वीर सेवा मन्दिर
दिल्ली

★

काल नं०
खण्ड



शब्दकल्पद्रुमः।

अर्थात्

एतद्देशस्थसमस्तकोषाम्नेयशास्त्रसङ्कलितावकारादिवर्णक्रमविन्यस्तशब्द-तन्निरुक्त-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-सहित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-उपकारशास्त्र-ज्योतिष-तत्तदाख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-सत्यनृत्यव्यवहारादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संस्कृताभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

पाणिनिमतानुसारि-प्रत्येकशब्दव्युत्पत्ति मूलग्रन्थातिरिक्तबङ्गलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदेशाक्षरन्यासादिभि-
र्नूतनसङ्कलितबङ्गलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
एतद्ग्रन्थपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

तृतीयः काण्डः।

अङ्गनवर्गः। प्रथम-खण्डः।

कलिकाता-राजधान्यां

रामनारायण-यन्त्रे मुद्रितः। ७१ नं० पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८०९।

PRINTED BY K. P. BASU, RAMNARAYAN PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY HARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71. Pathuriaghata Street, Calcutta: and at the Baptist Mission Press. No. 24 Lower Circular Road Calcutta. Price for Subscribers in India, Re. 1 and Countries out of India 3s. for each number.

All rights reserved.

शब्दकल्पद्रुमः।

तृतीयकाण्डम्।

प

प, पकारः। स तु पञ्चमवर्गस्य प्रथमो व्यञ्जनस्थैकविंशतितमो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति व्याकरणम्॥ (तथा च शिक्षायाम्। "वक्ष्यावक्षाविचुयशाक्कालव्या ओष्ठजावुपू"॥ अस्योच्चारणे आभ्यन्तरप्रयत्नः। ओष्ठेन सह जिह्वाग्रस्य स्पर्शः॥) तत्पर्य्यायः। लोहितः २ पार्श्वः ३ भ्रूरः ४। इति हरयामले वर्णाभिधानम्॥ अस्य तत्त्वं यथा,—

"अतः परं प्रवक्ष्यामि पकाराक्षरमव्ययम्।
चतुर्व्वर्गप्रदं वर्णं शरच्चन्द्रसमप्रभम्॥
पञ्चदेवमयं वर्णं स्वयं परमकुण्डली।
पञ्चप्राणमयं वर्णं त्रिगुणशक्तिसहितं सदा॥
त्रिगुणावहितं वर्णमात्मादितत्त्वसंयुतम्।
महामोक्षप्रदं वर्णं हृदि भावय पार्व्वति!"॥

इति कामधेनुतन्त्रे ५ पटलः॥

(वङ्गभाषायां) अस्य लेखनक्रमो यथा,—

"कुञ्चिता वामरेखाया कोणाद्दक्षिणतोऽपरा।
कुञ्चिता सापि विज्ञेया मात्रा वामोन्नता तथा॥
ग्रन्थभङ्गा भगवती क्रमग्रन्थासु तिष्ठति"॥

इति वर्णोद्धारतन्त्रम्॥

अस्योत्पत्तिप्रकारो यथा,—

"कटुरेफषकारस्य मर्द्दनो दन्तगस्तथा।
स्तवर्गलसनोष्ठानुपूपध्मानसंभवान्"॥

इति प्रपञ्चसारः॥ तस्य ध्यानं यथा,—

"विचित्रवसनां देवीं द्विभुजां पङ्कजेक्षणाम्।
रक्तचन्दनलिप्ताङ्गीं पद्ममालाविभूषिताम्॥
मणिरत्नादिकेयूरहारभूषितविग्रहाम्।
चतुर्व्वर्गप्रदां नित्यां नित्यानन्दमयीं पराम्॥
एवं ध्यात्वा पकारन्तु तल्लक्षं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥*॥ तस्य नामानि यथा।

"मः पूरयिता तोक्ष्णलोहितः पञ्चमो रमा।
गुह्यकर्त्ता निधिः शैवः कालराशिः सुवाहिता॥
तपनः पालनः पाता पद्मरेणुर्गिरञ्जनः।
सावित्री पालिनी पानं वीरतत्त्वो धनुर्द्धरः॥
दक्षपार्श्वश्च सेनानी मरीचिः पवनः शुचिः।
उड्डीशं जयिनी कुम्भोऽसं रेखा च मोहकः॥

पक्किम्

मूला द्वितीयमिश्राणी लोकाक्षी मग आत्मनः"॥ इति नागतन्त्रम्॥

(अनुबन्धविशेषः। यथा कविकल्पद्रुमे।
'नः स्वादिः पो सुचादिर्भः ग्रमादिर्म्मो लिचीक्षमोः'।
तेन सुच लक्ष ग्र प भौ मोक्ष इत्यस्य लटि सुक्षति॥)

पः, पुं, (पातयति वेगेन वृक्षादीन्। पत्+कर्त्तरि डः। अन्तर्णिच्।) पवनः। (पतति वृक्षात्। पत्+कर्त्तरि डः।) पर्व्वम्। (पीयते इति।) पानम। पाता। इत्येकाक्षरकोषः॥

(यथा, मनुः। २। १३६।
"राजस्नातकयोश्चैव स्नातको नृपमानभाक्"॥)

पक्कणः, पुं क्लीं, (पचति स्वादिनिक्वथमांसमिति। पच्+क्विप्। पक्व ग्रवरः तस्य कणः कलहग्रब्दः कोलाहलग्रब्दो वा यत्र।) ग्रवरालयः। इत्यमरः॥ २। २। २०॥ (यदुक्तम्।
"मध्येविन्ध्याटवि पुरा पक्कणाख्यजनाग्रणीः।
पल्लीपतिरभूदुग्रः पिङ्गाक्ष इति विश्रुतः"॥)

पक्कपौड़ः, पुं, वृक्षविशेषः। पखौड़ा इति हिन्दी भाषा। तत्पर्य्यायः। पक्वफलः २ वर्द्धनः ३ पक्वरञ्जकः ४। अस्य गुणाः। हृद्याञ्जनविधौ ग्रस्तत्वम्। कटुत्वम्। जीर्णज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

पक्वा, [क्व] त्रि, (पचतीति। पच पाके+"ण्वुल्तृचौ"। ३। १। १३३। इति ण्वुल्। तृच्।) पाककर्त्ता।

(यथा अथर्ब्ववेदे। १०। ६। ७।
"ये ते देवि! ग्रमितारः पक्वारो ये च ते जनाः"॥)

अग्नौ पुं। यथा। आग्नेये २ अध्यायः॥

"अन्नदाता च पक्वा च पञ्चभोक्ता पचे नमः"॥

पक्तिः, स्त्री, (पच्यते परिणम्यते इति। भावे क्तिन्।) गौरवम्। पाकः। इति मेदिनी॥

(यथा, मनुः। ३। ६७।
"वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म्म यथाविधि।
पञ्चयज्ञविधानञ्च पक्तिञ्चान्वाहिकीं गृही"॥)

पक्तिमूलं, क्लीं, (पक्तौ भुक्तस्यान्नादिकस्य परिणामे जायते यत् मूलं रोगविशेषः।) परिणाम-

पक्कं

मूलम्। तत्पर्य्यायः। पाकजम् २ परिणामजम् ३। इति राजनिर्घण्टः॥

पक्वं, क्लीं, (पच्यतेऽनेन। पच् "ग्रहवृदृभूपचवीति"। उणां ४। १६६। इति क्वः।) गार्हपत्याग्निः। इत्युणादिकोषः॥

पक्किमं, त्रि, (पाकेन निर्वृत्तम्। डु पच पाक+"छितः क्तिः"। ५। १। ८८। इति क्तिः। "क्तेर्मम् नित्यम्"। इति मम्।) पाकिमम्। पाकाज्जातम्। इति त्रिकाण्डशेषः॥

पक्वं, क्लीं, (पच्यते स्म। पच+क्तः। "पचो वः"। ८। २। ५२। इति निष्ठातस्य वः।) स्विन्नतण्डुलादि। तच्च पाकस्य विधिनिषेधादिर्यथा,—

"पूर्व्वाग्नाभिमुखो भूत्वा उत्तराग्नामुखेन वा।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत्॥
अग्न्याग्नाभिमुखे पक्वा अन्नताम्रं निवोध च।
पूर्व्वमुखो धर्म्मकामः श्रीकामश्चोत्तरमुखो पतिकामश्च पश्चिमे।
ऐग्नाग्नाभिमुखे पक्वा दरिद्रो जायते नरः"॥*॥
"यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते॥
ताम्रे पक्वा चक्षुर्ज्ञानिर्म्मलौ भवति वै ध्रुवम्।
स्वर्णपात्रे तु यत् पक्वं अन्नतं तदपि स्मृतम्"॥*॥
"पित्तघ्नी पक्वमन्नञ्च पित्तघ्नेन यशस्विनि!।
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम्॥
वातुलेन तु यत् पक्वं भङ्गिना च कनिष्ठया।
असगोत्रेण यत पक्वं श्रोत्रियं तदपि स्मृतम्॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वं सदैव च।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत्"॥*॥
"उडुम्बरेण काष्ठेन कदम्बस्य दलेन च।
शालेन करमर्द्देन उदरावर्त्तकेन च॥
पक्वान्नं नैव भुञ्जीत भुक्ता रात्रिमुपावसेत्।
गर्हितान्नमवीरान्नं भुक्ता छन्दं समाचरेत्॥
अप्रजा धातु वनिता गान्धीयाद्देव तद्गृहे"॥
"शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि।
कलिञ्चकातकस्यैव वचावारुणकस्य च।
भैरवस्यान्नजातैर्व्वापि पक्वान्नं गर्हितं स्मृतम्॥*॥"

"यदा ब्रह्मक्षयपात्रे तु पक्वं वै सार्द्धकालिकम् ।
मासे पक्षे तथाष्टौ च तत् पात्रं विद्धजेद्गृही" ॥*
"धनुःपाके तथा सिंहे मिथुने वा वरानने ।
यः जुह्यांद्घोजनं देवि! तत्क्षणेनैव विमुच्यति" ॥*॥
"एकदा तु जलं दद्यात् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पक्वान्नीयं न दापयेत्" ॥
इति ॥ * ॥
"मोदकं कन्दुपक्वञ्च गव्याढ्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दूष्यति" ॥
इति च मलमासतत्त्वे मदनरत्ने ४२ पटलः ॥

पक्वं, त्रि, (पच्यते स्म यत् इति । पच्+कर्म्मणि क्तः । "पचो वः" । ८ । २ । ५२ । इति निष्ठातस्य वः ।) परिणतम् । पाका इति भाषा ॥ (यथा, मनुः । ६ । १७ ।
"अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा" ॥)
निष्ठा प्राप्तम् । सुदृढमिति यावत् । यथा परिणता बुद्धिः । विनाग्नौष्णसुखम् । प्रत्यासन्नविनाशम् । अतिपक्वयज्ञनदग्नमूलादौ विच्यक्तं कथितञ्च । क्षीराज्यपयसां पाके घृतम् । ईषत्पक्वे आपक्वम् । इत्यमरभरतौ ॥ (भावे क्तः । पाकः । परिणामः ॥)

पक्वकृत्, पुं, (पक्वं करोति वैद्यशास्त्रोक्तसंस्कारं परिणमयति निष्पादयतीत्यादिभिरिति । कृ+क्विप् ततस्तुक् ।) भिषक्तप्तः । इति शब्दचन्द्रिका ॥ (पक्वं करोति पचत्यन्नादिकमित्यर्थः ।) पाककर्त्तरि त्रि ॥

पक्वरसः, पुं, (पक्वस्य गुडान्नादेः रसः ।) मद्यम् । इति शब्दरत्नावली ॥

पक्ववारि, क्ली, (पक्वस्यान्नादेर्वारि यद्वा, पक्वं वारि खिन्नसलिलमिति यावत् ।) काञ्जिकम् । इति शब्दचन्द्रिका ॥ पक्कवारि इत्यपि पाठः। पक्वजलञ्च ॥

पक्वान्नं, त्रि, (पक्वमन्नम् ।) कृतपाकसक्तुलाजादि । यथा,
"आमं मूढस्य पक्वान्नं पक्वमुत्तरदक्षिणम्" ।
इति तिथितत्त्वम् ॥
("यतौ च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ" ।
इति सदाचारः ॥)

पक्वाशयः, पुं, (पक्वस्य आमादेराशयः आधानम् । यद्वा पक्वं आमादिकं आशेतेऽत्र । पक्व+आ+शीङ्+आधारे+अच् ।) नाभ्यधोभागः । इति राजनिर्घण्टः ॥
"पक्वाशयस्याधो नाभेरूर्द्धमामाशयः स्मृतः" ।
इति वैद्यकम् ॥

पक्ष, क परिग्रहे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पक्षयति । इति दुर्गादासः ॥

पक्ष, तृ क परिग्रहे । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) पक्षयति पक्षापयति । इति दुर्गादासः ॥

पक्षः, पुं, (पक्षते परिगृह्यते देवपित्रकार्य्यार्थं यः । यद्वा, पक्षते चन्द्रस्य पक्षदशानां कलानामापूरणं क्षयो वा येन । पक्ष+घञ् । यद्वा, पक्षते इति । पक्ष क्षुत्वादौ "गृधिपक्ष्योर्दकौच" । उणा ३ । ६८ । इति सः कक्षान्तादेशः ।) पक्षद्वयाहोरात्राः । स च द्विविधः । शुक्लपक्षः पूर्व्वसंज्ञः कृष्णपक्षोऽपरसंज्ञः । तद्भेदेन व्यवस्था यथा ।
"शुक्लपक्षे तिथिर्य्यस्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्य्यस्या यस्यामस्तमितो रविः" ॥
अत्रामावास्यावत्तिथिक्षयवृद्धिभ्यां न व्यवस्था किन्तु रवेरदर्शनात्मकसम्बन्धाच्छुक्लाद्यपक्षाभ्यां व्यवस्था सा च युग्मादिनाधाततिथिकर्म्मपरा सामान्यविशेषन्यायात्" । इति तिथ्यादितत्त्वम् ॥ पक्षिणामवयवविशेषः । पाखा इति भाषा । तत्पर्य्यायः । गरुत् २ छदः ३ पत्रम् ४ पतत्रम् ५ तनूरुहम् ६ ॥ ग्रहपक्षः । सौरेर पाखा इति भाषा । तत्पर्य्यायः । बाजः २ । सहायः । कक्षात् परे सन्नहार्थः । यथा केशपक्षः । इत्यमरः ॥ (महाकालः शिवः । कालोपाधिभेदात् पक्षस्य तथात्वम् । यथा महाभारते । १३ । शिवसहस्रनामकीर्त्तने । १७ । १३८ ।
"ऋतुः संवत्सरो मासः पक्षः संख्या समापनः" ॥)
पार्श्वः । गृहम् । साध्यम् । (सन्दिग्धसाध्यवान् पदार्थः । यथा, भाषापरिच्छेदे । ७० । ७१ ।
"सिद्धाधिधिया शून्या सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्" ॥)
विरोधः । बलम् । (यथा, पञ्चतन्त्रे । ३ । ६६ ।
"यस्तीर्थानि निजे पक्षे परपक्षे विशेषतः ।
गुप्तेश्वरैर्न वेत्ति न स दुर्गतिमाप्नुयात्" ॥)
सखा । चुल्लीरत्नम् । राजकुञ्जरः । इति मेदिनी ॥ विहगः । वलयम् । शुद्धः । इति शब्दरत्नावली ॥ वर्गः । (सजातीयवृन्दम् । यथा, गोः रामायणे । २ । १८ । १३
"भरतस्यापि वा पक्षं यो गृहीयादचेतनः ।
तं पापमहमद्यैव प्रेषयामि यमक्षयम्" ॥)
पिच्छम् । देहाङ्गम् । इति हेमचन्द्रः ॥

पक्षः, [स्] क्ली, (पचतीति । "पचिवचिभ्यां सुट् च" । उणा । ४ । २१८ । इति असुन् सुट् च ।) गरुत् । यथा । पक्षसौ च क्षतौ पक्षौ । इति भरतधृतसुभाषितः ॥

पक्षकः, पुं, (पक्ष इव प्रतिभाति । "इवे प्रतिकृतौ" । ५ । ३ । ९६ । इति कन् ।) पक्षद्वारम् । पार्श्वद्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीदार इति भाषा । पार्श्वमात्रम् । इति मेदिनी ॥ सहायः । इति शब्दरत्नावली ॥

पक्षघातः, पुं, (पक्षस्य देहार्द्धस्य घातं विनाशं यस्मात् यत्र वा ।) स्वनामख्यातवातरोगविशेषः । तल्लक्षणादि यथा,—
"गृहीत्वार्द्धं ततो वायुः शिरोबाह्वक्षिविग्रहम् ।
पक्षमन्यतमं हन्ति सन्धिबन्धात् विमोचयन् ॥
हनुस्तब्धोऽर्द्धकायस्य स्याद्दुर्ब्बलो विचेतनः ।
एकाङ्गघातं तं केचिदन्ये पक्षवधं विदुः" ॥
अर्द्धं अर्द्धनारीश्वरवत् । पक्षं बाहुपार्श्वोरुजङ्घादिभागम् । अन्यतमं वामं दक्षिणं वा । विमोचयन् शिथिलीकुर्व्वन् । अकर्म्मण्यः कर्म्मासमर्थः । विचेतनः ईषत्संज्ञादिज्ञानयुक्तः ॥*॥
अस्य साध्यासाध्यज्ञानमाह ।
"दाहसन्तापमूर्च्छाः स्युर्व्यायौ पित्तसमन्वित ।
शैत्यशोथगुरुत्वानि तस्मिन्नेव कफाहते" ॥
दाहो बाह्यः । सन्तापः आभ्यन्तरः । एतच्च लक्षणमन्यत्रापि वातव्याधौ बोद्धव्यम् । सामान्यतो वायाविति निर्द्देशत्वात् ॥ * ॥
पक्षाघातस्य साध्यत्वादिकमाह ।
"शुद्धवातहतं पक्षं लक्ष्मसाध्यतमं विदुः ।
साध्यमन्येन संयुक्तमसाध्यं क्षयहेतुकम्" ॥
शुद्धः केवलः । अन्येन पित्तेन कफेन वा । क्षयहेतुकं क्षयो धातुक्षयः । तत्कुपितं वातनिमित्तकम् ॥ * ॥ अपरमसाध्यलक्षणमाह ।
"गर्भिणीबालवृद्धस्त्रीक्षीणक्षतविषार्त्तके ।
पक्षाघातं परिहरेत् वैद्यवारहितो यदि" ॥
वैद्यवारहितो यदीति भिन्नमसाध्यलक्षणम् ॥*॥
अथ तस्य चिकित्सा ।
"माषात्मगुप्तावातारिवाश्वालकजटाशतम् ।
हिङ्गुसैन्धवसंयुक्तं पक्षाघातं विनाशयेत् ।
माषिके हिङ्गुसिन्धूत्थे अरणाट्यास्तु वाजिकाः" ॥
इति माषादिक्वाथः ॥ १ ॥
"ग्रन्थिकाग्निकणाशुण्ठीराजासैन्धवकल्कितम् ।
माषक्वाथयुतं तैलं पक्षाघातं व्यपोहति" ॥
इति ग्रन्थिकादितैलम् ॥ २ ॥
"माषात्मगुप्तातिविषाहयूक-
राजाग्नितालाश्वलवणैः सुपिष्टैः ।
चतुर्गुणे माषबलाकषाये
तैलं घृतं हन्ति हि पक्षघातम्" ॥
इति माषादितैलम् ॥३॥ इति भावप्रकाशः ॥*॥
पक्षाघातस्तु जन्मान्तरीयमहापातकप्रभवोपपापविशेषः । यथा,—
"पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये ।
बाधते व्याधिरूपेण तस्य लक्ष्मादिभिः क्रमः ॥
कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
मूत्रकृच्छ्राश्मरीवाता अतिसारभगन्दरौ ॥
दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् ।
इत्येवमादयो रोगा महापापोद्भवा नृणाम्" ॥*॥
तत्प्रायश्चित्तं यथा,—
"लक्षसङ्ख्यावरं पुण्यं प्रदद्यात् कृष्णवर्त्मने ।
दद्यात् द्विजसहस्राय मिष्टान्नं द्विजभोजने" ॥
इति मलमासतत्त्वम् ॥ द्विज ।
"क्रूरस्त्री ग्रावदग्नश्च द्वादशरात्रं जपं चरित्वा उद्धरेयासां तद्दग्धनखादिति । अत्र द्वादशरात्रं पराकरूपम् । तच्च पक्षे धेनवः । न तु प्राजापत्यं तद्धि कर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात् । अत्र बहूनामेकधर्म्माणामिति वचनादाकाङ्क्षितत्वात् कृच्छ्रादीनामपि प्रायश्चित्तम् । अतएव प्रायश्चित्तविवेकेऽप्युक्तम् । एवं दुष्कर्म्मादिष्वप्यूह्यम्" । इति शुद्धितत्त्वम् ॥

पक्षचरः, पुं, (पक्षे शुक्लपक्षे चरतीति । चर+टः ।) चन्द्रः । पृथक्चारिगणः । इति मेदिनी ॥

पक्षज, पुं, (पक्षे शुक्लपक्षे जायते इति । पक्ष+जन्+ड ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

पक्षजन्मा, [न्] पुं, (पक्षे शुक्लपक्षे जन्म उत्पत्तिः

पक्षस

यैस्य ।) चक्रः । इति शब्दरत्नावली ॥ पक्ष-जाते त्रि ॥

पक्षता, स्त्री, (पक्षस्य भावः ।) अनुमित्याविरह-विशिष्टसिद्धत्वभावः । इयमनुमितिकारणम् । तच्च पर्व्वते वह्न्यनुमितौ अनुमित्याविरहविशिष्ट-पर्व्वतधर्म्मैकदेशवह्निनिश्चयाभावः । यथा,—

"सिसाधयिषया मूढा सिद्धिर्यत्र न विद्यते ।
स पक्षस्तत्र हेत्वित्तज्ञानादनुमितिर्भवेत्" ॥
इति भाषापरिच्छेदे । ७१ ॥

पक्षतिः, स्त्री, (पक्षस्य मूलम् । "पक्षात्तिः" । ५।२।२५ । इति तिः ।) प्रतिपत्तिथिः । (यदुक्तं तिथितत्त्वे ।

"पक्षत्वाद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः"॥)
पक्षमूलम् । इत्यमरः । १ । १ । ७२ ॥ जानक् इति भाषा ॥

पक्षद्वारं, क्ली, (पक्षे पार्श्वे स्थितं द्वारम् ।) पार्श्व-द्वारम् । इत्यमरः । २ । २ । १४ ॥ खड़कीदार इति भाषा ॥

पक्षधरः, पुं, (पक्षं धरति धारयतीति वा । ड + अच् ।) चक्रः । इति जटाधरः ॥ पक्षधारण-कर्त्तरि, त्रि ॥

पक्षपातः, पुं, (पक्षे अन्याय्यसाहाय्ये पातः अभि-निवेशः । स्नेहसम्बन्धाद्यनुरोधात एकस्मिन्नेव वर्गे आनुकूल्यप्रयोगश्चिकीर्षितभावः ।) अन्याय्य-साहाय्यकरणम् । (यथा गौः रामायणे २ । १०६ । ५७ ।

"क्वचिद्विवदतोऽर्थेषु बलिनो दुर्बलस्य च ।
अपक्षपातात् पश्यन्ति कार्य्येष्वधिकृता नराः" ॥)
गणताकरणम् । यथा । "ईश्वरत्वविषये विप-क्षितां पक्षपातकरणे न कारणम्" । इत्युत्तर-मीमांसायां संक्षेपशारीरके ॥ (पक्षाणां गरुतां पातः पतनं यत्र ।) पक्षिणां ज्वरः । यदुक्तं "पक्षपातः पतङ्गानाम्" । इति विश्वप्रकाशः ॥

पक्षपातिता, स्त्री, (पक्षपातिनः साहाय्यकारिणो भावः । पक्षपातिन् + तल् ।) सहायता । यथा,—

"न सुवर्णमयी तनुः परं
ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातिता
ऽनवलम्बे किमु माद्दशोऽपि सा" ॥
इति नैषधे । २ । ५२ ॥ (पक्षयोः पातो विद्यतेऽस्य इति पक्षपाती खगस्तस्य भावः । पक्षपातत्व ॥)

पक्षपालिः, पुं, (पक्षस्य गृहस्य पालिरिव ।) खड़-किका । इति शब्दरत्नावली । खड़कीदार इति भाषा ॥

पक्षभागः, पुं, (पक्षस्य पार्श्वस्य पक्ष एव वा भागः ।) हस्तिपार्श्वभागः । इत्यमरः । २ । ८ । ४० ॥

पक्षमूलं, क्ली, (पक्षस्य मूलम् ।) पक्षतिः । इत्य-मरः । २ । ५ । ३६ । जानक् इति भाषा ॥

पक्षवाहनः, पुं, (पक्षौ वाहनमिव यस्य ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षसुन्दरः, पुं, (पक्षे देशाङ्गे कुसुमे सुन्दरः ।) लोधः । इति राजनिर्घण्टः ॥

पक्षी

पक्षान्तः, पुं, (पक्षस्य अन्तो यत्र काले ।) अमा-वस्या । पूर्णिमा । तत्पर्य्यायः । पक्षदर्शौ २ । इत्यमरः । १ । ४ । ७ ॥ अर्केन्दुविश्लेषः ३ पर्व्व ४ । इति राजनिर्घण्टः ॥ पक्षावसरः ५ । इति शब्दरत्नावली ॥ (अस्मिन् यात्रा निष्फला भवति । यदुक्तं ज्योतिस्तत्त्वे ।

'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम्' ॥)
पक्षानुः, पुं, (पक्षौ विद्येते यस्य । पक्ष + अर्शआदि-त्वात् अच् ।) पक्षी । इति शब्दचन्द्रिका ॥

पक्षावसरः, पुं, (पक्षस्यावसरोऽपसरणं यत्र काले ।) पूर्णिमा । अमावस्या । इति शब्द-रत्नावली ॥

पक्षिणी, स्त्री, (पक्षौ इव पूर्व्वापरदिग्भे विद्येते यस्याः । पक्ष + इनि ङीप् च ।) आगामिवर्त्त-मानाहर्युक्ता रात्रिः । इत्यमरः । १ । ४ । ५ ॥ यथा, सुद्धितत्त्वे ।

"द्वावहावेकरात्रिश्च पक्षिणीत्यभिधीयते" ॥
पूर्णिमा ॥ (पक्षौ विद्येते यस्याः । इनि ङीप् ।) विहगी । याकिनीभेदः । इति मेदिनी ॥

पक्षिपानीयशालिका, स्त्री, (पक्षिणां पानीयस्य पानार्थजलस्य शालिका शाला ।) चुण्टीकृतताल-वालम् । पक्षिजलपानस्थानम् । इति भूरि-प्रयोगः ॥

पक्षिलः, पुं, (पक्षयति तत्त्वज्ञानं परिग्रहातीति । पक्ष + बाहुलकादिलच् ।) वात्स्यायनमुनिः । इति त्रिकाण्डशेषः ॥ (अयं हि गौतमसूत्रभाष्यं कृत-वान् ॥)

पक्षिशाला, स्त्री, (पक्षिणां शाला गृहम् ।) नीड़म् । तत्पर्य्यायः । कुलायिका २ । इति त्रिकाण्डशेषः ॥

पक्षिसिंहः, पुं, (पक्षी सिंह इव । उपमितसमासः । यद्वा, पक्षिषु सिंहः, श्रेष्ठः । "सिंहव्याघ्रपुरु-षव्याघ्राद्याः पुंसि श्रेष्ठार्थवाचकाः" । इत्यमरोक्त-त्वात् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥

पक्षिस्वामी, [न्] पुं, (पक्षिणां स्वामी प्रभुः ।) गरुड़ः । इति हेमचन्द्रः ॥

पक्षी, [न्] पुं, (पक्षाः कङ्कादीनां पञ्चापि सन्त्यस्य । "अत इनिठनौ" । ५ । २ । ११५ । इति इनिः ।) वायुः । इति धरणिः ॥

पक्षी, [न्] पुं स्त्री, पक्षौ विद्येते यस्य । (पक्ष + इनिः ।) विहङ्गमः ॥ पाखी इति चिड़िया इति च भाषा ॥ तत्पर्य्यायः । खगः २ विहङ्गः ३ विहगः ४ विहङ्गमः ५ विहायाः ६ शकुनिः ७ शकुनिः ८ शकुनः ९ द्विजः १० द्विजः ११ पतत्री १२ पक्षी १३ पतगः १४ पतत् १५ पत्त-रथः १६ अण्डजः १७ नगौकाः १८ वाजी १९ विकिरः २० विः २१ विष्किरः २२ पतत्रिः २३ नीड़ोद्भवः २४ गरुत्मान् २५ पिच्छन् २६ नभ-सङ्गमः २७ । इत्यमरः । २ । ५ । ३४ ॥ गाड़ीचरणः २८ कङ्कालिः २९ पतङ्गः ३० अगौकाः ३१ चञ्चु-भृत् ३२ क्षुरजः ३३ सरङ्गः ३४ । इति शब्द-रत्नावली ॥ पिपतिषुः ३५ पत्रवाहः ३६ द्युगः ३७ । इति राजनिर्घण्टः ॥*॥ गुरुभक्तबहुभक्त-

पङ्क्तिः

स्थूलकायपक्षिणां पूर्व्वार्द्धस्य श्रेष्ठत्वं यथा,—

"गुरुभक्षा बहुसुतो ये चोपचितमेदसः ।
एकदेहेऽपि पूर्व्वार्द्धं तेषां पक्षिणां परम्" ॥*॥
पक्षिणामङ्गादीनामुत्तरोत्तरं गुरुत्वं यथा,—

"सर्व्वेषाञ्च शिरःस्कन्धोदरपर्म्मयकृद्गुदम् ।
पादपुच्छान्तमस्थिच्छसुष्ककोड़ाः समेधनाः ।
धातवः श्रोणिताद्याश्च गुरवःस्युः परस्परम्" ॥
अस्याङ्गगुणाः ।

"मत्स्यकूर्म्मखगाङ्कानि खादुवाक्षीकराणि च ।
कटूपाकानि हृद्यानि वातश्लेष्महराणि च" ॥
इति राजवल्लभः ॥ * ॥ तेषामुत्पत्तिर्यथा,—

"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महाबलौ ।
सम्पातिश्च जटायुश्च प्रथितौ पक्षिसत्तमौ ॥
सम्पातिर्जनयत् पुत्रान् काकाः पुत्रा जटायुषः ।
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥
धृतराष्ट्री गरुत्मांस्तु सुग्र्यां जज्ञे च षट् सुतान् ।
चित्ररथश्च सुनेत्रश्च सुरुचश्च तथा ॥
सुरूपस्तु सुपर्ब्बाख्यः सेयं पुत्रा अनन्तकाः ।
चतुर्दशसहस्राणि क्रूराणां पन्नगाशिनाम् ॥
समद्वीपेषिमे सन्ति गारुड़ास्ते महाबलाः ।
भासी पुत्रास्तथा भासा उलूका: काककुक्कुटाः ॥
मयूराः कलविङ्काश्च कपोतौ चैव तित्तिरी ।
क्रौञ्च्यां वाधीनसा आसन् क्रुरराः सारसा वकाः ॥
धृतराष्ट्री कलहंसान् धार्त्तराष्ट्रांश्च भामिनी ।
चक्रवाकांश्च विहगान् सम्पेदे गौरकान् द्विजान् ॥
अन्यानपि द्विजान् जज्ञे पुत्रपौत्राननन्तकान्" ॥
इत्यग्निपुराणे काश्यपीयवंशः ॥ (महादेवः । यथा, महाभारते १३ । शिवनामकीर्त्तने । १७।६६ ।

"पक्षी च पक्षरूपश्च अतिदीप्तो विभाम्पतिः" ॥)

पक्ष्णुः, त्रि, पाककर्त्ता । पच + "ग्लाजास्थाश्रु-पचपरिष्रजः स्नुः" । इति स्नुप्रत्ययनिष्पन्नः । इति सुबोधव्याकरणम् ॥

पक्ष्म, [न्] क्ली, (पक्ष्यते परिरक्ष्यते आतपतापा-दिकमनेन । पक्ष + करणे मनिन् ।) अक्षिलोम । नेत्रच्छदरोम । (यथा, भागवते । ३ । १ । ३६ ।

"यमात्मुतस्त्वित् तनयौ पृथायाः
पार्थैष्टतौ पक्ष्मभिरत्त्विणीव" ॥)
किञ्जल्कः । केशरः । तन्त्वादेरणीयान् । तन्त्वादे-रत्यल्पभागः । इत्यमरभरतौ ॥ गरुत् । पक्षः । इत्यमरमाला ॥

पङ्क्तिः, पुं, स्त्री, (पच्यते व्याप्यते श्लिष्यते वाऽनेन । पच् + क्तिच् कुत्वं च ।) कर्द्दमः । पाँक् इति भाषा । (यथा, हितोपदेशे । १ । ६२ ।

"कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः संस्तुतो यथा" ॥
पच्यते व्याप्तीक्रियते दुःखमनेन । पचि विस्तारे व्याप्तीकरणे च । पचधातोरिदित्वात् नुम् । "श्नम-क्षेति" । ३ । ३ । १२१ । करणे क्तिच् ततो णित्त्वात् वृद्धस्य कुत्वम् ।) पापम् । इत्यमरः । १ । ४ । २३ ॥ (यथा, अग्निपुराणे । ६ । "न्यङ्का-करे वपुषि कङ्कादिरक्तपुषि कङ्कादिपक्षिविषये त्वं कामनामयसि किं कारणं हृदय ! पङ्कारि-

मेहि गिरिजाम् ॥") पूर्वस्य गुणाः। पित्तास-दाहगान्धित्वम्। भयक्षयवहितत्वम्। स्थिमत्वञ्च। इति राजवल्लभः॥ श्लोपत्वम्। सरत्वञ्च। इति भावप्रकाशः॥

पङ्कर्व्वटः, पुं, (पङ्केषु कर्व्वटो मनोहरः।) जल-युक्तपङ्कम्। यथा,—

"चुलुको घनजम्बाले दलाटे पङ्कर्व्वटः"।

इति त्रिकाण्डशेषः॥

पङ्ककीरः, पुं, (पङ्कप्रियः कीरः पक्षिविशेषः।) कोयष्टिपक्षी। इति त्रिकाण्डशेषः॥ (काद-खोँचा इति भाषा॥)

पङ्ककीड़ः, पुं, (पङ्के पङ्केन वा क्रीड़ति यः। पङ्क + क्रीड़ + अच्।) शूकरः। इति कश्चित्। कर्द्दमखेलके, त्रि॥

पङ्कगड़कः, पुं, (पङ्के स्थितो गड़कः।) मत्स्य-विशेषः। पाँकाल इति भाषा। तत्पर्य्यायः। ब्रह्मी २। इति त्रिकाण्डशेषः॥

पङ्कगतिः, स्त्री, (पङ्के गतिरस्य।) पङ्कगड़क-मत्स्यः। इति शब्दमाला॥

पङ्कग्राहः, पुं, (पङ्कस्थितो ग्राहः जलजन्तुभेदः।) मकरः। इति हारावली॥

पङ्कजं, क्ली, (पङ्के पङ्कात् वा जायते इति। पङ्क + जन + कर्त्तरि + डः।) पद्मम्। इति राज-निर्घण्टः॥ (यथा रघुः। ३। ८।

"तिरस्कार भ्रमराभिलीनयोः
सजातयोः पङ्कजकोषयोः श्रियम्"॥

अयं हि योगरूढ़शब्दः। यदुक्तम्।

"रूढ़ा गवाद्यः प्रोक्ता यौगिकाः पाचकादयः।
योगरूढ़ाश्च विज्ञेयाः पङ्कजाद्या मनीषिभिः"॥)

पङ्कजन्म, [न्] क्ली, (पङ्के जन्म यस्य।) पद्मम्। इति त्रिकाण्डशेषः॥

पङ्कजिनी, स्त्री, (पङ्कजानि सन्त्यस्याम्। "पुष्क-रादिभ्यो देशे"। ५। २। १३५। इति इनिः।) पद्माकरः।

(यथा, मार्कण्डेये। ७५। २४।

"तस्यर्त्तस्य तु या काम्निर्जाता पङ्कजिनीसरः"॥)

पद्मसमूहः। इति रत्नमाला हेमचन्द्रश्च॥

पङ्कयः, पुं, (पङ्के मांसादिनिमित्तके पापाचार-कर्म्मणि कयः कलहो यस्य सः। पृषोदरादित्वात् साधुः।) पक्कयः। शूकरालयः। इति शब्द-रत्नावली॥

पङ्कप्रभा, स्त्री, (पङ्कस्य प्रभा प्रकाशो यस्याम्।) कर्द्दमयुक्तनरकविशेषः। इति हेमचन्द्रः॥

पङ्कमण्डूकः, पुं, (पङ्के मण्डूक इव) शम्बूकः। इति हारावली॥

पङ्करुट्, [ह्] क्ली, (पङ्के रोहतीति। पङ्क + रुह + क्विप्।) पद्मम्। इति राजनिर्घण्टः॥

पङ्करुहं, क्ली, (पङ्के रोहतीति। पङ्क + रुह् + "इगुपधज्ञाप्रीकिरः कः"। ३। १। १३५। इति कः।) पद्मम्। इति राजनिर्घण्टः॥

पङ्कवासः, पुं, (पङ्के वासो यस्य सः।) कर्क्कटः। इति राजनिर्घण्टः॥ (मत्स्यादयोऽप्यत्र॥)

पङ्कशुक्तिः, स्त्री, (पङ्के स्थिता या शुक्तिः।) दुर्गन्धा। इति हारावली॥ भिसुक् इति भाषा॥

पङ्कशूरणः, पुं, (पङ्के शूरण इव।) शालूकः। इति त्रिकाण्डशेषः॥

पङ्कारः, पुं, (पङ्कमृच्छति पङ्कं प्राप्य वर्त्तते इति यावत्। पङ्क + ऋ + उपपदे "कर्म्मण्यण्"। ३। २। १। इति अण्।) शैवलः। सेतुः। सोपानम्। जलकुञ्जकः। इति मेदिनी॥

पङ्किलः, त्रि, (पङ्कोऽस्यास्तीति। "लोमादिपामादि-पिच्छादिभ्यः शनेलचः"। ५। २। १००। इति इलच्।) सकर्द्दमः। तत्पर्य्यायः। सजम्बालः। २। इत्यमरः। २। १। १०॥ पङ्कयुक्तः ३। इति शब्दरत्नावली॥ कर्द्दमान्वितः ४। इति जटाधरः॥ (लक्षणया व्याप्यर्थेऽपि। यथा महाभारते ८ पर्व्वणि। "मांसमज्जास्थिपङ्किला मही"॥)

पङ्केजं, क्ली, (पङ्के जायते इति। "सप्तम्या जनेर्डः"। ३। २। ९७। इति डः। "तत्पुरुषे कृतीति"। ६। ३। १४। इति सप्तम्या अलुक्।) पद्मम्। इति त्रिकाण्डशेषः॥

पङ्केरुहं, क्ली, (पङ्के रोहतीति। पङ्क + रुह + "इगु-पधेति"। ३। १। १३५। इति कः। "तत्-पुरुषे कृति बहुलम्"। ६। ३। १४। इति सप्तम्या अलुक्।) पद्मम्। इत्यमरः॥ १। १०। ४०॥ (यथा, भागवते। ७। १५। ६८।

"यत्पादपङ्केरुहसेवया भवानहारवीन्निर्जित-दिग्गजः क्रतून्"॥) सारसपक्षिणि, पुं॥

पङ्क्तिः, स्त्री, (पच्यते अक्तीक्रियते श्रेणीविशेषे-णेति यावत्। पचि + अक्तीकरणे + भावे + क्तिन्। इदित्त्वान्नुम्। यद्वा, पञ्चयति विस्तार-यति जातिसंस्थानविशेषमिति। पचि + विस्तारे + कर्त्तरि + क्तिच्।) सजातीयसंस्थानविशेषः। आरि इति पाँति इति च भाषा। तत्-पर्य्यायः। वीथी २ आलिः ३ आवलिः ४ श्रेणी ५। इत्यमरः। २। ४। ४॥ वीथिः ६ आली ७ आवली ८ पङ्क्ती ९ श्रेणिः १०। इति भरतः॥ शूरब्जिः ११ सन्ततिः १२। इति जटाधरः॥ विल्लोली १३ पालिः १४ पाली १५ वीथिका १६। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ४३। ३६।

'विलोक्या विशदा चैषां फलपङ्क्तिः सुभीषणा'॥)

पञ्चाक्षरपादच्छन्दोविशेषः। तस्य लक्षणं यथा।

"भ्नौगिति पङ्क्तिः"॥१॥ उदाहरणं यथा,—

"लक्ष्मीसनाथा तरुणकपङ्क्तिः।
यासूनकच्छे चार चचार"॥

इति छन्दोमञ्जरी॥ (पङ्क्तिच्छन्दस उत्पत्ति-स्थानं यथा, भागवते। ३। १२। ४६।

"मध्यायाः पङ्क्तिरुत्पन्ना दृङ्मती प्राणतोऽभवत्"॥

पङ्कद्वयं परिमाणमस्य इति। "पङ्क्ति-विंशतित्रिंशद्भिति"। ५। १। ५९। निपातनात् प्रकृतेः पङ्कशब्दस्य टिलोपः तिप्रत्ययश्च।) दशाक्षरपादच्छन्दः। दशसंख्या। इति मेदिनी॥ (यथा, रघुः। १२। ६६।

"तेन मन्त्रप्रयुक्तेन निमेषार्द्धादपातयत्।
स रावणशिरःपङ्क्तिमज्ञातव्रतवेदनाम्"॥)

पृथिवी। इति शब्दमाला॥ गौरवम्। पाकः। इति हेमचन्द्रः॥ *॥

अथ पङ्क्तिसाङ्कर्य्यदोषाः यथा,—

"न संवसेच्च पतितैर्न चाक्रान्तैर्न पुत्रकैः।
न क्लैबैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः॥
एकाध्यायासनं पङ्क्तिर्भोजनक्रियमेव च।
याजनाध्यापने योनिस्तथैव सह भोजनम्॥
सहाध्यायस्तु दम्भश्च सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणां।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्"॥*॥

पङ्क्तिसाङ्कर्य्यदोषनिवारणोपाया यथा,—

"एकपङ्क्त्युपविष्टा ये न गृह्णन्ति परस्परम्।
भक्षणा क्रममर्य्यादा न तेषां सङ्करो भवेत्॥
अग्निना भक्षणा चैव षड्भिः पङ्क्तिर्विभिद्यते"॥

इति कूर्म्मे १५ अध्यायः॥

पङ्क्तिग्रीवः, पुं, (पङ्क्तिः दशषड्विंशका ग्रीवा यस्य।) रावणः। इति शब्दरत्नावली॥

पङ्क्तिचरः, पुं, (पङ्क्त्या श्रेण्या चरतीति। पङ्क्ति + चर् + टः।) कुररपक्षी। इति राजनिर्घण्टः॥

पङ्क्तिदूषकः, पुं, (श्राद्धकाले भोजनार्थमुप-विष्टानां व्रतस्नातानां ब्राह्मणानां पङ्क्तिं अकर्म्म दूषयति यः। पङ्क्ति + दूष + कर्त्तरि ण्वुल्।) अपाङ्क्तेयः। श्राद्धभोजनानर्हब्राह्मणः। यथा,—

"अपाङ्क्तेयास्तु ये राजन्! कीर्त्तयिष्यामि तान् शृणु।
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः॥
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी।
अगारदाही गरदः कुण्डाशी सोमविक्रयी॥
सामुद्रिको राजभृतस्तैलिकः कूटकारकः।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे॥
अभिशस्तस्तथा स्तेनः क्लिष्टं यश्चोपजीवति।
पर्व्वकारश्च सूची च मित्रध्रुक् पारदारिकः॥
अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च।
अभिक्ष्णं यः परिक्रामेत् यः शुना दष्ट एव च॥
परिवित्तिस्तु यश्चाग्र्यो गुरुतल्पगः।
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति॥
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः।
रक्षांसि गच्छते हव्यं यदेषामुप दीयते"॥ *॥

"श्राद्धे भुक्ता महाराज! दुष्कर्म्मा गुरुतल्पगः।
श्राद्धं गाधयते तस्य पितरोऽपि न भुञ्जते॥
सोमविक्रयिणे दत्तं विड्भानुल्यं भवेन्नृप!
भिषजे ग्लोपितस्यं श्राद्धं देवलके तथा॥
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम्।
बहुयाजिनके दत्तं नेह नामुत्र तत्फलेत्॥
भक्षणीव हुतं हव्यं तथा पौनर्भवे द्विजे।
ये तु धर्म्मव्यपेतेषु चरित्रापगतेषु च॥
हव्यं कव्यं प्रयच्छन्ति तेषां तत् परिनश्यति।
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः॥
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम्।

इतान्विह्नि महाबाहो अपाङ्क्तेयान् द्विजाधमान्।
भूताग्रासुपदेष्यन्ति ये कुर्व्वन्त्यल्पबुद्धय: ॥
यद्दिं काण: शुतं खञ्ज: श्वित्री यावत् प्रपश्यति।
पङ्क्त्यां वसुपविष्टायां तावद्धयते नृप ! ॥
यदेष्टितग्निरा शुङ्क्ते यद्वङ्क्ते दक्षिणामुख:।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
असूयते च यद्दत्तं यच्च श्रद्धादिवर्জ्जितम्।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
यानञ्च पङ्क्तिदूषाञ्च नावेक्षेरन् कथञ्चन ॥"*॥
"तस्मात् परिहृते दद्यात्तिलांश्चात्रे विकीरयेत्।
तिलैर्विरहितं श्राद्धं हुतं क्रोधवशेन च ॥
यातुधाना: पिशाचाश्च विप्रलुम्पन्ति तद्धवि:।
अपाङ्क्तेयानत: पङ्क्त्यां शुश्रूषो नतु पश्यति।
तावत् फलाद्भ्रंशयति दातारं तस्य वाऽनिशम्॥"
इति मात्ये स्वर्गखण्डे ३५ अध्याय: ॥

पङ्क्तिपावन:, पुं, (पङ्क्तिं श्राद्धोपलक्षे भोजनायोपविष्टानां वेदविद्याविचारज्ञानां ब्राह्मणानां श्रेणीं पुनाति पावयति वा स्वोपवेशनेनेति। पङ्क्ति + पावि + ल्यु:।) श्रेणिपवित्रकर्त्ता। श्राद्धभोजनार्हब्राह्मण:। यथा,—
"इमे हि मनुजश्रेष्ठ! विज्ञेया: पङ्क्तिपावना:।
विद्यावेदव्रतज्ञाता ब्राह्मणा: सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेया: पङ्क्तिपावना:।
मातापित्रोश्च वश्य: श्रोत्रियो दश पूरुष: ॥
ऋतुकालाभिगामी च धर्म्मपत्नीषु य: सदा।
वेदविद्याव्रतस्नातो विप्र: पङ्क्तिं पुनात्युत ॥
अथर्व्वशिरसोऽध्येता ब्रह्मचारी यतव्रत:।
सत्यवादी धर्म्मशील: स्वकर्म्मनिरतश्च य: ॥
ये च पुण्येषु तीर्थेषु अभिषेकक्लतश्रमा:।
मखेषु च समर्त्थेषु भवन्त्यवभृथप्लुता: ॥
अक्रोधना ह्यचपला: शान्ता दान्ता जितेन्द्रिया:।
सर्व्वभूतहिता ये च ब्राह्मणांस्तान् निमन्त्रयेत् ॥
एतेषु दत्तमाक्षय्यमेते वै पङ्क्तिपावना:।
यतयो मोक्षधर्म्मज्ञा योगा: सुचरितव्रता: ॥
ये चेतिहासं प्रयता: श्रावयन्ति द्विजोत्तमान्।
ये च भाष्यविद: केचिद्ये च व्याकरणे रता:॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत।
अधीत्य च यथान्यायं विधिवत्तस्य कारिण:॥
उपपन्ना गुरुकुले सत्यवादी सहस्रद:।
ऋग्यु: सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च।
ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावना:॥
ऋत्विगनुपाध्याय: स वेदस्यासनं व्रजेत्।
ऋत्विग्भिरनुज्ञात: पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्व: पङ्क्तिदोषैर्विवर्জ्जित:।
न च स्यात् पतितो राजन्! पङ्क्तिपावन उच्यते॥"
इति मात्ये स्वर्गखण्डे ३५ अध्याय: ॥

(पङ्क्त्याग्निर्यस्य:। यथाह हारीत:।
"पवन: पावनस्तेषां यस्य पङ्क्त्याग्नयो गृहे।
सायं प्रात: प्रदीप्यन्ते स विप्र: पङ्क्तिपावन:॥")

पङ्क्तिरथ:, पुं, (पङ्क्तिषु दृश्यासु दिक्षु गतो रथो यस्य।) दशरथराज:। इति शब्दरत्नावली ॥

तथा च।
"अयोध्यायां महाराज: पुरा पङ्क्तिरथो बली।
तत्स्यात्मजो रामचन्द्र: सर्व्वसूरशिरोमणि: ॥"
इति पाद्मे पातालखण्डम् ॥ (तथा, रघु:।१।७४।
"नृपते: प्रतिपद्यमेव तत्
क्षतवान् पङ्क्तिरथो विलम्बितम् ॥")

पङ्क्तिबीज:, पुं, (पङ्क्तिभूतानि बीजानि यस्य स:।) वर्ब्बूरवृक्ष:। इति राजनिर्घण्टु: ॥

पङ्गु:, पुं, (खञ्जति गतिवैकल्यं प्राप्नोतीति। खञ्जि गतिवैकल्ये। "बाहुलकात् कु:। खञ्जयो: पगौ नुमागमश्च।" उणा०। १।३७। इति पगौ नुमागमश्च। अस्य कथाया अत्युक्ततया बहुकालेन राशिभागादिभोगात् मन्दगतित्वादस्य तथात्वम्।) शनैश्चर:। इति शब्दमाला ॥ (परिव्राट्। यथोक्तं चिन्तामणौ।
"भिक्षार्थं गमनं यस्य विघ्नसञ्चकरणाय च।
योजनान्न परं याति सर्व्वथा पङ्गुरेव स: ॥")

पङ्गु:, त्रि, (खञ्जि गतिवैकल्ये। बाहुलकात् कु:। खस्य पत्वे जसा गादेश: नुम् च। उणा १।३७।) जङ्घावैकल्येन चलनाक्षम:। तत्पर्य्याय:। श्रोण:। २। इत्यमर:।२।६।४८॥ जङ्घाहीन:३। इति शब्दरत्नावली ॥ (यथा, महाभारते २।५।१२५।
"कचिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानवान्धवान्।
पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि ॥"
यानहरणेनैव लोक: पङ्गुर्भवति। यथा, मार्कण्डेये। १५।३१।
"पुण्यापङ्क्तिरिह्म पङ्गुर्यानापङ्क्तिर:॥")
अस्य लक्षणं खञ्जशब्दे द्रष्टव्यम् ॥

पङ्गुल:, पुं, सितकाचाभघोटक:। इति हेमचन्द्र: ॥

पङ्गुलाङ्गारिणी, स्त्री, (सेचनेन पङ्गुत्वं पङ्गुत्वं हरति या। पङ्गुला + हृ + णिच् + ङीप्।) शिम्बीवृक्ष:। इति राजनिर्घण्टु: ॥

पच, इ क ननौ। इति क्रविकल्पद्रम: ॥ (चुरां-परं-सकं-सेट्। इदित्।) ननिरिह विस्तारवचनम्। इ क, पक्षयति धीरो ग्रन्थार्थम्। इति दुर्गादास: ॥ (यथा, गीतगोविन्दे। १०। १३।
"अययति वृथा मौनं तन्वि! प्रपञ्चय पञ्चमम्।
नवलि! मधुरालापैस्तापं विनोदय दृष्टिभि: ॥")

पच, इ ड अक्लीकारे। (भ्वां-आत्मं-सकं-सेट्।) इ, कर्म्मणि पच्यते। ड, पचते स्वगुणं भिक्षुक:। इति दुर्गादास: ॥

पच, ड औ अक्लीकारे। इति क्रविकल्पद्रम: ॥ (भ्वां-आत्मं-सकं-अनिट्।) औ, पक्ता। ड, पचते स्वगुणं भिक्षुक:। इति दुर्गादास: ॥

पच, डु च औ ष पाके। इति क्रविकल्पद्रम: ॥ (भ्वां-उभं-द्विकं-अनिट्।) पाको विक्लित्त्यनुकूलव्यापार:। डु, पक्त्रिमम्। च, पचति पचते तण्डुलानोदनं लोक:। औ, पक्ता। ष, पच्या। इति दुर्गादास: ॥

पच:, त्रि, पचति य:। (पच् + "नन्दिग्रहिपचादिभ्यो ल्युणिन्यच:।" ३।१।१३४। इति अच्।) पाककर्त्ता। इति व्याकरणम् ॥ स्वार्थे कनि पचकश्च ॥

पचत:, पुं, (पचतीति। "भृञ्जभ्रस्जिमर्जिपर्व्विपच्यमितमिनमिहृषिभ्योऽतच्।" उणा।३।११०। इति अतच्।) सूर्य्य:। अग्नि:। इन्द्र:। इत्युणादिकोष: ॥ (परिपक्वे, त्रि। यथा, ऋग्वेदे। १।६१।७। "पचतं सक्थीयान् विधाहराहं तिरो अद्रिमस्ता ॥")

पचतिकल्प, क्ली, (ईषदूनं पचतीति तिङन्तात् कल्पप्।) ईषदूनस्य पाकस्य कर्त्ता। इति व्याकरणम् ॥

पचतपुट:, पुं, (पचत् पुटमस्य।) सूर्य्यमणिवृक्ष:। इति शब्दचन्द्रिका ॥

पचन, [न्] त्रि, (पचति य:। "लट: शतृशानचौ।" २।२।१२४। इति शतृप्रत्यय:।) पाककर्त्ता। इति व्याकरणम् ॥

पचनं, क्ली, (पचते इति। पच् + भावे ल्युट्।) पाक:। (यथा, भागवते। ३।२६।४०।
"द्योतनं पचनं पायमदनं शमनं दमनम् ॥")
पचतेऽनेन इति पचे: करणे ल्युट्। पाकसाधनम्। यथा, ऋग्वेदे। १।१६२।६। "ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥")

पचम:, पुं, (पचत्यसौ इति। पच् + कर्त्तरि ल्यु:।) अग्नि:। इति शब्दचन्द्रिका ॥ पाककर्त्तरि, त्रि ॥

पचनी, स्त्री, (सुक्तमञ्जीर्णादिकं पचतेऽनया। पच् + करणे ल्युट् स्त्रियां ङीप्।) वनजीरकपूरक:। इति राजनिर्घण्टु: ॥

पचन्ती, स्त्री, (ओदनादीन् पचति या। पच् + शतृ + स्त्रियां ङीप्।) पाककर्त्री। इति व्याकरणम् ॥

पचमान:, त्रि, (पचतेऽसौ इति। "लट: शतृशानचौ"। २।२।१२४। इति शानच्।) पाककर्त्ता। इति व्याकरणम् ॥ (पुं, वह्नि: ॥)

पचम्पचा, स्त्री, (पचं पथ्यं पचति। पच्+ खश् ततो मुम्। स्त्रियां टाप्।) दारुहरिद्रा। इत्यमर:। २। ४। १०२ ॥

पचा, स्त्री, (पचते इति पचे: घित्वादड् ततष्टाप्।) पाक:। इत्यमर:। ३। २। ८ ॥ (पचत्यसौ इति पचाद्यच् स्त्रियां टाप्। पाककर्त्री ॥)

पचि:, पुं, (पचतीति। पच् + "सर्व्वधातुभ्य: इन्।" उणा। ४। ११७। इति इन्।) अग्नि:। इति त्रिकाण्डशेष: ॥ पचनम्। इति संक्षिप्तसारव्याकरणम् ॥

पचेलिम:, पुं, (पचत्यसौ इति। "पच एलिमच्।" उणा। ४। ३७। इति एलिमच्।) सूर्य्य:। अग्नि:। इत्युणादिकोष: ॥ कर्त्तुरायासेन स्वयं पक्वे, त्रि। (स्वयमेव पच्यते पच: कर्म्मकर्त्तरि केलिमप्रत्यय:।) यथा, पचेलिमाश्चञ्चुला:। इति सुग्धबोधव्याकरणम् ॥ (यथा च

मनौ। ४। १७२। श्लोकस्य टीकायां कुल्लूकभट्टः। "यथा भूमिरप्रबीजमाचा तदेव प्रचुरपचेलिमफलप्रदीहिस्तवकसम्बलिता न भवति॥")

पचेलुकः, पुं, (पचत्योदनादीन्। पचो वाहुलकादेलुकः।) सूदः। पाचकः। इति चिकाण्डशेषः॥

पच्छः, [स्] पुं, (पीत्यर्थे पादं पादमिति पद्भावः ततः अच्।) पादं पादम्। इति संक्षिप्तसारव्याकरणम्॥

पच्यमानः, त्रि, (पच्यतेऽसौ इति। पच्+कर्म्मणि शानच्।) वर्त्तमानपचनकर्म्मनाश्रयः। वर्त्तमानपाकविशिष्टतण्डुलादि। इति व्याकरणम्॥

पच्ल, ट रोधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्-इदित्।) रोध आवरणम्। पच्छरः। सौत्रधातुरयम्। इति दुर्गादासः॥

पञ्जः, पुं, (पञ्चां जातः। पद्+जन्+कर्त्तरि डः।) शूद्रः। इति हेमचन्द्रः॥ (शूद्रस्य पद्भ्यांतत्वमुक्तं श्रुतौ यथा,—

"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। उरू तदस्य यत् वैश्यः पद्भ्यां शूद्रो अजायत॥")

पञ्झटिका, स्त्री, छन्दोविशेषः। तल्लक्षणं यथा,

"प्रतिपदयमकितषोड़शमात्रा
नवमगुरुत्वविभूषितगात्रा।
पञ्झटिका पुनरत्र विवेकः
क्वापि न मध्यगुरुर्जगण एकः॥"

उदाहरणं यथा,—

"तरलवतंसाश्लिष्टस्कन्ध-
स्खलतरपञ्झटिकाकटिबन्धः।
मौलिचपलशिखिचन्द्रकछन्दः
कालियशिरसि ननर्त्त मुकुन्दः॥"

इति छन्दोमञ्जर्य्यां मात्रावृत्ताख्यः ५ स्तवकः॥

(तथा च भगवच्छङ्कराचार्य्यकृतमोहमुद्गरे ४।

"मा कुरु धनजनयौवनगर्व्वम्
हरति निमेषात् कालः सर्व्वम्।
मायामयमिदमखिलं हित्वा
ब्रह्मपदं प्रविशाशु विदित्वा॥"#॥)

क्षुद्रघण्टिका। इति छन्दोमञ्जरीटीका॥

पञ्च, [न्] त्रि, संख्याविशेषः। पाँच इति भाषा। बहुवचनान्तोऽयम्। इदुदादिकोशः॥ (यथा, मनुः। ११। १६५।

"पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

तद्वाचकानि यथा। पाशुपतः १ शिवास्त्रम् २ इन्द्रियम् ३ स्वर्गः ४ व्रताग्निः ५ महापापम् ६ महाभूतम् ७ महाकाव्यम् ८ महामख ९ पुराणलक्षणम् १० अन्नम् ११ प्राणाः १२ वर्णाः १३ इन्द्रियार्थः १४ वाणः १५। इति कविकल्पलता॥ पञ्चसंख्याविशिष्टे, त्रि। यदुक्तम्। "संख्या संख्येये स्यादग्र त्रिषु।" इत्यमरः। २। ६। ८३॥

पञ्चकं, त्रि, (पञ्चैव इति स्वार्थे कन्।) पञ्च। यथा, भाषापरिच्छेदे। ३३। "संख्यादिपञ्चकं कालदिग्योः शब्दश्च ते च खे।" इति॥ (पञ्च संख्यापरिमाणमस्य। "तदस्य परिमाणम्।" ५। १। ५७। इत्यनुवृत्तौ,"संख्यायाः संज्ञा संघसूत्राध्ययनेषु।" ५। १। ५८। इति पञ्चसङ्ख्यापरिमिति संघार्थे कन् प्रत्ययः। धनिष्ठादि पञ्चनक्षत्रम्। यथाह चिन्तामणिः।

"अग्निचौरभयं रोगो राजपीड़ा धनक्षतिः।
संयद्दे क्षणकाष्ठानां क्षते वस्वादिपञ्चके॥"

पञ्चभिः क्रीतम्। "संख्याया अतिशदन्तायाः कन्।" ५। १। २२। इति कन्। पञ्चभिः क्रीते मद्यविशेषे॥)

पञ्चकपालः, पुं, पञ्चसु कपालेषु संस्कृतः पुरोडाशः। ("संस्कृतं भक्षाः।" ४। २। १६। इत्यण् ततो "द्विगोर्लुगनपत्ये।" ४। १। ८८। इत्यणो लुक्।) स तु यज्ञविशेषः। यथा। "परा वा एष यज्ञं पशून् वपति योऽग्निमुद्वासयते पञ्चकपालः पुरोडाशो भवति।" इत्यादि यजुर्व्वेदीयश्रुतिः॥ (पञ्चानां कपालानां समाहारः। परनिपातः।) कपालपञ्चके, क्ली॥

पञ्चकर्म्म, [न्] क्ली, (पञ्चानां कर्म्मणां समाहारः।) पञ्चप्रकारशारीरिकचिकित्साविशेषः। यथा,—

"वमनं रेचनं नस्यं निरूहश्चानुवासनम्।
पञ्चकर्म्मेदमन्यच्च कर उत्क्लेपणादिकम्॥"

इति शब्दचन्द्रिका॥ (भाषापरिच्छेदोक्तानि पञ्चकर्म्माणि। यथा, तत्रैव ६।

"उत्क्लेपणं ततोऽवक्षेपणमाकुञ्चनं तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥")

पञ्चकषायः, पुं. (पञ्चविधः कषायः। अथवा पञ्चानां वृक्षाणां कषायः वल्कलरसः। क्वचित्त्वयं बहुवचनान्तोऽपि दृश्यते। तत्र तु पञ्च च ते कषायाश्चेति एवमेव।) महाकषायीयपञ्चप्रकारकषायद्रव्यम्। यथा,—

"जम्ब्वाम्रप्लक्षवाट्याश्वत्थं वकुलं वदरं तथा।
कषायाः पञ्च विज्ञेया देहाः प्रीतिकराः शुभाः॥"

इति दुर्गोत्सवपद्धतिः॥

पञ्चफलः, पुं, (पञ्च विस्तृतं फलं यस्य पलाशादिकं यत्र।) पक्वपीलुवृक्षः। इति राजनिर्घण्टः॥ (क्ली, पञ्च प्रधानं फलं कार्य्यं वृक्षादिकम्। वृष्टिस्थितिध्वंसविधानानुग्रहात्मकं कार्य्यम् इति भावः। यथाह चिन्तामणिः।

"यस्मिन् सृष्टिस्थितिध्वंसविधानानुग्रहात्मकम्।
फलं पञ्चविधं शास्त्रज्ञासने तं नुमः शिवम्॥")

पञ्चकोलं, क्ली, पाचनविशेषः। यथा,—

"पञ्चकोलं कणामूलं क्षाराश्चव्याग्निनागरैः।"

इति शब्दचन्द्रिका॥ अस्य गुणाः।

"पञ्चकोलं रसे पाके कटुकं रुचिकारकम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्।
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"

इति भावप्रकाशः॥ अपि च।

"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम्।
दीपनीयः प्रथमो वर्गः कफानिलगदापहः॥"

इति चक्रपाणिदत्तः॥ (पञ्चकोलघृतमुक्तं चरके चिकित्सितस्थाने १८ अध्याये।

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः।
सप्तभागैरुपलिकैः प्रस्थं तर्पिणः पचेत्॥
कल्कैर्द्विपञ्चमूलस्य गुलार्द्धस्य रसेन च।
दधिमस्तानकोपेतं तत्सर्पिर्जठरापहम्।
क्षयार्शः वातविष्टम्भं गुल्माग्नींश्च नाशयेत्॥")

पञ्चकोषाः, पुं, (पञ्च च ते कोशाश्चेति।) कोशा इवाच्छादकत्वेन कोशाः। ते च पञ्चविधाः। यथा। अन्नविकारत्वात् स्थूलशरीरं अन्नमयकोषः १॥ पञ्चकर्म्मेन्द्रियसहितप्राणपञ्चकं प्राणमयकोषः २॥ पञ्चज्ञानेन्द्रियसहितं मनः मनोमयकोषः ३॥ पञ्चज्ञानेन्द्रियसहिता बुद्धिः विज्ञानमयकोषः ४॥ अहङ्कारात्मको विद्यात्मको वा आनन्दमयकोषः ५॥ इति शिवगीतासनम्॥ * ॥ अपि च।

"पित्तशुक्रान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते।
देहः सोऽन्नमयो नाम्ना प्राक् चोर्द्ध्वं तदभावतः॥"

इत्यन्नमयकोषः १॥

"पूर्णो देहे बलं यच्छन्नश्वासानां यः प्रवर्त्तकः।
वायुः प्राणमयो नासावात्मा चैतन्यवर्द्धनात्॥"

इति प्राणमयकोषः २॥

"अहन्तां ममतां देहे गृहादौ च करोति यः।
कामाद्यस्थया आत्मो नासावात्मा मनोमयः॥"

इति मनोमयकोषः ३॥

"लीना सुप्तौ वपुर्बोधे आप्नुयादात्मवायगा।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक्॥"

इति विज्ञानमयकोषः ४॥

"काचिदन्तर्मुखावृत्तिरानन्दप्रतिबिम्बभाक्।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम्॥"

इत्यानन्दमयकोषः ५॥ इति पञ्चधा॥

पञ्चक्षारगणः, पुं, (पञ्चानां क्षाराणां गणः।) क्षारपञ्चकम्। पञ्चलवणम्। यथा,—

"क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः।
काचसैन्धवसामुद्रविट्सौवर्च्चलैः समैः॥
स्यात् पञ्चलवणं तच्च श्लक्ष्णचूर्णितं षड़ाह्वयम्।"

इति राजनिर्घण्टः॥

पञ्चखट्वं, क्ली खौ, (पञ्चानां खट्वानां समाहारः।) पञ्चखट्वाः समाहृताः। इति व्याकरणम्॥

पञ्चगणयोगः, पुं, (पञ्चानां गणो यत्र स एव योगः।) विदारी गन्धा वृश्चिली एन्द्रिपर्णी निदिग्धिका स्वदंष्ट्रा एता मिलिताः। इति राजनिर्घण्टः॥

पञ्चगवं, क्ली खौ, पञ्चानां गवां समाहारः॥ (समासे टच्।) पञ्चगावः समाहृताः। इति व्याकरणम्॥

पञ्चगवधनः, त्रि, पञ्च गावो धनं यस्य। इति मुग्धबोधव्याकरणम्॥

पञ्चगव्यं, क्ली, (गोर्विकारः गव्यम्। पञ्चगुणितं गव्यम्।) गोसम्बन्धिपञ्चप्रकारद्रव्यम्। (यथा, मनुः। ११। १६५।

"भक्ष्यभोज्यापहरणे यानशय्यासनस्य च।
पुष्पमूलफलानाञ्च पञ्चगव्यं विशोधनम्॥")

तत्तु गोमयगोमूत्रदुग्धदधिघृतरूपम् । यथा,—
"पञ्चगव्यं दधिक्षीरघृतगोमूत्रगोमयैः ।" इति शब्दचन्द्रिका ॥ * ॥ तत्परिमाणं यथा,—
"पलमात्रं दुग्धभागं गोमूत्रं तावदिष्यते ।
घृतञ्च पलमात्रं स्यात् गोमयं तोलकत्रयम् ॥
दधि प्रकुडवमात्रं स्यात् पञ्चगव्यमिदं स्मृतम् ।
अथवा पञ्चगव्यानां समानो भाग इष्यते ॥"
इति गौतमीयतन्त्रम् ॥ * ॥ अपि च ।
"गोमूत्रञ्चैगुणं क्षीरं पयः स्यात्तच्चतुर्गुणम् ।
घृतं तद्द्विगुणं प्रोक्तं पञ्चगव्ये तथा दधि ॥" * ॥
तस्य पानफलं यथा,—
"पञ्चगव्येन घृतेन वाजिमेधफलं लभेत् ।
गव्यन्तु परमं मेध्यं गव्यादन्यन्न विद्यते ॥
सौम्ये नक्षत्रे संयुक्ते पञ्चगव्यन्तु यः पिबेत् ।
यावज्जीवकृतात् पापात् तत्क्षणादेव मुच्यते ॥"
गव्यानां देवप्रीतिकरत्वं यथा,—
"दक्षा हि त्रिदशाः सर्व्वे क्षीरेण च महेश्वरः ।
घृतेन पावको नित्यं पायसेन पितामहः ॥
सस्यदक्षेण प्रीयन्ते वर्षाणाञ्च त्रयोदश ।
तां दत्त्वा चैव गौस्तात न प्रेतो मेध्यश्च जायते ॥"
इति वराहपुराणम् ॥ * ॥
तस्य विधिर्यथा,—
"पयः काञ्चनवर्णाया रौप्यवर्णोत्थगोमयम् ।
गोमूत्रं ताम्रवर्णाया नीलवर्णाभवं घृतम् ॥
दधि स्यात् श्यामवर्णाया दर्भैरेकसमायुतम् ।
गोमूत्रमाषकाग्र्यौ गोमयस्य चतुष्टयम् ॥
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश उच्यते ।
घृतस्य माषकाः पञ्च पञ्चगव्यं मलापहम् ॥"
इति गारुडे प्रायश्चित्तप्रकरणम् ॥
पञ्चगुः, त्रि, पञ्चभिर्गोभिः क्रीतः । इति सुबोधव्याकरणे द्विगुसमासः ॥
पञ्चगुप्तः, पुं, (पञ्चानामिन्द्रियाणां चापल्यं गुप्तं यत्र । यद्वा पञ्चानां पदार्थानां गुप्तः गोपनं यत्र ।) चार्व्वाकदर्शनम् । (करौ चरणौ शिरश्चेति पञ्चाङ्गानि गुप्तानि अस्य ।) कच्छपः । इति मेदिनी ॥
पञ्चगुणिरसा, स्त्री, (पञ्चधा गुणौ रसोऽस्याः ।) सज्जा । इति राजनिर्घण्टः ॥
पञ्चचामरं, क्ली, षोड़शाक्षरपादच्छन्दोविशेषः । यथा,—
"प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ॥"
इति छन्दोमञ्जरी ॥४॥ (अस्योदाहरणमाह तत्रैव।
"सुरद्रुभूलमण्डपे विचित्ररत्ननिर्म्मिते
लसद्वितानभूषिते सलीलविभ्रमालसम् ॥
सुराङ्गनाभवल्लवीकरप्रपञ्चचामर-
स्फुरत्समीरवीजितं सदाच्युतं भजामि तम् ॥")
पञ्चचौरः, पुं, (पञ्च चौरायस्य । बौद्धधर्म्मावलम्बि-जिनभेदः । पञ्च चौराणि स्वरभेदा अस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥
पञ्चचूड़ा, स्त्री, (पञ्चसङ्ख्काः चूड़ाः शिरोरत्नानि यस्याः ।) अप्सरोविशेषः । इति पुराणम् ॥ (यथा, रामायणे । ६ । ६२ । ७१ ।
"उर्व्वशी मेनका रम्भा पञ्चचूड़ा तिलोत्तमा ।
उपानृत्यंस्तु काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥")
पञ्चजनः, पुं, (पञ्चभिर्भूतैर्जन्यतेऽसौ । पञ्च + जन् + कर्म्मणि घञ् । "जनिवध्योश्च" ।७।३।३५। इति न वृद्धिः ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, राजतरङ्गिण्याम् । ३ । ३५५ ।
"सङ्गावश्राद्धिका देवस्तेन श्रीशब्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन् निवेशिताः ॥")
दैत्यविशेषः । स च संह्लादस्य सुतो पत्न्यां जातः । (यथा, श्रीभागवते । ६ । १८ । १४ ।
"संह्लादस्य कृतिर्भार्य्याऽसुत पञ्चजनं ततः ॥"
अपरो दैत्यभेदः । श्रीकृष्णः एनं हत्वा सान्दीपनिसुतये अस्य मृतं पुत्रं गुरुदक्षिणारूपं ददौ । यथा, भागवते । ३ । ३ । २ ।
"सान्दीपनेः सकृत् प्रोक्तं ब्रह्माधीत्य सविस्तरम् ।
तस्मै प्रादात् वरं पुत्रं मृतं पञ्चजनोदरात् ॥")
अस्यास्त्रा पाञ्चजन्यनामा शङ्खो जातः । स च श्रीकृष्णस्य । यथा,—
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ॥"
इत्यादि श्रीभगवद्गीतायाम् । १ । १५ ॥ (प्रजापतिः । यथा, भागवते । ६ । ४ । ५१ ।
"दक्षा पञ्चजनस्याङ्ग ! दुहिता वै प्रजापतेः ।
असिक्नी नाम पत्नीत्वे प्रजेश ! प्रतिगृह्यताम् ॥"
सगररानपुत्रः । यथा, हरिवंशे । १५ । ६ ।
"कीर्त्तिमद्भुत सगरादसमञ्जसमात्मजम् ।
राजा पञ्चजनो नाम बभूव स महाबलः ॥"
गन्धर्व्वाः पितरो देवा असुरा रक्षांसि पञ्चजनपदवाच्यानि भवन्ति । इति चिन्तामणिः ॥)
पञ्चजनी, स्त्री, पञ्चानां जनानां समाहारः ततो ङीप् । इति व्याकरणम् ॥ (विश्वरूपकन्या । यथा, भागवते । ५ । ७ । १ । "तदनुशासनपरः पञ्चजनीं विश्वरूपदुहितरमुपयेमे ॥")
पञ्चजनीनः, पुं, (पञ्चसु जनेषु व्याप्तः । दिक्संख्यासंज्ञायामिति समासः । पञ्चजनैः हितम् । पञ्चजनादुपसङ्ख्यानमिति खः । यां । ५ । १ । ६ । वार्त्तिके ।) भक्तः । इति हलायुधः ॥ पञ्चजनसम्बन्धिनि पञ्चजन्याः प्रभौ च त्रि ॥
पञ्चज्ञानः, पुं, (पञ्चानां पदार्थानां ज्ञानमस्य ।) बुद्धः । इति हेमचन्द्रः ॥
पञ्चतत्त्वं, क्ली स्त्री, पञ्चानां तत्त्वानां समाहारः । इति व्याकरणम् ॥
पञ्चतत्त्वं, क्ली, (पञ्चानां तत्त्वानां समाहारः ।) पञ्चभूतम् । इति स्वरोदयः ॥ पञ्चमकारः । मद्यमांसमत्स्यमुद्रामैथुनरूपम् । यथा,—
"मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च ।
पञ्चतत्त्वमिदं देवि ! निर्व्वाणमुक्तिहेतवे ॥
मकारपञ्चकं देवि ! देवानामपि दुर्ल्लभम् ॥"
इति कौलतन्त्रे प्रथमपटलः ॥ वैष्णवानां यथा,—
"तत्त्वज्ञानमिदं प्रोक्तं वैष्णवे शृणु यत्नतः ।
गुरुतत्त्वं मन्त्रतत्त्वं मनस्तत्त्वं सुरेश्वरि ! ॥
देवतत्त्वं ध्यानतत्त्वं पञ्चतत्त्वं वरानने ! ।
तत्त्वादौ श्रीगुरोस्तत्त्वं वक्ष्याम्यहञ्चाभि पार्व्वति ! ॥
सतैलं वर्त्तिकायुक्तं देहस्थं ब्रह्मतेजसम् ।
गुरुणा मन्त्रदानेन तत्सूक्ष्मं दीपितं भवेत् ॥
देवतायाः शरीरं हि मन्त्रादुत्पद्यते ध्रुवम् ।
अत एव हि तस्यात्मा देवरूपो न संशयः ॥
ईश्वरस्य तु यद्वीर्य्यं तदेव अक्षयात्मकम् ।
तेन वर्णात्मकं देहं जन्तोरेव न संशयः ॥
मन्त्रवर्णो सर्व्ववर्णमयास्ते परमेश्वरि ! ।
वर्णतत्त्वमिदं देवि ! सर्व्वस्वं मम यद्धनम् ॥
स्वयं देवो न चान्योऽस्मि निर्म्मलो देवरूपकः ।
सर्व्वत्र देवतां ध्यायेत् लतागुल्मलतादिषु ॥
ध्यानेन लभते सर्व्वं ध्यानेन विष्णुरूपकः ।
ध्यानेन सिद्धिमाप्नोति विना ध्यानं न सिध्यति ॥
इति ते कथितं तत्त्वं वैष्णवस्य सुरेश्वरि ! ।
यज्ज्ञानादमरत्वञ्च विष्णुरूपो भवेन्नरः ॥
ते नरा नहि गच्छन्ति कदाचिद्यममन्दिरम् ॥"
इति निर्व्वाणतन्त्रे १२ पटलः ॥
पञ्चतपाः, [स्] त्रि, (अग्न्यादिभिः पञ्चभिस्तेजःपदार्थैस्तपति यः । पञ्च + तप् + असुन् ।) अग्निचतुष्टयसूर्य्यपञ्चकसाधनपोविशिष्टः । यथा,
"तेजस्विमध्ये तेजस्वी स्त्रीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥"
इति माघे । २ । ५१ ॥
पञ्चतयं, त्रि, (पञ्च अवयवा यस्य । अवयवे तयप् ।) पञ्चावयवम् । इति व्याकरणम् ॥
पञ्चतन्मात्रं, क्ली, (पञ्चगुणितं शब्दादिभूतसूक्ष्मात्मकं तन्मात्रम् ।) तामसाहङ्कारोत्पन्नमहाभूतोपादानकारणशब्दस्पर्शरूपरसगन्धाः। तदाश्रयद्रव्याणि च । इति सांख्यभाष्यम् ॥
पञ्चता, स्त्री, (पञ्चानां भूतानां भावः । पाञ्चभौतिकस्य शरीरस्य पञ्चधाभावे आरम्भकाणां भूतानां तद्भावापत्तौ सत्यां औपचारिकत्वात् ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं तत्कृतं जानता ते ! ।
नरहर उपनीतः पञ्चतां पञ्चविंश ॥")
देहारम्भकाणां पृथिव्यादिपञ्चमहाभूतानां स्वांशसंक्रमणात् पृथक्त्वम् । इति भरतः ॥ पञ्चभावः । इति मेदिनी ॥ (यथा, मनुः । ८ । १५१ ।
"धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥")
पञ्चतिक्तं, क्ली. (पञ्चगुणितं तिक्तम् ।) तिक्तद्रव्यपञ्चकम् । यथा । निम्बाम्बसाहषपटोलगिरिधिकाः । इत्यादि चक्रपाणिदत्तः ॥
पञ्चतीर्थी, स्त्री, (पञ्चानां तीर्थानां समाहारः । ङीप् ।) तीर्थपञ्चकम् । यथा । "विष्णुवह्निसरे प्राप्ते पञ्चतीर्थीविधानतः ।" इति तिथितत्त्वम् । पञ्चतीर्थान्याह । (तानि च भिन्नदेशे भिन्नरूपाणि, तत्र काशीस्थानि । यथा, काशीखण्डे । १०० । ३६—४० ।
"ज्ञानवापीसुपञ्चाग्न्यं नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं ततोऽभ्यर्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दशाश्वमिति मे पञ्चतीर्थिका ॥")

पुरुषोत्तमक्षेत्राणि यथा,—
"मार्कण्डेये वटे क्षेत्रे रौहिणेये महोदधौ।
इन्द्रद्युम्नसरः स्नात्वा पुनर्जन्म न विद्यते ॥"
इति तीर्थतत्त्वम् ॥ * ॥ अपि च। नाना-स्थानस्थानि यथा,—
"पृथिव्यां यानि तीर्थानि सर्व्वाण्येवाभिषेचनात्।
तत्पञ्चतीर्थस्नानेन समं नास्त्यत्र संशयः ॥
एकादश्यां विश्राम्यां द्वादश्यां पौष्करे तथा।
अयोदश्यां नैमिषे च प्रयागे च चतुर्दशी ॥
कार्त्तिक्यां पुष्करे चैव कार्त्तिकस्य सितासिते।
कालेष्वेषु नरः स्नात्वा सर्व्वं पापं व्यपोहति ॥"
इति वराहपुराणम् ॥

पञ्चत्वं, क्ली, (पञ्चानां क्षित्यादिभूतानां भावः।) मरणम्। पञ्चानां भावः। इति हेमचन्द्रः ॥ ("पञ्चधात्वात्मकः कायो यदि पञ्चत्वमागतः। पञ्चभिः स्वशरीरोत्थैस्तत्र का परिवेदना" ॥ तथा, भागवते। १। १५। ४१।
"स्नात्वावपानं सोत्सर्गं तं पञ्चत्वे व्यजोहवीत्॥")

पञ्चदग्गः, त्रि, पञ्चदग्नानां पूरणः। (पूरणे डट्। पञ्चाधिका दग्न यत्र वा।) पोनेर इत्यादि भाषा। तत्संख्यामात्रवाचिते नाम्नवहुवचनान्तोऽयम्। इति व्याकरणम् ॥ तद्व्याचक्षग्रन्थः। (यथा, अथर्ब्ववेदे। ११। १। १८। "पितामहाः पितरः प्रजोपजाश्च पक्षा पञ्चदग्नास्ते अस्मिन्॥") तिथिः। इति कविकल्पलता ॥

पञ्चदग्नी, स्त्री, (पञ्चदग्नानां पूरणी। डट्। ङीप्।) पूर्णिमा। अमावास्या। इति मेदिनी ॥ (यथाह याज्ञवल्क्यः। १। १४६।
"पञ्चदग्नां चतुर्दग्यामष्टम्यां राहुसूतके।
ऋतुसन्धिषु भुक्ता वा आह्निकं प्रतियत्न च ॥"
(पञ्चदग्नप्रकरणानि तत्रत्यस्याम्।) श्रीमद्भारती-तीर्थविद्यारण्यमुनीश्वरजतो वेदान्तग्रन्थविशेषः॥

पञ्चदीर्घ, क्ली, (शरीरस्य स्तुतिग्राह्योत्तमत्व-व्यञ्जकपञ्चस्थलं दीर्घं पञ्चसु अवयवेषु दीर्घलक्षण-व्यञ्जकमित्यर्थः।) शरीरपञ्चावयवलक्षणविशेषः। यथा,—
"बाहू नेत्रद्वयं कुक्षिर्हनुर्नासे तथैव च।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥"
इति वाक्यरत्नकम् ॥

पञ्चधा, व्य, (पञ्चन् + "संख्यायाविधार्थे धा।" ५। ३। ४२। इति धा।) पञ्चप्रकारम्। इति व्याकरणम् ॥ (यथा, भागवते। ८। १६। ३७।
"धर्म्माय यशसेऽर्थाय कामाय स्वजनाय च।
पञ्चधा विभजन् वित्तमिहामुत्र च मोदते ॥")

पञ्चनखः, पुं, (पञ्च नखा यस्य।) हस्ती। कूर्म्मः। इति हेमचन्द्रः ॥ व्याघ्रः। इति राजनिर्घण्टः ॥ * ॥
भक्ष्यीयपञ्चनखा यथा,—
"गृध्रकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः॥"
इति स्मृतिः ॥
(तथाच याज्ञवल्क्यः। १। १७७।
"भक्ष्याः पञ्चनखाः सेधागोधाकच्छपशल्लकाः।
गृध्रश्च मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥")

"पञ्च पञ्चनखा भक्ष्या ये प्रोक्ताः शतजैर्द्विजैः।
कौशल्याज! गृध्रादीनां तेषां नैकोऽप्यहं कपिः॥"
इति भट्टिः। ६। १३१ ॥

पञ्चनदः, पुं. (पञ्च पञ्चसङ्ख्याकाः नद्यः सन्त्यत्र। समासे टच्।) पञ्चनदीयुक्तदेशविशेषः। पञ्जाब इति पारस्यभाषा। तस्य नामान्तरम्। वाह्लीकः मद्रदेशश्च। ता नद्यो यथा। शतद्रुः १ विपाशा २ इरावती ३ चन्द्रभागा ४ वितस्ता ५। इति पुराणम् ॥
(यथा, राजतरङ्गिण्याम्। ४। २४८।
"रङ्गः पञ्चनदे जातु दुष्टरैः सिन्धुसङ्गमे॥")
पञ्चानां नदीनां समाहारे क्ली ॥ (यथा, रामायणे। ३। ४३। २१।
"ततः पञ्चनदं क्षत्तर्ब्रह्मण्यं समभ्यगात्॥"
तत्र काश्मीरस्थनदीपञ्चकरूपं तीर्थम्। यथा, काश्मीरखण्डे। ५६। ११३—११६।
"किरणाधूतपापे च तस्मिन् धर्म्मनदे शुभे।
स्नवन्त्यौ पापसंहर्त्र्यौ वाराणस्यां शुभप्रदे॥
ततो भागीरथी प्राप्ता तेन देवीपिना सह।
भागीरथी समायाता यमुना च सरस्वती॥
किरणाधूतपापा च पुण्यतोया सरस्वती।
गङ्गा च यमुना चैव पञ्चनदोऽत्र कीर्त्तिताः।
अतः पञ्चनदं नाम तीर्थं त्रैलोक्यविश्रुतम्॥"
तीर्थविशेषः। यथा, महाभारते। ३। ८२। ७६।
"अथ पञ्चनदं गत्वा नियतो नियताशनः।
पञ्चयज्ञानवाप्नोति क्रमशो येनुकीर्त्तितान्॥"
असुरभेदः। यथा, हरिवंशे। १२०। ८८।
"हत्वा पञ्चनदं नाम नरकस्य महासुरम्॥")

पञ्चनिम्बं, क्ली, (पञ्चानां स्वीयपुष्पमूलादि-रूपाणां निम्बानां समाहारः।) निम्बवृक्षस्य-पत्रत्वक्पुष्पफलमूलानि। इति राजनिर्घण्टः ॥
"पञ्चनिम्बन्तु तत्पुष्पमूलवल्कफलच्छदैः ॥"
इति शब्दचन्द्रिका ॥

पञ्चनी, स्त्री, (पञ्चते प्रपञ्चते प्राणक्रीड़ा-नियमो यत्र। पचि विस्तारे + ल्युट् स्त्रियां ङीप्।) शारिप्रक्रीड़ा। इति शब्दरत्नावली ॥ (प्राणार क्रुक इति भाषा ॥)

पञ्चनीराजनं, क्ली. पञ्चानां नीराजनानां समाहारः। पञ्चप्रकारारात्रिकम्। इति कालोत्तर तन्त्रम् ॥ अस्य विवरणं नीराजनशब्दे द्रष्टव्यम् ॥

पञ्चपर्व्वी, [न्] पुं, (अकारादि-ओकारान्ताः अरउएओरूपाः पञ्चस्वराः पञ्चिमः पञ्चि-स्वरूपा यत्र।) पारिभाषिकपञ्चिपञ्चकद्वारा त्रिकालबोधकग्रन्थभेदः। यथा,—
"प्रणम्य श्रीमहादेवं सर्व्वशास्त्रविशारदम्।
भविष्यदर्थबोधाय पञ्चपर्व्वी प्रदर्श्यते॥
तेषां वचनमाकर्ण्य निजगाद महेश्वरः।
त्रिकालज्ञानबोधार्थं पञ्चपर्व्वी प्रदर्श्यते॥
अनेन शास्त्रसारेण लोकैः कालत्रयं प्रति।
बलाबलानि दृष्ट्वात्मने सर्व्वकार्य्येषु निश्चितः॥
आगतं प्रच्छकं दृष्ट्वा देवज्ञः सावधानतः।
यद्यत् करोति कर्म्माणि तत्तात् सर्व्वं विचारयेत्॥

ऊर्द्धावलोकने जीवस्त्वधोदृष्टौ तु मूलकम्।
समदृष्टौ भवेद्धातुरेतास्त्रिस्ताप्रभेदतः॥"
तत्र।
"ललाटे पुत्रचिन्ता स्यात् कामचिन्ता च कण्ठके।
बाहुभ्यां वस्तुचिन्ता च व्याधिचिन्ता तथोदरे॥
कटौ विच्छेदचिन्ता च शत्रुचिन्ता च गुह्यके।
दुःखचिन्ता भवेत् पादे इति चिन्ताप्रभेदकाः॥" * ॥
अपरञ्च।
"अक्षरं पक्षिशुक्रञ्च दिग्देवतदिनानि च।
कालं वर्णं बलं मित्रं धातुमूलादिकं क्रमात्॥
आरूढप्रश्नलग्नेभ्यः प्रथमाक्षरतोऽपि वा।
प्रच्छकस्य वचः श्रुत्वा यात्रो वर्णः स्वरस्तथा॥ * ॥
स्वरेण कल्पयेद्वारं वारात् पक्षी प्रजायते।
पक्षिणो जायते वायं वाक्याच्च फलसम्भवः॥" * ॥
"अकारादिऔकारान्ताः स्वराः पञ्च प्रकीर्त्तिताः।
भुक्त्यर्थं कल्पयेद्रूपं स्वराणां पक्षिरूपिणः॥
अकारः पूर्ण आख्यातः इकारः पिङ्गलस्तथा।
उकारो वायसश्चैव एकारस्तामधूश्वरः।
ओकारो मौलकण्ठश्च स्वराणां पक्षिसंज्ञकाः॥
अकारः पूर्व्वदिग्भागे इकारश्चैव दक्षिणे।
उकारः पश्चिमे ज्ञेय एकारश्चोत्तरे तथा॥
मध्यस्थानेषु सर्व्वेषु ओकारस्तु प्रकीर्त्तितः।
ग्रहणानां क्रियागत्या ज्ञाते युद्धे जयाजयौ॥
प्राक्पक्षिणः पिङ्गलो याम्ये पश्चिमे काक उच्यते।
उत्तरे ताम्रचूड़श्च कलापी मध्यगः स्मृतः॥
ऊष्मणाक्षरकेष्वेषां ककारादौस्तु विन्यसेत्।
अकारादिषु हान्तेषु तानेकैकं पदं परिक्रमात्॥
अस्वरे कङ्कटो वर्णो धमधाश्च भवन्ति हि।
खजटा नमशा वर्णा इकारे परिकीर्त्तिताः।
गसताः पयषा वर्णा उस्वरे स्युर्यथाक्रमम्॥
घटष्याः करसा एते वर्णा एस्वरमाश्रिताः।
चटता वलहा वर्णा ओस्वरे परिकीर्त्तिताः॥ * ॥
प्रथमे रविभौमौ च द्वितीये चन्द्रचन्द्रजौ।
तृतीये जीववारश्च चतुर्थे भृगुवासरः॥
पञ्चमे मन्दवारश्च पक्षिणां क्रमशो लिखेत्।
नन्दा भद्रा जया रिक्ता पूर्णा च तिथयः क्रमात्॥
अकारे मेषसिंहालिः इः कन्यायुगमकर्कटाः।
उकारे चापमीनौ च एकारे च तुलावृषौ॥
ओकारे मृगकुम्भौ च एवं राशिश्च संलिखेत्।
स्वराधः स्थापयेत् खेटान् राशेर्यो यस्य नायकः॥
अकारे सप्त ऋक्षाणि रेवत्यादिक्रमेण च।
पञ्च पञ्च इकारादावेवमन्तं स्वरोदयं ॥ * ॥
प्रथमे चाश्विनी पूर्व्वं पञ्चमत्रसुधते।
अतः क्रमात् द्विघट्टे च पञ्च पञ्च च तारकाः॥ *
स्वराणाञ्च क्रमेणैव देवताः परिकीर्त्तिताः।
ईश्वरः पवनश्चैव इन्द्राकाग्नः सदाग्निवः॥ * ॥
प्राच्यां पृथ्वी गुरुश्चैव याम्यां शुक्रो जलं तथा।
अङ्गारकः पश्चिमेऽग्निर्बुधो वायुस्तथोत्तरे॥
सूर्य्यपुत्रस्तथाकाशे ऊर्द्धमेवं लिखेत्ततः।
क्षितौ ब्रह्मा जले विष्णुस्तथा रुद्रो हुताशने॥
ईश्वरः पवने चैव तथाकाशे सदाशिवः।
भूतौ मयूरः कुजश्च कुक्कुटो वर्त्तमानकः॥

बलिभुक्श्येनकौ ख्यातौ भविष्यन्तौ सुनिश्चितम् ।
श्येनो हरितयवर्णश्च पिङ्गलः शुक्लवर्णकः ॥
काको रक्तोऽसितश्चित्रः कुक्कुटः श्यामलः शिखी ।
काको बलीयान् सर्व्वेभ्यस्तस्मात् श्येनो हि
दुर्ब्बलः ॥
कुक्कुटो दुर्ब्बलस्ताभ्यां पिङ्गलस्तेभ्य ऊनकः ।
सर्व्वेभ्यो दुर्ब्बलः पक्षी नीलकण्ठो न संशयः ॥
बली मयूरात् शुक्लस्तु ताम्रचूडस्ततोबली ।
एतेभ्यो बलवान् श्येनस्तुर्णो वायसो बली ॥*॥
मित्रं मयूरः श्येनस्य मयूरस्य च पिङ्गलः ।
ताम्रचूडस्य सुहृदौ मयूरपिङ्गलौ तथा ॥
वायसस्यापि मित्रं स्यात् शिखी भवति सर्व्वदा ।
सुहृदौ पिङ्गलश्येनौ मयूराख्यशिखरौ ॥ * ॥
काककुक्कुटश्येनाश्च पिङ्गलस्य च विद्विषः ।
मयूरस्य रिपू नित्यं सर्व्वदा श्येनवायसौ ॥
भवतः श्येनकाकौ द्वौ ताम्रचूडस्य विद्विषौ ।
काकस्य शत्रवो नित्यं पिङ्गलश्येनकुक्कुटाः ॥*॥
ऊर्द्धदृष्टिर्भवेत् जीवो ह्यधोदृष्टिस्तु मूलकम् ।
समदृष्टिर्भवेद्धातुरेते चिन्ताप्रभेदकाः ॥ * ॥
श्येनो मूलं तथा कुक्षौ जीवो धातुश्च वायसः ।
कुक्कुटो मूलजीवौ च मूलधातू शिखण्यपि ॥*॥
श्येनो नरो वधूः कुक्षः पुरुषो वायसस्तथा ।
कुक्कुटः स्त्री पुमांश्चैव शिखी नपुंसकस्तथा ॥*॥
श्येनकाकौ द्विजश्रेष्ठौ मयूरोपालस्तु वायसः ।
ताम्रचूडो वणिक् शूद्रो नीलकण्ठस्तथान्त्यजः ॥*॥
चतुष्पात् पिङ्गलो श्येनो द्विपदौ श्येनवायसौ ।
ताम्रचूडो नखी पक्षी शिखण्डी पक्षिजीवकः ॥*॥
श्येनो सुखं कण्ठवाक् कुक्षौ वक्षस्तु वायसः ।
कुक्कुटः पृष्ठभागः स्यात् शिखी पादयुगं क्रमात् ॥*
श्येनो भूम्यां घनं श्रेयं पिङ्गलो जलपङ्कयुक् ।
वायसस्तृणसङ्घाते कुक्कुटो भस्मनाततम् ॥
श्येनः शिखी गृहारामे बन्धुस्थानेषु निश्चितम् ।
स्वग्रामे श्येनकाकौ तु वायसो बन्धुमाप्नुयात् ॥
कुक्कुटः परदेशे च परग्रामे तथा शिखी ।
कुक्षस्तु दशहस्ते च स्वल्पक्रोशे तु कुक्कुटः ॥
द्विक्रोशे तु तथा काकः श्येनः क्रोशे तु पूर्व्वतः ।
मयूरो योजने चैति तथैव दूरनिश्चयः ॥ * ॥
भुक्तौ च मासो गमने च पक्षो
राज्ये दिनानि त्वयनन्तु सद्मे ।
मृते च वर्षं शकुनस्य चर्य्या
कालप्रमाणं मुनयो वदन्ति ॥
शुक्रे चन्द्रे गुरुमवल्ली लताकन्दौ बुधे तथा ।
पत्रं गुरौ फलं सूर्य्ये मूलञ्च रविजे कुजे ॥ * ॥
शुक्रे चन्द्रे भवेद्दौग्ध्यं बुधे स्वर्णसुदाहृतम् ।
गुरौ रजतयुतं हेम सूर्य्ये मौक्तिकमेव च ॥
भौमे ताम्रं शनौ लौहं राहावश्मोनि कीर्त्तयेत् ।
एतेषां धातुभेदञ्च वाराणामुदयक्रमात् ॥ * ॥
शुक्रे चन्द्रे जलाधारो देवतावसतिर्गुरौ ।
रवौ चतुष्पदस्थानमिष्टकानिलयो बुधे ॥
दग्धस्थानं कुजे प्रोक्तं शनौ राहौ च वाह्यभूः ।
अमीभिर्हिंसके स्थाने गर्भभूमिं विलोकयेत् ॥*॥
रवौ भौमे च भेरुण्डो मयूरो वायसः शनौ ।

पादायुधः शिखी शुक्रे काककुक्कौ गुरौ तथा ॥
कुक्कुटाविन्दुजौ क्रमोऽयं शुक्लसंज्ञयोः ।
यस्य वारस्य यः पक्षी तदादिं गणयेद्बुधः ॥
दिनपक्षौ कार्य्यरूपौ प्रश्नपक्षौ फलप्रदः ।
दिनेषु शुक्लपक्षे यत् क्षणे रात्रिषु तत्तथा ॥
क्षणे दिनेषु यद्यत्तत् शुक्ले रात्रिषु योजयेत् ।
बालः कुमारस्तरुणो वृद्धो मृत इति क्रमात् ॥
घटिका घट घर्केवं हि फलमेवासुदीरितम् ।
किञ्चिल्लाभकरो बालः कुमारस्त्वर्द्धलाभदः ॥
तरुणो राज्यदो वृद्धो हानिदो मृत्युदो मृतः ।
भोजनं गमनं राज्यं निद्रा मरणमेव च ॥
एकान्तरे भवेत् क्षणे शुक्ले स्यात् क्रमशो विदुः ।
पक्षिणां क्रमशो ज्ञात्वा फलं ब्रूयात् यथा तथा ॥
गणयेत् पञ्चपक्षादौ ज्ञानभूतगणादपि ॥"
शुक्लपक्षे ॥ * ॥ ततः क्षणपक्षे ।
"भोजनं मरणञ्चैव निद्रा राज्यं तथैव च ।
गमनं पञ्चपक्षाणां क्षणपक्षे क्रमो दिवा ॥ * ॥
राज्यं सुभिक्षमत्योभं नष्टलाभं सदा जयम् ।
रोगमृत्युं महालाभं पक्षिणां शुक्लिलक्षणम् ॥*॥
अनायासेन दृष्टिः स्याद्दृष्टधनसञ्चयः ।
मूलाभो रोगनाशश्च यात्रासिद्धौ रणे जयः ॥
दूरादागमनं योगः प्रयाणे पक्षिलक्षणम् ।
राज्योदये यदि प्रश्नो लाभार्थे स्वल्पलाभदः ॥
राजानां चिररोगः स्यात् याने हानिः क्षयो रणे ।
पुरग्रामप्रवेशश्च गमनं कलहं तथा ।
मनश्चञ्चलमारोग्यं गमनेषु विचारयेत् ॥ * ।
राज्यलाभो जयं सौख्यमत्योभं रोगनाशनम् ।
सुभिक्षं बहुदृष्टिञ्च पक्षिणां राज्यलक्षणम् ॥*॥
यात्राहानिरनादृष्टिः कार्य्यहानिरदर्शनम् ।
व्याधिश्च दीर्घरोगश्च पक्षिणां सन्निलक्षणम् ॥
अपमृत्युभयञ्चैव सर्व्वकार्य्यविनाशनम् ।
एतदेव फलं ब्रूयात् पक्षिणां मृत्युलक्षणम् ॥*॥
श्येने भोक्तरि काकस्तु पान्थो राजा भुजङ्गभुक् ।
स्वप्नावस्थां गतः कुक्षः परासुस्ताम्रशेखरः ॥ * ॥
काके भोक्तरि केकी तु पान्थः स्यात् पिङ्गलो नृपः ।
ताम्रचूडस्तथा स्वापी श्येनः कालवशं गतः ॥*॥
मयूरे भोक्तरि तथा कुक्षो याम्यावशं गतः ।
महीपः कुक्कुटः श्येनः स्वापी काको वशं गतः ॥
कुक्षे भोक्तरि पान्थस्तु कुक्कुटः श्येनको नृपः ।
काको निद्रावशं यातो मयूरो मरणं गतः ॥*॥
कुक्कुटे भोक्तरि श्येनः पान्थो राजा तु वायसः ।
शिखी निद्रावशं यातः पिङ्गलः कालमाप्नुयात् ॥"
इति क्षणपक्षस्य दिवाक्रमः शुक्लपक्षस्य रात्रिक्रमश्च ॥ स्वरोऽपि यथा । अनुमोदिते । उच्चोदितेन । ओमित्येवायुः । एवेव जुहो । एवमुक्तोऽसि ॥*॥
"श्येने भोक्तरि कुक्षः स्यात् पान्थः काको महीपतिः ।
ताम्रचूडो निद्रितश्च शिखी कालवशं गतः ॥ * ॥
मयूरे भोक्तरि श्येनः पान्थः कुक्षो महीपतिः ।
स्वप्नावस्थां गतः काकस्ताम्रचूडो मृतस्तथा ॥*॥
कुक्कुटे भोक्तरि शिखी सदा गमनमाप्नुयात् ।
श्येनो महीपतिः कुक्षः स्वापी काको मृतिं गतः ॥*॥

काके भोक्तरि याम्यायां ताम्रचूडः शिखी नृपः ।
निद्रायां रमते श्येनः कुक्षः कालवशं गतः ॥ * ॥
कुक्षे भोक्तरि याम्यायां वायसः कुक्कुटो नृपः ।
नीलकण्ठस्तथा स्वापी श्येनो मृत्युवशं गतः ॥"
इति शुक्लपक्षस्य दिवाक्रमः क्षणपक्षस्य रात्रिक्रमश्च ॥ * ॥ स्वरोऽपि यथा । अग्निपुरेभ्यो । गोकरिपुरे । एकोनरिपुः । उपेन्द्रो हरिः । विष्णुस्ते लोकः ॥ * ॥
"इत्युक्तं पक्षिणां कार्य्यं लाभालाभं शुभाशुभम् ।
येन विज्ञानमात्रेण त्रिकालज्ञो भवेन्नरः ॥
तावद्भ्रमन्ति शास्त्राणि शकुनानामनेकशः ।
यावन्न श्रूयते पक्षिशब्दकं शब्दरोदितम् ॥"
इति श्रीमहादेवविरचितं पञ्चपक्षिशाकुनं समाप्तम् ॥

पञ्चपर्णिका, स्त्री. (पञ्च पञ्च पर्णान्यस्याः । ततः कप् टापि अतः इत्वम् ।) गोरक्षीक्षुपः । इति राजनिर्घण्टः ॥

पञ्चपल्लवं, क्ली. (पञ्चानां पल्लवानां समाहारः ।) आम्रादिपञ्चपल्लवकम् । यथा,—
"आम्रजम्बूकपित्थानां बीजपूरकविल्वयोः ।
गन्धकर्म्मणि सर्व्वत्र पत्राणि पञ्चपल्लवम् ॥"
इति शब्दचन्द्रिका ॥
वैदिककर्म्मणि घटोपरिदेयपञ्चपल्लवं यथा,—
आम्राश्वत्थवटपर्कटीयशोडुम्बराणि । तान्त्रिक-कर्म्मणि पञ्चपल्लवं यथा,—
"धनसारं तथाश्वत्थं वटं वकुलमेव च ।
पञ्चपल्लवमुक्तञ्च सुनिभिस्तन्त्रवेदिभिः ॥"
इति तन्त्रसारः ॥

पञ्चपात्रं, क्ली. पञ्चानां पात्राणां समाहारः । इति पात्रकरणम् ॥ पञ्चपात्रकरणकपार्व्वणविधिकश्राद्धम् । तच्च अन्वष्टकाश्राद्धम् । अमावस्यान्तप्रेतपक्षान्तमाब्दसरिकं सपिण्डीकरणञ्च । इति लोकप्रसिद्धम् ॥

पञ्चपित्तं, क्ली, (पञ्चविधं पित्तम् ।) पित्तपञ्चकम् । यथा,—
"वराहच्छागमहिषमत्स्यमायूरपित्तकम् ।
पञ्चपित्तमिति ख्यातं सर्व्वेष्वेव हि कर्म्मसु ॥"
इति वैद्यकम् ॥

पञ्चप्रदीपः, पुं, (पञ्चसंख्यकाः प्रदीपा यत्र ।) पञ्चदीपयुक्तारात्रिकम् । यथा,—
"कुर्य्यात् सप्तप्रदीपेन शुक्लघण्टादिवाद्यकैः ।
हरेः पञ्चप्रदीपेन बहुभी भक्तितत्परः ॥"
इति पाद्मोत्तरखण्डे १०७ अध्यायः ॥

पञ्चप्रासादः, पुं, (प्रसीदन्ति मनांसि अत्र । प्र + सद + अधिकरणे घञ् । "उपसर्गस्य दीर्घत्वं क्विप्यचादौ क्वचिद्भवेत् ।" इति वचनात् दीर्घः । पञ्चचूडान्वितः प्रासादः । मध्यपदलोपिकर्म्मधारयः ।) देवगृहविशेषः । पञ्चरत्न इति ख्यातः । यथा,—
"पञ्चैकचित्तं रम्यं पञ्चप्रासादसंयुतम् ।
कारयित्वा हरेर्धाम धूतपापो व्रजेद्दिवम् ॥"
इत्यग्निपुराणम् ॥

पञ्चबन्धः, पुं, (पञ्चमः बन्धः भागो यत्र।) नष्टद्रव्यस्य पञ्चमांशदानम्। यथा,—
"आगमेनोपभोगेन नष्टं भाग्यमतोऽन्यथा।
पञ्चबन्धो दमस्तस्य राज्ञे तेनाविभाविते॥"
आगमेन रिक्थक्रयादिना। उपभोगेन च मदीयमिदं द्रव्यं तच्चैवं नष्टमपहृतं वेत्यपि। भाग्यं खाधनीयं तत् स्वामिना। अतोऽन्यथा तेन स्वामिना अविभाविते। पञ्चबन्धो नष्टद्रव्यस्य पञ्चमांशो दमो नाष्टिकेन राज्ञे देयः। इति मिताक्षरा॥

पञ्चभद्रः, पुं, (पञ्चसु अङ्गभेदेषु भद्रः शुभः पुष्टितत्वात्।) पञ्चस्थानेषु पुष्टितोऽश्वविशेषः। यथा,—
"पञ्चभद्रस्तु कृष्णपृष्ठसुखपार्श्वेषु पुष्टितः॥"
इति हेमचन्द्रः॥ पाचनविशेषः। यथा,—
"छिन्नोद्भवापर्पटवारिवाह-
भूनिम्बगुडूचीजनितः कषायः।
समीरपित्तज्वरजन्तुरागां
करोति भद्रं खलु पञ्चभद्रः॥"
इति शार्ङ्गधरः॥

पञ्चभूतं, क्ली, पञ्चानां भूतानां शिवप्रतेजोमरुद्व्योम्नां समाहारः। (क्वचित्तु संज्ञाप्रयुक्तत्वात् पञ्च च तानि भूतानि चेति कर्म्मधारयसमासमाहुरुत्र तु एकवचनमश्चिन्त्यमेवम्।)
अस्योत्पत्तिर्यथा।
"अभूत्तस्मादहङ्कारस्त्रिविधः सृष्टिभेदतः।
वैकारिकादहङ्कारात्तैजसा वैकारिका दश॥
दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः।
तैजसादिन्द्रियाण्यासंस्तन्मात्रा क्रमयोगतः।
भूतादिकादहङ्कारात् पञ्चभूतानि जज्ञिरे॥"
इति शारदायां प्रथमपटलः॥ * ॥
"तैजोऽहङ्कारभेदः स्यात् सत्त्वादिगुणयोगतः।
वैकारः सात्त्विको नाम तैजसो राजसः स्मृतः॥
भूतादिस्तामसस्तेषु पृथक्तन्मात्रवाचकान्।
वैकारिकाद्दिगादाश्च चन्द्रैकादश स्मृताः॥
इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिताः।
यच्चापरं मनस्तत्त्वं संकल्पविकल्पकम्॥
तैजसादेव तज्ज्ञातमिन्द्रियाणि तथा दश।
भूतादेः पञ्चतन्मात्राण्यासन् भूतमतः परम्॥"
इति राघवभट्टधृतम्॥ * ॥
"शब्दादेर्गगनस्पर्शतस्तेन वायु-
स्ताभ्यां रूपाद्विरेफैः रसाच्च।
अस्माद्गन्धेनान्वितो भूधरादा
भूताः पञ्च स्युर्गुणोना क्रमेण॥"
इति प्रपञ्चसारे प्रथमपटलः॥ * ॥
"आकाशाज्जायते वायुर्वायोरुत्पद्यते रविः।
रवेरुत्पद्यते तोयं तोयादुत्पद्यते मही॥"
(तथा च श्रुतिः।
"तस्माद्वा एतस्मादाकाशः सम्भूतः। आकाशाद्वायुः वायोरग्निरग्नेरापोऽद्भ्यः पृथ्वी समजायत॥"
एतच्छ्रुत्यवलम्बनेन मनुनाप्युक्तम्। १। २०। यथा,—

"आद्यादाद्यस्य गुणत्वमेषामवाप्नोति परःपरः।
यो यो यावतिथश्चेषां स स तावद्गुणः स्मृतः॥"
अत्र कुल्लूकभट्टः।
"आद्याद्यस्याकाशादेर्गुणं शब्दादिकं वायुादिः परः परः प्राप्नोति। एतदेव स्पष्टयति यो यः इति येषां मध्ये यो यो यावतां पूरणो यावतिथः वतेरिथुक् स स द्वितीयादिः द्वितीयो द्विगुणः तृतीयस्त्रिगुणः इत्येवमादिर्मन्वादिभिः स्मृतः। एतेनैतदुक्तं भवति। आकाशस्य शब्दो गुणः वायोः शब्दस्पर्शौ तेजसः शब्दस्पर्शरूपाणि अपां शब्दस्पर्शरूपरसाः भूमेः शब्दस्पर्शरूपरसगन्धा इति॥)
तस्य लयप्रकारो यथा,—
"मही संलीयते तोये तोयं संलीयते रवौ।
रविः संलीयते वायौ वायुर्नभसि लीयते।
पञ्चतत्त्वात्मके देवि सृष्टिस्तत्त्वे तत्त्वं विलीयते॥"
इति ब्रह्मज्ञानसन्तरङ्गे॥ * ॥
तद्भूतवास्त्वादि यथा,—
"अस्थिमांसनखान्येव नाड्यो त्वक् चेति पञ्चमः।
पृथ्वीपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
मलं मूत्रं तथा शुक्रं श्लेष्मा शोणितमेव च।
तोयपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
क्षुधा तृष्णा तथालस्यं निद्रा चैव प्रकाशकः।
तेजःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
धारणं चालनं क्षेपः सङ्कोचः प्रसरस्तथा।
वायुपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥
कामक्रोधस्तथा लोभस्तथा मोहश्च पञ्चमः।
नभःपञ्चगुणाः प्रोक्ता ब्रह्मज्ञानेन भाषितम्॥"
इति ब्रह्मज्ञानतन्त्रे प्रथमपटलः॥ * ॥
पञ्चभूतनक्षत्राणि यथा,—
"धनिष्ठा रेवती ज्येष्ठानुराधा श्रवणा तथा।
अभिजिच्चोत्तराषाढा पृथ्वीतत्त्वमुदाहृतम्॥
पूर्व्वाषाढा तथाश्लेषा मूलार्द्रा चैव रोहिणी।
उत्तरभाद्रपदा तोयं आपस्तत्त्वमितीरितम्॥
भरणी कृत्तिका पुष्या मघा पूर्व्वा च फल्गुनी।
पूर्व्वभाद्रपदा स्वाती तेजस्तत्त्वमिति प्रिये॥
विशाखोत्तरफल्गुन्यौ हस्ता चित्रा पुनर्व्वसुः।
अश्विनी मृगशीर्षा च वायुस्तत्त्वमुदाहृतम्॥"
इति रुद्रयामलोदयः॥

पञ्चमं, क्ली, मैथुनम्। यथा,—
"भगलिङ्गस्य योगेन मैथुनं यद्वदेत् प्रिये।
तस्य नाम भवेद्देवि पञ्चमं परिकीर्त्तितम्॥"
इति समयाचारतन्त्रे द्वितीयपटलः॥

पञ्चमः, त्रि, पञ्चानां पूरणः। (पूरणे डट् ततः मान्तादिति मट्।) पाँच इत्यादि भाषा। इति मेदिनी॥ (यथा, मनुः। ८। १२५।
"उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम्। चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च॥")
रुचिरः। दक्षः। इति हेमचन्द्रः॥

पञ्चमः, पुं, पञ्चानां स्वराणां पूरणः। तन्त्रोक्तोत्थितस्वरविशेषः। इत्यमरः॥ स तु षड्जादिसप्तस्वराणां पञ्चमः स्वरः। तस्योत्पत्तिर्यथा,—
"वायुः सञ्चरतो नाभेरुरोहृत्कण्ठमूर्द्धसु।
विचरन् पञ्चमस्थानप्राप्तो पञ्चम उच्यते॥"
इति तट्टीकायां भरतः॥ अपि च।
"प्राणोऽपानः समानश्च उदानो व्यान एव च।
एतेषां समवायेन जायते पञ्चमः स्वरः॥"
इति सङ्गीतदामोदरः॥ अस्य जातिः औडवः। पञ्चस्वरमिलित इति यावत्। अस्य कूटतानाः विंशत्यधिकशतम् १२०। प्रत्येकताने चत्वारिंशत् ४०। समुदायेन चतुःसहस्राष्टशतानि ४८००। तानाः भवन्ति। अस्योच्चारणजातिः पिकः। उच्चारणस्थानं उरः गलः शिरश्च। आकारणमते अधरः। अयं विप्रवर्णः। इति शुद्धतानविवेकलक्षणम्॥ अस्य रूपं इन्द्ररूपतुल्यम्। वर्णः श्यामः। स्थानं क्रौञ्चद्वीपम्। देवता महादेवः। वारो बृहस्पतेः। समयः चतुर्व्विंशत्पलाधिकाद्वौ घटिकाः। श्रुतयश्चत्वारः। क्षितिः रक्ता सन्दीपनी आलापिनी च। मूर्च्छनाश्चित्रः यमली निर्म्मली कोमली च। इति नारदपुराणम्॥ * ॥ रागभेदः। इति मेदिनी॥ अयं कल्लिनाथमते सोमेश्वरमते च षड्रागाणां मध्ये तृतीयरागः। सोमेश्वरमते अस्य गानसमयः ग्रीष्मर्तुः प्रातःकालश्च। कल्लिनाथमते अस्य रागिण्यः षट्। यथा, त्रिवेणी १ तुम्बतीर्था २ आभीरी ३ कुकुभ ४ वराटी ५ सावीरी ६। सोमेश्वरमते तु विभासा १ भूपाली २ कामोदी ३ वङ्गहंसिका ४ मालश्री: ५ पटमञ्जरी ६। अस्मिन्नागे गान्धारस्वरस्तीव्रः। ऋषभपञ्चमौ स्वरौ लघू। षड्जस्वरः ग्रहांशन्यासाः। स च कनकमते भरतमते च भैरवरागस्याष्टमपुत्रः। इति सङ्गीतशास्त्रम्॥

पञ्चमकारं, क्ली, (पञ्चसंख्यकं मकारं तत्त्वं यत्र। मद्यं मांसमित्यादिषु आदौ मकारस्थितेरुक्तथात्वम्।) मकारपञ्चकम्। पञ्चतत्त्वम्। तच्च सुरामैथुनमद्यमांसमत्स्यरूपम्। यथा,—
"मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च।
पञ्चतत्त्वमिदं देवि! निर्व्वाणमुक्तिहेतवे।
मकारपञ्चकं देवि! देवानामपि दुर्लभम्॥"
इति गुप्तसाधनतन्त्रे ७ पटलः॥ * ॥
"मद्यैर्मांसैस्तथा मत्स्यैर्मुद्राभिर्मैथुनैरपि।
स्त्रीभिः सार्द्धं महासाधुरर्चयेद्जगदम्बिकाम्॥
अन्यथा च महानिन्दा गीयते पण्डितैः सुरैः।
कायेन मनसा वाचा तस्मात्तत्त्वपरो भवेत्॥"
इति कामाख्यातन्त्रे ५ पटलः॥ * ॥
"या सुरा सर्व्वकार्य्येषु कथिता भुवि सुखिदा।
तस्या नाम भवेद्देवि! तोयं पानं सुदुर्लभम्॥
शूद्राद्या भक्ष्ययोग्यानां यन्मांसं देवनिर्म्मितम्।
वेदमन्त्रेण विधिवत् प्रोक्षा सा शुद्धिरुत्तमा॥
भक्ष्ययोग्याश्च कथिता ये ये मत्स्या वरानने!।
ते रहस्ये मया प्रोक्ता मीनाः सिद्धिप्रदायकाः॥

पृथुकाक्षतकुला भक्ष्या गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! सुप्रा सुक्तिप्रदायिनी ॥
भगलिङ्गस्य योगेन मैथुनं यद्भवेत् प्रिये ! ।
तस्य नाम भवेद्देवि ! पञ्चमं परिकीर्त्तितम् ॥
प्रथमन्तु भवेन्मद्यं मांसञ्चैव द्वितीयकम् ।
मत्स्यश्चैव तृतीयं स्यान्मुद्रा चैव चतुर्थिका ॥
पञ्चमं पञ्चमं विद्यात् पञ्च ते नामतः स्मृताः ॥"

इति समयाचारतन्त्रे २ पटलः ॥ * ॥

अथ मत्स्यादिशुत्पत्तिः ।

"मायामलादिग्रसनान्मोक्षमार्गनिरूपणात् ।
अष्टदुःखादिविरहान्मत्स्येति परिकीर्त्तितः ॥
भाङ्गल्लाजननाद्देवि ! सच्चिदानन्दरूपतः ।
सर्व्वदेवप्रियत्वाच्च मांस इत्यभिधीयते ॥
पञ्चमं देवि ! सर्व्वेषु मम प्राणप्रियं भवेत् ।
पञ्चमेन विना देवि ! चण्डीमन्त्रं कथं जपेत् ॥
यदि पञ्चमकारेषु ग्लानिश्चेन्न कुरुते प्रिये ! ।
तस्य सिद्धिः कथं देवि ! चण्डीमन्त्रं कथं जपेत् ॥
आनन्दं परमं ब्रह्म मकारास्तस्य वाचकाः ॥"

इति कुलार्णवतन्त्रे पञ्चमपटले १७ उल्लासः ॥*॥

नैषां शोधनादिकं वाहुल्यभिया लोकमोह-भयाच्च नोक्तम् ॥

पञ्चमहायज्ञाः, पुं, (पञ्चविधा महायज्ञाः ।) गृहस्थकर्त्तव्यपञ्चप्रकारनित्यकर्म्माणि । यथा,—
"पाठो होमस्त्रातिथीनां सपर्य्या तर्पणं बलिः ।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः ॥"

इत्यमरः । २ । ७ । १४ ॥

(तथा च मनुः । ३ । ६८-७० ।
"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महात्मभिः ।
पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥")

पञ्चमारः, पुं, (पञ्चसु इन्द्रियेषु मियते आसक्तो भवतीति । पञ्च + मृ + कर्त्तरि घञ् ।) बलदेवपुत्रः । इति शब्दमाला ॥

पञ्चमास्यः, पुं, (पञ्चमो रागः स्वरो वा आस्ये यस्य । "कोकिलो पञ्चमं वदेत् ।" इत्युक्तेरस्य तथात्वम् ।) कोकिलः । इति शब्दरत्नावली ॥

पञ्चमी, स्त्री, (पञ्चानां पाण्डवानां इयम् । अथवा पञ्च पशून् मिनोति सेवायां क्षिपादिभिर्बध्नाति या । पञ्च + मी + क्विप् । मीधातुरत्र बन्धार्थः ।) पाण्डवपत्नी । द्रौपदी । इति मेदिनी ॥ (पञ्चानां पूरणी तिथिः तत्र भवः । पञ्चन् + डट् ततो ङीप् ।) शारिवाशाखा । पाशार इति भाषा । इति भूरिप्रयोगः ॥ * ॥ तिथिविशेषः । सा च शुक्लस्य पञ्चमकलाक्रियारूपा तदुपलक्षितकालश्च । पञ्जिकाकारसङ्केतेन शुक्लपक्षे ५ कृष्णपक्षे २० एतदङ्कबोधिता ॥ * ॥ अथ पञ्चमीव्रतकथा ।
सा च चतुर्थीयुता ग्राह्या युग्मात् ।
"पञ्चमी च प्रकर्त्तव्या चतुर्थीसहिता विभो ! ॥"

इति स्कन्दपुराणाच्च ॥ * ॥

अथ नागपञ्चमी । यथा,—देवीपुराणे ।
"सुप्ते जनार्द्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्नागसाद्देवीं कुक्षीवीटपसंस्थिताम् ॥
पद्मनाभे गते ग्राह्यां देवैः सर्व्वैरनन्तरम् ।
पञ्चम्यामसिते पक्षे वसुस्तिष्ठति पन्नगी ॥"
देवैरिति सहार्थे तृतीया । तथा,—
"देवीं संपूज्य नत्वा च न सर्पभयमाप्नुयात् ।
पञ्चम्याम्पूजयेन्नागानगन्धान्नाकुलैरगान् ।
क्षीरं सर्पिश्च नैवेद्यं देयं सर्व्वविषापहम् ॥"
एवं गारुडे तथैव नागानाह ।
"अनन्तं वासुकिं पद्मं महापद्मं तथैव च ।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च तक्षकम् ॥
कालीयं तक्षकञ्चैव पिङ्गलं मासि मासि च ।
यजेत्तानसिते नागान् दृष्टमुक्तो दिवं व्रजेत् ॥"

पुराणान्तरेऽपि ।

"अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलिकः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥"

पुराणान्तरेऽपि ।

"शेषः पद्मो महापद्मः कुलीरः शङ्खपालकः ।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ।
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥"
अत्र च ।
"योऽसौ ज्ञानस्वरूपेण ब्रह्माण्डं सचराचरम् ।
पुष्पवद्धारयेन्मूर्द्धि तस्मै नित्यं नमो नमः ॥"
इत्यनेन ओंकारपूर्व्वेण मत्स्यपुराणोक्तेनानन्तं पूजयेत् । रत्नाकरे ।
"पिष्टमर्द्दस्य पञ्चानि स्थापयेद्भवनोदरे ।
स्वयञ्चापि तदश्नीयाद्ब्राह्मणांश्चैव भोजयेत् ॥"*॥
अथ श्रीपञ्चमी । भविष्योत्तरे । माघशुक्लपञ्चमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी प्रपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"

सम्वत्सरप्रदीपे ।

"पञ्चम्यां पूजयेल्लक्ष्मीं पुष्पधूपान्नवारिभिः ।
मस्याधारं लेखनीञ्च पूजयेन्न लिखेत्ततः ॥
माघे मासि सिते पक्षे पञ्चमी या श्रियः प्रिया ।
तस्याः पूर्व्वाह्ण एवेह कार्य्यः सारस्वतोत्सवः ॥"
इत्युपादानात् श्रियः स्वरसत्वाः । तथा च व्यासः ।
"लक्ष्मीसरस्वतीधीवित्सर्गसम्पद्विभूतिशोभासु ।
उपकरणवेषारचनाविधासु च श्रीरिति प्रथिता ॥"
ध्यानं यथा,—
"तरुणशुकलमिन्दोर्बिभ्रती शुभ्रकान्तिः
कुचभरनमिताङ्गी सन्निषण्णा सिताब्जे ।
निजकरकमलोद्यल्लेखनीपुस्तकश्रीः
सकलविभवसिद्ध्यै पातु वागदेवता नः ॥"
इति नारदोक्तं ध्यायेत् । पाद्यादिभिः पूजयित्वा ।
"भद्रकाल्यै नमो नित्यं सरस्वत्यै नमो नमः ।
वेदवेदाङ्गवेदाङ्गविद्यास्थानेभ्य एव च ॥"
स्वाहेति ब्रह्मपुराणोक्तेन मन्त्रः पूजयेत् । मत्स्यसूक्ते । वन्यजीवञ्च होमञ्च सरस्वत्यै न दापयेत् ।
सरस्वतीं संपूज्य,—

"यथा न देवो भगवान् ब्रह्मा लोकपितामहः ।
त्वां परित्यज्य सन्तिष्ठेत्तथा भव वरप्रदा ॥
वेदाः शास्त्राणि सर्व्वाणि कृत्यगीतादिकञ्च यत् ।
न विद्येयं त्वया देवि ! तथा मे सन्तु सिद्धयः ॥
लक्ष्मीर्मेधा धरा पुष्टिर्गौरी तुष्टिः प्रभा धृतिः ।
एताभिः पाहि तनुभिरष्टाभिर्मां सरस्वति ! ॥"

इति मत्स्यपुराणीये प्रार्थयेत् ॥ * ॥

अथ पञ्चमीव्रतम् ।

तच्च शुक्लकाले माघशुक्लपञ्चम्यामारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां कार्य्यम् । यथा,—
"क्षीरोदे च पुरा सुप्तं लक्ष्मीसमन्वितं हरिम् ।
प्रणम्य परिपप्रच्छ नारदो मुनिसत्तमः ॥

नारद उवाच ।

केनोपायेन देवेश ! नारीणाञ्च सुखं भवेत् ।
सौभाग्यमतुलं याति तन्मे त्वं वक्तुमर्हसि ॥

श्रुत्वा तद्वचनं देवो नारदस्य महात्मनः ।
संप्रेक्ष्य कमलां सद्यो ब्रूहि देवि शुभानने ! ॥
इङ्गितं पत्युरालोक्य पद्मपत्राक्षवल्लभा ।
वल्लभं तं पुरस्कृत्य प्रीत्या व्रतमुवाच ह ॥

देव्युवाच ।

अस्ति श्रीपञ्चमीनाम व्रतं परमदुर्लभम् ।
यत् कृत्वा प्राप्यते लोकैः सुखं सौभाग्यमुत्तमम् ॥
तत्र मां पूजयेद्भक्त्या माधवञ्च प्रयत्नतः ।
गन्धैः पुष्पैश्च वस्त्रैश्च धूपैर्नानाविधैः फलैः ॥
श्रद्धया पूजयेद्भक्त्या माघादौ पञ्चमीदिने ।
इमां ब्रह्मपुराणोक्तां या करोति च पञ्चमीम् ॥
लक्ष्मीसमा भवेन्नारी इह लोके परत्र च ।
विधानं शृणु धर्म्मज्ञ ! यादृग्यौ पञ्चमी मम ॥
वर्षाणि षट् प्रकर्त्तव्या परमप्रीतिमानसा ।
शुक्लकाले तु संप्राप्ते पञ्चमी या शुभा भवेत् ॥
तस्यामारभ्य कर्त्तव्यं व्रतं पापप्रणाशनम् ।
स्वयं यतात्मा भूत्वा च आरभेद्व्रतमुत्तमम् ॥
आद्यद्वयमलवर्णेन हविष्येण हृयं तथा ।
फलैकेनैव कर्त्तव्यमुपवासैः प्रतिष्ठयेत् ॥
प्रतिष्ठाया विधिरयं काञ्चनस्य श्रियं हरिम् ।
ब्राह्मणञ्च सपत्नीकं पूर्व्वेद्युरधिवासयेत् ॥
पञ्चम्याग्त्विजं विप्रमाचार्य्यञ्च द्विजोत्तमम् ।
पूजा च विविधा कार्य्या मूलमन्त्रेण भक्तितः ॥
होमश्च तिललाजानां घृतं कुर्य्यात् पृथक् पृथक् ।
नैवेद्यं विविधं कुर्य्यात् लड्डुकं पूपमुत्तमम् ॥
आसनं पाद्यमर्घ्यञ्च तथाचाचमनीयकम् ।
वासो यज्ञोपवीतञ्च गन्धपुष्पफलं तथा ॥
क्षुद्रं धूपः प्रदीपश्च ताम्बूलं फलमेव च ।
गौः शय्या कमलञ्चैव हिरण्यं रजतं तथा ॥
ब्राह्मणेभ्यः प्रदेयानि दक्षिणासंयुतानि च ।
यथोक्तेन विधानेन या कुर्य्यात् पञ्चमीव्रतम् ॥
आसप्तकुलमुद्धृत्य विष्णुलोकमवाप्नुयात् ।
गुरोरिव गुरुत्वस्य रतेरिव मदनस्य च ॥
शूद्रस्य यथा गौरी तथा भवति सा शुभा ।
मासि मासि सिते पक्षे पञ्चमी या प्रकीर्त्तिता ॥
तस्यां पूज्या सदा देवी भक्तितः कमलोद्भवा ।
लक्ष्मीसमा भवेन्नारी षट्पञ्चमीव्रतेन वै ॥

श्रीपञ्चमीव्रतं रम्यं या करोति पतिव्रता ।
तस्याहं स्थिरतां यामि यथा नारायणे स्थिरा ॥
मत्प्रसादाच्च भुक्त्वेह ! सर्व्वसौभाग्यमाप्नुयात् ॥"
इति ब्रह्मपुराणोक्तषट्पञ्चमीव्रतकथा समाप्ता ॥

अथ पञ्चमीजातफलं यथा ।

"भूपालमान्यो मनुजः सुगात्रः
क्षपासमेतो विदुषां वरेण्यः ।
वाग्मी गुणी बन्धुजनैकमान्यः
प्रसूतिकाले यदि पञ्चमी स्यात् ॥"
इति कोष्ठीप्रदीपः ॥

विद्याविशेषः । सद्विवरणं यथा,—
"कामं विष्णुयुतं देवि ! शक्तिमायेन्द्रमेव च ।
महामायां ततः पश्चात् वाग्भवं बीजमुद्धरेत् ॥"
विष्णुयुतं अकारयुक्तमित्यर्थः । शक्तिरेकारः ।
माया ईकारः ।
"वियच्चन्द्रस्ततः पश्चात् कलौ नक्तुलिरेव च ।
मायास्वरेण संयुक्तं नादबिन्दुकलान्वितम् ॥
प्रथमं कामराजस्य बीजं परमदुर्लभम् ।
वियद्विष्णुयुतं कामो हंसः शक्रस्ततः परम् ॥
महामाया ततः पश्चात् स्वप्नावतीति कथ्यते ॥"
हंसो हकारः । एतद्वितीयं कामकूटम् ॥ * ॥
"मादनं शिवबीजञ्च वायुबीजं ततः परम् ।
इन्द्रबीजं ततः पश्चात् महामायां समुद्धरेत् ॥"
इति तृतीयम् । इयं मधुमती ॥ * ॥
"शिवबीजं तथा कामं इन्द्रं देवीं नियोजयेत् ।
महामायां ततः पश्चात् शक्तिकूटं समुद्धरेत् ॥"
देवीं सकारम् ।
"वाग्भवं प्रथमं कूटं शक्तिकूटन्तु पञ्चमम् ।
मध्यकूटत्रयं देवि ! कामराजं मनोहरम् ।
कथिता पञ्चमी विद्या त्रैलोक्यसुभगोदया ॥"*॥

ईश्वर उवाच ।

"शृणु देवि ! महाभागे शक्तिकूटं सुदुर्लभम् ।
वाग्भवं प्रथमं कूटं कामराजं त्रिकूटकम् ॥
शक्तिकूटं प्रवक्ष्यामि तव स्नेहात् विशेषतः ।
जीवप्राणौ महादेवि ! मादनं सदनन्तरम् ॥
इन्द्रबीजं ततः पश्चात् भुवनेशी तु पञ्चमम् ॥"
जीवः सकारः । प्राणो हकारः । इति वा शक्तिकूटम् ॥ * ॥
"अथवा देवदेवेशि ! सौभाग्यायाश्च वाग्भवम् ।
कूटत्रयं कामराजं शक्तिबीजञ्च पूर्ब्ववत् ।
एषा शक्ता महादेवि ! पञ्चमी परमेश्वरी ॥"
अस्या वाग्भवं कूटं हित्वा सौभाग्यायाः प्रथमकूटं वाग्भवं कूटमित्यर्थः । कामराजकूटत्रयं पञ्चम्या एव ।
"वामनेत्रादिकूटं वा भगादिकूटमेव वा ।
अरिष्टा सिद्धिदा विद्या सर्व्वदोषविवर्ज्जिता ॥"
भग एकारः । एतेनाष्टधा पञ्चमी वाग्भवशक्तिकूटभेदेन ॥ * ॥ यामले ।
"द्विविधा पञ्चमी विद्या पञ्चपञ्चाक्षरी परा ।
मध्ये षडक्षरी चैव शक्तिश्च चतुरक्षरी ॥"
षडिति कामराजविद्याया मध्यकूटमित्यर्थः । शक्तिरिति कामराजस्य शक्तिकूटमित्यर्थः ।
एषा चतुर्व्वा वाग्भवकूटभेदात् । एतयोः कामराजस्य तृतीयकूटन्तु तत्रैव ॥ * ॥
"कामबीजं महेशानि ! शिवबीजं ततः परम् ।
तदधो हंसबीजन्तु इन्द्रबीजं विचिन्तयेत् ॥
महामायां ततः पश्चात् कूटं परमदुर्लभम् ॥"
एषा पूर्ब्ववदुक्ता । अन्या चतुर्व्वा ॥ * ॥
तथा तत्त्वबोधे ।
"कामाकाशपरा शक्र संस्थानक्षतरूपिणी ॥"
परा सकारः । संस्थानक्षतरूपिणी महामाया ॥*॥

तथा च तन्त्रे ।

"कामबीजं महेशानि ! शम्भुबीजं ततः परम् ।
तदधश्चन्द्रबीजन्तु पृथ्वीबीजं ततो लिखेत् ।
तदन्ते च महामाया कूटं परमदुर्लभम् ॥"
एषा पूर्ब्ववदुक्ता । अन्या चतुर्व्वा । तेन षट्चिंशदक्षरूपिणी पञ्चमी ॥ * ॥ हंसमाहेश्वरे ।
"वामकेश्वरविद्यायाः कूटं वाग्भवसुत्तमम् ।
एकारादि वाग्भवन्तु कूटं वाग्भवसुत्तमम् ॥
एकारादि वाग्भवन्तु सौभाग्यायाश्च वाग्भवम् ।
एषा च पञ्चमी विद्या त्रैलोक्यवशकारिणी ॥"*॥

श्रीक्रमे ।

"एतासां चैव विद्यानां प्राणं शृणु वरानने ! ।
रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ॥
शक्त्यन्ते तु महादेवि ! हंसं मायां रमां तथा ।
अभिधुंक्तेन देवेशि ! विद्याजपनमाचरेत् ॥"
जपञ्च सप्तवारमेव दीपन्यां तथा दर्शनात् ।
एतासां पूर्ब्वोक्तश्रीक्रमोक्तविद्यानाम् ॥ * ॥

पञ्चम्यास्तु विशेषो यथा ।

"रमां मायां हंसबीजं वाग्भवाद्ये नियोजयेत् ।
शक्त्यन्ते तु महेशानि ! हंसं मायां रमां तथा ॥
कामराजत्रये देवि ! ककारं शक्तसंयुतम् ।
मायाबिन्दीश्वरयुतं सूर्य्यकोटिसमप्रभम् ॥
प्रथमं कामकूटस्य चाद्ये नियोजयेदिदम् ॥
वाग्भवं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
नादबिन्दुसमायुक्तं श्रियो बीजमुदाहृतम् ।
द्वितीयं कामबीजन्तु जपेद्वक्त्रे च सुन्दरि ! ॥
गगनं वह्निसंयुक्तं वामनेत्रविभूषितम् ।
नादबिन्दुसमायुक्तं मायाबीजं प्रकीर्त्तितम् ॥
मधुमतीं जपेच्चापि सर्व्वकामफलप्रदाम् ॥"
इति तन्त्रसारः ॥ * ॥ * ॥ रागिणीविशेषः । सा च वसन्तरागस्य प्रिया । यथा,—
"वसन्ती पञ्चमी दौली बहारी रूपमञ्जरी ।
रागिण्य ऋतुराजस्य वसन्तस्य प्रिया इमाः ॥"

अस्या ध्यानं यथा,—

"सङ्गीतगोष्ठीषु गरिष्ठभावं
समाश्रिता गायनसम्प्रदायैः ।
खर्व्वाङ्गिणी नूपुरपादपद्मा
सा पञ्चमी पञ्चमवेदवेत्री ॥"

इति सङ्गीतदर्पणः ॥

(नदीविशेषः । यथा, महाभारते ।६।८।२६।
"वरां वीरकरां चापि पञ्चमीञ्च महानदीम् ॥")

पञ्चमीव्रतं, क्ली, (पञ्चम्यां माघशुक्लपञ्चमीमारभ्य षड्वर्षं यावत् प्रतिमासीयशुक्लपञ्चम्यां स्त्रिया कर्त्तव्यं व्रतम् नियमविशेषः ।) माघशुक्लपञ्चमीमारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां स्त्रीकर्त्तव्यनियमविशेषः । तत्प्रयोगो यथा, तत्रादौ कृतनित्यक्रिया यजमाना कृताचमनस्वस्तिवाचनपूर्ब्वकं सङ्कल्पं कुर्य्यात् । विष्णुर्नमोऽद्य माघे मासि शुक्ले पक्षे पञ्चम्यां तिथौ अमुकगोत्रा श्रीअमुकी पुत्रपौत्राद्यनवच्छिन्नसन्ततिसद्धैश्वर्य्यसौभाग्यारोग्यसौन्दर्य्यावैधव्यप्राप्तिपूर्ब्वकविष्णुलोकप्राप्तिकामा अद्यारभ्य षड्वर्षपर्य्यन्तं प्रतिमासीयशुक्लपञ्चम्यां गणपत्यादिनानादेवतासलक्ष्मीकवासुदेवपूजापूर्ब्वकभविष्यपुराणोक्तकथाश्रवणरूपषट्पञ्चमीव्रतमहं करिष्ये । इति सङ्कल्प्य लक्षं पाठयेत् । ततः सामान्यार्घ्यादि आसनशुद्धिभूतशुद्धिमातृकान्यासकराङ्गन्यासान् कृत्वा गणेशादीन् संपूज्य लक्ष्मीं नारायणञ्च यथाशक्ति पूजयेत् । ततो भोज्योत्सर्गं कृत्वा प्रणमेत् ॥ * ॥

अथ कथा ।

"श्रीधर्म्मव्यासमासीनं लक्ष्मीधृतपदाम्बुजम् ।
योगनिद्रान्वितं कृष्णं नारदः परिपृच्छति ॥
केनोपायेन भगवन्नारी दुःखं न विन्दति ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रादिकं लभेत् ॥
इत्युक्तो माधवस्तत्रे लक्ष्मीसुखनिरीक्षणम् ।
इङ्गिताकारतत्त्वज्ञा पद्मा पद्मालयवल्लभा ।
वल्लभाङ्गं पुरस्कृत्य प्रीता वचनमब्रवीत् ॥

श्रीरुवाच ।

षट्पञ्चमीव्रतं सम्यक् श्रयतां पापनाशनम् ।
सौभाग्यारोग्यसौन्दर्य्यपुत्रपौत्रधनप्रदम् ॥
माघे मासि सिते पक्षे पञ्चमी या शुभा भवेत् ।
तस्यामारभ्य कर्त्तव्यं षड्वर्षं व्रतसुत्तमम् ॥
प्रतिमासि च पञ्चम्यां लक्ष्मीं संपूज्य कंनरम् ।
पूजयेद्गन्धपुष्पाद्यैर्नैवेद्यैश्च पृथग्विधैः ॥
कुर्य्याद्धोमञ्च विधिवत् गणेशस्य ग्रहस्य च ।
विष्णोर्लक्ष्म्याश्च वाग्देव्या दुर्गायाः विभवक्रमात् ॥
अन्येषाञ्च यथाशक्ति तिलाज्यव्रीहियवैः ।
ततोऽग्नेयादलवणमाशी संवत्सरद्वयम् ॥
तृतीये च चतुर्थे च हविष्यान्नञ्च भोजयेत् ।
पञ्चमे फलमश्नीयात् षष्ठे कुर्य्यादुपोषणम् ॥
षष्ठे प्रतिष्ठा कर्त्तव्या भोजयेद्वादश द्विजान् ॥
तत्र षोड़शदानानि क्षीमछत्रोपानहौ शुभे ।
दक्षिणासहितां दत्त्वादाचार्य्याय मुनीश्वर ! ॥
ततः पञ्चवर्णकं दद्यात् सर्व्वालङ्कारभूषितम् ।
काञ्चनप्रतिमायुक्तलक्ष्मीनारायणान्वितम् ॥
विधिनानेन या कुर्य्यात् पञ्चमीव्रतसुत्तमम् ।
स्वर्गान्ते तु समुत्पत्य विष्णुलोकमवाप्नुयात् ॥
एतत्ते कथितं विप्र ! मर्त्यलोके प्रकाशितम् ।
शोकसन्तापहानिश्च दुर्भाग्यदुःखं न जायते ॥
धर्म्मो यशस्यमायुष्यमैश्वर्य्यञ्चापि वर्द्धयेत् ।
यान्तु कुर्व्वन्ति भूलोके तासां सर्व्वं सुखावहम् ॥

श्रीरुवाच ।

शृणु सत्यं मुनिश्रेष्ठ ! दैवा यत् कथितं मयि ।
तदनुष्ठानसर्व्वन्तु प्रतिष्ठाञ्च द्विजोत्तम ! ॥
या करोति व्रतं साध्वी सर्व्वकामफलं लभेत् ।

तस्या: श्रीर्निश्चला गेहे सत्यं सत्यं हि नारद! ॥
यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा ।
भृङ्गरस्य यथा गौरी सापि भर्तुर्भवेत्तथा ॥
या पञ्चमीव्रतं कुर्य्यात् सा भवेच्च पतिव्रता ।
यथोक्तविधिना या तु कुर्य्यात व्रतमुत्तमम् ॥
पुत्रपौत्रधनैश्वर्य्यं पञ्चमीकरणादपि ।
एतत्ते कथितं सर्व्वं तत्त्वं कमललोचन ! ॥

नारद उवाच ।

केनापि कथितं पूर्व्वं श्रुतं केनापि वा पुन: ।
प्राप्तं कुत्र त्वया देवि ! श्रोतुमिच्छामि तद्वद ॥

श्रीरुवाच ।

माघे मासि सिते पक्षे पञ्चम्यां मघासुते ! ।
निशावसानसमये चन्द्रभागां महानदीम् ॥
हंससङ्घै: समाकीर्णां नलिनीपुलिनोज्ज्वलाम् ।
तत्र गौरी श्रुची मेधा सावित्री चोर्व्वशी परा ॥
नारायणं समाराध्य कुर्व्वन्ति व्रतमुत्तमम् ।
काव्यव्रतमिदं पद्मे ! लभते फलमुत्तमम् ॥
हर्षवतीञ्च तां वीक्ष्य प्रोवाच कमलालया ।
पुण्यञ्च देहि मे धूपं दीपं नैवेद्यमुत्तमम् ॥
मया तव प्रसादेन क्रियते व्रतमुत्तमम् ।
सतत्तासां फलै: पुष्पैर्नैवेद्यैश्च वनं श्रुतम् ॥
सतत्तासां प्रसादेन तवभाग्यं जगद्धन ! ।
त्वयि देव जगन्नाथ ! नरनारीगणेन च ॥
भक्ता मया ते कथितं मर्त्यलोके प्रकाशितम् ।
या करोति व्रतं स्त्रीयत् यथाविधिविधानत: ॥
इह लोके सुखं भुक्ता नारायणपुरं व्रजेत् ।
श्रुत्वा व्रतस्य माहात्म्यं व्रतमेतत चरन्ति या: ॥
न किञ्चिदुच्यते लोके तासां सत्यं वदाम्यहम् ।
हरन्ति तासां पापानि याश्च श्रुण्वन्त्यहर्निशम् ॥
नारायणं नमस्कृत्य प्रपूज्य च विसर्ज्जयेत् ॥"

इति भविष्यपुराणोक्ता षट्पञ्चमीव्रतकथा समाप्ता ॥

पञ्चसुख:, पुं (पञ्च विस्तृतं सुखं यस्य स:।) शिव:। इति राजनिर्घण्टः ॥ (पञ्च सुखानि यस्य स:।) शिव:। इति हेमचन्द्र: ॥ तस्य नामवर्णादि यथा, देवीपुराणे ।
"शिवस्तत्र स्थित: साक्षात् सर्व्वपापहर: शुभ: ।
स तु पञ्चसुख: ख्यातो लोके सर्व्वार्थसाधक: ।
पञ्चब्रह्मात्मको यस्मात्तेन पञ्चसुख: स्मृत: ॥
पश्चिमे तु सुखे सद्यो वामदेवस्तथोत्तरे ।
पूर्व्वे तत्पुरुषं विद्याद्घोरमप्यपि दक्षिणे ॥
ईशान: पञ्चमो मध्ये सर्व्ववर्णसमन्वित: ।
एते पञ्च सुखा वत्स ! पापघ्ना यज्ञनाशना: ॥
सद्योजातं भवेच्छुक्लं वामदेवन्तु पीतकम् ।
रक्तवत्पुरुषो ज्ञेयोऽघोर: कृष्ण: स एव च ॥
ईशान: पश्चिमस्तेषां सर्व्ववर्णसमन्वित: ।
कामद: कामरूपी स्यात् ज्ञानाधार: शिवात्मक: ॥
(रुद्राक्षविशेष: । अस्य धारणत: शुभं भवति ॥ पञ्च सुखानि यस्य इति विग्रहे वाप्यलिङ्गत्वम् । यथा, रामायणे ।५।४१।२३। [तत: ।
"तस्य पञ्चायसांस्तीक्ष्णान् स्निग्धान् पञ्चसुखान् शिरस्युत्पतत: पञ्चाभान् दुर्धर्ष: संन्यवेष्टयत् ॥")

पञ्चसुखी, स्त्री, (पञ्चसुखानीव सन्त्यस्या: ।) वासक: । इति राजनिर्घण्टः ॥ अपापुष्पविशेषश्च ॥ (पञ्च विस्तृतं सुखमस्या: । स्त्रियां ङी ॥ रुद्राक्षे पञ्चमहाभूतान्येव पञ्चसुखानीव यस्या: शक्तेरित्यर्थ: । शिवपत्नी । इति शब्दाम्बुधि: ॥)

पञ्चसुद्रा, स्त्री, (पञ्चविधा सुद्रा ।) पूजायां कर्त्तव्या पञ्चप्रकारसुद्रा । तस्या अनुष्ठानं यथा, —
"सम्यक् प्रपूरित: पुष्पै: कराभ्यां कल्पितोऽञ्जलि: ।
आवाहनी समाख्याता सुद्रा देवीकसत्तमै: ॥१॥
अधोमुखौ स्थितौ चेत् स्यात् स्थापनी मुद्रिका भवेत् ।२।
उच्छ्रिताङ्गुष्ठसुश्लिष्टौ तु संयोगात् सन्निधापनी ॥३॥
अन्त:प्रवेशिताङ्गुष्ठा सैव सम्बोधनी मता । ४ ।
उत्तानसंस्थितयुगला संमुखी करणी मता ॥"५॥

इति पूजाप्रदीप: ॥

पञ्चसूत्रं, क्ली, (पञ्चविधं सूत्रम् ।) गवाजामेषी-महिषीरोमभिर्निर्म्मितसूत्रम् । इति राजनिर्घण्टः ॥

पञ्चमूलं, क्ली, (पञ्चप्रकारं पञ्चगुणितं वा मूलम् ।) स्वनामख्यातपञ्चमम् । तत् त्रिविधं दृहत् स्वल्पं लघ्वाख्यञ्च । आद्यं यथा, —
"विल्वाग्निमन्थश्योनाकगाम्भारीपाटलागणिकारिका ।
कफवातहरं श्रेष्ठं पञ्चमूलमिदं महत् ॥"
द्वितीयं यथा, —
"श्योनाकपर्णी पृश्निपर्णी दृहतीद्वयगोक्षुरम् ।
वातपित्तहरं हृद्यं कनीय: पञ्चमूलकम् ॥"
तृतीयं यथा, —
"कुश: काश: शरो दर्भ इक्षुश्चेति तृणोद्भव: ।"

इति चक्रपाणिदत्त: ॥

अपि च ।
"विल्वाग्निमन्थश्योनाककाश्मर्य्य: पाटला तथा ।
ज्ञेयं दृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥
शरेक्षुदर्भकाशानां नलस्य मूलमेव च ।
सौमुनद्वारकश्चैव तृणानां पञ्चमूलकम् ॥"

इति शब्दचन्द्रिका ॥

(पञ्चानां मूलानां समाहार: । इति विग्रहे मूलपञ्चकम् ॥)

पञ्चमूली, स्त्री, (पञ्चानां मूलानां समाहार: । "द्विगो: ।" ४ । १ । २१ । इति ङीप् ।) स्वल्प-पञ्चमूलपाचनम् । यथा, —
"श्योनाकपर्णी पृश्निपर्णी दृहती कण्टकारिका ।
तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी ॥"

इति शब्दचन्द्रिका ॥

पञ्चयज्ञा:, पुं, (पञ्चविधा यज्ञा: ।) गृहस्थकर्त्तव्य-पञ्चप्रकारयज्ञविशेषा: । यथा, —
"ब्रह्मयज्ञो हुतश्चैव देवयज्ञश्च सत्तम ! ।
पितृयज्ञो भूतयज्ञ: पञ्चयज्ञा: प्रकीर्त्तिता: ॥"

इति पाद्मे क्रियायोगसारे १६ अध्याय: ॥

मूलमधिकृत्य, —
"नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत् ।"

इति तिथ्यादितत्त्वम् ॥

अस्य विवरणं पञ्चमहायज्ञशब्दे द्रष्टव्यम् ॥

पञ्चरत्नक:, पुं, (पञ्चगुणितानि रत्नका इव कण्ट-कानि यस्मिन् ।) पक्वपौड्रेक्षुः । इति राज-निर्घण्टः ॥

पञ्चरत्नं, क्ली, पञ्चानां रत्नानां समाहार: । (यद्वा पञ्चविधं पञ्चगुणितं वा रत्नम् ।) तद्यथा, कनकम् १ हीरकम् २ नीलमणि: ३ पद्मराग: ४ मुक्ता ५ । यथा, —
"कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभि: पूर्व्वदर्शिभि: ॥
रत्नानाप्राप्यभावे तु स्वर्णं कर्षार्द्धमेव वा ।
सुवर्णस्याप्यभावे तु ग्राह्यं ज्ञेयं विचक्षणै: ॥"

इति हेमाद्रि: ॥

कनकरजतप्रवालमौक्तिकराजपट्टात्मकमिति गौड़ा: ॥

पञ्चरसा, स्त्री, (पञ्च: विस्तीर्णो रसोऽस्याम् ।) आमलकी । इति हारावली शब्दमाला च ॥

पञ्चराज्रं, क्ली, (पञ्चविधानि राज्राणि ज्ञानानि यत्र । समासे अच् ।) तन्त्रविशेष: । यथा, —
"राज्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चराज्रञ्च प्रवदन्ति मनीषिण: ॥
प्रथमं सात्त्विकं ज्ञानं द्वितीयन्तु तदेव च ।
नैर्गुण्यञ्च तृतीयञ्च ज्ञानञ्च सर्व्वत: परम् ॥
चतुर्थञ्च राजसिकं भक्तस्तन्त्राभिवाञ्छति ।
पञ्चमं तामसं ज्ञानं विद्वांस्तन्त्राभिवाञ्छति ॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चराज्रं विदुर्बुधा: ॥"
तत् सप्तविधं यथा, —
"पञ्चराज्रं सप्तविधं ज्ञानिनां ज्ञानदं परम् ।
ब्राह्मं शैवञ्च कौमारं वाशिष्ठं कापिलं परम् ॥
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥"

इति नारदपञ्चराज्रे प्रथमराज्रम् ॥

अपि च ।
"पञ्चकं पञ्चराज्राणां कथामाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चराज्रञ्च पञ्चकम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्याय: ॥ एतदतिरिक्तानिरुद्धयामौर्षपृथुध्रुवादिपञ्चराज्राणि-सन्ति ॥ (पञ्चानां रात्रीणां समाहार: ।) पञ्च निशा: । यथाह चक्रपाणिदत्त: ।
"चिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्यादारोग्यदर्शनात् ॥"

पञ्चलक्षणं, क्ली, (सर्गादि पञ्चविधानि लक्षणानि यत्र ।) पुराणम् । यथा, —
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥"

इत्यमरभरतौ ॥

(पञ्चानां लक्षणानां समाहार: । इति विग्रहे पञ्चलक्षणानि ॥)

पञ्चलवणं, क्ली, पञ्चानां लवणानां समाहार: । (पञ्चगुणितं लवणमिति कैश्चित् ।) तद्यथा, —
काचम् । सैन्धवम् । साम्भरम् । विड्म् । सौवर्च्चलम् । इति राजनिर्घण्टः ॥

पञ्चलाङ्गलकं, क्ली, (सुक्तादिविभूषितदण्डव-

युक्तानि सारदारुनिर्म्मितानि पञ्च लाङ्गलकानि यस्मिन् ।) महादानभेदः । यथा,—
"अथातः संप्रवक्ष्यामि महादानमनुत्तमम् ।
पञ्चलाङ्गलकं नाम महापातकनाशनम् ॥
पुण्यां तिथिं समासाद्य युगादिप्रभृतादिकम् ।
भूमिदानं ततो दद्यात् पञ्चलाङ्गलकान्वितम् ॥
कर्ब्बटं खेटकञ्चापि ग्रामं वा ग्रस्यशालिनम् ।
निवर्त्तनशतं वापि तदर्द्धं वापि शक्तितः ॥
सारदारुमयान् कृत्वा हलान् पञ्च विचक्षणः ।
सर्व्वोपकरणैर्युक्तानन्यान् पञ्च च काञ्चनान् ॥
वृषलक्षणसंयुक्तान् दृष्ट्वैव तु धुरन्धरान् ।
सुवर्णशृङ्गाभरणान् सुक्तालाङ्गूलभूषितान् ॥
रौप्यपादाग्रतिलकान्नक्तकौशेयभूषणान् ।
स्रगदामचन्दनयुतान् शालायामधिवासयेत् ॥
पर्ज्जन्यादित्यरुद्रेभ्यः पायसं निर्व्वपेत् ततम् ।
एकस्मिन्नेव कुण्डे तु गुरुर्यस्मिन्निवेदयेत् ॥
पालाशाः समिधस्तद्वदाज्यं क्षौद्रतिलांक्तथा ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनं बुधः ॥
ततो मङ्गलशब्देन युक्तमाल्याम्बरो बुधः ।
आहूय द्विजदाम्पत्यं क्षेमसञ्चाङ्गवीयकैः ॥
कौशेयवस्त्रकटकैर्मणिभिश्चापि पूजयेत् ।
शय्यां सोपस्करां तद्वद्धेमैकां पयसिनीम् ॥
तथाष्टादश धान्यानि समन्तादधिवासयेत् ।
ततः प्रदक्षिणं कृत्वा गृहीतकुसुमाञ्जलिः ॥
इमसुच्चारयेन्मन्त्रमथ सर्व्वं निवेदयेत् ।
यस्माद्देवगणाः सर्व्वे स्थावराणि चराणि च ॥
धुरन्धराङ्गे तिष्ठन्ति तस्माद्भक्तिः शिवेऽस्तु मे ।
यस्माच्च भूमिदानस्य कलां नार्हन्ति षोड़शीम् ॥
दानान्यन्यानि मे भक्तिर्धर्म्मे एव दृढ़ा भवेत् ।
दक्षेण समहस्तेन चिंशद्दक्षान्निवर्त्तनम् ॥
त्रिभागहीनं गोचर्म्ममानमाह प्रजापतिः ।
मानेनानेन यो दद्यात् निवर्त्तनशतं बुधः ॥
विधिनानेन तस्यापि क्षीयते पापसंहतिः ।
तदर्द्धमथवा दद्यादपि गोचर्म्ममात्रकम् ।
भवनस्थानमात्रं वा सोऽपि पापैः प्रमुच्यते ॥
यावन्ति लाङ्गलकमार्गसुखानि भूमे-
र्लाभां पतिर्दुहितुरङ्गजरोमकाणि ।
तावन्ति पूर्व्वपुरुषे वर्षाणि तिष्ठे-
द्भूमिप्रदानमथ यः कुरुते मनुष्यः ॥
गन्धर्व्वकिन्नररसुरासुरसिद्धसंघै-
राघुष्टचामरमुपेत्य महाद्रुमानम् ।
सम्पूज्यते पितृपितामहबन्धुयुक्तः
शम्भोः पुरं व्रजति चामरनायकः सन् ॥
इन्द्रत्वमप्यधिगतं क्षयमभ्युपैति
गोभूमिलाङ्गलधुरन्धरसंप्रदानात् ।
तस्मादघौघपटलक्षयकारिभूमे-
र्दानं विधेयमिति भूमिभवाभवाय ॥"
इति मात्स्ये २५७ अध्यायः ॥

पञ्चलोहं, क्ली, (पञ्च विकीर्णं लोहम् ।) सौराष्टक-लोहम् । इति हेमचन्द्रः ॥ (पञ्चगुणितं लोहम् । सुवर्णरजतताम्रकांसकरङ्गाणि ॥)

पञ्चलोहकं, क्ली, पञ्चानां लोहकानां धातूनां समाहारः । तद्यथा । सुवर्णरजततामरङ्गनागानि । इति राजनिर्घण्टः ॥

पञ्चवक्त्रः, पुं, (पञ्च वक्त्राणि यस्य ।) शिवः । ("विश्वादिं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥" इति शिवध्यानम् ॥)

अस्य मन्त्रा यथा,—
"समस्तानां खराद्यानां दीर्घाः शेषाः सबिन्दुकाः ।
ऋलृकभूम्याः सार्द्धचन्द्रा उपान्ते नाभिसंहिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
क्रमात् सद्यादिसन्दोहमादगौरवसंयुताः ॥
प्रासादस्तु भवेत् शेषं पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं वक्त्रं मन्त्रेण पूजयेत् ॥
एकं सप्तदिनं जप्त्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ॥
सद्यादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ।
शम्भोः प्रसादनेनैव यस्मादुक्तस्तु मन्त्रकः ॥
तेन प्रासादसंज्ञोऽयं कथ्यते सुविपश्चिद्भिः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सद्य उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवात्मकः ।
एतद्व्याप्तं समस्तञ्च मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरञ्च यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
स्वयम्भुनैव मन्त्रेण आराधयतमीश्वरम् ॥ * ॥
ध्यानञ्च शृणु वक्ष्यामि सम्यग्वेतालभैरवौ ।
पञ्चवक्त्रं महाकायं जटाजूटविभूषितम् ॥
चारुचन्द्रकलायुक्तं मूर्द्ध्नि ज्वालौघसंगतम् ।
बाहुभिर्दशभिर्युक्तं व्याघ्रचर्म्माम्बरावृतम् ॥
कालकूटधरं कण्ठे नागहारोपशोभितम् ।
कोटीरकुण्डलं कान्तु भूषणञ्च सुशोभनम् ॥
विभूतिं सर्व्वगात्रेषु द्योतमानामनेकेषु च विभिक्षिभिः ॥
नेत्रैस्तु पञ्चदशभिर्व्याप्तमुद्भिर्विभूषितम् ।
वृषभोपरि संस्थन्तु गजकृत्तिपरिच्छदम् ॥
सद्योजातं वामदेवमघोरञ्च ततः परम् ।
तत्पुरुषं यथैशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातं भवेद्वक्त्रं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
नीलवर्णमघोरन्तु दंष्ट्राभीतिविवर्द्धनम् ।
रक्तं तत्पुरुषं देवं स्त्रियमूर्त्तिं मनोहरम् ॥
धूम्रामलञ्च तथैशानं सर्व्वदेव शिवात्मकम् ।
चिन्तयेत् पश्चिमे त्वाद्यं द्वितीयञ्च तथोत्तरे ॥
अघोरं दक्षिणे देवं पूर्व्वे तत्पुरुषन्तथा ।
ईशानं मध्यतो ध्यायं चिन्तयेद्भक्तितत्परः ॥
शक्तिशूलखट्वाङ्गवरदाभयदं शिवम् ।
दक्षिणेष्वथ वक्त्रेषु वामेष्वपि ततः शृणु ॥
अक्षस्रक्त्रं बीजपूरं शुभगं डमरूत्पलम् ।
ऐश्वर्य्यसमायुक्तं ध्यायेत्तु कृत्तं शिवम् ॥"
इति कालिकापुराणे ५० अध्यायः ॥ * ॥

पञ्चसुखरुद्राक्षः । यथा स्कान्दे,—
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगस्त्यागमनाच्चैव अभक्ष्यस्य च भक्षणात् ।
सूचते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथितत्त्वम् ॥

(पञ्चं विस्तृतं वक्त्रं वदनं यस्य । इति विग्रहे । शिवः ॥)

पञ्चवटः, पुं, (पञ्चो विस्तीर्णो वटः ।) उरुवटः । तत्पर्य्यायः । जोटिङ्गः २ महाव्रती ३ बालयज्ञोपवीतकम् ४ । इति त्रिकाण्डशेषः ॥ (पञ्चसंख्यका वटा अश्वत्थविल्ववटधात्र्य शोकरूपा वृक्षा यस्मिन् । पञ्चवटीवनम् । यथा रामायणे । १ । ३ । १६ ।
"समागमं विराधेन वासं पञ्चवटे तथा ॥")

पञ्चवटी, स्त्री, (पञ्चानां वटानां समाहारः । तद्धितार्थेति तत्पुरुषः संख्यापूर्व्वोद्विगुरिति द्विगुसंज्ञायां "द्विगोः" ।४।१।२१। इति ङीष् । द्विगुरेकवचनमिति एकवचनम् ।) पञ्चप्रकारवृक्षविशेषः । यथा,—
"अश्वत्थविल्ववृक्षश्च वटधात्र्यशोकम् ।
वटीपञ्चकमित्युक्तं स्थापयेत् पञ्चदिक्षु च ॥
अश्वत्थं स्थापयेत् प्राच्यां विल्वमुत्तरभागतः ।
वटं पश्चिमभागे तु धात्रीं दक्षिणतस्तथा ॥
अशोकं वह्निदिक्स्थाप्यं तपस्यार्थं सुरेश्वरि ।
मध्ये वेदीं चतुर्हस्तां सुन्दरीं सुमनोहराम् ॥
प्रतिष्ठां कारयेत्तस्याः पञ्चवर्णोत्तरं शिवे ! ।
अनन्तफलदात्री सा तपस्यासफलदायिनी ॥ * ॥
इयं पञ्चवटी प्रोक्ता दृष्टमुपञ्चवटीं शृणु ।
विल्ववृक्षं मध्यभागे चतुर्हस्तु चतुष्टयम् ॥
वटवृक्षं चतुष्कोणे वेदसंख्यं प्ररोपयेत् ।
अशोकं वर्त्तुलाकारं पञ्चविंशतिसम्मितम् ॥
दिग्विदिक्षामलकीञ्चैव एकैकं परमेश्वरि ।
अश्वत्थञ्च चतुर्हस्तु दृष्टमुपञ्चवटी भवेत् ॥
यः करोति मनुष्याणां सायुज्यादिक्रमो भवेत् ।
इह लोके मनुष्यस्य परे च परमा गतिः ॥"
इति हैमाद्रीयव्रतखण्डधृतस्कन्दपुराणवचनानि ॥
(स्वनामख्यातः प्रदेशविशेषः । यथा, रामायणे । १ । १ । ४५ ।
"देशः पञ्चवटीनाम पुण्यः पक्षिमृगायुतः ॥")

पञ्चवल्कलं, क्ली, (पञ्चानां वल्कलानां समाहारः ।) वल्कलपञ्चकम् । यथा,—
"न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसवल्कलैः ।
सर्व्वैरेकत्र संयुक्तैः पञ्चवल्कलमुच्यते ॥"
अपि च ।
"न्यग्रोधोडुम्बराश्वत्थप्लक्षपिप्पलभीतनाः ।
क्षीरिवृक्षाश्च पञ्चैषां वल्कलं पञ्चवल्कलम् ॥"
इति शब्दचन्द्रिका ॥

अस्य गुणाः ।
"पञ्चेन क्षीरिणो वृक्षात्त्वक् पञ्चवल्कलम् ।
त्वक्पञ्चकं हिमं याहि व्रणशोथविसर्पजित् ॥"
इति राजनिर्घण्टः ॥

पञ्चवाणः, पुं, (पञ्च वाणाः शरा यस्य सः ।) कामदेवः । इति हेमचन्द्रः ॥ पञ्चानां वाणानां समाहारे क्ली । (कामस्य पञ्च वाणा यथा,—
"द्रवं स्तोभनं वाणं तापनं मोहनाभिधम् ।

उन्मादनश्च कामस्य वाणाः पञ्च प्रकीर्त्तिताः ॥"
पञ्चपुष्पवाणा यथा,—
"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥")
पञ्चबाणविशिष्टे त्रि ॥

पञ्चशरः, पुं, (पञ्च शरा यस्य सः।) कन्दर्पः। इत्यमरः। १। १। २६ ॥ अस्य पञ्च शरादि यथा, ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३२ अध्याये।
"सम्मोहनं सप्तदेशबीजं स्तम्भनकारणम्।
उच्चाटबीजं ज्वलनं शुभ्रश्वेतनहारकम् ॥"
अपि च।
"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥"
पञ्च इन्द्रियार्थाः शरा अस्येत्यर्थे। इति भरतः॥
(यथा, कुमारे। ७। ६२।
"प्रायावसाने प्रतिपन्नमूर्त्ते-
र्यथाशिरे पञ्चशरस्य सेवाम् ॥")

पञ्चशस्यं, क्ली, (पञ्चानां शस्यानां समाहारः।) शस्यपञ्चकम्। तच्च धान्यसप्ततिलयवश्यामाकसर्षपरूपम्। सर्षपस्थाने माषोऽपि। इति दुर्गादासः॥

पञ्चशाखः, पुं, (पञ्च शाखा इवाङ्गुलयो यस्य।) हस्तः। इत्यमरः। २। ६। ८१ ॥ पञ्चानां शाखानां समाहारे क्ली। पञ्चशाखादिविशिष्टे त्रि॥

पञ्चशिखः, पुं, (पञ्चा विस्तीर्णा शिखा केशरादिर्यस्य।) सिंहः। इति हेमचन्द्रः॥ धर्म्मस्य हिंसाभार्य्यायां जातो मुनिविशेषः। यथा,—
"धर्म्मस्य भार्य्या हिंसाख्या तस्यां पुत्रचतुष्टयम्।
सत्यात्मं मुनिशार्दूल! योगशास्त्रविचारकम् ॥
ज्येष्ठः सनत्कुमारोऽभूद्वितीयश्च सनातनः।
तृतीयः सनको नाम चतुर्थश्च सनन्दनः॥
सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम्।
दृष्ट्वा पञ्चशिखं श्रेष्ठं योगयुक्तं तपोनिधिम् ॥
ज्ञानयोगं न ते दद्युर्न्यायांशोऽपि कनीयसाम् ॥"
इति वामने ५० अध्यायः॥
(अस्य अन्यप्रकारोत्पत्तिर्नामनिरुक्तिश्च उक्ता महाभारते। १२। २१८। ६—१६।
"तत्र पञ्चशिखो नाम कापिलेयो महामुनिः।
परिधावन् महीं सर्वां जगाम मिथिलामथ॥
सर्व्वसंन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये।
सुपर्य्यवसितार्थश्च निर्द्वन्द्वो गतसंशयः॥
ऋषीणामाहुरेकं यं कामादवसितं नृषु।
ज्ञानवन्तं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम्॥
यमाहुः कापिलं सांख्याः परमर्षिं प्रजापतिम्।
स मन्ये तेन रूपेण विस्मापयति हि स्वयम्॥
आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम्।
पञ्चशीतसि यः सत्रमास्ते वर्षसहस्रिकम्॥
यत्र चासीनमागम्य कापिलं मङ्गलं महत्।
पुरुषावस्थमव्यक्तं परमार्थं व्यवेदयत्॥
दृष्टश्चैव संस्पृष्टो भूयश्च तपसासुरिः।
क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः॥

यत्तदेकाक्षरं ब्रह्म नागारूपं प्रचक्षते।
आसुरिर्म्मण्डले तस्मिन् प्रतिपेदे तदव्ययम्॥
तस्य पञ्चशिखस्यः स्निग्धो मानुष्या पयसा भृतः॥
ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी।
तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ॥
ततः स कापिलेयत्वं लेभे बुद्धिञ्च नैष्ठिकीम्।
एतत्ते भगवानाह कापिलेयस्य सम्भवम्॥
तस्य तत् कापिलेयत्वं सर्व्वविस्तमनुत्तमम्॥
सामान्यं जनकं ज्ञात्वा धर्म्मज्ञो ज्ञानमुत्तमम्।
उपेत्य श्रुतमाचार्य्याज्जोहयामास हेतुभिः॥
जनकस्त्वभिसंरक्तः कापिलेयानुदर्शनात्।
उत्सृज्य श्रुतमाचार्य्यान् दृष्टतोऽनुजगाम तम्॥
पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः।
पञ्चघ्नः पञ्चतत्त्वज्ञः पञ्चाग्निश्च स्मृतः॥"
गायत्रीस्वरूपायां स्त्रियां स्त्री। यथा, देवीभागवते। १२। ६। १०५।
"पावनप्रिया पञ्चशिखा पन्नगोपरिशायिनी॥")

पञ्चशूरः, पुं, (पञ्च शूरणा यत्र।) पञ्चप्रकारशूरणः। तद्यथा। अत्यन्तपर्णी काश्मीरः मालाकन्दः शूरणः श्वेतशूरणश्च। तथाहि।
"अत्यन्तपर्णीकाश्मीरमालाकन्दद्विशूरणैः।
कुलत्थो भवति योगोऽयं पञ्चशूरणसंज्ञकः॥"
इति राजनिर्घण्टः॥

पञ्चशैरीषकं, क्ली, (शिरीषवृक्षस्य इदम् शैरीषकम्। पञ्चसंख्यकं शैरीषकम्।) शिरीषवृक्षस्य कुसुममूलफलपत्रत्वचः। इति राजनिर्घण्टः॥

पञ्चषाः, त्रि, पञ्च वा षड्वा परिमाणं येषां ते। बहुवचनान्तोऽयं शब्दः। इति सुबन्धोपाध्यायः॥

पञ्चसिन्धवः, पुं, (पञ्च सिन्धा औषधयो यस्मिन्।) पञ्चप्रकारौषधविशेषः। यथा,—
"सैलकन्दसुधाकन्दक्रोडकन्दरुदन्तिकाः।
सर्पनेत्रयुताः पञ्चसिन्धवौषधिकसंज्ञकः॥"
इति राजनिर्घण्टः॥

पञ्चसुगन्धकं, क्ली, (पञ्च सुगन्धा यत्र। ततः कप्।) पञ्चप्रकारसुगन्धिद्रव्यम्। यथा,—
"कुसुमानि लवङ्गस्य तथा कक्कोलकाख्ययोः।
जातीफलानि कर्पूरमेतत् पञ्चसुगन्धकम्॥"
इति शब्दचन्द्रिका॥
अपि च।
"कर्पूरकक्कोललवङ्गपुष्प-
गुवाकजातीफलपञ्चकेन।
समांशभागेन च योजितेन
मनोहरं पञ्चसुगन्धकं स्यात्॥"
इति राजनिर्घण्टः॥

पञ्चसूना, स्त्री, (पञ्चगुणिता सूना प्राणिवधस्थानम्।) पञ्चप्रकारप्राणिवधस्थानम्। यथा,—
"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च वध्यते याश्च वाहयन्॥"
इति शुद्धितत्त्वम्॥
तज्जन्यपापं गृहस्थस्य प्रतिदिनं भवति तस्य प्रायश्चित्तं वैश्वदेवः। यथा,—
"लौकिके वैदिके वापि कृतोच्छिष्टे जले क्षितौ।
वैश्वदेवन्तु कुर्व्वीत पञ्चसूनापनुत्तये॥"
इति आह्निकतत्त्वधृतशातातपवचनम्॥
अग्नौ पञ्चकालोत्पन्नपञ्चसूनादिजन्यपापस्य दानादिनाश्यत्वं यथा,—
"दत्त्वाहानुपरं सम्यक् विप्रोऽधीयीत धर्म्मवित्।
दानञ्च विधिना देयमधीतारकं हि तत्॥"
इति शुद्धितत्त्वधृतसत्यव्रतवचनम्॥

पञ्चस्वरा, स्त्री, (पञ्च स्वरा यत्र।) प्रजापतिदासवैद्यनतग्निसुरिष्टमाहरिष्टपिङ्गरिष्टस्त्रीपुंनपुंसकज्ञानसुखदुःखरिष्टच्छेदादियोगज्ञत्वज्ञाननिर्णय इति सप्ताध्यायात्मकज्योतिर्ग्रन्थविशेषः। यथा। तत्रैव।
"पञ्चस्वराभिधानञ्च ग्रन्थं विद्वत्सम्मतम्।
किञ्चिद्दृष्ट्वाग्रन्थञ्च स्वल्पं वक्ष्यामि शाश्वतम्॥"

पञ्चस्वरोदयः, पुं, (पञ्चानां स्वराणामुदयो यत्र।) ज्योतिःशास्त्रविशेषः। यथा,—
"कालं वक्ष्यामि संसिद्ध्यै रुद्र पञ्चस्वरोदयात्।
राजा माजा उदासा च पौड़ा मृत्युस्तथैव च॥
आ इ ऊ ऐ औ स्वराश्च लिखेत् पञ्चाग्निकोष्ठके।
ऊर्द्धनिर्गमगतैरग्रैः षड्वह्निक्रममागतैः॥
तिथौ एकाग्निकोष्ठेषु चयो राजाथ माजया।
उदासा पौड़ा मृत्युश्च क्रमः सोमसुतः क्रमात्॥
गुरुशुक्रज्ञनैश्चररविचन्द्रा यथोदितम्।
रेवत्यादिग्रिवान्ताश्च ऋक्षाश्च प्रथमाः कलाः॥
पञ्चपञ्चान्यत्र भानि चैत्राद्य उदयस्तथा।
द्वादशाहा हयो मासा मान्त्र आद्यक्षरं तथा॥
कला लिङ्गञ्च या तिष्ठेत् पञ्चमस्तस्य वै गतिः।
लका तिथिस्तथा वारनक्षत्रं मासमेव च॥
नामोदयस्य पूर्व्वञ्च तथा भवति नान्यथा॥"
इति गरुड़पुराणम्॥

पञ्चाग्नि, क्ली, पञ्चानामग्नीनां समाहारः। अस्य विवरणं पञ्चातपाशब्दे द्रष्टव्यम्॥ शरीरस्थपञ्चाग्नयो यथा,—
"उदरे गार्हपत्याग्निर्मध्यदेशे तु दक्षिणः।
आस्ये आहवनीयश्च सत्यः पत्नी च मूर्द्धनि।
यः पञ्चाग्नीनिमान् वेद आहिताग्निः स उच्यते॥"
इति गरुड़पुराणम्॥
(पञ्चाग्नयो गृहे यस्य। इति विग्रहे बाध्यलिङ्गत्वम्। यथा मनुः। ३। १८५।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णषडङ्गवित्॥")

पञ्चाङ्ग, क्ली, पञ्चानां अङ्गानां एकत्रस्थस्य त्वक्पत्रपुष्पमूलफलानां समाहारः। यथा,—
"त्वक्पत्रपुष्पमूलं फलमेकस्य भाषितम्।
एकत्र मिलितञ्चैतत् पञ्चाङ्गमिति संज्ञितम्॥"
इति राजनिर्घण्टः॥
पुरश्चरणविशेषः। यथा,—
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम्।
पञ्चाङ्गोपासनं लोके पुरश्चरणमिष्यते॥"
इति तन्त्रसारः॥
वारतिथिनक्षत्रयोगकरणात्मकपञ्जिका। यथा,-

"तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत्" ॥
इति ज्योतिषम् ॥

पञ्चाङ्गः, पुं, (पञ्चाङ्गानि यस्य ।) कमठः । इति शब्दमाला ॥ अश्वविशेषः । तत्पर्य्यायः । पञ्चभद्रः२ पुष्पितत्वरङ्गमः३ । इति शब्दरत्नावली ॥ प्रणामविशेषः । यथा,—
"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा ।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरावितौ ॥"
इति तन्त्रसारः ॥
(राजनयः । यदुक्तम् ।
"सहायाः साधनोपाया विभागो देशकालयोः ।
विनिपातप्रतीकारः सिद्धिः पञ्चाङ्ग इष्यते ॥")

पञ्चाङ्गगुप्तः, पुं, (पञ्चसंख्यकानि अङ्गानि गुप्तानि यस्य ।) कच्छपः । इति त्रिकाण्डशेषः ॥

पञ्चाङ्गुलः, पुं, (पञ्च अङ्गुलय इव पत्राणि यस्य ।) एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । पञ्चाङ्गुलपरिमाणयुक्ते त्रि ॥

पञ्चाङ्गुलिः, त्रि, पञ्चाङ्गुलयो यस्य सः । इति आकरग्रन्थः ॥

पञ्चाङ्गुली, स्त्री, तत्राकारानुपः । इति राजनिर्घण्टः ॥

पञ्चातपा, स्त्री, (पञ्चभिरग्निसूर्य्यैरातप्यते इति । आङ् + तप् + अच् । ततः टाप् ।) तपस्याविशेषः । यथा,—
"वर्षा पञ्चातपाचिन्ता ग्राम्भवी ग्राम्भवो जपः ।
यन्नियेर्दशभिः शुष्कैश्चतुर्हिन्नु चतुष्कृतम् ॥
वह्निसंस्थापनं शौरौ तीव्रांशुस्तत्र पञ्चमः ।
कृत्वान्तरे चतुर्व्यूहान् कृत्वा वैश्वानरेहिना ॥
तत्रस्थस्य सूर्य्यबिम्बं वीक्षन्ती बहुलांशुका ।"
इति कालिकापुराणे ४२ अध्यायः ॥

पञ्चाननः, पुं, (पञ्च आननानि यस्य ।) शिवः । (पञ्च विस्तृतं आननं यस्य ।) सिंहः । इति मेदिनी ॥ अत्रयः । इति शब्दरत्नावली ॥ (ज्योतिषोक्तसिंहराशिः । यथाह स्मृतिः ।
"पञ्चानने गते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥"
रुद्राक्षविशेषः । तद्धारणे महच्छुभं भवति ॥)

पञ्चामराः, स्त्री, (पञ्च अमराः । संज्ञात्वात्कर्म्मधारयः ।) पञ्चप्रकारामरलतादि । यथा,—
"एका तु अमरा दूर्व्वा तस्या यष्टिं समानयेत् ।
अन्या तु विजया देवी सिद्धिरूपा सरस्वती ॥
अन्या तु विल्वपत्राख्या शिवसन्तोषकारिणी ।
अन्या तु योगसिद्ध्यर्थं निर्गुण्डी चामरा लता ॥
अन्या तु कालतुलसी श्रीविष्णोः प्रियतोषिणी ।
एताः पञ्चामरा ज्ञेया योगसाधनकर्म्मणि ॥"
इति रुद्रयामलोत्तरखण्डे ३६ पटलः ॥

पञ्चामृतं, क्ली, (पञ्चानाममृतानां समाहारः । गव्यैरादुग्धघृतदधिमधुघटितम् । यथा,—
"दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥
गर्भवतीभक्षणस्य हितं यथा,—
"रेवत्यश्विपुनर्व्वसुद्वयमरुन्मूलानुराधामघा-
हस्तास्वात्युत्तरफल्गुनीषु भृगुजे जीवार्कवारे तथा ।
लग्नर्क्षेन्दुपयोभनेषु नियतं सत्पञ्चरिक्तां तिथिं
देयं मासि च पञ्चमेषु करणे पञ्चामृतं योषिताम् ॥"
इति ज्योतिस्तत्त्वम् ॥

पञ्चामृतयोगः, पुं, (पञ्चानाममृतानां गुडुच्यादीनां योगः ।) गुडुचीगोक्षुरसुशूलीसुरिकाशतावरीणां संयोगः । यदुक्तं राजनिर्घण्टे ।
"गुडूची गोक्षुरश्चैव सुशूली सुरिका तथा ।
शतावरीति पञ्चानां योगः पञ्चामृताभिधः ॥"

पञ्चाम्नायः, पुं, (पञ्चसंख्यकः आम्नायः ।) शिवस्य पञ्चवक्त्रविनिर्गतसत्तन्त्रशास्त्रविशेषः । यथा,—
"पूर्व्वाम्नायः पूर्व्वमुखः पश्चिमः पश्चिमामुखः ।
दक्षिणो दक्षिणास्यस्तदुत्तरोत्तरः परः ॥
निवृत्तरं तथा चोर्द्धं सिद्धान्तागमरूपिणम् ।
ऊर्द्धाम्नायपरित्यागं नाप्नुयात्तप्तः फलम् ॥"
अन्यच्च ।
"पूर्व्वाम्नायः शब्दरूपो दक्षिणः कर्णरूपकः ।
पश्चिमः प्रश्नरूपः स्यादुत्तरश्चोत्तरस्तथा ॥
ऊर्द्धाम्नायस्तत्त्वबोधः केवलानुभवात्मकः ॥"
इत्यादि । इति भैरवतन्त्रम् ॥
मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः ।"
इति कुलार्णवतन्त्रम् ॥ * ॥
"विभाव्य सुखपद्मं हि शिवस्य वरवर्णिनि ।
सद्योजातं वामदेवमघोरस्य ततः परम् ॥
तत्पुरुषं तथेशानं पञ्चवक्त्रं प्रकीर्त्तितम् ॥
सद्योजातस्य वै शुक्लं शुद्धस्फटिकसन्निभम् ।
पीतवर्णं तथा सौम्यं वामदेवं मनोहरम् ॥
लाक्षावर्णमघोरस्य समं भीमविवर्द्धनम् ।
रक्तं तत्पुरुषं देवि ! दिव्यमूर्त्ति मनोहरम् ॥
श्यामलस्य तथेशानं सर्व्वदेवशिवात्मकम् ।
चिन्तयेत पश्चिमे चाद्यं द्वितीयस्य तथोत्तरे ॥
अघोरं दक्षिणं देवं पूर्व्वे तत्पुरुषं तथा ।
ईशानं मध्यतो ध्येयं चिन्तयेद्भक्तितत्परः ॥"
इति निर्व्वाणतन्त्रे ६ पटलः ॥ * ॥
अन्यत् षड़ाम्नायशब्दे द्रष्टव्यम् ॥

पञ्चाम्रं, क्ली, (अम्नन्ति रसानि प्राप्नुवन्तीति । अमगत्यादिषु + "अमिनम्योर्दीर्घश्च ।" उणां २ । १६ । इति रक् दीर्घश्चोपधायाः इति आम्रा दृष्टाः । पञ्चानां आम्राणामश्वत्थादिवृक्षाणां समाहारः ।) वृक्षविशेषाणां समाहारः । यथा,—
"अश्वत्थमेकं पिचुमर्द्दमेकं
न्यग्रोधमेकं दश पुष्पजातीः ।
द्वे द्वे तथा दाडिममातुलुङ्गे
पञ्चाम्रवापी नरकं न याति ॥"
इति वराहपुराम् ॥
अपि च ।
"अश्वत्थ एकः पिचुमर्द एकौ
द्वौ चम्पकौ बीजि च केशराशि ।
सप्तात्र तालाः नव नारिकेलाः

पञ्चाम्रोपी नरकं न याति ॥"
इति तिथितत्त्वम् ॥

पञ्चाम्लं, क्ली, (पञ्चानामम्लानां कोलादीनां समाहारः ।) अम्लपञ्चकम् । यथा,—
"कोलदाड़िमदृक्काम्लैरम्लवेतससंयुतैः ।
चतुरम्लञ्च पञ्चाम्लं मातुलुङ्गसमन्वितम् ॥"
इति शब्दचन्द्रिका ॥

पञ्चारी, स्त्री, (पञ्चपञ्चसंख्यान्यच्छतीति । कृ गतौ "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरादित्वात् ङीष् ।) शारिवृक्षलता । इति शब्दमाला ॥ (पाचार इक इति भाषा ॥)

पञ्चार्चिः, [स्] पुं, (पञ्च अर्चींषि यस्य सः ।) बुधग्रहः । इति त्रिकाण्डशेषः ॥

पञ्चालः, पुं (पञ्चविस्तारवचने + "तमिविधिग्रिविधिस्त्रिकुलीति ।" उणां १ । ११ । इति कालन् ।) देशविशेषः । इत्युणादिकोषः ॥ तस्य व्युत्पत्तिर्यथा । "हर्य्यश्वाख्यनृपस्यासन् पञ्चेन्द्रद्युम्नकाम्पिल्यसंज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते सुतपुत्रा इति पित्राभिहिता इति पञ्चालाः ।" इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (अस्य स्थितिनिर्णय उत्तरकाण्डे यथा,—
"कुरुक्षेत्रात् पश्चिमेषु तथाचोत्तरभागतः ।
इक्षुप्रस्थान्महेन्द्राणि ! दृषद्योजनकद्वये ।
पञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ॥")

पञ्चालाः, पुं, (पञ्चालाः क्षत्रियास्तेषां निवासोजनपदः । निवासेऽणो जनपदे लुप् ।) औशद्गविशेषः । बहुवचनान्तोऽयम् । इति मेदिनी ॥

पञ्चालिका, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल् भूषणे + अच् । टाप् स्वार्थे कन् इत्वञ्च ।) पुत्तली । इत्यमरटीकायां भरतः ॥

पञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलति । आ + अल् भूषणे + अच् । गौरादित्वात् ङीष् ।) वस्त्रादिछादितपुत्रिका । कानिर पुतुल इति भाषा ॥ गीतविशेषः । इति मेदिनी ॥ पांचाली इति भाषा ॥ (पञ्चारी रस्य लत्वे सिद्धम् ।) शारिवृक्षलता । इति त्रिकाण्डशेषः ॥ छक् इति भाषा ॥

पञ्चावटं, क्ली, (पञ्च विस्तृतसुरःस्थलं आवटति वेष्टते इति । आ + वट् + अच् ।) उरस्कटम् । कालोपवीतम् । इति हारावली ॥ (पञ्चानां वटानां वटादिवृक्षाणां समाहारः । निपातनात् साधुः । पञ्चवटी । यथा, गोः रामायणे । ३ । २० । ३८ ।
"विवेश पञ्चावटमध्यसेवितम्
रिपून् दिधक्षुः प्रलयानिवाध्वगः ॥")

पञ्चावस्थः, पुं, (पञ्चसु भूतेषु अवस्था यस्य । तस्य देहारम्भकक्षितिक्षयकारकेषु लयत्वात्तथात्वम् ॥ शवः । इति त्रिकाण्डशेषः ॥ पञ्चावस्थायुक्ते त्रि ॥

पञ्चाशत्, त्रि, (पञ्चदशतः परिमाणमस्य ।) "षट्कतिकतिपयचतिकतिपयादिति ।" ५ । १ । ५९ । निपातनात् साधुः ।) संख्याविशेषः । इति ज्योतिषम् ॥ पचास इति भाषा ॥ (यथा, स्मृतिपञ्चाशति । ५१ ।

"पक्षाद्यङ्गिपिभिः पुरा भगवति ! स्वया यदङ्गी-
कृतं तत्राहं सफलोऽधुनापि विमतिस्तत्पादपद्म-
स्तुतेः ॥")

पक्षाख्यः, पुं, (पक्षं विस्तृतं आख्यं यस्य ।) सिंहः । इत्यमरः । २ । ५ । १० ॥ (पक्षाणि आख्यानि यस्य । शिवः ॥ पक्षसुखविधिष्टे, त्रि । यथा, गोः रामायणे । ५ । ७४ । २३ ।

"लक्षितेयं विशालाक्षी मया श्लोकपरायणा ।
आदायेतां न जानीषे पक्षाख्यामिव भोगि-
नीम् ॥")

पक्षीकरणं, क्ली, पक्षभूतानां भागविशेषेण मिश्री-करणम् । यथा । "पक्षीकरणन्तु आकाशादि-पञ्चस्वेकैकं द्विधा समं विभज्य तेषु दशसु भागेषु मध्ये प्राथमिकान् पञ्चभागान् प्रत्येकं चतुर्द्धा समं विभज्य तेषां चतुर्थो भागानां स्वस्वद्वितीयार्द्धभागं परित्यज्य भागान्तरेषु संयोजनम् । तदुक्तम् ।

द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते ॥ इति ॥
अस्याप्रामाण्यं नाशङ्कनीयं त्रिवृत्करणश्रुतेः पञ्चीकरणस्याप्युपलक्षणार्थत्वात् । पञ्चानां पञ्चात्मकत्वे समानेऽपि तेषु च वैशिष्ट्यात् तद्व्यवस्थादर्शनाद इति न्यायेन आकाशादिव्यपदेशः सम्भवति । तदानीमाकाशे शब्दोऽभिव्यज्यते । वायौ शब्द-स्पर्शौ । अग्नौ शब्दस्पर्शरूपाणि । अप्सु शब्द-स्पर्शरूपरसाः । पृथिव्यां शब्दस्पर्शरूपरस-गन्धाश्च । एतेभ्यः पञ्चीकृतेभ्यो भूतेभ्यः भूर्भुवः स्वर्महर्जनस्तपः सत्यमित्येतन्नामकानाम् पर्य्युपरि विद्यमानानां अतलवितलसुतलरसा तलातलमहातलपातालनामकानां अधोऽधो विद्यमानानां लोकानां ब्रह्माण्डस्य तदन्तर्गत-चतुर्विधस्थूलशरीराणामन्नपानादीनाञ्चोत्पत्ति-र्भवति ॥" इति वेदान्तसारः । ३६-४२ ॥

पञ्चेन्द्रियं, क्ली, पञ्चानां ज्ञानेन्द्रियाणां समाहारः । यथा । "श्रोत्रत्वङ्नेत्ररसनघ्राणां पञ्चेन्द्रियाणि च ।" इति शब्दचन्द्रिका ॥ पञ्चकर्म्मेन्द्रियञ्च ॥

पञ्चेषुः, पुं, (पञ्च इषवो यस्य ।) कामदेवः । इति हलायुधः ॥

पञ्चोपविषं, क्ली, (पञ्चसंख्यकं उपविषम् ।) उप विषपञ्चकम् । यथा, राजनिर्घण्टे ।

"खल्वर्ककरवीराणि लाङ्गली विषमुष्टिका ।
एतान्युपविषाण्याहुः पञ्च पाकित्थपूर्वाणि ॥"

पञ्चोष्माणः, पुं, (पञ्च उष्माणः ।) आहारपाचक शरीरस्थपञ्चाग्नयः । यथा, सारकौमुद्याम ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।
पञ्चाहारगुणान् स्वान् स्वान् पार्थिवादीन् पचन्त्यमु ।
पार्थिवाः पार्थिवानेव शेषाः शेषांश्च देहगान् ॥"

पञ्जरं, क्ली, (पञ्जयते बध्यते उदरयन्त्रमनेन । पञ्जि-रोधे + अरन् ।) कायास्थिस्कन्दम् । शरीरास्थि पञ्जरम् । (यथा, पद्मपुराणे । ६ । १७२ ।

"देहादिपञ्जरं यन्त्रं तदारोहोऽभिमानिता ।
चिच्छायप्रतिबिम्बेषु प्रवृत्तिर्भ्रमजं भवेत् ॥"

पञ्जरः, पुं, (पञ्जयते बध्यते आत्मा यस्मिन् । पञ्जि-रोधे + अरन् ।) शरीरम् । इति चिकाण्ड शेषः ॥ (यथा, हठयोगदीपिकायाम् । ४ । १८ ।

"द्वासप्ततिसहस्राणि नाड़ीद्वाराणि पञ्जरे ।
सुषुम्ना शाम्भवी शक्तिः शेषाश्चैव निरर्थकाः ॥"

"पञ्जरे पञ्जरच्छिद्रास्थिभिर्बद्धे शरीरे ।" इति तट्टीका ॥) देहास्थिसमूहः । तत्पर्य्यायः । कङ्कालः २ देहबन्धास्थि ३ । इति जटाधरः ॥ कलियुगम् । गवां गोराजनाविधिः । इति सार-स्वताभिधानम् ॥

पञ्जराखेटः, पुं, (पञ्जरेणैव यन्त्रेण आखेटो मृगया यस्मात् ।) मनुष्यमारणोपाययन्त्रम् । पोलो इति भाषा । तत्पर्य्यायः । ध्रुवः २ पलवः ३ । इति चिकाण्डशेषः ॥ [राजनिर्घण्टः ॥

पञ्जलः, पुं, (पञ्ज + अलच् ।) कोलकन्दः । इति

पञ्जिः, स्त्री, (पञ्ज + इन् ।) सूचनालिका । इति शब्दमाला । पाँइज इति भाषा । पञ्जिका च ॥

पञ्जिका, स्त्री, (पञ्जि + स्वार्थे कन् टाप् ।) तूलना-लिका । इति हारावली ॥ पाँइज इति भाषा ॥ टीकाविशेषः । यथाह हेमचन्द्रः ।

"टीका निरन्तरव्याख्या पञ्जिका पदभञ्जिका ॥"

अग्रसन्धानी । इति चिकाण्डशेषः ॥ पञ्चाङ्गम् । पाँजि इति भाषा । तत्श्रवणफलं यथा,—

"वारो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गाया योगः सागरसङ्गमः ।
करणं सर्व्वतीर्थानि श्रूयते दिनपञ्जिका ॥"

इति देवज्ञाः ॥

अपि च ज्योतिस्तत्त्वे वराहवचनम् ।

"दुःस्वप्ननाशको वारो नक्षत्रं पापनाशनम् ।
तिथिरायुष्करी प्रोक्ता योगो बुद्धिविवर्द्धकः ॥
चन्द्रः करोति सौभाग्यमंशकः शुभदायकः ।
करणाज्जायते लक्ष्मीं यः शृणोति दिने दिने ॥"

निःशेषपदव्याख्याकारी । तिथिवारादिज्ञापिका । आयव्ययलिखनार्थाय च । इत्यमरटीकायां भरतः ॥

पञ्जिकारकः, पुं, (पञ्जिं करोतीति । कृ + ण्वुल् ।) कायस्थजातिः । यथाह जटाधरः ।

"अथ कायस्थः करणः पञ्जिकारकः ॥"

(अस्य पञ्जिकरणकथा कायस्थशब्दे द्रष्टव्या ॥) पञ्जिकाकारश्च ॥

पञ्जी, स्त्री, (पञ्जि + वा ङीप् ।) पञ्जिः । बालिका । इति शब्दमाला ॥ पञ्जिका । पाँजि इति भाषा । यथोक्तं देवज्ञैः ।

"देवज्ञवक्त्रेण वदत्यसौ पञ्जीं
शुभाशुभं याति शुभीव लक्ष्मीं ॥"

अन्यविशेषः । यथाह भुवनानन्दमिश्रः ।

"प्रणम्य विघ्नेश्वरपादपद्मौ
सरस्वतीं तां कुलदेवताञ्च ।
शिष्यप्रबोधाय कुलस्य पञ्जी
विविच्यते श्रीयुतमिश्रकेण ॥"

पञ्जीकरः, पुं, (पञ्जीं पञ्जिकां करोतीति । कृ + ट: ।) कायस्थः । यथा । "कायस्थे कूटलेख-पञ्जीकरौ ।" इति चिकाण्डशेषः ॥

पट, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं सेट् ।) पटति । इति दुर्गादासः ॥

पट, क लिखि । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) क, पाटयति । लिखि दीप्तौ । इति दुर्गादासः ॥

पट, ऋ क वेष्टने । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) वस्त्रने । इत्यन्ये । पट-यति मालां मालिकः । इति दुर्गादासः ॥

पटं, क्ली, (पटतीति । पट् + पचाद्यच् ।) छदिः । चालम् । इति पटलशब्दटीकायां भरतः ॥

पटः, पुं, क्ली, (पटत्यनेन । पट वेष्टने घञर्थे कः ।) शोभनवस्त्रम् । तत्पर्य्यायः । सुचेलकः २ । इत्यमरः । ७ । ६ । २१६ ॥ (यथा, पद्मपुराणे । ६ । १२ ।

"यथा धौतो घर्षितश्च लाञ्छितो रञ्जितः पटः ।
चित्रत्वमेति विराट् चाला तथैवायं मिलत्यसौ ॥")

चित्रपटः । इति मेदिनी ॥ तस्य लक्षणं यथा,—

"पटस्य लक्षणं वक्ष्ये यथा सिद्धान्ति साधकाः ।
ग्रन्थिकेशविहीने तु अजीर्णे समतन्तुके ॥
अस्फाटिते अच्छिद्रे तु श्लक्ष्णेनैव समालिखेत् ।
योगिनी रूपिणी कार्य्या जयादेः परिवारिता ॥
दृष्टेन च भवेद्दुष्टो व्याधितो व्याधितो भवेत् ।
कुरूपेण कुरूपस्तु मूर्खेण तु न पूज्यते ॥
लेखकस्य तु यद्रूपं चित्रे भवति तादृशम् ॥"

इति देवीपुराणम् ॥

पटः, पुं, पियालवृक्षः । इति मेदिनी ॥ पुरस्कृतः । इति विश्वः ॥

पटकः, पुं, (पटेन छदनेन कायति प्रकाशते इति । कै + कः ।) शिविरम् । इति शब्दमाला ॥

पटकारः, पुं, (पटं शोभनवस्त्रं चित्रं वा करोति यः । पट् + कृ + अण् ।) तन्तुवायः । चित्रकरः ॥

पटकुटी, स्त्री, (पटस्य पटनिर्म्मिता वा कुटी ।) वस्त्रवेश्म । तাঁবু इति भाषा । तत्पर्य्यायः । केलिका २ गुणालयनिका ३ । इति हेमचन्द्रः ॥

पटचरं, क्ली, (भूतपूर्व्वं पटत् । भूतपूर्व्वे चरट् । यद्वा पटदिव्यत्यर्थं शब्दं चरतीति । पटत् + चर + अच् ।) जीर्णवस्त्रम् । इत्यमरः । २ । ६ । ११५ ॥ (पट्यते आवेष्ट्यते इति । पट् + बाहुलकात् अत् । पटदिव चरति यः । चर् + अच् ।) चौरे पुं इत्यमरटीकायां रमानाथः ॥

पटमञ्चः, पुं, (पटानां वस्त्राणां मञ्चः ।) पट-कुटी । इति शब्दचन्द्रिका ॥

पटमयं, क्ली, (पट + मयट् ।) वस्त्रगृहम् । यथा,—

"पटवासः पटमयं कूर्च्यं वस्त्रगृहं स्थलम् ॥"

इति चिकाण्डशेषः ॥

घाटी । यथा, शब्दरत्नावल्याम् ।

"पटवासः पटमयं घाटी घाटक इत्यपि ॥"

पटरकः, पुं, (पटर + स्वार्थे कन् ।) गुञ्जवृक्षः । इति राजनिर्घण्टः ॥

पटलं, क्ली, (पटं विस्तृतं लाति । पट् + ला + "आतोनुपेति" ।३।२।३। कः । यद्वा पटतीति । पट + "लषपतहिभ्यश्छित् ।" उणा ।१।१०८। इति कलच् ।) छदिः । चाल इति भाषा । नेत्ररोगः । इत्यमरः । ३ । ३ । २०० ॥ पिटकः । परिच्छदः । तिलकः । (यथा, कलाविलासे । १ । २५ ।

"अस्तमिते दिवसकरे तिमिरभरविरदसंसक्ता ।
सिन्दूरपटलपाटलकान्तिरिवाशे बभौ सन्ध्या ॥")

सन्दृष्टे क्ली क्ली । इति मेदिनी ॥ (यथा, भागवते । ३ । १४ । २६ ।

"यस्यानवद्याचरितं मनीषिणो
गृणन्त्यविद्यापटलं विभित्सवः ।
निरस्तसाम्यातिशयोऽपि यत् स्वयं
पिशाचचर्यामचरत् गतिः सताम् ॥")

इष्टेरावरकम् । चतुर परदा इति भाषा । यथाह माधवकरः ।

"प्रथमे पटले दोषो यस्य दृष्ट्या व्यवस्थितः ।
अव्यक्तानि स्वरूपाणि कदाचिदपि पश्यति ॥"

दृष्ट्या चत्वारि पटलानि । रक्तरक्ताश्रयं वाह्यं द्वितीयं मांससंश्रयं तृतीयं मेदःसंश्रितं चतुर्थं शुक्लाक्षिसंश्रितम् । तथा च सुश्रुतः ।

"तेजोजलाश्रितं बाह्यं तेष्वन्यत् पिशिताश्रितम् ।
मेदस्तृतीयं पटलमाश्रितं श्लेष्म चापरम् ।
पञ्चमाश्रयजं दृष्टेर्दोषं वाहुर्व्यमिश्रितं ॥"

इति । अत्र तेजःशब्देन रक्तं जलशब्देन रसो व्याख्यातः । तेषु पटलेषु वाह्यादिभेदेनाधिष्ठानविशेषप्रभावात् दोषाणां लिङ्गविशेषमाह प्रथमे पटले इत्यादि । प्रथमे पटले सर्व्वाभ्यन्तरं न तु वाह्ये । इति विजयरक्षितः ॥

पटलः, पुं, क्ली, (पाटयति दीर्य्यते यः । पट् + कलच् ।) ग्रन्थः । वृक्षः । इति शब्दरत्नावली ॥ वृक्षस्थाने द्रुमोऽपि पाठः ॥

पटलप्रान्तं, क्ली, (पटलस्य छदिषः प्रान्तम् ।) गृहचालिकान्तभागः । छाँचि इति भाषा । तत्पर्य्यायः । वलीकम् २ नीव्रम् ३ । इत्यमरः । २ । २ । १४ ॥

पटली, स्त्री, (पटल + ङीष् ।) छदिः । इति भरतहेमचन्द्रौ ॥ चाल इति भाषा ॥

पटवासः, पुं, (पट उप्यते प्राचुर्य्येण दीयते यत्र । पट + वप् + घञ् ।) वस्त्रगृहम् । इति त्रिकाण्डशेषः ॥

पटवासः, पुं, (पटस्य पटनिर्म्मितो वा वासः गृहम् ।) वस्त्रगृहम् । ग्राटी । इति शब्दरत्नावली ॥

पटवासकः, पुं, पटो वास्यतेऽनेनेति घञि पटवासः ततः स्वार्थे कन् । पटवासचूर्णम् । तत्पर्य्यायः । पिष्टातः २ । पिष्टेन कुङ्कुमचूर्णादिना अक्ततीति पिष्टातः पचाद्यच् । इत्यमरभरतौ ॥

पटहं, क्ली पुं, (पटेन हन्यते इति । पट + हन् + ड ।) पटशब्दं जहाति पटहः ड: निपातनात् तलोपः । इति भरतः ॥ आनकवाद्यम् । इत्यमरः । १ । ७ । ६ ॥

पटहः, पुं, (पट इत्यव्यक्तं शब्दं जहाति त्यजतीति । पट + हा + ड ।) पाटयति गमयति योधान् युद्धाय उत्साहवर्द्धकत्वात पट गतौ णाच्चीति अच् । इति भरतः ॥ युद्धे वाद्यमानढक्का । तत्पर्य्यायः । आडम्बरः २ । इत्यमरः । २ । ८ । १०८ ॥ समारम्भः । हिंसनम् । इति शब्दरत्नावली ॥

पटाकः, पुं, (पटति गच्छतीति । पट् + निपातनात् आकः ।) पक्षिविशेषः । इत्युणादिकोषः ॥

पटाका, स्त्री, (पटाक + टाप् ।) पताका । इति शब्दरत्नावली ॥

पटालुका, स्त्री, (पट इव अलतीति । पट् + वाहुलकात् उकः ततष्टाप् ।) जलौका । इति त्रिकाण्डशेषः ॥

पटिः, स्त्री, (पट + इन् ।) पटभेदः । वागुलिः । कुम्भिकाद्रुमः । इति मेदिनी ॥

पटिका, स्त्री, (पटि + स्वार्थे कन् ततः टाप् ।) पटिः । वस्त्रम् । यथा, लीलावती । [पे-

"विस्तारे चिकरा: करार्द्धकमिता दैर्घ्ये विचित्राश्च ये
तैरुत्कटपङ्कजच्छपटिका अष्टौ लभन्ते शतम् ।
दैर्घ्ये सार्द्धकरत्रया परपटी हस्तार्द्धविस्तारिणी
तादृक् किं लभते हतं वद वणिक् वाणिज्यकं वेत्सि चेत् ॥"

पटिष्ठः, त्रि, (अयमेषामतिशयेन पटुः । पट + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटी, स्त्री, (पट + इन् । वा ङीप् ।) वस्त्रभेदः । इति शब्दरत्नावली । यवनिका । इति त्रिकाण्डशेषः ॥

पटीयान्, [स] त्रि, (अयमेषामतिशयेन पटुः । पटु + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटीरं, क्ली, (पटतीति । पट गतौ । "भृञ् पृकटिपटिगोटिभ्य ईरन् ।" उणा । ४ । ३० । इति ईरन् ।) तिनउः । तुङ्गम् । मूलकम् । केदारः । वारिदः । वेणुसारः । वातिकः । चन्दनम् । इति शब्दरत्नावली ॥ खदिरम् । उदरम् । कन्दर्पः । हरगोयम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

पटु, क्ली, (पाटयति । पट गतौ णयन्तः । "फलिपाटीति ।" उणा । १ । १६ । इति उः पटादेशश्च ।) छत्रा । लवणम् । इति मेदिनी ॥ पांशुलवणम् । इति रत्नमाला ॥

पटुः, पुं, (पाटयतीति । पट् + क्विप् + "फलिपाटीति ।" उणा । १ । १६ । इति उः पटादेशश्च ।) पटोलः । इत्यमरः । २ । ४ । १५५ ॥ पटोलपत्रम् । इति विश्वः ॥ काक्कोरलता । कारवेल्लः । चोरकः । इति राजनिर्घण्टः ॥

पटुः, त्रि, (पाटयतीति । पट गतौ । णयन्तः । "फलिपाटीति ।" उणा । १ । १६ । इति उः पटादेशश्च ।) दक्षः । (यथा, रघुः । ६ । ४६ ।

"अनुभवन् नवदोलतलूतूलवं
पटुरपि प्रियकण्ठजिघृक्षया ।
अनयदासनरज्जुपरिग्रहे
सुजनतां जडतामबलाजनः ॥")

नीरोगः । चतुरः । इति मेदिनी ॥ (मधुरः । यथा, रघुः । ६ । ७३ ।

"कुम्भपूरणभवः पटुरस्या
रुक्षचार निनदोऽभ्यसि तस्याः ॥")

तीक्ष्णः । स्फुटः । इति हेमचन्द्रः ॥ निष्ठुरः । इति जटाधरः ॥ धूर्त्तः । इति त्रिकाण्डशेषः ॥

पटुकः, पुं, (पटु + स्वार्थे कन् ।) पटोलः । इति शब्दरत्नावली ॥

पटुकल्पः, त्रि, ईषदूनः पटुः । (पटु + कल्पप् ।) इति व्याकरणम् ॥

पटुजातीयः, त्रि, पटुप्रकारः । (पटु + जातीयर् ।) इति व्याकरणम् ॥

पटुलवणकं, क्ली, (पटु लवणं तत्प्रचुरं लवणम् । ततः कन् ।) लवणलवणम् । इति राजनिर्घण्टः ॥

पटुपञ्चिका, स्त्री, (पटु पञ्चमस्याः कप् । टापि अत इत्वम् ।) क्षुद्रचञ्चुपुः । इति राजनिर्घण्टः ॥

पटुपर्णिका, स्त्री, (पटु पर्णमस्याः । कप् टाप् अत इत्वञ्च ।) क्षीरिणीवृक्षः । इति राजनिघण्टः ॥

पटुपर्णी, स्त्री, (पटुपर्ण + "पाकफलेति ।" ४ । १ । ६४ । इति ङीष् ।) स्वर्णक्षीरी । इत्यमरः । २ । ४ । १३८ ॥

पटरूपः, त्रि, (प्रशस्तः पटुः । पटु + रूपप् ।) अतिशयपटुः । इति व्याकरणम् ॥

पटोटजं, क्ली, (पटस्य छदिषः उटे इगादौ जायते यत् । "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) छत्राकः । इति शब्दरत्नावली ॥

पटोलं, क्ली, (पट गतौ + "कपिगडिगडीति ।" उणा ।१।६७। इति ओलच् ।) वस्त्रभेदः । इति मेदिनी ॥ तस्तु गुज्जरदेशीयविचित्रपटवस्त्रम् ॥

पटोलः, पुं, (पटति वस्तुगुणान् प्रापयतीति । पट गतौ + "कपिगडिगडीति ।" उणा । १ । ६७ । इति ओलच् ।) स्वनामप्रसिद्धलतिकाफलम् । पलवल इति हिन्दी भाषा ॥ (यथा, पञ्चतन्त्रे १ । ५०६ ।

"साध्येव यत्र सिद्धिर्न तत्र दक्षो बुधेन विनियोज्यः ।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन ॥")

तत्पर्य्यायः । कुलकम् २ तिक्तकः ३ पटुः ४ । इत्यमरः । २ । ४ । १५५ ॥ कर्कशफलः ५ कुलजः ६ वालिजमानू ७ लताफलः ८ राजफलः ९ वरतिक्तः १० अम्बुलताफलः ११ । इति रत्नमाला ॥ कटुफलः १२ कटुकः १३ कर्कशच्छदः १४ राजनामा १५ अम्बुफलः १६ पाण्डुः १७ पाण्डुफलः १८ बीजगर्भः १९ नागफलः २० कुलटारिः २१ कासमर्द्दनः २२ पल्लरः २३ आलोफलः २४ ज्योत्स्नी २५ कक्कुभी २६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारकत्वम् । पित्तवलाश्लेष्मकण्डूतिकुष्ठाङ्गज्वरदाहार्त्तिनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

पाचनत्वम्। कृमित्वम्। दृष्यत्वम्। लघुत्वम्। अग्निदीपनत्वम्। स्निग्धत्वम्। कासदोषत्रय-क्रिमिनाशित्वञ्च। तस्य मूलादिगुणाः।

"पटोलस्य भवेन्मूलं विरेचनकरं सुखात्।
नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः॥
दोषत्रयहरं प्रोक्तं तद्वत्तिक्ता पटोलिका॥"

इति भावप्रकाशः॥

अपि च राजवल्लभः।

"पटोलं कफपित्तास्रज्वरकुष्ठव्रणापहम्।
विसर्पनयनव्याधिच्छर्दिदोषगरनाशनौ।
पटोलपलकर्षेति किञ्चिद्गुणान्तरावुभौ॥"

पटोलकः, पुं, (पटोल इव कायति प्रकाशते इति कै+कः।) शुक्तिः। इति शब्दमाला॥

पटोलिका, स्त्री, (पटोल+कन्+टाप्+अत इत्वञ्च।) फलविशेषः। झिङ्गा इति भाषा। पोरल इति ख्याता। इति केचित्। इति भरतः॥ तत्पर्य्यायः। ज्योत्स्नी २ जाली ३। इत्यमरः। २। ४। ११८॥ ज्योत्स्ना ४। इति स्वामी॥

पटोली, स्त्री, (पटोल+जातित्वात् ङीष्।) ज्योत्स्नी। इति मेदिनी॥ (झिङ्गा इति भाषा॥ यथा, गारुडे १६८ अध्याये।

"पटोलीसुक्तकाभ्याञ्च वालकेन च नाशयेत्॥")

पट्टं, क्ली, (पट् गतौ+क्तः। नेट्।) नगरम्। इति शब्दरत्नावली॥

पट्टः, पुं, (पट्+क्तः। नेट्।) पेषणपाषाणः। शिल इति भाषा॥ (यथा, रघुः। १८। १७।

"तस्याभवन् कलुषदारशीलाः
शिलाः शिलापट्टविशालवक्षाः॥")

व्रणादीनां बन्धनम्। पटी इति भाषा॥ चतुष्पथः। चौमाता रास्ता इति भाषा॥ राजादि-प्रासनाग्रम्। पाटा इति भाषा॥ (यथा, मार्कण्डेये। ३६। ८।

"तदास्थाय पुत्र! निष्कृष्य महत्तादङ्गुलीयकात्।
वाच्यस्ते प्रासनं पट्टे क्षत्राचारनिवेशितम्॥")

पीठः। इति मेदिनी॥ पिड़ि इति भाषा॥ फलकः। इति चिकाण्डशेषः॥ ढाल इति भाषा॥ उष्णीषादिः। इति स्वामी॥ पाग् इत्यादि भाषा॥ उत्तरीयादिः। इति भूमिः॥ एक पाटा इति भाषा॥ (यथा, भट्टिः। १०।६०।

"गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम्॥")

कौषेयः। इति मुकुटः॥ पाट रेशम् इति च भाषा। लोहितकौषेयसृणीवादिः। इति भरतः॥ राङ्गा रेशमी पाग् इत्यादि भाषा॥ (नृपादीनां किरीटविशेषस्वरूपपट्टलक्षणं हेमाद्रि-संज्ञितायां ४६ अध्याये उक्तम्। तद्यथा,—

"विस्तरशो निर्हृष्टं पट्टानां लक्षणं यदाचार्य्यैः।
तत् संक्षेपः क्रियते मयाच सकलार्थसम्पन्नः॥
पट्टः शुभदो राज्ञां मध्येऽष्टाङ्गुलानि विस्तीर्णः।
सामन्तेन्द्रमहिष्याः षड्युवराजस्य निर्दिष्टः॥
चतुरङ्गुलविस्तारः पट्टः सेनापतेर्भवति मध्ये।
द्वे च प्रसादपट्टः पञ्च ते कीर्त्तिताः पट्टाः॥
सर्व्वे द्विगुणायामा मध्यार्द्धेन पार्श्वविस्तीर्णाः।
सर्व्वे च शुद्धकाञ्चनविनिर्म्मिताः श्रेयसो हेतोः॥
पञ्चशिखो भूमिपतेस्त्रिशिखो युवराजपार्थिव-महिष्योः।
एकशिखः सैन्यपतेः प्रसादपट्टो विना शिखया॥
क्रियमाणं यदि पत्रं सुखेन विस्तारमेति पट्टस्य।
दृष्ट्विजयौ भूमिपतेस्तथा प्रधानाच्च सुखसम्पत्॥
जीवितराज्यविनाशं करोति मध्ये व्रणः ससुतपत्नः।
मध्ये स्फुटितस्थाभ्यो विपक्षकरः पार्श्वयोः स्फुटितः॥
अशुभनिमित्तोत्पत्तौ ग्राह्यस्त्रः ग्राह्यमादिशेद्-द्राक्षः।
मुक्तनिमित्तः पट्टो नृपराष्ट्रविवृद्धये भवति॥")

पट्टकः, पुं, पट्ट एव इत्यर्थे स्वार्थे कन्। पट्टः॥

पट्टकं, क्ली, (पट्टात् कौषेयात् जायते इति। पट्ट+जन्+ड।) वस्त्रभेदः। पट्टवस्त्रम्। इति जटाधरः॥ (यथा, महाभारते। २।५०।२३।

"और्णञ्च राङ्कवञ्चैव पट्टकं कीटजन्तथा।
कूटोत्तमं तथैवान्यत् कमलाभं सहस्रशः॥")

पट्टदेवी, स्त्री, (पट्टा सिंहासनार्हा देवी।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टनं, क्ली, (पटन्ति गच्छन्ति वणिजो यत्र। पट गतौ+बाहुलकात् तनन्।) पत्तनम्। इति द्विरूप-कोषः॥

पट्टनी, स्त्री, (पट्टन+गौरादित्वात् ङीष्।) पत्तनम्। इति द्विरूपकोषः॥

पट्टरङ्गं, क्ली, (पट्टं वस्त्रं रज्यतेऽनेन। पट्ट+रञ्ज+घञ्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥ वकम् इति भाषा॥

पट्टरञ्जनकं, क्ली, (पट्टानां वस्त्राणां रञ्जनम्। ततः कन्।) पत्तरङ्गम्। इति राजनिर्घण्टः॥

पट्टशाकं, क्ली पुं, (पट्टस्य पट्टवृक्षस्य शाकम्।) नालिताशाकम्। इति शब्दमाला भावप्रकाशश्च॥ अस्य गुणाः नाड़ीचक्रशब्दे द्रष्टव्याः॥

पट्टार्हा, स्त्री, (पट्टे नृपासने अर्हा योग्या।) महादेवी। इति राजनिर्घण्टः॥ पाटराणी इति भाषा॥

पट्टिका, स्त्री, (पट्टिरिव कायति प्रकाशते इति। पट्टि+कै+कः। स्त्रियां टाप्।) पट्टिकाख्य-लोध्रः। इत्यमरटीकायां वाचस्पतिः॥ (क्षुद्रः पट्टः। क्षुद्रार्थे कन्। स्त्रियां टाप् इत्वञ्च। वितस्तिविस्तारं वस्त्रम्। इति त्रिलिङ्गशेषः॥ पट्टः। पाटा इति भाषा। यथा, नैषधे। १८। ६१।

"सर्व्वं विस्मृत्य दैवात् क्षतिसुषसि गतां घोषयन् यो घसंश्चां
प्राक् संस्कारेण सम्यक्त्वयि धुवति शिरः पट्टिकापाठनेन॥")

पट्टिकाख्यः, पुं, (पट्टिका आख्या यस्य।) रक्त-लोध्रः। पाटियालोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ पट्टी ३ लाक्षाप्रसादनः ४। इत्य-मरः। २। ४। ४१॥

पट्टिकालोध्रः, पुं, (पट्टिका एव लोध्रः।) रक्त-लोध्रः। पाटिया लोध इति भाषा। तत्पर्य्यायः। क्रमुकः २ वल्कलोध्रः ३ दृढत्वचः ४ जीर्णपुष्पः ५ दृढत्वक्कः ६ शीर्णपत्रः ७ अस्थिमेवजः ८ शावरः ९ श्वेतलोध्रः १० गालवः ११ दृढत्वचः १२ पट्टी १३ लाक्षाप्रसादः १४ वल्कः १५। इति राजनिर्घण्टः॥ स्थूलवल्कलः १६ जीर्णपत्रः १७ दृढत्वपत्रः १८। इति भावप्रकाशः॥ लोध्रद्वय-गुणाः। कषायत्वम्। शीतत्वम्। वातकफास्र-विषनाशित्वम्। चक्षुष्यत्वम्। तस्य वल्कलीप्रको-विशिष्टः। इति राजनिर्घण्टः॥ ग्राहित्वम्। लघुत्वम्। पित्तरक्तपित्तातीसारव्रणयोनिनाशित्वञ्च। इति भावप्रकाशः॥

पट्टिलः, पुं, (पट्टो विद्यतेऽस्य। पट्ट+अर्श आद्यच्।) पूतिकरञ्जः। इति जटाधरः॥

पट्टिलोध्रः, पुं, (पट्टिरेव लोध्रः।) पट्टिकालोध्रः। इति शब्दरत्नावली॥

पट्टिलोध्रकः, पुं, (पट्टिलोध्र+स्वार्थे कन्।) पट्टिका-लोध्रः। इति शब्दरत्नावली॥

पट्टिशः, पट्टिसः } पुं, (पट् गतौ+बाहुलकात् टिशन्(स) च।) अस्त्रविशेषः। यथा,—

"परशुः पट्टिशो नाम स एव च परश्वधः॥"

इत्यमरटीकायां भरतः॥

(यथा, भागवते। ८। १०। ३६।

"भुशुण्डिभिश्चक्रगदर्ष्टिपट्टिशैः
शक्त्युल्मुकैः प्रासपरश्वधैरपि।
निस्त्रिंशभल्लैः परिघैः ससत्तरैः
सभिन्दिपालैश्च शिरांसि चिच्छिदुः॥")

पट्टी, स्त्री, (पट्टि+वा ङीप्।) पट्टिकालोध्रः। इति राजनिर्घण्टः॥ ललाटभूषा। इति विश्वः॥ तलसारकम्। अश्ववस्त्रःस्थलवन्धनरज्जुः। इति शब्दमाला॥

पट्टी, [न्] पुं, (पट्टोऽस्यास्तीति। इनिः।) रक्त-लोध्रः। इति स्वामी॥ इत्यमरटीकायां भरतः॥

पट्टोलिका, स्त्री (पट्टं पट्टाख्यं उलति प्राप्नोतीति। उल गतौ+ण्वुल् टापि इत्वम्।) कुलफाशाक। अवस्थापत्रं इति केचित्। पाट्टा। इति च केचित्। इति त्रिकाण्डशेषः॥

पठ, वाचि। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पठति श्लोकं धीरः। इति दुर्गादासः॥

पठनं, क्ली, (पठ+भावे ल्युट्।) वाचनम्। पड़न् इति भाषा। यथा, मार्कण्डेये। ६२। १८।

"भूतप्रेतपिशाचानां पठनादेव नाशनम्॥"

पठमञ्जरी, स्त्री, श्रीरागस्य चतुर्थरागिणी। तस्या न्यासांशग्रहाः पञ्चमः। गानसमयस्तु एकप्रहर-दिवोत्तरम्। इति सङ्गीतदर्पणः॥ लक्षणं यथा, सङ्गीतदामोदरे।

"वियोगिनी कान्तविनीर्णपुष्पां
स्रजं वहन्ती वपुषातिसुग्धा।
आन्दोलमाना प्रियया च सख्या
विधूसराङ्गी पठमञ्जरीयम्॥"

पठसमञ्जरी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

पणिः, स्त्री, (पण् + "वर्णधातुभ्य इन् ।" उणा० । ४ । ११७ । इति इन् ।) पठनम् । पाठः । इति शब्दरत्नावली ॥

पठितः, त्रि, (पठ् + क्त ।) वाचितः । ज्ञातपाठः । अधीतः । उच्चरितः । यथा, हारीतार्जुने ।

"मया न पठिता चक्षी त्वया नापि चिकित्सितम् ।
अकस्मान्नगरोपान्ते कथं धूमायते चिता ॥"

पठितव्यं, त्रि, (पठ् + "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) पठनीयम् । पाठ्यम् । यथा, मार्कण्डेये देवीमाहात्म्ये । ८२ । ६ ।

"तस्माज्ज्ञमेतन्माहात्म्यं पठितव्यं समाहितैः ॥"

पड, इ क संहतौ । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पडयति । संहतौ राशीकरणम् । इति दुर्गादासः ॥

पड, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् । इदित् ।) इ, पडते । ङ, पडते । इति दुर्गादासः ॥

पण, ड व्यवहृतौ । स्तुतौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) व्यवहृतौ व्यवहारे । ड, पणते । पणायति पणायते आयान्तत्वादुभयपदमिति बोपदेवः । प्राणानामपणिष्टासौ अत्र कर्मणि षष्ठी । स्तुतौ तु पणायति पणायते विष्णुं वीरः । अरे तु द्वयोरर्थयोरेव आयस्याप्राप्तिपक्षे आत्मनेपदमेव । अपणिष्ट पेणे पणिता पणिषीष्ट पणिष्यते अपणिष्यत । इति दुर्गादासः ॥

पण, पुं, (पणयतेऽनेन । पण व्यवहारे + "जिपण्यमे ।" ३ । ३ । ६६ । इति अप् ।) कार्षिकतान्त्रिकः । स तु पञ्चक्षणालमाषकारब्धताम्रकर्षक्षतव्यवहारद्रव्यम् । पूर्वं हि ताम्रटङ्किकायाः कपर्दक एको मूल्यमिति अग्नीतिवराटमूल्यः । लोके तूपचारात् कार्षापणवत् पणव्यपदेशो मूल्य एव । निर्व्ययः । भृतिः । (पणो मूल्येऽक्षखण्डने । पण + "अर्त्तिपण्यो ऽच् ।" ५ । २ । १२७ । इत्यच् ।) द्यूतम् । मूल्यः । आड् इति छोड् इति वाजि इति च भाषा । (यथा, आर्य्यासप्तशती । ३५४ ।

"प्रतिभूः सुकृती विपत्तौ दक्षः प्रहारसंकथा गुरुषु ।
पुरुषायितं पणस्त्रदबाले परिभाव्यतां हायः ॥"

पणयते व्यवह्रियते इति । "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः ।) मूल्यम् । धनम् । इत्यमरभरतौ ॥ कार्षापणः । (यथा, मनुः । ८ । २२४ ।

"यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्य्यान्नृपो दण्डं स्वयं वसवतिं पणान् ॥")

क्रयशुल्काकाङ्क्षिका । व्यवहारः । इति मेदिनी ॥ विंशतिगण्डकः । इति हेमचन्द्रः ॥ शौल्किकः । इति जटाधरः ॥ गृहम् । इति शब्दमाला ॥ (पणते अधिकारिभेदेन सुखभोगादिकं व्यवहरति साधकस्य सुकृत्यनुसारेण वैकुण्ठवासादिफलं प्रदत्तेऽनेनेत्यर्थः । पचाद्यच् । यद्वा, पण्यते स्तूयते यः । पण स्तुतौ "पुंसीति संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । विष्णुः । यथा, महाभारते । १३ । १४६ । ११५ ।

"ऊर्जस्वः सत्पथाचारः प्राज्ञः प्रणव पण्यः ॥")

पण्यस्त्रियः, पुं, (पण्यस्य विक्रयादेर्यस्त्रियश्च ।) धूर्तः । इति शब्दरत्नावली ॥

पण्यं, क्ली, (पण व्यवहारे + भावे ल्युट् ।) विक्रयः । इति शब्दरत्नावली ॥

पण्यकरं, क्ली, (पण्यात् द्वितीयपञ्चमाष्टमैकादश्यलाभः । यथा, ज्योतिश्शास्त्रे ।

"पण्यकरं द्वितीयाष्टपञ्चमैकादशं विदुः ॥"

पण्यवः, पुं, (पण्यं स्तुतिं वातीति । पण्य + वा + कः ।) गायनपटहः । (यथा, गीतायाम् । १ । १३ ।

"ततः शङ्खाश्च भेर्य्यश्च पण्यवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥")

पण्यव इति केचित् । इत्यमरभरतौ ॥

पण्यवा, स्त्री, (पण्यव + टाप् ।) पण्यवः । यथा,—

"पण्यवः पण्यवा च स्यात् प्रणवोऽप्यत्र वर्णितः ॥"

इति भरतशिरूपकोषः ॥

पण्यसः, पुं, (पण्यायते इति । पण्य + "अत्यविचमीति ।" उणा० । ३ । ११७ । इति असच् ।) पण्यद्रव्यम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पण्याङ्गना, स्त्री, (पण्येन धनेन लभ्या अङ्गना । धनेन वशत्वात् तथात्वम् ।) वेश्या । इति हेमचन्द्रः ॥

पण्याया, स्त्री, (पण्यायते व्यवह्रियते इति । पण्य व्यवहारे स्तुतौ च + स्वार्थे आय + ततो भावे अप् । ततष्टाप् ।) क्रयविक्रयव्यवहारः । इति जटाधरः ॥ (स्तुतिः । द्यूतम् । इति धात्वर्थलाभोऽर्थः ॥)

पण्यायितः, त्रि, (पण्यायते स्म इति । पण्य व्यवहारे स्तुतौ च । "आधादय आर्धधातुके वा ।" ३ । १ । ३१ । इति स्वार्थे आयस्तत: क्तः ।) स्तुतः । इत्यमरः । ३ । २ । १०६ ॥ (व्यवहृतम् । क्रीतम् । विक्रीतम् । इति धात्वर्थलाभोऽर्थः ॥)

पण्यास्थि, क्ली, (पण्यस्य पण्याय वा यदस्थि ।) कपर्दकम् । वराटकः । इति त्रिकाण्डशेषः ॥

पण्यास्थिकं, क्ली, (पण्यास्थि + स्वार्थे कन् ।) वराटकः । इति हेमचन्द्रः ॥

पण्यितं, त्रि, (पण्यते स्म इति । पण्य + क्त । अयाभावपक्षे सिद्धम् ।) स्तुतम् । इत्यमरः । ३ । २ । १०६ ॥ व्यवहृतम् । इति पणधातोरर्थदर्शनात् ॥ (मूल्ये, क्ली । वाजि इति भाषा । यथा, महाभारते १ । सौप्तिके । २२ । ४ ।

"ततस्ते पण्यितं ज्ञात्वा भगिन्यौ द्विजसत्तम ! ।
जग्मतुः परया प्रीत्या परं पारं महोदधेः ॥")

पण्यितव्यं, त्रि, (पण्यते इति । पण व्यवहारे स्तुतौ च । "तव्यत्तव्यानीयरः ।" ३ । १ । ९६ । इति तव्य ।) विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ ॥ क्रोतव्यम् । व्यवहार्य्यम् । इति पणधात्वर्थदर्शनात् ॥

पण्डः, पुं, (पण्डते निष्फलत्वं प्राप्नोतीति । पण्ड् + गतौ + पचाद्यच् । यद्वा पण्ड व्यवहारे । "जमन्ताड्डः ।" उणा० । १ । ११३ । इति डः ।) क्लीवम् । नपुंसकम् । इत्यमरः । २ । ६ । ३६ ॥ निष्फले, त्रि, ॥

पण्डा, स्त्री, (पण्ड व्यवहारे । "जमन्ताड्डः ।" उणा० । १ । ११३ । इति डः । ततष्टाप् ।) बुद्धिः । इति मेदिनी ॥ तत्त्वानुगा बुद्धिः । इति हेमचन्द्रः ॥

पण्डापूर्व्वं, क्ली, (पण्डं निष्फलं अपूर्व्वं अहरम् ।) फलाजनकाहरम् । तद्विशिष्टे त्रि । यथा, "यद्यपि पण्डापूर्व्वं फलमिति तदपि न कामनाभावे अकरणापत्तेस्तौल्यात् ।" इति सिद्धान्तमुक्तावली ॥

पण्डितः, पुं, (पण्डा वेदोक्तज्ञा तत्त्वविषयिणी वा बुद्धिः । सा जाता अस्य । "तदस्य संजातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् । यद्वा, पण्डते तत्त्वज्ञानं प्राप्नोतेऽनात् । पण्ड् + गतौ + क्तः ।) शास्त्रज्ञः । अस्य लक्षणं यथा,—

("निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अ-नास्तिकः श्रद्दधान एतत् पण्डितलक्षणम् ॥"

इति चिन्तामणिः ॥)

"पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥"

इति महाभारते वनपर्व्व ॥

अपि च श्रीभगवद्गीतायाम् । ५ । १८ ।

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥"

तत्पर्य्यायः । विद्वान् २ विपश्चित् ३ दीक्षज्ञः ४ सन्१५ सुधीः ६ कोविदः ७ बुधः ८ धीरः ९ मनीषी १० ज्ञः ११ प्राज्ञः १२ संख्यावान् १३ कविः १४ धीमान् १५ धृतिः १६ मतौ १७ धृष्टः १८ लब्धवर्णः १९ विचक्षणः २० दूरदर्शी २१ दीर्घदर्शी २२ । इत्यमरः । २ । ७ । ५-६ ॥ विधारदः २३ । कवौ २४ धरौ २५ । इति भरतः ॥ विदग्धः २६ दूरदृक् २७ वेदी २८ दृष्टः २९ बुद्धः ३० विधानगः ३१ प्रज्ञिलः ३२ ज्ञप्तिः ३३ । इति शब्दरत्नावली ॥ विज्ञः ३४ मेधावी ३५ । इति राजनिर्घण्टः ॥ सिद्धकः । इति मेदिनी ॥ (सर्व्वज्ञत्वात् महादेवः । यथा, महाभारते । १३ । १७ । १२४ ।

"व्यायनिर्व्यग्रः पादः पण्डितो ह्यचलोपमः ॥")

पण्डितमन्य, त्रि, (आत्मानं पण्डितमन्यते यः । मन्यते स्म इति । मन + क्विप् ।) पण्डिताभिमानी । इति आकरग्रन्थः ॥

पण्डितमानी, [न्] त्रि, (आत्मानं पण्डितं मन्यते इति । मन + णिच् ।) पण्डिताभिमानी । यथा "मूर्खाः पण्डितमानिनः ।" इति प्राचीनाः ॥

पण्यं, त्रि, (पण्यते इति । पण व्यवहारे स्तुतौ च । "अवद्यपण्यवर्य्यागर्ह्यति ।" ३ । १ । १०१ । निपातनात् साधु ।) पणितव्यम् । विक्रेयद्रव्यम् । इत्यमरः । २ । ९ । ८२ । (यथा, रुद्रः रामायणे । २ । ४८ । ४ ।

"न चाक्षुद्यान् न चामोदान् वणिजो न प्रसारयन् ।

पत्

च चाद्योभन्त पण्यानि नापचन् यज्ञमेधिन: ॥") अवहार्यम्। स्तोतव्यम्। इति पणधात्वर्थदर्शनात् ॥ (स्त्री, पण्यते अवक्रियतेऽत्र। पण + यत्। विपणि:। यथा, मनु:। ५। १२६।

"गिर्यं सुह्द: कावहस्त: पण्ये यच्च प्रसारितम् ॥"

"पण्ये पण्यवीथिकायाम्।" इति भरतकभट्ट: ॥)

पण्यवीथिका, स्त्री, (पण्यानां विक्रेयद्रव्याणां वीथिका यत्रम्।) विपणि:। इत्यमर:। २। २। २॥ पण्यविक्रयशाला। इति हलायुध: ॥ चत्र:। इत्यर्थे ॥ विक्रयार्थप्रसारितनानाद्रव्याणां वणिग्वीथी। वाणियाविही इति बाजार इति च ख्यात:। इति केचित्। चत्रमध्यस्थपण्यविक्रयवीथी। इति केचित्। इति तट्टीकायां भरत:॥

"आपण: पण्यवीथी च द्वयं वीथीति संज्ञितम्॥"

इति शाश्वत:॥

पण्यवीथी, स्त्री, (पण्यानां वीथी विक्रयशत्रम्।) क्रयविक्रयस्थानम्। इति शब्दमाला॥

पण्यशाला, स्त्री, (पण्यानां विक्रेयद्रव्याणां शाला यत्रम्।) चत्र:। इति हेमचन्द्र:॥ विक्रयगृहञ्च॥

पण्यस्त्री, स्त्री, (पण्या मूल्येन लभ्या या स्त्री। यद्वा पण्ये चत्रादिस्थले स्थिता स्त्री।) वेश्या। इति कोषान्तरम्॥

पण्या, स्त्री, (पण्यते स्तूयते रोगग्रस्तत्वात्। पण्य ड अवहारे स्तुतौ च + कर्म्मणि यत् ततष्टाप्।) पिण्या। इति द्विरूपकोष:॥

पण्याङ्गना, स्त्री, (पण्या पणेन मूल्येन लभ्या या अङ्गना।) वेश्या। इति हेमचन्द्र:॥

पण्याजीव:, पुं, (पण्ये: क्रयविक्रयद्रव्यैराजीवति प्राणिति। आ + जीव + क:।) क्रयविक्रयिक:। वणिक्। इत्यमर:। २। ६। ७८॥

पण्याजीवकं, क्ली, (पण्ये: क्रयविक्रयद्रव्यैराजीवतितिष्ठतीति। पण्याजीवत्तत: स्वार्थे कन्। अभिधानात् क्लीवत्वम्। यद्वा, पण्याजीवैर्वाणिग्भि: कार्य्यति शब्दायते इति। कै + क:।) चत्र:। इति चिकाण्डशेष:॥ पण्यजीवकमित्यपि पाठ:॥

पण्यान्धा, स्त्री, (पण्यं अन्धयति स्वगुणेन या। अन्ध + अच्।) तृणविशेष:। तत्पर्य्याय:। कङ्गुनीपत्रा २ पण्यधा ३ पत्यधा ४। अस्या गुणा:। समवीर्य्यत्वम्। तिक्तत्वम्। क्षारत्वम्। सारकत्वम्। तत्कालग्राह्यत्वातत्रत्यसंरोपणत्वञ्च।

"दीर्घा मध्या तथा ह्रस्वा पण्यान्धा त्रिविधा स्मृता।
रसवीर्य्यविपाकेषु मध्यमा गुणदायिका॥"

इति राजनिर्घण्टु:॥

पण्यन्धा इत्यपि पाठ:॥

पत [द्] पुं, (पद्यते गच्छत्यनेन। पद्यौ ङ गतौ + करणे क्विप्।) पाद:। इत्यमर:। २। ६। ७१॥ (यथा, मनु:। ४। २०७।

"मत्तक्षुत्तुरावाञ्च न भुञ्जीत कदाचन।
केशकीटावपन्नञ्च पदाभ्याहृतञ्च कामत:॥"

केचित्तु पादशब्दस्य पद् इत्यादेशो भवतीति वदन्ति। अन्येस्तु न मन्यन्ते अत: "पदादय:

पतञ्चि

पृथक्शब्दा इत्येके।" इति सुग्धबोधे बोपदेवेनोक्तम्॥)

पत, ल ऌ गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुम:॥ (भ्वां-परं-अकं-सेट्।) ल, अपतत्। ऌ, पात: पत:। गतिरिह पतनम्। पतति पत्रं वृक्षात्। इति दुर्गादास:॥

पत, तृ क गतौ। ऐश्वर्य्ये। इति कविकल्पद्रुम:॥ (अदन्तचुरां-परं-अकं-सेट्।) ऐश्वर्य्यमिश्वरीभाव:। गतिरिह पतनम्। पतयति पत्रं वृक्षात्। इति दुर्गादास:॥

पत, य ड ऐश्वर्य्ये। इति कविकल्पद्रुम:॥ (दिवादात्मं-अकं-सेट्।) य ड, पत्यते। ऐश्वर्य्यमैश्वर्य्यमिश्वरीभाव:। इति दुर्गादास:॥

पतं, त्रि, (पततीति। पत् + अच्।) पृष्टम्। इति जटाधर:॥ (पतनकर्त्तरि च, त्रि॥)

पतग:, पुं, (पत उत्पतित: सन् गच्छतीति। यद्वा पतेन पक्षेण गच्छतीति। गम् + ड:।) पक्षी। इत्यमर:। २। ५। ३३॥ (यथा, मनु:। ७।२३।

"देवदानवगन्धर्व्वा रक्षांसि पतगोरगा:।
तेपि भोगाय कल्पन्ते दण्डेनैव निपीडिता:॥")

पतङ्गं, क्ली, (पत् ड गत्यैश्वर्य्ययो:। बाहुलकात् अङ्गच्।) सुतम्। पारदम्। इति मेदिनी॥ चन्दनभेद:। इति शब्दचन्द्रिका॥

पतङ्ग:, पुं, (पतति गच्छतीति। "पतेरङ्गच् पक्षिणि।" उणा०। १। ११८। इति अङ्गच्।) पक्षी। (यथा, मार्कण्डेये। १०। ८६।

"तत: सर्व्वेषु निर्ल्लीनै: पापी तिर्य्यक्त्वमभ्युत।
लभिकीटपतङ्गेषु स्थावरे मशकादिषु॥")

सूर्य्य:। (यथा, माघे। १। १२।

"पतत्पतङ्गप्रतिमस्तपोनिधि:
पुरोऽस्य यावन्न भुवि व्यलीयत॥"

"कथं पतङ्ग: सूर्य्य:। खगत्वसामान्योपचारात्।
'पतङ्ग: शलभे सूर्य्ये पतङ्ग: पक्षिणि स्मृत:॥'
इति कोषान्तरम्॥" इत्युज्ज्वलदत्त:॥)

शलभ:। इत्यमर:। ३। ७। २०॥ शालिप्रभेद:। इति मेदिनी॥ जलमधूकवृक्ष:। इति राजनिर्घण्टु:॥

पतङ्गम:, पुं, (पत उत्पतित: सन् गच्छतीति। गम् + खच्। मुम् च।) पक्षी। इति व्याकरणम्॥ (शलभ:। यथा, भागवते। ७। ८।२४।

"अलक्षितोऽग्नौ पतित: पतङ्गमो
यथा तृसिंहौजसि सोऽसुरस्तदा॥")

पतङ्गिका, स्त्री, (पतङ्ग + स्वार्थे संज्ञायां वा कन्। स्त्रियां टाप् अत इत्वञ्च।) मधुमक्षिकाविशेष:। तत्पर्य्याय:। पुत्तिका २। इत्यमर:। २। ५। २७॥ (यथा, महाभारते। १। १०८। १०।

"पतङ्गिकानां पुच्छेषु त्वयेवीका प्रवेशिता।
कर्म्मजस्तस्य ते भ्राम: शलभेतत्तपोधन!॥")

पतञ्चिका, स्त्री, (पतमभिगतं शुक्लमित्यर्थ: चिक्कयति पीड्यति सारोपितशरेणेति यावत्। चिक्क + घञर्थे क। पृषोदरात् साधु:।) धनुर्ज्या। इति शब्दरत्नावली॥

पतञ्जलि

पतञ्जलि:, पुं, (पत: पतन् वा अञ्जलि: नमस्कार्य्यतया यस्मिन्। शाकपार्थिवादित्वात् साधु:।) मुनिविशेष:। स तु पातञ्जलदर्शनपाणिनिटीकामहाभाष्यादिग्रन्थकर्त्ता। तत्पर्य्याय:। गोनर्दीय: २। इति हेमचन्द्र:॥ चूर्णिकृत् ३ भाष्यकार: ४। इति चिकाण्डशेष:॥ वररुचि: ५। इति शब्दरत्नावली॥ (कैश्चिदुच्यते योगसूत्रकारपतञ्जलेर्भाष्यकृत् पतञ्जलिर्भिन्न एव। अनयोरभेदस्तान्त्रिकैर्निर्दिश्यन्ति पाश्चात्या:॥ पातञ्जलयोगशास्त्रन्तु पादचतुष्टयात्मकं तत्र प्रथमे पादे "अथ योगानुशासनम्।" इति योगशास्त्रारम्भप्रतिज्ञां विधाय "योगश्चित्तवृत्तिनिरोध:।" इत्यादिना योगलक्षणसूत्रा सप्रपञ्चसमाधिनिर्द्देशं कृतवान् भगवान् पतञ्जलि:। द्वितीये तु "तप: स्वाध्यायेश्वरप्रणिधानानि क्रियायोग:।" इत्यादिना श्रुत्युक्तचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गाणि साधनानि च निरदिशत्। तृतीये "देशबन्धश्चित्तस्य धारणा।" इत्यादिना धारणाध्यानसमाधित्रयरूपमन्तरङ्गं संयमपदवाच्यं तत्र अवान्तरफलं विभूतिज्ञानञ्च उपदिदेश। चतुर्थे पादे तु "जन्मौषधिमन्त्रतप: समाधिजा: सिद्धय:।" इत्यादिना सविस्तरपञ्चकं मुख्यं प्रयोजनं कैवल्यं प्रधानादीनि पञ्चविंशतितत्त्वानि क्लेशकर्म्मविपाकाशयैरसंश्लिष्टं पुरुषं स्वेच्छया निर्म्माणकायमधिष्ठाय लौकिकादिसम्प्रदायप्रवर्त्तकं संसारदहने दग्धानां जीवानां निस्तारकञ्च उपदिष्टवान्॥)

पतत्त्रं, क्ली, (पतन्तं त्रायते इति। पतत् + त्रै + क:।) पक्ष:। पाखा इति भाषा। इत्यमर:। २। ५। ३६। (यथा, भागवते। ८।११।३४।

"येन मे पूर्व्वमद्रीणां पक्षच्छिद: प्रजात्यये।
क्षतो निर्विण्णनां भारे: पतत्रै: पततां भुवि॥"

(चुं) पत लृ गतौ। "अमिनक्षियजिवधिपतिभ्योऽत्रन्।" उणा०। ३। १०५। इति अत्रन्। वाहनम्। इत्युज्ज्वलदत्त:॥)

पतत्री, [न्] पुं, (पतत्रं पक्षो विद्यतेऽस्य। पतत्र + इनि:।) पक्षी। इत्यमर:। २। ५। ३३॥ (यथा, कुमारे। ५। ४।

"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुन: पतत्रिण:॥")

पतत्रि:, पुं, (पतति उत्पततीति। "पतेरत्रिन्।" उणा०। ४। ६८। इति अत्रिन्।) पक्षी। इत्यमर:। २। ५। ३३॥

पतद्ग्रह:, पुं, (पतत् सुखादिभ्य: स्खलत् जलादि गृह्णातीति। पतत् + ग्रह + अच्।) प्रतिग्राह:। इत्यमर:। २। ३। १६६॥ पिकदानी इति भाषा॥

पतङ्गोक:, पुं, (पतन् पक्षी भीरुर्यस्मात्।) द्रोण:। इति शब्दरत्नावली॥

पतन् [तृ] पुं, (पततीति। पत् + शतृ।) पक्षी। (यथा, महाभारते। २। ३८। २८।

"गच्छतां सुखं यत्र आदित्यस्तेजसां सुखम्।

पर्व्वतानां सुखं मेरुर्गरुड: पततां सुखम् ॥") पतगग्रीले त्रि। इति मेदिनी ॥

पतनं, क्ली, (पत्+भावे ल्युट्।) पात:। पड़न् इति भाषा। यथा,—

"अग्नेर्: पतने न वेदना पतनज्ञानमतीव दु:सहम् ॥"

इत्युद्भट: ॥

"द्विजातिकर्म्मभ्यो ह्रानि: पतनं परत्र चासिद्धिस्तमेकं नरकम्।" इति हारीतसूत्रम् ॥ पापम्। यथा, प्रायश्चित्तविवेके।

"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नर: पतनमृच्छति ॥"

पतम:, पुं, (पतति कर्म्मक्षये यस्मात्। पत्+अम। स्त्रीपुंसयोर्गां चन्द्रलोकात् पतनं ग्राह्ये प्रसिद्धम्।) चन्द्र:। (पततीति। पत्+अम।) पक्षी। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पतयालु:, त्रि, (पत्+"सृहृपतिदयीति।" उणां ३।२।१५८। इति आलच्।) पतनशील:। तत्-पर्य्याय:। पातुक: २। इत्यमर: ।३।२।२७ ॥

पतस:, पुं, (पततीति। "अत्यविचमीति।" उणां ३।११७। इति असच्।) पक्षी। इत्युणादिवृत्ति: ॥ चन्द्र:। पतङ्ग:। इति संक्षिप्तसारोणादिवृत्ति: ॥

पताका, स्त्री, पत्यते ज्ञायते कस्यचित् भेदोऽनया। (पत्+"वलाकादयश्च।" उणां ४।१४। इति आक प्रत्ययेन साधु:।) ध्वजम्। निघण्टु इति भाषा। (यथा, महाभारते ।६।१७।१५।

"श्वेतैश्चत्रै: पताकाभिर्ध्वजवारणवाजिभि:। तान्यनीकान्यशोभन्त राजन्नुपदासिभि: ॥")

तत्पर्य्याय:। वैजयन्ती २ केतनम् ३ ध्वजम् ४। इत्यमर: ।२।८।६६ ॥ पटाका ५ जयन्ती ६ वैजयन्तिका ७ कदली ८ कन्दली ९ केतु: १० कदलिका ११ व्योममङ्गलम् १२। इति शब्दरत्नावली ॥ चिह्नम् १३। इति जटाधर: ॥ केतनं ध्वजं रतद्वयं पताकादण्डे। इति भरत: ॥ सौभाग्यम्। नाटकाङ्कम्। इति मेदिनी ॥ (यथा, साहित्यदर्पणे। ६। २७।

"पताकास्थानकं योज्यं सुविधार्य्यैह वस्तुनि ॥"

रूढ नाटे ॥ तल्लक्षणं यथा तत्रैव। ६। २८।

"यत्रार्थे चिन्तितेऽन्यस्मिंस्तल्लिङ्गोऽन्य: प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत् ॥"

तद्भेदमाह तत्रैव। ६। ३६—३२।

"सहसैवार्थसम्पत्तिर्गुणवत्तुप्रचारत:। पताकास्थानकमिदं प्रथमं परिकीर्त्तितम् ॥"

यथा, रत्नावल्यां 'वासवदत्तेयमिति राजा यदा तत्कण्ठप्राप्तं मोचयति तदा तद्ग्रहा 'सागरिकेयमिति' प्रत्यभिज्ञाय 'कथं प्रिया मे सागरिका अलमलमनिमाचम्' इत्यादि फलरूपार्थसम्पत्ति: पूर्व्वापेक्षया उपचारातिशयात् गुणवती उत्तमा ।१।

यत्र: सानिशयश्चिह्नं नानाबन्धसमाश्रयम्। पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम् ॥

यथा, वेणीसंहारे सूत्रधार:।

'रक्तप्रसादितमुख: शतविद्यश्च

खस्था भवन्तु कुरुराजसुता: सभृत्या:।'

अत्र रक्तादीनां रुधिरशरीरार्थहेतुकत्वेऽपि बीजेन बीजार्थप्रतिपादनात् नेदमङ्गलप्रतिपत्तौ सत्यां द्वितीयं पताकास्थानम्। २।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्।
श्लिष्टप्रश्नोत्तरोपेतं तृतीयमिह्मुच्यते ॥

लीनं अव्यक्तार्थं श्लिष्टेन सम्बन्धयोग्येनाभिप्रायान्तरप्रयुक्तेन प्रश्नोत्तरेणोपेतं सविनयं विधेयनिश्चयप्राप्त्या सहितं सम्पद्यते यत् तत् तृतीयं पताकास्थानम्। यथा, वेणीसंहारे २ अङ्के।

कञ्चुकी। 'देव! भयं भयम्।' राजा। 'केन।' कञ्चुकी। 'भीमेन।' राजा। 'कस्य।' कञ्चुकी। 'भवत:।' राजा। 'आ:! किं प्रलपसि?' कञ्चुकी। (सभयम्) 'देव! नन्नु ब्रवीमि। भयं भीमेन भवत:।' राजा। 'धिक् वृद्धापसद! कोऽयमद्य ते व्यामोह:।' कञ्चुकी। 'देव! न व्यामोह: सत्यमेव। भयं भीमेन भवतो महता रथकेतनम्।

पतितं किङ्किणीकाण्डबद्धाक्रन्दमिवाचिरौ ॥'

अत्र दुर्य्योधनोरुभयरूपप्रस्तुतसङ्क्रान्तमर्थोपक्षेपणम्। ३।

हार्य्यो वचनविन्यास: सुश्लिष्ट: काव्ययोजित:।
प्रधानार्थान्तरापेक्षी पताकास्थानकं परम् ॥"४॥)


अङ्क:। केतु:। इति हेमचन्द्र: ॥ अस्य विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

पताकी, [न्] त्रि, (पताका विद्यतेऽस्य। पताका+इनि:।) वैजयन्तिक:। पताकाधारी। इत्यमर:। २। ८। ७१ ॥ (यथा, महाभारते। ६। १७। २०।

"स तु गोवासन: श्रीय: सहित: सर्व्वराजभि:। ययौ मातङ्गराजेन राजार्हेण पताकिना ॥")

रिष्टारिष्टबोधकचक्रविशेष:। तस्य लिखनक्रमो यथा,—

"तिर्य्यगूर्द्धगता रेखास्तिस्रो देया: पताकया। युता: कार्य्या वेधविदा सर्व्वसङ्क्रमरेखया ॥
दक्षस्योत्तररेखातो वामं मेषाद्राशय:। षष्ठाष्टयुग्मविंशाश्च गृह्यन्ते क्रमिसागरा:।
कर्कटाद्यीनपर्य्यन्तमङ्का देया यथाक्रमम् ॥



बालस्य जन्मकालीनग्रहलग्नसमादिव।
विन्यस्य चिन्तयेत् प्राज्ञ: शुभाशुभं यथाग्रहात्॥"

तच्च शुभाशुभज्ञानं यथा,—

"शुभदृक्कयोगवेधैर्लग्नाद्दशस्य शोभनम्।
पापदृक्कयोगवेधैराग्यङ्गादिदिक्कालवित्।
बलेऽधिके दिनं मध्ये मासो क्षीणे च क्षायनम्॥"

वैधज्ञानं यथा,—

"कर्कोर्णाघशुभार्थाच्च हरे: कीटघटेन च।
स्त्रियास्तौलिझषाभ्याच्च घटे मीनेन कन्यया ॥
धनुषो झषकर्कीभ्यां मकरे धनुषा स्त्रिया।
मीने कर्किंतुलाभ्याच्च मीनस्त्रीधनुषालये ॥
तुलाकर्किझषैर्मेषे कीटकुम्भवृषेषु च।
सिंहवैधेऽयनेषु वामदक्षिणसंमुखै: ॥
राहुकेत्वर्कसौरारे: पापैर्विद्धो युतोऽशुभ:।
तदन्येयुर्नविद्धस्तु लग्नराशि: शुभप्रद: ॥"

दिष्टिकालो यथा,—

"एकोनविंशति: कर्के सिंहे सप्तदशैव तु।
षट्त्रिंशद्बलायाश्च षड्विंशतिस्तुलाधरे ॥
वृश्चिके सिंहवज्ज्ञेयमृजुत्रिंशच्छरासने।
षड्विंशं मकरे ज्ञेयं कुम्भे सप्तदश स्मृता: ॥
नव युग्मे तथा मीने मेषे षड्दशभिस्तथा।
वृषभे च तथा सिंहे युग्मेऽङ्कहरलोचने ॥
त्रितयाङ्कादियं संख्या दिनमासाब्दनिर्णये।
एकाङ्कादिग्रहाङ्काद्या क्वचिद्विद्येव सम्भव: ॥"

अथ यामार्द्धाधिपज्ञानम्।

"वारेशार्द्धयामेषु रात्र्यह्नो: पञ्चषट् क्रमात्।
अधिपा: स्युर्यथाक्षेत्रं भवन्ति ते।
रवीज्येन्दुभृगुज्ञाजशनिभास्करवो निशि ॥
रविभृकुजराज्ञीशेन्दुशनीज्यकुजभास्करा:।
दिने ऊह्या: परश्चैवं तत्राधश्चाश्चतुर्हता: ॥"

अथ दण्डाधिपज्ञानम्।

"पापदृक्के भवेद्दृष्टि: शुभदृक्के शुभं भवेत्।
शुभग्रहस्य दृक्के तु कर्म्मारम्भाश्शुभं भवेत् ॥
यस्यार्द्धयामस्तस्यैव प्राग्दण्ड: सर्व्वदा मत:।
षट् घटं परीत्य दण्डाश्च त्रयो राज्ञां मता यथा ॥
आदित्यभृगुजो बुधोऽपि च शुक्रो सोमे शुनोऽन्यौ कुजौ
भौमेऽर्क: सितसोमजौ च शुक्रजे सोम: शनिर्व्योक्पति:।
जीवेऽङ्गारखरौ भृगुर्भृगुसुते सौम्येन्दुमार्गणजा:
काले जीवमहोऽतिमन्दकिरणा राज्ञो च दण्डाधिपा: ॥

यामार्द्धाधिपसंख्यातो द्वितीयस्तु तदर्द्धक:।
तदर्द्धात्तु तृतीय: स्यात्तदर्द्धात्तु तुरीयक: ॥
अङ्काभावे तु राहु: स्यात् तदङ्को वसुसंयुक:।
भयाङ्कस्य परित्यागाद्दिवादण्डाधिपा यथा ॥

रविदनुजबुधश्लौचन्द्रसुरासुरज्ञा:
कुजरविदनुजज्ञाश्चेन्दुसुरासुराश्च।
गुरुशुक्रिरविदैत्या: शुक्रभौमार्कदैत्या:
शनिकुजरविदैत्या दण्डपाश्चर्क्षयामे ॥"

शुभाशुभदण्डज्ञानं यथा,—

"शुभावर्कस्य दृष्टौ सततशुभकरावादिशौ चन्द्रतश्चेन्दो:
शुभो दृक्: कुजस्याप्यथ गुरुबुधयोरात्मभं प्रशस्तम्।
आदिर्दृक्कस्थयेको भृगुकुलकृपते: सर्व्वकार्य्येषु शस्तो
दण्डाश्चत्वार एते क्वचिदपि समये नैव शौरे: प्रशस्ता: ॥"

पतपताकी यथा,—
"प्रतिदण्डं पलान्येषां ज्ञात्वा वाद्यं क्षिपेच्छनम् ॥
रवौ च वेदा वसवः सुधांशौ
कुजे च वाणाः शशिजे तथाङ्काः ।
गुरावृतुर्दिक् च दृहस्पतौ स्या-
द्दाक्षौ तुरङ्गा भृगुजे च रुद्राः ॥"
बालस्य शुभाशुभफलं यथा,—
"अशुभे दण्डसंयोगे सर्व्वत्र पुण्यवर्जिते ।
बालस्य मरणं शीघ्रं यदि पापैः समन्वितम् ॥
अशुभग्रहदृष्टे तु सर्व्वत्र पापवर्जिते ।
बालस्य कुशलं सर्व्वं शुभैर्यदि समन्वितम् ॥
अशुभो दण्डनाथो हि वेधश्चैतेन लभ्यते ।
मरणं तत्र वक्तव्यं बालस्य नान्यथा भवेत् ॥
पापस्य दण्डमात्रे तु तद्योगवेधवर्जिते ।
बालस्य कुशलं तत्र शुभैर्यदि समन्वितम् ॥"
इति ज्योतिषतत्त्वे पताकीवेधः ॥
(स्त्रियां ङीप् । सेना । यथा, रघुः । ४ । ८२ ।
"न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥")
पतिः, पुं, (पाति रक्षतीति । पा + क्तिच् ।) भूमिः । गतिः । इति त्रिकाण्डशेषः ॥ पाणिग्रहीता । भर्त्ता इति भाषा । तत्पर्य्यायः । धवः २ प्रियः ३ भर्त्ता ४ । इत्यमरः । २ । ६ । ३५ ॥ कान्तः ५ प्राणनाथः ६ गुरुः ७ हृदयेशः ८ जीवितेशः ९ जामाता १० सुखोत्सवः ११ मर्म्मकोलः १२ रत्नगुरुः १३ स्वामी १४ रमणः १५ । इति शब्दरत्नावली ॥ वरः १६ परिणेता १७ गृही १८ । इति राजनिर्घण्टः ॥ तस्य लक्षणम् । विधिवत्पाणिग्राहकः । अनुकूलदक्षिणभृष्टगुणभेदात् पतिश्चतुर्धा । सार्व्वकालिकपराङ्मुखापराङ्मुखत्वे सति सर्व्वकालमनुरक्तोऽनुकूलः । १ । सकलनायिकाविषयसमभक्तिरनुरागो दक्षिणः । २ । भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः । ३ । कामिनीविषयकपटपटुः शठः । ४ । इति रसमञ्जरी ॥ * ॥ पतिसेवादिफलं यथा,—
"कथं मे सुव्रते ! साध्वि ! निद्राभङ्गः कृतस्त्वया ।
यथं व्रतादिकं तस्या या भर्त्तुश्चापकारिणी ॥
तपस्तीर्थव्रतं चैव व्रतं दानादिकञ्च यत् ।
भर्त्तुरप्रियकारिण्याः सर्व्वं भवति निष्फलम् ॥
यथा प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रताव्रतार्थञ्च पतिरूपी हरिः स्वयम् ॥
सर्व्वदानं सर्व्वयज्ञः सर्व्वतीर्थनिषेवणम् ।
सर्व्वं व्रतं तपः सर्व्वमुपवासादिकञ्च यत् ॥
सर्व्वधर्म्मश्च सत्यञ्च सर्व्वदेवप्रपूजनम् ।
तत् सर्व्वं स्वामिसेवायाः कलां नार्हन्ति षोड़शीम् ॥
सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः पुरम् ॥
विप्रियं कुरुते भर्त्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रजाता या तत्फलं शृणुतां सति ! ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्रविवर्ज्जिता ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४१ अध्यायः ॥*॥
अपि च ।
"स्वकान्तश्च परो बन्धुरिह लोके परत्र च ।
नहि कान्तात् परः श्रेयान् कुलस्त्रीणां परो गुरुः ॥
देवपूजा व्रतं दानं तपश्चानशनं जपः ।
स्नानञ्च सर्व्वतीर्थेषु दीक्षा सर्व्वमखेषु च ॥
प्रादक्षिण्यं पृथिव्याश्च ब्राह्मणानभिषेचनम् ।
सर्व्वाण्येतानि पतिसेवायाः कलां नार्हन्ति षोड़शीम् ॥
किमतः पतिभक्तायाः अभक्तायाश्च भारते ।
यया दुःखी सुखारम्भे साकाङ्क्षः प्रथमो भवेत् ॥
पतिसेवापरो धर्म्मो नहि स्त्रीणां श्रुतौ श्रुतम् ।
स्वप्ने ज्ञाने च सततं कान्तं नारायणाधिकम् ।
दृष्ट्वा तच्चरणाम्भोजं सेवां नित्यं करिष्यसि ॥
परिहासेन कोपेन भ्रमेणावज्ञया सुते ! ।
कटूक्तिं स्वामिनः साक्षात् परोक्षान्न करिष्यसि ॥
स्त्रिया वाग्योनिदृष्टाया कामतो भारते भुवि ।
प्रायश्चित्तं श्रुतौ नास्ति नरकं ब्रह्मणः श्रुतम् ॥
सर्व्वधर्म्मपरीक्षा या कटूक्तिं कुरुते पतिम् ।
श्रुतजन्मकृतं पुण्यं तस्या नश्यति निश्चितम् ॥
दत्त्वा कन्यां बोधयित्वा जगाम मुनिपुङ्गवः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २४ अध्यायः ॥
अपि च ।
"या स्त्री भर्त्तुरसौभाग्या सा सौभाग्या च सर्व्वतः ।
भुक्तं भोजनं तस्या न सुखं जीवनं वृथा ॥
यस्या नास्ति प्रियप्रेम तस्या जन्म निरर्थकम् ।
तत् किं पुत्रे धने रूपे सम्पत्तौ यौवनेऽथवा ॥
यत्तस्यास्ति कान्ते च सर्व्वप्रियतमे परे ।
सा सुचिर्धर्म्मशीला च सर्व्वकर्म्मविवर्ज्जिता ॥
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च ।
सर्व्वस्माच्च परः स्वामी न गुरुः स्वामिनः परः ॥
पिता माता सुतो भ्राता स्त्रियो दत्त्वा मितं धनम् ।
सर्व्वसदाता स्वामी च मूढानां योषितां सुराः ! ॥
काचिदेव हि जानाति महासाध्वी च स्वामिनम् ।
अतिसङ्गप्रजाता च सुशीला कुलपालिका ॥
असङ्गप्रसृता या तु दुःशीला धर्म्मवर्জ্জিता ।
सुखदुष्टा योनिदुष्टा पतिं निन्दति कोपतः ॥
या स्त्री हरिं सर्व्वपरं पतिं विष्णुसमं गुरुम् ।
कुम्भीपाकं पचति सा यावदिन्द्राश्चतुर्दश ॥
व्रतस्नानगुणं दानं सत्यं पुण्यं तपश्चिरम् ।
पतिभक्तिविहीनाया भस्मीभूतं निरर्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५७ अध्यायः ॥
अपि च ।
"साध्वी सदंशुजाया च शुभपुत्राधिकः पतिः ।
असङ्गप्रसृता या तु दुःशीला ज्ञानवर्জ্জिता ॥
स्वामिनं मन्यते नासौ पित्रोर्दोषेण कुत्सिता ।
कुत्सितं पतितं मूढं दरिद्रं रोगिणं जड़म् ॥
कुलजा विष्णुतुल्यञ्च कान्तं पश्यति सन्ततम् ॥
हुताशनो वा सूर्य्यो वा सर्व्वतेजस्विनां परः ।
पतिव्रतातेजसश्च कलां नार्हन्ति षोड़शीम् ॥
महादानानि पुण्यानि व्रतान्यनशनानि च ।
तपांसि पतिसेवायाः कलां नार्हन्ति षोड़शीम् ॥
पुत्रो वापि पिता वापि बान्धवो वा सहोदरः ।
योषितां कुलजातानां न कश्चित् स्वामिनः समः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ४४ अध्यायः ॥*॥
पतिदक्षिणादि यथा,—
"निरूपितश्च वेदेषु स्वयम्भो धनवाचकः ।
तद्दक्षस्यास्तीति स स्वामी वेदज्ञ ! ब्रह्मणः ॥
तस्य दाता सदा स्वामी न च स्वं स्वामिनो भवेत् ।
अहो व्यवस्था भवतां वेदज्ञानमबोधताम् ॥
धर्म्म उवाच ।
पत्नीं विना न स्वं साध्वि ! स्वामिनं दातुमक्षमम् ।
दम्पती ध्रुवमेकाङ्गौ तयोर्दाता च द्वौ समौ ॥
निरूपिता पुण्यफलं च व्रते स्वामी च दक्षिणा ।
श्रुतौ श्रुतो यः स्वधर्म्मो विपरीतो न धर्म्मकः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ७ अध्यायः ॥
पतिः, त्रि, (पाति रक्षति पालयतीति वा । "पतेर्डतिः ।" उणा० । ४ । ५७ । इति डतिः ।) अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३ ईशिता ४ अधिभूः ५ नायकः ६ नेता ७ प्रभुः ८ परिवृढः ९ अधिपः १० । इत्यमरः । ३ । ११ । ११ ॥ (यथा, मनुः । ७ । ११५ ।
"ग्रामस्याधिपतिं कुर्य्यात् दशग्रामपतिं तथा ।
विंशतीशं शतेशञ्च सहस्रपतिमेव च ॥")
पतिंवरा, स्त्री, (पतिं वृणीते या सा । वृ + अच् । "संज्ञायां भृञामिति ।" ३ । २ । ४९ । इति सुम् ।) स्वयंवरा । स्वेच्छया पत्यन्वेषिणी । (यथा, रघौ । ६ । १० ।
"मनुष्यवाह्यं चतुरश्रयान-
मध्यास्य कन्या परिचारशोभि ।
विवेश मध्यान्तरराजमार्गं
पतिंवरा कल्पितविवाहवेषा ॥")
ज्ञानजीवकः । इति शब्दचन्द्रिका ॥
पतिघ्नी, स्त्री, (पतिं हन्ति इति । "लक्षणे जायापत्योष्टक् ।" ३ । २ । ५२ । इति टक् ततो ङीप् ।) पतिनाशकहस्तरेखाविशेषः । यथा, "लक्षणे जायापतिभ्याम् । जायाघ्नो हस्तः । पतिघ्नी पार्श्वरेखा ।" इति संक्षिप्तसारव्याकरणम् ॥ स्वामिहन्त्री । (विवाहात् प्राक् चैत्रादिदिनत्रिपञ्चाष्टकस्य कुमार्य्यै परीत्यार्थं दाने तदा ज्ञानाज्ञातत्वे तत्पिष्टस्य ग्रहणे कुमार्य्यास्तस्याः पतिघ्नत्वरूपफलं यथा, आश्वलायनगृह्यसूत्रे १ । ५ । ६ । "अष्टौ पिण्डान् कृत्वा पिण्डानभिमन्त्र्य कुमारीं ब्रूयात् एषामेकं गृहाणेति ।" इति नियोजिता कुमारी यदि ममज्ञानादाहृतां स्वं गृह्णाति तदा पतिघ्नीति तां विद्यात् ॥)
पतितः, त्रि, (पतति भ्रष्टो भवति स्वधर्म्मात् ब्राह्मणविहितकर्म्मणः सदाचारादिभ्यो वा यः । पत् + कर्त्तरि क्तः । स्खलितः । गलितः । पतनाश्रयः । पड़ा इति भाषा । तत्पर्य्यायः । प्रस्कन्नः २ । इति हेमचन्द्रः ॥ पातित्यविशिष्टः । स्वधर्म्मच्युतः । तस्य लक्षणं यथा, मार्कण्डेयपुराणे ।
"स्वधर्म्मं यः समुत्सृज्य परधर्म्मं समाश्रयेत् ।
अनापदि स विज्ञेयः पतितः परिकीर्त्तितः ॥"

पातित्यकारणं यथा, मात्स्ये २०१ अध्याये ।
"चाण्डालान्त्यस्त्रियो गत्वा सुरां च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥"
पतिता यथा,—
"गराग्निविषदाश्चैव पापेभ्यः क्रूरबुद्धयः ।
क्रोधात् प्रायं विषं वह्निं प्रविशन्ति जलम् ॥
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ।
कुक्षिलग्नजीविनश्चैव सूनालङ्कारकारिणः ॥"
तथा,—
"ब्रह्मदग्धहता ये च ये च वै ब्राह्मणेहताः ।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥"
तेषां दाहादिनिषेधो यथा,—
"पतितानां न दाहः स्यान्नाम्बुभिर्नाञ्जिसञ्चयः ।
न चानुपातः पिण्डो वा कार्य्यश्चाद्यादिकं क्वचित् ॥"
इति शुद्धितत्त्वे ब्रह्मपुराणम् ॥ * ॥
तेषां संसर्गनिषेधो यथा, वराहपुराणे ।
"आसनाशयनाच्चैनं भोजनात् कथनादिभिः ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥"
प्रायश्चित्तेतरवैदिककर्म्मानधिकारी सन् नरकभागी । यथा,—
"पतितैः संप्रयुक्तानामिमां प्रकृत निष्कृतिम् ।
सम्वत्सरेण पतति पतितेन सहाचरन् ॥
याजनाध्यापनाद्योनाच्छासनाद्गुणनाशनात् ।
यो येन पतितेनैव संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्य्यात् संसर्गस्य विशुद्धये ॥"
तेषामुदककार्य्यं यथा,—
"पतितस्यौदकं कार्य्यं सपिण्डैर्ज्ञातिभिः सह ।
निन्दितेऽहनि सायाह्ने ज्ञातिभिर्गुरुसन्निधौ ॥
दासीघटमयं पूर्णं पर्य्यस्येत् प्रेतवत् सदा ।
अहोरात्रमुपासीनं नाग्नौचं ब्राह्मणैः सह ॥
निवर्त्तयेरंस्ततस्तस्मात् सम्भाषणसहासनम् ॥"
इति माले २०१ अध्यायः ॥
अन्याभ्या पतिता यथा, मत्स्यपुराणे ।
"पतिता गुरवस्त्याज्या न तु माता कदाचन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥"
द्वादशवार्षिकव्रतनाम्नयपापयुक्तः । तस्य और्द्धदेहिकविधिर्यथा, "पूर्व्वोक्तचान्द्रायणादेः दाहाग्नौचादिनिषेधस्तदानीमेव । वत्सरान्ते तु सर्व्वमौर्द्धदेहिकं कुर्य्यात् ॥
गोब्राह्मणहतानाञ्च पतितानां तथैव च ।
ऊर्द्धं संवत्सरात् कुर्य्यात् सर्व्वमेवौर्द्धदेहिकम् ॥"
इति हेमाद्रौ षट्त्रिंशन्मतात् ॥
एवं स्त्रीक्लीबतानामपि । गयाश्राद्धमपि कार्य्यम् ।
"ब्रह्महा च सुतघ्नश्च गोघाती पक्षपातकी ।
सर्व्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥"
इत्यग्निपुराणात् ॥ * ॥
एवं ब्राह्मेऽपि ।
"क्रियते पतितानान्तु गते संवत्सरे क्वचित् ।
देशधर्म्मप्रमाणत्वात् गयाकूपे स्वबन्धुभिः ॥
मार्गशुक्लपादमूले वा श्राद्धं हरिहरौ स्मरन् ॥"
सूर्य्यपदे इत्यर्थः ॥ * ॥ तत्र वर्षमध्ये मृतस्योक्तमपरार्के वायुपुराणे ।
"शुक्लपक्षे तु द्वादश्यां कुर्य्यात् श्राद्धन्तु वत्सरम् ।
द्वादशाहानि वा कुर्य्यात् शुक्ले च प्रथमेऽहनि ॥"
छागलेयः ।
"नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं गान्धर्येणाब्रवीदृषिः ॥"
व्यासः ।
"नारायणं समुद्दिश्य घृतं वा यत् प्रदीयते ।
तस्य शुद्धिकरं कर्म्म तद्भवेन्नेतरन्यथा ॥"
स चात्मघातादिप्रायश्चित्तं कृत्वा कार्य्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते ।
"कृत्वा चान्द्रायणं पूर्व्वं क्रिया कार्य्या यथाविधि ।
नारायणबलिः कार्य्यो लोकगर्हाभयात् नरैः ॥
पिण्डोदककिया पश्चात् वृषोत्सर्गादिकञ्च यत् ।
एकोद्दिष्टानि कुर्व्वीत सपिण्डीकरणं तथा ॥"
द्विजोदासीये हत्याघातातपस्तु इत्याह ।
"पतिते च मृते शुद्धेः प्राजापत्यान्तु षोडश ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥"
इदं प्रायश्चित्तार्हपित्रादिविषयम् ।
"इन्द्रियैरपरित्यक्ता ये च मूढा विषादिनः ।
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया सम्भविष्यता ।
यथाश्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् ॥
तथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयम्भुवे ॥"
इति हेमाद्रौ तेनैवोक्तेः ॥ * ॥
तत्रैव वौधायनोऽपि । नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा वारिमरणं यत्र यस्य तत्र तत्र कुर्व्वीतेति ॥ * ॥ गरुडपरिशिष्टे तु चण्डालादित्याद्याह,—
"दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तन्तु कर्त्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥"
इत्युक्तम् ॥ * ॥ मदनरत्ने ।
"ब्राह्मणहतानाञ्च द्वादशवर्षाणि त्रीणि वा कुर्व्वीतेति ॥" * ॥ मदनरत्ने ब्राह्मे ।
"प्रमादादपि निःशङ्कैरकस्माद्विधिचोदितः ।
चण्डालैर्ब्राह्मणैर्वीरैर्निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्य्यं यस्मात्र पतितस्तु सः ।
चान्द्रायणं तप्तकृच्छ्रद्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान् पञ्चदश कृत्वा तु विधिना दहेत् ।
मृद्विपूर्व्वमृतानान्तु त्रिंशत्तप्तकृच्छ्रं समाचरेत् ॥"
इत्युक्तम् । स्मृतिरत्नावल्यां तद्द्विगुणं प्रायश्चित्तं कृत्वा और्द्धदेहिकादि सर्व्वं कार्य्यमित्युक्तम् ।
"आत्मनो घातमुद्दिश्य चरेच्चान्द्रायणत्रयम् ।
तप्तकृच्छ्रचतुष्कञ्च त्रिंशत्तप्तकृच्छ्राणि वा पुनः ॥
अर्व्वाक् संवत्सरात् कुर्य्यात् दहनादि यथोदितम् ।
कृत्वा नारायणबलिमनित्यत्वात्ततस्त्यजेत् ॥" इति ॥
इदमात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन सहितं कार्य्यम् । अतएव वौधायनेनोक्तम् । द्वादशवर्षाणि त्रीणि वेति । मदनपारिजाते स्मृत्यर्थसारे च ब्रह्महादीनां तद्दोष्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्य्य इत्युक्तम् । एवं स्त्रीक्लीबतानामपि ॥ * ॥ यत्तु कश्चिदाह । पुत्रक्षतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः । आत्मघाते तु वचनादस्तु । महापातके तु कथं स्यादिति । स स्वयमेव आत्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन सहितस्य वदन् हृदयशून्य एव । नहि जातिवधनिमित्तं पुत्रैः कार्य्यमिति वचनमस्ति पुत्रकर्त्तृकसर्व्वप्रायश्चित्तादिविधानात्तेः । प्राग्युक्तवौधायनवचनाच्चेति दिक् । इदं प्रायश्चित्तार्हाणामेव । प्रायश्चित्तानर्हाणान्तु पतितौदकमात्रं कार्य्यमिति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् । वस्तुतस्तु तदर्हानर्हयोर्व्वचनेऽनुपादानात् अविशेषात् तत्रापि नारायणबलिर्गयाश्राद्धञ्चेति युक्तम् ॥ * ॥ पतितोदकविधिस्तु मिताद्यतिरिक्तविषय इत्यपरे । स यथा । हेमाद्रौ ब्राह्मे ।
"पतितस्य तु कारुण्यात् यस्यापि कर्त्तुमिच्छति ।
स हि दासीं समाकृष्य सर्व्वगां दत्तवेतनाम् ॥
अभुक्तघटदत्तान्नां यथादृष्टं ब्रवीत्यपि ।
हे दासि ! गच्छ मूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटञ्चेमं सतिलं दक्षिणासुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कीर्त्तयेः पातकिसंज्ञां त्वं पितेति सुहृज्जनैः ।
निगृह्य तस्य वाक्यं सा लब्धमूल्या करोति तत् ॥
एवं कृते भवेत्तस्य पतितानां न चान्यथा ॥"
इति ।
इदञ्च मृताहे कार्य्यम् । पतितस्य दासी मृताहि यदा घटमपवर्ज्जयेदेतावतायमुपचरितो भवतीति मदनरत्ने विष्णुः । इदञ्चात्मत्यागिविषयम् । आत्मत्यागिनः पतितास्तेनाग्नौचोदकभाजः स्युरित्युपक्रम्य विष्णुना एतस्याभिधानादिति गौडाः । उपलक्षणत्वात् सर्व्वेषामिति तु युक्तम् । इति निर्णयसिन्धौ ५ परिच्छेदः ॥

पतिवत्नी, स्त्री, (पतिर्विद्यते यस्याः । पति + मतुप् । "अस्मायामेधास्रजो र्णुक् ।" ४ । १ । ३२ । इति निपातनात् वत्वं गुणागमश्च । ततः ।) "ऋन्नेभ्यो ङीप् ।" ४ । १ । ५ । इति ङीप् ।) सभर्त्तृका । मघवा । इत्यमरः । २ । ६ । १२ ॥ (यथा, रघुः । १५ । ३५ ।
"इतरेऽपि रघोर्वंश्याः क्षयरोगाग्निनेजसः ।
तद्योगात् पतिवत्नीषु पत्नीष्वासन् द्विरूपवः ॥")

पतिव्रता, स्त्री, (पतिर्व्रतमिव धर्म्मार्थकामेषु कायवाङ्मनोभिः सदोपास्योऽस्याः ।) स्वाम्यनुरक्ता । तत्पर्य्यायः । सुचरित्रा २ सती ३ साध्वी ४ । इत्यमरः । २ । ६ । ६ ॥ एकपत्नी ५ । इति शब्दरत्नावली ॥ तस्या लक्षणं यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना क्षमा ।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥"
इति शुद्धितत्त्वम् ॥ * ॥
तस्या माहात्म्यं यथा,—
नारद उवाच ।
"कर्म्मणा केन राजेन्द्र ! तपसा वा तपोधन ! ।
उत्तमाञ्च गतिं याति ज्ञानवान् प्रब्रूहि मे ॥
एवमुक्तस्तु धर्म्मात्मा नारदेनाब्रवीत्तदा ।

यम उवाच ।
न तस्या नियमो विप्र ! तपो नैव च सुव्रत ! ।
उपवासो न दानञ्च न क्रमो वा महामते ! ॥
यादृशी तु भवेद्विप्र ! शृणु तत्त्वं समासतः ।
प्रभाते या प्रस्वपिति विबुद्धे जायति स्वयम् ॥
सुरक्ते तु भोजिते विप्र ! सा न स्वपिति शुभ्रवम् ।
मौने मौना भवेद्या तु क्षिप्ते तिष्ठति या स्वयम् ॥
सा न स्वपिति विप्र ! नान्यत् पश्यामि किञ्चन ॥
एकदृष्टिरेकमना भर्तुर्वञ्चनकारिणी ।
तस्या विभीमहे सर्व्वे ये तथान्ये तपोधन ! ॥
देवानामपि सा साध्वी पूज्या परमशोभना ।
भर्त्रा वाभिहिता वापि प्रब्रूयाच्चायिनी भवेत् ॥
वर्त्तमानापि विप्रेन्द्र ! प्रब्रूयाच्चायिनी यदा ।
तदैव तं संत्यजति पतिं गान्यं कदाचन ॥
भर्त्तुर्न्नान्यसुखं ब्रह्मन् ! या पश्यति वराङ्गना ।
एवं याति भवेन्नित्यं भर्त्तुः प्रियहिते रता ॥
अनुविष्टेन भावेन भर्त्तारमनुगच्छति ।
सा तु न्नान्यसुखद्वारं न गच्छेद्ब्रह्मसम्भव ! ॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषते या तु सा मां विजयते सदा ।
पतिव्रता तु या साध्वी तस्याश्चाग्रे कृताञ्जलिः ॥
भर्त्तारमनुध्यायन्ती भर्त्तारमनुगच्छति ।
भर्त्तारमनुशोचन्ती न्नान्यद्वारं न पश्यति ॥
गीतवादित्रकृत्यानि प्रेक्षणीयान्यनेकशः ।
न शृणोति न पश्येत न्नान्यद्वारं न पश्यति ॥
स्नायन्ती तिष्ठती वापि कुर्व्वन्ती वा प्रसाधनम् ।
नान्यच्च मनसा ध्यायेत् कदाचिदपि सुव्रता ॥
देवता वार्चयन्ती वा भोजयन्त्यथ वा द्विजान् ।
पतिं न त्यजते चित्तात् न्नान्यद्वारं न पश्यति ॥
भर्त्तरि चानुस्थिते या तु उत्थाय च तपोधन ! ।
गृहं मार्जयते नित्यं न्नान्यद्वारं न पश्यति ॥
चतुर्दृष्टेः स्वभावञ्च यस्या नित्यं सुसंस्कृतम् ।
शौचाचारसमायुक्ता सापि न्नान्यं न पश्यति ॥
भर्त्तुर्मुखं प्रपश्यन्ती भर्त्तुश्चित्तानुसारिणी ।
वर्त्तते च हिते भर्त्तुर्मृत्युद्वारं न पश्यति ॥
एवं कीर्त्तिमतां लोके शृण्वन्ते दिवि देवताः ।
मानुषाणाञ्च भार्य्या वै तत्र देशे तु शृण्वते ॥
कथितेयं पुरा विप्र ! आदित्येन पतिव्रता ।
मया सङ्क्षेपतो विप्रर्षे ! यथाश्रुतं यथागतम् ॥
शुश्रूषेमन्ततो दृष्ट्वा पूजयामि पतिव्रताम् ॥"

इति वाराहे पतिव्रताचरित्रम् ॥ * ॥

पतिव्रताधर्म्मो यथा,—
"पतिव्रतानां यद्धर्म्मं तन्निबोध व्रजेश्वर ! ।
नित्यं भर्त्तुर्म्मनुकया तत्पादोदकमीप्सितम् ।
भक्तिभावेन सततं भोक्तव्यं तदनुज्ञया ॥
व्रतं तपस्या देवार्च्चां परित्यज्य प्रयत्नतः ।
कुर्य्याच्चरणसेवाञ्च स्नपनं परितोषणम् ॥
तदाचारहितं कर्म्म न कुर्य्यादेरतः सती ।
नारायणात् परं कान्तं ध्यायते सततं सती ॥
परपुंसां पुरश्चैव सुवेषं पुरुषं परम् ।
यात्रामहोत्सवं नित्यं नर्त्तकं गायनं व्रज ।
परस्त्रीञ्च सततं नहि पश्यति सुव्रता ॥

यद्व्रतं स्वामिनो नित्यं तदेवमपि योषिताम् ।
नहि त्यजेत्तु तत्सङ्गं क्षणमेव च सुव्रता ॥
उत्तरे नोत्तरं दद्यात् स्वामिनश्च पतिव्रता ।
न कोपं कुरुते मुह्यन् ताड़नाद्यापि कोपनः ॥
क्षुधितं भोजयेत् कान्तं दद्यात् पानञ्च तोषणे ।
न बोधयेत्तं निद्रालुं प्रेरयत्येव कर्म्मसु ॥
पुत्राणाञ्च व्रतगुणं स्नेहं कुर्य्यात् पतिं सती ।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं कुलयोषितः ॥
शुभं दृष्ट्वा सुधातुल्यं कान्तं पश्यति सुन्दरी ।
सस्मितं वदनं कृत्वा भक्तिभावेन यत्नतः ॥
पुरुषाणां सहस्रञ्च सती स्त्री च समुद्धरेत् ।
पतिः पतिव्रतानाञ्च मुच्यते सर्व्वपातकात् ॥
नास्ति तेषां कर्म्मभोगः सतीनां व्रततेजसा ।
तया सार्द्धञ्च निष्कर्म्मी मोदते हरिमन्दिरे ॥
पृथिव्यां यानि तीर्थानि सतीपादेषु तान्यपि ।
तेजश्च सर्व्वदेवानां सुनीनाञ्च सतीषु च ॥
तपस्विनां तपः सर्व्वं व्रतिनां यत् फलं व्रज ।
दाने फलं यज्ञतृणां तत् सर्व्वं तासु सन्ततम् ॥
स्वयं नारायणः शम्भुर्विधाता जगतामपि ।
सुराः सर्व्वे मुनयो भीतास्ताभ्यश्च सन्ततम् ॥
सतीनां पादरजसा सद्यः पूता वसुन्धरा ।
पतिव्रतां नमस्कृत्य मुच्यते पातकान्नरः ॥
त्रैलोक्यं भस्मसात् कर्त्तुं क्षणेनैव पतिव्रता ।
स्वतेजसा समर्था सा महापुण्यवती सदा ॥
सतीनाञ्च पतिः साध्वीपुत्रो निःशङ्क एव च ।
नहि तस्य भयं किञ्चिद्देवेभ्यश्च यमादपि ॥
मृतवत्सापुण्यवतां गृहे जाता पतिव्रता ।
पतिव्रताप्रसूः पूता जीवन्मुक्ता पिता तथा ॥
सती स्त्री प्रातरुत्थाय स्नात्वा च रात्रिवाससम् ।
भर्त्तारञ्च नमस्कृत्य करोति स्नपनं मुदा ॥
गृहकार्य्यं ततः कृत्वा स्नात्वा धौते च वाससी ।
गृहीत्वा शुक्लपुष्पञ्च भक्तितः पूजयेत् पतिम् ॥
स्नापयित्वा सुपूतेन जलेन निर्म्मलेन च ।
तस्मै दत्त्वा धौतवस्त्रं तत्पादौ क्षालयेन्मुदा ॥
आसने वासयित्वा च दत्त्वा माल्यं गले ऽपि च ॥
सामवेदोक्तमन्त्रेण भोगद्रव्यैः सुधोपमैः ।
संपूज्य भक्तितः कान्तं स्तुत्वा च प्रणमेन्मुदा ॥
'ओं नमः कान्ताय शान्ताय सर्व्वदेवाश्रयाय
स्वाहा ॥'
इत्यनेनैव मन्त्रेण दत्त्वा पुष्पञ्च चन्दनम् ।
पाद्यार्घ्यधूपदीपांश्च वस्त्रं नैवेद्यमुत्तमम् ॥
जलं सुवासितं शुद्धं ताम्बूलञ्च सुसंस्कृतम् ।
दत्त्वा स्तोत्रञ्च प्रपठेत् यत् स्तुतं पाद्मेषु च ॥
ओं नमः कान्ताय शान्ताय शिवचक्रस्वरूपिणे ।
नमः शान्ताय दान्ताय सर्व्वदेवाश्रयाय च ।
नमो ब्रह्मस्वरूपाय सतीप्राणपराय च ।
नमस्कृत्य च पूज्याय क्षुदाधाराय ते नमः ॥
पञ्चप्राणाधिदेवाय चक्षुश्चक्रधराय च ।
सृष्टिसंहारबीजाय पत्नीनां परमानन्दरूपिणे ॥
प्रतिव्रता प्रतिर्विष्णुः पतिरेव महेश्वरः ।
अतस्त्वं निर्गुणाधारो ब्रह्मरूप ! नमोऽस्तु ते ॥

त्वमस्य भगवन् ! दोषं ज्ञानाज्ञानकृतञ्च यत् ।
पत्नीबन्धो ! दयासिन्धो ! दासीदोषं क्षमस्व च ॥
इदं स्तोत्रं महापुण्यं स्नात्वा पद्मया कृतम् ।
सरस्वत्या च धरया गङ्गया च पुरा व्रज ॥
सावित्र्या च कृतं पूर्व्वं ब्रह्मणे चापि नित्यशः ।
पार्व्वत्या च कृतं भक्त्या कैलासे शङ्कराय च ॥
मुनीनाञ्च सुराणाञ्च पत्नीभिश्च कृतं पुरा ।
पतिव्रतानां सर्व्वासां स्तोत्रमेतत् शुभावहम् ॥
इदं स्तोत्रं महापुण्यं यो शृणोति पतिव्रता ।
नरोऽन्यो वापि नारी वा लभते सर्व्वमीप्सितम् ॥
अपुत्रो लभते पुत्रं निर्धनो लभते धनम् ।
रोगी च मुच्यते रोगात् बद्धो मुच्येत बन्धनात् ॥
पतिव्रता च स्तुत्वा च तीर्थस्नानफलं लभेत् ।
फलञ्च सर्व्वतपसां व्रतानाञ्च व्रजेश्वर ! ॥
इदं स्तुत्वा नमस्कृत्य मुच्यते सा तदनुज्ञया ।
उक्तः पतिव्रताधर्म्मो गृहिणां श्रूयतां व्रज ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः ॥ * ॥

पतिव्रतानामानि यथा,—
सूर्य्यस्य सुवर्चला १ शुक्रस्य शुची २ वह्निस्य अरुन्धती ३ चन्द्रस्य रोहिणी ४ अगस्त्यस्य लोपामुद्रा ५ अत्रेरनसूया ६ सत्यवतः सावित्री ७ कपिलस्य श्रीमती ८ मौद्गलस्य मदयन्ती ९ सगरस्य केशिनी १० नलस्य दमयन्ती ११ रामस्य सीता १२ शिवस्य सती १३ नारायणस्य लक्ष्मीः १४ ब्रह्मणः सावित्री १५ रावणस्य मन्दोदरी १६ । इति पुराणान्तरम् ॥
(गायत्रीस्वरूपा भगवती। यथा, देवीभागवते ।
१२ । ६ । ८६ ।
"पतिव्रता पवित्राङ्गी पत्यहासपरायणा ।
प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")

पतेरः, पुं स्त्री, (पतति गच्छतीति । पत्लृ गतौ + "पतिकठिकुटिगडिदंशिभ्य एरक् ।" उणां १ । ५६ । इति कर्त्तरि एरक् ।) पक्षी । गन्तरि त्रि । इत्यु-णादिकोषः ॥

पतेरः, पुं, (पतत्यस्मिन्निति । "पति कठीति ।" उणां १ । ५६ । इति अधिकरणे एरक् ।) आढकः । गर्त्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पतङ्गः, क्ली, (पञ्चमिव अङ्गं यस्य । पृषोदरात्-साधु ।) रक्तचन्दनम् । इति शब्दरत्नावली ॥ वृक्षविशेषः । वकम इति भाषा । तत्पर्य्यायः । पत्राङ्गम् २ रक्तकाष्ठम् ३ सुरङ्गम् ४ पत्रा-ढ्यम् ५ पट्टरङ्गम् ६ भार्य्याहृत् ७ रक्तकः ८ लोहितम् ९ रङ्गकाष्ठम् १० रोगकाष्ठम् ११ कुचन्दनम् १२ पट्टरञ्जनकम् १३ सुरङ्गम् १४ । अस्य गुणाः । कटुत्वम् । रूक्षत्वम् । अम्लत्वम् । शीतत्वम् । गौल्यत्वम् । वातपित्तज्वरविष्फो-टोन्मादभूतनाशित्वञ्च । इति राजनिर्घण्टः ॥
अपि च भावप्रकाशे ।
"पतङ्गस्तु रक्तसारं सुरङ्गं रञ्जनं तथा ।
पटरञ्जनमाख्यातं पत्तूरश्च कुचन्दनम् ॥
पतङ्गं मधुरं शीतं पित्तश्लेष्मव्रणापहम् ।
हरिचन्दनवत्तुल्यं विशेषाद्दाहनाशनम् ॥"

पत्तनं, क्ली, (पत्तन्ति गच्छन्ति जना यस्मिन् । पत लृ गतौ + "वीपतिभ्यां तनन् ।" उणां ३।१५०। इति तनन् ।) नगरम् । इत्यमरः । २।२।१० ॥ (यथा, भागवते । ७ । २ । १४ ।
"पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् ।
खेटखर्वटघोषांश्च ददृशुः पत्तनानि च ॥")
महती पुरी । इति श्रीधरस्वामी ॥ स्टदङ्गः । इति हारावली ॥

पत्तनवणिक्, [ज्] पुं, (पत्तनस्य नगरस्य वणिक् ।) नगरवणिक् । तत्पर्य्यायः । स्वाध्यायी २ । इति त्रिकाण्डशेषः ॥

पत्तिः, पुं, (पद्यते विपक्षसेनां प्रति पद्भ्यां गच्छतीति । पद्यौ ङ गतौ + "पदिप्रथिभ्यां नित् ।" उणां ४ । १८२ । इति तिः स च नित् ।) पदातिकः । इत्यमरः । २।८।६६। (यथा, रघुः । ७।३७।
"पत्तिः पदातिं रथिनं रथेन
स्तुरङ्गसादी तुरगाधिरूढम् ।
यत्रा गजस्याभ्यपतद्गजस्थं
तुल्यप्रतिद्वन्द्वि बभूव युद्धम् ॥" * ॥
पद्यते विपक्षं प्राप्नोतीति । पद् + तिन् ।) वीरः । इति विश्वः ॥

पत्तिः, स्त्री, (पतत लृ गतौ + भावे क्तिन् ।) गतिः । (पद्यते विपक्षो यया । पद् + करणे क्तिन् ।) सेनाविशेषः । यदुक्तं अमरे । २।८।८० ।
"एकैकेभरथा त्राश्वा पत्तिः पञ्चपदातिका ॥"

पत्तिसंहतिः, स्त्री, (पत्तीनां पदातीनां संहतिः ।) पदातिसमूहः । तत्पर्य्यायः । पादातम् २ । इत्यमरः । २।८।६७ ॥

पत्तूरः, पुं, (पतत्यनेन + वातुलकादूरः । निपातनात् तस्य द्वित्वम् ।) घण्टिकाशाकः । इति त्रिकाण्डशेषः ॥ पत्तङ्गे, स्त्री । इति भावप्रकाशः ॥

पत्नी, स्त्री, (पत्यर्थज्ञे सम्बन्धो यया । "पत्युर्नो यज्ञसंयोगे ।" ४।१।३३ । इति नकारादेशः ङीप् च ।) वेदविधानेनोढा । अन्यत्रोपचारात् । पत्या उद्वाहविहितमन्त्रादिना ऊढा । इति भरतः ॥ तत्पर्य्यायः । पाणिगृहीती २ द्वितीया ३ सहधर्म्मिणी ४ भार्य्या ५ जाया ६ दारा ७ सधर्म्मिणी ८ धर्म्मचारिणी ९ दारः १० गृहिणी ११ । इति शब्दरत्नावली ॥ सहचरी १२ गृहः १३ क्षेत्रम् १४ वधूः १५ जनी १६ परिग्रहः १७ ऊढा १८ कलत्रम् १९ । इति हेमचन्द्रः ॥ (पत्नीगुणेनैव हि पुरुषाः सुखिनो भवन्ति । यस्य पत्नी वशानुगा स भूस्थोऽपि स्वर्गस्थः । गृहाश्रमतुल्यं किञ्चिदपि नास्ति यदि तत्र हितकामा पत्नी वर्त्तते । सपत्नीक एव सर्व्वधर्म्मकरणार्हः । यदुक्तं दक्षसंहितायाम् ।
"पत्नीमूलं गृहं पुंसां यदि छन्दोगुवर्त्तिनी ।
गृहाश्रमसमं नास्ति यदि भार्य्या वशानुगा ॥
तया धर्म्मार्थकामानां त्रिवर्गफलमश्नुते ।
प्राकाम्ये वर्त्तमाना तु क्लेशायैव निवारिता ॥
अवश्या सा भवेत् पश्चात् यथा व्याधिरुपेक्षितः ।
अनुकूला च वाग्दुष्टा दक्षा साध्वी प्रियंवदा ॥
आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी ।
अनुकूलकलत्रो यस्तस्य स्वर्गः इहैव हि ॥
प्रतिकूलकलत्रस्य नरको नात्र संशयः ।
स्वर्गेऽपि दुर्लभं तेषां परस्परम् ॥
रक्तश्चको विरक्तोऽन्यस्त्रीसङ्गात् कष्टतरं नु किम् ॥
गृहवासः सुखार्थाय पत्नीमूलं गृहे सुखम् ।
सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्त्तिनी ॥
दुःखदान्या सदा खिन्ना चित्तभेदात् परस्परम् ।
प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ॥
योषित् सर्व्वा अलीकैव भूषणाच्छादनाशनैः ।
सुभूत्यापि कृता नित्यं पुरुषं स्वपकर्षति ॥
अलीका रक्तमाल्ये केवलं सा तपस्विनी ।
इतरा तु धनं वित्तं मांसं वीर्य्यं बलं सुखम् ॥
सप्राङ्गा बालभावे तु यौवने विसुखी भवेत् ।
स्तवत्यन्यते पश्चाद्वृद्धभावे स्वकं पतिम् ॥
अनुकूला च वाग्दुष्टा दक्षा साध्वी पतिव्रता ।
गृहैरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः ॥
या कृष्टमनसा नित्यं स्यानमानविचक्षणा ।
भर्तुः प्रीतिकरी नित्यं सा पत्नी ह्यीतरा ज्वरा ॥")

पत्राटः, पुं, (अटति सुखं विहरति अत्र इति अट + घञ् । ततः पत्राणां अटः ।) पत्रीगृहम् । यदुक्तं त्रिकाण्डशेषे ।
"वासागारं भोगगृहं कन्यापत्राटनिष्कुटाः ॥"

प(च)त्रं, क्ली, (पतति वृक्षात् । पत लृ गतौ + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणां ४।१५८। इति ष्ट्रन् ।) वृक्षावयवविशेषः । पाता इति भाषा । तत् पर्य्यायः । पलाशम् २ छदनम् ३ दलम् ४ पर्णम् ५ छदः ६ । इत्यमरः । २ । ४ । १४ ॥ पाचम् ७ छादनम् ८ वर्हम् ९ वर्हणम् १० पत्रकम् ११ । इति शब्दरत्नावली ॥ * ॥ विष्णवे पत्रविशेषदानफलं यथा नारसिंहे ५२ अध्याये ।
"पत्राण्यपि सपुष्पाणि हरेः प्रीतिकराणि च ।
प्रवक्ष्यामि नृपश्रेष्ठ ! शृणुष्व गदतो मम ॥
अपामार्गपत्रं प्रथमं तस्माद्भृङ्गारकं परम् ।
तस्मात्तु खादिरं श्रेष्ठं ततश्च भ्रमिपत्रकम् ॥
दूर्व्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम् ।
पत्रं तस्माद्दमनकं ततो विल्वस्य पत्रकम् ॥
विल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् ।
एतेषाञ्च यथालाभैः पत्रैर्वा योऽर्चयेद्धरिम् ॥
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥"
देवीप्रीतिकरपत्राणि यथा,—
"अपामार्गस्य पत्रन्तु ततो भृङ्गारपत्रकम् ।
ततोऽपि गन्धिनीपत्रं बलाद्धकमतः परम् ॥
तस्मात् खदिरपत्रन्तु बकुलस्यवकस्तथा ।
आम्रन्तु वकगुच्छन्तु जम्ब्वाः पत्रं ततः परम् ॥
बीजपूरस्य पत्रन्तु ततोऽपि कुशपत्रकम् ।
दूर्व्वाङ्कुरं ततः प्रोक्तं भ्रमीपत्रमतः परम् ॥
पत्रमामलकं तस्माद्दाडिमपत्रमतः परम् ।
सर्व्वतो विल्वपत्रन्तु देयाः प्रीतिकरं मतम् ॥"

इति कालिकापुराणे ६८ अध्यायः ॥ * ॥
तेजपत्रम् । तत्पर्य्यायः । तमालपत्रम् १ पत्रकम् २ छदनम् ३ दलम् ४ पालाशम् ५ अंशुकम् ६ वासः ७ तापसम् ८ सुकुमारकम् ९ वस्त्रम् १० तमालकम् ११ रामम् १२ गोपनम् १३ वसनम् १४ तमालम् १५ सुरभिगन्धिम् १६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातविषवस्तिकृच्छ्रातिदोषनाशित्वम् । सुखमस्तकशोधनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । भावप्रकाशे ।
"पत्रकं मधुरं किञ्चित्तीक्ष्णोष्णं पित्तलं लघु ।
निहन्ति कफवातार्शःकुष्ठासाग्निविषौदसान् ॥"
(पत्र्यते स्थानात् स्थानान्तरं अनेन । पत + "हलश्च-ग्रसगुयुजस्तुदसिसिचमिहपतदशनहः करणे ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।) वाहनम् । शरपक्षः । पक्षिपक्षः । इति मेदिनी ॥ * ॥
(पत्र्यते पात्र्यते ग्राह्यबोधायवर्णनिश्चयोऽनेन । पत + करणे ष्ट्रन् । अक्षरविन्यासात् तथात्वम् । लिखनाधारः । पात् इति भाषा । यथा, ज्योतिस्तत्त्वे ।
"धान्यमासिके तु सम्प्राप्ते भान्तिः संजायते यतः ।
धान्यराशि समानि पत्राण्यत्र पुरा ॥"
धातुमयपत्राक्षरलिपित्रयम् । पतर् इति तबक् इति च भाषा । यथा, तुलापुरुषदाने दानसागरे ।
"सुवर्णपत्राभरणा च कार्य्या
सुलोहपार्श्वध्वजचक्रलाभिः ॥" * ॥
(पात्र्यते स्थानात् स्थानान्तरं समाधारोऽनेन ।) पक्षी । लिपिः । तस्य रक्षणं यथा —
"सुवर्णरूप्यरङ्गादौ रक्षयेत् पत्रमुत्तमम् ।
सामान्योत्तममध्यानां पत्ररक्षणमीरितम् ॥" * ॥
अथ पत्रप्रमाणम् ।
"षड्ङ्गुलाधिकं ह्रस्वं पत्रमुत्तममीरितम् ।
मध्यमं हस्तमात्रं स्यात् सामान्यं सप्तहस्तकम् ॥"
अथ पत्रभङ्गप्रकारः ।
"पत्रन्तु त्रिगुणीकृत्य ऊर्द्धं तु द्विगुणं त्यजेत् ।
शेषभागे लिखेद्वर्णान् गद्यपद्यादिसंयुतान् ॥" * ॥
अथ पत्रस्य रक्षणक्रमः ।
"राजलेखकमाकृष्य नृपो ब्रूयात् प्रयत्नतः ।
पत्रं कुरु यथायोग्यं गद्यपद्यादिसंयुतम् ॥
पण्डितैरुपमानीय लेखको रक्षसि स्थितः ।
यथायोग्यानुसारेण पत्रं कुर्य्यान्मनोरमम् ॥
दिनद्वयं त्रयं वापि विचार्य्य पण्डितैर्नवै ।
स्वभाग्यैर्दूषणं ज्ञात्वा विलिखेत् पत्रपुस्तकं ॥
सामान्यपत्रे संलिख्य रहसि आवयेन्नृपम् ।
नृपाज्ञया शुभे पत्रे विलिखेद्राजलेखकः ॥" * ॥
अथ लेखनप्रकारः ।
"आदौ प्रथमं दद्यात् मङ्गलार्थं विचक्षणः ।
मध्ये बिन्दुसमायुक्तमधः समाक्षरसंयुतम् ॥ ॥
तदधः स्वस्ति विन्यस्य ततो गद्यं सुशोभनम् ।
ततः श्रीशब्दरूपाणि पद्यान्यासक्रमं लिखेत् ॥
भाषया संस्कृतेनैव कुशलं विलिखेत् सुधीः ।
ततः शुभाशुभं वार्त्तां संस्कृतैः प्राकृतैरपि ॥
ततः प्रमाणसन्देशं ततो वार्त्तां नियोजयेत् ।
कीर्त्तिश्लोकसंयुतं पद्यं ततः किमधिकादिकम् ॥
पद्यश्लोकसंयुतं पद्यं ततः किमधिकादिकम् ॥

पत्रं

सर्व्वेषामेव पत्रेषु लिखनञ्चैवमीरितम् ॥
सर्व्वेषामेव पत्राणां विधिं ज्ञात्वा लिखेत्तु यः ।
स्वदेशे कीर्त्तिमाप्नोति तथा देशान्तरेष्वपि ॥
एवं प्राज्ञक्रमं ज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं यशः प्राप्नोत्यनुत्तमम् ॥
प्राज्ञसन्दर्भमज्ञात्वा यो लिखेद्राजपत्रकम् ।
स राजमन्त्रिभिः सार्द्धं दुर्यशो महदाप्नुयात्॥"*॥

अथ पत्रनयनक्रमः ।

"राजपत्रं नयेन्मूर्द्ध्नि ललाटे पाद्यमन्त्रिणाम् ।
गुरुपत्रं नयेन्मूर्द्ध्नि ब्राह्मणानान्तथैव च ॥
यतिसन्न्यासिनाञ्चैव स्वामिनञ्च तथैव च ।
सादरेणैव यत्नेन तथा मूर्द्ध्नि धारयेत् ॥
भार्य्यापुत्रस्य मित्रस्य हृदये धारयेत् सुधीः ।
प्रवीराणां करे देयं पत्रधारणमीरितम् ॥
एतेषाञ्चैव पत्राणामुक्तं धारणलक्षणम् ।
अन्येषामपि पत्राणां नियमो नात्र दर्शितः ॥"

अथ पत्रपठनप्रकारः ।

"पत्रं धृत्वा नमस्कृत्य पूर्ब्बाग्रं स्थापयेत् सुधीः ।
दक्षिणाग्रेण सदसि वृपाग्रे राजलेखकः ॥
पत्रं वितत्य सदसि दिवारं मनसा पठेत् ।
स्फुटं पश्चात् प्रवक्तव्यमक्षोभो राजलेखकः ॥
रहसि श्रावयेत् पत्रं शुभं वा यदि वाशुभम् ।
पत्रं श्रुत्वा विदित्वार्थं सभायां श्रावयेत्ततः ॥
रहस्य-पत्रं रहसि वृपाग्रे श्रावयेद्विजः ।
अशुभं नैव सदसि शुभं पत्रं वृपाज्ञया ॥
एवं क्रमेण पत्रार्थं श्रावयित्वा द्विजोत्तमः ।
वृपतेः सन्निधौ स्थित्वा वृपाज्ञामनुवर्त्तते ॥"

अथ पत्रचिह्नानि ।

"ऊर्द्ध्वं षड्ङ्गुलं त्यक्त्वा वर्त्तुलं चन्द्रविम्बवत् ।
कस्तूरीकुङ्कुमैः कुर्य्याद्राजपत्रं सुचिह्नितम् ॥
मल्लिकां कुङ्कुमेनैव पण्डितस्यैव चन्दनैः ।
गुरूणां चन्दनेनैव सिन्दूरेणैव स्वामिनः ॥
भार्य्यायाश्चाऽलक्तेन चन्दनैः पितृपुत्रयोः ।
भट्टाचार्य्यस्य चन्दनेन यतीनां कुङ्कुमेन च ॥
रक्तचन्दनपङ्केन भृत्यस्य समुदीरितम् ।
गोमयेनैव ब्राह्मणां पत्रचिह्नं प्रकल्पयेत् ॥
एतेषाञ्चैव सर्व्वेषां यथायोग्यानुसारतः ।
पत्रस्थैर्य्यं तु मतिमान् कुर्य्यात् चिह्नं सुवर्त्तुलम्॥"

अथ राजपत्रस्य कोणच्छेदनप्रकारः ।

"दक्षिणे पत्रकोणस्य अधस्तात् छेदयेत् सुधीः ।
एकाङ्गुलप्रमाणेन राजपत्रस्य चैव हि ॥"

अथ राजपत्राङ्के पदन्यासः ।

"महाराजाधिराजस्य दानपत्रं तथैव च ।
तथा सच्चरितं योज्यं कल्पवृक्षादिकं न्यसेत् ॥
यथायोग्यानुसारेण तथैव गुणभेदतः ।
राजपत्रेषु सर्व्वेषु पदन्यासक्रमं विदुः ॥"

अथ मल्लिपत्रस्य ।

"प्रवरं गुणभेदेन तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् प्राज्ञो मल्लिपत्रे पदक्रमम् ॥"

अथ पण्डितस्य ।

"संख्यावद्वन्दितपदं ज्ञात्वार्थनिपुणादिकम् ।
पण्डितानाञ्च पत्रेषु विलिखेद्वै पदक्रमम् ॥"

अथ गुरुपत्रस्य ।

"सांख्यसिद्धान्तनिपुणं सनमस्कारकं पदम् ।
विन्यस्य विलिखेत् प्राज्ञो गुरुपत्रपदक्रमम् ॥"

अथ स्वामिपत्रस्य ।

"प्रवर्य्यं सनमस्कारं प्राणप्रियादिकं पदम् ।
विन्यस्य विलिखेद्धीमान् स्वामिपत्रपदक्रमम् ॥"

अथ भार्य्यापत्रस्य ।

"प्राणप्रियापदं साध्वीं तथा सच्चरितादिकम् ।
भार्य्यापत्रं लिखेद्विद्वान् पदक्रममनुत्तमम् ॥"

अथ पुत्रस्य ।

"प्राणपुत्रपदं तद्वत्तथा सच्चरितादिकम् ।
आशीर्व्वचनसंयुक्तं पुत्रपत्रपदक्रमम् ॥"

अथ पितृपत्रस्य ।

"प्रभुवर्य्यं नमस्कारं तथा सच्चरितादिकम् ।
विन्यस्य विलिखेत् पुत्रः पितृपत्रपदक्रमम् ॥"

अथ साधासियतिपत्रस्य ।

"सर्व्वबाञ्छाविनिर्म्मुक्तं सर्व्वशास्त्रार्थपारगम् ।
सन्न्यासियतिपत्रेषु विलिखेच्च पदक्रमम् ॥"

सामान्यस्य ।

"सामान्यभृत्यपात्राणां विनियोज्यानुकं प्रति ।
शुक्लावशेषितपदं ज्ञानशुल्कादिकं तथा ॥
एतेषामेव पत्रेषु यथायोग्यानुसारतः ।
विन्यस्य विलिखेत् प्राज्ञः पदक्रममनुत्तमम् ॥"

श्रीगुरुविन्याससंख्या यथा,—

"षड् गुरोः स्वामिनः पञ्च दे भार्य्ये चत्वारो रिपौ ।
श्रीगुरुज्ञानां त्रयं मित्रे एकैकं पुत्रभार्य्ययोः ॥"*॥

अथ राज्ञः प्रशस्तिः ।

स्वस्तिगीर्व्वाणचयचूड़ारत्नराजिरोचिश्चुम्बित-चन्द्रचूड़चरणनखेन्दुवृन्दचन्द्रिकासदृक्षहासादचतुरचेतसकोरकवरविषमसमरसङ्कटप्रबलनर-गुरुगाखुरपुटपटलदलितभूपृष्ठोत्थितरुद्धियिष्टधूलि-धाराधूसरितसकलहरिदन्तरप्रचण्डभुजदण्ड-भाजमानखरतरासिवित्रासितप्रत्यर्थिपृथ्वीपति-सार्थप्रार्थितानुकम्पासुधासम्पातानवरतविकृद्धा-दिद्राविद्रावणप्रविरराणविश्राणनसमुपार्ज्जितो-र्ज्जितयशोमरालावलिकवलितवलिदधीचिसञ्चित-यशोऽट्टालमालभूपालकुलतिलकश्रीयुतमहा-राजाधिराजेषु ॥ १ ॥

स्वस्तिप्रचण्डदोर्द्दण्डखण्डखण्डितारिमण्डल-सुखोल्लुक्कसुत्तावशोभिखण्डितसंग्रामाङ्गणपरिङ्गमा-णानेकवारणवाहादिकायकाण्डवल्लरनरुचक्र-चक्रमणदूरनिक्रमणीयापगापतिप्रभृतयशस्चन्द्र-चन्द्रिकाद्योतविद्योतिताखिलजगन्मण्डलविविध-द्रविणार्पणसन्तोषितहरिसमूहस्तूयमानावदात-कीर्त्तिनर्त्तकीनर्त्तनलीलालोलपलितगोतिधुरीणो-र्व्वीशादिवेद्याजनसविलासगीयमानगुणश्रवणा-न्दोलितावलम्बकुण्डलपरिलम्बपलितप्रतापतपनोत्तापितारातितप्तिसमध्यासितनिकुञ्जकुञ्ज-प्रसृतसौन्दर्य्यगाथाप्रमुदितश्रीमन्नारायणचरण-किङ्करश्रीयुतमहाराजदानशौण्डेषु ॥ २ ॥*॥

अथ मन्त्रिप्रशस्तिः ।

स्वस्तिश्रीमत्समस्तसामन्तसेवकनिर्व्याहकेषु ।
कोषगोहस्तिहयौघबलगजवाजिगृहपरिवारहर्ष-हेतुनीतिसेतुरक्षणनिपुणेषु । अखण्डिताखण्डैक-निकेतनेषु श्रीश्रीमन्त्रिप्रवीरेषु आशीराशिनिवे-दनकोऽयं वर्णभृत्योऽत्यं भयमावेदयन् सत्यं भयमयाहतमनुदिनमनुक्षणं पृच्छति स्म ॥ *॥

अथ गुरुप्रशस्तिः ।

स्वस्तिश्रीनारायणपदपाथोरुहनिःसरन्मक-रन्दमधुपायमानमानसेषु । विविधविद्याविद्योति-ताखिलगुणगणालङ्कृतवेदवेदाङ्गपारगस्वाश्रमो-चिताचारसन्यस्तपरमहंसपरिव्राजकाचार्य्यसेव्य-मानश्रीगोविन्दस्वरूपगुरुचरणारविन्देषु कोटि-शः प्रणामाः ॥ *॥

अथ भार्य्यायाः स्वामिप्रशस्तिः ।

स्वस्तिश्रीमद्दामप्रेमहेमभूषितास्मदादिभक्त-जनेषु । कर्णयोरधिष्ठानेषु । नेत्रयोरधिदेवतेषु । कामस्य परिणामेषु । चतुर्व्वर्गप्रदायकेषु । ममा-परूपेषु । श्रीमत्स्वामिचरणारविन्देषु । गोविन्द इवेन्दिरायाः शङ्कर इव गिरिजायाः महेन्द्र इव पुलोमजायाः प्रतिदिनं वर्द्धमाना समाराधना प्रणाममूर्ब्बमास्ताम् ॥ *॥

अथ भर्त्तुर्भार्य्याप्रशस्तिः ।

स्वस्तिश्रीमत्सममस्तप्रेमपरिलावण्यमूर्त्तौ प्रिय-तमायां नेत्रयुग्मस्य कनीनिकायामिव चन्द्रस्य चन्द्रिकायामिव कमलाकरस्य कमलिन्यामिव पथिकस्य छायायामिव क्षुधातुरस्य शीतलाम्बु-धारायामिव मम सप्रेम निवेदयन्ती पत्नी शुभाशीराशीर्निवेदयतु सर्व्वदा ॥ *॥

अथ पुत्रस्य पितरं प्रति प्रशस्तिः ।

स्वस्तिश्रीमदभिनवप्रह्लादचित्तचिन्तितस्त्री-यानुरागानुरञ्जितानुग्रहीतस्वभृत्यवर्गेषु । निज-चरणसरोज-रञ्जितपरागसंरक्तामरादिभाल-स्थलविशालभाग्यसम्भावुकेषु । श्रीयुतपितृचरण-सरोरुहेषु । अकिञ्चित्करकिङ्करस्य मम बहु-करसम्पुटस्यावनीपृष्ठलग्नाः साष्टाङ्गप्रणतयः सहस्रमजस्रं विज्ञापयन्ति च ॥ *॥

अथ पितुः पुत्रं प्रति प्रशस्तिः ।

स्वस्तिश्रीविश्वेश्वरचरणसरोरुहानुग्रहसमा-सादितानिवितानवद्यविद्याविलासपीयूषपर-म्परापराभावुकानुपममाधुरीधुरीणविविधगुणा-लङ्कृतनिजवंशावतंससकलविश्वासनिधाननिज-कुलपवित्रीक्षणनात्मप्रायेषु । श्रीयुतसुज्ञाचारपरि-पूरितपुत्रेषु शुभाशिषां राशयः सन्तु विज्ञा-पयन्ति च ॥ *॥

अथ सन्न्यासियतिप्रशस्तिः ।

स्वस्तिश्रीमत्परमहंसपरिव्राजकाचार्य्यकरुण-निपुणतापराङ्मुखेषु । विषमविषयदोषदर्शन-दूषितप्रपञ्चरचनाविभावेषु । वेदवेदान्तसांख्य-सिद्धान्तबद्धदेवप्रकृतिपुरुषविवेकज्ञानशीलेषु । संख्यावद्भुवनवन्दितचरणारविन्दस्वाश्रमोचिता-चारपरिपालनपवित्रीक्षणधरित्रीतलेषु । सकल-भूदेव-पूजित-श्रीयुत-गोस्वामि-चरणारविन्देषु ।

ममावनीसंलग्नाः साष्टाङ्गप्रणामसहस्रमञ्जसं ओं नमो नारायणायेति मन्त्रेणाकलितमस्तु ॥ * ॥

अथ भृत्यप्रप्रश्नस्तिः ।

१ॐस्तिश्रीभगवच्चरणपरायणसकलद्रविणाधिरक्षकगोमहिष्यादिप्रतिपालकनिखिलवंशानुसेवकवर्गावदासुकभृत्यं प्रति ॥ * ॥

अथारिप्रप्रश्नस्तिः ।

स्तिसमराङ्गनश्रद्धप्रतिभटयशः परिपूरितसकलसामन्तराजधानीविजृम्भितवीरशब्दावधोषितनिजवंशानुरक्तसकलपरिभक्तप्रजारक्षागतासुकं प्रति ॥ * ॥

अथ विवेकिनां प्रश्नस्तिः ।

स्तिश्रीभगवत्पदपङ्कजपूजनोपचितपुण्यपुञ्जपवित्रीकृतात्मनः करणदिगन्तविलासिनीविसरद्भिर्मिलन्मालतीमालाकलापशोभनुबन्धिनिरवधिवसुविश्राणनाधरीकृतसुरपुरभूमीरुहेषु ।

स्तिश्रीमत्परमेश्वरपादपाथोरुहाखादचतुरचित्तचञ्चरीकभूतेन्द्रारकवृन्दावनजनितामिनयशः पटीरपङ्कपटलालङ्कृतदिगङ्गनागण्डस्थलनतटप्रबलप्रतापपौर्वेखर्व्वीकृतप्रत्यर्थिसार्थगर्व्वांकुरापारपारेषु ।" इति वरवच्चितपत्रकौसुदी ॥

पत्रकं, क्ली, (पत्रमेव । पत्र + स्वार्थे कन् ।) वृक्षस्य पत्रम् । पत्रावली । इति शब्दरत्नावली । तेजपत्रम् । अस्य गुणः । कफवायुर्शोशूलासारुचिनाशित्वम् । इति राजवल्लभः । शालिञ्चशाके पुं । इति रत्नमाला ॥

पत्रकाहला, स्त्री, (पत्रकाणां आहला शब्दः ।) पिञ्जोला । पत्रशब्दः । इति हारावली ॥

पत्रक्षुद्रः, पुं, (पत्रैः पत्रकार्यैः साध्यः क्षुद्रोव्रतविशेषः ।) पर्णक्षुद्रव्रतम् । यथा,—

"पलाशोदुम्बरराजीवविल्वपत्रकुशोदकैः ।
प्रत्येकं प्रत्यहं पीतैः पर्णक्षुद्र उदाहृतः ॥"

इति याज्ञवल्क्यः ॥

"पलाशोदुम्बरारविन्द-श्रीवृक्ष-पर्णानामेकैकेन क्वाथितमुदकं प्रत्यहं पिबेत् कुशोदकञ्च एकस्मिन्नहनीति पञ्चाहसाध्यः पर्णक्षुद्रः ।" इति मिताक्षरा ॥

पत्रगुप्तः, पुं, (पत्राणि गुप्तानि यस्य ।) त्रिकण्टः । इति शब्दचन्द्रिका । तेकाँटा सिज् इति भाषा ॥

पत्रघना, स्त्री, (पत्रमेव घनं यस्याः । पत्रबाहुल्यात्तथात्वम् ।) सातलावृक्षः । इति राजनिर्घण्टः ॥

पत्रङ्गं, क्ली, (पत्रमश्नुतेऽनेन । अङ्ग + करणे घञ् । यद्वा पत्रवत् अङ्गं यस्य । पृषोदरादित्वात् साधु ।) पत्राङ्गम् । रक्तचन्दनम् । इति शब्दरत्नावली ।

पत्रभङ्गारः, पुं, (पत्रेषु भङ्गारवत्त्वात् शब्दो यस्य ।) पुरोटिः । इति त्रिकाण्डशेषः । रायभाटी इति भाषा ॥

पत्रभा, स्त्री, (अस्य भाव + अप् अभः । लक्षं प्रतिगमनाय । पत्रैः अभो जीवनमिव यत्र ।) शरपत्ररचना । यथाह हारावली ।

"शूराणां पत्ररचना पत्रभा परिकीर्त्तिता ॥"

पत्रभक्षुली, स्त्री, (पत्रेषु तण्डुलवत् विद्यतेऽस्याः । अर्श-आदित्वादच् । गौरादित्वात् ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः ॥

पत्रभरः, पुं, (पत्रप्रधानस्तरुः । शाकपार्थिववत् समासः ।) दुग्धखदिरः । इति राजनिर्घण्टः ॥

पत्रभारकः, पुं, (पत्रवत् दारयति इत्यणि इति । डु + णिच् + ण्वुल् ।) क्रकचः । इति त्रिकाण्डशेषः । करात इति भाषा ॥

पत्रभाड़िका, स्त्री, (पत्रस्य भाड़िका ।) पत्रशिरा । इति जटाधरः ॥

पत्रभरशुः, पुं, (पत्रे भातुर्निर्मितपशाकारे परशुरिव । तच्छेदकत्वात्तथात्वम् ।) खर्णकारादीनां खर्णादिच्छेदिका । छेनी इति भाषा । तत्पर्य्यायः । व्रश्चनः २ । इत्यमरः । २।१०।३३॥ पत्रपर्शुः ३ । इति शब्दरत्नावली ॥

पत्रभा, स्त्री, (अपत्रपणमिति । अप + त्रप् + अच् । निपातनात् अकारलोपः ।) अपत्रपा । लज्जा । इति शब्दरत्नावली ॥

पत्रभाजः, पुं, (पत्रवत् पत्र्यते प्राप्यतेऽसौ । पत्र + पल गतौ + घञ् ।) आयता छुरिका । इति हेमचन्द्रः । ३ । ४४८ ॥

पत्रभाली, स्त्री, (पत्रवत् पालिरग्रभागो यस्याः ।ङीप्। कर्णनी । इति हलायुधः ॥ काँची इति भाषा ।

पत्रभाषा, स्त्री, (भाषानां समूहः भाषा । पत्रमिव भाषा ।) खर्णादिरचितललाटाभरणम् । इत्यमरः । २।६।१०३ ॥ टीका इति भाषा ॥

पत्रपिण्याकिका, स्त्री, (पत्रैः पत्रेण वा पिण्याकीव । इवार्थे कन् ।) जलजा । टोका इति भाषा । तत्पर्य्यायः । खर्परः २ वारिजा ३ मूर्द्धखोलम् ४ । इति त्रिकाण्डशेषः ॥ मस्तके पलाशपत्रबन्धनम् । यदुक्तं

"बन्धः पलाशपत्राणां शीर्षे पत्रपिण्याकिका ॥"

इति हारावली॥

पत्रपुष्पः, पुं, (पत्रं पुष्पमिव यस्य ।) रक्ततुलसी । इति शब्दचन्द्रिका ॥

पत्रपुष्पकः, पुं, (पत्रपुष्प इव कायते प्रकाशते इति । कै + कः ।) भूर्ज्जपत्रम् । इति शब्दमाला ॥

पत्रपुष्पा, स्त्री, (पत्रपुष्प + स्त्रियां टाप् ।) तुलसी । इति शब्दमाला ॥ क्षुद्रपत्रतुलसी । इति रत्नमाला ॥

पत्रबन्धः, पुं, (पत्राणां बन्धो बन्धनं यस्मिन् । पुष्परचनाकाले हि पत्राणां बन्धनं खादतस्तथात्वम् ।) पुष्परचना । यथा, शब्दरत्नावल्याम् ।

"रचना च परिस्पन्दः पत्रबन्ध इति त्रयम् ।
पत्रभङ्गप्रसूनादिरचनायां निगद्यते ॥"

पत्रबालः, पुं, (पत्रवत् बल्यते धीयतेऽस्मिन् । बल + रत्नये + अधिकरणे घञ् । अयभागे पत्राजातेस्तथात्वम् ।) तुलाघटः । इति त्रिकाण्डशेषः । दाँड़ इति भाषा ॥

पत्रभङ्गः, पुं, (पत्राणां लिखितपत्राजतीनां भङ्गो विचिन्तता यत्र ।) स्तनकपोलादौ कस्तूरिकादिरचितपत्रावली । तत्पर्य्यायः । पत्रलेखा २ पत्रवल्ली ३ पत्रलता ४ पत्राङ्कुली ५ । इति हेमचन्द्रः ॥ पत्राङ्कुलिः ६ पत्रभङ्गी ७ पत्रकम् ८ पत्रभङ्गिः ९ पत्रावली १० । इति शब्दरत्नावली ॥

पत्रभङ्गी, स्त्री, (पत्रभङ्ग + गौरादित्वात् ङीष् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥

पत्रयौवनं, क्ली, (पत्राणां यौवनं यत्र ।) पल्लवम् । नूतनपत्रम् । यथा, जटाधरः ।

"नवोन्नते किंशुलयं किंशुलं पत्रयौवनम् ॥"

पत्ररथः, पुं,क्ली, (पत्रं पक्षो रथो यानमिव यस्य ।) पक्षी । इत्यमरः । २ । ५ । ३३ ॥ (यथा, भागवते । २ । ६ । १३ ।

"चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियम् ।
नलवेणुशरस्तम्बकुशकीचकगह्वरम् ॥")

पत्रलं, क्ली, दध्यम् । अम्लदधि । इति हेमचन्द्रः ॥

पत्रलेखा, स्त्री, (पत्राणां कस्तूरिकादिरचितपत्राजतीनां लेखा रचना ।) पत्रभङ्गः । इत्यमरः ॥ २ । ६ । १०२ ॥ (यथा, रघुः ६ । ७२ ।

"मदेनमाख्याय महीशरूपं
यः संयति प्राप्तपिनाकलीलः ।
चकार वाणैरसृगङ्गनानां
गण्डस्थलीः प्रोषितपत्रलेखाः ॥")

पत्रवल्ली, स्त्री, (पत्राणां रचितपत्राजतीनां वल्लीलतेव ।) पत्रभङ्गः । इति हेमचन्द्रः ।३।३१८॥ (यथा, माघे । ८ । ५६ ।

"गण्डेषु स्फुटरचनाजपत्रवल्ली
पर्य्याप्तं पयसि विभूषणं वधूनाम् ॥")

कदलजटा । पलाशी लता । इति राजनिर्घण्टः ॥ पर्णलता च ॥

पत्रवाहः, पुं, (पत्रेण पत्रच्छदेन उह्यते इति । वह + घञ् ।) बाहुः । इति जटाधरः ॥ (पत्रं लिपिं वहतीति । वह + अण् ।) लिपिवाहके त्रि॥

पत्रशाकः, पुं, (पत्रप्रधानः शाकः । शाकपार्थिववत् समासः ।) षड्विधशाकान्तर्गतपत्रशाकः शाकः यथाह राजवल्लभः ।

"पत्रं पुष्पं फलं नालं कन्दं संक्षेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यादधोत्तरम् ॥"

पत्रशिरा, स्त्री, (पत्रस्य शिरेव ।) पत्रभङ्गः । तत्पर्य्यायः । माटिः २ । इति हारावली ॥ पर्णनाड़ी च ॥

पत्रश्रेणी, स्त्री, (पत्राणां श्रेणीव ।) हवनी । इति राजनिर्घण्टः ॥ पर्णपंक्तिश्च ॥

पत्रश्रेष्ठः, पुं, (पत्रं श्रेष्ठं यस्य ।) विल्वः । इति राजनिर्घण्टः ॥

पत्रसचिः, पुं, (पत्राणां सचिरिव ।) करञ्जकम् । इति त्रिकाण्डशेषः ॥

पत्रसिमं, क्ली, (पत्रेषु सिमं यस्मिन् दिनि ।) सिमदुर्दिनम् । इति त्रिकाण्डशेषः ॥

पत्राख्यं, क्ली, (पत्रमेव आख्या यस्य ।) तेजपत्रम् । इति शब्दचन्द्रिका ॥ तालीशपत्रम् । इति राजनिर्घण्टः ॥

पत्री

पत्राङ्गं, क्ली, (पत्रमिव अङ्गं यस्य । यद्वा पत्रेषु अङ्गतीति । अगि गतौ + अच् ।) रक्तचन्दनम् । रक्तचन्दनवृक्षगुणाः विशेषः । वक्रम् इति भाषा । इत्यमरः । २ । ६ । १३२ ॥ भूर्जम् । पद्मकम् । इति मेदिनी ॥

पत्राङ्गुलिः, स्त्री, (पत्रं अङ्गुलिरिव यत्र । यद्वा अङ्गुलिभिर्लिखितं रचितं पत्रं पत्राङ्गुलितिरत्र इति परनिपातस्तथात्वम् ।) पत्रभङ्गः । क्षणकपोलादौ कस्तूरिकादिरचितपत्रावली । इत्यमरः । २ । ६ । १३२ ॥

पत्राङ्गनं, क्ली, (पत्रं लेखनपत्रमश्नुतेऽनेन । पत्र + अङ्ग + करणे ल्युट् ।) मषी । इति शब्दरत्नावली ॥

पत्राट्यं, क्ली, (पत्रैराढ्यम् ।) पिप्पलीमूलम् । पर्वतहरिद्रम् । इति राजनिर्घण्टः ॥

पत्राढ्यं, क्ली, पत्तङ्गम् । इति राजनिर्घण्टः ॥

पत्रालुः, पुं, (पत्र + अस्त्यर्थे आलुः ।) कासालुः । इक्षुदर्भा । इति राजनिर्घण्टः ॥

पत्रावलिः, स्त्री, (पत्राणां पत्राङ्गतीनां आवलिः पङ्क्तिरिव रचना यस्याः ।) मौरिकम् । इति शब्दचन्द्रिका ॥ (पत्राणां आवलिः श्रेणी राजिर्वा ।) पत्रश्रेणी च ॥

पत्रावली, स्त्री, (पत्रावलि + वा ङीप् ।) पत्रभङ्गः । इति शब्दरत्नावली ॥ नवदुर्गासम्प्रदानकमधुमिश्रितयवचूर्णयुक्तनवान्नत्यपत्राणि । यथा,—

"अमायां निशि संधे तु पक्वे चाश्वत्थसंज्ञके ।
क्रमात् पत्रावली देयं मधुना यवचूर्णकम् ॥"
इति कौलज्ञानतन्त्रम् ॥

देवादिसन्निधौ सन्दिग्धवस्तुनोरेकतरावधारणार्थं कन्याबालबालकोक्तोक्तिततत्तत्सन्देहकोटिलिखितपत्रसन्दृष्ट्य ॥

पत्रिका, स्त्री, (पत्री एव । स्वार्थे कन् ततो टाप् ।) पत्री । लिपिः । यथा, ज्योतिषे ।

"आदित्यादिग्रहाः सर्वे नक्षत्राणि च राशयः ।
दीर्घमायुः प्रयच्छन्तु यस्येयं जन्मपत्रिका ॥"
(प्रशस्तपत्रं विद्यते यस्याः । पत्र + विद्यमानार्थे ठन् । कदल्यादिनवपत्रिका । यथा, दुर्गोत्सवपद्धतौ ।

"कदली दाड़िमी धान्यं हरिद्रा मानकं कचु ।
विल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका ॥")

पत्रिकाख्यः, पुं, (पत्रिका आख्या यस्य ।) कर्कोटभेदः । इति राजनिर्घण्टः ॥ पत्रिकानामके त्रि ॥

पत्रिणी, स्त्री, (पत्राणि सन्त्यस्याः । पत्र + इनिः । स्त्रियां ङीप् ।) पल्वलः । इति शब्दचन्द्रिका ॥

पत्री, [न्] पुं, (पत्रं पक्षो विद्यतेऽस्य । पत्र + इनिः ।) बाणः । (यथा, रघुः । ११ । ८४ ।

"शुंस किं गतिमनेन पत्रिणा
क्षिप्त लोकशतके मयाऽर्जितम् ॥")

पक्षी । इत्यमरः । २ । ५ । १०५ ॥ (यथा, रघुः ११ । २६ ।

"तं चुरप्रक्रान्तशीर्षं पतन्तं
पत्रिणां प्रभवदाप्रमाद्रिः ॥")

पथिक

ग्रेणः । (यथा, नैषधे । १६ । १२ ।

"नभसि मरुतां धावत्धावद्दृषत्प्रमापणपत्रिणा-
मिह विहरणैः श्रेणीभूतां रवेरवधारयन् ॥"
"पत्रिणां श्रेणीवत्पथिरूपाणाम् ।" इति तट्टीकायां नारायणः ॥ पत्राणि पक्षदानि सन्त्यस्य । अत इनिः ।) वृक्षः । रथी । पर्वतः । इति मेदिनी ॥ तालः । श्वेतकिञ्जिही । गङ्गापर्णी । पाची । इति राजनिर्घण्टः ॥ पत्रविशिष्टे, त्रि ॥

पत्री, स्त्री, (पत्र + स्त्रियां ङीप् ।) लिपिः । पत्रम् । यथा, ज्ञातके ।

"श्रीमत्पद्मजिनोपतिः कुसुदिनीप्राणेश्वरो
भूभवः
ग्राग्राङ्गिः सुरराजवन्दितपदो दैत्येन्द्रमन्त्री शनिः ।
स्वर्भानुः शिखिनां गणो गणपतिर्ब्रह्मेशलक्ष्मीधरा-
र्क्षां रक्षन्तु सदैव यस्य विमला पत्री मया
लिख्यते ॥"

पत्रोपस्करः, पुं, (पत्रमेव उपस्करः उपकरणं यस्य ।) कासमर्दः । इति त्रिकाण्डशेषः ॥

पत्रोर्णं, क्ली, (पत्रेषु ऊर्णा यस्य । "अर्श आदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) वटलकुचादिपत्रेषु क्रिमिभिरुर्णायाः जातत्वात् पत्रसम्बन्धिनी ऊर्णा अर्थात् । इति भरतः ॥ पौतकौशेयम् । इत्यमरः । २ । ६ । ११३ ॥ (यथा, महाभारते । १३ । १११ । १०३ ।

"पत्रोर्णं चीरयित्वा तु क्रकरत्वं नियच्छति ॥")

पत्रोर्णः, पुं, (पत्रेषु ऊर्णा यस्य ।) श्रोणाकवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

पत्सलं, क्ली, (पतति गच्छति अस्मिन् । पत लृ गतौ + "पते रश्च लः ।" उणा । ३ । ७४ । इति सरन् रस्य लश्च ।) पन्थाः । इत्युणादिवृत्तिः ॥

पथ, इ क गत्याम् । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् । इदित् ।) इ क, पन्थयति । इति दुर्गादासः ॥

पथ, इ ञ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ज्वलादिः ।) इ, अपथीत् । ञ, पाथः पथः । इति दुर्गादासः ॥

पथः, पुं, (पथति गच्छति अत्र । पथ गतौ + घञर्थे अधिकरणे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

पथन्, [न्] पुं, पथः । इत्यमरटीका ॥ (पथति गच्छति । पथ गतौ + ग्रहः ।) गमनकर्त्ता च ॥

पथिकः, त्रि, पन्थानं गच्छति यः । (पथिन् + "पथः ष्कन् ।" ५ । १ । ७५ । इति ष्कन् पो ङीषर्थः ।) पथयात्री । (यथा, गोः रामायणे । १ । ५ । १० ।

"नानापथिकदूतैश्च वणिग्भिश्चोपशोभिताम् ।
देवतायतनैश्चैव विमानैरिव शोभिताम् ॥")

तत्पर्य्यायः । अध्वगीनः २ अध्वगः ३ अध्वन्यः ४ पान्थः ५ । इत्यमरः । २ । ८ । १७ ॥ गन्तुः ६ यातुः ७ पथकः ८ यात्रिकः ९ यात्रकः १० । इति शब्दरत्नावली ॥ पथिलः ११ । इत्युणादिकोषः ॥

पथिकसन्ततिः, स्त्री, (पथिकानां सन्ततिः सन्तरः ।) पथिकसङ्घः । तत्पर्य्यायः । व्रातिः २ । इति त्रिकाण्डशेषः ॥ पथिकसंहतिः ३ । इति हारावली ॥

पथिका, स्त्री, (पथिक + टाप् ।) कपिलद्राक्षा । इति राजनिर्घण्टः ॥

पथिद्रुमः, पुं, (पथि प्राप्तगुणो द्रुमः । बहुव्रीहौ तथात्वम् ।) खदिरवृक्षः । इति जटाधरः ॥ श्वेतखदिरः । इति राजनिर्घण्टः ॥

पथिलः, त्रि, (पथति गच्छतीति । पथ गतौ + "मिथिलादयश्च ।" उणा । १ । ५८ । इति निपातनात् साधुः ।) पथिकः । इत्युणादिकोषः ॥

पथिवाहकः, त्रि, (पन्थानं वाहयतीति । वह + णिच् + ण्वुल् ।) शाकुनिकः । निषुरः । इति शब्दमाला ॥ भारवाहकश्च ॥

पथ्यं, त्रि, (पथिन् + "धर्म्मपथ्यर्थन्यायादनपेते ।" ४ । ४ । ९२ । इति यत् ।) चिकित्सादौ हितकारकम् । तत्पर्य्यायः । करम् २ हितम् ३ । इति शब्दचन्द्रिका ॥ आत्रेयम् ४ आयुष्यम् ५ । सैन्धवे क्ली । इति राजनिर्घण्टः ॥

पथ्यः, पुं, (पथि साधुः । दिगादित्वात् यत् इलोपः ।) हरीतकीवृक्षः । यथा,—

शिवायां वनतिक्तः स्यात् पथ्यः सुन्दरमाल्कौ ।"
इति शब्दमाला ॥

पथ्याशाकः, पुं, (पथ्यं हितकरं शाकं यस्य ।) तण्डुलीयशाकः । इति राजनिर्घण्टः ॥

पथ्या, स्त्री, (पथ्य + टाप् ।) हरीतकी । (यथा, हठयोगदीपिकायाम् । ३ । ३५ ।

"ततः सैन्धवपथ्याभ्यां चूर्णिताभ्यां प्रकर्षयेत् ।
पुनः सप्तदिने प्राप्ते रोममात्रं समुच्छिनेत् ॥")

श्वेतोर्व्वारुः । चिर्भिटा ॥ वन्ध्या कर्कोटकी । इति राजनिर्घण्टः ॥ (संसाररोगस्य पथ्यस्वरूपत्वात् भक्तापि पथ्यस्वरूपा । यथा, काशीखण्डे २६ । ११२ ।

"पद्मनाभपदार्घेण प्रकृता पद्ममालिनी ।
परर्द्धिदा पुष्टिकरी पथ्या पूर्त्तिः प्रभावती ॥")

पथ्यादिगुग्गुलुः, पुं, (पथ्या आदिर्यस्य तथाविधो गुग्गुलुः ।) औषधविशेषः । यथा,—

"पथ्या विभीतामलकीफलानां
घृतं क्रमेण द्विगुणाभिवृद्धम् ।
प्रस्थेन युक्तञ्च पलकृषाणां
द्रोणे जले संस्थितमेकराजम् ॥
अर्द्धावशेषं क्वथितं कषायं
भाण्डे पचेत्तत् पुनरेव लोहे ।
अग्नौ वहेरवनार्थ दद्यात्
दद्यात्ति संचूर्ण्य पलार्द्धकानि ॥
विड़ङ्गदन्तीत्रिफलागुडूची-
त्रायन्तिवृत्तागरकोषणानि ।
यथेष्टचेष्टस्य नरस्य शीघ्रं
हिताम्बुपानानि च भोजनानि ॥
निषेव्यमाणो विनिहन्ति रोगान्
सर्व्वान् नृणां नूतनखञ्जताञ्च ।
श्रीहाबलीं जठरार्शिगुल्मं
पाण्डुत्वकुष्ठत्वविवातरक्तम् ॥

पथ्यादिको गुग्गुलुरेव नाम्ना
ख्यातः क्षितावप्रमितप्रभावः।
बलेन नागेन समं मनुष्यं
जवेन कुर्याात्तुरगेण तुल्यम्॥
आयुःप्रकर्षं विदधाति चक्षु-
र्बलं तथा पुष्टिकरो विशेषः।
चतस्र सन्धानकरो विशेषा-
द्रोगेषु गुल्मः सकलेषु तज्ज्ञैः॥"

इति भावप्रकाशः॥

पथ्यापथ्यं, क्ली. (पथ्यं रोगिणां हितकरं अपथ्यं अशुभकरं द्वयोः समाहारः।) रोगाणां हिताहितकारकद्रव्यादि।

तत्र तरुणज्वरे पथ्यं यथा।

वमनम्। लङ्घनम्। कालोऽहाः। यवागुः। स्वेदनम्। कटुतिक्तरसौ। रसानि पाचनानि॥*॥

नवज्वरे अपथ्यं यथा।

स्नानम्। विरेकः। सुरतम्। कषायः। व्यायामः। अभ्यङ्गनम्। दिवानिद्रा। दुग्धम्। घृतम्। वेदलम्। आमिषम्। तक्रम्। सुरा। खादुगुरुद्रवद्रव्याणि। अन्नम्। प्रवातः। श्रमजम्। कोपः॥*॥

मध्यज्वरे पथ्यं यथा।

पुरातनयष्टिकः। पुरातनशालिः। वार्त्ताकुः। शोभाञ्जनम्। कारवेल्लः। वेत्राग्रम्। आषाढफलम्। पटोलम्। कर्कोटकम्। मूलकपोतिका। सुन्नमस्तरचञ्चकुलत्यसुकृष्टकानां यूषः। पाठा। अम्लता। वास्तूकम्। तण्डुलीयः। जीवन्ती। काकमाची। सूपकानि द्राक्षाकपित्थदाडिमवेकृतफलानि। लघूनि शाल्यन्नानि च भेषजानि॥*॥

अथ पुराणज्वरे पथ्यम्।

विरेचनम्। कृच्छ्रनम्। अञ्जनम्। नस्यम्। धूमः। अनुवासनम्। सिराव्यधः। संशमनम्। प्रदेहः। अभ्यङ्गः। अवगाहः। शिरोरोपचारः। एडः। कुलिङ्गः। हरिणः। मयूरः। लावः। शशः। तित्तिरिः। कुक्कुटः। क्रौञ्चः। कुरङ्गः। पृषतः। चकोरः। कपिञ्जलः। वर्तकः। कालपुच्छः। गोक्षीरम्। अजाक्षीरम्। गोघृतम्। अजाघृतम्। हरीतकी। पर्वतनिर्झराम्भः। एरण्डतैलम्। सितचन्दनम्। ज्योत्स्ना। प्रियालिङ्गनम्॥*॥

व्यायामञ्च अवायञ्च स्नानं चंक्रमणं तथा।
ज्वरमुक्तो न सेवेत यावन्नो बलवान् भवेत्॥*॥

अथातिसाररोगे पथ्यम्।

वमनम्। लङ्घनम्। निद्रा। पुराणाः शालिषष्टिकाः। विलेपी। लाजमण्डः। मण्डरतुवरीसुन्नभवयूषः। निःस्नेहोद्धृतसारगव्यदधि। गवां छाग्या वा पयोजं नवनीतम्। छागघृतपयोदधीनि। तिलतैलम्। सुरा। माक्षिकम्। शालूकम्। वकुलम्। दाडिमयुगम्। नस्यं भक्ष्यम्। रम्भापुष्पम्। रम्भाफलम्। तरुणविल्वम्। वृक्षाटकम्। चाङ्गेरी। विजया। कपित्थम्। कुटजम्। अजाजी। कणेरः। तक्रम्। कच्चटपल्लवम्। तिलकम्। आतीफलम्। जाम्बवम्। धन्याकम्। निम्बुकम्। महानिम्बम्। अरणी। अपेतम्। क्रव्यात्। लावगृध्रबलिचिल्लिरिभासवयूषः। सर्व्वे क्षुद्रमत्स्याः। खड्गीशः। मधुरालिकामत्स्यः। खलिशः। सर्व्वकषायरसः। गाभेर्दाङ्गुलतोऽधस्तात् तथा वंशाग्निमूले प्रज्वलितायस्पार्श्वचन्द्रवह्नाः॥*॥

अथ ग्रहण्यामपथ्यं यथा।

रक्तशुतिः। जागरः। अम्बुपानम्। स्नानम्। स्त्री। वेगविधारणम्। नस्यम्। अञ्जनम्। स्वेदनम्। धूमपानम्। श्रमः। विरुद्धान्नम्। आतपः। गोधूमः। गिव्याव्यः। कलायः। माषः। यवः। आर्द्रकम्। छत्रकम्। राजमाषः। उपोदिका। वास्तूकः। काकमाची। कुष्माण्डः। तुम्बी। मधुशिग्रुः। कन्दः। ताम्बूलम्। रक्तुः। बदरम्। रसालम्। दध्याढकम्। पूगफलम्। रसोनम्। धान्याम्लम्। सौवीरम्। तुषोदकम्। दुग्धम्। गुडः। मस्तु। नारिकेलम्। पुनर्नवा। वार्ताकम्। वेत्रवम्। सर्व्वाणि मत्स्यशाकानि। दुरालभा। गोक्षुरम्। शृङ्गाणि। क्षारम्। लवणानि सरांसि। द्राक्षा।

विल्वम्। तिन्दुकम्। दाडिमत्रयम्। तिलकम्। वाच्चटदलम्। चाङ्गेरी। विजया। अरणी। जातीफलम्। अहिफेनम्। जीरकः। गिरिमल्लिका। कुसुम्भम्। महानिम्बम्। सकलकषायरसः। दीपनानि लघून्यन्नपानानि। नाभेर्दाङ्गुलतोऽधस्तात् तथा वंशाग्निमूले प्रज्वलितायस्पार्श्वचन्द्रवह्नाः॥*॥

अतीसारे अपथ्यं यथा।

स्वेदः। अञ्जनम्। रुधिरमोक्षणम्। अम्बुपानम्। स्नानम्। अवायः। जागरणम्। धूमः। नस्यम्। अभ्यङ्गनम्। सकलवेगधारणम्। रूक्षाणि। अवगाह्यमज्जनम्। विरुद्धान्नम्। गोधूमः। माषः। यवः। वास्तूकम्। काकमाची। गिव्याव्यः। कन्दः। मधुशिग्रुः। रसालम्। पूगम्। कुष्माण्डम्। तुम्बी। बदरम्। गुर्व्वन्नम्। गुरुपानम्। ताम्बूलम्। इक्षुः। गुडः। मद्यम्। उपोदिका। द्राक्षा। अम्लवेतसपलम्। लशुनम्। धान्यी। दुरालभ्यु। मस्तु। यूषवारि। नारिकेलम्। स्नेहनम्। नगमदः। अखिलपत्रशाकम्। क्षारः। सर्व्वाणि सरांसि। पुनर्नवा। दर्वाकम्। लवणम्। अम्लम्॥*॥

अथ ग्रहणीरोगे पथ्यम्।

निद्रा। छर्दनम्। लङ्घनम्। पुरातनशालयः। पुरातनयष्टिकाः। लाजमण्डः। मण्डरतुवरीसुन्नभवयूषः। निःस्नेहोद्धृतसारगव्यदधि। गवां छाग्या वा पयोजं नवनीतम्। छागघृतपयोदधीनि। तिलतैलम्। सुरा। माक्षिकम्। शालूकम्। वकुलम्। दाडिमयुगम्। नस्यं भक्ष्यम्। रम्भापुष्पम्। रम्भाफलम्। तरुणविल्वम्। वृक्षाटकम्। चाङ्गेरी। विजया। कपित्थम्। कुटजम्। अजाजी। कणेरः। तक्रम्। कच्चटपल्लवम्। तिलकम्। आतीफलम्। जाम्बवम्। धन्याकम्। निम्बुकम्। महानिम्बम्। अरणी। अपेतम्। क्रव्यात्। लावगृध्रबलिचिल्लिरिभासवयूषः। सर्व्वे क्षुद्रमत्स्याः। खड्गीशः। मधुरालिकामत्स्यः। खलिशः। सर्व्वकषायरसः। गाभेर्दाङ्गुलतोऽधस्तात् तथा वंशाग्निमूले प्रज्वलितायस्पार्श्वचन्द्रवह्नाः॥*॥

अथ ग्रहण्यामपथ्यं यथा।

रक्तशुतिः। जागरः। अम्बुपानम्। स्नानम्। स्त्री। वेगविधारणम्। नस्यम्। अञ्जनम्। स्वेदनम्। धूमपानम्। श्रमः। विरुद्धान्नम्। आतपः। गोधूमः। गिव्याव्यः। कलायः। माषः। यवः। आर्द्रकम्। छत्रकम्। राजमाषः। उपोदिका। वास्तूकः। काकमाची। कुष्माण्डः। तुम्बी। मधुशिग्रुः। कन्दः। ताम्बूलम्। रक्तुः। बदरम्। रसालम्। दध्याढकम्। पूगफलम्। रसोनम्। धान्याम्लम्। सौवीरम्। तुषोदकम्। दुग्धम्। गुडः। मस्तु। नारिकेलम्। पुनर्नवा। वार्ताकम्। वेत्रवम्। सर्व्वाणि मत्स्यशाकानि। दुरालभा। गोक्षुरम्। शृङ्गाणि। क्षारम्। लवणानि सरांसि। द्राक्षा।

अम्लम्। जवजरसः। गुर्व्वन्नम्। गुरुपानम्। सर्व्वे पूपाः॥*॥

अथार्शांसि पथ्यम्।

विरेचनम्। लेपनम्। अस्रमोक्षः। क्षारः। अग्निकर्म्म। शस्त्रकर्म्म। पुरातनशालीक्षितशालयः। पुरातनयष्टिकाः। यवाः। कुलत्थाः। गोधाखड्गाजोष्ट्रकूर्म्माविकलिङ्गाजखरौतुकीशूतरक्षुचाषशृगालकाकाकीनां मांसानि। खड्गमांसाः। प्रसहाः। पटोलम्। पत्तूरः। रसोनकम्। वह्निः। पुनर्नवा। मूरणः। वास्तूकम्। जीवन्तिका। दग्धशुष्कः। सुरा। शुक्तिः। वयःस्था। नवनीतम्। तक्रम्। कक्कोलम्। धात्री। बदरम्। कपित्थम्। औदुम्बराण्यपर्याप्तानि। भल्लातकम्। सर्षपतैलम्। गोधूमम्। सौवीरम्। तुषोदकम्। वातापहान्नपानम्। अग्निवर्द्धकान्नपानम्॥*॥

अर्शांसि अपथ्यं यथा।

आनूपमामिषम्। मत्स्यः। पिण्याकः। दधि। पिष्टकम्। माषः। करीरम्। गिव्याव्यः। विल्वम्। तुम्बी। उपोदिका। पलाण्डुम्। सर्व्वशाकम्। विष्टम्भीनि। गुरूणि। आतपः। जलपानम्। वमनम्। बस्तिकर्म्म। नदीनां सलिलम्। विरुद्धानि सर्व्वाणि। पूर्व्वदिग्भववायुः। वेगरोधः। स्त्रियः। पृष्ठयानम्। उत्कटकासनम्। यथास्वं दोषलं द्रव्यम्। रक्तपित्तिनां यद्यत् पथ्यापथ्यं तत्तदपि रक्तार्शोरोगिणां विशेषतो विद्यात्॥*॥

अथाग्निमान्द्याजीर्णादौ पथ्यम्।

श्लैष्मिके पूर्व्वं वमनम्। पैत्तिके मृदुरेचनम्। वातिके स्नेहनम्। यथावस्थं हितवस्तूनि। नानाप्रकारव्यायामः। दीपनानि। लघूनि। बहुकालसम्भृतपक्वा सुन्नलोहितशालयः। विलेपी। लाजमण्डः। सुन्नभवमण्डः। सुरा। एडः। वर्हीं। शशः। लावः। सर्व्वक्षुद्रमत्स्याः। शालिषष्टिकम्। वेत्राग्रम्। वास्तूकम्। वालशूलम्। लशुनम्। दृढकुष्माण्डम्। नवीनकदलीफलम्। शोभाञ्जनम्। पटोलम्। वार्त्ताकुः। गलदम्बु। कर्कोटकम्। कारवेल्लम्। वार्ताकम्। मण्डूकम्। प्रसारणी। काकमाची। चाङ्गेरी। सुनिषण्णकम्। धात्रीफलम्। मातुलुङ्गम्। दाडिमम्। यवः। पर्पटः। अम्लवेतसम्। जम्बीरम्। नागरङ्गम्। माक्षिकम्। नवनीतम्। घृतम्। तक्रम्। सौवीरकम्। तुषोदकम्। धान्याम्लम्। कटुतैलम्। रामठम्। लवणार्द्रकम्। यमानी। मरिचम्। मेथी। धान्यकम्। जीरकम्। दधि। ताम्बूलम्। तप्तखलिकम्। कटुरसः। तिक्तरसः॥*॥

अग्निमान्द्याजीर्णादौ अपथ्यं यथा।

विरेचनम्। विण्मूत्रवायूनां वेगधारणम्। अतिरिक्ताध्वनम्। अध्यशनम्। जागरणम्। विषमाशनम्। रक्तशुतिः। घर्मौषधम्। मतृष्णः। मांसम्। उपोदिका। अजमांसम्। पिष्टकम्।

पथ्याप

जाम्बवम् । सर्व्वशालूकम् । कूष्माण्डिका । मोरटः । क्षीरम् । किलाटः । प्रपानकम् । ताजाख्यि-ग्रहम् । बालतालम् । खेचनम् । दुरुवारि । विरङ्गपानान्नम् । अवालापानान्नम् । विष्टम्भीनि । गुरूणि ।

बलवर्त्तिं वमिं स्वेदं लङ्घनं चापतर्पणम् ।
विग्रेषादलसे कुर्य्यात्क्लिष्टश्यामनिषारवत् ॥ * ॥

अथ क्रिमिरोगे पथ्यम् ।

आस्थापनम् । कायविरेचनम् । शिरोविरे-चनम् । धूमः । कफघ्नानि द्रव्याणि । शरीर-मार्জ্জনা । पुरातनयवगोधूमशालयः । पटोलम् । वेत्राग्रम् । रसोनम् । वास्तूकम् । शुताग्रः । सप्तपरदलम् । सर्षपः । नवीनमोचम् । दृढतीक्ष्णम् । तिक्तानि बालीचदलानि । मौक्षिक-मांसम् । विड्ङ्गम् । पिचुमर्दपल्लवम् । पथ्या । तिलतैलम् । सर्षपतैलम् । सौवीरम् । शुक्तम् । तुषोदकम् । मद्य । पर्पटिलमतालम् । अल-वणम् । गोमूत्रम् । ताम्बूलम् । सुरा । छागा-ज्यम् । औद्दम्बराण्यपर्याप्तानि । रामठम् । क्षारः । अजमोदा । खदिरः । वत्सकम् । अम्बीरनीरम् । सुषवी । यमानिका । सुराक्षा-गुरुसिंग्रपोद्भवक्षारः । तिक्तकटुकषायरसाः ॥ * ॥

क्रिमिरोगे अपथ्यं यथा ।

छर्द्दिः । तद्वेगविधारणम् । विरङ्गपानाग्रणम् । दिवानिद्रा । द्रवदध्यम् । पिष्टान्नम् । अजीर्ण-भोजनम् । घृतम् । माषः । दधि । पत्रशाकम् । मांसम् । पयः । अम्लः । मधुररसः ॥ * ॥

अथ पाण्डुरोगे पथ्यम् ।

छर्द्दिः । विरेचनम् । पुरातनयवगोधूमशालयः । सप्ताङ्गकोमलरसाणां यूषः । आङ्गलजरसः । पटो-लम् । वृन्ताकुशाकम् । तरुणकदलीफलम् । जीवन्ती । क्षुरः । मत्स्याण्डी । गुडूची । तण्डु-लीयकम् । पुनर्नवा । द्रोणपुष्पी । वार्त्ताकुः । लघुपञ्चमूलम् । पञ्चाम्लम् । अभया । विल्वी । शिग्रुः । मत्स्यः । गोमूत्रम् । धात्री । तक्रम् । घृतम् । तैलम् । सौवीरकम् । तुषोदकम् । नवनीतम् । गन्धसारः । हरिद्रा । नागकेशरम् । यवक्षारः । लौहभस्म । कषायद्रव्यम् । कुङ्कुमम् । चरणयोः यस्यौ नाभेर्ह्यङ्गुलादधः मस्तके हस्तयोर्म्मूले लक्षणकक्षयोर्मध्ये च दाहः । यथादोषमिदं पथ्यं पाण्डुरोगवतां भवेत् ॥ * ॥

पाण्डुरोगे अपथ्यं यथा ।

रक्तक्षुतिः । धूमपानम् । वमिः । वेगधारणम् । खेदनम् । मैथुनम् । शिग्रुः । पत्रशाकानि । रामठम् । माषः । अम्लपानम् । पिण्याकः । ताम्बूलम् । सर्षपः । सुरा । क्षुद्रक्षवाम् । दिवा-स्वप्नः । तीक्ष्णानि । लवणानि । सिन्धुविन्ध्याद्रि-जातनदीनां जलम् । सर्व्वाण्यम्लानि । दुष्टाम्बः । विरङ्गान्नानि । गुर्व्वन्नम् । विदाहीनि ॥ * ॥

अथ रक्तपित्ते पथ्यम् ।

अधोगते छर्द्दनम् । ऊर्द्धगते विरेचनम् । उभयत्र लङ्घनम् । पुरातनाः षष्टिकशालिकोद्रव-प्रियङ्गुनीवारयवप्रशालिकाः । मुद्गः । मसूरः । चणकः । तुवरी । सुकुष्टकः । चिङ्गटः । वर्म्मि-मत्स्यः । मृगः । कपोतः । हरिणः । एणः । लावः । मयूरालिः । पारावतः । वर्त्तकः । वकः । उरभ्रः । कालपुच्छः । कपिञ्जलः । कषायवर्गः । गोदुग्धघृतम् । अजादुग्धघृतम् । महिषीघृतम् । पनसम् । पियालम् । रम्भाफलम् । कच्छटम् । तक्कलीयः । पटोलम् । वेत्राग्रम् । महार्द्रकम् । पुराणकुष्माण्डफलम् । पक्वतालम् । तद्बीजजलम् । वासा । खादूनि । विल्वम् । दाडिमम् । खर्জ্জूरम् । धात्री । मिधिः । नारिकेलम् । कपित्थ । शृङ्गाटकम् । पौष्करम् । कपित्थम् । शालूकम् । पद्मकन्दम् । भूनिम्बशाकम् । पिचुमर्द-पत्रम् । तुम्बी । कलिङ्गम् । लाजशुक्तवः । द्राक्षा । सिता । माक्षिकम् । ऐक्षवम् । शीतोदकम् । औद्भिदवारि । सेकः । अवगाहः । घृतधौतसर्पिः । अभ्यङ्गः । शिशिरप्रदेहः । हिमानिलः । चन्दनम् । इन्दुपादाः । मनोऽनुकूलविचित्रकथा । धाराग्रहम् । सुशीतं भूमि-गृहम् । वैदूर्य्यसुक्तामणीनां धारणम् । रम्भोत्-पलाम्भोरुहपत्राणां शय्या । सौमाम्बरम् । सुशीतोपवनम् । प्रियङ्गुः । चन्दनरुषितानां वराङ्गनानामालिङ्गनम् । पद्माकरसरित्कूद-चन्द्रोदयहिमवद्गुरौसुशीतलगिरिनिर्झराणामा-लिङ्गनम् । स्तुतिप्रशस्तकीर्त्तनम् । प्रवीजनीरम् । हिमवालुका ॥ * ॥

रक्तपित्ते अपथ्यं यथा ।

आयासः । अध्वनिषेवणम् । रविकरः । ती-क्ष्णानि कर्म्माणि । क्षोभः । वेगधारणम् । चपलता । हस्त्यश्वयानानि । खेदः । असक्सृतिः । धूमपानम् । सुरतम् । क्रोधः । कुलत्थः । गुडः । वार्त्ताकुः । तिलः । माषः । सर्षपः । दधि । क्षारः । कौपपयः । ताम्बूलम् । नलदाम्बु । मद्यम् । लशुनम् । शिग्रुः । विरङ्गाशनम् । कटु । अम्लम् । लवणम् । विदाहिद्रव्यम् ॥ * ॥

अथ राजयक्ष्मणि पथ्यम् ।

घृतपक्वमरिचशीरकसंस्कृतलावतित्तिरिरसः । दोषाधिकस्य बलिनोऽग्ने रुट्शुद्धिः । गोधूमः । मुद्गः । चणकः । अरण्यशालयः । छागानि मांस-नवनीतपयोघृतानि । कषाटमांसम् । जाङ्-गलजा रसाः । मार्জ্জारचटकीरजपरिशोषितसु-चूर्णितपक्वपललं लेह्यम् । रागाः । काम्बलिकः । वाटवः । वेशवारः । शूकाकुक्किरजः । मधुर-रसः । मोचपनसाम्राणां पक्वफलानि । धात्री । खर्জ্জूरम् । पौष्करम् । पक्वकम् । नारि-केलम् । घृतभाजनम् । वल्लूरम् । नवताल-शस्यम् । द्राक्षा । मिधिः । माक्षिकमद्यम् । सिंहास्यपत्रम् । अजागोमहिषीघृतम् । छागा-क्षयः । छागावस्करजलौकः । मत्स्यखण्डिका । शिखरिणी । मदिरा । रसाला । कर्पूरम् । मृगमदः । सितचन्दनम् । अभ्यङ्गजानि । सुरभी-कृतवस्तुलेपनानि । क्षौमम् । वेशरचनम् । अव-गाहनम् । हर्म्यम् । स्रजः । सरकथा । मृदु-गन्धवाहः । गीतानि । लास्यम् । चन्द्ररश्मिः । विपञ्ची । मृगद्वयी सन्दर्शनम् । हेमचूर्णम् । सूक्ष्मामणिप्रचुरभूषणधारणम् । होमः । प्रदा-नम् । अमरपूजा । द्विजपूजा । वृद्धान्न-पानम् ॥ * ॥

राजयक्ष्मणि अपथ्यं यथा ।

विरेचनम् । वेगधारणम् । श्रमः । स्त्री । खेदः । अञ्जनम् । प्रजागरः । साहसकर्म्मसेवा । रूक्षान्नपानम् । विषमाशनम् । ताम्बूलम् । कालिङ्गम् । कुलत्थम् । माषः । रसोनम् । वंशा-ङ्कुरः । रामठम् । अम्लम् । तिक्तम् । कषायः । सर्व्वकटु । पञ्चक्षाराः । क्षारः । विरङ्गाशनम् । शिग्रुः । कर्कोटकम् । विदाहिद्रव्यम् । छत्र-कटिल्लकम् ॥ * ॥

अथ कासे पथ्यम् ।

स्वेदः । विरेचनम् । छर्द्दिः । धूमपानम् । समा-शनम् । घृतालिः । यष्टिकः । गोधूमः । श्यामाकः । यवः । कोद्रवः । आत्मगुप्ता । माषसूनकुलत्थानां रसाः । ग्राम्योदकम् । अनूपधन्वदेशभवविविध-मांसानि । सुरा । पुरातनसर्पिः । छागदुग्धम् । छागघृतम् । वास्तूकम् । वायसीशाकम् । वार्त्ताकुः । बालमूलकम् । कारवेल्लः । जीवन्ती । सुनिषण्णकम् । द्राक्षा । बिम्बी । मातुलुङ्गम् । पौष्करम् । वासकः । चुटिः । गोमूत्रम् । लशुनम् । पथ्या । घोषम् । उष्णोदकम् । मधु । लाजाः । दिवसनिद्रा । लघून्यन्नानि ॥ * ॥

कासे अपथ्यं यथा ।

वस्तिः । गन्धम् । अवश्यमोक्षः । आयासः । स्नानघर्षणम् । आतपः । दूरपवनः । रजः । मार्गनिषेवणम् । विष्टम्भीनि । विदाहीनि । विविधरूक्षाणि । शुक्लच्छर्द्योरकासवमिवेग-विधारणम् । मत्स्यः । कन्दः । सर्षपः । तुम्बी । उपोदिका । दूषाम्बु । दूषान्नपानम् । विरङ्गा-शनम् । गुरुशीतान्नपानम् ॥ * ॥

अथ श्वासे पथ्यम् ।

विरेचनम् । स्वेदनम् । धूमपानम् । प्रच्छर्द्दनम् । दिवास्वपनम् । पुरातनाः षष्टिकरक्तशालिकुलत्थ-गोधूमयवाः । मुद्गः । अहिशुक् । तित्तिरिः । लावः । दक्षः । शुकादयः । घन्वन्तगाः । घन्व-पक्षिणः । पुरातनसर्पिः । अजादुग्धघृतम् । सुरा । मधु । निदिग्धिका । वास्तूकम् । तण्डु-लीयः । शौवल्लिका । मूलकपोतिका । पटो-लम् । वार्त्ताकुः । रसोनम् । पथ्या । अम्बीरम् । बिम्बीफलम् । मातुलुङ्गम् । द्राक्षा । क्षुटिः । पौष्करम् । उष्णवारि । कटुत्रयम् । गोमूत्रम् । कफानिलघ्नान्नपानभेषजानि । वक्षःप्रदेशात् पार्श्वयुग्मे करस्थयोर्मध्यमयोर्ययोः मस्तकूपे च प्रदीप्तलौहेन दाहः ॥ * ॥

श्वासे अपथ्यं यथा ।

मूत्रोद्गारच्छर्द्दिष्टक्काषायां रोधः । गन्धम् ।

पथ्यापथ्य

वस्तिः । दन्तकाष्ठम् । श्रमः । अध्वा । भारः । रेतुः । सूर्यकिरणः । विरुद्धान्नानि । व्यायामः । विदाह्यन्नानि । व्यानूपमामिषम् । विष्यावः । श्लेष्मकारीणि । माषः । रक्तस्रावः । पूर्ववातान्नपानम् । मेषीदुग्धम् । दुरुच्चलम् । मत्स्यः । कन्दः । सर्षपः । रूक्षशीतगुर्वन्नपानम् ॥ * ॥

अथ हिक्कायां पथ्यम् ।

स्नेहनम् । वमनम् । नस्यम् । धूमपानम् । विरेचनम् । निद्रा । स्निग्धानि लघ्वन्नानि । लवणानि । जीर्णकुलत्थयोधूमयवालिषष्टिकयवाः । एणतित्तिरिलावाद्या आङ्गला वृगपक्षिणः । पञ्चकपित्थम् । लशुनम् । पटोलम् । बालमूलकम् । पौष्करम् । कृष्णासुलसी । मदिरा । नलदाग्वु । उष्णोदकम् । मातुलुङ्गम् । मार्त्तिकम् । सुरभिजलम् । वातश्लेष्महरान्नपानानि । घृतानुषेकः । सहसा त्रासः । विस्रापनम् । भयम् । क्रोधः । हर्षः । प्रियोद्वेगः । प्राणायामनिषेवणम् । दग्धस्निग्धरूक्षान्नाशनम् । कूर्चधाराजलार्पणम् । नाभ्यूर्ध्वपीडनम् । पायूर्ध्वनाभेर्ह्रल्लाटूर्ध्वं च दीपदग्धहरितया दाहः ॥ * ॥

हिक्कायां अपथ्यं यथा ।

वातश्लेष्मोद्गारकारणान्नपानविहारणम् । रजः । अनिलः । आतपः । विरुद्धान्नपानम् । विरुद्धान्नानि । विदाह्यन्नानि । रूक्षाणि । कषायाणि । निष्यावः । पिण्डकः । माषः । पिण्याकः । आनूपमामिषम् । अविदग्धम् । दन्तकाष्ठम् । वस्तिः । मत्स्यः । सर्षपम् । अम्लम् । सुरा । कन्दः । तैलभृष्टम् । उपोदिका । गुरुशीतान्नपानम् ॥ * ॥

अथ स्वरभेदे पथ्यम् ।

स्नेहः । वस्तिः । धूमपानम् । विरेकः । कवलग्रहः । नस्यम् । भालसिरावेधः । यवः । लोहितशालिः । हंसाटवी । ताम्रचूडकौकिलां मांसरसाः । सुरा । गोकण्टकः । काकमाची । जीवन्ती । बालमूलकम् । द्राक्षा । पथ्या । मातुलुङ्गम् । लशुनम् । लवणार्द्रकम् । ताम्बूलम् । मरिचम् । सर्पिः ॥ * ॥

स्वरभेदे अपथ्यम् ।

आमकपित्थम् । वकुलम् । प्रालूकम् । आम्रवम् । तिन्दुकम् । कषायः । वमिः । स्वप्नः । प्रजल्पनम् । अनुपानम् ॥ * ॥

अथारोचके पथ्यम् ।

वस्तिः । विरेकः । यथाबलं वमनम् । धूमोपसेवा । कवडग्रहः । तिक्तकाष्ठेन दन्तधावनम् । चित्रान्नपानम् । गोधूमः । मुद्गाः । लोहितशालयः । यष्टिका । वराहच्छागगृध्रैणानां मांसम् । चेङ्गः । भक्षाङ्गम् । मधुरालिका । इङ्गिग्वः । प्रोष्ठी । खर्जूरः । कवयी । दोहिनः । कर्कारुः । वैत्राग्यम् । नवौदनखलकम् । वार्ताकुः । घृतभ्राष्टनम् । मोचम् । दाडिमम् । भक्ष्यम् । पटोलम् । रुचकम् । घृतम् । पयः । बालतालम् । रसोनम् । शूरण्यम् । द्राक्षा । रसालम् । नलदाम्बु । काञ्जिकम् । मद्यम् । रसाला । दधि । तक्रम् । आर्द्रकम् । कक्कोलम् । खर्जूरम् । पियालम् । तिन्दुकम् । पक्वकपित्थम् । बदरम् । विकङ्कतम् । तालास्थिभक्ष्या । हिमवालुका । सिता । पथ्या । यमानी । मरिचम् । रामठम् । स्वाद्वम्लतिक्तानि । देहमार्जना ॥ * ॥

अरोचके अपथ्यम् ।

कासोद्गारक्षुधानिद्रावमीनां वेगधारणम् । अक्षुद्व्यायामः । अवहड्मोक्षः । क्रोधः । लोभः । भयम् । शोकः । दुर्गन्धः । सूर्यसेवा ॥ * ॥

अथ छर्द्यां पथ्यम् ।

विरेचनम् । छर्दनम् । लङ्घनम् । क्षारम् । लाजा । लाजमण्डः । पुराणाः षष्टिकशालिमुद्गाः । कलायः । गोधूमः । यवः । मधु । मधुरस्निग्धकृतिन्तिरिलावकाद्याः । जाङ्गलमृगपक्षिणः । मनोज्ञनानारसगन्धरूपा रसाः । गाढ़वा यूषाः । रागाः । खड़ाः । कार्म्मलिकाः । सुरा । पञ्चाम्लम् । कुक्कुण्डुः । नारिकेलम् । पत्रैलिमानि जम्बीरधान्यीसहकारकोलद्राक्षाकपित्थानि । हरीतकी । दाड़िमम् । बीजपूरम् । जातीफलम् । बालकम् । निम्बम् । वासा । सिता । घृताक्ता । करिकेशूरम् । हितमनःप्रीतिकरभक्ष्याः । शुक्लस्य वक्त्रे घ्रियिरास्वेकः । कस्तूरिका । चन्दनम् । इन्दुकिरणः । मनोज्ञगन्धाल्यनुलेपनानि । सुगन्धिपुष्पोपानफलानि । स्वमनोऽनुकूलरूपरसगन्धस्पर्शशब्दाः । नाभेरिन्द्रियबोपरिष्टाद्दाहः ॥ *

छर्द्यां अपथ्यम् ।

नस्यम् । वस्तिः । स्नेहनम् । स्नेहपानम् । रक्तस्रावः । दन्तकाष्ठम् । दवाग्नम् । वीभत्सदर्शनम् । भीतिः । उद्वेगः । उच्चालिङ्गवासालाबुवेरोधिकान्नम् । रम्भा । शिग्रुः । कोविदारी । मधूकम् । चिञ्चा । क्षुद्रौला । सर्षपः । देवदाली । आयासः । कृच्छिका । अञ्जनम् ॥ *

अथ तृष्णायां पथ्यम् ।

शोधनम् । वमनम् । निद्रा । स्नानम् । कवलधारणम् । दीपदग्धहरितया जिघ्राधःशिरसोर्दाहः । कोद्रवाः । शालयः । पेया । विलेपी । लाजसक्तवः । अम्लमद्यः । धन्वरसः । शर्करा । रागः । खाड़वः । भक्ष्यसुद्गमद्यरुचकलवणरसः । रम्भापुष्पम् । तैलकूष्माण्डम् । द्राक्षा । पर्पटपल्लवः । कपित्थम् । कोलम् । मल्लिका । कृष्णाष्टकम् । उपोदिका । खर्जूरम् । दाड़िमम् । धात्री । कर्कटी । नलदाम्बु । जम्बीरम् । करमर्दम् । बीजपूरम् । मद्यं पयः । मधूकपुष्पम् । क्षीरेक्षुम् । तिक्तानि । मधुराणि । बालतालाम्बु । शीताम्बु । पयःपेटी । प्रपानकम् । मार्त्तिकम् । सरसीतोयम् । घृताक्ता । नागकेशूरम् । हला । जातीफलम् । पथ्या । कुसुम्भ । टङ्कणम् । घनसारः । गन्धसारः । कौशुदी । शिग्रुशिरोनिलः । चन्दनार्द्रप्रियाश्लेषः । रत्नाभरणधारणम् । हिमानुलेपनम् ॥ * ॥

तृष्णायां अपथ्यम् ।

स्नेहः । अञ्जनम् । स्वेदः । धूमपानम् । व्यायामः । नस्यम् । आतपः । दन्तकाष्ठम् । गुर्वन्नम् ।

पथ्यापथ्य

अम्लम् । लवणम् । कषायः । कटुः । क्षियः । दुरुच्चलम् । तीक्ष्णम् ॥ * ॥

अथ मूर्च्छायां पथ्यम् ।

सेकः । अवगाहः । मज्जिः । हारः । शीताः । प्रदेहाः । व्यजनानिलः । शीतानि गन्धवन्ति प्राणानि । धाराग्रहम् । शीतमरीचिरोचिः । धूमः । अञ्जनम् । लावणम् । अस्रमोक्षः । दाहः । सूचीपरिनोदनम् । लोम्नां कषायाश्च लुञ्चनम् । नखान्तपीड़ा । दशनोपदंशः । नासासुखद्वारमरुन्निरोधः । विरेचनम् । छर्दनम् । लङ्घनम् । क्रोधः । भयम् । दुःखकरी कथा । विचित्रा मनोहराः कथाः । छाया । नभोऽम्भः । शीतघौतसर्पिः । स्वदूनि । सिक्तानि । लाजमण्डः । जीर्णयवलोहितशालयः । कौम्भं घृतम् । मुद्गयूषः । सतीनयूषः । धन्वोद्भवा मांसरसाः । रागाः । षाड़वाः । गव्यपयः । सिता । पुराणकुष्माण्डम् । पटोलम् । मोचम् । हरीतकी । दाड़िमम् । नारिकेलम् । मधूकपुष्पम् । तण्डुलीयः । तुषोदकम् । लघ्वन्नानि । प्रनीरनीरम् । सितचन्दनम् । कर्पूरनीरम् । हिमवालुका । अल्पचण्डः । अङ्गुलदर्शनम् । उत्कटगीतम् । उत्कटवाद्यम् । श्रमः । स्तुतिः । चिन्तनम् । आत्मबोधः । धैर्यम् ॥ * ॥

मूर्च्छायामपथ्यं यथा ।

ताम्बूलम् । पत्रशाकम् । व्यवायः । स्वेदनम् । कटुः । स्निग्धयोर्वेगरोधः । तक्रम् ॥ * ॥

अथ मदात्यये पथ्यम् ।

संशोधनम् । संशमनम् । स्वपनम् । लङ्घनम् । श्रमः । सम्वत्सरसप्तपञ्चशालिषष्टिकयवसुद्गमाषगोधूमसतीनाः । रागः । षाड़वः । एणतित्तिरिलावाजदत्तवर्द्धिष्णूनामामिषम् । वेशवारः । विचित्रान्नम् । क्षुद्रमद्यम् । पयः । सिता । तण्डुलीयः । पटोलम् । मातुलुङ्गम् । परूषकम् । खर्जूरम् । दाड़िमम् । धात्री । नारिकेलम् । मोचनी । पुराणसर्पिः । कर्पूरम् । प्रनीरम् । शिग्रुशिरानिलः । धाराग्रहम् । चन्द्रपादाः । मद्यम् । मित्रसङ्गमः । चौमाम्बरम् । प्रियाश्लेषः । उद्धतगीतवादित्रम् । शीताम्बु । चन्दनम् । स्नानम् ॥ * ॥

मदात्यये अपथ्यं यथा ।

स्वेदः । अञ्जनम् । धूमपानम् । व्यायामम् । दन्तघर्षणम् । ताम्बूलम् ॥ * ॥

अथ दाहे पथ्यम् ।

शालयः । यष्टिकाः । मुद्गाः । मसूराः । चणकाः । यवाः । धन्वमांसरसाः । लाजमण्डः । लाजशुक्तवः । सिता । घृतशीतदुग्धम् । पयोभक्षणवनीतम् । कुष्माण्डम् । कर्कटी । मोचम् । पनसम् । स्वादुदाड़िमम् । पटोलम् । पर्पटम् । द्राक्षा । धात्रीफलम् । मधूकम् । शिग्रुः । तुम्बी । पयःपेटी । खर्जूरम् । धान्यकम् । मिसिः । बालतालम् । पिण्डालम् । शृङ्गाटकम् । कपित्थकम् । मधूकपुष्पम् । क्षीरेक्षुम् ।

पथ्या । सर्व्वाणि तिक्तानि । घृतानि । मद्येषु । भूषेषु । सेकः । अभ्यङ्गः । अवगाहनम् । पद्मोत्पलदलज्योत्स्नाद्या छाया । घृतलक्कागनम् । विचित्रा कथा । गीतानि । शिशिरः । मधुभाषणम् । उशीरचन्दनालेपः । घृतान्नम् । शिशिरानिलः । धाराग्रहम् । प्रियास्पर्शः । प्रवीरम् । हिमवालुका । सुधांशुरश्मयः । ज्ञानम् । मद्यम् । मधुररसः ॥ * ॥

दाहे अपथ्यम् ।

विरुद्धान्नपानानि । क्रोधः । वेगधारणम् । मद्याश्वयानम् । अध्वा । घामम् । पित्तकराणि । व्यायामः । आतपः । तक्रम् । ताम्बूलम् । मद्यम् । रामठम् । व्यवायः । कटुः । तिक्तः । उष्णाः ॥ * ॥

अथोन्मादे भूतोन्मादे च पथ्यम् ।

मस्तुन्यै पूर्व्वं स्नेहः । पित्तोद्भवे पूर्व्वं विरेकः । कफोद्भवे पूर्व्वं वमनम् । ततःपरं बस्तिविधिः । नस्यम् । सन्तर्पणम् । ताडनम् । अञ्जनम् । आश्वासनम् । ज्ञापनम् । बन्धनम् । भयम् । हर्षणम् । दानम् । धूपः । दमः । विस्मारणम् । प्रदेहः । शिराव्यधः । संग्रमनम् । सेकः । आश्चर्य्यकर्म्माणि । धूमपानम् । घीधैर्य्यम् । सत्यम् । आत्मनिवेदनम् । अभ्यञ्जनम् । स्वापनम् । आसनम् । निद्रा । सुघृतान्यनुलेपनानि । गोधूमः । मुद्गः । अरुणश्यामलयः । धारोष्णदुग्धम् । घृतघौतसर्पिः । नवीनघृतम् । पुरातनघृतम् । कूर्म्माभिषम् । धन्वरसः । रसालम् । पुराणकुष्माण्डफलम् । पटोलम् । ब्रह्मीदलम् । वास्तूकम् । तण्डुलीयः । खराश्वमत्स्यम् । गगनाम्बु । पथ्या । सुवर्णगैरिकम् । नारिकेलम् । द्राक्षा । कपित्थम् । पनसम् ॥ * ॥

उन्मादे अपथ्यम् ।

मद्यम् । विरुद्धाशनम् । उष्णभोजनम् । निद्राक्षुत्तृष्णावेगधारणम् । व्यवायः । आषाढफलम् । कठिल्लकम् । पत्रशाकम् । तिक्तानि । विल्वी ॥ * ॥

अथापस्मारे पथ्यम् ।

वातोद्भवे पूर्व्वं बस्तिः । पैत्तिके विरेचनम् । श्लैष्मिके वमनम् । परं धूपनम् । अञ्जनम् । नस्यम् । शिराव्यधः । दानम् । त्रासनम् । बन्धनम् । भयम् । तर्ज्जनम् । ताडनम् । हर्षः । धूमपानम् । विस्मयः । धीधैर्य्यम् । आत्मादिविज्ञानम् । ज्ञानम् । अभ्यञ्जनम् । लोष्टिशय्यालयः । सुप्ताः । गोधूमाः । घृतं हविः । कूर्म्माभिषम् । धन्वरसः । दुग्धम् । ब्रह्मीदलम् । वचा । पटोलम् । वृन्ताकुष्माण्डम् । वास्तूकम् । स्वादुदाडिमम् । घोभाञ्जनम् । पयःपेटी । द्राक्षा । धात्री । पक्वकम् । तैलम् । खराश्वमत्स्यम् । गगनाम्बु । हरीतकी ॥ * ॥

अपस्मारे अपथ्यम् ।

चिन्ता । शोकभयम् । क्रोधः । असुचीन्यन्नपानानि । मद्यम् । मत्स्यः । विरुद्धान्नम् । तीक्ष्णोष्णगुरुभोजनम् । अतिव्यवायः । आयासः । पूष्यपूलातिक्रमः । पत्रशाकानि । विल्वी । आषाढफलम् । इत्यादिनिदानोद्भवेगाः ॥ * ॥

अथ वातरोगे पथ्यम् ।

अभ्यङ्गः । मर्द्दनम् । वस्तिः । स्नेहः । स्वेदः । अवगाहनम् । संवाहनम् । संग्रमनम् । प्रावृतिः । वातवर्ष्मनम् । अग्निकर्म्म । उपनाहः । भूशय्या । ज्ञानम् । आसनम् । तैलद्रोणी । शिरोवस्तिः । शयनम् । नस्यम् । आतपः । सन्तर्पणम् । इक्षुरसः । किलाटः । दधि । कूर्चिका । सर्पिः । तैलम् । वसा । मज्जा । स्वादुम्ललवणा रसाः । नवीनतिलगोधूममाषाः । सम्यक्सरोधितशालिषष्टिकाः । कुलत्थरसः । सुरा । आप्या गोऽश्वतरोष्ट्रासभच्छागलादयः । आनूपाः कोलमद्गुधन्वकुरङ्गगोगजादयः । औदका हंसकादम्बचक्रमद्गुरकादयः । विलेशया भेकगोधानकुलश्वाविदादयः । जाङ्गलाः चटककुक्कुटवर्त्तितित्तिरयः । शिलिन्ध्रः । पर्व्वतः । नक्रः । गर्गरः । कवयी । दक्षिणूः । एरण्डः । चुलुकी । कूर्म्मः । शिशुमारः । तिमिङ्गिलः । रोहितः । मद्गुरः । ग्रन्थी । वर्म्मी । खड्गीघः । घृतं भक्षाः । पटोलम् । शिग्रु । वार्ताकुः । लशुनम् । दाडिमद्वयम् । पञ्चनालम् । रसालम् । नलदाम्बु । परूषकम् । जम्बीरम् । वदरम् । द्राक्षा । नागरङ्गम् । मधूकजम् । प्रसारणी । गोक्षुरकः । शुक्लाक्षी । पारिभद्रकः । पर्याप्ति । पयःपेटी । रवितैलम् । गवां जलम् । मस्त्यण्डिका । ताम्बूलम् । धान्याम्लम् । निम्बिडीफलम् । स्निग्धोष्णभोज्यानि । स्निग्धोष्णाशुलेपनम् । आमाशयमुपागते विण्मूत्रावरुद्धनम् । पक्वाशयस्थे तथा मांसस्थे स्निग्धविरेचनम् । प्रत्याध्मानाध्यानसङ्गे वर्त्तिः लङ्घनं दीपनम् । अष्ठीलाख्ये गुल्मविधिः । शुक्रस्थे चयजित्क्रिया । खड्गमांसाक्तकसिराग्रहे रक्तमोक्षणम् ॥ * ॥

वातरोगे अपथ्यम् ।

चिन्ता । प्रजागरः । वेगधारणम् । छर्द्दिः । श्रमः । व्यवनम् । चणकः । कलायः । नीवारकङ्गुयवयवकोद्रूषश्यामाकचूर्णम् । कुरुविन्दः । लगधान्यानि । राजमाषः । मुद्गः । तड़ागसरिदम्बु । करीरम् । शम्बु । कपीरु । तलकम् । क्रमुकम् । स्तम्बालम् । निष्पावबीजम् । तालफलास्थिमज्जा । प्रालूकम् । तिन्दुकम् । कठिल्लकम् । बालतालम् । विल्वी । पत्रशाकम् । उडुम्बरम् । घृतान्नम् । रासभपयः । विरुद्धमन्नम् । क्षारः । शुष्कपललम् । कतजलुतिः । क्षौद्रम् । कषायकटुतिक्तरसाः । व्यवायः । हृत्प्लवध्यानम् । चंक्रमणम् । खट्वा । आध्मानिनोऽर्द्धितवतोऽपि विण्मूत्रोत्सर्गात् स्नानम् । प्रदुष्टसलिलम् । दन्तघर्षणम् ॥ * ॥

अथ वाते गुग्गुलुसेविनां पथ्यम् ।

क्षीरम् । मांसरसाः । यूषाः । कलमादिशालयः । यवगोधूममाषाः ॥ * ॥

गुग्गुलावपथ्यम् ।

व्यायामः । आतपः । रूक्षम् । क्षारम् । बहुभाषणम् । प्रवातः । मैथुनम् । यानम् ॥ * ॥

अथ वातरक्ते पथ्यम् ।

उत्तानेऽभ्यञ्जनम् सेकः सोपनाहः प्रलेपनम् । गम्भीरे स्नेहपानं व्यास्थापनं विरेचनम् । सर्व्वत्र क्षीरघृतौदनक्षीरालाबुभिरन्नसुतिः । घृतघौतघृताभ्यङ्गः । मेषीदुग्धावसेचनम् । यवः । षष्टिकः । नीवारः । कलमः । अरुणशालिः । गोधूमः । चणकः । मुद्गः । तुवरी । सुकुष्टकः । अजागविमहिषीगवां पयः । लावः । तित्तिरिः । सर्पद्विट् । ताम्रचूड़ादिः । घृते पिष्किराः । प्लवदाः शुकदात्यूहकपोतचटकादयः । उपोदिका । काकमाची । वेत्राग्रम् । सुनिषण्णकम् । वास्तूकम् । कारवेल्लम् । तण्डुलीयः । प्रसारणी । पलूरः । वृन्ताकुष्माण्डम् । सर्पिः । सम्यक्पक्वम् । पटोलम् । रवितैलम् । स्वदूतीका । श्वेतगुर्करा । नवनीतम् । सोमवल्ली । कस्तूरी । सितचन्दनम् । शिंशुपागुरुदेवदारुसरलक्षेद्रमर्द्दनम । तिक्तम् ॥ * ॥

वातरक्ते अपथ्यम् ।

दिवास्वप्नः । अग्निसन्तापः । व्यायामः । आतपः । मैथुनम् । माषः । कुलत्थः । निष्पावः । कलायः । क्षारसेवनम् । अम्बुजानूपमांसानि । विरुद्धानि । दधीनि । इक्षुः । मूलकम् । मद्यम् । पिण्याकम् । अम्लम् । काञ्जिकम् । कटु । उष्णम् । गुरु । अभिष्यन्दि । लवणम् । शुक्तयः ॥ * ॥

अथोरुस्तम्भे पथ्यम् ।

सर्व्वोरुस्तविधिः । स्वेदः । कोद्रवः । रक्तशालिः । यवः । कुलत्थः । श्यामाकः । पुरातनोद्दालाः । घृतभोजनम् । कारवेल्लम् । पटोलम् । लशुनम् । सुनिषण्णम् । काकमाची । वेत्राग्रम् । निम्बपल्लवम् । पलूरः । वास्तूकम् । पथ्या । वार्त्ताकुः । तण्डुलीयः । सम्यक्पक्वाम् । पिण्याकम् । तक्रम् । अरिष्टम् । मधु । कटुः । तिक्तः । कषायः । क्षीरसेवा । गवां जलम् । यथाशुक्तिव्यायामः । स्थूलस्याक्रमशम् । अक्षक्रीड़े सन्तरणम् । नदीषु प्रतिस्रोतः सन्तरणम् । श्लेष्मापहरणम् । अमाकृतकोपनम् ॥ * ॥

ऊरुस्तम्भे अपथ्यम् ।

गुरुस्निग्धदवस्निग्धविरुद्धासात्म्यभोजनम् । विरेचनम् । स्नेहनम् । वमनम् । रक्तमोक्षणम् । बस्तिः ॥ * ॥

अथामवाते पथ्यम् ।

रूक्षस्वेदः । लङ्घनम् । स्नेहपानम् । बस्तिः । लेपः । रेचनम् । पायुवर्त्तिः । अन्दोलपल्यङ्काधिरूढत्वाः । जीर्णं मद्यम् । जाङ्गलानां रसः । वातश्लेष्मघ्नानि सर्व्वाणि । तक्रम् । वर्षाभूः । एरण्डतैलम् । रसोनम् । पटोलम् । पलूरकम् । कारवेल्लम् । वार्त्ताकुः । शिग्रु । तण्डुलीयम् । मन्दारः । गोकर्णकः । वृन्ताकः । भल्लातकम् ।

मोजलम्। आर्द्रकम्। कटूनि। तिक्तानि। दीपनानि॥ * ॥

आमवाते अपथ्यम्।

दधि:। मत्स्य:। गुड:। क्षीरम्। उपोदिका। माष:। पिष्टकम्। दुष्टनीरम्। पूर्ववात:। विरुद्धान्नपानम्। अवालाम्। वेगरोध:। जागर:। विषमान्नपानम्॥ * ॥

अथ शूले पथ्यम्।

छर्दि:। स्वेद:। लङ्घनम्। पायुवर्त्ति:। वस्ति:। निद्रा। रेचनम्। पाचनम्। अन्दोत्पन्ना: शूलाय:। वाय्वमड:। तप्तक्षीरम्। जाङ्गलानां रस:। पटोलम्। शोभाञ्जनम्। कारवेल्लम्। वार्त्ताकु:। पक्वान्नम्। द्राक्षा। कपित्थम्। रुचकम्। पियालम्। शालिच्छप्पवाणि। वालुकम्। वासुदम्। सौवर्चलम्। हिङ्गु। विल्वम्। विड्म्। शूलाङ्का। लशुनम्। लवङ्गम्। एरण्डतैलम्। सुरभीजलम्। तप्ताम्बु। जम्बीररस:। कुष्ठम्। लघूनि। चारक्षाणि॥ * ॥

शूले अपथ्यम्।

विरुद्धान्नपानम्। जागर:। विषमान्नपानम्। रूक्षतिक्तकषायाणि। शीतलानि। गुरूणि। व्यायाम:। मैथुनम्। मद्यम्। वैदलम्। लवणम्। कटु। वेगरोध:। शोक:। क्रोध:॥ * ॥

अथोदावर्त्तानाह्योः पथ्यम्।

नारिकेलपुष्पमिश्रितशीतलोदकपानम्। स्नेह-स्वेद:। विरेक:। वस्ति:। फलवर्त्ति:। अभ्यङ्ग:। यव:। स्निग्धविष्मूत्रमारुत:। व्याध्योदकम्। व्यायाम:। रुचितैलम्। वारुणी। बालमूलकम्। सम्याक:। चित्रक। तिल:। शुण्ठादलम्। पञ्चवैरम्। मातुलुङ्गम्। यवक्षार:। हरीतकी। लवङ्गम्। रामठम्। द्राक्षा। गोमूत्रम्। लवणानि। अधोवातसमुत्थे तु। स्नेह:। स्वेद:। वर्त्ति:। वस्ति:। समीरणहरान्नपानम्। तथा पुरीषजे। वस्ति:। स्वेद:। अभ्यङ्ग:। अवगाहनम्। फलवर्त्ति:। विड्भेदशमनपानम्। मद्यवेगसमुत्पन्ने। विविधं वस्तिकर्म। स्वेद:। अभ्यङ्ग:। अवगाह:। सर्पिषावपीडनम्। उद्गारोत्थे हिक्कान्नविधि:। कासजे कासजिद्विधि:। श्वासजे। स्वेदनम्। धूम:। औत्तरभक्तिकहृतम्। श्वासप्रवर्त्तननस्यम्। ऊर्ध्वजत्रुकाभ्यङ्ग:। क्षयोत्थे घृतान्नपानम्। वृंहणोत्थे वातजित्क्रिया। निद्रावेगोत्थिते क्षीरम्। स्वप्नसंवाहनम्। बुभुक्षोत्थे स्निग्धाल्पोष्णलघुभोजनम्। वाय्वजे वाय्वसंमोक:। स्वप्न:। मद्यम्। प्रियकथा। श्रमश्वाससमुत्पन्ने विश्राम:। वातहारिद्रयम्। शुक्रोत्थे वस्ति:। अभ्यङ्ग:। अवगाह:। शरणायुध:। शालि:। माहिरा। क्षीरम्। यौवनगर्व्वितप्रिया। क्षुद्भोत्थे लङ्घनम्। धूम:। मुक्ता प्रच्छर्दनम्। श्रम:। रूक्षान्नपानम्। विरेक:। रक्तमोक्षणम्॥ * ॥

उदावर्त्तानाह्योरपथ्यम्।

वेगनम्। वेगरोध:। धूमौषान्नम्। कोद्रव:। नालीचणाकम्। शालूकम्। जाम्बवम्। कर्कटीफलम्। पिण्याकम्। सर्व्वमालुकम्। करीर:। पिण्डवेत्रतम्। विष्टम्भीनि। विरुद्धानि। कषायाणि। गुरूणि॥ * ॥

अथ गुल्मे पथ्यम्।

स्नेहस्वेद:। विरेक:। वस्ति:। बाहुसिराव्यध:। लङ्घनम्। वर्त्ति:। अभ्यङ्ग:। स्नेह:। पक्वे तु पाटनम्। सम्वत्सरसमुत्पन्नकलायरक्तशालय:। खड:। कुलत्थयूष:। धन्वमांसरस:। सुरा। गवाजयो: पय:। रूष्टीका। पटूषकम्। खर्ज्जूरम्। दाडिमम्। धात्री। नागरङ्गम्। अम्लवेतसम्। तक्रम्। एरण्डतैलम्। लशुनम्। बालमूलकम्। पत्तूर:। बालूकम्। शिग्रु। यवक्षार:। हरीतकी। रामठम्। मातुलुङ्गम्। जूषणम्। सुरभीजलम्। स्निग्धोष्णाल्पेङ्गणलघुदीपनान्नानि। वातानुलोमनम्॥ * ॥

गुल्मे अपथ्यम्।

सर्व्वं वातकारि। विरुद्धान्नपानम्। वल्लूरम्। मूलकम्। मत्स्य:। मधुरफलम्। शुष्कशाकम्। शमीधान्यम्। विष्टम्भीनि। गुरूणि। अधोवातमूत्रपुरीषशुक्रासृग्वमथुसंधारणम्। वमनम्। जलपानम्॥ * ॥

अथ हृद्रोगे पथ्यम्।

स्वेद:। विरेक:। वमनम्। लङ्घनम्। वस्ति:। विलेपी। पुरातनरक्तशालय:। जाङ्गलमृगपक्षिमयूषा:। सुरकुलत्थरसा:। रागा:। खड़ा:। काम्बलिका:। षाड़वा:। भक्ष्यम्। पटोलम्। कदलीफलम्। पुराणकुष्माण्डम्। रसालम्। दाडिमम्। सम्याकशाकम्। नवमूलकम्। एरण्डतैलम्। गगनाम्बु। सैन्धवम्। द्राक्षा। तक्रम्। पुरातनगुड:। शुण्ठी। यमानी। लशुनम्। हरीतकी। कुष्ठम्। कुस्तुम्बुरु। शृङ्गम्। आर्द्रकम्। सौवीरम्। शुक्तम्। मधु। वारुणीरस:। कस्तूरिका। चन्दनम्। प्रपानकम्। ताम्बूलम्॥ * ॥

कृच्छ्रेरोगे अपथ्यम्।

कृच्छ्रहृद्विमूत्रानिलशुक्रकासोद्गारश्रमश्वासविड्भेदानां वेगधारणम्। सद्यःस्नानविन्ध्यादिनदीनां जलम्। मेघोदय:। दुष्टजलम्। कषाय:। विरुक्षम्। उष्णम्। गुरु। तिक्त:। अम्ल:। स्थिरलशनपलाण्डुशाकानि। क्षार:। मधूकम्। दन्तकाष्ठम्। रक्तमूनि:॥ * ॥

अथ मूत्रकृच्छ्रे पथ्यम्।

वातोद्भवे अभ्यङ्ग:। निरूहः। वस्ति:। स्नेह:। अवगाह:। उत्तरवस्ति:। सेक:। पैत्ते अवगाह:। घृतशीरपदेह:। श्लैष्मे विधि:। वस्तिविधि:। विरेक:। श्लैष्मोद्भवे स्वेद:। विरेक:। वस्ति:। क्षार:। यवान्नम्। तीक्ष्णम्। उष्णम्। त्रिदोषजे अभ्यङ्गपुर:सराणि त्रिमलोदितानि सर्व्वाण्यत्र्यानि। यथा यथा दोषमयं गद:। पुरातनलोहितशालि:। गोमहिषाजक्षीरदधीनि। धन्वामिषम्। सुरारस:। सिता। पुराणकुष्माण्डफलम्। पटोलम्। मधूकफलम्। गोक्षुरक:। कुमारी। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां शिरांसि। पथ्या। तालास्थिमज्जा। वपुषम्। शुटि:। शीतपानम्। शीताशनम्। प्रवीरनीरम्। क्षिमवालुका॥ * ॥

मूत्रकृच्छ्रे अपथ्यम्।

मद्यम्। श्रम:। निधुवनम्। गजवाजियानम्। सर्व्वं विरुद्धाशनम्। विषमाशनम्। ताम्बूलम्। मत्स्य:। लवणम्। आर्द्रकम्। तैलभृष्टम्। पिण्याकम्। हिङ्गु। तिल:। सर्षप:। वेगरोध:। माष:। करीर:। अतितीक्ष्णम्। विदाहि। रूक्षम्। अम्ल:॥ * ॥

अथ मूत्राघाते पथ्यम्।

अभ्यङ्गनम्। स्नेह:। विरेक:। वस्ति:। स्वेद:। अवगाह:। उत्तरवस्ति:। पुरातनलोहितशालि:। धन्वभवमांसम्। मद्यम्। तक्रम्। पय:। दधि। माषयूष:। पुराणकुष्माण्डफलम्। पटोलम्। मधूकम्। तालफलास्थिमज्जा। हरीतकी। कोमलनारिकेलम्। गुवाकखर्ज्जूरनारिकेलतालद्रुमाणां मज्जकानि॥ * ॥

मूत्राघाते अपथ्यम्।

सर्व्वाणि विरुद्धानि। व्यायाम:। मार्ग:। शीतलम्। रूक्षम्। विदाहि। विष्टम्भि। अवाय:। वेगधारणम्। करीरम्। वमनम्॥ * ॥

अथाश्मर्य्यां पथ्यम्।

स्नेहस्य शुक्रस्य च वेगधारणम्। अम्ल:। विष्टम्भि। रूक्षम्। गुर्व्वन्नपानम्। विरुद्धपानाशनम्॥ * ॥

अथ प्रमेहे पथ्यम्।

पूर्व्वं लङ्घनम्। वमनम्। विरेचनम्। शोधनम्। शमनम्। दीपनम्। नीवार:। कङ्गु:। यव:। वेणव:। कोरदूष:। श्यामाक:। जङ्घ:। कुरुविन्द:। सुकुटक:। गोधूम:। शालि:। कलम:। पुरातनकुलत्थ:। सुद्राढ़कीचणकयूषरसा:। तिला:। लाजा:। पुरातनसुरा। मधु। वाय्वमड:। तक्रम्। शालभजलम्। मांसधीजलम्। कङ्कु:। जाङ्गला: कपोतग्राम्यनिखिलाववर्त्तिभल्लैणवर्त्तकसूकरादय:। शोभाञ्जनम्। कुलकम्। कटिल्लकम्। कर्कोटकम्। तलकम्। वार्ताकम्। औड्डम्बरम्। लशुनम्। नवनीतौषम्। पत्तूरम्। गोक्षुरकम्। स्वादिकपरिणाकम्। मन्दारपत्रम्। अम्लता। त्रिफला। कपित्थम्। जम्बु:। काकेरु। कमलोत्पलकह्लारबीजम्। खर्ज्जूरलाङ्गलिकतालनारिकेलानां मज्जकम्। शोधम्। तिन्दुकफलम्। खदिर:। कलिङ्ग:।

पथ्यापथ्य

तिक्तः। कषायः। हस्त्यश्ववाहनम्। अतिभ्रमणम्। रविकिरणः। व्यायामः॥ * ॥

प्रमेहे अपथ्यम्।

मूत्रवेगः। धूमपानम्। स्वेदः। रक्तमोक्षणम्। सद्योन्नम्। दिवानिद्रा। नवान्नम्। दधि। आनूपमांसम्। पिण्याकम्। पिष्टान्नम्। मैथुनम्। सौवीरकम्। सुरा। शुक्तम्। तैलम्। क्षीरम्। घृतम्। गुडः। तुम्बी। तालफलमज्जा। विरुद्धान्नम्। कुल्माषम्। इक्षुः। दुष्टाम्बु। स्वादु। अम्लः। लवणम्। अभिष्यन्दि॥ * ॥

अथ मेदसि पथ्यम्।

चिन्ता। भयम्। जागरणम्। व्यायामः। प्रोद्वर्तनम्। लङ्घनम्। आतपः। हस्त्यश्वयानम्। भ्रमणम्। विरेकः। प्रच्छर्दनम्। अपतर्पणम्। पुराणयवगोधूमशालिषष्टिकमुद्गकुलत्थजूर्णाः। यवः। कुलत्थः। चणकः। मसूरः। मुद्गः। तुवरी। मधु। लाजाः। कटुतिक्तकषायाणि। तक्रम्। सुरा। चिञ्चाटमलवणः। दग्धवार्ताकुः। फलत्रयम्। यवासकम्। शिरीषलोध्रहरीतकीनां चूर्णेन शालविलेपनम्। कटुत्रयम्। सर्षपतैलम्। रसाः। सर्वाणि रूक्षाणि। सुखतैलम्। पत्रशाकः। अगुरुलेपनम्। प्रतप्तनीराणि। शिलाजतूनि। भोजनात् प्राक् वारिपानम्॥ * ॥

मेदसि अपथ्यम्।

स्नानम्। रसायनम्। शालिः। गोधूमः। सुखशीतलता। क्षीरम्। इक्षुविकृतिः। माषः। सौहित्यम्। स्वेदनानि। मत्स्यः। मांसम्। दिवानिद्रा। शुक्रम्। गन्धः। मधुराणि। समग्रभोजनस्य पश्चात् जलपानम्। अतिमात्रोपचिते विधिवाङ्मनक्रिया॥ * ॥

अथोदररोगे पथ्यम्।

विरेचनम्। लङ्घनम्। अम्लसम्भवकुलत्थसुहाकुलत्थशालियवाः। जाङ्गलमृगपक्षिणः। सिता। सुरा। माक्षिकम्। सीधुः। माध्वीकम्। द्राक्षः। तक्रम्। रसोनम्। रवितैलम्। आर्द्रकम्। शालिषष्टिकम्। कुलत्थम्। कठिल्लकम्। पुनर्नवा। शिग्रुफलम्। हरीतकी। ताम्बूलम्। एला। यवशूकम्। आयसम्। अजागवोष्ट्रीमहिषीणां पयः मूत्रञ्च। लघूनि। तिक्तानि। दीपनानि। वस्त्रेण सम्वेष्टनम्। अग्निकर्म। विषप्रयोगः। विरेचन; प्रोढसमुद्भवे वामे अग्रवाहौ धमनौषधः। यकृत्प्लीहे उदकोदरे चतोत्थिते नाभेरधः यथाविधिशस्त्रविधिः। समीरणोत्थे आदितः घृतपानम्। अभ्यञ्जनम्। अनुवासनम्॥ * ॥

उदररोगे अपथ्यम्।

स्नेहनम्। धूमपानम्। जलपानम्। सिरामोक्षः। छर्दिः। यानम्। दिवानिद्रा। व्यायामः। पिण्डस्वेदनम्। औदकानूपमांसम्। मद्यशाकम्। तिलः। उष्णानि। विदाहीनि। लवणशाकम्। शमीधान्यम्। विरुद्धान्नम्। दुष्टनीरम्। गुरूणि।

मद्येन्द्रगिरिजातानां नदीनां जलम्। पिण्डस्वीनि। छिद्रसमुद्भवे विशेषतः स्वेदः॥ * ॥

अथ शोथे पथ्यम्।

संशोधनम्। लङ्घनम्। अल्पमोक्षः। स्वेदः। प्रलेपः। परिषेचनम्। पुरातनशालियवकुलत्थसुद्गाः। गोधा। शशकः। शृङ्गशुक्तितित्तिरिताम्रचूडलावादयो आङ्गलविष्किराः। कूर्मः। भल्लूकी। प्रपुराणसर्पिः। तक्रम्। सुरा। माक्षिकम्। आसवः। निम्बावः। कठिल्लकम्। रक्तशिग्रु। रसोनम्। कर्कोटकम्। मार्कवमूलम्। सुवर्चला। शृङ्गवेरः। पटोलम्। वेत्राग्रम्। वार्ताकुम्। मूलकम्। पुनर्नवा। चित्रकम्। पारिभद्रः। शीपर्णम्। निम्बः। सुरपद्मवम्। एरण्डतैलम्। कटुका। हरिद्रा। हरीतकी। खारनिषेवणम्। भल्लातकम्। गुग्गुलुः। आयसम्। कटूनि। तिक्तानि। दीपनानि। गोऽजामहिषीभवमूत्राणि। कस्तूरिका। शिलाजतु। पाण्डुरोगोक्तवल्लिकर्म॥ * ॥

शोथे अपथ्यम्।

पवनसलिलम्। वैगरोधः। विरुद्धपानान्नम्। विदग्धान्नम्। रूक्षान्नम्। व्याघ्राजानुपैपिण्डितलवणं। शुष्कशाकम्। नवान्नम्। गौडम्। पिष्टान्नम्। दधि। क्षीरम्। विष्टम्भलम्। मद्यम्। अम्लम्। धानाः। वल्लूरम्। गुरु। असात्म्यम्। विदाहि। अरात्रौ स्वप्नः। मैथुनम्॥ * ॥

अथ दृष्टिव्रणाधिकारे पथ्यम्।

संशोधनम्। वस्तिः। अक्ष्णिमोक्षः। स्वेदः। प्रलेपः। अरुणशालयः। एरण्डतैलम्। सुरभीजलम्। घन्वामिषम्। शिग्रुफलम्। पटोलम्। पुनर्नवा। गोधरः। अग्निमन्थः। ताम्बूलम्। पथ्या। सरला। रसोनम्। वार्ताकुम्। शृङ्गवेरकम्। मधूनि। कौम्भं घृतम्। तप्तजलम्। तक्रम्। आमवातापहमग्निकारि चान्नपानम्। पुराणसुरा। अर्द्धेन्दुवदंशजयोर्द्वारः। आमाशये वाहुशिराव्यधः॥ * ॥

ब्रणशुक्लावपथ्यम्।

विरुद्धपानान्नम्। असात्म्यसेवा। संक्षोभणम्। हस्तिहयादियानम्। आनूपमांसानि। दधीनि। माषाः। दुग्धानि। पिष्टान्नम्। उपोदिका। गुरूणि। शुक्रोत्पत्तिवेगरोधः॥ * ॥

अथ गलगण्डादौ पथ्यम्।

छर्द्दिः। विरेचनम्। नस्यम्। स्वेदः। धूमः। शिराव्यधः। अग्निकर्म। क्षारयोगः। प्रलेपः। लङ्घनम्। पुराणघृतपानम्। शीर्णलोहितशालयः। यवाः। मुद्गाः। पटोलम्। रक्तशिग्रु। कठिल्लकम्। शालिषष्टिकम्। वेत्राग्रम्। रूक्षाणि। कटूनि। सर्वाणि दीपनानि। गुग्गुलुः। शिलाजतु। विशेषतः जिह्वातलस्थशिराव्यधश्चेदः। मणिबन्धोर्द्ध अङ्गुलान्तरास्त्रिस्रो रेखाः कार्याः। गलगण्डगण्डमालापचीयन्यार्बुदातुरे यथादोषं यथावस्थं एतत् सर्वं पथ्यम्॥ * ॥

पथ्यापथ्य

गलगण्डे अपथ्यम्।

सर्वक्षीरेक्षुविकृतिः। आनूपमांसम्। पिष्टान्नम्। अम्लम्। मधुरम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ श्लीपदे पथ्यम्।

प्रच्छर्दनम्। लङ्घनम्। अल्पमोक्षः। स्वेदः। विरेकः। परिषेचनम्। पुरातनयष्टिकशालयः। यवाः। कुलत्थाः। लशुनम्। पटोलम्। वार्ताकुः। शोभाञ्जनम्। कारवेल्लम्। पुनर्नवा। मूलकम्। पूतिका। एरण्डतैलम्। सुरभीजलम्। कटूनि। तिक्तानि। दीपनानि। वातोल्बणे गुल्मोपरिष्टात् चतुरङ्गुले सिराव्यधः। पैत्तिके गुल्मतले शिराव्यधः। कफजे अङ्गुष्ठमूले सिराव्यधः॥ * ॥

श्लीपदे अपथ्यम्।

पिष्टान्नम्। दुग्धविकृतम्। गुडः। आनूपमांसम्। स्वादुरसः। पारिपात्रसम्भवविन्ध्यनदीजलम्। पिच्छिलम्। गुरुद्रव्यम्। अभिष्यन्दिद्रव्यम्॥ * ॥

अथ विद्रधौ पथ्यम्।

आमावस्थे रेचनलेपस्वेदास्रमोक्षणानि। जीर्णश्यामाककलमौ। कुलत्थः। लशुनम्। रक्तशिग्रु। निम्बावः। कारवेल्लः। पुनर्नवा। श्रीपर्णी। चित्रकम्। सौदम्। शोथोक्तानि सर्वाणि। पक्वावस्थे शस्त्रकर्म्म। पुराणरक्तशालिः। घृतम्। तैलम्। सुरारसः। विलेपी। धन्वजरसाः। शालिषष्टिकम्। कदलम्। पटोलम्। हिमवालुका। चन्दनम्। तप्ताम्बु। शीताम्बु। व्रणोदितं सर्वम्॥ * ॥

विदग्धावपथ्यम्।

आमावस्थे शोथोक्तान्यपथ्यानि। पक्वावस्थे व्रणोक्तान्यपथ्यानि॥ * ॥

अथ व्रणशोथव्रणसन्दोव्रणनाड्यादिव्रणेषु पथ्यम्।

विस्रापनम्। रक्तमोक्षः। उपनाहः। विपाटनम्। शोधनम्। रोपणम्। पुराणसितशालयः। यवः। षष्टिकः। गोधूमः। जाङ्गलमृगपक्षिणः। विलेपी। लाजमण्डः। कटुतैलम्। घृतम्। मधु। तैलम्। मद्यरसः। सुरा। सुद्रयूषः। शर्करा। आषाढफलम्। वार्ताकुः। कर्कोटकम्। पटोलम्। कारवेल्लम्। निम्बपत्रम्। वेत्राग्रम्। बालमूलकम्। सुनिषण्णकम्। शालिषष्टिकम्। तण्डुलीयः। वास्तूकम्। त्रिफला। पनसम्। मोचम्। दाडिमम्। कटुकाफलम्। जीवन्ती। सैन्धवम्। द्राक्षा। स्वादुतिक्तकषायाः। स्निग्धोष्णद्रवोत्तरान्नम्। व्यायामः। ग्रामनम्। दाहः। स्वेदनम्। बन्धनक्रिया। व्रणावचूर्णनम्। लेपः। धूपनम्। पत्रधारणम्। उष्णीरम्। बालव्यजनम्। चन्दनम्। तिललेपनम्। तप्तशीताम्बु। कर्पूरम्। पञ्चतः परा वेदनाः॥ * ॥

व्रणशोथव्रणसन्दोव्रणनाड्यादिव्रणेषु अपथ्यम्।

नवधान्यम्। तिलः। कलायः। माषः। कुलत्थः।

पथ्यापथ्य

लाघवः। हिमाम्भः। विविधक्षीरेक्षुविकारः। अन्नानि। पञ्चशाकम्। अजाङ्गलमांसम्। असात्म्यान्नम्। विदाहि। विष्टम्भि। गुरूणि। कटु। अम्लम्। घृतम्। लवणम्। अपायः। आयासः। उच्चैः परिभाषणम्। प्रियासमालोकनम्। अह्नि निद्रा। प्रजागरम्। नितान्तचंक्रमणम्। यथास्थितं प्रागधिरोपणम्। नस्यम्। ताम्बूलम्। अजीर्णता। प्रवातवातः। आतपः। धूमः। दृष्टिः। रजः। भयम्। क्रोधः। वमिः। प्रहर्षः। शोकः। विरुक्षाञ्जनम्। अम्बुपानम्। तीक्ष्णम्। उष्णम्। रूक्षम्। विषदूषणम्। कण्डूयनम्। काष्ठनखादिनोदः। गिरन्नभावः। विषमोपचारः॥ * ॥

अथ भग्ने पथ्यम्।

घृताभ्यङ्गः। चन्दनम्। पङ्कप्रदेहः। बन्धनक्रिया। शालिः। प्रियङ्गुः। गोधूमः। सुद्गसतीलयोयूषः। नवनीतम्। घृतम्। क्षीरम्। तैलम्। मांसरसः। मधु। पटोलम्। लशुनम्। शिग्रु। पलूरम्। बालमूलकम्। द्राक्षा। धात्री। वञ्जवल्ली। लाक्षा। इक्षुखण्डम्॥ * ॥

भग्ने अपथ्यम्।

लवणम्। कटुकम्। क्षारः। अम्लः। मैथुनम्। आतपः। आयामः। रूक्षान्नम्॥ * ॥

अथ भगन्दरे पथ्यम्।

आमे संशोधनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पक्वे यथाविधिशस्त्रक्षारकर्माणि। सर्षपः। शालिः। मुद्गः। विलेपी। आङ्गलरसः। पटोलम्। शिग्रु। वेत्राग्रम्। पलूरम्। बालमूलकम्। तिलसर्षपयोस्तैलम्। तिक्तवर्गः। घृतम्। मधु॥ * ॥

भगन्दरे अपथ्यम्।

विरुद्धान्नपानानि। विषमाशनम्। आतपः। आयामः। मैथुनम्। युद्धम्। एकयानम्। गुरूणि। रूढव्रणोऽपि नरः सम्वत्सरं एतत् सर्वं परिहरेत्॥ * ॥

अधोपदंशे पथ्यम्।

छर्दिः। विरेकः। ध्वजमध्यनाडीवेधः। जलौका। परिषानम्। सेकः। प्रलेपः। यवः। शालयः। धन्वामिषम्। मुद्गरसः। घृतम्। कठिल्लकम्। शिग्रुफलम्। पटोलम्। शालिशाकम्। नवमूलकम्। तिक्तम्। कषायम्। मधु। कूपवारि। तैलम्॥ * ॥

उपदंशे अपथ्यम्।

दिवानिद्रा। सद्यवेगः। गुर्वन्नम्। मैथुनम्। गुडः। आयासः। अम्लम्। तक्रम्॥ * ॥

अथ भूकदोषे पथ्यम्।

लेपः। विरेकः। अहर्मोक्षः। सर्पिःपानम्। शालिः। यवः। आङ्गलमांसम्। मुद्गयूषः। कठिल्लकम्। पटोलम्। शिग्रु। कर्कोटम्। पलूरम्। बालमूलकम्। वेत्राग्रम्। आषाढफलम्। दाडिमम्। सैन्धवम्। वचा। कूपोदकम्। गन्धसारः। कस्तूरी। हिमवालुका। तक्रम्। कषायम्। तैलम्॥ * ॥

भूकदोषे अपथ्यम्।

मूत्रवेगः। दिवानिद्रा। व्यायामः। मैथुनम्। गुडः। विदाहि। गुरूदम्। तक्रम्॥ * ॥

अथ कुष्ठरोगे पथ्यम्।

पक्षात् पक्षात् छर्दनम्। मासात् मासाद्विरेचनम्। त्र्यहात् त्र्यहात् नस्यम्। षष्ठे षष्ठे मासि असृग्मोक्षणम्। सर्पिर्लेपः। पुराणाः यवगोधूमशालिमुद्गाढकीमसूराः। माक्षिकम्। जाङ्गलामिषम्। आषाढफलम्। वेत्राग्रम्। पटोलम्। इक्षुतोयफलम्। काकमाची। निम्बपत्रम्। लशुनम्। छिल्लमोचिका। पुनर्नवा। मेषशृङ्गम्। चक्रमर्दफलम्। भल्लातकम्। मञ्जतालम्। खदिरः। चित्रकः। वरा। जातीफलम्। नागपुष्पम्। कङ्कुमम्। प्रवालशिवः। कोशातकी। करञ्जोमातिलसर्षपनिम्बेङ्गुदीभवतैलम्। लघूनि अन्नानि। सरलदेवाङ्गिंशुपा गुरुसम्भवश्चेष्टः। गोखरोष्ट्राश्वमस्तिष्कीणां मूत्राणि। कस्तूरिका। गन्धसारः। तिक्तानि। क्षारकर्म॥ * ॥

कुष्ठरोगे अपथ्यम्।

पापकर्म। ज्ञातन्नभावः। गुरुनिन्दा। गुरुधर्षणम्। विरुद्धपानान्नाशनम्। दिवानिद्रा। चण्डांशुतापः। विषमाशनम्। स्वेदः। रतम्। वेगरोधः। दुग्धम्। व्यायामः। अम्लम्। तिलः। माषः। द्रवगुरुनवान्नानां भोजनम्। विदाहि। विष्टम्भि। मूलकम्। सन्धानादिविधान्यादिसमुद्भवनदीजलम्। आनूपमांसम्। दधि। दुग्धम्। मद्यम्। गुडः॥ * ॥

अथ घृतपित्तोदर्दकोठरोगेषु पथ्यम्।

छर्दिः। विरेचनम्। लेपः। अहर्मोक्षः। पुराणशालिः। आङ्गलामिषमुद्गकुलत्थानां यूषः। कर्कोटकम्। कारवेल्लम्। शिग्रु। मूलकपोतिका। शालिशाकम्। वेत्राग्रम्। दाडिमम्। त्रिफला। मधु। कटुतैलम्। तप्तनीरम्। पित्तश्लेष्महरद्रव्यम्। सर्वं कटुतिक्तकषायाणि॥ * ॥

घृतपित्तादावपथ्यम्।

विविधक्षीरेक्षुविकारः। मद्यम्। उदकानूपभवामिषम्। नवौदनमद्यम्। वमिवेगरोधः। प्राग्दक्षिणाशायिपवनः। अह्नि निद्रा। स्नानम्। विरुक्षाञ्जनम्। व्यायामः। स्निग्धम्। अम्लम्। मधुरम्। कषायः। गुर्वन्नपानानि॥ * ॥

अथास्रपित्ते पथ्यम्।

ऊर्ध्वगे पूर्वं वमनम्। अधोगे पूर्वं विरेचनम्। पश्चादन्नाशनम्। शिरुहः। शालिः। यवः। गोधूमः। मुद्गः। आङ्गलरसः। तप्तशीतजलानि। शर्करा। मधु। शक्तुः। कर्कोटकम्। कारवेल्लम्। पटोलम्। छिल्लमोचिका। वेत्राग्रम्। इक्षुकशाखम्। रम्भापुष्पम्। वास्तूकम्। कपित्थम्। दाडिमम्। धात्री। तिक्तानि। कफपित्तहरपानान्नम्॥ * ॥

पथ्यापथ्य

अम्लपित्ते अपथ्यम्।

नवान्नम्। विरुद्धद्रव्यम्। पित्तकोपकरद्रव्यम्। वेगरोधः। तिलः। माषः। कुलत्थः। तैलभक्षणम्। अविदग्धम्। धान्याम्लम्। लवणम्। अम्लम्। कटु। गुर्वन्नम्। दधि। मद्यम्॥ * ॥

अथ विसर्पे पथ्यम्।

विरेकः। वमनम्। लेपः। लङ्घनम्। रक्तमोक्षणम्। पुराणा यवगोधूमकङ्कुषष्टिकशालयः। मुद्गः। मसूरः। चणकः। सुवरी। आङ्गलजरस। नवनीतम्। घृतम्। द्राक्षा। दाडिमम्। कारवेल्लकम्। वेत्राग्रम्। कुलकम्। धात्री। खदिरः। नागकेशरम्। लाक्षा। शिरीषः। कर्पूरम्। चन्दनम्। तिललेपनम्। नीवेरकम्। सुरूकम्। सकलानि तिक्तानि॥

विसर्पे अपथ्यम्।

आयासः। अह्नि शयनम्। सुरतम्। प्रवातः। क्रोधः। शोकः। वमनम्। वेगः। अञ्जनम्। शाकम्। विरुद्धाशनम्। दधि। कूर्चिका। सौवीरकादि। अनेकविधकिलाटः। गुर्वन्नपानम्। लशुनम्। कुलत्थः। माषः। तिलः। सकलमजाङ्गलमांसम्। खेदः। विदाहि। लवणम्। अम्लम्। कटु। मद्यम्। अर्कप्रभा॥ * ॥

अथ विस्फोटे पथ्यम्।

विरेचनम्। छर्दनम्। लेपः। लङ्घनम्। पुरातनषष्टिकशालयः। यवः। मुद्गः। मसूरः। चणकः। सुकुष्टकः। धन्वामिषम्। गव्यघृतम्। कठिल्लकम्। वेत्राग्रम्। आषाढफलम्। पटोलम्। ज्योतिष्मती। निम्बदलम्। चन्दनम्। तैलम्। सिताभ्रः। तिललेपः। लङ्घनम्। वालम्॥ * ॥

विस्फोटे अपथ्यम्।

खेदः। अपायः। आयासः। क्रोधः। गुर्वन्नम्। आतपः। वमिवेगः। पञ्चशाकम्। प्रवातः। दिवास्वप्नः। व्याव्योदकम्। आनूपमांसम्। विरुद्धान्यान्नानि। तिलः। माषः। कुलत्थः। लवणाम्लकटूनि। विदाहि। रूक्षम्। उष्णम्॥ * ॥

अथ मसूर्यां पथ्यम्।

पूर्वं लङ्घनवान्तिरेचनशिरावेधाः। घृताभ्यङ्गोत्सन्नजीर्णषष्टिकशालयः। चणकः। मुद्गः। मसूरः। यवः। कपोतशटकदात्यूहकौञ्चजीवञ्जीवशुकादयः पक्षिणः। नङ्गल्यः। काठिल्लम्। आषाढकम्। कर्कोटम्। कदलम्। शिग्रु। रुचकम्। द्राक्षा। दाडिमम्। मेषदृषदन्नपानम्। कोलम्। माषरसः। अक्षीणोः सेकविधौ मधुयष्टिमधुकोदकसुघृतोदकम्। भ्रूकोदरकोषणीरम्। कर्पूरचूर्णम्। पक्वे मुद्गरसः। आङ्गलरसः। शालिशाकम्। घृतम्। निर्गुण्डीजलम्। यष्टिधूपविधिनौ धूपः। गव्यद्गोमयभस्मगुण्ठनम्। शुष्के घृताभिषेचनं पिचुमर्दपत्रविघृतोरालेपः। शेषे व्रणोक्तक्रिया॥ * ॥

पथ्यापथ्य

मक्षर्यामपथ्यम् ।

रतम् । खेदः । श्रमः । तैलम् । गुर्वन्नम् । क्रोधः । आतपः । दुष्टाम्बु । दुष्टपवनः । विरुद्धान्नम् । निद्रायाः । आनूपमांसम् । लवणम् । विषमान्नम् । कटु । अम्लम् । वेगरोधः ॥ * ॥

अथ क्षुद्ररोगे पथ्यापथ्यम् । यथा,—
क्षुद्ररोगेषु सर्व्वेषु नानारोगानुकारिषु ।
दोषान् दुष्यानवस्थाञ्च निरीक्ष्य मतिमान् भिषक् ।
तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्व्वशः ।
यथादोषं यथादुष्टं यथावस्थञ्च कल्पयेत् ॥ * ॥

अथ सुखरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । गण्डूषः । प्रतिसारणम् । कवलः । अरुक्सुप्तिः । नस्यम् । धूमः । घृतादिकर्म्मणी । हृद्यधान्यम् । यवः । मुद्गः । कुलत्थः । जाङ्गलरसः । दग्धौष्ठी । कारवेल्लम् । पटोलम् । बालमूलकम् । कर्पूरगौरम् । ताम्बूलम् । तप्ताम्बु । खदिरः । घृतम् । कटु । तिक्तम् ॥ * ॥

सुखरोगे अपथ्यम् ।

दन्तकाष्ठम् । क्षारम् ॥ अम्लम् । मत्स्यः । आनूपामिषम् । दधि । क्षीरम् । गुडः । मांसम् । रूक्षान्नम् । कठिनान्नम् । अधोसुखशयनम् । गुरु । अभिष्यन्दकारि । दिवानिद्रा ॥ * ॥

अथ कर्णरोगे पथ्यम् ।

स्वेदः । विरेकः । वमनम् । नस्यम् । धूमः । सिराव्यधः । गोधूमः । घृतम् । मुद्गः । यवः । प्रतनच्छविः । लावः । मयूरः । हरिणः । तित्तिरिः । वनकुक्कुटः । पटोलम् । घृतम् । वार्त्ताकुः । सुनिषण्णकम् । कठिल्लकम् । रसायनद्वयम् । ब्रह्मचर्य्यम् । अभाषणम् ॥ * ॥

कर्णरोगे अपथ्यम् ।

विरुद्धान्नपानम् । वेगरोधः । प्रजल्पनम् । दन्तकाष्ठम् । शिरःस्नानम् । अवायः । शैत्यलम् । गुरु । कण्डूयनम् । तुषारः ॥ * ॥

अथ नासारोगे पथ्यम् ।

निर्व्यातनिलयस्थितिः । प्रगाढ़ौषधधारणम् । गण्डूषः । लङ्घनम् । नस्यम् । धूमः । छर्द्दिः । सिराव्यधः । कटुचूर्ण्यं नासारन्ध्रे निःक्षिप्य चिः । प्रवेशनम् । स्वेदः । स्वेदः । शिरोभ्यङ्गः । पुराणा यवशालयः । कुलत्थमुद्गयोर्यूषः । माध्वजाङ्गलजा रसाः । वार्त्ताकुः । कुलकम् । घृतम् । कर्कोटः । बालमूलकम् । लशुनम् । दधि । तप्ताम्बु । वारुणी । कटुत्रयम् । कटु । अम्लम् । लवणम् । स्निग्धम् । उष्णम् । लघुभोजनम् ॥ * ॥

नासारोगे अपथ्यम् ।

विरुद्धान्नम् । दिवास्वप्नः । अभिष्यन्दि । गुरूणि । स्नानम् । क्रोधः । प्रजल्पनवायाद्यां वेगधारणम् । शीतः । प्रवम् । भूशय्या ॥ * ॥

अथ नेत्ररोगे पथ्यम् ।

आश्योतनम् । लङ्घनम् । अञ्जनम् । स्वेदः । विरेकः । प्रतिसारणम् । प्रपूरणम् । नस्यम् । अरुक्स्रोक्षः । घृतक्रिया । लेपनम् । आच्यपानम् । सेकः । मनोनिर्वृतिः । अक्षिपूजा । मुद्गः । यवः । लोहितशालिः । लावः । मयूरः । वनकुक्कुटः । कूर्म्मः । कुलिङ्गः । कपिञ्जलः । कौर्म्मं हविः । वन्यकुलत्थयूषः । पेया । विलेपी । लशुनम् । पटोलम् । वार्त्ताकुः । कर्कोटकः । कारवेल्लम् । नवीनमोचम् । नवमूलकम् । पुनर्नवा । मार्कवः । काकमाची । पत्तूरशाकम् । कुमारिका । द्राक्षा । कुसुम्भः । माक्षिकमन्थम् । क्षौद्रम् । वरा । क्षौद्रम् । उषाजलौ । नारीपयः । चन्दनम् । इन्दुरक्तम् । तिक्तम् । लघु ॥

नेत्ररोगे अपथ्यम् ।

क्रोधः । शोकः । मैथुनम् । अम्बुवायुविरुद्धम् । निद्रावश्यायानां वेगरोधः । स्वप्नोऽत्यम् । दन्तविघर्षणम् । स्नानम् । निद्राभोजनम् । आतपः । प्रजल्पनम् । छर्द्दनम् । अम्बुपानम् । मधूकपुष्पम् । दधि । पत्रशाकम् । कठिल्लम् । पिण्याकः । विरूढ़कम् । मत्स्यः । सुरा । अजाकुलमांसम् । ताम्बूलम् । अम्लम् । लवणम् । विदाह्नि । तीक्ष्णम् । कटु । उष्णम् । गुर्व्वन्नपानम् ॥ * ॥

अथ शिरोरोगे पथ्यम् ।

स्वेदः । नस्यम् । धूमपानम् । विरेकः । लेपः । छर्द्दिः । लङ्घनम् । शीर्षवस्तिः । रक्तोक्षुक्तिः । वह्निकर्म्म । उपनाहः । जीर्णसर्पिः । शालिः । षष्टिकः । यूषः । दुग्धम् । धन्वमांसम् । पटोलम् । घृतम् । द्राक्षा । वार्त्ताकुम् । कारवेल्लम् । आम्लम् । धात्री । दाड़िमम् । मातुलुङ्गम् । तैलम् । तक्रम् । काञ्जिकम् । नारिकेलम् । पथ्या । कुष्ठम् । भृङ्गराजः । कुमारी । सुक्तः । उष्णीरम् । चन्द्रिका । गन्धसारः । कर्पूरम् ॥ * ॥

शिरोरोगे अपथ्यम् ।

अवश्यायनिशावातनिद्राविद्राधां वेगधारणम् । अञ्जनम् । दुष्टनीरम् । विरुद्धान्नम् । सद्यविन्ध्यसरिज्जलम् । दन्तकाष्ठम् । दिवानिद्रा ॥ * ॥

अथ क्षीरोगे पथ्यापथ्यम् ।

यत्पथ्यं यदपथ्यञ्च रक्तपित्तेषु कीर्त्तितम् ।
प्रदरेषु यथादोषं तत्तत्कारी भजेत्तत्तत् ॥
वातव्याधिमतां पथ्यमपथ्यञ्च यदीरितम् ।
योनिव्यापत्सु सर्व्वासु तद्विद्याच्च यथाबलम् ॥ * ॥

अथ गर्भिणीपथ्यम् ।

शालिः । षष्टिकः । मुद्गः । गोधूमः । जाङ्गलशुक्तः । नवनीतम् । घृतम् । क्षीरम् । रसाला । मधु । शर्करा । पनसम् । कदलम् । धात्री । द्राक्षा । आम्रम् । स्वादु । शीतलम् । कस्तूरी । चन्दनम् । माला । कर्पूरम् । अनुलेपनम् । चन्द्रिका । स्नानम् । अभ्यङ्गः । लघुद्रव्या । हिमानिलः । सत्यप्रेमम् । प्रियवाक् । मनोरमविहारः । प्रियङ्गुरान्नपानम् ॥ * ॥

गर्भिण्या अपथ्यम् ।

स्वेदनम् । वमनम् । क्षारः । कलहः । विषमाशनम् । अशालाम्यम् । नक्तसञ्चारः । शौर्य्यम् । अप्रियदर्शनम् । अतिव्यवायः । आयासः । भारः । गुरुप्रावरणम् । अकालजागरणं खप्नश्च । कठिनोत्कटकासनम् । शोकः । क्रोधः । भयम् । उद्वेगः । श्रद्धा । वेगविधारणम् । उपवासः । अध्वगमनम् । तीक्ष्णोष्णगुरुविदग्धिभोजनम् । नक्तम् । निरशनम् । अभ्रकूपेक्षणम् । मद्यम् । आमिषम् । उत्तानशयनम् । स्त्रीणामनौषधितम् ॥ * ॥

अष्टममासमारभ्य गर्भिण्या अपथ्यं यथा,—
तथा रक्तसुतिं मुहिं वस्तिमायासतोऽतिमात् ।
एभिर्भावैः सवेदाम्बः कुक्षौ सुप्येज्जियेत वा ॥
भजेन्न नित्यं तिक्ताम्लकटूषणकषायकान् ।
वातलेच्च भयेन्नम्रः कुलाम्बजकृशासनः ॥
पित्तलैः खलती पिङ्गः श्वित्री पङ्गः कपालभिः ।
अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः ॥ * ॥

अथ प्रसूतायाः पथ्यम् ।

लङ्घनम् । रूक्षस्वेदः । गर्भकोष्ठविशोधनम् । अभ्यङ्गनम् । तैलपानम् । कटुतिक्तोष्णसेवनम् । दीपनम् । पाचनम् । मद्यम् । पुराणषष्टिशालयः । कुलत्थः । लशुनम् । घृतम् । बालमूलकम् । पटोलम् । मातुलुङ्गम् । ताम्बूलम् । दाड़िमद्वयम् । श्लेष्मानिलघ्नानि । सप्ताहात् परं किञ्चित् इन्द्रियम् । द्वादशाहात् परं आमिषम् । सार्द्धमासात् परं आहारादियथाबलम् ॥ * ॥

प्रसूतायाः अपथ्यम् ।

श्रमः । नस्यम् । रक्तसुप्तिः । मैथुनम् । विषमाशनम् । विरुद्धान्नम् । वेगरोधः । अशालाम्यम् । अतिभोजनम् । दिवानिद्रा । अभिष्यन्दि । विदग्धि गुरुभोजनम् ॥
क्षतिकाश्मेष रोगेषु वातश्लेष्मोचितानि च ।
तत्तद्रोगानुकूल्येन पथ्यापथ्यानि निर्द्दिशेत् ॥ * ॥

अथ बालरोगे पथ्यापथ्यम् ।

नृणां ज्वरादिषु यत् पथ्यापथ्यं बालानामौचित्यात् तद्विधेयम् । मन्दाग्नौ यत् पथ्यापथ्यं बालानां पारिगर्भिके तद्विधेयम् । आगन्तुकोन्मादिनां यत् पथ्यापथ्यं बालानां ग्रहरोगिणां तद्योज्यम् ॥ * ॥

अथ विषरोगे पथ्यम् ।

अरिष्टाबन्धनम् । मन्त्रक्रिया । छर्द्दिः । विरेचनम् । रूक्षणम् । शोणितास्रुक्षिः । परिषेकः । अवगाहनम् । हृद्यावरणम् । नस्यम् । अञ्जनम् । प्रतिसारणम् । उत्कर्त्तनम् । प्रधमनम् । प्रलेपः । वह्निकर्म्म । उपधानम् । प्रतिविषम् ॥
धूपः । संज्ञाप्रबोधनम् । शालिः । षष्टिकः । कोरदूषः । प्रियङ्गुः । मुद्गः । हरेणुः । तैलम् । सर्पिः । शिखितित्तिरिलावैणगोधाखुशशविड़ामिषम् ।
वार्त्ताकुः । कुलकम् । धात्री । निम्बाः । तक्षशीयः । मरुकपर्णी । जीवन्ती । सुनिषण्णम् ।

उपोदिका । कालशाकम् । लशुनम् । दाडिमम् । विकङ्कतम् । प्राचीनामलकम् । पथ्या । कपित्थम् । नागकेशरम् । गोच्छागनरमद्यानि । नक्रम् । घृतानाम् । शर्करा । अविदाहीन्यन्नानि । सैन्धवम् । मधु । कुङ्कुमम् । पश्चिमोत्तरवातः । कृष्णिका । सितचन्दनम् । सक्तवः । शिरीषः । कस्तूरी । तिक्तानि । मधुराणि । क्षीमचूर्णम् ॥ * ॥

विषरोगे अपथ्यम् ।

क्रोधः । विरुद्धान्नम् । अध्यशनम् । अपायः । ताम्बूलम् । आयासः । प्रवातः । सर्वान्नम् । सर्वलवणम् । नानाविधसंस्वेदनम् । निद्रा । भयम् । धूमविधिः । क्षुधा ॥ * ॥

अथ रोगसङ्करे पथ्यम् ।

एषां गदानां यदि सङ्करः स्या-
त्तत्र प्रयत्नेन भिषङ्मनीषी ।
उक्तेषु पथ्येषु विरोधि यद्य-
त्तत्तत् प्रयुञ्जीत चिकित्सितेषु ॥*॥

रोगसङ्करे अपथ्यम् ।

अपथ्यानि च सर्वाणि तत्तद्रोगोचितानि च ।
दुरबलाबलविद्वेषो वर्त्मवेद्याधिसङ्करे ॥ * ॥

अथ वातिकरोगे पथ्यम् ।

अभ्यङ्गः । परिमर्दनम् । भ्रमणम् । संवाहनम् । हंसपदम् । स्वेदः । स्वेदनम् । आसनम् । शयनम् । संवाहनम् । वस्तिः । नस्यम् । प्रावरणम् । समीरणपरित्यागः । अवगाहः । शिरोवस्तिः । विरेचनम् । दिवाकरकरः । स्नानम् । विस्रापणम् । तैलद्रोणी । सरसता । गाढोपनाहः । सुरा । भूशय्या । सुखशीलता । स्वादुम्ला रसाः । मज्जा । तैलम् । वसा । घृतम् । नवमाषः । कुलत्थः । तिलः । गोधूमः । मुद्गः । कलमः । शालिः । यष्टिकः । पेया । धान्याम्लम् । पयः । क्षीरः । मस्तु । सुखोष्णोदकम् । गोमूत्रम् । नलदाम्बु । दधि । पयःपेटी । यवः । कूर्चिका । आनूपाःरसखड्गिकोलमहिषाः । गजः । घन्वोद्भवाः सर्पोष्ट्रलकवाकुतित्तिरिकुलिङ्गाः । कुम्भीरः । तिमिङ्गिलः । मकरः । मत्स्यपरः । कच्छपः । रोहितमत्स्यः । वर्मिः । मद्गुरः । सिलिन्ध्रः । शरङ्गः । शष्कुली । इक्षिणः । शौण्डी । गर्गरः । पर्वतः । अन्ये जलजन्तवः । वार्ताकुः । कुलकम् । शिग्रु । लशुनम् । द्राक्षा । आम्रम् । आम्रातकम् । धात्री । दाडिमम् । अम्लवेतसवल्लम् । कोलम् । कपित्थम् । शिग्रु । पक्वतालम् । वकुलम् । गोकण्टकः । वास्तूकम् । शुक्लाम्बी । गणिका । सरसा । मन्दारपत्रम् । ताम्बूलम् । सितशर्करा । लवणः । लोधः । सुरुक्षः । अगुरु । श्रीवासः । सुरदारु । गुग्गुलुः । पत्रकाः । कुङ्कुमम् । स्निग्धोष्णविधिः । सचूर्णितं हेम रजतं मौक्तिकञ्च । जालुतपाटलमल्लिकायुथ्यानां विशुष्कं माल्यं ॥ * ॥

वातिकरोगे अपथ्यम् ।

चिन्ता । जागरणम् । अवेगमोक्षः । वमिः । लङ्घनम् । व्यायामः । गजवाजिवाहनविधिः । सन्धारणम् । मैथुनम् । आघातः । अपतर्पणम् । प्रपतनम् । धातुक्षयः । शोभनम् । शोकः । चंक्रमणम् । विरुद्धान्नम् । सन्धक्षसुक्तक्रमः । वृद्धत्वम् । जलदागमः । रजनीशीधः । अपरात्रः । भयम् । रूक्षाम्लरूक्षकषायतिक्तकटुकक्षारातिशीतागमान्नम् । हृत्यधान्यम् । उद्दिका । आढकी । कङ्गुः । उद्दालः । सुकुरुटकः । कोद्रवः । यवः । श्यामाकः । चूर्णादयः । शिग्रुः । जम्बु । राजमाषः । चणकः । मुद्गः । कुलत्थः । विषम् । शालूकम् । क्रसुकम् । कशेरु । तालकम् । कठिल्लकम् । तिन्दुकम् । कर्कोटम् । नवलाजशुष्कम् । लाजाख्यमज्जा । नदीतडागजलम् । करका । निष्पावबीजम् । पिण्याकः । शिग्रुशिराम्बु । रासभपयः । पक्वाम्रकम् । बिल्वम् । भूनिम्बम् । कटुका । करीरम् । अम्लिकमुष्कामिषम् । माक्षिकम् । धूमः । मद्यमद्यम् । रजः । परिभवः । लज्जा ॥ * ॥

अथ पैत्तिके पथ्यम् ।

सर्पिःपानविधिः । विरेचनम् । अवेगमोक्षः । सितशालिः । गोधूमः । आढकिः । धान्यकम् । पक्वाकः । मुद्गः । मसूरः । यवः । पर्युषितमद्यः । पयः । पयःपेटी । वरा । माक्षिकम् । लाजाः । मध्वरसः । घृतानि । सिता । शीतोदकम् । उद्दिदः । कर्कोटम् । कदलम् । कपोतकिपलम् । वेत्राग्रम् । आषाढकम् । वल्लीका । कोमलकुलकम् । कुष्माण्डम् । दर्व्याः । तुम्बी । पर्पटकः । अम्बमारिष्टदलम् । कठिल्लकम् । दाडिमम् । धात्री । कोमलतालशस्यम् । अभया । खर्जूरम् । औदुम्बरम् । विल्वम् । कषायः । तिक्तः । मधुरः । मधूकम् । वरी । कांस्यम् । अयः । रजतम् । हेम । कटुका । निम्बः । चिरायत । चन्दनम् । हर्म्यतलम् । भूमिगृहम् । सुशीतलवसनम् । धारागृहम् । चन्द्रिका । रम्भाकोशदलव्यजनवीजनम् । शीताः प्रदेशाः । भूशय्या । मणिः । प्रदोषसमयः । शीतलम् । प्रियालिङ्गनम् । स्नानम् । मित्रसमागमः । प्रियकथा । मन्दानिलः । अभ्युक्षणम् । वादित्रश्रवणम् । मनोरमतरभावाः । सुलास्यदर्शनम् । पुन्नागोत्पलपाटलाजसुमनःकह्लारपुष्पाणि । कर्पूरम् । प्रणीरणीरम् । शीतक्रिया ॥ * ॥

पैत्तिके अपथ्यम् ।

धूमः । स्वेदनम् । आतपः । निष्पवनम् । सन्धारणम् । क्रोधः । क्षारः । अम्लाः । गजवाजिवाहनविधिः । तीक्ष्णकर्म्म । आयासः । अन्नविदाहकारिसमयः । शौण्डः । विरुद्धान्नम् । मद्याढ्यः । जलदाल्पयः । रजनीमद्यम् । मद्यमयः । व्रीहिः । वेणुफलम् । तिलः । लशुनम् । माषः । कुलत्थः । गुडः । निष्पावः । मदिरा । अतसी । प्रहीणजम् । धान्याम्लम् । उष्णोदकम् ।

जम्बीरम् । नलदाम्बु । हिङ्गु । लकुचम् । मद्यम् । भल्लातकम् । ताम्बूलम् । दधि । सर्षपः । वदरम् । तैलाम्लम् । तिन्तिडी । कटु । अम्लम् । लवणम् । विदाहि ॥ * ॥

अथ श्लैष्मिके पथ्यम् ।

छर्दिः । लङ्घनम् । अञ्जनम् । निष्ठुवनम् । प्रोद्वर्त्तनम् । स्वेदनम् । चिन्ता । जागरणम् । श्रमः । अतिगमनम् । छर्दवेगधारणम् । गण्डूषः । प्रतिसारणम् । प्रधमनम् । हस्त्यश्वयानम् । धूमः । प्रावरणम् । नियुद्धम् । अतिसंक्षोभः । नस्यम् । भयम् । रूक्षोष्णविधिः । पुरातनव्रीहिः । षष्टिका । निष्पावः । लघुधान्यम् । पक्वाकः । मुद्गः । कुलत्थरसः । क्षारः । सर्षपतैलम् । उष्णजलम् । घन्वामिषम् । राजिका । वेत्राग्रम् । कुलकम् । कठिल्लकम् । वार्ताकुः । औदुम्बरम् । कर्कोटम् । लशुनम् । मोचकुसुमम् । गुडाम्बुनम् । मूलकः । निम्बम् । मूलकपोतिका । वरुणः । तिक्ता । चिरत् । माक्षिकम् । ताम्बूलम् । नलदाम्बु । कौलमहिरा । योधम् । वरा । गोजलम् । लाजाः । सुश्रुष्टतण्डुलभवम् । तिलम् । सुखोष्णालयः । कांस्यम् । अयः । अञ्जनम् । मौक्तिकम् । कटुः । कषायरसः ॥ * ॥

श्लैष्मिके अपथ्यम् ।

स्नेहः । अभ्यञ्जनम् । आसनम् । अहि शयनम् । स्नानम् । विरुद्धान्नम् । पूर्वाह्णः । शिशिरः । वसन्तसमयः । राज्यादिः । आत्मवधः । सुखमात्मसमयः । अन्नपानकरत्वम् । मांसः । नवशालुकः । मत्स्यः । मांसम् । इक्षुविकृतिः । दध्यविकृतिः । तालास्थिमज्जा । द्रवः । पेया । भक्ष्यम् । उपोदिका । पनसम् । हृद्याकम् । आषाढकम् । खर्जूरम् । अनुलेपनम् । पयःपेटी । पयः । पायसः । स्वादु । अम्लम् । लवणम् । गुरूणि । सुहिनम् । सन्तर्पणम् ॥ * ॥

अथ वसन्तर्तौ पथ्यम् ।

वमनम् । अपायः । व्यायामः । भेदः । भ्रमणम् । व्यधिसेवा । कटुः । तिक्तः । विदाहि । तीक्ष्णम् । कषायः । मध्वोदनम् ॥ * ॥

वसन्तर्तावपथ्यम् ।

दिवानिद्रा । सन्तर्पणम् । आलस्यम् । सुधांशुसेवा । पिच्छालुकम् । स्वादु । गुरूदकान्नम् । पिष्टम् । दधि । क्षीरम् । घृतम् ॥ * ॥

अथ ग्रीष्मर्तौ पथ्यम् ।

चन्दनम् । शीतवातः । छाया । अम्बु । शय्यागृहम् । प्रस्थनम् । सद्यःपयोभावितशीतभक्ष्यम् । विश्रिग्धान्नम् । प्रियभोजनम् ॥ * ॥

ग्रीष्मर्तावपथ्यम् ।

कटु । तिक्तम् । उष्णम् । क्षारम् । अम्लम् । रौद्रम् । श्रमश्रम् । व्यधिसेवा । उन्निद्रता । भास्करतप्तोदयशयनम् । अतिपानम् । दधि । तक्रम् । तैलम् ॥ * ॥

पथ्यापथ्य

अथ वर्षासु पथ्यम् ।
लवणम् । अम्लम् । मिस्रम् । क्षारम् । प्रियम् । स्निग्धम् । गुरु । उष्णम् । वस्त्रम् । अभ्यङ्गः । उद्वर्त्तनम् । अग्निसेवा । तप्तान्नपानम् । दधि ॥

वर्षाखपथ्यम् ।
पूर्व्वपवनः । वृष्टिः । घर्म्मः । हिमः । श्रमः । नदीवारिम् । दिवास्वप्नः । क्रूरम् । नित्यमैथुनम् ॥ * ॥

शरदि पथ्यम् ।
शीतरसाम्बुपानम् । तरुच्छाया । चन्दनम् । इन्दुसेवा । सिता । मुद्गः । मसूरम् । गव्यदुग्धम् । इक्षुः । शाल्योदनम् ॥ * ॥

शरत्यपथ्यम् ।
लवणम् । अम्लम् । तीक्ष्णम् । कटु । पिस्रम् । आतपौ । विदाहि । सुरा । नाग्नम् । दधि । तक्रम् । तैलम् । क्रोधः । उपवासः । आतपः । मैथुनम् ॥ * ॥

अथ हिमर्त्तौ पथ्यम् ।
तप्तजलम् । उपनाहः । पयः । अन्नम् । पानम् । घृतम् । स्त्रीसेवा । वह्निसेवा । गुरूणि । यथेष्टभुक्तम् ॥ * ॥

हिमर्त्तावपथ्यम् ।
दिवानिद्रा । कुभोजनम् । अभोजनम् । लङ्घनम् । पुरातनान्नम् । लघुपाकि । शैत्यम् । वाय्वोदनम् । शीतजलावगाहः ॥ * ॥

शिशिरे पथ्यम् ।
स्त्री । वह्निसेवा । मत्स्यः । अजमांसम् । दधि । दुग्धम् । सर्पिः ॥ * ॥

शिशिरेऽपथ्यम् ।
तीक्ष्णोष्णकटुक्षकषायतिक्तानि । वासुदकम् । आर्द्रभोजनम् । दिवानिद्रा । चन्दनम् । चन्द्रसेवा । शीतजलस्नानादि ॥ * ॥

माघे विशेषो यथा ।
माघे च शीतद्रवमिष्टपिष्टं
कन्दः कदन्ना गुरुशालिभक्तम् ।
इति षड्ऋतुपथ्यापथ्याधिकारः ॥ * ॥

आगन्तुकज्वरादौ पथ्यापथ्यं ज्वराधिकारे न लिखितमतोऽत्र लिख्यते ।
"अभिघातसमुत्थाने पानाभ्यङ्गौ च सर्पिषः ।
क्षतेऽसृग्व्रजने चापि क्षतघ्नाचिकितंसितम् ॥
औषधीगन्धविषये विषघ्नप्रशमौषधम् ।
अभिचाराभिशापोत्थे जपहोमादिभेषजम् ॥
उत्पातव्यङ्गपीडोत्थे दानस्वस्त्ययनादयः ।
क्रोधोत्थिते पित्तहरं कामजे कामजित्क्रिया ॥
कामशोकभयोद्भूते सर्व्वा वातहरी क्रिया ।
आश्वासनञ्चेष्टलाभो हर्षदायीनि यानि च ॥
पथ्येभ्यः गुणवान् कामक्रोधसमुत्थिते ।
भयशोकसमुद्भूते कामक्रोधोक्तभेषजम् ॥
भूताभिषङ्गजे भूतबन्धावेद्यगतादनम् ।
मनःक्षोभसमुत्पन्ने मनसः सान्त्वनानि च ॥
इत्यागन्तुज्वरे पूर्व्वैरभिधाभिः पथ्यमिष्यते ।
विस्तीर्णमपथ्यञ्चास्य पाठगं ग्रन्थगौरवात् ॥

पद्कः

देवानां ब्राह्मणानाञ्च गुरूणामपि पूजनम् ।
ब्रह्मचर्य्यं तपो होमः प्रदानं नियमो जपः ॥
साधूनां दर्शनं स्वर्गं इत्यौषधिविधारणम् ।
मङ्गलाचरणञ्चेति वर्गः सर्व्वान् ज्वरान् जयेत् ॥"

आगन्तुकज्वरे अपथ्यम् ।
"अधिवासनकर्म्मादि रक्तस्रवणधारणम् ।
वमिवेगं दन्तकाष्ठमसात्म्यमपि भोजनम् ॥
विरुद्धान्नपानानि विदाहीनि गुरूणि च ।
दुष्टाम्बुक्षारमद्यानि पक्वान्नाकं विरूक्षणम् ॥
नलदाम्बु च ताम्बूलं कलिङ्गं लकुचं फलम् ।
आढकीमतस्यञ्च पिण्याकं कुलत्थं पिण्डवेशनम् ॥
अभिष्यन्दीनि चैतानि ज्वरितः परिवर्জ্জयेत् ॥"

इति पथ्यापथ्यविनिश्चयः समाप्तः ॥

पद, स्थैर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-पदं-अकं-सेट् ।) पदति । इति दुर्गादासः ॥

पद, नृ क ड गतौ । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-आत्मं-सकं-सेट् ।) क ड, पदयते । इति दुर्गादासः ॥

पद, य ड औ गत्याम् । इति कविकल्पद्रुमः ॥ (दिवां-आत्मं-सकं-अनिट् ।) य ड, पद्यते । औ, पत्ता । इति दुर्गादासः ॥

पदं, क्ली, (पद + "नन्दिग्रहिपचादिभ्यो ल्यु णिन्यचः ।" ३ । १ । १३४ । इति अच् ।) व्यवसायः । न्यायः । स्थानम् । (यथा, मनुः । १२ । १२५ ।
"एवं यः सर्व्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्व्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥")
चिह्नम् । पादः । वस्तु । इत्यमरः । ३ । ३ । ८३ ॥ शब्दः । वाक्यम् । प्रदेशः । पादचिह्नम् । श्लोकपादः । (यथा, हैः रामायणे । १ । २ । १८ ।
"पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः ।
शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा ॥")
किरणे पुं । इति मेदिनी ॥ पदलक्षणं यथा,—
"वर्णाः पदं प्रयोगार्हा नन्वितैकार्थबोधकाः ।"

इति साहित्यदर्पणे । २ । ४ ॥

श्रीकृष्णपदचिह्नं यथा,—
"सौवर्णीं राजतीं वापि पाषाणाद्यैर्निर्म्मितामपि ।
पादयोरङ्कितां कृत्वा पूजाञ्चैव समाचरेत् ॥
दक्षिणस्य पदाङ्गुष्ठमूले चक्रं विभर्त्ति यः ।
तत्र तन्नखमध्यस्थसंसारच्छेदनाय सः ॥
मध्यमाङ्गुलिमूले तु धत्ते कमलमच्युतः ।
धातुचित्तद्विरेफाणां लोभनायाति शोभनम् ॥
पद्मस्याधो ध्वजं धत्ते सर्व्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भक्तपापादिभेदनम् ॥
पार्ष्णिमध्येऽङ्कुशं भक्तचित्तभयप्रकारणम् ।
भोगसम्भारयं धत्ते यवमङ्गुलपर्व्वणि ।
तथा वामाङ्गुष्ठमूले प्राच्यजन्यस्य लक्षणम् ।
सर्व्वविद्याप्रकाशाय धत्ते च भगवानजः ॥"

इति पाद्मे पातालखण्डे १२ अध्यायः ॥

पदकः, पुं, पदं वेत्ति यः ("ऋमादिभ्यो डुण् ।" ४ । २ । ६१ । इति डुण् ।) पदज्ञाता । इति भरतः ॥ (यथा, राजतरङ्गिण्याम् । ५ । ६६ ।

पद्ष्ठी

"रामनाम्नानुषाध्यायं ख्यातव्याकरणक्रमम् ।
व्याख्याष्टपदकक्रके स तस्मिन् सुरमन्दिरे ॥")
खनामख्यातकण्ठभूषणञ्च । क्वेवपदचिह्नादियुक्तत्वात् ॥ (पदमेव इति स्वार्थे के जाते, स्त्री । पदम् । यथा, महाभारते अनुशासनपर्व्वणि ।
"इतःप्रभृति यातव्यं पदकं पदकं गुरोः ॥")

पदगः, पुं, (पद्भ्यां गच्छतीति । गम लृ गतौ + "अन्येभ्योऽपि ।" इति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६६ ॥ पद्भ्यां गमनकर्त्तरि त्रि ॥

पदन्यासः, पुं, (पदस्य गोपदस्येव न्यासो यत्र । यद्वा, गोपुरः । इति व्युत्पत्तिकः ॥ पदस्य विन्यासः । यथा, रत्नमञ्जरी ।
"पदन्यासो गेहाङ्गहिरहिपणारीहृदयजः
खगेहादन्यत् स्याद्वनमपरहीपतुलितम् ।
वचो लोकालभ्यं क्षपयघनतुल्यं जगद्गुरुः
पुमानन्यः कान्ताद्विधुरिव चतुर्थोसमुदितः ॥"
(तन्त्रोक्तान्नपूर्णामन्त्रस्यपदार्थो तत्तदङ्गेषु न्यासः । बहुलं तन्त्रसारन्यासार्णवे ।
"एकमेकं पुनश्चैकं पुनरेकं द्वयन्ततः ।
चतुश्चतुस्तथा द्वाभ्यां पदान्येतानि पार्व्वति ! ॥
पदान्येतानि देवेशि ! नवद्वारेषु विन्यसेत् ।
ब्रह्मादिगुह्यपर्य्यन्तं पुनस्तेषु वरानने ! ॥
गुह्यादिब्रह्मरन्ध्रान्तं पदाद्यं नवकं न्यसेत् ॥")

पदभञ्जनं, क्ली, (विभक्तियुक्तानां पदानां भञ्जनं विश्लेषो यत्र । यद्वा, पदानि भज्यन्तेऽनेन । भञ्ज + करणे ल्युट् ।) निरुक्तम् । गूढार्थशब्दव्याख्या । इति हेमचन्द्रः ॥

पदभञ्जिका, स्त्री, (पदानां भञ्जिका विश्लेषिका ।) पञ्जिका । टिप्पनी । इति हेमचन्द्रः ॥

पदमाला, स्त्री, (पदानां माला विस्तृतिर्यस्याम् ।) मोहनशीला विद्या । यथा,—
"पदमालां महाविद्यां सर्व्वदेवनमस्कृताम् ।
याचयामि सुरेशानसुमादेहार्द्धधारिणम् ॥"

इति देवीपुराणे ६ अध्यायः ॥

अस्या विवरणं तत्रैव द्रष्टव्यम् । पदश्रेणी च ॥

पदवि, स्त्री, (पद्यते गम्यतेऽनया । पद गतौ + "पदटिभ्यामविः ।" इति अविः ।) पङ्क्तौ । पन्थाः । इत्यमरः । २ । १ । १५ ॥

पदवी, स्त्री, (पदवि + "ऋदिकारादक्तिनः ।" इति पक्षे ङीष् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, रघुः । ७ । ७ ।
"उत्सृष्टलीलागतिरागवाक्षा-
दलक्षकाञ्चीं पदवीं ततान ॥"
पङ्क्तिः । यथा, तत्रैव । ६ । ५० ।
"अलं प्रयत्नेन तवात्र मा निधाः
पदं पदव्यां सगरस्य सन्ततेः ॥"
पदम् । यथा, पञ्चतन्त्रे । १ । २५८ । "अथ तेन चिन्तितं अमात्यपदवी प्रदत्ता आजाय गृह्यापालनमिति ॥")

पदष्टीवं, क्ली, (प्राङ्गौ च ष्ठीवन्तौ च तयोः समाहारः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति

नियातनात् सिद्धम् ।) युगपदुपस्थितचरण-जानुनी । इति व्याकरणम् ॥

पदाङ्कः, पुं, (पदस्य अङ्कश्चिह्नम् ।) क्रमाङ्कः । पाद-चिह्नम् । यथा,—

"ग्रामे ग्रामकवेदशोऽयमिति श्रीलक्ष्मणार्म्मार्यय-
मागच्छत्पदवन्दनन्दनपदद्वन्द्वारविन्दं हृदि ।
चक्रे लक्ष्मपदाङ्कदूतमतुलं प्रीतिप्रदं प्रद्युतां
धीरः श्रीरघुरामरायनृपतेराज्ञां गृहीत्वादरात् ॥

इति पदाङ्कदूतकाव्यम् ॥

पदाङ्गी, स्त्री, (हंसस्य पदमिव अङ्गं यस्याः । स्त्रियां ङीष् ।) हंसपदी । इति राजनिर्घण्टः ॥

पदाजि:, पुं, (पादाभ्यामजतीति । अज गतौ + "पादे च ।" उणा० ४।१२१ । इति पादे गोप-पदे अजेरिञ् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः । बहुल-वचनात् अजेर्घञभावः ।) पदातिकः । इत्य-मरः । २ । ८ । ६६ ॥

पदातः, पुं, (पदाभ्यामततीति । पद् + अत् + अच् ।) पादातिकः । इति शब्दरत्नावली ॥

पदाति:, पुं, (पादाभ्यामतति गच्छतीति "पादे च ।" उणा० ४।१२१ । इति पाद् + अति + इञ् । "पादस्य पदाज्यातिगोपहतेषु ।" ६।३।५२ । इति पदादेशः ।) पदातिकः । पेयादा इति भाषा । तत्पर्य्यायः । पत्तिः २ पतगः ३ पादा-तिकः ४ पदाजिः ५ पद्मः ६ पदिकः ७ । इत्य-मरः । २ । ८ । ६६ ॥ पदातिकः ८ पादात् ९ पादातिकः १० पदात् ११ पादिकः १२ शब्द-रत्नावलिः १३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । १३६ । ३१ ।

"गजानश्वान् रथांश्चैव पातयामास पाण्डवः ।
पदातींश्च रथांश्चैव शवधोदर्शनायकः ॥")

पदातिकः, पुं, (पदाति + स्वार्थे कन् ।) पदातिः । इति शब्दरत्नावली ॥

पदारः, पुं, (पदं ऋच्छति प्राप्नोतीति । ऋ + अच् ।) पादधूलिः । पादालिन्दः । इति मेदिनी ॥

पदार्थः, पुं, पदानां घटपटादीनां अर्थोऽभिधेयः । तत्पर्य्यायः । भावः २ धर्म्मः ३ तत्त्वम् ४ सत्त्वम् ५ वस्तु ६ । इति जटाधरः ॥ ❀ ॥ (पदार्था हि दर्शनमतभेदेन नानाविधाः । तत्र वैशेषिकाणां मते ।) सप्त पदार्थाः । यथा,—

"द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥"
"सप्तानामपि साधर्म्म्यं ज्ञेयत्वादिकमिष्यते ।
द्रव्यादयः पञ्च भावा अनेके समवायिनः ॥
सत्तावत्तत्त्वयत्ताद्या गुणादिर्निर्गुणक्रियः ॥"

इति भाषापरिच्छेदे । २, १४ ॥

"एते पदार्था वैशेषिकप्रसिद्धाः । नैयायिकाना-मप्यविरुद्धाः ।" इति सिद्धान्तमुक्तावली ॥ गौत-मोक्तषोडशपदार्थास्तु न्यायशब्दे द्रष्टव्याः ॥ (कपिलमते प्रकृत्यादयः पञ्चविंशतिः । पातञ्जल-मते तु ईश्वरेण सह षड्विंशतिः । वेदान्तमते आत्मानात्मभेदात् द्विविधः । तत्र आत्मापि द्विविधः ईश्वरजीवाद्युपाधिभेदात् । इतावपि विद्याविद्याभेदेन द्विविधौ । केवलमविद्योप-हितत्वाद्भेदव्यवहारः । अनात्मापि कारण-सूक्ष्मस्थूलभेदात् त्रिविधः इति ॥)

पदासनं, क्ली, (पदः पादस्य वा आसनम् ।) पाद-पीठम् । इति हेमचन्द्रः ॥ पा राक्षा टुञ् । इति भाषा ॥

पदिकः, पुं, (पादेन चरतीति । पाद + "पर्य्यादिभ्यः ठन् ।" ४।४।१०। इति ठन् । ततः पदादेशश्च ।) पदातिः । इत्यमरः । २ । ८ । ६७ ॥

पद्मः, पुं, (पद्भ्यां गच्छतीति । पद् + गम् + अच् । अच्योऽपीति डः ।) पदातिकः । इत्यमरः । २ । ८ । ६७ ॥

पद्धतिः, } स्त्री, (पद्भ्यां हन्ति गच्छतीति । हन पद्धती, } गतौ + क्तिन् । "हिमकाशिहतिषु च ।" ६।३।५४ । इति पद्भावः । "वङ्कादिभ्यश्च ।" ४।१।४५ । इति वा ङीष् ।) वर्त्म । (यथा, रघुः ३।४६ ।

"पथः श्रुतेर्द्वैधितार इश्वराः
मलीमसामाददते न पद्धतिम् ॥")

पंक्तिः । इति मेदिनी ॥ सत्यार्थबोधकग्रन्थः । इति हेमचन्द्रः ॥ पदवी । सा च घोषवत्सु-मित्रादिरूपा । यथा । "षष्ठेऽन्नप्राशनं मासि यदेवं मङ्गलं कुले इति मनुवचनात् चूडाकार्य्या यथाकुलमिति याज्ञवल्क्यवचनात् दैवानु-ग्रिहं कुलधर्म्मसूत्रं सगोत्रधर्म्मे नहि संत्यजेच्च इति वामनपुराणाच्च संस्कारमात्रे कुलधर्म्मानु रोधेन कालान्तरे मङ्गलविशेषाचरणवत् सूत्राणां नामकरणे वसुघोषादिरूपपद्धतियुक्त-नामलक्ष्म बोध्यम् । एवमेव कुलूकभट्टः ।" इत्यु द्वाहतत्त्वम् ॥

पद्मिमं, क्ली, (पादस्य हिमम् । "हिमकाशिहतिषु च ।" ६।३।५४ । इति पद्भावः ।) पदस्य प्रीति-लता । इति संक्षिप्तसारव्याकरणम् ॥

पद्मं, क्ली पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तु-सुहुसिति ।" उणा० । १ । १३६ । इति मन् । यद्वा, पद्मा लक्ष्मीरस्यास्ति । "अर्शं आदि-भ्योऽच् ।" ५।२।१२७ । इति अच् ।) स्वनाम-ख्यातपुष्पविशेषः । तत्पर्य्यायः । नलिनम् २ अरविन्दम् ३ महोत्पलम् ४ सहस्रपत्रम् ५ कमलम् ६ शतपत्रम् ७ कुशेशयम् ८ पङ्केरु-हम् ९ तामरसम् १० वारिजम् ११ सरसी-रुहम् १२ विसप्रसूनम् १३ राजीवम् १४ पुष्क-रम् १५ अम्भोरुहम् १६ । इत्यमरः । १ । १० । ३६-४० ॥ पङ्कजम् १७ अम्भोजम् १८ अम्बु-जम् १९ सरसिजम् २० श्रीवासम् २१ श्रीपर्णम् २२ इन्दिरालयम् २३ जलजातम् २४ अजम् २५ कंजम् २६ नलम् २७ नालीकम् २८ नालिकम् २९ वनजम् ३० अब्जानम् ३१ पुटकम् ३२ अजः ३३ । इति शब्दरत्नावली ॥ अस्य गुणाः । कषायत्वम् । मधुरत्वम् । शीतत्वम् । पित्त-कफासगाग्निजित्त्वञ्च । इति राजवल्लभः ॥ अव-शिष्टम् कमलशब्दे द्रष्टव्यम् ॥ ❀ ॥ पद्मकम् ।

तच्च गजस्य सुप्रतीकादिभेदात् विविधम् । यथा-विधेयः । (यथा, मनुः ७ । १८८ ।

"अतश्च भयमाद्यन्तौ वित्तागारं बलं तथा ।
पद्मेनैव तु यूहेन निधिपेत सदा स्वयम्" ॥)

निधिभेदः । (यथा, महाभारते । २ । १० । ६६ ।

"निधिप्रवरसंख्यौ च शङ्खपद्मौ धनेश्वरौ ।
सर्व्वान्निधीन् प्रयच्छाय उपास्तां वै धनेश्वरम्" ॥)

संख्याभेदः । तच्च दशार्बुदम् । (यथा, महा-भारते ।

"अयुतम् प्रयुतञ्चैव पद्मम् खर्व्वमथार्बुदम्" ॥)

दशशतञ्च इति मेदिनी ॥ पद्मकाष्ठौषधिः । इति धरणिः ॥ पुष्करमूलम् । सौवर्चलम् । इति राज-निर्घण्टः (वर्णविशेषः । यथा, मार्कण्डेये ४७।६ ॥

"पद्मावसाने प्रलये निद्रामुन्मीलितः प्रभुः ।
सस्मोन्निद्रस्तदा ब्रह्मा शून्यं लोकमवैक्षत" ॥)

शरीरस्थषट्पद्मानि यथा,—

"मूलाधारे त्रिकोणाख्ये रक्तज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्धे कामबीजन्तु कलाज्ञानीन्दुनादकम् ।
तदूर्द्धे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्ब्रह्मे हेमवर्णाभम् व स-वर्णचतुर्दलम् ।
इतरेषसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्धेऽम्बिसमप्रख्यं षड्दलं शोणकप्रभम् ।
बादिलान्तवर्णैस्तु युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ॥१॥
स्वाधिष्ठानं परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥२॥
तदूर्द्धे नाभिदेशे तु मणिपूरं महत्प्रभम् ।
मेघाभं विद्युदाभञ्च डकारादिफलान्वितम् ॥
मणिवद्भासितं तत् पद्मं मणिपूरं ततोऽभवत् ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥
शिवेनाधिष्ठितं पद्मं विज्ञानोकैकसारकम् ॥३॥
तदूर्द्धेऽनाहतं पद्मसहस्रादित्यसन्निभम् ।
कादिठान्ताक्षरैर्वर्णैर्द्वादशैश्च समन्वितम् ॥
तन्मध्ये वायुलिङ्गन्तु स्वर्ण्णद्युतिसमप्रभम् ।
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र जायते ॥
तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्यते ।
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ॥४॥
तदूर्द्धन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैः षोडशभिर्युक्तं धूम्रवर्णं महत्प्रभम् ॥
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महत् परम् ॥५॥
आज्ञाचक्रं तदूर्द्धे तु आज्ञानाधिष्ठितं परम् ।
आज्ञा संक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ॥६॥
कैलासाख्यं तदूर्द्धे तु बोधनीन्तु तदूर्द्धतः ।
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ! ।
षट्सहस्राम्बुजं विष्णुस्थानं तदूर्द्धमीरितम् ॥"

इति तन्त्रसारः ॥

पद्मः, पुं, (पद्यते इति । पद गतौ + "अर्त्तिस्तु स्वति ।" उणा० । १ । १३६ । इति मन् ।) रामा-रथिः । नागविशेषः । इति भरतिः ॥ (यथा, महाभारते । २ । ६ । ८ ।

"शङ्खश्च लोहितश्चैव पद्मश्चिरुचश्च वीर्य्यवान् ॥"

पद्मोत्तरालजः । स तु ह्रादगुणिनचक्रवर्त्तिगान्धर्व-गीतचक्रवर्त्तिविशेषः । बलदेवः । इति हेमचन्द्रः । षोढ्यूरतिबन्धान्तर्गीतप्रथमबन्धः । यथा,—

"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि ।
रमेताढ्यं समालब्ध्य बन्धोऽयं पद्मसंज्ञकः ॥"

इति रतिमञ्जरी ॥

पद्मर्क, क्ली, (पद्ममिव कायतीति । पद्म + के + कः । पद्मप्रतिज्ञातिरस्कारत्वात् तथात्वम् ।) बिन्दुजालम् । गजस्य सुखादिस्थो बिन्दुसमूहः । इत्यमरभरतौ ॥ (यथा, कुमारे । १ । ७ श्लोक-टीकायां मल्लिनाथः । "अतएव कुञ्जरस्य ये बिन्दवः कार्ये वयोविशेषभाविनः पद्मकाख्याः ।) पद्मकाष्ठम् । इति मेदिनीधरण्यौ ॥ (यथा, गारुडे १६८ अध्याये ।

"कर्पूरकः पद्मकश्च एतैस्तैलं प्रसाधितम् ।
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ॥"

अस्य गुणा यथा, भावप्रकाशे ।

"पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ।
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ।
गर्भसंस्थापनं रूक्षं वमिव्रणहरापयात् ॥")

कुष्ठम् । इति राजनिर्घण्टः ॥

पद्मकन्दः, पुं, (पद्मस्य कन्दः ।) कमलकन्दः । तत्पर्य्यायः । मृणालकम् २ पद्ममूलम् ३ कटाक्षयम् ४ मृणालकम् ५ जलालूकम् ६ । अस्य गुणाः । कटुत्वम् । विष्टम्भित्वम् । रूक्षत्वम् । कषायत्वम् । कफपित्तकाश्मरीहरत्वादि-विनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"पद्मादिकन्दः मृणालकं करहाटञ्च कथ्यते ।
नलमूलन्तु भिस्साख्यं जलालूकञ्च कथ्यते ॥
मृणालकं शीतलं हृद्यं पित्तदाहास्रनुद्गुरु ।
दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ॥
संग्राहि मधुरं रूक्षं भिस्साख्यमपि तद्गुणम् ॥"

इति भावप्रकाशः ॥

पद्मकाष्ठं, क्ली (पद्ममिव गन्धवत् काष्ठम् ।) ओषधिविशेषः । तत्पर्य्यायः । पद्मकम् २ पीतकम् ३ पीतम् ४ भारतम् ५ शीतलम् ६ हिमम् ७ शुभम् ८ केदारजम् ९ रक्तम् १० पाटलापुष्पसन्निभम् ११ पद्मदारुम् १२ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । रक्तपित्त-विनाशित्वम् । मोहदाहज्वरश्लेष्मकुष्ठविस्फोट-शान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च भावप्रकाशे ।

"पद्मकं पद्मगन्धि स्यात्तथा पद्माह्वयं स्मृतम् ।
पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥
विसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ।
गर्भसंस्थापनं रूक्षं वमिव्रणहरापयात् ॥"

इति भावप्रकाशः ॥

पद्मकी [न,] पुं, (पद्मकं बिन्दुजालमस्यास्य । इनिः ।) भूर्णहस्तः । इति शब्दमाला ॥

पद्मकेशरः, पुं क्ली, (पद्मस्य केशरः ।) किञ्जल्कः । इति राजनिर्घण्टः ॥ (यथा, हस्तिजालसंग्रहे ।

"गोक्षीरैः पेषयेत्तुल्यं पद्मकेशरचन्दनम् ॥")

पद्मगन्धं, पद्मगन्धि, } त्रि, (पद्मस्येव गन्धोऽस्य । "उपमानाच्च ।" ५।४।१३६ । इति इच् । मुग्धबोधमते तु वातूपमानादित्युक्तेर्विभाषा ।) पद्मस्येव गन्धो यस्य तत् । इति मुग्धबोधव्याकरणम् ॥

पद्मगर्भः, पुं, (पद्मं गर्भः क्षत्तिरिव यस्य । विष्णु-नाभिकमलजातत्वात् तथात्वम् ।) ब्रह्मा । इति शब्दरत्नावली ॥ (पद्मस्य हृदयस्यपद्मस्य गर्भ आसनत्वेन कल्पितो यस्य उपासकैरितिशेषः । विष्णुः । यथा, महाभारते । १३।१४६।५१ ।

"पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ॥"

"पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् पद्मगर्भः ।"

इति भाष्यम् ॥

शिवः । यथा, तत्रैव १३।१७।१३२ ।

"पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥")

पद्मचारिणी, स्त्री (पद्ममिव चरतीति । चर + णिनिः स्त्रियां ङीप् ॥) उत्तरापथभवखनाम-ख्यातहृत्यविशेषः । (स्थलकमलिनी इति ख्याता ॥) तत्पर्य्यायः । अश्वथा २ अतिचरा ३ पद्मा ४ चारटी ५ । इत्यमरः । २ । ४ । १४६ ॥ अस्याः पर्य्यायान्तरं गुणाश्च स्थलपद्मिनीशब्दे द्रष्टव्याः ॥

पद्मतन्तुः, पुं, (पद्मस्य तन्तुः ।) मृणालम् । इति राजनिर्घण्टः ॥

पद्मदर्शनः, पुं, (पद्मस्येव दर्शनमस्य ।) श्रीवासः । इति शब्दचन्द्रिका ॥ लोवान् इति भाषा ॥

पद्मनाभः, पुं,] (पद्मं नाभौ यस्य । "अच् प्रत्यन्वव पूर्व्वात् सामलोम्नः ।" ५ । ४ । ७५ । इत्यत्र "अच्" इति योगविभागादच् । ब्रह्मोत्पत्ति-कारणीभूतपद्मस्य नाभिजातत्वादस्य तथात्वम् ।) विष्णुः । इत्यमरः । १ । १ । १० ॥ (यथा, महा-भारते । १३ । १४६ । १६ ॥

"अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥")

ध्यायने तस्य ध्यानीयत्वं यथा,—

"औषधं चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च विवाहे च प्रजापतिम् ॥"

इत्यादि हृद्वन्निर्द्देशेश्वरपुराणम् ॥

(हृदयपद्मस्यनाभौ नाभेरौषदुपरिभागे प्रकाश-मानत्वात् महादेवः । यथा, महाभारते । १३ । १७ । १०५ ।

"पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ॥"

पद्मवत् वर्त्तुलाकृतिः नाभिर्यस्य । भूतराष्ट्रपुत्र-भागन्यतमः । यथा, महाभारते ।१।६७।८५ ।

"ऊर्णनाभः पद्मनाभस्तथा नन्दोपनन्दकौ ॥"

नागविशेषः । यथा, तत्रैव । १२ । ३५५ । ४ ।

"क्षत्राधिवासो धर्म्मात्मा तत्र चक्षुःश्रवा महान् ।
पद्मनाभो महानाभः पद्म इत्येव विश्रुतः ॥")

भाषिजिनविशेषः । इति हेमचन्द्रः ॥ (क्षत्रि-यान्तरविशेषः । यथा, गोः रामायणे १ ।३१।७ ।

"पद्मनाभो महानाभः सुनाभो दुन्दुभिस्वनः ॥")

पद्मनाभिः, पुं, (पद्मं नाभौ यस्य । अजातिः योग-विभागस्य असार्व्वत्रिकत्वात् न अच् ।) पद्म-नाभः । इति द्विरूपकोषः ॥

पद्मनालं, क्ली, (पद्मस्य नालम् ।) मृणालम् । यथा,

"कर्णिका पद्मनालन्तु मृणालं तन्तुलं बिसम् ॥"

इति हेमचन्द्रः । ४ । २३१ ॥

पद्मपर्णं, क्ली, (पद्मस्य पर्णमिव । पद्मपर्णाकृत्या-दस्य तथात्वम् ।) पुष्करमूलम् । इत्यमरः । २ । ४ । १४५ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये । "श्वेतपद्मकपद्मपत्रप्रभृतिभिः ॥"*॥ पद्मस्य पत्रम् ।) कमलदलम् ॥ (यथा, हठयोग दीपिकायाम् । २ । ७० ।

"अन्तः प्रवर्त्तितोदारमारुतापूरितोदरः ।
पयस्यगाधेऽपि सुखात् प्लवते पद्मपत्रवत् ॥")

पद्मपर्णी, क्ली, (पद्मस्य पर्णं पत्रम् ।) पद्मपत्रम् । पुष्करमूलम् । इत्यमरटीका ॥

पद्मपलाशलोचनः, पुं, (पद्मस्य पलाशे पत्रे इव लोचने यस्य । पद्मपुष्पदलाकारचक्षुर्विशिष्टत्वा-त्तथात्वम् ।) विष्णुः । । यथा,—

"नान्यं ततः पद्मपलाशलोचनाद्-
दुःखच्छिदन्ते मृगयामि कञ्चन ।
यो मृग्यते हस्तगृहीतपद्मया-
श्रियेतरैरङ्ग ! विमृग्यमाणया ॥"

इति श्रीभागवते ४ स्कन्धः ॥

पद्मपाणिः, पुं, (पद्मं पाणौ यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ बुद्धः । सूर्य्यः । इति त्रिकाण्ड-शेषः ॥ (पद्महस्तके त्रि ॥)

पद्मपुष्पः, पुं, (पद्ममिव पुष्पमस्य ।) कर्णिकार-वृक्षः । पिकाङ्गपक्षी । इति शब्दचन्द्रिका ॥

पद्मप्रभः, पुं, (पद्मस्येव प्रभा दीप्तिरस्य ।) चतु-र्विंशतितीर्थङ्करगर्भतपष्ठार्हन् । इति हेम-चन्द्रः ॥ पद्मतुल्यप्रभायुक्ते त्रि ॥

पद्मप्रिया, स्त्री, (पद्मानि प्रियाणि यस्याः ।) जरत्कारुमुनिपत्नी । मनसादेवी । इति शब्द-रत्नावली ॥ (गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ६४ ।

"पद्मप्रिया पद्मसंस्था पद्माक्षी पद्मसम्भवा ॥")

पद्मबन्धः, पुं, (पद्मस्येव बन्धो रचना यस्य ।) चित्रकाव्यविशेषः । शब्दालङ्कारभेदः । यथा,

"पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।"

अस्य च तथाविधसन्निवेशवशेन चमत्कार-विधायिनामपि वर्णानां तथाविधश्लोकाद्या-वयवविशेषवशेन च चमत्कारविधायिभि-र्वर्णैरभेदेनोपचारात्तच्छब्दालङ्कारत्वम् । उदा-हरणं यथा, साहित्यदर्पणे ॥

"मारमा हुयमा चारु रुचा मार वधूत्तमा ।
मात्त धूर्त्ततमा वासा सा वामा मेस्तु मा रमा ॥"

अत्र पद्मदलेषु वर्णविन्यासक्रमः ॥



पद्मबन्धुः, पुं (पद्मस्य कमलस्य बन्धुः । सूर्य्योदये पद्मस्य प्रकाशतया तथात्वम् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (पद्मेन बध्यते कथ्यते असौ निशायां मधुलोभात् इति भावः । बन्ध + उन् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पद्मभूः, पुं, (पद्मं विष्णुनाभिभवकमलं भूरुत्पत्तिस्थानं यस्य । (यद्वा, पद्मात् भवतीति । भू + क्विप् ।) ब्रह्मा । इति हलायुधः ॥ (अस्योत्पत्तिकथा यथा भागवते । ६ । ६ । ८—६ ।

"परावरेषां भूतानामात्मा यः पुरुषः परः ।
स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन ॥
तस्य नाभेः समभवत् पद्मकोशो हिरण्मयः ।
तस्मिन् जज्ञे महाराज ! स्वयम्भूश्चतुराननः ॥")

पद्मसुखी, स्त्री, (पद्मस्य सुखमिव सुखं उत्पत्तिप्रारम्भो यस्याः । स्त्रियां ङीप् ।) दूरालभा । इति शब्दचन्द्रिका ॥ (पद्मस्य सुखमिव सुखं वदनं यस्य ।) पद्मसदृशमुखविशिष्टे त्रि ॥

पद्मयोनिः, पुं, (पद्मं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानं यस्य ।) ब्रह्मा । यथा,—

"अस्माच्च कारणाद्ब्रह्मन् ! पुत्रो भवतु मे भवान् ।
पद्मयोनिरिति ख्यातो मत्प्रियार्थं जगत्त्रयः ॥"

इति कौर्म्मे ६ अध्यायः ॥

पद्मरागः, पुं, (पद्मस्येव रागो यस्य ।) रक्तवर्णमणिविशेषः । माणिक इति भाषा । तत्पर्य्यायः । शोणरत्नम् २ । लोहितकः ३ । इत्यमरः । २ । ६ । ६२ ॥ लोहितम् ४ । कुरुविन्दकम् ५ । इति शब्दरत्नावली ॥ (इदानीं संक्षिप्तायां ८० अध्याये अस्य परीक्षादिकं यथा, —

"सौगन्धिककुरुविन्दस्फटिकेभ्यः पद्मरागसम्भूतिः ।
सौगन्धिकजा भ्रमराङ्गनाजम्बूरसद्युतयः ॥
कुरुविन्दभवाः प्रबला मन्दद्युतयश्च धातुभिर्विद्धाः ।
स्फटिकभवा द्युतिमन्तो नानावर्णा विदुश्चाच्छाः ॥
स्निग्धः प्रभानुलेपी स्वच्छोऽधिष्ठानगुरुसंस्थानः ।
अन्तःप्रभोऽतिरागी मणिरत्नगुणाः समस्तानाम् ॥
कलुषा मन्दद्युतयो लेखाकीर्णाः सधातवः खरुक्षाः ।
दुर्विद्धा न मनोज्ञाः सङ्कररागाश्च मणिदोषाः ॥
भ्रमरशिखिकण्ठवर्णा
दीपशिखासमप्रभो भुजङ्गानाम् ।
भवति मणिः किल मूर्द्धनि योऽनर्घ्यः स विज्ञेयः ॥
यस्तं बिभर्त्ति मनुजाधिपतिर्न तस्य
दोषा भवन्ति विषरोगकृताः कदाचित् ।
राष्ट्रं च नित्यमभिवर्षति तस्य देवः
शस्त्रञ्च नाशयति तस्य मणेः प्रभावात् ॥
षड्विंशतिः सङ्ख्यागोक्षस्य मणेः पलप्रमाणस्य ।
कर्षचयस्य विंशतिरुपदिष्टा पद्मरागस्य ॥
अर्द्धपलस्य द्वादशकर्षसंख्यस्य षट् सङ्ख्याणि ।
यद्भारमाषकृष्णं तस्य सङ्ख्यत्रयं मूल्यम् ॥

माषकचतुष्टयं द्रम्भशतकयं
द्वौ तु पञ्चशतमूल्यौ ॥
परिकल्प्यमन्तरालेष्वन्यं हीनाधिकगुणानाम् ॥
वर्णे घनस्यार्द्धं तेजोहीनस्य मूल्यमर्धांशः ।
अल्पगुणो बहुदोषो मूल्यात् प्राप्नोति विंशांशम् ॥
आधन्नं व्रणबहुलं स्वल्पगुणञ्चाप्नुयाद्विंशतिभागम् ।
इति पद्मरागमूल्यं पूर्व्वाचार्य्यैः समुद्दिष्टम् ॥")

राजनिर्घण्टोक्तपर्य्यायगुणौ माणिक्यशब्दे द्रष्टव्यौ तस्य वर्णो यथा,—

"सिंहले तु भवेद्रक्तं पद्मरागमनुत्तमम् ।
पीतं काञ्चनपुरोद्भूतं कुरुविन्दमिति स्मृतम् ॥
अशोकपल्लवच्छायमम्बु सौगन्धिकं विदुः ।
तुम्बुरे छायया नीलं नीलगन्धि प्रकीर्त्तितम् ॥
उत्तमं सिंहलोद्भूतं निजरं तुम्बुरोद्भवम् ।
मध्यमं मध्यमं ज्ञेयं माणिक्यं क्षेत्रभेदतः ॥*॥

तथा च ।

बन्धूकगुञ्जासकलेन्द्रगोप-
जवाप्रवालाङ्कसमानवर्णौभाः ।
माणिक्यवो दाडिमबीजवर्णा-
स्तथापरे किंशुकपुष्पभासः ॥
सिन्दूरपद्मोत्पलकुङ्कुमानां
लाक्षारसस्यापि समानवर्णाः ।
सान्द्रे निरागे प्रभया स्वयैव
भान्ति स्वसञ्ज्ञा स्फुटमध्यशोभाः ॥
भानोश्च भासामनुवेधयोगं
मासाद्य रश्मिप्रकरांश्च दूरम् ।
पार्श्वानि सर्व्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥
कुसुम्भनीलीद्युतिमिश्ररागा
प्रत्यग्ररक्ताम्बरतुल्यभासः ।
तथापरेऽरुष्करकण्टकाभै-
पुष्पत्विषो हिङ्गुलकत्विषोऽन्ये ॥
चकोरपुंस्कोकिलसारसानां
नेत्रावभासश्च भवन्ति कस्यचित् ।
अन्ये पुनर्नीतिविपश्चितानां
तुल्यत्विषः कोकनदोदराणाम् ॥
प्रभावकाठिन्यगुरुत्वयोगैः
प्रायः समानाः स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासः
सौगन्धिकाख्या मणयो भवन्ति ॥
यो मन्दराजः कुरुविन्दजेषु
न एव जातः स्फटिकोद्भवेषु ।
निरप्रियोऽल्पैर्बहुलीभवन्ति
प्रभावयुक्तोऽपि न तत्समानाः ॥
ये तु रावणगङ्गायां जायन्ते कुरुविन्दकाः ।
पद्मरागा घनं रागं बिभ्राणाः स्वस्फुटार्चिषः ॥
वर्णानुयायिनस्तेषामन्यदोषो तथापरे ।
न जायन्ते तु ये कैश्चित् मूल्यलेशमवाप्नुयुः ॥
तथैव स्फटिकोत्थानां दोषो मुम्बुरसंभवे ।
सधर्म्माणः प्रजायन्ते स्वल्पमूल्याश्चिरेण ते ऽपि ॥"

अथ जात्यादि ।

"माणिक्यस्य प्रवक्ष्यामि यथा जातिचतुष्टयम् ।
ब्रह्मक्षत्रियवैश्यानां शूद्राणाञ्च यथाक्रमम् ॥
रक्तश्वेतो भवेद्विप्रश्चलितरक्तस्तु क्षत्रियः ।
रक्तपीतो भवेद्वैश्यो रक्तनीलस्तथान्त्यजः ।
पद्मरागो भवेद्विप्रः कुरुविन्देषु बाहुजः ।
सौगन्धिको भवेद्वैश्यो मांसखण्डस्तथान्त्यजः ॥
द्रोणपद्मसमाकारः खदिराङ्गारसप्रभः ।
पद्मरागो द्विजः प्रोक्तश्छायाभेदेन सर्व्वदा ॥
गुञ्जाबिम्बूरबन्धूकनागरङ्गसमप्रभः ।
दाडिमीकुसुमाभासः कुरुविन्देषु बाहुजः ॥
हिङ्गुलाभाशोकपुष्पाभमीषत्पीतलोहितम् ।
ज्वालाशारसप्रायं वैश्यं सौगन्धिकं विदुः ॥
आरक्तः कान्तिहीनश्च चिक्कणश्च विशेषतः ।
मांसखण्डसमाभासो ज्ञेयस्त्वन्त्यजः पापनाशनः ॥"

मांसखण्डस्तु नीलगन्धेः संज्ञा ॥ * ॥

अथ दोषाः ।

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः ।
द्विच्छायश्च द्विरूपश्च सम्भेदः कर्करस्तथा ॥
अशोभनं कोकिलश्च जलं धूम्राभिधश्च वै ।
गुणाष्टकस्य आख्याताश्छायाः षोडश कीर्त्तिताः ॥
छायास्तु पूर्व्वोक्ता एव ।
"छायाद्वितयसम्बन्धाद्द्विच्छायं बन्धुनाशनम् ।
द्विरूपं द्विपदश्लेन माणिक्येन पराभवः ॥
सम्भेदो भिन्नमित्युक्तं शस्त्रघातविधायकः ।
कर्करं कर्करायुक्तं पशुबन्धुविनाशनम् ॥
दूर्व्वयेव समालिप्तमम्बुपीतमुच्यते ।
अशोभनं समुद्दिष्टं माणिक्यं बन्धुदुःखदम् ॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम् ।
आयुर्लक्ष्मीयशो हन्ति सदोषं नव धारयेत् ॥
रागहीनं जलं प्रोक्तं धनधान्यापवादकृत् ।
धूम्रं धूमसमाकारं वैद्युतं भयमावहेत् ॥

तथा,—

"शोभाहीनप्रभावन्तो ये मण्यः क्षतिकारकाः ।
उभयत्र पदं येषां तेन च स्यात् पराभवः ॥
भिन्नेन युद्धे बन्धुः स्यात् कर्करेणाग्निनाशनम् ।
दूर्व्वयेव समालिप्तः पुटके यस्तु सम्भवेत् ॥
दुःखदस्तं स समाख्यातो न दृष्टे रक्षणोचितः ।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता ॥
तेषाञ्च बन्धुभदाः स्युर्न ते धार्य्या कदाचन ॥"

अथ गुणाः ।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता ॥"

तथा च ।

"वर्णाधिकं गुरुत्वञ्च स्निग्धता समताच्छता ।
अच्छिन्नता महत्ता च मणीनां गुणसंग्रहः ॥"*॥

फलम् ।

"ये कर्कराश्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः पतया विवर्णाः ।
न ते प्रशस्ता मणयो भवन्ति
समानतो जातिगुणैः समस्तैः ॥
दोषोपदष्टं मणिमप्रशोधाद्-
बिभर्त्ति यः कञ्चन कञ्चिदंशम् ।

नं चक्षुदःखाय सकलसुविस-
नाग्रादयो दोषगणा भजन्ते ॥
सपद्मकेऽपि ह्रदताधिवासं
प्रमादतस्तावपि वर्तमानम् ।
न पद्मरागस्य महागुणस्य
भर्तारमापन्न समुपैति काचित् ॥
दोषोपसर्गप्रभवाश्च ये ते
नोपद्रवास्तं समभिद्रवन्ति ।
गुणैः समग्रैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति ॥" * ॥

अस्य परीक्षा यथा,—

"बालार्ककरसंस्पर्शात् यः स्निग्धां लोहितां वमेत् ।
रक्तवेदाश्रमं वापि स महागुण उच्यते ॥
दग्धे घृतगुणो स्निग्धो रक्तवेदयः समन्ततः ।
वमेत् स्निग्धां लोहितां वा पद्मरागः स उत्तमः ॥
अन्धकारे महाघोरे यो व्यक्तः सन् महामणिः ।
प्रकाशयति सूर्याभः स श्रेष्ठः पद्मरागकः ॥
पद्मकोषे तु यो व्यक्तो विकाशयति तत्क्षणात् ।
पद्मरागवरो ज्ञेय देवानामपि दर्लभः ॥
सर्वारिष्टप्रशमनः सर्वसम्पत्तिदायकः ।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम् ॥
यो मणिर्दह्यते दूराच्छुल्वह्निसमच्छविः ।
वैद्युताग्निः स विज्ञेयः सर्वसम्पत्तिकारकः ॥
पञ्च सप्त नव त्रिंशति रागः
स्निग्ध एव सकलः खलु वर्ण्यः ।
वर्ण्यतेऽन्यमपि वा करजाल-
सुत्तरोत्तरमहागुणिनञ्च ॥
नीलं-रसं दग्धरसं जलं वा
यो रञ्जयति स्निग्धतप्रमाणम् ।
तं तं यथापूर्व्वमतिप्रधक्ता:
सौभाग्यसम्पत्तिविधानदायकाः ॥" * ॥

परिमाणम् ।

"गुञ्जाफलप्रमाणस्तु दृश्यसन्निगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
क्रोष्टुकोलफलाकारो द्वादशाष्टाधिगुञ्जकान् ।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः ॥
बदरीफलतुल्यो यः स्वदृश्यसुमाषक ।
तथा धात्रीफलस्निग्धदृश्यतिन्द्राष्टमाषकः ॥
तथाक्षफलतुल्यो यो वह्निपक्वैकमाषकः ।
ताम्बूलफलमानो यश्चतुस्त्रिद्विकतोलकः ॥
बिल्वोपलसमाकारो वसुषड्दृश्यतोलकः ।
अतःपरं प्रमाणेन मानेन च न लभ्यते ।
यदि लभ्येत पुण्येन तदा सिंहमवाप्नुयात् ॥
केचिच्छाकनराः सन्ति जातीनां प्रतिरूपकाः ।
विज्ञातयः प्रयत्नेन विज्ञातव्यास्तु पद्मरागाणाम् ॥
कलमपुरोद्भवसिंहलसुम्बुरदेशोत्थमुक्तमालीयाः ।
श्रीपर्व्वताश्च सद्वृत्ता विज्ञातयः पद्मरागाणाम् ॥
तुषापसर्गात् कलसाभिधान-
मातास्रभावादपि तुम्बुरुत्थम् ।
कार्षात्तथा सिंहलदेशजातं
सुक्ताभिधानं गमस्तः स्वभावात् ।
श्रीपर्व्वतं दीप्तिनिराकृतित्वा-
द्विज्ञातिलिङ्गात्रय एव भेदाः ॥"

तथा च ।

"स्नेहप्रदिग्धो मृदुता लघुत्वं
विज्ञातिलिङ्गं खलु सार्व्वजन्यम् ।
यः श्यामिकां पुष्यति पद्मरागो
यो वा तुषाग्रामिव चूर्णमध्यः ॥
स्नेहप्रदिग्धो न च यो बिभाति
यो वा प्रस्टष्टः प्रजहाति दीप्तिम् ।
आक्रान्तलङ्घ्यौ च तथाङ्गुलिभ्यां
यः कालिकां पार्श्वगतां बिभर्त्ति ॥
सम्प्राप्य चोत्क्षेपपथागुवृत्तिं
बिभर्त्ति यः सर्व्वगुणानतीव ।
तुल्यप्रमाणस्य च तुल्यजाति-
र्यो वा गुरुत्वेन भवेन्न तुल्यः ॥
प्राप्यापि रत्नाकरजां स्वजातिं
लक्षेतुरत्वेन गुणेन विद्वान् ॥
अप्रणश्यति सन्दीप्ते म्लिलायां परिवर्धयेत् ।
दृष्टो योऽत्यन्तशोभावान् गरिमाणं न मुञ्चति ।
स ज्ञेयः सुहृज्जातिस्तु ज्ञेयाचार्य्ये विजानयः ॥
स्वजातकं समुत्पेन विलिखेद्वा परस्परम् ।
वज्रं वा कुरुविन्दं वा विमुखाभ्यो न्यकेनचित् ।
न पाक्यं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः ॥
जातस्य सर्व्वेऽपि मणेर्न जातु
विजातयः कान्तिसमानवर्णाः ।
तथापि नानाकरणार्थमेवं
भेदप्रकारः परमः प्रदिष्टः ॥
गुणोपपन्नेन सहाववद्धो
मणिस्तु घार्य्यो विगुणेन जात्यः ।
न कौस्तुभेनापि सहाववद्धं
विद्वान् विजातिं विभृयात् कदाचित् ॥
चक्राल रक्तोऽपि यथा हिजातीन्
समेत्य भूरीनपहन्त्यवश्यात् ।
तथा मणीन् भूरिगुणोपपन्नान्
गृह्णाति विद्रावयितुं विजातः ॥" * ॥

अथ मूल्यम् ।

बालार्काभिमुखं स्थाप्य दर्पणे धारयेन्मणिम् ।
तत्र कान्तिविभागेन छायाभागं विनिर्दिशेत् ॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुन्मापितगौरवस्य ।
तत्पद्मरागस्य गुणान्वितस्य
स्याच्चाषकाख्या तुलितस्य मूल्यम् ॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम् ।
तावन्मूल्यं तथामुद्रे कुरुविन्दे विधीयते ॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम् ।
तावन्मूल्याच्चतुर्थांशहीनं स्याद्दे सुगन्धिके ॥
यावन्मूल्यं समाख्यातं वैद्यवर्गे च सूरिभिः ।
तावन्मूल्यच्चतुर्थांशं क्षीयते शूद्रलक्षणे ॥
पद्मरागः पगं यस्तु धत्ते लाक्षारसप्रभः ।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः ॥
इन्द्रगोपकसङ्काशः कर्षत्रयधृतो मणिः ।
द्वाविंशतिं सहस्राणां तस्य मूल्यं विनिर्दिशेत् ॥

एकोनो नूयते यस्तु जवाकुसुमसन्निभः ।
कार्षापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षं यस्तु प्रतुल्यते ।
कार्षापणशतानान्तु मूल्यं सद्भिः प्रकीर्त्तितम् ॥
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सम्मितः ।
कार्षापणशतानान्तु विंशतिं मूल्यमादिशेत् ॥
चत्वारो माषका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं सूरिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु गुणैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं द्विशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतोऽन्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
स्वर्णद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पुराणद्वयसम्मतः ।
अन्ये कुसुम्भपानीयमञ्जिष्ठोदकसन्निभाः ॥
काषाया इति विख्याताः स्फटिकप्रभवाश्च ते ।
तेषां दोषान् गुणान् वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यानां चतुर्णां ये प्रकीर्त्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्या सम्पत्तिहेतवे ।
अतोऽन्यथा धृतः कुर्य्यादोगघ्नोकभयत्रयम् ॥"

इति युक्तिकल्पतरौ पद्मरागपरीक्षा ॥

पद्मलाञ्छनः, पुं, (पद्मवत् लाञ्छनं पद्माकारलक्षणं चिह्नमितियोगः यस्य ।) ब्रह्मा । सूर्य्यः । कुबेरः । राजा । इति मेदिनी ॥ (बुद्धविशेषः । इति हेमचन्द्रः ॥)

पद्मलाञ्छना, स्त्री, (पद्मं लाञ्छनं यस्याः ।) तारा । लक्ष्मीः । सरस्वती । इति मेदिनी ॥

पद्मवर्णकं, क्ली, (पद्मस्येव वर्णोऽस्य । कप् । पुष्करमूलम् । इति जटाधरः ॥ पद्मतुल्यवर्णे युक्तं त्रि ॥

पद्मवासा, स्त्री, (पद्मे वासो यस्याः ।) लक्ष्मीः । इति हेमचन्द्रः ॥

पद्मबीजं, क्लीं, (पद्मस्य बीजम् ।) कमलबीजम् । तत्पर्य्यायः । पद्माक्षम् २ मालोत्थम् ३ कन्दली ४ भेण्डा ५ क्रौञ्चादनी ६ क्रौञ्चा ७ श्यामा ८ पद्मपर्कटी ९ । अस्य गुणाः । कटुत्वम् । स्वादुत्वम् । पित्तरक्तहृद्दाहास्रशोषनाशित्वम् । पाचनत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

"पद्मबीजं हिमं स्वादु कषायं तिक्तकं गुरु ।
विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् ॥
कफवातकरं बल्यं आहि पित्तास्रदाहजुत् ॥"

इति भावप्रकाशः ॥

(पद्मबीजमालाजपेनासु साधकः सिद्धिमाप्नुयात् । इति तन्त्रशास्त्रे प्रसिद्धिः ॥ तदुक्तं यथा,—

"भक्त्या यो जपते नित्यं पद्मबीजैः सुदीपकः ।
व्यचिराल्लभते सिद्धिं सत्यं सत्यं न संशयः ॥"

पद्मबीजाभं, क्लीं, (पद्मबीजस्य आभा इव आभा यस्य । पद्मबीजवत् आभातीति वा । आ + भा + क; ।) मखाग्रम् । इति राजनिर्घण्टः । मखाना इति भाषा ॥

पद्मा. स्त्री, (पद्मं वासस्थलत्वेनास्त्यस्याः। "अर्शं आदिभ्योऽच्।" ५।२।१२७। इति अच् टाप् च।) लक्ष्मीः। (यथा, रघुः। ४।५।
"हायामकज्जलश्यामैस्तमद्यप्रा किल स्वयम्।
पद्मा पद्मातपत्रेण मेजे सान्ध्यदीधितम्॥")
लवङ्गम्। पद्मचारिणी। इत्यमरः॥ (पद्यते इति। "अर्त्तिसुञ्जीति।" उणा०। १।१४०। इति मन् टाप् च।) पन्नगी। सा तु मनसा। फञ्जिका। इति मेदिनीशब्दरत्नावली॥ वृत्ताई भाता। इति हेमचन्द्रः॥ कुसुम्भपुष्पम्। इति रत्नमाला॥ वृहद्रथराजकन्या कल्किदेवेन विवाहिता। यथा, कल्किपुराणे १० अध्यायः॥
"हरेरागमनं श्रुत्वा सहर्षोऽभूद्वृहद्रथः।
पुरोधसा ब्राह्मणैश्च पात्रैर्मित्रैः समङ्गलैः॥
वाद्यसाङ्गवगीतैश्च पूजायोजनपाणिभिः।
जगामानयितुं कल्किं सार्द्धं निजजनैः प्रभुः॥
ततो जलाशयाभ्याशं गत्वा विष्णुयशःसुतम्।
मणिवेदिकमासीनं भुवनैकगतिं पतिम्॥
ददर्श पुरतो राजा रूपशीलगुणाकरम्।
साश्रुः सपुलकः श्रीमान् दृष्ट्वा साधु समर्चयत्॥
ज्ञानागोचरमेतन्मे तवागमनमीश्वर!।
यथा मान्धातृपुत्रस्य यदुनाथेन कानने॥
इत्युक्त्वा तं पूजयित्वा समानीय निजाश्रमे।
हर्म्यप्रासादसंबाधे स्थापयित्वा ददौ सुताम्॥
पद्मो पद्मविशालाक्षो पद्मनेत्राय पद्मिनीम्।
पद्मजादेग्रितः पद्मनाभायाद्दादयथा श्रियम्॥
कल्किर्लब्ध्वा प्रियां भार्यां सिंहले साधु सत्कृतः।
ससुवास विशेषज्ञः समीक्ष्य द्वीपमुत्तमम्॥"

पद्माकरः, पुं, (पद्मस्य आकरः।) पद्मजनकजलाशयः। तत्पर्य्यायः। तडागः २ कासारः ३ सरसी ४ सरः ५। इत्यमरः। १।१०।२८॥ सरोजिनी ६। इति जटाधरः॥ सरोवरः ७ तडागः ८ तटाकः ९ सरस्म् १० सरम् ११ सरकम् १२। इति शब्दरत्नावली॥ पद्म सदैवागाधे महाजलाशये सपद्मे योग्यतया निष्पन्ने च। पद्मैव सरोमात्रे। इति पञ्जिकाकोष्कटादयोऽपि। पद्माकरादिद्वयं सपद्माम्बुजलाशये। कासारादित्रयं त्वन्यिमपद्माकरे। इति व्याख्यादयः। पद्माकरादिद्वयं पद्मयुक्तजलाशयमात्रे। कासारादित्रयं सरोवरमात्रे। इत्यन्ये। पद्मानामाकर उत्पत्तिस्थानं पद्माकरः क्वचित् पद्मशून्योऽपि योग्यतयेति सुभूतिः। इति भरतः॥

पद्माक्षं, क्ली, (पद्मस्य अक्षीव। समासे अच्।) पद्मबीजम्। इति हारावली॥ (पद्मे इव पद्मपलाशवत् अक्षिणी यस्य।) पद्मतुल्याक्षे त्रि॥

पद्माटः, पुं, (पद्मं पद्मसाङ्घयं अटति गच्छति पद्मेषीति अट गतौ + "कर्म्मण्यण्।" ३।२।१। इति अण्।) चक्रमर्दः। इत्यमरः। २।४। १४७॥

पद्मालया, स्त्री, (पद्ममेव आलयो वासस्थानं यस्याः।) लक्ष्मीः। लवङ्गम्। इत्यमरः॥ (लक्ष्मीस्वरूपत्वात् गङ्गापि। यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने। २६।१०५।
"पद्मालया पराशक्तिः पुरचित्परमप्रिया॥")

पद्मावती, स्त्री, (पद्म + अस्त्यर्थे मतुप् मस्य वत्वम्। संज्ञायां दीर्घः।) मनसादेवी। नदीविशेषः। पद्मा इति ख्याता। इति शब्दरत्नावली॥ पद्मचारिणी। इति जटाधरः॥ जयदेवपत्नी। यथा,—
"जयति पद्मावतीरमणजयदेव-
कविभारतीभणितमनिशातम्।"
इति गीतगोविन्दः॥

पद्मावतीप्रियः, पुं, (पद्मावत्याः प्रियः स्वामी।) जरत्कारुमुनिः। इति शब्दरत्नावली॥ जयदेवश्च॥

पद्मासनं, क्ली, (पद्ममिव पद्माकारेण बद्धमित्यर्थः। आसनम्।) योगासनविशेषः। यथा,—
"वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविकारनाशजनकं पद्मासनं प्रोच्यते॥"
अन्यत्रापि।
"वामोरूपरि दक्षिणं हि चरणं संस्थाप्य वामं तथा-
प्यूरूपरि तस्य बन्धनविधौ धृत्वा कराभ्यां दृढम्।
अङ्गुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकये-
देतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते॥"
इति गोरक्षसंहिता॥
(मत्स्येन्द्रनाथाभिमतं पद्मासनं यथा, हठयोगदीपिकायाम्। १।४४-४७।
"वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा
दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम्।
अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्र-
मालोकयेदेतद्व्याधिविनाशकारि यमिनां
पद्मासनं प्रोच्यते॥
उत्तानौ चरणौ कृत्वा ऊरुसंस्थौ प्रयत्नतः।
ऊरुमध्ये तथोत्तानौ पाणी कृत्वा ततोदृशौ॥
नासाग्रे विन्यसेद्राजदन्तमूले तु जिह्वया।
उत्तभ्य चिबुकं वक्षस्युत्थाप्य पवनं शनैः॥
इदं पद्मासनं प्रोक्तं सर्व्वव्याधिविनाशनम्।
दुर्लभं येन केनापि धीमता लभ्यते भुवि॥")
पूजार्थं धातुमयपद्माकारासनञ्च।
(रतिविषयकपद्मासनम् यथा, रतिमञ्जर्य्याम् ४०
"पद्मासनो नागपादौ ललाटेऽञ्जलिसंपुटः।"
लक्षणं यथा, तत्रैव ४२।
"हस्ताभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेद्गाढं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः॥")

पद्मासनः, पुं, (पद्मं विष्णुनाभिकमलं आसनं यस्य।) ब्रह्मा। कमलासनः। इत्यमरदर्शनात्॥

पद्मिनी, स्त्री, (पद्मानि सन्त्यस्याम्। पुष्करादित्वादिनिः।) पद्मयुक्तदेशः। पद्मसमूहः। पद्मलता। इति भरतः॥ तत्पर्य्यायः। नलिनी २ विसिनी ३। इत्यमरः। १।१०।३६॥ कुवालिनी ४ कमलिनी ५ पुटकिनी ६ पङ्कजिनी ७ सरोजिनी ८। इति माधवः॥ नालिकिनी ९ नालीकिनी १० अरविन्दिनी ११। इति कोषान्तरम्॥ अम्भोजिनी १२ पुष्करिणी १३ जम्बालिनी १४। इति शब्दरत्नावली॥ अलिनी १५। तस्या लक्षणं यथा,—
"नलनालदलोत्पुल्लकलेः वसुविता पुनः।
पद्मिनी प्रोच्यते प्राज्ञैर्विलिन्यादिश सा स्मृता॥"
तस्या गुणाः।
"पद्मिनी मधुरा तिक्ता कषाया स्निग्धिरा परा।
पित्तक्रिमिश्रीषवान्तिभान्तिसन्तापदोषहृत्॥"
इति राजनिर्घण्टः॥ *॥
(पद्मं पद्मगन्धोऽस्यस्याः पद्मस्य गन्ध इव गन्धो विद्यते शरीरे यस्या इति तात्पर्य्यार्थः अथवा पद्मगन्धयोस्तादात्म्यमङ्गीकृत्यैव समासः कथितः।) चतुर्लिङ्गस्त्रीभेदे स्त्रीविशेषः। तस्या लक्षणं यथा,—
"भवति कमलनेत्रा नासिकात्युन्नतास्या
अविरलकुचयुग्मा दीर्घकेशी लघ्वङ्गी।
मृदुवचनसुशीला कृत्यगीतानुरक्ता
सकलतनुसुवेषा पद्मिनी पद्मगन्धा॥"
इति रतिमञ्जरी। ४॥* ॥
(अस्या रतिप्रकारः यदुक्तः तत्रैव। २८।
"कृत्वा करेण संमर्दं पीडयेदधरं दृढम्।
रमणं पद्मबन्धेन पद्मिनीरतिमादिशेत्॥")
सरोवरम्। पद्मम्। इति विश्वः॥ (यथा, कुमारे। ३।७६।
"सुरगज इव विभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीद् वेगदीर्घोत्तराङ्गः॥")
लक्षणम्। इति शब्दमाला॥ हस्तिनी। इति धरणिः॥

पद्मिनीकण्टकः, पुं, (पद्मिनीकण्टक इव आकृतिर्विद्यतेऽस्य।) क्षुद्ररोगविशेषः। पद्मकाँटा इति भाषा। तल्लक्षणं यथा,—
"कण्टकैराचितं वृत्तं कक्षमत्पाण्डुमण्डलम्।
पद्मिनी कण्टकप्रख्यैस्तदाख्यं कफवातजम्॥"
आचितं व्याप्तम्। पद्मिनीकण्टकप्रख्यैः पद्मिनीनालकण्टकसदृशैः। तदाख्यं पद्मिनीकण्टक नामकम्॥ *॥
तच्चिकित्सा यथा,—
"पद्मिनीकण्टके रोगे क्षुद्रयेत्रिफलावारिणा।
तेनैव सिद्धं सर्पिश्च पातुं प्रदापयेत्॥
निम्बारग्वधकल्केन सक्षुद्रक्षुद्रगं क्षिपेत्।
चतुर्गुणेन निम्बोत्थपत्रक्वाथेन गोधृतम्॥
पचेत्तत्तस्तु निम्बस्य ज्ञातमालस्य पत्रजैः।
कल्कैर्भूयः पचेत् सिद्धं तत् पिबेत् मलसंशमम्॥

पद्मिनीकण्टकाद्रोगान्मुक्तो भवति नान्यथा ॥"
इति निम्बादिवृक्षम्। इति भावप्रकाश: ॥

पद्मिनीकान्त:, पुं, (पद्मिन्या: कान्त:। षष्ठीतत्पुरुषप्रकाशकत्वादस्य तथात्वम्।) सूर्य्य:। इति जटाधर: ॥

पद्मिनीवल्लभ:, पुं, (पद्मिन्या नलिन्या वल्लभ: प्रिय:। पद्मिनी वल्लभाऽस्येति वा।) सूर्य्य:। इति शब्दरत्नावली ॥

पद्मी, [न्] पुं, (पद्मं विष्णुनालकमस्त्यस्य। पद्म + इनि:।) शङ्खी। इत्यमर:। २। ८। ३५ ॥ (यथा, महाभारते। १२। २६। ६६।
"सर्व्वा रथगता: कन्या रथा: सर्व्वे चतुर्युजः।
घनं घनं रथे नागा: पद्मिनो हेममालिन:॥"
नाभिकमले हस्ते वा पद्ममस्यास्तीति। विष्णु:। यथा, महाभारते। १३। १४६। ५०।
"अनुकूल: प्रसादज्ञ: पद्मी पद्मनिभेक्षण:।
पद्मनाभोऽरविन्दाक्ष: पद्मगर्भ: शरीरभृत्॥")

पद्मेक्षय:, पुं, (पद्मे क्षीते इति। क्षी ड क्ष क्षयने + "अधिकरणे क्षीते:।" ३। २। १५। इति अच्। "क्षयवासजाम्बिभ्यश्च।" ६। ३। १८। इत्यलुक्।) विष्णु:। इति हेमचन्द्र: ॥

पद्मोत्तर:, पुं, (पद्मादुत्तर: वर्णत: श्रेष्ठ:।) कुसुम्भ:। इति राजनिर्घण्ट: ॥

पद्मोत्तरात्मज:, पुं, (पद्मोत्तरस्य आत्मज: पुत्र:।) जिनचक्रवर्त्तिविशेष:। इति हेमचन्द्र: ॥

पद्मोद्भव:, पुं, (पद्मं उद्भव उत्पत्तिस्थानं यद्वा पद्मे पद्मादुद्भवो यस्य।) ब्रह्मा। अब्जयोनिरित्यमरदर्शनात् ॥ (यथा, महाभारते। १३।६।४।
"तत: पद्मोद्भवो राजन्! देवदेव: पितामह:।
उवाच मधुरं वाक्यमर्थवद्भूतभूषितम्॥")

पद्मोद्भवा, स्त्री, (पद्मं पद्मादुद्भवो यस्या:।) मनसा देवी। यथास्या: पौराणिकध्यानम्।
"कान्त्या काञ्चनसन्निभां सुवदनां पद्मासनां पद्मिनीं
नागेन्द्रै: जनपोषणां विषहरीं पद्मोद्भवां जाङ्गुलीम्॥"

पद्म, क्ली, (पदं चरणमर्हतीति। पद + यत्।) कविकृति:। श्लोक:। इत्यमर:। ३। ५। ३१ ॥ तस्य लक्षणं यथा, छन्दोमञ्जर्य्याम्।
"पद्यं चतुष्पदी ब्रह्म वृत्तं जातिरिति द्विधा।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्॥"
(तच्च अन्वयगतिवशात् मुक्तकयुग्मकसन्दानितककलापककुलकभेदात् पञ्चविधम्। यदुक्तं साहित्यदर्पणे। ६। २८७।
"छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम्।
द्वाभ्यान्तु युग्मकं सन्दानितकं त्रिभिरिष्यते॥
कलापकं चतुर्भिश्च पञ्चभि: कुलकं मतम्॥"
"तदूर्द्धं कुलकं स्तुतम्।" इति क्वचित् पाठ:॥)
प्राग्भम्। इति जटाधर: ॥ ("पदमस्मिन् इत्यम्।" ४। ४। ८७। इति यत्। नास्तिशुष्ककर्दम:। इति सिद्धान्तकौमुदी ॥)

पद्म:, पुं, (पद्मात् जात:। पद्म + यत्।) शूद्र:। इति मेदिनी ॥ (यदुक्तं यजुषि।
"ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्य: कृत:।
ऊरू तदस्य यद् वैश्य: पद्भ्यां शूद्रो अजायत॥")

पद्या, स्त्री, (पादाय हिता। पाद शब्दस्यैकवचनात् यत्। "पद्यत्यतदर्थे।" ६। ३। ५२। इति पद्भाव:।) स्तुति:। इति विश्व:॥ पथ्या:। इत्यमर:। २। १। १५ ॥ (यथा, ऋग्वेदे। २।३१।२।
"यदाग्नव: पद्याभिश्चितो रज: पृथिव्या: सानौ जङ्घनन्त पाणिभि:॥" पादौ विध्यन्ति पद्या: प्रकरा:। इति सिद्धान्तकौमुदी। "विध्यत्यधशुषा।" ४। ४। ८३। इति यत्। "पद्यत्यतदर्थे।" ६।३।५२। इति पदादेश:॥)

पद्र:, पुं, (पद्यतेऽस्मिन्निति। पद गतौ। "स्फायितञ्चीति।" उणा। २। १३। इति रक्।) ग्राम:। इति सिद्धान्तकौमुद्यामुणादिवृत्ति:॥ ग्रामपथ:। इत्युणादिकोष:॥ भूलोक:। देशभेद:। इति संक्षिप्तसारोणादिवृत्ति:॥

पद्वर:, पुं, (पद्यते गम्यतेऽस्मिन्नेन वा। पद गतौ "सर्व्वनिष्पद्वरिध्वेति।" उणा। १। १५३। इति निपातनात् सिद्धम्।) भूलोक:। रथ:। इति संक्षिप्तसारोणादिवृत्ति:॥ पथ्या:। इत्युणादिकोष:॥

पद्वा, [न्] पुं, (पद्यते गम्यते यत्र। पद गतौ। "स्कामदिपदीति।" उणा। ५। ११२। इति वनिप्।) पथ्या:। इति संक्षिप्तसारोणादिवृत्ति:॥

पन, ङ इदुं। इति कविकल्पद्रुम:॥ (भ्वा-आत्मं-सकं सेट्।) ईड्:। इति दुर्गादास:॥

पनम:, पुं, (पनायते स्तूयतेऽनेन देव: मनुष्यादिर्वेति। यद्वा पनायति स्तौति मन्त्रोपयतीत्यर्थ: देवमनुष्यादीन् इति। पन स्तुतौ + "अत्यविचमितमीति।" उणा। ३। ११७। इति असच्।) फलवृक्षविशेष:। कांटाल इति भाषा॥ (यथा भागवते। ८। २। १०।
"चते: प्रियालै: पनसैरम्बाम्बाराम्रातकैरपि॥")
तत्पर्य्यायः। कण्टकिफल: २। इत्यमर:। २।४।६१॥ महासर्ज्ज: ३ फलिन: ४ फलवृक्षक: ५ मूल: ६ कण्टफल: ७ मूलफलद: ८ अपुष्पफलद: ९ पूनफल:१० चम्पकोष:११ चम्पाकु:१२ कण्टकीफल: १३ रसाल: १४ स्वदङ्गफल: १५ पानस: १६। इति शब्दरत्नावली॥ अस्य फलगुणा:। मधुरत्वम्। तृप्तिच्छेलत्वम्। गुरुत्वम्। बृंहत्वम्। बलवीर्य्यवृद्धिदत्वम्। श्रमहविघ्नोघनाघ्नित्वम्। रुचिकारित्वम्। वाह्नित्वम्। परमदुर्ज्जरत्वञ्च। तद्बीजगुणा:। ईषत्कषायत्वम्। मधुरत्वम्। वातलत्वम्। गुरुत्वम्। बृंहत्वम्। तत्फलविकारत्वगदोषघनाघ्नित्वञ्च।
"बालन्तु गौरसं चूतं मध्यं पक्वन्तु दीपनम्।
रुचिदं लवणाभ्यक्तं पनसस्य फलं स्तुतम्॥"
इति राजनिर्घण्ट: ॥ * ॥

"पनस: कण्टकिफल: फलाग्रोऽनिष्टहृत्फल:।
पनसं गुरुशीतलं पक्वं स्निग्धं पित्तानिलापहम्॥
तर्पणं हृद्यगं स्वादु मांसलं श्लेष्मलं गुरुम्।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान्॥
व्यायन्नदेव विष्टम्भि वातलं तुवरं गुरु।
दाहशूलमधुरं वल्यं कफमेदोविमर्द्दनम्॥
पनसोद्भवबीजानि वृष्याणि मधुराणि च।
गुरूणि बहुवर्चांसि हृद्यमूषाणि संवदेत्॥"
अन्यच्च।
"मध्या: पनसजो वृष्यो वातपित्तकफापह:।
विशेषात् पनसं वर्ष्यं गुल्मिभिर्मन्दवह्निभि:॥
अलं पनसपाकाय फलं कदलमम्बवम्॥"
इति भावप्रकाश: ॥ * ॥
"कण्टाफलं सुमधुरं हृद्यगं स्निग्धशीतलम्।
दुर्ज्जरं वातपित्तघ्नं श्लेष्मशुक्रबलप्रदम्॥
तदेव सर्पिषा युक्तं स्निग्धं रुच्यं बलप्रदम्।
बृंहितं गुरु चक्षुष्यं वृष्यञ्च वातपित्तनुत्॥
कण्टाफलमपक्वन्तु कषायं स्वादु वातलम्।
रक्तपित्तहरं स्वादु तत्फलास्थ्यपि तद्गुणम्॥"
इति राजवल्लभ: ॥

पनसतालिका, स्त्री, (पनसं दीर्घत्वेन स्तुत्यं यत्तालम्। तद्वत् फलमस्त्यस्या:। ठन्।) कण्टकिफलम्। इति शब्दमाला ॥

पनसिका, स्त्री, (पनसवत् कण्टकमयात्तिर्विद्यते यस्या:। पनस + ठन्।) क्षुद्ररोगविशेष:। स च कर्णमध्यजातव्रण:। तल्लक्षणं यथा,—
"कर्णस्याभ्यन्तरे जातां पिडकानुग्रवेदनाम्।
स्थिरां पनसिकां तान्तु विद्याद्दारुणकोत्थिताम्॥"
तच्चिकित्सा यथा,—
"भिषक् पनसिकां पूर्व्वं स्वेदयेदथ लेपयेत्।
कल्कैर्मेषनृगोखुनिर्म्मोतालकदारुजै:॥
पक्वां विज्ञाय तां भित्त्वा व्रणवत् समुपाचरेत्॥"
इति भावप्रकाश: ॥

पन्था:, [इन्] पुं, पनन्ति यात्यनेन। (पत लृ गतौ + "पतस्थ च।" उणा। ४। १२। इति इनि; थश्चान्तादेश:।) रथ्या। रास्ता इति भाषा॥ (यथा, मनु:। ४। ४५।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे॥")
तत्पर्य्यायः। अयनम् २ वर्त्म ३ मार्ग: ४ अध्वा ५ पदवी ६ सृति: ७ सरणि:८ पद्धति: ९ पद्या १० वर्त्मनी ११ एकपदी १२। इत्यमर:। २।१।१५॥ पथ: १३ पदवि: १४ पदवी १५ सरणी १६ सृरणि: १७ पद्धती १८ वर्त्मनि: १९। इति भरत:॥ सृरणी २० वाट: २१ धर्म्मवर्त्मनम् २२ माथ: २३ विवध: २४ वीवध:२५। इति शब्दरत्नावली ॥ * ॥

तस्य लक्षणम्।
"त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु नै: स्मृत:।
विंशद्धनुर्ग्राममार्ग: सीमामार्गो दशैव तु॥
धनूंषि दश विस्तीर्ण: श्रीमान् राजपथ: स्मृत:।
वृषाजिरथनागानामसम्बाध: सुसञ्चर:॥
धनूंषि चैव चत्वारि प्राकारस्यास्तु निर्म्मिता:।

पन्नगी

त्रिकराश्चोपरथ्यासु द्विकराण्युपरथ्यका ॥
अङ्गुलपथचतुष्पादक्षितिपादस्य गृहान्तरम् ।
तृतीयपादस्यर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे प्रसादाने वा शून्यागारे चतुष्पथे ।
नवस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथस्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति नीलतन्त्रम् ॥ * ॥
पथगमनगुणाः ।
"अध्वा मेदःकफस्त्यौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥"
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे स्नातकाय ।
वृद्धाय भारवहाय रोगिणे दुर्बलाय च ॥"
इति कौर्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा,—
"गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयशीर्षपञ्चरात्रम् ॥ * ॥
अस्थानादावुपचारो यथा,—
"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
इति महाभारते । ३ । ३१२ । ११२ । धर्म्मवकपर्व्व युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेषः । यच्चाटाच्यते । इति मनौ ४ अध्यायः ॥
पन्न, त्रि, (पद्यौ ङ गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥
पन्नः, पुं, (पन स्तुतौ + "कृपॄवृजि सिदमदीति ।" उणा । ३ । १० । इति नः स च नित् ।) अधोगमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
पन्नगः, पुं, (पन्नं अधोगमनं पतितं वा गच्छतीति । गम ल गतौ + "सर्व्वत्र पन्नयोरुपसंख्यानम् ।" ३ । २ । ४८ । इत्यस्य वार्त्तिं इति डः । पद्भ्यां न गच्छतीति वा विग्रहः ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, विष्णुपुराणे । १ । १७ । ७ ।
"पातालमूलं महाज्ञानं स्थिरचेयकथिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्व्वपन्नगाः ॥")
ओषधीभेदः । पद्मकाष्ठम् । इति मेदिनी ॥
पन्नगकेश्वरः, पुं, (पन्नगवत् केशरो यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥
पन्नगाशनः, पुं, (पन्नगं सर्पं अश्नातीति । अश्न भोजने + ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा ।) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥
पन्नगी, स्त्री, (पन्नग + जातौ ङीष् ।) पन्नगपत्नी । (यथा, भागवते । ३ । १६ । ११ ।
"तां स आपततीं वीक्ष्य भगवान् समवस्थितः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥") मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे सप्तसिद्धिरिति पन्नगी ॥"
सर्पिणीत्युपः । इति राजनिर्घण्टः ॥
पन्नद्धा, स्त्री, (पदि गद्धा बद्धा ।) चर्म्मपादुका । इति हेमचन्द्रः ॥
पन्नद्धी, स्त्री, (पदीश्वरणयोर्नद्धी ।) चर्म्मपादुका । इति त्रिकाण्डशेषः ॥
पपिः, पुं, (पाति लोकम् । पिबति वा । पा + "आदृगमहनजनः किकिनौ लिट् च ।" ३ । २ । १७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पावकश्चेति त्रि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, ऋग्वेदे । ६ । २३ । ४ । "पपिः सोमं दिवर्गाः ॥")
पपीः, पुं, (पाति लोकम् । पा रक्षणे + "यापोः कित् ह्रे च ।" उणा । ३ । १५६ । इति ईक् द्वित्वञ्च ।) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥
पपुः, पुं, (पाति रक्षतीति । "कुर्भ्रेखेति ।" उणा । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्र्यां स्त्री । इत्युणादिकोषः ॥
पमरा, स्त्री, गन्धद्रव्यविशेषः । सल्लकी इति ख्याता । अस्यानुलेपनगुणः । परमालक्ष्मीरक्षोज्वरनाशित्वम् । इति राजवल्लभः ॥
पम्पा, स्त्री, (पाति रक्षति मङ्गल्यादीन् स्वीयपवित्रसलिलदानादिभिरिति शेषः । पा पालने + "खन्य-ग्रिल्प-ग्रिप्य-ग्राम्य-रूप-पम्पा-तल्पाः ।" उणा । ३ । २८ । इति निपातनात् ह्रस्वत्वे मुड़ागमत्वे च साधुः ।) ओड्रदेशस्थनदीविशेषः । इत्युणादिकोषः ॥ (यथा, रघुः । १३ । ३० ।
"दूरावतीर्णा पिबतीव विन्ध्या-
दस्मच्छ पम्यासलिलानि दृष्टिः ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥)
पम्प, गतौ । (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गोपधोपधः । पम्पति । इति दुर्गादासः ॥
पय, ड गतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्मं-सकं सेट् ।) ड, पयते । इति दुर्गादासः ॥
पयः, [स्] क्ली, (पय्यते पीयते वा पय गतौ पी ड पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणा । ४ । १८८ । इत्यसुन् ।) जलम् । (यथा, रघुः । १ । ६७ ।
"पयः पूर्व्वैः स्रुतिन्यासैः कवोष्णमुपभुज्यते ॥") दुग्धम् । इति मेदिनी ॥ (यथा, मनुः । ३ । ८२ ।
"कुर्य्याद्घृतहविः प्राशमन्त्रैर्वोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥")
पयःकन्दा, स्त्री, (पयः कन्दे यस्याः ।) क्षीरविदारी । इति राजनिर्घण्टः ॥
पयःफेनी, स्त्री, (पयो दुग्धमिव फेनमस्याः । गौरादित्वात् ङीष् ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥
पयश्चयः, पुं, (पयसां चयः समूहः ।) जलसमूहः । तत्पर्य्यायः । पूरः २ वेणिः ३ । इति जटाधरः ॥

पयस्य

पयस्यं, त्रि, (पयसो विकारस्तत्र हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् ।) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ६ । ५१ ॥ पयोहितम् । इति मेदिनी ॥
पयस्यः, पुं, (पयः पिबतीति ।) विड़ालः । इति शब्दचन्द्रिका ॥
पयस्या, स्त्री, (पयस्य + टाप् ।) दुग्धिका । क्षीरकाकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्कपुष्पिका । इति रत्नमाला ॥ कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥ आमिक्षा । इति हेमचन्द्रः ॥
पयस्वलः, पुं (पयोऽस्त्यस्य । पयस् + "अन्येभ्योऽपीति ।" वलच् ।) छागः । इति राजनिर्घण्टः ॥
पयस्विनी, स्त्री, (पयो विद्यतेऽस्याः । "अस्माया-मेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ततो ङीप् ।) नदी । (प्रशस्तजलवत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २६ । १०६ ।
"परापरफलप्राप्तिः पाचनी च पयस्विनी ॥")
धेनुः । (यथा, रघुः । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीं तां
सुदक्षिणा साक्षतपात्रहस्ता ॥")
रात्रिः । इति मेदिनी ॥ काकोली । क्षीरकाकोली । दुग्धयोनी । क्षीरविदारी । छागी । इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥ (गायत्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ६६ ।
"प्रज्ञावती सुता पौत्री पुत्रपुण्या पयस्विनी ॥")
पयोगड़ः, पुं, (पयसो गड़ इव ।) घनोपलः । द्वीपः । इति शब्दमाला ॥
पयोघनः, पुं, (पयोभिर्घनः साद्रः ।) घनोपलः । इति हारावली ॥
पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघः । इति शब्दमाला ॥
पयोधरः, पुं, (धरतीति धरः । भृ + अच् । पयसो दुग्धस्य जलस्य वा धरः ।) स्त्रीस्तनः । (यथा, रघुः । १४ । २२ ।
"षड़ाननापीतपयोधरासु
तेना च स्खलामिव लक्षिकासु ॥")
मेघः । इत्यमरः । ३ । ३ । १६३ ॥ कोषकारः । नारिकेलम् । कपोलः । इति मेदिनी ॥
पयोधाः, [स्] पुं, (पयो जलं दधातीति । डु धा असि धारणे + "पयसि च ।" उणा । ४ । २२६ । इति असिः ।) समुद्रः । जलाधारः । इत्युणादिकोषः ॥
पयोधिः, पुं, (पयांसि धीयन्तेऽस्मिन् । डु धा अ + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ६३ । इति किः ।) समुद्रः । इति राजनिर्घण्टः ॥
पयोधिकं, क्ली, (पयोधौ समुद्रे कायति प्रकाशते इति । कै + कः ।) समुद्रफेनः । इति राजनिर्घण्टः ॥

पयोनिधिः, पुं, (पयांसि निधीयन्तेऽस्मिन् । धा आधारे + अधिकरणे किः ।) समुद्रः । यथा,—
"न गणितं यदि जन्म पयोनिधौ
हरशिरःस्थितिभूरपि विस्मृता ।"
इति नैषधे । ४ । ५० ॥ (पय इव शुक्लः सत्त्वगुणः निधीयतेऽत्र इति विग्रहे । शिवः । यथा, महाभारते । १३ । १७ । ८७ ।
"लक्ष्मीो लक्ष्मिनोऽत्र महामायः पयोनिधिः ॥")

पयोरः, पुं, (पयो जलं रातीति । रा + कः ।) खदिरः । इति शब्दरत्नावली ॥

पयोलता, स्त्री, (पयः क्षीरं तेनाढ्या लता ।) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयोव्रतः, पुं, (पयोमात्रपानसाध्यो व्रतः ।) पयोमात्रपानरूपव्रतविशेषः । यथा,—
"पुण्यां तिथिं समासाद्य युगमन्वन्तरादिकम् ।
पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा ॥"
इति मात्स्ये १५२ अध्यायः ॥ * ॥

द्वादशाङ्गसाध्यविष्णुव्रतविशेषः । यथा,—
कश्यप उवाच ।
"एतच्छ्रे भगवान् दृष्टः प्रजाकामस्य पद्मज ! ।
यदाह ते प्रवक्ष्यामि व्रतं केशवतोषणम् ॥
फाल्गुनस्यामले पक्षे द्वादशाहं पयोव्रतः ।
अर्चयेत्पुरुषं भक्त्या परमयान्वितः ॥
सिनीवाल्यां स्पृशेत्पित्र्यं स्नायात् क्रोडविदीर्णया ।
यदि लभ्येत वै स्रोतस्येतन्मन्त्रमुदीरयेत् ॥
त्वं देवादिवराद्येण रसाया: स्थानमिच्छता ।
उद्धृतासि नमस्तुभ्यं प्राप्नुयं मे प्रणाशय ॥
निर्ऋतिस्तात्मनियमो देवमर्चेत् समाहितः ।
अर्घ्यायां स्थण्डिले सूर्ये जले वह्नौ गुरावपि ॥
नमस्तुभ्यं भगवते पुरुषाय महीयसे ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे ॥
नमोऽव्यक्ताय सूक्ष्माय प्रधानपुरुषाय च ।
चतुर्विंशद्गुणज्ञाय गुणसंख्यानहेतवे ॥
नमो द्विमूर्धाय त्रिपदे चतुःशृङ्गाय तन्तवे ।
सप्तहस्ताय यज्ञाय त्रयीविद्यात्मने नमः ॥
नमः शिवाय रुद्राय नमः शक्तिधराय च ।
सर्वविद्याधिपतये भूतानां पतये नमः ॥
नमो हिरण्यगर्भाय प्राणाय जगदात्मने ।
योगैश्वर्यशरीराय नमस्ते योगहेतवे ॥
नमस्त आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ॥
नमो मरकतश्यामवपुषेऽधिगतश्रिये ।
केशवाय नमस्तुभ्यं नमस्ते पीतवाससे ॥
त्वं सर्ववरदः पुंसां वरेण्य वरदर्षभ ! ।
अस्मे श्रेयसे धीराः पादरेणुमुपासते ॥
अन्ववर्तन्त यं देवाः श्रीश्च तत्पादपद्मयोः ।
स्पृहयन्त इवामोदं भगवान्मे प्रसीदताम् ॥
एतैर्मन्त्रैर्हृषीकेशमावाहनपुरस्कृतम् ।
अर्चयेच्छ्रद्धया युक्तः पाद्योपस्पर्शनादिभिः ॥
अर्चित्वा गन्धमाल्याद्यैः पयसा स्नापयेद्विभुम् ।
वस्त्रोपवीताभरणपाद्योपस्पर्शनेक्षतैः ॥
गन्धधूपादिभिश्चार्चेद्द्वादशाक्षरविद्यया ।
हुतं पयसि नैवेद्यं प्राश्यान्नं विभवे सति ॥
सर्पिः सगुडं दत्त्वा जुहुयान्मूलविद्यया ।
निवेदितं तद्भक्ताय दत्त्वाश्नीयात् स्वयम् ॥
दत्त्वाचमनमर्चित्वा ताम्बूलञ्च निवेदयेत् ।
जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुम् ॥
कृत्वा प्रदक्षिणं भूमौ प्रणमेद्दण्डवन्मुदा ।
क्षमित्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ॥
द्विजवरान् भोजयेद्विप्रान् पायसेन यथोचितम् ।
भुञ्जीत तैरनुज्ञातः शेषं सेष्टः सबान्धवैः ॥
ब्रह्मचार्यथ तद्रात्रौ शेषभुग्दे प्रथमेऽहनि ।
स्नातः शुचिर्यथोक्तेन विधिना सुसमाहितः ॥
पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनम् ।
पयोभक्षो व्रतमिदं चरेद्विष्णुचतुष्टयम् ॥
पूर्ववच्चहुयादग्निं ब्राह्मणांश्चापि भोजयेत् ।
एवन्त्वहरहः कुर्यादृद्वादशाहं पयोव्रतम् ॥
हरेराराधनं होममर्हणं द्विजतर्पणम् ।
प्रतिपद्दिनमारभ्य यावत् शुक्लत्रयोदशीम् ॥
ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिसवनन्तरेत् ।
वर्जयेदसदालापं भोगानुच्चावचांस्तथा ॥
अहिंसः सर्वभूतानां वासुदेवपरायणः ।
त्रयोदश्यामथो विष्णोः स्नपनं पञ्चकैर्विभोः ॥
कारयेच्छास्त्रदृष्टेन विधिना विधिकोविदैः ।
पूजाञ्च महतीं कुर्यादृवित्तशाठ्यविवर्जितः ॥
चरुं निरूप्य पयसि घृतविष्टाय विष्णवे ।
हुत्वेन तेन पुरुषं यजेत सुसमाहितः ॥
नैवेद्यञ्चातिगुणवद्दद्यात् पुरुषतुष्टिदम् ।
आचार्यं ज्ञानसम्पन्नं वस्त्राभरणधेनुभिः ॥
तोषयेदृत्विजश्चैव तद्विद्धाराधनं हरेः ।
भोजयेत्तान् गुणवता सदन्नेन शुचिस्मिते ॥
अन्यांश्च ब्राह्मणान् भक्ष्यान् ये च तत्र समागताः ।
दक्षिणां गुरवे दद्यादृत्विग्भ्यश्च यथार्हतः ॥
अन्नादीनान्यपाकांश्च प्रोक्षयेत् सदुपागतान् ।
सत्त्ववत्स्वथ सर्वेषु हीनान्नक्षपणेषु च ॥
विष्णोरन्नं प्रोक्षणं विद्वान् भुञ्जीत सह बन्धुभिः ।
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचनैः ॥
कारयेत्तत्कथाभिश्च पूजां भगवतोऽन्वहम् ।
एतत् पयोव्रतं नाम पुरुषाराधनं परम् ॥
पितामहेनाभिहितं मया ते सदुदाहृतम् ।
त्वञ्चानेन महाभागे ! सम्यक् चीर्णेन केशवम् ॥
आत्मना शुद्धभावेन नियतात्मा भजाव्ययम् ।
अयं वै सर्वयज्ञाख्यः सर्वव्रतमिति स्मृतम् ॥
तपःसारमिदं भद्रे दानञ्चेश्वरतर्पणम् ।
त एव नियमाः साक्षात्त एव च यमोत्तमाः ॥
तपो दानं व्रतं यज्ञो येन तुष्यत्यधोक्षजः ।
तस्मादेतद्व्रतं भद्रे प्रयता श्रद्धया चर ॥
भगवान् परितुष्टस्ते वरान्मे विदधास्यति ॥"
इति श्रीभागवते ८ स्कन्धे १६ अध्यायः ॥

पयोष्णिजाता, स्त्री, (पयोष्णी नाम्नी नदी जाता अस्याः । पृषोदरात् साधुः ।) सरस्वती नदी । इति राजनिर्घण्टः ॥

पयोष्णी, स्त्री, (पयः सलिलं उष्णं उष्णगुणं वा अस्याः ।) नदीविशेषः । सा विन्ध्याचलदक्षिणे प्रविष्टा । अस्या जलगुणाः ।
"पयोष्णीसलिलं रुच्यं पवित्रं पापनाशनम् ।
सर्व्वामयहरं सौख्यबलकान्तिप्रदं लघु ॥"
इति राजनिर्घण्टः ॥

परं, क्ली, (पृ + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् ।) केवलम् । इति मेदिनी ॥ मोक्षः । यथा । कैवल्यमन्तं परम् । इति सुक्तिपर्य्यायरत्नावली ॥ (ब्रह्म ब्रह्मा च । यदुक्तं श्रुतौ ।
"द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव च ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । २० ।
"प्रभूतस्त्रिककुद्धाम पवित्रं मङ्गलं परम् ॥"
ब्रह्मणः आयुः । यथा, मार्कण्डेये । ४६ । ४२ ।
"एवन्तु ब्रह्मणो वर्षमेकं वर्षशतन्तु तत् ।
भूतं हि तस्य वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्द्विगुणाद्वर्षैः परार्द्धमिति कीर्त्यते ॥")

परं, [म्] व्य, नियोगः । क्षेपः । इति मेदिनी ॥

परः, पुं, (पृ + अच् ।) शत्रुः । इत्यमरः ॥ (यथा, रघुः । ७ । ६७ ।
"इतः परानर्भकहार्यशुल्कान्
वैदर्भि ! पश्यानुमता मयासि ॥")
ब्रह्मणः आयुः । यथा,—
"कालसंख्या समासेन पूर्व्वार्द्धद्वयकल्पिताम् ।
न एव स्यात् परः कालस्तदन्ते परिपूज्यते ॥
निजेन तस्य मानेन चायुर्व्वर्षशतं स्मृतम् ।
तत् परार्द्धं तदर्द्धञ्च परार्द्धमभिधीयते ॥"
अपि च ।
"त्रीणि कल्पशतानि स्युस्तथा षष्टिर्हि लोकमाः ।
ब्रह्मणः कथितं वर्षं परार्द्धं तच्च तत् परम् ॥"
इति कौर्म्मे ५ अध्यायः ॥
(शिवः । यथा, तत्रैव । १३ । १७ । ६७ ।
"कपिलः कपिलः शुक्ल आयुश्चैव परोऽपरः ॥")

परः, त्रि, श्रेष्ठः । (यथा, आर्य्यासप्तशत्याम् । ३५५ ।
"परमोऽहनाय सुतो निष्करुणो
नरकाग्नि ! तव कटाक्षोऽयम् ।
विग्रिख इव कलितकर्णः
प्रविशति हृदयं निःसरति ॥")
अरिः । दूरः । अन्यः । उत्तरः । इति मेदिनी ॥ * ॥
न्यायमते द्रव्यगुणकर्म्मवृत्तिसत्ता । इयं व्यापक जातिः । यथा,—
"सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च ।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥
परभिन्ना तु या जातिः सैवापरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥
व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ॥"
इति भाषापरिच्छेदे । ८—६ ॥ * ॥
परात्मादिशब्दानां श्रीनाथकत्वं यथा,—
"परात्मञ्च परम्ब्रह्म परज्योतिः परेश्वरः ।
परवैकुण्ठनिवासञ्च शुक्लादपि हरेरिच्छयम् ॥"
इति गरुड़पुराणम् ॥ * ॥
श्रेष्ठवाचकपरशब्दप्रयोगाः । यथा,—
"अन्नदातुः प्रसवितुर्गरीयान् परः स्मृतः ।
गुरुस्त्राणाच्छतगुणो विद्यामन्त्रप्रदायकः ॥

अज्ञानतिमिराच्छन्नं ज्ञानदीपेन चक्षुषा ।
यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥
गुरुदत्तेन मन्त्रेण तपसेष्टसुरं लभेत् ।
सर्व्वज्ञत्वं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥
पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापथ्यात् स महापातकी शिव ! ॥
नास्ति वेदात् परं शास्त्रं न हि ज्ञानात् परः सुरः ।
नास्ति गङ्गासमं तीर्थं न पुण्यं तुलसीपरम् ॥
क्षमावती भूपरा न पुत्रान्नास्ति परः प्रियः ।
न च देवात् परः शक्तो व्रतं नैकादशीं विना ॥
प्राणयामात् परो यज्ञो न चैत्रं भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्व्वत्याः परा साध्वी न गङ्गेशात् परो वशी ॥
न च विन्यासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ॥"
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४४ अध्यायः ॥

परःशतं, त्रि, शतात् परम् । शताधिकसंख्या । इत्यमरः । ३ । १ । ६४ ॥

परःश्वः, [स्] अ, श्वो दिनात् परमह्नः परः श्वः परः सप्तमवत् पारस्करादित्वात् सुट् परःश्व इति मधुः । सुटं नेच्छन्त्यन्ये परश्व इत्याहुः । अतिक्रान्ते पूर्व्वतरे दिने परश्वो जात इति प्रयोगो गौणः तत्र परश्व तत् श्वेति कर्म्मधारयः । इति भरतः ॥ श्वः पराह्णः । इत्यमरः । ३ । ४ । २२ ॥ परश्शु । इति भाषा ॥

परःसहस्रं, त्रि, सहस्रात् परम् । सहस्राधिकसंख्या । इत्यमरटीका ॥

परकीयं, त्रि, (परस्येदम् । "गह्वादिभ्यश्च ।" ४ । २ । १३८ । इति छः । "कुगतिप्रादयः परस्य च ।" इति कुक् ।) परसम्बन्धि । (यथा, मनुः । ४ । २०१ । "परकीयनिपानेषु न स्नायाच्च कदाचन ॥")

परकीया, स्त्री, (परकीय + टाप् ।) नायिकाभेदः । अस्या लक्षणं यथा । अप्रकटपरपुरुषानुरागा । सा च द्विविधा । परोढ़ा १ कन्यका च २ । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा ॥*॥

परोढ़ा यथा,—

"अयं रेवाकुञ्जः कुसुमभरसंवासमुचितः
समीरोऽयं वेलादरविलसदेलापरिमलः ।
इयं प्रावृड्धन्या नवजलदविन्यासचतुरा
पराधीनं चेतः सखि ! किमपि कर्त्तुं न्यायते ॥"*

गुप्ताविदग्धालक्षितानुकूलटानुशयानामुदिताप्रभृतीनां परकीयायां एवान्तर्भावः । गुप्ता त्रिविधा । दृष्टसुरतगोपना १ वर्त्तिष्यमाणसुरतगोपना २ वर्त्तमानसुरतगोपना च ३ । त्रिविधा यथा,—

"श्वश्रूः क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यान्तरस्तस्मिन् किन्तु न मन्दिरे सखि ! पुनः स्वापो विधेयो मया ।
आमोदाकृमणाय कोणकुहरादुत्फालमानन्वनी माञ्जीरौ मणिरे ! खरैः क्षतवती कां कां न मे दुर्द्दशाम् ॥" * ॥

विदग्धा द्विविधा । वाग्विदग्धा १ क्रियाविदग्धा चेति २ । प्रथमा,—

"निविड़तमतमालमल्लिवल्ली-
विल्लिकिलरालिविराजितोपकण्ठे ।
पथिकसमुचितक्षणाद्यतीव्रे
सवितरि तत्र सरित्तटे निवासः ॥"

द्वितीया यथा,—

"हासाय भवनार्थे वदरीमपनेतुमादिशति ।
हेमन्ते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥" * ॥

लक्षिता यथा,—

"यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात् ।
यद्भवतु तद्भवतु वा विफलस्तव गोपनायासः ॥"*

कुलटा यथा,—

"एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः
शैलाः शाद्वलसङ्गमन्ति न लतास्तन्वन्ति पुष्पोद्गमान् ।
त्रैलोक्ये तरवः फलानि सृजते नैवारभन्ते जनान्
धातः ! कातरमालपामि कुलटाहेतोस्तवया किं कृतम् ॥"

अपि च ।

"पृथ्वी तावत्त्रिकोणा विपुलनदनदीग्रावरुद्धं तदर्द्धं
तस्यामेवास्ति शैलो विपिनमपि तथा चैत्रकासारकूपाः ।
लोकानामङ्गनारी भ्रियुरपि जरसः कोऽपि रोगी विवेकी
मिथ्यावादी ममार्थं सुखरसुखवरः पुंश्चली पुंश्चलीति ॥" * ॥

अनुशयाना त्रिविधा ।

वर्त्तमानस्थानविघटनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तुर्गमनानुमानेन प्रत्येकं उदाहरणानि ।

"समुपागतवति चैत्रे निपतति पत्रं लवङ्गलतिकायाः ।
सुहृदः कपोलपाली म्लिय म्लिय नालीदलद्युतिं लेभे ॥"*॥

"निद्रालुकेकिमिथुनानि कपोतपोत-
श्रेणीनवीनमहीरुहपल्लवानि ।
तत्रापि तन्वि ! न वनानि कियन्ति सन्ति
खिन्नस्य न प्रियतमस्य गृहं प्रयासि ॥
कर्णे कल्पितनवशालमञ्जरी-
पिञ्जरीजनकपोलमण्डलः ।
निष्यन्दन्नयनवारिधारया
राधया मधुरिपुर्निरीक्ष्यते ॥" * ॥

सुदिना यथा,—

"गोष्ठेषु निष्ठति पतिर्वधिरा ननन्दा
नेत्रद्वयस्य न च पाटवमस्ति यातुः ।
इत्थं निगद्य सुतनुः कुचकुम्भसौम्नि
हीमाश्चकञ्चुकमुदञ्चितमातनोति ॥" * ॥

कन्यका यथा,—

"किञ्चित्कुञ्चितहारयष्टिसरलभ्रूवल्लिसाचिक्षतं
प्रान्तभ्रान्तविलोचनद्युतिसुजा पर्य्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनं
कुर्व्वाणा मृगकन्यका सुललितं सख्याजमालोकते ॥"

इति रतिमञ्जरी ॥

परक्षेत्रं, क्ली, (परस्य क्षेत्रं पत्न्यादि ।) परपत्नी । (यथा, मनुः । ३ । १७५ ।
"तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च ।
दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् ॥")
परशरीरम् । परभूमिः । यथा,—
"वृथापेक्षि परक्षेत्रादायाति क्षेत्ररक्षकः ।"

इति चन्द्रालोकः ॥

(तथा च मनुः । ८ । ३४१ ।
"द्विजोऽध्वगः क्षीणवृत्तिर्हर्त्ता हव्यं च मूलके ।
आदद्यात् परक्षेत्रात् दण्डं दातुमर्हति ॥")

परग्रन्थिः, पुं, (परगा ग्रन्थिर्यत्र ।) पर्व्वावधिः । आङ्गुलिपर्व्व । इति हारावली ॥

परच्छन्दः, त्रि, (परस्य छन्दो यत्र ।) पराधीनः । इति हेमचन्द्रः ॥

परच्छिद्रं, क्ली, (परस्य छिद्रम् ।) परदोषः । यथा,
"नीचः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"

इति गरुड़पुराणम् ॥

परजातः, त्रि, (परेण जातः । परपुत्त्वात्तथात्वम् ।) परैधितः । औदासीन्येन परपुष्टः । परपोषितत्वात् । परस्माज्जातः । इत्यमरभरतौ ॥ अन्येनोत्पन्नश्च ॥ (कोकिले पुं । एष हि काकेन पुष्टो भवतीति प्रसिद्धिः ॥)

परजितः, त्रि, (परेण जितः ।) परपुष्टः । प्रच्युता पराजितः । इति केचित् ॥

परञ्जः, पुं, (परं जयतीति । जि जये + बाहुलकात् ञः ।) नैलयन्त्रम् । क्षुद्रिकाफलः । फेनः । इति मेदिनी ॥

परञ्जनः, पुं, (परायाः पश्चिमस्या दिशो जनः स्वामी । निपातनात् साधुः ।) वरुणः । इति हेमचन्द्रः ॥

परञ्जयः, पुं, (परां पश्चिमां दिशं जयति स्वामित्वेन । जि + अच् । सर्व्वनाम्नः वृत्तौ पुंवद्भावः सुम् च ।) वरुणः । इति त्रिकाण्डशेषः ॥ प्रच्युतजयकर्म्मा । परान् जयतीति स्वप्रत्ययनिष्पन्नः ॥

परतन्त्रः, त्रि, (परस्तन्त्रं प्रधानं यस्य ।) पराधीनः । इत्यमरः ॥ (यथा, महाभारते । १३ । २ । १५ ।
"परतन्त्रं कथं हेतुमात्मानमनुपश्यसि ।
कर्म्मणां हि महाभाग ! सूक्ष्मं ज्ञेयतरं त्रियम् ॥"

परस्य तन्त्रं इति विग्रहे क्ली । परकीयप्राधान्यम् । परं श्रेष्ठं तन्त्रमिति विग्रहे । उत्तमप्रधानम् । उत्तमपरिच्छदम् ॥)

परत्रभीरुः, त्रि, (परत्र परलोकान्तरघटनाविषये भीरुः ।) धार्म्मिकः । परकालभयशीलः । यथा,—

"परत्रभीरुं धर्म्मिष्ठसदृशुक्तं क्रोधवर्जितम् ॥"
इति मिताक्षरायां कात्यायनः ॥

परत्वं, क्ली, परस्य भावः । परता । न्यायमते तद्द्विविधम् । दैशिकम् १ । तत्तु बहुतरदेश्यसंयोगज्ञानजन्यगुणः । कालिकम् २ तच्च बहुतरकालान्तरितत्वज्ञानजन्यगुणः । एतद्द्वयं मूर्त्तपदार्थगुणः । दैशिकपरत्वस्यासमवायिकारणं दिक्शरीरसंयोगः । कालपरत्वस्यासमवायिकारणं कालपिण्डसंयोगः । ते चापेक्षाबुद्धिजन्ये । तन्नाशनाश्ये च । यथा,—
"परत्वञ्चापरत्वञ्च द्विविधं परिकीर्त्तितम् ।
दैशिकं कालिकञ्चापि मूर्त्त एव तु दैशिकम् ॥
परत्वं सूर्य्यसंयोगभूयस्त्वज्ञानतो भवेत् ।
अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धितः ॥
परत्वमपरत्वन्तु तदनन्तरबुद्धितः ।
अत्र त्वसमवायी तु संयोगः कालपिण्डयोः ॥
अपेक्षा बुद्धिनाश्याच्च नाशस्तेषां निरूपितः ।"
इति भाषापरिच्छेदः ॥

परदारः, (परस्य दाराः ।) परभार्य्या । तद्गमने दोषो यथा, कर्म्मलोचनम् ॥
"परदाररताश्चैव परद्रव्यहराश्च ये ।
अधोऽधो नरके यान्ति पीड्यन्ते यमकिङ्करैः ॥"
"ब्राह्मणः क्षत्रियो वैश्यो यो रतः परयोषिति ।
याति तस्यापूजितस्य दत्ता लक्ष्मीर्गृहादपि ॥
दुष्टातिनिन्द्यः सर्व्वत्र नाधिकारी स्वकर्म्मसु ।
परत्रैवान्धकूपे च यावदर्षशतं वसेत् ॥
अपि च ।
"किमत्रोक्तेन तपसा मौनेन च व्रतेन च ।
सुरार्च्चनेन तीर्थेन स्त्रीभिर्यस्य मनो हृतम् ॥
सर्व्वमायाकरञ्चैव धर्म्ममार्गार्गलं नृणाम् ।
अवधानञ्च तपसां दोषाणामाश्रमं परम् ॥
कर्म्मबन्धनिबद्धानां निगडं कठिनं सुत ! ।
मरीचिरूपं कीटानां मीनानां बड़िशं यथा ॥
विषकुम्भं दुग्धसुखमारम्भे मधुरोपमम् ।
परिणामे दुःखबीजं सोपानं नरकस्य च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६० । ६१ अध्यायः ॥ * ॥
"यस्तु पाणिग्रहीतीं तां हित्वान्यां योषितं व्रजेत् ।
अगम्यागमनं तद्धि सद्यो नरककारणम् ॥
नित्यं नैमित्तिकं काम्यं यागयोग्यव्रतादिकम् ।
क्षेत्रतीर्थाटनं सत्रिन् वासो धर्म्मक्रियादिकम् ॥
स्वाध्यायादि तपो दैवं पैत्र्यं कर्म्म वरानने ! ।
यावत्तन्निष्फलं सर्व्वं परस्त्रीगमनान्नृणाम् ॥
परदाराभिगमनात् कोटि एकादशीव्रतम् ।
अपरं किन्तु वक्तव्यं निष्फलं निरये स्थितिः ॥
सत्यं सत्यं पुनः सत्यं सत्यमेव ब्रवीमि ते ।
परयोनौ पतन् बिन्दुः कोटिपूजां विनाशयेत् ॥"
इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥ * ॥
अपि च ।
"त्याज्यं धर्म्मान्वितैर्नित्यं परदारोपसेवनम् ।
नयन्ति परदारा हि नरकानेकविंशतिम् ॥
सर्व्वेषामेव वर्णानामेष धर्म्मो ध्रुवोऽन्वक ! ॥
एवं पुरा सुरपते ! देवर्षिरसितोऽब्रवीत् ।
प्राह धर्म्मव्यवस्थानं खगेन्द्रायाखण्डाय हि ।
तस्मात् सुदूरतो वर्ज्जेत् परदारान् विचक्षणः ।
नयन्ति निष्कृतिप्रघ्नं परदाराः पराभवम् ॥"
इति वामने ९३ अध्यायः ॥

परदुःखं, क्ली, (परेषां दुःखम् ।) अन्यजनपीड़ा । यथा,—
"स्वस्वामिसुखभोगेच्छा सर्व्वसत्त्वसुखैषिणः ।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥
परदुःखातुरा नित्यं स्वसुखानि महान्त्यपि ।
नावेक्षन्ते महात्मानः सर्व्वभूतहिते रताः ॥"
इत्यग्निपुराणम् ॥

परदेवी, [न्] त्रि, (परेभ्योदेदीति । पर + दिव् + णिनिः ।) विदूषकः । परदेवा । इति शब्दमाला ॥

परध्यानं, क्ली, (परं श्रेष्ठं ध्यानम् ।) ध्यानविशेषः । यथा,—
"ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ॥
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥"
इति गरुड़पुराणम् ॥
(परस्य ब्रह्मणोध्यानं यद्वा परं ब्रह्मविषयकंध्यानमिति । ब्रह्मचिन्तनम् ॥ परेषां ध्यानमितिविग्रहे । परानिष्टचिन्तनम् ॥)

परन्तपः, त्रि, (परान् शत्रून् तापयतीति । तप सन्तापे "द्विषत्परयोस्तापेः ।" ३ । २ । ३६ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति उपधाया ह्रस्वत्वञ्च सुम् ।) परतापी । (यथा, भट्टिः । १ । १ ।
"अभूदभूपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ॥")
(जितेन्द्रियः । इति चिन्तामणिः ॥ तामसमनोः पुत्रभेदः । यथा, हरिवंशे । ७ । २४ ।
"द्युतिमत्तपस्यः सुतपास्तपोमूलस्तपोधनः ।
तपोरतिरकल्माषस्तन्वीधन्वी परन्तपः ।
तामसस्य मनोरेते दशपुत्रा महाबलाः ॥"
नृपविशेषः । असौ हि मगधेश्वरः । यदुक्तं रघौ । ६ । २१ ।
"असौ शूरसेनः शूरसेनोच्चखानामगाधसत्त्वो मगधप्रतिष्ठः ।
राजा प्रजारञ्जनलब्धवर्णः
परन्तपो नाम यथार्थनामा ॥")

परपदं, क्ली, (परं श्रेष्ठं पदम् ।) श्रेष्ठस्थानम् । मुक्तिः । यथा,—
"कल्याणानां निदानं कलिमलमथनं जीवनं सज्जनानां
पार्थ्यं यन्मुमुक्षोः सपदि परपदप्राप्तये प्रस्थितस्य ।"
इति महानाटकम् ॥
(परस्य परेषां वा पदं स्थानमितिविग्रहे-षष्ठ्यन्तम् ॥)

परपाकनिवृत्तः, पुं, (परार्थात् पाकात् निवृत्तः ।) परेरिष्टपाकरहितः । पञ्चयज्ञाकर्त्ता । यथा,—
"गृहीत्वाग्निं समारोप्य पञ्चयज्ञान् निर्वपेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्त्तितः ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपाकरतः, पुं, (परस्य पाके रतः ।) परपाकरुचिः । प्रातः पञ्चयज्ञाग्निर्व्वैश्व परान्नभोजी । यथा,—मिताक्षरायां प्रायश्चित्ताध्याये ।
"पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥"* ॥
परपाकनिवृत्तपरपाकरतयोरन्नभोजने दोषो यथा,—
"परपाकनिवृत्तस्य परपाकरतस्य च ।
अपक्वस्य च भुक्ताग्नं द्विजस्यान्द्रायणञ्चरेत् ॥"
इति मिताक्षरायां प्रायश्चित्ताध्यायः ॥

परपिण्डादः, त्रि, (परस्य पिण्डं अन्नादिकंअत्तीति । अद् + लौ भक्षणे + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) पराभोपजीवी । इत्यमरः । ३ । १ । २० ॥

परपुरुषः, पुं, (परः श्रेष्ठः पुरुषः ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (परोऽन्यः पुरुषः ।) अन्यपुमान् । उपनायकः । यथा,—
"राजन् जीवावधानं कुरु मम निभृतं प्रेयसीनां कुचेष्टा
एका ते कीर्त्तिकान्ता जगदटनपरा विश्वभोग्या परा श्रीः ।
या वा पाणौ गृहीता विधिवदसिलता मुग्धधारेति मत्वा
सोत्कण्ठं सापि नित्यं परपुरुषगतं मारभावादुपैति ॥"
इति कर्णाटराजस्मृतौ कालिदासः ॥

परपुष्टः, पुं, (परेण काकेन पुष्टः पालितः । डिम्भस्फोटनाक्षमया कोकिलया हि नीड़स्थं काकशिशमपसार्य्य स्वशिशौ तत्र स्थापिते काकया निजशिशुबुद्ध्या तत्परिपाल्यते इति प्रसिद्धेरस्य तथात्वम् ।) कोकिलः । इति मेदिनी ॥ परेण पोषिते त्रि । इति धरणिः ॥

परपुष्टमहोत्सवः, पुं, (परपुष्टानां कोकिलानां महोत्सवो यत्र । आम्रसुकुलोद्गमे हि कोकिलानां आनन्दो जायते ।) आम्रः । इति शब्दमाला ॥

परपुष्टा, स्त्री, (परेण परपुरुषेण पुष्टा पालिता ।) वेश्या । इति मेदिनी ॥ पराश्रया । इति शब्दचन्द्रिका ॥ परसाड़ा इति भाषा ॥

परपूर्व्वा, स्त्री, परोऽन्यः पूर्व्वो भर्त्ता यस्याः सा पत्यन्तरग्रहणात् प्रागन्येन गृहीतेतीदित्यर्थः । अस्या लक्षणं यथा, मानवे ५ अध्यायः ॥
"पतिं हित्वापकृष्टं स्वमुत्कृष्टं या निषेवते ।
निन्द्यैव सा भवेल्लोके परपूर्व्वेति चोच्यते ॥"
अस्याः प्रकारो यथा,—
"परपूर्व्वाः स्त्रियस्तस्याः स्मृताः प्रोक्ता यथाक्रमम् ।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा ॥"
इति मिताक्षरायां नारदः ॥

परप्रतिनप्ता, [तृ] पुं, (प्रतिनप्तुः परः अन्यः।) वृद्धप्रपौत्रः। इति हेमचन्द्रः॥

परभागः, पुं, (परस्य अन्यस्य भागः।) गुणोत्कर्षः। इति हेमचन्द्रः॥ (यथा, रघुः। ५।७०॥
"आभाति लब्धपरभागतयाऽधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदोयम्॥")
सुखभुक्। इति त्रिकाण्डशेषः॥ पीषांग्रश्च॥

परभुक्ता, स्त्री, (परेण परपुरुषेण भुक्ता।) अन्यपुरुषसम्भोगविशिष्टा। यथा,—
"परभुक्ताच्च कान्ताच्च यो भुङ्क्ते स नराधमः।
स पच्यते कालसूत्रे यावच्चन्द्रदिवाकरौ॥
न सा देवे न सा पित्र्ये पाकार्हा पापसंयुता।
तस्या आलिङ्गने भर्त्ता भवेच्छ्रीलज्जया हतः॥
देवताः पितरस्तस्य हव्यदाने च तर्पणे।
सुखिनो न भवन्त्येवमित्याह कमलोद्भवः॥
तस्मादुद्यत्नेन भार्य्याञ्च रक्षणं कुरुते सुधीः।
अन्यथा पापिनीभर्त्ता निश्चितं नरकं व्रजेत्॥
पदे पदे सावधानः कान्तां रक्षति पण्डितः।
न प्रतीतिस्थली योषा दोषाणाञ्च करण्डिका॥
कलङ्कं पापपात्रञ्च सदा रक्षितुमर्हति।
परस्त्रीदर्शनाच्च सुधां स्वस्त्रीयेन सदा॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०५ अध्यायः॥*॥
अन्येन भुक्तेति त्रि॥

परभृत्, पुं, (परान् कोकिलान् बिभर्त्तीति। डुभृञ् भरणे भृतिपुष्टौ + क्विप्। परेषां भृतिः केचित्।) काकः। इत्यमरः। २। ५। २०॥ (परजनपोषके, त्रि। यथा, भागवते। २। २। ५।
"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्॥")

परभृतः, पुं, (परेण काकेन भृतः पुष्टः।) कोकिलः। इत्यमरः। २। ५। १६॥ (यथा, सुश्रुतटीकायां।
"परभृत इव नीडे रक्षितो वायसीभिः॥"
स्त्रियां टाप्। यथा, रघौ। ८। ६७।
"परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः॥"
तथाच कुमारे। ६। २।
"चूतयष्टिरियं बाल्ये मधौ परभृतोन्मुखी॥"
अत्र मल्लिनाथः। "परभृतया कोकिलया उन्मुखी सुखरा। परभृतेति क्रियाशब्दविवक्षायां 'जातेरस्त्री' इति ङीप् प्रत्ययो न भवति। अथवा भृङ्गरणं सम्यदादित्वात् क्विप्। परैः भृत्यस्थानीयैः परभृता इति व्याख्यानम्। परमभृङ्गीकारस्तु परैः भियते इति कर्म्मणि क्विपमाह॥") परपोषिते त्रि॥

परम्, अ, (पॄ पूर्त्तौ + अम्।) निश्चयः। क्षेपः। इति मेदिनी॥ पश्चात्॥ (किन्त्वर्थे। यथा, पद्मपुराणे।
"वेदा सर्व्वे ब्राह्मणपारगाः परं बुद्धिरहिताः॥"
अधिकम्। यथा, रघुः। १। १७।
"रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्॥"
अनन्तरम्। यथा, तत्रैव। १। ६६।
"नूनं मत्तःपरं वंश्याः पिण्डविच्छेददर्शिनः॥")

परम, त्र, अनुज्ञा। इति मेदिनी॥ हाँ इति भाषा। तथा च। ओमेवं परमं मते। इत्यमरः। ३। ४। १२॥ त्रीणि मते अनुमतौ। ओं कुरु ओमित्युक्तवतः। एवं वाढं एवं यदाह भगवान्। परमस्मै आवसं मयेदं परमम्। त्रयं प्रकारेऽपि। इति भरतः॥

परमः, त्रि, (परं उत्तमं मातीति। "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) परः। उत्तमः। इति मेदिनी॥ (यथा, मनुः। ८।३१८।
"सर्व्वथा ब्राह्मणाः पूज्याः परमं दैवतं हि तत्॥")
प्रधानम्। (यथा, मनुः। ६। ६६।
"एवं संन्यस्य कर्म्माणि स्वकार्य्यपरमोऽमृतः॥")
आद्यः। ओङ्कारः। इति विश्वः॥ (यथा, कुमारे। ६। ३५।
"ततः परमिमुद्वाहं प्रतस्थे सुमिमङ्गलम्॥")
अर्थेश्वरः। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। १३। १७। ५१।
मन्त्रवित् परमोमन्त्रः सर्व्वभावकरो हरः॥")

परमगतिः, स्त्री, (परमा गतिः।) मुक्तिः। मोक्षहेतौ त्रि। यथा। गुणातीतोऽपीशस्त्रिगुणमयिनं विश्वमखिलं परमयन्त्रैर्गुणैर्यः सृष्टिस्थितिविलयकर्म्माणि कुरुते। कृपापारावारः परमगतिरेष त्रिजगतां नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे॥ इति मङ्गलवादः॥ तस्या लक्षणं यथा,—
"यां विप्राः सर्व्वतः प्राप्ता विशुद्धा ज्ञाननिश्चयाः।
गतिं गच्छन्ति सम्भूयास्तामाहुः परमां गतिम्॥"
इति महाभारते मोक्षधर्म्मः॥

परमगवः, पुं, स्त्री, परमश्चासौ गौश्चेति। श्रेष्ठगौः।

परमपदः, पुं, क्ली, (पद्यते ज्ञायते प्राप्यते इति पदम्। ततः कर्म्मधारयः।) श्रेष्ठस्थानम्। परदेवताचरणः। यथा। स्मपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्। स गन्धर्व्वश्रेणीपतिरपि कवित्वाम्भोदानां प्रभवति चिरात् प्रौढविदुषां परमपदलीनः प्रभवति॥ इति कर्पूरारत्नस्तोत्रम्॥

परमब्रह्म, [न्] क्ली, (परमं ब्रह्म।) परमेश्वरः। नारायणः। यथा।
सत्यतपा उवाच।
"यदेतत् परमं ब्रह्म त्वया प्रोक्तं महामुने!।
तस्य रूपं न जानन्ति योगिनोऽपि महात्मनः॥
अनामगोत्ररहितमभूतं मूर्त्तिवर्ज्जितम्।
कथं तज्ज्ञायते ब्रह्म संज्ञानामविवर्ज्जितम्॥
तत्तस्य संज्ञां कथय येन जानाम्यहं गुरो!॥"
दुर्व्वासा उवाच।
"यदेतत् परमं ब्रह्म वेदवादेषु पठ्यते।
स देवः पुरुषोत्तमः स्वयं नारायणः परः॥
स यज्ञैर्विविधैर्दानैर्नियमैश्च सुदुष्करैः।
प्राप्यते परमो देवः स्वयं नारायणो हरिः॥"
इति वराहपुराणम्॥

परमर्षिः, पुं, (परमश्चासौ ऋषिश्चेति।) अस्य व्युत्पत्तिरर्थश्च यथा,—
"ऋषिर्दृष्टार्थतत्त्वो यो धातुविद्याक्षयक्षमः।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
मन्त्रार्थाद्यवतेर्धातोर्नामानि दृष्टिकारणम्।
यस्मादेष स्वयं भूतस्तस्माच्च ऋषिता मता॥"
इति मात्स्ये १९० अध्यायः॥
भेलादिऋषिविशेषः। इति त्रिकाण्डशेषः॥ (वेदव्यासो हि परमर्षिः। यथा, महाभारते। १। १। १७।
"द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा॥")

परमब्रह्मधर्म्मा, [न्] त्रि, परमब्रह्मो धर्म्मो यस्य। इति कर्म्मधारयपूर्व्वपदबहुव्रीहौ सिद्धान्तकौमुदी॥

परमहंसः, पुं, (परमः श्रेष्ठः हंसः सोऽहं आत्मा यस्य।) सन्न्यासिविशेषः। अस्य लक्षणं यथा।
जातरूपधरो निर्द्वन्द्वो निरालम्बस्त्वनपेक्षमार्गे सम्यक् सम्पन्नः शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले भैक्षमाचरन् लाभालाभौ समौ लब्धा शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुहरकन्दरकोटरनिकरस्थण्डिलेष्वनिकेतवासी निष्पत्रहो निर्म्ममः शुक्लध्यानपरायणः अध्यात्मनिष्ठः शुभाशुभकर्म्मनिर्म्मूलनाय सन्न्यासेन देहत्यागं करोति यः स एव परमहंसो नामेति जीवन्मुक्तिविवेकः॥ (अयं हि चतुर्व्विधावधूतेषु श्रेष्ठः। यदुक्तं महानिर्व्वाणतन्त्रे।
"चतुर्णामवधूतानां तुरीयो हंस उच्यते।
त्रयोऽन्ये भोगयोगाढ्या मुक्ताः सर्व्वे त्रिवोपमाः॥"
परमहंसेन हि यज्ञोपवीतादिचिह्नानि परित्यज्य कौपीनादिकं धारणीयम्। यदुक्तं सूतसंहितायां ज्ञानयोगे।
"परमहंसश्चिह्नञ्च रज्जुं गोवालमिश्रितम्।
शिक्यं जलपवित्रञ्च पवित्रं कमण्डलुम्॥
पक्षिणीमजिनं कन्थां स्वनासाग्रां त्रिधारिकाम्।
शिखां यज्ञोपवीतञ्च नित्यकर्म्म परित्यजेत्॥
कौपीनं छादनं वस्त्रं कन्थां पौतनिवारिकाम्।
योगपट्टं बहिर्वस्त्रं पादुकां छत्रमङ्गुलम्॥
अत्यमात्राञ्च गृह्णीयान् वैखरं दण्डमग्रगम्।
अग्निहोत्रादिभिर्मन्त्रैः कुर्य्यादुद्वहनं सुदा॥
आमिति त्रिभिः प्रोक्तं परमहंसकिपुङ्गकम्॥"
अविद्वान् परमहंसेन शब्दब्रह्म भाषम्।
विद्वान् तु शब्दादिकं किमपि न धारणीयम्॥
यदुक्तं निर्व्वाणतन्त्रे। "परमहंसस्त्वेकदण्ड एव सोऽप्यविद्वान्। विद्वान्तु सोऽपि नास्ति। न दण्डं न शिखां नाच्छादनं धरति परमहंसः॥"
परमहंसास्तु केवलं प्रणवैकपरतत्परा एव भवन्ति। यदुक्तं सूतसंहितायाम्।
"प्रणवाद्ब्राह्मयोर्वेदाः प्रणवे पर्य्यवस्थिताः।
तस्मात् प्रणवमेवैकं परमहंसः सदा जपेत्॥
विविक्तदेशमाश्रित्य सुखासीनः समाहितः।
यथाशक्ति समाधिस्थो भवेत् कल्पार्णवं वरः॥"
परमहंसास्तु "तत्त्वमसि" इत्यादि महावाक्यार-

लम्बनेन आत्मज्ञानानुशीलिनो भवन्ति "सोऽहं" शिवोऽहं" इत्यादि वदन्तस्तत्त्वज्ञानावलम्बनस्य परिचयं प्रयच्छन्ति च। एषामध्यो हि स्वामीत्याख्या प्रसिद्धः। एते हि तीर्थभ्रमण-निषुत्वात्तीर्थस्थानस्थाच्च। मतस्य परमहंसस्य शरीरं भूमौ निखातत्वम्। यदुक्तं वायु-संहितायाम्।

"मृते न दहनं कार्य्यं परमहंसस्य सर्व्वदा।
कर्त्तव्यं खननं तस्य नाग्नौचं नोदकक्रिया॥"

परमहंसस्तु दक्षिपरमहंसावधूतपरमहंसभेदेन द्विविधः। ये तु दण्डं परित्यज्य पारमहंस्य-व्रतावलम्बनं कुर्व्वन्ति ते दक्षिपरमहंसाः। ये चावधूतवृत्त्यानुष्ठानेन परमहंसास्ते एवा-वधूतपरमहंसाः। परं सर्व्वे एव प्रणवोपासकाः इति॥ *॥

शुक्लयजुर्व्वेदगत उपनिषद्विशेषः। इति मुक्ति कोपनिषत्॥)

परमाणुः, पुं, (परमः सर्व्वपरमकोऽणुः।) पृथिव्यादिभूतचतुष्टयानां द्व्यणुकानामवयवः। स च नित्यः निरवयवः ततः किमपिक्षुद्रं नास्ति। यथा,

"नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥"

पारिमाण्डल्यनामकतत्परिमाणन्तु न कस्यापि कारणम्। यथा,

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्॥"

जलादिपरमाणुरूपस्य नित्यत्वम्। पार्थिवपर-माणुरूपस्यानित्यत्वम्। पार्थिवपरमाणुरूप-स्यानित्यत्वम्। यथा, भाषापरिच्छेदे॥

"जलादिपरमाणौ तन्नित्यमन्यत् सङ्क्षेतुकम्।"

तैरेव परमाणुभिरानुपादानैर्द्व्यणुकक्रमेण स्थूलत्तिजलतेजोमरुतः सृजति परमे-श्वरः। यथा आयोजनं परमाणुकर्म्म तथा च सर्गाद्यकालीनं द्व्यणुकारम्भकपरमाणुकर्म यत्नजन्यं प्रयत्नवदात्मसंयोगजन्यं वा कर्म्मत्वात् अस्मदादिशरीरकर्म्मवत् इति कुसुमाञ्जलिः॥ प्रलयेऽनित्यमूलस्थूलनाशानन्तरं परमाणुक्रिया-विभागपूर्व्वसंयोगनाशादिक्रमेण द्व्यणुकनाशा-त्तिष्ठन्ति परमाणव एवेति। यथा,—

"शोधयमानास्तिष्ठन्ति प्रलये परमाणवः।"

इति प्राचीनकारिका॥

तस्य महत्त्वाभावादतीन्द्रियत्वम्। यथा। महत्त्वं बहुविधे हेतुरिति भाषापरिच्छेदः॥ *॥

कालविशेषः। यथा, श्रीभागवते ३।११।७-५॥

"स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम्।
सतो विशेषभुग् यस्तु कालः स परमो महान्॥
अणुर्द्वौ परमाणू स्यात्तत्सरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्॥"

अस्यार्थः। एतदेव प्रपञ्चयति स इत्यादिना। अतः प्रपञ्चस्य परमाणुतां परमाणवस्थां यो भुङ्क्ते स कालः परमाणुः तस्यैवाविशेषं याकाल्यं यो भुङ्क्ते स परममहान्। अयमर्थः ग्रहर्क्षतारा चक्रस्य इत्यादिना यत् सूर्य्यपर्य्यटनं वक्ष्यति तत्र सूर्य्यो यावता परमाणुर्देशमतिक्रामति तावान् कालः परमाणुः। यावता च द्वादशराशात्मकं सर्व्वं भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः तस्यैवाहत्या युगमन्वन्तरादिक्रमेण द्विपरार्द्धान्तत्वमिति। तथा च पञ्चमे सूर्य्यगत्यैव कालादिविभागं वक्ष्यति।५। इदानीं द्व्यणुकादिलक्षणपूर्व्वकं मध्यमकालावस्थां कथयति द्वौ परमाणू यमुः स्यात् त्रयोऽणव-स्ते त्रसरेणुः स तु प्रत्यक्ष इत्याह जालार्केति गवाक्षप्रविष्टैर्भर्करश्मिभिरवगतः कोऽसौ योऽति-लघुत्वेन खमेवानुपतन् अगात् गतः। न गामिति पाठे खमेवानुपतन्नवगतः न तु गां पृथ्वीम्। इति श्रीधरस्वामी॥

परमाणुलक्षकः, पुं, (परमाणुरङ्कं यस्य। कप्।) विष्णुः। इति शब्दमाला॥

परमात्मा, [न्] पुं, (परमः केवलः आत्मा।) परं ब्रह्म। तत्पर्य्यायः। आपोज्योतिः २ चिदात्मा ३। यथा,—

"परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानाञ्च श्रीकृष्णो भगवान् स्वयम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥ (विष्णुः। यथा, महाभारते। १३। १४८।१५।

"पूतात्मा परमात्मा च मुक्तानां परमा गतिः॥"

महादेवः। यथा, तत्रैव। १३। १७। १३७।

"प्रीतात्मा परमात्मा च प्रयतात्मा प्रधानधृक्॥")

परमार्हतः, पुं, (परमः अर्हतः हैतवर्ज्जितः।) विष्णुः। यथा,—

"नमस्ते ज्ञानसद्भाव नमस्ते ज्ञानदायक।
नमस्ते परमार्हत नमस्ते पुरुषोत्तम!॥"

इति गरुड़पुराणम्॥

परमान्नं, क्ली, दैवपित्र्यत्वात् परमसुलक्षमन्नम्। परमाणामसुलक्षाणां देवादीनामन्नमिति वा। इति भरतः॥ तत्पर्य्यायः। पायसः २। इत्य मरः। २। ७। २॥ क्षीरिका ३। तस्य पाकप्रकारो यथा,—

"सुदुर्द्धर्षपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् क्षिपेत्।
ते सिद्धाः क्षीरिका ख्याता सा सिताज्ययुतो-त्तमा॥"

अस्य गुणाः।

"क्षीरिका दुर्ज्जरा बल्या धातुपुष्टिप्रदा गुरुः।
विष्टम्भिनी हरेत् पित्तरक्तपित्तामिमारुतान्॥"

इति भावप्रकाशः॥

परमायुः, [स्] क्ली, (परमं आयुः।) जीवित-कालः। यथा,—

"शतं वर्षाणि विंशत्या निशाभिः पञ्चभिः सह।
परमायुरिदं प्रोक्तं नराणां करिणामिह॥
अब्दा द्वात्रिंशदब्दानां शतं द्वादशवत्सराः।
पञ्चविंशतिवर्षाणि खरस्य करभस्य च॥
चतुस्त्रिंशतिरब्दानां वृषस्य महिषस्य च।
शतमूकरवस्त्रादिशूनां षड्दशान्वितः॥"

इति शब्दमाला॥ *॥

अथायुरानयनम्।

"अज्ञानादायुषः सर्व्वं विफलं कीर्त्तितञ्च यत्।
तस्मादानयनं तस्य स्फुटार्थमभिधीयते॥
नौचान्तरस्य खेटस्य भागस्तुङ्गगुणो भवेत्।
चेष्टा केन्द्रस्तु चेत् षड्भादधिकं चक्रशोधितम्॥
नान्यथा तस्य भागादि चेष्टा गुणक उच्यते।
गुणश्चेत् षष्टि६०तो न्यूनं तदा ह्रासं सखा-
नलः ३०॥
एवं तुङ्गगुणश्चेष्टा गुणो यत् स्यात् तयोर्वधात्।
स्फुटं कलादिकं तत् स्यादृणकस्फुट उच्यते॥
अथाश्रयगुणं वक्ष्ये चेष्टादिसप्तवर्ज्जनम्।
वर्गे चेष्टादिके सर्व्वे याम्यक्षिंशुगत३० कलागुणः॥
अधिमित्रयुते तत्त्वम् २५ मित्रे विंशांशगुणानयः।
२१। ४०।
समे पञ्चदश याम्याः शुक्रौ खवंशांशकोरगाः८।००
पञ्चाग्नयौ ५ तदैक्यं यत् चेष्टोत्यगुणयुक् पुनः।
सर्व्वे वर्गोत्तमे खांशे खवंशांशे स्फुटं गुणः॥
अधीष्टे युगांशोनक्षांशोनो मित्रवेश्मनि।
समे द्व्यंशो रिपौ त्र्यंशो युगांशस्त्रिगुणश्च भे॥
एवं स्फुटाश्रयगुणो विशेषो यः स उच्यते।
खवंशांशकः खांशको वा वर्गोत्तमगतोऽपि वा॥
यदि स्यादधिमित्रर्क्षे तदा तत्राश्रये गुणे।
गजनेत्रे समुद्राक्षौ २८।३४ कलाद्यं मिश्रयेद्बुधः।
एवं मित्रगृहे तद्वद्रूपक्षिंशुद्विमिश्रयेत्१६।३०।
शत्रुक्षेत्रे तु षड्लिप्ता कुनेत्रविकला त्यजेत्॥६।२१
अधिशत्रुगृहे वाणरुद्राब्धी ५। ११ लिप्तादिकं
त्यजेत्।
आश्रयस्य गुणस्यास्य वधः स्फुटगुणस्य यः॥
तन्मूलं कर्म्मयोग्यः स्याद्गुण आयुर्विधौ स्फुटः।
खेटानाञ्च तनोर्भागाः खाब्धि ४० घ्निष्टाः कली-
हताः॥
पुनः शून्यरसा ६० भक्ताः क्रमात् स्यादायुषः
पलम्।
लब्धलग्नं यदेष्टोनं न्यूनं चक्रार्द्धतो यदि॥
तत्कला स्यात्तदाहारो नायं षड्भाधिके विधिः।
खखधृत्या १८०० खखाङ्केन ८०० गुणितं पल-
मायुषः॥
क्रमतः पापसौम्यानां हारात्रं शोधनं भवेत्।
खखधृत्यूनहारच्छेदो हारदलं क्रमात्॥
आयुः पलन्नं शून्याब्धं धृत्याप्तं शोधनं तथा।
आयुःपलं शोधनोनमेवं चक्रार्द्धशोधनम्॥
चक्रार्द्धशोधने त्वेकराशौ ह्रासादिगर्हे सति।
एकस्याधिकवीर्य्यस्य हानिं सत्यः प्रभासते॥
आयुःपलं शतं स्वीयैर्गुणैर्भाग्यैः कलादिभिः।
षष्ट्याप्तम् ६० तत् पुनः सूर्य्यसङ्ख्याप्तः १२००
समाहृयः।
तनोरायुः पलं सूर्य्यः सङ्ख्याप्तः समाहृयः।
चेष्टाप्तं बलवद्दृग्योर्ह्रासवृद्ध्या समाहृता॥
द्वादशाहतभागाद्यैर्दिनाद्यैरपि संयुताः।
एवं सूर्य्यादिलग्नानामंशायुः प्रस्फुटं भवेत्॥
लब्धान्तरितखेटस्य कला आयुःपलं भवेत्।
तच्चेत् षड्भः कलाभ्यूनं तदा सांद्रिगुणाप्तकम्॥

अथवा ।
"सुनीचान्तरितः खेटः सप्तदृग्भः सकलीकृतः ।
आयुःपलमिदं प्राज्ञैर्ज्ञेयं पैण्डादिकत्रये ॥
चंद्रांशोनं शुक्रभक्तस्य विनाड्यायुः पलम् ।
अस्तगस्य द्विभागोनं क्षित्वा शुक्रग्रनैश्चरौ ॥
एकस्य यदि खेटस्य चंद्रांशार्द्धहानिसम्भवः ।
अधिकैका तदा हानिः कर्त्तव्या च विपश्चिता ॥
चक्रार्द्धोद्धरणं कार्य्यं पूर्ब्बवत् गति सम्भवे ।
एवमायुःपलं पैण्डे जीवः प्रोक्ते निसर्गजे ॥
पैण्डं यथागतं सौरैर्भागोर्व्विंशांशवर्ज्जितम् ।
चन्द्रस्य वेदभागाढ्यं भृगोश्च विंशांशसंयुतम् ॥
कुजगुर्व्वोश्चयुगांशोनं शस्त्रार्द्धं तत् यरांशयुक् ।
आयुःपलं निसर्गाख्ये रविकव्योर्यथागतम् ॥
दृग्भागोनदलं शस्त्र जीवस्य विदृग्भागकम् ।
दृग्भागं भूमिपुत्रस्य विंशत्यंशं निशापतेः ॥
दृग्भागं शुतिभिर्भक्तं भानेरायुःपलं भवेत् ।
जीवोक्तं सप्तभागोनं सर्व्वेषामायुषः पलम् ॥
आयुः पलस्य खाब्धाद्रिभागेन १०८०० समायुतम् ।
इत्यमायुःपलं खाब्धाद्रिभागम् १०८० स्यात् समादिकम् ॥
पैण्डजैर्सर्य्यजीवोक्ते भवेदायुः खगामिनाम् ।"
अथवा ।
"रवेरायुःपलं त्र्यग्नं विनखांशं दिनादिकम् ।
पैण्डमायुर्भवेदिन्दोर्नागभक्तम् ५ द्वादशो १२ हृतम् ।
कुजगुर्व्वोश्चयुगे नाग्नं बुधस्य पञ्चभिर्हृतम् ।
भवेः शैल ७ हृतं विंशत्यग्नं २० सौरेर्गुणोद्धृतम् ।
विधोरायुःपलं लब्धं खरसैः स्याद्दिनादिकम् ॥
निसर्गे शुक्रपुत्रस्य ३ रामघ्नं खयमोद्धृतम् ।
रविकव्योर्गुणैर्नाग्नं कुजस्य खगुणोद्धृतम् ॥
गुरोस्त्रिघ्नं खपक्षाग्नं १० शनेस्तर्कौ ६ शनोलितम् ॥"

अथवा ।
"आयुःपलमिनादीनां खाब्धिघस्राग ८६४० भागयुक् ।
द्विघ्नं सप्तघ्नमायुः स्याद्दिनाद्यं जीवभाषितम् ॥
विराशिलग्नविकलाः खखखार्का १२००० हृतातनोः ।
तदंशकघ्नं ज्ञेयमायुः पैण्डादिकत्रये ॥
अंशतुल्यं तनोरायुर्व्वदन्ति बहवो बुधाः ।
केचिदाद्यिमं केचित्तस्य यस्याधिपो बली ॥
लग्नस्फुटस्य लिप्ताभिर्हन्यादायुर्द्धारिणाम् ।
प्रत्येकं चन्द्रलिप्ताभि २१६००० र्भजेद्वर्षाधिकं भवेत् ॥
अनेन क्षीनखस्यायुर्लग्ने पापयुते सति ।
दृष्टे तु सौम्यखेटेन तस्यार्द्धेन तदा युक् ॥
व्याख्यानसृत्पलस्यैव दृङ्ज्ञातकभाषितम् ।
केचित् प्राहुर्लग्नराशिं व्यक्ता लिप्तादिका क्रिया ॥
अन्ये लग्नस्य पापस्य भावीत्यफलताडितम् ।
पुराणं प्रोच्यमायुर्यत् तत्षष्ट्याप्तं विशोधयेत् ॥
तत्रापि लग्ने पापौ चेत् बलिष्ठस्य फलेन तत् ।
खाब्धि पुरुषलेनैव क्रिया कार्य्या विपश्चिता ॥
पापेऽपि लग्ने लग्नेशे न कर्त्तव्या स्वियं क्रिया ।

चंद्रायुषि च कार्य्यैवं हानिः प्राज्ञैः कथञ्चन ॥
लग्नस्य यौग्यादंशोत्थं पैण्डं भानोर्बलाधिकात् ।
निसर्गोत्थं विधोर्व्वौग्यादायुः साधं विपश्चिद्भिः ॥
चयखेटबलौनाः स्युर्जीवोक्तं साधयेत्तदा ।
लग्नेन्दोर्लग्नभान्वोश्च सूर्य्येन्दोः समयोर्ययोः ॥
तदायुषो यदैक्यार्द्धं तदुक्तं श्रीधरादिभिः ।
नाद्यत्रयावगादायुः पृथक्सूत्यनगांघ्रके ॥
साष्टसूर्य्यांघ्रके १२८ क्षौनं सौरं वर्षादिकं भवेत् ॥
पथ्याग्निग सधर्म्मा ये सच्छीलाढ्या जितेन्द्रियाः ।
गुरुदेवद्विजे भक्तास्तेषामेवायुरीरितम् ॥
ये पापा लुब्धकप्रख्या देवब्राह्मणनिन्दकाः ।
वसुगुर्व्वङ्कनासक्तास्तेषां मृत्युरकालजः ॥"
इति तोषणयामायुर्दायाध्यायः ॥

परमायुष्, पुं, (परमं आयुर्यस्य । एषोदरादित्वादच् । दीर्घकालजीवित्वादस्य तथात्वम् ।) असनवृक्षः । इति शब्दचन्द्रिका ॥

परमार्थः, पुं, (परमः श्रेष्ठः अर्थः ।) उत्कृष्टवस्तु । यथार्थः । यथा,—
"प्रपञ्चो यदि वर्त्तेत निवर्त्तेत न संशयः ।
मायामात्रमिदं दैतमद्वैतं परमार्थतः ॥"
इति माण्डूक्यवार्त्तिकम् ॥
(तथा च कुमारे । ५ । ७५ ।
"उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ॥"
परमः श्रेष्ठः अर्थः प्रयोजनमिति विग्रहे । मोक्षः । सुखम् । सुखभोगः दुःखाभावः ॥ इति न्यायदर्शनम् ॥)

परमार्हतः, पुं, (परमः अर्हन् देवता उपास्यतया अस्त्यस्य । परमार्हत + अण् ।) जैनराजर्षिविशेषः । इति हेमचन्द्रः ॥

परमृत्युः, पुं, परेभ्यो मृत्युरस्य । (रोगादिना मृत्योरभावात् अस्य तथात्वम् ।) काकः । इति त्रिकाण्डशेषः ॥

परमेश्वरः, पुं, (परमश्चासौ ईश्वरश्चेति ।) शिवः । इति हलायुधः ॥ (यथा, महाभारते शिवसहस्रनाम प्रकरणे,—
"सहस्रारे महापद्मे त्रिकोणनिलयान्तरे ।
विन्दुरूपे महेशानि ! परमेश्वर ईरितः ॥")
विष्णुः । यथा,—
"इदन्तु द्वादशं प्रोक्तं पद्मं वै कैटभस्य हि ।
द्वादशारं तथा चक्रं यन्नाभिद्विभुजं तथा ॥
त्रिवृद्वलयकन्तस्मिंश्च तथोक्तः परमेश्वरः ।"
इति वामने ५८ अध्यायः ॥
(स्त्रियां ङीप् । दुर्गा । यथा,—
देवीभागवते । ७ । ३० । ७० ।
"देवकी मथुरायान्तु पाताले परमेश्वरी ॥")

परमेष्ठिनी, स्त्री, (परमेष्ठिन् + ङीप् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ वामनहाटी इति भाषा ॥
परमेष्ठिनः शक्तिश्च ॥

परमेष्ठी, [न्] पुं, (परमे व्योम्नि चिदाकाशे ब्रह्मपदे वा तिष्ठतीति । स्थागादि तिष्ठतौ "परमे कित् ।" उणा० । ४ । १० । इति इनिः स च

कित् । "इगन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ६ । इत्यलुक् "स्थास्थिन् स्थाम् । इति थमम् । परमे स्थाने ऽनाद्यनन्तलक्षणे तिष्ठतीति कुल्लूकभट्टः ॥) ब्रह्मा । इत्यमरः । १ । १ । १६ । (यथा, मनुः । १।८०।
"मन्वन्तराण्यसंख्यानि सर्गः संहार एव च ।
क्रीड़न्निवैतत् कुरुते परमेष्ठी पुनः पुनः ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । ५८
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
महादेवः । यथा, महाभारते । ३ । ३७ ।५८।
"क्रियतां दर्शने यत्नो देवस्य परमेष्ठिनः ।
दर्शनात्तस्य कौन्तेय ! संसिद्धः सर्व्वमेष्यसि ॥")
जिनः । इति हेमचन्द्रः ॥ ग्रामण्यामविशेषः । यथा,—
"परमेष्ठी च शुक्लाभः पद्मचक्रसमन्वितः ।
चित्राङ्गतिस्तथा एष्टे शुषिरश्चातिपुष्कलम् ॥
परमेष्ठी लोहिताभश्चक्रमेकं तथा युतम् ।
चित्राङ्गतिस्तथा रेखा शुषिरश्चातिपुष्कलम् ॥"
इति ब्रह्मपुराणम् ॥
"परमेष्ठी च शुक्लाभश्चक्रपद्मसमन्वितः ।
स वर्त्तुलस्तथा पीतः एष्टे च शुषिरं ध्रुवम् ॥"
इति पुराणसंग्रहः ॥
"परमेष्ठी तु रक्ताभश्चक्रपद्मसमन्वितः ।
द्विधाङ्गतिस्तथा एष्टे शुषिरश्चापि वर्त्तुलम् ॥
पीतवर्णयुतो वापि सुक्तिसुक्तिवरप्रदः ॥"
इति वैश्वानरसंहिता ॥ * ॥
गुरुविशेषः । यथा,—
"आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुत्वं हि परमेष्ठी त्वहं गुरुः ॥"
इति दुर्गातन्त्रे २ पटलः ॥
मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुत्वं हि परमेष्ठिगुरुत्वहम् ॥"
इति तन्त्रान्तरम् ॥
(अजमीढपुत्रः । यथा, महाभारते । १।६४।३१।
"अजमीढो वरस्त्रीषु तस्मिन् वंशः प्रतिष्ठितः ।
षट् पुत्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु भारत ।
ऋक्षं धूमिन्यधोविली दुष्मन्तपरमेष्ठिनौ ॥"
परमस्यानन्तरिते वाच्यलिङ्गः । यथा, मार्कण्डेये । ७६ । २ ।
"अन्यजन्मनि जातोऽसौ चक्षुषः परमेष्ठिनः ।
चाक्षुषत्वमनन्तस्य अजन्यस्यापि द्विज ! ॥")

परम्परः, पुं, (परं विपक्षौति । पॄ पूर्त्तौ + अच् । "तत्पुरुषे कृतीति" अलुक् ।) प्रपौत्रादिः । नगभेदः । इति हेमचन्द्रः ॥ प्रपौत्रतनयः । इति मेदिनी ॥

परम्परा, स्त्री, अन्वयः । (यथा, कुमारे । ६।४६ ।
"गगनादवतीर्णा सा यथा दृष्टपुरःसरा ।
तोयान्तर्भास्करालीव रेजे सुनिपरम्परा ॥")
सन्तानः । वधः । हिंसा । इति हेमचन्द्रः ॥ परीपाटी । अनुक्रमः । इति शब्दरत्नावली ॥ यथा,
"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥

एवं परम्परायातं तथा राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ! ॥"
इति श्रीभगवद्गीतायां ४ अध्यायः ॥

परम्परीकं, क्ली, (परम्परया कायते प्रकाश्यते इति । कै + कः । परम्परास्थापितपशुहननात् तथात्वम् ।) यज्ञार्थपशुहननम् । तत्पर्य्यायः । घ्रुमनम् २ प्रोक्षणम् ३ । इत्यमरः । २।७।२६ ॥ घातनम् ४ वधः ५ । इति शब्दरत्नावली ॥

परम्परीणं, त्रि, (परांश्च परतरांश्च अनुभवति । "परोवरपरम्परेति ।" ५ । २ । १० । इति खः । प्रज्ञादेः परम्परभावो निपात्यते ।) परम्परा-प्राप्तम् । यथा, भट्टिः । ५ । १५ ।
"लक्ष्मीं परम्परीणां त्वं पुत्रपौत्रीणतां नय ॥"

परः, पुं, (पिपर्त्ति देवादिकं पूरयतीति । पॄ + बाहुलकात् अरः ।) केशराजः । इति त्रिकाण्ड-शेषः ॥

परलोकः, पुं, (परो लोकः ।) लोकान्तरम् । तच्च स्वर्गादि । यथा,—
"समस्तानाप्यभूयिष्ठपात्रवैमल्यमेव यम् ।
लोके प्रयाति पन्थानं परलोकेन तं कृतः ॥"
इति नैषधम् ॥

परलोकगमः, पुं, (परलोके लोकान्तरे गमो गमनं यस्मात् ।) मृत्युः । इति हेमचन्द्रः ॥

परवशः, त्रि, (परस्य परेषां वा वशः वशीभूतः ।) अन्यवशीभूतः । तत्पर्य्यायः । परायत्तः २ पराधीनः ३ परच्छन्दः ४ परवान् ५ । इति हेम-चन्द्रः ॥ (यथा, मनुः । ४ । १५६ ।
"यद्यत् परवशं कर्म तत्तद् यत्नेन वर्जयेत् ।
यद्यदात्मवशन्तु स्यात्तत्तत् सेवेत यत्नतः ॥")

परवाग्निः, पुं, (परं धर्म्मं वाग्यति प्रकाशयति । वच प्रकाशे + णिच् + इन् । धातूनामनेकार्थत्वादत्र प्रकाशार्थः ।) धर्म्माध्यक्षः । वन्सरः । इति मेदिनी ॥ (परं प्रकृष्टं सर्पमित्यर्थः वाग्यतीति ।) कार्त्तिकेयवाहनो मयूरः । इति शब्दमाला ॥

परवान्, [न्] त्रि, (परः स्वामी अस्त्यस्य । "तदस्यास्त्यस्मिन्निति ।" ५ । २ । ९४ । इति मतुप् मस्य वः ।) पराधीनः । इत्यमरः ।३।१।१६ (यथा, रघौ । २ । ५६ ।
"भवानपीदं परवानवैति
महान् हि यत्नस्तव देवदारौ ॥")

परव्रतः, पुं, (परं व्रतमस्य ।) भूतराट्टः । इति शब्दरत्नावली ॥

परशुः, क्ली, (शृणातीति । पृषोदरादित्वात् साधुः । अस्य शॄधातोः अपरस्य धातोः स्वर्जत्वं जायते अतोऽस्य तथात्वम् ।) रत्नविशेषः । यथा,—
"मुक्तामाणिक्यपरशुमणिरत्नाकरान्वितम् ।
लक्ष्मशुभ्रहरिद्रक्तमणिराजिविराजितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥

परशव्यं, त्रि, परशवे हितम् । तस्मै हितादा-वुत्तगवादेर्यत् । इति संक्षिप्तसारव्याकरणम् ॥ (पां उपगवादिभ्यो यत् । परशुहितम् । इति व्याकरणम् ॥)

परशुः, पुं, (परान् शत्रून् शृणाति हिनस्त्यनेनेति । शॄ हिंसायाम् + "आडृपरयोः खनिशॄभ्यां डिच्च ।" उणा । १ । ९४ । इति कुः स च डित् ।) अस्त्र-विशेषः । टाङ्गी इति भाषा ॥ तत्पर्य्यायः । पर्शुः २ परश्वधः ३ पर्श्वधः ४ स्वधितिः ५ कुठारः ६ । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८८।१४ ।
"ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवीबाणौघैरपातयत भूतले ॥")

परशुधरः, पुं, (धरतीति धरः । धृ + अच् । ततः परशोर्धरः ।) गणेशः । इति हलायुधः ॥ (परशुरामः । परशुग्रहणप्रधानत्वादस्य तथा-त्वम् ॥)

परशुरामः, पुं, (परशुना कुठाराख्यास्त्रेण रामः रमणं यस्य । परशुग्रहणबलेनैव दुष्ट-क्षत्रियवंशान् निहत्यात्मानं रमयति इति तात्-पर्य्यार्थः ।) भगवतः षोड़शावतारः । यथा,—
"अवतारे षोड़शमे पश्यन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ॥"
इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥
तत्पर्य्यायः । जामदग्न्यः २ पर्शुरामः ३ परशु-रामकः ४ भार्गवः ५ भृगुपतिः ६ भृगूत्तमः ७ । इति शब्दरत्नावली ॥ अस्योत्-पत्त्यादिकं यथा,—
मार्कण्डेय उवाच ।
"अथ काले व्यतीते तु जमदग्निर्महातपाः ।
विदर्भराजस्य सुतां प्रयत्नेन जितां स्वयम् ॥
भार्य्यार्थे प्रतिजग्राह रेणुकां लक्षणान्विताम् ।
सा तस्मात् सुषुवे पुत्रान् चतुरो वेदसम्मतान् ॥
रमयन्तं सुषेणञ्च विश्वं विश्वावसुन्तथा ।
पश्चात्तस्यां स्वयं जज्ञे भगवान् मधुसूदनः ॥
कार्त्तवीर्य्यवधायाशु प्रकाशे सकलैः सुरैः ।
याचितः पञ्चमः सोऽभूत्तेषां रामाह्वयस्तु यः ॥
भारावतारणार्थाय जातः परशुना सह ।
सहजः परशुस्तस्य तं जहाति कदाच न ॥
अयं निजपितामह्याश्चरुभुक्तिविपर्य्ययात् ।
ब्राह्मणः क्षत्रियाचारो रामोऽभूत् क्रूरकर्म्मकृत् ।
स वेदानखिलान् ज्ञात्वा धनुर्व्वेदांश्च सर्व्वशः ।
स्वतातात् कृतकृत्योऽभूद्देवविद्याविशारदः ॥"
इति कालिकापुराणे ८५ अध्यायः ॥
अवशिष्टं पाद्मोत्तरखण्डे ५० अध्याये द्रष्टव्यम् ॥
(अयमेव पितुरादेशात् परशुना स्वमातुः शिर-श्छित्त्वा ततः प्रसन्नात् पितुर्वरं लब्ध्वा मातरं पुनर्जीवयामास । यदुक्तं महाभारते । ३ । ११६ । ५—१८ ।
"फलाहारेषु सर्व्वेषु गतेष्वथ सुतेषु वै ।
रेणुका स्नातुमगमत् कदाचित्रियतव्रता ॥
सा तु चित्ररथं नाम मार्त्तिकावतकं नृपम् ।
ददर्श रेणुका राजन्नागच्छन्ती यदृच्छया ॥
क्रीड़न्तं सलिले दृष्ट्वा सभार्य्यं पद्ममालिनम् ।
ऋद्धिमन्तं ततस्तस्य स्पृहयामास रेणुका ॥
अभिचाराच्च सा तस्मात् क्लिन्नाम्भसि विचेतना ।
प्रविवेशाश्रमं त्रस्ता तां वै भर्त्ता त्वबुध्यत ॥

स (जमदग्निः) तां दृष्ट्वा च्युतां धैर्य्यात् ब्राह्म्या लक्ष्म्या विवर्ज्जिताम् ।
धिक्शब्देन महातेजा गर्हयामास वीर्य्यवान् ॥
ततो ज्येष्ठो जामदग्नो रुमण्वान्नाम नामतः ।
आजगाम सुषेणश्च वसुर्विश्वावसुस्तथा ॥
तावानुपूर्व्व्या भगवान् वधे मातुरचोदयत् ।
न च ते जातसम्मोहाः किञ्चिदूचुर्व्विचेतसः ॥
ततः शशाप तान् क्रोधात्ते शप्ताश्चेतनां जहुः ।
मृगपक्षिसधर्म्माणः क्षिप्रमासन् जड़ोपमाः ॥
ततो रामोऽभ्ययात् पश्चादाश्रमं परवीरहा ।
उवाच च महाबाहुं जमदग्निर्म्महातपाः ॥
जहीमां मातरं पापां मा च पुत्र ! व्यथां क्षयः ।
तत आदाय परशुं रामो मातुः शिरोऽहरत् ॥
ततस्तस्य महाराज ! जमदग्नेर्म्महात्मनः ।
कोपोऽभ्यगच्छत् सहसा प्रसन्नश्चाब्रवीदिदम् ॥
ममेदं वचनात्तात ! कृतं ते कर्म्म दुष्करम् ।
वृणीष्व कामान् धर्म्मज्ञ ! यावतो वाञ्छसे हृदा ॥
स वव्रे मातुरुत्थानमस्मृतिञ्च वधस्य वै ।
पापेन तेन चास्पृष्टो भ्रातॄणां प्रकृतिस्तथा ॥
अप्रतिद्वन्द्वतां युद्धे दीर्घमायुश्च भारत ! ।
ददौ च सर्व्वान् कामांस्तान् जमदग्निर्म्महा-तपाः ॥"

अथ पुनर्बलदर्पितं आश्रमात् वत्सहारिणं कार्त्तवीर्य्यार्জ্জुनं हतवान् । अनेन जातामर्षा-स्तस्यार्জ্জुनस्य सुतास्तत्प्रभृति कालं प्रतीक्ष-माणाः कदाचित् रामविरहितमाश्रममागत्य तस्य पितरं जमदग्निं निजघ्नुः । रामस्तु अस्मात् पितृवधामर्षात् क्षिःसप्तकृत्वः पृथिवीं निःक्षत्रिया-मकरोत् । ततो गच्छति काले दाशरथिना रामेण हतगर्व्वो दक्षिणाशां गत्वा महेन्द्रे गिरौ उग्रेण तपसा कालं यापयति ॥)

परश्वः, [स्] अ, श्वः परदिनम् । आगामि-दिनात् परदिनम् । इत्यमरः । ३ । ४ । २२ ॥ अस्य टीका परश्वःशब्दे द्रष्टव्या । गतदिनात् पूर्व्वदिनम् । पर्सु इति भाषा ॥ यथा,—
"परश्वश्च महाभाग ! स्नातुं गङ्गाह्रदं गता ।
अवतीर्य्य विशदाम्भसि वृद्धनागेन केनचित् ॥"
इति मार्कण्डेयपुराणे अवीक्षिच्चरितम् ॥

परश्वधः, पुं, (पर + श्वि + अन्येभ्योऽपीति डः । ततः परश्वं दधातीति । "आतोनुपसर्गे" ३ । २।३, इति कः । कुठारः । इत्यमरः । २ । ८ । ६२ ॥ (यथा, रघौ । ६ । ४२ ।
धारां शितां रामपरश्वधस्य
सम्भावयद्भुत्पलपत्रसाराम् ॥")

परसंज्ञकः, पुं, (परा श्रेष्ठा संज्ञा अस्य । ततः कप् ।) आत्मा । इति शब्दरत्नावली ॥

परस्परं, त्रि, ("सर्व्वनाम्ने ङे वाच्ये समासवच्च बहुलम् ।" वार्त्ति असमासवद्भावे पूर्व्वपदस्य सुपः सुर्व्वत्वम् । कस्कादित्वात् विसर्ज्जनीयस्य सः ।) अन्योन्यम् । इतरेतरम् । यथा,—
"वनानि तोयानि च नेचकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः ।

परस्परां विलयवल्लि लक्ष्मी-
मालोकयाश्वकुरिवादरेण ॥"
इति भट्टिः । २ । ५ ॥

परस्मैपदं, क्ली, (परस्मै परार्थं परबोधकं पदम् ।) दशलकाराणां प्रत्येकं पूर्व्वनवविभक्तयः । यथा, "लड़ादिषु पूर्व्वं नव परस्मैपदं परे नव आत्मनेपदं परिभाष्यन्ते । इति संक्षिप्तसारव्याकरणम् ॥ (ताच्च पाणिनिमते । तिप् तस् झि । सिप् थस् थ । मिप् वस् मस् ॥) बोपदेवेनास्य पर्य्यायो लुप्तो । यथा । "नवयुग्मं प्रथमे त्रितोऽन्यद्विद्वयं द्वे ।" इति मुग्धबोधव्याकरणम् ॥

परस्वधः, पुं, (परस्वधा + निपातनात् सत्वम् ।) परस्वधः । कुठारः । इत्यमरटीकायां रायमुकुटः ॥

परा, व्य, विमोचः । प्राधान्यम् । प्रातिलोम्यम् । धर्षणम् । आभिमुख्यम् । श्लाघार्थम् । विक्रमः । गतिः । वधः । इति मेदिनी ॥ * ॥ उपसर्गविशेषः । अस्यार्थः । भङ्गः । अनादरः । प्रत्यावृत्तिः । न्यग्भावः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परा, स्त्री, (पृ + अच् + ततः टाप् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ (अस्याः गुणा यथा,—
"वन्ध्याकर्कोटकी लघ्वी कफगुल्मव्रणापहा ।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नाभिरूपमूलाधारात् प्रथमोदितनादस्वरूपवर्णः । यथा,—
"मूलाधारात् प्रथमसुदितो यस्तु भावः पराख्यः ॥"
इत्यलङ्कारकौस्तुभे प्रथमकिरणः ॥
(पूरयति सागरं भक्तमनोरथमिति व्युत्पत्त्या गङ्गा । यथा, काशीखण्डे । २६ । १०६ ।
"परानन्दा प्रकृष्टार्था प्रतिष्ठा पालनी परा ॥"
गायत्री । यथा, देवीभागवते । १२ । ६ । ६०।
"पार्व्वती परमोदारा परब्रह्मात्मिका परा ॥")

पराकः, पुं, (परं अत्यन्तं अर्कं दुःखं उपवासादिजन्यशरीरेन्द्रियादिक्लेशो यत्र यस्माद्वा ।) व्रतविशेषः । खड्गः । इति मेदिनी ॥ क्षुद्रः । रोगविशेषः । जन्तुविशेषः । इति विश्वः ॥ * ॥
पराकव्रतमाह मनुः । ११ । २१५ ।
"यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् ।
पराको नाम कृच्छ्रोऽयं सर्व्वपापापनोदनः ॥"
पराके पञ्च धेनवः पराकस्य प्राजापत्यपञ्चकतुल्यत्वात् । यथा अङ्गिराः ।
"षड़्भिर्व्वर्षैः कृच्छ्रचारी ब्रह्महा तु विशुध्यति ।
मासि मासि पराकेण त्रिभिर्व्वर्षैरघोहनि ॥"
अत्र षड़्भिर्व्वर्षैः साधीनिशतप्राजापत्यानि पूर्व्वसूक्तानि तथा प्रतिमास्येकैकपराकेण वर्षे द्वादश पराकाः वर्षत्रये षट्त्रिंशत् पराकाः । ततश्च षट्त्रिंशत् पराकाधीनोत्तरप्राजापत्यशतयोः प्रत्येकं ब्रह्मवधपापक्षयैककार्य्यकरत्वात् तुल्यत्वं षट्त्रिंशतश्च पञ्चगुणमधीनोत्तरशतं भवतीति । अतः प्राजापत्यपञ्चकतुल्यः पराकः । इति प्रायश्चित्ततत्त्वम् ॥ * ॥
"द्वादशाहोपवासेन पराकः सर्व्वपापहा ॥"
इति गरुड़पुराणे प्रायश्चित्तप्रकरणम् ॥

पराक्, [च्] त्रि, परा अञ्चतीति । (परा + अञ्च + क्विप् ।) प्रतिलोमगमनाश्रयः ॥

पराक्पुष्पी, स्त्री, (पराक् पुष्पं यस्याः ।) अपामार्गः । इति राजनिर्घण्टः ॥ (अपामार्गशब्देऽस्या विवृतिरुक्ता ॥)

पराक्रमः, पुं, पराक्रम्यतेऽनेन । (क्रम + "इलच्च ।" ३ । ३ । १२१ । इति घञ् । "नोदात्तोपदेशस्य ।" ७ । ३ । ३४ । इति न वृद्धिः ।) तत्पर्य्यायः । द्रविणम् २ तरः ३ सहः ४ बलम् ५ शौर्य्यम् ६ स्थाम ७ शुष्मम् ८ शक्तिः ९ प्राणः १० । इत्यमरः । २ । ८ । १०२ ॥ मन्युः ११ शुष्म १२ सामर्थ्यम् १३ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये देवीमाहात्म्ये । ६२ । १३ ।
"पराक्रमश्च युद्धेषु जायते निर्भयः पुमान् ॥")
विक्रमः ॥ (यथा, मार्कण्डेये । २० । २५ ।
"यस्य मित्रगुणान् मित्रायमित्राश्च पराक्रमम् ।
कथयन्ति सदा सत्सु पृच्छवांस्तेन वै पिता ॥")
उद्योगः । इति मेदिनी ॥ निष्क्रान्तिः । इति शब्दरत्नावली ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ४४ ।
"त्यौषधं जगतः सेतुः सत्यधर्म्मः पराक्रमः ॥")

पराग्, पुं, (परागच्छतीति । गम + अन्येभ्योपीति डः ।) पुष्पधूलिः । तत्पर्य्यायः । सुमनोरजः २ कौसुमरेणुः ३ । इत्यमरः । २ । ४ । १७॥ पुष्परेणुः ४ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशती । ५०६ ॥ [गेय ।
"लिप्तं न सुखं नाङ्गं न पक्ष्मलौ न चरणौ परागस्यृप्तेव गलिन्या विदग्धमधुपेन मधु पीतम् ॥")
धूलिः ॥ (यथा, रघुः । ४ । ३० ।
"प्रतापोपाये ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुष्कर्म्मैव सा चमूः ॥")
खानीयद्रव्यम् ॥ गिरिप्रभेदः ॥ विख्यातिः ॥ उपरागः ॥ चन्दनम् । इति मेदिनी ॥ स्वच्छन्दगमनम् । इति शब्दरत्नावली ॥

पराङ्गदः, पुं, (परं अङ्गं काङ्क्षितार्थौ श्लिष्यत्वं ददातीति । दा + कः ।) श्लिषः । इति शब्दमाला ॥

पराङ्गवः, पुं, (पराङ्गं अलभ्यलाभा प्रचुरशरीरं वाति प्राप्नोतीति । वा + कः ।) समुद्रः । इति त्रिकाण्डशेषः ॥

पराङ्मुखः, त्रि, (पराक् प्रतिलोमगामि मुखं यस्य ।) विमुखः । तत्पर्य्यायः । पराचीनः २ । इत्यमरः । ३ । १ । ३३ ॥ (यथा, मनुः । १० । ११८ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ॥")
तन्त्रोक्तमन्त्रविशेषे, पुं । यथा, तन्त्रसारे ।
"कामबीजं सुखे माया श्रीरस्यकुशमेव च ।
अयौ पराङ्मुखः प्रोक्तो मध्ये तु बिन्दुलाञ्छितः ॥"

पराचितः, त्रि, (परेण आचितः पालितः ।) परपुष्टः । परद्वारा प्रतिपालितः । तत्पर्य्यायः । परिस्कन्दः २ परजातः ३ परेधितः ४ । इत्यमरः । २ । १० । १८॥ परिस्कन्दः ५ । इति भरतः ॥

पराचीनः, त्रि, (पराञ्चति अनभिमुखीभवतीति । अञ्चु + "ऋत्विग्दधृक् ।" ३ । २ । ५९ । इति क्विन् ततः स्वार्थे "विभाषाञ्चेरदिक् स्त्रियाम् ।" ५ । ४ । ८ । इति ख ।) पराङ्मुखः । इत्यमरः । ३ । १ । ३३ ॥ (यथा, भागवते । ३ । ६ । २८ ।
"ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्म्मिणा ॥")

पराजयः, पुं, (परा + जि + अप् ।) रणे भङ्गः । इत्यमरः । २ । ८ । १११ ॥ (अत्र रण इत्युपलक्षणं वस्तुतस्तु विद्यावादादावपीतिबोद्धव्यम् ।) तत्पर्य्यायः । भङ्गः २ हारी ३ हारिः ४ पराभवः ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ७ । १९९ ।
"अनिलो विजयो यस्माद्दृश्यते युध्यमानयोः ।
पराजयस्तु संग्रामे तस्माद्युद्धं विवर्ज्जयेत् ॥")

पराजितः, त्रि, (परा + जि + कर्म्मणि क्तः ।) क्षतपराजयः । हारितः । तत्पर्य्यायः । पराभूतः २ विजितः ३ निर्जितः ४ जितः ५ । इति शब्दरत्नावली ॥ "इदं वाद्यमिदमवाद्यमेवं सति पराजितो भवतीति इमानि खलु प्रहाणि भिन्नगवादमार्गज्ञानार्थमधिगन्तव्यानि भवन्ति ।" इति चरके विमानस्थाने ८ अध्याये ॥)

पराञ्जः, पुं, (पराक् अनक्तीति । अञ्जु व्यक्तौ + अच् ।) तैलयन्त्रः । घानः । क्षुरिकादण्डम् । इति शब्दरत्नावली ॥

परात्परः, पुं, परात् श्रेष्ठादपि परः श्रेष्ठः । स च श्रीकृष्णः । यथा,—
"देवाः कालस्य कालोऽहं विधातुर्विधिरेव च ।
संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६ अध्यायः ॥

परात्प्रियः, पुं, (परादपि प्रियः ।) कलविशेषः । इति शब्दचन्द्रिका । उलु इति भाषा ॥

परादनः, पुं, (परस्तृतत्वात् अदनं अस्य यद्वा परान् शत्रून् अत्ति भक्षयति नाशयतीत्यर्थः आदयति विनाशयति स्वारोहिणं संग्रामे इति वा अद लुटः णिच् ल्युर्वा ।) पारसीयोटकः । इति त्रिकाण्डशेषः ॥

पराधीनः, त्रि, (परस्य परेषां वा अधीनः ।) परवशः । तत्पर्य्यायः । परतन्त्रः २ परवान् ३ नाथवान् । इत्यमरः । ३ । १ । १६ ॥ तस्य जीवन्मृतत्वं यथा,—
"स्वाधीनवृत्तेः साफल्यं न पराधीनवृत्तिना ।
ये पराधीनकर्म्माणो जीवन्तोऽपि च ते मृताः ॥"
इति गरुड़पुराणे ११३ अध्यायः ॥

परानसा, स्त्री, चिकित्सा । इति शब्दचन्द्रिका ॥

परान्नं, क्ली, (परस्य अन्नम् ।) अन्यस्वामिकभक्तादिकादि ॥ परकर्त्तृकान्नस्यापाकजद्रव्यमात्रम् । परस्यान्नम् । यस्य यस्यान्नं भुक्त्वा —

परान्न

"परान्नं परवासश्च नित्यं धर्म्मरतस्त्यजेत् ।"

इति स्मृतिः ॥

संयमादिने तस्य त्याज्यत्वं यथा.—

"कांस्यं मांसं मसूरश्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् द्विजः ॥"*॥

पारस्करादिने तस्य त्याज्यत्वं यथा,—

"अभ्यङ्गश्च परान्नञ्च तैलं निर्म्माल्यलङ्घनम् ।
तुलसीचयनं क्षौरं पूतभोजनमेव वा ॥
वस्त्रपीड़ां तथा क्षारं द्वादशाऽवर्ज्ययेद्बुधः ॥"*॥

तद्भोक्तुर्यागादेर्विफलत्वं यथा,—

"परपाकेन जुष्टस्य द्विजस्य गृहमेधिनः ।
हुतं दत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत् ॥"*॥

तदुद्भवा पुत्रोत्पादने दोषो यथा,—

"यस्यान्नेन तु सुक्लेन भार्य्यां समधिगच्छति ।
यस्यान्नं तस्य ते पुत्रा अन्नादेसः प्रवर्त्तते ॥"*॥

ब्राह्मणादिस्वामिकान्नभोजने दोषो यथा,—

"ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रेष्यताम् ।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेनैरवं व्रजेत् ॥"

इत्येकादशीतत्त्वम् ॥*॥

परान्नभोजनेन तीर्थगमने फलस्याल्पत्वं यथा,—

"घोड़शांशं न लभते यः परान्नेन गच्छति ।
अन्नं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ॥"

इति प्रायश्चित्ततत्त्वम् ॥*॥

महागुरुनिपाते तस्य त्याज्यत्वं यथा,—

"अन्यश्राद्धं परान्नञ्च गत्वा मासञ्च मैथुनम् ।
वर्ज्ययेद्गुरुपाते तु यावत् पूर्णो न वत्सरः ॥"

इति सुद्धितत्त्वम् ॥*॥

तद्भोजने प्रतिप्रसवो यथा,—

"गर्भान्नं मातुलान्नं वा श्वशुरान्नं तथैव च ।
पितुः पुत्रस्य चैवान्नं न परान्नमिति स्मृतिः ॥"

इत्येकादशीतत्त्वम् ॥

परान्नः, त्रि, (परान्नं नित्यमस्त्यस्य । "अर्शआदिभ्योऽच ।" ५ । २ । १२७ । इति अच् ।) परान्नोपजीवी । तत्पर्य्यायः । परपिण्डादः २ । इत्यमरः । ३ । १ । २० ॥

परापरं, त्रि. (परागता आपो यस्मात् । "अवर्णा त्रादृवा ।" ६ । ३ । ८७ । इत्यस्य वार्त्तिं इत्यनेन पत्वे अप इदभावः ।) पत्वे ईत्वे परेपम् । इति सिद्धान्तकौमुदी ॥

परापरं, क्ली. (परमापिपर्त्ति । आ + पृ + अच् ।) परुषकम् । इति भावप्रकाशः ॥ (अस्य विवरणं परुष शब्दे द्रष्टव्यम् ॥ परश्चापरश्च द्वयोः समाहारः ।) परमपरश्च ॥ (यथा, विष्णुपुराणे । १ । ६ । ८७ ।

"ततश्च सहयज्ञेन प्रजानां कारणं परम् ।
परापरविदः प्राज्ञास्तत्तो यज्ञान् वितन्वते ॥")

परापरगुरुः, पुं, (परमादपि परः श्रेष्ठः परापरः । पृषोदरादित्वात् साधुः ततः कर्म्मधारयः ।) गुरुविशेषः । स तु भगवती । (यथा,—

"आद्यौ सर्व्वस्य देवेशि ! मन्त्रदः परमो गुरुः ।
परापरगुरुश्चं हि परमेष्ठी त्वहं गुरुः ॥"

इति हरहृदयोल्लासे २ पटलः ॥

(तन्त्रान्तरे च यथा,—

"मन्त्रदाता गुरुः प्रोक्तो मन्त्रस्तु परमो गुरुः ।
परापरगुरुश्चं हि परमेष्ठिगुरुश्चहम् ॥")

पराभवः, पुं, (पराभूयते इति पराभवनमित्यर्थः । परा + भू + भावे अप् ।) तिरस्कारः । (यथा, मार्कण्डेये । १८ । २८ ।

"मत्तासक्तोऽहमुच्छिष्टो नचैवाहं जितेन्द्रियः ।
कथमिच्छथ मत्तोऽपि देवाः शुभ्रपराभवम् ॥")

अस्य पर्य्यायः । अक्षारः २ तिरस्क्रिया ३ परिभावः ४ विप्रकारः ५ परिभवः ६ अभिभवः ७ अवाकारः ८ निकारः ९ । इति हेमचन्द्रः ॥ विनाशः । इति मेदिनी ॥

पराभूतः, त्रि, (पराभूयते स्म । परा + भू + क्तः ।) पराजितः । इत्यमरः । २ । ८ । ११२ ॥

परामर्शः, पुं (परामृश्यते इति । परामर्शनमित्यर्थः । परा + मृश् + भावे घञ् ।) युक्तिः । विवेचनम् । तत्पर्य्यायः । वितर्कः २ उन्नयनम् ३ विमर्शनम् ४ अध्याहारः ५ तर्कः ६ ऊहः ७ । इति हेमचन्द्रः ॥ तर्कशास्त्रे तु व्याप्तिविशिष्टपक्षधर्म्मताज्ञानम् । यथा,—

"व्याप्यस्य पक्षधर्म्मत्वधीः परामर्श उच्यते ॥"

इति भाषापरिच्छेदः ॥

अस्यार्थः "वह्निविशिष्टस्य पर्व्वतस्य सम्बन्धविशिष्टा वह्निज्ञानमनुमितिजनकम् । तच्च व्याप्यपक्षे इति ज्ञानं पक्षो व्याप्यवान् इति ज्ञानं वा ।" इति सिद्धान्तमुक्तावली ॥ स चानुमितिव्यापारः । यथा,—

"व्यापारस्तु परामर्शः करणं वह्निधीर्भवेत् ॥"

इति भाषापरिच्छेदः ॥

अस्यार्थः । "अनुमायामनुमितौ व्याप्तिज्ञानं करणं परामर्शो व्यापारः । तथा हि । येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चाच्च स एव पुरुषः क्वचित् पर्व्वतादौ अविच्छिन्नमूलां धूमरेखां पश्यति तदनन्तरं धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य पुरुषस्य भवति पश्चाच्च वह्निव्याप्यधूमवान् पर्व्वत इति ज्ञानं भवति स एव परामर्श इत्युच्यते ।" इति सिद्धान्तमुक्तावली ॥

परामृष्टं, क्ली (परमृष्टं वारि यस्मात् ।) वर्षाजलम् । इति त्रिकाण्डशेषः ॥ (परमृष्टं अमरणधर्म्मैकं ब्रह्मात्मभूतं यस्य । इति विग्रहे वाक्यलिङ्गः । यथा, सुबालोपनिषदि । ३ । ७ । ६ ।

"वेदान्तविज्ञानसुनिश्चितार्थाः
सन्न्यासयोगात् यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्व्वे ॥")

परामृष्टः, त्रि, (परामृश्यते स्म । परा + मृश् + कर्म्मणि क्तः ।) सम्बद्धः । सम्बन्धयुक्तः । यथा,—

"क्रियाकर्म्मविपाकाग्नेरपरामृष्टः । इति कुल्लूकभट्टः ॥

माङ्गलिकारिकाख्याने रामभद्रः ॥ क्षतपरामर्शः । विवेचितः ॥

परायणं, त्रि, आसङ्गवचनम् । इत्यमरः । ३ । २ । २ ॥ परं केवलमयनमासक्तिस्थानमिति परायणम् । यथा धर्म्मपरायणो धर्म्मासक्तः । इति भरतः ॥ आश्रयः । (यथा, मनुः । ४ । १० ।

"वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ॥"

तत्परम् । अभीष्टम् । इति मेदिनी ॥ (नित्यप्रतिष्ठा । यथा, रामायणे । २ । ४८ । १७ ।

"पादच्छायासुखं भर्त्तुस्त्यक्त्वाहमस्य महात्मनः ।
स हि नाथोऽनुनस्यास्य स गतिः स परायणम् ॥"

"परायणं शाश्वतप्रतिष्ठा ।" इति रामानुजः ॥)

परायत्तं, त्रि. (परस्य परेषां वा आयत्तम् ।) पराधीनम् । यथा,—

"तत्रायत्तवशाधीनच्छन्दवन्तः परात्परे ॥"

इति हेमचन्द्रः ॥

परारि, त्र (पूर्व्वतरे वत्सरे इत्यर्थे "सद्यः परुत्परारीति ।" ५ । ३ । २२ । इति पूर्व्वतरस्य परभावः आरि च संवत्सरे ।) पूर्व्वतरवत्सरे । गतत्रयोदशवर्षे । इत्यमरभरतौ ॥ (परस्य अरिः ।) परशत्रौ त्रि ॥

परारिजः, त्रि, (परारि भवः । "त्रिपरुत्परारिभ्यस्त्रो वक्तव्यः ।" ४ । ३ । २३ । इत्यस्य वार्त्तिं इत्यनेन त्रः ।) पूर्व्वतरवत्सरसम्बन्धी । इति व्याकरणम् ॥

परारुः, पुं, (पराञ्चतीति । परा + ञ्च + उन् ।) कारवेल्लः । इति त्रिकाण्डशेषः ॥ (कारवेल्लशब्दे अस्य गुणादयो ज्ञातव्याः ॥)

परारुकः, पुं, (परारुञ्चतीति । परा + ञ्च + उकः ।) प्रस्तरः । इति त्रिकाण्डशेषः ॥

परार्द्ध क्ली, (परार्द्धमिति सर्व्वोत्कृष्टतया वर्त्तते इति । ऋध्यदृ वृद्धौ + अच् ।) दशमध्वसंख्या । लक्षलक्षकोटिः । १००,०००,०००,०००,०००,००० इदं परमसंख्या अष्टादशाङ्कपर्य्यन्तम् । इति हेमचन्द्रः ज्योतिषञ्च ॥ (यथा, नैषधे । ३ । ९० ।

"यदि त्रिलोकीगणनापरा स्यात्
तन्याः समाप्तिर्यदि नायुषः स्यात् ।
पारे परार्द्धं गणितं यदि स्यात्
गणेयनिःशेषगुणोऽपि स स्यात् ॥")

ब्रह्मण आयुषोऽर्द्धम् । यथा,—

"निजेन तस्य मानेन चायुर्व्वर्षशतं स्मृतम् ।
तत् परार्द्धं तदर्द्धञ्च परार्द्धमभिधीयते ॥"

इति कौर्म्मे ५ अध्यायः ॥

(तथा, मार्कण्डेये । ४६ । ४८—५३ ।

"शतं हि तस्य (ब्रह्मणः) वर्षाणां परमित्यभिधीयते ।
पञ्चाशद्विगुणैर्वर्षैः परार्द्धमिति कीर्त्यते ॥
एवमस्य परार्द्धन्तु गतमेतं द्विजसत्तम ! ।
वर्षस्याद्योऽभूत्कल्पाख्यः पाद्म इत्यभिविश्रुतः ॥")

परार्द्धजः, त्रि, (परार्द्धं परार्द्धसंख्यावत् प्रधानत्वमर्हतीति । परार्द्ध + यत् यद्वा परस्मिन्नर्द्धे भवः । "परावराधमोत्तमपर्व्वाच्च ।" ४ । ३ । ५ । इति

यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः । ३ । १ । ५८ । (यथा, रघुः । १० । ६४ ।

"ताभ्यस्तथाविधान् स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः ।
मेने परार्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावर्तः, क्ली, (परावर्ततेऽति । परा + अव + वृत् + घञ् ।) परिवर्तकम् । इति राजनिर्घण्टः ॥

परावर्णः, पुं, (परा वर्ण्यते इति । परा + वृत् + अप् ।) परिवर्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पुं, (परा वहतीति । वह् + अच् ।) सप्तवायुस्कन्धगतसप्तमवायुः । स तु परिवहवायोरूर्द्धस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।

"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

पराविद्धः, पुं, (परा + अध + क्तः ।) कुबेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परमुत्कर्षमाविन्दतीति । विद् + अण् । स्त्रियां ङीप् ।) दहनी । इति कश्चित् ॥

पराशरः, पुं, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७६ । ३ ।

"पराशुः स यतस्तेन वह्निष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"
"पराशोराशयासनमवस्थानं येन स पराशरः ।
आदृपूर्व्वाच्छासतेर्ड्डरन् ।" इति नीलकण्ठः ॥)
व्यासपिता । शक्तिसुनिपुत्रः । यथा,—

"सुतं जनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् साक्षे कृष्णद्वैपायनं मुनिम् ॥"
इत्यग्निपुराणम् ॥

(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां श्रुतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।

"श्रुते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
तत्र संहितायां १मे अध्याये युगभेदे धर्म्मभेदादिकथनम् । २अः आचारधर्म्मश्राद्धधर्म्मादिकथनम् । ३अः अशौचव्यवस्था आत्महरणादिदोषाः । ४अः प्रायश्चित्तमनान्यैहिकियाकृच्छ्रपुत्तलिकादिकथनम् । ५अः प्राणिदग्धप्रायश्चित्तव्यवस्था । ६ अः प्राणिवधप्रायश्चित्तकथनम् । ७अः द्रव्यशुद्ध्यादि । ८अः गोवधादिप्रायश्चित्तम् । ९अः गोवधापवादादि । १०अः अगम्यागमनादिप्रायश्चित्तम् । ११अः अमेध्यभक्षणादि प्रायश्चित्तम् । १२अः प्रायश्चित्ताङ्गस्नानभेदादि ॥ * ॥

अयं खलु मत्स्यगन्धायां सत्यवत्यां वेदव्यासमुत्पादितवान् । एतद्विवरणसूत्रं यथा देवीभागवते । २ स्कन्धे । २ अध्याये द्रष्टव्यम् ॥

पराश् आक्षणाति हिनस्तीति । अश भि हिंसे + क्विप् ।" नागभेदः । यथा, महाभारते ।

१ । ५७ । १८ । "पराशुको वीरणकः सुचित्रश्चित्रवेगिकः । पराशुरक्षरक्षाको मणिस्कन्धस्तथारुणिः ॥")

पराशुरी, [न्] पुं, पराशुरेण प्रोक्तं भिक्षुसूत्रं पाराशुरं तद्धित्तेऽस्याध्ययनायेति वा । इञ् च । पराशुरीति ह्रस्वादिश्च । इत्यमरटीकायां भरतः ॥ पाराशुरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (पर आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परमाड़ा इति भाषा । तत्पर्य्यायः । वन्ध्या २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ वह्निनी ६ पुत्रिणी ७ वन्ध्या ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा + अस् + भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥ (यथा, रघौ । ६ । ७८ ।

"नौ दम्पती वह्नि विलप्य शिष्टौ प्रहर्त्तुं प्रभुरन्यं निखातमुद्धारयतासुरस्त्रः ।
सोऽभूत् परासुश्च भूमिपतिं शुशोच हस्तार्पितैर्नयनवारिभिरेव दृष्टः ॥"

परासुपरीक्षा वैद्यके यथा,—

"तस्य चेत् परिदृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठांसिका-ग्रीवा-तालुओष्ठललाटं स्निग्धं शीतं प्रसन्नं दारुणं वीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिदृश्यमानानि पृथक्त्वेन मुखफलानुवृत्त-गुदवृषण-मेढ्रनाभ्यश्रुस्तनमणिकहनुपर्व्वनासिका कर्णाक्षिभ्रूललाटादीनि श्लक्ष्णानि श्लक्ष्णानि श्लथानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"

"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेन्मन्ये परिदृश्यमानेन न सन्देयात् परासुरिति विद्यात् । तस्य चेन्नखाः प्रतिकीर्णाः श्वेता आताम्रकोराः स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटावद्धानि स्युः परासुरिति विद्यात् । तस्य चेच्चक्षुषी प्रकृतिस्थेने विकृतियुक्ते अत्युत्पिच्छिले अतिप्रविष्टे अतिनिम्ने अतिविषमे अतिप्रसृते अतिविसृतबन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषानिष्प्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके द्वौनदृष्टिके अस्तदृष्टिके नकुलार्त्ते कपोतार्त्ते अङ्गारवर्णे क्षणानीलपीतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंप्लुते वा स्यातां परासुरिति विद्यात् । तथास्य केशलोमाभ्यायच्छेत् । तस्य चेत् केशलोमाभ्यायच्छमानानि प्रसुप्यरन् नचेत् वेदयन् परासुरिति विद्यात् ।
तस्य चेदुदरे शिरा: प्रदृश्येरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् ।

तस्य चेन्नखा नीलमांसशोणिताः पञ्चजाम्बरवर्णाः स्युः परासुरिति विद्यात् ।
अथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुल्य आयम्यमाना नचेत् स्फुटेयुः परासुरिति विद्यात् ॥"
इति चरकेणेन्द्रियस्थाने चतुर्थोऽध्याय उक्तम् ॥
"वातालीला तु हृदये यस्योर्द्ध्वमनुयायिनी ।
तज्ज्ञानविनाशकरी स परासुरसंशयम् ॥"
इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्भृतस्य भावः । परासु + तल् स्त्रियां टाप् ।) मृतत्वम् । निद्रापरवशता । इति पुराणम् ॥

परास्कन्दी, [न्] पुं (परान् आस्कन्दितुं शीलमस्य । आ + स्कन्द् + णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

परास्तं, त्रि (परास्यते स्म । परा + अस् + क्तः ।) निरस्तम् । पराजितम् । यथा,—

"क्षीणिरासु वरमस्तु पुनर्भो-
स्त्रीकृतैव परवागपराक्ता ॥"
इति नैषधे ५ सर्गः ॥

पराह्णः, पुं, (परमुत्तरकालं अह्नः । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्णे तद्विधत्तेऽपि पराह्णे चिरसन्ध्यायामिति पराह्ण एव । इति सावित्रीव्रते तिथितत्त्वम् ॥

पराह्णः, पुं, (परश्च तदह्नश्चेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः तस्य णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्णोऽपि ॥)

परि, अ, सर्व्वतोभावः । वर्ज्जनम् । व्याप्तिः । शैवः । इत्यमरभरतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दोषाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी ॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ सम्भोगभावणम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्यभावः । चिह्नम् । भागः । व्यागः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,

"अथ वाङ्मयभेदाः सुरज्येष्ठः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥"
इति चिकाण्डशेषः ॥

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिक्रीर्य्यते इति । कृ विक्षेपे + "अकर्त्तरि ।" ३ । ३ । १९ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंस्त्वेऽपि घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६५ ॥ समारम्भः । हर्षः । इति शब्दरत्नावली ॥ प्रगाढ़ालिङ्गनम् । (यथा, मार्कण्डेये । १६ । २५ ।

"गाढ़ं परिकरं बद्ध्वा मुञ्चमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम चण्डिकाम्बिका ॥")
विवेकः । इति विश्वः । सहकारी । यथा,—

परिक्र

"परिकरः सहकारी स च आप्तिप्रसवधर्म्मत्वादिः।"
इति सामान्यनिरुक्तौ जगदीशः॥
(अलङ्कारविशेषः। यथा, साहित्यदर्पणे।१०।७५।
"उक्तिर्विशेषसिद्धेः साभिप्रायैः परिकरो मतः॥"
उदाहरणं यथा तत्रैव। "अङ्गराज! सेनापते! दोर्गोपच्छाखिन्! कर्ण! रक्षैनं भीमाद्दुःशासनम्॥")

परिकर्म्मा, [न्] पुं, (परिकरोतीति। परि+कृ+ल्युट्।) अनूढ्यज्येष्ठे कनिष्ठविवाहस्य याजकः। इत्युद्वाहतत्त्वम्॥

परिकर्म्म, [न्] क्ली, (परिक्रियते इति। परि+कृ+मनिन्।) कुङ्कुमादिना शरीरशोभाधानरूपसंस्कारः। इति भरतः॥ स्नानोद्वर्त्तनादि। इति स्वामी॥ शरीरसंस्कारमात्रम्। इत्यन्ये॥ तत्पर्य्यायः। अङ्गसंस्कारः २। इत्यमरः। २। ६। १०१॥ प्रतिकर्म्म ३। इति शब्दरत्नावली॥ (यथा कुमारे। ४। १६।
"विबुधैरसि यस्य दारणे;
असमाप्ते परिकर्म्मणीव स्तनः।
तमिमं कुरु दक्षिणोत्तरं
चरणं निर्म्मितरागमेहि मे॥")

परिकर्म्मा, [न्] पुं, (परितः कर्म्म यस्य।) परिचारकः। सेवकः। इति रत्नमाला॥

परिकर्म्मी, [न्] त्रि, (परिकर्म्म विद्यतेऽस्य। परिकर्म्म+इनिः।) परिकर्म्मा। इति हेमचन्द्रः॥

परिकाङ्क्षितः, त्रि, (परित्यक्तं काङ्क्षितं अभिलाषो येन।) तपस्वी। इति शब्दरत्नावली॥

परिकूटं, क्ली, (परि सर्व्वतो भूषितं कूटम्।) पुरद्वारकूटकम्। तत्पर्य्यायः। कल्पितगवः २ नगरद्वारकूटकम् ३। इति हेमचन्द्रः॥

परिक्रमः, पुं, (परिक्रमणम्। क्रमु पादविक्षेपे+भावे घञ्। "नोदात्तोपदेशस्येति।" ७।३।३४। इति उपधाया न वृद्धिः।) क्रीड़ार्थं पद्भ्यां गमनम्। तत्पर्य्यायः। विहारः २। इत्यमरः। ३। २। १६॥ प्रदक्षिणम्। यथा,—
वराह उवाच।
"इत्या भद्रे! महापुण्यं पृथिव्यां सर्व्वतो दिशम्।
परिक्रम्य यथान्यायं प्रमाणगणितं शुभम्॥
भूम्याः परिक्रमे सम्यक् प्रमाणं योजनानि च।
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च॥
तीर्थान्येतानि देवाश्च तारकाश्च नभस्तले।
गणितानि समस्तानि वायुना जगदायुषा॥
ब्रह्मणा सोमपुत्रेण नारदेन ध्रुवेण च।
जाम्बवता सपुत्रेण रावणेन हनूमता॥
एतैरन्यैश्च देवैः ससागरवना मही।
क्रमिता वालिना चैव वाह्यमक्षलरूपया॥
अन्तरा भ्रमणेनैव सुग्रीवेण महात्मना।
तथा च पूर्व्वदेवेन्द्रैः पञ्चभिः पाण्डवोत्तमैः॥
योगविद्भिस्तथा कैश्चिन्मार्कण्डेयसुरैरपि।
क्रमिता न क्रमिष्यन्ति न पूर्व्वे नापरे जनाः॥
अल्पसत्त्वबलोपेतैः प्राणिभिश्चाल्पबुद्धिभिः।
मनसापि न शक्यन्ते गमनस्य च का कथा॥
सप्तद्वीपे तु तीर्थानि भ्रमणाद् यत् फलं भवेत्।
प्राप्यते चाधिकं तस्मान्मथुरायाः परिक्रमे॥
मथुरां समनुप्राप्य यस्तु कुर्य्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामानभीप्सुभिः।
कर्त्तव्या मथुरां प्राप्य नरैः सम्यक् प्रदक्षिणा॥"
इति वराहपुराणम्॥

परिक्रमसहः, पुं, (परिक्रमं विहारं सहते इति। सह+पचाद्यच्।) छागलः। इति त्रिकाण्डशेषः॥

परिक्रिया, स्त्री, (परिकरणम्। परि+कृ+भावे क्यप्। "रिङ् शयग्लिङ्क्षु।" ७।४।२८। इति रिङ्।) परिखाजलादिना वेष्टनम्। तत्पर्य्यायः। परिसर्पः २। इत्यमरः। ३। २। २०॥ (यज्ञाङ्गयागविशेषः। यदुक्तं आश्वलायनश्रौते।८।५।१२।
"सत्रस्थिया अनुक्रिया परिक्रिया वा स्वर्गकामः॥" "परिक्रियाप्येकाहा भवति यद्यामन्यतमेन स्वर्गकामो यजेत॥" इति नारायणी॥)

परिक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते क्षण्यते दुरितं येन। परि+क्षि+क्विप्। कलिप्रागभावकर्त्तृत्वादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। तथा चोक्तं मह्राभारते। १०। १६। २—३॥
"विराटस्य सुतां पूर्व्वं स्नुषां गाण्डीवधन्वनः।
उपयम्य गतां दृष्ट्वा ब्रुवन् ब्राह्मणोऽब्रवीत्॥
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति॥")
अभिमन्युपुत्रः। तत्पर्य्यायः। पर्य्यवित् २ पारिक्षीतः ३ परिक्षित्तः ४। इति शब्दरत्नावली॥
(अयं पुनर्युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। कुरुक्षेत्रयुद्धे परिक्षीणे कुरुकुले अभिमन्युपत्न्या उत्तरायां गर्भाज्जातः। अयमेव गर्भस्थः कृष्णास्त्रेणाश्वत्थाम्नाप्रयुक्तेन ब्रह्मास्त्रेण निहतोऽपि पुनर्भगवतः कृष्णस्य प्रभावात् जीवितं लब्धवान्। अयमेव दुष्टरूपिणं धर्म्मं निगृह्णन्तं कलिं प्रशशास। ततो गच्छति काले एकदाऽसौ मृगयां विहरन् क्षुधाक्रष्टपौड़िनः मौनव्रतावलम्बिनः शमीकस्य मुनेराश्रमं गत्वा प्रत्युत्तरदानपराङ्मुखस्य तस्य स्कन्धे धनुष्कोट्या मृतं सर्पमासज्जयामास। अनेनापराधेनेमं राजन् शमीकस्य पुत्रः शृङ्गी नामा तपस्वी इतः सप्तमेऽहनि तक्षकदष्टोयं मृतो भविष्यतीत्यभिशप्तवान्। एतदाकर्ण्यायं गङ्गातीरे सुनिप्रभृतिभिरीश्वरनामकीर्त्तनादिकमालोच्यन् प्रायोपवेशने स्थितस्तक्षकदष्टो मृतश्च। इत्येतत्कथा महाभारते विस्तरतो द्रष्टव्या॥)
(कुरुपुत्रविशेषः। यथा, हरिवंशे। ३२। ६०।
"कुरोस्तु पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा।
परिक्षित्तु महाबाहुः प्रवरश्चारिमेजयः॥"
अविक्षित-पुत्रः। यथा, महाभारते। १।६४।५०।
"अविक्षितः परिक्षिच्च बलाश्वश्च बीर्य्यवान्॥")

परिक्षि

परिग्र

परिक्षिप्तं, त्रि, (परितः क्षिप्यते स्म इति। क्षिप्+क्त।) परिखादिना वेष्टितम्। तत्पर्य्यायः। निवृतम् २। इत्यमरः। ३। १। ८८॥ सर्व्वतोभावेन क्षेपयुक्तञ्च॥

परिखा, स्त्री, (परितः खन्यते इति। खन्+"अन्येभ्योऽपीति।" ३। २। १०१। डः।) राजधान्यादिवेष्टनखातम्। इति भरतः॥ गड्खाइ इति खाना इति च यस्याः प्रसिद्धिः। तत्पर्य्यायः॥ खेयम्। इत्यमरः। २। १०। २६॥ (यथा, मनुः। ७। १६६।
"भिन्द्याच्चैव तडागानि प्राकारपरिखास्तथा।
समवस्कन्दयेच्चैनं रात्रौ वित्रासयेत्तथा॥")
तस्या मानं यथा,—
"प्रस्थे च परिखामानं ज्ञातव्यं प्रग्रहक्रमम्।
परितः शिविराणाञ्च गम्भीरं दण्डहस्तकम्॥"
सङ्केतपूर्व्वकञ्चैव परिखाद्वारमीप्सितम्।
शत्रोरगम्यं मित्रस्य गम्यमेव सुखेन च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २०० अध्यायः॥

परिख्यातः, त्रि, परिसर्व्वतोभावेन ख्यातः प्रथितः। इति परिपूर्ब्वख्याधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नः॥ विख्यातः॥

परिगणितः, त्रि, (परिसर्व्वतोभावेन गण्यते स्म। परि+गण+क्त।) सर्व्वतोभावेन गणनायुक्तः। यथा। "परिगणितसमनिरिक्तेषु संसर्गलक्षणविशेषो नादरणीयः परिगणनानर्थक्यात्।" इति जीमूतवाहनः॥

परिगतः, त्रि, (परि+गम्+क्त।) प्राप्तः। विस्तृतः। ज्ञातः। वेष्टितः। इति मेदिनी॥ गतः। इति हेमचन्द्रः॥ वेष्टितः। यथा,—
"अथ सवल्कदुकूलकुथादिभिः
परिगतोज्ज्वलदङ्गनवालधिः।"
इति भट्टिकाव्ये। १०। १॥

परिग्रहा, स्त्री, (परि सर्व्वतोभावेन गृह्यते या परि+ग्रह+कर्म्मणि क्यप्।) नारी। इति शब्दचन्द्रिका॥

परिग्रहः, पुं, (परिग्रहणमिति। परि+ग्रह+"ग्रह वृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) प्रतिग्रहः। (यथा, पञ्चतन्त्रे। ४। ७।
"कण्ठाश्लेषपरिग्रहे शिथिलता यन्नादराच्चुम्बने
तत्तत् धूर्त्त! तवास्ति सा किमपरा कान्तेऽधुना मय्यपि॥")
सैन्यपश्चाद्भागः। पत्नी। भार्य्या। (यथा, रघुः। ६। १४।
"समनुकन्या सपत्नपरिग्रहा-
ज्वलनकानलकामवमां पुरीम्॥")
परिजनः। परिवारः। आदानम्। (यथा, रघुः। ६। ४६।
"अनुभवन्नवदोलदृतूत्सवं
पटुरपि प्रियकर्त्तृजिघृक्षया।
अनयदासनरज्जुपरिग्रहं
भुजलताजलतामवलाजनः॥")
स्वीकारः। (यथा, रघुः। १८। ३८।

परिघः

"लोकेन भावी पितुरेव तुल्यः
सम्भाविनो मौलिपरिग्रहात् सः ॥")
मूलम् । कन्दः । शापः । शपथः । इत्यमरभरतौ ॥ राहुवक्त्रस्थभास्करः । इत्यजयः ॥ (पुत्रदारादि-भर्त्तव्यपरिमाणम् । यथा, मनुः । १० । १०४ ।
"प्रकल्पया तस्य तैर्वृत्तिं स्वकुटुम्बाद् यथार्हतः ।
अक्लिष्टांश्चैव दाक्ष्यञ्च भूतानाञ्च परिग्रहम् ॥"
परिगृह्यतेऽनेनेति विग्रहे हस्तः ॥ विष्णुः । यथा, महाभारते । १३ । १४६ । ५८ ।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ॥"
"शरणार्थिभिः परितो गृह्यते सर्व्वगतत्वात् परितो ज्ञायत इति वा । पुण्यादिभिर्भक्तैरर्चितं परिगृह्णाति इति वा परिग्रहः ॥" इति शाङ्कर-भाष्यम् ॥ साधनम् । यथा, रघुः । ६ । २१ ।
"अजिनदण्डभृतं कुशमेखलां
यतगिरं मृगशृङ्गपरिग्रहाम् ॥"
"मृगशृङ्गं परिग्रहः कमण्डलुसाधनं यस्यास्ताम् ॥"
इति तट्टीकायां मल्लिनाथः ॥)

परिग्राहः, पुं, (परि + ग्रह् + "परौ यज्ञे ।" ३ । ३ । ४७ । इति घञ् ।) यज्ञवेदिविशेषः । इति केचित् ॥

परिघः, पुं, (परि हन्यतेऽनेनेति । परि + हन् + "परौ घः ।" ३ । ३ । ८४ । इति अप् घादेशश्च ।) लोहबद्धलगुडः । लोहमय-लगुडः लोहसुखलगुडः । तत्पर्य्यायः । परि-घातनः २ । इत्यमरः । २ । ८ । ६१ ॥ परि-घातकः ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ६ । ६७ । २४ ।
"बाहूनामुत्तमाङ्गानां कार्ष्मुकाणाञ्च भारत ! ।
गदानां परिघाणाञ्च हस्तानाञ्चोरुभिः सह ॥")
परिघातः । परितो हननम् । इत्यमरभरतौ ॥ विष्कम्भादिसप्तविंशतियोगान्तर्गत ऊनविंशति-योगः । (यथा, ज्योतिषे ।
"वज्रोऽष्टक् च व्यतीपातो वरीयान् परिघस्तथा ॥"
अस्य अर्द्धाह्नं परित्यज्य शुभं कर्म्म कुर्य्यात् । यदुक्तं तत्रैव ।
"परिघस्य त्यजेदर्द्धं शुभकर्म्म ततः परम् ॥")

अथ परिघयोगजातफलम् ।
"उत्पत्तिकाले परिघो यदि स्या-
त्तदा नरस्तीक्ष्णकुठारकल्पः ।
असत्यसाक्षी क्षमया विहीनः
स्वस्यानुभोक्ता विजितारिपक्षः ॥"
इति कोष्ठीप्रदीपः ॥

अर्गलः । इति मेदिनी ॥ सुभटः । शूलः । इत्य-जयः ॥ कलसः । काचघटः । गोपुरम् । सद्म । इति शब्दरत्नावली ॥ ॥ * ॥ (कार्त्तिकानुचर-विशेषः । यथा, महाभारते । ९ । ४५ । ३३ ।
"परिघञ्च वटञ्चैव भीमञ्च सुमहाबलम् ।
दहतिं दहनञ्चैव प्रघसं भीमसम्मतौ ॥
अंशोऽप्यनुचरान् पञ्च ददौ स्कन्दाय धीमते ॥"
चक्षालविशेषः । यथा, महाभारते । १२ । ११८ । ११४ ।

परिघ

"लम्बकर्णो महावक्त्रो मलिनो घोरदर्शनः ।
परिघो नाम चक्षालः शुक्लपाण्डिरदच्छदः ॥")
परिघातः, पुं, (परिहन्यतेऽनेन । परि + हन् + घञ् । "हनस्तोऽचिण्णलोः ।" इति तः ।) अस्त्रम् । हननम् । इति धरणिः ॥
परिघातनः, पुं, (परितो घातनं यस्मात् ।) परिघा-स्त्रम् । इत्यमरः । २ । ८ । ६१ ॥ सर्व्वतो-भावेन हनने क्लीं ॥
परिघोषः, पुं, (परितो घोषो यस्मिन् ।) मेघ-शब्दः । शब्दः । अवाद्यः । इति मेदिनी ॥
परिचयः, पुं, (परि समन्तात् चयनं बोधो ज्ञान-मित्यर्थः । परि + चि + अप् ।) विशेषेण ज्ञानम् । सेवा इति भाषा । तत्पर्य्यायः । संस्तवः २ । इत्यमरः । ३ । २ । २३ ॥ प्रणयः ३ । इति भरतः ॥ (यथा, माघे । ७ । ६१ ।
"न परिचयो मलिनात्मनां प्रसाधनम् ॥"
अभ्यासः । यथा, माघे । २ । ७५ ।
"हेतुः परिचयस्तेषां वक्तुर्गुणनिकैव सा ॥"
नादस्य अवस्थाविशेषः । यथा, हठयोगदीपि-कायाम् । ४ । ६६ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्याश्चतुष्टयम् ॥")
परिचरः, पुं, (परितश्चरतीति । परि + चर + पचाद्यच् ।) युद्धकाले परप्रहारात् रथरक्षकः । प्रजासामन्तव्यवस्थापनकारी । इति केचित् ॥ सेनायां राज्ञो दक्षनायकः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । परिधिस्थः २ । इत्य-मरः । २ । ८ । ६२ ॥ सहायः ३ । इति हेम-माला ॥ (परिचर्य्याकारकः । यथा वैद्यके, —
"उपचारज्ञता दाक्ष्यमनुरागश्च भर्त्तरि ।
शौचमेति चतुर्थोऽयं गुणः परिचरे जने ॥"
इति चरके सूत्रस्थाने नवमेऽध्याये ॥
"स्निग्धोऽनुगुप्तुर्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदत्यन्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्याये ॥)
परिचरणकर्म्म, [न्] क्ली, (परिचरणं सेवैव कर्म्म ।) परिचर्य्या । तद्वैदिकपर्य्यायाः । इर-यति १ विधेम २ सपर्य्यति ३ नमस्यति ४ दुर-स्यति ५ कृणोति ६ कल्पति ७ अर्च्छति ८ सपति ९ विवासति १० । इति दश परिचरण-कर्म्माणः । इति वेदनिघण्टौ ३ अध्याये ॥
परिचर्य्या, स्त्री, (परिचर्य्यते परिचरणमित्यर्थः । परि + चर् + "परिचर्य्यापरिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिके इति ण्यो यक् च निपात्यते ।) सेवा । (यथा, देवीभागवते । १ । ४ । ११ ।
"अथवा वाहके प्राप्ते परिचर्य्यां करिष्यति ।
पुत्रः परमधर्म्मिष्ठः पुण्यार्थं कुलवर्द्धनः ॥")
तत्पर्य्यायः । वरिवस्या २ शुश्रूषा ३ उपा-सनम् ४ । इत्यमरः । २ । ७ । ३५ ॥ परिसर्य्या ५ उपासना ६ उपासितिः ७ । इति भरतः ॥ शुश्रू-षणा ८ । इति शब्दरत्नावली ॥

परिच्छ

परिचाय्यः, पुं, (परिचीयते इति । चिञ् चित्याम् + "अयौ परिचाय्योपचाय्यसमूह्याः ।" ३ । १ । १३१ । इत्यनेन साधुः ।) यज्ञाग्निः । तत्पर्य्यायः । समूह्यः २ उपचाय्यः ३ । इत्यमरः । २ । ७ । २० ॥ (अग्निरिह न वह्निः किन्त्वग्निधारणार्थस्थल-विशेषः । इति सिद्धान्तकौमुदी ॥)
परिचारकः, त्रि, (परिचरतीति । परि + चर् + ण्वुल् ।) सेवकः । चाकर इति भाषा ॥ (यथा-मनुः । ७ । २१७ ।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः ।
सुपरीक्षितमन्नाद्यमद्याज्जीवेदिवापदि ॥")
तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ दासः ५ गोप्यकः ६ पेटकः ७ नियोज्यः ८ किङ्करः ९ प्रेष्यः १० भुजिष्यः ११ । इत्य-मरः । २ । १० । १७ ॥ शिङ्करः १२ चेटः १३ गोप्यः १४ परार्थितः १५ परिष्कन्दः १६ परि-कर्म्मी १७ । इति हेमचन्द्रः । ३ । १४ ॥
परिचार्य्यः, त्रि, परिचर्य्यतेऽसौ इति । परि + चर + कर्म्मणि ण्यत् । सेव्यः ॥
परिचितः, त्रि, (परि + चि + कर्म्मणि क्तः ।) परिचर्य्याविशिष्टः । ज्ञातः । यथा,—
"त्यक्तव्येयं चिरपरिचिता जन्मभूमीति यद्वा
मा खिद्यस्व चिरुवनजनप्राणहेतोः क्रमाङ्ग ! ।
किन्न त्याज्यं भवति महतां चेत् परस्योपकारो
वाराहस्या सुनिरपि गतो दक्षिणाशामगस्त्यः ॥"
इति पदाङ्कदूतः ॥
परिचेयं, त्रि, परि पूर्ब्बचिधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥ परिचययोग्यम् । परिचयनीयम् । परिचेतव्यम् ॥
परिच्छदः, पुं, (परिच्छाद्यतेऽनेनेति । परि + छद + णिच् + "पुंसि संज्ञायाम् ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाह्रस्वः ।) परिवारः । इति हेम-चन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । ६७३ ।
"सहधर्म्मचारिणी मम परिच्छदः सुतनु ! नेह सन्देहः ।
न तु सुखयति तुहिनदिनच्छन्नच्छायेव सन्ध्यानी ॥")
वृक्षस्यावल्कलजलादुपकरणम् । यथा,—
"परिच्छदं कृपार्हेऽर्थे परिवर्त्तोऽथवा परे ॥"
इत्यस्य टीकायां भरतः ॥
(यथा, रघुः । १ । १६ ।
"सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्ब्बी शत्रुषु चातता ॥")
आच्छादनम् । यथा,—
"पयःफेननिभा शुभ्रा दान्ता रत्नपरिच्छदा ।"
इति श्रीभागवतम् ॥
परिच्छन्दः, पुं, (परिच्छन्द्यतेऽनेन । परि + छदि संवरणे + घञ् ।) परिच्छदः । इति त्रिकाण्ड-शेषः ॥
परिच्छन्नः, त्रि, परिपूर्ब्बच्छदसोः कर्म्मणि क्तः । तत्प्रत्ययनिष्पन्नः ॥ परिच्छदविशिष्टः । सर्व्वतो-भावेनाच्छादितः । संवृतः ॥

परिच्छिन्नः, त्रि, (परि + छिद् + कर्मणि क्तः ।) परिच्छेदविशिष्टः । अवधिप्राप्तः । यथा,—
"परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरं
न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ।"
इति महिम्नः स्तोत्रम् ॥
सर्व्वतोभावेन छिदविशिष्टत्व ॥

परिच्छेदः, पुं, (परि + छिद् + भावे करणादौ च घञ् ।) अन्यविच्छेदः । यथा, चिकाकाण्डे ॥
"सर्गवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः ।
उच्छ्वासः परिवर्तश्च पटलः काण्डमस्त्रियाम् ॥
स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसञ्चयः ॥"
(तत्र काव्ये सर्गः । कोषे वर्गः । अलङ्कारे परिच्छेदोच्छ्वासौ । कथायामुद्घातः । पुराणसंहितादौ अध्यायः । नाटके अङ्कः । तन्त्रे पटलः । ज्ञाने काण्डम् । संगीते प्रकरणम् । इतिहासे पर्व्व । भाष्ये आह्निकम् । एवमन्येऽपि पादतरङ्गस्तवकप्रपाठकस्कन्धमञ्जरीलहरीप्रभृत्यादयो ग्रन्थसञ्चयो ग्रन्थभेदे यथायथं ज्ञेयाः ॥*॥)
सीमा । अवधिः । यथा, मालतीमाधवे ।
"परिच्छेदातीतैः सकलवचनानामविषयैः
पुनर्भेदैरन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च सापत्न्य कुरुते ॥"

परिजनः, पुं, (परिगतो जनः ।) परिवारः । पोष्यवर्गः । यथा, महिम्नः स्तोत्रे ।
"यदृद्धिं सूत्राग्रो वरद परमोच्चैरपि सती
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः ॥"
नियतसन्निधिवर्त्तिपरिचारकः । यथा, आनन्दलहर्य्याम् । ३० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम् ।
प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं
ह्रस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ॥"
" परिजनः नियतसन्निधिवर्त्तिपरिचारकः । "
इत्यस्यश्लोकस्य व्याख्यायां गोपीरमणतर्कपञ्चाननः ॥

परिजल्पितं, क्ली, (परि + जल्प + भावे क्तः ।) दृष्टाङ्गचित्रजल्पान्तर्गतद्वितीयजल्पनम् । यथा,
"प्रभोर्निर्दयतामाद्यचापलाद्युपपादनात् ।
स्वविचक्षणतार्थात्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥"
इत्युज्ज्वलनीलमणिः ॥

परिज्मा, [न्] पुं, (परिजायते इति । परि + जन् + मन् । निपातनात् साधुः ।) चन्द्रः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्य्यजतीति । अजेः परिपूर्व्वस्य अनुस्वारनिवृत्तादिना मनुप्रत्ययोऽकारलोपः आत्वादेशश्च निपात्यते । परिगन्ता । इति वेदभाष्यम् ॥)

परिज्वा, [न्] पुं, (परि + ज्रु जैत्रधातुः + "ज्वरुचन् पूषन्निति ।" उणा० । १ । १५८ । इति कनिन् । इदन्तु उज्ज्वलदत्तमतम् ।) इन्द्रः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

परिञ्जीलकं, क्ली, (परि + ञीं + क्तः । ततः स्वार्थे कन् ।) पक्षिगतिविशेषः । यथा,—
"ञीनं प्रञीनमुञीनं संञीनं परिञीनकम् ।"
इति जटाधरः ॥
(तथाच महाभारते । ८ । ४१ । २७ ।
"अतिञीनं महाञीनं ह्रञीनं परिञीनकम् ॥")

परिणतं, त्रि, (परिणमति स्म । परि + नम् + क्तः ।) पक्वम् । इत्यमरः । २ । १ । ६६ ॥ तिर्य्यग्घातिगजः । इति हेमचन्द्रः ॥ (यथा, माघे । ४ । २६ ।
"सततमसुमतामगण्यरूपाः
परिणतदिक्करिकास्थटीर्विभर्ति ॥")
सर्व्वतोभावेन गतञ्च ॥

परिणयः, पुं, (परिणयनम् । परि + नी + अप् ।) विवाहः । इत्यमरः । २ । ७ । ५७ ॥

परिणामः, पुं, (परिणमनम् । परि + नम् + घञ् ।) विकारः । प्रकृतेरन्यथाभावः । यथा । सुखस्य विकारः क्रोधरहितता । कैश्चित्तु । प्रकृतिध्वंसजन्यविकारः । यथा काष्ठस्य विकारो भस्म । मृत्पिण्डस्य घटः । इत्यमरभरतौ ॥ परमः । पोषः । यथा,—
"परिणामसुखे गरीयसि
व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्य्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥"
इति भारवौ । २ । ४ ॥
(निदानभेदेन यथा,—
"असात्मेन्द्रियार्थसंयोगप्रज्ञापराधपरिणामभेदात्त्रिविधो वा ॥" "परिणामोऽयोगादियुक्तो ऋतुस्वभावजा शीतादयः । अधर्म्मस्य च रोगहेतोरचैवात्मभाव इति भट्टारहरिश्चन्द्रः ॥" इति माधवकरकृतरुग्विनिश्चयस्य पक्वनिदानव्याख्याने विजयेनोक्तम् ॥
"कालस्य परिणामेन जरामृत्युनिमित्तजाः ।
रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः ॥"
इति चरके शारीरस्थाने प्रथमेऽध्याये ॥
अर्थालङ्कारभेदः । तल्लक्षणं यथा,—
"परिणामः क्रियार्थत्वेद्विषयौ विषयात्मना ॥")

परिणामदर्शी, [न्] त्रि, (परिणामं चरमं पश्यतीति । दृश् + णिनि ।) चरमकालप्रेक्षी । पश्चाद्दर्शी । विषयादेः शेषदर्शी । इति भारतम् ॥

परिणामशूलः, पुं, (परिणामे चरमावस्थायां शूलं यस्य । यद्वा परिणामे भुक्तान्नादेः परिपाके उत्पद्यते शूलं यस्मात् ।) रोगविशेषः । तस्योत्पत्तिर्यथा,—
"स्वैर्निदानैः प्रकुपितो वायुः सन्निहिते यदा ।
कफपित्ते समाहत्य शूलकारी भवेद्बली ॥"
तस्य लक्षणं यथा,—
"भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम् ।
तस्य लक्षणमप्येतत् समासेनाभिधीयते ॥"
वातिकस्य तस्य लक्षणं यथा,—
"आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः ।
स्निग्धोष्णोपशमप्रायं वातिकं तद्विदेद्भिषक् ॥"
पैत्तिकस्य तस्य लक्षणं यथा,—

"क्षुत्पादाहारतिस्वेदकृच्छ्रसवज्वोत्तरम् ।
मूलं शीतशमप्रायं पैत्तिकं लक्षयेद्भिषक् ॥"
श्लैष्मिकस्य तस्य लक्षणं यथा,—
"छर्द्दिश्वासाससम्मोहं स्वल्परुग्दीर्घसन्तति ।
कटुतिक्तोपशान्तौ च तच्छ्लेष्मं कफात्मकम् ॥"
त्रिदोषजस्य तस्य लक्षणं यथा.—
"संसृष्टलक्षणं बुद्ध्वा त्रिदोषं परिकल्पयेत् ।
त्रिदोषजमसाध्यन्तु शीघ्रमांसबलानलम् ॥"
इति माधवकरः ।
तस्यौषधं यथा, गरुड़पुराणे ।
"लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा ।
मधुना खादितं रात्रौ ! परिणामाख्यशूलहृत् ॥"
(चिकित्सास्य यथा,—
"वमनं तिक्तमधुरैर्विरेकञ्चापि शस्यते ।
वस्तयश्च हिताः शूले परिणामसमुद्भवे ॥
विड्भृष्टलवणक्षौद्रं त्रिवृद्दन्तीसचित्रकम् ।
सर्व्वाण्येतानि संकृत्य श्लक्ष्णचूर्णानि कारयेत् ॥
गुड़ेन मोदकं कृत्वा भक्षयेत् प्रातरुत्थितः ।
उष्णोदकानुपानन्तु दद्यादग्निविवर्द्धनम् ॥
जयेत्त्रिदोषजं शूलं परिणामसमुद्भवम् ॥
नागरगुड़तिलकल्कं पयसा संसाध्य यः पुमान् पिबात् ।
उग्रं परिणामशूलं तस्यापैति समरात्रेण ॥"
"तिलनागरपथ्यानां भागं शुल्बकभक्षणम् ।
द्विभागगुड़संयुक्तं गुड़ीं कृत्वाक्षभागिकाम् ॥
शीताम्बुपानं पूर्व्वाह्णे भक्षयेत् क्षीरभोजनः ।
सायाह्णे रसकं पीत्वा नरो सुच्यत दुर्ज्जयात् ॥
परिणामसमुत्थाच्छूलाच्चिरभवादपि ।
शुल्बकर्णं त्रयञ्चैव पञ्चैव लवणानि च ॥
समांशां गुड़िकां कृत्वा कलञ्जीकरसेन वा ।
प्रातर्भोजनकाले वा भक्षयेत्तु यथाबलम् ॥
शूलादुद्विमुच्यते जन्तुः सहसा परिणामजात् ॥
यः पिबति समराच्चं शुक्लूनेकान् कलायमूषेच्च ।
स जयति परिणामरुजं चिरजामपि किमुत नूतनजाम् ॥
लौहचूर्णं वरायुक्तं विलीढ़ं मधुसर्पिषा ।
परिणामशूलं शमयेत्तक्रं वा प्रयोजितम् ॥
सामुद्रं सैन्धवं क्षारो रुचकं रौमकं विड्म् ।
दन्ती लौहरजः किट्टं त्रिवृच्चूरणकं समम् ॥
दधिगोमूत्रपयसा मन्दपावकपाचितम् ।
तद्यथाग्निबलं चूर्णं पिबेदुष्णेन वारिणा ॥
जीर्णाजीर्णे तु भुञ्जीत मांसादिष्टसाधितम् ।
नाभिमूलं क्लोमशूलं यच्चदृगुल्मजतच्च यत् ॥
विनष्यत्यौलिकं हन्ति कफवातोद्भवन्तथा ।
शूलानामपि सर्व्वेषामौषधं नास्ति तत् परम् ॥
परिणामसमुत्थस्य विशेषेणाग्निबलप्रदम् ॥"
इति सप्तमाद्यं चूर्णम् ॥ * ॥
"सर्पिष्यलीगुड़ं सर्पिः पचेत् क्षीरे चतुर्गुणे ।
विनिहन्त्यचिरात्पित्तं शूलञ्च परिणामजम् ॥"
इति गुड़पिप्पलीघृतम् ॥ * ॥
"क्षारेण कल्केन च पिप्पलीनां
सिद्धं हृतं माक्षिकसंप्रयुक्तम् ।

परिणो

शीरानुपानं विनिहन्त्यवश्यं
मूलं प्रवृद्धं परिणामसंभ्रमम् ॥"
इति पिप्पलीघृतम् ॥ * ॥
"मक्षूरं घृतितं पक्वं लौहजां वा गुडेन तु ।
भक्षयन्मुच्यते मूलात् परिणामसमुद्भवात् ॥
संशोध्य चूर्णितं कृत्वा मक्षूरस्य पलाष्टकम् ।
घृतावरीरसस्याष्टौ दध्नश्च पयसस्तथा ॥
पलान्यादाय चत्वारि तथा गव्यस्य सर्पिषः ।
विपचेत् सर्व्वमेकीयं यावत् पिच्छत्वमागतम् ॥
लिह्यात् भक्षयेच्चाधो भोजनस्याग्रतोऽपि वा ।
वातात्मकं पित्तभवं मूलञ्च परिणामजम् ॥
निहन्त्येव हि योगोऽयं मक्षूरस्य न संशयः ॥"
इति घृतावरीमक्षूरम् ॥ * ॥
इति वैद्यकचक्रपाणिसंग्रहे मूलाधिकारे ॥
"अजीर्णान्नरसः प्रोक्तो दग्धमः परिणामजः ।"
"जीर्णेऽन्ने च भवेद्यस्तु स ज्ञेयः परिणामजः ॥"
"लङ्घनं वमनञ्चैव विरेकश्चानुवासनम् ॥
निरूहो वस्तिः कर्म्माणि परिणामे त्रिदोषजे ।
त्रिवृतं त्रिवृता दन्ती विड्ङ्गं कटुकत्रयम् ॥
समं चूर्णं गुडेनाथ कारयेल्लोहकान् सुधीः ।
भक्षयेत् प्रातरुत्थाय पश्चाद्दुग्धोदकं पिबेत् ॥
परिणामोद्भवं मूलं हन्ति शीघ्रं नरस्य च ।
यवानीहिङ्गु सिन्धूत्थक्षारं सौवर्च्चलाभया ।
सुरामण्डेन पातव्या परिणामे त्रिदोषजे ॥
हिङ्ग्वोषवच्चाजमोदहपुषा पथ्यायवानी घृतौ
जातीपिप्पलीदाडिमशुक्तीनिम्बीढ्यचाम्लि-
कम् ।
तक्रादम्लसुवर्च्चला च यवजक्षारं तथा सर्ज्जिका
सिन्धूत्थं त्रिकटुत्रयं समलवणं स्याद्बीजपूरे रसे ॥
संभार्य्य सुलतात्वनेन गुडिका चाक्षप्रमाणा तथा
कल्को वातविकारिणां प्रदहनः मूलार्शसः
प्रीष्टकान् ॥"
"एष हिङ्गादिको नाम सर्व्वमूलार्शिनाशनः ।
सर्व्ववातविकारघ्नः सर्व्वक्षयनिवारणः ।
परिणामोद्भवं मूलं वारयत्याश्वसंशयम् ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥

परिणायः, पुं, (परितो वामदक्षिणतो नयनम् । परि + नी + "परियोर्नीणोद्यभाभ्रियोः ।" ३ । ३ । ३० । इति घञ् ।) शारीणां समन्तान्नयनम् । इत्यमरः । २ । १० । ४६ ॥ परेरितो दीर्घत्वे परीणायश्च । इति भरतः ॥

परिणाहः, पुं, (परिणह्यतेऽनेन इति । परि + णह + घञ् ।) विस्तारः । तत्पर्य्यायः । विशालता २ । इत्यमरः । २ । ६ । ११४ ॥ ओसार इति चौड़ा इति च भाषा ॥ (यथा, महाभारते । ६ । ७ । २२ ।
"अरत्नीनां सहस्राणि शतानि दश पञ्च च ।
परिणाहस्तु वृक्षस्य फलानां रसमेदिनाम् ॥")

परिणेता, [तृ] पुं, (परिणयतीति । परि + नी + तृच् ।) वोढ़ा । भर्त्ता २ । इति राजनिर्घण्टः ॥ (यथा,—
"स्त्रियै दत्तायतो दत्तात् परिनेतुः प्रसूतये ।

परिदा

अप्यर्थकामौ तस्यास्तां धर्म्म एव मनीषिणः ॥"
इति रघुः । १ । २५ ।)

परितः [सृ] अ, (परि + "पर्य्यभिभ्याञ्च ।" ५ । ३ । ६ । इति तसिल् ।) सर्व्वतः । चतुर्दिगभिधायी । इत्यमरः । ३ । ७ । १३ ॥ (यथा, रघुः । ६ । ६ ।
"पुरोपकण्ठोपवनाश्रयाणां
कलापिनां सङ्कुलनृत्यहेतौ ।
प्रधानगुप्तेऽपि परितो दिगन्तान्
तूर्य्यस्वने मूर्च्छति मङ्गलार्थे ॥")

परितापः, पुं, (परिसर्व्वतोभावेन तप्यतेऽनेन । परि + तप् + घञ् ।) दुःखम् । (यथा, भागवते । ७ । ८ । ५२ ।
"स तु जनपरितापं ततक्षतं जानता ते
नरहर उपनीतः पञ्चतां पञ्चविंशः ॥")
नरकान्तरम् । इति मेदिनी ॥ शोकः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । २२ । २५ ।
"एतया तत्त्वया बुद्ध्या संस्तभ्यात्मानमात्मना ।
बाष्पतेऽप्यभिषेकं मे परितापो न विद्यते ॥")
भयम् । कम्पः । इति विश्वः ॥ अनुशयश्च ॥ (यथा, मार्कण्डेये । २५ । ४८ ।
"परितापश्च गात्रेभ्यः पीडाबाधाश्च सत्तम ! ।
अपहन्ति नरव्याघ्र ! दयां कुरु महीपते ! ॥")

परितुष्टः, त्रि, (परि + तुष् + क्तः ।) परितोषयुक्तः । सन्तुष्टः । यथा,—
"यत् प्रार्थ्यते त्वया भूप ! त्वया च कुलनन्दन ! ।
मत्तस्तत् प्राप्यतां सर्व्वं परितुष्टा ददामि तत् ॥"
इति मार्कण्डेये देवीमाहात्म्ये । ८३ । १० ॥

परितोषः, पुं, (परितोषणमिति । परि + तुष् + घञ् ।) सर्व्वतोभावेन तुष्टिः । सन्तोषः । यथा,—
"त्वामुदर ! साधुमन्ये शाकै-
रपि यदसि लब्धपरितोषम् ।
हतहृदयं त्वधिकाधिक-
वाञ्छाशतदुर्भरं न पुनः ॥"
इति शान्तिशतके ॥

परित्यागः, पुं (परित्यजनमिति । परि + त्यज् + घञ् ।) सर्व्वतोभावेन वर्জ্জनम् । तत्पर्य्यायः । क्षोरणम् २ । इति त्रिकाण्डशेषः ॥ * ॥
"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥"
इति मत्स्यसूक्तम् ॥

परित्राणं, क्लो, (परित्रायते इति । परि + त्रै + ल्युट् ।) मारणोद्यतस्य निवारणम् । तत्पर्य्यायः । पर्य्याप्तिः २ रक्षणम् ३ । इत्यमरः । ३ । २ । ५ ॥ रक्षणम् । यथा,—
"परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्म्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥"
इति श्रीभगवद्गीतायाम् । ४ । ८ ॥

परिदानं, क्लो, (परिदीयते इति । परि + दा + भावे ल्युट् ।) परीवर्त्तः । विनिमयः । इत्यमरः । २ । ८ । ८० ॥

परिदायी, [न्] पुं, (परिदाय ज्येष्ठाय कन्यां ददातीति । परि + दा + णिनिः ।) अनूढ़ज्येष्ठे

परिधिः

तत्कनिष्ठाय कन्यादाता । "यथा हारीतः । ज्येष्ठेऽनिर्विण्णे कनीयान् निर्व्विण्णः परिवेत्ता भवति परिविन्नो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकश्चते सर्व्वे पतिताः ।" इत्युद्वाहतत्त्वम् ॥

परिदेवनं, क्लो, (परि + दिव + ल्युट् ।) अनुशोचनोक्तिः । विलापः । इत्यमरः । १ । ६ । १६ ॥ (यथा, महाभारते । १ । २ । १४६ ।
"परिदेवनञ्च पाञ्चाल्या बाहुदेवस्य सन्निधौ ।
आश्वासनञ्च कृष्णस्य दुःखार्त्तायाः प्रकीर्त्तितम् ॥")

परिदेवना, स्त्री, (परिदेवयतीति । परि + दिव + "गुरोश्चहलः ।" ३ । ३ । १०३ । इति युच् । ततष्टाप् ।) शोकनिमित्तो विलापः । यथा,—
"अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥"
इति श्रीभगवद्गीतासूपनिषदध्यायश्लोकव्याख्याने श्रीधरस्वामी ॥ अपि च ।
"न मन्त्रबलवीर्य्येण प्रज्ञया पौरुषेण च ।
शक्यं लभते मर्त्यस्तत्र का परिदेवना ॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि शौनक ! ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥
अयाचितो मया लब्धस्तत्प्रेषितः पुनः कुतः ।
यत्रागतस्तत्र गतस्तत्र का परिदेवना ॥
एकश्चरो यदा रात्रौ नानापक्षिसमागमः ।
प्रभाते दश दिक्षु यान्ति तत्र का परिदेवना ॥
एकसार्थप्रयातानां सर्व्वेषान्तत्र गामिनाम् ।
यत्रैकस्खलितो याति का तत्र परिदेवना ॥"
इति गरुड़पुराणे १११ अध्यायः ॥

परिधानं, क्लो, (परिधीयते यत् । परि + धा + कर्म्मणि ल्युट् ।) परिधेयवस्त्रम् । तत्पर्य्यायः । अन्तरीयम् २ उपसंव्यानम् ३ अधोंशुकम् ४ । इत्यमरः । २ । ६ । ११७ ॥ (यथा, पञ्चतन्त्रे । ५ । २३ ।
"वरं वस्त्रं शाल्वजादिसेवितं
जलेन हीनं बहुकण्टकावृतम् ।
तृणानि मुख्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवितम् ॥")

परिधायः, पुं, (परिधीयतेऽत्र । परि + धा + घञ् ।) जलस्थानम् । परिच्छदः । नितम्बः । इति मेदिनी ॥ (जलस्थानमित्यत्र जलस्थानमिति केचित् ॥)

परिधिः, पुं, (परिधीयतेऽनेन । परि + धा + "उपसर्गे धोः किः ।" ३ । ३ । ८२ । इति किः ।) परिवेषः । चन्द्रसूर्य्यसमीपमण्डलम् । (यथा, रघुः । ८ । ३० ।
"अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधितिः ॥")
यज्ञियतरुशाखा । यज्ञियतरोः पलाशादीर्घस्य पशुबन्धनार्थं या शाखा निखायते तस्याम् । इत्यमरभरतौ ॥ (यथाह आपस्तम्बः । "खादिरं पालाशं वैकङ्कतमिध्मं करोति यथ;

परिधयः पालाशकाश्चकाः खादिरौदुम्बरविल्वरोहितकधविकङ्कतानां ये वा यज्ञिया दृढा आर्द्राः शुष्करसलचकाः ॥" इति ॥ * ॥)

भूगोलार्द्धवेष्टनम् । यथा,—

"व्यासेभनन्दाग्निहते विभक्ते
खबाणसूर्यैः परिधिस्तु सूक्ष्मः ॥"
इति लीलावती ॥

(स्त्री, परिधीयते यदिति । परि + धा + कर्म्मणि किः । परिधेयवस्त्रम् । यथा, भागवते । ८ । ७ । १७ ।

"मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मौलिं भ्राजिष्णुलसितकचः सानुरोधो रक्तनेत्रः ॥"

"कनके सुवर्णमिव पीते परिधि वस्त्रे यस्य" इति तट्टीका ॥)

परिधिस्थः, पुं, (परिधौ तिष्ठतीति । परिधि + स्था + कः ।) परिचरः । इत्यमरः । २ । ८ । ६२ ॥ युद्धकाले परप्रहारात् रथरक्षके । प्रजासामन्तव्यवस्थापनकारिणीति केचित् । सेनायां राज्ञो दक्षनायकः । इत्यन्ये । इति भरतः ॥

परिधेयं, त्रि, (परिधातुं योग्यम् । परि + धा + "अचो यत् ।" ३ । १ । ९७ । इति यत् "ईद्यति ।" ६ । ४ । ६५ । इति आत ईत् तनोः गुणः ।) परिधानीयम् । परिधातव्यम् । परिधानोपयुक्तवस्त्रादि । यथा,—

"न तु स्वभोग्यतयापि प्राप्ते परिधेयादौ स्मृतेरदृष्टार्थत्वापत्तेः ।" इति विवादचिन्तामणिः ॥

परिपक्वं, क्ली, (परिपच्यते स्म यत्तदृश्यतेऽनेन । परि + पच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः ।) मूलधनम् । इत्यमरः । २ । ९ । ८० । पूँजि इति भाषा ॥

परिपन्थकः, पुं, (परिपन्थयति दोषादिकं प्राप्नोतीति । परि + पथि कृ गतौ + ण्वुल् ।) मूत्रुः । इति हेमचन्द्रः । ३ । ३६३ ॥ (यथा, महाभारते । १० । १६ । ३१ ।

"हतो दुर्योधनः पापो राज्यस्य परिपन्थकः ॥")

परिपन्थी, [न्] त्रि, (परिसर्व्वतो भावेन दोषाख्यानं पन्थयितुं शीलमस्य । परि + पन्थ + णिनिः ।) मूत्रुः । इत्यमरः । २ । ८ । ११ । (यथा, गीतायाम् । ३ । ३५ ।

"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥"

प्रतिकूलाचारी । यथाह कश्चित् ।

"अपराधिनि चेत् क्रोधः क्रोधे क्रोधः कथं न हि ।
धर्म्मार्थकाममोक्षाणां चतुर्णां परिपन्थिनि ॥")

परिपाकः, पुं, (परिपच्यते इति । परि + पच् + घञ् ।) परिपक्वता । यथा, भावप्रकाशे ।

"इत्युक्तं केवलवस्तुपक्व-
मांसेन मतस्यः परिपाकमेति ।"

नैपुण्यम् । यथा,—

"वीक्ष्य तस्य विनये परिपाकं
प्राकशासनपदं स्पृशतोऽपि ।"
इति नैषधपञ्चमसर्गः ॥

परिपाकिनी, स्त्री, (परिपाकः परिपाकशक्तिर्विद्यतेऽस्याः । परिपाक + इनि + ङीप् ।) चिरुता । इति शब्दचन्द्रिका ॥

परिपाटिः, स्त्री, (परिपाटनम् । परि + पट् + स्वार्थे णिच् + अच् इः । यद्वा परि भागे भागेन पाटिः पाटनं गतिर्यस्याम् ।) पारिपाट्यविशिष्टः । तत्पर्य्यायः । आनुपूर्व्वी २ आवृत् ३ अनुक्रमः ४ पर्य्यायः ५ । इत्यमरः । ३ । ७ । ३७ ॥ आनुपूर्व्यम् ६ परिपाटी ७ । इति भरतः ॥ आनुपूर्व्यम् ८ आनुपूर्व्यकम् ९ । इति टीकाकारम् ॥ क्रमः १० । इति जटाधरशब्दरत्नावल्यौ ॥

परिपिष्टकं, क्ली, (परि + पिष् + क्त + संज्ञायां कन् ।) सौषकम् । इति राजनिर्घण्टः ॥

परिपुष्करा, स्त्री, (परितः पुष्करं सुखं यस्याः ।) गोडुम्बा । इति शब्दचन्द्रिका ॥ राजगोमक् इति भाषा ॥

परिपूतं, क्ली, (परि + पू + क्तः ।) अपाक्लतुषधान्यम् । यथा, मनुः ।

"परिपूतेषु धान्येषु शाकमूलफलेषु च ।
निरन्वये शुतं दद्यात् सान्वये तद्धुतं दमः ॥"

त्रि, सर्व्वतोभावेन पवित्रम् ॥ (यथा,माघे ।२।१६ ।

"घूर्णयन् मदिराखादमदपाटलितद्युतीः ।
देवतीवदनोच्छिष्टपरिपूतपुटा दृशौ ॥")

परिपूर्णता, स्त्री, (परिपूर्णस्य भावः । परिपूर्ण + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति तल् ततः "स्त्रियां क्तीक्तिकन्तल्लक्षं स्त्रियाम् ।" इति वार्त्तिकोक्तत्वात् स्त्रियां टाप् ।) परिपूर्णत्वम् । सम्पूर्णता । तत्पर्य्यायः । आभोगः २ । इत्यमरः । २ । ६ । १३७ ॥

परिपूर्णत्वं, क्ली, (परिपूर्णस्य भावः । "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्व । ततः स्त्रीत्वम् ।) परिपूर्णता । सम्पूर्णत्वम् । इति जटाधरः ॥ (यथा,—

"दृश्यते परिपूर्णत्वं मुखचन्द्रस्य ते सखि ! ।
न जाने कच्चकोरं हि विधाता पालयिष्यति ॥"
इत्युद्भटः ॥)

परिपेलं, क्ली, (परिपेलति मृदुतां गच्छतीति । पेल गतौ + अच् ।) परिपेलवम् । कैवर्त्तीमुस्तकम् । इति शब्दमाला ॥ तन्नामान्तरं यथा,—

"परिपेलं ध्रुवं वल्यं तत्कुटन्नटसंज्ञकम् ।
जायते मुस्तकाकारं शैवालकुलसञ्चये ॥"
इत्यमरटीकायां भरतः ॥

परिपेलवं, क्ली, (परि सर्व्वतः पेलवं मृदुता यस्य ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १३१ ॥ (आलस्यकोमले, त्रि । यथा, दुष्टदमनसंहितायाम् । ६४ । ८ ।

"स्फीतमध्यपरिपेलवं फलं
शीघ्रमध्यचिरकालसम्भवम् ॥"

गुणादयोऽस्य कैवर्त्तीमुस्तकशब्दे वक्ष्यन्ते ॥)

परिप्लवं, त्रि, (परिप्लवते इति । प्लु + अच् ।) चञ्चलम् । इत्यमरः । ३ । १ । ९५ ।

(यथा, माघे । १४ । ६८ ।

"मत्स्यकूर्म्माविव पुरा परिप्लवौ
सिन्धुनाथशयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नेत्रसुखविप्लुतां क्षणम् ॥"

पुं, राज्ञः सुखीनलस्य पुत्रः । यथा, भागवते । ९ । २२ । ४२ ।

"सुनीथस्यास्य भविता वृत्रस्तुर्यसुखोऽनलः ।
परिप्लवः सुतस्तस्माच्छ्रुतोऽथ पुरुषाद्गजः ॥")

परिप्लुतः, त्रि, (परिप्लु + क्तः ।) जलादिप्लावितः । यथा, मार्कण्डेये देवीमाहात्म्ये १ अध्यायः ॥

"यावन्नाहि न यज्ञोर्व्वीं सलिलेन परिप्लुताम् ॥"

परिप्लुता, स्त्री, (परि + प्लु + क्तः । स्त्रियां टाप् ।) मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥ व्याध्यधर्म्मे (मैथुने) वेदनावती योनिः । यथा,—

"परिप्लुतायां भवति व्याध्यधर्म्मे वृथा भृशम् ।"
इति योनिव्यापत्प्रदाने माधवकरः ॥

("पित्तलाया वृसंवासे क्षवथूद्गारधारणात् ।
पित्तसंमूर्च्छितो वायुर्योनिं दूषयति स्त्रियाः ॥
शूनाक्षपूर्णाक्षमासाक्षिनीलपीतमस्तक् स्रवेत् ।
श्रोणीवंक्षणपृष्ठार्त्तिज्वरार्त्तायाः परिप्लुता ॥"
इति चरके चिकित्सास्थाने त्रिंशेऽध्याये ॥)

आप्लुते त्रि ॥

परिवर्हः, पुं, (परिवर्ह्यतेऽनेन । वर्ह प्राधान्ये + घञ् ।) परिच्छदः । हस्त्यश्ववस्त्रकम्बलादि । नृपार्हं सितच्छत्रादि अर्थात् धनमिति केचित् । इत्यमरभरतौ ॥ (यथा,—

"निवेश्य गङ्गामनु तां महानदीं
क्रमं विधानैः परिवर्हशोभिनीम् ।
उवास रामस्य तदा महात्मनो
विचिन्तयानो भरतो निवर्त्तनम् ॥"
इति रामायणे । २ । ८३ । २६ ।)

परिभवः, पुं, (परि + भू + अप् ।) अनादरः । इत्यमरः । १ । ७ । २२ ॥ (यथा, रघुः ।१२।३७।

"फलमस्योपहासस्य सद्यः प्राप्स्यसि पश्य मां ।
स्त्रियाः परिभवो व्याघ्रामित्यवेहि त्वया हृतम् ॥")

परिभावः, पुं, (परि + भू + "परौ भुवोऽवज्ञाने ।" ३ । ३ । ५५ । इति घञ् ।) परिभवः । इत्यमरः । १ । ७ । २२ ॥

परिभाषणं, क्ली, (परि + भाष् + ल्युट् ।) सनिन्द उपालम्भः । इत्यमरः । १ । ६ । १४ ॥ उपालम्भो दुर्व्वादः । निन्दया सह वर्त्तमानो य उपालम्भस्तच्च सनिन्दं परिभाषणम् । उपालम्भो गुणाधिक्करणेन स्तुतिपूर्व्वकोऽपि भवति । यथा महाकुलस्य भवतः किमिदमुचितं भवति । अत्र तु सस्तुतौ न परिभाषणम् । टीकान्तरेऽपि बन्धुलस्य तवागम्यागमनं योग्यमिति निन्दापूर्व्वः । महाकुलस्य तव कथं विप्रवधः । इति स्तुतिपूर्व्वश्च उपालम्भः । इति भरतः ॥* ॥ नियमः । इति मेदिनी ॥ आलापः । इति विश्वः ॥

परिभाषा, स्त्री, (परि + भाष् + अच् । ततष्टाप् । परिष्कृतं भाषणम् । पदार्थविवेचकाचार्य्याणां युक्तियुक्ता वाक् । इति काव्यप्रकाशटीकायां चण्डीदासः ॥ तत्पर्य्यायः । प्रज्ञप्तिः २ शैली ३ सङ्केतः ४ समयकारः ५ । इति त्रिकाण्डशेषः ॥ (सूत्रलक्षणविशेषः । सूत्रं षड्विधम् । यथा,—

"संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥")

"ग्रन्थस्य संक्षेपनिर्व्वाहार्थसङ्केतविशेषः । यथा चपोदितैत्यादि ।" इति मुग्धबोधटीकायां दुर्गादासः ॥ यथा माघे । १६ । ८० ।

"न खलु प्रतिहन्यते कुतश्चित्
परिभाषेव गरीयसी यदाज्ञा ॥"

("अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशिकाः ।
परिभाषाः प्रवक्ष्यन्ते दीपीभूताः सुनिश्चिताः ॥"
इति वैद्यकपरिभाषायां लक्षणम् ॥
"प्रथमं परिभाषा स्यात्तद्भैषज्याख्यानकल्पना ।"
इति शार्ङ्गधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥)

परिभूतं, त्रि, (परिभूयते स्म । परि + भू + क्तः ।) अनादृतम् । तत्पर्य्यायः । अवगणितम् २ अवमतम् ३ अवज्ञातम् ४ अवमानितम् ५ । इत्यमरः । ३ । १ । १०६ । अभिभूतम् ६ । इति जटाधरः ॥ अपमानम् ७ । इति शब्दरत्नावली ॥ (यथा, सारावल्यां त्रिंशाध्याये ।

"परिभूतं सुखरहितं कुलटापुत्रमतिपापरतञ्च ।
जनयति नवांशपतिः क्षितिसुतदृष्टो भाधि सूरम् ॥")

परिभ्रमः, पुं, (परि + भ्रम् + अच् ।) सर्व्वतोभ्रमणम् । परिपूर्व्वभ्रमधातोर्भावे अल्प्रत्ययनिष्पन्नः ॥

परिमण्डलं, त्रि, (परि सर्व्वतो मण्डलम् ।) वर्त्तुलम् । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । २ । १९ ।

"लक्षोत्तरं सार्द्धनवकोटियोजनपरिमण्डलं भूवलयस्य क्षणेन सगव्यूत्युत्तरं द्विसहस्रयोजनानि स भुङ्क्ते ॥" परमाणुपरिमाणम् । परिमाणविशिष्टः परमाणुः । इति वैशेषिकसूत्रविवृतिः ॥ शब्दोऽयं न्यग्रोधशब्देन युक्तः अर्थान्तरं प्रकाशयति । पुं, पुरुषविशेषः । तस्य लक्षणं यथा, मात्स्ये ११८ अध्याये ।

"न्यग्रोधौ तु स्मृतौ बाहू व्यासो न्यग्रोध उच्यते ।
व्यासेन उच्छ्रयो यस्य अध ऊर्द्धञ्च देहिनः ।
समोच्छ्रयपरीणाहो न्यग्रोधपरिमण्डलः ॥"

स्त्री, लक्षणान्वितरमणीविशेषः । यथा, शब्दरत्नावल्याम् ।

"स्तनौ सुकठिनौ यस्या नितम्बे च विशालता ।
मध्ये क्षीणा भवेद् या च न्यग्रोधपरिमण्डला ॥"

पर्व्वतविशेषः । यथा महाभारते ६ । ६ । ११ ।

"परिमण्डलयोर्मध्ये मेरुः कनकपर्व्वतः ।
आदित्यतरुणाभासो विधूम इव पावकः ॥")

परिमलः, पुं, (परिमलते सुगन्धिपार्थिवकणान् धरतीति । मल ङ धारणे + अच् । "क्षितावेव गन्धः ।" इति न्यायादस्य तथात्वम् ।) विमर्द्दनम् । कुङ्कुमादिमर्द्दनम् । विमर्द्दोत्थजनमनोहरगन्धः । सुरतादिविमर्द्दोत्थविलेपनकुङ्कुमादिगन्धः । इत्यमरभरतौ ॥ सुरभिमाल्यगन्धादिधारणेनोत्पन्नो हृद्यो गन्धः । इति स्वामी ॥ (यथा, कलाविलासे । १ । ५ ।

"रतिसुलिततललिततलनाक्रमजलजवर्णाहिनी
सुहृर्येव ।
स्तवकेशकुसुमपरिमलवासितदेहा वहन्त्यनिलाः ॥")

तत्पर्य्यायः । आमोदः २ गन्धः ३ सौरभ्यम् ४ सौरभम् ५ । इति राजनिर्घण्टः ॥ पण्डितसमूहः । इति शब्दरत्नावली ॥

परिमाणं, क्ली, परिमीयतेऽनेन । (परि + मा + करणे ल्युट् ।) परिमितव्यवहारासाधारणकारणम् । इति सिद्धान्तमुक्तावली ॥ माप इति भाषा । (यथा, मनुः । ८ । १३३ ।

"त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः ॥")

तत्पर्य्यायप्रकारा यथा,—

"यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।
मानं तुलाङ्गुलिप्रस्थैर्गुञ्जाः पञ्चाद्यमाषकः ॥
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम् ।
सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले ॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
आचितं दशभाराः स्युः शाकटो भार आचितः ॥
कार्षापणः कार्षिकः स्यात् कार्षिके ताम्रिके पणः ।
अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।"
इत्यमरः । २ । ९ । ८५—८९ ॥ * ॥

न्यायमते तद्यथा,—

"परिमाणं भवेन्मानव्यवहारस्य कारणम् ।
अणु दीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ॥
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।
संख्यातः परिमाणाच्च प्रचयादपि जायते ॥
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ।
परिमाणं घटादौ तु परिमाणजमुच्यते ॥
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ।
परिमाणन्तूलकादौ नाशस्त्वाश्रयनाशतः ॥"
इति भाषापरिच्छेदे । ११०—११३ ॥

(परिमाणं निरूपयति । परिमाणमिति । परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थः । तच्चतुर्व्विधं अणु महद्दीर्घं ह्रस्वञ्च इदं चातुर्व्विध्यं प्रत्यक्षसिद्धं तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्रपरिमाणमित्यनुवर्त्त्यते जायते इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्यमिति पूर्व्वेणान्वितं तथाचानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यञ्चेत्यर्थः । तत्र संख्याजन्यमुदाहरति द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु परमाण्वाद्यपेक्षया नोत्कृष्टं त्रसरेणुपरिमाणन्तु न सजातीयं अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः । परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यम् । प्रचयजन्यमुदाहरन् प्रचयं निर्व्वक्ति प्रचय इति अर्थात् प्रचयस्य नष्टावयविनाशः कथं परिमाणनाशकः अस्त्यप्यवयविनि विनश्वरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् । परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनो नाशस्यावश्यकत्वात् सति च नाशकेऽनभ्युपगममात्रेण नाशस्य अपवदितुमशक्यत्वात् शरीरादाववयवोपचये असमवायिकारणनाशस्यावश्यकत्वादवयविनाशः आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाशस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरवयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यम् । अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत् न च पूर्व्वतन्तव एव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यम् मूर्त्तयोः समानदेशताविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलब्ध्या बाधितत्वाच्च पूर्व्वद्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यवश्यमभ्युपेयत्वात् ॥" इति सिद्धान्तमुक्तावली ॥)

परिमार्ग्यं, त्रि, (परि + मृज + ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिः ।) परिमार्ज्यम् । परिशोधनीयम् ॥

परिमार्जनं, क्ली, (परि + मृज् + ल्युट् ततो वृद्धिः ।) खाद्यभेदः । मधुमस्तकम् । यथा, शब्दचन्द्रिका ।

"मधुनैलघृतैर्मध्ये वेष्टिताः समिताश्च ये ।
मधुमस्तकसुहृद्यं तस्याख्या परिमार्ज्जनम् ॥"

परिशोधनञ्च ॥

परिमितं, त्रि, (परि + मा + क्तः । परितो मितं वा ।) युक्तम् । इति त्रिकाण्डशेषः ॥ परिमाणविशिष्टम् । यथा, उद्भटः ।

"द्रविणं परिमितमधिक-
मयिनं जनमाकुलीं कुरुते ।
क्षीणाम्बुमिव मीन-
स्तनजघनाया: कुलीनायाः ॥"

परिमृज्यं, त्रि, (परि + मृज् + "मृजेर्विभाषा ।" ३ । १ । ११३ । इति क्यप् ।) परिमार्ग्यम् । इति व्याकरणम् ॥

परिमेयं, त्रि, (परिमीयते इति । परि + मा + "अचो यत् ।" ३ । १ । ९७ । इति यत् । "ईद्यति ।" ६ । ४ । ६५ । इति ईत् ततो गुणः ।) परि-

मार्गविग्रहम्। परिमातव्यम्। परिमाणीयम्। (यथा, रघुः। १। ३७।
"माभूदाश्रमपीडेति परिमेयपुरःसरौ।
अनुभावविशेषाणु सेनापरिगताविव॥")
परिमोक्षः, पुं, (परितो मोक्षः परित्यागः।) मलत्यागः। यथा, श्रीभागवते २। ६। १०।
"पायुर्यमस्य मित्रस्य परिमोक्षस्य भारत!।
हिंसायाः निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम्॥"
"परिमोक्षस्य मलत्यागस्य। पायुरिन्द्रियं गुदं स्थानम्। निर्ऋतेरलक्ष्म्याः।" इति तट्टीकायां श्रीधरस्वामी॥ * ॥ परित्यागम्। यथा, विष्णुधर्म्मोत्तरे।
"सर्व्वाशुभानां परिमोक्षकारि
संपूजनं देववरस्य विष्णोः।"
इति तिथ्यादितत्त्वम्॥
(विमुक्तिः। यथा, महाभारते। १। २। १६०।
"कर्णस्य परिमोक्षोऽथ कुण्डलाभ्यां पुरन्दरात्॥")
परिमोषी, [न्] त्रि, (परिमुष्णातीति। परि+मुष्+णिनिः।) परिमोषणशीलः। चौरः। (इति हेमचन्द्रः। ३। ४६॥)
परिरम्भः, पुं, (परिरभ्यते इति। परि+रभि+घञ्। "रभेरशब्लिटोः।" ७। १। ६३। इति नुम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गीतगोविन्दे। ५। ७।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
मय्यस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥")
परियत्सरः, पुं, वत्सरः। इति जटाधरः॥ वत्सरविशेषः। यथा, मलमासतत्त्वे।
"शकाब्दात् पञ्चभिः शोधात् समाद्यादिषु वत्सराः।
सम्वरीद्यानुपूर्व्याच्च तपोदापूर्व्यका मताः॥"
"परिपूर्व्वे तथादानं यवानाञ्च द्विजोत्तमाः॥"
इति विष्णुधर्म्मोत्तरम्॥
परिवर्জ্জनं, क्ली, (परिवर्জ্यते परित्यज्यते प्राणिभिर्येन। परि+वृज्+णिच्+ल्युट्।) मारणम्। इत्यमरः। २।८।११४॥ (भावे ल्युट्।) परित्यागः। यथा, उद्भटः।
"गोप्यो न दोषो मथुराङ्गनानां
घृणस्य कृष्णस्य हि रीतिरेषा।
विपर्य्ययो येन कृतः स्वपित्रो-
स्तस्योपपत्तौ परिवर्জ্जनं किम्॥"
परिवर्জ্जनीया यथा, कौर्म्मे उपरिभागे १५ अः।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्ययने योनिस्तथैव सहभोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्জ্जयेत्॥"
"यस्मिन्द्वेषो न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित्तं देशं परिवर्জ্जयेत्॥"
इति चाणक्यम्॥
"ब्राह्मणं बालिशं क्षत्रमयोद्वारं विषं जलम्।
मूढमक्षरसंयुक्तं दूरतः परिवर्জ्जयेत्॥

कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम्।
कुवस्तुञ्च कुदेशञ्च दूरतः परिवर्জ্जयेत्॥"
इति गरुडपुराणे ११३ अध्यायः॥
("यस्य वै भाषमाणस्य रसजातं सुरोत्तमम्।
अन्नञ्च क्षयते सद्यं स्थितस्यापि न जीर्य्यति॥
बलञ्च क्षीयते यस्य क्षुधा चाभिप्रवर्द्धते।
जायते हृदि शूलञ्च तं भिषक् परिवर्জ্जयेत्॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम्॥)
परिवर्त्तः, पुं, (परिवर्त्तनमिति। परि+वृत्+भावे घञ्।) विनिमयः। (यथा, रामायणे। २। १०५। २५।
"कृच्छ्रान्नातुसुखं दृष्ट्वा नवं नवमिवागतम्।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंचयः॥")
कूर्म्मराजः। अपवर्त्तनम्। इति मेदिनी॥ युगान्तः। इति हेमचन्द्रः॥ ग्रन्थविच्छेदः। इति जटाधरः॥ मृत्युपुत्रस्य दुःसहस्यौरसेन कलिकन्यानिर्म्माहिंगर्भजातासुपुत्रान्तर्गततृतीयपुत्रः। (यथा, मार्कण्डेये। ५१। २।
"अष्टौ कुमाराः कन्याश्च नयाष्टावतिभीषणाः।
दम्भात्प्रदिष्टास्तथोक्तिश्च परिवर्त्तस्तथापरः॥"
तत्रामनिरुक्तिर्यथा तत्रैव १४ श्लोके।
"अन्यगर्भं परान् गर्भान् सदैव परिवर्त्तयन्।
रतिमाप्नोति वाक्यश्च विवक्षोरन्यदेव यत॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित्॥")
तस्य पुत्रयोः कर्म्मादि यथा,—
"परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज!।
तौ तु वृक्षादिपरिखाप्राकाराम्भोधिसंश्रयौ॥
गुल्मिन्याः परिवर्त्तनौ कुरुतः पादपादिषु।
क्रोष्टुके! परिवर्त्तः स्याद्गर्भस्यान्योदराक्षतः॥
न वृक्षस्येव नैवाद्रिं न प्राकारं पयोनिधिम्।
परिखां न समाक्रामेदबला गर्भधारिणी॥"
इति मार्कण्डेयपुराणे। ५१। ६२—६४॥
परिवर्त्तनं, क्ली, (परि+वृत्+ल्युट्।) परिवर्त्तः। तत्पर्य्यायः। परिदानम् २ विनिमयः ३ नैमेयः ४ अतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८। इति हेमचन्द्रः॥ (यथा, रघुः। १६। १३।
"अङ्कमङ्कपरिवर्त्तनोचिते
तस्य निद्यतुरमूल्यतासुभे।
बालकौ च हृदयङ्गमत्वना
बलगुवागपि च वामलोचना॥")
परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः। तल्लक्षणमाह।
"मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघातनः।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते।
सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित्॥
मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते।
मारुतागमसम्भूता विन्द्यात्तां परिवर्त्तिकाम्।
सकष्टः कठिना वापि सैव श्लेष्मसमन्विता॥"
यस्यां वातजायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात्। क्षोदः चर्म्मकोषः॥ * ॥

अथ तस्याश्चिकित्सा।
"परिवृत्तं गुदाभ्यक्तं सुस्निग्धमुपनाहयेत्।
घृताक्तं पत्तूराद्यं वा वातघ्नैः घ्राणवत्तादिभिः॥
ततोऽभ्यज्य घृतेनाशु पाटयेत् पीड़येन्नखैः।
प्रविष्टे चर्म्मणि मलौ खेदयेदुपनाहयेत्॥
दद्याद्धातघ्नरान् वर्त्तीन् स्निग्धान्नान्यपि भोजयेत्।"
इति भावप्रकाशः॥
परिवसथः, पुं, (परितो वसत्यत्र। परि+वस्+उपसर्गे वसेरिति अथच्।) ग्रामः। इति हेमचन्द्रः। ४। २७॥
परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति। परि+वह्+अच्।) सप्तवायुस्कन्धसंवहवायुः। स तु सुवहवायोरुपरिस्थितः। (यथा, सिद्धान्तशिरोमणौ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वं:
स्यादुद्वहस्तदनुसंवहसंज्ञकश्च।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकाऽस्मात्
वाहः परावह इमे पवनाः प्रसिद्धाः॥")
परिवादः, पुं, (परिसर्व्वतो दोषोल्लेखेन वादः कथनम्। परि+वद्+भावे घञ्।) अपवादः। (यथा, महानिर्व्वाणतन्त्रे। १। ४२।
"नीचसंसर्गनिरता परवित्तापहारकाः।
परनिन्दापरद्रोह-परिवादपरा खलाः॥"*॥
परि+वद्+णिच्+करणे घञ्।) वीणावादनवस्तु। इति मेदिनी॥
परिवादकः, त्रि, (परिवदतीति। परि+वद्+ण्वुल्।) परिवादकर्त्ता। इति व्याकरणम्॥
परिवादिनी, स्त्री, (परिवदति स्वरानिति। परि+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः स्त्रियां ङीप्।) सप्ततन्त्रीयुक्तवीणा। इत्यमरः॥ (यथा, माघे। ६। ६।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावयमाययुः॥")
परिवादविशिष्टा च॥
परिवादी, [न्] त्रि, (परिवदतीति परिवदिन् णीलमस्य वा। परि+वद्+णीलार्थे कर्म्मरि णिनिः।) परिवादकर्त्ता। (यथा, महाभारते। ७। ७१। २६।
"साधूनसूयतां ये च ये चापि परिवादिनाम्॥"
परिवादो निन्दा विद्यतेऽस्य।) परिवादविशिष्टः। इति परिवादशब्दादस्त्यर्थे इनिः॥
परिवापः, पुं, (परिसर्व्वतः उप्यते इति। परि+वप्+घञ्।) पर्य्युप्तिः। वपनम्। क्षुरस्थानम्। परिच्छदः। इति मेदिनी। पे २५॥
परिवापनं, क्ली, (परि+वप्+णिच्+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥
परिवापितं, त्रि, (परिवाप्यते स्म। परि+वप्+णिच्+क्त।) मुण्डितम्। इत्यमरः। ३। १। ८५॥
परिवारः, पुं, (परिवियतेऽनेन। परि+वृ+करणे घञ्।) परिजनः। (यथा, रघुः। ६। १०।
"मनुष्यवाह्यं चतुरश्रयान-
मध्यास्य कन्या परिवारशोभि।

विवेश्य मन्त्रान्तरराजमार्गं
पतिंवरा कन्यमिवाहवेषा ॥")

खड्गकोषः। परिच्छदः। इति मेदिनी। रे। २८० ॥

परिव्राट्, पुं, (परिव्रज्यते त्यजादिकं येन। परि + व्रज् + घञ्।) परीव्राजः। अलोच्छासः। इत्यमरटीकायां रमानाथः॥ (यथा, रघुः। ८।७४।

"स.विवेश्य पुरीं तया विना
सुखदापायमपाकृदर्शनः।
परिव्राड्मिवावलोकयन्
स्वजनः पौरवधूसुखाश्रुषु ॥")

परिविद्धः, पुं, (परि + विद् + क्तः।) परिवित्तिः। यथा, उद्वाहतत्त्वे।

"ज्येष्ठेऽनिर्विष्टे कनीयान् निर्विशन् परिवेत्ता भवति परिविद्धो ज्येष्ठः परिवेदनीया कन्या परिदायी दाता परिकर्त्ता याजकः, ते सर्व्वे पतिताः॥"

परिविद्धिः, पुं, (परिवर्ज्जनं विन्दति लभते इति। परि + विद् + क्विप्।) परिवेत्तृज्येष्ठः। ज्ञातविवाहस्यानूढ्ज्येष्ठभ्राता। इत्यमरः। २।७।५६॥ (यथा, मनुः। ३। १७१।

"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिविद्धस्तु पूर्व्वजः॥")

परिविन्दन्, [न्] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति अग्न्याधानभार्य्यादिकं लभते इति। विद् + शतृ।) परिवेदनकर्त्ता। यथा,—

"देशान्तरस्थस्त्रीवैकृष्यज्ञानसहोदरान्।
वेश्याभिसक्तपतितशूद्रतुल्यातिरोगिणः॥
जडमूकान्धबधिरकुब्जवामनकुष्ठकान्।
अनिसृष्टानभार्य्यांश्च क्षत्रियस्यान् नृपस्य च॥
धनवृद्धिप्रसक्तांश्च कामतः कारितस्तथा।
कुलटोन्मत्तचौरांश्च परिविन्दन् न दुष्यति॥"

इत्युद्वाहतत्त्वे छन्दोगपरिशिष्टम्॥

परिविष्णु, क्ली, सर्व्वतो विष्णुः। विष्णुं विष्णुं परि इत्यव्ययीभावसमासे दुर्गादासः॥

परिवृंहितं, त्रि, वृहिधातोः कर्म्मणि क्तः। (ततः परितो वृंहितमिति।) सर्व्वतोभावेन दीप्तिविशिष्टम्। सर्व्वतोभावेन करिगर्ज्जितम्। सर्व्वतोभावेन वृद्धिविशिष्टम्। सर्व्वतोभावेन ध्वनिविशिष्टम्॥

परिवृढः, त्रि, (परिसर्व्वतोभावेन वृंहति वर्द्धते इति। वृहि वृद्धौ + कर्त्तरि क्तः। निपातनात् हकारलोपो निष्ठानस्य ढत्वञ्च।) अधिपः। प्रभुः। इत्यमरः। ३। १। ११॥ (यथा, राजतरङ्गिण्याम्। ३। २८२।

"जगत्परिवृढः प्रौढ़ीनिर्लं न फलार्थिनम्।
ज्ञात्वा प्रादुष्कृतवपुस्तनो भूयोऽप्यभाषत॥")

परिवृतः, त्रि, (परिसर्व्वतोभावेन वृतः।) आवृतः। वेष्टितः। यथा,—

"अवद्वारान् नृपः पश्येत् सभ्यैः परिवृतोऽन्वहम्।"

इति मिताक्षरा॥

परिवृत्तिः, पुं, (परिवर्ज्जने वर्त्तते इति। परि + वृत् + क्तिच्।) परिवित्तिः। इति हेमः॥ (परि + वृत् + भावे क्तिन्। परिवर्त्तनम्। यथा, महाभारते। १४। १८। २६।

"तस्य कालपरीमाणमकरोत् स पितामहः।
भूतेषु परिवृत्तिञ्च पुनरावृत्तिमेव च॥"

अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। १०५।

"परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्॥"

क्रमेणोदाहरणं यथा,—

"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः॥"

अत्र प्रथमेऽर्द्धे समेन द्वितीयेऽर्द्धे न्यूनेन॥)

परिवृहितं, त्रि, सर्व्वतोभावेन वृहिविशिष्टम्। सर्व्वतोभावेनोत्तमविशिष्टम्। इति वृहधातोः कर्म्मणि क्तप्रत्ययनिष्पन्नम्॥

परिवेत्ता, [तृ] पुं, (परित्यज्य ज्येष्ठं भ्रातरं विन्दति भार्य्याग्न्याधानादिकं वा लभते इति। विद् लाभे + "ग्लुलृचौ।" ३। १। १३३। इति तृच्।) अनूढ्ज्येष्ठे ज्ञातविवाहकनिष्ठः। इत्युद्वाहतत्त्वम्॥ (यथा, मनुः। ३। १७१।

"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः॥")

परिवेदनं, क्ली, (परि + विद् + ल्युट्।) विवाहः। अग्न्याधानम्। यथा,—

"क्लीबे देशान्तरगते पतिते भिक्षुकेऽपि वा।
योगग्राह्याभियुक्ते च न दोषः परिवेदने॥"

इत्युद्वाहतत्त्वे प्रायश्चित्तम्॥

सर्व्वतोभावेन ज्ञानम्। (यथा, महाभारते। १४। १६। १२।

"स हि धर्म्मः सुपर्य्याप्तो ब्रह्मणः परिवेदने।
न शक्यं तत्त्वया भूयस्तथा वक्तुमशेषतः॥")

सर्व्वतोभावेन विचारणम्। सर्व्वतोभावेन विद्यमानत्वम्। सर्व्वतोभावेन लाभः॥

परिवेदिनी, स्त्री, (परिवेदोऽस्त्यस्यामिति। इनि + ङीप् च।) परिवेत्तृस्त्री। इति हेमचन्द्रः॥

परिवेदनीया, स्त्री, (परिविद्यते या। परि + विद् + अनीयर्।) अनूढ्ज्येष्ठे तत्कनिष्ठेन विवाहिता कन्या। अस्य प्रमाणं परिदायिशब्दे द्रष्टव्यम्॥

परिवेषः, पुं, (परितो विष्यतीति। परि + विष् + घञ्।) वेष्टनम्। परिधिः। इति मेदिनी। षे, ३७॥

"वातेन मण्डलीभूता; सूर्य्याचन्द्रमसोः करा;।
मालाभा योज्झि तनुते परिवेषः प्रकीर्त्तितः॥"

इति भरतधृतसाङ्कसाङ्कः॥

परिवेषः, पुं, (परितो विष्यतेऽनेनेति। विषिरौ आधारे + घञ्।) परिवृतिः। परिधिः। (वृहत्संहितायाम् ३४ अध्याये तल्लक्षणादिकमुक्तम्। तद्यथा,—

"सम्मार्ज्जिता रवीन्दोः किरणाः पवनेन मण्डलीभूताः।
नानावर्णाकृतयस्तन्वन्ति योज्झि परिवेषाः॥
ते रक्तनीलपाण्डुरकापोताभाभ्रबलहरिशुक्लाः।

इन्द्रायुधवरुणनिर्ऋतिसिन्धुसनेरुपितामहाग्निज्ञाताः॥
धनदः करोति मेचकमन्योऽन्यगुणाश्रयेण चाप्यन्ये।
प्रविलीयते सुदूर्म्मुरुरल्पफलः सोऽपि वायुजनः॥
चापग्निखिरजततैलक्षीरजलाभः स्वकालसम्भूतः।
अविकलवृत्तः स्निग्धः परिवेषः स्निग्धसुभिक्षकरः॥
सकलगगनानुचारी नैकाभः शतजलप्रभो रूक्षः।
असकलमकटपुरासनसङ्काटकवत्स्थितः पापः॥
स्निग्धिसगलसमेऽतिवर्षं बहुवर्णे नृपवधो भयं धूम्रे।
हरिचापनिभे युद्धान्यशोककुसुमप्रभे चापि॥
वर्णैर्नैकेन यदा बहुलः स्निग्धः सुराभ्रकाकीर्णः।
स्वर्गो सद्यो वर्षं करोति पीतश्च दीप्तार्कः॥
दीप्तविहङ्गोन्नगरुतः कलुषः सन्ध्याव्ययोत्थितोऽतिमहान्।
भयसत्त्वक्षितिदुर्गाटैर्नृपं हन्ति प्राक्षेण॥
प्रतिदिनमर्कहिमांशोरहर्निशं रक्तयोर्नरेन्द्रवधः।
परिविष्टयोरभीक्ष्णं लग्नास्तगभःक्षयोत्सहन॥
सेनापतेर्भयकरो द्विमण्डलो नातिग्रन्थकोपकरः।
त्रिप्रभृतिग्रन्थकोपं युवराजभयं नगररोधम्॥
वृद्धिस्त्रयेण मासेन विग्रहो वा यवेष्टभानिरोधं।
दीर्घालब्धाधिपयोर्जन्मर्क्षे वासुभो राज्ञः॥
परिवेषमण्डलगतो रविनयः क्षुद्रधान्यनाशकरः।
जनयति च वातवृष्टिं स्थावरकुधिरद्विषश्च॥
भौमे कुमारबलपतिसेन्यानां विद्रवोऽग्निग्रन्थभयम्।
जीवे परिवेषगते पुरोहितामात्यनृपपीड़ा॥
मन्त्रिस्थावरलोहकपरिवृद्धिश्चन्द्रजे सुवृष्टिश्च।
शुक्रे याधिस्त्रियराज्ञां पीड़ा प्रियं चान्नम्॥
क्षुदनलक्षत्यनराधिपशस्त्रभयो जायते भयं केतौ।
परिविष्टे गर्भभयं राहौ व्याधिर्नृपभयञ्च॥
युद्धानि विज्ञानीयात् परिवेषाभ्यन्तरे त्रयोर्ग्रहयोः।
दिवसज्ञतः शशिनो वा क्षुद्वृष्टिभयं त्रिषु क्रमेण॥
यानि चतुर्षु नरेन्द्रः सामात्यपुरोहितो वर्षं स्थितो;।
प्रलयमिव विद्धि जगतः पश्चादिषु मण्डलस्थेषु॥
सावयवस्य कृत्स्नात् पृथगेव समुत्थितो नरेन्द्रवधम्।
नक्षत्रात्रामथवा यदि केतोर्नोदयो भवति॥
विप्रक्षत्रियविट्शूद्रा भवेत् प्रतिपदादिषु क्रमशः।
श्रेणीपुरकोशानां पञ्चस्यादिष्वशुभकारी॥
युवराजक्षत्रियां परतश्चियुपा धैर्यस्य दोषकरः।
पुररोधो द्वादश्यां सैन्यक्षोभक्षयोदश्याम्॥
नरपतिपत्नीपीड़ां परिवेषोऽभ्युत्थितश्चतुर्दश्याम्।

परिवे

कुर्य्यात्तु पञ्चदश्यां पीड़ां मनुजाधिपस्येव ॥
नागरकाणामभ्यन्तरस्थिता यायिनाञ्च बाह्यस्था।
परिवेषमधरेखा विज्ञेया कृष्णसारागाम् ॥
रक्तः श्यामो रूक्षश्च भवति येषां पराजय-
स्तेषाम् ।
स्निग्धः श्वेतो द्युतिमान् येषां भागो जय-
स्तेषाम् ॥")

परिवेषणम् । इति हेमचन्द्रः ॥

परिवेषकः, पुं, (परिवेषतीति । परि + विष् + ण्वुल् ।) परिवेष्टा । परिवेषणकर्त्ता । तस्य लक्षणं यथा,—

"स्नातश्चन्दनचर्चितः सुवसनः सर्वो प्रसन्नाननः
स्वष्टात्मा सुभगः प्रसन्नहृदयः श्रीकाल्पपूजारतः।
स्वामिस्नेहपरः स्वकार्य्यनिपुणः प्रौढ़ो वदान्यः शुचि-
र्विप्रो वा परिवेषकस्तु कुलजस्वान्योऽपि वा
भूपतेः ॥"

इति पाकराजेश्वरः ॥

परिवेषणं, क्ली, (परि + विष् + णिच् + ल्युट् ।) वेष्टनम् । भोजनार्थं भोजनपात्रे अन्नादेर्दानम् । अथ श्राद्धे परिवेषणं मनुः ।

"पाणिभ्यान्नोपसंगृह्य स्वयमन्नस्य वर्द्धितम् ।
विप्रान्तिके पितॄन् ध्यायन् प्रणकैरुपनिक्षिपेत् ॥
अन्नस्थितिर्हतीयार्थे घृतौ वर्द्धितं पूरितं पात्र-
मिति शेषः । उपनिक्षिपेत् परिवेषणार्थम् ।
तथा च पाकस्थाल्या आकृष्य प्रथमं भोजन-
पात्रे न देयं किन्तु स्थान्यादिकं पाणिभ्यां पात्र-
समीपे भूमौ संस्थाप्य पश्चात् पाणिभ्यां पात्रा-
न्तरिताभ्यां श्राद्धं परिवेषयेत् । उभाभ्यामपि
हस्ताभ्यामाकृष्य परिवेषयेदिति मत्स्यपुरा-
णात् । यत्तु श्राद्धे परिवेषणन्तु दक्षिणपाणि-
मात्रेणेत्याकाङ्क्षानभिधानादिति मैथिलोक्तं तन्न ।
शकृन्न पाणिना दत्तं शूद्रादत्तं न भक्षयेदित्यादि
पुराणीयेन शकृत्पाणिदत्तशूद्रादत्तभक्षणनिषेधेन
तस्मात्परिवेषणस्यापि निषिद्धत्वात् पाणिभ्या-
मपि पात्रान्तरितं कृत्वा देयम् ।
हस्तदत्तान्न ये स्नेहा लवणं भक्षणानि च ।
दातारं नोपतिष्ठन्ते भोक्ता भुङ्क्ते च किल्बिषम् ॥
तस्मादन्तरितं देयं पर्णेनाथ दलेन वा ।
प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥
इति वह्निपुराणवचनेन सामान्यतोऽभिधानात् । पिट-
भक्तिनरङ्गिरणामप्येवम् । मनुः ।
गुणांश्च सूपशाकान्नान् पयो दधि घृतं मधु ।
विन्यसेदुदगग्रतः सम्यगभूमावेव समाहितः ॥
आमिषं पायसान्नञ्च भोक्तुर्दक्षिणतो न्यसेत् ।
भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च ॥
शुद्धानि चैव मांसानि पानानि सुरभीणि च ।
उपनीय च तत् सर्व्वं शनकैः सुसमाहितः ॥
परिवेषयेत् प्रयतो गुणान् सर्व्वान् प्रचोदयन् ।
गुणान् उपकरणानि भूमावेव न तु भक्षणादि-
पात्राणि अन्नादि पात्रोपरि निक्षिपेत् ।" इति
श्राद्धतत्त्वम् ॥

परिवेषिका, स्त्री, (परिवेषति या । परि + विष् + ण्वुल् । स्त्रियां टाप् अत इत्वञ्च ।) परिवेषणकर्त्री । तस्या लक्षणं यथा,—

"स्नाता विशुद्धवसना नवधूपिताङ्गी
कर्पूरसौरभसुखी नयनाभिरामा ।
विम्बाधरा गिरसि बद्धसुगन्धिपुष्पा
मन्दस्मिता क्षितिभृतां परिवेषिका स्यात् ॥"

इति पाकराजेश्वरः ॥

परिवेष्टितं, त्रि, सर्व्वतोभावेन वेष्टितम् । तत्पर्य्यायः । परिक्षिप्तम् २ वलयितम् ३ निवृतम् ४ परिष्कृतम् ५ परीतम् ६ । इति हेमचन्द्रः ॥

परिव्याधः, पुं, (परि सर्व्वतोभावेन विध्यतीति । परि + व्यधौ ताड़े + "ग्याद्व्यधेति ।" ३ । १ । १४१ । इति घञ् ।) अम्बुवेतसः । हुमोत्पलः । इत्यमरः । २ । ४ । ३०, ४० ॥

परिव्रज्या, स्त्री, (परि + व्रज + भावे क्यप् । स्त्रियां टाप् ।) तपस्या । इति हेमचन्द्रः । १ । ८१ । (इतस्ततो भ्रमणम् । यथा, मनुः । १० । ५२ ।

"वासांसि मलनेलानि भिन्नभाण्डेषु भोजनम् ।
काणाप्यसमलङ्कारः परिव्रज्या च नित्यशः ॥"
"लौहवलयादि चालङ्करणं सर्व्वदा च भ्रमण-
शीलत्वम् ॥" इति कुल्लूकभट्टः ॥)

परिव्राजः, पुं, (परित्यज्य सर्व्वान् विषयभोगान् गृहाश्रमाद् व्रजतीति । परि + व्रज् + संज्ञायां कर्त्तरि घञ् ।) परिव्राट् । इत्यमरटीकायां रमानाथः ॥

परिव्राजकः, पुं, (परिव्राज + स्वार्थे कन् । परिव्रजतीति । परि + व्रज् + ण्वुल् वा ।) परिव्राट् ॥ (यथा, गोः रामायणे । ३ । ५५ । २ ।

"स परिव्राजकच्छद्मा महाकायगिरोधरः ।
प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः ॥")

परिव्राजिः, स्त्री, (परि + व्रज् + णिच् । इन् ।) श्रावणी । इति राजनिर्घण्टः ॥ घुनकुड़ी इति भाषा ॥ (श्रावणीभक्तकपर्णीशब्दयोरस्या विशेषो ज्ञेयः ॥)

परिव्राट्, [ज्] पुं, (परित्यज्य सर्व्वं विषय-भोगं गृहस्थाश्रमाद् व्रजति गच्छतीति । परि + व्रज् + क्विप् दीर्घश्च ।) चतुर्थाश्रमी । तत्पर्य्यायः । भिक्षुः २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ । इत्यमरः । २ । ७ । ४२ ॥ सन्न्यासी ६ श्रमणः ७ । इति जटाधरः ॥ परिव्राजकः ८ पराशरी ९ व्रजकः १० । इति शब्द-रत्नावली ॥ तस्य लक्षणं यथा, गरुड़पुराणे ।

"सर्व्वारम्भपरित्यागो भैक्ष्याशी ब्रह्मचारिता ।
निष्परिग्रहता द्रोहसमता सर्व्वजन्तुषु ॥
प्रियाप्रियपरित्यक्तः सुखदुःखविकारिता ।
संत्यक्ताभ्यन्तरं शौचं सुखदुःखविकारिता ॥
सर्व्वेन्द्रियसमाहारो धारणा ध्याननित्यता ।
भावसंशुद्धिरित्येष परिव्राड्वर्य्य उच्यते ॥"

परिशङ्कनीयः, त्रि, (परिशङ्क्यते इति । परि + शङ्क + अनीयर् ।) सर्व्वतोभावेन शङ्काविषयः । यथा,

"श्राद्धं सुचिन्तितमपि प्रतिचिन्तनीय-
मारोधितोऽपि नृपतिः परिशङ्कनीयः ।
अङ्के स्थितापि युवतिः परिरक्षणीया
श्राद्धे नृपे च युवतौ च कुतो विश्वस्तत्वम् ॥"

इत्युद्भटः ॥

परिशिष्टं, क्ली, (परितः शिष्टः । शिष् + क्तः ।) परिशेषविशिष्टम् । अवशिष्टार्थबोधकग्रन्थः । इति हेमचन्द्रः । २ । १७१ ॥ (यथा, छान्दोग-परिशिष्टम् । गृह्यपरिशिष्टमित्यादि ॥)

परिशुष्कं, क्ली, (परितः शुष्कम् । शुष् + क्तः ।) मांसयञ्जनभेदः । यथा,—

"मांसं बहुघृतैर्भृष्टं सिक्थकेक्षाम्बुना सुधूः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥"

इति शब्दचन्द्रिका ॥

सर्व्वतोभीरसे त्रि ॥ (यथा, रैः रामायणे । २ । ५६ । ५ ।

"उपनद्योदका नद्यः पल्वलानि सरांसि च ।
परिशुष्कपलाशानि वनान्युपवनानि च ॥")

परिशोधः, पुं, (परि + शुध् + भावे घञ् ।) परिशोधनम् । सर्व्वतोभावेन शुद्धिः ॥

परिशोषः, पुं, (परि + शुष् + भावे घञ् ।) सर्व्वतोभावेन शुष्कता । (यथा, गोः रामायणे । ४ । १५ । ३४ ।

"वायुर्कपरिपीतास्बुर्विपरिज्ञानपङ्कजः ।
तड़ाग इव कालेन परिशोषं गमिष्यति ॥")

परिश्रमः, पुं, (परि + श्रम् + घञ् । न वृद्धिः ।) परिश्रान्तिः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ प्रयासः ५ आयासः ६ आयामः ७ । इति हेमचन्द्रः । २ । २३३ ॥ (यथा, रघुः । १ । ५८ ।

"तमातिथ्यक्रियाशान्त-रथक्षोभपरिश्रमम् ।
पप्रच्छ कुशलं राज्ये राज्याश्रमसुनिं मुनिः ॥")

परिश्रयः, पुं, (परिश्रयत्यस्मिन् इति । परि + श्रि + "हरत्च ।" ३ । ३ । ५६ । इति अच् ।) सभा । (भावे अच् ।) आश्रयः । इति मेदिनी । ये । १२२ ॥

परिश्रान्तः, त्रि, (परि + श्रम + कर्म्मणि क्तः ।) सर्व्वतोभावेन श्रान्तियुक्तः । (यथा, महा-भारते । १ । ४६ । २६ ।

"परिश्रान्तो वयःस्थश्च षष्टिवर्षो जरान्वितः ।
सुधिनः स महाराज्यं ददर्श मुनिसत्तमम् ॥")

स्त्री । गायत्रीस्वरूपा भगवती । यथा, देवी-भागवते । १२ । ६ । ६३ ।

"पावनी पादसहिता पेशला पवनाग्निनी ।
प्रजापतिः परिश्रान्ता पर्यंतस्तनमण्डला ॥")

परिश्रुतः, त्रि, (परि + श्रु + क्तः ।) सर्व्वतोभावेन श्रवणविशिष्टः ॥

परिश्लेषः, पुं, (परि + श्लिष + भावे घञ् ।) आश्लेषः ॥

परिषत्, [द्] स्त्री, (परितः सीदन्त्यस्याम् । परि + सद् + अधिकरणे क्विप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) सभा । इत्य-मरः । २ । ७ । १५ ॥ (यथा, गोः रामा-यणे । २ । १३ । १६ ।

परिष्क

"यादृशी परिषत् सीते ! दूतत्वायं तथाविधः ।
ध्रुवमद्यैव राजा मां यौवराज्येऽभिषेक्ष्यति ॥"
परिषच्च खलु द्विविधा, ज्ञानवती मूढ़परिषच्च, सैव द्विविधा सती त्रिविधा पुनरनेन कारणविभागेन सुहृत्परिषत्, उदासीनपरिषत्, प्रतिनिविष्टपरिषच्चेति । तत्र प्रतिनिविष्टायां परिषदि ज्ञानविज्ञानवचनप्रतिवचनप्राप्तिसम्पन्नायां मूढ़ायां वा न कथञ्चित् केनचित् सह जल्पो विधीयते । मूढ़ायान्तु सुहृत्परिषदि उदासीनायां वा ज्ञानविज्ञानमन्तरेणाप्यदीप्तयशसा महाजनद्विष्टेन सह जल्पो विधीयते । तद्विधेन च सह कथयता आविद्धदीर्घसूत्रसङ्कलैर्वाक्यैरुत्कैः कथयितव्यम् । अतिक्लृप्तं सुहृर्मुहुरपहसता परं रूपयता च परिषदमाकारैरुवनस्यास्य वाक्यावकाशो न देयः । कथञ्चिदेव ब्रुवन् वक्तव्यो नोथन इति । अथवा पुनर्हीनां ते प्रतिज्ञेति पुनराक्षेप्यमाणः प्रतिवक्तव्यः । परिसंवत्सरोभव शिक्षस्व तावत् । पर्य्याप्तमेतावत्ते । सकृदपि हि पारिप्लेपिकं निहनं निहनमाहुरिति । नास्य योगः कर्त्तव्यः कथञ्चिदप्येवं श्रेयसा सह विग्रह्य वक्तव्यमित्याहुरित्येके । सर्व्वथैव ज्यायसा सह विग्रहं प्रशंसन्ति कुशलाः । प्रत्यवरेण तु सह समानाभिमतेन वा विग्रह्य जल्पता सुहृत्परिषदि कथयितव्यम् । अथवाप्युदासीनपरिषदि अनवधानश्रवणज्ञानविज्ञानोपधारणवचनप्रत्तिसम्पन्नायां कथयता सावहितेन परस्य सादृगुण्यदोषबलमवेक्षितव्यम् । समवेक्ष्य च यत्नेन श्रेष्ठं मन्येन नास्य तत्र लब्धं योजयेन् अनाविष्कृतमयोगं कुर्व्वन् । यत्र त्वेनमवरं मन्येन तत्रैवैनमासु निगृह्णीयात् ।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
परिषत्त्वं यथा, प्रायश्चित्तविवेके ।
"एकविंशतिसंख्याकैर्मीमांसान्यायपारगैः ।
वेदाङ्गकुशलैश्चैव परिषत्त्वं प्रकल्पयेत् ॥"
परिषद्, पुं, (परितः सीदन्तीति । परि + सद् + क्विप् । "सदिरप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) पारिषद्यः । अनुचरः । इति भरतः ज्ञानद्विरूपकोषः ॥
परिषद्य, पुं, (परिषदमर्हतीति । परिषद् + यत् ।) परिषद्वलः । इति भरतः ज्ञानद्विरूपकोषः ॥
परिषद्वलः, पुं (परिषदस्त्यस्तीति । परिषद् + "रजःकृष्यासुतिपरिषदो वलच् ।" ५ । २ । ११९ । इति वलच् ।) सभासदः । पारिषद्यः । इति शब्दरत्नावली ॥ (यथा, भट्टिः । ४ । १२ ।
"ब्राह्मणान्यज्ञदीक्षाश्च सुहृदः परिपूजयन् ।
परिषद्वलाञ्जघानाशु क्षीराट नैकटिकाश्रमान् ॥")
परिष्कन्दः, त्रि, (परिष्कन्दतीति । परि + स्कन्दिर् गतिशोषणयोः + घञ् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वम् ।) परिस्कन्दः । परपुष्टः । इत्यमरटीकायां रमानाथः ॥
परिष्कक्षः, त्रि, (परि + स्कन्द + क्तः । दस्य तस्य च षः । "परेश्च ।" ८ । ३ । ७४ । इति षत्वं णत्वञ्च ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥

परिस

परिष्कारः, पुं, (परिष्क्रियतेऽनेन । परि + कृ + "सम्परिभ्यां करोतौ भूषणे ।" ६ । १ । १३७ । इति सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) अलङ्कारः । इत्यमरः । २ । ६ । १०१ ॥ संस्कारः । शुद्धिः ॥
परिष्कृतः, त्रि, (परिष्क्रियते स्म इति । परि + कृ + क्तः । "सम्परिभ्यामिति ।" सुट् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वञ्च ।) भूषितः । अलङ्कृतः । इत्यमरः । २ । ६ । १०० ॥ वेष्टितः । इति हेमचन्द्रः ॥ आहितसंस्कारः । इति वैद्यशब्दटीकायां भरतः ॥
परिष्कृतभूमिः, स्त्री, वेदिः । परिष्कृता यज्ञार्थं परिषेचनाय यज्ञोपाचासादनाय चाहितसंस्कारा भूमिः । इत्यमरभरतौ ॥
परिस्तोमः, पुं, (परिस्तृणाति स्तृ + मन् । ततः षत्वम् । केचित्तु "परेःस्तौतिं प्रति अनुपसर्गत्वात् न षः ।" इत्युक्ता परिस्तोम इति कल्पयन्ति ।) परिस्तोमः । इत्यमरटीकायां स्वामी ॥
परिष्वङ्गः, पुं, (परिष्वजनम् । परि + स्वञ्ज + घञ् । "परिनिवीति ।" ८ । ३ । ७० । इति षत्वम् ।) आलिङ्गनम् । इत्यमरः । ३ । २ । ३० ॥ (यथा, गीतः रामायणे । २ । ४ । ८८ ।
"अङ्गदप्रमुखानाञ्च हरीणां रामदर्शनम् ।
चकमतः परिष्वङ्गो राघवेण महात्मना ॥")
परिसभ्यः, पुं, सर्व्वतोभावेन सभायां साधुः इत्यर्थे यत् प्रत्ययः ॥ परिषद्यः । सभासदः ॥
परिसरः, पुं, (परिसरत्यत्र । परि + सृ + "पुंसीति ।" ३ । ३ । ११८ । इति घः ।) पर्य्यन्तभूः । नदीनगरपर्व्वतादेरुपान्तभूमिः । इत्यमरभरतौ ॥ (यथा, मेघदूते । ६६ ।
"मन्दाकान्तैः स्नपनपरिसरच्छिन्नजम्बूवनैश्च छायैर्नेयो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥")
सत्यः । विधिः । इति मेदिनी । रे । २७१ ॥
परिसर्पः, पुं, (परि समन्तात् सर्पणम् । परि + सृप् + घञ् ।) परिक्रिया । परिखादिना वेष्टनम् । समन्तात् सर्पणम् । इत्यमरभरतौ ॥ (सर्पविशेषः । यथा, सुश्रुते कल्पस्थाने ४ अध्याये । तत्र दर्व्वीकराः । "गन्धधूकः, परिसर्पः खरडकः, ककुदः, पद्मो महापद्मः ॥" इति । कुष्ठविशेषः । यथा, तत्रैव निदानस्थाने ५म अध्याये । "क्षुद्रकुष्ठान्यपि स्थूलारुष्कं महाकुष्ठमेककुष्ठञ्चर्म्मदलं विसर्पः परिसर्पः किण्ठ विचर्चिका किटिभं पामा रकसा चेति ॥")
परिसर्य्या, स्त्री, (परिसरणमिति । सृ गतौ + "परिचर्य्या परिसर्य्येति ।" ३ । ३ । १०१ । इत्यस्य वार्त्तिके इति निपातनात् सिद्धम् ।) पर्य्यालोचनम् । सर्व्वतोगमनम् । भूमौ सर्व्वतोभ्रमणम् । इति सर्व्वस्वम् ॥ अन्वेषणम् । इति केचित् । इत्यमरभरतौ ॥

परिस्रु

परिस्कन्दः, पुं, (परिस्कन्दतीति । परि + स्कन्द + घञ् । "परेश्च ।" ८ । ३ । ७४ । इति षत्वाभावः ।) परपुष्टः । परेण प्रतिपालितः । इत्यमरः । २ । १० । १८ ॥
परिस्कन्दः, पुं, (परि + स्कन्द + क्तः । "परेश्च ।" ८ । ३ । ७४ । इति षत्वाभावः ।) परिस्कन्दः । इत्यमरटीकायां रायमुकुटः ॥
परिस्तोमः, पुं, (परि स्तृयते प्रशस्यते नानावर्णत्वात् । परि + स्तृ + "अन्येभ्योऽपीति ।" मन् । यद्वा परिगतः स्तोमोऽत्र वर्णस्तोमत्वात् ।) गजपृष्ठस्थचित्रकम्बलः । इत्यमरः । २ । ८ । ४२ ॥ हातीर पिठेर झुल इति भाषा ॥
परिस्पन्दः, पुं, (परि + स्पन्द + अधिकरणे घञ् ।) कुसुमप्रकरादेः पत्रावल्यादेश्च रचना । इत्यमरः । २ । ६ । १३७ ॥ परिकरः । परिवारः । इति हेमचन्द्रः । ३ । ६७६ ॥ (भावे + घञ् ।) सर्व्वतोभावेन स्पन्दनञ्च ॥ (महत्त्वम् । यथा, महाभारते । १ । १५४ । ८ ।
"अहमेनं हनिष्यामि प्रेक्षन्त्याः ते सुमध्यमे ! ।
नायं प्रतिबलो भीरु ! राक्षसापसदो मम ।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः ॥")
परिस्पन्दनं, क्लीं, (परि सर्व्वतोभावेन स्पन्दते इति । परि + स्पन्द + ल्युट् ।) सर्व्वतोभावेन कम्पनम् । यथा । कोऽपि परिस्पन्दनसाधनसाध्यः । यथा गमनादिः । कोऽप्यपरिस्पन्दनसाधनसाध्यः । यथा अवस्थानादिः । इति गोयीचन्द्रः ॥
परिस्पन्दमानः, त्रि, (परिस्पन्दते इति । परि + स्पन्द + शानच् ।) सर्व्वतोभावेन कम्पमानः । यथा । "अनवरतपरिस्पन्दमाना परिमितपवनादिपरमाणुचेतनसंयोगसन्तानजन्यतान्तीनामविरतमेवोपरमात् ।" इति सामान्यलक्षणायां शिरोमणिः ॥
परिस्यन्दः, पुं, (परि + स्यन्द + भावे घञ् । अप्राणिकर्त्तृकत्वे वा घत्वम् ।) परिस्यन्दः । इत्यमरटीकायां भरतः ॥
परिस्रुत्, क्लीं (परिस्रवतीति । परि + स्रु + क्विप् तुक् च ।) वरुणालया । मदिरा । इत्यमरः । २ । १० । ३६ ॥ (यथा, ऋग्वेदे । ३ । २ । ७ ।
"गर्भो परिस्रुतः कुम्भ आदधः कलशीरयुः ॥")
सर्व्वतोभावेन स्रवणे त्रि । यथा, ऋग्वेदे । ८ । ३६ । १० ।
"त्वामापः परिस्रुतः परियन्ति समुद्रवो यथा ।
मन्यके समे ॥")
परिस्रुतः, त्रि, (परितः स्रूयते स्म । सु स्रवणे + "गत्यर्थेति ।" ३ । ४ । ७२ । इति क्तः ।) स्रवयुक्तः । सर्व्वतोभावेन स्रुतः । इति मेदिनी । ते । २०६ ॥ (वाक्यालङ्कारस्या विवृतिर्नाम संज्ञा । यथा, यजुर्व्वेदे । २ । ३४ ।
"ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ॥")
परिस्रुता, स्त्री, (परितः स्रूयते स्मेति । परि + सु +

त्वात् तथात्वम्।) वारुणी। मदिरा इति मेदिनी। ते। २०६ ॥

परिहारः, पुं, (परिह्रियतेऽनेनेति। परि + हृ + घञ्।) अवज्ञा। अनादरः। इति शब्दरत्नावली ॥ ("परिहारो नाम तस्यैव दोषवचनस्य परिहरणं यथा नित्यमात्मनि शरीरस्थे जीवलिङ्गान्युपलभ्यन्ते तस्य चापगमान्नोपलभ्यन्ते तस्मादयं शरीरादात्मा नित्यः शरीरादात्मेति।" इति चरके विमानस्थाने ऽष्टमेऽध्याये ॥ त्यागः। परिवर्जनम्। यथा, राजतरङ्गिण्याम्। ४। ६७६।

"दूर्वृत्तस्य प्रभोरस्य परिहारात् न मेघजम् ॥"

गोपनम्। यथा, शाकुन्तलायां १ अङ्के।

"कथमिदानीमात्मानं निवेदयामि कथं वा आत्मनः परिहारं करोमि ॥" विजिनदयादिकम्। यथा, मनुः। ७। २०१।

"जित्वा सम्यग्जयेद् देवान् ब्राह्मणांश्चैव धार्म्मिकान्।
प्रदानात् परिहाराच्च स्थापयेदभयानि च ॥"

स्थानविशेषः। यथा, मनुः। ८। २३७।

"धनुः शतं परीहारो ग्रामस्य स्यात् समन्ततः॥"

अत्र कुल्लूकभट्टः। "चतुर्हस्तो धनुः शब्दो यष्टिस्तस्याः पातः प्रक्षेपो ग्रामसमीपे सर्व्वासु दिक्षु चत्वारि हस्तशतानि त्रीन् वा यष्टिप्रक्षेपान् यावत् पशुप्रचारार्थं शस्यवपनादिसंरोधपरिहारः कार्य्यः ॥")

परिहार्य्यः, पुं, (परि + हृ + ण्यत्।) पारिहार्य्यः। वश्यः। इति भरतहिरूपकोषः ॥ परिहरणीये त्रि ॥ (यथा, शाकुन्तलायाम् १ अङ्के।

"न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते॥")

परिहासः, पुं, (परि + हस् + भावे घञ्।) परिहसनम्। ठाट्टा इति भाषा। परीहासः। यथा। "परिहासः केलिसुखः केलिर्देवननर्म्मणी।" इति त्रिकाण्डशेषः ॥ तत्पर्य्यायः। क्रीड़ः २ देवना ३। इति शब्दरत्नावली ॥ वञ्चना ४। इति जटाधरः ॥ (यथा, शाकुन्तलायाम् २ अङ्के।

"परिहासविजल्पितं सखे! परमार्थेन न गृह्यतां वचः ॥")

परीक्षकः, त्रि, (परि + ईक्ष + ण्वुल्।) निरूपकः। (यथा पञ्चतन्त्रे। १। ८४।

"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")

तत्पर्य्यायः। कारणिकः २। इत्यमरः। ३। १। ७ ॥

परीक्षते अवधारयति प्रमाणेन। यथा, वह्निना परीक्षकः स्वर्णस्य स्वर्णकारः। कारणैर्हेतुभिश्चरति कारणिकः इति भरतः ॥

परीक्षणं, क्लीं, (परि + ईक्ष + ल्युट्।) परीक्षा। राज्ञा धर्म्मकामार्थभयैरमात्यादिभावतत्त्वनिरूपणम्। इति भरतः। यथा,—

"भेदोपजापापधर्म्मान्नाद्येत् परीक्षणम्।"

इत्यमरः। २। ८। २१ ॥

सर्व्वतोभावेन दर्शनञ्च ॥

परीक्षा, स्त्री, (परितः ईक्ष्यतेऽनया। परि + ईक्ष + "गुरोश्च हलः।" ३। ३। १०३। इति अः। ततष्टाप्।) दिव्यम्। अथ दिव्यानि। तत्र बृहस्पतिः।

"धटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम्।
षष्ठश्च तण्डुलः प्रोक्तः सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम्।
दिव्यानीतानि सर्व्वाणि निर्दिष्टानि स्वयम्भुवा ॥"

अथ किन्निर्दिव्यम्।

तत्र मानुषप्रमाणानिर्णयस्यापि निर्णायकं यन्निर्दिव्यमिति लोकप्रसिद्धम्। यत्तूद्यतेरपि प्रपथानामस्ति तथापि कालान्तरनिर्णायकत्वेन तेषां भेदात्। अपिना मानुषप्रमाणसत्त्वेऽपि यत्र धटादीनामङ्गीकारस्तत्रापि तद्भवति इति सूचितम्। अतएव लिखितसाक्षिभुक्तिलक्षणत्रिविधमानुषप्रमाणभिन्नप्रमाणं यन्निर्दिव्यं प्रमाणं तत् प्रमाणं न भावैकगोचरं किन्तु भावाभावाविशेषेण गोचरयतीति। तत्र महाभियोगेषु दिव्यान्याह याज्ञवल्क्यः।

"तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये।
महाभियोगेष्वेतानि धीर्घकर्म्मेऽभियोक्तरि ॥"

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये। महाभियोगेषु महापातकादिगुरुतराभियोगेषु। धीर्घकस्य इति धीर्घकं प्रधानं व्यवहारस्य चतुर्थपादो जयपराजयलक्षणः। तेन दक्षो लक्ष्यते तत्र निपुणीति धीर्घकस्य; तत्प्रयुक्तदक्षभागीत्यर्थः। महाभियोगात् स्मरयति कालिका पुराणम्।

"परदाराभिगमने च चौर्य्यागम्यागमेषु च।
महापातककर्म्मसु स्यादिव्यं नृपसाहसे ॥
प्रतिपत्तौ विवादे च प्रमाणस्य स्थापने कृते।
तत्रैव स्थापयेद्दिव्यं शिरःपूर्व्वं महीपतिः ॥
परदाराभिगमने च बहवो यत्र वादिनः।
शिरोहीनं भवेद्दिव्यमात्मनः शुद्धिकारणात् ॥"

पितामहः।

"शिरःस्थायिविहीनानि दिव्यानि परिवर्জ্জयेत्।
चत्वारि तु धटादीनि कोशश्चैवाशिराः स्मृतः ॥"

महाभियोगेतरेऽपि कोशमाह स्मृतिः। कोशमल्पे च दापयेत्। याज्ञवल्क्योनाभियोक्तुर्वादिनः शिरोवर्त्तित्वाभिधानादभियोज्यस्य दिव्यकर्त्तृत्वं प्रतिपादितम्। अत्रमाह कात्यायनः।

"न कञ्चिदभियोक्तारं दिव्येषु विनियोजयेत्।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥"

प्रत्यर्थिस्वीकारेणार्थिनोऽपि दिव्यमाह याज्ञवल्क्यः।

"कथा वाक्यतरः कुर्य्यादितरो वर्म्मयेच्छिरः।
विनापि धीर्घकान् कुर्य्यान्नृपदोषेऽथ पातके ॥"

इतरोऽभियुक्तः शिरः शारीरदक्षमर्थदक्षं वा वर्म्मयेत् स्त्रीबालार्त्तयोः। बृहस्पतिः।

"क्षेत्रात्क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः।
विधिदृष्टस्य दिव्यस्य न भेदो जायते क्वचित ॥"

भेदः सत्यादेरपीत्यम्। यत्तु कात्यायनवचनम्।

"क्रिया न वैदिकी प्रोक्ता विद्यमानेषु साक्षिषु।
लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः ॥"

इति तद्गुणान्वितसाक्षिसत्त्वे। यथा व्यासः।

"मणिमन्त्रौषधिबलात् प्रदत्तं वा विषादिना।
विसंवदेद्दिव्यमपि न तु साक्षी गुणान्वितः ॥"

अतएव नारदः।

"युक्तिव्यवसनात्तु प्रपथैर्नैनमर्हयेत् ॥"

एनं विपर्य्ययमाप्तमर्थं अर्हयेत् पीड़येत्। निर्द्धारयेदिति यावत् ॥*॥ प्रपथानाह नारदः।

सत्यवाहनशस्त्राणि गोबीजकनकानि च।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्वोच्छिष्टरांस पुत्राणां दारानां सुहृदान्तथा।
अभियोगेषु सर्व्वेषु कोषपानमथापि वा ॥
इत्येते प्रपथाः प्रोक्ता मनुना स्वयमेव तु ॥"

बृहस्पतिः।

"यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः।
अयथोक्तप्रदत्तन्तु न शुद्धं साध्यसाधने ॥
अदेशकालदत्तानि बहिर्वादिकृतानि च।
अभिचारं सदा ह्येवं कुर्व्वन्तीह न संशयः ॥"

बहिर्वादिकृतमभियोक्तारं विना कृतम्। अनेन प्रायिकं आत्मशुद्धिपराणामभियोक्तारं विनापि दिव्यविधानात्।

तथा च नारदः।

"राजभिः शुद्धिनाशाय निर्दिष्टानाञ्च दस्युभिः।
आत्मशुद्धिपराणाञ्च देयं दिव्यं शिरो विना ॥*॥"

अथ दिव्यदेशाः। कात्यायनः।

"इन्द्रस्थानेऽभियुक्तानां महापातकिनां गृहात्।
नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रवृत्तानां दिव्यं देयं चतुष्पथे।
अन्येषु च कार्य्येषु सभामध्ये विदुर्बुधाः ॥"

इन्द्रस्थाने इन्द्रध्वजस्थाने ॥ * ॥

अथ दिव्यकालाः। पितामहः।

"त्रैयो मार्गशिरश्चैव त्रैशाखश्च तथैव हि।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
घटः सर्व्वर्त्तुकः प्रोक्तो वाते वाति विवर्জ্জयेत्।
अग्निः शिशिरहेमन्तवर्षासु परिकीर्त्तितः ॥
शरदृतौ तु सलिलं हेमन्ते शिशिरे विषम्।
कोषस्तु सर्व्वदा देयस्तुला स्यात् सार्व्वकालिकी ॥"

मिताक्षरायां नारदः।

"न शीते नोष्णशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम्।
न प्रावृषि विषं दद्यात् प्रवाते न तुलां नृप ॥"

नारदः।

"पूर्व्वाह्णे सर्व्वदिव्यानां प्रदानं परिकीर्त्तितम्।
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन ॥"

शीते हेमन्तशिशिरवर्षासु। उष्णकाले ग्रीष्मशरदोः। वर्षासु विषनिषेधश्चतुर्थवातिरिक्तपरः। वर्षे चतुर्थवा मासा इति वक्ष्यमाणनारदवचनात्। तण्डुलादीनान्तु विशेषानभिधानात् सार्व्वकालि-

कत्वम् । अत्र विषे विशेषतो वर्षानिषेधात् वक्ष्यमाणवचने सिंहस्थरवावेव परीक्षामात्रनिषेधाच्च दिव्यान्तरं सिंहेतरत्र वर्षास्वपि कुर्व्वीत ।

अनोयाय्यायने हरौ सुप्ते सर्व्वकर्म्माणि वर्ज्जयेदित्यस्य न विषयः । ज्योतिषे ।

सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा ।
मलमासे न कर्त्तव्या परीक्षा जयकाङ्क्षिणा ॥
रविशुक्रौ गुरौ चैव न शुक्रोऽस्तङ्गते पुनः ।
"सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः ॥
नाष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणं ।
न परीक्षा विवाहस्थ शुनिभौमदिने तथा ॥
रविशुक्रौ गुरौ चैवेत्यत्र शस्यत इति शेषः ॥
तथा च दीपिकायाम् ।
"नो शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेन्दौ
विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मनाशासु चाथ ।
नाड़ीनक्षत्रहीने गुरुरविरजनीनाथतारा-विशुद्धौ
प्रातः कार्य्या परीक्षा हितसुखरयुहांशोदये शुक्लपक्षे ॥" * ॥

पितामहः ।

"प्रत्ययं दापयेद्दिव्यं राजा वाधिक्रतोऽपि वा ।
ब्राह्मणानां श्रुतवतां प्रकृतीनान्तथैव च ॥"
ब्राह्मणानां प्रकृतीनाञ्च प्रत्ययं दिव्यं दापयेदित्यन्वयः । प्रकृतयस्तु ।
"स्वाम्यमात्यः सुहृत् कोषो राष्ट्रदुर्गबलानि च ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेति
अमरसिंहोक्ताः ॥ * ॥

अथ दिव्यविशेषाधिकारिणः । नारदः ।

"ब्राह्मणस्य घटो देयः क्षत्रियस्य तुलाशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव तु ॥
साधारणः समस्तानां कोषः प्रोक्तो मनीषिभिः ।
विषवर्ज्जं ब्राह्मणस्य सर्व्वेषान्तु तुला स्मृता ॥"
यत्तु पुनरनेन ।

"सत्रतानां भृशार्त्तानां व्याधितानां तपस्विनाम् ।
स्त्रीणाञ्च न भवेद्दिव्यं यदि धर्म्मत्वमेक्षितः ॥"
इति स्त्र्यादीनां दिव्यं निषिद्धं तत्तुलेतरविषयकमिति शूलपाणिः ॥ मित्राक्षरायान्तु ।

स्त्रीपुंसयोर्व्विवादेन स्त्रीणां दिव्यमिति तथा वान्यतरः कुर्य्यादिति विकल्पनिषेधार्थमेतदुक्तं भवति । अवश्याभियोगेषु स्त्र्यादीनामभियोक्तृत्वे अभियोज्यानामेव दिव्यं दातव्यमभियोगे योज्यत्वेऽपि अभियोक्तृणामेव दिव्यं परस्परामियोगे तु विकल्प एव तत्रापि तुलेवेति नियम्यते । तथा महापातकादिदुष्टाभियोगे तु स्त्र्यादीनां तुलैव । यथा याज्ञवल्क्यः ।

"तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ।
अग्निर्जलं वा शूद्रस्य यथा स्वप्न विषञ्च वा ॥"
स्त्रीमात्रं जातिवयोऽवस्थाविशेषानादरेण बालव्याधोढ़व्याङ्गव्यजातिविशेषानादरेण वृद्धोऽप्रीतिपारगः । एतच्च वचनं सर्व्वदिव्यसाधारणेषु मार्गशिरशुक्लैकादशीप्रभृतिषु स्त्र्यादीनां सर्व्वदिव्यसमवधानविधाने नियमार्थकतयार्थवत् । न च सर्व्वकालं स्त्रीणामनुज्ञेति ।

"स्त्रीणान्तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
घटकोषादिभिस्तासामन्यत्वञ्च विचारयेत् ॥"
इति विषसलिलव्यतिरिक्तघटकोषादिभिः सृष्टिविधानात् । एवं बालादिष्वपि योजनीयम् । तथा ब्राह्मणादीनामपि न सार्व्वकालिकतुलादिनियमः ।

"सर्व्वेषामेव वर्णानां कोषाक्कुद्धिर्विधीयते ।
सर्व्वाण्येतानि सर्व्वेषां ब्राह्मणस्य विषं विना ॥"
इति पितामहस्मरणात् ।

तस्मात् साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्व्वेषाम् । तथा हि वर्षास्वग्निरेव सर्व्वेषां हेमन्तशिशिरयोस्तु चक्रियादीनां चयानां अग्निविषयोर्विकल्पः ब्राह्मणस्य तु अग्निरेव न कदाचिद्विषं ब्राह्मणस्य विषं विनेति निषेधात् । ग्रीष्मशरदोस्तु सलिलमेव ।

येषां कुष्ठादीनान्तु विशेषेणाग्न्यादिनिषेधः ।

"कुष्ठिनां वर्ज्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषन्तु परिवर्ज्जयेदिति वचनात्तेषामग्न्यादिकालेऽपि साधारणं तुलाद्यमेव दिव्यं भवति । यथा । तोयमग्निर्विषञ्चैव दास्यं बलिनां वृणामिति स्मरणात् । दुर्ब्बलानामपि सर्व्वथा विषनिषेधात् तत्तत्कालानतिक्रमेण व्यवस्थोऽवस्थाश्रितानि दिव्यानि देयानि । अत्र च यस्य यानि विशेषसामान्यपर्य्युदस्तेतरविहितानि तानि मुख्यकल्पानुकल्परूपाणि वेदितव्यानि । यथा, ब्राह्मणस्य घटो मुख्यः कोषस्त्वनुकल्पः । ज्वलार्यो व्यापत्कल्पो प्रागुक्तनारदवचने तत्कारस्मृतिर्मुख्यकल्पादित्यं न तु प्रशस्ततमादित्यमिति । एवञ्चात्रापि व्ययोक्तप्रशस्तन्तु न प्राक्तं साधयाधने इति प्रागुक्तं बोधम् । स्मृतिः ।

"अवश्याभियुक्तानां घटाद्यानि विनिर्द्दिशेत् ।
तत्तुलैव कोषश्च ग्राह्यश्चैव न संशयः ॥"
अवश्यमोऽत्र निश्चयः । शिरोवर्त्तिनीति केचित् ।
इति व्यवहारदीपिका ॥ कात्यायनः ।

"अस्वप्याधमदासानां म्लेच्छानां पापकारिणाम् ।
प्रतिलोमप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि समये तेषु निर्द्दिशेत् ॥"
तत्प्रसिद्धानि सर्पघटादीनि । तथा,—

देशकालाविरोधं तु यथायुक्तं प्रकल्पयेत् ।
अन्येन कारयेद्दिव्यं विधिरेष विपर्य्यये ॥"
अन्येन प्रतिनिधिना कारयेत् कारयेत् । विपर्य्यये अभियुक्तस्यासामर्थ्ये ।

अतएव महापातकादीनामन्यद्वारा दिव्यमाह स एव ।

"मातापितृद्विजगुरुबालस्त्रीराजघातिनाम् ।
महापातकयुक्तानां नास्तिकानां विशेषतः ॥
लिङ्गिनां व्रतिनाञ्च मन्त्रयोगक्रियावताम् ।
वर्णसङ्करजातानां पाषाभ्यासप्रवर्त्तिनाम् ॥

एतेष्वेषामभियोगेषु निर्ण्णयेष्वेव प्रयत्नतः ।
इत्याद्यभिधाय ।

दिव्यं प्रकल्पयेन्नैव राजा धर्म्मपरायणः ।
एतैरेव प्रयुक्तानां साधूनां दिव्यमर्हति ॥"
कात्यायनः ।

"न लौहाग्निस्पिनामग्निं सलिलं नाब्दुसेविनाम् ।
तण्डुलैर्न नियुञ्जीत ब्राह्मणं सुखरोगिणम् ॥"
नारदः ।

"स्त्रीबालातुरान् सत्त्वहीनान् परितापार्द्दितान्नरान् ।
बालवृद्धातुरादींश्च परीक्षेत घटे सदा ॥
नार्त्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम् ।
श्लिष्मान्धकुनखादीनां नाग्निकर्म्म विधीयते ॥"
न मज्जनं स्त्रीबालयोर्धर्म्मशास्त्रविधारदैः ।
निरुत्साहान् व्याधिक्षुन्नार्त्तान्क्लोये निमज्जयेत् ॥
न चापि द्वारयेदग्निं न विषेण विशोधयेत् ॥
यत्तु,—

स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेदिति पितामहवचनं तल्लिखितसामन्तादिसर्व्वं दिव्यनिषेधकम् । यद्यपि अलेख्यसाक्षिके दिव्यं व्यवहारे विनिर्द्दिशेदिति स्मृतेर्विवादान्तरेऽपि लेख्यादिसत्त्वे दिव्यानाहरणेऽपि ऋणादानादिविवादे साध्युपन्यासे क्षतेऽपि प्रत्यर्थी यदि दण्डाङ्गीकारेण दिव्यमङ्गीकरोति तदा दिव्यमपि भवति साक्षिणां दोषसम्भवाद्दिव्यस्य तु निर्दोषत्वेन वस्तुतत्त्वविषयत्वात् तत्प्राबल्यत्वाच्च धर्म्मस्य । यथाह नारदः ।

"तत्र सर्व्वे स्थितो धर्म्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषस्तु न लेख्यस्तु प्रयोजयेत ॥"
स्थावरविवादे तु प्रत्यर्थिना दण्डाङ्गीकारेण दिव्यावलम्बने कृते सामन्तादिदृष्टप्रमाणमङ्गीकृत्यापि दिव्यं ग्राह्यमिति विकल्पनिवारणाय स्थावरेष्वित्यादि पितामहवचनं नात्यन्तिकदिव्यं निराकरणाय लिखितान्यभावे स्थावरादिषु निर्णयाप्रसक्तेः ॥ * ॥

अथ द्रव्यसंख्यया दिव्यविशेषाः । विष्णुः ।

अथ समयक्रियाराजद्रोहसाहसेषु यथाकामं निःक्षेपणं स्त्रीबालवृद्धव्याधप्रमाणादिति । समयो दिव्यं राजद्रोहादिषु यथाकामं राजेच्छानुरोधाद्दिव्यं निःक्षेपादिषु तु धनप्रमाणानारतम्यादित्यर्थः । बृहस्पतिः ।

"संख्या रश्मिरजोमला मधुना सप्तशाकृता ।
कार्षापणाख्या सा दिव्ये नियोज्या विनये तथा ॥
विषं सप्तसमेऽप्लुते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशतार्पणे तु दानव्यत्यप्रमाणकः ।
त्रिशते तण्डुला देयाः कोषस्त्वेव सदर्द्धके ॥
शते सार्द्धे तदर्द्धे च दानयं धर्म्मशोधनम् ।
गोचौरस्य प्रदातव्यं सभ्यैः कालं प्रयत्नतः ॥
एषा संख्या निबद्धानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानान्तु कल्पनीया परीक्षकैः ॥"
रश्मिरजः ।

जाजान्तरगते भानौ यत् सुवर्णं दृश्यते रजः।
प्रथमं तत्प्रमाणानां भवरेणुं प्रचक्षते॥"
इति मनूक्तम्॥
"कार्षापणाश्च पणाश्च कार्षापणः 'पण इति पर्य्यायदर्शनात्। विंशये दृष्टे। एवञ्च सहस्र इत्यादौ पण इति शेषं उपक्रमात् निश्चितानां जातिकर्म्मगुणैः। नाप्तदासादरेदर्घिं न तुलां न विपन्नतेति वाशिष्ठवचनं मध्यमोत्तमविषयत्वेन दृष्टस्तुतिवचनैकवाक्यत्वादविरुद्धम्।
"सहस्रेषु घटं दद्यात् सहस्रार्द्धे तथाढकम्।
अर्द्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं क्षुतम्॥"
इति वचनं मध्यमापराधे पातित्यं तद्विषयमिति। एतत् सर्व्वं क्षेयसाहसविषयम्। अपह्नवे तु कात्यायनः।
"एतस्यापह्नवो यत्र प्रमाणं तत्र कारयेत्।
क्षेयसाहसयोर्द्विगं अर्घ्यंऽर्घं प्रदापयेत्॥
सर्व्वत्रैवप्रमाणन्तु दाता हैम प्रकल्पयेत्।
हैमप्रमाणयुक्तन्तु तदा दिगं प्रदापयेत्॥
दाता संख्यां सुवर्णानां क्षुतनाशे विषं क्षुतम्।
अग्नीतेश्च विनाशे तु दत्तादेव क्षुतागमम्॥
यदा नाशे जलं देयं चत्वारिंशति वै घटम्।
विंशद्दशविनाशे तु क्षोपपातं विधीयते॥
पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुलाः।
ततोऽर्द्धार्द्धविनाशे तु लौकिकश्च क्रियाः क्षुताः।
एवं विचारयन्दाता धर्म्मार्थाभ्यां न हीयते॥"
सुवर्णानां पञ्च क्षत्यजको माषस्ते सुवर्णस्तु षोड़श इत्युक्तापीतिरक्तिकापरिमितहेम्नां नाशे अपह्नवे वा दशाधिकस्य पञ्चाधिकस्य वा विंशस्य नाशे कोषपातमित्यर्थः। तण्डुलाः पुनरत्यल्पौर्य्याभिप्रायेणैव न तु साहसादौ। चौर्य्ये च तण्डुला देया नाप्तवचेति विनिश्चय इति पितामहस्तुतेः। तत्प्रमाणस्तु महार्घ्यार्घ्याभिप्रायेण।
महार्घ्यार्घ्याभियुक्तानां तत्प्रमाणो विधीयते।
इति स्मृतेः॥
व्यवहारमातृकायाम्।
"समर्थं साक्षिणां यत्र दिव्यैस्तमपि बोधयेत्।
प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु॥
दिव्यमालभते वादी न पृच्छेत्तत्र साक्षिणः॥"
इति दिव्यतत्त्वम्॥ * ॥
घटादिनवविधपरीक्षा तत्तत्शब्दे द्रष्टव्या॥
("बुद्धिः पश्यति या भावान् बहुकारणयोगजान्।
युक्तिस्क्षिकाला सा क्षेया विवर्गः साध्यते यया॥
एषा परीक्षा नाम्नेया यया सर्व्वं परीक्ष्यते।
परीक्ष्यं सदसच्चैव तथा चाक्षि पुनर्भवः॥"
इति चरके सूत्रस्थाने एकादशोऽध्याये॥
"तत्र चेद्भिषगभिषज्या भिषजं पृच्छेद्गमनविरेचनास्थापनानुवासन-शिरोविरेचनानि प्रयोक्तुकामेन भिषजा कतिविधया परीक्षया कतिविधं परीक्ष्यं कञ्चात्र परीक्षाविशेषः कथञ्च परीक्षितव्यं किंप्रयोजना च परीक्षा क्व च वमनादीनां प्रवृत्तिः क्व च निवृत्तिः प्रवृत्तिनिवृत्तिलक्षण-संयोगे च किं नैष्ठिकं कानि च वमनादीनां भेषजद्रव्याणि उपयोगं गच्छन्तीति। स एवं पृष्टो यदि मोहयितुमिच्छेत् ब्रूयादेनं बहुविधा परीक्षा तथा परीक्ष्यविधिभेदः कतमेन विधिभेदप्रकल्पान्तरेण परीक्षकस्य भिन्नभेदाय भवान् पृच्छत्याख्यायमानं इदानीं भवतोऽन्येन वा विधिभेदप्रकल्पान्तरेण परीक्षस्य भिन्नस्याभिलषितमर्थं श्रोतुमहमन्येन परीक्षा विधिभेदप्रकल्पान्तरेण परीक्षं भिषगर्थमाचक्षाण इच्छां पूरयेयमिति।
द्विविधा परीक्षा ज्ञानवतां प्रत्यक्षमनुमानञ्च एतत्तु द्वयमुपदेशश्च परीक्षाद्वयमेवमेषा द्विविधा परीक्षा त्रिविधा वा सद्भोपदेशेन।
दशविधं परीक्ष्यं कारणादि यदुक्तमग्रे तदिह भिषगादिषु संज्ञार्थं सन्दर्शयिष्यामः इह कार्य्यप्राप्तेः कारणं भिषक्करणं पुनर्भेषजं कार्य्ययोनिर्धातुवैषम्यं कार्यं धातुसाम्यं कार्य्यफलं सुखावाप्तिः अनुबन्धः आयुः देशो भूमिरातुरश्च कालः संवत्सरर्त्वादयश्च प्रवृत्तिः प्रतिकर्म्मासमारम्भः उपायो भिषगादीनां सौष्ठवमभिविधानञ्च सम्यगित्याद्यस्योपायस्य विषयः पूर्व्वोक्तेनोपायविशेषेण आख्यात इति कारणादीनि दश दशसु भिषगादिषु संज्ञार्थमभ्यर्हितानि तथैवानुपूर्व्या एतद्दशविधपरीक्ष्यमुक्तम्।
तस्य यो यो विशेषो यथा यथा च परीक्षितव्यः स स तथा तथा आख्यास्यते कारणं भिषगियुक्तमग्रे तस्य परीक्षा भिषङ्नाम यो भिषज्यति यः क्षत्रार्थप्रयोगकुशलः यस्य चायुः सर्व्वथाविदितम्। यथावत् सर्व्वधातुसाम्यं चिकीर्षतात्मानमेवादितः परीक्षेत गुणेषु गुणतः कार्य्याभिनिर्वृत्तिं पश्यन् कश्चिदङ्गस्य कार्य्यस्याभिनिर्वर्त्तने समर्थो भवेति।" इति चरके विमानस्थाने अष्टमेऽध्याये॥)
परीक्षित्, पुं, (परि सर्व्वतोभावेन क्षीयते क्षण्यते दुरितं येन। परि+क्षि+क्षये+क्विप्। कलिप्राप्तनादस्य तथात्वम्। यद्वा, परिक्षीणेषु कुरुषु क्षियति ईष्टे इति। क्षि धृ ऐश्वर्य्ये+क्विप्। "उपसर्गस्य दीर्घत्वं क्विप्चस्यादौ क्वचिद्भवेत्।" इति वाक्यात् उपसर्गस्य दीर्घत्वम्। अस्य निरुक्तिरुक्ता महाभारते। १। ८५। ८४।
"स भगवता वासुदेवेनासंजातबलवीर्य्यपराक्रमोऽकालजातोऽस्त्राग्निना दग्धस्तेजसा स्वेन संजीवितः। संजीवयित्वा चैनमुवाच। परिक्षीणेषु कुरुषु जातो भवत्वयं परीक्षिन्नामेति।")
अभिमन्युपुत्रः। स युधिष्ठिरादनन्तरं कलियुगस्यारम्भे राजचक्रवर्त्ती आसीत्। यथा,—
"अभिमन्योरुत्तरायां परिक्षीणेषु कुरुष्वश्वत्थाम-प्रयुक्तब्रह्मास्त्रेण गर्भ एव भस्मीकृतो भगवतः सकलसुरासुरवन्दितचरणयुगलस्य आत्मेच्छया कारयमानुषरूपधारिणोऽनुभावात् पुनर्जीवितमवाप्य परीक्षिन्नाम्ने। योऽयं साम्प्रतमेतद्भूमण्डलमखण्डितायति धर्म्मेण पालयति।" इति विष्णुपुराणे ४ अंशे २० अध्यायः॥
"विपरीतानि दृष्ट्वा च निमित्तानि स पाण्डवः।
याते स्वर्गे चकाराथ सोऽभिषेकं परीक्षितः॥
प्रयास्यन्ति यदा चैते पूर्व्वाषाढ़ां महर्षयः।
तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति॥
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे॥"
इति तत्रैव २४ अः। ३८—४०॥
(अन्यपुत्रः। यथा, महाभारते। १।९५।४०।
"अनश्वा खलु मागधीमुपयेमे अश्वतां
नाम तस्यामस्य जज्ञे परीक्षित्॥")
परीक्षितः, पुं, (परिक्षीणे कुरुकुले क्षियति क्षय ईष्टे वा इति। परि+क्षि+क्तः। उपसर्गस्य दीर्घत्वम्।) अभिमन्युपुत्रः। (यथा, देवीभागवते। २। ७। ६।
"परिक्षीणेषु वंशेषु जातो यस्मात् वरः सुतः।
तस्मात् परीक्षितो नाम विख्यातः पृथिवीतले॥"*॥
परीक्षा सञ्जाता अस्य। परीक्षा इतच्। ज्ञातपरीक्षे, त्रि। यथा, रामायणे। २।४३।६।
"स हि राजगुणैर्युक्तो युवराजः परीक्षितः॥")
परीक्षायः, पुं, (परितो नयनम्। परि+नी+घञ्। "उपसर्गस्य दीर्घत्वं क्विप्चस्यादौ क्वचिद्भवेत्।" इति पाणिनौ दीर्घः।) परिणायः। प्रारीणां समन्तान्नयनम्। इत्यमरटीकायां भरतः॥
परीत, त्रि, (परि+इ+क्तः।) परिवेष्टितम्। इति हेमचन्द्रः॥ (यथा, महाभारते। १। ११२। ७।
"ततः कामपरीताङ्गी सलज्जप्रचलन्मनसा।
व्रीड़माना स्वजं कुम्भी राज्ञः स्कन्धे समासजत्॥")
परीतत्, त्रि, (परि+तन+क्विप्+"नष्टाश्वदग्धविधीति।" ६। ३। ११६। इति पूर्व्वपदस्य दीर्घः।) सर्व्वतोभावेन विस्तृतम्। इति मुग्धबोधव्याकरणम्॥
परीणाहः, पुं, (परिभाव्यते इति। परि+भाव+घञ् वैकल्पिकदीर्घश्च।) परिभावः। आदरः। इत्यमरटीकायां भरतः॥
परीतं, क्लीं, (पूर्य्यतेऽनेनेति। पॄ+"कृञ्यजि कटीति।" उणां ४। ३०। इति ईरन्।) जलम्। इत्युणादिकोषः॥
परीरम्भः, पुं, (परिरभ्यते इति। परि+रभ+घञ् भावे वैकल्पिकदीर्घत्वम्।) परिरम्भः। आलिङ्गनम्। इति भरतसिद्धरूपकोषः॥
परीवर्त्तः, पुं, (परि+वृत्+घञ्। "उपसर्गस्य घञीति।" ६। ३। १२२। इति दीर्घः।) परिवर्त्तनम्। तत्पर्य्यायः। प्रतिदानम् २ नैमेयः ३ विनिमयः ४। इत्यमरः। २।९।८०॥ परिवर्त्तः ५ वैमेयः ६ विनिमयः ७ परिदानम् ८। इति शब्दरत्नावली॥ कूर्म्मराजः। इति जटाधरः॥

परीवादः, पुं, (परि+वद्+भावे घञ्। "उपसर्गस्य घञ्मनुष्ये।" ६।३।१२२। इति दीर्घः।) दोषोल्लासः। तत्पर्य्यायः। जुगुप्सा २ निन्दा ३ जुगुप्सा ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ जुगुप्सनम् ८ परिवादः ९ जुगुप्सनम् १० आक्षेपः ११ अवर्णः १२ निर्वादः १३ अपक्रोशः १४ भर्त्सनम् १५ उपक्रोशः १६ अपवादः १७ अववादः १८। इति शब्दरत्नावली॥ (यथा,

"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः।
तुजो तीर्णस्यापि प्रकटितहताशेषतमसो
रवेरुल्लाहकृतेजो नहि भवति काव्यां गतवतः॥")

वीणादिवादनम्। येन काष्ठविशेषादिना वीणादिर्वाद्यते सः। इति जटाधरः।

परीवारः, पुं, (परिवियतेऽनेनेति। परि+वृ+घञ्। उपसर्गस्य दीर्घः।) खड्गकोषः। जङ्गमः। (यथा, रघुः। १५। १६।

"धूमधूम्रो वसागन्धी ज्वालावभुशिरोरुहः।
क्रव्याद्गणपरीवारश्चितामिरिव जङ्गमः॥")

परिच्छदः। इत्यमरः। २। ९। १६८॥

परीवारः परिजने खड्गकोषे परिच्छदे। इत्यनेकत्र दर्शनात्। जङ्गमो जङ्गमविशेषः परिजन इत्यर्थः। खड्गकोषोऽसिवायकः मेयान् इति ख्यातः। परिच्छदः शोभाजनकमुपकरणं छत्रचामरादिः सभ्यजनादिश्च यत्तु परीवारः। इति तट्टीकायां भरतः॥

परीवाहः, पुं, (परितो वहत्यनेनेति। परि+वह+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति घञ्। "उपसर्गस्य घञ्मनुष्ये।" ६। ३। १२२। इति दीर्घः।) जलोच्छ्वासः। इत्यमरः। १।१०।१०॥ (अत्र जलशब्द उपलक्षणमात्रं ज्ञेयम्। द्रवद्रव्यस्य प्रवाहोऽत्यर्थो बोद्धव्यः। यथा च महाभारते। ७। ६८। १३।

"रुधिरस्य परीवाहान् पूरयित्वा सरांसि च॥"

परित उच्छ्रयते इति।) राजयोग्यवस्तु। इति मेदिनी॥ हे, ३३॥

परीक्षिः, स्त्री, (परि+इष्+"परे र्वा।" ३। ३। १०७। इत्यस्य वार्त्तिके इति पक्षे क्तिन्।) अन्वेषणा। इत्यमरः। २। ७। ३२॥ परिचर्य्या। प्राकाम्यम्। इति मेदिनी। टे, ४८॥

परीसारः, पुं, (परिसरणम्। परि+सृ+घञ्। "उपसर्गस्य घञ्मनुष्ये।" ६। ३। १२२। इति दीर्घः।) परिसर्य्या। सर्व्वतोगमनम्। इत्यमरः। ३। २। २१॥

परीहारः, पुं, (परिहरणम्। परि+हृञ् हरणे+घञ्। "उपसर्गस्य घञ्मनुष्ये।" ६। ३। १२२। इति दीर्घः।) अवज्ञा। इति शब्दरत्नावली॥

परीहासः, पुं, (परि+हस+घञ्। उपसर्गस्य दीर्घः।) परीहसनम्। (यथा, मार्कण्डेये। ३४।८४।

"परीवादं न कुर्व्वीत परीहासञ्च पुत्रक!॥")

तत्पर्य्यायः। हवः २ केलिः ३ क्रीड़ा ४ लीला ५ नर्म्म ६। इत्यमरः। १। ७। ३२॥ परिहासः ७ केलिसुखम् ८ देवनम् ९। इति त्रिकाण्डशेषः॥

परुः, पुं, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकादुः।) समुद्रः। स्वर्गलोकः। अग्निः। पर्व्वतः। इति संक्षिप्तसारोणादिवृत्तिः॥

परुः, [स्] क्ली, (पॄ+"अर्त्तिपॄवपियजितनीति।" उणा। २। ११८। इति उस्।) अग्निः। इत्यमरः। २। ४। १६२॥ (यथा, वाजसनेयसंहितायाम्। १३।२०। [पदवस्परि॥")

"काष्ठात् काष्ठात् परोहन्ति परुषः (सः)

परुत्, अ, (पूर्व्वस्मिन् वत्सरे इति। "सद्यः परुत्परारिषण्णः वक्तव्यः।" ४। ३। २३। इत्यस्य वार्त्तिके इति त्यः।) इति आकरग्रन्थः॥

परुहारः, पुं, (परुः समुद्रः पर्व्वतो वा हारमिव यस्य।) घोटकः। इति शब्दमाला॥

परुषं, क्ली, (पिपर्त्ति अलं वृद्धिं करोतीति। पॄ+"पॄनृभ्यां कित्।" उणा। ४। ७५। इति उषच्। कित्वात् गुणाभावः।) निष्ठुरवाक्यम्। इत्यमरः। १। ६। १६॥ (परेषां देशजातिकुलविद्याशिल्पकर्म्मवृत्ताचारशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषमिति वदन्ति॥ यथा, रामे। अयो। १। १। ८२।

"तासुवाच ततो रामः परुषं जनसंसदि।
अन्तःपुरमाशा सा सीता विवेश्य ज्वलनं सती॥")

नीलभिण्टी। इति शब्दचन्द्रिका॥ परुषफलम्। इति भावप्रकाशः॥ (नीलभिण्टीशब्दस्य गुणादयो ज्ञातव्याः॥)

परुषं, त्रि, (पिपर्त्तीति। पॄ लि पूर्त्तौ+"पॄनृभ्यां कित्।" उणा। ४। ७५। इति उषच्। कित्वात् गुणाभावः।) कर्ब्बुरः। (यथा, वृहत्संहितायाम्। ३। ३६।

"असितविचित्रनीलपरुषो जनघानकरः।
खगन्धगभैरवस्वरतैश्च निशाद्युमुखे॥")

रूक्षः। (यथा, वैद्यके रामायणे। १। ५८।१०।

"अथ रात्र्यां व्यतीतायां राजा चक्राललां गतः।
नीलवस्त्रधरो नीलः परुषो भस्मगुण्ठितः॥")

निष्ठुरोक्तिः। इति मेदिनी। षे, ४०॥ (मलिनः। यथा, आर्य्यासप्तशत्याम्। ४१६।

"भस्मपरुषैरपि गिरिशे स्नेहमयी तनुर्चितेन सुभगासि।"

"भस्ममलिनैरपि गिरिशे।" इति तट्टीका॥)

परुषोक्तिकः, त्रि, (परुषमेव उक्तिर्यस्य। ततः स्वार्थे कन् कप् वा।) निष्ठुरवक्ता। इति जटाधरः॥

परूषकं, क्ली, (पॄ+कषन्।) फलवृक्षभेदः। परुषफल इति वङ्गभाषा। फरूसा इति फलञ्चे इति च हिन्दीभाषा। तत्पर्य्यायः। परूषकम् २ नागदलोपमम् ३। इति रत्नमाला॥ परुषम् ४ अल्पास्थि ५ परापरम् ६। इति भावप्रकाशः॥ नीलवर्म्मे ७ गिरिपीलु ८ परावतम् ९ नीलमञ्जलम् १० पटः ११। अस्य गुणाः। अम्लत्वम्। वातुत्वम्। कफार्त्तिवातनाशित्वञ्च। तदाम-फलगुणः। पित्तदत्वम् उक्तत्वञ्च। तत्पक्वफलगुणाः। मधुरत्वम्। वह्निप्रदत्वम्। पित्तशोणितहरत्वम्। तर्पणत्वञ्च। इति राजनिर्घण्टः॥

"परूषकं कषायाम्लमामं पित्तकरं लघु।
तत् पक्वं मधुरं पाके शीतं विद्यान्न दुर्जरम्॥
वृष्यं रक्तपित्तदाहाम्लज्वरक्षयक्लमीरहृत्॥"

इति भावप्रकाशः॥

("परूषकैटर्यकपीलुकानां
पियालसिंह्री करमर्दकानाम्।
फलानि चैतानि निहन्ति पित्तं
हृत्याज सर्व्वातुरसन्निपातम्॥"

इति हारीते प्रथमस्थाने दशमेऽध्याये॥)

परूषकं, क्ली, (परूष+स्वार्थे कन्।) परूषम्। इति राजनिर्घण्टः॥ (अस्य पर्य्याया यथा,—

"परूषकं परूषं स्यात् शल्लिनागदलोपमम्।"

इति वैद्यकरत्नमालायाम्॥

यथास्य गुणाः चरके सूत्रस्थाने २७ अध्याये।

"अम्लं परूषकं ग्राही वर्ष्माग्न्यादकफानि च।
पित्तशोणितकोपीनि कर्कन्धुसदृशान्यपि॥"

"अल्पाम्लमीषन्मधुरं कषायानुरसं लघु।
वातघ्नं पित्तजननमामं विद्यात् परूषकम्॥
तदेव पक्वं मधुरं वातपित्तनिबर्हणम्।
विपाके मधुरं शीतं रक्तपित्तप्रसादनम्॥"

इति सुश्रुते सूत्रस्थाने। ४६ अध्याये॥)

परेतः, त्रि, (परं लोकमितः।) मृतः। इत्यमरः। २। ८। ११७॥ (यथा, कुमारे। ५।६८।

"अलक्तकाङ्कानि पदानि यादसो-
र्विकीर्य्यकेशास्तु परेतभूमिषु॥")

भूताग्नौ पुं,। इति मेदिनी। ते, १२६॥

परेतराट्, [ज्] पुं, (परेतेषु मृतेषु राजते इति। राजृ अ ञ दीप्तौ+"सत्सूद्विषेति।" ३। २।६१। इति क्विप्। यद्वा, परेतानां प्रेतानां राट्।) प्रेतराजः। यमः। इत्यमरः। १। १। ६१॥

परेद्यवि, अ, परस्मिन्नहनि। ("सद्यःपरुत्परारिति।" ५। ३। २२। इति निपातनात् साधुः।) परदिनम्। इति शुद्धबोधकाकरधृतम्॥ यथा,—

"परेद्यवद्यपूर्व्वेद्युरन्येद्युश्चापि चिन्तयन्।
दृष्ट्वियौ सुतौ ग्राम्यां प्रियभ्रातृकतामगात्॥"

इति भट्टिः। ४। १३॥

परेद्युः, [स्] अ, (परः+एतुस्।) परदिनम्। इति शुद्धबोधकाकरधृतम्॥

परेयं, त्रि, परा गता आपो यत्र। ("ह्यन्यतरस्यामित्यपः ईत्।" ६। ३। ८०। इत्यस्य वार्त्तिके "अवर्ष्मण्यात्।" इति ईत्। परापम्।) इति विद्वान्मनोरमी॥

परेष्टुका, स्त्री, (परैरिष्यते इति। इष+बाहुलकात् तु। स्वार्थे कन्। स्त्रियां टाप्।) बहुप्रसूता गौः। इत्यमरः। २। ९। ७०॥

परेधित:, त्रि, (परैरेधित: सन्वर्द्धित: ।) औदासीन्येन परपुष्ट: । परेण संवर्द्धित: । तत्पर्य्यायः । पराधित: २ परिध्वन्द: ३ परजात: ४ । इत्यमर: । २ । १० । १८ ॥ कोकिले पुं । इति शब्दमाला ॥

परोक्षं, क्ली, (अक्ष्णो: परम् ।) अप्रत्यक्षम् । असाक्षात् । यथा, याज्ञवल्क्यसंहितायाम् ।

"परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्জ্জयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥"

(परोक्षं परोक्षलमित्यर्थः विद्यतेऽस्य । "अर्शआदिभ्योऽच् ।" ५ । २ । १२७ । इति अच् ।) शब्दविशिष्टे त्रि ॥ (मुखाग्रजन्यादिज्ञानविशेष: । यथा, पञ्चदश्याम् । ७ । ३१ ।

"अस्ति कूटस्थ इत्यादौ परोक्षं वेत्ति वार्णया ॥")

परोक्ष:, पुं, (परोक्षमश्नातीति । मुखाग्रवाक्यश्रवणजन्यशब्दार्थज्ञानवेति बोध्यम् ।) तपस्वी । इति शब्दमाला ॥ ययातिपुत्रखागो: पुत्रविशेष: । यथा, भागवते । ९ । २३ । १ ।

"अनो: सभानरश्चक्षु: परोक्षश्च सुताश्रय: ॥")

परोपकार:, पुं, (परेषामुपकार: ।) परेषामुपकृति: । अन्यसम्बन्धिहितम् । यथा,—

"एष मे प्रवरो भाति गुह्यधर्म्मप्रदो विधि: ।
परोपकरणादन्यत् सर्व्वमस्यं स्मृतं बुधै: ॥
परोपकारिभिर्दत्ता खप्राणा ऋषिभि: पुरा ।
अस्थि: प्रेतोपकार: स्यात् किन्न लब्धं मया पुन: ॥
दधीचिना पुरा दत्त: स्रोकश्च श्रूयते भुवि ।
सर्व्वधर्म्ममय: सार: सर्व्वधर्म्मेषु सम्मत: ॥
परोपकार: कर्त्तव्य: प्राणै: कण्ठगतैरपि ।
परोपकारजं पुण्यं तुल्यं क्रतुशतैरपि ॥"

इति पद्मोत्तरखण्डे २२ अध्याय: ॥

परोवरीय:, त्रि, परावरांश्चानुभवति । ("परोवरपरम्परपुत्रपौत्रमनुभवति ।" ५ । २ । १० । इति ।) अवरस्योत्तं निपात्यते । श्रेष्ठाश्रेष्ठयुक्त: । इति सिद्धान्तकौमुदी ॥

परोष्णी, स्त्री, (पर: प्रत्युष्णो यस्या: ।) तैलपायिका । इत्यमर: । २ । ५ । २६ ॥ (काश्मीरदेशस्थनदीविशेष: । यथा, राजतरङ्गिण्याम् । ८ । २००७ ।

"कोष्टकोमज्जकोष्टाद्यैर्मिलैर्युक्तोऽपि सादिभि: ।
तीर्त्वा परोष्णीं तत्सेना निर्ममाथाप्रमाथिनीम् ॥")

पर्कटि:, } स्त्री, (पृष् धौ च सम्पर्के + बाहुपर्कटी, } लकाद्यटि: । "वहादिभ्यश्च ।" ४ । १ । ४५ इति वा ङीष् ।) शस्यवृक्ष: । इत्यमरटीकायां भरत: ॥ पाकुड़ इति भाषा ॥ (यथा, शिवोपदेशे । "अस्ति तत्र महान् पर्कटीवृक्ष: ॥") तस्य गुणा: भावप्रकाशे ।

"शस्य: कषाय: शिशिरो व्रणयोनिगदापह: ।
दाहपित्तकफास्रघ्न: श्लोषघ्नो रक्तपित्तजित् ॥"

पर्कटी, [न्] पुं, वृक्षविशेष: । पाकुड़ इति भाषा ॥ तत्पर्य्यायः । प्लक्ष: २ जटी ३ । इत्यमर: । २ । ४ । ३२ ॥ कमण्डलुवट: ४ । इति रत्नमाला ॥ कपीतन: ५ चीरी ६ सुपार्श्व: ७ कमण्डलु: ८ अक्षी ९ अवरोह: १० शाखी ११ शृङ्गभाङ् १२ पीतन: १३ दृढ़रोह: १४ शुचक: १५ शुवङ्ग: १६ मङ्गल्य: १७ । अस्य गुणा: कटुत्वम् । कषायत्वम् । शिशिरत्वम् । रक्तदोषनाशित्वञ्च । व्रणग्रहणापनायित्वञ्च । विशेषतो दुग्धस्य गुणा: । इति राजनिर्घण्टः ॥

पर्ज्जनी, स्त्री, (परं स्वास्थ्यं जनयतीति । पर् + जन + णिच् । "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । स्त्रियां ङीप् ।) दारुहरिद्रा । इत्यमर: । २ । ४ । १०२ ॥

पर्ज्जन्य:, पुं, (पर्वति सिञ्चति वृष्टिं ददातीति । पृङ् सेचने + "पर्ज्जन्य: ।" उणा० । ३ । १०३ । इति निपातनात् वकारस्य जकारश्च साधु: ।) इन्द्र: । (यथा, ऋग्वेदे । ६ । ५२ । १६ । [सुष्टुतिं न: ॥")

"अथोपर्ज्जन्यावर्त्तं घिषं मेऽस्मिन् हवे सुहवा शृण्वदमानमेघ: । इत्यमर: । १ । १ । १४६ ॥ मेघशब्द: । इति भरत: ॥ अग्नावपि मेघ: । इति विश्व: ॥ अगर्ज्जन्नपि मेघ: । इति भरत: ॥ यथा, श्रीभगवद्गीतायाम् ।

"यज्ञाद्भवति पर्ज्जन्य: पर्ज्जन्यादन्नसम्भव: ॥"

(कश्यपपत्न्या मुनेः पुत्रविशेष: । स तु गन्धर्व्वविशेष: । यथा, महाभारते । १ । ६५ । ४४ ।

"तथा शालिशिरा राजन् ! पर्ज्जन्यश्च चतुर्दश: ।
कलि: पञ्चदशस्त्वेषां नारदश्चैव षोड़श: ॥"

पर्ज्जन्य इव सर्व्वकामप्रदानात् विष्णु: । यथा, महाभारते । १३ । १४६ । १०० ।

"कुसुद: कुन्दर: कुन्द: पर्ज्जन्य: पावनोऽनिल: ॥"

"पर्ज्जन्यवदाध्यात्मिकादितापत्रयं शमयति सर्व्वान् कामानभिवर्षतीति पर्ज्जन्य: ।" इति श्रीधरभाष्यम् ॥)

पर्ज्जन्या, स्त्री, (पर्ज्जन्य + टाप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

पर्ण, त् क हारित्ये । इति कविकल्पद्रुमः ॥ (अदन्तचुरां-परं-सकं-सेट् ।) हरित् पीतवर्णस्य भाव: हारित्यम् । पर्णयति पर्णायति चम्पकम् । इति दुर्गादास: ॥

पर्ण, क्ली, (पिपर्त्तीति । पॄ + "धापृवस्यज्यतिभ्यो न: ।" उणा० । ३ । ६ । इति न: । यद्वा, पर्णयतीति । पर्ण त् क हारित्ये + अच् ।) पत्रम् । इत्यमर: । २ । ४ । १४ ॥ (यथा, कुमारे । ५ । २८ ।

"स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुन: ।
तदध्यपाकीर्णमत: प्रियंवदा
वदन्त्यपर्णेति च तां पुराविद: ॥")

ताम्बूलम् । यथा, राजनिर्घण्टे ।

"अनिधाय मुखे पर्णं पूगं खादयते नर: ।
मतिभ्रंशो दरिद्र: स्यादन्ते न स्मरते हरिम् ॥"

ताम्बूलधारिलक्षणं यथा,—

"अनाढ्यार्थोऽशृङ्गारश्च दृढ़भक्तिश्च पार्थिवे ।
ताम्बूलधारी भवति नारी वाप्यथ तद्गुणा ॥"

इति मात्स्ये १८८ अध्याय: ॥

(पिपर्त्ति पालयति गगनपातादिति । पॄ + न । पत्र: । यथा, महाभारते । १ । ३६ । २४ ।

"तदुत्तरफलमभिप्रेक्ष्य तस्य पर्णमनुत्तमम् ।
भूतानि सर्व्वभूतानि नाम चक्रुर्गतक्लमा: ।
सुरूपं पत्रमालक्ष्य तस्य पर्णमनुत्तमम् ॥")

पर्ण:, पुं, (पिपर्त्तीति । पॄ पालने + "धापृवस्यज्यतिभ्यो न: । उणा० । ३ । ६ । इति न: । पलाशवृक्ष: । इत्यमर: । २ । ४ । २६ ॥ (यथा, ऋग्वेदे । १० । ८० । ५ ।

"अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ॥")

पर्णकार:, पुं, (पर्णं ताम्बूलम् । करोति उत्पादयतीति । पर्ण + कृ + अण् ।) वारजीवी । बारुइ इति भाषा ॥ इति केचित् ॥

पर्णक्षुद्र:, पुं, (पर्णै: साधं क्षुद्रं व्रतं यत्र । पत्रक्षुद्रव्रतम् । यथा, याज्ञवल्क्ये । ३ । ३१६ ।

"पर्णोञ्छवरराजीवविल्वपत्रकुशोदकै: ।
प्रत्येकं प्रत्यहाभ्यस्तै: पर्णक्षुद्र उदाहृत: ॥"

पर्णखण्ड:, पुं, (पर्णमेव खण्डो यस्य । पृषोदरादित्वात्तथात्वम् ।) वनस्पति: । इति शब्दचन्द्रिका ॥ (पर्णस्य ताम्बूलस्य खण्ड: ।) ताम्बूलैकांशश्च ॥

पर्णचोरक:, पुं, (पर्णं चोरयतीति । पर्ण + चोरि + ण्वुल् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

पर्णध्वत्, [स्] त्रि, पर्ण + ध्वनस् + कर्त्तरि क्विप् । पत्रध्वंसकर्त्ता । इति व्याकरणम् ॥

पर्णनर:, पुं, (पर्णै: पलाशपत्रैर्निर्म्मितो नर: नराकार: पुत्तलक:।) पित्रादिश्राद्धाख्यलाभे दाक्षाद्यैतत्प्रतिनिधीभूतपलाशपत्ररचितोर्णासन्नवेष्टितयवपिष्टलिप्तनराकारपुत्तलक: । यथा,

"आश्वलायनसूत्रपरिशिष्टम् । अस्थिनाशे पलाशपत्राणां चौणि वष्टिशतानि पुरुषप्रतिकृतिं कृत्वा, अग्नौत्यर्द्धन्तु शिरसि ग्रीवायां दश योजयेत् ।
'उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा ॥
बाहुभ्याञ्च शतं दद्यात् दद्यादङ्गुलिभिर्दश ।
द्वादशार्द्धं दृषणयोरर्द्धं शिश्न एव च ॥
ऊरुभ्यान्तु शतं दद्यात् त्रिंशतं जानुजङ्घयो: ।
पादाङ्गुलीषु च दश एतत् प्रेतस्य लक्षणम् ॥
ऊर्णासूत्रेण संवेष्ट्य यवपिष्टेन लेपयेत् ॥'
आदिपुराणम् ।
'तदलाभे पलाशोत्थै: पत्रै: कार्य्य: पुमानपि ।
शतैस्त्रिभिस्तथा षष्ट्या शरपत्रैर्विधानत:: ॥'
तदलाभे अश्वत्थाभे । अत्र पलाशपत्रशरपत्रयो: तुल्यत्वेनोपादानात् आश्वलायनसूत्रेऽपि प्रतिकृतौ शरपत्रस्य लाभ: । अन्याचारादयोग्यत्वाच्च शरपत्रै: पुत्तलकं कृत्वा शिरप्रभृतिषु पलाशपत्राणि देयानि । ततो वेष्टनं ऊर्णासूत्रेण लेपनं यवपिष्टेनेति । अग्नौचाभ्यन्तरदाहे शौचाहेनशुद्धि: । तदुत्तरपर्णनरदाहे तु त्रिरात्रम् । एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदित्यादि पुराणात् । यज्ञपार्श्व: ।
'पुत्राद्यैर्दुपलब्धेरन् तदस्थीनि कदाचन ।
तदलाभे पलाशस्य सम्भवे हि पुन: क्रिया ॥'

हि यस्यास्तदलाभे अस्थ्यामप्राप्तौ पलाशस्य तन्नलपुत्तलकस्य दाहक्रिया। पुनरपि सम्भवे अस्थिलाभे पुनरपि अस्थिदाहक्रिया विहिता तस्मादयदि पुनरस्थीनि प्राप्यन्ते तदा पुनर्दाहश्चिराम्नायोक्ते कर्म्मणे न पुनः पिण्डादिदानं वस्त्रमाल्यधृक्तेः। विष्णुः।

"त्रिपक्षे तु गते पर्णनरं दद्यादनग्निकः।
त्रिपक्षाभ्यन्तरे राजन्नेव पर्णनरं दहेत्॥
तदूर्द्धमस्थीं प्राप्य दर्भे वापि विचक्षणः॥"

दहेदिति शेषः। अस्यार्थः। अग्नौचाभ्यन्तरे यदि पर्णनरदाहं न कुर्य्यात्तदा मरणादिकावधित्रिपक्षानन्तरं दाहः कार्य्य इत्यर्थः। इति हरिदासतर्कालङ्कारः। यादवभट्टोऽप्येवम्। अवहारोऽपि ईदृश एव।

'पर्णनरं दहेन्नैव विना दर्भे कदाचन।
अस्थ्यामलाभे दर्भे तु ततः पर्णनरं दहेदिति॥'

दीपकलिकायां क्षमन्तुवचनात् दर्भे पर्णनरदाहः। दर्भेमित्यत्राष्टमीमिति क्वचित् पाठः। अत्राष्टमी लक्षा पिण्डकर्म्मणि लक्षणपक्षस्य प्राशस्त्योक्तेः।" इति शुद्धितत्त्वम्॥

पर्णभेदिनी, स्त्री, (पर्णानि भिनत्तीति। पर्ण + भिद् + णिनिः स्त्रियां ङीप्।) प्रियङ्गुः। इति राजनिर्घण्टः॥

पर्णभोजनः, पुं, (पर्णान्येव भोजनं यस्य। पर्णानि भुङ्क्ते इति वा। भुज् + कर्त्तरि ल्युः।) छागलः। इति शब्दरत्नावली॥

पर्णमाचालः, पुं, (पर्णमाचालयतीति। पर्ण + आ + चल + णिच् + अण्। निपातनात् विभक्तेर्लोपाभावः। बाहुलकात् सुम् वा।) कर्म्मरङ्गवृक्षः। इति शब्दमाला॥

पर्णमृगः, पुं, (पर्णेचरो मृगः पशुः।) मृगगजविशेषः। यथा,—

"वनौकोवृक्षमार्ज्जारवृक्षमर्कटिकाश्च्यः।
एते पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः॥
वनौका वानरो वृक्षमार्ज्जारो वृक्षविड़ालः।
वृक्षमर्कटिका स्त्री इति लोके। एतेषां मांसगुणाः। [हिताः।
"क्षुताः पर्णमृगा वृष्याश्चक्षुष्याः श्लेष्मिणो श्वासार्शःकासप्रसेकाः क्षतक्षयपुरीषकाः॥"

इति भावप्रकाशः॥

पर्णलता, स्त्री, (पर्णप्रधाना लता।) नागवल्ली। इति राजनिर्घण्टः॥

पर्णवल्ली, स्त्री, (पर्णप्रधाना वल्ली।) पलाशी लता। इति राजनिर्घण्टः॥

पर्णशाला, स्त्री, (पर्णैः पत्त्रादिभिः रचिता शाला। मध्यपदलोपिसमासः।) मुनीनां पत्त्ररचितगृहम्। तत्पर्य्यायः। उटजम् २। इत्यमरः। २। २। ६॥ पर्णोटजम् ३। इति शब्दरत्नावली॥ पर्णवती शाला। पर्णप्रधाना शाला वा। इति भरतः॥ (यथा, रघुः। १। ६५।

"निर्दिष्टां कुलपतिना स पर्णशाला-
मध्यास्य प्रयतपरिग्रहद्वितीयः।
तच्छिष्याध्ययननिवेदितावसानां
संविशः क्रतुशयने निशां निनाय॥"

मध्यदेशस्थ्यायामविशेषः। यथा महाभारते। १३। ६८। ३।

"मध्यदेशे महान् ग्रामो ब्राह्मणानां बभूव ह।
गङ्गायमुनयोर्मध्ये यामुनस्य गिरेरधः॥
पर्णशालेति विख्यातो रमणीयो नराधिप!॥")

पर्णसः, पुं, (पॄ पूरणे + "वर्णसिवर्णसिपर्णसीति।" उणा। ४। १०७। इति असिनुँक् च।) पद्मम्। इत्युणादिकोषः॥ जलपद्मम्। जलटुङ्गी इति भाषा॥ इति सिद्धान्तकौमुद्युणादिवृत्तिः॥ पाकम्। आभरणक्रिया। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्णाशनः, पुं, (पर्णं अश्नाति भक्षयतीति। अश् + ल्युः। पर्णानामशनः।) मेषः। इति शब्दमाला॥

पर्णासः, पुं, (पर्णैरसति दीप्यति श्लोभते इति यावत्। अस दीप्तौ + अच्।) तुलसी। इत्यमरः। २। ४। ७६॥

पर्णिनी, स्त्री, (पर्णानि सन्त्यस्याः। पर्ण + इनिः।) भावपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते उत्तरतन्त्रे ६२ अध्याये।

"बर्हिस्तरजनीकुल्थ पर्णिनीग्रारिवाकृये:॥"

अम्बष्ठोविशेषः। यथा, हरिवंशे। ७१८। ४६।

"मेनकासहजन्या च पर्णिनी पुक्किकास्यला॥")

पर्णी, [न्] पुं, (पर्णानि सन्त्यस्य। पर्ण + इनिः।) वृक्षः। इति हेमचन्द्रः। ४। १८०॥

पर्णोटजं, क्ली, (पर्णनिर्म्मितं उटजम्।) पर्णशाला। इति शब्दरत्नावली॥

पर्ह, ङ अपानोत्सर्गे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) ङ, पर्हते बृहः। इति दुर्गादासः॥

पर्हः, पुं, (पृ + बाहुलकात् हः।) केशसमूहः। इत्युणादिकोषः॥ (पर्ह अपानोत्सर्गे + अच्।) अपानोत्सर्गश्च॥

पर्हणं, क्ली, (पर्ह + ल्युट्।) अपानोत्सर्गः। इति हेमचन्द्रः। ६। ३६॥ पाद् इति भाषा॥

पर्पं, क्ली, (पॄ पालनादौ + "खण्डिशिल्पशुल्वाव्यरूपपर्पतल्पाः।" उणा। ३। २८। इति निपातनात् सिद्धम्।) नवलवणम्। गुडम्। इत्युणादिकोषः॥ खञ्जवाद्यप्रकटम्। इति सिद्धान्तकौमुद्युणादिवृत्तिः॥

पर्पटः, पुं, (पर्प + अटन्।) वृक्षविशेषः। पेतपापड़ा इति बङ्गभाषा। दगनपापर इति हिन्दीभाषा। तत्पर्य्यायः। चिर्यटिः २ तिक्तः ३। इति रत्नमाला॥ चरकः ४ रेणुः ५ क्षत्त्वारिः ६ वरकः ७ अरकः ८ प्रीतः ९ प्रीतप्रियः १० पांसुः ११ कल्पाङ्गः १२ कर्म्मकण्टकः १३ क्षुद्रपाखः १४ प्रगन्धः १५ सुतिक्तः १६ रक्तपुष्पकः १७ पित्तारिः १८ कटुपत्त्रः १९ वक्रः २०। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। पित्तश्लेष्मज्वररक्तदाहरुचिग्लानिमदभ्रमनाशित्वञ्च। इति राजनिर्घण्टः॥*॥

"पर्पटो वरतिक्तश्च क्षुतः पर्पटकश्च सः।
कथितः पांशुपर्य्यायस्तथा क्षवचनामकः॥
पर्पटो हन्ति पित्तास्रभ्रमतृष्णाकफज्वरान्।
संग्राही शीतलश्चिक्को दाहशुद्धातसो लघुः॥"

इति भावप्रकाशः॥*॥

पिष्टकभेदः। पापर इति भाषा॥ तस्य गुणः। लघुत्वम्। रूक्षत्वञ्च। इति राजवल्लभः॥

"धूमसौरचिता स्निग्धुरिन्नालवर्ष्येर्युता।
औरकस्त्रिकाभाश्च तनुं लत्वा च वेल्लिता॥
दीपना पाचना रूक्षा गुरवः किञ्चिदीरिता॥
मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः।
चणकस्य गुणैर्युक्ता पर्पटाश्चणकोद्भवाः॥
खण्डे भृष्टास्तु ते सर्व्वे भवेयुर्मध्यमा गुणैः॥"

इति भावप्रकाशे पूर्व्वखण्डे द्वितीयभागे॥

पर्पटदलः, पुं, (पर्पट इव दलः।) कुम्भीरक्षः। इति राजनिर्घण्टः॥

पर्पटी, स्त्री, (पर्पट + ङीप्।) सौराष्ट्रमृत्तिका। इति रत्नमाला॥ पिष्टकभेदः। इत्युणादिकोषः॥ उत्तरदेशभवसुगन्धिद्रव्यम्। पपरीति प्रसिद्धम्। पद्मावतीति च। तत्पर्य्यायः। रङ्गनी २ लक्षा ३ जतुका ४ जवनी ५ जवी ६ जतुलक्षा ७ संध्यार्घा ८ जतुकृत् ९ चक्रवर्त्तिनी १०। अस्या गुणाः। तुवरत्वम्। तिक्तत्वम्। शीघ्रिग्रत्वम्। वर्णलत्वम्। लघुत्वम्। विषव्रणकण्डूकफपित्तास्रकुष्ठनाशित्वञ्च। इति भावप्रकाशः॥

पर्पटीकः, पुं, (पिपर्त्तीति। पॄ + "ग्रहिज्यावयीति कृञ्चाभ्यासस्य।" उणा। ४।१६। इति इकन् हित्वं अभ्यासस्य रुगागमश्च।) सूर्य्यः। इत्युणादिकोषः॥ वह्निः। इति त्रिकाण्डशेषः। जलाग्नयः। इति संक्षिप्तसारोणादिवृत्तिः॥

पर्पिकः, पुं स्त्री, पर्पेण गच्छतीति। (पर्प + ठन्। स्त्रियां ङीप्।) इति सिद्धान्तकौमुदी॥ [सेट्।)

पर्प्प, गतौ। इति कविकल्पद्रुमः॥ (भ्वां परं सकं-

पर्य्यङ्कः, पुं, (परितोऽङ्क्यते इति। परि + अकि-लक्षणे + घञ्।) खट्वा। पालङ्क इति भाषा॥ इत्यमरः। २। ६। १२८॥ तत्पर्य्यायः। (मञ्चः मञ्चकः ३ पल्यङ्कः ४। इति हेमचन्द्रः। ३। ३४०॥) पर्य्यस्तिका ५ परिकरः ६ अवसक्थिका ७ इति च तत्रैव। ३। ३४३॥ (यथा, महाभारते। ३। २४६। ८।

"अधोपविष्टं राजानं पर्य्यङ्के ज्वलनप्रभे।
उपप्लुतं यथा सोमं राहुणा रात्रिसंक्षये।
उपगम्याब्रवीत् कर्णो दुर्य्योधनमिदं तदा॥"

योगभेदः। यथा, कुमारे। ३। ४५।

पर्य्यङ्कबन्धस्थिरपूर्व्वकायं
ऋज्वायतं सन्नमितोभयांसम्॥")

पर्य्यङ्कपादिका, स्त्री, (पर्य्यङ्कस्यैव पादोऽवयवः। ठन् टाप् च।) कोणशिला। इति राजनिर्घण्टः॥

पर्य्यङ्कबन्धनं, क्ली, (पर्य्यङ्कवत् यद्बन्धनम्।) वस्त्रादिना पृष्ठजानुजङ्घावन्धनम्। काछ्‌बाँधा इति भाषा॥ यथा,—

"पादप्रसारणन्यायं तथा पर्य्यनुबन्धनम् ॥"
इत्यपराधगणनायां हरिभक्तिविलासः ॥

पर्य्यटनं, क्ली, (परितोऽटनं भ्रमणम्। परि+अट+भावे ल्युट्।) सर्व्वतोभावेनाटनम्। पुनः पुनर्गमनम्। भ्रमणम्। तत्पर्य्यायः। ब्रज्या २ अटाट्या ३। इत्यमरः। २। ७। ३६॥ (यथा, भागवते। ६। ७। १८।
"भूमेः पर्य्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैः॥")

पर्य्यनुयोगः, पुं, (परितोऽनुयोगः पृच्छा। परि+अनु+युज्+भावे घञ्।) जिज्ञासा। इति हलायुधः॥ ("एतेनास्यापि पर्य्यनुयोगस्यानवकाशः।" इति दायभागः॥)

पर्य्यन्तः, पुं, (परितोऽन्तम्। प्रादिसमासः।) गोष्ठसीमा। इति दुर्गादासः॥ (यथा, पञ्चतन्त्रे। १। १४१।
"पर्य्यन्तो लभ्यते भूमेः वसुद्रव्यस्य गिरेरपि।
न कथञ्चित् महीपस्य चित्तायाः केनचित् क्वचित्॥"
समीपम्। यथा, हरिवंशे। १२२। ५३।
"पर्य्यन्तदेशं सरसेन देवी
लिलेप सा लोहितचन्दनेन॥"
पार्श्वः। यथा, रघौ। १८। ४३।
"पर्य्यन्तसञ्चारितचामरस्य
कपोललोलोभयकाकपक्षात्।
तस्यानलादुत्थितयो विवादः
चखाल वेलास्वपि नार्णवानाम्॥")

पर्य्यन्तभूः, स्त्री, (पर्य्यन्तस्य गोष्ठसीमायाः भूः पृथिवी।) तद्दीनगरपर्व्वतादेरुपान्तभूमिः। तत्पर्य्यायः। परिसरः २। इत्यमरः।२।१।१४॥

पर्य्यन्तिका, स्त्री, (परितः सर्व्वतो भावेन अन्तिका गुणादीनां गणिका।) गुणभंग्यः। इति हारावली। २१०॥

पर्य्यन्यः, पुं, (पर्जन्य+पृषोदरादित्वात् साधुः।) इन्द्रः। शब्दायमानमेघः। मेघशब्दः। इत्युणादिकोषः॥ (यथा, गोः रामायणे।६।३१।३२।
"ततो दुन्दुभिनिर्घोषः पर्य्यन्यनिनदोपमः॥")

पर्य्ययः, पुं, (परि क्रमशः अयो गमनम्।) क्रमोल्लङ्घनम्। (परि शास्त्रलोकाचारमर्य्यादां परित्यज्य अयो गमनमुल्लङ्घनमित्यर्थः।) अतिक्रमः। शास्त्रतो लोकव्यवहाराच्च प्राप्तस्यार्थस्य परित्यागः। तत्पर्य्यायः। अतिपातः २ उपात्ययः ३। इत्यमरभरतौ॥ विपर्य्ययः ४ अत्ययः ५। अतिपतनम् ६ अत्ययः ७ अतिक्रमः ८। इति शब्दरत्नावली॥ (यथा, महाभारते।२।४८।१२।
"अन्नाभ्याच्छादयं चाहं यथा कुपुरुषस्तथा।
अमर्षं धारयं चोग्रं प्रतीक्षन् कालपर्य्ययम्॥")

पर्य्ययणं, क्ली, (परितोऽयनं गच्छत्यनेन। परि+अय+ल्युट्।) अश्वसज्जा। इति शब्दमाला॥ जिन् इति भाषा॥

पर्य्यवस्था, स्त्री, (परितोऽवस्थानम्। परि+अव+स्था+"आतश्चोपसर्गे।" ३। ३। १०६। इत्यङ्।) विरोधनम्। इत्यमरः। ३। २। २१॥

पर्य्यवस्थातृ, [ऋ] त्रि, (पर्य्यवतिष्ठते इति। परि+अव+स्था+तृच्।) पर्य्यवस्थाकर्त्ता। विरोधी। इति हलायुधः॥ (यथा, किरा-तार्জ্জुनीये। ११। १६।
"अन्तकः पर्य्यवस्थाता जन्तिनः सन्ततापदः।
इति व्याप्ये भवे भयो सुक्तावुक्तिरुक्तं जनः॥")

पर्य्यवस्थानं, क्ली, (परितोऽवतिष्ठतेऽनेन। परि+अव+स्था+करणे ल्युट्।) विरोधः। इति जटाधरः॥ सर्व्वतोभावेनावस्थितिश्च॥

पर्य्यस्तः, त्रि, (परितोऽस्तः क्षिप्तः। अस्तु इर क्षेपे+क्तः।) पतितः। क्षतः। इति मेदिनी। ते, १२१॥ (सर्व्वतः प्रहृतः। विक्षतः। यथा, हरिवंशे। १५६। २०। [राम॥")
"पर्य्यस्तां पृथिवीं छत्त्वां साश्वां सरथकुञ्जर-

पर्य्यङ्किका, स्त्री, (परितः अस्यते क्षिप्यते शरीरमत्र। परि+अस क्षेपे+अधिकरणे क्विन्। ततः स्वार्थे कन्।) खट्वा। इति हेमचन्द्रः। ३। ३४३॥

पर्य्यायं, क्ली, (परितो याति गच्छत्यनेनेति। परि+या+ल्युट्। एषोदरादित्वात् साधुः। अन्यपक्षायनम्। इति हेमचन्द्रः। ४। २१८॥ (यथा, हरिवंशे। ६३। ६।
"आरोहणमन्यवाजिनां
पर्य्यायादियुतस्य वाजिनः।
उपवाह्य तुरङ्गमस्य वा
कल्यस्येव विपन्नशोभना॥")

पर्य्याप्तं, क्ली, (परि+आप्+भावे क्तः।) यथेष्टम्। क्लृप्तः। शक्तिः। निवारणम्। इति मेदिनी। ते, १२७॥ त्रि, प्राप्तः॥ (शक्तिसम्पन्नः। यथा, भगवद्गीतायाम्। १। १०।
"पर्य्याप्तन्त्विदमेतेषां बलं भीष्माभिरक्षितम्।"
"पर्य्याप्तं समर्थं भाति इति।" श्रीधरस्वामी॥)

पर्य्याप्तिः, स्त्री, (परि+आप+क्तिन्।) परिज्ञानम्। मरणोद्यतस्य निवारणम्। इत्यमरभरतौ॥ प्रकाशः। प्राप्तिः। इति शब्दरत्नावली॥ (क्लृप्तिः। यथा, 'कथासरित्सागरे। २६। १६६।
"नास्ति यत्नवतां वत्स! भुवि पर्य्याप्तये धनम्॥"
शक्तिः। यथा, तत्रैव। २६। ४७।
"प्रविष्टः सोऽप्यपश्यत्तां तत्र नेत्रोत्सवप्रदाम्।
धातुरद्भुतनिर्म्माणपर्य्याप्तिमिव रूपिणीम्॥")

सम्बन्धविशेषः। स च सर्व्वेषामेव पदार्थानां विशिष्टबुद्धिनियामकः। पदार्थभेदेन नाना। यथा। पर्य्याप्तिश्चायमेको घट इमौ द्वौ इत्यादि प्रतीतिसाक्षिकः सम्बन्धविशेषः। इति दीधितिः॥ समवायेन गुणे गुणत्वाश्रयेऽपि चत्वारो गुणा इत्यादि प्रतीत्या गुणादिषु संख्यादिमत्त्वनियामकोऽपि तादृशसम्बन्धः। इति सामान्याभावे जगदीशः॥ द्वितीयव्युत्पत्तिवादे गदाधरभट्टाचार्य्यश्च॥

पर्य्यायः, पुं, (परि+इण गतौ+"परावनुपात्यय इणः।" ३। ३। ३८। इति घञ्। क्रमप्राप्तस्यातिपातोऽनुपात्ययः।) पर्य्ययणम्। क्रमः। (यथा, कुमारे। २। ३६।
"पर्य्यायसेवासुलभ्य पुण्यसम्भारसम्भराः।
उद्यानपालस्त्रामाख्यन्नवस्तुपायते॥")

तत्पर्य्यायः। आनुपूर्व्वी २ आवृत् ३ परिपाटी ४ अनुक्रमः ५। इत्यमरः। २। ७। ३७॥ आनुपूर्व्येण ६ आनुपूर्व्यम् ७ आनुपूर्व्यकम् ८ परिपाटिः ९। इति भरतादयः॥ प्रकारः। अवसरः। इति मेदिनी। ये, ८६॥ निर्म्माणम्। द्रव्यधर्म्मः। इति हेमचन्द्रः॥ ६। १३६। क्रमे त्वेकार्थवाचकाः शब्दाः पर्य्यायाः। इति विजयरक्षितः॥ सम्यक्विशेषः। ग्रन्थेन सह यत्सम्यक् सम्बन्धस्तेन सह तत्पर्य्यायः। यथा,—
"समानं कुलभावञ्च दानादानन्तथैव च।
तयोर्व्वैग्रसमागं हि पर्य्यायञ्च प्रचक्षते॥"
इति कुलदीपिका॥
(अर्थालङ्कारविशेषः। यथा, साहित्यदर्पणे १०। १०४।
"क्वचिदेकमनेकस्मिन्ननेकञ्चैकगं क्रमात्।
भवति क्रियते वा चेत् तदा पर्य्याय इष्यते॥"
उदाहरणं क्रमेण यथा,—
"स्थिताः स्वयं पद्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे
क्रमेण नाभिं प्रथमोदबिन्दवः॥
विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः।
हृककाकाग्निवास्तत्र धावन्त्यरिपुरे तव॥
विस्पष्टरागादधरान्निवर्त्तित-
स्तनाङ्गरागादरुणाच्च कन्दुकात्।
कृशाङ्गुरादानपरिच्युताङ्गुलिः
स्तनोच्चसूत्रप्रणयी तया करः॥
ययोरारोपितस्तारो हारस्तारविधूजनैः।
निर्धीयन्ते तयोः स्थूलाः स्तनयोरम्बुबिन्दवः॥
सन्तु च क्वचिदाधारः संहतरूपोऽसंहतरूपश्च।
क्वचिदाधेयमपि। यथा, 'स्थिताः स्वयं पद्मसु' इत्यत्र उदबिन्दवः पद्मादावसंहतरूप आधारे क्रमेणाभवन्। 'विचरन्ति' इत्यत्राधेयभूता हृककाद्यः संहतरूपारिपुरे क्रमेणाभवन्। एवमन्यत्। अत्र चैकस्यानेकत्र क्रमेणैव वृत्तिर्विशेषालङ्कारादेः। विनिमयाभावात् परिवृत्तेः॥")

पर्य्यायग्रथनं, क्ली, (पर्य्यायेण क्रमेण ग्रथनम्।) पङ्क्तिरिकादीनां क्रमेण ग्रथनम्। तत्पर्य्यायः। उपग्रायः २ विग्रायः ३। इत्यमरभरतौ॥

पर्य्यासः, पुं, (पर्य्यस्यते इति। परि+अस्+घञ्।) पतनम्। क्षेपणम्। इति पर्य्यस्तशब्दार्थदर्शनात्॥ (परिवर्त्तः। यथा, मार्कण्डेयपुराणे। ५४। २।
"महाभूतप्रमाणञ्च लोकालोकस्तथैव च।
पर्य्यासं परिमाणञ्च गतिश्चन्द्रार्कयोरपि॥")

पर्य्युदस्तं, क्ली, (पर्य्युदस्यते इति। परि+उत्+अस+"क्त्यस्युटौ बहुलम्।" ३। ३। ११३। इति ल्युट्।) क्षणम्। इत्यमरः। २। ६। ३॥

पर्य्युदस्तः, त्रि, (पर्य्युदस्यते इति । परि + उत् + अस + क्तः ।) पर्य्युदासविशिष्टः । विधात्मकभिन्नात्मकनञर्थयुक्तः । यथा । यद्यपि पर्य्युदस्तराज्ञ्यादिषु आह्वाहिकरणे विधिरौदासीन्यान्न फलं न वा प्रत्यवाय इति सिद्धान्तः ॥ इति मलमासतत्त्वम् ॥ (परित उत्क्षिप्ते त्रि ।)

पर्य्युदासः, पुं, परि सर्व्वतोभावेन उदास्यते विधिर्यत्र सः । (परि + उत् + अस् + घञ् ।) तस्य लक्षणम् आह्निकविवेके ।

"सामान्यशास्त्रप्राप्तनिषेधस्यैव पर्य्युदासत्वम् ॥"

अपि च मलमासतत्त्वे ।

"प्राधान्यन्तु विधेर्यत्र प्रतिषेधोऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥"

अस्योदाहरणम् । अमावस्यायां पितृभ्यो दत्तात् रात्रौ श्राद्धं न कुर्व्वीत । अत्र श्राद्धकरणे रात्रेः पर्य्युदासः ॥ (यथा च साहित्यदर्पणे । ७ । ३ ।

"क्षुधोपात्तानमत्रस्तो भेजे धर्म्ममनातुरः ।
अयमधुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥
अत्राऽत्रस्ततामनुद्यात्मगोपनादौचित्यविधेयमिति नञः पर्य्युदासतया गुणभावो युक्तः ॥")

पर्य्युषितं, त्रि, (परित्यज्य स्वकालमुषितम् । वस + क्तः ।) बुष्टम् । बासि इति भाषा । तस्याभक्ष्यत्वं यथा,—

"भक्तं पर्य्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ।
उदक्याशूद्रसंस्पृष्टं पर्य्यायान्नञ्च वर्ज्जयेत् ॥"

इति गरुडपुराणम् ॥

"यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥"

इति भगवद्गीता ॥ * ॥

तस्य भक्ष्यत्वं यथा,—

"मन्त्राभिमन्त्रितं ग्राह्यं न च पर्य्युषितं नृप ! ।
अन्यत्र फलमांसेभ्यः शुष्कशाकादिकात्तथा ॥
तद्वद्धादरिकेभ्यश्च गुरुपक्वेभ्य एव च ॥"

इत्याह्निकतत्त्वम् ॥

तुलसीयुक्तपुष्पे पर्य्युषितदोषाभावो यथा,—

"तुलसीलग्नपुष्पाणि पद्मं गङ्गोदकं कुशाः ।
न पर्य्युषितदोषोऽत्र छिन्नभिन्नं न दुष्यति ॥"

इति पुराणम् ॥

पर्य्युषितभोजी, [न्] त्रि, (पर्य्युषितं बुष्टं भुङ्क्ते इति । भुज + णिनिः ।) बुष्टद्रव्यभोक्ता । इति कलापव्याकरणम् ॥

पर्य्येषणा, स्त्री, (इष + युच् + टाप् । ततः परित एषणा ।) अन्वेषणा । इत्यमरः । २ । ७ । ३२ ॥ तर्कादिना यथावोधितधर्म्मादिज्ञानेच्छया । अन्वेषणमात्रेऽपि । इति भरतः ॥ (क्ली, अन्वेषणम् । यथा, महाभारते । ३ । २६ । १८ ।

"ब्राह्मणेष्वेव मेधावी बुद्धिपर्य्येषणक्षरेत् ॥")

पर्व्व, गतौ । (भ्वां-परं-सकं-सेट् ।) पर्व्वति । इति दुर्गादासः ॥

पर्व्व, पूर्त्तौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पर्व्वति पयसा कुल्मं पेटो । इति दुर्गादासः ॥

पर्व्व, [न्] क्ली, (पर्व्वतीति । पर्व्व गतौ + बाहुलकात् कनिन् । यद्वा, पिपर्त्तीति । पॄ + "ज्ञाम्रदिपद्यर्त्तिपॄभ्यो वनिप् ।" उणा । ४ । ११२ । इति वनिप् ।) ग्रन्थः । ग्रन्थिः । (यथा, भागवते । ५ । २१ । १७ । "तथा वालखिल्या ऋष्योऽङ्गुष्ठपर्व्वमात्राः सहप्रजाभ्यो पुरतः सूर्य्यं स्तुवन्ति ॥") प्रस्तावः । लक्षणान्तरम् । दर्शप्रतिपदोः सन्धिः । (पूर्णिमाप्रतिपदोःसन्धिश्च । यथा, साहित्यदर्पणे । "अकालजलदावली किरतु नाम सुक्तावली-रपर्व्वणि विधुन्तुदस्तुदतु नाम ग्रीतद्युतिम् ॥") विष्णुवत्प्रभृति । इति मेदिनी । ने, ८८ ॥ यज्ञविच्छेदः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते अष्टादशपर्व्वाणि । तानि उक्तानि यथा तट्टीकायाम् ।

"आदिः सभावनविराटमथोद्यमश्च
भीष्मो गुरू रविजमद्रकसौप्तिकश्च ।
स्त्रीपर्व्व शान्तिरनुशासनमश्वमेध-
आश्रमो सुसलयानदिवावरोहः ॥")

खण्डः । इति शब्दचन्द्रिका ॥ (भङ्गौ । यथा, रघुवंशे । १६ । ४६ ।

दिने दिने ग्रैवलवन्ध्यशक्तात्
सोपानपर्व्वाणि विसृष्टदम्भः ॥")

पञ्चपर्व्वाणि यथा । विष्णुपुराणम् ।

"चतुर्द्दश्यष्टमी चैव अमावास्याथ पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससम्भोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं नरः ॥"

पर्व्वसु कर्त्तव्याकर्त्तव्यानि यथा । ब्रह्मपुराणे ।

"नित्यं हयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोश्चतसृषूपरागेषु पर्व्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयञ्च तत् ॥"

पराशरभाष्ये कूर्म्मपुराणम् ।

"अनध्यायेषु नाङ्गेषु नैतिहासपुराणयोः ।
न धर्म्मशास्त्रेष्वन्येषु पर्व्वस्वेतानि वर्ज्जयेत् ॥"

पैठीनसिः । न पर्व्वसु तैलं क्षौरं मांसमभ्युपेयात् नामावस्यायां हरितमपि छिन्द्यात् । इति तिथ्यादितत्त्वम् ॥

पर्व्वकं, क्ली, (पर्व्वणा ग्रन्थिना कायतीति । कै + कः ।) ऊरुपर्व्व । इति शब्दचन्द्रिका ॥ ओँटु इति भाषा ॥

पर्व्वकारी, [न्] पुं, (पर्व्व करोतीति । पर्व्व + ञ + णिनिः ।) धनादिलोभेनापर्व्वसु अमावास्यादिषु क्रियाप्रवर्त्तकः । यथा, विष्णुपुराणे द्वितीयांशे ६ अः ।

"क्षयी माहिषकश्चैव पर्व्वकारी च यो द्विजः ॥"

पर्व्वगामी, [न्] पुं, (पर्व्वसु चतुर्द्दश्यष्टम्यादिषु गच्छति स्त्रियमिति । पर्व्व + गम + णिनिः ।) पर्व्वसु स्त्रीगामी । इति पूर्व्वोक्तश्लोके पर्व्वकारीत्यत्र पर्व्वगामीति पाठान्तरे स्वामी ॥

पर्व्वतः, पुं, (पर्व्वन्ति पूरयन्तीति । पर्व्व पूरणे + "भृञ्जिधारिसर्जिपर्व्वीति ।" उणा । ३ । ११० । इति अतच् ।) शैलः, पर्व्वणि भागाः सन्त्यस्य । प्राहाड़ इति भाषा ॥ तत्पर्य्यायाः । महीधरः २ गिरिवरी ३ क्ष्माभृत् ४ अद्रार्यः ५ धरः ६ अद्रिः ७ गोत्रः ८ गिरिः ९ शैवा १० अचलः ११ शैलः १२ गिरिलोचयः १३ । इत्यमरः । २ । ३ । १ ॥ स्थावरः १४ सानुमान् १५ पृथ्वीधरः १६ धरणीकीलकः १७ कुधारः १८ जीमूतः १९ धातुभृत् २० भूधरः २१ स्थिरः २२ कुलीरः २३ कटकी २४ शृङ्गी २५ निर्झरी २६ अगः २७ नगः २८ दन्ती २९ । इति शब्दरत्नावली ॥ धरणीधः ३० भूभृत् ३१ क्षितिभृत् ३२ अवनीधरः ३३ कुधरः ३४ धराधरः ३५ प्रस्थवान् ३६ वृक्षवान् ३७ । इति राजनिर्घण्टः ॥ * ॥ सुमेरोः पूर्व्वे पर्व्वता यथा,—

"ग्रीतान्तश्चक्रसुक्रश्च कुलीरोऽन्यश्च कङ्कवान् ।
मन्थिग्रैलोऽथ वृषवान् महानीलो भवाचलः ॥
सुविष्कुमन्दरो वेणुः सुमेरो र्निमिधक्षया ।
देवग्रैलस्य पूर्व्वेण मन्दरस्य महाचलाः ॥" * ॥

सुमेरोर्दक्षिणे पर्व्वता यथा,—

"त्रिकूटः शिखिरश्चैव कलिङ्गोऽथ पतङ्गकः ।
रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान् ॥
शैलोदरः समलश्च वसुधारश्च रत्नवान् ।
एकशृङ्गो महाग्रैलो गजग्रैलः शिखाचकः ॥
पञ्चग्रैलोऽथ कैलासो हिमवांश्चाचलोत्तमः ।
इत्येते दक्षिणे पार्श्वे मेरोः प्रोक्ता महाचलाः ॥"

सुमेरोः पश्चिमे पर्व्वता यथा,—

"सुचक्षुः शिखिरश्चैव वैदूर्य्यः शिखलस्तथा ।
शिखरोऽथ तथा भद्रः सुरसः कपिलो मधुः ॥
अञ्जनः कुक्कुटः क्षाणः पाण्डुरश्चाचलोत्तमः ।
सहस्रशिखरश्चादिः पारिपात्रः स शृङ्गवान् ॥
पश्चिमेन तथा मेरोर्विष्कम्भात् पश्चिमाद्बहिः ।
एतेऽचलाः समाख्याताः शृणुष्वातश्चतो-
ऽपरान् ॥"

सुमेरोरुत्तरे पर्व्वता यथा,—

"शृङ्गकूटोऽथ ऋषभो हंसनाभो तथाचलौ ।
कपिलेन्द्रस्तथा ग्रैलः सानुमान्नील एव च ॥
शुनशृङ्गः स्वर्णशृङ्गः तुम्बुको मेघपर्व्वतः ।
विराजाख्यो वराहाद्रिमयूरो रुचिरस्तथा ॥
इत्येते कथिता ब्रह्मन्मेरोरुत्तरतो नगाः ॥"

इति मार्कण्डेयपुराणम् ॥ * ॥

सप्तकुलपर्व्वतादि यथा,—

"सप्त यत्रस्थिताः सन्ति महापर्व्वा विभूतयः कुलपर्व्वतसंज्ञाः ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ॥
विन्ध्यश्च पारिपात्रश्च इत्येते कुलपर्व्वताः ।
तेषां सहस्रशश्चान्ये पर्व्वतास्तु समीपतः ॥
अविज्ञाताः पर्व्वसङ्गो विपुलाश्चित्रसानवः ।
अन्ये तेभ्योऽपरिज्ञाता दृश्याः स्वल्पोपजीविनः ॥
तैर्विमिश्रा जनपदा आर्य्या म्लेच्छाश्च सर्व्वशः ॥"

इति मात्स्ये ६५ अध्यायः ॥ * ॥

विन्ध्यादिः श्रेष्ठपर्व्वता यथा,—

"हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः ।
श्वेतश्च शृङ्गवान् मेरुर्मान्द्यवान् गन्धमादनः ॥

महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महांश्चैव तथैवोत्तरमानसः ।
इति विष्णुनिर्विख्याताः पर्व्वताश्चास्मृषां वराः ॥"
जम्बुद्वीपवर्षविभाजकपर्व्वता यथा,—
"लक्षादेशाद्दिमगिरिस्तदर्द्धं हेमकूटश्च तस्मा-
त्तस्माच्चान्यो निषध इति ते सिद्धपर्य्यन्तदैर्घ्याः ।
एवं सिद्धाद्दशापि पुराच्छैलवच्छ्रूयतां लीला
वर्षाख्येषां जगुरिह बुधा अन्तरे दोषिदेशान् ॥"
इति सिद्धान्तशिरोमणिः ॥ * ॥
पर्व्वतानां पक्षोत्पत्तिर्यथा,—
"ततोऽद्रयो जातपक्षा विष्णोश्चैव तु मायया ।
प्रक्षिप्ता मेदिनीं त्यक्त्वा यथापूर्व्वं निवेशिताः ॥
सत्र स्थानमसुराणान्तु वाचादिष्टं जलार्णवे ।
पतीच्यां पर्व्वताः सर्व्वे निममज्जुर्यथा गजाः ॥
तत्रासुरेभ्यः शृंखले आधिपत्यं सुराश्रयम् ।
तच्छ्रुत्वैवासुराः सर्व्वे चक्रुरुद्योगसत्तमम् ॥*॥"
युद्धजयानन्तरं तेषां पक्षोच्छेदो यथा,—
"धरण्यान्तु गिरीन् स्थाप्य स्वेषु स्थानेषु गोपतिः ।
चिच्छेद पविना पक्षान् सर्व्वेषां भुवि चारिणाम् ॥
एकः सपक्षो मैनाकः सुरैस्तत्समये धृतः ॥"
इत्यग्निपुराणम् ॥ * ॥
पर्व्वतानां स्थावरजङ्गमरूपे यथा,—
"सद्यश्च पर्व्वताः सर्व्वे द्विरूपाश्च स्वभावतः ।
नौयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्लानामथ कायानां तथैवाम्बुगता तनुः ॥
बहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आधीयते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु नौयेनाधीयते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ॥
जगत्स्थित्यौ पुरा विष्णुः कल्पयामास यत्नतः ।
नौयधानौ नदीदुःखज्ञायते सततन्त्विदा ॥
विष्णोर्न्ने स्थावरे दुःखं जायते गिरिकायगम् ॥"
इति कालिकापुराणे २२ अध्यायः ॥*॥
अतः परं पर्व्वतेषु देवानामवकाशा वर्ण्यन्ते ।
तत्र योऽसौ ग्रामाख्यः पर्व्वतस्तस्योपरि महे-
न्द्रस्य क्रीड़ास्थानं तत्र देवराजस्य पारिजातक-
वृक्षवनम् । तस्य पूर्व्वपार्श्वे कुञ्जरो नाम गिरिः
तस्योपरि दानवानामष्टौ पुराणि च । तथा
वज्रकेतुपर्व्वते राक्षसानामनेकानि पुराणि तेषु च
नाना नीलकाः कामरूपिणः महाबलीलेषु च
शैलेन्द्रे पुराणि पञ्चदशसहस्राणि किन्नराणां
स्थानानि तत्र देवताश्चन्द्रास्यो राजानः पञ्च-
दश किन्नराणां गर्व्विताः तानि सौवर्णानि विल-
प्रवेशानानि च पुराणि चन्द्रोदये च पर्व्वतवरे
नागानामधिवासः ते च विलप्रवेशासेवितेषु
वैनतेयविषयावर्त्तिनो वशस्थितानुरागे च दान-
वेन्द्रा वशस्थिता वेशुवत्यपि विद्याधरपुरत्रयं
त्रिंशद्योजनशतविस्तीर्णमेकैकं तावदायतं

उलूकरोमसममहावैचाद्रयश्च राजानो विद्या-
धराणाञ्च एकैके च शैलराजनि स्वयमेव गरुड़ो
वसस्थितः । कुञ्जरे तु पर्व्वतवरे नित्यं पशुपतिः
स्थितः वृषभाङ्को महादेवः शृङ्गरो योगिनां
प्रभुः अनेकगणभूतकोटिसहस्रपरिवारो भग-
वानादिपुरुषो वसस्थितः । वसुधारे चायुष्मतां
वसूनाञ्च समावासः वसुधाररत्नधारयोर्म्मूर्द्ध्नि
अष्टौ सप्त च संख्यया पुराणि वसुसप्तर्षीणाञ्च ।
एकशृङ्गे च पर्व्वतोत्तमे प्रजापतेः स्थानं चतु-
र्व्वक्त्रस्य ब्रह्मणः । गजपर्व्वते च महाभूतपरि-
वृता स्वयमेव भगवती तिष्ठति । वसुधारे च
पर्व्वतवरे मुनिसिद्धविद्याधराणामायतनं चतु-
रशीत्यपरपुर्य्यो महाप्राकारतोरणाः तत्र
चानेकपक्षता नाम गन्धर्व्वा युद्धशालिनो वसन्ति
तेषाञ्चाधिपतिर्देवो राजराजैकवल्लभः । सुर-
राक्षसाः पञ्चकूटे दानवाः शृङ्गशृङ्गे यक्षाणां
पुरद्वयम् । प्रमेदकस्य पश्चिमेन देवदानवसिद्धा-
दीनां पुराणि तस्य गिरेर्म्मूर्द्ध्नि महती सोमशिला
तिष्ठति तस्याञ्च पर्व्वणि पर्व्वणि सोमः स्वयमेवा-
वतरति । तस्यैवोत्तरपार्श्वे चिकूटं नाम तत्र
ब्रह्मा तिष्ठति क्वचित्तत्र च वह्न्यायतनं तत्र
मूर्त्तिमान् वह्निरुपास्यते देवैः । उत्तरे च शृङ्गार्द्धे
पर्व्वतवरे देवसाधनायतनानि पूर्व्वेण नारा-
यणस्यायतनं मध्ये ब्रह्मणः शृङ्गरस्य च पश्चिमे
तत्र यक्षादीनां कानिचित् पुराणि । तस्य
चोत्तरतीरे जातुष्कमहापर्व्वते त्रिंशद्योजन-
मण्डलं नन्दनं नाम सरस्तत्र नन्दो नाम नाग-
राजो वसति शतशीर्षप्रचण्ड इति । इत्येतेऽष्टौ
देवपर्व्वता विज्ञेयाः तैर्नानावर्णमेघ हेमरजतरत्न-
वैदूर्य्यमणिशिलादिवर्णाः । इयञ्च पृथ्वी लक्ष-
कोटिशृङ्गानेकसंख्याता पूर्णा तैश्च सिद्धविद्या-
धराणां निलयाः । तद्यथा मेरोः पार्श्वतः
केशरवलयालवालं सिद्धलोकेति कीर्त्यते इयञ्च
पृथ्वी पद्माकारेण व्यवस्थिता एष सर्व्वपुराणेषु
क्रमः सामान्यः प्रतिपाद्यते । इति वराहपुरा-
णम् ॥ *॥ हिमालयादिपर्व्वतवासिनो यथा,—
"रक्षःपिशाचा यक्षाश्च सर्व्वे हैमवतास्तु ते ।
हेमकूटे तु गन्धर्व्वा विज्ञेयाश्चाप्सरोगणाः ॥
सर्व्वे नागाश्च निषधे शैलवासुकितक्षकाः ।
महामेरौ चयस्त्रिंशत् क्रीड़न्ते याज्ञिकाः सुराः ॥
नीले तु वैदूर्य्यमये सिद्धा ब्रह्मर्षयोऽवसन् ।
दैत्यानां दानवानाञ्च श्वेतपर्व्वत उच्यते ॥
शृङ्गवान् पर्व्वतश्रेष्ठः पितॄणां प्रतिसञ्चरः ।
इत्येतानि मयोक्तानि नव वर्षाणि भागशः ॥"
इति मात्स्ये ६५ अध्यायः ॥ * ॥
अथ पर्व्वतनदीजलगुणाः ।
"हिमवत्प्रभवा याश्च जलं तासान्तु सोपमम् ।
पारियात्रभवा याश्च विन्ध्यर्क्षप्रभवाश्च याः ॥
गिरीणामुद्भोगकुलानां ता हेतुः शीपदस्य च ।
चन्द्रार्ककरसंघृष्टं वायुनास्फालितं सुधु ॥
पर्व्वतोपरि यद्वारि सममौरन्द्रेण तत् ।
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ॥

लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥"
इति राजवल्लभः ॥ * ॥
पर्व्वते वर्ज्जनीयानि यथा,—
"शैले मेध्यौषधीधातुवर्णकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥"
इति कविकल्पलता ॥ * ॥
अथ कैलासपर्व्वतवर्णनम् ।
"मध्ये हिमवतः पृष्ठे कैलासो नाम पर्व्वतः ।
तस्मिन्निधिपतिः श्रीमान् कुबेरः सह राक्षसैः ॥
अमरःसहितो राजा मोदते ह्यलकाधिपः ।
कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ॥
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ।
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ॥
दिव्यञ्च चन्दनवनं तस्याश्चीरे महद्वनम् ।
प्रागुत्तरेण कैलासं दिव्यं सौगन्धिकं गिरिम् ॥
सर्व्वधातुमयं दिव्यं शुभ्रवर्णं पर्व्वतं प्रति ।
चन्द्रप्रभो नाम गिरिः सुपुण्ये रत्नसन्निभः ॥
ततस्तमीपे सरो दिव्यमक्षोदनाम विश्रुतम् ।
तस्मात् प्रभवते दिव्या नदी ह्यक्षोदका शुभा ॥
तस्याश्चीरे वनं दिव्यं महच्चैत्ररथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्रः महाबलः ॥
यक्षसेनापतिः क्रूरैर्गुह्यकैः परिवारितः ।
पुण्या मन्दाकिनी चैव नदी ह्यक्षोदका शुभा ॥
महीमण्डलमध्ये तु प्रविष्टा तु महोदधिम् ।
कैलासाद्दक्षिणप्राच्यां शुभ्रं सर्व्वौषधिं गिरिम् ।
मनःशिलामयं दिव्यं शुभ्रवर्णं पर्व्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदो महान् ।
देवारण्यं विशोकञ्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो बली ।
सौम्यैः स धार्म्मिकैश्चैव गुह्यकैः परिवारितः ॥*॥
कैलासात् पश्चिमोदीच्यां ककुद्मानोषधीगिरिः ॥
ककुद्मति च रुद्रस्य चोत्पत्तिश्चिककुद्मिनः ।
तदवनं चैककुदं शैलं चिककुदं प्रति ॥
सर्व्वधातुमयस्तत्र सुमहद्दैद्युतो गिरिः ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्याश्चीरे वनं दिव्यं वैभ्राजनाम विश्रुतम् ॥
कुबेरानुचरस्तस्मिन् प्रहेतितनयो बली ।
नाम्ना वै ब्रह्मधामेति राक्षसोऽनन्तविक्रमः ॥*॥
कैलासात् पश्चिमामाशां दिशः सर्व्वौषधिर्गिरिः ।
अरुणः पर्व्वतश्रेष्ठो रक्तधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्व्वतो हेमसन्निभः ।
नानाकौशमयैर्दिव्यैः शिलाजालैः समन्ततः ॥
शतसंख्यैस्तापनीयैः शृङ्गैर्हेमविभोल्लिखन् ।
युक्तवान् सुमहद्दिव्यैर्दंशैलो महोच्छ्रितः ॥
तस्मिन् गिरौ निवसति गिरीशो धन्यलोहितः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा वङ्क्षुशुतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।

अभ्युत्तरेण कैलासं शिवे सर्व्वौषधिं गिरिम् ।
गौरन्तु पर्व्वतश्रेष्ठं हरितालमयं प्रति ।
हिरण्यशृङ्गः सुमहान् दिव्यौषधिमयो गिरिः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ।
रम्यं बिन्दुसरो नाम यत्र राजा भगीरथः ॥
गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ।
दिवं यास्यन्ति ये पूर्व्वं गङ्गातोयपरिप्लुताः ॥
तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥"

इति मात्स्ये १०१ अध्यायः ॥

अथ दग्धा क्षत्रियपर्व्वतदानम् ।

"प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ।
गुडाचलस्तृतीयस्तु चतुर्थो घृतपर्व्वतः ॥
पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्व्वतः ।
सप्तमो दधिशैलश्च रत्नशैलस्तथाष्टमः ॥
राजतो नवमस्तद्वद्दशमः शर्करागिरिः ।
वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः ॥
अयने विषुवे पुण्ये व्यतीपाते दिनक्षये ।
शुक्लपक्षे तृतीयायामुपरागे शशिक्षये ॥
विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ।
शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः ॥
धान्यशैलादयो देया यथाशास्त्रं विजानता ।
तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने ॥
मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम् ।
प्रागुदक्प्रवणञ्चैव प्राङ्मुखं वा विधानतः ॥
गोमयेनानुलिप्तायां भूमावास्तीर्य्य वै कुशान् ।
तन्मध्ये पर्व्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम् ॥
धान्यद्रोणसहस्रेण भवेद्गिरिरिहोत्तमः ।
मध्यमः पञ्चशतिकः कनिष्ठः स्यात्त्रिभिः शतैः ॥
मेरुर्मन्दारहिमयस्तन्मध्ये
सुवर्णशृङ्गत्रयसंयुतः स्यात् ।
पूर्व्वेण मुक्ताफलवज्रयुक्तो
याम्येन गोमेदकपुष्परागैः ॥
पश्चाच्च गारुत्मतनीलरत्नैः
सौम्येन वैदूर्य्यसरोजरागैः ।
श्रीखण्डखण्डैरभितः प्रवाल-
लताञ्चितः शुक्तिशिलातलः स्यात् ॥
ब्रह्मायं विष्णुर्भगवान् सुरारि-
र्दिवाकरोऽप्यत्र हिरण्मयः स्यात् ।
मूर्द्धन्यवस्थानममत्सरेण
कार्य्यन्त्वनेके च पुनर्दिवौघाः ॥
चत्वारि शृङ्गाणि च राजतानि
तिलप्रभागेष्वपि राजतः स्यात् ।
तथैक्षुवंशाद्भुतकन्दरस्तु
घृतोदकप्रस्रवणश्च दिक्षु ॥
शुक्लाम्बराण्यम्बुधरावली स्यात्
पूर्व्वेण नीलानि च दक्षिणेन ।
वासांसि पश्चादथ कर्व्बराणि
रक्तानि चोत्तरतो घनाली ॥
रौप्याद्रिराजेन्द्रप्रसूनवाद्यौ
संस्थाप्य लोकाधिपतीन् क्रमेण ।
नानाफलाली च समन्ततः स्या-
ज्जनोरमं माल्यविलेपनञ्च ॥

वितानकञ्चोपरि पञ्चवर्णं-
मम्लानपुष्पाभरणं सितं वा ।
दद्यं निवेद्यामरशैलमय्या-
मतस्तु विष्कम्भगिरीन् क्रमेण ॥
तुरीयभागेण चतुर्हिमाद्रि-
संस्थापयेत् पुष्पविलेपनाढ्यान् ॥
पूर्व्वेण मन्दरमनेकफलावलीभि-
र्युक्तं यवैः कनकभद्रकदम्बचित्रम् ।
कामेन काञ्चनमयेन विराजमान-
माकारयेत् कुसुमवस्त्रविलेपनाढ्यम् ॥
क्षीरोदशोदसरसाथ वनेन चैव
रौप्येण शुक्तिघटितेन विराजमानम् ।
याम्येन गन्धमदनञ्च निवेद्यतोयो
गोधूमसक्तुमयः कलधौतजो वा ॥
हैमेन यत्नपतिना घृतमाक्षिकेण
वल्लीच्छ राजितवनेन च संयुतः स्यात् ।
पक्वान्नशालाचलमेकसुगन्धिपुष्पं
सौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥
आकारयेद्रजतपुष्पवनेन तद्व-
द्दध्योदनान्वितं दधिसितोदसरस्तथाग्ये ।
संस्थाप्य तं विपुलशैलमथोत्तरेण
शैलं सुपार्श्वमपि ताम्रमयं सुवस्त्रम् ॥
पुष्पैश्च हेमवटपादपशेखरन्त-
माकारयेत् कनकधेनुविराजमानम् ।
माक्षीकभद्रसरसा च वनेन तद्व-
द्दौग्ध्येन भास्वरवता च युतं विधाय ॥
होमश्चतुर्भिरथ वेदपुराणविद्भि-
र्दान्तैरनिन्द्यचरितान्वितिभिर्द्विजेन्द्रैः ।
पूर्व्वेण हस्तमितमत्र विधाय कुण्डं
कार्य्यन्तिलैर्घृतयुतेन समित्कुशैश्च ॥
रात्रौ च जागरमनुद्धतगीततूर्य्यै-
रावाहनञ्च कथयामि शिलोच्चयानाम् ।
त्वं सर्व्वदेवगणधामनिधे ! विरुद्ध-
मस्मद्गृहेष्वमरपर्व्वत ! नाशयाशु ॥
क्षेमं विधत्स्व कुरु शान्तिमनुत्तमां नः
संपूजितः परमभक्तिमता मया हि ॥
त्वमेव भगवान्सोमो ब्रह्मा विष्णुर्दिवाकरः ।
मूर्त्तामूर्त्तजगद्बीजरूपं नः पाहि सनातन: ॥
यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मन्दिरम् ।
रुद्रादित्यवसूनाञ्च तस्माच्छान्तिं प्रयच्छ मे ॥
यस्मादभूत्यममरैर्नागैरीभिश्च शिरस्तव ।
तस्माच्छान्तिसुहृद्राज्ञोग्रदुःखसंसारसागरात् ॥
एवमभ्यर्च्च्य तं मेरुं मन्दरञ्चाभिपूजयेत् ।
यस्माच्चेश्वरयेन त्वं भद्राश्च विघ्नेशतः ।
शोभसे मन्दर ! क्षिप्रमतस्तुष्टिकरो भव ॥
यस्माच्चूडामणिर्जम्बुद्वीपे त्वं गन्धमादन ! ।
गन्धर्व्वयक्षशोभावांस्ततः कीर्त्तिर्दृढास्तु मे ॥
यस्माच्चूतं केतुमालेन वेल्लजेन वनेन च ।
हिरण्मयश्च शिखरस्तस्मात् पुष्टिर्धृवास्तु मे ॥
उत्तरैः कुरुभिर्यस्मात् सावित्रेण वनेन च ।
सुपार्श्व ! राजसे नित्यमतः श्रीरचलास्तु मे ॥
एवमामन्त्र्य तान् सर्व्वान् प्रभाते विमले पुनः ।

स्नात्वाथ गुरवे दद्याद्यथार्थं पर्व्वतोत्तमम् ॥
विष्कम्भान् पर्व्वतान्दद्याद्विगण्यः क्रमशो मुने! ॥
गावो देयाश्चतुर्विंशद्यथवा दश नारद ! ॥
घृक्षितः सप्त षाष्टौ वा पञ्च दद्यादशक्तिमान् ।
एकापि गुरवे देया कपिलाय प्रयत्निनी ।
पर्व्वतानामशेषाणामेष एव विधिः स्मृतः ॥
त एव पूजने मन्त्रास्त एवोपस्करा: स्मृताः ।
यक्षाद्याः लोकपालाश्च ब्रह्मादीनाञ्च सर्व्वदा ॥
क्षमन्त्वेतेन सर्व्वेषु होमः शैलेषु पञ्चसु ।
उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥
विधानं सर्व्वशैलानां क्रमशः शृणु नारद ! ।
दानकाले च ये मन्त्राः पर्व्वतेषु च यत् फलम् ॥
अन्नं ब्रह्म यतः प्रोक्तमन्नं प्राणाः प्रकीर्त्तिताः ।
अन्नाद्भवन्ति भूतानि जगदन्नेन वर्त्तते ॥
अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ।
धान्यपर्व्वतरूपेण पाहि तस्मान्नगोत्तम ! ॥
अनेन विधिना यस्तु दद्याद्धान्यमयं गिरिम् ।
मन्वन्तरप्रान्तं सार्द्धं देवलोके महीयते ॥
अप्सरोगणगन्धर्व्वैरीड्यैश्च विराजितः ।
विमानेन दिवः पृष्ठमायाति सुरसेवितम् ॥
ततः कर्म्मक्षये राज्यमाप्नोतीह न संशयः ॥१॥
अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ।
यत्प्रदाता नरो लोकं प्राप्नोति शिवसंयुतम् ॥
उत्तमः षोडशद्रोणः कर्त्तव्यो लवणाचलः ।
मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥
विस्तीर्णो यथाशक्त्या द्रोणादूर्द्ध्वन्तु कारयेत् ।
चतुर्थांशेन विष्कम्भान् पर्व्वतान् कारयेत् पृथक् ॥
विधानं पूर्व्ववत् कुर्य्यात् ब्रह्मादीनाञ्च सर्व्वदा ।
तद्वद्धेमतनून् सर्व्वान् लोकपालान्निवेशयेत् ॥
सरांसि कामदेवादीन्नद्यश्चाथ निवेशयेत् ।
कुर्य्याच्चागरमत्रापि दानमन्त्रं निबोधत ॥
सौभाग्यरससंभूतो यतोऽयं लवणो रसः ।
तथा लवणेन च मां पाहि पापान्नगोत्तम ! ॥
यस्मादमरसाः सर्व्वे सोत्कटा लवणं विना ।
प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिप्रदो भव ॥
विष्णुदेहसमुद्भूतो यस्मादारोग्यवर्द्धनः ।
तस्मात् पर्व्वतरूपेण पाहि संसारसागरात् ॥
अनेन विधिना यस्तु दद्याल्लवणपर्व्वतम् ।
उमालोके वसेत् कल्पं ततो याति परां गतिम् ॥२॥
अतः परं प्रवक्ष्यामि गुडपर्व्वततत्त्वमम् ।
यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितः ॥
उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः ।
त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान् ॥
तद्वद्धामलकं पूजा हैमस्तत्सुरार्च्चनम् ।
विष्कम्भपर्व्वतास्तद्वत् सरांसि वनदेवताः ॥
होमजागरयज्ञाद्यास्तद्वत् लोकपालाधिवासनम् ।
धान्यपर्व्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत् ॥
यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्द्दनः ।
सामवेदस्तु वेदानां महादेवस्तु योगिनाम् ॥
प्रणवः सर्व्वमन्त्राणां गारीणां पार्व्वती यथा ।
तथा रत्नानां प्रवरः सदेवेष्वसुरेषु मतः ॥
मम तस्मात् परां लक्ष्मीं गुडपर्व्वत ! देहि वै ।

यस्मात् सौभाग्यदात्रिया भ्राता त्वं गुरुपर्व्वत ! ॥
शिवाख्यं हि पार्व्वत्याख्यस्मात्मां पाहि सर्व्वदा ।
अनेन विधिना यस्तु दद्याद्गुरुमयं गिरिम् ॥
पूज्यमानः सगन्धर्व्वैर्गौरीलोके महीयते ।
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥
आयुरारोग्यसम्पन्नः पुत्रभृत्यापराजितः ॥ ६ ॥
अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् ।
यस्य प्रदानाद्ध्रुवं वैरिघं याति मानवः ॥
उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः ।
तदर्द्धेनाधमस्तद्वद्द्रव्यवित्तोऽपि शक्तितः ॥
दद्यादेकपलादूर्द्धं यथाशक्त्या विमत्सरः ।
धान्यपर्व्वतवत् सर्व्वं विधायाङ्गिपुङ्गव ! ॥
विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ।
नमस्ते ब्रह्मबीजाय ब्रह्मगर्भाय वै नमः ॥
यस्मादनन्तफलदस्तस्मात् पाहि शिलोच्चय ! ।
यस्मादमेरुरूपं त्वं तस्मान्नमो जगत्पते ! ॥
हेमपर्व्वतरूपेण तस्मात् पाहि नगोत्तम ! ।
अनेन विधिना यस्तु दद्यात् कनकपर्व्वतम् ॥
स याति परमं ब्रह्मलोकमानन्दकारकम् ।
तत्र कल्पशतान्तेऽपि ततो याति परां गतिम् ॥४॥
अतः परं प्रवक्ष्यामि तिलशैलं विधानतः ।
यत्प्रदानान्नरो याति विष्णुलोकमनुत्तमम् ॥
उत्तमो दशभिर्भोगैः पञ्चभिर्मध्यमो मतः ।
त्रिभिः कनिष्ठो विप्रेन्द्र ! तिलशैलः प्रकीर्त्तितः ॥
पूर्व्ववच्चापरं सर्व्वं विष्कम्भपर्व्वतादिकम् ।
दानमन्त्रं प्रवक्ष्यामि यथावन्मुनिसत्तम ! ॥
यस्मान्मधुवधे विष्णोर्देहात् स्वेदसमुद्भवाः ।
तिलाः कृष्णाश्च समिधस्तस्मात्त्वन्ते भवन्तिह ॥
हव्यकव्येषु यस्माच्च तिला एवाभिरक्षणम् ।
भवादुद्धर शैलेन्द्र ! तिलाचल ! नमोऽस्तु ते ॥
इत्यामन्त्र्य च यो दद्यात्तिलाचलमनुत्तमम् ।
स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम् ॥
दीर्घायुष्टमवाप्नोति पुत्रपौत्रैश्च मानवः ।
पितृभिर्देवगन्धर्व्वैः पूज्यमानो दिवं व्रजेत् ॥५॥
अथातः संप्रवक्ष्यामि कार्पासाचलमुत्तमम् ।
यत्प्रदानान्नरो नित्यमाप्नोति परमं पदम् ॥
कार्पासपर्व्वतस्तद्वद्विघ्नकारैरिहोत्तमः ।
दशभिर्मध्यमः प्रोक्तः कनिष्ठः पञ्चभिर्मतः ॥
भारेणाल्पधनो दद्याद्वित्तशाठ्येन वर्ज्जितः ।
धान्यपर्व्वतवत् सर्व्वमासाद्य मुनिपुङ्गव ! ॥
प्रभातायान्तु रात्र्यां दद्याद्दिव्यसुरीरयेत् ।
त्वमेवावरणं यस्माल्लोकानामिह सर्व्वदा ॥
कार्पासाद्रे नमस्तस्मादघौघध्वंसनो भव ।
इति कार्पासशैलेन्द्रं यो दद्यात् शक्तिसन्निधौ ॥
ब्रह्मलोके वसेत् कल्पं ततो राजा भवेदिह ॥*॥६॥
अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ।
तैलोऽन्नतमयं दिव्यं महापातकनाशनम् ॥
विंशत्या घृतकुम्भानामुत्तमः स्याद्घृताचलः ।
दशभिर्मध्यमः प्रोक्तः पञ्चभिस्त्ववरः स्मृतः ॥
अल्पवित्तोऽपि कुर्व्वीत ह्याभ्यामिह विधानतः ।
विष्कम्भान् पर्व्वतांस्तद्वच्चतुर्भागेन कल्पयेत् ॥
घानितण्डुलपात्राणि कुम्भोपरि निवेशयेत् ।
कारयेत् संहतासुत्रान् यथाशोभं विधानतः ॥
वेष्टयेत् शुक्लवासोभिरिक्षुदण्डफलादिकैः ।
धान्यपर्व्वतवत् सर्व्वं विधानमिह पठ्यते ॥
अधिवासनपूर्व्वन्तु तद्वद्धोमसुरार्च्चनम् ।
प्रभातायान्तु रात्र्यां गुरवे च निवेदयेत् ॥
विष्कम्भपर्व्वतांस्तद्वद्ऋत्विग्भ्यः श्रान्तमानसः ।
संयोगाद्दृषसत्पन्नं यस्माद्दत्ततेजसोः ॥
तस्माद्वृषनाभिर्विष्णात्मा प्रीयतामत्र शङ्करः ।
यस्मात्तेजोमयं ब्रह्म घृते तच्च व्यवस्थितम् ॥
घृतपर्व्वतरूपेण तस्मान्मां पाहि भूधर ! ।
अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥
महापातकयुक्तोऽपि लोकमायाति शाङ्करम् ।
हंससारसयुक्तेन किङ्किणीजालमालिना ॥
विमानेनाम्बरोभिश्च सिद्धविद्याधरेवृतः ।
विहरेत् पितृभिः सार्द्धं यावदाभूतसंप्लवम् ॥७॥
अतः परं प्रवक्ष्यामि रत्नाचलमनुत्तमम् ।
सुवर्णशतसाहस्रेण पर्व्वतः स्यादनुत्तमः ॥
मध्यमः पञ्चसप्ततिकञ्चिन्यूनेश्वरः स्मृतः ।
चतुर्थांशेन विष्कम्भाः पर्व्वताः स्युः समन्ततः ॥
पूर्व्वोक्तैश्च वस्त्रगोमेदैर्दधिशैलेन्द्रनीलकैः ।
पुष्परागयुतैः कार्य्यो विद्रुद्भिर्गन्धमादनः ॥
वैदूर्य्यविद्रुमैः पश्चात् संमिश्रो विपुलोऽचलः ।
मुक्तारागैः ससौवर्णैस्तदुत्तरेण तु विन्यसेत् ॥
धान्यपर्व्वतवत् सर्व्वमत्रापि परिकल्पयेत् ।
तदुदाहृतं हुत्वा वृक्षान् देवांश्च काञ्चनान् ॥
पूजयेद् पुष्पपानीयैः प्रभाते चाथ पूर्व्ववत् ।
पूर्व्ववद्गुरु-ऋत्विग्भ्यः फलमन्त्रानुदीरयेत् ॥
यथा देवगणाः सर्व्वे सर्व्वरत्नेष्ववस्थिताः ।
तथा रत्नमयो नित्यमतः पाहि महाचल ! ॥
यस्माद्रत्नप्रदानेन तुष्टिं प्रकुरुते हरेः ।
सदानन्दप्रदानेन तस्मान्मां पाहि पर्व्वत ! ॥
अनेन विधिना यस्तु दद्याद्रत्नमहागिरिम् ।
स याति वैष्णवं लोकमप्सरोभिरभिष्टुतः ॥
यावत् कल्पशतं सार्द्धं वासस्तत्रेह नराधिप ! ।
रूपारोग्यगुणोपेतः सप्तद्वीपाधिपो भवेत् ॥
ब्रह्महत्यादिकं किञ्चिद्दुष्कृतमुत्त वा कृतम् ।
तत् सर्व्वं नाशमायाति गिरिर्वज्रहतो यथा ॥८॥
अतः परं प्रवक्ष्यामि रौप्याचलमनुत्तमम् ।
यत्प्रदानान्नरो याति सोमलोकं द्विजोत्तम ! ॥
दशभिः पलसाहस्रैरुत्तमो रजताचलः ।
पञ्चभिर्मध्यमः प्रोक्तस्तदर्द्धेनावरः स्मृतः ॥
अप्रक्तौ विंशतेरूर्द्धं कारयेत् शक्तितः सदा ।
विष्कम्भपर्व्वतांस्तद्वच्चतुरीयांशेन कल्पयेत् ॥
पूर्व्ववद्राजतान् कुर्य्याच्छैलेन्द्रादीन् विधानतः ।
कलधौतमयांश्चैव लोकपालान् रचयेद्बुधः ॥
ब्रह्मविष्णुवत् कार्य्यो नितम्बोऽत्र चिरन्तनैः ।
राजतं स्याद्दृषस्थेषु सर्व्वमत्रापि काञ्चनम् ॥
शैलेषु पूर्व्ववत् कुर्य्याद्धोमजागरणादिकम् ।
प्रदद्यात्तं प्रभाते तु गुरवे रौप्यपर्व्वतम् ॥
विष्कम्भशैलाऋत्विग्भ्यः पूज्यवस्त्रविभूषणैः ।
इमं मन्त्रं पठन् दद्याद्दर्भपाणिर्विमत्सरः ॥
पितॄणां वल्लभं यस्माद्विष्णोर्ब्रह्मरस्य च ।
रजतं पाहि तस्मान्नः शोकसंसारसागरात् ।
इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम् ।
गवामयुतदानस्य फलं प्राप्नोति मानवः ॥
सोमलोके स गन्धर्व्वैः किन्नराप्सरसाङ्गणे ।
पूज्यमानो वसेच्छक्रान् यावदाभूतसंप्लवम् ॥ ९ ॥
अथातः संप्रवक्ष्यामि शर्करागैलमुत्तमम् ।
यस्य प्रदानाद्विघ्नकृद्ब्रह्मरुद्रार्च्यते सदा ॥
अष्टभिः शर्कराभारैरुत्तमः स्याच्छशाचलः ।
चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥
सार्द्धभारेण शैलन्तु यः कुर्य्यात् स्वल्पवित्तवान् ।
विष्कम्भपर्व्वतान् कुर्य्यात्तुरीयांशेन मानवः ॥
धान्यपर्व्वतवत् सर्व्वमासाद्य मेरुसंयुतम् ।
मेरोरुपरि तद्वच्च स्थाप्यं हेमतरुद्वयम् ॥
मन्दारः पारिजातश्च तृतीयः कल्पपादपः ।
एतद्वृक्षत्रयं ब्रह्मन् सर्व्वेभ्यापि निवेदयेत् ॥
हरिचन्दनसञ्ज्ञानौ पूर्व्वपश्चिमभागयोः ।
निवेद्यौ सर्व्वशैलेषु विशेषाच्छर्करार्चले ॥
मन्दरे कामदेवस्तु प्रत्यग्वक्त्रः सदा भवेत् ।
गन्धमादनशृङ्गेषु धनदः स्याद्दृढसुखः ॥
प्राङ्मुखो वेदमूर्त्तिश्च हंसः स्याद्विपुलाचले ।
हेमो सुपार्श्वसुरभौ दक्षिणाभिमुखौ भवेत् ॥
धान्यपर्व्वतवत् सर्व्वमावाहनमखादिकम् ।
दत्त्वाथ गुरवे दद्याच्छशधरं पर्व्वतोत्तमम् ।
ऋत्विग्भ्यश्च नरः शैलानिमान्मन्त्रानुदीरयेत् ॥
सौभाग्यात्तत्सारोऽयं परमः शर्करागुणः ।
तत् सदानन्दकारी त्वं भव शैलेन्द्र ! सर्व्वदा ॥
अन्तं पिबन्ति ये तु निपेतुर्भुवि शौकराः ।
देवानान्तत्सम्भवोऽयं पाहि नः शर्करागल ! ॥
मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ।
तस्मात्त्वमसि महाशैल ! पाहि संसारसागरात् ॥
यो दद्यात् शर्कराशैलमनेन विधिना नरः ।
सर्व्वपापविनिर्म्मुक्तः प्रयाति शिवमन्दिरम् ॥
चन्द्रादित्यप्रतीकाशमधिरुह्यानुजीविभिः ।
सहैव यानमातिष्ठेत् स तु विष्णुप्रचोदितः ॥
ततः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ।
आयुरारोग्यसम्पन्नो यावच्चन्द्रार्कदैवतम् ॥
भोजनं शक्तितः कुर्य्यात् सर्व्वशैलेष्वमत्सरः ।
सर्व्वाचारगुणवतामशीयात्तदनुज्ञया ।
पर्व्वतोपस्करान् सर्व्वान् प्रापयेत् ब्राह्मणालयम् ॥१०॥

इति मात्स्ये ७७ अध्यायः ॥

देवर्षिविशेषः । यथा,—
"कश्यपान्नारदश्चैव पर्व्वतोऽरुन्धती तथा ॥"
इत्यग्निपुराणम् ॥
(यथाच, महाभारते । ३ । ६३ । २५ ।
"लोमशस्योपसंगृह्य पादौ द्वैपायनस्य च ।
नारदस्य च राजेन्द्र ! देवर्षेः पर्व्वतस्य च ॥")
मत्स्यविशेषः । पावदा इति भाषा । अस्य गुणाः । वायुनाशित्वम् । स्निग्धत्वम् । बलशुक्रकारित्वञ्च । इति राजवल्लभः ॥ इदः । ह्रादभेदः । इति मेदिनी । ते, १२६ ॥ (सह्याद्रिविशेषः । स तु शङ्कराचार्य्यशिष्यस्य मण्डनमिश्रस्य

गिष्यविशेषः। यथा, प्राञ्जलोधिरयां अवधूत-प्रकरणे।
"वसेत् पर्व्वतमूलेषु प्रौढ़ो यो ध्यानधारणात्। सारात्सारं विजानाति पर्व्वतः परिकीर्त्तितः॥")
पर्व्वतकाकः, पुं, (पर्व्वते जातः काकः। प्रायशः पर्व्वतजातत्वात्तथात्वम्।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३। ८६॥
पर्व्वतजा, स्त्री, (पर्व्वतात्जायते या। पर्व्वत+जन्+"पञ्चम्यामजातौ।" ३।२।९८। इति डः।) नदी। इति हेमचन्द्रः। ४। १४६॥ (हिमगिरिजातत्वात् गौरी।) गिरिभववस्तुनि त्रि॥
पर्व्वतजतृणं, क्ली, (पर्व्वतभवं तृणम्। प्राकपार्थिव-वत् समासः।) तृणभेदः। सज्ज इति हिन्दी भाषा। तत्पर्य्यायः। तृणाट्यम् २ पत्राढ्यम् ३ गन्धप्रियम् ४। अस्य गुणाः। बलपुष्टिकरत्वम्। पशूनां सर्व्वदा प्रियत्वञ्च। इति राजनिर्घण्टः॥
पर्व्वतमोचा, स्त्री, (पर्व्वतोद्भवा मोचा कदली-त्यर्थः।) गिरिकदली। इति राजनिर्घण्टः॥
पर्व्वतराजः, पुं, (पर्व्वतानां राजा। "राजाहः-सखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) हिमालयगिरिः। अस्य प्रमाणं वक्ष्यमाणग्रन्थे द्रष्टव्यम्॥
पर्व्वतराजपुत्री, स्त्री, (पर्व्वतराजस्य हिमालयस्य पुत्री।) दुर्गा। यथा, जिकनधनञ्जयसंग्रहयोः।
"शुक्लाच्छात् पक्षयुते दशाहे मूलर्क्षयुक्ता सितसप्तमी या। आरभ्य तस्यां दशमीञ्च यावत् प्रपूजयेत् पर्व्वतराजपुत्रीम्॥"
इति तिथ्यादितत्त्वम्॥
पर्व्वतवासिनी, स्त्री, (पर्व्वते वसतीति। पर्व्वत+वस+णिनि+ङीप्।) आकाशमांसी। इति राजनिर्घण्टः॥ गायत्री। यथा,—
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!। ब्रह्मयोनिसमुत्पन्ने! गच्छ देवि! यथासुखम्॥"
इति यजुर्व्वेदीयगायत्रीविसर्জ্জनमन्त्रः।
काली। यथा, श्यामापूजायां विसर्জ্জनमन्त्रः॥
"उत्तरे शिखरे देवि! भूम्यां पर्व्वतवासिनि!। ब्रह्मयोनिसमुत्पन्ने गच्छ देवि! ममान्तरम्॥"
पर्व्वताधारा, स्त्री, (पर्व्वतः आधारो यस्याः। अदन्तुलाचजे; पृथिवी धियते इति पुराण-प्रसिद्धेस्तथात्वम्।) पृथिवी। इति हेम-चन्द्रः। ४। ३॥
पर्व्वतारिः, पुं, (पर्व्वतानामरिः शत्रुः। पर्व्वत-पक्षच्छेदनादस्य तथात्वम्।) इन्द्रः। इति शब्दरत्नावली॥
पर्व्वताग्रयः, पुं, (पर्व्वते आग्रीते इति। आ+ग्री ग्रयने+अच्।) मेघः। इति शब्दचन्द्रिका॥
पर्व्वताश्रयः, पुं, (पर्व्वत आश्रयो वासस्थानं यस्य।) शरभः। इति राजनिर्घण्टः॥ पर्व्वतवासिनि त्रि॥
पर्व्वतीयः, त्रि, (पर्व्वते भवः। पर्व्वत+"विभाषा-मनुष्ये।" ४। २। १४४। इति छः।) पर्व्वत-सम्बन्धी। पर्व्वतमयः। पाहाड़िया इति भाषा। पर्व्वतशब्दात् भवार्थे ढ्यप्रत्ययनिष्पन्नः। (मनुष्ये तु पार्व्वतीयः। इति सिद्धान्तकौमुदी॥ यथा, रघुः। ४। ७७।
"तत्र जन्यं रघोर्घोरं पार्व्वतीयैर्गजैरभूत्। नाराचक्षेपणीयाश्मनिर्य्येणोत्पतितानलम्॥")
पर्व्वतोर्म्मिः, पुं, मतुरुविशेषः। इति कश्चिन् भूरि-प्रयोगे प्रमादलिखनं, पर्व्वतोर्व्वीरिति मतुरुह्रस्वबोधकपाठः साधुः॥
पर्व्वधिः, पुं, (पर्व्वाणि अमावस्यापूर्णिमयोः ह्रास-वृद्धिं दधातीति। पर्व्व+धा+किः।) चन्द्रः। इति शब्दकल्पद्रुमः॥
पर्व्वपुष्पी, स्त्री, (पर्व्वसु ग्रन्थिषु पुष्पं यस्याः। स्त्रियां ङीप्।) रामदूतीवृक्षः। नागदन्ती। इति शब्दचन्द्रिका रत्नमाला च॥
पर्व्वपूर्णता, स्त्री, (पर्व्वणः पूर्णता।) सम्भारः। आयोजनम्। इति भूरिप्रयोगः॥ पर्व्वणः पूर्ण-त्वञ्च॥
पर्व्वमूला, स्त्री, (पर्व्वणि पर्व्वणि मूलं यस्याः। यद्वा, पर्व्व एव मूलं यस्याः।) वेतसः। इति राजनिर्घण्टः॥
पर्व्वयोनिः, पुं, (पर्व्व एव योनिरुत्पत्तिकारणं यस्य।) इक्ष्वादिः। इति हेमचन्द्रः। ४। २६६॥
पर्व्वरोगं, क्ली, पर्व्व। इति शब्दरत्नावली॥
पर्व्वरोधः, पुं, पर्वोत्तरः। गर्व्वः। मारुतः। पर्व्वशिरा। नतकम्। दूतकञ्चणः। पत्र-चूर्णरसः। इति शब्दरत्नावली॥ पर्परोध इति मेदिन्यां पाठः॥
पर्व्वलट [ट], पुं, (पर्व्वसु ग्रन्थिषु रोहतीति। रुह+क्विप्।) दाड़िमः। इति शब्दकल्पद्रुमः॥
पर्व्ववल्ली, स्त्री, (पर्व्वप्रधाना ग्रन्थिबहुला वल्ली लता।) मालाढूर्व्वा। इति राजनिर्घण्टः॥
पर्व्वसन्धिः, पुं, (पर्व्वणोः सन्धिः) प्रतिपत्पक्ष-दशोरन्तरम्। इत्यमरः। १।४।७॥ "प्रतिपत्-पक्षदशयोर्यत्सन्धं स पर्व्वसन्धिः। किंवा स सन्धिः पर्व्वत्यन्वयः। पक्षदशानां पूरणी पक्ष-दशी संख्याया डट्टिति डट टित्त्वादीप्। पक्षदशीशब्देन पूर्णिमामावास्ययोर्द्वयोर्ग्रहणम्। अतएव पौर्णमास्या अमावास्या वा शेषसार्द्ध-दण्डचतुष्टयं प्रतिपदश्च प्रथमसार्द्धदण्डचतुष्टयं पर्व्वसन्धिरिति वृद्धाः॥ सैंहिकेयो यदा राहु-र्ग्रसते पर्व्वसन्धिञ्चिति यमः॥ पर्व्वणोः सन्धिः पर्व्वसन्धिः पृषोदरादित्वेनापि पर्व्वपूरणी इत्यस्य गाक्षीत्यपि वा पर्व्व। प्रतिपत्पक्षदशयोस्तु सन्धिः पर्व्वाथ दिक् ककुविति स्वामी॥
दर्शप्रतिपदोः सन्धौ ग्रन्थिप्रस्तावयोरपि।
पर्व्वशब्दो हि विद्युवत्प्रभृतिष्वपि दृश्यते॥
इति रत्नः।" इति भरतः॥
पर्व्वित्तः, पुं, (पर्व्व ग्रन्थिर्जातमस्य। पर्व्व+इतच्।) पर्व्वतमनुष्यः। इति शब्दरत्नावली॥
पर्शुः, पुं, (परं शृणाति हिनस्तीति। शृगि हिंसे+"आङ्परयोः खनिशृभ्यां डिच्च।" उणा।

१।१४। इति कुः स च डित्। पृषोदरादित्वात् दलोपः। यद्वा, अपृणति शृणोतीति। अपृ संसर्गे+"सृपृभ्यः कित्" उणा ५।२०। इति शुन् धातोश्च पृ-आदेशः।) परशुः। इति हेमचन्द्रः। ३।४५०॥ (यथा, रामायणे। ३। २८। २४।
"भिन्दिपालान् शतघ्नीश्च पाशान् पर्शूंश्च मुद्गरोपलान्।
प्रासान् पाशांश्च पर्शून् कुन्तांश्च कुशलो युधा॥")
पर्शुका, स्त्री, (पर्शुरिव प्रतिभातीति। "इवे प्रति-कृतौ।" ५।३।९६। इति कन्। स्त्रियां टाप्।) पार्श्वास्थि। इत्यमरः। २।६।६९॥
पर्शुपाणिः, पुं, (पर्शुः परशुः पाणौ यस्य।) गणेशः। इति हेमचन्द्रः। २।१२१॥ (परशुरामः। इति व्युत्पत्तिलभ्योऽर्थः॥)
पर्शुरामः, पुं, (पर्शुधारी रामः। प्राकपार्थिवादि-वत् समासः। परशुना सह जातत्वादस्य तथात्वम्। यदुक्तं कालिकापुराणे ७८ अध्याये।
"भारावतरणार्थाय जातः परशुना सह। सहजः परशुस्तस्य न जहाति कदाचन॥")
परशुरामः। इति शब्दरत्नावली॥
पर्षदः, पुं, (परत्रं दधातीति। परत्र+धा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः। पृषोदरात् साधुः।) कुठारः। इति जटाधरः॥
पर्ष, ङ क्षेपे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) रेफोपधः। क्षेप इह आदौ-भावः। ङ, पर्षते पथसा पटः। स्पर्ध इति चतुर्भुजः। स्पर्धते पस्पर्धे। इति दुर्गादासः॥
पर्षत्, [द्] स्त्री, (परिसीदन्त्यस्याम्। परि+सद्+"सत्सूद्विषेति।" ३। २। ६१। इति क्विप्। "सदिरप्रतेः।" ८। ३। ६६। इति षत्वम्। बाहुलकात् इकारलोपः। यद्वा, "शृदृभसोऽदिः।" उणा १।१२८। इति वचन-वचनात् पर्ष क्षेपणे इत्यस्मादपि अदिः।) सभा। इत्यमरादिकोषः॥ (यथा, याज्ञवल्क्ये। १। ६।
"चत्वारो वेदधर्म्मज्ञाः पर्षत्त्रैविद्यमेव वा।
सा ब्रूते यं स धर्म्मः स्यादेको वाधात्त-विंशतिः॥")
पर्षदृलः, त्रि, (पर्षत् सभा विद्यते यस्य। पर्षत्+"रज:शब्दाभ्यां।" ५।२।११२। इति वलच्।) पारिषदः। इति शब्दरत्नावली॥ (यथा, भट्टिः। ४। १२।
"ब्राह्मीवयालदीप्राक्षः सुतनः परिपूजयन्। पर्षद्वलान् महाप्रश्नैराट नैकटिकाश्रमान्॥")
पर्ष, क रक्षे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पार्षयति। शुक्लयजु-र्वेदसिद्धे दीर्घोऽपि पाठः कात्यायनाग-मिदशुक्लयजुर्वेदतत्त्वं नैरन्तर्य्यसां बोधयति। तेन पार्षति पर्षति इत्यपि सिद्धम्। इति दुर्गादासः॥
पर्ष, ज गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ज, पार्षः पर्षः। इति दुर्गादासः॥

पलं, क्ली, (पलतीति। पल+अच्।) आमिषम्। कर्षचतुष्टयम्। इत्यमरः।३।३।२०१।२।६।८६॥ तन्तु ग्राम्ये तोलकचतुष्टयम्। वैद्यके अष्टतोलकम्। लौकिके द्वात्रिंशद्भिमाषकैस्तोलकत्रितयम्। तत्पर्य्यायः। सृष्टिः २ प्रकुञ्चः ३ चतुर्थिका ४ विलम्॥ षोड्शिकाख्यम्६। इति वैद्यकपरिभाषा॥ यथा, तिथ्यादितत्त्वे।

"पलन्तु लौकिकैर्मानैः द्वात्रिंशद्भिमाषकम्।
तोलकत्रितयं ज्ञेयं ज्योतिर्वैः क्षुतिसम्मतम्॥"

षिचटिका। इति राजनिर्घण्टः॥ सा तु घटिकाषष्टिभागैकभागः। षष्टिविपलञ्च। पलदण्डयोः प्रमाणन्तु।

"दशगुर्वक्षरोच्चारकालः प्राणः षडात्मकैः।
तैः पलं स्यात्तु तत्षष्ट्या दण्ड इत्यभिधीयते॥"

तेन च।

"मा कान्ते पलशब्दान्ते पर्य्यायाग्रे देवी स्याच्चौः
कान्तं वक्रं वृत्तं पूर्णं चन्द्रं मत्वा रात्रौ चेत्।
क्षुत्क्षामः प्राटंश्चेत्तत्रेतो राक्षः क्रूरः प्राप्ता-
सक्षाद्वान्ते हन्मीत्याख्यान्ते ग्रस्येत्काम्ये कर्त्तव्या॥"

अस्यैकपाठात् पलं षष्टिपाठाद्दण्डः। इति ज्योतिस्तत्त्वम्॥

पलः, पुं, (पलतीति। पल+अच्।) पलालः। इति हेमचन्द्रः। ३। २४८॥ (यथा, महाभारते। ३। २३३। ११।

"पक्वाश्च शौल्काश्च महाशुनाश्च
चौराश्च दुष्टाश्च पलाश्च वर्ज्याः॥")

पलक्या, स्त्री, (पलकं मांसं तद्वहये हितम्। पलक+यत्। स्त्रियां टाप्।) पालङ्क्याकः। इति राजनिर्घण्टः॥

पलगण्डः, पुं, (पलं मांसं तद्वत् गण्डति भित्त्वा स्रवादिना निर्गच्छतीति। गण्ड+अच्।) लेपकः। इत्यमरः। २। १०। ६॥ राज इति भाषा॥

पलङ्कटः, त्रि, (पलं मांसं कटति आकुञ्चितं करोतीति। पल+कट+बाहुलकात् खच् सुम् च।) भयग्राहः। भीरुः। इति त्रिकाण्डशेषः॥

पलङ्करः, पुं, (पलं मांसं करोतीति। पल+ञ+अच्। "तत्पुरुषे कृतीति।" ६। ३। १४। इति द्वितीयायाः अलुक्।) पिशुनः। इति त्रिकाण्डशेषः॥

पलङ्कषः, पुं, (पलं कषतीति। कष हिंसायाम्+अच्। "तत्पुरुषे कृतीति।" ६। ३। १४। इति द्वितीयायाः अलुक्।) राक्षसः। इति मेदिनी। षे, ५१॥ कश्यपगृध्रगुधुः। इति राजनिर्घण्टः॥

पलङ्कषा, स्त्री, (पलङ्कष+टाप्।) शौण्डिकः। राजा। गृध्रगुधुः। किंशुकः। सुरौरी। लाक्षा। इति मेदिनी॥ क्षुद्रगोक्षुरकः। महाश्रावणी। (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।

"अजाक्षीक्षुमेरोमाणि वचाकुष्ठं पलङ्कषा॥")

मक्षिका। इति राजनिर्घण्टः॥

पलप्रियः, पुं, (पलमामिषं प्रियं यस्य।) शौण्डिकाकः। इति राजनिर्घण्टः॥ मांसाधिनि, त्रि॥

पलभा, स्त्री, (पलस्य भा छविर्यत्र।) मेषसंक्रमणादर्वाक् यमादष्टदिने मध्याह्ने द्वादशाङ्गुलशङ्कुना छाया। तत्पर्य्यायः। पलविभा २ विषुवत्प्रभा ३। यथा, गणितावे।

"मेषादिगे सायनभागसङ्ख्ये
दिनार्द्धजा भा पलभा भवेत् सा॥"

पलभयोन्नतचरखण्डकैः क्रमोत्क्रमस्थैर्दोर्गणान्वितैर्लङ्कोदयैः खदेशीयोदया भवन्ति। अन्यत्तत्सृष्ट्यधिकारेऽपि चरसंस्कृता यदाः खदा भवन्तीति प्रयोजनम्॥ यथा, सिद्धान्तशिरोमणौ॥

"क्रियतुलाधरसंक्रमपूर्व्वतोऽयनलवोत्क्रदिनैर्विषुवद्दिनम्।
मकरकर्कटसंक्रमतोऽयनं द्युदलभा विषुवद्दिवसेऽभा॥"

"एवं विषुवती छाया खदेशे या दिनार्द्धजा।
दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा॥"

इति सूर्य्यसिद्धान्तः॥

"अक्षतुलाद्रिगतस्य रवेर्दिने
द्युदलभार्कभसाङ्गुलशङ्कुजा।
पलविभाख्य— ॥"

इति ब्रह्मवधिस्फुटसिद्धान्तः॥

पललं, क्ली, (पलति पल्यतेऽनेन वा। पल गतौ+"वृषादिभ्यश्चित्।" उणां १। १०८। इति कलच्।) मांसम्। इत्यमरः। २। ६। ३३॥ (यथा, गारुडे। १८१ अध्याये।

"मार्ज्जारपललं पिष्ट्वा हरितालञ्च भावितम्।
छागमूत्रेण तल्लिप्तो मूषिको मूषिकान् हरेत्॥")

पङ्कम्। (यथा, गोः रामायणे। ५। ८७। २६।

"दोषपङ्कनिमग्नं त्वामयशःपललावृतम्।
सर्व्वथा मानुषो रामस्त्रातमभ्युपपद्यते॥")

तिलचूर्णम्। इति मेदिनी। ले, १०४।

"पललं तिलकल्कं स्यात्तिलचूर्णञ्च पिष्टकः।
पललं मधुरं वृष्यं पित्तास्रबलपुष्टिदम्॥"

इति राजनिर्घण्टः॥

वैद्यकतिलचूर्णम्। तिलकुटा इति भाषा। यथा, वैद्यके।

"पललन्तु समाख्यातं वैद्यकं तिलपिष्टकम्।
पललं मलहृद् वृष्यं वातघ्नं कफपित्तजित्॥
हृद्यं गुरु वृष्यञ्च स्निग्धं मूत्रविवर्द्धकम्॥"

पललः, पुं, (पलतीति। पल गतौ+"वृषादिभ्यश्चित्।" उणां। १। १०८। इति कलच्। यद्वा, पलं मांसं लातीति। ला+कः।) राक्षसः। इति मेदिनी। ले, १०४॥

पललज्वरः, पुं, (पललस्य मांसस्य ज्वर इव।) पित्तम्। इति त्रिकाण्डशेषः। १४१॥

पललाशयः, पुं, (पललेऽशेते इति। आ+शीङ् शयने+अच्।) गण्डरोगः। इति शब्दरत्नावली।

पलवः, पुं, (पलं पलायनं वाति हिनस्ति नाशयतीति। पल+वा ञ गमनहिंसयोः+"आतो-

ऽनुपसर्गे कः।" ३। २। ३। इति कः।) मत्स्यबन्धनोपायः। पोलो इति भाषा। तत्पर्य्यायः। प्लवः २ प्लञ्जरावेटः ३। इति त्रिकाण्डशेषः॥

पलाशिः, पुं, (पलस्य मांसस्य अशिः। मांसपाकशुक्तिवत्तयास्य तथात्वम्।) पित्तम्। इति हारावली। १४१॥

पलाङ्गः, पुं, (पलं मांसं तत्प्रधानं अङ्गं यस्य।) शिशुमारः। इति हारावली। ७०॥

पलाङ्गुः, पुं, (पलस्य मांसस्य अङ्गमिवाचरतीति। "कृञो द्वितीयतृतीयशम्बबीजात्कृषौ।" उणां १। ३८। इति डुप्रत्ययात् साधुः।) मूलविशेषः। पेयाङ् इति भाषा। तत्पर्य्यायः। सुकन्दकः २। इत्यमरः। २। ४। १४७॥ लोहितकन्दः ३। इति रत्नमाला॥ तीक्ष्णकन्दः ४ उग्रः ५ मुखदूषणः ६ भूप्रियः ७ लम्बिनः ८ दीपनः ९ सुखगन्धकः १० बहुपत्रः ११ विषगन्धः १२ रोचनः १३ पलाण्डुः १४ सुकुन्दकः १५। इति शब्दरत्नावली॥ अस्य गुणाः। कटुत्वम्। बल्यत्वम्। कफपित्तवाग्निदोषनाशित्वम्। गुरुत्वम्। वृष्यत्वम्। रोचनत्वम्। स्निग्धत्वञ्च। इति राजनिर्घण्टः॥ यथा, भावप्रकाशे।

"पलाण्डुर्वनेषञ्च दुर्गन्धो मुखदूषकः।
पलाण्डुस्तु गुणैर्न्यूनो रसोनसदृशो गुणैः॥
स्वादुपाकरसोऽशुष्कः कफशुक्रातिपित्तलः।
हरते केवलं वातं बलवीर्य्यकरो गुरुः॥"

पलाण्डुभक्षणे दोषो यथा,—

"पलाण्डुं विड्वराहञ्च छत्राकं ग्रामकुक्कुटम्।
लशुनं गृञ्जनञ्चैव जग्ध्वा चान्द्रायणञ्चरेत्॥"

इति प्रायश्चित्तविवेके याज्ञवल्क्यः॥

पलादः, पुं स्त्री, (पलं मांसमत्तीति। अद् भक्षणे+"कर्म्मण्यण्।" ३। २। १ इत्यण्।) राक्षसः। इति जटाधरः॥ (मांसभक्षके, त्रि॥)

पलादनः, पुं स्त्री, (पलं मांसमत्तीति। पल+अद्+ल्युः।) राक्षसः। इति हेमचन्द्रः॥ मांसभक्षणशीले, त्रि॥

पलान्नं, क्ली, (पलं मांसं तेन सह पक्वं अन्नम्। शाकपार्थिवादिवत् समासः।) मांसादियुक्तसिद्धभक्तम्। पोलाओ इति भाषा। तस्य पाकप्रकारो द्रव्याणि च यथा। छागमांसं १ घृतावः। घृतं १० घृतावपादः। लवणं ३ माषकम्। लवङ्गं ३ माषकम्। एला ३ माषकम्। तण्डुलं १ घृतावः। मरिचं २ तोलकम्। तेजपत्रं २ तोलकम्। कुङ्कुमं १ माषकम्। आर्द्रकं २ तोलकम्। लवणं ६ तोलकम्। धन्याकं २ तोलकम्। द्राक्षा ८० घृतावपादार्द्धम्। छागमांसं क्षुण्णं घोरयित्वा शुष्कप्रलेपपाककरणानन्तरं पात्रान्तरे तेजपत्रोपरि अल्पाखण्डगन्धद्रव्येण सह प्रथमं सञ्जीकरणीयम्। ततस्तण्डुलं जलेनार्द्धसिद्धं कृत्वा मण्डगालनपूर्व्वकमल्पाखण्डगन्धद्रव्येण सह तन्मांसोपरि सञ्जीकरणीयम्। एवं प्रकारेण वारं वारं सञ्जीकृत्य तदुपरि अवशिष्टघृत-

पलाग्रः

क्षेपयेत् दक्षहस्तं तमाङ्गारोपरि रक्षेत्। इति पाकराजेश्वरः॥ * ॥ अत्र मांसस्थाने मत्स्य-पलन्यूनादिकं गन्धद्रव्येण सह दधियोगः घृत-परिमाणस्याधिक्यञ्च भवितुमर्हति॥

पलापः, पुं, (पलं मांसं आप्यते प्राप्यते वाहु-ल्येन अत्र। पल+आप्+घञ्।) कण्ड-पाग्रकः। हस्तिकपोलः। इति शब्दमाला॥

पलायनं, क्ली, (पलायते इति। पलाय+भावे ल्युट्।) भयादिना स्थानान्तरगमनम्। पालान इति पीठ देशीय इति च भाषा॥ (यथा, रघुः।१६।३१।

"मित्र क्षतमपदिश्य पार्थतः
प्रस्थितं तमनवस्थितं प्रियाः।
विघ्न हे गुरु! पलायनच्छला-
च्छङ्कसेति रुरुधुः कचग्रहैः॥")

तत्पर्य्यायः। अपयानम् २ संद्रावः ३ द्रवः ४ विद्रवः ५ उपक्रमः ६ संद्रावः ७ उद्द्रावः ८ प्रद्रावः ९। इति हेमचन्द्रः।३।४६६॥ निद्रावः १० उद्द्रवः ११ सल्लापः १२ द्रावः १३ हंसालिका १४ अपक्रमः १५ चंक्रमः १६। इति शब्दरत्नावली॥

पलायितः, त्रि, (पलाय+क्त।) पलायनविशिष्टः। तत्पर्य्यायः। नष्टः २ गृहीतदिक् ३ तिरो-हितः ४। इति हेमचन्द्रः॥

पलालः, पुं क्ली, (पलति गच्छत्यूर्द्ध्वं प्राप्नोतीति। पल+"तमिविषिविडीति।" उणां १।११७। इति कालन्। यद्वा, पलं अलतीति। अल+ "कर्म्मण्यण्।" ३।२।१। इति अण्।) विच्छलकाष्ठः। गुच्छमूल्यधान्यनालः। इत्य-मरः। २।८।२२॥ पोयाल इति भाषा॥ (यथा, मनुः।५।१२२।

"प्रोक्षणात् दृषत्काष्ठेन पलालेनैव शुध्यति॥"

क्ली, छन्दस्य मात्राविशेषः। यथा, महा-भारते।३।१२७।१०।

"काकी च हलिमा चैव मालिनी हंहिला तथा।
आर्य्या पलाला वैमित्रा सप्तैता: शिशुमातरः॥")

पलालशेखरः, पुं, (पलालं शेखरं यस्य।) आम्रवृक्षः। इति शब्दमाला॥

पलाश्यं, क्ली, (पलं मांसं कल्पनमित्यर्थः। अश्नुते व्याप्नोतीति। पल+अश्+"कर्म्मण्यण्।" ३। २।१। इत्यण्।) पचम्। इत्यमरः। २।४।१४॥ (यथा, महाभारते।३।३५।२५।

"हृष्टच्छाल इवानूपे शाकपुष्पपलाश्यवान्॥"

पलाश्यस्य पलाग्रवृक्षस्य इदम्। पलाग्रपुष्पादि। यथा कुमारे।३।२६।

"बालेन्दुवक्त्राण्यविकाशभावात्
बभुः पलाश्यान्यनिलोद्धतानि।
सद्यो वसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम्॥")

पलाश्यः, पुं, (पलाश्यानि पर्णानि सन्त्यस्य। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्।) खनाम-ख्यातवृक्षः। स तु ब्रह्मणः स्वरूपः। यथा,—

पलाश्यः

स्कन्द उवाच।

"अश्वत्थरूपो भगवान् विष्णुरेव न संशयः।
ब्रह्मरूपो वटस्तद्वत् पलाश्यो ब्रह्मरूपधृक्॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम्॥

ऋषय ऊचुः।

कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः।
एतत् कथय सर्व्वज्ञ! संशयोऽत्र महान् हि नः॥

स्कन्द उवाच।

पार्व्वतीग्निवयोर्देवैः सुरतं कुर्व्वतोः किल।
अग्निं ब्राह्मणवेषेण प्रेष्य विघ्नं कृतं पुरा॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः।
रेतःसेकसुखभंगकल्पमाना तदा रुषा॥

पार्व्वत्युवाच।

क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम्।
तस्माच्चम सुखभंगादूयूयं वृक्षत्वमाप्नुत॥

स्कन्द उवाच।

एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः॥"

इति पाद्मोत्तरखण्डे १६० अध्यायः॥

तत्पर्य्यायः। किंशुकः २ पर्णः ३ वातपोथः ४। इत्यमरः।२।१।२६॥ याज्ञिकः ५ त्रिपर्णः ६ वक्रपुष्पः ७ पूतद्रुः ८ ब्रह्मवृक्षकः ९ ब्रह्मोप-नेता १० काष्ठद्रुः ११। अस्य गुणाः। कषा-यत्वम्। उष्णत्वम्। क्रिमिदोषविनाशित्वञ्च॥ सद्-बीजगुणः। पामकण्डूतिदद्रुत्वग्दोषनाशित्वम्॥ तत्पुष्पगुणः। उष्णत्वम्। कफकुष्ठनाशित्वञ्च॥ तत्पुष्पं चतुर्विधं यथा, राजनिर्घण्टे।

"रक्तः पीतः सितो नीलः कुसुमेषु विभाव्यते।
किंशुकैर्गुणसाम्येऽपि सितो विप्रानदः स्मृतः॥"

"पलाश्यः किंशुकः पर्णो याज्ञिको रक्तपुष्पकः।
त्रारम्भेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः॥
पलाशी दीपनो वृष्यः सरोणो व्रणगुल्मजित्।
कषायः कटुकस्तिक्तः स्निग्धो गुदजरोगजित्॥
भग्नसन्धानकृद्दोषयकृत्प्लीहार्शःक्रिमीन् हरेत्।
तत्पुष्पं स्वादु पाके तु कटु तिक्तं कषायकम्॥
वातलं कफपित्तास्रकृच्छ्रक्षितिदूषणि गुरुतलम्।
तद्दलाद्यमनं वातरक्तक्लेदहरं परम्॥
फलं लघ्वग्नि मेहार्शःक्रिमिवातकफापहम्।
विपाके कटुकं रूक्षं कुष्ठगुल्मोदरप्रणुत्॥"

इति भावप्रकाशः॥

पलाश्यभेदा। यथा,—

"तद्भेदे स्यात् किंशुलुकः किंशुलो हस्तिकर्णकः॥"

इति शब्दरत्नावली॥

(पलाश्यस्य फलपुष्पादौ क्ली॥) घृटी। (पलं मांसं अश्नातीति। पल+अश्+अण्। यद्वा, पले मांसे आशा यस्य।) राक्षसः। इति मेदिनी। शे, २४॥ हरितः। मगधदेशः। इति शब्दरत्नावली॥

पलाश्यः, त्रि, (पलवद्धरिद्वर्णेन अश्यते व्याप्यते इति। अश+घञ्।) हरिद्वर्णविशिष्टः। इति मेदिनी। शे, २४॥ निर्दयः। इति धरणिः॥

पलितं

पलाश्यकः, पुं, (पलाश+संज्ञायां कन्।) घृटी। इति जटाधरः॥ पलाश्यदृक्षः। इति शब्द-रत्नावली॥

पलाश्यपर्णी, स्त्री, (पलाश्यस्य पर्णमिव पर्णमस्याः। गौरादित्वात् ङीष्।) अश्वगन्धा। इति राज-निर्घण्टः॥

पलाश्याख्यः, पुं, (पलाश्यस्य आख्या आख्या यस्य। यद्वा, पलाश्यं पलाश्यगन्धमाख्यातीति। आ+ख्या+कः।) गाढ़ीहिङ्गु। इति राजनिर्घण्टः॥

पलाश्यान्ता, स्त्री, (पलाश्यं अन्ते यस्याः। यद्वा, पलाश्यानां पत्राणां अन्तो गन्धवान् यस्याः।) गन्धपत्रा। इति राजनिर्घण्टः॥

पलाश्यी, [न्] पुं, (पलाश्यं विद्यतेऽस्य। पलाश्य +इनिः।) वृक्षः। इत्यमरः। २।४।५॥ (पलं मांसं अश्नातीति। अश्+णिनिः।) राक्षसः। इति मेदिनी। ने, १८६॥ क्षीरि-वृक्षः। इति रत्नमाला॥ (पञ्चविशिष्टे वाच्य-लिङ्गः। यथा,—

"ततः स भगवान् विद्वान् ब्राह्मणो द्विजसत्तमः।
भस्मराशीकृतं वृक्षं विद्यया समजीवयत्॥
अङ्कुरं जनयांचक्रे ततः पर्णद्वयान्वितम्।
पलाश्यिनं शाखिनञ्च तथा विटपिनं पुनः॥"

इति महाभारते।१।३३।६—१०॥

स्त्री, नदीविशेषः। इयन्तु शुक्तिमत्पर्व्वतसम्भूता। यथा, मार्कण्डेये।५७।३०।

"क्षमा पलाश्यिनी चैव शुक्तिमत्प्रभवा स्मृता॥")

पलाश्यी, स्त्री, (पलाश्य+गौरादित्वात् ङीष्।) लाक्षा। लताविशेषः। तत्पर्य्यायः। पञ्चपत्री२ पर्णवल्ली ३ पलाश्यिका ४ सुरपर्णी ५ सुपर्णी ६ दीर्घवल्ली७ विषाद्यंगी८ अल्पपर्णी९ दीर्घपर्णी१० रसाल्ला ११ अश्यिका १२ अश्वातकी १३ काश्यिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। सुखदोषारोचकनाशित्वम्। पथ्य-त्वम्। पित्तकोपकारित्वञ्च। इति राजनिर्घण्टः॥

पलिक्नी, स्त्री, (पलितमस्या अस्तीति। "अर्श आदिभ्योऽच्।" इत्यच्। "अस्सितपलितयोर्नः।" वार्त्ति। "छन्दसि वामेके।" इत्येकोक्तेर्भाषाया-मपि तस्य क इत्यादेशो भवति। ततो नाम-त्वात् ङीप्।) वृद्धा। इत्यमरः। २।६।१२॥ वालगर्भिणी गौः। इति हेमचन्द्रः॥

पलिघः, पुं, (परिहन्यतेऽनेनेति। परि+हन+ "परौ घः।" ८।२।२२। इति अप् घादे-शश्च। ततः "परेश्च घाङ्कयोः।" ८।२।२२। इति रस्य लः।) काष्ठकलसः। घटः। प्राकारः। गोपुरम्। इति मेदिनी। घे, ६॥

पलितं, क्ली, (पलि+भावे क्तः। यद्वा, पलन-मिति। पल+"पलेरितजादेश्च पः।" उणां। ५। ३४। इति इतच् पस्य पत्वम्।) जरया केशादौ शौक्ल्यम्। केशपाकः। इत्यमरः। २। ६।४१॥ (यथा, मनुः।६।२।

"यद्यस्यास्तु यदा पश्येदलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत्॥")

तस्य निदानं यथाह माधवकरः ।
"क्रोधशोकश्रमक्लान्तः शरीरोष्णाग्निरोगतः ।
पित्तञ्च केशान् प्रचुरं पलितं तेन जायते ॥"
तच्चिकित्सा यथा,—
"लौहचूर्णस्य कर्षन्तु दद्याद्धृतमञ्जतः ।
धात्रीफलरसं पथ्ये द्वे तथैकं विभीतकम् ॥
पिष्ट्वा लोहमये भाण्डे स्थापयेन्निशि वासयेत् ।
लेपोऽयमचिराद्धन्ति पलितं नेह संशयः ॥
दद्यादेनं पचेत्कर्षांश्च ।
काश्मर्य्या मूलमादौ सहचरकुसुमं केतकस्यापि मूलं
लौहं चूर्णं सभृङ्गं त्रिफलपलयुतं तैलमेभिः पचेयुः ।
क्षात्वा लोहस्य भाण्डे क्षितितलनिहितं स्थापयेत्तन्निशायामेकं
केशाः काशप्रकाशा अपि मधुपनिभा जायते योगादस्य ॥
त्रिफला नीलिकापत्रं भृङ्गराजोऽयसो रजः ।
अवीक्षूत्थेन संपिष्टं लेपात् कृष्णीकरं परम् ॥"
इति भावप्रकाशे मध्यखण्डे क्षुद्ररोगाधिकारे ॥
पलनम् । तापः । कर्दमः । इति मेदिनी । ते, १२२ ॥ (पल गतौ + "लोहपलिलौ ।" उणा । ३ । ८२ । इति क्तप्रत्ययेन निपातनात् सिद्धम् ।)
केशमात्रः । इति हेमचन्द्रः उज्ज्वलदत्तश्च ॥
पलितः, पुं, (पलति इद्धावस्थायां केशग्रहीत्रादिकं प्राप्नोतीति । पल + "पलेरितजादेश्च पः ।" उणा । ५ । २४ । इति इतच् पस्य च पः ।) वृद्धः । इति जटाधरः ॥
पलिता, स्त्री, (पलित + टाप् ।) वृद्धा । इति जटाधरः ॥
पल्यङ्कः, पुं, (परितोऽङ्कतेऽत्र इति । परि + अकि लक्षणे + घञ् । "परेश्च घाङ्कयोः ।" ८ । २ । २२ । इति रस्य लः ।) पर्य्यङ्कः । इत्यमरः । २ । ७ । १७८ ॥ (यथा, रामायणे । २ । ३२ । ६ ।
"पल्यङ्कमन्यास्तरणं नागराजविभूषितम् ।
तमप्येच्छति वैदेही प्रतिष्ठापयितुं त्वयि ॥")
पल्ययनं, क्ली, (परितः अयति गच्छति अनेन । परि + अय गतौ + करणे ल्युट् । रस्य लत्वम् ।) पर्य्याणम् । इति हेमचन्द्रः । ४ । ३१८ ॥ घोड़ार जिन् इति भाषा ॥
पल्यूल, तृ क लूनिपूत्योः । इति कविकल्पद्रुमः । (अदन्तपुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः हृस्वमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्यूलत् त्वं लोकः । पल्यूलयति जगं गङ्गा । इति दुर्गादासः ॥
पल्यूल, तृ क लूनिपूत्योः । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-परं-सकं-सेट् ।) यकारयुक्तैकलकारमध्यः दीर्घमध्यश्च । लूनिश्छेदः । पूतिः पवित्रीकरणम् । अपपल्यूलत् त्वं लोकः । पल्यूलयति जगं गङ्गा । इति दुर्गादासः ॥
पल्ल, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पल्लति । इति दुर्गादासः ॥

पल्लः, पुं, (पल्लति गच्छत्यादिग्राह्यं गच्छतीति । पल्ल + पचाद्यच् ।) स्थलकुमूलकम् । इति मेदिनी । ले, ३० ॥ पानुड इति मराट इति च भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने १३ अध्याये ।
"सुपिधानन्तु तं कृत्वा यवपल्ले निधापयेत् ॥")
पल्लवः, पुं, क्ली, (पल्यते इति पल् । पल् + क्विप् । लूयते इति लवः । लू + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । ततः पल्लश्चासौ लवश्चेति ।) नवपत्राद्युद्गमशाखाग्रपर्व्व । इति भरतः ॥ नवपत्रस्तवकः । "इति मधुः ॥ पर्व्वपत्रादिसंघाते शाखायाः पल्लवो मतः ।" इति कोषान्तरम् ॥ (यथा, रघुः । ६ । ३३ ।
"अभिनयान् परिचेतुमिवोद्यता
मलयमारुतकम्पितपल्लवा ।
अमदयत् सहकारलता मनः
सकलिकाकलिकामजितामपि ॥")
तत्पर्य्यायः । किसलयम् २ । इत्यमरः । २ । ४ । १४ ॥ प्रवालम् ३ नवपत्रम् ४ । इति राजनिर्घण्टः ॥ वलम् ५ किसलम् ६ किशलम् ७ किशलयम् ८ विटपः ९ । इति शब्दरत्नावली ॥ पत्रयौवनम् १० । इति जटाधरः ॥ विस्तरः । वलम् । प्रस्तारः । अलक्तरागः । इति विश्वमेदिन्यौ ॥ वलमित्यत्र वनमिति क्वचित् पाठः ॥ वलयः । चापलः । इति शब्दरत्नावली ॥ (देशविशेषः । तद्देशवासिषु पुं भूम्नि । यथा, मार्कण्डेये । ५७ । ३६ ।
"अपरान्ताश्च शूद्राश्च पल्लवाश्चमेखलिकाः ।
गान्धारा गवलाश्चैव सिन्धुसौवीरभद्रकाः ॥")
पल्लवकः, पुं, (पल्लवेन प्रस्तारेण कायतीति । पल्लव + कै + कः ।) वेशपतिः । (पल्लव इव कायतीति ।) मत्स्यविशेषः । इति हलायुधः ॥ (पल्लवः किसलये कायतीति । अर्शोकटच् । इति कश्चित् ॥)
पल्लवद्रुः, पुं, (पल्लवप्रधानो द्रुर्वृक्षः ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥
पल्लवाधारः, पुं, (पल्लवस्य आधारः ।) शाखा । इति शब्दचन्द्रिका ॥
पल्लविकः, त्रि, (पल्लवः प्रस्तारस्तोऽस्त्यस्यास्तीति वा । पल्लव + ठन् ।) कामुकः । इति हेमचन्द्रः । २ । २४५ ॥
पल्लविनं, क्ली, (पल्लवोऽलक्तरागः सञ्जातोऽस्य । तारकादित्वात् इतच् ।) लाक्षारक्तः । इति मेदिनी । ले, २०४ ॥
पल्लवितः, त्रि, (पल्लवः सञ्जातोऽस्य । पल्लव + इतच् ।) सपल्लवः । पल्लवयुक्तः । ततम् । विस्तृतम् । इति मेदिनी । ते, २०४ ॥
पल्लवी, [न्] पुं, (पल्लवाः सन्त्यस्य । पल्लव + इनिः ।) वृक्षः । इति शब्दमाला ॥ (पल्लवविशिष्टे, त्रि । यथा, कुमारे । ३ । ५४ ।
"पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥")

पल्लः, पुं, क्ली, (पल्लतीति । पल्ल + "सर्व्वधातुभ्य इन् ।" इति इन् ।) यामकः । कुटी । इति हेमचन्द्रः ॥ कुटीसमुदायः । यामः । इत्यर्थे ॥ गृहमिति भट्टः ॥ कुटीग्रामकयोः पल्लीति शाश्वतः ॥ स्थानमिति स्वामी ॥ पतन्ति भरणेन भ्रमणेन च जीवन्तीति क्विपि पतो गावः तेषां लीयन्तेऽत्र पल्लिः गाङ्लीति डिः पाल्लोत्यादीति ईपि पल्ली च गोपपल्लीप्रभृति च । इत्याभीरपल्लिशब्दटीकायां भरतः ॥ (गृहगोधिका । इति हेमचन्द्रे पल्लीशब्ददर्शनात् ॥)
पल्लिका, स्त्री, (पल्लि + स्वार्थे कन् ततष्टाप् ।) गृहगोधिका । इति राजनिर्घण्टः ॥
पल्लिवाहः, पुं, (पल्लिं कुटीं वाहयति निर्वाहयतीति । पल्लि + वह + णिच् + अण् ।) ज्ञातभेदः । यथाह राजनिर्घण्टः ।
"पल्लिवाहो दीर्घलग्नः सुपत्रस्ताम्रवर्णकः ।
व्यट्टः शाकपत्राद्यः प्रभूतामबलप्रदः ॥"
पल्ली, स्त्री, (पल्लि + "ङ्यादिकारादिति ।" वा ङीष् ।) खल्यग्रामः । (यथा, कथासरित्सागरे । १० । १३५ ।
"इतश्चं गच्छ मत्पल्लीं जाने सा तव ते गता ।
अहं तत्रैव यास्यामि दास्याम्यधिमिमञ्च ते ॥")
कुटी । इति विश्वमेदिन्यौ ॥ नगरभेदः । स तु दक्षिणदेशे प्रसिद्धः त्रिचनापल्ल्यादिः । इति शब्दरत्नावली ॥ क्षुद्रजन्तुविशेषः । टिकटिकी इति भाषा । तत्पर्य्यायः । सुवली २ गृहगोधा ३ विशम्बरा ४ व्येष्ठा ५ कुचमत्स्यः ६ पल्लिका ७ गृहगोधिका ८ । इति राजनिर्घण्टः ॥ गृहगोलिका ९ मालिखा १० भित्तिका ११ गृहोलिका १२ । इति हेमचन्द्रः । ४ । ३६३ ॥ अवल्गुष्टं व्येष्ठीशब्दे द्रष्टव्यम् ॥ (अस्याः पतनफलमुक्तं यथा, ज्योतिषशास्त्रे ।
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणकृदिष्टा सर्व्वसौख्यं ददाति ॥")
पल्वलं, क्ली, पुं, (पलति गच्छति पिबत्यस्मिन् वा । पल गतौ पा पाने वा + "सानसिवर्णसिपर्णसीति ।" उणा । ४ । १०७ । इति निपातनात् वलच् प्रत्ययेन सिद्धम् ।) अल्पसरः । इत्यमरः । १ । १० । २८ ॥ (यथा, महाभारते । ७ । ५१ । ६ ।
"पल्वलानि च सर्व्वाणि सर्व्व एव ह्रदोपलाः ।
स्थावरं जङ्गमञ्चैव निःशेषं कुरुते जगत् ॥")
तस्य लक्षणं यथा,—
"अल्पं सरः पल्वलं स्यादृद्धञ्च चक्रर्क्षगे रवौ ।
न क्लिद्यति जलं किञ्चित्तच्चलं वारि पाल्वलम् ॥
तज्जलगुणाः ।
पाल्वलं वार्य्यभिष्यन्दि गुरु स्वादु त्रिदोषलम् ॥"
इति भावप्रकाशः ॥
"पाल्वलं गुर्व्वभिष्यन्दि विष्टम्भि दोषलं परम् ॥"
इति राजवल्लभः ॥

पवं, क्ली, (पूयतेऽनेन। पूञ् शोधने + "ऋदोरप्।" ३। ३। ५७। इति अप्।) गोमयम्। इति शब्दचन्द्रिका॥ (गोमयशब्दे विवरणमस्य ज्ञातव्यम्॥)

पवः, पुं, (पवनमिति। पूञ् शोधने + भावे अप्। यद्वा, पुनातीति। पू + अप्।) निष्पावः। स च व्रीह्यादीनां निर्वुषीकरणम्। व्रीह्यादेः शोधनं बहुलीकरणम्। इत्यसरभरतौ॥ (पू + करणे अप्। यद्वा पुनातीति कर्त्तरि अप्।) वायुः। इति शब्दचन्द्रिका॥

पवनं, क्ली, (पूयते अग्निसंयोगेन यस्मिन्। पू + आधारे ल्युट्।) कुम्भकारस्य आमघटादिपाकस्थानम्। पोयान् इति भाषा। इति मेदिनी। ने, ८४॥ (यथा,—

"यः कुम्भकारपवनोपरिपक्वलेप-
स्तापाय केवलमलौ न तु तापशान्त्यै॥")

इत्युद्भटः॥)

पयनमिति प्रमादपाठः। जलम्। इति शब्दमाला॥ प्रयते चि। इति शब्दरत्नावली। (भावे ल्युट्।) पवित्रीकरणञ्च॥

पवनः, पुं, (पुनातीति। पू + बहुलमन्यत्रापीति युच्।) निष्पावः। वायुः। इति मेदिनी। ने, ८४॥ (यथा, गीतायाम्। १०। ३१।

"पवनः पवतामस्मि रामः शस्त्रभृतामहम्॥")

अष्टौ वात्यपवना यथा, सिद्धान्तशिरोमणौ।

"भूवायुरावह इह प्रवहस्तूर्द्ध्वः
स्यादुद्वहस्तदनु संवहसंज्ञकश्च।
अन्यः परोऽपि सुवहः परिपूर्व्वकोऽस्मा-
द्वात्याः परावह इमे पवनाः प्रसिद्धाः॥"

सप्त पवनाधिपा यथा, ज्योतिस्तत्त्वे।

"प्राकः प्रताग्निसंयुक्तो सुनिभिर्भागहारितः।
आवहादिक्रमेणैव सप्त वाता प्रकीर्त्तिताः॥
आवहः प्रवहश्चैव सम्वहो निवहस्तथा।
उद्वहो विवहो वायुः सप्त वाता प्रकीर्त्तिताः॥"

अन्यद्वायुशब्दे द्रष्टव्यम्॥ (प्राणवायुः। यथा, हठयोगदीपिकायाम्। २। ७५।

"अनेनैव विधानेन प्रयाति पवनो लयम्।
ततो न जायते मृत्युर्व्याधिरारोगादिकं तथा॥"

उत्तममनुपुत्रविशेषः। यथा, भागवते। ८।१।२३।

"तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः।
पवनः सृञ्जयो यज्ञहोत्राद्यास्तत्सुता नृप!॥")

पवनविजयः, पुं, (पवनं श्वासवायुंविजयतेऽनेन। वि + जि + करणे अप्। यद्वा, पवनस्य विजयो यत्र।) शुभाशुभसूचकश्वासवायुजयोपायकथनग्रन्थविशेषः। यथा—

ईश्वर उवाच।

"हरेः श्रुत्वा हरो गौरीं ईषद्धासं ज्ञानमब्रवीत्।
कुजो वह्निः रविः पृथ्वी शौरिरापः प्रकीर्त्तिताः॥
वायुसंस्थास्थितो राहुर्दक्षरन्ध्रावभासकः।
गुरुः शुक्रस्तथा सौम्यश्चन्द्रश्चैव चतुर्थकः॥
वामनाड्यास्तु मध्यस्थान् कारयेदात्मनस्तथा।
यदाचार दृढ़ायुक्तस्तदा कर्म्म समाचरेत्॥
स्नानसेवा तथा ध्यानं वाणिज्यं राजदर्शनम्।
अन्यानि शुभकर्म्माणि कारयेत प्रयत्नतः॥
दक्षनाड़ीप्रवाहे तु ग्रन्थिर्भौमश्च सैंहिकः।
इत्यनेन तथापेक्ष्य पापानासुदयो भवेत्॥
शुभाशुभविवेको हि ज्ञायते तु खरोदयात्।
देहमध्ये स्थिता नाड्यो बहुरूपाः सुविस्तराः॥
नाभेरधस्तादुदयः कन्दो अङ्कुराश्चत्र निर्गताः।
द्वासप्ततिसहस्राणि नाभिमध्ये व्यवस्थिताः॥
चक्रवच्च स्थितास्तासु सर्व्वाः प्राणहराः स्मृताः।
तासां मध्ये त्रयः श्रेष्ठा वामदक्षिणमध्यमाः॥
वामा सोमात्मिका प्रोक्ता दक्षिणा रविसन्निभा।
मध्यमा च भवेदग्निः प्रलयो कालरूपिणी॥
वामा ज्ञानतरूपा च जगदाप्यायने स्थिता।
दक्षिणा रौद्रभागेन जगच्छोषयते सदा॥
द्वयोर्मार्गे तु ऋतवः स्यात् सर्व्वकार्य्यविनाशिनी।
निर्गमे च भवेद्वामा प्रवेशे दक्षिणा स्मृता॥
कारयेत् क्रूरकर्म्माणि प्राणे पिङ्गलसंस्थिते।
दृढ़ाचारे तथा सौम्यं चन्द्रस्तूर्य्यगतस्तथा॥
यात्रायां सर्व्वकार्य्येषु विषापहरणे दृढ़ा।
भोजने मैथुने युद्धे पिङ्गला सिद्धिदायिका॥
उच्चाटमारणाद्येषु कर्म्मस्वेतेषु पिङ्गला।
मैथुने चैव संग्रामे भोजने सिद्धिदायिका॥
शोभनेषु च कार्य्येषु यात्रायां विषकर्म्मणि।
शान्तिसुस्थार्थसिद्धौ च दृढ़ा योज्या नराधिपैः॥
द्वाभ्यां चैव प्रवाहे च क्रूरसौम्यविवर्ज्जने।
विषुवत्तीस्तु जानीयात् संक्रान्तेस्तु विचक्षणः॥
सौम्यादिशुभकार्य्येषु लाभादिजयजीविते।
गमनागमने चैव वामा सर्व्वत्र पूजिता।
युद्धादिभोजने घाते स्त्रीगमे चैव तु सङ्गमे।
प्रशस्ता दक्षिणा नाड़ी प्रवेशे क्रूरकर्म्मणि॥
शुभाशुभानि कार्य्याणि लाभालाभौ जयाजयौ।
जीवाजीवाय यत् पृच्छेत् सिध्यति च मध्यमा॥
वामाचारेऽथवा दत्ते प्रत्यये यत्र नायकः।
तत्रस्थः पृच्छते यस्तु तत्र सिद्धिर्न संशयः॥
वैच्छन्दो वामदेवस्तु यदा वहति चात्मनि।
तत्र भागे स्थितः पृच्छेत् सिद्धिर्भवति निश्चला॥
वामे वा दक्षिणे वापि यत्र संक्रमते शिरा।
घोरे घोराणि कर्म्माणि सौम्ये वै मध्यमानि च॥
प्रस्थिते भागतो हंसे द्वाभ्यां वै सर्व्ववाञ्छितम्।
तदा ऋतुं विजानीयादृणी योगविशारदः॥
यत्र यत्र स्थितः पृच्छेद्वामदक्षिणसंमुखः।
तत्र तत्र समं दिद्यादात्मस्योदयनं सदा॥
अग्रतो वामिका श्रेष्ठा पृष्ठतो दक्षिणा शुभा।
वामेन वामिका प्रोक्ता दक्षिणे दक्षिणा शुभा॥
जीवो जीवति जीवेन यच्छून्यं तत् खरो भवेत्।
यत्किञ्चित् कार्य्यसुद्दिष्टं जयादिशुभलक्षणम्॥
तत् सर्व्वं पूर्णगात्रान्तु जायते निश्चिकल्पकम्।
अन्यनाड्यादिपर्य्यन्तपञ्चत्वयमुदाहृतम्॥
यावत् षष्ठीन्तु पृच्छायां पूर्णायां प्रथमो जयेत्।
रिक्तायान्तु द्वितीयन्तु कथयेत्तदशङ्कितः॥
वामाचारः समं वायुर्जायते कर्म्मसिद्धिदम्।
प्रवृत्ते दक्षिणे मार्गे विषमे विषमाचरम्॥

अन्यच्च वामवाहे तु नाम वै विषमाचरम्।
तदावौ जयमाप्नोति योद्धः संग्राममध्यतः॥
दक्षवातप्रवाहे तु यदि वाम समाचरम्।
जायते नात्र सन्देहो नाड़ीमध्ये तु जन्तवेत्॥
पिङ्गलामार्गते प्राणी समानीयाद्दक्षवञ्जयेत्।
यावन्नाड्योदयं चारस्तां दिशं यावदाजयेत्।
न जातु जयते सोऽपि नात्र कार्य्या विचारणा॥
अथ संग्राममध्ये तु यत्र नाड़ी सदा वहेत्।
सा दिशा जयमाप्नोति शून्ये भङ्गं विनिर्द्दिशेत्॥
जातचारे जयं विद्यान्मृतके मृतमादिशेत्।
जयं पराजयञ्चैव यो जानाति स पण्डितः॥
वामे वा दक्षिणे वापि यत्र सञ्चरते शिरा।
ज्ञात्वा तत्पदमादौ तु यात्रां जयति शोभनाम्॥
अग्निचार्य्यप्रवाहे तु सति युद्धं समाचरेत्।
तत्रस्थः पृच्छते यस्तु स साधुर्जयति ध्रुवम्॥
यां दिशं वहते वायुस्तां दिशं यावदाजयेत्।
जयते नात्र सन्देह इत्थं यत्नयतः स्थितः॥
मेषाद्या दश या नाड्यो दक्षिणा वामसंस्थिताः।
चरस्थिरद्विमार्गे तास्ताड्ये ताड्यः क्रमात्॥
निर्गमे निर्गमं याति संग्रहे संग्रहं विदुः।
पृच्छकस्य वचः श्रुत्वा चपेटाकारेण जन्तवेत्॥
वामे वा दक्षिणे वापि पञ्चतत्त्वस्थितः शिवे!।
ऊर्द्धोऽग्निरध आपश्च तिर्य्यक्संस्थः प्रभञ्जनः।
मध्ये तु पृथिवी ज्ञेया नभः सर्व्वत्र सर्व्वदा॥
ऊर्द्धे ऋतुरधः शान्तिस्तिर्य्यक् चोच्चाटयेत् सुधीः।
मध्ये स्थिरं विजानीयान्नाशः सर्व्वत्र सर्व्वगे॥"

इति गारुड़े पवनविजयादि ६७ अध्यायः॥

पवनव्याधिः, पुं, (पवनः वायुरोग एव व्याधिरस्य।) उन्मादः। श्लीपदस्य सखा। इति त्रिकाण्डशेषः॥ (यथा,—

"विवक्षितामर्थविदस्तनूजप्रतिसंस्तुताम्।
प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम्॥"

इति माघे। २। १५॥

पवनात् प्रकुपितवायोरुद्भवो व्याधिः।) वातरोगश्च॥

पवनात्मजः, पुं, (पवनस्य आत्मजः पुत्रः।) हनूमान्। इति शब्दरत्नावली॥ (पवनस्य वायोरात्मजः। "वायोरमिः।" इति श्रुतेर्वायुरूपतयास्य तथात्वम्।) हयग्रीवः। इति भरतस्य पुराणम्॥ (भीमसेनः। इति महाभारतम् यथा, राजतरङ्गिण्याम्। ८।२८८०।

"वाहिनीरङ्गमार्गौ तौ यदवीमनुसञ्चरुः।
मार्गे घनञ्जयश्चैव शौरेयपवनात्मजौ॥")

पवनाशः, पुं, (पवनाय विघाताय अलति पर्य्याप्नोतीति। अल पर्य्याप्तौ + अच्।) व्याधिविशेषः। देंधान इति पोवरी इति च भाषा। तत्पर्य्यायः। देवधान्यम् २ पृथ्वीकः ३ कुधूलः ४ कुलत्थः ५ वीजपूरः ६ पूषणाख्यः ७। अस्य गुणाः। स्निग्धत्वम्। स्वादुत्वम्। शोषितत्वम्। श्लेष्मपित्तनाशित्वम्। अदृश्यत्वम्। तुवरत्वम्। रूक्षत्वम्। शीतकारित्वम्। बहुत्वञ्च। इति भावप्रकाशः॥

पवितः

पवनाशः, पुं, (पवनं वायुं अत्ति भक्षयतीति। अद् भोजने + "कर्म्मण्यण्।" ३।२।१। इति अण्।) सर्पः। इति हलायुधः॥

पवनाशनः, पुं, (पवनो वायुरशनं भक्ष्यं यस्य।) सर्पः। इत्यमरः। १। ८। ८॥

पवनाशनाशः, पुं, (पवनाशनस्य सर्पस्य नाशो यस्मात्। यद्वा, पवनाशनं सर्पमत्तीति। अद् + अण्।) गरुडः। इति हलायुधः॥ मयूरः। यथा, उत्तरचोरपञ्चाशिकायाम्।

"स्वयोनिभक्षध्वजसम्भवानां
श्रुत्वा निनादं गिरिनिर्झरेषु।
तमोऽरिबिम्बप्रतिबिम्बधारी
रराव कान्ते! पवनाशनाशः॥"

पवनेष्टः, पुं, (पवने वायुरोगे इष्टः।) मञ्जानिम्बः। इति रत्नमाला॥ (मञ्जानिम्बशब्दस्य गुणादिकं ज्ञेयम्॥)

पवनोत्थुजं, क्ली, पक्वम्। इति शब्दचन्द्रिका॥

पवमानः, पुं, (पवते शोधयतीति। पूञ् शोधने + "पूङ्यजोः शानन्।" ३।२।१२८। इति शानन्। "आने मुक्।" ७।२।८२। इति मुमागमः।) वायुः। इत्यमरः। १।१।६६॥ (यथा, रघुः। ८।६। "न खरो न च भूयसा मृदुः
पवमानः पृथिवीरुहानिव।
स पुरस्कृतमध्यमक्रमो
नमयामास नृपानशुद्धरम्॥"

अग्नेः स्वाहायां जातः पुत्रः। यथा, मार्कण्डेये। ५२। २७-२८॥ "योऽसावग्निरभीमानी ब्रह्मशक्तनयोऽग्रजः।
तस्मात् स्वाहा सुतान् लेभे चौदुदारौजसो द्विज!॥
पावकं पवमानञ्च शुचिञ्चापि जलाग्निनम्।
तेषान्तु सन्ततावेते चत्वारिंशच्च पञ्च च॥")

निर्मन्थ्याग्निः। स च गार्हपत्याग्निः। यथा,—
"अथ यः पवमानस्तु निर्म्मन्थ्योऽग्निः स उच्यते।
स च वै गार्हपत्योऽग्निः प्रथमो ब्रह्मणः स्मृतः॥"

इति मात्स्ये ४८ अध्यायः॥

पवमानात्मजः, पुं, (पवमानस्य वायोरात्मजः।) "वायोरग्निः।" इति श्रुतेर्वायुजन्यतयास्य तथात्वम्। यद्वा, पवमानस्य अग्निविशेषस्य आत्मजः।) हनूमान्। यथा,—
"पवमानात्मजो ह्यग्निर्हनूमान् उच्यते॥"

इति मात्स्ये ४८ अध्यायः॥

पवाका, स्त्री, (पूजयतीति। पूज् गि शोधने + "वलाकाद्यच्च।" उणा ४। १४। इति आक प्रत्ययेन निपातनात् साधुः।) वाल्मा। चक्रजातः। इत्युणादिकोषः॥

पविः, पुं, (पुनातीति। पूञ् शोधने + "अच इः।" उणा ४। १३८। इति इः।) वज्रम्। इत्यमरः। १।१।५०॥

पवितः, त्रि, (पूयते स्म। पूङ् शोधि + क्तः। "पूङश्च।" ७।२।५३। इति इट्। "पूङः क्त्वा च।" १।२।२२। — क्तिच्। क्तिन्। क्तिम्।) पूतः। इति शब्दबोध-

पवित्र

पविता [तृ], त्रि, (पुनातीति। पू + तृच्।) पवित्रताकारकः। यथा, नैषधे।
"तनुश्रिया यस्य हृतं स मज्जथः
कुलश्रिया यः पवितासदन्वयम्॥"

पवित्रं, क्ली, (पूयतेऽनेनेति। पू + "पुवः संज्ञायाम्।" ३। २। १८५। इति ष्ट्रन्।) वर्षजलम्। कुशम्। (यथा, मनुः। २। ७५।
"प्राक्कूलान् पर्य्युपासीन: पवित्रैश्चैव पावितः॥")
ताम्रम्। पयः। इति मेदिनी। रे, १७७॥ वर्षजलम्। इति विश्वः॥ अर्घोपकरणम्। इति हेमचन्द्रः॥ यज्ञोपवीतम्। इति त्रिकाण्डशेषः॥ घृतम्। मधु। इति राजनिर्घण्टः॥ पार्व्वणश्राद्धादावर्थाय होमादावाज्यसंस्कारार्थञ्च दर्भनिर्म्मितकुशान्तरवेष्टितप्रादेशमात्रकुशपत्रद्वयम्। यथा,—
"अनन्तर्गर्भितं सार्यं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यज्ञकर्म्मणि॥"

इति श्राद्धतत्त्वम्॥
(विष्णुः। यथा, महाभारते। १२। १४६। २०।
"प्रभूतखड्गकुड्डाम पवित्रं मङ्गलं परम्॥"
महादेवः। यथा तत्रैव। १२। १७। ३५।
"पवित्रञ्च महाञ्चैव नियमो नियमाश्रितः॥")

पवित्रः, त्रि, (पू + इत्रच्।) व्रतादिना शुद्धः। (यथा, गौतमीयायाम्। ४। ३८।
"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥")
तत्पर्य्यायः। प्रयतः २ पूतः ३। एतत्त्रयं प्राणिविषयमात्रम्। शुचिः ४ शुद्धः ५ पवित्रितः ६। इति शब्दरत्नावली॥ पुण्यः ७ पावनः ८। इति जटाधरः॥ (पूयतेऽनेन। पूञ् + "पुवः संज्ञायाम्।" ३।२।१८५। इति ष्ट्रन्।) शुद्धत्रयम्। तत्पर्य्यायः। पूतम् २ मेध्यम् ३। एतत्त्रयं अप्राणिद्रव्यविषयम्। इति ब्रह्मवर्गे विश्वप्रकाशे च अमरभरतौ॥ शुद्धम् ४ शुचि ५ पुण्यम् ६ पूतिवत् ७। इति जटाधरः॥
(यथा,—
"बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्।
एतत्तु गव्यघृतगुणपरम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पवित्रः, पुं, (पुनातीति। पू + कर्त्तरि ष्ट्रन्।) तिलवृक्षः। पुत्रजीववृक्षः। इति राजनिर्घण्टः॥ (तिलपुत्रजीवशब्दयोरस्य विवृतिर्ज्ञेया॥)
कार्त्तिकेयस्य नामान्तरम्। यथा, महाभारते। ३। २३१। ६।
"वल्लीप्रियश्च धर्म्मात्मा पवित्रो मातृवत्सलः॥")

पवित्रकं, क्ली, (पवित्र + कन्। यद्वा, पवित्रं पर्य्यस्यति कायतीति। कै + कः।) आज्यम्। इति शब्दरत्नावली॥ घृतकुचजालम्। इत्यमरः। १।१०।१६॥ क्षत्रियस्य यज्ञोपवीतम्। यथा,
"कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्वृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकम्॥
इति मनुवचनात् पवित्रकमपि तदुच्यते। इत्यसरटीकायां भरतः॥

पवित्रा

पवित्रकः, पुं, (पवित्र + स्वार्थे कन्।) कुशः। दमनकः। अश्वत्थः। उदुम्बरः। इति राजनिर्घण्टः॥

पवित्रधान्यं, क्ली, (पवित्रं धान्यम्। नित्यकर्म्मोपयोगि धान्यम्।) यवः। इति राजनिर्घण्टः॥ (यवशब्दस्य गुणादयो वक्तव्याः॥)

पवित्रा, स्त्री, (पवित्र + टाप्।) तुलसी। इति शब्दमाला॥ नदीभेदः। इति हेमचन्द्रः॥ हरिद्रा। अश्वत्थीवृक्षः। इति राजनिर्घण्टः॥

पवित्रारोपणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोपणं प्रदानं यत्र।) श्रीलक्ष्मीसम्प्रदानकोपवीतदानरूपोत्सवविशेषः। यथा,—
"श्रावणस्य सिते पक्षे द्वादश्यां वैष्णवेर्मुदा।
कर्त्तव्यः लक्ष्मीदेवस्य पवित्रारोपणोत्सवः॥"

अथ तन्निश्चयता वङ्गभाषापरिच्छेदे।
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः।
हरिञ्च प्रीतिमाप्नोति यः पवित्रं समाचरेत्॥
विधिना शास्त्रदृष्टेन यो न कुर्य्यात् पवित्रकम्।
हरन्ति राक्षसास्तस्य वर्षपूजादिकं फलम्॥"

योगसारे च पवित्रोत्पत्तिप्रकाशनेन नानाराजं पवित्रं प्रति श्रीरुद्रेण वरदानम्। यथा,—
"ये त्वां न बहुमन्यन्ते यथा सम्भावितो मया।
जपहोमादिकं तेषां फलं त्वामेतु निश्चयात्॥
विष्णुरहस्ये।
न करोति विधानेन पवित्रारोपणन्तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम!॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे तु कर्त्तव्यं पवित्रारोपणं हरेः॥"

अथ पवित्रारोपणमाहात्म्यम्।
तत्र बौधायनः।
"यावत्तन्तुः पवित्रस्य तावत् स्वर्गे महीयते।
आयुरारोग्यमैश्वर्य्यं विपुलं तस्य वर्द्धते॥
महासंहितायाम्।
सम्वत्सरेण या पूजा क्षता वै मल्लिका द्विज!।
पवित्रदानात् पूर्णा स्यादित्याह भगवान् हरिः॥
विष्णुरहस्ये।
पवित्रारोपणं विष्णोर्भुक्तिमुक्तिप्रदायकम्।
स्त्रीपुंवीर्त्तिप्रदं पुण्यं सुखसम्पद्गणावहम्॥
पुण्यानान्तु तथा पुण्यं सर्व्वपापहरन्तु वै।
पवित्रारोपणं तस्मात् पवित्रं परमं स्मृतम्॥
सम्वत्सरे नरो भक्त्या समर्थयेत् जगद्गुरुम्।
यत् फलं समवाप्नोति पवित्रारोपणेन तत्॥
किञ्च।
पावयत्येनसो नित्यं त्रायते भवबन्धनात्।
पवित्रं तेन विख्यातं ब्राह्मं तेजोऽभिधीयते॥
विष्णुशक्त्या तु विख्यातं तदा लोके विधीयते।
स एव रुद्ररूपेण यज्ञेशः कर्म्मणां प्रभुः॥
तदेव त्रिगुणीभूतं सतं नारायणाख्यया।
चिदेवात्मा अविद्यात्मा चाचरः प्रणवः स्मृतः॥"

अथ पवित्रारोपणविधिः।
"सौवर्णैः राजतैस्ताम्रैः सौमैः रत्नैस्तु पाञ्चमैः।
कार्पासैर्वा पवित्राणीष्यते कार्य्यैः कुशैरपि॥

तत्र कार्पासिकं सूत्रं ब्राह्मणोकर्त्तितं शुभम् ।
आनीय त्रिगुणीकृत्य पुनस्त्रिगुणयेत्सुधिः ॥
पञ्चगव्येन तत् प्रोक्ष्य प्रक्षाल्य शुचिनाम्बुना ।
मूलेनाष्टोत्तरशतं मन्त्रेणाथाभिमन्त्रयेत् ॥
त्रीणि सादशतैनास्य तस्यार्द्धेनास्य चार्द्धतः ।
जानूरुनाभिदघ्नानि पवित्राणयाचरेत् प्रभोः ॥
षट्त्रिंशद्ग्रन्थयस्तिस्रोमाद्यो कार्य्याश्च मध्यमे ।
चतुर्विंशतिरन्ये च द्वादशग्रन्थयो बुधैः ॥
अङ्गुष्ठपर्व्वमात्रन्तु कुर्य्याद्ग्रन्थिमथोत्तमे ।
तदर्द्धं मध्यमे कुर्य्यात्तदर्द्धञ्च कनीयसि ॥
ग्रन्थीन् कुर्व्वीत सर्व्वत्र सुवृत्तान् सुमनोहरान् ।
न वै विषमसंख्याकान् ग्रन्थीन् कुर्व्वीत कुत्रचित् ॥
अष्टोत्तरसहस्रेण तन्तूनस्य पवित्रकम् ।
अष्टोत्तरशतं ग्रन्थिं वनमालाख्यमाचरेत् ॥
आरभ्य सुकुटं या तु सूत्रैर्धैरचिता शुभा ।
आपादलम्बिनी माला वनमाला प्रकीर्त्तिता ॥
कुर्य्यात्तन्मयपवित्रञ्च सूत्रैर्द्वादशभिः शुभैः ।
अरत्निप्रमितं तच्च द्वादशग्रन्थिकं क्रमी ॥
पवित्राणि परीवारदेवतानां समाचरेत् ।
सूत्रैस्तैरेव संख्याकैः कलासंख्यार्कसंख्यकैः ॥
तेषु ग्रन्थीन् यथाशोभं बद्ध्वा वह्नेर्गुणैरपि ।
सप्तविंशतिभिः सूत्रैः षड्विंशतिभिरात्मनः ॥
यथासम्भवमन्येषां पवित्राणि च कारयेत् ।
सम्पादयेच्च सर्व्वाणि शोभनान्येव यत्नतः ॥
तथा चोक्तम् ।
विशोभसूत्रदानेन कर्त्तुः स्यादशुभं फलम् ।
परित्रं परया भक्त्या तस्मात् कुर्व्वीत शोभनम् ॥
रञ्जयित्वाथ काश्मीरागुरुगोरोचनादिना ।
वस्त्रेणाच्छाद्य पटले स्थापयेत्तानि वैष्णवे ॥"

इति पवित्रविनिर्म्माणम् ॥ * ॥

"कृत्वा कृत्यं दशम्याञ्च पवित्रारोपणाय हि ।
कृत्यां विज्ञाप्य तत्रादिं यथा पाल्लिखितं नयेत् ॥
एकादश्यां प्रभाते च नित्यकृत्यं समाप्य हि ।
देवालयमुपस्कृत्य मण्डलं रचयेत् शुभम् ॥
कृत्वा कृत्यास्य नित्यार्च्चां पवित्रारोपणाय्यकाम् ।
पूजां विशोधनः कृत्वा कृत्यां विज्ञापयेदिदम् ॥
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ! ।
मयैतत् क्रियते देव ! भवत्तुष्टौ पवित्रकम् ॥
न मे विघ्नो भवत्वत्र कुरु नाथ ! दयां मयि ।
सर्व्वथा सर्व्वदा विष्णो ! मम त्वं परमा गतिः ॥
देवस्य सर्व्वतो व्यस्रेष्टलकाष्ठं जलं क्षिपेत् ।
स्फटिकाञ्च हरिद्राञ्च कुङ्कुमं रोचनानि च ॥
उपानहौ मितं छत्रं चामरं व्यजनं तथा ।
यवा व्रीह्यादिधान्यानि यथास्थानं पृथक् पृथक् ॥
कृत्वं सुद्राम्बुनापूर्य्य सर्व्वतोभद्रमण्डले ।
देवाग्रतो निधायाग्निं परिचार्य्याधिवासयेत् ॥"

अथ पवित्राधिवासनम् ।

"भगवत्पुरतस्तानि पटलस्थानि पूजयन् ।
आदावाचार्य्यमभ्यर्च्च्य तन्मूलेन बुधः ॥
तन्मन्त्रस्यायम् ।
ओँ संवत्सरस्य यागस्य परिक्रीकरणाय भोः ।
विष्णुलोकात् परिक्राम्य आगच्छेह नमोऽस्तु ते ॥

तेष्वावाह्य यथास्थानं ब्रह्माद्या देवतास्ततः ।
तत्तन्मन्त्रैः सन्निधाप्याथतत्तन्मन्त्रादिनार्घयेत् ॥
तत्र तत्र ता देवताश्चोक्ताः ।
ब्रह्मविष्णुमहादेवाश्चित्रलुप्तौदेवताः क्षुमाः ।
प्रभवः सोमवह्नी च ब्रह्मा नागः ग्रहो रविः ॥
ग्रिवश्च विश्वदेवाश्च नवसूत्राधिदेवताः ।
क्रिया च पौरुषी वीरा चतुर्थी चापराजिता ॥
जया च विजया चैव सुस्तिदा च सदाशिवा ।
मनोमयी तु नवमी दशमी सर्व्वतोसुखी ।
ग्रन्थीनां देवतास्त्वेतास्तत्र विनिवेशयेत् ॥
तन्मन्त्राश्चैते ।
ओँ सर्व्वाभरणचित्राङ्ग ! सर्व्वदेवनमस्कृत ! ।
लावण्यरूपविख्यातन् ! व्येष्टसूत्रं समाश्रय ॥
ओँ सर्व्वलक्ष्मीकर ! श्रीशु ! सर्व्वज्ञानरसात्मक ! ।
निष्कलरूपविख्यातन् ! मध्यसूत्रं समाश्रय ॥
ओँ अतिवेगमरुद्योने ! पुरुषात्मन् ! दिवस्पते ! ।
कनीयो हे प्रभो ! देव ! तेजसा सूत्रमाश्रय ॥
यच्च मन्त्रो न वर्त्तेत तत्तन्नामैव तत्र च ।
नमोऽन्तं सचतुर्थीकमन्त्रः प्राग्लिखनाम्नयुः ॥*॥
अथ ब्रह्माकरान्तोक्ते षट्सूत्रेण निर्म्मितम् ।
वितस्तिमात्रं बध्नीयात् डोरकं मङ्गलात्मकम् ॥
तत्र मन्त्रः ।
ओँ संवत्सरव्रतानाञ्च या सम्पूर्णफलदायि यत् ।
पवित्रीकरणायैतत् कौतुकं धरते नमः ॥
ततो गन्धपवित्रञ्च गृहीत्वा धूपितं बुधः ।
भगवन्तं नमस्कृत्य भक्त्या संप्रार्थयेदिदम् ॥
आमन्त्रितोऽसि देवेश ! सार्द्धं देवगणेश्वरैः ।
मन्त्रैर्लोकपालैश्च सहितः परिवारकैः ॥
आगच्छ भगवन्नीश ! विधिसंपूर्त्तिकारक ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥
ततश्च ।
विष्णुतेजोद्भवं रम्यं सर्व्वपापक्षयापहम् ।
सर्व्वकामप्रदं देव नवार्कं धारयाम्यहम् ॥
अनेन मनुना विद्वान् मूलमंपुटितेन हि ।
दद्यात् गन्धपवित्रं तच्छ्रीकृष्णचरणाब्जयोः ॥
नीराज्य देवं स्तुत्वा च दत्वा पुष्पाञ्जलिं ततः ।
तत्पवित्राणि तत्कृत्यमण्डलमूलाथवा ॥
नृसिंहमनुना रक्षेत् कवचेनावगुण्ठयेत् ।
गीतनृत्यादिना कुर्य्याद्विधिवज्जागरं निशि ॥"

अथ पवित्रार्पणम् ।

"प्रातःकृत्यानि निर्व्वर्त्य नित्यपूजां विधाय च ।
विशोधनोऽर्चयेद्देवं पवित्राणि च पूजयेत् ॥
महावाद्यिघोषेण नाममंकीर्त्तनोत्सवैः ।
मूलमंपुटितेनैव पवित्राण्यर्पयेत् क्रमात् ॥
वक्ष्यमाणेन मन्त्रेण भक्त्या कृष्णाय वेधसः ।
पूजां कृत्वा परीवारदेवानां तान्यथार्पयेत् ॥
अर्पणमन्त्रः ।
कृष्ण ! कृष्ण ! नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कृतञ्चात्र यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव ! तत्प्रसादाज्जनार्द्दन ! ॥
महापूजां ततः कृत्वा स्तुत्वा नत्वार्घयेत् प्रभुम् ।

वनमाला यथा देव ! कौस्तुभं सततं हृदि ॥
तद्वत् पवित्रतन्तूंश्च पूजाश्च हृदये वह ।
जानताजानता वापि न ज्ञातं यत्तवार्चनम् ॥
केनचिद्विघ्नदोषेण परिपूर्णमस्तु मे ॥
अथाग्निं विधिनाभ्यर्च्च्य पवित्रं तस्य चार्पयेत् ।
कृत्वं निवेदयेत्सम्यङ्नीराज्य दत्तादिना ततम् ॥
गुरुञ्च पूजया संपूज्य पवित्रं गुरवेऽर्पयेत् ।
वैष्णवेभ्यः पवित्राणि दत्त्वैकं धारयेत् स्वयम् ॥
संपूज्य वैष्णवान् विप्रान् भुक्त्वा सम्भोज्य बन्धुभिः ।
सम्यं महाप्रसादान्नं सुखं भुञ्जीत वैष्णवः ॥"

अथ पवित्रविसर्ज्जनविधिः । तत्र ।

"मासं यत्तमहोरात्रं त्रिरात्रं धारयेत्तथा ।
देवं तं सूत्रसम्भूतं देशकालानुसारतः ॥
प्रत्यहं स्नानकर्म्मादि सूत्रायत्तार्च्चं कारयेत् ।
अभिषिच्याथ तोयेन पुनर्देवे निवेदयेत् ॥
तथान्ते देवमभ्यर्च्च्य विशेषात् पुष्पचन्दनैः ।
नैवेद्यं विविधं दत्त्वा ततः सूत्रं विसर्ज्जयेत् ॥
ओँ सांवत्सरीं शुभां पूजां सम्यगद्य विधिवत्कृतम ।
व्रतेदानीं पवित्र ! त्वं विष्णुलोकं विसर्ज्जितम् ॥
यावद्देवे पवित्राणि तावत्तिष्ठेत् समाहितः ।
ब्रह्मचारी हविष्याशी देवपूजापरायणः ॥
तत्फलञ्चोक्तं बौधायनेन ।
एवं यः कुरुते विद्वान् वर्षे वर्षे न संशयः ।
स याति परमं स्थानं यत्र देवो हृषीकेशरी ॥"

अथ तत्र मुख्यगौणकालनिर्णयः ।

"मुख्यकालस्य चैवास्य विघ्नोपशमे सति ।
भाद्रादावपि कर्त्तव्यं पवित्रारोपणं प्रभोः ॥
तथा च विष्णुरहस्ये ।
आवणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
सिंहस्थे वा रवौ कार्य्यं कन्यायाञ्च गतेऽथवा ।
तस्यामेव तिथौ सम्यक् तुलासंस्थे कथञ्चन ॥
मत्स्यसूक्तप्रकाशे च ।
कर्कटञ्च गते सूर्य्ये तथा सिंहगतेऽपि वा ।
द्वादश्यां शुक्लपक्षस्य हरेर्देयात् पवित्रकम् ॥
अथ सैंहिकपातेन सुख्यकालो न लभ्यते ।
कन्यागतेऽपि कुर्व्वीत यावन्नोत्तिष्ठते हरिः ॥"

इति हरिभक्तिविलासः ॥

पवित्रारोहणं, क्ली, (पवित्रस्य यज्ञोपवीतस्य आरोहणं सम्पादनं यत्र ।) पवित्रारोपणम् । यथा,—

"आषाढ़शुक्लपक्षस्य यार्द्धी श्रावणस्य च ।
पवित्रारोहणं कुर्य्याद्देवाः प्रीतिकरं परम् ॥
दुर्गानन्तेन मन्त्रेण दुर्गाबीजेन भैरव ! ।
वैष्णवीनन्तमन्त्रेण पवित्रारोहणञ्चरेत् ॥
विशोधात् श्रावणादेव देवाः कुर्य्युः पवित्रकम् ।
सर्व्वेषामपि देवानां पवित्रारोहणञ्चरेत् ॥
आषाढ़े श्रावणे वापि संवत्सरफलप्रदम् ।
प्रतिपद्युदयस्योक्ता पवित्रारोहणे तिथिः ॥
श्रिया देव्या द्वितीया तु तिथीनामुत्तमा तिथिः ॥
हनीया भवभाविन्याश्चतुर्थी तनुसूनवे च ॥
पञ्चमी सांवत्सरस्य [illegible]

सप्तमी भास्करक्षेत्रा दुर्गायाश्च तथाष्टमी ॥
मातॄणां नवमी प्रोक्ता वासुकेर्दशमी स्मृता ।
एकादशी हृषीकाणां द्वादशी चक्रपाणिनः ॥
त्रयोदशी त्वनङ्गस्य मम चैव चतुर्दशी ।
ब्रह्मणो दिक्पतीनाञ्च पौर्णमासी तिथिर्मता ॥
पवित्रारोहणं यो वै देवानां न समाचरेत् ।
तस्य वार्षिकपूजायाः फलं हरति केशवः ॥
तस्मात्प्रयत्नेन कर्त्तव्यं पवित्रारोहणं परम् ।
कृते बहुफलप्राप्तिस्तत्पूजा सफला भवेत् ॥
पवित्रं येन रूपेण यथा कार्य्यं विजानता ।
तत् प्रमाणञ्च प्रमाणञ्च रचनासु च भैरव ! ॥
प्रथमं दर्भसूत्रञ्च पञ्चसूत्रं ततः परम् ।
ततः सौम्यं सुपुण्यं स्यात् कार्पासकमतः परम् ॥
पट्टसूत्रं तथान्येन पवित्राणि न कारयेत् ।
पवित्राणि विचित्राणि कर्त्तव्यानि प्रयत्नतः ॥
गन्धमाल्यैः सुरभिभिरर्चितानि यथोदितम् ।
कन्या च कर्त्तयेत् सूत्रं प्रमदा वा पतिव्रता ॥
विधवा वाथ्वयोनी वा दुःशीला न हि कर्त्तयेत् ।
यत् सूचिभिर्न दग्धञ्च भक्षधूमाभिगुण्ठितम् ॥
तद्गृह्णीयेत यत्नेन सूत्रमक्लिन्नं पवित्रके ।
उपयुक्तञ्चाशुद्धं मद्यरक्तादिदूषितम् ॥
मलिनं नीलरक्तञ्च यत्नेन परिवर्जयेत् ।
सूत्रैः पवित्रं कुर्व्वीत कनिष्ठोत्तममध्यमम् ॥
कनिष्ठकं पवित्रन्तु सप्तविंशतितन्तुभिः ।
मर्त्यलोके यशःकीर्त्तिसुखसौभाग्यवर्द्धनम् ॥
चतुःपञ्चाशता प्रोक्तं तन्तुभी मध्यमं परम् ।
दिव्यभोगावहं पुण्यं स्वर्गसौख्यप्रदायकम् ॥
उत्तमञ्चैव तन्तूनामष्टोत्तरशतेन वै ।
तद्धृत्वा तु महादेवे शिवसायुज्यमाप्नुयात् ॥
उत्तमं वासुदेवाय दद्यादृद्धि पवित्रकम् ।
तदा याति हरेर्लोकं साधको नात्र संशयः ॥
अष्टोत्तरसहस्रन्तु रत्नमालेति गीयते ।
पवित्रन्तु महादेव्या मुक्तिमुक्तिप्रदायकम् ॥
रत्नमालान्तु यो दद्यान्महादेवे पवित्रकम् ।
कल्पकोटिसहस्राणि स्वर्गे स्थित्वा शिवो भवेत् ॥
एतत्तु नागहाराख्यं शङ्करस्य पवित्रकम् ।
अष्टोत्तरसहस्रेण तन्तूनां सुमनोहरम् ॥
यः प्रयच्छति मन्त्रज्ञ स यावत् तन्तुसञ्चयः ।
तावत्कल्पसहस्राणि मम लोके प्रमोदते ॥
अष्टोत्तरसहस्रेण वनमाला हरेः स्मृता ।
तन्तूनां तस्य दानेन विष्णुसायुज्यमाप्नुयात् ॥
यत् किञ्चिद् पवित्रन्तु नाभिमात्रं भवेत्तु तत् ।
द्वादशग्रन्थिसंयुक्तमात्ममानेन योजयेत् ॥
ऊर्द्धप्रमाणं मध्यं स्यात् ग्रन्थीनां तत्र योजयेत् ।
चतुर्विंशतिमध्यस्थ मालामात्मन एव च ॥
पवित्रमुत्तमं प्रोक्तं जानुमात्रञ्च भैरव ! ।
षट्त्रिंशत्तन्तुग्रन्थीनां योजयेदात्ममानतः ॥
शतमष्टोत्तरं कार्य्यं ग्रन्थीनां स्वविधानतः ।
नागहाराख्यं तद्वदर्थेषु च विधानतः ॥
पवित्रं क्रियते येन सूत्रेण ग्रन्थयः पुनः ।
तदन्यवर्णसूत्रेण कर्त्तव्या लक्षणान्विताः ॥
ग्रन्थिन्तु सप्तभिः कुर्य्याद्वेदनेत्रैस्तु कनिष्ठके ।

त्रिगुणैर्मध्यमे कुर्य्यात्त्रिगुणैरुत्तमे तथा ॥
अधिवास्य पवित्राणि पूर्व्वस्मिन्दिवसे पुनः ।
मन्त्रन्यासं पवित्रेषु कुर्य्यात्तच्च परेऽहनि ॥
दुर्गाबीजेन मन्त्रेण मन्त्रन्यासं द्विजश्चरेत् ।
वैष्णवीतन्त्रमन्त्रेण कुर्य्युरन्ये च भैरव ! ॥
प्रतिपत्ति स्वयं कुर्य्यान्मन्त्रन्यासं विचक्षणः ॥
अङ्गुष्ठाग्रेण जप्यन्तु मालायामिह भैरव ! ।
यावन्तो ग्रन्थयस्त्वत्र तावत्त्वेव च संख्यया ।
मन्त्राणि तस्य तेन स्यात् देवाङ्गोपनियोजनम् ॥
दुर्गातन्त्रेण मन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
एकत्र न्यस्य सकलं यत्नपात्रे पवित्रकम् ॥
तस्मिन्निधाय पुष्पाणि गन्धादि च सुशोभनम् ॥
तत्त्वन्यासं ततः कुर्य्यादङ्गुल्याग्रेण भैरव ! ॥
विष्णोस्तु मूलमन्त्रेण तत्त्वन्यासन्तु कारयेत् ।
इदं विष्णुरिति प्रोक्तं मन्त्रन्यासे द्विजस्य हि ॥
शूद्राणां मन्त्रविन्यासे मन्त्रो वै द्वादशाक्षरः ।
प्रासादेन तु मन्त्रेण मन्त्रन्यासो मम स्मृतः ॥
अनेन मन्त्रन्यासन्तु दानस्थानेन कारयेत् ।
कुङ्कुमोशीरकर्पूरैश्चन्दनादिविलेपनैः ॥
पावयाणि विलिप्याथ तत्त्वन्यासन्तु योजयेत् ।
सम्पूज्य विधिवद्देवीं मण्डले प्रयतो नरः ॥
वैष्णवीतन्त्रमन्त्रेण दुर्गामन्त्रेण भैरव ! ।
दुर्गाबीजेन दद्यात्तु देव्या मूर्द्ध्नि पवित्रकम् ॥
यस्य देवस्य या पूजा तस्य तस्यैव मण्डलम् ।
यस्य यस्य तु यो मन्त्रो यथाध्यानादिपूजनम् ॥
तं देवं तेन भावेन पूजयित्वा प्रयत्नतः ।
तस्यैव बीजमन्त्राभ्यां मूर्द्ध्नि दद्यात् पवित्रकम् ॥
पवित्रं समये दद्याद्देवेभ्यश्च पवित्रकम् ।
सर्व्वेषामेव वेदानां सम्पूर्णार्थञ्च भैरव ! ॥
अग्निर्ब्रह्मा भवानी च गजवक्त्रो महोरगः ।
स्कन्दो भानुर्मालगणो दिक्पालाश्च नव ग्रहाः ॥
एषां घटेषु प्रत्येकं पूजयित्वा यथाविधि ।
मूर्द्ध्नि पवित्रमेकैकं दद्यादेभ्यः समाहितः ॥
प्रणवञ्चाथवरं कृत्वा देवै दत्त्वाहुतित्रयम् ।
तेनैव वह्नये दत्त्वा ग्रन्थये च यथाविधि ॥
आज्यैरष्टोत्तरशतं तिलैराज्यैस्तथैव च ।
अष्टोत्तरशतं दद्यान्महादेवै च साधकः ॥
एवमेवं विधानेन विष्णुादीनाञ्च वैष्णवः ।
पवित्रारोपणं कुर्य्यात्सर्व्वकामार्थसिद्धये ॥
नैवेद्यैर्विविधैः पैथैर्वटपिष्टकमोदकैः ।
कृष्माण्डैर्नारिकेलैश्च खर्जूरैः पनसैस्तथा ॥
चाम्रदाडिमकर्कारुद्राक्षादिविविधैः फलैः ।
भक्ष्यभोज्यादिभिः सर्व्वैर्मद्यैर्मांसैस्तथोल्वणैः ॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्च सुमनोहरैः ।
वासोभिर्भूषणैश्चैव भवानीं साधको यजेत् ॥
नटनर्त्तकसंघैश्च वेणुवीणाभिरपि भैरव ! ।
कृष्णगीतैः समुदितो जागरं कारयेन्निशि ॥
भोजयेद्ब्राह्मणांश्चापि शक्तीनपि द्विजोत्तमैः ।
पवित्रारोहणे वृत्ते दक्षिणामुपदापयेत् ॥
स्थिरद्रव्यं गां तिलं वासो घृतं वा शाकमेव वा ।
इमं मन्त्रं ततः पश्चात् साधकः समुदीरयेत् ॥
मल्लिकाकुसुमाजाभिर्मन्दारकुसुमादिभिः ।

इयं सांवत्सरी पूजा तवास्तु परमेश्वरि ! ॥
ततो विसर्ज्जयेद्देवीं पूर्व्वाभिः प्रतिपत्तिभिः ।
एवं कृते पवित्राणां दाने देवा यथाविधि ॥
संवत्सरस्य या पूजा सम्पूर्णा वत्स ! जायते ।
कल्पकोटिशतं यावद्देवीलोके वसेन्नरः ।
अत्रापि सुखसौभाग्यसन्ततिरतुला भवेत् ॥"
इति कालिकापुराणे ५८ अध्यायः ॥
गरुडपुराणे ४२ । ४३ अध्याययोरप्येतद्दृश्यम् ॥

पवित्रितः, त्रि, पवित्रमस्य जातं इतच्प्रत्ययनिष्पन्नः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ पूतः ४ शुचिः ५ शुद्धः ६ । इति शब्दरत्नावली ॥

पश्, क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) क, पाशयति । इति दुर्गादासः ॥

पश्, श बाधे । ग्रन्थे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) श, पश्यति, पश्यते । बाधो विच्छित्तिः । ग्रन्थो ग्रन्थनम् । ग्रन्थस्थाने स्वर्गं पठन्ति केचित् । इति दुर्गादासः ॥

पश्, त् क अनुपसर्गाद्बन्धबाधयोः । स्वर्गगतौ । इति कविकल्पद्रुमः ॥ (अदन्तपुरां-परं-सकं-सेट् ।) तालव्योपधः । पश्यति । अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते । बाधो विच्छित्तिः । इति दुर्गादासः ॥

पशूय, त्रि, (पशोरिदं पशवे हितं वा । पशु+यत् ।) पशुसम्बन्धि । इति संक्षिप्तसारव्याकरणम् ॥ (पशुहितकरम् । यथा, याज्ञवल्क्यः । १ । ३०१ ।
"रम्यं पशूयमाजीवं जाङ्गलं देशमावसेत् ॥")

पशुः, पुं, (अविशेषेण सर्व्वं पश्यतीति । दृशिरौ प्रेक्षणे + "अर्च्चिदृशिकम्यमिपंसीति ।" उणां । १ । २८ । इति कुः पशादेशश्च ।) अथवा व्युत्पत्तिर्यथा, "पश्यन्ति पश्यन्ति पार्श्वहस्ताभ्यां हिताहितम् ।" इति भरतः ॥ जन्तुविशेषः । तस्य लक्षणम् । लोमवल्लाङ्गूलवत्त्वम् । इति भाषारत्ने कलादः ॥ तद्भेदा यथा । सिंहः १ व्याघ्रः २ तरक्षुः ३ वराहः ४ कपिः ५ भल्लुकः ६ खड्गी ७ महिषः ८ शृगालः ९ विड़ालः १० गोधा ११ श्वावित् १२ हरिणः १३ कृष्णसारः १४ रुरुः १५ ऋक्षुः १६ रङ्कुः १७ शम्बरः १८ रोहिषः १९ गोकर्णः २० पृषतः २१ रुरुः २२ ऋष्यः २३ रोहितः २४ चमरः २५ गन्धर्व्वः २६ शरभः २७ रामः २८ सृमरः २९ गवयः ३० शशः ३१ खड्गशशः ३२ गौः ३३ उष्ट्रः ३४ छागः ३५ मेषः ३६ खरः ३७ कृष्णी ३८ अश्वः ३९ । इत्यमरः ॥ * ॥ (यथा, ("पशुः पशूनां दौर्ब्बल्यात् कश्चिन्मध्ये वृकायते । ससत्त्वं वृकमासाद्य प्रकृतिं भजते पशुः ॥ तद्वदज्ञो भ्रमध्यस्थः कश्चिन्मौखर्य्यसाधनः । स्थापयत्यात्ममात्मानमात्मन्यासाद्य भिद्यते ॥"
इति चरके सूत्रस्थाने त्रिंशोऽध्याये ॥)
तच्च व्याख्यारत्नभेदेन चतुर्दशविधाः पशवो यथा,

"गौरविरजोऽश्वोऽश्वतरो गर्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः। महिषवाजरुरुशरभ-रोहिषरुरुपृषतगवयाश्चेति सप्तारण्याः पशवः॥" इति दुर्गोत्सवतन्त्रे पैठीनसिः॥ * ॥ वैद्यके भूयस्त्वाङ्गुलभेदेन स त्रिविधः। तत्र विलग्नायित्वात् भूयस्त्वा नकुलगोधादयः। तेषां मांसगुणाः। "प्रहसा भूयस्त्वानूपवारिजा वारिचारिणः। गुरुत्वान्मधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः॥ स्थलजा जाङ्गलाः प्रोक्ता लघ्वो जङ्गलचारिणः। आङ्गला हरिणच्छागादयः। तेषां मांसगुणाः। लघवः शीतमधुराः सकषाया हिता नृणाम्॥ तेषामवयवादीनां गुणः।

गुरुभक्षा बहुभुजो ये चोपचितमेदसः।
एकदेशेऽपि पूर्व्वार्द्धं त्यजेत्तेषां पशित्वा परम्॥
सर्व्वेषाञ्च शिरःस्कन्धग्रीहृत्पर्शयकृद्गुदम्।
पादपुच्छान्त्रमस्तिष्कसृक्कक्रोडाः समेहनाः।
धातवः शोणितात्राच्च गुरवः स्युः परस्परम्॥"

इति राजवल्लभः॥ * ॥

("तत्र गजगवयमहिषरुरुशमरहरिणरोहित-वराहखड्गशशोलूकर्क्षकालपुच्छ-शोलन्यङ्कुरण्य-गवयप्रभृतयः कूलचराः पशवः।" एषां गुणा यथा,—

"वातपित्तहरा हृद्या मधुरा रसपाकयोः।
ग्रीवतला बलिनः स्निग्धा स्थूलाः कफवर्द्धनाः॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥

"उष्ट्रा गजा वाजिनश्च महिषाः सौरभाजकाः।
खरशूकरमेषाश्च श्वा च मार्জ্জারमूषकाः।
इत्यते पशवो ज्ञेया ग्रामवासनिवासिनः॥"

इति हारीते प्रथमस्थाने एकादशोऽध्यायः॥)

छागादौ पशुपदप्रयोगमाह यज्ञपार्श्वः।

"उष्ट्रो वा यदि वा मेषश्छागो वा यदि वा हयः।
पशुस्थाने नियुक्तानां पशुशब्दोऽभिधीयते॥"

इति बलिदानप्रकरणे तिथितत्त्वम्॥*॥

अवैधपशुहनने दोषो यथा,—

"वसेत् स नरके घोरे दिनानि पशुरोमभिः।
संमितानि दुराचारो यो हन्त्यविधिना पशून्॥"

इति गारुडे ६५ अध्यायः॥ * ॥

पशध्यधिष्ठात्री देवता यथा,—

"सिंहे वसति दुर्गा च शरभे च प्रजापतिः।
कूर्म्मे च वसते वायुर्मेषे चैव च चन्द्रमाः॥
वराहे च गृध्रके ज्ञानसारे हरिः स्वयम्।
घृतकुलुर्गवां पृष्ठे गवये भुवनानि च॥
शूकरे मङ्गलाश्वौ गजे विघ्नगणेश्वरः।
अन्ये तु हादयादित्या ब्राह्मणे सर्व्वदेवताः॥
अजा तु श्यामरे चैव छागले तु तथानलः।
एतस्मात् कारणादेते पूज्या वन्द्याः प्रयत्नतः॥"

इति मत्स्यसूक्तनले ३६ पटलः॥ * ॥

पशवः। देवः। प्राणिमात्रम्। इति शब्द-रत्नावली॥ छागलः। यज्ञः। संसारिजीवात्मा। इति धरणिः॥ यज्ञोदुम्बरः। इति शब्द-चन्द्रिका॥ * ॥ * ॥ साधकानां भावत्रयाणां प्रथमो भावः। तस्य निर्णयो यथा, षट्पटले।

"पशुभावस्थितो नाथ! देवतां यजेत् विस्तरात्।
दुर्गापूजां विष्णुपूजां शिवपूजाञ्च नित्यशः॥
अवश्यं हि यः करोति स पशुरुत्तमः स्मृतः।
केवलं शिवपूजाञ्च यः करोति च साधकः॥
पशूनां मध्यतः श्रीमान् शिवया सह घोत्तमः।
केवलं वैष्णवो धीरः पशूनां मध्यमः स्मृतः॥
भूतानां देवतानाञ्च सेवां कुर्व्वन्ति सर्व्वदा।
पशूनामधमाः प्रोक्ता नरकस्था न संशयः॥
स्वसेवां मम सेवाञ्च ब्रह्मविष्ण्वादिसेवनम्।
ज्ञात्वान्यसर्व्वभूतानां नायिकानां महाप्रभो!॥
यक्षिणीनां भूतिनीनां ततः सेवां शुभप्रदाम्।
यः पशुर्मद्भक्तयादिसेवाञ्च कुरुते सदा॥
तथा शैतारकब्रह्मसेवां यो वा नरोत्तमाः।
तेषामसाध्या भूतादिदेवता सर्व्वकामदा॥
वर्জ্জयेत् पशुमार्गेण विष्णुसेवापरो जनः॥"

द्वितीयपटले।

"नित्यस्नानं तथा सन्ध्यावन्दनं पितृतर्पणम्।
देवतादर्शनं पीठदर्शनं तीर्थदर्शनम्॥
गुरोराज्ञापालनञ्च देवतानित्यपूजनम्।
पशुभावस्थितो मर्त्यो महासिद्धिं लभेद्ध्रुवम्॥"

षष्ठपटले।

"पुनर्भावं पशोरेव शृणुष्वादरपूर्व्वकम्।
अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः॥
वैकुण्ठनगरे याति चतुर्भुजकलेवरः।
शङ्खचक्रगदापद्महस्तो गरुडवाहनः॥
महाधर्म्मस्वरूपोऽसौ महाविद्याप्रसादतः।
पशुभावं महाभावं भावानां सिद्धिदं परम्॥
आदौ भावं पशोः कृत्वा पश्चात् कुर्य्यादवग्रहम्।
वीरभावं महाभावं सर्व्वभावोत्तमोत्तमम्।
तत्सञ्चादतिसौन्दर्य्यं दिव्यभावं महाफलम्॥

इति रुद्रयामले उत्तरखण्डम्॥ * ॥

तस्य कालो यथा,—

"आदौ दशमदण्डेन पशुभावमथापि वा॥"

इति तन्त्रे।

"जन्ममात्रं पशुभावं वर्षमेकमुदाहृतम्॥"

इति वामकेश्वरे ५१ पटलः॥ * ॥

पशुभावकर्त्तव्याकर्त्तव्यगमनस्वभावनिरूपणमाह।

"पशुभावरता ये च केवलं पशुरूपिणः।
रात्रौ यत्रच मत्रच न व्रजेत् न व्रजेत् क्वचित्॥
संग्रयो बलिदाने च तन्त्रे च संशयः सदा।
मन्त्रे चाक्षरबुद्धिश्च अविश्वासो गुरौ सदा॥
प्रतिमासु शिलाबुद्धिर्भेदको देवते पुनः।
निरामिषञ्च देवेशि! देवताया: प्रपूजनम्॥
अज्ञानेन सदा ज्ञानं प्रत्यहं देहताडनम्।
सर्व्वत्राचैव निन्दासु यः कुर्य्याच्च महेश्वरि!।
स एव पशुभावेन अधमः परिकीर्त्तितः॥"

इति रुद्रयामले उत्तरखण्डे ६ पटलः॥ * ॥

"रात्रौ नैव यजेद्देवीं सन्ध्यायां वा पराङ्गके।
ऋतुकालं विना देवि! रमणं परिवर्জ্জयेत्॥
मांसादिकं महेशानि! त्यजेत् पञ्चसु पर्व्वसु।
यदन्यद्वेदविहितं कुर्य्यान्नियमतत्परः॥"

इति निरुत्तरतन्त्रे १ पटलः॥ * ॥

पशूनां व्रतभङ्गप्रायश्चित्तं यथा,—

"पशूनां व्रतभङ्गादौ विधिं प्रथमतः शृणु।
व्रतभङ्गे नित्यभङ्गे नित्यपूजादिकर्म्मणि।
सहस्रं प्रजपेन्मन्त्री व्रतदोषोपशान्तये॥"

इति रुद्रयामले उत्तरखण्डे २ पटलः॥

पशु, य, (हन्यते इति। हन् + "अन्येभ्योऽपीति।" उणा॰ ३।१०८। इति भावे कुः पशि-आदेशश्च।) दर्शनम्। इति मेदिनी। शे, १०॥

पशुक्रिया, स्त्री, (पशोरिव क्रिया कार्य्यम्।) मैथुनम्। इति हेमचन्द्रः। २।२०१॥ (पशुना छागादिजन्तुना क्रिया इति विग्रहे छागादि पशुबलिदानकार्य्यम्। यथा, हरिवंशे।५७।५२।

"छागानुयाता भूतेशं नित्यं मांसबलिप्रिया।
तिथौ नवम्यां पूजाञ्च प्राप्यासे पशुक्रियाम्॥")

पशुगायत्री, स्त्री, (पशुकर्म्मजन्या गायत्री।) बलिदानीयपशुकर्म्मजन्यमन्त्रविशेषः। यथा,—

पशुकर्म्मे पशुगायत्रीं जपेत्। सा यथा। "पशु-पाशाय विद्महे शिरश्छेदाय धीमहि तन्नः पशुः प्रचोदयात्।" इति दुर्गोत्सवप्रयोगः॥

पशुपतिः, पुं, (पशूनां स्थावरजङ्गमानां पतिः।) शिवः। इत्यमरः। १। १। २२॥ (यथा, महाभारते। १३। १७। १६३।

"जङ्गमाना पशुपतिर्ब्राह्मणश्च मनोजवः॥"

तस्य निरुक्तिर्यथा चिन्तामणिधृतवचने,—

"ब्रह्माद्याः स्थावरान्ताश्च पशवः परिकीर्त्तिताः।
तेषां पतित्वभावेन देवः स्मृतः पशुपतिः शुभौ॥")

अपरा निरुक्तिर्यथा, वराहपुराणे।

"अहञ्च सर्व्वविद्यानां पतिराद्यः सनातनः।
अहं वै पतिभावेन पशुमध्ये व्यवस्थितः।
अतः पशुपतिर्नाम मे लोके ख्यातिमेष्यसि॥"

अथ यजमानलक्षणम्। यथा। पशुपतये यज मानलक्षणाय नमः। इत्यष्टलक्षपूजायां भविष्य-पुराणम्॥ (महादेवो हि नेपाले पीठस्थाने पशु-पतिरित्याख्या विराजते। यदुक्तं महाकिङ्क-रतन्त्रे शिवस्य शतनामस्तोत्रे,—

"नेपाले च पशुपतिः केदारे परमेश्वरः॥")

पशुपल्वलं, क्ली, (पशुप्रियं पल्वलं क्षुद्रजलाशय उत्पत्तिस्थानत्वेनाश्रयत्वात्। अच्। पशुप्रियं पल्वलमिवेति केचित्।) गोवर्त्तीमुस्तकम्। इति शब्दचन्द्रिका॥

पशुपाशकः, पुं, (पशूनामिव पाशो बन्धनं यत्र। ततः कप्।) रतिबन्धविशेषः। यथा,—

"म्रियमाणतपूर्व्वाङ्गौ स्वपादाग्रःपरङ्गयम्।
ऊर्द्धाग्रेण रमेत् कामी बन्धोऽयं पशुपाशकः॥"

इति रतिमञ्जरी॥

पशुप्रेरणं, क्ली, (पशूनां प्रेरणम्।) गवादीनां चालनम्। तत्पर्य्यायः। उदञ्चः २। इत्य-मरः। ३। २। ३८॥

पशुमोक्षणिका, स्त्री, (मुच्यतेऽनया। मुच + ल्युट्। स्वार्थे कन् टापि अत इत्वम्। ततः पशूनां मोक्षणिका।) कड़ीलता। इति राज-निर्घण्टः॥ (कड़ीशब्देऽस्या विवरणं ज्ञेयम्॥)

पशुरज्जुः, स्त्री, पशूनामन्धादीनां बन्धनाय रज्जुः। तत्पर्य्यायः। दामनी २। इत्यमरः। २।८।७६॥ बन्धनी ३। इति शब्दरत्नावली॥

पशुराजः, पुं, (पशूनां राजा। "राजाहःसखिभ्यष्टच्।" ५।४।९१। इति समासान्तष्टच्।) सिंहः। इति शब्दचन्द्रिका॥

पशुहरीतकी, स्त्री, (पशूनां हरीतकीव हितकारित्वात्।) आम्रातकफलम्। इति त्रिकाण्डशेषः॥

पश्चात्, अ, (अपरस्मिन् अपरस्मात् अपरो वा वर्त्तते आगतो रमणीयं वा। "पश्चात्।" ५।३।३२। इति अपरस्य पश्चभाव आतिश्च प्रत्ययोऽस्मातिर्विषये।) प्रतीची। चरमम्। इत्यमरः। ३।३।७४२॥ (यथा, रघुः। ४।३०।

"प्रतापोऽग्रे ततः शब्दः पराक्रान्तदलन्तरम्।
ययौ पश्चात्तथादौति चतुरङ्गमिव वा चमूः॥")

अधिकारः। इति मेदिनी। ते, ३१॥

पश्चात्तापः, पुं, (पश्चात् अपरतोऽनार्य्ये कृते चरमे तापः।) अनुशोचनम्। चरमे शोकः। पश्चात्त इति भाषा। तत्पर्य्यायः। अनुतापः २ विप्रतीसारः ३। इत्यमरः। १।७।२५॥ (यथा, रामायणे। ३।५१।३६।

"उक्तेति पदमं वाक्यं पश्चात्तापसमन्वितः॥"

केचित्तु पश्चात् ताप इति पदद्वयमिच्छन्ति॥)

पश्चार्द्धः, त्रि, (अपरस्यार्द्धस्य इति। "अपरस्यार्द्धे पश्चभावो वक्तव्यः।" २।१।५८। इत्यस्य वार्त्तिं इति पश्चभावः।) शेषार्द्धः। अपरार्द्धः। यथा, शकुन्तलायाम्। १अङ्के।

"शोकाभङ्गाभिरामं सकुरुतपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्॥"

पश्चिमं, त्रि, (पश्चाद्भवम्। "अव्ययादाप्सुपः।" ४।३।२६। इत्यस्य वार्त्तिं इति डिमच्।) पश्चाद्भवम्। इत्यमरः। ३।१।८१॥ (यथा, रघुः। १७।८।

"तदात्मसम्भवं राज्ये मन्त्रिवृद्धाः समादधुः।
अरण्यः पश्चिमामाशां भर्त्तुः संग्रामयायिनः॥")

पश्चिमा, स्त्री, (पश्चिम+टाप्।) अस्ताचलावच्छिन्नदिक्। तत्पर्य्यायः। प्रतीची२ वारुणी३ प्रत्यक् ४। तद्दिग्भववायुगुणाः।

"पश्चिमो मारुतस्तीक्ष्णः कषमेच्छविघोषवान्।
सद्यः प्राणहरो दुष्टः शोषकारी शरीरिणाम्॥"

इति राजनिर्घण्टः॥

अपिच। राजवल्लभः।

"पश्चिमोऽग्निपुरुषैर्बलारोग्यविवर्द्धनः।
कषायः शीतलः स्वर्य्यो रोचनो विशदो लघुः॥
अर्शो लघुत्वदौर्ब्बल्यशैत्यदौर्गन्ध्यकारकः।
सर्व्वदोषप्रशमनः प्रभावरसवीर्य्यतः॥
ग्रहणीरोगपक्षाघ्नो दाहशोथहरश्च सः॥"

तद्दिगधिपतिर्वरुणः। यथा, अमरे। १।३।१।

"इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्व्वादीनां दिशां क्रमात्॥"

तद्दिक्पतयो मिथुनतुलाकुम्भराशयश्च। यथा,

"प्रागादिकक्षभान्नाथा यथासंख्यं प्रदक्षिणम्।
मेषाद्या राशयो ज्ञेयाश्चिरात्तिष्ठन्ति परिभ्रमात्॥"

इति ज्योतिस्तत्त्वम्॥

पश्च, अ, प्रशंसा। विज्ञयः। इति शब्दरत्नावली॥ (पश्चतीति व्युत्पत्त्या "पाशाधाधेट्टङ्गः शः।" ३।१।१३७। इति शप्रत्ययेन पश्चो वाच्यलिङ्गः। दर्शकः। यथा, तुलकोपनिषदि। ३।१।३।

"यदा पश्चः पश्चते रुक्मवर्णं
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥")

पश्चात्कर्म्मा, [न्] पुं, (पश्चात्तदर्शनमेव कर्म्म यस्य।) दर्शनकर्म्मा। तद्वैदिकपर्य्यायाः। चिकीर्षात् १ चाकलत् २ आचख्यौ ३ चख्यौ ४ विचख्यौ ५ विचख्यिवान् ६ विचख्यिवान् ७ अवचाकशात् ८। इत्यष्टौ पश्चात्कर्म्माणः। इति वेदनिघण्टौ ३ अध्यायः॥

पश्चात्तोहरः, त्रि, (पश्चात्तं जनमनादृत्य हरतीति। हृञ् हरणे+अच्। "षष्ठी चानादरे।" २।३।३८। इति अनादरे षष्ठी। "वाग्दिक्पश्चाद्भगो युक्तिदण्डहरेषु।" ६।३।२१। इत्यस्य वार्त्तिं इति षष्ठ्या अलुक्।) चौरः। यथा, हेमचन्द्रे। ३।७६।

"यः पश्चतो हरेदर्थं स चौरः पश्चतोहरः॥"

पश्चत् [न्], त्रि, (पश्चतीति। डप्रिटौ प्रेक्षणे+"लटः शतृशानचावप्रथमासमानाधिकरणे।" २।२।१२४। इति शतृ।) ईक्षणकर्त्ता। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ८२।२८।

"इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा।
पश्चतामेव देवानां तत्रैवान्तरधीयत॥")

पश्चन्ती, स्त्री, (पश्चति या डप्रिट्+शतृ+ङीप्। ततः "ग्रयपश्चनोर्नित्यम्।" ७।१।८१। इति नुम्।) मूलाधारोत्थितसूक्ष्मदयगतनादरूपवर्णः। यथा,—

"मूलाधारात् प्रथममुदितो यस्तु तारः पराख्यः
पश्चात् पश्चन्नाथ हृदयगो बुद्धियुङ्मध्यमाख्यः॥"

इत्यलङ्कारकौस्तुभः॥

(यथाच,—

"वैखरीशक्तिरुत्पत्तिर्मध्यमा स्मृतिगोचरा।
द्योतिनार्था तु पश्चन्ती स्वप्ना वाङ्मनपायिनी॥"

इति मल्लिनाथधृतवाक्यम्॥

ईक्षणकर्त्री। इति व्याकरणम्॥)

पश्चाचारः, पुं, (पश्चूनां तत्तदुक्ताधिकारिविशेषाणामाचारः।) आचारविशेषः। यथा,—

"वेदोक्तेन यजेद्देवीं कामसङ्कल्पपूर्व्वकम्।
स एव वैदिकाचारः पश्चाचारः स उच्यते॥"

इत्याचारभेदतन्त्रम्॥

पश, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पाशयति। तालव्यान्त एवायमिति बहवः। दन्त्यान्त इति केचित्। ह्रस्वान्तपाठस्तु कस्यचिदनुरोधात्। इति दुर्गादासः॥

पश, न बाधे। बन्धे। इति कविकल्पद्रुमः॥ (भ्वां-उभं-सकं-सेट्।) न, पसति पशते। बाधो विहृतिः। बन्धो बन्धनम्। बन्धनस्थाने सार्द्धनं केचित् पठन्ति। इति दुर्गादासः॥

पश, तृ क अनुपसर्गाद्बन्धबाधयोः। आर्द्धनाशे। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) नृङ्नाशोपश्चः। क, पशयति। अनुपसर्गादिति सोपसर्गस्य प्रयोगो निषिध्यते। बाधो विहृतिः। इति दुर्गादासः॥

पस, ट क नाशे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) नाशः इह नष्टीकरणम्। ट क, पंसयति पापं गङ्गा। इति दुर्गादासः॥

पस, क बन्धे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पासयति। पृथक्पाठादर्थं न भित्। अन्यथा पस कि ञ इत्यनेनैवेष्टसिद्धे पृथक्पाठोऽनर्थकः स्यात्। इति दुर्गादासः॥

पस, ञ बाधे। बन्धे। इति कविकल्पद्रुमः। (भ्वां-उभं-सकं-सेट्।) ञ, पसति पसते। इति दुर्गादासः॥

पस्त्यं, क्ली, (अपस्त्यायन्ति सङ्घीभूय तिष्ठन्ति जीवा यत्र। अप+स्त्ये सङ्घातशब्दयोः+"आतश्चोपसर्गे।" ३।१।१३६। इति कः। उपसर्गस्याकारलोपो निपातनात्।) गृहम्। इति हेमचन्द्रः। ४।५६॥ (यथा, ऋग्वेदे। १०।६६।११। [सूर्य्याय॥")

प्र पस्त्यमसुर हर्य्यतं गोरविष्कधि हरये

पह्लवः, पुं, (म्लेच्छधारिम्लेच्छजातिविशेषः। तस्य विवरणं यथा, हरिवंशे। १४।१५—१६।

"सगरस्तां प्रतिज्ञाय गुरोर्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
यवनानां शिरः सर्व्वं काम्बोजानामथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलाः सर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः॥
सर्व्वे ते क्षत्रियास्तात! धर्म्मस्तेषां निरासतः।
वशिष्ठवचनाद्राजन्! सगरेण महात्मना॥")

(क्वचित् पह्लवः पाठोऽपि दृश्यते। यथा, गोः रामायणे। १।५५।१८।

"तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप!।
अनाशयन् बलं सर्व्वं विश्वामित्रस्य पश्यतः॥")

पह्लिका, स्त्री, वारिप्रपा। इति शब्दमाला॥

पा, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) अस्येव पिबादेशः। पिबति पयः प्राप्यः। इति दुर्गादासः॥

पा, ल रक्षणे। इति कविकल्पद्रुमः॥ (अदां-परं-सकं-अनिट्।) ल, पाति। इति दुर्गादासः॥

पाः, त्रि, (पिबतीति । पा पाने + क्विप् ।) पानकर्त्ता ॥ (पाति रक्षतीति । पा रक्षणे + क्विप् ।) रक्षणकर्त्ता । ("विश्वं पातीति विश्वपाः ।" इति मुग्धबोधव्याकरणम् ॥)

पांशवः, पुं, (पांशोरेवायं विकारः । पांशु + अण् ।) लवणविशेषः । पाङ्गा लोण इति भाषा ॥ तत्पर्य्यायः । रोमकम् २ औद्भिज्जम् ३ वसुकम् ४ वसुपांसुः ५ ऊषरजम् ६ औषरम् ७ ऐरिणम् ८ और्व्वम् ९ सहम् १० । अस्य गुणाः । तीक्ष्णत्वम् । अल्पत्वम् । कटुत्वम् । तिक्तत्वम् । दीपनत्वम् । दाहशोषकरत्वम् । ग्राहित्वम् । पित्तकोपकरत्वञ्च । इति राजनिर्घण्टः ॥

"औद्भिदं पांशुलवणं यत्स्यात् भूमितः स्वयम् ।
क्षारं गुरु कटु स्निग्धं श्लेष्मलं वातनाशनम् ॥"
इति भावप्रकाशः ॥

पांसुः, पुं, (पंसयति नाशयति आत्मानमिति । पसि नाशने + "अर्च्चिडुचिकमीति ।" उणां । १ । २८ । इति कुः दीर्घश्च ।) धूलिः । इत्यमरः । २ । ८ । ६८ ॥ (यथा, मनुः । ४ । १०२ ।
"कर्णश्वघ्रेनिले राजौ दिवा पांसुसमूहने ।
एतौ वर्षासनध्यायावध्यायज्ञाः प्रचक्षते ॥")
घृतस्यार्थं चिरसञ्चितगोमयः । सार इति भाषा ॥ इति मेदिनी । शे, ११ ॥ पर्पटः । कर्पूरविशेषः । इति राजनिर्घण्टः ॥ (दन्त्यसकारान्तोऽपि दृश्यते ॥)

पांशुकाशीसं, क्ली, (पांसुरिव काशीसम् ।) काशीसम् । इति राजनिर्घण्टः ॥

पांशुकूली, स्त्री, (पांशुना कोलति आकुलीभवतीति । कूल + कः । ततः स्त्रियां ङीष् ।) राजमार्गः । यथा । "रथ्या पांशुकुली भवेत् ।" इति हारावली । ११२ ॥

पांशुकूलं, क्ली, (पांशोः कूलमिव ।) अशास्पृष्टोलिका । यथा, चिकाकण्डशेषे ।
"ग्रामणं धर्म्मकीलः स्याच्छुक्तिः शूद्रग्रासनम् ।
पट्टोलिका कुलप्रकीला पांशुकूलं न कस्यचित् ॥"

पांशुचत्वरः, पुं, (पांसुभिश्चत्वर इव ।) घनोपलः । इति शब्दमाला ॥

पांशुचन्दनः, पुं, (पांसुश्चिताभस्मरजश्चन्दनमिव यस्य ।) शिवः । इति चिकाकण्डशेषः ॥

पांशुचामरः, पुं, (पांसुर्धूलिश्चामर इव यस्य ।) पटवासः । इति जटाधरः ॥ ताँबु इति भाषा ॥ (पांशौ दूर्व्वा चामर इव यस्य ।) दूर्व्वाश्चिततटी भूमिः । वर्द्धापकः । प्रशंसा । पुरोटिः । धूलिगुच्छकः । इति मेदिनी । रे, ३०५ ॥

पांशुजं, क्ली, (पांशोर्जायते इति । पांसु + जन् + डः ।) पांशुलवणम् । पाङ्गा लोण इति भाषा ॥ तत्पर्य्यायः । ऊषम् २ औद्भिदम् ३ । पाक्यम् ४ लवणम् ५ पटु ६ । इति रत्नमाला ॥ अस्य गुणाः । भेदकत्वम् । पाचनत्वम् । पित्तकारित्वम् । इति राजवल्लभः ॥

पांशुपर्णं, क्ली, (पांसुः कर्पूर इव सुगन्धि पर्णमस्य ।) वालूकम् । इति शब्दमाला ॥

पांशुमर्दनः, पुं, (मृद्यतेऽसाविति । मृद् + ल्युट् । मर्दनः । ततः पांसुः मर्दनो यत्र । यद्वा पांशोर्मर्दनं यत्र ।) केदारः । इति त्रिकाकण्डशेषः ॥

पांशुरः, पुं, (पांसु चिरसञ्चितगोमयादिकमुत्पत्तित्वेन राततीति । पांसु + रा + कः ।) दंशकः । डाँश इति भाषा ॥ पीठसर्पी । खड्गः । इति हारावली । १२६ ॥ (पांसुरस्यास्तीति । "गणपांसुपाकुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य वार्त्तिं इति रः । पांसुविशिष्टे, त्रि ॥ यथा, ऋग्वेदे । १ । २२ । १७ ।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसु(सु)रे ॥")

पांशुरागिणी, स्त्री, (पांशुरागो विद्यतेऽस्याः । इनिः स्त्रियां ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

पांशुलः, पुं, (पांसुर्विद्यतेऽस्य । पांसु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) शरः । पापी । इति शब्दरत्नावली ॥ पुच्छलः । शूकरः । खड्गः । इति मेदिनी । ले, १०८ ॥ कँटाकरञ्ज इति भाषा ॥ इति शब्दचन्द्रिका ॥ पांशुयुक्ते त्रि । इति धरणिः ॥ (पांशुर्दोषः पापञ्च तद्युक्ते च त्रि । यथा, रघुः । १२ ।
"तस्याः खुरन्यासपवित्रपांसु
मपांसुलानां धुरि कीर्त्तनीया ।
मार्गं मनुष्येश्वरधर्म्मपत्नी
श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥")

पांशुला, स्त्री, (पांशुल + टाप् ।) कुलटा । भूमिः । इति शब्दरत्नावली ॥ केतकी । रजस्वला । इति राजनिर्घण्टः ॥

पांसनः, त्रि, (पंसयति गुणादिकं नाशयतीति । पसि + ल्युः । बाहुलकात् दीर्घः ।) दूषकः । इति त्रिकाकण्डशेषः ॥ (यथा, महाभारते । १ । १५४ । ३६ ॥
"निराबाधाञ्च यि हते मया राक्षसपांसन ! ।
वनमेतच्चरिष्यन्ति पुरुषा वनचारिणः ॥")

पांसुः, पुं, (पंसयतीति । पसि नाशने + "अर्च्चिडुचिकमीति ।" उणां । १ । २८ । इति कुदीर्घश्च ।) धूलिः । (यथा, वैद्यकरामायणे । २ । ८० । ६ ।
"अपरे पूरयन् कूपान् पांसुभिः श्वभ्रमायतम् ।
निम्नभागांस्तथैवाशु समाचक्रुः समन्ततः ॥")
घृतस्य चिरसञ्चितगोमयम् । इत्युणादिकोषः भरतश्च ॥ सार इति भाषा ॥

पाकः, पुं, (पच् + भावे घञ् ।) पचनम् । क्लेदनम् । तत्पर्य्यायः । पचा २ । इत्यमरः । ३ । २ । ८ ॥ रन्धनम् । स तु सप्तप्रकारो यथा,—
"भर्ज्जनं तलनं स्वेदः पचनं क्वथनं तथा ।
ताम्बूरं पुटपाकश्च पाकः सप्तविधो मतः ॥"
भर्ज्जनं केवलपात्रे । तलनं स्नेहद्रव्ये । स्वेदनं अम्बुतापे । पचनं जले । क्वथनं स्विन्नद्रव्यरसयत्नेन । ताम्बूरं द्वारपिहितमृन्मये । पुटपाकः अधोर्द्धतापितापे ज्ञेयः । इति पाकराजेश्वरः ॥

क्षारालोमार्ज्जनाद्योदनपरीक्षान्तो व्यापारविशेषः पाकः । इति स्मृतिः ॥ * ॥ पाकभाजनस्य त्याज्यत्वं यथा,—
"नित्यं नूतनभाण्डेन कर्त्तव्यः पाक एव च ।
अथवा पक्षपर्य्यन्तं ततस्त्याज्यं मनीषिभिः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥

पाककाले शूद्रायामन्नदाननिषेधो यथा,—
"शूद्रायाञ्चैव यो दद्यात् पाककाले विशेषतः ।
शूद्रापक्वं भवेदन्नं ब्राह्मणः शूद्रतामियात् ॥"
इति कर्म्मलोचनम् ॥ * ॥

एकोद्दिष्टश्राद्धे तस्य नित्यत्वं यथा,—
"एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदन्नैः सक्तुभोजनम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥

तस्य विधिर्यथा,—
"पूर्व्वाह्णाभिमुखो भूत्वा उत्तराह्णामुखेन वा ।
पचेदन्नञ्च मध्याह्ने सायाह्ने च विवर्ज्जयेत् ॥
अन्नाह्णाभिमुखे पक्वमन्नन्तस्मै विनाशनम् ।
पूर्व्वाह्णमुखो धर्म्मकामः श्रीकाङ्क्षानिश्च दक्षिणी ॥
श्रीकामश्चोत्तरमुखे पशुकामश्च पश्चिमे ।
ऐशान्याभिमुखे पक्वा दरिद्रो जायते नरः ॥
यदा तु आयसे पात्रे पक्वमन्नाति वै द्विजः ।
स पापिष्ठोऽपि शुद्धात्मा रौरवे परिपच्यते ॥
ताम्रे पक्वा चक्षुरङ्गनिर्म्मली भवति वै त्वयम् ।
पित्तभ्यां पक्वमन्नञ्च पित्तरोगं व्यपोहति ॥
पुष्करीकस्य यज्ञस्य लभते फलमीप्सितम् ।
वातुलेन तु यत् पक्वं भगिन्या च कनिष्ठया ।
असगोत्रेण यत् पक्वं श्रोत्रियं तदपि क्षुतम् ॥
अभक्तेन च यत् पक्वं स्त्रिया पक्वन्तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥
उदुम्बरेण कालेन कदम्बस्य दलेन च ।
शालेन करमर्दैन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्त्वा रात्रिमुपावसेत् ।
गर्हितान्नमवीरान्नं भुक्त्वा कृच्छ्रं समाचरेत् ।
अप्रजा या तु वनिता नाश्नीयादेव तद्गृहे ॥
शालकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कलिञ्चखातकस्यैव वज्रावारुणकस्य च ।
भेरण्डशाल्मलेर्वापि पक्वान्नं गर्हितं क्षुतम् ॥
यदा लोहमयपात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टौ च तत्पाकं विवर्জ্জयेत् गृही ॥
घृतः पाके तथा सिद्धे मिश्रणे वा वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! कृच्छ्रेणैव विशुध्यति ॥
एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पश्चात्तोयं न दापयेत् ॥"
इति मत्स्यसूक्ते ४२ पटलः ॥ * ॥

परिणतिः । (यथा, मार्कण्डेये । ७० । ३४ ।
"स्वकर्म्मफलपाकेन भर्त्तुस्तस्य महात्मनः ।
वियोजिताहं तस्तेसुरयमासीन् निशाचरः ॥"
पिबति क्लेत्यादिकं इति । पा पाने + "इण्भीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणां । ३ । ४३ । इति कन् ।) शिशुः । जरसा केशस्य शौक्ल्यम् । क्षयाद्यादि । इति मेदिनी । के, २८ ॥

पैचकः। राङ्गादि। भङ्गः। भौतिः। इति शब्द-रत्नावली॥ दैत्यः। इति हैमचन्द्रः। २।८८॥ (यथा, भागवते। ७। २। ४।

"भो भो दानवदैतेया! हिन्नलुब्ध! शम्ब! शम्बर!। शतबाहो! हयग्रीव! नमुचे! पाक! इल्वल!॥" पिबतीति। पा+"इगुपधज्ञाप्रीकिरः कः।" उणा॰ ३। ४३। इति कन्।) पानकर्त्तरि त्रि॥

पाकफलाः, पुं, (पाके फलां फलं यस्य।) फल-पाकः। पानी आमला। इति शब्द-चन्द्रिका॥

पाकफलपत्रकः, पुं, (पाके फलां फलं यस्य।) पाकफलः। इति शब्दमाला॥

पाकजं, क्ली, (पाकात् जायते इति। पाक+ जन्+ड।) काचलवणम्। परिणाममूलम्। इति राजनिर्घण्टः॥ (पाकजाते त्रि। यथा, भाषापरिच्छेदे। ३६।

"स्मर्य्यलक्ष्यास्तु विज्ञेयो ह्यनुभाग्यीतपाकजः॥")

पाकपुटी, स्त्री, (पाकाय पुटी।) कुम्भशाला। इति हैमचन्द्रः। ४।६६६॥ पोयान् इति भाषा॥

पाकफलः, पुं, (पाकफलां फलमस्य।) फलपाकः। इति शब्दचन्द्रिका॥ पानी आमला इति भाषा॥

पाकभाण्डं, क्ली, (पाकाय पाकस्य वा भाण्डम्।) पाकपात्रम्। यथा,—

"यस्य यस्य तु वर्णस्य यद्यत् स्यात्
पक्षिमन्नवहः।
स तत्र गृहशुद्धिञ्च वस्त्रशुद्धिं करोत्यपि॥
पक्षिमन्नवहः अग्न्याधानादिम्। गृहशुद्धिं पाकनपाकभाण्डत्यागोल्लेपनादिना।" इति शुद्धि-तत्त्वम्॥

पाकमन्त्रः, पुं, (पाकः पाकयुक्तो मन्त्रो यत्र।) मन्त्रभेदः। तत्पर्य्यायः। मन्त्रलम् २। इति शब्दचन्द्रिका॥ (मन्त्रप्रणातमन्त्र-विशेषः। यथा, सुश्रुते कल्पस्थाने। ४६ अध्याये। "निमिमिमिङ्गिलकुलिशपाकमन्त्र-निरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहा-मीनराजीवप्रभृतयः सासुद्राः॥" कौटविशेषः। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।

"पद्मकोटा कुरुभिको मकरः शतपादकः।
पद्मालकः पाकमन्त्रः क्षणात्तुल्योऽथ मर्दभी॥")

पाकयज्ञः, पुं, (पाकसाध्यो यज्ञः। पाकपार्थिव-वत् समासः।) इष्टोत्सर्गयज्ञप्रतिष्ठादीनां होमः। चतुर्होमाङ्गकर्म्म। यथा,—

"प्रायश्चित्ते विधुर्ज्ञेय पाकयज्ञे तु साहसः॥"
इति तिथितत्त्वम्॥

(अग्न्याधेयं पाकयज्ञानग्निहोत्रादिकान् मखान्। यः करोति इतो यस्य स तस्यर्त्विगिहोच्यते॥" "अष्टकादीन् पाकयज्ञान्।" इति तट्टीकायां कुल्लूकभट्टः॥)

पाकयज्ञिकः, पुं, (पाकयज्ञं करोतीति। पाकयज्ञ + ठन्।) पाकयज्ञकर्त्ता। (पाकयज्ञस्य व्याख्यान-मस्य भवो वा। "क्रतुयज्ञेभ्यश्च।" ४। ३। ६८। इति ठन्। पाकयज्ञव्याख्यानमस्य॥ पाकयज्ञभवश्च। इति आकरग्रन्थः॥)

पाकरञ्जनं, क्ली, (पाकं पच्यमानं रञ्जयतीति। रञ्ज+णिच्+ल्युः।) तेजपत्रम्। इति शब्द-चन्द्रिका॥

पाकलं, क्ली, (पाकं लातीति। ला+"आतो-ऽनुपसर्गे कः।" ३। २। ३। इति कः।) कुष्ठौ-षधिः। इत्यमरः। २। ४। १२६॥

पाकलः, पुं, (पाक+ला+कः।) कुक्कुरश्वरः। इति मेदिनी। ले, १०८॥ बोधनदयम्। अगिलः। अगलः। इति विश्वः॥ ब्रह्मादि-कारिणि, त्रि॥

पाकलिः, स्त्री, (पाक+ला+इन्।) कुष्ठ-विशेषः। इति रत्नमाला। रोहिणीति केचित्॥

पाकली, स्त्री, (पाकलि+ङीष्।) कर्कटी। इति शब्दमाला॥

पाकशाला, स्त्री, (पाकस्य शाला गृहम्।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २। इति जटाधरः॥ पाकस्थानम्३ महानसम् ४। इत्य-मरः। २। ६। १०७॥ अग्निकोणे तस्याः कर्त्तव्यता। यथा,—

"प्राच्यां दिशि स्नानगृहमाग्नेय्यां पचनालयम्।
शयनं याम्यदिग्भागे नैर्ऋत्यां शस्त्रमन्दिरम्॥
प्रतीच्यां भोजनगृहं वायुभागे सभागृहम्।
भाण्डारसदनं सौम्ये ऐशान्यां देवतालयम्॥"
इति मुहूर्त्तचिन्तामणिटीकायां पीयूषधारायां कश्यपवचनम्॥

पाकशासनः, पुं, (शासीति। शास+ल्युः। ततः पाकस्य तदाख्यया प्रसिद्धस्य असुरस्य शासनः शास्ता।) इन्द्रः। इत्यमरः। १।१।४४॥ तन्नाम-कारणं यथा, वामनपुराणे।

"पाकं जघान तीक्ष्णाग्रैर्म्मार्गणैः कङ्कवाससैः।
तत्र नाम विभुर्लेभे शासनत्वाच्छरैर्हरेः।
पाकशासनतां शक्रः सर्व्वामरपतिर्विभुः॥"

पाकशासनिः, पुं, (पाकशासनस्यापत्यम्। "अत इञ्।" ४।१। ९५। इति इञ्।) इन्द्रपुत्रः। जयन्तः। इत्यमरः। १। १। ४६॥ (अर्জ্জুनः। यथा, महाभारते। १। १३७। ८।

"सोऽब्रवीन्मेघगम्भीरस्वरेण वदतांवरः।
भ्राता भ्रातरमज्ञातं सावित्रः पाकशासनिम्॥")

पाकशुक्ला, स्त्री, (पाके परिणामे शुक्ला।) खड़ी। यथा, शब्दचन्द्रिकायाम्।

"पाकशुक्ला शिलाधातुः कठिनी वर्णखटी खड़ी॥"

पाकस्थानं, क्ली, (पाकस्य स्थानम्।) महानसम्। इत्यमरः। २। ६। १०॥

पाका, स्त्री, (पाक + अजादित्वात् टाप।) बालिका। इति जटाधरः॥

पाकारिः, पुं, (पाकं ऋच्छतीति। ऋ गतौ+ इन्।) स्वेतकाञ्चनम्। इति रत्नमाला॥

पाकिमं, त्रि, (पाकेन निर्वृत्तम्। पाक+भाव-प्रत्ययनन्तादिमप्।) पक्त्रिमम्। पाकेन निष्प-न्नम्। इति चिकाण्डशेषः॥ (यथा, सुश्रुते। सूत्रस्थाने। ४६ अध्याये।

"मेदोन्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः॥")

पाकुकः, पुं, (पचतीति। पच पाके+"पचि-नशिभ्यां कुकनकथुकौ च।" उणा॰। ७। ३०। इति कुकन् काट्प्रत्यश्च।) सूपकारः। इत्य-मरादिकोषः॥

पाक्यं, क्ली, (पच्यतेऽनेन। पच्+"ऋहलोर्ण्यत्।" ३।१।१२४। इति ण्यत्। "चजोः कुघिण्यतोः।" ७।३।५२। इति कुत्वम्।) विड्लवणम्। इत्यमरः। २। ६। ४२॥ पांसुलवणम्। इति रत्नमाला॥ (यथा, सुश्रुते। १।४२।

"सैन्धवसौवर्चलविड्पाक्यरोमकसामुद्रकपक्त्रिम-यवक्षारोषप्रकृतसुवर्चिकाप्रभृतीनि समासेन लवणो वर्गः॥" पचनीये, त्रि। यथा, चक्रपाणि-संग्रहे ज्वराधिकारे पित्तज्वरचिकित्सायाम्।

"अवश्यायस्थितं पाक्यमेतत् पित्तज्वरापहम्॥")

पाक्वः, पुं, (पच्+ण्यत् कुत्वञ्च।) यवक्षारः। इत्यमरः। २। ६। १०६॥

पाक्षायणः, त्रि, (पक्षस्यार्द्धं पक्षे भवः पक्षेण निर्वृत्त इति वा। पक्ष+"युष्मच्छयाकठञिति।" ४। २। ८०। इति फक्।) पक्षसम्बन्धी। पक्षे भवः। इति सिद्धान्तकौमुदी॥

पाक्षिकः, त्रि, (पक्षे तिष्ठतीति। पक्ष+ठक्।) पक्षपाती। यथा,— [पाक्षिकः॥"

"स को राजा न शास्ता यः प्रजावधञ्च
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्यायः॥
(पक्षिणो हन्तीति। "पक्षिमत्स्यमृगान् हन्ति।" ४। ४। ३५। इति ठक्।) पक्षिघातकः॥ (पक्षे पक्षान्तरे भवतीति। पक्षकालभवः॥ पक्षेण निर्वृत्त इति। पक्ष+ठञ्। पक्षसाध्यः। इति व्युत्पत्तिलभ्योऽर्थः॥)

पाक्षिकः, पुं, (पातीति। पा+क्विप्। पाक्षयी-धर्म्मस्तं क्षपयतीति। क्षपि भेदने+पचा-द्यच्। यदुक्तम्।

"पालनाच्च क्षयीधर्म्मः पाक्षस्तेन निगद्यते।
तं क्षपयन्ति ते यस्मात् पाक्षिकास्तेन हेतुना।
नानाव्रतधरा नानावेषाः पाक्षिकिणो मताः॥")

पाक्षिकः। इत्यमरटीकायां भानुदीक्षितः॥

पागलः, पुं, (पा रक्षणं तस्मात् गलति आत्म-रक्षणात् विच्युतो भवतीति। गल्+अच्।) उन्मत्तः। वातुलः। यथा,—

"पागलायाङ्गहीनाय चान्धाय बधिराय च।
जड़ाय चैव मूर्खाय क्लीवतुल्याय पापिने।
ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे १४ अध्यायः॥

पाचकं, क्ली, (पचतीति। पच्+ण्वुल्। पित्त-रसेन मुक्तदधिपचनादस्य तथात्वम्।) पित्त-विशेषः। यथा,—
"पाचकं भ्राजकश्चैव रञ्जकालोचके तथा।
साधकश्चैव पञ्चेति पित्तनामान्यनुक्रमात्॥"
इति शब्दचन्द्रिका॥
पाचकादीनां स्थानान्याह।
"अन्त्याग्न्ये यकृत्प्लीह्नोर्हृदये नीचगह्वरे।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात्॥"
अथ तेषां कर्म्माण्याह।
"पाचकं पचते शुक्तं शेषाभिबलवर्द्धनम्।
रसमूत्रपुरीषाणि विरेचयति निश्चयः॥"
* इति भावप्रकाशः॥
("पित्तं पक्वाशयं तत्र पक्वामाशयमध्यगम्।
पञ्चभूताश्रयत्वेऽपि यत्तेजसगुणोदयात्॥
द्रवत्वसरत्वं पाकादिकर्म्मणामनलग्रन्थितम्।
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा॥
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम्।
करोति बलदानेन पाचकं नाम तत् स्मृतम्॥"
इति वाभटे सूत्रस्थाने द्वादशाध्याये॥)
पाचकः, पुं, (पचतीति। पच्+ण्वुल्।) अग्निः। इति हलायुधः॥ ("तत्राहृष्टहेतुकेन विशेषेण पक्वामाशयमध्यस्थं पित्तं चतुर्व्विधमन्नपानं पचति विरेचयति च रसदोषमूत्रपुरीषाणि तत्रस्थमेव चालयन्नन्या शेषाणां पित्तस्थानानां शरीरस्य चाग्निकर्म्मणानुग्रहं करोति तस्मिन् पित्ते पाचकोऽग्निरिति संज्ञा।" इति सुश्रुते सूत्रस्थाने एकविंशेऽध्याये॥) चि, सूपकारः। पाककर्त्ता। यथा,—
"पुत्रपौत्रगुणोपेतः शास्त्रज्ञो मितभाषकः।
शूरश्च कठिनश्चैव सूपकारः स उच्यते॥"
इति चाणक्यम्॥
अन्नादिपाककारकौषधादिश्च॥

पाचनं, क्ली, (पाच्यतेऽनेनेति। पच्+णिच्+करणे ल्युट्।) प्रायश्चित्तम्। इति मेदिनी। नं, ६०॥ दोषपाचककाथौषधम्। तस्य दान-काल:। यथा, सारकौमुद्याम्।
"ज्वरितं षड्हेतीतं क्षपन्नप्रतिभोजनम्।
सप्ताहात् परतोऽल्पेऽग्नौ सामे स्यात् पाचनं ज्वरे॥"
सर्व्वेषां पाचनद्रव्याणां परिमाणं यथा,—
"द्रव्यस्तिकमाधेन गृहीत्वा तोलकद्वयम्।
दत्त्वाम्भः षोड़शगुणं यावत् पादावशेषितम्॥"
इति परिभाषा॥
अथ सर्व्वज्वरे पाचनम्।
"नागरं देवकाष्ठञ्च धान्यकं वृहतीद्वयम्।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम्॥"
इति नागरादि॥ १॥
अथ वातिकज्वरे।
"बिल्वादिपञ्चमूलस्य क्वाथः स्याद्वातिकज्वरे॥"
इति बिल्वादिपञ्चमूली॥२॥
"पाचनं पिप्पलीमूलगुडूची बिल्वजोऽथवा॥"
इति पिप्पलीमूलादि---

"किरातास्फान्तलीदीप्यवृहतीद्वयगोक्षुरैः।
सक्षिरामलकीबिल्वैः क्वाथो वातज्वरापहः॥"
इति किरातादि॥ ४॥
"राजा वृक्षादनी दारु वरणं वैल्ववालुकम्।
कषायः शर्करायौक्तो वातज्वरापहः॥"
इति राजादि॥ ५॥
"बिल्वादिपञ्चमूली च गुडूच्यामलके तथा।
मुस्तमुस्तसमो शेष कषायो वातिके ज्वरे॥"
इति बिल्वादिपञ्चमूल्यादि॥ ६॥
"पिप्पलीशारिवाद्राक्षाघृतपुष्पाक्षरेणुभिः।
लीढः कषायः सगुड़ो हन्याच्छसनजं ज्वरम्॥"
इति पिप्पल्यादि॥ ७॥
"गुड़ूची शारिवा द्राक्षा घृतपुष्पा पुनर्नवा।
सगुड़ोऽयं कषायः स्यादाहातज्वरविनाशनः॥"
इति गुड़ूच्यादि॥ ८॥
"द्राक्षागुड़ूचीकाश्मर्य्यशारिवाः सशारिवाः।
निःक्वाथ्य सगुड़ं क्वाथं पिबेद्वातज्वरापहम्॥"
इति द्राक्षादि॥ ९॥
अथ पैत्तिकज्वरे।
"कलिङ्गं कटफलं मुस्तं पाठानिम्बकरोहिणी।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे॥"
इति कलिङ्गादि॥ १०॥
"सचौद्रं पाचनं पैत्ते तिक्ताम्बिन्नयवैः कृतम्॥"
इति तिक्तादि॥ ११॥
"लोध्रोत्पलाम्बष्ठापद्मशारिवाभिः सशर्करैः।
क्वाथः पित्तज्वरं हन्यादथवा पर्पटोद्भवः॥"
इति लोध्रादि॥ १२॥ १३॥
"पटोलयवनिःक्वाथो मधुना मधुरीकृतः।
तीव्रपित्तज्वरामर्हो पाषाणभेदनाद्भवः॥"
इति पटोलम्॥ १४॥
"दुरालभापर्पटकप्रियङ्गु-
भूनिम्बपाठाकटुरोहिणीनाम्।
जलं पिबेच्छर्करयावगाढं
हन्यात्सपित्तज्वरदाहयुक्तः॥"
इति दुरालभादि॥१५॥
"क्वाथमाना च मधुकं पिप्पलीमूलमेव च।
किराततिक्तकं मुस्तं मधुकं सविभीतकम्॥
सशर्करं पीतमेतत् पित्तज्वरविनाशनम्॥"
इति क्वाथमानादि॥ १६॥
"वृहतीका मधुकं निम्बं कटुकारोहिणीसमाः।
अवश्यायक्षिप्तं पाचनमेतत् पित्तज्वरापहम्॥"
इति वृहतीकादि॥ १७॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोदीच्यवासकैः॥"
इति पर्पटकादि॥ १८॥
"बिल्वाम्बुपर्पटोशीरचन्दनसाधितम्।
दद्यात् सुशीतलं वारि वृद्धहिध्मज्वरदाहयुत्॥"
इति बिल्वादि॥ १९॥
"पर्पटाम्बुतधान्यौषां क्वाथः पित्तज्वरं जयेत्॥"
इति पर्पटादि॥ २०॥
"क्वाथश्चन्दनयोश्चापि॥ २१॥ क्वाथश्चन्दनवासयो

क्वाथाभयापर्पटकाम्बुतिक्ता-
क्वाथं सशंपाकयुतं विदध्यात्।
प्रलापमूर्च्छांभ्रमदाहशूल-
हृल्लासयुक्ते पित्तभवे ज्वरे तु॥"
इति क्वाथादि॥ २३॥
"घृष्टं वस्त्रकजलं प्रातः पीतं सशर्करं पुंसाम्।
अन्तर्दाहं भ्रमयत्यचिराद्दूरमपक्वमपि॥"२४॥
अथ कफज्वरे।
"मातुलुङ्गत्रिफलाविम्बजवक्षारसंयुतम्।
कफज्वरेऽनु सक्षारं पाचनं वा कणादिकम्॥"
इति मातुलुङ्गादि॥ २५॥
"कटुकं चित्रकं निम्बं वृहतीद्वितिविदे वचाम्।
कुष्ठमिन्द्रयवं तुल्यौ पटोलस्यापि वाधितम्॥
पिबेच्छर्करसंयुक्तं सक्षौद्रं श्लेष्मिके ज्वरे॥"
इति कटुकादि॥ २६॥
"निम्बविम्बाम्बुतादारुवृहतीभूनिम्बमौक्षकम्।
पिप्पल्यौ हरितौ पेतिक्वाथो हन्ति कफज्वरम्॥"
इति निम्बादि॥ २७॥
"बिल्वुवारदलक्वाथं श्लोष्मजं कफजे ज्वरे।
सक्षौद्रोच्च वचे शीघ्रं कर्षे वा पिप्पलिते पिबेत्॥"
इति बिल्वुवारादि॥ २८॥
"आमलक्यभया क्षुण्णा चित्रकक्षेत्रयं गवः।
सर्व्वज्वरकफातङ्कभेदी दीपनपाचनः॥"
इति आमलक्यादि॥ २९॥
"त्रिफलापटोलवासाच्छिन्नरुहातिक्तरोहिणी-
वट्व्यश्वाः॥"
इति त्रिफलादि॥ ३०॥
"मधुनाक्षेद्रवसुखे वस्त्रगलौ पाचकस्य वा
क्वाथः॥"३१॥
"सुखं वस्त्रकजीवन्ति त्रिफला कटुरोहिणी।
पक्वपक्वाश्च च क्वाथः कफज्वरविनाशनः॥"
इति सुखादि॥ ३२॥ *॥
अथ वातपैत्तिकज्वरे।
"संसृष्टदोषेषु हितं संसृष्टमथ पाचनम्॥
बिल्वाम्बुनाब्भूनिम्बैः पञ्चमूलीसमन्वितैः।
क्षतः कषायो हन्यासु वातपित्तोद्भवं ज्वरम्॥"
इति नवाङ्गम्॥ ३३॥
"त्रिफलाग्न्यास्फलीराजादारुघाट-रूषकैः।
घृतमस्तु हरेत्सूर्यं वातपित्तोद्भवं ज्वरम्॥"
इति त्रिफलादि॥ ३४॥
"किराततिक्तकं मुस्तं क्वाथमामलकीं घृटीम्।
बिल्वाथ्य पित्तानिलजे क्षौद्रितं सशुक्रं पिबेत्॥"
इति किराततिक्तकादि॥ ३५॥
"निदिग्धिकावलाराजाक्वाथमाक्षाक्षतायुतैः।
मक्षरविदलैः क्वाथो वातपित्तज्वरं जयेत्॥"
इति निदिग्धिकादि॥ ३६॥
"गुड़ूची पर्पटं मुस्तं किरातं बिल्वभेषजम्।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम्॥"
इति पञ्चभद्रम्॥ ३७॥
"मधुकं शारिवे द्राक्षा मधुकं चन्दनोत्पलम्।
काश्मरी पद्मकं लोध्रं बिल्वली प्रपौण्डरम्॥

मधुजाजधितायुक्तं तत् पीतं वुधितं निधि ॥
वातपित्तज्वरदाहं हृल्लासान्छर्दिमिन्द्रमान् ।
ग्रसयेदक्तपित्तच्च क्षीणस्तानिव मारुतः ॥"

इति मधुकादि ॥ ३८ ॥ * ॥

अथ पित्तश्लैष्मिकज्वरे ।

"पटोलं चन्दनं मुस्तं पाठाऽतिविषापाठाब्दतागरः ।
पित्तश्लेष्मानिलच्छर्दिज्वरकृच्छ्रविषापहः ॥"

इति पटोलादि ॥ ३९ ॥

"गुडूचीनिम्बधान्याकं पद्मकं रक्तचन्दनम् ।
एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः ॥
हृल्लासारोचकच्छर्दिपिपासादाहनाशनः ॥"

इति गुडूच्यादि ॥ ४० ॥

"किरातं नागरं मुस्तं गुडूची च कषाधिके ।
पाठोदीच्यजयालेषु सह पित्ताधिके पिबेत् ॥"

इति चातुर्भद्रकपाठासप्तकौ ॥ ४१ ॥ ४२ ॥

"गुडूची चन्दनं पद्मं नागरेन्द्रयवासकम् ।
अभयारग्वधोशीरं पाठा धान्याब्दरोहिणी ॥
कषायं पाचयेदेतत् पिप्पलीचूर्णसंयुतम् ।
पित्तश्लेष्मज्वरं तन्द्रापिपासादाहनाशनम् ॥
विषाग्न्यामिनविदग्धविदीपप्रभवञ्च यत् । *
गुडूच्यादिगणो ह्येष पाचनो दीपनः परः ॥"

इति गुडूच्यादिगणः ॥ ४३ ॥

"कण्टकार्य्यब्दतामार्गी नागरेन्द्रयवासकम् ।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणी ॥
कषायं पाचयेदेतत् पित्तश्लेष्मज्वरापहम् ।
दाहहृल्लासचिच्छर्दिकासकृतपार्श्वशूलजुत् ॥"

इति कण्टकार्य्यादि ॥ ४४ ॥

"मधुकपुष्पवासाया रसः सौद्रसितायुतः ।
कफपित्तज्वरं हन्ति सासपित्तं सकामलम् ॥"

इति वासादि ॥ ४५ ॥

"पटोलं पित्तुमर्दच्च त्रिफला मधुकं बला ।
साधितोऽयं कषायः स्यात् पित्तश्लेष्मभवे ज्वरे ॥"

इति पटोलादि ॥ ४६ ॥

"गुडूचीन्द्रयवारिष्टं पटोलं कटुरोहिणी ।
नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् ॥
अष्टसाष्टक इत्येष पित्तश्लेष्मज्वरापहः ।
हृल्लासारोचकच्छर्दिहिक्काश्वासनिवारणः ॥"

इति अष्टसाष्टकम् ॥ ४७ ॥

"पटोलधवधान्याकमुन्नामलकचन्दनम् ।"
पैत्तिकं श्लैष्मपित्तोत्थे ज्वरे हृच्छर्दिदाहजुत् ॥"

इति पटोलादि ॥ ४८ ॥

क्षुद्राब्दतास्थां सह नागरेण
सपुष्करेणेति किरातितिक्तम् ।
पिबेत् कषायं त्रिदशं पञ्चतिक्तं
ज्वरं निहन्यादविधं समग्रम् ॥"

इति क्षुद्रादि ॥ ४९ ॥

इति पित्तश्लैष्मिकज्वराधिकारः ॥ * ॥

अथ वातश्लैष्मिकज्वरे ।

"दीपनं कफविच्छेदि वातपित्तानुलोमनम् ।
ज्वरघ्नं पाचनं भेदि मुस्तं धान्यपटोलयोः ॥"

इति धान्यपटोलम् ॥ ५० ॥

कफवातप्रशमनं पाचनं ज्वरनाशनम् ॥"५१ ॥
पिप्पली पिप्पलीमूलं चव्यं चित्रकनागरम् ।
दीपनीयः शृतो वर्गः कफानिलगदापहः ॥"

इति पिप्पलीवर्गः ॥ ५२ ॥

"पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम् ।
वातश्लेष्मविकारघ्नं शीतज्वरविनाशनम् ॥"

इति पिप्पलीक्वाथः ॥ ५३ ॥

"आरग्वधग्रन्थिकमुस्तनिम्ब-
हरीतकीभिः क्वथितः कषायः ।
सामे समूले कफवातयुक्ते
ज्वरे हितो दीपनपाचनश्च ॥"

इति आरग्वधादि ॥ ५४ ॥

"क्षुद्राब्दतानागरपुष्कराह्वयैः
शृतः कषायः कफमारुतोत्तरे ।
तन्द्वासकासारुचिपार्श्वरुक्करे
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"

इति क्षुद्रादि ॥ ५५ ॥

"दशमूलीरसः पेयः कषायुक्तः कफानिले ।
अविपाकेऽतिसन्तप्तायां पार्श्वरुक्श्वासकासके ॥"

इति दशमूलम् ॥ ५६ ॥

"मुस्तं पर्पटकं मुष्की गुडूची कटुरोहिणी ।
कफवातारुचिच्छर्दिदाहश्वासज्वरापहा ॥"

इति मुस्तादि ॥ ५७ ॥

"दारुपर्पटभार्ग्यब्दवत्सकाधस्यकट्फलैः ।
साभयाविश्वभूनीवैः काथो छिन्नुमधूत्कटः ॥
कफवातज्वरं पीतो छिन्द्यात्सगलयग्रहान् ।
कासघ्नोपप्लवेकांश्च हन्यात् तरमिवाग्निः ॥"

इति दार्व्यादि ॥ ५८ ॥ * ॥

अथ त्रिदोषजज्वरे ।

"पञ्चमूलीकिरातादिर्गणो योज्यस्त्रिदोषजे ।
पित्तोत्कटे च मधुगा कषया च कफोत्कटे ॥"

इति चतुर्भद्रपञ्चमूलम् ॥ ५९ ॥

"विल्वाग्निमन्थशोणाकगाम्भारीपाटलागणिकारिकाः ।
दीपनं कफवातघ्नं पञ्चमूलमिदं महत् ॥"

इति दृहत्पञ्चमूली ॥ ६० ॥

"शालपर्णी पृश्निपर्णी दृहतीद्वयगोक्षुरम् ।
वातपित्तज्वरहरं कर्णीयः पञ्चमूलकम् ॥"

इति क्षुद्रपञ्चमूली ॥ ६१ ॥

"उभयं दशमूलञ्च सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"

इति दशमूलम् ॥ ६२ ॥

"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः ।
किराततिक्तादिगणः प्रयोज्यः
सुखार्थिने वा चिरता विमिश्रः ॥"

इति चतुर्भद्राक्वाथम् ॥ ६३ ॥

"दशमूलं घटी मुष्की पौष्करं सदुरालभम् ।
भार्गी कुटजबीजञ्च पटोलं कटुरोहिणी ॥
अष्टादशाङ्ग इत्येष सन्निपातज्वरापहः ।
कासहृल्लासपार्श्वार्तिश्वासहिक्कावमीहरः ॥"

इति वातश्लैष्मिकज्वरोक्तक्वाथाः ॥ ६४ ॥

"भूनिम्बदारुदशमूलमहौषधाब्द-
तिक्तेन्द्रबीजघनिकैभकणाकषायः ।
तन्द्रीप्रलापकसनारुचिदाहमोह-
श्वासादियुक्तमखिलं ज्वरमाशु हन्ति ॥"

इति अष्टादशाङ्गम् ॥ ६५ ॥

"मुस्तपर्पटकोशीरदेवदारुमहौषधम् ।
त्रिफला धन्वयासञ्च नीली कल्पिकवं त्रिवृत् ॥
किरासतिक्तकं पाठा बला कटुकरोहिणी ।
मधुकं पिप्पलीमूलं मुक्ताद्यो गण उच्यते ॥
अष्टादशाङ्गमुदितमेतद्धा सन्निपातजुत् ।
पित्तोत्तरे सन्निपाते हितत्वोक्तं मनीषिभिः ॥
मन्याहनु उरोबाहु उरःपार्श्वशिरोग्रहे ॥
६६ ॥

द्राक्षाब्दता घटी मुष्की मुस्तकं रक्तचन्दनम् ।
नागरं कटुकं पाठा भूनिम्बं सदुरालभम् ॥
उशीरं पद्मकं धान्यं बालकं कण्टकारिका ।
पुष्करं पित्तुमर्दच्च दशाङ्गमिदं शुभम् ॥
जीर्णज्वरातिसारघ्नं सन्धयधुनाशनम् ॥"

इति अपराष्टादशाङ्गम् ॥ ६७ ॥

"घटी पुष्करमूलञ्च धात्री मुष्की दुरालभा ।
गुडूची नागरं पाठा किरातं कटुरोहिणी ॥
एष मुख्यादिको वर्गः सन्निपातज्वरापहः ।
कासहृद्ग्रहपार्श्वार्तिश्वासे तन्द्रायाञ्च शस्यते ॥"

इति मुख्यादि ॥ ६८ ॥

"हृद्दयौ पुष्करं भार्गी घटी मुष्की दुरालभा ।
वत्सकस्य च बीजानि पटोलं कटुरोहिणी ॥
हृद्दयादिर्गणः प्रोक्तः सन्निपातज्वरापहः ।
कासादिषु च सर्व्वेषु हितः सोपद्रवेषु च ॥"

इति हृद्दयादिगणः ॥ ६९ ॥

"भार्गी पुष्करमूलञ्च राजावित्तयमानिकाः ।
नागरं दशमूलञ्च पिप्पलीश्वासु साधयेत् ॥
सन्निपातज्वरे देयं क्षुत्पार्श्वार्तिग्रहमूलिनाम् ।
कासश्वासामिमान्द्यञ्च तन्द्राञ्च विनिवर्त्तयेत् ॥"

इति भार्ग्यादि ॥ ७० ॥

"द्विपञ्चमूली षड्ग्रन्था विश्वभेषजसंयुतम् ।
कफवातहरः क्वाथः सन्निपातहरः परः ॥"

इति द्विपञ्चमूल्यादि ॥ ७१ ॥

"कारवीपुष्करैरण्डनागरास्ताः ।
दशमूलीघटीहृद्भीयासभार्गीपुनर्नवाः ॥
तुल्या भक्त्वेव निष्क्वाथ्य पीतश्चेतोविशोधनः ।
अभिन्नाग्नं ज्वरं घोरमाशु हन्ति समुद्भवम् ॥"

इति दशमूल्यादि ॥ ७२ ॥

"मातुलुङ्गाम्लभिङ्गिक्षवाम्लीपाठोरुवूकजः ।
क्वाथो लवणमूलाढ्योऽभिन्नाग्नाहशूलजुत् ॥"

इति मातुलुङ्गादि ॥ ७३ ॥

"कण्टरोधकफश्वासहिक्कासंन्यासपीडितः ।
मातुलुङ्गार्द्रकरसं दशमूलाम्भसा पिबेत् ॥"

इति मातुलुङ्गार्द्रकरसयुक्तदशमूलम् ॥७४॥

"योजयेद्विफलातिक्तापटोलारिष्टवासकैः ।
भूनिम्बादुसयाभैश्च त्रिदोषज्वरजुत् जलम् ॥"

इति योगादि ॥ ७५ ॥

"त्रिवृद्विशालाकटुकाकटुकारवृषैः कृतः ।

सप्तारो भेदनः काथः पेयः सर्व्वज्वरापहः ॥"
इति त्रिवृतादि ॥ ७६ ॥
अथ जीर्णज्वरे ।
"निदिग्धिकानागरकास्थलानां
क्वाथं पिबेन्मिश्रितपिप्पलीकम् ।
जीर्णज्वरारोचककासशूल-
श्वासामिमान्द्यार्दितपीनसेषु ॥
हन्त्यङ्गमायं प्रायः सायं तेनायमिष्यते ॥"
इति निदिग्धादि ॥ ७७ ॥
"पिप्पलीचूर्णसंयुक्तः क्वाथश्चिरज्वरोद्भवः ।
जीर्णज्वरकफध्वंसी पञ्चमूलीकृतोऽथवा ॥
कासार्शोग्रहणीदोषश्वासकृत् पाण्डुकिमिरोगनुत् ॥ ७८ ॥
इति जीर्णज्वराधिकारः ॥ * ॥
अथ सन्ततादिज्वरे ।
"मधुकं चन्दनं मुस्तं द्राक्षा धान्यमुशीरकम् ।
क्वथित्वा पटोलस्य क्वाथं समधुशर्करम् ॥
ज्वरं पञ्चविधं हन्यात् सन्ततादिं सुदारुणम् ।
वातिकं पैत्तिकश्चैव श्लैष्मिकं सान्निपातिकम् ॥
आमं विपाचयत्याशु निरामं शमयत्यपि ॥"
इति मधुकाद्यम् ॥७९॥
"कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी ॥८०॥
पटोलं शारिवामुस्तं पाठा कटुकरोहिणी ॥८१॥
निम्बं पटोलं त्रिफला गुडूचीकां मुस्तवत्सकौ ॥ ॥ ८२ ॥
किराततिक्तमन्तां चन्दनं विश्वभेषजम् ॥८३॥
गुडूच्यामलकं मुस्तम् ८४ अर्द्धश्लोकसमापनाः ।
क्वाथाः शमयन्त्याशु पञ्च पञ्चविधान् ज्वरान् ॥
सन्ततं सततान्येद्युस्तृतीयकचतुर्थकान् ।
गुडूचीमुस्तधान्यानां क्वाथयेद्वा समाधिकम् ॥
मुस्तामलकगुडूचीविश्वौषधकटुकारिकाक्वाथः ।
पीतः सकणाचूर्णः समधुर्विषमज्वरं हन्ति ॥"
इति मुस्तादि ॥ ८५ ॥ * ॥
अथ तृतीयकज्वरे ।
"महौषधान्तामुस्तचन्दनोशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥"
इति महौषधादि ॥ ८६ ॥
अथ चातुर्थकज्वरे ।
"वासाधात्रीस्थिरादारुपथ्यानागरसाधितः ।
सितामधुयुतः क्वाथश्चातुर्थकनिवारणः ॥"८७ ॥
इति ज्वराधिकारः ॥ * ॥
अथ ज्वरातीसारे ।
"पाठेन्द्रयवभूनिम्बमुस्तपर्पटकान्वनाः ।
जयन्त्याममतीसारं सज्वरं समहौषधाः ॥"
इति पाठादि ॥ ८८ ॥
"नागरातिविषामुस्तभूनिम्बान्तवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः ॥"
इति नागरादि ॥ ८९ ॥
"हौवेरातिविषामुस्तविल्वधान्यकनागरैः ।
पिबेत् पित्तातिसारघ्नं शूलदोषामपाचनम् ॥
सरक्तं हन्त्यतीसारं सज्वरं वाथ विज्वरम् ॥"
इति हौवेरादि ॥ ९० ॥
"गुडूचीतिविषाधान्यमुशीरित्वाम्बुवालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ॥
कषायः शीतलः पेयो ज्वरातीसारशान्तये ।
तृष्णावारोचकच्छर्द्दिपिपासादाहनाशनः ॥"
इति हृद्दाहगुडूच्यादि ॥ ९१ ॥
"उशीरं बालकं मुस्तं धान्यकं विश्वभेषजम् ।
समङ्गा धातकी लोध्रं विल्वं दीपनपाचनम् ॥
हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् ।
सशोणितमतीसारं सज्वरं वाथ विज्वरम् ॥"
इति उशीरादि ॥ ९२ ॥
"पञ्चमूलीबलाविल्वगुडूचीमुस्तनागरैः ।
पाठाभूनिम्बहीवेरकुटजत्वक्फलैः शृतम् ॥
हन्ति सर्व्वानतीसारान् ज्वरदोषं वमिं तथा ।
सशूलोपद्रवं श्यावं क्वाथं हन्यात् सुदारुणम् ॥"
इति पञ्चमूल्यादि ॥ ९३ ॥
"कलिङ्गातिविषामुस्तकिरातान्नुयवाशकम् ।
ज्वरातिसारसन्तापं नाशयेदविकल्पतः ॥"
इति कलिङ्गादि ॥ ९४ ॥
"वत्सकस्य फलं दारु रोहिणी गजपिप्पली ॥"
इति वत्सकादि ॥ ९५ ॥
"यष्ट्याह्वा पिप्पलीधान्यं विल्वं पाठायमानिका॥"
इति यष्ट्याह्वादि ॥ ९६ ॥
"द्वावेतौ सिद्धियोगौ श्लोकार्द्धेनाभिभाषितौ ।
ज्वरातीसारशमनौ विशेषाद्दाहनाशनौ ॥
नागराहतभूनिम्बविल्ववालकवत्सकैः ।
समुस्तातिविषोशीरैर्ज्वरातीसारनुज्जलम् ॥"
इति नागरादि ॥ ९७ ॥
"मुस्तकविल्वातिविषापाठाभूनिम्ब-
वत्सकैः क्वाथः ।
मकरध्वजगर्भयुतो ज्वरातिसारौ जयेद्घोरौ ॥"
इति मुस्तकादि ॥ ९८ ॥
"घनजलपाठातिविषाप्रपौण्ड्रधान्य-
रोहिणीबिल्वैः ।
संक्षयवैः शृतमम्भः सातीसारं ज्वरं जयति ॥"
इति घनादि ॥ ९९ ॥
"दशमूलीकषायेण विश्वमल्लसमं पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति दशमूलशुण्ठी ॥ १०० ॥
"किरातान्द्रान्तताविश्वचन्दनोदीच्यवत्सकैः ।
शोथातीसारशमनं विशेषात् ज्वरनाशनम् ॥"
इति किरातादि ॥ १०१ ॥
इति ज्वरातीसाराधिकारः ॥ * ॥
अथातीसारे ।
"धान्यकं नागरं मुस्तं बालकं विल्वमेव च ।
आमशूलविबन्धघ्नं पाचनं वह्निदीपनम् ॥"
इति धान्यपञ्चकम् ॥ १०२ ॥
"इदं धान्यचतुष्कं स्यात् पैत्ते शुण्ठीं विना पुनः ॥"
इति धान्यचतुष्कम् ॥ १०३ ॥
"कच्चटद्राक्षिमज्जमुद्गलाटकपञ्चविल्वशृङ्गीवेरम् ।
जलधरनागरसहितं गङ्गामपि पेयिनीं कुरुते ॥"
इति कच्चटादि ॥ १०४ ॥
"किराततिक्तकं [illegible]

पिबेत् पित्तातिसारघ्नं सक्षौद्रं वेदनापहम् ॥"
इति किराततिक्तादि ॥ १०५ ॥
"कुटजत्वक्फलं मुस्तं क्वाथयित्वा जलं पिबेत् ।
अतीसारं जयेदाशु शर्करामधुयोजितम् ॥"
इति कुटजादि ॥ १०६ ॥
"विल्वशुण्ठ्यब्धिनिर्यूहः पीतः सक्षौद्रशर्करः ।
निहन्याच्छर्द्दितीसारं वैश्वानर इवाहुतिम् ॥"
इति विल्वादिक्वाथः ॥ १०७ ॥
"पटोलयवधान्याक्वाथः पेयः सुशीतलः ।
शर्करामधुसंमिश्रश्छर्द्दितीसारनाशनः ॥"
इति पटोलादिक्वाथः ॥ १०८ ॥
"कुटजं दाडिमं मुस्तं धातकी विल्ववालकम् ।
लोध्रपञ्चनपाठाश्च कषायं मधुना पिबेत् ॥
सामे सशूले रक्ते च पिच्छास्रावे च शस्यते ।
कुटजादिरिति ख्यातः सर्व्वातीसारनाशनः ॥"
इति कुटजादि ॥ १०९ ॥
"समङ्गातिविषा मुस्तं विल्वं दीवेरधातकी ।
कुटजत्वक् फलं विश्वं क्वाथः सर्व्वातिसारजुत्॥"
इति समङ्गादि ॥ ११० ॥
"कुटजत्वक्कृतक्वाथो घनीभूतः सुशीतलः ।
लोहितोऽतिविषायुक्तः सर्व्वातीसारनाशनः ॥"
इति कुटजक्वाथः ॥ १११ ॥
"सवल्कः सातिविषः सविल्वः
सोदीच्यमुस्तश्च हतः कषायः ।
सामे सशूले सह शोणिते च
चिरप्रवृत्तेऽपि हितोऽतिसारे ॥"
इति वल्कादि ॥ ११२ ॥
"कषायो मधुना पीतस्त्वचो दाडिमवल्कजात् ।
सद्यो जयेदतीसारं सरक्तं दुर्निवारणम् ॥"
इति कुटजदाडिमम् ॥ ११३ ॥ * ॥
अथ ग्रहण्याम् ।
"ग्रहणीमाश्रितं दोषमतीसारवदाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
नागरातिविषामुस्तक्वाथः स्यादामपाचनः ॥"
इति नागरादि ॥ ११४ ॥ * ॥
अथामिमान्द्ये ।
"विश्वाभयागुडूचीनां कषायेण षडूषणम् ।
पिबेत् क्षौद्रयुतं मन्देऽग्नौ तक्रपञ्चासुरभोजनम् ॥
पञ्चकोलं समरिचं षडूषणमुदाहृतम् ॥"
इति षडूषणविश्वादि ॥ ११५ ॥ * ॥
अथामाजीर्णे ।
"धान्यनागरसंसिद्धं तोयं हन्याद्विचक्षणः ।
आमाजीर्णप्रशमनं दीपनं बस्तिशोधनम् ॥"
इति धान्यशुण्ठी ॥ ११६ ॥ * ॥
अथ पाण्डुरोगे ।
"मलशिक्यान्तरावासान्निष्काभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम्॥"
इति मलशिक्यादि ॥ ११७ ॥ * ॥
अथ रक्तपित्ते ।
"जलं खर्ज्जूरमृद्वीकामधुकैः सपरूषकैः ।
शृतशीतं प्रयोक्तव्यं तर्पणार्थं सशर्करम् ॥"

अथ राजयक्ष्मणि ।
"दन्त्याकपिप्पलीबिल्वदशमूलीजलं पिबेत् ।
पार्श्वमूलज्वरश्वासशीतवातशिरस्तये ॥"
इति दन्त्यादि ॥ ११८ ॥
"अश्वगन्धाऽऽस्फोताबलीवदशमूलीबलाद्वयाः ।
पुष्करातिविषे व्योषं चूर्णं क्षौद्रयुताधिकः ॥"
इति अश्वगन्धादि ॥ १२० ॥
"दशमूलबलाराम्नापुष्करभृङ्गराजगोकण्टकैः क्वथितम्।
पेयं पार्श्वशिरोरुक्कफवातकासादिशान्तये
सर्पिजम् ॥"
इति दशमूलादि ॥ १२१ ॥
इति राजयक्ष्माधिकारः ॥ * ॥

अथ कासे ।
"पञ्चमूलीक्वाथः क्षौद्रः पिप्पलीचूर्णसंयुतः ।
रसालामश्नतो नित्यं वातकासमपोहति ॥"
इति पिप्पलीचूर्णयुक्तपञ्चमूली ॥ १२२ ॥
"पौष्करं कटुफलं भार्गी पिप्पलीविल्वसाधितम् ।
पिबेत् क्वाथं कफोद्रेके कासे श्वासे च दुर्जये ॥"
इति पौष्करादि ॥ १२३ ॥
"पिप्पलीचूर्णसंयुक्तं दशमूलीजलं पिबेत् ॥"
इति पिप्पलीचूर्णयुक्तदशमूली ॥ १२४ ॥
"कटुफलं कणा भार्गी मुस्तं धान्यं वचाभया ।
शृङ्गी पर्पटकं मुस्ता सुराह्वश्च जले श्रुतम् ॥
मधुक्षौद्रयुतं पेयं कासे वातकफात्मके ।
कण्ठरोगे मुखे मूके श्वासहिक्काज्वरेषु च ॥"
इति कटुफलादि ॥ १२५ ॥
"कण्टकारीजलः क्वाथः सक्षारः सर्वकासहा ॥"
इति कण्टकारीक्वाथः ॥ १२६ ॥
इति कासाधिकारः ॥ * ॥

अथ हिक्कायाम् ।
"अश्वत्थाम्रशिरीषार्कपर्णासाधितकाथः ।
पीतः सक्षारचूर्णः कासश्वासौ जयत्यारु ॥"
इति अश्वत्थादि ॥ १२७ ॥
"दशमूलीकषायस्तु पुष्करेणावचूर्णितः ।
कासश्वासप्रशमनः पार्श्वरुक्शूलनाशनः ॥"
इति कुष्ठचूर्णयुक्तदशमूली ॥ १२८ ॥
"कुलत्थनागरक्वाथीधान्याभिः क्षपितं जलम् ।
पीतं पुष्करसंयुक्तं हिक्काश्वासनिवारणम् ॥"
इति कुलत्थादि ॥ १२९ ॥
"शृङ्गीमहौषधकषायवरपौष्करार्द्रा
चूर्णं घटीमरिचशुण्ठ्करया विमिश्रम् ।
क्षौद्रेण पीतमनलादवपक्वमन्त्राः
श्वासं व्यपोह्य विनिहन्त्यतिदोषसूत्रम् ॥"
इति शृङ्गादि ॥ १३० ॥
इति हिक्काश्वासाधिकारः ॥ * ॥

अथ छर्द्याम् ।
"कषायो भरद्वाजस्य सलाजमधुशर्करः ।
निहन्याच्छर्दितीसारं वैद्यानर इवासुरिम् ॥"
इति भरद्वाजकषायः ॥ १३१ ॥
"गुडूचीविजयारिष्टपटोलैः क्षपितं पिबेत् ।
सौम्रयुक्तं विहन्त्याशु छर्दिं पित्तात्मकामपि ॥"
इति गुडूच्यादि ॥ १३२ ॥

"क्वाथः पर्पटजः पीतः सशौद्रश्छर्दिनाशनः ॥"
इति पर्पटक्वाथः ॥ १३३ ॥
"क्षतं गुडूच्या विधिवत् कषायं क्षिप्तसंस्कृतम् ।
तिक्तमपि भवेत् पथ्यं मात्रिकेव जनायुतम् ॥
प्रयादापोशितात्तोये प्रतप्ते निशि संस्थितात् ।
कषायो योऽभिनिर्यात स पीतः सद्यदाक्षतः ॥"
इति गुडूचीप्रपीतकषायः ॥ १३४ ॥
"श्रीपलक्ष गुडूच्या वा कषायो मधुसंयुतः ।
पेयश्छर्दिभये पीतो दूर्वा वा तण्डुलाम्बुना ॥"
इति विल्वमूलगुडूचीकषायौ ॥ १३५ ॥
"जम्ब्वाम्रपल्लवतरुष्वकषायसेच-
क्षौद्रेवारि पिबतो मधुनाप्यमन्थम् ।
छर्दिः प्रयाति द्रुतमर्क चिरुगण्डिकुत्था
क्षीद्रा निहन्ति मधुनाथ दुरालभा वा ॥"
इति जम्ब्वादिवारि ॥ १३६ ॥
इति छर्द्यधिकारः ॥ * ॥

अथ मूर्च्छायाम् ।
"महौषधाम्रतार्क्षौद्रं पौष्करं ग्रन्थिकोद्भवम् ।
पिबेत् कषायुतं क्वाथं मूर्च्छा येषु गदेषु च ॥"
इति महौषधादि ॥ १३७ ॥
"पिबेद्दुरालभाक्वाथं सक्षतं क्षमयाम्बये ॥"
इति दुरालभाक्वाथः ॥ १३८ ॥
इति मूर्च्छाधिकारः ॥ * ॥

अथोन्मादे ।
"दशमूलाम्बु सक्षतं युक्तं मांसरसेन वा ।
ससिद्धार्थकचूर्णं वा पुराणं वैकृतं घृतम् ॥"
इति घृतादियुक्तदशमूलम् ॥ १३९ ॥ * ॥

अथापस्मारे ।
"क्षतकम्पोऽचिरजा यस्य खेदो ज्वरादि-
घ्नीतता ।
दशमूलीजलं तस्य कल्याणाद्यञ्च योजयेत् ॥"
इति दशमूलीकल्याणघृतौ ॥१४०॥*॥

अथ वातरोगे ।
"पञ्चमूलीक्षतः क्वाथो दशमूलीक्षतोऽथवा ।
रूक्षः खेदक्षमा नस्यं मन्थाक्षाभे प्रशस्यते ॥"
इति पञ्चमूली-दशमूलीक्वाथौ ॥ १४१ ॥
"अर्हति नवनीतेन स्नाईक्षाबस्तिकर्मी नरः ।
क्षीरमांसरसैर्भुक्ता दशमूली जलं पिबेत् ॥"
इति दशमूली ॥ १४२ ॥
"माषबलाशुकशिम्बाकपृक्षराजाम्बष्ठगन्धो-
दवूकाक्षाम् ।
क्वाथो नस्यनिपीतो रामठलवणान्वितः कोष्ठः ॥
अपहरति पञ्चवातं मन्थाक्षाभं सकर्ण-
शिरसजम् ।
दुर्जयमर्हितवातं सप्ताहाज्जयति चावश्यम् ॥"
इति माषबलादि ॥ १४३ ॥
"दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितम् ।
सार्धं सुक्ष्मा पिबेन्नस्यं विल्वच्यामवधावुके ॥"
इति दशमूलादि ॥ १४४ ॥
"माषाक्षगुप्तकैरण्डजाम्बवकश्वदंष्ट्रं पिबेत् ।
क्षिप्तुसैन्धवसंयुक्तं पञ्चवातनिवारणम् ॥"
इति माषादि ॥ १४५ ॥

"वातघ्नैर्दशमूलैश्च सरं कुर्वतुपाचरेत् ॥"
इति वातघ्नदशमूलीकषायौ ॥ १४६ ॥
"दशमूली बला राम्ना गुडूची बिल्वभेषजम् ।
पिबेदैरण्डतैलेन यवक्षीक्षीरपञ्चमु ॥"
इति एरण्डतैलयुक्तदशमूल्यादि ॥ १४७ ॥
"शिग्रुनिर्यासदलजक्वाथो व्योषक्षिपरिप्लावितः ।
दुर्नामं यवक्षीरोगं पीतमात्रं वसुद्धरेत् ॥"
इति शिग्रुजक्वाथः ॥ १४८ ॥
"पञ्चमूलीकषायस्तु रघुतैलविमिश्रितम् ।
त्रिवृतैर्वाथवा युक्तं यवक्षीगुल्ममूलजुत् ॥"
इति एरण्डतैलयुक्तपञ्चमूली ॥ १४९ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्बसा ।
कटीभूलेषु सर्वेषु तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलीशुण्ठीक्वाथौ ॥१५०॥
"गुग्गुलुं कोष्णवीर्यं तु गुडूचीं त्रिफलाम्बसा ।
क्षीरेणैरण्डतैलं वा पिबेद्वा वृद्धदारकम् ॥"
इति गुग्गुलुयुक्तगुडूचीत्रिफलाक्वाथः ॥१५१॥
इति वातव्याध्यधिकारः ॥ * ॥

अथ वातरक्ते ।
"अश्वत्थामरधन्वार्कपर्णबन्धेषु साधितम् ।
जयति वरक्तं वातं शमं कुर्वन्त्यपि त्रिधामि ॥"
इति अश्वत्थादि ॥ १५२ ॥
"वत्सादनीयुक्षवः क्वाथः पीतो गुग्गुलुसंयुतः ।
समीरक्तसमायुक्तं शोणितं संप्रधावयेत् ॥"
इति वत्सादनीक्वाथः ॥ १५३ ॥
"वासागुडूचीं चतुरङ्गुलोना-
मेरण्डतैलेन पिबेत् कषायम् ।
क्रमेण सर्वाङ्गजमप्यशेषं
जयेदरुग्वातभवं विकारम् ॥"
इति वासादि ॥ १५४ ॥
"सौद्रा सुक्तिसिकाचूर्णं मधुसर्पिःसमन्वितम् ।
क्षिप्ताक्वाथं पिबन् हन्ति वातरक्तं सुदुस्तरम् ॥"
इति गुडूचीक्वाथः ॥ १५५ ॥
"त्रिफलोऽथवा पञ्चगुडेन पथ्या
जग्ध्वा पिबेच्छिन्नरुहाक्वाथम् ।
सवातरक्तं शमयत्यशेषं-
माजानुसंस्थञ्च निहन्त्यवश्यम् ॥"
इति गुडूचीकषायः ॥ १५६ ॥
इति वातरक्ताधिकारः ॥ * ॥

अथोरस्तम्भे ।
"शिलाजतुं गुग्गुलुं वा पिप्पलीमथ नागरम् ।
उरस्तम्भे पिबेन्मन्दैरण्डमूलीरसेन वा ॥"
इति शिलाजत्वादियुक्तदशमूली ॥ १५७ ॥
"भल्लातकाम्लतासुक्तीदारुपथ्यापुनर्नवाः ।
पञ्चमूलीद्वयोन्मिश्रा उरस्तम्भनिवारणाः ॥"
इति भल्लातकादि ॥ १५८ ॥
"पिप्पली पौष्पलीमूलं भल्लातकाथ एव वा ।
क्षौद्रो वा समधुर्हन्ति उरस्तम्भविनाशनः ॥"
इति पिप्पल्यादि ॥ १५९ ॥
इत्युरस्तम्भाधिकारः ॥ * ॥

अथामवाते ।
"[illegible]

कषायमामवातस्य पाचनं रूक्षभोजनम् ॥"
इति गुडूच्यादि ॥ १६० ॥
"गुटी विशौषधं कल्कं वर्षाभूकाथसंयुतम् ।
सप्तरात्रं पिबेच्छुद्धामवातविपाचनम् ॥"
इति पुनर्नवाद्यः ॥ १६१ ॥
"दशमूलाष्टतैरण्डराजानागरदारुभिः ।
क्वाथोरुबूकतैलेन सामं हन्त्यनिलं गुरुम् ॥"
इति राजादशमूलम् ॥ १६२ ॥
"दशमूलीकषायेण पिबेद्वा नागराम्भसा ।
कृत्तिवल्लिकटीमूले तैलमेरण्डसम्भवम् ॥"
इति एरण्डतैलयुक्तदशमूलमुष्टीक्वाथौ ॥१६३॥
"राज्ञां गुडूचीमेरण्डं देवदारु महौषधम् ।
पिबेत् सर्वाङ्गवाते च सामे सन्धास्थिमज्जगे ॥"
इति राजापञ्चकम् ॥ १६४ ॥
"राज्ञामृतारण्यधदेवदारु-
त्रिकण्टकैरण्डपुनर्नवानाम् ।
क्वाथं पिबेन्नागरचूर्णमिश्रं
सक्षौद्रमष्ठत्रिकपार्श्वशूली ॥"
इति राज्ञासप्तकम् ॥ १६५ ॥
"गुडूचीगोक्षुरकक्वाथः प्रातः प्रातर्निषेवितः ।
सामे वाते कटीमूले पाचनो रूक्प्रणाशनः ॥"
इति गोक्षुरगुडूची ॥ १६६ ॥
"आमवाते कणायुक्तं दशमूलीजलं पिबेत् ॥"
इति कणायुक्तदशमूली ॥ १६७ ॥
इत्यामवाताधिकारः ॥ * ॥

अथ शूले ।
"बलापुनर्नवैरण्डहृतीक्षुगोक्षुरैः ।
सद्विङ्गु लवणं पीतं सद्यो वातरुजापहम् ॥"
इति बलादि ॥ १६८ ॥
"विश्वमेरण्डजं मूलं क्वाथं पीत्वा जलं पिबेत् ।
हिङ्गुसौवर्चलोपेतं सद्यः शूलनिवारणम् ॥"
इति विश्वादि ॥ १६९ ॥
"हिङ्गुपुष्करमूलाभ्यां हिङ्गुसौवर्चलेन वा ।
विश्वैरण्डयवक्वाथः सद्यः शूलनिवारणः ॥"
इति हिङ्गुपुष्करमूलयुक्तविश्वैरण्डयवक्वाथः ॥
१७० ॥
"तहहृद्वयवक्वाथो हिङ्गुसौवर्चलान्वितः ॥"
इति रुग्वादि ॥ १७१ ॥
"हृहत्यौ गोक्षुरैरण्डकुशकाशेक्षुशालिकाः ।
पीताः पित्तभवं शूलं सद्यो हन्ति सुदारुणम् ॥"
इति हृहत्यादि ॥ १७२ ॥
"शुनावरीसपद्माक्षवाह्यालकुशगोक्षुरैः ।
घृतप्लुतं पिबेच्चोष्णं सगुडक्षौद्रशर्करम् ।
पित्तासृग्दाहशूलघ्नं सद्यो दाहज्वरापहम् ॥"
इति शुनावर्यादि ॥ १७३ ॥
"त्रिफलाविल्वपद्माक्षकटुकारग्वधैः कृतम् ।
पाचयेन्मधुसंमिश्रं दाहशूलोपशान्तये ॥"
इति त्रिफलादि ॥ १७४ ॥
"सैरेयमेरण्डजं वापि मधुकक्वाथसंयुतम् ।
शूलं पित्तोद्भवं हन्याद्गुडाक्षं पैत्तिकमेव च ॥"
इति मधुकक्वाथः ॥ १७५ ॥
"त्रिफलारग्वधक्वाथं सक्षौद्रं शर्करान्वितम् ।

पाययेदसृक्पित्तघ्नं दाहशूलनिवारणम् ॥"
इति त्रिफलारग्वधक्वाथः ॥ १७६ ॥
"विश्वमूलमथैरण्डं त्रिभङ्गं विश्वभेषजम् ।
हिङ्गुसैन्धवसंयुक्तं सद्यः शूलनिवारणम् ॥"
इति विश्वमूलादि ॥ १७७ ॥
"सक्षारं वा पिबेत् क्वाथं विल्वादेः कफमूलगम्॥"
इति विल्वादिक्वाथः ॥ १७८ ॥
"मातुलुङ्गरसो वापि शिग्रुक्वाथसक्षारापरः ।
सक्षारो मधुना पीतः पार्श्वहृद्बस्तिशूलजित् ॥"
इति शिग्रुक्वाथः ॥ १७९ ॥
"आमशूले क्रिया कार्या कफमूल-
विनाशिनी ।
सैरेयमामहरं वर्म्यं यदन्यदपि वर्हणम् ॥
पटोलत्रिफलारिष्टक्वाथं समधुकं पिबेत् ।
पित्तश्लेष्मज्वरच्छर्दिदाहशूलोपशान्तये ॥"
इति पटोलादि ॥ १८० ॥
"विश्वोरुबूकदशमूलजयवाम्भसा तु
द्विक्षारहिङ्गुलवणत्रयपुष्करायाम् ।
चूर्णं पिबेद्धृदयपार्श्वकटीग्रहाम-
पक्वाशयोद्भवशिरोग्रहगुल्मशूली ॥"
इति विश्वादि ॥ १८१ ॥
"क्वाथेन चूर्णपानं यत्तच्च क्वाथप्रधानता ।
प्रवर्तते न तेनात्र चूर्णापेक्षी चतुर्द्वयः ॥
चूर्णं समं रूक्षकहिङ्गुमहौषधानां
सुखाम्बुना कफसमीरणपित्तजेषु ।
कृतयार्द्धपूतलवणक्षारविल्वशिखासु
पेयं तथा यवरसेन तु विड्विबन्धे ॥"१८२ ॥
"समं सुखाम्बुनेत्येवं योजना क्रियते बुधैः ।
तेनाप्यमानमेवाच्च हिङ्गु संपरिदीयते ॥"
इति रूक्षकादि ॥ १८३ ॥
"हिङ्गु सौवर्चलं पथ्या विड्सैन्धवयवक्षाराः ।
पौष्करश्च पिबेच्चूर्णं दशमूलयवाम्भसा ॥
पार्श्वहृत्कटिपृष्ठोष्णमूत्रे तन्त्रापतानके ।
श्रोणिवृषणभासक्ते च कर्कशेगे च शस्यते ॥"
इति हिङ्ग्वादिचूर्णयुक्तदशमूलीयक्वाथः ॥१८४॥
"एरण्डविल्वहृहतीद्वयमातुलुङ्ग-
प्राचाम्लभिङ्गिकटमूलजतः कषायः ।
सक्षारहिङ्गुलवणो लवणैकमिश्रः
श्रोण्यंशुमेढ्रहृदयस्तनवङ्क्षणे यः ॥"
इति एरण्डसप्तकः ॥ १८५ ॥
"एरण्डफलमूलानि हृहतीद्वयगोक्षुरम् ।
पर्णिन्यौ सहदेवा च सिंहपुच्छीक्षुरालिका ॥
तुल्यैरेतैः कृतं तोयं यवक्षारयुतं पिबेत् ।
पृथग्दोषभवं मूलं हन्यात् सर्वभवत्वथा ॥"
इति एरण्डादशकः ॥ १८६ ॥
इति मूलाधिकारः ॥ * ॥

अथोदावर्ते ।
"श्यामा दन्ती द्रवन्ती चक् महाश्यामा क्षुही
चित्रकः ।
सप्तला श्वेतिनी श्वेता राजवृक्षः सतिल्वकः ॥
कम्पिल्लकः करञ्जश्च हैमवारीत्वयं गणः ।
सर्पिस्तैलवणःक्षारयवक्षेम्यान्नतेन च ॥

उदावर्तोदरानाहविषगुल्मादिनाशनः ॥"
इति प्रसेवं श्यामादिगणक्वाथः ॥ १८७ ॥
इत्युदावर्ताधिकारः । आनाहोऽपि ॥ * ॥
अथ हृद्रोगे ।
"वातोपसृष्टे हृदये वामयेत् स्निग्धमातुरम् ।
स्निग्धमूलीक्वाथेन सक्षैरण्डयवेन च ॥"
इति क्षैरण्डयवयुक्तदशमूली ॥ १८८ ॥
"नागरं वा पिबेद्वर्ष्यं कषायक्षाधिवर्द्धनम् ।
क्षारक्षाक्षाभिलक्षारं मूलहृद्रोगनाशनम् ॥"
इति नागरक्वाथः ॥ १८९ ॥
"वचाभिनिम्बकक्वाथौ वान्तं हृदि कफोत्थिते ।
वातहृद्रोगहृत्पार्श्वं पिप्पल्यादिश्च पाचयेत् ॥"
इति वचाभिनिम्बक्वाथौ ॥ १९० ॥
"त्रिकण्टकगजाह्वित्रिविल्वक्षारा-
क्षुद्राभयाचित्रकक्वाथमूलम् ।
पिबेत् सक्षौद्रयवक्षारपुष्करा-
यवाम्भसा मूलहृदामयघ्नम् ॥"
इति त्रिकण्टकादिचूर्णयुक्तक्वाथः ॥ १९१ ॥
"दशमूलकक्वाथस्तु लवणक्षारसंयुतम् ।
कासं श्वासञ्च हृद्रोगं गुल्ममूलञ्च नाशयेत् ॥"
इति लवणक्षारयुक्तदशमूली ॥ १९२ ॥
इति हृद्रोगाधिकारः ॥ * ॥
अथ मूत्रकृच्छ्रे ।
"अन्तर्धूमं नागरं धान्यौ वाजिगन्धा त्रिकण्टकम् ।
प्रपिबेन्नातरोगार्तः सक्षौद्रो मूत्रकृच्छ्रवान् ॥"
इति अन्तर्धूमादि ॥ १९३ ॥
"कुशः काशः शरो दर्भः स्तम्बेरिति हृयोद्भवम् ।
पित्तश्लेष्महरं पञ्चमूलं बस्तिविशोधनम् ॥"
इति तृणपञ्चमूलम् ॥ १९४ ॥
"एतत् सिद्धं पयःपीत्वा मेढ्रं हन्ति प्रोक्षितम् ॥
शुतावरीकाशकुशेक्षुदर्भा-
विदारिशालीक्षुकगोक्षकाणाम् ।
क्वाथं सुशीतं मधुशर्करार्द्धं
पिबन् जयेत् पैत्तिकमूढमूत्रम् ॥"
इति शुतावर्यादि ॥ १९५ ॥
"हरीतकीगोक्षुरराजवृक्ष-
प्राचाम्लभिङ्गित्रयवासकानाम् ।
क्वाथं पिबेच्चाक्षिकसंप्रयुक्तं
सक्षौद्रं सद्यो सरुजे विबन्धे ॥"
इति हरीतक्यादि ॥ १९६ ॥
"स्वदंष्ट्रा विल्वतोयं वा कफमूढमूत्रविनाशनम् ॥"
इति स्वदंष्ट्राविल्वक्वाथौ ॥ १९७ ॥
"हृहतीधावनीपाठाक्वथीमधुकपिप्पलाः ।
पाचनीयो हृहत्यादिः सक्षौद्रो बस्तिशूलनुत् ॥"
१९८ ॥
"क्वाथं गोक्षुरबीजस्य यवक्षारयुतं पिबेत् ।
मूढमूत्रं मूढवातञ्च पीतः शीघ्रं निवारयेत् ॥"
इति यवक्षारयुक्तगोक्षुरबीजक्वाथः ॥ १९९ ॥
"क्रिया क्षिता स्वल्पतरिग्रुकेरायां
या मूढमूत्रे कफमारुतोत्थे ।
यच्चूढमूत्रे विहितन्तु पैत्ते
तत् कारयेत् शीतलतामुपेते ॥

चिकणहकारम्बधदर्भकाश्म-
दुरालभापर्वतमेदपथ्याः ।
भिन्नन्ति पीता मधुनाक्षरीव
संग्राह्यशब्दोरपि मूत्रकृच्छ्रम् ॥"
इति चिकणटकादि ॥ २०० ॥
"कषायोऽतिबलालक्षणसाधितोऽग्नेयकल्पोक्तजित् ॥"
इति अतिबलाकषायः ॥ २०१ ॥
इति मूत्रकृच्छ्राधिकारः ॥ * ॥
अथ मूत्राघाते ।
"मूत्राघाते यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
पिबेच्छिलाजतुयुक्ताथे गजी वीरतरादिके ॥"
इति शिलाजतुयुक्तवीरतरादिक्काथः ॥२०२॥
" रसं दुरालभाया वा कषायं वायकस्य वा ॥"
इति दुरालभारसवासाकषायौ ॥ २०३ ॥
इति मूत्राघाताधिकारः ॥ * ॥
अथाश्मर्याम् ।
"वरुणस्य त्वचं भेदी शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारगुडं दत्त्वा क्वाथयित्वा पिबेन्नराम् ॥
आश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥"
इति वरुणत्वगादि ॥ २०४ ॥
"वीरतरः सहचरौ दर्भो हृद्दारणी बलः ।
गुन्द्रा काशकुशावल्लभेदमोरटटुण्टुकाः ॥
कृष्णटकोऽथ वधिरो वसुकः स्वाभिमन्यकः ।
हस्तीवरी भद्रबला च तथा कापोतवल्लकः ॥
वीरतरादिरित्येष गणो वातविकारजुत् ।
आश्मरीमूत्रकृच्छ्राघातरुजापहः ॥"
इति वीरतरादिगणक्काथः ॥२०५॥
"शुण्ठ्यग्निमन्थपाषाणाग्निमुक्तगोक्षुरः ।
अभयारग्वधपलैः क्वाथं कृत्वाद्विचञ्चवः ॥
गामटत्तारलवणक्षारं दत्त्वा पिबेन्नरः ।
आश्मरीभूत्रकृच्छ्रघ्नं पाचनं दीपनं परम् ॥
हन्यात् कोष्ठाश्रितं वातं कटूरुगुदमेढ्रगम् ॥"
इति शुण्ठ्यादि ॥ २०६ ॥
"वरुणत्वक्कषायन्तु पीतन्तु गुडसंयुतम् ।
आश्मरीं पातयत्याशु वस्तिमूलविनाशनम् ॥"
इति वरुणकाथः ॥ २०७ ॥
"पिबेद्वरुणमूलत्वक्क्वाथं तत्कल्कसंयुतम् ॥"
इति वरुणकल्कयुक्तवरुणत्वक्कषायः ॥२०८॥
"क्वाथञ्च शिग्रुमूलोत्थः कदुष्णोऽश्मरिघातनः ॥"
इति शिग्रुक्काथः ॥ २०९ ॥
"नागरवरुणत्वक्कगोक्षुरपाषाणभिन्नकपोतवल्लज-
क्वाथः ।
गुडयावशूककमिश्रः पीतो हन्त्यश्मरीमुग्राम् ॥"
इति नागरादि ॥ २१० ॥
"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकैः कृतः ।
कषायः क्षारसंयुक्तः शर्करांश्च भिनत्त्यपि ॥"
इति वरुणत्वगादि ॥ २११ ॥
"श्वदंष्ट्रेक्षुपलाशि नागरं वरुणत्वचम् ।
शतपुष्पावरं प्रातः पिबेदश्मरिभेदनम् ॥"
इति श्वदंष्ट्रादि ॥ २१२ ॥
"शतपुष्पायवक्षारमधुकाश्मभेद-
क्वाथं पिबेदश्मजतुप्रगाढ़ं
सशर्करं क्षाश्मरिमूत्रकृच्छ्रे ॥"
इति शतादि ॥२१३॥
"मुक्ताश्मशर्क्यासु सामान्यो विधिरश्मरिनाशनः ॥"
इत्यश्मरीशर्करेत्याधिकारः ॥*॥
अथ मेहे ।
"दूर्वाकाशेक्षुपुनर्नवाकुम्भीकाम्बष्ठैर्बलम् ।
जले निःक्वथितं पीतं शुक्रमेहहरं परम् ॥"
इति दूर्वादि ॥ २१४ ॥
"चिरबिल्वत्वगाक्षीकाम्बष्ठो मधुना युतः ।
पीतो निहन्ति पित्तास्रं प्रमेहं नियतं नृणाम् ॥"
इति चिरबिल्वादि ॥ २१५ ॥
"लोध्राभयाकटफलसप्तपर्णकानां
विड्डङ्गपाटार्जुनधन्वनानाम् ।
कदम्बशालार्जुनदीप्यकानां
विड्डङ्गदार्वीधवशाल्मकानाम् ॥
चत्वार एते मधुना कषायाः
कफप्रमेहेषु भिषग्वरीयाः ॥
न्यग्रोधादेः फलत्रयात् ।
सजिक्षिरक्तसाराच्च क्वाथाः पञ्च समाक्षिकाः ॥
नीलङ्गारिष्टशुक्लाख्यान् क्षारमाक्षिकसाक्ष्यान् ।
मेहान् हन्युः क्रमादेते सक्षौद्रो रक्तमेह-
जित् ॥
क्वाथः खर्जूरकाम्रास्थिनिम्बकाम्याम्लताजतः ॥"
इति खर्जूरादि ॥ २१६ ॥
"लोध्रार्जुनोशीरकुचन्दनानाम् २१७
अरिष्टसेव्यामलकाभयानाम् । २१८ ।
धात्र्यर्जुनारिष्टकवत्सकानां २१९
नीलोत्पलैलात्वनिशार्जुनानाम् ॥ २२० ॥
चत्वार एते विहिताः कषायाः
पित्तप्रमेहे मधुसंप्रयुक्ताः ॥"
इति कषायचतुष्टयम् ॥ २२१ ॥
"छिन्नावल्लिकषायेण पाठाकुटजरामठम् ।
तिक्तां कुष्ठञ्च सक्षौद्रं सर्पिर्मेहे पिबेन्नरः ॥"
इति छिन्नावल्लिकषायः ॥ २२२ ॥
"कदरखदिरपूगक्वाथं क्षौद्राढ्ये पिबेत् ॥"
इति कदरादि ॥ २२३ ॥
"अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत् ॥"
इति अग्निमन्थकषायः ॥२२४॥
"पाठाग्निरीवदृक्षार्ष्यसुर्वाः किंशुकतिन्दुकौ ।
कपित्थार्जा भिषक् क्वाथं हरिमेहे प्रयोजयेत् ॥"
इति पाठादि ॥ २२५ ॥
"कषायश्चिफलादारुमुस्तकैरथवा कृतः ॥"
इति त्रिफलादि ॥ २२६ ॥
"फलत्रिकं दारु निशा विशालां
तुलाञ्च निष्क्वाथ्य निशार्णकल्कम् ।
पिबेत् कषायं मधुसंप्रयुक्तं
सर्वप्रमेहेषु सतृष्णितेषु ॥"
इति फलत्रिकादि ॥ २२७ ॥
"कटङ्कटेरीमधुकत्रिफलाश्चित्रकैः समैः ।
सिद्धः कषायः पातव्यः प्रमेहाणां विनोत्थितः ॥"
इति कटङ्कटेर्यादि ॥ २२८ ॥
"त्रिफलादारुदार्व्याम्बुकाथः क्षौद्रेण मेहहा ॥"
इति त्रिफलादि ॥ २२९ ॥
"कुटजासनदार्व्याम्बुफलत्रयभवोऽथवा ॥"
इति कुटजादि ॥ २३० ॥
इति प्रमेहाधिकारः ॥ * ॥
अथोदरे ।
"पयसा सक्षितृकल्केनोदुम्बरजरसेन वा ।
सप्तलाक्षायमाक्षाभ्यां घृतेनारग्वधेन वा ॥"
इति सितृकल्कयुक्तारग्वधक्षाक्षैरुक्तकाथौ ॥
२३१ ॥
"सन्निपातोदरे सर्वं क्वाथयोक्तं क्रियाम् ।
पीतः क्षौद्रोदरं हन्यात् पिप्पलीमरिचान्वितः ॥
अम्बष्ठेतसंयुक्तः शिग्रुक्काथः सलैन्धवः ॥"
इति शिग्रुक्काथः ॥ २३२ ॥
"दशमूलदारुनागरच्छिन्नरुहापुनर्नवाक्काथः ।
जयति जलोदरशोथप्लीपदगलगण्डवात-
रोगांश्च ॥"
इति दशमूलादि ॥ २३३ ॥
"हरीतकीनागरदेवदारु
पुनर्नवाच्छिन्नरुहाकषायः ।
सगुग्गुलुर्मूत्रयुतश्च पेयः
शोथोदराणां प्रवरः प्रयोगः ॥"
इति हरीतक्यादि ॥ २३४ ॥
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तक्षिपफलारसो वा ।
निहन्ति बालोदरशोथशूलं
क्वाथः समूत्रो दशमूलजश्च ॥"
इति एरण्डतैलेन गोमूत्रेण वा युक्ता दशमूली ॥
२३५ ॥
"पुनर्नवानिम्बपटोलमुस्ता-
तिक्ताष्टतादार्वभयाकषायः ।
सर्वाङ्गशोथोदरकाशशूल-
श्वासान्वितं पाण्डुगदं निहन्ति ॥"
इति पुनर्नवाष्टकम् ॥ २३६ ॥
"पुनर्नवादार्वभयागुडूचीं
पिबेत् सशूलां महिषाक्षयुक्ताम् ।
त्वग्दोषशोथोदरपाण्डुरोग-
स्त्रीक्लैब्यप्लीकोष्ठकफामयेषु ॥"
इति पुनर्नवाचतुष्कम् ॥ २३७ ॥
इति उदराधिकारः ॥ * ॥
अथ शोथे ।
"शुण्ठीपुनर्नवैरण्डपञ्चमूलशृतं जलम् ।
वातिके श्वयथौ शूले पानाहारपरियहे ॥"
इति शुण्ठ्यादि ॥ २३८ ॥
"दशमूलं सर्वथा च शूले वाते विशेषतः ॥"
इति दशमूलम् ॥ २३९ ॥
"क्षीराशनः पित्तकृतेऽथ शोथे
चिरद्रुगुडूचीत्रिफलाकषायम् ।
पिबेन्नरो मक्षविमिश्रितं वा
फलत्रिकाचूर्णमथाक्षमात्रम् ॥"
इति चिरत्वादि ॥ २४० ॥
"अभया दारु मधुकं तिक्ता दन्ती सपिप्पली ।

पटोलं चन्दनं दार्वी आयमार्येन्द्रवारुणी ॥
एषां क्वाथः ससर्पिष्कः क्षयपुण्यरदाहरुक् ।
दौसर्पकुष्ठाग्निमान्द्यसन्निपातविषापहः ॥"
इति अभयादि ॥ २३१ ॥

"पुनर्नवाविश्वभिङ्गुवृषी-
सम्याकपथ्यामरदारुकल्कम् ।
घृतेऽथ कपोतैर्मधिराक्षमज्ज-
युक्तं पिबेद्वा सलिलं सधैर्यम् ॥"
इति पुनर्नवासप्तकम् ॥ २३२ ॥

"पुनर्नवादारुशुण्ठीक्वाथे मूर्वेऽथ केवले ।
दशमूलजले वापि गुग्गुलुः शीथवाश्नः ॥"
इति गुग्गुलुयुक्तपुनर्नवादिदशमूलक्वाथौ॥२३३॥

"सिंहाख्यान्नतभण्टाकीक्वाथं क्षौद्रा समाधिकम् ।
पीत्वा घृतेषं जयेच्छत्रुः कासं श्वासं ज्वरं वमिम् ॥"
इति सिंहाख्यादि ॥ २३४ ॥

"भूनिम्बविश्वकल्कं वरुणा पेयः पुनर्नवाक्वाथः ।
अपहरति निशतमासु घृतेषं सर्वाङ्गजं गदानाम् ॥"
इति पुनर्नवाक्वाथः ॥ २३५ ॥
इति घृतेषाधिकारः ॥ * ॥

अथाक्षतृड्धौ ।

"पुनर्नवायास्तैलं वा तैलं वाराह्यजस्तथा ।
पाने वस्तौ नवोस्तैलं पेयं वा दशकाभसा ॥"
इति शतपुनर्नवतैलम् ॥ २३६ ॥

"राज्ञायष्ट्याम्रतैरण्डबलागोक्षुरसाधितः ।
क्वाथोऽक्षतृड्विं हन्त्याशु शतपुनर्नवेव मिश्रितः ॥"
इति राज्ञादि ॥ २३७ ॥
इति अक्षतृड्धिकारः ॥ * ॥

अथ विद्रधौ ।

"पुनर्नवादारुविश्वदशमूलाभयाभसा ।
गुग्गुलुं शतपुनर्नवं वा पिबेन्नाशयति विद्रधौ ॥"
इति पुनर्नवादि ॥ २३८ ॥

"पिबेद्वा त्रिफलाक्वाथं चित्रकल्काक्षसंयुतम् ॥"
इति चित्रकल्कयुक्तत्रिफलाक्वाथः ॥२३९॥

"दशमूलीकषायेण सन्दोहवरसेन वा ।
घृतेषं त्रयं वा कोष्णेन सशूलं परिषेचयेत् ॥"
इति दशमूलीकषायः ॥ २४० ॥

"क्वाथो वंशत्वगेरण्यदंष्ट्राभिदा श्रुतः ।
सक्षिद्रुसैन्धवः पीतः कोष्ठस्थं मारयेदरुक् ॥"
इति वंशत्वगादिक्वाथः ॥ २४१ ॥*॥

अथोपदंशे ।

"पटोलनिम्बत्रिफलागुडूची-
क्वाथं पिबेद्वा खदिराग्ववाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्वोपदंशापहरः प्रयोगः ॥"
इति पटोलादि ॥ २४२ ॥

"त्रिफलायाः क्वाथयेत्क्वरराजरसेन वा ।
व्रणप्रक्षालनं कुर्यादुपदंशप्रशान्तये ॥"
इति त्रिफलाक्वाथः ॥ २४३ ॥

"जयाजात्यम्बमारार्कसन्याकानां दलैः पृथक् ।
क्षतं प्रक्षालने क्वाथं मेढ्रपाके प्रयोजयेत् ॥"
इति जयादिक्वाथः ॥ २४४ ॥ * ॥

अथ भग्ने ।

"व्योषादिक्वाथमक्षौद्रं सुशीतं परिषेचने ॥"
इति व्योषादि ॥ २४५ ॥ * ॥

अथ कुष्ठे ।

"त्रिफलापटोलरजनीमञ्जिष्ठारोहिणीवचा-
त्रिलैः ।
एष क्वाथो विहन्ति क्षणपित्तजं
कुष्ठम् ॥"
इति नवकषायः ॥ २४६ ॥

"पटोलखदिरारिष्टत्रिफलाक्षक्वेषजम् ।
तिक्ताद्यम् पिबेत् क्वाथं कुष्ठी कुष्ठं व्यपोहति ॥"
इति पटोलादि ॥ २४७ ॥

"धात्रीखदिरयोः क्वाथं पीत्वा पलशतसंयुतम् ।
गुडेनूधवलं त्रिघ्नं तूर्णं खलति न संशयः ॥"
इति धात्रीखदिरक्वाथः ॥ २४८ ॥ * ॥

अथ पीतपित्ते ।

"उदर्दं वमनं क्वाथं पटोलारिष्टवारिणा ॥"
इति पटोलारिष्टजलम् ॥ २४९ ॥ * ॥

अथाम्लपित्ते ।

"निम्बत्रयवरुक्षवाभीक्वाथक्षिप्तगुडान्वितः पीतः ।
अपनयति क्षाम्लपित्तं यदि भुङ्क्ते सुस्नयग्वेव ॥"
इति निम्बत्रयादि ॥ २५० ॥

"कफपित्तवमीकण्डूज्वरविस्फोटदाहहृत् ।
पाचनो दीपनः क्वाथः पटुकुवेरपटोलयोः ॥"
इति पटुकुवेरपटोलक्वाथः ॥ २५१ ॥

"पटोलं नागरं धान्यं क्वाथयित्वा जलं पिबेत् ।
कण्डूपामार्जिभूशूलं कफपित्तामिमान्द्यजित् ॥"
इति पटोलादि ॥ २५२ ॥

"पटोलविश्वान्ततरोहिणीजलं
जलं पिबेत् पित्तकफोत्क्लेदी च ।
शूलभ्रमारोचकवह्निमान्द्य-
श्वासज्वरच्छर्दिनिवारणत्वात् ॥"
इति पटोलादि ॥ २५३ ॥

"पटोलत्रिफलाक्वाथं क्षौद्रयुतं पिबेत् ।
नाशयेदम्लपित्तञ्च अरुचिञ्च वमिन्तथा ॥"
इति यवादि ॥ २५४ ॥

"वासान्नतापर्पटकभूनिम्बनिम्बमार्कवैः ।
त्रिफलाकुलकैः क्वाथः सक्षौद्रश्चाम्लपित्तहा ॥"
इति दशाङ्गम् ॥ २५५ ॥

"फलत्रिकं पटोलञ्च तिक्ताक्वाथः सितायुतः ।
पीतः सीतकमभक्तो ज्वरच्छर्द्यम्लपित्तजित् ॥"
इति फलत्रिकादि ॥ २५६ ॥

"पटोलधन्वाकमधौषधार्द्धैः
क्षतः कषायो विनिहन्ति शीघ्रम् ।
मन्दानलं पित्तबलासदाह-
च्छर्द्यिज्वराभानिलमूत्ररोगान् ॥"
इति पटोलादि ॥ २५७ ॥

"छिन्नोद्भवानिम्बपटोलपत्रं
फलत्रयं सुक्वथितं सुशीतम् ।
क्षौद्रान्वितं पीतमनेककल्पं
सुदारुणं हन्ति तदम्लपित्तम् ॥"
इति छिन्नोद्भवादि ॥ २५८ ॥

"पटोलत्रिफलानिम्बवासकारिष्टपर्पटैः ।
खदिराम्बुयुतैः क्वाथो विस्फोटार्तिज्वरापहः ॥"
इति पटोलादि ॥ २५९ ॥

"पटोलत्रिफलारिष्टगुडूचीसुरदारुभिः ।
सप्तच्छदो रोहिणी पाठा रजनी संधुरालभा ॥
कषायं पाययेदेतत् पित्तश्लेष्मज्वरापहम् ।
कण्डूव्रणदोषविस्फोटविषमीसर्पनाशनम् ॥"
इति पटोलादि ॥ २६० ॥

"भूनिम्बवासाकटुकापटोल-
फलत्रिकाचन्दननिम्बसिद्धः ।
विसर्पदाहज्वरवक्त्रशोष-
विस्फोटहृत्क्वाथमिमं कषायः ॥"
इति भूनिम्बादि ॥ २६१ ॥

"सकणे पित्तयुक्ते तु त्रिफलां योजयेद्भिषक् ।
दुरालभां पर्पटकं पटोलं कटुकान्वया ।
कोष्णं गुग्गुलुसंयुक्तं पिबेद्वा खदिराष्टकम् ॥"
इति दुरालभादि ॥ २६२ ॥

"कुष्ठानी पित्तमर्दांसु खदिरेन्द्रयवाम्बु वा ।
विस्फोटाम्राम्रजम्बासु वायुर्जलधराजिव ॥"
इति कुष्ठल्यादि ॥ २६३ ॥ * ॥

अथ मक्षयाम्।

"दुरालभां पर्पटकं भूनिम्बं कटुरोहिणीम् ।
श्लैष्मिकां पित्तजार्तां वा पाने निःक्वाथ्य दापयेत्॥"
इति दुरालभादि ॥ २६४ ॥

"निम्बं पर्पटकं पाठां पटोलं कटुरोहिणीम् ।
वासां दुरालभां धात्रीसुरौ चन्दनमुशीरम् ॥
एष निम्बादिकः क्वाथः पीतः शर्करया युतः ।
हन्ति त्रिदोषजरजौ [illegible]

उत्थिता प्रविशेद्दग्धा तु पुनस्तां वातजतो नयेत् ॥"
इति निम्बादि ॥ २८२ ॥
"पटोलकुरुवृतीसप्तपर्णवत्सकैः ।
भूनिम्बनिम्बकटुकापर्पटैश्च घृतं जलम् ॥
मक्षरीं ग्रसयेदाशां पक्वाश्चैव विशोषयेत् ।
नातः परतरं किञ्चिदिस्फोटज्वरशान्तये ॥"
इति पटोलादि ॥ २८३ ॥
"पटोलमूलारग्वधतक्तजीयकं
पिबेत्तरिद्रामलकल्कसंयुतम् ।
मक्षरिविस्फोटविदाहशान्तये
सदैव पित्तास्रवमिज्वरापहम् ॥"
इति पटोलादि ॥ २८४ ॥
"पटोलमूलारग्वधतक्तजीयकं
तथैव धात्रीखदिरैश्च संयुतम् ।
पिबेज्जलं सुक्वथितं सुशीतं
मक्षरिकारोगविनाशनं परम् ॥"
इति पटोलमूलादि ॥ २८५ ॥
"खदिरचित्रकारिष्टपटोलाम्रवासकैः ।
क्वाथोऽष्टकाङ्गो जयति रोमान्तीश्च मक्षरिकाम् ॥
वीसर्पकुष्ठविस्फोटकण्डूतीर्नाशयेत् पातः ॥"
इति खदिराष्टकम् ॥ २८६ ॥
"अम्लतादिकषायस्तु जयेत् पित्तकफात्मिकाः ॥"
इति अम्लतादि ॥ २८७ ॥
"जातीपत्रं समञ्जिष्ठं दार्व्याः पुष्पफलं शमीम् ।
धात्रीफलं समधुकं क्वथितं मधुसंयुतम् ॥
मुखरोगे कण्ठरोगे गण्डघार्थं प्रशस्यते ॥"
इति जातीपत्रादि ॥ २८८ ॥
"अक्ष्णोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना ॥"
इति गवेधुमधुकक्वाथः ॥ २८९ ॥
"वेदनादाहशान्त्यर्थं खराणाञ्च विशुद्धये ।
सगुग्गुलं वराक्वाथं युञ्जाद्वा खदिराष्टकम् ॥"
इति वराक्वाथखदिराष्टकौ ॥ २९० ॥
"निम्बातिमुक्तकाग्नीकन्नवेतसपल्लवैः ।
निर्यूषपर्युषितः क्वाथो मक्षरीभयनाशनः ॥"
इति निम्बादि ॥ २९१ ॥ इति मक्षर्यधिकारः ॥ * ॥
अथ मुखरोगे ।
"हृद्दतीभूमिकदम्बककरटकार्याः क्वाथः ।
गण्डूषतैलयुक्तः क्रिमिदन्तस्य वेदनाशमनः ॥"
इति हृद्दत्यादि ॥ २९२ ॥
"क्वाथपानन्तु दार्व्यादिहरीतक्यम्बुकल्किजम् ।
हरीतकीकषायो वा पेयो माक्षिकसंयुतः ॥"
इति दार्व्यादिहरीतकीकषायौ ॥ २९३ ॥
"कटुकातिविषादारुपाठामुस्तकलिङ्गकाः ।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः ॥"
इति कटुकादि ॥ २९४ ॥ * ॥
मुखपाके ।
"जातीपत्राम्रताम्राश्वत्थदार्व्याफलत्रिकैः ।
क्वाथः क्षौद्रयुतः पीतो गण्डूषो मुखपाकजुत् ॥"
इति जातीपत्रादि ॥ २९५ ॥
"पटोलनिम्बजम्ब्वाम्रभार्गतीनवपल्लवाः ।
मक्षपल्लवकः श्रेष्ठः कषायो मुखधावने ॥"
इति पटोलादि ॥ २९६ ॥

"पञ्चवल्ककषायो वा त्रिफलाक्वाथ एव वा ।
मुखपाकेषु सक्षौद्रः प्रयोज्यो मुखधावने ॥"
इति पञ्चवल्कत्रिफलाकषायौ ॥ २९७ ॥
"खदिरः क्वथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगाखगण्डोषणादीन्प्रशमयेत् ॥"
इति दार्व्यौक्वाथः ॥ २९८ ॥
"सप्तच्छदोशीरपटोलमुस्त-
हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥"
इति सप्तच्छदयष्ट्याह्वादिकषायौ ॥ २९९ ॥
"पटोलमुस्तौचित्रफलाविशाला-
त्रायन्तिनिक्तात्रिवृतास्तृतानाम् ।
पीतः कषायो मधुना निहन्ति
मुखे स्थितस्यास्य गदानशेषान् ॥"
इति पटोलादि ॥ ३०० ॥
"क्वथिताक्षिफलापाठाग्रन्थीकाजातिपल्लवाः ।
निषेव्या भक्षयित्वा वा त्रिफला मुखपाकहा ॥"
इति त्रिफलादि ॥ ३०१ ॥
इति मुखरोगाधिकारः ॥ * ॥
अथ प्रदरे ।
"दार्व्यौरसाञ्जनशताह्किरातविल्व-
भल्लातकैरवबलातो मधुना कषायः ।
पीतो जयत्यतिबलं प्रदरं सशूलं
पीतासितारक्तविलोहितनीलसंज्ञम् ॥"
इति दार्व्यादि ॥ ३०२ ॥ * ॥
अथ योनिव्यापदि ।
"गुडूचीत्रिफलादन्तीक्वाथेन परिषेचनम् ॥"
इति गुडूचीत्रिफलादन्तीक्वाथः ॥ ३०३ ॥
अथ गर्भिणीनाम् ।
"चन्दनं शारिवालोध्रदार्व्यौक्वाथुर्करान्वितम् ।
एष क्वाथः प्रदातव्यो गर्भिण्या ज्वरशान्तये ॥"
इति चन्दनादि ॥ ३०४ ॥
"क्षीवेरारक्तरक्तचन्दनबलाधन्वाकवत्सादनी-
मुस्तोशीरयवासपर्पटविषाक्वाथं पिबेद्गर्भिणी ।
नागरवर्धरजातिसारकगदं गर्भाश्रिते वा ज्वरे
योगोऽयं मुनिभिः पुरा निगदितः सद्भामये-
घृतम् ॥"
इति हृद्दतृक्षीवेरादि ॥ ३०५ ॥ * ॥
अथ क्षतरोगे ।
"हरिद्रादिं वचादिं वा प्रपिबेत् क्षतशुद्धये ॥"
इति हरिद्रादिवचादिक्वाथौ ॥ ३०६ ॥
"तत्र वातात्मके क्षत्रे दग्धमूलीरसं पिबेत् ॥"
इति दग्धमूलक्वाथः ॥ ३०७ ॥
"पित्तदुष्टेऽम्लताक्षीरपटोलं निम्बचन्दनम् ।
धात्री कुमारश्च पिबेत् क्वाथयित्वा सशर्करम् ॥"
इति अम्लतादि ॥ ३०८ ॥
"कफे वा त्रिफलाचव्यभूनिम्बकटरोहिणी ॥"
इति त्रिफलादि ॥ ३०९ ॥
"धात्री क्षत्रविशुद्ध्यर्थं सुशीतकरसाम्बुना ।
भार्गीदारुवचापाठाः पिबेत् सातिविषाः सृताः ॥"
इति भार्ग्यादि ॥ ३१० ॥

"सघृतं त्रिफलाक्वाथं क्षतरोगहरं पिबेत् ॥"
इति सघृतत्रिफलाक्वाथः ॥ ३११ ॥ * ॥
अथ क्षतिकारोगे ।
"अम्लतानागरसप्तपरभद्रोत्कटपञ्च-मूलजलद-
जलम् ॥
ग्रहसंयुतं मधुयुतं निवारयति क्षतिकातङ्कम् ॥"
इति क्षतिकादशमूलम् ॥ ३१२ ॥
"सप्तपरपुष्करवेतसमूलं वैकङ्कृतदारुकुलत्थ-
समम् ।
जलमत्र सर्वैन्धवहिङ्गुयुतं सद्यो ज्वरक्षतिक-
मूलहरम् ॥"
इति सप्तपरादि ॥ ३१३ ॥
"दग्धमूलीक्षतः क्षारः सद्यः क्षतीक्षणापहः ॥"
इति दग्धमूली ॥ ३१४ ॥ * ॥
अथ मक्षिकामूले ।
"क्षतायां क्षुच्छिरोवस्तिमूलं मक्षिकसंज्ञितम् ।
यवक्षारं पिबेत्तच्च मस्तुनोष्णोदकेन वा ॥
पिप्पल्यादिगणक्वाथं पिबेद्वा लवणान्वितम् ॥"
इति पिप्पल्यादिगणक्वाथः ॥ ३१५ ॥
इति क्षीरोगाधिकारः ॥ * ॥
अथ बालरोगे ।
"भैषज्यं पूर्वसदृष्टं नराणां यज्ज्वरादिषु ।
कार्यमत्रैव बालानां मात्रा त्वस्य कनीयसी ॥
हरिद्रादययष्ट्याह्वसिंहीशुक्लयवैः कृतः ।
ग्रिग्रोर्ज्वरातिसारघ्नः कषायः क्षत्यदोषजित् ॥"
इति हरिद्रादि ॥ ३१६ ॥
"विल्वस्य पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
क्वाथावलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥"
इति विल्वादिक्वाथः ॥ ३१७ ॥
"समङ्गाधातकीलोध्रशारिवाभिः कृतं जलम् ।
दुर्ब्बारेऽपि ग्रिग्रोर्दद्यमतीसारे समाक्षिकम् ॥"
इति समङ्गादि ॥ ३१८ ॥
"नागरातिविषासुस्तबालकैरण्डवैः कृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥"
इति नागरादि ॥ ३१९ ॥
"विल्वमूलकषायेण लाजाश्चैव सशर्कराः ।
आलोड्य पाययेद्बालं छर्द्दयतीसारनाशिनीः ॥"
इति सशर्करलाजयुक्तविल्वमूलकषायः ॥ ३२० ॥
"पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
क्षतविस्फोटदीसर्पज्वरार्त्तां शान्तये ग्रिग्रुः ॥"
इति पटोलादि ॥ ३२१ ॥ * ॥
अथ विषे ।
"कटभ्यर्জ্জুनशारीवयष्टीमुस्तोरिहमत्स्यकः ।
कषायकल्कचूर्णाः स्युः कीटलूताव्रणापहाः ॥"
इति कटभ्यादि ॥ ३२२ ॥ इति चक्रपाणिदत्तः ॥
पाचनं, क्लि, पाचयिता । इति मेदिनी । ने, ६१ ॥
अथ विशिष्टद्रव्याणां विशिष्टं पाचनद्रव्यमाह ।
"अलं मनसपाकाय फलं कदलसम्भवम् ।
कदलस्य तु पाकाय वृक्षैरभिहितं घृतम् ॥
घृतस्य परिपाकाय जम्बीरस्य रसो हितः ॥

पाचनं

नारिकेलफलताजबीजयो:
पाचकं क्षपयति क्षुधं विदु:।
क्षीरमाशु सहकारपाचनं
चारमञ्जनि हरीतकी हिता॥
मधूकमालूरकृपाटनानां
मरुज्वखर्ज्जूरकपित्थकानाम्।
पाकाय पेयं पिचुमर्दबीजं
घृतेऽपि तक्रेऽपि तदेव देयम्॥
खर्ज्जूरमज्जाटकयो: प्रशस्तं
विश्वौषधं कुन्द च भद्रमुस्तम्।
यत्राङ्गबोधिदुग्धेषु प्रीतं
क्षुद्रे तथा वार्य्युषितं प्रशीतम्॥
तक्रेषु पथ्य: पयो हितं
दीप्यकन्तु चिपिटे कषायुतम्।
यद्दिका दधिजलेन जीर्य्यते
कर्कटी च सुमनेषु गीर्य्यते॥"

सुमनेषु गोधूमेषु। गीर्य्यते कथ्यते।

गोधूममाषहरिमन्थसतीलमुद्ग-
पाको भवेज्झटिति मातुलपुत्रकेषु।
खण्डश्च खण्डयति माषभवन्तजीर्णं
तैलं कुलत्थमथवा विदधाति जीर्णम्॥

मातुलपुत्रक: धुस्तूरफलम्॥

कङ्गुश्यामाकनीवारा: कुलत्थाश्चाविलम्बितम्।
दध्नो जलेन जीर्य्यन्ति वैदला: काञ्जिकेन तु॥
पिष्टान्नं घृतलं वारि क्षुद्रां सैन्धवं पचेत्।
माषेक्षुरोनिम्बमूलं पायसं मुद्गयूषके:॥
वटो वैणुवाराम्बुवल्केन पैत्तो-
ग्रमं पर्पट: प्रियुबीजेन याति।
कषायूलतो लड्डुकापूपपृक्षा-
विपाको भवेच्छष्कुलीमण्डयोश्च॥

वेसवार: वेसर इति लोके। तद्यथा,—

स्नेहो निषादिङ्गुलवल्लकैला-
धन्याकजीरार्द्रकनागराणि।
अम्लोषणं सैन्धवपर्णमत्रे
यथोचितं संस्कृतये प्रशीतमिति॥

ग्रट्टा ग्रट्टक: पाचकविशेष:। मक्क: माक्ड इति लोके।

किमत्र चित्रं बहुमत्स्यमांस-
भोजी सुखी काञ्जिकपानत: स्यात्।
इत्यद्भुतं केवलवह्निपक्व-
मांसेन मनुष्य: परिपाकमेति॥

आममात्रफलं मीने तद्वोजं पित्तिते हितम्।
कूर्म्ममांसं यवक्षाराच्छौद्रं पाकमुपेति हि॥
कपोतपारावतगोलकण्ठ-
कपिञ्जलानां पित्तानि सुक्ष्मा।
क्षारस्य मूलं परिपीय पिष्टं
सुखी भवेन्ना बहुशो हि दष्टम्॥
कपोतो धवलपाण्डु:।
ग्राकाशि सर्व्वाण्यपि यान्ति पाकं
क्षारेण सद्यस्तिलनालजेन।
चञ्चूकसिद्धार्थकवास्तुकानां
शाकस्तु सारक्रथितेन पाक:॥

पाचल:

चञ्चूक पेषु इति लोके। शाकस्तु खदिर:॥

पलङ्किकाकेसुककारवेल्ली-
वार्त्ताकुवर्षाङ्कुरमूलकानाम्।
उपोदिकाजाङ्गटपोलकानां
चित्रार्थको मेचरवस्य पक्ता॥

मेचरव: चवराई इति लोके।

विपच्यते शूरणकं गुडेन
तथाम्लकं तण्डुलचोदकेन।
पिण्डालुकं जीर्य्यति कोरदूषात्
कण्टेरुपाक: खिल नागरेण॥

लवङ्गतण्डुलतोयात् सर्पिर्जलीरकाद्यन्नात्।
मरिचादपि तच्छीघ्रं पाकं यात्येव काञ्जिका-
तैलम्॥

क्षीरं जीर्य्यति तक्रेण तद्गव्यं कोष्णमस्ककात्।
माहिषं माक्षिमन्थेन घृतचूर्णेन तद्दधि॥

मस्तक: माक्ड इति लोके।

रसाला जीर्य्यति क्षौद्रात् खण्डं नागरभक्षणात्।
चिता नागरसुस्तेन तथेक्षुक्षारविकारत्वात्॥

जरामिरा गैरिकचन्दनाभ्या-
मभ्येति शीघ्रं सुनिभि: प्रशीतम्।
उष्णेन घृतं घृतिरेव चोष्णं
जीर्णो भवेत् क्षारगणस्तथाम्ले:॥

हरा मदिरा।

तप्तं तप्तं क्षैम वा तारमम्भौ
तोये क्षिप्तं वप्तलवस्तदम्भ:।
पीत्वाजीर्णं तोयजातं निहन्या-
त्तत्र क्षौद्रं भद्रमुस्तं विशेषात्॥

तत्र तोयाजीर्णे। इति भावप्रकाशे जठराग्निविकाराजीर्णविसूचिकालसकविलम्बिकाधिकित्सा॥

पाचन:, पुं, (पाचयतीति। पच्+णिच्+"नन्दि-ग्रहीति।" ३।१।१३४। इति ल्यु:।) अग्नि:। इति मेदिनी। ने, ६०॥ अम्लरस:। इति क्षेमचन्द्र:। ६। २४॥ रक्तैरण्ड:। इति राजनिर्घण्टः॥

पाचनक:, पुं, (पाच्यतेऽनेनेति। पच्+णिच्+करणे ल्युट्। ततः संज्ञायां कन्।) टङ्कण:। इति हेमचन्द्र:। ४। १०॥

पाचनी, स्त्री, (पाच्यते भुक्तद्रव्यादिकं यया। पच्+णिच्+ल्युट्। स्त्रियां ङीप्।) हरीतकी। इति मेदिनी। ने, ६१॥ (पाचयतीति ल्युन्पत्त्या परिपाचके वाच्यलिङ्ग:। यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"कषटकारी सरा तिक्ता कटुका दीपनी लघु:।
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्॥")

पाचलं, क्ली, (पाचयतीति। पच्+णिच्+बाहुलकात् कलन्। यद्वा, पाचं पाचनं लातीति। ला+कः।) पाचनम्। इति मेदिनी। ले, १०६॥

पाचल:, पुं, (पाचयतीति। पच्+णिच्+बाहुलकात् कलन्।) पाचक:। अग्नि:। राजमन्थम्। वायु:। इति शब्दरत्नावली॥

पाञ्चज

पाञ्ची, स्त्री, (पाचयति खपचरसादिप्रक्षेपादिना परिपक्वयति ब्रह्मादिति। पच+णिच्+"सर्व्वधातुभ्य इन्।" उणा॰ ४। ११७। इति इन्। "ऋहिकारादक्तिन:।" ४। १। ४५। इत्यस्य वार्त्तिकोक्त्या ङीष्।) लताविशेष:। पाचि इति पञ्जे इति च हिन्दी भाषा। तत्पर्य्यायः। मरकतपत्री २ हरितलता ३ हरितपत्रिका ४ पत्री ५ सुरभि: ६ मालातिरा ७ गारुत्मतपत्रिका ८। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कषायत्वम्। वातदोषग्रहभूतविकारनाशित्वम्। कफदोषप्रशमनत्वम्। व्रणेषु हितत्वञ्च। इति राजनिर्घण्टः॥

पाज:, [स्] क्ली, (पाति रक्षतीति पाः तेजस्तेनेति वा। पा रक्षणे+"पातेर्डसे च्छुट् च।" उणा॰ ४। २०२। इति असुन् च्छुट्चागमश्च।) बलम्। इत्युणादिकोषः॥ (यथा, ऋग्वेदे ।८।४६।२५।
"आ नो वायो महे तने याहि मखाय पाजसे॥")

पाचकपाल:, त्रि, (पचकपालस्यायमिति। "तस्येदम्।" ४। ३। १२०। इत्यण्।) पचकपालयागसम्बन्धी॥ इति याज्ञिकाः॥

पाञ्चजन्य:, पुं, (पञ्चजने दैत्यविशेषे भव:। "पञ्चजनादुपसंख्यानम्।" ४। ३। ५८। इत्यस्य वार्त्तिकोक्त्या ञ्य:।) विष्णुशङ्ख:। इत्यमर:। १।१।२६॥ "पञ्चजनो नाम दैत्य: सङ्गहे तिमिरूप आसीत् तदस्थिजत्वात्।" इति भरत:॥ (यथा, गौतमायाम्। १। १५।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जय:।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदर:॥"
अस्य विवरणम् यथा, हरिवंशे।८६।१५—१७।
"सगर: प्रभुवाचेदं दैत्य: पञ्चजनो महान्।
तिमिरूपेण तं बालं यस्तवानिति माधव!॥
स पञ्चजनमासाद्य अवाप पुरुषोत्तम:।
न चासस्वाद तं बालं गुरुपुत्रं तदाच्युत:॥
स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्द्दन:।
य: स देवमनुष्येषु पाञ्चजन्य इति श्रुत:॥"
पञ्चभि: काश्यपवह्निदुग्धाज्झिरसश्वयथुभिर्जनैर्निर्वृत्त:। इति अण्।) अग्नि:। इति मेदिनी। ये, १२२॥ (यथा, महाभारते।३।२१६।१-५।
"काश्यपो ह्यथ वाग्निष्ठ: प्राज्यश्च प्राज्यपुत्रक:।
अग्निराङ्गिरसश्चैव श्यवनश्चिसुवर्चक:॥
अचरत् स तपश्चोग्रं पुत्रार्थे बहुवार्षिकम्।
पुत्रं लभेयं धर्म्मिष्ठं यशसा ब्रह्मणा समम्॥
महाव्याहृतिभिर्धौत: पञ्चभिस्तेजसा वृत:।
जज्ञे तेजो महार्चिष्मान् पञ्चवर्ण: प्रभावन:॥
समिद्धोऽग्नि: शिरस्तस्य बाहू सूर्य्यनिभौ तथा।
लङ्गूले च सुवर्णाभे जज्ञे जङ्घे च भारत!॥
पञ्चवर्ण: सुतपसा ज्ञातस्तै: पञ्चभिर्जनै:।
पाञ्चजन्य: स्मृतो देव: पञ्चवर्णप्रकरस्तु स:॥"
हारीतसुनिवर्ण्यायस्य दीर्घबुद्धे: पुत्र:। इति स्कन्दपुराणे ब्रह्मारिखण्डम्। १। २७। ४२॥)

पाञ्चजन्यधर:, पुं, (पाञ्चजन्यं तदाख्यया प्रसिद्धं शङ्खं धरतीति। धृ+अच्।) विष्णु:। इति हारावली॥

पाञ्चाली

पाञ्चालिका, स्त्री, (पञ्चाली + स्वार्थे कन् । ततः कन् ततश्चापि अत इत्वञ्च ।) पञ्चालिका । इति भरतहिरूपकोषः ॥

पाञ्चग्रन्थिकं, क्ली, (पञ्चभिः ग्रन्थैर्निर्वृत्तम् । "तेन निर्वृत्तम् ।" ५ । १ । ७९ । इति ठक् ।) पञ्चप्रकारवाद्यम् । यथा, स्कान्दे रेवाखण्डे ।

"अङ्गजं चर्मजञ्चैव तन्त्रजं कांस्यजं तथा ।
घनवातञ्चेति मुनिभिः कथितं पाञ्चग्रन्थिकम् ॥"

पाञ्चार्थिकः, पुं, (पञ्चार्थाः सम्बन्धाः । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) पाशुपतः । यथा,—

"पाञ्चार्थिकः पाशुपतश्चिह्नपः स्यूर्तिमाञ्जतः ॥"

इति त्रिकाण्डशेषः ॥

पाञ्चालं, क्ली, (पञ्चाल एव । पञ्चाल + स्वार्थे अण् ।) ग्राम्यम् । यथा,—

"पिष्टकूर्मपुरुषा ह्याहुतिशेषेण पुरञ्जनः ।
राज्ञः दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥

इति श्रीभागवते ।४। पुरञ्जनोपाख्याने ।२५।५०॥

"पञ्चानां विषयाणामन्यतोऽवगतानां प्रकाशनायालमिति पञ्चालं ग्राम्यम् ।" इति ।

"प्रकृतञ्च निकृतञ्च ग्राम्यं पञ्चालसंज्ञकम् ।"

इति च तट्टीकायां श्रीधरस्वामी ॥

अत्र पञ्चालमिति पाठः किन्तु स्वार्थे ञ्यप्रत्यये पाञ्चालमपि भवति ॥

पाञ्चालः, त्रि, (पञ्चाले तदाख्यया प्रसिद्धे प्रदेशे भवः । "तत्र भवः ।" ४ । ३ । ५३ । इत्यण् ।) पञ्चालदेशोद्भवः ॥

पाञ्चालः, पुं, (पञ्चभिः प्रधानाभिर्नदीभिरलति पर्य्याप्नोतीति पञ्चालः । ततः स्वार्थे अण् ।) देशविशेषः । स तु हुपदराजनगरम् । अधुना फरक्काबाद इति ख्यातः ॥ (यथा, महाभारते । १ । १३८ । ३ ।

"पाञ्चालराजं द्रुपदं गृहीत्वा रथानहूनि ।
पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा ॥"

तद्देशवासिषु पुंभूम्नि ।) यथा,—

"पाञ्चालाश्चेदिमत्स्याश्च शूरसेनाः पटच्चराः ।"

इत्यादि विराटपर्व्व ॥

(ब्रह्मदत्तस्य सहचरविशेषः । यथा, हरिवंशे । २३ । २२ ।

"पाञ्चालकखरीकाख्यां तस्य सख्यमभूत्तदा ॥")

पाञ्चालिका, स्त्री, (पाञ्चाली + स्वार्थे कन् । ततो दस्वञ्चाप् च ।) वस्त्रदन्तादिजसपुत्तलिका । तत्पर्य्यायः । पुत्रिका २ । इत्यमरः ॥ पञ्चालिका ३ । इति भरतः ॥ ग्राम्यभङ्गी ४ । इति हेमचन्द्रः ॥ पाञ्चाली ५ ग्राम्यभङ्गिका ६ । इति जटाधरः ॥ (रीतिविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ६ । ५ ।

"————————वर्णैः प्रौढैः गुणदयोः ।
समस्तपञ्चपदी बन्धः पाञ्चालिका मता ॥")

पाञ्चाली, स्त्री, (पञ्चभिर्वर्णैरलतीति । अल + अच् । गौरादित्वात् ङीष् ।) पाञ्चालिका । (यथा, देवीभागवते । ७ । १८ । ४ ।

"यज्ञाया मोहितश्चाहं सदावर्त्ते परात्मनः ।
परवान् दारुपाञ्चाली मायिकस्य यथा वशे ॥")

(पाञ्चाले भवा । पाञ्चाल + अण् । स्त्रियां ङीप् ।) पाञ्चालपत्नी । तत्पर्य्यायः । कृष्णा २ पाण्डुपुत्रप्रिया ३ पार्षती ४ द्रौपदी ५ याज्ञसेनी ६ वेदिजा ७ । इति जटाधरः ॥ वैरन्ध्री ८ नित्ययौवना ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १६८ । ४१ ।

"कुमारी चापि पाञ्चाली वेदीमध्यात् समुत्थिता ॥"

अस्य अज्ञादिविवरणं द्रौपदीशब्दे द्रष्टव्यम् ॥

रीतिविशेषः । पाञ्चालानां प्रियत्वादेवास्याः तथात्वम् । यथा, साहित्यदर्पणे । ६ । २ ।

"वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा ॥"

एतल्लक्षणं यदाह भोजः ।

"समस्तपञ्चपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमारार्थ पाञ्चालीं कवयो विदुः ॥")

पाट्, ध, (पाटयति कार्य्यान्तरप्रेरणात् पूर्व्वकार्य्यं क्षेपयतीति । पट + णिच् + क्विप् ।) सम्बोधनम् । इत्यमरः । ३ । ४ । ७ ॥

पाटकः, पुं, (पाटयति दीप्यतीति । पाटि + ण्वुल् ।) महाकिरुः । कटकान्तरम् । वाद्यम् । अश्वादिपालनम् । मूलद्रव्यापचयः । दोषः । इति मेदिनी ॥ ग्रामैकदेशः । इति हेमचन्द्रः ॥ (पाटयति छिनत्तीति । क्षेदके । भेदके, त्रि । यथा, हरिवंशे । १७१ । १४ ।

"अहं तमो घनीभूतमहमेव च पाटकः ॥")

पाटचरः, पुं, (पाटयन् छिन्दन् चरतीति । चर + पचाद्यच् । पृषोदरादित्वात् साधुः ।) चौरः । इत्यमरः ॥ (यथा, प्रद्युम्नविजये । ७ अङ्के ।

"मन्त्रिन् ! कुलिङ्गसाहसिकत्वं किलैतस्य पापपाटचरस्य ॥")

पाटनं, क्ली, (पट + णिच् + भावे ल्युट् ।) क्षेदनम् । यथा,—

"अक्षिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पाटने कर्णयङ्गानां मासार्द्धन्तु यवान् पिबेत् ॥"

इति प्रायश्चित्ततत्त्वे यमः ॥

पाटलं, क्ली, (पाटलो वर्णोऽस्यास्तीति । पाटल + अर्श आदित्वादच् ।) पाटलीपुष्पम् । इत्यमरः ॥ गोलावाख्यपुष्पमिति केचित् ॥ (यथा, भागवते । ४ । ६ । १४ ।

"पाटलाशोकवकुलैः कुन्दैः कुरवकैरपि ॥"

पाटलीति केचित् ॥)

पाटलः, पुं, (पाटयतीति । पट + णिच् + कृषादित्वात् कलच् ।) श्वेतरक्तवर्णः । गोलाविशेष इति भाषा । आशुधान्यम् । इत्यमरः ॥ अस्य गुणाः । अतुष्यत्वम् । वह्निनिष्क्रान्तित्वम् । त्रिदोषकारित्वञ्च । इति राजवल्लभः ॥ तद्वर्णयुक्ते, त्रि ॥ (यथा, रघौ । २ । २६ ।

"स पाटलायां गवि तस्थिवांसं
बहुर्द्वरः क्षेत्ररिवं ददर्श ।

अधिज्यकायामिव धातुमत्तां
लोध्रद्रुमं साधुमतः प्रफुल्लम् ॥")

पाटलद्रुमः, पुं, (पाटलस्य पाटलपुष्पस्य द्रुमो वृक्षः । यद्वा, पाटलो द्रुमः इति नित्यकर्म्मधारयः ।) पुन्नागवृक्षः । इति राजनिर्घण्टः ॥

पाटला, स्त्री, (पाटलो वर्णोऽस्यस्याः । पाटलवर्णत्वादेवास्यास्तथात्वम् ।) दुर्गा । यथा,—

"अपर्णैकपर्णा च पाटला पाटलावती ॥"

इति तन्त्रसारे तस्याः शतनामस्तोत्रम् ॥

पुष्पवृक्षविशेषः । पारुल इति भाषा ॥ तत्पर्य्यायः । पाटलिः २ अमोघा ३ काक्षस्थाली ४ फलेरुहा ५ शुक्लवृन्ता ६ कुबेराक्षी ७ । इत्यमरः ॥ ताम्रपुष्पी ८ कुक्षिका ९ सुपुष्पिका १० वसन्तदूती ११ स्थाली १२ क्षिरगन्धा १३ अम्बष्ठी १४ कालवृन्ती १५ । इति राजनिर्घण्टः ॥ मधुदूती १६ कालास्थली १७ अलिवल्लभा १८ । इति भावप्रकाशः ॥ कामदूती १९ कुम्भी २० लोयाधिवासिनी २१ । इति रत्नमाला ॥ अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातगुल्मोपाध्मानवमिश्वासक्षिप्रपातनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । अगुरुत्वम् । दोषत्रयाद्यधिष्ठिक्काक्षयनाशित्वञ्च ॥ तत्फलगुणाः । कषायत्वम् । मधुरत्वम् । हिमत्वम् । स्नेहत्वम् । कफवातनाशित्वञ्च । तत्फलगुणाः । पित्तातिसारदाहनाशित्वम् । हिक्कारुधिरपित्तकारित्वञ्च । इति भावप्रकाशः ॥ * ॥ तदुत्पत्तिर्यथा,—

"गते ब्रह्मणि सर्व्वोऽपि तपः संत्यज्य तं सदा ।
लिङ्गं चित्रवने स्थाप्य प्रतिष्ठाप्य चचार ह ॥
विचरन्तं तदा भूयो मदेशं कुसुमायुधः ।
आरात् स्थित्वाथतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमथतो दृष्ट्वा क्रोधाध्मातदृशा हरः ।
क्षारमालोकयामास शिखाथ्यरुणाल्किम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् पादादारभ्य कक्षवत् ॥
प्रदह्यमानौ चरणौ दृष्ट्वाथौ कुसुमायुधः ।
उत्ससर्ज धनुः श्रेष्ठं तज्जगामाथ पञ्चधा ॥
यदङ्गुष्ठिवत्यस्तु रक्तपृष्ठो महाप्रभः ।
स चम्पकतरुर्जातः सुगन्धाढ्यो गुणान्वितः ॥
नासाग्रस्थं शुभाकारं यदासीद्वृक्षभूषितम् ।
तज्जातं केशरारण्यं बकुलं नामतो भुवि ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजिविभूषिता ॥"

इति वामने ६ अध्यायः ॥

रक्तलोधः । इति शब्दचन्द्रिका ॥

पाटलापुष्पसन्निभं, क्ली, (पाटलापुष्पस्य सन्निभा सादृश्यं यत्र ।) पद्मकाष्ठम् । इति राजनिर्घण्टः ॥

पाटलिः, स्त्री, (पाटि + भावे घञ् । पाटो दीप्तिरस्तं लातीति । ला + "आतश्च ह्रः ।" उणा ४ । १३८ । इति ह्रः । पाटलिपुष्पाद्यां अतिशुक्लीकृतायेवाख्या तथात्वम् ।) पाटलापुष्पवृक्षः । इत्यमरः ॥

पाटीरः

(यथा, महाभारते । ७ । २२ । १५ ।
"तन्तु पाटलिपुष्पाणां समवर्णा हयोत्तमाः ।
वहमाना वराजग्मुः मल्लस्वामिन्नघातिनः ॥")

पाटलिपुत्रं, क्ली, (पाटलिः पुत्र इव यस्य । बहुपाटलिवृक्षोत्पत्तिस्थानत्वेनास्य तथात्वम् ।) नगरविशेषः । पाटना इति ख्यातः । तत्पर्य्यायः । कुसुमपुरम् २ । इति हेमचन्द्रः । ४ । ४२ ॥ पुष्पपुरम् ३ पाटलिपुत्रकम् ४ । इति त्रिकाण्डशेषः ॥ (इदन्तु गङ्गातीरस्थम् । यथा हितोपदेशे । "अस्ति भागीरथीतीरे पाटलीपुत्रनामधेयं नगरम् ॥"
इदमेव पुरा मगधानां राजधानी आसीत् । अत्रत्यसुदर्शननाम्नो भूपतेः पुत्राणां नीतिविद्याधिगमाय विष्णुशर्म्मणा पञ्चतन्त्रहितोपदेशाख्यो ग्रन्थो विरचितः ॥)

पाटली, स्त्री, (पाटं दीप्तिं लातीति । ला + कः । स्त्रियां ङीप् ।) कटभीवृक्षः । सुष्ककदलः । इति राजनिर्घण्टः ॥ (यथा, रघुवंशे १ अध्याये ।
"पुष्पे रक्तजटामूलं सुखस्थं कारयेद्बुधः ।
ताम्बूलादौ प्रदातव्यं वश्या भवति निश्चितम् ।
तथैव पाटलीमूलं ताम्बूलेन तु वश्यकृत् ॥")

पाटवं, क्ली, (पटोर्भावः कर्म्म वा । पटु + "इगन्ताच्च लघुपूर्ब्बात् ।" ५ । १ । १३१ । इत्यण् ।) पटुता । यथा । "पाटवं संस्कृतोक्तिषु ।" इति हितोपदेशः ॥ (दार्ढ्यम् । यथा, पञ्चतन्त्रे । ३ । ६३ ।
"विचिन्त्यते कदाचित् धीः कर्म्मणा भोगदायिना ।
पुनः समाहिता सा स्यात् तदैवाभ्यासपाटवात् ॥")
आरोग्यम् । इति राजनिर्घण्टः ॥ (पटोरस्याः पाटवाः । इति सिद्धान्तकौमुदी ॥)

पाटविकः, त्रि, (पाटवं पटुत्वमस्यास्ति । पाटव + ठन् ।) पटुः । धूर्त्तः । इति त्रिकाण्डशेषः ॥

पाटहिका, स्त्री, (पाटहं पटहावयवः तद्दलतिरस्यस्याः । पाटह + ठन् । टकारादेशाद्यतिसङ्गत्यादेवाख्यातत्वम् ।) गुञ्जा । इति शब्दरत्नावली । २७५ ॥

पाटिनं, त्रि, (पाट्यते स्म इति । पट + णिच् + क्तः ।) छेदपाटनम् । तत्पर्य्यायः । दारितम् २ भिन्नम् ३ । इति हेमचन्द्रः ॥ (यथा, सुश्रुते । २ । २६ ।
"पाटितमपि बहुविदारितं वेदनावच्च ॥")

पाटी, स्त्री, (पाटयतीति । पाटि + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् । स्त्रियां वा ङीष् ।) वलाशुपः । इति राजनिर्घण्टः ॥ परिपाटी । अनुक्रमः । यथा, "पाटीं सङ्गणितस्य वक्ष्मि चतुरप्रीतिप्रदां प्रस्फुटाम् ।" इत्यादि लीलावती ॥

पाटीरः, पुं, पटीरः । इति विश्वः । (यथा, हरिवंशे भविष्यपर्व्वणि ३२ ।

पाठः

"लाटीनेत्रपुटीपयोधरघटीरेवातटीदुष्कुटी
पाटीरद्रुमवर्ब्बनेन कविभिर्मूढैर्दिनं नीयते ।
गोविन्देति जगाद्गुरेति जगतां नाथेति शम्भोरिति
चाहारैः समयस्तदेकमनसां पुंसामतिक्रामति ॥")

पाठ्यं, क्ली, (पठ्यस्य इदम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) पठ्यग्रन्थम् । यथा,—
"पाठ्यग्रन्थन्तु मधुरं दुर्ज्जरं गुरुपाकि च ॥"
इति राजवल्लभः ॥
(पाटि + यत् । पाटनीये । हेये, त्रि ॥)

पाठः, पुं, (पठनमिति । पठ + भावे घञ् ।) विधिना वेदस्याध्ययनम् । (पठ + णिच् + भावे घञ् ।) शिष्यायाध्यापनम् । तत्पर्य्यायः । महायज्ञः २ ब्रह्मयज्ञः ३ पठनम् ४ पाठना ५ पाठनम् ६ अध्ययनम् ७ अध्यापनम् ८ अध्यापना ९ अध्यसनम् १० । इत्यमरभरतौ ॥ निपाठः ११ निपठः १२ । इति सङ्कीर्णवर्गे अमरः ॥ * ॥ भाट्टालंग्रादिपाठे तु ॐ नारायणाय नमः ॐ नराय नमः ॐ नरोत्तमाय नमः ॐ देव्यै नमः ॐ सरस्वत्यै नमः ॐ व्यासाय नमः । इति मत्वा पाठ्यम् ।
"नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥"
इति विधिः ॥
एवञ्च भागवतीयस्तुतौ उदीरयेत् इत्यस्य स्वयमन्यथा उदीरयन्नन्यान् पौराणिकानुपाध्यायतीति श्रीधरस्वामिव्याख्यानमनुपपन्नविवक्षम् । यैवेति भारतपाठाशयकारेण व्यासो लब्धः । भागवते चैवेत्यत्र व्यास इति व्याख्यालिखितम् । जयपदार्थमाह ब्रह्मचारिकाण्डे भविष्यपुराणम् ॥
"अष्टादशपुराणानि रामस्य चरितन्तथा ।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्मांश्च भारत ! ॥
कार्ष्णञ्च पञ्चमो वेदो यन्महाभारतं स्मृतम् ॥"
कार्ष्णं कृष्णद्वैपायनप्रणीतम् ।
"सौराश्च धर्म्मा राजेन्द्र मानवोक्ता महीपते ।
जयेति नाम एतेषां प्रवदन्ति मनीषिणः ॥"
जयन्नामेन संसारमिति जयस्तद्ग्रन्थः । एवञ्चार्थानवलोकनात् आचारादा श्लोकादावेव श्लोकः पठ्यते । मत्स्यसूक्ते वाराहीतन्त्रे च ।
"प्रणवञ्चादौ जपेच्च श्लोकं वा संहितां पठेत् ।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः ॥
सर्व्वत्र पाठे विघ्नेशो ह्यन्यथा विफलं भवेत् ।
मुक्तेनानन्यचित्तेन पठितव्यं प्रयत्नतः ॥
न कार्य्यासक्तमनसा कार्य्यं श्लोकस्य वाचनम् ।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः ॥
हस्तसंस्थापनादेव यस्मादध्यफलं भवेत् ।
स्वयञ्च लिखितं यत्तु ह्यन्यैना लिखितन्न यत् ॥
अन्यालेखेन लिखितं तच्चापि विफलं भवेत् ।
ऋषिच्छन्दादिकं नास्य पठेत् श्लोकं विचक्षणः ॥
श्लोके न ह्रस्यते यच्च प्रणवन्नाक्षमाचरेत् ।
सङ्ख्यिते श्लोकपाठे संख्यां ज्ञात्वा पठेत् सुधीः ॥
अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन ।
ऋते विरामे मध्ये तु अध्यायादिं पठेन्नरः ॥"

पाठः

ततश्च मार्कण्डेयपुराणीयदेवीमाहात्म्यस्तवादौ ऋषिच्छन्दादिकं पठेत् । तद्यथा । प्रथमचरितस्य ब्रह्म ऋषिर्महाकाली देवता गायत्री छन्दो नन्दा शक्तिः रक्तदन्तिकाबीजमग्निस्तत्त्वं महाकालीप्रीत्यर्थं जपे विनियोगः । मध्यमचरितस्य विष्णुर्ऋषिर्म्महालक्ष्मीर्देवतानुष्टुप् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं वायुस्तत्त्वं सरस्वतीप्रीत्यर्थं जपे विनियोगः । उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता उष्णिक् छन्दो भीमा शक्तिर्भ्रामरी बीजं सूर्य्यस्तत्त्वं सरस्वतीप्रीत्यर्थं जपे विनियोगः ॥ नैमित्तकालिकस्तवतौ भविष्यपुराणम् ॥
"इतिहासपुराणानि श्रुत्वा भक्त्या महीपते ।
मुच्यते सर्व्वपापेभ्यो ब्रह्महत्यादिभिर्विभो ॥
ब्राह्मणं वाचकं विद्यान्नान्यवर्णसमादरात् ।
श्रुत्वान्यवर्णजाद्राजन् ! वाचकान्नरकं व्रजेत् ॥"
तथा ।
"देवार्चामग्यतः श्रुत्वा ब्राह्मणानां विशेषतः ।
यत्किञ्च ग्रन्थिजं कुर्य्याद्वाचकः कुशलव्रतः ॥
पुनर्ब्भक्षीत तत् सूत्रं न श्रुत्वा धारयेत् क्वचित् ।
हिरण्यं रजतं गाञ्च तथा काञ्चोपदोहनाः ॥
दत्त्वा तु वाचकायेह श्रुतस्याप्नोति यत् फलम् ।"
काञ्चोपदोहनाः काञ्चकोड़ाः ।
"वाचकः पूजितो येन प्रसन्नस्तस्य देवताः ॥"
तथा ।
"ज्ञात्वा सर्व्वसमाप्तिञ्च पूजयेद्वाचकं बुधः ।
आत्मानमपि विक्रीय य इच्छेत् सफलं क्रतुम् ॥"
तथा ।
"विस्तरमहतं ग्रान्थं सङ्क्षारपदन्यथा ।
कलस्वरसमायुक्तं रसभावसमन्वितम् ॥
वृध्यमानः सदर्थं वै ग्रन्थार्थं श्रृणुयान्नृप ।
ब्राह्मणादिषु सर्व्वेषु ग्रन्थार्थज्ञार्पयेन्नृप ॥
य एवं वाचयेद्ब्रह्मन् स विप्रो याति उच्यते ॥"
तथा ।
"सप्तस्वरसमायुक्तं काले काले विराजते ।
प्रदर्शयन्सुवान् सर्व्वान् वाचयेद्वाचको नृप ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
पाठस्याष्टादशदोषा यथा,—
"शङ्कितं भीतमुद्भुटमव्यक्तमनुनासिकम् ।
विस्वरं विरसञ्चैव विलिष्टं विषमाहतम् ॥
काकस्वरं शिरःकम्पं तथा स्थानविवर्ज्जितम् ।
आकुलं तालहीनञ्च पाठदोषाश्चतुर्दश ॥
संगीतं शिरसः कम्पमव्यक्तञ्चाष्टमन्तथा ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अध्ययनक्रमो यथा,—
"आचम्य प्रयतो नित्यमधीयीत उदङ्मुखः ।
उपसंगृह्य तत्पादौ वीक्षमाणो गुरोर्मुखम् ॥"
अध्यापनक्रमो यथा,—
"अधीष्व भो इति ब्रूयादिरामोऽस्त्विति चाचमेत् ।
प्राक् कूलान् पर्य्युपासीनः पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।
ब्राह्मणः प्रणवं कुर्य्यादन्ते च विधिवद्द्विजाः ॥

कुर्यादध्यायनं नित्यं च श्राद्धादौपि पूर्ववत्। सर्व्वेषामेव भूतानां वेदश्चक्षुः सनातनः॥ अधीयीताध्ययनित्यं श्राद्धकर्म्माङ्गतोऽन्यथा॥"

इति कौर्म्मे उपविभागे १३ अध्यायः॥ *॥

पाठनिषेधकालो यथा। पक्षहेऽनध्यायो न ह्रस्वोपरागमात्रविषयः।

"आर्द्रं नक्षत्रमेतेषु राज्ञो राहोश्च सूतके।" इति मनुवचनेन सामान्यतो निषेधात्॥

एव श्राद्धानध्यायो यज्ञाङ्गविषय इति मिताक्षरा अन्यत्र लघोरात्रमनध्यायो वायुवचनात्। यथा,—

"अन्धागर्च्छितनिर्घातभूकम्पोल्कापिपातने। समाप्य वेदं मुनिश्रेष्ठमारण्यकमधीत्य च॥ पञ्चदश्यां चतुर्द्दश्यामष्टम्यां राहुसूतके। ऋतुसन्धिषु सन्ध्या वा आहिर्त्रं प्रतियत्न च॥"

मुनिश्रेष्ठोरात्रम्। वैश्वदेवबलिकर्म्मग्रहोपरागादिप्रतिषेधो नित्याः इति ब्रह्मचारिकाण्डधृतहारीतवचने एतासामनध्याये नित्यत्वाभिधानादेतासां काम्यत्वम्। आदिप्रतिषेधः सुखप्रतिषेधः॥

"सा च यौधिष्ठिरी सेना गाङ्गेयशरताडिता। प्रतिपत्पाठशीलानां विद्यैव सप्तमी गता॥"

इति व्यासवचनमपि तावच्छास्त्रपरम्॥ *॥

गोतमोक्ताकालिकानध्याया यथा,—

आकालिकनिर्घातभूकम्पराहुदर्शनोल्का इति आकालिका इति। निमित्तकालमारभ्य परेद्युर्यावत् स एव कालस्तावत्कालत्वञ्च भवाः॥ तथा,—

"विद्युत्स्तनितवर्षेषु महोल्कानाञ्च संप्लवे। आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥" *॥

उल्कादिषु प्रतिप्रसवमाह मनुः।

"वेदोपकरणे चैव स्वाध्याये चैव नित्यके। नानुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि॥"

पराशरभाष्ये कूर्म्मपुराणम्।

"अनध्यायस्तु गाङ्गेषु नेतिहासपुराणयोः। न धर्म्मशास्त्रेष्वन्येषु धर्म्महेतानि वर्ज्जयेत्॥"

नारदः।

"अयने विषुवे चैव ग्रयने वोभयोः सुरेः। अनध्यायस्तु कर्त्तव्यो सन्ध्यादिषु युगादिषु॥" *॥

सन्ध्यागर्जने प्रायश्चित्तान्निन्दामाह अत्रिः।

"सन्ध्यायां गर्जितं मेघे प्रायश्चित्तं करोति यः। चत्वारि तस्य नश्यन्ति आयुर्विद्या यशो बलम्॥ प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिस्वने। सन्ध्योतिः स्नादनध्याय इत्याह भगवान् मनुः॥"

इति मनुवचनं वर्षाविषयम्॥ *॥

अहन्यादिषु विशेषमाह शैमाद्रिधृतापस्तम्बः।

"उदयास्तमिते वापि सुपूर्णेऽपरगामि यत्। तद्दिनं तदहोरात्रमनध्यायविदो विदुः॥ केचिदाहुः सन्ध्यहेनं यावत्तु दिनगामिका। तावदेव भवेदध्यायो न तस्मिन् दिनान्तरे॥"

तद्दिनं तां तिथिं प्राप्येत्यर्थः। दिनान्तरे तिथ्यन्तरे। अत्र पूर्ववचनस्योत्तरमीमांसाध्यायिभिः परिग्रहीतम्। परवचनन्तु अन्यव्यवहारपरम्। यत्तु निर्णयाब्धृतम्।

"प्रतिपद्वेदमात्रेषु कलामात्रेषु चाष्टमी। दिनं दूषयते सर्व्वं सुरा मद्यघटं यथा॥"

तदप्यनेन वचसा प्रत्यभिधानात् पूर्ववर्त्तिनामात्रेण सर्व्वदिनदूषणाय। राजमार्त्तण्डे।

"प्रे को चे चा द्वितीयाद्याः प्रेतपक्षे गते हुया। या तु कोजागरे याते चैत्रावद्याः परेऽपि याः॥ चातुर्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः। सर्व्वाध्येताध्ययनाध्यायः पुराणैः परिकीर्त्तितः॥"

इति तिथ्यादितत्त्वम्॥

पाठकः, त्रि, (पाठयति अध्यापयतीति। पठ+णिच्+ण्वुल्।) उपाध्यायः। इति हेमचन्द्रः। २। ७८॥ (यथा, महाभारते। ३।३१२।१०५।

"पठका: पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः। सर्व्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः॥")

धर्म्मभाषकः। इति त्रिकाण्डशेषः॥ (पठतीति। पठ+ण्वुल्। वाचकः। अध्येता।

"चर्व्वणं गिलनञ्चापि कासितं श्वासितञ्जथा। नीचोच्चश्चैव गम्भीरं वर्ज्जयेत् पाठकः सुधीः॥"

इति चारीते प्रथमस्थाने प्रथमेऽध्याये॥)

पाठभूः, स्त्री, (पाठस्य भूर्भूमिः स्थानमित्यर्थः।) ब्रह्मारण्यम्। वेदादिपाठस्थानम्। इति त्रिकाण्डशेषः॥

पाठमञ्जरी, स्त्री, (मञ्जु सुन्दरं यथा तथा राजति शब्दायते इति। मञ्जु+रै+कः। स्त्रियां ङीप्। एषोदरादिलोपः। ततः पाठस्य मञ्जरी वाचिकेव।) शारी पक्षिणी। इति शब्दमाला॥

पाठशाला, स्त्री, अध्ययनगृहम्। पाठस्य अध्ययनस्य शाला गृहम्। इति षष्ठीतत्पुरुषसमासनिष्पन्ना॥

पाठशालिनी, स्त्री, (पाठेन शालते शोभते इति। शाल+णिनिः+ङीप्।) शारी पक्षिणी। इति शब्दमाला॥

पाठा, स्त्री, (पठ्यते बहुगुणवत्तया कथ्यते इति। पठ+कर्म्मणि घञ्। अजादित्वात् टाप्।) लताविशेषः। आकनादि इति भाषा। तत्पर्य्यायः। अम्बष्ठा २ अम्बष्ठिका ३ प्राचीना ४ पाषपेलिका ५ यूथिका ६ शारणी ७ मेषशृङ्गी ८ विश्वक्सेनिका ९ एकाष्ठीला १० कुचेला ११ दीपनी १२ वनतिक्तिका १३ तिक्तपुष्पा १४ हृद्यगन्धा १५ शिशिरा १६ वृक्षी १७ माल्यली १८ वरा १९ देवी २० वृत्तपर्णी २१। अस्या गुणाः। तिक्तत्वम्। गुरुत्वम्। उष्णत्वम्। वातपित्तज्वरपित्तदाहातीसारशूलनाशित्वम्। भग्नसन्धानकारित्वञ्च। इति वैद्यकम्॥ *॥

"अम्बष्ठा वालिका बाला ग्रन्थाम्बा वालिजाम्बिका।
अम्बा च नागिका चैव हृद्यगन्धा मनोरिका॥
ग्रन्थपर्णी चित्रपृष्पी श्रेयसी सुखवाचिका।
छिन्नपर्णी भूरिमल्लिर्विश्वेया षोढ़ाह्वया॥
अम्बष्ठा सकषायाम्बा कषकण्ठरुजापहा।
वातामयवलासघ्नी सचित्रहीपनी मता॥"

इति राजनिर्घण्टः॥

"पाठाम्बष्ठाम्बष्ठकौ च प्राचीना पापचेलिका।
एकाष्ठीला स्वर्णा प्रोक्ता पाठिका वरतिक्तिका॥
पाठोम्बा कटुका तीक्ष्णा वातश्लेष्महरी लघुः।
हन्ति शूलज्वरच्छर्द्दिकृमिहृत्पीनसारुचीः॥
दाहकण्डूविषश्वासकफमेदोव्रणान्नजान्॥"

इति भावप्रकाशः॥

पाठिका, स्त्री, (पाठा+स्वार्थे कन्। टापि अत इत्वञ्च।) पाठा। इति भावप्रकाशः॥

पाठी, [न्] पुं, (पाठेव आकृतिर्विद्यते अस्य। पाठा+इनिः।) चित्रकवृक्षः। इत्यमरः॥ (पाठोऽस्यास्तीति। "अत इनिठनौ।" ५।२।११५। इति इनिः।) पाठविशिष्टः॥ (कर्म्मोपपदेनास्य प्रमाणं यथा, मार्कण्डेये। ६८। २६।

"वह्निनामथ वृक्षाणां विष्टानां शास्त्रपाठिनाम्॥")

पाठीकूटः, पुं, (पाठीं कूटतीति। कूट+"दृग्रुपधस्येति।" ३।२।१३५। इति कः।) चित्रकवृक्षः। इति राजनिर्घण्टः॥

पाठीनः, पुं, (पाठिं पृष्ठं नमयतीति। पाठि+नम+घञ्+"अन्येष्वपीति।" दः।"अन्येषामपि दृश्यते।" ६।३।१३७। इति दीर्घः।) मत्स्यविशेषः। बोयालि इति भाषा। तत्पर्य्यायः। वृहत्सदंष्टः २। इत्यमरः॥ वृहत्सदंष्ट्री ३ घोदालः ४ वदालकः ५। इति शब्दरत्नावली॥ (यथा, मनुः। ५। १६।

"पाठीनरोहितावाद्यौ नित्यौ हव्यकव्ययोः॥")

अस्य गुणाः। स्नेग्धत्वम्। स्निग्धत्वम्। मधुरत्वम्। कषायत्वम्। बल्यत्वम्। हृद्यत्वम्। पाके कटुत्वम्। रोचनत्वम्। वातपित्तजित्त्वञ्च। इति राजवल्लभः॥ (यथा च।

"पाठीनः स्नेग्धको हृद्यो निद्रासुः शिशिरात्मकः।
दूषीदग्निपित्तञ्च कुष्ठरोगं करोत्यपि॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

पाठकः। गुग्गुलुद्रुमः। इति मेदिनी। के, ८६॥

पाठ्यं, त्रि, (पठ्यते इति। पठ+"अचो यत्।" ३।१।१२४। इति यत्।) पठनीयम्। पठितव्यम्। यथा,—

"तिष्ठ रे तिष्ठ कण्ठोष्ठ कुक्षयामि हठादहम्।
अपठ्यं पठतः पाठ्यमभिगोहि पठस्व ते॥"

इति नैषधे १७ सर्गः॥

पाठ्यः, पुं, (पठ्यते अवश्यिक्षयतेऽनेनेति। पठ+करणे यत्।) पाणिः। इति शब्दचन्द्रिका॥ (पठ+भावे यत्। पठनम्। समवः। यथा, महाभारते। २। ५०। ८।

"दीर्घामर्षे पार्थिव! मा विद्यूहां
कुरुष्व पाठ्यञ्च चिरन्न सा क्षयाः॥")

पाणिः, स्त्री, (पक्षायस्मै अवहरन्त्यस्मादिति। पक्ष+"अग्निपक्ष्याण्यो रक्षायसुकौ च।" उणा ४। १३२। इति इन् आयप्रत्ययस्य सुक् च।) पक्षयवौषौ। इत्यु-णादिकोषः॥

पाणिः, पुं, (पक्षायस्मै अवहरन्त्यनेन। पक्ष+ अवहारे+ "अग्निपक्ष्याण्यो रक्षायसुकौ च।" उणा ४। १३२। इति इन् आयप्रत्ययस्य सुक् च।) स च मणिबन्धावधङ्गुलिपर्य्यन्तभागः। स तु गर्भस्थबालकस्य मासदयेन भवति॥ इति सुबोधः॥ तत्पर्य्यायः। पक्षशाखः २ शयः ३ समः ४ हस्तः ५ करः ६। इत्यमरभरतौ॥ भुजः ७। इति जटाधरः॥ कुलिः ८। इति शब्दरत्नावली॥ भुजादलः ९। इति त्रिकाण्ड-शेषः॥ (यथा, देवीभागवते। २। २। १९।

"नखगणाभिसुगन्धां तां लक्ष्मीं कान्तां मनो-रमाम्।
जग्राह दक्षिणे पाणौ मुनिर्मैत्रजघपीडितः॥")

कुलिकहस्तः। इति रत्नमाला॥ कुलियाकड़ा इति भाषा॥

पाणिकच्छपिका, स्त्री, (कच्छपः कूर्म्मस्तदाकारो-ऽस्यस्याः। कच्छप+ठन्। टापि अत इत्वच। पाणिभ्यां कृता कच्छपिका कूर्म्माकृतिमुद्रा।) कूर्म्ममुद्रा। यथा,—

"पाणिकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः।
तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः॥
पूजितं तेन पुष्पेण देवत्वं लभते ध्रुवम्॥"

कूर्म्ममन्त्रो यथा,—

"द्वितीयं वेदावीतन्तं बीजं बिन्दिन्दुसंयुतम्।
षड्वरो परिचरं कूर्म्मबीजं प्रकीर्त्तितम्॥"

इति कालिकापुराणे ५६ अध्यायः॥

पाणिगृहीती, स्त्री, (पाणिर्गृहीतो यस्याः। "पाणिगृहीती भार्य्यायाम्।" ४। १। ५२। इत्यस्य वार्त्तिकोक्त्या ङीष्।) विवाहिता। इत्यमरः। २। ६। ५॥

पाणिग्रहणं, क्ली, (पाणेर्ग्रहणं यत्र।) विवाहः। इति हेमचन्द्रः। ३। १८२॥ (यथा, रघुः। ७। २६।

"इति क्षत्रभौजकुलप्रदीपः
सन्यास्य पाणिग्रहणं स राजा।
महीपतीनां पृथगर्हणार्थं
समादिदेशाधिकृतानधिश्रीः॥")

पाणिघः, पुं, (पाणिं पाणिना वा हन्तीति। हन+"पाणिघताडघौ शिल्पिनि।" ३। २। ५५। इति टक् टिलोपो घत्वञ्च निपात्यते।) पाणिवादः। पाणिना ऋदङ्गादिवाद्यम्। पाणिं वा हन्ति यः। यः पाणिनैव ऋदङ्गादिवाद्य-मुत्पादयति तत्र। यः पाणिना ऋदङ्गमिव पाणिं वादयति तत्र च। इत्यमरभरतौ॥

पाणिघातः, पुं, (पाणिना हन्तीति। हन+ अधिकरणत्वात् अच्।) पाणिताडकः। इति सिद्धान्तकौमुदी॥ (हन+भावे घञ्। पाणिना घातो हननमिति। पाणिहननम्॥)

पाणिजः, पुं, (पाणौ जायते इति। पाणि+जन् +"सप्तम्यां जनेर्डः।" ३। २। ९७। इति डः।) नखः। इति हलायुधः॥

पाणितलं, क्ली, (पाणितलमिव परिमाणमस्य-स्येति। अण्।) कर्षपरिमाणम्। तोलकद्वयम्। इति वैद्यकपरिभाषा॥ (पर्य्यायोऽस्या यथा,—

"कोलद्वयञ्च कर्षः स्यात् स प्रोक्ता पाणिमालिका।
अक्षं पिचुःपाणितलं किञ्चित् पाणिश्च तिन्दुकम्॥
विडालपदकञ्चैव सुवर्णं कवलग्रहः।
उदुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते॥"

इति धान्वन्तरे पूर्व्वखण्डे प्रथमेऽध्याये॥ पर्य्यायान्तरं यथा,—

"विडालपदकाक्षञ्च पिचुःपाणितलन्तथा।
तिन्दुकञ्च विजानीयात् कवड़ग्रहमेव च॥"

इति चरके कल्पस्थाने द्वादशेऽध्याये॥ प्राचीनतमं।) हस्ताधोभागः॥ (यथा, मनौ। ४। १४६।

"स्पृष्ट्वैतानशुचिर्नित्यमद्भिः प्राणानुपस्पृशेत्।
गात्राणि चैव सर्व्वाणि नाभिं पाणितलेन तु॥")

पाणिजः, पुं, (पणिनो सुनेर्गोत्रापत्यम्। पणिन्+ अञ्। "गार्गिविदधिकेशिगर्गशिवपणिभ्यश्च।" ६। ४। १६५। इति न टिलोपः।) पाणिनि-मुनिः। इति त्रिकाण्डशेषः॥

पाणिनिः, पुं, (पणिनो सुनेर्युवापत्यम्। पणिन्+ इञ्। न टिलोपः।) मुनिविशेषः। तत्पर्य्यायः। आहिकः २ दाक्षीपुत्रः ३ शालङ्की ४ पाणिजः ५ शालातुरीयः ६। इति त्रिकाण्डशेषः॥ * ॥ (अयं हि पणिन्-वंशसम्भूतः प्रसिद्धो वाकरण-कर्त्ता। अस्य माता दाक्षी इत्याख्या विश्रुता। यथा, पातञ्जलकारिकायाम्। १। १। २०।

"सर्व्वे सर्व्वपदादेशा दाक्षीपुत्रस्य पाणिनेः॥"

तथाच शिक्षायाम्। ५६।

"शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः॥"

अस्य शालातुरीय इत्याख्यापि दृश्यते। यथा, अभिधानचिन्तामणौ। ३। ५१५।

"————————अथ पाणिनौ।
शालातुरीयदाक्षेयौ————————॥"

"गान्धारप्रदेशविशेषशलातुरग्रामजातत्वा-देवास्य तथा नाम।" इति चिन्तामणिटीका॥ परे तु शलातुरग्रामोऽस्य जन्मस्थानमिति न स्वीकुर्व्वन्ति। यतः शलातुरोऽभिजनोऽस्य इति युत्पत्त्या शालातुरशब्देन शलातुरदेशोद्भवे जने एवार्थो बोधयते। अष्टाध्यायीसूत्र-पाठस्य "तूदीशलातुरवर्म्मतीकूचवाराट् ठक् छण् ठञ् यकः।"४। ३। ९४। सूत्रात् अभि-जनार्थे एव छण्प्रत्ययः। वृत्तिकारभट्टोजी-दीक्षितेन तु "अभिजनश्च।" ४। ३। ९०। इति सूत्रे "यत्र स्वयं वसति स निवासः। यत्र पूर्व्वैरुषितं सोऽभिजनः।" इत्यभिजनशब्द-स्यार्थः प्रदर्शितः। अतः सूत्रतः शलातुर-प्रदेशः पाणिनेः पूर्व्वपुरुषाणां वासस्थानमित्ये-वावगम्यते नतु तस्येति।

पुरा किल कात्यायननामा मुनिः सप्तलक्ष-श्लोकात्मकं बृहत्कथाभिधानं ग्रन्थं विरचय्य कायभूतये आदयामास। सोमदेवभट्टस्तु ततः सारांशं समुद्धृत्य कथासरित्सागर इत्याख्या प्रसिद्धं ग्रन्थं निर्म्मितवान् तस्मादेवाख्यायिका समधिगम्यते। यथा, तत्रैव। ४। २०—८५।

"अथ कालेन वर्षेण शिष्यवर्गो महानभूत्।
तत्रैकः पाणिनिर्नाम जड़बुद्धितरोऽभवत्॥
स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्य्यया।
अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम्॥
तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात्।
सर्व्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम्॥
ततश्चागत्य मामेव वादायाह्वयते स्म सः।
प्रवृत्ते चावयोर्वादे प्रयागाः सप्तवासराः॥
अहमेऽहि मया सख्यिन् जिते तत्समनन्तरम्।
नभःस्थेन महाघोरो हुङ्कारः शुश्रुवे ततः॥
तेन प्रणष्टमैन्द्रन्तद्व्याकरणं भुवि।
जिताः पाणिनिना सर्व्वे मूर्खीभूता वयं पुनः॥
अथ संजातनिर्व्वेदः स्वगृहस्थितये धनम्।
वृत्तं हिरण्यदत्तस्य विधाय वणिजो निजम्॥
उक्त्वा तत्रोपकोशाये गतवानस्मि गुरुकम्।
तपोभिराराधयितुं निराहारो हिमाचलम्॥"

* * * *

"अथान्तरे सुधाराद्रौ लब्ध्वा तीव्रतरं तपः।
आराधितो मया देवो वरदः पार्व्वतीपतिः॥
तदैव तेन शास्त्रं मे पाणिनीयं प्रकाशितम्।
तदिच्छानुग्रहादेव मया पूर्णीकृतञ्च तत्॥"

* * * *

"वर्षोऽथ मनुसादेच्छत् श्रोतुं व्याकरणं नवम्।
ततः प्रकाशितं स्वामिकुमारेणैव तस्य तत्॥
ततो व्याड़ीन्द्रदत्ताभ्यां विघ्नमो दक्षिणां प्रति।
गुरुर्वर्षोऽब्रवीत् स्वर्णकोटिर्मे दीयतामिति॥
अङ्गीकृत्य गुरोर्वाक्यं तौ च मामित्यवोचताम्।
एहि राज्ञः सदो। नद्वात् याचिष्यं गुरुदक्षिणाम्
गच्छामो गान्धतोऽस्माभिरियत् काञ्चनमाप्यते।
नवाधिकायां नवतेः कोटीनामधिपो हि सः॥"

इत्युपाख्यानेन पाणिनिः कात्यायनस्य राज्ञो-नन्दस्य च समसामयिक इत्येवायाति। परं कात्यायनपाणिन्योः ग्रन्थग्राह्यपाठेन पाणिनिः कात्यायनात् पूर्व्वतन इत्यनायासेनैव विज्ञायते। यतः कात्यायन एव पाणिनिप्रतिव्याकरणस्य वार्त्तिककारः। स च स्वकृतग्रन्थे विदुषां वरं पाणिनिं आचार्य्यत्वेन स्वीकृतवान्। [६। ४। १०४। इत्यस्य वार्त्तिं।] पाणिनिस्तु स्वीय-व्याकरणे पूर्व्वतनानां बहूनां विदुषां नामोल्लेखं कृतवान् परं कुत्रापि कात्यायनस्य नाम नाभि-हितवानतः अवरोऽवगम्यते पाणिनिः कात्या-यनात् इत्यलम्।

अनेन महात्मना पाणिना रचितं व्याकरणं पाणिनीयाष्टकमित्याख्या प्रथितम्। कात्यायन

पाणिपी

एवाच्च पाणिनिं विधाय लौकिकमाजोचनाच्चकार। परं पतञ्जलिः स्वल्पपाठस्य पाणिनीयस्य च महाभाष्यं विधाय सर्व्वतः प्रमादपरिभूयोऽयं पाणिनीयाराधायीत्यस्य इति प्रदर्शयन् कात्यायनतीव्रहृष्टेः दर्पेणैवं समादरणीयं व्याकरणमम्। अष्टाध्यायीप्रारम्भे तु चतुर्दशसूत्राणि सन्ति तानि तु प्रत्याहारसूत्राणि।

अष्टाध्यायीसूत्रपाठे, आपिशलिः।६।१।९२। गालवः।६।३।६१। चान्द्रवर्म्मणः।६।१।१३०। क्षोटायनः।६।१।१२३। काश्यपः।८।४।६७। गार्ग्यः।८।४।६७। भारद्वाजः।७।२।६३। सेनकः।५।४।११२। शाकटायनः।३।४।१११। शाकल्यः।१।१।१६। इतीयां पूर्व्वतनवैयाकरणानां नामानि सन्ति। अत्र १९९६ संख्यकानि सूत्राणि विद्यन्ते। काश्मीरराजस्य जयापीडस्य राजत्वसमये पाणिनिव्याकरणं वार्त्तिकेन महाभाष्येण च सह विद्वद्विद्यार्थिसुधीवरविद्वज्जनाग्रिमार्थं प्रचलितमासीत्। यथा, राजतरङ्गिण्याम्। ४। ६३८—६४०।

"सितानां सप्तसप्तत्यः गुणसप्तविधायिनः।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम्॥
भाष्यव्याख्यात्रयीं श्लोकैर्व्वैचक्षण्यहृतैः कृतः।
सोऽयं तस्य विपर्य्यासो बुधैरिव विवर्त्तितः॥
सप्तविंशोपसर्गस्य भूतनिष्ठाविधायिनः।
श्रीजयापीड़देवस्य पाणिनेश्च किमन्तरम्॥"

कात्यायनसप्तवार्त्तिकात् पतञ्जलिसप्तमहाभाष्याच्च अन्या अपि अष्टाध्यायीसूत्रपाठस्य उल्लिखितमहाभाष्यस्य च वह्व्यष्टीकाः सन्ति बाहुल्यभिया तासां नामानि न प्रदत्तानि॥*॥)

पाणिनीयं, त्रि, (पाणिनिना प्रोक्तं उपदिष्टं वा। पाणिनि+"वृद्धाच्छः।" ४।२।११४। इति छः।) पाणिनिना प्रोक्तं ग्रन्थादि। इति सुग्धबोधव्याकरणम्॥

पाणिनमः, त्रि, (पाणिं नमतीति। पाणि+नम्+संयोगयोः+"उपपदमतिङ्।" ३।२।१९। इति खश् मुम् च।) हस्तकर्म्मताकामिसंयोगकर्त्ता। एवं ग्रन्थकर्त्ता च। इति सुग्धबोधव्याकरणम्॥ ("पाणयो भायन्तेऽस्मिन्निति पाणिभमोऽध्वा। अन्धकाराद्याकृतद्व्यर्थः। तत्र हि सर्पादिग्रहणोद्यताय पाणयः ग्रन्थन्ते।" इति विद्वान्मनोमुदी॥)

पाणिपः, त्रि, (पाणिभ्यां धयति पिबतीति। धेट पाने+"नाड़ीमुष्टीक्षनकरस्तुदिपाणिनाधिकात् पाय च।" इति कृत्यात् खश्प्रत्ययेन सा.धुः।) पाणिद्वारा पानकर्त्ता। इति सुग्धबोधव्याकरणम्॥

पाणिपादं, क्ली, पाणिश्च पादश्च द्वयोः समाहारः। पाणिपादयोः समाहारः। इति व्याकरणम्॥

पाणिपीड़नं, क्ली, (पाणेः पीड़नं यत्र यच।) पाणिग्रहणम्। विवाहः। इत्यमरः॥ (पाणिभ्यां पीड़नमिति विग्रहे क्रीयादिना हस्तमर्द्दनम्॥)

पाण्डरः

पाणिशुक्, [ज्] पुं, (पाणिनैव शुध्यते दीयतेऽनेन वर्म्मादिदृश्यं यद्वा, पाणिरिव शुध्यते यत्रादिस्थले अवस्थियते इति। शुध्+क्विप्।) उड़ुम्बरवृक्षः। इति शब्दचन्द्रिका॥ (पाणिना शुद्धक्ते इति। शुध्+क्विप्।) पाणिकरत्यक्तभोक्तरि, त्रि॥

पाणिसहैः, पुं, (पाणिं सहतीति। पाणि+सह+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) करसहैकः। इति राजनिर्घण्टः॥

पाणिसूत्रं, क्ली, (पाणिभ्यां सूत्रं परिमाणम्।) अक्षम्। इति हलायुधः॥

पाणिस्वरः, पुं, (पाणौ रोहतीति। रुह+"इगुपधज्ञेति।" ३।१।१३५। इति कः।) नखः। इति राजनिर्घण्टः॥

पाणिवादः, त्रि, (पाणिं पाणिना वा वादयतीति। वद+णिच्+अण्।) पाणिघः। इन्द्रजालिवादकः। इत्यमरः॥ (पाणिना वाद्यते इति। वद+णिच्+कर्म्मणि घञ्। इन्द्रजालादौ, क्ली। यथा, रामायणे। २।६५।४।

"अपदानान्युदाहृत्य पाणिवादान्यवादयन्।")

पाणिवादकः, त्रि, (पाणिं पाणिना वा वादयतीति। वद+णिच्+ण्वुल्।) पाणिवादः। इति हैमचन्द्रः। ३।५८॥ (यथा, रामायणे। २।६५।४।

"ततस्तु स्तुवतां तेषां स्तुतानां पाणिवादकाः।
अपदानान्युदाहृत्य पाणिवादान्यवादयन्॥")

पाणिसर्म्मा, क्ली, (पाणिभ्यां क्रियतेऽसौ। कृञौ ग्रु विसर्गे+"पाणौ कृञेश्चेत्युप बाच्यः।" इति श्यत्। "चजोः कु घिण्ण्यतोः।" ७।३।५२। इति कुत्वम्।) रज्जुः। इति सुग्धबोधव्याकरणम्॥

पाणौतलं, क्ली, (पाणिस्थलं निपातनात् दीर्घः।) तोलकहृदयम्। यथा,—

"विड़ालपदकर्षौ च पाणौतलसहोदरम्॥"

इति शब्दमाला॥

पाणौकरणं, क्ली, (पाणौ क्रियतेऽनेनाङ्गिनं वा। कृ+ल्युट्। समन्वयः अनुक्तं।) विवाहः। इति जटाधरः॥

पाण्डरं, क्ली, (पाण्डरो वर्णोऽस्यास्येति। अच्।) कुन्दपुष्पम्। मेदिनिकम्। इति शब्दचन्द्रिका॥

पाण्डरः, पुं, (पाण्डरः शुक्लवर्णोऽस्यास्येति। अच्।) मत्स्यकेतुः। (पडि+अर+दीर्घश्च।) श्वेतवर्णः। (पर्व्वतविशेषः। स तु मेरोः पश्चिमे वर्त्तते। यथा, मार्कण्डेये। ५५।१०।

"अञ्जनः कुक्कुटः शङ्खः पाण्डरश्चाचलोत्तमः॥"

"पश्चिमेन तथा मेरोर्विस्तम्भात् पश्चिमाद्दिशः।
एतेऽचलाः समाख्याताः————————॥"

ऐरावतकुलोत्पन्ननागविशेषः। यथा, महाभारते। १।५७।११—१२।

"पारावतः पारिजातः पाण्डरो हरिणः शशः।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥
ऐरावतकुलादेते प्रविष्टा हयवाहनम्॥"

पक्षिविशेषः। यथा, ज्योतिश्शास्त्रभरतवचनम्।

"यवः कङ्कः कपोतश्च उलूकः श्येन एव च।
चित्रश्च धर्म्मचित्रश्च भासः पाण्डर एव च।
गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते॥")

तद्वर्णविशिष्टे, त्रि। इत्युणादिकोषः॥ (यथा, हरिवंशे। ८२।५०।

"असितास्वरसंवीतं पाण्डरं पाण्डरासनम्॥")

पाण्डरपुष्पिका, स्त्री, (पाण्डरं शुक्लवर्णं पुष्पमस्याः। कप्। ततः कापि अत इत्वम्।) श्वेतलाङ्गलः। इति शब्दचन्द्रिका॥

पाण्डवः, पुं, (पाण्डोरपत्यमिदं वा पाण्डु+"ओरञ्।" ४।२।७१। इत्यञ्।) पाण्डुपुत्रगणः। पञ्चपाण्डवोत्पत्तिर्यथा,—

वैशम्पायन उवाच।

"संवत्सरधृते गर्भे गान्धार्य्या जनमेजय!।
आजघ्यामास वै कुन्ती गर्भार्थे धर्म्ममच्युतम्।
सा बलिं चरिता देवी धर्म्मायोपजहार ह।
जजाप मन्त्रं विधिवद्दत्तं दुर्व्वाससा पुरा॥
संगम्य सा तु धर्म्मेण योगमूर्त्तिधरेण ह।
लेभे पुत्रं वरारोहा सर्व्वप्राणिहितं वरम्॥
ऐन्द्रे चन्द्रसमायुक्ते मुहूर्त्तेऽभिजिते ऽहनि।
दिवामध्यगते सूर्य्ये तिथौ पुण्येऽभिपूजिते॥
सन्दृश्यमानं कुन्ती सुषाव प्रवरं सुतम्।
जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी॥
एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः।
विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति॥
युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः।
भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः।
यशसा तेजसा चैव वृत्तेन च समन्वितः॥१॥*॥
धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत्।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं कुरु॥
ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥
समप्रतिबलं जातं वागुवाचाशरीरिणी।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमत्यद्भुतक्षत्तरीज्ञातमात्रे वृकोदरे।
यद्दक्षात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती बालभयोद्विग्ना सहसोत्पतिता किल।
नात्यबुध्यत तं सुप्तसुतमङ्के स्वं वृकोदरम्॥
वज्रसंहनना सोऽथ कुमारो न्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥
तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्विस्मयमागतः।
यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम!॥
दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप!॥२॥*॥
जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत्।
कथन्नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति॥
दैवे पुरुषकारे च लोकोऽयं संप्रतिष्ठितः।
तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते॥
इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम्।
अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः॥
तं तोषयित्वा तपसा पुत्रं लप्स्ये महाबलम्।
यं दास्यति स मे पुत्रं स गरीयान् भविष्यति॥

कर्म्मणा मनसा वाचा तप्यन्तेऽपत्यहेतवे महत्तपः। ततः पाण्डुर्महाराजो मन्त्रयित्वा महर्षिभिः॥ दिदेश कुन्त्वाः कौरव्यो व्रतं सांवत्सरं शुभम्। आत्मना च महाबाहुरेकपादस्थितोऽभवत्॥ उग्रं स तप आतस्थे परमेण समाधिना। आदित्यमुपतिष्ठन्तं जिघ्रन्तं तमीश्वरम्॥ ऊर्ध्वेन सह धर्म्मात्मा पर्य्यवर्त्तत भारत!। तस्य वर्षेण महता वासवः प्रत्यपद्यत॥

शक्र उवाच।

पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम्। ब्राह्मणानां गवाञ्चैव हन्तृदाक्षार्यसाधकम्॥ दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम्। सुतं तेऽहं प्रदास्यामि सर्व्वामित्रविनाशनम्॥

इत्युक्तः कौरवो राजा वासवेन महात्मना। उवाच कुन्तीं धर्म्मात्मा देवराजवचः स्मरन्॥ उदर्कोऽस्य कल्याणि सुखो देवनमेश्वरः। दातुमिच्छति मे पुत्रं यथासङ्कल्पितं त्वया॥ अतिमानुषकर्म्माणं यशस्विनमरिन्दमम्। नीतिमन्तं महात्मानमादित्यसमतेजसम्॥ दुराधर्षं क्रियावन्तमनीषादृप्तदर्पनम्। पुत्रं जनय सुश्रोणि! क्षमं क्षत्रियतेजसाम्॥ लब्धः प्रसादो देवेन्द्रात् तमाशय शुभानने!॥

एवमुक्ता ततः शक्रमाजुहाव यशस्विनी। अथाजगाम देवेन्द्रो जनयामास चार्জ্জुनम्॥ जातमात्रे कुमारे तु वागुवाचाशरीरिणी। महागम्भीरनिर्घोषा नभो नादयती तदा॥ शृण्वतां सर्व्वभूतानां तेषाञ्चाश्रममासिनाम्। कुन्तीमाभाष्य विबुधसुवाचेदं सुचिस्मिताम्॥ कार्त्तवीर्य्यसमः कुन्ति! शिबितुल्यपराक्रमः। एष शक्र इवाजेयो यशस्ते प्रथयिष्यति॥ अदित्या विष्णुना प्रीतिर्यथाभूदभिवर्द्धिता। तथा विष्णुसमः प्रीतिमवर्द्धयिष्यति ते सुतः॥ एष मद्रान् वशे कृत्वा कृत्स्नञ्च सह सोमकैः। चेदिकाशिकरूषाञ्च कुरुसञ्जौ वर्द्धयिष्यति॥ एतस्य भुजवीर्य्येण खाण्डवे हव्यवाहनः। मेदसा सर्व्वभूतानां तृप्तिं यास्यति वै पराम्॥ यामलौच्च महीपालान् एष जित्वा महाबलः। भ्रातृभिः सहितो वीरस्त्रीन् मेधानाहरिष्यति॥ जामदग्न्यसमः कुन्ति! वायुवेगपराक्रमः। एष वीर्य्यवतां श्रेष्ठो भविष्यति महायशाः॥ तथा दिव्यानि चास्त्राणि निखिलेनाहरिष्यति। विप्रनष्टां श्रियञ्चायमाहर्त्ता पुरुषर्षभः॥ एतामाश्चर्य्यभूतां वाचं कुन्ती शुश्राव भारत!। वाचमुच्चरितामुच्चैस्तां निशम्य तपस्विनाम्॥ बभूव परमो हर्षः शृतशृङ्गनिवासिनाम्। तथा देवरथाग्र्याच्च सैन्याग्र्याच्च दिवौकसाम्॥ आकाशे दुन्दुभीनाञ्च बभूव तुमुलः स्वनः। उदतिष्ठन्महाघोषः पुष्पवृष्टिभिरावृतः॥"६॥*॥

वैशम्पायन उवाच।

"कुन्तीपुत्रस्य जातेषु शृतराष्ट्रात्मजेषु च। मद्रराजसुता पार्थं रहो वचनमब्रवीत्॥ न मेऽस्ति त्वयि सन्तापो विबुधोऽपि परन्तप। नावरत्वे वराङ्गीणां स्त्रियो वाप्यव! निन्दिताः॥ मान्याश्चैवेह वृषते! जातं पुत्रशतन्तथा। श्रुत्वा च मे तथा दुःखमभवत् कुरुनन्दन!॥ इदन्तु मे महद्दुःखं तुल्यतावामपुत्रता। दिष्ट्या त्वदानीं भर्त्तर्म्मे कुन्त्यामप्यस्ति सन्ततिः॥ यदि चापत्यसन्तानं कुन्तिराजसुता मयि। कुर्य्यादनुग्रहो मे स्यात्तव चापि हितं भवेत्॥ संलम्भो मे सपत्नीत्वात् वक्तुं कुन्तिसुतां प्रति। यदि तु त्वं प्रसन्नो मे स्वयमेनां प्रचोदय॥

पाण्डुरुवाच।

ममाप्येष वदा भामि! हृदयं परिवर्त्तते। न तु तां प्रसहे वक्तुमिष्टानिष्टविवक्षया॥ तव त्विदं मतं ज्ञात्वा प्रयतिष्याम्यतः परम्। मन्ये ध्रुवं मयोक्ता सा वचनं प्रतिपत्स्यते॥

वैशम्पायन उवाच।

ततः कुन्तीं पुनः पाण्डुर्विविक्त इदमब्रवीत्। कुलस्य मम सन्तानं लोकस्य च कुरु प्रियम्॥ मम चापिण्डनाशाय पूर्व्वेषामपि चात्मनः। मनुष्यार्थञ्च कल्याणि! कुरु कल्याणमुत्तमम्। यशसेऽर्थाय चैव त्वं कुरु कर्म्म सुदुष्करम्॥ एवमुक्ताब्रवीद्भार्य्या सङ्गम्यनय देवतम्। तस्मात्ते भवितापत्यमनुरूपमसंशयम्॥ ततो माद्री विषाद्यैवं जगाम मनसाश्विनौ। तावागम्य सुतौ तस्यां जनयामासतुर्यमौ॥ नकुलं सहदेवञ्च रूपेणाप्रतिमौ भुवि। तथैव तावपि यमौ वागुवाचाशरीरिणौ॥ रूपसत्त्वगुणोपेतावेतावत्यश्विनावपि। भास्वत्तेजसमाद्यर्थं रूपद्रविणसम्पदा॥ नामानि चक्रिरे तेषां शृतशृङ्गनिवासिनः। भक्ता च कर्म्मणा चैव तथाग्र्यैर्विविधाम्यते॥ ज्येष्ठं युधिष्ठिरेत्येवं भीमसेनेति मध्यमम्। अर्জ্জुनेति तृतीयञ्च कुन्तीपुत्रानकल्पयन्॥ पूर्व्वजं नकुलेत्येवं सहदेवेति चापरम्। माद्रीपुत्रावकथयंस्ते विप्राः प्रीतमानसाः॥"

इति महाभारते १। १२३—१२४॥

तेषां पुत्रा यथा,—

"प्रतिविन्ध्यः सुतः सोमः शृतकीर्त्तिस्तु चार्জ্জुनात्। शृतानीकः शृतकर्म्मा नौपद्याः पञ्च विक्रमात्॥"

तेषां भार्य्या यथा, गारुडे १३६ अध्याये।

"यौधेयी च हिडिम्बा च काशी चैव सुभद्रिका। विजया वै वेणुमती पञ्चैतास्तु सुताः क्रमात्॥ देवकी घटोत्कचञ्च अभिमन्युञ्च सर्व्वगः। अहोचो निरमित्रञ्च परिक्षितमभञ्जयः॥"

पाण्डवेयः, त्रि, (पाण्डोरियं दृश्यञ् ङीप् च पाण्डवी कुन्ती माद्री च तयोरपत्यम् इति। टक्।) पाण्डोरपत्यम्। इति मुग्धबोधव्याकरणम्॥ (युधिष्ठिरप्रभृतयः पञ्च भ्रातरः। यथा, महाभारते। १। २०१। १५।

"यावन्नायाति वार्ष्णेयः कर्षन् यादववाहिनीम्। राज्यार्थं पाण्डवेयानां पाञ्चाल्यसदनं प्रति॥"

अभिमन्युपुत्रो नरपतिः परीक्षित्। यथा, भागवते। १। ७। ७।

"कथं वा पाण्डवेयस्य राजर्षेर्भुनिना सह। संवादः समभूत्तात! ब्रह्मेशा वाक्पतौ स्तुतिः॥")

पाण्डवाभीलः, पुं, (अभीः अभयं ज्ञातीति। ज्ञा + कः। पाण्डवोऽभीलो यस्मात्। पाण्डवानामभियमभयं जानीते वा।) ज्ञाः। इति त्रिकाण्डशेषः॥

पाण्डवायनः, पुं, (पाण्डवानामयनं दृश्यं यस्मात्।) ज्ञाः। इति हेमचन्द्रः। २। १३१॥

पाण्डित्यं, क्लो, (पण्डितस्य भावः कर्म्म वा। इति "वर्णदृढादिभ्यः ष्यञ् च।" ५। १। १२३। इति ष्यञ्।) पण्डितधर्म्मकर्म्मणी। यथा,—

"एवमेषा पाण्डित्यपरिपाकमनुभवति॥"

इति हरिवंशे॥

(यथा च महाभारते। ५। ३१। २।

"उत बालाय पाण्डित्यं पण्डितायोत बालताम्। ददाति सर्व्वमौदार्य्यः पुरस्ताच्छुक्रसुन्दरम्॥")

पाण्डुः, पुं. (पडि गतौ + "पण्डिकाशिभ्यश्च।" उणा। १। ३८। इति कुप्रत्ययः निपातनात् धातोर्दीर्घश्च।) पाण्डुरफलीक्षुपः। पटोलः। इति राजनिर्घण्टः॥ शुक्लपीतमिश्रितवर्णः। तत्पर्य्यायः। हरिद्रः २। पाण्डुरः ३। हलभरः॥ पाण्डरः ४। इति शब्दरत्नावली॥

"सितपीतसमायुक्तः पाण्डुवर्णः प्रकीर्त्तितः॥"

इति शब्दभूतिः॥

मेदोऽपि दृश्यते यथा,—

"पाण्डुरस्तु रक्तपीतभागी प्रबृंहणकरवान्।
पाण्डुस्तु पीतभागार्द्धः केतकीधूलिसन्निभः॥"

इति भरतः॥

तद्वति, त्रि। इत्यमरः॥ (यथा रघुः। १। २।

"शरीरसादादसमग्रभूषणा
सुखेन बालत्वत एव पाण्डुना॥"

पृथ्वीविशेषः। स तु शुम्भनिशुम्भविजयवीर्य्यस्य शैवे आसाद्यते। (यथा, महाभारते। ९। ११८। ५।

"राजा पाण्डुर्महारण्ये मृगयाचरणे रतः।
चरन् मैथुनधर्म्मेण ददर्शं मृगयूथपम्॥"

अस्य देहपाण्डुताकारणं नामनिरुक्त्यादिकं च यथा, महाभारते। १। १०६। १५-१८।

"अम्बालिकामथाभ्यागाद्दृष्ट्वा चापि तथा।
विवर्णा पाण्डुसङ्काशा समपद्यत भारत!।
तां भीतां पाण्डुसङ्काशां विवर्णां प्रेक्ष्य भारत!॥
व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत्।
यस्मात् पाण्डुसमापन्ना विरूपं प्रेक्ष्य मामिह॥
अस्मादेव सुतस्ते वै पाण्डुरेव भविष्यति।
नाम चास्यैतदेवेह भविष्यति शुभानने!॥")

नागभेदः। श्वेतदूर्व्वा। खितवर्णः। रोगविशेषः। इति शब्दरत्नावली॥*॥

पाण्डुरोगनिदानम्। यथा,—

"पाण्डुरोगाः स्मृताः पञ्च वातपित्तकफैस्त्रयः।
चतुर्थः सन्निपातेन पञ्चमो भक्षणाद्भृदः॥
आयासमद्यं लवणानि मद्यं
मृदं दिवास्वप्नमतीवतीक्ष्णम्।

निषेवमाणस्य समेत्य रक्तं
दोषास्त्रयं पाण्डुरतां नयन्ति ॥ * ॥

तस्य पूर्वरूपाणि यथा,—

त्वक्स्रोटनष्ठीवनगात्रसाद-
हृद्भक्तभक्तप्रेक्षकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ * ॥

वातिकस्य तस्य लक्षणं यथा,—

त्वङ्नखनयनादीनां रूक्षत्वात्परुषाभताः ।
वातपाण्डामये कल्यस्तोदानाह्यमादयः ॥ * ॥

पैत्तिकस्य लक्षणं यथा,—

पीतनखत्वङ्नयनो दाहज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्डामयी नरः ॥

श्लैष्मिकस्य लक्षणं यथा,—

कफप्रसेकस्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफात्पाण्डुश्लेष्मलनयनाननैः ॥ * ॥

त्रिदोषजस्य लक्षणं यथा,—

ज्वरारोचकतृष्णास्यच्छर्दिष्ठष्ठीवनान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैर्विद्याज्ज्ञः क्षीणो हतेन्द्रियः ॥

रूक्षस्य संप्राप्तिर्यथा,—

रूक्षस्तिक्तादनशीलस्य कृशस्यातपसो मलः ।
कषाया मारुतं पित्तश्लेष्मरा मधुरा कफम् ॥
कोपयेन्नखसादौष्ण्यादुक्तश्च रूक्षयेत् ।
पूरयत्यपि कोष्ठे च स्रोतांसि विसृजन्नपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ * ॥

रूक्षतिक्ताभक्षणस्यथयाकुलत्वं यथा,—

रूक्षभक्षणशीलेन वेगान् वातकफापहान् ।
सक्षारस्नायसूलार्शःसदाहविषमन्वितः ॥
मूत्राग्निकूटगलभृत् मूत्रपात्राभिमेहनः ।
क्षामिक्षोऽतिसार्येण मलं सासृक्कफान्वितम् ॥

तस्य असाध्यलक्षणं यथा,—

ज्वरारोचकतृष्णास्यच्छर्दिष्ठष्ठीवनान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैर्विद्याज्ज्ञः क्षीणो हतेन्द्रियः ॥
पाण्डुरोगशिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥
बहाल्पविट् सहरितं सकफं श्लोतिसार्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्दिरुच्छ्वासान्वितः ॥
सनाखभङ्गक्षयाद्दृश्य पाण्डुः श्वेतत्वमाप्नुयात् ॥
पाण्डुरुन्नखो वस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंज्ञातदन्तौ च पाण्डुरोगी विनश्यति ॥

अतीव मूत्रं परिहीनमध्यं
ज्ञानं तथाग्नेश्च मध्यमूनम् ।
गुदे च श्वेतत्वथ शुक्लयोश्च
मूत्रं प्रतान्यत्नमथ त्वगक्ष्णम् ॥
विवर्जयेत् पाण्डुकिनं यमौ वा
तथातिसारज्वरपीडितञ्च ॥"

इति माधवकरः ॥

(तथा च,—

"पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्नराः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं त्वचि स्थितम् ॥
प्रसर्पदेहं सन्याप्य व्याप्नुवत् सकलां तनुम् ।
श्वेतीकरोति सहसा तं विद्यात् श्वेतपित्तिनम् ॥
श्वेतावभासं सकलं शरीरं यस्य जायते ।
स श्वेतकुष्ठी विज्ञेयः पित्तश्लेष्मविकारवान् ॥
श्वेतीभवेत् त्वगथ वा सकलं यदि देहिनः ।
तं श्वेतकुष्ठिनं विद्यात् सर्वदोषसमुद्भवम् ॥
श्वेतं यदा भवेन्मांसं सिरास्नायुसमाश्रितम् ।
तं श्वेतकुष्ठिनं विद्यात् वातश्लेष्मसमुद्भवम् ॥
श्वेतं यदा भवेन्मांसं सिरास्नायुसमाश्रितम् ।
लङ्घनस्वेदसाध्यं तं कुष्ठं विद्यात् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं नेत्र चाधिकम् ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ।
धातूनां स्यात्र शैथिल्यमोजसश्च गुरुक्षयः ॥
ततोऽवरक्तमेदस्को निःसारः स्यात् अथेन्द्रियः ।
रूक्ष्यमाणैरिवाङ्गैर्नो रुजता हृदये न च ॥
मूत्राग्निकूटवदनः कोपनः क्षीणोऽल्पवाक् ।
अन्नद्विट् शिथिरदेही शीर्णरोमा हतानलः ॥
सन्नसक्थ्योऽवरी स्यातां कर्णचक्षुषी भ्रमौ भ्रमौ ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राप्नूयस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं खेदाभावोऽल्पवह्निता ॥
सादः श्रमोऽनिलात्तस्य शास्त्रक्तोदकम्पनम् ।
लम्बदाहशिरानद्धविण्मूत्रनेत्रता ॥
श्लेष्माणाहास्यवैरस्यविड्गौरवाः पार्श्वमर्दकृत् ।
पित्ताद्धरितपीताभशिरादित्वं ज्वरश्लमः ॥
हृत्कण्ठदाहच्छर्दीतीसारादीर्ण्यं कटुवक्त्रता ।
वर्चोमेदोऽम्लको दाहः कफात् मुक्तशिरादिता ॥
तन्द्रालस्यवमथ्लेदं रोमहर्षैः स्वरक्षयः ।
सादः स्तैमित्य निद्रयाग्निमलिङ्गोऽतिदुःसहः ॥
हृत्कफाया निलं पित्तघ्नरा मधुरा कफम् ।
दूषयित्वा रसादींश्च रौक्ष्यादुक्तं विरूक्ष्य च ॥
स्रोतांस्यपक्वैवापूर्य कुर्याद्दृद्धा च पूर्ववत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं श्लेष्ममिश्रञ्छिद्रं सासृक्कफं नरः ॥"

इति वाभटे निदानस्थाने । १३ । १—१३ ॥)

तस्यौषधं यथा,—

"लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ॥"

इति गारुडे १८० अध्यायः ॥

अपि च ।

"सप्तरात्रं गवां मूत्रे भावितं चायसो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुडभक्षतः ।
पाण्डुरोगः क्षयं याति पक्षान्निश्शूलच दारुणम् ॥ २
अयोमलं सुसंभृतं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥ ३ ॥
पुनर्नवात्रिदण्डोषविड्गं दारु चित्रकम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं सुस्तं व्योषं च कारवी ।
यमानी कटफलचेति पृथक्पलमितं मतम् ॥ ४ ॥

इति भावप्रकाशः ॥ * ॥

(अस्य सकारलक्षणचिकित्सादीनि यथा,—

"ब्रह्मन् पुत्र! प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
पञ्चैव पाण्डुरोगाः स्युः सम्भवन्तीह मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो रूक्षजः प्रोक्तो यश्चैवाशु सम्भवम् ॥
दीर्घाध्वगा पीडितो वा ज्वरेण
रक्तस्रावो पीडितो वा क्षयेण ।
चिन्तायासाद्रोगवाहे मनुष्ये
चायं पाण्डुर्जायते सेवते यः ॥

क्षारोष्णं कट्वम्लेरेयसेवा
अध्यायामाध्येयुनातिश्रमेण ।
निद्रानाशे नातिनिद्रा दिवापि
योगैश्चैतैर्रक्तिकाभक्षणेन ॥
अतिस्निग्धतीक्ष्णशरीरे रोगस्तम्भौषधे वा
लवणकटुकषाया सेवनाच्चेन वह्निः ।
अतिसुरतमजस्रं सेवनातिक्रमेण
नयति रुधिरदोषं तेन वै पाण्डुरोगम् ॥
सैनाग्निकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतमूत्रः ।
निष्ठीवते त्वक् प्रविदीर्यते च
संजायते तस्य पुरःसराणि ॥
तोदः पक्वत्वग्शिरोगुरुत्वं
सङ्मूत्रनेत्रे नखक्लोमिमा स्यात् ।
वातात्मकं तन्मनुजस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
आमत्वपीतत्वकरो हि लोके
विभर्ति शोथं कटुकास्यता च ।
मन्दज्वरो वै भ्रमशोषमोहः
पीतच्छविः पीतभवो हि पाण्डुः ॥
तन्त्रानुतापोष्णकफेन युक्तः
आलस्यकासक्लेदगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽसौ
नरस्य पाण्डुत्वभवो विकारः ॥
तन्त्रालस्यं श्वयथुवमथू कासश्वासशोषा
विड्भेदः स्यात् पवनजये सज्वरो वै क्षुधार्तः ।
मोहस्तृष्णाक्लमसमथ मनुजस्यासु पश्येत् सुदूरं
त्र्याख्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
रक्तिकाभक्षणेनाथ ब्रह्मन् पुत्र! गदो महान् ।
पाण्डुरोगो गरिष्ठोऽपि भवेद्वातुक्षयङ्करः ॥
रूक्षत्वक्षाक्षेव मलं प्रकोप्य
स्रोतांसि रुन्धन्ति च रक्तिकायाः ।
तेनैव नाडीक् परिवर्तयन्ति
न तर्पयन्ते वपुषं रसेन ॥
क्षारात् कषायाम्लसुरस्य पानात्
स कोपयत्यासु नरस्य रक्तजा ।
श्लैष्मप्रकोपाच्छ्वयथूरान् करोति
रूक्षा न जग्धा हितकारिणी स्यात् ॥
विक्षतिसुपगताङ्गे मारुतात्माक्षयस्तु
बलवदनलचीनां नाशयत्यासु दोषाः ।
भवति विकलमेवं पाण्डुरोगे शरीरं
भवति जठरपाण्डू रोग आशुप्रवीरः ॥"

"लोहचूर्णमधौ मतिमान् क्षापयेत् सप्तरात्रि-
कम् ।
सक्षारं चूर्णमु मधुना देयं पाण्डुमयापहम् ॥
चूर्णयं त्रिफला सुस्ता विड्गं चित्रकं
समम् ।
भागमेकं लौहचूर्णमिक्षुद्रावे विभावयेत् ॥
सप्ताहमथ लोहस्थितं
पुनरपि शुष्कं प्रवरं स्यात् ।
शीलितमु मधुनापि घृतेन
पाण्डुरोगहृदयामयापहम् ॥

कामलार्शो हलीमकहरि
कथितं सुमतिभिश्च पञ्चमे: ॥
इति लौहचूर्णवटकम् ॥ * ॥
चूर्णं त्रिफलया सह त्रिवृतं
मेघपञ्चसुरदारुसमांशिकम् ।
ग्रन्थिकञ्च ग्रिखिण्टङ्गराजकं
योजयेत् पलिकभागिकानिमान् ॥
चर्चितान्हिगुणमेव योजयेत्
लौहचूर्णमपि कञ्चलप्रभम् ।
अष्टभागसमशुद्धकल्पितं
पाचितं पुनरभवद्वरप्रदम् ।
संवयेद्बलसुपक्वकर्म तथा
तक्रसंयुतमिहाग्निदीपनम् ।
नाशयेच्च कफकामलान् क्रिमीन्
पाण्डुकुष्ठगुदजान् हलीमकम् ॥
इति मण्डूरवटकम् ॥"*॥

पथ्यापथ्यान्नस्य यथा,—
"गोधूमयवालियवषष्टिकसुद्गकानां
श्यामाढकीहृतयुतं सघयःसतक्रम् ।
गाङ्गीववाल्लकमयो घृतपुष्पवर्त्ता
पथ्यं हितं निगदितं मनुजस्य पाण्डौ ॥
ग्राम्यानसुद्गगोधूममण्डूराढ़की यवाः ।
जाङ्गलानि च मांसानि भोजने च प्रशस्यते ॥
तिक्तानि रूक्षाणि कषायकाणि
तीव्राणि दाहीन्यपि काञ्जिकानि ।
सुरान्नसौवीरकबीजपूरान्
तैलानि वर्ज्यानि च पाण्डुरोगे ॥"
इति हारीते चिकित्सितस्थाने नवमेऽध्याये ॥*॥

अस्य चिकित्सान्तरं यथा,—
"पाण्डामयी पिबेत् सर्पिरादौ कल्याणकाह्वयम् ।
पञ्चगव्यं मञ्चातिक्तं घृतं वारग्वधादिना ॥
दाड़िमात् कुड़वौ धान्यात् कुड़वार्द्धं पलं पलम् ।
त्रिवृतात् पञ्चवेराच्च पिण्यलार्द्धपलञ्च तैः ॥
काञ्जनैर्विंशतिपलं घृतस्य सलिलाढ़के ।
सिद्धं क्षतपाण्डुगुल्मार्शःप्लीहवातकफार्त्तिनुत् ।
दीपनं श्वासकासघ्नं मृदुवानानुलोमनम् ॥
दःखप्रसवितीनाञ्च वन्ध्यानाञ्च प्रशस्यते ।
क्षौद्रहीनं वामयेत्तीक्ष्णैः पुनःस्निग्धञ्च भोजयेत् ।
पयसा मूत्रयुक्तेन बहुशः केवलेन वा ॥
दन्तीफलरसे कोष्णे काञ्जिकाञ्जलिमाहृतम् ।
द्राक्षाञ्जलिं वा मृदितं तत् पिबेत् पाण्डुरोग-
जित् ॥

मूत्रेण पिष्टां पथ्यां वा तत्सिद्धं वा फलत्रयम् ।
खर्जूरीरौ त्रिवृच्छ्यामा भद्रदारु महौषधम् ॥
गोमूत्राञ्जलिना पिष्टं मृदितं तेनैव वा पिबेत् ।
साधितं क्षीरमेभिर्वा पिबेद्दोषानुलोमनम् ॥
मूत्रे क्षितं वा सप्ताहं पयसा यो रजः पिबेत् ।
जीर्णे क्षीरेण भुञ्जीत रसेन मधुरेण वा ॥
मृद्वग्नीभयतो लिह्यात् पथ्यां मधुघृतप्लुताम् ।
विण्मूलां कटुकां मुक्तां कुष्ठं दारुकलिङ्गकः ॥
द्वावित्यादिपिचुर्मूर्ध्वा कर्षार्द्धोन्मानुपप्रिया ।
पीत्वा तच्चूर्णमम्भोभिः सुखैर्लिह्यात्ततो मधु ॥

पाण्डुरोगं ज्वरं दाहं कासं श्वासमरोचकम् ।
गुल्मानाहामवातांश्च रक्तपित्तञ्च तज्जयेत् ॥
वासागुडूचीत्रिफला कटुकीभूनिम्बनिम्बजः ।
क्वाथः क्षौद्रयुतो हन्ति पाण्डुपित्तास्रकामलाः ॥"
"गुडनागरमङ्कुरतिलांश्चाजाक्षीरतः समान् ।
पिण्यलीद्विगुणान् दद्यात् गुटिकां पाण्डुरोगिणे ॥
ताप्यं दार्व्यास्त्वचं चव्यं ग्रन्थिकं देवदारु च ।
क्षौद्रादि नरकेसरचूर्णद्विगुणं ततः ।
मण्डूरक्वाथजनिभं सर्व्वक्षौद्रगुणोऽथ तत् ॥
पृथग्विपक्वे गोमूत्रे वटकीकरणक्षमे ।
प्रक्षिप्य वटकान् कुर्य्यात् तान् खादेत्तक्रभोजनः ॥
एते मण्डूरवटकाः प्रायशः पाण्डुरोगिणाम् ।
कुष्ठान्यजरकं ग्रोपमरक्तक्षमरोचकम् ॥
अर्शांसि कामलां मेहान् प्लीहानं ग्रमयन्ति च ।
ताप्यान्निजतुरौप्याद्यैर्मलाः पञ्चपलाः पृथक् ॥
त्रिवृत्त्रिफला क्षौद्रविड्भ्यैः पालिकैः सह ।
ग्रर्करार्द्धपलोन्मिश्राचूर्णिता मधुना हृताः ॥
पाण्डुरोगं विषं कासं यक्ष्माणं विषमं ज्वरम् ।
कुष्ठान्यजरकं मेहं ग्रोपं श्वासमरोचकम् ॥
विग्रेषाद्वह्नयपस्मारं कामलां गुदजानि च ।
कौटजत्रिफलानिम्बपटोलवननागरैः ॥
भावितानि दशाहानि रसैर्द्विगुणानि वा ।
ग्रिलाजतुपलाग्र्यो तावती सितशर्करा ॥
त्वक्क्षीरी पिण्यली धात्री कर्कटाख्याः पलो-
न्मिताः ।
निर्दग्धाः फलमूलाभ्यां पलं युक्त्या त्रिजातकम् ॥
मधुत्रिपलसंयुक्तं कुर्य्याद्दलसमान् गुड़ान् ।
दाड़िमाम्बुपयःपक्षिरसतोयसुरासवान् ॥
तान् भक्षयित्वानुपिबेत्क्षिरान्नो भुक्त एव वा ।
पाण्डुकुष्ठज्वरप्लीहगुल्मकार्शो भगन्दरम् ॥
क्षणमूत्रपूतीशुक्राग्निदोषग्रोथगरोदरम् ।
कासाहृद्ग्रहपित्तास्रक्ग्रोफगुल्मगलामयान् ॥
मेहवर्त्मभ्रमान् हन्युः सर्व्वदोषहराः शिराः ॥"
इति वाभटे चिकित्सास्थाने षोड़शोऽध्याये ॥*॥

"अपायमन्नं लवणानि मद्यं
मृदं दिवास्वप्नमतीवतीक्ष्णम् ।
निषेवमाणस्य प्रदूष्य रक्तं
कुर्व्वन्ति दोषाश्चयि पाण्डुभावम् ॥
पाण्डामयोऽष्टाङ्गविधः प्रदिष्टः
पृथक्समस्तैर्यंगपञ्च दोषैः ।
सर्व्वेषु चैवेष्विह पाण्डुभावो
यतोऽधिकोऽतः खलु पाण्डुरोगः ॥"
"लक्षीयं लक्षणसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।
वातेन पाण्डुं मनुजं वदेच्च-
दूयुक्तं तथान्यैस्तदुपद्रवैश्च ॥
पीतेक्षणं पीतसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।
पित्तेन पाण्डुं मनुजं वदेच्च-
युक्तं तथान्यैस्तदुपद्रवैश्च ॥
शुक्लेक्षणं शुक्लसिरावनद्धं
तद्वर्णविण्मूत्रनखाननत्वं ।

कफेन पाण्डुं मनुजं वदेच्च
युक्तं तथान्यैस्तदुपद्रवैश्च ॥
सर्व्वात्मके सर्व्वमिदं वदेच्च
वक्ष्यामि लिङ्गान्यथ कामलायाः ॥"
चिकित्सान्तरं यथा,—
"साध्यन्तु पाण्डामयिनं समीक्ष्य
स्निग्धं घृतेनोर्द्धमधश्च शुद्धम् ।
सम्पादयेत् क्षौद्रघृतप्रगाढ़ै-
र्हरीतकीचूर्णयुतैः प्रयोगैः ।
पिबेद्घृतं वा रजनीविपक्वं
यवैफलं तैक्तकमेव वापि ॥
विरेचनद्रव्यशृतं पिबेद्वि
योगांश्च वैरेचनिकान् घृतेन ॥"
"उभे हरिद्रे रजनीं सुकाख्यां
सुकादनीञ्चापि सकाकमाचीम् ।
आदारिबिल्वौ सकदम्बपुष्पीं
विपाच्य सर्पिर्व्विपचेत् कषाये ॥
तत् पाण्डुतां क्षत्यपयुष्यमाणं
क्षीरेण वा मार्गधिकां यथाग्निः ।
हितञ्च यष्टीमधुकं कषायं
चूर्णं समं वा मधुनावलिह्यात् ॥
गोमूत्रयुक्तं त्रिफलादनानां
दद्यायसचूर्णमनल्पकालम् ।
प्रवालमुक्ताञ्जनगैरिकोत्थम् ॥
लिह्यात्तथा काञ्चनगैरिकोत्थम् ॥
आजं पुरीषं कुड़वप्रमाणं
त्रिवृं हरिद्रा लवणोत्तमञ्च ।
पृथक् पलांशानि समग्रमेत-
च्चूर्णं हितार्थी मधुनावलिह्यात्
मण्डूरलोहाग्निविड़ङ्गपथ्या
योगांश्चकः सर्व्वसमाननाम्नः ।
मत्वासुतोऽयं मधुनावलेह-
पाण्डामयं हन्त्यचिरेण घोरम् ॥"
इत्युत्तरतन्त्रे चतुश्चत्वारिंशत्तमेऽध्याये सम्पूर्ण
नीलम् ॥*॥ चिकित्सार्थमस्य वटिकौषधं यथा,
"लौहचूर्णं त्रिफायुक्तं त्रिफला कटुरोहिणी ।
प्रलिह्यान्मधुसर्पिर्भ्यां कामला पाण्डुरोगनुत् ॥"
इति त्रिफालौहम् ॥
"गुडूचीं तथा गव्यं घृतदेमाक्षगुग्गुलु ।
जेपालबीजं तुल्यञ्च घृतेन गुडकीकृतम् ॥
भक्षयेद्वदराभाक्षाक्षौद्रपाण्डुप्रणाशये ।
पञ्चाननवटी ख्याता अनुपानञ्च पूर्ब्बवत् ॥"
इति पञ्चाननवटी ॥
"पलं क्षतं पलं गव्यं वह्निपथ्या पलं पलम् ।
सुक्तेजापत्रकाभाक्षं प्रतिभार्द्धपलं त्रिपेत् ॥
चूर्णयं पिण्यलीक्षतं त्रिफयापि पलं पलम् ।
नागकेशरतः कर्षमेरक्तस्य पलमात्रया ॥
पुरातनगुडेनैव तुल्येनैव विमिश्रयेत् ।
मर्द्दयेत् कनकक्षारैरेकीकं वा घृताप्लुतम् ॥
गुड़ेन वदराभाभां कारयेद्भक्षयेन्नित्यं ।
पाण्डुरोगहरः श्रेष्ठं रसः कामेश्वरः स्वयम् ॥"
इति कामेश्वरो रसः ॥

इति वैद्यकरत्नसारसंग्रहे पाण्डुरोगाधिकारे ॥ * ॥ * ॥)

पाण्डुः, स्त्री, (पण्डि + कुः । निपातनात् दीर्घत्वम् ।) माषपर्णी। इति शब्दचन्द्रिका ॥ माषाणी इति भाषा ॥ पाण्डुवर्णश्च । इति मुग्धबोधव्याकरणम् ॥

पाण्डुकः, पुं, (पाण्डु + संज्ञायां कन् ।) पाण्डुरोगः । पाण्डुराजा । इति शब्दरत्नावली ॥ पाण्डुवर्णः । इति हलायुधः ॥

पाण्डुकण्टकः, पुं, (पाण्डुवर्णानि कण्टकान्यस्येति ।) अपामार्गः । इति राजनिर्घण्टः ॥

पाण्डुकम्बलः, पुं, (पाण्डुवर्णः कम्बलः नित्यकर्म्मधारयः ।) श्वेतप्रावारः । प्रस्तरभेदः । इति मेदिनी । ले, १७० ॥ पाण्डुवर्णकम्बलः । इति भरतः ॥

पाण्डुकम्बली, [न्] पुं, (पाण्डुवर्णकम्बलेन परिवृतः । पाण्डुकम्बल + "पाण्डुकम्बलादिनिः ।" ४ । २ । ११ । इति इनिः ।) पाण्डुवर्णकम्बलावृतरथः । इत्यमरः । २ । ८ । ५४ ॥ पाण्डुकम्बलयुक्ते, त्रि ॥

पाण्डुतरुः, पुं, (पाण्डुवर्णस्तरुरिति कर्म्मधारयः ।) धववृक्षः । इति राजनिर्घण्टः ॥

पाण्डुनागः, पुं, (पाण्डुवर्णो नाग इव । यद्वा, नाग इव पाण्डुरिति राजदन्तादित्वात् समासः ।) पुन्नागवृक्षः । इति शब्दरत्नावली ॥ (पाण्डुवर्णो नाग इति विग्रहे ।) श्वेतहस्ती श्वेतसर्षपश्च ॥

पाण्डुपत्री, स्त्री, (पाण्डु पत्रमस्या इति जातित्वात् ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"रेणुका राजपुत्री च जन्हिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपत्री सूक्ष्मा कौन्ती हरेणुका ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पाण्डुपृष्ठः, त्रि, (पाण्डु पृष्ठं यस्य ।) पाण्डुवर्णपृष्ठयुतः । अलक्तगः । इति त्रिकाण्डशेषः ॥

पाण्डुफलः, पुं, (पाण्डूनि फलानि यस्य ।) पटोलः । इति राजनिर्घण्टः ॥

पाण्डुफला, स्त्री, (पाण्डु फलमस्या इति टाप् ।) चिर्भिटा । इति राजनिर्घण्टः ॥

पाण्डुभूमः, त्रि, (पाण्डुर्भूमिरिव इति । "लक्ष्मीदृक्पाण्डुसज्ञायां पूर्व्वायां भूमेरजिष्यते ।" ५ । ४ । ७५ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या अच् समासे ।) पाण्डुवर्णभूमियुक्तदेशः । यथा,—

"पाण्डूदक् लक्षतो भूमिः पाण्डूदक् लक्षा स्मृत्तिका ॥"
इति हेमचन्द्रः ॥

पाण्डुमृत्, स्त्री, (पाण्डुः पाण्डुवर्णा मृत् मृत्तिका यत्र ।) पाण्डुभूमिः । पाण्डुर्मृत् इति कर्म्मधारये ।) खटी । इति राजनिर्घण्टः ॥

पाण्डुरः, पुं, (पाण्डु रक्षतीति । पाण्डु + "नगपांसुपाण्डुभ्यश्च ।" ५ । २ । १०७ । इत्यस्य सूत्रस्य वार्त्तिकोक्त्या रः ।) श्वेतपीतमिश्रितवर्णः । सह्यगिरि, त्रि । इत्यमरः । १ । ५ । १७ ॥ (यथा, भागवते । ८ । ८ । ६ ।

"तत उच्चैःश्रवा नाम हयोऽभूच्चन्द्रपाण्डुरः ।
तस्मिन् बलिः स्पृहाञ्चक्रे नेन्द्रः पुरुषधिष्ण्यया ॥")

कामलारोगः । इति शब्दरत्नावली ॥ श्वित्ररोगे, क्ली । इति हलायुधः ॥

पाण्डुरङ्गः, पुं, (पाण्डूनि अङ्गान्यस्येति ।) फलशाकविशेषः । पाटराङ्गा इति भाषा ॥ अस्य गुणाः । क्रिमिश्लेष्मप्रशमनत्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥

पाण्डुरद्रुमः, पुं, (पाण्डुरः श्वेतः श्वेतपीतमिश्रितवर्णो वा द्रुमो वृक्षः ।) कुटजवृक्षः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिका पुष्पे इत्यपि ।
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ॥")

पाण्डुरपृष्ठः, त्रि. (पाण्डुरं पृष्ठमस्य ।) लक्षणहीनः । इति हेमचन्द्रः ॥ पाण्डुवर्णपृष्ठयुक्तश्च ॥

पाण्डुरफली, स्त्री, (पाण्डुरं पाण्डुवर्णं फलं अस्याः । जातित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पाण्डुः २ धूसरा ३ वृक्षबीजका ४ भूरिपलितदा ५ पाण्डुफली ६ । अस्या गुणाः । शीतलत्वम् । गौल्यत्वम् । कफवातदोषपित्तमूत्राघातनाशित्वम् । बल्यत्वम् । वृष्यत्वञ्च । इति राजनिर्घण्टः ॥

पाण्डुरा, स्त्री, (पाण्डुरस्यस्या इति तदस्याप् च ।) माषपर्णी । इति राजनिर्घण्टः ॥ पाण्डुरवर्णा च ॥

पाण्डुरागः, पुं, (पाण्डुरं पाण्डुरत्वं वा सम्यक्रूपेण गच्छतीति । गम + डः । यद्वा, पाण्डुः रागोऽस्येति ।) रसनकवृक्षः । इति राजनिर्घण्टः ॥ पाण्डुवर्णयुक्ते, त्रि ॥

पाण्डुरेक्षुः, पुं, (पाण्डुरः श्वेतवर्ण इक्षुः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

पाण्डुलेखः, पुं, (पाण्डुर्लेखः ।) पाण्डुलिपिः । मुसविदा इति पारस्यभाषा ॥ यथाह यास्कः ।

"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥
फलकं काष्ठादिपट्टकम् ।" इति व्यवहारतत्त्वम् ॥

पाण्डुलोमशा, स्त्री, (पाण्डूनि लोमानीवाङ्गान्यस्याः ।) माषपर्णी ॥ इति रत्नमाला ॥ पाण्डुवर्णलोमयुक्ता च ॥

पाण्डुलोमा, स्त्री. (पाण्डु लोम यस्याः ।) माषपर्णी । इति शब्दार्णवः ॥ पाण्डुवर्णलोमयुक्ते, त्रि ॥

पाण्डुशूर्करा, स्त्री, (पाण्डुः शूर्करा इव यस्यां रोगावस्थायामित्यर्थः ।) रोगविशेषः । यथा, गारुडे १८२ अध्याये ।

"पिष्टं वै मालतीमूलं श्रीखण्डाक्षे समाहृतम् ।
साधितं छागदुग्धेन पीतं शूर्करयान्वितम् ॥
हरेत्सूत्रमशेषञ्च हरेद्वै पाण्डुशूर्करान् ॥"

पाण्डुसूत्रिका, स्त्री, द्रौपदी । इति त्रिकाण्डशेषः ॥

पाण्डुसोपाकः, पुं, (वर्णसङ्करविशेषः । स तु चाण्डालाद्वैदेह्यां जातः ॥ (अस्योत्पत्तिविवरणम् । यथा, मनौ । १० । ३७ ।

"चण्डालात् पाण्डुसोपाकश्चर्म्मकारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥"
"वैदेह्यां चण्डालात् पाण्डुसोपाकाख्यो वर्णावहारजीवी जायते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ क्वचित् पाण्डुसौपाकोऽपि पाठो दृश्यते । यथा, महाभारते । १३ । ४८ । २६ ।

"चण्डालात् पाण्डुसौपाकश्चर्म्मकारव्यवहारवान् ॥")

पाण्य, त्रि, (पण्य व्यवहारस्तुत्योः + यत् ।) स्तुत्यः । स्तवनीयः । ("पण्या गौः व्यवहर्त्तव्यार्घ्यः । पाण्यमन्यत् स्तुत्यर्हमित्यर्थः ।" इति सिद्धान्तकौमुद्याम् । ३ । १ । १०१ । इत्यस्य सूत्रस्य वृत्तौ आख्यातम् ॥)

पात, पुं, (पत + घञ् ।) पतनम् । (यथा, महाभारते । ३ । १३३ । २६ ।

"वडवे इव संयुक्ते श्येनपाते दिवौकसाम् ।
कस्तयोर्गर्भमाधत्ते गर्भं सुषुवतुश्च कम् ॥")

आते, त्रि । इति मेदिनी ॥ (पातयति चन्द्रसूर्य्यौ क्षादयतीति । पत + णिच् + अच् ।) राहुः । यथा,—

"ताडितः खदहनेर्हिंसकाग्रः
षटकषटकशरक्षतफलमांसाः ।
खं भुवे कुसुदिनीपतिपातो
राहुमाहुरिह केऽपि तदेव ॥"
इति सिद्धान्तशिरोमणिः ॥

पातकं, क्ली, (पातयति अधो गमयति दुष्क्रियाकारिणमिति । पत + णिच् + ण्वुल् ।) नरकसाधनमिति यावत् । तत्पर्य्यायः । अशुभम् २ दुष्कृतम् ३ दुरितम् ४ पापम् ५ अघः ६ आभा ७ किल्बिषम् ८ कलुषम् ९ किल्बम् १० कल्मषम् ११ दुरितम् १२ तमः १३ अंहः १४ कल्कम् १५ अघम् १६ पङ्कम् १७ । इति हेमचन्द्रः ॥ तच्च नवविधं यथा । अतिपातकम् १ महापातकम् २ अनुपातकम् ३ उपपातकम् ४ जातिभ्रंशकरम् ५ सङ्करीकरणम् ६ अपात्रीकरणम् ७ मलावहम् ८ प्रकीर्णकम् ९ । इति प्रायश्चित्तविवेकः ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम् ॥ कायवाङ्मनःसम्भवानि दशविधपापानि यथा,—

"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥

पातञ्जिः, पुं, (पतञ्जस्य ऋषेरयमपत्यमिति । पतञ्ज + "अत इञ् ।" ४ । १ । १५ । इति इञ् ।) मुनेर्वरः । इति शब्दरत्नावली ॥

पातञ्जलं, क्ली, (पतञ्जलिना खनामविश्रुतमहर्षिणा प्रणीतं प्रोक्तं वा इति अण्।) पतञ्जलिमुनिप्रणीतपादचतुष्टयात्मकयोगशास्त्रनिरूपकदर्शनशास्त्रविशेषः। तच्च प्रथमे पादे अथ योगानुशासनमिति योगशास्त्रारम्भे प्रतिज्ञां विधाय योगश्चित्तवृत्तिनिरोध इत्यादिना योगलक्षणमभिधाय समाधिं सप्रपञ्चं निरदिक्षद्भगवान् पतञ्जलिः॥ १॥ द्वितीये तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इत्यादिना युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गानि साधनानि॥ २॥ तृतीये। देशबन्धश्चित्तस्य धारणेत्यादिना धारणाध्यानसमाधित्रयमन्तरङ्गं संयमपदवाच्यं तत्फलान्तरपादं विभूतिजातम्॥३॥ चतुर्थे जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धय इत्यादिना सिद्धिप्रपञ्चनपूर्वकं परमं प्रयोजनं कैवल्यम्॥ ४॥ प्रधानादीनि पञ्चविंशतितत्त्वानि साङ्ख्योक्तान्येवाप्यत्र। षड्विंशस्तु परमेश्वरोऽधिकः। इति सर्व्वदर्शनसंग्रहः॥

पातनं, क्ली, (पत+णिच्+भावे ल्युट्।) अधोनयनम्। यथा "ऊर्द्धाधस्तिर्य्यक्पातनादिभी रसस्य नानाविधा मुक्तिरुक्ता।" इति रत्नावली॥

पाता, [तृ] त्रि, (पाति रक्षतीति। पा रक्षणे+तृच्।) रक्षिता। यथा,—

"संहारकर्त्तुः संहर्त्ता पातुः पाता परात्परः।
ममाश्रयार्थं संहर्त्ता नाम्ना तेन हरः स्मृतः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६ अध्यायः॥

गन्धपत्रः। इति शब्दचन्द्रिका॥ बादुर इति भाषा॥

पातालं, क्ली, (पतन्त्यस्मिन् दुष्क्रियावन्त इति। पत+"पतिचटिभ्यामालच्।" उणा०। १। २१६। इति आलच्। पादस्य तले वर्त्तते इति पृषोदरात् साधुरिलेके।) विवरम्। वडवानलः। इति मेदिनी॥ जम्बाद्यतुर्थखण्डम्। यथा,—

"पातालं हिमुकञ्चैव सुतलं सप्तमं चतुर्थकम्॥"

इति ज्योतिस्तत्त्वम्॥

स्वनामख्यातभुवनविशेषः। तत्पर्य्यायः। अधोभुवनम् २ बलिसद्म ३ रसातलम् ४ नागलोकः ५। इत्यमरः॥ अधः ६ उरगस्थानम् ७॥ *॥

सप्तपातालानि यथा,—

"अतलं वितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपाताले पातालानि तु सप्त वै॥"

इति शब्दरत्नावली॥

शेष उवाच।

"कथयामि महाभाग! पातालस्य विनिर्णयम्।
क्रमादेव निबोधेतत् सावधानो द्विजर्षभ!॥
पातालानि च सप्तैव सुनयः संप्रचक्षते।
अतलं वितलञ्चैव सुतलञ्च तलातलम्॥
महातलञ्च विख्यातं ततो ज्ञेयं रसातलम्।
ततः पातालमित्येवं सप्त पातालसंज्ञकाः॥
एते स्वर्गाधिकसुखा विलसर्गाः प्रकीर्त्तिताः।
सर्व्वसुभवनोद्यानविहाराक्रीड़चत्वराः॥
या च सा मेदिनी ब्रह्मन्! धत्ते स्थावरजङ्गमान्।
अधस्तस्या यदतलं योऽन्धकायुततो द्विज!॥
मयपुत्रो महामायो बलञ्च महासुरः।
येन सृष्टाः पुरा माया बहून्नवतिः किल॥१॥
तदधो वितलं नाम योजनानां ततोऽयुते।
हरो विहरते तत्र भगवान् हाटकेश्वरः॥
सुपार्श्वदैर्भूतगणैर्भवान्या च सह प्रभुः।
प्रसृता च सरित् तत्र हाटकी नाम विश्रुता॥२॥
अधः सुतलमित्येतत् योजनानां ततोऽयुते।
तत्रोदारश्रवाः पुण्यश्लोको वैरोचनिर्बलिः॥३॥
तलातलं ततोऽधस्तात् सुतलादूयोजनायुते।
मयो नाम दानवेन्द्रस्त्रिपुराधिपतिर्महान्।
निवसत्यत्र सुचिरं मायानां परमाश्रयः॥ ४॥
महातले ततोऽधस्तादूयोजनानामथायुते।
सर्पाणां काद्रवेयाणां गणाः क्रोधवशाश्रयः॥
गरुडात् सर्व्वदा भीतः सबन्धुः सुहृदावृतः।
निवसत्यत्र विप्रेन्द्र! पक्षिराजेन गरुडे॥ ५॥
रसातले ततोऽधस्तादूयोजनानामथायुते।
निवसन्ति दानवाश्च यज्ञारीतरा निरन्तरम्॥६॥
पाताले तु ततोऽधस्तादूयोजनानां द्विजायुते।
नागलोकेश्वराः शूरा निवसन्ति महाबलाः॥"७

इति पाद्मे पातालखण्डे १। २। ३ अध्यायाः॥*

अपि च अग्निपुराणे।

"अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्॥
कृष्णभौमं शिलाभौमं पातालं नीलरक्तिकम्।
रक्तपीतसितेतल्लाभौमानि च भवन्त्यपि॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुधिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥
अष्टाविंशतिविख्याताश्चतो नरककोटयः।
नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान्।
तद्भो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत्॥" *॥

अन्यच्च।

"दशसाहस्रमेकैकं पातालं मुनिसत्तम!।
अतलं वितलञ्चैव नितलञ्च गभस्तिमत्॥
महाख्यं सुतलाख्यं पातालञ्चापि सप्तमम्।
शुक्लासितारुणापीताशर्करापैलकाञ्चनाः॥
भूमयो यत्र मैत्रेय! वरप्रासादशोभिताः।
तेषु दानवदैतेयजातयः सुतसंयुताः॥
निवसन्ति महाभागा अहयश्च महासुने!।
सप्तलोकादपि रम्याणि पातालानीति नारद!॥
दिवाकरप्रभायो यच्च प्रभा तत्रास्ति मारुतम्।
अग्निश्च न शीतायं विधि शीतायं केवलम्॥
पातालानामधस्तात्ते विष्णोर्या तामसी तनुः।
शेषाख्या यद्गुणान् वक्तुं न शक्ता दैत्यदानवाः॥
योऽनन्तः पठ्यते सिद्धैर्देवर्षिपूजितः।
यस्येषा सकला पृथ्वी फणामणिनिबन्धना।
आस्ते कुसुममालेव कालहीर्य्यं वहिष्यति॥
यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः।
तदा चलति भूरेषा सार्द्रतोयाब्धिकानना॥"

इति विष्णुपुराणे। २। ५। अध्यायः॥

पाताल:, पुं, (पतति आरम्भाद्यर्थं पारदादिकं यत्र। पत+आलच्।) औषधपाकार्थयन्त्रविशेषः। इति शब्दचन्द्रिका॥ तत्प्रकारो यथा, वैद्यके।

"ऊर्द्धमाषजले बह्निर्मध्ये तु रसबन्धकः।
पातालयन्त्रमेतद्धि द्रोधयेत् क्षुतकादिकम्॥"

पातालगरुड़ी, स्त्री, (पातालाख्या गरुड़ी।) लताविशेषः। हेउड़ा इति हिन्दीभाषा॥ तत्पर्य्यायः। वत्सादनी २ क्षीरवल्ली ३ सिद्धाङ्गा ४ मेघकाभिधा ५ तार्क्षी ६ सौपर्णी ७ गारुड़ी ८ दीर्घकाण्डा ९ डङ्गकाण्डा १० महाबला ११ दीर्घवल्ली १२ डङ्गलता १३। अस्या गुणाः। मधुरत्वम्। पित्तदाहास्रदोषविषदोषनाशित्वम्। हृद्यत्वम्। सन्धानत्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

अपि च।

"छिलिछिल्ली महाकन्दः पातालगरुड़ाह्वयः।
छिलिछिल्लः परं हृद्यः कफघ्नः पवनापहः॥"

इति भावप्रकाशः॥

पातालनिलयः, पुं, (पाताले पातालं वा निलयो यस्य।) दैत्यः। इति हलायुधः॥ सर्पः। इति राजनिर्घण्टः॥

पातालौकाः, [स्] पुं, (पातालमोकः स्थानमस्येति।) दैत्यः। इति हेमचन्द्रः॥ पातालवासिनि, त्रि॥

पाति:, पुं, (पाति रक्षतीति। पा+"पातेरतिः।" उणा०। ५। ५। इति अतिप्रत्ययः।) प्रभुः। स्वामी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

पातिक:, पुं, (पातः पतनं जले निमज्जनोन्मज्जनमेवाध्यस्येति। पात+ठन्।) शिशुमारः। इति शब्दमाला॥

पातिव्रती, स्त्री, (पाति: सम्पाति: पतिव्रतं स्त्रीयते ऽस्य। स्त्री+कः। ङीष् च।) वायुरा। (पाति: स्वामी स्त्रीयतेऽस्याम्।) नारी। ऋतुपात्रभेदः। इति मेदिनी॥ पातिव्रत इति भाषा॥

पातुक:, त्रि, (पत+"जवयतपदश्चेति।" ३। २। १५४। इति उकञ्।) पतयालुः। पतनशीलः। इत्यमरः॥ (यथा, महाभारते। १२। ६१। ४२।

"यमो राजा धार्म्मिकाणां मान्यानां परमेश्वरः।
संयच्छन् भवति प्राज्ञानसंयच्छंस्तु पातुकः॥")

प्रपाते जलस्खलिनि च पुं। इति मेदिनी॥

पात्र:, त्रि, (नानागुणाश्रयत्वेन जनः।

"अपात्रः पात्रतां याति यत्र पात्रो न विद्यते॥"

इत्युद्वाहितत्त्वधृतदुःखवलहरः॥

तथा च महाभारते। १३। ६८। २२।

"भूमि पात्रे ये गुणा गोप्रदाने
तावान् दोषो ब्राह्मणस्वापहारे॥")

पात्रोक्तप्रत्ययनित्यत्वादेस्तत्कारणत्वायत्वम्॥

पात्रं, क्ली, पाति रक्षति क्रियामाधेयं वा। पिबत्यनेनेति वा। पा रक्षणे पा पाने वा+"सर्व्वधातुभ्यः ष्ट्रन्।" उणा०। ४। १५८। इति ष्ट्रन्।)

आधेयधारणवस्तु। तत्पर्य्यायः। अमत्रम् २ भाजनम् ३। इत्यमरः।२। ६।३६॥ भाक्तम् ४ कोशः ५ कोशः ६ प्राचौ ७ कोशौ ८ कोशौ ९ कोशिका १० कोशिका ११। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। २। ४०।

"सकलगुणगणानामेकपात्रं पवित्र-
मखिलभुवनमातुर्नाथवद्दृष्टिचित्रम्॥")

पोग्यम्। सुवादि। राजमन्त्री। तीरस्थवान्तरम्। इति मेदिनी॥ पातार इति भाषा॥ पक्वम्। नाम्नातुकर्णा। इति हेमचन्द्रः॥ आढकपरिमाणम्। इति वैद्यकपरिभाषा॥*॥ (यथा, चरके कल्पस्थाने १० अध्याये।

"————————चतुः प्रस्थमथाढकम्।
पात्रं तदेव विज्ञेयं————————॥")

पात्राणां विधिर्यथा,—

"हेमपात्रेण सर्व्वाणि लभते चेति साध्यते।।
अर्घ्यं दत्त्वा तु रौप्येण आयुराप्नुयुतान् लभेत्॥
ताम्रपात्रेण सौभाग्यं धर्म्मं शङ्खमयस्तथा।
वार्क्षपात्राणि रम्याणि नैष्ठिकादिषु कारयेत्॥
श्रौक्षाणि क्रूरजातीनां रक्षांसि सर्व्वकामिनाम्।
धातूत्तमानि पात्राणि कृपदार्द्रविदृद्धये॥
अपुंसीयकलौहानि अन्त्यजादिषु कारयेत्।
विवाहयज्ञयात्रासु प्रतिष्ठासु विशेषतः॥
पात्राणाञ्चादरः कार्य्यः पात्राणयेवोत्तमानि च।
पात्रेषु पृथिवी दुग्धा सुधा पात्रेषु धार्य्यते॥
देवाः सोमः क्रतुर्यज्ञः पात्राण्येव विदुर्बुधाः।
बलिहोमक्रियादीनि विना पात्रेण सिध्यति॥
तस्मादृयत्नात्कृमेवातः पात्रचाणं महामुने!॥"

तत्परिमाणादिर्यथा,—

"षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम्।
मध्यमं तन्त्रिभागेण भागं कन्यसमीरितम्॥
वस्त्रकुम्भप्रमाणन्तु तत् पात्रं कारयेत् क्वचित्।
नानाविचित्ररूपाणि पौष्करीकाणतीनि च॥
शुक्लनीलोत्पलाकारपात्राणि परिकल्पयेत्।
रत्नादिरचितान् कुर्य्यात् काञ्चीमूलसुसञ्चितान्॥
यथाशोभं यथालाभं तथा पात्राणि कारयेत्।
विना पात्रेण यः कुर्य्यात् प्रतिष्ठायाग्निकीं क्रियाम्।
विफला भवते सर्व्वा याचनादिधनापहा॥"

इति देवीपुराणम्॥*॥

भोजनपात्राणि भोजनशब्दे द्रष्टव्यानि॥

पात्रट, पुं, (पात्रा इव पिबन्निव वा अटतीति। अट+अच्।) कपटकः। इति शब्दरत्नावली॥

पात्रटोर, पुं, (पात्रेव रक्षन्निव पिबन्निव वा अटतीति। अट+बाहुलकात् ऊरन्।) युक्तव्यापारमन्त्री। लौहपात्रम्। कांस्यपात्रम्। रजतपात्रम्। खिंचाम्। पावकः। इति शब्दमाला मेदिनी च॥ रे, २८१। पिङ्गाक्षः। वायसः। काकः। इति शब्दरत्नावली॥

पात्रपाल, पुं, (पात्रं पालयतीति। पाल+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) सुवा-

धटः। इति जटाधरः॥ पातओयार इति भाषा॥

पात्रसंस्कारः, पुं, (संस्क्रियते इति। सम्+स्कृ+घञ्। पात्रस्य संस्कारः शुद्धिः।) भाजनशुद्धिः। पुरोटिः। इति शब्दचन्द्रिका॥ रायभाटी इति भाषा॥

पात्री, स्त्री, (पा+कृत्। स्त्रियां ङीप्।) पात्रम्। इति त्रिलिङ्गसंग्रहे अमरः। ३। ५। ४२॥ (यथा, पाद्मे क्रियायोगसारे तडागविधिप्रकरणे।

"पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम्।
तत्र निःक्षिप्य मकरं मत्स्यादींश्चैव सर्व्वशः॥")

पात्रीयं, स्त्री, (पात्रे साधु। पात्र+बाहुलकात् छः।) यज्ञपात्रम्। इति त्रिकाण्डशेषः॥

पात्रीरः, पुं, (पात्रेण राति पात्रीं रातीति वा। रा+कः।) यज्ञद्रव्यम्। इति भूरिप्रयोगः॥

पात्रेसमितः, त्रि, (पात्रे भोजनसमये एव समितः सङ्गतः।) भोजनादन्यत्र यो न मिलितः सः। भोजनेष्वेव दृष्टः। यथा,—

"स पात्रेसमितोऽन्यत्र भोजनान्मिलितो न यः॥"

इति त्रिकाण्डशेषः॥

पापविशेषः। यथा,—

"निधाय हृदये पापं यः परं शंसति स्वयम्।
स पात्रेसमितोऽथ स्यात्॥" इति शब्दमाला॥

पात्रोपकरणं, क्ली, (पात्रस्य पात्राणां वा उपकरणम् उपभूषणम्।) उपभूषणम्। यथा,—

"रीतिवर्णादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्ज्यन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादिपात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्यादयस्तात्तदुपभूषणम्॥"

इति कालिकापुराणे ६८ अध्यायः॥

पात्रं, क्ली, (पततीति। पत+क्विप्। पतं अधःपतनं त्रायते। त्रै+कः। ततः स्वार्थे प्रज्ञाद्यण् निपातोऽस्य निरुक्तिश्च दर्शनीया।) पात्रिजाता। यथा, भविष्यपुराणे।

"सर्व्वेषामेव पात्राणां परं पात्रं महेश्वरः।
पतनं त्रायते यस्मादतीवनरकार्णवात्॥"

महेश्वर इति प्रदर्शकं हेतोरविघातात्।

तथा तन्त्रिपुराणम्।

"पात्राणामाश्रमिका सुखा विमुक्ताश्रमिश्रोत्रिया:।
देवतास्तु तथा सुखा गोदानं क्षेत्रमुत्तमम्॥"

इति प्रायश्चित्ततत्त्वम्॥

पात्रता, स्त्री, (पात्रस्य भावः।) पात्रत्वम्। विद्यातपस्त्याचारयुक्तता। यथा,—

"न विद्यया केवलया तपसा वापि पात्रता।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते॥"

इति शुद्धितत्त्वम्॥

पात्र्य, क्ली, जलम्। इति मेदिनी। ये, ६॥

पाथः, पुं, (पातीति। पा+थुट् निपातनात्।) सूर्य्यः। अग्निः। इति मेदिनी। थे, ६॥

पाथः, [स्] क्ली, (पाति रक्षति जीवानिति। पा+"उदके थुट् च।" उणा। ४। २०९।

इति असुन् थुट् च। "पातेरेवोदके वाच्येऽसुन् तस्य थुडागम इत्युज्ज्वलदत्तः।) जलम्। इत्यमरः॥ (यथा, काशीखण्डे। २६। ४६।

"अरसज्ञापयन्मनो खनिः पीयूषपाथसाम्॥")

पाथिः, [स्] पुं, (पिबति नद्यादिजलमाकर्षतीति। "पिबतेरिथुक् च।" उणा। २। ११५। इति इथिन् थुगागमश्च।) समुद्रः। इत्युणादिकोषः॥ चक्षुः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (पीयते इति। पा+इथिन् थुगागमश्च।) कीलाले, क्ली। इत्युणादिकोषः॥

पाथेयं, क्ली, (पथि साधुरिति। "पथ्यतिथिवसतिस्वपतेष्ठक्।" ४। ४। १०४। इति ठक्।) पथि पथिसत्यद्रव्यम्। इति हेमचन्द्रः॥ पथखरच इति भाषा॥ तत्पर्य्यायः। शम्बलम् २। इत्यमरः॥ मम्बलम् ३। इति भरतः॥ (यथा, देवीभागवते। ३। २५। १२।

"क्षुधिता तस्करैर्मार्गे वञ्चमाना तथा-ज्ञता।
पाथेयञ्च हृतं सर्व्वं बालपुत्रा निराश्रया॥")

कन्थाराशिः। यथा,—

"क्रियतामुरिजितुमकुलीरलेयपाथेययूकवौ-
र्यांख्याः।
तौल्यिक आकोकेरो क्षुरोगश्चान्यभक्षेत्यम्॥"

इति ज्योतिस्तत्त्वम्॥

पाथोज, क्ली, (पाथसि जले जायते इति। जन+डः।) कमलम्। इति राजनिर्घण्टः॥ (यथा, नैषधे। १६। ७७।

"अनतिस्निग्धिते पुम्भावेन प्रगल्भबला: खलु
प्रसभमलयः पाथोजास्ये निविश्य गिरित्वराः॥"

कमलशब्दे विवरणं सविस्तरं द्रष्टव्यम्॥)

पाथोद, पुं, (पाथो जलं ददातीति। दा+कः।) मेघः। इति त्रिकाण्डशेषः॥

पाथोधर, पुं, (धरति धारयतीति वा। धृ+अच्। पाथसो धरः। पाथो धारयतीति। धारि+अच् ह्रस्व इत्येके।) मेघः। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ३। २४०।

"अन्तर्ये सततं लुठन्ति गणिनाक्षानेव पाथोधरै-
रार्त्तानापतितांश्चरङ्गबलयेरालिङ्ग्य यक्षन्नयौ॥")

पाथोधिः, पुं, (पाथांसि धीयन्तेऽत्र। धा+कि।) समुद्रः। इति त्रिकाण्डशेषः॥ (यथा, राजतरङ्गिण्याम्। १। ६८।

"वप्रीकृतेयं पृथिवी क्षत्त्वा भवदनुग्रहात्।
सेतुं द्वीपान् कथयतान्नु युक्तिः पाथोधिलङ्घने॥")

पाथोनिधिः, पुं, (पाथांसि जलानि निधीयन्तेऽस्मिन् इति। नि+धा+किः।) समुद्रः। इति शब्दरत्नावली॥

पाद्, पुं, (पद+क्विप्+क्विप्।) पादः। इति जटाधरः॥

पादः, पुं, (पद+करणे घञ्।) पद्यते गम्यते अनेन। पा इति भाषा। स तु गर्भस्थबालकस्य भावद्वयेन भवति। यथा,—

"आसीन तु शिरो हार्य्यं वाङ्मुद्ध्वाद्यङ्गविग्रहः॥'

इति भागवतीयदशमस्कन्धः॥

तत्पर्य्यायः। पत् २ अङ्घिः ३ चरणः ४। इत्यमरः॥ अंहिः ५। इति शब्दरत्नावली॥ * ॥ ऋग्वेदीयमन्त्रचतुर्थांशः। श्लोकचतुर्थांशः। यथा, पादाघेश्लोपे सत्येव पूर्य्यते। इह ऋक्पाद एव गृह्यते। इति वामनः॥ अविशेषात् श्लोकपादोऽपि। इत्यपरे। इति सिद्धान्तकौमुदी॥ * ॥

पादद्वारा पादाक्रमणादिनिषेधो यथा,—

"पादेन नाक्रमेत् पादमुच्छिष्टं नैव लङ्घयेत्।
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः॥"

इति कर्म्मलोचनम्॥ * ॥

पादचालनादिनिषेधो यथा,—

"न पादचालनं कुर्य्यात् पादेन वा कदाचन।
नाग्नौ प्रतापयेत् पादौ न कांस्ये धावयेद्बुधः॥
नातिप्रसारयेद्वेश्म आक्रम्याद् गामथापि वा।
वाय्वग्निसूर्य्यविप्राणां सूर्य्यं वा प्रतिमं प्रति॥"

इति कौर्म्मे उपविभागे १५ अध्यायः॥ * ॥

पादेन्द्रियस्याध्यात्मत्वं तल्लिङ्गमधिभूतमधिदैवतञ्च यथा, महाभारते. आश्वमेधिकपर्व्वणि ४२ अध्याये।

"अतः परं प्रवक्ष्यामि सर्व्वं विविधमिन्द्रियम्।
पादावध्यात्ममित्याहुर्मार्गकालाक्षतत्त्वदर्शिनः॥
अधिभूतन्तु गन्तव्यं विष्णुस्तत्राधिदैवतम्॥"

बुधः। इत्यमलम्। तुरीयांशः। चतुर्थभागः। शैलप्रत्यन्तपर्व्वतः। महानिम्नसमीपे क्षुद्रपर्व्वतः। (यथा, हरिवंशे ८४। २०।

"उभयोर्विन्ध्यशैलयोः पादे नगयोर्ज्जां महापुरीम्॥")

मयूखः। किरणः। इति मेदिनी॥ (शिवः। यथा, महाभारते। १३। १७। १२४।

"न्यायनिर्व्वपणः पादः पक्किलो ह्यचलोपमः॥"

चिकित्साया पादचतुष्टयं यथा,—

"वैद्यो व्याधुपसृष्टस्तु भेषजं परिचारकः।
एते पादाश्चिकित्साया कर्म्मसाधनहेतवः॥
गुणवद्भिश्चिभिः पादैश्चतुर्थो गुणवान् भिषक्।
व्याधिमल्पेन कालेन महान्तमपि साधयेत्॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः।
उन्नाहस्वेदनस्नाय्यो यथाधार्य्यं विनाऽरे॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती।
जघन्यः शुचिः शूरः सज्जोपस्करभेषजः॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सर्व्वधर्म्मपरो यश्च स भिषक् पाद उच्यते॥
आयुष्मान् सत्त्ववान् साध्यो ह्यवयानात्मवानपि।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम्।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम्॥
दोषघ्नमग्न्यनिकरमविकारि विपर्य्यये।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते॥
स्निग्धोऽनुद्धुर्बलवान् युक्तो व्याधितरक्षये।
वैद्यवाक्यस्थदक्षान्तः पादः परिचरः स्मृतः॥"

इति च सुश्रुते सूत्रस्थाने ३४ अध्यायः॥

"कारणं षोड़शगुणं विद्धौ पादचतुष्टयम्॥"

इति चरके सूत्रस्थाने नवमेऽध्याये॥

अस्य शुभलक्षणं यथा,—

"अक्षेदनौ मृदुतलौ कमलोदराभौ
स्निग्धाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी।
उच्चौ शिरोविरहितौ च निगूढ़गुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य॥"

अशुभलक्षणञ्च यथा,—

"खर्पाकारविरूक्षपाण्डुरनखौ वक्रौ शिरासन्ततौ
संशुष्कौ विरलाङ्गुली च चरणौ दारिद्र्यदुःखप्रदौ॥")

पादकटकः, पुं, (पादस्य कटक इवेति।) नूपुरः। रवमूल्यहंसालक्तिचरञ्जभूषणम्। वेंक मल इति भाषा। तत्पर्य्यायः। हंसकः २। इत्यमरभरतौ॥

पादकच्छूः, पुं, व्रतविशेषः। यथा,—

"एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैकेन पादकच्छ्र उदाहृतः॥"

इति गारुड़े १०३ अध्यायः॥

पादगण्डिरः, पुं, (गण्यते स्तूर्य्यते पूयरक्तादि यस्मात् यत्र वा पादे इत्यर्थः। गड़ + किरच् इति गण्डिरः पदः ततो राजदन्तादित्वात् परनिपातनात् साधुः। गण्डीर इति पाठोऽपि दृश्यते तत्र गड़ + ईरन्प्रत्ययेन साधुरिति।) श्लीपदम्। इति शिकाकाशेषः॥ गोद इति भाषा॥ (श्लीपदशब्देऽस्य विवृतिर्द्रष्टव्या॥)

पादग्रहणं, क्ली, (पादयोर्ग्रहणम् इति। ग्रह + भावे ल्युट्।) अभिवादनम्। पादस्पर्शपूर्ब्बकप्रणामः। इत्यमरः॥ तन्निषेधो यथा, "समिद्दार्य्यूदकुम्भपुष्पान्नहस्तो नाभिवादयेत् यथाप्येवं युक्तम्।" इति बौधायनः॥

"जपयज्ञजलस्थञ्च समित्पुष्पकुशान्नलान्।
दन्तकाष्ठञ्च भस्मञ्च वह्निं नाभिवादयेत्॥"

इति लघुहारीतः॥

न पुण्याहत्रयाधिक्यमुचितं जपन् न देवपित्रकार्य्यं कुर्व्वन्। अभिवादयेदित्यनुक्तौ ग्रहणलिखितौ॥ * ॥ तद्विधिः।

"लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्॥
ऊर्द्धं प्राणा ह्युत्क्रामन्ति युनः स्थविर आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते॥"*॥

तत्प्रकारः।

"अभिवादात् परं विप्रो ज्यायांसमभिवादयन्।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्॥
नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वाश्चयैव च॥
भोः शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
नाम्नां स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः॥"

इति मनुः। २। १२२—१२४॥

पादचतुरः, पुं, (पादे पदव्यापारे गमनादौ चतुरः।) छागः। शैकतम्। पिप्पलः। करकः। परदोषैकप्रवक्ता। इति मेदिनी। रे, १०४॥

पादचारी, [न्] पुं, (पद्भ्यां चरतीति। चर गतौ + णिनिः) यदातिः। इति शब्दचन्द्रिकः। ३। १६२॥ पद्भ्यां गमनशीले, त्रि॥ (यथा, भागवते। ६। १२। २६।

"गिरिराट् पादचारीव पद्भ्यां निर्झरयन् महीम्।
जग्राह स समासाद्य बलिं सकलदायनम्॥")

पादजः, पुं, (पद्भ्यां जायते इति। जन + डः।

"पद्भ्यां भूमेऽजायत।" इति श्रुतेर्ब्राह्मणः पद्भ्यां जातत्वात्तथात्वम्।) शूद्रः। इति शिकाकाशेषः॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ३६। ६३।

"न विप्रा न च राजानो न वैश्या न च पादजाः॥"

पादोद्भवमात्रे, त्रि॥)

पादत्राणं, क्ली, (पादयोस्त्राणं यस्मात्।) पादुका इति जटाधरः॥ (यथा, सुश्रुते चिकित्सितस्थाने २१ अध्याये। "अधनस्यवान्यो वा पादत्राणातपत्रविरहितो मैक्षाशी यामैकरात्रानुवासी मुनिरिव संयतात्मा योजनशतमधिकं वा गच्छेत्॥" प्रीतिरूपचारेऽस्य व्यवहारो यथा,—

"उच्चावचभावैर्लुभिः प्राकृतः स्तूयतेऽजस्रम्।
युक्त्यार्कैकिरणान् खेदं पादत्राणञ्च सर्व्वदा॥")

पादपः, पुं, (पादेन मूलेन पिबति रसानिति। पा + कः।) वृक्षः। इत्यमरः॥ (यथा, हितोपदेशे। १। ६३।

"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"

पादौ पाति रक्षतीति। पा + रक्षणे + कः।) पादपीठः। इति मेदिनी। पे, २१॥

पादपद्मा, स्त्री, (पादपे हृदे रोचतीति। रुच + कः।) वल्लाकः। इति राजनिर्घण्टः॥

पादपा, स्त्री, (पादौ पाति रक्षतीति। पा + कः + टाप्।) पादुका। इति मेदिनी। पे, २१॥

पादपाद्यः, पुं, (पादस्य पाद्यः।) अन्यपादरज्जुः। तत्पर्य्यायः। दामाबन्धनम् २। इति हेमचन्द्रः। ४। २६५॥

पादपाद्यी, स्त्री, (पादपाद्य + स्त्रियां जातित्वात् ङीष्।) खड़्गुका। खेड़ुया इति भाषा॥ खड़ाऊ। खिलजी इति भाषा॥ इति मेदिनी॥

पादपीठं, क्ली, (पादस्य पीठम्।) पादस्थापनासनम्। पा राखा टुक इति भाषा॥ तत्पर्य्यायः। पदासनम् २। इति हेमचन्द्रः। ३। ३८२॥ (यथा, रघुः। १७। २८।

"वितानसहितं तत्र भेजे पैतृकमासनम्।
चूड़ामणिभिरुद्दृष्टपादपीठं महौजसाम्॥")

पादपीठिका, स्त्री, (पादपीठं आसनत्वेनास्त्यस्यां इति। पादपीठ + ठन्।) स्थापितादिस्थित्यम्। यथा,—

"स्थापितादिस्थितौ तु स्यात्पादपीठिका॥"

इति शब्दमाला॥

पादप्रक्षालनं, क्ली, (पादयोः प्रक्षालनम्।) चरणधौतम्। पा धोब्बोया इति भाषा॥ अस्य गुणाः। मेधाजनकत्वम्। पवित्रत्वम्। आयुष्यत्वम्। अलक्ष्मीकलिनाशकत्वञ्च। इति राजवल्लभः॥ (यथा च,—
"पादप्रक्षालनं पादमलदौर्गन्ध्यनाशनम्।
चक्षुःप्रसादनं दृष्यं रक्षोघ्नं प्रीतिवर्द्धनम्॥"
इति चिकित्सितस्थाने चतुर्विंशेऽध्याये सुश्रुतेनोक्तम्॥)

पादप्रधारणं, क्ली, (पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति। प्र+धृ+णिच्+ल्युट्।) पादुका। इति केचित्॥

पादप्रहारः, पुं, (पादस्य पादेन वा प्रहारः।) पदाघातः। लाथि इति भाषा॥ यथा।
"नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम्।" इति काव्यप्रकाशे सप्तमोल्लासः॥ (यथा च साहित्यदर्पणे। १०। ४६।
"दासे लज्जागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि! नात्र दूये।
उत्सृत्कटोरपुलकाङ्कुरकण्टकार्ये-
र्यद्भिद्यते मृदु पदं मम सा यथा मे॥")

पादबन्धनं, क्ली, (पादयोर्गोमहिष्यादीनामित्यर्थः। यद्बन्धनम्।) गोमहिष्यादिबन्धनम्। इति जटाधरः॥ यादवश्रुष्टीकायां भरतश्च॥ (यथा-त्मनेनेति। बन्ध+करणे ल्युट्। पादयोर्बन्धनं ततुसाधनवस्तु। गोमहिष्यादीनां पादबन्धनदण्डम्। यथा, हेमचन्द्रः। ४। ३२९।
"स तु ग्रन्थनकः काष्ठमयैः स्यात् पादबन्धनैः॥")
चरणोद्गमश्च॥

पादभङ्गः, क्ली, (पादयोर्भङ्गम्।) चरणाधोभागः। यथा, हेमचन्द्रः।
"पादभङ्गं गोहिरं स्यात् पार्ष्णस्तु घुटयोरधः॥"
(यथा, रामायणे। २। ७८। ३५।
"सा पादभङ्गे कैकेय्या मन्थरा निपपात ह।")
प्रत्यन्तपर्व्वताधोभागः। यथा, कथासरित्सागरे। १। २७।
"महीं भ्रमन्तौ हिमवत्पादभङ्गमवापतुः॥")

पादरक्षणं, क्ली, (पादयो रक्षणं यस्मात्।) पादुका। इति हेमचन्द्रः। ३। ५७८॥

पादरज्जुः, स्त्री, (पादबन्धनार्थो रज्जुः।) चर्म्मि-पादबन्धनरज्जुः। तत्पर्य्यायः। पादरी २। इति जटाधरः॥ चरणबन्धनदाममात्रञ्च॥

पादरथी, स्त्री, (पादस्य रथी खुरी रथ इव।) पादुका। इति त्रिकाण्डशेषः॥

पादरोहकः, पुं, (पादैर्मूलैः रोहतीति। रुह+ण्वुल्।) वटवृक्षः। इति राजनिर्घण्टः॥

पादवल्मीकः, पुं, (पादे वल्मीक इव।) श्लीपदम्। इति हेमचन्द्रः। ३। १२६॥ (श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम्॥)

पादविकः, पुं, (पदवीं धावतीति। पदवी+"माद्योत्तरपदपदव्यनुपदं धावति।" ४। ४।३७। इति ठक्।) पथिकः। इति चिन्तामणौ॥

पादविरजाः, [स्] क्ली, (पादौ विरजा धूलिविहीनौ यस्याः।) पादुका। इति हारावली। ७४॥

पादशः, [स्] अ, पादं पादम्। पादशब्दात् वीप्सायां शस्प्रत्ययनिष्पन्नम्। इति आकरग्रन्थः॥ (यथा, मनुः। १। ८२।
"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः॥")

पादशैलः, पुं, (पादः महादिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः।) प्रत्यन्तपर्व्वतः। इति शब्दरत्नावली॥

पादशोथः, पुं, (पादोद्भवः शोथः। श्राकपार्थिवादित्वात् समासः।) पादगतशोफः। यथा,—
"अनन्योपद्रवजातः शोथः पादसमुत्थितः।
पुरुषं हन्ति नारीन्तु सुखजो गुरुजो द्वयम्॥"
इति माधवकरः॥
(यथा च हारीते चिकित्सितस्थाने २६ अः॥
"शोथो भवेच्च विकृतेन्द्रियरोममार्गः
स्त्रीणे वसे वपुषि चाम्लकटूष्णसेवया।
शैत्यात्तथा विशदपिच्छलसेवनेन
रूक्षाभिघातपतनेन च धारणाद्वा॥
आमाशये गतिरतोऽपि नरस्य यस्य
अन्नं प्रधावति ततोऽपि च दोष एषः।
करोति पाणिचरणे च पृथक् प्रसक्तो
द्वन्द्वेन वा भवति शोथविकारचारः॥
नरस्य चान्नःप्रभवाश्च शोथाः
साध्या भवेयुर्विनता सुखेषु।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य॥")

पादस्फोटः, पुं, (पादस्य स्फोटः। पादं स्फोटयतीति वा। स्फुट+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) रोगविशेषः। तत्पर्य्यायः। विपादिका २। इत्यमरः॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५। इति शब्दरत्नावली॥ स तु एका दशक्षुद्रकुष्ठान्तर्गतश्चतुर्थकुष्ठम्। यथा,—
"वैद्यादिकं पाणिपादस्फुटनं तीव्रवेदनम्।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्। इति माधवकरः॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या॥

पादहारकः, त्रि, पादाभ्यां हियतेऽसौ। पादशब्दात् निपातनात् कर्म्मणि अकप्रत्ययान्तः। इति सुग्धबोधव्याकरणम्॥ ("ज्ञाजनाद्युटो बहुलम्।" ३।३।११३। इति कर्म्मणि ल्युट्। इति सिद्धान्तकौमुदी।) चरणद्वारा हरणकर्त्ता॥

पादार्घं, क्ली, (पादयोरर्घम्।) चरणाग्रभागः। तत्पर्य्यायः। प्रपदम् २। इत्यमरः॥

पादाङ्गदं, क्ली, (पादस्य अङ्गदमिव।) नूपुरम्। इत्यमरः॥

पादात, पुं, (पादाभ्यामतति गच्छतीति। अत+क्विप्।) पादातिः। इति शब्दरत्नावली॥ (पादाभ्यामतीति। अद्+क्विप्। दस्यः। इति व्युत्पत्तिलभ्योऽर्थः॥)

पादातं, क्ली, (पदातीनां समूहः। पदाति+"भिक्षादिभ्योऽञ्। ४। २। ३८। इत्यञ्।) पदातिसंहतिः। पदातिसमूहः। इत्यमरः॥ (यथा, महाभारते। १२। ६६। ८।
"साहिनामन्तरे स्थाप्यं पादातमपि दंशितम्॥")

पादातः, पुं, (पादाभ्यामततीति। अत+अच्।) पादातिः। यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः॥"
इत्यमरमाला॥
(यथा, महाभारते। २। ५१। ४६।
"अयुतं वोऽपि पद्मानि गजारोहाः सहादिनः।
रथानामर्व्बुदं चापि पादाता बहवस्तथा॥")

पादातिः, पुं, (पादाभ्यामततीति। अत+इन्।) पदातिः। इति हेमचन्द्रः॥

पादातिकः, पुं, (पादातिरेव। पादाति+स्वार्थे कन्।) पदातिः। इति हेमचन्द्रः। ३। १६२॥

पादारकः, पुं, (पाद इव आरुहतीति। आ+रुह+ण्वुल्।) गोलिन्दः। इति त्रिकाण्डशेषः॥

पादालिन्दी, स्त्री, (पाद इव आलिन्दो यत्र। गौरादित्वात् ङीष्।) नौका। इति हारावली। ५६।

पादावर्त्तः, पुं, (पाद इव आवर्त्तते इति। आ+वृत+अच्।) अरघट्टकः। इति हेमचन्द्रः। ४। १५६॥ रहट इति हिन्दीभाषा॥

पादाविकः, पुं, (अव रक्षणे+भावे घञ्। पादेन अवः रक्षणम्। तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः। पादाव+"तत्र नियुक्तः।" ४। ४। ६८। इति ठक्।) पदातिः। इति शब्दरत्नावली॥

पादी, [न्] पुं, (पादोऽस्यस्येति। पाद+इनिः।) पादविशिष्टजलजन्तुमात्रः। अस्य गमना गुणाश्च यथा, भावप्रकाशे।
"कुम्भीरकूर्म्मनक्राश्च गोधाग्रकरचञ्चवः।
चक्रिकः शिशुमारश्चेत्याद्याः पादिनः स्मृताः॥
पादिनोऽपि च ये ते तु कोशस्थानां गुणैः समाः॥"
चतुर्थांशभागी। यथा, मनुः। ८। २१०।
"सर्व्वेषामहिंसो सुख्याज्ज्यायसोऽहिंसकोऽपरे।
हतीयिनस्तृतीयांशाच्चतुर्थांशाच्च पादिनः॥"

पादुकः, त्रि, (पद्यते गच्छतीति। पद+"जपपतपदेति।" ३। २। १५४। इति उकञ्।) गमनशीलः। पदधातोः कर्म्मणि उकप्रत्ययनिष्पन्नः। इति मुग्धबोधव्याकरणम्॥

पादुका, स्त्री, (पादूरेव। पादू+स्वार्थे कन् ततो टाप्।) चर्म्मादिनिर्म्मितपादाच्छादनम्। जुता इति भाषा॥ तत्पर्य्यायः। पादूः २ उपानत्३। इत्यमरः॥ पन्नद्धा ४ पादरक्षिका ५ प्राक्षिप्ता ६। इति हेमचन्द्रः॥ पन्नद्धी ७ पादरक्षी ८। इति त्रिकाण्डशेषः॥ कोशी ९। इति शब्दरत्नावली॥ * ॥ तस्या धारणविधिर्यथा,—
"वर्षातपादिके छत्री दण्डी राजपटौ च।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत्॥"
इति ज्योतिस्तत्त्वम्॥

अस्या धारणगुणाः ।
"पादप्रधारणं कृत्वामोजस्यं चक्षुषोर्हितम् ।
सुखप्रचारमायुष्यं वस्यं पादरुजापहम् ॥"*॥
अस्या अधारणे दोषा यथा,—
"पादाभ्यामनुपानद्भ्यां भूमौ चंक्रमणं सदा ।
अनारोग्यमवाप्नुयान्निन्द्रियाणामदर्शितम् ॥"
इति राजवल्लभः ॥ * ॥
तस्या दानफलं यथा,—
"दत्त्वामाताय विप्राय यः प्रयच्छत्युपानहौ ।
न तस्य मानसो दाहः कदाचिदपि जायते ॥
यानञ्चाश्वतरीयुक्तं तस्य हेममयं शुभम् ।
उपतिष्ठति विप्रर्षे सर्व्वरत्नविभूषितम् ॥
दानमत्र यथोत्पन्नं तत्ते वक्ष्यामि पार्थिव ।
शृणुष्वैकमना भूप ! लोके सर्व्वसुखप्रदम् ॥
जमदग्निर्मुनिः पूर्व्वं तपःस्वाध्यायकर्शितः ।
बाणखड्गधरो धन्वी बभूव सततोद्यतः ॥
धनुर्व्वेदे तथा वेदे सर्व्वशास्त्रपारगोऽभवत् ।
क्षिपन् बाणांस्तथा ग्रन्थत् भार्य्ययानुगतो हि सः ॥
कदा निदाघकाले तु क्षिपन् बाणान् सहस्रशः ।
तस्यौ स्थाण्वरिवाचल्यः प्रतिज्ञां मरुतामुनिः ॥
निदाघतीव्रसन्तापाद् धरणादा ह्यपीडिता ।
दृष्टिमद्दृष्टिभिः स्पृष्टा न शशाकाह मार्गि-
तुम् ॥
इत्युक्ते स क्रुधाविष्टः प्राह सन्धाय कार्मुके ।
एषत्कं मां न जानाति सूर्य्यो विश्वंभरीयिवान् ॥
यः सन्नपति मे भार्यां साध्वीं धर्म्मपरायणाम् ।
साध्वसाधु अजानन् वै फलमाप्नोतु तस्य हि ॥
इत्युक्त्वा स्थानमात्रस्थावर्कोविंध्यंशृङ्गेतवे ।
प्रतीक्ष्य हि मुहूरेव क्रूररूपधरो मुनिः ॥
तं विज्ञाय मुनिं सूर्य्यो द्विजोऽभूदिदमब्रवीत् ।
किमालोकयसे सूर्य्यं पुनः पुनरतीव हि ॥
सुबाणाञ्चितपाणित्वं कथयस्वास्मिलं मुने ! ।
इत्युक्तः स तमाहेदं पातयिष्याम्यहं रविम् ॥
द्विजस्तु तमुवाचाथ मुने क्षिप्तं विभाति मे ।
मातुरङ्कगतो यद्वद्बालचन्द्रं जिघृक्षति ॥
योजनानां सहस्राणि निमेषाद्यति यो दृग् ।
विप्र ! मुक्तेन बाणेन तं कथं पातयिष्यसि ॥
तच्छ्रुत्वा मदमीलं प्राह ह्यद्य द्विजोत्तम ! ।
पातयिष्याम्यहं यद्यदिमं सूर्य्यं नभःस्थलात् ॥
विषयेरो यदा सूर्य्यो मर्त्यलोके ततन्द्रितः ।
मध्याह्ने क्षिरतामेति सर्व्वलोकान्दहन्दिवान् ॥
तत्काले सुमहच्छस्त्रं भविष्यति दिवाकरः ।
एवं तं पातयिष्यामि पश्यतस्ते द्विजोत्तम ! ॥
तच्छ्रुत्वा सहसोद्विग्नस्तस्य प्रत्यक्षतां ययौ ।
सूर्य्यस्तं नमयामास दत्त्वा ह्युपानहौ ॥
ततः प्रभृति तच्छस्त्रं द्विजानां परिगीयते ।

दत्तं तैर्धार्य्यतेऽन्यैर्वा क्षत्रियाणां द्विजोत्तम ! ॥
यो ददाति द्विजेभ्यस्तु तृतीयायामुपानहौ ।
वैशाखे शुक्लपक्षे तु सच्छत्रं कनकान्वितम् ॥
न तस्य मानसो दाहो जन्तुलोकेऽभिजायते ।
सर्व्वव्याधिविनिर्म्मुक्तः प्रियं पुत्रांश्च विन्दति ॥
कालादिह यदा याति मम लोके द्विजोत्तम ! ।
यानं वाश्वतरीयुक्तं सर्व्वहेममयं शुभम् ॥
दिव्याङ्गनाभिराकीर्णं सर्व्वरत्नविभूषितम् ।
उपतिष्ठति विप्रेन्द्र ! सर्व्वकामफलप्रदम् ॥"
इत्यग्निपुराणम् ॥ * ॥
विष्णुपदे सपादुकगमने दोषो यथा,—
वराह उवाच ।
"वहन्नुपानहौ पद्भ्यां यस्तु मासमपाक्रमेत् ।
चर्म्मकारस्तु जायेत वर्षाणान्तु त्रयोदश ॥
तत्र जन्मपरिभ्रष्टः शूकरो जायते पुनः ।
शूकराच्च परिभ्रष्टः श्वा च तत्रैव जायते ॥
ततः श्वत्वात् परिभ्रष्टो मानुषत्वेव जायते ।
मद्भक्तश्च विनीतश्च अपराधविवर्ज्जितः ॥
सुखा तु सर्व्वसंसारं मम लोकाय गच्छति ॥
य इतेन विधानेन वसुधे ! कर्म्म कारयेत् ।
न स लिप्यति पापेन एवमेतन्न संशयः ॥"
इति वराहपुराणे उपानद्दानापराधप्रायश्चित्तम् ॥
अथ देवतापादुकानिर्म्माणपूजनविधिः । यथा,—
"मणिरत्नमयी कार्य्या हेमरूप्यमयी पि वा ।
चन्दनेनापि कर्त्तव्या पादुकाप्रतिमापि वा ॥
श्रीपर्णां श्रीहुमा चापि देवदारुमयी पि वा ।
षड्ङ्गुला च सा कार्य्या पादुके पूजयेत् सदा ॥"
इति देवीपुराणम् ॥ * ॥
गुरुपादुकालक्षणं यथा,—
"प्रस्फुरन्मुसरसीरुहोदरे
नित्यलग्नमवदातमद्भुतम् ।
कुण्डलीविवरकाण्डमण्डितं
द्वादशार्णसरसीरुहं भजे ॥ १ ॥
तस्य कन्दलितकर्णिकापुटे
कूजदूरेखमकथादिरेखया ।
कोमलत्रितयलक्षमक्षरी-
भावलक्ष्यमवलालयं भजे ॥ २ ॥
तत्पुटे पटुतडित्कडारिम-
स्फूर्जमानमणिपाटलप्रभम् ।
चिन्तयामि हृदि चिन्मयं वपु-
र्विन्दुनादमणिपीठमण्डलम् ॥ ३ ॥
उर्द्धमस्य हुतभुक्शिखायतं
तद्विलासपरिहृष्यदाननम् ।
विश्वयज्ञरसहोत्रसद्दीप्तकटं
वाग्भवादियुगमादिदृक्षयोः ॥ ४ ॥
तस्य गाथचरणारविन्दयोः ।
कुङ्कुमासवभरौमरन्ध्रयोः ।
इन्दमिन्दुमकरन्दशीतलं
मानसं स्मरति मज्जनाश्रयम् ॥ ५ ॥
पादुकापञ्चकस्तोत्रं पञ्चवक्त्रादिनिर्गतम् ।
मङ्गल्यायमनोपेतं प्रपठेद्यातिदुर्लभम् ॥"
इति रुद्रयामलः ॥

पादुकाकारः, पुं, (पादुकां करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चर्म्मकारः । इति हलायुधः ॥
पादुकाकृत्, पुं, (पादुकां करोतीति । कृ + क्विप् ।) चर्म्मकारः । इति हेमचन्द्रः । ३ । ५०८ ॥
पादूः, स्त्री, (पद्यते गम्यते सुखेन यत्रेति । पद + "शितृकाधिपद्यर्त्तेः ।" उणा १ । ८० । इति ऊः स च क्वित् ।) पादुका । इत्यमरः ॥
पादूकृत्, पुं, (पादूं पादुकां करोतीति । कृ + क्विप् । तुक् ।) चर्म्मकारः । इत्यमरः ॥
पादोदकं, क्ली, (पादप्रक्षालनजातं उदकम् । प्राकृतपार्थिवादिवत् समासः ।) चरणधौतजलम् । चरणामृतम् । यथा,—
"कृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य वैष्णवः ॥
नैवेद्यमन्नं तुलसीविमिश्रं
हृदा
विधिवत् पादजलं पिबेच्च ।
योऽश्नाति नित्यं प्रयतो मुरारेः
प्राप्नोति सुप्रेमयुतां स भक्तिम् ॥
हत्या हन्ति यदङ्गिसङ्गसुजसोद्भेयच्च पादोदकं
नैवेद्यं बहुमद्यपानदुरितं गुर्व्वङ्गनासङ्गमम् ।
भक्त्याधीनमतिः स्थितिर्हरिजने ततसंगतिः सङ्गजा
ग्राजन्यामग्निजलादिभिर्मिहिसां यावन्ति के वै
हरेः ॥"
इति पाद्मोत्तरखण्डे १०० अध्यायः ॥ * ॥
अथ श्रीचरणोदकाभिषेकमाहात्म्यं पद्मपुराणे ;
"स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः ।
ग्राजन्यामग्निजातोयैर्योऽभिषेकं समाचरेत् ॥
गङ्गागोदावरीरेवानद्यो सुक्तिप्रदास्तु याः ।
निवसन्ति सतीर्थास्ता ग्राजन्यामग्निजाजले ॥
कोटितीर्थसहस्रेषु सेवितैः किं प्रयोजनम् ।
तीर्थं यदि भवेत् पुण्यं ग्राजन्यामग्निलोद्भवम् ॥"
तत्रैव गौतमाम्बरीषसंवादे ।
"येषां धौतानि गात्राणि हरेः पादोदकेन वै ।
अम्बरीष ! कुले तेषां दासोऽस्मि वसुधः सदा ॥
राजसूयानि तावच्च तीर्थानि भुवनत्रये ।
यावन्न प्राप्यते तोयं ग्राजन्यामाभिषेकजम् ॥"
स्कान्दे कार्त्तिकमाहात्म्ये ।
"एकेऽपि वसतस्तस्य गङ्गाद्याश्च दिने दिने ।
ग्राजन्यामग्निजातोयैर्योऽभिषिञ्चति मानवः ॥"
तत्रैवान्यत्र ।
"यानि कानि च तीर्थानि ब्रह्माद्या देवता-
स्तथा ।
विष्णुपादोदकस्पर्शे सर्व्वाः सान्निध्यमीयुषीः ॥
ग्राजन्यामोद्भवो देवो देवो द्वारवतीभवः ।
उभयोः स्नानतोयेन ब्रह्महत्या निवर्त्तते ॥"
विष्णु ।
"स वै चावभृतस्नातः स च यज्ञाजजायुतः ।
विष्णुपादोदकं प्राप्य यः स्नाति मानवः ॥"
वैशिष्ठे पुराणे ।
"गङ्गाप्रयागगमने नैमिषपुष्कराणि
पुण्यानि यानि कुरुजाङ्गलयासनानि ।

कालेन तीर्थसलिलानि पुनन्ति पापं
पादोदकं भगवतः प्रपुनाति सद्यः ॥"
स्मृतौ च ।
"शिरोभिषेकजा नद्यो याः काश्चिदखनद्गताः ।
खनद्गाश्च पञ्चस्य मानवस्य सरितां पतिः ॥
यज्ञावभृथजा गोदा वतूवरस्य तु आकृती ।
पादोदकं भगवतो द्वादशाब्दफलप्रदम् ॥"
तन्निन्दता च गरुडपुराणे ।
"जलञ्च येषां तुलसीविमिश्रितं
पादोदकं चक्रशिलाखनुद्भवम् ।
नित्यं विखन्यं प्रवते न गात्रं
खगेन्द्र ! ते धर्मबहिष्कृता नराः ॥"
अथ श्रीधरोदकपानमाहात्म्यम् । पाद्मे गौतमाम्बरीषसंवादे ।
"हरेः स्नानावशेषन्तु जलं यस्योदरे स्थितम् ।
अम्बरीष ! प्रयत्नेन पादपांसुः प्रयत्नताम् ॥"
तत्रैव देवदूतविष्णुजलसंवादे ।
"ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रेषु तेषितैः किं प्रयोजनम् ॥
कोटितीर्थसहस्रेषु तेषितैः किं प्रयोजनम् ।
नित्यं यदि पिबेत् पुण्यं शालग्रामशिलाजलम् ॥
शालग्रामशिलातोयं यः पिबेद्विष्णुना समम् ।
मातुः स्तन्यं पुनर्नैव स पिबेज्जन्तिभाजनः ॥"
किञ्च ।
"दहन्ति नरकान् सर्वान् गर्भवासञ्च दारुणम् ।
पीतं येन सदा नित्यं शालग्रामशिलाजलम् ॥"
तत्रैव श्रीयमधूलकेतुसंवादे ।
"शालग्रामशिलातोयं विष्णुभाक्तं तु यः पिबेत् ।
सर्वपापैः प्रमुच्येत मुक्तिमार्गे स्थितोद्यमः ॥"
तत्रैव पुलस्त्यभगीरथसंवादे ।
"पादोदकस्य माहात्म्यं भगीरथ ! वदामि ते ।
पावनं सर्वतीर्थेभ्यो ह्यश्वकोटिविनाशनम् ॥
दृष्टे शिरसि पीते च सर्वान्मुञ्चन्ति देवताः ।
प्रायश्चित्तन्तु पापानां कलौ पादोदकं हरेः ॥"
किञ्च ।
"ऋषिभिः सारस्वतं तोयं स्नानेन तु गयादयम् ।
सद्यः पुनाति गाङ्गेयं दर्शनादेव यामुनम् ।
पुनन्त्येतानि तोयानि स्नानदर्शनकीर्तनैः ।
पुनाति स्मरणादेव कलौ पादोदकं हरेः ॥
अर्चितैः कोटिभिर्लिङ्गैर्नित्यं यत् क्रियते फलम् ।
तत् फलं स्नानमात्रेण पीतैः पादोदकैर्हरेः ॥
अशुचिर्वा दुराचारो महापातकसंयुतः ।
स्मृत्वा पादोदकं विष्णोः सदा मुच्यति मानवः ॥
ग्रामकोटिप्रतो यस्तु स्नानकाले शिरे स्पृशेत् ।
देहे पादोदकं यस्य न प्लवति यमालयम् ॥
न दानं न हविर्वेद्यां स्वाध्यायो न सुरार्चनम् ।
तेऽपि पादोदकं पीत्वा प्रयान्ति परमां गतिम् ॥
विप्राक्षात्रवधयुक्ता वैश्याक्षी किं करिष्यति ।
शिल्पारके महातीर्थे उच्चस्थिता भगीरथ ! ॥
माघमासे प्रयागे तु स्नानं वै किं करिष्यति ।
प्रयागं सततं तस्य यस्य पादोदकं हरेः ॥
कार्त्तिके कार्त्तिकीयोगे किं करिष्यति पुष्करे ।
नित्यन्तु पुष्करं तस्य यस्य पादोदकं हरेः ॥
प्रबोधवासरे प्राप्ते मथुरायाञ्च तस्य किम् ।
नित्यञ्च यासनं स्नानं यस्य पादोदकं हरेः ॥
काश्यान्तु उत्तरवाहिन्यां गङ्गायान्तु मृतस्य किम् ।
यस्य पादोदकं विष्णोर्मुखे चैवावतिष्ठते ॥"
किञ्च ।
"स्थित्वा पादोदकं विष्णोर्याम्यतीर्थानि गच्छति ।
अनर्घ्यरत्नसमृद्धस्य लोष्टं वाञ्छति दुर्मतिः ॥
कुरक्षेत्रसमो देशो विष्णुपादोदकं मतः ।
एतद् यत्नाश्रयं पुण्यं नित्यं भवति सद्गृहे ॥
गयापिण्डसमं पुण्यं पुत्रत्वाभमपि जायते ।
पादोदकेन देवस्य ये कुर्युः पिण्डतर्पणम् ॥
नासुराणां भयं तस्य प्रेतजन्यं न राक्षसम् ।
न रोगाणां भयं चैव नास्ति विघ्नकृतं भयम् ॥
न दुष्टा नैव चोराद्याश्चापदोत्थभयं नहि ।
यमाः पीडां न कुर्वन्ति वैरा गच्छन्ति दारुणाः ॥
किं तस्य तीर्थगमने देवयोनाञ्च दर्शने ।
यस्य पादोदकं मूर्ध्नि प्राणस्थमधिलोद्भवम् ॥
प्रीतो भवति मार्कण्डः प्रीतो भवति केशवः ।
ब्रह्मा भवति सुप्रीतः प्रीतो भवति शङ्करः ॥
पादोदकस्य माहात्म्यं यः पठेत् केशवाग्रतः ।
स याति परमं स्थानं यत्र देवो जनार्दनः ॥"
ब्रह्माण्डपुराणे श्रीब्रह्मनारदसंवादे ।
"प्रायश्चित्तं यदि प्राप्तं लब्धुं वा लघमर्षणम् ।
सोऽपि पादोदकं पीत्वा मुक्तिं प्राप्नोति तत्क्षणात् ॥
अशौचं नैव विप्रेन्द्र सूतके मृतकेऽपि च ।
येषां पादोदकं मूर्ध्नि प्राशनं ये प्रकुर्वते ॥
अन्तकालेऽपि यस्येह दीयते पादयोर्जलम् ।
सोऽपि सद्गतिमाप्नोति सदाचारैर्बहिष्कृतः ॥
अपेयं पिबते यस्तु भुङ्क्ते यश्चाप्यभोजनम् ।
अगम्यागमना ये वै पापाचाराश्च ये नराः ।
तेऽपि पूज्या भवन्त्याशु सद्यः पादाम्बुसेवनात् ॥"
किञ्च ।
"अपवित्रं यदन्नं स्यात् पानीयं चापि पापिनाम् ।
भुक्त्वा पीत्वा विशुद्धः स्यात् पीत्वा पादोदकं हरेः ॥
तन्नक्षत्रात् पञ्चगत्वात् महानक्षत्रादिसिध्यति ।
चान्द्रायणात् पादनक्षत्रात् परमादपि सुव्रत ।
कायशुद्धिर्भवेदाशु पीत्वा पादोदकं हरेः ॥
अगुरुं कुङ्कुमं चापि कर्पूरं चानुलेपनम् ।
विष्णुपादाम्बुसंसर्गं सर्वं पावनपावनम् ॥
दृष्टिपूतन्तु यत्तोयं विष्णुना प्रभविष्णुना ।
तद्धि पापहरं पुत्र ! किं पुनः पादयोर्जलम् ॥
इतदर्थमहं पुत्र ! शिरसा विष्णुतत्परः ।
धारयामि शिवाभ्यश्च माहात्म्यं विदितं मम ॥
प्रियस्त्वमसि मे पुत्र स्वदर्थं गदितं मया ।
रहस्यं मे त्वनर्हेभ्य न वक्तव्यं कदाचन ॥
धारयस्व सदा मूर्ध्नि प्राशनं कुरु नित्यशः ।
अन्यथा त्वमुपरादुःखैर्मोक्षं यास्यसि पुत्रक ! ॥"
विष्णुधर्मोत्तरे ।
"सद्यः पतप्रदं पुण्यं सर्वपापविनाशनम् ।
सर्वमङ्गलमङ्गल्यं सर्वदुःखविनाशनम् ।
दुःखघ्नमाघ्रणं पुण्यं विष्णुपादोदकं शुभम् ॥
सर्वोपद्रवहन्तारं सर्वव्याधिविनाशनम् ।
सर्वोत्पातप्रशमनं सर्वतापनिवारणम् ॥
सर्वकल्याणसुखदं सर्वकामफलप्रदम् ।
सर्वसिद्धिप्रदं धन्यं सर्वधर्मैविवर्द्धनम् ॥
सर्वग्रहप्रशमनं सर्वभोगप्रदायकम् ।
सर्वतीर्थस्य फलदं मूर्ध्नि पादाम्बुधारणम् ॥
प्रयागस्य प्रभासस्य पुष्करस्य च सेवने ।
पृथूदकस्य तीर्थस्य आचामो लभते फलम् ॥
चक्रतीर्थे फलं याहक् ताहक् पादाम्बुधारणात् ॥
सरस्वत्यां गयायाञ्च गत्वा यत् प्राप्नुयात् फलम् ।
तत् फलं लभते मर्त्यो मूर्ध्नि पादाम्बुधारणात् ॥"
स्कान्दे ।
"पादोदकस्य माहात्म्यं देवो जानाति शङ्करः ।
विष्णुपादच्युता गङ्गा शिरसा येन धारिता ॥
स्थानं नैवाप्नि पापस्य देहिनां देहमध्यतः ।
सबाह्याभ्यन्तरं यस्य स्नानं पादोदकेन वै ॥
पादोदं विष्णुनैवेद्यसदरे यस्य तिष्ठति ।
नाशयं लभते पापं स्वयमेव विनश्यति ॥
महापापाग्निदग्धस्य स्नानं रोगशतैरपि ।
हरेः पादोदकं पीत्वा मुच्यते नात्र संशयः ॥
शिरसा तिष्ठते येषां नित्यं पादोदकं हरेः ।
किं करिष्यन्ति ते लोके तीर्थकोटिमनोरथैः ॥
अयमेव परो धर्मो ह्यमेव परं तपः ।
ह्यमेव परं तीर्थं विष्णुपादाम्बु यत् पिबेत् ॥"
तत्रैव शिवोमासंवादे ।
"विलयं यान्ति पापानि पीते पादोदके हरेः ।
किं पुनर्विष्णुपादोदं शालग्रामशिलाप्लुतम् ॥
विशेषेण हरेत् पापं ब्रह्महत्यादिकं प्रिये ।
पीते पादोदके विष्णोर्यदि प्राणैर्वियुज्यते ।
हत्वा यमभटान् सर्वान् वैष्णवं लोकमाप्नुयात् ॥
तत्रैव शिवकार्त्तिकेयसंवादे शालग्रामशिलामाहात्म्ये ।
"छिन्नस्तेन महाघेन । गर्भवासः सुदारुणः ।
पीतं येन सदा विष्णोः शालग्रामशिलाजलम् ॥
ये पिबन्ति नरा नित्यं शालग्रामशिलाजलम् ।
पञ्चगव्यसहस्रेषु प्राप्तितैः किं प्रयोजनम् ॥
प्रायश्चित्ते सहस्रेषु किं दानैः किमुपोषणैः ।
शान्द्रायणैश्च तीर्थैश्च पीत्वा पादोदकं शुचिः ॥
ह्यहस्नारदीये तुलसीकोपाख्यानारम्भे ।
हरिपादोदकं यस्तु शश्वन्मानव धारयेत् ।
न स्नातः सर्वतीर्थेषु विष्णोः प्रियतरस्तथा ॥
अकालमृत्युशमनं सर्वव्याधिविनाशनम् ।
सर्वदुःखोपशमनं हरिपादोदकं शुभम् ॥"
तत्रैव तदुपाख्यानान्ते ।
"हरिपादोदकस्याग्र्यां शुश्रुवो वीतकल्मषः ।
दिव्यं विमानमास्थाय मुनिभेनमथाब्रवीत् ॥
हरिपादोदकं यस्माच्छ्रुतं त्वं चिरवान् मुने ।
प्राप्तिलोऽसि तया तस्माद्विष्णोः परमं पदम् ॥"
हरिभक्तिसुधोदये ।
"पादं पूर्वं किल कृत्वा गङ्गाभूत् क्षपितैनोचया ।
विष्णोः सद्यस्तु तत्स्पर्शि पादाम्बु कथमीर्यते ॥

तापत्रयानलो योऽसौ न शाम्येत् सकलाब्धिभिः ।
हृतं शाम्यति सोऽप्येन श्रीमद्विष्णुपदाम्बुना ॥
अथाख्यामेद्यकथं भवामित्तम्भनौषधम् ।
सर्व्वाङ्गैः सर्व्वथा ध्यायं पाद्यं शुचिवदः सदा ॥
अम्लतत्वावहं नित्यं विष्णुपादाम्बु यः पिबेत् ।
स पिबत्यन्तकं नित्यं मासे मासे तु देवताः ॥
माहात्म्यमियदित्यस्य यो वक्ता सोऽपि निर्भयः ।
न त्वनर्थमयीर्मूढां कलयन्नघमश्नुते ॥"
अन्यत्रापि ।
"स ब्रह्मचारी स व्रती आश्रमी च सदा शुचिः ।
विष्णुपादोदकं यस्य हृत्से शिरसि विद्यते ॥
अन्यप्रभृतिपापानां प्रायश्चित्तं यदीच्छति ।
प्रातरयामश्रिलाबारि पापहारि पिबेतराम् ॥"
अतएव तेजोऽविन्दूपनिषदि श्रीब्रह्मोक्तम् ।
"गौडप्रक्षालादुदकं पृथगादाय पुत्रक ! ।
सिञ्चयेन्मूर्द्ध्नि भक्तानां सर्व्वतीर्थमयं हि तत् ॥"
इति ।
"पादोदकस्य माहात्म्यं विख्यातं सर्व्वशास्त्रतः ।
लेखितुं शक्नुयात् को हि सिन्धुमौर्व्व गणयन्नपि ॥
विशेषतश्च पादोदं तुलसीदलसंयुतम् ।
गृह्णे त्वा वैष्णवेभ्यो दत्त्वा प्राश्नन् पिबेत्सुधीः ॥"
अथ शुद्धतत्पादोदकमाहात्म्यं स्कान्दे ब्रह्म-नारदसंवादे ।
"त्यक्त्वा पादोदकं शुद्धं वैष्णवानां महात्मनाम् ।
यो दद्यात्तुलसीमिश्रं चान्द्रायणशतं लभेत् ॥
गृहीत्वा तज्जपादाम्बु शुद्धं त्यक्त्वा तु वैष्णवः ।
यो वहेत् शिरसा नित्यं स मुनिस्तापसोत्तमः ॥"
पाद्मे देवदूतविष्णुदूतसंवादे ।
"शालग्रामशिलातोयं यदि शुद्धमतं पिबेत् ।
हत्याकोटिविनाशं तु कुरुते नात्र संशयः ॥"
अगस्त्यसंहितायाञ्च ।
"शालग्रामशिलातोयं तुलसीदलवासितम् ।
ये पिबन्ति पुनस्तेषां स्तन्यपानं न विद्यते ॥
श्रीविष्णोर्वैष्णवानाञ्च पावनत्वरणोदकम् ।
सर्व्वतीर्थमयं पीत्वा कुर्य्यादाचमनं न हि ॥"
तदुक्तं स्कान्दे श्रीशिवेन ।
"विष्णोः पादोदकं पीत्वा पश्चादशुचिशङ्कया ।
आचामति च यो मोहाद्ब्रह्महा स निगद्यते ॥"
श्रुतिश्च । "भगवान् पवित्रो भगवत्पादौ पवित्रौ पादोदकं पवित्रं न तत्पानं आचमनीयं यथा हि सोम इति ।" कौपर्णे च ।
"विष्णुपादोदकं पीत्वा भक्तपादोदकं तथा ।
य आचामति संमोहात् ब्रह्महा स निगद्यते ॥"
इति श्रीहरिभक्तिविलासः ॥

पाद्यं, क्ली, (पादार्थमुदकम् । पाद + "पादार्घाभ्याञ्च ।" ५ । ४ । २५ । इति यत् ।) पादाय वारि । पादप्रक्षालनार्थजलम् । इत्यमरः ॥ तत्-लक्षणं यथा,—
"पादावनेजनजलयोग्यं पात्रमुदाहृतम् ।
लौहजं वा वरोजातं हैमं राजतमेव वा ॥
ताम्रमत्तरजमपि वाग्यवेनं सतामिति ॥"
इति वैद्यानसग्रन्थः ॥

"षड्गुणं प्रविस्तारसुत्सेधचतुरङ्गुलम् ।
श्रोत्रमेखाङ्गुलं कुर्य्यान्नाभिकां चतुरङ्गुलाम् ॥
एष्टे पादसमायुक्तं चतुरङ्गुलमानतः ।
पाद्यपात्रमिति ख्यातं सर्व्वदेवप्रपूजने ॥"
इति विद्यान्नरेश्वरः ॥

पाद्यं, क्ली, (पा पाने + भावे ष्युट् ।) पौतिः । द्रवद्रव्यस्य गलाधःकरणम् । (यथा, हितोपदेशे । "पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ॥") भाजनम् । (पाद्य रक्षणे + भावे ष्युट् ।) रक्षणम् । इति मेदिनी ॥ (पीयते क्षुदादिभिर्यत्र । पा + अधिकरणे ष्युट् । कुत्वा । इति हेमचन्द्रः । ४ । १५५ ॥ पीयते यदिति । कर्म्मणि ष्युट् । जलम् । इति युत्पत्तिलभ्योऽर्थः ॥ * ॥ पाति रक्षतीति । पा + ष्युः । रक्षाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ४ ।
"व्रतानि पाभो अमृतस्य चारुण
उभे कृणोषा अशु पद्यते विशौ ॥"
पायनम् । अङ्गशुद्धार्थं तोयादेर्यत्तासव्यादनथापारभेदः । पान् इति भाषा ॥ यदुक्तं हरत्संहितायाम् ।
"षड्द्रोणकरेऽदुग्धपानं
यदि पानेन समीहतेऽर्थसिद्धिम् ।
भवपित्तगदाश्च बल्वदुग्धैः
करिहस्तच्छिदये सतालगर्भैः ॥
आर्कं पयोदुग्धविदाहमसीसमेतं
पारावताखुग्रहता च युतं प्रलेपः ।
गृध्रस्य तैलमथितस्य ततोऽस्य पानं
पश्चाच्छितस्य न गिलासु भवेद्विघातः ॥
खरे कदल्या मथितेन युक्ते
दिनोषिते पायितमायसं यत् ।
सम्यक् घृतं चाश्नति नेति भक्षं
न चान्यलौहैरपि तस्य कौष्ठ्यम् ॥"
तथाच शुक्रनीत्याम् ।
"इदमौषधसंयुक्तं शुद्धपानं
कथितेन श्रियमिच्छतः प्रदीप्ताम् ।
हविषा गुडवत् सुतामिलिप्सोः
सलिलेनाशयमिच्छतश्च वित्तम् ॥")

पानः, पुं, (पीयते यज्ञादिति । पा + अपादाने ल्युट् ।) औष्ठिकः । इति अटाधरः ॥ निःश्वासः । इति हेमचन्द्रः । ६ । ४ ॥

पानकं, क्ली, (पानाय कायतीति । कै + कः ।) पानद्रव्यविशेषः । तत्प्रकारो यथा, "यथोक्त-परिमितशर्करानिम्बूरसयुक्तोऽथवाम्लाद्ययुक्तः पञ्चरसः । इति पाकराजेश्वरः ॥ (यथा, सुश्रुते । १ । ४६ ।
"पानीयं पानकं मद्यं लवणायेषु प्रदापयेत् ॥"
क्वचित् पुंस्यपि दृश्यते । यथा, तत्रैव । १ । ६६ ।
"एभिर्लेपान् कषायांश्च तैलं सर्पींषि पानकान् ॥"
तत्राम्रफलपानकम् । यथा,—
"आम्रमामं जलक्लिन्नं मर्द्दितं दृढपाणिना ।
सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् ॥

प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्म्मितम् ।
सद्यो रुचिकरं बल्यं ग्रीष्मभिक्षियतर्पणम् ॥
अपक्वाम्ररसोद्भूतपानकं वातनाशनम् ।
कफपित्तकरं किञ्चित् प्रायशः यदि सेवितम् ॥"
पक्वाम्रस्य तु ।
"सुपक्वमाम्रस्य फलं सुतृप्तिना
सम्मर्द्दितं शर्करया समन्वितम् ।
एलालवङ्गार्द्रकवासयान्वितं
वर्णान्वितं वस्त्र न रोचकं भवेत् ॥
पानकं पानसम्भूतं स्वादुकं गुरुपित्तजित् ।
सृष्टमूत्रं श्लेष्मलहृत्यं वर्ण्यं दृष्यं रुचिप्रदम् ॥"
अम्बिकाफलपानकं यथा,—
"अम्बिकायाः फलं पक्वं मर्द्दितं दृढपाणिना ।
शर्करा मरिचोन्मिश्रं लवङ्गैश्च सुवासितम् ॥
अम्बिकाफलसम्भूतं पानकं वातनाशनम् ।
पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधनम् ॥"
निम्बूफलपानकं यथा,—
"भागैकनिम्बुजं तोयं षड्भागं शर्करोदकम् ।
लवङ्गमरिचोन्मिश्रं पानकं पानकोत्तमम् ॥
निम्बूफलभवं पानमल्पं वातनाशनम् ।
वह्निदीप्तिकरं रुच्यं क्षमक्षाहारपाचकम् ॥"
धान्याकपानकं यथा,—
"ग्रिलायां साधुसम्पिष्टं धान्याकं चन्दनान्वितम् ।
शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम् ॥
नवीनं रुच्यं पाचि स्निग्धं पित्तहरं परम् ॥
जम्ब्वाः पानकं यथा,—
"जम्बूफलं स्थूलतरं सुपक्वं
सम्मर्द्दितं शर्करयानुलाक्तम् ।
सुवासितं वेल्लजभङ्गपर्णं
रुचिं विधत्ते विरुचौ जनानाम् ॥
जम्बूफलभवं रुच्यं पानकं कफवातनुत् ।
कषायं वातलघ्नं स्वादुकं ग्राहकं परम् ॥"
बीजपूरपानकम् ।
"मातुलुङ्गरसे योज्यं त्रिगुणं शार्करं जलम् ।
कर्पूरमरिचोन्मिश्रं पानकं स्वादिदं वरम् ॥
मातुलुङ्गभवं पानं शूलानाह विनाशनम् ।
श्वासे कासेऽरुचौ वातविबन्धेषु च पूजितम् ॥"
हेमकिरणस्तु ।
"शर्करानागकेसरञ्च बीजपूररसप्लुतम् ।
षट्पलं भवेद्धेमकिरणं नामपानकम् ॥
पानकं हेमकिरणं रुच्यं दृष्यं बलप्रदम् ।
सुस्निग्धं वातदुष्टघ्नं किञ्चित् कफकरं गुरु ॥"
करमर्द्दपानकं यथा,—
"लवङ्गार्द्रकसंयुक्तं सुपिष्टं वारिणा युतम् ।
करमर्दं करमर्दैश्च सक्षौद्रासितान्वितम् ॥
वातघ्नहृद्यं मधुरं रुच्यमल्पतरं स्मृतम् ।
रक्तपित्तकरश्लेष्मनाशनं कारमर्दितम् ॥"
नारङ्गपानकं यथा,—
"सुपक्वनारङ्गफलं निपीडितं
संयोजितं शर्करयाति शुभ्रया ।
सहार्द्रकं वेल्लजयोग वासितं
पानेच्छया केन न संस्तुतत्त्वजम् ॥

नारङ्गफलसम्भूतं पानकं वातनाशनम् ।
मधुरं विशदं रूक्षं सुरुच्यं पित्तकृद्बृहत् ॥"
चारस्य तु ।
"चारस्याम्लफलं सद्यःकरं
मर्दितं शिशिरवारिणा दृढम् ।
रेजमार्द्रकयुतेन सुवासं
भक्तविक्थमिलितं लसद्रसम् ॥
चारस्य फलजं पानं गुरु रूक्षं रुचिप्रदम् ।
कफपित्तहरं श्रेष्ठं रूक्षं मधुरपाकि च ॥
परखजीरपुक्काद्रिदाक्षादाडिमजं तथा ।
एकैकं सप्तधा भिन्नं पानकं क्रियते बुधैः ॥
एवमन्यस्य पुष्पस्य फलस्याम्लस्य वा तथा ।
शर्करामरिचोन्मिश्रं रम्यं स्यात् पानकं वरम् ॥
एवं हि पानकं कार्यं सुधिया तद्धि यत्नतम् ।
गुणा द्रव्यानुसारेण ज्ञातव्याः पानकेषु च ॥"
यथास्य गुणाः,—
"अम्लमुत्कटलमरं पानकं श्रीखण्डं गुरु ।
विदग्धि रूक्षलं रूक्षं यथाद्रव्यगुणश्च तत् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
"गोक्षीरमन्थनजं वा पानकं गुरु रूक्षलम् ।
तदेव खण्डहीनाशर्करासहितं पुनः ॥
साम्लं सतीक्ष्णं सुहिमं पानकं स्यादिरत्ययम् ।
"प्रदद्याद्यि रसांश्चैव पानीयं पानकं पयः ।
खड्गान् यूषांश्च पेयांश्च सर्वे पार्श्वे प्रदापयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥"

पानगोष्ठिका, स्त्री, (पानस्य पानाय वा गोष्ठिका ।) यत्र सम्भूय पीयते । मद्यपानचक्रम् । तत्पर्य्यायः । आपानम् २ । इत्यमरः ।२।१०।४३॥

चक्राकारेण पंक्त्याकारेण वा भिन्नभिन्नासने स्थापयित्वा युक्तश्चेत् युग्मयुग्मक्रमेण पद्मासनेनोपविश्य सामयिकललाटे चन्दनं दत्त्वा शिवशक्तिबुद्ध्या पुष्पञ्च दद्यात् । ततो यदि गुरुस्तत्र तिष्ठति तदादौ गन्धादिना तं पूजयित्वा तत्पात्रे पुष्पं दत्त्वा सुद्रिसहितं तस्मै समर्प्य प्रणमेत् । गुरोरभावे तत् पात्रं जले क्षिपेत् । ततः शक्तिपात्रं सुद्रिसहितं शक्तौ दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परान्नं सुद्रिसहितं दद्यात् । ततः सामयिकोऽपि भक्त्या हस्तद्वयेन संगृह्य तदुपरि मूलमन्त्रमष्टधा जप्त्वा पूर्ववदानन्दभैरवं भैरवीञ्च सम्पूज्य गुरून् देवताश्च सम्तर्पयेत् । स्वस्वकल्पोक्तविधिना भूतशुद्धिं कुर्य्यात् । ततश्चक्रनायकस्तैः सह पात्रवन्दनं कुर्य्यात् । यथा,
"श्रीमद्भैरवशैलराजविलसच्चन्द्रान्वितप्राक्तितं
श्रीमाधीश्वरयोगिनीसुरगणैः सिद्धैः समाराधितम् ।
आनन्दार्णवकं महाबलकमिदं साक्षात्सिद्धवन्दितं
वन्दे श्रीप्रथमं कराब्जजगतं पात्रं विशुद्धिप्रदम् ॥"
इत्यभिमन्त्र्य वामहस्तेन पात्रमुत्तोल्य अन्योन्यवन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकेश्वराज्ञामात्रां गृह्णीयात् । ते सुरस्तेति ब्रूयुः । ततो मूलाधारात् कुलकुण्डलिनीं इष्टदेवतास्वरूपां आत्मिकां विभाव्य गुरुपादुकां स्पृष्ट्वा शिवोऽहमिति विचिन्य हस्ताभ्यां पात्रं धृत्वा मूलमन्त्रेण कुलकुण्डलिनीमुखे देवीं तर्पयेत् । एतदुक्तमुद्रायाः पद्धतिम् ।
"कृत्वा मन्त्रतनुं स्मरेत् गुरुपदं देवीं बलां चिन्मयीं
पश्चात् वारयेयं सदासवहृतं दीपैर्युतं कज्जलैः ।
पुण्याद्यैरभिमन्त्रितञ्च निविडं सम्पोडकाभंवकं
ये सञ्चिन्त्य पिबन्ति यान्ति खलु ते मुक्तिञ्च
मुक्तिं पराम् ॥"
तन्त्रान्तरे च ।
"सिन्दूरतिलकं भाले पात्रौ च मदिरासवम् ।
कृत्वा पिबेद्गुरुं ध्यायंस्तथा देवीञ्च चिन्मयीम्॥"
ततः पात्रमाधारोपरि संस्थाप्य पुनस्तेन क्रमेण परान्नं गृहीत्वा पात्रवन्दनं कुर्य्यात् । यथा,—
"मद्यं मौनरसावहं यदि तथा दत्तञ्च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजहृद्या तस्मै समावेदितम् ।
वामे स्वात्मविशुद्धिशुद्धिकमलं पात्रौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम् ॥"
ततः पूर्ववत् पात्रं स्पृष्ट्वा अन्यत् पात्रवन्दनं कुर्य्यात् । यथा,—
"सर्व्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रयक्षभुवनव्यालक्षयादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्व्वन्द्यार्च्चितं सर्व्वदा
वन्दे पात्रमहं तृतीयमधुना चात्मावबोधक्षमम्॥"
तृतीयपात्राभिवन्दनं कृत्वान्यत् पात्रवन्दनं कुर्य्यात् । यथा,—
"हेमं मौनरसावहं हरिहरब्रह्मादिभिः सेवितं
सुरामैथुनधर्म्मैकनिरतं चारात्मतिक्ताम्र-
यम् ।
आचार्य्याष्टकसिद्धिभैरवकलामांसेन संशोधितं
पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः॥"
इति चतुर्थपात्रवन्दनं कृत्वान्यत्पात्रवन्दनं कुर्य्यात् । यथा,—
"आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं वह्निसुद्वारि पिण्डितं चार्द्धौ च दिग्-
दन्तिनः ।
सोऽहञ्चैव विभावयन् प्रतिदिनं तारागणे रचितो
ऽप्यादित्यप्रसुखैः सुरासुरगणैराकारैः
किङ्करैः ॥"
इति पञ्चमपात्रं स्पृष्ट्वा कुर्य्यात् । ततो यावद्दृष्टादिकं न चलति तावत् पानादिकं कार्य्यम् । अथास्य प्रमाणं यथा वह्नियामले ।
"साधकेभ्यश्च शक्तिभ्यो दद्यान्निर्म्माल्यचन्दनम् ।
सामयिकैः समं कुर्य्याद्देवि! पानादिभक्षणम् ॥"
अन्यत्रापि ।
"निविशेच्चक्ररूपेण पंक्त्याकारेण वा यथा ।
शक्तियुक्तो वसेद्वापि युग्मयुग्मविधानतः ।
शिवशक्तिधिया सर्व्वं चक्रमध्ये समर्पयेत् ॥"
तन्त्रान्तरे च ।
"ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् ।
गुरवे च निवेद्याथ शक्तौ दत्त्वा स्वयं हरेत् ॥"
भावचूड़ामणौ च ।
"साक्षाद्यदि गुरुर्न स्यात्तदातोये विसर्ज्जयेत्॥"
एतत् सर्व्वं कलौतरपरम् ।
"दिव्यवीरमयो भावः कलौ नास्ति कदाचन ॥"
इति कालीविलासवचनात् ॥

पानपात्रं. क्ली, (पानस्य पेयमद्यादेः पात्रम् ।) मद्यपानपात्रम् । मद्यपानस्य भाजनम् । तत्पर्य्यायः । चषकः २ चरकः ३ अनुत्तर्षणम् ४ । इत्यमरः ॥ पूर्व्वद्वयं मद्यपानपात्रे शेषद्वयं मद्यपरिवेषणपात्रे । इति भरतः ॥ चषकम् ५ अनुतर्षः ६ पारी ७ पारीकम् ८ । इति शब्दरत्नावली ॥ * ॥ (यथा, मार्कण्डेये ।८२।२६।
"ददावमूल्यं सुरया पानपात्रं धनाधिपः ॥")
अथ पानपात्रपरिमाणादि यथा कुलसारे ।
"नयनाग्निबाणसंख्यकर्षेषु परमेश्वरि ! ।
पात्रं प्रकल्पयेन्मिश्रं कुलसाधने ॥
इतोऽधिकप्राप्तेषु न कर्षस्यच साधकैः ॥"
कर्षं लौकिकतोलकमित्यर्थः । तदुक्तं कुलोत्तमे ।
"गृह्णादादश माषः स्यात्तदर्द्धो कर्ष उच्यते ॥"
अथोत्तरतन्त्रे ।
"अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।
गुरुस्तेत्यभ्यनुज्ञातो गुरुवा वा कुलीनकैः ॥
गृह्णीयाच्च स्वयं सिद्धो बहुपद्मासनः सुधीः ॥"
कुलार्णवे ।
"एकासने निविष्टा ये भुञ्जीरंश्चैव भाजने ।
एकपात्रे पिबेद्दत्त्वं ते यान्ति नरकाधमे ॥"
एकपात्रमिति सर्व्वैर्मिलित्वा नैकपात्रे पिबेत् ।
न तु प्रतिवारं द्रव्यपाने भिन्नभिन्नपात्रं कार्य्यं
अननुष्ठानलक्षणापत्तेः सम्प्रदायविरोधाच्च ॥

पानवणिक्, [ज्] पुं, (पानाय पेयसुरादेर्विक्रयार्थं वणिक् पानस्य वणिक् वा ।) शौण्डिकः । इति हेमचन्द्रः ॥

पानभाजनं, क्ली, (पानाय पानस्य वा भाजनं पात्रम् ।) पानपात्रम् । तत्पर्य्यायः । कंसः २ । इत्यमरः । २ । ६ । ६२ ॥ "काम्यतेऽसौ कंसः कसुकट्स्यृहि गाङ्गीति सः दन्त्यान्तः । स्वार्थे ष्ठो कांस्यञ्च । स्वर्णरजतादिनिर्म्मिते पात्रमात्रेऽपि कंसः । 'कंसः स्यात् तैजसे द्रव्ये पानपात्रेऽपि कांस्यवत् ।' इति शाश्वतः ॥
'पात्रान्तरे पानपात्रे कांस्यं कंसे च तैजसे ।'
इति रभसः ॥
पीयते यत्र मद्यादि तस्य भाजनं पानभाजनम् ।" इति भरतः ॥

पानसं. क्ली, (पनसस्य इदं पनसफले भवं तत्फलस्य विकार इति वा अण् ।) पनसभवमद्यम् । इति जटाधरः ॥ पनससम्बन्धिनि, त्रि ॥

पानालयः, पुं, (पानाद्धेतोः जातो योऽलयः रोगविशेषः ।) मद्यालयरोगः । इति राजनिर्घण्टः ॥

पानिलं, क्ली, (पानमाधारत्वेनास्त्यस्य इति इलच् ।) पानपात्रम् । इति शब्दचन्द्रिका ॥

पानीयं, क्ली, (पीयते इति । पा + अनीयर् ।) जलम् । इत्यमरः । १ । १० । ४ ॥ पातव्ये रस-

णीये च त्रि ॥ पानार्हद्रव्यविशेषः । पाना इति वङ्गभाषा । शरबत् इति पारस्यभाषा । तत्र अम्लिकापानीयं पित्तवमिनाशकम् । मिष्टदाड़िमीपानीयं प्रतिश्यायकाशनाशकम् । अम्लदाड़िमीपानीयं उदरविकारे धारकं क्षुधावृद्धिकारकञ्च । निम्बूपानीयं कृमिक्लेदलालासंसर्गज्वरनिवारकं सकलाहारपाचकञ्च । नागरङ्गपानीयं कासपित्तविनाशकं अम्लःकरञ्चप्राशस्त्य-जनकञ्च । नेवचन्दनपानीयं बलकारकं उन्मादमूर्च्छारोगभ्रान्तिकारकं रतिशक्तिवर्द्धकं उदरविकारोपकारकञ्च । इति प्राकाराजेश्वरः ॥ (अन्यत् पानकशब्दे द्रष्टव्यम् ॥ * ॥) अन्नदानविधिर्यथा,—

यम उवाच ।

"एतत्ते कथितं विप्र ! मम लोके तु दुर्लभम् ।
पानीयं सन्ततन्नाहात्तस्मं सुखमिच्छता ॥
अतोऽन्नं कारयेत् कूपं वापीं वा बहुपल्वलम् ।
बहुलोकाकुले देशे सर्व्वसत्त्वोपजीवितम् ॥"

इत्यग्निपुराणम् ॥

तड्डागाजन्मनं पाद्मसत्त्वो यथा,—

"पानीयं प्राणिनः प्राणाः पानीयं पावनं महत् ।
पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती ॥"

इति स्मृतिः ॥

तत्पर्य्यायः ।

"पानीयजीवनवनान्ततपुष्करास्भः-
पाथोऽम्बुशुभ्रवरपयःसलिलोदकानि ।
आपः कवारकबन्धजलानि नीरं
कीलालवारिकमलानि विषार्णवौ च ॥
सुवर्णं दहनारातिर्वाक्कोयं सर्व्वतोसुखम् ।
क्षीरं घनरसं निम्नगं मेघप्रसवो रसः ॥"

अस्य साधारणगुणाः ।

"पानीयं मधुरं स्निग्धञ्च रुचिदं क्षुत्पिपासाविषोषापहं
मोहभ्रान्तिमपाकरोति कुरुते शुक्लान्नपक्तिं
परान् ।
निद्रालस्यनिरासनं विवहरं आन्तार्त्तिसन्तर्पनं
नृणां धीबलवीर्य्यवृद्धिजनकं नष्टाङ्गपुष्टिप्रदम् ॥"
सद्यो वृष्टाञ्च भूमिस्थं कटुकं दोषदायकम् ।
चिरस्थितं लघु स्वच्छं पथ्यं स्वादु सुखावहम् ॥"

देशभूमिविशेषजलगुणाः ।

"आर्द्रं ताम्रमृदस्तदेव सलिलं वातादिदोषप्रदं
दैर्घ्याच्चाग्यकरञ्च दुर्जरतरं दोषावहं धूसरात् ।
वातघ्नञ्च शिलाशिरोत्थममलं पथ्यं लघु स्वादुकं
श्लेष्मं श्यामसरस्त्रिदोषशमनं सर्व्वामयघ्नं
जलम् ॥"

इति राजनिर्घण्टः ॥

"पिच्छिलं लवणं क्लिन्नं पर्य्यग्नेर्बालकर्दमैः ।
विवर्णं विरसं सान्द्रं दुर्गन्धि न हितं जलम् ॥
चन्द्रार्कैकरसंस्पृष्टं वायुस्पर्शावितं शुचु ।
पर्व्वतोपरि यद्वारि तत्समं गौरमृद्रसैश्च तत् ॥
तस्यानुगुणसुद्दिष्टं शैलप्रस्रवणोद्भवम् ।
लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपनम् ॥"

इति राजवल्लभः ॥

पानीयनकुलः, पुं, (पानीये जले नकुल इव ।) उद्रः । उदिड़ाल इति भाषा । यथा,—

"उद्रस्तु जलमार्जारः पानीयनकुलो वसी ॥"

इति हैमचन्द्रः ॥

पानीयपृष्ठजः, पुं, (पानीयपृष्ठे जलोपरि जायते इति । जन + डः ।) कुम्भी । इति रत्नमाला ॥ पाना इति भाषा ॥

पानीयफलं, क्ली, (पानीयजातं फलमिति मध्यपदलोपी समासः ।) मखान्नम् । इति भावप्रकाशः ॥ माखाना इति भाषा ।

पानीयमूलकं, क्ली, (पानीयमेव मूलमस्य । ततः कप् ।) शोभराजी । इति शब्दचन्द्रिका ॥

पानीयवर्द्धिका, स्त्री, (पानीयं वर्द्धयति प्रकाशयतीति । वर्द्धि + ण्वुल् । टाप् अत इत्वञ्च ।) वालुका । इति राजनिर्घण्टः ॥

पानीयशालिका, स्त्री, (पानीयस्य जलस्य वितरणार्थं शालिका शालायरूपमित्यर्थः ।) जलावस्थानगृहम् । पानिशाला इति जलछत्र इति च भाषा । तत्पर्य्यायः । प्रपा २ । इत्यमरः ॥ तत्कर्त्तृफलं यथा,—

"कूपारामप्रपाकारी तथा वृक्षादिरोपकः ।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम् ॥"

इत्युद्वाहतत्त्वे यमः ॥

पानीयामलकं, क्ली, (पानीयमामलकं पानीयाख्यं आमलकं वा ।) प्राचीनामलकम् । पानि आमला इति भाषा । अस्य गुणाः । दोषत्रयज्वरनाशित्वम् । इति भावप्रकाशः ॥ सुखशुद्धिमलबद्धकारित्वम् । अम्लत्वम् । स्वादुत्वञ्च । इति राजवल्लभः ॥

पानीयालुः, पुं, (पानीयसम्भव आलुः ।) कन्दविशेषः । पनियालु इति हिन्दीभाषा । तत्पर्य्यायः । जलालुः २ क्षुपालुः ३ वालुकः ४ । अस्य गुणः । त्रिदोषनाशित्वम् । सम्पर्य्यकारित्वञ्च । इति राजनिर्घण्टः ॥

पानीयाम्ना, स्त्री, (पानीयं जलं अम्नातीति । अम्ल गतौ भोजने + बाहुलकात् नः ततष्टाप् ।) वल्लजा । इति राजनिर्घण्टः ॥

पान्थः, त्रि, (पथि कुशलः पन्थानं नित्यं गच्छतीति वा । "पथो ण नित्यम् ।" ५ । १ । ७५ । पथः पन्थ च इत्यनेन पन्थादेशे सति णः । पथिकः । इत्यमरः । २ । ८ । १७ ॥ (यथा, हरिवंशे । ४२ । २ ।

"यथा निदाघसमये सूर्य्यांशुपरिपीड़ितः ।
पान्थो याति जलं दृष्ट्वा त्वरितं तत्प्रिपासया ॥")

पापं, क्ली, (पाति रक्षति अस्मादात्मानमिति । पा + "पापौषिधिभ्यः पः ।" उणा० । ३ । २३ । इति पः ।) अधर्म्मम् । दुरदृष्टम् । तत्पर्य्यायः । पङ्कम् १ पाप्मा २ पापम् ३ किल्बिषम् ४ कल्मषम् ५ कलुषम् ६ दुरितम् ७ एनः ८ अघम् ९ अंहः १० दुरितम् ११ दुष्कृतम् १२ । इत्यमरः ॥ पातकम् १३ दुष्कृतम् १४ कल्कम् १५ गुरुतल्पम् १६ । इति शब्दरत्नावली (निषिद्धकर्म्मानुष्ठानविहितकर्म्मानुष्ठानाभ्यां पापोत्पत्तिं संक्षेपेणाह श्रीसदाशिवः ।

"अनुष्ठानं निषिद्धस्य त्यागो विहितकर्म्मणः ।
वृथा जनयतः पापं क्लेशग्लौकामयप्रदम् ॥
स्वानिष्टमात्रजनकात् परानिष्टोपपादनात् ।
तदेव पापं द्विविधं जानीहि कुलनायिके ! ॥
परानिष्टकरात् पापात् मुच्यते राजशासनात् ।
अन्यस्मान्मुच्यते मर्त्यः प्रायश्चित्तात् समाधिना ॥
प्रायश्चित्ताद्यथा दक्षैर्न पूता ये मृतांश्चयः ।
नरकान् न निवर्त्तन्ते दहाम्युच्च निगर्हिताः ॥"

इति श्रीमहानिर्व्वाणतन्त्रे ॥)

तद्द्विविधं यथा,—

"प्राणाभिपातनं स्त्रैण्यं परदारमथापि च ।
त्रीण्यि पापानि कायेन सर्व्वतः परिवर्ज्जयेत् ॥
असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा ।
चत्वारि वाचा राजेन्द्र ! न जल्पेत न चिन्तयेत् ॥
अनभिध्या परस्वेषु सर्व्वसत्त्वेषु सौहृदम् ।
कर्म्मेत्या कुलमस्तीति त्रिविधं मनसा चरेत् ॥"

इति शान्तिपर्व्वणि दानधर्म्मः ॥

क्षुद्रपुत्रान्येतानि पातकशब्दे लिखितानि ॥ * ॥

पापस्य पुरुषत्वयातुवर्त्तित्वं यथा,—

"नाधर्म्मश्चरितो राजन् ! सद्यः फलति गौरिव ।
शनैरावर्त्तमानस्तु मूलान्यपि निकृन्तति ॥
यदि नात्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु ।
पापमाचरितं कर्म्म त्रिवर्गमनुवर्त्तते ॥
फलत्येव ध्रुवं पापं गुरुशुक्लमिवोदरे ॥"

इति मात्स्ये २८ अध्यायः ॥ * ॥

तीर्थस्य पापनाशकत्वं तत्र कृतपापस्य वज्रलेपत्वञ्च । यथा,—

"अन्यत्र हि कृतं पापं तीर्थमासाद्य नश्यति ।
तीर्थे तु यत् कृतं पापं वज्रलेपो भविष्यति ॥
मथुरायां कृतं पापं तत्रैव च विनश्यति ।
इयं पुरी महापुण्या यस्यां पापं न विद्यते ॥"

इति वाराहे मथुरामाहात्म्यम् ॥ * ॥

औषधपापत्वत्वं यथा,—

"अतः परं प्रवक्ष्यामि औषधापस्य लक्षणम् ।
कृतं देवर्षिभूतानां मनुष्याणां विशेषतः ॥
पितृणाञ्च द्विजश्रेष्ठ ! सर्व्ववर्णेषु चैवतः ।
ओंकारादिनिषृष्टञ्च पापकार्य्यसमन्वितञ्च यत् ॥
हत्यादिकं महापापं तत्सम्भाषणमेव तथा ।
कृतादिविक्रयं चौरं चाण्डालादिप्रतिग्रहम् ॥
स्वदोषगोपनं पापं परदोषप्रकाशनम् ।
दैर्घ्यादिहेतुं वाक्यदुष्टं निष्ठुरकं बहुप्रलपम् ॥
ढाकितं तालवादित्रं गाना वाद्यादिधर्म्मजः ।
मारणात्मकधार्म्मिकं नरकावहमुच्यते ॥
एतैः पापैस्तु संयुक्तः पच्यते यदि मूढ़धीः ॥"

इति वामने ५८ अध्यायः ॥

साङ्कर्य्यनामकपापानि यथा,—

"एकमुद्याहनं पंक्तिभाक्त्वमन्नाम्निमन्त्रणम् ।
याजनाध्यापने योनिसम्बन्धेष्वेव सङ्गतिभोजनम् ॥
सङ्काध्यायस्तु दम्भः सङ्कयाजनमेव च ।

एकादश समुद्दिष्टा दोषाः साङ्कर्यसंज्ञिताः ॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम् ।
तस्मात् सर्वप्रयत्नेन साङ्कर्यं परिवर्जयेत् ॥"

इति कौर्मे उपविभागे १५ अध्यायः ॥

"आसनात्पादसंस्पर्शात् संवासात् सहभोजनात् ।
आसनाच्छयनाद्यानात् पापं संक्रमते नृणाम् ॥
आसनादेकशय्यायां भोजनात् पंक्तिसङ्करात् ।
ततः संक्रमते पापं घटाद्घट इवोदकम् ॥"

इति गारुडे नीतिसारे ११२ अध्यायः ॥

राङ्कादिसहितपापेन राजादीनां परस्परं पापित्वं यथा,—

"राजा राङ्कसतात् पापात् पापी भवति वै हरे ! ।
तथैव राज्ञः पापेन सहाध्यस्थास्तु ये जनाः ॥
वर्णाश्रमादयः सर्वे पापिनो नात्र संशयः ।
भार्यांहोदुष्कृती स्वामी दुष्कृतात् स्वामिनोऽबला ॥

तथा देशिकपापात्तु शिष्यः स्यात् पातकी सदा ।
शिष्यार्हि पापिनो नित्यं गुरुर्भवति दुष्कृती ॥
पातकी यजमानः स्यात् पापिनोऽङ्ग ! पुरोधसः ।
पुरोहितकृता पापी यजमानार्हनो ध्रुवम् ॥"

अदत्तपुण्यपापभागित्वं यथा,—

"अदत्तानि च पुण्यानि पापानि च यथा प्रिये ! ।
प्राप्यानि कर्मणा येन तद्यथावन्निबोधमे ॥
देशग्रामकुलानि स्युर्भागभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्मा फलभुक् पुण्यपापयोः ॥
अन्यतोऽपि च संसर्गे अवश्यंयसुदाहृता ।
संसर्गात् पुण्यपापानि यथा यान्ति निबोध तत् ॥
एकत्र मैथुनाद्यानादेकपाच्यभोजनात् ।
फलार्द्धं प्राप्नुयात्कर्त्री यथावत् पुण्यपापयोः ॥
स्पर्शनाद्भाषणाद्वापि परस्य स्तवनादपि ।
दर्शनाच्च पुण्यपापानां नित्यं प्राप्नोति मानवः ॥
दर्शनश्रवणाभ्याञ्च मनोध्यानात्तथैव च ।
परस्य पुण्यपापानां भूतांशं प्राप्नुयान्नरः ॥
परस्य निन्दापैशुन्यं धिक्कारञ्च करोति यः ।
तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥
कुर्वतः पुण्यकर्म्माणि सेवां यः कुरुते परः ।
पत्नी भृत्योऽथ शिष्यो वा सजातीयोऽपि मानवः ।
तस्य सेवानुरूपेण तस्य तत्पुण्यभाग्भवेत् ॥
एकपंक्त्यासनो यस्तु लङ्घयन् परिवेष्यते ।
तस्य पापशतांशन्तु लभते परिवेषकः ॥
स्नानसन्ध्यादिकं कुर्वन् संस्पृष्टो वा प्रभावते ।
स पुण्यकर्म्मषष्ठांशं दद्यात्तस्मै सुनिश्चितम् ॥
धर्म्मोद्देशेन यो द्रव्यं परं याचयते नरः ।
तत् पुण्यं कर्म्मणं तस्य धनं दत्वाप्नुयात् फलम् ॥
अपकृत्य परद्रव्यं पुण्यकर्म्म करोति यः ।
कर्म्मजन्तु पापभोक्तारं ऋणिनञ्चैव फलम् ॥
नापशुत्य ऋणं यस्तु परस्य म्रियते नरः ।
धनी तत् पुण्यमाप्नोति स्वधनस्यानुरूपतः ॥
बुद्धिदत्वनुमन्ता च यज्ञोपकरणप्रदः ।
यजमानोऽपि षष्ठांशं प्राप्नुयात् पुण्यपापयोः ॥
प्रजाभ्यः पुण्यपापानां राजा षष्ठांशमुद्धरेत् ।
शिष्याद्गुरुः स्त्रिया भर्त्ता पिता पुत्रात्तथैव च ।
स्वपतेरपि पुण्यस्य भार्य्यार्द्धं समवाप्नुयात् ॥
परद्वेषेण दानादि कुर्वतः पुण्यकर्म्मणः ।
विना भृतकशिष्याभ्यां कर्त्ता षष्ठांशमाहरेत् ।
आत्मनो वा परस्यापि यदि सेवां न कारयेत् ॥

श्रीकृष्ण उवाच ।

इत्थं ह्यदत्तान्यपि पुण्यपापा-
न्यायान्ति नित्यं परसञ्चितानि ।
ह्यश्नुत्र चास्मिन्निति हासमर्थः
पुराभवं पुण्यमतिप्रियश्च ॥"

इति पाद्मोत्तरखण्डे । ७१।१५७ अध्यायः ॥

क्षुद्रजन्तुप्रभृतीनां वधे पापं तत्प्रायश्चित्तञ्च यथा,—

"वधे च क्षुद्रजन्तूनां हिंसकानाञ्च पण्डितः ।
कार्षापणं समुत्सृज्य म्रियमाणे प्रमुच्यते ॥
अहिंसकानां क्षुद्राणां वधे घृतगुणं ध्रुवम् ।
प्रायश्चित्तं म्रियमाणे कथितं पद्मयोनिना ॥
वधे विप्रकृतजन्तूनां पक्षिणाञ्च कामतः ।
ततः घृतगुणं पापं निश्चितं मनुरब्रवीत् ॥
नराणां म्लेच्छजातीनां वधे घृतगुणं ततः ॥
म्लेच्छानाञ्च घृतानाञ्च यत् पापं लभते वधे ।
सच्छूद्रैकस्य च वधे तत् पापं लभते पुमान् ॥
सच्छूद्राणां घृतानाञ्च यत् पापं लभते वधे ।
तत् पापं लभते नूनं गोवधेनैव निश्चितम् ॥
गवां दशगुणं पापं ब्राह्मणस्य वधे भवेत् ।
विप्रहत्यासमं पापं स्त्रीवधे लभते नरः ॥" * ॥

पापिदर्शनजन्यपापं यथा,—

"पापं यद्भूमे तात ! कथयामि निशामय ।
दुःस्वप्नं पापबीजञ्च केवलं विघ्नकारणम् ॥
मौण्ड्यञ्च ब्रह्मघ्नं वापि क्षतघ्नं कुटिलं तथा ।
देवघ्नं पितृमातृघ्नं पापं विश्वासघातिनम् ॥
मिथ्यासाक्ष्यप्रदातारं पक्षपातिमथर्विजकम् ।
ग्रामयाजिनमेवेति देवविप्रस्वहारिणम् ॥
अश्वत्थघातिनं दुष्टं शिववित्तविनिन्दकम् ।
अदीक्षितमनाचारं सन्ध्याहीनं द्विजन्तथा ॥
देवलं वृषवाहञ्च शूद्राणां सूपकारकम् ।
शूद्रदासी च शूद्राणां शूद्रस्यान्नभोजिनम् ॥
अवीरां छिन्ननासाञ्च देवब्राह्मणनिन्दकम् ।
पतिभक्तिविहीनाञ्च विष्णुभक्तिविहीनकम् ॥
शूद्राणां विधवाञ्चैव चण्डालं अभिचारिणीम् ।
शूद्रस्य सोपयुक्तं दुष्टस्त्रियञ्च जारजम् ॥
चौरं मिथ्यावादिनञ्च शूद्रान्नरतघातिनम् ।
मांसापहारिणञ्चैव ब्राह्मणं वृषलीपतिम् ॥
ब्राह्मणीगामिनं शूद्रं द्विजं वार्द्धुषिकन्तथा ।
अगम्यागामिनं दुष्टं चतुर्वर्णं नराधमम् ॥
मातासपत्नीं माता च स्वस्रञ्च भगिनीं सुताम् ।
गुरुपत्नीं पुत्रपत्नीं सोदरस्य प्रियां सतीं ॥
मातृष्वसां पितृष्वसां भागिनेयप्रियां तथा ।
मातुलानीं नवोढ़ां च पितृष्वस्रीं रजस्वलाम् ॥
पितृमातृप्रभुञ्चैव त्यागन्याद्यादृशं स्त्रियः ।
कीर्त्तिताः सामवेदे च परिपाल्याः सदा व्रज ! ॥

एतान् दृष्ट्वा च स्पृष्ट्वा च ब्रह्महत्यां लभेन्नरः ।
तस्माद्देवादिमान् दृष्ट्वा सूर्य्यं दृष्ट्वा हरिं स्मरेत् ॥
कामतो यदि पश्यन्ति तत्तुल्यास्ते भवन्ति वै ।
तस्मात् सन्तो न पश्यन्ति पापभीता व्रजेश्वर ! ॥"

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ७।७८ अध्यायः ॥

(अनिष्टम् । वधः । इति राजगुरुः ॥ यथा, रामायणे । २ । ८ । ३२ ।

"तस्मात् न लक्ष्मणे रामः पापं किञ्चित् करिष्यति ।
रामस्तु भरते पापं कुर्य्यादेव न संशयः ॥"

तद्वति, त्रि । इत्यमरः ॥ यथा, महाभारते । १ । ६० । १६ ।

"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ।
कीटाः पतङ्गाश्च भवन्ति पापा
न मे विवक्षास्ति महानुभाव ! ॥")

पापकं, क्ली, (पापमेव । स्वार्थे कन् ।) पापम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ७४ । २७ ।

"मन्यते पापकं कृत्वा न कश्चिदिति मानिति ।
विदन्ति चैनं देवाश्च यश्चैवान्तरपूरुषः ॥"

पापेन कायतीति । कै + कः । पापवति, त्रि । यथा, महाभारते । १ । ७४ । २६ ।

"एकोऽहमस्मीति च मन्यसे त्वं
न ह्युच्यं वेत्सि मुनिं पुराणम् ।
यो वेदिता कर्म्मणः पापकस्य
यस्यान्तिके त्वं वृजिनं करोषि ॥")

पापकृत्, त्रि, (पापं कृतवानिति । पाप + कृ + "सुकर्म्मपापमन्त्रपुण्येषु कृञः ।" ३ । २ । ८९ । इति क्विप् ।) पापकर्त्ता । यथा,—

"स्वापनेनानुतापेन तपसाध्ययनेन च ।
पापकृन्मुच्यते पापाद्दानेन च दमेन च ॥"

इति प्रायश्चित्ततत्त्वम् ॥

(यथा च महाभारते । १ । ६० । १६ ।

"पुण्यां योनिं पुण्यकृतो व्रजन्ति
पापां योनिं पापकृतो व्रजन्ति ॥")

पापग्रहः, पुं, (पापोऽशुभकारी ग्रहः ।) अङ्गारकचन्द्रः । कुजः । राहुः । शनिः । एतेषुक्तो बुधः । रविः । यथा, ज्योतिःसारसंग्रहे ।

"अङ्गारकेन्दुः कुजो राहुः शनिश्चैतेषुतं बुधः ।
रविः पापा भवन्त्येते शुभाश्चार्द्धे प्रकीर्त्तिताः ॥"

पापघ्नः, पुं, (पापं हन्तीति । पाप + हन + "अमनुष्यकर्त्तृके च ।" ३ । २ । ५३ । इति टक् ।) तिलः । इति राजनिर्घण्टः ॥ पापनाशके, त्रि इति सुबोधाकरश्च ॥

पापचेलिका, स्त्री, (पापमशुभं चेलमिति गच्छतीति । चेल + खुल् + टाप् । कापि अत इत्वञ्च ।) पाठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

पापचेली, स्त्री, (पापं चेलमस्यामिति । चेल + अच् + गौरादित्वात् ङीष् ।) पाठा । इत्यमरः । २ । ४ । ८५ ॥

पापनाशितः, पुं, (पापो नाशितः ।) धूर्त्तनाशितः । इति संक्षिप्तसारव्याकरणम् ॥

पापपतिः, पुं, (पापोत्पादकः पतिः ।) उपपतिः। इति त्रिकाण्डशेषः ॥

पापपुरुषः, पुं, (पापः पापमयः पुरुषः ।) पापमयाङ्गरः । यथा,—

"वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्णस्तेयभुजद्वयम् ॥
सुरापानकृता युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गि महदङ्गमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाढ्यं रक्तश्मश्रुविलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेवं कुक्षौ विचिन्तयेत् ॥"

इति भूतशुद्धिप्रकरणी तन्त्रसारः ॥ *

"सृष्ट्यादौ पुरुषश्चण्डः संसारं सचराचरम् ।
सर्व्वेषां दमनार्थाय सृष्टवान् पापपूरुषम् ॥
द्विजातिहत्याब्रह्मघ्नं मदिरापानलोचनम् ।
सुवर्णस्तेयवदनं गुरुतल्पगतिस्मृतिम् ॥
स्त्रीहत्यागात्मिकञ्चैव गोहत्यादोषवाहुकम् ।
न्यासापहरणश्रीर्यं भ्रूणहत्यागलन्तथा ॥
परस्त्रीगतिवृक्षाढ्यं सुहृल्लोकवधोदरम् ।
शरणापन्नहत्यादिनाभिं गर्ब्बकथाकटिम् ॥
गुरुनिन्दासक्थियुगं कन्याविक्रयणोपमम् ।
विश्वासवाक्यकथनपायुं मित्रवधाङ्घ्रिकम् ॥
उपपातकरोमाढ्यं महाकायं भयङ्करम् ।
लम्बवर्णं पिङ्गनेत्रं खाश्रयात्यन्तदुःखदम् ॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः ॥

पापमुक्तः, त्रि, पापान्मुक्तः । निष्पापः । इति संक्षिप्तसारव्याकरणम् ॥ स च यथा,—

"यः समः सर्व्वभूतेषु जितात्मा ध्यानमानसः ।
स पापेभ्यो विमुच्येत ज्ञानवान् स च वेदवित् ॥
गुणागुणपरिज्ञाता क्षयस्य व्ययस्य च ।
ध्यानेनैव समारूढः स पापेभ्यः प्रमुच्यते ॥
स्वदेहे परदेहे च सुखदुःखेन निस्पृहः ।
विचारज्ञो भवेद्यस्तु स मुच्येतेनसो ध्रुवम् ॥
अहिंसः सर्व्वभूतेषु क्षमाक्रोधविवर्जितः ।
शुभध्यानः सदा यस्तु स पापेभ्यः प्रमुच्यते ॥
प्राणायामैश्च निर्दग्ध अधःस्तम्भारजांसि च ।
अवस्थितमना यस्तु स पापेभ्यः प्रमुच्यते ॥
निराशीः सर्व्वतश्चित्तैर्दिदार्थैस्तु न लोलुपः ।
परीतात्मा त्यजेत् प्राणान् सर्व्वपापात् प्रमुच्यते ॥
अदृग्भी जितक्रोधः परस्वविवर्जितः ।
अनसूयश्च यो मर्त्यः स पापेभ्यः प्रमुच्यते ॥
गुरुशुश्रूषया युक्तो ह्यहिंसानिरतश्च वः ।
शुचिश्च शुचिशीलश्च स पापेभ्यः प्रमुच्यते ॥
प्रशस्तानि च यः कुर्य्यादप्रशस्तानि वर्जयेत् ।
योऽभिगच्छति तीर्थानि विमुक्तैनान्तरात्मना ।
पापाद्दूरतरो नित्यं स पापेभ्यः प्रमुच्यते ॥
उत्थाय ब्राह्मणं गच्छेन्नरो भक्त्या समन्वितः ।
अभिगम्य प्रयत्नेन स पापेभ्यः प्रमुच्यते ॥"

इति वराहपुराणम् ॥

पापरोगः, पुं, (पापोद्भवो रोगः ।) मङ्करीरोगः। इति शब्दरत्नावली ॥ (यथा, मनुः ।५।१६३।

"अभिचाराच्च भर्त्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥"

यत्पापजन्यो यद्रोगो भवति तत् सर्व्वं कर्म्मविपाकशब्दे द्रष्टव्यम् ॥)

पापर्द्धिः, स्त्री, (पापानां ऋद्धिर्द्धिर्यत्र ।) जरायाः। इति हेमचन्द्रः । ३ । ५८२ ॥ (यथा, पद्मतन्त्रे । २ । ७८।

"अस्ति कश्चिद्विजनोद्देशे कश्चित् पुलिन्दः ।
स च पापर्द्धिं कर्त्तुं वनं प्रविशतः ॥")

पापलं, क्ली, परिमाणविशेषः । इति संक्षिप्तसारोद्धारादिधृतिः ॥ (पापं लातीति । ला+कः ।) पापप्राहके, त्रि ॥

पापग्रमनी, स्त्री, (पापं ग्रस्यतेऽनयेति । ग्रस+णिच्+करणे ल्युट् । स्त्रियां ङीप् ।) ग्रसनीवृक्षः । इति राजनिर्घण्टः ॥ पातकनाशिका च ॥

पापात्मा, [त्मन्] पुं, (पापः पापविशिष्ट आत्मा यस्य । पापे अधर्म्मे आत्मा वृत्तिर्यस्येति वा ।) पापी । यथा,—

"पापात्मनां ध्रुवं गतिं विस्तरेण वदाम्यहम् ।
षड्शीतिसहस्राणि योजनानि दुरत्ययम् ॥
प्रोक्तो मार्गस्य विस्तारः सर्व्वदुःखान्वितस्य च ।
क्वचित्क्वचित् ज्वलद्वह्निः सन्तप्तः कर्द्दमः क्वचित् ।
क्वचित् क्वचित् द्विजश्रेष्ठ! सन्तप्तं ताम्रवालुकम् ॥
क्वचित् क्वचित्तीक्ष्णशिलाः क्वचित्तप्तशिलास्तथा ॥
क्वचित् क्वचिच्छ्वभ्रदृष्टिः क्वचिदङ्गारवर्षणम् ।
कुत्रचिद्वह्निवृष्टिश्च कुत्रचित् पङ्कवर्षणम् ॥
उल्कामुवर्षणं क्वापि क्वचित् पाषाणवर्षणम् ।
ज्वलदग्निरिव क्वापि सन्तप्तो याति मारुतः ॥
गभीरा अन्धकूपाश्च क्षुत्तृष्णासक्तका द्विज ! ।
क्वापि कण्टकवृक्षाश्च नाराचसमकण्टकाः ॥
पाषाणश्रेण्यः क्वापि दुरारोहाः सपन्नगाः ।
क्वचिन्नाढ्यान्धकाराश्च क्वचित् श्रोणितकर्दमाः ॥
क्वचिद्दीरवहृष्टाश्च क्वचित् क्षाराः क्वचित्क्षुराः ।
क्वचित् क्वचित् शुष्कराश्च लोहवच्च क्वचित् क्वचित् ॥
क्वचिदस्त्यां राशयश्च दुर्गन्धा मांसराशयः ।
क्वचित् कण्टकराशिश्च शैवालानि क्वचित् क्वचित् ॥
कीलका बलयः क्वापि क्वचिद्व्याघ्रास्तथा शिवाः ।
खड्गिनः करिणः क्वापि क्वचिद्वह्नाः भयङ्कराः ॥
एवं बहुविधक्लेशैः क्षयाजलविवर्जितः ।
तस्मिन्मार्गे द्विजश्रेष्ठ! पापिनो यान्ति दुःखिनः ॥
नग्ना विमुक्तकेशाश्च प्रेताकारभयङ्कराः ।
गच्छन्ति पापिनस्तत्र शुष्ककण्ठौष्ठतालुकाः ॥"

इति क्रियायोगसारे २२ अध्यायः ॥

पापात्मं, क्ली, (पापं अस्यतीति । अस्+"कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) तीर्थविशेषः । तस्य नामान्तरम् पृथूदकं अघुकीर्त्तिश्च । यथा,—

"पृथूदके महातीर्थे अघुकीर्त्तीति नामतः ।
जुहाव पुनराकृष्य राष्ट्रं नरपतेस्ततः ॥
हूयमाने तदा राष्ट्रे प्रवृत्ते यज्ञकर्म्मणि ।
अधावत ततो राष्ट्रं नृपतेर्दुष्कृतेन वै ॥

पामघ्नः

ततः स चिन्तयामास ब्राह्मणस्य विचेष्टितम् ।
पुरोहितेन संयुक्तो दक्षाद्यादाय सर्व्वशः ॥
प्रसादनार्थं विप्रस्य अघुकीर्त्तेः ययौ तदा ।
प्रसादितः स राज्ञा च तुष्टः प्रोवाच तं नृपम् ॥
ब्राह्मणा नावमन्तव्याः पुरुषेण विजानता ।
ब्राह्मणश्चेद्वचस्तापो नश्येन्निपुरुषं कुलम् ॥
एवमुक्ता च नृपतिमाज्ञप्तेन पयसा पुनः ।
उत्थापयामास मृतांश्चक्षा राज्ञो द्विजे स्थितः ॥
तस्मिंस्तीर्थे तु यः स्नाति श्रद्धायो जितेन्द्रियः ।
स प्राप्नोति नरो नित्यं मनसा चिन्तितं फलम् ॥
तत्तु तीर्थं सुविख्यातं पापात्मं नाम नामतः ।
यस्मिंश्च यज्ञशस्त्रस्य मधु सुस्राव वै नदी ॥
तस्मिन् स्नातोऽथ भक्त्या च मुच्यते सर्व्वपातकैः ।
फलं प्राप्नोति यज्ञस्य अश्वमेधस्य मानवः ॥
पापात्मेति विख्यातं तीर्थं पुण्यतमं द्विजाः ॥"

इति वामनपुराणे ९८ अध्यायः ॥

पापी, [न्] पुं. (पापमस्यस्येति । इनिः ।) पापयुक्तः । यथा,—

"अधिरोहन्नुताः केचित् केचित् कर्द्दमभूषिताः ।
केचित् केचित् क्षुधाक्रान्ताश्च पथि गच्छन्ति पापिनः ॥
क्रन्दन्तो व्यथया केचित् स्वदुष्कर्म्माकुलेक्षणाः ।
शोचन्तः स्वानि कर्म्माणि केचिद्गच्छन्ति पापिनः ॥
कस्यचिच्चर्म्मपाशस्य बन्धनं पापिनो गले ।
कस्यचिद्बाहवे कस्यचिच्च सुदृढे ॥
कस्यचिन्नासिकारन्ध्रे निर्द्दयैर्यमकिङ्करैः ।
अङ्कुशाग्रं विनिक्षिप्य क्रोधेनाकृष्यते द्विज ॥
ग्रीवे कस्यचिदत्युच्चैर्बद्धा दृढं तथा ।
आकृष्यते यमश्रेष्ठैः केषाञ्चित् सक्थितैनसाम् ॥
गृह्यमाणान् गुरुपाषाणान् वहतः कर्णरन्ध्रके ।
आयोभारांश्च गृह्यार्य्यैर्वहन्ति पथि पापिनः ॥
कांश्चिदृष्ट्वोला केशेषु कांश्चित् कर्णेषु पापिनः ।
कांश्चिद्गुदेषु पादेषु नयन्ति यमकिङ्कराः ॥
शीघ्रास्तु पापिनः कांश्चित् करप्रहरणैर्दृढैः ।
क्षिप्ता क्षिप्ता यमश्रेष्ठा नयन्ति यममन्दिरम् ॥
यान्त्यधःशिरसः केचिदूर्द्ध्वपादास्तथा परे ।
गच्छन्ति वायुभिः केचिदेकपादाश्च केचन ॥
दृश्यन्ते विकृताकारा नार्य्यश्चाधोविरोचिषः ।
यमदूतैरुह्यमानाः पापिनोऽपि च तत्पथि ॥"

इति पाद्मे क्रियायोगसारे २२ अध्यायः ॥

पाम्ना, [न्] पुं. (पा+"नामन् सीमन्निति ।" उणा ।४।१५०। इति मनिन् । पुमागमे निपातनात् साधुः ।) पापम् । इत्यमरः । १ । ७ । २२ ॥ (यथा, मनुः । ६ । ८५ ।

"क्षमेण क्षमयोगेन परिव्रजति यो द्विजः ।
स विधूयेह पाप्मानं परं ब्रह्माधिगच्छति ॥")

पाम, [न्] क्ली, (पा+मनिन् ।) विचर्च्चिका। इत्यमरः । २ । ६ । ५१ ॥ (यथा, माधवकरः ।

"कण्डूया वह्नयः पीडरुजः आवयन्ति
पामेत्युक्ताः कफकृताः सदाहा ॥")

पामन्नः, पुं, (पाम हन्ति । हन्+टक् ।) गन्धकः । इति जटाधरः ॥

पामघ्नी, स्त्री, (पाम हन्तीति । हन् + टक् । टित्वात् ङीप् ।) वटुका । इति राजनिर्घण्टः ॥

पामनः, त्रि, (पामाऽस्यास्य इति । "लोमादि-पामादिपिच्छादिभ्यः शनेलचः ।" ५ । २।१०० । इत्यस्य वार्त्तिकोक्ता "पामादिभ्यो नः ।" इति नः ।) पामरोगविशिष्टः । तत्पर्य्यायः । कच्छुरः २ । इति हेमचन्द्रः ॥

पामरः, त्रि, (पाम पापादिहीरालमस्त्यस्येति । पामन् + "अश्वादिभ्यो रः ।" ७ । २ । ८० । इत्यस्य वार्त्तिकोक्ता रः । ततो न लोपे साधुः ।) खलः । नीचः । इति मेदिनी । रे, १८२ ॥ (यथा, राजतरङ्गिण्याम् । १ । ३०८ ।

"दूरात् पामरदुर्वृत्तेः श्रुतिपथप्राप्तेः प्रबुद्धक्षभू-
दृष्टो निर्भरवारिभिः सहसभाः सद्यो निमज्ज-
न्निव ॥"

सर्पः । इति हेमचन्द्रः ॥

पामरोद्धारा, स्त्री, (पामरं उद्धरतीति । उद् + धृ + अण् । ततो अजादित्वात् टाप् ।) गुडूची । इति शब्दचन्द्रिका ॥

पामा, [न्] स्त्री, (पामन् + "अत्र्यनुनासिकस्य ।" ४ । १ । ११ । इति न ङीप् ।) कच्छूः । इत्यमरः । २ । ६ । ५३ ॥ पाँचड़ा इति भाषा ॥ अस्या औषधं यथा,—

"हरिद्रा हरितालञ्च दूर्व्वागोमूत्रसैन्धवम् ।
अयं लेपो हन्ति दृढं पामानं वै गरं तथा ॥"

अपि च ।

"माक्षिकं नवनीतञ्च सिन्दूरञ्च मरीचकम् ।
पामा विलेपिता नश्येत् बहुजापि दृढव्रज ! ॥"

अन्यच्च ।

"मरीचं त्रिकृतं कुष्ठं हरितालं मनःशिला ।
देवदारु हरिद्रे द्वे कुष्ठं मांसी च चन्दनम् ॥
विश्वाला करवीरञ्च अर्कक्षीरं सहस्रपत्रम् ।
एषाञ्च कार्षिको भागो विषस्यार्द्धपलं भवेत् ॥
प्रस्थं कटुकतैलस्य गोमूत्रेऽष्टगुणे पचेत् ।
लक्षपाके लौहपात्रे वा मृन्मैर्द्वाग्निना पचेत् ॥
पामा विचर्चिका चैव दद्रुविस्फोटकानि च ।
अभ्यङ्गेन प्रशाम्यन्ति कोमलत्वञ्च जायते ॥
प्रबलान्यपि चिह्नानि तैलेनानेन जयेत् ।
चिरोत्थितमपि क्षिप्रं विषमं तद्वज्जयेद्वेत् ॥"

इति गारुडे १६७ । १६८ अध्याययोः ॥

पामारिः, पुं, (पामाया अरिर्नाशकः ।) गन्धकः । इति हेमचन्द्रः ॥

पायसः, पुं क्ली, क्षीरान्नः । टारपिन् इति भाषा । पयसा संस्कृतः । (पयसो विकार इत्यण् ।) परमान्नम् । इत्यमरभेदिनीकरौ । अस्य पाक-प्रकारो गुणाश्च ।

"अतप्ततण्डुलो धौतः परिभ्रष्टो घृतेन च ।
लक्षयुक्तेन दुग्धेन पाचितः पायसो भवेत् ॥
पायसः कफलक्षघ्नो विदग्धो मधुरो गुरुः ॥"

तस्य पितृश्राद्धेन गङ्गाम्भसि निःक्षेपे फलं यथा,—

"पितृन्निष्ठन्न यो भक्त्या पायसं मधुसंयुतम् ।
गुरुवर्षशतैः सार्द्धं गङ्गाम्भसि विनिःक्षिपेत् ॥

लभते भवन्ति पितरस्तस्य वर्षशतं हरे ! ।
यच्छन्ति विविधान् कामान् पतितुष्टाः पितामहाः ॥"

इति स्कान्दे काशीखण्डे २७ अध्यायः ॥

चन्द्रप्रभपायसो यथा,—

"श्रृङ्गीरचतुर्जातचन्द्रकान्तः सुरोचनः ॥"

इति राजवल्लभः ॥

पयोविकारे, त्रि । यथा,—

"कन्दूपक्वानि तैलेन पायसं दधि घृक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहजतान्यपि ॥"

इति तिथितत्त्वे वराहपुराणम् ॥

पायिकः, पुं, पदातिकः । इति शब्दरत्नावली ॥

पायुः, पुं, (पाति रक्षति शरीरं मलनिस्सारणेनेति । यद्वा, पिबति वस्त्यौषधमनेनेति । पा + "सर्वापाजीति ।" उणा १ । १ । इत्युण् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) मलद्वारम् । स तु गर्भस्यस्य सप्त-भिर्मासैर्भवति । इति सुश्रुतबोधः ॥ तत्पर्य्यायः । अपानम् २ गुदम् ३ च्युतिः ४ अधोमार्गः ५ मूत्रद्वारम् ६ त्रिवलीकम् ७ वर्चिः ८ । इति हेमचन्द्रः । ३ । २०६ ॥ (यथा, मनौ । १ । २१ ।

"रक्षोऽग्नेः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु ।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥")

तस्याधात्मादि यथा,—

"अवाग्गतिरपानश्च पायुरध्यात्मसुच्यते ।
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ॥"

इति महाभारते आश्वमेधिकपर्व्व ॥

(खनामख्यातो भरद्वाजपुत्रः । यथा, ऋग्वेदे । ६ । ४७ । २४ । "अन्वयः पायवेऽदात् ॥"

"पायवे भरद्वाजपुत्रायैतत्सर्वमायाज्ञदृष्ट्वान्ते चाग्नयोऽन्वायन्नेतत्सर्वम्; प्रशब्दोऽदात् दत्तवान् ।" इति तद्भाष्ये सायणः ॥ पालके, त्रि । यथा, ऋग्वेदे । २ । १ । ७ ।

"त्वं पायुर्दमे यस्तेऽविधत् ॥")

पाय्यं, क्ली, (भीयतेऽनेनेति । भी भाये + "पाय्य-सांग्राम्येति ।" ३ । १ । १२६ । इति निपातनात् ण्यन्ताद्भावादेः पत्वं युगागमश्च ।) परिमाणम् । इत्यमरः । २ । ६ । ८५ ॥ पानम् । इति संक्षिप्तसारोद्धादिवृत्तिः ॥ जलम् । निघण्टौ, त्रि । इति त्रिकाण्डशेषः ॥ (पा पाने + क्षिप् + ण्यत् । पायश्चित्ते । यथा, सुश्रुते । १ । १६ ।

"घृतञ्च पाय्यः स नरः सुजीर्णे
स्निग्धो विरेच्यः स यथोपदेशम् ॥")

पार, तृ क कर्म्मसमाप्तौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) अपपारत् । इति दुर्गादासः ॥

पारं, क्ली, (पारयतीति । पार + घञ्यच् ।) परतीरम् । नदीसङ्गमाद्गन्तव्यतीरम् । इत्यमरः । १ । १० । ८ ॥ (यथा, सङ्गीतदर्पणे ।

"गान्धर्व्वेषु परं पारं न जानाति सरस्वती ।
अद्यापि मज्जनभयात् तूष्णीं वहति वच्यति ॥")

पारः, पुं, (पूर्य्यतेऽनेनेति । पॄ + घञ् ।) पारदः रत्नमञ्जरीटीकायां सारसुन्दरी ॥ प्रान्तभागे, पुंस्त्री । इति मेदिनी । रे, ५६ ॥

पारकः, त्रि, (पॄ पूर्त्तौ पालने प्रीतौ आयामे च + ण्वुल् ।) पूर्त्तिकारकः । पालनकारकः । प्रीति-कारकः । आयामकारकः । एवमेवेषु पृधातोः कर्त्तरि ण्वुलप्रत्ययनिष्पन्नः ॥

पारक्, [क्] पुं, (पारयतीति । पार कर्म्म-समाप्तौ + क्विप् + "पारेरञ्च्यिः ।" उणा १ । १२५ । इति अञ्चिः । क्विलोपः ।) सुवर्णम् । इत्युणादिकोषः ॥

पारक्यं, क्ली, (परस्मै लोकाय हितम् । पर + ष्यञ् कुक् च ।) परलोकहितकर्म्म । यथा,—

"पादेन तस्य पारक्यं कुर्य्यात् सञ्चयमात्मवान् ।
अर्द्धेन चात्मभरणं नित्यनैमित्तिकन्तथा ॥
पारक्यार्द्धार्द्धमर्थस्य मूलभूतं विवर्द्धयेत् ।
एवमाचरतः पुंसो धर्म्मः सम्पद्यतेऽक्षयः ॥"

इति मार्कण्डेयपुराणम् ॥

(परस्य इदमिति । परलोके, त्रि । यथा, मनुः । १० । ६७ ।

"परं स्वधर्म्मो विगुणो न पारक्यः स्वनुष्ठितः ।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥")

पारगः, त्रि, (पारं गच्छतीति । पार + गम + "अन्नात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः ।" ३ । २ । ४८ । इति डः ।) पारगामी । तत्पर्य्यायः । कर्णरीकः २ । इति शब्दमाला ॥ (यथा, महा-भारते । ७ । १४ । २१ ।

"उद्धरिष्यन्ति मां सर्व्वे नावं लब्ध्वेव पारगः ॥"

तथा च तत्रैव । २ । १४० । २६ ।

"पारगश्च धनुर्युद्धे बभूवाथ धनञ्जयः ॥")

पारगतः, पुं, (ग्राह्यादेः अविद्यायाः वा पारं गतः ।) जिनः । इति हेमचन्द्रः ॥ पारगे, त्रि ॥

पारजायिकः, पुं, (परजायां गच्छतीति । पर-जाया + ठक् ।) पारदारिकः । (यथा, महा-भारते । १२ । ६० । १८ ।

"वाक्शूरो दत्तपक्षो यश्च स्यात् पारजायिकः ।
यः परस्वमथादद्यात् याच्या नक्षाढ्या इति ॥")

पारटोट, पुं, प्रस्तरः । इति त्रिकाण्डशेषः ॥

पारदः, पुं, (पारयतीति । पार + णिच् + ल्युः ।) मेघः । इति शब्दमाला ॥

पारणं, क्ली, (पार + भावे ल्युट् ।) उपवास-व्रतान्तरदिवसकर्त्तव्यप्राथमिकभोजनम् । विव-रणमस्य पारणाशब्दे द्रष्टव्यम् ॥

पारणा, स्त्री,(पार + युच् + टाप् ।) उपवासव्रता-नन्तरदिवसकर्त्तव्यप्राथमिकभोजनम् । यथा,—

"पारणं पावनं पुंसां सर्व्वपापप्रणाशनम् ।
उपवासाङ्गभूतञ्च फलदं शुद्धिकारणम् ॥
सर्व्वेष्वेवोपवासेषु दिवापारणमिष्यते ।
अन्यथा फलहानिः स्याद्रात्रौ पारणपारणम् ॥
न रात्रौ पारणं कुर्य्याद्रात्रौ दोषोऽतिशस्यते ।
विद्यायां पारणं कुर्य्याद्भक्त्वेयित्वा महानिशाम् ॥
पूर्व्वाह्णे पारणं कृत्वा विप्र ! सुरार्च्चनम् ।

सर्व्वेषां सम्मतं कुर्य्याद्दते वै रोहिणीव्रतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्माष्टमीव्रतं ८ अध्यायः ॥

अथ श्रीकृष्णजन्माष्टमीव्रतपारणकालः ।
"अष्टम्यामथ रोहिण्यां न कुर्य्यात्पारणं क्वचित् ।
हन्यात् पुराकृतं कर्म्म उपवासार्জितं फलम् ॥
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात्तिथिभान्ते च पारणम्॥"
अत्रोभयवियोगे पारणमुक्तम् । "यदा सार्द्ध-प्रहरनिशाभ्यन्तरे एकस्यैव वियोगस्तदैकतर-वियोगेऽपि पारणम् ॥ तथा च नारदीये ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणन्तु न कर्त्तव्यं यावन्नैकस्य संक्षयः ॥
सांयोगिके व्रते प्राप्ते यद्यप्येको वियुज्यते ।
तत्रैव पारणं कुर्य्यादेवं वेदविदो विदुः ॥
यद्येकस्यापि सार्द्धप्रहरनिशाभ्यन्तरे न वियोग-स्तदा तयोरवियोगेऽपि प्रातरुत्सवान्ते पार-णम् । निशान्ते चोत्सवान्ते वा व्रती कुर्व्वीत पारणम् । इत्युक्तत्वात् ॥ * ॥ महाष्टम्युपवास-पारणं मत्स्यमांसोपहारेण कर्त्तव्यम् । यथा,—
"अष्टम्यां सप्तपोथ्येव नवम्यामपरेऽहनि ।
मत्स्यमांसोपहारेण दद्यान्नैवेद्यमुत्तमम् ॥
तेनैव विधिनान्नन्तु स्वयं भुञ्जीत नान्यथा ॥"
छागाद्यन्तु पशुमांसभक्षणन्निन्द्यं न तेन पारणं किन्तु मत्स्येन । अष्टम्युपवासपारणे रविवारादौ मांसनिषेधः । एवं मांसाशनत्यागग्रहणनियमेन नियोगादिष्वपि मांसं वर्জ्जनीयम् ॥ * ॥

अथ श्रीरामनवमीव्रतपारणकालः ।
"नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां वै दशम्यामेव पारणम् ॥"

अथैकादशीव्रतपारणकालः ।
"मलं क्षपित्वा हरये निवेद्योपोषणं व्रती ।
द्वादश्यां पारणं कुर्य्याद्भक्षयित्वा द्युपोदकीम् ॥"
द्वादशीलङ्घने दोषमाह नारदीयम् ।
"महाहानिकरी ह्येषा द्वादशी लङ्घिता नृणाम् ॥
विष्णुधर्म्मोत्तरे ।
"द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
तमतिक्रम्य कुर्व्वीत पारणं विष्णुतत्परः ॥"

अथ श्रवणद्वादश्युपवासपारणकालः ।
"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य संक्षयः ॥
विशेषेण महीपाल श्रवणं वर्द्धते यदि ।
तिथिक्षयेण भोक्तव्यं द्वादशीं नैव लङ्घयेत् ॥"
तिथिक्षयेण एकादशीक्षयेण भोक्तव्यं द्वादश्यां पारयेदित्यर्थः ॥ * ॥ अथ शिवरात्र्युपवास-पारणकालः ।
"जयन्ती शिवरात्रिश्च कार्य्ये भद्रजयान्विते ।
क्षपोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥"
तिथ्यन्ते पारणन्तु जयन्तीमात्रपरम् । अत्र चतुर्द्दश्यामेव तत् ।
"ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतानि पारणे क्षते ॥"*॥

पारणदिने वर्জ्यानि यथा, ब्रह्माण्डपुराणम् ।
"कांस्यं मांसं सुरा चौद्रं लोभं वितथभाषणम् ।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
घृष्टापिष्टं मसूरांश्च द्वादशैतानि वैष्णवः ।
द्वादश्यां वर्জ्जयेन्नित्यं सर्व्वपापैः प्रमुच्यते ॥"
हरिवासलोपे ।
"कांस्यं मांसं मसूरश्च चणकं कोरदूषकम् ।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥"
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरयोर्यहणम् । इति तिथ्यादि-तत्त्वम् ॥

पारतः, पुं, (विविधव्याधिसङ्कटादिभ्यः पारं तनोतीति । तन + अन्येभ्योपीति डः ।) पारदः । इति हेमचन्द्रः । १ । ११६ ॥

पारतन्त्र्यं, क्ली, (परतन्त्रस्य भावः । परतन्त्र + ष्यञ् ।) परतन्त्रता । पराधीनत्वम् । अन्यायत्तता । यथा, माधवकरः ।
"दोषाणां समवेतानां विकल्पेऽप्यांशुकल्पना ।
स्वातन्त्र्यपारतन्त्र्याभ्यां याथेः प्राधान्यमादिशेत् ॥"

पारत्रिकं, त्रि, (परत्र भवम् । परत्र + ठक् ।) पारलौकिकम् । परत्र भवमित्यर्थे ष्ठिकप्रत्यय-निष्पन्नम् ॥

पारदः, पुं, (अरामरणसङ्कटादिभ्यः पारं ददा-तीति । दा + कः ।) धातुविशेषः । पारा इति भाषा । तत्पर्य्यायः । रसराजः २ रसनाथः ३ महारसः ४ रसः ५ महातेजः ६ रसेशः ७ रसोत्तमः ८ सूतराट् ९ चपलः १० जैत्रः ११ शिववीर्य्यम् १२ शिवः १३ अच्युतम् १४ रसेन्द्रः १५ लोकेशः १६ दुर्द्धरः १७ प्रभुः १८ रुद्रजः १९ हरतेजः २० रसधातुः २१ अग्नि-मुखः २२ खेचरः २३ अमरः २४ देहदः २५ मृत्युनाशकः २६ सूतः २७ स्कन्दः २८ स्कन्दा-शुकः २९ देवः ३० दिव्यरसः ३१ रसायनश्रेष्ठः ३२ यशोदः ३३ । इति राजनिर्घण्टः ॥ सूतकः ३४ सिद्धधातुः ३५ पारतः ३६ । इति शब्दरत्ना-वली ॥ हरबीजम् ३७ रजखलः ३८ । इति हेमचन्द्रः ॥ शिववीर्य्यम् ३९ शिवाक्षयः ४० । इति भावप्रकाशः ॥ अस्य गुणाः । क्रमिकुष्ठ-नाशित्वम् । चक्षुष्यत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥ अस्य भक्षणः पूर्व्ववीर्य्यं मासत्रय-पर्य्यन्तं तिष्ठति । इति परिभाषा ॥*॥अपि च ।
"पारदः सकलरोगनाशकः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एष कीर्त्तितो
देहलोहवरसिद्धिकारकः ॥
मृच्छितो हरते व्याधीन् बद्धः खेचरसिद्धिदः ।
सत्त्वसिद्धिकरो लीनो निरुद्धो देहसिद्धिदः ॥
विविधव्याधिभयोदयमरणजरासङ्कटेऽपि
मर्द्दनीयः ।
पारं ददाति यस्मात्तस्मादयं पारदः कथितः ॥"
इति राजनिर्घण्टः ॥

तस्योत्पत्तिलक्षणं यथा,—
"शिवाङ्गात् प्रच्युतं रेतः पतितं धरणीतले ।
तद्देहसारजातत्वाच्छुक्लमच्छमभूच्च तत् ॥
अत्र भेदेन विज्ञेयं शिववीर्य्यं चतुर्विधम् ।
श्वेतं रक्तं तथा पीतं कृष्णं तत्तु भवेत् क्रमात् ॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च खलु जातितः ।
श्वेतं शुक्लं रजो नाम्ने रक्तं किल रसायने ॥
धातुवादे तु तत् पीतं खे गतौ कृष्णमेव च ॥
पारदः षड्रसः स्निग्धस्निग्धदोषघ्नो रसायनः ।
योगवाही महावीर्य्यः सदा हरिबलप्रदः ॥
सर्व्वामयहरः प्रोक्तो विशेषात् सर्व्वकुष्ठहृत् ।
खण्डो रसो भवेद्बद्धो ग्रासो योगो जगार्द्दनः ।
रञ्जितः क्रामितश्चापि साक्षाद्देवो महेश्वरः ॥
मूर्च्छितो हरति रुजं बन्धनमप्युभयं खे गतिं
कुरुते ।
अजरीकरोति हि नृणां कोऽन्यः करुणाकरः
सूतात् ॥"
रसार्णवे ।
"यस्य रोगस्य यो योगस्तेनैव सह योजितः ।
रसेन्द्रो हन्ति तं रोगं नरकुञ्जरवाजिनाम् ॥"
तस्य दोषा यथा,—
"मलं विषं वह्निगिरित्वचापलं
नैसर्गिकं दोषमुशन्ति पारदे ।
उपाधिजौ द्वौ त्रिपुनागयोगजौ
दोषौ रसेन्द्रे कथितौ सुनीश्वरैः ॥
मलेन मूर्च्छा मरणं विषेण
दाहोऽग्निना कष्टतरः शरीरे ।
देहस्य नाशं गिरिणा सदा स्या-
च्चापल्यतो वीर्य्यहतिश्च पुंसाम् ॥
वह्निं कुष्ठं सृजत्येव गण्डो
भवेदसाध्यः परिशोधनीयः ॥
वह्निर्विषं मलश्चेति सुखा दोषात्रयो रसे ।
एते कुर्व्वन्ति सन्तापं मृतिं मूर्च्छां तृणां क्रमात् ॥
अन्येऽपि दोषाः कथिता भिषग्भिः पारदे यदि ।
तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥
संस्कारहीनं खलु सूतराजं
यः सेवते तस्य करोति बाधाम् ।
देहस्य नाशं विदधाति नूनं
कष्टांश्च रोगान् जनयेन्नराणाम् ॥"
मारितस्य मूर्च्छितस्य तस्य गुणाः ।
"पारदः क्रमिकुष्ठघ्नो जयदो हरिदः सरः ।
मृत्युघ्नश्च महावीर्य्यो योगवाही जराहरः ॥
सूतोजोरूपदो दृष्टो दृष्टिलङ्घातुवर्द्धनः ।
वह्निजनाशनः शूरः खेचरः सिद्धिदः परः ॥
पारदः सकलरोगहा सूतः
षड्रसो निखिलयोगवाहकः ।
पञ्चभूतमय एव कीर्त्तित-
स्तेन तद्गुणगणैर्विराजते ॥" * ॥
अथ रसस्य शोधनविधिः । तच्च स्वेदनम् ।
"नागाधान्येयया प्राप्तैस्तुषवर्জ्जैर्जलान्वितैः ।
लङ्घाखं पूरितं रन्ध्रैदृढावस्त्रत्वमाप्नुयात् ॥
तन्मध्ये भृङ्गराजस्य विष्णुक्रान्ता पुनर्नवा ।

मौनाक्षी चैव सर्पाक्षी वह्निदेवी घृतावरी ॥
त्रिफला गिरिकर्णी च हंसपादी च चित्रकः ।
समूलं कुट्टयित्वा तु यथालाभं विनिःक्षिपेत् ॥
पूर्ववाजभागमध्ये तु धान्याम्लकमिदं क्षुतम् ।
खेदनादिषु सर्वत्र रसराजस्य योजयेत् ॥"
विष्णुक्रान्ता गिरिकर्णी च अपराजितैव श्वेत-नीलपुष्पभेदात् । अलाभेमारणार्थं वा तदभावे प्रयोजयेत् । तदभावे धान्याम्लाभावे ।
"चुम्बकं लवणं राजी रजनी त्रिफलार्द्रकम् ।
महावला नागबला मेघनादः पुनर्नवा ॥
मेषशृङ्गी चित्रकश्च नवसारं समं समम् ।
क्षुतं समसमं चूर्णं वा पूर्ववाजेनैव पेषयेत् ॥
प्रलिप्येतेन कल्केन वज्रमूषामुखसाचकम् ।
तन्मध्ये निःक्षिपेत् क्षुतं वह्नौ तन्निहितं पचेत् ॥
दोलायन्त्रेऽम्लसंयुक्ते जायते खेदितो रसः ॥"
मेघनादः चक्रराद्याकविशेषः । मेषशृङ्गी मेढ़ाशृङ्गी । तदलाभे कर्कटशृङ्गी ग्राह्या । नवसारं नौसादर । अन्यत्र ।
"क्षुलकालसिन्धूत्थचुम्बलार्द्रकराजिकाः ।
रसस्य षोडशांशेन क्रमं युञ्जात् पृथक् पृथक् ॥
क्रमेष्वनुक्तमानेषु मतं मानमिदं बुधैः ।
पटाकृतेषु चैतेषु क्षुतं प्रक्षिप्य काञ्जिके ॥
खेदयेद्दिनमेकञ्च दोलायन्त्रेण बुद्धिमान् ।
खेदार्त्तोऽयो भवेत् क्षुतो मर्द्दनाच्च सुनिर्मलः ॥"
क्षुलकं सरट । अनलचित्रकम् । चाङ्गेरी त्रिकटु । राजिका राइ ॥ * ॥ अथ मर्द्दनम् ।
"दृष्टिकाचूर्णचूर्णाभ्यामादौ मर्द्यो रसक्षुतः ।
दम्बा गुडेन सिन्धूत्थराजिकायष्टधूमकैः ॥"
अन्यच्च ।
"कुमारिकाचित्रकरक्तसर्षपैः
क्षुतैः कषायैर्बृहतीविमिश्रितैः ।
पलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥" * ॥
अथ मूर्च्छनम् ।
"चुम्बकं त्रिफलावल्याकन्दैः क्षुद्राह्वयान्वितैः ।
चित्रकोन्मत्तनिर्गुण्डीरक्तव्याकन्दकल्कदवैः ॥
क्षुतं क्षुतेन यूषेण वारान् सप्ताभिमूर्च्छयेत् ।
दृत्वा संमूर्च्छितः क्षुतस्यजेत् सप्तापि कक्षुकान् ॥"
वल्याकन्दः वाभ्यरक्तसाकन्दः । क्षुद्राह्वयं छोटी-कटैया वड़ोकटैया । ऊर्ध्वा ऊर्ध्वामेधका । निर्गुण्डी । क्षारः यवक्षारः । व्याघ्री कुमारिका । अर्कः अर्कपत्ररसः । कनकः धत्तूरपत्ररसः ॥*॥
अथोर्द्धपातनम् ।
"मयूरशीवताप्याभ्यां गन्धपिष्टीक्षतस्य च ।
यन्त्रे विद्याधरे कुर्य्यादूर्द्धसंज्ञस्तोर्द्धपातनम् ॥
क्षुतः स्यादूर्द्धपातेन सर्व्वदोषविवर्ज्जितः ॥"
मयूरशीवा तुतिया । ताप्यः सुवर्णमाक्षी । गन्धपिष्टीक्षतस्य कुमारिकाद्रवयोगेन तावन्मर्द्दनं कर्त्तव्यं यावत् पारदः पृथङ् न दृश्यते दृश्यते । विद्याधरयन्त्रे उमरयन्त्रे ॥ * ॥
अथाधःपातनम् ।
"त्रिफलाग्न्यग्निखिभिर्नवणाक्षुरिसंयुतैः ।

गन्धपिष्टं रसं क्षुत्वा लेपयेदूर्द्धभाजनम् ॥
ततो दीप्तैरधःपातसुपलैस्तस्य कारयेत् ।
यन्त्रे भूधरसंज्ञे तु ततः क्षुतो विमुच्यति ॥
खेदनादिक्रियाभिस्तु शोधितोऽसौ यदा भवेत् ।
तदा कार्य्याणि कुरुते प्रयोज्यः सर्व्वकर्म्मसु ॥"
अथ सुखदोषहरशोधनविधिः ।
"गृहकन्या हरति मलं त्रिफलायां चित्रको विषं हन्ति ।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत् सप्त ॥"* ॥
अथ सर्व्वदोषहरः संक्षिप्तः शोधनविधिः ।
"कुमारिकाचित्रकरक्तसर्षपैः
क्षुतैः कषायैर्बृहतीविमिश्रितैः ।
पलत्रिकेणापि विमर्द्दितो रसो
दिनत्रयं सर्व्वमलैर्विमुच्यते ॥
एवं कदर्थितः क्षुतः बलो भवति निश्चितम् ।
बलौषधीकषायेण खेदितः स बली भवेत् ॥
सर्पाक्षीचित्रिकाबन्ध्याभृङ्गाब्दैः खेदितो बली ।
ततः स पारकप्रावैः खिन्नः स्यादतिदीप्तिमान् ॥"
सर्पाक्षी नागफणी । चित्रिका अग्निशी । बन्ध्या बाँझखखसा । भृङ्गः भृङ्गराजः । अब्दो मुस्ता । पावकः चित्रकः ॥ * ॥
अथ रसस्य मारणविधिः ।
"धूमसारं रसं तोयैर्गन्धकं नवसादरम् ।
यामैकं मर्द्दयेदम्लैर्भागं ज्ञात्वा समं समम् ॥
काचकूप्यां विनिःक्षिप्य ताच्च मृदम्बसुद्रया ।
विलिप्य परितो वह्निं सुदृढां दत्त्वा विशोधयेत् ॥
अधःसच्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ।
पिठरीं वालुकापूरैर्भृत्वा वा कूपिकागलम् ॥
निवेश्य चुल्ल्यां तदधो वह्निं कुर्य्याच्छनैः शनैः ।
तस्मादप्यधिकं किञ्चित् पावकं ज्वालयेत्क्रमात् ॥
एवं द्वादशभिर्यामैर्म्रियते रस उत्तमः ।
स्फोटयेत् स्वाङ्गशीतं तन्मर्द्दनं गन्धकं त्यजेत् ॥
अधःस्थञ्च क्षुतं क्षुतं गृह्णीयात्तन्तु मात्रया ।
यथोचितानुपानेन सर्व्वकर्म्मसु योजयेत् ॥" * ॥
अथान्यप्रकारः ।
"अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ।
तत् संपुटे क्षिपेत् क्षुतं मलपूदुम्बसम्भितम् ॥"
मलपूः काष्ठोदुम्बरिका ।
"द्रोणपुष्पीप्रकन्दानि विड्वराभिरिमेदकः ।
क्षुतचूर्णमधक्षौद्रं दत्त्वा सुदां प्रदीपयेत् ॥
तद्गोलमाधमेत् सम्यक् मृदम्बासंपुटे सुधीः ।
सुदां दत्त्वा शोधयित्वा ततो गजपुटे पचेत् ॥
एकेनैव पुटेनैव क्षुतकं भस्म जायते ।
तत् प्रयोज्यं यथास्थाने यथामात्रं यथाविधि ॥"
अथान्यप्रकारः ।
"काष्ठोदुम्बरिकादुग्धे रसं किञ्चिद्विमर्द्दयेत् ।
तदुग्धहरहिङ्गोत्थ मूषायुग्मं प्रकल्पयेत् ॥
क्षिप्त्वा तत्संपुटे क्षुतं तत्र सुदां प्रदीपयेत् ।
धृत्वा तद्गोलकं प्राज्ञो मृदम्बासंपुटेऽधिके ॥
पचेद्गजपुटे तेन क्षुतकं याति भस्मताम् ॥"
अन्यः प्रकारः ।
"नागबलीरसैर्दृढः कर्कोटीकन्दगर्भितः ।

मृदम्बासंपुटे पक्वः क्षुतो याम्येव भस्मताम् ॥"
इति भावप्रकाशे पूर्वखण्डे २ भागे ॥
अथ पारदशिवलिङ्गनिर्म्माणविधिः ।
"पारदे शिवनिर्म्माणे नानाविघ्नं यतः प्रिये ! ।
अतएव महेशानि ! शान्तिस्वस्ययनं चरेत् ॥
पारदं शिवबीजं हि ताडनं नहि कारयेत् ।
ताडनाद्धिक्षनाशः स्यात्ताडनाद्विक्षहीनता ॥
ताडनाद्रोगयुक्तत्वं ताडनाच्चरणं भवेत् ।
द्वादशं पार्थिवं लिङ्गमुपचारेण षोडशैः ।
षड्विधलक्षनिर्म्माणरचितं मुक्तमेव वा ॥
पुरुषस्य यथायोग्यं युग्मवस्त्रं निवेदयेत् ॥
भोगयोग्यं प्रदातव्यं मधुपर्कं कुलेश्वरि ! ।
अलङ्कारं यथाशक्ति दद्यात् कल्याणहेतवे ॥
पूजयेद्दृढयत्नेन विधिनापि च पार्व्वति ! ।
षोडशोक्तेन विधिना प्रत्येकेनायुतं जपेत् ॥
आदौ पञ्चाक्षरं मन्त्रमष्टोत्तरशतं जपेत् ।
पूजान्ते प्रजपेत् पश्चात् प्रासादाख्यं महामनुम् ॥
दक्षिणान्तं समाचर्य्य हविष्याशी जितेन्द्रियः ।
ताम्बूलञ्च तथा मद्यं वर्जयेन्न कदाचन ।
अक्षिप्तान्ते हविष्यान्नं ताम्बूलं मौनमुत्तमम् ॥
होमयेत् परमेशानि ! दशांशं वा घृताक्तकम् ।
होमस्य दक्षिणा कार्य्या तदा विघ्नैर्न लिप्यते ॥
ततः परस्मिन् दिवसे पारदं आनयेत् सुधीः ।
तस्योपरि जपेन्मन्त्रं सर्व्ववश्यं नवाक्षरम् ॥
व्योमबीजं शिवार्द्धेन्दुं वर्णाद्यं बिन्दुमस्तकम् ।
वायुबीजं चेन्दुयुतं त्रितयं त्र्यम्बकं प्रिये ! ॥
इमं मन्त्रं महेशानि ! प्रजपेदौषधोपरि ॥
पारदे प्रजपेन्मन्त्रमष्टोत्तरशतं यदि ।
तदैवौषधयोगेन बद्धो भवति नान्यथा ॥
ततः परस्मिन् दिवसे ग्रसेत् यत् प्राग्यवस्तमे ! ।
वरयेत् सर्व्वकर्त्तारं यथोक्तविभवावधि ॥
सुवर्णं चम्पकाकारं कर्णयुग्मे निवेशयेत् ।
चतुष्कोणयुतं स्वर्णं ग्रीवायां सुमनोहरम् ॥
हस्तद्वये महेशानि ! दद्याद्वलययुग्मकम् ।
वलयं शुक्लवर्णञ्च अङ्गुरीयं तथैव च ॥
कर्म्मी दद्यात् पीतवर्णं क्षौमवस्त्रयुगं प्रिये ! ।
एवं ज्ञात्वा महेशानि ! शिवरूपं विचिन्तयेत् ॥
अथातः संप्रवक्ष्यामि विधानं शृणु पार्व्वति ! ।
प्रस्तरे चैव संस्थाप्य भिण्डीपत्ररसेन च ।
प्रथमेन समालोड्य कुर्य्यात् कर्द्दमवत् प्रिये ! ॥
निर्म्माणयोग्यं तद्द्रव्यं यदि स्यात् सुरसुन्दरि ! ।
तदा निर्म्माय तल्लिङ्गं पुनर्दृढतरं चरेत् ॥
क्षणुष्यसंयुते वस्त्रे अङ्गारे च करीषके ।
किञ्चिदुष्णं प्रकर्त्तव्यं यतो दृढतरं भवेत् ॥"
इति मालतीमाधवतन्त्रे ८ पटलः ॥ * ॥
सगररावणसतसुकेशुम्लेच्छजातिविशेषः ॥
(यथा, महाभारते । २ । ५१ । १३ ।
"कैराता दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्विभागा पारदाः सह वाह्लिकैः ॥")
अस्य विवरणं पह्लवशब्दे द्रष्टव्यम् ॥
पारदकः, पुं, देशविशेषः । इति शब्दरत्नावली । स तु ओड्रदेशैकभाग इति केचित् ॥

पारदारिकः, पुं, (परेषां अन्येषां दारान् गच्छतीति। परदार + "गच्छतौ परदारादिभ्यः।" ७।३।७। इत्यस्य वार्त्तिकोक्त्या ठक्।) पारजायिकः। परदाररतः। (यथा, महाभारते १२।३१।२५। "तत्र मार्हिष्मतीवासी भगवान् हव्यवाहनः। श्रूयते हि गृहीतौ वै पुरस्तात् पारदारिकः॥")

"पुण्यकाङ्क्षयष्टिक्षिमायितं
यत्र गोतमकलत्रकामिनः।
पारदारिकविलासलाहसं
देवभर्तुरुदटङ्क भित्तिषु॥"

इति च नैषधे १८ सर्गः॥

अस्य दोषा यथा,—

"यः परस्त्रीषु निरतस्तस्य जीवां कुतो यशः।
स च निन्द्यः पापयुक्तः म्रियते सर्व्वसाधुषु च॥"

इति ब्रह्मवैवर्त्ते गणेशखण्डे २१ अध्यायः॥

पारदार्य्यं, क्ली, (परदारा दारा यस्य स परदारस्तस्य कर्म्मेति ष्यञ्।) परदारगमनम्। यथा,

"भूतादध्ययनादानं भूतकाध्यापनन्नथा।
पारदार्य्यं पारिवित्तं वार्धुष्यं लवणक्रिया॥"

इत्युपपातकप्रसङ्गे याज्ञवल्क्यः॥

पारदेश्यः, त्रि, प्रेषितः। पारदेशिकः। पथिकः। परदेशं गत इत्यर्थे ण्यप्रत्ययनिष्पन्नः॥ (परदेशे भव इति ष्यञ्। परदेशजातः। यथा, याज्ञवल्क्ये। २। २५५।

"स्वदेशपण्ये तु गुणं वणिग्गृह्णीत पञ्चकम्।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी॥")

पारमहंस्यं, त्रि, (परमहंसैर्गम्यं परमहंसस्य भावः परमहंसेन ज्ञेयं यत् प्राप्यमिति वा। परमहंस + ष्यञ्।) परमहंससम्बन्धि। यथा,

"श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्म्यमाविष्कृतं
तच्छृण्वन् सुपठन् विचारणपरो भक्त्या विमुच्येन्नरः॥"

इति श्रीमद्भागवते। १२। १३। १८॥

"पारमहंस्यं परमहंस्यैः प्राप्यम्।" इति तट्टीकायां श्रीधरस्वामी॥ (परब्रह्मधाम। यथा, भागवते। १। १८। २२।

"यज्ञानुरक्ताः सहसैव धीरा
अपोह्य देहादिषु सङ्गमूढम्।
व्रजन्ति तत्पारमहंस्यमन्त्यं
यस्मिन्नहिंसोपशमः स्वधर्म्मः॥"

प्रत्यङ्निष्ठारूपम्। यथा, तत्रैव। २। ४।१२।

"पुंसां पुनः पारमहंस्य आश्रमे॥
व्यवस्थितानामनुवर्त्यदाम्पुषे॥"

ज्ञानस्वरूपम्। यथा, तत्रैव। ४। २१। ४१।

"न वै तथा चेतनया बहिष्कृते
हुताशने पारमहंस्यपर्य्यगुः॥")

पारमार्थिकः, त्रि, (परमार्थाय परमपुरुषार्थाय हित इति। ठक्।) परमार्थयुक्तः। यथा,—

"गतानुगतिको लोको न लोकः पारमार्थिकः॥"

इति पुराणम्॥

तुल्यम्। यथा,—

"त्रिचतुःपञ्चषाट्नवद्वादश एव च।
क्रमेण घटिका श्वेतास्तत्पृथग्यं पारमार्थिकम्॥"

इति तिथ्यादितत्त्वम्॥

(यथाथः। यथा, मनौ ८। ६२ श्लोकटीकायां कुल्लूकभट्टः। "तेषां प्रकाशाप्रकाशतस्कराणां सकर्म्मणि चौर्य्यादौ ये पारमार्थिका दोषा इति।" परस्परविभक्तः। यथा, भागवते। ३। २८। १।

"लक्षणं महदादीनां प्रकृतेः पुरुषस्य च।
स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्॥"

"पारमार्थिकं परस्परविभक्तमित्यर्थः।" इति तट्टीकायां श्रीधरस्वामी॥)

पारम्पर्य्यं, क्ली, (परम्परायां आगतम्। तत आगत इत्यण्। चतुर्व्वर्णादित्वात् ष्यञ्। परम्परा + स्वार्थे ष्यञ् वा।) आम्नायः। कुलक्रमः। इति हेमचन्द्रः॥ तथा च।

"यस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः।
तत्र तं नावमन्येत धर्म्मस्तत्रैव तादृशः॥"

इति विवादभङ्गार्णवः॥

परम्परायां भावश्च॥ (यथा, महाभारते। ६। ११७। २७।

"निवृत्तेषु च सैन्येषु पारम्पर्य्येण सर्व्वशः।
विसृक्तकवचाः सर्व्वे भौमसौवुर्नराधिपाः॥")

पारम्पर्य्योपदेशः, पुं, (पारम्पर्य्येण गुरुपरम्परया प्राप्त उपदेशः।) उपदेशपरम्परा। तत्पर्य्यायः। ऐतिह्यम् २ इतिह ३। इत्यमरः। २। ७। १२॥ परम्परैव पारम्पर्य्यं स्वार्थे ष्यञ्। पारम्पर्य्येणोपदेशः पारम्पर्य्योपदेशः। तत्र इतिहशब्दोऽव्ययः। यथा। इतिह ह स्माह वटे यक्षः प्रतिवसतीति। इति एवं रूपं ह्यस्मि गच्छति इतिह ह स्मजनवादिति वः। इतिह ग्रन्थात् स्वार्थे ष्ठञ् ऐतिह्यम्। इति भरतः॥

पारलौकिकः, त्रि, (परलोके भवः परलोकाय हित इति वा। परलोक + ठञ्। "अनुशतिकादीनाञ्च।" ७।३।२०। इति त्रिस्वाद्युभयपदस्यैव वृद्धिः।) परलोकसम्बन्धी। यथा,—

"दानपाचमधर्म्मभिद्वेक-
याहि कोटिगुणितं दिवि दाधि।
साधुरेति सुकृतैर्यदि कर्त्तुं
पारलौकिककुसीदमसीदत्॥"

इति नैषधे। ५। ६२॥

(तथा च महाभारते। १३। १११। १६।

"तस्माच्छ्रायागतैरर्थैर्धर्म्मं सेवेत पण्डितः।
धर्म्म एको मनुष्याणां सहायः पारलौकिकः॥")

पारवतः, पुं, पारावतः। इति द्विरूपकोषः॥

पारशवः, पुं, शूद्रायां क्षत्रियतनयः। इत्यमरः। ३। ३। २०६॥ स तु निषादजातिः। यथा,—

"ब्राह्मणादेव्यकन्यायामम्बष्ठो नाम जायते।
निषादः शूद्रकन्यायां यः पारशव उच्यते॥
शूद्रकन्यायामूढायां निषाद उत्पद्यते यतः;

संज्ञान्तरेण पारशवश्चोच्यते। तस्योपनयनसंस्कारनिषेधमाह।

स पारयन्नेव शवत्वात् पारशवः स्मृतः॥
स जीवन्नेव शवतुल्यः।" इति मनुकुल्लूकभट्टौ॥

परस्त्रीरतयः। (परस्त्रीरेव स्वार्थे ष्यञ्।) शूल्यम्। तत्तु लौहम्। इति मेदिनी। वे, ६०॥ परस्त्रीजाते, त्रि॥

पारश्वीकः, पुं, पारस्त्रीकः। इत्यमरटीकायां रमानाथः॥

पारश्वधः, पुं, (परश्वधेन युध्यतेऽसौ परश्वधः प्रहरणमस्येति वा। परश्वध + "तदस्येति।" अण्।) परश्वधधारी। पारश्वधिकः। इति हेमचन्द्रः॥

पारश्वधिकः, पुं, (परश्वधः प्रहरणमस्य। "परश्वधाट्ठञ् च।" ४। ४। ५८। इति ठञ्।) परश्वधधारी। कुठारधारी। तत्पर्य्यायः। पारश्वधः २ परश्वधायुधः ३। इति हेमचन्द्रः॥

पारस्त्रिकः, पुं, पारस्त्रीकः। इति शब्दरत्नावली॥

पारस्त्री, स्त्री, पारस्त्रभाषा। पारस्त्रदेशभवविद्यादि। तदारम्भादिकं यथा,—

"ज्येष्ठाश्लेषामघापूर्व्वारेवतीभरणीदिने।
विद्यारम्भोत्तराषाढ़ाश्रवणे पापवासरे॥
तस्मे स्थिरे लग्नचन्द्रे च पारस्त्रीमारभेत् पठेत्॥"

इति गरुडपक्षिसुकृतैः॥

पारस्त्रीकः, पुं, पारस्त्रीकदेशोद्भवघोटकः। तत्पर्य्यायः। वानायुजः २। इति कश्चिदित्यमरटीकायां भरतः॥ पराद्यः ३ आवर्त्तजः ४। इति त्रिकाण्डशेषः॥ (यथा, अश्वशास्त्रे। ६। ८।

"पारस्त्रीकास्त्वाजिकाभाः कोट्टाभाः केचिदुन्नताः॥")

देशविशेषः। तत्पर्य्यायः। पारसिकः २। इति शब्दरत्नावली॥ तद्देशोद्भवे, त्रि॥ (यथा, रघुः। ४। ६०।

"पारस्त्रीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना॥")

पारस्त्रैणेयः, त्रि, (परस्त्रियां जातः।" कल्याण्यादीनामिनङ्।" ४। १। १२५। इति ढक् इनङादेशश्च। तत उभयपदवृद्धिः।) परस्त्रियाः सुतः। इत्यमरः। २। ६। २४॥

पारा, स्त्री, (पारोऽस्त्यस्या इत्यच् ततष्टाप्।) नदीविशेषः। सा तु पारिपात्रपर्व्वतोद्भवा। इति मेदिनी। रे, ५६॥ (यथा, माघे। १२। २४।

"पारा चर्म्मस्रुती रूपा विदुषा वेणुमत्यपि॥")

पारापतः, पुं, (पारे गिरिनद्यादिपरपारे पतति, पारादप्यापततीति लोभादिति। पत + अच्।) पारावतः। इत्यमरटीकायां रमानाथः॥

पारापारः, पुं, (पारञ्चापारञ्चास्येति। "अर्च आदिभ्योऽच्।" ५। २। १२७। इत्यच्।) पाताबारः। इति द्विरूपकोषः॥

पारायण्यं, क्ली, वाक्यवचनम्। इत्यमरः। ३। २। "पारं समाप्तिं अयते गच्छति प्राप्नोति पारायण्यं गन्धादित्वादनः। आविष्टलिङ्गत्वाद्विभक्तिलिङ्गेन सामानाधिकरण्येऽपि क्लीबमेव पारायण्यम्। यथा धातुपारायणम्। इत्य-

पाराय्यं नाम कथ्यते मम मैथिलीति भट्टिः।" इति भरतः॥ (पारमवाप्ते समाप्तिं प्राप्नुवन्ति येनेति। अव+क्युट् कारणे ल्युडिति।) पुराण-पाठः। (यथा, देवीभागवते। १। २५। २७। "वरयेद्ब्राह्मणं प्राज्ञं पाराय्यज्ञप्तये तदा॥") तत्र श्रीभागवतपाठानुक्रमो यथा,—

श्रीपार्वत्युवाच।

"स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो!। सुकस्तच्छ्रावयामास महाराजं परीक्षितम्॥ समाप्तेनेति भगवन्! भूयते तत्र तत्र च। तच्छ्रावणक्रममिच्छामि श्रोतुं तत्त्वमतेव च॥

सदाशिव उवाच।

साधु पृष्टमहाभागे! लोके यत् प्रचरिष्यति। पाराय्यमिति ख्यातं सद्यो मुक्तिप्रदं नृणाम्॥ सुकस्योत्क्रमणेनैव पठेद्भागवतन्तु यः। श्रावयेच्छृणुयाद्वापि तस्यानन्तं फलं भवेत्॥ स्नाननित्यक्रियः प्रातः कृताह्निकः कृतासनः। देवद्विजगुरूनत्वा ध्यात्वा विष्णुं सनातनम्॥ व्यासायनं नमस्कृत्य सुकदेवञ्च भक्तितः। हिरण्याक्षवधं यावत् प्रथमेऽहनि कीर्त्तयेत्॥ चरितं भरतस्यापि द्वितीयेऽथ तृतीयके। मथनञ्चाब्धितस्यापि यज्ञे कूर्म्मः स्वयं हरिः॥ चतुर्थेदिवसे चैव दशमे हरिवञ्च च। पञ्चमे तु षष्ठेद्विद्वान् रुक्मिण्या हरणावधि॥ षष्ठे चोद्वहसंवादं सप्तमे तु समापयेत्। अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन॥ क्षते विरामे मध्ये तु अध्यायादिं पठेत् पुनः। पठेदर्धं वुध्यमानः श्रावयेद्वैष्णवोत्तमे!॥ श्रोता तु प्राङ्मुखो भूत्वा प्रणम्याङ्गिरसन्नरः। अध्याये स्वर्णमाषैकं तथा दद्याच्च दक्षिणाम्॥ समाप्तौ च ततो धेनुं स्वर्णशृङ्गीं निवेदयेत्। कुर्य्याच्च वैष्णवं होमं सान्नदानं भोजयेत्ततः॥ एवं यः कुरुते देवि! पाठं भागवतस्य तु। अवशं श्रावणं वापि स दद्यां गतिमाप्नुयात्। एतत् पाराय्यं नाम सर्व्वकामफलप्रदम्॥ पाठकाले तु विदुषा सुनयश्च तपोधनाः। पार्श्वेऽथ तथा विष्णोः सान्निध्यं तत्र कुर्व्वते॥ इतस्ते कथितं देवि! पाराय्यविधानकम्। विष्णुप्रीतिकरं पुण्यं किमन्यः श्रोतुमिच्छसि॥" इति पाद्मे पातालखण्डे पाराय्यमाहात्म्ये ७१ अध्याय.॥ ०॥ अपिच।

कुमारा ऊचुः।

"अथ ते संप्रवक्ष्यामः समाहरणमुत्तमं विधिम्। सहायैर्वसुभिर्येव प्रायः साध्यो विधिः स्मृतः॥ दैवज्ञन्तु समाहूय मुहूर्त्तं पृच्छ यत्नतः। दिवाद्यं यादृशं वित्तं तादृशं परिकल्पयेत्॥ नभस्य आश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभाः। एते मासाः कथारम्भे श्रोतृणां मोक्षदायकाः॥ मासानां निर्णये यानि तानि त्याज्यानि सर्व्वथा। सङ्ख्यायाञ्च न ग्राह्याः कर्त्तव्याः सोदमाश्च ये॥ देशे देशे तथा चैवं वार्त्ता प्रेष्या प्रयत्नतः। आविशन्ति कथा चात्र आगन्तव्यं कुटम्बिभिः॥ दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्त्तनाः। स्त्रियः शूद्रादयो ये च तेषां बोधो यतो भवेत्॥ देशे देशे वितन्वन्ति ये वैष्णवाः कीर्त्तनोत्सुकाः। तेष्वेव पर्व्व प्रेष्यञ्च तल्लेखमितीरितम्॥ सतां समाजो भविता सप्तरात्रं सुदुर्लभः। अपूर्व्वरसरूपैव कथा चात्र भविष्यति॥ श्रीभागवतपीयूषकथासु रसलम्पटाः। भवन्तश्च तदा श्रोतुमायान्तु प्रेमतत्परा॥ गायकाश्च कदाचिद्वा दिनमात्रं तथापि वा। सर्व्वथा गमनं कार्य्यं सतोऽत्रैव सुदुर्लभः॥ एवमाकारणं तेषां कर्त्तव्यं विनयेन च। आगन्तुकानां सर्व्वेषां वासस्थानानि कल्पयेत्॥ तीर्थे चैव वने चापि गृहे वा भवनं स्मृतम्। विप्राणां वसुधा यत्र कर्त्तव्यं तत्कथास्थलम्॥ शोधनं मार्जनं भूमेर्लेपनं धातुमण्डनम्। गृहोपस्करसङ्कृत्य गृहकोणे निवेशयेत्॥ अग्रतः पश्चाद्देशो यत्नादास्तीर्णानि प्रवेशयेत्। कर्त्तव्यं मण्डपं प्रोच्चैः कदलीपल्लवान्वितम्॥ कलपुष्पदलैर्विचित्रं वितानं च विराजितम्। चतुर्द्दिक्षु ध्वजारोपो बहुसम्पद्विराजितः॥ ऊर्द्धं सप्तैव लोकाश्च कल्पनीया: सुविस्तरम्। तेषु विप्रा विरक्ताश्च स्थापनीया: प्रबुध्य च॥ पूर्व्वं तेषामासनानि कर्त्तव्यानि यथोत्तरम्। वक्तुश्चापि तथा दिव्यमासनं परिकल्पयेत्॥ उदङ्मुखो भवेद्वक्ता श्रोता वै प्राङ्मुखस्तदा। प्राङ्मुखोऽथ भवेद्वक्ता श्रोता चोदङ्मुखस्तदा॥ अथवा पूर्व्वदिक् श्रेष्ठा पुण्यपूजकमध्यतः। श्रोतृणामागमः प्रोक्तो देशकालादिकोविदैः॥ विरक्तो वैष्णवो विप्रो वेदशास्त्रविमुह्रिमान्। दृष्टान्तकुशलो धीरो वक्ता कार्य्योऽतिनिस्पृहः॥ अनेककर्म्मविभ्रान्ता: स्त्रैणा: पाखण्डवादिनः। सुकशास्त्रकथोद्गारे त्याज्यास्ते योऽप्यपण्डिताः। वक्तुः पार्श्वे समर्थार्थमन्यः श्राव्यस्तथाविधः॥ पण्डितः संशयच्छेत्ता लोकबोधनतत्परः॥ वक्ता क्षौरं प्रकर्त्तव्यं दिनादर्व्वाक् व्रतारम्भे। अरुणोदयेऽसौ निर्व्वर्त्य शौचं स्नानं समाचरेत्॥ मण्डलञ्च प्रकर्त्तव्यं तत्र स्याप्यो हरिस्तथा। ज्ञात्वानुद्दिश्य मन्त्रेण चरेत् पूजाविधिं क्रमात्। प्रदक्षिणनमस्कारान् पूजान्ते स्तुतिमाचरेत्॥ संसारसागरे मग्नं दीनं मां करुणानिधे!। कर्म्मग्राहगृहीताङ्गं मामुद्धर भवार्णवात्॥ श्रीमद्भागवतस्यापि ततः पूजां प्रयत्नतः। कर्त्तव्या विधिना प्रीत्या धूपदीपसमन्विता॥ ततस्तु श्रीफलं धृत्वा नमस्कारं समाचरेत्। स्तुतिः प्रसन्नचित्तेन कर्त्तव्या केवलं तदा॥ श्रीमद्भागवताख्यस्य प्रत्यक्षः कल्प एव हि। क्षौद्रतोऽसि मया नाथ! सुखार्थं भवसागरे॥ मनोरथो मदीयोऽयं सफलः सर्व्वथा त्वया। निर्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव!॥ एवं दीनं वचः प्रोक्त्वा वक्तारञ्चाथ पूजयेत्। संभूष्य वस्त्रभूषाभिः पूजान्ते तच्च संस्तवेत्॥ सुकरूपप्रबोधज्ञः सर्व्वशास्त्रविशारदः। एतत्कथाप्रकाशेन मदज्ञानं विनाशय॥ तदर्थे नियमः पश्चात् कर्त्तव्यः श्रेयसे सदा। सप्तरात्रं यथाशक्त्या धारणीयः स एव हि॥ वरञ्च पञ्चविप्राणां कथाभागनिरूपणे। कर्त्तव्यं तैर्व्वरैर्व्वेद्यं द्वादशाक्षरविद्यया॥ ब्राह्मणान् वैष्णवान् शान्तान् तथा कीर्त्तन-कारिणः।

नत्वा संपूज्य दत्त्वार्घ्यं स्वयमासनमाविशेत्॥ लोकचित्ताधनागारपुत्रचित्तानुरञ्जनः यः। कथाचित्तानुवृत्तिः स लभेत् फलमुत्तमम्॥ आरब्धोदयमारभ्य यावद्विप्रहरात्मकम्। वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता॥ कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम्। तत्कथामनुकार्य्यं वै कीर्त्तनं वैष्णवैस्तदा॥ मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः। हविष्यान्नेन कर्त्तव्यो स्त्रीकथारं कथार्थिना॥ उपोष्य सप्तरात्रं वा मुक्तिक्षेत्रं व्रजेद्यदा। घृतपानं पयःपानं कृत्वा वा भक्षयेत् सुखम्॥ फलाहारेण वा आद्यमेकभक्तेन वा पुनः। सुखसाध्यं भवेदेवन्तु कर्त्तव्यं अवशाय तत्॥ भोजनन्तु वरं मन्ये कथाश्रवणकारकम्। नोपवासो वरः प्रोक्तः कथाविघ्नकरो यदि॥ सप्ताहव्रतिनां पुंसां नियमान् शृणु नारद!। विष्णुदीक्षाविहीनानां नाधिकारः कथाश्रवे॥ ब्रह्मचर्य्यमधःसुप्तिः पत्राद्यल्पाच्च भोजनम्। कथासमाप्तौ भक्तिञ्च कुर्य्यान्नित्यं कथाव्रती॥ द्विदलं मधु तैलञ्च गरिष्ठान्नन्तथैव च। भावदुष्टं पर्य्युषितं जह्यान्नित्यं कथाव्रती॥ दम्भाकाङ्क्षं कलिङ्गञ्च दम्भमद्यं मत्सरिकाम्। निन्दावमानिमाद्यञ्च वर्ज्जयेत्तु कथाव्रती॥ पलाण्डुं लशुनं हिङ्गुं मूलकं श्लेष्मनन्तथा। लालिकालालकुष्माण्डं नेवाद्याच्च कथाव्रती॥ देववैष्णवविप्राणां गुरुगोव्रतिनान्तथा। स्त्रीराजमहतां निन्दां वर्ज्जयेच्च कथाव्रती॥ कामं क्रोधं मदं दानं मत्सरं लोभमेव च। दम्भं मोहं तथा द्वेषं दूरयेच्च कथाव्रती॥ रजस्वलान्त्यजश्वेष्कपतितव्रातकेक्षणम्। द्विजद्विड्वेदवाक्यैश्च न वदेदृतुः कथाव्रती॥ सत्यं शौचं दया मौनं मार्ज्जनं विनयन्तथा। उदारं मानसं तद्वत् कुर्य्यादेव कथाव्रती॥ दरिद्रश्च क्षयी रोगी विभाव्यः पापकर्म्मवान्। अनपत्यो मोक्षकामः शृणुयात् स कथामिमाम्॥ अपुत्रा काकवन्ध्या च वन्ध्या या च मृतार्भका। स्रवद्गर्भा च या नारी तया श्राव्या प्रयत्नतः॥ एतेन विधिना दत्तं तदक्षयतरं भवेत्। अनुक्तमादिना सप्तकोटियज्ञफलप्रदा॥ एवं ज्ञात्वा व्रतविधिसदुपापनमाचरेत्। तच्छ्राद्धमौक्षतवत् कर्त्तव्यं फलकाङ्क्षिभिः॥ अकिञ्चनेषु भक्तेषु प्रायो नोद्यापनाग्रहः। अवशेनैव पूतास्ते निष्कामा वैष्णवा यतः॥ एवं नगाद्यज्ञेऽस्मिन् समाप्ते ओदभिश्चदा। पुष्पकस्य च वस्तुस्य पूजा कार्य्याऽतिभक्तितः॥

प्रसादस्तुलसीमाला भोज्यमस्याय दीयताम् ।
नृदङ्गतालललितं कीर्त्तनं कीर्त्यतां ततः ॥
जयशब्दो नमःशब्दः शुभशब्दश्च गीयताम् ।
विप्रेभ्यो याचकेभ्यश्च वित्तमन्नञ्च दीयताम् ॥
विरक्तश्चेद्भवेत् श्रोता श्रोता वाप्या परेऽहनि ।
गृहस्थश्चेत्तदा होमः कर्त्तव्यः कर्म्मशान्तये ॥
प्रतिश्लोकञ्च जुहुयाद्विधिना दशमस्य च ।
पायसं दधि सर्पिश्च तिलादिमधुसंयुतम् ॥
अथवा हवनं कुर्य्याद्गायत्र्या सुसमाहितः ।
तन्मयत्वात् पुराणस्य परमस्यास्य तत्त्वतः ॥
होमाशक्तौ पुनो हौम्यं दद्यात्तत्फलसिद्धये ।
नानाच्छिद्रनिरोधार्थं न्यूनताधिक्यतास्वयोः ॥
दोषयोः प्रशमार्थन्तु पठेन्नामसहस्रकम् ।
तेन स्यात् सफलं सर्व्वं नान्यस्मादधिकं यतः ॥
द्वादश ब्राह्मणान् पश्चाद्भोजयेच्छ्रद्धयान्वितः ।
दद्यात् सुवर्णं धेनुञ्च व्रतपूर्त्यर्थसिद्धये ॥
गृहौ पलमयमितं स्वर्णसिंहं विधाय च ।
तच्चास्य पुस्तकं स्थाप्य लिखितं ललिताक्षरम् ॥
संपूज्यावाहनाद्यैस्तदुपचारैः सदक्षिणम् ।
वस्त्रभूषणगन्धाद्यैः पूजिताय यतात्मने ॥
आचार्य्याय सुधीर्दत्त्वा मुक्तः स्याद्भवबन्धनैः ।
एवं कृते विधाने च सर्व्वपापनिवारणी ।
फलदं स्यात् पुराणन्तु श्रीमद्भागवतं शुभम् ॥
धर्म्मार्थकाममोक्षाणां साधनं नात्रसंशयः ।
इति ते कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥
श्रीमद्भागवतेनैव भक्तिमुक्तिः प्रकाशिता ॥"
इति पाद्मोत्तरखण्डे श्रीभागवतमाहात्म्ये ६ अध्यायः ॥

पारायणिकः, पुं, (पारायणं वर्त्तयतीति । पारायण + "पारायणतुरायणेति ।" ५ । १ । ७२ । इति ठक् ।) पाठकः । छात्रः । इति सिद्धान्तकौमुदी ॥

पारावतः, पुं, (पृ पूर्त्तौ + घञ् । पारं पूर्त्तिं गच्छतीति । गम गतौ + डः ।) प्रस्तरः । इति शब्दरत्नावली ॥

पारावतः, पुं, (पारे गिरिदुर्गनद्यादिपरपारे आपततीति । पार + आ + पत + अच् । एषोदरादित्वात् पस्य वः । उड्डीयने हृदयत्वादेवास्य तथात्वम् । यद्वा, परावद्दूरदेशस्थस्मिन् अन्तरीक्षादिदूरदेशे भवः उड्डीयमानः सन् स्थित इत्यर्थः । परावत् + अण् ।) पक्षिविशेषः । पाएरा इति भाषा । तत्पर्य्यायः । हेत्यजक्षः २ कपोतः ३ रक्तलोचनः ४ । इति हेमचन्द्रः ॥ पारापतः ५ कलरवः ६ अरुणलोचनः ७ मदनकाकुरवः ८ कामी ९ रक्तेक्षणः १० मदनमोहनवाग्विलासी ११ कम्बुग्रीवः १२ शुक्लपोतकः १३ ॥ (यथा,—
"सिंहो बली द्विरदकुञ्जरमांसभोजी
संवत्सरेण कुरुते रतिमेकवारम् ।
पारावतः खलु शिलाकणमात्रभोजी
कामी भवेदनुदिनं वद कोऽत्र हेतुः ॥"
अस्य मांसगुणाः । स्निग्धत्वम् । मधुरत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तासृग्दाहनाशित्वम् । बल्यत्वम् । वीर्य्यवृद्धिदात्रत्वम् । इति राजनिर्घण्टः ॥ रसे पाके स्वादुत्वम् । कषायत्वम् । विशदत्वञ्च । इति राजवल्लभः ॥ तद्भेदो यथा,—
"पारावतोऽन्यो वनदेशगो वासको घुलघुलारवः ।
पारावताङ्घ्रिपिच्छश्च श्रेयो गलरवश्च सः ॥"
इति राजनिर्घण्टः ॥
मर्कटः । तिन्दुकः । इति मेदिनी । ते, २१२ ॥
गिरिः । इति हेमचन्द्रः ॥ (नागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः शरभः ।
विहङ्गः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलादेते प्रविष्टा हव्यवाहनम् ॥"
अन्नवर्गान्नामन्यतमः । यथा, सुश्रुते । १ । ४२ ।
"दाड़िमामलकमातुलुङ्गाम्लातककपित्थकरमर्द्दबदरकोलप्राचीनामलकतिन्तिड़ीककोशाम्रभव्यपारावतवेत्रफलजम्बुचाम्लवेतसदन्तशठकक्षुराम्लसौवीरकतुषोदकधान्याम्लप्रभृतीनि समासेनाम्लो वर्गः ॥" * ॥ परात् शब्दोरवङ्कारात् अवति रक्षतीति । अव रक्षणे + घञ् । ततः पारावते इदमिति । तस्येदमित्यण् । दत्तात्रेयस्य गुरुः । इति चिन्तामणिः ॥)
पारावतपदी, स्त्री, (पारावतस्येव पादो मूलं यस्याः । ङीष् । पद्भावः ।) पारावताङ्घ्रिः । नयाफट्की इति भाषा ॥ इति रत्नमाला ॥ काकजङ्घा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ।
"पारावतपदीदन्तीवाकुचीकेशराह्वयैः ।
कण्टकार्य्या च तत् पक्वं पूतं कृत्वा तु योजयेत् ॥")
पारावताङ्घ्रिः, स्त्री, (पारावतस्य अङ्घ्रिरिव अङ्घ्रिर्मूलं यस्याः ।) ज्योतिष्मती । इत्यमरः । २ । ४ । १५० ॥
पारावताङ्घ्रिपिच्छः, पुं, (पारावताङ्घ्रिरिव पिच्छः पक्षात्पदेशो यस्य ।) वनदेशीयपारावतः । इति राजनिर्घण्टः ॥
पारावती, स्त्री,(पारावतस्येव ध्वनिरस्त्यस्या इति । अच् । ततो ङीष् ।) गोपगीतम् । नदीभेदः । (यथा, हारीते प्रथमस्थाने ७ अध्याये ।
"तथा चर्म्मण्वती वेत्रवती पारावती तथा ॥")
लवणीफलम् । इति मेदिनी । ते, २१२ ॥
पारावारं, क्ली, (पारं नद्यादिपरपारं आवृणोतीति । आ + वृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तटद्वयम् । इति मेदिनी । रे, २८१ ॥
पारावारः, पुं, (पारावारं तटद्वयं पारं अवारञ्च वा अस्त्यस्येति । अच् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ (यथा, देवीभागवते । १ । ५ । ५६ ।
"यदर्थं कीलालं कलयितुमशक्तः स तु नरः
कथं पारावाराकलनचतुरः स्यादतमतिः ॥")
पारावारीयः, त्रि, (पारावारं गच्छतीति । ६ । इत्यत्र "अवारपारादियद्वीतादपि विपरीतार्थेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या ख: ।) पारावारे गच्छति यः । पारावारशब्दात् कीनृप्रत्ययनिष्पन्नः ॥
पाराशरं, क्ली, (पराशरेण कृतमिति । पराशर + अण् ।) पराशरोक्तभिक्षुसूत्रम् । इति पाराशरिभाष्यटीकायां भरतः ॥ (उपपुराणविशेषः । इति पुराणम् ॥ श्रुतविशेषः । यथाह चक्रदत्तः ।
"यष्टीबलागुडूच्यश्वपञ्चमूलीतुलां पचेत् ।
भूपैर्द्वामदभागस्थे तत्र पात्रे पचेदृतम् ॥
धात्रीविदारीक्षुरसे क्षिपात्रे पयसोर्म्मले ।
सुपिष्टैर्जीवनीयैश्च पाराशरमिदं घृतम् ॥")
पाराशरः, पुं, (पराशरस्यापत्यं पुमान् । पराशर + "ऋष्यन्धकेति ।"४ । १ । ११४ । इत्यण् ।) व्यासदेवः । इति शब्दरत्नावली ॥ (पराशरप्रोक्तसूत्रसंहितादिविशेषः । यथा,—
"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"
अस्य विशेषविवरणन्तु पराशरशब्दे द्रष्टव्यम् ॥)
पाराशरसम्बन्धिनि, त्रि ॥
पाराशरकल्पिकः, पुं, (पाराशरः पराशरप्रोक्तः कल्पग्रन्थं वेत्त्यधीते वा । "विद्याप्रोक्तग्रन्थकल्पाभ्यामिति वक्तव्यम् ।" ४ । २ । ६० । इत्यस्य वार्त्तिकोक्त्या ठक् ।) पाराशरकल्पाध्यायी । पाराशरकल्पवेत्ता । इति सिद्धान्तकौमुदी ॥
पाराशरिः, पुं, (पराशरस्यापत्यम् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) वेदव्यासः । इति भूरिप्रयोगः ॥
पाराशरी, [न्] पुं, (पाराशर्य्येण प्रोक्तं भिक्षुसूत्रमधीते इति । पाराशर्य्य + "पाराशर्य्यशिलालिभ्यां भिक्षुनटसूत्रयोः ।" ४ । ३ । ११० । इति णिनिः ।) मस्करी । चतुर्थाश्रमी । पाराशरेण प्रोक्तं भिक्षुसूत्रं इत्यर्थे ञे पाराशरं तदधीतेऽस्याध्यायमायेति वेत्यादिति इन् । इत्यमरभरतौ ॥
पाराशर्य्यः, पुं, (पराशरस्यापत्यम् । पराशर + "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) व्यासः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ३ । ३२ ।
"पाराशर्य्य ! महाभाग ! यत्नं पृच्छसि मामिह ॥")
पारिकाङ्क्षी, [न्] पुं, (पारमाकाङ्क्षतीति । इनिः । पारि + काङ्क्ष + णिनिः ।) तपस्वी । इत्यमरः । २ । ७ । ४२ ॥ मस्करी । इति हेमचन्द्रः । ३ । ४७ ॥
पारिजातः, पुं, (पारमस्माल्लोकीति पारी समुद्रस्तस्मात् जातः । समुद्रमन्थनकाले तद्गर्भजातत्वात् तथात्वम् । पारिजोऽद्रेर्जातः इति क्वचित् ।) पारिभद्रवृक्षः । सुरतरुः । इति मेदिनी । ते, २११ ॥ (समुद्रमन्थनकालेऽस्योत्पत्तिकथा यथा,

"ततोऽभवत् पारिजातः सुरलोकविभूषणम् ।
पूरयत्यर्थिनो योऽर्थैः ग्रन्थदृष्ट्या यथा भवान् ॥")
अस्योत्पत्तिहरौ यथा,—
"अदित्यानुमतात्मुग्रो देवराजो जनार्दनम् ।
यथावत् पूजयामास वसुमानपुरःसरम् ॥
ततो ददर्श लक्ष्मीऽपि सत्यभामासहायवान् ।
देवोद्यानानि सर्व्वाणि नन्दनादीनि सत्तम ! ॥
ददर्श च सुगन्धाढ्यं मञ्जरीपुञ्जधारिणम् ।
शैत्याह्लादकरं दिव्यं बालपल्लवशोभितम् ॥
मथ्यमानेऽम्बुधौ जातं जातरूपमयं वरम् ।
पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तम ! ।
कस्मान्न द्वारकामेष नीयते लक्ष्म ! पादपः ॥
इत्युक्तः स प्रहस्येनं पारिजातं गरुत्मति ।
आरोपयामास हरिस्तत्पुष्पैर्नवचारिभिः ॥
भोः ग्रन्थी देवराजस्य महिषी तत्परिग्रहम् ।
पारिजातं न गोविन्द ! हर्त्तुमर्हसि पादपम् ।
ग्रन्थीविभूषणार्थाय देवैरत्नमयैर्वने ।
उत्पादितोऽयं न क्षेमी ग्रन्थीत्वेनं गमिष्यसि ॥
अवश्यमस्य देवेन्द्रो निष्कृतिं लप्स्यते । याच्यति ।
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः ॥
तदलं सकलैर्देवैर्विग्रहेण सवाच्युत ! ।
विपाककटु यत् कर्म्म न तच्छंसन्ति पण्डिताः ॥
इत्युक्ते तेऽवदत्तांस्तान् सत्यभामानिकोपिनी ।
का ग्रन्थी पारिजातस्य कोऽयं शक्रः सुराधिपः ॥
सामान्यः सर्व्वलोकानां यद्येषोऽमृतमन्थने ।
समुत्पन्नः सुराः कस्मादेको गृह्णाति वासवः ॥
यथा सुधा यथैवेन्दुर्यथा श्रीर्वनरत्नियः ! ।
सामान्यः सर्व्वलोकस्य पारिजातस्तथा तरुः ॥
भर्तृबाहुमहागर्व्वा रुक्मिण्येनं यथा ग्रन्थी ।
तन् कथ्यतामलं ज्ञात्वा सत्याहारयति द्रुमम् ॥
कथ्यतां वै इदं गत्वा पौलम्यां वचनं मम ।
सत्यभामा वदत्येतदिति गर्व्वोद्धताक्षरम् ॥
यदि त्वं दयिता भर्तुर्यदि वज्रः प्रतिव्रत ! ।
मद्भर्तुर्हरतो वृक्षं तत् कारय निवारणम् ॥
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् ।
पारिजातं तथाप्येनं मानुषी हारयामि ते ॥

श्रीपराशर उवाच ।

इत्युक्ता रुक्मिणी गत्वा शच्या सर्व्वमशेषितम् ।
ग्रन्थी शोतुमुपाक्रामत् शुतार्थां त्रिदशाधिपम् ॥
ततः समस्तदेवानां सैन्यैः परिवृतो हरिः ।
ययौ पारिजातार्थमिन्द्रो योधयितुं द्विज ! ॥
ततः परिघनिस्त्रिंशगदाशूलवरायुधाः ।
बभूवुस्त्रिदशाः सर्व्वा शक्रे वज्रकरे स्थिते ॥
ततो निरीक्ष्य गोविन्दो नागराजोपरिस्थितम् ।
शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् ।
समोच्च च शरज्ञालं सङ्कल्पाकुलसन्निभम् ॥
छिन्नेष्वश्वेषु शक्रेषु शक्रेष्वक्षेषु सत्वरम् ।
जग्राह वासवो वज्रं लक्ष्यशक्रं सुदर्शनम् ॥
ततो हाहाकृतं सर्व्वं त्रैलोक्यं द्विजसत्तम ! ।

वज्रचक्रधरौ दृष्ट्वा देवराजजनार्दनौ ॥
क्षिप्रं वज्रमदेयेन जघ्राह भगवान् हरिः ।
न मुमोच तथा चक्रं शक्र ! निष्ठेति चाब्रवीत् ।
प्रणतश्चक्रं देवेशं गरुडक्षतवाहनम् ।
सत्यभामाप्रवोधीरं पलायनपरायणम् ॥
त्रैलोक्येश्वर ! नो युक्तं ग्रन्थीभर्त्तुः पलायनम् ।
पारिजातसमाभोगा त्वामुपस्थास्यते ग्रन्थी ॥

श्रीपराशर उवाच ।

इत्युक्तो वै निवर्त्तते देवराजस्तथा द्विज ! ।
प्राह चैनामलं चक्रि ! सत्यः खेदातिविस्तरैः ॥
न चापि सर्व्वसंहारस्थितिकर्त्ताखिलस्य यः ।
जितस्य तेन मे व्रीड़ा जायते विश्वरूपिणा ॥
यस्मिन् जगत् सकलमेतदनादिमध्ये
यस्मादुदेतच्च न भविष्यति सर्व्वभूतात् ।
तेनोद्भवप्रलयपालनकारणेन
व्रीड़ा कथं भवति देवि ! निरामयस्य ॥
संस्तुतो भगवानित्थं देवराजेन केशवः ।
प्रहस्य भावगम्भीरमुवाचेन्द्रं द्विजोत्तम ! ॥
देवराजो भवानित्थं यदि मन्यो जगत्पते ! ।
जानतं भवतैवैतदपराधं क्षमं मया ॥
पारिजाततरुश्चायं नीयतामुचितास्पदम् ।
ग्रन्थीतोऽयं मया शक्र ! सत्या वचनकारणात् ॥

श्रीशक्र उवाच ।

विमोहयसि मामीश ! मर्त्योऽहमिति किं वदन् ।
जानीमस्त्वां भगवतो न तु सूक्ष्मविदो वयम् ॥
नीयतां पारिजातोऽयं कृष्ण ! द्वारवतीं पुरीम् ।
मर्त्यलोके त्वया सृष्टे नायं वै स्थास्यते भुवि ॥
तथेत्युक्त्वा च देवेन्द्रमाजगाम शुचिं हरिः ।
हर्षमुत्पादयामास द्वारकावासिनां द्विज ! ॥
अवतीर्य्य च गरुडात् सत्यभामासहायवान् ।
निष्कृष्टे स्थापयामास पारिजातं महातरुम् ॥
यमर्थेऽत्र जनः सर्व्वो जातिं स्मरति पौर्व्विकीम् ।
वाञ्छते यस्य पुष्पाणां गन्धेनोर्वीं त्रियोजनाम् ॥
ततस्ते यादवाः सर्व्वे देवबन्धानमानुषान् ।
ददृशुः पादपे तस्मिन् कृष्णतो सुखदर्शनम् ॥"
इति विष्णुपुराणे पञ्चमेऽंशे पारिजाततरुहरणे ३० । ३१ अध्यायौ ॥ (ऐरावतकुलजातनागविशेषः । यथा, महाभारते । १ । ५७ । ११ ।
"पारावतः पारिजातः पाण्डरो हरिणः कृशः ॥"
ऋषिविशेषः । यथा तत्रैव । २ । ५ । ११ ।
"पारिजातेन राजेन्द्र ! रैवतेन च धीमता ।
सुमुखेन च सौम्येन देवर्षिरमितद्युतिः ॥"
तन्त्रशास्त्रविशेषः । यथा, आगमतत्त्वविलासे ।
"भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमम् ॥")
पारिजातकः, पुं. पारिजादेर्जातः पारिजात: स्वार्थे कः । 'पारे जातो विद्युपत्रा: पारिजातेति ग्रन्थिताः ।' इत्यागमः ॥ देवतरुः । तत्पर्य्यायः । मन्दारः २ । इत्यमरः । २ । ४ । २६ ॥ पारिभद्रवृक्षः । पाजितामादार इति भाषा ॥ "पारि पारं प्राप्तं जातं जन्म यस्य । 'पारिभद्रे तु मन्दारतरुमन्दारः पारिजातकः ।' इति चतुरः ॥", इत्यमरटीकायां भरतः ॥

पारिजाह्यं, त्रि. (परिजये विवाहकाले लभ्यम् । परिजय + ष्यञ् ।) परिजयलभ्यं धनादिकम् । यथा,—
"मातुः पारिजाह्यं स्त्रियो विभजेरन् ॥"
इति दायभागधृतविष्णुवचनम् ॥
पारिजाह्यं, त्रि, (परिजाहमर्हतीति । परिजाह + ष्यञ् ।) गृहोपकरणग्रन्थ्यासनकुड्यकटाहादि । यथा, मनुः । ६ । ११ ।
"अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्याञ्च पारिजाह्यस्य चैश्वरे ॥"
"पारिजाह्यस्य गृहोपकरणस्य ग्रन्थ्यासनकुड्यकटाहादेरर्थेऽस्याः स्त्रियाः नियोजयेत् ॥" इति तट्टीकायां कुल्लूकभट्टः ॥
पारितथ्या, स्त्री, (परितस्त्यथाभूता परितथा । ततः स्वार्थे ष्यञ् ।) सीमन्तिकाख्यितस्त्र्यादिरचितपट्टिका । सिँती इति भाषा ॥ तत्पर्य्यायः । बालपाठ्या २ । इत्यमरः । २ । ६ । १०३ ॥
पारितोषिकं, त्रि, (परितोषेण लब्धं परितोषादागतं वा । परितोष + ठञ्धिकञ्च ।) आनन्दिकरम् । परितोषजनकद्रव्यम् । यथा,—
"ममापि चन्द्रशेखर-मुखासनादोपलप्रथमवासिनः पारितोषिकं धारयसि।" इति मुरारिः ॥
पारिन्द्रः, पुं, (पारीन्द्र + एषोदरादित्वात् हस्वः ।) सिंहः । इति हेमचन्द्रः । ३ । ३५० ॥
पारिपन्थिकः, पुं, (परिपन्थं पन्थानं वर्त्तयित्वा व्याप्य वा तिष्ठति परिपन्थं हन्तीति वा । "परिपन्थञ्च तिष्ठति ।" ४ । ३ । ३६ । इति ठक् ।) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥
पारिपाट्यं, क्ली, (परिपाटी + ष्यञ् ।) परिपाट्या भावः । परिपाटीशब्दात् भावे ष्यञ्प्रत्ययः ॥
पारिपात्रः, पुं, पर्व्वतविशेषः । तत्पर्य्यायः । पारियात्रः २ । इति शब्दरत्नावली ॥ स तु विन्ध्यस्य पश्चिमे मालवदेशस्य सीमापर्व्वतः ॥ (अयं हि भारतस्यास्य वर्षस्य कुलपर्व्वतानामन्यतमः । यथा, मार्कण्डेये । ५७ । २१ ।
"महेन्द्रो मलयः सह्यः शुक्तिमाञ्ऋक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥"
अस्मादुद्भूतनद्यो यथा, तत्रैव । ५७ । १६—२० ।
"वेदस्मृतिर्वेदवती वृत्रघ्नी सिन्धुरेव च ।
वेत्रा सानुमती चैव सदानीरा मही तथा ।
पारा चर्म्मण्वती रूपी विदिशा वेत्रवत्यपि ।
शिप्रा त्ववन्ती च तथा पारिपात्राश्रयाः
स्मृताः ॥")
पारिपात्रिकः, पुं, (पारिपात्र + स्वार्थे कन् ।) पारिपात्रपर्व्वतः । इत्यमरः । २ । ३ । ६ ॥
पारिपार्श्विकः, पुं, (परिपार्श्वं वर्त्तते इति । परिपार्श्व + "परिमुखाच्च ।" ४ । ४ । २६ । इति चकारात् ठक् ।) पार्श्वस्थः । इति हेमचन्द्रः ॥ त्रि, पार्श्ववर्त्ती । यथा, अमरकोषे । २ । ६ । ३१ ।
"मातरः पितृतो दक्षचर्चिकाद्याः पारिपार्श्विकाः ॥"

पारिप्लवं, त्रि, (परि+प्लु+अच् । ततः प्रज्ञाद्यण् ।) चञ्चलम् । इत्यमरः ।३।१।७५॥ (यथा, रघुः । ३ । ११ ।

"तयोपचाराञ्जलिलिप्तहस्तया
ननन्द पारिप्लवनेत्रया नृपः ॥")

आकुलः । इति मेदिनी । वे, ६० ॥ (क्ली, तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । १२ ।

"ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।
अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ॥"

पुं, जलपक्षी । इति रामानुजः ॥ यथा, रामायणे । ४ । २७ । २३ ।

"पारिप्लवप्लुतैर्जुष्टा बर्हिकौञ्चनिनादिता ।
रम्यतीया नदी सौम्या सुनिसङ्कुलनिर्वृता ॥"

पञ्चमसम्बन्धीयप्रकृतिविशेषः । यथा, हरिवंशे । ७ । २७ ।

"देवाद्याभूतरजसस्तथा प्रकृतयोऽपरे ।
पारिप्लवश्च रैभ्यश्च मनोरन्तरसुच्यते ॥")

पारिभद्रः, पुं, (परितो भद्रमस्मात् । परिभद्र+तसः प्रज्ञाद्यण् ।) वृक्षविशेषः । पालिताम्बार इति भाषा ॥ तत्पर्य्यायः । निम्बतरुः २ मन्दारः३ पारिजातकः ४ । इत्यमरः ।२।४।२६॥ रक्तकुसुमः५ क्षमिप्रः६ बहुपुष्पः७ रक्तकेसरः८ इति राजनिर्घण्टः ॥ अस्य गुणाः । अनिलश्लेष्मशोथमेदःक्षमिनाशित्वम् । अस्य पुष्पगुणाः । पित्तरोगकर्णव्याधिनाशित्वम् । इति भावप्रकाशः ॥ देवदारु । इति मेदिनी ॥ सरलवृक्षः । इति शब्दचन्द्रिका ॥ (यज्ञवाहस्य पुत्रविशेषः । प्लक्षद्वीपस्य वर्षविशेषः । यथा, भागवते । ५ । २० । ६ ।

"तद्द्वीपाधिपतिः प्रियव्रतात्मजो यज्ञबाहः
खसृतेभ्यस्तन्नामानि सप्त वर्षाणि अभजत् ।
सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रमाप्यायनमविज्ञातमिति ॥")

पारिभद्रकः, पुं, (पारिभद्र एव । स्वार्थे कन् ।) देवदारुवृक्षः । इत्यमरः ॥ (यथा, महाभारते । १ । १२५ । ३ ।

"पलाशैश्छिन्नकैश्छन्नैश्चम्पकैः पारिभद्रकैः ॥")

निम्बवृक्षः । कुष्ठौषधे, क्ली । इति राजनिर्घण्टः ॥

पारिभाव्यं, क्ली, (परिभवाय रोगादिनाशाय हितम् । परिभव+ष्यञ् ।) कुष्ठौषधम् । इत्यमरः ।२।४।१२६ ॥ परिभुवो भावः । जामिनी इति भाषा ॥ यथा,—

"सात्त्विकं पारिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"

इति दायभागः ॥

पारिभाषिकं, क्ली, (परिभाषात आगतम् । परिभाषा+ठञ् ।) परिभाषयार्थबोधकं पदम् । यथा । तत्राधुनिकसङ्केतः परिभाषा तया अर्थबोधकं पदं पारिभाषिकम् । यथा शाब्दिकादिसङ्केतितनदीवृद्धादिपदम् । इति शक्तिवादे गदाधरः ॥

पारिमाण्डल्यं, क्ली, (परिमण्डलस्य परमाणोर्भावः । परिमण्डल+ष्यञ् ।) परमाणुपरिमाणम् । यथा, भाषापरिच्छेदे । १५ ।

"पारिमाण्डल्यभिन्नानां कारणत्वसदाकृतम् ॥"

पारिसुखिकः, त्रि, (परिसुखं वर्त्तते इति । "परिसुखञ्च ।" ४ । ४ । २६ । इति ठक् ।) परिसुखेन तिष्ठति यः । बन्धुसुखवर्त्ती । परिसुखशब्दात् ष्ठिकप्रत्ययनिष्पन्नः ॥

पारियात्रः, पुं, (परितो यात्रया ह्रायते । "शीङो ।" ७।२।६२ । इत्यत्र ।) पारिपात्रपर्व्वतः । इति शब्दरत्नावली ॥ (यथा, गोलाध्याये । १ । ४२ ।

"मार्हेन्द्रभुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्तकुलाचलाख्याः ॥")

पारियात्रिकः, पुं, (पारियात्र एव । स्वार्थे ठक् ।) पारियात्रः । इति हेमचन्द्रः । ४ । ६० ॥

पारियानिकः, पुं, (परियानं प्रयोजनमस्य । परियान+ठञ् ।) अश्वरथः । इति हेमचन्द्रः । १ । ४१६ ॥ परिवातिकोऽपि पाठः ॥

पारिरक्षकः, पुं, (परिरक्षति आत्मानमिति । परि+रक्ष+ण्वुल् । ततः प्रज्ञाद्यण् ।) मस्करी । तापसः । इति हेमचन्द्रः । ३ । ४७४ ॥

पारिभद्रः, पुं, वृक्षविशेषः । पलाशपिप्पल इति गजहच इति च भाषा ॥ तत्पर्य्यायः । पलाशः१ कपिवृक्षः २ कमण्डलुः ३ गर्दभाण्डः ४ कन्दरालः ५ कपीतनः ६ सुपार्श्वकः ७ । अस्य गुणाः । दुर्जरत्वम् । स्निग्धत्वम् । क्रिमिशुक्रकफप्रदत्वम् । फले अम्लत्वम् । मूले मधुरत्वम् । कषायत्वम् । स्वादुभञ्जकत्वञ्च । इति भावप्रकाशः ॥

पारिषदः, पुं, परिषदि तिष्ठति यः । (परिषदि साधुः । परिषदो ण्यः इत्यत्र योगविभागात् अः ।) सभाध्यः । तत्पर्य्यायः । सभ्यः २ सभाक्षारः ३ सभासत् ४ परिषद्वलः ५ पर्षद्वलः ६ पारिषद्यः ७ पार्षदः ८ । इति शब्दरत्नावली ॥ (यथा, महाभारते । २ । १० । ३२ ।

"शकुनकर्णसखाः सर्व्वे द्विजाः पारिषदास्तथा ॥"

परिषद इदम् । "पञ्चाध्यर्द्धपरिषदश्च ।" ४ । २।१२३। इति अञ् ।) परिषत्सम्बन्धिनि, त्रि ॥

पारिषद्यः, पुं, (परिषदं समवैति । "परिषदो ण्यः ।" ४ । ४ । ४४ । इति ण्यः ।) पारिषदः । इति शब्दरत्नावली ॥

पारिहारिकः, त्रि, (परिहारे साधुः । परिहार+ठञ् ।) परिहारकर्त्ता । परिहारं करोति यः इत्यर्थे ष्ठिकप्रत्ययनिष्पन्नः ॥

पारिहार्य्यः, पुं, (परिह्रियते इति । परि+हृ+ण्यत् । ततः प्रज्ञाद्यण् ।) वलयः । इत्यमरः ॥

परिहारत्ने, क्ली ॥

पारिहास्यं, क्ली, (परिहास+ष्यञ् ।) परिहासस्य भावः । परिहासद्वारा कृतम् । यथा, श्रीभागवते । ६ । अजामिलोपाख्याने । २।१४। "साहसं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"

"नन्वयं पुत्रनामाद्यक्षीत्र भगवन्नाम तत्राहुः । साङ्केत्यं पुत्रादौ सङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थे कृतम् । हेलनं किं विष्णुमेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति लघ्वीकायां श्रीधरस्वामी ॥

पारी, स्त्री, (पारयत्यनयेति । पॄ पूर्त्तौ+णिच्+घञ् । ततो ङीष् ।) पूरः । जलपिप्पलः । कर्क्करी । हस्तिपादरज्जुः । इति मेदिनी । रे, ५६॥ पाकी । परागः । इति विश्वः ॥ (पीयतेऽनयेति । पा+णिच् । सप्रातीति । रा+कः । ङीष् ।) पानपात्रम् । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७३ ।

"कर्पूरपारीपतितं मौरेयमिव चारितम् ॥")

दोहनपात्रम् । इति जटाधरः ॥

पारीक्षितः, पुं, परीक्षितराजः । इति शब्दरत्नावली ॥ जनमेजयः । परीक्षितोऽपत्यं इत्यर्थे अण्प्रत्ययनिष्पन्नः ॥ (यथा, देवीभागवते । २ । ११ । १२ ।

"ततः सुवर्णवर्म्माद्यो राजा काम्पीपतिः किल ।
वपुष्मां शुभां कन्यां ददौ पारीक्षिताय च ॥")

पारीण्यः, त्रि, (पारं गामीति । पार+"अवारपारत्वात्तुकामं गामी ।" ५ । २ । ११ । इति खः ।) पारगमनकर्त्ता । पारं गच्छति इत्यर्थे खीनप्रत्ययनिष्पन्नः ॥ (यथा, भट्टिः । २ । ७६ ।

"त्रिवर्गपारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः ॥")

पारीन्द्रः, पुं, (पृ पालने+कर्म्मणि इन्द्रः । पारिः पशुस्तस्य इन्द्रः ।) सिंहः । अजगरसर्पः । इति हेमचन्द्रः ॥

पारीरजः, पुं, (पार्श्वौ जलपूरे रजः यस्य ।) कमठः । दक्षः । षटपाटकः । इति विश्वः ॥

पारुः, पुं, (पिबति रसानिति । पा+"वाहुलकात् पिवतेश्च । ४ । १०१ । इत्यत्र उज्ज्वलदत्तोक्त्या रुः ।) वह्निः । सूर्य्यः । इत्युणादिकोषः ॥

पारुष्यं, क्ली, (परुषस्य भावः । परुष+ष्यञ् ।) अप्रियभाषणम् । तत्पर्य्यायः । अभिवादः २ । इत्यमरः । १ । ६ । १४ ॥ तच्च चतुर्व्विधवाङ्मयपापान्तर्गतमापविशेषः । यथा,—

"पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥"

इति तिथ्यादितत्त्वम् ॥

परुषत्वम् । दुर्व्वाक्यम् । इति मेदिनी । ये, ६७ ॥ इन्द्रस्य वज्रम् । इति विश्वः ॥ अगुरु । इति शब्दचन्द्रिका ॥

पारुष्यः, पुं, (परुषस्य भावः पारुष्यं दुर्व्वाक्यं तदिव नीलिवाक्यमस्ति अस्यास्मिन् वा रत्नच् ।) इन्द्रस्यतिः । इति मेदिनी । ये, ६७ ।

पारेरकः, पुं, (वध्यादेः पारमीर्त्ते गच्छतीति । ईर्+ण्वुल् ।) झङ्गः । इति शब्दमाला ॥

पार्वटं, क्ली, (पाटे वटति इति अच्। ततः पृषोदरादित्वात् साधुः।) पांसु। इति हारावली। १६२॥

पार्थः, पुं, (पृथायाः अपत्यं पुमान्। अश्वादित्वादञ्।) पृथापुत्रः। (यथा, महाभारते। ३। २३५। २।

"वरप्रदानाच्च वनच्च पुण्यं
ततः परं किमकुर्व्वन्त पार्थाः॥"

अर्জ্জुनः। यथा, भगवद्गीतायाम्। १। २५।

"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति॥") अर्জ্জুनस्य। इति शब्दरत्नावली॥

पार्थक्यं, क्ली, (पृथक्+भावे ष्यञ्।) पृथक्त्वम्। पृथक् इत्यस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम्॥ ("घटप्रदीपवद् व्यङ्ग्यव्यङ्गकयोः पार्थक्यमेव॥" इति साहित्यदर्पणम्॥)

पार्थवं, क्ली, (पृथोर्भावः। पृथु+अण्।) पृथुता। पृथोर्भावः इति भावार्थे अण्प्रत्ययनिष्पन्नम्॥ (पृथुनामा राजा तस्येदमित्यण्। पृथुराजसम्बन्धिनि, त्रि। यथा, भागवते। १। ३। १४। "ऋषिभिर्याचितो भेजे भवं पार्थवं वपुः॥")

पार्थिवं, क्ली, (पृथिव्या विकारः पृथिव्यां भवमिति वा अण्।) तगरपुष्पम्। इति राजनिर्घण्टः॥

पार्थिवः, पुं, (पृथिव्या ईश्वरः।) पृथिवी+"तस्येश्वरः।" ५। १। ४२। इति अण्।) राजा। इत्यमरः॥ (यथा, मनुः। २। १३६। "तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ। राजस्नातकयोश्चैव स्नातको पूजमानभाक्॥" वत्सरविशेषः। यथा,—

"वङ्गप्रस्थानि जायन्ते सर्व्वदेशे सुलोचने। सौराष्ट्रकाटदेशे च पार्थिवे नाब्द संशयः॥"

इति चिन्तामणिधृतवचनम्॥ पृथिव्या अयं इत्यण्।) ग्रहावः। इति त्रिकाण्डशेषः॥ (पृथिव्या विकार इति। "सर्व्वभूमिपृथिवीभ्यामणञौ।" ५। १। ४१। इत्यण्।) पृथिवीविकारौ, त्रि। इति मेदिनी॥ (यथा, भागवते। १। २। २४।

"पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥"

पृथिव्या निमित्तं संयोग उत्पातो वा॥ पृथिवीसम्बन्धिनि, त्रि। यदुक्तम्।

"मधुमत् पार्थिवं रजः॥")

पार्थिवी, स्त्री, (पृथिव्यां भवा। "दिक्पदादीति।" ४। १। ८५। इत्यस्य सूत्रस्य वार्त्तिके "पृथिव्या आनौ।" इत्युक्तेरण्। ततो ङीप्।) सीता। इति मेदिनी। वे, ३३॥

पार्पटः, पुं, यमः। इति जटाधरः॥

पार्व्वणः, पुं, (पर्व्वणि यज्ञतयोग्यः इत्यण्।) ब्रह्मविशेषः। इति शब्दरत्नावली॥ (पर्व्वणि क्रियते यत् तत्।) अमावस्यापर्व्वसामान्ययोः कर्म्मणआद्धम्। यथा,—

"अमावस्यां यत् क्रियते तत् पार्व्वणमुदाहृतम्। क्रियते पर्व्वणि वा यत्तत् पार्व्वणमुदाहृतम्॥"

इति भविष्यपुराणम्॥

पर्व्वणि यत् क्रियते इत्यनेनामावास्यायाः पर्व्वत्वात्तच्छ्राद्धस्य वैदिकप्रयोगाधीनत्वयौगिकत्वेन पार्व्वणत्वप्राप्तौ अमावास्यायां पृथगभिधानं तदमावास्याश्राद्धस्य रूढ्यर्थं तेन पार्व्वणेन विधानेनेत्यादौ यौगिकनामावयवप्रत्ययापेक्षया एकस्याः समुदायप्रत्ययेनैकत्वात् अमावास्यापार्व्वणातिदेशो लभ्यते न तु पूपाष्टकादिपार्व्वणधर्म्मातिदेशः।" इति श्राद्धतत्त्वम्॥ * ॥ सामगानां तस्य प्रयोगो यथा,—

"विप्राभावाद्या श्राद्धतो सुखार्थं क्रमसञ्चयम्। श्राद्धपूर्व्वदिने मांसस्त्रीत्यागश्चैकभोजनम्॥ श्राद्धाहे स्नानशक्तस्य त्यागः स्नानं तथौषधि। याच्यास्वस्तं पादशौचे वाक्यचर्चा विसृष्टिचिन्तनम्॥ तत्रैव पूजा मन्त्रादानं परभूस्वामिनेऽथवा। तत् पिण्डभक्ष्यभोज्यादानं दध्यादीपकुशद्विजाः॥ श्राद्धानुज्ञा च गायत्री देवताश्च इति त्रिधा। मन्त्रजप्योक्षणं दध्याज्यलक्षणमेकतः॥ पूर्व्वं विप्रकरे तोयं कुशासनमनन्तरम्। दक्षिणे देवविप्रस्य पित्रविप्रस्य वामतः॥ आवाहनार्घ्ये व्युक्षच्च ततो गन्धादिपञ्चकम्। ऐशानीक्रमतो रेखा प्रागग्रा देवमण्डले॥ नैर्ऋतीक्रमतो रेखा दध्याद्या पित्रमण्डले। पाद्याद्यं तेषु विन्यासो होमप्रान्तोऽग्निहोमकः॥ हुतशेषप्रदानच्च पाद्यालम्भोऽन्नवेक्षणम्। इदमित्यङ्गुलेः क्षेपस्तूष्णीं देवे यवस्य च॥ पित्रे मन्त्रेण निःक्षेपस्तिलस्यापहता इति। मधुनोऽन्ने च निःक्षेपो गायत्र्याखिलस्य तत्॥ मधुवाता ऋचा चैव मधुमद्भ्यजपेत च। अन्नाभिमन्त्रणं तस्य दानं जलनिवेदनम्॥ गायत्र्यादिद्विकलपोऽप्यन्नहीनजपस्तथा। द्विजाभावेऽपि तृप्त्यर्थं गायत्र्यादिद्विकस्य च॥ पुण्याख्यानस्य च जपः सतिलोच्यते कुशे। अग्निदग्धेतिमन्त्राभ्यां सतिलान्ननिवेदनम्॥ हस्तप्रक्षालनाचमनं हरिस्मृतिर्जलस्य च। पित्रादिक्रमतो दानं गायत्र्यादिजपः पुनः॥ पौषान्नपिण्डयोः प्रश्नो निष्क्रयीति च मन्त्रके। अपहतासुरित्यभ्यां देवायुग्मं पितृक्रमात्॥ आसुरो देवतीर्थस्य जप आवाहनं तिलैः। अवनेजनदानच्च मधुवाता मधुत्रयम्॥ अन्नमग्नौ पिण्डदानं दर्भतेषामपसर्पणम्। आचमनं स्मृतिर्विष्णोः प्राचप्रालवनेजनम्॥ अर्घ्यादिजपो वामावर्त्तनोदङ्मुखस्थितः। आद्यन्तमौजपश्चैव श्वासत्यागोऽस्तचित्ततः॥ नम इत्यादिकजपो वासोदानच्च पूजनम्। वसन्ताय जपश्चैव द्विजायभूमिसेचनम्॥ दैवादिनाक्षयी दानं जलादिचितयस्य च। ग्रिवा इत्यादिनाद्यन्तमघोरा गोत्रमित्यपि॥ सपवित्रकुशाः पिण्डे स्वधावाचनमर्জ্জनम्। आद्यायाश्चैव पिण्डानां तेषामुत्तोलनन्ततः। व्युक्षोत्थानं पितुः पत्न्या दक्षिणादानमन्ततः॥ विश्वे देवाश्च प्रीयन्तां देवे वा जलमित्यपि। विसर्জनं वाज इति आमावेति प्रदक्षिणम्॥ अन्यत् सर्व्वं समानम्।" इति श्राद्धप्रयोगतत्त्वम्॥

पार्व्वतः, पुं, (पर्व्वते भवः। "विभाषा मनुष्ये।" ४। २। १४४। इति पक्षे अञ्।) मङ्गानिम्बः। इति रत्नमाला॥ घोड़ानिम् इति भाषा॥ (अश्वविशेषः। यथा, महाभारते। १। १३६। २०। "भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः॥") पर्व्वतसम्बन्धिनि, त्रि॥ (यथा, महाभारते। १। ६०। १०।

"यावत् पृथिव्यां विहितं गवाव्यं
सङ्हारार्थैः पशुभिः पार्व्वतेयैः॥")

पार्व्वती, स्त्री, (पर्व्वतो हिमाचलस्तस्य तद्धिष्ठातृदेवस्येति भावः अपत्यमिति। अञ् ङीप् च।) दुर्गा। इत्यमरः॥ तस्या युत्पत्तिर्यथा,—

"तिथिभेदे कल्पभेदे पर्व्वभेदप्रभेदतः।
ख्यातौ तेषु च विख्याता पार्व्वती तेन कीर्त्तिता॥
महोत्सवविशेषेषु पर्व्वस्विति प्रकीर्त्तितम्।
तस्याधिदेवी या सा पार्व्वती परिकीर्त्तिता॥
पर्व्वतस्य सुता देवी साविर्भूता च पर्व्वते।
पर्व्वताधिष्ठातृदेवी पार्व्वती तेन कीर्त्तिता॥"

इति ब्रह्मवैवर्त्ते दुर्गोपाख्याने ५७ अध्यायः॥ ग्रामकी। गोपालपुत्रिका। इति मेदिनी॥ द्रौपदी। जीवनी। इति विश्वः॥ सौराष्ट्रमृत्तिका। इति रत्नमाला॥ क्षुद्रपाषाणभेदः। धातकी। सैंहली। इति राजनिर्घण्टः॥

पार्व्वतीनन्दनः, पुं, (पार्व्वत्या नन्दनः।) कार्त्तिकेयः। इत्यमरः। १। १। ४२॥

पार्व्वतीयकुमारः, पुं, (पार्व्वतीयः पार्व्वतीजातः कुमारः।) पार्व्वतीपुत्रः। यथा,—

"स्वादुश्राद्धविधाश्चाथ नैगमेयश्चैव च।
पार्व्वतीयाः कुमाराश्च चत्वारः परिकीर्त्तिताः॥"

इत्यग्निपुराणम्॥

पार्वतेयं. क्ली, (पर्व्वते भवम् । पर्व्वत + ढक् ।) सौवीराञ्जनम् । इति शब्दचन्द्रिका ॥

पार्वतेयः, पुं, (पर्व्वते भवः । पर्व्वत + ढक् ।) सूर्य्यावर्त्तवृक्षः । इति रत्नमाला ॥ खलचिया इति भाषा । पर्व्वतजाते, त्रि ॥

पार्ष्णवः, पुं, (पर्ष्णुना आयुधेन जीवतीति । पर्ष्णु + "पर्ष्वादियौधेयादिभ्योऽणञौ ।" ५ । ३ । ११७ । इति अण् ।) पर्ष्णुधारियोद्धा । पर्ष्णुना युध्यते इत्यर्थे व्याघ्रादयश्च ॥

पार्श्व, क्ली, पुं, (स्पृश्यते इति । स्पृश् + "स्पृशोः श्वन्सुवौ ऽ च ।" उणा० ५ । २७ । इति श्वन् ऽ-आदेशश्च ।) कक्षाधोभागः । इत्यमरः । २ । ६ । ७६ ॥ पार्श्व इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने । ३६ अध्याये ।
"तिर्य्यक् प्रणिहिते नेत्रे तथा पार्श्वावपीड़िते ॥"
यथा, शाकुन्तलस्याम् १ अङ्के ।
"न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथ-
जवात् ॥")

पार्श्व, क्ली, (स्पृश् + श्वन् धातोः ऽ-आदेशश्च ।) चक्रोपान्तम् । (पर्ष्णीनां समूहः । अण् ।) पर्ष्णिगणः । पार्श्वास्थिसमूहः । इति मेदिनी ॥ (अस्पृशदुपायः । इति सिद्धान्तकौमुदी ॥)

पार्श्वः, पुं, जिनः । (अयमेव जैनागमोक्तत्रयोविंशतितीर्थङ्करः । अस्य पिता विश्वसेनः माता च ब्रह्मी । यदुक्तं पार्श्वनाथचरित्रे । १० । ७१ ।
"श्रीलक्ष्मीपार्श्वतीर्थेशो विश्वसेननृपालये ।
ब्रह्मीगर्भे जगन्नाथोऽवतरिष्यति सुक्तये ॥"
तथा च तत्रैव । ११ । ३६ ।
"विश्वसेनपतेर्ब्रह्मा: सद्गर्भेऽवतरिष्यति ।
श्रीपार्श्वनाथ एवाष्टतीर्थकृत्तो जगद्गुरुः ॥"
हेमचन्द्राचार्य्यादिमते तु अस्य पितुनाम अश्व-
सेनः मातुनाम वामा ॥ * ॥
अस्य जन्मकालादिर्यथा तत्रैव । ११ । ४५—४६, ६६—६७ ।
"वैशाखस्यासिते पक्षे दशम्यां निशाक्षये ।
विशाखर्क्षे शुभग्रहे शुभलग्ने सुरेश्वरः ॥
अवतीर्णो दिवश्च्युत्वा भुक्त्वा भोगान् सुनिर्मलान् ।
राज्ञो गर्भे निरौपम्ये शुक्लस्फाटिकसन्निभे ॥"
"त्रयोदश्यां सिते पौषे मासि दर्शोदयात् ।
लग्नपत्तिथिले योगे सुमे एकादशीतिथौ ॥
शुभलग्नमुहूर्त्तादौ सुखवेलासुखेन सा ।
सती देवकुमारीभिः सेव्या तीर्थङ्करं सुतम् ॥"
बाल्यकाले एवास्य वैराग्योत्पत्तिर्यथा ।
ततोऽसौ संसारासक्तिं दुष्कीलञ्च गृहादिकं विहाय वनं प्रस्थितवान् । एतत्प्रचलितमतं यथा, तत्रैव । १४ । ७८ - ८० ।
"मिथ्यात्वेनाविरत्या च प्रमादेन कषायतः ।
दुष्टयोगेन मूढानां महापापं प्रजायते ॥
पश्चाग्निसाधनेनैव पृथिव्याद्यङ्गिराशयः ।
म्रियते षड्विधः सर्व्वदिक्षु तत्तापसो भ्रमन् ।
जीवघातेन घोरार्घं तस्य पापेन दुर्गतिः ।
जायते च महद्दुःखं तापसानां जड़ात्मनाम् ॥

ज्ञानहीनो वपुःक्लेशो व्यर्थः पाषाण्डवादृशाम् ।
दयां विना तपो धर्म्मः सर्व्वमस्ति निरर्थकम् ॥
तुषखण्डनयोगेन लभ्यते तण्डुला यथा ।
न तथा ज्ञानकष्टेन मोक्षमार्गादयः क्वचित् ॥
यथाम्बुमथनान्नैवोत्पद्यते जातुचिद्घृतम् ।
तथा हिंसाकरेणैव तपसाप्त सुखादि च ॥
अचारात्प्राप्यते स्वर्गं गोघ्नश्चाप्य यो न हि ।
जायते जातु धर्म्मो वा सुखं पञ्चाग्निसाधनात् ॥
दावभीत्या यथान्धो धावन्नपि म्रियते यथा ।
कुर्व्वन्नपि तपो ज्ञानी मज्जत्येव भवार्णवे ॥
हेयाहेयविचारश्च पुण्यपापं हिताहितम् ।
देवादेवं भवं मोक्षं ज्ञात्वा स्वस्थं सुखं भजेत् ॥
निर्ज्जरा तत्त्वविज्ञानं गुरुं चक्षुर्गुरुं सुखम् ।
कृपाक्षं वेत्ति नज्ञानी जात्यन्ध इव दन्तिनम् ॥
अतो जैनमतं तथ्यं धर्म्मजीवदयावहम् ।
तपोनार्थं गृहाणं त्वं लक्ष्मीमत्र दुराग्रहम् ॥
नैयत्यतपसा मोक्षः सुखं वाचामगोचरम् ।
अज्ञानं तपसा दुःखं भ्रमणञ्च भवाटवौ ॥
भवत्स्नेहेन तथ्यं हितञ्च धर्म्मसाधनम् ।
वचः प्रोक्तं मयेति त्वां ह्यीक्षता शुभमङ्गला ॥"
तत्प्रचलितानुप्रेक्षादिमतं तत्रैव १५ अध्याये विशेषतो द्रष्टव्यम् ॥ * ॥
जैनशास्त्रोक्ततत्त्वादीनि यथा, तत्रैव २० अध्याये ।
"शृणु तत्त्वं गणाधीश ! सार्द्धं द्वादशभिर्गणैः ।
तत्त्वादीनि प्रवक्ष्येऽहं स्वैकाग्रचित्तेन संप्रति ॥
जीवादितत्पदार्थानां याथार्थ्यं तत्त्वमिष्यते ।
सम्यग् जैनागमे तत्त्वं विद्धि नान्यत् कृपासने ॥
जीवाजीवास्रवबन्धः संवरो निर्ज्जरा शिवः ।
इत्युक्तानि जिनाधीशैः सप्त तत्त्वानि चागमे ॥
संसारिमुक्तभेदेन द्विधा जीवा भवन्त्यहो ।
मुक्ता भेदविनिर्म्मुक्ता अनन्तसुखभाजनाः ॥
भव्याभव्यप्रभेदेन द्विधा संसारिणोऽङ्गिनः ।
त्रसस्थावरभेदेन वा मुक्तिभवे गामिनः ॥
एकाक्षा विकलाक्षाः पञ्चाक्षाश्चेति ते मताः ।
देवनारकतिर्य्यङ्मनुष्यभेदा इति चतुर्व्विधाः ॥
एकद्वित्रिचतुःपञ्चेन्द्रियभेदोपभेदधा ।
पृथ्वप्तेजोमरुद्वृक्षत्रसभेदात् षड़ङ्गिनः ॥
संज्ञिनोऽसंज्ञिनोदाहृताश्चा हि चतुरिन्द्रियाः ।
एकाक्षा बादराः सूक्ष्माः सप्तधैवङ्गिराशयः ॥
पर्य्याप्तेतरभेदेन ता: सप्त जीवयोनयः ।
शुद्धिना अशुद्धिना जीवसमासाः स्युश्चतुर्दश ॥
अष्टधा ज्ञानवो बादरक्ष्मोक्ष चतुर्व्विधा ।
नित्येतरनिकोता हि विकलत्रयदेहिनः ॥
संज्ञिनोऽसंज्ञिनः सुप्रतिष्ठिताः अप्रतिष्ठिताः ।
इति संसारिणो जीवभेदा एकोनविंशतिः ॥
ते पर्य्याप्तेतरालब्धिपर्य्याप्तैर्भेदिता भुवि ।
सर्व्वे जीवसमासाः सप्तपञ्चाशत्प्रमा मताः ॥
स्थावराश्च द्विपञ्चाशत्क्षुद्रा: सुरनारकाः ।
द्विधापञ्चाशतिर्म्मनुष्यशुद्धिभेदप्रभाः स्मृताः ॥
नवधा मानवाश्चैव नवधा विकलाङ्गिनः ।

इति जीवसमासाः स्युरष्टानवतिसंख्यकाः ॥
पृथ्वप्तेजःसमीरा अष्टधा बादरक्ष्मजाताः ।
नित्येतरनिकोताश्चतुर्द्धा बादरक्ष्मजाताः ॥
निकोतसहिताश्चाप्रतिष्ठिताः प्रत्येककायिनः ।
एकत्र मेलिता इते सर्व्वे भेदाश्चतुर्दश ॥
एकाक्षा शुद्धिताश्चैते द्विचतुरिंद्रियप्रमाः स्फुटम् ।
पर्य्याप्तकेतरालब्धिपर्य्याप्तैः स्युर्द्विनागमे ॥
द्विप्रकाराः सुराः स्युः पर्य्याप्तापर्य्याप्तभेदतः ।
तथा च नारको ज्ञेयो द्विधा दुःखाग्निमध्यगः ॥
जलस्थलनभश्चारिसंज्ञासंज्ञिभेदतः ।
षड्विधा गर्भजा जीवाः पञ्चेन्द्रियसमाह्वयाः ॥
भोगभूमिभवा जीवा द्विधा स्थलखगामिनः ।
ते सर्व्वे मेलिता अष्टभेदाश्च शुद्धिताः पुनः ॥
पर्य्याप्तेतरभेदाभ्यां षोड़शैव भवन्त्यपि ।
संज्ञासंज्ञिभेदाभ्यां जलस्थलखचारिणः ॥
षड्वार्षभूर्च्छिताश्चैते पर्य्याप्तियुक्ताश्चेतरा: ।
भवन्त्यलब्धिपर्य्याप्ताः प्रत्येकं त्रिजगद्भिनः ॥
क्षुता एकत्र ते सर्व्वे भेदा अष्टादशप्रमाः ।
गर्भसम्मूर्च्छिताः सर्व्वे स्युश्चतुर्व्विंशद्भिनः ॥
आर्य्यम्लेच्छभवा भोगकुभोगभूमिजा नराः ।
अष्टभेदा मता वै पर्य्याप्तापर्य्याप्तभेदतः ॥
सम्मूर्च्छिनो मनुष्या अलब्धिपर्य्याप्तसंज्ञकाः ।
इति विश्वे भवन्त्यत्र नव भेदा नृयोनिजाः ॥
पर्य्याप्तादिविभेदेन शुद्धिता विकलाङ्गिनः ।
नवधा श्रीजिनैः प्रोक्ता ज्ञानचक्षुर्व्वरागमे ॥
अष्टानवतिरेते जीवसमासा विचक्षणैः ।
विज्ञेया यत्नतश्चैषां दया कार्य्या सुसत्त्वभिः ॥
भूरेकाग्निवाताख्या नित्येतरनिकोतकाः ।
सप्तसप्तदशख्याश्च वनस्पतयो दश ॥
द्वित्रितुर्य्यक्रिया द्वौ द्वौ ज्ञेयौ देवाश्च नारकाः ।
प्रत्येको हि चतुर्लेश्याश्चतुर्दशगुणालयः ॥
चतुरशीतिलक्षा इमा जीवजातयोऽखिलाः ।
रक्षणीया प्रयत्नेन ज्ञात्वा दृष्टेः सुतत्त्वतः ॥
कोटीकोटीकालवनस्पतिलक्षाश्च कोटयः ।
सप्तचाशत्सहस्रं इत्यखिलाङ्गिकुलाख्यपि ॥
जीवितुः प्राणनाशो हि जीविष्यति न वः सदा ।
जीवत्वयं ततस्तज्ज्ञो जीवदयं किलोच्यते ॥
अक्षजाः पञ्च च प्राणा मनोवाक्कायतस्त्रयः ।
आयुरुच्छ्वासनिश्वासौ दशैते संज्ञिनां मताः ॥
असंज्ञिनां नवक्षुद्धे विनाऽत्र मनसाखिलाः ।
चतुरेन्द्रियजीवानां शुद्धौ सर्व्वेन्द्रियैर्विना क्षुताः ॥
द्वीन्द्रियाणां विना चक्षुः सप्त प्राणाः प्रकीर्त्तिताः ।
त्रीन्द्रियाणां हि षट्प्राणाः कथिता नासिकां विना ॥
सूक्ष्मबादर्य्यां विनैकाक्षाणां प्राणाः स्युश्चतुः-
प्रमाः ।
यथायोग्यमपर्य्याप्तानां ज्ञेयाश्च जिनागमे ॥
आहाराङ्गेन्द्रियोच्छ्वासनिश्वासवाक्चेतसः ।
षड्वा पर्य्याप्तयश्चेति विज्ञेया संज्ञिदेहिनाम् ॥
विकला संज्ञिनां पञ्चपर्य्याप्तयो मनो विना ।
चतुःपर्य्याप्तयो ज्ञेया एकाक्षाणां यचो विना ॥
निश्चयेन भवेत् केवलज्ञानदृग्व्ययोऽक्षयान् ।

अनन्तसुखवीर्याद्यविद्धलक्षण एव हि ॥
अवधारेण मिथ्यादिविभावगुणसंयुतः ।
नेत्रादिदर्शनैर्युक्तः प्राप्तो कर्मेक्षते: क्षयी ॥
कर्मपुद्गलसंयोगाच्चूर्णो वीर्येवधारतः ।
अमूर्तो निष्क्रियः शुद्धो ज्ञानवर्त्तिश्च निश्चयात् ॥
अवधारे नयेनाद्यनुपचारस्वभावना ।
कर्मेक्षो कर्मेक्षां कर्त्ता-भोक्ता तत्फलमश्नुते ॥
उपचारस्वभावाद्या नयेन प्राप्तभङ्गुवि ।
घटवस्त्रयधारीनां कर्त्ता च द्विष्किकर्मेक्षाम् ॥
अशुद्धनिश्चयेनाद्यो कर्त्ता च भावकर्मेक्षाम् ।
रागद्वेषमरोक्षादयोक्षादिविषयाक्षाणाम् ॥
प्राक्पुण्यक्षयजान्मृत्यु: प्रादुर्भावाद्यसम्भव: ।
स्वरूपेण नित्यत्वं चतुर्गतिषु देहिनाम् ॥
जायतेऽतो मवाधीक्षेत्यादयश्च एव च ।
क्षीणभावोऽथ संप्रोक्त: सर्वेषां अवधारत: ॥
कायप्रमाण आत्मायं पर्यायनयत: क्वचित् ।
युक्त: प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥
विना सप्तसमुद्घातैर्निश्चयेन भवेत् पुन: ।
कर्मोत्पन्नाद्यक्षीनाक्षी स्वसंख्यानप्रदेशम: ॥
वेदनाख्य: कषायाख्यो विकुर्वणसमाख्य: ।
मारणान्तिकसंज्ञश्चेत्यसाद्यारकसंज्ञकौ ॥
केवलाख्य: समुद्घाता: सप्तेति श्रीजिनैर्मता: ।
केवल्यतैजसाहारायोगिनां स्यु: परेऽक्षिणाम् ॥
पुण्यपापफलानां हि विविधानां चतुर्गतौ ।
शुभैकाशुभैकरागां प्राप्तौ भोक्ता अवधारत: ॥
स्वस्वरूपस्य कर्त्ता शुद्धनिश्चयनयादसौ ।
अनन्तस्वसुखरातीनो न कर्त्ता बन्धमोक्षयो: ॥
अतोऽत्यागाप्यसौ ज्ञेयो निश्चिक्यपदाश्रितै: ।
शुद्धै: सिद्धेन साद्दश्यो ज्ञानवर्त्तिरनुत्तिमान् ॥
यथाग्निकणिकैकात्र दग्धुमे काष्ठराशय: ।
अनन्तकर्मैकाष्ठानि तथाध्यानजवाग्निना ॥
दष्टभयो यथा नागो दंष्ट्राभग्नोऽगमो हरि: ।
स्वकार्ये च तथा ध्यानहीन: कर्मारिघातने ॥
चिन्तामणिश्च रत्नानां कल्पवृक्षोऽथ प्राणिनाम् ।
चिद्रत्नानां यथा ग्रन्थो वृत्तौ मध्ये परो जिन: ॥
आत्मतत्त्वश्च तत्त्वानां पदार्थानां तथा महान् ।
स्वकीयात्मपदार्थो द्रव्याणां स्वत्व एव हि ॥
इति मत्वा स्वसंसिद्धो मन: ज्ञात्वातिनिश्चलम् ।
विषयेभ्यो विनिष्क्रान्तं संवेगादिगुणाङ्कितम् ॥
सर्वद्रव्यबहिर्भूतोऽनन्तगुणसागर: ।
सर्वावस्थासु सर्वत्र स्वात्मा ज्ञेयो सुसन्तुभि: ॥
इत्यात्मतत्त्वमाख्याय तीर्थनाथो गणान् प्रति ।
मार्गणादिकमाख्यातुं प्रारेभे मार्गसिद्धये ॥
गतिरिन्द्रियकायौ हि योगवेदकषायक: ।
ज्ञानसंयमदर्शनेश्याभव्यत्वसंज्ञिन: ॥
आहारे मार्गणश्चेति चतुर्दश निरूपिता: ।
जिनैस्तासु बुधैर्ज्ञेयो जीवतत्त्वो मनाक्षिदे ॥
मिथ्यात्वासादनौ मिश्रो विरताक्षचतुर्थक: ।
देशैकविरताख्य: प्रमत्तोऽप्रमत्तसंज्ञक: ॥
अपूर्वैकरणो नाम्ना निवृत्तिकरणाभिध: ।
सूक्ष्मसाम्परायोपशान्तक्षीणकषायका: ॥

चतुर्दशभि जिनै: प्रोक्ता गुणस्थानगुणाकरा: ॥
तत्त्वै: सोपानभागा एते भव्यानां जिनोदिता: ।
अभव्यानां जिनैरेको मिथ्यागुणस्थानाश्रित: ॥
द्वीनाधिकगुणैर्युक्ता अन्धिभाक्षेषु धीयुते: ।
गुणानां स्थानकैर्ज्ञेय: परोक्ष गुणभृद्भि: ॥
इत्यादिवाक्सुधापूरैराप्ताय जिनिनां सभाम् ।
अजीवतत्त्वमाख्यातुं पुनरारब्धवान् प्रभु: ॥
पुद्गलो बहुधा धर्मोऽधर्म आकाश एव हि ।
कालश्चेति जिनै: प्रोक्तो जीवद्रव्योऽथ षड्धा ॥
पूरणाद्गलनाद्यैश्च: पुद्गलोऽयं निरूपित: ।
मूर्तोऽनेकविध: कार्यकारणात्मक: कर्मेक्षेत्रभृत् ॥
अष्टौ स्पर्शा रसा: पञ्च वर्णा: पञ्च गन्धौ द्विधा ।
इति विंशतिरत्रैव गुणा: प्रोक्ता द्विधात्मका: ॥
मुख्याश्चैर्ये गुणा: मुख्या मता: स्वाभाविकाश्च ते ।
गुणा: स्वत्वेन ये मुख्या विभवाख्या हि ते बुधै: ॥
अणुस्कन्धविभेदेन पुद्गलश्च द्विधा स्थिति: ।
स्निग्धरूक्षमयाणूनां सङ्घात: स्कन्ध उच्यते ॥
अणव: कार्यलिङ्गा: स्युरेकैकतयाक्षिजा: ।
नित्या द्रव्यार्थिकेनानित्या: पर्यायार्थिकेन च ॥
सूक्ष्मसूक्ष्मास्तथा सूक्ष्मा: सूक्ष्मस्थूलाभिधा: परे ।
स्थूलसूक्ष्मात्मका: स्थूला: स्थूलस्थूलाश्च पुद्गला: ॥
एकोऽणु: स्कन्धसूक्ष्म: स्यादक्षो नयनेर्नृणाम् ।
सूक्ष्मास्तेऽपि मता: षड्भिर्ये कर्ममयपुद्गला: ॥
रसनस्पर्शनघ्राणश्रोत्रैर्ये यान्ति पुद्गला: ।
अक्षनाम्ने बहुहिता: सूक्ष्मस्थूला जिनागमे ॥
स्थूलसूक्ष्मा जिनैर्ज्ञेयाश्चाक्षायाभ्योत्खातपादय: ।
जलजालादय: स्थूला उच्यन्ते पुद्गला बुधै: ॥
भूकायादिविमानाद्या: स्थूलस्थूलपुद्गला: ।
षड्भेदा इति तीर्थेशै: पुद्गला हि निरूपिता: ॥
शब्दो बन्धस्तथा सूक्ष्म: स्थूल: संस्थानसंज्ञक: ।
भेदस्तमस्तथाच्छायाद्युद्योतश्चातपादय: ॥
एते पुद्गलपर्यायाः विभावाख्या मता जिनै: ।
स्वाभाविकाश्च पर्याया अणुरूपा: पृथक् पृथक् ॥
शरीरवाङ्मन:प्राणापानसुखादिकान् ।
कुर्वन्ति पुद्गला जीवानां जन्तुजीवितादिकान् ॥
जीवपुद्गलयो: साद्यकर्मा जिनैर्मतो गतौ ।
अमूर्तो निष्क्रियो धर्मो महत्त्वाच्च यथा जलम् ।
सहकारी मतो धर्म: स्थितौ पुद्गलजीवयो: ।
अमूर्तो निष्क्रियो नित्यो यथा स्याद्व्यापगामिनाम् ॥
लोकालोकविभेदेन द्विधाकाशस्वरूपिमान् ।
अवकाशप्रद: सर्वद्रव्याणां निष्क्रियोऽक्षय: ॥
पदार्था यत्र लोक्यन्ते लोकाकाशो मतो हि स: ।
तत्राद्यद्विरनन्तोऽन्यलोकाकाशोऽस्ति केवल: ॥
धर्माधर्मैकजीवानां लोकाकाशस्य सन्ति च ।
असंख्याता: प्रदेशा हि पुद्गलानामनेकधा ॥
निश्चयव्यवहारेण द्विधा कालोऽतिनिश्चय: ।
द्रव्याणां सहकारी परिणतौ मूर्त्तिवर्जित: ॥
समयादिमय: कालो अवधारोऽत्र लक्ष्यते ।
गोदोहादिक्रियार्थो: परत्वापरत्वयोगत: ॥

राद्यत्वेन रत्नानां च कालो निश्चयाभिध: ॥
एकत्र सह जीवेन षड्द्रव्या मुनिभि: स्मृता: ।
ते कालेन विना ज्ञेया: पञ्चास्तिकायसंज्ञका: ॥
पुद्गलौघो य आयाति कर्मरूपोऽत्र रागिण: ।
द्रव्यभावविभेदेन द्विधा स आस्रवो भवेत् ॥
रागद्वेषादियुक्तेन परिणामेन येन हि ।
आस्रवत्यत्र कर्माणि स भावास्रवसंज्ञक: ॥
द्रव्यास्रव: स विज्ञेयोऽनन्तभवकारक: ॥
ध्यानाग्नेराश्रवो रुद्धो यैस्ते स्युर्मुक्तिवल्लभा: ।
अन्यथा विषलक्षेभ्यस्तेषामुत्पत्तादित: सताम् ॥
संश्लेषो जीवकर्मणोर्य: स बन्धो द्विधा मत: ।
भावद्रव्यप्रभेदेन विज्ञाद्यर्ज्ञाकरोऽमुभ: ॥
बध्यते येन भावेन रागादिदूषितेन हि ।
कर्मादि भावबन्धोऽत्र सोऽनन्तसंसृतिप्रद: ॥
प्रकृतिस्थितिबन्धानुभागप्रदेशतोऽङ्गिनाम् ।
चतुर्धा बन्ध आख्यातोऽनेकविक्रियाकर: ॥
प्रकृति: स्वभाव: स्याच्च स्थिति: कालावधारणम् ॥
रसतुल्योऽनुभाग: प्रदेशो जीवप्रदेशयुक् ॥
सप्रकृतिप्रदेशाख्यौ बन्धौ च योगतो सताम् ।
स्थित्यनुभागबन्धौ कषायैर्भवनिबन्धनौ ॥
यथा बन्धनबद्धो लभते दु:खमनेकश: ।
कर्मबद्धस्तथा जीवो नानादुर्गतौ ॥
सर्वास्रवनिरोधो यो ध्यानाद्यैर्द्रव्यभावत: ।
स द्विधा संवर: प्रोक्त: स्वर्गमुक्त्यादिकारक: ॥
चैतन्यपरिणामो य एकीभूतो निजात्मक: ।
निश्चिक्यमयो ज्ञेयो भावसंवर एव स: ।
त्रयोदशविधं वृत्तं परो धर्मो दशात्मक: ।
द्विषड्भेदा अनुप्रेक्षा: परीषहजयोत्तिज: ॥
पञ्चधा संयमो ध्यानश्रुताख्यसंयमादय: ।
भवन्त्यमी मता सर्वे भावसंवरकारकम् ॥
विरोध: क्रियते योऽत्र कर्मेक्षां यत्नतो बुधै: ।
स द्रव्यसंवर: प्रोक्तोऽनन्तगुणसागर: ॥
संवरेण स्वयं ज्ञेय दत्तेऽनाक्षिजं सुखं ।
सतां स्वर्गेव सुस्त्रीणामन्यथा क्षेत्रकोटिभि: ॥
प्राक्तन: कर्मबन्धो य: कालेन तपसाथवा ।
क्षीयते निर्जरा साक्षविपाकेन स्मृता द्विधा ॥
कर्मपाकेन या जाता सविपाकाक्षिजालनाम् ।
सा सर्वभाजिता ज्ञेया परकर्मनिबन्धना: ॥
संवरेण समयाच्च निर्जरा क्रियते बुधै: ।
तपोभि: साविपाका प्रादेयानेकसुखाकरा ॥
निर्जराकर्मणामत्र जायतेऽपि यथा यथा ।
आयाति निकटं मुक्तिस्तत्कारिणां तथा तथा ॥
अत्यन्तं योऽत्र विश्लेष: कर्मात्मनो स्वयोगिनाम् ।
कालत्रयेण स मोक्ष: स्यात् द्रव्यभावाद्विधा-
त्मक: ॥

भावमोक्षः स विज्ञेयः कर्ममोक्षणहेतुतः ॥
समस्तकर्मक्षेदेशाद्यदैवात्मा जायते पृथक् ।
तदैव द्रव्यमोक्षः स्यादचलगुणदायकः ॥
आषाढमल्लकाग्रं यथा बद्धो बन्धनैर्दृढैः ।
मोचनाज्जायते सौख्यं तथा मुक्तो विधिः क्षयात् ॥
तस्मात् कर्मातिगो जीव एरण्डादिकबीजवत् ।
समयेन त्रयेणैव यावल्लोकाग्रमल्लकम् ॥
तत्रैवाव्याबाधः सौख्ये गमनवर्जितः ।
सिद्धो धर्मोऽस्ति कायाभावादनन्तसुखा-
श्रयः ॥
तत्र मुक्ते निराबाधं स्वात्मजं विषयातिगम् ।
इन्द्रियातीतमौपम्यं प्राप्तं सुखमनश्वरम् ।
दुःखातीतं निरौपम्यं प्राप्तं सुखमनश्वरम् ।
अवक्तव्यं परमं शून्यदृष्टान्तवर्जितमेव हि ॥
यद्देवमनुजैः सर्वैः सुखं त्रैलोक्यगोचरम् ।
सुखं तदाद्यनन्तं तज्जायते परमेष्ठिनाम् ॥
एकेन समयेनैव भूषितानां गुणाष्टकैः ।
नित्यानामशरीराणां सर्वोत्तमं क्षयच्युतम् ॥
इति विविधविभागैः समतत्त्वानि सूत्रे
जगवगमसुबीजानि प्रकृत्यात्मवान् यः ।
परसुरमपि भव्यानाचकार स्वबीजै-
रुन्नतपरमतुलौर्मेऽत्र दद्यात् स्वमुक्तिम् ॥
पार्श्वः सर्वसुखाकरोऽसुखहरः पार्श्वं श्रिता धर्मिणः
पार्श्वेणाशु समाप्यतेऽमरपदं पार्श्वाय नित्यं नमः ।
पार्श्वान्नास्ति हितङ्करो भवभृतां पार्श्वस्य सूक्तिः प्रिया
पार्श्वे चित्तमहं दधेऽखिलसिद्धे मां पार्श्व ! पार्श्वं नय ॥"

इति श्रीपार्श्वनाथचरित्रे २० सर्गः ॥*॥)

सन्निहिते, त्रि । इति हेमचन्द्रः ॥

पार्श्वकः, त्रि, (अनृजुरूपायः पार्श्वं तेन अन्विच्छति अर्थानिति । "पार्श्वेनान्विच्छति ।" ५ । २ । ७५ । इति कन् ।) प्राप्तेन विभवान्वेषी । यथा,—

"कुरुत्वा विभवान्वेषी पार्श्वकः सन्धिजीवकः ॥"

इति हेमचन्द्रः ॥

स्वार्थे के पार्श्वार्थोऽपि । (यथा, याज्ञवल्क्ये । ३ । ८६ ।

"तस्यां ते ललाटाक्षिगण्डे नासाधनास्थिका ।
पार्श्वकास्थालके: सार्द्धमर्द्धदेह द्विसप्तति: ॥")

पार्श्वतः, [स्] य, (पार्श्व + "आद्यादिभ्य उपसंख्यानम् ।" ५ । ३ । ३३ । इत्यस्य वार्त्तिकोक्त्या तसि: ।) पार्श्वात् । पार्श्वे । इत्यादि । इति संक्षिप्तसारव्याकरणम् ॥ (यथा, रघुः । १६ । ३१ ।

"मित्रलक्ष्मणमादिश्य पार्श्वतः
प्रस्थितं तमवस्थितं प्रियाः ॥")

पार्श्वतीयः, त्रि, (पार्श्वतो भवः । पार्श्व + "सुखपार्श्वतसोर्लोपश्च ।" ४ । २ । १३८ । इत्यस्य वार्त्तिकोक्तः छः ।) पार्श्वसम्बन्धी । पार्श्वतो भवः । इति सिद्धान्तकौमुदी ॥

पार्श्वपरिवर्त्तनं, क्ली, (पार्श्वेन पार्श्वेन वा परिवर्त्तनम् ।) कटिदानम् । काञ्चिकापरिहृत्तिः । पाशफेराव इति भाषा । श्रीहरेः पार्श्वपरिवर्त्तनोत्सवो यथा,—

"भाद्रस्य शुक्लैकादश्यां श्रवणोत्सववत् प्रभोः ।
कटिदानोत्सवं कुर्य्याद्देवाद्यैः सह वैष्णवः ॥"

तथा च भविष्योत्तरे ।

"प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि ।
कटिदानं भवेद्विष्णोर्महापातकनाशनम् ॥
जलाशयान्तिकं नीत्वा संपूज्याभ्यर्च्य च प्रभुम् ।
काञ्चिकापरिहृत्तिञ्च दक्षिणाङ्गे प्रकल्पयेत् ॥"

अस्य व्याख्या । श्रवणोत्सवात् कथञ्चिद्विशेषमनुवादपूर्ब्बकं लिखति । जलेति त्रिभिः काञ्चिकायाः कक्षाः परिहृत्तिं दक्षिणाङ्गे प्रकल्पयेदिति पूर्ब्बं वामाङ्गेन सम्बन्धाधुना दक्षिणाङ्गेन ग्राहयेदित्यर्थः । तत्कालविशेषञ्च पूर्ब्बमेव लिखितोऽस्ति । अभ्यर्च्येनामन्त्रः ।

"देवदेव ! जगन्नाथ योगिगम्य ! निरञ्जन ! ।
कटिदानं कुरुष्वाद्य मासि भाद्रपदे शुभे ॥
महापूजां ततः श्रुत्वा वैष्णवान् परितोष्य च ।
देवं स्वमन्दिरे नीत्वा यथापूर्ब्बं निवेशयेत् ॥"

इति श्रीहरिभक्तिविलासे २५ विलासः ॥

पार्श्वपिप्पलं, क्ली, (पार्श्वे पिप्पलमिव ।) हरीतकीविशेषः । इति भावप्रकाशः ॥ गजहड़ इति हिन्दीभाषा ॥

पार्श्वभागः, पुं, (पार्श्वस्य भागः ।) पक्षभागः । इत्यादेः पार्श्वदेशः । इत्यमरः । २ । ८ । ७० ॥

पार्श्वशूलः, पुं, क्ली, (पार्श्वे जातः शूलः ।) शूलरोगविशेषः । तस्यौषधम् । यथा,—

"घृतपुष्पा देवदारु प्रालपर्णी वचागुरु ।
कुष्ठं मांसी सैन्धवञ्च पलमेकं पुनर्नवा ॥
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
कृच्छ्रं पार्श्वशूलञ्च गुल्ममाशु नाशयेत् ॥"

इति गारुड़े १८६ अध्यायः ॥

(अस्य सन्न्यासिपूर्ब्बलक्षणचिकित्सितानि यथा, सुश्रुते उत्तरतन्त्रे ४२ अध्याये ।

"दण्डाहि मारुतं क्षीणा कुक्षिपार्श्वावस्थितः ।
स संरुद्धः करोत्याशु मारं गुरुगुदायनम् ॥
सूचीभिरिव निस्तोदः सञ्छोच्छ्वासौ सदा नरः ।
नाल्पं वाञ्छति नो निद्रामुपैत्यभिनिपीडितः ॥
पार्श्वशूलः स विज्ञेयः कफानिलसमुद्भवः ।
तत्र पुष्करमूलानि शिग्रुखौवर्चलं विडम् ॥
सैन्धवं तुम्बुरूण्याचूर्णं कृत्वा तु पाययेत् ।
पार्श्वहृत्सक्थिशूलेषु यवक्षारेण संयुतम् ॥
सर्पिःक्षौद्रोदरीक्तं वा घृतं वा शिग्रुसंयुतम् ।
बीजपूरकसारं वा पयसा सह साधितम् ॥
एरण्डतैलमथवा मद्यमस्तुपयोरसैः ।
भजयेच्चापि पयसा जाङ्गलेन रसेन वा ॥"

पार्श्वस्थः, पुं (पार्श्वे तिष्ठतीति । पार्श्व + स्था + कः ।) पार्श्वस्थितभटः । इति हेमचन्द्रः ॥ समीपस्थिते, त्रि ॥ (यथा, महाभारते । ६ । २०० । १४८ ।

"यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्द्दनः ॥")

पार्श्वास्थि, क्ली, (पार्श्वस्थं अस्थि ।) शरीरपार्श्वस्थितास्थि । पाँजरा इति भाषा । तत्पर्य्यायः । पर्शुका २ । इत्यमरः । २ । ६ । ६६ ॥

पार्श्विकं, त्रि, (पार्श्व + ठक् ।) पार्श्वस्थेदम् । पार्श्वजातम् । पार्श्वशब्दात् शिल्पिकप्रत्ययनिष्पन्नम् ॥

पार्श्वैकादशी, स्त्री, (पार्श्वसम्बन्धिनी हरेः पार्श्वपरिवर्त्तनजन्या एकादशी ।) भाद्रशुक्लैकादशी । तद्विवरणं पार्श्वपरिवर्त्तनशब्दे द्रष्टव्यम् ॥

पार्षोदरप्रियः, पुं, (पार्षस्य सुदरस्य तस्यां प्रीयाति भोक्तारमिति । प्री + कः ।) कर्कटः । इति हेमचन्द्रः । ३ । ३१८ ॥

पार्षती, स्त्री, (पृषतस्यापत्यमिति । पृषत + अण् + स्त्रियां ङीप् ।) द्रौपदी । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ३ । ८५ ।

"युधिष्ठिरं भोजयित्वा शेषमश्नाति पार्षती ।
द्रौपद्यां भुज्यमानायां तदन्नं क्षयमेति च ॥")

पार्षदः, त्रि, (पारिषद + पृषोदरादित्वात् साधुः । यद्वा, पर्षदि साधुः पर्षदो वयः इत्यत्र योगविभागात् वा इति कश्चित् ।) पारिषदः । इति शब्दरत्नावली ॥ (यथा, भागवते । ३ । १६ । २ ।

"एतौ द्वौ पार्षदौ मुख्यौ जयो विजय एव च ॥")

पार्षदः, त्रि, (पर्षदि साधुः । पर्षद् + "पर्षदो वयः ।" इति वयः ।) पार्षदः । इति भरतः ॥

पार्ष्णिः, पुं, स्त्री, (पृष्यते भूम्यादिकमनेनेति । पृष् + "वृषिपृजिपार्ष्णिभूर्जि ।" उणा ७ । ५२ । इति निपातनेन निपातनात् साधुः ।) गुल्फस्याधोभागः । पादस्यान्यावरः । इत्यमरः । २ । ६ । ७२ ॥ गोड़ालड़ा इति गोड़ारि इति च भाषा । स तु गर्भस्थस्य मासद्वयेन भवति । इति सुश्रुतबोधः ॥ (यथा, कुमारे । १ । ११ ।

"उद्देजयत्कुलिपार्ष्णिभागान्
मार्गे शिलीभूतहिमेऽपि यत्र ॥")

सैन्यपृष्ठम् । इति मेदिनी । णे, २० ॥ (यथा, हरिवंशे । २५ । ३२ ।

"उग्रसेनस्तस्य जगाद पार्ष्णिग्राहिरसन्नदा ॥")

पृष्ठम् । इति हलायुधः ॥ जिगीषा । यथा,—

"सैन्यपृष्ठे पुमान् पार्ष्णिः पश्चात्पदजिगीषयोः ॥"

इति रत्नकोषः ॥

पार्ष्णिः, स्त्री, उच्चदक्षी । इति मेदिनी । णे, २० ॥ क्षुल्ली । इति धरणिः ॥

पार्ष्णिग्राहः, पुं, (पार्ष्णिं सैन्यपृष्ठं गृह्णातीति । ग्रह + अण् ।) पृष्ठतः शत्रुः । शत्रुजयोद्यतस्य विजिगीषोरुत्तप्तशत्रूपद्रवपातेन पार्ष्णिं पश्चात् पदं गृह्णाति यातीति यः । इत्यमरभरतौ ॥ (यथा, मनुः । ७ । २०७ ।

"पार्ष्णिग्राहञ्च संप्रेक्ष्य तथाक्रन्दञ्च मण्डले ॥")

पार्ष्णिकं, क्ली, (पार्ष्णिं जायते इति । जन् + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।)

पाल, क रक्षे । इति कविकल्पद्रुमः (चुरां-परं-सकं-सेट् ।) क, पालयति । दृश्यतेऽपरसिद्धे दीर्घोऽपि पाठः । कानुबन्धागमिदशुबन्धवत् नेरनित्यतां बोधयति । तेन पालति पलति इत्यपि सिद्धम् । इति दुर्गादासः ॥

पालः, पुं, (पालयतीव निष्ठीवणादिकमिति । पालि + अच् ।) पतदृग्ग्रहः । इति हेमचन्द्रः ॥ पिकदानं इति भाषा ॥ पालके, त्रि । यथा,—
"दिवाब्रह्मव्रता पाले रात्रौ स्वामिनि तद्गृहे ।
योगक्षेमेऽन्यथा चैतु, पाको ब्रह्मव्रतामियात् ॥"
इति मनुः ॥

पालकः, पुं, (पालयतीति । पालि + ण्वुल् ।) घोटकरक्षकः । तत्पर्य्यायः । अश्वरक्षः २ वल्लभः ३ । इति जटाधरः ॥ चित्रकहृक्षः । इति राजनिर्घण्टः ॥ पालनकर्त्तरि, त्रि । यथा, प्रायश्चित्ततत्त्वे ।
"गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत् ।
मक्षिकाजीवनरके मक्षिकाभिः स भक्ष्यते ॥"

पालकाप्यः, पुं, मुनिविशेषः । तत्पर्य्यायः । करेणुभूः २ । इति हेमचन्द्रः ॥ धन्वन्तरिः । इति त्रिकाण्डशेषः ॥

पालघ्नः, पुं, (पालं शैवं हन्तीति । हन + टक् ।) छत्रा । इत्यमरः । २ । ५ । १६७ ॥

पालङ्कः, पुं, (पाल रक्षणे + सम्यदादित्वात् किप् । तेन अञ्चति इति । अञ्च + घञ् ।) शाकभेदः । पालङ् इति भाषा । पालिपत्री । इति मेदिनी । के, १२७ ॥ वाज इति भाषा ॥

पालङ्गी, स्त्री, (पालङ्ग + गौरादित्वात् ङीष् ।) क्षुद्रतृणाभगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२१ ॥ शाकभेदः । पालङ् इति भाषा ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।
"यथादोषशाकैर्वास्तूकतन्दूलीयकजीवन्तुपोदिकाम्बष्ठशाकमूलकपालङ्गसनचिल्लीचुचुकलायवल्लीभिरन्यैर्वा ॥") अस्या गुणाः । कफपित्तवातविबन्धनाशित्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

पालङ्गी, स्त्री, (पालङ्ग + स्वार्थे अण् ।) शाकभेदः । पालङ् इति भाषा ॥ तत्पर्य्यायः । पलक्या २ मधुरा ३ क्षुरपत्रिका ४ सुपत्रा ५ स्निग्धपत्रा ६ वामीशा ७ शाम्बवल्लभा ८ । अस्य गुणाः । ईषत् कटुत्वम् । मधुरत्वम् । पथ्यत्वम् । शीतलत्वम् । रक्तपित्तहरत्वम् । रुचिदत्वम् । परमतर्पणत्वञ्च । इति राजनिर्घण्टः ॥

पालङ्क्या, स्त्री, (पालङ्ग + स्त्रियां अजादित्वात् टाप् ।) क्षुद्रतृणः । इत्यमरः ॥ क्षुद्रपत्रशोटी इति भाषा । पालङ्कशाकः । तत्पर्य्यायः । वास्तुशाकारी २ क्षुरिका ३ चीरितच्छदा ४ । (यथा, सुश्रुते । १ । ४२ ।
"प्रायशः क्रूरवकशोविदारकजीवन्तीचिल्ली-पालङ्क्यासुनिषण्णकप्रभृतीनि नीवाराद्यो तद्-[illegible]") अस्या गुणाः । वातजनत्वम् । ग्राहित्वम् । मेदनत्वम् । गुरुत्वम् । विष्टम्भित्वम् । मदग्लानपित्तरक्तविषापहत्वञ्च । इति भावप्रकाशः ॥

पालनं, क्ली, (पाल्यतेऽनेनेति । पालि + "करणाधिकरणयोश्च ।" ३ । ३ । ११७ । इति ल्युट् ।) सद्यःप्रसूतायाः गोः क्षीरम् । इति शब्दचन्द्रिका ॥ (पाल रक्षणे + भावे ल्युट् ।) रक्षणम् । यथा, "अभिषेकादिसुसंस्कृतस्य राज्ञः प्रजापालनं परमो धर्मः ॥" इति मिताक्षरा ॥

पालाशं, क्ली, (पलाशस्येदमिति । अण् ।) तमालपत्रम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥ (यथा, वाभटे शुक्लाचिकित्सितायाम् ।
"पालाशं दहनार्जुनं घृतिजयापामार्गकुम्भाह्वकम् ॥")

पालाशः, पुं, (पालाशस्य वर्ण इव वर्णोऽस्येति । अण् ।) हरिद्वर्णः । (यथा, हरिवंशे भविष्यपर्व्वणि । ६१ । ४ ।
"पालाशतालवर्णाभैः पिङ्गलैः कनकप्रभैः ॥")
तद्वर्णविशिष्टे पलाशवृक्षसम्बन्धिनि च, त्रि । इत्यमरः ॥ (यथा, मनुः । २ । ४५ ।
"ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ ॥")

पालाशवल्कः, पुं, (पालाशानां पलाशवृक्षाणां वल्को यत्र ।) मगधदेशः । इति शब्दरत्नावली ॥ पलाशसम्बन्धिवल्कश्च ॥

पालिः, स्त्री, (पल्यते पाल्यते इति । पल पालने + "बाहुलकात् शूलपतिपलतिभ्यश्च ।" ४ । १२६ । इत्युञ्प्रत्ययोक्त्या इण् ।) कर्णलताख्यम् । (यथा, "यस्य पालिद्वयमपि कर्णस्य न भवेद्दिह ।
कर्णपीठं समे मध्ये तस्य विद्वान् विवर्द्धयेत् ॥
बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत् ।
आभ्यन्तरायां दीर्घायां बाह्यसन्धिरदाहृतः ॥
एकैव तु भवेत् पालिः स्थूला पृथ्वी स्थिरा च या ।
तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत् ॥
शस्त्रादुत्पाद्य मांसेन वागुरान्तेन जीवता ।
कर्णपालिमपाकेषु कुर्य्यान्निर्व्रणेषु प्राज्ञवित् ॥"
"कर्णपाल्यामयान्नष्टां पुनर्वक्ष्यामि सुश्रुत ! ।
कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः ॥
दिधा वाप्यथ संरुद्धाः कुर्व्वन्ति विविधा रुजः ।
विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके ॥
दाहविस्फोटजननं शोफः पाकश्च पैत्तिके ।
कण्डूः सम्भवतः स्तम्भो गुरुत्वञ्च कफात्मके ॥
यथादोषञ्च संशोध्य कुर्य्यात्तेषां चिकित्सितम् ।
स्वेदाभ्यङ्गपरीषेकैः प्रलेपाद्यैर्विमोक्षणैः ॥
यद्धीं क्रियां हृद्यतमीयेर्यथास्वं भोजनैश्च या ।
य एवं वक्ति दोषाणां चिकित्सां कर्त्तुमर्हति ॥
अत ऊर्द्धं नामलिङ्गैर्वक्ष्ये पाल्यासुपद्रवान् ।
उत्पाटकोत्पुटकः स्रावः कण्डूयुतो भ्रमः ॥
अवमन्थः सकण्डूको व्यधिको जम्बुकस्तथा ।
शोफो च दाहपाकौ च पक्ष्मणां क्रमशः क्रियाम् ॥
अपामार्गः सर्ज्जरसः पाटलाजकुचत्वचौ ।
क्षतपाटके प्रलेपः स्यात् तैलमेभिश्च पाचयेत् ॥
ग्रन्थ्याकण्ठिगुडूचीकगोधामेदोऽथ तद्रसा ।
वाराहं गन्धमेतैश्च पित्तं सर्पिश्च संक्षिपेत् ॥
लेपसुत्पुटके दद्यात्तैलमेभिश्च साधितम् ।
गौरीं सुगन्धां सहामामनन्तां तद्गुडूचीयकम् ॥
स्रावे प्रलेपनं दद्यात्तैलमेभिश्च साधितम् ।
पाठां रसाञ्जनं चौद्रं तथाम्लाद्युच्यकाङ्क्षिकम् ॥
दद्याल्लेपं सकण्डूके तैलमेभिश्च साधितम् ।
ग्रथीभूतस्य हेयं स्यादिदं तैलं विजानता ॥
मधुकं क्षीरकाकोली जीवकाद्यैर्विपाचितम् ।
गोधावराहसर्पाणां वसाः स्युः क्षतदंशके ॥
प्रलेपनमिदं दद्यादवमन्थावमन्थके ।
प्रपौण्डरीकं मधुकं समङ्गा धवमेव च ॥
तैलमेभिश्च सम्यक् स्याद्व्यङ्गकदूमतः क्रियाम् ।
सहदेवा विश्वदेवा अजाक्षीरं ससैन्धवम् ॥
एतैरालेपनं दद्यात् तैलमेभिश्च साधितम् ।
ग्रन्थिके गुटिकां पूर्व्वं सावयेदवपाट्य तु ॥
ततः सैन्धवचूर्णन्तु दृष्ट्वा लेपं प्रदापयेत् ।
लिखित्वा ततु सूतं दृष्ट्वा चूर्णं रोधस्रं जम्बुले ॥
क्षीरेक्षु प्रतिसार्य्यैनं मुद्गं संरोपयेत्ततः ।
मधुपर्णीं मधूकञ्च मधुकं मधुना सह ॥
लेपः स्राविणि दातव्यस्तैलमेभिश्च साधितम् ।
पञ्चकल्कैः समधुकैः पिष्टैस्तैश्च घृतान्वितैः ॥
जीवकाद्यैः ससर्पिष्कैर्दह्यमानं प्रलेपयेत् ॥"
इति सुश्रुते शल्यस्थाने षोड़शोऽध्याये ॥)
अग्निः । षड़ङ्गिः । (यथा, गीतगोविन्दे ।६।१०।
"विपुलपुलकपालिः स्फीतघूत्कारमन्त-र्जनितजडिमकाकुव्याकुलं व्याहरन्ती ॥")
अङ्गभेदः । छात्रादिदेयम् । इति मेदिनी । ले, ३० ॥ यूका । जातघ्नजन्तुश्च । प्रान्तः । (यथा, गीतगोविन्दे । ३ । १३ ।
"भूषणभरं धनुरपाङ्गतरङ्गितानि
बाला गुणः श्रवणपालिरिति स्मरेण ।
तस्यामनङ्गजयजङ्गमदेवतायाः
मन्त्राणि निर्ज्जितजगन्ति किमर्पितानि ॥")
सेतुः । कल्पितभोजनम् । प्रशंसा । उल्लङ्घः । प्रस्थः । इति हेमचन्द्रः ॥

पालिका, स्त्री, (पालिरेव । स्वार्थे कन् टाप् च ।) अग्निः । इति शब्दरत्नावली ॥ कर्णपत्रम् । इति शब्दचन्द्रिका । दधादिच्छेदनी । तत्पर्य्यायः । कुलालिका २ । इति शब्दावली ॥

पालितः, त्रि, (पाल + क्त ।) रक्षितः । यथा,—
"चित्रलेखा तमाज्ञाय पौत्रं बाणस्य योगिनी ।
ययौ विहायसा राजन् द्वारकां गुप्तपालिताम् ॥"
इति श्रीभागवतीयदशमस्कन्धे ६२ अध्यायः ॥
कायस्थस्य पदवितिविशेषः ॥

पालिन्दः, पुं, (पालयतीति । पालि + बाहुलकात् किन्दच् ।) कुक्कुरकः । इति राजनिर्घण्टः ॥

पालिन्दी, स्त्री, (पालिन्द + गौरादित्वात् ङीष् ।) श्यामालता । इति रत्नमाला ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये ।

"कृष्णपित्तहृतश्लक्ष्मा पालिन्दीतक्षुलीवकैः ॥")
पालिन्दी । त्रिवृता । इति त्रिकप्रकाशः ॥
(अस्या: पर्य्यायो यथा,—
"त्रिवृत् श्यामात्रैवृन्ता च पालिन्दी च सुधे-
त्रिका ।
मसूरविदलाकोलकेवुका कालमेषिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पालिन्दी, स्त्री, लक्ष्मत्रिवृता । इत्यमरः ।२।४।१०८॥
पाली, स्त्री, (पालि + ङीदिकारादिति वा ङीष् ।)
यूका । सक्तसुथोवित् । इति मेदिनी । ले, १० ।
श्रेणी । इति शब्दरत्नावली ॥ खाली । इति
शब्दचन्द्रिका ॥
पावकः, पुं, (पुनातीति । पू + ण्वि ग्रौ धे + ण्वुल् ।)
अग्निः । इत्यमरः ।१।१।५७ ॥ (यथा, काशी-
खण्डे ६ अध्याये ।
"अपावनानि सर्व्वाणि वह्निसंसर्गतः क्षणात् ।
पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः ॥")
वैद्युताग्निः । यथा,—
"पावकः पवमानश्च शुचिरग्निश्च ते त्रयः ।
निर्म्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः ॥
यश्चासौ तपते सूर्य्यः शुचिरग्निस्तथा स्मृतः ॥"
इति कौर्म्मे १२ अध्यायः ॥
स च ब्रह्मणो मानसपुत्रस्तदभिमानिनामकाग्नेः
स्वाहायां जातः । यथा,—
"योऽसावग्निरभीमानी स्मृतः सायम्भुवेऽन्तरे ।
ब्रह्मणो मानसः पुत्रस्तस्मात् स्वाहा व्यजीजनत् ॥
पावकं पवमानञ्च शुचिरग्निञ्च यः स्मृतः ॥"
इति मात्स्ये ४८ अध्यायः ॥
सदाचारः । वह्निमन्थः । (अस्य पर्य्यायो यथा,
"तेजोमन्थो हविर्मन्थो ज्योतिष्को पावकोऽग्निः ।
वह्निमन्थोऽग्निमन्थश्च मथनो गह्निकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
चित्रकः । भल्लातकः । विडङ्गः । इति मेदिनी ।
के, ११८॥ औषधिवृक्षभेदः । इति हेमचन्द्रः ॥ रक्त-
चित्रकः । कुसुम्भः । इति राजनिर्घण्टः ॥ (पवित्र-
कारके, त्रि । यथा, ऋग्वेदे । १ । ११ । २० ।
"मित्रः पावका: प्रततो अभूवन् ॥")
पावकाग्निः, पुं, (पावकाय वह्न्युत्पादनार्थं
अरणिरिव ।) अग्निमन्थः । इति शब्दमाला ॥
पावकिः, (पावकस्यापत्यम् । पावक + इञ् ।)
कार्त्तिकेयः । यथा,—
"कथं तं ज्ञप्तिकापुत्रसुतत्वात् तं सुरं गुरुम् ।
कथञ्च पावकिरसौ कथं वा माहनन्दनः ॥"
इति वराहपुराणम् ॥
पावनं, क्ली, (पावयत्यनेनेति । पू + ल्युट् ।)
जलम् । छन्दुम् । इति मेदिनी । ने, ६०॥ गोम-
यम् ॥ इति शब्दचन्द्रिका ॥ रसाञ्जनम् । कुङ्कुम् ।
इति राजनिर्घण्टः ॥ चित्रकम् । अध्यायः ।
प्रायश्चित्तम् । इति विश्वः ॥ (मुद्गः । यथा,
मनुः । ११ । १७८ ।
"सा चेत् पुनः प्रदुष्येत् सद्यस्तेनोपयन्त्रिता ।
छन्दुं चान्द्रायणञ्चैव तदस्याः पावनं स्मृतम् ॥")
पावनः, पुं, (पावयतीति । पू + णिच् + ल्युः ।)
वायुः । पावकः । इति मेदिनी । ने, ६० ॥
(यथा, १।१८५। मनुश्लोकटीकायां कुल्लूकभट्टः ।
"पावनः सव्योऽग्निर्यः प्रीतापनोदनार्थं वस्तुनः
हेतोरप्यपि विधीयते ॥") चित्रकः । इति विश्वः ॥
पीतभृङ्गराजः । इति राजनिर्घण्टः ॥ (विष्णुः ।
यथा, महाभारते । १३ । १४८ । ७५ ।
"भूतभव्यभवन्नाथः पवनः पावनोऽनलः ॥"
"पावयतीति पावनः । भीषास्माद्वातः पवत
इति श्रुतेः ।" इति शाङ्करभाष्यम् ॥) त्रिवृत् ।
पवित्रे पावयितरि च, त्रि । इति हेमचन्द्रः ॥
(यथा, रघुः । १६ । ५३ ।
"स जनैरवनिता सखोऽपि सन्
पावनीमनवलोक्य सन्ततिम् ।
वैद्यवत्परिभाविनं गदं
न प्रदीप इव वायुमत्यगात् ॥")
पावनाग्निः, पुं, (पावनः पवित्रजनको अग्नि-
र्यस्य ।) मुनिः । इति राजनिर्घण्टः ॥ (पावनो-
ऽग्निरिति विग्रहे ।) पवित्राग्निशब्दः ॥
पावनी, स्त्री, (पावयत्यनयेति । पू + णिच् +
ल्युट् + ङीप् ।) हरीतकी । इति विश्वः ॥
तुलसी । गौः । इति राजनिर्घण्टः । गङ्गा ।
यथा, शङ्कराचार्य्यकृतगङ्गाष्टके ।
"ब्रह्माण्डं खण्डयन्ती हरशिरसि जटावल्लि-
मुल्लासयन्ती
स्वर्लोकादापतन्ती कनकगिरिगुहागण्डशैलात्
स्खलन्ती ।
क्षौणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती
पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः
पुनातु ॥"
(दृश्यन्तु गङ्गाया अंशुविशेषः । यथा, मात्स्ये ।
१२० । ३६—४१ ।
"ततो विसर्ज्जयामास संरुद्धां स्वेन तेजसा ।
नदीं भगीरथस्यार्थे तपसोग्रेण तोषितः ।
ततो विसर्ज्जयामास सप्त स्रोतांसि गङ्गायाः ॥
नलिनी ह्लादिनी चैव पावनी चैव प्राच्यगा ।
सीता चक्षुश्च सिन्धुश्च तिस्रस्ता वै प्रतीच्यगाः ॥
सप्तमी त्वनुगा तासां दक्षिणेन भगीरथम् ।
तस्माद् भागीरथी या वै प्रविष्टा दक्षिणो-
दधिम् ॥"
शाकद्वीपस्य नदीविशेषः । यथा, मत्स्यपुराणे ।
१२१ । ३१ ।
"नन्दा च पावनी चैव तृतीया परिकीर्त्तिता ॥")
पाशः, पुं, (पद्यते बध्यतेऽनेनेति । पद्य + घञ् ।)
बन्धभेदः । इति शब्दरत्नावली ॥ (वैद्यशास्त्र-
बन्धशब्दवैद्योक्तपाशलक्षणं यथा,—
"पाशः सुकोमलावयवो लौहधातुस्त्रिकोणवान् ।
प्रादेशपरिधिः सीवगुलिकाभरभाञ्चितः ॥"
आग्नेयबन्धशब्दवैद्योक्तलक्षणं यथा,—
"दण्डहस्तो भवेत् पाशो दक्षः करसलक्षया ।
गुल्फयोर्पाससुस्थानमर्म्मकोचावचर्म्मेयाम् ॥
अन्येषां सुदृढ़ानाञ्च सुस्थानं परिवेष्टितम् ।
तथा चिन्तयेत्समं पाशं वृत्तः कुर्य्यात्सुवर्त्तितम् ॥"
अस्य क्रियादिकं यथा,—
"कर्त्तव्यं शिल्पकैस्तस्य स्थानं कक्षासु वै सदा ।
वामहस्तेन संग्रह्य दक्षिणेनोद्धरेत्ततः ॥
कुक्षिजत्राजातिं हत्वा आग्नेयं मस्तकोपरि ।
क्षिपेत्————————— ॥"
"वध्यते च स्रुते चैव तथा प्रव्रजितेषु च ।
समयोगविधिं ज्ञात्वा प्रयुञ्जीत सुचिन्तितः ॥
विजित्य तु यथान्यायं ततो बन्धं समाचरेत् ।
कक्षां बद्ध्वा ततः खड्गं वामपार्श्वावलम्बितम् ॥
हठं विगृह्य वामेन निष्कर्षेद्दक्षिणेन च ॥"
अन्यच्च ।
"पराङ्मुखमपाङ्मुखं गृहीतं जघनसंस्थितम् ।
ऊर्द्ध्वस्थितमधःस्थितं सन्धारितविधारितम् ॥
ग्रैवेयपार्श्वं गजपार्श्वं व्याघ्रव्याघ्रौ तथैव च ।
एवमेकादशविधा ज्ञेयाः पाशविचारणाः ॥"
वैद्यव्यायनोक्तक्रिया यथा,—
"प्रसारणं वेदनञ्च कर्षणञ्चेति ते त्रयः ।
योगाः पाशाश्रिता लोके पाशाः क्षुद्रसमा-
श्रिताः ॥"
अन्यच्च ।
"अन्यायतं विद्याज्ञञ्च तिर्य्यक्प्राप्तमितमेव च ।
पञ्च कर्म्मविनिर्द्दिष्टं बन्धे पाशे मनीषिभिः ॥")
कक्षाग्ने सन्धार्थः । (यथा, माघे । ७ । ६२ ।
"शुचिरविकिरणपाशपातभारा-
दिव नितरां नतिमद्भिरंशभागैः ॥")
कर्णाग्ने शोभनार्थः । छायाशब्दे निन्दार्थः ।
पक्षादिबन्धनरज्ज्वादि । इति विश्वः ॥ (यथा,
महाभारते । ५ । ६४ । १ ।
"शकुनीनामिवाकाशे पाशं भूमावयोजयत् ।
क्वचिच्छाकुनिकस्यात पूर्व्वेषामिति शुश्रुम ॥"
रोगविशेषः । यथा, ज्योतिषे ।
"यदा राशियन्त्रके सप्त यहा भवन्ति तदा
पाशाख्ययोगो भवति ॥" पारिभाषिकपाशो
यथा, कुलार्णवे १ उल्लासे ।
"इच्छा ग्रहा भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशाः प्रकी-
र्त्तिताः ॥"
अन्येऽपि दर्शनभेदं यथा,—
"कार्पासभङ्गाश्चिकपालमूलं
चक्रञ्च पाशुल्लयवा प्रपञ्चेत् ।
तस्यापदं रोगधनञ्जयं वा
रोगी लतिं वा तनुतेऽतिकष्टम् ॥"
इति हारीते द्वितीये स्थाने द्वितीयेऽध्याये ॥)
पाशुकः, पुं, (पाशुयति पीड़यतीति । पश + णिच्
+ ण्वुल् ।) द्यूतविशेषः । पाशा इति भाषा ।
तत्पर्य्यायः । अक्षः २ देवनः ३ । इत्यमरः ।
२ । १० । ७५ ॥ शारिः ४ शारिः ५ शारः

पाशुपाक्षिः, पुं, (पाशुः पाशौ यस्य ।) वरुणः । इति हलायुधः ॥

पाशुपाजनं, क्ली, (पशुत्वं पशुसंघं पालयतीति । पाशि + क्युः ।) छागः । इति शब्दचन्द्रिका ॥

पाशुपतः, त्रि, (पाशु + क्त ।) पाशयुक्तः । बद्धः । इति धरणिः ॥

पाशुपतः, [न्] पुं, (पाशुरस्यास्तीति । पाशु + इनिः ।) वरुणः । इत्यमरः । १ । १ । ६४ ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ८ ।
"यदि ग्रहं यमं वापि रुद्रैरमपि पाशिनम् ॥")
व्याधः । इति मेदिनी । ते, ६१ ॥ यमः । इति क्वचित् ॥ पाशधरे, त्रि । इति विश्वः ॥

पाशुपीकृतः, त्रि, पाशुपक्षः । अभूततद्भावे चिप्रत्ययनिष्पन्नः ॥

पाशुपतः, पुं, (पशुपतिर्देवतास्येति । "तस्य देवता ।" ४ । २ । २४ । इति अण् ।) वकपुष्पम् । (अस्य पर्य्यायो यथा, भावप्रकाशे । १ । १ ।
"शिवमल्ली पाशुपत एकाङ्गोलो वृको बहुः ॥")
पशुपत्यधिदेवतः । तद्भक्तः । इति मेदिनी । ते, २११ ॥ (क्ली, तन्त्रशास्त्रविशेषः । यथा, कूर्म्मपुराणे १४ अध्याये ।
"एवं सम्बोधितो रुद्रो माधवेन सुरारिणा ।
चकार मोहयाञ्चक्रे केशवोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"
अथर्व्ववेदान्तर्गतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि ।
"सर्व्वत्रात्मा पाशुपतं परब्रह्मावधूसकम् ॥")

पाशुपतव्रतं, क्ली, (पाशुपतं पशुपतिसम्बन्धि व्रतम् ।) पशुपतिव्रतविशेषः । यथा,—
"यथा पशुपतिर्नित्यं कृत्वा सर्व्वमिदं जगत् ।
न लिप्यते पुनः सोऽपि यो नित्यं व्रतमाचरेत् ॥
दृष्टजन्मकृतं पापं पूर्व्वजन्मकृतञ्च यत् ।
व्रतं पाशुपतं नाम कृत्वा हन्ति द्विजोत्तम ! ॥
द्वादश्यामेकभक्ताशी चतुर्दश्यामयाचितम् ।
चतुर्दश्यां तथा नक्तमुपवासं परेऽहनि ॥
गोदत्तमेव हैरण्यं रौप्यं ताम्रमथापि वा ।
सौवर्णं कारयेत् पद्मं गृह्याग्नौ हुत्वा पृथक् पृथक् ॥
तत्रैवोक्तेश्वरेशानीं शिवायाञ्च शिवस्य च ।
तत्प्रमाणं हरं कुर्य्यात्तौल्यं हेम्नश्चतुर्गुणैः ॥
रौप्यादष्टगुणं ताम्रं तद्वर्द्धं वापि कारयेत् ।
चारपत्रे समारोप्य वस्त्रोत्तरसुतन्तथा ॥
चतुर्दश्यामेकभक्तं दिवाञ्च नक्तमाचरेत् ।
कुर्य्यादयाचितं दर्शे पादशक्रव्रतञ्चरेत् ॥
गन्धपुष्पैः सुनैवेद्यैर्व्वस्त्राभरणदीपकैः ।
गङ्गाधरं समभ्यर्च्च्य प्रार्थयेत् प्रवरं वरम् ॥
गङ्गाधर ! महादेव ! सर्व्वलोकचराचर ! ।
यदि मे वर्त्तसे पूजितस्त्वञ्च शङ्कर ! ॥
शङ्कराय नमस्तुभ्यं सर्व्वपापहराय च ।
यथा यमं न पश्यामि तथा मे कुरु शङ्कर ! ॥
यममार्गे यथा शम्भो ! न पश्यामि कदाचन ।
[redacted] तथा मे कुरु शङ्कर ! ॥
गङ्गाधर ! वराधीश ! परात्परतर प्रभो ! ।
श्रीकण्ठ ! गौरीकान्तसुमाकान्त ! नमोऽस्तु ते ॥
संपूर्व्वेवंविधानेन प्रतिपत्तिथि रवौ ।
हैरण्यादीन् गोदधांच ब्राह्मणेभ्यो निवेदयेत् ॥
यथा सर्व्वं सर्व्वगः सर्व्वः सर्व्वत्रास्तु सर्व्वकृत् ।
न लिप्यसे विकुर्व्वाणस्तथा मां कुरु शङ्कर ! ॥
एवं श्रुत्वा नमस्कृत्य रुद्राणीञ्च यथोदितान् ।
गुर्व्वादिभ्यो द्विजेभ्यश्च शङ्करः प्रीयतामिति ॥
एवं व्रतमिदं कृत्वा हरं दद्याद्द्विजातये ।
यममार्गं महाघोरं न पश्यति कदाचन ॥
यः करोति व्रतेनैव सर्व्वपापप्रणाशनम् ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ॥
ब्रह्महत्यादिभिः पापैरगम्यागमनादिभिः ।
मुच्यते पातकेभ्योऽथ त्वभक्ष्यापेयजैः पुमान् ॥
यः करोति महाभाग ! दानं सर्व्वसुखावहम् ।
हत्वा पापान्यपीवापि स्वर्गलोकं स गच्छति ॥"
इति वह्निपुराणे पाशुपतव्रतदानाध्यायः ॥
(यथा च शिवपुराणे वायुसंहितायां पूर्व्वभागे २६ अध्याये ।
ऋषय ऊचुः ।
"भगवन् ! श्रोतुमिच्छामो व्रतं पाशुपतं परम् ।
ब्रह्मादयोऽपि यत् श्रुत्वा सर्व्वे पाशुपताः स्मृताः ॥
वायुरुवाच ।
रहस्यं वः प्रवक्ष्यामि सर्व्वपापविनाशनम् ।
व्रतं पाशुपतं श्रौतमथर्व्वशिरसि स्मृतम् ॥
कालाग्निशान्तौर्गमासी देयः शिवपरिग्रहः ।
क्षेत्रारामादिरम्यो वा प्रशस्तः शुभलक्षणः ॥
तत्र पूर्व्वं त्रयोदश्यां स्नातः सज्जलताद्विकः ।
अनुज्ञाप्य समाचार्य्यं संपूज्य प्रणिपत्य च ॥
पूजां वक्ष्यामिकीं कृत्वा शुक्लाम्बरधरः स्वयम् ।
शुक्लयज्ञोपवीती च शुक्लमाल्यानुलेपनः ॥
दर्भासने समासीनो दर्भमुष्टिं प्रगृह्य च ।
प्राणायामत्रयं कृत्वा प्राङ्मुखो वाप्युदङ्मुखः ॥
ध्यात्वा देवञ्च देवीञ्च तद्विज्ञापनकर्म्मणा ।
व्रतमेतत् करोमीति भवेत् संकल्प्य दीक्षितः ॥
यावच्छरीरपातं वा द्वादश्राब्दमथापि वा ।
तद्वर्द्धं वा तदर्द्धं वा मासद्वादशकन्तु वा ॥
तदर्द्धं वा तदर्द्धं वा मासमेकमथापि वा ।
दिनद्वादशकं वाथ दिनषट्कमथापि वा ॥
तदर्द्धं दिनमेकं वा व्रतसंकल्पनावधि ।
अग्निमाधाय विधिवद्धिरण्या होमकारणात् ॥
कृत्वाज्येन समिद्भिश्च चरुणा च यथाक्रमम् ।
पूर्णाहुतिः पुरस्तो भूयस्तत्तन्नाम्ना सुहुत्सुहुयात् ॥
जुहुयान्नृत्यगीतेन तैरेव समिदादिभिः ।
तत्तान्येतानि मन्त्रेण शुध्यन्तामित्यनुस्मरन् ॥
पञ्च भूतानि तन्मात्राः पञ्च कर्म्मेन्द्रियाणि च ।
ज्ञानकर्म्मविभेदेन पञ्च पञ्च विभाग्यतः ॥
खगादिधातवः सप्त प्रत्यं प्राणादिवायवः ।
मनोबुद्धिरहंख्यातिर्गुणाः प्रकृतिपूरुषौ ॥
रागो विद्या कला चैव नियतिः काल एव च ।
माया च शुद्धविद्या च महेश्वरसदाख्यौ ॥
[redacted] तत्तानि क्रमशो विदुः ।
मन्त्रेस्तु विरजैर्हुत्वा होतावौ विरजौ भवेत् ॥
अथ गोमयमादाय पिण्डीकृत्याभिमन्त्र्य च ।
न्यस्यात्मौ तच्च संरक्ष्य दिने तस्मिन् हविष्यभुक् ॥
प्रभाते तु चतुर्द्दश्यां स्नात्वा सर्व्वं पुरोदितम् ।
दिने तस्मिन्नितारम्भः कालशेषं समापयेत् ॥
प्रातःपर्व्वणि चाप्येवं स्नात्वा होमावसानतः ।
उपसंहृत्य रुद्राग्निं यज्ञीयाङ्गञ्च यत्नतः ॥
ततस्तु जटिलो मुण्डः शिखैकजट एव वा ।
भूत्वा स्नात्वा पुनर्नीलवस्त्रश्चेत् स्यादिगम्बरः ॥
अथ काषायवसनश्चर्म्मचीराम्बरोऽथवा ।
एकाम्बरो वल्कली वा भवेदृक्षी च मेखली ॥
प्रक्षाल्य चरणौ पश्चाद्विराचम्याग्निमग्रतः ।
संकल्पीत्य तङ्गत्वा विरजानलसम्भवम् ॥
अग्निरित्याभिमन्त्रैः षड्भिराधर्व्वणैः क्रमात् ।
विन्यस्याङ्गानि मूर्द्धादिचरणान्तञ्च संस्पृशेत् ॥
ततस्तेन क्रमेणैव समुद्धृत्य च भस्मना ।
सर्व्वाङ्गोद्धूलनं कुर्य्यात् प्रणवेन शिवेन वा ॥
ततश्चिपुण्ड्रं रचरेत्त्रियायुषसमाश्रयम् ।
शिवभावं समागम्य शिवयोगं समाचरेत् ॥
कुर्य्यात्त्रिसन्ध्यमप्येवमेतत् पाशुपतं व्रतम् ।
पूजनीयो महादेवो लिङ्गमूर्त्तिः सनातनः ॥
पद्ममष्टदलं हैमं नवरत्नैरलङ्कृतम् ।
कर्णिकाकेसरोपेतमासनं परिकल्पयेत् ॥
विभवे तद्भावे तु रक्तं सितमथापि वा ।
पद्मं तस्याप्यभावे तु केवलं भावनामयम् ॥
तत्पद्मकर्णिकामध्ये स्थाप्य लिङ्गं कनीयसम् ।
स्फाटिकं मौक्तिकोपेतं पूजयेद्वि ततः क्रमात् ॥
प्रतिष्ठाप्य विधानेन तस्मिन्नं स्नपनोदकम् ।
परिकल्पासनं मूर्त्तिं पञ्चवक्त्रप्रकारतः ॥
पञ्चगव्यादिभिः पूर्व्वैर्यथाविभवविस्तरैः ।
स्नापयेत् कलशैः पूर्व्वैः सहस्रादिषु सम्भवैः ॥
गन्धतोयैः सकर्पूरैश्चन्दनाद्यैः सकुङ्कुमैः ।
सवेदिकं समालिप्य लिङ्गं भूषणभूषितम् ॥
विल्वपत्रैश्च पद्मैश्च रक्तश्वेतैरथोत्पलैः ।
नीलोत्पलैस्तथाग्नेयैः पुष्पैस्तैस्तैः सुगन्धिभिः ॥
पुष्पैश्च ग्रथितैश्चित्रैर्दूर्व्वाद्यादिभिः ।
समभ्यर्च्च्य यथालाभं महापूजाविधानतः ॥
धूपं दीपं तथार्घ्यं नैवेद्यञ्च समादिशेत् ।
निवेदयित्वा विभवे कल्याणञ्च समाचरेत् ॥
दृष्टानि च विशिष्टानि न्यायेनोपार्जितानि च ।
सर्व्वद्रव्याणि देयानि व्रते तस्मिन् विशेषतः ॥
शैवपाशुपतव्रतानां संख्या साहस्रिकी मता ।
प्रत्येकमपरा संख्या शतमष्टोत्तरं द्विजाः ॥
तथापि च विशेषेण न त्वेतद्विद्यते पुनः ।
हैममेकं परं प्राहुः पद्मं पद्मसहस्रकात् ॥
नीलोत्पलादिष्वप्येतत्समानं विद्यते पुनः ।
पुण्यान्तरान्यनियमादृष्टयालाभं निवेदयेत् ॥
अष्टाङ्गमर्घ्यमुत्तमं धूपालेपौ विशेषतः ।
स्नात्वाशुक्लमघोरास्त्रे वक्त्रे सद्ये मनःशिखाम् ॥
चन्दनं वामदेवास्त्रे हरितालञ्च पौरुषे ।
ईशाने भस्मितं किञ्चिदालेपनमितीदृशम् ॥

न धूप इति मन्यन्ते धूपान्तरविधानत: ।
सितागुरुमघोराख्ये सुखे ज्ञाणागुरुं पुन: ॥
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं सुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषत: ॥
शर्करामधुकर्पूरकपिलाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्तिराख्याता देया दीपावली तत: ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमत:परम् ॥
प्रथमावरणे पूज्यौ क्रमाद्वेरम्बवक्त्रकौ ।
ब्रह्माङ्गानि ततश्चैव प्रथमावरणेऽर्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाद्यास्त्रवर्गिण: ।
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्तय: ॥
महादेवादयश्चान्त्र तथैकादशमूर्तय: ।
चतुर्थावरणे पूज्या: सर्व्व एव गणेश्वरा: ॥
बहिरेव तु पद्मस्य पञ्चमावरणे क्रमात् ।
दश दिक्पतय: पूज्या: साङ्गा: सानुचरास्तथा ॥
ब्रह्मणो मानसा: पुत्रा: सर्व्वेऽप्यूर्द्ध्वज्योतिषाङ्गजा: ।
सर्व्वे देवाश्च देवाश्च सर्व्वा: सर्व्वेऽपि खेचरा: ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो मुक्तत: सर्व्वे पञ्चमे मातरस्तथा ॥
क्षेत्रपालश्च सगण: सर्व्वे चेतश्चराचरम् ।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साङ्गं सवाहनं कृत्वं हविर्भक्ष्यं निवेदयेत् ।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अनुज्ञाप्य च भूयोऽपि नानापुष्पविभूषणै: ।
नीराजनान्ते विघ्नेशं पूजाशेषं समापयेत् ॥
चन्दनाद्यानुलेपांश्च धूपनीये समर्पयेत् ।
आर्द्रां वृषोचितं कृत्वं तत्तल्लब्धमनुरूपत: ॥
ज्ञात्वा च कारयित्वा च कृत्वा च प्रतिपूजनम् ।
स्तोत्रं जपोहनं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च ज्ञात्वात्मानं समर्पयेत् ।
तत: पुरस्ताद्देवस्य गुरुपीठे च पूजयेत् ॥
दत्त्वार्घ्यमग्रौ पुष्पाणि देवमुद्वास्य लिङ्गत: ।
अर्घेऽग्निं मुसंरक्ष्य उद्वास्य च तमप्युत ॥
प्रत्यहं जप दत्त्वेवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्पाशुपं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद् वा शिवालये ।
संपूज्य च गुरुन्सम्यान् व्रतिनश्च विशेषत: ॥
भक्तान् द्विजांश्च शक्त्यैवं दीनानाथांश्च तोषयेत् ।
स्वयं चानशनप्राय: फलमूलाशनोऽथवा ॥
पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं युक्ताशनो नित्यं भूशय्याशिरत: शुचि: ॥
अक्षशायी क्षये शायी चीराजिनधरोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अकैवारे तथार्द्रायां पञ्चदश्यां च पर्व्वयो: ।
अष्टम्यां चतुर्द्दश्यां शक्तस्तूपवसेदपि ॥
पापस्कन्दपतितोद्धारस्तिकान्त्यजपूर्व्वकाम् ।
सर्व्वयेत्प्रयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशील: सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च तपोध्यानरत: सदा ॥
कुर्य्यान्नित्यमज्ञानं भक्तज्ञानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥

बहुनात्र किमुक्तेन नाचरेदग्निधं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभि: ।
आसमाप्तेर्व्रतस्यैवमाचरेन्न प्रमादत: ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्याथ समासत: ॥
प्रतिमादि विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्येष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
भाद्रे भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विधिवल्लोमेदकमयं शुभम् ।
कार्त्तिक्यां वै हेमं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्परागमयं पौषे माघे मुक्तामयं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्वत्त्रयोऽथवा ॥
सर्व्वमासेषु रत्नानामलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं श्रैलजमेव वा ॥
स्फाटिकं वा यथालाभं क्षणिकं चान्यदेव वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितमेव वा ।
ज्ञात्वा वैशेषिकीं पूजां कृत्वा चैव यथा पुरा ॥
संपूज्य च सदाचार्य्यं व्रतिनञ्च विशेषत: ।
दैशिकेनाभ्यनुज्ञात: प्राक्सुखो वाप्युदक्सुख: ॥
दर्भासनो दर्भपाणि: प्राणापानौ नियम्य च ।
जपित्वा मूर्त्तितो मूलं ध्यात्वा ग्राह्यं शिवात्मकम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलि: ।
वसुतत्त्वज्ञामि भगवन् ! व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत् ।
ततो दक्षजटाचीरमेखलाद्यपि चोत्सृजेत् ॥
पुनराचम्य विधिवत् पश्चाच्चरुमुदीरयेत् ।
य: ज्ञात्वाग्निकीं दीक्षामादेहान्तमनाकुल: ॥
व्रतमेतत् प्रकुर्वीत स तु वै लौकिक: स्मृत: ।
सोऽव्याश्रमी च विज्ञेयो महापाशुपलक्षया ॥
स एव तपसां श्रेष्ठ: स एव च महाव्रती ।
न तेन सदृश: कश्चिन् ज्ञातज्ञातो सुरासुरे ॥
यतिर्यो लौकिको ज्ञातस्तमाहुर्लौकिकोत्तमम् ।
योऽनन्यादग्राहं वा व्रतमेतत् समाचरेत् ॥
सोऽपि लौकिकतुल्य: स्यात्तीव्रव्रतसमन्वयात् ।
हुत्वाग्नौ यश्चरेदेतद्व्रतं व्रतपरायण: ॥
दिव्यैकदिवसं वापि स च कश्चन लौकिक: ।
ज्ञात्वमित्येव निष्कामो यश्चरेद् व्रततुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृश: क्वचित् ।
भक्तच्छन्नो द्विजो विद्वान् महापातकसम्भवै: ॥
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशय: ।
रुद्रामर्षेश्वरं वीर्य्यं तद्वत्त्र परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भक्तसंयुत: ।
भक्तविरुद्ध दत्त्वन्ने दोषा भक्तविसङ्गमात् ॥
भक्तज्ञानविशुद्धात्मा भक्तनिष्ठ इति स्मृत: ।
भक्तानां दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्डक: ॥
भक्तघ्नायी च पुरुषो भक्तकल्मषभक्षणात् ।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम् ।
व्रती च भक्तानां ज्ञात: स्वयं देवो महेश्वर: ॥

परमाख्यञ्च धैर्य्यानां भक्तैस्तत्पारमेश्वरम् ।
धौम्याग्रजस्य तपसि ज्ञायदो यन्निवारिता: ॥
तस्मात्सर्व्वप्रयत्नेन ज्ञात्वा पाशुपतं व्रतम् ।
धनवद्भक्त संयुक्त भक्तज्ञानरतो भवेत् ॥"
इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनविंशोऽध्याय: ॥ * ॥)

पाशुपताख्यं, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपते: मूलास्त्रम् । तस्य स्वरूपं यथा,—
"गजाननोऽपि सञ्चिन्त्य यत्तत् पाशुपतं परम् ।
महारूपं महाकायं युगान्ताग्निसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोराख्यत्रैकेयं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिधियमाणं शिवाङ्गजम् ।
वेणुवीणाशङ्खघण्टं डमरुकारावसंकुलम् ॥
शिवारावं भयात्रासि शवहाडवचेष्टितम् ।
उल्कादण्डज्वलज्ज्वालं नीलाम्बुदसदृशम् ॥
ललज्जेखलनागेन्द्रं गजचर्म्माम्बरावृतम् ।
केकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारिणम् ॥
यत्समानं समस्तिं वैलोक्यं सचराचरम् ।
पुरतो विघ्ननाशस्य वेलिङ्गानं व्यवस्थितम् ॥"
इति देवीपुराणम् ॥

पाशुपाल्यं, क्ली, (पशुपालस्य भाव: कर्म्म वा । पशुपाल + ष्यञ् ।) वैश्यवृत्ति: । पशून् गोमहिष्यादीन् पालयति पशुपाल: तस्य भाव: कर्म्म वा इत्यर्थे ष्याप्रत्ययनिष्पन्नम् । इत्यमरभरतौ । (यथा, मार्कण्डेये । २८ । ६ ।
"दानमध्ययनं यज्ञो वैश्यस्यापि विधेव स: ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥")

पाश्चात्य:, त्रि, (पश्चात् + "दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ६८ । इति त्यक् ।) पश्चाद्भव: । (यथा, देवीभागवते । १ । १७ । ६६ ।
"पाश्चात्यं यामिनीयामं ध्यानमेवान्वपद्यत ।
स्नात्वा प्रात: क्रिया: कृत्वा पुनरार्क्षे समाहित: ॥")
पश्चिमदेशजात: । इति मुग्धबोधव्याकरणम् ॥
(यथा, महाभारते । १ । १२१ । ११ ।
"स विजित्य महीपाला च भूपतीन् राजसत्तम: ।
प्राप्याशुहरीयान् पाश्चात्यान् दाक्षिणात्यानकाल यत् ॥")

पाश्चात्याकरसम्भव, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकरे सम्भव उत्पत्तिर्यस्य ।) पाश्चात्याकरजम् । तत्पर्य्याय: । रोमकम् २ रामजम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाशानां समूह: । पाश + "पाशादिभ्यो य: ।" ४ । २ । ४८ । इति य: ।) पाशसमूह: । इत्यमर: । १ । २ । ४३ ॥

पाषक:, पुं, (पषति बध्नातीव चरणौ । पष बन्धे + ण्वुल् ।) पादाभरणविशेष: । पायजी इति भाषा । यथा,—
"रत्नपाषकपट्टैश्च विराजितपदाम्बुजै: ॥"
इति [illegible]

पाषण्डः, पुं, (पापं खण्डयति दर्शनसंसर्गादिना दूरादपनयतीति। षण्ड खण्डने + अण्कर्म्मणि। षण्डोदरादित्वात् साधुः। यद्वा, पाति रक्षति दुष्कृतेभ्य इति। पा + किप्। पा वेदधर्म्मेक्षं षण्डयति खण्डयतीति। षण्ड + अच्। यदुक्तम्।

"पाखण्डाश्च त्रयीधर्म्मः पाशुल्येन निगद्यते।
तं ये (खं)डयन्ति ते पाषण्डाः खण्डेन हेतुना॥
नानाव्रतधरा नानावेशाः पाषण्डिनो मताः॥")

वेदविरुद्धाचारवान् सर्व्ववर्णचिह्नधारी। बौद्धजैनकादिः। इति भरतः॥ तत्पर्य्यायः। सर्व्वलिङ्गी २। इत्यमरः। २।७।३५॥ कौलिकः ३ पाषण्डिकः ४। इति शब्दरत्नावली॥ * ॥ पाषण्डादिसम्भाषणे दोषो यथा,—

"तस्मात् पाषण्डिभिः पापैराचारं कर्म्मनं त्यजेत्।
विप्रोषितः क्रियाकाले यस्मादौ चापि दीक्षितः॥
क्रियाङ्गानि यै यस्य मासमेकं प्रजायते।
तस्यावलोकनात् सूर्य्यं पश्येत् मतिमान् नरः॥
किं पुनर्य्यैस्तु सन्दृष्टा त्रयी सर्व्वात्मना द्विज!।
पाषण्डभोजिभिः पापैर्व्वेदबाह्यविरोधिभिः॥
पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान्।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥
दूरापास्तस्तु संसर्गः सङ्गाख्या वापि पापिभिः।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत्॥
एते मयास्तवाख्याता दृष्टा आद्योपघातकाः।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति॥
एते पाषण्डिनामानो लोकानत्र बालबुद्धयः।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम्॥
पुंसां जटाधरत्वमौण्ड्यवतां वृथैव
मौद्गाग्निनामखिलमौञ्जनिराजतानाम्।
तोयप्रदानपिठरपिक्कवह्निधूतानां
सम्भाषणादपि नरा नरकं प्रयान्ति॥"

इति विष्णुपुराणे ३ अंशे १८ अध्यायः॥ * ॥

पाषण्डादीनां लक्षणं यथा,—

"अतः स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निगद्यते।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः॥
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्॥
तद्धानृ वैडालव्रतिकः॥
प्रियं वक्ति पुरोऽत्यन्तं विप्रियं कुरुते भृशम्।
अत्तापराधवेषश्च शठोऽयं कथितो बुधैः॥
वन्दैकहेतुभिर्यः स्वकर्म्मस्थ सहैतुकः।
अर्थागृहिर्नैहतिकः स्वार्थसाधनतत्परः॥
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः॥" इति। एतद्टीकायां नामी॥ * ॥ अपि च।

सदाशिव उवाच।

"येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः।
नारायणाङ्गजन्मानं ते वै पाषण्डिनस्तथा॥
कषायभस्माक्षिधरा ये श्रुवैदिकलिङ्गिनः।
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा॥
[illegible]

रचिता ये द्विजा देवि! ते वै पाषण्डिनो मताः॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः।
स पाषण्डीति विज्ञेयः सर्व्वलोकेषु गर्हितः॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मस्वदेवतम्॥
उरस्य देवताश्चैव जुहोति च ददाति च।
स पाषण्डीति विज्ञेयः स्नातको वापि कर्म्मसु॥
स्नातकत्वात् क्रियते येस्तु कर्म्म वेदोदितं महत्।
विना वै भगवत्प्रोक्ता ते वै पाषण्डिनः स्मृताः॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदेवतैः।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा॥
अनास्था क्रियते येस्तु मनोवाक्कायकर्म्मभिः।
वासुदेवे न जानाति स पाषण्डी भवेत् द्विजः॥
हरेर्नामैकमन्त्राढ्या लोकाः सद्भिर्विवर्ज्जिताः।
यदि वर्णाश्रमाढ्या ये ते वै पाषण्डिनः स्मृताः॥
वर्णानां गुरवो नित्यं शिवे यद्यप्यवैष्णवाः।
भगवद्धर्म्मरहिता वैष्णवादिविनिन्दकाः॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः।
असत्प्रतिग्रहरता देवला ग्रामयाजकाः॥
भ्रष्टाचाराश्रुथा वाग्मा नानाविबुधपूजकाः।
देवनोच्छिष्टभुक्त्यादिभोजिनः शूद्रवत्क्रियाः॥
विविधासत्कर्म्मरता भक्ष्याभक्ष्यविचारिणः।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा॥
एवंविधाः पारदारिकाद्या येऽत्र सुभाषने!।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः॥
वर्णाश्रमाढ्या ये मर्त्याः स्वस्वधर्म्मविवर्ज्जिताः।
ते वै पाषण्डिनो देवि! नारायणबहिर्मुखाः॥
सर्व्वाग्निनो द्विजा येऽपि सर्व्वक्रियाजडतया।
षड्वेदाचाररहितास्ते वै पाषण्डिनो मताः॥
ये त्वसद्भक्ष्यपानादिरता लोका निरन्तरम्।
प्रिये! पाषण्डिनो ह्येया इह ते नात्र संशयः॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः।
अश्वत्थतुलसीनीरशङ्खादिषु महागुरौ॥
लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने!।
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः॥
रुद्राक्षेक्षाक्षभद्राक्षस्फाटिकाद्यादिधारिणः।
जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये!॥
अग्निजीवी मसीजीवी धावकः पाचकस्तथा।
एते पाषण्डिनो विप्रा मादकव्रयभोजिनः॥
देवि! कार्य्यादयो भक्ता अनन्यशरणास्तु ये।
पाषण्डसङ्गं न कुर्य्युस्तद्वदे पानभोजने॥
यदि देववशाल्लोभान्मोहात्तत्सङ्गमादिकम्।
ततस्तूर्णं जलस्नानं चक्रुस्तत्सङ्गमादिकम्॥
तत्पानभोजनालापसङ्गालिङ्गनतोऽचिरात्।
पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा॥
किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः।
असदाचरणात्ते स्युरसदा पाषण्डिनः स्मृताः॥
एतद्भोजनपानादिकर्म्मभिर्वैष्णवा जगाः।
पाषण्डिनस्तथा स्वर्णं जटाभस्मादिधारिणः॥"

इति पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४२ अः॥

तस्य तात्पर्य्यं यथा,—

"अज पाषण्डसंसर्गं सङ्गं भज सतां सदा।

कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः॥ * ॥

तस्य राष्ट्राहहिष्कर्त्तव्यता यथा,—

"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान्।
विकर्म्मस्थान् शौण्डिकांश्च क्षिप्रं निर्व्वासयेत् पुरात्॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्म्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः॥"

इति मानवे ९ अध्यायः॥

अपि च।

"आकुष्ठांश्च तथा शुल्बान् कृतार्थांतस्त्रभाषिणः।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत्॥"

इति युक्तिकल्पतरुः॥

पाषण्डकः, पुं, (पाषण्ड एव। स्वार्थे कन्।) पाषण्डः। इति शब्दरत्नावली॥

पाषण्डी, [न्] पुं, (पां त्रयीधर्म्मं षण्डयतीति। पा + षण्ड + णिनिः।) पाषण्डः। इति जटाधरः॥ (यथा, मनुः। ४। ३०।

"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान्।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्॥")

पाषाणः, पुं, (पर्व्वति पीड्यतेऽनेनेति। पर्व पीड़ने + बाहुलकात् आनच्। "पर्वेडिच।" २। ६०। इत्युज्ज्वलदत्तोक्त्या स च णित्।) प्रस्तरः। तत्पर्य्यायः। श्मा २ उपल ३ अश्मा ४ शिला ५ दृषत् ६। इत्यमरः। २।३।४॥ दृषत् ७। इति भरतः॥ प्रस्तरः ८ पाराडुकः ९ पाराडीटः १० लक्षरः ११ काषकः १२। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ७। २१। ५४।

"गतेऽथ नारदे कंसः समाकूयाथ बालकम्।
पाषाणे पोथयामास सुखं प्राप च मन्दधीः॥")

पाषाणादिनिर्म्मितत्वात् देवतापतिमादि। यथा, आह्निकसूत्रावल्याम्। ६८६।

"पूजां विना प्रतिष्ठा नास्ति न मन्त्रं विना प्रतिष्ठा च।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम्॥")

पाषाणगर्भः, पुं, हृद्रुक्वह्निजन्तुदरोगविशेषः। तल्लक्षणमाह।

"वातश्लेष्मसमुद्भूतः क्रमशो हृदुपसन्धिजः।
स्थिरो मन्दरुजः किञ्चो ज्ञेयः पाषाणगर्भकः॥"

स्थिरः कठिनः॥ * ॥ तच्चिकित्सा यथा,—

"पाषाणगर्भं पूर्व्वं स्नेहयेत् कुशलो भिषक्।
ततः पत्रसिकाप्रोक्तैः कल्कैरेनं प्रलेपयेत्॥
वातश्लेष्मिकगुल्मघ्नैः कल्कैरस्मै च लेपयेत्।
परिपाकगतं ज्ञात्वा व्रणवत्तमुपाचरेत्॥
जलौकाभिर्हृते रक्ते स शाम्यति विनौषधम्।
एततूर्ध्वजेषु बहुषु प्रेक्षितं लिखितं ततः॥"

इति भावप्रकाशः॥

पाषाणचतुर्दशी, स्त्री, (पाषाणसाध्या पाषाणवत्पिष्टकभोजनसाध्या चतुर्दशी।) कार्त्तिकराशिस्थरविकशुक्लपक्षीयचतुर्दशी। यथा, भविष्ये।

पिकरा

"वृश्चिके शुक्लपक्षे तु या पाषाणचतुर्दशी।
तस्यामाराधयेद्गौरीं नक्तं पाषाणभोजनैः॥
पाषाणभोजनैः पाषाणाकारपिष्टकभोजनैः।"
इति तिथ्यादितत्त्वम्॥

पाषाणदारकः, पुं, (दारयति विदारयतीति। दृ+णिच्+ण्वुल्। पाषाणस्य दारकः।) टङ्कः। इति हेमचन्द्रः। ३। ५८३॥

पाषाणदारवः, पुं, (दारयतीति। दृ+णिच्+ण्युः। पाषाणस्य दारवो विदारकः।) टङ्कः। इत्यमरः। २। १०। ३४॥

पाषाणभेदनः, पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+ल्युः।) वृक्षविशेषः। हाड़जुड़ी इति भाषा। तत्पर्य्यायः। अश्मघ्नः २ शिलाभेदः ३ अश्मभेदकः ४ श्वेता ५ उपलभेदी ६ पलभित् ७ शिलागर्भजः ८। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। मेहहृद्दाहमूत्रकृच्छ्राश्मरीनाशित्वम्। शीतलत्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"पाषाणभेदकोऽश्मघ्नो गिरिभिद्विश्मयोजनी।
अश्मभेदो हिमस्निग्धः कषायो वस्तिशोधनः॥
भेदनो वृष्ण्य दोषाग्नीगुल्मकृच्छ्राश्महृद्रुजः।
योनिरोगान् प्रमेहांश्च प्लीहाशूलव्रणानि च॥"
इति भावप्रकाशः॥

पाषाणभेदी, [न्] पुं, (पाषाणं अश्मरीं भिनत्तीति। भिद्+णिनिः।) वृक्षविशेषः। पाथरचुर इति भाषा। तत्पर्य्यायः। अश्मभेदः २ शिलाभेदः ३ अश्मभित् ४। इति रत्नमाला॥ (अश्मभेदशब्दे ज्ञातव्यमस्य विवरणम्॥)

पाषाणी, स्त्री, (पाषाण+अस्त्यर्थे ङीष्।) क्षुद्रपाषाणः। स तु परिसापकविशेषः। वाटखारा इति भाषा। तत्पर्य्यायः। पृषाकरा २। इति शब्दचन्द्रिका॥

पाहातः, पुं, (पाति रक्षति दुष्कृतेभ्य इति। पा+क्विप्। पां वर्षीधर्म्मं हन्ति गच्छतीति। हन् गतौ+डः। पाहं ब्रह्माणं अतति व्याप्नोतीति। अच्।) ब्रह्मराक्षसः। इति शब्दचन्द्रिका॥

पि, शु गतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-अनिट्।) शु, पियति। इति दुर्गादासः॥

पिक, पुं, (अपि कायति शब्दायते इति। अपि+कै+"आतश्चोपसर्गे।" ३। १। १३५। इति कः। अपेरकारलोपः।) कोकिलः। इत्यमरः॥ २। ५। १८। (यथा,—
"पिक! विधुरस्य हन्ति यं तमखमपि चन्द्रविरोधिकूजितैः।
इति तयोरनिशं हि विरोधिना कथमहो रमता मम तापने॥"
दण्डिनः॥)

पिकप्रिया, स्त्री, (पिकानां प्रिया।) मञ्जरीवृक्षः। इति राजनिर्घण्टः॥

पिकबन्धुः, पुं, (पिकानां बन्धुरिव।) आम्रवृक्षः। इति त्रिकाण्डशेषः॥

पिकरागः, पुं, (पिकानां रागोऽनुरागो यत्र।) आम्रवृक्षः। इति राजनिर्घण्टः॥

पिङ्गलः

पिकवल्लभः, पुं, (पिकानां वल्लभः।) आम्रवृक्षः। इति भावप्रकाशः॥ (शुभाचास्य आम्रशब्दे ज्ञातव्या॥)

पिकाक्षः, पुं, (पिकस्य अक्षि लोचनं तद्वत् वर्णो यस्य। समासे अच्।) रोचनी। इति शब्दचन्द्रिका॥

पिकाक्षः, पुं, (पिकस्याक्षमिव अक्षं यस्य।) पक्षिविशेषः। इति शब्दचन्द्रिका॥

पिकागन्धः, पुं, (पिकागमागन्धो यस्मिन्।) वसन्तकालः। इति राजनिर्घण्टः॥

पिकी, स्त्री, (पिक+स्त्रियां ङीष्।) कोकिला। इति राजनिर्घण्टः॥

पिकेक्षणा, स्त्री, (पिकस्य पुंस्त्वं लोचनं तद्वत् वर्णो यस्याः।) कोकिलाक्षः। इति राजनिर्घण्टः॥ कोकिलाक्षचक्षुस्तुल्याक्षचक्षुर्युक्ता च॥

पिक्कः, पुं, (पिक इत्यव्यक्तशब्देन कायति शब्दायते इति। कै+कः। पिक इव कायतीति। पृषोदरादित्वात् साधुरित्येके।) क्षत्रियशावकः। इति शब्दमाला॥

पिङ्गं, क्ली, (पिङ्गतीति। पिङ्गि वर्णे+अच्। ह्रस्वादित्वात् कुत्वम्।) बालकः। इति मेदिनी। गे, १२॥ हरितालम्। इति राजनिर्घण्टः॥

पिङ्गः, पुं, (पिङ्गि वर्णे+अच्। कुत्वञ्च।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ (यथा, महाभारते। १। १२३। ३२।
"पद्मपत्राक्षः पिङ्गलेक्षणः प्रज्वलन्निव॥")
मूषकः। इति राजनिर्घण्टः॥

पिङ्गकपिङ्गा, स्त्री, (पिङ्गा कपिङ्गा च। वर्णो वर्णेनेति समासः।) तैलपायिका। इति हेमचन्द्रः। ४। २०३॥

पिङ्गचक्षुः, [स्] पुं, (पिङ्गे चक्षुषी यस्य।) कुम्भीरः। इति हेमचन्द्रः। ४। ४९८॥

पिङ्गजटः, पुं, (पिङ्गा पिङ्गलवर्णा जटा यस्य।) शिवः। इति हेमचन्द्रः। २। ११३॥

पिङ्गलं, क्ली, (पिङ्गं लातीति। ला+कः।) रीतिः। इति राजनिर्घण्टः॥

पिङ्गलः, पुं, (पिङ्गो वर्णोऽस्यास्तीति। पिङ्ग+"सिध्मादिभ्यश्च।" ५। २। ९७। इति लच्।) नीलपीतमिश्रितवर्णः। तत्पर्य्यायः। कडारः २ कपिलः ३ पिङ्गः ४ पिङ्गाक्षः ५ कहुः ६। तद्वति, त्रि। इत्यमरः। १। ५। १६॥ केचित्तु हयं हयं पर्य्यायमाहुः। अत्र नीलपीतः कपिलः। रोचनाभः पिङ्गाक्षः। कनकपिङ्गलः कहुः। इति भूरिप्रयोगः॥
"पिङ्गाक्षो रोचना प्राक्षुः कहुः कनकपिङ्गलः।"
इति नाममाला॥
"पिङ्गदीपशिखाभः स्यात् पिङ्गाक्षः पद्मधूलिवत्।
पीतनीलहरिद्रक्तः कडारस्त्वग्वदिङ्गितैः॥
अयस्तद्विल्वः पीताक्षः कपिलो रोचनाच्छविः॥
इत्यत्र भेदोऽपि दृश्यते। अक्षभेदत्वादिहावौ गाढतः।" इति तट्टीकायां भरतः॥ *॥ नागभेदः। (यथा महाभारते। १। ३५। ६।

पिङ्गला

"निहागको वैमशुङ्गो नहुषः पिङ्गलस्तथा।")
वृक्षः। चक्षांसुपारिपार्श्विकः। निधिभेदः। कपिः। अग्निः। इति मेदिनी। ले, ११३॥ सुविविग्नेषः। (यथा, महाभारते। १। ५३। ६।
"अजाभवत् साङ्गरवो अथर्युश्चापि पिङ्गलः॥")
नकुलः। स्थावरविषविशेषः। इति हेमचन्द्रः। ४। १४५॥ मुद्गोलूकः। इति राजनिर्घण्टः॥ (यक्षविशेषः। यथा, महाभारते। ३। २३०। ५२।
"पिङ्गलो नाम यक्षेन्द्रो लोकस्यानन्ददायकः॥")
पर्व्वतविशेषः। इति ब्रह्माण्डपुराणम्॥) प्रभवादिषष्टिवर्षाणामर्गलैकपञ्चाशत्तमवर्षः। यथा,
"देशभङ्गोऽथ दुर्भिक्षं समासात् कथयाम्यहम्।
पिङ्गले चारुपक्षाक्षि! दुर्भिक्षं नर्मदातटे॥"
इति ज्योतिस्तत्त्वम्॥ *॥
पिङ्गलाचार्य्यकृतच्छन्दोग्रन्थविशेषः। यथा,—
"जो विविहमत्तसायरपारं पत्तो विविमलमइ पिंगलम्।
पढमं भासतरङ्गो णाओसो पिङ्गलो जयइ॥"
अस्य व्याख्या।
"अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्य्यस्य स्तुतिरूपं मङ्गलं निर्विघ्नग्रन्थपरिसमाप्तये ग्रन्थारम्भं करोति। विविधा नानाप्रकारकविन्यासविशिष्टा भाषा यत्र तद्विविधभाषं छन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात् भाषा एव तरङ्गा यस्य। प्राकृते दुरूहता तेन भाषयैव छन्दःशास्त्रसूत्राणि व्याख्यायन्ते। केचित्तु लघुगुरुरूपा या विविधा भाषा सैव सागरः तत्पारं प्राप्तः अपिरवधारणे। विमलया मत्या हेला यत्र तद्यथा स्यात् तिर्म्मलबुद्ध्या हेलयैव पारं गत इत्यर्थः। प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमित्यवगम्यते। अर्थान्तरन्यासेनैव ज्ञाप्यते यो विविधमात्राभिः सागरपारं प्राप्तः विः पक्षी अर्थात्गरुडः तस्य विमलमतौ हेला यत्र तत् यथा स्यात् भाषा अनुनयवाक्यैव नौर्यस्य ईदृशो नागो जयति। इयं हि श्रूयते भोक्तुमुद्यतं गरुडं दृष्ट्वा सकौशलं सविनयं तमुवाच भो गरुड़ मनेदं कौशलं पश्य यत्तेकवारलिखितं मया लिख्यते तदा मां भक्ष इत्युक्त्वा सागरतीरं गरुत्विग्रत्यग्रपर्य्यन्तं प्रसार्य्य प्रदर्श्य तमुद्यं प्रविवेश गरुड़ोऽपि वक्रनां शुद्धलेख तच्च मत्वा तद्दोषाद्विरक्तमुखाद्यं बुद्धिगौरवं यस्य अतएव जयति उत्कर्षेण वर्त्तते तं प्रति प्रथमोऽयमिति ज्ञाप्यते अथवा गाथायां भगवोपन्यासो मङ्गलार्थः प्रथमं भगवोदात्तीनयोर्भगणजगणयोर्योगोऽशुचिनोऽपि कथमित्यवहितैर्भाव्यम्।" इति पिङ्गलच्छन्दोवृत्तौ च॥

पिङ्गललोहं, क्ली, (पिङ्गलं लोहमिति नित्यकर्म्मधारयः।) पित्तलम्। इति राजनिर्घण्टः॥

पिङ्गला, स्त्री, (पिङ्गल+टाप्।) वामनाड्यधिष्ठितदक्षिणनासिका स्त्री। इत्यमरः। १। ३। ४॥ कुलटस्य करिण्यौ। वेश्याविशेषः। इति मेदिनी। ले, ११७॥ तस्या उपाख्यानं यथा—

"पिङ्गला नाम वेश्याभीद्विदेहनगरे पुरा ।
तस्या मे घ्रियमाणं किञ्चिन्निबोध वृषनन्दन ! ॥
सा स्वैरिण्येकदा कान्तं सङ्केत उपनेष्यती ।
अभूत् काले बहिर्द्वारि विभ्रती रूपमुत्तमम् ॥
मार्ग आगच्छतो वीक्ष्य पुरुषान् पुरुषर्षभ ! ।
तान् शुल्कदान् वित्तवतः कान्तान् मेनेऽर्थ-
कामुका ॥
आगतेष्वपयातेषु सा सङ्केतोपजीविनी ।
अन्यतो वित्तवान् कोऽपि मामुपैष्यति भूरिदः ॥
एवं दुराशया ध्वस्तनिद्रा दौर्बल्यलम्बिनी ।
निर्गच्छन्ती प्रविशती निशीथं समपद्यत ॥
तस्या वित्ताशया शुष्यद्वक्त्राया दीनचेतसः ।
निर्वेदः परमो जज्ञे चिन्ताहेतुः सुखावहः ॥
तस्या निश्चिन्तचित्ताया गीतं शृणु यथा मम ॥
निर्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ।
न ह्यङ्गाजातनिर्वेदो देहबन्धं जिहासति ॥
पिङ्गलोवाच ।
अहो मे मोहविततिं पश्यतां विजितात्मनः ।
या कान्तादसतः कामं कामये येन याचिता ॥
सन्तं समीपे रमणं रतिप्रदं
वित्तप्रदं नित्यमिमं विहाय ।
अकामदं दुःखभयाधिशोक-
मोहप्रदं तुच्छमहं भजेऽज्ञा ॥
अहो मयात्मा परितापितो वृथा
सात्वित्यवृत्तात्तविगर्ह्यवार्तया ।
स्त्रैणात्परादर्थलवोऽनुशोच्यात्
क्षोभेण वित्तं रतिमात्मनेच्छतो ॥
यदस्थिभिर्निर्मितवंशवंश्य-
स्थूणं त्वचा रोमनखैः पिनद्धम् ।
क्षरन्नवद्वारमगारमेतद्-
विण्मूत्रपूर्णं मदुपैति कान्या ॥
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः ।
यान्यमिच्छत्यसत्यस्मादात्मदात् काममच्युतात् ॥
सुहृत् प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ।
तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ॥
कियत् प्रियं ते सभजन् कामा ये कामदा नराः ।
आद्यन्तवन्तो भार्यायाः देवा वा कालविद्रुताः ॥
ननं मे भगवान् प्रीतो विष्णुः केनापि कर्मणा ।
निर्वेदोऽयं दुराशाया यन्मे आशः सुखावहः ॥
मैवं स्युर्मन्दभाग्यायाः क्लेशा निर्वेदहेतवः ।
येनानुबन्धं निर्हृत्य पुरुषः शमसञ्जतः ॥
तेनोपकृतमादाय शिरसा ग्राम्यसङ्गताः ।
अहो दुराशाः पुरुषं ब्रजामि तमधीश्वरम् ॥
सन्तुष्टा श्रद्दधत्येतदयथालाभेन जीवती ।
विहरामि तेनाहमात्मना रमणेन वै ॥
नैनं आरकूपे पतितं विषयैर्मुषितेक्षणम् ।
यक्षं कालाहिनात्तानं कोऽत्यक्षातुमधीश्वरः ॥
आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ॥
श्रीब्राह्मण उवाच ।
एवं व्यवसितमतिर्दुराशां कान्ततर्षजाम् ।
छित्त्वोपशममास्थाय शय्यामुपविवेश सा ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
यथा संछिद्य कान्ताशां सुखं सुष्वाप पिङ्गला ॥"
इति श्रीभागवते ११ स्कन्धे श्रीभगवदुद्धव-
संवादे अष्टमेऽध्याये ।२२—४३ ॥ * ॥
कर्णिका । नाड़ीविशेषः । इति हेमचन्द्रः ॥
पक्षिभेदः । राजनीतिः । इति राजनिर्घण्टः ॥
घ्रियमाणपाठस्तु । इति रत्नमाला ॥ * ॥
अथ पिङ्गलादिनाड़ीनिरूपणम् ।
"दक्षिणाक्षिः स्मृतः सूर्य्यो वामभागो निशाकरः ।
नाड़ीरेषु विदुस्तासु मुख्यास्तिस्रः प्रकीर्त्तिताः ॥
इड़ा वामे तनोर्भागे सुषुम्णा पिङ्गला परे ।
मध्या तासवपि नाड़ी स्यादग्नीसोमस्वरूपिणी ॥"
"अञ्चता वामवृक्काधःस्था धनुर्वक्रा वामनासा-
पर्य्यन्तं गता एवं पिङ्गला दक्षिणवृक्काधःस्था
धनुर्वक्रा दक्षिणनासान्तं गता पृष्ठवंशाश्रिता
सुषुम्णा इत्यर्थः ।" इति सारदातिलकम् ॥
"नाड़ीनां संवहो देवि ! कञ्जयोनिः खगाग्रवत् ।
तत्र नाड्यः समुत्पन्नाः सहस्राणां द्विसप्ततिः ॥"
कञ्जस्य पद्मस्य योनिरुत्पत्तिस्थानं नालूकमिति
यावत् ।
"प्रधानाः प्राणवाहिन्यो भूयस्तत्र दश स्मृताः ।
इड़ा च पिङ्गला चैव सुषुम्णा च त्रयीमयी ॥
गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी ।
अलम्बुषा कुहूश्चैव शङ्खिनी च दश स्मृताः ॥
एवं नाड़ीमयं चक्रं विज्ञेयं शक्तिचक्रके ।
इड़ायाः पिङ्गलायाश्च मध्ये या सा सुषुम्-
णिका ॥
इयञ्च त्रिगुणा ज्ञेया ब्रह्मविष्णुशिवात्मिका ।
रजोगुणा च ब्रह्माख्या चित्रिणी सत्त्वसंयुता ॥
तमोगुणा ब्रह्मनाड़ी कार्य्यभेदक्रमेण च ॥"
इति निरुत्तरतन्त्रे प्रथमपटलः ॥
इड़ापिङ्गलयोः स्वरूपं यथा,—
"इड़ा च शुक्लचन्द्राभा तस्या वामे व्यवस्थिता ।
पिङ्गला सितरक्ताभा दक्षिणं पार्श्वमाश्रिता ॥"
इति योगार्णवः ॥
"इड़ायां संस्थितश्चन्द्रः पिङ्गलायां दिवाकरः ॥"
इति तन्त्रान्तरम् ॥
पिङ्गलिका, स्त्री, (पिङ्गलो वर्णोऽस्त्यस्या इति । पिङ्गल + ठन् ।) बलाका । इति अटाधरः ॥ (कीटविशेषः । यथा, सुश्रुते । ५ । ८ ।
"मल्लिका कान्तारिका जम्भा पिङ्गलिका मधु-
लिका काषायी स्यात्किलेयं षट् ताभिर्दष्टस्य दाहमोहौ भवतः ॥")
पिङ्गसारः, पुं, (पिङ्गमेव सारो यस्य ।) हरि-
तालम् । इति राजनिर्घण्टः ॥ (हरितालशब्दे विवृतिरस्य ज्ञातव्या ॥)
पिङ्गस्फटिकः, पुं, (पिङ्गः पिङ्गलवर्णः स्फटिकः
इति नित्यकर्म्मधारयः ।) गोमेदभणिः । इति राजनिर्घण्टः ॥
पिङ्गा, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति । अच् टाप् च ।) गोरोचना । हिङ्गुः । नासिका ।
चण्डिका । इति मेदिनी । गे, ११ ॥ हरिद्रा ।
इति शब्दचन्द्रिका ॥ वंशरोचना । इति राज-
निर्घण्टः ॥ (स्वनामख्याता तपस्विनी । अस्या
आश्रमस्तु तीर्थस्थानत्वेन प्रसिद्धः । यथा,
महाभारते । १ । ८२ । ५५ ।
"पिङ्गातीर्थं उपस्पृश्य ब्रह्मचारी नराधिप ! ।
कपिलानां नरव्याघ्र ! शतस्य फलमश्नुते ॥"
तथा च तत्रैव । १३ । २५ । ५३ ।
"उष्णाम्बक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्व्वपापैः प्रमुच्यते ॥")
पिङ्गाक्षः, पुं, (पिङ्गं अक्षि यस्य । बहु० समासे ।)
शिवः । इति त्रिकाण्डशेषः ॥ (कुम्भीरः । पिङ्ग-
चक्षुःशब्ददर्शनात् ॥ द्रोणपुत्रखगविशेषः । यथा,
मार्कण्डेये । १ । २१ ।
"पिङ्गाक्षश्च विबोधश्च सुपुत्रः सुमुखस्तथा ।
द्रोणपुत्राः खगश्रेष्ठास्तत्सखाः शास्त्रचिन्तकाः ॥"
पिङ्गलनेत्रे, त्रि । यथा, तत्रैव । ६६ । ४५ ।
"नमस्तेऽनल ! पिङ्गाक्ष ! नमस्तेऽस्तु हुताश-
शन ! ॥")
पिङ्गाक्षः, पुं, (पिङ्गं वर्णमश्नुते इति । अश +
अण् ।) पक्षीपतिः । मत्स्यभेदः । पाङ्गाश इति
भाषा ॥ जात्यस्वर्णे, क्ली । इति मेदिनी । शे, २५ ॥
पिङ्गाक्षी, स्त्री, (पिङ्गं वर्णमश्नुते इति । अश +
अण् । स्त्रियां ङीष् ।) नीलिका । इति मेदिनी ।
षे, २५ ॥
पिङ्गास्यः, पुं, (पिङ्गमास्यं वदनं यस्य ।) पिङ्गाक्ष-
मत्स्यः । इति शब्दरत्नावली ॥
पिङ्गी, स्त्री, (पिङ्गो वर्णोऽस्त्यस्या इति । अच् ।
ततो गौरादित्वात् ङीष् ।) शमीवृक्षः । इति
मेदिनी । गे, १२ ॥
पिङ्गेक्षणः, पुं, (पिङ्गानि पिङ्गलवर्णानि ईक्षणानि
यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥
(कुम्भीरः । पिङ्गचक्षुःशब्ददर्शनात् ॥ पिङ्गल-
नेत्रे, त्रि ॥)
पिचण्डः, पुं, (अपिचण्डतेऽनेनेति । अपि +
चडि कोपे + घञ् । अपेरलोपः ।) पद्मोर-
वयवः । उदरम् । इति हेमचन्द्रः । ३ । २६८ ॥
पिचण्डिलः, त्रि, (अतिशयितं पिचण्डसुदरमस्य ।
पिचण्ड + तुन्दादित्वात् इलच् ।) तुन्दिलः ।
इति हेमचन्द्रः । ३ । ११४ ॥ (यथा, काशी-
खण्डे । ८७ । १०२ ।
"खाहाकारैर्वषट्कारैः सुरा जाना पिच-
ण्डिलाः ।
रचिता गिरयस्तेन सहस्राणां पदे पदे ॥")
पिचयः, पुं, (पिचवे तूलाय साधुः । पिचु + यत् ।)
कार्पासः । इति हेमचन्द्रः । ४ । २०५ ॥
पिचिण्डः, पुं, उदरम् । इत्यमरः । २ । ६ । ७७॥
तस्य लक्षणं यथा,—
"भोगाढ्याः समजठरा निःस्वाः स्युर्घटसन्निभाः ।
सर्पोदरा दरिद्राः स्युः———— ॥"
इति गारुड़े ६२ अध्यायः ॥
पद्मोदरवयवः । इति मेदिनी । डे, २२ ॥

पिचुलः

पिचिण्डिका, स्त्री, (पिचिण्ड इव पिण्डाकृतिरस्त्यस्येति। पिचिण्ड+ठन्।) पिण्डिका। इति हेमचन्द्रः। ३। २७६॥ पार डिम इति भाषा॥

पिचिण्डिलः, पुं, (अतिशयितः पिचिण्ड उदरमस्य। पिचिण्ड+तुन्दादित्वात् इलच्।) हृद्दुदरयुक्तः। इत्यमरः। २। ६। ४४॥ तत्पर्य्यायः। पिचण्डिलः २ हृद्दतुक्षिः ३ तुन्दी४ तुन्दिकः ५ तुन्दिलः ६ उदरी ७ उदरिलः ८। इति हेमचन्द्रः। ३। ११४॥ (यथा, काशीखण्डे शिवशर्म्मणो वैकुण्ठलोकगमने विष्णुगरुडसंवादे।

"पिचिण्डिलैः स्थूलवपुर्भिर्मेघगम्भीरनिस्वनैः॥")

पिचुः, पुं. (पेचतीति। पिच मर्द्दने+कृगृशॄदिभ्यः कुः।) कार्पासतूलः। इत्यमरः। २। ६। १०६॥ (यथा, सुश्रुते। ४। ६।

"अग्नौ वीक्ष्य श्लोकयोर्नृपीड्य पिचुवस्त्रयोरन्यतरेण प्रच्छाद्य क्षारं पातयेत्॥") कुष्ठभेदः। कर्षः। असुरविशेषः। इति मेदिनी। चे, ७॥ भैरवः। शुक्लभेदः। इति विश्वः॥ (चिकित्सोपयोगिपञ्चकर्म्मान्तर्गतक्रियाविशेषः। यथा,—

"कामिन्यां पूतियोन्याञ्च कर्त्तव्यः स्वेदनो विधिः। क्रमः कार्य्यस्ततः स्नेहपिचुभिस्तर्पणं भवेत्॥ शाल्मलीजिङ्गिनीजम्बुधवत्वक्पत्रवल्कलैः। कषायैः साधितैः स्नेहैः पिचुः स्यादिह तर्पणे॥" इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापच्चिकित्सायाम्॥)

पिचुकः, पुं, (पिचुरिव कायतीति। कै+कः।) मदनवृक्षः। इति रत्नमाला॥ मयना इति भाषा॥

पिचुतूलं, क्ली, (पिचोस्तूलम्।) तूलः। इति चिकाण्डशेषः॥

पिचुमन्दः, पुं, (पिचुं कुष्ठविशेषं मन्दयति नाशयतीति। मन्द+अण्।) निम्बवृक्षः। इति हेमचन्द्रः। ४। २०५॥ (यथा, आर्य्यासप्तशत्याम्। ३४६।

"पश्यानुरूपमिन्दिन्दिरेण माकन्दशेखरो सखरः।
अपि च पिचुमन्दसुकुले मौकुलिकुलमाकुलं मिलति॥")

पिचुमर्दः, पुं, (पिचुं कुष्ठविशेषं मर्दयति मर्द्दातीति वा। मर्द्द+अण्।) निम्बवृक्षः। इत्यमरः। २। ४। ६२॥ (यथा, देवीभागवते। ३। १०। १२।

"असतामुपकाराय दुर्जनानां विभूतयः।
पिचुमर्दः फलाढ्योऽपि काकैरेवोपभुज्यते॥"

पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।

"कैटर्य्यः पिचुमर्दश्च निम्बोऽरिष्टो वरत्वचा।
दर्दुघ्नो हिक्कनिर्य्यासः सर्व्वतोभद्र इत्यपि॥")

पिचुलः, पुं, (पिचुं लातीति। ला+कः।) भार्ङ्गकः। इक्षवलः। जलवायसः। इति मेदिनी। ले, ११२॥ तूलः। इत्यमरटीकायां भारतसुन्दरी॥

पिच्छिलं

पिच्छ क छेदे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं सेट्।) क, पिच्छयति। इति दुर्गादासः॥

पिच्छटं, क्ली, (पिच्छयतीति। पिच्छ छेदने+अटन्।) बीजकम्। रङ्गम्। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"रङ्गं वङ्गञ्च कस्तीरं त्रपुरङ्गं पुन्न पिच्छटम्॥")

नेत्ररोगे, पुं। इति मेदिनी। टे, ५०॥

पिच्छ, ग्रं बाधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं सेट्।) ग्रं, पिच्छती पिच्छन्ती। बाधो विच्छितिः। इति दुर्गादासः॥

पिच्छं, क्ली, (पिच्छतीति। पिच्छ+अच्।) मयूरपुच्छम्। तत्पर्य्यायः। शिखण्डः२ बर्हम्३। इत्यमरः। २। ५। ३१॥ शिखिपुच्छम् ४ शिखण्डकम् ५। इति शब्दरत्नावली॥ (यथा, अनर्घराघवे। ६। ६५।

"तस्यारिबलभीमस्य ध्वजदण्डस्य लाञ्छनम्।
दर्पदीप्तः क्षुरप्रेण मायूरं पिच्छमच्छिनत्॥")

चूड़ा। इति मेदिनी। छे, ५॥

पिच्छः, पुं, (पिच्छतीति। पिच्छ+अच्।) लाङ्गूलम्। इति मेदिनी। छे, ५॥

पिच्छलदला, स्त्री, (पिच्छलं दलं पत्रं यस्याः।) वदरीवृक्षः। इति त्रिकाण्डशेषः॥

पिच्छवाणः, पुं, (पिच्छं बाण इव यस्य।) शलभपक्षी। इति राजनिर्घण्टः॥

पिच्छा, स्त्री, (पिच्छ+अजादित्वात् टाप्।) शाल्मलीवृक्षः। इत्यमरः। २। ४। ४७॥ (अस्याः पर्य्यायो यथा,—

"निर्य्यासः शाल्मलेः पिच्छा शाल्मली वेष्टकोऽपि च।
मोचासारो मोचरसो मोचनिर्य्यास इत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) पूगः। छटा। कोषः। मोचा। भक्तसम्भृतमक्षम्। पङ्क्तिः। अश्वपदाभयः। इति मेदिनी। छे, ४॥ चोलिका। फलिलाला। इति हारावली। २३०॥ शिंशपावृक्षः। इति शब्दचन्द्रिका॥

पिच्छिका, स्त्री, (पिच्छं मयूरबर्हं अस्त्यस्येति। पिच्छ+ठन्।) चामरविशेषः। यथा। "पिच्छिकां चामरयित्वा बहुविधं हास्यं कृत्वा प्रणामहरं दत्त्वा चरणे इदं अलिं अर्पिता कुजमस्क।" इति रत्नावलीनाटके ४ अङ्कः॥

पिच्छितिका, स्त्री, शिंशपा। इति शब्दचन्द्रिका॥ (विवृतिरस्याः शिंशपाशब्दे ज्ञातव्या॥)

पिच्छिलं, त्रि, (पिच्छा भक्तसम्भृतमक्षं अस्त्यस्येति। पिच्छादित्वात् इलच्।) भक्तमक्षयुक्तम्। इति रायमुकुटः॥ बहुसर्षपतैलादि। इति भरतः॥ क्षुपादि। इति रमानाथः। स्निग्धक्षुपादि। इति भानुदीक्षितः॥ मक्षयुक्तभक्तम्। जलयुक्तव्यञ्जनम्। इति नीलकण्ठः॥ तत्पर्य्यायः। निञ्जिलम् २। इत्यमरः। २। ८। ४६॥ विजयिनम् ३ विजिनम्४ विच्छ

पिच्छटः

लम् ५ इच्छलम् ६ लालसीकम् ७। इति वाचस्पतिः॥ (यथा, छन्दोमञ्जर्य्याम्।

"तरुणं सर्षपशाकं नवौदनानि पिच्छिलानि च दधीनि।
अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति॥")

पिच्छयुक्तः॥ (स्निग्धसरसपदार्थविशेषः। पेचल इति भाषा॥ यथा, साहित्यदर्पणे १०। ५५।

"काले वारिधराणामपतितया नैव शून्यतां यातुम्।
उत्कण्ठितासि तरले! नहि नहि सखि! पिच्छिलः पन्थाः॥")

पिच्छिलः, पुं, (पिच्छं चूड़ाऽस्त्यस्येति। पिच्छादित्वात् इलच्।) श्लेष्मातकवृक्षः। इति राजनिर्घण्टः॥

पिच्छिलकः, पुं, (पिच्छिलः सन् कायतीति। कै+कः।) धन्वनवृक्षः। इति राजनिर्घण्टः॥

पिच्छिलच्छदा, स्त्री, (पिच्छिलच्छदो यस्याः।) उपोदकी। इति राजनिर्घण्टः॥

पिच्छिलत्वक्, [च्] पुं, (पिच्छिला त्वग् यस्य।) नागरङ्गवृक्षः। इति त्रिकाण्डशेषः॥ धन्वनवृक्षः। इति रत्नमाला॥

पिच्छिलसारः, पुं, (पिच्छिलः सारो यस्य।) मोचरसः। इति राजनिर्घण्टः॥

पिच्छिला, स्त्री, (पिच्छा+इलच्। ततष्टाप्।) मोचिका। शिंशपा। (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"पिच्छला पिच्छिला वीरा क्षत्रसारा च शिंशपा॥")

शाल्मलिः। (अस्याः पर्य्यायो यथा,—

"शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) सिन्धुभेदः। इति मेदिनी। ले, ११५। कोकिलाक्षः। वृश्चिकालुपः। मूलीशाकम्। अतसी। इति राजनिर्घण्टः॥ कच्छूः। इति शब्दचन्द्रिका॥

पिञ्ज, इ क भाषकार्य्ये। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सकं च सेट्।) इ क, पिञ्जयति। भाः दीप्तिः। वक्तार्थो निकेतनहिंसाबलदानानि। इति दुर्गादासः॥

पिञ्ज, इ ल ड वर्णपूजयोः। इति कविकल्पद्रुमः॥ (अदां-आत्मं-अकं सकं च सेट्।) इ, पिञ्जते। ल ड, पिञ्जिले। इति दुर्गादासः॥

पिञ्जं, क्ली, (पिञ्ज वर्णे+भावे घञ्।) बलम्। आकुले, त्रि। इति मेदिनी। जे, १३॥

पिञ्जः, पुं, (पिञ्ज वधे+भावे घञ्।) वधः। इत्यमरः। २। ८। ११५॥ कर्पूरभेदः। इति राजनिर्घण्टः॥

पिञ्जटः, पुं, (पिञ्जयति नेत्रं दूषयतीति। पिञ्ज+अटन्।) नेत्रमलम्। पिंचुटि इति भाषा॥ यथा, शब्दरत्नावल्याम्।

"दूषीका दूषिका दूषिः पिञ्जटः पिञ्जटापि।"

पिञ्जेटः

पिञ्जनं, क्ली, (पिञ्जनेऽनेनेति। पिञ्जि स्फोटने + करणे ल्युट्।) कार्पासस्फोटनधनुः। तत्पर्य्यायः। पिञ्जनम् २ तूलस्फोटनकार्मुकम् ३। इति हेमचन्द्रः। ३। ५। ६॥

पिञ्जरं, क्ली, (पिञ्जि दीप्तौ वर्णे वा + बाहुलकात् अरः। इत्युज्ज्वलदत्तः। ३। १३१।) हरितालम्। इत्यमरः। २। ९। १०१॥ खर्जम्। इति मेदिनी। रे, १८५॥ नागकेशरम्। इति राजनिर्घण्टः॥ पक्ष्यादिबन्धनयन्त्रम्। कायास्थिछन्दम्। इत्यमरटीकायां रामाश्रमः॥

पिञ्जरः, पुं, (पिञ्जि + अरः।) अश्वभेदः। पीतरक्तवर्णः। इति हेमचन्द्रः॥ (सुमेरुपश्चिमपार्श्वस्थपर्व्वतविशेषः। यथा, मार्कण्डेये। ५५।८।
"पिञ्जरोऽथ महाभद्रः सुरसः कपिलो मधुः॥")
पीते, त्रि। इति मेदिनी। रे, ११५॥ (यथा, आर्य्यासप्तशत्याम्। ३८२।
"प्रियया कुङ्कुमपिञ्जरपाणिहृदयोजनाङ्कितं वासः।
प्रहितं मां वाचयाञ्जलिमञ्जुलकिरणाय शिक्षयति॥")

पिञ्जरकं, क्ली, (पिञ्जरमेव। स्वार्थे कन्।) हरितालम्। इति राजनिर्घण्टः॥ (पुं, नागविशेषः। यथा, महाभारते। १। ३५। ६।
"नागस्तथा पिञ्जरक एलापत्रोऽथ वामनः॥")

पिञ्जलं, क्ली, (पिञ्जि हिंसायां वर्णे च + कलच्।) कुशपत्रम्। हरितालम्। इति धरणिः॥

पिञ्जलः, पुं, (पिञ्जि + कलच्।) अत्यन्तव्याकुलसैन्यादिः। इत्यमरः। २। ८। ६६॥

पिञ्जली, स्त्री, (पिञ्जल + स्त्रियां ङीष्।) कुशाभ्यन्तरवेष्टितप्रादेशमात्रसाग्रकुशपत्रद्वयम्। अस्या नामान्तरं पवित्रम्। यथा,—
"अनन्तर्गर्भितं साग्रं दैर्घ्यं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥
एतदेव हि पिञ्जल्या लक्षणं समुदाहृतम्॥"
इति छन्दोगपरिशिष्टम्॥

पिञ्जा, स्त्री, (पिञ्जाते स्फोट्यते इति। पिञ्ज + गुरोश्चेति अः। ततष्टाप्।) तूलम्। हरिद्रा। इति त्रिकाण्डशेषः॥ छड़ी। छड़ा इति भाषा॥ यथा, शब्दमालायाम्। [च॥"
"प्रोत्फुल्लः सिंहला स्यात्तज्जडी पिञ्जा छटापि

पिञ्जारं, क्ली, खर्जम्। इति राजनिर्घण्टः॥

पिञ्जिका, स्त्री, (पिञ्जयतीति। पिञ्जि + ण्वुल्। टापि अत इत्वम्।) तूलनालिका। इति त्रिकाण्डशेषः॥ पाँजि इति भाषा॥

पिञ्जुलं, क्ली, (पिञ्जयतीति। पिञ्जि + "ञ्जिपिञ्जादिभ्य ऊरोलचौ।" उणा ४।८०। इति उलच्।) वर्त्तिका। इत्युणादिकोषः॥

पिञ्जूषः, पुं, (पिञ्जयति छिनत्ति कर्णौ इति। पिञ्जि + बाहुलकात् ऊषन्।) कर्णमलम्। इति हेमचन्द्रः। २। ७६॥

पिञ्जेटः, पुं, (पिञ्जटः। पृषोदरादित्वात् साधुः।) मेषमलम्। इति शब्दरत्नावली॥

पिटकः

पिञ्जोला, स्त्री, (पिञ्जयतीति। पिञ्जि + बाहुलकात् ओलः।) पञ्जकाङ्गला। पञ्जशब्दः। इति हारावली। २०७॥

पिट, संहतौ। भ्वादौ। इति कविकल्पद्रुमः॥ (भ्वां-परं सकं-अकंच-सेट्।) पेटति जनः किञ्चिद्राशीकरोति ग्रन्थायते वा। इति दुर्गादासः॥

पिटं, क्ली, (पेटति संहतो भवतीति। पिट + कः।) चालः। इति त्रिकाण्डशेषः॥

पिटः, पुं, (पेटति द्रव्यान्तरैः संहतो भवतीति। पिट संहतौ + कः।) पेटः। इति धरणिः॥ पेटारा इति भाषा॥

पिटकः, पुं, क्ली, (पेटतीति। पिट् + कुन्।) पंक्तिवेष्टादिमयसमुद्गकः। पेटारी इति पेटा इति पेड़ा इति च ख्यातः। तत्पर्य्यायः। पेटकः २ पेड़ा ३ मञ्जूषा ४। इत्यमरः। २। १०। ३०॥ आद्यौ खल्वपेटिकायाम्। इति स्वामी॥ पेटः ५ पेटिका ६ तरिः ७ तरीच मञ्जूषाच पेड़िका १०। इति शब्दरत्नावली॥ (यथा, मार्कण्डेये। ५०। ८६।
"कुद्दालदात्रपिटकास्तद्वत् स्याल्लाङ्गलादिभाजनम्॥")
विस्फोटे, त्रि। इति मेदिनी। के, १२०॥ (देहेस्थानभेदेन जातस्यास्य शुभाशुभसूचकम्। यथा, बृहत्संहितायाम्। ५२। १— १०।
"सितरक्तपीतकृष्णा विप्रादीनां क्रमेण पिटकाये।
ते क्रमशः प्रोक्तफला वर्णानामप्यजादीनाम्॥
सुस्निग्धवृत्तशोभाः शिरसि घनचयं मुहुर्नृसौभाग्यमाहुर्दौर्भाग्यं भ्रूयुगोत्थाः प्रियजनघटनामासु दुःखशोकताच्च।
तच्चक्षुरुत्थाच्च शोकं नयनपुटगता नेत्रयोरिष्टदृष्टिं
प्रव्रज्यां शुष्कदेशेऽम्बुजलनिपतनस्थानगाश्चाति चिन्ताम्॥
घ्राणागण्डे वसनसुतदाक्षोष्ठयोरन्नलाभं
कुर्युस्तद्वच्चिबुकतलगा भूरि वित्तं ललाटे।
हस्तोरस्थं गलकतपदा भूषणान्नप्रपाने
ओष्ठे तद्वन्नगगमपि ज्ञानमात्मस्वरूपम्॥
शिरःसन्धिस्थोवाहृदयकुचपार्श्वोरसि गता
अयोघातं घातं सुतसनयलाभं सुचमपि।
प्रियप्राप्तिं स्कन्धेऽप्यटनमथ भिक्षार्थमसकृद्-
विनाशं कक्षोत्था विदधति धनानां बहु सुखम्॥
दुःखप्रभुनिचयस्य विघातं
पृष्ठबाहुयुगजा रचयन्ति।
संयमञ्च मणिबन्धनजाता
भूषणान्नसुपबाहुयुगोत्थाः॥
धनाप्तिं सौभाग्यं सुचमपि करास्फालदरगाः
सुपात्रात्तं नाभौ तदध इह चौरैर्धनहृतिम्।
धनं धान्यं वस्त्रौ युवतिमथ मेढ्रे सुतसपान्
धनं सौभाग्यं वा गुदहृज्जजाता विदधति॥

पिड़कः

जवोर्यानाङ्गनालाभं जान्वोः भ्रूभुजगात्
क्षतिम्।
ग्रन्थेश्च जङ्घयोर्मूलपेऽभवन्त्यक्षेग्रहादयिनः॥
स्त्रिकपार्श्वोपादजाता
धनलाभागम्यगमनमध्वानम्।
बन्धनमङ्गुलिनिचये-
ऽङ्गुष्ठे च ज्ञातिलोकनः पूजाम्॥
उत्थातगुल्फपिटका
दक्षिणतो वामतश्चभीघाताः।
धन्या भवन्ति पुंसां
तद्विपरीतास्तु नारीणाम्॥
इति पिटकविभागः प्रोक्त आ मूर्द्धतोऽयं
व्रणतिलकविभागोऽप्येवमेव प्रकल्प्यः।
भवति मधुकलक्ष्मावर्णजन्मापि तद्-
व्रिगदिनपलकारि प्राणिनां देहसंस्थम्॥")

पिटङ्गाग्रः, पुं, पर्व्वतोर्ध्वमितृक्षः। इति भूरिप्रयोगः॥

पिटङ्गोकी, स्त्री, इन्द्रवारुणी। इति रत्नमाला॥

पिटाकः, पुं, सुनिविशेषः। इत्युणादिकोषः॥

पिठरं, क्ली, (किठ्रं पृषोदरादित्वात् कस्य पः।) दन्तकिठ्रकम्। इति शब्दरत्नावली॥

पिठ, क्षिप्तौ। वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-वधे सकं-सेट्।) ओष्ठ्यवर्णादिः। पेठति। पिपिठतुः। क्षिप्तौ दुःखानुभवे। इति दुर्गादासः॥

पिठरं, क्ली, (पिठं रातीति। रा + कः।) सुस्ता। मन्थानदण्डः। इति मेदिनी। रे, १८४॥

पिठरः पुं, (पिठ्यते क्षिप्यतेऽनेनेति। पिठ + करणे।) गृहभेदः॥ तत्पर्य्यायः। कुम्भकः २ उखाटः ३। इति त्रिकाण्डशेषः॥ (यथा, अश्वमेधपर्व्वणि। ५५२। [श्यन्ति॥")
"विद्युज्ज्वालावलयितजलधरपिठरोदराद्विनिस्यन्ती। इत्यमरः। २। ६। ३१॥ (यथा, महाभारते। ३। ३। ७२।
"गच्छोत्थ पिठरं ताम्रं मया दत्तं नराधिप!।
यावत् वर्त्तयति पाञ्चाली पाचयान्नेन सुव्रत!॥")
अग्निविशेषः। यथा, हरिवंशे। १७८। ३३।
"पिठरः पतगः स्वर्गचागाधो बाज एव च।
स्वधाकाराश्रयाः पञ्च अयुध्यंश्चोऽपि चाग्नयः॥")
दानवविशेषः। यथा, महाभारते। २। ६। १३।
"घटोदरो महापार्श्वः क्रथनः पिठरस्तथा॥")

पिठरी, स्त्री, (पिठर + स्त्रियां ङीष्।) स्थाली। इत्यमरटीकायां रायमुकुटः॥

पिड, इ क संहतौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) इ क, पिण्डयति। संहतिः राशीकरणम्। इति दुर्गादासः॥

पिड, इ ड संहतौ। इति कविकल्पद्रुमः॥ (भ्वां आत्मं-अकं सेट्। सकं इति केचित्।) इ, पिण्ड्यते ड, पिण्डते। इति दुर्गादासः॥

पिड़कः पुं, (पीड़यतीति। पीड़ + ण्वुल्। निपातनात् साधुः।) स्फोटकः। इति हेमचन्द्रः। ३। १९०॥

पिड़का

पिड़का, स्त्री, (पीड़यतीति। पीड़ + ण्वुल् + टाप्। निपातनात् साधुः।) स्फोटकविशेषः। प्रमेअहा सा दशविधा। यथा,—
"शराविका कच्छपिका जालिनी विनतालजी।
मल्लरिका सर्षपिका पुत्रिणी च विदारिका।
विद्रधिश्चेति पिड़काः प्रमेहोपेक्षया दश॥"
तासां प्रत्येकलक्षणं यथा,—
"सन्धिमर्म्मसु जायन्ते मांसलेषु च धातुषु।
अन्तोन्नता च तद्रूपा निम्नमध्या शराविका॥१॥
सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः॥२॥
जालिनी तीव्रदाहार्त्तिर्मांसजालसमावृता॥३॥
अवगाढरुजा क्लेदा पृष्ठे वाप्युदरेऽपि वा।
महती पिड़का नीला विनता नाम सा स्मृता॥४॥
रक्तासिता स्फोटचिता दारुणा त्वलजी भवेत्॥५॥
मल्लरफलसंस्थाना विज्ञेया सा मल्लरिका॥६॥
गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी। ७।
महत्यल्पचिता ज्ञेया पिड़का चापि पुत्रिणी॥८॥
विदारी कन्दवद्वृत्ता कठिना च विदारिका।९।
विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा॥"१०॥
कुष्ठपिड़का यथा,—
"कच्छू र्विपूयकच्छैव कुष्ठे श्लीपितसंश्रिते।
बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिड़कोद्गमः॥"*॥
पिड़काविशेषो यथा,—
"यवाकारा सकठिना ग्रथिता मांससंश्रिता।
पिड़का श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते॥
घनामवक्त्रां पिड़कासुन्नतां परिमण्डलाम्।
अन्तालजीमल्पपूयां तां विद्यात् कफवातजाम्॥१
विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम्।
परिमण्डलां पित्तबलां विवृतां नाम तां विदुः॥२॥
ग्रथिताः पञ्च वा षड् वा दारुणाः कच्छपोपमाः।
कफानिलाभ्यां पिड़का ज्ञेयाः कच्छपिका बुधैः॥३॥

ग्रीवांसकक्षाकरपाददेशे
सन्धौ गले वा त्रिभिरेव दोषैः।
ग्रन्थिः सवल्मीकवदक्रियायां
जातः क्रमेणैव गतः प्रवृद्धिम्॥
सुखैरनेकैः सुनितोदवह्नि-
र्विसर्पवत् सर्पति चोन्नताग्रैः।
वल्मीकमाहुर्भिषजो विकारं
निग्रह्यतीव्रं चिरजं विशेषात्॥४॥

पद्मकर्णिकवच्चापि पिड़काभिः सदाचिताम्।
दारुणाञ्चानुनां विद्याद्वातपित्तोत्थितां भिषक्॥५॥
मण्डलं वृत्तसुत्सन्नं मरुकं पिड़काचितम्।
रजाकरीं गर्दभिकां तां विद्याद्वातपित्तजाम्॥६॥
वातश्लेष्मसमुद्भूतः श्वयथुश्चैतुलन्धिजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः॥७॥
कर्णस्याभ्यन्तरे जातां पिड़कासुग्रवेदनाम्।
स्थिरां पनसिकान्तान्तु विद्याद्दन्तःप्रपाकिनीम्॥८॥

पिण्डः

विसर्पवत् सर्पति यः श्लीपवत्तनुरपाकवान्।
दाहज्वरकरः पित्तात् स ज्ञेयो जालगर्दभः॥९॥
पिड़कासदृशाकृत्यां वृत्तामल्पव्यरुग्ज्वराम्।
सर्व्वालिकां सर्व्वलिङ्गां जानीयादिरिवेल्लिकाम्॥१०॥
बाहुपार्श्वांसकक्षेषु ज्ञेयास्फोटां सवेदनाम्।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत्॥११॥
एकामेसाङ्घ्रौ दृष्ट्वा पिड़कां स्फोटसन्निभाम्।
त्वग्गतां पित्तकोपेन गन्धनामां प्रचक्षते॥१२॥
कक्षभागेषु ये स्फोटा जायन्ते मांसदारुणाः।
अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः॥
सप्ताहाद्दशरात्राद्वा पक्त्वा वा यान्ति मानवम्।
तामग्निरोहिणीं विद्यादसाध्यां सन्निपातजाम्॥१३॥
नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
कुरुते दारुणाकारौ च व्याधिनं विद्यमादिशेत्॥
तदेवाल्पतरैर्दोषैः कुनखं परुषं वदेत्॥१४॥
गम्भीरामल्पसंरम्भां सवर्णासुपरिस्थिताम्।
पादस्थानुगयीं तान्तु विद्यादन्तःप्रपाकिनीम्॥१५॥
विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु।
विदारीति च तां विद्यात् सर्व्वजां सर्व्वलक्षणाम्॥"१६॥

इति माधवकरः॥

पिण्ड, क्ली, पुं, (पिण्डते संहतो भवतीति। पिडि संहतौ + अच्। पिण्ड्यते राशीक्रियते इति। कर्म्मणि घञ् वा।) आजीवनम्। अयः। इति मेदिनी। डे, १६॥ आहुतौषधद्रव्यनिर्म्मितविल्वफलाकारपिण्डादेयककव्यान्नम्। यजुर्व्वेदिनां पिण्डशब्दो नपुंसकलिङ्गेन प्रयुज्यते। यथा,—
"अवनिक्तं पिण्डं दद्यादसावेतत्त इति आहुर्विवेकपूतपिण्डपितृयज्ञीयकाण्डायनवचने पिण्डविशेषणो एतदिति नपुंसकनिर्द्देशात् भाषेतेतच्च वै पिण्डं घृतदत्तस्य पूरकमिति ऋग्यजुर्व्वचनेऽपि तथा दर्शनाच्च। छन्दोगानां पिण्डशब्दः पुंलिङ्गेन प्रयुज्यते। दर्भेषु मधु मधु मधित्यन्नमसीति मन्त्रत इति जपित्वा चौक्षीन् पिण्डान् दद्यादिति गोभिलसूत्रे पिण्डानिति पुंलिङ्गनिर्द्देशात्।" इति आह्निकतत्त्वम्॥ * ॥ गयादावात्मपिण्डदानविधिर्यथा,—
"गयाञ्च पिण्डदानञ्च गयाञ्च तीर्थमेव च।
पञ्चकाञ्च कामरूपं पिण्डिलाञ्च सरित् शुभे॥
जनार्द्दनस्य क्षेत्रे तु पिण्डं दद्यात् स्वकं नरः।
विरजे च तथा चाश्वकर्णे रामे च सोमके॥
जीवन्पिण्डप्रदानेन अक्षयायुर्जायते नरः।
यत्रागत्य महाक्षेत्रे स्वकं पिण्डं ददेत्तु यः।
मासद्वयाधिकं वर्षमायुषो वर्द्धते क्रमात्॥"
इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटलः॥
अन्यत् गयाशब्दे द्रष्टव्यम्॥

पिण्ड:, पुं, (पिडि संहतौ + अच्।) बोलः। (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"विहान् गोलः पिण्डकञ्च पिण्डो बोलो रसोरसः॥)
बलम्। सान्द्रम्। देहैकदेशः। (यथा, महाभारते। ३। १९२। ३।

पिण्डः

"द्वौ चास्य पिण्डावधरेण कक्षा-
दक्षान्तरौसौ सुमनोहरौ च॥")
अगारैकदेशः। देहमात्रम्। (यथा, रघुः। २। ५७।
"एकान्तविध्वंसिषु मन्दिधानां
पिण्डेष्वनास्था खलु भौतिकेषु॥")
निवापः। (यथा, मनुः। ३। २१५।
"भौंस्तु तस्याहुविशेषात् पिण्डान् दत्त्वा समाहितः।
औदकेनैव विधिना निर्व्वपेदन्वितासुखः॥")
गोलः। सिक्थकः। ओड्डपुष्पम्। इति मेदिनी। डे, १६॥ हस्तम्। कवलः। इति हेमचन्द्रः॥ (यथा, मनुः। ११। २१७।
"एकैकं ग्रासयेत् पिण्डं त्रीणि शुद्धे च वर्द्धयेत्॥")
गलकुम्भः। इत्यमरः। २।८।३७॥ मदनवृक्षः। इति राजनिर्घण्टः॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"मदनस्कन्दनः पिण्डो नटः पिण्डीतकस्तथा।
करहाटो मरुवकः शुल्यको विषपुष्पकः॥"
किलाटः। यथा, वैद्यकरत्नमालायाम्।
"किलाटः कुर्चिका पिण्डः————॥")
निवापस्य पिण्डदेयस्य विधिर्यथा,—
"यावदन्नमुपादाय ह्यविषोऽभक्षमभक्षकम्।
चरुणा सह सन्नीय पिण्डदानमुपक्रमेत्॥
आह्वायाह्विषोऽन्नादेः सकाशात् यावदभक्ष्यभोजनयज्ञनादि ततोऽभक्ष्यं गृहीत्वा यदग्नौ करणेनेषेण सह सन्नीय मिश्रीकृत्य पिण्डदानमारभेतेत्यर्थः।
मध्याह्नतिलसंयुक्तं सर्व्वयज्ञसमन्वितम्।
उद्धामादाय पिण्डन्तु ज्ञात्वा विल्वफलोपमम्।
दद्यात् पितामहादिभ्यो दर्भमूलादृजुक्रमम्॥
अत्र पितामहपदं पितृपरं वचनान्तरैकवाक्यत्वात्।
सपित्रे प्रथमं पिण्डं दद्यादुच्छिष्टसन्निधौ।
पितामहाय चैवाथ तत्पित्रे च ततः परम्॥
दर्भमूले क्षेपणञ्चार्घपवित्रैश्चोपवर्हणैः।
पिण्डैर्मातामहांस्तद्वद्गन्धमाल्यादिसंयुतैः॥
प्रीणयित्वा द्विजाग्र्याणां दद्यादाचमनन्ततः॥"
इति आह्निकतत्त्वम्॥ * ॥
अन्नाद्यभावे फलादिनापि तस्य कर्त्तव्यत्वं यथा,—
"रेवतं वदरोन्मिश्रं पिण्याकं दर्भसंस्तरे।
न्यस्य पिण्डं ततो राम इदं वचनमब्रवीत्॥
इदं भुङ्क्ष्व महाराज! प्रीतो यदन्नया वयम्।
यदन्नाः पुरुषा राजंस्तदन्नाः पितृदेवताः॥"
इत्ययोध्याकाण्डम्॥ * ॥
पूरकपिण्डविधिर्यथा,—
"ततश्चोत्तरपूर्व्वस्यामग्निं प्रज्वालयेद्द्विजः।
तण्डुलप्रस्थितं तत्र प्रज्वाल्य हविः पचेत् स्वयम्॥
सपवित्रैस्तिलैर्मिश्रां कृत्वा कौटविवर्द्धिताम्।
द्वारोपान्ते ततः क्षिप्त्वा मृद्वां वा गौरवत्तिकाम्॥
तत्पृष्ठे प्रस्तरेदर्भान् यान्याग्यान् दैवसत्रयान्।

ततोऽवनेजनन्दद्यात् संस्करन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः सक्षितं तन्नमेव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुडक्षीरतिलमिश्रमनु क्वचित् ।
अर्घैः पुष्पैस्तथा दीपैर्धूपैर्नैवेद्यैः सुशीतलैः ॥
जलार्तन्नुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् ।
प्रयाति यावदाकाशं पिण्डादाश्रमयी शिखा ॥
तावत्तु संस्रवस्तिष्ठेत् सर्व्वं तोये ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
आद्यशौचे प्रदातव्याः प्रथमे लेक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च, चैव हि ।
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकञ्च दीयते ॥
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥"
इति शुद्धितत्त्वम् ॥ * ॥

गयायामात्मपिण्डदानप्रमाणं यथा,—
"स्वकर्म्मधर्म्मयोगेन धनमुत्पाद्यं बहु ।
उपार्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्व्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार स्वपितॄणाञ्च दायादानामनन्तरम् ॥
आत्मनञ्च महाबुद्धिर्म्महावेद्यां तिलैर्विना ।
पिण्डनिर्व्वपणं चक्रे तथान्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥"
इति वामने ७६ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । कै + कः ।) वोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । "तृतीये (मासि) हस्तपादशिरसां पञ्च पिण्डकानि वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च स्पष्टो भवति ॥")

पिण्डकः, पुं, (पिण्ड इव कायतीति । कै + कः ।) सिक्तनामगन्धद्रव्यम् । इत्यमरः । १ । ६ । १२८ ॥ (बोलः । अस्य पर्य्यायो यथा,—
"विदानं गोलः पिण्डकश्च पिण्डोबोलो रसोरसः ॥"
इति वैद्यकरत्नमालायाम् ॥)
पिण्डाचः । इति त्रिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
"पिण्डको वातलः श्लेष्मी याही दग्धो महागुरुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
पिण्ड + स्वार्थे कन् । कवलः । यथा, हरिवंशे । भविष्यपर्व्वणि । १० । २१ ।
"पयःपानं तथा कुर्व्वन् भक्षयन् दधिपिण्डकम् ॥")

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुग्रन्थेऽस्य विशेषो

पिण्डखर्ज्जूरः, पुं, (पिण्डवत् खर्ज्जूरः ।) खनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजखर्जूः २ पिण्डी ३ । इति जटाधरः ॥
पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या २ खपिण्डा ३ मधुरश्रवा ४ फलपुष्पा ५ स्वादुपिण्डा ६ हृद्यभक्षा ७ पिण्डखर्ज्जूरिका ८ । अस्या गुणाः । गौल्यत्वम् । हिमत्वम् । पित्तदाहार्शिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"पिण्डखर्ज्जूरिका ज्ञेया सा देशे पश्चिमे भवेत् ।
खर्जूरी गोस्तनाकारा परादृङ्नीपादिहागता ॥
जायते पश्चिमे देशे सा क्षोहोरेति कीर्त्यते ।
खर्जूरीत्रितयं ग्राह्यं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं बलवर्णकरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविड्भिश्रुक्रदम् ॥
कोष्ठमारुतशूलघ्नं वाजिवातकफापहम् ।
ज्वराभिघातक्षतक्षीणाकासश्वासनिवारकम् ॥
मदमूर्च्छाभ्रमतृष्णादाहोद्भूतगदान्नुदत् ।
मद्यद्विच्च गुणैरेषा स्वल्पखर्ज्जूरिका स्मृता ॥
खर्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥"
अथ पिण्डखर्ज्जूरीभेदः ।
"सुनेपाली तु मृदुला दलहीनफला च सा ।
सुनेपाली भ्रमभ्रान्तिदाहमूर्च्छापित्तहृत् ॥"
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥
पिण्डगोलः, पुं, (पिण्डवत् संहतो गोलः ।) गन्धरसः । इत्यमरटीकायां रमानाथः ॥
पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥
पिण्डदः, पुं, (पिण्डं ददातीति । दा + कः ।) पिण्डदानकर्त्ता । यथा,—
"लेपभाजस्तृतीयाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषम् ॥"
इति शुद्धितत्त्वम् ॥
अपि च ।
"गाङ्गेयेह परां सिद्धिं प्राप्नुवन्ति वारिणा नराः ।
पैत्र्याः पश्चात् क्रियाः कार्य्याः सर्व्वाश्चैवौर्द्ध्वदेहिकाः ॥
क्रियां करोति यः पूर्व्वां पितॄणां यश्च पिण्डदः ।
प्रायश्चित्तमचौर्य्यं तत् प्रायश्चित्ती भवेत्तु सः ॥"
इत्यग्निपुराणम् ॥
पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) अङ्गविशेषः । यथा,—
"रूपार्द्धकैर्विनिहतो भवनस्य बन्धः
कर्त्तुः खण्डत्रयमिह युग्मशरैकविन्नम् ।
एकीकृतं रसनिशाकरयुग्मभक्त-
शेषं ततो भवति पिण्डपदं गृहस्य ॥
रूपार्द्धकैरेकाशीत्या विनिहतः पूरितः भवनस्य बन्धः दीर्घप्रकारमिलितश्चत्वारः खण्डाः तत्संख्यानं युग्मशरैकविन्नं द्विपञ्चाशदुत्तरशतमितं एकीकृतं पञ्चकेन मिलितं रसनिशाकर-

करयुग्मभक्तशेषं षोड़शाधिकद्विशतक्षतावशिष्टं तत् संख्यानं पिण्डपदसंज्ञं गृहस्य भवति ॥"
इति ज्योतिस्तत्त्वम् ॥
पिण्डपादः, पुं, (पिण्ड इव पादो यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥
पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । पे, २७॥
तगरपुष्पम् । इति शब्दरत्नावली ॥
पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिभाति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)
पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
"स्विन्नस्य विम्लापनमेव कुर्य्या-
दङ्गुष्ठलोष्ठोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकनक्षी
काकादनीतापसतृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥"
इति सुश्रुते चिकित्सितस्थानेऽष्टादशोऽध्याये ॥)
पिण्डबीजकः, पुं, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्दे विवृतिरस्य ज्ञातव्या ॥)
पिण्डमुक्ता, स्त्री, (पिण्डवत् स्थूला मुक्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥
पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्जरम् । मूलकभेदः । तत्पर्य्यायः । गजाख्यम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
पिण्डलः, पुं, (पिण्डि संहतौ + बाहुलकात् कलच् ।) सेतुः । इति हारावली । १२६ ॥
पिण्डसः, पुं, (पिण्डेन परदत्तग्रासेन सनोति जीवतीति । सन + डः ।) भिक्षार्थी । भिक्षोपजीवी । इति शब्दमाला ॥
पिण्डा, स्त्री, (पिण्ड + टाप् ।) पिण्डायसम् । कस्तूरीभेदः । सा कुलत्थिकातः कियत्स्थूला । इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥
पिण्डादः, पुं, (पिण्ड इव अतति सादृश्यमनुकरोतीति । अत् + अच् ।) सिक्तकः । इति रत्नमाला ॥
पिण्डाभ्रं, क्ली, (पिण्डवत् आभ्रं मेघजलसम्बन्धिद्रव्यम् ।) घनोपलः । इति शब्दमाला ॥
पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥
पिण्डारं, क्ली, (पिण्डं संहतमच्छतीति । अर्च् + [illegible]

शाकविशेषः। पिण्डारा इति हिन्दीभाषा। अस्य गुणाः। शीतलत्वम्। बल्यत्वम्। पित्तनाशित्वम्। रुचिकारित्वम्। पाके लघुत्वम्। विशेषेण विषघ्नाग्निकरत्वञ्च। इति भावप्रकाशः॥

पिण्डारः, पुं, (पिण्डं ऋच्छतीति। ऋ + अण्।) क्षपणकः। गोपः। महिषीदुग्धकः। इभभेदः। इति मेदिनी। रे, १८५॥ विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

पिण्डालुः, पुं, (पिण्डवत् स्थूल आलुः।) कन्दगुडूची। कन्दभेदः। पेंड़ालु इति हिन्दीभाषा। चुवड़ि आलु इति बङ्गभाषा। तत्पर्य्यायः। ग्रन्थिलः २ पिण्डकन्दः ३ ग्रन्थिः ४ रोमशः ५ रोमकन्दः ६ रोमालुः ७ ताम्बूलपत्रः ८ नागकन्दः ९ पिण्डकः १०। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। मूत्रकृच्छ्रदाहशोषप्रमेहनाशित्वम्। दृष्यत्वम्। सप्तधातुवर्द्धकत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

पिण्डालुकं, क्ली, (पिण्डालुरिव प्रतिभाति। इवार्थे कन्।) आलुविशेषः। गोल आलु इति गुड़ आलु इति चुवड़ि आलु इति च भाषा। अस्य गुणाः। कफकरत्वम्। गुरुत्वम्। वातप्रकोपणत्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १। ४६।

"विदारीकन्दशतावरीविसबृसालम्बष्टङ्गाटककर्कोरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकग्रन्थालुकरक्तालुकैर्न्दीवरोत्पलकन्दप्रभृतीनि॥")

पिण्डाका, स्त्री, (पिण्डां कस्तूरीविशेषमाकर्षते खड्डते खगन्धेनेति। कै + कः।) गाड़ीहिङ्गु। इति राजनिर्घण्टः॥

पिण्डिः, स्त्री, (पिडि संहतौ + इन्।) पिण्डिका। इत्यमरटीकायां रमानाथः॥

पिण्डिका, स्त्री, (पिण्डानि संहतानि भवन्ति पिण्डान्ते राशीक्रियन्ते वा अराणि यस्याम्। पिण्ड + घन्। गौरादित्वात् ङीष्। ततः कन्। ह्रस्वश्च।) रथनाभिः। इत्यमरः। २। ८। ५६॥ या रथचक्रमध्ये मण्डलाकारा यस्यां सर्व्वाणि काष्ठान्यासज्यन्ते। इति रायमुकुटः॥ (पिण्डम्। यथा, हारीते प्रथमस्थाने सप्तमेऽध्याये।

"कांस्यपात्रे समुद्धृत्य परीक्षेत भिषग्वरः।
शुद्धकर्म्मा स तत्रस्थो श्वेतप्रालोदनस्य वा॥
पिण्डिका तत्र संक्षिप्ता नान्यथा भासिता पुनः॥")

पिच्चिण्डिका। सा जानुनोऽधोमांसलप्रदेशः। इति हेमचन्द्रः॥ पायेर डिम् इति भाषा॥ (यथा, चरके सूत्रस्थाने ७ अध्याये।

"प्रज्ञाग्न्यग्निशिरःशूलं वातवर्च्चोनिरोधनम्।
पिण्डिकोद्वेष्टनाध्मानं पुरीषे स्यादधारिते॥")

श्वेताब्जिः। इति राजनिर्घण्टः॥ पीठः। यथा,

सूत उवाच।

"पिण्डिकालक्षणं वक्ष्ये यथावदनुपूर्ब्बशः।
पीठोच्छ्रायं यथावच्च भागान् षोड़श कारयेत्॥
भूमावेकः प्रतिष्ठः स्याच्चतुर्भिर्जगती मता।
भागैस्त्रिभिस्तथा कण्ठं कण्ठपट्टस्तु भागतः।
भागेन वृत्तपट्टस्तु ग्रीवाभागेन पट्टिका॥
प्रविन्यसं भागमेकैकं जगती यावदेव तु।
निर्गमस्तु पुरस्तस्या यावद् विष्कम्भपट्टिकाः॥
पीठिकानान्तु सर्व्वासामेतत् सामान्यलक्षणम्।
निःश्रेणीहैवतादीनां पृथक्त्वं द्विजसत्तमाः॥
स्थण्डिला वाथ वापी च यज्ञी वेदी च मण्डला।
पूर्णचन्द्रा च वह्नी च पद्मा वार्द्धेन्दुसंज्ञिता॥
त्रिकोणा दशमी तासां संस्थानञ्च निबोधत।
स्थण्डिला चतुरस्रा तु वर्णिता मेखलादिभिः॥
वापी द्विमेखला श्रेया यज्ञी चैव त्रिमेखला।
चतुरस्रायतां वेदीं न तां लिङ्गेषु योजयेत्॥
मण्डला वर्त्तुला या तु मेखलाभिर्गणप्रिया।
रिक्ता द्विमेखला मध्ये पूर्णचन्द्रा तु सा भवेत्॥
मेखलात्रयसंयुक्ता षड़स्रा वह्निका भवेत्।
षोड़शास्रा भवेत् पद्मा किञ्चिद्वृत्ता च मूलतः॥
तथैव धनुराकारा सार्द्धचन्द्रा प्रशस्यते।
त्रिशूलसदृशा तद्वत् त्रिकोणानृजुतो मता॥
प्रागुदक्प्रवणा तद्वत्प्रशस्ता लक्षणान्विता।
परिवेषस्त्रिभागेन निर्द्देशूलञ्च कारयेत्॥
विस्तारस्तत्प्रमाणन्तु मूले चाग्रे तदूर्द्धतः।
अलवाहश्च कर्त्तव्यस्त्रिभागेन सुशोभनः॥
लिङ्गस्यार्द्धत्रिभागेन स्थौल्येन समधिष्ठिता।
मेखला तु त्रिभागेन स्थातव्ये तत्प्रमाणतः॥
अथवा पादहीनन्तु शोभनं कारयेत् सदा।
उत्तरन्तु प्रमाणन्तु प्रमाणादधिकं भवेत्॥
स्थण्डिलायामथारोग्यं धनधान्यञ्च पुष्कलम्।
गोप्रदा तु भवेत् यज्ञी वेदी सन्ततिप्रदा भवेत्॥
मण्डलायां भवेत् कीर्त्तिर्वरदा पूर्णचन्द्रिका।
आयुःप्रदा भवेद्वह्नी पद्मा सौभाग्यदायिनी॥
पुत्रप्रदार्द्धचन्द्रा स्यात् त्रिकोणा शत्रुनाशिनी।
देवस्य यजनार्थन्तु पिण्डिका दश कीर्त्तिता॥
शैले शैलमयीं दद्यात् पार्थिवे पार्थिवीं तथा।
दारुजे दारुजां कुर्य्यान्मिश्रे मिश्रामथैव च॥
नान्ययोनिस्तु कर्त्तव्या सदा शुभफलेप्सुभिः॥
अर्द्धायामसमं दैर्घ्यं लिङ्गायामसमं तथा।
यस्य देवस्य या पत्नी तां पीठे परिकल्पयेत्॥
एवमेतत् समाख्यातं समासात् पीठलक्षणम्॥"

इति मत्स्यपुराणे पीठिकानुकीर्त्तनं २६६ अः॥ (लिङ्गपीठम्। गौरीपट्टः। यथा, कालीखण्डे वायुसंहितायामुत्तरखण्डे। ७८। ६।

"लिङ्गं पिण्डिकया सार्द्धं पञ्चगव्येन शोधयेत्॥")

पिण्डितं, त्रि, (पिडि + क्तः।) गणितम्। घनम्। इति विश्वमेदिन्यौ॥ (संहतः। यथा, वायुपुराणे।

"अर्च्चिष्मान् पिण्डितग्रीवः सर्पिः काञ्चनसन्निभः।
स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये॥")

गुणितम्। इति हेमचन्द्रः॥ तुरङ्गे, पुं। इति राजनिर्घण्टः॥

पिण्डिलः, पुं, (पिण्डवदाकृतिरस्यस्येति। पिण्ड + इलच्।) सेतुः। इति त्रिकाण्डशेषः॥ गणकः।

पिण्डिला, स्त्री, (पिण्डिल + टाप्।) गोधुमा। इति शब्दचन्द्रिका॥

पिण्डी, [न्] त्रि, (पिण्डोऽस्यास्येति। इनिः।) शरीरी। यथा,—

"यथा सूर्य्यं विना भूमिर्यथा दीपविवर्ज्जितम्।
लिङ्गहीनो यथा पिण्डी जयश्रीस्त्वां विना तथा॥"

इति जैमिनिभारते आश्वमेधिकपर्व्वणि ३८ अध्याये॥

पिण्डी, स्त्री, (पिण्डाकारोऽस्यस्या इति। अच्। ततो ङीष्।) पिण्डीनगरः। अलाबूः। खर्ज्जूरविशेषः। इति मेदिनी। डे, २०॥ ज्ञाननिरूपणार्थकोपन्यासः। इति धरणिः॥ (पिण्ड + इदितश्चेति वा ङीष्।) पिण्डिका। इत्यमरटीकायां रायमुकुटः॥ पिण्डम्। यथा,—

"गोसाय तुरगायाशु भक्तपिण्डीं सुगन्धिनीम्।
दद्यात् पुरोहितस्तत्र संमन्त्र्य ग्लानिमन्वकैः॥"

इति कालिकापुराणे ८६ अध्यायः॥

पिण्डीतकः, पुं, (पिण्डीं खल्वपिण्डं तनोतीति। तन + अन्येभ्योऽपीति डः। ततः संज्ञायां कन्।) मदनवृक्षः। इत्यमरः। २। ७। ५२॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम्।

"मदनः भ्रमनीरात्मो गोलः पिण्डीतकः फलम्।
छर्द्दालो विषपुष्पा च हरहाटस्तु गुल्मकः॥"

यथा च।

"पिण्डीतकस्य तु वराङ्गविभाविनस्य
मूलेषु कन्दमुकुलेषु च सौम्यवेषु।
तैलं कृतं गतिमपोहति शीघ्रमेतत्
कण्ठेषु चामरवरायुधसाधकेषु॥"

इति सुश्रुते चिकित्सितस्थाने सप्तदशोऽध्याये॥) नगरः। फणिज्झकः। इति विश्वः॥

पिण्डीतगरः, पुं, (पिण्डया पुष्पावच्छेदे खल्वपिण्डेन उपलक्षितस्तगरः।) तगरविशेषः। तत्पर्य्यायः। कपर्व्वकः २। इति त्रिकाण्डशेषः॥

पिण्डीतगरकः, पुं, (पिण्डीतगर + स्वार्थे संज्ञायां वा कन्।) तगरम्। इति राजनिर्घण्टः॥

पिण्डीतरुः, पुं, (पिण्डया उपलक्षितस्तरुः।) महापिण्डीतरुः। इति राजनिर्घण्टः॥

पिण्डीपुष्पः, पुं, (पिण्डीवत् पुष्पं पुष्पस्तवको यस्य।) अशोकवृक्षः। इति राजनिर्घण्टः॥ (अशोकशब्दे ऽस्य विशेषो ज्ञेयः॥)

पिण्डीरः, पुं, (पिण्डीवत् पिण्डाकाराद्यौत्यर्थः फलानि ईरयतीति। ईर + णिच् + अण्।) दाड़िमवृक्षः। इति त्रिकाण्डशेषः॥ क्षिप्तीरः। इत्यमरटीकायां रायमुकुटः॥ क्षीरसे, त्रि। इति शब्दरत्नावली। १६६॥

पिण्डीशूरः, पुं, (पिण्ड्यां पिण्डव्यापारे भोजने एव शूरः अतिनिपुणः नान्यत्र कार्य्यादाविति भावः।) खगेहमात्रे वसन् परदेशी। तत्पर्य्यायः। गेहेनदी २ गेहेशूरः ३। इति हेमचन्द्रः॥३।५८१॥ (यथा, भट्टौ। ५। ८५।

"राक्षसान् वटयशेषु पिण्डीशूरानिरन्तरान्।

पिण्डोलिः, स्त्री, सुक्तसमुद्भितः। इति हेमचन्द्रः। ३। ८१॥
पिण्या, स्त्री, पण्यते स्तूयते रोगहन्तृत्वात् पण्या पण ड यवश्रुतौ स्तुतौ मुह्वेत्यात्; तत्यानीयया इति यः निपातनादत् इत्। पण्येति पठति स्वामी। इति भरतः॥ ज्योतिष्मती॥ इत्यमरः॥ (ज्योतिष्मतीशब्देऽस्या विवृतिर्विज्ञेया॥)
पिण्याकः, पुं, क्ली, (पिनष्टीति। पिष्लृ संचूर्णने + "पिनाकादयश्च।" उणा। ४। १५। इति आकप्रत्ययेन निपातनात् साधुः।) तिलकल्कः। (अस्य गुणाः यथा,—
"पिण्याको मलपनो रूक्षो विष्टम्भी दृष्टिदूषणः॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥
यथा, महाभारते। १२। १६७। ३६।
"नवनीतं यथा दध्नस्तथा कामोऽर्थधर्मतः।
मोक्षस्तैलं हि पिण्याकात् हृतं श्रेय उदाहृतः॥")
अस्य भक्षणे दोषो यथा,—
"पिण्याकं भक्षयित्वा तु यो वै मासुपसर्पति।
तस्य वै ब्रूण सुश्रोणि! प्रायश्चित्तं सुशोभनम्॥
उल्को दशवर्षाणि कच्छपस्तु समाश्वयः।
जायते मानवस्तत्र मम कर्म्मपरायणः॥"
इति वराहपुराणम्॥
पिङ्गु। वाल्मीकम्। पिङ्कः। इति मेदिनी॥ (सरलरसः। अस्य पर्य्यायो यथा,—
"तैलपर्णी हविष्याख्यः पिण्याको रक्तशीर्षकः।
वेष्टो रसाङ्गः श्रीवासः श्रीपिष्टसरलद्रवौ॥"
इति वैद्यकरत्नमालायाम्॥)
पितरौ, पुं, जनकजनयित्र्यौ। माता च पिता चेति विशेषे विकल्पादेकशेषे पितराविति प्राच्यः। इति भरतः॥ तत्पर्य्यायः। मातापितरौ २ मातरपितरौ ३ तातजनयित्र्यौ ४। इत्यमरः। २। ६। ३७॥ (यथा, रघुः। १।१।
"जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥")
तयोरभक्त्या पालने दोषो यथा,—
"पितृमातृगुरूंश्चापि भक्तिहीनेन पालयेत्।
वाचा च ताडयेन्नित्यं स्वामिनं कुलटा च या॥
सा क्षतघ्नीति विख्याता पापिनां भारते नरः।
यद्विकुर्यं महाघोरं स च सा च प्रयाति च॥
तत्र वह्नौ वसत्येव यावच्चन्द्रदिवाकरौ।
ततो भवेच्छलोका च जन्म सप्त ततः शुचिः॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः॥
पिता, [तृ] पुं, पाति रक्षत्यपत्यं यः। (पा रक्षणे + "नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।" उणा। २। ९६। इति तृच्प्रत्ययेन निपातनात् साधुः।) जनकः। वाप् इति भाषा। तत्पर्य्यायः। तातः २ जनकः ३। इत्यमरः। २।६।२८॥ प्रसविता ४ वप्ता ५ जनयिता ६ गुरुः ७ जन्मदः ८ जन्यः ९ जनिता १०। इति शब्दरत्नावली॥ बीजी ११ वप्रः १२। इति हेमचन्द्रः॥ * ॥ तस्य माहात्म्यं लक्षणञ्च यथा,—
अहो यस्य प्रसादेन सर्व्वान् पश्यति मानवः॥
जनको जन्मदाता च रक्षणाच्च पिता नृणाम्।
तातो विख्यातकरणात् कलया सा प्रजापतिः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥
स च गुरुः। यथा,—
"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ॥
बन्धुर्ज्येष्ठपितृव्यश्च पुंस्येते गुरवः स्मृताः॥"
इति कौर्म्मे उपविभागे ११ अध्यायः॥
(ज्येष्ठपितृव्यार्थे पितृशब्दप्रयोगो यथा, महाभारते। ६। ५३। ६।
"गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव॥")
स हि महागुरुः। यथा, "महागुरुर्नाम विष्णुः। अयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति॥" इति शुद्धितत्त्वम्॥
कामासक्तस्य पितुर्व्वचनमग्राह्यं यथा,—
"पितुर्व्वचो हि मा कार्षीः कामयासक्तचेतसः।
आत्मानमात्मभिक्षिप्तं तदर्थं क्षत्रियो क्षसि॥"
इत्यादिवाक्यं श्रीरामं प्रति कौशल्यावाक्यम्॥
तस्य पुत्रकृतधर्म्माधर्म्मभागित्वं यथा,—
"यः पिता स तु पुत्रोऽयमिति वै वैदिकी श्रुतिः।
निगदते पुराणे तु सा ग्रहणञ्च यथातथम्॥
न्यग्रोधस्य सुशाखायाः शुष्कात्तास्तु गता भुवि।
प्ररोहानुपपद्यन्ते मूलभंशात्तथा सुताः॥
तद्विधानुपपद्यन्ते तथान्ये ते च तादृशाः।
तस्यान्ये प्ररोहन्ति व्रीहिभ्योऽपि यथा तथा॥
एवं पुत्रैः कृतो धर्म्मस्तथाधर्म्मश्च भूपते।
पिता संलिप्यते तेन मा च त्वं संशयं कृथाः॥
न धर्म्मिणां नराणान्तु बीजनाशो भवेदिह।
सर्व्वथा ध्वंसते लोके बीजात् पुनः समुच्छ्रयः॥"
इत्याग्नेये पापनाशनतृषदानाध्यायः॥ * ॥
तस्मिन् जीवति वाङ्निष्पत्तिकनिषेधो यथा,—
"न वाङ्निष्पत्तिकं कुर्य्यात् यस्य जीवन् पिता स्थितः।
तथा ज्येष्ठः सोदरश्च यस्य जीवति स तथा॥"
इति वृहद्धर्म्मपुराणम्॥ * ॥
उत्पादकपित्रपेक्षया मन्त्रदातृपितुर्गुरुतरत्वं यथा, तन्त्रसारे।
"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
तस्मान्मन्त्रेत सततं पितुरप्यधिकं गुरुम्॥"
पञ्च पितरो यथा, चाणक्ये।
"अन्नदाता भयत्राता यस्य कन्या विवाहिता।
जनयिता चोपनेता च पञ्चैते पितरः स्मृताः॥"
सप्त पितरो यथा,—
"कन्यादाताऽन्नदाता च ज्ञानदाताभयप्रदः।
जन्मदो मन्त्रदो ज्येष्ठभ्राता च पितरः स्मृताः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६५ अध्यायः॥
एकविंशतिपितृगणा यथा,—
"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः सुभासनः।
भूमिदो भूमिजद्भूतिः पितृणां ये गणा नव॥
कव्याशः कव्यदः कव्यसदः कव्यनराश्रयः।
बर्हिषदस्तु पितरश्च बर्हिमे ते गणाः स्मृताः॥
वरो वरेण्यो वरदो भूतिदः पुष्टिदस्तथा।
विश्वपाता तथा धाता सप्तैते च गणाः स्मृताः॥
महान् महात्मा महितो महिमावान्महाबलः।
गणाः पञ्च तथैवैते पितृणां पापनाशनाः॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः।
पितृणां कथ्यते चैतत्तथा गणचतुष्टयम्॥
एकविंशतिपित्रादिगणा यैर्व्याप्तमखिलं जगत्।
ते मेऽत्र शान्तिमायन्तु दिशन्तु च सदा शिवम्॥"
इति गारुडे पितृश्लोकं ८६ अध्यायः॥
(पितृणां स्तुतिपूर्ब्बकं नामसंख्यादिकथनम् यथा मार्कण्डेये। ९६। १३—४८।
रुचिरुवाच।
"नमस्येऽहं पितॄन् श्राद्धे ये वसन्त्यधिदेवताः।
देवैरपि हि तर्प्यन्ते ये च श्राद्धे स्वधोत्तरैः॥
नमस्येऽहं पितॄन् स्वर्गे ये तर्प्यन्ते महर्षिभिः।
श्राद्धैर्मनोमयैर्भक्त्या मुक्तिमुक्तिमभीप्सुभिः॥
नमस्येऽहं पितॄन् स्वर्गे सिद्धाः सन्तर्पयन्ति यान्।
श्राद्धेषु दिव्यैः सकलैरुपहारैरनुत्तमैः॥
नमस्येऽहं पितॄन् भक्त्या येऽर्च्यन्ते गुह्यकैरपि।
तत्प्रियत्वेन वाञ्छद्भिरैहिमात्यन्तिकीं पराम्॥
नमस्येऽहं पितॄन्नित्यं येऽर्च्यन्ते भुवि ये सदा।
श्राद्धेषु श्रद्धयाभीष्टलोकप्राप्तिप्रदायिनः॥
नमस्येऽहं पितॄन् विप्रैरर्च्यन्ते भुवि ये सदा।
वाञ्छितार्थाभीष्टलाभाय प्राणापत्यप्रदायिनः॥
नमस्येऽहं पितॄन् ये वै तर्प्यन्तेऽरण्यवासिभिः।
वन्यैः श्राद्धैर्यताहारैस्तथानिर्धूतकिल्बिषैः॥
नमस्येऽहं पितॄन् विप्रैर्नैष्ठिकव्रतचारिभिः।
ये संयतात्मभिर्नित्यं सन्तर्प्यन्ते समाधिभिः॥
नमस्येऽहं पितॄन् श्राद्धे राजन्यास्तर्पयन्ति यान्।
कव्यैरन्नैर्विधिबलोकक्रियाफलप्रदान्॥
नमस्येऽहं पितॄन् वैश्यैरर्च्यन्ते भुवि ये सदा।
स्वकर्मभिरनेनित्यं पुष्यधूपान्नवारिभिः॥
नमस्येऽहं पितॄन् श्राद्धैर्ये शूद्रैरपि भक्तितः।
सन्तर्प्यन्ते जगत्यञ्च नाम्ना ख्याताः सुकालिनः॥
नमस्येऽहं पितॄन् श्राद्धैः पातालेषु ये महासुरैः।
सन्तर्प्यन्ते स्वधाहाराख्यक्तरभसैः सदा॥
नमस्येऽहं पितॄन् श्राद्धैरर्च्यन्ते ये रसातले।
भोगैरन्नैर्विधिबलागतैः कामानभीप्सुभिः॥
नमस्येऽहं पितॄन् श्राद्धैः सर्पैः सन्तर्पितान् सदा।
तत्रैव विधिवत्तत्तद्भोगसम्पत्समन्वितैः॥
पितॄन्नमस्ये निवसन्ति साक्षात्
ये देवलोके च तथान्तरीक्षे।
मर्त्येतरे ये च सुरादिपूज्या-
स्ते मे प्रतीच्छन्तु मयोपनीतम्॥
पितॄन्नमस्ये परमात्मभूता
ये वै विमाने निवसन्ति मूर्त्ताः।
यजन्ति यानुत्तमलैर्मखेभि-
र्योगीश्वराः क्लेशविशुद्धिहेतून्॥
पितॄन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ।
प्रदानयुक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु॥

तृप्यन्तु तेऽस्मिन् पितरः समस्ता
इच्छावतां ये प्रदिशन्ति कामान् ।
सुरत्वमिन्द्रत्वमतोऽधिकं वा
सुतान् पशून् स्वानि बलं ग्रहाणि ॥
सोमस्य ये रश्मिषु येऽर्कबिम्बे
शुक्रे विमाने च सदा वसन्ति ।
तृप्यन्तु तेऽस्मिन् पितरोऽमलतोये-
गंन्धादिना पृथिवीस्थो व्रजन्तु ॥
येषां हुतेऽग्नौ हविषा च तृप्ति-
र्ये भुञ्जते विप्रशरीरसंस्थाः ।
ये पिण्डदानेन सदं प्रयान्ति
तृप्यन्तु तेऽस्मिन् पितरोऽमलतोये: ॥
ये खड्गमांसेन सुरैरभीष्टै:
लाक्षोक्षितैर्दिव्यमनोहरैश्च ।
कालेन शाकेन महर्षिवर्यैः
संप्रीणितास्ते सुदमस्तु यान्तु ॥
कथान्यपीहास्ति च यान्यभीष्टा-
न्यतीव येषाममरार्चितानाम् ।
तेषान्तु सान्निध्यमिहास्तु पुण्य-
गन्धान्नभोज्येषु मया कृतेषु ॥
दिने दिने ये प्रतिगृह्णतेऽर्घां
मासान्तपूज्या भुवि येऽष्टकासु ।
ये वत्सरान्तेऽभ्युदये च पूज्याः
प्रयान्तु ते मे पितरोऽत्र तृप्तिम् ॥
पूज्या द्विजानां कुसदेन्दुभासो
ये क्षत्रियाणाञ्च नवार्कवर्णाः ।
तथा विशां ये कनकावदाता
नीलोनिभाः शूद्रजनस्य ये च ॥
तेऽस्मिन् समस्ता मम पुण्यगन्ध-
मपान्नतोयादिनिवेदनेन ।
तथाग्निहोत्रेण च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वान्वितपित्रिहेतो-
रश्नन्ति कव्यानि शुभान्वितानि ।
तृप्ताश्च ये भूतिकृतो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्नाशयन्तस्त्वखिलं प्रजानाम् ।
आद्याः सुराणामसुरैरपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं आद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरः स्मृताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ॥
सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ।
विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः शुभाननः ॥
भूतिदा भूतिकृद्भूतिः पितॄणां ये गणा नव ।
कल्याणाः कल्पता कर्त्ता कल्पः कल्पनराश्रयः ॥
कल्पनाहेतुरनघः षड्डिमे ते गणाः स्मृताः ।

वरो वरेण्यो वरदः पुष्टिदस्तुष्टिरस्तथा ॥
विश्वपाता तथा धाता सप्तैवेते तथा गणाः ।
महाञ्जहात्मा महितो महिमावाञ्जहाबलः ॥
गणाः पञ्च तथैवेते पितॄणां पापनाशनाः ।
सुखदो धनदश्चान्यो धर्म्मदोऽन्यश्च भूतिदः ॥
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ।
एकविंशतिपित्रादा येषांन्नमखिलं जगत् ॥
ते मेऽनुग्रहमास्तृण्वन्तु यच्छन्तु च सदा हितम् ॥"
इत्यादिः । यथा, महाभारते ।१३ । १७ । १४१ ।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥")
पितामहः, पुं, (पितुः पितेति । "पितृव्यमातुल-
मातामहपितामहाः ।".४ । २ । ६६ । इत्यत्र
"मातृपितृभ्यां पितरि डामहच् ।" इति वार्त्ति-
कोक्त्या डामहच् । ब्रह्मणि तु पितुः पिता जनक-
स्यापि जनकः । पितॄणां मरीच्यादीनां पितृ-
गणानां पिता वा ।) ब्रह्मा । (यथा, महा-
भारते । १ । १ । ३२ ।
"यस्मात् पितामहो यज्ञे प्रभुरेकः प्रजापतिः ।
ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ ॥"
इत्यादिः । यथा, महाभारते । १३ । १७ । १४१ ।
"सदसद्व्यक्तमव्यक्तं पिता माता पितामहः ॥")
पितृपिता । इत्यमरः । २।६ । ३१ ॥ ठाकुरदादा
इति भाषा ॥ अस्य पर्य्यायः । आर्य्यकः २ ।
इति शब्दमाला ॥ (यथा, मनौ । ३ । २२१ ।
"पिता यस्य तु वृत्तः स्याद् जीवेद्वापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्त्तयेत् प्रपितामहम् ॥")
पितामही, स्त्री, (पितुर्मातेति । पितृव्यमातुलेत्यत्र
"मातृपितृभ्यां पितरि डामहच् ।" इति डाम-
हच् । ततः "मातरि घित्वेति ।" घित्कार्य्यं ततः
घित्वात् ङीप् ।) पितामहपत्नी । इति जटा-
धरः ॥ ठाकुरमा इति भाषा ॥ (यथा, कौर्म्मे
उपविभागे ११ अध्याये ।
"मातामह्यो मातुलानी तथा मातुश्च सोदराः ।
श्वश्रूः पितामह्यो ज्येष्ठा धात्री च गुरवः स्त्रीषु ॥")
पौत्रैः पितामहधनविभागकरणे पितामह्ये
मातृवद्भागो देयः । यथा,—
"असुताश्च पितुः पत्न्यः समभागांशाः प्रकीर्त्तिताः ।
पितामह्यश्च सर्व्वास्ता मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागे व्यासः ॥
पित्र्यं, त्रि, (पितुः सम्बन्धि पितुरागतं वेति ।
पितृ + यत् । यदा, पैतृक + पृषोदरादित्वात्
साधुः ।) पितृसम्बन्धि । यथा,—
"पैत्र्यञ्च पितृकञ्चापि पित्र्यञ्च पितुरागतम् ॥"
इति शब्दमाला ॥
पितृकाननं, क्ली, (पितॄणां काननमिव ।) श्मशान-
नम् । इति जटाधरः ॥ (यथा, महानिर्व्वाण-
तन्त्रे । १० । ७६ ।
"पञ्चवर्षाधिकान् मर्त्यान् दाहयेत् पितृकानने ।
भर्त्रा सह कुलेशानि ! न दहेत् कुलकामिनीम् ॥")
पितृगृहं, क्ली, (पितॄणां गृहम् ।) श्मशानम् ।
इति हेमचन्द्रः ॥ (पितुर्गृहम् ।) पितृ-
वेश्म च ॥

पितृतर्पणं, क्ली, (तृप्यन्त्यनेनेति । तृप् + करणे
ल्युट् । पितॄणां तर्पणमिति । यद्वा, तृप + भावे
ल्युट् । पितॄणां तर्पणं तृप्तिर्यस्मात् ।) पितृ-
तीर्थम् । तत्तु तर्जन्यङ्गुष्ठयोर्म्मध्यम् । इति शब्द-
चन्द्रिका ॥ निवापः । इति हेमचन्द्रः ॥ तिलः ।
इति राजनिर्घण्टः ॥ पितृतीर्थेन पितृदेवतक-
जलदानम् । तस्यानुष्ठानं तर्पणशब्दे द्रष्टव्यम् ॥
पितॄणां तृप्तिमात्रञ्च ॥
पितृतिथिः, स्त्री, (पितृप्रिया तिथिरिति मध्य-
लोपी समासः ।) अमावास्या । यथा,—
"अमावास्यादिनं वोऽस्तु तस्यां कुशतिलोदकैः ।
तर्पिता मानुषैस्तृप्तिं परां गच्छत नान्यथा ॥"
इति वाराहे पितृसर्गक्षितिवर्णनम् ॥
पितृतीर्थं, क्ली, (पितृप्रियं तीर्थम् ।) गया । इति
जटाधरः ॥ (गयादि-२२२ पितृवल्लभतीर्थानि
मत्स्यपुराणे श्राद्धकल्पे २२ अध्याये उक्तानि ।
यथा,—
"तीर्थानि कानि गुह्यानि पितॄणां वल्लभानि च ।
नामतस्तानि वक्ष्यामि संक्षेपेण द्विजोत्तमाः ! ।
पितृतीर्थं गया नाम सर्व्वतीर्थवरं शुभम् ॥
यत्राक्षे देवदेवेशः स्वयमेव पितामहः ।
तत्रेमा पितृभिर्गीता गाथा भागमभीप्सुभिः ॥
एकया बहवः पुत्रा यदेकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
तथा वाराणसी पुण्या पितॄणां वल्लभा सदा ।
तत्राविमुक्तसान्निध्यं मुक्तिमुक्तिफलप्रदम् ॥
पितॄणां वल्लभं तद्वत् पुण्यञ्च विमलेश्वरम् ।
पितृतीर्थं प्रयागन्तु सर्व्वकामफलप्रदम् ॥
वटेश्वरस्तु भगवान् माधवेन समन्वितः ।
योगनिद्राप्रियस्तद्वत् सदा वसति केशवः ॥
दशाश्वमेधिकं पुण्यं गङ्गाद्वारं तथैव च ।
नन्दाह्रदं ललिता तद्वत्तीर्थं मायापुरी शुभा ॥
तथा मित्रपदं नाम ततः कैदारमुत्तमम् ।
गङ्गासागरमित्याहुः सर्व्वतीर्थमयं शुभम् ॥
तीर्थं ब्रह्मसरस्तद्वच्छतद्रुसलिले ह्रदे ।
तीर्थन्तु नैमिषं नाम सर्व्वतीर्थफलप्रदम् ॥
गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः ।
तथा यज्ञवराहस्तु देवदेवश्च शूलभृत् ॥
यत्र तत्काञ्चनं द्वारमद्यापश्यति वो हरः ।
नैमिषन्तु हरिचक्रस्य शीर्णा यत्राभवत् पुरा ॥
तदेतन्नैमिषारण्यं सर्व्वतीर्थनिषेवितम् ।
देवदेवस्य तत्रापि वाराहस्य तु दर्शनम् ॥
यः प्रयाति च पूतात्मा नारायणपदं व्रजेत् ।
शुतशौचं महापुण्यं सर्व्वपापविशोधनम् ॥
यत्राक्षे नारसिंहस्तु स्वयमेव जनार्द्दनः ।
तीर्थमिक्षुमती नाम पितॄणां वल्लभं सदा ॥
सङ्गमे यत्र तिष्ठन्ति गङ्गायाः पितरः सदा ।
कुरुक्षेत्रं महापुण्यं सर्व्वतीर्थसमन्वितम् ॥
तथा च सरयूः पुण्या सर्व्वदेवनमस्कृता ।
हिरावती नदी तद्वत् पितृतीर्थाधिवासिनी ॥
यमुना देविका काली चन्द्रभागा ह्लादिनी ।

पितृणां वल्लभा ज्ञेया: श्राद्धे कोटिगुणा मता: ।
जम्बूमार्गे महापुण्यं यत्र मार्गो हि लक्ष्यते ॥
अद्यापि पिष्टतीर्थं तत् सर्वकामफलप्रदम् ।
गोलक्कमिति ख्यातं पिष्टतीर्थं द्विजोत्तमा: ! ॥
तथा सरसर: पुण्यं सरो मानसमेव च ।
मन्दाकिनी तथाच्छोदा विपाशाथ सरस्वती ॥
पूर्वमिषपदन्तद्वैधनाथं महाफलम् ।
क्षिप्रा नदी महाकालक्षयाकालक्षरं शुभम् ॥
वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महाफलम् ।
भद्रेश्वरं विष्णुपदं गन्धेश्वारमेव च ॥
गयापिण्डप्रदानेन समान्याहुर्मनीषिण: ।
एतानि पिष्टतीर्थानि सर्वपापहराणि च ॥
स्मरणादपि लोकानां किंतु श्राद्धवतां नृणाम् ।
ओङ्कारं पिष्टतीर्थंच कावेरी कपिलोदकम् ॥
सप्तभेदस्रवेगायास्तथैवामरकण्टकम् ।
कुरुक्षेत्राच्छतगुणं तस्मिन् स्नानादिकं भवेत् ॥
शुक्लतीर्थंच विख्यातं तीर्थं सोमेश्वरं परम् ।
सर्वव्याधिहरं पुण्यं घृतकोटिफलाधिकम् ॥
श्राद्धे दाने तथा होमे स्वाध्याये जलसन्निधौ ।
कायावरोहणं नाम तथा चर्मण्वती नदी ॥
गोमती वरदा तद्वत्तीर्थमौशनसं परम् ।
भैरवं भृगुतुङ्गंच गौरीतीर्थमनुत्तमम् ॥
तीर्थं वैनायकं नाम भद्रेश्वरमत: परम् ।
तथा पापहरं नाम पुण्याय तपती नदी ॥
मूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा ।
महाबोधि: पाटला च नागतीर्थमवन्तिका ॥
तथा वेणा नदी पुण्या महाघ्राणं तथैव च ।
महाह्रदं महालिङ्गं दण्डार्णा च नदी शुभा ॥
घृतह्रदा घृताक्षा च तथा विष्णुपदं परम् ।
अङ्गारवाहिका तद्वन्नदौ तौ घोणसङ्गरौ ॥
कालिका च नदी पुण्या वितस्ता च नदी तथा ।
एतानि पिष्टतीर्थानि श्रुत्वन्ने स्नानदानयो: ॥
श्राद्धमेतेषु यद्दत्तमनन्तफलं स्मृतम् ।
द्रोणी वाटनदी धारासरित् क्षीरनदी तथा ॥
गोकर्णं गजकर्णंच तथा च पुरुषोत्तम: ।
द्वारका लक्ष्मणतीर्थंच तथाबुंदसरस्वती ॥
नदी मञ्जिमती नाम तथा च गिरिकर्णिका ।
धूतपापं तथा तीर्थं वसुदो दक्षिणस्तथा ॥
एतेषु पिष्टतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
तीर्थं मेघकरं नाम स्वयमेव जनार्दन: ॥
यत्र शार्ङ्गधरो विष्णुर्मेखलायामवस्थित: ।
तथा मन्दोदरी तीर्थं तीर्थं चम्पा नदी शुभा ॥
तथा सामलनाथंच महाघ्राणनदी तथा ।
चक्रवाकं चर्मकोटं तथा जम्बेश्वरं महत् ॥
अर्जुनं त्रिपुरं चैव सिद्धेश्वरमत: परम् ।
श्रीशैलं शाङ्करं तीर्थं नारसिंहमत:परम् ॥
मणेन्द्रंच तथा पुण्यमथ श्रीरङ्गसंज्ञितम् ।
एतेष्वपि सदा श्राद्धमनन्तफलदं स्मृतम् ॥
दर्शनादपि वैतानि सद्य: पापहराणि वै ।
तुङ्गभद्रा नदी पुण्या तथा भीमरथी सरित् ॥
भौमेश्वरं लक्ष्मवेणा कावेरी कृष्णमला नदी ।
नदी गोदावरी नाम त्रिसन्ध्या तीर्थमुत्तमम् ॥

तीर्थं चैत्रमकं नाम सर्वतीर्थनमस्कृतम् ।
यत्राक्षे भगवान्गौरी: स्वयमेव त्रिलोचन: ॥
श्राद्धमेतेषु सर्वेषु कोटिकोटिगुणं भवेत् ।
स्मरणादपि पापानि नश्यन्ति घृतधा द्विजा: ! ॥
श्रीपर्णी ताम्रपर्णी च जयातीर्थमनुत्तमम् ।
तथा मल्यनदी पुण्या त्रिवर्धारं तथैव च ॥
भद्रतीर्थंच विख्यातं पम्यातीर्थंच शाश्वतम् ।
पुण्यं रामेश्वरं तद्वदेलापुरमतं परम् ॥
अङ्गभूतंच विख्यातमानन्दकमलं बुधम् ।
आम्रातकेश्वरं तद्वदेशाम्भकमत: परम् ॥
गोवर्द्धनं हरिक्षेत्रं छत्रवत्रं पृथूदकम् ।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥
रामाधिवासस्तत्रापि तथा सौमित्रिसङ्गम: ।
इन्द्रकीलं महानादन्तथा च प्रियमेलकम् ॥
एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि तु ।
एतेषु सर्वदेवानां सान्निध्यं ह्यवतते यत: ॥
दानमेतेषु सर्वेषु दत्तं कोटिगुताधिकम् ।
वाहुदा च नदी पुण्या तथा सिन्धुवनं शुभम् ॥
तीर्थं पाशुपतं नाम नदी पार्वतिका शुभा ।
श्राद्धमेतेषु सर्वेषु दत्तं कोटिगुणोत्तरम् ॥
तथैव पिष्टतीर्थन्तु यत्र गोदावरी नदी ।
युतालिङ्गसहस्रेण सर्वान्तरजलावहा ॥
जामदग्न्यस्य तत्तीर्थं क्रमादायातमुत्तमम् ।
प्रतीकस्य भयाद्भिन्नं यत्र गोदावरी नदी ॥
तत्तीर्थं हयकर्णाख्यमक्षरोद्युगसंज्ञितम् ।
श्राद्धाग्निकार्यदानेषु तथा कोटिगुताधिकम् ॥
तथा सहस्रलिङ्गंच राघवेश्वरमुत्तमम् ।
सैन्यपेना नदी पुण्या यत्रेन्द्र: पतित: पुरा ॥
निहत्य नमुचिं शक्रस्तपसा स्वर्गमाप्तवान् ।
तत्र दत्तं नरै: श्राद्धमनन्तफलदं भवेत् ॥
तीर्थंतु पुष्करं नाम ग्रामाख्यामं तथैव च ।
सोमपानंच विख्यातं यत्र वैश्वानरालयम् ॥
तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च ।
मलद्धरा नदी पुण्या कौशिकी चन्द्रिका तथा ॥
वैदर्भा वाथ वेरा च पयोष्णी प्राङ्मुखा परा ।
कावेरी चोत्तरा पुण्या तथा जालन्धरी गिरि: ॥
एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते ।
लोहदण्डं तथा तीर्थं चित्रकूटस्तथैव च ॥
विन्ध्ययोगंच गङ्गायास्तथा नदीतटं शुभम् ।
कुलाभन्तु तथा तीर्थं उर्वशीपुलिनं तथा ॥
संसारमोचनं तीर्थं तथैव ऋणमोचनम् ।
एतेषु पिष्टतीर्थेषु श्राद्धमानन्त्यमश्नुते ॥
अङ्गुष्ठाकं तथा तीर्थं गौतमेश्वरमेव च ।
तथा वह्निकुं तीर्थन्तु चारितं तु ततः परम् ॥
ब्रह्मावर्तं कुशावर्तं हयतीर्थं तथैव च ।
पिङ्गारकंच विख्यातं गुह्योद्धारं तथैव च ॥
घण्टेश्वरं विल्वकंच नीलपर्वतमेव च ।
तथा च धरणीतीर्थं रामतीर्थं तथैव च ॥
अश्वतीर्थंच विख्यातमगस्त्यं श्राद्धदानयो: ।
तीर्थं वेदगिरो नाम तथैवौघवती नदी ॥
तीर्थं वसुप्रदं नाम छागलाख्यं तथैव च ।
एतेषु श्राद्धदातार: प्रयान्ति परमं पदम् ॥

तथा च वदरीतीर्थं गयातीर्थं तथैव च ।
जयन्तं विजयश्चैव मुक्कतीर्थं तथैव च ॥
श्रीपतेश्च तथा तीर्थं तीर्थं रैवतकं तथा ।
तथैव द्वारदातीर्थं भद्रकालेश्वरं तथा ॥
वैकुण्ठतीर्थंच परं भौमेश्वरमथापि वा ।
एतेषु श्राद्धदातार: प्रयान्ति परमां गतिम् ॥
तीर्थं माल्यवद्यं नाम करवीरपुरं तथा ।
कुशेश्वरंच विख्यातं गौरीशिखरमेव च ॥
नकुलेशस्य तीर्थंच कदलं तथैव च ।
दक्षिपुण्यकरं तद्वत् पुष्करीकपुरं तथा ॥
सप्त गोदावरीतीर्थं सर्वतीर्थेश्वरेश्वरम् ।
तत्र श्राद्धं प्रदातव्यमनन्तफलमीप्सुभि: ॥
एष तूद्देशत: प्रोक्तस्तीर्थानां संग्रहो मया ।
वागीशोऽपि न शक्नोति विस्तरात् किंतु ।
मानुष: ॥
सत्यं तीर्थं दया तीर्थं तीर्थमिन्द्रियनिग्रह: ।
वर्णाश्रमाणां गेहेऽपि तीर्थान्तु सप्तदाहृतम् ॥
एतत्तीर्थेषु यच्छ्राद्धं तत् कोटिगुणमिष्यते ।
यस्मात् तस्मात् प्रयत्नेन तीर्थं श्राद्धं समाच-
रेत् ॥"*॥)
तर्व्यश्वकुण्डयोर्मेध्यम् । इत्यमर: ॥
"अन्तराकुण्डदेशिन्यो: पितृणां तीर्थमुत्तमम् ॥"
इति कौर्मे उपविभागे ११ अध्याय: ॥

पिष्टदानं, क्ली, (पितरि पिण्डे वा दानम् ।) पिण्डादु-
द्धरणानन्तरवस्त्रादिदानम् । पिष्टपदं न्तोपलक्षणं
तेन माषादेरपि ग्रहणम् । तत्पर्य्याय: ।
निवाप: २ । इत्यमर: । २।७।३१ ॥ निवपनम् ३
पिष्टदानकम् ४ । इति शब्दरत्नावली ॥

पिष्टदानकं, क्ली, (पिष्टदान + स्वार्थे कन् ।)
पिण्डदेयकदानम् । इति शब्दरत्नावली ॥

पिष्टपक्ष:, पुं, (पिष्टप्रिय: पक्ष: ।) गौणाश्विन-
कृष्णपक्ष: । स तु प्रेतपक्ष: । तत्र श्राद्धकर्म
यथा, हेमाद्रिमाधवसंग्रहयोर्नागरखण्डम् ।
"आषाढ्या: पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नर: कुर्य्यादेकस्मिन्नपि वासरे ।
तस्य संवत्सरं यावत् तृप्ता: स्यु: पितरो ध्रुवम् ॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तम: पिष्टपक्ष: स्यादन्यत्रैव तु पञ्चम: ॥"
इति मलमासतत्त्वम् ॥

पिष्टपति:, पुं, (पितॄणां पति: ।) यम: । इत्य-
मर: ।१।१।६१ ॥ (यथा, मार्कण्डेये १०४।३७
"त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो
वित्तेश: पिष्टपतिरम्बुपति: समीर: ।
सोमोऽग्निर्गगनमहीधरोऽब्धिसंघ:
किं स्तुत्यं तव सकलात्मरूपधार्य: ॥")

पिष्टपिता, [तृ] पुं, (पितु: पिता ।) पितामह: ।
इत्यमर: । २ । ६ । ३३ ॥

पिष्टप्रख्य:, स्त्री, (पितॄणां प्रख्यमिव । पिष्टशब्दो
सन्ध्यावन्दनाख्यक्रियोपयोगिद्रव्यस्य प्रख्यतुल्यपाल-
कतया तथात्वम् ।) सन्ध्या । इत्यमर: ।१।४।३॥
(यथा, आर्य्यासप्तशत्याम् । ५०१ ।
"रजनीमियमुपनेतुं पिष्टप्रख्य: प्रथमहुपतस्थे ।

रञ्जयति स्वयमिन्दुं कुमायकं दुष्टदूतीव ॥"
पितुः प्रस्तर्जनयित्री ।) पितामही ॥
पितृप्रियः, पुं, (पितॄणां प्रियः ।) भङ्गराजः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य भङ्गराजशब्दे ज्ञातव्याः ॥)
पितृबन्धुः, पुं, (पितुर्बन्धुः ।) पितामहभगिनीपुत्रः । पितामहीभगिनीपुत्रः । पितुर्मातुलपुत्रः । इत्युद्वाहतत्त्वम् ॥
पितृबान्धवः, पुं, (पितुर्बान्धवः ।) पितृबन्धुः । यथा, उद्वाहतत्त्वे ।
"पितुः पितुःस्वसुः पुत्राः पितुर्मातुःस्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥"
पितृभोजनः, पुं. (पितृभिर्भुज्यते इति । भुज + कर्म्मणि ल्युट् । पित्रुद्देश्यकदानेऽस्य प्रशस्ततया तथात्वम् ।) माषः । इति राजनिर्घण्टः ॥ (भुज + भावे ल्युट् । पितॄणां भोजनमिति ।) पितॄणां भक्षणे, क्ली ॥
पितृभ्राता, [तृ] पुं, (पितुर्भ्राता ।) पितृव्यः । इत्यमरः । २ । ६ । ३१ ॥
पितृयज्ञः, पुं, (पितृभ्यः पितॄनुद्दिश्येत्यर्थः यो यज्ञः ।) तर्पणम् । यथा, मनुः । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"
पितृलोकः, पुं, (पितॄणां लोकः ।) पितॄणां भुवनम् । (यथा, महाभारते । १ । ६२ । १० ।
"कथञ्च उहुलाः संगाः पाण्डवः शल्यसारथिः । अस्यन्नेकोऽनयत् सर्व्वाः पितृलोकं धनञ्जयः ॥")
अस्य विवरणं यथा,—
मार्कण्डेय उवाच ।
"सर्व्वेषामेव देवानामाद्यो नारायणो गुरुः । तस्माद्ब्रह्मा समुत्पन्नः सोऽपि सप्तार्हजन्मभोक् ॥ मा यजस्वेति तेनोक्तास्तदा ते परमेष्ठिनः । आत्मनात्मानमेवाग्ये अयजन्त इति श्रुतिः ॥ तेषां वै ब्रह्मजातानां महावैकारिकर्म्मणाम् । अपध्यद्दाभिचारेण महानेष क्षयो यतः । प्रभ्रष्टज्ञानिनः सर्व्वे भविष्यथ न संशयः ॥ एवं शप्तास्ततस्तेऽपि ब्रह्मणात्मसमुद्भवाः । मद्योर्वंशकरान् पुत्रानुत्पाद्य त्रिदिवं ययुः ॥ गतेषु प्रयातेषु त्रिदिवं ब्रह्मवादिषु । तत्पुत्राः श्राद्धदानेन तर्पयामासुरञ्जसा ॥ ते च वैमानिकाः सर्व्वे ब्रह्मणः सप्त मानसाः । तत्पिण्डदानमन्त्रोक्तं प्रयच्छन्तो व्यवस्थिताः ॥
गौरमुख उवाच ।
ये च ते पितरो ब्रह्मन् स्वच्छ कालं समासते । कियन्तो वै पितृगणास्तस्मिन् लोके व्यवस्थिताः ॥
मार्कण्डेय उवाच ।
प्रवर्त्तन्ते वराः केचिद्देवानां सोमवर्द्धनाः । ते मरीच्यादयः सप्त स्वर्गे ते पितरः स्मृताः ॥ चत्वारो मूर्त्तिमन्तो वै त्रयस्त्वन्ये ह्यमूर्त्तयः । तेषां लोकनिसर्गञ्च कीर्त्तयिष्यामि तच्छृणु ॥ प्रभावञ्च महर्षे तं विस्तरेण निबोध मे । धर्म्मस्यर्षिवरास्तेषां त्रयोऽन्ये परमा गणाः ॥ तेषां नामानि लोकांश्च कीर्त्तयिष्यामि तच्छृणु ॥ लोकाः सन्तानकामाय यज्ञ तिष्ठन्ति भास्वराः । अमूर्त्तयः पितृगणास्ते वै पुत्राः प्रजापतेः ॥ विराजस्य प्रजाः श्रेष्ठास्ते वैराजा इति स्मृताः । देवानां पितरस्ते हि तान् यजन्तीह देवताः ॥ एते वै लोकविभ्रष्टा लोकान् प्राप्य सनातनान् । पुनर्यंगप्रतानेषु जायन्ते ब्रह्मवादिनः ॥ ते प्राप्य तां स्मृतिं भूयः सिद्धियोगमनुत्तमम् । चिन्त्य योगगतिं मुख्यां पुनरावृत्तिदुर्लभाः ॥ एतेऽस्मिन् पितरः श्राद्धे योगिनां योगवर्द्धनाः । आप्यायितास्तु ते पूर्व्वं येऽपि योगबले रताः ॥ तस्मात् श्राद्धानि देयानि योगिनां योगसत्तमैः । एष वै प्रथमः सर्गः सोमपानामनुत्तमः ॥ एते त्वेकतनवो वर्त्तन्ते द्विजसत्तमाः । भूर्लोकवासिनो याम्या भुवर्लोकनिवासिनः ॥ स्वर्गलोका मरीच्यास्तेषां याम्या महर्गताः । कल्पवासिकसंज्ञानां तेषामपि अयं स्थितः ॥ सनकाद्यास्ततस्तेषां वैराजास्तपसि स्थिताः । तेषां सत्यगताः प्रोक्ता एतेषां पितृसन्ततिः ॥ सप्तधा सप्तलोकेषु आदिमन्वन्तरक्रिया । अन्येषां वसवः साध्या रुद्रादित्याश्विनाविति ॥ अयतः सर्व्ववर्णानां साधारण्येन संस्थिताः । ऋषयश्च तदुत्पन्ना इति सप्तविधा गणाः ॥ तेषां कल्यास्तु संज्ञाता महती पितृसन्ततिः । आग्निष्वात्ताश्च मारीचा वैराजा बर्हिसंज्ञिताः ॥ सुकाला नाम पितरो वह्निस्तस्य प्रजापतेः । तेऽपि याम्याश्चाभिवर्त्तैर्न मूर्त्तेश्च पृथक् स्मृतम् ॥ वर्जयाभ्युद्यतः मूढः सर्व्वान् पितॄन् यजेत् । न तु तस्य पृथक् सन्ति पितरः मूर्त्तजातयः ॥ सुतृप्तचेतनका ब्रह्मन् ! न दह्यन्ते पितृष्वपि । विशेषणात्तदृष्टा तु पुराणानाञ्च दर्शनात् ॥ एवं ऋषिसुतैः प्राप्तैर्ज्ञात्वा याजकसम्भवान् । स्वयं दृष्ट्वा स्मृतिर्लब्धा पुत्राणां ब्रह्मणा सतः ॥ परं निर्व्वाणमापन्नास्तेऽपि ज्ञानिन एव च । वैश्यादीनां कव्यभाजो वर्णानां वसवादयः ॥ अविशेषेण विज्ञेया गन्धर्व्वाद्या अपि ध्रुवम् । एष ते पैतृकः सर्गः उद्देशेन महामुने ! । कथितो नास्त एवास्य वर्षकोट्या हि दह्यते ॥"
इति वाराहे श्राद्धकल्पः ॥ * ॥
अपि च ।
"पितॄणां सम्भवं राजन् ! कथ्यमानं निबोध मे । पूर्व्वं प्रजापतिर्ब्रह्मा सिसृक्षुर्विविधाः प्रजाः ॥ एकाग्यमानसः सर्व्वान्ससर्ज्जाथ मनसो बहिः । ज्ञात्वा परमकं ब्रह्म ध्यायन् सर्व्वेषु रूपकैः ॥ तस्यात्मनि तदा योगं गतस्य परमेष्ठिनः । तन्मात्रा निर्ययुर्देहाद्धूमवर्णाकृतत्विषः ॥ पितर इति भाषन्तः सुरा सोममितोऽसृजन् । ऊर्द्धं जिगमिषवो ये अधःसंस्थास्तपस्विनः ॥ तान् दृष्ट्वा सहसा ब्रह्मा तिर्यक्संस्थाञ्छदोऽनुगान् । भवन्तः पितरः सन्तु सर्व्वेषां गृहमेधिनाम् ॥ ऊर्द्ध्वगास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥ इत्युक्ता तु तदा ब्रह्मा तेषां पन्थानमाकरोत् । दक्षिणायनसंस्थस्तु पितृणामतु पितामहः ॥ तूष्णीं ससर्ज्ज भूतानि तन्मयः पितरस्ततः । तृप्तिं नो देहि भगवन् यथा विन्दामहे सुखम् ॥
ब्रह्मोवाच ।
अमावास्यादिनं वोऽस्तु तस्यां कुप्तिलोदकैः । तर्पिता मानुषेस्तृप्तिं परां गच्छत नान्यथा ॥ तिला देयास्तथैतस्यामुपोष्य पितृभक्तितः । परमं तस्य सन्तुष्टाः परं यच्छत मा चिरम् ॥"
इति वाराहे पितृसर्गोत्पत्तिवर्णनम् ॥ * ॥
पितृश्राद्धविधौ देवताविशेषाः पितृगणाश्च यथा,
"ऋतुदक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः । रोचकश्चार्द्रवाश्चैव तथा चान्यः पुरूरवाः ॥ विश्वेदेवा भवन्त्येते दश सर्व्वत्र पूजिताः । विश्वेदेवौ ऋतुदक्षौ सर्व्वास्विष्टिषु विश्रुतौ ॥ नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके । नवान्नालम्भने देवौ कामकालौ सदैव हि ॥ अपि कन्यागते सूर्य्ये श्राद्धे च ध्वनिरोचकौ । पुरूरवाश्चार्द्रवाश्च विश्वेदेवौ च पर्व्वणि ॥ सुभास्वरा बर्हिषदो ह्यग्निष्वात्तास्तथैव च । आज्यपाश्चोपहूताश्च कव्यादाश्च सुकालिनः । एते पितृगणाः सप्त पौराणाः केचिदेव हि ॥"
इत्यग्निपुराणम् ॥ * ॥
अग्निष्वात्ताद्येकतृप्तिर्यथा,—
"ततो निमग्नेन्द्रियकं विकारं चतुराननः । जिघृक्षुरपि तत्याज तां सन्ध्यां कामरूपिणीम् ॥ तनूशरीरात्तु धर्म्माज्ञो यत् पपात द्विजोत्तमाः । अग्निष्वात्ता बर्हिषदो जाताः पितृगणास्ततः ॥ भिन्नाञ्जननिभाः सर्व्वे फुल्लराजीवलोचनाः । नितान्तसंयताः पुण्याः संसारविसुखाः परे ॥ सहस्राणां चतुःषष्टिरग्निष्वात्ताः प्रकीर्त्तिताः । षड़शीतिसहस्राणि तथा बर्हिषदो द्विजाः ॥"
इति कालिकापुराणे २ अध्यायः ॥ * ॥
तेषां तर्पणविधिर्यथा,—
"अपसव्यं ततः कृत्वा सव्यं जानु च भूतले । अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥ सुकालिनो बर्हिषदस्तथा चैवाज्यपान् पुनः । तर्पयेत्तु पितॄन् भक्त्या सतिलोदकचन्दनैः ॥ दर्भपाणिस्तु विधिवत् प्रेतांस्तांस्तर्पयेत्ततः । पित्रादीनामगोत्रेण तथा मातामहानपि । सन्तर्प्य विधिवद्ब्रह्मा इमं मन्त्रमुदीरयेत् ॥ ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु यच्चास्तोऽभिवाञ्छति ॥"
इति मात्स्ये दानविधौ ८७ अध्यायः ॥
पितृवनं, क्ली, (पितॄणां वनमिव ।) श्मशानम् । इत्यमरः । २ । ८ । ११८ ॥ (यथा, महाभारते । ११ । ७ । १५ ।
"सर्व्वे पितृवनं प्राप्ता स्वपन्ति विगतज्वराः । निर्म्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥")
पितृवनेश्वरः, पुं, (पितृवने श्मशाने चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक्समासः ।) शिवः । इति केचित् ॥

पितृवसतिः, स्त्री, (पितृणां वसतिर्यत्र ।) श्मशानम् । इत्यमरटीकायां रमानाथः ॥

पितृव्यः, पुं, (पितुर्भ्राता । "पितृव्यमातुलमातामहपितामहाः ।" ४ । २ । ७६ । इत्यत्र "पितुर्भ्रातरि यत् ।" इति वार्त्तिकोक्त्या यत्प्रत्ययः ।) पितृभ्राता । इत्यमरः । २ । ६ । २१ ॥ अपि च ।

"पितृव्यो जनकभ्राता ज्येष्ठतातोऽग्रजो यदि ।
पितुः कनिष्ठभ्राता तु खुज्जतातोऽभिधीयते ॥"

इति शब्दरत्नावली ॥

पितृष्वसा, [स्वस्] स्त्री, (पितुः स्वसा भगिनी । "मातृपितृष्वसा ।" ८ । ३ । ८४ । इति षत्वम् ।) पितुर्भगिनी । पिसी इति भाषा । यथा,

"मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"

इति दायभागः ॥

पितृष्वसीयः, त्रि, पितृष्वसुरपत्यम् । (पितृष्वस्र + छः ।) पितृभागिनेयः । इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १११ । २ ।

"पितृष्वसीयाय सुतामनपत्याय भारत ! ।
अग्न्याधेये प्रतिज्ञाय स्वस्यापत्यं स लब्धवान् ॥")

पितृसन्निभः, पुं, (सम्यङ्निभातीति सन्निभशब्दात् । पितुः सन्निभः ।) पितृतुल्यः । तत्पर्य्यायः । मनोजवः २ मनोजवसः ३ । इत्यमरभरतौ ॥

पितृस्वः, स्त्री, (स्वते इति स्वर्जनकौ । पितृणां स्वर्जनकौव । पितृत्वे सत्यागामित्वात्तेषां स्वर्जनकत्वात् जननीवत् पालकत्वेनैव तथात्वम् ।) सन्ध्या । इति शब्दमाला । (पितरं स्वते इति । क्विप् । पितामही । इति व्युत्पत्तिलब्धोऽर्थः ॥)

पितृहूः, पुं, (पितृनाह्वयत्यनेनेति । पितृ + हे + करणे क्विप् ।) दक्षिणकर्णः । यथा, श्रीभागवते । ७ । २५ । ५० ।

"पितृहूर्नृपपूर्य्या हार्दक्षिणेन पुरञ्जनः ॥"

"घ्राणे च प्रथमं श्रोतं कर्म्मकाण्डं इत्येतावता सामान्येन प्रवृत्तसंज्ञकस्य कर्म्मकाण्डस्य दक्षिणकर्णेन श्रवणमिष्यते । ततस्तदर्थमनुष्ठाय पितृभिराहूतः पितृलोकप्रापकं पितृयानं प्रपद्यते । तदनेन प्रकारेण पितृणामाह्वानसाधनेन भवति पितृहूर्दक्षिणः कर्णः । एवं तद्विपरीतेन उत्तरकर्णो देवहूः । तथा च व्याख्यास्यति । पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्रुतः । प्रवृत्तश्च निवृत्तश्च द्विधा पञ्चालसंज्ञितम् ॥"

इति नदीकायां श्रीधरस्वामी ॥

पित्तं, क्ली, (अपिद्दीयते प्रकृतावस्थया रक्ष्यते विकृतावस्थया नाश्यते वा शरीरं येनेति । अपि + दे ङ पालने, दो य च्छेदने वा + क्तः । "अव उपसर्गात्तः ।" ७ । ४ । ४७ । इति सादेशः । अपरस्योपः ।) शरीरस्यधातुविशेषः । तत्पर्य्यायः । मायुः २ । इत्यमरः । २ । ६ । ६२ ॥ पलञ्वलः ३ । इति शब्दरत्नावली ॥ तेजः ४ तिक्तधातुः ५ उष्मा ६ अग्निः ७ अनलः ८ । (यथा, महाभारते । ६ । ८१ । ४१ ।

"अभिमन्योस्ततस्तेषु घोरं युद्धमवर्त्तत ।
शरीरस्थ यथा राजन् ! वातपित्तकफैस्त्रिभिः ॥")

अस्य गुणाः ।

"पित्तञ्च तिक्ताम्लरसञ्च सारकं
तूष्णं द्रवं तीक्ष्णमिदं मधौ वसु ।
वर्षात्यकाले भृशमर्कराजे
मध्यन्दिने तप्यति च कुप्यति ॥"

इति राजनिर्घण्टः ॥*॥

अपि च ।

"सर्व्वं पित्तमपस्मारकुष्ठदुष्टव्रणापहम् ।
चक्षुष्यं कटुतीक्ष्णोष्णमुद्गादक्रिमिनाशनम् ॥"

इति राजवल्लभः ॥ * ॥

पित्तस्य स्वरूपमाह ।

"पित्तमूष्मा द्रवं पीतं नीलं सत्त्वगुणोत्तरम् ।
सरं कटु लघु स्निग्धं तीक्ष्णमम्लञ्च पाकतः ॥"

पीतं निरामम् । नीलं सामम् । एकं पित्तं वातघ्नामस्थानकर्म्मभेदैः पञ्चविधम् ॥ * ॥

तेषां पित्तानां नामाख्याह ।

"पाचकं रञ्जकञ्चापि साधकालोचके तथा ।
भ्राजकञ्चेति पित्तस्य नामानि स्थानभेदतः ॥"*॥

अथ पाचकादीनां स्थानाख्याह ।

"अग्न्याशये यकृत्प्लीह्नोर्हृदये लोचनद्वये ।
त्वचि सर्व्वशरीरेषु पित्तं निवसति क्रमात् ॥"*॥

अथ तेषां कर्म्माण्याह ।

"पाचकं पचते भुक्तं शेषाग्निबलवर्द्धनम् ।
रसमूत्रपुरीषाणि विरेचयति नित्यशः ॥"

पाचकं पित्तमामपक्वाशयमध्यस्थं षड्विधमाहारं भोज्यं भक्ष्यं चर्व्व्यं लेह्यं चोष्यं पेयं पचति दोषरसमूत्रपुरीषाणि पृथक् करोति च । तदाम्याशयस्थमेवालम्बाख्या रसरञ्जनहृदयस्थकफतमोऽपनोदनरूपस्वकर्म्मणा प्रभाप्रकाशनाभ्यङ्गपादादिपाचनाद्यग्निकर्म्मणा शेषाणां पित्तस्थानानामनुग्रहं करोति । शेषाण्यपि पित्तस्थानानि यकृत्प्लीहादीनि भागेन गत्वा तत्र तत्र रसरञ्जनादिकर्म्माभिरूपकरोतीत्यर्थः । कथम्भूतं पाचकं पित्तं शेषाग्निबलवर्द्धनं शेषा अवयवः पृथिव्यादिमहाभूतगताः सप्तधातुगताश्च । यत उक्तं चरकेण ।

"भौमाप्याग्नेयवायव्याः पञ्चोष्माणः सनाभसाः ।"

इति ।

उष्माणोऽवयवाः । यत उक्तं वाग्भटे ।

"दोषधातुमलादीनामुष्मेत्याग्नेयमासनम्" इति । दोषधातुमलादीनामुष्मेत्यग्निरित्यर्थः । रसादिधातुगताश्च सप्त तेषां बलवर्द्धनम् । यथा गृहे स्थापितानि रत्नानि खद्योतवद्दूरभास्वराणि तान्यपि दीपज्योतिषा दूरप्रकाशकानि भवन्ति । तथा अग्न्याशयस्थपाचकाग्नितेजसा सर्व्वेऽवयवो बलवन्तो भवन्ति । तथा च वाग्भटः ।

"अन्नस्य पक्ता सर्व्वेषां पक्वाशयोऽधिको मतः ।
तत्मूलास्ते हि तद्वृद्धिक्षयवृद्धिक्षयात्मकाः ॥"

इति ॥

नन्वत्र पित्तादन्योऽग्निराख्यातः पित्तमेवाग्निरिति सन्देहः । उच्यते पित्तस्योष्मादिगुणद्वारा धारणरञ्जनदर्शनादिकर्म्मणश्च न खलु पित्तव्यतिरेकेणान्योऽग्निः । तस्मादग्निरूपस्यैव पित्तस्य स्थानभेदात् पाचकरञ्जकसाधकालोचकभ्राजकसंज्ञाः । तथा च वाग्भटे ।

"पाचकं तिलमात्रं स्यात् कार्षिक्यास्तस्य दीपना ।
अनुग्रहात्यविज्ञातं पित्तं पाकोग्रदर्शनैः ॥
क्षुत्तृड्रुचिप्रभामेधाधीशौर्य्यतनुमार्दवैः ।
पित्तं पक्वाशयं तस्य पक्वामाशयमध्यगम् ॥
पञ्चभूताग्निकत्वेऽपि यत्तेजसगुणोदयात् ।
तत्पक्तृद्रवत्वं पाकादिकर्म्मणानलसङ्ज्ञितम् ॥
पचत्यन्नं विभजते सारकिट्टौ पृथक् तथा ।
तत्रस्थमेव पित्तानां शेषाणामप्यनुग्रहम् ॥
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥"

नन्वत्र यदि पित्ताग्नेरभेदस्तदा कथं पृथक् पित्तस्य ग्रहणमभेदोपपत्तिमिति । तथा मतस्याः पित्तं कुर्व्वन्ति न च तेऽग्निदीप्तिकरा इति । तथा पित्ताधिक्यात्तीक्ष्णोऽग्निरित्यपि कथं स्यात् । तथा समदोषः समाग्निश्चेत्यपि वक्तुं न युज्यते । तथा द्रवं स्निग्धमधोगच्च पित्तं वह्निरतोऽन्यथेति । अत्रोच्यते । पित्तमयेः सततताधिष्ठानम् । तथा चोक्तं तन्त्रान्तरे ।

"अग्निभिन्नगुणैर्युक्तः पित्तं भिन्नगुणैस्तथा ।
द्रवं स्निग्धमधोगच्च पित्तं वह्निरतोऽन्यथा ॥
तस्मात्तेजोमयं पित्तं पित्तोष्मा यः स शक्तिमान् ।
स सञ्चरति कुक्षिस्थः सर्व्वतो धमनीमुखैः ॥
स कायाग्निः स कायोष्मा स पक्ता स च जीवनम् ।
अनन्यगतिरित्येवं देहे कायाग्निरुच्यते ॥"

अन्यच्च ।

"वामपार्श्वाश्रितं नाभेः किञ्चित् सोमस्य मण्डलम् ।
तन्मध्ये मण्डलं सौम्यं तन्मध्येऽग्निर्व्यवस्थितः ॥
जरायुमात्रप्रच्छन्नः काचकोषस्थदीपवत् ॥"

तथा च मधुकोषे । "द्रवतेजःसमुदायात्मकस्य पित्तस्य तेजोभागोऽग्निरिति । तेन पित्तमग्निवत् मन्यते । अग्नितापितायोगोलकवत् ।" परमार्थतस्तु अग्निः पित्ताद्भिन्न एवेति सिद्धान्तः । अतएवाह रसप्रदीपे ।

"आहरो भगवानग्निरीश्वरोऽस्य पाचकः ।
सौम्यादन्नरसादन्नो विवेक्तुं नैव शक्यते ॥
नाभौ मध्ये शरीरस्य विद्यात् सोममण्डलम् ।
सोममण्डलमध्यस्थं विद्यात् सूर्य्यस्य मण्डलम् ॥
प्रदीपवत्तत्र वृत्तौ स्थितो मध्ये हुताशनः ।
सूर्य्यो दिवि यथा तिष्ठंस्तेजोयुक्तैर्गभस्तिभिः ॥
विशोधयति सर्व्वाणि पक्वाशयगतानि च ॥
तद्वच्छरीरिणां भुक्तं त्वनलो नाभिमाश्रितः ।
मयूखैः पचते क्षिप्रं नानाव्यञ्जनसंस्कृतम् ॥
स्थूलकायेषु सर्व्वेषु यवमात्रप्रमाणतः ।
कृशकायेषु सर्व्वेषु तिलमात्रप्रमाणतः ॥
कृमिकीटपतङ्गेषु चाणुमात्रोऽवतिष्ठते ॥" इति ।

पुनः प्रकृतमनुसरति ।

"रञ्जकं नाम यत् पित्तं तद्रसं ग्रीवजातं नयेत् । यत्तु साधकसंज्ञं तत् कुर्य्याद्बुद्धिं धृतिं स्मृतिम्॥" धृतिं मेधाम् ।
"यदालोचकसंज्ञं तद्रूपग्रहणकारणम् । भ्राजकं कान्तिकारि स्यादभ्यङ्गादिपाचकम् ॥
पित्तप्रकृतिको यथा,—
"पित्तप्रकृतिको यादृक् तादृग्रोऽथ निगद्यते । अकालपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ॥ बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति । ग्रामकेशः समो मृदुर्बहुवीर्य्यो महाबलः ॥
पित्तं वह्निर्वह्निजं वा तदस्मात्
पित्तोद्रिक्तस्तीव्रतृष्णो बुभुक्षुः ।
गौरोष्णाङ्गस्ताम्रहस्तोऽङ्गिरक्तः
शूरो मानी पिङ्गकेशोऽल्पलोमा ॥"
पित्तप्रकृतिकन्यका यथा,—
"आताम्रकपिमार्जारयशोलूकाश्च पैत्तिकाः ॥"
पित्तस्योपशमहेतुमाह ।
"तिक्तस्वादुकषायशीतपवनच्छायानिशावीजनज्योत्स्नाभूगृहयन्त्रवारिजलदस्त्रीगात्रसंस्पर्शनम् ।
सर्पिःक्षीरविरेकसेकरुधिरस्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशान्तिं नयेत् ॥"
अथ पित्तप्रकोपकारणानि ।
"कटूष्णाम्लविदाहितीक्ष्णलवणक्रोधोपवासातपक्षीसंभोगलघ्वशुधाभिहननव्यायाममद्यादिभिः। भुक्तेऽजीर्य्यति भोजने च शरदि ग्रीष्मे तथा प्राणिनां मध्याह्ने च तथार्द्धरात्रसमये पित्तप्रकोपो भवेत्॥"
इति भावप्रकाशे पूर्वखण्डे २ भागे ॥
(यथा च ।
"अत्युष्णरुक्षाम्लकटुप्रदाहैः
सौधीः सुरासेवनेनातिधर्म्मे ।
क्रोधादपि स्वेदने च व्यवाये
अभोजने याति कोपञ्च पित्तम् ॥
कुलत्थमाषकौद्रवमूलकेषु ग्रिष्मे
तिलातसीराजिकाग्राकदुष्णे ।
निशाजागरे योधने च श्रमे वा
घनान्ते शरत्सु प्रकोपः प्रदिष्टः ।
शरद्यं वासरे मध्यगेऽर्के निशीथे
ऽसुजीर्य्यत्प्रभुक्ते प्रकोपः प्रदिष्टः ॥"
इति हारीते प्रथमस्थाने पञ्चमेऽध्याये ॥)
स तु ज्वरजनकमन्दाग्निजनकः ।
"मन्दाग्निस्तस्य जनको मन्दाग्निर्जनकाश्रयः ।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २६ अध्यायः ॥*॥
(यथा च ।
"पित्तं पञ्चात्मकं तत्र पक्वामाशयमध्यगम् ।
पञ्चभूतात्मकत्वेऽपि यत्तेजसगुणोदयात् ॥
व्यक्तत्ववत्त्वं पाकादिकर्म्मणानलशब्दितम् ।
पञ्चत्वञ्च विभजते सारकिट्टौ पृथक् तथा ॥
तत्रस्थमेव पित्तानां श्रेष्ठानामप्यनुग्रहम् ।
करोति बलदानेन पाचकं नाम तत् स्मृतम् ॥
आमाशयाश्रयं पित्तं रञ्जकं रसरञ्जनात् ।
बुद्धिमेधाभिमानाद्यैरभिप्रेतार्थसाधनात् ॥
साधकं हृद्गतं पित्तं रूपालोचनतः स्मृतम् ।
दृक्स्थमालोचकं त्वक्स्थं भ्राजकं भ्राजनात्त्वचः ॥"
इति वाभटे शरीरस्थाने द्वादशेऽध्याये ॥
"पित्तविकाराश्चत्वारिंशदत ऊर्द्धं व्याख्यास्यन्ते। तद्यथा, औष्ण्यं दौष्ण्यं दाहश्च दवथुश्च धूमकश्चान्तकश्च विदाहश्च अम्लदाहश्चासदाहश्चोष्माधिक्यञ्चातिस्वेदश्चाङ्गगन्धश्चाङ्गावयवदरणञ्च शोणितक्लेदश्च मांसक्लेदश्च त्वग्दाहश्च मांसदाहश्च त्वङ्मांसदरणञ्च रक्तकोठाश्च रक्तविस्फोटाश्च रक्तपित्तञ्च रक्तमण्डलानि च हरितत्वञ्च हरितत्वञ्च नीलिका च कक्षा च कामला च तिक्तास्यता च पूतिसुखता चलज्जाया आधिक्यञ्चाहृल्लासाम्लपाकश्च गलपाकश्चाक्षिपाकश्च गुदपाकश्च मेढ्रपाकश्च जीवादानञ्च तमःप्रवेशश्च हरितहारिद्रमूत्रनेत्रवर्च्चस्त्वचेति चत्वारिंशत् पित्तविकाराः। पित्तविकाराणामपरिसंख्येयानामाविष्कृततमा व्याख्याता भवन्ति। सर्व्वेष्वपि खल्वेतेषु पित्तविकारेष्वेषु चातुष्कीये पित्तस्येदमात्मरूपमपरिणामिकर्म्मेतच्च खलूत्तरं यत्तदुपलभ्य तदवयवं वा विमुक्तसन्देहाः पित्तविकारमेवाध्यवस्यन्ति कुशलाः। तद्यथा,—
औष्ण्यं तैक्ष्ण्यं लाघवमनतिस्नेहो वर्णश्च शुक्लारुणवर्णो गन्धश्च विस्रो रसौ च कटुकाम्लौ पित्तस्यात्मरूपाण्येवंविधत्वाच्च कर्म्मणः खल्वस्यामिदमस्य भवति। तं तं शरीरावयवमाविशतो दाहोष्मपाकस्वेदक्लेदकोथस्रावरागाः। यथास्वञ्च गन्धवर्णरसाभिनिर्व्वर्त्तनं पित्तस्य कर्म्माणि तैरन्वितं पित्तविकारमेवाध्यवस्येत्। तं मधुरतिक्तकषायशीतैरुपक्रमैरुपक्रमेत। स्नेहविरेकप्रदेहपरिषेकाभ्यङ्गावगाहादिभिः पित्तहरैर्मात्रां कालञ्च प्रमाणीकृत्य विरेचनन्तु सर्व्वोपक्रमेभ्यः पित्ते प्रधानतमं मन्यन्ते भिषजः। तद्ग्राहित एवाशयमनुप्रविश्य केवलं वैकारिकं पित्तमूलञ्चापकर्षति। तत्रावजिते पित्तेऽपि शरीरान्तर्गताः पित्तविकाराः प्रशान्तिमापद्यन्ते। यथाग्नौ समीढे केवलमग्निगृहञ्च ग्लपितं भवति तद्वत्॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥*॥
"पित्तमुष्णाम्लतीक्ष्णं द्रवं विस्रमम्लकटुकञ्च। तस्योष्णात्वात् पित्तला भवन्त्युष्णाशयाः सुकुमारावदातगात्राः प्रभूतपिप्लुव्यङ्गतिलकपिटिकाः क्षुत्पिपासावन्तः क्षिप्रवलीपलितखालित्यदोषाः प्रायोऽल्पक्लेशकपिलप्रभ्रुलोमकेशाः तैक्ष्ण्यात्तीक्ष्णपराक्रमाः तीक्ष्णाशयाः प्रभूताशनपानाः क्लेशासहिष्णवो दन्दशूकाः द्रवत्वात् शिथिलस्नायुसन्धिमांसाः प्रभूतस्वेदमूत्रपुरीषाश्च विस्रत्वात् प्रभूतपूतिवसाऽसृग्धिरःशरीरगन्धाः कटूष्णाम्लादेष्यशुक्लव्यवायाप्रजाः। त एवं गुणयोगात् पित्तला मध्यबला मध्यायुषो ज्ञानविज्ञानविद्योपकरणवन्तश्च।" इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)
पित्तिन्, त्रि, (पित्तं ह्यस्तीति। हस्त+"अमनुष्यकर्त्तृके च।" ५।२।५३। इति टक्। ततो ङीप्।) गुडूची। इति शब्दचन्द्रिका ॥
(पित्तनाशके, त्रि। यथा, भावप्रकाशे। १।१।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः॥")
पित्तज्वरः, पुं, (पित्तनिमित्तको ज्वरः।) पैत्तिक ज्वरः। यथा,—
"विशेषतः कोमलनारिकेलं
निहन्ति पित्तज्वरमूत्रदोषान् ॥"
इति राजनिर्घण्टः ॥
अस्य लक्षणं ज्वरशब्दे द्रष्टव्यम् ॥*॥
अथ पित्तज्वरचिकित्सा।
"आमाशयस्थो ह्यधिकं सामो मार्गान् पिधापयन्।
विदधाति ज्वरं दोषलक्षणाक्रान्तमाचरेत् ॥"
इति वचनात् सामाशयतो ज्वरिमात्रस्य यावदारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो लङ्घनविधाने विशेषमाह सुश्रुतः। पैत्तिके दशराज्ञेयं ज्वरे युञ्जीत भेषजमिति। दशराज्ञेय लङ्घनवता यतीतेनेत्यर्थः। किन्तद्भेषजं तदाह।
"तिक्तासृक्स्रावयेः पाठाकट्फलाभ्यां सहोदकम्।
पक्वं सशर्करं पीतं पाचनं पैत्तिके ज्वरे ॥"
इति तिक्तादिक्वाथः ॥
"पर्पटो वासकस्तिक्ता कैरातो धन्वयासकः।
प्रियङ्गुश्च शृतः क्वाथ एष शर्करया युतः॥
पिपासादाहपित्तास्रयुक्तं पित्तज्वरं हरेत् ॥"
इति पर्पटादिक्वाथः ॥
"द्राक्षा हरीतकी मुस्ता कटुका शृङ्गमालकः।
पर्पटश्च शृतः क्वाथः एष पित्तज्वरापहः ॥
मुखशोषप्रलापान्तर्दाहमूर्च्छाभ्रमप्रणुत्।
पिपासारक्तपित्तानां शमनो भेदनो मतः ॥"
इति द्राक्षादिक्वाथः ॥
"पटोलमथ धन्वाकं मधुकं मधुसंयुतम्।
हन्ति पित्तज्वरं दाहं तृष्णाञ्चातिप्रमाथिनीम्॥"
इति पटोलादिक्वाथः ॥
"गुडूच्यामलकीयुक्तः केवलो वापि पर्पटः।
पित्तज्वरं हरेत्तूर्णं दाहशोषभ्रमान्वितम् ॥"
इति गुडूच्यादिक्वाथः ॥
"एकः पर्पटकः श्रेष्ठः पित्तज्वरविनाशनः।
किं पुनर्यदि युज्येत चन्दनोशीरवालकैः ॥
वीरचन्दनोशीरधनपर्पटसाधितम्।
दद्यात् सुशीतलं वारि तृट्छर्द्दिज्वरदाहनुत् ॥"
इति वीरादिक्वाथः ॥
"भूनिम्बातिविषाशोधसुरदारुकिरातिक्तकाः।
बालकं धान्यकं बिल्वं कषायो माक्षिकान्वितः ॥
विड्भेदन्याशकासांश्च रक्तपित्तज्वरं हरेत् ॥"
इति भूनिम्बादिक्वाथः ॥

"द्राक्षाचन्दनपद्माानि सक्षा सिक्ताज्जतापि च ।
धात्री वालसुधीरश्च लोध्रेन्द्रयवपर्पटाः ॥
पल्लवकं प्रियङ्गुश्च धवाशो वासकस्तथा ।
मधुकं कुलकं वापि किरातो धान्यकं तथा ॥
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृष्णां दाहं प्रलापश्च रक्तपित्तं भ्रमं क्लमम् ॥
मूर्च्छां छर्दिं तथा मूलं सुखशोषमरोचकम् ।
क्वाथं क्षौद्रयुतं शीतं नाशयेन्नात्र संशयः ॥"

इति मदनादिक्वाथादिकाथः ॥

"खसितो निम्बि पर्य्युषितः प्रातर्धान्याकतण्डुल-
क्वाथः ।
पीतः शमयत्यचिरादन्तर्दाहं ज्वरं पैत्तम् ॥"

इति धान्याकक्वाथः ॥

"अन्नताया हिमः प्रातः सखितः पैत्तिकज्वरम् ।
वासाक्वाथश्च तथा क्षारश्चपित्तज्वरान् जयेत् ॥"

इति अन्नताक्षारक्वाथौ ॥

"गुडूची भूमिनिम्बश्च वासा वीरतरूलकम् ।
शतमूलं त्रिवृद्दात्री द्राक्षा वासा च पर्य्यटः ॥
एषां क्वाथो हरत्येव ज्वरं पित्तसृतं हृतम् ।
सोपद्रवमपि प्रातर्निपीतो मधुना सह ॥"

इति गुडूच्यादिक्वाथः ॥

"प्रलापग्रस्य वदनं वा निम्बस्य स्वदुपल्लवैः ।
अम्लपिष्टैः प्रलेपोऽयं हन्याद्दाहयुतं ज्वरम् ॥
उत्तानशयनस्य शीतलाम्बु-
कांस्यादिपात्रे निहिते च नाभौ ।
घृतान्वधारा बहुला पतन्ती
निहन्ति दाहं चरितं ज्वरञ्च ॥
पथ्यां तैलघृतक्षौद्रैर्लिहन् दाहज्वरापहा ।
वासाक्वपित्तवीसर्पान्धात्री हन्ति भ्रमीमपि ॥"

तैलघृतक्षौद्रैरित्यत्र न सप्तम्यः तेन केवलेन क्षौद्रेणापि लिह्यात् ।

"कार्ष्णिकाद्यंपटीनावगुण्ठनं दाहनाशनम् ।
अथ गोतक्रसुस्निग्धशीतलीकृतवाससा ॥
द्राक्षामलकक्वाथेन कवलोऽत्र हितो मतः ।
पक्वदाडिमबीजैर्वा धात्र्याक्वाथेन च क्षिपेत् ॥"

इति कवलः ॥ धान्यञ्च धान्यकम् ॥ * ॥

अथान्नमाह ।

"दाहज्वरार्दितं स्नानं गिरं तृष्णान्वितम् ।
भृङ्गैराम्रमधुयुक्तं पाययेल्लाजतर्पणम् ॥"

लाजतर्पणं लाजशक्तुरूपतर्पणम् । सक्तुतर्पण-
स्वरूपञ्चोक्तं सामान्यज्वरचिकित्सायाम् ।

"तृष्णयौदनो देयः सितया पैत्तिके ज्वरे ॥
मूर्च्छे मुद्गाम्बुसक्तूंश्च मृद्वाङ्कुरशृतांस्तथा ।
मज्जयोदकसंसिक्ते तृष्यात् पित्तज्वरी नरः ॥
द्राक्षावलीचन्दनशीतलानां
सुगन्धपुष्पाम्बरभूषितानाम् ।
सितस्त्रिणीनां सुपयोधराग्रा-
न्मालिङ्गनान्मानु हरन्ति दाहम् ॥
आलाद्यास्य निधाय ताम्र स्त्री रमयेत् पुनः ।
सितञ्च भोजयेदन्नं च सितं सुरसं मधु ॥
वाप्यः कमलहारिण्यो जलयन्त्रगृहाः शुभाः ।
नार्यश्चन्द्रसहिष्णवो दाहदैन्यहरा मताः ॥

इति पित्तज्वराधिकारः ।" इति भावप्रकाशे मध्यखण्डे प्रथमभागः ॥ * ॥

पित्तश्लेष्मज्वरनाशकौषधं यथा,—

"गुडूचीपद्मकारिष्टधान्यकं रक्तचन्दनम् ।
पित्तश्लेष्मज्वरच्छर्दिदाहतृष्णान्नमिश्रितम् ॥"

इति गारुडे १८८ अध्यायः ॥

(अस्य बलत्वचिकित्सितान्यपराणि यथा,—

"मूर्च्छा दाहो भ्रममदश्चावेगतीक्ष्णोष्णविकार-
स्तत्क्षालस्यं प्रलपनवमिः पाकलाक्षोष्ठवक्त्रे ।
खेदः स्वादो भवति कटुकं पित्तलत्वं क्षुधा वा
एतैर्लिङ्गैर्भवति मनुजे पैत्तिको वै ज्वरस्तु ॥
दीप्तोष्णाक्षतजसता कमलं सितार्द्रा
तत्सारिवासहितमेव हि पाचनेषु ।
निःक्वाथ्य पानमति चास्तु निहन्ति पित्तं
पित्तज्वरप्रशमनं प्रकरोति पुंसाम् ॥
क्वथितं तण्डुलपयसा शुक्राम्लकटुरोहिणीसहि-
तम् ।
क्वाथं यष्टीमधुना पित्तज्वरिणाय पातु ।
दुरालभावासकपर्पटानां
प्रियङ्गुबिल्वैः कटुरोहिणीनाम् ।
किराततिक्तं क्वथितं कषायं
सशर्करार्द्धं क्वथितञ्च पाचनम् ॥
सदाहपित्तज्वरमाशु हन्ति
हृत्पार्श्वमूर्द्धशोषविकारयुक्तम् ।
एकोऽपि वै पर्पटको वरिष्ठः
पित्तज्वराणां शमनाय योग्यः ।
तस्मात् पुनर्नागरधान्यकाभ्यः
सिंहो यथा कङ्कटके प्रहर्त्ता ॥
नागरोशीरतृष्णा च चन्दनं कटुरोहिणी ।
धान्यकानां क्वाथ एव पित्तज्वरविनाशनः ॥
अम्लतापर्पटोधात्री क्वाथः पित्तज्वरं हरेत् ।
सितारग्वधयोर्वापि क्वाथार्थं क्वाथ वा पुनः ॥
द्राक्षापर्पटकं सिक्ता पथ्यारग्वधसप्तकैः ।
क्वाथस्तृष्णाभ्रमदाहयुक्तपित्तज्वापहः ॥
विदारिका रोधदधित्थकानां
स्वाभ्रातुशुक्लस्य च दाडिमानाम् ।
यथानुलाभेन च मूलपत्रं
निहन्ति तृड्दाहसमूर्च्छनञ्च ॥
उत्तानस्य प्रसुप्तस्य क्षौद्रं वा साज्यभाजनम् ।
नाभौ निधाय धारान्तु शीतदाहनिवारणम् ।
रम्भारामाम्रकुभरनलिताल्लिङ्गं पेरुसङ्गं
अक्षामाम्लं सुविवरमदितं शीतलं सेवनं स्यात् ।
शुद्धाम्भोजं मलयजसलिलाक्षिप्तसंशीतवासो
सुस्नाहारो विशदवसुदिनं कौसदी वा सुखाय ॥
एभिर्हन्ति द्रुततरमिमं मानुषाणान्तु पित्तं
दाहं शोषं भ्रममपि तथा तृष्णमं मूर्च्छनञ्च ।
एतैर्योगैर्भवति नियतं पित्तदाहस्य शान्ति-
र्योग्या चैव प्रभवति सदा सत्क्रिया सौम्यताच्च ॥
यदि जिह्वा मलताम्रशोषो वै मनुजस्य च ।
केशरं मातुलुङ्गस्य मधुक्षैद्रवसंयुतम् ।
पेष्यमाणं तालुशेषः सद्यः पित्तज्वरापहः ॥"

इति पित्तज्वरचिकित्सा ॥ * ॥

पित्तज्ञावी, [न्] पुं, (पित्तं ज्ञापयतीति । ज्ञा + णिच् + णिनिः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

पित्तरक्तं, क्ली, (पित्तसंसृष्टं रक्तमिति मध्यपदलोपी समासः ।) रोगविशेषः । तत्पर्य्यायः । रक्तपित्तम् २ पित्तासृक् ३ पित्तशोणितम् ४ । इति राजनिर्घण्टः ॥ अस्य विवरणं रक्तपित्तशब्दे द्रष्टव्यम् ॥

पित्तलं, क्ली, (पित्तं तद्वर्णं जातीति । जन + कः ।) धातुविशेषः । पितल इति भाषा ॥ (यथा, वैद्यकरत्नसारसंग्रहे लोहलक्षणाधिकारे ।
"पित्तलञ्च तथा कांस्यं ताम्रवत्कारयेद्भिषक् ।
ताम्रवच्छोधनं तेषां ताम्रवद्गुणकारकम् ॥")
तत्पर्य्यायः । आरकूटम् २ रीतिः ३ पतिलावेरम् ४ प्रत्यक्षम् ५ । इति जटाधरः ॥ रीतौ ६ । इति शब्दरत्नावली ॥ मिश्रम् ७ । इति रत्नमाला ॥ आरः ८ राजरीतिः ९ ब्रह्मरीतिः १० कपिला ११ पिङ्गला १२ । इति भावप्रकाशः ॥ शुक्लवर्णः १३ सिंहलम् १४ पिङ्गलकम् १५ पीतलकम् १६ लोहितकम् १७ पिङ्गललोहम् १८ पीतकम् १९ । रीतिकाशुभलगुणाः । तिक्तत्वम् । शीतलत्वम् । रसे जवलत्वम् । शोधनत्वम् । पाण्डुवातश्लेष्मशोणितनाशित्वञ्च ।
"शुक्ला स्निग्धा लघुः शीता सरक्ता कफपित्तिनी ।
हैमोपमा शुभा स्वच्छा ज्ञाया रीतिः प्रकीर्त्तिता ॥"

इति राजनिर्घण्टः ॥

"रीतिरप्युपधातुः स्यात् ताम्रस्य यशदस्य च ।
पित्तलस्य गुणा ज्ञेया क्षयोगिसहृशा बुधैः ॥
संयोगस्य प्रभावेण तस्याप्येते गुणाः स्मृताः ।
रीतिकायुगलं रूक्षं तिक्तञ्च लवणं रसे ।
शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिशीतलम् ॥"

इति भावप्रकाशः ॥ * ॥

भूर्णपत्रम् । इति शब्दमाला ॥ (बाहुल्येन पित्तमस्यास्तीति । पित्त + "सिध्मादिभ्यश्च ।" ५ । २ । १७ । इति मत्व ।) पित्तयुक्ते, त्रि । इति मेदिनी । ले, ११४ ॥ (पित्तदूषिकरे च । यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"सक्षारं पित्तलं कौपं क्षेत्रजं दीपनं लघु ॥"

यथा च माधवकरधृतवाग्भटवचनसंग्रहे पाण्डुरोगाधिकारे ।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते ।
तस्य पित्तमसृक्चाशु दग्ध्वा रोगाय कल्पते ॥")

पित्तला, स्त्री, (पित्तज + टाप् ।) तोयपिप्पली । इति मेदिनी । ले, ११४ ॥

पित्तारिः, पुं, (पित्तानामरिर्वाशुकः ।) पर्य्यटः । ज्ञाता । धर्म्मरम् । इति राजनिर्घण्टः ॥

पित्र्य, क्ली,(पितरो देवता अस्येति । पितृ + "वायृतुपितृभ्यो यत् ।" ४ । २ । ३१ । इति यत् । "दीर्घात् ।" ७ । ३ । २७ । इति दीर्घादेशश्च । पितृदेवताकरागोत्रत्वादस्य तथात्वम् ।) मधु ।

इति राजनिर्घण्टः ॥ पिङ्गतीर्थम् । तत्तु तत्रैव व्यङ्गुलात्तः । इति हेमचन्द्रः । २ । ५०४ ॥ (पितुरिदं पितुरागतं वेति । पितृ + "पितुर्यच्" ४ । ३ । ७६ । इति यत् । ततो रौङादेशः ।) पितृसम्बन्धिनि, त्रि । यथा,—

"ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरस्तथा ॥"

इति दायभागः ॥

(पितृप्रियत्वात् श्राद्धार्हे च त्रि । यथा, सुश्रुते । २ । ४६ ।

"कपित्थं खड्गिपिशितं कषायमनिलापहम् ।
पित्र्यं प्रवित्र्यमायुष्यं बृंहणं विरूक्षणम् ॥")

पित्र्यः, पुं, (पितुश्चुल्ल इति । वाहुलकात् यत् । ततो रौङादेशः ।) ज्येष्ठभ्राता । इति हेमचन्द्रः । ३ । २१५ ॥ (पितृणां प्रिय इति यत् ।) मासः । इति शब्दमाला ॥

पित्र्या, स्त्री, (पितरो देवता अस्या इति । पितृ + यत् । पितृदेवतत्वादेव तथात्वम् ।) मघानक्षत्रम् । इति हेमचन्द्रः । २ । २५ ॥ पौर्णमासी । इति शब्दमाला ॥

पितृषद्, [त्] पुं, (पतितुमिच्छतीति । पत् + षद् + "सदि मीमाधुरभलभक्रमतमदामच इस्" । ७ । ४ । ५४ । इति इस् । अभ्यासस्य लोपश्च । ततः पितृस + सप्तमी ।) पक्षी । इत्यमरः । २ । ५ । ३४ ॥ प्रतिपन्ने पतनेच्छौ च त्रि । इति विश्वः ॥

पित्सलं, क्ली, (पतत्यत्रेति । पत + "सलः पतेरदिहा ।" २ । २६२ । इति उणादिकोषधृतसूत्रात् अधिकरणे सलः । अकारस्य इत्वं ।) पक्षः । इत्युणादिकोषः । २ । २६२ ॥

पिधानं, क्ली, (अपि + धा + ल्युट् । अपेरलोपः ।) छदनम् । इत्यमरः । १ । १ । १३ ॥ (यथा, आर्य्यासप्तशत्याम् । ४८२ ।

"युग्मपक्षधनोरःक्षतपिधानमधुरे ! त्वयाक्षिता-
र्द्रसखि ! ।
लोकाक्षि ! नेष पवनो विरमति तव वचनपरि-
वर्त्तौ ॥")

उदञ्चनम् । इति हेमचन्द्रः । ३ । ६६ ॥

पिनद्धः, त्रि, (अपि नह्यते स्मेति । अपि + नह + क्तः । अपेरलोपः ।) परिहितवस्त्रादि । तत्पर्य्यायः । आसक्तः २ प्रतिमुक्तः ३ अपिनद्धः ४ । इत्यमरः । २ । ८ । ६५ ॥ (आच्छादितः । यथा, भागवते । ११ । ८ । ३३ ।

"यदस्थिभिर्निर्मितवंशवंश-
स्त्वचा च रोमनखैः पिनद्धम् ॥")

पिनाकः, पुं क्ली, (पाति रक्षति पलाय्यते स्तूयते वा । पाल रक्षणे, पल गतौ वा + "पिनाकाद्यश्च ।" उणां ४ । १५५ । इति आकप्रत्ययेन निपातनात् साधुः ।) शिवधनुः । तत्पर्य्यायः । अजगवम् २ । (यथा, महाभारते । ६ । ६० । १८ ।

"पिनाकमिव रुद्रस्य क्रुद्धस्याभिप्रतः पशून् ॥")

मूलम् । इत्यमरः । २ । २ । ३७ ॥ मूलमपि

ग्राह्यरमिश्रेति केचित् । इति भरतः ॥ पांसुवर्षणम् । इति मेदिनी । के, ११६ ॥

पिनाकी, [न्] पुं, (पिनाकोऽस्यास्तीति । इनिः ।) शिवः । इत्यमरः । १ । १ । ३३ ॥ (यथा, हरिवंशे । ३५ । २० ।

"दृष्ट्वा च निश्चयं सर्व्वे पलायनपरायणाः ।
विहाय मथुरां रम्यां मागधस्य पिनाकिनम् ॥"

रुद्रभेदः । यथा, भारते । ५ । २६—३० ।

"अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ॥")

पिनाकं, क्ली, (पिनाक इव विस्तीर्णत्वात् आकारो यस्य । अपेरलोपः ।) किण्वं । इति जटाधरः ॥

पिपतिषद्, [त्] त्रि, (पतितुमिच्छतीति । पत + सन् । ततः शतृ ।) पतनेच्छुः । विहङ्गमे, पुं । इति मेदिनी । ते, २३१ ॥

पिपतिषुः, पुं, (पतितुमिच्छतीति । पत + सन् । पिपतिष + "सनाद्यंतबमिश्च उः ।" १ । २ । १६८ । इति उः ।) पक्षी । इति राजनिर्घण्टः ॥ (पतनेच्छौ, त्रि ॥)

पिपासा, स्त्री, (पातुमिच्छेति । पा + सन् + अः । ततष्टाप् ।) पानेच्छा । तत्पर्य्यायः । क्षुधा २ तर्षः ३ उपलालिका ४ वृट् ५ क्षुधा ६ उदन्या ७ । इति हेमचन्द्रः । ३ । ५८ ॥ (यथा, सुश्रुते सूत्रस्थाने १ अध्याये । "स्वाभाविकाः क्षुत्पिपासाजरानिद्राप्रभृतयः ॥")

पिपासितः, त्रि, (पिपासा जातास्येति । पिपासा + इतच् ।) पिपासायुक्तः । क्षपितः । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । ८ । ६१ ।

"नमो मुक्तः कपालेन भिक्षार्थी क्षुत्पिपासितः ।
अन्धः शत्रुकुलं गच्छेद्यः साक्षमनृतं वदेत् ॥")

पिपासुः, त्रि, (पातुमिच्छुः । पा + सन् + उः ।) पानेच्छुः । तत्पर्य्यायः । क्षपितः २ क्षुधार्त्त ३ । इति हेमचन्द्रः । ३ । ५७ ॥ (यथा, महाभारते । ३ । २२३ । २५ ।

"भागार्थं तपसो धातुं तेषां सोमं तथाध्वरे ।
पिपासवो यतुर्देवाः घृतक्रतुपुरोगमाः ॥")

पिपीतकः, पुं, ब्राह्मणविशेषः । अस्य प्रमाणं पिपीतकीशब्दे द्रष्टव्यम् ॥

पिपीतकी, स्त्री, (पिपीतको ब्राह्मणविशेषः प्रवर्त्तकतयास्त्यस्येति । अच् । गौरादित्वात् ङीष् ।) वेशाख्यशुक्लदादशी । तत्र कर्त्तव्यव्रतं यथा,—

घृताचीक उवाच ।

"जलदानस्य माहात्म्यं यत्त्वया परिकीर्त्तितम् ।
तदहं श्रोतुमिच्छामि पिपीतकीकथां शुभाम् ॥
पुरा केन कृतश्चैतत् केन चैतत् प्रकाशितम् ।
कथं पिपीतकीनाम विधानञ्चैव कीदृशम् ॥
तत् सर्व्वं ब्रूहि देवर्षे ! यदि तुष्टो मयि प्रभो ! ॥

नारद उवाच ।

शृणु राजन् ! प्रवक्ष्यामि दादशीं तां पिपीतकीम् ।

वां ह्यत्वा यमलोकाद्वै प्राप्यते वैष्णवं पदम् ॥
पिपीतक इति ख्यातो ब्राह्मणः संयतव्रतः ।
तपःस्वाध्यायनिरतः सर्व्वप्राणिहिते रतः ॥
शान्तो दान्तः क्षमायुक्तो वह्निहोमपरायणः ।
निवसन् निर्जनेऽरण्ये वर्षून् कांश्चान् द्विजोत्तमः ॥
चिरं स्थित्वा तपोऽरण्ये कालं ह्यनुपपेदिवान् ॥
ततः कालेन कियता यमदूतैर्महाबलैः ।
नीयमानः स विप्रेन्द्रो यमलोकं भयावहम् ॥
ददर्श बहुशस्तत्र नरान्निरयसंस्थितान् ॥
असिपत्रादनेकेषु कृमीपाकेषु संस्थितान् ।
शतार्त्तस्वरसंस्थान् दृष्ट्वा विषादमगमद्विजः ।
क्षुत्पिपासाकुलो भूत्वा प्रेतराजवशं गतः ॥
बहून् वध्यार्हतान् कृत्वा दण्डैरतिमनोहरान् ।
प्रदीप्तानीप्सितांश्चैव प्राणादेरपशोभितान् ॥
गीतवाद्यादिहृद्यैश्च सेव्यमानः समन्ततः ।
क्वचित् प्रहरमात्रञ्च किङ्करैर्बलशालिभिः ॥
नीयमानांश्चतः प्रेतान् वध्यमानान् स्वकर्म्मभिः ।
घोरयन्त्रापसंयुक्तान् दृष्ट्वा परिपीड़ितः ॥
संपश्यमानो राजेन्द्र ! ययौ किङ्करान् जलम् ।
बहुशो याच्यमानैश्च किङ्करैरभिताड़ितः ॥
स नीयमानो दण्डैश्च बहुशास्त्रं हुमोत्तमम् ।
सुच्छायं शीतलं रम्यं महान्तं पिप्पलद्रुमम् ॥
तत्रैव वसतान् कृष्णान् माध्यशीर्षान् सुशो-
भितान् ।
ददर्श वस्त्रावृतसुखान् सुवासितसुशीतलान् ॥
रक्षन्ति बहवस्तत्र किङ्कराः शस्त्रपाणयः ।
तोयदर्शनमात्रेण ब्राह्मणो ब्राह्मणोऽभवत् ॥
विनयावनतो भूत्वा ययाचे किङ्कराञ्जलम् ।

ब्राह्मण उवाच ।

यमदूता महाभागस्तोयं मे दीयतामिति ।
अप्राप्य तोयं प्राणानां विनाशो जायते
ध्रुवम् ॥
तस्मात्तोयप्रदानेन प्राणान्रक्षत मेऽधुना ।
श्रुत्वा विप्रस्य तद्वाक्यं तत्पुर्य्यमकिङ्कराः ॥
न ह्यतं कर्म्म तद्विप्र ! येन तोयञ्च लभ्यते ॥
प्राययाम पुनस्तोयं यमदूतैः स ताड़ितः ॥
क्षुधार्त्तवचनं श्रुत्वा यमः प्रोवाच तं द्विजम् ।
ब्रूहि त्वं विप्र ! मा रोदीः क्षुधा ते पीड़यिष्यति
चेतसि ॥
पुनर्ययाचे तत्तोयं क्षुधाधाकुलचेतनः ।
श्रुत्वा विप्रस्य तद्वाक्यं तमुवाच स धर्म्मराट् ॥
त्वया तत्र कृतं कर्म्म येन वै लभ्यते जलम् ॥

ब्राह्मण उवाच ।

त्वयि प्रसन्ने दिक्पाल ! तत्तोयं दुर्लभं न मे ।
तस्मात्तोयप्रदानेन प्राणदत्वां कुरु प्रभो ! ॥
इत्थं बहुविधैर्वाक्यैर्यमः प्रीतोऽभवत्तदा ॥

यम उवाच ।

वरं वरय विप्रेन्द्र ! यत्ते मनसि वर्त्तते ॥

ब्राह्मण उवाच ।

यदि तुष्टोऽसि मे देव ! येन प्राप्तोऽस्मि तज्जलम् ।
तत् कुरुष्व धर्म्मराज ! सर्व्वप्राणीश्वर ! प्रभो ! ॥

धर्म उवाच ।
वैशाखं तद्व्रतं विप्र ! कृत्वा गत्वा निजालयम् ।
विधानं श्रवणं विप्रेन्द्र ! द्वादशी यादृशी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः ।
तस्यां सुप्रीतजलजैः स्नापयेत् केशवं प्रभुम् ॥
पूजयेन्नवपुष्पाद्यैर्धूपदीपैर्विधानतः ॥
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वासवा ॥
अग्रतो तु वैष्णवं मन्त्रं दक्षवत् प्रजमेत्ततः ।
दध्याद्विप्रेभ्यो विधिवत् कुम्भान्क्षीरसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दध्याज्यवस्त्रसंयुतान् ॥
गुडवस्त्रादितसक्तुपवीतसुसंयुतान् ।
धेनुभोजनसमायुक्तान् सभोज्यदक्षिणान्वितान् ॥
द्वितीयेऽब्दौ घटान्दद्याद्विंशत्कैरसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोडशघटान् दुग्धशर्कुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां भक्तितो दद्यात् भोज्यं चैव विशेषतः ।
यत्र कुत्रापि संगच्छेन्न कुत्रापि हृषान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ॥
अन्ते जगाम स्वर्लोकं वैष्णवं पदमुत्तमम् ॥
पिप्पीतकीति नाम्नासौ विख्यातो वैष्णवी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
दृष्ट पुत्रादिसम्पन्ना धनधान्यसुतान्विता ॥"
इति भविष्यपुराणे पिप्पीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपिपीलतीति । अपि + पील क्षेपणे + ण्वुल् । अपेरलोपः ।) पीलकः । इति हेमचन्द्रः । ३ । २०२ ॥ छोटया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक + टापि अत इत्वम् ।) क्षीराङ्गी । इति हेमचन्द्रः । ३ । २०३ ॥ छुदे पिंपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीली ५ पिपिली ६ क्षीरेक्षा ७ । इति राजनिर्घण्टः ॥ क्षीरा ८ । इति शिवाक्षरकोषः ॥ (यथा, हरिवंशे । २३ । ४ ।
"श्रुत्वा तु याच्यमानां तां क्षुद्रां क्षुत्पिपीलिकाम् ।
ब्रह्मदत्तो महाहावमकरोदेव चाहवत् ॥")

पिपीली, स्त्री, (अपिपीलतीति । पील् + अच् । अपेरलोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुडशर्करा २ । इति शिवाक्षरकोषः ॥

पिप्पलं, क्ली, (पीयते इति । पा + अलच् । पृषोदरादित्वात् साधुः ।) जलम् । यज्ञच्छेदभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं जलं सिध्यमानलेनास्त्यस्य मत्वर्थीयच्छेदे इति । पिप्पल + "अर्शआदिभ्योऽच् ।" ५।२।१२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । २ । २१ । ८ ।
"वनराजीषु पद्मेभाः पिप्पलानां मनोरमाः ।
शोभार्थाश्च शुभाः पार्थ ! गौतमीकः समीपजाः ॥")

गिरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—
नारद उवाच ।
"अनायासेन यन्नृणां सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकश्चैव तन्मे ब्रूहि पितामह ! ॥
ब्रह्मोवाच ।
शृणु नारद ! यत्नेन गुह्यं सर्व्वाघनाशनम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥*॥
अश्वत्थदक्षिणे ब्रह्मा पश्चिमे विष्णुरेव च ।
ब्रह्मा चोत्तरतश्चास्य पूर्व्वे वैश्वादिदेवताः ॥
स्कन्धे स्कन्धे च पत्रेषु ब्राह्मणा ऋषयः स्तुताः ।
तस्य मूले सर्व्वदेवाः ब्रह्मा तस्य हुमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणस्तुतिमन्त्रेभ्यः चारसङ्ग्रह्य संचितम् ।
निष्ठाप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं क्षीरी फलितश्चैव घृतसक्थ वनस्पते ! ।
त्वामाराध्य नरो हन्यात् ऐहिकाधिष्ठितं मलम् ॥
अश्वत्थ ! यस्मात् त्वयि हृषराज !
नारायणस्तिष्ठति सर्व्वकारणम् ।
अतः शुचिस्त्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथने चैव यथा श्रीस्त्वामुपाश्रिते ।
तत्तेन तेन हृष्टेन्द्र ! आश्रीर्मयि निधीयतु ॥
एकादशोऽपि रुद्राणां वसूनाञ्चाष्टमस्तथा ।
नारायणोऽपि देवानां हृत्तारामसि पिप्पल ॥
अग्निगर्भस्त्वमश्वत्थ ! देवगर्भः प्रजापतिः ।
हरिर्यस्मेव श्रीगर्भो यज्ञगर्भ ! नमोऽस्तु ते ॥
अरातेरग्निरश्वत्थ ! परापर ! नमोऽस्तु ते ।
निर्यातं त्वभिवर्धन्तु स्वस्ति तेऽस्तु नमोऽस्तु ते ॥
अश्वित्थस्त्वं मुखस्त्वन्दुःस्वप्नं दुर्निरोचितम् ।
गृह्णाच्च सप्तत्यानमश्वत्थ ! शमयाशु मे ॥
यं दृष्ट्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्रित्य च दीर्घायुस्तमश्वत्थं नमाम्यहम् ॥
अश्वत्थ ! सुमहाभाग ! सर्व्वदा प्रियदर्शन ! ।
दिवान्नभोजनं देहि गृह्णाच्च पराजयम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा सुखम् ।
देहि देव महावृक्ष ! त्वामहञ्चाभिवादये ॥
अश्वत्थ ! देवसदनस्त्वन्दिभिः प्रोच्यते सदा ॥
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आदृत्य दृष्टवत्वेनं शुद्धः पापात्तिगो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मर्त्यस्तु व्रतमेतत् समाचरेत् ॥
एकरात्रं द्विरात्रं वा कुर्य्याद्गोमयलेपनम् ।
अश्वत्थे स्थापिते यस्तु मूले क्षपनमाचरेत् ॥
धनायुःसन्ततैर्हीनो नरकात्तारयेत् पितॄन् ॥
अश्वत्थमूलमासाद्य घृतेनाक्षोदकेन वा ।
एकं वा भोजयेद्विप्रं कोटि कोटि फलं भवेत् ॥
अश्वत्थमूलमासाद्य तपो होमः सुरार्चनम् ।

अक्षयं सुनिशार्दूल ! ब्रह्मणो वचनं यथा ॥
एवं समर्च्चितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यस्मार्थं हेहितोऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिता सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अतः शुद्धः सुसम्पूर्णोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुरुत्ववविनाशकः ॥
शनैश्चरवारे भौमे च मध्याह्ने निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलक्षयभयात्तमिः ॥ * ॥
अश्वत्थस्य जले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासेऽत्र पूर्व्वोक्तविधिना सुधे ! ।
अश्वत्थं सेवयेद्विद्वान् संप्रदक्षिणमादितः ॥
पापोपहतमर्त्यानां पापनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् शृणुयाद्वापि अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥"
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥
ऋषय ऊचुः ।
"कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यश्चौ कथं पूज्यतमौ कृतौ ॥
सूत उवाच ।
अश्वत्थरूपो भगवान् विष्णुरेव न संशयः ।
वटरूपो वटस्साक्षात् शाखाभी ब्रह्मरूपधृक् ॥
दर्शनस्पर्शनैवास्य ते वै पापहराः स्मृताः ।
दुःखापहाधिदुष्टानां विनाशकारिणो ध्रुवम् ॥
ऋषय ऊचुः ।
कथं वृक्षत्वमापन्नौ ब्रह्मविष्णुमहेश्वरौ ।
एतत् श्रोतुं सर्व्वज्ञ ! संशयोऽत्र महान् हि नः ॥
सूत उवाच ।
पार्व्वतीधिषणयोर्द्वन्द्वे सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेषेण प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप विधिवैकसः ।
रेतःसेकसुखक्षुब्धमानसा तद्धि रुधा ॥
पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरते सुखम् ।
तस्माच्चम सुखभ्रंशाद्यूयं वृक्षत्वमाप्नुथ ॥
सूत उवाच ।
एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्व्योधिवटौ सुनीश्वराः ! ।
बोधिस्त्वयं चार्कदिनं विनैव
नक्षत्रसामर्क्षजवारयोगात् ॥
ऋषय ऊचुः ।
अक्षत्रत्वं कथं यातः सूत ! बोधितरुः अयम् ।
क्षत्रत्वञ्च कथं प्राप्तस्तथायं वृणिवाधरे ॥
सूत उवाच ।
समुद्रमथनाद्यानि रत्नान्यायुः सुरोत्तमाः ।
श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावद्रमोचकारासौ लक्ष्मीं भार्य्यार्थमात्मनः ।
तावत् विघ्नमयामास लक्ष्मीरूपं भृगूद्वहम् ॥

लक्ष्मीरुवाच।
असंस्कृत्य कथं ज्येष्ठां कनिष्ठां परिणीयते।
तस्मात्त्वमद्य यामेतामलक्ष्मीं मधुसूदन!॥
विवाहोऽद्य मां पश्चादेव धर्म्मः सनातनः।
तस्मादहमेनामतिक्रामं न कुर्य्या मधुसूदन!॥
सूत उवाच।
इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः।
उद्दालकाय सुनये सुदीर्घतपसे तदा।
आम्रवाक्यानुरोधेन तामलक्ष्मीं ददौ किल॥
स्थूलोष्ठीं मुष्कवदनां विरूपां विश्वतीं तनुम्।
सवदारक्तनयनां कृष्णपिङ्गशिरोरुहाम्॥
स मुनिर्विष्णुवाक्यात्तामलक्ष्मीञ्च क्षमाक्षमम्।
वेदध्वनिसमायुक्तमानयामास धर्म्मवित्॥
क्षौमधूमसुगन्धाढ्यं वेदघोषेण नादितम्।
आश्रमन्तं विलोक्याथ अथिता साभ्रवीदिदम्॥
ज्येष्ठोवाच।
नहि वासोऽनुरूपोऽयं वेदध्वनियुतो मम।
नाभागमिश्रे भोब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्॥
उद्दालक उवाच।
कथं यास्यसि विप्राच्च वर्त्तते क्षमतं तव।
तव योग्या च वसतिः का भवेत्तद्दद्य मां॥
ज्येष्ठोवाच।
वेदध्वनिर्भवेद्यत्रनित्यतिथीनाञ्च पूजनम्।
यज्ञदानादिकं यत्र नैव तत्र वसाम्यहम्॥
परस्परानुरागेण दाम्पत्यं यत्र विद्यते।
पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम्॥
दानशौचे न विद्येते परद्रव्यापहारिणः।
परदाररता यत्र तत्र स्थाने रतिर्मम॥
वृद्धसज्जनविप्राणां यत्र स्यादपमानकम्।
विष्णुरं भावयं यत्र तत्र सन्यवसाम्यहम्॥
सूत उवाच।
इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्।
उद्दालकस्ततो वाक्यं तामलक्ष्मीमुवाच ह॥
उद्दालक उवाच।
अन्यत्यद्दक्षमूलेऽस्मिन्नद्य! आस्यतां चिरम्।
आश्रमस्थानमालोक्य यावदायाम्यहं पुनः॥
सूत उवाच।
इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः।
प्रतीक्षन्ती पितुः तत्र यदा तं न ददर्श सा॥
तदा ररोद बदनं भर्तुस्त्यागेन दुःखिता॥
तस्मात्राः क्षितिं लक्ष्मीर्वैकुण्ठभवनेऽद्भवोत्।
तदा विज्ञापयामास विष्णुतुष्टिमानसा॥
लक्ष्मीरुवाच।
स्वामिन्! मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता।
तामाश्वासयितुं यामि क्षमाजो! यद्यहं प्रिया॥
सूत उवाच।
लक्ष्म्या वचः ततो विष्णुस्त्यागात् क्षपयान्वितः।
आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत्॥
विष्णुरुवाच।
अन्यत्यद्दक्षमासाद्य सदालक्ष्मि! स्थिरा भव।
ममांशसम्भवो स्नेव आवासस्ते मया कृतः॥
मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति।
अलक्ष्मीस्त्वं भवेत्तस्मान्मन्दवारं विना किल॥
प्रत्यब्दमर्च्चयिष्यन्ति त्वां ज्येष्ठां गन्धधूपिनः।
तेषियं श्रीः कनिष्ठा ते सदा तिष्ठत्वनामया॥"
इति पाद्मोत्तरखण्डे। १६०—१६१। अध्यायौ॥
(रेवत्यां जातो मित्रस्य पुत्रविशेषः। यथा, भागवते। ६। १८। ६।
"रेतः सिषिचतुः कुम्भे उर्व्वश्याः सन्निधौ हुतम्।
रेवत्यां मित्र उत्सर्गमरिष्टं पिप्पलं बधात्॥")
पिप्पलकः, क्ली, (पीयते इति। पा+अलच्। पृषोदरादित्वात् साधुः। ततः संज्ञायां कन्।) लवङ्गम्। जीवनस्कन्धम्। इति मेदिनी। के, १६८॥
पिप्पलिः, स्त्री, (पिपर्त्तीति। पॄ लि पूर्त्तौ+बाहुलकात् अलच्। गौरादित्वात् ङीष्। ह्रस्वः। पृषोदरादित्वात् साधुः।) पिप्पली। इति शब्दरत्नावली॥
पिप्पली, स्त्री, (पिपर्त्तीति+पॄ+बाहुलकात् अलच्। पृषोदरादित्वात् साधुः। गौरादित्वात् ङीष्।) द्रव्यविशेषः। पिँपुल इति भाषा॥ तत्पर्य्यायः। क्षुद्रा २ उपकुल्या ३ वैदेही ४ मागधी ५ चपला ६ कृष्णा ७ उषणा ८ श्रौण्डी ९ कोला १०। इत्यमरः। २। ४। १७॥ कृष्णा ११ पिप्पलिः १२। इति भरतः॥ लघुला १३ कटुवीजा १४ कोरङ्गी १५ तिक्तण्डुला १६ श्यामा १७ दन्तफला १८ मगधोद्भवा १९। अस्या गुणाः। ज्वरनाशित्वम्। वृष्यत्वम्। स्निग्धत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वम्। दीपनत्वम्। मारुतश्लेष्मकासश्वासक्षयापहत्वञ्च। इति राजनिर्घण्टः॥ स्वादुपाकत्वम्। रसायनत्वम्। लघुत्वम्। पित्तलत्वम्। रेचनत्वम्। कुष्ठप्रमेहगुल्मार्शःप्लीहशूलामनाशित्वञ्च॥ आर्द्रायास्तस्या गुणाः। बलप्रदत्वम्। स्निग्धत्वम्। शीतलत्वम्। मधुरत्वम्। गुरुत्वम्। पित्तप्रशमनत्वञ्च। राजबल्यन्तु कषायपटलम्। मधुयुक्तायास्तस्या गुणाः। मेदःकफश्वासकासज्वरहरत्वम्। वृष्यत्वम्। मेधाग्निवर्द्धनत्वञ्च। शुष्कपिप्पलीगुणाः। जीर्णज्वरे अग्निमान्द्ये च गुरुत्वम्। कासार्शोर्द्दर्च्छाश्वासकृमिपाण्डुत्वनाशित्वञ्च। द्विगुणात् पिप्पलीचूर्णाद्गुडोऽत्र भिषजां मतः। इति भावप्रकाशः॥ (अस्यवर्णनपर्व्वतादिः हतो नदीविशेषः। यथा, भारते। ११३। २५।
"समसा पिप्पली क्षेमी तथा चित्रोत्पलापि च॥")
पिप्पलीका, स्त्री, अन्यत्यद्दक्षः। इति राजनिर्घण्टः॥
पिप्पलीमूलं, क्ली, (पिप्पल्या मूलमिव मूलमस्य।) खनामख्यातमूलम्। पिँपुलमूल इति भाषा। तत्पर्य्यायः। यष्टिकम् २ यष्टिकाग्निः ३। इत्यमरः। २। ६। ११०॥ वक्तव्यम् ४। इति रत्नमाला॥ मूलम् ५ कोलमूलम् ६ कटुपत्रिण्य ७ कटुमूलम् ८ कटूद्भवम् ९ सर्व्वसम्मि १० प्रधानम् ११ विरूपम् १२ शीघ्रसञ्जयम् १३ सुगन्धि १४ यन्त्रिजम् १५। इति राजनिर्घण्टः॥ उष्णम् १६। अस्य गुणाः। दीपनत्वम्। कटुत्वम्। पाचनत्वम्। लघुत्वम्। रूक्षत्वम्। पित्तकरत्वम्। भेदकत्वम्। कफवातोदरानाहश्लीहगुल्मामनाशित्वञ्चेति भावप्रकाशः॥ उष्णत्वम्। दीपनत्वम्। इति राजनिर्घण्टः॥
पिप्पिका, स्त्री, दन्तमलम्। इति हेमचन्द्रः। ३। २६६॥
पिप्पुः, पुं, (अपि भवति दैहोपरि इति। अपि+प्लु+कुः। अपेरलोपः।) जटुलः। इत्यमरः। २। ६। ४६॥
पियालः, पुं, (पीयति तर्पयतीति। पीय+"पीयुक्षन्यिभ्यां कालन्।" उणां ३। ७६। इति कालन् कृच्च।) वृक्षविशेषः। अस्यैव बीजं चिरौञ्जीति ख्यातम्। तत्पर्य्यायः। राजादनम् २ सन्नकद्रुः ३ सन्नकटः ४। इत्यमरः। २। ४। ६५॥ राजातनम् ५ राजातनः ६ प्रियालः ७ सञ्जः ८ कद्रुः ९ धनुः १० पटः ११। इति तट्टीका॥ वृक्षनाकः १२ शल्यपटः १३ पियालकः १४। इति शब्दरत्नावली॥ क्षारस्कन्धः १५ क्षारः १६ बहुलवल्कलः १७ तापसेष्टः १८॥ (यथा, भागवते। ८। २। १०।
"चूतैः पियालैः पनसैरासैरास्रातकैरपि॥")
तस्य गुणाः। पित्तकफास्रनाशित्वम्। इति भावप्रकाशः॥ अस्य फलगुणाः। मधुरत्वम्। स्निग्धत्वम्। दृंहणत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥ गुरुत्वम्। सरत्वम्। दाहज्वरतृषापहत्वञ्च। तस्य मज्जगुणाः। मधुरत्वम्। वृष्यत्वम्। पित्तानिलापहत्वम्। बृंहणत्वम्। अतिदुर्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाशे पूर्व्वखण्डे प्रथमो भागः॥
पिल, क क्षुद्रे। इति कविकल्पद्रुमः॥ (चुरादिरयं-सकं-सेट्।) कः, पेलयति। क्षुद्रं प्रेरयति। इति दुर्गादासः॥
पिलुकः, पुं, (अपिलातीति। अपि+ला+बाहुलकात् कुः। अपेरलोपः। ततः कन्।) पीलुवृक्षः। इति शब्दरत्नावली॥
पिलुपर्णी, स्त्री, (पिलोरिव पर्णमस्याः। ङीष्।) शोरटा। इति रत्नमाला॥
पिङ्गः, पुं, (पिङ्गे चक्षुषी यस्येति। "इगुपधज्ञाप्रीकिरः कः।" ५। २। ३३। इत्यत्र "पिङ्गस्य पिप्पिलश्चाक्ष चक्षुषी।" इति वार्त्तिकोक्त्या पिङ्गादेशः।) क्रोदयुक्तचक्षुः। (अस्य पिङ्गिलवृषा यथा,—
"ताम्रपात्रे गुडाज्यं स्निग्धमरिचान्वितम्।
आरनालेन संघृष्टमञ्जनं पिङ्गलाशुभम्॥"
इति वैद्यकचक्षुरोगाधिकारे॥)
तद्युक्ते, त्रि। इत्यमरः। २। ६। ६०॥

पिशङ्का, स्त्री, (पिशङ्गेन छेदयुक्तचक्षुषा काय-तीति। कै+कः। टाप्।) हस्तिनी। इति शब्दमाला॥

पिष, ट सेचने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) ट, पिन्वते। इति दुर्गादासः॥

पिष्ट, ष्ट प अवयवे। इति कविकल्पद्रुमः॥ (तुदां-सर्वां-परं अकं-सेट्।) ष्ट प, पिंष्टते पटः अवयवी स्यादित्यर्थः। इति दुर्गादासः॥

पिष्टङ्गः, पुं, (पिंष्टतीति। पिष्ट+"विड्वनिभ्यः कित्।" उणां। १।१२०। इत्यङ्गच् स च कित्।) पिङ्गलवर्णः। तद्वति, त्रि। इत्यमरः। १। ५। १६—१७॥ (यथा, ऋग्वेदे। १। ८८। २।

"तेऽरुणेभिर्वरमा पिष्टङ्गैः सुमिं यान्ति रथ-तूर्भिरश्वैः॥"

यथा च माघे। २। ६।

"पिष्टङ्गमौञ्जीयुजमर्ज्जुनच्छविं वसानमेणाजिनमङ्गनद्युति।
सुवर्णसूत्राकलिताम्बरां विडम्बयन्तं श्रितवाससस्तनुम्॥"

नागभेदः। यथा, महाभारते। १। ५७। १६।

"भैरवो मुखवेदाङ्गः पिष्टङ्गोदरपारकः॥")

पिशाचः, पुं, (पिशितं मांसमश्नातीति। पिशित+अश्+"कर्म्मण्यण्।" ३। २। १। इति अण्। ततः "एषोदरादीनि यथोपदिष्टम्।" ६। ३। १०९। इति शितभागस्य लोपः अशभागस्य शाचादेशः।) देवयोनिविशेषः। इत्यमरः। १। १। ११॥ पिचाश इति भाषा॥ (यथा, मनौ। १। ३७।

"यक्षरक्षःपिशाचांश्च गन्धर्व्वाप्सरसोऽसुरान्॥"

"यक्षो वैश्रवणस्तदनुचराश्च। रक्षांसि रावणा-दीनि। पिशाचास्तेभ्योऽपकृष्टा अशुचिमक्षंग्रा-निवासिनः।" इति तट्टीकायां कुल्लूकभट्टः॥) तस्य लोको यथा,—

"अन्तरीक्षचरा ये च भूतप्रेतपिशाचकाः।
वर्जयित्वा रुद्रगणांस्ते चरेव चरन्ति हि॥
नोर्द्धं विक्रमणे शक्तिस्तेषां सम्भृतपाप्मनाम्।
अत ऊर्द्धं हि विप्रेन्द्र! राजसा ये ह्यनैनसः।
ते तु स्वर्य्यादधः सर्व्वे विहरन्त्यूर्द्धवर्जिताः॥"

इति पाद्मे स्वर्गखण्डे १५ अध्यायः॥

प्रेतः। यथा, शुद्धितत्त्वे।

"अशौचान्ताद्दितीयेऽह्नि यस्य नोत्तूयते वृषः।
पिशाचत्वं भवेत्तस्य दत्ते; श्राद्धशतैरपि॥"

पिशाचकी, [न्] पुं, (पिशाचाः सन्त्यस्येति। "वातालीसाराभ्यां कुक् च।" ५। २। १०९। इत्यत्र "पिशाचाच्च।" इति वार्त्तिकोक्त्या इनिः कुक् च।) कुबेरः। इति हेमचन्द्रः। २।१०।१॥

पिशाचदः, पुं, (पिशाचानां दः पिशाचप्रियो दर्वा निविड़त्वादन्धकारत्वात्तदुचितस्थानजातत्वाच्च।) प्राखोटवृक्षः। इति त्रिकाण्डशेषः॥ (प्राखोट-शब्दोऽस्य विवृतिर्ज्ञातव्या॥)

पिशाचदत्तः, पुं, (पिशाचानां दत्तः पिशाचप्रियो दत्तो वा।) प्राखोटवृक्षः। इति रत्नमाला॥

पिशाचसभं, क्ली, पिशाचानां सभा। इति मनु-स्मृतिकुल्लूकसंग्रहटीकायां भरतः॥

पिशाची, स्त्री, (पिशाच+ङीष्।) पिशाचिका। स्त्री पिशाची। इति शब्दमाला॥ (पिशाच-शब्दोऽस्यस्या इति। अच् ततो ङीष्। तद्दुगन्धयुक्तत्वात् तथात्वम्।) गन्धमांसी। इति राजनिर्घण्टः॥

पिशितं, क्ली, (पिंशति अवयवीभवतीति। पिश +"पिशेः किच्च।" उणां। ३। ६५। इति इतन् स च कित्। यद्वा, पिश्यते स्मेति। क्तः।) मांसम्। इत्यमरः। २। ६। ६३॥ (यथा, मार्कण्डेयपुराणे। २५। २७।

"क्षालोऽस्थिसन्धूर्णनमस्थियुग्म-
मत्युज्ज्वलं तर्ज्जनमङ्गनाथाः।
कृच्छादि पीनं पिशितं घनं तत्
स्यानं रतेः किं नरकं न योषित्॥")

पिशिता, स्त्री, (पिशितवद्वन्धोऽस्यस्या इति। अच् ततष्टाप्।) जटामांसी। इति मेदिनी। ते, ६३॥

पिशिताशी, [न्] त्रि, (पिशितं अत्नातीति। अश्+णिनिः।) मांसभक्षकः। मांसभक्षकः। इति हेमचन्द्रः। ३। ६३॥ (यथा, महाभारते। १। ८४। १४।

"सङ्कीर्णाचारधर्म्मेषु प्रतिलोमचरेषु च।
पिशिताशिषु चान्येषु मूढ! राजा भवि-ष्यसि॥")

पिशी, स्त्री, (पिंशतीति। पिश+कः। गौरादि-त्वात् ङीष्।) जटामांसी। इति राजनिर्घण्टः॥ (जटामांसीशब्दोऽस्या गुणादयो ज्ञातव्याः॥)

पिशुनं, क्ली, (पिंशतीति। पिश+"क्षुधिपिशि-मिथः कित्।" उणां ३। ५५। इति उनन्। स च कित्।) कुङ्कुमम्। इत्यमरः। २। ६। १२९॥ (पर्य्यायोऽस्य यथा,—

"कुङ्कुमं क्षुल्लकं रक्तं काश्मीरं पीतकं वरम्।
सङ्कोचं पिशुनं धीरं वाह्लीकं घोणिताभिधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पिशुनः, पुं, (पिश+उनन्। स च कित्।) कपि वक्रः। नारदः। काकः। इति मेदिनी। ने, ६२॥ (अङ्गधृक् पुत्रः। यथा, मार्कण्डेये। ५१। ६५।

"अङ्गधृक् तनयं लेभे पिशुनं नाम नामतः॥"

कौशिकस्य पुत्रभेदः। यथा, हरिवंशे। २१।५-६।

"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च।
स्वरूपः पिङ्गलाक्षी च नामभिः कर्म्मभिस्तथा॥
कौशिकस्य सुताह्येते! शिष्या गार्ग्यस्य भारत!।
पितर्य्युपरते सर्व्वे बभूवुस्तत्प्रभावतः॥")

पिशुनः, त्रि, (पिश+उनन्। स च कित्।) अप्रकाशनानुचितप्रबोधकः। परस्परभेदशीलः। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः।

"द्विजिह्वः सूचकः कर्णेजपः पिशुन इत्यपि।
दुर्जनो दुर्विधो विश्वकद्रुश्च पिशुनः खलः॥"

इति जटाधरः॥ * ॥

"कर्णेजपः सूचकः स्यादनौचित्यप्रबोधके।
परस्परं भेदशीले पिशुनो दुर्जनः खलः॥"

इति शब्दरत्नावली॥

(यथा, आर्य्यासप्तशत्याम्। ५६।

"अनुमन्येयं न तथा व्यथयति कटुकूजितैर्यथा पिशुनः।
बधिरादाताद्धिकं दुनोति कर्णे जपन् मशकः॥")

क्रूरः। इति मेदिनी। ने, ६२॥ (यथा, मनौ। ३। १६१।

"श्यामरी गन्धमाली च शिखावो पिशुनस्तथा॥")

पिशुना, स्त्री, (पिशुन+टाप्।) एलका। इति मेदिनी। ने, ६२॥ पिड़िंगाक इति भाषा॥ (एलाशब्दोऽस्या गुणादयो ज्ञातव्याः॥)

पिष, ष औ ल चूर्णने। इति कविकल्पद्रुमः॥ (रुधां-परं-सकं-अनिट्।) ष, पिनष्टि लोको गोधूमम्। औ, पेष्टा। ल, अपिषत्। इति दुर्गादासः॥

पिष्टं, क्ली, (पिष्यते स्मेति। पिष+क्तः।) सीस-कम्। इति रत्नमाला॥ पिष्टकः। यथा,—

"अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्।
घृतादष्टगुणं तैलं मद्यान्न च भक्षणात्॥"*॥

अस्य गुणाः।

"पिष्टं प्राणकरं रूक्षं विदाह्यि गुरु दुर्ज्जरम्॥
श्लेष्मपित्तहरं वृष्यं बलपुष्टिविवर्द्धनम्॥
मद्दितं समितं क्षीरनारिकेलघृतादिभिः।
अवस्थाप्य घृते पक्वा घृतपूरोऽयमुच्यते॥
घृतपूरो गुरुर्वृष्यः कफरक्तमांसदः।
रक्तपित्तहरो वृद्धः स्वादुः पित्तहरोऽभिदः॥"

गोधूमचूर्णं समिता।

"समिता मधुदुग्धेन खण्डेलामरिचादिभिः।
घृते पक्वा क्षिपेत् खण्डे संयावो वृंहणो गुरुः॥
समिता वेष्टिता मध्ये मधु दत्वा घृते हृता।
मधुमस्तकमुद्दिष्टं तद्दृष्यं गुरु दुर्ज्जरम्॥"

इति राजवल्लभः॥

पर्पटगुल्फुलीफेनकवटलड्डुकानां गुणास्तत-च्छब्दे द्रष्टव्याः॥ *॥ चूर्णीकृते, त्रि॥ (यथा, कथासरित्सागरे। ६। ४१।

"त्वया सार्द्धमकान् पिष्टान् गृहीत्वा जल-कुम्भिकाम्।
अतिष्ठं चत्वरे गत्वा छायायां नगराद्बहिः॥")

पिष्टकं, क्ली, (पिष्टमिव प्रतिकृतिः। इवार्थे कन्।) तिलचूर्णम्। इति राजनिर्घण्टः॥

पिष्टकः, पुं, (पिष्टानां विकार इति। "संज्ञा-याम्।" ४। ३। १४७। इति कन्।) पिष्टानां तण्डुलादीनां विकारः। पिठा इति भाषा॥

तत्पर्य्यायः। पूपः २ अपूपः ३। इत्यमरः। २।६।४८॥ आपूपः ४ पिष्टः ५। इति शब्दरत्नावली॥ अस्य गुणाः पिष्टशब्दे द्रष्टव्याः। नेत्ररोगविशेषः। इति मेदिनी। के, १२०॥ तस्य लक्षणम्। यथा, —

"श्लेष्मा मारुतकोपेन शुक्ले पिष्टसमुद्गतम्।
पिष्टवत् पिष्टकं विद्धि मलाक्तादर्शसन्निभम्॥"

इति माधवकरः॥

(अस्य चिकित्सा यथा —

"वेदेच्छी सितमरिचं सैन्धवं नागरं समम्।
मातुलुङ्गरसैः पिष्टमञ्जनं पिष्टकापहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥)

पिष्टं, क्ली, पुं, (विशत्यत्र सुखमिति। "विटपपिष्टपविशिपोलपाः।" उणा। ३।१४५। इति कपप्रत्ययेन निपातनात् साधुः।) भुवनम्। इत्यमररत्नकोशौ॥ (यथा, मनौ। ४। २३१।

"अनड्वाहः श्रियं पुष्टां गोदो ब्रह्मस्य पिष्टपम्॥")

पिष्टपचनं, क्ली, (पच्यते अत्रेति। पच+आधारे ल्युट्। पिष्टस्य पचनम्।) पिष्टपाकपात्रम्। नैलाणी इति ख्यातम्। इति भूरिः॥ तत्पर्य्यायः। ऋष्टीषम् २। इत्यमरः। २।६।३२॥ ऋष्टीषम् ३। इति स्वामी॥ पिष्टपाकभृत् ४। इति हेमचन्द्रः॥ (यथा, सुश्रुते चिकित्सितस्थाने सप्तविंशाध्याये।

"विङ्गतण्डुलानां दोषं पिष्टपचने पिष्टवदुत्स्वेदेति॥")

पिष्टपाकभृत्, क्ली, (पिष्टपाकं लक्षभिहितो भावो द्रव्यवन प्रकाशते इति न्यायात् पक्वमानपिष्टं बिभर्त्ति धारयतीति। भृ+क्विप् तुगागमश्च।) पिष्टकपाकपात्रम्। इति हेमचन्द्रः। ३। ८६॥

पिष्टपूरः, पुं, (पिष्टैः पूर्य्यते इति। पूरि+कर्म्मणि अप्।) वटकः। इति भूरिप्रयोगः। पिष्टकविशेषः। तत्पर्य्यायः। घृतपूरः २ घृतवरः ३ घार्त्तिकः ४। इति हेमचन्द्रः। ३। ६४॥

पिष्टवर्त्तिः, पुं, (पिष्टं वर्त्तयतीति। वर्त्ति+इन्।) हस्तमक्षरादिपिष्टम्। तत्पर्य्यायः। चमसिः २। इति हेमचन्द्रः। ३। ६४॥

पिष्टसौरभं, क्ली, (पिष्टेन पेषणेन सौरभं यस्य।) चन्दनम्। इति शब्दरत्नावली। १०६॥

पिष्टानः, पुं, (पिष्टं अतति गच्छतीति। अत+अण्।) पटवासचूर्णम्। इति भरतः॥ वस्त्रादिवासनार्थमेकीकृतगन्धद्रव्यचूर्णम्। इति सारसुन्दरी॥ दृक्का। इति भानुदीक्षितः॥ आबीर इति ख्यातः। इति रमानाथजीलकण्ठौ॥ तत्पर्य्यायः। पटवासकः २। इत्यमरः। २। ७। १३६॥ धूलिगृच्छकः ३। इति चिकाण्डशेषः॥

पिष्टिकं, क्ली, (पिष्टसुत्पत्तिकारणत्वेनास्त्यस्येति। ठन्।) तण्डुलोद्भवसत्वसारम्। इति राजनिर्घण्टः॥

पिष्टिका, स्त्री, (पिष्टं पेषणं साधनतया अस्त्यस्या इति। पिष्ट+ठन्। ततष्टाप्।) पिष्टद्विदलः। पिठी इति हिन्दीभाषा॥ यथा,—

"दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका।
घृतायां साधु संपिष्टा पिष्टिका कथिता बुधैः॥"

इति भावप्रकाशः॥

पिष्टोड़ी, स्त्री, श्वेताम्बिः। इति राजनिर्घण्टः॥

पिस, ह कि क्षुतौ। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्। इदित्।) ह, पिंसयते। कि, पिंसयति पिंसति। क्षुतिर्हौंमिः। इति दुर्गादासः॥

पिस, ह गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) ह, अपिपेसत् अपिपिसत्। पिपेसतुः पिपिसतुः। इति दुर्गादासः॥

पिस, क वधार्थे। गत्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) क, पेसयति। अहिंस्यात्मोऽयमिति केचित्। वधार्थो निकेतनहिंसाबलदानादि। इति दुर्गादासः॥

पिहितं, त्रि, (अपि धीयते स्मेति। धा+क्तः।) "दधातेर्हिः।" ७। ४। ४२। इति ह्यादेशः। अपेरलोपः।) आच्छादितम्। तत्पर्य्यायः। संवीतम् २ रुद्धम् ३ आवृतम् ४ संवृतम् ५ छन्नम् ६ स्थगितम् ७ अपवारितम् ८ अन्तर्हितम् ९ तिरोधानम् १०। इति हेमचन्द्रः॥ (यथा, महाभारते। ७। ४५। १८।

"अजेन पिहिताः सर्व्वा दिशो न प्रतिभान्ति मे।
गाण्डीवस्य च शब्देन कर्णौ मे बधिरीकृतौ॥")

पी, ड य पाने। इति कविकल्पद्रुमः॥ (दिवां-आत्मं-सकं-अनिट्।) ड य, पीयते। इति दुर्गादासः॥

पीठं, त्रि, (पेठत्युपविशन्त्यस्मिन्निति। पिठ+"सृजन।" ३। ३। १२१। इति घञ्। बाहुलकादिकारस्य दीर्घः। यद्वा, पीयतेऽत्रेति। पी ड पाने+बाहुलकात् ठक्।) उपवेशनाधारः। इत्यमरः। २।६।१३८॥ पिड़ी चौकी इत्यादि भाषा। तत्पर्य्यायः। आसनम् २ उपासनम् ३ पीठी ४ विष्टरः ५। इति शब्दरत्नावली। प्रतिनामासनम्। तत्तु कुशासनादि। तत्पर्य्यायः। विष्टरः २। इति चिकाण्डशेषः॥ वृषी ३। इति हेमचन्द्रः॥ (यथा, महाभारते। ५। ३८। २।

"पीठं दत्त्वा साधवेऽभ्यागताय
आसीनायाः परिनिर्ज्य पादौ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः॥")

अथ पीठोद्देशः।

"धातुपाषाणकाष्ठैश्च पीठस्त्रिविध उच्यते।
धातवश्च शिलाश्चैव काष्ठानि विविधानि च॥
तदत्र संप्रवक्ष्यामि यदर्थेषासुपवुज्यते॥"

अथ मानम्।

"हस्तद्वयस्तु दैर्घ्येण तदर्द्धं परिणाहतः।
तदर्द्धेनोन्नतः पीठः सुख इत्यभिधीयते॥
हस्तद्वयद्वयाधिक्यात् पञ्च पीठा भवन्ति हि।
सुखं जयः शुभः सिद्धिः सम्पदेति यथाक्रमम्॥
धनभोगसुखैश्वर्य्यवाञ्छितार्थप्रदायकः।
समदीर्घसुखावाप्तिर्विषमे विषमापदः॥
आयामपरिणाहाभ्यां हस्तद्वयमितो हि यः।
अर्द्धहस्तोन्नतः पीठो जारको नाम विश्रुतः॥
दैर्घ्योन्नतिपरीणाहैश्चतुर्हस्तमितो हि यः।
राजपीठ इति ज्ञेयः सकलार्थप्रसाधकः।
अत्राभिषेकमिच्छन्ति क्षितिपस्य पुराविदः॥
दैर्घ्योन्नतिपरीणाहैः षड्हस्तमितो हि यः।
राज्ञां चित्तप्रसादार्थं केशिपीठाभिधानकः॥
दैर्घ्योन्नतिपरीणाहैरष्टहस्तमितो हि यः।
अश्वपीठो ह्ययं नाम्ना भवेत् पञ्चसुखप्रदः॥
कामको राजपीठः स्याज्जयो वा राजतः सुखः।
राज्ञामेवोभयोक्तयो जयवश्योत्तरोत्तरम्॥
राजपीठे चिरायुः स्याज्जये सर्व्वां महीं जयेत्।
जारको जारयेच्छत्रून् सुखे सुखमवाप्नुयात्॥
राजतः कीर्त्तिजननो धनवृद्धिकरः परः।
ताम्रः प्रतापजननो विपक्षक्षयकारकः॥
लौहस्तूच्चाटने सार्व्वः सर्व्वकर्म्मसु युज्यते।
अपुंसीसकरङ्गाद्याः शुभदायफलप्रदाः॥"

इति धातुपीठाः।

अथ शिलापीठाः।

"राजपीठो वज्रपाणेरेव नान्यस्य दृश्यते।
पद्मरागो दिनेशस्य चान्द्रकान्तो विधोरपि॥
राहोर्मारकतः पीठः शनेर्नीलसमुद्भवः।
गोमेदकस्तु सौम्यस्य स्फाटिकस्तु दृहस्पतेः॥
शुक्रस्य वैदूर्य्यभवः प्रावालो मङ्गलस्य हि॥"

इत्थं पुराणयात्रां॥ * ॥

"यो यस्य हि दशाजातः पीठस्तस्य हि तस्यः।
स्फाटिकस्तु महीन्द्राणां सर्व्वेषामेव युज्यते॥
अभिषेके च यात्रायासुत्सवे जयकर्म्मणि।
जयस्कान्तोपघटितः संग्रामे पीठ इष्यते॥
गरुडोद्गारचर्चिते घर्षांसु वृषतिर्व्यसेत्।
सुन्दरत्नमयं पीठं भजते धनगर्व्वितं॥
सामान्यः प्राकृतः पीठो विलासाय महीभुजाम्।
एषां मानं गुणाश्चापि विज्ञेया धातुपीठवत्॥"

अथ काष्ठपीठाः।

तद्यथा, मानं पूर्व्ववदेव।

"सम्पत्तिसुखवृद्ध्यर्थं गाम्भारीजनितो जयः।
जारको रोगनाशाय सुखः शत्रुविनाशनः॥
सिद्धिः सर्व्वार्थसंसिद्ध्यै विजयाय च वैरिणाम्।
शुभः स्यादभिषेके च सम्पदैरिनिवारणः॥
पानसो राजकः पीठः सुखसम्पत्तिकारकः।
जयः स्यादभिषेके च शुभः शत्रुविनाशनः॥
सुखो रोगविनाशाय सिद्धिः सर्व्वार्थदायिका।
सम्पदुच्चाटनविधौ विज्ञेयं पीठलक्षणम्॥
चान्दनस्तु सुखः पीठो अभिषेके महीभुजाम्।
जयः स्यादोगनाशाय शुभः सौख्यं प्रयच्छति॥
जारको यज्ञसुश्रूषां अन्ये तु दस्युदुष्कराः।
यज्ञतो निर्म्मितास्ते तु सामान्यफलदायकाः॥
काशेयको यावको हि भूभुजामभिषेचने।
पीठानगुरुकादीनामन्ये चन्दनवद्विदुः॥
बाकुलस्य शुभः पीठो भूभुजामभिषेचने।

अथो रोगविनाशाय सुखसम्पत्तिकारकः ॥
सिद्धिः सिद्धिप्रदा सम्यक् संग्रामे विजयप्रदः ।
जारको जारणाय स्यादिति भोजस्य सम्मतम् ॥
एवं सुगन्धिकुसुमाः सचारा ये च पादपाः ।
वाकुलेन समः कार्य एवं पीठस्य निर्णयः ॥
ये शुष्ककाष्ठा दृषास्तु लवणो लवणोऽथवा ।
गात्रभारीसदृशः पीठस्तेषां कार्यस्तथा गुरुः ॥
फलिनश्च सचाराश्च रक्तसाराश्च ये नगाः ।
तेषां प्राणवत् पीठस्तथैव गुणमाचरेत् ॥"*॥

अथ निषेधः ।

"त्रिस्रोतो निन्दितः पीठो लौहित्यः सर्व्वधातुजे ।
गिरोत्थः पार्व्वतो वर्ज्यः कर्करश्च विशेषतः ॥
काष्ठजेषु च पीठेषु नासारा नातिसारिणः ॥"
तथाहि ।
"आत्मजन्मुकदम्बागमासनं वंशनागजनम् ॥"
भोजराजः ।
"गुरुः पीठो गौरवाय लघुर्लाघवकारकः ॥"
पराशरस्तु ।
"नात्यस्थिर्नातिस्थश्च नागुरुर्नासमाङ्गनिः ।
पीठः स्यात् सुखसम्पत्तेः नातिदीर्घो न वामनः ॥
ये चान्ये पीठसदृशा दृषदः शिलाविनिर्म्मिताः ।
गुणान्दोषांश्च मानश्च तेषां पीठवदादिशेत् ॥
विधायाग्नेन विधिना यः शुद्धं पीठमाचरेत् ।
तस्य लक्ष्मीरियं वेश्म कदाचिन्न विमुञ्चति ॥
अज्ञानादथवा मोहाद्योऽन्यथा पीठमाचरेत् ।
एतानि तस्य नश्यन्ति लक्ष्मीरायुर्बलं कुलम् ॥"

इति युक्तिकल्पतरौ पीठोद्देशः ॥ * ॥

कृतयुगे दक्षकन्यौ शिवनिन्दां श्रुत्वा प्राणांस्यक्तवत्यां सत्यां भरीरं शिरसि धृत्वा भ्रमति शिवे विष्णुना चक्रेण छिन्नास्तस्या अवयवा यत्र यत्र पतितास्त्र एव देशा एकपञ्चाशत्पीठा अभवन् ॥ इति पौराणिकी वार्त्ता ॥ * ॥

तेषां निरूपणं यथा,—

ईश्वर उवाच ।

"मातः परापरे ! देवि ! सर्व्वज्ञानमयीश्वरि ! ।
कथ्यतां मे सर्व्वपीठं शक्तिभैरवदेवता ॥

देव्युवाच ।

शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ।
याभिर्विना न सिध्यन्ति जपसाधनतत्क्रियाः ॥
पञ्चाशद्देकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥
ममाव्यवपुषो देव ! क्षितौ तस्य क्षये कथम् ।
ब्रह्मरन्ध्रं शिङ्गुलायां भैरवो भीमलोचनः ॥
कोट्टरीसा महामाया त्रिगुणा या दिगम्बरी ॥१
शर्करारे त्रिनेत्रं मे देवी महिषमर्द्दिनी ।
क्रोधीशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ २ ॥
सुगन्धायां नासिका मे देवस्त्र्यम्बकभैरवः ।
सुन्दरी सा महादेवी सुनन्दा तत्र देवता ॥३॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ४ ॥
ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदागम्यां ५ स्कन्धं जालन्धरे मम ।
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥ ६ ॥
हार्दपीठं वैद्यनाथे वैद्यनाथस्तु भैरवः ।
देवता जयदुर्गाख्या ७ नेपाले जानुनी मम ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥८॥
मानसे दक्षहस्तो मे देवी दाक्षायणी हर ।
अमरो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥ ९ ॥
उत्कले नाभिदेशश्च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥१०॥
गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः ।
तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः॥११॥
बहुलायां बाहुलकश्चण्डिकाख्या च देवता ।
भीरुको भैरवो देवः सर्व्वसिद्धिप्रदायकः ॥१२॥
उज्जयिन्यां कूर्परश्च माङ्गल्यः कपिलाम्बरः ।
भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका ॥१३॥
चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
भवानी देवता तत्र भवरूपा भगवती ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥ १४ ॥
त्रिपुरायां दक्षपादो देवता त्रिपुरा मता ।
भैरवस्त्रिपुरेशश्च सर्व्वाभीष्टफलप्रदः ॥ १५ ॥
त्रिस्रोतायां वामपादो भ्रामरी भैरवोऽम्बरः॥१६॥
योनिपीठं कामगिरौ कामाख्या तत्र देवता ।
यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी ।
यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः ॥
सर्व्वदा विहरेद्देवी तत्र सुस्थिरं संशयः ।
तत्र श्रीभैरवी देवी तत्र नक्षत्रदेवता ॥
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ।
वगला कमला तत्र सुवनेशी सुधूमिनी ॥
एतानि वरपीठानि शंसन्ति वरभैरव ! ।
एवं ता देवताः सर्व्वा एवस्ते दश भैरवाः ॥
सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे ।
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ॥१७॥
करतोयां समासाद्य यावत् शिखरवासिनीम् ।
शतयोजनविस्तीर्णं त्रिकोणं सर्व्वसिद्धिदम् ॥
देवा मरणमिच्छन्ति किं पुनर्म्मानवादयः ।
भूतधात्री महामाया भैरवः क्षीरखण्डकः ॥
युगाद्यायां महादेव ! दक्षाङ्गुष्ठं पदो मम ॥१८॥
नकुलीशः कालिपीठे दक्षपादाङ्गुलीषु च ।
सर्व्वसिद्धिकरी देवी कालिका तत्र देवता ॥१९॥
अङ्गुलीषु च हस्तस्य प्रयागे ललिता भवः॥२०॥
जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः ॥२१॥
सुवनेशी सिद्धिरूपा किरीटस्था किरीटतः ।
देवता विमला नाम्नी सम्वर्त्तो भैरवस्तथा ॥२२॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
मणिकर्णीति विख्याता कुण्डलस्य मम श्रुतेः॥२३॥
कन्याश्रमे च पृष्ठं मे निमिषो भैरवस्तथा ।
सर्व्वाणी देवता तत्र २४ कुरुक्षेत्रे च गुल्फतः ॥
स्थाणुर्नाम्ना च सावित्री देवता २५ मधि-

वेदके ।

मणिबन्धे च गायत्री सर्व्वानन्दस्तु भैरवः ॥२६॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः सम्वरानन्दो देशे देशे व्यवस्थितः ॥२७॥
कात्यायनीदेशे च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या २८ मिलस्व: कालमाधवे ॥
भैरवश्चासिताङ्गश्च देवी काली च सुक्तिदा ।
डङ्का डङ्का महादेव ! मन्त्रसिद्धिमवाप्नुयात् ॥
कुजवारे भूतनिधौ निशार्द्धे यस्तु साधकः ।
नत्वा प्रदक्षिणीकृत्य मन्त्रसिद्धिमवाप्नुयात् ॥२९॥
शोणाख्या भद्रसेनस्तु नर्म्मदाख्ये मिलस्वकः ॥३०॥
रामगिरौ शिवानाम्नि शिवानी चण्डभैरवः ॥३१॥
वृन्दावने केशजाले उमानाम्नी च देवता ।
भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः ॥३२॥
संहाराख्ये जटाटन्ते देवी नारायणी शुचौ ।
अधोदन्ते महारुद्रो वाराही पञ्चसागरे ॥३३॥
करतोयातटे तल्पं वामे वामनभैरवः ।
अपर्णा देवता तत्र ब्रह्मरूपा करोद्भवा ॥३४॥
श्रीपर्व्वते दक्षतल्पं तत्र श्रीसुन्दरी परा ।
सर्व्वसिद्धिकरी सर्व्वा सुन्दरानन्दभैरवः ॥ ३५ ॥
कपालिनी भीमरूपा वामगुल्फो विभाषके ॥३६॥
उदरञ्च प्रभासे मे चन्द्रभागा यशस्विनी ।
वक्रतुण्डो भैरव-३७ स्त्रीलोको भैरवपर्व्वते ।
अवन्त्यो च महादेवी लम्बकर्णस्तु भैरवः ॥३८॥
विपुले भ्रामरी देवी विशालाक्षी जले स्थले॥३९॥
गण्डो गोदावरीतीरे विश्वेशी विश्वमातृका ।
दक्षपार्श्वभैरवस्तु वामगण्डे तु राक्षिणी ॥
अमायौ भैरवो वत्स ! सर्व्वशैलात्मकोपरि ॥४०॥
रत्नावल्यां दक्षस्कन्धः कुमारी भैरवः शिवः ॥४१॥
मिथिलायां उमा देवी वामस्कन्धो महोदरः॥४२॥
नलाख्यां नलपातो योगेशो भैरवस्तथा ।
तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका॥४३॥
कर्णाटे चैव कर्णं मे अभीरुर्नाम भैरवः ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४४ ॥
वक्त्रेश्वरे मनःपातो वक्त्रनाथस्तु भैरवः ।
नदी पापहरा तत्र देवी महिषमर्द्दिनी ॥ ४५ ॥
यशोरे पाणिपद्मश्च देवता यशरेश्वरी ।
चण्डश्च भैरवो यत्र तत्र सिद्धिमवाप्नुयात् ॥४६॥
अट्टहासे ओष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः॥ ४७ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः॥४८॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।
इन्द्राणी देवता तत्र इन्द्रेणोपासिता पुरा ॥४९॥
विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् ।
भैरवश्चाऽमृताक्षश्च देवी सम्बाम्बिका स्मृता ॥५०॥
मागधे दक्षजङ्घा मे व्योमकेशस्तु भैरवः ।
सर्व्वानन्दकरी देवी सर्व्वकामफलप्रदा ॥ ५१ ॥
एतास्ते कथिताः पुत्र ! पीठनाथाधिदेवताः ॥
क्षेत्राधीशं विना देवं पूजयेत् पीठदेवताम् ।
भैरवैर्जीयते सर्व्वं जपपूजादिसाधनम् ॥
अज्ञाला भैरवं पीठं पीठशक्तिञ्च शङ्कर ! ।
प्राणनाथ ! न सिध्येत कल्पकोटिशतैरपि ॥
न देयं परशिष्येभ्यो निन्दकाय दुरात्मने ।
शठाय वञ्चकायेदं दत्त्वा मृत्युमवाप्नुयात् ॥
दद्यात् शान्ताय शिष्याय नैष्ठिकाय शुचौ प्रिये
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ॥")

इति तन्त्रचूड़ामणौ शिवपार्वतीसंवादे एकपञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः ॥ * ॥
(देवीभागवतोक्तशाक्ताधिकाग्रसपीठनामादि यथा, तत्रैव। ७। ३०। ७८—९५।
"अपश्यन्तां सतीं वह्नौ दह्यमानान्तु चिल्लताम्।
स्कन्धेऽप्यारोपयामास हा! सतीति वदन् मुहुः॥
बभ्राम भ्रान्तचित्तः सन्नागादेशेषु शङ्करः।
तदा ब्रह्मादयो देवाश्चिन्तामापुरनुत्तमाम्॥
विष्णुस्तु त्वरया तत्र धनुरुद्यम्य मार्गणैः।
चिच्छेदावयवान् सत्याश्चक्रस्थानेषु तेऽपतन्॥
तत्तत् स्थानेषु तन्नामशीलानामधिनेश्वरो हरः।
उवाच च ततो देवान् स्थानेष्वेतेषु ये शिवाम्॥
भजन्ति परया भक्त्या तेषां किञ्चिन्न दुर्लभम्।
नित्यं सन्निहिता यत्र निजाङ्गेषु पराम्बिका॥
स्थानेष्वेतेषु ये मर्त्याः पुरश्चरणकर्म्मिणः।
तेषां मन्त्राः प्रसिध्यन्ति मायाबीजं विशेषतः॥
इत्युक्त्वा शङ्करस्तेषु स्थानेषु विरहासुरः।
कालं निये नृपश्रेष्ठ! जपध्यानसमाधिभिः॥
जनमेजय उवाच।
कानि स्थानानि तानि स्युः सिद्धपीठानि चानघ!।
कतिसंख्यानि नामानि कानि तेषाञ्च मे वद॥
तत्र स्थितानां देवीनां नामानि च कृपाकर!।
कृतार्थोऽहं भवे येन तद्दासानु महामुने!॥
व्यास उवाच।
शृणु राजन्! प्रवक्ष्यामि देवीपीठानि साम्प्रतम्।
येषां श्रवणमात्रेण पापहीनो भवेन्नरः॥
येषु येषु च पीठेषूपास्यं लिङ्गाद्भिः।
भूतिकामैरभिधेया तानि वक्ष्यामि तत्त्वतः॥
वाराणस्यां विशालाक्षी गौरीसुस्थनिवासिनी।
नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी॥
प्रयागे ललिता प्रोक्ता कामुकी गन्धमादने।
मानसे कुमुदा प्रोक्ता दन्तिनी चोत्तरे तथा॥
विश्वकामा भगवती विश्वकामप्रपूरिणी।
गोमन्ते गोमती देवी मन्दरे कामचारिणी॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे।
गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले॥
एकाम्रपीठे संप्रोक्ता देवी सा कीर्त्तिमत्यपि।
विश्वे विश्वेश्वरी प्राहुः पुरुहूताच्च पुष्करे॥
केदारपीठे संप्रोक्ता देवी सन्मार्गदायिनी।
मन्दा हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका॥
स्थाणेश्वरी भवानी तु विल्वके विल्वपत्रिका।
श्रीशैले माधवी प्रोक्ता भद्रा भद्रेश्वरे तथा॥
वराहशैले तु जया कमला कमलालये।
रुद्राक्षी रुद्रकोट्यान्तु काली कालञ्जरे तथा॥
शालग्रामे महादेवी शिवलिङ्गे जलप्रिया।
महालिङ्गे तु कपिला माकोटे मुकुटेश्वरी॥
मायापुर्य्यां कुमारी स्यात्सन्ताने ललिताम्बिका।
उत्पलाक्षी सहस्राक्षे हिरण्याक्षे महोत्पला।
विपाशायाममोघाक्षी पाटला पुरुषर्द्धने॥
नारायणी सुपार्श्वे तु त्रिकूटे रुद्रसुन्दरी।
विपुले विपुला देवी कल्याणी मलयाचले॥
सह्याद्रावेकवीरा तु हरिश्चन्द्रे तु चण्डिका।
रमणा रामतीर्थे तु यमुनायां मृगावती॥
कोटवी कोटतीर्थे तु सुगन्धा माधवे वने।
गोदावर्य्यां विश्वमुखा तु गङ्गाद्वारे रतिप्रिया॥
शिवकुण्डे शुभानन्दा नन्दिनी देविकातटे।
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने॥
देवकी मथुरायान्तु पाताले परमेश्वरी।
चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी॥
करवीरे महालक्ष्मीरमादेवी विनायके।
आरोग्या वैद्यनाथे तु महाकाले महेश्वरी॥
अभयेशुक्लतीर्थेषु नितम्बा विन्ध्यपर्व्वते।
माण्डव्ये माण्डवी नाम स्वाहा माहेश्वरीपुरे॥
कुशद्वीपे प्रचण्डा तु चण्डिकामरकण्टके।
सोमेश्वरे वरारोहा प्रभासे पुष्करावती॥
देवमाता सरस्वत्यां पारावारा तटे स्थिता।
महालये महाभागा पयोष्ण्यां सिद्धलेश्वरी॥
सिंहिका तापसाख्ये तु कार्त्तिके त्वतिशाङ्करी।
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे॥
माता सिद्धवने लक्ष्मीरनङ्गा भरताश्रमे।
जालन्धरे विश्वमुखी तारा किष्किन्धपर्व्वते॥
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले।
भीमादेवी हिमाद्रौ तु तुष्टिश्चन्द्रेश्वरी तथा॥
कपालमोचने शुद्धिर्माता कायावरोहणे।
शङ्खोद्धारे धरा नाम धृतिः पिण्डारके तथा॥
कला तु चन्द्रभागायामच्छोदे शिवधारिणी।
वेणायामन्तता नाम वन्ध्यासुव्रेश्वरी तथा॥
ओषधिश्चोत्तरकुरौ कुशद्वीपे कुशोदका।
मन्मथा हेमकूटे तु कुमुदे सत्यवादिनी॥
अश्वत्थे वन्दनीया तु निधिर्वैश्रवणालये।
गायत्री वेदवदने पार्व्वती शिवसन्निधौ॥
देवलोके तथेन्द्राणी ब्रह्मास्येषु सरस्वती।
सूर्य्यबिम्बे प्रभा नाम मातृणां वैष्णवी मता॥
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा।
शिवे शङ्खकला नाम शक्तिः सर्व्वशरीरिणाम्॥
इत्याद्यष्टशतानि स्युः पीठानि जनमेजय!।
तत्तत्संख्याकास्तद्दीपाब्धो देवाश्च परिकीर्त्तिताः॥
सतीदेहाङ्गभूतानि पीठानि कथितानि च।
अन्यान्यपि प्रसङ्गेन यानि स्थानानि भूतले॥
यः स्मरेच्छृणुयादापि नामाष्टशतमुत्तमम्।
सर्व्वपापविनिर्म्मुक्तो देवीलोकं परं व्रजेत्॥
एतेषु सर्व्वपीठेषु गच्छेद् यात्राविधानतः।
सन्तर्पयेच्च पित्रादीन् श्राद्धादीनि विधाय च॥
कुर्य्याच्च महतीं पूजां भगवत्या विधानतः।
क्षमापयेच्चगद्धात्रीं जगदम्बां मुहुर्मुहुः॥
कृतकृत्यं स्वमात्मानं जानीयाज्जनमेजय!।
भक्ष्यभोज्यादिभिः सर्व्वान् ब्राह्मणान् भोजयेत्ततः॥
सुवासिनीः कुमारीश्च बटुकादींस्तथा नृप!।
तस्मिन् पीठे स्थिता ये तु चाण्डालाद्या अपि प्रभो!॥
देवीकृपाः स्मृताः सर्व्वे पूजनीयास्तनो हि ते।
प्रतिमहादिकं सर्व्वं तेषु क्षेत्रेषु वर्ज्जयेत्॥

यथाशक्तिपुरश्चर्य्यां कुर्य्याज्जनस्य चत्तमः।
मायाबीजेन देवेशीं तत्तत्पीठाधिवासिनीम्॥
पूजयेदनिशं राजन्! पुरश्चरणलब्धवेत्।
वित्तशाठ्यं न कुर्व्वीत देवीभक्तिपरो नरः॥
य एवं कुरुते यात्रां श्रीदेव्याः प्रीतमानवः।
सहस्रकल्पपर्य्यन्तं ब्रह्मलोके महत्तरे॥
वसन्ति पितरस्तस्य सोऽपि देवीपुरे तथा।
अन्ते लब्ध्वा परं ज्ञानं भवेन्मुक्तो भवाब्धेः॥")
अन्यानि पीठादीनि कालीपुराणे १८।५०।६१ अध्यायेषु द्रष्टव्यानि। * ॥ पीठन्यासस्तु न्यासशब्दे द्रष्टव्यः। पीठदेवतापूजनं न्यासक्रमेणैव॥

पीठकेलिः, पुं, (पीठे आसने केलिर्नर्म्मादिरस्य।) पीठमर्द्दनायकः। यथा,—
"विदूषको वलीकः पटप्रश्नः कामकेलिर्विदूषकः।
पीठकेलिः पीठमर्द्दो भविलम्भिदुरो विटः॥"
इति त्रिकाण्डशेषः॥

पीठमर्द्दः, पुं, (मृद्नातीति। मृद्+अच्। पिठस्यासनस्य मर्द्दः।) नायकविशेषः। तस्य लक्षणम्। कुपितस्त्रीप्रसादकः। उदाहरणं यथा,—
"कोऽयं कोपविधिः प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिता मेदिनी।
आस्यं वा मृदयामु लोचनमिदं वावर्त्तयन्त्रो-
मृदु-
र्यत्ते कुप्यसि तस्य सुन्दरि! तपोमृद्नामि
वन्दामहे॥
नर्म्मसचिवोऽयमेव।" इति रसमञ्जरी॥ (अयं हि नायकस्य उत्तमसहायानामन्यतमः। इति साहित्यदर्पणम्।३।५३॥ नायकप्रियः। अतिधृष्टः। यथा, मेदिनी। दे, ५०।
"पीठमर्द्दोऽति धृष्टे स्यान् नायकस्य प्रियेऽपि च॥"
यथा, महाभारते। ४। २०। ३३।
"प्रेक्षते स्म विराटस्तु कङ्कञ्च बहवो जनाः।
रथिनः पीठमर्द्दाश्च हस्त्यारोहाश्च नैगमाः॥")

पीठसर्पी, [नृ] त्रि, (पीठेन सर्पतीति। सृप्+णिनिः।) खञ्जः। तत्पर्य्यायः। पांशुरः २। इति हारावली॥

पीठी, स्त्री, (पीठ+स्वार्थे ङीष्।) आसनम्। इति शब्दरत्नावली॥ पौंड़ी इति भाषा॥

पीड, ञ क वाधे। माहे। इति कविकल्पद्रुमः॥ (चुरां परं सकं-सेट्।) बाधो विलोड़नम्। ञ, अपीपिड़त् अपिपीड़त्। क, पीड़यति शत्रुं लोकः। पीड़यति स्तनं कामी। इति दुर्गादासः॥

पीड़नं, क्ली, (पीड़ बाधे अवगाहे वा+भावे-ल्युट्।) अस्त्रादिसम्पन्नदेशस्य परचक्रेण पीड़नम्। प्रचुरतरगाढ़प्रहारः। इति केचित्। पदाक्रमणम्। इति केचित्। इति भरतः॥ तत्पर्य्यायः। अवमर्द्दः २। इत्यमरः।२।८।९०८॥
(यथा, देवीभागवते। ३। १२। १३।
"पीडनञ्चैव पाञ्चाल्या तथा ह्यते पराजयः॥")

पीड़ितं

दुःखवत् । यथा,—
"अरयं पीड्यमानस्य प्रशस्तं स्वपनाधनम् ।
अरयं पीड़ने चास्य तस्मात्पथ्येन तं भरेत् ॥"
इति दायभागधृतमनुवचनम् ॥
महनम् । टिपण चापन इत्यादि भाषा । यथा,—
"अभीऽभिघातविषमाशुगपीड़नाद्यैः
यद्यं सुमादिव यतं यतति यत्नेन ॥"
इति माधवकरः ॥

पीड़ा, स्त्री, (पीड़नमिति । पीड़+"विड्भिदादिभ्योऽङ् ।" ३ । ३ । १०४ । इति अङ् । ततष्टाप् ।) पीड़नम् । तत्पर्य्यायः । बाधा २ व्यथा ३ दुःखम् ४ अमानसम् ५ प्रकृतिजम् ६ मरम् ७ लक्ष्मम् ८ आभीलम् ९ । इत्यमरः । १ । ८ । ३ ॥ आबाधा १० । इति हलायुधः ॥ आमानसम् ११ । इति रायमुकुटः ॥ (मूलम् १२ दग् १३ वेदना १४ आर्त्तिः १५ तोदः १६ रुजा १७ । इति वैद्यकरत्नमाला ॥ यथा, मनुः । ७ । १४६ ।
"यदाराष्ट्रेषु राज्ञोऽयुक्ताधिकृतं भुवमाचरेत् ।
तदाराष्ट्रे चाधिपतौ पीड़ां तत्रा लघिं समाप्नुयात् ॥")
एषां पीड़ादीनां मध्ये विशेषणगामिनो ये दुःखकरलक्षणाभीलाद्यो भिन्निङ्गाः । सा आध्यात्मिकाधिभौतिकाधिदैविकतापत्रयभेदेन त्रिविधा । आध्यात्मिकोऽपि द्विविधः । यथा,—
"आध्यात्मिकादि मैत्रेय ! त्रयमेतत्रयं बुधः ।
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिकौ द्वे द्विविधः शारीरो मानसस्तथा ।
शारीरो बहुभिर्भेदैर्भिद्यते भूयताञ्च सः ॥
शिरोरोगप्रतिश्यायज्वरमूलभगन्दरैः ।
गुह्यार्शःक्षयपुंस्त्वघ्नहृद्रोगादिभिरेकधा ॥
तथाक्षिरोगातीसारकुष्ठाङ्गामवर्त्मकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥"
अङ्गामयो वातजलोदरादिः । १ ॥ * ॥
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
ईर्षाक्षयावमानेर्ष्यामात्सर्य्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥२॥
इत्येवमादिभिर्भेदैस्तापो आध्यात्मिकः स्मृतः ॥
जलपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
वरीसृपाद्यैश्च कृतो जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युताद्यसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
शारीरैश्चतुराशानां तुल्यारब्धं तथा ।
दुःखं बहुविधो भेदैर्भिद्यते सुनिश्चितम् ! ॥"
इति विष्णुपुराणे । ६ । ५ । १—६ ॥ * ॥
छाया । शिरोरोगादि । वरटहः । इति मेदिनी । दे, २० ॥

पीड़ितं, त्रि, (पीड़+क्तः । यद्वा, पीड़ाञ्च आसेति तारकादित्वात् इतच् ।) स्त्रीयां ङीष् । पीड़नम् । पीड़ितम् । बाधितम् । इति मेदिनी । ते, २२ । आबाधितम् । इति हेमचन्द्रः ॥ दुःखप्राप्तः पीड़ापर्य्यायोऽप्यत्र ॥ (यथा, मनुः । ८ । ३७५ । [ब्रूयाः ॥] "यद्यस्यार्त्तिकरा मन्त्रा दण्डका पीड़िता-

पीतः

पीतं, क्ली, (पा+भावे क्तः ।) पानम् । इति मेदिनी । ते, २३ ॥ (पीतो वर्णोऽस्यास्तीति । अच् । पीताम्बरादेश्च तथात्वम् ।) हरितालम् । इति राजनिर्घण्टः ॥ (हरिचन्दनम् । तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"पीतसारं सुगन्धञ्च तत्पीतं हरिचन्दनम् ॥")
पीतः, पुं, (पिबति वर्णान्तरमिति । पा+क्तादिभि औणादिकः क्तः ।) वर्णविशेषः । हलदिया इति भाषा । तत्पर्य्यायः । गौरः २ हरिद्राभः ३ । इत्यमरः । १ । ५ । १४ ॥ कुसुम्भः । अङ्गोटः । आखोटः । पुष्यरागः । इति राजनिर्घण्टः ॥ पीतवस्तूनि यथा,—
"पीतानि ब्रह्म-१जीवे-२ऋ-३गरुड़े-४चरटम्-५ घटाः ६ ।
गौरी-७द्वापर-८गोलज-९मधु-१०वीररजा-११ रजः १२ ।
हरिद्रा१३रोचना१४रीति-१५गन्धके१६ द्वीप-१७ चम्पके १८ ।
किञ्जल्क-१९वल्कले२०ऽब्जि-२१हरिताल-२२ मनःशिलाः २३ ।
कर्णिकारम्२४ चक्रवाक-२५ वागरी२६ द्वारिकास्तम् २७ ।
केशरांशुक-२८मक्षूक-२९सराग-३०कनका-दयः३१ ॥" * ॥
पीतश्वेतवाचकानि यथा,—
"पीतश्वेतौ गौर-१द्विजराज-२कपर्द-३शम्बु-४ हरि-५ताक्ष्यौ ६ ।
हैमलोमा-७टापद-८ महारजत-९चन्द्र-१० कलधौतार्२१ ॥"
अस्यार्थः । गौरः श्वेतपीतयोः । द्विजराजो गरुड़चन्द्रयोः । कपर्दः शम्बुघटाजूटकपर्दयोः । शम्बुर्ब्रह्मजिलोचनयोः । हरिः पिङ्गलसिंहयोः । ताक्ष्यौ गरुड़ः पक्षी उच्चैःश्रवाः । हैमलोमः हैमोऽयं हैमः पक्षे हिमस्थायम् । अटापदं सुवर्णशरभयोः । महारजतं सुवर्णरूप्ययोः । चन्द्रः सुवर्णशङ्खयोः । कलधौतं हैमरूप्ययोः ।
"सुशोभितारकूटस्थौ सुवर्णलोमचमुतिः ।
रक्तनीलसवर्णाभिर्गर्भाभिश्चित्रविग्रहः ॥"
अस्यार्थः । तारकूटो रूप्यवर्णः पक्षे चारकूटो रीतिः । सुशोभनसर्वः कनकश्च । गोपतिताक्ष्यैताभिः रक्तिमकृष्णाभिः । पक्षे गोपतिरिन्द्रः तस्य ताक्ष्यैरावणः । वामदेवजिदिभैर्मनोज्ञमेदः मेलायाञ्च ॥७॥ पीतश्यामवाचकानि यथा,
"पीतश्यामौ कृष्णाम्बर-१ मधुजित्-२ श्यामल-३ मेघारः ४ ।
पिशुलाक्षः ५ श्यामदेवि-६ हरि-७ सर्वंसहावाः ८ ॥"
अस्यार्थः । कृष्णाम्बरं विष्णुवस्त्रे सर्वंसहाश्वयोः । मधुजित् मधुसूदनविष्णोः । श्यामदेवा सर्व-

पीतक

तमस्तुल्ययोः । पिशुलाक्षः मेघतड़ित्तमसोः । श्यामदेवौ सूर्य्यान्धकारतुल्ययोः । हरिः सर्पिशल्ययोः । सर्वंसहायः सुवर्णसुन्दरवस्तुसुखाद्योरभयोः । इति शब्दरत्नावली ॥ (पर्व्वतविशेषः । यथा, भारते । १२१ । ६३ ।
"प्रथमः सर्वशृङ्गाणां कुमुदो नाम पर्व्वतः ।
पीतस्तु मध्यमस्तस्य श्वेतसौम्यमयो गिरिः ॥")
पीतं, त्रि, (पीतवर्णोऽस्यास्तीति । अच् ।) पीतवर्णयुक्तम् । इति मेदिनी । ते, २३ । (यथा, महाभारते । ३ । ४१ । २० ।
"ये त्विमे भिन्नशिखाः पीताः पृथव ईक्षणाः ।
शैलाग्रसन्निभपर्व्वाणो राक्षस एते महाबलाः ॥"
पा+क्तादिभि क्तः ।) क्षतपानम् । यथा,—
"क्षतात्क्षतमपि पीतं बहुशो भिक्षापि भक्षिता भवता ।
अनयोरपगतरसयोः किमद्यतनं वद योगिन् ॥"
इत्युद्भटः ॥
(पीतं पानमस्यास्तीति । अच् । यद्वा, पीतं गौरं क्षीरं वा येन इत्युत्तरपदलोपः । पीतदुग्धादिकम् । यथा, रघौ । २ । १ ।
"अथ प्रजानामधिपः प्रभाते
जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच ॥")
पीतकं, क्ली, (पीत+"वाचादिभ्यः कन् ।" ५ । ४ । २६ । इति स्वार्थे कन् ।) हरितालम् । इत्यमरः ॥ (पीतेन पीतवर्णेन कायतीति । के+कः ।) कुङ्कुमम् । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो गुणश्च यथा,—
"कुङ्कुमं सुरसं रक्तं काश्मीरं पीतकं वरम् ।
बह्नीकं पिशुनं धीरं वाह्लीकं घोषिताभिधम् ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं बह्निवेष्टितम् ।
स्वल्पकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरम्बुजम् ।
केसरौगन्धयुक्तत्वाच्चाधमं स्वल्पकेशरम् ॥
कुङ्कुमं पारसीकेयमल्पगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णत्वादधमं स्थूलकेशरम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अगुरु । पद्मकाष्ठम् । रीतिः । माक्षिकम् । इति राजनिर्घण्टः ॥ नक्षीद्रुमः । पीतप्रासः । इति रत्नमाला ॥ योगाभ्रभेदः । हरिद्रः । किंकिरातवृक्षः । इति राजनिर्घण्टः ॥ (पीतेन पीतवर्णेन रक्तमिति । पीत+"आचारोपनाटकच् ।" ५ । २ । २ । इकच् "पीतात् कन् ।" इति वार्त्तिकोक्त्या कन् । पीतवर्णरञ्जिते पीतवर्णविशिष्टे च त्रि ॥ पीत+स्वार्थे कन् । पीतवर्णे, पुं । यथा, महाभारते । १२ । १८८ । ५ ।
"ब्राह्मणानां सितो वर्णः क्षत्रियाणान्तु लोहितः ।
वैश्यानां पीतको वर्णः शूद्राणामसितस्तथा ॥")
पीतकदली, स्त्री, (पीता कदलीति विशेषणसमासः ।) स्वर्णकदली । इति राजनिर्घण्टः ॥

पीतकहुमः, पुं, (पीतको द्रुम इति नित्यकर्म्मधारयः।) हरिद्रुवृक्षः। इति राजनिर्घण्टः॥ (हरिद्रुशब्दोऽस्य विवरणं विलोक्यम्॥)

पीतकन्दं, क्ली, (पीतः कन्दोऽस्य।) गजेरम्। इति राजनिर्घण्टः॥

पीतकरवीरकः, पुं, (पीतः करवीर इति नित्यकर्म्मधारयः। ततः स्वार्थे कन्।) पीतवर्णकरवीरपुष्पवृक्षः। तत्पर्य्यायः। पीतप्रसवः २ सुगन्धिकुसुमः ३। अस्य गुणाः। सामान्यकरवीरगुणतुल्याः। इति राजनिर्घण्टः॥

पीतकार्वेरं, क्ली, (कुत्सितं वेरं शरीरं कार्वेरम्। पीतं कार्वेरं कुत्सितशरीरमपि यस्मात्।) कुङ्कुमम्। पित्तलम्। इति मेदिनी। रे, १०५॥ (विवृतिरस्य कुङ्कुमपित्तलशब्दयोर्द्रष्टव्या॥)

पीतकाष्ठं, क्ली, (पीतं काष्ठमिति नित्यकर्म्मधारयः।) पीतचन्दनम्। इति राजनिर्घण्टः॥

पीतकोशा, स्त्री, (पीता कोशा कोशतुल्या जतेति नित्यकर्म्मधारयः।) आरग्वधकोशता। इति राजनिर्घण्टः॥

पीतघोषा, स्त्री, (पीतानि पुष्पाणि सन्त्यस्या इति पीता पीतपुष्पेत्यर्थः। ततः पीता घोषेति कर्म्मधारयः।) पीतपुष्पघोषालता। इति रत्नमाला॥ अस्याः पर्य्यायः घोषकशब्दे द्रष्टव्यः॥

पीतचन्दनं, क्ली, (पीतं चन्दनमिति नित्यकर्म्मधारयः।) पीतवर्णचन्दनम्। तत्तु द्रविडदेशे प्रसिद्धम्। कजक्क इति ख्यातम्। तत्पर्य्यायः। पीतगन्धम् २ कालेयम् ३ पीतकम् ४ माधवप्रियम् ५ कालेयकम् ६ पीतकाष्ठम् ७ वर्ब्बरम् ८। इति राजनिर्घण्टः॥ कालीयकम् ९ कालीयम् १० पीताभम् ११ हरिचन्दनम् १२ हरिप्रियम् १३ कालसारम् १४ कालानुसार्य्यकम् १५। अस्य गुणाः। रक्तचन्दनगुणतुल्यगुणत्वम्। अङ्गनाप्रियत्वञ्च। इति भावप्रकाशः॥ पीतजत्वम्। तिक्तत्वम्। कुष्ठश्वेत्यकण्डूविषक्षिताद्रक्रिमिनाशित्वम्। कान्तिकरत्वञ्च। इति राजनिर्घण्टः॥

पीतचम्पकः, पुं, (पीतं चम्पकमिव ग्रिक्षा यस्य।) प्रदीपः। इति जटाधरः॥ (पीतं चम्पकं तत्पुष्पमस्य।) पीतवर्णचम्पकपुष्पवृक्षश्च॥

पीततण्डुलः, पुं, (पीततण्डुलोऽस्य।) कङ्गुधी। इति राजनिर्घण्टः॥

पीततण्डुला, स्त्री, (पीततण्डुलोऽस्याः।) चर्विकावृक्षः। इति राजनिर्घण्टः॥

पीततुण्डः, पुं, (पीतं तुण्डं यस्य।) कारण्डवपक्षी। तत्पर्य्यायः। चञ्चुरुचिः २ सुमुखः ३। इति त्रिकाण्डशेषः॥

पीतता, स्त्री, (पीत+तल्+टाप्।) हरिद्राभता। पीतत्वम्। पीतशब्दात् भावार्थे तप्रत्ययनिष्पन्ना। इति व्याकरणम्॥ (यथा, महाभारते। ६। १४६। ३६।
"द्वापरेऽपि युगे धर्म्मो त्रिभागो नः प्रवर्त्तते।
विष्णुर्वै पीततां याति चतुर्व्वा वेद एव च॥"

पीततैजा, स्त्री, (पीतं तैजमस्याः।) ज्योतिष्मती लता। इति जटाधरः॥ महाज्योतिष्मती। इति राजनिर्घण्टः॥

पीतदारु, क्ली, (पीतञ्च तत् दारु चेति।) देवदारु। इत्यमरः। २।४।५१॥ (पर्य्यायोऽस्य यथा,—
"सुरदारु हकिलिमं सुराह्वं भद्रदारु च।
देवकाष्ठम्पीतदारु देवदारु च दारु च॥"
इति वैद्यकरत्नमालायाम्॥)
सरलः। इति रत्नमाला॥ हरिद्रः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा,—
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च॥
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

पीतदुग्धा, स्त्री, पीतं दुग्धं यस्या यथा वा। धेनुभेदा। दुग्धवत्यकैः संख्याता गौः। इति हेमचन्द्रः॥ (पीतं पीतवर्णं दुग्धं क्षीरमस्याः। कटुपर्णी। चोक इति भाषा॥ अस्याः पर्य्यायः।
"कटुपर्णी हैमवती हैमक्षीरी हिमावती।
हैमाका पीतदुग्धा च तनूरुहचोकसुच्यते॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

पीतद्रुः, पुं, (पीतो द्रुरिति नित्यकर्म्मधारयः।) सरलवृक्षः। दारुहरिद्रा। इत्यमरः। २।४।६०, २।४।९०१॥ (यथास्य पर्य्यायः।
"दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा॥
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

पीतनं, क्ली, (पीतं करोतीति। तत्करोतीति णिच्। ततो ल्युः। यद्वा, पीतं पीतवर्णं नयतीति। नी+डः।) कुङ्कुमम्। (यथा, श्रीकृष्णचरिते। ६। ६७।
"अपक्रुत्य पीतनमधेय-
ममरसुहृदां शरीरतः।
भीत इव गहनगाभिगुहां
प्रपलाय्य तूर्णमविशत् प्रभोभरः॥")
हरितालम्। पीतदारु। इत्यमरमेदिन्यौ॥

पीतनः, पुं, (पीतं करोतीति। णिच्। ततो ल्युः।) वृक्षः। इति राजनिर्घण्टः॥ आम्रातकः। इति मेदिनी। ने, ६२॥ (नन्दीवृक्षः। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"नन्दीवृक्षस्त्वाम्रपाकी मलपाकी च पीतनः।
गन्धभाङ्गो गन्धसुखो द्वितीयः क्षिप्रपाकसौ॥")

पीतनकः, पुं, (पीतन एव। पीतन+स्वार्थे कन्।) आम्रातकः। इति राजनिर्घण्टः॥

पीतपर्णी, स्त्री, (पीतानि पीतवर्णानि पर्णानि यस्याः। ङीष्।) त्रिवल्ली। इति शब्दचन्द्रिका॥ विछिटि इति भाषा॥

पीतपादा, स्त्री, (पीतौ पादौ यस्याः।) शारिकापक्षी। इति हेमचन्द्रः॥ पीतचरणयुक्ते, त्रि॥

पीतपुष्पं, क्ली, (पीतानि पुष्पाणि यस्य।) आम्रवृक्षः। इति राजनिर्घण्टः॥ (कुष्माण्डम्। तत्पर्य्यायो यथा भावप्रकाशे।
"कुष्माण्डं स्यात् पुष्पफलं पीतपुष्पं हरत्फलम्॥")
हरिद्राभकुसुमञ्च॥

पीतपुष्पः, पुं, (पीतानि पीतवर्णानि पुष्पाणि यस्य।) कर्णिकारवृक्षः। इति शब्दचन्द्रिका॥ चम्पकवृक्षः। इति राजनिर्घण्टः॥ पीतकिङ्किणी। पिङ्गीतकमेहः। इति रत्नमाला॥ (रुद्रजटीवृक्षः। यथा, वैद्यकरत्नमालायाम्।
"पीतपुष्पोऽक्षारपुष्पो रुद्रजटी तापसप्रियः॥"
राजकोशातकी। तत्पर्य्यायो यथा, भावप्रकाशे।
"धामार्गवः पीतपुष्पो जालिनी ज्ञतबोधना।
राजकोशातकी चेति तथोक्ता राजिमत्फला॥")

पीतपुष्पा, स्त्री, (पीतं पुष्पं यस्याः।) इन्द्रवारुणी। शिखरिद्राक्षुपः। आढकी। इति राजनिर्घण्टः॥ (महावला। तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम्।
"अत्यम्लोक्ता ज्ञतिबला पीतपुष्पा महाबला॥")

पीतपुष्पी, स्त्री, (पीतं पुष्पं यस्याः। जातित्वात् ङीष्।) शुक्लपुष्पी। सक्षदेवी। महाकोशातकी। अपुष्पी। इति राजनिर्घण्टः॥

पीतफलः, पुं, (पीतानि फलानि यस्य।) आखोटवृक्षः। इति त्रिकाण्डशेषः॥ कर्म्मारवृक्षः। इति राजनिर्घण्टः॥

पीतफलकः, पुं, (पीतफल एव। स्वार्थे कन्।) आखोटवृक्षः। इति भावप्रकाशः॥

पीतबालुका, स्त्री, (पीता बालुकेव चूर्णनरजो यस्याः।) हरिद्रा। इति त्रिकाण्डशेषः॥ पीतवर्णबालिकता च॥

पीतबीजा, स्त्री, (पीतं बीजं यस्याः।) मेथिका। इति राजनिर्घण्टः॥ पीतवर्णबीजयुक्ते, त्रि॥

पीतभृङ्गराजः, पुं, (पीतो भृङ्गराजः।) पीतभृङ्गराजः। पीत कैशुरिया इति भाषा। तत्पर्य्यायः। स्वर्णभृङ्गारः २ हरिप्रियः ३ देवप्रियः ४ वन्दनीयः ५ पावनः ६। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामशोषनाशित्वम्। तस्य बीजे रसायनः। इति राजनिर्घण्टः॥

पीतमणिः, पुं, (पीतो मणिरिति नित्यकर्म्मधारयः।) पुष्परागः। इति राजनिर्घण्टः॥ (पुष्पराग-शब्दोऽस्य विवरणं ज्ञातव्यम्॥)

पीतमाक्षिकं, क्ली, (पीतं माक्षिकम्।) माक्षिकम्। इति राजनिर्घण्टः॥

पीतसुग्गः, पुं, (पीतः पीतवर्णो सुग्गः।) सुग्गविशेषः। सोआ सुग्ग इति भाषा। तत्पर्य्यायः। वसुः २ खञ्जरीटः ३ प्रवेकः ४ अग्रः ५ शारदः ६। इति हेमचन्द्रः। ४। २३८॥

पीतसालकं, क्ली, (पीतं सालकमस्य । कप् ।) गर्ज्जरम् । इति राजनिर्घण्टः ॥

पीतसूची, स्त्री, (पीता सूची ।) स्वर्णसूची । इति राजनिर्घण्टः ॥ (स्वर्णसूचीशब्देऽस्या विवृतिर्विलेखा ॥)

पीतस्तं, क्ली, (पीतं स्तमच । वर्णो वर्णेनेति समासः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीतरागं, क्ली, (पीतो रागो वर्णो यस्य ।) किञ्जल्कम् । झिङ्गकम् । इति राजनिर्घण्टः ॥ पीतवर्णे, पुं । तद्वति, त्रि ॥

पीतरोहिणी, स्त्री, (पीता सती रोहतीति । रुह + णिनिः + ङीप् ।) काञ्चनी । इति भावप्रकाशः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।

"काञ्चीरौ काञ्चनी हीरा काञ्चन्यः पीतरोहिणी ॥")

पीतलः, पुं, (पीतं लातीति । ला + कः ।) पीतवर्णः । इति हेमचन्द्रः ।६।१२०॥ तद्युक्ते, त्रि ॥

पीतलकं, क्ली, (पीतलेन पीतेन वर्णेन कायति प्रकाशते इति । कै + कः ।) पित्तलम् । इति राजनिर्घण्टः ॥

पीतलोहं, क्ली, (पीतं लोहमिति नित्यकर्म्मधारयः ।) पित्तलभेदः । इति हेमचन्द्रः ।४।११४॥

पीतवासाः, [स्] पुं, (पीतं वासो वस्त्रं यस्य ।) श्रीकृष्णः । इति हलायुधः ॥ पीतवस्त्रयुक्ते, त्रि ॥ (यथा, महाभारते । २ । ६४ । ५२ ।

"यः सचक्रगदापाणिः पीतवासाः श्रितप्रभः ॥")

पीतवृक्षः, पुं, (पीतो वृक्षः ।) म्लेच्छाकप्रभेदः । सरलवृक्षः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।

"सरलः पीतवृक्षः स्यात्तथा सुरभिदारुकः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पीतशाल(सा)लः, पुं, (पीतः शालो वृक्षविशेषः ।) अश्वकर्णवृक्षः । इति शब्दचन्द्रिका ॥ (यथा, कालिकापुराणे ६८ अध्याये ।

"पीतशालः परिमलो विमर्द्दोकासनस्तथा ॥")

पीतसारं, क्ली, (पीतः सारो यस्य ।) पीतवर्णचन्दनकाष्ठम् । हरिचन्दनम् । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"पीतसारं सुगन्धिस्यात्तत्पीतं हरिचन्दनम् ॥")

पीतसारः, पुं, (पीतः पीतवर्णः सारो यस्य ।) मलयजः । गोमेदकमणिः । इति मेदिनी । रे, २८१ ॥ अश्वोठवृक्षः । इति जटाधरः ॥ तुरङ्गः । पीलुकः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"पीलुकः पीतसारश्च पीतशालक इत्यपि ।
वल्गुकपुष्पः प्रियकः सर्ज्जकश्चायनः स्मृतः ॥")

पीतसारकः, पुं, (पीतः सारो यस्य । कप् ।) निम्बवृक्षः । अश्वोठवृक्षः । इति राजनिर्घण्टः ॥

पीतसारि, क्ली, (पीतं पीतवर्णं सरति प्राप्नोतीति । सृ + णिनिः ।) लोलोऽञ्जनम् । इति शब्दचन्द्रिका ॥

पीतसालकः, पुं, (पीतः सालकः सालवृक्षः ।) पीतवर्णसालवृक्षः । पेया साल इति भाषा । तत्पर्य्यायः । सर्ज्जकः २ असनः ३ वन्धूकपुष्पः ४ प्रियकः ५ जीवकः ६ । इत्यमरः । २ । ४ । ४२ ॥ अस्य पर्य्यायान्तरं गुणाश्च असनशब्दे द्रष्टव्याः ॥

पीतस्फटिकः, पुं, (पीतः स्फाटिक इति मित्रकर्म्मधारयः ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥

पीता, स्त्री, (पीतो वर्णोऽस्यस्या इति । अच् । टाप् ।) हरिद्रा । इत्यमरः । २ । ६ । ४१ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।

"हरिद्रा पीतका गौरी काञ्चनी रजनी निशा ।
मेहघ्नी रजनी पीता वर्णिनी राजिनामिका ॥")

दारुहरिद्रा । महाज्योतिष्मती । कपिलपिङ्गपा । प्रियङ्गुः । गोरोचना । इति राजनिर्घण्टः ॥ अतिविषा । इति शब्दचन्द्रिका ॥ (पीतवर्णयुक्ते, त्रि । यथा, विष्णुकर्म्मप्रकाशे । २ । २४ ।

"श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्व्वशः ॥")

पीताङ्गः, पुं, (पीतं अङ्गं यस्य ।) म्लेच्छाकप्रभेदः । इति राजनिर्घण्टः ॥

पीताब्धिः, पुं, (पीतः अब्धिः सप्तमो येन ।) अगस्त्यमुनिः । इति हेमचन्द्रः । २ । ३६ ॥ (अगस्त्यमुनेः सप्तमपानकथा यथा, महाभारते । ३ । १०५ । १—६ ।

"सप्तमं स समासाद्य वातापिर्भगवानृषिः ।
उवाच वदितान् देवानृषींश्चैव समागतान् ॥
अहं लोकहितार्थं वै पिबामि वरदालयम् ।
भवद्भिर्यदनुष्ठेयं तच्छीघ्रं संविधीयताम् ॥
एतावदुक्त्वा वचनं मेघावरणिरच्युत: ।
सप्तमंपिबत् क्रुद्धः सर्व्वलोकस्य पश्यतः ॥
पीयमानं सप्तमन्तु दृष्ट्वा सेन्द्रास्तदामराः ।
विस्मयं परमं जग्मुः स्तुतिभिश्चाप्यपूजयन् ॥
त्वं स्रष्टाता विधाता च लोकानां लोकभावन ॥
सप्तमादात् सप्तर्षेदं न गच्छेत् सामरं जगत् ॥
संपूज्यमानस्त्रिदशैर्महात्मा
गन्धर्व्वतूर्य्येषु नरस्तु सर्व्वैः ।
दीप्तैश्च पुष्पैरवकीर्य्यमाणो
महार्णवं निःसलिलं चकार ॥")

पीताम्बरः, पुं, (पीतं अम्बरं वस्त्रं यस्य ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, विष्णुस्तोत्रे । २१ ।

"एतत्पातित्यदाम्नो जघनमतिघनादित्यसो भाग्यैर्यं ।
सारस्वतेनैव वेगोविधृतमवतरत् पातु पीताम्बरस्य ॥")

श्लेष्मलः । इति मेदिनी । रे, २८१ ॥ पीतवस्त्रयुक्ते, त्रि । हरिद्राभवसने, क्ली ॥ (यथा,—

"पीताम्बरधरः स्रग्वी वनमालाविभूषितः ॥"

इति पुराणम् ॥)

पीताश्मा, [न्] पुं, (पीतः अश्मा ।) पुष्परागमणिः । इति राजनिर्घण्टः ॥ (विवृतिरस्य पुष्परागशब्दे ज्ञातव्या ॥)

पीतिः, पुं, (पिबतीति । पा + क्तिच् । "हुमाख्यागापेति ।" ६ । ३ । ६६ । इतीत्वम् ।) घोटकः । इत्यमरः । २ । ८ । ४६ ॥

पीतिः, स्त्री, (पा + भावे क्तिन् ।) पानम् । इति मेदिनी । ते, ३६ ॥ (पीयतेऽनयेति । करणे क्तिन्) सुरा । इति शब्दचन्द्रिका ॥

पीतिका, स्त्री, (पीतो वर्णोऽस्यस्या इति । उन् ।) हरिद्रा । इति रत्नमाला ॥ दारुहरिद्रा । इति राजनिर्घण्टः ॥ सर्ज्जवृक्षः । इति जटाधरः ॥

पीती, [न्] पुं, (पीतं पानं प्रायुर्य्येणास्यस्येति । इनि: ।) पीतिः । घोटकः । इत्यमरटीकायां रायमुकुटः ॥

पीतुः, पुं, (पिबति रसादीनिति । पा + "प्रः किच्च ।" उणा २ । ७१ । इति क्तुन् । स च कित् । किन्वात् ईत्वम् ।) सूर्य्यः । अग्निः । इत्युणादिकोषः । यूथपतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पीथं, क्ली, (पीयते इति । पा + "पातृतुदीति ।" उणा २ । ७ । इति थक् ।) जलम् । इति हेमचन्द्रः ॥ घृतम् । इत्युणादिकोषः ॥ (पिबति रसादीनिति । पा + कर्त्तरि थक् ।) सूर्य्यः । अग्निः । कालः । इति त्रिकाण्डशेषः ॥

पीथिः, पुं, (पीति + एषोदरादित्वात् तस्य थः ।) पीतिः । घोटकः । इत्यमरटीकायां स्वामी ॥

पीनः, त्रि, (ओ प्या यी ड इट्नौ + क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) स्थूलः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, आर्य्यासप्तशत्याम् । ५६१ ।

"वक्षःस्थलसुप्ते मम सुखसुपधातुं न मौलिमालभसे ।
पीनोत्तुङ्गस्तनभरदूरीभूतं रतश्रान्तौ ॥")

पीनसः, पुं, (पीनं स्थूलमपि जनं स्यति नाशयतीति । सो + कः ।) नासिकारोगविशेषः । पीनास इति भाषा । तत्पर्य्यायः । प्रतिश्यायः २ । इत्यमरः । २ । ६ । ५१ ॥ अपीनसः ३ प्रतिश्रायः ४ । इति भरतः ॥ नासिकामयः ५ । इति शब्दरत्नावली ॥ तस्य निदानं यथा,—

"आघ्रायते यस्य विमुच्यते च
प्रक्लिद्यते धूपयति चैव नासा ।
न वेत्ति यो गन्धरसांश्च जन्तु-
र्जुष्टं भवेत् खलु पीनसेन ॥
तच्चानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम् ॥"

इति माधवकरः ॥

आमपीनसलक्षणं यथा,—

"शिरोगुरुत्वमरुचिर्नासास्रावश्चदुस्तरः ।
घ्राणः क्षीयति चाभीक्ष्णमामपीनसलक्षणम् ॥"

पक्वपीनसलक्षणं यथा,—

"आमलिङ्गान्वितः श्लेष्मा घनः क्षेषु निमज्जति ।
खरवर्णविमुक्तिश्च पक्वपीनसलक्षणम् ॥"

तस्यौषधानि यथा,—

"सर्व्वेषु सर्व्वकालं पीनसरोगेषु जातमात्रेषु ।
मरिचं गुडेन दत्त्वा भक्षयेत् नरः सुखं लभते ॥१

कट्फलं पौष्करं शृङ्गी व्योषं यासश्च कारवी।
एषां चूर्णं कषायं वा दद्यादार्द्रकजै रसैः॥
पीनसे स्वरभेदे च तमकश्वासहृद्ग्रहे।
सन्निपाते कफे वाते कासे श्वासे च सुस्तरे॥२॥
व्योषचित्रकतालीशतिन्तिडीकाम्लवेतसम्।
सचव्याजाजितुल्यांशमेलात्वक्पत्रपादिकम्॥
व्योषादिकमिदं चूर्णं पुराणगुडपिण्डितम्।
पीनसश्वासकासघ्नं रुचिस्वरकरं परम्॥” ३॥
इति भावप्रकाशः॥*॥
“पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगज्वरश्वासशोषपीनसनुद्भवेत्॥”
इति गारुडे १८९ अध्यायः॥
(अस्य चिकित्सान्तरं यथा,—
“वातात् सकासवैस्वर्य्ये सक्षारं पीनसे घृतम्।
पिबेद्रसं पयश्चोष्णं स्नैहिकं धूममेव वा॥”
“दशमूलस्य निर्व्यूहे रास्नामधुककल्कवत्।
सिद्धं सलवणं तैलं दशमूलो गुणाः स्मृतम्।
स्निग्धस्याश्वापनैर्दोषं निर्हरेद्वातपीनसे॥
स्निग्धाम्लोष्णैश्च लघ्वन्नं धान्यादीनां रसैर्हितम्।
उष्णाम्बुना स्नानपानं निवातोष्णप्रतिश्रयः।
चिन्ताव्यायामवाक्चेष्टाव्यवायविरतो भवेत्।
पैत्ते सर्पिः पिबेत् सिद्धं शृङ्गवेरशृतव्ययः॥
पाचनार्थं पिबेत् पक्के कार्य्यमूर्द्धविरेचनम्।
पाठादिरजनीमूर्व्वापिप्पलीजातिपल्लवैः॥
दन्त्या च साधितं तैलं नस्यं सम्यक्कपीनसे।
पूयास्रे रक्तपित्तघ्नाः कषायो नवनानि च॥
पाकदाहाद्यरुचेषु शीता लेपाः ससेचनाः।
प्रेयनस्योपचारश्च कषायस्वादुतिक्तकाः॥”
“गौरवारोचकेष्वादौ लङ्घनं कफपीनसे।
स्वेदाः सेकाश्च पाकार्थं स्निग्धे शिरसि सर्पिषा॥
लशुनं मुद्गयूषेण व्योषक्षारसमायुतम्।
देयं कफघ्नं वमनमुत्क्लिष्टश्लेष्मणे हितम्॥
अपीनसे पूतिनस्ये घ्राणस्रावश्रुकके।
धूमः प्रशस्तोऽवपीडश्च कटुभिः कफपीनसे॥
मनःशिला वचा व्योषं विडङ्गं हिङ्गु गुग्गुलुः।
चूर्णो ज्ञेयः प्रधमनः कटुभिश्च फलैस्तथा॥”
“स्निग्धस्य वाहते वेगे छर्दनं कफपीनसे।
वमनीयशृतक्षीरतिलमाषयवागुभिः॥”
“सर्व्वजित् पीनसे दुष्टे कार्य्यं शोथे च शोथजित्।
घ्राणोऽर्व्वुदाधिमांसेषु क्रिया सर्व्वत्रैव च॥”
इति चरके चिकित्सास्थाने २६ अध्याये॥
“सर्व्व एव प्रतिश्याया नरस्याप्रतिकारिणः।
कालेन रोगजनना जायन्ते दुष्टपीनसाः॥
बाधिर्य्यमान्ध्यमघ्रत्वं घोरांश्च नयनामयान्।
कासाग्निसादशोथांश्च दृष्टाः कुर्व्वन्ति पीनसाः॥”
इत्युत्तरतन्त्रे चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम्॥)

पीनसा, स्त्री, (पीनं स्यतीति। सो+कः। टाप्।) कर्कटी। इति राजनिर्घण्टः॥ (कर्कटीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

पीनसी, [न्] त्रि, पीनसरोगी। पीनसशब्दादस्त्यर्थे इन्प्रत्ययनिष्पन्नः॥ (यथा, सुश्रुते उत्तरतन्त्रे २४ अध्याये।
“विलङ्घनैः पाचनदीपनीयै-
रुपाचरेत् पीनसिनं यथावत्।
बहुद्रवं शीतकफोपपन्नं
प्रच्छर्दयेत् पीनसिनं वयःस्थम्॥”)

पीनोध्नी, स्त्री, (पीनं स्थूलमूधोऽस्याः। “बहुब्रीहेरूधसो ङीष्।” ४।१।२५। इति ङीष्। “ऊधसोऽनङ्।” ५।४।१३१। इति ऊधोऽन्तस्य बहुव्रीहेरनङादेशः।) पीवरस्तनी गौः। इत्यमरः। २।९।७१॥

पीपरिः, पुं, (अपि पिपर्त्तीति। पॄ+इन्। अपेरल्लोपः। दीर्घश्च।) प्लक्षवृक्षः। इति राजनिर्घण्टः॥

पीय, प्रीणने। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) पीयूषं सौत्रधातुरयम्। इति दुर्गादासः॥

पीयुः, पुं, (पिबतीति। पा+“खरशङ्कुपीयुनीलङ्गुलिगु।” उणां। १।३७। इति कुः। निपातनात् युगागम ईत्वं चान्तादेशः।) काकः। रविः। घूकः। इति मेदिनी। ये, ३७॥ कालः। इति संक्षिप्तसारोणादिवृत्तिः॥ (हिंसके प्रतिकूले च त्रि। यथा, ऋग्वेदे। १।१७४।८।
“भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य
पीयोः॥”
“पीयोः प्रतिकूलस्य हन्तुः।” इति तद्भाष्ये सायनः॥)

पीयूषं, क्ली, (पीयति इति। पीय सौत्रधातुः+“पीयेरूषन्।” उणां। ४।७६। इति ऊषन्।) अमृतम्। इत्यमरः। १।१।५१॥ (यथा, काशीखण्डे। ९६।४६।
“भवसन्तापशमनी खनिः पीयूषपायसाम्॥”)
दुग्धम्। इति राजनिर्घण्टः॥ (यथा,—
“पाचीयं श्रमनाशनं भ्रमहरं मूर्च्छापिपासापहं
तन्द्राच्छर्दिविबन्धदाहशमनं निद्राहरं तर्पणम्।
हृद्यं शुक्रदमोजसां श्रमकरं नित्यं हितं शीतलं
कामर्द्धं रसकारकञ्च निगदे पीयूषवल्ली-
चितम्॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

पीयूषः, पुं, क्ली, (पीय+ऊषन्।) अभिनवं पयः। नवप्रसूताया गोः सप्तदिनाभ्यन्तरीयदुग्धम्। इत्यमरभरतौ॥
“अथ पीयूषपेयूषे नवं सप्तदिनावधि।”
इति शब्दार्णवः॥
“आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते॥”
इति हारावली॥

पीयूषमहाः, [स्] पुं, (पीयूषमृततमयं महः किरणं यस्य। यद्वा, पीयूषमिव महो यस्य।) चन्द्रः। इति शब्दरत्नावली॥

पीयूषरुचिः, पुं, (पीयूषं पीयूषमयी रुचिः किरणं यस्य।) चन्द्रः। इति हलायुधः॥ (पीयूषे अस्यते रुचिर्यस्य।) अमृतप्रियश्च॥

पील, रोधे। इति कविकल्पद्रुमः॥ (भ्वा-परं-सकं-सेट्।) दीर्घी। रोधः क्रियानिरोधः जडीभाव इत्यर्थः। पीलति पशुः। इति दुर्गादासः॥

पीलकः, पुं, (पीलति स्तभ्नातीति। पील+ण्वुल्।) पिपीलिका। इति हेमचन्द्रः॥ (कायस्थानां पद्धतिकरविशेषः। यथा, पञ्चकुलाचार्य्यकारिकायाम्।
“आदित्या विष्णुगुप्ताश्च शिवाश्च पीलकास्तथा॥”)

पीलुः, पुं, (पीलति प्रतिष्टभ्नातीति। पील+“मृगय्वादयश्च।” उणां। १।३७। इति कुः।) प्रसूनम्। परमाणुः। मतङ्गजः। अस्थिखण्डम्। तालकाण्डः। इति मेदिनी। ले, १२॥ बाणः। इति वररुचिः॥ कोङ्कणादिदेशे प्रसिद्धः फलवृक्षविशेषः। पीलु इति भाषा। तत्पर्य्यायः। गुडफलः २ संसी ३। इत्यमरः। २।४।२८॥ शीतसहः ४ धानी ५ विरेचनः ६ फलशाखी ७ श्यामः ८ करभवल्लभः ९॥ (यथा, महाभारते। ८।५०।४।
“उद्वामीच्छिन्नतश्च गुडाः पीलुशमीकुदैः॥”)
अस्य फलगुणाः। श्लेष्मवायुगुल्मनाशित्वम्। पित्तदत्वम्। भेदकत्वम्। यत् स्वादु तिक्तं तत् नात्युष्णं त्रिदोषहरत्वञ्च। इति राजनिर्घण्टः॥

पीलुनी, स्त्री, (पील+बाहुलकात् उन। गौरादित्वात् ङीष्।) मूर्व्वा। इति रत्नमाला॥

पीलुपत्रः, पुं, (पीलुयुक्तं पत्रमस्य।) मोरटालता। इति राजनिर्घण्टः॥

पीलुपर्णी, स्त्री, (पीलोरिव पर्णान्यस्याः। यद्वा, पीलुयुक्तानि पर्णान्यस्याः। “पाककर्णपर्णपुष्पफलमूलबालोत्तरपदाच्च।” ४।१।६४। इति ङीष्।) मूर्व्वा। बिम्बिका। ओषधिभेदः। इति मेदिनी। णी, १०३॥

पीव, स्थौल्ये। इति कविकल्पद्रुमः॥ (भ्वा-परं-अकं-सेट्।) पीवति लोकः स्थूलः स्यादित्यर्थः। इति दुर्गादासः॥

पीवन्, [न्] त्रि, (प्यायते इति। प्यैङ् वृद्धौ+“प्याय्योः सम्प्रसारणञ्च।” उणां। ४।११४। इति कनिप् सम्प्रसारणञ्च। “हलः।” ६।४।२। इति दीर्घः।) स्थूलम्। इत्यमरः। ३।१।६१॥ (यथा, भागवते। ९।१९।६।
“पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदम्।
स एकोऽजवरस्तासां बह्वीनां रतिवर्द्धनः॥”)

पीवरः, त्रि, (प्यायते वर्द्धते इति। प्यैङ्+“छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः।” उणां। ३।१। ष्वरच्। सम्प्रसारणं दीर्घश्च।) उपचितावयवः। मोटा इति भाषा। तत्पर्य्यायः। पीनः २ पीवा ३ स्थूलः ४। इत्यमरः। ३।१।६१॥ (यथा, आर्य्यासप्तशत्याम्। ३९०।
“अपरिहितं बालानां पीवरकुच[illegible]।
निभायां प्रेमार्द्रः पश्यसि निःश्वस्य निःश्वस्य॥”)
पुं, तामसमन्वन्तरीयसप्तर्षिभेदः। यथा, मार्कण्डेये। ७४।५९।

पुंश्चलः

"ज्योतिर्ग्रामा पृथुः काव्यश्चेतोऽभिर्वलकक्षया।
पीवरश्च तथा ब्रह्मन्! सप्त सप्तर्षयोऽभवन्॥")

पीवरस्तनी, स्त्री, (पीवरौ स्थूलौ स्तनौ यस्याः। "स्वाङ्गोपसर्जनादिति।" ४।१।५४। इति ङीष्।) पीनोन्नी। इत्यमरः।२।६।७१॥ स्थूलस्तनयुक्ता नारी॥ (यथा, भारवौ। ८।१६।

"अपोहितुं लोचनतो सुखानिले-
रपारयन्तं किल पुष्पजं रजः।
पयोधरेणोरसि काचिदुन्मना:
प्रियङ्गुघानोन्नतपीवरस्तनी॥")

पीषा, [न्] पुं, (प्यायते इति। पै ड इट्च्+"प्याय्योः सम्प्रसारणम्।" उणा० ४।१४। इति क्विप् सम्प्रसारणञ्च। "इलः।" ६।४।२। इति दीर्घः।) बलवान्। वायुः। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवा, स्त्री, (पीयते इति। पी ड य पाने+वाहुलकात् वः। ततष्टाप्।) उदकम्। इति संक्षिप्तसारोणादिवृत्तिः॥

पीवरा, स्त्री, (पीवर+टाप्।) अश्वगन्धा। घृतावरी। इति राजनिर्घण्टः॥ स्थूला च॥

पीवरी, स्त्री, (प्यायते इति। पै+वरच्। सम्प्रसारणं दीर्घः ङीप् च।) घृतम्। इति रत्नमाला॥ घृतपर्णी। इति भावप्रकाशे।१।२॥ तरुणी। गौः। इति संक्षिप्तसारोणादिवृत्तिः॥ (बर्हिषदनामकपितॄणां मानसीकन्यानामन्यतमा। सा तु शुकदेवस्य पत्नी। यथा, हरिवंशे।१८। ४६—५२।

"एतेषां मानसी कन्या पितरी नाम विश्रुता।
योगा च योगिपत्नी च योगिमाता तथैव च॥
भविष्यन्ती द्वापरं प्राप्य युगं धर्म्मभृतां वरा।
पराशरकुलोद्भूतं सुकं नाम महातपाः॥
भविष्यति युगे तस्मिन् महायोगी द्विजर्षभः।
आसादरण्यां सम्भूतो विधूमाग्निरिवोज्ज्वलन्॥
स तस्यां पितृकन्यायां पीवर्य्यां जनयिष्यति।
कन्यां गौरं प्रभुं शम्भुं कन्यौ कन्यां तथैव च॥")

पुंलिङ्गं, क्ली, (पुंसो लिङ्गं चिह्नम्।) पुंचिह्नम्। शिश्नः। (यथा, महाभारते। ५। १६४। ३।

"किञ्चित् कालान्तरं दास्ये पुंलिङ्गं स्वमिदं तव।
आगन्तव्यं त्वया काले सत्यमेव वदस्व मे॥")

शब्दवाचकतायाम्, पुं। इति भूमरः॥ (पुंसो लिङ्गमस्येति। पुंलिङ्गविशिष्टे, त्रि। यथा, महाभारते। ६। ५८। ५७।

"पुंलिङ्गा इव नार्य्यस्तु स्त्रीलिङ्गाः पुरुषाभवन्।
दुर्य्योधने तदा राजन्! पतिते तनये तव॥")

पुंड्रः, पुं, (पुमानिव वर्त्तते इति। वृत+कः।) गन्धमूषिकः। इति शब्दमाला॥ छुँचा इति भाषा॥ (पुमान् गौः।) पुंगवश्च॥

पुंश्चलः, पुं, (पुंश्चली+अण्। उपचारात् पुंस्त्वम्।) व्यभिचारी। यथा, गारुडे ६६ अध्याये।

"ललाटोपहतास्तिस्रो रेखाः स्युः प्रेतवर्षिणाम्।
नृपत्वं स्वाचलस्थैरायुः पञ्चभिरब्दैश्च॥
अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः॥"

पुंश्चली

पुंश्चली, स्त्री, (पुंसो भर्तुः सकाशात् चलति पुरुषान्तरं गच्छतीति। चल+अच्। गौरादित्वात् ङीष्।) असती। इत्यमरः।२।६।१०॥ अस्या अमरोक्तपर्य्यायाः कुलटाशब्दे लिखिताः। तद्व्यतिरिक्तपर्य्यायो यथा, धृष्टा १ दुष्टा २ धर्षिता ३। इति शब्दरत्नावली॥ लक्षा ४ निशाचरी ५ अपारक्षा ६। इति शब्दधरः॥ तस्याश्चरित्रदोषादि यथा,—

"अहो! को वेद भुवने दुर्ज्ञेयं पुंश्चलीमनः।
पुंश्चल्यां यो हि विश्वस्तो विधिना स विडम्बितः।
बहिष्कृतश्च यशसा धर्म्मेण स्वकुलेन च॥
वाञ्छितं नूनं प्राप्य विनश्यति पुरातनम्।
सदा स्वकर्म्मसाध्या सा को वा तस्याः प्रियोऽप्रियः॥
देवे कर्म्मणि पित्र्ये च पुत्रे बन्धौ च भर्त्तरि।
दारुणं पुंश्चलीचित्तं सदा प्रह्लारकर्म्मणि॥
प्राणाधिकं रतिञ्चास्यास्तदृष्ट्या हि पुंश्चली।
रत्नपूर्णं रत्नविक्रं विपद्दृष्ट्या हि पश्यति॥
सर्व्वेषां स्थलमस्त्येव पुंश्चलीनां न कुत्रचित्।
दारुणा पुंश्चलीजातिर्भरजातिभ्य एव च॥
निष्कृतिः कर्म्मभोगान्ते सर्व्वेषामस्ति निश्चितम्।
न पुंश्चलीनां विप्रेन्द्र! यावच्चन्द्रदिवाकरौ॥
अन्यासां कामिनीनाञ्च कीटं हन्तुञ्च या दया।
सा नास्ति पुंश्चलीनान्तु कान्तं हन्तुं पुरातनम्॥
रतिञ्च नूनं प्राप्य विषतुल्यं पुरातनम्।
कान्तं दृष्ट्वा द्विजस्त्रेव सोपायेनावलोकया॥*॥
पृथिव्यां यानि पापानि पुंश्चलीष्वेव भारते।
निष्कृतिः ताभ्यो न परा; पापिष्ठाः सन्ति कैचन॥
पुंश्चलीपरिपक्वान्नं सर्व्वपातकमिश्रितम्।
देवे कर्म्मणि पित्र्ये च देयं न च तथा जलम्॥
अन्नं विष्ठा पयो मूत्रं पुंश्चलीनाञ्च निश्चितम्।
दत्त्वा पितृभ्यो देवेभ्यो भुक्त्वा च नरकं व्रजेत्॥
घृतवर्षं कालरात्रे पक्वमेव सुदारुणे।
घोरान्धकारे ज्वलयन्तं दहन्ति दिवानिशम्॥
पुंश्चल्यास्तु यो भुङ्क्ते देवाद्यदि नराधमः।
सप्तजन्मकृतं पुण्यं तस्य नश्यति निश्चितम्॥
आयुःश्रीयशसां हानिरिह लोके परत्र च।
तस्मादयत्नाद्वर्জ्जनीयं पाकपात्रं कलत्रकम्॥
पुंश्चलीदर्शने पुण्यं यात्रासिद्धिर्भवेद्ध्रुवम्।
स्पर्शने च महापापं तीर्थस्नानादिशुध्यति॥
स्नानं दानं व्रतञ्चैव जपश्च देवपूजनम्।
निष्फलं पुंश्चलीनाञ्च भारते जीवनं वृथा॥"

उपस्थितसकामपुंश्चलीत्यागे दोषो यथा,—

"रहस्युपस्थितां कामात् पुंश्चलीञ्चेत्यजेत्तु यः।
परित्यजेन्नर्म्मभयाद्धर्म्मान्नरकं व्रजेत्॥"

सर्व्वदैव तस्यास्त्याज्यत्वं गर्हितत्वञ्च यथा,

"उपस्थिता च या योषिदत्याज्या रागिणामपि।
श्रुतौ श्रुतमिति त्याज्या सर्व्वदैव तपस्विनाम्॥
अहो सर्व्वैः परित्याज्या पुंश्चली च विशेषतः।
धनायुःप्राणयशसां नाशिनी दुःखदायिनी॥
स्वकार्य्यतत्परा मूढा परकार्य्यविघातिनी।
निष्ठुरा नरघातिन्यः सर्व्वापद्दीजरूपिणी॥

पुंसव

विद्युद्दीप्तिर्जले रेखा लोभाम्भोधौ यथा भवेत्।
परदोहाद्यथा सम्यक् कुलटाप्रेमतत्परम्॥
सर्व्वेभ्यो हिंसनशुभ्यो विपद्दीजा सदैव सा।
यो विश्वसेत्तां संमूढो विपत्तस्य पदे पदे॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे। २३। २४। ३२ अध्यायाः॥

पुंचिह्नं, क्ली, (पुंसः पुरुषस्य चिह्नम्।) शिश्नः। इति हेमचन्द्रः।३।२७४।

पुंस, क मर्द्दे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) ओष्ठ्यवर्णोपधः। संयोगादनुस्वारः। तेन क्विपि पुंसोऽसुक्त्वाविल्पक्षे पुमान्। मर्द्दोऽभिमर्द्दनम्। क, पुंसयति खलं राजा। इति दुर्गादासः॥

पुंसवनं, क्ली, (पुमांसमिव सूते बलप्रदानेन पुरुषवत् जनयत्यनेनेति। सू+करणे ल्युट्।) दुग्धम्। इति हेमचन्द्रः।३।४०४॥ (पुमांसं सूतेऽनेनेति। सू+ड+करणे ल्युट्।) संस्कारविशेषः। इति विवाहतत्त्वम्॥ (यथा, रघुवंशे।३।१०।

"यथाक्रमं पुंसवनादिकाः क्रियाः
धृतेश्च धीरः सहधर्म्मचारिणा सः॥")

अस्यैतिकर्त्तव्यता यथा। "गर्भस्य तृतीयमासोपक्रमे यच्छुद्धदिनं तस्मिन् पतिः स्नातनित्यक्रियः कृतदृद्धिश्राद्धः चन्द्रनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य कृतस्नानां वधूमग्नेः पश्चिमायां दिशि स्वदक्षिणतः कृशेषु प्राङ्मुखीमुपवेश्य प्रस्तावकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमयौ कृत्वा महाव्याहृतिहोमं कुर्य्यात्। यथा। प्रजापतिर्ऋषिर्गायत्री छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिर्ऋषिरुष्णिक् छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिर्ऋषिरनुष्टुप् छन्दः सूर्य्यो देवता महाव्याहृतिहोमे विनियोगः। ॐ स्वः स्वाहा। ततः पतिर्नत्याय वधूदक्षिणे स्थितो वधूदक्षिणस्कन्धं सृष्ट्वा अवतीर्य्येन दक्षिणहस्तेन अवधृतं वधूनाभिदेशं स्पृशन् जपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दो मित्रावरुणाग्निवायवो देवताः पुंसवने विनियोगः।

ॐ पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे॥

इत्येकं पुंसवनम्॥*॥

अपरपुंसवनकर्म्मार्थञ्च वटवृक्षस्य पूर्व्वोत्तरशाखायां फलयुगलशालिनौ क्षमिभिरनुपहतौ वटशुङ्गौ यवानां माषाणां वा त्रिभिस्त्रिभिर्गोड्कैः सप्त वारान् सप्तभिर्मन्त्रैः क्षीणीयात्। स्नानां मन्त्राद्याश्चाद्याः साधारणाः। प्रजापतिर्ऋषिः सोमवरुणाश्विसूर्य्यादित्यमरुद्विश्वेदेवा देवता न्यग्रोधशुङ्गापरिक्रयणे विनियोगः। ॐ वटसि सौमी सोमायत्वा राज्ञे परिक्रीणामि। इति शुङ्गक्रयणम् एकं क्रयणम्॥१॥

ॐ यद्यसि वारुणी वरुणायत्वा राज्ञे परिक्रीणामि। इति गुडकत्रयेण द्वितीयं क्रयणम् ॥ २ ॥ ॐ यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण तृतीयं क्रयणम् ॥ ३ ॥ ॐ यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण चतुर्थं क्रयणम् ॥४॥ ॐ यद्यसि आदित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण पञ्चमं क्रयणम् ॥५॥ ॐ यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण षष्ठं क्रयणम् ॥६॥ ॐ यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यस्त्वा परिक्रीणामि। इति गुडकत्रयेण सप्तमं क्रयणम् ॥ ७ ॥ ततः क्रीतां वटशुङ्गां अनेन मन्त्रेण दक्षादाहरेत्। प्रजापतिर्ऋषिरोषधयो देवता व्यंधशुङ्गाच्छेदने विनियोगः। ॐ ओषधयः समनसो भूत्वा अस्यां वीर्यं समाधत्त इयं कर्म्म करिष्यति। ततस्तां लक्षणवेदितामन्तरौदीच्यामग्नेय्यन्तरौद्धे स्थापयेत्। ततः स्नातशोभननान्नोऽमेकवस्त्रः प्रक्षालितपाणिपादायां अक्षतधारी गर्भवती वा सुतस्नाध्यायहीनो वा ब्राह्मणः प्राङ्मुख आचारतो नीहारजलेन अनाकृत्तलोहेन पुनः पुनः पेषयेत्। ततोऽग्नेः पश्चिमत उत्तरायेषु कुशेषु पश्चिमाभिमुखीं वधूं पूर्व्वदिगासनमस्तकां कृत्वा तत्पृष्ठदेशे स्थितः पतिर्दक्षिणपाणेरङ्गुष्ठानामिकाभ्यां वस्त्रवद्धौ पेषितवटशुङ्गां गृहीत्वा गर्भवत्या दक्षिणनासाविवरे शुङ्गारसं निःक्षिपति। प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽमोऽदक्षतयो देवता व्यंधशुङ्गारसस्य दाने विनियोगः।

ॐ पुमानग्निः पुमानिन्द्रः पुमान् देवो बृहस्पतिः। पुमांसं पुत्रं विन्दस्व तं पुमाननुजायताम् ॥

ततो महाव्याहृतिहोमं कृत्वा तूष्णीं प्रादेशप्रमाणां घृताक्तां समिधमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं ग्राह्यायनहोमादिवामदेव्यगानान्तं कर्म्म कृत्वा कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यादिति पुंसवनम्।" इति दशकर्म्मपद्धतौ भवदेवभट्टः ॥*॥ अथ पुंसवनोक्तवाराः। रविमङ्गलबृहस्पतयः। नक्षत्राणि। पूर्व्वाषाढोत्तराषाढापूर्व्वभाद्रपदोत्तरभाद्रपदपुष्यपुनर्व्वसुमूलाश्विरेवतीहस्तश्रवणाश्वयुग्नयः। तिथयः। नन्दा भद्राः। लग्नानि। कुम्भसिंहधनुर्मीनमिथुनानि। स्त्रियाश्चन्द्रादिशुद्धौ दम्पत्योर्गर्भधारणादिनावधिसप्तमीयमासे कर्त्तव्यम्। इति ज्योतिषम् ॥ * ॥ स्त्रीकर्त्तव्यव्रतविशेषः। यथा,—

श्रीराजोवाच।

"व्रतं पुंसवनं ब्रह्मन्! भवता यदुदीरितम्।
तस्य वेदितुमिच्छामि येन विष्णुः प्रसीदति ॥

श्रीशुक उवाच।

शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया।
आरभेत व्रतमिदं सर्व्वकामिकमादितः ॥
निगृह्य मनसा वाचं ब्राह्मणाननुमन्त्र्य च।
स्नात्वा शुक्लाम्बरधरा शुक्ले वसीतालङ्कृताम्बरे।
पूजयेत् प्रातराशात् प्राक् भगवन्तं श्रिया सह ॥
अलं ते निरपेक्षाय पूर्णकाम! नमोऽस्तु ते।
महाविभूतिपतये नमः सकलसिद्धये ॥
यथा त्वं तपसा धृत्या तेजसा महिमौजसा।
जुष्टं दृग्गुणैः सर्व्वैस्ततोऽसि भगवान् प्रभुः ॥
विष्णुपत्नि! महाभाये महापुरुषलक्षणे।
प्रीयेथा मे महाभागे लोकमातर्नमोऽस्तु ते ॥
ॐ नमो भगवते महापुरुषाय महानुभावाय महाविभूतिपतये सह महाविभूतिभिर्म्बलिमुपहरामीति। अनेनाहरहर्म्मन्त्रेण विष्णोरावाहनार्घ्यपाद्योपस्पर्शन-स्नान-वासोपवीत-भूषणगन्धपुष्पधूपदीपोपहारादुपचारान् सुसमाहितोपाहरेत्।

ऋविःयेषश्च जुहुयादग्नौ द्वादशाहुतीः।
ॐ नमो भगवते महापुरुषाय महाविभूतिपतये स्वाहेति।

श्रियं विष्णुञ्च वरदावाधिपां प्रभवायुभौ।
भक्त्या संपूजयेन्नित्यं यदीच्छेत् सर्व्वसम्पदः ॥
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वेण चेतसा।
दृग्वारं जपेन्मन्त्रं ततः स्तोत्रमुदीरयेत् ॥
युवाभ्यां विश्वस्य विभू जगतः कारणं परम्।
इयं हि प्रकृतिः सूक्ष्मा मायाशक्तिर्दुरत्यया।
तस्या अधीश्वरः साक्षात् त्वमेव पुरुषः परः ॥
त्वं सर्व्वयज्ञ इज्येयं क्रियेयं फलभुग्भवान्।
गुणशक्तिरियं देवी यत्र्कोऽ गुणभुग्भवान् ॥
त्वं हि सर्व्वगुरोरात्मा श्रीः शरीरेन्द्रियासवः।
नामरूपे भगवती प्रत्ययस्यमपाश्रयः ॥
यथा युवां त्रिलोकस्य वरदौ परमेष्ठिनौ।
तथा म उत्तमश्लोक! सन्तु सत्या महाशिषः ॥
इत्यभिष्टूय वरदं श्रीनिवासं श्रिया सह।
तन्निसाद्योपहरणं दत्त्वाचमनमर्चयेत् ॥
ततः स्तुवीत स्तोत्रेण भक्तिप्रह्वेण चेतसा।
यज्ञोच्छिष्टमवघ्राय पुनरभ्यर्चयेद्धरिम् ॥
पतिञ्च परया भक्त्या महापुरुषचेतसा।
प्रियैस्तैस्तैरुपनमेत् प्रेमगद्गदया गिरा स्वयं पतिः ॥
विभृयात् सर्व्वकर्म्माणि पत्न्या उच्चावचानि च।
क्षणमेकन्तरेणापि इत्यर्थोरुभयोरपि ॥
पत्नी कुर्य्यादनर्हाणि पतिरेतत् समाहितः।
विष्णोर्नैवेद्यनिर्म्माल्यं बिभृयात् कथञ्चन ॥
विप्रान् स्त्रियो वीरवतीः सुमङ्गलबलिमर्हणैः।
अर्च्चेदहरहर्भक्त्या देवं नियममास्थिता ॥
उदास्य देवं स्वे धाम्नि तन्निवेदितमग्नयतः।
अद्यादात्मविशुद्ध्यर्थं सर्व्वकामसमृद्धये ॥
एतेन पूजाविधिना मासान् द्वादशहायनम्।
शीलार्थोपरमेत् साध्वी कार्त्तिके चरमेऽहनि ॥
स्नोभूतोऽप उपस्पृश्य स्नानमभ्यर्च्य पूर्व्ववत्।
पयःसूनेन हविषाचरुणा सह सर्पिषा।
पाकयज्ञविधानेन द्वादशैवाहुतीर्यजेत् ॥
आग्नेयः शिरसादाय द्विजैः प्रीतैः समीरिताः।
प्रणम्य शिरसा भक्त्या भुञ्जीत तदनुज्ञया ॥
आचार्य्यमग्रतः कृत्वा वाग्यतः सह बन्धुभिः।
दद्यात् पत्न्यै चरोः शेषं सुप्रजस्त्वं सुसौभगम् ॥
एतच्चरित्वा विधिवद्व्रतं विभोरभीप्सितार्थं लभते पुमानिह।
स्त्री चैतदास्थाय लभेत सौभगं
श्रियं प्रजां जीवपतिं यशो यशम् ॥
कन्या च विन्देत समग्रलक्षणं
पतिं त्ववीरा हतकिल्बिषाकृतिम्।
वृतप्रजा जीवसुता धनेश्वरी
सुदुर्भगा सुभगा रूपमग्र्यम् ॥
विन्देद्विरूपा विरुजा विमुच्यते
य आमयावीन्द्रियकल्यदेहम्।
एतत् पठन्नभ्युदये च कर्म्म-
ण्यनन्यधीरग्निः पितृदेवतानाम् ॥
तुष्टाः प्रयच्छन्ति समस्तकामान्
होमावसाने हुतभुक् श्रीर्हरिश्च।
राजन्महन्मरुतां जन्मपुण्यं
दितेर्व्रतञ्चाभिहितं मघत्ते ॥"

इति श्रीभागवते ६ स्कन्धे पुंसवनव्रतकथनं १९ अध्यायः ॥ (पुंवत् क्रियते इति। कर्म्मणि क्युट्। गर्भः। इति श्रीधरस्वामी ॥ यथा, भागवते। ५। २७। १५। "यस्मिन् प्रविष्टेऽसुरवध्वनां प्रायः पुंसवनानि भयादेव क्षरन्ति पतन्ति च ॥"*॥ पुत्रोत्पादके, त्रि। यथा, भागवते। ६।६।२८। "पप्रच्छुः कस्य कर्म्मेदं पौंसं पुंसवनं जलम् ॥" तथा च तत्रैव। ४। १२। ३७—३८। "स विप्रानुमतो राजा गृहीत्वाञ्जलिनौदनम्। अवघ्राय सुदा युक्तः प्रादात् पत्न्या उदारधीः ॥ सा तत् पुंसवनं राज्ञी प्राश्य वै पत्युरादधे। गर्भं काल उपावृत्ते कुमारं सुषुवे प्रजाः ॥")

पुंस्कोकिलः, पुं, (पुमान् कोकिलः।) पुरुषपिकपक्षी। पुमांसौ शब्देन कोकिलशब्दस्य कर्म्मधारय समासे तस्यान्तलोपे पुंस; तन्निति मस्य सनि हते मस्यानुस्वारे निष्पन्नः। इति मुग्धबोध व्याकरणम् ॥ (यथा, कुमारे। ३। ३२।

"चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ॥")

पुंस्त्वं, क्ली, (पुंसः पुरुषस्य भावः। पुमंस्+त्व।) शुक्रम्। इति हेमचन्द्रः। ३। २६३ ॥ पुरुषत्वञ्च ॥ (यथा, मार्कण्डेये। ५०। १२।

"सौम्यासौम्येक्षया प्राप्तेः पुंस्त्वं स्त्रीत्वञ्च स
प्रभुः।
विभेद बहुधा देवः पुरुषैरसितैः सितैः ॥")

पुंस्त्वविघ्नः, पुं, (पुंस्त्वस्य शुक्रस्येव विघ्नो यस्य। भूलशम्। इति राजनिर्घण्टः ॥

पुक्कशः, पुं, (पुक् कुत्सितं कशति गच्छतीति कश गतौ + अच्।) चण्डालः। इत्यमरः। २। १०। २०। ॥ (यथा, मार्कण्डेये। १५। १८।

"अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः।
मनुष्यत्वे वायसः कृमिः पुक्कशो जायते ततः ॥"

स तु निषादात् शूद्रायां जातो जातिविशेषः। यथा, मनुः। ४। ७६।

"न संवसेच्च पतितैर्नचाण्डालैर्न पुक्कशैः ॥")

पुक्कसः, पुं, (पुक् कुत्सितं कषतीति। कष गतौ + अच्।) चण्डालः। इत्यमरटीकायां भरतः॥

पुक्कसः, पुं, (पुक् कुत्सितं कषतीति। कष गतौ + अच्।) चण्डालः। (स तु निषादात् शूद्रायां जातः। यथा, मनुः। १०। १८।

"जातो निषादात् शूद्रायां आत्मा भवति पुक्कसः॥")

अधमे, त्रि। इति मेदिनीशब्दरत्नावल्यौ॥

पुक्कसी, स्त्री, कालिका। नीली। इति मेदिनीशब्दरत्नावल्यौ॥ (पुक्कस + जातौ ङीष्। पुक्कसस्त्रीजातिः। यथा, मनुः। १०। १८।

"चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥")

पुक्कः, पुं, (पुमांसं खनतीति। खन + ड; ।) काष्ठमूलम्। इत्यमरः। ३। ५। १७॥ पुक्कस इति ख्यातम्॥ (अर्हर्चादित्वात् क्लीवलिङ्गोऽपि॥ यथा, रघुः। २। ३१।

"सक्ताङ्गुलिः सायकपुङ्ख एव
चित्रार्पितारम्भ इवावतस्थे॥"

मल्लिनाथः। इति हेमचन्द्रटीका॥)

पुङ्गः, पुं, क्लीं, (पुङ्ग + पृषोदरादित्वात् साधुः।) समूहः। इति शब्दचन्द्रिका॥

पुङ्गलः, पुं, (पुङ्गं देहसमूहं लाति आदत्ते इति। पुङ्ग + ला + कः।) आत्मा। इति भूरिप्रयोगः॥

पुङ्गवः, पुं, (पुमान् गौः। "गोरतद्धितलुकि।" ५। ४। ९२। इति टच्।) वृषः। (यथा, हरिवंशे। ७५। ४१।

"भवता रक्षिता लोका गोलोकश्च महालयम्।
वहयं पुङ्गवैः सार्द्धं वत्सैः प्रस्रवणैस्तथा॥")

औषधभेदः। (पुमान् गौरिव मदबलाद्यतिशय्यादित्वमभिसमासः।) उत्तरपदस्थः श्रेष्ठवाचकः। इति मेदिनी। वे, ४४॥ (यथा, भागवते। १। ६। ३२।

"इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि॥")

अथौषधम्। महौषधः। इति राजनिर्घण्टः॥

पुच्छ, प्रसादे। इत्यमरटीकायां रायमुकुटधृतधातुः॥ (भ्वां-परं-अकं-सेट्॥)

पुच्छः, पुं, क्लीं, (पुच्छतीति। पुच्छ प्रसादे + अच्।) लाङ्गूलम्। इत्यमरः। २। ८। ५०॥ (यथा, देवीभागवते। ५। ७। १६।

"खुरघातैस्तथा दैत्यान् पुच्छस्य भ्रमणेन च।
स जघान बधाविष्टो महिषः परमाद्भुतः॥")

पश्चाद्भागे, पुं। इति मेदिनी। छे, ५॥ (यथा महाभारते। ७। ६। २८।

"उल्का ज्वलन्ती संग्रामे पुच्छेनास्य सर्व्वतः॥")

लोमवल्लाङ्गूलेकलापे च, क्ली। इत्युणादिकोषः॥

पुच्छटि, स्त्री, (पुच्छ प्रसादे + भावे क्विप्। पुच्छं प्रसादं अटतीति। अट गतौ + इन्।) अङ्गुलिमोटनम्। इति त्रिकाण्डशेषः॥ आङ्गुलमट्काव इति भाषा।

पुच्छदा, स्त्री, (पुच्छमिव ददातीति। दा + कः।) जलमाकन्दः। इति राजनिर्घण्टः॥

पुच्छी, [न्] पुं, (पुच्छोऽस्यस्तीति। पुच्छ + इनिः।) अर्कवृक्षः। इति राजनिर्घण्टः॥ कुक्कुटः। इति शब्दचन्द्रिका॥ लाङ्गूलयुक्ते, त्रि॥

पुञ्जः, पुं, (पिञ्जयते पिञ्जयतीति वा पिञ्जि + अच्। पृषोदरादित्वात् साधुः।) समूहः। राशिः। इत्यमरः। २। ५। ४२॥ (यथा, मार्कण्डेये। ८। ८२।

"गृहीतपक्षिपुञ्जश्च ग्रथमाल्योरलङ्कृतः॥")

पुट, क चूर्णे। भाषि। इति कविकल्पद्रुमः॥ (चुरां-परं-चूर्णे सकं-भाषि अकं-सेट्।) कः, पोटयति। भाषि दीप्तौ। इति दुर्गादासः॥

पुट, न् क संश्लेषे। इति कविकल्पद्रुमः॥ (अदन्तचुरां परं-सकं-सेट्।) पुटयति पुष्पं सूत्रेण जनः संश्लेषयतीत्यर्थः। इति दुर्गादासः॥

पुट, श्लि श्लेषे। इति कविकल्पद्रुमः॥ (तुदां-कुटां-परं-अकं-सेट्।) श्लि, पुटति अपुटीत् पुपोट। श्लेषः सम्बन्धीभावः। इति दुर्गादासः॥

पुटं, क्लीं, (पुटतीति। पुट संश्लेषे + कः।) जातीफलम्। इति राजनिर्घण्टः॥ उपर्य्यधोभावापन्नसंयुक्तमृदादिकपालद्वयरूपौषधपाकपात्रम्। धात्वादिमारणोपयुक्तान् पुटप्रकारानाह रसप्रदीपे।

"लोहादेरपुनर्भावस्तद्गुणत्वं गुणाढ्यता।
सलिले तरणञ्चापि तल्लिङ्गैः पुटनाङ्कवेत्॥
गम्भीरे विस्तृते कुण्डे द्विहस्ते चतुरस्रके।
वनोपलसहस्रेण पूरिते पुटनौषधम्॥
कोष्ठे रुद्धं प्रयत्नेन गोविड्डोपरि धारयेत्।
वनोपलसहस्रार्द्धं कोष्ठिकोपरि निःक्षिपेत्॥
वह्निं विनिःक्षिपेत्तत्र महापुटमिति स्मृतम्॥१॥
कोष्ठं रुधा। गोविड्डा गोइठा। इति महापुटम्॥
सपादहस्तमानेन कुण्डे निम्बे तथायते।
वनोपलसहस्रेण्य पूर्णमध्ये विधारयेत्॥
पुटनद्वयसंयुक्तां कोष्ठिकां सुदृढां सुखे।
अधोऽङ्गानि करस्थानि अङ्गान्युपरि निःक्षिपेत्॥
एतद्गजपुटं प्रोक्तं ख्यातं सर्व्वपुटोत्तमम्॥
हस्तचतुर्विंशत्यङ्गुलप्रमाणः स सपादः तेन चिंशदङ्गुलप्रमाणेनेत्यर्थः। अतएवोक्तम्।
साधारणो नराङ्गुल्या त्रिंशदङ्गुलको गजः॥
इति गजपुटम्॥ २॥

अरत्निमात्रके कुण्डे पुटं वाराहसञ्ज्ञितं॥ ३॥
वितस्तिमात्रके खाते कथितं कोक्कुटं पुटम्।
'अरत्निस्तु निष्कनिष्ठेन मुष्टिना' इत्यमरः। २। ६। ८६॥ निःक्षतकनिष्ठया मुष्टोपलक्षितो हस्तोऽरत्निरित्यर्थः।
षोड़शाङ्गुलके खाते कस्यचित् कौक्कुटं पुटम्॥४॥
यत् पुटं दीयते खाते क्षुद्रसंख्यैर्वनोपलैः।
कपोतपुटमेतत्तु कथितं पुटपण्डितैः॥ ५॥
गोष्ठाङ्गगोखुरक्षुण्णं शुष्कचूर्णितगोमयम्।
गोवरं तत् समाख्यातं वरिष्ठं रससाधने॥
हृद्दृभाङ्गस्थितैर्यन्त्रैर्गोवरैर्दीयते पुटम्।

तन्नोवरपुटं प्रोक्तं भिषग्भिः क्षुतभक्षणात्॥६॥
हृद्दङ्गाङ्के तुषैः पूर्णं मध्ये रुद्धा विधारयेत्।
चिन्नाग्निं सुदयेद्वाङ्गं तद्वाक्यपुटसञ्ज्ञितं॥"॥

इति भावप्रकाशे पूर्व्वखण्डे २ भागः॥

पुटः, पुं क्लीं, (पुटतीति। पुट श्लेषे + कः।) अम्बुरुहः। इति शब्दरत्नावली॥

पुटः, त्रि, (पुट् + कः।) आच्छादनम्। पत्रादिरचितः पुष्पाद्याधारः। यथा, रघुः। २। ६५।

"दुग्धा पयः पत्रपुटे मदीयं
पुत्रोपभुङ्क्ष्वेति तमादिदेश॥"

(यथा च मनौ। ६। २८।

"ग्रामादाहृत्य वासीयादष्टौ ग्रासान् वने वसन्।
प्रतिगृह्य पुटेनैव पाणिना सकलेन वा॥")

मिथःसंश्लेषः। इति मुकुटः॥ इत्यमरटीकायां भरतः॥

पुटकं, क्लीं, (पुटवत् कायतीति। कै + कः।) पद्मम्। इति शब्दरत्नावली॥ स्वार्थे कप्रत्यये पुटशब्दार्थोऽप्यत्र॥

पुटकन्दः, पुं, (पुटमिव कन्दो यस्य।) कोलकन्दः। इति राजनिर्घण्टः॥

पुटकिनी, स्त्री, (पुटकानि सन्त्यस्येति। पुटक + "पुष्करादिभ्यो देशे।" ५। २। १३५। इति इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्मयुक्तदेशः। पद्मसमूहः पद्मलता च। इति हेमचन्द्रः॥

पुटग्रीवः, पुं, (पुटमिव ग्रीवा यस्य।) गर्गरी। ताम्रकुम्भः। इति मेदिनी। वे, ६१॥

पुटपाकः, पुं, (पुटेन पाकः।) पुटाभ्यन्तरितौषधपचनम्। अथ पुटपाकविधिः।

"पुटपक्वस्य कल्कस्य स्वरसो ग्रह्यते यदा।
अतस्तु पुटपाकानां युक्तिरत्रोच्यते मया॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्ज्जना।
लेपश्च द्व्यङ्गुलं स्थूले कुर्य्याद्वाङ्गुलिमात्रकम्॥
काश्मरीवटजम्बादिपत्रैर्वेष्टनमुत्तमम्।
पलमात्रो रसो ग्राह्यः कर्षमात्रं मधु क्षिपेत्॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः॥
अपि च।

हे विल्वे क्षिरधर्मासस्य परं द्रव्यं पलं मतम्।
द्रव्यस्य कुड़वोन्मानं सर्व्वमेकत्र पेषयेत्॥
तदेकत्र समालोड्य पत्रैः सूपरिवेष्टितम्।
पुटपाकविधानेन सत् पक्त्वा तदसं बुधः।
तर्पणोक्तेन विधिना यथावदवचारयेत्॥
हृदिमध्ये निषेच्यः स्यात्नित्यसुत्तानशायिनः।
लेखनो लेखनश्चैव रोपणश्चेति स त्रिधा॥
स्थितः स्निग्धो विरूक्षस्य स्निग्धस्य स तु लेखनः।
हृद्दर्व्वलार्थमितरः पित्तास्रग्व्रणवातजुत्॥
इतरो रोपणः।

लेहमांसवसामज्जमेदःस्नाय्वौषधैः कृतः।
लेहनः पुटपाकः स्याद्वार्य्यो दे वाक्शते तु सः॥
वाक्शतं कोटिकाग्रसम्।
आङ्गलानां यकृन्मांसैर्लेखनद्रव्यसंयुतैः।
लाङ्गलीहरजस्ताम्रगुडविद्रुमसिन्धुजैः॥
सप्तदर्शनकासीससोलोजदधिमस्तुभिः।

लेखनो वाक्प्रसूतं तस्य परं धारणमिष्यते ॥
स्नग्यणाङ्गलमध्याभ्यतिलकद्वयभावितः ।
लेखनाच्छिशुको धार्य्यः पुटपाकस्तु रोपणः ॥
तिलकद्वयाख्यानाच्च ।
निश्चान्तताडपटोलनिदिग्धिकाभिः
स्यात् पञ्चतिलक इति प्रथितो गणोऽयम् ॥
आचरेत्तर्पणोक्तान्तु क्रियां व्यापत्तिदर्शने ॥
व्यापत्तिदर्शने मिथ्याक्षतपुटपाकजनितव्याधि-
दर्शने ।
तेजांस्यखिलमाकाशमादर्शं भास्करादपि च ।
नेत्रेत तर्पिते नेत्रे यच्च वा पुटपाकवान् ॥"
इति भावप्रकाशः ॥

पुटभेदः, पुं, (पुटे संश्लिष्टे भिनत्तीति । भिद+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) नदी-वक्रम् । (नदीचक्रम् । इत्यमरः । १ । १० । ७ ॥ यथा, आर्य्यासप्तशत्याम् । ११८ ।
"प्रायेणैव हि मलिना मलिनानामाश्रयत्वमुप-यान्ति ।
कालिन्दीपुटभेदः कालियपुटभेदनं भवति ॥") पत्तनम् । आतोद्यम् । इति मेदिनी । दे, ५० ॥

पुटभेदनं, क्ली, (पुटैरम्बुखरैर्भिद्यते इति । भिद+ कर्म्मणि ल्युट् ।) नगरम् । इत्यमरः । २ । २ । १ ॥ (यथा, महाभारते । १ । १०० । १२ ॥
"स ह्यासीन्नगरे रम्ये कुरूणां पुटभेदने ।
वसन् सागरपर्य्यन्तामन्वशासद्वसुन्धराम् ॥")

पुटाकुः, पुं, (पुटः संश्लिष्ट आकुः ।) कोलकन्दः । इति राजनिर्घण्टः ॥

पुटिका, स्त्री, (पुटं अस्त्यस्या इति । पुट+ठन् +टाप् ।) एला । इति हारावली । ६७ ॥

पुटितं, क्ली, (पुटं जातमस्येति । पुट+इतच् । पुट+क्त वा ।) छत्रपुटम् । पाटितम् । स्फुटे, त्रि । इति मेदिनी । ते, १३४ ॥ आद्यन्तप्रत्य-यादियुक्तमन्नादौ पुटप्राप्ते च त्रि ॥

पुटी, स्त्री, (पुटतीति । पुट+कः । गौरादित्वात् ङीष् ।) कौपीनम् । इति जटाधरः ॥ आच्छा-दनम् । पत्रादिरचितः पुण्यात्राधारः । इत्य-मरभरतौ ॥ (यथा, आर्य्यासप्तशत्याम् । १४८ ।
"एरण्डपत्रपुटना जनयन्ती खेदमलघुजघन-तटा ।
धूलिपुटीव मिलन्ती खरच्छदं हरति हलिक-वधूः ॥")

पुटोटजं, क्ली, (पुटं संश्लिष्टपुटजमिव ।) श्वेत-च्छत्रम् । इति त्रिकाण्डशेषः ॥

पुटोदकः, पुं, (पुटे अन्तर्भूतपात्रमध्ये उदकं यस्य ।) नारिकेलः । इति हारावली । १०० ॥

पुड्, क तौच्छ्ये । इति कविकल्पद्रुमः ॥ (चुरा-परं-सकं-सेट् ।) पञ्चमस्वरी । इदुपान्तः । एक टकार इति रामः । कः, पुड्यति । तौच्छ्यमल्पी-भावः । इति दुर्गादासः ॥

पुड, इ मर्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) पञ्चमस्वरी । इ, पुण्डति । मर्दे चूर्णीकरणम् । इति दुर्गादासः ॥

पुण्ड, ग्र धर्म्मे । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) शुभक्रियायामित्यन्ये । ग्र, पुण्डति शुभं लोकः । पौण्डिता । इति दुर्गादासः ॥

पुण्ड्रः, पुं, (पुण्ड्यते इति । पुंड्रि मर्दे + घञ् ।) तिलकः । इति जटाधरः ॥

पुण्ड्री, [ड्र] पुं, हस्तिनां मनुष्याणाञ्च चक्षुषः क्षुद्रविटपः । ग्रालपर्णीपत्रतुल्यपत्रः । पुण्ड-रिया इति ख्यातः । तत्पर्य्यायः । पौण्डरी-कम् २ पुण्डरीकम् ३ पुण्डरीयकम् ४ प्रपौण्ड-रीकम् ५ चक्षुष्यम् ६ पौण्ड्र्यम् ७ तालपुष्प-कम् ८ तालपुष्पम् ९ दृष्टिप्रतम् १० स्थलपद्मम् ११ मालकम् १२ । केचित्तु पूर्व्वोदग्रकं पद्मकाष्ठे प्रचक्षते ॥ इति शब्दरत्नावली ॥

पुण्डरीकं, क्ली, (पुण्डति अन्यपुष्पाणां गर्व्वं चूर्णी-करोतीति । पुण्ड मर्दे + "अर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकन्प्रत्ययेन निपा-तनात् साधुः । "पुण्डतेः पुण्डरीकम् ।" इत्यु-ज्ज्वलदत्तः ।) श्वेतपद्मम् । तत्पर्य्यायः । सिता-म्भोरुहम् २ । इत्यमरः । १ । १० । ४१ ॥ श्वेत-पद्मम् ३ महापद्मम् ४ सिताम्बुजम् ५ । इति रत्नमाला ॥ अस्य पर्य्यायान्तरं गुणाश्च श्वेत-पद्मशब्दे द्रष्टव्याः ॥ (यथा, रघुः । ४ । १७ ।
"पुण्डरीकातपत्रस्य विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥") पद्माक्षम् । इति भरतधृतधाड्डिः ॥ श्वेत-च्छत्रम् । मेघभेदः । इति मेदिनी । के, १६६ ॥ सप्तमहाकुष्ठानामन्यतमः । तल्लक्षणं यथाह माधवकरः ।
"सर्व्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्लेशञ्च सरागञ्च पुण्डरीकं तदुच्यते ॥"

पुण्डरीकः, पुं, (पुण्डरीकवद्दर्शनोऽस्यस्येति । अच् ।) अभिजातगजदिग्गजः । व्याघ्रः । इत्यमरः । ३ । ३ । ११ ॥ कोषकारभेदः । इति मेदिनी ॥ सङ्कर-जातिः । गणधरः । राजसर्पः । गजश्रेष्ठः । इति हेमचन्द्रः ॥ दमनकवृक्षः । इति राजनिर्घण्टः ॥ (धान्यविशेषः । तद्यथा,—
"पुण्याह्वकः पुण्डरीकस्तथा मध्यमशूकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) कमण्डलुः । श्वेतवर्णः । इत्यनेकार्थकोषः ॥ (क्रौञ्चद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ८ ।
"ईशानतः परेणापि पुण्डरीको महान् गिरिः ।
एते रत्नमयाः सर्व्व क्रौञ्चद्वीपस्य पर्व्वताः ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८३ । ७६ ।
"शुक्लपक्षे दशम्याञ्च पुण्डरीकं समाविशत् ।
तत्र स्नात्वा नरो राजन् ! पुण्डरीकफलं लभेत् ॥"
यज्ञविशेषः । यथा, तत्रैव । ३ । ३० । १७ ।
"अश्वमेधो राजसूयः पुण्डरीकोऽथ गोसवः ।
एतैरपि महायज्ञैरिष्ट्वा ते भूरिदक्षिणैः ॥"
नागविशेषः । यथा, तत्रैव । ५ । १०३ । १३ ।
"नागानामेकपर्णानां यथाऽहं प्रवरो मतः ।
तथा पद्मौ पुण्डरीकश्च पुण्यो सुन्दरपर्णकः ॥"
रामचन्द्रवंशीयनृपविशेषः । यथा, रघुः । १८ । ८ ।
"तेन हिमानामिव पुण्डरीको
राज्ञामजय्योऽजनि पुण्डरीकः ।
ग्राम्ये पितर्य्याहृतपुण्डरीका
यं पुण्डरीकाक्षमिव श्रिता श्रीः ॥"
पुण्डरीकाः सन्त्यस्येति । अच् । पुण्डरीक-विशिष्टे, त्रि । यथा, मात्स्ये । १२० । ६८ ।
"पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ।
पुण्डरीकात् पयोदाच्च तस्मात् ह्रे सम्प्रसूय-ताम् ॥")

पुण्डरीकाक्षं, क्ली, (पुण्डरीकवद्दक्षिणौ यस्मात् । बच् समासे ।) पुण्ड्र्यम् । इति शब्दचन्द्रिका ॥

पुण्डरीकाक्षः, पुं, (पुण्डरीकवद्दक्षिणौ नेत्रे यस्य । बच् समासे ।) विष्णुः । इत्यमरः । १ । १ । १६ ॥ (यथा, महाभारते । ५ । ७० । ६ ।
"पुण्डरीकं परं धाम नित्यमक्षरमव्ययम् ।
तद्भावात् पुण्डरीकाक्षो दक्षयज्ञसाज्ञार्हणः ॥"
"हृदयाख्यपुण्डरीकमश्नुते व्याप्नोति तज्जोपलब्धत इति पुण्डरीकाक्षः । यत् पुण्डरीकाक्षस्तत्-पुण्डरीकं परममध्यमस्य इति श्रुतेः । अक्षिणी पुण्डरीकाभे यस्येति वा ।" इति शाङ्करभा-ष्यम् ॥) तस्य स्मरणे बाह्याभ्यन्तरशुचित्वं यथा,
"अपवित्रः पवित्रो वा सर्व्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥"
इति वामने ३३ अध्यायः ॥
(जलचरपक्षिविशेषः । तद्यथा,—
"उत्क्रोशः पुण्डरीकाक्षो मेघरावोऽम्बुकुक्कुटौ ॥"
इति चरके सूत्रस्थाने २७ अध्याये ॥)

पुण्डरीयकं, क्ली, स्थलपद्मम् । इति शब्दमाला ॥ प्रपौण्डरीकम् । इति राजनिर्घण्टः ॥

पुण्ड्र्यं, क्ली, (पुण्ड्रस्येति । पुंड्रि + अच् । तस्यार्थं प्रधानम् । शाकन्धादित्वात् साधुः ।) प्रपौण्ड-रीकम् । इत्यमरः । २ । ४ । १२० ॥ "ये हस्तिनां मनुष्याणाञ्च चक्षुषि क्षुद्रविटपे ग्रालपर्णीपत्र-तुल्यपत्रे । पुण्डरिया इति ख्याते । प्रकृष्टं पुण्ड-रीकमिव दाहहरत्वात् प्रपौण्डरीकं वा; सुप-ह्वालादित्वादन्तपदस्यादौ वृद्धिः । पुण्ड्यति खण्डयति दोषान् पुण्ड्र्यं पुंड्रि मर्दे नाम्नीति व्यः पौण्ड्र्यमिति पाठे स्वार्थे ष्यः वृद्धिः पुण्डरीकादित्यञ्च ।
'स्थलपद्मं साधुपुष्पं दृष्टिप्रसत् पुण्ड्रीयकम् ॥'
इति रभसः ।" इत्यमरटीकायां भरतः ॥

पुण्ड्रः, पुं, (पुण्ड्यन्ते गुड़पूपकरादयः चूर्णीक्रियन्ते इति । पुंड्रि मर्दे + "स्फायितञ्चीति ।" उणा० २ । १३ । इति रक् ।) इक्षुभेदः । पुँड्रिया इति भाषा । इत्यमरः । २ । ४ । १६३ । दैत्यविशेषः । अतिसुरूपकः । त्रिधम् । क्रिमिः । पुण्डरीकम् । दैत्यविशेषे, पुं भूम्नि । इति मेदिनी । रे, ५६ ॥ (यथा, मात्स्ये । ११३ । ७५ ।
"प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः ।
ग्राम्यमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥")
तिलकवृक्षः । इति हेमचन्द्रः । [illegible]

पुण्ड्रकः

इति राजनिर्घण्टः ॥ (अश्वदेहस्यचिह्नविशेषः । अस्य लक्षणादिकं पुण्ड्रकशब्दे द्रष्टव्यम् ॥ बलिराजस्य चेदिजः पुत्रविशेषः । यस्मादेव पुण्ड्रदेशो विख्यातः । यथा, महाभारते । १ । १०४ । ४७—५१ ।

"बलिः सुदेष्णां भार्य्यां स्वां तस्मै तां प्राहिणोत् पुनः ।
तां स दीर्घतमाङ्गेषु उप्त्वा देवीमथाब्रवीत् ॥
भविष्यन्ति कुमारास्ते तेजसादित्यवर्चसः ।
अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ॥
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ।
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ॥
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः ।
पुण्ड्रस्य पुण्ड्राः प्रख्याताः सुह्मा सुह्मस्य च स्मृताः ॥
एवं वलेः पुरा वंशः प्रख्यातो वै महर्षिजः ॥")

पुण्ड्रकः, पुं, (पुण्ड्र इव प्रतिकृतिः । "एवे प्रतिकृतौ ।" ४ । ३ । ६६ । इति कन् ।) माषपर्णीलता । इत्यमरः । २ । ४ । ७२ ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"माषपर्णी स्यात्तु वाराही पुण्ड्रको मस्तकोऽपि च ।
अतिसुतो विसुतश्च कासुको भ्रमरोत्सवः ॥")
तिलकवृक्षः । (पुण्ड्र + स्वार्थे कन् ।) इक्षुभेदः । पुँड़ि आक् इति भाषा । तत्पर्य्यायः । रसालः २ इक्षुवाटी ३ योनिः ४ इक्षुयोनिः ५ रसाली ६ रसवल्लिका ७ करङ्गपालिः ८ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । रुचिकारित्वम् । स्नेहलत्वम् । पित्तदाहहरत्वम् । तृप्यत्वम् । तेजोबलविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (अश्वशरीरस्यचिह्नविशेषेऽपि, पुं, क्ली । यथा, अश्ववैद्यके । ३ । ७१—८१ ।
"अत ऊर्द्धं प्रवक्ष्यामि पुण्ड्राणां लक्षणं शुभम् ।
आनुपूर्व्व्या यथादृष्टं मुनिभिस्त्वर्थवेदिभिः ॥
शुक्तिशङ्खगदाखड्गपद्मचक्राङ्कुशोपमाः ।
शरासनसमाकाराः प्रशस्ताः पुण्ड्रकाः स्मृताः ॥
माल्यभृङ्गारप्रासादसर्व्वदीपसमप्रभाः ।
श्रीवृक्षदर्पणाकाराः शुभदाः परिकीर्त्तिताः ॥
शिरोललाटवदनं यः पुण्ड्रो व्याप्य तिष्ठति ।
स धन्यः पूजितो नित्यमच्युतश्चैव यो भवेत् ॥
पर्व्वतेन्द्रपताकाभा ये च सगदामसन्निभाः ।
ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः ॥
इति पुण्ड्राः शुभाः प्रोक्ताः पूर्ब्बशास्त्रानुसारतः ।
अशुभांश्चैव वक्ष्यामि यथायोगं समासतः ॥
काककङ्कवबन्धाहिगृध्रगोमायुसन्निभाः ।
असिताः पीतका रक्ताः पुण्ड्रका नैव पूजिताः ॥
तिर्य्यग्गात्रैश्च विच्छिन्नाः भग्नशस्त्रास्त्रसन्निभाः ।
सूनाया वामदेहस्थाः पुण्ड्रका न शुभाः स्मृताः ॥
निष्काकलम्बकृष्णाभा भस्मवर्णनिभाश्च ये ।
पुण्ड्रकाश्च न ग्रहणे भिन्नवर्णानि वाजिनः ॥"
पुण्ड्रदेशनृपतिः । यथा, महाभारते । १ । ४ । २४ ।
"तथाङ्गवङ्गौ सह पुण्ड्रकेण
राजाधिराजौ च महाबलेन ॥")

पुण्ड्रकेलिः, पुं, (पुण्ड्रे इक्षुविशेषे केलिर्यस्य ।) हस्ती । इति शब्दमाला ॥

पुण्यं, क्ली, (पूयतेऽनेनेति । पू + "पूङो यक्सुक् डुक्षश्च ।" उणा० ५ । १५ । इति यत् सुगागमो डुक्षश्च ।) शुभादृष्टम् । तत्पर्य्यायः । धर्म्मम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ पुण्यभारवोढुमशक्तस्य पक्षिणस्य निन्दा यथा, अग्निपुराणे ।
"पक्षितेनापि किञ्चित्तु समर्थेन च देहिनाम् ।
यत् पुण्यं भारसंहोढुमशक्तं पारलौकिकम् ॥
आत्मलाभतपुण्यकथनविधेर्यथा,—
"दृष्टं दत्तमधीतं वा विनश्यत्यनुकीर्त्तनात् ।
आदातुर्द्युद्भवाभ्यां भयतेजो विभिद्यते ॥
तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत् ॥"
इति शुद्धितत्त्वे देवलः ॥ * ॥
अदत्तपुण्यभागित्वं पापशब्दे द्रष्टव्यम् ॥ * ॥
शोभनकर्म्मे । पावनम् । सुन्दरे, त्रि । इति हेमचन्द्रः ॥ सुगन्धि । इति जटाधरः ॥

पुण्यकं, क्ली, (पुण्याय कायतीति । कै + कः ।) व्रतम् । तच्च उपवासादि । प्राक्षे पुण्यत्वेन पवित्रताजनकत्वेन यद्बोधितमुपवासादि तदेव व्रतं न तु यः कोऽपि नियमः । आदिना नक्तं भोजनाचारलवणादिपरिग्रहः । इत्यमरभरतौ ॥

पुण्यकव्रतं, क्ली, (पुण्यकं व्रतमिति ।) पतिसौभाग्यस्य श्रीलक्ष्मातुल्यपुत्रस्य च जनकः स्त्रीकर्त्तव्यनियमविशेषः । तस्य विधिर्यथा,—
महादेव उवाच ।
"हरेराराधनं कृत्वा व्रतं कुरु वरानने ! ।
व्रतञ्च पुण्यकं नाम वर्षमेकं करिष्यसि ॥
देवि ! शुद्धे च कार्त्तिक्यां परं नियमपूर्ब्बकम् ।
माघशुक्लत्रयोदश्यां व्रतारम्भः शुभः प्रिये ! ॥
गात्रं सुनिर्म्मलं कृत्वा शिरःसंस्कारपूर्ब्बकम् ।
उपोष्य पूर्ब्बदिवसे वस्त्रं प्रक्षाल्य यत्नतः ॥
धौते च वाससी धृत्वा उपविश्यासने शुभे ।
आचम्य तिलकं कृत्वा निर्व्वाप्य आब्दिकं पुरः ॥
घटस्यारोपणं कृत्वा स्वस्तिवाचनपूर्ब्बकम् ॥
पुरोहितस्य वरणं पुरः कृत्वा प्रयत्नतः ।
संकल्प्य वेदविहितं व्रतमेतत् समाचरेत् ॥
व्रते त्र्यहि निशानि षोडशोपचाराणि षोडश ।
देयानि नित्यं देवेशि ! लक्ष्माय परमात्मने ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ॥
मधुपर्कञ्च स्नानीयं वस्त्राभरणानि च ।
सुगन्धिपुष्पं धूपञ्च दीपनैवेद्यवन्दनम् ॥
यज्ञसूत्रञ्च ताम्बूलं कर्पूरादिसुवासितम् ।
त्र्यहाय्येतानि पूजायाश्चाङ्गरूपाणि सुन्दरि ! ॥
देवि ! किञ्चिद्विहीनेनैवाङ्गहानिः प्रजायते ।
अङ्गहीनञ्च यत् कर्म्म याङ्गहीनो यथा नरः ॥
अङ्गहीने च कार्य्ये च फलहानिः प्रजायते ।
अशोकरम्यं पुष्पं पारिजातस्य विश्रुते ।
देयं प्रतिदिनं दुर्गे ! स्वात्मनो रूपहेतवे ॥
श्वेतचम्पकपुष्पाणां लक्षमप्यतमीप्सितम् ।
प्रदेयं हरये भक्त्या बहुसौन्दर्य्यहेतवे ॥

पुण्ड्रक

नीलोत्पलानां लक्षञ्च देयं लक्ष्माय भक्तितः ।
व्रताङ्गभूतं देवेशि ! चक्षुषो रूपहेतवे ॥
हिमालयोद्भवं लक्षं रुचिरं श्वेतचामरम् ।
प्रदद्यो केशवायैव केशसौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं दर्पणानां सहस्रकम् ।
देयं नारायणायैव नासिकासौन्दर्य्यहेतवे ॥
अमूल्यरत्नरचितं पुटकानां सहस्रकम् ।
प्रदेयं गोपिकेशाय नासिकारूपहेतवे ॥
बन्धूकपुष्पलक्षञ्च देयं राधेश्वराय च ।
ओष्ठयोराधरयोश्चैव बन्धुसौन्दर्य्यहेतवे ॥
मुक्ताफलानां लक्षञ्च दन्तसौन्दर्य्यहेतवे ।
देयं गोलोकनाथाय गोपीजने ! भक्तिपूर्ब्बकम् ॥
रत्नगेण्डूकलक्षञ्च गण्डसौन्दर्य्यहेतवे ।
मदीश्वराय दातव्यं व्रते गोलोकवासके ! ॥
रत्नपात्रफलक्षञ्च देयं लक्ष्मेश्वराय च ।
ओष्ठाधःस्थलरूपाय प्राणेशि ! भक्तितो व्रते ॥
कर्णभूषणलक्षञ्च रत्नसारविनिर्म्मितम् ।
देयं सर्व्वेश्वरायैव कर्णसौन्दर्य्यहेतवे ॥
माध्वीकफलसानाञ्च लक्षं रत्नविनिर्म्मितम् ।
देयं विश्वेश्वरायैव स्वरसौन्दर्य्यहेतवे ॥
सुधापूर्णेच कुम्भानां सहस्रं रत्ननिर्म्मितम् ।
देयं लक्ष्माय देवेशि ! वाक्यसौन्दर्य्यहेतवे ॥
रत्नपद्मोपलक्षञ्च गोपवेशविधायिने ।
देयं क्षीरोदवेशाय दृष्टिसौन्दर्य्यहेतवे ॥
धुस्तूरकुसुमाकारं रत्नपात्रसहस्रकम् ।
देयं गोरक्षकायैव गलसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितं पद्मनालसहस्रकम् ।
देयं सनकपालाय बाहुसौन्दर्य्यहेतवे ॥
लक्षञ्च रक्तपद्मानां कक्षसौन्दर्य्यहेतवे ।
देयं गोपाङ्गनाथाय नारायणि ! हरिव्रते ॥
अङ्कुरीयकलक्षञ्च रत्नसारविनिर्म्मितम् ।
अङ्गुलीनाञ्च रूपार्थं देयं देवेश्वराय च ॥
मणीन्द्रसारलक्षञ्च श्वेतवर्णं मनोहरम् ।
देयं मुनीन्द्रनाथाय नखसौन्दर्य्यहेतवे ॥
सद्रत्नभारहाराणां लक्षञ्चातिमनोहरम् ।
देयं मदनमोहाय वक्षःसौन्दर्य्यहेतवे ॥
सुपक्वश्रीफलानाञ्च लक्षञ्च सुमनोहरम् ।
देयं सिद्धेन्द्रनाथाय स्तनसौन्दर्य्यहेतवे ॥
सद्रत्नभृङ्गाकारं लक्षपात्रं मनोहरम् ।
देयं पद्मालयेशाय देहस्य रूपहेतवे ॥
सद्रत्नसाररचितनाभीनालसहस्रकम् ।
प्रदेयं पद्मनाभाय नाभिसौन्दर्य्यहेतवे ॥
सद्रत्नसाररचितरत्नचक्रसहस्रकम् ।
नितम्बसौन्दर्य्यार्थञ्च प्रदेयञ्चक्रपाणये ॥
सुवर्णरत्नकुम्भानां लक्षञ्च सुमनोहरम् ।
प्रदेयं श्रीनिवासाय श्रोणिसौन्दर्य्यहेतवे ॥
घृतपक्वस्थलाजानां लक्षमज्ञानमप्यतम् ।
प्रदेयं पद्मनेत्राय पादसौन्दर्य्यहेतवे ॥
सुवर्णरचितानाञ्च खञ्जनानां सहस्रकम् ।
गतिसौन्दर्य्यहेतोर्यं देयं लक्ष्मीश्वराय च ॥
राजहंससहस्रञ्च गजेन्द्राणां सहस्रकम् ।
सुवर्णेक्षुलक्षञ्च देयं नारायणाय च ॥

पुण्डक

विचित्रं रत्नसारेण मूर्ह्नः सौन्दर्य्यहेतवे ॥
मालतीनाञ्च कुसुममत्यन्तं लक्ष्मीश्वरि ! ।
देयं वृन्दावनेशाय हास्यसौन्दर्य्यहेतवे ॥
अमूल्यरत्नलक्षञ्च देयं नारायणाय वै ।
सुव्रते ! व्रतपूर्त्यर्थं शीलसौन्दर्य्यहेतवे ॥
मुक्ताखण्डिकसङ्घाढ्यं मणीन्द्रसारलक्षकम् ।
देयं मुनीन्द्रनाथाय मनःसौन्दर्य्यहेतवे ॥
प्रवालसारसङ्घाढ्यं मणिसारसहस्रकम् ।
देयं लक्ष्णाय भक्त्या च प्रियानुरागवृद्धये ॥
माणिक्यसारलक्षञ्च देयं लक्ष्णाय यत्नतः ।
जन्मनः कोटिपर्य्यन्तं स्वामिसौभाग्यहेतवे ॥
कुष्माण्डं नारिकेलञ्च जम्बीरं श्रीफलं तथा ।
फलान्येतानि देयानि हरये पुत्रहेतवे ॥
रत्नेन्द्रसारलक्षञ्च देयं लक्ष्णाय यत्नतः ।
असंख्यजन्मपर्य्यन्तं स्वामिनो धनवृद्धये ॥
वाद्यं नानाप्रकारञ्च कांस्यतालादिकं परम् ।
व्रते सम्पत्तिवृद्ध्यर्थं श्रीहरिं श्रावयेद्व्रती ॥
पायसं पिष्टकं सर्पिःशर्करात्तं मनोहरम् ।
प्रदेयं हरये भक्त्या स्वामिनो भोगवृद्धये ॥
सुगन्धिपुष्पमाल्यानां लक्षमत्यन्तमीप्सितम् ।
प्रदेयं हरये भक्त्या हरिभक्तिविवृद्धये ॥
नैवेद्यानि प्रदेयानि स्वादूनि मधुराणि च ।
श्रीकृष्णप्रीतिप्राप्त्यर्थं दुर्गे ! नानाविधानि च ॥
नानाविधानि पुष्पाणि तुलसीसंयुतानि च ।
श्रीकृष्णप्रीतये भक्त्या व्रते देयानि सुव्रते ! ॥
ब्राह्मणानां सहस्रञ्च प्रत्यहं भोजयेद्व्रती ।
स्वामिनः पुत्रवृद्ध्यर्थं व्रते जन्मनि जन्मनि ॥
पुष्पाञ्जलिप्रमाणं देयं नित्यं पूर्णञ्च पूजने ।
प्रणामशतकं देवि ! कर्त्तव्यं भक्तिवृद्धये ॥
षष्ठ्यन्नञ्च हविष्यान्नं मासान् पञ्च फलादिकम् ।
हविः पञ्चं जलं पञ्चं व्रते पञ्चे च सुव्रते ! ॥
रत्नप्रदीपशतकं वह्निं दद्याद्विनिग्रम् ।
रात्रौ हुताशनं कृत्वा नित्यं जागरणं व्रते ॥
जागरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सकृच्चोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविवृद्धये ।
ज्ञानवृद्धिर्जागरणे सुबुद्धिर्मितभोजने ॥
लोभमोहकामक्रोधभयशोकविवादकम् ।
कलहञ्च परित्याज्यं व्रते बन्धुविवृद्धये ॥
संपूर्णे च व्रते देवि ! प्रतिष्ठा तदनन्तरम् ॥
त्रिगुणञ्च षष्ठाधिकं वस्त्रकं वस्त्रसंयुतम् ।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम् ॥
त्रिगुणञ्च षष्ठाधिकं सहस्रं विप्रभोजनम् ।
त्रिगुणञ्च षष्ठाधिकं सहस्रं तिलहोमकम् ॥
त्रिगुणञ्च षष्ठाधिकं सहस्रं स्वर्णमेव च ।
देया व्रतसमाप्तौ च दक्षिणा विविधैरिता ।
अन्यां समाप्तिदिवसे कथयिष्यामि दक्षिणाम् ॥
एतद्व्रतफलं देवि ! दृढ़ा भक्तिर्हरौ भवेत् ।
हरितुल्यो भवेत् पुत्रो विख्यातो भुवनत्रये ॥
सौन्दर्य्यं स्वामिसौभाग्यमैश्वर्य्यं विपुलं धनम् ।
सर्व्वयाच्ञिनसिद्धीनां बीजं जन्मनि जन्मनि ॥
इत्येवं कथितं देवि ! व्रतं कुरु महेश्वरि ! ।

पुण्यभू

पुत्रस्ते भविता साध्वीत्युक्त्वा च विरराम ह ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ।३-७। अध्यायौ ॥
पुण्यकृत्, त्रि, (पुण्यं करोति सेवति । कृ + "सुकर्म्म-पापमन्त्रपुण्येषु कृञः ।" ३।२।८८। इति क्विप् । "हलस्य तुक् पिति कृति ।" ६।१।७१। इति तुगागमश्च ।) पुण्यकर्त्ता । धार्म्मिकः । यथा, "पुण्यकृत्याटुकारस्ते किङ्करः सुव्रतेषु कः ॥"
इति भट्टिः । ५ । ६८ ॥
पुण्यगन्धः, पुं, (पुण्यः पवित्रो गन्धश्च गन्धोऽस्य ।) चम्पकः । इति त्रिकाण्डशेषः ॥
पुण्यजनः, पुं, (पुण्यः विरुद्धलक्षणया पापी चासौ जनश्चेति ।) राक्षसः । इत्यमरः । १।१।६३॥ यक्षः । (यथा, हरिवंशे । २ । २६ ।
"सर्पः पुण्यजनैश्चैव वीरुद्भिः पर्व्वतैस्तथा ॥"
पुण्याश्रितो जनः ।) सज्जनः । इति मेदिनी । ने, १६८ ॥
पुण्यजनेश्वरः, पुं, (पुण्यजनानां यक्षाणामीश्वरः ।) कुबेरः । इत्यमरः । १ । १ । ७३ ॥ (यथा, रघुः । ६ । ६ ।
"समसत्त्वा वसुवृष्टिविसर्जनैः
नियमनादसतश्च नराधिपः ।
अनुययौ यमपुण्यजनेश्वरौ
सवरुणावरुणाग्यसरं रुचा ॥")
पुण्यलक्षणं, क्ली, (पुण्यं पवित्रं लक्षणम् ।) श्वेतकुशम् । इति राजनिर्घण्टः ॥
पुण्यदर्शनः, पुं, (पुण्यं शुभजनकं दर्शनं यस्य ।) चाषपक्षी । इति राजनिर्घण्टः ॥ (यद्दर्शनेन पुण्यं भवति तत्र, त्रि । यथा, रघुः । १ । ८६ ।
"तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याच्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ॥")
पुण्यफलः, पुं, (पुण्यानि शुभानि फलानि यस्य ।) वनभेदः । तत्पर्य्यायः । लक्ष्मणारामः २ । इति शब्दमाला ॥ (पुण्यस्य फलं पुण्यजन्यं फलमिति वा ।) धर्म्मजन्यफले, क्ली ॥ (यथा, मनुः । ५ । ५३ ।
"वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥")
पुण्यभाक्, [ज्] त्रि, (पुण्यं भजतीति । भज + विच् ।) पुण्यविशिष्टः । यथा, पद्मपुराणे ।
"क्रीड़ावन्तो विनीताश्च सुरतरताः पुण्यभाजः
सुपुत्राः स्युः ॥"
पुण्यभूः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूर्भूमिः ।) आर्य्यावर्त्तदेशः । यथा, हेमचन्द्रे ।४।२।४।
"आर्य्यावर्त्तो जन्मभूमिर्जिनचक्रार्हचक्रिणाम् ।
पुण्यभूराचारवेदौ मध्यं विन्ध्यहिमालयोः ॥"
पुण्यभूमिः, स्त्री, (पुण्यस्य पुण्योत्पादिका वा भूमिः ।) आर्य्यावर्त्तदेशः । इत्यमरः ।२।१।८॥ स तु विन्ध्यहिमालयावधिमध्यदेशः । यथा,—
"आसमुद्रात्तु पूर्ब्बादासमुद्रात्तु पश्चिमात् ।
तयोरेवान्तरं गिर्य्योरार्य्यावर्त्तं विदुर्बुधाः ॥"
इति भरतधृतमधुः ॥
पुण्यरुः । इति शब्दरत्नावली ॥

पुण्यात्मा

पुण्यवान्, [त्] त्रि, (पुण्यमस्यास्तीति । पुण्य + मतुप् । मस्य वः ।) पुण्ययुक्तः । तत्पर्य्यायः । सुकृती २ धन्यः ३ । इत्यमरः ।३।१।३॥ सुकृत् ४ पुण्यवान् ५ । इति जटाधरः ॥ धर्म्मवान् ६ श्रेयस्वान् ७ वृषवान् ८ । इति पुण्यपर्य्यायकशब्दोत्तरवतुप्रत्ययेन सिध्यन्ति ॥ (यथा, महाभारते । १२ । २६७ । २८ ।
"ऊर्द्धं भिक्षा प्रतिष्ठन्ते प्राणाः पुण्यवतां नृप ! ।
मध्यतो मध्यपुण्यानामधो दुष्कृतकर्म्मणाम् ॥")
पुण्यश्लोकः, पुं, (पुण्यः पुण्यदायकः श्लोको यशश्चरित्रं वा यस्य ।) विष्णुः । इति श्रीभागवतम् ॥ युधिष्ठिरः । इति महाभारतम् ॥ नलराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ३ । ७४ । ११ ।
"पुण्यश्लोकस्य वै श्रुतो वार्ष्णेय इति विश्रुतः ॥")
पुण्यश्लोकचरित्रे, त्रि ॥ (यथा, भागवते ।२।१४।१।
"संप्रस्थिते द्वारकायां जिष्णौ बन्धुदिदृक्षया ।
भ्रातुश्च पुण्यश्लोकस्य शृण्वतश्चरितं महत् ॥")
पुण्यश्लोका, स्त्री, (पुण्यः पुण्यजनकः श्लोको यशश्चरित्रं वा यस्याः ।) द्रौपदी । इति शब्दमाला ॥ सीता । यथा,—
"पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्द्दनः ॥"
इति पुराणम् ॥
पुण्या, स्त्री, (पुनाति या पूयतेऽनयेति वा । पू + "पूङो यक्सुक् हस्वश्च ।" उणा० ५ । १५ । इति यत् यक् हस्वश्च धातोः । ततष्टाप् ।) तुलसी । इति शब्दमाला ॥ पुण्यजनिका च ॥
पुण्यात्मा, त्रि, (पुण्यः आत्मा स्वभावो यस्य ।) पुण्यस्वभावः । तस्य गत्यादिर्यथा,—
सुप्रज्ञोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि यत्त्वया श्रोतुमिच्छते ।
पुण्यात्मनां पापिनाञ्च पन्थानं सुखदुःखदम् ॥
आदौ ब्रवीमि पन्थानं नृणां पुण्यवतामहम् ।
शृण्वञ्च द्विजशार्दूल ! शृण्वतां प्रीतिवर्द्धनम् ॥
प्रस्तरैरिष्टकैर्बद्धो दिव्यवस्त्रैः समावृतः ।
भाति पुण्यात्मनां पन्थाः सर्व्वोपद्रववर्জ্জितः ॥
क्वचिन्नृत्यैर्व्वकन्याभिर्गीयते गानमुत्तमम् ।
क्वचिन्मञ्जुगरीराभिरप्सरोभिश्च कृत्यते ।
क्वचिच्च वीक्षालक्षणं नानावाद्यं मनोहरम् ।
क्वचित् कुसुमवृष्टिश्च क्वचिदायुः सुगीतलः ॥
क्वचित् पुण्याः प्रीततोयाः कुत्रचित् भक्तमालिकाः ।
क्वचिद्देवाश्च गन्धर्व्वाः पठन्ति स्तवमुत्तमम् ॥
क्वचित् क्वचिद्दीर्घिकाश्च पुष्पपद्मसुशोभिताः ।
सुच्छायाः पादपाः क्वापि पुष्पिता वल्लयादयः ॥
समस्तसुखसम्पन्ने पथि गच्छन्ति मानवाः ।
पुण्यात्मानो द्विजश्रेष्ठ ! सुखस्यैत्यवाप्य च ॥
केचित्तुरङ्गमारूढ़ा नानालङ्कारभूषिताः ।
उद्यद्धवलच्छत्रैरुच्छ्रितोष्टतमस्तकाः ॥
केचिद्यान्ति गजारूढ़ा रथारूढ़ाश्च केचन ।
यानारूढ़ा जनाः केचित् सुखेन यममन्दिरम् ॥

केचिद्वैवाङ्गनाहस्तन्यस्तचामरवायुभिः ।
गच्छन्ति वीजिता मार्गाः स्तूयमानाः सुरर्षिभिः ॥
केचिद्विद्याङ्गधराः सुचन्दनविभूषिताः ।
भुञ्जन्तो यान्ति तांबूलं पुण्यात्मानो यमालयम् ॥
विजयाम्रविषा केचिच्छालयन्तो दिशो दश ।
व्रजन्ति भ्रमणागारं चलद्ग्रहनिवासिनः ॥
केचिच्च पायसं दिव्यं भुञ्जन्तो यान्ति सत्तमाः ।
सुधापानं प्रकुर्व्वन्तः पथि गच्छन्ति केचन ॥
केचिद्दुग्धं पिबन्तश्च केचिदिक्षुरसं तथा ।
केचित्तक्रं पिबन्तश्च गच्छन्ति यममन्दिरम् ॥
केचिद्भक्षयन्ति खादन्तः केचिन्नानाफलानि च ।
केचिन्मधु पिबन्तश्च पुण्यवन्तो व्रजन्ति वै ॥
नानागतांस्ततो दृष्ट्वा नरान् धर्म्मपरायणान् ।
भास्करिः प्रीतिमासाद्य स्वयं नारायणो भवेत् ॥
चतुर्भाहुः श्यामवर्णः प्रफुल्लकमलेक्षणः ।
शङ्खचक्रगदापद्मधारी गरुडवाहनः ॥
स्वर्णयज्ञोपवीती च क्षौमचारुतरानरः ।
किरीटी कुण्डली चैव वनमालाविभूषितः ॥
चित्रगुप्तो महाप्राज्ञश्चक्षुष्या यमकिङ्कराः ।
सर्व्वे नारायणाकारा बभूवुर्मधुरोक्तयः ॥
ततः स्वयं धर्म्मराजस्तान् सर्व्वान्नत्वोत्तमान् ।
परमां प्रीतिमासाद्य मित्रवत् पूजयेद्द्विज ! ॥
दिव्यैर्वस्त्रैः फलैश्चैव तेषां पुण्यवतां नृणाम् ।
भोजनं कारयित्वा तु तानुवाचाथ भास्करिः ॥

यम उवाच ।

यूयं सर्व्वे महात्मानो नरकक्लेशभीरवः ।
निजपुण्यप्रभावेन गम्यतां परमं पदम् ॥
संसारे जन्म संप्राप्य पुण्यं यः कुरुते नरः ।
स मे पिता स मे भ्राता स मे बन्धुः स मे सुहृत् ॥
इत्युक्ता धर्म्मराजेन ते सर्व्वे द्विजसत्तम ! ।
दिव्यं रथं समारुह्य नारायणपुरं ययुः ॥"
इति पाद्मोत्तरे क्रियायोगसारे २२ अध्यायः ॥

पुण्याहं, क्ली, (पुण्यञ्च तदहश्चेति । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "उत्तमैकाभ्याञ्च ।" ५ । ४।९० । इति अच्-हेशो न ।) पुण्यदिनम् । इत्यमरः ॥ (यथा, अमरशतके । ९१ ।
"पुण्याहं व्रजमङ्गलं सुदिवसं प्रातः प्रयातस्य ते
यत्स्नेहोचितमीहितं प्रियतम ! त्वं निर्गतः
श्रोष्यसि ॥")

पुण्याहवाचनं, क्ली, (पुण्याहस्य वाचनम् ।) देवादिकर्म्मादौ मङ्गलार्थं पुण्याहमितिशब्दस्य वारत्रयकथनम् । यथा,—
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव शिरोङ्कारं कुर्य्यात् क्षत्रियवैश्ययोः ॥
ओङ्कारं ब्राह्मणो ब्रूयात् शिरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युदाहृतत्वे यमः ॥

पुत्त, गतौ ॥ (भ्वां-परं-सकं-सेट् ।) तदयाम्नः । पुत्तिका । सौत्रधातुरयम् । इति दुर्गादासः ॥

पुत्तकः, पुं, (पुत्त गतौ + भावे घञ् । पुत्तं गमनं जाति अन्यस्मादिति । जा + कः । ततः संज्ञायां कन् । अन्यान्येवैव हि गमनादिक्रियावत्त्वादस्य तथात्वम् ।) पत्रादिनिर्म्मितप्रतिमूर्त्तिः । पुतुल इति भाषा । यथा, "आचारात् योग्यत्वाच्च शूरपत्नैः पुत्तकं कृत्वा शिरःप्रभृतिषु पलाशपत्राणि देयानि ।" इति शुद्धितत्त्वम् ॥

पुत्तलिका, स्त्री, (लघुकाष्ठदन्तदक्षधातुरत्नादिनिर्म्मितप्रतिमूर्त्तिः । पुत्तली इवेति स्वार्थे कनि ईकारस्य ह्रस्वे टापि निष्पन्ना ॥

पुत्तली, स्त्री, (पुत्तं गमनं लाति आदत्ते इति । ला + कः । ततो ङीष् ।) स्त्रदादिनिर्म्मितप्रतिमूर्त्तिः । यथा, उत्तरकामाख्यातन्त्रे ॥
"अमावास्यां समासाद्य मध्यरात्रौ विचक्षणः ।
स्त्रणमयीं पुत्तलीं कृत्वा दीपादिभिरलङ्कृताम् ॥"

पुत्तिका, स्त्री, (पुत्तं दन्तस्तनो भ्रमणमस्त्यस्या इति । पुत्त + ठन् । ततष्टाप् ।) मधुमक्षिकाविशेषः । तत्पर्य्यायः । पतङ्गिका २ । इत्यमरः । २ । ५ । २७ ॥ (पिपीलिकाप्रभेदः । यथा, मनुः । ५ । २३८ ।
"धर्म्मं शनैः सञ्चिनुयात् वल्मीकमिव पुत्तिकाः ।
परलोकसहायार्थं सर्व्वभूतान्यपीडयन् ॥")

पु(त्र)त्रः, पुं, त्रायते पुन्नाम्नो नरकात् । पा + "सर्व्वधातुभ्यः ष्ट्रन्" उणा० ४ । १५९ । इति ष्ट्रन् । पुंसन्तानः । पुन्नामनरकत्राता । पुत्र इति वेटा इति च भाषा । तत्पर्य्यायः । आत्मजः २ तनयः ३ सूनुः ४ सुतः ५ । इत्यमरः । २ । ६ । २७ ॥ तनूजः ६ अपत्यम् ७ दायादः ८ कुलाधारकः ९ नन्दनः १० आत्मजन्मा ११ द्वितीयः १२ प्रसूतिः १३ स्वजः १४ । इति शब्दरत्नावली ॥ अस्य निरुक्तिर्यथा,—
"पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥"
इति महाभारते । १ । ७४ । ३७ ॥
(यथा च रामायणे । २ । १०७ । १२ ।
"पुन्नाम्नो नरकात् यस्मात् पितरं त्रायते सुतः ।
तस्मात् पुत्र इति प्रोक्तः पितॄन् यः पाति सर्व्वतः ॥")

स च द्वादशविधः यथा,—
"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादो बान्धवश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयन्दत्तश्च शौद्रश्च षडदायादबान्धवाः ॥"*॥
तेषां लक्षणानि यथा,—
"स्वे क्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम् ।
तमौरसं विजानीयात् पुत्रमग्र्यमकल्पितम् ॥१॥

यस्तत्सुतः प्रमीतस्य क्लीवस्य व्याधितस्य वा ।
स्वधर्म्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः ॥२॥
माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ॥३॥
सदृशन्तु प्रकुर्य्यादयं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥ ४ ॥
उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्यादयं तत्सुतः ॥५॥
मातापित्रभ्यामुत्सृष्टस्तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥ ६ ॥
पित्रैवोक्तानि कन्या तु यं पुत्रजननेऽन्वहम् ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥७॥
या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥८॥
क्रीणीयादयस्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥९॥
या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया ।
उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते ॥१०॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं समर्पयेद्यस्मै स्वयं दत्तस्तु स स्मृतः ॥११
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत् सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवः स्मृतः ॥१२॥
क्षेत्रजादीन् सुतानेवानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥"
इति मानवे ९ अध्यायः ॥ *॥

चतुर्व्विधपुत्रा यथा,—

सुमना उवाच ।

"कृतसम्बन्धिनः केचित् केचिच्चासापहारकाः ।
रिपवश्च प्रियाश्चेति स्वकर्म्मफलवर्त्तिनः ॥
भेदैश्चतुर्भिर्जायन्ते पुत्रा मित्रा स्त्रियस्तथा ।
भार्य्या पिता च माता च भ्रात्राः स्वजनबान्धवाः ॥
स्वेन स्वेन हि जायन्ते सम्बन्धेन महीतले ।
न्यासापहारभावेन यस्य यस्य हृतं भुवि ॥
न्यासस्वामी भवेत् पुत्रो गुणवान् रूपवान् भुवि ।
येन चापहृतं न्यासं तस्य गेहे न संशयः ॥
न्यासापहरणाद्दुःखं स दत्त्वा दारुणं गतः ।
न्यासस्वामी स पुत्रोऽभूत्र्यासापहारकस्य च ॥
गुणवान् रूपवांश्चैव सर्व्वलक्षणसंयुतः ।
भक्तिञ्च दर्शयेत्तस्य पुत्रो भूत्वा दिने दिने ॥
प्रियवाक्यधरो वापि बहुक्लेशं प्रदर्शयेत् ।
स्वीयं द्रव्यं समुद्धार्य्य प्रीतिमुत्पाद्य चात्मनाम् ॥
मुक्त्वा तु पोषणात्तेन तदादाय पुनर्व्रजेत् ।
यथा तेन प्रदत्तं तन्न्यासापहरणात् पुरा ॥
दुःखमेवं महत् कृत्वा दारुणं प्राणनाशनम् ।
ताडयं तस्य दत्त्वा स पुत्रो भूत्वा महागुरुः ॥
अल्पायुष्कतया भूत्वा मरणं यान्ति ते तथा ।
दुःखं दत्त्वा प्रयान्त्येवं प्रकृत्येवं पुनः पुनः ॥
यदाह पुत्र पुत्रेति प्रलापं हि करोति सः ।
तदा हास्यं करोत्येव कः स पुत्रो हि कस्य च ॥
अनेनापि हृतं न्यासं मदीयं परिचारिणा ।
व्यापहारोऽपि पिता पूर्व्वमद्यैव तस्य च ॥
पित्राचरितं मया दत्तमद्यैव हि दुरात्मनः ।

पुत्रः

दयापरश्चेत्तातापि मम प्राणा गताः किल ॥
दुःखेन महता चैव यदाहं पीडितः पुरा ।
तथा दुःखं प्रदत्त्वाहं द्रव्यं तद्ब्राह्मणोत्तमम् ॥
भोगेन सर्वमादाय चिरादिश्वास्य चौर्यवत् ।
गतोऽसि स्वगृहत्वाद्य कस्याहं सुत इङ्गयः ॥
न चैषोऽपि पिता पूर्वमद्यैव न च कस्यचित् ।
पित्राद्यत्तं मया दत्तमद्यैव च दुरात्मनः ॥
एवमुक्त्वा प्रयात्येव तं प्रहस्य पुनः पुनः ।
प्रयात्यनेन मार्गेण दुःखं दत्त्वा सुदारुणम् ॥
एवं न्यासस्य सम्बन्धात् पुत्राः किम्ते भवन्ति वै ।
संसारे दुःखबहुला दृश्यन्ते यत्र तत्र हि ॥१॥
ऋणसम्बन्धिनः पुत्रान् प्रवक्ष्यामि तवाग्रतः ।
ऋणं यस्य गृहीत्वा यः प्रयाति मरणं किल ॥
अन्नदाता सुतो भूत्वा भ्राता वाथ पिता प्रियः ।
भिन्नरूपेण वर्त्तेत अन्नदेष्टः सदैव सः ॥
गुणं नैव प्रपश्येत स क्रूरो निष्ठुराकृतिः ।
अश्नुते निष्ठुरं वाक्यं सदैव स्वजनेषु च ॥
नित्यं मिष्टं समश्नाति भोगान् भुङ्क्ते नित्यशः ।
क्रूरकर्म्मरतो नित्यं चौरकर्म्मणि नित्यशः ॥
गृहाद्द्रव्यं बलाद्धृत्वा वार्य्यमाणः प्रकुप्यति ।
पितरं मातरञ्चैव कुत्सते च दिने दिने ॥
द्रावकक्षारकश्चैव बहुनिष्ठुरजल्पकः ।
वञ्चयित्वैव सुद्राक्ष्य हृत्वा सुखेन तिष्ठति ॥
ज्ञातकर्म्मादिभिर्व्वाक्यैर्द्रव्यं गृह्णाति दारुणः ।
पुनर्व्विवाहसंयोगान्नानाभेदैरनेकधा ॥
एवं संचीयते द्रव्यं नैवमेतद्दात्यपि ।
गृहक्षेत्रादिकं सर्व्वं ममैव हि न संशयः ॥
पितरं मातरञ्चैव वदत्येवं दिने दिने ।
मुद्गरैर्मुसलैश्चैव कषाघातैस्तु दारुणैः ॥
हते तु तस्मिन् पितरि तथा मातरि निष्ठुरम् ।
निःस्नेहो निर्घृणश्चैव जायते नात्र संशयः ॥
आद्धकार्य्याणि दानानि न करोति कदाचन ।
एवंविधाश्चयः पुत्रा भवन्ति च महीतले ॥ २ ॥
रिपुपुत्रं प्रवक्ष्यामि तवाग्रे द्विजपुङ्गव ! ।
बाल्ये वयसि संप्राप्ते रिपुवद्वर्त्तते सदा ॥
पितरं मातरञ्चैव क्रीड़मानो हि ताड़येत् ।
ताड़यित्वा प्रयात्येवं प्रहस्यैव पुनः पुनः ॥
पुनरायाति तं तत्र पितरं मातरं पुनः ।
सक्रोधो वर्त्तते नित्यं वैरकर्म्मणि सर्व्वदा ॥
पितरं मारयित्वा तु मातरञ्च पुनः पुनः ।
प्रयात्येवं स दुष्टात्मा पूर्व्ववैरानुभावतः ॥ ३ ॥*॥
अथातः संप्रवक्ष्यामि यस्माज्ज्ञाभ्यो भवेत् प्रियः ।
जातमात्रः प्रियं कुर्य्याद्बाल्ये नटनक्रीड़नैः ॥
वयः प्राप्य प्रियं कुर्य्यान्मातापित्रोरनन्तरम् ।
भक्त्या संतोषयेन्नित्यं तावुभौ परिपालयेत् ॥
स्नेहेन वचसा चैव प्रियसम्भाषणेन च ।
तयोर्गुरू समाज्ञाय स्नेहेन रुदते पुनः ॥
आद्धकर्म्माणि सर्व्वाणि पिण्डदानादिकां क्रियाम् ।
करोत्येवं सुदुःखार्त्तेभ्यो यात्रां प्रयच्छति ॥
ऋणत्रयान्वितः स्नेहान्निर्य्यापयति निश्चितः ।
यस्माज्ज्ञभ्यं भवेत् कान्त प्रयच्छति न संशयः ।
पुत्रो भूत्वा महाप्राज्ञः अनेन विधिना किल ॥४॥

पुत्रः

उदासीनं प्रवक्ष्यामि तवाग्रे प्रिय ! साम्प्रतम् ॥
उदासीनेन भावेन सदैव परिवर्त्तते ।
ददाति नैव गृह्णाति न क्रुध्यति न तुष्यति ॥
नैवोपयाति संलक्ष्य उदासीनो द्विजोत्तम ! ।
तवाग्रे कथितं सर्व्वं पुत्राणां गतिरीदृशी ॥
यथा पुत्रास्तथा भार्य्या पिता माताथ बान्धवाः ।
भृत्याश्चान्ये समाख्याताः पशवस्तुरगास्तथा ।
गजा महिष्यो दासाश्च ऋणसम्बन्धिनस्त्वमी ॥"*
सुपुत्रलक्षणं यथा,—
वशिष्ठ उवाच ।
"पुत्रस्य लक्षणं पुण्यं तवाग्रे प्रवदाम्यहम् ।
पुण्यप्रसक्तो यस्यात्मा सत्यधर्म्मरतः सदा ।
बुद्धिमान् ज्ञानसम्पन्नस्तपस्वी वाग्विदांवरः ॥
सर्व्वकर्म्मसु सन् धीरो वेदाध्ययनतत्परः ।
सर्व्वशास्त्रप्रवक्ता च देवब्राह्मणपूजकः ॥
याजकः सर्व्वयज्ञानां दाता त्यागी प्रियंवदः ।
विष्णुध्यानपरो नित्यं शान्तो दान्तः सुसंयतः ॥
पितृमातृपरो नित्यं सर्व्वस्वजनवत्सलः ।
कुलस्य तारको विद्वान् कुलस्य परिपोषकः ॥
एवं गुणैः सुसंयुक्तः सुपुत्रः सुखदायकः ।"*॥
पुत्रस्य जङ्गमतीर्थत्वं यथा,—
"सर्व्वतीर्थाहृतं तोयं पुत्रतीर्थसदाहृतम् ।
यद्देवो वैष्णवश्रेष्ठो सर्व्वधर्म्मबहिष्कृतः ॥
पृथुना पुत्रतीर्थेन पवित्रोऽगात् परं पदम् ॥
सत्पुत्रं परमं तीर्थं प्राप्य सुखन्ति पूर्व्वजाः ।
पितापि ऋणमुक्तः स्याच्छ्राद्धे पुत्रे महात्मनि ॥"
वैष्णवपुत्रस्य पूर्व्वपुरुषत्राणत्वं यथा,—
"वैष्णवो यदि पुत्रः स्यात् स तारयति पूर्व्वजान् ।
पितृनधस्तना वंश्यास्तारयन्त्यतिपावनाः ॥"*॥
कुपुत्रजनने पितॄणां नरकगमनं यथा,—
"तथा यदि कुपुत्रः स्यात्तेन मज्जन्ति पूर्व्वजाः ।
सुघोरे नरके दीनाः शपन्ति च सुदुर्मुहुः ॥
यथा जलं कुम्भेन तरन्नश्यति मूढधीः ।
तथा पिता कुपुत्रेण तमस्यन्धे निमज्जति ॥
जातमात्रे कुले जन्मी संग्रहरते पितामहाः ।
किमेषोऽधो नयेदस्मानूर्द्धं वा वैष्णवो भवन् ॥"
इति पाद्मे भूमिखण्डे ११ । १२ । १८ । १२० ।
अध्यायाः ॥ * ॥
सप्तविधपुत्रा यथा,—
"वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाम्न यष्टीता स्वयम् सुतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥*॥
पुत्रमुखदर्शने पुण्यं यथा,—
पार्व्वत्युवाच ।
"गृहमागत्य प्राणेश ! तपसां फलदायकम् ।
कल्पे कल्पे ध्यासते यं तं पश्यागत्य मन्दिरम् ॥
पूर्व्वं पुत्रमुखं पश्य पुण्यबीजं महोत्सवम् ।
पुन्नामनरकत्राणकारणं भवतारणम् ॥
स्नातश्च सर्व्वतीर्थेषु सर्व्वयज्ञेषु दक्षिणा ।
पुत्रस्य दर्शनस्यास्य कलां नार्हन्ति षोड़शीम् ॥
सर्व्वदानेन यत् पुण्यं यत् पृथिव्याः प्रदक्षिणम् ।
पुत्रदर्शनपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥

पुत्रः

सर्व्वैस्तपोभिर्यत् पुण्यं यदेवानशनैर्व्रतैः ।
सत्पुत्रोद्भवपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥
यद्द्विजभोजनैः पुण्यं यदेव सुरसेवनैः ।
सत्पुत्रप्राप्तिपुण्यस्य कलां नार्हन्ति षोड़शीम् ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ६ अध्यायः ॥*॥
पुत्रोत्सवविधिर्यथा,—
"पुत्रोत्सवं नन्दश्चकार परमादरात् ।
ददौ यशोदा गोपीभ्यो ब्राह्मणेभ्यो ददौ मुदा ।
धनानि गवाक्षयूनि तैलसिन्दूरमेव च ॥"
अपि च ।
"गन्धैः सचेलैः स्नात्वा च भुक्त्वा धौते च वाससी ।
पारम्पर्य्यविधिं तत्र चकार क्षुद्भयातुरः ॥
ब्राह्मणान् भोजयामास कारयामास मङ्गलम् ।
वाद्यानि वादयामास वन्दिभ्यश्च ददौ धनम् ॥
ततो गन्धश्च सानन्दं ब्राह्मणेभ्यो ददौ धनम् ।
सद्रत्नानि प्रवालानि क्षीरकाणि च सादरम् ॥
तिलानां पर्व्वतान् सप्त सुवर्णं काञ्चनं तथा ।
रौप्यं धान्याचलं वस्त्रं गोसहस्रं मनोहरम् ॥
दधि दुग्धं घृतं राज्ञ नवनीतं घृतं मधु ।
मिष्टान्नं लड्डुकौघञ्च स्वादूनि मोदकानि च ॥
भूमिञ्च सर्व्वशस्याढ्यां वायुवेगोत्थुरङ्गमान् ।
ताम्बूलानि च तैलानि दत्त्वा तुष्टो बभूव ह ॥"
पुत्रप्रशंसा यथा,—
"धनं धान्यञ्च रत्नं वा तत् सर्व्वं पुत्रहेतुकम् ।
न भक्षितं यत् पुत्रेण तद्व्यं निष्फलं भुवि ॥
घृतकूपाधिका वापी घृतवापीसमं सरः ।
सरःघृताधिको यज्ञः पुत्रो यज्ञघृतात्परः ॥
तपोदानोद्भवं पुण्यं जन्मान्तरसुखप्रदम् ।
सुखप्रदोऽपि सत्पुत्रः प्राणेभ्योऽपि सुचिन्तितम् ।
पुत्रादपि परो बन्धुर्न भूतो न भविष्यति ॥"
पुत्रात् पराजये आनन्दयुक्तत्वं यथा,—
"नन्दः सपुलको हृष्टः सभार्यां साश्रुलोचनः ।
आनन्दयुक्ता मनुजा यदि पुत्रैः पराजिताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ । १४ । ८१
अध्यायाः ॥ * ॥
बहवः पुत्राः काम्याः । यथा,—
"एकेन बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेद्वा चाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"
मातापित्रोराज्ञाकारिकनिष्ठपुत्रस्यापि राज्यभागित्वं यथा,—
ययातिरुवाच ।
"पुत्रो यस्यनुवर्त्तेत स राजा पृथिवीपतिः ।
भवन्तः प्रतिजानन्तु पुरू राज्येऽभिषिच्यताम् ॥
प्रजाः ऊचुः ।
यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वं सोऽर्हति कल्याणं कनीयानपि स प्रभुः ।"
इति मात्स्ये २२।३४ अध्यायौ ॥ * ॥
सत्पुत्रोत्पत्तिमात्रेण पुन्नामनरकत्राणं स्वर्गगमनञ्च । यथा,—
"सत्पुत्रेण सुनिश्चेष्टाः सत्पुत्रेण दुरीतिः ।
उत्तताराण्डियात् स्वर्गं पुन्नामनरकादृतम् ॥"

इत्यग्निपुराणम् ॥

पुत्रः

अपि च।

"सत्पुत्रेण च जातेन वेणोऽपि त्रिदिवं ययौ।
पुन्नामनरकात्त्रातः स तेन सुमहात्मना॥"

इति विष्णुपुराणे। १। १३। ४१॥ *॥

विद्यादिरहितस्य पुत्रस्य निन्दा यथा,—

"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् धार्मिकः॥
एकेनापि सुपुत्रेण विद्यायुक्तेन धीमता।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वनं सुवासितं सर्वं सुपुत्रेण कुलं यथा॥
एको हि गुणवान् पुत्रो निर्गुणेन शतेन किम्।
चन्द्रो हन्ति तमांस्येको न च ज्योतिः सहस्रशः॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम्।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्रसमो रिपुः॥
धैर्य्ये तपसि दाने वा यस्य न ग्रथितं यशः।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः॥"

इति गारुडे ११४।१।५ अध्यायौ॥ *॥

स च मध्यमोत्तमाधममेदेन त्रिविधः। यथा,—

"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा।
तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः॥
तद्वीर्य्याभ्यधिकं यस्तु पुनरन्यत् समर्जति।
निगद्यति तं प्राज्ञा वदन्ति नरसुत्तमम्॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च।
ह्रासयति न यति प्राज्ञास्तमाहुः पुरुषाधमम्॥"

इति मार्कण्डेयपुराणम्॥ *॥

अपि च।

"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः।
अधमोऽश्रद्धया कुर्य्यादकर्त्तोचरितं पितुः॥"

इति महाभारतम्॥

(अनुरूपपुत्रप्राप्त्युपायो यथा,—

"ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनु परिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राभ्यक्षं प्राश्नीयात्। पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत्। ततस्तौ सह संवसतामष्टरात्रं तथाविधपरिच्छदावेव तयेदं पुत्रं जनयेताम्। या तु स्त्री श्यामं लोहिताक्षं वृढोरस्कं महाबाहुं पुत्रमाप्नुयात्। या वा ह्रस्वां ह्रस्वदुर्दीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम्। एष एवानयोरपि होमविधिः किन्तु परिवर्हवर्णवर्ज्यं स्यात् पुत्रवर्णानुरूपस्तु यथाग्नीरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात्। द्विजेभ्यः शूद्रा तु नमस्कारमेव कुर्य्यात् देवगुरुतपस्विनिन्दाभ्यश्च। या या च यथाविधं पुत्रमाप्नुयात् तस्यास्तस्यास्तां पुत्राभिधेयमनुनिगृह्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत्। ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्रमाप्नुयात् सा सा तेषां तेषां जनपदानामा-

[redacted] तविधीवक्ष्यति

पुत्रदा

वाप्या स्यात्। इत्येतत् सर्व्वं पुत्राग्निधां सन्ततिकरं कर्म्म व्याख्यातम्।"

"तथा च कुर्व्वती प्रजनेः प्रजनेः पूर्व्वं प्रवाहेत ततोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाह्यमाणायां स्त्रियः प्रजन्यं कुर्य्युः प्रजाताः प्रजाता धन्यं धन्यं पुत्रमिति तथास्या हर्षमापाद्यन्ते प्राणाः।"इति चरके शारीरस्थानेऽष्टमेऽध्याये॥)

पुत्रकः, पुं, (पुत्र+स्वार्थे संज्ञायामनुकम्पायां वा कन्।) पुत्रः। (यथा, विष्णुपुराणे।१।११।२१। तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक!।
यस्य यावत् स तेनैव खेन तुष्यति बुद्धिमान्॥") शरभः। धूर्त्तः। शैलविशेषः। वृक्षभेदः। इति मेदिनी। के, १२४॥ प्रतनूकः। अनुकम्पान्वितजनः। इति शब्दरत्नावली॥

पुत्रकन्दा, स्त्री, (पुत्रप्रदो कन्दोऽस्याः। अस्याः कन्दस्य गर्भदोषनाशेन पुत्रदात्वात् तथात्वम्।) लक्ष्मणाकन्दः। इति राजनिर्घण्टः॥

पुत्रका, स्त्री, (पुत्र+स्वार्थे संज्ञायां वा कन्। टाप्। "न यासयोः।" ७। ३। ४५। इत्यस्य "क्षुद्रकापुत्रिकाटन्द्रारकाणां वेति वक्तव्यम्।" इति वार्त्तिकोक्त्या ङीन इत्वस्य प्रत्ये।कारः।) पुत्रिका। इति शब्दरत्नावली॥

पुत्रजीवः, पुं, (पुत्रं गर्भं जीवयतीति। जीवि+अण्।) वृक्षविशेषः। जियापुता इति भाषा। तत्पर्य्यायः। श्रीपदापत्रः २। इति त्रिकाण्डशेषः॥ कुमारजीवः ३ पुत्रश्लीवकः ४। इति रत्नमाला॥ पवित्रः ५ गर्भदः ६ सुतजीवकः७॥ अस्य गुणाः। हिमत्वम्। वृष्यत्वम्। श्लेष्मगर्भजीवदात्वम्। चक्षुष्यत्वम्। पित्तघ्नमनत्वम्। दाहत्रृष्णानिवारणत्वञ्च। इति राजनिर्घण्टः॥ गुरुत्वम्। वातकारित्वम्। वृष्यत्वम्। स्वादुत्वम्। पटुत्वम्। कटुत्वम्। इति भावप्रकाशः॥

पुत्रश्लीवकः, पुं, (पुत्रं गर्भं जीवयतीति। जीवि+ण्वुल्। द्वितीयाया अलुक्।) पुत्रजीवकवृक्षः। इति रत्नमाला॥ (यथा, सुश्रुते चिकित्सितस्थाने ३९ अध्याये।
"अनेनैव विधानेन पुत्रश्लीवकजं रसम्।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित्॥")

पुत्रस्य जीवके, त्रि॥

पुत्रदा, स्त्री, (पुत्रं गर्भं ददाति सेवनेनेति। दा+कः।) वन्ध्याकर्कोटकी। लक्ष्मणाकन्दः। गर्भदात्रीत्युपः। इति राजनिर्घण्टः॥

पुत्रदात्री, स्त्री, (पुत्रं ददाति सेवनेनेति। दा+तृच्+ङीप्। वन्ध्यादोषनाशित्वादस्यास्तथात्वम्।) मालवे प्रसिद्धो लताविशेषः। तत्पर्य्यायः। वातारिः २ भ्रमरी ३ श्वेतपुष्पिका ४ वृतपत्रा ५ अतिगन्धालुः ६ वेणुजाता ७ सुवल्लरी ८। अस्या गुणाः। वातकटूष्णकफनाशित्वम्। सुरभित्वम्। सर्व्वदा पथ्यत्वम्। वन्ध्यादोषनाशित्वञ्च। इति राजनिर्घण्टः॥

पुत्रिका

पुत्रप्रदा, स्त्री, (पुत्रं प्रददाति सेवनेनेति। प्र+दा+कः। टाप्।) सर्पिका। इति राजनिर्घण्टः॥

पुत्रभद्रा, स्त्री, (पुत्रस्य भद्रमस्या इति।) वृद्धजीवन्ती। इति राजनिर्घण्टः॥

पुत्रभद्रकी, स्त्री, (पुत्रं पवित्रं भद्रकमिव पुष्पमस्याः। गौरादित्वात् ङीष्।) अजशृङ्गी। इति राजनिर्घण्टः॥

पुत्रश्रेणी, स्त्री, (पुत्राणां ततुल्यानानां श्रेणिरत्र। ङीप्।) मधुकपर्णी। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये।
"श्यामा महाश्यामा वृहद्वल्ली शुक्लिनी तिल्वकशल्यिल्लकारण्यकशुक्लपुत्रश्रेणीगवाक्षी राजवृक्षकरञ्जवयस्थाक्षगलाक्षीसुधाः सुवर्णक्षीरी चेति॥")

पुत्रघ्नः, स्त्री, (पुत्रं हन्ते इति। हन्+क्विप्।) पुत्रजनिका। यथा,—

"पुत्रघ्नः पुण्यभूमिः स्याद्वनन्तः पुत्रिकाप्रदः॥"

इति शब्दरत्नावली॥

पुत्रान्नादः, त्रि, (पुत्रस्य अन्नं तदुपहृतमन्नमत्तीति। अद्+अण्।) पुत्रान्नभोजी। तत्पर्य्यायः। कुटीचकः २। इति त्रिकाण्डशेषः॥

पुत्रिका, स्त्री, (पुत्री+स्वार्थे कन् टाप्। "केऽणः।" ७। ४। १३। इति ह्रस्वः।) कन्या। तत्पर्य्यायः। आत्मजा २ दुहिता ३ पुत्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्रिका ८ स्वजा ९ तनया १० नप्त्रिनी ११। इति शब्दरत्नावली॥ (यथा, पञ्चतन्त्रे। ३। ७२१।
"पुत्रिकाब्रवीत्। तात! अतिदहनात्मकोऽयं नाहमेनमभिलषामि॥" पुत्रीव प्रतिकृतिरस्या इति। पुत्री+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन् ह्रस्वश्च।) पुत्तलिका। यावतूलकः। इति मेदिनी। के, १२४॥ (यथा, सुश्रुते सूत्रस्थाने। १६ अध्याये।
"प्रीतोपमपालिरुभयतः स्त्रीपुत्रिकाग्निर्निर्व्वेधिमः शूलाग्रसमविषमपालिर्या योनिमः॥"
पुत्रस्वरूपत्वेन ज्ञाता कन्या। तज्जन्मजातः पुत्रस्तु कन्यादातुः पुत्रो भवतीति। यथा, मनौ। ९। १२७-१२८।
"अपुत्रोऽनेन विधिना सुतां कुर्व्वीत पुत्रिकाम्।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम्॥"
यथा च महाभारते। १। ६६। १२।
"ताः सर्व्वाभरणवत्यश्च कन्याः कमललोचनाः।
पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजापतिः॥")

पुत्रिकापुत्रः, पुं, (पुत्रिकायाः जातेऽस्याः पुत्रे स हि मदीयः पुत्रो भविष्यतीति पुत्रस्वरूपत्वेन ज्ञातायाः सुतायाः पुत्रः।) पुत्रिकायाः सुतः। स च औरससमः। यथाह वशिष्ठः।
"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥
अथवा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामप्यत्यन्ताभावयवानां

वाकुलाच्च । यथाह वशिष्ठः । द्वितीयः पुत्रिकैवेति । द्वितीयः पुत्रः कन्यैवेत्यर्थः ।" इति मिताक्षरा ॥

पुत्रिकाप्रसूः, स्त्री, (पुत्रिकायाः कन्यायाः प्रसूर्जननी ।) पुत्रिकाजननी । तत्पर्य्यायः धनसूः २ । इति शब्दरत्नावली ॥

पुत्रिकासुतः, पुं, (पुत्रिकायाः सुतः ।) पुत्रिकायाः पुत्रः । पुत्रिकैव पुत्रः । अस्य प्रमाणं पुत्रिकापुत्रशब्दे द्रष्टव्यम् ॥

पुत्रिणी, स्त्री, (पुत्रोऽस्या अस्तीति । पुत्र + इनिः + ङीप् ।) पुत्रवती । यथा,—

"सर्व्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत् ।
सर्व्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥"

इति दायभागधृतमनुवचनम् ॥

पुत्री, [न्] पुं, (पुत्रोऽस्यास्तीति । पुत्र + इनिः ।) पुत्रयुक्तः । पुत्रशब्दादस्यर्थे इनिप्रत्ययनिष्पन्नः ॥ यथा,—

"ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
पितॄणामनृणश्चैव स तस्मात्सर्व्वमर्हति ॥"

इति मनुः ॥

पुत्री, स्त्री, (पुत्र + "शार्ङ्गरवाद्यञो ङीन् । ४ । १ । ७३ । इति ङीन् । यद्वा, गौरादित्वात् ङीष् ।) सुता । इति हलायुधः ॥ अस्याः पर्य्यायः पुत्रिकाशब्दे द्रष्टव्यः । वृत्तविशेषः । इति शब्दचन्द्रिका ॥

पुत्रीयं, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । इति छः ।) पुत्रार्थम् । (यथा, महाभारते १ । ६७ । १६३ ।

"धन्यं यशस्यं पुत्रीयमायुष्यं विजयावहम् ।
इदमंशावतरणं श्रोतव्यमनसूयता ॥"

यथा च रघौ । १० । ४ ।

"ऋष्यशृङ्गादयस्तस्य सख्यः सन्तानकाङ्क्षिणः ।
आरेभिरे जितात्मानः पुत्रीयामिष्टिमित्विजः ॥"

"पुत्रीयां पुत्रनिमित्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥") पुत्रसम्बन्धि । पुत्रस्येदमित्यर्थे ईयप्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥

पुत्रेष्टिः, स्त्री, (पुत्रनिमित्तिका इष्टिरिति मध्यपदलोपी समासः ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥ यथा,—

"गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमश्चरेत् ॥"

इति स्मृतिः ॥

(अस्याः क्रियाविशेषो यथा,—

"ततः पुत्रकामा पश्चिमस्यामग्नेः स्थण्डिलस्योदक्शिरसमुपवेश्यान्वालभेत सह भार्यां यष्टेः पुत्रमाशासाना । ततश्चास्या आशासानायां ऋत्विक् प्रजापतिमभिनिर्हृत्य योनौ तस्याः कामपरिपूरणार्थं काम्यामिष्टिं निर्व्वपेद्विष्णुर्योनिं कल्पयतित्यन्वयार्था ततश्चैवाज्येन स्थालीपाकमयभिः संसार्य्य त्रिर्जुहुयात् । यथाम्नायश्चोपमन्त्रितसुदग्रार्द्धं तस्यै दद्यात् सर्व्वोदकार्थांश्च कुरुष्वेति । ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनुपरिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्रा भ्रियेणं प्राश्नीयात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवघ्रापयेत् ततस्तौ सहसंवसेतामहरात्रं तथाविधपरिच्छदावेव तथेष्टपुत्रं जनयेताम् ।

या तु स्त्री श्यामं लोहितार्द्धं वृषोरस्कं महाबाहुं पुत्रमाशासीत । या वा क्षीणा क्षणदृदीर्घकेशं शुक्लार्द्धं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिवत्सरवर्णवर्ष्मौ स्यातां पुत्रवर्णापुरूपस्तु यथाशरीरेव तयोः परिवर्हौऽन्यः कार्य्यः स्यात् ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्रेष्टिका, स्त्री, (पुत्रेष्टि + स्वार्थे कन् टाप् च ।) पुत्रनिमित्तकयागविशेषः । इति जटाधरः ॥

पुत्रौ, पुं, (दुहिता च पुत्रश्च पुत्रौ इत्येकशेषः ।) पुत्रदुहितरौ । इत्यमरः । २ । ६ । ३७ ॥ द्विवचनान्तोऽयम् ॥

पुत्र्य, त्रि, (पुत्रस्य निमित्तं संयोग उत्पातो वेति । पुत्र + "पुत्राच्छ च ।" ५ । १ । ४० । चकारात् यत् ।) पुत्रीयम् । पुत्रनिमित्तसंयोगः पुत्रनिमित्तोत्पातो वा । इति याज्ञिकाः ॥

पुथ, ह कुत्से । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । ह, पुन्थते । अन्तःस्थप्रथमादिरयमित्यन्ये । पुन्थति । इति दुर्गादासः ॥

पुथ, क क्लिथि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, पोथयति । क्लिथि दौर्गौ । इति दुर्गादासः ॥

पुथ, य हिंसे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) य, पुथ्यति पुपोथ । इति दुर्गादासः ॥

पुद्गलः, पुं (पूरणात् पुद् गलनात् गलः । ततः कर्म्मधारयः । वृद्धिह्रासवत्त्वाद्देहस्य तथात्वम् ।) देहः । (यथा, पार्श्वनाथचरिते । १२ । ११० ।

"चक्षुः शिरसि भाले च नेत्रे सर्व्वाङ्गपुद्गले ॥") आत्मा । इति शब्दरत्नावली ॥ परमाणुः । यथा,—

"स्थूला मध्यास्तथा सूक्ष्माः सूक्ष्मात् सूक्ष्मतराश्च ये ।
देहभेदा भवान् सर्व्वे ये केचित् पुद्गलाश्रयाः ॥"

इति विष्णुपुराणे ५ अंशे २० अध्यायः ॥

"पूर्य्यन्ते गलन्ति चैते पुद्गलाः । वृद्ध्यपचयभाजो येऽवयवास्तदाश्रया देहभेदाः । यथाहुः । पूरणाद्गलनाद्देहे पुद्गलाः परमाणव इति ।"

इति तट्टीकायां श्रीधरस्वामी ॥

पुद्गलः, त्रि, (पुद् यद्बहुनाम्नीलः गलो ह्रासवांश्चेति कर्म्मधारयः ।) सुन्दराकारः । इति शब्दरत्नावली ॥ रूपादिमद्द्रव्यम् । इति हेमचन्द्रः ॥

पुनः, [र्] अ, (पुनाति स्तूयते इति । पन + बाहुलकात् अर् अस्य उत्वञ्च ।) अप्रथमः । (यथा, मनुः । २ । १२० ।

"ऊर्द्धं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥")

भेदः । अवधारणम् । इत्यमरः । ३ । ३ । १५ ॥ अधिकारः । पश्चात्तरम् । इति मेदिनी ॥ रे, ७२ ॥ (यथा, रघुः । २ । ४८ ।

"भूतानुकम्पा तव चेदियं गौ-
रेका भवेत् स्वस्तिमती त्वदन्ते ।
जीवन् पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ ! पितेव पासि ॥")

पुनःपुनः [र्] अ, (पुनर् + वीप्सायां द्वित्वम् ।) वारंवारम् । तत्पर्य्यायः । सकृत् २ शश्वत् ३ अभीक्ष्णम् ४ असकृत् ५ । इत्यमरः । ३ । ४ । १२ ॥ वारंवारेण ६ पौनःपुन्यम् ७ प्रतिक्षणम् ८ । इति शब्दरत्नावली ॥ (यथा, चाणक्ये ।

"अतिथिर्बालकश्चैव राजा भार्य्या तथैव च ।
अस्ति नास्ति न जानन्ति देहि देहि पुनः-पुनः ॥")

पुनःपुना, स्त्री, नदीविशेषः । पनपुना इति भाषा । यथा,—

"कीकटेषु गया पुण्या पुण्यं राजगृहे वनम् ।
श्रवणस्याश्रमः पुण्यो नदी पुण्या पुनःपुना ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥

पुनःसंस्कारः, पुं, (पुनः पुनर्वारञ्च संस्कारः ।) द्वितीयवारोपनयनादिसंस्कारः । यथा,—

"पुनर्ब्रह्मसुतो विप्रः पुनःसंस्कारमर्हति ॥"

इति ज्योतिस्तत्त्वम् ॥

पुनरागमनं, क्ली, (पुनः पुनर्व्वारमागमनम् ।) द्वितीयवारागमनम् । फिरे आसा इति भाषा ॥ यथा—

"संवत्सरव्यतीते तु पुनरागमनाय च ॥"

इति दुर्गोत्सवपद्धतिः ॥

पुनरुक्तं, क्ली, (वच + भावे क्तः । पुनः पुनर्व्वारमुक्तम् ।) पुनर्व्वारकथनम् । यथा,—

"आपाततो यदर्थस्य पौनरुक्त्येव भाषणम् ।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ।"

इति साहित्यदर्पणम् ॥

(यथाह गौतमः । ५ । ५७—५८ ।

"शब्दार्थयोः पुनर्व्वचनं पुनरुक्तमन्यत्रानुवादात् ॥"

"पुनर्व्वचनं पुनरुक्तं तस्य विभागार्थं शब्दार्थयोरिति । तेन शब्दपुनरुक्तमर्थपुनरुक्तञ्च लभ्यते । अनुवादेऽतिव्याप्तिवारणाय अन्यत्रानुवादादिति अनुवादाभावे सतीत्यर्थः । निष्प्रयोजनं पुनरभिधानं हि पुनरुक्तं अनुवादस्तु आवृत्तरूपः सप्रयोजनक एवेति भावः । तथाच समानार्थकपूर्व्वानुपूर्व्वीकशब्दप्रयोगः शब्दपुनरुक्तम् । समानार्थकभिन्नानुपूर्व्वीकशब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तम् । आद्यं यथा घटो घट इति । द्वितीयं यथा, घटः कलश इति । एतस्य प्रमादादिना सम्भवः ॥"*॥

पुनरुक्तभिदान्तरमाह ।

"अर्थादापन्नस्य स्वशब्देन [illegible]

"पुनरुक्तमित्यनुपपन्नते। यस्मिन्नुक्ते यस्यार्थस्यौत्सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम्। इदमेव च अर्थपुनरुक्तमिति गीयते। यथा वह्निरुष्ण इति पूर्वपदार्थाभिधोक्तिरियम्। उष्णो वह्निरिति उत्तरपदार्थाभिधोक्तिः। एवं वह्निरस्ति गेहे नास्तीति विधार्थाभिधोक्तिः। जीवन् गेहे नास्ति वह्निरस्तीति निषेधार्थाभिधोक्तिः। पुनरुक्तत्वेविधत्वेदं भाष्यादि सम्मतम्। तस्यैव शब्दस्य पुनरभिधानं पर्य्यायैकाभिधानम् अन्यत् पुनरर्थपुनरुक्तमित्याहुः॥"* पुनर् + वच + कर्म्मणि क्तः। पुनःकथिते, त्रि। यथा, महाभारते। ८।४।१६।
"ब्रूहि सञ्जय! तत्त्वेन पुनरुक्तां कथामिमाम्॥")

पुनरुक्तजन्मा, [न्] पुं, (पुनरुक्तं जन्म यस्य। "द्वितीयं मौञ्जीबन्धने।" इति मनूक्तेरस्य तथात्वम्।) ब्राह्मणः। इति त्रिकाण्डशेषः॥

पुनर्जन्मन्, [न्] क्ली, (पुनर्भूयो जन्म।) पुनर्व्वारोत्पत्तिः। यथा,—
"आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्জ্জুন!।
मामुपेत्य तु कौन्तेय! पुनर्জন्म न विद्यते॥"
इति श्रीभगवद्गीतायाम्। ८। १६॥

पुनर्नवः, पुं, (पुनरपि छिन्ने भूयोऽपि नवः।) नखः। इति हेमचन्द्रः॥

पुनर्नवा, स्त्री, (छिन्नायां पुनरपि नवा। यद्वा, पुनर्भूयोभूयः नूयते स्तूयते इति। नु स्तुतौ + "कृदोरप्।"३। ३। ५७। इत्यप्। नसहाप्। ऋभ्वादित्वात् न णत्वम्।) शाकविशेषः। तत्पर्य्यायः। शोथघ्नी २ वर्षाभूः ३ प्रावृषायणी ४ कठिल्लकः ५। एता अरुणाः॥ श्वेतायाः पर्य्यायः। वृश्चीरः २ चिरोटिका ३। इति रत्नमाला॥ विशाखः ४ कठिल्लः ५ अग्निघाटिका ६ पृथ्वी ७ सितवर्षाभूः ८ घनपत्रः ९ कठिल्लकः १०। अस्या गुणाः। उष्णत्वम्। तिक्तत्वम्। कफकासकुष्ठोदरशूलास्रपाण्डुशोफाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥ भेदकत्वम्। रसायनत्वम्। आमदुर्नामनप्लीहोदरनाशित्वञ्च। इति राजवल्लभः॥ *॥
"पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका।
कटुः कषाया कथ्यर्ণः पाण्डुकुष्ठीपनी परा॥
शोफानिलगरश्लेष्महरी प्लीहोदरप्रणुत्॥ *॥
पुनर्नवा परा रक्ता रक्तपुष्पानिलाटिका।
शोथघ्नी स्तब्धवर्षाभूर्वर्षकेतुः कठिल्लकः॥
पुनर्नवाद्वया तिक्ता कटुपाका हिमा लघुः।
वातला श्लेष्मणी श्लेष्मपित्तरक्तविनाशिनी॥"
इति भावप्रकाशः॥

पुनर्भवः, पुं, (छिन्नोऽपि पुनर्भवतीति। भू + अच्।) नखः। इत्यमरः। २। ६। ८३॥ रक्तपुनर्नवा। इति राजनिर्घण्टः॥ (पुनर् + भू + भावे अप्। पुनरुत्पत्तिः। यथा, महाभारते। १। १। २५५।
"बन्धनञ्च प्रवृत्तिश्च जन्मनश्चापुनर्भवः॥"*॥

पुनर्भवी, [न्] पुं, (पुनर्भवः पुनःपुनरुत्पत्तिरस्यास्तीति। पुनर्भव + इनिः।) आत्मा। इति हेमचन्द्रः। ६। २॥

पुनर्भूः, स्त्री, (पुनर्भवति जायात्वेनेति। भू + क्विप्।) द्विरूढा। तत्पर्य्यायः। दिधिषूः २। इत्यमरः। २। ६। २३॥ "अक्षतयोनिर्व्याहृतिभिर्या पुनरुह्यते। इत्यसावन्यस्य भूत्वा अन्यस्य पुनर्भवतीति क्विपि पुनर्भूः। धिष्यते निन्दितत्वेन ग्रह्यते दिधिषूः धिष ग्रन्थे नान्नीति कूः निपातनाद्दीर्घत्वम्।" इति तट्टीकायां भरतः॥ सा त्रिविधा। यथा,—
"परपूर्व्वाक्षितयक्षन्या: सप्त प्रोक्ता यथाक्रमम्।
पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्व्विधा॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्म्मणा॥
देशधर्म्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसाभ्यस्ते सा द्वितीया प्रकीर्त्तिता॥
उत्पन्नसाहसा उत्पन्नव्यभिचारा।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्त्तिता॥"
इति मिताक्षरा॥ \॥

पुनर्भोजाति, त्रि॥

पुनर्यात्रा, स्त्री, (पुनरप्रथमा यात्रा।) शिवस्य यात्रा। सा तु आषाढ़शुक्लपञ्चीयरथद्वितीयानन्तरं तन्नवमदिवसविहिता श्रीजगन्नाथदेवस्य दक्षिणमुखयात्रा। फिरे रथ इति उल्टा रथ इति च भाषा। अस्या इतिकर्त्तव्यता यात्राशब्दे द्रष्टव्या॥

पुनर्वसुः, पुं, (पुनः पुनः शरीरेषु वसति सैवच्छरूपेणेति। पुनर् + वस + उः।) विष्णुः। (यथा महाभारते। १३। १४६। ३८।
"अग्निर्वपुर्विभुर्विष्णुः सविता विश्वयोनिः पुनर्व्वसुः॥")
शिवः। कात्यायनमुनिः। लोकभेदः। धनारम्भः। इति शब्दरत्नावली॥ नक्षत्रविशेषः। स च धनुराकृतिपञ्चतारात्मकः। यथा,—
"मध्यवर्त्मनि शरासनाकृता-
वम्बरस्य सुरमार्गमे गताः।
लिम्पिकाः सुमुखि! पञ्चतारके
पञ्चपावकमिता घटोदयात्॥"
इति कालिदासकृतरात्रिलग्ननिरूपणम्॥
तस्याधिष्ठात्री देवता अदितिः। इति जातकः॥ तच्च जातफलम्। यथा, कोष्ठीप्रदीपे।
"प्रभूतमित्रः सुतशास्त्रयत्नः
सद्रत्नकामी वरभूषणाढ्यः।
दाता प्रतापी वसुधाधिपश्रीः
पुनर्व्वसौ यस्य भवेत् प्रसूतिः॥"

पुनर्व्वसू, पुं, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतसप्तमनक्षत्रम्। तत्पर्य्यायः। यामकौ २ आदित्यौ ३। इति हेमचन्द्रः॥ द्विवचनान्तोऽयम्॥

पुन्नागः, पुं, (पुमान् नाग इव श्रेष्ठत्वात्।) वृक्षनाम ख्यातवृक्षतुल्यपुष्पवृक्षविशेषः। तत्पर्य्यायः। पुरुषः २ केशरः ३ केसरः ४ देववल्लभः ५। इत्यमरः। २। ४। २५॥ कुभोकः ६ रक्तकेशरः ७। इति रत्नमाला॥ पुन्नामा ८ पाटलद्रुमः ९ रक्तपुष्पः १० रक्तरेणुः ११ अरुणः १२। अस्य पुष्पगुणाः। मधुरत्वम्। शीतत्वम्। सुगन्धित्वम्। पित्तनाशित्वम्। भूरितो द्रावणत्वम्। देवताप्रसादनत्वञ्च। इति राजनिर्घण्टः॥ कषायत्वम्। कफरक्तनाशित्वञ्च। इति राजवल्लभः॥ \॥
सितोत्पलः। जातीफलः। नरश्रेष्ठः। पाण्डुनागः। इति मेदिनी। गे, ४६॥

पुन्नाटः, पुं, (पुन्नाड़ + एषोदरादित्वात् डस्य टः।) चक्रमर्दः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"चक्रमर्दः प्रपुन्नाटो दद्रुघ्नो मेवलोचनः।
पन्नाटः स्यादेड़गजचक्री पुन्नाट इत्यपि॥")

पुन्नाड़ः, पुं, (पुमांसं नाड़यतीति। नड़ बंधे + "कर्म्मण्यण्।"३। २। १। इत्यण्।) चक्रमर्दः। इति राजनिर्घण्टः॥

पुन्नामनरकः, पुं, (पुरिति नाम यस्य स पुन्नामा। पुन्नामा चासौ नरकश्चेति कर्म्मधारयः।) पुत् इतिनामकनरकविशेषः। तच्च षोड़शविधपापैः पतति। यथा,—
ब्रह्मोवाच।
"परदाराभिगमनं पापानाञ्चोपसेवनम्।
पारुष्यं सर्व्वभूतानां प्रथमं नरकं स्मृतम्॥
फलस्तेयं महापापं फलार्हस्य च पाटनम्।
पाटनं वृक्षजातीनां द्वितीयं परिकीर्त्तितम्॥
वर्ज्यादानं तथा हिंसमवध्यवधबन्धनम्।
विवादित्वमहेतूत्थं तृतीयं नरकं स्मृतम्॥
भयदं सर्व्वसत्त्वानां नरभूतिविनाशनम्।
भंशनं निजधर्म्माणां चतुर्थं नरकं स्मृतम्॥
मारणं मित्रकौटिल्यं मिथ्याभिशपनञ्च यत्।
मिष्टैकाशनमित्युक्तं पञ्चमञ्च विषाशनम्॥
प्ररोहणं यन्त्रकरं यमनं योगनाशनम्।
यानसख्यस्य हरणं षष्ठमुक्तं नृपाशनम्॥
राजभागस्य हरणं राजजायानिषेवणम्।
राज्ये स्वहितकारित्वं सप्तमं नरकं स्मृतम्॥
क्लीबत्वं लोलुपत्वञ्च लब्धधर्म्मार्थनाशनम्।
नाल्पकर्म्मकरं प्रोक्तमष्टमं नरकं स्मृतम्॥
ब्रह्मस्वहरणञ्चैव ब्राह्मणानां विनिन्दनम्।
विरोधो ब्राह्मणैश्चोक्तो नवमो नरकक्षयम्॥
ग्लिष्टाचारविनाशञ्च मित्रद्वेषं ग्लिष्टोर्व्वरधम्।
ग्राह्यस्त्रेयं धर्म्मशून्यो दशमं परिकीर्त्तितम्॥
षड़ङ्गनिधनं घोरं षाड़्गुण्यप्रतिषेधनम्।
एकादशममेवोक्तं नरकं सन्निरुक्तम!॥
सन्निरुक्तं सदा चैवमनाचारमसत्क्रिया।
संस्कारपरिहीणत्वमिदं द्वादशमं स्मृतम्॥
हानिर्धर्म्मार्थकामानामपवर्गस्य हारणम्।
स्वर्गघ्नञ्च मतिदं त्रयोदशमुदाहृतम्॥
समलं धर्म्महीनञ्च यद्वृत्तं यच्च दोषजम्।
चतुर्दशकमेवोक्तं नरकं सद्विगर्हितम्॥
अज्ञानाच्चानिष्टत्वमग्रीष्मसुभाषितम्।
गर्ह्यं तत् पञ्चदशकमसत्यवचनानि च॥

आलस्यं वै षोड़शकमाक्रोशश्च विशेषतः ।
सर्व्वस्य चाततायित्वमगारेष्वग्निदापनम् ॥
इच्छा च परदारेषु नरकाय निगद्यते ।
ईर्ष्याभावश्च सभ्येषु औद्धत्यन्तु विगर्हितम् ॥
एतेषु पापैः पुरुषः पुन्नामनरके पतेत् ।
पुन्नामनरकं घोरं विनाशं प्राह सर्व्वतः ॥
एतस्मात् कारणात् साध्वस्तः पुत्रो निगद्यते ॥"
इति वामने ५८ अध्यायः ॥

पुप्फुलः, पुं, (पुप्फुस् । पृषोदरादित्वात् सस्य लत्वम् ।) उदरस्थवायुः । इति भूरिप्रयोगः ॥

पुप्फुसः, पुं, (पुप्फुसवत् आकृतिरस्याकृतीति । अच् ।) पद्मबीजाधारः । तत्पर्य्यायः । बीजकोषः २ वराटकः ३ । (पुप्फुस इति ग्रन्थोऽस्यास्तीति ।) वामपार्श्वस्थमलाशयः । फोँफड़ा इति फुलघरा इति च भाषा । तत्पर्य्यायः । कोष्ठः २ । इति शब्दचन्द्रिका ॥ रक्तपीनसः ३ । इति क्षेमचन्द्रः ॥ तिलकम् ४ क्षोम ५ । इत्यमरः ॥ क्षोमम् ६ । इति भरतः ॥ फुप्फुसोऽपि पाठः ॥ (फुप्फुसशब्दोऽस्य विषयो ज्ञातव्यः ॥)

पुमान् [न्] पुं, (पाति रक्षतीति । पा + "पातेर्डुमुसुन् ।" उणा० । ४ । १७७ । इति डुमुसुन् । डित्त्वात् टिलोपः ।) मनुष्यजातिपुरुषः । तत्पर्य्यायः । पञ्चजनः २ पूरुषः ३ पूरुषः ४ नृ ५ । इत्यमरः । २ । ६ । १ ॥ (यथा,—

"स्वदेशजातस्य जनस्य लोके
गुणाधिके पुंसि भवत्यवज्ञा ।
निजाङ्गना यद्यपि रूपराशि-
स्तथापि पुंसां परदारचेष्टा ॥"
इत्युद्भटः ॥)

मनुष्यजातिः । इति केचिदिति भरतः ॥ पुंलिङ्गमात्रञ्च ॥ (कूटस्थपुरुषः । यथा, विष्णुपुराणे । १ । १ । २ ।

"सदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत्प्रपञ्चसः
स नोऽस्तु विष्णुर्निजमूर्त्तिसुक्तिदः ॥"

"अक्षरमिति विकारं निराकरोति पुमान् कूटस्थः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

पुर, प्र अग्रगत्याम् । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) पुः, पुरति अग्रेऽतिशयेन कनिष्ठस्य अग्रे गच्छतीत्यर्थः । पोरिता । इति दुर्गादासः ॥

पुरं, क्ली (पूर्य्यते पूर्य्यते इति । पॄ पूर्त्तौ + कः ।) गेहम् । देहः । पाटलिवृक्षः । पुष्पादीनां दलादृतिः । इति मेदिनी । रे, ५८—५६ ॥ नागरमुस्ता । इति रत्नमाला ॥ धर्म्म इति शब्दरत्नावली ॥ गृहोपरिगृहम् । इति विश्वः ॥

पुरं, क्ली स्त्री, (पिपर्त्तीति । पॄ + मूलविभुजादित्वात् कः । यद्वा, पुरति अग्रे गच्छतीति । पुर + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) चतुरादिविग्रिहस्थानम् । इति श्रीधरस्वामी ॥ बहुधामीयशब्दारस्थानम् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । पूः २ पुरी ३ नगरम् ४ पत्तनम् ५ स्थानीयम् ६ कटकम् ७ पट्टम् ८ निगमः ९ पुटभेदनम् १० । इति शब्दरत्नावली ॥ तस्य लक्षणादि यथा,—

मनुरुवाच ।

"राजा सहायसंयुक्तः प्रभूतयवसेन्धनम् ।
रम्यमाणञ्च सामन्तं मध्यमन्देशमावसेत् ॥
वैश्यशूद्रजनप्रायमनाहार्य्यमथा परैः ।
किञ्चिद्ब्राह्मणसंयुक्तं बहुकर्म्मकरन्तथा ॥
अदेवमातृकं रम्यमगुरुक्तजनान्वितम् ।
करैरपीड़ितं वापि बहुपुष्यफलन्तथा ॥
अगम्यं परचक्राणां तद्वासयगृहमादिशेत् ।
समदुःखसुखं राज्ञः सततं प्रियमास्थितम् ॥
सरीसृपविहीनञ्च व्याडसस्करवर्ज्जितम् ।
एवंविधं यथालाभं राजा विषयमावसेत् ॥
एतद्दुर्गं नृपः कुर्य्यात् यस्मात्तमेकतमं बुधः ।
वनदुर्गं महीदुर्गं नरदुर्गमथैव च ॥
वार्क्षमेवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ! ।
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिघोपेतं चयाट्टालकसंयुतम् ।
धनुर्नीयन्तमुख्यैश्च शतघ्नञ्च समाहृतम् ॥
गोपुरं सकवाटञ्च तत्र स्यात् सुमनोहरम् ।
सपताकं गजारूढो येन राजा विशेत् पुरम् ॥
चतसश्च तथा कार्य्या वीथयः सर्व्वतोमुखाः ।
एकस्मिंस्तत्र वीथ्यग्रे देववेश्म भवेद्दृढम् ॥
द्वितीये वापि वीथ्यग्रे राजवेश्म विधीयते ।
धर्म्माधिकरणं कार्य्यं वीथ्यग्रे च तृतीयके ॥
चतुर्थे चैव वीथ्यग्रे गोपुरन्तु विधीयते ॥
आयतं चतुरस्रं वा वृत्तं वा कारयेत् पुरम् ।
सुक्तिहीनं त्रिकोणञ्च यवमध्यन्तथैव च ॥
अर्द्धचन्द्रप्रकारञ्च वज्राकारञ्च कारयेत् ॥
अर्द्धचन्द्रं प्रशंसन्ति नदीतीरेषु तद्वसेत् ।
अन्यत्र तन्न कर्त्तव्यं प्रयत्नेन विजानता ॥
राज्ञा कारागृहं कार्य्यं दक्षिणे राजवेश्मनः ।
तस्यापि दक्षिणे भागे गजस्थानं विधीयते ॥
गजानां प्राङ्मुखा शाला कर्त्तव्या वाप्युदङ्मुखा ।
आग्नेये च तथा भागे आयुधागारमिष्यते ॥
महानसञ्च धर्म्मज्ञ ! कर्म्मशालास्तथापराः ।
गृहं पुरोधसः कार्य्यं वामतो राजवेश्मनः ॥
मन्त्रिवेदविदाञ्चैव चिकित्सकर्त्तुरेव च ।
तत्रैव च तथा भागे कोष्ठागारं विधीयते ॥
गवां स्थानं तथैवाश्च तुरगाणाञ्चथैव च ।
उत्तराभिमुखा श्रेणी तुरगाणां विधीयते ॥
दक्षिणाभिमुखा वाथ परिग्रिष्टास्तु गर्हिता ।
तुरगास्तु तथा धार्य्याः प्रदीपैः सार्व्वरात्रिकैः ॥
कुक्कुटान् वागरांश्चैव मर्कटांश्च नराधिप ! ।
धारयेदश्वशालायां सवत्सां धेनुमेव च ॥
अजाश्च धार्य्या यत्नेन तुरगाणां हितैषिणा ।
गोगजाश्वादिशालासु तत्पुरीषस्य निर्गमम् ।
अस्तं गते न कर्त्तव्यं देवदेवे दिवाकरे ॥
ततश्चैव यथास्थानं राजा विज्ञाय सारथिम् ।
दद्यादावसथस्थानं सर्व्वेषामनुपूर्व्वशः ॥
योधानां मुख्यिनाञ्चैव सर्व्वेषामविशेषतः ।
दद्यादावसथान् दुर्गे मन्त्रकालविदां शुभान्
गोवैद्यानश्ववैद्यांश्च गजवैद्यांस्तथैव च ।
आहरेत भृशं राजा दुर्गे परबलारुजः ॥
कुशीलवानां विप्राणां दुर्गे स्थानं विधीयते
न बहूनामतो दुर्गे विना कार्य्यं तथा भवेत्
सर्व्वं निरर्थकं कार्य्यं विना दुर्गं महीपते ! ।
दुर्गे यन्त्राः प्रकर्त्तव्या नानाप्रहरणान्विताः ।
सहस्रघातिनो राजंस्तेषु रक्षा विधीयते ॥
दुर्गाद्वाराणि गुप्तानि कार्य्याण्यपि च भूभुजा
सञ्चयश्चाच सर्व्वेषामायुधानां विधीयते ॥
धनुषां चेषणीयानां तोमराणाञ्च भार्गव ! ।
शराणामथ खड्गानां कवचानाञ्तथैव च ।
शतघ्नीनाञ्च कुन्तानां परिघैः सह पार्थिव ।
अक्षणाञ्च प्रभूतानां सुदृढानाञ्तथैव च ॥
त्रिशूलानां पट्टिशानां कुणपानाञ्च पार्थिव !
प्रासानाञ्च सशूलानां शक्तीनाञ्च नरोत्तम !
परश्वधानां चक्राणां वर्ष्मणाञ्चर्म्मभिः सह ।
कुद्दालरज्जुवेत्राणां पिटकानाञ्तथैव च ॥
हैसुकानाञ्च दात्राणामङ्गारस्य च सञ्चयः ।
सर्व्वेषां मुख्यभाण्डानां सञ्चयस्त्रय इष्यते ॥
वादित्राणाञ्च सर्व्वेषामौषधीनाञ्तथैव च ।
यवसानां प्रभूतानामिन्धनस्य च सञ्चयः ॥
गुडानां सर्व्वतैलानां गोरसानाञ्तथैव च ।
वसानामथ मज्जानां स्नायूनामस्थिभिः सह ॥
गोचर्म्मपटहानाञ्च धान्यानां सर्व्वतस्तथा ।
तथैव पर्पटानाञ्च यवगोधूमयोरपि ॥
रत्नानां सर्व्ववस्त्राणां लोहानाञ्चाप्यशेषतः ।
कलायमुद्गमाषाणां चणकानां तिलैः सह ॥
तथा च सर्व्वशस्त्राणां पांशुगोमययोरपि ।
गुडसर्ज्जरसं भूर्जतुलाञ्चाज्यञ्च टङ्कणम् ॥
राजा सञ्चिनुयाद्दुर्गे यच्चान्यदपि किञ्चन ॥
कुम्भाञ्चाग्नीषिधाः कार्य्या बालसिंहादयस्तथ
व्याघ्राञ्च पक्षिणश्चैव विरुद्धा ये परस्परम् ॥
स्थानानि च विरुद्धानां सुगुप्तानि पृथक् पृथक्
कर्त्तव्यानि महाभाग ! यत्नेन पृथिवीक्षिता ॥
उक्तानि चाप्युक्तानि राजद्रव्याण्यशेषतः ।
सुगुप्तानि पुरे कुर्य्याज्ज्ञानां हितकाम्यया ॥
जीवकर्षभकाकोलीशामलञ्च पलङ्कषम् ।
मालपर्णीं पृश्निपर्णीं मुद्गपर्णीं तथैव च ॥
माषपर्णीं च मेदे द्वे मृद्वीके द्वे वलाद्वयम् ।
वीरा शतावरी दृष्टीया वृहती कण्टकारिका ।
भङ्गी पद्मचाटकौ द्वौ वर्षाभूदर्भवुकाः ।
मधुपर्णी विदार्य्यौ द्वे महाश्रुद्रा महालया ।
धन्वना सह देवाह्वा कटुकैरण्डकं विषम् ।
पर्णाग्रुगाकन्दहीका पलगुल्कर्ज्जूरयष्टिका ॥
शुक्रातिशुक्रकाश्मर्य्यश्छत्रातिच्छत्रवीरकाः ॥
इक्षुरिक्षुविकाराश्च फाणितान्याश्च सत्तम ! ।
सिंही च सहदेवी च विश्वदेवाटरूषकम् ॥
मधुकं पुष्पकं सारा घृतपुष्पा मधूलिका ।
घृतावरीमधूके च प्रियालञ्चालमेव च ॥
आम्रगुप्ता कट्फलाख्या दारदा राजशीर्षिका

पुरं

कालशाकं पद्मबीजं गोवल्ली मधुपल्लिका ।
घृतपाकी कुलिङ्काची काकजिङ्घोरुपत्रिका ॥
दर्व्वारुचपुषौ चोभौ गुञ्जारक्तपुनर्नवे ।
कपोतका तु काश्मीरी विम्बग्वालुकेश्वरम् ॥
शूकधान्यानि सर्व्वाणि शमीधान्यानि यानि च ।
क्षौरं क्षौद्रं तथा शुक्रं मज्जा तैलं वसा घृतम् ॥
निकोचाभिषुकास्फोटं वातसामाकमालकम् ।
एवमादीनि चान्यानि विद्येयो मधुरो गणः ॥
राजा सन्निवसेत् सर्व्वं पुरे निरवशेषतः ।
दाडिमाम्लातकाम्लाम्ल तिन्तिड़ीकाम्लवेतसम् ॥
भव्यं कर्कन्धु लकुचं करमर्दकरूषकम् ।
बीजपूरकनाड्डीरं मालती राजबन्धुकम् ॥
कौटकङ्कयपर्णानि ह्रयोर्ल्लिकयोरपि ।
पारेवतं नागरकं प्राचीनामलकमेव च ॥
कपित्थामलकी चुक्रं फलं दन्तशठस्य च ।
जम्बीरं नवनीतञ्च सौवीरकतुषोदके ॥
सुरासवञ्च मद्यानि मस्तुतक्रदधीनि च ।
शुक्लानि चैव सर्व्वाणि क्षीरान्नक्षरणं हिता: ॥
एवमादीनि सर्व्वाणि राजा सन्निवसेत् पुरे ।
सैन्धवोद्भिदपाटेयपाक्यसाम्लदरोमकम् ।
कुष्ठशौवर्च्चलविटं बालकेयं यवाक्षयम् ॥
औषक्षारं कालभक्ष्म विद्येयो लवणो गणः ।
एवमादीनि सर्व्वाणि राजा सन्निवसेत् पुरे ॥
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
कुठेरकं समरिचं शिग्रुभल्लातसर्षपाः ॥
कुष्ठाजमोदा किणिही हिङ्गुमूलकधान्यकम् ।
कारवी कृष्णिकाजाज्यः सुसवः कालमालिका ॥
पलिञ्जकोऽथ लशुनं भल्लातं हरसक्तथा ।
कायस्था च वयःस्था च हरितालं मनःशिला ॥
अम्लता च रुदन्ती च रोहिषं कुङ्कुमं तथा ।
वचा हरिद्रकाक्षीरं गुञ्जकी कृपुषा तथा ॥
सर्व्वपित्तानि मूत्राणि प्रायो हरितकानि च ।
सङ्कराणि च मूलानि यहिश्वारिविषाणि च ॥
पलानि चैव च तथा क्षुण्णेला हिङ्गुपत्रिका ।
एवमादीनि चान्यानि गणः कटुकसंज्ञकः ।
राजा सन्निवसेद्दुर्गे प्रयत्नेन नृपोत्तम ! ॥
सुरक्तचन्दनश्रीवेरक्तनमालकदारवः ।
हरिद्रामलकीक्षीरं रक्तमालकवस्तुकम् ॥
दूर्व्वापटोलकटुकादन्तित्वक्पत्रकक्षुराः ।
किराततिक्तकं निम्बं विषा चातिविषा तथा ॥
ताक्षीक्षपत्रं तगरं सप्तपर्णविकङ्कताः ।
काकोदुम्बरकोदीच्यसुवयः किणिही तथा ॥
षड्ग्रन्था रोहिणी मांसी पर्पटं मध्यन्तिका ।
रसाञ्जनं भृङ्गराजं पतङ्गी परिपेलवम् ॥
दुग्धघ्नी गुरुची कामा श्यामाकं गन्धनाकुली ।
चतुष्पाणी व्याघ्रनखमम्बका चतुरङ्गुला ॥
रम्भा चैव कुथापुष्पी तारास्फोता हरेणुका ।
वेत्राग्रो वेतसस्तम्बो विषाणी लोहमञ्जनम् ॥
मालती करवीरक्षाख्या विषाङ्गी जिङ्किका तथा ।
पर्य्यटच गुडूची च गवाक्षित्तकसंज्ञकः ॥
एवमादीनि चान्यानि राजा सन्निवसेत् पुरे ।
अभयामलके चोभे तथैव च विभीतकम् ॥

पुरः

प्रियङ्गुधातकीपुष्पं मोचलोधार्জ্জुनासनाः ।
अनन्ताम्बो सुरागङ्गा प्रियोनाकं कदम्बकं तथा ॥
भूर्जपत्रं शिलोद्भेदं पाटलापत्रलोमकम् ।
समङ्गा चित्रतामूलं कार्पासो गैरिकाञ्जनम् ॥
विद्रुमं समधूच्छिष्टं कुम्भीकाशुसुदोत्पलम् ।
न्यग्रोधोदुम्बराश्वत्थकिंशुका ग्रिंशुपा शमी ॥
पियालपिशुका शालशिरीषं पद्मकन्तथा ।
विल्वोऽथिमन्थः प्रक्षश्च श्यामाकयवकोद्रवम् ॥
राजादनं करीरश्च धान्यकप्रियकौ तथा ।
शाकोटाशोकवदराः कदम्बखदिरद्वयम् ॥
एषां पत्राणि साराणि मूलानि कुसुमानि च ।
एवमादीनि चान्यानि कषायाख्यो गणो मतः ॥
प्रयत्नेन नृपश्रेष्ठः राजा सन्निवसेत् पुरे ।
कीटाश्च मारणे योग्या यज्ञतायास्तथैव च ॥
वातधूमाम्बुमार्गाणां दूषणानि तथैव च ।
धार्य्याणि पार्थिवैर्दुर्गे तानि वक्ष्यामि भारत ! ॥
विषाणान्धारणं कार्य्यं प्रयत्नेन महीभुजा ।
विचित्राश्च गदा धार्य्या विषघ्नाममलाक्षया ॥
रक्तोभृतपिशाचघ्नाः पापघ्नाः पुष्टिवर्द्धनाः ।
कलाविदश्च पुरुषाः पुरे धार्य्याः प्रयत्नतः ॥
भीतान् प्रमत्तान् कुपितान् तथैव च विमानितान् ।
कुभृत्यान् पापशीलांश्च न राजा वासयेत् पुरे ॥
यन्त्रायुधाढ्यालचयोपपन्नं
समप्रधान्यौषधिसंप्रयुक्तम् ।
बलिग्रजनैश्चान्वितमावसेत
दुर्गं सुगुप्तं नृपतिः सदैव ॥"
इति मात्स्ये राजधर्म्मे दुर्गसम्पत्तिर्नाम १९१ अध्यायः ॥ * ॥
पुरे वर्ज्जनीयानि यथा,—
"पुरे वृक्षप्रतोली च परिखातोरणध्वजाः ।
प्रासादाध्वप्रपारामवापीवेश्याः सती त्वरी ॥"
इति कविकल्पलता ॥
अवशिष्टं नगरशब्दे द्रष्टव्यम् ॥

पुरः, पुं, (पिपर्त्तीति । पॄ + कः ।) गुग्गुलुः । इत्यमरः ।२।४।३६॥ (अस्य पर्य्यायो यथा,—
"गुग्गुलुर्नैर्ऋतश्च अटायुः कौशिकः पुरः ।
कुम्भोलूखलकं क्लीवे महिषाक्षः पलङ्कषः ॥"
"अल्पं तीक्ष्णमजीर्णञ्च यवायं श्लेष्मनाशनम् ।
मत्तं रोचनमेतत् सम्यग्गुग्गुलार्थी पुरंसेवकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पीतभिक्षुटी । इति शब्दचन्द्रिका ॥

पुरः, [स्] अ, (पूर्व्वस्मिन् पूर्व्वस्मात् पूर्व्वो वा एवं पूर्व्वस्याः पूर्व्वस्मिन्नित्यादि । पूर्व्व + "पूर्व्वाधरावराणामसि पुरधवश्चैषाम् ।"५ । ३ । ३९ । इति असि तदयोगेन पुर् इत्यादेशश्च ।) अग्रतः । इत्यमरः । ३ । ४ । ७ ॥ (यथा, कुमारे । ४ । ३ ।
"अयि जीवितनाथ ! जीवसी-
त्यभिधायोत्थितया तया पुरः ।
दहशे पुरुषाकृति क्षितौ
हरकोपानलभस्म केवलम् ॥")
प्राच्यां दिशि । प्रथमे काले । (यथा, अभिज्ञानशाकुन्तलायाम् । ७ अङ्के ।

पुरगाः

"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् प्रथमं तदन्तरं पयः ।
निमित्तनैमित्तिकयोरयं विधि-
स्तव प्रसादस्य पुरस्तु सम्पदः ॥")
पुरार्थे । अतीते । इति नष्टीकार्य्या भरतः ॥

पुरःसरः, त्रि, (पुरोऽग्रे सरति गच्छतीति । सृ + "पुरोऽव्ययोऽग्रेषु सर्त्तेः ।" ३ । २ । ११८ । इति टः ।) अग्रगामी । इत्यमरः ।२।८।७२॥ (यथा, महाभारते । ४ । १६ । २२ ।
"यस्याः पुरःसरा ह्यासन् पृष्ठतश्चानुयायिनः ।
साहमद्य सुरेणायाः पुरःपश्चाच्च गामिनी ॥")
अस्य पर्य्यायः अग्रसरशब्दे द्रष्टव्यः ॥

पुरञ्जनः, पुं, (पुरं देहरूपं जनयतीति । जनि + बाहुलकात् डः ।) जीवः । यथा,—
"पुरञ्जनं पुरञ्जनं विद्यात् यदुजनकमात्मनः पुरम् ।
एकद्विचितुष्पादं बहुपादमपादकम् ॥"
इति श्रीभागवते । ४ । २९ । २ ॥

पुरञ्जनी, स्त्री, (पुरञ्जन + गौरादित्वात् ङीष् ।) बुद्धिः । यथा,—
"न विदाम वयं सम्यक् कर्त्तारं पुरुषर्षभ ! ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥
राजन् ! मदीयाः सर्व्वे ते मामाहुश्च पुरञ्जनीम् ॥"
"बुद्धिस्तु प्रमदां विद्यान्ममाहमिति यत् कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽखिलान्
गुणान् ॥"
इति श्रीभागवते । ४ स्कन्धे । २५ । २९ अध्यायौ ॥

पुरञ्जयः, पुं, (पुरं शत्रुपुरं जयतीति । जि + खच् ।) सूर्य्यवंशीयराजविशेषः । सत्यव्रताय: । काकुत्स्थः २ । इति त्रिकाण्डशेषः ॥ (यथा, भागवते । ९ । ६ । १२ ।
"पितर्य्यूपरतेऽभ्येत्य विकुक्षिः पृथिवीमिमाम् ।
भ्रातरीजे हरिं यज्ञैः भ्रात्राद इति विश्रुतः ॥
पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः ।
ककुत्स्थ इति चाप्युक्तः शत्रूणां नामभिः ॥")
पूरुवंशीयः क्षञ्जयपुत्रः । यथा, हरिवंशे । ३१ । १८ ।
"क्षञ्जयस्याभवत् पुत्रो वीरो राजा पुरञ्जयः ।
जनमेजयो महाराज ! पुरञ्जयसुतोऽभवत् ॥"
पुरं जयतीति । पुर + जि + खच् ।) पुरञ्जय-कर्त्तरि, त्रि ॥ (यथा, महाभारते । १ । १०२ । ४५ ।
"स्वार्थमेव तैरपि राष्ट्राणि जग्मुः परपुरञ्जय ! ॥")

पुरटं, क्ली, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अटन् ।) सुवर्णम् । यथा,—
"हरिः पुरटसुन्दरद्युतिकदम्बसन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः प्रभोनन्दनः ॥"
इति विदग्धमाधवः ॥

पुरणः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ पालनादौ + "कृपॄवृजिमन्दिनिधाञः क्युः ।" उणा० २ । ८१ । इति क्युः । उत्वं रपरत्वञ्च ।) सप्तमः । इत्युणादिकोषः ॥

पुरतः, [स्] व, (पुरति अग्रे गच्छतीति । पुर + बाहुलकात् अतसुच् ।) अग्रतः । इत्यमरः ।३।४।७॥ (यथा, राजतरङ्गिण्याम् । १ । १०७ ।
"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतस्ततः ।
कन्थे नीलनिचोलिन्यौ स कैंचिच्चारुलोचने ॥")

पुरतटी, स्त्री, (पुरस्थिता तटीव ।) हट्टी । क्षुद्रहट्टः । इति हारावली । १६४ ॥

पुरद्वारं, क्ली, (पुरस्य द्वारम् ।) नगरद्वारम् । तत्पर्य्यायः । गोपुरम् २ । इत्यमरः ।२।२।१६॥ (यथा, मनुः । ५ । ६२ ।
"दक्षिणेन व्रतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मनः ॥")

पुरद्विट्, [ष्] पुं, (पुरं द्वेष्टीति । द्विष् + क्विप् । मयनिर्म्मितानां पुरविशेषाणां दाहकत्वादस्य तथात्वम् ।) शिवः । इति जटाधरः ॥ (यथा, भागवते । ४ । ६ । ७ ।
"स इत्थमादिश्य सुरानजस्तु तैः
समन्वितः पितृभिः सप्रजेशैः ।
ययौ सधिष्ण्यान्निलयं पुरद्विषः
कैलासमद्रिप्रवरं प्रियं प्रभोः ॥")

पुरन्दरं, क्ली, (पुर + दारि + खच् ।) पविकम् । इति शब्दचन्द्रिका ॥

पुरन्दरः, पुं, (अरीणां पुरो दारयतीति । दृ + णिच् + "पूःसर्व्वयोर्दारिसहोः ।" ३ । २ । ४१ । इति खच् । "वाचंयमपुरन्दरौ च ।" ६ । ३ । ६१ । इति निपातितः ।) इन्द्रः । इत्यमरः ।१।१।४४॥ (यथा, महाभारते । ३ । १०१ । ६ ।
"कालेयभयमन्वस्तो देवः साक्षात् पुरन्दरः ।
जगाम शरणं शीघ्रं तत्र नारायणं प्रभुम् ॥"
पुरं गेहं दारयतीति । दारि + खच् । निपातितः ।) चौरः । यथा,—
"समांसमोगा यदि पाकशाला
समांसमोगा दश धेनवः स्युः ।
पुरन्दरस्याविषयं यदि स्यात्
पुरन्दरस्यापि पुरं न याचे ॥"
इत्युद्भटः ॥

पुरन्ध्रा, स्त्री, (पुरं दारयति प्रवाहैरिति । दारि + खच् । निपातनात् साधुः । तनटाप् ।) गङ्गा । इति हारावली ॥

पुरन्ध्रिः, पुरन्ध्री } स्त्री, (स्वजनसहितं पुरं धारयतीति । धृञ् + खच् । गौरादित्वात् ङीष् । पृषोदरादित्वात् ह्रस्वो वा ।) पतिपुत्रदुहित्रादिमती । इति भरतः ॥ तत्पर्य्यायः । कुटुम्बिनी । इत्यमरः ।२।६।६॥ (यथा, रघुः ।७।२८।
"तौ स्नातकैर्बन्धुमता च राज्ञा
पुरन्ध्रिभिश्च क्रमशः प्रयुक्तम् ।
कन्याकुमारौ कनकासनस्थौ
आर्द्राचतारोपचयन्वभूताम् ॥")
स्त्रीमात्रम् । इति राजनिर्घण्टः ॥

पुरश्चरणं, क्ली, (पुरोऽग्रतश्चरणं मन्त्रजपादिपञ्चाङ्गकर्म्माचरणमिति ।) पुरस्क्रिया । सा तु स्वेष्टदेवतामन्त्रसिद्ध्यर्थं तद्देवतापूजापूर्व्वकं तन्मन्त्रजपहोमतर्पणाभिषेकब्राह्मणभोजनरूपपञ्चाङ्गकसाधना । यथा, योगिनीहृदये ।
"गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ।
ततः पुरस्क्रियां कुर्य्यान्मन्त्रसंसिद्धिकाम्यया ॥
जीवहीनो यथा देही सर्व्वकर्म्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः ॥
तस्मादादौ स्वयं कुर्य्यात् गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रं वा सर्व्वप्राणिहिते रतम् ।
स्निग्धं घ्राणविदं मित्रं नानागुणसमन्वितम् ॥
स्वयं वा सद्गुणोपेतां सपुत्रां विनियोजयेत् ॥
आदौ पुरस्क्रियां कर्त्तुं स्थाननिर्णय उच्यते ॥"
योगिनीहृदये ।
"पुण्यक्षेत्रं नदीतीरं गुहापर्व्वतमस्तकम् ।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम् ॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ॥
तुलसीकाननं गोष्ठं हृद्यशून्यं शिवालयम् ॥
अश्वत्थामलकीमूलं गोघ्राघ्राणजलमधतः ।
देवतायतनं कूलं समुद्रस्य निजं गृहम् ॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् ।
अथवा निवसेत्तत्र यत्र चित्तं प्रसीदति ॥"* ॥
तथा ।
"गृहे प्रतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् ।
कोटिर्देवालये पुण्यमनन्तं शिवसन्निधौ ॥
म्लेच्छदुष्टान्यगाचारशङ्कानङ्कविवर्ज्जिते ।
एकान्तपावने निन्दारहिते भक्तिसंयुते ॥
सदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे ।
रम्ये भक्तजनस्थाने निवसेत् तापसः प्रिये ! ॥
गुरूणां सन्निधाने च चित्तैकाग्र्यस्थले तथा ।
एषामन्यतमस्थानमाश्रित्य जपमाचरेत् ॥
यत्र ग्रामे जपेन्मन्त्री तत्र कूर्म्मं विचिन्तयेत् ॥"
गौतमीये ।
"पर्व्वते सिन्धुतीरे वा पुण्यारण्ये नदीतटे ।
यदि कुर्य्यात् पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत् ॥"
बिल्वमूलादावपि कूर्म्मचिन्ता नास्ति तदुक्तं वैद्यन्यायनसंहितायाम् ।
"पुण्यक्षेत्रं गृही तीर्थं देवतायतनं शुभम् ।
नदीतीरं तथा सिन्धुसङ्गमोऽतिमनोहरः ॥
पर्व्वतस्य गुहाक्षेत्रं तथा पर्व्वतमस्तकम् ।
बिल्वमूलं समुद्रस्य वनमुद्यानमेव च ॥
एषु स्थानेषु विप्रेन्द्र ! कूर्म्मचक्रं न चिन्तयेत् ।
ग्रामे वा यदि वा वास्तौ गृहे तत्र विचिन्तयेत् ॥"

अथ पुरश्चरणे भक्ष्यादिनियमः ।
गौतमीये ।
"पुरश्चरणकर्त्तारौ भक्ष्याभक्ष्यं विचारयेत् ।
अन्यथा भोजनाद्दोषात् सिद्धिहानिः प्रजायते ॥
मुक्तान्नञ्च समश्नीयात् मन्त्रसिद्धिसमीहया ।
तस्मान्नित्यं प्रयत्नेन मुक्तान्नार्थी भवेन्नरः ॥"
अगस्त्यसंहितायाम् ।
"दधि क्षीरं घृतं गव्यं ऐक्षवं गुडवर्ज्जितम् ।
तिलाश्चैव सिता शुद्धाः कन्दः केसुकवर्ज्जितः ॥
नारिकेलफलञ्चैव कदली लवली तथा ।
चाम्रमामलकञ्चैव पनसञ्च हरीतकी ॥
व्रतान्तरे प्रशस्तञ्च हविष्यं मन्यते बुधैः ॥"
व्रतान्तर इति ।
"हैमन्तिकं सिताक्षिप्तं धान्यं शुद्धास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
वर्षिका कालशाकञ्च मूलकं केसुकेतरत् ।
लवणं सैन्धवसाम्भरे गव्ये च दधिसर्पिषी ॥
पयोऽगुडकृतसारञ्च पनसाम्रहरीतकी ।
पिप्पली जीरकञ्चैव नागरञ्च तिन्तिड़ी ॥
कदलीलवलीधात्रीफलानिगुडमेव च ।
अतैलपक्वं सुनयो हविष्यान्नं प्रचक्षते ॥
शुक्लानो वा हविष्यान्नं शाकं यावकमेव वा ।
पयो मूलं फलं वापि यत्र यच्चोपलभ्यते ॥
रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम् ।
फलान्येतानि भोज्यानि सर्व्वेभ्योऽन्यानि विवर्ज्जयेत् ॥"
यत्तु योगिनीतन्त्रे ।
"चिञ्चाञ्च नालिकाशाकं कलायं लकुचं तथा ।
कदम्बं नारिकेलञ्च व्रते कुष्माण्डकं त्यजेत् ॥"
तत्तु व्रतान्तरे बोध्यम् । चिञ्चा तिन्तिड़ी ॥ * ॥

अथ वर्ज्यानि ।
"विवर्ज्जयेन्मधु चारलवणं तैलमेव च ।
ताम्बूलं कांस्यपात्रञ्च दिवाभोजनमेव च ॥"
तथा ।
"चारञ्च लवणं मांसं मद्यं कांस्यभोजनम् ।
माषाढ्यकामसूरांश्च कोद्रवांश्चणकानपि ॥
अन्नं पर्य्युषितञ्चैव निःस्नेहं कीटदूषितम् ॥"
रामार्च्चनचन्द्रिकायाम् ।
"मैथुनं तत्कथालापं तन्नेष्टैः परिवर्ज्जयेत् ।
ऋतुकालं विना मन्त्री स्वस्त्रियं नैव गच्छति ॥
लवणञ्च पलञ्चैव क्षारं क्षौद्रं रसान्तरम् ।
कौटिल्यं चौरमभ्यङ्गमनिवेदितभोजनम् ॥
असङ्कल्पितलब्धञ्च वर्ज्जयेच्छेदनादिकम् ।
स्नायाच्च पञ्चगव्येन केवलामलकेन वा ॥
मन्त्रजप्तान्नपानीयैः स्नानाचमनभोजनम् ।
कुर्य्यादुभयथोक्तविधिना त्रिसन्ध्यं देवतार्च्चनम् ॥
अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा ।
प्रलपन् प्रजपेदुभावत्तावत् निष्फलमुच्यते ॥"
नारदीये ।
"स्नेहं सोमां सुपक्वञ्च कुर्य्याद्दे लघु भोजनम् ।
नेन्द्रियाणां यथा वृद्धिस्तथा सुज्ञीत साधकः ॥"
कुलार्णवेऽपि ।
"यस्यान्नपानपुष्टाङ्गः कुरुते धर्म्मसञ्चयम् ।
अन्नदातुः फलस्यार्द्धं कर्त्तुरर्द्धं न संशयः ॥
तस्मात् सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत् सुधीः ।
पुरश्चरणकालेषु सर्व्वकर्म्मसु शाम्भवि ! ॥
भिक्षा दग्धा परान्नेन करौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्म्मनो दग्धं कथं सिद्धिर्वरानने ! ॥"
परान्नं भिक्षितेतरविषयम् । भिक्षायां तस्य स्वतोग्रहात् । तथा च ।
"वैदिकाचारयुक्तानां सुधीनां श्रीमतां सताम् ।
सत्कुलस्थानजातानां भिक्षान्नं चाग्र्यजन्मनाम् ॥

विहाय वह्निं नहि वस्तु किञ्चित्
ग्राह्यं परेभ्यः सति सम्भवे च ।
असम्भवे तीर्थबहिर्विशुद्धात्
पर्वातिरिक्ते प्रतिगृह्य जप्यात् ॥
तत्रासमर्थोऽनुदिनं विशुद्धात्
याचेत यावद्दिनमात्रभैक्ष्यम् ।
गृह्णाति रागादधिकं न सिद्धिः
प्रजायते कल्पशतैरतस्य ॥ * ॥
सहस्रदुश्चरिते ग्रन्थे प्रथमं सहस्रदीरयेत् ।
प्रोक्ते पारशवे ग्रन्थे प्राणायामं सहस्रचरेत् ॥
बहुप्रलापी आत्मन्य व्यस्याङ्गानि ततो जपेत् ।
क्षुतेऽप्येवं तथास्पृश्यस्थानानां स्पर्शनेन च ॥
एवमादौच नियमान् पुरश्चरणसञ्चरेत् ॥
विण्मूत्रोत्सर्गशुद्ध्यादियुक्तः कर्म्म करोति यत् ।
जपार्चनादिकं सर्वमप्रवित्रं भवेत्प्रिये ! ॥
मलिनाम्बरकेशास्थिसुखदौर्गन्ध्यसंयुतः ।
यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता ॥
आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम् ।
नीचाङ्गस्पर्शनं कोपं जपकाले विवर्ज्जयेत् ॥ * ॥
एवमुक्तविधानेन विलम्बं त्वरितं विना ।
उक्तसंख्यं जपं कुर्य्यात् पुरश्चरणसिद्धये ॥
देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ।
जपेदेकमनाः प्रातःकालं मध्यन्दिनावधि ॥
यत्सङ्ख्यया समारब्धं तत् कर्त्तव्यं दिने दिने ।
यदि न्यूनाधिकं कुर्य्यात् व्रतभ्रष्टो भवेन्नरः ॥"
सङ्क्षोभालायाम् ।
"यत्सङ्ख्यया समारब्धं तत् जप्यं दिने दिने ।
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् ॥
प्रजपेदुक्तसङ्ख्यायाश्चतुर्गुणजपं कलौ ॥"
अन्यत्रापि ।
"क्षते जपस्तु कल्योक्तस्त्रेतायां द्विगुणो मतः ।
द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणजपः कलौ ॥"
कुलार्णवेऽपि ।
"न्यूनातिरिक्तकर्म्माणि न फलन्ति कदाचन ।
यथाविधिकृतान्येव सत्कर्म्माणि फलन्ति हि ॥
भूशय्या ब्रह्मचारित्वं मौनमाचार्य्यसेविता ।
नित्यपूजा नित्यदानं देवनास्तुतिकीर्त्तनम् ॥
नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्मविवर्ज्जनम् ।
नैमित्तिकार्च्चनञ्चैव विश्वासो गुरुदैवयोः ॥
जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धिदाः ॥
स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् ।
असत्यभाषणं जिह्मभाषणं परिवर्ज्जयेत् ॥
सत्येनापि न भाषेत जपहोमार्च्चनादिषु ।
अन्यथानुष्ठितं सर्व्वं भवत्येव निरर्थकम् ॥
पुरश्चरणकाले तु यदि स्यान्मृतसूतकम् ।
तथा च क्षतसङ्कल्पो व्रतं नैव परित्यजेत् ॥"
योगिनीहृदये ।
"ग्रयीतत्कृष्णशय्यायां शुचिर्वस्त्रधरः सदा ।
प्रत्यहं त्रिसवनं स्नानं शय्यामेकाकी निर्भयः स्वपेत् ॥
असत्यभाषणं वाचं कुटिलां परिवर्ज्जयेत् ।
वर्ज्जयेद्गीतवाद्यादिश्रवणं नृत्यदर्शनम् ॥
अभ्यङ्गं गन्धलेपञ्च पुष्पधारणमेव च ।

त्यजेदृणोदकस्नानमन्यदेवप्रपूजनम् ॥"
तत्रैव ।
"नैकवासा जपेन्नित्यं बहुवासाकुलोऽपि वा ॥"
वैद्यम्यायनसंहितायाम् ।
"विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः ।
उपर्य्यधो वह्निवस्त्रे पुरश्चरणतत्परः ॥
पतितानामन्त्यजानां दर्शने भाषणे श्रुते ।
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् ॥
तथा तस्य च तन्मात्रौ प्राणायामं षडङ्गकम् ।
कृत्वा सम्यक् जपेत् प्रौढं यद्वा स्यादिदृशं मनुम् ॥"
आदिग्रहाद्वह्निं ब्राह्मणञ्च ॥ * ॥ तत्रान्तरे ।
"मनःसंहरणं प्रौढं मौनं मन्त्रार्थचिन्तनम् ।
अयत्नमनिर्व्वेदो जपसम्पत्तिहेतवः ॥ * ॥
उष्णीषी कञ्चुकी नग्नो मुक्तकेशो गणाकृतः ।
अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् क्वचित् ॥
अनासनः अयानो वा गच्छन् सुप्तान एव वा ।
अप्राप्तौ करौ कृत्वा शिरसा प्राप्तोऽपि वा ॥
चिन्ताव्याकुलचित्तो वा क्षुधो श्रान्तः सुधान्वितः ।
रथ्यायामप्यशस्याने न जपेत्तिमिरालये ॥
उपानद्गूढपादो वा यानग्रथ्यागतोऽपि वा ।
प्रसार्य्य न जपेत् पादावुत्कटासन एव च ।
न यन्त्रकाष्ठे पाषाणे न भूमौ नासने स्थितः ॥"
तथा ।
"मार्জ্জारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरम् ।
दृष्ट्वाचम्य जपेत् प्रौढं स्पृष्ट्वा स्नानं विधीयते ॥"
सर्व्वत्र जपे त्वयं नियमः ॥ मानसे तु नियमो नास्त्येव । तथा च ।
"अशुचिर्व्वा शुचिर्व्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव सदाभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
प्राणायामादिजपे तु तत्तत्कर्म्मणि विशेषो वक्तव्यः ॥
जपफलमाह शिवधर्म्मे ।
"जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् ।
सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः ॥
जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ॥"
पाद्मे ।
"यत्तरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः ।
जापिनं नोपसर्पन्ति भयभीताः समन्ततः ॥"
प्राणतोषिण्यां कूर्म्मपुराणे ।
"यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च ।
सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् ॥
माहात्म्यं वाचिकस्यैतज्जपयज्ञस्य कीर्त्तितम् ।
तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः ॥"
तथा तत्रैव ।
"मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः ।
वाचिको मारणे चैव प्रशस्तो जप ईरितः ॥"
गौतमीये ।
"प्राणायाः त्रिसवनं स्नानमन्यथा द्विः सकृच्च वा ।
त्रिसन्ध्यं प्रजपेन्मन्त्रं पूजनं ततृतीयकं भवेत् ॥"

सन्ध्यात्रये पूजाङ्गत्वाज्जपमष्टोत्तरशतमित्यर्थः ॥
"एकदा वा भवेत् पूजा न जपेत् पूजनं विना ।
जपान्ते वा भवेत् पूजा पूजान्ते वा जपेन्मनुम् ॥
प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ॥"
मध्यन्दिनावधीति न नियमपरं किन्त्वधिककालावच्छेदपरम् । अन्यथा तत्तन्मयजपनियमे कदाचित् जिह्वाया जाड्याज्जाड्येन वा प्रतिनियतदिवसीयजपसङ्ख्याया अपूर्त्तत्वे अधिकत्वे वा नियमभङ्गः स्यात् ॥ * ॥
"मनः संहृत्य विषयाज्जन्मार्थगतमानसः ।
न द्रुतं न विलम्बञ्च जपेन्नौत्पत्तिकक्रमेण ॥ * ॥
जपः स्याद्वचरावृत्तिर्मानसोपांशुवाचिकैः ।
धिया यद्वर्णमैत्रीं वर्णस्वरपदात्मिकाम् ॥
उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः ॥"
मन्त्रनिर्णये ।
"मानसं मन्त्रवर्णस्य चिन्तनं मानसः स्मृतः ।
जिह्वोष्ठौ चालयेत् किञ्चिद्देवमागतमानसः ॥
किञ्चित् श्रवणयोग्यः स्यात् उपांशुः स जपः स्मृतः ।
मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः ॥
उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः ।
जिह्वाजपः शतगुणः सहस्रो मानसः स्मृतः ॥"
प्रकारान्तरम् ।
"जिह्वाकर्णागोचरो यो मानसः स जपः स्मृतः ।
उपांशुर्निजकर्णस्य गोचरः स प्रकीर्त्तितः ॥
निगदस्तु जपैर्वैद्यविधोऽयं जपः स्मृतः ॥"
तत्रान्तरे ।
"उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः ।
उत्तमो मानसो देवि ! त्रिविधः कथितो जपः ॥"
जिह्वाजपस्तु ।
"जिह्वाजपः स विज्ञेयः केवलं जिह्वया धुवैरिति ॥
अतिविलम्बातिशीघ्रजपे दोषमाह ।
"अतिद्रुतो व्याधिहेतुरतिदीर्घो वसुक्षयः ।
अक्षराक्षरसंयुक्तं जपेन्नौत्पत्तिकक्रमवत् ॥
मनसा यः स्मरेत् स्रोतं वचसा वा मनुं जपेत् ।
उभयं निष्फलं याति भिन्नभाण्डोदकं यथा ॥"
गौतमीये ।
"पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः ।
सौम्यध्वन्युच्चरिताः प्रभुत्वं प्राप्नुवन्ति ते ॥"
प्राणतोषिण्यां ।
"मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव परमव्योम्नि परमात्मनि संस्थिते ॥
दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति ।"
गौतमीये दशाक्षरपटले ।
"स्थूलमन्त्रं प्राणवृद्ध्या सुषुम्नामूलदेशके ।
मन्त्रार्थं तस्य चैतन्यं जीवं ध्यात्वा पुनः पुनः ॥
कुलार्णवेऽपि ।
"मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः ।
न सिद्ध्यति वरारोहे ! कल्पकोटिशतैरपि ॥
जातसूतकमादौ स्यादन्ते च मृतसूतकम् ।
सूतकद्वयसंयुक्तो यो मन्त्रः स न सिद्ध्यति ॥
गुरोरुक्तविधिं त्यक्त्वा मन्त्रं यावज्जपेद्धिया ।

स्तनकद्वयनिर्म्मुक्तः स मन्त्रः सर्व्वसिद्धिदः ॥
जातस्तनकमादौ स्यान्मृतस्तनकमन्ततः ।
स्तनकद्वयनिर्म्मुक्तो मन्त्रः सिद्ध्यति नान्यथा ॥"
तत्रैव ।
"तस्माद्देवि ! प्रयत्नेन भुवेण पुटितं मनुम् ।
अष्टोत्तरशतं वापि सप्तवारं जपादितः ॥
जपान्ते च तथा जप्यात् चतुर्व्वर्गफलाप्तये ॥"
तत्रैव ।
"ब्रह्मबीजं मनोर्द्धृत्वा चाद्यन्ते परमेश्वरि ! ।
सप्तवारं जपेन्मन्त्रं स्तनकद्वयसुक्तये ॥ * ॥
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
शतकोटिजपेनापि तस्य सिद्धिर्न जायते ॥
सुप्तबीजाश्च ये मन्त्रा न दास्यन्ति फलं प्रिये ! ।
मन्त्राश्चैतन्यसहिताः सर्व्वसिद्धिकराः स्मृताः ॥
चैतन्यरहिता मन्त्राः प्रोक्ता वर्णास्तु केवलम् ।
फलं नैव प्रयच्छन्ति लक्षकोटिजपैरपि ॥
मन्त्रोद्धारे स्तनं यादृक् स्वरूपं प्रथमं भवेत् ।
घृते सहस्रे लक्षे वा कोटिजापे न तत्फलम् ॥
हृदये ग्रन्थिभेदश्च सर्व्वावयवबर्द्धनम् ।
आनन्दाश्रुणि पुलको देहावेशः कुलेश्वरि ! ॥
गद्गदोक्तिश्च सहसा जायते नात्र संशयः ।
सकृदुच्चरितेऽप्येवं मन्त्रे चैतन्यसंयुते ॥
हृद्यन्ते प्रत्यया यत्र पारम्पर्य्यं तदुच्यते ॥ * ॥
मासमात्रं जपेन्मन्त्रं भूतलिप्या तु संपुटम् ।
क्रमोत्क्रमात् सहस्रञ्च तस्य सिद्धो भवेन्मनुः ॥"
तत्र भूतलिपिः ।
"पञ्च हस्वाः सन्धिवर्णा वोमाराभिजलन्धराः ।
अन्त्यमाद्यं द्वितीयञ्च चतुर्थं मध्यमं क्रमात् ॥
पञ्चवर्गाश्चराणि स्युर्व्वान्तश्चेन्द्रुभिः सह ।
एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरैः ॥
मन्त्रस्तु ।
अ इ उ ऋ ऌ ए ऐ ओ औ ह य र व ल ङ
क ख घ ग न च छ झ ज ण ट ठ ढ ड न त
थ ध द म प फ भ व ग्र ष सः ।
अतः परं मन्त्रसुद्धार्थं पुनः क्रमेणोल्लेखम् ॥*॥
गौतमीये ।
"एवं जपं पुरा कृत्वा तेजोरूपं समर्पयेत् ।
देवस्य दक्षिणे हस्ते कृशपुष्पार्घ्यवारिभिः ॥
सफलं तद्विधानेन प्राणायामं समाचरेत् ।
जपस्यादौ जपान्ते च चिन्तयं चिन्तयं चरेत् ॥"*॥
मुक्तिविषये देया वामहस्ते । तथा च ।
"एवं जपं पुरा कृत्वा गत्वाचमनकृन्नदीकैः ।
जपं समर्पयेद्देव्या वामहस्ते विचक्षणः ॥ * ॥
जपान्ते प्रत्यहं मन्त्री होमयेत्तद्दशांशतः ।
तर्पणाभिषेकञ्च तत्तद्दशांशतो सुने ! ॥
प्रत्यहं भोजयेद्विप्रान् न्यूनाधिकप्रशान्तये ।
अथवा सर्व्वपूर्त्तौ च होमादिकमथाचरेत् ॥
सम्पूर्णायां प्रतिज्ञायां तर्पणादिकमाचरेत् ॥"
सुरूमालायाम् ।
"यस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात् ।
तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्य्याद्दिने दिने ॥"
जपसङ्ख्यायां विशेषमाह सुरूमालायाम् ।

नाघनेर्द्दलपर्व्वैर्वा न धान्यैर्न च पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसङ्ख्यां तु कारयेत् ॥
लाजाक्षतैर्दधिसिन्दूरं गोमयञ्च करीषकम् ।
विलोम्य गुटिकां कृत्वा जपसङ्ख्यां तु कारयेत् ॥"
पुरश्चरणचन्द्रिकायाञ्च ।
"ततो जपदशांशेन होमं कुर्य्याद्दिने दिने ।
अथवा लक्षसङ्ख्यायां पूर्णायां होममाचरेत् ॥"
तथा । होमाद्यशक्तौ च सनत्कुमारीये ।
"यद्यदङ्गं भवेद्धीनं तत्तत्सङ्ख्यादिगुणो जपः ।
होमाभावे जपः कार्य्यो होमसङ्ख्याचतुर्गुणः ॥
विप्राणां क्षत्रियाणाञ्च रससङ्ख्यागुणः स्मृतः ।
वैश्यानां वसुसङ्ख्याकमेषां स्त्रीणामयं विधिः ॥
यं वर्णमाश्रितः शूद्रः स च तस्य विधिश्चरेत् ।
अनाश्रितस्य शूद्रस्य दिक्सङ्ख्याकः समीरितः ।
शूद्रस्य विप्रभृत्यस्य तत्पत्न्याः सदृशो जपः ॥"
अनाद्यशक्तौ योगिनीहृदये ।
"होमकर्म्मण्यशक्तानां विप्राणां त्रिगुणो जपः ।
इतरेषान्तु वर्णानां त्रिगुणादिः समीरितः ॥"
त्रिगुणादिः होमसङ्ख्यात्रिगुणजपः क्षत्रियेण कार्य्यः । वैश्येन चतुर्गुणः । शूद्रेण पञ्चगुणः ।
तदुक्तं कुलार्णवे ।
"यद्यदङ्गं विहीनं स्यात् तत्तत्सङ्ख्यादिगुणो जपः ।
कुर्व्वीत त्रिचतुःपञ्च यथासङ्ख्यं द्विजादयः ॥"
एतेन स्त्रीशूद्राणां होमाधिकारः । तथा च ।
"द्विजानामर्द्धशूद्राणां कोटिं त्यक्त्वा भवति शूद्राणाम् ।"
इति नागभट्टविरचिते ॥
शूद्राणां त्यक्तमिति कुब्जिकाप्रकरणे सारदायाम् ॥
स्त्रीणां होमाधिकारश्च तत्र ।
"लाजैस्त्रिमधुरोपेतैर्होमः कन्यां प्रयच्छति ।
अनेन विधिना कन्या वरमाप्नोति वाञ्छितम् ॥"
अतः स्त्रीणां होमाधिकारः । तच्च ब्राह्मणद्वारा । तथा च तन्त्रे ।
"ओङ्कारोच्चारणाद्धोमान् घ्राणत्र्यामग्निलाभैर्मान ।
ब्राह्मणीगमनाच्चैव शूद्रश्चाङ्गालतां व्रजेत् ॥"
इति ब्राह्मणाग्निविधानात् ।
तथा स्त्रीणामपि सर्व्ववैदिककर्म्मसु शूद्रतुल्यत्वप्रतिपादनात् ।
स्त्रीशूद्रकरसंस्पर्शो वज्रपातसमो मम ॥
इति भगवद्वचनाच्च ॥ तथा च नारायणकल्पे ।
"अष्टाक्षरो महामन्त्रः सप्तार्णः स्त्रीशूद्रयोषितोः ।
प्रणवादिश्च यो मन्त्रो न स्त्रीशूद्रे प्रशस्यते ॥"
इति सर्व्वत्र स्त्रीणां शूद्रवदाचारः ॥*॥
शूद्रस्यापि स्वकर्म्मैकहोमः । तथा च वाराहीतन्त्रे ।
"यदि कामी भवत्येव शूद्रोऽपि होमकर्म्मणि ।
वह्निजायां परित्यज्य हृदयाग्नेन होमयेत् ॥"
सर्व्वेषां वा द्विगुणो जपः । तथा च वाशिष्ठे ।
"यद्यदङ्गं विहीयेत तत्तत्सङ्ख्यादिगुणो जपः ।
कर्म्मयच्छाङ्गसिद्ध्यर्थं तदशक्तेन भक्तितः ॥
न चैवङ्गं विहीयेत तद्विशिष्टमवाप्नुयात् ।

विप्रभोजनमात्रेण यज्ञं साङ्गं भवेत् ध्रुवम् ॥
यत्र शूद्रो द्विजस्तत्रात्र शूद्रो हरिः स्वयम् ॥"
तथा अगस्त्यसंहितायाम् ।
"यदि होमेऽप्यशक्तः स्यात् पूजायां तर्पणेऽपि वा ।
तावत्सङ्ख्याजपेनैव ब्राह्मणाराधनेन च ॥
भवेदङ्गक्षयेनैव पुरश्चरणमार्य्य वै ॥"*॥
वीरतन्त्रे ।
"नियमः पुरुषे श्रेष्ठो न योषित्सु कथञ्चन ।
न न्यासो योषितामत्र न ध्यानं न च पूजनम् ॥
केवलं जपमात्रेण मन्त्राः सिद्ध्यन्ति योषिताम् ॥"
ततश्च ।
"गुरवे दक्षिणां दद्यात् भोजनाच्छादनादिभिः ।
गुरुसन्तोषमात्रेण मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥"*॥
तथा च योगिनीहृदये ।
"गुरोरभावे पुत्राय तत्पत्न्यै वा निवेदयेत् ।
तयोरभावे देवेशि ! ब्राह्मणेभ्यो निवेदयेत् ॥
सम्यक्सिद्धेकमन्त्रस्य पञ्चाङ्गोपासनेन च ।
सर्व्वे मन्त्राश्च सिद्ध्यन्ति तत्प्रसादात् कुलेश्वरि ! ॥
गुरुमूलमिदं सर्व्वमित्याहुस्तन्त्रवेदिनः ।
एकग्रामे स्थितो नित्यं गत्वा वन्देत वै गुरुम् ॥
गुरुरेव परं ब्रह्म तस्मादादौ तमर्च्चयेत् ।
तदन्ते महतीं पूजां कुर्य्यात् साधकसत्तमः ॥
सुभाषिणीं कुमारीञ्च भूषणैरपि भूषयेत् ।
मिष्टान्नं बहुशः कार्य्यं भुञ्जीत बन्धुभिः सह ॥
एवं सिद्धमनुर्मन्त्री साधयेत् सकलेप्सितान् ॥"*॥

अथ ग्रहणपुरश्चरणम् ।

तत्र ।
"अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्द्रोर्व्वा शुचिः पूर्व्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रजले स्थितः ।
स्पर्शादिमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥" * ॥
यदि नक्रादिदूषिता नदी भवति तदा यत्कर्म्मेयं तदाह रुद्रयामले ।
"अपि शुष्कोदकैः स्नात्वा शुचौ देशे समाहितः ।
यावद्विमुक्तिपर्य्यन्तं जपेन्मन्त्रमनन्यधीः ॥
इति ज्ञात्वा न सन्देहो जपस्य फलभाग्भवेत् ॥"
नद्यभावे ।
"यद्वा पुण्योदकैः स्नात्वा शुचिः पूर्व्वमुपोषितः ।
ग्रहणादिविमोक्षान्तं जपेन्मन्त्रमनन्यधीः ॥"* ॥
उपवासासमर्थे तु तत्रैव ।
अथवान्यप्रकारेण पौरश्चरणिको विधिः ।
चन्द्रसूर्य्योपरागे च स्नात्वा प्रयतमानसः ॥
स्पर्शनादिविमोक्षान्तं जपेन्मन्त्रं समाहितः ।
जपाद्दशांशतो होमं तथा होमात्तु तर्पणम् ।
एवं ज्ञात्वा तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥"*॥
गोपालमन्त्रतर्पणे तु होमसमसङ्ख्यत्वं यथा,—
"इह गोपालमन्त्रस्य तर्पणं होमसङ्ख्यया ।
वर्णानामिह सर्व्वेषामित्यागमविदो विदुः ॥
स्नात्वा ज्ञात्वा सुसङ्कल्प्य विमोक्षान्तं जपञ्चरेत् ।
तावद्दशांशादिकं कुर्य्याद्दशमान्ते शुचिः पुमान् ॥
एवं जपान्मन्त्रसिद्धिर्भवत्येव न संशयः ॥" * ॥

ग्रहणे जपस्य आवश्यकत्वम् ।
"आद्याद्यैरगुरोधेन यदि जप्यं त्यजेन्नरः ।
स भवेद्देवताद्रोही पितॄन् सप्त नयत्यधः ॥"
इति सनत्कुमारीयवचनात् ॥
वस्तुतस्तु आरब्धपुरश्चरणविषयमिदम् ।
तथाहि ।
"आरब्धे पुरश्चर्यी यदि च ग्रहणं भवेत्
तदा आद्याद्यगुरोधेन जप्यं न त्यजेत् । एवं
राघावपि पुरश्चरणविधेये बोद्धव्यम् ।" इति
सर्वसम्मतम् ॥ * ॥ योगिनीहृदये ।
"कथितविधिना मन्त्री कुर्याद्धोमादिकन्ततः ।
अथवा तद्दशांशेन होमादींश्च समाचरेत् ॥"
तथा ।
"अनन्तरं दशांशेन क्रमाद्धोमादिकञ्चरेत् ।
तदन्ते महतीं पूजां कुर्याद्ब्राह्मणभोजनम् ॥
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं सम्पूज्य तोषयेत् ।
एवञ्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति ॥"
अत्र ब्राह्मणभोजनमावश्यकमेव ।
"सर्वथा भोजयेद्विप्रान् ज्ञानसाङ्गत्वसिद्धये ।
विप्राराधनमात्रेण यज्ञं साङ्गं भवेदृषम् ॥"
क्रियासारे ।
"दीक्षाहीनान् पशून् यस्तु भोजयेद्वा स्वमन्दिरे ।
स याति परमेशानि ! नरकानेकविंशतिम् ॥
एवं यः कुरुते देवि ! पुरश्चरणकं प्रिये ! ।
सर्वपापविनिर्मुक्तो देवीसायुज्यमाप्नुयात् ॥"
यद्यपि पुरश्चरणपदं पञ्चाङ्गपरम् । तथा च ।
"जपहोमौ तर्पणञ्चाभिषेको विप्रभोजनम् ।
पञ्चाङ्गोपासनं लोके पुरश्चरणमुच्यते ॥"
तथापि ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रपरम् ।
"सूर्योदयं समारभ्य यावत् सूर्योदयान्तरम् ॥"
इत्यादौ तथादर्शनात् तत्र होमादेरभावात् ।
तर्हि कथं ग्रहणपुरश्चरणे होमादि इति चेत्
वचनादेव । न च पुरश्चरणस्य पञ्चाङ्गत्वात्
सर्वत्र तदेव स्यादिति वाच्यम् । ग्रहणे पुनस्तद्विधानमनर्थकं स्यात् । किञ्च ग्रहणे होमादि-
नियमात् नान्यत्र होमादिः । ग्रहणपुरश्चरणे
होमादिविधानन्तु प्रक्षालीभूतपञ्चाङ्गपुरश्चरणमुख्यतावोधनाय । अतएव ग्रहणे पञ्चाङ्गस्वरूपपुरश्चरणे क्षते सत्यप्रयोगेऽप्यधिकार इति
प्रकटीकृतम् । तदकरणे पुनः केवलजपमात्रपुरश्चरणे क्षते नाधिकार इति सर्वसम्मतमिति ।
पुरश्चरणकालस्तु वाराहीये ।
"चन्द्रतारानुकूले च शुक्ले पक्षे शुभेऽहनि ।
आरभेत पुरश्चर्यां हरौ सुप्ते न चाचरेत् ॥"
प्रतिप्रसवः । रुद्रयामले ।
"कार्त्तिकाश्विनवैशाखमाघेष्वथ मार्गशीर्षके ।
फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते ॥"
यद्यप्यत्र यज्ञोदये च दीक्षापुरश्चरणयोर्निषेधमाह तत्रान्तरे ।
"यज्ञादौ क्षुद्दिने नैव कुर्याद्दीक्षां जपं प्रिये ! ।
क्षते नाशो भवेदाशु आयुःश्रीसुतसम्पदाम् ॥"

अथ पुरश्चरणप्रयोगः ।
तत्र तावत् भूमेः परिग्रहं कृत्वा पुरश्चरणप्राक्कृतीयदिवसे क्षौरादिकं विधाय वैदिकायाचतुर्हस्तं क्रोशं क्रोशार्धं वा क्षेत्रं चतुरस्रम्
आहारादिविहारार्थं परिकल्प्य तत्र कूर्मचक्राकारं मण्डलं विधाय एकभक्तं कुर्यात् ।
ततः परदिने स्नानादिकं विधाय शुद्धः सन्
वैदिकायाचतुर्हस्तु अभ्यर्णोदुम्बरन्यग्रोधाश्वत्थसमस्य वितस्तिमात्रान् दश कीलकान्, ॐ
नमः सुदर्शनाय अस्त्राय फडिति मन्त्रेणाष्टोत्तरशतेनाभिमन्त्रितान् वैदिकाया दशदिक्षु,
ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरीक्षगाः ।
विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु ॥
मयैतत् कीलितं क्षेत्रं परित्यज्य विदूरतः ।
अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥
इत्यनेन निखन्य तेषु ॐ नमः सुदर्शनाय
अस्त्राय फडिति मन्त्रेणास्त्रं संपूज्य पूर्वादि
क्रमेण इन्द्रादिलोकपालान् पूजयेत् । तद्यथा ।
ॐ भूर्भुवःस्वरिन्द्रलोकपाल इहागच्छ इदमर्घ्यं वज्राय पाद्योपचारैरभ्यर्च्य पूजयेत् । तथा च
सुदर्शनमालायाम् ।
"पुण्यक्षेत्रादिकं गत्वा कुर्याद्भूमेः परिग्रहम् ।
तथा ह्यमुकमन्त्रस्य पुरश्चरणसिद्धये ।
मयेयं गृह्यते भूमिर्मन्त्रोऽयं सिध्यतामिति ॥"
तथा ।
"यामे क्रोशमितं स्थानं नद्यादौ स्वेच्छया मतम् ।
नगरादावपि क्रोशं क्रोशयुग्ममथापि वा ॥
क्षेत्रं वा यावदिष्टन्तु विहारार्थं प्रकल्पयेत् ।
आहारादिविहारार्थं तावतीं भूमिमाक्रमेत् ॥
क्षौरिश्चोद्भवान् कीलान् अस्त्रमन्त्राभिमन्त्रितान् ।
निखनेद्दशदिग्भागे तैरस्त्रञ्च प्रपूजयेत् ॥
लोकपालान् पुनस्तेषु गन्धाद्यैः पूजयेत् सुधीः ।
ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिञ्च संपूज्य
सर्वविघ्नविनाशार्थं गणपतिं पूजयेत् । ॐ
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा मत्कर्मण्यामुकमन्त्रपुरश्चरणकर्मण्यपि सर्वविघ्नविनाशार्थं गणेशपूजामहं करिष्ये । इति सङ्कल्प्य
वैदिकामध्ये पञ्चोपचारैर्गणेशं पूजयेत् । तदुक्तम् ।
"क्षेत्रपालादिकं तत्र पूजयेत् विधिवत्ततः ।
क्षेत्रेशं वास्तुनामानं विघ्नराजं समर्चयेत् ॥
दिक्पालेभ्यो बलिं दद्यात् ततः क्षेत्रं समाविशेत् ॥"
ततो माषभक्तादिना पूजितदेवताभ्यो बलिं
दद्यात् । ततः ।
"ॐ ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ।
मातरोऽणुरूपाश्च गणाधिपतयश्च ये ॥
विघ्नभूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः ।
सर्वे ते प्रीतमनसः प्रतियन्त्वस्मिन्नं बलिम् ॥"
इत्यनेन दशदिक्षु भूतेभ्यो बलिं दद्यात् । ततो
गायत्रीं जपेत् । तथा च ।

"प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो
जपेत् ।
स्नानाज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥"
इति विष्णुधराचार्यः ॥ * ॥
यत्तु प्रातः स्नात्वा तु गायत्र्या अयुतं प्रयतो
जपेत् इति । तत् पुनरज्ञातपापक्षयार्थम् । ॐ
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा
स्नानाज्ञातपापक्षयकामोऽष्टोत्तरसहस्रगायत्रीजपमयुतगायत्रीजपं वा अहं करिष्ये । इति
सङ्कल्प्य जपेत् । तत उपवासं हविष्यं वा
कुर्यात् ॥ * ॥
तत्परदिने उषसि स्नानादिकं कृत्वा स्वस्तिवाचनपूर्वकं सङ्कल्पं कुर्यात् । यथा विष्णुः
ओम् अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्मा
अमुकदेवताया अमुकमन्त्रसिद्धिप्रतिबन्धकतादोषदुरितक्षयपूर्वकतन्मन्त्रसिद्धिकामोऽद्यारभ्य
यावता कालेन सेत्स्यति तावत्कालममुकदेवताया अमुकमन्त्रस्य दशसंख्याजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये । इति
सङ्कल्प्य भूतशुद्धिप्राणायामादिकं कृत्वा स्वस्तिवाचनं कृत्वा स्वस्तिपूजाघण्टाद्युक्तक्रमेण देवतां संपूज्य
दीपे प्रज्वलिते देवतां हृदये प्रातःकालं समारभ्य मध्यंदिनं यावत् जपं कुर्यात् । ततस्तद्दशांशहोम-तद्दशांश तर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मणभोजनकुर्यात् । तथा च । सनत्कुमारतन्त्रे ।
"प्रणवं तत्सहस्रेति मासपक्षतिथावपि ।
अमुकामुकगोत्रोऽहं मूलमुच्चार्य तत्परम् ॥
सिद्धिकामोऽस्य मन्त्रस्य इयत्संख्यं जपन्ततः ।
दशांशं हवनं होमाद्दशांशं तर्पणं ततः ॥
दशांशं मार्जनं तस्माद्दशांशं विप्रभोजनम् ।
पुरश्चरणमेवं हि करिष्ये प्रागुदङ्मुखः ॥"
तथा ।
"दीपस्य ज्वलितस्याथ जपकर्म प्रशस्यते ।
तद्दीपस्थानमाश्रित्य वातातपसहां कुटिम् ॥
निर्माय विधिवत् कुर्यात् जपं तत्र शुभे दिने ॥"
ततो होमस्तत्तर्पणम् ॥ * ॥
तन्त्रान्तरे ।
"तर्पणन्तु ततः कुर्यात्तीर्थादेस्तन्मिश्रितैः ।
जले देवं समावाह्य पाद्यादैरेककालिकैः ॥
सम्पूज्य विधिवद्भक्त्या परिवारसमन्वितम् ।
एकैकमञ्जलिं तोयं परिवारान् प्रतर्पयेत् ॥
ततो होमदशांशेन तर्पयेत् परदेवतम् ।
संपूर्णायान्तु सङ्ख्यायां पुनरेकैकमञ्जलिम् ।
अङ्गादिपरिवारेभ्यो दत्वा देवं विसर्जयेत् ॥" * ॥
तर्पणवाक्यन्तु मूलमुच्चार्य श्रीअमुकं तर्पयामि
नमः । इति विष्णुविषयम् । तथा च गौतमीये ।
"आदौ मन्त्रं समुच्चार्य श्रीपूर्वं नाममित्यपि ।
तर्पयामि पदञ्चोक्त्वा नमोऽन्तं तर्पयेन्नरः ॥"
अन्यत्र मूलमुच्चार्य अमुकदेवतां तर्पया-
मीति ।

तथा च।
"तर्पयामि पदद्योक्ता मन्त्रान्ते खेषु नामसु।
द्वितीयान्तेषु चैवं तर्पयस्व मनुर्मतः॥"
मूर्त्तिविषये पूर्वमूलमुच्चार्य्य असुकीं तर्पयामि स्वाहा। होमतर्पणयोः स्वाहेति तत्तत्तन्त्रवचनात्। गौतमीये।
"मन्त्रान्ते नाम चोच्चार्य्य तर्पयामि ततः परम्।
कुर्य्यादेव वरारोहे! स्वाहान्तं तर्पणं मतम्॥"
इत्यादि॥ विश्वेश्वरतन्त्रे।
"विद्यां पूर्वं समुच्चार्य्य तदन्ते देवताभिधाम्।
तर्पयामीति सम्प्रोक्ता स्वाहान्तस्तर्पणो मतः॥"
अभिषेकवाक्यन्तु। नमोऽन्तं मूलमुच्चार्य्य असुकदेवतामहमभिषिञ्चामि इति कलसमुद्रया स्वमूर्द्धं अभिषिञ्चेत्। तथा च। गौतमीये।
"नमोऽन्तं मूलमुच्चार्य्य तदन्ते देवताभिधाम्।
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु॥
अभिषिञ्चेत् स्वमूर्द्धानं तोयैः कुम्भास्यमुद्रया॥"
मूर्त्तिविषये गौतमीये।
"मन्त्रान्ते नाम चोच्चार्य्य सिञ्चामीति नमः पदम्॥"
इति। ततो ब्राह्मणान् भोजयित्वा पूजां कुर्य्यात्॥ * ॥ ततो दक्षिणा। अद्येत्यादि कृतैतदसुकमन्त्रपुरश्चरणकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनं वह्निदैवतं असुकगोत्राय गुरवे तुभ्यमहं सम्प्रददे। ततोऽच्छिद्रावधारणं कुर्य्यात्॥

अथ ग्रहणपुरश्चरणसङ्कल्पः।

तद्यथा,—
ओम् अद्येत्यादि राहुग्रस्ते निशाकरे दिवाकरे वा असुकगोत्रःश्रीअसुकदेवशर्म्मा असुकदेवताया असुकमन्त्रसिद्धिकामो यावत्सिद्धिमुक्तिपर्य्यन्तं असुकदेवताया असुकमन्त्रजपरूपपुरश्चरणमहं करिष्ये। इति सङ्कल्प्य जपेत्। ततस्तद्दिने तत्परदिने वा स्नानादिकं विधाय ओं अद्येत्यादि असुकदेवताया असुकमन्त्रस्य कृतैतत् ग्रहणकालीन-दशसङ्ख्यजपतद्दशांशहोमतद्दशांशतर्पण-तद्दशांशाभिषेक-तद्दशांशब्राह्मण-भोजनकर्म्माङ्गमहं करिष्ये। इति सङ्कल्प्य होमादिकं कुर्य्यात्। दक्षिणादिकन्तु पूर्ववत्।"
इति ज्ञानानन्दकृततन्त्रसारः॥ * ॥

(अथ रहस्य पुरश्चरणम्।

श्रीपार्व्वत्युवाच।
"कथयस्व महादेव! सिद्धिकारणमुत्तमम्।
येन सिद्धिं समायान्ति सर्व्वतन्त्राश्च सिद्धिदाः॥
येषु येषु च कालेषु पुरश्चर्य्या भवेद्ध्रुवम्॥

श्रीशिव उवाच।
कथयामि समासेन शृणुष्व पर्व्वतात्मजे!।
मेषराशौ दशसहस्रं जपेन्मन्त्रमुत्तमम्॥
पुरश्चरणमेतद्धि शृणुष्व सुरवन्दिते!॥
वृषराशौ यदा मन्त्री द्वयुतं जपेत् सुधीः।
तेन तत्र सुसिद्धिः स्यान्नात्र कार्य्या विचारणा॥
मिथुने च यदा मन्त्री चायुतं मन्त्रमुत्तमम्।
प्रजपेत् प्रयतो नित्यं पुरश्चरणमुच्यते॥
कर्कटे च यदा मन्त्री सहस्रं प्रजपेत्।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुच्यते॥
सिंहे च सर्व्वमन्त्राणामयुतानां हयं जपेत्।
धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवम्॥
कन्यायाञ्च यदा मन्त्री मन्त्रं मन्त्रपरायणः।
सहस्रं द्वादशञ्चैव जपेन्नियतमानसः॥
पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनम्।
इह लोके सुखं भुक्त्वा चान्ते देवीपदं व्रजेत्॥
तुलायां प्रजपेन्मन्त्रं मन्त्री सहस्रं साधको जपेत्।
अनेन विधिना देवि! पुरश्चरणमुच्यते॥
वृश्चिके चायुतं मन्त्रं शृण्वायां प्रजपेत् सुधीः।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चर्य्याफलं भवेत्॥
धनुषि च यदा मन्त्रं जपेदयुतमादरात्।
इहैव कन्दर्पसमो धनवान् बलवान् सुखी॥
मकरे च यदा मन्त्रं जपेत् साधकसत्तमः।
चतुर्णामयुतं देवि! प्रयतोऽयतमानसः॥
धर्म्मार्थं भावयेन्नित्यं पुरश्चरणमुच्यते॥
कुम्भे चैव यदा मन्त्रं जपेदयुतमादरात्।
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुद्भवेत्॥
मीने चैव यदा देवि! प्रजपेदयुतं हयम्।
तेन पुरश्चरणमित्याहुः सर्व्वागमविशारदाः॥
सर्व्वत्र जपनं श्रेयं रात्रौ वा मैथुनेऽपि वा।
शृण्वायान्तु विशेषेण परयोनिसमागमे॥
हविष्याशी तदा देवि! जपेन्नियतमानसः।
एवंविधं जपं कृत्वा दशांशञ्च तदाचरेत्॥
दक्षिणां गुरवे दत्त्वा सिद्धिभाग् भवति ध्रुवम्।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
रविवारादिसर्व्वेषु वारसंख्यासहस्रकम्।
जप्त्वा मन्त्रं सदा देवि! साधकः सिद्धिभाग् भवेत्॥
पुरश्चरणमेतद्धि नात्र कार्य्या विचारणा॥
एवंविधं समाचर्य्य दशांशञ्च तदाचरेत्।
गुरवे दक्षिणां दत्त्वा सर्व्वकाममवाप्नुयात्॥
केवलं जपमात्रेण पुरश्चरणमुच्यते।
येषु येषु च नक्षत्रेषु जायते सिद्धिरुत्तमा॥
कथयामि समासेन शृणुतां पर्व्वतात्मजे!।
अश्विन्यां जप्यते मन्त्रं साधकैश्च सहस्रकम्॥
तेन सिद्धिमवाप्नोति साधको नात्र संशयः।
द्विसहस्रं जपेन्मन्त्रं भरणञ्च यदा सुधीः॥
यमलोकं परित्यज्य धनेन च धनाधिपः।
कृत्तिकायां जपेन्मन्त्रं त्रिसहस्रञ्च साधकः॥
रोहिण्याञ्च यदा मन्त्रं जपेत् साधकसत्तमः।
सहस्रं वा शतं वापि सर्व्वकामार्थमाप्नुयात्॥
मृगशीर्षे यदा मन्त्रं नियतं प्रजपेत् सुधीः।
सहस्रपञ्चकञ्चैव हविष्यान्नसमो भवेत्॥
आर्द्रायां जप्यते मन्त्रं साधकैः सुसमाहितैः।
षट्सहस्रं यदा देवि! सर्व्वकामार्थसिद्धये॥
पुनर्व्वसुसमायोगे यदा सहस्रमुत्तमम्।
जप्यते साधको नित्यं लभते च सुरोत्तमम्॥
पुष्यायाञ्च जपेन्मन्त्रं सप्तशतञ्च सप्तकम्।
तेन सर्व्वसुसिद्धिः स्यात् पुरश्चर्य्याधिको विधिः॥
अश्लेषायां यदा देवि! मन्त्री मन्त्रं समाहितः।
सहस्रपञ्चकञ्चैव जपेत् सर्व्वार्थसिद्धये॥
दशसहस्रं मघायाञ्च जप्या मन्त्रं समाहितः।
पुरन्दरसमो भूत्वा साधको विचरेत् भुवि॥
एकादशसहस्रन्तु पूर्व्वफल्गुन्यां जपेत् सुधीः।
कुबेर इव वित्ताढ्यो जायते नात्र संशयः॥
उत्तरफल्गुनीये देवि! सहस्रं द्वादशं तथा।
जप्यते साधकैर्नित्यं सर्व्वकामार्थसिद्धये॥
हस्तायाञ्च जपेद्देवि! सहस्रञ्च त्रयोदश।
सूर्य्यस्येव समो भूत्वा विचरेत् भुवि साधकः॥
चित्रायाञ्च जपेन्मन्त्रं द्विसहस्रञ्च साधकैः।
नानाभोगसमायुक्तो भवेद् भुवि पुरन्दरः॥
स्मृत्वा सर्व्वार्थसिद्धिः स्यात् द्विसहस्रञ्च जापनात्।
साधकोऽव्याहतगतिर्जायते नात्र संशयः॥
विशाखायां यदा मन्त्रं चतुःसहस्रकं प्रिये!।
जपेच्च साधको नित्यं सोमवत् प्रियदर्शनः॥
अनुराधायां यदा देवि! मन्त्री मन्त्रं सदा जपेत्।
पुत्रपौत्रसमायुक्तः खेचरो जायते ध्रुवम्॥
ज्येष्ठायाञ्च यदा मन्त्रं द्विसहस्रं विचक्षणः।
प्रजपन् लभते सिद्धिं नात्र कार्य्या विचारणा॥
मूलायाञ्च जपेन्मन्त्रं सहस्रं पञ्चकं प्रिये!।
नानासिद्धिमवाप्नोति साधको नात्र संशयः॥
वरुणेन समो भूत्वा जायते साधको भुवि।
पूर्व्वाभाद्रायां यदा मन्त्रं द्विःसहस्रं जपेत् सुधीः॥
महापातकान्मुच्यते फलभाग्भवति ध्रुवम्।
रेवत्यां च यदा मन्त्रं चत्वारि सहस्रकं तथा॥
जप्त्वा स्तुत्वा सदा देवि! सोमलोकमवाप्नुयात्।
रात्रौ वा मैथुने वापि शय्यायाञ्च व्यवस्थितः॥
प्रजपेत् साधको नित्यं साधयेदात्मनो हितम्।
सर्व्वदा प्रजपेन्मन्त्रं हविष्याशी दिवा शुचिः॥
दक्षिणां गुरवे दद्यात् यथा विभवविस्तरम्।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
आदित्यादिवारयोगे नन्दादितिथियोगतः।
तत्तत्र जपेन्मन्त्रं सहस्रपञ्चकं प्रिये!॥
तेन सर्व्वार्थसिद्धिः स्यात् पुरश्चरणमुद्भवेत्।
प्रतिपत्तिथिमारभ्य कुर्य्यावत् भवेत् प्रिये!॥
तिथिसंख्यां समासाद्य वर्द्धयेच्च सहस्रकम्।
जप्त्वा मन्त्रं सदा मन्त्री सर्व्वकाममवाप्नुयात्॥
पुरश्चरणमेतद्धि कथितं ते वरानने!।
प्रतिपत्तिथिमारभ्य राका यावद् भवेत् प्रिये!॥
तावन्मन्त्रं प्रजपेत तिथिसंख्याक्रमेण तु।
सर्व्वभावसमायुक्तो जायते भावसाधकः॥
एतत्तेव सुसिद्धिः स्यात् नात्र कार्य्या विचारणा।
अथवान्यप्रकारेण पुरश्चरणमुच्यते॥
वर्षादिकरणे देवि! जप्त्वा विद्यामनन्यधीः।
करणानुसारेणैव वर्द्धयेच्च सहस्रकम्॥
पुरश्चरणमेतद्धि सर्व्वतन्त्रे च गोपितम्।
साधकस्य हितार्थाय कथितं तद्वरानने॥
अथवान्यप्रकारेण पुरश्चरणमुच्यते।
विष्कुम्भादिषु योगेषु यो जपेत् योगसंख्यया॥

सहस्रं साधको नित्यं सर्व्वसिद्धिपरायणः।
पुरश्चरणमेतस्मिन् तन्त्रे तन्त्रे निरूपितम्॥
संक्रान्त्यादिषु सर्व्वासु विषुवादिषु पार्व्वति!।
संक्रान्त्यनुसारेणैव वर्द्धयेच्च सहस्रकम्॥
पूर्व्वमुखो जपेन्नित्यं घनार्थी सर्व्वदा प्रिये!।
शत्रुनाशाय सततं दक्षिणाभिमुखो जपेत्॥"
इति स्वतन्त्रे तन्त्रे हरगौरीसंवादे रहस्यपुरश्चरणविधिः॥*॥) अत्र आगमकल्पद्रुमोक्तकूर्म्मचक्रं तच्छब्दे द्रष्टव्यम्। हरिभक्तिविलासीयपुरश्चरणन्तु तद्ग्रन्थे समग्रविलासे दर्शनीयम्॥

पुरस्कारः, पुं, (पुरस्करणमिति+पुरस्+क+भावे घञ्।) पुरस्क्रिया। अभिप्रायः। आदरग्रहणम्। अग्रकरणम्। (पुरः क्रियतेऽनेनेति।) पूजनम्। ("तस्य बहुमानपुरस्कारं लप्स्ये।" इति हितोपदेशः॥) स्वीकारः। सेकः। इति पुरस्कृतशब्दार्थदर्शनात्॥

पुरस्कृतः, त्रि, (पुरः क्रियते स्मेति। पुरस्+कृ+क्तः।) अभिप्रेतः। आदरेणः। अग्रकृतः। पूजितः। इति मेदिनी। ते, २१३॥ स्वीकृतः। सिक्तः। इति हेमचन्द्रः॥

पुरस्तात्, व्य, (पूर्व्वस्मिन् पूर्व्वस्याः पूर्व्वस्मात् पूर्व्वस्याः वा पूर्व्वः पूर्व्वा वेति। पूर्व्व+"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः।" ५।३।२७। इति अस्तातिः। "अस्ताति च।" ५।३।४०। इति पूर्व्वस्य पुरादेशः।) प्राच्यां दिशि। यथा, पुरस्तात् सूर्य्य उदेति। प्रथमे काले। यथा, पुरस्ताद्बुद्धे। पुरार्थे। अतीते। यथा, पुरस्तादासीत्। अग्रतः अग्रे देशे। यथा, पुरस्तादायाति। इत्यमरभरतौ॥ (यथा च रघौ। २।४४।

"मान्यः स मे स्थावरजङ्गमानां
सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहिताग्नेः
नैश्यन् पुरस्तादनुपेक्षणीयम्॥")

पुरा, व्य, (पुरति अग्रे गच्छतीति। पुर+बाहुलकात् का।) प्रबन्धः। वाक्यरचना पुराणादिः। यथा, पुराविदः। चिरम्। चिरन्तनम्। पुराणमित्यर्थान्तरम्। अतीतम्। भूतम्। चिरातीतमित्येकम्। यथा इतिहासः पुरावृत्तमिति केचित्॥ निकटः। सन्निहितः। आगामिकम्। अनागतम्। निकटागामिकः। भविष्यदासत्तिः। इति केचित्॥ इत्यमरभरतौ॥ भीरुः। इति शब्दरत्नावली॥ (प्राक्। इति हेमचन्द्रः। ६।१७१॥ यथा, पञ्चदश्याम्। २।१४।

"इदं चर्च्चं पुरा ब्रह्मरेकमेवाद्वितीयकम्।
सदेवासीन्नामरूपे नाख्यामित्यादयोऽवचः॥")

पुरा, स्त्री, (पुरतीति। पुर+क+टाप्।) पूर्व्वदिक्। सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। गन्धपत्नी २ दिव्या ३ गन्धाढ्या ४ गन्धमादिनी ५ सुरभिः ६ भूरिगन्धा ७ कुटी ८ गन्धकुटी ९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। शीतलत्वम्। कषायत्वम्। कफपित्तश्वासास्रविषदाहार्त्तिभ्रममूर्च्छाव्रणाग्नित्वञ्च। इति राजनिर्घण्टः॥

पुराकृतं, त्रि, (पुरा पूर्व्वं पूर्व्वस्मिन् काले वा कृतम्।) प्रारब्धकर्म्म। पूर्व्वकालकृतपुण्यादि। यथा,—

"अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"
इति स्मृतिः॥

पुराणं, क्ली, (पुरा भवमिति। पुरा+"सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्युः।"पूर्व्वकालैकसर्व्वजरत्पुराणनवकेवलाः समानाधिकरणेन।"२।१।४९। इति निपातनात् तुडभावः। यद्वा, "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु।" ४।३।१०५। इति निपातितः। यद्वा, पुरा नीयते इति। नी+ड। णत्वञ्च।) यास्कादिमुनिप्रणीतवेदार्थवर्णितपञ्चलक्षणान्वितग्रन्थम्। तत्पर्य्यायः। पञ्चलक्षणम् २। इत्यमरः। १।६।५॥ पञ्चलक्षणानि यथा, सर्गः १ प्रतिसर्गः २ वंशः ३ मन्वन्तरम् ४ वंशानुचरितम् ५॥ महापुराणस्य दश लक्षणानि। यथा, सर्गः १ विसर्गः २ वृत्तिः ३ रक्षा ४ अन्तरम् ५ वंशः ६ वंश्यानुचरितम् ७ संस्था ८ हेतुः ९ अपाश्रयः १०॥ अथाष्टादशमहापुराणानि तेषां श्लोकसंख्यानि च तथा। ब्राह्मं दशसहस्रम् १ पाद्मं पञ्चपञ्चाशत्सहस्रम् २ वैष्णवं त्रयोविंशतिसहस्रम् ३ शैवं चतुर्व्विंशतिसहस्रम् ४ भागवतम् अष्टादशसहस्रम् ५ नारदीयं पञ्चविंशतिसहस्रम् ६ मार्कण्डेयं नवसहस्रम् ७ आग्नेयं चतुःशताधिकपञ्चदशसहस्रम् ८ भविष्यं पञ्चशताधिकचतुर्दशसहस्रम् ९ ब्रह्मवैवर्त्तम् अष्टादशसहस्रम् १० लैङ्गं एकादशसहस्रम् ११ वाराहं चतुर्व्विंशतिसहस्रम् १२ स्कान्दं शताधिकैकाशीतिसहस्रम् १३ वामनं दशसहस्रम् १४ कौर्म्मं सप्तदशसहस्रम् १५ मात्स्यं चतुर्दशसहस्रम् १६ गारुडं एकोनविंशतिसहस्रम् १७ ब्रह्माण्डं द्वादशसहस्रम् १८। समुदायेन चतुर्लक्षश्लोकाः। इति श्रीभागवतीयद्वादशस्कन्धः॥ (अपि च देवीभागवते १ स्कन्धे ३ अध्याये तथा मत्स्यपुराणे ५३ अध्याये एतद्विवरणं द्रष्टव्यम्॥) अपि च।

सूत उवाच।

"विस्तराणि पुराणानि वेतिहासस्य गौनक!।
संहितां पञ्चरात्राणि कथयामि यथागमम्॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं विप्र! पुराणं पञ्चलक्षणम्॥
एतदुपपुराणानां लक्षणञ्च विदुर्बुधाः।
महतान्तु पुराणानां लक्षणं कथयामि ते॥*॥

दृष्टिश्चापि विसृष्टिश्च स्थितिस्त्वेषाञ्च पालनम्।
कर्म्मणां वासना वार्त्ता मनूनाञ्च क्रमेण च॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्॥
दशाधिकं लक्षणञ्च महतां परिकीर्त्तितम्।
संख्यानञ्च पुराणानां निबोध कथयामि ते॥
परं ब्रह्मपुराणञ्च सहस्राणां दशैव च।
पञ्चोनषष्टिसाहस्रं पाद्ममेव प्रकीर्त्तितम्॥
त्रयोविंशतिसाहस्रं वैष्णवञ्च विदुर्बुधाः।
चतुर्विंशतिसाहस्रं शैवमेव निरूपितम्॥
ग्रन्थोऽष्टादशसाहस्रं श्रीमद्भागवतं विदुः।
पञ्चविंशतिसाहस्रं नारदीयं प्रकीर्त्तितम्॥
मार्कण्डं नवसाहस्रं पुराणं पण्डिता विदुः।
चतुःशताधिकं पञ्चदशसाहस्रमेव च॥
परमग्निपुराणञ्च रुचिरं परिकीर्त्तितम्।
चतुर्दशसहस्राणि परं पञ्चशताधिकम्॥
पुराणप्रवरञ्चैव भविष्यं परिकीर्त्तितम्।
अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्॥
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः।
एकादशसहस्रञ्च परं लिङ्गपुराणकम्॥
चतुर्व्विंशतिसाहस्रं वाराहं परिकीर्त्तितम्।
एकाशीतिसहस्रञ्च परमेव शताधिकम्॥
वरं स्कन्दपुराणञ्च सद्भिरेवं निरूपितम्।
वामनं दशसाहस्रं कौर्म्मं सप्तदशैव तु॥
मात्स्यं चतुर्दशं प्रोक्तं पुराणं पण्डितैस्तथा।
ऊनविंशतिसाहस्रं गारुडं परिकीर्त्तितम्॥
परं द्वादशसाहस्रं ब्रह्माण्डं परिकीर्त्तितम्।
एवं पुराणसंख्यानं चतुर्लक्षमुदाहृतम्॥
अष्टादशपुराणानामेवमेव विदुर्बुधाः।
एवोपपुराणानामष्टादश प्रकीर्त्तिताः॥*॥
इतिहासो भारतञ्च वाल्मीकं काव्यमेव च।
पञ्चकं पञ्चरात्राणां ज्ञानमाहात्म्यपूर्व्वकम्।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम्।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम्॥
पञ्चन्यः संहितानाञ्च ज्ञानभक्तिसमन्विताः।
ब्रह्मणश्च शिवस्यापि प्रह्लादस्य तथैव च॥
गौतमस्य कुमारस्य संहिताः परिकीर्त्तिताः।
इति ते कथितं सर्व्वं क्रमेण च पृथक् पृथक्॥
अन्यच्च विपुलं ग्राह्यं ममापि च यथागमम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः॥

पद्मपुराणमते तु।

"निस्तारार्थं तु लोकानां स्वयं नारायणः प्रभुः।
व्यासरूपेण जनवान् पुराणानि महीतले॥
पठनाच्छ्रवणाद्येषां नृणां पापक्षयो भवेत्।
धर्म्माधर्म्मपरिज्ञानं सदाचारप्रवर्त्तनम्॥
गतिश्च परमा तद्वद्भक्तिर्भगवति प्रभौ।
तानि ते कथयिष्यामि सप्तमाणानि भूतले॥"*॥

पुराणसंख्यान्तरमाह।

"पुराणानि चतुर्लक्षाण्येतानि धरणीतले।
तथा महाभारतञ्च लक्षसंख्यं प्रकीर्त्तितम्॥
पञ्चलक्षमिदं राजन्! कथितं ब्रह्म केवलम्।
वेदः पञ्चमनामैव लोकनिस्तारकः परः॥

तत्र पद्मपुराणञ्च प्रथमं स प्रणीतवान्।
ततोऽन्यानि पुराणानि ज्ञात्वा योऽग्र तु क्रमात्॥
अष्टादशं भागवतं सारमालक्ष्य सर्व्वतः।
ज्ञतवान् भगवान् व्यासः शुकश्चाध्यापयत् सुतम्॥"
इति पातालखण्डे ७१ अध्यायः॥ * ॥
व्याख्यानादिभिः सह व्यासः पुराणं चक्रे।
यथा,—
"व्याख्याने चाप्युपाख्याने र्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थविशारदः॥
प्रख्यातो व्यासशिष्योऽभूत् सूतो वै लोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥"
अस्य टीका यथा,—
व्याख्यानादिभिः सह पुराणं चक्रे व्यास इत्यन्वयः। तत्र च।
स्वयं दृष्टार्थकथनं प्राहुराख्यानकं बुधाः।
श्रुतस्यार्थस्य कथनमुपाख्यानं प्रचक्षते॥
गाथास्तु पितृपृथ्वीप्रभृतिगीतयः। कल्पशुद्धिः श्राद्धकल्पादिनिर्णयः॥ * ॥
"सुमतिश्चाग्निवर्च्चाश्च मित्रायुः शांशपायनः।
अकृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन्॥"
टीका। सुमत्यादयस्तु रोमहर्षणस्य षट्शिष्यास्तन्नामानः षट् संहिता जगदुः॥ * ॥
"काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः।
लौमहर्षणिका चान्या तिस्रश्चा मूलसंहिता॥"
टीका। अकृतव्रण एव काश्यपः काश्यपो ह्यकृतव्रण इतिवायुक्तेः। रौमहर्षणिका चान्या रोमहर्षणेन पुनः संक्षेपेण प्रोक्ता॥ * ॥
"चतुष्टयेनाप्येतेन संहितानामिदं मुने!।"
टीका। एतासां काश्यपादिकृतानां संहितानामर्थचतुष्टयेनापि मूलभूतेन सनत्सारोद्धारात्मकं इदं श्रीविष्णुपुराणं मुने! मैत्रेय! मया ज्ञातमिति शेषः॥ * ॥
"आद्यं सर्व्वपुराणानां पुराणं ब्राह्ममुच्यते।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते॥"
इति विष्णुपुराणे ३ अंशे ६ अध्यायः॥*॥
तेषां नामोच्चारणादिमाहात्म्यं यथा,—
"अष्टादशपुराणानां नामधेयानि यः पठेत्।
विसत्यं जपते नित्यं सोऽश्वमेधफलं लभेत्॥"
इति मार्कण्डेयपुराणम्॥ * ॥
तामसपुराणानि यथा,—
"मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।
आग्नेयञ्च षडेतानि तामसानि निबोधत॥"
सात्त्विकपुराणानि यथा,—
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम्।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने!।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै॥"
राजसपुराणानि यथा,—
"ब्राह्मं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च।
भविष्यं वामनं ब्राह्मं राजसानि निबोधत॥
सात्त्विका मोक्षदाः प्रोक्ता राजसाः स्वर्गदाः शुभाः।
तथैव तामसा देवि! निरयप्राप्तिहेतवः॥"
इति पाद्मोत्तरखण्डे ३३ अध्यायः॥ * ॥
अष्टादशोपपुराणानि यथा,—
"आद्यं सनत्कुमारोक्तं नारसिंहमथापरम्।
तृतीयं स्कान्दसंज्ञितं कुमारेण तु भाषितम्॥
चतुर्थं शिवधर्म्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्व्वाससोक्तमाश्चर्य्यं नारदोक्तमतः परम्॥
कापिलं वामनञ्चैव तथैवोशनसेरितम्।
ब्रह्माण्डं वारुणञ्चाथ कालिकाख्यमेव च॥
माहेश्वरं तथा साम्बं सौरं सर्व्वार्थसञ्चयम्।
पराशरोक्तमपरं मारीचं भार्गवाह्वयम्॥"
इति गारुडे २२७ अध्यायः॥ * ॥
कौर्म्मोक्तान्येतानि उपपुराणग्रन्थे द्रष्टव्यानि॥
पुराणपाठक्रमस्तु पारायणग्रन्थे पाठग्रन्थे च द्रष्टव्यः॥ अथाष्टादशमहापुराणानामनुक्रमणिका अर्थात् तेषां श्लोकपर्व्वखण्डभागोपाख्यानश्रवणदानफलानि लिख्यन्ते।
सूत उवाच।
"एतच्छ्रुत्वा नारदस्तु कुमारस्य वचो मुदा।
पुनरप्याह सुप्रीतो जिज्ञासुः श्रेय उत्तमम्॥
नारद उवाच।
साधु साधु महाभाग! सर्व्वलोकोपकारकम्।
महाज्ञानं त्वया प्रोक्तं सर्व्वतन्त्रोत्तमोत्तमम्॥
अधुना श्रोतुमिच्छामि पुराणाख्यानमुत्तमम्।
यस्मिन् यस्मिन् पुराणे तु यद्यदाख्यानकं भुवि!।
तत्तत् सर्व्वं समाचक्ष्व सर्व्वज्ञस्त्वं यतो मतः॥
तच्छ्रुत्वा वचनं विप्रा नारदस्य शुभावहम्।
पुराणाख्यानसंप्रश्नं कुमारः प्रत्युवाच ह॥
सनत्कुमार उवाच।
पुराणाख्यानकं विप्र! नानाकल्पसमुद्भवम्।
नानाकथासमायुक्तमद्भुतं बहुविस्तरम्॥
ऋषिः सनातनश्चायं यथा वेद तथापरः।
न वेद तस्मात् पृच्छ त्वं बहुकल्पविदांवरम्॥
श्रुत्वेत्थं नारदो वाक्यं कुमारस्य महात्मनः।
प्रणम्य विनयोपेतः सनातनमथाब्रवीत्॥
ब्रह्मन्! पुराणविच्छ्रेष्ठ! ज्ञानविज्ञाततत्पर!।
पुराणानां विभागं मे साकल्येनानुकीर्त्तय॥
यस्मिन् श्रुते श्रुतं सर्व्वं ज्ञाते ज्ञातं हते हतम्।
वर्णाश्रमाचारधर्म्मं साक्षात्कारत्वमेष्यति॥
कियन्ति च पुराणानि कियत् सङ्ख्यानि मानतः।
किं किमाख्यानयुक्तानि तद्वदस्व मम प्रभो!॥
चातुर्वर्ण्याश्रया नाना व्रतादीनां कथास्तथा।
लक्षिक्रमेण वंशानां कथाः सम्यक् प्रकाशय॥
त्वत्तोऽधिको न चान्योऽस्ति पुराणाख्यानवित् प्रभो!।
तस्मादाख्याहि मह्यं त्वं सर्व्वसन्देहभञ्जनम्॥
ततः सनातनो विप्राः श्रुत्वा नारदभाषितम्।
नारायणं स्वयं ध्यात्वा प्रोवाचाथ विदांवरः॥
सनातन उवाच।
साधु साधु मुनिश्रेष्ठ! सर्व्वलोकोपकारक!।
पुराणाख्यानविज्ञाने यज्ञासा नैष्ठिकी मतिः॥
तुभ्यं समभिधास्यामि यत् प्रोक्तं ब्रह्मणा पुरा।
मरीच्यादिऋषिभ्यस्तु पुत्रस्नेहाद्दतात्मना॥
एकदा ब्रह्मणः पुत्रो मरीचिर्नाम विश्रुतः।
स्वाध्यायश्रुतसम्पन्नो वेदवेदाङ्गपारगः॥
उपस्थाय स्वपितरं ब्रह्माणं लोकभावनम्।
प्रणम्य भक्त्या पप्रच्छ इदमेव सुनीश्वर!।
पुराणाख्यानमखिलं यत्त्वं पृच्छसि मानद!॥
मरीचिरुवाच।
भगवन्! देवदेवेश! लोकानां प्रभवाव्यय!।
सर्व्वज्ञ! सर्व्वकल्याण सर्व्वाध्यक्ष नमोऽस्तु ते॥
पुराणबीजमाख्याहि मह्यं शुश्रूषते पितः!।
लक्षणञ्च प्रमाणञ्च वक्तारं पृच्छकं तथा॥
ब्रह्मोवाच।
शृणु वत्स! प्रवक्ष्यामि पुराणानां समुच्चये।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम्
पुराणमेकमेवासीत् सर्व्वकल्पेषु मानद!।
चतुर्लक्षस्य बीजञ्च शतकोटिप्रविस्तरम्॥
प्रवृत्तिः सर्व्वशास्त्राणां पुराणादभवत्ततः॥
कालेनाग्रहणं दृष्ट्वा पुराणस्य महामतिः।
हरिर्व्यासस्वरूपेण जायते च युगे युगे॥
चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा।
तदष्टादशधा कृत्वा भूर्लोके निर्दिशत्यपि॥
अद्यापि देवलोके तु शतकोटि प्रविस्तरम्।
अस्त्येव तस्य सारस्तु चतुर्लक्षेण वर्ण्यते॥*॥
ब्राह्मम् १ पाद्मम् २ वैष्णवञ्च ३ शैवम् ४ भागवतम् ५ नारदीयम् ६ मार्कण्डेयञ्च ७ आग्नेयञ्च ८ भविष्यञ्च ९ ब्रह्मवैवर्त्त-१० लिङ्गके ११। वाराहञ्च १२ तथा स्कान्दम् १३ वामनम् १४ कूर्म्म-१५ संज्ञकम्। मात्स्यञ्च १६ गारुडम् १७ तद्वद्ब्रह्माण्डाख्य-१८ मिति त्रिषट्॥
एकं कथानकं स्तूयं वक्तुः श्रोतुः समाश्रयम्।
प्रवक्ष्यामि समासेन निशामय समाहितः॥"*
तत्र प्रथमं ब्रह्मपुराणम्।
"ब्राह्मं पुराणं तत्रादौ सर्व्वलोकहिताय वै।
व्यासेन वेदविदुषा समाख्यातं महात्मना॥
तद्धि सर्व्वपुराणाद्यं धर्म्मकामार्थमोक्षदम्।
नानाख्यानेतिहासाढ्यं दशसाहस्रमुच्यते॥*॥
तत्पूर्व्वभागे।
"देवानामसुराणाञ्च यज्ञोत्पत्तिः प्रकीर्त्तिता।
प्रजापतीनाञ्च तथा दक्षादीनां तपोधन!॥
ततो लोकेश्वरस्याञ्च सूर्य्यस्य परमात्मनः।
यन्माहात्म्यकीर्त्तनं पुण्यं महापातकनाशनम्॥
यत्रावतारः कथितः परमानन्दरूपिणः।
श्रीमतो रामचन्द्रस्य चतुर्व्यूहावतारिणः॥
ततश्च सोमवंशस्य कीर्त्तनं यत्र वर्णितम्।
ज्ञात्वास्य जगदीशस्य चरितं कल्मषापहम्॥
द्वीपानाञ्चैव सिन्धूनां वर्षाणां चाप्यशेषतः।
वर्णनं यत्र पातालस्वर्गाणाञ्च प्रदृश्यते॥
नरकाणां समाख्यानं सूर्य्यस्तुतिकथानकम्।

पार्वत्याश्च तथा जन्म विवाहश्च निगद्यते ॥
इत्याख्यानं ततः प्रोक्तमेकाम्रक्षेत्रवर्णनम् ।
पूर्वभागोऽयमुदितः पुराणस्यास्य मानद ! ॥"*॥
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु पुरुषोत्तमवर्णनम् ।
विस्तरेण समाख्यातं तीर्थयात्राविधानतः ॥
अत्रैव क्षत्रचरितं विस्तरात् समुदीरितम् ।
वर्णनं यमलोकस्य पितृश्राद्धविधिस्तथा ॥
वर्णाश्रमाणां धर्म्माश्च कीर्त्तिता यत्र विस्तरात् ।
विष्णुधर्म्मयुगाख्यानं प्रलयस्य च वर्णनम् ॥
योगानाञ्च समाख्यानं साङ्गानाञ्चापि वर्णनम् ।
ब्रह्मवादमतुद्देश्यः पुराणस्य च शंसनम् ॥
एतद्ब्रह्मपुराणन्तु भागद्वयसमन्वितम् ।
वर्णितं सर्व्वपापघ्नं सर्व्वसौख्यप्रदायकम् ॥"*॥
तत्फलश्रुतिः ।
"सूतशौनकसंवादं भुक्तिमुक्तिप्रदायकम् ।
लिखित्वैतत् पुराणं यो वैष्णाख्यं हेमसंयुतम् ॥
जलधेनुयुतस्यापि भक्त्या दत्वाद्विजन्मने ।
पौराणिकाय सम्पूज्य वस्त्रभोज्यविभूषणैः ।
स वसेद्ब्रह्मणो लोके यावच्चन्द्रार्कतारकम् ॥
यः पठेच्छृणुयाद्वापि ब्राह्मानुक्रमणीं द्विज ! ।
सोऽपि सर्व्वपुराणस्य श्रोतुर्वक्तुः फलं लभेत् ॥
शृणोति यः पुराणन्तु ब्राह्मं सर्व्वं जितेन्द्रियः ।
हविष्याशी च नियमात् स लभेद् ब्रह्मणः
परम् ॥
किमत्र बहुनोक्तेन यद्यदिच्छति मानवः ।
तत्तत् सर्व्वं लभते वत्स ! पुराणस्यास्य कीर्त्तनात् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे ६२ अध्यायः ॥१॥
द्वितीयं पद्मपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु पुत्र ! प्रवक्ष्यामि पुराणं पद्मसंज्ञितम् ।
महत्पुण्यप्रदं नृणां शृण्वतां पठतां सदा ॥
यथा पञ्चेन्द्रियः सर्व्वः शरीरीति निगद्यते ।
तथेदं पञ्चभिः खण्डैरुदितं पापनाशनम् ॥"*॥
तत्र प्रथमे सृष्टिखण्डे ।
"पुलस्त्येन तु भीष्माय सृष्ट्यादिक्रमतो द्विज ! ।
नानाख्यानेतिहासाद्यैर्यथोक्तो धर्म्मविस्तरः ॥
पुष्करस्य च माहात्म्यं विस्तरेण प्रकीर्त्तितम् ।
ब्रह्मयज्ञविधानञ्च वेदपाठादिलक्षणम् ॥
दानानां कीर्त्तनं यत्र वृत्तान्ताञ्च पृथक् पृथक् ।
विवाहः प्रेतजायाञ्च नारदाख्यानकं महत् ॥
माहात्म्यञ्च गवादीनां कीर्त्तितं सर्व्वपुण्यदम् ।
कालकेयादिदैत्यानां वधो यत्र पृथक् पृथक् ॥
यज्ञागामर्च्चनं दानं यत्र प्रोक्तं द्विजोत्तम ! ।
तत्सृष्टिखण्डमुद्दिष्टं व्यासेन सुमहात्मना ॥"*॥
द्वितीये भूमिखण्डे ।
"पितृमाचादिपूज्यत्वे शिवशर्म्मकथा पुरा ।
सुव्रतस्य कथा पश्चात् वृत्तस्य च वधस्तथा ॥
पृथोर्वैन्यस्य चाख्यानं धर्म्माख्यानं ततः परम् ।
पितृसुम्भवधाख्यानं नहुषस्य कथा ततः ॥
ययातिचरितञ्चैव गुरुतीर्थनिरूपणम् ॥
राज्ञा जैमिनिसंवादो वज्राश्वस्यैकथायुतः ॥
कथा ह्यशोकसुन्दर्य्या दुष्टदैत्यवधान्विता ।
कामोदाख्यानकं तत्र विदुषवधसंयुतः ॥
कुञ्जलस्य च संवादश्चावनेन महात्मना ।
विल्वाख्यानं ततः प्रोक्तं खण्डस्यास्य फलोदयम् ॥
शतयूपैलकसंवादं भूमिखण्डमिदं स्मृतम् ॥"*॥
तृतीये स्वर्गखण्डे ।
"ब्रह्माक्षोत्पत्तिरहिता यत्रर्षिभिश्च सौतिना ।
सप्तभूमिलोकसंस्थानं तीर्थाख्यानं ततः परम् ॥
नर्म्मदोत्पत्तिकथनं तत्तीर्थानां कथा पृथक् ।
कुरुक्षेत्रादितीर्थानां कथाः पुण्याः प्रकीर्त्तिताः ॥
कालिन्दीपुण्यकथनं कार्त्तीमाहात्म्यवर्णनम् ॥
गयायाश्चैव माहात्म्यं प्रयागस्य च पुण्यकम् ।
वर्णाश्रमानुरोधेन कर्म्मयोगनिरूपणम् ॥
व्यासजैमिनिसंवादः पुण्यकर्म्मकथान्वितः ।
समुद्रमथनाख्यानं व्रताख्यानं ततः परम् ॥
ऊर्ज्जपञ्चाङ्गमाहात्म्यं स्तोत्रं सर्व्वापराघघ्नम् ।
एतत्स्वर्गाभिधं विप्र ! सर्व्वपातकनाशनम् ॥"
चतुर्थे पातालखण्डे ।
"रामाश्वमेधे प्रथमं रामराज्याभिषेचनम् ।
अगस्त्याद्यागमश्चैव पौलस्त्यावधकीर्त्तनम् ॥
अश्वमेधोपदेशश्च हयचर्य्या ततः परम् ।
नानाराजकथाः पुण्या जगन्नाथानुवर्णनम् ॥
वृन्दावनस्य माहात्म्यं सर्व्वपापप्रणाशनम् ।
नित्यलीलानुकथनं यत्र कृष्णावतारिणः ॥
माधवक्षेत्रमाहात्म्ये स्नानदानार्च्चने फलम् ।
धराधरार्कसंवादो यमब्राह्मणयोः कथा ॥
संवादो राजदूतानां ब्राह्मणोत्तमनिरूपणम् ।
शिवशर्म्मसुशर्म्मायोगो दधीच्याख्यानकन्ततः ॥
भस्ममाहात्म्यमतुलं शिवमाहात्म्यसुत्तमम् ।
देवदानसुताख्यानं पुराणश्रवणं शनम् ॥
गौतमाख्यानकञ्चैव शिवगीता ततः स्मृता ।
कल्पान्तरी रामकथा भरद्वाजश्रमाश्रितौ ॥
पातालखण्डमेतद्धि शृण्वतां ज्ञानिनां सदा ।
सर्व्वपापप्रशमनं सर्व्वाभीष्टफलप्रदम् ॥"
पञ्चमे उत्तरखण्डे ।
"पर्व्वताख्यानकं पूर्व्वं गौर्य्यै प्रोक्तं शिवेन वै ।
जालन्धरकथा पश्चाच्छ्रीशैलाद्यनुकीर्त्तनम् ॥
सगरस्य कथा पुण्या ततः परमुदीरितम् ।
गङ्गाप्रयागकाशीनां गयायाश्चाधिपुण्यकम् ॥
आत्मादिदानमाहात्म्यं तन्महाद्वादशीव्रतम् ।
चतुर्विंशैकादशीनां माहात्म्यं पृथगीरितम् ॥
विष्णुधर्म्मसमाख्यानं विष्णुनामसहस्रकम् ।
कार्त्तिकव्रतमाहात्म्यं माघस्नानफलन्ततः ॥
जम्बुद्वीपस्य तीर्थानां माहात्म्यं पापनाशनम् ।
साम्बमत्स्याश्च माहात्म्यं वृत्तिसंस्थित्यवर्णनम् ॥
देवधर्म्मादिकाख्यानं गौतमाश्रमवर्णने ।
भक्ताख्यानञ्च माहात्म्यं श्रीमद्भागवतस्य ह ॥
रुद्रप्रश्नस्य माहात्म्यं बहुतीर्थकथान्वितम् ।
मन्वन्तराभिधानञ्च त्रिपाद्भूतस्य वर्णनम् ॥
अवतारकथा पुण्या मत्स्यादीनामतः परम् ।
रामनामशतं दिव्यं तन्माहात्म्यञ्च वाडव ! ॥
परीक्षणञ्च भृगुणा श्रीविष्णोर्वैभवस्य च ।
इत्येतदुत्तरं खण्डं यत्पद्मं सर्व्वपुण्यदम् ॥" * ॥
तत्फलश्रुतिः ।
"पद्मपद्मद्वयं पाद्मं यः शृणोति नरोत्तमः ।
स लभेद्वैष्णवं धाम भुक्त्वा भोगानिहेप्सितान् ॥
एतद्वै पद्मपद्माग्र्यलक्षणं पद्मसंज्ञकम् ।
पुराणं लेखयित्वा वै व्येष्ठ्यां स्वर्णाद्यसंयुतम् ॥
यः प्रदद्यात् सुसंशुद्धं पुराणज्ञाय मानद ! ।
स याति वैष्णवं नाम सर्व्वदेवनमस्कृतः ॥
पद्मानुक्रमणीमेतां यः पठेत् शृणुयात् तथा ।
सोऽपि पद्मपुराणस्य लभेत् श्रवणजं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृहदुपाख्याने चतुर्थपादे ६३ अध्यायः ॥ २ ॥
तृतीयं विष्णुपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वैष्णवं महत् ।
त्रयोविंशतिसाहस्रं सर्व्वपातकनाशनम् ॥
यत्रादिभागे निर्द्दिष्टाः षड्ंशाः शुक्लजेन ह ।
मैत्रेयाद्यादिमे तत्र पुराणस्यावतारिकाः ॥"
तत्र प्रथमभागस्य प्रथमांशे ।
"आदिकारणसर्गञ्च देवादीनाञ्च सम्भवः ।
समुद्रमथनाख्यानं दक्षादीनां ततोद्भवाः ॥
ध्रुवस्य चरितं चैव पृथोश्चरितमेव च ।
प्राचेतसं तथाख्यानं प्रह्लादस्य कथानकम् ॥
पृथग्राज्याधिकाराख्या प्रथमोऽंश इतीरितः ॥"
प्रथमभागस्य द्वितीयांशे ।
"प्रियव्रताद्यख्यानं द्वीपवर्षनिरूपणम् ।
पातालनरकाख्यानं सप्तस्वर्गनिरूपणम् ।
सूर्य्यादिचारकथनं पृथग्लक्षणसंयुतम् ॥
चरितं भरतस्याथ मुक्तिमार्गनिदर्शनम् ॥
निदाघऋभुसंवादो द्वितीयोऽंश उदाहृतः ॥"
प्रथमभागस्य तृतीयांशे ।
"मन्वन्तरसमाख्यानं वेदव्यासावतारकम् ।
नरकोद्धारकं कर्म्म गदितञ्च ततः परम् ॥
सगरस्यौर्वसंवादे सर्व्वधर्म्मनिरूपणम् ।
आह्निकञ्च तथोद्दिष्टं वर्णाश्रमनिबन्धने ।
सदाचारश्च कथितो मायामोहकथा ततः ।
तृतीयोऽंशोऽयमुदितः सर्व्वपापप्रणाशनः ॥"
प्रथमभागस्य चतुर्थांशे ।
"सूर्य्यवंशकथा पुण्या सोमवंशानुकीर्त्तनम् ।
चतुर्थेऽंशे मुनिश्रेष्ठ ! नानाराजकथान्वितम् ॥"
प्रथमभागस्य पञ्चमांशे ।
"कृष्णावतारसंग्रन्थो गोकुलीया कथा ततः ।
पूतनादिवधो बाल्ये कौमारेऽरिष्टहिंसनम् ॥
केशोरे कंसहननं माथुरं चरितं तथा ।
ततस्तु यौवने प्रोक्ता लीला द्वारवतीभवा ॥
सर्व्वदैत्यवधो यत्र शिवाद्याश्च पृथग्विधाः ।
यत्र स्थित्वा जगन्नाथः कृष्णो योगेश्वरेश्वरः ॥
भूभारहरणं चक्रे परस्परहननादिभिः ।
अष्टावक्रीयमाख्यानं पञ्चमोऽंश इतीरितः ॥"

प्रथमभागस्य षष्ठांशे ।
"कलिजं चरितं प्रोक्तं चातुर्विध्यं लयस्य च ।
ब्रह्मज्ञानसमुद्देशः खाण्डिक्यस्य निरूपितः ॥
कैशिध्वजेन चैतेषु षष्ठोंऽशः परिकीर्तितः ॥"
तस्य द्वितीयभागे ।
"अतःपरन्तु सूतेन शौनकादिभिरादरात् ।
पृष्टेन चोदिताः ब्रह्मद्विष्णुधर्म्मोत्तराक्षयाः ॥
नानाधर्म्मकथाः पुण्या व्रतानि नियमा यमाः ।
धर्म्मशास्त्रं चार्थशास्त्रं वेदान्तं ज्योतिषं तथा ॥
वंशाख्यानं प्रकरणात् स्तोत्राणि मनवस्तथा ॥
नानाविद्याश्रयाः प्रोक्ताः सर्व्वलोकोपकारकाः ।
एतद्विष्णुपुराणं वै सर्व्वशास्त्रार्थसंग्रहम् ॥"* ॥
तत्फलश्रुतिः ।
"वाराहकल्पवृत्तान्तं व्यासेन कथितं त्विह ।
यो नरः पठते भक्त्या यः शृणोति च सादरम् ।
तावुभौ विष्णुलोकं हि व्रजेतां भुक्तभोगकौ ॥
लिखित्वा च यो दद्यादाषाढ्यां घृतधेनुना ।
सहितं विष्णुभक्ताय पुराणार्थविदे द्विज ! ।
स याति वैष्णवं धाम विमानेनार्कवर्चसा ॥
यश्च विष्णुपुराणस्य समनुक्रमणीं द्विज ! ।
कथयेच्छृणुयाद्वापि स पुराणफलं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे द्वितीयपादे षण्णवतितमोऽध्यायः ॥ ३ ॥
चतुर्थं वायुपुराणम् ।
ब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं वायवीयकम् ।
यस्मिन् श्रुते लभेद्ब्रह्म रुद्रस्य परमात्मनः ॥
चतुर्विंशतिसाहस्रं तत् पुराणं प्रकीर्त्तितम् ।
श्वेतकल्पप्रसङ्गेन धर्म्मागम्याह मारुतः ॥
तदायवीयमुदितं भागद्वयसमाश्रितम् ॥" * ॥
तस्य पूर्व्वभागे ।
"स्वर्गादिलक्षणं यत्र प्रोक्तं विप्र ! सविस्तरम् ॥
मन्वन्तरेषु वंशाश्च राज्ञां ये यत्र कीर्त्तिताः ।
गयासुरस्य चरितं विस्तरादत्र कीर्त्तितम् ॥
मासानाञ्चैव माहात्म्यं माघस्योक्तं फलाधिकम् ।
दानधर्म्मा राजधर्म्मा विस्तरेणोदितास्तथा ॥
भूपातालककुब्व्योमचारिणां यत्र निर्णयः ।
व्रतादीनाञ्च पूर्व्वोऽयं विभागः समुदाहृतः ॥"
तदुत्तरभागे ।
"उत्तरे तस्य भागे तु नर्म्मदातीर्थवर्णनम् ।
शिवस्य संहिताख्या वै विस्तरेण मुनीश्वर ! ॥
यो देवः सर्व्वदेवानां दुर्ज्ञेयः सनातनः ।
स तु सर्व्वात्मना यस्यां तीरे तिष्ठति सन्ततम् ॥
इदं ब्रह्मा हरिरिदं साक्षादेदं परो हरः ।
इदं ब्रह्म निराकारं केवलं नर्म्मदाजलम् ॥
ध्रुवं लोकहितार्थाय शिवेन स्वयमीरितः ।
मुक्तिः काशि सरिद्वरा रेवेयमवतारिता ॥
ये वसन्त्युत्तरे कूले रुद्रस्यानुचरा हि ते ।
वसन्ति याम्यतीरे ये लोकं ते यान्ति वैष्णवम् ॥
ओंकारेश्वरमारभ्य यावत् पश्चिमसागरम् ।
सङ्गमाः पञ्च च त्रिंशन्नदीनां पापनाशनाः ॥
एकैकमुत्तरे तीरे त्रयोविंशति दक्षिणे ।
पञ्चत्रिंशत्तमः प्रोक्तो रेवासागरसङ्गमः ॥
सङ्गमैः सहितान्येव रेवातीरद्वयेऽपि च ।
चतुःशतानि तीर्थानि प्रसिद्धानि च सन्ति हि ।
षष्टितीर्थसहस्राणि परिक्रोशो मुनीश्वर ! ।
सन्ति चान्यानि रेवायास्तीरयुग्मे पदे पदे ॥
संहितेयं महापुण्या शिवस्य परमात्मनः ।
नर्म्मदाचरितं यत्र वायुना परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"लिखित्वेदं पुराणन्तु शुद्धधेनुसमन्वितम् ।
श्रावणर्क्षे यो ददाति ब्रह्मणाय कुटुम्बिने ॥
रुद्रलोके वसेत् सोऽपि यावदिन्द्राश्चतुर्दश ।
यः श्रावयेद्वा शृणुयाद्वायवीयमिदं नरः ।
नियमेन हरिष्यामो न रुद्रो नात्र संशयः ॥
यश्चानुक्रमणीमेतां शृणोति श्रावयेत वा ।
सोऽपि सर्व्वपुराणस्य फलं श्रवणजं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे द्वितीयपादे चतुर्थपादे ९५ अध्यायः ॥ ४ ॥
पञ्चमं श्रीभागवतपुराणम् ।
ब्रह्मोवाच ।
"मरीचे ! शृणु वक्ष्यामि वेदव्यासेन यत् कृतम् ।
श्रीमद्भागवतं नाम पुराणं ब्रह्मसम्मितम् ॥
तदष्टादशसाहस्रकीर्त्तितं पापनाशनम् ।
सुरूपादक्रमोऽयं स्कन्धैर्द्वादशभिर्युतः ॥
भगवानेव विप्रेन्द्र ! विश्वरूपी सनातनः ॥"
तस्य प्रथमस्कन्धे ।
"तत्र तु प्रथमे स्कन्धे सूतशौनकयोः समागमः ।
व्यासस्य चरितं पुण्यं पाण्डवानां तथैव च ॥
पारीक्षितसुपाख्यानमितीदं समुदाहृतम् ॥"
द्वितीयस्कन्धे ।
"परीक्षित्शुकसंवादे सृष्टित्रयनिरूपणम् ।
ब्रह्मनारदसंवादोऽवतारचरितान्वितम् ॥
पुराणलक्षणञ्चैव सृष्टिकारणसम्भवः ।
द्वितीयोऽयं समुदितः स्कन्धो व्यासेन धीमता ॥"
तृतीयस्कन्धे ।
"चरितं विदुरस्याथ मैत्रेयेणास्य सङ्गमः ।
सृष्टिप्रकरणं पश्चाद्ब्रह्मणः परमात्मनः ॥
कापिलं साङ्ख्यमप्यत्र तृतीयोऽयमुदाहृतः ॥"
चतुर्थस्कन्धे ।
"सत्याश्चरितमादौ तु ध्रुवस्य चरितं ततः ।
पृथोः पुण्यसमाख्यानं ततः प्राचीनबर्हिषः ।
इत्येष तुर्य्यो गदितो विसर्गः स्कन्ध उत्तमः ॥"
पञ्चमस्कन्धे ।
"प्रियव्रतस्य चरितं तद्वंश्यानाञ्च पुण्यदम् ।
ब्रह्माण्डान्तर्गतानाञ्च लोकानां वर्णनन्ततः ॥
नरकस्थितिरित्येष संस्थाने पञ्चमो मतः ॥"
षष्ठस्कन्धे ।
"अजामिलस्य चरितं दक्षसृष्टिनिरूपणम् ॥
वृत्राख्यानं ततः पश्चान्मरुतां जन्म पुण्यदम् ।
षष्ठोऽयमुदितः स्कन्धो व्यासेन परिपोषणे ॥"
सप्तमस्कन्धे ।
"प्रह्लादचरितं पुण्यं वर्णाश्रमनिरूपणम् ।
सप्तमो गदितो वत्स ! वासनाकर्म्मकीर्त्तने ॥"
अष्टमस्कन्धे ।
"गजेन्द्रमोक्षणाख्यानं मन्वन्तरनिरूपणम् ।
समुद्रमथनञ्चैव बलिबैभवबन्धनम् ॥
मत्स्यावतारचरितमष्टमोऽयं प्रकीर्त्तितः ॥"* ॥
नवमस्कन्धे ।
"सूर्य्यवंशसमाख्यानं सोमवंशनिरूपणम् ।
वंश्यानुचरितं प्रोक्तो नवमोऽयं महामते ! ॥"
दशमस्कन्धे ।
"कृष्णस्य बालचरितं कौमारञ्च व्रजस्थितिः ॥
कैशोरं मथुराख्यानं यौवनं द्वारकास्थितिः ।
भूभारहरणञ्चात्र निरोधे दशमः स्मृतः ॥"
एकादशस्कन्धे ।
"नारदेन तु संवादो वसुदेवस्य कीर्त्तितः ।
यदोश्च दत्तात्रेयेण श्रीकृष्णोद्धवस्य च ॥
यादवानां मिथोऽन्तश्च सूक्तावेकादशः स्मृतः ॥"
द्वादशस्कन्धे ।
"भविष्यकलिनिर्देशो मोक्षो राज्ञः परीक्षितः ॥
वेदशाखाप्रणयनं मार्कण्डेयतपः स्मृतम् ।
सौरी विभूतिरहिता सात्वती च ततः परम् ॥
पुराणसङ्ख्याकथनमाश्रये द्वादशो ह्ययम् ।
इत्येवं कथितं वत्स ! श्रीमद्भागवतं तव ॥" * ॥
तत्फलश्रुतिः ।
"वक्तुः श्रोतुश्चोपदेष्टुरनुमोदितुरेव च ।
साहाय्यकर्त्तुर्गदितं भक्तिमुक्तिविमुक्तिदम् ॥
प्रौष्ठपद्यां पूर्णिमायां हंससंहितसमाश्रितम् ।
देयं भागवतार्थेदं द्विजाय प्रीतिपूर्व्वकम् ॥
संपूज्य वस्त्रहेमाद्यैर्भगवद्भक्तिमिच्छता ।
योऽध्यशुक्रमणीमेतां श्रावयेच्छृणुयात्तथा ।
स पुराणश्रवणजं प्राप्नोति फलमुत्तमम् ॥"* ॥
इति श्रीनारदीयपुराणे पूर्व्वभागे द्वितीयपादे चतुर्थपादे ९६ अध्यायः ॥ ५ ॥
षष्ठं नारदीयपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु विप्र ! प्रवक्ष्यामि पुराणं नारदीयकम् ।
पञ्चविंशतिसाहस्रं हरिभक्तिकथाश्रयम् ॥" * ॥
तत्र पूर्व्वभागे प्रथमपादे ।
"सूतशौनकसंवादः सृष्टिसंक्षेपवर्णनम् ।
नानाधर्म्मकथाः पुण्याः प्रवृत्ते समुदाहृताः ॥
प्राग्भागे प्रथमे पादे सनकेन महात्मना ॥"
पूर्व्वभागे द्वितीयपादे ।
"द्वितीये मोक्षधर्म्माख्ये मोक्षोपायनिरूपणम् ।
वेदाङ्गानाञ्च कथनं शुकोत्पत्तिश्च विस्तरात् ।
सनन्दनेन गदिता नारदाय महात्मने ॥" * ॥
पूर्व्वभागे तृतीयपादे ।
"महातन्त्रे समुद्दिष्टं पशुपाशविमोचनम् ।
मन्त्रार्थशोधनं दीक्षा मन्त्रोद्धारश्च पूजनम् ॥
प्रयोगाः कवचं नामसहस्रं स्तोत्रमेव च ।
गणेशसूर्य्यविष्णूनां शिवशक्तेरनुक्रमात् ॥
सनत्कुमारमुनिना नारदाय तृतीयके ॥"
पूर्व्वभागे चतुर्थपादे ।
"पुराणलक्षणञ्चैव प्रमाणं दानमेव च ॥
पृथक् पृथक् समुद्दिष्टं दानकालपुरःसरम्

चैत्रादिसर्व्वमासेषु तिथीनाञ्च पृथक् पृथक् ॥
प्रोक्तं प्रतिपदादीनां व्रतं सर्व्वाघनाशनम् ।
सनातनेन मुनिना नारदाय चतुर्थके ॥
पूर्व्वभागोऽयमृद्दिष्टो दृढदृढाख्यानसंज्ञितः ॥"
तदुत्तरभागे ।
"अस्योत्तरे विभागे तु प्रश्न एकादशीव्रते ॥
वशिष्ठेनाथ संवादो मान्धातुः परिकीर्त्तितः ।
रुक्माङ्गदकथा पुण्या मोहिन्युत्पत्तिकर्म्म च ॥
वसुधापश्च मोहिन्यै पश्चादुद्वरणक्रिया ।
गङ्गाकथा पुण्यतमा ययातेश्चानुकीर्त्तनम् ॥
काश्या माहात्म्यमतुलं पुरुषोत्तमवर्णनम् ।
यात्राविधानं क्षेत्रस्य वङ्गाख्यानसमन्वितम् ॥
प्रयागस्याथ माहात्म्यं कुरुक्षेत्रस्य तत्परम् ।
हरिद्वारस्य चाख्यानं कामोदाख्यानकं तथा ॥
बदरीतीर्थमाहात्म्यं कामाख्यायास्तथैव च ।
प्रभासस्य च माहात्म्यं पुराणाख्यानकं ततः ॥
गौतमाख्यानकं पश्चाद्देदपादस्तवस्ततः ।
गोकर्णक्षेत्रमाहात्म्यं लक्ष्मणाख्यानकं तथा ॥
सेतुमाहात्म्यकथनं नर्म्मदातीर्थवर्णनम् ।
अवन्त्याश्चैव माहात्म्यं मथुरायास्ततः परम् ॥
वृन्दावनस्य महिमा वसोर्मोक्षाप्तिकं गतिः ।
मोहिनीचरितं पश्चादेवं वै नारदीयकम् ॥"*॥
तत्फलश्रुतिः ।
"यः पठेति नरो भक्त्या आवयेद्वा समाहितः ।
स याति ब्रह्मणो धाम नात्र कार्य्या विचारणा ॥
यत्क्षेत्रदिग्विपूर्णायां धेनूनां सप्तकाञ्चितम् ।
प्रदत्ताद्विगुणं पुण्यं लभेन्नोत्तमेव च ॥
यश्चानुक्रमणीमेनां नारदीयस्य वर्णयेत् ।
शृणुयादेकचित्तेन सोऽपि स्वर्गतिं लभेत् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदृढाख्याने
चतुर्थपादे ६७ अध्यायः ॥ ६ ॥
सप्तमं मार्कण्डेयपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि मार्कण्डेयाभिधं मुने ! ।
पुराणं सुमहत् पुण्यं पठतां शृण्वतां सदा ॥
यत्राधिकृत्य शुक्रेण सर्व्वधर्म्मनिरूपणम् ।
मार्कण्डेयेन मुनिना जैमिनेः प्राक् समीरितम् ॥
पक्षिणां धर्म्मसंज्ञानां ततो जन्मनिरूपणम् ।
पूर्व्वजन्मकथा चैषां विक्रिया च दिवस्पतेः ॥
तीर्थयात्रा बलस्यानो द्रौपदेयकथानकम् ।
हरिश्चन्द्रकथा पुण्या युद्धमाण्डीकाभिधम् ॥
पितापुत्रसमाख्यानं दत्तात्रेयकथा ततः ।
हैहयस्याथ चरितं महाख्यानसमाचितम् ॥
मदालसाकथाश्चोक्ता शूलकंचरितान्विता ।
सृष्टिसंकीर्त्तनं पुण्यं नवधा परिकीर्त्तितम् ॥
कल्पान्तकालनिर्द्देशो यत्रसृष्टिनिरूपणम् ।
ब्रह्मादिसृष्टिरप्युक्ता द्वीपवर्षानुकीर्त्तनम् ॥
मन्वन्तराश्च कथा नाना कीर्त्तिताः पापहारिकाः ।
तासु दुर्गाकथाश्चान्या पुण्यदा चाष्टमेऽन्तरे ॥
ततः पश्चात् प्रजोत्पत्तिश्चतुर्योनिसमुद्भवः ।
मार्कण्डेयस्य च ब्रह्मन्नाख्या तन्माहात्म्यसमाचिता ॥
वैष्णवाख्यमपि प्रोक्तं चरितं ततः ॥"
यत्सप्तशीत्याख्याने वत्सश्री च पाठः ।
"खनित्रस्य ततः प्रोक्ता कथा पुण्या महात्मनः ॥
अविचिच्चरितं चैव किमिच्छव्रतकीर्त्तनम् ।
नरिष्यन्तस्य चरितं दृष्ट्वाकुचरितं ततः ॥
तुलस्याश्चरितं पश्चाद्रामचन्द्रस्य सत्कथा ।
कुशवंशसमाख्यानं सोमवंशानुकीर्त्तनम् ॥
पुरूरवःकथा पुण्या नहुषस्य कथाद्भुता ।
ययातिचरितं पुण्यं यदुवंशानुकीर्त्तनम् ॥
श्रीकृष्णबालचरितं माथुरं चरितं ततः ।
द्वारकाचरितञ्चाथ कथा सर्व्वावतारजा ॥
ततः साङ्गासनुद्देशः प्रपञ्चासत्त्वकीर्त्तनम् ।
मार्कण्डेयस्य चरितं पुराणश्रवणे फलम् ॥"*॥
तत्फलश्रुतिः ।
"यः पठेति नरो भक्त्या पुराणमिदमादरात् ।
मार्कण्डेयाभिधं वत्स ! स लभेत् परमां गतिम् ॥
यस्तु शृणुयते चैतच्चैव स लभते पदम् ॥
तत्र प्रयच्छेल्लिखित्वा यः सौवर्णकरिसंयुतम् ।
कार्त्तिक्यां द्विजवर्य्याय स लभेद्ब्रह्मणः पदम् ॥
पठेति श्रावयेद्वापि यश्चानुक्रमणीमिमाम् ।
मार्कण्डेयपुराणस्य स लभेद्वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदृढाख्याने
चतुर्थपादे ६८ अध्यायः ॥ ७ ॥
अष्टमं अग्निपुराणम् ।
श्रीब्रह्मोवाच ।
"अथातः संप्रवक्ष्यामि नवाग्नेयपुराणकम् ।
ईशानकल्पवृत्तान्तं वशिष्ठायानलोऽब्रवीत् ॥
तत् पञ्चदशसाहस्रं नाम्ना चरितमद्भुतम् ।
पठतां शृण्वतां चैव सर्व्वपापहरं नृणाम् ॥
प्रश्नपूर्व्वं पुराणस्य कथा सर्व्वावतारजा ।
सृष्टिप्रकरणं चाथ विष्णुपूजादिकं ततः ॥
अग्निकार्य्यं ततः पश्चाल्लक्षमुद्रादिलक्षणम् ।
सर्व्वदीक्षाविधानञ्च अभिषेकनिरूपणम् ॥
लक्षणं मण्डलादीनां कुण्डाया मार्ज्जनं ततः ।
पवित्रारोपणविधिर्देवालयविधिस्ततः ॥
शालग्रामादिपूजा च मूर्त्तिलक्ष्म पृथक् पृथक् ।
न्यासादीनां विधानञ्च प्रतिष्ठा पूर्त्तिका ततः ॥
विनायकादिदीक्षाणां विधिर्ज्ञेयस्ततः परम् ।
प्रतिष्ठा सर्व्वदेवानां ब्रह्माद्यस्य निरूपणम् ॥
गङ्गादितीर्थमाहात्म्यं जम्बुद्वीपवर्णनम् ।
ऊर्द्धाधोलोकरचना ज्योतिश्चक्रनिरूपणम् ॥
ज्योतिषञ्च ततः प्रोक्तं शान्तं युद्धजयार्णवम् ।
षट्कर्म्म च ततः प्रोक्तं मन्त्रयन्त्रौषधीगणः ॥
कुब्जिकादिसमर्च्चा च पीठन्यासविधिस्तथा ।
कोटिहोमविधानञ्च तदन्तरनिरूपणम् ॥
ब्रह्मचर्य्यादिधर्म्माश्च आह्निकस्यविधिस्ततः ।
अशून्यशयनतः प्रोक्तो वैदिकस्मार्त्तकर्म्म च ॥
प्रायश्चित्तानुकथनं तिथीनाञ्च व्रतादिकम् ।
वारव्रतानुकथनं नक्षत्रव्रतकीर्त्तनम् ॥
मासिकव्रतनिर्द्देशो दीपदानविधिस्तथा ।
नवशूद्दार्चनं प्रोक्तं नरकाणां निरूपणम् ॥
व्रतानाञ्चापि दानानां निरूपणमिहोदितम् ।
गाडीचक्रसमुद्देशः सन्ध्याविधिरनुत्तमः ॥
गायत्र्यर्थस्य निर्द्देशो लिङ्गलोकं ततः परम् ।
राजाभिषेकमन्त्रोक्तिर्धर्म्मलक्ष्यञ्च भूभुजाम् ॥
स्वप्नाध्यायस्ततः प्रोक्तः शकुनादिनिरूपणम् ।
मङ्गलादिनिर्द्देशो रणदीक्षाविधिस्ततः ॥
रामोक्तनीतिनिर्द्देशो रत्नानां लक्षणं ततः ।
धनुर्विद्या ततः प्रोक्ता व्यवहारप्रदर्शनम् ॥
देवासुरविमर्द्दाख्या व्यायुर्व्वेदनिरूपणम् ।
गजादीनां चिकित्सा च तेषां शान्तिस्ततः परम् ॥
गोनसादिचिकित्सा च नानापूजास्ततः परम् ।
शान्तयश्चापि विविधा छन्दःशास्त्रमतः परम् ॥
साहित्यञ्च ततः पश्चादेकार्थादिसमाख्याः ।
सिद्धगुह्यानुगुह्यञ्च कोषः स्वर्गादिवर्गके ॥
प्रलयानां लक्षणञ्च शारीरकनिरूपणम् ।
वर्णनं नरकाणाञ्च योगशास्त्रमतः परम् ॥
ब्रह्मज्ञानं ततः पश्चात् पुराणश्रवणे फलम् ।
एतदाग्नेयकं विप्र ! पुराणं परिकीर्त्तितम् ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् सुवर्णकमलान्वितम् ।
तिलधेनुयुतं वापि मार्गशीर्ष्यां विधानतः ।
पुराणार्थविदे सोऽथ स्वर्गलोके महीयते ॥
एषानुक्रमणी प्रोक्ता तवाग्नेयस्य भक्तिदा ।
शृण्वतां पठताञ्चैव नृणाञ्चेह परत्र च ॥"*॥
इति श्रीनारदीयपुराणे पूर्व्वभागे दृढदृढाख्याने
चतुर्थपादे ६६ अध्यायः ॥ ८ ॥
नवमं भविष्यपुराणम् ।
श्रीब्रह्मोवाच ।
"अथ ते संप्रवक्ष्यामि पुराणं सर्व्वसिद्धिदम् ।
भविष्यं भरतः सर्व्वलोकाभीष्टप्रदायकम् ॥
यत्राहं सर्व्वदेवानामादिकर्त्ता समुद्यतः ।
सृष्ट्यर्थं तत्र सञ्जातो मनुः स्वायम्भुवः पुरा ॥
स मां प्रणम्य पप्रच्छ धर्म्मं सर्व्वार्थसाधकम् ।
अहं तस्मै तदा प्रीतः प्रावोचं धर्म्मसंहिताम् ॥
पुराणानां यदा व्यासो व्यासचक्रे महामतिः ।
तदा तां संहितां सर्व्वां पञ्चधा व्यभजन्मुनिः ॥
अघोरकल्पवृत्तान्तनागाश्वर्य्यकथान्विताम् ॥"
तत्र प्रथमपर्व्वणि ।
"तत्रादिमं सूतं पर्व्व ब्राह्मं यत्राख्युपक्रमः ।
सूतशौनकसंवादे पुराणप्रश्नसंक्रमः ।
सूर्य्यादित्यचरितः प्रायःसर्व्वाख्यानसमाचितः ॥
सृष्ट्यादिलक्षणोपेतः प्राक्षसर्व्वस्वरूपकः ।
पुण्यलेखकुलेखानां लक्षणञ्च ततः परम् ॥
संस्काराणाञ्च सर्व्वेषां लक्षणञ्चात्र कीर्त्तितम् ।
पक्षत्यादितिथीनाञ्च कल्पाः सप्त च कीर्त्तिताः ॥
अक्षय्याद्याः शुभकल्पा वेद्यादे पर्व्वणि स्मृताः ।
शैवे च कामनो भिन्नाः सौरे चान्यकथाश्रयः ॥
प्रतिसर्गाक्रयं पश्चान्नानाख्यानसमाचितम् ।
पुराणस्योपसंहारमन्वितं पर्व्व पञ्चमम् ॥
एषु पञ्चसु पूर्व्वेषु ब्रह्मणो महिमाधिकः ॥"
द्वितीयतृतीयचतुर्थपञ्चमयोस्तु ।
"धर्म्मे कामे च मोक्षे तु विष्णोश्चापि शिवस्य च ।
द्वितीये च तृतीये च सौरो धर्मश्चतुर्थके ॥
प्रतिसर्गाक्रयं तत्तत् प्रोक्तं सर्व्वकथान्वितम् ।

समविष्यं विनिर्दिष्टं पर्व व्यासेन धीमता ।
चतुर्दशसहस्रन्तु पुराणं परिकीर्तितम् ।
भविष्यं सर्व्वदेवानां साध्यं यत्र प्रकीर्तितम् ॥
गुणानां तारतम्येन समं ब्रह्मेति हि श्रुतिः ॥"
तत्फलश्रुतिः ।
"तल्लिखित्वा तु यो दद्यात् पौर्ण्यां विद्वान् विमत्सरः ।
गुडधेनुयुतं हेमवस्त्रमाल्यविभूषणैः ॥
वाचकं पुस्तकञ्चापि पूजयित्वा विधानतः ।
गन्धाद्यैर्भोज्यभक्ष्यैश्च क्षत्वा वीराजनादिकम् ।
यो वै जितेन्द्रियो भूत्वा सोपवासः समाहितः ॥
अथ वै यो नरो भक्त्या कीर्त्तयेच्छृणुयादपि ।
स मुक्तः पातकैर्घोरैः प्रयाति ब्रह्मणः पदम् ॥
योऽप्यनुक्रमणीमेतां भविष्यस्य निरूपिताम् ।
पठेदा श्रद्दधायाद्वेनौ मुक्तिं मुक्तश्च विन्दति ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरोपाख्याने
चतुर्थपादे १०० अध्यायः ॥ ६ ॥
दशमं ब्रह्मवैवर्त्तपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं दशमं तव ।
ब्रह्मवैवर्त्तकं नाम वेदमार्गानुदर्शकम् ॥
सावर्णिर्यत्र भगवान् साक्षाद्वैवर्घयेऽर्हिणः ।
नारदाय पुराणार्थं प्राह सर्व्वमलौकिकम् ॥
धर्म्मार्थकाममोक्षाणां सारः प्रीतिर्हरौ हरे ।
तयोरभेदसिद्ध्यर्थं ब्रह्मवैवर्त्तमुत्तमम् ॥
रथन्तरस्य कल्पस्य वृत्तान्तं यत्रयोदितम् ।
शतकोटिपुराणे तत् संक्षिप्य प्राह वेदवित् ॥
व्यासश्चतुर्द्धा संकृत्य ब्रह्मवैवर्त्तसंज्ञितम् ।
अष्टादशसहस्रन्तत् पुराणं परिकीर्त्तितम् ॥
ब्रह्मप्रकृतिविघ्नेशकृष्णचरितसमाश्रितम् ।
तत्र सूतर्षिसंवादे पुराणीयक्रमो मतः ॥"
तत्र प्रथमे ब्रह्मखण्डे ।
"सृष्टिप्रकरणं त्वाद्यं ततो नारदवेधसोः ।
विवादः सुमहान् यत्र द्वयोरासीत् पराभवः ॥
शिवलोकगतिः पश्चाज्ज्ञानलाभः शिवात्मजे ।
शिववाक्येन तत्पश्चात् मरीचे । नारदस्य च ॥
मननञ्चैव सावर्ण्यज्ञानार्थं सिद्धसेविते ।
आश्रमे सुमहत्पुण्ये त्रैलोक्याश्चर्यकारिणि ।
एतद्धि ब्रह्मखण्डं हि श्रुतं पापविनाशनम् ॥"
द्वितीये प्रकृतिखण्डे ।
"ततः सावर्णिसंवादो नारदस्य समीरितः ।
ज्ञानमाहात्म्यसंयुक्तो नानाख्यानकथोत्तरः ॥
प्रकृतेरंशभूतानां कलानाञ्चापि वर्णितम् ।
माहात्म्यं पूजनाद्यञ्च विस्तरेण यथास्थितम् ॥
एतत्प्रकृतिखण्डं हि श्रुतं भूतिविधायकम् ॥"
तृतीये गणेशखण्डे ।
"गणेशजन्मसंप्रश्नः सपुण्यकमहाव्रतम् ।
पार्व्वत्याः कार्त्तिकेयेन सह विघ्नेशसम्भवः ॥
चरितं कार्त्तवीर्यस्य जामदग्न्यस्य चाद्भुतम् ।
विवादः सुमहान् पश्चाज्जामदग्न्यगणेशयोः ॥
एतद्विघ्नेशखण्डं हि सर्व्वविघ्नविनाशनम् ॥"

चतुर्थे श्रीकृष्णजन्मखण्डे ।
"श्रीकृष्णजन्मसंप्रश्नो जन्माख्यानं ततोऽद्भुतम् ।
गोकुले गमनं पश्चात् पूतनादिवधोऽद्भुतः ॥
बाल्यकौमारजा लीला विविधाश्चैव वर्णिताः ।
रासक्रीड़ा च गोपीभिः शारदी समुदाहृता ।
रहस्ये राधया क्रीड़ा वर्णिता बहुविस्तरा ॥
सङ्क्षेपेण तत्पश्चान्मथुरागमनं हरेः ।
कंसादीनां वधे वृत्ते सान्दीपस्य द्विजस्य च ॥
काम्यसान्दीपनेः पश्चाद्विद्योपादानमद्भुतम् ।
यवनस्य वधः पश्चाद्द्वारकागमनं हरेः ॥
नरकादिवधश्चैव क्षणेन विहितोऽद्भुतः ।
क्षणाख्यखण्डमिदं विप्र ! नृणां संसारखण्डनम् ॥"
तत्फलश्रुतिः ।
"पठितञ्च श्रुतं ध्यातं पूजितं चाभिवर्णितम् ।
इत्येतद्ब्रह्मवैवर्त्तं पुराणं चात्यलौकिकम् ॥
व्यासोक्तं चादिसम्भूतं पठन् श्रृण्वन् विमुच्यते ।
विज्ञानज्ञानगहनात् घोरात् संसारसागरात् ॥
लिखित्वेदञ्च यो दद्यान्माघ्यां धेनुसमाचितम् ।
ब्रह्मलोकमवाप्नोति स मुक्तोऽज्ञानबन्धनात् ॥
यश्चानुक्रमणीं वापि पठेदा श्रद्दधायादपि ।
सोऽपि कृष्णप्रसादेन लभते वाञ्छितं फलम् ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरोपाख्याने
चतुर्थपादे १०१ अध्यायः ॥ १० ॥
एकादशं लिङ्गपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु पुत्र ! प्रवक्ष्यामि पुराणं लिङ्गसंज्ञितम् ।
पठतां श्रृण्वतान्चैव भक्तिमुक्तिप्रदायकम् ॥
यत्र लिङ्गाभिधं निष्ठन् वह्निलिङ्गे हरोऽभ्यधात् ।
मन्वं धर्म्मादिसिद्ध्यर्थं अग्निकल्पकथाश्रयम् ॥
तदेव व्यासदेवेन भागद्वयसमाचितम् ।
पुराणं लिङ्गमुदितं बहाख्यानविचित्रितम् ॥
तदेकादशसाहस्रं हरमाहात्म्यसूचकम् ।
परं सर्व्वपुराणानां सारभूतं जगत्त्रये ॥
पुराणोपक्रमे प्रश्नः सृष्टिसंकीर्त्तनः पुरा ॥"
तत्र पूर्व्वभागे ।
"योगाख्यानं ततः प्रोक्तं कल्पाख्यानं ततःपरम् ॥
लिङ्गोद्भवस्तदर्च्चा च कीर्त्तिता हि ततः परम् ।
सनत्कुमारशैलादिसंवादश्चाथ पावनः ॥
ततो दधीचिचरितं युगधर्म्मनिरूपणम् ।
ततो भुवनकोषाख्या सूर्य्यसोमान्वयस्ततः ॥
ततश्च विस्तरात् सर्गाख्यिपुराख्यानकं तथा ।
लिङ्गप्रतिष्ठा च ततः प्रभुपाशुपतविमोक्षणम् ॥
शिवव्रतानि च तथा सदाचारनिरूपणम् ।
प्रायश्चित्तान्यशेषाणि कापीशीशैलवर्णनम् ॥
अन्धकाख्यानकं पश्चाद्धाराहरचरितं पुनः ।
वृत्रसंहरचरितं पश्चाज्जलन्धरवधस्ततः ॥
शैवं सङ्क्षेपनामाथ दक्षयज्ञविनाशनम् ।
कामस्य दहनं पश्चात् गिरिजायाः करग्रहः ॥
ततो विनायकाख्यानं वृत्राख्यानं शिवस्य च ।
उपमन्युकथा चापि पूर्व्वभाग इहीरितः ॥"॥
तदुत्तरभागे ।
"विष्णुमाहात्म्यकथनमम्बरीषकथा ततः ।

सनत्कुमारनन्दीशसंवादश्च पुनर्मुने ! ॥
शिवमाहात्म्यसंयुक्तज्ञानयोगादिकं ततः ।
सूर्य्यपूजाविधिश्चैव शिवपूजा च सुक्रिया ॥
दानानि बहुधोक्तानि श्राद्धप्रकरणन्ततः ।
प्रतिष्ठा तत्र गदिता ततोऽघोरस्य कीर्त्तनम् ॥
ब्रह्मेश्वरी महाविद्या गायत्रीमहिमा ततः ।
ब्राह्मकल्पस्य च माहात्म्यं पुराणश्रवणस्य च ॥
एतस्योपरिभागस्थं लैङ्गस्य कथितो मया ।
व्यासेन हि निबद्धस्य रुद्रमाहात्म्यसूचिनः ॥"
तत्फलश्रुतिः ।
"लिखित्वैतत् पुराणन्तु तिलधेनुसमाचितम् ।
फाल्गुन्यां पूर्णिमायां यो दद्याद्ब्रह्मा द्विजातये ।
स लभेच्छिवसायुज्यं जरामरणवर्जितः ॥
यः पठेच्छृणुयाद्वापि लैङ्गं पापापहं नरः ।
स भुक्तभोगो लोकेऽस्मिन्ते शिवपुरं व्रजेत ॥
लिङ्गानुक्रमणीमेतां पठेद्यः श्रद्दधायात् तथा ।
तावुभौ शिवभक्तौ तु लोकद्वितयभोगिनौ ।
जायेतां गिरिजाभर्त्तुः प्रसादान्नात्र संशयः ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरोपाख्याने
चतुर्थपादे १०२ अध्यायः ॥ ११ ॥
द्वादशं वराहपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि वाराहं वै पुराणकम् ।
भागद्वययुतं ग्रन्थद्विगुणाद्भाहात्म्यसूचकम् ॥
मानवस्य तु कल्पस्य प्रसङ्गं मनुजं पुरा ।
निबद्धं पुराणेऽस्मिंश्चतुर्विंशसहस्रके ॥
व्यासो हि विदुषां श्रेष्ठः साक्षान्नारायणो भुवि ।
तत्रादौ शुभसंवादः सूतनो भूमिवराहयोः ॥"
तत्र पूर्व्वभागे ।
"अथादिजनवृत्तान्तं रभ्यस्य चरितं ततः ।
दुर्म्मदाय च तत्पश्चाच्छ्राद्धकल्प उदीरितः ॥
महातपस आख्यानं गौर्य्युत्पत्तिस्ततः परम् ।
विनायकस्य नागानां सेनान्यादित्ययोरपि ॥
गणानाञ्च तथा देव्या धनदस्य हरस्य च ।
आख्यानं सत्यतपसो व्रताख्यानसमन्वितम् ॥
अगस्त्यगीता तत्पश्चाद्दुर्गायाः प्रकीर्त्तिता ।
महिषासुरविध्वंसे माहात्म्यञ्च विशेषतः ॥
पर्व्वाध्यायस्ततः श्वेतोपाख्यानं गोप्रदानिकम् ।
इत्यादिजनवृत्तान्तं प्रथमोद्दिष्टनामकम् ॥
भगवद्धर्म्मके पश्चाद्व्रततीर्थकथानकम् ।
दानचिन्तदपराधानां प्रायश्चित्तं शरीरकम् ॥
तीर्थानाञ्चापि सर्व्वेषां माहात्म्यं पृथगीरितम् ।
मथुराया विशेषेण श्राद्धादीनां विधिस्ततः ॥
वर्णनं यमलोकस्य ऋषिपुत्रप्रसङ्गतः ।
विपाकः कर्म्मणाञ्चैव विष्णुव्रतनिरूपणम् ॥
गोकर्णस्य च माहात्म्यं कीर्त्तितं पापनाशनम् ।
इत्येष पूर्व्वभागोऽस्य पुराणस्य निरूपितः ॥"
उत्तरभागे ।
"उत्तरे प्रविभागे तु पुलस्त्यकुबेरयोः ।
संवादे सर्व्वतीर्थानां माहात्म्यं विस्तरात्पृथक् ॥
अशेषधर्म्माख्यातः पौष्करं पुण्यपर्व्व च ।
इत्येवं तव वाराहं प्रोक्तं पापविनाशनम् ॥"

तत्फलश्रुतिः ।
"पठतां शृण्वतामेव भगवद्भक्तिवर्द्धनम् ।
काञ्चनं गरुडं कृत्वा तिलधेनुसमन्वितम् ॥
लिखित्वैतच्च यो दद्याद्ब्राह्मणाय विपाय भक्तितः ।
स लभेद्वैष्णवं धाम देवर्षिगणवन्दितः ॥
यो वाशुक्रमणीसेनां शृणोत्यपि पठत्यपि ।
सोऽपि भक्तिं लभेद्विष्णौ संसारोच्छेदकारिणीम् ॥" ॥
इति श्रीनारदीयपुराणे पूर्वभागे हरिहरपाख्याने चतुर्थपादे १०६ अध्यायः ॥ १२ ॥
अथोदग्रं स्कन्दपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्से मरीचे! च पुराणं स्कन्दसंज्ञितम् ।
यस्मिन् प्रतिपदं साक्षाच्छङ्करादेवो व्यवस्थितः ॥
पुराणे शतकोटौ तु यच्चैवं वर्णितं मया ।
लक्षितस्यार्थजातस्य सारो व्यासेन कीर्तितः ॥
स्कन्दाध्यस्तत्र खण्डाः सप्तैव परिकल्पिताः ।
एकाशीतिसहस्राणि स्कान्दं सर्व्वाघनाशनम् ॥
यः शृणोति पठेदापि च तु साक्षाच्छिवः स्वयम् ।
यत्र माहेश्वरा धर्म्माः षण्मुखेन प्रकाशिताः ॥
कल्पे तत्पुरुषे प्रोक्ताः सर्व्वसिद्धिविधायकाः ॥"
तत्र प्रथमे माहेश्वरखण्डे ।
"तस्य माहेश्वरख्यातेः खण्डाः पापप्रणाशनाः ॥
किञ्चिच्छ्रुतार्कसाहस्रो मनुपुण्यो हरत्कथः ।
सुचरित्रप्रतेर्युक्तः स्कन्दमाहात्म्यसूचकः ॥
यत्र केदारमाहात्म्यं पुराणोपक्रमः पुरा ।
दक्षयज्ञकथा पश्चाच्छिवलिङ्गार्चने फलम् ॥
समुद्रमथनाख्यानं देवेन्द्रचरितं ततः ।
पार्व्वत्याः सप्तपाख्यानं विवाहस्तदनन्तरम् ॥
कुमारोत्पत्तिकथनं ततस्तारकसङ्गरः ।
ततः पशुपताख्यानं चक्राख्यानसमाश्रितम् ॥
हृतप्रवर्त्तनाख्यानं नारदेन समागमः ।
ततः कुमारमाहात्म्यं पञ्चतीर्थकथानकम् ॥
धर्म्मवर्म्मनृपाख्यानं नदीसागरकीर्त्तनम् ।
इन्द्रद्युम्नकथा ब्रह्मन्नाड़ीजङ्घकथान्विता ॥
प्रादुर्भावस्ततो मत्स्याः कथा हयशिरस्य च ।
मद्दीसागरसंयोगः कुमारेशकथा ततः ॥
ततस्तारकयुद्धञ्च नानाख्यानसमाश्रितम् ।
वधश्च तारकस्याथ पञ्चलिङ्गनिवेशनम् ॥
द्वीपाख्यानं ततः पुण्यं ऊर्द्धलोकव्यवस्थितः ।
ब्रह्माख्यस्थितिमानञ्च वर्करेशकथानकम् ॥
महाकालसमुद्भूतिः कथा चास्य महाद्भुता ।
वासुदेवस्य माहात्म्यं कोटितीर्थं ततः परम् ॥
नानातीर्थसमाख्यानं गुप्तक्षेत्रं प्रकीर्त्तितम् ।
पाण्डवानां कथा पुण्या महाविद्याप्रसाधनम् ॥
तीर्थयात्रानमाप्नित्र कौमारमिदमद्भुतम् ।
अरुणाचलमाहात्म्यं सनकब्रह्मसंकथा ॥
गौरीतपःसमाख्यानं ततस्तीर्थनिरूपणम् ।
महिषासुरजाख्यानं वधश्चास्य महाद्भुतः ॥
शोणाचले शिवाख्यानं नित्यदा परिकीर्त्तितम् ।
इत्येष कथितः स्कान्दे खण्डो माहेश्वरोऽद्भुतः ॥"

द्वितीये वैष्णवखण्डे ।
"द्वितीयो वैष्णवः खण्डस्तस्याख्यानानि मे शृणु ।
प्रथमं भूमिवाराहं समाख्यानं प्रकीर्त्तितम् ॥
यत्र वोपकुशस्य माहात्म्यं पापनाशनम् ।
कमलायाः कथा पुण्या श्रीनिवासस्थितिस्ततः ॥
कुलालाख्यानकं चात्र सुवर्णमुखरीकथा ।
नागाख्यानसमायुक्ता भारद्वाजकथाद्भुता ॥
मतङ्गाञ्जनसंवादः कीर्त्तितः पापनाशनः ।
पुरुषोत्तममाहात्म्यं कीर्त्तितं चोत्कले ततः ॥
मार्कण्डेयसमाख्यानमम्बरीषस्य भूपतेः ।
इक्ष्वाकुवंशस्य चाख्यानं विद्यापतिकथा शुभा ॥
जैमिनेः सप्तपाख्यानं नारदस्यापि वाडव ! ।
गौलकण्डसमाख्यानं नारसिंहोपवर्णनम् ॥
अश्वमेधकथा राज्ञो ब्रह्मलोकगतिस्तथा ।
रथयात्राविधिः पश्चाज्जगन्नाथविधिस्तथा ॥
दक्षिणाम्नायपाख्यानं गुण्डिचाख्यानकं ततः ।
रथरक्षाविधानञ्च गुण्डिचोत्सवकीर्त्तनम् ॥
श्वेतोपाख्यानमप्युक्तं वङ्गानुसर्वनिरूपणम् ।
दोलोत्सवो भगवतो व्रतं सांवत्सराभिधम् ॥
पूजा च कामिभिर्विष्णोरुद्दालकनियोगकः ।
मोक्षसाधनमप्युक्तं नानायोगनिरूपणम् ॥
दशावतारकथनं स्नानादिपरिकीर्त्तनम् ।
ततो वदरिकाथाश्च माहात्म्यं पापनाशनम् ॥
अप्सरादितीर्थमाहात्म्यं वैनतेयशिलाभवम् ।
कारणं भगवद्वासे तीर्थं कापालमोचनम् ॥
पञ्चधाराभिधं तीर्थं मेरुसंस्थापनं तथा ।
ततः कार्त्तिकमाहात्म्यं माहात्म्यं मदनालसम् ॥
धूम्रकोशसमाख्यानं दिनलक्षाणि कार्त्तिके ।
पञ्चभीव्रततास्याख्यानं कीर्त्तिदं मुक्तिमुक्तिदम् ॥
तद्व्रतस्य च माहात्म्यं विधानं स्नानजं तथा ।
पुष्पादिकीर्त्तनं चात्र मालाधारणपुण्यकम् ॥
पश्चाद्दत्तस्नानपुण्यं घण्टानादादिजं फलम् ।
नानापुष्पार्च्चनफलं तुलसीदलजं फलम् ॥
नैवेद्यस्य च माहात्म्यं हरिवासरकीर्त्तनम् ।
अखण्डैकादशीपुण्यं तथा जागरणस्य च ॥
मत्स्योत्सवविधानञ्च नाममाहात्म्यकीर्त्तनम् ।
ध्यानादिपुण्यकथनं माहात्म्यं मधुराभवम् ॥
मधुरातीर्थमाहात्म्यं पृथगुक्तं ततः परम् ।
वनानां द्वादशानाञ्च माहात्म्यं कीर्त्तितं ततः ॥
श्रीमद्भागवतस्याच्च माहात्म्यं कीर्त्तितं परम् ।
वज्रशाण्डिल्यसंवादं अन्तर्लीलाप्रकाशकम् ॥
ततो माघस्य माहात्म्यं स्नानदानजपोद्भवम् ।
नानाख्यानसमायुक्तं दशाध्याये निरूपितम् ॥
ततो वैष्णवमाहात्म्ये ग्रन्थादानादिजं फलम् ।
जलदानादिविधयः कामाख्यानमतः परम् ॥
श्रुतदेवस्य चरितं व्याधोपाख्यानमद्भुतम् ।
तथान्यच्छतशोयाद्यैर्विष्णोर्व्रात पुण्यकीर्त्तनम् ॥
ततस्त्वयोध्यामाहात्म्ये चक्रब्रह्महतीर्थके ।
ब्रह्मपापविमोक्षाख्ये तथाधारसप्तकम् ॥
स्वर्गद्वारं चक्रहरिघण्टाहर्षुपवर्णनम् ।
स्वर्णवृष्ट्युपाख्यानं तिलोदा सरयूयुतिः ॥
सीताकुण्डं गुप्तहरिः सरयूर्घर्घराश्रयः ।

गोप्रचारश्च दुग्धोदं गुरुकुब्जादिपञ्चकम् ॥
घोषार्कादीनि तीर्थानि त्रयोदश्च ततः परम् ।
गयाकूपस्य माहात्म्यं सर्व्वाघविनिवर्त्तकम् ॥
माहेन्द्राश्रमपूर्व्वाणि तीर्थानि तदनन्तरम् ।
अजितादिमानसादितीर्थानि गदितानि च ॥
इत्येष वैष्णवः खण्डो द्वितीयः परिकीर्त्तितः ॥"
तृतीये ब्रह्मखण्डे ।
"अतःपरं ब्रह्मखण्डं मरीचे! शृणु पुण्यदम् ।
यत्र वै सेतुमाहात्म्यं फलं स्नानेत्यशेषवम् ॥
गालवस्य तपश्चर्या राक्षसाख्यानकं ततः ।
चक्रतीर्थादिमाहात्म्यं देवीपतनसंयुतम् ॥
वेलातीर्थमहिमा पापनाशादिकीर्त्तनम् ।
मङ्गलादिकमाहात्म्यं ब्रह्मकुण्डादिवर्णनम् ।
हनूमत्कुण्डमहिमागस्त्यतीर्थभवं फलम् ॥
रामतीर्थादिकथनं लक्ष्मीतीर्थनिरूपणम् ।
शृङ्गादितीर्थमहिमा तथा साध्याश्रमादिजः ॥
धनुष्कोट्यादिमाहात्म्यं क्षीरकुण्डादिजं तथा ।
गायत्र्यादिकतीर्थानां माहात्म्यं चात्र कीर्त्तितम् ॥
रामनाथस्य महिमा तत्स्थानोपदेशनम् ।
यात्राविधानकथनं सेतौ मुक्तिप्रदं नृणाम् ॥
धर्म्मारण्यस्य माहात्म्यं ततः परमुदीरितम् ।
स्थाणुः स्कन्दाय भगवान् यत्र तत्त्वमुपादिशत् ॥
धर्म्मारण्यसमुद्भूतिस्तत्पुण्यपरिकीर्त्तनम् ।
कर्म्मसिद्धेः समाख्यानं ऋषिवंशनिरूपणम् ॥
अप्सरातीर्थसुखानां माहात्म्यं यत्र कीर्त्तितम् ।
वर्णानामाश्रमाणाञ्च धर्म्मतत्त्वनिरूपणम् ॥
देवस्थानविभागञ्च वसुशार्ककथा शुभा ।
छत्रा गन्धा तथा घण्टा श्रीमाता च मतङ्गिनी ॥
पुण्यदात्र्यः समाख्याता यत्र देव्यः समास्थिताः ।
इन्द्रेश्वरादिमाहात्म्यं द्वारकादिनिरूपणम् ॥
लोहासुरसमाख्यानं गङ्गाकूपनिरूपणम् ।
श्रीरामचरितञ्चैव सप्तमन्दिरवर्णनम् ॥
जीर्णोद्धारस्य कथनं स्नानसम्प्रतिपादनम् ।
जातिभेदप्रकथनं स्मृतिधर्म्मनिरूपणम् ॥
ततस्तु वैष्णवा धर्म्मा नानाख्यानैरुदीरिताः ।
चातुर्म्मास्ये ततः पुण्ये सर्व्वधर्म्मनिरूपणम् ॥
दानप्रशंसा ततपश्चाद्भुतस्य महिमा ततः ।
तपसश्चैव पूजायाः सच्छिद्रकथनं ततः ॥
प्रकृतीनां भिदाख्यानं ग्रासग्रासनिरूपणम् ।
तारकस्य वधोपायो व्याख्याश्चो महिमा तथा ॥
विष्णोः स्नापश्च वृत्तान्तं पार्व्वत्यनुनयस्ततः ।
हरस्य ताण्डवं वृत्तं रामनामनिरूपणम् ॥
हरस्य लिङ्गपतनं कथायै जगतश्च ।
पार्व्वतीजन्मचरितं तारकस्य वधोद्भवः ॥
प्रणवैश्वर्य्यकथनं तारकाचरितं पुनः ।
दक्षयज्ञसमाप्तिश्च द्वादशाक्षरकल्पनम् ॥
ज्ञानयोगसमाख्यानं महिमा द्वादशाक्षरजः ।
श्रवणादिकपुण्यञ्च कीर्त्तितं ब्रह्मणेदं नृणाम् ॥"
तृतीये ब्रह्मखण्डस्योत्तरभागे ।
"ततो ब्रह्मोत्तरे भागे शिवस्य महिमाद्भुतः ।

प्रभाचरस्य महिमा गोकर्णमहिमा ततः ॥
शिवरात्रेश्च महिमा प्रदोषव्रतकीर्तनम् ।
सोमवारव्रतस्यापि सीमन्तिन्याः कथानकम् ॥
भद्रायुत्पत्तिकथनं सदाचारनिरूपणम् ।
शिवधर्मसमुद्देशो भद्रायुद्वाहवर्णनम् ॥
भद्रायुमहिमा चापि भक्तमाहात्म्यकीर्तनम् ।
शूद्रवराख्यानकं चैव उमामाहेश्वरव्रतम् ॥
रुद्राध्यायस्य च माहात्म्यं रुद्राध्यायस्य पुण्यकम् ।
अघमाद्यधिकपुण्यश्च ब्रह्मखण्डोदयीरितः ॥"*॥

चतुर्थं काशीखण्डे ।

"अतः परं चतुर्थन्तु काशीखण्डमनुत्तमम् ।
विन्ध्यनारदयोर्यत्र संवादः परिकीर्तितः ॥
सत्यलोकप्रभावाख्यावासे सुरागमः ।
पतिव्रताचरित्रञ्च तीर्थचर्याप्रशंसनम् ॥
ततश्च सप्तपुर्य्याख्या संयमिन्या निरूपणम् ।
ब्रह्मस्य च तपेन्द्राग्नेर्लोकाप्तिः शिवशर्मणः ॥
अग्नेः समुद्भवश्चैव क्रव्यादरणसम्भवः ।
गन्धवत्यलकापुर्य्योरौच्चर्य्यात्च समुद्भवः ॥
चन्द्रोडुबुधलोकानां कुजेज्यार्कसुखा क्रमात् ।
सप्तर्षीणां ध्रुवस्यापि तपोलोकस्य वर्णनम् ॥
ध्रुवलोककथा पुण्या सत्यलोकनिरीक्षणम् ।
स्कन्दागस्त्यसमालापो मणिकर्णीसमुद्भवः ॥
प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम् ।
वाराणसीप्रशंसा च भैरवाविर्भवस्ततः ॥
दण्डपाणिज्ञानवाप्योरुद्भवः समनन्तरम् ।
ततः कलावत्याख्यानं सदाचारनिरूपणम् ॥
ब्रह्मचारिसमाख्यानं ततः क्षौनक्षणानि च ।
कृत्याकृत्यविनिर्देशो ह्यविमुक्तप्रवर्णनम् ॥
ब्रह्मस्थयोगिनोधर्म्माः कालज्ञानं ततः परम् ।
दिवोदासकथा पुण्या काश्यावर्णनमेव च ॥
योगिचर्य्या च लोलार्कोत्तरगाम्बार्कजा कथा ।
द्रुपदार्कस्य तार्क्ष्याख्यारुणार्कस्योदयस्ततः ॥
दशाश्वमेधतीर्थाख्या मन्दराच्च गणागमः ।
पिशाचमोचनाख्यानं गणेशप्रथमस्ततः ॥
मायागणपतेश्चाथ भुवि प्रादुर्भवस्ततः ।
विष्णुमायाप्रबोधश्च दिवोदासविमोक्षणम् ॥
ततः प्रह्लादोत्पत्तिर्विन्दुमाधवसम्भवः ।
ततो वेणावतीर्थाख्या शूलिनः काशिकागमः ॥
जैगीषव्येण संवादो व्यङ्केशाख्या महर्षिभुः ।
क्षेत्राख्यानं कन्दुकेशाद्यार्केश्वरसमुद्भवः ॥
श्रीशैलशैलेश्वरयोः स्थित्वावासस्य चोद्भवः ।
देवतानामधिष्ठानं दुर्गासुरपराक्रमः ॥
दुर्गायाः विजयश्चाथ ओङ्कारेशस्य वर्णनम् ।
पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः ॥
केदाराख्या च धर्म्मेशकथा विश्वभुजोद्भवा ।
वीरेश्वरसमाख्यानं गङ्गामाहात्म्यकीर्तनम् ॥
विश्वकर्म्मेशमहिमा दक्षयज्ञोद्भवस्तथा ।
सतीशरीरात्तेजोदेहभङ्गस्तम्भः पराशरः ॥
क्षेत्रतीर्थकदम्बश्च मुक्तिमण्डपसंकथा ।
विश्वेशविभवश्चाथ ततो यात्रापरिक्रमः ॥" * ॥

पञ्चमे अवन्तीखण्डे ।

"अतः परं त्रवन्त्याख्यं प्रवक्ष्ये खण्डञ्च पञ्चकम् ।
महाकालवनाख्यानं ब्रह्मशीर्षच्छिदा ततः ॥
प्रायश्चित्तविधिश्चामरेतुत्पत्तिश्च सुरागमः ।
देवदीक्षा शिवस्तोत्रं नानापातकनाशनम् ॥
कपालमोचनाख्यानं महाकालवनस्थितिः ।
तीर्थं कलकलेशस्य सर्व्वपापप्रणाशनम् ॥
कुब्जाम्बरसंज्ञश्च सर्गो रुद्रस्य पुण्यदम् ।
कुटुम्बेशश्च विघ्नाधमर्कटेश्वरतीर्थकम् ॥
स्वर्गद्वारं चतुःसिन्धुतीर्थं शुक्रस्वामिका ।
सकरार्कगन्धवतीतीर्थन्यापप्रणाशनम् ॥
दशाश्वमेधैकानंशातीर्थं च हरिसिद्धिदम् ।
पिशाचकाद्रियात्रा च हनूमत्कयमेश्वरौ ॥
महाकालेशयात्रा च वल्मीकेश्वरतीर्थकम् ॥
शुक्रेशभैरवोपाख्यानं कुशस्थल्याः प्रदक्षिणम् ।
अक्रूरमन्दाकिन्यङ्गपादचन्द्राकवेभवम् ॥
करभेशकुकुटेशलङ्गुकेशादितीर्थकम् ।
मार्कण्डेशं यज्ञवापी सोमेशं नरकान्तकम् ॥
केदारेश्वररामेशसौभाग्येशनरार्कम् ।
कैशार्कं भक्तिभेदश्च स्वर्णाक्षरसुखानि च ॥
ओङ्कारेशादितीर्थानि अन्धकस्तुतिकीर्तनम् ।
कालारण्ये लिङ्गसङ्ख्या स्वर्णह्रदाभिधानकम् ॥
कुशस्थल्या अवन्त्याश्चोज्जयिन्या अभिधानकम् ।
पद्मावती कुमुद्वत्यमरावतीतिनामकम् ॥
विघ्नालाप्रतिकल्पाभिधाने च ज्वरघ्नान्तिकम् ।
शिप्राख्यानादिकफलं नागोक्तीता शिवस्तुतिः ॥
हिरण्याश्ववधाख्यानं तीर्थं सुन्दरकुण्डकम् ।
नीलगङ्गा पुष्कराख्यं विन्ध्यावासनतीर्थकम् ॥
पूरणोत्तमाधिमासं ततीर्थश्चाघनाशनम् ।
गोमतीरामने कुण्डे विघ्नेशादिसुरोक्षनम् ॥
वीरेश्वरस्तवः कालभैरवस्य च तीर्थके ।
महिमा नागपत्न्यां वृषिंहस्य जयन्तिका ॥
कुतुबेश्वरयात्रा च देवसाधककीर्तनम् ।
कर्करराजाख्यतीर्थञ्च विघ्नेशादिसुरोक्षनम् ॥
रुद्रकुण्डप्रभृतिषु बहुतीर्थनिरूपणम् ।
यात्राष्टतीर्थजा पुण्या रेवामाहात्म्यमुच्यते ॥
धर्म्मपुण्यस्य वैराग्ये मार्कण्डेयेन सङ्गमः ।
प्राक्लयानुभवाख्यानं अम्बतापरिकीर्तनम् ॥
कल्पे कल्पे पृथक् नाम नर्म्मदायाः प्रकीर्तनम् ।
स्तवमार्गे नार्म्मदश्च कालरात्रिकथा ततः ॥
महादेवस्तुतिः पश्चात् पृथक्कल्पकथाद्भुता ।
विपाल्याख्यानकं पश्चाच्छालेश्वरकथा तथा ॥
गौरीव्रतसमाख्यानं त्रिपुरस्यालनन्ततः ।
देहपातविधानञ्च कावेरीसङ्गमस्ततः ॥
दारुतीर्थं ब्रह्मवर्च्चो यत्नेश्वरकथानकम् ।
अग्नितीर्थं रवितीर्थं मेघनादं हिरण्यकम् ॥
देवतीर्थं नर्म्मदेशं कपिलाख्यं करञ्जकम् ।
कुब्जलेशं पिप्पलादं विमलेशञ्च शूलभित् ॥
अर्चीश्वरणमाख्यातमन्धकस्य वधस्ततः ।
शूलभेदोद्भवो यत्र दानधर्म्माः पृथग्विधाः ॥
आख्यानं दीर्घतपस ऋष्यशृङ्गकथा ततः ।
चित्रसेनकथा पुण्या काशिराजस्य मोक्षणम् ॥
ततो देवशिलाख्यानं प्रवरीश्वरसंज्ञितम् ।
व्याघाख्यानं ततः पुण्यं पुष्करिण्यर्कतीर्थकम् ॥
आपित्येश्वरतीर्थञ्च शुक्रतीर्थं करोटिकम् ।
कुमारेशमगस्त्येशं अयनेशञ्च माहलम् ॥
लोकेशं धनदेशञ्च मङ्गलेशञ्च कामजम् ।
नागेशञ्चापि गोपारं गौतमं शुक्लषड्जम् ॥
नारदेशं नन्दिकेशं वरुणेश्वरतीर्थकम् ।
दधिस्कन्दादितीर्थानि हनूमत्तेश्वरस्ततः ॥
रामेश्वरादितीर्थानि सोमेशं पिङ्गलेश्वरम् ।
ऋणमोक्षं कपिलेशं पूतिकेशं जलेशयम् ॥
चण्डार्कयमतीर्थञ्च कङ्कोडेशञ्च नान्दिकम् ।
नारायणञ्च कोटीशं वासतीर्थं प्रभासिकम् ॥
नागेशं सङ्गमेशार्कं मन्मथेश्वरतीर्थकम् ।
एरण्डीसङ्गमं पुण्यं सुवर्णाख्यिलतीर्थकम् ॥
करञ्जं कामदं तीर्थं भाण्डीरं रोहिणीभवम् ।
चक्रतीर्थं धौतपापं स्कान्दमाङ्गिरसाश्रयम् ॥
कोटितीर्थमयोन्यारव्यमङ्गारार्कञ्च त्रिलोचनम् ।
रुद्रेशं कम्बुकेशञ्च सोमेशं कोहनेशकम् ॥
नार्म्मदं चार्कमार्यं भागवेश्वरसत्तमम् ।
आद्यं देवञ्च भागेशमादित्यारादशं कवेः ॥
रामेशमथ सिद्धेशमाहल्यं कङ्कटेश्वरम् ।
प्राक्रं सौम्यञ्च नान्दीशं तापेशं रविनन्दीभवम् ॥
योजनेशं वराहेशं द्वादशीशिवतीर्थके ।
सिद्धेशं मङ्गलेशञ्च लिङ्गवाराहतीर्थकम् ॥
कुण्डेशं श्वेतवाराहं भागवेशं रवीश्वरम् ।
शुक्लादीनि च तीर्थानि हुंकारस्वामितीर्थकम् ॥
सङ्गमेशं नारकेशं मोक्षं सार्पञ्च गोपकम् ।
नागं प्राम्बञ्च सिद्धेशं मार्कण्डाकूरतीर्थके ॥
कामोदपूलारोपाख्यं माण्डव्यं गोपकेश्वरम् ।
कपिलेशं पिङ्गलेशं भूतेशं गाङ्गगौतमे ॥
आश्वमेधं भृगुकच्छं केदारेशञ्च पापनुत् ।
खनखलेशं जालेशं प्रालग्रामं वराष्टकम् ॥
चन्द्रप्रभासमादित्यं सौपत्याख्यञ्च हुंकरम् ।
मूलस्थानञ्च शूलेशमामायाश्चिचर्दैवकम् ॥
शिवेशं कोटितीर्थञ्च दशकन्यं सुवर्णकम् ।
ऋणमोक्षं भारभूतिरवास्तं पुंखसुष्किमम् ॥
आमलेशं कपालेशं शङ्कुरेशांभवस्ततः ।
कोटितीर्थं लोटनेशं फलस्तुनिरतः परम् ॥
ढमिलङ्गलमाहात्म्ये रोहिणाश्वकथा ततः ।
धुन्धुमारसमाख्यानं वधोपायस्ततोऽस्य च ॥
वधो धुन्धोस्ततः पश्चात् ततश्चिचवहोद्भवः ।
महिमास्य ततश्चक्षीशप्रभावो रतीश्वरः ॥
केदारेशो लक्षतीर्थं ततो विष्णुपदीभवम् ।
सुखारं अवनाख्यानं ब्रह्मणश्च सरस्ततः ॥
चक्राख्यं ललिताख्यानं तीर्थञ्च बहुगोमथम् ।
रुद्रावर्तञ्च मार्कण्डं तीर्थं पापप्रणाशनम् ॥
रावणेशं शुद्धपटं देवाम्बुनितीर्थकम् ।
लिङ्गोद्भवतीर्थसम्भूतिः शिवोद्भेदं फलस्तुतिः ॥
एष खण्डो ह्यवन्त्याख्यः प्रख्यातो पापनाशनः ॥

षष्ठे नागरखण्डे ।

"अतः परं नागराख्यः खण्डः षष्ठोऽभिधीयते ॥
लिङ्गोत्पत्तिसमाख्यानं हरिस्वन्द्रकथा शुभा ।
विश्वामित्रस्य माहात्म्यं त्रिशङ्कुस्वर्गतिस्तथा ॥
हाटकेश्वरमाहात्म्ये हत्वासुरवधस्तथा ।

नागविलं शुक्लतीर्थमत्रयेश्वरवर्णनम् ॥
चमत्कारपुराख्यानं चमत्कारकरं परम् ।
गायत्रीयं बालघ्नाख्यं बालमरुं मृगाक्षयम् ॥
विष्णुपादश्च गोकर्णं युगरूपं समाश्रयः ।
सिद्धेश्वरं नागसरः सप्तार्षेयं त्र्यगाख्यकम् ॥
भृगुगर्तं गणेशश्च भीमं दूर्वेश्वरमर्कजम् ।
सोमेशं शोभनाश्वश्च दौर्गमान्जकेश्वरम् ॥
जमदग्निवधाख्यानं नैःक्षत्रियकथानकम् ।
रामह्रदं नागपुरं जडलिङ्गं च यक्षभृः ॥
सुकौशादिचिकार्कं च सतीपरिणयस्तथा ।
बालखिल्याश्च यागेशं बालखिल्याश्च गारुडम् ॥
लक्ष्मीशापः सामवेशः सोमप्रासादमेव च ।
अम्बादेवीं पाटलाख्यमाम्रेयं ब्रह्मकुण्डकम् ॥
गोसुखं लोहयष्ट्याख्यामृणापालेश्वरी तथा ।
ज्ञानेश्वरं राजवापी रामेशो लक्ष्मणेश्वरः ॥
कुशेशाख्यं लवेशाख्यं लिङ्गं सर्वोत्तमोत्तमम् ।
अघर्षणसमाख्यानं दमयन्त्याख्यिजातकम् ॥
ततोऽम्बा रेवती चात्र भद्रिकातीर्थसम्भवम् ।
क्षेमङ्करी च केदारं शुक्लतीर्थं सुखारकम् ॥
सत्यसन्धेश्वराख्यानं तथा कर्णोत्पलाकथा ।
अटेश्वरं याज्ञवल्क्यं गौर्यं गाणेशमेव च ॥
ततो वास्तुपदाख्यानमजागृहकथानकम् ॥
सौभाग्यान्धुकशूलेशं धर्मेशजकथानकम् ।
मिष्टान्नदेश्वराख्यानं गाणपत्यत्रयं ततः ॥
जाबालिचरितञ्चैव मकरेशकथा ततः ।
कालेश्वर्यन्धकाख्यानं कुब्जमाम्रवनन्तथा ॥
पुण्यादित्यं रौहिणाख्यं नागरीनर्पतिकीर्तनम् ।
भार्गवं चरितं चैव वैश्वामित्रं ततः परम् ॥
सारस्वतं प्रेष्यलादं कंसारीशञ्च पैष्टिकम् ।
ब्रह्मणो यज्ञचरितं सावित्र्याख्यानसंयुतम् ॥
रैवतं भर्तृयज्ञाख्यं सुखासीर्थनिरीक्षणम् ।
कौरवं हाटकेशाख्यं प्रभासं शैवकत्रयम् ॥
पौष्करं नैमिषं धार्म्मारण्यचितयं स्तुतम् ।
द्वारावत्यो द्वारकाख्यापत्त्यावेति पुरीत्रयम् ॥
वृन्दावनं खाण्डवाख्यमर्केकाख्यं वनत्रयम् ।
कक्षः शालस्तथा नन्दी ग्रामत्रयमनुत्तमम् ॥
असिशुक्लपितृसंज्ञं तीर्थत्रयमुदाहृतम् ।
आर्बुदो रैवतश्चैव पर्व्वतत्रयमुत्तमम् ॥
नदीनां चितयं गङ्गा नर्म्मदा च सरस्वती ।
सार्द्धकोटित्रयफलमेकैकस्मिन् कीर्त्तितम् ॥
कूपिका शुक्लतीर्थञ्चामरकं बालमरुकम् ।
हाटकेशस्तथैवान्यः प्रोक्तं चतुष्टयम् ॥
ग्राम्बादित्यं आङ्गकल्पं यौधिष्ठिरमथान्धकम् ।
जलशायि चतुर्म्मास्यमभूत्यशयनव्रतम् ॥
मङ्कणेशं शिवरात्रितुलापुरुषदानकम् ।
पृथ्वीदानं वाराहेशं कपालमोचनेश्वरम् ॥
पापपिण्डं साप्तलेङ्गं युगमानादिकीर्त्तनम् ।
गिरीशाराधनाख्यानं रुद्रैकादशकीर्त्तनम् ॥
दानमाहात्म्यकथनं द्वादशादित्यकीर्त्तनम् ।
इत्येष नागरः खण्डः प्रभासाख्योऽधुनोच्यते ॥"
सप्तमे प्रभासखण्डे ।
"सोमेशो यत्र विश्वेशोऽर्केशत्वं पुण्यदं महत् ।
सिद्धेश्वरादिकाख्यानं पृथगत्र प्रकीर्त्तितम् ॥
अश्वितीर्थं कपर्दीशं केदारेशं गणिप्रदम् ।
भीमभैरवचण्डीशभास्करोङ्कारकेश्वराः ॥
बुधेश्यभृगुसौरेन्दुशुक्रगीशा हरविग्रहाः ।
सिद्धेश्वराद्याः प्रत्यक्षे रुद्रास्तत्र व्यवस्थिताः ॥
वराहोहा त्रिजापाला मङ्गला ललितेश्वरी ।
लक्ष्मीशो वाडवेशश्चार्घीशः कामेश्वरस्तथा ॥
गौरीशवरणेशाख्यसुधीशश्च गणेश्वरम् ।
कुमारेशश्च शाकल्यं शुक्लतीर्थं गतिप्रदम् ॥
देवसत्रं चक्रतीर्थं सन्निहत्याश्रयं तथा ।
भूतेशाद्दीनि लिङ्गानि आदिनारायणाश्रयम् ॥
तत्तच्चक्रधराख्यानं ग्राम्बादित्यकथानकम् ।
कथा कण्टकशोधिन्या महिषग्रास्ततः परम् ॥
कपालीश्वरकोटीशबालब्रह्माक्षसत्कथा ।
नरकेशसवर्त्तेशगणिधीश्वरकथा ततः ॥
बलभद्रेश्वरस्याथ गङ्गाया गगनस्य च ।
आम्बवत्याख्यसरितः प्राग्वकूपस्य सत्कथा ॥
घृतमेधलघुमेधकोटिमेधकथा तथा ।
दूर्व्वासाकथदुष्यन्तहिरण्यासङ्गमोत्कथा ॥
नगराकर्षस्य ख्यातस्य सङ्कर्षणवसुद्रयोः ।
कुमार्याः शैवपालस्य ब्रह्मेशस्य कथा पृथक् ॥
पिङ्गलासङ्गमेशस्य शुक्लेशकपटेशयोः ।
ऋषितीर्थस्य नन्दार्कचित्रकूपस्य कीर्त्तनम् ॥
घृतपीपानस्य पर्णार्कस्यकुमत्योः कथाद्भुता ।
वाराहस्वामिवृत्तान्तं छायालिङ्गाख्यगुरुस्त्रियोः ॥
कथा कनकनन्दायाः कुन्तीगङ्गेशयोस्तथा ।
चमसोद्भेदविदुरत्रिलोकेशकथा ततः ॥
मङ्कणेशचक्रपुरेशषडतीर्थकथा तथा ।
सूर्य्यप्राभोचीत्तमयोरुमानाथकथा तथा ॥
भृङ्गारशूलसूलयोश्चवनार्कशयोस्तथा ।
अजापालेशशालार्ककुवरस्यलजा कथा ॥
ऋषितीर्थकथा पुण्या सङ्गलेश्वरकीर्त्तनम् ।
भारदादित्यकथनं नारायणनिरूपणम् ॥
तमकुण्डस्य माहात्म्यं मूलचण्डीशवर्णनम् ।
चतुर्व्वक्त्रगणाध्यक्षकलम्बेश्वरयोः कथा ॥
गोपालस्वामिवकुलस्वामिनोर्भारतीकथा ।
क्षेमार्कोत्पत्तिविघ्नेशलम्बस्वामिकथा ततः ॥
कालमेघस्य कपिलायज्ञा ऊर्ध्वप्रीश्वरभद्रयोः ।
शुक्लावर्त्तभोजनतीर्थगोप्रदाद्यनसद्वनाम् ॥
जालेश्वरस्य हूँकारकूपवटीशयोः कथा ।
व्याघ्रापुरस्थविघ्नेशकाकुब्जकथाद्भुता ॥
कपिलेशस्य च कथा जरद्गवेशस्य च ।
मलककोटीश्वरयोर्हाटकेश्वरजा कथा ॥
नारदेशमल्लभृषा दुर्गकूटगणेशजा ।
सुपर्णलाख्यभैरवीभक्षतीर्थभवा कथा ॥
कीर्त्तनं कर्कमालस्य गुप्तसोमेश्वरस्य च ॥
बहुस्वर्णशुक्लङ्गेशकोटीश्वरकथा ततः ॥
मार्कण्डेश्वरकोटीशदामोदरशुक्लोत्कथा ।
स्वर्णरेखा ब्रह्मकुण्डं कुन्तीभीमेश्वरौ तथा ॥
त्यागीकृतञ्च सर्व्वस्वं शैवे वस्त्रापथे स्तुतम् ।
दुर्व्वासविष्णुगङ्गारैवतानां कथाद्भुता ॥
ततोऽर्बुदे अम्बिकथा अचलेश्वरकीर्त्तनम् ।
नागतीर्थस्य च कथा वशिष्ठाश्रमवर्णनम् ॥
भद्रकर्णस्य माहात्म्यं त्रिनेत्रस्य ततः परम् ।
केदारस्य च माहात्म्यं सीर्यागमनकीर्त्तनम् ॥
कोटीश्वररुपतीर्थकुबेरीकूपकथा ततः ।
सिद्धेशपुष्केश्वरयोर्मणिकर्णीशकीर्त्तनम् ॥
पङ्गुतीर्थयमतीर्थवाराहतीर्थवर्णनम् ।
चन्द्रप्रभासपिण्डोदश्रीमातासुक्लतीर्थजम् ॥
कात्यायन्याश्च माहात्म्यं ततः पिण्डारकस्य च ।
ततः कनखलस्याथ चक्रमानुषतीर्थयोः ॥
कपिलाग्नितीर्थकथा तथा रक्तानुवन्धजा ।
गणेशपार्थेश्वरयोर्व्यासायासुक्लस्य च ॥
चण्डीस्थानं नागभवनेश्वरः कुब्जमत्स्येशजा ।
कामेश्वरस्य मार्कण्डेयोत्पत्तेश्च कथा ततः ॥
उद्दालकेशसिद्धेशगालतीर्थकथा पृथक् ।
श्रीदेवमातोत्पत्तिश्च व्यासगौतममतीर्थयोः ॥
कुलसन्तारमाहात्म्यं रामकोव्याङ्गतीर्थयोः ।
चन्द्रोदभेदेशानशङ्खब्रह्मस्थानोद्भवोद्भवम् ॥
त्रिपुष्करहदह्रदगुहेश्वरकथा शुभा ।
अविमुक्तस्य माहात्म्यमुमामाहेश्वरस्य च ॥
मद्दीजस्य प्रभावश्च जम्बुतीर्थस्य वर्णनम् ।
गङ्गाधरमिश्रकथयोः कथा चाथ फलश्रुतिः ॥
द्वारकायाश्च माहात्म्ये चन्द्रशर्म्मकथानकम् ।
जागराद्याख्यव्रतञ्च व्रतमेकादशीभवम् ॥
महाह्रदाग्निकाख्यानं प्रद्युम्नर्षिसमागमः ।
दुर्व्वासस उपाख्यानं याज्ञोपक्रमकीर्त्तनम् ॥
गोमत्युत्पत्तिकथनं तस्या स्नानादिजं फलम् ।
चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः ॥
सनकादिह्रदाख्यानं कुशतीर्थकथा ततः ।
गोप्रचारकथा पुण्या गोपीनां द्वारकागमः ॥
गोपीसरःसमाख्यानं ब्रह्मतीर्थादिकीर्त्तनम् ।
पञ्चनद्यागमाख्यानं नानाख्यानसमाचितम् ॥
शिवलिङ्गमहातीर्थलक्ष्मीपूजादिकीर्त्तनम् ।
त्रिविक्रमस्य मूर्त्त्याख्या दुर्व्वासःक्षमासंकथा ॥
कुशदैत्यवधोत्पत्त्याख्या विशेषाच्चैनजं फलम् ।
गोमत्यां द्वारकायाश्च तीर्थागमनकीर्त्तनम् ॥
क्षमामन्दिरसंप्राप्ता द्वारवत्यभिषेचनम् ।
तत्र तीर्थावासकथा द्वारकापुण्यकीर्त्तनम् ॥
इत्येष सप्तमः प्रोक्तः खण्डः प्राभासिको द्विज ! ।
स्कान्दे सर्व्वोत्तरकथा शिवेमाहात्म्यवर्णने ॥"
सप्तफलश्रुतिः ।
"लिखित्वैतत्तु यो दद्याद्धैमशूलसमाचितम् ।
माघ्यां सप्तदश्यां विप्राय च शिवे भोदत पदे ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे वृद्धवृषाख्याने
चतुर्थपादे १०४ अध्यायः ॥ १६ ॥
चतुर्दशं वामनपुराणम् ।
श्रीवशिष्ठोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि पुराणं वामनाभिधम् ।
त्रिविक्रमचरित्राढ्यं दशसाहस्रसङ्ख्यकम् ॥
कूर्म्मकल्पसमाख्यानं वर्णाश्रमकथानकम् ।
भागवयसमायुक्तं वक्तृश्रोतृप्रभावजम् ॥" * ॥
तत्र पूर्व्वभागे ।
"पुराणप्रश्नः प्रथमं ब्रह्मणोत्पत्तिदा ततः ।

कपालमोचनाख्यानं दक्षयज्ञविध्वंसनम् ॥
हरस्य कालरूपाख्या कामस्य दहनं ततः।
प्रह्लादनारायणयोर्युद्धं दैवासुराक्षयम् ॥
सुकेशराक्षसाख्यानं ततो भुवनकोशकम्।
ततः कान्यव्रताख्यानं श्रीदुर्गाचरितं ततः ॥
तपतीचरितं पश्चात् कुरुक्षेत्रस्य वर्णनम्।
सरोमाहात्म्यमतुलं पार्वतीजन्मकीर्तनम् ॥
तपस्तप्त्वा विवाहश्च गौर्य्याख्यानकं ततः।
ततः कौशिक्युपाख्यानं कुमारचरितं ततः ॥
ततोऽन्धकवधाख्यानं साध्योपाख्यानकं ततः।
जावालिचरितं पश्चादरजायाः कथाद्भुता ॥
अन्धकेश्वरयोर्युद्धं गणत्वं चान्धकस्य च।
महतां जन्मकथनं वलेश्च चरितं ततः ॥
ततस्तु जन्याचरितं त्रैविक्रममतः परम्।
प्रह्लादतीर्थयात्रायां प्रोच्यन्ते तत्कथाः शुभाः ॥
ततश्च ध्रुवचरितं प्रेतोपाख्यानकं ततः।
नचपुरुषाख्यानं श्रीदामचरितं ततः ॥
त्रिविक्रमचरित्रान्ते ब्रह्मप्रोक्तः स्तवोत्तमः।
प्रह्लादबलिसंवादे सुतले हरिसंगमम् ॥
इत्येष पूर्वभागोऽस्य पुराणस्य तवोदितः ॥"
तदुत्तरे भागे दृष्टहामनाख्ये।
"अद्य तस्योत्तरं भागं दृष्टहामनसंज्ञकम् ॥
माहेश्वरी भागवती सौरी गाणेश्वरी तथा।
चतस्रः संहिताश्चात्र पृथक् साहस्रसङ्ख्यया ॥
माहेश्वर्यांस्तु लक्षस्य तद्भक्तानाञ्च कीर्तनम्।
भागवत्यां जगन्मातुरवतारकथाद्भुता ॥
सौर्य्यां सूर्य्यस्य महिमा गदितः पापनाशनः।
गाणेश्वर्यां गणेशस्य चरितञ्च महेशितुः ॥
इत्येतद्दामनं नाम पुराणं सुविचित्रकम्।
पुलस्त्येन समाख्यातं नारदाय महात्मने ॥
ततो नारदतः प्राप्तं व्यासेन सुमहात्मना।
व्यासात्तु लब्धवान् वत्स! तच्छिष्यो रोमहर्षणः ॥
स चाख्यास्यति विप्रेभ्यो नैमिषीयेभ्य एव च।
एवं परम्पराप्राप्तं पुराणं वामनं शुभम् ॥" * ॥
तत्फलश्रुतिः।
"ये पठन्ति च शृण्वन्ति तेऽपि यान्ति परां गतिम्।
लिखित्वैतत् पुराणन्तु यः प्रयच्छेत्पयेत् ॥
विप्राय वेदविदुषे धनधेनुसमाचितम्।
स समुद्धृत्य नरकान्नयेत् स्वर्गं पितॄन् स्वकान्।
देहान्ते सूक्तभोगोऽसौ याति विष्णोः परं
पदम् ॥"
इति श्रीनारदीयपुराणे पूर्वभागे दृष्टहामनाख्याने
चतुर्थपादे १०५ अध्यायः ॥ १४ ॥
पञ्चदशं कूर्मपुराणम्।
श्रीब्रह्मोवाच।
"अद्य वत्स! मरीचेश्च पुराणं कूर्मसंज्ञितम्।
सर्व्वाकल्पानुचरितं यत्र कूर्मवपुर्हरिः ॥
धर्म्मार्थकाममोक्षाणां माहात्म्याच्च पृथक् पृथक्।
इन्द्रद्युम्नप्रसङ्गेन प्राहर्षिभ्यो दयानिधिः ॥
तत्सप्तदशसाहस्रं सप्तधा संहितं शुभम्।
यत्र ब्राह्मी पुरा प्रोक्ता धर्म्मा नानाविधा सुने!॥
नानाकथाप्रसङ्गेन नृणां सन्ततिदायकाः ॥" * ॥

ततपूर्वभागे।
"तत्र पूर्वविभागे तु पुराणोपक्रमः पुरा।
लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षिगणसङ्कथा ॥
वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम्।
कालसङ्ख्या समासेन लयान्ते स्तवनं विभोः ॥
ततः सङ्क्षेपतः सर्गः प्राकृतं चरितं तथा।
सङ्कल्पनाम पार्व्वत्या योगस्य च निरूपणम् ॥
भृग्वृषिवंशसमाख्यानं ततः स्वायम्भुवस्य च।
देवादीनां वसतृत्पत्तिर्दक्षयज्ञाहृतिस्ततः ॥
दक्षस्वसृकथा पश्चात् कश्यपान्वयकीर्त्तनम्।
आदित्यवंशकथनं लक्ष्म्यास्य चरितं शुभम् ॥
मार्कण्डलक्ष्म्यसंवादो व्यासपाण्डवसंकथा।
युगधर्म्मानुकथनं व्यासजैमिनिकी कथा ॥
वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम्।
त्रैलोक्यवर्णनञ्चैव वेदव्याख्यानिरूपणम् ॥"* ॥
तदुत्तरभागे।
"उत्तरेऽस्य विभागे तु पुरा गौरीश्वरी ततः।
व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधनी ॥
नानाविधानां तीर्थानां माहात्म्याच्च पृथक्
ततः।
नानाधर्म्मप्रकथनं ब्राह्मीयं संहिता स्मृता ॥
अतः परं भगवती संहितार्थनिरूपणी।
कथिता यत्र वर्णानां पृथग्वृत्तिरदाहृता ॥"
तदुत्तरभागीयभगवत्याख्यद्वितीयसंहितायाः
पञ्चपादेषु।
"पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यव-
स्थितिः।
सदाचारालिका वत्स! भोगसौख्यविवर्द्धनी ॥
द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकी-
र्त्तिता।
यया स्वाश्रितया पापं विधूयेह त्रजेद्दिवम् ॥
तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्व्विधा।
यया चरितया सम्यक् लभते गतिमुत्तमाम् ॥
चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता।
यया सन्तुष्यति श्रीमान् नृणां श्रेयोविवर्द्धनः ॥
पञ्चमेऽस्याश्च तः पादे वृत्तिः सङ्करजोदिता।
यथा चरितयाप्नोति भाविनीमुत्तमां जनिम् ॥
इत्येषा पञ्चपदुक्ता द्वितीया संहिता सुने!।
तृतीयाप्युदिता सौरी नृणां कामविधायिनी ॥
षोढ़ा षट्कर्म्मसिद्धिं सा बोधयन्ती च कामि-
नाम्।
चतुर्थी वैष्णवी नाम मोक्षदा परिकीर्त्तिता ॥
चतुष्पदो द्विजादीनां साक्षाद्ब्रह्मस्वरूपिणी।
ताः क्रमात् षट्चतुर्द्दौसाहस्राः परि-
कीर्त्तिताः ॥"
तत्फलश्रुतिः।
"एतत्कूर्म्मपुराणन्तु चतुर्व्वर्गफलप्रदम्।
पठतां शृण्वतां नृणां सर्व्वोत्तमगतिप्रदम् ॥
लिखित्वैतत्तु यो भक्त्या हेमकूर्म्मसमन्वितम्।
ब्राह्मणायायने दद्यात् स याति परमां गतिम् ॥"
इति श्रीनारदीयपुराणे पूर्वभागे दृष्टहामनाख्याने
चतुर्थपादे १०६ अध्यायः ॥ १५ ॥

षोड़शं मत्स्यपुराणम्।
श्रीब्रह्मोवाच।
"अथ मात्स्यं पुराणं ते प्रवक्ष्ये द्विजसत्तम!।
यत्रोक्तं सत्स्वरूपाणां तृतीयं सङ्क्षिप्य भूतले ॥
व्यासेन वेदविदुषा नरसिंहोपवर्णनम्।
उपक्रम्य तदुद्दिष्टं चतुर्दशसहस्रकम् ॥
मनुमत्स्यसुसंवादो ब्रह्माण्डवर्णनन्ततः।
ब्रह्मदेवासुरोत्पत्तिर्म्मातृतोत्पत्तिरेव च ॥
मदनद्वादशी तद्वत् लोकपालाभिपूजनम्।
मन्वन्तरसमुद्देशो वैशाख्याभिधवर्णनम् ॥
सूर्य्यवैवस्वतोत्पत्तिर्व्वंशसङ्क्रमणं तथा।
पितृवंशानुकथनं श्राद्धकालस्तथैव च ॥
पितृतीर्थप्रचारश्च सोमोत्पत्तिस्तथैव च।
कीर्त्तनं सोमवंशस्य ययातिचरितं तथा ॥
कार्त्तवीर्य्यस्य चरितं वृष्टं वंशानुकीर्त्तनम्।
नृगुशापस्तथा विष्णोर्दैग्धा जन्म च शिबौ ॥
कीर्त्तनं पुरुवंशस्य यदोः क्रौष्टाग्रजः परः।
क्रियायोगस्ततः पश्चात् पुराणं परिकीर्त्तितम् ॥
व्रतं नक्षत्रपुरुषं मार्त्तण्डशयनं तथा।
लक्षाष्टमीव्रतं तद्वद्रोहिणीचन्द्रसंज्ञितम् ॥
तडागविधिमाहात्म्यं पादपोत्सर्ग एव च।
सौभाग्यशयनं तद्वदगस्त्यव्रतमेव च ॥
तथानन्तफलतीयाया रसकल्याणिनीव्रतम्।
तथैवानन्दकर्य्याश्च व्रतं सारस्वतं पुनः ॥
उपरागाभिषेकश्च सप्तमीशयनं तथा।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा ॥
अशून्यशयनं तद्वत् तथैवाङ्गारकव्रतम्।
सप्तमीसप्तकं तद्वद्विशोकद्वादशीव्रतम् ॥
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च।
ग्रहस्वरूपकथनं तथा शिवचतुर्दशी ॥
तथा सर्व्वफलत्यागः सूर्य्यवारव्रतं तथा।
संक्रान्तिशयनं तद्वद्विभूतिद्वादशीव्रतम् ॥
पतिव्रतानां माहात्म्यं तथा स्त्रीविधिक्रमः।
प्रयागस्य तु माहात्म्यं द्वीपलोकानुवर्णनम् ॥
तथान्तरीक्षचारश्च ध्रुवमाहात्म्यमेव च।
भवनानि सुरेन्द्राणां त्रिपुरोद्योतनं तथा ॥
पितृप्रवरमाहात्म्यं मन्वन्तरविनिर्णयः।
चतुर्युगस्य सम्भूतिर्युगधर्म्मनिरूपणम् ॥
वज्राङ्गस्य तु सम्भूतिस्तारकोत्पत्तिरेव च।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्त्तनम् ॥
पार्व्वतीसम्भवस्तद्वत्तथा शिवतपोवनम्।
अनङ्गदेहदाहश्च रतिशोकस्तथैव च ॥
गौरीतपोवनं तद्वच्छिवेनाथ प्रसादनम्।
पार्व्वतीऋषिसंवादस्तथैवोद्वाहमङ्गलम् ॥
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा।
तारकस्य वधो घोरो नरसिंहोपवर्णनम् ॥
पद्मोद्भवविसर्गस्तु तथैवान्धकघातनम्।
वाराणस्याश्च माहात्म्यं गङ्गादानाश्रयेव च ॥
प्रवरानुक्रमस्तद्वत् पितृगाथानुकीर्त्तनम्।
तथोभयमुखीदानं दानं छायाजिनस्य च ॥
ततः सावित्र्युपाख्यानं राजधर्म्माश्रयेव च।
विविधोत्पातकथनं ग्रहशान्तिस्तथैव च ॥

यात्रानिमित्तकथनं स्नानमङ्गलकीर्तनम् ॥
वामनस्य तु माहात्म्यं वाराहस्य ततः परम् ॥
समुद्रमथनं तद्वत् कालकूटाभिभाषणम् ।
देवासुरविमर्दश्च वास्तुविद्या तथैव च ॥
प्रतिमालक्षणं तद्वद्देवतास्थापनं तथा ।
प्रासादलक्षणं तद्वन्मण्डपानाञ्च लक्षणम् ॥
भविष्यराजवंशाश्च देवो महादानाद्युत्कीर्तनम् ।
कल्पानुकीर्तनं तद्वत् पुराणेऽस्मिन् प्रकीर्तितम्॥"
तत्फलश्रुतिः ।
"पवित्रमेतत् कल्याणमायुःकीर्तिविवर्द्धनम् ।
यः पठेच्छृणुयाद्वापि स याति भवनं हरेः ॥
लिखित्वैतत्तु यो दद्याद्धेममत्स्यसमन्वितम् ।
विप्राय श्रद्धया विष्णुर्वै स याति परमं पदम् ॥"
इति श्रीनारदीयपुराणे पूर्वभागे हरिदुपाख्याने चतुर्थपादे १०७ अध्यायः ॥ १६ ॥
सप्तदशं गरुडपुराणम् ।
श्रीब्रह्मोवाच ।
"मरीचे शृणु वक्ष्यामि पुराणं गारुडं शुभम् ।
गरुडायाब्रवीत् कृष्णो भगवान् गरुडासनः ॥
एकोनविंशसाहस्रं नाम्ना कल्पकथाश्रितम् ॥"
तत्र पूर्वखण्डे ।
"पुराणोपक्रमो यत्र सर्गसङ्क्षेपलक्षणः ।
सूर्यादिपूजनविधिर्दीक्षाधिधिरतः परम् ॥
अग्न्यादिपूजा ततः पञ्चाङ्गवच्छार्चनं द्विज ! ।
पूजाविधानञ्च तथा वैष्णवं पञ्जरं ततः ॥
योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्तनम् ।
ध्यानं विष्णोस्ततः सूर्यपूजा स्तुत्युग्रयार्चनम् ॥
मालामन्त्राः शिवार्चाथ गणपूजा ततः परम् ।
गोपालपूजा त्रैलोक्यमोहनश्रीधरार्चनम् ॥
विष्णोर्वा पञ्चतत्त्वार्चा चक्रार्चा देवपूजनम् ।
व्यासादिसन्ध्योपास्तिश्च दुर्गार्चाथ सुरार्चनम् ॥
पूजा माहेश्वरी चातः पवित्रारोहणार्चनम् ।
मूर्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम् ॥
प्रतिष्ठा सर्वदेवानां पृथक्पूजाविधानतः ।
योगोऽष्टाङ्गो दानधर्मः प्रायश्चित्तं विधिक्रिया ॥
द्वीपेषूनरकाख्यानं सूर्यव्यूहश्च ज्योतिषम् ।
सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम् ॥
माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम् ।
ततो मन्वन्तराख्यानं पृथक् पृथक्विभागशः ॥
पित्र्याख्यानं वर्णधर्मा द्रव्यशुद्धिः समर्पणम् ।
श्राद्धं विनायकस्यार्चा ग्रहयज्ञस्तथाश्रमाः ॥
मनवाख्या प्रेताद्यौचं नौतिसारो व्रतोक्तयः ।
सूर्यवंशः सोमवंशोऽवतारकथनं हरेः ॥
रामायणं हरिवंशो भारताख्यानकत्ततः ।
आयुर्वेदे निदानं प्राक् चिकित्साद्रव्यजा गुणाः ॥
रोगघ्नं कवचं विष्णोर्गारुडं चैपुरो मनुः ।
ग्रन्थचूडामणिज्ञाने हयायुर्वेदकीर्तनम् ॥
औषधीनामकथनं ततो आकरणोद्धवम् ।
स्नानः शौचं सदाचारस्ततः स्नानविधिः स्मृतः ॥
तर्पणं वैष्णवेश्चैव सन्ध्या पार्वणकर्म च ।
नित्यश्राद्धं सपिण्डाख्यं धर्मसारोऽघनिष्कृतिः ॥
प्रतिसङ्क्रम उक्तोऽतादृगुणधर्म्माः क्षतेः फलम् ।
योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः ॥
माहात्म्यं वैष्णवस्याथ नारसिंहस्तवोत्तमम् ।
ज्ञानाख्यं गुह्यकं स्तोत्रं विष्णोर्नामाश्रयम् ॥
वेदान्तसाङ्ख्यसिद्धान्तं ब्रह्मज्ञानं तथात्मकम् ।
गीतासारफलोत्कीर्तिः पूर्वखण्डोऽयमीरितः॥"
उत्तरखण्डे प्रेतकल्पे ।
"अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः ।
यत्र तार्क्ष्येण संपृष्टो भगवानाह वाडव ! ॥
धर्म्मप्रकटनं पूर्व्वयोनीनां गतिकारणम् ।
दानाधिकं फलाध्यापि प्रोक्तमत्रौर्द्ध्वदैहिकम् ॥
यमलोकस्य मार्गस्य वर्णनञ्च ततः परम् ।
षोड्शश्राद्धफलकं दृष्टान्ताद्याञ्च वर्णितम् ॥
निष्कृतिर्यममार्गस्य धर्म्मराजस्य वैभवम् ।
प्रेतपीड़ाविनिर्देशः प्रेतचिह्ननिरूपणम् ॥
प्रेतानां चरिताख्यानं कारणं प्रेतता प्रति ।
प्रेतकल्पविचारस्य संक्षिप्तीकरणोदयः ॥
प्रेतत्वमोक्षणाख्यानं दानानि च विशुद्धये ।
आवश्यकोक्तमं दानं प्रेतसौख्यकरं हितम् ॥
घोरोरकनिर्देशो यमलोकस्य वर्णनम् ।
प्रेतसोद्धारकथनं कर्म्मकर्तृविनिर्णयः ॥
मृत्योः पूर्व्वक्रियाख्यानं पश्चात् कर्म्मनिरूपणम् ।
मध्यं षोड्शकं श्राद्धं स्वर्गप्राप्तिक्रियोदितम् ॥
क्षतकस्याथ सङ्घातं नारायणबलिक्रिया ।
वृषोत्सर्गस्य माहात्म्यं निपिण्डपरिवर्ज्जनम् ॥
अपमृत्युक्रियोक्तिश्च विपाकः कर्म्मणां नृणाम् ।
कृत्याकृत्यविचारश्च विष्णुध्यानं विशुद्धये ॥
स्वर्गनौ विहिताख्यानं स्वर्गसौख्यनिरूपणम् ।
भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम् ॥
पक्षीतल्लोककथनं ब्रह्माण्डस्थितिकीर्तनम् ।
ब्रह्माण्डानेकचरितं ब्रह्मजीवनिरूपणम् ॥
आत्यन्तिकलयाख्यानं फलस्तुतिनिरूपणम् ।
इत्येतद्गरुडं नाम पुराणं भुक्तिमुक्तिदम् ॥"
तत्फलश्रुतिः ।
"कीर्त्तितं पापघ्नमनं पठतां शृण्वतां नृणाम् ।
लिखित्वैतत् पुराणन्तु विशुद्धं यः प्रयच्छति ॥
सौवर्णं हंसयुग्माढ्यं विप्राय स दिवं व्रजेत् ॥"*॥
इति श्रीनारदीयपुराणे पूर्वभागे हरिदुपाख्याने चतुर्थपादे १०८ अध्यायः ॥ १७ ॥
अष्टादशं ब्रह्माण्डपुराणम् ।
श्रीब्रह्मोवाच ।
"शृणु वत्स ! प्रवक्ष्यामि ब्रह्माण्डाख्यं पुरातनम् ।
यच्च द्वादशसाहस्रं भाविकल्पकथाश्रितम् ॥
प्रक्रियाख्योऽनुषङ्गाख्य उपोद्घातस्तृतीयकः ।
चतुर्थ उपसंहारः पादाश्चत्वार एव हि ॥
पूर्व्वपादद्वयं पूर्व्वो भागोऽत्र समुदाहृतः ।
तृतीयो मध्यमो भागश्चतुर्थस्तूत्तरो मतः ॥"*॥
तत्र पूर्व्वभागे प्रक्रियापादे ।
"आदौ क्रमसमुद्देशो नैमिषाख्यानकं ततः ।
हिरण्यगर्भोत्पत्तिश्च लोककल्पनमेव च ॥
एष वै प्रथमः पादो द्वितीयं शृणु मानद ! ॥"
पूर्व्वभागे अनुषङ्गपादे ।
"कल्पमन्वन्तराख्यानं लोकज्ञानं ततः परम् ।
मानसीसृष्टिकथनं रुद्रप्रसववर्णनम् ॥
महादेवविभूतिश्च ऋषिसर्गस्ततः परम् ।
अग्नीनां विषयश्चाथ कालसङ्ख्यावर्णनम् ॥
प्रियव्रताद्ययोद्देशः पृथिव्याथामविस्तरः ।
वर्णनं भारतस्याथ ततोऽन्येषां निरूपणम् ॥
जम्बूद्वीपाख्या ततोऽधोलोकवर्णनम् ।
ऊर्द्धलोकानुकथनं ग्रहचारस्ततः परम् ॥
आदित्यशशिकथनं देवयज्ञानुकीर्तनम् ।
नीलकण्ठाख्यानं मन्वादेश्च वैभवम् ॥
अमावास्यानुकथनं युगतत्त्वनिरूपणम् ।
यज्ञप्रवर्त्तनं चाथ युगयोरन्तयोः स्थितिः ॥
युगप्रज्ञाश्च ऋषिप्रवरवर्णनम् ।
वेदानां व्यसनाख्यानं स्वायम्भुवनिरूपणम् ॥
प्रियमन्वन्तराख्यानं पृथिवीदोहनन्ततः ।
चाक्षुषेऽन्तरे सर्गो द्वितीयोऽङ्गिः पुरोदितः ॥"
मध्यमभागे उपोद्घातपादे ।
"अथोपोद्घातपादे तु सप्तर्षिपरिकीर्तनम् ।
प्राणापत्यक्षयस्तस्माद्देवादीनां समुद्भवः ॥
ततो जयाभिधाद्यारौ मरुदुत्पत्तिकीर्तनम् ।
काश्यपेयानुकथनन्तदृषिवंशनिरूपणम् ॥
पितृकल्पानुकथनं श्राद्धकल्पस्ततः परम् ।
वैवस्वतसमुत्पत्तिः ऋद्धिस्तस्य ततः परम् ॥
मनुपुत्राश्चयश्चानां गान्धर्वस्य निरूपणम् ।
इक्ष्वाकुवंशकथनं वंशोऽरेः सुमहात्मनः ॥
अमावसोश्चयस्य रजेश्चरितमद्भुतम् ।
ययातिचरितञ्चाथ यदुवंशनिरूपणम् ॥
कार्त्तवीर्यस्य चरितं जामदग्न्यं ततः परम् ।
तृष्णावंशानुकथनं सगरस्याथ सम्भवः ॥
भार्गवस्यानुचरितं तथा कार्य्यवधाश्रयम् ।
समरस्याथ चरितं भार्गवस्य कथा पुनः ॥
देवासुराद्यवकथा क्षत्राविर्भाववर्णने ।
क्षत्रस्य च क्षयः पुण्यः शुक्रेण परिकीर्त्तितः ॥
विष्णुमाहात्म्यकथनं बलिवंशनिरूपणम् ।
भविष्यराजचरितं संप्राप्तेऽथ कलौ युगे ॥
उपसंहारपादोऽयं क्षत्तोयो मध्यमे दृशे ॥"
उत्तरभागे उपसंहारपादे ।
"चतुर्थेऽपसंहारं वक्ष्ये खण्डे तथोत्तरे ।
वैवस्वतान्तराख्यानं विस्तरेण यथातथम् ॥
पूर्व्वमेव समुद्दिष्टं सङ्क्षेपादिह कथ्यते ।
भविष्याणां मनूनाञ्च चरितं हि ततः परम् ॥
कल्पप्रलयनिर्देशः कालमानं ततः परम् ।
लोकाश्चतुर्दश ततः कथिता मानलक्षणैः ॥
वर्णनं नरकाणाञ्च विकर्म्माचरणोद्भवः ।
मनोमयपुराख्यानं लयः प्राकृतिकस्ततः ॥
शैववंश्याथ पुरस्यापि वर्णनञ्च ततः परम् ।
विविधादृगुणसम्बन्धाज्जन्तूनां कीर्त्तना गतिः ।
अनिर्देश्याप्रतर्क्यस्य ब्रह्मणः परमात्मनः ।
अन्वयव्यतिरेकाभ्यां वर्णनं हि ततः परम् ॥
इत्येष उपसंहारः पादो दृष्टः स चोत्तरः ।
चतुष्पादं पुराणं तै ब्रह्माण्डं समुदाहृतम् ॥
अष्टादशमनौपम्यं सारात्सारतरं द्विज ! ।
ब्रह्माण्डञ्च चतुर्लक्षं पुराणत्वेन पठ्यते ॥

तदेव यस्य गदितमष्टादशधा पृथक् ।
पाराशर्य्येण मुनिना सर्व्वेषामपि मानद ! ॥
वस्तुतश्चाथ तेनैव मुनीनां भाविनात्मनाम् ।
मतः श्रुत्वा पुराणानि लोकेभ्यः प्रथकाश्रिरे ॥
मुनयो धर्म्मशीलास्ते दीनानुग्रहकारिणः ।
मया वेदं पुराणञ्च वशिष्ठाय पुरोदितम् ॥
तेन प्रक्षिप्ततायोक्तं जातूकर्णाय तेन च ।
व्यासो लब्ध्वा ततश्चैतत् प्रभञ्जनमुखोद्गतम् ॥
प्रमाणीकृत्य लोकेऽस्मिन् प्रावर्त्तयदनुत्तमम् ॥"
तत्फलश्रुतिः ।
"य इदं कीर्त्तयेद्वत्स ! शृणोति च समाहितः ।
स विधूयेह पापानि याति लोकमनामयम् ॥
लिखित्वैतत् पुराणन्तु स्वर्णसिंहासनस्थितम् ।
पत्रैर्णाच्छादितं यस्तु ब्राह्मणाय प्रयच्छति ॥
स याति ब्रह्मणो लोकं नात्र कार्य्या विचारणा ॥
मरीचेरष्टादशैतानि मया प्रोक्तानि यानि ते ।
पुराणानि तु सङ्क्षेपाच्छ्रोतव्यानि च विस्तरात् ॥
अष्टादशपुराणानि यः शृणोति नरोत्तमः ।
कथयेद्वा विधानेन नेह भूयः स जायते ॥
श्रुत्वमेतत् पुराणानां यत्नयोक्तं तवाधुना ।
तन्नित्यं श्रोतव्यं हि पुराणफलमिच्छता ॥
न दाम्भिकाय पापाय देवगुर्व्वनुद्वेषवे ।
देयं कदापि साधूनां देयं शान्ताय च ॥
शुश्रूषाभिरताय च ।
निर्म्मत्सराय शुचये देयं सद्भक्तिवाय च ॥"
इति श्रीनारदीयपुराणे पूर्व्वभागे हरिहरोपाख्याने चतुर्थपादे १०६ अध्यायः ॥ १८ ॥ * ॥
इत्यष्टादशमहापुराणानुक्रमणिका समाप्ता ॥*॥
(अष्टादशमहापुराणानां निरुक्तिर्यथा शिव-पुराणे उत्तरखण्डे मध्यमेश्वरमाहात्म्ये ।
"यत्र वक्ता स्वयं तत्र ! ब्रह्मा साक्षात् चतुर्मुखः ।
तस्माद्ब्राह्मं समाख्यातं पुराणं प्रथमं सुने ! ॥" १ ॥
तत्र इति सुनिसम्बोधनम् ।
"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम् ।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम् ॥ २ ॥
परापुरश्चरितं यत्तु पुराणं विष्णुबोधकम् ।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः ॥ ३ ॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु ।
श्रैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥४॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते ।
तत्तु भागवतं प्रोक्तं तत्तु देवीपुराणकम् ॥५॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते ॥ ६ ॥
यत्र वक्ताभवत्तत्र ! मार्कण्डेयो महामुनिः ।
मार्कण्डेयपुराणं हि तदाख्यानञ्च सामम् ॥७॥
अग्नियोगात्तदाग्नेयं ८ भविष्योक्तैर्भविष्यकम् ।९।
विवर्त्तनात् ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते ॥ १० ॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते ।११।
वराहस्य च वाराहं पुराणं द्वादशं सुने ! ॥१२॥
यत्र स्कन्दः स्वयं श्रोता वक्ता साक्षात् महेश्वरः ।
तत्तु स्कान्दं समाख्यातम् १३ वामनस्य तु वामनम् ॥ १४ ॥
कौर्म्मं कूर्म्मस्य चरितम् १५ मात्स्यं मत्स्यस्य कीर्त्तितम् । १६ ।
गारुडन्तु स्वयं वक्ता यत्तद् गारुडसंज्ञकम् ॥ १७ ॥
ब्रह्माण्डचरितोक्तत्वात् ब्रह्माण्डं परिकीर्त्तितम् ॥" १८ ॥
पुराभवः वेदः । ऋग्वेदादिप्रतिपादको ग्रन्थः । यथा, शतपथब्राह्मणे । १४ । ६ । १० । ६ ।
"ऋग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि ॥"
तथा च बृहदारण्यकोपनिषदि ।
"अस्य महतो भूतस्य निश्वसितमेतद् यदृग्वेदो यजुर्व्वेदः सामवेदोऽथर्व्वाङ्गिरस इतिहासः पुराणम् ॥"
"इदं वा अग्रेणव किञ्चिदासीदित्यादिकं जगतः प्रागवस्थासूपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम् ।" इति ऋग्वेदोपोद्घाते ॥ * ॥)
पुराणः, पुं, (पुरा पूर्व्वस्मिन् काले भव इति । पुरा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्युट्युलौ तुट्च ।"४ । ३ । २३ । इति ट्युः तुडागमश्च ।) पशुः । (शिवः । यथा, महाभारते । १३ । १७ । १०६ ।
"बलवांश्चोपशान्तश्च पुराणः पुण्यचक्षुरी ॥")
पुरातने, त्रि । (यथा, मनुः । ५ । २३ ।
"बभूवुर्हि पुरोडाशा भक्ष्याणां च पशुक्रियाम् ।
पुराणैरपि यज्ञेषु ब्रह्मत्वञ्च सदैव च ॥")
कार्षापणे, पुं क्ली । इति शब्दरत्नावली ॥ (यथा, मनुः । ८ । १३६ ।
"तं षोडशं स्याद्धरणं पुराणश्चैव राजतम् ।
कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः ॥")
पुराणगः, पुं, (पुराणं गायति इति । गै + घञर्थे कः । यद्वा, पुराणं वेदं गायतीति । गै + "आतोऽनुपसर्गे ।" ३ । २ । ३ । इति कः ।) ब्रह्मा । इति हेमचन्द्रः । २ । १२६ ॥ पुराणगायके, त्रि ॥
पुराणपुरुषः, पुं, (पुराणैर्वेदादिभिरुपस्तुतः पुरुषः इति मध्यपदलोपिसमासः । यद्वा, पुराणः पुरुषः इति कर्म्मधारयः ।) विष्णुः । इति हेमचन्द्रः । २ । १२८ ॥ (यथा, वायुपुराणे उत्तरखण्डे १११ अध्याये विष्णोरष्टोत्तरशतनामकीर्त्तने ।
"पुराणपुरुषो नन्दात्मजः श्रीवत्सलाञ्छनः ॥")
पुरातनः, पुं, (पुरा भवः । पुरा + ट्युल्तुट् च ।) पुराणः । तद्वैदिकपर्य्यायः । प्रत्नम् १ प्रदिवः २ प्रवयाः ३ सनेमि ४ पूर्व्वम् ५ अह्नाय ६ । इति षट्पुराणनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥ (विष्णुः । यथा, महाभारते । १३ । १४६ । ६६ ।
"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ॥")
पुरातनः, त्रि, (पुरा पूर्व्वकाले उत्पन्नः प्राग्भवः तनुः ।) भीष्मः । इति त्रिकाण्डशेषः ॥
पुरातत्, क्ली, (पुरा पुराणं वृत्तं चरित्रं यत्र ।) पूर्व्ववृत्तान्तनिबन्धनम् । तत्पर्य्यायः । इतिहासः २ । इत्यमरः । १ । ६ । ४ ॥ पूर्व्वचरितम् ३ । इति स्वामी ॥ (यथा, महाभारते । ७ । २८ । २८ ।
"इदं गुह्यमिदं पार्थ ! पुरावृत्तं यथातथ ! ॥")
पुरासिनी, स्त्री, (पुरं नगरमस्यति त्यजतीति । अस + णिनिः + ङीप् ।) सद्यदेवोलना । इति राजनिघण्टुः ॥
पुरासुहृत्, [द्] पुं, (पुरस्य त्रिपुरस्य असुहृत् शत्रुः ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥
पुरिः, स्त्री, (पूर्य्यते इति । पॄ + "सृगशॄस्वृकटेति ।" उणा० ४ । १४२ । इति इः । स च कित् ।) पुरी । इत्यमरटीकायां भरतः ॥ नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पुरीरम् । इति पुरीतत्-शब्दटीकायां भरतः ॥)
पुरिः, पुं, (पूर्य्यते यज्ञादिभिरिति । पॄ + इः । सच कित् ।) राजा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (सङ्ख्याविशेषः । शङ्कराचार्य्यशिष्यतोटकस्य शिष्येषु अन्यतमशिष्याणामुपाधिविशेषः । इति केचित् ॥ तल्लक्षणं यथा, प्राणतोषिण्यामवधृतप्रकरणे ।
"ज्ञानतत्त्वेन संपूर्णः पूर्णतत्त्वपदे स्थितः ।
परब्रह्मरतो नित्यं पुरिनामा स उच्यते ॥"
तथा च मुक्तमालातन्त्रे २ पटले ।
"देवतायाः सदा ध्यानं श्रीगुरोः पूजनं तथा ।
अन्तर्यागेषु यो निष्ठः स वीरः पुरिरेव च ॥")

पुरी

पुरी, स्त्री, (पुरि+वा ङीष्।) नगरी। इत्यमरः। २। २। १॥ (यथा, श्रीधरस्वामिधृत-भृगुवचनम्।

"नृपावासः पुरो प्रोक्ता विप्राणां पुरमप्योच्यते॥")

अस्या लक्षणादि पुरशब्दे नगरशब्दे च लिखितम्। तद्वर्णनं यथा, महाभारते। ३। १५। ५—८।

"पुरी समन्ताद्विहिता सपताका सतोरणा।
सचक्रा सदृढा चैव सयन्त्रखनका तथा॥
सोपप्रलम्बप्रतोली का साट्टाट्टालकगोपुरा।
सचक्रशतघ्नी चैव सोल्कालाताबपोथिका॥
सोष्ट्रिका भरतश्रेष्ठ! सभेरीपणवानका।
सतारणाङ्कुशा राजन्! सघण्टाशतकोलङ्कला॥
सतुरङ्गाश्वगृहका सायुधा सपरस्वधा।
लाहचर्म्मवती चापि सासिः सगुडशङ्किका॥"

"पताकाध्वजाचलः। तोरणानि बहिर्द्वाराणि। चक्राणि योधगणाः। दृढास्तदाश्रयस्थानानि भाषायां बुरुजसंज्ञानि। अन्ये तु विष्णुचोत-सञ्ज्ञनशङ्खानि दृढा इत्याहुः उदाहरन्ति च। 'कल्याणे दृढशङ्खानि रथस्योपरि लक्षिभिः। विष्णुवक्षसि शुद्धार्थं करादिक्षयं उच्यते॥'

इति॥

यन्त्राणि आग्नेयौषधबन्धेन दृषत्पिण्डोत्क्षेपणानि महान्ति भाषायां कामान्मंज्ञकानि। क्षुद्राणि सोसगुलिकोत्क्षेपणयन्त्राणि वल्लकसंज्ञकानि। खनकाः सुरङ्गद्वारा गुप्तमार्गकर्त्तारः॥ उपप्रलम्बाः लोहसुखाः कीलाः तद्युक्ताः प्रतोल्यो रथ्यामार्गा यस्यां सा। अट्टालकाः उन्नतिगृहाः। गोपुराणि पुरद्वाराणि। साट्टानि अट्टेन अग्रेन सहितानि अट्टालकादीनि यस्यां सा। साट्टेति विशेषणं उपप्रलम्बस्य ग्रामान्तस्य रथ्यायास्त्वा-दृशत्वा सम्बध्यते। चक्रशतघ्नी सैन्यनिर्याहिका मोर्व्वा इति म्लेच्छप्रसिद्धा। सोल्कालाताव-पोथिका सोल्कमलातं ज्वालासहितमुल्मुकं यस्यां सा सोल्कालाता इति कैश्चित्। अवपोथाः पाथिका यन्त्रवल्लाः काष्ठपाषाणादयो रिपुणा-मुपरिपातनाय यस्यामिति प्राहुः। उल्कावल्का प्राणहरत्वात् यन्त्रोत्क्षिप्तो गोलः। अलातं सकाष्ठदग्धलोहमयभाण्डेयं प्रहरणं बाण इति भाषायां प्रसिद्धम्। तयोरप्यलाक्षेयगतोरपि पोथिका पातयित्र्याः मन्त्रमय्यः शक्तयः, कर्णा-येन्द्रदत्तशक्तिसदृशा तद्युक्ताः सोल्कालाता-वपोथिका॥ * ॥ उष्ट्रिका चर्म्ममयानि भाण्डानि। सष्टिकेति पाठे ऋष्य आयुध-विशेषाः॥ * ॥ अश्वगुडकाः वर्त्तुलोलूखलाः पाषाणाः। लोहमयानि चर्म्माणि कमठपृष्ठा-कारादि प्रहारवारकाणि ढाल इति प्रख्या-तानि। सासिः आग्नेयौषधसहिता गुडाः गोलकाः। मल्लिकाख्यादुत्क्षेपकयन्त्राणि। शत्रूणामुपरि पातनाय तप्तो गुडो द्रवीभूतो यत्र शिखरे स्थाप्यते तत्सहितेत्यन्ये॥" इति नीलकण्ठधृतभारतभावदीपनामटीका॥

पुरीतत्

पुरीतत्, पुं क्ली, (पुरीं शरीरं तनोतीति। तन दुङ् विस्तारे+क्विप्। "गमः क्वौ।" ६।४।४०। इत्यत्र "गमादीनामिति वक्तव्यम्।" इति वार्त्तिकोक्त्या अनुनासिकलोपः। तुगागमश्च। पुरिं तनोतीति वाक्ये "नहिवृतिवृषिव्यधि-रुचिसहितनिषु क्वौ।" ६। ३। ११६। इति पूर्वपदस्य दीर्घः।) अन्त्रम्। आँत इति ख्यातम्। अन्नादि वहति कालखण्डादि अन्नं अतिवर्त्ते नाड्यादिरः। पुरिः शरीरं तनोतीति पुरीतत् क्विप् वनतनाद्यनिमामिति नलोपे खस्य तनिति तन् निपातनादिकारस्य दीर्घः। अन्न-साहचर्य्यात् क्लीबत्वम्। पुरीतदस्त्रियामिति वाचस्पतिः। इत्यमरभरतौ॥

पुरीषः, पुं, (पुरीं शरीरं मोहयतीति। मुह+क्विप्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) धुस्तूरः। इति शब्दमाला॥

पुरीषं, क्ली, (पिपर्त्ति शरीरमिति। पॄ+"शॄ-पॄभ्यां किच्च।" उणा०४।२७।इति ईषन्। स च किन्।) विष्ठा। इत्यमरः। २। ६। ६६॥

तदुत्सर्गविधिर्यथा,—

"मेढ्रवृत्तिं आस्थाय राजिवासं परित्यजेत्।
परिधायाम्बरं वस्त्रं शयनस्थानतोऽन्यहम्॥
सुखाङ्घ्रिहस्तान् प्रक्षाल्य द्विराचम्य ततो द्विजः।
क्षणं क्षणं स्थितिं कृत्वा खनित्वा नैर्ऋतीं दिशम्॥
खनित्रखननेनैव हृदग्राङ्गुल्यधोमुखम्।
गृहीत्वोदकपात्रञ्च मितं गच्छेदनुःशुतम्॥
ग्रामाद्वा गृहविक्षेपमात्रामनुदिते रवौ।
मेढ्रमात्रप्रकं कर्त्तुं नगराच्च चतुर्गुणम्॥
तत्रिमुष्टायतं गर्त्तं तथा कृत्वा गभीरकम्।
कृत्वा त्वङ्मः खनित्रेण कृष्णैराच्छाद्य तत्तृणम्॥
शुष्कैः काष्ठैरग्नौ भूमौ गर्त्तं सवगुण्ठनः।
संशीतानूपो वेणुदलैः पत्रैरुदुम्बरयभाजनैः॥
कृत्वं खनित्रं संप्राप्य वारिपात्रमुपानहौ।
ततो द्विजस्तृणविक्षेपैस्तेनाच्छाद्य भक्तकम्॥
यज्ञोपवीतं कर्णेऽथ धृत्वा मौनी च दक्षिणे।
आगतो द्विजमग्निं नोपसृज्य सन्तच्च भास्करम्॥
गुरुं समीरणं सर्व्वदेवतान्नृपतिं एव च।
मातरं पितरं चन्द्रं सर्व्वं गुरुजनं स्त्रियम्॥*॥
उदङ्मुखश्चिन्तयन्वासु दिवसे च यदा निशि।
दक्षिणासुख उत्सर्गं कुर्य्यान्मूत्रपुरीषयोः॥
पूर्व्वाह्णे तु द्विजः कुर्य्यात् पश्चिमाभिमुखोऽथवा।
अपराह्णे पूर्व्वमुखो मूत्रगूथविसर्जनम्॥
मध्याह्ने प्रयतः कुर्य्यादुदयतवागुत्तरामुखः।
दक्षिणाभिमुखो रात्रौ द्विजो मैत्रं प्रयत्नतः॥
निशायामन्धकारे तु छायायां दिवसे तथा।
यथेच्छमुखमुखो भूत्वा मैत्रं कुर्य्यात् द्विजो भयात्॥
दिग्भ्रमाच्च मनोदुःखाद्विगूत्रस्य विसर्ज्जनम्।
मोहाद्बाधोमुखः कुर्य्यादुदयतवाक् प्रयतो द्विजः॥
सन्ध्यासी ब्रह्मचारी च वानप्रस्थो गृही द्विजः।
श्राद्धाधायी च वेदानां सर्व्वयज्ञेषु दीक्षितः॥
मुनिश्च सर्व्वधर्म्मज्ञो दान्तः शान्त उदारधीः।
सदोत्तरमुखः कुर्य्यादेतयोर्नाम एव च॥

पुरीषं

प्रातश्च मैत्रं सायाह्णे दक्षिणाभिमुखो निशि।
योगिनान्तु यथा स्त्रीणां शूद्रादीनामयं क्रमः॥
न देवायतने कृष्णमृत्तिके च न जले नदे।
न नदीकूपमार्गेषु न वापीगोष्ठभस्मसु॥
न चितामिश्रस्थानेषु गोष्ठे न द्विजालये।
नाम्भःसमीपे न पथि नाकाशे न च शाद्वले॥
न सस्यदे न काम्ये च न तीर्थे न द्विजालये।
न यज्ञवृक्षमूलेषु गोपद्वारे चतुष्पथे॥
न शस्यक्षेत्रे न खले पुष्पोद्याने न चत्वरे।
सोपानत्को न नग्नश्च न रथ्यासेवभूतले॥
न वेण्यवालये गोत्रे न सूर्य्याभिमुखस्तथा।
न फालकृष्टकेदारे न तिष्ठंश्च कदाचन॥
न गच्छन्न च वल्मीके न च पर्व्वतमस्तके।
न जलं न दिशो भागान्नाकाशमवलोकयन्॥
न गोव्रजे नदीतीरे नित्यस्थाने न गोमये।
न यज्ञभूमौ न गृहे न पवित्रौषधस्थले॥
द्विजो न देहच्छायायां मूत्रस्नूषविसर्जनम्।
कुर्य्यादूषरभेदाकाटे न च सप्राणिगर्त्तके॥
उद्धृताम्भोऽस्थिकाभ्यामित्यं नारद! यत्नतः।
क्षालनोत्सर्गं ततः कुर्य्यात् शौचं मृच्चपुरीषयोः॥
शुष्ककाष्ठेन लोष्ट्रेण गोमयेनोषरेण वा।
प्रमार्ज्य गुह्यमुत्सिक्तं शिश्नञ्चैव विशोधयेत्॥
विधृत्य वामहस्तेन शिश्नमूर्द्धविशोधितम्।
चेद्दक्षिणासुखः सन्ध्यां दिवोत्तरसुखस्तदा॥
पूतिगन्धिजलं दुष्टं सफेनञ्च सबुद्बुदम्।
तीर्थादिकं सलवणं पाथो वर्ज्यान्तरन्तथा॥
सप्तद्रगानदीवारः साप्तद्रञ्च सकर्दमम्।
यवनान्त्यजखाताम्भः सप्तद्रगगोदकम्॥
धान्यक्षेत्रस्थ सलिलं सकीटञ्च परित्यजेत्।
मानवो देवखाताम्भः सकले शौचकर्म्मणि॥*॥
ह्रदः सकीटास्तीर्थानां देवायतनगोदयोः।
नदीदधिनदीदेवखाततीरस्थ मृत्तिकाः॥
मङ्गोलोद्भवाः क्षेत्रकूप्योः सिकताश्च याः।
अन्तर्जला धूलिमिश्रा वल्मीकस्य च कर्दमाः॥
ऊषराश्च हलोत्खाता मृत्तिका भवनस्य च।
अश्वत्थतुलसीघाचीमूलादीनाञ्च या ह्रदः॥
श्मशानभूमेः शैलस्य तथा पूतस्थलस्य च।
शौचावशिष्टमार्गस्थ आखनुखाताच्च मृत्तिकाः॥
यज्ञस्थानस्य विप्राणां साधूनामालयस्य च।
मृत्तिका वर्ज्ययेदेता देवर्षे! शौचकर्म्मणि॥
पवित्रस्थानतो याह्या द्वादशाङ्गुलधोमृदः।
द्विजैः सकलशौचार्थं मृत्करादिविवर्जिताः॥*॥
प्रथमेऽह्नि करैः शौचं कुर्य्यान्मृद्धिरतः परम्।
पुनर्जलैः पुरीषस्य यथा गन्धक्षयो भवेत्॥
मृत्तिका प्रथमा शौचे सार्द्धप्रकृतिसम्मिता।
पूर्णप्रकृतिमात्रा तु द्वितीया सजला तथा॥
तृतीया प्रमिता शौचे सार्द्धप्रकृतिमृत्तिका।
चतुर्थाद्या क्रमादेवमर्द्धप्रकृतिवर्द्धिता॥
यया मृत्तिकया पूर्व्वं विप्रर्षे शौचकारिभिः।
अर्द्धप्रकृतिमात्रा सा मुनिभिः परिकीर्त्तिता॥
गुदे हस्तावनेक्तव्यः पञ्च वा सप्त वा तथा।
ह्रदमेकां तथा शिश्ने तिस्रो वा मृत्तिका ह्रयम्॥

सप्त वामकरे दद्यान्नदक्षिणग्रन्थतुर्दश ।
तिस्रो वा हस्तयोः सप्त चतुर्दश च षोड़श ॥
पाणयोरेका नदं पृष्ठे षड़ा तिस्रश्च नत्तिकाः ।
हस्तद्वयनखेष्वेका तिस्रश्च षड़ नदस्तथा ॥ * ॥
मैथुने रेतःस्खलने मूत्रोत्सर्गे च नदयम् ।
दन्तात्तिस्रश्च स्निग्धैका तिस्रो वामकरे नदः ॥
हस्ते च नदयं कृत्वैतिस्रो वा शुद्धितत्परः ।
पदैकैके द्विजस्तिस्रो गृहीत्वा शौचमाचरेत् ॥
गृहिणो द्विगुणं शौचं यत्नतो ब्रह्मचारिणाम् ।
गृहस्थवानप्रस्थानां प्रोक्तं त्रिगुणमेव च ॥
सन्यासिनां वैणवानां शौचं सेयं चतुर्गुणम् ।
हस्तपाद्दारिपात्रस्तु नद्भिरद्भिश्च गोमयैः ॥
दिवा यद्विहितं शौचं निशायामर्द्धकं भवेत् ।
एतदर्द्धमशौचे तु जातके नृतकेऽपि च ॥
चौरादिबाधिते मार्गे शौचमस्यार्द्धमाचरेत् ।
योषितामेतदर्द्धन्तु शूद्रादीनाञ्च नारद ! ॥
व्याधिभिश्चातुरो मर्त्य आर्त्तो यदि यथाबलम् ।
शौचं कुर्य्यात् ततं यत्र तत् स्थानं शोधयेज्जलैः ॥
वेदस्मृतिपुराणानि धर्म्मशास्त्राणि नैत्यिकम् ।
नैत्रादिकर्म्म यः कुर्य्याद्विहाय मन्दधीर्द्विजः ॥
प्रतिप्रज्ञानमायुश्च प्रज्ञां हन्ति यशः श्रियम् ।
बलमाचारहीनस्य सदा तस्यापवित्रता ॥ * ॥
सावत्ताश्चेद्विजा भूपा वैश्यशूद्रान्त्यजाः स्त्रियः ।
कुर्व्वन्ति शौचं यत्नेन यावच्चेदापवित्रता ॥
येषां ज्ञानस्य मननं तथा नामप्रजल्पनम् ।
सदैव स्मरणं भागवतानां साधुसेवनम् ॥
भक्तिप्रधौतमनसां गोविन्दार्पितकर्म्मणाम् ।
बाह्याभ्यन्तरशुद्धानां शुचिना तद्दर्शनम् ॥
नृद्गोमयजलैः शौचमनैकैः क्रियते यदि ।
मनोऽपवित्रता यस्य कदाचिद्वै न शुध्यति ॥
गोविन्दस्मरता नास्ति यस्य लोकस्य जल्पनि ।
सोऽपि देहाशुचिः ज्ञात्वा शौचं मैत्रादिकर्म्मसु ॥
मृतधा यदि देवर्षे शौचं कुर्य्यात् सहस्रधा ।
नृद्दारिगोमयैर्लोको भावदुष्टो न शुध्यति ॥
सदा चित्तापवित्रत्वमकार्य्यो भुवि यो नरः ।
तस्य तु स्यान्न मैत्रादिशौचेनैव स शुध्यति ॥
पर्व्वताकारकूटेषु गोविट्सर्व्वमरीजलैः ।
शौचं ज्ञात्वा न शुध्येत दुश्चित्तो भवेद्यदि ॥"
इति पाद्मोत्तरखण्डे १०६ अध्यायः ॥
(उदकम् । इति निघण्टुः । १ । १२ ॥ "पूर्य्यति जगत् प्रलयकाले पूर्य्यते अनेन तड़ागादि पालकं वा जगत् पूरयोत्पत्तिहेतुत्वात् । पृणातेर्वा बाहुलकात् कीषन्प्रत्ययः ईकारस्योकारादेशः स च पकारात् परो द्रष्टव्यः ।" इति तच्च देवराजयज्वा ॥ यथा,ऋग्वेदे । १ । १६३ । १ ।
"यदक्रन्दः प्रथमं जायमान
उद्यन्त्समुद्रादुत वा पुरीषात् ॥"
"पुरीषात् सर्व्वकामानां पूरकादुदकात् ॥"
इति तद्भाष्ये सायणः ॥)

पुरीषजः, पुं, (पुर्य्यां देहात् द्रव्यते त्यज्यते इति । पुरी + द्रव + कर्म्मणि क्विप् ।) पुरीषम् । इति त्रिकाण्डशेषः ॥

पुरीषमः, पुं, (पुरीषं मिमीते इति । मा + कः ।) माषः । इति त्रिकाण्डशेषः ॥

पुरुः, पुं, (पिपर्त्ति पूर्य्यते वेति । पॄ + "पॄभिदि-व्यधिगृधिधृषिक्षिपेः कुः ।" उणा० १ । २४ । इति कुः । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् । "उरण्रपरः ।" १ । १ । ५१ । इति रपरत्वम् ।) देवलोकः । नृपभेदः । स च ययातेः कनिष्ठपुत्रः । (आनूदोऽपि पाठः ।) परागः । इति मेदिनी । रे, ५८ ॥ दैत्यः । इत्यु-णादिकोषः ॥ नदीभेदे, त्रि । इति शब्दरत्नावली ॥ (राजविशेषः । यथा, महाभारते । २ । ४ । २७ ।
"सुकर्म्मा चेकितानश्च पुरुश्चामित्रकर्षणः ॥"
चाक्षुषमनोः पुत्रभेदः । यथा,मार्कण्डेये । ७६ । ५५ ।
"उरुपुरुशतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
पर्व्वतभेदः । यथा, महाभारते । ३ । ८० । २२ ।
"पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः ।
भृगुर्यत्र तपस्तेपे महर्षिगणसेवितः ॥"
शरीरम् । यथा, शुक्ररहस्ये । १२ अध्याये ।
"पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं यत्नयेन प्रयुज्यते ॥")
प्रचुरे, त्रि । इत्यमरः । ३ । १ । ६३ ॥ (यथा, मेघदूते । १६ । ५ ।
"स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोल्बणः
पुरुसितगरुच्छच्छद्मच्छटस्फुटचुम्बितः ॥")

पुरुकुत्सवः, पुं, इन्द्रारिपुविशेषः । यथा,—
"इन्द्रो विपक्षिद्देवानां तद्रिपुः पुरुकुत्सवः ।
जघान हस्तिरूपेण भगवान्मधुसूदनः ॥"
इति गारुड़े ८७ अध्यायः ॥

पुरुदंशकः, पुं, (पुरु बहुलं यथा स्यात्तथा दशतीति । दृनृग् + खुल् ।) हंसः । इति त्रिकाण्डशेषः ॥

पुरुदंशाः, [स्] पुं, (पुरुं दैत्यविशेषं दशति छिनत्तीति । दृनृग् + असुन् ।) इन्द्रः । इति जटाधरः ॥

पुरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर + "पुरः कुषन् ।" उणा० ४ । ७४ । इति कुषन् ।) पिपर्त्ति पूरयति बलं यः पुरुं शेते य इति वा । पुमान् । (यथा, मनौ । १ । ३२ ।
"द्विधा कृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥")
तत्पर्य्यायः । पूरुषः २ नृ ३ नरः ४ पञ्चजनः ५ पुमान् ६ अर्थाश्रयः ७ अधिकारी ८ कर्म्मार्हः ९ जनः १० अथर्वान् ११ । इति राजनिर्घण्टः ॥ मनुष्यः १२ मानवः १३ मर्त्यः १४ मानुषः १५ मनुः १६ । इति शब्दरत्नावली ॥ रसिकराजः १७ घनकामधामा १८ मदनशायकाङ्कः १९ मन्मथशायकलक्ष्यः २० । इति कविकल्पलता ॥ स चतुर्विधः । यथा,—
"शुक्लो रक्तो हरिश्चान्यो नृणां जातिचतुष्टयम् ॥"
शुक्लादीनां लक्षणं यथा,—
"मृदुवचनसुशीलः कोमलाङ्गः सुकेशः
सकलगुणनिधानः सत्यवादी शुचिोऽयम् ॥१॥
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
श्चपलमतिरतुच्छः शीघ्रवेगो नगोऽयम् ॥२॥
बहुगुणबहुबन्धुः शीघ्रकामो नताङ्गः
सकलरुचिरदेहः सत्यवादी हयोऽयम् ॥३॥
उदरकटिलग्नः स्वादुरक्तश्चाधरौष्ठो
दशनवदनगन्धस्त्रोत्तरीयौ हि बाजी ॥"४॥
इति रतिमञ्जरी ॥ * ॥
तस्य पञ्चलक्षणत्वं यथा,—
"पात्रे त्यागी गुणे रागी भोगी परिजने सदा ।
शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः ॥"
इति प्राचीनाः ॥
जितेन्द्रियस्य पुरुषत्वं यथा,—
"सा श्रीर्यां न मदं कुर्य्यात् स सुखी हृष्यतो
ऽभितः ।
तच्चित्तं यत्र विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुड़े १६ अध्यायः ॥ * ॥
(अस्य लक्षणादिकं यथा,—
"उन्नासमानगतिसंहतिसारवर्ण-
स्नेहस्वरप्रकृतिसत्त्वमनृक्षमादौ ।
शौचं नखाश्च विधिवत् कुशलोऽवलोक्य
सामुद्रविद्वदति यातमनागतञ्च ॥
अक्षेदनौ नृदुतलौ कमलोदराभौ
स्निग्धाङ्गुली रुचिरताम्रनखौ सुपार्ष्णी ।
उष्णौ स्निराविरहितौ सुनिगूढगुल्फौ
कूर्म्मोन्नतौ च चरणौ मनुजेश्वरस्य ॥
शूर्पाकारविरूक्षपार्ष्णिरनखौ वक्रौ स्निरासन्ततौ
संशुष्कौ विरलाङ्गुलौ च चरणौ दारिद्र्यदुःख-
प्रदौ ।
मार्गार्योत्कठकौ कषायसदृशौ वंशस्य विच्छि-
त्तिदौ
ब्रह्मघ्नौ परिपक्वनृदुतिलौ पीतावगम्यारतौ ॥
प्रविरलतनुरोमवृत्तजङ्घा
द्विरदकरप्रतिमैर्वरोरुभिश्च ।
उपचितसमजानवश्च भूपा
धनरहिता: श्वसृगालतुल्यजङ्घाः ॥
रोमैकैकं कूपके यार्धिवानां
द्वे द्वे ज्ञेये पण्डितश्रोत्रियाणाम् ।
व्याघ्रोर्णिःस्वा मानवा दुःखभाजः
केशाश्चैवं निन्दिता: पूजिताश्च ॥
निर्मांसजानुर्व्रियते प्रवासे
सौभाग्यमल्पैर्विकटैरेरिद्राः ।
स्त्रीनिर्जिताश्चापि भवन्ति निस्वे
राज्यं समासेद्य मघक्षिरायुः ॥
लिङ्गेऽल्पे धनवानपत्यरहितः स्यात् स्थूले विहीनो धने-
र्मेढ्रे वामनते सुतार्थरहितो वक्रेऽथवा पुत्र-
वान् ।
दारिद्र्यं विनते लघोऽथ तनयो लिङ्गे शिरास-
न्तते ।
स्यूलग्रन्थियुते सुखी नृदु करोत्यल्पं प्रमेहा-
दिभिः ॥

कोशनिगूढैर्भूपा दीर्घैर्भवेच्च वित्तपरिहीणाः। अल्पतृणशीपसो लघुशिरालशिराश्च धनवन्तः॥ जलमल्पमेकदृषदो विषमैः स्त्रीचञ्चलः समैः क्षितिपः।

दृक्ताम्रगुरोहृद्यैः प्रलम्बदृषणस्य मृतमायुः॥ रक्तैराढ्या मणिभिर्निर्द्रव्याः पाण्डुरैश्च मलिनैश्च। सुस्निग्धः सगुल्मसूत्रा निःस्वा निःगुल्मधाराश्च॥ त्रिचतुर्धाराभिः प्रदक्षिणावर्तवलितलूनाभिः। पृथ्वीपतयो नेया विकीर्णलूनाश्च धनहीनाः॥ एकैव लूनधारा वलिता रूपप्रधानसुतदात्री। स्निग्धोन्नतसममणयो धनवनितारत्नभोक्तारः॥ मणिभिश्च मध्यनिम्नैः कन्यापितरो भवन्ति निःस्वाश्च।

बहुपशुभाजो मध्योन्नतेश्च नाभुलवर्णैर्धनिनः॥ परिशुष्कवल्लिपीथैर्धनरहिता दुर्भगाश्च विज्ञेयाः।

कुसुमसमगन्धसुक्ता विज्ञातथा मर्त्यपालाः॥ मधुगन्धे बहुवित्ता मत्स्यसगन्धे बहून्यपत्यानि। तनुसुक्तः स्त्रीजनको मांसगन्धो महाभोगी॥ मदिरागन्धे यज्वा क्षारसगन्धे च रेतसि दरिद्रः। प्रौढं मैथुनगामी दीर्घायुरनोऽन्यथाल्पायुः॥ निःस्नेहातिस्थूलस्फिक् समांसलस्फिक् सुखान्वितो भवति। यात्रान्तोऽर्धस्फिग्लङ्कस्फिग्नराधिपतिः॥ सिंहकटिर्मनुजेन्द्रः कपिकरभकटिर्धनैः परित्यक्तः।

समजठरा भोगयुता घटपिठरनिभोदरा निःस्वाः॥ अविकलपार्श्वा धनिनो निर्मैर्वक्रैश्च भोगसन्त्यक्ताः। समकुक्षा भोगाढ्या निम्नाभिर्भोगपरिहीनाः॥ उन्नतकुक्षाः क्षितिपाः कुटिलाः क्ष्मानिवा विषमकुक्षाः। सर्पोदरा दरिद्रा भवन्ति वक्राग्निनश्चैव॥ परिमण्डलोन्नताभिर्विलीर्णाभिश्च नाभिभिः सुस्निग्धः। स्वल्पा त्वङ्मलिम्ना नाभिः क्लेशावहा भवति॥ वलिमध्यगता विषमा मूलावाधं करोति नैःस्व्याच्च।

ग्राह्यं वामावर्त्ता करोति मेधां प्रदक्षिणगतः॥ पार्श्वायता चिरायुषमुपरिष्टाज्जेश्वरं गवाढ्यमधः।

गूढपत्रकर्णिकाभा नाभिर्मनुजेश्वरं कुरुते॥ ग्रन्थान्तं स्त्रीभोगिनमाचार्यं बहुसुतं यथासङ्ख्यम्।

एकद्वित्रिचतुर्भिर्वलिभिर्विद्यात्क्रमं त्वचलिम्नः॥ विषमवलयो मनुष्या भवन्त्यगम्याभिगामिनः पापाः।

ऋजुवलयः सुखभाजः परदारद्वेषिणश्चैव॥ मांसलदृढभिः पार्श्वैः प्रदक्षिणावर्तरोमभिर्भूपाः। विपरीतैर्निर्द्रव्याः सुखपरिहीनाः परप्रेष्याः॥

सुभगा भवन्त्यनुद्गतचूचुका निर्धना विषमदीर्घैः। पीनोपचितनिमग्नैः क्षितिपतयश्चूचुकैः सुखिनः॥ हृदयं वसुसततं पृथु न वेपनं मांसलं च कृपणानाम्। अधमानां विपरीतं खररोमचितं शिरालञ्च॥ समवक्षसोऽर्थवन्तः पीनैः सूराक्षकिञ्चनाक्षतुभिः। विषमं वक्षो येषां ते निःस्वाः शुष्कनिधनाश्च॥ विषमैर्विषमो जनुभिरर्थविहीनोऽस्थिसन्धिपरिगूढैः। उन्नतजत्रुभागी निर्व्रणैर्निःस्वोऽर्थवान् पीनैः॥ पिचिटग्रीवो निःस्वः शुष्का सशिरा च यस्य वा ग्रीवा।

मद्विषयीवः शूरः ग्राह्यास्यो वृषसमग्रीवः॥ कम्बुग्रीवो राजा प्रलम्बकक्षः प्रभक्षणो भवति। पृष्ठमभयमरोमशुभमर्थवतामशुभदमतोऽन्यत्॥ अखेदनपीनोन्नतसुगन्धिसमरोमसकुलाः कक्षाः।

विज्ञातया धनिनामसोऽन्यथार्थैर्विहीनानाम्॥ निर्मांसौ रोमचितौ भग्नावंसौ च निर्धनस्यांसौ। विपुलावनुच्छ्रितौ सुश्लिष्टौ सौख्यवीर्यवताम्॥ करिकरसदृशौ वृत्तावाजान्ववलम्बिनौ समौ पीनौ।

बाहू पृथिवीशानामधमानां रोमशौ दुःखौ॥ हस्ताङ्गुलयो दीर्घाश्चिरायुषामवलिताश्च सुभगानाम्।

मेधाविनाश्च हस्वाङ्गुलिपिटाः परकर्मनिरतानाम्॥ स्थूलाभिर्धनरहिता बहिर्गताभिश्च ग्रन्थिनिर्याताः। कपिसदृशकरा धनिनो व्याघ्रोपमपाणयः पापाः॥ मणिबन्धनैर्निगूढैर्दृढैश्च सुश्लिष्टसन्धिभिर्भूपाः। हीनैर्हस्वच्छेदैः ग्रन्थैः सगुल्दैश्च निर्द्रव्याः॥ पिष्टविहीना विहीना भवन्ति निम्नेन करतलेन नराः।

संहतनिर्व्रणधनिनः प्रोत्तानकराश्च दातारः॥ विषमैर्विषमा निःस्वाश्च करतलैरीश्वरास्तु लाजाभैः। पीतैरगम्यवनिताभिगामिनो निर्धना रूक्षैः॥ तुषसदृशनखाः क्लीवाश्चिपिटैः स्फुटितैश्च वित्तसन्त्यक्ताः।

कनकविवर्णैः परतर्कुकाश्च ताम्रैश्च भूपतयः॥ अक्षुण्णयवैराढ्याः सुतवन्तोऽक्षुण्णमूलगैश्च यवैः। दीर्घाङ्गुलिपर्वाणः सुभगा दीर्घायुषश्चैव॥ स्निग्धा निम्ना रेखा धनिनां तद्विपर्ययेण निःस्वानाम्। विरलाङ्गुलयो निःस्वा धनसञ्चयिनो घनाङ्गुलयः॥ तिस्रो रेखा मणिबन्धनोत्थिताः करतलोपगा नृपतेः।

मीनयुगाङ्कितपाणिर्निःस्वं सञ्जनयति भवति॥ वज्राकारा धनिनां विद्याभाजान्तु मीनपुच्छनिभाः।

शुक्लातपत्रशिखिविकागजाश्वपद्मोपमा नृपतेः॥ कलशध्वजालपताकाङ्कुशोपमाभिर्भवन्ति निधिपालाः।

दामनिभाभिश्चाढ्याः खड्गिकरूपाभिरैश्वर्यम्॥ चक्रासिपरशुतोमरशक्तिधनुःकुन्तसन्निभा रेखाः।

कुर्वन्ति चक्रनाथं यज्वानमुलूखलाकाराः॥ मकरध्वजकोष्ठागारसन्निभाभिर्महाधनीपेताः। वेदीनिभेन चैवाग्निहोत्रिणो ब्रह्मसौख्येन॥ वापीदेवकुलाट्टैर्धर्मं कुर्वन्ति च त्रिकोणाभिः।

अक्षुण्णमूलरेखाः पुत्राः स्युर्दारिकाः क्षुण्णाः॥ रेखाः प्रदेशिनीगाः घृतायुषां कथनीयसमाभिः।

छिन्नाभिर्द्रमपतनं बहुरेखारेखिणो निःस्वाः॥ क्षतिक्षयदीर्घैश्चिबुकैर्निर्द्रव्या मांसलैर्धनोपेताः। बिम्बोपमैरवक्रैरधरैर्भूपालनुभिरस्राः॥ ओष्ठैः स्फुटितविखण्डितविवर्णरूक्षैश्च धनपरित्यक्ताः।

स्निग्धा घनाश्च दशनाः सुतीक्ष्णदंष्ट्राः समाश्च शुभाः॥ जिह्वा रक्ता दीर्घा श्लक्ष्णा सुसमा च भोगिनां ज्ञेया।

श्वेता क्षाम्या परमा निर्द्रव्यार्यां तथा तालु॥ वक्त्रं सौम्यं संवृतममलं श्लक्ष्णं समञ्च भूपानाम्। विपरीतं क्लेशभुजां महासुखं दुर्भगानाञ्च॥ स्त्रीसुखमनपत्यानां ग्राम्यवतां मङ्गलं परिज्ञेयम्।

दीर्घे निर्द्रव्याणां भोगसुखाः पावकर्माणः॥ चतुरस्रं घृतानां निम्नं वक्त्रञ्च तनयरहितानाम्।

कृपणानामतिदुःखं सम्पूर्णं भोगिनां कान्तम्॥ अस्फुटितायं स्निग्धं घनमुन्नतं शुभं दृढं च सन्नतञ्चैव।

रक्तैः परप्रेष्यौराः क्षतभुजिरल्पैश्च वित्तेयाः॥ निर्मांसैः कर्णैः पापप्रत्यवसर्पटैः सुदुःखभोगाः। लम्बाश्च कृष्णकर्णाः ग्रन्थ्यवताश्च भूपतयः॥ रोमशकर्णा दीर्घायुषस्तु धनभागिनो विपुलकर्णाः।

क्रूराः शिरावनद्धैर्व्यालम्बैर्मांसलैः सुस्निग्धः॥ भोगी त्वविभक्तगण्डो मन्त्री सम्पूर्णमांसगण्डो यः। सुखभाक् सुकसमनासश्चिरजीवी शुष्कनासश्च॥ छिन्नानुरूपयागन्यगामिनो दीर्घया तु सौभाग्यम्।

आकुञ्चितया चौरः क्षीणत्वं स्यात्पिटनासः॥ धनिनोऽग्रवक्रनासा दक्षिणवक्राः प्रभक्षणाः क्रूराः।

ऋज्वी स्वल्पच्छिद्रा सुपुटा नासा सभाग्यानाम्॥

पुरुषः

धनिनां सुतं सदृढं त्रिपिपिक्षितं क्रादि सान-
नाद्यच ।
दीर्घायुषां प्रसुप्तं विज्ञेयं संहननचैव ॥
पद्मदलाभैर्धनिनो रक्तान्तविलोचनाः स्त्रियो-
भाजः ।
मधुपिङ्गलैर्मेधाविनो मार्जारविलोचनाः पापाः ॥
हरिद्याच्छा मद्यलालोचनाश्च जिह्मेक्ष लोचने-
क्षौराः ।
क्रूराः केकरनेत्रा गजसदृग्रुद्धग्रुश्च भूपतयः ॥
ऐश्वर्यं गम्भीरैर्नीलोत्पलकान्तिभिश्च विद्वांसः ।
अतिताम्रतारकाणामल्पात्सुत्पाटनं भवति ॥
मन्त्रित्वं स्थूलदृशां श्यावाच्छाच्छाच्च भवति
सौभाग्यम् ।
हीना हरिःस्वानां स्निग्धा विपुलार्थभोगव-
ताम् ॥
अभ्युन्नताभिरल्पायुषो विद्यालोहिताभिरति-
सुखिनः ।
विषमभ्रुवो हरिद्रा बालेन्दुनतभ्रुवः सधनाः ॥
दीर्घासंसक्ताभिर्धनिनः खड्गाभिरर्थपरिहीनाः ।
मध्यविनतभ्रुवो ये ते सक्ताः स्त्रीष्वगम्यासु ॥
उन्नतविपुलैः ग्रुद्धैर्धन्या निम्नैः सुतार्थसन्यक्ताः ।
विषमललाटा विधना धनवन्तोऽर्धेन्दुसदृशेन ॥
मुक्तिविद्यालेराचार्य्यता शिरासन्ततेरधर्म्म-
रताः ।
उन्नतशिराभिराढ्याः स्वस्तिकवत्संस्थिताभिश्च ॥
निम्नललाटा वधबन्धभागिनः क्रूरकर्म्मनिर-
ताश्च ।
अभ्युन्नतेश्च भूपाः क्षपणाः स्युः सङ्कटललाटाः ॥
खण्डितमदीनमनसु स्निग्धश्च शुभावहं मनुष्या-
णाम् ।
रूक्षं हीनं प्रचुरास्रु चैव न शुभप्रदं पुंसाम् ॥
हसितं शुभदृगकस्मं सनिमीलितलोचनच
पापस्य ।
हृदस्य हसितमसकृत् सोष्मादस्यासकृत्प्राप्ते ॥
तिस्रो रेखाः ग्रुतजीविनां ललाटायताः स्थिता
यदि ताः ।
शतहृदभिरवनीग्रुखं गतिश्चायुः सपत्नाब्दा ॥
विच्छिन्नाभिश्चागम्यगामिनो गतिरप्यरेखेव ।
केशान्तोपगताभी रेखाभिरग्रीतिवर्षायुः ॥
पञ्चभिरायुः सप्ततिरेकायावस्थिताभिरपि यदि ताः ।
बहुरेखेव ग्रुतार्थं चत्वारिंश्च वक्राभिः ॥
त्रिंग्रद्भुजमाभिर्विंग्रतिरेखेव वामवक्राभिः ।
क्षुद्राभिः खल्वायुर्न्यूनाभिश्चान्तरे कल्प्याम् ॥
परिमण्डलैर्गवाढ्याश्चक्राकारैः शिरोभिरव-
नीग्राः ।
चिपिटैः पिटमाटन्ना करोटिशिरसां चिरा-
युषः ॥
घटग्रीवा ध्यानरुचिर्दिग्मलकः पापसङ्गनैस्यक्ताः ।
निम्नशिरो मन्दानां बहुनिम्नमनर्थदं भवति ॥
एकैकभवैः स्निग्धैः क्षणैराकुञ्चितैरभिन्नाग्रैः ।
हृदुभिर्न चातिबहुभिः केशैः सुखभाग् नरश्रेष्ठो
वा ॥

पुरुषः

बहुनखलविषमकपिलाः स्थूलरुटिताग्रपर्व-
रुक्षाश्च ।
अतिकुटिलाश्चातिघनाश्च मूर्धजा वित्तहीना-
नाम् ॥
यद्यन्नात्रं रूक्षं मांसविहीनं शिरावनद्धच ।
तत्तदनिष्टं प्रोक्तं विपरीतमतः शुभं सर्वम् ॥
स्निग्धः विपुलो गम्भीरस्त्रिस्त्रेव षड्नतश्चतुर्रुन्नः ।
पञ्चसु रक्तो राजा पञ्चसु दीर्घश्च रुक्षश्च ॥
नाभिः स्वरः सत्त्वमिति प्रदिष्टं
गम्भीरमेतत्त्रितयं नराणाम् ।
उरो ललाटं वदनञ्च पुंसां
विस्तीर्णमेतत्त्रितयं प्रशस्तम् ॥
वक्षोऽथ कक्षा नखनासिकास्यं
ह्रस्वानि पञ्च चेति षड्नतानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठं
ग्रीवा च जङ्घे च हितप्रदानि ॥
नेत्रान्तपादकरताल्वधरोष्ठजिह्वा
रक्ता नखाश्च खलु सप्त सुखावहानि ।
रूक्षाणि पञ्च दशनाङ्गुलिपर्वकेशाः
साकं त्वचा करुहाश्च न दुःखितानाम् ॥
हनुलोचनबाहुनासिकाः
स्तनयोरन्तरमञ्च पञ्चमम् ।
इति दीर्घमिदं तु पञ्चकं
न भवत्येव नृणामभूभृताम् ॥
इति क्षेत्रम् ॥
छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तैजोगुणान् वहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥
स्निग्धद्विजत्वड्मुखरोमकेश-
छाया सुगन्धा च महीसमत्वा ।
तुष्ट्यर्थलाभाभ्युदयान् करोति
धर्म्मस्य चाहन्यहनि प्रवृत्तिम् ॥
स्निग्धा सिताच्छहरिता नयनाभिरामा
सौभाग्यमार्दवसुखाभ्युदयान् करोति ।
सर्व्वार्थसिद्धिजननी जननीव चाया
छाया फलं तनुभृतां शुभमादधाति ॥
चक्षाधृष्या पद्मदलेमायिवर्णा
युक्ता तेजोविक्रमैः सप्रतापैः ।
आमेयीनि प्राणिनां स्याच्छ्रियाय
क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥
मलिनपरुषरुक्षा पापगन्धानिलोत्था
जनयति वधबन्धव्याधनर्थार्थनाग्र्यान् ।
स्फटिकसदृशरूपा भाग्ययुक्तात्मुदारा
निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥
छायाः क्रमेण कुजलागन्यनिलाम्बरोत्थाः
केचिद्दन्ति दृग्र ताश्च यथानुपूर्व्या ।
सूर्य्याजनाभपुरुहूतयमोडुपानां
तुल्यास्तु लक्षणफलैरिति तत्त्वमासः ॥
इति छाया ॥
करिवृषरथौघभेरीस्वस्तिकाब्धिनिःस्वना
भूपाः ।

पुरुषः

गर्दभजर्जरकच्छपराज्ञ धनसौख्यसत्यक्ताः ॥
इति स्वरः ॥
सप्त भवन्ति च सारा मेदोमज्जास्थिशुक्राणि ।
रुधिरं मांसं चेति प्राज्ञैस्तत्त्वमासफलम् ॥
ताम्रोष्ठदन्तपालीजिह्वानेत्रान्तपाण्युकरचरणैः ।
रक्तेषु रक्तसारा बहुसत्त्वधनितार्थपुत्रयुताः ॥
स्निग्धत्वक्का धनिनो बहुभिः सुभगा विख्या-
ताश्चारुभिः ।
मज्जासारः सारा सुगुरोरीशाः पुत्रवित्तयुक्ताः ॥
स्थूलास्थिरस्थिसारो बलवान् विद्वान्नगः सुरू-
पश्च ।
बहुगुरुशुक्राः सुभगा विद्वांसो क्रूरवक्त्राश्च ॥
उपचितदेहो विद्वान् धनी सुरूपश्च मांस-
सारी यः ।
इति सारः ॥
सङ्घात इति च सुश्लिष्टसन्धिता सुखसुजो ज्ञेया ॥
इति संहतिः ॥
स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वादन्तनेत्रनखसंस्थः ।
सुतधनसौभाग्ययुताः स्निग्धैस्तैर्धनिना रूक्षैः ॥
इति स्नेहः ॥
द्युतिमान्मर्त्यः स्निग्धः क्षितिपानां मध्यमः सुतार्थ-
वताम् ।
रूक्षो धनहीनानां मुह्यः सुभटो न सङ्गीर्यः ॥
इति वर्णः ॥
साध्यमनूकं वक्त्राग्नोष्ठग्राहूलसिंहगरुडसुखाः ।
अप्रतिहतप्रतापा जितरिपवो मानवेन्द्राश्च ॥
वायसमक्षिवराहाजतुल्यवदनाः सुतार्थसुख-
भाजः ।
गर्दभकरभप्रतिमैर्मुखैः शरीरैश्च निःस्वसुखाः ॥
इत्यनूकम् ॥
अष्टशतं वपयतिः परिमाणं चतुरश्रीरिति
पुंसाम् ।
उत्तमसमहीनानामङ्गुलसङ्ख्याप्रमाणेन ॥
इत्युन्मानम् ॥
भाराधंतनुः सुखभाक् तुलितोऽतो दुःखभाग्
भवत्यूनः ।
भारोऽतीवाढ्यानामध्यर्धः सर्व्वधरणीग्रः ॥
विंग्रतिवर्षा नारी पुरुषः खलु पञ्चविंग्रतिभि-
रब्दैः ।
अर्हति मानोन्मानं जीवितभागे चतुर्थे वा ॥
इति मानम् ॥
भूजलधिस्थनिलाम्बर-
सुरगरुरुचःपिशाचरक्षांसि ।
सत्त्वेन भवति पुरुषो
लक्षणमेतद्बलवतां ॥
महीसभावः शुभपुण्यगन्धः
सभोगवान् सुश्वसनः स्थिरश्च ।
तोयस्वभावो बहुतोयपायी
प्रियाभिकामी रसभोजनश्च ॥
अग्निप्रकाशा चपलोऽतितीक्ष्ण-
वक्त्रः क्षुधालुर्बहुभोजनश्च ।

वायोः स्वभावेन चलः स्वयञ्च
क्षिप्रं च कोपस्य वशं प्रयाति ॥
स्वप्रज्ञतिर्निपुणो विदूतास्त्रः
शूरश्चतेः कुशलः सुधिराङ्गः ।
त्यागयुतो पुरुषो रुदुकोपः
स्नेहरतश्च भवेत्पुरुषज्ञः ॥
मत्सैस्वसंयुतो गौतभूषणप्रियः ।
संविभागशीलवान्नित्यमेव मानवः ॥
तीक्ष्णप्रकोपः क्षणचेष्टितश्च
पापश्च सत्त्वेन निशाचराणाम् ।
पिशाचसत्त्वप्रभवो मलाक्तो
बहुप्रलापी च सदुःखभाङ्गः ॥
भीरुः क्षुधालुर्बहुभुक्त्व ज्ञ ज्ञः खरः
क्षीणः स सत्त्वेन नरक्षिरस्थाम् ।
एवं नराणां प्रकृतिः प्रदिष्टा
यज्ञत्वयज्ञाः प्रवदन्ति सत्त्वम् ॥

इति प्रकृतिः ॥

ग्राहूनहंसवसमद्विपगोपतीनां
तुल्या भवन्ति गतिभिः शिखिनाश्च भूपाः ।
येषाञ्च शब्दरहितं क्षितिमण्डलञ्च यातं
सेऽपीश्वरा हतपरिभ्रमणा दरिद्राः ॥

इति गतिः ॥

आत्मस्थ यानमग्रञ्च बुभुक्षितस्य
पात्रं लभापरिमितस्य भवेत्तु रक्षा ।
एतानि यस्य पुरुषस्य भवन्ति काले
धन्यं वदन्ति खलु तं नरलक्षणज्ञाः ॥
पुरुषलक्षणमुक्तमिदं मया
मुनिमतान्यवलोक्य समासतः ।
इदमधीत्य नरो नृपवल्लभो
भवति सर्व्वजनस्य च वल्लभः ॥"

इति श्रीवराहमिहिरकृतौ बृहत्संहितायां पुरुषलक्षणं नामाष्टषष्टितमोऽध्यायः ॥ * ॥)

लक्षणभक्तपुरुषस्य गोविन्दपदाश्रयत्वं यथा,—
"स्त्रियो वा पुरुषो वापि क्लाततायी नपुंसकः ।
भक्तस्ते गदनीयश्चेद्गोविन्दपदमाश्रयेत् ॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः ॥

पुरुषाणां मध्ये गुरवो यथा,—
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्याश्रयः श्रेष्ठास्त्रीणां माता सुपूजिता ॥
यो भावयति या स्तौति येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥"

इति कौर्म्मे उपविभागे ११ अध्यायः ॥

आत्मा । इत्यमरः । ३ । ३ । २१८ ॥ (यथा, भागवते । ७ । १४ । ३७ ।
"पुराणेनेन रूपेण पृथिव्यप्तिदेवताः ।
पीते जीवेन रूपेण पुरुषो ह्यसौ ॥"
यथा च शङ्करविजये १३ अध्याये ।
"पुरुषसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः ।
शकारस्य षकारोऽयं आद्ययेन प्रयुज्यते ॥")

साङ्गातत्त्वम् । पुंनागपादपः । इति मेदिनी । ये, ४१ ॥ (तत्पर्य्यायो यथा, वैद्यकरत्नमालायाम् ॥
"कुम्भीकः पुरुषस्तुङ्गः पुन्नागो रक्तकेशरः ॥")

विष्णुः । इति शब्दरत्नावली ॥ (स हि पुराणपुरुष एव । यथा, हरिवंशे । १२८ । २० ।
"एवं पुराणः पुरुषो विष्णुर्वेदेषु पठ्यते ।
अचिन्त्यश्चाप्रमेयश्च गुणैश्चैव परत्वया ॥"
शिवः । यथा, महाभारते । १३ । ८ । १७ ।
"योग्याययोगरूपाय सद्वृत्ते शङ्कराय च ।
चौर्य्याय हरिकेशाय ज्ञानवे पुरुषाय च ॥"
जीवः । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे । ७ । १६ ।
"प्रकृतिः परमित्युक्तं पुरुषोऽपर उच्यते ।
तावुभौ प्रेरयत्यन्यः स परः परमेश्वरः ॥")
दुर्गा । यथा,—
"महदादिति च योगेषु प्रधानत्वेन कथ्यते ।
विगुणा व्यतिरिक्ता सा पुरुषत्वेति चोच्यते ॥"

इति देवीपुराणे ७५ अध्यायः ॥

तस्य पञ्चविंशतितत्त्वात्मकत्वं जडत्वञ्च यथा,—
"एभिः सम्यादितं सूक्ष्मैः पुरुषः पञ्चविंशकः ।
ईश्वरेच्छावशः सोऽपि जडात्मा कथ्यते बुधैः ॥"

इति मात्स्ये तत्त्वकथनाध्यायः ७ अध्यायः ॥

(अन्यस्थानकभेदः । यथा, माघे । ५ । ५६ ।
श्रीकण्ठटीकायां मल्लिनाथधृतवचनम् ।
"पश्चिमेनाम्यपादेन भुवि स्थित्वाग्यपादयोः ।
जङ्घाप्रेरणया स्थानमन्यानं पुरुषः स्मृतः ॥")
मेषमिथुनसिंहतुलाधनुःकुम्भराश्यः । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
स्त्रीजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"

पुरुषग्रहा यथा,—
"भौमार्कजीवाः पुरुषाः क्षीणौ सोमजभार्गवौ ।
स्त्रियौ भार्गवचन्द्रौ द्वौ तत्प्रतित्वात्तथोच्यते ॥"

पुरुषलक्षणानि यथा,—
"दक्षो मूलश्रवणपुनर्व्वसुहस्तत्रयाग्निरेवत्यः ।
गर्भाधानादिकार्य्येषु पुंनामायं गणः शुभदः ॥"

इति ज्योतिस्तत्त्वम् ॥

तद्वैदिकपर्य्यायः । मनुष्याः १ नरः २ धवाः ३ जन्तवः ४ विशः ५ क्षितयः ६ क्षत्त्रियः ७ चर्षणयः ८ मनुषः ९ हरयः १० मर्त्याः ११ मर्त्ताः १२ मर्त्ताः १३ वाताः १४ तुर्व्वशाः १५ हव्यवः १६ आयवः १७ यदवः १८ अनवः १९ पूरवः २० जगतः २१ तस्थुषः २२ पञ्चजनाः २३ विश्वमनाः २४ धृतनाः २५ । इति वेदनिघण्टौ २ अध्यायः ॥

पुरुषकं, क्ली, पुं, (पुरुष एवेति । पुरुष + स्वार्थे कन् ।) षोडशकार्षाण्यर्हस्थितिः । इति त्रिकाण्डशेषः ॥ पोखरा इति हिन्दीभाषा ॥ (यथा, माघे । ५ । ५६ ।
"श्रीकृष्णको पुरुषकोन्नमिताग्रकायः ॥"
"पुरुषकोऽभ्यानं स्थानकभेदः । यदुक्तम्,—
'पश्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः ।
जङ्घाप्रेरणया स्थानमभ्यानं पुरुषः स्मृतः ॥'
पुरुष एव पुरुषकस्तेन पुरुषकेण स्थानके-

नोन्नमित जङ्घावच्छिन्नोऽग्रकायः पूर्व्वकायो यस्य स तथोक्तः ।" इति सर्व्वानन्दायां मल्लिनाथः ॥)
पुरुषकारः, पुं, (पुरुषस्य कारः करणम् ।) पुरुषस्य कृतिः । पौरुषम् । चेष्टा । यथा,—

मनुरुवाच ।

"दैवे पुरुषकारे च किं न्याय्यं ब्रवीहि मे ।
अत्र मे संशयो देव छेत्तुमर्हस्यशेषतः ॥

मत्स्य उवाच ।

स्वमेव कर्म्म दैवाख्यं विद्धि देहान्तरार्जितम् ।
तस्मात् पौरुषमेवेह श्रेष्ठमाहुर्मनीषिणः ॥
प्रतिकूलतया दैवं पौरुषेण विहन्यते ।
मङ्गलाचारयुक्तानां नित्यमुत्थानशीलिनाम् ॥
दैवं पूर्व्वकृतं कर्म्म तत्त्विकं मनुजोत्तम ! ।
पौरुषेण विना तेषां क्वचिदुद्दृश्यते फलम् ॥
कर्म्मणा प्राप्यते लोके राजत्वञ्च तथा फलम् ।
दास्यञ्चैव कर्म्मणा विद्धि तामसस्य तथा फलम् ॥
पौरुषेणाप्यते राजन् ! मार्गितव्यं यतो नरैः ।
दैवमेव विजानन्ति नराः पौरुषवर्জ্জिताः ॥
तस्मात्त्रिकालसंयुक्तं दैवं न सफलं भवेत् ।
पौरुषं दैवदग्धेषु काले फलति पार्थिव ! ॥
दैवं पुरुषकारश्च कालश्च मनुजोत्तम ! ।
त्रयमेतच्छुभस्यैव पण्डितैः स्यात् फलावहम् ॥
क्वचिद्वृष्टिसमायोगादुद्दृश्यन्ते फलद्विषः ।
तासु काले प्रदग्धासु नैवाकाले कथञ्चन ॥
तस्मात् सदैव कर्त्तव्यं सधर्म्मं पौरुषं बुधैः ।
इहत्ते प्राप्नुवन्त्यौह परलोकफलं ध्रुवम् ॥
आलसाः प्राप्नुवन्त्यर्थान्न च दैवपरायणाः ।
तस्मात् सर्व्वप्रयत्नेन पौरुषे यत्नमाचरेत् ॥
त्यजालसान् दैवपरान् मनुष्या-
नुत्थानयुक्तान् पुरुषान् हि लक्ष्मीः ।
अन्विष्य यत्नादुपयाति राजन् !
तस्मात् सदोत्थानवता हि भाव्यम् ॥"

इति मात्स्ये दैवपुरुषकारको नाम १९५ अध्यायः ॥
(यथा च नीतिशास्त्रे ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
पुरुषकुञ्जरः, पुं, (पुरुषेषु कुञ्जरः श्रेष्ठ इति । पुरुषः कुञ्जर इवेत्युपमितसमासो वा ।) पुरुषश्रेष्ठः । यथा, अमरे । ३ । १ । ५६ ।
"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः ॥"
(यथा, रामायणे । २ । १० । ५ ।
"हन्तानार्य्ये ! ममामित्रे ! सकामा भव कैकयि ! ।
हते मयि गते रामे वनं पुरुषकुञ्जरे ॥")
पुरुषचा, य, (द्वितीयासप्तम्यर्थदृत्तेः पुरुषशब्दात् "देवमनुष्यपुरुषपुरुमर्त्तेभ्यो द्वितीयासप्तम्योर्बहुलम् ।" ५ । ४ । ५६ । इति चा ।) पुरुषम् । पुरुषौ । पुरुषान् । पुरुषे । पुरुषयोः । पुरुषेषु ॥ देवादेर्द्वीप्रोक्ताजिनिसञ्ज्ञेयं चात्मप्रत्ययनिष्पन्नम् । देवादिस्तु देवमनुष्यपुरुषपुरुमर्त्तेभ्यश्च इत्यादि । इति मुग्धबोधटीकायां दुर्गादासः । (यथा, ऋग्वेदे । ३ । ३३ । ८ ।

"उकथेषु कारो प्रति नो जुषस्व
मा नो नि कः पुरुषत्रा नमस्ते ॥"
"पुरुषत्रा पुरुषेषु।" इति तद्भाष्ये सायणः ॥)

पुरुषत्वं, क्ली, पुरुषस्य भावः। पुरुषवृत्तिरसाधारणधर्म्मः। पुरुषशब्दात् भावार्थे त्वप्रत्ययः। (यथा, महाभारते। ५। १८६। १६।
"इन्द्रियाणि दशैकं च पुरुषत्वञ्च लक्षणे ॥")
पुंस्त्वञ्च ॥

पुरुषदघ्नः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे दघ्नट्प्रत्ययः। इति व्याकरणम् ॥

पुरुषदन्तिका, स्त्री, (पुरुषस्य दन्त इव आकृतिर्यस्याः। कप्। कापि अत इत्वम्।) मेदा। इति राजनिर्घण्टः ॥ (मेदाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

पुरुषद्वयसः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे द्वयसट्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥

पुरुषदेषी, [न्] त्रि, पुरुषद्वेषशीलः। पुरुषशब्दोपपदाद्विषधातोर्णिन्प्रत्ययनिष्पन्नः। इति व्याकरणम् ॥

पुरुषनागः, पुं, (पुरुषो नाग इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषपुङ्गवः, पुं, (पुरुषः पुङ्गव इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषपुण्डरीकः, पुं, (पुरुषेषु पुण्डरीकः श्रेष्ठ इत्यर्थः। यद्वा, पुरुषः पुण्डरीको व्याघ्र इवेत्युपमितसमासः।) पुरुषव्याघ्रः। नरश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ जिनराजविशेषः। इति हेमचन्द्रः। ३। ३६० ॥

पुरुषमात्रः, त्रि, पुरुषपरिमाणः। पुरुषशब्दात् परिमाणार्थे मात्रट्प्रत्ययः। इति व्याकरणम् ॥ (यथा, तैत्तिरीयसंहितायाम्। ५। २। ५। १।
"पुरुषमात्रेण वि मीमिते यज्ञेन वै पुरुषः सम्मितः ॥")

पुरुषर्षभः, पुं, (पुरुष ऋषभ इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥

पुरुषव्याघ्रः, पुं, (पुरुषो व्याघ्र इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ६। १६। ४३।
"एवमेते पुरुषव्याघ्राः पाञ्चाल्या युद्धनन्दिनः ॥")

पुरुषशार्दूलः, पुं, (पुरुषः शार्दूल इव।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ (यथा, महाभारते। ३। ८१। ६ ॥
"तव च भ्रातरं वीरमप्रमेयं सत्यसाचिनम्।
शक्रस्यार्द्धासनगतं तत्र मे विस्मयो महान्।
आसीत् पुरुषशार्दूल! दृष्ट्वा पार्थं तथागतम् ॥")

पुरुषसिंहः, पुं, (पुरुषः सिंह इव पुरुषेषु सिंहः श्रेष्ठो वा।) पुरुषश्रेष्ठः। इत्यमरः। ३। १। ५६ ॥ जिनराजविशेषः। तत्पर्य्यायः। ग्रीवि २। इति हेमचन्द्रः। ३। ३६० ॥

पुरुषाद्यः, पुं, (पुरुषाणां जिनपुरुषाणामाद्यः प्रथमः।) आदिनाथनामा जिनविशेषः। इति धनञ्जयः ॥ (पुरुषेषु जीवेषु आद्यः प्रथमः। पुरुषाद्यामाद्य इति वा।) विष्णुः ॥

पुरुषाधमः, पुं, (पुरुषेषु अधमोऽतिनिकृष्टः।) निकृष्टनरः। यथा, शान्तिशतके।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥"

पुरुषार्थः, पुं, (पुरुषस्य अर्थः।) पुरुषस्य प्रयोजनम्। स च चतुर्विधः। यथा, अग्निपुराणे।
"धर्म्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः ॥"
(यथा, मनुः। ७। १००।
"एतच्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम् ॥")
मोक्षाभिमते भक्तिः पञ्चमपुरुषार्थः ॥ (पुरुषकारः। यथा, महाभारते। १। १७६। २७।
"दैवं पुरुषकारेण को वाधयितुमर्हति।
दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥")

पुरुषास्थिमाली, [न्] पुं, (पुरुषाणामस्थीनि तेषां माला अस्त्यस्येति। पुरुषास्थिमाला+ब्रीह्यादित्वात् इनिः।) शिवः। इति हेमचन्द्रः। २। २११ ॥

पुरुषोत्तमः, पुं, (पुरुषेषु उत्तमः।) विष्णुः। इत्यमरः। १।१।२१॥ (यथा, रघुः। ३। ३६।
"हरिर्यथैकः पुरुषोत्तमः स्मृतः
महेश्वरस्त्र्यम्बक एव नापरः।
तथा विदुर्म्मां सुनयः प्रजाकृतं
द्वितीयगामी न हि शब्द एष मे ॥"
एतन्निरुक्तिर्यथा, महाभारते। ५। ७०। १०।
"पुराणात् सदनाच्चापि ततोऽसौ पुरुषोत्तमः ॥")
जिनराजविशेषः। तत्पर्य्यायः। सोमभूः २। इति हेमचन्द्रः। ३। ३५८ ॥ पुरुषेषु मध्ये उत्तमः। यथा, धर्म्मपुराणे।
"विशेषसमभावस्य पुरुषस्यागुणस्य च।
अरिमित्रेऽप्युदासीने मनो यस्य समं व्रजेत् ॥
समो धर्म्मः समः स्वर्गः समो हि परमं तपः।
यस्यैवं मानसं नित्यं स नरः पुरुषोत्तमः ॥"
(पुरुषोत्तमो जगन्नाथोऽस्यत्रेति। अण्। उत्कलखण्डैकदेशः। स तु पीठस्थानानामग्र्यतमः। तत्र भगवती विमलारूपेण विराजते। यथा, देवीभागवते। ७। ३०। ६७।
"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥")
ग्रन्थकर्तृविशेषः। स तु प्रयोगरत्नमालाव्याकरणस्य हिरूपैकाक्षरहारावलीकोषाणां अन्येषाञ्च कतिपयग्रन्थानां प्रणेता ॥)

पुरुहूः, त्रि, (पुरुं प्रचुरं हन्ति गच्छतीति। पुरु+हन गतौ+अन्येभ्योऽपीति डः।) प्रचुरम्। इत्यमरः। ३। १। ६३ ॥

पुरुहु, त्रि, (पुरुं प्रचुरं हन्ति गच्छतीति। हन गतौ+बाहुलकात् डुः।) प्रचुरम्। इत्यमरटीकायां स्वामी ॥ (पुरुहूरित्यपि पाठः ॥)

पुरुहूतः, पुं, (पुरु प्रचुरं हूतमाह्वानं यज्ञेषु यस्य। पुरु यथा स्यात्तथा हूयते यज्ञेष्वभिरिति वा। यद्वा, पुरूणि बहूनि हूतानि नामानि यस्य।) इन्द्रः। इत्यमरः। १।१।४४॥ (यथा, महाभारते। १। १२६। २५।
"पुरुहूतादयं जज्ञे कुन्त्यामेव धनञ्जयः ॥")
प्रचुरनामविशिष्टे, त्रि। यथा, भागवते। ८। १। १३।
"स विश्वकायः पुरुहूत ईशः
सत्यः स्वयंज्योतिरजः पुराणः ॥"
स्त्री, भगवती। सा तु पुष्करे पीठस्थाने विराजते। यथा, देवीभागवते। ७। ३०। ५६।
"विन्ध्ये विन्ध्येश्वरी प्राहुः पुरुहूताच्च पुष्करे ॥")

पुरूरवाः [स्] पुं, (पुरु प्रचुरं यथा स्यात्तथा रौतीति। "पर्व्वतश्च पुरुर्नाम यत्र यज्ञे पुरूरवाः।" ३।६०।२२। इति महाभारतोक्तपर्व्वतनाम्नः पुरौ पर्व्वते रौतीति वा। पुरु+रु+"पुरूरवाः।" उणा० ४। २३१। इति असिप्रत्ययेन निपातनात् साधुः।) बुधस्य पुत्रः। स तु चक्रवर्त्तिराजर्षिः। तत्पर्य्यायः। बौधः २ ऐलः ३ उर्व्वशीरमणः ४। इति हेमचन्द्रः ॥ यथा, अग्निपुराणे।
"ततो बुधाश्रमं प्रायादिडा रूपान्विता सती।
बुधेनान्तरमासाद्य मैथुनायोपमन्त्रिता ॥
सोमपुत्रात्तु बुधाद्ब्राह्मणः! तस्या जज्ञे पुरूरवाः।
जनयित्वा ततः सा तं पुनः सुद्युम्नतां गता ॥"
अपि च।
"इलोदरे च यन्निष्टं बुधः पुत्रमजीजनत्।
अश्वमेधशतं साग्रमकरोदृषिः स्वतेजसा ॥
पुरूरवा इति ख्यातः सर्व्वलोकनमस्कृतः।
हिमवच्छिखरे रम्ये आराध्य स जनार्द्दनम्।
लोकैश्वर्य्यमगाद्राजा सप्तद्वीपपतिस्तदा ॥
केशिप्रभृतयो दैत्यास्तस्य भृत्यत्वमागताः।
उर्व्वशी यस्य पत्नीत्वमगात् सद्रूपमोहिता ॥
सप्तद्वीपा वसुमती सप्तोदधिनदीनगा।
धर्म्मेण पालिता तेन सर्व्वलोकहितैषिणा ॥
शामरथ्याहिणो कीर्त्तिः सप्तस्वेकाङ्गवाहिका।
विष्णुप्रसादाद्देवेन्द्रो ददावङ्गासनञ्जदा ॥
धर्म्मार्थकामान्धर्म्मेण समभेदान्व्यपालयत्।
धर्म्मार्थकामास्तं द्रष्टुमाजग्मुः कौतुकात् पुरा ॥"
इति मात्स्ये २४ अध्यायः ॥
(अस्य विशेषविवरणन्तु हरिवंशे २६ अध्याये द्रष्टव्यम् ॥ * ॥) विश्वदेवः। इति जटाधरः ॥ पार्व्वणश्राद्धदेवः। यथा,—
"पुरूरवा माद्रवाश्च पार्व्वणे समुदाहृतौ ॥"
इति आह्निकतत्त्वे हरिवंशः ॥

पुरोगः त्रि, (पुरोऽग्रे गच्छतीति। पुरस्+गम+डः।) अग्रगामी। इत्यमरः। २। ८। ७२ ॥ (यथा, रघुः। ६। ५५।
"व्याघातरेखे सुभुजा भुजाभ्यां
बिभर्त्ति यश्चापभृतां पुरोगः ॥")
प्रधानः। इति हेमचन्द्रः। ६। ७१ ॥

पुरोगतिः, पुं, (पुरोऽग्रे गतिर्गमनमस्य।) कुक्कुरः। इति धरणिः॥ अग्रगे, त्रि॥

पुरोगमः, त्रि, (पुरोऽग्रे गच्छतीति। गम+अच्।) अग्रगामी। इत्यमरः। २। ८। ७२॥ (यथा, महाभारते। ६। २६। १०।
"यं दृष्ट्वा पार्थिवाः सर्व्वे दुर्य्योधनपुरोगमाः।
निवर्त्तिष्यन्ति संत्रस्ताः सिंहं क्षुद्रमृगा यथा॥"
कुक्कुरे, पुं। इति हेमचन्द्रटीका॥)

पुरोगामी, [न्] त्रि, (पुरोऽग्रे गच्छतीति। गम+णिनिः।) अग्रगामी। तत्पर्य्यायः। पुरोगः २ अग्रेसरः ३ प्रस्थः ४ अग्रतःसरः ५ पुरःसरः ६ पुरोगमः ७। इत्यमरः। २।८।७२॥ नायकः ८ प्रग्रसरः ९। इति शब्दरत्नावली॥

पुरोटः, पुं, (पुरोऽटतीति। अट+इन्।) पत्र-भक्षकः। इति त्रिकाण्डशेषः॥ रायभाटि इति भाषा॥ (पुरःसंस्कारः। इति हारावली। २६७॥)

पुरोडाः, [श्] पुं, (पुर आदौ दाश्यते दीयते इति। पुरस्+दाश दाने+क्विप्। निपातनात् दस्य डः।) हविः। इति सुग्धबोधव्याकरणम्॥

पुरोडाश्वः, पुं, (पुरोऽग्रे दाश्यते दीयते इति। दाश+कर्म्मणि घञ्। निपातनात् दस्य डः।) हविर्भेदः। स तु यवचूर्णनिर्म्मितरोटिकाविशेषः। (यथा, मनुः। ६। ११।
"वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः।
पुरोडाशांश्चरूंश्चैव विधिवन्निर्वपेत् पृथक्॥")
पिष्टकचमसौ। हुतशेषः। इति मेदिनी। शे, २८॥ सोमरसः। इति हेमचन्द्रः॥

पुरोडाश्य, त्रि, (पुरोडाशाय हितमिति। पुरोडाश+यत्।) पुरोडाशौयम्। हविर्योग्यम्। पुरोडाशाय हितम्। यथा, भट्टिः। ५। १२।
"आमिक्षौयं दधि क्षीरं पुरोडाश्यं तथौषधम्।
हविर्हेयञ्चवीनञ्च नाश्नुवन्ति राक्षसाः॥"

पुरोऽनुवाक्या, स्त्री, (पुरः उच्चारो यस्याः।) महामेदा। इति रत्नमाला॥

पुरोधाः, [स्] पुं, (पुरोऽग्रे दधाति मङ्गलमिति। पुरस्+धा+"पुरसि च।" उणा० ४। २३०। इति असिः। स च कित्।) पुरोहितः। इत्यमरः। २।८। ५॥ (यथा, रघुः। ३। १८।
"स जातकर्म्मण्यखिले तपस्विना
तपोवनादेत्य पुरोधसा कृते॥")

पुरोभागी, [न्] त्रि, (पुरः पूर्व्वमेव भजते इति। पुरस्+भज+घिनिः।) दोषमात्रदर्शी। इत्यमरः। ३। १। ४६॥ (यथा, राजतरङ्गिण्याम्। ६। ८३।
"कुपितोऽपि स यत्नेन स्ववधोद्यागमोद्यतः।
तेनैवाघात् पुरोभागिवितर्कात्तत्कृपाऽचताम्॥")
अग्रगामी च॥

पुरोहितः, पुं, पुरो हव्याहव्यफलेषु कर्म्मसु धीयते आरोप्यते यः। (यद्वा, पुर आदावेव हितं मङ्गलं यस्मात्।) शान्त्यादिकर्त्ता। तत्पर्य्यायः। पुरोधाः २। इत्यमरः। २। ८। ५॥ धर्म्मकर्म्मादिकारकः ३। इति शब्दरत्नावली॥ तस्य लक्षणं यथा, याज्ञवल्क्ये।
"वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः।
आशीर्व्वादवचोयुक्त एष राजपुरोहितः॥"
तस्य वर्ज्जनीयलक्षणं यथा,—
"काणं श्वित्रमपुत्रं वाग्भिन्नमक्षितेन्द्रियम्।
न दूरं याधितं वापि नृपः कुर्य्यात् पुरोहितम्॥"
इति कालिकापुराणम्॥ *॥
पुरोहिते वर्ज्जनीयानि यथा,—
"पुरोहितो हितो वेदस्तिनिः सत्यवाक् शुचिः।
अक्षरघ्नो विमलाचारः प्रतिकर्त्तापदाक्षुः॥"
इति कविकल्पलता॥
(यथा च।
"दोषागमक्षुज्जलभ्यो रसमन्त्रविचारदौ।
रक्षेतां नृपतिं नित्यं यत्नादैद्यपुरोहितौ॥
ब्रह्मा वेदाङ्गमष्टाङ्गमायुर्व्वेदमभाषत।
पुरोहितमते तस्मादर्त्तस्त्रं भिषगात्मवान्॥"
इति सुश्रुते सूत्रस्थाने चतुस्त्रिंशोऽध्याये॥)

पुर्व्व, पूर्त्तौ। पूर्णीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पचमम्बरी। पूः पुरौ पुरः। पूर्व्वति पयसा कुम्भं चेटी। इति दुर्गादासः॥

पुल, क उच्छ्रायौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) उच्छ्रितिरूपीभावः। क, पोलयति पर्व्वतः। इति दुर्गादासः॥

पुल, ञ महत्त्वे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ञ, पोलः पुलः। पोलति। इति दुर्गादासः॥

पुल, ग्र महत्त्वे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-अक०-सेट्।) ग्र, पुलति पुलिनं शरदि महत् स्यादित्यर्थः। पोलिता। इति दुर्गादासः॥

पुलः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+कः।) पुलकः। विपुले, त्रि। इति मेदिनी। ले, २३॥

पुलकं, क्ली, (पुलतीति। पुल+कः। ततः संज्ञायां कन्।) कङ्कुष्ठम्। तच्च पर्व्वतीयमृत्तिकाविशेषः। इति राजनिर्घण्टः॥

पुलकः, पुं, (पुल+स्वार्थे कन्।) रोमाञ्चः। तत्पर्य्यायः। रोमोद्भेदः २ त्वक्पुष्पम् ३ स्वयङ्कुरः ४। इति त्रिकाण्डशेषः॥ (यथा, आर्य्यासप्तशत्याम्। ३७६।
"प्रेमलवलूनतकेशुवबोभरविपुलपुलककुचकलसा।
गोवर्द्धनगिरिगुरुतां सुग्धवधूर्निभृतमुपहसति॥")
शरीरावयवैर्हर्षकीटः। इति हेमचन्द्रः॥ (तुच्छधान्यम्। यथा, पञ्चतन्त्रे। २। ६६।
"पुलका इव धान्येषु पूनिका इव पक्षिषु।
मशका इव मर्त्येषु येषां धर्म्मो न कारणम्॥")
प्रस्तरविशेषः। तस्य परीक्षा यथा,—
"पुण्येषु पर्व्वतवरेषु च निम्नगासु
स्थानान्तरेषु च तथोत्तरदेशगत्वात्।
संस्थापिताश्च नगरा भुवनैः प्रकामं
संपूज्य दानवपतिं प्रथिते प्रदेशे॥
दाशार्णवागदवमेकलकालशादौ
गुञ्जाञ्जनश्वौद्रमलालवर्णाः।
गन्धर्व्ववल्लिकदलीसदृशावभासा
एते प्रशस्ताः पुलकाः प्रकृताः॥
शुक्लाञ्जनश्वौद्रकपिञ्चभङ्गा
मूद्वेरपेताः परमाः पवित्राः।
मङ्गल्ययुक्ता बहुभक्तिचित्रा
वृद्धिप्रदास्ते पुलका भवन्ति॥
काकच्चरासभमृगालवृकोपकण्ठै-
र्गृध्रैः समांसरुधिरार्द्रसुखेक्षणैस्ते॥
मृत्युप्रदास्तु विदुषा परिवर्ज्जनीया
मूल्यं पलस्य कथितञ्च शतानि पञ्च॥"
इति गारुडे ७७ अध्यायः॥
मणिदोषविशेषः। हरितालम्। गजाम्रपिण्डम्। गन्धर्व्वविशेषः। इति मेदिनी। के, १२१॥ असुरराजौ। गन्धर्वः। इति हेमचन्द्रः॥

पुलकी, [न्] पुं, (पुलकोऽस्यस्येति। पुलक+इनिः।) धाराकदम्बः। इति राजनिर्घण्टः॥

पुलस्ति, पुं, (पुलं महत्त्वे+क्विप्। पुलं महत्त्वं अस्यते गच्छतीति। अस्+तिः। इत्युज्ज्वलदत्तः। ४। १७६।) पुलस्त्यमुनिः। इत्युणादिकोषः॥

पुलस्त्यः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स ब्रह्मणः कर्णाभ्यां जातः। तस्य भार्य्या हविर्भूः कर्दमकन्या। तस्य पुत्रः अगस्त्यः विश्रवाश्च। इति श्रीभागवतम्॥ यथा, हरिवंशे। ७। ८।
"मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः।
पुलस्त्यश्च वशिष्ठश्च सप्तैते ब्रह्मणः सुताः॥"

पुलहः, पुं, सप्तर्षीणां मध्ये ऋषिविशेषः। इति शब्दरत्नावली॥ स च ब्रह्मणो नाभितो जातः तस्य भार्य्या कर्दममुनिकन्या गतिः। तस्य पुत्राः कर्म्मश्रेष्ठः यवीयान् सहिष्णुश्च। इति श्रीभागवतम्॥

पुलाकः, पुं, (पोलति उच्छ्रितो भवतीति। पुल+"बलाकादयश्च।" इति आकप्रत्ययेन निपातनात् साधुः।) तुच्छधान्यम्। आगड़ा इति ख्यातम्॥ (यथा, मनुः। १०। १२५।
"पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः॥")
संक्षेपः। अल्पत्वम्। भक्तसिक्थकम्। भक्तगुलिका। इत्यमरभरतौ॥ क्षिप्रम्। यथा पुलाककारी। इति स्वामी॥

पुलाकी, [न्] पुं, (पुलाकः क्षिप्रता दृष्टौ विषये अस्त्यस्येति। पुलाक+इनिः।) दृष्टः। इति हेमचन्द्रः। ४। १८०॥

पुलायितं, क्ली, (पुल+क्यच्+क्तः।) अश्वगतिः। तत्पर्य्यायः। विक्रान्तिः २। इति त्रिकाण्डशेषः॥

पुलिनं, क्ली, (पोलतीति। पुल महत्त्वे+"तलिपुलिभ्याञ्च।" उणा० २। ५३। इति इनन्। स च कित्।) तोयोत्थितसटम्। इत्यमरः। १। १०। ६॥ चर इति चड़ा इति च भाषा॥

पुलिन्दः

(यथा, रामायणे। २। ६५। ६।
"कचिन्निम्नगिनिकाशोणां कचित् पुलिनशालिनीम्।
कचित् सिद्धजनाकीर्णां प्रेक्ष्य मन्दाकिनीं नदीम्॥")
जलादुच्चरोत्थितं तटम्। इति भरतः॥ तत्-क्षणतोययुक्तद्वीपम्। इति सुभूतिः॥ क्रमेणोत्थितं तटम्। इति स्वामी॥ जलमध्यस्थसुत्थितं तटम्। इति पञ्जिका॥ द्वीपम्। इति चिकाखशेषः॥ (यज्ञविशेषे, पुं। यथा, महाभारते। १। ३२। १६।
"उलूकश्वसनाभ्याञ्च निमिषेण च पक्षिराट्।
प्रलयेन च संयामं चकार पुलिनेन च॥")
पुलिन्दः, पुं, (पुल महत्त्वे + "कृञिपुलीः किन्दच्।" उणा० ४। ८५। इति किन्दच्।) चण्डाल-भेदः। स च म्लेच्छशब्दवाच्यः। इत्यमरभरतौ॥
तस्योत्पत्तिर्यथा,—
पुलस्त्य उवाच।
"एवं गतेषु त्रैलोक्यं दानवेषु पुरन्दरः।
जगाम ब्रह्मसदनं सह देवैः शचीपतिः॥
तत्रापश्यत् स देवेशं ब्रह्माणं कमलोद्भवम्।
ऋषिभिः सार्द्धमासीनं पितरं स्वञ्च काश्यपम्॥
ततो ननाम शिरसा शक्रः सुरगणैः सह।
ब्रह्माणं काश्यपञ्चैव तांश्च सर्व्वान्तपोधनान्॥
प्रोवाचेन्द्रः सुरैः सार्द्धं देवनाथं पितामहम्।
पितामह! हृतं राज्यं बलिना बलिना मम॥
ब्रह्मा प्रोवाच शक्रैतत् शुभ्यते स्वकृतं फलम्।
शक्रः पप्रच्छ भो ब्रूहि किं मया दुष्कृतं कृतम्॥
काश्यपोऽप्याह देवेश! भ्रूणहत्या हता त्वया।
दितिदरास्थया गर्भः हतो वै बहुधा बलात्॥
पितरं प्राह देवेन्द्रो मातुर्दूषणतो विभो!।
कर्म्मणः प्राप्तवान् गर्भो यदशौचा हि साभवत्॥
ततोऽब्रवीत् काश्यपस्तु मातुर्दोषे सदासताम्।
गतस्ततो विनिहतो दोषोऽपि कुलिशेन भोः॥
तच्छ्रुत्वा काश्यपवचः प्राह शक्रः पितामहम्।
विनाशं पापिनो ब्रूहि प्रायश्चित्तं विभो! मम॥
ब्रह्मा प्रोवाच देवेशं वज्रिणः काश्यपस्तथा।
हितं सर्व्वस्य जगतः शक्रस्यापि विशेषतः॥
शक्रत्वक्रगदापाणिर्माधवः पुरुषोत्तमः॥
तं प्रपद्यस्व गुरुणा स ते श्रेयो विधास्यति॥
सहस्राक्षोऽपि वचनं गुरूणां स निशम्य वै।
प्रोवाच स्वल्पकालेन कस्मिन् प्राप्तो बहूदयः॥
ता ऊचुर्देवता मर्त्तैः स्वल्पकाले बहूदयः॥
इत्येवमुक्तः सुरराड्विरिञ्चिना
मरीचिपुत्रेण च काश्यपेन।
तथेति मित्रावरुणात्मजेन
वेगाच्छचीपृष्ठमवाप्य तस्थौ॥
कालक्षरस्योत्तरतः सुपुण्य-
स्तथा हिमाद्रेरपि दक्षिणस्याम्।
कुरुस्थलात् पूर्व्वत एव विश्रुतो
वसोः पुरात् पश्चिमतोऽवतस्थे॥
यत्राथ चक्रे भगवान् मुरारि-
र्वाल्यञ्जमयक्लमतमुक्लमूर्त्तिः।

पुलोमा

ख्यातिं जगामाथ गदाधरेति
महाबलस्यन्दनस्य श्रुतः कुठारः॥
यस्मिन् द्विजेन्द्राः श्रुतिशास्त्रसंयुताः
समानतां यान्ति पितामहेन।
मरुत्पितॄन् यत्र च संप्रपूज्य
भक्त्या स्वनव्ये नहि वैसवेव।
फलन्महामेधमखस्य मानवा
लभन्त्यनन्तं भगवत्प्रसादात्॥
महानदी यत्र सुरर्षिकन्या
बालापदेशाद्धिमशैलमेत्य।
चक्रे जगत् पापविनष्टमर्त्यं
सद्यस्तनप्राप्तनमज्जनेन॥
तत्र शक्रः समभ्येत्य महानद्यास्तटेऽहुते।
आराधनाय देवस्य कृत्वाश्रममवस्थितः॥
प्रातःस्नायी त्वधःशायी एकभक्तिर्जयार्थिनः।
तपस्तेपे सहस्राक्षः स्तुवन् देवं गदाधरम्॥
तस्यैवं तप्यतः सम्यक् जितसर्व्वेन्द्रियस्य च।
कामक्रोधविहीनस्य साग्रः संवत्सरो गतः॥
ततो गदाधरः प्रीतो वासवं प्राह नारद!।
शक्र प्रीतोऽस्मि भवतो सुकृतापोऽसि साम्प्रतम्॥
निजं राज्यञ्च देवेश! प्राप्स्यसि त्वचिराद्दिवः।
बलिष्यामि यथा शक्र! भाविश्रेयो यथा तव॥
इत्येवमुक्तोऽथ गदाधरेण
विसर्জিतः स्वाप्य मनोहरायाम्।
ज्ञातस्य देवस्य ततः पुरस्तात्
संप्रोत्पुरस्थाननुशासयञ्च॥
प्रोवाच तान् भीषणकर्म्मकारान्
नाम्ना पुलिन्दा मम पापसम्भवाः।
यस्माज्जमेवान्तरमद्रिमुख्ययो-
र्हिमाद्रिकालाङ्गरयोः पुलिन्दाः॥
इत्येवमुक्ता सुरराट् पुलिन्दान्
विसृष्टवान् सुरसिद्धयक्षैः।
संपूज्यमानोऽनुजगाम चाश्रमं
मातुस्तदा धर्म्मनिवासमाद्यम्॥
इति वामने ७३ अध्यायः॥
पुलोमजा, स्त्री, (पुलोम्नो दैत्यात् जायते इति। जन + ड।) शची। इत्यमरः। २। १। ४८॥ (यथा, काशीखण्डे १० अध्याये।
"निष्पत्यूहं क्रतुशतं यः कश्चित् कुरुतेऽवनौ।
जितेन्द्रियोऽमरावत्यां स प्राप्नोति पुलोमजाम्॥")
पुलोमजित्, पुं, (पुलोमाणं जयतीति। जि + क्विप् तुगागमश्च।) इन्द्रः। इति केचित्॥
पुलोमद्विट्, [ष्] पुं, (पुलोम्नो दैत्यविशेषस्य द्विट् शत्रुः।) इन्द्रः। इति हेमचन्द्रः। २। ८८॥
पुलोमभित्, [द्] पुं, (पुलोमाणं भिनत्तीति। भिद् + क्विप्।) इन्द्रः। इति भूरिप्रयोगः॥
पुलोमा, [न्] पुं, असुरविशेषः। स इन्द्रस्य श्वशुरः। इति पुलोमजाशब्दटीकायां भरतः॥ (अयं खलिबन्धेन निपातितः। यथा, हरिवंशे। २०। १२४।
"श्रुत्वा समन्यकं चापि विश्वसेच्छचुणा सह।

पुष्करं

पुलोमाणं जघानाजौ जामाता सन् शतक्रतुः॥")
पुलोमारिः, पुं, (पुलोम्नोऽरिः शत्रुः।) इन्द्रः। इति त्रिकाण्डशेषः॥
पुष, पुष्टौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) पोषति तातः पुत्रम्। इति दुर्गादासः॥
पुष, ह्रस्व य औ पुष्टौ। पोषणे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-अनिट्।) ह्रस्व, अपुषत्। य, पुष्यति। औ, पोष्टा। इति दुर्गादासः॥
पुष, क पुष्टौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, पोषयति। इति दुर्गादासः॥
पुष, ग पुष्टौ। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-सेट्।) ग, पुष्णाति पुपोष। इति दुर्गादासः॥
पुषा, स्त्री, (पुष्णातीति। पुष पुष्टौ + कः। ततष्टाप्।) लाङ्गलिकीवृक्षः। इति शब्दचन्द्रिका॥
पुषितं, त्रि, (पुष्यते स्मेति। पुष + क्तः। भ्वादिगणीयत्वात् इट्।) पुष्टम्। ज्ञातपोषणपक्षिमृगादि। इत्यमरः। ३। १। ६७॥
पुष्करं, क्ली, (पुष्णातीति। पुष पुष्टौ + "पुषः कित्।" उणा० ४। ७। इति करन्। स च कित्।) हस्तिशुण्डाग्रम्। (यथा, माघे। ५। ३०।
"आलोलपुष्करसुखोल्लसितैरभीक्ष्ण-
सुत्तामभूवुरभितो वपुरम्बुवर्षैः॥")
वाद्यभाण्डमुखम्। (यथा, रघुः। १७। ११।
"नद्धैः स्निग्धगभीरं तूर्य्यैराहतपुष्करैः॥"॥
"पुष पुष्टौ। पुषः कित्। इति करन्प्रत्ययः। पुषिरचान्तर्नीतण्यर्थः। पोषयति भूतान्यवकाशप्रदानेन उदकदानात्युपकारेण च। पुष्कं वारि रातीति पुष्करं इति क्षीरस्वामी। पुषेरन्नर्थात् स्फायितञ्चिवञ्चिलूषिपूषिसूषिधिन्वक्ष्मूभ्यः कित्। इति कित्त्वे करन्प्रत्ययो बाहुलकात् भवति। स्फायितञ्चिवञ्चिलूषिपूषिसूषिधिन्वक्ष्मूभ्यः कित्। इति करु इति श्रीभोजदेवः। पोषयति भूतानीति। पुष्कोपपदाद्रातेः आतोऽनुपसर्गे कः। यद्वा, वपुरित्युदकनाम सत् कर्त्तुं शीलमस्येति। ह्रस्वो हेतुनाच्छील्यानुलोम्येषु। इति टः। वपुष्करं सत् वकारलोपेन पुष्करम्। एषोदरादिः।" इति निरुक्तटीकायां देवराजयज्वा॥) जलम्। (यथा, शतपथब्राह्मणे। ६। ४। २। २।
"आपो वै पुष्करं प्राणोऽथर्वा प्राणो वा॥")
ओम। (यथा, हारीते प्रथमस्थाने चतुर्थेऽध्याये।
"मेघाः सूर्य्यांशुसंतापसमानरूपयो ह्यल्पसत्त्वाख्यस्वना
हंसालीकमलालिमञ्जितजलः पद्माकरः
शोभनः।
तीव्रस्निग्धमयूखचन्द्रविमला स्वानन्दिनी
कौमुदी
चित्रा धर्म्मविपक्षतोयसुरसा स्यान्निर्म्मलं
पुष्करम्॥")

खड्गफलम्। पद्मम्। (यथा, रामायणे। २। ६५। १४।
"सखीवच्च विगाहस्व सीते! मन्दाकिनीं नदीम्।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि!॥")
तीर्थभेदः। (यथा, महाभारते। १। ३६। ३।
"गोकर्णे पुष्करारण्ये तथा हिमवतस्तटे॥"
अस्य अन्यद्विवरणं पुंलिङ्गात्मपुष्करशब्दे द्रष्टव्यम्॥) कुष्ठौषधम्। इत्यमरः। ३। ३। १८५॥ (यथास्य पर्य्यायः।
"उत्पलं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत्।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
खड्गकोषः। इत्यमरटीकायां मथुरेशः॥
काष्ठम्। द्वीपभेदः। इति मेदिनी। रे, १८७॥
(अस्य विवरणं पुंलिङ्गात्मपुष्करशब्दे द्रष्टव्यम्॥)
युद्धम्। इति नानार्थरत्नमाला॥ *॥

पुष्करः, पुं, (पुष्क + "पुषः कित्।" उणा० ४। ११। इति करन्। स च कित्।) रोगविशेषः। नागविशेषः। सारसपक्षी। नृपभेदः। स तु नलराजभ्राता। (यथा, महाभारते। ३। ५६। १२।
"स समाविश्य च नलं समीपं पुष्करस्य च।
गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै॥"
अयं हि कलिसाहाय्येन अक्षज्ञतां नलं विजित्य निषधाधिपोऽभवत्। एतद्वृत्तान्तं महाभारते वनपर्व्वणि ५८ अध्याये द्रष्टव्यम्॥)
वरुणपुत्रः। इति मेदिनी। रे, १८७॥ (वाद्यविशेषः। यथा, मार्कण्डेये। १०६। ४१।
"प्रावाद्यन्त ततस्तत्र वेणुवीणादिदर्दुराः।
पणवाः पुष्कराश्चैव नन्दङ्गाः पटहानकाः॥")
पर्व्वतविशेषः। इति शब्दरत्नावली॥ *॥
सप्तद्वीपानां मध्ये द्वीपविशेषः। पुष्करद्वीपवर्णनं यथा,—
सूत उवाच।
"प्राक्कद्वीपस्य विस्तारादिगुणेन समन्ततः।
क्षीरार्णवं समावृत्य द्वीपः पुष्करसंज्ञितः॥
एक एवात्र विप्रेन्द्राः पर्व्वतो मानसोत्तरः।
योजनानां सहस्राणि षोडशोच्छ्रायतः स्मृतः॥
तावदेव च विस्तीर्णः सर्व्वतः परिमण्डलः।
स एव द्वीपो यत्राद्यो मानसोत्तरसंज्ञितः॥
एक एव महाभागः सन्निवेशाद्विधाकृतः।
तस्मिन्द्वीपे सुतौ तु द्वौ पुण्यौ जनपदौ शुभौ॥
अपरौ मानवस्यात्र पर्व्वतस्यानुमण्डलौ।
महावीतं सुखं वर्षं धातकीषण्डमेव च॥
स्वादूदकेनोदधिना पुष्करः परिभावितः।
तस्मिन्द्वीपे महाभागो न्यग्रोधोऽमरपूजितः॥
तस्मिन्निवसति ब्रह्मा विश्वात्मा विश्वभावनः।
तत्रैव मुनिभिर्गीतः श्रूयते नारायणालयम्॥
वसन्त्यत्र महादेवो हरार्द्धो हरिरव्ययः।
संपूज्यमानो ब्रह्मर्षेः कुमाराद्यैश्च योगिभिः॥
गन्धर्व्वैः किन्नरैर्यक्षैरीश्वरः सगणैर्वृतः।
सुखात्तत्र प्रजाः सर्व्वा ब्राह्मणाः सङ्गुणान्विताः॥
निरामया विशोकाश्च रागद्वेषविवर्ज्जिताः।
सत्त्वाढ्यते न तत्रास्तां नीचमाधममध्यमाः॥
न वर्णाश्रमधर्म्माश्च न नद्यो न च पर्व्वताः।
परेण पुष्करस्यार्द्ध समाहृत्य स्थितो महान्॥
स्वादूदकः समुद्रस्तु समन्ताद्विजसत्तमाः।
परेण तस्य महती ह्रूयते लोकसंस्थितिः॥"
इति कौर्म्मे ४० अध्यायः॥ *॥
पुष्करद्वीपस्यराजा। तस्य वधः। यथा,—
"लोकेश्वरः सोऽपि नृभिर्मुनीन्द्रै-
र्देवैः सहेन्द्रैरथ ब्रह्मचारी।
द्वीपे शुभे पुण्यजनैरुपेते
उवास राजा स तु पुष्करस्थः॥
तेनैव राज्ञा स तु पुष्करोऽपि
सदोच्यते देवगणैः ससिद्धैः।
तेनैव यानेन तथाव्रजेन
बभूव राजा तमथाक्षयन्ति॥"
इत्यग्निपुराणम्॥ *॥
ब्रह्मक्षत्रसौर्य्यविशेषः। तस्य नामान्तरम्। रूपसौर्य्यम् २ सुखदर्शनम् ३। तत्र ज्येष्ठपुष्करमध्यमपुष्करकनिष्ठपुष्करनामकाख्रयो ह्रदाः। तस्य परिमाणं शतयोजनमण्डलम्। इति पद्मपुराणम्॥ *॥ योगविशेषे गङ्गादीनां पुष्करत्वं यथा,—
"मकरस्थो यदा भानुस्तदा देवगुरुर्यदि।
पूर्णिमायां भानुवारे गङ्गा पुष्कर ईरितः॥
गङ्गोत्तर्य्यां प्रयागे च कोटिसूर्य्यग्रहैः समः।
सिंहसंस्थे दिनकरे तथा जीवेन संयुते॥
पूर्णिमायां गुरोर्वारे गोदावर्य्यास्तु पुष्करः।
तत्र स्नानञ्च दानञ्च सर्व्वं कोटिगुणं भवेत्॥
मेषसंस्थे दिवानाथे देवानाञ्च पुरोहिते।
सोमवारे सिताष्टम्यां कावेरी पुष्करो मतः॥
कर्कटस्थे दिवानाथे तथा जीवेन्दुवासरे।
अमायां पूर्णिमायां वा गङ्गा पुष्कर उच्यते॥"
इति स्कन्दपुराणे पुष्करखण्डे श्रीगोलमाहात्म्यम्॥
मेघनायकविशेषः। तत्परिचायकं यथा,—
"त्रिगुणे ग्राकवर्षे तु चतुर्भिः शोधिते क्रमात्।
आवर्त्ते विद्धि सम्वर्त्ते पुष्करं द्रोणमम्बुदम्॥"
इति ज्योतिस्तत्त्वम्॥
तस्य फलम्। यथा,—
"पुष्करे दुष्करं वारि सुखहीना वसुन्धरा।
विषद्वीपहता लोकाः पुष्करे जलदाधिपे॥"
इति ज्योतिषम्॥ *॥
क्रूरवार-भद्रातिथि-मघापादनक्षत्र-घटितासुभ-जनकयोगविशेषः। यथा,—
"पुनर्व्वसूत्तराषाढा स्वातिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च रविभौमशनेश्वराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
एतेषामेकदा योगे भवतीति त्रिपुष्करः॥ *॥
जाते तु जारजो योगो मृते भवति पुष्करः।
त्रिगुणं फलदो वृद्धौ नष्टे लुप्ते मृते तथा॥
प्रथमे मासि वर्षे वा कुटुम्बमपि पीड़येत्।
देवोऽपि यदि वा रक्षेत् तस्य पुत्रो न जीवति॥

अतस्तद्दोषशान्त्यर्थं होमयेदयुतं बुधः।
अशक्तश्च सुवर्णादिदानं कुर्य्यादृथाविधि॥"
समर्थश्चेद् वराहसंहितोक्तं अयुतहोमादिकं कुर्य्यात्। वाक्यं यथा,—
श्रीविष्णुरोम् तत् सदद्यासुके मास्यसुकपक्षेऽसुकतिथौ असुकगोत्रः श्रीअसुकदेवशर्म्मा अस्य असुकगोत्रस्य प्रेतस्यासुकदेवशर्म्मणश्चिरपुष्करयोगकालीनमरणजन्यदोषशमनकामः इदं काञ्चनं श्रीविष्णुदैवतं यथासम्भवगोधनाग्रे ब्राह्मणायाहं ददे। ततो दक्षिणां दद्यात्। अन्यत्र पूजाहोमकर्म्मणौ करिष्ये। इति विशेषः। एतत् सर्व्वमशौचेऽपि कर्त्तव्यम्। यथा स्मृतेः।
सूत्यकाले क्रियां सर्व्वं सूतकं परिकीर्त्तितम्।
आपद्गतस्य सर्व्वस्य सूतकेऽपि न सूतकम्॥"
इति शुद्धिकारिका॥ *॥
अपि च।
"पुनर्व्वसूत्तराषाढा स्वातिकोत्तरफल्गुनी।
पूर्व्वभाद्रं विशाखा च वर्द्धते वै त्रिपुष्कराः॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च।
शनिभौमौ रविश्चैव वाराश्चैते त्रिपुष्कराः॥
एते त्रिपुष्करा ज्ञेयास्तथा द्वादशमासिके।
द्विमासे च तथा प्राप्ते षण्मासे च चतुर्थके॥
षोड़शे मासि संपूर्णे कुटुम्बं पीड़येदध्रुवम्।
अन्तेऽप्यन्ते मध्ये च पुष्करो हन्ति नान्यथा॥
तद्दोषप्रशमार्थन्तु होमयेदयुतं बुधः।
तिलव्रीहियवांश्चैव लाजान्येन समन्वितान्॥
घीरेणैव तथाचार्य्यो कुर्य्याद्भक्तिभावतः।
चरुञ्च अपयेत्तत्र प्राज्ये कुर्य्याद्विलिन्तथा॥
वैकङ्कोडुम्बराश्वत्थैः प्रत्येकाष्टोत्तरं शतम्।
एकैकं चित्रसंयुक्तं दर्भैश्च परिवेष्टितम्॥
यमाय वैकङ्कतेन धर्म्मायोडुम्बरेण च।
अश्वत्थेश्चित्रगुप्ताय कुर्य्यात् क्रमशस्तथा॥
तद्वद् घृततिलांश्चैव तथा समिधमेव च।
एकीकृत्य समं सर्व्वं चरुमाश्रित्य होमयेत्॥
यवव्रीहितिलैर्युक्तं तण्डुलं अपयेच्चरुम्।
दधिमध्याज्यसंयुक्तं होमः सङ्ख्यसंख्यया॥
वैकङ्कोडुम्बराश्वत्थैर्होमयेद्विधिपूर्व्वकम्।
यमं धर्म्मं चित्रगुप्तं पुष्करं पुरुषं तथा॥
तिथिं वारं तथा ऋक्षं पूजयित्वा तु होमयेत्।
पञ्चवर्णेन चूर्णेन कुर्य्याद्वै पद्ममण्डलम्॥
यमं धर्म्मं चित्रगुप्तं स्थापयेत् क्रमशस्ततः।
तिलप्रपूरिते पात्रे लौहे च क्षणावासका॥
वेष्टयित्वा यमं तत्र स्थापयेल्लौहनिर्म्मितम्।
घृतप्रपूरिते पात्रे कांस्यपात्रे निरञ्जनम्॥
रौप्यान्वितं शुक्लवस्त्रवेष्टितं तत्र पूजयेत्।
गुड़प्रपूरिते पात्रे ताम्रपात्रे च मन्त्रिणम्॥
स्वर्णान्वितं रक्तवस्त्रवेष्टितं तत्र पूजयेत्।
क्षीरप्रपूरिते पात्रे प्रस्तरपात्रे च पुष्करम्॥
क्षणान्वितं क्षणवस्त्रवेष्टितं तत्र पूजयेत्।
सुवर्णतुल्यमर्हं वा अथवा शक्तिभावतः॥
प्रतिमास्तत्र समाः सर्व्वाः क्रमात्तत्र नियोजिताः।
व्रीहौ यवे तथा धान्ये क्रमात् पात्रत्रयस्थितः॥

नृतने च क्रमात् पीठे स्थापयेद्विधिपूर्व्वकम् ।
मण्डलस्य चतुर्दिक्षु चतुःकुम्भांश्च स्थापयेत् ॥
दधिगुड़क्षीरपूर्णान् प्रकल्प्य संयुतैरन्नतः ।
अथवा तन्मूलदेशे सचूतपल्लवान्वितान् ॥
पीतवस्त्रेण संयुक्तं कुर्य्याद्दृढचतुष्टयम् ।
चन्द्रातपं तदुपरि विचित्रं परिकल्पितम् ॥
कुम्भानाञ्च चतुःपार्श्वे यवतिलैर्युक्तसङ्गुलान् ।
स्थापयेयुः क्रमात्तत्र पूजाकाले द्विजोत्तमाः ॥
मण्डलस्य तथा पूर्व्वे वारुणं घटमर्पयेत् ।
नानादेवान् गणेशादीन् ग्रहादींश्च समर्चयेत् ॥
कृत्वा यथाक्रमं तत्र बलिं दद्याद्विचक्षणः ।
पयोदृष्टेन क्षीरेण स्थापयित्वा यथाक्रमम् ॥
खेन खेनैव मन्त्रेण पूजयित्वा च होमयेत् ॥
एवं विधिप्रकारेण यः प्रेतं न तु होमयेत् ।
पुष्करारिष्टदोषस्तु चतुष्पात्तस्य सम्भवेत् ॥
संवत्सरे तथा पूर्णे षोड़शे मासि वै तथा ।
षण्मासाभ्यन्तरे तस्य सुतदारांगि विनिर्द्दिशेत् ॥
अथवा स्वामिनं हन्ति द्वितीयं भ्रातरन्तथा ।
तृतीयं सर्व्वहानिः स्यात् सुतवित्तविनाशनम् ॥
प्रेतारिष्टविनाशाय यमादीन् यो न होमयेत् ।
सर्व्वाणि तस्य नश्यन्ति गोमहिषादीनि सर्व्वतः ॥
एवंविधिकृतं होमं यः कर्त्तुमक्षमो भवेत् ।
होमं कृत्वा यथाशक्त्या धेनुमेकां प्रदापयेत् ॥
अग्निन् कृते न सन्देहः प्रेतारिष्टं न पीड़येत् ।
न विघ्नो यजमानस्य न चारिष्टं प्रजायते ॥
एतद्धोमं विनिर्द्दिष्टं यत्नतो न करोति यः ।
न रक्षति यमस्तस्य अभिमांसैश्च वंशजम् ॥
सुतो भ्राता तथा जाया पतिः श्वशुर एव च ।
माता पिता स्वसा वापि पितृव्यो भगिनीपतिः ॥
ज्येष्ठभ्राता पतिश्चापि स्वामी चापत्यमेव च ।
एकैकं वर्षसंपूर्णे कुटुम्बं पीड़येद्ध्रुवम् ॥
षोड़शे मासि संपूर्णे बान्धवान् परिपीड़येत् ॥
बान्धवानामभावे च वास्तुस्थो न जीवति ॥
त्रिपुष्करे तथा दोषे यः प्रेतं न तु होमयेत् ।
दैवज्ञा यदि वा रक्षेत् तस्य पुत्रो न जीवति ॥
यत्किञ्चिद्दानसुतदृष्ट्य मुह्यो भवति मानवः ।
न रक्षति यमस्तस्य यदि होमं न कारयेत् ॥
तस्मात् विधिप्रकारेण पुष्करारिष्टशान्तये ।
यमं धर्म्मं चित्रगुप्तं पूजयित्वा च होमयेत् ॥
मण्डले घटमारोप्य पूजयित्वा यथाक्रमम् ।
विधिपूर्व्वं तथा कृत्वा प्रान्ते दद्याद्वलिं मुधः ॥
प्रभाते च तथा रात्रावथौचान्तदिने तथा ।
आचार्य्यञ्च प्रकुर्व्वीत अपरेद्यः चरुं ततः ॥
विप्रक्षत्रियवैश्यैर्भैः पिष्टैर्वैश्यस्य निर्म्मितम् ।
शूद्रस्य गोमयेनापि प्रतिमां दापयेत्ततः ॥
दत्त्वा मधुघृताक्तञ्च चरुं पश्चाच्च दापयेत् ।
ततोऽरिष्टः प्रशान्तः स्यात्ततो होमं समापयेत् ॥
संकल्प्य विधिना पूर्व्वं वस्त्रयुग्मेन यत्नतः ।
आचार्य्यं वृणुयात्तत्र पश्चाद्वलिजमेव च ॥"
इति वराहसंहितोक्तपुष्करशान्तिप्रमाणम् ॥

पुष्करकर्णिका, स्त्री, (पुष्करं पद्मं कर्णयति साहचर्य्येण प्राप्नोतीति । कर्ण + ण्वुल् । टापि अत इत्वम् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥ (स्थलपद्मिनीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

पुष्करनाड़ी, स्त्री, (पुष्करं पद्मं नाड़यति सौन्दर्य्येण भंग्यायतीति । नाड़ + अच् । ततो ङीष् ।) स्थलपद्मिनी । इति राजनिर्घण्टः ॥

पुष्करमूलं, क्ली, (पुष्करस्य मूलमिव मूलमस्य । पुष्करजातं मूलं वा ।) पुष्करदेशप्रसिद्धौषधिविशेषः । अस्य स्थाने कुष्ठं योजयन्ति । तस्यपर्य्यायः । मूलम् २ पुष्करम् ३ पद्मपत्रकम् ४ पुष्करिणी ५ वीरम् ६ पौष्करम् ७ पुष्कराह्वयम् ८ काश्मीरम् ९ ब्रह्मतीर्थम् १० श्वासारिः ११ मूलपुष्करम् १२ पुष्करजटा १३ पुष्करग्रिका १४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरश्वासारोचककासग्रहोपपार्श्वनाशित्वञ्च । इति राजनिर्घण्टः ॥ "विशेषात् पार्श्वशूलनुत् ।" इति भावप्रकाशः ॥ (अवहारोऽस्य यथा,—

"भार्गीं पुष्करमूलञ्च राज्ञां विल्वं यमानिकाम् ।
नागरं दशमूलञ्च पिप्पलीञ्चाम् साधयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे भार्य्यादिक्वाथे ॥)

पुष्करमूलकं, क्ली, (पुष्करस्य कुष्ठस्य मूलम् । ततः संज्ञायां कन् ।) कुष्ठवृक्षस्य मूलम् । इति चिकित्साप्रभेदः ॥ (कुष्ठशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

पुष्करग्रिका, स्त्री, (पुष्करस्य ग्रिका जटेव ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥

पुष्करलजौ, पुं, (पुष्करस्य पद्मस्य स्रक् ययोरिति ।) अश्विनीकुमारौ । हिवचान्तोऽयम् । इति शब्दरत्नावली ॥ (अश्विनीकुमारतुल्ये, त्रि । यथा, वाजसनेयसंहितायाम् । २ । ३३ ।
"आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
यथेह पुरुषोऽसत् ॥"
"किमत्र कुमारं पुष्करस्रजं पुष्कराणां पद्मानां स्रक् माला ययोस्तौ पुष्करस्रजौ अश्विनौ अश्विनौकुमारौ पुष्करस्रजौ पद्ममालिनौ देवानां भिषजौ । तत्तुल्यः कुमारः पुष्करस्रक् तम् । अश्विसाम्यकथनेन रोगहीनं सुन्दरञ्च पुत्रमधत्तेति लक्षितम् ॥" इति तत्र वेददीपः ॥)

पुष्कराक्षः, पुं, (पुष्करवदक्षिणी यस्य । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।) विष्णुः । यथा, विष्णुसहस्रनामे ।
"पुष्कराक्ष ! नमस्तेऽहं मायाविज्ञानसागरे ।
त्राहि मां देवदेवेश त्वत्तो नान्योऽस्ति रक्षिता ॥"
(श्रीकृष्णः । यथा, महाभारते ।१।२२०।१६।
"अथाब्रवीत् पुष्कराक्षः प्रहसन्निव भारत ! ॥")

पुष्कराक्षः, पुं, (पुष्करस्य आक्षा आक्षा यस्य ।) सारसपक्षी । इत्यमरः । २ । ५ । २२ ॥ (पुष्करं आक्षा यस्य । पुष्करमूलम् । यथा, सुश्रुते चिकित्सितस्थाने ५ अध्याये ।
"तुम्बुरुपुष्कराक्षहिङ्गुसैन्धवैतसपथ्यालवणत्रयं यवक्षारेण पातुं प्रयच्छेत् ॥")

पुष्कराह्वयं, क्ली, (पुष्करं आह्वयो यस्य ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (यथा,—
"क्षुद्रान्द्रता नागरपुष्कराह्वयैः
क्षतः कषायः कफमारुतोद्भवे ।
सश्वासकासारुचिपार्श्वदूषके
ज्वरे त्रिदोषप्रभवे च शस्यते ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

पुष्करिणी, स्त्री, (पुष्करवत् आकृतिरस्त्यस्या इति । पुष्कर + इनिः । ततो ङीप् ।) स्थलपद्मिनी । पुष्करमूलम् । इति राजनिर्घण्टः ॥ (पुष्करं शुण्डादण्डस्तदस्त्यस्या इति । इनिः ।) हस्तिनी । सरोजिनी । (पुष्कराणि पद्मानि सन्त्यस्मिन्निति ।) जलाशयः । इति मेदिनी । णी, १०४॥ शुभधनुःपरिमितसमचतुरस्रजलाधारः । पुकुर इति पुष्करिरिति च भाषा । तत्पर्य्यायः । खातम् २ । इत्यमरः ।१।१०।२७॥ जलकूपी ३ । इति जटाधरः ॥ पौष्करिणी ४ । इति शब्दरत्नावली ॥*॥
सा तु दक्षिणोत्तरायता कार्य्या ।
यथा,—
"कूपवापीपुष्करिण्यो दीर्घिका ह्रद एव च ।
तड़ागः सरसी चैव सागरश्चाष्टमो मतः ॥
सद्भिर्जलाशयः कार्य्यो यत्नादन्योन्यरायतः ॥"
इति कल्पतरौ वायुपुराणम् ॥ * ॥
तस्या लक्षणं यथा । "पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् ।
'चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः ।
शतधन्वन्तरञ्चैव सावत् पुष्करिणी मता ।
एतत्परिमाणः प्रोक्तस्तड़ाग इति निश्चयः ॥'
तेन चतुर्हस्तु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनाभ्यन्तरत्वेन पुष्करिणी । एतज्जलाशयाधारपरं न तु उपरिस्तटम् । शतेन धनुर्भिः पुष्करिणी । इति नद्यवर्त्तमानश्लोको वशिष्ठः ॥*॥
तत्करणे वास्तुयागः कर्त्तव्यः । महाकपिलपञ्चरात्रम् ।
'जलाधारग्रहार्थञ्च यत्नेनाहूय विग्रहतः ।
ब्रह्माद्यदितिपर्य्यन्ता पञ्चाग्न्यन्वयसंयुता ।
सर्व्वर्षा त्रिल वास्तूनां नायका परिकीर्त्तिता ॥
असंपूज्य हि तान् सर्व्वान् प्रासादादीन्न कारयेत् ।
अनिष्यात्तर्विनाशः स्यादुभयोर्धर्म्मधर्म्मिणोः ॥'
ब्रह्माद्यदितिपर्य्यन्ता इति कल्पान्तरम् । देवीपुराणोक्तं दुर्गादिकल्पे एव अवगम्यते । धर्म्मधर्म्मिणोक्तड़ागादिनष्टकर्त्रोः । आरम्भदिने तत्करणे उत्सर्गादिनेऽपि आदौ तत्करणम् । यथा,—
'प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ।
पुरवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये ॥
वास्तूपशमनं कृत्वा ततः स्वस्थेन चेतसा ।
वास्तुपूजामकुर्व्वाणस्तत्त्वाहारो भविष्यति ॥'
इति मत्स्यपुराणे पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचने प्रासादधर्म्मोत्तिदेशादेव वाप्यादिप्रतिष्ठादिनेऽपि वास्तुयागकरणम् ॥ * ॥

तदारम्भे नक्षत्रादि दीपिकायाम् ।
'पुष्यामित्रकरोत्तरस्वहस्तत्रह्मान्तपित्र्येन्दुभिः
ग्रस्तेऽर्के शुभयोगवारतिथिषु क्रूरेक्षवीर्य्येषु च ।
पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभोदये
प्रारम्भः सलिलाशयस्य शुभदो नीवेन्दुपुत्रोदये॥'
पुष्यानुराधा-हस्तोत्तराश्रय-धनिष्ठा-शतभिषा-
रोहिणी-पूर्वाषाढ़ा-मघा-अश्विनीभिर्भैः ॥
मात्स्ये ।
'नक्षत्रादित्यवसं लग्नं लग्नं शुभनिरीक्षितम् ।
लग्नोच्छ्रायादि कर्त्तव्यमन्यच्च परिवर्जयेत् ॥
अश्विनी रोहिणी मूलमुत्तराश्रयमेव च ।
स्वातौ हस्तानुराधा च गृहारम्भे प्रशस्यते ॥
वज्रव्याघातमूले च व्यतीपातातिगण्डयोः ।
विष्कम्भगण्डपरिघवर्जं योगेषु कारयेत् ॥
आदित्यभौमवर्जेषु सर्व्वे वाराः शुभावहाः ।
प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि ॥'
ज्योतिषे । गुरोर्भृगोरस्तवाक्ये इत्यभिधाय
प्रतिष्ठारम्भणे देवकूपादेर्वर्জयन्ति हि ॥ * ॥
उत्सर्गफलमाह । कपिलपञ्चरात्रे ।
'संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु ।
पुष्करिण्यादिदानेन विष्णुः प्रीणाति विश्वभृक् ॥'
जलाशयकरणार्थेभूमिदानफलमाह चित्रगुप्तः ।
'जलाशयार्थं यो दद्यात् वाटकं लोकमाप्नुयात् ॥'
भूमिमिति शेषः ॥ * ॥ तत्प्रतिष्ठाकालमाह ।
मत्स्यपुराणम् ।
'शृणु राजन् ! महाबाहो ! तड़ागादिषु यो
विधिः ।
चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ॥
माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ।
प्राप्य पर्व्व शुभं शुक्लमतीते चोत्तरायणे ॥
पुण्येऽह्नि विप्रकथिते लब्ध्वा ब्राह्मणवाचनम् ॥'
अतीते प्रवृत्ते । तथा च प्रतिष्ठासमुच्चये ।
'माघेऽथ फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्वापि प्रवृत्ते चोत्तरायणे ॥'
ब्राह्मणवाचनं पुण्याहस्वस्तिऋद्धिवाचनम् ॥*॥
'पञ्चमी च द्वितीया च तृतीया सप्तमी तथा ।
दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ॥
आषाढ़े हे तथा मूलमुत्तराश्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदा तथा ॥
हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते ॥*॥
बुधो दृश्यति: शुक्रस्य यते शुभावहाः ।
एतन्निरीक्ष्य तं लग्नं नक्षत्रञ्च प्रशस्यते ।
यद्वतारावलं लब्ध्वा ग्रहपूजां विधाय च ।
निमित्तं सकलं ज्ञात्वा वर्জयित्वाद्भुतादिकम् ॥
शुभयोगे शुभग्रहे क्रूरग्रहविवर्জिते ।
लग्ने दृष्टे च कुर्व्वीत प्रतिष्ठादिकमुत्तमम् ॥*॥
अग्नये विष्णवे तद्वत् षड़ग्नीतिमुखे तथा ।
एतेषु स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा ॥'
भविष्ये ।
'प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा ।
दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता ॥
सोमो बुधस्तिथैव शुक्रश्चैव तथा गुरुः ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठायागकर्म्मणि ॥'
प्रतिष्ठाधिकारे व्यवहारसमुच्चयः ।
'लग्नपक्षे च पञ्चम्यामष्टम्यां चैव गृह्यते ॥'
दीपिकायाम् ।
'पुष्याश्विशुक्रभगदैवतवासवेषु
सौम्यानिलेशुमघरोहिणिमूलहस्ते ।
पौष्णानुराधहरिमेषु पुनर्व्वसौ च
कार्य्याभिषेकतरुभूतपतिप्रतिष्ठा ॥'
वासवं धनिष्ठा । वैधं आर्द्रा । आर्द्रायाश्चैव सौम्यायणमिति प्रतिष्ठासारसमुच्चयात् । * ॥
वापीत्यादीनां पूर्त्तत्वाभिधानात् सूत्रस्याधिकार-
माह जातूकर्णः ।
'वापीकूपतड़ागादि देवतायतनादि च ।
अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥
अग्निहोत्रं तपः सत्यं वेदानामनुपालनम् ।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते ॥
यज्ञोपरागे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते ॥
अधिकारी भवेत् शूद्रः पूर्त्ते धर्म्मे न वैदिके ॥'
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्ना-
करः ॥ एवं स्त्रीणामपि पूर्त्ताधिकारः । यथा,
नारीत्यगुरुतल्पी दृश्यति: ।
'पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान् ।
पूजयेत् कन्यपूर्त्ताभ्यां इष्टान्नाद्यातिथीन् स्त्रियः ॥'
अस्य पूर्त्तत्वात् इष्टिश्राद्धमप्यादौ कर्त्तव्यम् ।
यथा, गोभिलः । 'इष्टिः पूर्त्तेषु युग्मा नाद्यायेत्
प्रदक्षिणमुपचारः । यवैस्तिलार्थं इति ॥' * ॥
हयशीर्षपञ्चरात्रे ।
'वापीकूपतड़ागानां पश्चिमे यागमण्डपम् ।
कुर्य्याद्यथाक्रमेणैव कन्यसं मध्यमुत्तमम् ॥
कन्यसं दशहस्तन्तु कूपे शस्तं तथानघ ! ।
द्विषट्कं कारयेद्वाप्यां पुष्करिण्यां चतुर्दश ।
द्विरष्टहस्तं कुर्व्वीत तड़ागे मण्डपं शुभम् ॥'
कन्यसं कनीयांसम् ॥ * ॥ सङ्कल्पविधिमाह
भविष्ये ।
'गृहीत्वौदुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भैश्चयं साग्रमूलं फलपुष्पसमन्वितम् ॥
जलाशयारामकूपे सङ्कल्पे पूर्व्वदिङ्मुखः ।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेत् पयः ॥'
मत्स्यपुराणे ।
'प्राग्दक्प्रवणे देशे तड़ागस्य समीपतः ।
चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्मुखीम् ॥'
कारयेदित्यर्थः । तथा,—
'सप्तैतः समवर्णाः स्युः पताका ध्वजसंयुताः ॥'
समवर्णा वक्ष्यमाणलोकपालवर्णाः ।
'अश्वत्थोदुम्बरप्लक्षवटग्राखायुतानि च ।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥'
तथा ।
'कुलशीलसमापन्नः स्थापकः स्यादिजोत्तमः ॥'
स्थापक आचार्य इति रत्नाकरः ॥ * ॥
'सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यकुक्कुभौ ।
ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः ॥
एवमाद्याश्च तान् सर्व्वानादौ चैव विन्यसेत् ॥
शुक्लमाल्याम्बरधरः शुक्लगन्धविलेपनः ॥
सर्व्वौषध्युदकक्लिन्नशापितो वेदपुङ्गवः ।
यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः ।
पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम् ॥
ततो मङ्गलशब्देन भेरीणां निःस्वनेन च ।
रजसा मण्डलं कुर्व्वात् पञ्चवर्णेन तत्त्ववित् ॥
षोड़शारं ततचक्रं पद्मगर्भं चतुर्मुखम् ।
चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् ॥
वेद्याश्चोपरि तत् कृत्वा ग्रहौघोक्तपतींस्तथा ।
विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः ।
भानादीन् स्थापयेन्मध्ये वास्तुं मण्डलमाश्रितः ॥'
भानादीन् कूर्म्मादीन् ।
'ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः ।
विनायकन्तु विन्यस्य कमलामम्बिकान्तथा ॥'
पूजयेदिति शेषः । तथा,—
'नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न कार्य्यं जायते क्वचित् ॥'
ग्रहपूजामण्डलं भ्रान्तिदीपिकायाम् ।
'वर्त्तुलो भास्करः कार्य्यो त्रस्रश्चन्द्रो निशाकरः ।
अङ्गारकश्चिकोणस्तु बुधश्चापाकृतिस्तथा ॥
पद्माकृतिर्गुरुः कार्य्यश्चतुष्कोणस्तु भार्गवः ।
खड्गाकृतिः शनिः कार्य्यो राहुस्तु मकराकृतिः ।
सर्पाकृतिस्तथा केतुः कार्य्यो मण्डलपूजने ॥'
मत्स्यपुराणे ।
'देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहिते रताः ।
मध्ये तु भास्करं विद्वान्नोत्तिष्ठं दक्षिणेन तु ॥
उत्तरेण गुरुं विद्वान्बुधं पूर्व्वोत्तरेण तु ।
पूर्व्वेण भार्गवं विद्वात् सोमं दक्षिणपूर्व्वके ॥
पश्चिमेन शनिं विद्वान्राहुं पश्चिमदक्षिणे ।
पश्चिमोत्तरतः केतुं स्थापयेत् मुक्ततण्डुले: ॥*॥
भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्यापि तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्यात् शुक्रस्यापि प्रजापतिम् ।
शनैश्चरस्य तु यमं राहोः कालन्तथैव च ।
केतूनाञ्चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥ * ॥
अग्निरापः क्षितिर्विष्णुरिन्द्रः शक्रो च देवताः ।
प्रजापतिश्च सर्पश्च ब्रह्मा प्रत्यधिदेवताः ॥ * ॥
विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥
संस्मरेन्मन्त्रमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा शेषौ बुधजीवौ च पिङ्गलौ ॥
मन्दराहू तथा ज्ञात्वौ धूम्रं केतुगणं विदुः ।
ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ।
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥
गुड़ौदनं रवेः कुर्य्यात् सोमाय घृतपायसम् ।
संग्रावकं कुजे दद्यात् शालान्नं सोमसूनवे ॥

दध्योदनन्तु जीवाय मृताय च घृतोदनम् ।
अग्नेश्चराय क्षुवरमाज्यमांसञ्च राहवे ।
चित्रौदनन्तु केतुभ्यः सर्व्वभक्षैः समन्वितम् ॥'
स्कन्दपुराणम् ।
'जन्मभूर्गोत्रमेतेषां वर्णस्थानसंख्यानि च ।
योऽज्ञात्वा कुरुते ग्राणिं यज्ञार्थेनावमानितः ॥
उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः ।
अङ्गारकस्त्ववन्त्यान्तु मगधे तु हिमांशुजः ॥
सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा ।
अग्नेश्चरस्तु सौराष्ट्रे राहुर्वैराटिकापुरे ।
अन्तर्वेद्यां तथा केतुरित्येता यज्ञभूमयः ॥
आदित्यः काश्यपो गोत्र आत्रेयश्चन्द्रमा
भवेत् ।
भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः ॥
सुरपूज्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा ।
शनिः काश्यप एवायं राहुः पैठीनसिस्तथा ।
केतवो जैमिनेयाश्च यज्ञा लोकहिते रताः ॥'
कात्यायनः ।
'नदृग्गोत्रजातो यज्ञात्वा होमं यः कुरुते नरः ।
न तस्य फलमाप्नोति न मनुष्यन्ति देवताः ॥
न हुतं न च संस्कारो न च यज्ञफलं लभेत् ।
ब्राह्मणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ ॥
वैश्यौ सोमबुधौ चैव शैषान् शूद्रान् विनि-
र्दिशेत् ॥'
ग्रान्तिदीपिकायाम् ।
'शुक्रार्कौ प्राङ्मुखौ स्याप्यौ ग्रज्ञाङ्गारकौ च
दक्षिणौ ।
उत्तरास्यौ गुरुबुधौ पश्चिमास्यौ शनापरे ॥'
अग्निप्रणयनानन्तरं ग्रहयागमाह वैग्रन्याय-
नः ।
'अग्निप्रणयनं कृत्वा पश्चादावाहयेत् सुरान् ।
मध्ये तु भास्करं विद्यात्कोणस्थं दक्षिणेन तु ॥'
यद्यपि ग्रहादीनां बहवः ग्रब्दा वाचकाः सन्ति
ग्रब्दोपहितचार्थोऽर्थोपहितः ग्रब्दो वा देवता
उभयथापि ग्रब्दनियमात् अविनिगमकः स्यात्
तथापि बहुषु दृष्टत्वात् सूर्य्यादिग्रब्देन ग्रहार्णा
देवतात्वम् । तेन सूर्य्यसोमकुजबुधबृहस्पतिशुक्र-
ग्रनैश्चरराहुकेतुपदैर्देवतात्वम् । अधिदेवता-
नान्तु ताम्रकोमास्कन्दविष्णुब्रह्मेन्द्रयमकाल-
चित्रगुप्तानामेभिरेव पदैः । तथा ग्रत्यधिदेव-
तानाञ्च अग्न्यापपृथिवीविष्णुेन्द्रग्रचीप्रजापति-
ब्रह्मणामेभिरेव पदैः । तथा विनायकदुर्गावा-
युकाग्न्याश्विनामेभिरेव । इति कल्पप्रदीपः ॥*॥
ग्रान्तिदीपिकोक्तध्यानानि प्रयोगे वक्ष्यन्ते ।
लोकपालमन्त्रानाह भविष्ये ।
'न्यासमन्त्रानहं वक्ष्ये लोकपालात्मकानिह ।
इन्द्रस्तु मघवा शीघ्रः सर्व्वदेवाधिपो महान् ।
वज्रहस्तो महासत्त्वस्तस्मै नित्यं नमो नमः ॥
आग्नेयः पुरुषो रक्तः सर्व्वदेवमयोऽव्ययः ।
धूमकेतुरनाधृष्यस्तस्मै नित्यं नमो नमः ॥
यमस्त्वोत्पलवर्णाभः किरीटी दण्डधृक् सदा ।
महिषस्थो विवस्वात्मा तस्मै नित्यं नमो नमः ॥
निर्ऋतिस्तु पुमान् ज्ञेयः सर्व्वरक्षोऽधिपो
महान् ।
खड्गहस्तो महावपुस्तस्मै नित्यं नमो नमः ॥
वरुणो धवलो ज्ञेयः पुरुषो नित्यगाधिपः ।
पाग्रहस्तो महाबाहुस्तस्मै नित्यं नमो नमः ॥
वायुश्च सर्व्ववर्णोऽयं सर्व्वगन्धवहः शुभः ।
पुरुषो ध्वजहस्तश्च तस्मै नित्यं नमो नमः ॥
गौरो यस्तु पुमान् सौम्यः सर्व्वौषधिसमन्वितः ।
नक्षत्राधिपतिः सोमस्तस्मै नित्यं नमो नमः ॥
ईशानः पुरुषः शुभ्रः सर्व्वविद्याधिपो महान् ।
शूलहस्तो विरूपाक्षस्तस्मै नित्यं नमो नमः ॥
पद्मयोनिश्चतुर्व्वक्त्रैर्भवान्तः पितामहः ।
यज्ञाध्यक्षश्चतुर्व्वक्त्रस्तस्मै नित्यं नमो नमः ॥
योऽसावनन्तरूपेण ब्रह्माण्डं सचराचरम् ॥
पुष्यवद्धारयेन्नित्यं तस्मै नित्यं नमो नमः ।
ॐकारपूर्व्वका ह्येते न्यासे बलिनिवेदने ।
मन्त्राः स्युः सर्व्वकार्य्याणां हव्यपुष्पफलप्रदाः ॥'
क्रियाप्रदीपेऽपि राजे ।
'अथवा कामतः कुर्य्यात् स्वस्मारत्नादिनिर्म्मितम् ।
द्विभुजं हंसपृष्ठस्थं दक्षिणेनाभयप्रदम् ॥
वामेन नागपाग्रन्तु धारयन्तं सुभोगिनम् ।
मौलिनं वा महाभागं कारयेदृग्यादसां पतिम् ॥
वामे तु कारयेद्देवीं दक्षिणे पुष्करं शुभम् ।
नागैर्नदीभिर्यादोभिः ससुद्रैः परिवारितम् ॥
कृत्वैवं वरुणं देवं प्रतिष्ठाविधिमाचरेत् ॥'
पुष्करं ततपुत्रम् । तथा प्रसन्नवदनमिति ध्यानं
वक्ष्यते । वरुणमन्त्रोद्धारस्तु तत्रैव ।
'अष्टाविंग्राल्लवोत्तेन चतुर्द्दग्युतेन च ।
अर्द्धेन्दुबिन्दुयुक्तेन प्रणवोद्दीपितेन च ॥'
तेन ॐ वौं इति मन्त्रः ।
'प्रतिमायां स्थितिं कृत्वा प्रणवेन निरोधयेत् ।
पूजयेत् गन्धपुष्पाद्यैः सान्निध्यं पाग्रमुद्रया ॥'
स्थितिं प्राणप्रतिष्ठाम् । निरोधयेत् अन्तर्गता-
कृष्टसृष्ट्यां निरोधमुद्रां दर्ग्ययेत् । दानकल्प-
तरुरत्नाकरयोर्य्यत्कृत्यत्वपरिग्रहम् ॥ अथातो
वरुणविम्बं वापीकूपतडागयज्ञं व्याख्यास्यामः ।
पुण्ये तिथिकरणे शुभे नक्षत्रे प्रतीच्यां दिग्भ-
माश्रित्य प्राक्प्रवणे उदक्प्रवणे वा उदक्-
समीपे अग्निमुपसमाधाय वास्तुं ग्रपयित्वा
आज्यभागान्तं हुत्वा चतस्र आज्याहुतीर्जुहुयात् । ससुद्रज्येष्ठा इति प्रत्यृचं ततो हविषा
अष्टभिर्जुहुयात् । तदायामि ब्राह्मणा वन्द-
मानः इति पञ्च । स्वस्त्योम्ये वरुणस्य विदा-
मिति द्वे इमं मे वरुणं श्रवी हवेति च स्विष्ट-
कृतश्च नवमं नव वै प्राणाः प्राण एव आप-
स्तस्मादापो नवभिर्जुहोति ॥*॥ मार्ज्जनान्ते
धेनुमुपवतारयेत् । अवतार्य्यमाणान्तामनुमन्त्र-
येत् । इदं सलिलं पवित्रं कुरुष्व शुद्धः पूतो
भवतः सन्तु नित्यं तारयन्ती सर्व्वतीर्थाभिषिक्तं
लोकालोकं तरते तीर्य्यते च । इत्यनेन पुष्करायै
यजमानः स्वयं स्नात्वा आचार्य्यमाचार्य्यं उत्तीर्य्य
आपोऽज्ञाज्ञातरः सन्त्वयन्त्विति ऐशान्यां दिग्भि-
उत्थापयेत् । सुयवसा भगवतीह भूया इति
द्वे क्षतयेत् तदा द्वे क्षरन्ती वसुमती वरुणा-
मिति जपेत् । तां सचैलकण्ठां कनकब्रह्मणे
हयपृष्ठां रूप्यखुरां कांस्योपदोहां विप्राय सामगाय दद्यात् दक्षरां वा । यथाशक्ति दक्षिणा च
देया इति । तत उत्सर्गं कुर्य्यात् । दैवंपित्र्य-
मुष्या: ग्रीयन्तां दत्ताद्य ग्रौनक: । यजमानो
ब्राह्मणान् भोजयित्वा स्वस्ति वाचयीतेति ।
अस्यार्थः । तिथ्यादीनां शुभत्वं पूर्व्ववचनेभ्यो
ज्ञेयम् । एवमेव विधिर्गोभिलपारस्करयज्ञोक्त-
कर्म्मानुष्ठानेष्वनुसन्धीयते ।
'यत्राक्षा तं स्वधाक्षायां परोक्तमविरोधि च ।
विहन्त्रिसदनुष्ठेयमग्निहोत्रादि कर्म्मवत् ॥'
इति छन्दोगपरिग्रहात् ॥
ततश्च अग्निमुपसमाधायेति स्वस्त्ययनोक्तविधि-
नाग्निं संस्थाप्य वास्तुं वरुणदेवताकं
चरुं निर्व्वाप्य आज्यभागान्तं हुत्वा इति
छन्दोगैतरपरम् । स तु विरूपाक्षजपान्तां
कुग्डिकां समाप्य महाव्याहृतीर्हुत्वा प्रकृतं
कर्म्म कुर्य्यात् । तत्र प्रथमतः पित्र्यभूमस्तु
इत्यादि पुराणीयं ध्यात्वा अयं त्वं वरुणनामा-
सीति नाम कुर्य्यात् ।
'प्रतिष्ठायां रोहितश्च वास्तुयागे प्रजापतिः ।
जलाग्रयप्रतिष्ठायां वरुणः ससुदाहृतः ॥'
इति स्मृतेः ।
तत आवाह्य पूजयित्वा समिदग्नेप्रणयनान्तरं
महाव्याहृतिहोमं हुत्वा ससुद्रा ज्येष्ठा इत्यादि
चतुर्भिर्मन्त्रैश्चतस्र आहुतीर्जुहुयात् । ॐ महा-
यामीति ॐ तदिदमस्तमिति ॐ सुनःग्रेयो-
हीति ॐ अवते हेडो वरुण इति ॐ उदु-
त्तममिति पञ्चभिः ॐ स्वस्त्योम्ये इति द्वाभ्यां
ॐ इमं वरुण इत्येकेन एवं स्थानत्रयोक्तैरेक-
चोक्तैः प्रत्येकमष्टभिर्मन्त्रैश्चरुं चतुरावर्त्तं अनु-
गोत्रो भार्गवप्रवरश्च पञ्चावत्तं स्रुचा जुहुयात् ।
अग्नये स्विष्टकृते च । ततः कुग्डिकोक्त-
विधिना ग्रेषं समापयेत् । नव वै प्राणा इति
नवाहुतिस्तुतिः । मार्ज्जनान्त इति यजमानाभि-
धिकः । तद्विधानन्तु मत्स्यपुराणे ।
'गजाश्वरथावल्मीकसङ्गमात् नदगोकुलात् ।
नदमादाय कुम्भेषु प्रक्षिपेच्चतुरात्तथा ॥
गोरोचनाञ्च सिद्धार्थान् गन्धान् गुग्गुलुमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चभङ्गसमन्वितम् ।
पूर्णकुम्भैर्महामन्त्रैरेव ह्येता विधानतः ॥'
पञ्चभङ्गाश्च ग्रान्तिकपौष्टिककल्पतरुक्ताः ।
'अश्वत्थोदुम्बरप्लक्षवटचूतस्य पल्लवाः ॥'
महामन्त्रैः । सुरास्त्वामभिषिञ्चन्त्वित्यादिभिः ।
एतत्पर्य्यन्तं कूपेऽपि । कापिले ।
'ऐशान्यां स्थापयेदूपं स्नातात् पश्चकरान्तरम् ।
यूपदीक्षितमन्त्रेण सर्पाकारं सुशोभनम् ।
पूजयित्वा तु वस्त्राद्यैस्ततो यष्टिं प्रचालयेत् ॥'
मात्स्ये ।
'आरक्षिमात्रोच्चयः स्यात् शीर्षच्छन्नविभूषितः ।

यजमानप्रमाणो वा संख्याप्तो भूमिमिच्छता ॥'
क्षीरिवृक्षोऽश्वत्थादिः । ततो धेनुं सपिलकण्ठां
कांस्योपदोहां वस्त्रादिवस्त्रपुष्पोपशोभिताम् ।
सुवर्णशृङ्गीं रौप्यखुरां ताम्रपृष्ठां सुशोभनाम् ॥
लाङ्गूलबालहस्तोऽसौ यजमानः सबान्धवः ।
गुरवे सम्प्रदद्यात्तां सामाचार्याय निवेदयेत् ॥'
कांस्योपदोहां कांस्यक्षीरामिति यावत् ।
कापिले ।
'अजले जलमुत्पाद्य यजमानः सभार्यकः ।
तरेद्वै प्राङ्मुखो भूत्वा ज्ञातगोलाङ्गूलाङ्गुलिः ॥'
इदं सलिलं पवित्रं इतिमन्त्रेणावतार्य्यमाणा-
मनुमन्त्रयेत् । ततः प्राङ्मुखः सन्नवतारयेत् ।
सा च गौः पश्चिमतोऽवतार्या । ततः कूल-
समीपं गत्वा तर्पयेत् । यथा कापिलम् ।
'पुनः पुष्कोदकेनाथ सलिलेन कुशेन तु ।
मुखेनैवापसव्येन पितृतीर्थेन तर्पयेत् ॥
मताश्चागमिष्यन्ति ये कुले मम बान्धवाः ।
ते सर्व्वे तृप्तिमायान्तु मया दत्तजलेन वै ।
ततो सुचामि मन्त्रेण सुधेहां वत्ससंयुताम् ॥'
आचार्य्यं ब्राह्मणान् स्वान् उत्तीर्य्य आपोऽस्माक्षातरः
सुष्ठयन्त्विति मन्त्रेण रेणून्वासत्यापयेत् । सुय-
वसा भगवतीह भूता इति ब्रूयात् । सा यदि
हिंकारं करोति तदा हिं क्षमतीत्यादि जपेत् ।
ततः उक्तविधेयवयुक्तां धेनुमाचार्य्याय सामगाय
दद्यात् । ततो यथाशक्ति दक्षिणाञ्च दद्यात् ।
एतत्पर्य्यन्तं न कूपे अवस्थियतेऽसम्भवात् ॥*॥
ततः उत्सर्गं कुर्य्यात् । अत्र विशेषमाह रत्ना-
करधृतमत्स्यपुराणम् ।
'जलाग्न्याद्यित्य मनसा विविधानि शुभानि च ।
प्रदद्यात् सर्व्वभूतेभ्यो जलपूर्णं जलाशयम् ॥'
कापिलञ्च ।
'ततस्तत्पश्चिमं तीरं गत्वा पूर्व्वाननस्थितः ।
जलोत्सर्गं प्रकुर्व्वीत सर्व्वसत्त्वार्थकं ध्रुवम् ॥'
सर्व्वसत्त्वार्थकं सर्व्वभूतप्रयोजनकम् । सर्व्वभूतेभ्य
उत्सृजेदित्यर्थः । देवपितृमानुष्याः प्रीयन्ता-
मिति पठेदिति शेषः । उत्सृज्य यजमानो
ब्राह्मणान् स्वस्ति वाचयीतेति दक्षिणाभिरिति
शेषः । एतत्पर्य्यन्तं कूपेऽपि । जलाशयोत्सर्गस्य
सर्व्वभूतोद्देश्यकत्वेन अपक्षदशैतगोद्देश्यकत्वेऽपि
नागत्वमपि । ततश्च कीटादेर्मेदमिति स्वीका-
रायोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वाजनकत्वागत्व-
प्रयुक्तं अस्य नागत्वम् । अतएव जलाशयोत्-
सर्गप्रकरण्ये मत्स्यपुराणेऽपि । प्राप्नोति तद्-
यागवशेन भूय इति यागत्वेनाभिहितम् । ततश्च
तज्जलं स्वस्वत्वदूरीकरणेन गवादिवत् साधा-
रणीकृतम् । अतएव
'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम् ।
रमन्तु सर्व्वभूतानि तृप्तिमायान्तु नागवरैः ॥'
[illegible]लिखेन उत्पादनं विना कस्यापि न
स्वत्वमिति । ततश्चास्य यागवदुत्तराप्रतिपत्तेर-
श्रुतत्वात् साधारणजनस्य परित्यक्तमात्रेण गोत-
मोक्तेन स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन
स्वामित्वात् तत्र ज्ञानादावदोष इति तत्त्वम् ।
यथा गोतमः । स्वामी रिक्थग्रहणविभाग-
परित्यक्षाधिगमेषु ब्राह्मणस्याधिकं जलं क्षत्रि-
यस्य विजितं निर्हृतं वैश्यशूद्रयोरिति । परि-
त्यक्षोऽनग्निपूर्व्वस्य जलस्यव्याहारैः स्वीकार
इति मिताक्षरा । अक्षय्याधिकारे वक्ष्यमाणा-
पस्तम्बः । दायादां श्रियोऽन्यो चान्यत्रापरि-
गृहीतमिति । अपरिगृहीतमन्याक्षीणतमस्वा-
मिकमिति यावत् । निर्व्विष्टं वेतनलब्धं निर्व्वेशो
भृतिभोगयोरित्यमरकोषविवेकाक्षीरस्वामी ।
हयशीर्षे ।
'आपोहिष्ठेति तिसृभिः पञ्चगव्यं विनिःक्षिपेत् ।
तीर्थतोयं तथा पुण्यं ग्राम्तितोयं द्विजैः क्षतम् ॥
गोकुलं पाययेत् पश्चात् द्विजान् वेदविदस्तथा ।
ततोऽन्नं भोजयेद्विप्रान् दद्यात्तेभ्यश्च दक्षिणाम् ॥
एतत्पर्य्यन्तं कूपेऽपि ॥ * ॥ कापिले ।
'नागानामष्ट नामानि लिखितानि पृथक् पृथक् ।
ततः कुम्भे च निःक्षिप्य गायत्र्या च विलोड्य वै ॥
उद्धरेत् पत्रिकामेकां तत्रैव नागमीक्षयेत् ।
यस्य नामोद्धरेद्यस्य स वै जलाधिपः स्मृतः ॥
तस्य संपूज्य गन्धाद्यैर्दद्यात् क्षीरञ्च पायसम् ॥'
पद्मपुराणस्य योगीश्वरधृतवचनादृग्यथा ।
'अष्टौ नामान्यात्मपत्रे लिखा चैव प्रयत्नतः ॥'
तानि च गारुडे ।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः ।
कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः ॥'
एतानि नामानि आत्मपत्रे लिखित्वा कलस-
मध्ये निःक्षिप्य गायत्र्या छन्दसा मथ्नामि इति
रघुनाथधृतमन्त्रेणालोड्य यस्य नामोत्तिष्ठति तं
यद्यां समावाह्यानेन नागेनाद्य जलस्य रक्षा
कर्त्तव्या इति ब्राह्मणान् आवयेत् । हयशीर्षे ।
'वेणुकं वारुणञ्चैव पुन्नागं नागकेसरम् ।
बकुलं चम्पकञ्चैव निम्बञ्चैवाथ खादिरम् ॥
एतेषामेव दारूणां नागयष्टिः प्रकीर्त्तिता ।
सवक्त्रकोटरं त्यक्त्वा तत्तात् कुर्य्यादृयथेप्सितम् ॥'
तथा च हरिवंशे ।
'मूलचक्राङ्कितां कृत्वा स्थापयित्वा जलाशये ।
द्वादशाङ्गुलमानन्तु वाप्यौचक्रं प्रकल्पयेत् ॥
षोडशं पुष्करिण्यान्तु विंशतिञ्च सरोवरे ।
सागरे हस्तमात्रन्तु लौहं ताम्रन्तु पैत्तलम् ॥
चक्रञ्च विविधं प्रोक्तं कुर्य्यात्तेषां यथेप्सितम् ।
घृतहस्ता भवेद्वापी द्विगुणा पुष्करिण्यपि ॥
त्रिगुणन्तु सरोमानमत ऊर्द्धन्तु सागरः ॥'
ततो द्वादशपञ्चदशविंशत्यत्रिंशत्यतमकनि-
ष्ठाङ्गुल्यवच्छिन्नहस्तप्रमाणां यष्टिं वक्ष्यमाण-
मन्त्रेण स्थापयेत् । ॐ गन्धद्वारेति गन्धद्वारिका
ॐ भद्रं कर्णेभिरिति तैलहरिद्रया ॐ काण्डात्
काण्डादिति दूर्व्वाभिः ॐ हृषदादिव इत्यादिना
सप्तमृत्तिकादिभिः ॐ मधुवातेति पञ्चाङ्गुलेन

या: फलिनीरिति फलोदकेन ॐ युवासुवासा
इति युग्मवस्त्रिकायुतां पताकां यष्ट्यां बध्नीयात् ।
ॐ यष्ट्यै नमः इतिमन्त्रेण पूजयेत् । पुष्पाद्यल-
कृतां यष्टिं कन्दरवसीपं नयेत् । गुरवस्तु ग्रहादि-
भिःस्तने राजतवस्त्रप्रतिमां उत्तिष्ठेति वसुत्याय
प्रदक्षिणत्रयं कृत्वा आपोहिष्ठा इत्यादिना
मन्त्रेण वस्त्रस्रोतस्त्रजमपि इतिमन्त्रेण च
जले क्षिपेत् । ततस्तत्रैव स्नाते ग्राह्यजगोमय-
दधिमधुकुशग्रमहानदीजलपञ्चरत्नानि ॐ येते-
वायौ रोचने दिव इतिमन्त्रेण क्षिपेत् । ॐ ध्रुवं
ध्रुवेण मनसा इतिमन्त्रेण यष्टिमभिमन्त्र्य ॐ
ध्रुवक्षेतिमन्त्रेण जलमध्ये आरोपयेत् । ततो
जलमातृः पूजयेत् । यथा क्षीं पूर्व्वस्याम् ।
श्रियं आग्नेय्याम् । ह्रीं दक्षिणस्याम् । मेधां
नैर्ऋत्याम् । मह्यां पश्चिमायाम् । विद्यां वाय-
व्याम् । लक्ष्मीं उत्तरस्याम् । सरस्वतीं ऐशा-
न्याम् । अधो विद्याम् । ऊर्द्धे लक्ष्मीम् । पाद्या-
दिभिः संपूज्य अग्निं प्रदक्षिणीकृत्य सूर्य्यादि-
द्वादशग्रहदेवताः पूजयेत् । चमसेति वस्त्रं
चामयेत् । कापिलम् ।
'ग्रहतूर्य्यादिनिर्घोषैर्यथा वै क्षीरधारया ॥'
जलाशयं प्रवेशयेदिति शेषः । प्रतिष्ठावत्तरं
मात्स्ये ।
ततः सहस्रं विप्राणामथवाशक्तितस्तथा ।
भोजयेच्च यथान्यायं पश्चाद्गुरवे निवेदयेत् ॥"
इति जलाशयोत्सर्गतत्त्वम् ॥

पुष्करी, [न्] पुं, (पुष्करमस्त्यस्येति । पुष्कर+
इनिः ।) हस्ती । इति चिकाण्डशेषः ॥

पुष्कलं, क्ली, (पुष्यति पुष्टिं गच्छत्यनेनेति । पुष
+ "कलंच ।" उणा० ४ । ५ । इति कलन् स च
कित् ।) यावचतुष्टयात्मकभिक्षा । यथा,—
"भिक्षामाहुर्यावमात्रमन्नं तच्चावचतुर्गुणम् ।
पुष्कलं ह्यन्नकारन्तु तच्चतुर्गुणमुच्यते ॥"
इति कौर्म्मे उपविभागे १७ अध्यायः ॥
अष्टकुडिपरिमाणम् । यथा, प्रायश्चित्ततत्त्वे ।
"अष्टमुष्टिर्भवेत् कुक्षिः कुक्षयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि आढकः परिकीर्त्तितः ॥"
(नगरविशेषः । यथा, रामायणे ।७।११७।११।
"हतेषु तेषु सर्व्वेषु भरतः कैकयीसुतः ।
निवेद्ययामास तदा सन्दृष्टे हे पुरोत्तमे ॥
तच्चं तच्चाग्निजायाञ्च पुष्कलं पुष्कलावते ।
गान्धर्व्वदेशौ रुचिरे गान्धारविषये च सः ॥")

पुष्कलः, त्रि, (पुष्कं महत्त्वं जातीति । जा+कः ।
यद्वा, पुष्कं पुष्टिर्मङ्गलमिति यावत् तदस्त्य-
स्येति । पुष्क+"सिध्मादिभ्यश्च ।" ५ । २ । ९७ ।
इति लच् ।) श्रेष्ठः । इत्यमरः । ३ । १ । ४८ ॥
बहुः । इति हेमचन्द्रः ॥ (यथा, महा-
भारते । ३ । ३ । १० ।
"राजानो हि महाभागा योगिकर्म्मविशो-
धिताः ।
उद्धरन्ति प्रजाः सर्व्वास्तप आस्थाय पुष्कलम् ॥")
उपस्थितः । इति जटाधरः ॥

पुष्टं, त्रि, (पुष+क्तः।) ज्ञानपोषणम्। तत्पर्य्यायः। पुषितम् २। इत्यमरः। ३।१।६७॥ पतम् ३। इति जटाधरः॥ (यथा, मनुः। ७। १७१।
"यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्। परस्य विपरीतञ्च तदा यायादरिं प्रति॥")

पुष्टिः, स्त्री, (पुष+भावे क्तिन्।) पोषणम्। वृद्धिः। इति मेदिनी। टे, २३॥ (यथा, मार्कण्डेये। २२। ११।
"वैदिकैर्वारुणैर्मन्त्रैः प्रजानां पुष्टिहेतुकैः॥") अश्वगन्धा। इति राजनिर्घण्टः॥ षोड़शमातृकान्तर्गतदेवताविशेषः। इति मात्रतत्त्वम्॥ (सा तु दक्षकन्यानामन्यतमा। यथा, मार्कण्डेये।
"प्रख्याता तथा दक्षतनया विंशतिस्तथा। सवर्णा कन्यालक्षाश्च सप्तैतानामानि मे शृणु॥ श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा॥" शंखपतेः पत्नी। यथा, ब्रह्मवैवर्त्तपुराणे। २। १। ६६।
"पुष्टिर्गंखपतेः पत्नी पूजिता जगतीतले। यया विना परिक्षीणाः पुमांसो योषितोऽपि च॥" खड्गविशेषः। यथाह भोजः।
"मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम्। प्रचण्डा सर्वतोभद्रा खड्गानामाष्टकं विदुः॥" तन्त्रोक्तचन्द्रकलाया नामान्तरम्। यथा, रुद्रयामले।
"अम्बता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः। शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः॥")

पुष्टिका, स्त्री, (पुष्टौ कं जलं यस्याः।) जलयुक्तिः। इति राजनिर्घण्टः॥

पुष्टिकान्तः, पुं, (पुष्टेः कान्तः।) गणेशः। इति शब्दरत्नावली॥

पुष्टिदा, स्त्री, (पुष्टिं ददातीति। दा+कः।) अश्वगन्धा। वृद्धिः। इति राजनिर्घण्टः॥ पुष्टिदात्री च॥

पुष्प, य पुष्पणे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) पञ्चमस्वरी। मूर्द्धन्योपधः। पुष्पणं विकसनम्। य, पुष्पाति कुन्दकोरकम्। इति दुर्गादासः॥

पुष्पं, क्ली, पुष्पाति विकसति यः। (पुष्प पुष्पणे+अच्।) तरुलतादीनां प्रसवः। फुल इति भाषा। तत्पर्य्यायः। प्रसूनम् २। कुसुमम् ३ सुमनस् ४। इत्यमरः। २।४।१७॥ सूनम् ५ प्रसवः ६ सुमनः ७। इति शब्दरत्नावली॥ खड्गस्पुष्पचयनफलं यथा,—
"उपहार्य्याणि पुष्पाणि मम कर्म्मपरायणः। यो मानुषानयेद्भक्त्या मम कर्म्मपथे स्थितः॥ पुष्पाणि तत्र यावन्ति मम मूर्द्धनि धारयेत्। स लभेत पुष्पकं कल्पं मम लोकाय गच्छति॥"
अकर्म्मण्यपुष्पदाने दोषो यथा,—
वराह उवाच।
"अकर्म्मण्येन पुष्पेण यो मामर्चयते भुवि। पातनं तस्य वक्ष्यामि तच्छृणु त्वं वसुन्धरे!॥ नार्चं तत् प्रतिगृह्णामि न च ते वै मम प्रियाः। मूर्खैर्भागवतैर्देयं मम विप्रियकारिणः॥ पतन्ति नरके घोरे रौरवे तदनन्तरम्। अज्ञातस्य च दोषस्य दुःखान्यनुभवन्ति च॥ वानरो दश वर्षाणि मार्जारश्च त्रयोदश। मूषकः पञ्च वर्षाणि बलीवर्दश्च द्वादश॥ छागश्चैवाष्ट वर्षाणि मासं वै ग्रामकुक्कुटः। त्रीणि वर्षाणि महिषो भवत्येव न संशयः॥ एतत्ते कथितं भद्रे! पुष्पं यत्ते न रोचते। अकर्म्मण्यं विजानीहि! पुष्पं ये न ददन्ति वै॥"
इति वराहपुराणम्॥ *॥
देवीप्रियपुष्पाणि यथा,—
"पुष्पाणि देव्या वक्ष्यामि प्रियाणि शृणु संप्रति। वकुलैश्चैव मन्दारैः कुन्दपुष्पकुरण्टकैः॥ करवीरार्कपुष्पैश्च शालमलैश्चापराजितैः। दमनैः सिन्धुवारैश्च सुरभीमरुवकैस्तथा॥ जातिभिर्बन्धुजीवैश्च दूर्व्वाङ्कुरैश्च कोमलैः। मञ्जरीभिः कुशाग्राश्च बिल्वपत्रैः सुशोभनैः॥ पूजयेद्देवतां देवीं कामाख्यां त्रिपुरां तथा। अन्याश्च याः शिवाप्रीत्यै जायन्ते पुष्पजातयः॥ ता इमाः शृणु कौमारि मया वेतालभैरव!॥ मालती मल्लिका जाती यूथिका माधवीलता॥ पाटला करवीरश्च जवा सप्तारिका तथा। कुब्जकं तगरश्चैव कर्णिकारोऽथ रोचनः॥ चम्पकाशोकतिलकौ वाणो वन्धूरा मल्लिका तथा। अशोको लोध्रतिलकौ वटरुग्वग्निरीषकौ॥ ग्रामीपुष्पञ्च द्रोणश्च पद्मोत्पलवकादयः। श्वेतारक्ते जिसम्बे च पलाशः खदिरस्तथा॥ वनमालाश्च सैवल्ली कुसुदोऽथ कदम्बकः। चक्रं कोकनदश्चैव भल्लिको गिरिकर्णिका॥ नागकेशरपुन्नागौ केतक्यञ्जलिका तथा। दोहदा बीजपूरश्च नमेरुः शालमेव च॥ अपूपी चक्रविल्वश्च भिण्टी पञ्चविधा तथा। एवमाद्युक्तकुसुमैः पूजयेत् वरदां शिवाम्॥"*॥
वर्জ্জनीयपुष्पं यथा,—
"पुष्पञ्च क्रमिसंभिन्नं विशीर्णं भग्नसन्ततम्। सकेशं मूषिकाधूतं यत्नेन परिवर्জ্জयेत्॥ याचितं परकीयञ्च तथा पर्য্যुषितञ्च यत्। अन्यस्पृष्टं पदाक्रान्तं यत्नेन परिवर्জ্জयेत्॥"
इति कालिकापुराणे। ६८। ५७। अध्यायः॥
केशवपूजने प्रशस्तपुष्पाणि यथा,—
"मालती मल्लिका चैव यूथिका चातिमुक्तकः। पाटला करवीरश्च जवा सैवन्तिरेव च॥ कुब्जकञ्चगुरुश्चैव कर्णिकारः कुरण्टकः। चम्पकस्तगरः कुन्दो वाणो वन्धूरमल्लिका॥ अशोकस्तिलकश्चम्यस्तथा चैवाटरूषकः। अमी पुष्पप्रकाराश्च प्रोक्ताः केशवपूजने॥ केतकीपत्रपुष्पञ्च पुष्पं भृङ्गारकस्य च। तुलस्यामलकी चैव सद्यस्तुष्टिकरं हरेः॥
पद्माम्बुजसमुत्पन्नि रक्तनीले तथोत्पले। सितोत्पलञ्च ज्ञातव्यं दयितानि सदा नृप!। तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे॥"
इत्यग्निपुराणम्॥ *॥
अपि च।
"जाती प्रतारा सुमना कुन्दं बहुपुटं तथा। वाणञ्च मङ्गलाश्लोकं करवीरञ्च यूथिका॥ पारिभद्रं पाटला च वकुलं गिरिमालिनी। तिलकं वनजञ्चैव पीतकं तगरन्तथा॥ एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने। सुरभीणि तथान्यानि वर्জ্জयित्वा तु केतकीम्॥ येषामपि हि पुष्पाणि प्रशस्तान्यच्युतार्चने। पल्लवान्यपि तेषां स्युः प्रशस्तानि महासुर!॥ वीरधानां प्रदानेन वर्हिषाञ्चार्घ्ययेत्तथा। नानारूपैश्चाम्बुभवैः कमलेन्दीवरादिभिः॥ प्रवालैः शुचिभिः शुद्धैर्जलप्रक्षालितैर्बले!। वनस्पतीनामर्घेण तथा दूर्व्वाग्रपल्लवैः॥"
इति वामने ९१ अध्यायः॥ *॥
विष्णौ पुष्पविशेषदानस्य फलं यथा,—
"आरामप्रभवैः पुष्पैरच्छिद्रैः कीटवर्জ्जितैः। तथापर्য্युषितैस्त्याज्यं कार्त्तिके विष्णुमर्चयेत्॥ वर्णानां हि यथा विप्रस्तीर्थानां जाह्नवी यथा। देवानाञ्च यथा विष्णुः पुष्पाणां मालती तथा॥ मालतीमालया देवं योऽर्चयेद्भक्तवत्सलम्। जन्मदुःखजरारोगैः कर्म्मभिर्मुच्यते नरः॥ मालतीमालया येन पूजितः कार्त्तिके हरिः। पापलक्षायुतं तस्य दहत्यग्निरिवेन्धनम्॥ मालतीपुष्पमालाभिः कार्त्तिके पुष्पमण्डपम्। विष्णोर्गृहे कृतं यैस्तु ते यान्ति परमां गतिम्॥ जातिपुष्पैर्विरचितां मालां यः संप्रयच्छति। विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च। वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः॥ यः स्वर्णकेतकीपुष्पैः पूजयेन्नरकध्वजम्। अब्दकोटिशतं यावत्तुष्टः स्यात्तस्य वै हरिः॥ दामोदरं पूजयेद्यः कुसुमैः केतकोद्भवैः। स वसेद्विष्णुनिलये देवेन सह मोदते॥ मल्लिकाकुसुमैर्हैमैर्यो ऽर्चयेच्छिवदेश्वरम्। कार्त्तिके परया भक्त्या दहेत् पापं त्रिधार्জितम्॥ सुगन्धैर्मल्लिकापुष्पैरच्युतं योऽर्चयेन्नरः। स सर्व्वपापनिर्मुक्तो विष्णुलोके महीयते॥ वेदधर्म्मेण केनापि संग्रामे मधुसूदने। योऽर्चयेत् स मुनिश्रेष्ठ! लभते वैष्णवं पदम्॥ यः पुनः पाटलापुष्पैरर्चयेद्गरुडध्वजम्। सुपुण्यात्मा परं स्थानं स प्रयाति हरेर्गृहे!॥ अगस्त्यपुष्पैर्देवेशं यो ऽर्चयन्ति जनार्द्दनम्। देवर्षे! दुर्गतास्तेषां नरकाग्निः प्रशाम्यति॥ न तत् करोति विप्रेन्द्र! तपसा तोषितो हरिः। यत् करोति क्षणोकेशो मुनिपुष्पैरलङ्कृतः॥ विहाय सर्व्वपुष्पाणि मुनिपुष्पैश्च केशवम्। कार्त्तिके योऽर्चयेद्भक्त्या वाजिमेधफलं लभेत्॥ मुनिपुष्पजातां मालां ये यच्छन्ति जनार्द्दने

शक्रोऽपि तैः समं वत्स ! कुरुते ह्यभिभाषणम् ॥
ददाम्यभीप्सितान् कामान् इत्यचिन्तामणिर्यथा ।
कार्त्तिके तुलसीपुष्पैश्च पूजितो गरुडध्वजः ॥
गवामयुतदानेन यत्फलं कार्त्तिके लभेत् ।
तुलसीपुष्पजैकेन कार्त्तिक्यां तत् फलं लभेत् ॥
यो ऽर्चयन्ति सुराध्यक्षं करवीरैः सितासितैः ।
तेषां वर्षशतं यावत् प्रसुप्तभवति केशवः ॥
वञ्जुलाशोककुसुमैर्ये ऽर्चयन्ति जगत्पतिम् ।
निःशङ्कास्ते भवन्तीह यावच्चन्द्रदिवाकरौ ॥
अशोककुसुमैः रम्यैर्जन्माशोकभयापहम् ।
पूजयित्वा हरिं याति पदं विष्णोरनामयम् ॥
सुभगास्तैः सितैर्वत्स ! कुसुमैः पङ्कजोद्भवैः ।
अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम् ॥
अभ्यर्च्य कौसुमैः पुष्पैः केशवं क्लेशनाशनम् ।
प्रयाति भवनं विष्णोर्ज्वलितं त्रिदशैरपि ॥
अटरूषकपुष्पैश्च पूजयेद्यो जगत्पतिम् ।
स पुण्यवान्नरो याति तद्विष्णोः परमं पदम् ॥
कार्त्तिके योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स न भूयो यमकिङ्करैः ॥
माधवे योऽर्चयेद्विष्णुं तुलसीविल्वपङ्कजैः ।
त्रिदशैरपि पूज्यः स वत्सं भूयो न किङ्करैः ॥
माधवे योऽर्चयेद्विष्णुं सुपुष्पैस्तिलकोद्भवैः ।
धूतपापो निरातङ्कः स विष्णोर्याति तत् पदम् ॥
समित्पुष्पकुशादीनि ओचियः स्वयमाहरेत् ।
मूलोपनीतैश्च हरेः पूजां कुर्वन् व्रजत्यधः ॥
तस्माद्विप्रो मुनिश्रेष्ठ ! शिष्येण स्वयमेव वा ।
पुष्पादीनि समाहृत्य पूजयेत्-परमेश्वरम् ॥
विप्रो दूर्वामयैः पुष्पैस्तथा काशकुशोद्भवैः ।
तुलसीविल्वपत्रैश्च पूजयेद्देवताः पितॄन् ॥
नार्चयेत्तगरैः क्षत्र्यं धत्तपुष्पैश्च केशवम् ।
देवीं जपाप्रपुष्पैश्च शङ्करं नागकेसरैः ॥"
कालविशेषे तस्य पर्युषितत्वं यथा,—
"प्रहरं तिष्ठते जाती प्रहरार्द्धन्तु मल्लिका ।
त्रियामं मुनिपुष्पञ्च करवीरमहर्निशम् ॥"
आम्रमञ्जरीविल्वपत्रादानफलं यथा,—
"मञ्जरीं सहकारस्य ये प्रयच्छन्ति वैष्णवाः ।
कार्त्तिके वसतास्ते सुरगोकोटिपूजकभागिनः ॥
कार्त्तिके योऽर्चयेद्भक्त्या विल्वपत्रेण केशवम् ।
दत्वाद्यश्वायुतफलं केशवस्तस्य वै सुते ! ॥
विल्वपत्रेण ये लक्ष्मीं कार्त्तिके कलिमर्दनम् ।
पूजयन्ति महाभक्त्या मुक्तिस्तेषां करे स्थिता ॥
नागकेसरपुष्पैर्यो पूजयेन्नरकध्वजम् ।
स याति वैष्णवं स्थानं यत्र गत्वा न शोचते ॥
कदम्बकुसुमैर्यो वै पूजयेज्जगदुद्भवम् ।
जन्मायुतार्जितं पापं क्षोटितं तेन नारद ! ॥
न तथा केतकीपुष्पैर्मालतीकुसुमैस्तथा ।
तोषमायाति देवेशः कदम्बकुसुमैर्यथा ॥
दृष्ट्वा कदम्बपुष्पाणि तोषमायाति माधवः ।
किं पुनः पूजितो देवः प्रेमकामप्रदो हरिः ॥
हरिं किंशुकपुष्पैर्यः पूजयेत्रिदशाधिपम् ।
वैकुण्ठे रमते ग्रन्थत् विष्णुना सह वैष्णवः ॥
वर्षाकाले च देवेशं कुसुदैश्चन्दनार्चितैः ।
योऽर्चयेत् परमं विष्णुं संसारे न पुनर्जिनेत् ॥
कुन्दपुष्पैश्च विप्रर्षे ! योऽर्चयेद्गरुडध्वजम् ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥
शमीपुष्पैश्च देवेशं पूजयेदसुरद्विषम् ।
यमं न पश्येद्विप्रर्षे ! न याति दुर्गतिं नरः ॥"
इति पाद्मोत्तरखण्डे १३१ अध्यायः ॥ ॥
लक्ष्मीतुष्टिप्रियपुष्पाणि यथा, नारदीयपुराण-वचने ।
"मालतीबकुलाशोकशेफालिकवमालिकाः ।
अज्ञातनगराद्भोटमल्लिकामधुपिञ्जिकाः ॥
यूथिमष्टापदं कुन्दं कदम्बं मधुपिप्पलम् ।
पाटला चम्पकं लक्ष्मीं लक्षणमतिसुलक्षकम् ॥
केतकं कुरवकं विल्वं काश्मरकरकं द्विजम् ।
पञ्चविंशतिपुष्पाणि लक्ष्मीतुष्टिप्रियाणि मे ॥"
केशवार्चने निषिद्धपुष्पाणि यथा, विष्णुधर्म्मोत्तरे ।
"उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत् ।
अन्यायतनजातानि कण्टकीनि तथैव च ॥
रक्तानि यानि धर्म्मज्ञ ! चैत्यवृक्षोद्भवानि च ।
श्मशानजातान्यन्यानि यानि चाकालजानि च ॥"
तथा ।
"कुटजं भ्राह्मलीपुष्पं शिरीषञ्च जनार्द्दने ।
निवेदितं भयं रोगं निःस्वत्वञ्च प्रयच्छति ॥
बन्धूकपुष्पाणि रक्तान्यपि च दापयेत् ।
अनुत्तरक्तकुसुमदानात् दौर्भाग्यमाप्नुयात् ॥"
परारोपितवृक्षस्य पुष्पग्रहणे दोषः । अगस्त्यः ।
"परारोपितवृक्षेभ्यः पुष्पाण्यानीय योऽर्चयेत् ।
अविज्ञाप्य च तस्यैव निष्फलं तस्य पूजितम् ॥"
एतद्विज्ञेतरपरम् ।
"द्विजस्तूशेधःपुष्पाणि स्वयंतः स्वयमाहरेत् ॥"
इति याज्ञवल्क्यात् ॥
"देवार्थन्तु कुसुममन्येयं मनुरब्रवीत् ॥"
इति वचनात् ॥
"गोऽश्वार्थे तृणमेधांसि वीरुदन्नस्य तोयानाम् ।
पुष्पाणि स्वयदादत्ते पशवः शाखापरिष्टंहितानि ॥"
इति गौतमवचनाच्च ॥
द्विजेतरस्य दत्तोऽपि ।
"तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम् ।
अप्रयच्छन्नियच्छानो दत्तस्यैदमर्हति ॥"
इति स्मृतेः ॥॥
देवोपरि धृतं मस्तकोपरि धृतं अधोवस्त्रधृतं अन्यजनस्पर्शितञ्च पुष्पं दुष्टमिति हरिभक्ति-नामके ग्रन्थे । अभिवाद्याभिवादकहस्तपुष्पं गोऽश्वादेः ग्रहणीयम् । इति केचित् ॥ ॥
याचितादिपुष्पदानस्य निष्फलत्वम् । याचितं निष्फलं पुष्पं क्रयक्रीतञ्च निष्फलमिति वह्नि ।
वामहस्तचिताद्यादिपुष्पस्यादेयत्वं यथा,—
"न पुष्पञ्छेदनं कार्य्यं देवार्थे वामहस्ततः ।
न दद्यात्तानि देवेभ्यः संग्राह्य वामहस्ततः ॥"
समित्पुष्पादीनां स्वयमाहरणीयत्वं हारीत-ग्रातातपौ ।
"समित्पुष्पकुशादीनि ग्राह्यः स्वयमाहरेत् ।
मूलोपनीतैः क्रयतोऽः कर्म्म कुर्वन् पतत्यधः ॥"
क्रये प्रतिग्रहमाह ब्रह्मपुराणम् ।
"पुष्पैर्मूलैश्च नैवेद्यैर्वीरक्रयक्रियाकृतैः ॥"
वीरक्रयी वीरवत् याच्ञाशून्येन विक्रेतृप्रत्यक्ष-लक्षेण क्रयः ॥ ॥ पुष्पदानप्रकारो ज्ञान-माजाताम् ।
"पुष्पं वा यदि वा पत्रं फलं नेष्टमधोक्षजम् ।
पुष्पाञ्जलिविधिं हित्वा यथोत्पन्नं तथार्पयेत् ॥"
मध्याह्नस्नानानन्तरं पुष्पचयनस्य दोषो यथा,—
"स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विजाः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥"
एतत्तु द्वितीयस्नानाभिप्रायम् । इति रत्नाकरः ॥
अन्यत्र मत्स्यसूक्ते ।
"स्नात्वा मध्याह्नसमये न छिन्द्यात् कुसुमं नरः ।
तत्पुष्पस्यार्द्धमेवेह ! रौरवे परिपच्यते ॥"
पुष्पाभावे देयानि यथा, विष्णुधर्म्मोत्तरे ।
"पुष्पाभावेऽपि देयानि पत्राणि च फलानि च ।
पत्राभावे जलं दद्यात्तेन पुण्यमवाप्यते ॥" ॥
पुष्पदानमाहात्म्यं यथा,—
"न रत्नैर्न सुवर्णेन न वित्तेन च भूरिणा ।
तथा प्रसादमायाति यथा पुष्पैर्जनार्द्दनः ॥ ॥
देवताविशेषे वर्ज्जनीयपुष्पं यथा, ज्ञातातपः ।
"शिवे विवर्ज्जयेत् कुन्दसुजातञ्च हरेस्तथा ।
देवीनामर्कमन्दारौ सूर्य्यस्य तगरन्तथा ॥" ॥
पुष्पविशेषाणां कालिकपर्य्युषितत्वम् । भविष्ये ॥
"पद्मानि सितरक्तानि कुसुदाम्बुजपलाशि च ।
एषां पर्य्युषिताग्रहा कार्य्या पञ्चदिनोत्तरम् ॥"
पुष्पविशेषस्यापर्य्युषितत्वं यथा,—
"तुलस्यगस्त्यविल्वानां न च पर्य्युषिताः स्मृताः ॥"
योगिनीतन्त्रे ।
"विल्वपत्रञ्च माल्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसीञ्चैव पद्मञ्च तुलिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यद्यान्यत् कलिकालकम् ॥"
कलिकालकं प्रस्फुटनयोग्यम् । इत्येकादशी-तत्त्वम् । राघवभट्टमते पुष्पविशेषाणां कालिक-पर्य्युषितत्वं यथा,—
"विल्वापामार्गजातीतुलसिबृहतिकेतकीभृङ्ग-पूर्णा
मन्दाभीजाद्रिदर्भा मुनितिलतगरब्रह्मकह्लार-मल्लौ ।
चम्पाचारातिकुब्जीरमबमबबका विल्वतो
ऽष्टरात्रि ग्राह्या-श्चिंशत्तत्रैकार्य्यरीग्रोनिधिनिधि-वसु-भू भू यमा भूय एवम् ॥"
अस्यार्थः । ग्रहा ग्रहावरी । मन्दः मन्दारः । अद्रिर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः करवीरः । कुब्जी पाटला । विल्वमारभ्य अद्रि-पर्य्यन्तं गृहीत्वा दर्भमारभ्य पुनश्चिंशदादि गणयेत् । एतद्विनोत्तरं पर्य्युषितानीत्यर्थः । इति पदार्थादर्शः ॥ ॥ पुष्पक्रीड़ायां वर्ज्जनीयानि यथा,

पुष्पचयनम् १ पुष्पार्पणे दयितार्थिता २ माला ३ गोचखलनेर्षा ४ वक्रोक्तिः ५ सम्भ्रमाक्षेप: ६ । इति कविकल्पलता ॥ (घोटकलक्षणविशेष: । यथा, अश्ववैद्यके । १ । ८२—९२ ।

"आगन्तवस्तुरङ्गस्य ये भवन्त्यन्यवर्णगा: । विन्दव: पुष्पसंज्ञास्तु ते हिताहितसंज्ञका: ॥ तेषां प्रदक्षिणेनैव लक्षणं यद् व्यवस्थितम् । तत्तथैव समासेन विस्तरं कोऽभिधास्यति ॥ ललाटे च ललाटे च भ्रुवोर्मध्येऽपि कर्णयो: । निशाते चैव केशान्ते पुष्पं ध्वजतमं स्मृतम् ॥ स्कन्धे वक्षसि कक्षे च सुक्ष्मयोर्बाहुकेशयो: । हन्वो: पृष्ठे च वाङ्गानां पुष्पं स्वामिहितप्रदम् ॥ नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम् । पुष्पं ध्वजतमं प्रोक्तं भर्तु: सर्वार्थसाधकम् ॥ अप्रशस्तानि दृष्टानि सुनिभिर्यानि वाजिनाम् । तानि सम्यक् प्रवक्ष्यामि पुष्पाणामागमदर्शनात् ॥ अधरोष्ठे कटे ग्रीवे उत्तरोष्ठे तथैव च । घोषायां गण्डयोश्चैव भ्रुवयोश्च तथा भ्रुवो: ॥ ग्रीवायाश्च वहे चैव लक्षणो: स्फूरके स्फिचि । पार्श्वौ क्रोडे च पुष्पाणि निन्दितानीति निश्चय: ॥ रक्तं पीतं तथा कृष्णं पुष्पं सर्वत्र नेष्यते । शुभप्रदेशसञ्जातं भवेत् साधारणं तत: ॥ पुत्रलाभं धनप्राप्तिमारोग्यं विजयं तथा । विन्द्यात् पुष्पै: शुभैर्भूरशुभैश्च विपर्ययम् ॥ सर्वाङ्गपुष्पिणो वाजी परित्याज्यो न संशय: ॥") क्षीरज: । (यथा, मार्कण्डेये । ५९ । ४२ ।

"स्त्रीणां पुष्पं हरत्यन्या प्रदत्तं सा तु कन्यका ॥") विकार्ण: । इति मेदिनी । णे, ८ ॥ धनदस्य विमानम् । नेत्ररोगविशेष: । इति हेमचन्द्र: ॥ फुली इति भाषा ॥ अस्यौषधं यथा,—

"हरीतकी वचा कुष्ठं पिप्पली मरिचानि च । विभीतकस्य मज्जा च गुडनाभिर्मन:शिला । सर्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ॥ नाशयेत्तिमिरं कृत्स्नं पटलान्यर्बुदानि च । अधिकानि च मांसानि यच्च रात्रौ न पश्यति ॥ अपि द्विवार्षिकं पुष्पं मासमेकेन साधयेत् । वर्त्तिश्चन्द्रोदया नाम कृत्वा दृष्टिप्रसादनी ॥"

इति चक्रपाणिदत्त: ॥

(अस्य चिकित्सान्तरं यथा,—

"पूर्व्वाहारविहारेषु नेत्रे पुष्पञ्च जायते । प्रथमं सुखसाध्यं स्यात् द्वितीयं कष्टसाध्यकम् ॥ तृतीयं दु:खसाध्यन्तु चतुर्थन्त्वसाध्यकम् । गुडपुष्पं यथा रोधं गुडनाभिर्मन:शिला ॥ काञ्जिकेन तु संपेष्य छायाशुष्का भिषग्वर ! । वातिके काञ्जिकेनापि पैत्तिके पयसा हिता ॥ श्लैष्मिके मूत्रसंयुक्ता पुष्पस्याञ्जनतो हिता ।"

इति हारीते चिकित्सितस्थाने चतुश्चत्वारिंशत्तमेऽध्याये ॥)

पुष्पकं, क्ली, (पुष्पमिव पुष्पेवा कायति प्रकाशते इति । कै + कः । पुष्प + संज्ञायां कन् वा ।) रीतिपुष्पम् । (पुष्पमिव प्रतिभाति: । पुष्प + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) धनदस्य विमानम् । (कालपर्य्यायेण धनदं विजित्य रावणेन हृते ऽस्मिन् रावणस्यैव जातम् । यथा, रघौ । १० । ७६ ।

"वैमानिका: पुष्पकसंज्ञमध्वनि व्यलङ्घयन्त्रुं मरुतां पथि । पुष्पकालोकसंक्षोभं मेघावरणतत्परा: ॥") नेत्ररोग: । रत्नकङ्कणम् । रक्षाबन्धनम् । लोहकांस्यम् । स्वर्णकारशुक्तिका । इति मेदिनी ॥ कांस्यम् । इति हेमचन्द्र: ॥ (पुष्प + स्वार्थे कन् । पुष्पम् । यथा, गारुडे १८७ अध्याये ।

"सन्नाभिमन्त्रितं कृत्वा करवीरस्य पुष्पकम् । स्त्रीणामग्रे भ्रामयेच्च यत्राङ्गे सा वशा भवेत् ॥"

पुं, निर्व्विषसर्पजातिभेद: । यथा, सुश्रुते कल्पस्थाने । ४ अध्याये ।

"निर्व्विषास्तु गलगोली मूकपक्षोऽजगरो दिव्यको वर्षाभिक: पुष्पशकली ज्योतीरथ: शौरिक: पुष्पकोऽतिपताकोऽन्याहिको गौराहिको दर्व्वीमुख इति ॥" ❀ ॥ पर्व्वतभेद: । यथा, मार्कण्डेये । ५५ । १३ ।

"स्वर्णशृङ्गो ग्रामशृङ्गो पुष्पको मेघपर्व्वत: ॥" प्रासादस्य मञ्चभेद: । यथा विश्वकर्म्मप्रकाशे । ६ अध्याये ।

"अथात: संप्रवक्ष्यामि मञ्चपानाच्च लक्षणम् । मञ्चपान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपत: ॥ विविधा मञ्चपा: कार्य्या: श्रेष्ठमध्यकनीयस: । नामतस्तान् प्रवक्ष्यामि शृणुध्वं द्विजसत्तमा: ॥ पुष्पक: पुष्पभद्रश्च सुहृतो नन्दनन्दन: । कौशल्यो वृद्धिसंकीर्णो गजभद्रो जयावह: ॥")

पुष्पकरण्डकं, क्ली, (पुष्पाधार करण्ड इव कायतीति । कै + कः । बहुतरमनोरमपुष्पाधारकत्वादस्य तथात्वम् ।) उद्यानस्थां शिवस्य उद्यानम् । यथा, शब्दमाला ।

"महाकालस्योज्जयनी विद्यालावन्तिका तथा । तस्य उद्यानकं ज्ञेयं नाम्ना पुष्पकरण्डकम् ॥"

पुष्पकरण्डिनी, स्त्री, (पुष्पकरण्डकं शिवोद्यानमस्त्यस्या इति । इनि: । स्त्रियां ङीप् ।) उज्जयिनी । यथा, हेमचन्द्र: । ४ । ४१ ॥

"उज्जयिनी स्यादिह्मालावन्ती पुष्पकरण्डिनी ॥"

पुष्पकालीसं, क्ली, (पुष्पमिव कालीसम् ।) पीतवर्णकालीसम् । यथा, भावप्रकाशे ।

"अथ कालीसं भल्लातवृन्ताकाम्लम् । कालीसं धातुकालीसं पांशुकालीसमित्यपि । तदेव किञ्चित् पीतन्तु पुष्पकालीसमुच्यते ॥ कालीसमम्लमुष्णञ्च तिक्तञ्च सुतरां तथा । वातश्लेष्महरं कोष्ठं नेत्रं कण्डूविषप्रणुत् । मूत्रशस्त्राग्निदीप्तिभ्रमनाशनं परिकीर्त्तितम् ॥"

तत्पर्य्याय: । कंसकम् २ नेत्रौषधम् ३ । इति हेमचन्द्र: ॥ वत्सकम् ४ मलीमसम् ५ दृक्षम् ६ विषदम् ७ नीलन्तिका ८ । अस्य गुणा: । तिक्तत्वम् । पीतत्वम् । नेत्रामयापहत्वम् । क्षेपेण पामाकुष्ठादिनाशत्वम् दोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुष्पकीट:, पुं, (पुष्पप्रिय: कीट: ।) भ्रमर: । इति त्रिकाण्डशेष: ॥ कुसुमञ्जमिमाचष्ट ॥

पुष्पकेतन:, पुं, (पुष्पं केतनं ध्वजो यस्य ।) कामदेव: । इति हेमचन्द्र: । २ । १४२ ॥

पुष्पकेतु, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य केतुरिव विनाशकत्वात् ।) कुसुमाञ्जनम् । इत्यमर: । २ । ६ । १०३ ॥

पुष्पघातक:, पुं, (हन्तीति । हन + ण्वुल् । घातक: । पुष्पाणां पुष्पवृक्षाणां घातक: नाशक: ।) वेधा: । इति शब्दमाला ॥

पुष्पचाप:, पुं, (पुष्पमेव पुष्पमयो वा चापोऽस्य ।) कामदेव: । इति हेमचन्द्र: । २ । १४१ ॥ (यथा, कथासरित्सागरे । १४ । ७६ ।

"सा संमोहनवाशयवाकर्षणास्त्रैर्निरन्तरै: । विद्धेव पुष्पचापेन तत्क्षणं समलक्ष्यत ॥"

पुष्पाणां चाप: । पुष्पधनु: । यथा, रघौ ।११।४५।

"आततज्यमकरोत् स संसदा विक्षयस्त्रिमितनेत्रमीक्षित: । शैलसारमपि नातियत्नत: पुष्पचापमिव पेशलं स्मर: ॥")

पुष्पचामर:, पुं, (पुष्पं चामर इवास्य ।) द्रुमवृक्ष: । इति त्रिकाण्डशेष: ॥ केतकवृक्ष: । इति शब्दमाला ॥

पुष्पद:, पुं, (पुष्पं ददातीति । दा + कः ।) वृक्ष: । इति हेमचन्द्र: । ४ । १८० ॥ पुष्पदातरि, त्रि ॥

पुष्पदन्त:, पुं, (पुष्पमिव शुक्लो दन्तोऽस्य ।) वायुकोणस्थदिग्गज: । इत्यमर: ।१।३।४॥ विद्याधरविशेष: । इति मेदिनी । ते, २१३ ॥ जिनभेद: । इति हेमचन्द्र: ॥ नागभेद: । इति धरणि: ॥ (यथा, महाभारते । ७ । २०० । ७० ।

"अर्जी क्षत्वेलपुत्रश्च पुष्पदन्तश्च नाम्बक: ॥"

पार्व्वतीप्रदत्त: कार्त्तिकेयस्यानुचरविशेष: । यथा, महाभारते । ६ । ४५ । ४६ ।

"उल्कादं पुष्पदन्तञ्च गुह्यकार्यौ तथैव च । प्रददावग्निपुत्राय पार्व्वती शुभदर्शना ॥"

विष्णोरनुचरविशेष: । यथा,भागवते ।८।२१।१७।

"जयन्त: श्रुतदेवश्च पुष्पदन्तोऽथ सात्वत: ॥"

शिवगणभेद: । यथा, कथासरित्सागरे ।१।४६।

"प्रसादवित्तक: शुक्लो: पुष्पदन्तो गणोत्तम: । त्र्यक्षेण च प्रवेशोऽस्य नन्दिना द्वारि तिष्ठता ॥")

पुष्पदन्तक:, पुं, गन्धर्व्वविशेष: । स च मल्लिका: स्रष्टकर्त्ता । इति शब्दरत्नावली ॥

पुष्पधव:, पुं, (पुष्पाणां धव: ।) पुष्परस: । तत्पर्य्यायं: । पुष्पसार: २ पुष्पसेद: ३ पुष्पज: ४ पुष्पनिर्य्यासक: ५ पुष्पाम्बुज: ६ । अस्य गुणा: । सुरभित्वम् । शीतत्वम् । कषायत्वम् । गौरत्वम् । दाहत्वमार्त्तवमिमोहसुखामयत्वञ्चार्शःपित्तकफदोषविषरोचकनाशित्वम् । सरत्वम् । सन्तर्पणत्वञ्च । इति राजनिर्घण्टः ॥

पुष्पधन्वा, [न्] पुं, (पुष्पं धनुरस्येति । "अनुपसर्जनात्" ५ । ४ । १२२ । इति अनङ्भावेऽपि: ।)

कामदेवः । इत्यमरः । २ । १ । २७ ॥ (यथा, कुमारसम्भवे । २ । ६७ ।
"सद्यश्चरमधुकलव्यक्तचूताङ्कुराक्तः
मुतमसमपतत्ते प्राञ्जलिः पुष्पधन्वा ।")

पुष्पनिधः, पुं, (पुष्पं निधत्ते पुष्यतीति । पुष्प + निधा + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) भ्रमरः । इति शब्दचन्द्रिका ॥

पुष्पन्धयः, पुं, (पुष्पं धयतीति । धेट पाने + खश् । "अवर्णेवर्णस्य ।" ६ । १ । ६७ । इति सुम् ।) भ्रमरः । इति राजनिर्घण्टः ॥ पुष्परसपानकर्त्तरि, त्रि । पुष्पशब्दाद्धेटधातोः कर्त्तरि खश्प्रत्ययनिष्पन्नत्वात् । इति सुग्धबोधव्याकरणम् ॥

पुष्पपथः, पुं, (पुष्पस्य खौरजसः पन्थाः सरणिः ।) वोथिः । इति त्रिकाण्डशेषः ॥

पुष्पपुरं, क्ली, (पुष्पवत् पाटलिपुष्पयुक्तं तद्वत् शोभाजनकं वा पुरम् ।) पाटलिपुत्रनगरम् । इति भूरिप्रयोगः ॥ (यथा, रघौ । ६ । २७ ।
"अनेन सेदिष्यसि यज्ञमार्यं
पार्श्वं वरेण्येन कुरु प्रवेशं ।
प्रासादवातायनसंश्रितानां
नेत्रोत्सवं पुष्पपुराङ्गनानाम् ॥"
"पुष्पपुराङ्गनानां पाटलिपुराङ्गनानाम् ।" इति तट्टीकायां मल्लिनाथः ॥)

पुष्पफलः, पुं, (पुष्पयुक्तं फलं यस्य ।) कूष्माण्डः । इति शब्दमाला ॥ कपित्थः । इत्यमरः । २ । ४ । २१ ॥

पुष्पमासः, पुं, (पुष्पाणां मासः पुष्पप्रधानो मासो वा ।) वसन्तः । इति राजनिर्घण्टः ॥ (यथा, हरिवंशे । ५६ । ७ ।
"मासान् वै पुष्पमासादीन् गणयन्तु मम स्त्रियः ।
परिणामे तु गर्भस्य प्रेषं ज्ञास्यामहे वयम् ॥")

पुष्परक्तः, पुं, (पुष्पे पुष्पावच्छेदे रक्तं रक्तवर्णमस्य । यद्वा, पुष्पं रक्तमस्य ।) सूर्य्यमणिद्वक्षः । इति शब्दचन्द्रिका ॥

पुष्परसः, पुं, (पुष्पाणां रसः ।) मकरन्दः । इत्यमरः । २ । ४ । १७ ॥ (यथा, भावप्रकाशे कासाधिकारे ।
"पलं पलाच्चापि कटुत्रयस्य
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विमिःक्षिपेत्तत्र विमिश्रयेच्च ॥")

पुष्परसाक्षयं, क्ली, (पुष्परस इत्याख्य आक्षा यस्य ।) मधु । इति राजनिर्घण्टः ॥

पुष्पराग:, पुं, (पुष्पस्येव रागो वर्णोऽस्य ।) मणिविशेषः । पुखराज इति भाषा । तत्पर्य्यायः । मञ्जुमणिः २ वाचस्पतिवल्लभः ३ । इति भावप्रकाशः ॥ पीतः ४ पीतस्फटिकः ५ पीतरत्नः ६ पीताक्ष ७ गुरुरत्नम् ८ पीतमणिः ९ पुष्परागः १० ॥ (यथा, रघौ ।१८।३२।
"तस्य प्रभा निर्च्छितपुष्परागं
पौष्यान्निशौ पुष्यमयूखतप्तौ ॥"
"प्रभया निर्च्छितः पुष्परागो मणिविशेषो येन ।" इति तट्टीकायां मल्लिनाथः ॥) अस्य गुणाः । अम्लत्वम् । शीतत्वम् । वातनाशित्वम् । दीपनत्वञ्च ॥ ॥ तस्य धारणगुणः । आयुःश्रीप्रज्ञाकारित्वम् ॥ ॥ तस्य लक्षणं यथा,—
"सुच्छायपीतगुरुगात्रसुरङ्गयुक्तं
स्निग्धञ्च निर्म्मलमतीव सुवृत्तशीतम् ।
यः पुष्परागसकलं कलयेदसुभ्य
पुष्णाति कीर्त्तिमतिशौर्य्यसुखायुरर्थान् ॥" ॥
तस्य कुलक्षणं यथा,—
"लक्ष्माविन्दुहितं रूक्षं धवलं मलिनं लघु ।
विच्छायं शर्करागारं पुष्परागं सदोषकम् ॥"
तस्य परीक्षालक्षणे यथा, राजनिर्घण्टे ।
"इष्टो विकाशयेत् पुष्परागमधिकमालीयम् ।
न खलु पुष्परागो जात्यतया परीक्षकैरुक्तः ॥"
तस्योत्पत्त्यादि यथा,—
सूत उवाच ।
"पतिता या हिमाद्रौ हि त्वचस्तस्य सुरद्विषः ।
प्रादुर्भवन्ति नाभ्यस्तु पुष्परागा महागुणाः ॥
आपीतपाण्डुरचिरः पाषाणः पुष्परागसंज्ञस्तु ।
कौरटकनामा स्यात् स एव यदि लोहितापीतः ॥
आलोहितस्तु पीतः स्वच्छः कषायकः स एवोक्तः ।
आनीलशुक्लवर्णः स्निग्धः सोमालकः सगुणः ॥
अत्यन्तलोहितो यः स एव खलु पद्मरागसंज्ञः स्यात् ।
अपि चेन्नीलसंज्ञः स एव कथितः सुनीलः सन् ॥
मूलं वैदूर्य्यमणेरिव गदितं तस्य रत्नशास्त्रविदा ।
धारणफलञ्च तद्वत् किन्तु स्त्रीणां सुतप्रदो भवति ॥"
इति गारुडे ७५ अध्यायः ॥ ॥
प्रकारान्तरम् ।
"शुक्लपुष्पसमः कान्त्या स्वच्छभावस्तु चिक्कणः ।
पुष्पदो धनदः पुण्यः पुष्परागमणिर्वरः ॥
दैत्यधातुसमुद्भूतः पुष्परागमणिर्द्विधा ।
पद्मरागाकरे कश्चित् कश्चित्तार्क्ष्योपलाकरे ॥
ईषत्पीतच्छविच्छायास्वच्छं कान्त्या मनोहरम् ॥
पुष्परागमिति प्रोक्तं रत्नसोममहीभुजा ॥
ब्रह्मादिजातिभेदेन तद्विज्ञेयं चतुर्विधम् ।
छाया चतुर्विधा तस्य सिता पीता सितासिता ॥"
इति युक्तिकल्पतरुः ॥

पुष्परेणुः, पुं, (पुष्पाणां रेणुः ।) परागः । इति शब्दरत्नावली ॥ (यथा, रघौ । १ । ६८ ।
"सेव्यमानौ सुखस्पर्शैः शीतनिर्झरवारिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ॥")

पुष्परोचनः, पुं, (पुष्पं रोचनेवास्य । पुष्पेषु रोचनः रुचिप्रदो वा ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

पुष्पलावः, पुं, (पुष्पं लुनाति अवचिनोति मालार्थमिति । पुष्प + लू + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) मालाकारः । इति जटाधरः ॥ (स्त्रियां ङीप् । मालाकारपत्नी । यथा, मेघदूते । ९८ ।
"गण्डस्वेदापनयनरुजा क्लान्तकर्णोत्पलानां
छायादानक्षणपरिचितः पुष्पलावीमुखानाम् ॥")

पुष्पलावी, [नृ] पुं, (पुष्पं लुनातीति । लूञ् + ण्विनिः ।) मालाकारः । इति हेमचन्द्रः । ३ । ५६८ ॥

पुष्पलिट्, [ड्] पुं, (पुष्पं लेढ़ीति । लिह + क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥

पुष्पवती, स्त्री, (पुष्पमस्त्यस्या इति । पुष्प + मतुप् । मस्य वः । ततो ङीप् ।) रजस्वला । इत्यमरः । २ । ६ । २० ॥ (यदुक्तं,—
"कालमेघी भवेत् सोऽपि पुष्पवत्याश्च सङ्गतात् ॥"
तीर्थविशेषः । यथा, महाभारते । ३ । ८५ । १२ ।
"पुष्पवत्यामुपस्पृश्य शिरसोपस्थितो नरः ।
गोसहस्रफलं लब्ध्वा पुनाति सकुलं नृप ! ॥")
पुष्पविशिष्टे, त्रि ॥ (यथा, रामायणे । २ । ६३ । १० ।
"पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ॥")

पुष्पवन्तौ, पुं, (पुष्प विकासे + भावे क्त्र । पुष्पो विकासोऽस्त्यनयोरिति । पुष्प + मतुप् । मस्य वः ।) एकयोक्त्या चन्द्रसूर्य्यौ । इत्यमरः । १ । ३ । १० ॥
"एकया उक्त्या अपृथग्वचनेन चन्द्रार्कौ पुष्पवच्छब्दवाच्यौ न तु पुष्पवानिन्दुः सूर्य्यो वेत्यभिधीयते । वाह्ने । एकयोक्तेति भिन्नप्रयोगे नैवेत्यर्थः । अतएव ह्यर्थकत्वात् सदा द्विवचनमित्यर्थः । पुष्पो विकाशयुक्तदृग्योगाद्धेतुः । पुष्पवन्तशब्दोऽन्तो रूढ्योऽपि रविवह्नियोगौ पुष्पवन्तावितिनाममाला ।" इति तट्टीकायां भरतः ॥

पुष्पवाटी, स्त्री, (पुष्पाणां वाटी ।) पुष्पोद्यानम् । फुलबागान इति भाषा ॥ यथा, हेमचन्द्रः । ४ । १७६ ॥ [विका ॥"
"वाटी पुष्पादृक्षवाटौ क्षुद्रारामः प्रसे-

पुष्पवाहनः, पुं, (पुष्पं पुष्करं वाहनमिव यस्य ।) पुष्करराजः । यथा, अग्निपुराणे ।
"राजा ययौ क्षयं पुत्रकरोत् पुष्पवाहनः ।
विभूतिद्वादशीं कृत्वा स गतः परमां गतिम् ॥"

पुष्पशकटी, स्त्री, आकाशयायी । यथा,—
"चित्रोक्तिः पुष्पशकटी देवप्रश्न उपश्रुतिः ॥"
इति त्रिकाण्डशेषः ॥

पुष्पशरः, पुं, (पुष्पाणि शरा यस्य ।) कन्दर्पः । कुसुमेषुदर्शनात् ॥

पुष्पशरासनः, पुं, (पुष्पं शरासनं धनुर्यस्य ।) कन्दर्पः । पुष्पधन्वदर्शनात् ॥

पुष्पशूलः, पुं, (पुष्पेण शूलः ।) उदुम्बरः । इति राजनिर्घण्टः ॥ कुसुमरहिते, त्रि ॥

पुष्पसमयः, पुं, (पुष्पाणां समयः ।) वसन्तः । इत्यमरः ॥

पुष्पसारः, पुं, (पुष्पस्य सारः ।) पुष्पद्रवः । इति राजनिर्घण्टः ॥ (पुष्पप्रधाने, त्रि । यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"पुष्पसारां नल्विनीञ्च तुलसीं शस्यजीवनीम् ॥")

पुष्पसौरभा, स्त्री, (पुष्पे सौरभं यस्याः। नीव्रग्रन्थवत्त्वादेव तथात्वम्।) कलिकारीवृक्षः। इति राजनिर्घण्टः॥

पुष्पस्वेदः, पुं, (पुष्पाणां स्वेदः।) पुष्परसः। इति राजनिर्घण्टः॥

पुष्पहासा, स्त्री, (पुष्पं स्त्रीरजः हास इव यस्याः।) रजस्वला। इति शब्दरत्नावली॥

पुष्पहीना, स्त्री, (पुष्पेण हीना।) उदुम्बरवृक्षः। इति शब्दचन्द्रिका॥ निष्फला। रजःशून्या। इति हेमचन्द्रः॥

पुष्पा, स्त्री, (पुष्पं अभिधेयत्वेनाऽस्त्यस्या इति। अच्। टाप्।) कर्णपुरी। अधुना भागलपुर इति ख्याता। तत्पर्य्यायः। चम्पा२ मालिनी३। इति त्रिकाण्डशेषः॥

पुष्पाजीवः, पुं, (पुष्पैराजीवति जीविकां निर्वाहयतीति। आ+जीव+अच्।) मालाकारः। इति हेमचन्द्रः। २। १५४॥

पुष्पाजीवी, [न्] पुं, (पुष्पैराजीवतीति। आ+जीव+णिनिः।) मालाकारः। इति जटाधरः॥

पुष्पाञ्जनं, क्ली, (पुष्पस्य नेत्ररोगविशेषस्य अञ्जनम्।) अञ्जनभेदः। तत्पर्य्यायः। पुष्पकेतु २ कौसुम्भम् ३ कुसुमाञ्जनम् ४ रौतिकम् ५ रौतिपुष्पम् ६ पौष्पकम् ७। तस्य गुणाः। स्निग्धत्वम्। पित्तश्लेष्मास्रदाहविषकासार्शिसर्व्वनेत्रामयनाशित्वञ्च। इति राजनिर्घण्टः॥

पुष्पाञ्जलिः, पुं, (पुष्पाणामञ्जलिः।) कुसुमाञ्जलिः। प्रकृताञ्जलिः। यथा,—

"मन्त्र पुष्पाञ्जलीन्दत्त्वा परिवारार्चनञ्चरेत्॥"

इति तन्त्रसारधृतभद्रः॥

पुष्पावचायी, [न्] पुं, (पुष्पं अवचिनोतीति। अव+चि+णिनिः।) मालाकारः। इति हेमचन्द्रः। २। ५६४॥

पुष्पासवं, क्ली, (पुष्पस्य आसवम्।) मधु। इति राजनिर्घण्टः॥ (यथा, ऋतुसंहारे। ५। ५।

"गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपङ्कजाः॥")

पुष्पास्त्रः, पुं, (पुष्पमस्त्रमस्य।) कन्दर्पः। इति शब्दरत्नावली॥

पुष्पाह्वा, स्त्री, (पुष्पैराह्वयते अर्च्यते इति। आ+ह्वे+कः। ततष्टाप्।) घृतपुष्पा। इति राजनिर्घण्टः॥

पुष्पिका, स्त्री, (पुष्पमिति विकसतीवेति। पुष्प+ष्वुन्। टापि अत इत्वम्।) दन्तमलम्। इति शब्दरत्नावली। १८५॥ लिङ्गमलम्। इति हेमचन्द्रः। ३। २८८॥ अध्यायान्ते तत्प्रतिपादितोक्तिः॥

पुष्पितः, त्रि, (पुष्प+क्तः। पुष्पं जातमस्येति। पुष्प+तारकादित्वात् इतच् वा।) जातपुष्पः। पुष्पविशिष्टः। कुसुमितः। यथा,—

"एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना।
वासितं तद्वनं सर्व्वं सुपुत्रेण कुलं यथा॥"

इति चाणक्यः॥

पुष्पिताग्रा, स्त्री, (पुष्पितं विकसितमिवाग्रं यस्याः।) छन्दोविशेषः। तस्य लक्षणम्। यथा,—

"अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा॥"

उदाहरणम्।

"करकिसलयशोभया विभाती
कुचफलभारविनम्रदेहयष्टिः।
स्खलतरुचिरविलासपुष्पिताग्रा
व्रजयुवतिव्रततौ हरेर्मुदेऽभूत्॥"

इति छन्दोमञ्जरी॥

पुष्पेषुः, पुं, (पुष्पं इषुर्यस्य।) कामदेवः। इति हेमचन्द्रः। २। १७१॥ (यथा, कथासरित्सागरे। ७। १६।

"तुल्याभिलाषामालोक्य स चैकां सुनिकन्यकाम्।
ययावकस्मात् पुष्पेषुशराघातरसङ्गताम्॥")

पुष्पः, पुं, (पुष्पन्त्यस्मिन्नर्था इति। पुष्प+"पुष्पमिन्द्रौ वक्तव्ये।" ३। १। ११६। इति क्थप्।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टमनक्षत्रम्। तत्तु बाणाकारैकतारात्मकम्। इति ज्योतिषम्॥ तत्पर्य्यायः। सिध्यः २ तिष्यः ३। इत्यमरः। १। ३। २२॥ पुष्या ४। इति भरतः॥ (यथा, मनुः। ४। ६६।

"पुष्ये तु छन्दसां कुर्य्याद्बहिरत्तसर्व्वणं द्विजः॥")

तस्य स्वरूपं यथा,—

"बालपीठकठिनीरजःप्रभे
मध्यमाश्रितविहायसे गुरौ।
तौषिकात् पृथगवलोचने
लोचनाद्विकृमितागताः कलाः॥"२।५२॥

इति कालिदासकृतराशिलग्ननिरूपणम्॥*॥

तत्र जातस्य फलम्।

"प्रसन्नगात्रः पितृमातृभक्तः
स्वधर्म्मयुक्तोऽभिनयाभियुक्तः।
भवेन्मनुष्यः खलु पुष्यजन्मा
सम्मानधामौकरवाहनाढ्यः॥"

इति कोष्ठीप्रदीपः॥

तन्नक्षत्रे गङ्गास्नानफलं यथा,—

"संक्रान्तिषु व्यतीपाते ग्रहणे चन्द्रसूर्य्ययोः।
पुष्ये स्नात्वा तु जाह्नव्यां कुलकोटीः समुद्धरेत्॥"

इति ब्रह्मवैवर्त्तपुराणम्॥*॥

पौषमासः। कलियुगः। इति मेदिनी। षे, ३८॥ (सूर्य्यवंशीयनृपविशेषः। यथा, रघुः। १८।१२।

"तस्य प्रभानिर्ज्जितपुष्यरागं
पौष्णं तिथौ पुष्यमसक्त पत्नौ।
तस्मिन्नपुष्यन्नुदिते समग्रां
पुष्टिं जवाः पुष्य इव द्वितीये॥"

पुष+भावे क्यप्। पुष्टिः। यथा, ऋग्वेदे। १। १६१। १२।

"श्रिः सप्त विद्युल्लिङ्गका विषस्य पुष्यमचन्॥"

"विषस्याऽऽहारकस्य पुष्यं पोषमचन्।" इति तद्भाष्ये सायणः॥)

पुष्यरथः, पुं, (पुष्य इव रथः। पुष्ये यात्रोत्सवादौ रथो वा।) वपु चक्रयानं युद्धार्थं न

भवति किन्तु यात्रोत्सवादौ सः। तत्पर्य्यायः। चक्रयानम् २। इत्यमरः। २। ८। ५१॥ (यथा, माघे। ३। ३२।

"महारथः पुष्यरथं रथाङ्गी
क्षिप्रं जगामाथ दवाधिरूढः॥")

पुष्पलकः, पुं, (पुष्पं पुष्टिं लकति लाकयति वा। लक+अच्।) गन्धकः। (यथा,—

"केशेषु चमरीं हन्ति सौम्ये पुष्पलको हतः॥"

इति वाक्यरत्नम्॥)

रूपलकः। कौजः। इति मेदिनी। के, १६६॥

पुष्पस्नानं, क्ली, (पुष्पे पुष्यनक्षत्रयोगे स्नानम्।) पुष्याभिषेकः। तस्य विधिर्यथा,—

औमेश उवाच।

"अथ वक्ष्यामि पुष्यस्नानविधिक्रमम्।
येन विज्ञातमात्रेण विघ्ना यान्ति सहस्रतम्॥
पौषे पुष्यर्क्षयोगे चन्द्रे पुष्यस्नानं समाचरेत्।
सौभाग्यकल्याणकरं दुर्भिक्षमरकापहम्॥
विष्टादिदुष्टकरणे व्यतीपाते च वैधृतौ।
वज्रे मूले हर्षणादौ योगे यदि न लभ्यते॥
दृतीयायुक्तपुष्यर्क्षं रविसौरिकुजेऽहनि।
तदा समस्तदोषाणां तत्स्नानं हानिकारकम्॥
यद्दोषाच्च जायन्ते यदि राज्ञेषु पैतृषु।
तदा पुष्यर्क्षमात्रे तु कुर्य्याच्छान्तिशतान्वितम्॥
इयन्तु ब्रह्मणा शान्तिरुद्दिष्टा गुरवे पुरा।
शुक्रार्थं सर्व्वदेवानां शान्त्यर्थञ्च जगत्पते!॥*॥
तुलकेशास्थिवस्त्रौकटदेशादिवर्ज्जिते।
शुक्रैराक्रमिभस्नादिदोषैश्च परिवर्ज्जिते॥
काकोलूककङ्कैश्च काकोलैर्गृध्रश्येनकैः।
वर्ज्जिते जगदुत्क्षिप्तविभीतकविवर्ज्जिते॥
शिग्रुश्लेष्मातकाभ्याञ्च जलौकाद्यैर्विवर्ज्जिते।
सुस्थाने चम्पकाशोकवञ्जुलादिविभूषिते॥
हंसकारण्डवाकीर्णे सरस्तीरेऽथवा शुचौ।
पुष्यस्नानाय कृपतिर्गृह्णीयात् स्थानमुत्तमम्॥
ततः पुरोहितो राजा नानावाद्यनिःस्वनैः।
प्रदोषसमये गच्छेत्तत्स्थानं पूर्व्ववासरे॥
तस्य स्थानस्य कौबेर्य्यां दिशि स्थित्वा पुरोहितः।
सुगन्धचन्दनैः पानैः कर्पूरादिविवासितैः॥
गोरोचनाभिः सिद्धार्थैरक्षतैश्च फलादिभिः।
गन्धद्वारेत्यादिभिस्तु मन्त्रैः सर्व्वाधिवासितैः।
अधिवास्य तु तत् स्थानं पूजयेत्तत्र देवताः॥
गणेशं केशवं शक्रं ब्रह्माणञ्चापि शङ्करम्।
उमया सहितं देवं सर्व्वाश्च ग्रहदेवताः।
मातॄश्च पूजयेत्तत्र नृपतिः सपुरोहितः॥
मन्त्रज्ञान् सकलान् ज्ञात्वा नानागेवद्यसञ्चयम्।
प्रदद्यात् पायसं स्वादु घृतं मोदकयावकौ॥
अधिवास्य तु तत् स्थानं दूर्व्वासिद्धार्थकाक्षतैः।
तस्मात् स्थानात्तु भूतानि:सारयेन्मन्त्रमीरयन्॥
अपसर्पन्तु ते भूता ये भूता भूमिपालकाः।
भूतानामधिरोधेन स्थानमेतत् करोम्यहम्॥
ततः करौ पुटीकृत्य मन्त्रेणानेन पार्थिवः।
आवाहयेदिमान्देवान् पूज्यान् पुष्याभिषेचकः॥
आगच्छन्तु सुराः सर्व्वे येऽत्र पूजाभिलाषिणः

दिग्पालोऽभिपालका: सर्वे ये चान्येऽप्यंशभागिन: ।
तत: पुष्पाञ्जलिं दत्त्वा पुनर्मन्त्रं पठेदिमम् ॥
अत्र तिष्ठन्तु विबुधा: स्थानमास्थाय मामकम् ।
श्व: पूजां प्राप्य यातारो दत्त्वा शान्तिं मही-
भुजे ॥
तच्च तां नृपतौ रात्रौ नयेत्तु सपुरोहित: ।
स्वप्ने शुभाशुभं विद्यात्पश्यतु सपुरोहित: ॥
ज्ञात्वा पूजान्तु देवानां रात्रौ स्थाने नृप: स्वपेत् ।
शुभाशुभफलं स्वप्ने ज्ञेयं दोषक्षयक्षते ॥
दु:स्वप्नदर्शनं चेत् स्यात्तदा पुण्याभिवेचने ।
होमं चतु:शतं कुर्याद्दद्याद्वापि गवां शतम् ॥
गोवाजिकुञ्जराणाञ्च प्रासादस्य गिरेस्तरो: ।
आरोहणं शुभकरं राज्यश्रीवृद्धिकारकम् ॥
दधिदेवसुवर्णानां सुजगस्य च दर्शनम् ।
वीणाभूम्याच्छतफलपुष्पच्छत्रविलेपनम् ॥
घृतांशुच्छत्रयुग्मानां पद्मस्य सुहृदां तथा ।
लाभ: क्षयकर: पूजोरलङ्कारस्य भूभृत: ॥
दर्पणस्योपरागस्य निगडस्यास्य बन्धनम् ।
मांसस्य भोजनञ्चैव पर्वतस्य विवर्तनम् ॥
नाभिमध्ये तरूत्पत्तिर्दन्तं प्रत्यग्ररोदनम् ।
अगम्यागमनं कूपपङ्कुगर्त्तावसीदता ॥
पर्वतस्य तथा नद्या: प्रोत्तार: शुचुकर्षणम् ।
स्वपुत्रमरणञ्चैव पानं रुधिरमद्यो: ॥
भोजनं पायसस्यापि मनुष्यारोहणं तथा ।
कल्याणसुखसौभाग्यराज्यशुभक्षयांस्तथा ।
एते स्वप्नाश्च कुर्वन्ति नृपस्य नृपसत्तम ! ॥
खरोष्ट्रमहिषाणान्तु आरोहो राज्यनाशक: ।
नृत्यं गीतं तथा हास्यं पाठ्यान्यशुभप्रद: ॥
रक्तवस्त्रपरीधानं रक्तमाल्यानुरञ्जनम् ।
रक्तां शय्यां स्त्रियञ्चैव कामयेत् म्रियमाणुयात् ॥
कूपान्तरे प्रवेशश्च दक्षिणाशागमिस्तथा ।
पङ्के निमज्जनं स्नानं भार्यापुत्रविनाशनम् ॥
नाभौ यस्य भवेत् स्वप्ने तरूत्पत्तिर्नृपस्य च ।
आदाय गर्भनाड़ीन्तु शकुनो याति खं द्रुतम् ।
स तु राज्यान्तरं प्राप्य महाकष्टाच्छनैरियात् ॥
दीर्घं विण्मूत्रिणञ्चैव हस्तघोड़ग्रविलुप्तनम् ।
कुर्यात्तु जलयोपेतं यज्ञमण्डलमुत्तमम् ॥
ततोऽपरेऽह्नि पूर्वाह्णे मातृणां पूजनञ्चरेत् ।
कुशलायै वसोर्धारां वृद्धिश्राद्धं तथैव च ॥
चन्दनागुरुकस्तूरीधूपकर्पूरचूर्णकै: ।
सम्पूज्य मण्डलस्थानं तस्मिन् द्वौ शुभदौ नम: ॥
अस्त्राय हुं पदित्येवं लिखेन्मन्त्रहृदयं बुध: ।
मन्त्रविन्मण्डलञ्चैव सूत्रै: कमलसम्भवै: ॥
कौशेयैर्वा स्वस्तिकाख्यं प्रथमं मण्डलं लिखेत् ।
चतुर्हस्तप्रमाणन्तु मण्डलं विलिखेत्तत: ॥
हस्तप्रमाणं पद्मन्तु मण्डलस्य प्रकीर्तितम् ।
द्वाराणि सार्द्धहस्तानि कर्णिकाकेसरोज्ज्वलम् ॥
सितं रक्तञ्च पीतञ्च श्यामं हरितमेव च ।
चूर्णैश्चूर्णेषु कौसुम्भैर्हारिद्रैर्हरितुत्वै: ॥
कुर्यात्तथाङ्गनेष्वेषु राजा मण्डलवृद्धये ।
पद्मात्तत: समारभ्य नाडीं पश्चिमगामिनीम् ॥
पश्चिमद्वारमध्येन घृतहस्तां विनिर्हरेत् ।

प्रत्येकद्वारमध्ये तु पञ्चचैवाष्टपञ्चकम् ॥
कुर्याच्चतुर्थभागे तु चूर्णैरेव पृथक् पृथक् ।
चूर्णैस्तु मण्डलं ज्ञात्वा सूत्राण्युत्तारयेत्तत: ॥
उत्तार्य्य सूत्रं प्रथमं मण्डलं पूजयेत्तत: ।
भुवनाय नम इति तत: सूत्रं वियोजयेत् ॥
तथावलम्बसूत्रन्तु रज:पातं समारभेत् ।
मध्यमानामिकाङ्गुष्ठैरवरिद्दादृथेच्छया ॥
अधोमुखाङ्गुलिं ज्ञात्वा पातयेत् सुविचक्षण: ।
समरेखा तु कर्त्तव्या विच्छिन्ना पुष्पवर्ज्जिता ।
अङ्गुष्ठपर्व्वनैपुण्यात् समा कार्य्या विजानता ॥
संसक्तं विषमं स्थूलं विच्छिन्नं जर्जरावृतम् ।
पर्य्यस्तमर्पितं रूक्षमालिखेन्न कदाचन ॥
संसक्ते कलहं विद्याद्दूरेरेखे तु विप्लवम् ।
अतिस्थूले भवेद्व्याधिर्नित्यपीड़ा विमिश्रिते ॥
विच्छिन्नभेदमाप्नोति शत्रुपक्षान्न संशय: ।
जर्जरायां चार्थहानि: स्याच्छिन्नायां मरणं
ध्रुवम् ॥
वियोगो वा भवेत्तस्य दृष्टव्यसुतस्य वा ॥
अविधिस्था लिखेद्रेखास्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषा: पूर्व्वभाषिता: ॥
सितसर्षपदूर्व्वाद्या रेखा: कार्य्या: प्रमाणत: ।
विमलं विजयं भद्रं विमानं शुभदं शिवम् ॥
वर्द्धमानञ्च देवेशं रताख्यं कामदायकम् ।
कलशं स्वस्तिकाख्यञ्च द्वादशैते तु मण्डला: ॥
यथास्थानं यथायत्नं योजनीया विचक्षणै: ॥
सागरे मथ्यमाने तु पीयूषार्थं सुरासुरै: ।
पीयूषधारणार्थाय निर्म्मिता विश्वकर्म्मणा ॥
कलां कलान्तु देवानामर्पिता ते पृथक् पृथक् ।
यत: क्षतास्तु कलसास्ततस्ते परिकीर्त्तिता: ॥
अवैव कलसा: प्रोक्ता नामतस्तान्निबोधत ।
शीतोपशीतो मरुतो मयूखश्च तथापर: ॥
मनोहा त्वसिभद्रश्च विजयस्तनुशोषक: ।
इन्द्रियघ्नोऽथ विजयो नवम: परिकीर्त्तित: ॥
तेषामेव क्रमाद्भूप ! नव नामानि यानि तु ।
शृणु तान्यपराण्येव शान्तिदानि सदैव हि ॥
सितौम्र: प्रथम: प्रोक्तो द्वितीयो जलसम्भव: ।
पवनाशी ततो द्वौ तु यजमानस्तत: पर: ॥
कौबेरसम्भवनामा तु षष्ठ: स परिकीर्त्तित: ।
सौमस्तु सप्तम: प्रोक्तस्तादृशस्तु तथाष्टम: ।
विजयो नाम कलसो ग्रोऽसौ नवम उच्यते ।
स तु पञ्चसख: प्रोक्तो मण्डलदेवस्वरूपधृक् ॥
घटस्य पञ्चवर्णेषु पञ्चवक्त्र: स्वयन्तथा ।
यथाकाष्ठाश्रित: सम्यक् वामदेवादिनामत: ।
मण्डलस्य च पद्मान्त: पञ्चवर्णं घटं न्यसेत् ॥
सितौम्रं पूर्व्वतो न्यस्य पश्चिमे जलसम्भवम् ।
वायव्ये वायवं न्यस्य आग्नेयं क्षमिसम्भवम् ॥
नैर्ऋत्यां यजमानन्तु ऐशान्यां कौबसम्भवम् ।
सौमस्तूत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत् ॥
न्यसेयं कलसांश्चैव तेषु चतान् विचिन्तयेत् ।
जलजानां सुरेशं ब्रह्मा पीठायां प्रथुर: स्थित: ॥
क्षमे तु संस्थितो विष्णुर्मध्ये माहेश्वरा: स्थिता: ॥
दिक्पाला देवता: सर्व्वा वेदयन्ति दिशो दश ॥

कुर्यौ तु सामरा: सप्त सप्तद्वीपाश्च संस्थिता: ।
गन्धमाल्ये मया: सप्त तथैव कुलपर्व्वता: ॥
गङ्गाद्या: सरित: सर्व्वा वेदाश्चत्वार एव च ।
कलसेषु स्थिता: सर्व्वे तेषु तानपि चिन्तयेत् ॥
रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च ।
वज्रमौक्तिकवैदूर्य्यमहापद्मस्फाटिकै: ॥
सर्व्वधातुमयं दिव्यं नागरोड्डमरं तथा ।
बीजपूरकजम्बीरकाङ्कोलाम्रातदाड़िमान् ॥
यवं व्रीहिञ्च गोधूमं सितसर्षपम् ।
कुङ्कुमागुरुकस्तूरीमदनं रोचनं तथा ॥
चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च ।
कर्पूरं पत्रचोरञ्च जलं निर्यासकाम्बुदम् ॥
प्रियेयं वदरं जातीपनसपुष्पे तथैव च ।
कालागरुं तथा एला हेवौ पूर्व्वक्रमेव च ॥
वर्षा धात्रीं समाङ्गिञ्च तुरुष्कं मङ्गलाष्टकम् ।
पूर्व्वां मोहनिकां भद्रां घृतपूर्णां घृतावरीम् ॥
पर्य्याणां सबलां क्षुद्रां सहदेवां गजाह्वयाम् ।
पूर्णकोषां सिनां पाठां गुडूचीं शिरविकालतौ ॥
श्यामकं गजदन्तञ्च घृतपुष्पां पुनर्नवाम् ।
ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसस्यानिकां तथा ।
समाहृत्य शुभानेतान् कलसेषु निधापयेत् ॥
कलसस्य यथादेशं विधिं शस्त्रं गदाधरम् ।
यथाक्रमं पूजयित्वा शस्त्रं सुस्नपया यजेत् ॥
प्रासादेन तु मन्त्रेण शस्त्रमन्त्रेण शार्ङ्गरम् ।
प्रथमं पूजयेन्मध्ये नानावेद्यवेदनै: ।
दिक्पालानां घटेष्वेव दिक्पालानपि पूजयेत् ॥
पूर्व्वं वह्नि:स्थापितेषु ग्रहाणां कलसेषु च ।
नवग्रहान् पूजयेत्तु मातर्मांडघटेषु च ॥
सर्व्वे देवा घटे पूज्या घटस्त्वेषां पृथक् पृथक् ।
सर्वे एव तत्र पूर्व्वोक्ता: सदा सुस्थतमा नृप ! ॥*॥
भक्ष्यैर्भोज्यैश्च पेयैश्च पुष्पैर्नानाविधै: फलै: ।
यावकै: पायसैश्चापि यथासम्भवयोजितै: ।
पुण्याहवाचनाय नृपति: पूजयेत् सकलान् सुरान् ॥
दक्षिणी मण्डलस्याथ कुम्भं निर्म्माय पायसै: ।
समिद्भि: शालिचिह्नार्थैस्तैर्दर्भाश्चतैस्तथा ।
केवलैश्च तथैवान्यै: पूजयेत सकलान् सुरान् ॥
होमान्ते तोषयेद्दृष्ट्वा नृप: सार्द्धं पुरोहितम् ॥
होमान्ते मण्डलोदीच्यां वेदिकायां सपङ्कजम् ।
रोचनाक्षमलङ्कारान् तथा सर्व्वान्नियोजयेत् ॥
हस्ता आकुलमङ्गुष्ठं हिर्दयाकुलयावधि ।
वृत्तं वा चतुरस्रं वा पद्मकर्णिकसंस्थितम् ।
रत्नैश्चान् पद्ममध्ये तु गोक्षीरकविनायकै: ॥
श्री: श्रीवृक्षो वरारोहा स्वामी देवी सुभाजिता ।
रत्नै: सर्व्वैरलङ्कारै: पद्मं कार्य्यं द्विहस्तकम् ।
हस्तविस्तारमुच्छ्रायं कर्णिकायन्तु दण्डाकुलम् ॥
आसार्थं सार्द्धहस्तन्तु पद्मं वृत्तासनान्वितम् ।
ग्रथ्या चतुर्गुणा दीर्घा धनुर्मानन्तु पीठकम् ॥
गजसिंहकताटोर्ण्णं हेमरत्नविभूषितम् ।
सिंहास्यं सार्द्धविस्तारहस्तासनमथापि वा ॥
यावच्चित्रकपट्टैर्वा उपधानानि कारयेत् ।
अन्येर्वा निर्म्मितैश्चर्म्मैस्तूलकपूरितान् ॥
ग्रथ्या दैर्घ्यार्द्धविस्तीर्णा चतुर्हस्ता हसच्छदा ।

विनश्यधिकमिच्छन्ति नृपस्य गुरुविद्यया ॥
अर्हच्चक्रसमं कुर्य्यादासनं चतुरस्रकम् ।
उपधानानि पुण्याया: कर्णादिमूलदेशत: ॥
षोड़शैवाच कार्य्याणि वर्णोचितयुतानि च ।
यानं सिंहासनं पट्टं पुण्योपकरणादिकम् ॥
राज्ञो नूतनयोग्यं तद्दैवज्ञा उत्तरतो न्यसेत् ।
तेषान्तु पश्चिमे स्वर्णरत्नौघनिचिते वरे ॥
पर्य्यङ्के यत्नदार्व्यौघनिर्म्मिते मध्यदारुके ।
जङ्घाच्छादनसंयुक्त चर्म्मोत्तरा चतुष्टयम् ॥
वृषभस्य तथोर्णाया: सिंहव्याघ्रजयोरपि ।
पादपीठे रत्नयुते पादावारोप्य पार्थिव: ॥
तस्मिन् पर्य्यङ्कपृष्ठस्थे चर्म्मखण्डचतुष्टये ।
नागालङ्कारभूषाढ्यं नृपतिं रत्नमालिनम् ॥
स्नापयेद्ब्राह्मणै: सार्द्धं राजानं सुखसङ्गतम् ।
संवीतकमलं छत्रां रत्नवस्त्रावशोभितम् ॥
कलसैर्व्वलिपुण्याद्यै: घृतलिप्तैश्च स्नापयेत् ॥
अष्टौ षोड़शविंशाद्यशतमष्टाधिकञ्च वा ।
कलसानां समाख्याता अधिकस्योत्तरोत्तरम् ॥
जयकल्याणदैर्मन्त्रैर्मङ्गलोत्थैश्च शाम्भवै: ।
वैष्णवैरथ दिक्पालैर्ग्रहमन्त्रैश्च मातृकै: ॥
आद्यं तेज: समुद्दिष्टमाद्यं पापहरं परम् ।
आद्यं सुराणामाहारमाद्ये लोका: प्रतिष्ठिता: ॥
भौमान्तरीक्षं दिव्यं वा यत्ते कल्मषमागतम् ।
सर्व्वं तदाद्यसंस्पर्शात् प्रयान्तु प्रपलायनम् ॥
ततोऽपनीय गात्राच्च कम्बलं वस्त्रमेव च ।
कलसै: स्नापयेद्रूपं पुण्यस्नानार्थपूरितै: ।
एभिर्मन्त्रैर्नरश्रेष्ठ ! तत्त्वतत्त्वार्थसाधकै: ॥ * ॥
सुराख्यामभिषिञ्चन्तु ये च सिद्धा: पुरातना: ।
ब्रह्मा विष्णुश्च रुद्रश्च साध्याश्च मरुद्गणा: ॥
आदित्या वसवो रुद्रा आश्विनेयौ भिषग्वरौ ।
अदितिर्देवमाता च स्वाहा लक्ष्मी: सरस्वती ॥
कीर्त्तिलैक्ष्मीर्धृति: श्रीश्च सिनीवाली कुहूस्तथा ।
दितिश्च सुरसा चैव विनता कद्रवे च ॥
देवपत्न्यश्च या: प्रोक्ता देवमातर एव च ।
सर्व्वाख्यामभिषिञ्चन्तु सर्व्वे चाप्सरसां गणा: ॥
नक्षत्राणि मुहूर्त्ताश्च पक्षाहोरात्रसन्धय: ।
संवत्सरो दिवा रात्रि: कला: काष्ठा: क्षणा लवा: ॥
सर्व्वे त्वामभिषिञ्चन्तु कालस्यावयवाश्च ये ।
वैमानिका: सुरगणा मनव: सागरै: सह ॥
सरितश्च महानागा यक्षा: किंपुरुषास्तथा ।
वैखानसा महाभागा द्विजा वैहायसास्तथा ॥
समुद्रय: सदाराश्च ध्रुवस्थानानि यानि तु ।
मरीचिरत्रि: पुलह: पुलस्त्यो भृगुरङ्गिरा: ॥
क्रतु: सनत्कुमारश्च सनकोऽथ सनन्दक: ।
सनातनश्च दक्षश्च जैगीषव्योऽथ नन्दन: ॥
एकतश्च द्वितश्चैव त्रित: आवालिकाग्रयौ ।
दुर्व्वासा दुर्व्विनीतश्च कण्व: कात्यायनस्तथा ॥
मार्कण्डेयो दीर्घतपा: शुन:शेफो विदूरथ: ।
और्व्व: सम्वर्त्तकश्चैव च्यवनोऽत्रि: पराशर: ॥
द्वैपायनो यवक्रीतो देवरात: सहानुज: ।
एते चान्ये च बहवो देवव्रतपरायणा: ॥
सेन्द्रिया लोकपालाश्च सर्व्वे त्वामभिषिञ्चन्तु वदाराश्च तपोधना: ॥
पर्व्वताक्षरवो नद्य: पुण्यान्यायतनानि च ।
प्रजापति: क्षितिश्चैव गाधो विश्वस्य मातर: ॥
वाहनानि च दिव्यानि सर्व्वे लोकाश्चराचरा: ।
अयय: पितरस्तारा भौमता: खं दिशो जलम् ॥
एते चान्ये च बहव: पुण्यसंकीर्त्तना: शुभा: ।
तोयैस्त्वामभिषिञ्चन्तु सर्व्वोत्पातनिवर्हणा: ॥
इत्येवं शुभदैवत्यैर्मन्त्रैर्दिव्यैस्तथापरै: ।
शैवैर्नारायणै रौद्रैर्ब्रह्मक्षत्रसमुद्भवै: ॥
आपोहिष्ठा हिरण्येति सम्भवेति सुरेति च ।
मानस्तोकेति मन्त्रेण गन्धद्वारेत्यनेन च ॥
सर्व्वमङ्गलमन्त्रैश्च श्रीश्च ते यशसा च ॥
इत्येवं स्नानमासाद्य गात्रमार्ष्टव कम्बले: ॥
सर्व्वमङ्गलमन्त्रेण वस्त्रं कार्पासकं हरेत् ।
आचम्य च ततो देवान् गुरुं विप्रांश्च पूजयेत् ॥
छत्रं छत्रं चामरञ्च घण्टामश्वान् गजांस्तथा ।
मन्त्रं जप्त्वा धारयेत्तु ततो गच्छेच्छुताग्रतम् ॥
तत्र गत्वा वह्निमध्ये वह्निश्रीर्वीक्ष्य पार्थिव: ।
अग्निमित्तनिमित्तानि लक्षयेत्तत्र विज्ञभि: ॥
दैवज्ञकक्षुकामात्यवह्निपौरजनैर्हृत: ।
वादित्रघोषैस्तुमुलैस्तथा तौर्य्यत्रिकै: शुभै: ॥
लत्वा शैवे पुन: स्नात्वा भुक्त्वा च वै द्विजान् ।
पूर्णां विधाय विधिवद्दक्षिणां कनकाप्लुत ॥
धान्यानि चाथ वासांसि दत्त्वा कुर्य्याद्दिसर्ज्जनम् ।
तत: शैवजलै: सर्व्वानमात्यादीन् पुरोहित: ।
सेचयेच्चतुरङ्गञ्च बलञ्चापि सराष्ट्रकम् ॥
एवं लत्वा नृप: पश्चात्तिरात्रं संयतो भवेत् ।
मांसमैथुनहीनञ्च कुर्य्याच्चाङ्गस्य सेवनम् ॥
पुष्यनक्षत्रयुक्ता तु तृतीया यदि लभ्यते ।
तस्यां पूज्या सदा देवी चण्डिका शुक्लरेव ह ॥
पक्वालिकाविवाहाद्यै: शिशूनां कौतुकैस्तथा ।
वैवाहिकेन विधिना मोदयेच्चण्डिकां शिवाम् ॥
चतुष्पथेषु सर्व्वेषु देवदेवीगृहेषु च ।
पताकाभिरलङ्कुर्य्यादेवं कुर्व्वन्न सीदति ॥
एवं लत्वा शान्तियागं तथा पुष्याभिषेचनम् ।
चतुरङ्गै: समं राजा भार्य्याभिस्तनयैै: सह ।
राज्यमण्डलसंयुक्त: परत्रेह न सीदति ॥
नात: परतरो यज्ञो नात: परतरोत्सव: ।
नात: परतरा शान्तिर्नात: परतरं शिवम् ॥
अनेनैव विधानेन नृपतेरभिषेचनम् ।
युवराज्याभिषेकञ्च कुर्य्यादाजपुरोहित: ॥
नृपाभिषेककरणमादौ यदि समाचरेत् ।
अनेनैव विधानेन स्थिर: स्यान्नृपतिस्सदा ॥
अयं यज्ञ: समुद्दिष्ट: शक्रार्थं ब्रह्मणा पुरा ।
एवं यज्ञं नृपो दृष्ट्वा परत्रेह न सीदति ॥"

इति कालिकापुराणे पुष्याभिषेक: ८६ अध्याय: ॥

पुष्या, स्त्री, (पुष्णाति कार्य्यकौति । पुष् + क्यप् यत् वा । निपातनात् साधु: । ततष्टाप् ।) पुष्यनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, इन्द्रजालतन्त्रसंग्रहे ।

"अश्विनीरुद्रमूलाश्च पुष्या पुनर्वसुस्तथा ।
यज्ञाकर्षश्च कर्त्तव्यं कारयेच्च सदा बुध: ॥")

पुस्त, क, बन्धे । इति कविकल्पद्रुम: ॥ (चुरा०-उभ०-सक०-सेट् ।) पञ्चमलघरी । इत्योपध: । क, पुस्तयति । इति दुर्गादास: ॥

पुस्तं, क्ली, (पुस्त्यते इति । पुस्त बन्धादरादौ + घञ् ।) लेप्यादिशिल्पकर्म्मे । आदिना काष्ठपुत्तलिकालक्षणलक्षणादि कर्म्म गृह्यते । इति सुभूत्यादय: ॥

यदा वा दारुणा वाथ वस्त्रेणाप्यथ चर्म्मणा ।
लोहरत्नै: कृतं वापि पुस्तमित्यभिधीयते ॥"

रत्नमरटीकायां भरत: ॥

(यथा, वामडे कल्पस्थाने । १ ।

"पुस्तलोहनखदन्तास्थप्रस्तोष्टीरवारिजे ॥"

पुस्त्यते बध्यते अथ्यते इत्यर्थे: आश्रियते वेति + पुस्त + घञ् ।) पुस्तकम् । इति मेदिनी । (पुस्त + गौरादित्वात् ङीष् ।) स्त्रियां पुस्ती ॥

पुस्तकम्, क्ली, स्त्री, (पुस्त + स्वार्थे कन् ।) पुस्तम् । पुति इति भाषा । (यथा, हरिवंशे । २५६ । ७६ ।

"शुक्लाम्बरधर: श्रीमान् शुचिर्भूत्वा समाहित: ।
अर्चयेत यथान्यायं गन्धमालै: पृथक् पृथक् ॥
संहितापुस्तकान् राजन् ! प्रयत: शिरसन्नत: ॥")

तस्य परिमाणं यथा,—

"मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समासत: ।
मानेनापि फलं विन्द्यादमाने श्रीर्हता भवेत् ॥
हस्तमात्रं सुविस्तारमायामाद्द्वादशाङ्गुलम् ।
दशाङ्गुलं तथाधो च ततो हीनं न कारयेत् ॥"

तस्य वेधो यथा,—

"वेधदयं सुविस्तारं बाहुमात्रे चिरन्तनम् ।
समभागे महेशानि ! हस्तादौ रूपरन्ध्रकम् ॥
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत् ।
प्रादेशादौ भवेद्रन्ध्रो द्व्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च आद्यन्ते यन्त्रवेधं विकल्पयेत् ।
भार्य्याहानिर्भवेदाद्ये धनानां वा क्षयो भवेत् ॥
दग्धरन्ध्रे भवेत् पीड़ा वर्त्तुलं शुभदं भवेत् ।"
चतुष्कोणे विद्ववस्तु त्रिकोणे मरणं भवेत् ॥

पुस्तककरणपत्रं यथा,—

"भूर्जे वा तैजपत्रे वा तालै वा तालिपत्रके ।
अगुरुणापि देवेशि ! पुस्तकं कारयेत् प्रिये ! ॥
सम्भवे स्वर्णपत्रे च ताम्रपत्रे च शुक्लरि ! ।
अन्यवृक्षत्वचि देवि ! तथा केतकिपत्रके ॥
मार्कण्डपत्रे रौप्ये वा वटपत्रे वरानने ! ।
अन्यपात्रे वसुदले लिखित्वा य: समभ्यसेत् ।
स दुर्गतिमवाप्नोति धनहानिर्भवेद्ध्रुवम् ॥"

पुस्तके वेदलिखननिषेधो यथा,—

"वेदस्य लिखनं लत्वा य: पठेद्ब्रह्महा भवेत् ।
पुस्तकंवा गृहे स्थाप्यं वज्रपातो भवेद्ध्रुवम् ॥"

युगभेदे पुस्तकाक्षरस्थैर्य्यं यथा,—

"सत्येऽक्षरे स्थित: शम्भु: शूलपाणिस्त्रिलोचन: ।
प्रजापतिस्त्रेतायां द्वापरे च त्रयी एव च ।
कलौ युगे पिनाकी च कलौ विष्णुश्चरे हरि: ॥"

तल्लेखकपूजाफलं यथा,—
"आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्।
वस्त्रैश्च गन्धपुष्पाद्यैर्भक्ष्यैश्चैव सुमनोहरैः॥
यावदक्षरसंख्यानं प्रतिपत्रे च सुन्दरि!।
तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम्॥"
वेतनग्रहणे लेखकस्य दोषो यथा,—
"वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं च तु।
यावदक्षरसंख्यानं तावच्च नरके वसेत्॥"
भूमौ पुस्तकलेखनस्यापनिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत्।
न सुप्ता पुस्तकं स्थाप्यं न तुल्यमाहरेत् तत्॥
भूकम्पश्चाहयो चैव अक्षरं वाथ पुस्तकम्।
भूमौ तिष्ठति देवेशि! जन्मजन्मनि नश्यता।
तदा भवति देवेशि! तस्मात्तत् परिवर्जयेत्॥"
इति योगिनीतन्त्रे तृतीयभागे सप्तमपटलः॥*॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज!।
पुराणस्य च यो दद्यात् स दैवत्वमवाप्नुयात्॥
शास्त्रदत्त्या जगत् सर्व्वं सुश्रुतञ्च शुभाशुभम्।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती॥"
इति पाद्मोत्तरखण्डे ११७ अध्यायः॥*॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि।
अर्थेन लेखयित्वा यो दद्याद्याति स वैदिकम्॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्॥"
इति मात्स्ये २१५ अध्यायः॥*॥
भागवतदानविधानं तु पाराशर्य्यग्रन्थे द्रष्टव्यम्॥
पुस्तकर्म्मा, त्रि, (पुस्तं लिखनादिकं कर्म्म यस्य।) लेप्यादिशिल्पकर्म्मकर्त्ता। इति हलायुधः॥
पू, ङ शोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) शोधः दृष्ट शुद्धीकरणम्। ङ, पवते पापिनं गङ्गा। इति दुर्गादासः॥
पू, ङ य शोधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्।) अयं केचिन्न मन्यते। ङ य, पूयते। इति दुर्गादासः॥
पू, ञ णि शोधे। इति कविकल्पद्रुमः॥ (क्रया०-प्रा०-उभ०-सक०-सेट्।) ञ णि, जाह्नवी नः पुनातु। पुनीते। क्वचित् आप्रत्ययस्यापि पृदिरित्यात् इस्व इति वरररुचिः। तेन।
"स्मरणात् पुनते पापं धारणात् पूर्व्वसञ्चितम्।
दर्शनान्नाशते मोक्षमेतद्योगस्य लक्षणम्॥"
इति दुर्गादासः॥
पूगं, क्ली, (पूयते सुखमनेनेति। पू ञ पवने+"क्वापूरुखञ्जिभ्यः कित्।" उणा०। १। १२३। इति गन् कित्च।) गुवाकफलम्। इत्यमरटीकायां रायमुकुटः॥ (यथा, भविष्यपुराणे। ब्राह्मणवर्म्मोक्तकथायाम्।
"पिक्कखर्ज्जूरं जातिञ्च एला चैव हरीतकी।
नारिकेलं तथा पूगं रम्भापक्कफलन्तथा।
तत्र सुखं प्रदातव्यं ब्राह्मस्य फलसत्तमम्॥")
पूगः, पुं, (पूयतेऽनेनेति। पू+"क्वापूरुखञ्जिभ्यः कित्।" उणा०। १। १२३। इति गन्। स च कित्।) गुवाकः। समूहः। इत्यमरः॥ (यथा, महाभारते। ६। २१। १४।
"अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः।
पुरुषः सनातनतमो यतः सत्यस्ततो जयः॥")
छन्दः। भावः। कण्टकिवृक्षः। इति शब्दरत्नावली॥
पूगपात्रं, क्ली, (पूगस्य दलचर्व्वितपूगरसस्य आधारभूतं पात्रम्।) पूगपीठम्। पिकदानी। इति भाषा। तत्पर्य्यायः। फलवकम् २। इति हारावली॥
पूगपीठं, क्ली, (पूगस्य दलचर्व्वितपूगरसस्य पीठमाधारपात्रम्।) पूगपात्रम्। तत्पर्य्यायः। कटकोलः २ पतद्ग्रहः ३। इति त्रिकाण्डशेषः॥
पूगपुष्पिका, स्त्री, (पूगसहितं पुष्पमस्येति। पूग-पुष्प+कप्। कापि अत इत्वम्।) विवाहसम्बन्धिपुष्पताम्बूलम्। तत्पर्य्यायः। कुहलिः २। इति त्रिकाण्डशेषः॥
पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम्।) गुवाकफलम्। तत्पर्य्यायः। पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कयम् ५ सोण्डकम् ६ उद्वेगम् ७ क्रमुकफलम् ८। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कषायमीषन्मधुरं किञ्चित् पूगफलं सरम्॥")
पूगरोटः, पुं, (पूगवृक्ष इव रोटयति दीप्यते प्रकाशते इति। रुट्+अच्।) हिन्तालवृक्षः। इति त्रिकाण्डशेषः॥
पूज, क पूजे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। क, पूजयति गुरुं लोकः। इति दुर्गादासः॥
पूजकः, त्रि, (पूजयतीति। पूज+ण्वुल्।) पूजाकर्त्ता। यथा, तिथ्यादितत्त्वे।
"यच्चैव भाषते वियत्पुरेति
प्राचीनं तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु॥"
पूजनं, क्ली, (पूज+भावे ल्युट्।) पूजा। अर्च्चनम्। यथा,—
"कुहेन न च कर्त्तव्यं लोभेन त्वरया न च।
मत्पूजनं विधानेन यदीच्छेत् परमां गतिम्॥"
इति वराहपुराणम्॥
पूजनी, स्त्री, (पूज्यते इति। पूज+कर्म्मणि ल्युट्। ङीप्।) चटका। इति भरतः॥ (ब्रह्मदत्तगृहस्थितशुकनिषिद्धकर्म्मविशेषः। यथा, महाभारते।१२। १३८। ७—१०।
"ब्रवीमि राजन्! यद्दृष्टं ब्रह्मदत्तनिवेशने।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः॥
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी।
पूजनी नाम शुकिर्दीर्घकालं सहोषिता॥
दत्तात्रा सर्व्वभूतानां यथा वै जीवजीवकः।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा॥
अभिप्रजाता सा तत्र पुत्रमेकं सुवर्च्चसम्।
समकालञ्च राज्ञोऽपि देव्यां पुत्रो व्यजायत॥
तयोरर्थे ज्ञातत्त्वा सा खेचरी पूजनी सदा।
वसुधातीरं सा गत्वा आजहार फलद्वयम्॥
पुत्रार्थञ्च स्वपुत्रस्य राजपुत्रस्य चैव ह॥
फलमेकं सुतायादाद्राजपुत्राय चापरम्।
अन्तःसाक्षादवर्त्तं भक्षतेजोऽभिवर्द्धनम्॥
आदायादाय सैवासु तयोः प्रादात् पुनःपुनः।
ततोऽगच्छत् परां तुष्टिं राजपुत्रः फलाप्तात्॥"
इत्यादि तत्रैवाध्याये विस्तरशो द्रष्टव्यम्॥)
पूजा, स्त्री, (पूजनमिति। पूज+"चिन्तिपूजिकथिकुम्बिचर्च्चश्च।" ३। ३। १०५। इति अङ्। ततष्टाप्।) पूजनम्। तत्पर्य्यायः। नमस्या २ अपचितिः ३ सपर्य्या ४ अर्च्चा ५ अर्च्चना ६। इत्यमरः। २। ७। ३५॥ स्तुतिः ७। इति शब्दरत्नावली॥ (यथा, रामायणे।१।५१।५।
"अपि रामे महाभागा मम माता यशस्विनी।
वन्ये रूपाहरत् पूजां पूजार्हे सर्व्वदेहिनाम्॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदाद्यादिकन्यासः करशुद्धिस्ततः परम्।
अङ्गलिन्यासकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम्।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः॥"
इति तन्त्रसारे यामलः॥
भक्तिविषये चतुःषष्टिरुपचारा यथा,—
आसनारोपणम् १ सुगन्धितैलाभ्यङ्गः २ मज्जनशालाप्रवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदकस्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्ज्जनम् ९ अरक्तदुकूलपरिधानम् १० अरक्तदुकूलोत्तरीयम् ११ आसेपमञ्जपप्रवेशनम् १२ आसेपमणिपीठोपवेशनम् १३ चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिद्रव्यसर्व्वाङ्गानुलेपनम् १४ केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचम्पकाशोकशतपत्रपूगकुङ्कुरीपुन्नागकङ्कारयूथीसर्व्वकुसुममालाभूषणम् १५ भूषणमञ्जपप्रवेशनम् १६ भूषणमणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलकरत्नम् २१ कालाञ्जनम् २२ कर्णपालीयुगलम् २३ नासाभरणम् २४ अधरयावकः २५ ग्रथनभूषणम् २६ कनकचिच्चपदकम् २७ महापदकम् २८ मुक्तावलिः २९ एकावलिः ३० हेमच्छन्दकः ३१ केयूरयुगलचतुष्टयम् ३२ वलयावलिः ३३ ऊर्म्मिकावलिः ३४ काञ्चीदाम ३५ कटिसूत्रम् ३६ शोभाख्याभरणम् ३७ पादकटकम् ३८ रत्ननूपुरम् ३९ पादाङ्गुरीयकम् ४० एवंकारे

पाद्यः४१ अर्घ्यकरे२कुसुमम् ४२ इतरकरे पुष्पेक्षुचापः ४३ अपरकरे पुष्पबाणाः ४४ श्रीमन्नाखिलपादुका ४५ स्वसमानवेषाकारावरणदेवताभिः सह सिंहासनारोहणम् ४६ कामेश्वरपर्यङ्कोपवेशनम् ४७ अष्टतालवृन्तद्वयम् ४८ आचमनीयम् ४९ कर्पूरवटिका ५० आनन्दोल्लासविलासहासिम् ५१ मङ्गलारात्रिकम् ५२ श्वेतच्छत्रम् ५३ चामरयुगलम् ५४ दर्पणः ५५ ताजवृन्तम् ५६ गन्धः ५७ पुष्पम् ५८ धूपः ५९ दीपः ६० नैवेद्यम् ६१ पुनराचमनीयम् ६२ ताम्बूलम् ६३ वन्दनञ्च ६४। इति तन्त्रसारे सिद्धयामलः॥ * ॥ षट्त्रिंशदुपचारा यथा,—

"आसनाभ्यञ्जने तद्वदुद्वर्त्तनविरूक्षणे।
सम्मार्जनं सर्पिरादिस्नपनावाहने तथा॥
पाद्यार्घ्याचमनीयञ्च स्नानीयमधुपर्ककौ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके॥
अलङ्कारो गन्धपुष्पधूपदीपास्तथैव च।
ताम्बूलादिकनैवेद्यं पुष्पमाला तथैव च॥
अनुलेपनञ्च ग्रन्था च चामरव्यजनन्तथा।
आदर्शदर्शनञ्चैव नमस्कारोऽथ वर्जनम्॥
गीतवाद्ये च नानानि स्तुतिहोमप्रदक्षिणम्।
दन्तकाष्ठप्रदानञ्च ततो देवविसर्जनम्।
उपचारा इमे त्रिंशत् षट्त्रिंशत् सुरपूजने॥"

इत्येकादशीतत्त्वम्॥

अष्टादशोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्व्वशः॥
गन्धं पुष्पं तथा धूपं दीपसन्नञ्च दर्शनम्।
माल्यानुलेपनञ्चैव नमस्कारविसर्जने॥
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत्॥"

अथ षोड़शोपचाराः।

"पाद्यमर्घ्यं तथाचामं स्नानं वसनभूषणे।
गन्धपुष्पधूपदीपनैवेद्याचमनन्ततः॥
ताम्बूलमर्चनं स्तोत्रं तर्पणञ्च नमस्क्रिया।
प्रपूजयेत् प्रपूजायां उपचारांस्तु षोड़श॥"

(अन्यप्रकारषोड़शोपचारा यथा,—

"आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमनीस्नानं वसनाभरणानि च।
गन्धपुष्पधूपदीपनैवेद्यं वन्दनन्तथा॥")

अथ दशोपचाराः।

"पाद्यमर्घ्यं तथाचामं मधुपर्काचमनन्तथा।
गन्धादयो नैवेद्यान्ता उपचारा दश क्रमात्॥"

अथ पञ्चोपचाराः।

"गन्धादयो नैवेद्यान्ताः पूजाः पञ्चोपचारिकाः॥"

इति तन्त्रसारः॥

अशुद्धादेः पूजानिषेधमाह।

"अशुचिर्न महामायां पूजयेत्तु कदाचन।
अवश्यन्तु स्नानेनैव सोऽतिभक्तियुतो नरः॥
दन्तरक्ते वसत्पन्ने स्नानञ्च न विद्यते।
सर्व्वेषामेव मन्त्राणां स्नानात्पूर्वकं व्रजेत्॥
जानुर्द्वे चतुरे जाते नित्यकर्म्म न चाचरेत्।
नैमित्तिकञ्च तद्वदःस्रवद्रक्तो न चाचरेत्॥
जीवके च सपुत्रत्वे सूतकर्म्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि संत्यजेत्॥
अर्घ्ये सूक्ते तथौर्द्धे च नैव शुद्धा च किञ्चन।
कर्म्म कुर्य्यान्नरो नित्यं सूतके मृतके तथा॥
पद्मं पुष्पञ्च ताम्बूलं भैषजत्वेन कल्पितम्।
कन्यादिपिण्डपर्य्यन्तञ्च पद्मं शुद्धा न चाचरेत्॥
अलक्ष्यापि नरश्रेष्ठ! भोजनादेर्भवेद्व्रते।
नित्यक्रिया निवर्त्तेत सह नैमित्तिकैः सदा॥
अलौकां गूढ़पादञ्च क्षमिगर्भूपदादिकम्।
कामाद्भक्षेण संस्पृश्य नित्यकर्म्माणि संत्यजेत्॥
विशेषतः श्रीपूजां प्रतीतपिष्टको नरः।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्तिघ्नं लक्षयज्ञञ्च आद्यं देवव्रतञ्च यत्॥
गुरुमाचम्य विप्रञ्च प्रणत्यैव च पाणिना।
न कुर्य्यान्नित्यकर्म्मेऽपि रेतःपाते च भैरव!॥
आसनार्घ्यपात्रञ्च भयमासादयेन्न यत्।
जघरे क्षमिसंयुक्ते स्थाने दृष्टेऽपि नार्चयेत्॥
नीचैरासाद्य तत्स्थानं शुचिः प्रयतमानसः।
अर्चयेच्चक्रिकां देवीं देवमन्त्रञ्च भैरव!॥
दिग्विभागे तु कौवेरी दिक् श्रीपीतिकारिणी।
तस्मात्तन्मुखमासीनः पूजयेच्चक्रिकां सदा॥"

पूजास्थानानि यथा,—

"लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च।
स्थण्डिलस्थां महामायां पादुके प्रतिमासु च॥
चित्रे च यन्त्रिते खड्गे जलस्थां वापि पूजयेत्।
पश्चाद्गदकुलं खड्गं त्रिशिखञ्च त्रिमूलकम्॥
शिलायां पर्व्वतस्थायां गङ्गायामपि तत्समा।
आर्य्यावर्त्ते मध्यदेशे तथा पर्व्वतगह्वरे॥
देवीं संपूजयेन्नित्यं भक्तिश्रद्धासमन्वितः।
वाराणस्यां सदा पूजा सम्पूर्णफलदायिनी॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।
ततोऽपि द्विगुणा प्रोक्ता द्वारवत्यां विशेषतः॥
सर्व्वक्षेत्रेषु तीर्थेषु पूजा द्वारवतीसमा।
विन्ध्ये शतगुणा प्रोक्ता गङ्गायामपि तत्समा॥
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च।
विन्ध्यतत्फलदा पूजा प्रयागे पुष्करे तथा॥
ततश्चतुर्गुणं प्रोक्तं करतोयानदीजले।
तस्माच्चतुर्गुणफला नन्दिकुण्डे च भैरव!॥
तस्माच्चतुर्गुणा प्रोक्ता जयन्तीश्वरसन्निधौ।
तत्र सिद्धेश्वरीयोनौ ततोऽपि द्विगुणा स्मृता॥
ततश्चतुर्गुणा प्रोक्ता लौहित्यनदपार्श्वयोः।
तत्समा कामरूपे तु सर्व्वत्रैव जले स्थले॥
सर्व्वश्रेष्ठो यथा विष्णुर्लक्ष्मीः सर्व्वोत्तमा यथा।
देवीपूजा तथा प्रोक्ता कामरूपे सुराजये॥
देवीचैत्रं कामरूपं विद्यतेऽन्यत्र तत्समम्।
अन्यत्र विरला देवी कामरूपे गृहे गृहे॥
ततः शतगुणं प्रोक्तं नीलकूटस्य मस्तके।
ततोऽपि द्विगुणं प्रोक्तं हैरके गिरिवल्लिके॥
ततोऽपि द्विगुणा प्रोक्ता शैलपुत्र्यादियोनिषु।
ततः शतगुणं प्रोक्तं कामाख्यायोनिमण्डले॥"

इति कालिकापुराणे ।५४।५७। अध्यायौ॥

पूजनसज्ञानि तत्फलानि च यथा,—

"उपविश्यासने रम्ये शस्ताजिनकुशोत्तरे।
राङ्खे कमले वापि काष्ठादौ शास्त्रसम्मते॥
न कुर्य्यादर्चनं विष्णोः शिवे काष्ठासनादिषु।
काष्ठासने कृथा पूजा पाषाणे रोगसम्भवः॥
भूम्यासने गतिर्नास्ति वस्त्रासने दरिद्रता।
कुशासने ज्ञानवृद्धिः कम्बले सिद्धिरुत्तमा॥
शस्ताजिने धनी पुत्री मोक्षः स्याद्व्याघ्रचर्म्मणि।
सर्व्वयोगं प्रकुर्व्वीत भोगार्थं सुखमासने॥"

इति पाद्मोत्तरखण्डे ७४ अध्यायः॥

पूजाधिकारिता प्रयोजकदेवषट्कपूजा यथा,—

"गणेशञ्च दिनेशञ्च वह्निं विष्णं शिवं शिवाम्।
संपूज्य देवषट्कञ्च सोऽधिकारी च पूजने॥
गणेशं विघ्ननाशाय विष्णवे सुखये पूजयेन्नरः॥
शिवं ज्ञानाय ज्ञानेशं शिवाञ्च बुद्धिवृद्धये।
संपूज्य तान् लभेत् प्राज्ञो विपरीतमतोऽन्यथा॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः॥

द्वादशमासे विष्णुपूजाविधिर्यथा,—

"प्रत्यहं कार्त्तिके मासि जातीपुष्पैः समर्चयेत्।
दद्याद्दीपञ्च नियतात्मा हरिव्रतः।
ब्राह्मणान् भोजयित्वाथ सहस्रायुष्यमाप्नुयात्॥
मार्गशीर्षे वकाक्षेण वकपुष्पैश्च केशवम्।
समर्च्य भोजयेद्विप्रान् वैकुण्ठपदमाप्नुयात्॥
धनुष्यृषभि देवेशं मासमेकं निरन्तरम्।
अर्चयेदुपवासैश्च करवीरैः सिताम्बरैः॥
धूपैर्दीपैश्च नैवेद्यैर्यथाशक्त्या निवेदयेत्।
समाप्तौ भोजयेद्विप्रान् महाभागवतोत्तमान्॥
अश्वमेधसहस्रस्य फलमाप्नोत्यसंशयः॥
तपोमासादिते भानौ ज्ञात्वा तत्त्वं विशेषतः।
अर्चयेत्साधवीपुष्पैस्तत्फलैश्च सुभानने!॥
पायसं विविधं दिव्यं भक्ष्यं तत्र निवेदयेत्।
मासान्ते वेदवान् विप्रान् भोजयेत् भक्तिसो द्विजः॥
तपस्ये च तथा देवि! माधवैः कुसुमैः शुभैः।
ज्ञात्वा संपूजयेद्विष्णुं मासमेकं निरन्तरम्॥
घृतैकरान्नु घृतं नित्यमपूपांश्च निवेदयेत्।
वेदवान् भोजयेच्छक्त्या मासान्ते शुभदर्शने!॥
मधुमासि तथा नित्यं वकुलैश्चम्पकैरपि।
पूजयेज्जगतामीशं गुडान्नञ्च! निवेदयेत्॥
मासान्ते वेदवान् विप्रान् भोजयेत् सुसमाहितः।
सहस्रवार्षिकं पूजाफलं नित्यमवाप्नुयात्॥
माधवे पूजयेद्विष्णुं घृतपक्वैर्मनोरमैः।
पूजयित्वा विधानेन दध्यन्नफलसंयुतम्॥
गुडोदकञ्च भक्त्या वै तस्मिन् देवि! निवेदयेत्।
तत्प्रीत्या तुष्टो जगन्नाथः प्रीतो भवति पार्व्वति!॥
ज्येष्ठे तु शुक्लपक्षे: पाटलैः कुसुमोत्तमैः।
अर्चयित्वा हरिं भक्त्या घृतपक्वैर्युतम्॥
निवेदयित्वा भक्त्या वै गवां कोटिप्रदो भवेत्॥
वेदवान् भोजयेन्नित्यं मासान्ते भक्तसत्तमः।
ब्राह्मणांश्च शिवे। सर्व्वं फलमाप्नोत्यसंशयं॥

आषाढ़े देवताधीशं जलशायिनमच्युतम् ।
श्रीपुष्पैरर्च्चयित्वाथ पायसान्नं निवेदयेत् ॥
मासान्ते भोजयेद्विप्रान् महाभागवतोत्तमान् ।
यदि वर्षसहस्रस्य पूजां प्राप्नोत्यसंशयम् ॥
नभोमास्यर्च्चयेद्विष्णुं पुन्नागैः कैतकीदलैः ।
अर्च्चयित्वाच्युतं भक्त्या न भूयो जन्मभाग्भवेत् ॥
दद्याद्वै पिष्टकान् भक्त्या शर्कराघृतमिश्रितान् ।
ब्राह्मणान् भोजयित्वा तु सर्व्वमासफलमश्नुते ॥
नभस्यमर्च्चयेदीशं कुन्दैः कुरुवकैरपि ।
क्षीरान्नं गुड़मिश्रन्तु भक्त्या तत्र निवेदयेत् ।
गवां कोटिप्रदानस्य फलञ्च समवाप्नुयात् ॥
इषे नीलोत्पलैर्मासि पूजयेन्मधुसूदनम् ।
भक्त्या निवेदयेत्तस्मिन् क्षीरमाज्यविमिश्रितम् ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वैष्णवं लोकमाप्नोति मुदितः सहमैथुनः ॥
ऊर्ज्जमासे स्वयं देवि ! कोमलैस्तुलसीदलैः ।
पूजयित्वाच्युतं भक्त्या तत्सायुज्यमवाप्नुयात् ॥"

इति पाद्मोत्तरखण्डे ७५ अध्यायः ॥

द्वादशमासादौ दुर्गापूजादि देवीपुराणे द्रष्टव्यम् ॥

अथ देवपूजाविधिः ।

प्रातःस्नानासामर्थ्ये आर्द्रवाससा हस्तगात्रमार्ज्जनादिकं देवसमीपं गत्वा प्राङ्मुख उदङ्मुखो वा प्रक्षालितपादः शुचिर्द्विवासाः कृतशिखः स्वाचान्तः सर्व्वत्र वीरासनोपविष्टः प्राङ्मुखः उदङ्मुख एव मौनी ध्यानपरायणः कामरागभय-दम्भक्रोध-मात्सर्य्यमत्सरा-रहितस्वमनाः सुमना वा शुचौ समुपविष्टोऽनिष्टशब्दगन्धरहिते देशे दक्षिणपार्श्वे नैवेद्याद्युपकरणानि च वामपार्श्वे जलं पुरतो घृतदीपौ ताम्रादिपात्रञ्च यथासन्निवेश्य पाद्यार्घ्याचमनीयपात्रं जलादिपूर्णमग्रतः स्थापयित्वा यथालाभं यज्ञोपवीतवस्त्रालङ्करणादि संस्थाप्य ।

ॐ अपसर्पन्तु ते भूता ये भूता भूमिपालकाः ।
भूतानामविरोधेन पूजाकर्म्म करोम्यहम् ॥

इत्युच्चार्य्य अस्त्राय फडिति तर्ज्जन्यङ्गुष्ठयोगजनितच्छोटिकया दशदिग्बन्धनं कुर्य्यात् ॥ * ॥ नादेवो देवमर्च्चयेदित्यनुरोधात् सर्व्वदेवार्च्चनेषु भूतशुद्धिमातृकागमिकाः । सा यथा,— सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थपरमात्मनि संयोज्य ततः पृथिवीं जले जलं तेजसि तेजो वायौ ततो वायुमाकाशे प्रवेश्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा यमिति वायुबीजेन षोड़शवारजपेन वायुकर्षणरूपपूरकसंज्ञया वायुचिन्तनरूपया वायव्याधारणया देहं शोषयित्वा ततो नासापुटावङ्गुष्ठानामिकाभ्यां धृत्वा रमिति वह्निबीजेन चतुःषष्टिवारजपेन स्वाभावरूपकुम्भकसंज्ञया अग्निचिन्तनरूपया आग्नेय्या धारणया देहं दाहयित्वा लमितीन्द्रबीजेन द्वात्रिंशद्वारजपेन दक्षिणनासापुटेन वायुनिःसारणरूपया रेचकसंज्ञया ऐन्द्रध्यानरूपया ऐन्द्राधारणया क्षितीस्य वमिति वरुणबीजेन चतुःषष्टिवारजपेन जलाधिपध्यानरूपया जलाधिपधारणया चन्द्रमण्डलाद्गलितं स्रावयित्वा तेनामृतेन प्रणवेन सर्व्वाङ्गं संघटितं पुनर्नवीभूतं चिन्तयित्वा वाय्वादिभूतानि व्योमादिभ्यो व्युत्क्रमेण बहिः कृत्वा हंस इति मन्त्रेण परमात्मतो जीवं नाभिमध्ये न्यसेत् ॥ * ॥

तत ऋष्यादिन्यासः ।

गोपालमन्त्रे तु नारदाय ऋषये नमः शिरसि । गायत्रीच्छन्दसे नमो मुखे । श्रीकृष्णाय देवाय नमो हृदि । एवमन्यत्रोहनीयम् ॥ * ॥

ततः प्राणायामः ।

ततो मूलमन्त्रेण षोड़शवारजपेन अङ्गुष्ठेन दक्षिणनासापुटं धृत्वा वामनासया वायुं पूरयेत् । अङ्गुष्ठानामिकाभ्यां नासापुटौ धृत्वा चतुःषष्टिवारजपेन वायुं कुम्भयेत् । वामनासामनामिकया धृत्वा दक्षिणनासया द्वात्रिंशद्वारजपेन वायुं त्यजेत् । पुनर्दक्षिणनासया पूरयेत् । उभाभ्यां कुम्भयेत् । वामनासया रेचयेत् । पुनर्व्वामया पूरयेत् । उभाभ्यां कुम्भयेत् । दक्षिणया रेचयेदिति ॥ * ॥

ततो बाह्यमातृकान्यासः । न्यासशब्दे द्रष्टव्यः ॥ अनेकदेवपूजने तु भूतशुद्धिमातृकान्यासयोरविशेषात् सकृदेवानुष्ठानम् ॥ * ॥

ततः करन्यासः ।

यथा गोपाले । ॐ क्लां अङ्गुष्ठाभ्यां नमः अङ्गुष्ठयोः । ॐ क्लीं तर्ज्जनीभ्यां स्वाहा तर्ज्जन्योः । ॐ क्लूं मध्यमाभ्यां वषट् मध्यमयोः । ॐ क्लैं अनामिकाभ्यां हुं अनामिकयोः । ॐ क्लौं कनिष्ठाभ्यां वौषट् कनिष्ठयोः । ॐ क्लः करतलपृष्ठाभ्यां फट् करतलपृष्ठयोः । एवमन्यत्राप्यूह्यम् ॥

ततोऽङ्गन्यासः ।

ॐ क्लां हृदयाय नमः हृदये हस्ततलेन । ॐ क्लीं शिरसे स्वाहा अङ्गुष्ठाङ्गुलिभिः शिरसि । ॐ क्लूं शिखायै वषट् अधोमुखाङ्गुलिमुष्टिना शिखायाम् । ॐ क्लैं कवचाय हुं हस्तकरतलाभ्यां आशिरःपादपर्य्यन्तरूपसर्व्वाङ्गे । ॐ क्लौं नेत्राभ्यां वौषट् तर्ज्जनीमध्यमाभ्यां नेत्रयोः । ॐ क्लः अस्त्राय फट् कराघस्तालत्रयं छोटिकाभिर्दशदिग्बन्धनञ्च कुर्य्यात् । एवमन्यत्राप्यूहनीयम् । आगमोक्तादिपूजने तु भूतशुद्ध्यादिनियमः अन्यत्र त्वनियमः ॥ * ॥

ततोऽर्घ्यस्थापनम् ।

वामतोऽर्घ्यपाद्याद्याचमनीयपात्राणि संस्थाप्य अर्घ्यपात्रं जलगन्धपुष्पैः संपूज्य तत्तद्देवतामूलमन्त्रं सर्व्वदेवतासाधारणे तु प्रणवं वा अष्टधा जप्त्वा धेनुमुद्रया अमृतीकृत्य तदुदकं पात्रान्तरे किञ्चित् दत्त्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षयेत् । प्रणवादितत्तद्देवताचतुर्थ्यन्तनाम्ना नमोऽन्तेन मूलमन्त्रेण वा आत्मानं गन्धादिभिरभ्यर्च्च्य तद्रूपं ध्यात्वा तत्स्नानपात्रे चन्दनादिरचिताष्टदलपद्मे सम्बोधनान्तदेवतानाम्ना इहागच्छेत्यावाह्य स्थापयित्वा मूलेन चतुर्थ्यन्तनाम्ना आसनं दत्त्वा सम्बोधनान्तनाम्ना स्वागतं ते इति पृच्छेत् । दीक्षितस्तु मूलमन्त्रमुच्चार्य्य प्रणवादिचतुर्थ्यन्तनाम्ना नमोऽन्तेन दद्यादिति विशेषः । एवं पाद्यार्घ्याचमनीयादीनि दद्यात् । पाद्यार्घ्ययोः पौर्व्वापर्य्ये त्वनियमः । ततो घृतमधुदधिमेलकपलमितं कांस्यपात्रस्थं पिहितञ्च मधुपर्कं पुनराचमनीयञ्च दद्यात् । ततो लौकिकमन्त्रविकघृतमयतोलकाद्यूनवैदिकाष्टोत्तरशतपलाद्यूनजलेन तदभावे षड्विंशतिमाषद्वयाधिकपयोदशतोलकरूपवैदिकपलचतुष्टयान्यूनजलेन इदं स्नानीयं एवं दुग्धादिनापि । घृतादिस्नाने तु गन्धद्रव्यचूर्णकषायसूक्ष्मोदकेन स्नानं चाङ्गं ततः पुनराचमनीयं वाससी पुनराचमनीयं दद्यात् । प्रत्येकमलङ्कारं यज्ञोपवीतं गन्धं पुष्पं धूपं दीपं नैवेद्यं पुनराचमनीयं ताम्बूलं दत्त्वा मूलमन्त्रं यथाशक्ति जप्त्वा समर्प्य स्तुतिः प्रदक्षिणीकृत्य अष्टाङ्गप्रणिपातेन पञ्चाङ्गप्रणिपातेन वा शिरसि करद्वयसंयोगेन च प्रणम्य स्तुत्वा प्रणवादिसम्बोधनान्तनाम्ना क्षमस्वेति विसर्ज्जयेत् । यत्र यदुपचारद्रव्यासम्भवस्तत्र जलं देयम् । प्रतिष्ठितस्थिरतरप्रतिमायां तत्तदावाहनविसर्ज्जने न स्तः । एवं शालग्रामे जले वा सर्व्वदेवपूजनेऽपि यथालाभं पाद्यादिदशोपचारैः । गन्धपुष्पधूपदीपनैवेद्यैः पञ्चोपचारैः गन्धपुष्पाभ्यां वा केवलेन पुष्पेण केवलेनाक्षतेन केवलेन जलेन मानसिकेन वा पूजयेत् । तत्र सामान्यदेवताधूपः शारदायाम् ।

सगुग्गुल्वगुरूशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवाय देशिकः ॥

एतैर्मिलितैर्यथालाभं वा । इति सर्व्वदेवतासाधारणो विधिः ॥ * ॥

ततः प्रथमं सूर्य्यपूजा ।

ॐ सूर्य्याय नमः इति पूजयेत् । तत्र गन्धाः । चन्दनागुरुकर्पूरवीरणलपद्मकाष्ठरक्तचन्दनानि । पुष्पाणि । मल्लिकामालतीकरवीरचम्पकपाटलाबकुलतगरपीतझिण्टीकुन्दयवमल्लिकाशौकपद्मनागस्यजवापुष्पाणि विहितानि । तुलसीलयातुलसीदूर्व्वाबिल्वपत्राणि राजिताकाशोकदवनगरमुकुलानि निषिद्धानि । धूपाश्च । गुग्गुल्वगुरुदेवदारुविष्णानि । दीपस्तु घृतेन तैलेन वा । नैवेद्यानि विविधभक्ष्याणि ॥ * ॥

अथ गणेशपूजा ।

तदावाहने । ॐ भूर्भुवःस्वर्गणेश इहागच्छ इति दूर्व्वापुष्पाक्षतैरावाह्य ॐ गणेशाय नम इत्यनेन पूजयेत् । तत्र तुलसी निषिद्धा । रक्तचन्दनरक्तपुष्पादिकं विहितम् । देवतान्तरप्रसिद्धं अन्यत् शुक्लादिकं न देयम् ॥ * ॥

अथ दुर्गापूजा ।

ॐ भूर्भुवःस्वर्दुर्गे इहागच्छ इति पुष्पाक्षतैरावाह्य ॐ दुर्गायै नम इत्यनेन पूजयेत् । तत्र

गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि। पुष्पाणि मल्लिकोत्पलपुन्नागशमीचम्पकाशोककर्णिकारकरवीरतुलसीविल्वपत्रादीनि विहितानि। सकुलाकर्मन्दारपुष्पाणि निषिद्धानि। धूपाः लक्ष्मागुरुसहितहुतमधिघाज्यगुग्गुलुविल्वान्ततमानि वीरवल्लजचन्दनेऽपि। दीपस्तु घृतेन तैलेन वा। नैवेद्यानि आम्रनारिकेलखर्जूरकदलीबीजपूरादीनि। क्षपितं विल्वं फलं निषिद्धम्। यत्पक्वकदलीफलमपि विहितम्। * ॥

अथ शिवपूजा।

उदङ्मुखः ॐ नमः शिवाय नमः इति मन्त्रेण पूजयेत्। तत्र गन्धः अगुरुचन्दने। पुष्पाणि च अर्कककरवीरजातीपङ्कजपाटलाश्वेतमन्दारनागकेशरचम्पक-धुस्तूरविल्वामलक-तुलसीपद्मानि विहितानि। केतकीमाधवीपुन्नागकुन्दयूथीमल्लिकाग्निरीषवर्जवन्यूकसुकुमाराणि निषिद्धानि। धूपस्तु घृतगुग्गुलुविल्वफलानि उशीरागुरुचन्दनानि च। दीपस्तु घृतेन तैलेन सर्वपादिना वा। नैवेद्यानि गुडखण्डघृतपक्वमाषतण्डुलान्नादीनि। * ॥

अथ प्राथमिकशिवलिङ्गपूजाविधिः।

ॐ हराय नम इति ऋद्धाहरणम्। ॐ मृत्युञ्जयाय नम इति घटनम्। ॐ भूतपतये नमः इति प्रतिष्ठा। आचारात् ध्यायेन्नित्यमित्यादिना शारदोक्तं ध्यायेत्। शिवाकलश इहागच्छ इत्यावाहनम्। ॐ पशुपतये नम इति स्नपनम्। एतत् पाद्यं ॐ नमः शिवाय नम इति पाद्यादिभिः संपूज्य वामावर्तेन वेद्यां प्राच्यादिषु ॐ सर्वाय क्षितिमूर्तये नमः ॐ भवाय जलमूर्तये नमः ॐ रुद्राय अग्निमूर्तये नमः ॐ उग्राय वायुमूर्तये नमः ॐ भीमाय आकाशमूर्तये नमः ॐ पशुपतये यजमानमूर्तये नमः ॐ महादेवाय सोममूर्तये नमः ॐ ईशानाय सूर्यमूर्तये नमः। इत्यष्टमूर्तीः पुष्पैः पूजयेत्। ततो गुरुवाक्यं श्रुत्वा महादेव क्षमस्वेति संहारमुद्रया विसर्जयेत्। स्त्रीशूद्रस्तु नमः शिवायेति मन्त्रेण पूजयेत् ॥*॥

अथ विष्णुपूजा।

गुरुवाद्यर्घ्यपात्रं पुरतो निधाय त्रिभागजलेनापूर्य वसुमिति धेनुमुद्रया अमृतीकृत्य ॐ विष्णवे नम इत्यर्घ्यं जपित्वा तेनोदकेनात्मानं पूजोपकरणञ्चाभ्युक्षेत्। दीक्षितस्तु तत्तन्मन्त्रेणार्घ्यं तत्तन्मन्त्रेण पूजयेत् अङ्गाद्यावरणञ्च पूजयेत् शालग्रामे मणौ प्रतिमायाञ्च पद्मजलादिषु। तत्र शालग्रामे आवाहनविसर्जने न स्तः। ध्येयः सदेत्यादिना ध्यात्वा ॐ भगवन् विष्णो इहागच्छेत्याद्यन्तपुष्पैरावाह्य इदमासनं ॐ श्रीविष्णवे नमः ॐ विष्णो स्वागतमिति पृच्छेत् एतत् पाद्यं ॐ विष्णवे नमः सामगस्तु इदमर्घ्यं ॐ विष्णवे नमः इति वदेत्। तदितरस्तु एषोऽर्घ इति विशेषः। तत्र द्रव्याणि कुशपुष्पाक्षतसिद्धार्थचन्दनतोयानि यथालाभं वा अर्घ्यपात्रयोस्तु पौष्पार्घ्यपात्रे विषमः। आचमनीये सुगन्धिद्रव्ययुक्तजलं केवलं वा प्रशस्तजलम्। घृतमधुदध्यात्मको मधुपर्कः तदभावे केवलं वा मधु। पूर्ववदिदमाचमनीयं इदं स्नानीयं तत्र लौकिकषड्विधमृत्तत्त्वयतोजलाप्लुतं जलम्। पुनराचमनीयं इदं वस्त्रं पुनराचमनीयं इदमाभरणं पुनराचमनीयं गन्धस्तु अङ्गुष्ठयुक्तकनिष्ठया गन्धमुद्रया तत्र चन्दनागुरुकर्पूरकुङ्कुमवीरवल्लजपद्मकाष्ठसिङ्कररक्तचन्दनकस्तूरिकाजातीफलानि कृष्णानि कृतधूपानि वा एतद्दाहाङ्गरसो वा पुष्पाणि च तर्जन्यङ्गुष्ठयोगरूपपुष्पमुद्रया तत्र मल्लिका-मल्लिकाजाती-केतकाशोक-चम्पकनाग-केशरकुरुबक-पद्मोत्पलतुलसी-विल्वकरवीरपारिभद्रपाटलाश्वेतापराजिताबकुलतगरश्वेतजवारक्ताशोकशुक्लपुष्पभूमिचम्पकशेफालीजीवमालिकायूथिकाकदम्बकुन्दजवुमाधवीपुन्नवकवन्यूककुरुवकविल्वपुष्प-बकुलारक-कञ्जारशोफपलाशपुष्पाणि विहितानि। नरसिंहेतरावतारे केतकी निषिद्धा। पर्युषितमक्षिप्तोच्छिष्टस्वयंपतितोपहतमध्याह्नकालोत्तरच्युटितमद्मचम्पकेतरकर्णिकातुलसीतरशुष्कपत्रपरिहित-पुष्पविहितेतररक्तपुष्पचैत्यवृक्षोद्भवशशानजात-कुटज-शालशमीशिरीषपुष्पाणि निषिद्धानि। ब्राह्मीतरस्य वनोद्भवानि च। विहितमप्यानि तुलसीविल्वभृङ्गराजतमालामलककेतकीपद्मानि। पद्मकुन्दोत्पलानि पक्षद्विगतः परतः पर्युषितानि। तुलस्यगस्त्यविल्वानि कदापि न पर्युषितानि। धूपस्यानञ्च देवस्य वामे पुरतो वा। तर्जन्यङ्गुष्ठयोगरूपधूपमुद्रया वामहस्तेन घण्टां वादयन् देयः। स च भूमौ न देयः। धूपश्च जटामांसीमञ्जिष्ठाशल्लकगुग्गुलुकर्पूरागुरुधिष्ण्यकदेवदारुजातीफलप्रारदोक्तमिश्रितगुग्गुल्वादयः। दीपस्यानं देवस्य दक्षिणतः पुरतो वा। मध्याङ्गुष्ठयोगरूपदीपमुद्रया एष दीपः घृतेन तैलेन वा भूमौ न देयः। नैवेद्यस्यानञ्च देवस्योत्तरदेशः। अनामिकाङ्गुष्ठयोगरूपनैवेद्यमुद्रया एतन्नैवेद्यं तत्र कदली-पनस-जम्बूलवली-करमर्दक-इविःसंस्कृततिलमाषमुद्गयवगोधूमब्रीहिप्रियाङ्गवं विहितम्। निषिद्धन्तु अजामहिषीक्षीरदधिघृतं पक्षिगवराह-मत्स्य-खग-छागेतरमांस-क्षिरगयोदकमर्धतरच्याजालब्धविड्जालाद्युच्छिष्टखड्गाक्रान्तपर्युषितेतरभक्ष्यम्। खण्डादीनि यवगोधूमक्षीरविकाराश्च न पर्युषिताः। ततः पुनराचमनीयं ताम्बूलञ्च दत्त्वा अष्टोत्तरसहस्रं प्रणवं वा उत्तरीयवस्त्रेण छादितशुद्धेन स्थिततिर्यग्भूतदक्षिणकरः यथाशक्ति मूलमन्त्रं जपित्वा ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देव! त्वत्प्रसादात् त्वयि स्थिते ॥ इत्यर्घोदकेन देवहस्ते जलं दद्यात्। ततोऽर्घ्यपात्रं गृहीत्वा त्रिः प्रदक्षिणीकृत्य,

ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।

नतार्तिहरं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
ब्रह्मा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्मिष्ठ! आर्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष! ते चरणारविन्दम्॥

इति स्तुत्वा ॐ प्रसीद भगवन्निति दण्डवत् प्रणमेत्।

ॐ यत् किञ्चित् क्रियते देव मया सुकृतदुष्कृतम्।
तत् सर्वं त्वयि संन्यस्तं मत्प्रयुक्तः करोम्यहम्॥
इत्यनेन सर्वं समर्पयेत्॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन।
यत् पूजितं मया देव! परिपूर्णं तदस्तु मे॥
इति प्रार्थयेत्। ततः संहारमुद्रया निर्माल्यपुष्पमादाय भूमौ क्षिपेत् विसर्जनमन्त्रे ॐ भगवन् विष्णो क्षमस्वेति विसर्जयेत् तदनन्तरं निर्माल्यपुष्पमादाय।

ॐ तिष्ठ देव परे स्थाने स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयः सर्वे सुरास्तिष्ठन्ति मे हृदि॥
इति मन्त्रेण देवं हृदि स्थापयेत्। ततः ॐ विष्वक्सेनाय नमः इति गन्धपुष्पनैवेद्यार्घं दद्यात्। ततो वैष्णवाय तन्निर्माल्यं चरणोदकं नैवेद्यञ्च किञ्चिद्दत्त्वा शिरसि निर्माल्यं धार्यं सर्वाङ्गेष्वनुलेपनं कृत्वा यथालाभं पादोदकं नैवेद्यञ्चोपभुञ्जीत। तत्र पादोदकमन्त्रौ मन्त्रः।

ॐ तव तत्त्वा महाबाहो भक्तानामार्तिनाशन।
सर्वपापप्रशमनं पादोदकं प्रयच्छ मे॥

ततस्तत्प्राशनादौ शरीरोक्तिरदेवतानाम स्मृत्वा स्वयं चिरञ्जीव्य पादोदकं पीत्वा तच्छेषम्।

अकालमृत्युशमनं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥
इति शिरसि धारयेत्॥ नैवेद्यभक्षणे मन्त्रः।

ॐ उच्छिष्टभोजिनस्तस्य वयस्तच्छिष्टकाङ्क्षिणः।
येन लीलावराहेण हिरण्याक्षो निपातितः॥
इत्युच्चार्य भक्षयेत्॥* ॥ यथालाभं दशोपचारेण वा पूजयेत्। तत्र दशोपचाराः। अर्घ्यपाद्याचमनीयमधुपर्काचमनगन्धपुष्पधूपदीपनैवेद्यानि। षडुपचाराः। गन्धपुष्पधूपदीपनैवेद्यानि। गन्धपुष्पाभ्यां वा केवलपुष्पेण केवलजलेन वा पूजयेत् ततोऽग्निकार्यरत्नवेलीश्रीणां पूजनम्। इत्याह्निकप्रयोगतत्त्वम्॥* ॥ तन्त्रोक्तसामान्यपूजा कलावतीग्रन्थे द्रष्टव्या॥

पूजार्हः, त्रि, (पूजामर्हतीति। पूजा+अर्ह+"अर्हः।" ४। २। १२। इत्यच्।) पूजायोग्यः। मान्यः। इति शब्दरत्नावली॥ (यथा, मनुः। ६। ६६।

"प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन॥")

पूजितः, त्रि, (पूज+क्तः।) प्राप्तपूजः। अर्चितः। तत्पर्य्यायः। अर्चित२। इत्यमरः॥३।१।८८॥ (यथा, भट्टिः। ४। १।

पूतग

"निहते भरते श्रीमान्ये रामस्तपोवनम् ।
प्रपेदे पूजितस्तस्मिन् दक्षकारण्यमौषिवान् ॥")
पूजितव्यः, त्रि, पूजनीयः । पूजधातोः कर्म्मणि तव्यप्रत्ययनिष्पन्नः ॥
पूजितः, पुं, (पूज्यते इति । पूज+"शुभादिभ्यः क्तिच् ।" उणा० १ । ५७ । इति इतच् । च च क्तित् ।) देवता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूज्ये, त्रि । इत्युणादिकोषः ॥
पूज्यः, पुं, (पूजयितुमर्हः । पूज+"अर्हे कृत्यतृचश्च ।" ३ । ३ । १६९ । इति यत् ।) चमूरः । पूजनीये, त्रि । तत्पर्य्यायः । प्रतीक्ष्यः २ । इत्यमरः । ३ । ३ । १५० ॥ यथा,—
"अहं हि पूज्यो वयसा भवद्भा-
क्षेनाभिवादं भवतां न युक्तम् ।
यो विद्यया तपसा जन्मना वा
वृद्धः स पूज्यो भवति द्विजानाम् ॥
अरुक उवाच ।
अवादीच्चेद्वयस्त्वञ्जि प्रवृद्ध
इति वैराजाभ्यधिकः कथञ्चित् ।
यो वै विद्यांस्तपसा च वृद्धः
स एव पूज्यो भवति द्विजानाम् ॥"
इति मात्स्ये ३६ अध्यायः ॥
पूञ्, क संचाते । राशीकरणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) षष्ठस्वरी । क, पूणयति धान्यं लोकः । राशीकरोतीत्यर्थः । इति दुर्गादासः ॥
पूतं, क्ली, (पूयते स्मेति । पू+कर्म्मणि क्तः ।) अपनीतदुष्टधान्यम् । पछोआन धान इति भाषा ॥ तत्पर्य्यायः । बहुलीकृतम् २ । इत्यमरः । २ । ६ । २३ ॥
पूतः, त्रि, (पू च घञर्थे + क्तः ।) व्रतादिना शुद्धः । तत्पर्य्यायः । पवित्रः २ प्रयतः ३ । इत्यमरः । २ । ७ । ३५ ॥ शुद्धः । यथा,—
"दधिगोमयादि सामान्यं पवित्रं स्वभावपवित्रं वा ।" इति भरतः ॥ तत्पर्य्यायः । पवित्रम् २ । मेध्यम् ३ । इत्यमरः । ३ । ३ । १५५ ॥ यथा,—
"चक्षुःपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं बुद्धिपूतं विचिन्तयेत् ॥"
इति मार्कण्डेयपुराणम् ॥
सत्यम् । इति जटाधरः ॥
पूतः, पुं, (पूयते स्म येनेति । पू+करणे क्तः । यद्वा, पवते स्मेति गत्यर्थेति कर्त्तरि क्तः ।) गृध्रः । श्वेतकुशः । विष्णुतरुश्च । इति राजनिर्घण्टः ॥
पूतक्रतायी, स्त्री, (पूतक्रतोरिक्षस्य स्त्री । पूतक्रतु+"पूतक्रतोरै च ।" ४ । १ । १६ । इति ङीप् ऐकारादेशश्च ।) इन्द्राणी । शची । इति जटाधरः ॥
पूतक्रतुः, पुं, (पूतः क्रतुर्येन ।) इन्द्रः । इति जटाधरः ॥
पूतगन्धः, पुं, (पूतः पवित्रो गन्धो यस्य ।) वर्ब्बरः । इति राजनिर्घण्टः ॥

पूतना

पूतद्रव्यम्, क्ली, (पूतं पवित्रं द्रव्यमिति निरुक्तकर्म्मधारयः ।) श्वेतकुशः । इति राजनिर्घण्टः ॥
पूतहः, पुं, (पूतः पवित्रो हः ।) प्रजापतिभेदः । इति राजनिर्घण्टः ॥
पूतधान्यं, क्ली, (पूतं धान्यमिति निरुक्तकर्म्मधारयः ।) तिलः । इति राजनिर्घण्टः ॥
पूतना, स्त्री, (पूतं करोतीति । तत्करोतीति णिच् । ततो बहुलमन्यत्रापीति युच् ।) हरीतकी । इत्यमरः । २ । ४ । ४६ ॥ विष्णुदेवीजा खड्गवक् हृद्दन्तिहरीतकी भेदने प्रसूता । इति राजवल्लभः ॥ (उत्पत्तिस्थानचाक्षुषचिकित्सा यथा,—
"पूतना मगधोद्भवा ।" "पूतना चतुरङ्गुला———————।"
इति हारीते कल्पस्थाने प्रथमेऽध्याये ॥)
गन्धमांसी । इति राजनिर्घण्टः ॥ दानवीभेदः । सा वकासुरभगिनी जिघांसया स्तनकालकूटप्रदानात् श्रीकृष्णेन हता । (एतद्वृत्तान्तस्तु हरिवंशे ६२ अध्याये द्रष्टव्यः ॥) रोगभेदः । इति मेदिनी । ने, ६३ ॥ स च अङ्गिपूतनानामबालरोगः । तस्य निदानं यथा,—
"पद्मवर्णो महापद्मो बाले दोषत्रयोद्भवः ।
ग्रहाभ्यां हृदयं यो वा हृदयाद्वा गुदं व्रजेत् ॥
क्षुद्ररोगे च कथिते अजगल्लाङ्गिपूतने ॥"
क्षुद्ररोगोक्तं यथा,—
"ग्रहस्तन्यसमायुक्तेऽग्नौ चैवोपाने घ्रियोर्भवेत् ।
क्षिप्ते वा स्राव्यमाने वा कण्डूरक्तकफोद्भवा ॥
कण्डूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते ।
एकीभूतं व्रणं घोरं तं विद्यादङ्गिपूतनम् ॥"
इति माधवकरः ॥ * ॥
(चक्षुष्यान्तरमस्या यथा,—
"सस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ
विड्भिन्नं क्षरति च काकतुल्यगन्धिः ।
हृद्दार्त्तो क्षुधिततनूरुहः कुमार-
स्तृष्णार्त्तो भवति च पूतनाग्रहीतः ॥"
इति सुश्रुतेनोत्तरतन्त्रे सप्तविंशोऽध्याय उक्तम् ॥
चिकित्सास्या यथा,—
"कपोतवङ्क्षारजुको वरुणः पारिभद्रकः ।
आस्फोता चैव योज्याः स्युर्बालानां परिवेचने ॥
वचा वयस्था गोलोमी हरितालं मनःशिला ।
कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते ॥
हिंसं घृतं सुगान्धीर्थ्यं सिद्धं मधुरकेषु च ।
कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा ॥
देवदारु वचाहिङ्गु कुष्ठं गिरिकदम्बकः ।
एकाक्षरेणवक्षारः योज्या तद्धूपने सदा ॥
गन्धनाकुलिकुम्भीका मञ्जानो वदरस्य च ।
कर्कटाख्यि घृतश्चैव धूपनं सर्वपैः सह ॥
काकादनीं चित्रफलां विल्वीं गुञ्जाश्च धारयेत् ।
मक्षीदंशञ्च कुर्व्वीत क्षारं पललमन्तथा ॥
घृतावसक्तं कृत्वा वलिं शून्यगृहे हरेत् ।
उच्छिष्टेनाभिषेकेण घृतञ्च स्नानमिष्यते ॥
पूज्या च पूतना देवी वलिभिः सोपहारकैः ।
मलिनाम्बरसंवीता मलिनाङ्गविलेपना ॥

पूतिः

शून्यागाराश्रिता देवी दारकं पातु पूतना ।
दुर्गन्धेना सुदुर्गन्धा करालाऽतिकराजिका ॥
भिन्नागाराश्रया देवी दारकं पातु पूतना ॥"
इति चोत्तरतन्त्रे द्वाविंशत्तमेऽध्याये सुश्रुतेनोक्तम् ॥) बालमारकविशेषः । यथा,—
"तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतना नाम मारुका । तया गृहीतमात्रेण प्रथमं भवति ज्वरः ॥ गात्रसुप्तेर्जयति स्तब्धं न गृह्णाति दृष्टिं भ्रमति क्रन्दति क्षणं निरीक्षते । वलिमस्य प्रवक्ष्यामि येन सम्यग्यते शुभम् । वह्नुभयतटन्तिकां गृहीत्वा गन्धं ताम्बूलं रक्तपुष्पं रक्तचन्दनं रक्तवस्त्रयुग्मं रक्तप्रदीपाः रक्तखलिकाः मत्स्यमांससुराः अन्नभक्तञ्च दक्षिणस्यां दिशि मध्याह्ने चतुष्पथे वलिर्दातव्यः शिवनिर्म्माल्यगुग्गुलुसर्षपनिम्बपत्रमेषशृङ्गैर्दिनत्रयं धूपयेत् । ॐ नारायणाय नमः हन हन सुच सुच हुं फट् स्वाहा । चतुर्थे दिवसे ब्राह्मणं भोजयेत् ततः सम्यग्यते शुभम् ।" इति चक्रपाणिदत्तः ॥
पूतनारिः, पुं, (पूतनाया अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥
पूतनास्तनः, पुं, (पूतनां स्तनयति स्तनितवानिति वा । स्तन+क्युः ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥
पूतनाहा, [न्] पुं, (पूतनां हन्तीति । हन+क्विप् ।) श्रीकृष्णः । इति हेमचन्द्रः ॥
पूतफलः, पुं, (पूतानि पवित्राणि फलान्यस्य ।) पनसः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विवरणं व्याख्यातम् ॥)
पूता, स्त्री, (पूत+टाप् ।) दूर्व्वा । इति राजनिर्घण्टः ॥
पूतात्मा, [न्] पुं, (पूतः पवित्र आत्मा स्वभावः ।) पवित्रस्वभावः । (पूत आत्मा स्वरूपं यस्य विष्णोः । यथा, महाभारते । १३ । १४६ । १५ ।
"पूतात्मा परमात्मा च मुक्तानां परमा गतिः ॥")
शुद्धदेहे, त्रि । यथा,—
"ग्रामेऽपि स्वराजेन स्नात्वा सम्प्राप्यवाहनम् ।
पूतात्मा गौरवः श्रीमान्स्वस्थाद्योगाद्विमुक्तवान् ॥"
इति ग्राम्यपुराणे हर्य्यस्तवः ॥
पूति, क्ली, (पुनातीति । पू+कर्म्मणि क्तिच् ।) रोहिषतृणम् । इति राजनिर्घण्टः ॥
पूतिः, स्त्री, (पू+भावे क्तिन् ।) पवित्रता । दुर्गन्धः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, मारुते १८० अध्याये ।
"मेषमूत्रसैन्धवाभ्यां कर्णयोर्भरणात् शिव ।
कर्णयोः पूतिनाशः स्यात् कृमिस्रावो विनश्यति ॥")
खड्गाग्रसुष्कः । खाटाशी इति भाषा । तस्यानुलेपनगुणः । परमालक्ष्मीरक्षोघ्नवरुणाग्नित्वम् । इति राजवल्लभः ॥ (अस्या विशोधनं यथा,—
"यथालाभमपामार्गं क्षुत्क्षामादिचारलेपितम् ।
वासखण्डेन संक्षिप्य पूतिं निर्लोमतां नयेत् ॥
क्षीरापाकं पचेत् पश्चात् पञ्चपल्लववारिणा ।
क्षतः साधुमिवोत्पीथ ततो निष्क्रिडतां नयेत् ॥

आजग्धोभाञ्जनजलैर्भावयेच्च पुनः पुनः ।
शिग्रुमूलेन कैतक्या पुष्पपत्रपुटे च तम् ॥
पचेदेवं विमुक्तः सन् जङ्गणाभिसमो भवेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥
दुर्गन्धविशिष्टे, त्रि । यथा, भगवद्गीतायाम् ।
१७ । १० ।
"यातयामं गतरसं पूति पर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥")

सामान्यं कर्म कुर्य्यात योगान् वैशेषिकानपि ॥
सर्ज्जिकायवसंयुक्तबीजपूररसं क्षिपेत् ।
कर्णस्रावहरा दाहाक्षेप नाशनसंग्रहम् ॥१॥
आम्रजम्बुप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णमदं हरेत् ॥२॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥३॥
घृतं रसाञ्जनं नार्या: क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थे तत् स्रावे पूतिकर्णके ॥४॥
कुलत्थिकूलवाद्राद्रशुक्लाकाम्बिकैर्यवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम् ॥
कुष्ठादितैलम् ॥ ५ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति ॥ ६ ॥
चूर्णेन गन्धकशिलारजनीभवेन
सृष्टाग्निकेन कटुतैलपलाष्टकेन तु ।
क्षत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जयेच्चिरभवामपि कर्णजाताम् ॥
सृष्टि: पलम् ॥ ७ ॥
क्षमिकर्णविनाशाय क्षमिघ्नीं कारयेत् क्रियाम् ।
वार्ताकुधूमच्छित: सार्षपस्नेह एव च ॥
पूरणं हरितालेन शम्बूकस्रवणेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलु: श्रेष्ठ उच्यते ॥"
इति भावप्रकाश: ॥
(चिकित्सास्य यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धूद्भवरजो गुड़: ।
पूरणं पूतिकर्णस्य ग्रसनो मधुसंयुत: ॥"
इत्युत्तरतन्त्रे एकविंशोऽध्याये सुश्रुतेनोक्तम् ॥)
पूतिकर्णक:, पुं, (पूति: कर्णो यस्मात् । कप् ।)
कर्णरोगभेद: । तस्य लक्षणम् । यथा,—
"कर्णविद्रधिपाकाद्वा जायते स्राव्यपूरणात् ।
पूयं स्रवति वा पूति स ज्ञेय: पूतिकर्णक: ॥"
इति माधवकर: ॥
(लक्षणान्तरमस्य यथा,—
"क्षिते कर्णे स्रोतसि पित्ततेजसा
विलाप्यमाने श्लक्ष्णसन्तापवान् ।
अवेदनो वाप्यथवा सवेदनो
यदं स्रवेत् पूति स पूतिकर्णक: ॥"
इत्युत्तरतन्त्रे विंशोऽध्याये सुश्रुतेनोक्तम् ॥)
औषधं यथा,—
"निर्गुण्डी स्वरसे तैलं सिन्धूद्भवरजोगुड़: ।
पूरणात् पूतिकर्णस्य ग्रसनो मधुसंयुत: ॥"
अथवा ।
"वस्तमूत्रार्कपित्याम्लजम्बूपल्लवसाधितम् ।
पूतिकर्णापहं तैलं जातीपत्ररसेन वा ॥"
इति चक्रपाणिदत्त: ॥
(चिकित्सास्य यथा,—
"घृतं रसाञ्जनं नार्या: क्षीरेण क्षौद्रसंयुतम् ।
प्रशस्यते चिरोत्थेऽपि स्रावे पूतिकर्णके ॥"
इति चोत्तरतन्त्रे एकविंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥)
पूतिका, स्त्री, (पूया कायतीति । के + क: । टाप् ।) मार्जारी । इति राजनिर्घण्ट: ॥

(कीटविशेष: । यथा, मनुस्मृतौ । ३ । ६६ ।
"पुत्रका दत्त धान्येषु पूतिका दत्त पक्षिषु ।
मशका दत्त मर्त्येषु यज्ञे धर्म्मो न कारयेत् ॥")
लताग्राकविशेष: । इत्यमरटीकायां भरत: ॥
पुँइ इति भाषा ॥ अस्या: पर्य्यायगुणौ
शब्दोदाहृतग्रन्थे द्रष्टव्यौ ॥ दोषाणां तद्वत्त्वे
दोषो यथा । पूतिका ब्रह्मचारिका । यदपि ।
'कुसुम्भं नालिकाशाकं हस्तार्कं पौतिवीलता ।
भक्षयन् पतितस्तु स्यादपि वैदान्तगो द्विज: ॥'
इत्यनुशासनं सामान्यतोऽभिहितम् । अत्र
नालिका श्वेतकाञ्चनीति कल्पतरु: । पूतिका च
हादशग्रामधिकदोषाय शूद्रविधविधिका च ।" इति
तिथितत्त्वम् ॥ (इयं हि श्रोमांसुतो जातेति
सोमस्थालाभे प्रतिनिधित्वेन ग्राह्या । यथा,
महाभारते । ३ । ३५ । ३६ ।
"अस्ति माव: प्रतिनिधिर्यथा ग्राह्युमनीषिण: ।
पूतिकामिव सोमस्य तथेदं क्रियतामिति ॥")
पूतिकासुख:, पुं, (पूतिकाया सुखमिव सुखं यस्य ।)
शम्बूक: । इति शब्दमाला ॥ (शम्बूकशब्दे ऽस्य
विषयो ज्ञेय: ॥)
पूतिकाष्ठं, क्ली, (पूति काष्ठमिति कर्म्मधारय: ।)
देवदारु । सरलवृक्ष: । इत्यमर: । २ । ४ । ५४ ।
२ । ४ । ६० ॥ पचिवदारु च ॥
पूतिकाष्ठकं, क्ली, (पूतिकाष्ठ + स्वार्थे कन् ।)
सरलवृक्ष: । इति शब्दरत्नावलि: ॥
पूतिगन्धं, क्ली, (पूतिर्गन्धो यस्य ।) रङ्गम् । इति
राजनिर्घण्ट: ॥
पूतिगन्ध:, पुं, (पूतिर्गन्धो यस्य ।) गन्धक: । इति
हेमचन्द्र: । इति राजनिर्घण्ट: ॥ दुर्गन्धे, त्रि ।
(यथा, मनु: । ४ । २०७ ।
"निम्नानध्याय एव स्यात् ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥")
पूतिगन्धि:, त्रि, (पूतिर्गन्धो यस्य । "गन्धस्ये
दुत्पूतिसुसुरभिभ्य: ।" ५ । ४ । १३५ । इति
इ: ।) दुर्गन्ध: । इत्यमर: । १ । ५ । १२ ।
पूतिविट् पूतिरिव गन्धोऽस्य । इति राजनिर्घण्ट: ।
(यथा, महाभारते । २ । ६० । ३६ ।
"अघाधिजं कटुकं तीक्ष्णतुण्डं
यद्रोहिषं मदगं पूतिगन्धि ।
सतां पेयं यन्न पिबन्त्यसन्तो
मद्युं महाराज ! पिब प्रशास्य ॥")
पूतिगन्धिक:, त्रि, (पूतिगन्धि + स्वार्थे कन् ।
दुर्गन्ध: । इति हेमचन्द्र: । ६ । २७ ॥
पूतिगन्धिका, स्त्री, (पूतिगन्धोऽस्यास्या इति
पूतिगन्ध + ठन् ।) वाकुची । इति राज-
निर्घण्ट: ॥
पूतितैला, स्त्री, (पूति दुर्गन्धं तैलं यस्या: ।
ज्योतिष्मती । इति रत्नमाला ॥ मयाफट्कं
इति भाषा ॥ (मर्य्यायोऽस्या यथा,—
"पारावतपदी पिण्या गगनाख्यटवन्यनी ।
ज्योतिष्मती पूतितैला केचित्तामिन्दुदीं विदु: ॥
इति वैद्यकरत्नमालायाम् ॥)

पूतिवा

पूतिनस्यः, पुं, (पूतिर्दुर्गन्धो नस्यं नासिकाभवो रोगः।) नासारोगभेदः। तस्य लक्षणम्। यथा,

"दोषैर्विदग्धैरलसापुमुत्थे
संमूर्च्छितो यस्य समीरवस्तु।
शिरेति पूतिर्मुखनासिकाभ्यां
तं पूतिनस्यं प्रवदन्ति रोगम्॥"

इति माधवकरः॥

औषधं यथा,—

"व्याघ्रीदन्तीवचाग्निमुखरसजोषसम्भवैः।
साधितं जायते तैलं पूतिनाशाजदं जयेत्॥"

अथवा।

"त्रिकटुविकङ्कतैलैस्तवहुतीमूलाग्निमुखरस-
दन्तीभिः।
तैलं गोजलसिद्धं नस्यं स्यात् पूतिनस्यस्य॥"

इति चक्रपाणिदत्तः॥

(अस्य व्याख्याने श्रीकण्ठदत्तेन यद्विदेहवचनमाहृतं तद्यथा। "नासिका भवो यस्यः पूतिर्नस्यो वायुर्यत्र तं पूतिनस्यम्।" इत्येव विदेहः।

"कफपित्तमहस्रोत्रं क्षपितं मस्तिष्कं देहिनाम्।
विदग्धसञ्चयोद्गारं कुर्या क्लान्तिमुखजनाम्॥
ततः प्रस्यन्दते व्याधात् सरक्तं पूति पीनसम्।
पूतिनस्यन्तु तं विद्याद्व्याधकक्लेशजप्रदम्॥"

चिकित्सान्तरमस्य यथा,—

"पूर्व्वोद्दिष्टे पूतिनस्ये च जन्तोः
क्षेड्यक्षेदौ हर्षणं अंसनञ्च।
युक्तं भक्तं तीक्ष्णमस्यं लघुस्या-
दुष्णं तोयं धूमपानञ्च कार्य्यं॥"

इत्युत्तरतन्त्रे त्रयोविंशोऽध्याये सुश्रुतेनोक्तम्॥)

पूतिपत्रः, पुं, (पूति पत्रं यस्य।) ग्रन्थिपर्णवृक्षः। इति राजनिर्घण्टः॥

पूतिपुष्पिका, स्त्री, (पूति पुष्पमस्याः। कापि अत इत्वम्।) मातुलुङ्गी। इति रत्नमाला॥ मखुरतेषु इति मौटा वा इति च भाषा॥ (गुणास्त्र्योऽस्या मातुलुङ्गशब्दे ज्ञातव्याः॥)

पूतिफला, स्त्री, (पूति फलं यस्याः।) सोमराजी। इति रत्नमाला॥

पूतिफली, स्त्री, (पूति फलं यस्याः। ङीष्।) सोमराजी। इत्यमरः। २। ४। ६६॥ (अस्याः पर्य्यायो यथा,—

"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्ण्यिका।
ग्रन्थिपर्णा लताफला सोमा पूतिफलीति च॥
सोमवल्ली कालमेघी कृष्णा च प्रकीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पूतिमयूरिका, स्त्री, (पूतिर्मयूरीव। ततः स्वार्थे कन् ह्रस्वश्च।) अजगन्धा। इति राजनिर्घण्टः॥

पूतिमेदः, पुं, (पूतिर्मेदोऽस्य।) अरिमेदः। इति राजनिर्घण्टः॥ (विशेषोऽस्य अरिमेदशब्दे बोद्धव्यः॥)

पूतिवातः, पुं, (पूतये पाविन्याय वातो यस्य।) विल्ववृक्षः। इति रत्नमाला॥ (पर्य्यायोऽस्य यथा, "विल्वो मङ्गल्यपित्याख्यः श्रीफलो गोहरीतकी।

पूपाष्ट

पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम्॥"

इति वैद्यकरत्नमालायाम्॥

(पूतिर्वातः।) दुर्गन्धवायुश्च॥

पूतिवृक्षः, पुं, (पूतिर्वृक्षः।) ग्रन्थिपर्णः। इति रत्नमाला॥ पवित्रदुर्गन्धौ तरू च॥

पूतिव्याहिजा, स्त्री, (पूतिः व्याहिरिव जायते इति। जन+डः। टाप्।) खदिराम्बौ। इति चिकाण्डशेषः॥

पूतीकः, पुं, (पूति+वा ङीष्। सहते कायतीति। कै+कः।) पूतिकरञ्जः। इत्यमरटीकायां भरतः॥ (यथास्य पर्य्यायः।

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः॥"

इति वैद्यकरत्नमालायाम्॥

यथा च सुश्रुते। १। ४६।

"पूतीकश्चिचकः पाठा विडङ्गैलाहरेणवः॥")

गन्धमार्जारः। इति राजनिर्घण्टः॥

पूतीकरञ्जः, पुं, (पूतीयुक्तः करञ्जः।) पूतिकरञ्जः। इति रत्नमाला॥ गाटा इति भाषा॥ (पर्य्यायोऽस्य यथा,—

"पूतीकरञ्जः पूतीकः प्रकीर्य्यश्च सकण्टकः॥"

इति वैद्यकरत्नमालायाम्॥)

पूतीका, स्त्री, (पूत्या दुर्गन्धेन कायतीति। कै+कः।) पूतिका। इत्यमरटीकायां भरतः॥

पूत्यक्षः, पुं, (पूति दुर्गन्धमक्षमस्य।) गन्धकीटः। गँदोपोका इति भाषा॥ (यथा, महाभारते। १२। ३२२। ७।

"पुलाका इव धान्येषु पूत्यक्षा इव पक्षिषु।
तद्विधास्ते मनुष्येषु येषां धर्म्मो न कारणम्॥")

जन्तुभेदः। इति मेदिनी। क्षे, १२॥ खटाशूँ इति भाषा॥

पूनः, त्रि, (पू+क्तः। "पूङो विनाशे।" ८। २। ४४। इत्यस्य वार्त्तिकोक्त्या तस्य नः।) नष्टः। इति सुग्धबोधव्याकरणम्॥

पूपः, पुं, (पू+क्विप्। पुवं पवित्रं पाति रक्षतीति। पा+कः।) पिष्टकः। इत्यमरः। २। ६। ४८॥ (यथा, मार्कण्डेये। १५। २४।

"मधु कृत्वा नरो दंशः पूपं कृत्वा पिपीलिकः॥"

(पिष्टकशब्दस्य विवृतिर्द्रष्टव्या॥)

पूपली, स्त्री, (पूपं तदाकारं लातीति। ला+कः।) पोलिका। इति हेमचन्द्रः। ३। ६३॥

पूपाली, स्त्री, (पूपाय अलतीति। अल+अच्। गौरादित्वात् ङीष्।) पोली। इति चिकाण्डशेषः॥

पूपाष्टका, स्त्री, (पूपप्रधाना साध्वी अष्टका अष्टमी।) अग्रहायणीपूर्णिमायाः परतः कृष्णाष्टमी। तद्विवरणं अष्टकाशब्दे द्रष्टव्यम्। "तत्र नित्यं श्राद्धं पूपाङ्कं कर्त्तव्यम्। यथा गोभिलः। अष्टका यौर्णमास्याग्रहायण्यास्तिसोऽष्टमी। ब्रह्मपुराणे।

पित्र्यादानाय मूले खुरकाक्षिज्ञ एव च।
कृष्णपक्षे वरिष्ठा हि पूर्व्वा चैन्द्री विभाषते॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी॥

पूयाख

आद्या पूपैः सदा कार्य्या मांसैरन्या भवेत्तथा।
शाकैः कार्य्या तृतीया स्यादेष क्रमगतो विधिः॥"

इति तिथितत्त्वम्॥

पूपिका, स्त्री, (पूपः पूपाकारोऽस्त्यस्या इति ठन्। ततष्टाप्।) पूलिका। इति हेमचन्द्रः। ३। ६२॥

पूय, ईं ङ दुर्गन्धे। धीरयाम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सक० च-सेट्। निष्ठायामनिट्।) षष्ठस्वरी। ईं, पूतः। ङ, पूयते मत्स्यः दुर्गन्धः स्यादित्यर्थः। धीरिति भेदनम्। इति दुर्गादासः॥

पूयं, क्ली, (पूयते दुर्गन्धो भवतीति। पूय+अच्।) पक्वव्रणादिसम्भवघनीभूतशुक्लवर्णविस्रतरक्तम्। पूँय इति भाषा। तत्पर्य्यायः। व्रततजम् २ मलजम् ३ पूयवम् ४। प्रस्रितम् ५। इति शब्दचन्द्रिका॥ (यथा, महाभारते। ३।१६६।५४।

"ये च दुष्कृतकर्म्माणः पूयं तेषां विधीयते॥")

पूयवर्द्धनद्रव्याणि यथा,—

नवधान्यमाषतिलकलायकुलत्थनिष्पावहरितकशाकाम्लवर्गकटुकगुडपिष्टविस्रतिषक्तशूरशुष्कशाकाजाविकानूपौदकमांसवसाघृतोदकक्षीरदधिदुग्धसक्तप्रभृतीनि परिहरेत्।

"तक्राम्लेनैवधान्यादिर्योऽयं वर्ग उदाहृतः।
दोषसंजननो ह्येष विज्ञेयः पूयवर्द्धनः॥"

इति सुश्रुतः॥

(अस्य विषयो यथा,—

"वाताढ्ये नास्ति रुजा न पाकः
पित्ताढ्ये नास्ति कफाच्च पूयः॥"

इति सुश्रुते खुद्दकस्थाने सप्तदशोऽध्याये॥)

पूयनं, क्ली, (पूयतेऽनेनेति। पूय+ल्युट्।) पूयम्। इति शब्दचन्द्रिका॥

पूयरक्तः, पुं, (पूयविशिष्टं रक्तमस्मिन्।) नासारोगभेदः। तस्य लक्षणम्। यथाह माधवकरः।

"दोषैर्विदग्धैरथवापि जन्तो-
र्ललाटदेशेऽभिहतस्य तैस्तैः।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम्॥"

(क्लीवलिङ्गेऽपि दृश्यते। यथा,—

"निचयादभिघाताद्वा पूयाद्रक्तासिका स्रवेत्।
तत् पूयरक्तमाख्यातं शिरोदाहज्वराकरम्॥"

इति वाभटे उत्तरस्थाने जनपदिनोऽध्याये॥

चिकित्सास्य यथा,—

"वल्याम्लं रक्तपित्तोपशान्तिं
नाड़ीस्वेदात् पूयरक्ते चिकित्सा।
वाच्ये सम्यक् स्रावपीड़ं वदन्ति
तीक्ष्णं धूमं शोधनञ्चास्य नस्यम्॥"

इत्युत्तरतन्त्रे त्रयोविंशोऽध्याये सुश्रुतेनोक्तम्॥)

पूयारिः, पुं, (पूयानामरिः तद्विनाशकत्वात्।) निम्बवृक्षः। इति शब्दचन्द्रिका॥ (विवरणमस्य निम्बशब्दे ज्ञातव्यम्॥)

पूयालसः, पुं, (पूयः आलस इव यत्र। सान्निपातेन चिराग्निमान्द्यभावेन तथात्वम्।) सन्निपातरोगभेदः। तस्य लक्षणं यथा—

पूरकः

"पक्वः शोफः क्षविजः संक्षवेदूयः
स्राव्यं पूयं पूतिपूयास्रवश्च ॥"
इति सुश्रुतः ॥
("पूयास्रवः शोषनाशः क्षावाश्चक्षार एव च ।
पर्व्वणीकाक्षजौ जन्तुर्ग्रन्थिसन्धौ न वामयाः ॥"
"पूयास्रवन्तु तं विद्यात् सन्धौ कायौनके गुदा-
मिति वचनात् ॥" इति भावप्रकाशस्य मध्यखण्डे
चतुर्थे भागे ॥)

पूर, ईं य ड पूर्त्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-
आत्म०-सक०-सेट् । लिङायामनिट् ।) दीर्घौ ।
ईं, पूर्णः । य ड, पूर्य्यन्ते पितरस्त्वेति हला-
युधः । पूर्णैरिहाप्यायनम् । इति दुर्गादासः ॥

पूर, क पूर्त्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-सक०-सेट् ।) दीर्घौ । क, पितॄन् पूरयति
आद्धे इत्वे: कर्त्तरि च: सदा । इति हलायुधः ॥
इति दुर्गादासः ॥

पूरं, क्ली, (पूरयति औषधमनेनेति । पूर+कः ।)
दाडिमवृक्ष । इति राजनिर्घण्टः ॥

पूरः, पुं, (पूरयतीति । पूर+कः ।) जलसमूहः ।
(यथा, रघौ । १ । १७ ।
"महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि ॥")
ब्रह्मसंयुक्तिः । स्रावविशेषः । इति मेदिनी । रे,
६० ॥ (प्राणायामादिकर्त्तुर्नासारन्ध्रेण बहिः-
पवनाकर्षणम् । यथा, भागवते । ३ । २८ । ६ ।
"प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः ।
प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम् ॥"
बीजपूरः । तत्पर्य्यायो यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
मुकुन्धः पूरकः पूरो बीजपूर्णोऽम्बुकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)

पूरकः, पुं, (पूरयतीति । पूरि+ण्वुल् ।) बीज-
पूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो
यथा,—
"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः ।
मुकुन्धः पूरकः पूरो बीजपूर्णोऽम्बुकेशरः ॥"
इति वैद्यकरत्नमालायाम् ॥)
गुणकाङ्क्षः । इति जीजावती ॥ ध्यानादिकर्त्तु-
र्नासिकागतोच्छ्वासः । ब्रह्मध्यानपूर्ब्बकप्राणाया-
मान्तर्गतब्रह्मबीजं जपन् वामनासिकया वायुना
देहपूरणम् । (यथा, हठयोगप्रदीपिकायाम् ।
२ । ७१ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः ॥")
यथाच व्यासः ।
"आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत् ।
ब्रह्माणं केशवं रुद्रं ध्यायेद्वेदानुक्रमात् ॥
पूर्ब्बवचने त्रिर्जपमाचाभिधानादत्र त्रिस्त्रिरिति
वीप्सा सङ्ख्याव्ययापेक्षया ।
ब्रह्माणं केशवं रुद्रं ध्यायन् मुच्येत बन्धनात् ॥
इति योगियाज्ञवल्क्यः ।
'भूर्भुवःस्वर्महर्जनस्तपः सत्यं तथैव च ।

पूरणः

प्रत्योङ्कारसमायुक्तं तथा तत् सवितुः परम् ॥
ॐ आपो ज्योतिरित्येतत्त्रिरः पश्चात्तु योज-
येत् ।
शिरावर्जनयोगात्तु प्राणायामस्तु मुच्यते ॥
पूरकः कुम्भको रेचः प्राणायामस्त्रिलक्षणः ।
नासिकाहृद उच्छ्वासो भ्रातुः पूरक उच्यते ॥
कुम्भको निश्चलः स्वासो मुच्यमानस्तु रेचकः ॥
मोचनं विशेषयति विष्णुपुराणम् ।
नासंदृतसुखो भूत्वेड्डाचकाभ्यौ च वर्ज्जयेत् ।
मोचयेत्संवृतं सम्यङ्मुखेन न सुखेन प्रवर्त्तं बुधः ॥"
इत्याह्निकाचारतत्त्वम् ॥
षोड्शचतुरन्यतरसंख्यकप्रणवमौजाग्यतरजपे-
नैकनासापुटकरधृतप्राणायामाङ्गवायुपूरणम् ।
यथा, मूलमन्त्रस्य बीजस्य प्रणवस्य वा षोड्श-
वारजपेन वामनासापुटे वायुपूरकं कुर्य्यादिति
तन्त्रसारः ॥ * ॥ क्ली, प्रेतदेहनिर्व्वाहकाग्नौच-
कालदेयद्रव्यपिण्डम् । यथा,—
"पूरकैश्च तु पिण्डेन देहो निर्व्वाह्यते यतः ।
ह्रासस्य कारणायोगात् पुनर्गार्व्वमेति क्रियाम् ॥"
इति वायुपुराणम् ॥

अथ्यग्रहः ।
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके ।
भाषितैतच्च वै पिण्डं यच्छ्राद्धस्य पूरकम् ॥"
अत्र भाषणविधौ एतत्पिण्डं यच्छ्राद्धस्य पूरक-
मित्येतावच्छ्रावणात् शिरःपूरकमित्यादिविप्रो-
क्तोक्तेषु प्रमाणं नास्ति । इति स्मार्त्तभट्टा-
चार्य्याः ॥ प्रेतपिण्डेऽपि यथा दर्शैर्देहमाप्नोति भाग-
वेति विष्णुधर्म्मोत्तरे देहश्रुतेर्देहपूरकमिति
प्रयोगाच्चेति । तस्मादनिरुद्धभट्टादयुक्तः केवल-
पूरकप्रयोग एव युक्त इति । शुद्धितत्त्वः ।
"भर्त्तुः पिण्डप्रदाने तु साध्वी स्त्री चेन्नवश्राद्धा ।
वस्त्रं त्यक्त्वा पुनः स्नात्वा स्पृशेच्च पूरकम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥
पूरणकर्त्तरि, त्रि । इति शब्दरत्नावली ॥ (यथा,
मनुः । ६ । २८६ ।
"प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत् ॥")

पूरणं, क्ली, (पूर्य्यते अनेनेति । पूर+करणे
ल्युट् ।) पिण्डभेदः । इति मेदिनी । णे, ६४ ॥
दृद्धिः । कुटनटम् । इति शब्दमाला ॥ अङ्कानां
गुणनम् । इति शुभङ्करः ॥ वापस्तनुः । इति
हेमचन्द्रः ॥

पूरणः, पुं, (पूर्य्यतेऽनेनेति । पूरि+करणे ल्युट् ।)
विष्णुतेलम् । इति धरणिः ॥ सेतुः । इति शब्दार-
त्नावली ॥ (पूरयतीति । पूरि+कर्त्तरि ल्युः ।)
चणुरः । इति संक्षिप्तसारोणादिवृत्तिः ॥ पूरके,
त्रि । इति मेदिनी । णे, ६३ ॥ (यथा, हरि-
वंशे । १२६ । ५२ ।
"आसन्नः सन्नतरः साधनानां
अङ्गावस्था आक्षुद्वृत्तिप्रयोक्ता ।
पतिर्मेजानां मक्षतां सप्तसप्तीनां
प्राणान्नेष्टः पूरणः पक्वशुक्लानाम् ॥")

पूरुषः

पूरणी, स्त्री, (पूर्य्यते अनयेति । पूरि+ल्युट्+
ङीप् ।) शाकशिम्बः । इत्यमरः । २ । ४ । ४६ ॥
(अस्या पर्य्यायान्तरं यथा, भावप्रकाशस्य पूर्व-
खण्डे प्रथमे भागे ।
"शाकशिम्बिस्तु भवेच्छोभा पिच्छिला पूरणीतिच ।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी ॥")
पूर्य्यतेऽनया पूरणी । यथा पचानां पूरणी पञ्चमी ॥
पूराङ्गं, क्ली, (पूरं पूरकमङ्गमस्य ।) हृत्पाङ्गम् ।
इति राजनिर्घण्टः ॥

पूरिका, स्त्री, (पूर्य्यते इति । पूरि+कः । स्त्रियां
ङीप् । पूरी । ततः स्वार्थे कन् । टाप् पूर्व-
वत्सिद्धञ्च ।) पिष्टकभेदः । पूरी इति कचुरी इति
च भाषा । यथा,—
"माषाणां पिष्टिकां शुद्धां शालपञ्चाङ्गकद्विभिः ।
तया पिष्टिकया पूर्णा समिता शष्कुलीकृता ।
ततस्तैले विपक्वा सा पूरिका कथिता बुधैः ॥"
अस्या गुणाः ।
"रूक्षा स्वादी गुरुः स्निग्धा वातपित्तास्रदूषिका ।
चक्षुष्येऽग्नेर्हरी श्लेष्मा पाके वातविनाशिनी ॥
तथैव घृतपक्वापि चक्षुष्या रक्तपित्तजुत् ॥"
इति भावप्रकाशः ॥
(अस्या गुणान्तरं यथा,—
"पूरिकाघृतपूरन्तु चिरोषणगमनं परम् ।
दृष्यं संदूषणं स्वादु शतचर्व्वणनिवारणम् ॥"
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥)

पूरितं, त्रि, (पूर्य्यते स्मेति । पृ पूरि वा+क्तः ।
"वा दान्तशान्तपूर्णेति ।" ७ । २ । २७ । इति
निपा इट् ।) ज्ञातपूरणम् । तत्पर्य्यायः । पूर्णम्
२ । इत्यमरः । ३ । १ । ६८ ॥ गुणितञ्च ॥

पूरुषः, पुं, (पुरति अग्रे गच्छतीति । पुर+"पुरः
कुषन् ।" उणा० ४।७४। इति कुषन् । "अन्येषा-
मपि दृश्यते ।" ६।३।१३७ । इति निपातनात्
दीर्घः ।) पुरुषः । पुमान् । इत्यमरः । २।६।१॥

अथ पूरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्हस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रद्वयं कुक्षिर्हनू तु नासा तथैव च ।
कट्योरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ओष्ठाव कर्णौ दृक्च हस्ते अङ्के सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति निश्चयः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचम् ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविशालानि प्रशस्यते ॥६॥
कटिर्विशाला बाहुपुत्रभागौ
विशालवक्षो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥

न श्रीरश्नुते रक्ताक्षं नार्यः कनकपिङ्गलम् ।
दीर्घबाहुं न वैधर्म्यं न मार्जोपचितांसकम् ॥
कदाचिद्दम्पती सर्वैः कदाचिद्रोगपः सुखी ।
कदाचित्तुल्यिलो दुःखी कदाचिच्चपला सती ॥
नेत्ररन्ध्रेण सौभाग्यं दन्तरन्ध्रेण भोजनम् ।
हस्तरन्ध्रेण वैधर्म्यं पादरन्ध्रेण वाहनम् ॥
अकर्मकठिनौ हस्तौ पादावश्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्दिशेत् ॥
दीर्घस्निग्धेन दारिद्र्यं रूक्षस्निग्धेन निर्धनः ।
श्लक्ष्णस्निग्धेन सौभाग्यं रूक्षस्निग्धेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनशीलता ।
रक्ताभिः प्रियमाप्नोति श्लक्ष्णाभिर्लोकपूजितः ॥
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उत्तमं भोजनं तस्य घृतं जीवति मानवः ॥
अङ्गुष्ठं कुलिशं वापि च राजा भवति ध्रुवम् ।
ऐश्वर्यञ्च विनिर्दिष्टमग्नीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्यञ्च राज्यञ्च अग्नीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्जनीं यावत् रेखा भवति चाञ्चला ।
विंशत्यब्दाधिकायुस्तं नरा जीवन्त्यनामयाः ॥
कनिष्ठामध्यमां यावत् रेखा भवति चाञ्चला ।
शतान्दं वाथ वाप्नोति नरो जीवेन्न संशयः ॥
कनिष्ठानाभिकायावत् रेखा भवति चाञ्चला ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावतीं पुरुषायुस्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा जङ्घंभवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽर्थवान् भवेत् ॥
मत्स्यपुच्छप्रकीर्णेन विद्याविनयसम्मितः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा ह्यग्न्यङ्गुष्ठे शुभप्रदाः ।
तदाल्पसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्याथ चक्रमङ्गुष्ठे यवादूर्द्धञ्च दृश्यते ।
सदा वै पामरादीनामञ्जितं धनमाप्नुयात् ॥
तर्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु क्षयो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु क्षयो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु क्षयो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु क्षयो भवति निश्चितम् ॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अग्नीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रकर्णञ्च दृश्यते ।
रेखाहीनञ्च कक्षञ्च स चोन्नतो महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं स्पृशि सर्वदा ।
भोगी भवति निर्व्याजः पृथ्वीं भ्रमति सर्वदा ॥
दन्ताश्च विरला यस्य नीचवन्नीचकर्मजृत् ।
भगजभो दन्तुरः सत्यं वेदान्तपारगो भवेत् ॥"

प्रकारान्तरम् ।
"दन्ताश्च विरला यस्य गच्छे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
दीर्घजिह्वे च सौभाग्यं रूक्षजिह्वे नृपो भवेत् ।
षष्ट्यास्यकठिनैर्लिङ्गैः प्रमाणान्वियंतः सदा ॥
रमते च सदा दास्यां निर्धनो भवति ध्रुवम् ।
श्लक्ष्णजिह्वेन रूक्षाक्ष रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
श्लक्ष्णजिह्वेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च विद्यात्मा कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि च राजा भवति ध्रुवम् ॥
श्लक्ष्णनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरा आलजिह्वाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च रूक्षाश्चैव दृढनखाः ॥
श्लक्ष्णातिदीर्घा मनुजास्ते दरिद्रा न संशयः ।
चिपुके श्मश्रुमूल्या ये निर्लोमहृदयाश्च ये ।
ते धूर्ता नैव सन्देहः वसुदत्तवचनं यथा ॥
रूक्षौष्ठा भग्नदृष्टाः श्लक्ष्णदन्ताः कुचेलकाः ।
वक्रनासा वक्रनासास्ते नरा दुष्टभाषकाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूज्या मानवाः स्मृताः ॥"
इति सामुद्रके पुरुषलक्षणम् । * ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुष-
लक्षणन्तु पुरुषपरीक्षाग्रन्थे द्रष्टव्यम् ॥

पूर्ण, त्रि, (पूर्यते स्मेति । पॄ पूरि धा + क्तः । "वा दान्तशान्तपूर्णदस्तस्थूलक्षन्नमाः ।" ७ । २ । २७ । इति इट्भावो निपात्यते च ।) पूरितः । सकलः । इत्यमरः । ३ । १ । ८८ ॥ (यथा, पञ्चदश्याम् । ७ । ७७ ।
"तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥")
शुक्लः । इति मेदिनी । णे, २२ ॥ स्त्रीसुखेच्छावदन्यः । इति गदाधरभट्टाचार्यः ॥ (मधायाः पुत्रभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
"सिद्धः पूर्णश्च बर्हीं च पूर्णायुश्च महायशाः ॥"
नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानवः पूर्णः शुक्लः पाली हलीमकः ॥")

पूर्णक, पुं, (पूर्ण + "संज्ञायां कन् ।" ५ । ३ । ७५ । इति कन् ।) स्वर्णचूडपक्षी । इति मेदिनी । के, १२५ ॥ (देवयोनिविशेषः । यथा, महाभारते । ७ । ५५ । ४ ।
"गटनर्णकगन्धर्वैः पूर्णकैर्वर्द्धमानकैः ।
निर्योद्योगैश्च क्रीडद्भिस्तच्च सर्वं परिवर्तितम् ॥")

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।) जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ । इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ । १८० ।
"प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नव ।
तेनैव सार्द्धं प्राश्येयुः स्नात्वा पुण्ये जलाशये ॥")
पूर्णजलाशयश्च । इति भरतः ॥ (यथितानु-

लिप्ता हस्ताभ्यां परिग्रहः पीवरं पूर्णकुम्भः । इति गौडकक्षः ॥ यथा, महाभारते । २ । २३ । १४ ।
"बाहुपाशादिकं कृत्वा पादाहतशिरोरुहौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥")

पूर्णकोष्ठा, स्त्री, (पूर्णः कोष्ठमस्याः ।) नागरसुरा । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्मधारयः ।) वसुपूर्णपात्रम् । वह्निपक्वः । इति मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात् गृहीतवस्त्राभरणादि । तत्पर्य्यायः । पूर्णालकम् २ । यथा,—
"हर्षादुत्सवकाले यद्वस्त्राभरणादिकम् ।
आहृत्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत् ॥"
इति जटाधरः ॥
(यथा, अनर्घराघवे । ३ । ४५ ।
"गृहाभ्यं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कन्ययिष्यते ॥")
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मत्वे इत्यादिनोक्तम् । आज्यस्थेऽपि पुंस्त्वं छान्दसम् । तस्य प्रमाणन्तु यज्ञसंयत्ते यज्ञपार्श्वपरिग्रिष्टयोः । अष्टसृष्टिर्भवेत् कुक्षिः कुक्ष्योश्चौ च पुष्कलम् । पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥ अत्र षट्पञ्चाशदधिकशतहयसृष्टिमितं पूर्णपात्रम् । अयमभावे तु कुन्दोगपरिग्रिष्टम् ।
यावता वह्निभोक्तुस्तु तृप्तिः पूर्णेन जायते ।
तावराद्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥"
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूरः । इति राजनिर्घण्टः ॥ (विस्तृतिरस्य बीजपूरशब्दे ज्ञातव्या ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णचन्द्रं पूरयं वा मातीति । मा + कः । टाप् । पूर्णिमा । इत्यमरटीकायां भरतः ॥

पूर्णमासः, पुं, (पूर्णमासी पूर्णिमा साधनत्वेनास्त्यस्येति । अच् ।) पौर्णमासयागः । इति जटाधरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ । १० । २ ।
"वै तिस्रः सोमः पूर्णमासः वाचादेव ब्रह्मवर्चसमवरुन्धे ॥")
पूर्णो मासो यत्रेति । पूर्णिमा । यथा, महाभारते । १२ । २६ । ११४ ।
"दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः ।
अयजद्वयमेधेन सहस्रं परिवत्सरान् ॥")

पूर्णमासी, स्त्री, (पूर्णो मासश्चान्द्रमासो यत्र । गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्दमाला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी । पूर्णिमा । अमावस्या । यथा,—
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥"

तत्र स्त्रीसंसर्गनिषेधो यथा,—
"पूर्णासु योषितं परिवर्जनीया ॥"
इति तिथितत्त्वम् ।
"गुरौ पूर्णा च संयुक्ता सिद्धियोगाः प्रकीर्तिताः ॥"
इति ज्योतिःसारसंग्रहः ॥

पूर्णालर्क, क्ली, वार्द्धायनाम्नम् । तत्पर्य्यायः । पूर्णपात्रम् २ । इति त्रिकाण्डशेषः । पूर्णालकमपि पाठः ॥

पूर्णावतारः, पुं, (पूर्णः अवतारः ।) वृष्णिभेदः । रामः । यथा,—
"पूर्णो वृष्णिषु रामश्च श्वेतद्वीपविराड्विभुः ।
परिपूर्णतमः साक्षी वैकुण्ठे गोलके स्वयम् ॥
वैकुण्ठे कमलाकान्तो रूपभेदश्चतुर्भुजः ।
गोलोके गोकुले राधाकान्तोऽयं द्विभुजः स्वयम् ॥
तस्यैव तेजो नित्यञ्च चिन्तां कुर्वन्ति योगिनः ।
भक्ताः पादाम्बुजं तेजः कृतस्त्रीजस्विना विना ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः ॥

पूर्णिका, स्त्री, नासाच्छिन्नौनामकपक्षी । इति त्रिकाण्डशेषः ॥

पूर्णिमा, स्त्री, (पूर्णिः पूरणम् । पूर्णिं मिमीते इति । मा + कः । टाप् ।) पञ्चदशी तिथिः । तत्पर्य्यायः । पौर्णमासी २ । निशाकरे कलाहीने सा अनुमतिः ३ पूर्णे निशाकरे सा राका ४ । इत्यमरः ।१।४।७-८ । पित्र्या ५ चान्द्री ६ पूर्णमासी ७ अनघा ८ चन्द्रमाना ९ निरङ्गना १० । इति वाचस्पतिः ॥ पूर्णिमा ११ । इति हलायुधः । ज्योत्स्नी १२ इन्दुमती १३ सिता १४ । इति राजनिर्घण्टः ॥ सा द्विविधा । यथा,—
"राका चानुमती चैव द्विविधा पूर्णिमा मता ।
पूर्व्वोदितकलाहीने पौर्णमास्या निशाकरे ।
पूर्णिमानुमती ज्ञेया पश्चात्तमितभास्करे ॥
यस्मात्तामनुमन्यन्ते देवताः पितृभिः सह ।
तस्मादनुमती नाम पूर्णिमा प्रथमा स्मृता ॥
यदा चास्तमिते सूर्य्ये पूर्णचन्द्रस्य चोदयः ।
युगपत् सोत्तरा रात्रात्तदानुमतिपूर्णिमा ॥
राकान्तामनुमन्यन्ते देवताः पितृभिः सह ।
रजनायाञ्च चन्द्रस्य राकेति कवयोऽब्रुवन् ॥"
इति देवीपुराणम् ॥*॥
सा चन्द्रस्य तिथिः । यथा,—
"तस्य ब्रह्मा ददौ प्रीतः पौर्णमासीं तिथिं प्रभुः ।
तस्यामुपोषयेद्राजंस्तमर्थं प्रतिपादयेत् ॥
न चान्नाहारश्च भवेत्तस्य ज्ञानं प्रयच्छति ।
कार्त्तिं पुष्टिञ्च राजेन्द्र ! धनं धान्यञ्च केवलम् ॥"
इति वराहपुराणे सोमोत्पत्तिरहस्यम् ॥*॥
तस्यां जातफलम् ।
"कन्दर्पतुल्यो युवतीप्रियश्च
न्यायान्वितः सततं सहर्षः ।
शूरो बली शास्त्रविचारदक्ष-
श्चेत् पूर्णिमा जन्मनि यस्य जन्तोः ॥"
इति कोष्ठीप्रदीपः ॥ *॥

सा चतुर्दश्यायुक्ता ग्राह्या युग्मात् । यमः ।
"पक्षान्ते क्षीयते क्षायास्तेन नायाति मत्पुरम् ॥"
विष्णुः ।
"दृश्येते सहितौ यस्यां दिवि चन्द्रबृहस्पती ।
पौर्णमासी तु महती ज्ञेया संवत्सरे तु सा ॥
तस्यां स्नानोपवासाभ्यामक्षयं परिकीर्त्तितम् ॥"
सहितौ माससंज्ञाविशेषनिमित्तनक्षत्रचिकाहिनक्षत्रगतौ । महाकार्त्तिक्यादिदर्शनात् । तथा च राजमार्त्तण्डे ।
"मासमध्ये यदा ऋक्षे चन्द्रः संपूर्णमण्डलः ।
गुरुणा याति संयोगं सा तिथिर्महती स्मृता ॥"
स्कान्दमातृस्थयोः ।
"पौर्णमासीषु चैतासु मासर्क्षसहितासु च ।
एतासां स्नानदानाद्यं फलं दशगुणं स्मृतम् ॥"
वैशाखीमधिकृत्य यमः ।
"गौरान् वा यदि वा क्षौमान्निलान् चौद्रेण संयुतान् ।
प्रीयतां धर्म्मराजेति पितॄंस्तेनाथ तर्पयेत् ॥
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ।
अक्षय्यमुच्यते तिष्ठेच्च स्वर्गलोके न संशयः ॥"*॥
ब्रह्मपुराणे ।
"महाज्येष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥*॥
ऐन्द्रे गुरुः शुक्रो वैव प्राजापत्ये रविस्तथा ।
पूर्णिमा शुक्रचन्द्रेज्य महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थगुरावपि ।
"ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः ।
पूर्णिमा शुक्रचन्द्रेज्य महाज्येष्ठी प्रकीर्त्तिता ॥"
अनुराधास्थचन्द्रेऽपि । आग्नभूतिः ।
"ऐन्द्रर्क्षे त्वथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ॥"
राजमार्त्तण्डे ।
"ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता ॥"
ज्येष्ठसंवत्सरश्च ।
"ज्येष्ठामूलोपगे जीवे वर्षं स्याच्छक्रदेवतम् ॥"
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः । संवत्सरोऽत्र वत्सरो बोध्यः । न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्येष्ठ इति विशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यात्तिथि पाठः काल्पनिकः । प्रपञ्चस्तु मलमासतत्त्वेऽनुसन्धेयः ॥*॥
विष्णुधर्म्मोत्तरब्रह्मपुराणयोः ।
"मासि ज्येष्ठे तु संप्राप्ते नक्षत्रे शक्रदेवते ।
पौर्णमास्यां तदा स्नानं सर्व्वपापं हरेद्दिजाः ॥
तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्राञ्च ते यान्ति पदमक्षयम् ॥"
स्कन्दपुराणे ।
"ज्येष्ठामहत्त्वतीर्थेऽत्र तत्पुण्यं जन्मवासरम् ।
तस्यां मे स्नपनं कुर्य्याज्जन्मर्क्षाक्रान्तविग्रहः ॥
ज्येष्ठां प्रातःस्नानकाले ब्रह्मणा सहितश्च माम् ।
रामं सुभद्रां संस्नाप्य मम लोकमवाप्नुयात् ॥"

विष्णुधर्म्मोत्तरे ।
"पौर्णमासी तथा माघी आषाढी च नरोत्तमः ।
प्रौष्ठपद्यामतीतायां तथा ज्ञेया त्रयोदशी ॥
एतासु आद्धकालात् वै निशानाथः प्रजापतिः ॥"
तत्र पूर्व्वेद्युः सङ्गवकालामे परेद्युर्मध्याह्नकालामे पूर्व्वेद्युरेव आद्धम् ।
"ज्ञेयापक्षस्य पूर्व्वाह्णे आद्धं कुर्य्यादिचक्षणः ।
ज्ञेयापक्षापराह्णे तु रौहिणस्तु न लङ्घयेत् ॥"
इति वायुपुराणवचनात् ॥
उभयदिने सङ्गवकालामे परेद्युः ।
"शुक्लपक्षे तिथिर्व्याप्ता यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्व्याप्ता यस्यामस्तमितो रविः ॥"
इति विष्णुधर्म्मोत्तरात् ॥
एवमन्यत्रतृतीयादावपि ॥*॥ आषाढ़कार्त्तिकमाघपौर्णमासीषु दानमावश्यकम् । तथा चायोध्याकाण्डे भरतप्रश्ने ।
"आषाढ़ी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्याद्योऽनुमतो गतः ॥"
अप्रदानवतो दानरहितस्येत्यर्थः । यान्तु आर्य्यः श्रीरामचन्द्रो गतो यस्यानुमतः इत्यन्वयः । उत्तरत्राप्ये यच्छब्दाद्य तच्छब्दापेक्षा ॥
अथ कोजागरव्रतम् । कल्पतरौ ब्रह्मपुराणम् ।
"आश्वयुज्यां पौर्णमास्यां निशीथो वायुकालतः ।
आयाति सेनया सार्द्धं लक्ष्म्या युक्तं सुदाव्रतम् ॥
तस्मात्तत्र नरैर्मार्गाः खगेन्द्रस्य समीपतः ।
शोभितव्याः प्रयत्नेन भूषितव्याश्च भूषणैः ॥
पुण्यार्घ्यमूलमूलाम्रसर्वपल्लवकैस्तथा ।
वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः ॥
सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं सवाससैः ।
दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः ॥
स्त्रीबालवृद्धमूर्खैश्च भोक्तव्यं पूजिते सुरैः ॥"
पूजिते सुरैरिति विशेषणी तृतीया । तेन पूजितसुरैरित्यर्थः ।
"पूज्याश्च सकलैः पक्वैस्तथा द्वारोर्द्धभित्तयः ।
द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः ॥
यवाश्चतस्तृतोपेतैस्तण्डुलैश्च सुतर्पितः ।
संपूजितश्च पूर्णेन्दुः पयसा पायसेन च ॥
वस्त्रः सभार्य्यः स्कन्दश्च तदा नन्दीश्वरो मुनिः ।
गोमद्भिः सुरभिः पूज्या छागवद्भिर्द्विजाग्रजैः ॥
उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः ।
पूज्यः सार्द्धेन रेवन्तो यथाविभवविस्तरैः ॥
ततः पूज्यो निशीथोऽपि समाहेल्लिजनकुलैः ।
सुगन्धिभिर्धूपितोपेतैः छत्रराजैश्च भूरिभिः ॥
ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम् ।
वल्लिपार्श्वगतैर्नैया द्यूता क्रीड़ाः पृथग्विधाः ॥"
ततश्च द्वारोर्द्धभित्तिहव्यवाहनपूर्णेन्दुसभार्य्यवस्त्रस्कन्दनन्दीश्वरसुरभयः सर्व्वैरेव पूज्याः । द्वारोर्द्धभित्तिशब्दोऽत्र बहुवचनान्तः । नन्दीश्वरसुनिरेकः । गोमता सुरभिः । छागवता धूमाग्निः । मेषवता वरुणः । हस्तिमता विनायकः । अन्य-

वता देवता: । सर्व्वेरेव निकुम्भ: पूज्य: । महाकल्पे लिङ्गपुराणम् ।
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ॥
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रैरावतसंस्थिताम् ।
सुगन्धिर्विविधै: पद्मैर्यो अर्च्चेज्जागरञ्चरेत् ॥"
तथा,—
"निशीथे वरदा लक्ष्मी: को जागर्त्तीतिभाषिणी ।
तस्यै वित्तं प्रयच्छामि अर्च्चै: क्रीडां करोति य: ।
नारिकेलैश्चिपिटकै: पितॄन् देवान् समर्च्चयेत् ।
वर्षञ्च पौर्णमासेन स्वयं तदगृहो भवेत् ॥"
अत्र निशीथेति निशीथ इति चाभिधानान्नार्द्धरात्रमिदम् ।
"तत: प्रदोषव्यापिन्यां पौर्णमास्यां सदा ।
प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"
इति संवत्सरप्रदीपधृतवसुवचनात् ॥
यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरव्रतम् । उभयव्याप्यनुरोधात् । यदा तु पूर्व्वदिने निशीथव्याप्ति: परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यम् । प्रधानपूजाकालव्याप्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथव्याप्ति: परेद्युर्न प्रदोषव्याप्तिस्तदा सत्तरां पूर्व्वेद्युस्तत्कृत्यम् ।
"अह:सु तिथय: पुण्या: कर्म्मानुष्ठानतो दिवा ।
व्रतादित्रितयोगे तु रात्रियोगो विधिष्यते ॥"
इति वचनात् ॥
वर्जयेदित्यनुवृत्तौ मत्स्यसूक्ते ।
"महालक्ष्म्यास्तु तुलसीं श्रिपिष्टां कार्त्तिकीं तथा ॥"
लक्ष्मीध्यानमादित्यपुराणे ।
"पाद्मासनस्थां ध्यायेच्च श्रियं त्रैलोक्यमातरम् ॥
गौरवर्णां सुरूपाञ्च सर्व्वालङ्कारभूषिताम् ।
दौकमानपद्मयुगलं वरदां दक्षिणेन तु ॥"
पाद्मेति । दक्षिणे पाद्मासनमालाख्यां वामे पद्माकुशाख्यां भूमिस्थां वामकरे पद्मयुग्मं दक्षिणकरे वरं दधतीत्यर्थ: । तत: पाद्यादिभि: संपूज्य,—
"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात् त्वदर्च्चनात् ॥"
इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ॥
स्कन्धध्यानमादित्यपुराणे ।
"चतुर्हस्तमजारूढो वज्रपाणि: पुरन्दर: ।
शचीपतिश्च ध्यातव्यो नानाभरणभूषित: ॥"
पाद्यादिभि: संपूज्य,—
"ॐ विचित्रैरावतस्थाय शचीतुलिताङ्गाय ते नम: ॥"
इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् । तत: कुबेर: संपूज्य: । इति स्मरण: ॥ तं पाद्यादिभि: संपूज्य,—
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादाच्चे धनधान्यादिसम्पद: ॥"
इति प्रणमेत् ॥

अत्र प्रदोषे सर्व्वेषां पूजेति स्मरणरत्नावली: ॥ न च निकुम्भपर्य्यन्तानां पूर्व्वाह्ण एव पूजनं निरूपणादिति वाच्यम् । दिवा तत्र न भोक्तव्यं दत्त्वोपलभ्य पूजाञ्च सपर्य्या: यत्नैरित्यादिना विधिम्य पूजामभिधाय भोक्तव्यमित्यभिधानात् रात्रावेव पूजाभोजने अवगम्येते । अतएवाग्रेतनानामेव भोक्तव्यं पूजिते: सुरैरित्यनेन विधिम्य दिवा पूजाभोजने विहिते ॥ * ॥
योगिनीतन्त्रे ।
"विरिञ्चेस्तु यदे दत्त्वा वरदां लक्ष्मीमर्च्चयेत् ।
सर्व्ववाद्यमयीं वरदां वाद्याभावे तु वादयेत् ॥" * ॥
लक्ष्मीव्रतम् ।
"प्रकीर्य्यभाक्तामगवेष्य कारिणीं
सदा च भर्त्तु: प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्जयामि ॥"
मार्कण्डेय: ।
"शिर: सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमन्नभोजनम् ।
अनन्यशायित्वमपर्व्वमैथुनं
चिरप्रणष्टां श्रियमानयन्ति षट् ॥
मानुषाणि यदे यत्र अहोरात्रञ्च तिष्ठति ।
तत्रालक्ष्मि ! तवावासस्तथान्येषाञ्च रक्षसाम् ॥
क्षुपैदाद्यादिकं यत्र प्रदाकर्म्मैतथावसम् ।"
हरिवंशे ।
"यत्र ह्री: श्री: स्थिता तत्र यत्र श्रीश्च सन्नति: ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं तत्रो महात्मनि ॥"
मत्स्यपुराणे ।
"स्थिरो हि यो हि पुरुष: स्थिरश्रीरेव जायते ।
रक्षितुं नैव शक्नोति चपलश्चपलां श्रियम् ॥"
तथा,—
"अवश्यसुद्योगवतां श्रीरपारा भवेत् सदा ।
अक्षयोत्साहिता देवा ममन्थु: पुनरब्धिम् ॥"
ज्ञानकौमुद्याम् ।
"नारिकेलोदकं पीत्वा अर्च्चेज्जागरकं निशि ।
तस्यै वित्तं प्रयच्छामि को जागर्त्तीति भाषिणी ॥"
अक्षक्रीड़ायां वासवयुधिष्ठिरसंवाद: प्रचरति ।
तत्क्रीड़ा चतुरङ्गशब्दे दृश्या ॥ * ॥ वैष्णवाग्नेये स्कन्दपुराणम् ।
"पौष्यान्तु समतीतायां यावद्भवति पूर्णिमा ।
माघमासस्य देवेन्द्र ! पूजा विष्णोर्विधीयते ॥"
इति । पौर्णमास्यन्तमासस्तूपक्रम्य ।
"पितॄणां देवतानाञ्च मूलकं नैव दापयेत् ।
दद्यान्नरकमाप्नोति भुङ्क्ते वाप्यथो यदि ॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणव्रतम् ।
अन्यथा नरकं याति चण्डो विट् मूढ एव च ॥
वरं भक्ष्यमभक्ष्यञ्च पिण्डेष्वा गर्हितञ्च यत् ।
वर्ज्जनीयं प्रयत्नेन मूलकं मद्यराक्षसम् ॥" * ॥
फाल्गुने दोलयात्रामाह तीर्थचिन्तामणौ ब्रह्मपुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"

स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये जन्मसिंघाध्याये ।
"फाल्गुन्यां क्रीड़नं कुर्य्यात् दोलायां मम
भूमिप ! ॥"
इति तिथितत्त्वम् ॥ * ॥
तस्या: पर्व्वत्वं पर्व्वशब्दे दृश्यम् ॥
पूर्त्त, क्ली. (पॄ पालने + भावे क्त: । "न ध्याख्यापॄमूर्च्छिमदाम् ।" ८ । २ । ५७ । इति निष्ठातस्य न नत्वम् ।) पालनम् । इति शब्दरत्नावली ॥ (विपत्तौ पालनत्वेन जीवानिति । पॄ + करणे क्त: ।) स्नानादिकर्म्म । रत्नमाल: । २ । ७ । २८ ॥ आदिना देवकुलादि । तद्यथा ।
"पुष्करिण्य: सभा वापी देवतायतनानि च ।
आरामश्च विशेषेण पूर्त्तं कर्म्म विदुर्बुधा: ॥"
इति भरत: ॥
तत्करणफलञ्च ।
"इष्टापूर्त्तं द्विजातीनां प्रथमं धर्म्मसाधनम् ।
इष्टेन लभते स्वर्गं पूर्त्तेन मोक्षञ्च विन्दति ॥
वापीकूपतड़ागानि देवतायतनानि च ।
पतितान्युद्धरेद्यस्तु स पूर्त्तफलमश्नुते ॥"
इति वराहपुराणम् ॥ * ॥
वापीत्वादीनां पूर्त्तत्वाभिधानात् शूद्रस्याधिकारमाह जातूकर्ण्य: ।
"वापीकूपतड़ागादि देवतायतनानि च ।
अन्नप्रदानमारामा: पूर्त्तमित्यभिधीयते ॥
अहोपरात्रे यद्दानं पूर्त्तमित्यभिधीयते ।
इष्टापूर्त्तं द्विजातीनां धर्म्म: सामान्य उच्यते ।
अधिकारी भवेत् शूद्र: पूर्त्ते धर्म्मे न वैदिके ॥"
वैदिके वेदाध्ययनसाध्ये अग्निहोत्रादाविति रत्नाकर: ॥ एवं स्त्रीणामपि पूर्त्ताधिकार: । यथा नारीव्यतुष्टौ दृश्यति: ।
"पितृश्वशुरदौहित्रान् भर्त्तु: स्वकीयमातुलान् ।
पूजयेत् कन्यपूर्त्ताभ्यां दृष्ट्वागायातिथीन् स्त्रिय:॥"
इति जलाशयतत्त्वम् ॥
(पूर्त्तं स्नानादिकर्म्म अङ्गत्वेनास्यास्तीति । अच् । धर्म्मविशेषे, पुं । यथा, मार्कण्डेये । ११ । ९५ ।
"यत्तेन वितता यागा विश्वस्य ब्रह्ममेधिन: ।
तस्मादिष्टञ्च पूर्त्तञ्च धर्म्मो द्वावपि मन्यते ॥")
पूर्त्त:, त्रि, (पॄ + कर्म्मणि क्त: ।) पूरित: । छन्न: । इति विश्व: ॥ (यथा, भागवते ।३।२४।३१।
"ऐश्वर्य्यवैराग्ययशोऽवबोध-
वीर्य्यश्रिया पूर्त्तमहं प्रपद्ये ॥")
पूर्त्ति:, स्त्री, पूरणम् । पॄधातोर्भावे क्ति: । इति भाकरणम् ॥ (यथा, ऋग्वेदे । ६ । १६ । ६ ।
"विश्वाभिर्गीर्भिरभि पूर्त्तिमश्वां
मदेम शतहिमा: सुवीरा: ॥")
पूर्त्त, क निकेतने । इति कविकल्पद्रुम: ॥ (चुरा०-परo-सिमन्नन्तो सकo-निवासे अकo-सेट् ।) वसतिकरी । निकेतनमिह सिमन्नन्तं निवासो वा । क, पूर्त्तयति द्विजान् भोक्तुं यज्ञी । पूर्त्तयति सौर्य्येण साधु: । इति दुर्गादास: ॥ वर्त्तमानोऽयम् ॥

पू(र्व)र्वः, त्रि, (पूर्वे निमज्जने निवासे वा + अच् ।) प्रथमः । (यथा, कुमारे । १ । ५२ ।
"यदेव पूर्वे जगते शरीरं
बभार दक्षस्य रुषोद्धतं सत् ।
तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरिग्रहोऽभूत् ॥"
यथाच मनुः । २ । १८३ ।
"गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत् ॥") आदिः । (यथा, मनुः । २ । ७४ ।
"ब्राह्मणः प्रवसं कुर्यादादावन्ते च सर्वदा ।
सवनव्यपदृतं पूर्वं पुरस्ताच्च विशोधयति ॥")
प्राग्दिग्-देशज्ञाताः । इत्यमरः ॥ (यथा, मनुः । ५ । ६२ ।
"दन्तधावेन सततं स्नानं गात्रस्य निर्हरेत् ।
पञ्चमोत्तरपूर्वेषु यथायोगं द्विजन्मनः ॥")
समयश्च । इति तट्टीकायां स्वामी ॥ अग्रः । इति जटाधरः ॥ (यथा, मनुः । २ । ५० ।
"त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")

पूर्वगङ्गा, स्त्री, (पूर्वा चासौ गङ्गा चेति ।) ब्रह्मसदादी । इति हेमचन्द्रः । ३ । १४६ ॥

पूर्वज, पुं, (पूर्वं जायते इति । पूर्व + जन + डः ।) ज्येष्ठभ्राता । इत्यमरः । २ । ६ । ३६ ॥ (पूर्वजातोत्पन्ने, त्रि । यथा, महाभारते । १ । १०५ । २६ ।
"तामग्निः परिविधानौ मन्त्रैरभिवाद्य च ।
मातरं पूर्वजः पुत्रो वाचो वचनमब्रवीत् ॥")

पूर्वजाः, पुं, (पूर्वं पूर्वजिनं वाचे जायन्ते इति । जन + डः ।) दिक्पालगजः । तत्पर्य्यायः । पितरः २ यमगोचराः ३ अग्निष्वात्ताः ४ सोमपाः ५ बर्हिषदः ६ । बहुवचनान्तोऽयम् । इति त्रिकाण्डशेषः ॥

पूर्वजा, स्त्री, (पूर्वं जायते इति । जन + डः । टाप् ।) अग्रजा । ज्येष्ठा भगिनी । पूर्वज इत्यमरदर्शनात् ॥

पूर्वजिनः, पुं, (पूर्वो जिनः ।) अतीतजिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्पणः ३ मञ्जुभद्रः ४ मञ्जुघोषः ५ कुमारः ६ अक्षारचक्रवान् ७ क्षितिचक्रः ८ वज्रधरः ९ प्रज्ञाकायः १० आदिराट् ११ नीलोत्पली १२ महाराजः १३ नीलः १४ मार्कुलवाहनः १५ क्षियाम्पतिः १६ खड्गी १७ दण्डी १८ विभूषणः १९ वाजिव्रतः २० पद्मचीरः २१ सिंहकेतिः २२ क्षितिधरः २३ वाग्ीश्वरः २४ । इति त्रिकाण्डशेषः ॥

पूर्वदिक्, स्त्री, (पूर्वा दिक् ।) प्राची दिक् । यस्यामिन्द्रियं सूर्य्य उदेति । तदधिपतिरिन्द्रः । तस्याः पर्य्यायादिः पूर्वाशब्दे द्रष्टव्यः ॥

पूर्वदिक्पतिः, पुं, (पूर्वदिग्रः पतिरधिपतिः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ ॥

पूर्वदेवः, पुं, (पूर्वमेवासौ देवश्चेति । यद्वा, पूर्वं देव इति सुप्सुपेति समासः ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (नरनारायणावृषी । तत्र द्विवचनान्तोऽयम् । यथा, महाभारते । ५ । ४८ । ५ ।
"तेषां मनश्च विज्ञाप्यादानाविधौजसा ।
पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")

पूर्वदेशः, पुं, (पूर्वो देशः ।) प्राच्यादिगवस्थितजनपदः । तत्पर्य्यायः । वर्द्धनिः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"प्राच्यां मागधगौडौ च वारेन्द्रीभोटराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोड्रवाद्रयः ॥"
इति ज्योतिस्तत्त्वम् ॥

पूर्वपक्षः, पुं, (पूर्वः पक्षः ।) शुक्लपक्षः । इत्यमरः ॥ (यथा, मनुः । ३ । २७८ ।
"यथा चैवापरः पक्षः पूर्वपक्षादतिक्रियते ॥") प्राच्योपक्षः । सिद्धान्तविरुद्धकोटिः । तत्पर्य्यायः । चोद्यम् २ । इति त्रिकाण्डशेषः ॥ देशम् ३ चक्रिका ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १ । ३ ।
"पूर्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥")
अधिकरणावयवभेदो अवहारविशेषः । यथा, याज्ञवल्क्ये । २ । १७ ।
"पूर्वपक्षेऽधरीभूते भवत्युत्तरवादिनः ॥")

पूर्वपक्षपादः, पुं, (पूर्वपक्ष एव पादः ।) चतुर्व्यवहारान्तर्गतः प्रथमः पादः । तस्य संज्ञान्तरम् । भाषा २ प्रतिज्ञा ३ पक्षः ४ । इति मिताक्षरा ॥ तत्र दक्षः ।
"पूर्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राड्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु ॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्वीकृततत्तेन क्रियावाप्तौ न भवतीति द्विपादतोक्ता ॥ * ॥
अथ भाषापादः । तत्र भाषास्वरूपमाह नारदः । काव्यायनश्च दक्षः ।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं वस्तुनिदर्शितम् ।
निर्णीतं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वभाषाचारः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः ॥
यद्वा तत्तद्विधः पक्षः कथितः पूर्ववादिना ।
दद्यात्ततुपक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तम् । साध्यं साधनार्हाभिमतार्थं पक्षं विदुः । अन्यथा प्रतिज्ञादोषैरेव साध्यदोषः स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अवहारेण वक्तव्ये अवहारेण वादिभिः ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्वोक्ते । नारदेनापि ।
"धारस्तु अवहाराणां प्रतिज्ञा बहुधास्मृता ।
तद्भागो हीयते यादौ तदंशात्तूत्तरो भवेत् ॥"
उत्तरो विजयी यद्यप्यत्रैव साध्यं साध्यं तथिरुद्धधर्म्मो पक्ष इति भेदः । तथाप्यत्र वाक्प्रलाप्यर्थादिधर्म्मैरेविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधर्म्मादेरेव साध्यत्वात् साध्यपक्षयोरभेदात्तिरूपणम् । यथा, महाभारते । ५ । ४८ । ५ ।
"तेषां मनश्च विज्ञाप्यादानाविधौजसा ।
पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")

पूर्वदेशः, पुं, (पूर्वो देशः ।) प्राच्यादिगवस्थितजनपदः । तत्पर्य्यायः । वर्द्धनिः २ । इति त्रिकाण्डशेषः ॥ यथा,—
"प्राच्यां मागधगौडौ च वारेन्द्रीभोटराढ़काः ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोड्रवाद्रयः ॥"
इति ज्योतिस्तत्त्वम् ॥

पूर्वपक्षः, पुं, (पूर्वः पक्षः ।) शुक्लपक्षः । इत्यमरः ॥ (यथा, मनुः । ३ । २७८ ।
"यथा चैवापरः पक्षः पूर्वपक्षादतिक्रियते ॥") प्राच्योपक्षः । सिद्धान्तविरुद्धकोटिः । तत्पर्य्यायः । चोद्यम् २ । इति त्रिकाण्डशेषः ॥ देशम् ३ चक्रिका ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १ । ३ ।
"पूर्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥")
अधिकरणावयवभेदो अवहारविशेषः । यथा, याज्ञवल्क्ये । २ । १७ ।
"पूर्वपक्षेऽधरीभूते भवत्युत्तरवादिनः ॥")

पूर्वपक्षपादः, पुं, (पूर्वपक्ष एव पादः ।) चतुर्व्यवहारान्तर्गतः प्रथमः पादः । तस्य संज्ञान्तरम् । भाषा २ प्रतिज्ञा ३ पक्षः ४ । इति मिताक्षरा ॥ तत्र दक्षः ।
"पूर्वपक्षः स्मृतः पादो द्विपादश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः ॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राड्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु ॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भाषार्थस्वीकृततत्तेन क्रियावाप्तौ न भवतीति द्विपादतोक्ता ॥ * ॥
अथ भाषापादः । तत्र भाषास्वरूपमाह नारदः । काव्यायनश्च दक्षः ।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं वस्तुनिदर्शितम् ।
निर्णीतं लोकसिद्धञ्च पक्षं पक्षविदो विदुः ॥
स्वभाषाचारः प्रभूतार्थो निःसन्दिग्धो निराकुलः ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधकः ॥
यद्वा तत्तद्विधः पक्षः कथितः पूर्ववादिना ।
दद्यात्ततुपक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तम् । साध्यं साधनार्हाभिमतार्थं पक्षं विदुः । अन्यथा प्रतिज्ञादोषैरेव साध्यदोषः स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
अवहारेण वक्तव्ये अवहारेण वादिभिः ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्वोक्ते । नारदेनापि ।
"धारस्तु अवहाराणां प्रतिज्ञा बहुधास्मृता ।
तद्भागो हीयते यादौ तदंशात्तूत्तरो भवेत् ॥"
उत्तरो विजयी यद्यप्यत्रैव साध्यं साध्यं तथिरुद्धधर्म्मो पक्ष इति भेदः । तथाप्यत्र वाक्प्रलाप्यर्थादिधर्म्मैरेविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधर्म्मादेरेव साध्यत्वात् साध्यपक्षयोरभेदात्तिरूपणम् । यथा, महाभारते । ५ । ४८ । ५ ।
"तेषां मनश्च विज्ञाप्यादानाविधौजसा ।
पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")

भेदाभिधानम् । अतएव उपसंहारे च एवंविधः पक्ष इति मिताक्षरायामु भाषा प्रतिज्ञापक्ष इति नार्थान्तरमित्युक्तम् । भाषार्थसङ्गा भाषास्वरूपप्रपञ्चमाह स्वभाषाचार इति । निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः ।
"अन्न स्तुतौ च अवहारे च प्रस्तुते यद्यकर्म्मणि ।
यानि पञ्चन्युदासीनाः कर्त्ता तानि न पश्यति ॥"
इति यज्ञसंस्थत्ववचनादुदासीनेभ्यो ज्ञाता शोधयेत् । तच्छोधनमाह दक्षस्मृतिः ।
"ऊनाधिकं पूर्वपक्षं तावदादौ विशोधयेत् ।
न ह्यादुत्तरं यावत् प्रस्तुतौ सभ्यसन्निधौ ॥"
तल्लिखनप्रकारमाह व्यासः ।
"प्राङ्मुखेखेन फलके भूमौ वा प्रथमं लिखेत् ।
क्रमाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
फलकं काष्ठादिपट्टकम् । व्यासावनः ।
"पूर्वपक्षं स्वभाषोक्तं प्राश्निकोऽथ लेखयेत् ।
प्राङ्मुखेखेन फलके ततः पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावहारस्य निर्णयः शोधनं भवेत् ॥
अन्यदुक्तं लिखेद्यो ऽन्यदर्थिप्रत्यर्थिनोर्वचः ।
चौरवच्छासयेत्तन्तु वादिनेकः पृथिवीपतिः ॥"
स्वभाषोक्तमङ्गभिन्नम् । एतच्च स्मरविशेषादिना तुल्यम् । अतएव याज्ञवल्क्यः ।
"दृष्टं श्रुतञ्च भूतेन अवहारान्नयेन्नृपः ।
भूतमप्यनुपश्यन्तं दोषवत् अवहारतः ॥"
भूतं तत्त्वार्थसम्बद्धम् । यदाह नारदः ।
"भूतं तत्त्वार्थ सम्बद्धं प्रमादाभिहितं क्वचित् ।
किन्तु राज्ञा विशेषेण सभ्यैश्चैवाभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्षा साध्यसाधुता ।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति ॥
पशुस्त्रीभूम्यादाने साक्षोऽप्यर्थात्र दीयते ।"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति । अत्रोदाहरणं पशुस्त्रीत्यादि । अर्थविवादग्रहणात्तुच्छविवादेषु प्रमादाभिधाने प्रस्तुतार्थाद्दोषत इति गम्यते । यथाक्षमनेन शिरसि पादेन ताडित इत्यभिधाय केवलं हस्तेन ताडित इति वदन् न केवलं दण्डः पराजीयते च । तथा च इदं भूतं मम्मं अवधारयसि मत्त अवधारणेन गृहीतत्वावहनकत्वादित्यादि भाषाशरीरं एतच्च संस्कृतदेशभाषान्तरेण यथादोषं वक्तव्यं लेख्यं वा नक्षत्रांशमपि वादिप्रतिवादिव्यर्थत्वात् । अतएवाश्वासनेऽपि तथोक्तम् । विष्णुधर्म्मोत्तरे ।
"संस्कृतैः प्राकृतैर्व्वाक्यैः शिष्यमनुरूपतः ।
देशभाषानुपायाद्वोधयेत् च गुरुः स्मृतः ॥"
इति अवहारतत्त्वम् ॥

पूर्वपदं, क्ली, (पूर्वं पदम् ।) परपदप्राग्वर्त्तिविभक्त्यन्तपदम् । इति पाणिनिप्रकाशः । यथा पूर्वपदात् संज्ञायामगः । इति पाणिनिसूत्रम् ॥

पूर्वपर्व्वतः, पुं, (पूर्वः पूर्वदिक्स्थः पर्व्वतः । इति निजकर्म्मधारयः ।) सह्याचलः । इत्यमरः । २ । १ । २ ॥

पूर्व्वय

पूर्व्वफल्गुनी, स्त्री, (पूर्व्वा फल्गुनीति कर्म्मधारयः।) अश्विन्यादिसप्तविंशतितमचान्तर्गतेकादशनक्षत्रम्। तच्च लक्षाकृतितारकाद्वयात्मकम्। तस्याधिष्ठात्री देवता भगः। इति सुकूर्म्मविन्तामणिः॥ अपि च।

"दक्षिणोत्तरगते द्वितारके
गोजिभे भिलति मस्तकोपरि।
क्रौञ्चतः स्फुटसरोदृशागमे!
निःक्षता २।८ गजरसाधिजिह्मिकाः॥"

इ० ३। २८। इति कालिदासज्ञतदराधिजयनिरूपणम्॥ ॐ॥ तच्च जातफलम्।

"शूरत्यागी वाहनी भूमिभर्त्ता
कोपाक्रान्तः स्वाप्तिरालोऽतिदक्षः।
धूर्त्तः क्रूरोऽन्नवासाधिकः प्राक्-
फल्गुन्यर्क्षेऽन्नजाते च यस्य॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वफल्गुनीभवः, पुं, (पूर्व्वफल्गुन्यां भवतीति। भू+अच्।) हस्तर्क्षम्। इति शब्दमाला॥

पूर्व्वभद्रपदः, पुं, पूर्व्वभद्रपदा, स्त्री, पूर्व्वाभाद्रपदाः, स्त्री, अश्विन्यादिसप्तविंशतितमचान्तर्गतपञ्चविंशनक्षत्रम्। तत्पर्य्यायः। प्रोष्ठपदाः २। इत्यमरः॥ "द्वे पूर्व्वाभाद्रपदोत्तराभाद्रपदासु। प्रोष्ठो गौः भद्रञ्च गौः तस्येव पादे आर्षा ताक्षया। यद्वपतिरिव भद्रपादानुगतो राजेत्याचार्य्यमञ्जरी शेषाद्भद्रपदाशब्दो हृस्वादिः भाद्रपदाशब्दो दीर्घादिरपीति केचित्। दीर्घादिपाठः प्रामादिक इति सुकूटादयः॥ पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भद्रपदे द्वे तदुदायवार्षा चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्दित्वात् द्वित्वबहुत्वम्। फल्गुनीप्रोष्ठपदाशब्दो द्वित्वे बहुत्वे च भद्रपदा द्वेऽपीति केचित् भद्रपदेन युक्तः काल इति प्रयोगात् पुंलिङ्गोऽपि भद्रपद इति केचित्।" इति तट्टीकायां भरतः॥ ॐ॥

तां तु दक्षिणोत्तरपर्य्यन्तद्वाक्षतितारकाद्वयात्मिकाः। भारद्वाक्षतितारकाद्वयरूपा वा। तदधिदेवता अजपादः आर्षा अजपद्युतः। इति ज्योतिषम्॥ अपि च।

"भारद्वाक्षतिकोपरिस्थिते
पूर्व्वभाद्रपदमे द्वितारके।
त्रिभिका; करिकराधि २२८ संमिता
निःसरन्ति हवभोदयात् प्रिये!॥"

इ० ३। ३८। इति कालिदासज्ञतदराधिजयनिरूपणम्॥ ॐ॥

तच्च जातफलम्।

"क्षितेश्चिरः सर्व्वजनात् दयो
जितारिपक्षः खलु तस्य जिष्णुः।
मनेश्चतौयान् सुतरामपूर्व्वा
पूर्व्वा यदा भाद्रपदा प्रहृष्टौ॥"

इति कोष्ठीप्रदीपः॥

पूर्व्वयज्वन्, पुं, (पूर्व्वजाती यज्वेति। पूर्व्वे पूर्व्वजिन् काले यज्वा वा।) जिनविशेषः। तत्पर्य्यायः। मल्लिभगः २ जयजयः ३ जयेन्द्रः ४। इति त्रिकाण्डशेषः॥

पूर्व्वरङ्गः, पुं, (पूर्व्वं रज्यतेऽस्मिन्निति। रञ्ज+अधिकरणे घञ्।) नाट्योपक्रमः। "इति हेमचन्द्रः। २। २६६॥ तत्पर्य्यायः। प्राक्संगीतम् २ गुरुनिका ३। इति जटाधरः॥ (अस्य लक्षणं यथा, साहित्यदर्पणे। ६। २०।

"यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्व्वन्ति पूर्व्वरङ्गः स उच्यते॥")

पूर्व्वरागः, पुं, (पूर्व्वं पूर्व्वजातौ रागोऽनुरागः।) नायकनायिकयोर्दर्शनादिविशेषः। यथा,—

"अवलोकदर्शनादपि मिथःसंकल्परागयोः।
दृष्टादिविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

इति साहित्यदर्पणम्॥

पूर्व्वराद्धः, पुं, (राज्ञः पूर्व्वो भागः। अच् समासे।) "राज्ञाह्नाह्नः पुंसि।" २। ४। २६। इति पुंस्त्वम्।) राज्ञः पूर्व्वभागः। इति शब्दबोधाकरः॥

पूर्व्वरूपं, क्ली, (पूर्व्वं रूपमिति कर्म्मधारयः।) पूर्व्वलक्षणम्। वैद्यके भाविव्याधिबोधकचिह्नम्। यथा,—

"————————प्राग्रूपं येन लक्ष्यते।
कृपितैस्तुरामयो दोषविशेषेणानुविद्धतः।
लिङ्गमव्यक्तमव्यक्तव्याधीनां तदुपायवित्॥"

द्विविधं हि पूर्व्वरूपं भवति। सामान्यं विशिष्टञ्च। सामान्यं येन दोषदूष्यसंमूर्च्छनावस्थाजनितेन भाविज्वरादिव्याधिमात्रं प्रतीयते न तु वातादिजनितत्वादिविशेषः। यथा। अमो रतिर्विवर्णत्वमिति। तथा वाजगुरुवाक्यम्रदेऽवादि। सामान्याभिप्रायेणैव तन्नान्तरं यथा। आर्षेणार्तिर्भुजा च पूर्व्वरूपेण लक्ष्यते। भाव; क्षिप्रात्मकत्वञ्च लक्ष्यते लक्षणेन तु इति॥ तथाच परागरः। पूर्व्वरूपं नाम येन भाविव्याधिविशेषो लक्ष्यते न तु दोषविशेष इति। विशिष्टं यथा। उरःक्षतादौ लिङ्गान्येव वातादिजान्यवस्थानि। यदुक्तं तत्रैव। अव्यक्तं लक्षणं त्रेधा पूर्व्वरूपमिति स्मृतमिति। तथाह सुश्रुतः।

सामान्यतो विशेषात्तु वृक्षाद्यर्थं समीरणात्।
पित्तात्तयमनयोर्द्दाहः कफात्तन्द्राभिनन्दनमिति॥

ज्वरोक्तेऽप्युक्तम्। इति पूर्व्वरूपमहतां ज्वराणां सामान्यतो विशेषात्तु वृक्षाद्यर्थमहैभूयिकं क्षुद्रयोगेऽपि वातजमिति। प्राग्रूपं येन लक्ष्यते इत्यस्यार्थमाह रक्षितः। येन अमादिना कृपितैस्तुः सामर्थ्यात्कालात्कृपितैरुत्तरामयो रोगः दोषविशेषेण वातादिजन्यासाधारणलक्षणेनानुविद्धतोऽन्वितो लक्ष्यते ज्ञायते तत्प्राग्रूपमिति। लिङ्गमव्यक्तमव्यक्तव्याधीनामित्यस्यार्थमाह स एव। प्राग्रूपमित्यनेन पूर्व्वोक्तेन सम्बन्धः लिङ्गं लक्षणम् अव्यक्तं नाम्नाभिधत्तं तच्च हेतुरूपत्वात् न व्याधिरूपादिवोमादिवत्तत्त्वमित्यर्थः यथायथं यच्च व्याधेर्यद्रूपं तदेवाव्यक्तं तस्य पूर्व्वमित्यर्थः। अन्ये तु पूर्व्वरूपलक्षणमाहुः।

"ज्ञानसंशयिनः कृत्वा भाविव्याधिप्रबोधकम्।
दोषाः कुर्व्वन्ति यल्लिङ्गं पूर्व्वरूपं तदुच्यते॥ इति॥

संक्षेपतस्तु लक्षणं भाविव्याधिबोधकमेव लिङ्गं पूर्व्वरूपम्।" इति माधवकरविजयरक्षितौ॥

पूर्व्ववादः, पुं, (पूर्व्वो वादः।) व्यवहारे राजादिसमीपे प्रागावेदनम्। यथा,—

"पूर्व्ववादव्यतिक्रम्य योऽन्यमालम्बते पुनः।
पदक्रामसमाख्येयो दोषवादी स वै नरः॥"

इति मिताक्षरा॥

पूर्व्ववादी, [न्] पुं, (पूर्व्ववादोऽस्यास्तीति। पूर्व्ववाद+इनिः।) प्रागभियोक्ता। प्रथमविवादी। यथा,—

"प्रारब्धायकारयोस्तौ तु प्रत्यर्थी निह्नवेत क्रियाम्।
मिथ्योक्तौ पूर्व्ववादी तु प्रतिपत्तौ न सा भवेत्॥"

इति मिताक्षरा॥

पूर्व्वशैलः, पुं, (पूर्व्वः पूर्व्वदेशस्थितो वा शैलः।) उदयपर्व्वतः। इति जटाधरः॥

पूर्व्वसरः, त्रि, (पूर्व्वं सरतीति। पूर्व्व+सृ+"पूर्व्वे कर्त्तरि।" ३। २। १६। इति टः।) अग्रगामी। यथा, भट्टिः। ५। ६७।

"द्विषन् वनेचराधीशां समादाय चरो वने।
अथेश्वरो जघन्यानां माभूत् पूर्व्वसरो मम॥"

पूर्व्वसारः, त्रि, पूर्व्वं देयं सरतीति कर्म्मणि घञ् (अच्)प्रत्ययः। पूर्व्वसरः। इति व्याकरणम्॥

पूर्व्वा, स्त्री, (पूर्व्व+टाप्।) पूर्व्वदिक्। तत्पर्य्यायः। प्राची २ पुरा ३ माधवी ४ ऐन्द्री ५ माधवती ६। तद्दिग्भवत्वादुगुणाः।

"पूर्व्वस्तु मधुरो वातः स्निग्धः कटुरुदाहितः।
गुरुर्विदाहश्लेष्मघ्नो बलदः पित्तनाशनः॥"

इति राजनिर्घण्टः॥

अपि च। राजवल्लभः।

"प्राग्वातो मधुरः स्वादी बल्यो माल्यकरो गुरुः।
वैरस्यगौरवौष्ण्यानि करोत्यूर्ध्वोषधौ च॥
भयोतृषिरुचताद्येषु रागश्चयथुदाहजित्।
सन्निपातज्वरश्वासकासदोषार्शोविषक्रिमीन्॥
कोपयेदामवातञ्च बलसंघातकारकम्॥"॥ॐ॥

तद्दिग्विषयाः मेघविघ्नधनूराज्यः। यथा,—

"प्रागादिकक्षभा गाथा यथासंख्यं प्रदक्षिणम्।
मेघाद्या राज्यो मेघाक्षिरात्तृप्तिपरिप्लवात्॥

इति ज्योतिस्तत्त्वम्॥

पूर्व्वाः, पुं, पूर्व्वजाः। पूर्व्वपुरुषाः। बहुवचनान्तोऽयम्। इत्यमरः। ३। ३। १२२। (यथा, रघुः। १। ६७।

"मत्परं दुर्लभं मत्वा नूनमावर्ज्जितं मया।
पयः पूर्व्वैः सुनिभृतैः कल्पोच्छ्रयसुपस्कृतम्॥")

पूर्व्वाद्रिः, पुं, (पूर्व्वः पूर्व्वदिक्स्थितो वा अद्रिः पर्व्वतः।) उदयाचलः। तत्पर्य्यायः। हिमगर्भः २। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। १। १८।

"पिङ्गोत्तुङ्गजटाकूटगतो यस्यानुते नवः।
सन्ध्यारुणप्रभापूर्व्वाद्रिशृङ्गस्थसुखं शशी॥")

पूर्व्वेद्युः

पूर्व्वाषाढ़ा, स्त्री, (पूर्व्वा चासावाषाढ़ा चेति ।) अभिजिदादिसप्तविंशतिनक्षत्रान्तर्गतविंशनक्षत्रम् । सा सर्पाकृतिचतुस्तारात्मिका । गजदन्ताकृतिद्वितारात्मिका वा । अस्या अधिष्ठातृदेवता सोयम् । इति ज्योतिषम् ॥ अपि च ।

"सर्पेन्द्रनिभि शिरोगते चतुस्तारके करिकरोदवारिमि ।
अम्बुभादमृतवाचि ! निर्मिता:
खेचराम्बरगृहाङ्गणिप्रिका: ॥"

इ० १।४६ ॥ इति कालिदासकृतराशिलग्ननिरूपणम् ॥४॥ तत्र जातफलम् ।

"भूयो भूयक्षयमानाङ्गरक्तो
भक्तो देवे वस्तुमान्योऽतिदक्ष: ।
पूर्व्वाषाढ़ा जन्मकाले यदि स्या-
दाषाढ़: स्याद्देहिवर्गे नितान्तम् ॥"

इति कोष्ठीप्रदीप: ॥

पूर्व्वाह्ण:, पुं, (अह्न: पूर्व्वम् । पूर्व्वापराधरेत्येक-देशिसमास: । "राजाह:सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अहोऽह्न एतेभ्य: ।" ५ । ४ । ८८ । इति अह्नादेश: । "अह्नोऽह्नात् ।" ८ । ४ । ७ । इति णत्वम् । "राजाह्नाद्य: पुंसि ।" २ । ४ । २९ । इति पुंस्त्वम् ।) त्रिधाविभक्तदिनप्रथमभाग: । स च चिंशद्घट्टिकादिनमाने सूर्य्योदयावधिदशघट्टिकाकाल: । यथा, पूर्व्वाह्णो वै देवानां मध्यन्दिनं मनुष्याणा-मपराह्ण: पितृणाम् । इति श्रुति: ॥ अपि च । त्रिधाविभक्तदिनभागाभिप्रायेण तु लोकाक्षि: ।

"पूर्व्वाह्णे मध्यमे वापि यदि पर्व्व समाप्यते ।
तदोपवास: पूर्व्वेद्युरुक्तदर्शेऽग दृश्यते ॥
अपराह्णेऽथवा रात्रौ यदि पर्व्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग दृश्यते ॥"

उपोष्येति गाहोरात्राभोजनपरं किन्तु क्षते अग्न्याधाने देवा यजमानस्य समीपमुपवसन्तीति उपवासशब्देनाग्न्याधानमुच्यते । सूर्य्योदयाव-धिप्रहरद्वयम् । त्रिधाविभक्तदिनपूर्व्वभाग: । यथा । पूर्व्वाह्णापराह्णरूपत्रिधाविभक्तदिनस्या-वधिमेनावर्त्तनमाह स्कन्दपुराणम् ।

"आवर्त्तनात्तु पूर्व्वाह्णो ह्यपराह्णस्ततः पर: ॥"

आवर्त्तनात् वासरस्य छायापरिवर्त्तनात् प्राग-तिथेव: अतएवोक्तम् ।

"अस्तं यन्तमेनित्यं पूर्व्वाह्णे प्रहरद्वये ।
अत ऊर्द्धं न वन्देत अस्तमस्तु कदाचन ॥"

इति मलमासतत्त्वम् ॥

पूर्व्वाह्णिक:, त्रि, (पूर्व्वाह्णे भव इति । पूर्व्वाह्ण+ "विभाषा पूर्व्वाह्णापराह्णाभ्याम् ।" ४।३।२३ । इति खुञौ तुट् च । "घकालतनेषु कालना-म्न: ।" ६ । ३ । २७ । इति विभाषया समम्या अनुक् ।) पूर्व्वाह्णे भव: । इति सिद्धान्तकौमुदी ॥

पूर्व्वेद्यु:, [स्] अ, (पूर्व्वस्मिन्नहनीति । पूर्व्व+ "सद्य:परुत्परारैषम: परेद्यवद्यपूर्व्वेद्युरन्येद्यु-रिति ।" ५।३।२२। इत्येद्युसुप्रत्ययो निपात्यते ।) पूर्व्वदिनम् । इत्यमर: ।३।४।२१ ॥ प्रात:काल: ।

पृ

धर्म्मवासर: । इति मेदिनी । अव्ययसे, ८४ ॥ (यथा, मनौ । ३ । १८७ ।

"पूर्व्वेद्युरपरेद्युर्वा श्राद्धकर्म्मण्युपस्थिते ।
निमन्त्रयेत त्रयवरान् सम्यग्विप्रान् यथोदि-तान् ॥")

पूर्व्व, क निकेतने । इति कविकल्पद्रुम: ॥ (चुरा०-परं०-निमन्त्रणे सक०-निवासे अक०-सेट् ।) वसतिकरी । निकेतनमिह निमन्त्रणं निवासो वा । क, पूर्व्वयति द्विजान् भोक्तुं यज्ञे । पूर्व्व-यति तीर्थेषु साधु: । इति दुर्गादास: ॥ अस्य-वाक्षोऽयम् ॥

पूष, वि संवृतौ । इति कविकल्पद्रुम: ॥ (चुरा०-परं० भ्वा०-परं-सर्व०-सेट् ।) वसतिकरी । वि, पूजयति पूषति । संवृतौ राशीकरणम् । इति दुर्गादास: ॥

पूष, वृद्धौ । इति कविकल्पद्रुम: ॥ (भ्वा०-पर०-अक०-सेट् ।) वसतिकरी । पूषति । इति दुर्गा-दास: ॥

पूष:, पुं, (पूषति वर्द्धते इति । पूष+क: ।) अन्न-दाताख्य: । इत्यमर: । २ । ७ । ३१ ॥ तुस इति भाषा ॥ (अन्नदातृशब्दस्यास्य विषयो ज्ञेय: ॥)

पूषक:, पुं, (पूष+स्वार्थे कन् ।) अन्नदाताख्य: । इति राजनिर्घण्ट: ॥ प्रलाशपिपल इति हिन्दी-भाषा ॥ अस्य पर्य्यायगुणा: तृणधान्ये द्रष्टव्या: ॥

पूषभासा, स्त्री, (पूषेव सूर्य्य इव भासते इति । भास+अच् । टाप् ।) इन्द्रनगरी । तत्पर्य्याय: । सरपुरी २ । इति शब्दरत्नावली ॥

पूषासुक्षत्, [द्] पुं, (पूष्णोऽसुक्षत् । शिवो हि खाण्डवीरभक्षेणास्य इन्द्रसत्काटयामास अतोऽस्य तथात्वम् ।) शिव: । इति हेमचन्द्र: । १ । ११७ ॥

पूषा, [न्] पुं, (पूषतीति । पूष वृद्धौ+"सर्व-धातुभ्य इन्" उणा० १ । १५८ । इति कनिन्प्रत्ययान्तो निपात्यते ।) सूर्य्य: । इत्यमर: । १ । ३ । २८ ॥ (यथा, मार्कण्डेये । १०८ । ६४ ।

"आदित्यं भास्करं भानुं सवितारं दिवाकरम् ।
पूषाणमर्य्यमाणञ्च सर्भानुं दीप्तदीधितिम् ॥"

स तु द्वादशादित्यानामन्यतम: । यथा, मह-भारते । १ । ६५ । १५—१६ ।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च ।
भगो विवस्वान् पूषा च सविता दशमस्तथा ॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते ।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिक: ॥")

पृ, क पूर्त्तौ । इति कविकल्पद्रुम: ॥ (चुरा०-पर०-सक०-सेट् ।) पूर्त्ति: पूर्णीकरणम् । क, पारयति मयसा कुम्भं लोक: । इति दुर्गादास: ॥

पृ, ग प्रीतौ । इति कविकल्पद्रुम: ॥ (स्वा०-पर०-सक०-अनिट् ।) ग, अतिथीन् पृणोति । इति दुर्गादास: ॥

पृ, जि भाजने । इति कविकल्पद्रुम: ॥ (ह्वा०-पर०-सक०-अनिट् ।) जि, पिपर्त्ति । इति दुर्गादास: ॥

पृक्त

पृ, प्रा ङ आपूरणे । इति कविकल्पद्रुम: ॥ (तुदा०-आत्म०-अक०-अनिट् ।) आपूरणको व्यापार: ॥ प्रा ङ, धर्म्मे व्याप्रियते सुधी: । इति दुर्गादास: ॥

पृक्का, स्त्री. (पृच्यते इति । पृच् + वाहुलकात् कन् । पृषोदरादित्वात् साधु: ।) शरकविशेष: । पिड़ि इति भाषा ॥ तत्पर्य्याय: । मरुज्जाता २ पिशुना ३ देवी ४ जता ५ जतु: ६ वसुजाता ७ वधू: ८ कोटिवर्षा ९ जङ्घायिका १० । इत्य-मर: ॥ मरुत ११ भाता १२ भृङ्गा १३ कोटी १४ वर्षा १५ जङ्घापिका १६ वर्षाजङ्घायिका १७ । इति तट्टीकायां भरत: ॥ तस्कर: १८ चोरक: १९ चक्र: २० । इति रत्नमाला ॥ अस्य गुणा: । भावे मधुरत्वम् । शुक्लत्वम् । पित्त-कफनाशित्वञ्च । इति राजवल्लभ: ॥

पृक्ति:, स्त्री, (पृच् + भावे क्तिन् ।) सम्पर्क: । सङ्ग: । तत्पर्य्याय: । सृष्टि: २ । इत्यमर: । ३ । २ । ९ ॥

पृच, ई ञ ङ सम्पर्के । इति कविकल्पद्रुम: ॥ (अदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ई, पृक्त: । ञ ङ, पृक्ते । परीपृच्यते । स चेह सम्पृक्तीभाव: । सम्पृक्ते नाभिमुक्तेयं इति कृषा-युध: । सम्पृक्ते मधुना पूर्व्वं भिषगिति तु अन्त-र्भूतण्यर्थत्वादिति चतुर्भुज: । इति दुर्गादास: ॥

पृच, कि संयमने । सम्पर्के । इति कविकल्पद्रुम: ॥ (चुरा० पक्षे भ्वा० पर०-सक० सेट् ।) संयमनं बन्धनम् । कि, पर्चयति पर्चति दुष्टं राजा । इति दुर्गादास: ॥

पृच, ध ई सम्पर्के । इति कविकल्पद्रुम: ॥ (रुधा०-पर०-सक० अक० च-सेट् । निष्ठायामनिट् ।) सम्पर्के इह संपृक्तीकरणं सम्पृक्तीभावश्च । ध, पृणक्ति घृतेन वासम् । संपृणक्ति न मापिभिर्यः इति कृषायुध: । ई, पृक्त: । पपर्च । इति दुर्गादास: ॥

पृच्छा, स्त्री, (प्रच्छ जिज्ञासायाम् + "गुरोश्च हल: ।" ३ । ३ । १०३ । इति अ: ।) प्रश्न: । इत्यमर: । २ । ८ । १० ॥ (यथा, नैषधचरिते । १८ । ६० ।

"इह किंसुवधि पृच्छाप्रांक्रिकिंग्रन्थकल्प-
प्रतिनियमितवाचा वाचयैनेव पृष्ट: ।
भव पक्षिभवद्भाक्षे सातङ्क: खानिनौका
विधिविहितसुखौघागुप्तर: कोक्षिलोऽभूत् ॥"

"पृच्छा तन्त्रात् यथाम्नायं विधिना प्रश्न उच्यते ॥"

इति च वैद्यकचरके सूत्रस्थाने विंशोऽध्याये ॥)

पृज, ई ञ ङ सम्पर्के । इति कविकल्पद्रुम: ॥ (अदा०-आत्म०-अक०-सेट् ।) सम्पर्कस्तरी । ई, पृङ्क्ते । ञ ङ, पृङ्क्ते । अर्थं नैषिक्त मन्यते । इति दुर्गादास: ॥

पृच, ग्र सृदि । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) सृदि क्षुद्रीकरणे । ग्र, पृङ्क्ति दीनं दाता । पर्क्ता । इति दुर्गादासः ॥

पृच, ग्र क्षरि । इति कविकल्पद्रुमः । (तुदा०-पर०-सक०-सेट् ।) क्षरि क्षरीकरणे । ग्र, अर्चिं पृचति यो द्विजः । पर्क्ता । इति दुर्गादासः ॥

पृतना, स्त्री, (प्रियते इति । पृङ् व्याप्तौ + बाहुलकात् तनन् गुणाभावश्च ।) सेना । सेनाभेदः । इति मेदिनी । ने, ६४ ॥ वाहिनीत्रयम् । अथ गजाश्वित्रत्वारिंशदधिकशततयम् २४३ । रथाश्वित्रत्वारिंशदधिकशततयम् २४३ । अश्वा जनत्रिंशदधिकषण्णतम् ७२६ । पदातिका: षण्णवत्याधिकषण्णतद्व्याधिकसहस्रम् १२१५ । सत्तदार्येण त्रिंशदधिकचतु:शतीत्राधिकसहस्रत्रयम् २४३० । इत्यमरभरतौ ॥ (यथा, महाभारते । १ । २ । २१ ।

"अयो गुल्मा गणो नाम वाहिनी तु गणात्रयः ।
पृतनाश्चित्रयस्तु वाहिन्यः पृतनेति विचक्षणैः ॥"

"व्याप्नियन्तेऽत्र योद्धारः इति । पृङ् व्याप्तौ । 'पृपृभ्यां कित् ।' इति तनन्प्रत्ययः ।" इति निघण्टौ देवराजयज्वा ॥ संग्रामः । इति निघण्टुः ॥ यथा, ऋग्वेदे । १ । ८५ । ८ ।

"शूरा इवेद्युयुधयो न जग्मयः
श्रवस्यवो न पृतनासु येतिरे ॥"

"पृतनासु संग्रामेषु येतिरे ।" इति तद्भाष्ये सायणः ॥)

पृतनाषाट्, [षाह्] पुं, (पृतनां सहते इति । सह + "छन्दसि सहः ।" ३ । २ । ६३ । इति ण्विः । सहेरिति षः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

पृथ, क प्रक्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, पर्थयति गुडमौषधे जनः । इति दुर्गादासः ॥

पृथक्, व्य, (प्रथयतीति । प्रथ विस्तारे + "प्रथः कित् सम्प्रसारणञ्च ।" उणा० १ । १६६ । इति अजिः कित् सम्प्रसारणञ्च धातोः ।) भिन्नम् । तत्पर्य्यायः । विना २ अन्तरेण ३ ऋते ४ हिरुक् ५ नाना ६ वर्ज्जनम् ७ । इत्यमरः । ३ । ४ । ३ ॥ (यथा, मार्कण्डेये । १४ । ६६ ।

"तेषामेतैः सितैः प्राज्ञैर्मुकुन्दविलसितां लघुः ।
पृथक् कुर्व्वन्ति वै यान्याः पुरीरादर्तिदारुणाः ॥")

पृथक्चेत्राः, पुं, (पृथक् भिन्नं क्षेत्रं उत्पत्तिस्थानं येषामिति ।) एकस्थानानावर्ण्यबीजातपुत्राः । इति मिताक्षरा ॥

पृथक्त्वं, क्ली, (पृथगित्यस्य भावः । पृथक् + भावे त्व ।) चतुर्विंशतिगुणान्तर्गतसप्तमगुणः । तस्य लक्षणम् । पृथक्प्रत्ययासाधारणकारणत्वम् । यथा, भाषापरिच्छेदे ।

"संख्यात्वञ्च पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ।
अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते ॥
अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥"

"पृथक्त्वं निरूपयति संख्यावदिति पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम् । तन्नित्यत्वादिकं संख्यावत् यथा हि नित्येषु एकत्वं नित्यं अनित्ये अनित्यम् आश्रयद्वितीयत्वयोः चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवत् द्विपृथक्त्वादिकमपीत्यर्थः ।" इति सिद्धान्तमुक्तावली ॥

पृथक्पर्णी, स्त्री, (पृथक् पर्णानि यस्याः । "पाकक्रमेणपर्णपुष्पफलेति ।" ४ । १ । ६४ । इति ङीष् ।) क्षुद्रवृक्षविशेषः । चाकुल्या इति भाषा ॥ तत्पर्य्यायः । पृश्निपर्णी २ चित्रपर्णी ३ अङ्गिवल्लिका ४ । इत्यमरः । २ । ४ । ६२ ॥ (यथा, सुश्रुते । १ । ३६ ।

"पृथक्पर्ण्यात्मगुप्ता च हरिद्रे मालती सिता ।
काकोल्यादिश्च योज्यः स्यात्प्रग्रहो रोपणे हृते ॥"

पर्य्यायान्तरमस्या यथा, वैद्यकरत्नमालायाम् ।

"पृश्निपर्णी पृथक्पर्णी लाङ्गली क्रोष्टुपुच्छिका ।
धावनिः कलशी तन्वी गृष्टाक्रोष्टुकमेखला ॥
दीर्घा शृगालविन्नासा शीर्षपर्णी सिंहपुच्छिका ।
दीर्घपत्रा त्वतिसुहृद् पृतिसहा चित्रपर्णिका ॥")

पृथक्त्वात्मता, स्त्री, (पृथक् आत्मा स्वरूपं यस्य । तस्य भावः । तल् ।) विवेकः । इत्यमरः । २ । ७ । ३८ ॥

पृथक्त्वात्मिका, स्त्री, (पृथक् आत्मा स्वरूपं यस्याः । काप्यत इत्वम् ।) शक्तिः । यथा,—

"जातिर्जातेश्च सामान्यं शक्तिस्तु पृथगात्मिका ॥"

इति जगन्मोहनतर्कालङ्कारोत्याद्यिश्लोकोत्तरं क्वचिदमरकोषे पाठः ॥

पृथग्जनः, पुं, (पृथक् सज्जनेभ्यो विभिन्नो जनः ।) मूर्खः । नीचः । इत्यमरः । २ । २ । १६ ॥ (यथा, मनुः । ७ । १३७ ।

"यस्तु किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम् ।
अवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् ॥")

पापी । इति शब्दरत्नावली ॥ भिन्नलोकश्च ॥

पृथग्बीजः, पुं, (पृथक् विभिन्नानि बीजानि यस्य ।) भल्लातकः । इति राजनिर्घण्टः ॥

पृथग्विधः, त्रि, (पृथक् विभिन्नलक्षणा विधा प्रकारो यस्य ।) नानारूपः । इत्यमरः । ३ । १ । ६३ ॥ (यथा, मनुः । १ । ४० ।

"सर्व्वञ्च पृथग्विधं स्थावरञ्च पृथग्विधम् ॥")

पृथवी, स्त्री, (प्रथते विस्तारमेतीति । प्रथ + "प्रथेः पिवन् सम्प्रसारणञ्च ।" उणा० १ । १५० । इत्यत्र 'पवन् इत्येके ।' इत्युज्ज्वलदत्तोक्त्या पवन् सम्प्रसारणञ्च । पित्त्वात् ङीष् ।) पृथिवी । यथा,

"पृथवी पृथिवी पृथ्वी धरा सर्व्वंसहा रसा ॥"

इति भरतधृतवाचस्पतिः ॥

पृथा, स्त्री, कुन्ती । इति जटाधरः ॥ (इयं हि शूरस्य कन्या वसुदेवस्य भगिनी । अस्याः पिता शूरस्तु कुन्तिनृपाय निजबान्धवायापुत्रायैनां ज्ञातकन्यकारूपेण दत्तवान् । तत्र कुन्तिराजवेश्मनि निवसन्तीं दुर्व्वाससं सन्तोष्य तस्मात् मन्त्रवरं लब्ध्वा कन्यावस्थायामेव सूर्य्यात् कर्णं वीरवरं प्रसूतवती । ततो गच्छति काले कुरुवंश्यावतंसः पाण्डुनृपतिरेनां परिणीतवान् । भर्त्रादिष्टा धर्म्मात् युधिष्ठिरं वायोर्भीमं इन्द्रादर्জ্জুनं प्रसूतवती । अनन्तरं भर्त्रादेशेन सपत्नीं मद्रसुतायै तज्जन्म प्रदत्तवती तेन माद्री अश्विभ्यां नकुलसहदेवौ लेभे । इत्येषा कथा भागवते ६ स्कन्धे २४ अध्याये द्रष्टव्या ॥)

पृथाजः, पुं, (पृथाया जायते इति । जन + डः ।) कुन्तीपुत्रः ॥ अर्জ্জुनश्च । इति राजनिर्घण्टः ॥

पृथापतिः, पुं, (पृथायाः पतिः ।) पाण्डुराजः । इति त्रिकाण्डशेषः ॥

पृथिका, स्त्री, शतपदी । इति शब्दमाला ॥

पृथिविः, स्त्री, (पृथवी । ङीषो वा लुक् ।) पृथिवी । इति संक्षिप्तसारोणादिवृत्तिः ॥

पृथिवी, स्त्री, (प्रथते विस्तारं यातीति । प्रथ + "प्रथेः पिवन् सम्प्रसारणञ्च ।" उणा० १ । १५० । इति पिवन् सम्प्रसारणञ्च । ङीष् ।) मर्त्यलोकाधिष्ठानभूता । तत्पर्य्यायः । भूः २ भूमिः ३ अचला ४ अनन्ता ५ रसा ६ विश्वम्भरा ७ स्थिरा ८ धरा ९ धरित्री १० धरणी ११ क्ष्मौ १२ क्ष्मा १३ काश्यपी १४ क्षितिः १५ सर्व्वंसहा १६ वसुमती १७ वसुधा १८ उर्व्वी १९ वसुन्धरा २० गोत्रा २१ कुः २२ पृथ्वी २३ क्ष्मा २४ अवनिः २५ मेदिनी २६ मही । इत्यमरः । २ । १ । २—३ ॥ भूर् २८ भूमी २९ धरणिः ३० क्ष्मोणिः ३१ क्ष्मोजी ३२ क्ष्मौणिः ३३ क्षमा ३४ अवनी ३५ महिः ३६ रत्नगर्भा ३७ सागराम्बरा ३८ अब्धिमेखला ३९ भूतधात्री ४० रत्नावती ४१ देहिनी ४२ पारा ४३ विपुला ४४ मध्यमलोकवर्त्मा ४५ । इति भरतः ॥ धरणीधरा ४६ धारणी ४७ महाकान्ता ४८ जगद्धात्री ४९ गन्धवती ५० खड्गिनी ५१ गिरिकर्णिका ५२ धारयित्री ५३ धात्री ५४ सागरमेखला ५५ सहा ५६ अचलकीला ५७ गौः ५८ अब्धिद्वीपा ५९ द्विरा ६० दृढा ६१ दृढ़िका ६२ दृला ६३ दृलिका ६४ । इति शब्दरत्नावली ॥ उदधिवस्त्रा ६५ हरा ६६ आदिमा ६७ ईला ६८ वरा ६९ उर्व्वरा ७० आद्या ७१ जगती ७२ पृथुः ७३ भुवनमाता ७४ निश्चला ७५ बीजप्रस्थः ७६ ग्रामा ७७ क्रोड़काम्बा ७८ । इति राजनिर्घण्टः ॥ खगवती ७९ अदितिः ८० । इति जटाधरः ॥ ❋ ॥ (पृथवी ८१ । इति शब्दार्णवः ॥) न्यायमते अस्या धर्म्मः । रूपस्पर्शवत्त्वप्रत्ययत्वयोगित्वम् । इयं गुर्व्वी रसवती च । अस्या द्रवत्वं नैमित्तिकम् । अस्या गुणाः । सङ्ख्या १ संज्ञा २ परिमितिः ३ पृथक्त्वम् ४ संयोगः ५ विभागः ६ परत्वम् ७ अपरत्वम् ८ वेगः ९ द्रवत्वम् १० गुरुत्वम् ११ रूपम् १२

रस: १३ गन्ध: १४। इयं गन्धकारणं नाना-
रूपवती षड्रसयुक्ता। गन्धस्तु द्विविध: सौरभ
असौरभम्। तस्या: सूक्ष्मा: अणुव्यूहोत्पा-
दकत्व:। सा द्विविधा नित्या अनित्या च। पर-
माणुस्वरूपा नित्या सावयवा अनित्या। सा
त्रिविधा देहेन्द्रियविषयरूपा। देहरूपा योनि-
जादि: इन्द्रियात्मिका घ्राणरूपा विषयात्मिका
द्व्यणुकादिब्रह्माण्डपर्यन्ता। यथा,—
"रूपप्रबलप्रत्यक्षयोगि स्यात् प्रथमश्चिकम्।
गुरुत्वो दे रसवती द्वयोर्नैमित्तिको द्रव:॥"
"सूक्ष्मादयोऽष्टौ वेगश्च द्रवत्वश्च गुरुत्वकम्।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश॥
स्नेहहीना गन्धयुता क्षितावेते चतुर्दश।
तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता॥
षड्विधस्तु रसश्चत्र गन्धोऽपि द्विविधो मत:।
सूक्ष्मस्तु तस्या विज्ञेयो द्व्यणुव्यूहोत्पादक:॥
नित्यानित्या च सा द्वेधा नित्या स्यादणुरूपिणी।
अनित्या तु तदन्या स्यात् सैवावयवयोगिनी॥
सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा।
योनिजादिर्भवेद्देहमिन्द्रियं घ्राणलक्षणम्॥
विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृत:॥"
इति भाषापरिच्छेदे। २८—३८॥
तस्या अध्यात्मादि यथा,—
"पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते।
अधिभूतं तथा गन्धो वायुश्चाधिदैवतम्॥"
इति महाभारते आश्वमेधिकपर्व॥
(यथा, मार्कण्डेये। ५७। ४।
"घृताद्रिकोटिविस्तारो पृथिवी शतयोजना
द्विज!।
तस्या हि स्थानमखिलं कथयामि शृणुष्व तत्॥")
तस्या उत्पत्तिकारणं यथा,—
"श्रूयतां वसुधाजन्म सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिदजानन्ति मधुकैटभमेदसा।
बभूव वसुधाजन्म तदविज्ञमतं शृणु॥
जघ्नतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध न यत्रोर्व्वी प्लाव्यसा संप्लुतेति च॥
तयोर्जीवनकालेन प्रत्यक्षा साभवत् स्फुटम्।
ततो बभूव मेदश्च मरुस्थाम्नरन्नयो:॥
मेदिनीति च विख्यातेत्युक्ता येनजातं शृणु।
जलधौता तदा पूर्व्वं वर्द्धिता मेदसा यत:॥
कथयामि च तच्चक्रं सार्थकं सर्व्वसम्मतम्।
पुरा श्रुतं यत् श्रुयुक्तं धर्म्मवक्त्राच्च पुष्करे॥
महाविराट्शरीरस्य जलस्यस्य चिरं स्फुटम्।
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्॥
स च प्रविष्ट: सर्व्वेषां सलोम्नां विवरेषु च।
कालेन महता तस्माद्बभूव वसुधा सुने!॥
प्रत्येकं प्रतिलोम्नाश्च कूपेषु सा स्थिरा स्थिता।
आविर्भूता तिरोभूता सा जले च पुन: पुन:॥
आविर्भूता सृष्टिकाले तच्चलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥
प्रतिविश्वेषु वसुधा शैलकाननसंयुता।
सप्तसागरसंयुक्ता सप्तद्वीपसमन्विता सती॥
हिमाद्रिमेरुसंयुक्ता ग्रहनक्षत्रार्कसंयुता।
ब्रह्मविष्णुशिवाद्यैश्च सुरैर्लोकैरुदालये॥
पुण्यतीर्थसमायुक्ता पुण्यभारतसंयुता।
पातालसप्ततदधस्तदूर्द्धं ब्रह्मलोकक:॥
ब्रह्मलोकश्च तत्रैव सर्व्वविश्वश्च तत्र वै।
एवं सर्व्वाणि विश्वानि पृथिव्यां निर्म्मितानि च।
जहौ गोलोकवैकुण्ठौ नित्यौ विश्वपरौ च तौ॥
नश्वराणि च विश्वानि सर्व्वाणि क्षत्रियाणि च।
प्रलये प्राप्तते ब्रह्मन्! ब्रह्मणश्च निपातने।
महाविराड्शरीरस्थो हरि: क्षणेन चात्मना॥
नित्यै: स्थिता च प्रलये काष्ठाकाशेश्वरै: सह।
स्थित्यधिष्ठातृदेवी सा वाराहे पूजिता सुरै:॥
मुनिभिर्मनुभिर्विप्रैर्गन्धर्व्वादिभिरेव च।
विष्णोर्व्वराहरूपस्य पत्नी सा श्रुतिसम्मता।
तत्पुत्रो मङ्गलो ग्रेयो धरणीगो मङ्गलात्मज:॥
नारद उवाच।
पूजिता केन रूपेण वाराहे च सुरैर्मही।
वराहेण च वाराही सर्व्वै: सर्व्वाश्रया सती॥
तस्या: पूजाविधानञ्चाप्यधश्चोद्धरणक्रमम्।
मङ्गलं मङ्गलस्यापि ब्रूहि सर्व्वं वद प्रभो!॥
श्रीनारायण उवाच।
वाराहे च वराहश्च ब्रह्मणा संस्तुत: पुरा।
उद्धार महीं हत्वा हिरण्याक्षं रसातलात्॥
जले तां स्थापयामास पद्मपत्रं यथा ह्रदे।
तत्रैव निर्म्ममे ब्रह्मा सर्व्वं विश्वं मनोहरम्॥
दृष्ट्वा तदधिदेवीञ्च सकामां कामुकी हरि:।
वराहरूपी भगवान् कोटिसूर्य्यसमप्रभ:॥
त्यक्त्वा रतिकरीं ग्रम्यां मूर्त्तिञ्च सुमनोहराम्।
क्रीड़ाञ्चकार रहसि दिव्यं वर्षमहर्निशम्॥
सुखसम्भोगसंप्राप्तां मूर्च्छां संप्राप सुन्दरी।
विदग्धाया विदग्धेन सङ्गमोऽतिसुखप्रद:॥
विष्णुस्तदङ्गसंस्पर्शात् बुबुधे न दिवानिशम्।
वर्षान्ते चेतनां प्राप्य कामी तत्याज कामुकीम्॥
पूर्व्वरूपञ्च वाराहं दधार भावलीलया।
पूजाञ्चकार भक्त्या च ध्यात्वा च धरणीं सतीम्॥
धूपैर्दीपैश्च नैवेद्यै: सिन्दूरैरनुलेपनै:।
वस्त्रै: पुष्पैश्च बलिभि: संपूज्योवाच तां हरि:॥
श्रीमहावराह उवाच।
सर्व्वाधारा भव शुभे! सर्व्वै: संपूजिता सुखम्।
मुनिभिर्मनुभिर्देवै: सिद्धैश्च मानवादिभि:॥
अम्बुवाचीत्यागदिने गृहारम्भप्रवेशने।
वापीतड़ागारम्भे च गृहे च क्षधिकर्म्मणि॥
तव पूजां करिष्यन्ति मदग्रे सुरादय:।
मूढ़ा ये न करिष्यन्ति यास्यन्ति नरकञ्च ते॥
वसुधोवाच।
वहामि सर्व्वं वाराहरूपेणाहं तवाज्ञया।
लीलामात्रेण भगवन्! विश्वञ्च सचराचरम्॥
सक्तां मुक्तिं हरेर्भक्तिं शिवलिङ्गं शिलां तथा।
शुद्धं प्रदीपं मन्त्रञ्च माणिक्यं हीरकं मणिम्॥
यज्ञसूत्रञ्च पुष्पञ्च पुस्तकं तुलसीदलम्।
अपमार्गं पुष्पमालां कर्पूरञ्च सुवर्णकम्॥
गोरोचनां चन्दनञ्च घ्राणत्यागमजन्तं विना।
एतान् वोढुमशक्तोऽहं क्षिप्ता च भगवन्!
शृणु॥
श्रीभगवानुवाच।
ब्रह्मण्येतानि मूढ़ा ये अर्पयिष्यन्ति सुन्दरि!।
ते यास्यन्ति कालसूत्रं दिव्यं वर्षायुतं त्वयि॥
इत्येवमुक्त्वा भगवान् विरराम च नारद!।
बभूव तेन गर्भेण तेजस्वी मङ्गलग्रह:॥
पूजां चक्रु: पृथिव्याश्च ते सर्व्वे चाज्ञया हरे:।
काम्यध्यानोक्तध्यानेन तुष्टुवु: स्तवनेन च॥
दुर्म्मन्त्रेण मन्त्रेण नैवेद्यादिकमेव च।
संस्तुता विष्णुलोकेषु पूजिता सा बभूव च॥
नारद उवाच।
किं ध्यानं स्तवनन्तस्या मूलमन्त्रश्च किं वद।
गूढ़ं सर्व्वपुराणेषु श्रोतुं कौतूहलं मम॥
श्रीनारायण उवाच।
आदौ च पृथिवी देवी वराहेण च पूजिता।
तत: सर्व्वैर्मुनीन्द्रैश्च मनुभिर्मानवादिभि:।
ध्यानञ्च स्तवनं मन्त्रं शृणु वक्ष्यामि नारद!॥*॥
ॐ श्रीं ह्रीं क्लीं वसुन्धरायै स्वाहा।
इत्यनेनैव मन्त्रेण पूजिता विष्णुना पुरा॥
श्वेतचम्पकवर्णाभां शतचन्द्रसमप्रभाम्।
चन्दनोक्षितसर्व्वाङ्गीं रत्नभूषणभूषिताम्॥
रत्नाधारां रत्नगर्भां रत्नाकरसमन्विताम्।
वह्निशुद्धांशुकाधानां सस्मितां वन्दितां भजे॥
ध्यानेनानेन सा देवी सर्व्वैश्च पूजिता भवेत्।
स्तवनं शृणु विप्रेन्द्र! काम्यध्यानोक्तमेव च॥
श्रीविष्णुरुवाच।
जये जये जयाकारे जयशीले जयप्रदे!।
यज्ञशूकरजाये च जयं देहि जयावहे॥
मङ्गले मङ्गलाधारे मङ्गल्ये मङ्गलप्रिये।
मङ्गलार्हे मङ्गलेशे मङ्गलं देहि मे भवे॥
सर्व्वाधारे सर्व्वबीजे सर्व्वशक्तिसमन्विते।
सर्व्वकामप्रदे देवि सर्व्वेष्टं देहि मे भवे॥
पुण्यस्वरूपे पुण्यानां बीजरूपे सनातनि।
पुण्याश्रये पुण्यवतामालये पुण्यदे भवे॥
रत्नाधारे रत्नगर्भे रत्नाकरसमन्विते।
सौरत्नरूपे रत्नार्हे रत्नसारप्रदे भवे॥
सर्व्वशस्याश्रये सर्व्वशस्यार्हे सर्व्वशस्यदे।
सर्व्वशस्यहरे काले सर्व्वशस्याधिके भवे॥
भूमे भूमिपसर्व्वस्वे भूमिपानां परायणे।
भूपाद्यैश्वारूपेण भूमिं देहि च भूमिपे॥
इदं शुत्रं महास्तोत्रं तां संपूज्य च य: पठेत्।
कोटि कोटि जन्म जन्म स भवेद्भूमिपेश्वर:॥
भूमिदानशतं पुण्यं लभते पाठनाज्जन:।
भूमिदानफलात् पापान्मुच्यते नात्र संशय:॥
अम्बुवाचीभूखनने पापात् स मुच्यते ध्रुवम्।
अन्धकूपे कूपदानात् पापात् स मुच्यते ध्रुवम्।
परभूमाक्रमणात् पापान्मुच्यते नात्र संशय:॥
भूमौ वीर्य्यपरित्यागात् भूमौ दीपादिस्थापनात्।
पापेन मुच्यते प्राज्ञ: स्तोत्रस्य पठनाच्छृणु!।
अश्वमेधशतं पुण्यं लभते नात्र संशय:॥

नारद उवाच ।
भूमिदानव्रतं पुण्यं पापं तद्धरणे च यत् ।
परभूमौ आद्धपापं कूपे कूपदानं तथा ॥
अम्बुवाचीभूखननं वीर्यस्तम्भनमेव च ।
दीपादिस्थापनात् पापं श्रोतुमिच्छामि यत्नतः ॥
अथवा पृथिवीजन्यं पापं मत्प्रभवतः परम् ।
यद्यस्ति तत्प्रतीकारं वद वेदविदांवर ! ॥
श्रीनारायण उवाच ।
वितस्तिमात्रां भूमिञ्च यो ददाति च भारते ।
सत्पात्रपूताय विप्राय स याति विष्णुमन्दिरम् ॥
भूमिञ्च सर्व्वशस्याढ्यां ब्राह्मणाय ददाति यः ।
भूमिरेणुप्रमाणञ्च वर्षं विष्णुपदे स्थितिः ॥
यावं भूमिञ्च धान्यञ्च यो ददात्याददाति च ।
सर्व्वपापविनिर्मुक्तौ चोभौ वैकुण्ठवासिनौ ॥
भूमिं दातुञ्च यत्काले यः साधुस्त्वानुमोदते ।
स च याति च वैकुण्ठं मित्रगोत्रसमन्वितः ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत्तु यः ।
स तिष्ठति कालसूत्रे यावच्चन्द्रदिवाकरौ ॥
तत्पुत्रपौत्रप्रभृतिर्भूमिहीनः श्रिया हतः ।
पुत्रहीनो दरिद्रश्चैवान्ते याति च रौरवम् ॥
गवां मार्गं विनिष्कृष्य यच्च ग्रस्यं ददाति च ।
दिव्यं वर्षशतञ्चैव कुम्भीपाकेषु तिष्ठति ॥
गोस्तं तडागं निष्कृष्य मार्गं ग्रस्यं ददाति च ।
स च तिष्ठत्यसिपत्रे यावदिन्द्राश्चतुर्दश ॥
न पश्यन्निजसुतत्वं परकूपे च खाति यः ।
प्राप्नोति नरकं नैव स्नानं फलमेव च ॥
कामी भूमौ च रहसि वीर्यत्यागं करोति यः ।
विन्ध्यरेणुप्रमाणञ्च वर्षं तिष्ठति रौरवे ॥
अम्बुवाच्यां भूखननं यः करोति च मानवः ।
स याति लक्षमिन्द्राश्च स्थितिस्तत्र चतुर्युगम् ॥
परकीयलुप्तकूपे कूपं मूढः प्रयच्छति ।
पुष्करिण्याश्च लुप्तायां पुष्करिणीं ददाति च ॥
सर्व्वं पुण्यं परस्यैव तत्पापन्तस्य निश्चितम् ।
तत्र तिष्ठति सन्तप्तो यावदिन्द्राश्चतुर्दश ॥
परकीयतडागे च पङ्कसन्तरणाय गोस्तरणेतु ।
रेणुप्रमाणवर्षञ्च ब्रह्मलोके वसेन्नरः ॥
पित्रे पित्रे भूमिभर्त्रे प्रदाय च मानवः ।
आद्धं करोति यो मूढो नरकं याति निश्चितम् ॥
भूमौ दीपं योऽर्पयति स चान्धः सप्तजन्मनि ।
भूमौ ग्रस्यञ्च संस्थाप्य कुष्ठं जन्मान्तरे लभेत् ॥
मुक्तामाणिक्यहीरञ्च सुवर्णञ्च मणिस्तथा ।
यश्च संस्थापयेद्भूमौ स तिष्ठेन्नरके युगम् ॥
जपमालां पूजयमालां कर्पूरं रोचनान्तथा ।
यो मूढश्चार्पयेद्भूमौ स याति नरकं ध्रुवम् ॥
मुने ! चन्दनकाष्ठञ्च रक्तवस्त्रं कुशमूलकम् ।
संस्थाप्य भूमौ नरके वसेन्मन्वन्तरावधि ॥
पुस्तकं यश्चक्षुश्च भूमौ संस्थापयेत्तु यः ।
न भवेद्दिप्रदोषौ च तस्य जन्मान्तरे जनेः ॥
ब्रह्महत्यासमं पापमसत्यञ्च लभेद्ध्रुवम् ।
यत्तियुक्तं यत्नशुभं पुण्यञ्च सर्व्ववर्णकैः ॥
यत्नं कृत्वा च यो भूमिं क्षीरेण नहि सिञ्चति ।
स याति तप्तमूर्म्मिञ्च सप्तप्तः सप्तजन्मसु ॥

भूकम्पे यद्भवेद्यो हि करोति स्वजनं सुतः ।
जन्मान्तरे महापापी स चाङ्गहीनो भवेद्ध्रुवम् ॥
भवनं यत्र वर्त्तेत भूर्भूमिरिति कीर्त्तिता ।
वसुरत्नं सा दधाति वसुधा सा वसुन्धरा ।
हरेरूरौ च या जाता सा चोर्व्वी परिकीर्त्तिता ॥
धरा धरित्री धरणी सर्व्वेषां धारणात्तु या ।
दृष्ट्वा च यागधाराञ्च यौनी यौवालये च या ।
महालये चयं याति क्षितिस्तेन प्रकीर्त्तिता ॥
काश्यपी कश्यपस्येयमचला स्थिररूपतः ।
विश्वम्भरा तद्धरणाद्वामनस्यानन्तरूपतः ॥
पृथिवी पृथुकन्यात्वाद्विस्तृतत्वाच्च हे मुने ! ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे पृथिव्युपाख्यानं ७ अध्यायः ॥ * ॥
तस्या भारो यथा,—
क्षितिरुवाच ।
"हत्याभक्तिविहीना ये ये च तद्धरनिन्दकाः ।
तेषां महापातकिनामग्रहा भारवाहने ॥
स्वधर्म्माचारहीना ये नित्यनैमित्यविवर्जिताः ।
ब्रह्महीनाश्च वेदेषु तेषां भारेण पीड़िता ॥
पितृमातृगुरूणाञ्च पोषणं पुत्रपोष्ययोः ।
ये न कुर्व्वन्ति तेषाञ्च न ग्रहा भारवाहने ॥
ये मिथ्यावादिनस्तात ! दयासत्यविहीनकाः ।
निन्दका गुरुदारानां तेषां भारेण पीड़िता ॥
मित्रद्रोही कृतघ्नश्च मिथ्यासाक्षिप्रदायकः ।
विश्वासघ्नः स्थापहारी तेषां भारेण पीड़िता ॥
कल्याणयुक्तनामानि हरेर्नामैकमङ्गलम् ।
कुर्व्वन्ति विक्रयं ये वै तेषां भारेण पीड़िता ॥
जीवघाती गुरुद्रोही ग्रामयाजी च लुब्धकः ।
ग्रहदाही सूदभोजी तेषां भारेण पीड़िता ॥
पूजायज्ञोपवासानि व्रतानि नियमानि च ।
ये ये मूढा विहन्तारस्तेषां भारेण पीड़िता ॥
सदा हिंसन्ति ये पापा गोविप्रसुरवेद्यवान् ।
हरिं हरिकथां भक्तिं तेषां भारेण पीड़िता ॥
ग्रहादीनाञ्च भारेण पीड़िताहं यथा विधे ! ।
ततोऽधिकेन दैत्यानां तेषां भारेण पीड़िता ॥
इत्येवमुक्त्वा वसुधा रुरोद च मुहुर्मुहुः ।
ब्रह्मा तद्रोदनं दृष्ट्वा तामुवाच कृपानिधिः ॥
भारं तवापनेष्यामि दस्यूनामपुपायतः ।
उपायतोऽपि कार्य्याणि सिध्यन्त्येव वसुन्धरे ! ॥
मन्त्रं मङ्गलकुम्भञ्च घृतलिङ्गञ्च कुङ्कुमम् ।
मधुकाष्ठं चन्दनञ्च कस्तूरीं तीर्थमृत्तिकाम् ॥
खड्गं गण्डकखड्गञ्च स्फटिकं पद्मरागकम् ।
इन्द्रनीलं सूर्य्यमणिं रुद्राक्षं कुशमूलकम् ॥
शालग्रामशिलाशङ्खतुलसीप्रतिमाजलम् ।
गृहप्रदीपमालाञ्च शिलाञ्चातुलसीं तथा ॥
निर्म्माल्यञ्चैव नैवेद्यं हरिवर्ष्मणिमन्तथा ।
यज्ञियुक्तं यज्ञशुभं दर्पणं श्वेतचामरम् ॥
गोरोचनाञ्च सुक्तञ्च शुक्तिं माणिक्यमेव च ।
पुराणसंहितां वह्निं कर्पूरं परशुं तथा ॥
रजतं काञ्चनञ्चैव प्रवालं रत्नमेव च ।
कुशद्विजं तीर्थतोयं गन्धं गोमूत्रगोमयम् ॥

त्वयि ये स्थापयिष्यन्ति मूढाश्चैतानि सुन्दरि ! ।
पच्यन्ते कालसूत्रे च वर्षाणामयुतं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः ॥
तस्या रूपान्तरं यथा,—
"इति तस्य वचः श्रुत्वा जनकस्य तदा क्षितिः ।
मुनीनां सन्निधौ रूपं दर्शयामास भूभृते ॥
नीलोत्पलदलश्यामामम्लानमालाधारिणीम् ।
बाहुयुग्मेन मुखेन नेत्राभ्यामतिशोभिना ।
सुन्दरीं लोकधात्रीं तां दृष्ट्वा ग्रन्थनृपोऽब्रवीत् ॥"
इति कालिकापुराणे ३६ अध्यायः ॥
पृथिव्या नामग्रहादुत्पत्तिकारणं यथा,—
प्रजा ऊचुः ।
"अराजके नृपश्रेष्ठ ! धरित्र्या सकलौषधीः ।
यस्मात्तस्मात् त्वयं यान्ति प्रजाः सर्व्वाः प्रजेश्वर ! ॥
त्वं नो वृत्तिप्रदो धात्रा प्रजापालो निरूपितः ।
देहि नः क्षुत्परीतानां प्रजानां जीवनौषधीः ॥
श्रीपराशर उवाच ।
ततोऽथ नृपतिर्दिव्यमादायाजगवं धनुः ।
शरांश्च दिव्यान् कुपितः सोऽभ्यधावद्वसुन्धराम् ॥
ततो धरापि त्वरिता गौर्भूत्वा तु वसुन्धरा ।
सा लोकान् ब्रह्मलोकादींस्त्रासादगमदग्रहो ।
यत्र यत्र ययौ देवी सा तदा भूतधारिणी ।
तत्र तत्र तु सा वैन्यं ददर्शाभ्युद्यतायुधम् ॥
ततस्तं प्राह वसुधा पृथुं पृथुपराक्रमम् ।
प्रवेपमाना तद्वाक्यपरित्राणपरायणा ॥
पृथिव्युवाच ।
स्त्रीवधे त्वं महापापं किं नरेन्द्र ! न पश्यसि ।
येन मां हन्तुमत्यर्थं प्रकरोषि नृपोद्यमम् ॥
श्रीपृथुरुवाच ।
एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमस्तस्य पुण्यप्रदो वधः ॥
पृथिव्युवाच ।
प्रजानामुपकाराय यदि मां त्वं हनिष्यसि ।
आधारः कः प्रजानान्ते नृपश्रेष्ठ ! भविष्यति ॥
पृथुरुवाच ।
त्वां हत्वा वसुधे ! वाणैर्मच्छासनपराङ्मुखीम् ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥
श्रीपराशर उवाच ।
ततः प्रणम्य वसुधा तं भूयः प्राह पार्थिवम् ।
प्रवेपिताङ्गी परमं साध्वसं समुपागता ॥
उपायतः समारब्धाः सर्व्वे सिध्यन्त्युपक्रमाः ।
तस्मादुपायमुपाये त्वं कुरुष्व यदीच्छसि ॥
समस्तास्ता मया जीर्णा नरनाथ ! महौषधीः ।
यदीच्छसि प्रदास्यामि ताः क्षीरपरिणामिनीः ॥
तस्मात् प्रजाहितार्थाय मम धर्म्मभृतांवर ! ।
तन्तु वत्सं प्रयच्छस्व चरेयं येन वत्सला ॥
समाञ्च कुरु सर्व्वत्र येन क्षीरं समन्ततः ।
वरौषधीबीजभूतं वीर ! सर्व्वत्र भावये ॥
श्रीपराशर उवाच ।
तत उत्सारयामास शैलान् शतसहस्रशः ।
धनुष्कोट्या तदा वैन्यस्तेन शैला विवर्द्धिताः ॥
नहि पूर्व्वविसर्गे वै विषमे पृथिवीतले ।

प्रतिभागः पुराणां वा ग्रामाणां वा पुराभवत् ॥
न शस्त्राणि न गोरक्षं न कृषिर्न वणिक्पथः ।
वैण्यात् प्रभृति मैत्रेय ! सर्व्वस्येतस्य सम्भवः ॥
यत्र यत्र समं यस्या भूमेरासीद्द्विजोत्तम ! ।
तत्र तत्र प्रजानां हि निवासं समरोचयत् ॥
आहारः फलमूलानि प्रजानामभवत्तदा ।
कृच्छ्रेण महता सोऽपि प्रनष्टास्वोषधीषु वै ॥
स कल्पयित्वा वत्सन्तु मनुं स्वायम्भुवं प्रभुम्
स्वे पात्रौ पृथिवीनाथो दुदोह पृथिवीं पृथुः ॥
शस्यजातानि सर्व्वाणि प्रजानां स्थितिकाम्यया ।
तेनान्नेन प्रजाताः ! वर्त्तयन्त्यद्यापि नित्यशः ॥
प्राणप्रदानात् स पृथुर्यस्मादभूमेरभूत् पिता ।
ततस्तु पृथिवीसंज्ञामवापाखिलधारिणी ॥
ततश्च देवैर्मुनिभिर्दैत्यै रक्षोभिरद्रिभिः ।
गन्धर्व्वैरुरगैर्यक्षैः पितृभिस्तरुभिस्तथा ॥
तत्तत्पात्रसुपादाय तस्मै दुग्धा सुते ! पयः ।
वत्स ! दोग्धृविशेषाच्च तेषां तद्योनयोऽभवन् ॥
सैषा धात्री विधात्री च धारणी पोषणी तथा ।
सर्व्वस्य जगतः पृथ्वी विष्णुपादतलोद्भवा ॥
एवंप्रभावः स पृथुः पुत्रो वेनस्य वीर्य्यवान् ।
जज्ञे मह्यीपतिः पूर्व्वो राजाभूज्जगरञ्जनात् ॥"
इति श्रीविष्णुपुराणे १ अंशे पृथुचरितं १३ अध्यायः ॥ * ॥

तस्या नामगोरूपदोहनानां कारणानि यथा,—
ऋषय ऊचुः ।
"बहुभिर्धरणी भुक्ता भूपालैः श्रूयते पुरा ।
पार्थिवाः पृथिवीयोगात् पृथिवी कस्य योगतः ॥
किमर्थञ्च स्मृता संज्ञा भूमिः किं पारिभाषिकी ।
गौरितीयञ्च विख्याता कुतः ! कस्माद्ब्रवीहि नः ॥
सूत उवाच ।
वंशे स्वायम्भुवे ह्यासीदङ्गो नाम प्रजापतिः ।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्म्मुखी ॥
सुनीथा नाम तस्यास्तु वेनो नाम सुतः पुरा ।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः ॥
लोकेऽप्यधर्म्मलुब्धात्मा परभार्य्यापहारकः ।
धर्म्माचारप्रसङ्गार्थं जगतोऽस्य महर्षिभिः ॥
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः ।
शापेन मारयित्वैनमराजकभयार्दितां ॥
ममन्थुर्बाहवस्तस्य वलाद्वेहमकल्मषाः ॥
तत्कायान्मथ्यमानात्तु निष्पेतुर्म्लेच्छजातयः ॥
शरीरे मातुरंशेन ज्ञात्वाज्ञानसमप्रभाः ।
पितुरङ्गस्य चांशेन धार्म्मिको धर्म्मचारिणः ॥
उत्पन्नो दक्षिणाद्बाहोस्तात् सधनुः सशरो गदी ।
दिव्यतेजोमयवपुः सरत्नकवचाङ्गदः ॥
पृथुरेवाभवद्यस्मात्तः पृथुरजायत ।
स विप्रैरभिषिक्तश्च तपः कृत्वा सुदुश्चरम् ॥
विष्णोर्व्वरेण सर्व्वस्य प्रभुत्वमगमत् प्रभुः ।
निःस्वाध्यायवषट्कारं निर्धनं वीक्ष्य भूतलम् ॥
दग्धुमेवोद्यतः कोपात्तरसामितविक्रमः ।
ततो गोरूपमास्थाय भूः पलायितुमुद्यता ॥
पृष्ठतोऽनुगतस्तस्याः पृथुर्दीप्तशरासनः ।
ततः स्थितैकदेशे तु किं करोमीति साब्रवीत् ॥

पृथुरप्यवदद्राज्ञ्यमीप्सितं देहि सुव्रते ! ।
सर्व्वस्य जगतः क्षौद्रं स्थावरस्य चरस्य च ॥
तथेव चाब्रवीद्भूमिर्दुदोह च नराधिपः ।
स्वे स्वे पात्रौ पृथुर्वत्सं कृत्वा स्वायम्भुवं मनुम् ॥
तदन्नमभवत् सुखं प्रजा जीवन्ति तेन वै ।
ततस्तु ऋषिभिर्दुग्धा वत्सः सोमस्तदाभवत् ॥
दोग्धा हविरभूत् पात्रं वेदस्तपो रसः ।
वेदैश्च वसुधा दुग्धा दोग्धा मित्रस्तदाभवत् ॥
इन्द्रो वत्सः समभवत् क्षीरमूर्ज्जस्करं बलम् ।
देवानां काञ्चनं पात्रं पितॄणां राजतन्तदा ॥
अन्नकृच्चाभवद्दोग्धा यमो वत्सः सुधारसः ।
असुराद्यपात्रं नागानां तक्षको वत्सकोऽभवत् ॥
विषं क्षीरं ततो दोग्धा धृतराष्ट्रोऽभवत् पुनः ।
असुरैरपि दुग्धेयमायसे पात्रकल्पीडनीम् ॥
पात्रे मायाममूद्वत्सः प्रह्लादश्च विरोचनः ।
दोग्धा द्विमूर्द्धा तत्रासीच्छाया येन प्रवर्त्तिता ॥
यस्मिंश्च वसुधा दुग्धा पुरान्नर्द्धनमौषधीः ।
ज्ञात्वा वैश्रवणं वत्समामपात्रे महीपते ! ॥
प्रेतरक्षोगणैर्दुग्धा धरा रुधिरमुल्बणम् ।
रौद्रलाभोऽभवद्दोग्धा समाधौ वत्स एव तु ॥
गन्धर्व्वैश्च पुनर्दुग्धा वसुधा चाक्षरोगणैः ।
वत्सं चैत्ररथं ज्ञात्वा गन्धान् पद्मदले तथा ॥
दोग्धा च सुरुचिर्नाम गान्धर्व्वेदस्य पारगः ।
गिरिभिर्वसुधा दुग्धा रत्नानि विविधानि च ॥
औषधानि च दिव्यानि दोग्धा मेरुर्महाबलः ।
वत्सोऽभूद्धिमवांश्चात्र पात्रं शैलमयं पुनः ॥
दुग्धे च वसुधा दुग्धा क्षीरं छिन्नप्ररोहणम् ।
पालाद्यगणजे दोग्धा तु सालः पुष्पद्रुमाकुलः ॥
प्लक्षोऽभवत्ततो वत्सः सर्व्वदुग्धगणाधिपः ।
एवमन्यैश्च वसुधा तथा दुग्धा यथेप्सितम् ॥"
इति मत्स्यपुराणे १० अध्यायः ॥ * ॥

अन्यद्विवरणं भूगोलशब्दे द्रष्टव्यम् ॥ पृथ्वी । तद्देहिकपर्य्यायः । गौः १ मा २ जमा ३ क्ष्मा ४ क्षा ५ क्षामा ६ क्षोणी ७ क्षितिः ८ अवनिः ९ उर्व्वी १० पृथ्वी ११ मही १२ रिपः १३ अदितिः १४ इला १५ निर्ऋतिः १६ भूः १७ भूमिः १८ पृथा १९ गातुः २० गोत्रा २१ । इत्येकविंशतिपृथिवीनामधेयानि । इति वैद्यनिघण्टौ १ अध्यायः ॥ (अस्यारिष्टम् । इति निघण्टुः ।१।३ ॥ यथा, ऋग्वेदे ।१०।१२१।१ ।

"स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम ॥"

"पृथिवीत्यस्यारिष्टनाम ।" इति तद्भाष्ये सायणः ॥)
पृथिवीगीता, स्त्री, (पृथिव्या गीता ।) पृथिवी-कथा । यथा,—

"मैत्रेय ! पृथिवीगीताः श्लोकाश्चाप निबोध तान् ।
यानाह धर्म्मध्वनिमे जनकायासितो मुनिः ॥
श्रीपृथिव्युवाच ।
कथमेष नरेन्द्राणां मोहो बुद्धिमतामपि ।
येन केन सधर्म्मोऽयमिति विभ्रान्तचेतसः ॥
पूर्व्वमात्मजयं कृत्वा जेतुमिच्छन्ति मन्त्रिणः ।

ततो भृत्यांश्च पौरांश्च जिगीषन्ते तथा रिपून् ॥
क्रमेणानेन जेष्यामो वयं पृथ्वीं ससागराम् ।
इत्यासक्तधियो मर्त्यं न पश्यन्त्यविदूरगम् ॥
ससुद्रावरणं याति मनुमज्जलमथो वशम् ।
कियदात्मजयादेतत्सुखं त्रैलोक्यजे फलम् ॥
उत्सृज्य पूर्व्वं यां याता यां गादाय गतः पिता ।
तां मामतिविमूढात्मा जेतुमिच्छन्ति पार्थिवाः ॥
मत्सुतं पितृपुत्राणां आहुर्ज्ञात्वापि विपश्चितः ।
जायन्तेऽत्यन्तमोहेन ममत्वाहतचेतसाम् ॥
पृथ्वी ममेयं सकला ममेयं
ममेति चैषा मम शाश्वतेयम् ।
यो यो मृतेऽत्रैव बभूव राजा
कुबुद्धिरासीदिति तस्य तस्य ॥
दृष्ट्वा ममत्वाहतचित्तमेकं
विहाय मां मृत्युपथं व्रजन्तम् ।
तस्मान्ममत्वं क्वचिदात्मजेऽपि
कृत्वात्मदं मत्प्रभवं करोति ॥
पृथ्वी ममैवास्तु परित्यजेमां
वदन्ति ये दूतमुखैः स्वपूर्व्वान् ।
नराधिमास्थेषु ममातिहास्यः
पुनश्च मूढेषु दयाभ्युपैति ॥
श्रीपराशर उवाच ।
इत्येते धरणीगीताः श्लोका मैत्रेय ये: स्मृताः ।
ममत्वं विलयं याति तापस्थस्य यथा हिमम् ॥"
इति विष्णुपुराणे ४ अंशे २४ अध्यायः ॥

पृथिवीपतिः, पुं, (पृथिव्याः पतिः ।) राजा । (यथा, मनुः । ७ । १०० ।

"सर्व्वोपायैस्तथा कुर्य्यात् नीतिज्ञः पृथिवीपतिः ।
यथास्याभ्यधिका न स्युर्मित्रोदासीनशत्रवः ॥") ऋषभनामौषधिः । इति मेदिनी । ते, २६१ ॥ यमः । इति हेमचन्द्रः ॥

पृथिवीपालः, पुं, (पृथिवीं पालयतीति । पृथिवी + पालि + अच् ।) राजा । यथा,—

"नृपतिः पृथिवीपालः पृथिवीमेव केवलाम् ॥"
इति रघुः ॥

पृथिवीचक्रः, पुं. (पृथिव्याः चक्रं इव ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

पृथुः, पुं, (प्रथते विख्यातो भवतीति । प्रथ + "प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ।" उणा० १ । २६ । इति कुः सम्प्रसारणञ्च ।) चैत्ययूपे कर्त्तव्यषड्यीयपशुभेदः । वेनपुत्रस्य दक्षिणकरमथनाज्जातः । प्रजारञ्जनात् आद्ये राजोपाधिं प्राप्तः । यथा,—

"अथ ते ऋषयः सर्व्वे प्रसन्नमनसस्ततः ।
गतकल्मषमेवं तं जातं वेनं नृपोत्तमम् ॥
ममन्थुर्दक्षिणं पाणिं तस्यैव च महात्मनः ।
मथिते तस्य पाणौ च सञ्जातं खेदमेव हि ॥
पुनर्ममन्थुस्ते विप्रा दक्षिणं पाणिमेव च ।
सकरात् पुरुषो जज्ञे द्वादशादित्यसन्निभः ॥
ताम्रकार्ष्णायताक्षो दिव्यमाल्याम्बरावृतः ।
दिव्याभरणशोभाढ्यो दिव्यगन्धानुलेपनः ॥

पृथुः

हनुटेन सुवर्त्तेन कृकलाभ्यां विराजते ॥
महाकायो महाबाहू रूपेणाप्रतिमो भुवि ।
खड्गचापधरो धन्वी कवची च महाप्रभः ॥
सर्व्वालङ्कारसम्पन्नः सर्व्वालङ्कारभूषितः ।
तेजसा रूपभावेन साक्षादग्निरिव ज्वलन् ॥
आदित्यमाजगवं नाम धनुर्गृह्य महावरम् ।
इन्द्रो दिवि यथा भाति भुवि वेनात्मजस्तथा ॥
तस्मिन् जाते महाभागे दैवाच्च ऋषयोऽमलाः ।
उत्सवं चक्रिरे सर्व्वे वेनस्य तनयं प्रति ॥
दीप्यमानः स्ववपुषा वर्च्चोभिरिव भास्करः ।
धरांच दिव्यानृचार्थं कवचच्च महाप्रभम् ॥
ददाविन्द्रः सङ्गरार्थी माताचाज्ञानपूर्व्विकाम् ॥
जाते तस्मिन्महाभागे पृथौ वीरे महात्मनि ॥
संप्रहृष्टानि भूतानि समस्तानि द्विजोत्तमाः ।
सर्व्वतीर्थानि तोयानि पुण्यानि विविधानि च ॥
स्थावराणि चराण्येव अभ्यषिञ्चन्नराधिपम् ।
महावीरं प्रजापालं पृथुमेवं द्विजोत्तमाः ॥
पृथुं वैण्यं वसुराज्ये अभिषिक्तं चराचरैः ।
देवैर्विप्रैस्तथा सर्व्वैरभिषिक्तो महामनाः ॥
राज्ञाञ्चैवाधिकारे वै पृथुर्वैण्यः प्रतापवान् ।
तदा प्रिया प्रजाः सर्व्वाः कदा नैवाशुरक्षिताः ॥
तेनाशुरक्षिताः सर्व्वाः सुखैर्मुमुदिरे तदा ।
अनुरागात्तु वीरस्य नाम राज्ञस्तदाभवत् ॥
प्रयातस्य सुधीरस्य वसुदत्तस्य द्विजोत्तमाः ।
आपस्तस्मिन्नरे सर्व्वा भयात्तस्य महात्मनः ॥
प्रयातस्य रथस्यापि तस्यैव च महात्मनः ।
दुर्गमार्गे विशोकेव खमार्गे पर्व्वता ददुः ॥
ध्वजभङ्गं न चक्रुस्ते गिरयः सर्व्व एव ते ।
अक्षतपच्या पृथिवी सर्व्वत्र कामधेनवः ॥
पर्জन्यः कामवर्षी च देवयज्ञान् महोत्सवान् ।
कुर्व्वन्ति ब्राह्मणाः सर्व्वे क्षत्रियाश्च तथापरे ॥
सर्व्वकामफला वृक्षास्तस्मिन् शासति राजनि ।
न दुर्भिक्षं न च व्याधिर्नाकालमरणं तदा ॥
सर्व्वे मुदेन जीवन्ति लोका धर्म्मपरायणाः ।
तस्मिन् शासति दुर्द्धर्षे राजराजे महात्मनि ॥"
इति माहेश्वरखण्डे २८ अध्यायः ॥ * ॥

तस्य माहात्म्यं यथा,—
"पृथुना प्रविभक्ता च गोभिता च वसुन्धरा ।
शस्यरत्नवती स्फीता पुरपत्तनशालिनी ॥
एवं प्रभावो वैण्यश्च राजासीद्राजसत्तमः ।
नमस्यश्चैव पूज्यश्च भूतिकामैर्नरोत्तमैः ॥
ब्राह्मणैर्भेदकामैश्च पृथुर्वैण्यः प्रतापवान् ।
आदिकर्त्ता नराणाञ्च योधानां प्रथमो नृपः ॥
यो हि योद्धा रणं याति कीर्त्तयित्वा पृथुं नृपम् ।
घोरेष्वपि न संग्रामान् क्षेमी तरति कौर्त्तिमान् ॥
वेणोरपि हि सूनेव सा: सा वृत्तीरयुञ्जितेः ।
पृथुरेव नमस्कार्य्यः सर्व्वसिद्धिकरस्तु सः ॥
एवं पृथुरभूत् पूर्व्वं प्रजादाक्षकपालिनः ।
सार्व्वभौमो महातेजा दुर्जिनयः सुरासुरैः ॥"
तस्य पुत्रौ द्वौ । यथा,—
"पृथोः पुत्रौ तु धर्म्मज्ञौ जज्ञातेऽन्तर्द्धिपाविनौ ।

पृथुकः

शिखण्डी च हविर्द्धानमग्नेर्द्धानाद्व्यजायत ॥"
अरेणाभूराजः पुत्रः । यथा, अग्निपुराणे ।
"अयोधस्तस्य पुत्रोऽभूत् कृतवृक्षो नाम वीर्य्यवान् ।
कृतवृक्षस्य अरेणाभूत्तस्य पुत्रः पृथुः स्मृतः ॥"
अग्निः । इति मेदिनी । थे, १० ॥ (प्रियव्रतवंशोद्भवस्य विभोः पुत्रः । यथा, विष्णुपुराणे । २ । १ । ३८ ।
"सुवर्च्चलात्तु तथोन्नीथः प्रवारस्तत्सुतो विभुः ।
पृथुस्ततोऽभवत्पुत्रो नक्तस्यापि गयः स्मृतः ॥"
तामसमन्वन्तरे ऋषिविशेषः । यथा, मार्कण्डेये । ७४ । ५८ ।
"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनकस्तथा ।
पीवरश्च तथा अन्यान् ! सप्त सप्तर्षयोऽभवन् ॥")
पृथुः, स्त्री, (प्रथते विस्तारमेतीति । प्रथ + कुः सम्प्रसारणञ्च ।) लाजाशीरकः । इत्यमरः । २ । ९ । ३७ ॥ (एतत्पर्य्यायो यथा,—
"लाजाशीरः सुगन्धश्च तथैवोदारशोधनः ।
कालालाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः लाजोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च दृढलाजीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
लकपर्णी । द्विदलपत्री । इति मेदिनी । थे, १०॥ (पर्य्यायोऽस्या यथा,—
"द्विदलपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अहिफेनः । इति शब्दरत्नावली ॥
पृथुः, त्रि, (प्रथ + कुः सम्प्रसारणञ्च ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।
"उल्लसितभूधनुषा तव पृथुना लोचनेन रुचिराङ्गि ! ।
अचला अपि न महान्तः के चञ्चलभावमानीताः ॥")
त्रिपुरः । इति शब्दरत्नावली ॥
पृथुकः, पुं, (पृथुरेव । पृथु + संज्ञायां कन् । यद्वा, प्रथते इति । प्रथ + "अर्भकपृथुकेति ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च ।) पिप्पिटकः । इत्यमरः । क्लीबलिङ्गोऽप्ययम् । यथा,—
"दिःखिन्नमन्नं पृथुकं सुखं देयमविशेषके ।
नाश्नन्तमुक्तं विप्राणां भक्तयेऽपि निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २७ अध्यायः ॥
(यथास्य गुणाः ।
"पृथुका गुरवो बल्या कफविष्टम्भकारिणः ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥
"पृथुका गुरवो भृष्टान् भक्षयेदल्पशस्तु तान् ।
यावा विदग्धा जीर्य्यन्ति सतुषा भिन्नवर्च्चसः ॥"
इति चरके सूत्रस्थाने खप्नविधेऽध्याये ॥
"पृथुका गुरवः स्निग्धा हृद्या बल्या कफप्रदाः ।
बल्याः सक्षीरभावात्तु वातघ्ना भिन्नवर्च्चसः ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥

पृथुक्ष

चाक्षुषमन्वन्तरे देवगणभेदः । यथा, हरिवंशे । ७ । ३२ ।
"आद्या प्रभूता ऋभवः पृथुकाश्च दिवौकसः ॥")
पृथुकः, त्रि, (प्रथते इति । प्रथ + "अर्भकपृथुकपाका वयसि ।" उणा० ५ । ५३ । इति कुकन् सम्प्रसारणञ्च । यद्वा, पृथु यथा स्यात् तथा कायति शब्दायते इति । के शब्दे + कः ।) बालकः । इति मेदिनी । के, १२६ ॥ (यथा, माघे । ३ । ३० ।
"प्रकीर्णितान् रेणुभिरेव तूर्णं
निर्युज्यमानः पृथुकान् पथिभ्यः ॥")
पृथुका, स्त्री, (पृथुः स्त्रीजेव । पृथु + कन् + टाप् ।) द्विदलपत्री । इति शब्दचन्द्रिका ॥ (अस्याः पर्य्यायो यथा,—
"द्विदलपत्री तु कवरी पृथ्विका पृथुका पृथुः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बालिका च ॥
पृथुकोलः, पुं, (पृथुः कोलः ।) राजबदरः । इति राजनिर्घण्टः ॥
पृथुच्छदः, पुं, (पृथवश्छदाः पत्राणि यस्य ।) हरिदर्भः । इति राजनिर्घण्टः ॥ द्वदलपत्रे, त्रि ॥
पृथुपत्रः, पुं, (पृथूनि पत्राणि यस्य ।) रक्तलशुनः । इति राजनिर्घण्टः ॥
पृथुपलाशिका, स्त्री, (पृथूनि पलाशानि यस्याः । कप् । टापि अत इत्वम् ।) शटी । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिका ।
गन्धारिका गन्धबधूर्बधूः पृथुपलाशिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुरोमा, [न्] पुं, (पृथूनि रोमाणि लोमस्थानीयानि शुल्काग्रस्थानि । यस्य ।) मत्स्यः । इत्यमरः । १ । १० । १७ ॥ द्वदलोमयुक्ते, त्रि ॥
पृथुलं, त्रि, (पृथुं पृथुत्वमश्नुते । पृथु + सिध्मादित्वात् लच् । यद्वा, पृथुं नाशयति । नश + कः ।) महत् । इत्यमरः । ३ । १ । ६० ॥ (यथा, माघे । १० । ६५ ।
"श्रोणिषु प्रियकरः पृथुलासु
स्वर्गमाप सकलेन तलेन ॥")
पृथुला, स्त्री, (पृथुज + टाप् ।) द्विदलपत्री । इति जटाधरः ॥ (गुणादयोऽस्या द्विदलपत्रीशब्दे ज्ञातव्याः ॥)
पृथुश्रिम्बः, पुं, (पृथुः श्रिम्बा यस्याः ।) श्लीपदभेदः । इति राजनिर्घण्टः ॥ (पर्य्यायान्तरमस्य यथा,—
"श्लीपदाकः श्लीपदञ्च स्थानटङ्कटुण्डुकाः ।
मण्डूकपदपत्रोर्ण्यूर्णुकाससकुटन्नटाः ॥
दीर्घतुण्डोऽरुषापि पृथुश्रिम्बः कटम्भरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पृथुशैखरः, पुं, (पृथु महत् शैखरं शृङ्गं यस्य ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥
पृथुशूकरः, पुं, (पृथुः शूकः शूकरो यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पृथूदकं, क्ली, (पृथु पुण्यप्रदत्वात् महदुदकं यस्य ।) तीर्थभेदः । यथा,—
"ते श्रुत्वा ऋषयः सर्वे तीर्थमाहात्म्यमुत्तमम् ।
कपालमोचनमिति नाम चक्रुः समागताः ॥
तत्रापि तुमहत्तीर्थं विश्वामित्रस्य विश्रुतम् ।
ब्राह्मण्यं लब्धवान् यत्र विश्वामित्रो महामुनिः ॥
तस्मिंस्तीर्थवरे स्नात्वा ब्राह्मण्यं लभते ध्रुवम् ।
ब्राह्मस्तु विशुद्धात्मा परं पदमवाप्नुयात् ॥
ततः पृथूदकं गच्छेन्नियतो नियताशनः ।
तत्र सिद्धस्तु ब्रह्मर्षी रुषद्गुनाम नामतः ॥
जातिस्मरो रुषद्गुस्तु गङ्गाद्वारे तदा स्थितः ।
अन्तकालं ततो ज्ञात्वा पुत्रान् वचनमब्रवीत् ॥
इह श्रेयो न पश्यामि नयध्वं मां पृथूदकम् ।
विज्ञाय तस्य तद्भावं रुषद्गोस्ते तपोधनाः ॥
तं वै तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ।
स तैः पुत्रैः समानीतः सरस्वत्यां समाप्लुतः ॥
स्नात्वा तीर्थगुणान् सर्व्वान् प्राप्तिदत्वधिसत्तमः ।
सरस्वत्यास्तु तीरे यः संत्यजेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो नैनं यो मरणं लभेत् ।
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्म्मिता ॥
पृथूदकं समाश्रित्य सरस्वत्यास्तटे स्थितः ।
चतुर्व्वर्णस्य सदार्थमात्मज्ञानपरोऽभवत् ॥
तस्याभिध्यायतः सर्व्वं ब्रह्मयोन्यत्तजन्मनः ।
मुखतो ब्राह्मणा जाता बाहुभ्यां क्षत्रियास्तथा ॥
ऊरुभ्यां वैश्यजातीयाः पद्भ्यां शूद्रास्ततोऽभवन् ।
चातुर्व्वर्ण्यं ततो दृष्ट्वा आत्मसस्थान् सुतांस्ततः ॥
एवं प्रतिहितं तीर्थं ब्रह्मयोनीतिसंज्ञितम् ।
तत्र स्नात्वा मुक्तिकामः पुनर्योनिं न पश्यति ॥"
इति वामनपुराणे ३८ अध्यायः ॥
(यथा च महाभारते । ३ । ८३ । १३२—१३६ ।
"ततो गच्छेत राजेन्द्र ! तीर्थं त्रैलोक्यविश्रुतम् ।
पृथूदकमिति ख्यातं कार्त्तिकेयस्य वै नृप ! ॥
तत्राभिषेकं कुर्व्वीत पितृदेवार्च्चने रतः ।
अज्ञानात् ज्ञानतो वापि स्त्रिया वा पुरुषेण वा ॥
यत्किञ्चिदशुभं कर्म्म कृतं मानुषबुद्धिना ।
तत् सर्व्वं नश्यते तत्र स्नानमात्रस्य भारत ! ॥
अश्वमेधफलञ्चापि लभते स्वर्गमेव च ।
पुण्यमाहुः कुरुक्षेत्रं कुरुक्षेत्रात् सरस्वती ॥
सरस्वत्याश्च तीर्थानि तीर्थेभ्यश्च पृथूदकम् ।
उत्तमं सर्व्वतीर्थानां यज्ञयज्ञेदात्मनस्तनुम् ॥
पृथूदके जप्यपरो न तस्य मरणं भवेत् ।
गीतं सनत्कुमारेण आसेन च महात्मना ॥
वेदे च नियतं राजन्नधिगच्छेत् पृथूदकम् ।
पृथूदकात् तीर्थतमं नान्यत्तीर्थं कुरूद्वह ! ॥
तत्तोयं तत् पवित्रञ्च पावनञ्च न संशयः ।
तत्र स्नात्वा दिवं यान्ति येऽपि पापकृता नराः ।
पृथूदके नरश्रेष्ठ ! एवमाहुर्मनीषिणः ॥")

पृथूदरः, पुं, (पृथु महदुदरं यस्य ।) मेघः । इति हारावली । ८० ॥ महदुदरयुक्ते, त्रि ॥

पृथ्वी, स्त्री, (पृथुः स्थूलत्वगुणयुक्ता । "वोतो गुणवचनात् ।" ४।१।४४। इति ङीष् ।) पृथिवी । (यथा, देवीभागवते । ३ । १३ । ८ ।
"मधुकैटभयोर्मेदःसंयोगात् मेदिनी स्मृता ।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः ॥")
पृथोर्दुहितृत्वसम्बन्धादेतन्नाम । यथा, अग्निपुराणे ।
"दुहितृत्वमनुप्राप्ता देवी पृथ्वी तथोच्यते ॥"
हिङ्गुपत्री । लक्ष्मणीरकः । इत्यमरः । २ । ६ । १०, २१६ । ४० ॥ (एतस्याः पर्य्यायो यथा,—
"लक्ष्मणीरः सुगन्धश्च तथैवोद्गारशोधनः ।
कालानाजी तु सुषवी कालिका चोपकालिका ॥
पृथ्वीका कारवी पृथ्वी पृथुः क्षुद्रोपकुञ्चिका ।
उपकुञ्ची च कुञ्ची च हृद्गन्धीरक इत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दृक्षार्द्धमाता । इति हेमचन्द्रः ॥ पुनर्नवा । स्थूलैला । इति राजनिर्घण्टः ॥ (समदशाक्षरपादकच्छन्दोभेदः । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिकं छन्दःशब्दे द्रष्टव्यम् ॥)

पृथ्वीका, स्त्री, (पृथ्वी + स्वार्थे कन् ।) हृद्देला । इत्यमरः । २ । ४ । १२५ ॥ (अस्याः पर्य्यायो यथा,—
"एलास्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला हृद्देला च चन्द्रबाला च निष्कुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
स्थूलैला । लक्ष्मणीरकः । इति रत्नमाला ॥ हिङ्गुपत्री । इति राजनिर्घण्टः ॥

पृथ्वीकुरबकः, पुं, (पृथ्व्यां भूमौ कुरबक इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

पृथ्वीजं, क्ली, (पृथ्व्यां जायते इति । जन + डः ।) गन्धलवणम् । इति राजनिर्घण्टः ॥

पृदाकुः, पुं, (पर्दते इति । पर्द अपानशब्दे + "पर्देर्नित् सम्प्रसारणञ्चोपधा ।" उणा० ३ । ८० । इति काकुः रेफस्य सम्प्रसारणं ओकारोपधा ।) सर्पः । इत्यमरः । १ । ८ । ६ ॥ (यथा, महाभारते । ६ । १७८ । २७ ।
"स भीमं सहसाभ्येत्य पृदाकुः कुपितो भृशम् ।
जग्राहाजगरो घोरो भुजयोरुभयोर्बलात् ॥")
वृश्चिकः । व्याघ्रः । चित्रकः । इति मेदिनी । के, १२५ ॥ कुञ्जरः । वृक्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥

पृश्निः, त्रि, (स्पृश्यते इति । स्पृश संस्पर्शे + "सृपि-पृश्नीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) अल्पतनुः । इत्यमरः । २ । ६ । ४८ ॥ (यथा, महाभारते । १३ । २६ । ८६ ।
"दत्त्वा पृश्निं हरन्तीं विप्रसङ्घां
गिरान्द्रां भगिनीं सुप्रसन्नाम् ।
विभावरीं सर्व्वभूतप्रतिष्ठां
गङ्गां गता ये त्रिदिवं गतास्ते ॥")
खर्व्वदुर्ब्बलाल्पाख्याः । इति भरतः ॥ (शुक्लवर्णः । यथा, ऋग्वेदे । १ । १६० । ३ ।
"धेनुञ्च पृश्निं वृषभं सुरेतसम् ॥"
"पृश्निं शुक्लवर्णां धेनुम् ।" इति तद्भाष्ये सायणः ॥ प्राप्तेजाः । यथा, ऋग्वेदे । १० । १८६ । १ ।
"आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ॥")

पृश्निः, स्त्री, (स्पृशति भक्षयति सर्व्वं स्पृशते इति वा । स्पृश + "इषिस्पृशीति ।" उणा० ४।५२। इति नि निपातनात् साधुः ।) रश्मिः । इति शब्दरत्नावली ॥ (अन्नम् । वेदाः । जलम् । अन्नतम् । इति महाभारतम् । १२ । ३०१ । ४३ ॥) सुतपोराजपत्नी । सैव जन्मान्तरे देवकी भूता । इति श्रीभागवते ९० स्कन्धः ॥

पृश्निका, स्त्री, (पृश्नौ जले कायति शोभते इति । के + कः । यद्वा, पृश्नि स्वल्पं कं जलं यत्र ।) कुलिका । इति शब्दमाला ॥

पृश्निगर्भः, पुं, (पृश्निर्वेदादयो गर्भे यस्य । यद्वा, पृश्निः जन्मान्तरजातदेवकी तस्याः गर्भे उत्पत्तिस्थानत्वेनाश्रयत्वेति । अच् ।) श्रीकृष्णः । इति हारावली । ६ ॥ (अस्य निरुक्तिर्यथा महाभारते । १२ । ३४९ । ४३ ।
"पृश्निरित्युच्यते चान्नं वेदा आपोऽमृतं तथा ।
ममैतानि सदा गर्भे पृश्निगर्भस्ततोऽस्म्यहम् ॥")

पृश्निपर्णी, स्त्री, (पृश्नि स्वल्पं पर्णमस्याः । ङीष् ।) लताविशेषः । चाकुलिया इति भाषा । चकरौत इति हिन्दी भाषा । सत्यशाकः । पृथक्पर्णी २ चित्रपर्णी ३ अङ्गिवल्लिका ४ क्रोष्टुविन्ना ५ सिंहपुच्छी ६ कलशिः ७ धावनिः ८ गुहा ९ । इत्यमरः । २ । ४ । ६२ ॥ केचित्तु पृश्निपर्ण्यादिचतुष्कं चाकुलिया इति ख्यातायाम् । क्रोष्टुविन्नादिपञ्चकं विरालछाँइ इति ख्यातायामित्याहुः । एतत्तु वैद्या न मन्यन्ते । ते हि कलशीत्यादिशब्देन पृश्निपर्णीमेव गृह्णन्ति । पृश्निपर्णी सिंहपुच्छी चित्रपर्णी कटुसिंहपुच्छी अनयोरल्पभेदात्सर्व्वैकार्था इति केचित् । इति भरतः ॥ अपि च ।
पिङ्गपर्णी १० चाङ्गली ११ क्रोष्टुपुच्छिका १२ पूर्णपर्णी १३ कलशी १४ क्रोष्टुकमेखला १५ दीर्घा १६ शृगालदृष्टा १७ त्रिपर्णी १८ सिंहपुच्छिका १९ दीर्घपत्रा २० अतिगुहा २१ पृथुला २२ चित्रपर्णिका २३ । इति साम्रे रत्नमाला ॥ महागुहा २४ शृगालविन्ना २५ घमनी २६ मेखला २७ चाङ्गलिका २८ पृश्निपर्णी २९ दीर्घपर्णी ३० । इति राजनिर्घण्टः ॥ अङ्गिपर्णी ३१ धावनी ३२ । इति भावप्रकाशः ॥ अस्या गुणाः । कटुत्वम् । अतीसारकासवातरोगज्वरोन्मादव्रणदाहनाशित्वञ्च । इति राजनिर्घण्टः ॥ त्रिदोषघ्नत्वम् । वृष्यत्वम् । मधुरत्वम् । सरत्वम् । श्वासरक्तातीसारव्रणवमिनाशित्वञ्च । इति भावप्रकाशः ॥ शीतत्वम् । इति राजवल्लभः ॥

पृश्निभद्रः, पुं, (पृश्नौ भद्रं यस्य ।) श्रीकृष्णः । इति शब्दमाला ॥

पृश्निश्रृङ्गः, पुं, (पृश्निर्वेदादयः शृङ्गमिवास्य ।) विष्णुः । इति शब्दमाला ॥ (पृश्नि स्वल्पं शृङ्गमिव शुक्लाग्रं यस्य ।) गवीशृङ्गः । इति त्रिकाण्डशेषः ॥

पृषती, स्त्री, (सृजति जलमिति। सृज + णिः। ततो वा ङीष्।) वारिपर्णी। इति शब्दरत्नावली॥ (विवरणमस्या वारिपर्णीशब्दे ज्ञातव्यम्॥) कृष्णिका। इति भूरिप्रयोगः॥

पृष, उ सेके। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। ञ्वाषेट्।) उ, पर्षिता पृष्टा। इति दुर्गादासः॥

पृषत्, क्ली, (पर्षति सिञ्चतीति। पृष सेचने + "वर्षमाने पृषद्बृहन्महदिति।" उणा० २। ८४। इति। अतिप्रत्ययो गुणाभावश्च निपात्यते। शतृवदस्य कार्यं विज्ञेयम्।) जलबिन्दुः। इत्यमरः। १।१०।६॥ यथा, "पृषदश्वश्च विधाग्नावेव स्तुवति।" इति श्रीभागवते ५ स्कन्धे ८ अध्यायः॥ "पृषत् जलबिन्दुरुद्वहत् अपक्षपेव मद्रुना विधाग्नावेव स्तुवति वहत्यृषति।" इति तट्टीकायां श्रीधरस्वामी। इदं क्लिवत्वबहुवचनान्तमपि भवति॥

पृषतः, पुं, (पर्षतीति। पृषि सेके + "पृषिरञ्जिभ्यां कित्।" उणा० ३। २१२। इति अतच्। स च कित्।) विष्णुः। इत्यमरः। १।१०।६॥ (यथा, रघौ। ३। ३।

"करीव सिक्तं पृषतैः पयोमुचां
सुचिश्यपाये वनराजिपल्लवम्॥")

श्वेतबिन्दुयुक्तमृगः। इति मेदिनी। ते, १३५॥ तत्पर्य्यायः। रङ्कुः २ धूसरपृष्ठकः ३। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये। "हरिणार्श्यकुरङ्गकराजग्रन्थमालभरभस्वदंष्ट्रा पृषतचारुस्करन्धमाहिषाप्रभृतयो जङ्गला मृगाः। कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा ग्राह्या वह्निप्रोधनाश्च॥"॥) द्रुपदराजस्य पिता। यथा, महाभारते। १। १६१। १७।

"भरद्वाजसखा चासीत् पृषतो नाम पार्थिवः।
तस्यापि द्रुपदो नाम तदा समभवत् सुतः॥"

मस्तिसर्पान्तर्गतसर्पविशेषः। यथा,—

"आदर्शमण्डलः श्वेतमण्डलो रक्तमण्डलश्चित्रमण्डलः पृषतो रोधपुष्प इत्यादिषु॥" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये॥)

पृषतान्धसिः, पुं, (पृषतां विष्णूनां पतिर्नेता इत्यसुक् समासः।) वायुः। इति जटाधरः॥ (यथा, माघे। ६। ५५।

"गजपतिहयसीरपि हैमन-
क्षुद्विनयन् चरितः पृषताग्धसिः।
सलिलसक्तलतिमभ्यगयोषिता-
मसनुसातसुतापकृतं दृशाम्॥")

पृषताश्वः, पुं, (पृषतो मृगविशेषोऽश्व इव गतिसाधनं वाहनो वा यस्य।) वायुः। इत्यमरटीकायां भरतः॥

पृषती, स्त्री, (पृषत + स्त्रियां ङीप्।) श्वेतबिन्दुयुक्ता मृगी। इति मेदिनी। ते, १३५॥ (यथा, रघुः। ८। ५६।

"पृषतीषु विलोलमौक्षितं
प्रसभाधत्तलतासु विभ्रमाः॥")

पृषदश्वः, पुं, (पृषत् मृगविशेषोऽश्व इव वाहनो यस्य।) वायुः। इत्यमरः। १। १। ६५॥ (यथा, ऋग्वेदे। १। ८७। ३।

"स हि स्वसृत् पृषदश्वो युवा गणोऽया ईशानस्तवीषिभिरावृतः॥"

राजर्षिभेदः। यथा, महाभारते। १३। ८। १२।

"अश्वः सदश्वो वज्राश्वः पृथुवेगः पृथुश्रवाः।
पृषदश्वो वसुमनाः क्षुपश्च सुमहाबलः॥"

विरूपस्य पुत्रः। यथा, भागवते। ६। ६। २।

"विरूपः केतुमान् शम्भुरमरीषसुताक्षयः।
विरूपात् पृषदश्वोऽभूत् तत्पुत्रस्तु रथीतरः॥")

पृषदाज्यं, क्ली, (पृषद्भिः दधिबिन्दुभिः सहितमाज्यम्।) सदध्याज्यम्। दधिमिश्रितघृतम्। इत्यमरः। २। ७। २४॥ (यथा, ऋग्वेदे। १०। ६०। ८।

"तक्राद्दध्नात् सर्वकृतः सम्भृतं पृषदाज्यम्।
पशून्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये॥"

"पृषदाज्यं दधिमिश्रमाज्यम्।" इति तद्भाष्ये सायणः॥)

पृषद्बलः, पुं, (पृषदेव बलमस्य।) वायुश्च। यथा,—

"ध्रुविक्षमरदान्दोलः कुबेरश्यामराजिकः।
पृषद्बलस्तु वायुश्च कुबेरे तु प्रमोदिनः॥"

इति शब्दमाला॥

पृषन्तिः, पुं, (पर्षतीति। पृष सेचने + अतिप्रत्ययः। निपातनात् साधुः।) विष्णुः। यथा,—

"पयःपृषन्तिभिः क्षुण्णा वान्ति वाताः शनैः शनैः॥"

इति भरतपृतनाम्नवतीविजयकाव्यम्॥

पृषभाषा, स्त्री, (पर्षतीति। पृष सेके + कः। पृषान्नभवर्षिणी भाषा यत्र।) अमरावती। इति शब्दरत्नावली॥

पृषाकरा, स्त्री, (पृष + भावे क्विप्। पृषे सेचनाय आकीर्य्यते इति। आ + कृ + अप् + टाप्। प्रातः सन्ध्यायाश्चास्या उपरि जलसेचनादेव तथात्वम्।) क्षुद्रगुला। इति शब्दचन्द्रिका॥ वाट्खारा इति भाषा॥

पृषातकं, क्ली, (पृषन्तं पृषदाज्यम् आतनुते इवतीति। तक + अच्। पृषोदरादित्वात् साधुः।) दधियुक्तघृतम्। इति हैमचन्द्रः॥

पृषोदरः, त्रि, पृषदुदरं यस्य। ("पृषोदरादीनि यथोपदिष्टम्।" ६। ३। १०६। इति तलोपः।) मनीषादित्वात् तलोपः। इति दुर्गादासः॥

"भवेद्वर्णागमाद्वंसः सिंहो वर्णविपर्ययात्।
वर्णादेशाच्च गूढाला वर्णलोपात् पृषोदरः॥"

इति गोयीचन्द्रकृतकारिका॥

पृषोद्यानं, क्ली, क्षुद्रोपवनम्। मनीषादित्वात् पृषतस्य तलोपः। इति सुबोधटीकायां दुर्गादासः॥

पृष्ठं, क्ली, (पृष्यते सिच्यते इति। पृष "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २। १२। इति थक्। प्रत्ययेन निपातनात् सिद्धम्।) शरीरपश्चाद्भागः। इत्यमरः। २। ६। ७८॥ पीठ इति भाषा॥ (यथा, मनौ। ३। ७२।

"न विगर्ह्यं कथां कुर्य्याद्विदुषां न्यायवेदिनाम्।
नगराष्ट्रस्य यां कुर्य्याद्विद्यात् तामासुरीं गतिम्॥")

चरममात्रम्। इति मेदिनी। ठे, ७॥ (श्लोकविशेषः। यथा, श्रुतपथब्राह्मणे। ८। १। १। ५।

"त्रिपृतस्तोमाद्रथन्तरं पृष्ठं गिरमिमीत॥")

पृष्ठग्रन्थिः, पुं, (पृष्ठस्य ग्रन्थिः।) शङ्खः। इति हैमचन्द्रः। ३। ७७६॥ कुंज इति भाषा॥

पृष्ठतः, [स्] अ, (पृष्ठ + "प्रतियोगे पञ्चम्यास्तसिः।" ५। ३। ७४। इत्यस्य "आद्यादिभ्य उपसंख्यानम्।" इति वार्त्तिकोक्त्या तसिः।) पश्चात्। यथा, भट्टिः। २। २४।

"तं पृष्ठतः प्रस्थमियाय नम्रो
हिंसेषु दीक्षाक्षधरः कुमारः॥"

पृष्ठदेशे। (यथा, मनौ। ८। ३००।

"पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्यात् चौरकिल्बिषम्॥")

पृष्ठदृष्टिः, पुं, (पृष्ठे दृष्टिर्दर्शनं यस्य।) भल्लूकः। इति राजनिर्घण्टः॥

पृष्ठमांसादः, त्रि, (पृष्ठे परोक्षे मांसादः इव। असमक्षमनिष्टजनकवाक्यकथनादस्य तथात्वम्।) वाक्याभिधायी। इति त्रिकाण्डशेषः॥ चोगोलखोर इति पारस्यभाषा। (पृष्ठमांसमत्तीति। अद्। पृष्ठमांसभक्षके, त्रि॥)

पृष्ठमांसादनं, क्ली, (पृष्ठे परोक्षे मांसादनं मांसभक्षणमिव कीर्त्तनस्यास्यानिष्टजनकत्वात्।) परोक्षे दोषकीर्त्तनम्। इति हैमचन्द्रः। ३। २६५॥ तद्वति, त्रि॥ (पृष्ठमांस + अद् + कर्त्तरि ल्युः। पृष्ठमांसभक्षके, त्रि।)

पृष्ठवंशः, पुं, (पृष्ठस्य वंशः वंश इव दण्ड इत्यर्थः।) पृष्ठास्थि। पिठेर दाँड़ा इति भाषा॥ तत्पर्य्यायः। शीर्षकः २। इति हैमचन्द्रः॥ (यथा, सुश्रुते शारीरस्थाने ६ अध्याये।

"तत्र पृष्ठवंशप्रसृतयः प्रतिश्रोणी काण्डसन्धिनी कटीतरुणी नाम मर्म्माणी।") स तु मासमात्रेण भवति। इति सुश्रुतबोधः॥

पृष्ठवाट्, } [ह्] पुं, (पृष्ठं युगपार्श्वं वहतीति। वह + क्विप्।) युगपार्श्वगतः। पाँटे बाँधा गरु इति भाषा। इत्यमरः॥ (पृष्ठं पृष्ठभागं वहतीति। वह + क्विप्। पश्चाद्भागवाहकः। यथा, हरिवंशे भविष्यपर्व्वणि। ५५। ३१।

"दारुकं पृष्ठवाहञ्च ज्ञात्वा केशव ईश्वरः।

पेचकः

आयेयमस्त्रं संयोज्य मुरे कस्मिंश्चिदीश्वरः।
अनेन त्वां दहाम्यद्य यदि शक्तोऽसि वारय॥")

पृष्ठवाह्यः, पुं, (पृष्ठे वाह्यं वहनीयद्रव्यमस्य।) भारवाहकवृषः। तत्पर्य्यायः। स्थौरी २ पृष्ठ्यः ३। इति हेमचन्द्रः। ४। ३२६॥

पृष्ठशल्यः, पुं, (पृष्ठे शल्यमस्य। शल्यस्य वक्रभावेन पृष्ठगमनात् तथात्वम्।) वनच्छागः। इति हेमचन्द्रः। ४। ३४४॥

पृष्ठशल्ली, [न्] पुं, (पृष्ठे शल्यमिव अस्त्यस्तीति। शल्य+इनिः।) भीमसेनः। नपुंसकम्। मरिचम्। इति मेदिनीशब्दरत्नावल्यौ॥

पृष्ठोदयः, पुं, (पृष्ठेनोदयोऽस्य।) मेषवृषकर्कटधनुर्म्मकरमीनलग्नाः। यथा, ज्योतिस्तत्त्वे।
"अजो गोपतियुग्मञ्च कर्किधन्विन्दगाक्षया।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः॥
निशासंज्ञा विमिथुना स्मृताः पृष्ठोदयाश्चया।
शेषाः शीर्षोदया ज्ञेते मौनश्चोभयसंज्ञकः॥"

पृष्ठ्य, क्ली, (पृष्ठानां स्तोत्रविशेषाणां समूह इति। पृष्ठ+"ब्राह्मणमाणवकवाडवाद् यत्।" ४। २। ४२। इत्यस्य "पृष्ठादुपसंख्यानम्।" इति वार्त्तिकोक्त्या यत्।) पृष्ठानां समूहः। इत्यमरः। ३। २। ४२॥

पृष्ठ्यः, पुं, (पृष्ठेन वहतीति। पृष्ठ+यत्।) पृष्ठेन भारवाहकाश्वः। तत्पर्य्यायः। स्थौरी २। इत्यमरः। २। ८। ४६॥ (यथा, महाभारते। १। २२२। ४६।
"पृष्ठ्यानामपि चाश्वानां वाहिकानां जनार्द्दनः।
ददौ शतसहस्राणि कन्याधनमनुत्तमम्॥"
धारके, त्रि। यथा, ऋग्वेदे। ४। ३। १०।
"ऋतेन हि ष्मा वृषभश्चिदक्तः
पुमाँ अग्निः पयसा पृष्ठ्येन॥"
"पृष्ठ्येन धारकेण पयसाक्तः।" इति तद्भाष्ये सायणः॥)

पृष्ण्यः, त्रि, (पृश्निः। पृषोदरादित्वात् साधुः।) प्रश्निः। इत्यमरटीकायां भरतः॥ पार्श्निः। तत्र स्त्रीलिङ्गः। इत्युणादिकोषः॥

पॄ, क पूर्त्तौ। इति कविकल्पद्रुमः॥ (पुरा०-पर०-सक०-सेट्।) क, पारयति। इति दुर्गादासः॥

पॄ, णि गि खि पालने। पूर्त्तौ। इति कविकल्पद्रुमः॥ (क्रया०-क्ला०च-पर०-सक०-सेट्।) खि, पूर्णोऽखि। ऋज्यादीदिदित्यत्र पूर्वग्रहणान्न क्तिनिष्ठातस्य नः। गि, पृणाति। क्तौ तु पूर्णिरित्येव मनीषादित्वान्न निः। खि, पिपर्त्ति। इति दुर्गादासः॥

पेचकः, पुं, (पचति पच्यते वा। पच+"पचिमन्थोरिच्च।" उणा० ५। ३७। इति वुन्। उपधायाश्च अत इत्वम्।) पक्षिविशेषः। पेँचा इति भाषा। तत्पर्य्यायः। उलूकः २ घायसारातिः ३। इत्यमरः। २। ५। १५॥ शुक्लाक्षः ४ दिवान्धः ५ वक्रनासिकः ६ हरिनेत्रः ७ दिवाभीतः ८ नक्ताक्षी ९ पीलुः १० घर्घरः ११ काकभीरुः १२ नक्तचारी १३। इति त्रिकाण्डशेषः॥ निशाचरः १४ कौशिकः १५ रूपनाशनः १६ पेचः १७ रक्तनासिकः १८ भीरुकः १९। इति शब्दरत्नावली॥ करिपुच्छमूलोपान्तः। गुदाच्छादकमांसपिञ्जविशेषः। इत्यमरः। २। ६। ९॥ पर्य्यङ्कः। यूकः। इति विश्वः॥ मेषः। इति शब्दरत्नावली॥

पेचकी, [न्] पुं, (पेचकोऽस्त्यस्यास्तीति। पेचक+इनिः।) हस्ती। इति शब्दरत्नावली॥

पेचिलः, पुं, (पच+बाहुलकात् इलच् अत इत्वञ्च।) हस्ती। इति त्रिकाण्डशेषः॥

पेचु, क्ली, (पचते इति। पच+उन्। अत इत्वञ्च।) पेचुली। इति त्रिकाण्डशेषः॥

पेचुली, स्त्री, (पचते इति। पच+उलच्। अत इत्वं गौरादित्वात् ङीष्।) शाकभेदः। कचु इति ख्यातः। यथा,—
"कैपुकं पेचुली पेचु नाड़ीचो विश्वरोचनः॥"
इति त्रिकाण्डशेषः॥

पेटः, पुं, (पेटतीति। पिट+अच्।) पङ्क्तिः। इति राजनिर्घण्टः॥ पेटके, क्ली। इत्यमरः। २। १०। ३०॥

पेटकः, पुं, (पेटतीति। पिट+ण्वुल्।) वंशवेत्रादिमयसमुद्गकप्रायः। पेटारी इति पेड़ा इति च ख्यातः। तत्पर्य्यायः। पिटकः २ पेड़ा ३ मञ्जूषा ४। इत्यमरः। २। १०। ३०॥ आद्यौ खल्वपेटिकायाम्। परौ महापेटिकायामिति स्वामी॥ समूहः। इति मेदिनी। के, ११७॥

पेटाकः, पुं, (पेटक+पृषोदरादित्वात् साधुः।) पेटकः। इति भरतसिद्धरूपकोषः॥

पेटिका, स्त्री, (पिटतीति। पिट+ण्वुल्। कापि अत इत्वम्।) वृक्षविशेषः। पेटारि इति भाषा। तत्पर्य्यायः। कुवेराक्षी २ कुलिङ्गाक्षी ३ लम्बपृष्टिका ४। इति रत्नमाला॥ (यथा,—
"पेटिकामूललेपाच्च योनिर्भिन्ना प्रजायते॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे॥)

पेटी, त्रि, (पेट+गौरादित्वात् ङीष्।) पेटकः। इत्यमरः। २। १०। ३०॥

पेड़ा, स्त्री, (पेटा। पृषोदरादित्वात् साधुः।) मञ्जूषा। महापेटिका। इत्यमरभरतौ॥

पेज, ऋ पेजे। गतौ। क्षेपे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-क्षेपे अक०-सेट्।) ऋ, अपिपेजत्। पिपेजयतु:। इति दुर्गादासः॥

पेलवं, क्ली, (पीयते इति। पा पाने+"अन्येभ्योऽपि दृश्यन्ते।" उणा० ४। १०५। इति डवन्। ऊठ्।) अन्नतम्। घृतम्। इत्युणादिकोषः॥ (पुं, पतनशीलः पक्षी। छागः। यथा, वाजसनेयसंहितायाम्। ९६। ५८।
"सावित्रो वारवः शस्त एकशितिपात् पेलवः॥"
"पेलवः पतनशीलो वेगवान् पक्षी॥" इति तद्भाष्ये महीधरः॥ तथाच ऋग्वेदे।७।१८।१७।

पेलवं

"चिन्नं चित् पेलवेना जघान॥"
"पेलवेन छागेन जघान घातयामास।" इति तद्भाष्ये सायणः॥)

पेयं, क्ली, (पीयते यदिति। पा पाने+कर्म्मणि यत्। "ईद्यति।" ६। ४। ६५। इति आत ईत् ततो गुणः।) जलम्। इति मेदिनी। ये, ३६॥ दुग्धम्। इति शब्दचन्द्रिका॥ अष्टविधान्नान्तर्गतान्नविशेषः। यथा,—
"भोज्यं पेयं तथा चूष्यं लेह्यं स्यादन्नमष्टविधं स्मृतम्॥
निष्पेषेणैव भक्ष्यं स्यादन्नमष्टविधं स्मृतम्॥"
इति राजनिर्घण्टः॥
मात्रये, त्रि। इति मेदिनी। ये, ३६॥ (यथा, महाभारते। १४। ४४। १०।
"सर्व्वेषां भक्ष्यभोज्यानामन्नं परमुच्यते।
प्रवाणाञ्चैव सर्व्वेषां पेयानामप उत्तमाः॥")

पेया, स्त्री, (पीयते इति। पा+यत्। ततष्टाप्।) सिक्थसमन्वितपेयद्रव्यम्। अस्या गुणाः।
"पेया खेदाग्निजननी वातघ्नीऽनुलोमनी।
क्षुत्तृष्णास्त्रानिद्रौषधक्षुत्तिरोगविनाशिनी॥"
इति राजवल्लभः॥
मिश्रेया। इति शब्दचन्द्रिका॥ आया। अच्छभक्ष्यम्। इति मेदिनी। ये, ३६॥

पेयूषः, पुं, क्ली, (पीय पाने+"पीयेरूषन्।" उणा० ४। ७६। इति ऊषन् वहुलवचनात् गुणः।) अभिनवं पयः। इत्यमरः॥ नवप्रसूतायां गोः सप्तदिनाभ्यन्तरीयदुग्धम्। यथा,
"आसप्तरात्रप्रभवं क्षीरं पेयूष उच्यते॥"
इति हारावली॥
"पीयते पेयूषः पीङ् पाने नाञ्चीति यूषः ऋन्नाभ्यः क्लीवत्वं। पीयूषञ्च अथ पीयूषपेयूषे नवं सप्तदीनावधीति शब्दार्णवः॥" इति तट्टीकायां भरतः॥ (यथा, मनुः।५। ६।
"गोमूत्रं गोमयं क्षीरं पयूषं दधि सर्पिश्च पञ्चगव्यम्॥")
अन्नतम्। अभिनवसर्पिः। इत्युणादिकोषः॥

पेरुः, पुं, (पीयते रक्षायामिति। पीङ् पाने+"मिपीभ्यां रुः।" उणा० ४। १०१। इति रुः।) वह्निः। सूर्य्यः। इत्युणादिकोषः॥ समूहः। इति त्रिकाण्डशेषः॥ (त्रि, रक्षकः। यथा, ऋग्वेदे। ६। ७४। ४।
"नरो हितमवसेऽह्वन्त पेरवः॥"
"नरो नेतारः पेरवः। पा रक्षणे। आपोरिच्चेति रिप्रत्ययः। सर्व्वस्य रक्षकाः।" इति तद्भाष्ये सायणः॥ पूरकः। यथा, ऋग्वेदे। ५। ८४। २।
"प्र या वाजं न पेरवस्तं पेरुमस्यर्जुनि॥")

पेरोजं, क्ली, उपरत्नविशेषः। पीरोजा इति यवनभाषा। तत्पर्य्यायः। फेरिताश्मम् २ पेरुजम् ३। तद्विविधम्। भस्माङ्गं हरितञ्च। तस्य गुणाः।
"पेरुजं सुकषाश्मं स्याच्छुभ्रं दीपनं परम्।
स्यादवरं जङ्गमञ्चैव संयोगाच्च यथा विषम्॥
तत् सर्व्वं नाशयेत् शीघ्रं शूलभूतादिदोषजम्॥"

पाठान्तरं यथा,—
"पिरजं सुकवार्थं स्नाय्वधुरं दीपनं हयोः।
स्थावरादिविषघ्नं स्याद्वरितचामरं हयम्॥
घृतार्द्रां माषपेशीञ्च मूलं तिमिरभूतजम्॥"
इति राजनिर्घण्टः।

पेस, ऋ गतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-चाले अक०-गतौ सक०-सेट्।) ऋ, अपिपेसत् पिपेसतुः। घाञः कर्म्मः। इति दुर्गादासः॥

पेसं, क्ली, (पेसति बद्धा गच्छतीति। पेस+अच्।) अञ्जकोषः। इति हेमचन्द्रः। ३। २७५॥

पेसलं, त्रि, (पेसं कर्म्मणं वाञ्छतीति। वा+कः।) विरजम्। अस्य सावकाशत्वं प्रकारः। इत्यमर-भरतौ॥ क्षुद्रः। इति हेमचन्द्रः। ३। ११६॥ कोमलम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ४।
"पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्रिणः॥")

पेस, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ऋ, अपिपेसत। ङ, पेसते। इति दुर्गादासः॥

पेशलः, त्रि, (पिश अवयवे+भावे घञ्। पेशं लातीति। ला+कः। यद्वा, पेशोऽस्यास्तीति। सिध्मादित्वात् लच्।) चारुः। (यथा, देवी-भागवते। ५। ६। ५८।
"मन्त्रिपुत्रस्य वचः श्रुत्वा पेशलं मन्त्रिसत्तमः।
जगाम तरसा कामं गजाश्वरथसंयुतः॥")
सुन्दरः। (यथा, रघुः। ६। ७०।
"युवतयः कुसुमं दधुराहितं
तदलके दलकेसरपेशलम्॥")
दक्षः। चतुरः। कोमलः। इत्यमरभरतौ॥ (यथा, सुकुन्दमालायाम्। २१।
"इदं शरीरं परिणामपेशलं
पतत्यवश्यं श्लथसन्धि जर्जरम्।
किमौषधैः क्लिश्यसि मूढ़ दुर्म्मते!
निरामयं ह्यगरसायनं पिब॥")
घृतम्। इति शब्दरत्नावली॥

पेशस्कृत्, पुं, (पेशो रूपान्तरं करोतीति। पेशस्+ञ+क्विप्। "इकस्य पिति च्छति तुक्।" ६। १। ७१। इति तुगागमः। अनेन गृहीतस्य कीटस्य रूपान्तरं भवति इत्यतोऽस्य तथात्वम्।) कीटविशेषः। कुमिरके इति भाषा। यथा,—
"कीटः पेशस्कृतं ध्यायन् कृत्स्नं तेन प्रवेशितः।
याति तत्सात्मतां राजन्! पूर्वरूपमसंत्यजन्॥"
इति श्रीभागवते। ११। ९। २१॥

पेशिः, पुं, (पिश+"कृपिपीति।" उणा०। ११८। इति इन्।) घृतकोटिः। इत्युणादिकोषः॥ अस्त्री मांसविदले च स्त्री। इति संक्षिप्तसारे कृदन्तपादः॥

पेशी, स्त्री, (पिश+इन्। वा ङीष्।) अञ्जम्। इत्यमरः। २।५।३७॥ (गर्भावेष्टनचर्म्ममयकोषः। यथा, सुश्रुते। १। २६।
"अमनोज्ञोत्तोऽस्थितद्विवरपेशीप्रभृतिषु वा शरीर-प्रदेशेषु॥") तृणशकलिका। (यथा, सुश्रुते उत्तरतन्त्रे। ७० अध्याये।
"मधुकं विल्वपेशञ्च शर्करामधुसंयुताः।
अतीसारं निहन्युश्च शालीक्षुदधिकथोः कणाः॥") मांसी। खड्गपिधानकम्। मांसपिण्डी। इति मेदिनी। शे, १२॥ (यथा, महाभारते। १। ११५। १२।
"तां स मांसमयीं पेशीं हृद्यां जघनजां वरः॥"
(अस्याः संख्यावस्थानादयो यथा,—
"पञ्च पेशीशतानि भवन्ति। तासां चत्वारि-शतानि आस्यान्तः। कोष्ठे षट्षष्टिः। शीर्षां सप्तोत्तरं चतुःशतम्। एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजान्वन्तरे विंशतिः। पञ्च जानुनि। विंशतिरूरौ। दश वङ्क्षणे। अण्डमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि बाहू च व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्यास्त्वपरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वङ्क्षणयोरसृजि। पञ्चोदरे। नाभ्यामेका। एकोनविंशतिः पृष्ठे। पञ्च पञ्च शीर्षाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकास्थि प्रति समन्तात् षट्। द्वे हृदयमाश्रययोः। षट् यकृत्प्लीहोण्डुकेषु॥ श्रोण्यायाश्चतस्रः। अष्टौ बाह्वोः। एकैका काकल-कगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। दन्तवेष्टे द्वे। द्वे नेत्रयोः। गण्डयो-श्चतस्रः। कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि।
शिराव्यायुस्नायुपर्व्वाणि सन्धयश्च शरीरिणाम्।
पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः॥
स्त्रीणान्तु विंशतिरधिकाः। दश तासां स्तनयो-रेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृतेऽभ्यन्तरतो द्वे सक्थ्याश्रिते बाह्ये च प्रसृते द्वे। गर्भच्छिद-संश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां बदरपलवसूक्ष्माण्यपृथुवृत्तानि स्वदीर्घस्थिर-सदृशलक्षणकर्कशभावाः सन्त्यस्थिशिराद्यायु-प्रच्छादका यथादेशं स्वभावत एव भवन्ति॥ भवति चात्र।
पुंसां पेश्यः पुरस्तात्ताः प्रोक्ता लक्षणसम्मताः।
स्त्रीणामाहृत्य तिष्ठन्ति फलमन्तर्गतं हिताः॥"
इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)
नदीभेदः। पिप्पलीविशेषः। राक्षसीविशेषः। इति शब्दरत्नावली॥ (वाद्यविशेषः। यथा, महाभारते। ६। ४२। ३।
"तथा भेर्य्यश्च पेशीश्च शङ्खाश्चा गोविषाणिकाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्॥")

पेषणं, क्ली, पिषधातोर्भावे ल्युट्प्रत्ययनिष्पन्नम्। चूर्णनम्। (यथा, मार्कण्डेये। १४। ८७।
"अयं क्षतानां भिन्नानामपकारी सुदुर्म्मतिः।
तप्तकुम्भे निपतति ततो याचति पेषणम्॥") खलम्। घृतगुग्गुः। इति शब्दचन्द्रिका॥ तैकाँटासिज इति भाषा॥

पेषणिः, स्त्री, (पिष्यतेऽनयेति। पिष+करणे अनिः। वा ङीष्।) पेषणशिला। शिल इति भाषा। तत्पर्य्यायः। पेषणी २ मङ्गः ३ मङ्गल्या ४ मङ्गल्यकल्पः ५। इति शब्दरत्ना-वली॥ (यथा, मनुः। ३। ६८।
"पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥")

पेषणः, त्रि, (पेषोऽस्यास्तीति। पेष+सिध्मादित्वात् लच्।) पेशलः। इत्यमरटीकायां भरतः॥

पेषाकः, पुं, (पिष+आकन्।) पेषणिः। इत्यु-णादिकोषः॥

पेस, ऋ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) ऋ, अपिपेसत् पिपेसतुः। इति दुर्गादासः॥

पेसलः, त्रि, (पेशलः। पृषोदरादित्वात् शस्य सत्वम्।) पेशलः। इत्यमरटीकायां भरतः॥

पै, शोधे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) पायति धान्यमातपेन। इति दुर्गादासः॥

पेक्षूपः, पुं, (पिक्षूषे साधुः। अण्।) कर्षुः। इति हेमचन्द्रः। ३। २३७॥

पैटरं, त्रि, (पिटरे संस्कृतं पक्वम्। पिटर+अण्।) स्थालीपक्वमांसादि। इत्यमरः। २।९। ४५॥ (यथा, गो० रामायणे। २। १००। ६१।
"प्रतप्तैः पैटरैश्चैव मार्गमायूरतैत्तिरैः॥")

पैठीनसिः, पुं, मुनिविशेषः। स च स्मृतिगोचयोः कारकः। इति पुराणम्॥

पैक्ष्यं, क्ली, (पिक्षं परपिक्षं भक्ष्यतयास्त्य-स्येति। पिक्ष+इन्। ततः स्वार्थे ष्यञ्।) भैक्ष-जीविका। इति त्रिकाण्डशेषः॥

पैतामहं, त्रि, (पितामहस्येदम्। पितामह+"तस्येदम्।" ४।३।१२०। इति अण्।) पितामह-सम्बन्धिधनादि। यथा, कात्यायनः।
"पैतामहञ्च पित्र्यञ्च यच्चान्यत् स्वयमर्ज्जितम्।
दायादानां विभागेषु सर्व्वमेतद्विभज्यते॥"
इति दायतत्त्वम्।
"पैतामहं सुतं पित्र्या स्वयमुत्पादयेत्तु यः।
विद्याशौर्य्यादिना प्राप्तं तत्र स्वाम्यं पितुः सुतम्॥"
इति दायभागः॥

पैटकं, त्रि, (पितुरागतं पितुरिदं वेति। पिटक+अण्।) पिटकसम्बन्धि। इति शब्दमाला॥ यथा, मनुः।
"ऊर्द्धं पितुश्च मातुश्च समेत्य भ्रातरः समम्।
भजेरन् पैटकं रिक्थमनीशास्ते हि जीवतोः॥"
मनुविष्णू।
"पैटकन्तु यदा द्रव्यमनवाप्तमवाप्नुयात्।
न तत् पुत्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम्॥"

पैठीनसिः ।
"पैत्रके विभज्यमाने दायाद्ये समो विभागः ॥"
नारदः ।
"यौर्ध्वभाग्यौर्ध्वदेहिके दित्वा यच्च विद्याधनं भवेत् ।
यौरसेतान्यविभाज्यानि प्रसादो यच्च पैत्रकः ॥"
इति दायभागः ॥

पैत्रकभूमिः, स्त्री, (पैत्रकी पितृसम्बन्धिनी भूमिः ।) पितृसम्बन्धिस्थानम् । तस्या माहात्म्यं यथा,—
श्रीभगवानुवाच ।
"भवांश्च यादवैः सार्द्धं प्रविश्य द्वारकापुरीम् ।
मातृपित्रा भ्रातृभिः सार्द्धं मोदेथाः च त्वमपि नृप ! ॥
उग्रसेन उवाच ।
वासुदेव न यास्यामि भूमिं तां पैत्रकीं पुनः ।
सर्व्वतीर्थपरां पुण्यां दैवे कर्म्मणि पैत्रके ॥
पारक्ये भूमिदेशे च पितॄणां निर्व्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म्म निहन्यते ॥
पितॄणां निष्फलं श्राद्धं देवानामपि पूजनम् ।
किञ्चित्फलप्रदञ्चैव सम्पूर्णं पैत्रके स्थले ॥
पुत्रपौत्रकलत्रेभ्यः प्राणेभ्यः प्रेयसी सदा ।
दुर्लभा पैत्रकी भूमिः पितुर्मातुर्गरीयसी ॥
तत् पुण्यञ्च पवित्रञ्च दैवे कर्म्मणि पैत्रके ।
क्रीतञ्च तद्धते दानं परदत्तमशुद्धकम् ॥
म्रियते पैत्रकीभूम्यां तीर्थतुल्यफलं लभेत् ।
गङ्गाजलसमं पूतं पितृस्नानोदकं हरेत् ॥
तत्र स्नात्वा जपे पूते गङ्गास्नानफलं लभेत् ।
पितॄणां तर्पणं तत्र पवित्रं देवपूजनम् ॥
पैत्रकी जन्मभूमिश्चेत् फलं तद्गुणं लभेत् ।
पैत्रकीभूमितुल्या च दानभूमिः क्वचिन्नहि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः ॥

पैतृष्वस्रेयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति । पितृष्वस्र + "ढक्यि लोपः ।" ४ । १ । १३३ । इति ज्ञापकात् ढक् अस्तलोपश्च ।) पितृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ ॥ भ्रिस्तुतभाइ इति भाषा ॥ (स्त्रियां ङीप् । पितृभगिनीपुत्री । यथा, मनुः । ११ । १७२ ।
"पैतृष्वस्रेयीं भगिनीं स्वसीयां मातुरेव च ।
मातुश्च भ्रातुरुत्तमां गत्वा चान्द्रायणञ्चरेत् ॥")

पैतृष्वस्रीयः, पुं, स्त्री, (पितृष्वसुरपत्यमिति । "पितृष्वसुश्छण् ।" ४ । १ । १३२ । इति छण् ।) पितृभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ ॥ भ्रिस्तुत भाइ इति भाषा ॥

पैत्त, त्रि, (पित्तात् आगतं पित्तस्य ग्रामं कोपनं वेति । पित्त + अण् ।) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ (यथा, माधवनिदाने गुल्माधिकारे ।
"कट्वम्लतीक्ष्णोष्णविदाहिरूक्ष-
क्रोधातिमद्याकुलताग्निसेवा ।
आमाभिघातो रुधिरञ्च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तम् ॥")

पैत्तिकः, त्रि, (पित्तेन निर्वृत्त इति । पित्त + ठञ् ।) पित्तजव्याधिः । इति राजनिर्घण्टः ॥ (यथा, चरके चिकित्सास्थाने २२ अध्याये ।
"प्रतप्तं ताम्रमाक्रम्य ज्योतींषीव च पश्यति ।
क्षेप्तारं पित्तसंरुष्टं निर्द्दीशति च पैत्तिके ॥")

पैत्र, क्ली, (पितुरिदमिति । पितृ + अण्) पितृतीर्थम् । अङ्गुष्ठतर्ज्जन्योर्मध्यम् । इत्यमरः । २ । ७ । ५१ ॥ पितृसम्बन्धिनि, त्रि । (यथा, महाभारते । ७ । १६८ । ७१ ।
"रौद्रं याम्यं वारुणं वैत्तपाक्यं
पैत्रं वायुं कर्म्म सौम्यञ्च तुभ्यम् ।
रूपं ज्योतिः शब्दमाकाशवायुः
स्पर्शैः स्वाद्यं सलिलं गन्ध उर्व्वी ॥")

पैत्राहोरात्रः, पुं, (पैत्रः अहोरात्रः ।) पितृलोकस्य दिवारात्रिः । स तु मनुष्यमाने मासैकेन भवति । यथा —
"मासेन स्यादहोरात्रः पैत्रो वर्षञ्च दैवतः ॥"
इत्यमरः । १ । ४ । २१ ॥

पैलः, पुं, (पीलाया अपत्यमिति । पीला + "पीलाया वा ।" ४ । १ । ११८ । इति अण् ।) मुनिविशेषः । स च ऋग्वेदी यथा,—
"तत्रर्गृ वेदधरः पैलः सामगो जैमिनिः कविः ।
वैशम्पायन एवैको निष्णातो यजुषामुत ॥
अथर्ब्वाङ्गिरसामासीत् सुमन्तुर्दारुणो मुनिः ।
इतिहासपुराणानां पिता मे रोमहर्षणः ॥"
इति श्रीभागवते १ स्कन्धे ४ अध्यायः ॥

पैशाचः, पुं, (पिशाचस्यायमिति । पिशाच + अण् ।) अष्टप्रकारविवाहान्तर्गताष्टमविवाहः । यथा याज्ञवल्क्यः । "पैशाचः कन्यकाहरात् ।" हरणमाह मनुः । ३ । ३४ ।
"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥"
इत्युदाहृतत्वम् ॥
पिशाचसम्बन्धिनि, त्रि ॥ (राजसकायान्तर्गतकायविशेषः । तल्लक्षणं यथा,—
"उच्छिष्टाहारता नैष्ठ्यं साहसप्रियता तथा ।
स्त्रीलोलुपत्वं नैर्लज्ज्यं पैशाचकायलक्षणम् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

पैशुन्यं, क्ली, (पिशुनस्य भावः । पिशुन + ब्राह्मणादित्वात् ष्यञ् ।) पिशुनता । खलता । तच्च दशविधपापान्तर्गतवाङ्मयपापविशेषः । इति तिथितत्त्वम् ॥ यथा,—
"पैशुन्यं साहसं द्रोह ईर्ष्यास्यार्थदूषणम् ।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥")
इति मनौ । ६ । ४८ ॥
अस्य विवरणं प्रायश्चित्तग्रन्थे द्रष्टव्यम् ॥

पैष्टः, त्रि, (पिष्टस्येदमिति । पिष्ट + अण् ।) पिष्टसम्बन्धी । यथा,—
"यत्पदन्तकः पुरा पैष्टमत्ति सदा चरम् ।
अमौक्ष्येश्वरसामान्यात्तत्खलोऽत्र विधीयते ॥"
इति तिथ्यादितत्त्वम् ॥

पैष्टिकं, क्ली, (पिष्ट + ठञ् ।) पिष्टानां समूहः । इति आपूपिकग्रन्थटीकायां भरतः ॥ मद्यविशेषः । यथा । कृष्णमाषीकादिजनिते मद्ये खिन्नपैष्टिकादि कटु मद्यं हेतुविपरीतमेव । इति विजयरक्षितः ॥ (यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"पालसाः श्लेष्मजनना गुरुवृद्धः कफपित्तलाः ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रको-
पजाः ॥")

पैष्टी, स्त्री, (पिष्टेन निर्वृत्तेति । पिष्ट + अण् + ङीप् ।) विविधधान्यविकारजा मदिरा । तस्या गुणाः ।
"पैष्टी बद्धमलीक्षया स्वादीयस्यौषसमापरा ।
वातघ्नी कफपित्तघ्नी बल्योष्णी च सा ॥"
इति राजनिर्घण्टः ॥
(यथा च हारीते प्रथमे स्थाने एकादशेऽध्याये ।
"गौड़ी माध्वी तथा पैष्टी निर्य्यासा कथिता-
परा ।
इति चतुर्व्विधा ज्ञेया सुरास्वासां प्रभेदकाः ॥"
"पैष्टी सन्दीपनी रुच्या कफघ्नहृतनाशिनी ।
पित्तला पाण्डुरोगाणां कारिणी बहुधा
मता ॥")

पोगण्डः, पुं, (पुनातीति । पू + विच् । पौः पण्डो यस्य ।) दशवर्षीयबालकः । यथा,—
"रोगी दृष्टस्तु पोगण्डः कुर्व्वन्नत्यैर्व्रतं सदा ॥"
इति प्रायश्चित्ततत्त्वे ब्रह्मपुराणम् ॥

पोगण्डः, त्रि, (पौः पण्ड एकदेशोऽस्य ।) अपोगण्डः । स्वभावतो न्यूनाधिकाङ्गः । जन्मविंशतिवत्सरीकैकविंशत्यङ्गुलीकैकविंशत्यङ्गुलीकादिजन्मः । यथा । पोगण्डो विकलाङ्गे स्यादिति हलायुधः । पोगण्डो विकलाङ्गकः । इति रत्नकोषः । इत्यमरटीकायां भरतः ॥

पोटः, पुं, (पुटत्यर्च्चेति । पुट संश्लेषे + आधारे घञ् ।) वेश्यभूमिः । इति जटाधरः ॥ (पुट-श्लेषे + भावे घञ् ।) संश्लेषः । इति पोटगल-ग्रन्थटीकायां भरतः ॥

पोटगलः, पुं, (पोटेन संश्लेषेण गलतीति । गल + अच् ।) जलः । काशः । इत्यमरः ।२।४।१४२ ॥ (अस्य पर्य्यायो यथा,—
"पोटगलो हृतत्काशः काकेक्षुः स च खक्कगकः ॥"
इति वैद्यकरत्नमालायाम् ॥)
मद्यः । इति मेदिनी । ले, १५० ॥ (सर्पजात्यन्तर्गतवैकरञ्जसर्पप्रभेदः ॥ "राजिलेन गोनस्यां वैपरीत्येन वा जातः पोटगलः ।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ॥)

पोटलिका, स्त्री, (पोटेन संश्लेषेण लीयते इति । ली + डः । ततः स्वार्थे कन् टाप् अत इत्वञ्च ।) संश्लिष्टवस्त्रादि । इति केचित् ॥ पुँटुलि इति भाषा ॥

पोटा, स्त्री, (पुटति स्त्रीपुरुषरूपं संश्लिष्यतीति । पुट + अच् । टाप् च ।) स्त्रीपुंसजन्तुजा । इत्यमरः । २ । ६ । १५ ॥ स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनशुक्रादिरूपं यस्यां सा । इति भरतः ॥

पोटिकः, पुं. (पोटः संज्ञोऽस्यास्तीति ठन् ।) विष्कोटकः । इति केचित् ॥ (विस्फोटकशब्दे-ऽस्य विवृतिर्द्रष्टव्या ॥)

पोटृणी, स्त्री, (पोटेव संज्ञेयेन जीयते इति । जी+कः । पृषोदरादित्वात् साधुः । ङीप् ।) पोहलिका । बखबहइया । पुंटुलि इति भाषा । यथा,—

"गुह्यार्थं त्रिपलाजाये गुडुचाः क्वाथ एव वा ।
दोलायन्ते पुरः पाथः पोटृण्या बखबहया ॥"
इति वैद्यकम् ॥

पोडुः, पुं, (पुडतीति । पुड+उन् ।) कपालास्थितलम् । इति राजनिर्घण्टः ॥

पोतः, पुं, स्त्री, (पुनातीति । पू+"इसिमसिकुसि-कासिदमिजूपूधूर्विभ्यस्तन् ।" उणा० ३ । ८६ । इति तन् ।) शिशुः । इत्यमरः । २ । ५ । ६८ ॥ (यथा, कथासरित्सागरे । १२ । १३३ ।

"तत्रस्थात् खर्जनूनाख्याद् गिरेः संप्रेष्य राज-यानम् ।
आनाययत् पक्षिपोतं गरुडात्मयसम्भवम् ॥")

पोतः, पुं. (पुनाति इति । पू+"ह्रस्वादेरिति ।" उणा० ३ । ८६ । इति तन् ।) वस्त्रम् । गृहस्यानम् । पोता इति भाषा । यज्ञम् । इति मेदिनी । ते, ३० ॥ दग्धवर्षीयबलौ । इति हेमचन्द्रः ॥ वस्तुवयानम् । जाहाज इति भाषा ॥ (यथा, देवीभागवते । १ । ३ । ४२ ।

"सम्प्राप्य मानुषभवं सकलाङ्गयुक्तं
पोतं भवार्णवजलोत्तरणाय कामम् ।
सम्प्राप्य वाचकमहो न गृह्णीति मूढः
सो वञ्चितोऽत्र विधिना सुहृदं पुराणम् ॥")

यथा,—

"वस्तुन्यानि रत्नानि महामौल्यानि साधुभिः ।
रत्नपारीक्षकैः सार्द्धमानयिष्ये बहूनि च ॥
सुकेन सह संप्राप्तो महान्तं लवणार्णवम् ।
पोतारूढास्ततः सर्व्वे पोतवाहैरधिष्ठिताः ।
अपारे दुस्तरेऽगाधे यान्ति वेगेन निश्चयः ॥"
इति वाराहे गोकर्णमाहात्म्याध्यायः ॥

पोतकी, स्त्री, (पोत इवेति । पोत+इवार्थे कन् । स्त्रियां ङीप् ।) पूतिका । इति शब्दमाला ॥ (अस्याः पर्य्यायो गुणाश्च यथा,—

"पोतक्यपोदिका सा तु मालवाम्लतवल्लरी ।
पोतकी पीतला स्निग्धा श्लेष्मला वातपित्तजित् ॥
अकण्ठ्या पिच्छिला गुर्व्वी रक्तपित्तप्रजित् ।
बलदा रुचिजत् पथ्या हृद्या गौ ह्यग्निकारिणी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्षामापत्री । इति राजनिर्घण्टः ॥

पोतजः, पुं, (पोतः सन् न तु डिम्बादिरूप इति भावः । जायते इति । जन+डः ।) क्षुद्र-राहिः । यथा, हेमचन्द्रः । ४ । ४२१ ।

"अल्पजाः पक्षिसर्पाद्याः पोतजाः क्षुद्ररा-दयः ॥"

पोतवणिक्, पुं, (पोतेन वणिक् ।) वस्त्रेण वाणिज्यकर्त्ता । नौवाणिज्यकरः । तत्पर्य्यायः ।

नौवाणिजः २ । इत्यमरः । २ । ९० । १२ । वस्त्रप्रधानव्यापारी ३ । इति जटाधरः ॥ नौ-वाणिज्यकरः ४ । इति शब्दरत्नावली ॥

पोतरत्नः, पुं. (पोतं रत्नतीति । रत्न+"कर्म्मेण्यण् ।" ३ । २ । १ । इत्यण् ।) केतिपादकः । इति शब्दमाला ॥ झाजि इति भाषा ॥

पोतशैलप्रियः, पुं, (पोतशैलः पर्व्वतविशेषः प्रियो-ऽस्य ।) वृहविशेषः । इति चिकित्साशेषः ॥

पोतवाहः, पुं, (पोतं नावं वहतीति । वह+"कर्म्मेण्यण् ।" ३ । २ । १ । इत्यण् ।) वहित्र-वाहकः । दाँड़ि इति भाषा । तत्पर्य्यायः । नियामकः २ । इत्यमरः । २ । १० । १२ ॥

पोता, [तृ] पुं, (पुनातीति । पू+"नप्तृनेष्टृ-त्वष्टृहोटृपोटृभ्रातृजामातृमातृपितृदुहितृ ।" उणा० २ । ९६ । इति तृन्प्रत्ययेन निपात्यते ।) विष्णुः । इति संक्षिप्तसारोणादिवृत्तिः ॥ ऋत्विक् । इति भूरिप्रयोगः ॥ (यथा, ऋग्वेदे । ४ । ९ । ३ ।

"य सद्म परि णीयते होता मन्द्रो दिविष्टिषु ।
उत पोता नि षीदति ॥")

पोताच्छादनं, क्ली, (पोतमिवाच्छादयतीति । आ+छादि+ल्युः ।) वस्त्रकृत्रिमम् । इति हारावली ॥

पोताधानं, क्ली, (आधीयतेऽत्रेति । ल्युट् । आधा-नम् । पोतानां अञ्जनमत्स्यानामाधानम् ।) क्षुद्राञ्जनमत्स्यसंघातः । इत्यमरः । १ । १० । १९ ॥ पोता इति भाषा । अस्य गुणाः । सुस्निग्धत्वम् । लघुत्वम् । रोचनत्वञ्च । इति राजवल्लभः ॥

पोतिका, स्त्री, (पोतोऽस्त्यस्या इति । पोत+ठन् । यद्वा, पूतिका पृषोदरादित्वात् साधुः ।) पूतिका । इत्यमरटीकायां भरतः ॥ गन्धपुष्पा ॥ मूल पोती । इति राजनिर्घण्टः ॥

पोतीशः, पुं, (पोतेभ्यः शिशुभ्यः अश्नुते क्षिप्यते इति । अश+घञ् ।) कर्पूरविशेषः । इति राजनिर्घण्टः ॥

पोत्रं, क्ली, (पूयतेऽनेनेति । पू+"इत्रसूत्रकरयोः पुवः ।" ३ । २ । १८३ । इति ष्ट्रन् ।) शूकर-सुखास्यम् । लाङ्गलसुखास्यम् । वस्त्रम् । इति मेदिनी । त्रे, ६१ ॥ वहित्रम् । इति संक्षिप्तसारो-णादिवृत्तिः ॥ (पोत्रनामर्त्विजः पात्रभेदः । यथा, ऋग्वेदे । १ । १५ । २ ।

"मरुतः पिबत ऋतुना पोत्रादृज्ञं पुनीतन ।
यूयं हि ष्ठा सुदानवः ॥" "पोत्रात् पोत्रनाम-कस्य ऋत्विजः पात्रात् सोमं पिबत ।" इति तद्भाष्ये सायणः ॥)

पोत्राग्रधः, पुं, (पोत्रं सम्मुखाग्रमेव आयुधं यस्य ।) शूकरः । इति राजनिर्घण्टः ॥

पोत्रिरथा, स्त्री, (पोत्री शूकरः रथ इव गति-साधकोऽस्याः ।) जिगमिषुविशेषः । इति चिकित्साशेषः ॥

पोत्री, [न्] पुं, (पोत्रमस्त्यस्येति । पोत्र+इनिः ।) शूकरः । इत्यमरः । २ । ५ । २ ॥ पोत्रविशिष्टे, त्रि ॥

पोलिन्दः, पुं. (पोतस्य अलिन्द इवेति । पृषो-दरादित्वात् साधुः ।) नौकावयवभेदः । तत्-पर्य्यायः । पादारकः २ । इति चिकित्साशेषः ॥

पोलिका, स्त्री, (पोली + स्वार्थे कन् टाप् । पूर्व्व-ह्रस्वश्च ।) पिष्टकविशेषः । पातला रोटी इति हिन्दी भाषा । यथा,—

"कुर्य्यात् सक्षितयातीव तन्वी पर्पटिका ततः ।
खेदयेत्तप्तके तान्तु पोलिकां तां जगुर्बुधाः ॥
तां खादेत्सर्पिषायुक्तां तस्यां मक्षकवद्गुणाः ।
तप्तकं तावा इति लोके ।" इति भावप्रकाशः ॥
तत्पर्य्यायः । पूलिका २ पौलिः ३ पूपिका ४ पूपला ५ । इति हेमचन्द्रः ॥

पोली, स्त्री, (पोलति महत्त्वं गच्छतीति । पुल्+ ण्वुलादित्वात् वः । ङीष् ।) पिष्टकविशेषः । तत्पर्य्यायः । पूपाली २ चर्पटी ३ । इति चिकित्साशेषः ॥

पोषः, पुं, पोषणम् । पुषधातोर्भावे घञ् प्रत्यय-निष्पन्नः । यथा, भट्टिः ।

"यः सर्व्वदाक्षानपुषत् स्वपोषम् ॥"
(यथा, च भागवते । ६ । १० । १० ।
"अर्थैरापादितैर्गृध्नुं हिंसयेत्तत्सतश्च तान् ।
पुष्णाति येषां पोषेण पोषमृच्छत्यसद्ग्रहः स्वयम् ॥")

पोषकं, क्ली, (पुष्+ण्वुल् ।) पुष्टिः । धृतिः । पुषधातोर्भावेऽनट् प्रत्ययनिष्पन्नः ॥ (यथा, मार्क-ण्डेये । २८ । ८ ।

"तद्द्विजातिशुश्रूषा पोषणं क्रयविक्रयौ ।
वर्णधर्म्माख्यिमे प्रोक्ताः शृण्वन्तामात्ममात्मया ॥")

पोषयित्नुः, पुं, (पोषयतीति । पुष+णिच् +"स्तनिक्षुधिपुधिगृदिमदिभ्यो डित्नित्नुच् ।" उणा० २ । २६ । इति इत्नुच् ।) कोकिलः । भर्त्ता । इति संक्षिप्तसारोणादिवृत्तिः ॥ पोषण-कर्त्तरि, त्रि ॥

पोष्टा, [ष्टृ] पुं, (पुष्णातीति । पुष+ष्ट्रच् ।) पूतीकः । इति शब्दचन्द्रिका ॥ काँटाकरञ्জ इति भाषा ॥ पोषणकर्त्तरि, त्रि ॥ (यथा, हरि-वंशे । २५ । १७ ।

"ताभिर्धार्य्याश्चयो लोकाः प्रजाश्चैव चतुर्विधाः ।
पोष्टा हि भगवान् सोमो जगतो जगतीपते ! ॥")

पोष्टृवरः, त्रि, पोषणकर्त्तृषु वरः । पोष्टृषु वर इति सप्तमी तत्पुरुषसमासः ॥

पोष्यः, त्रि, (पुष्यते इति । पुष+ण्यत् ।) पोष-णीयः । पोषितव्यः । पुषधातोः कर्म्मणि यप्रत्यय-निष्पन्नः ॥ (यथा, राधातन्त्रे चतुर्दशपटले ।

"मन्नैवेद्यस्य देवेशि ! भक्षणात् सर्व्वदा प्रियः ।
आत्मना जायते यस्तु आत्मजः स उदाहृतः ।
पोष्यः पुत्र इति ख्यातो नन्दस्य वरवर्णिनि ! ॥")

पोष्यपुत्रः, पुं, (पोष्यः पुत्रः । पोष्यत्वेनैव पुत्रत्वं प्राप्त इत्यर्थः ।) पालनादिना सुतत्वप्राप्तः यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे २४ अध्याये ।

"अधुना क्षत्रिकानाञ्च यस्यां सन्त्योष्यपुत्रकाः ।
तन्नाम चक्रुस्ताः प्रेम्णा कार्त्तिकस्येति कौतु-कात् ॥"

अथ तस्य व्यवस्था।
"तत्राह मनुः।
'अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः।
पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च॥'
अत्रिश्च।
'अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः॥'
शौनकः।
'अपुत्रो ऋतपुत्रो वा पुत्रार्थं वसुपोष्य च॥'
इति। तेन पुत्रोत्पत्त्या।
'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।
पितॄणामनृणश्चैव स तस्मात्तत्सुमर्हति॥'
इति मनुवचनावगत ऋणपरिहारेऽपि ततपुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम्। तयोरपि पिण्डदातृत्ववंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे ऋतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिरतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते॥ * ॥ स्त्रिया भर्तुरनुज्ञया तदधिकारः। यथाह वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति॥ * ॥ प्रतिनिधिरिति स च क्षेत्रजादिरेकादशविधः। यथाह मनुः।
'क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः॥'
दक्षस्मृतिः।
'पुत्राभावे तदर्थं प्रोक्ता मनुना येऽनुपूर्वशः।
सन्तानकारणं तेषामौरसः पुत्रिका तथा॥
आज्यं विना यथा तैलं सर्पिः प्रतिनिधीकृतम्।
तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना॥'
तत्रापि कलौ न सर्वेषामभ्यनुज्ञानम्।
'अनेकधा ज्ञाताः पुत्रा ऋषिभिर्यैः पुरातनैः।
न शक्यास्तेऽधुना कर्तुं मुक्तिहीनतया नरैः॥'
इति वचनात्॥
'दत्तौरसेतरेष्वाद्यं पुत्रत्वेन परिग्रहः।'
इत्याद्यभिधाय।
'इमान् धर्म्यान् कलियुगे वर्ज्यान्नाकुम्भनीषिणः।'
इति दत्तकेतरप्रतिनिधिनिषेधात्॥ * ॥ अतो दत्तकविधिर्विधत्ते। तत्र शौनकः।
'ब्राह्मणानां सपिण्डेषु कर्तव्यः पुत्रसंग्रहः।
तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्॥'
सपिण्डेष्विति सामान्यवचनात् समानासमानगोत्रेष्वित्यर्थः। तथा च सपिण्डाभावेऽसपिण्डः समानगोत्रस्तदभावे भिन्नगोत्रोऽपि यात्र इत्याह शाकलः।
'सपिण्डापत्यकश्चैव सगोत्रजमथापि वा।
अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत्॥
समानगोत्रजाभावे पालयेदन्यगोत्रजम्।
दौहित्रं भागिनेयञ्च मातृस्वसृसुतं विना॥' इति अन्यत्र तु न कारयेदिति ब्राह्मणातिरिक्तक्षत्रियादिसमानजातीयो दत्तको आदर्शते। यदाह मनुः।
'माता पिता वा दद्यातां यमद्भिः पुत्रमापदि।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः॥'
आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयं। अत्रमाह वृद्धयाज्ञवल्क्यः।
'सजातीयः सुतो ग्राह्यः पित्रादाता स भक्तदभाक्।
तदभावे विजातीयो वंशमात्रकरः सुतः॥'
यासाच्छादनमात्रेण स जनेत तदक्षिण इति। दौहित्रं भागिनेयञ्चेति दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः। तथा च शौनकः।
'क्षत्रियाणां स्वजातौ च गुरुगोत्रसमेऽपि वा।
वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥
सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः।
दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः॥
ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्॥'
जातिष्वेव न चान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः। अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्॥ * ॥ तत्रापि सन्निहितसपिण्डेषु सति आत्मपुत्रे स एव पुत्रीकार्य इत्याह मनुः।
'सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥'
वृद्धशातिः।
"यद्येकजाता बहवो भ्रातरश्च सहोदराः।
एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः॥'
इति। अत्र वचनद्वयेऽपि आत्मसुते च पुत्रप्रतिनिधितया कथञ्चित् सम्भवत्यन्यो न प्रतिनिधिः कार्य इत्यवगम्यते॥ * ॥ भर्तृबंधुमन्तरेण भार्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्वेन यत्नः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकादुपादानम्॥ * ॥ केन पुत्रो देय इत्याह शौनकः।
'नैकपुत्रेण कर्तव्यं पुत्रदानं कदाचन।
बहुपुत्रेण कर्तव्यं पुत्रदानं प्रयत्नतः॥'
द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्तरि तदनुमते प्रोषिते मृते वा तदनुज्ञां विनापि। यथा वशिष्ठः। 'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः।' इति। अनुमतिश्चाप्रतिषेधेऽपि भवति। अप्रतिषिद्धं परमनुमतं भवतीतिन्यायात्॥ * ॥ निरपत्यदानमाह याज्ञवल्क्यः।
'दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्॥'
तथा 'मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति॥'
अथ पुत्रपरिग्रहविधिमाह शौनकः।
'शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम्।
अपुत्रो ऋतपुत्रो वा पुत्रार्थं वसुपोष्य च॥'
उपोष्य यष्टव्यात् पूर्वेद्युरिति ऋतोपवासः। वृद्धगौतमः।
'वासवीं कुक्कुटे दत्त्वा उलूकं चाक्षुलीयकम्।
आचार्यं धर्मसंयुक्तं वेद्यां वेदपारगम्॥
मधुपर्केण संपूज्य राजानञ्च द्विजान् शुचीन्॥'
राज्ञो विज्ञापयेत् पश्चात्तामाज्ञामिनम्। 'बन्धूनाकृष्य सर्वांस्तु यामाज्ञामिनमेव च। इतिकरणात्। द्विजानिति बहुत्वं त्रिप्रभृत्यवक्षितं कपिञ्जलन्यायात्।
'वर्हिः क्षुग्रमयञ्चैव पाशाग्र्यञ्चैवमेव च।
एतानाकृष्य बन्धूंश्च ज्ञातीनाकृष्य यत्नतः॥
बन्धुजनेन सम्भोज्य ब्राह्मणांश्च विशेषतः।
अग्न्याधानादिकं तत्र कृत्वाज्योत्पवनान्तकम्॥
दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्।
दाने समर्थो दाताऽसौ यो यज्ञेनेति पञ्चभिः॥'
दद्यादिति शेषः। बन्धून् आत्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तथा।
'देवस्यत्वेतिमन्त्रेण हस्ताभ्यां परिगृह्य च।
अङ्गादङ्गात्त्वमसीति जपन् आत्मायं शिशुमुद्धरेति।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्॥'
पुत्रच्छाया पुत्रसादृश्यं निमोगादिना स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा।
'हृद्यगीतेन वाद्येन स्वस्तिशब्देन संयुतम्।
गृहमध्ये समाधाय वरं ज्ञात्वा विधानतः॥
यस्याङ्कात्त्वमृचा चैव तुभ्यमग्ने वृषेकया॥
सोमो दददित्येताभिः प्रत्यृचं पञ्चभिस्तथेति।'
वृद्धगौतमः।
'पायसं नव साज्यञ्च घृतसंस्कृत होमयेत्।
प्रजापते न त्वदेतानित्युद्दिश्य प्रजापतिम्॥'
इति॥
वशिष्ठः। 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाकृष्य राजानि निवेद्य निवेदनस्य मध्ये आहूतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव गृह्णीयात्। सन्देहे चोत्पन्ने दूरबान्धवं शूद्रमिव ख्यापयेत्। विज्ञायते ह्येकेन बहूंश्चायत इति।' निवेदनं यथा। सन्देह इति दूरावस्थितबान्धवस्यात्मदेशभाषाविप्रकर्षादिना कुलशीलादिसन्देहो भवत्येव तथात्वे निर्णयपर्यन्तं न व्यवहरेत् तत्र हेतुरर्केणेति। बन्धून् पित्रादीन्। एतदन्तरविधिरावश्यकः॥ * ॥ ततश्च शौनकः।
'दक्षिणां गुरवे दद्यादृत्विग्भ्यश्चापि द्विजोत्तमः।
कृपो राज्यार्द्धमेवाथ वैद्यो वित्तमृतत्रयम्।
शूद्रः सर्वस्वमेवापि अशक्तश्चेदयाचितम्॥'
राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयद्रव्यम्। अर्द्धाद्दर्द्धराज्योत्थमेकवर्षोद्भवं धनमिति वृद्धगौतमस्मरणात्। उत्तममध्यमाधमधर्मदेन वित्तानां सुवर्णरजतताम्राद्यानामिति ज्ञेयम्।
'ऋतत्रयं ब्राह्मणानां सौवर्णमथ राजतम्।
प्रदद्यात्ताम्रमथवा उत्तमाद्यिवस्तया॥'
इति वृद्धगौतमस्मरणात्॥
सर्वस्वमेकवर्षभवितव्यमिति यावत्॥ * ॥
तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः। अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः। प्रतिग्रहीष्यन्नुपकल्प्यते हे वाससी हे कुण्डले अक्षौलीयकमाचार्यश्च वेदपारगं क्षुग्रमयं वर्हिः पर्णमयमिध्ममित्यथ बन्धूनाकृष्य निवेद्यानस्य सर्वं राजनि निवेद्य परिवृते वागारमभ्ये ब्राह्मणं

बालालम्बेन उपवेद्य पुत्रवाहस्त्रिकृद्विमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आप्रणीताभ्यः श्रुत्वा दातुः समर्थं मत्वा मे पुत्रं देहीति भिक्षेत् ददानीतीतर आह तं परिग्रहीत इत्यनेन त्वा परिग्रहामि सन्तत्यै त्वा परिग्रहामीत्यनेन वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यधिवासनान्तं श्रुत्वा पक्षौ जुहोति यज्ञो वृद्धा कीरित्वा मन्यमान इति पुरोऽनुवाक्यमनुत्य यज्ञेयं सुहुते जातवेद इति याज्यया जुहोति अथ व्याहृतिभिर्हुत्वा खिरिखितप्रभृति सिद्धमाग्नेयवरप्रदानात् दक्षिणां ददातीति च वासवी ऋते श्रुवते ऋतव्याहृतीयकमेवं सौरस उत्पद्यते तुरीयभागे सन्नयनीति आहश्च गौधायन इति ॥ * ॥ एवमुक्तविधभावे परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं न लांशभागित्वमित्यग्रे वक्ष्यते । तथा च मनुः ।

'गोत्रऋक्थे जनयितुर्न हरेद्दत्रिमः सुतः ।
गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधेति ॥'

एतेन दाहधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्रिमस्य स्वत्वनिवृत्तिर्दाहगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् संस्कर्तृत्वात् स्वसुतान् पितेति स्मरणात् यद्वा अनन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्या न पुनर्जनकेन कृतपूर्वा अपि निवर्तनीयाः ॥ * ॥ यदि च तत्पूर्वं भाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः ॥ * ॥ एवमुपनयनमात्रकरणेऽपि प्रतिग्रहीतुर्दत्तकपुत्रसिद्धिः।

'अन्यगोत्रोद्भवो दत्तः पुत्रत्वेनोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभाक् ॥'

इति वशिष्ठस्मरणात् ॥

एतच्चाष्टमाब्दकृतपत्न्युपक्रमकालाभ्यन्तरवर्ति-परिग्रहे बोध्यम् । अन्यथा सुखकाले अधिकारयोग्यत्वाभावे गौणकाले अनधिकारात्र तत्सिद्धिरिति ॥ * ॥ अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वं विशेषतो वक्ष्यते ।

'चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः ।
दत्तात्मात्मनयाख्ये स्युरन्यथा दास उच्यते ॥'

एवञ्च चूडाद्या एतत्तद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य विवाहलाभः ॥ * ॥ तथा पैठीनसिः । अथ दत्तकक्रीतलब्धिमपुत्रिकापुत्राः परपरिग्रहेणा-र्थेन यो न जातास्तेऽवकृतकुलीना द्व्यामुष्यायणा भवन्तीति । आर्षेण ऋष्युक्तेन परिग्रहेण । जनकग्रहीत्रोः स्वीकारेण द्व्यामुष्यायणा भवन्तीत्यर्थः ॥ * ॥ अथ तत्कर्तृकत्वनिर्णयः । तत्र पितुः सपिण्डीकरणात्तत्रोर्ध्वभाजि दत्तकस्य पूर्वग्रहीतत्वेऽपि सत्यौरसे नाधिकारः । औरसे पुनरुत्पन्ने तेषु ज्येष्ठं न विद्यते । इति देवलेन ज्येष्ठत्वप्रतिषेधात् । 'पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः ।' इति याज्ञवल्क्यवचनाच्च । अन्यत्र सर्वत्रौरसवत् । यथाहे तु विशेषो यथा जातूकर्ण्यः ।

'औरसश्चैव पुत्रो विधिना पार्श्वगेन तु ।
प्रत्यक्षमितरे कुर्युरेकोद्दिष्टं सुता दश ॥'

इतरे दत्तकाद्याः ॥ * ॥ अथ दत्तकाद्यौचादिनिर्णयः । तत्र मुख्यदत्तकस्य तु जनकगृहे परस्परमशौचं नाद्यस्यैव गोत्रनिवृत्त्याद्यौचनिवृत्तेरर्थसिद्धत्वात् । द्व्यामुष्यायणस्य तु उभयत्रैवाद्यौचमिति । ब्रह्मपुराणे ।

'दत्तकश्च स्वयं दत्तः क्रत्रिमः क्रीत एव च ।
अपविद्धश्च ये पुत्रा भरणीयाः सदैव ते ॥
भिन्नगोत्राः पृथक्पिण्डाः पृथग्वंशकराः स्मृताः ।
जनने मरणे चैव त्र्याहाद्यौचस्य भागिनः ॥'

पराशरः ।

'भिन्नगोत्रः सगोत्रो वा नीतः संस्कृत्य चेच्छया ।
जनने मरणे तस्य त्र्याहाद्यौचं विधीयते ॥'

तथा ।

'औरसं वर्जयित्वा च सर्ववर्णेषु सर्वदा ।
क्षेत्रजादिषु पुत्रेषु जातेषु च मृतेषु च ।
अशौचन्तु चिरात्तं स्यात् समानमिति निश्चयः ॥'

अथ दत्तकविभागः । मनुः ।

'पुत्रान् द्वादश यानाह नृणां स्वायम्भुवो मनुः ।
तेषां षड्बन्धुदायादाः षड्दायादबान्धवाः ॥
औरसः क्षेत्रजश्चैव दत्तः क्रत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडदायादबान्धवाः ॥'

गौधायनः ।

'औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तक्रत्रिमौ ।
गूढजेवापविद्धश्च रिक्थभाजः प्रचक्षते ॥
कानीनश्च सहोढश्च क्रीतं पौनर्भवस्तथा ।
स्वयं दत्तं निषादश्च गोत्रभाजः प्रचक्षते ॥'

औरस पुत्रिकापुत्र-क्षेत्रज-कानीन-गूढोत्पन्नापविद्ध-सहोढ पौनर्भव-दत्तक-स्वयमुपागत-क्रीतानभिधाय देवलः ।

'एते द्वादश पुत्रास्तु सन्त्यर्थसुदाहृताः ।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा ॥
तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट् ।
विशेषं वापि पुत्राणामानुपूर्व्यो विधीयते ॥
सर्वे त्वगौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्येष्ठं न विद्यते ॥
तेषां भवर्णा ये पुत्रास्ते तुरीयांशभागिनः ।
हीनास्तत्तुल्यवेषुर्यांसाच्छादनसम्मताः ॥' * ॥

वशिष्ठः । सत्सिंस्तेन प्रतिग्रहीते औरस उत्पद्यते स चतुर्थभागभागी यदि नाभ्युदयिकेषु प्रयुक्तं स्यात् । स प्रतिग्रहीतपुत्रः आभ्युदयिकेषु यज्ञादिषु यदि औरसेन प्रयुक्तं न स्यात् प्रभूतं धनमिति शेषः । अतश्च दत्तकग्रहणानन्तरमौरसोत्पत्तौ तदौरसश्चतुर्थांशविधिर्वेशिष्ठोक्तो दत्तकविषयो ज्ञेयः । तथा देवलकात्या-यनवचने तनीयांशग्रहणविधिरनुत्तरगुरुदत्तकविषयो वाच्यः ।

'उपपन्नो गुणैः सर्वैः पुत्रो यस्य हि क्रत्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽप्यन्यगोत्रतः ॥'

इति मनुवचनैकवाक्यत्वात् । गुणैर्जातिविद्याचारैः । तथा केनापि मुनिना दत्तकस्य बन्धुदायादत्वमन्येन चादायादत्वमुक्तं तत् गुणवद्गुणवद्भेदेन समाधेयं एवं दत्तकस्य धनग्रहणादौ मुनिभेदेन पूर्वापरोक्तिवैषम्यं गुणागुणविवेकेनापाद्यं एतेनौरसस्य भ्रात्रादिधने येनैव भ्रात्रादिना सम्बन्धेन अधिकारित्वं तादृग्येनैव सम्बन्धेन तादृग्दत्तकस्यापि यथासम्भवमुचितांशभागित्वमवधेयम् । एवं धनिनः पुत्रान्तरसत्त्वे मृतपितृकदत्तकपौत्रस्यापि दत्तकोचितांशभागित्वम् । तदसत्त्वे सर्वहरत्वमपीति । न च पौत्रस्य स्वपितृयोग्यांशभागित्वं नियमात् दत्तकग्रहीतुः पितामहौरससत्त्वे तादृग्पितृतुल्यस्यैवांशस्य तद्योग्यत्वात् दत्तकपौत्रः पितृयतुल्यमेवांशं लभतामिति वाच्यम् । पुत्रकस्य दत्तकत्वे चतुर्थांशः पौत्रस्य तु तथात्वे समानांश इति वैषम्यात् । ततश्च स्वसमानरूपस्य पितुर्यादृशांशः प्राक्तनसिद्धस्तस्यैव स्वपितृयोग्यांशतेति यथोक्तमेव साधु । एवं दौहित्रः प्रपौत्रोऽप्यनुसन्धेयः ॥ * ॥

'औरसः क्षेत्रजश्चैव दत्तः क्रत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्त्रिसुता इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च दासश्च षडिमे पुत्रपांसनाः ॥
अभावे पूर्वपूर्वेषां परान् समभिनिर्दिशेत् ।
पौनर्भवं स्वयंदत्तं दासं राज्ये न योजयेत् ॥'

तथा ।

'न क्षेत्रजादीन्नयान् राजा राज्येऽभिषेचयेत् ।
पितॄणां श्रोधयेन्नित्यमौरसे तनये सति ॥' इति ।

एतावता प्रबन्धेनाभिहितो योऽयं क्षेत्रजदत्तकादीनामौरसेन सह विभागप्रकारः स तु शूद्रस्य न सम्भवति तस्य तु ।

'दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत् ।
सोऽनुज्ञातो हरेदंशमिति धर्मो व्यवस्थितः ॥'

इति मनुवचनेन जातोऽपि दास्यां शूद्रेण कामतोऽंशहरो भवेत् ।

'मृते पितरि कुर्युस्तं भ्रातरश्चांशभागिनम् ।
अभ्रातृको हरेत् सर्वं दुहितरश्च सुताश्च ते ॥'

इति याज्ञवल्क्येन च दासीपुत्रस्याप्यौरसेन समांशाभिधानेन पितुरनन्तरं भ्रातृरहितस्य तस्यैव दौहित्रेण सह विभागदर्शनेन च दत्ताद्यपायितं सति पितरि क्षेत्रजदत्तकादीनामौरसेन समांशोऽस्ति तु सदर्शांशः अन्यथा यत्र न क्षेत्रजदत्तकादीनामौरसचतुर्थांशत्वं तत्र तदपेक्षया अत्यन्तविप्रकृष्टाधिकारस्य दासीपुत्रस्यौरससमांशत्वमिति महद्वैषम्यं स्यात् एवं सतृतु क्षेत्रजादिषु सत्स्वेव पत्नीकन्ययो-

पौंस्नं

दौहित्राधिकारे कल्पाधिकारविधिबाधापत्ति-स्तेन दौहित्रपर्य्यन्ताधिकारिश्रुतलायां तदेक-तमे सत्यपि न दासीपुत्रस्य सर्व्वहरत्वं किन्तु तत्समांशः। अतएव।

'दत्तपुत्रे यथा जाते कदाचित्औरसो भवेत्।
पितुर्वित्तस्य सर्व्वस्य भवेतां समभागिनौ॥'

इत्यपि वचनं शूद्रविषय एव योजनीयम्॥ * ॥

अथान्यपङ्क्त्युपभृतिपुत्राणां धनाधिकारितया तद्दौरसक्षेत्रजयोरेव पितामहधनभागित्वश्रुतेर्न तद्गृहीतदत्तकपुत्रादेः पितामहधनाधिकारः किन्तु भरणमात्रं अन्यादिभार्य्याणां भरणविधा-नेन तद्भरणस्य दत्तापूपायितत्वात्। तथा अन्य-पङ्क्त्यादीनामधिकारिपुत्रानभिधायाह।

'औरसक्षेत्रजाश्चैषां निर्दोषा भागहारिणः।
अपुत्रयोषितश्चैषां भर्त्तुर्या: साधुवृत्तयः॥
सुताश्चैषां प्रभर्त्तव्या यावन्न भर्त्तुरात् क्षताः॥'

एवं दत्तकग्रहणानन्तरोत्पन्नौरसेन सह दत्त-कस्य विभागदर्शनात् सत्यौरसे गृहीतस्य तु नांशभागित्वमिति। तथा विधानं विना परि-गृहीतस्यापि नांशभागित्वमित्याह।

'तस्मिन् जाते सुते दत्ते न क्षते च विधानके।
तत्सुतस्तस्य वित्तस्य यः स्वामी पितुरक्षता॥'

मनुः।

'अविधाय विधानं यः परिगृह्णाति पुत्रकम्।
विवाहविधिभाजं तं न कुर्य्यादंशभाजनम्॥'

इति।

अन्यजातीयदत्तकस्यापि नांशभागित्वमित्याह

'यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्।
अंशभाजं न तं कुर्य्यात् शूद्रीजस्य मतं हि तत्॥'

इत्युक्तप्रायमित्यास्तां विस्तारः॥" इति दत्तक-चन्द्रिका॥

पोष्यवर्गः, पुं, (पोष्याणां प्रतिपालनीयानां वर्गः।) प्रतिपालनीयगणः। स तु मात्रादिः। यथा,—

"माता पिता गुरुः पत्नी स्वपत्यानि समाश्रिताः।
अभ्यागतोऽतिथिश्चासि: पोष्यवर्गो अमी नव॥"

इति कालीखण्डम्॥

अपि च।

"माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रिताः।
अभ्यागतोऽतिथिश्चायं: पोष्यवर्ग उदाहृतः॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्।
नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत्॥"

इति गारुडे २१५ अध्यायः॥

पौंसवनं, क्ली, (पुंसवनमेव। स्वार्थे अण्।) पुंस-वनसंस्कारः। इति भूरिप्रयोगः॥

पौंस्नं, क्ली, (पुंस इदम्। पुंस्+"स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्।" ४।१।८७। इति स्नञ्।) पुंस्त्वम्। इति शब्दमाला॥ (वैर्य्यम्। यथा, भागवते। ४।२६।२६।

"का देवरं वज्रगतं कुसुमाख्यवेग-
विस्रस्तपौंस्नसुहृती न भजेत लक्ष्मीं॥"

त्रि, पुंसः भवः। पुंस आगतः। यथा, भाग-वते। ३।१५।४५।

पौष्कलकः

"पौंस्नं वपुर्देशयानमनन्यचिन्ते-
रौत्पत्तिके: समगुणान् युतमष्टभोगैः॥"

स्त्रियां ङीप्। पुरुषयोग्या। पुरुषहिता। यथा, भट्टिः। ५।६१।

"सङ्गच्छ पौंस्नि! स्त्रैणं मां युवानं तरुणी शुभे॥")

पौंस्नं, क्ली, (पोंस्नस्य भावः। पोंस्न+ अण्।) अवस्थाविशेषः। यथा,—

"कौमारं पञ्चमाब्दान्तं पौंस्नं दशमवधि।
केशोरमाषष्ठदशात् यौवनञ्च ततः परम्॥"

इतिदशमस्कन्धीयहारद्राधायस्यसप्तविंशश्लोक-टीकायां श्रीधरस्वामिधृतवचनम्॥ (पोंस्नाव-स्थावति तदवस्थासम्बन्धिनि च त्रि। यथा, भागवते। ३।३१।२८।

"इत्येवं प्रीढ्यवं भुक्त्वा दुःखं पौंस्नमेव च॥")

पौष्करीकं, क्ली, (पुष्करीकमिव। पुष्करीक+ "प्रकरादिभ्योऽण्।" ५।३।१०७। इत्यण्।) प्रपौण्डरीकम्। इति राजनिर्घण्टः॥ (कुष्ठ-विशेषः। यथा, सुश्रुते निदानस्थाने ५ अध्याये।

"तत्र वातेनारुणं पित्तेनौडुम्बर्य्यलिक्कपाल-काकणकानि। श्लेष्मणा पौष्करीकं दद्रुकुष्ठ श्वेति॥" पुं, यज्ञविशेषः। यथा, महा-भारते। १३।१०७।३६-३७।

"यस्तु संवत्सरं चान्नो भुङ्क्ते ऽहन्यहनि नरः।
देवकार्य्यपरो नित्यं जुह्वानो जातवेदसम्॥
पौष्करीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम्।
पद्मवर्णनिभश्चैव विमानमधिरोहति॥")

पौष्कर्य्यं, क्ली, (पुष्कर्य्यमेव। स्वार्थे अण्।) पुष्क-र्य्यम्। इत्यमरटीकायां भरतः॥ (यथास्य पर्य्यायो गुणाश्च।

"प्रपौण्डरीकं पौष्कर्य्यं चक्षुष्यं पौष्करीयकम्।
पौष्कर्य्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफप्रणुत्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पौष्करः, पुं, देशभेदः। चम्बेल इति ख्यातः। इति शब्दरत्नावली॥ (सोऽस्य अभिजनस्य राजा वा। अण्। तद्देशवृत्तयः। यथा, हरिवंशे।

"पाण्ड्यं पौण्ड्रं कलिङ्गञ्च मात्स्यञ्चैव जनार्द्दनः।
जघान सहितान् सर्व्वान्————॥"

पौण्ड्रदेशोद्भवे, पुंभूम्नि। यथा, हरिवंशे। ११६।५२।

"अङ्गवङ्गकलिङ्गैश्च सार्द्धं पौण्ड्रैश्च वीर्य्यवान्।
निर्जयौ चेदिराजस्तु भाल्लभिः स महारथैः॥")

भीमसेनस्य गृहः। यथा,—

"पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः॥"

इति श्रीभगवद्गीतायाम्। १।१५॥

(पुडि खण्डने+"स्फायितञ्चीति।" उणा० २। १३। इति रक्। ततः प्रज्ञाद्यण्।) इक्षुभेदः। इति रत्नमाला। पुँड़ि इति भाषा॥

पौष्कलकः, पुं, (पौष्कल एव। स्वार्थे कन्।) इक्षु-भेदः। पुँड़ि आक इति भाषा। (यथा,—

"पौष्कलो भीरवश्चैव वंशकः शतपोरकः।
कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः॥

पौनःपुनं

नेपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्।
इक्षवो जातयः स्त्रीत्वाद्गुणान् वक्ष्याम्यतः-परम्॥"

इति सुश्रुते सूत्रस्थाने १५ अध्याये॥)

अस्य गुणाः। शीतलत्वम्। दृढत्वम्। स्निग्ध-त्वम्। मधुरत्वम्। दृंहणत्वञ्च। इति राजवल्लभः॥ (गुणान्तरमस्य यथा,—

"वातपित्तप्रशमनो मधुरो रसपाकयोः।
सुशीतो दृंहणो बल्यः पौण्ड्रको भीरुकस्तथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥

पौण्ड्रदेशोद्भवः। यथा, महाभारते। २।३४।१०।

"पौण्ड्रको वासुदेवश्च बलः कालिङ्गकस्तथा॥")

जातिविशेषः। पुँड़ो इति भाषा। स च शौण्डि-कायां वैश्याज्जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ (पौण्ड्रदेशोद्भवक्षत्रियविशेषः। स तु क्रियालोपा-दिना शूद्रत्वमापन्नः। यथा, मनुः। १०।४४।

"पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः॥")

पौण्ड्रवर्द्धनः, पुं, (पौण्ड्राणामिक्षुविशेषाणां वर्द्धनं यत्र।) देशभेदः। इति शब्दरत्नावली॥ बेहार इति ख्यातः॥ (यथा, कथासरित्सागरे। १८।१७।

"अभवत्तस्य भार्य्या च नगरात् पौण्ड्रवर्द्धनात्॥")

पौण्ड्रिकः, पुं, (पुण्ड्र+स्वार्थे ठक्।) इक्षुभेदः। पुँड़ि इति भाषा। तत्पर्य्यायः। पुण्ड्रेक्षुः २ पुण्ड्रः ३ सैव्यः ४ अतिरसः ५ मधुः ६। इति शब्दमाला॥

पौतवं, क्ली, परिमाणम्। इति यौतवशब्दटीकायां भरतः॥

पौत्तिकं, क्ली, (पुत्तिकाभिर्मधुमक्षिकाविशेषैः कृतम्। पुत्तिका+"संज्ञायाम्।" ४।३। ११७। इति ठञ्।) पिङ्गलवर्णपुत्तिकाख्यक्षु-द्रमक्षिकाकृतक्षुद्रवर्णमधु। इति जटाधररत्न-माले॥ (यथा, सुश्रुते। १।४५।

"पौत्तिकं भ्रामरं क्षौद्रं मार्क्षिकं छात्रमेव च।
आर्घ्यमौद्दालिकं दालमित्यष्टौ मधुजातयः॥")

पौ(त्र)त्रः, पुं, (पुत्रस्यापत्यम्। पुत्र+"अवृद्धा-न्मनुष्ये विदादिभ्योऽञ्।" ४।१।१०४। इति अञ्।) पुत्रस्य पुत्रः। नाति इति भाषा॥ तत्पर्य्यायः। नप्ता २। इति हेमचन्द्रः॥ यथा,—

"पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥"

इति दायभागधृतमनुगुरुकल्पितवशिष्ठहारीत-वचनम्॥

पौत्री, स्त्री, (पुत्रस्यापत्यं स्त्री। पुत्र+अञ्। ङीप्।) पुत्रात्मजा। तत्पर्य्यायः। नप्त्री २। इत्यमरः। २।६।२६॥

पौनःपुनिकः, त्रि, (पुनः पुनर्भवः। पुनःपुनः+ ठञ्। टिलोपः।) पुनःपुनर्भवः। इति सुबो-धाकरम्॥

पौनःपुन्यं, क्ली, (पुनःपुनः+स्वार्थे अञ्। टिलोपः। पुनर्व्वारम्। तत्पर्य्यायः। वारंवारम् २ तद्भावः

भूयश्च ३ अवज्ञया ४ पुनःपुनः ५ वारंवारेण ६ अभीक्ष्णम् ८ प्रतिक्षणम् ९। इति भरतः॥

पौनर्भवः, पुं, (पुनर्भूर्योऽपत्यमिति। पुनर्भू+"अपत्याधर्थे विदादिभ्योऽञ्।" ४। १। १०६। इति अञ्।) ब्राह्मणविप्रपुत्रक्षान्तर्गतपुत्रविशेषः। इति जटाधरः॥ पुनर्भूपुत्रः। स तु भर्तृपरित्यक्तविधवयोरन्येनोत्पादितः। तस्य लक्षणं यथा,—

"या पत्या वा परित्यक्ता विधवा वा स्वयेच्छया। उत्पादयेत् पुनर्भूत्वा स पौनर्भव उच्यते॥"

इति मानवे। ९। १७५॥

"पतिरिति। या भर्त्रा परित्यक्ता मृतभर्तृका वा स्वेच्छया अन्यस्य पुनर्भार्या भूत्वा यमुत्पादयेत् स तदुत्पादकस्य पौनर्भवः पुत्र उच्यते।" इति तट्टीकायां कुल्लूकभट्टः॥ *॥ भर्तृविशेषः। अक्षतयोन्योर्भर्तृपरित्यक्तविधवयोः पौनर्भवेन भर्त्रा सह विवाहविधिः एवं कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनरागतायास्तेन कौमारेण भर्त्रा सह विवाहविधिर्यथा,—

"सा चेदक्षतयोनिः स्यादक्षतप्रत्यागतापि वा। पौनर्भवेन भर्त्रा सा पुनः संस्कारमर्हति॥"

इति मानवे। ९। १७६॥

"सा चेदिति। सा स्त्री यद्यक्षतयोनिः सती अन्यमाश्रयेत्तदा तेन पौनर्भवेन भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति। यद्वा कौमारं पतिमुत्सृज्यान्यमाश्रित्य पुनस्तमेव प्रत्यागता भवति तदा तेन कौमारेण भर्त्रा पुनर्विवाहाख्यं संस्कारमर्हति।" इति तट्टीकायां कुल्लूकभट्टः॥ *॥

कन्याविशेषे, स्त्री। सप्तविधपौनर्भवाः कन्या वर्ज्जनीयाः। यथा,—

"सप्त पौनर्भवाः कन्या वर्ज्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥ उदकस्पर्शिता या च या च पाणिगृहीतिका। अग्निं परिगता या च पुनर्भूप्रभवा च या। इत्येताः काश्यपेनोक्ता दहन्ति कुलमग्निवत्॥ कृतकौतुकमङ्गला षड्वक्तव्या। उदकस्पर्शिता उदकपूर्वं दत्तेति रत्नाकरः।" इत्युद्वाहतत्त्वम्॥

पौरं, क्ली, (पुरे भवम्। पुर+"तत्र भवः।" ४। ३। ५३। इत्यण्।) रोहितवृक्षम्। इत्यमरः। २। ४। १६६॥ रामकर्पूर इति ख्यातम्॥ (अस्य पर्य्यायो यथा,—

"कालस्कं रौहिषं देवदारु सौगन्धिकं तथा। भूनीपं आवपौरेय श्यामकं धूमगन्धिकम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

पुरोभूते, त्रि। इति मेदिनी॥ (यथा, रघुः। ६। ८५।

"इति समगुणयोगप्रीतयक्तश्च पौराः
अवजकटु नृपाणामेकवाक्यं विवव्रुः॥"

पुं, पुरुराजपुत्रः। यथा, ऋग्वेदे। ८। ३। १२।

"मन्थी नो अत्र वह पौरमाविथ धिय इन्द्र सिषासतः॥"

पूरः पूरक एव। स्वार्थे अण्। उदरपूरके, त्रि। यथा, तत्रैव। २। ११। ११।

"पृथक्तस्ते कृतो वर्हयज्ञित्या सुतः पौर इन्द्रमाव॥")

पौरकः, पुं, (पौर इव कायतीति। कै+कः।) गृहवाटीपवनम्। यथा,—

"निष्कुटस्तु गृहारामो वाटारामस्तु पौरकः॥"

इति हेमचन्द्रः। ४। १७८॥

पौरवः, पुं, (पुरोरपत्यमिति। पुरु+अण्।) पुरुवंशः। यथा,—

"दक्षोस्तु तनया भोजा अजोस्तु स्वेच्छजातयः। पुरोस्तु पौरवो वंशो यत्र जातोऽसि पार्थिव!॥"

इति मात्स्ये ३४ अध्यायः॥

(देशविशेषः। यथा, मार्कण्डेये। ५८। ५२।

"जिनेच्छाः पौरवाश्चैव गान्धर्वाश्च द्विजोत्तम!। पूर्व्वोत्तरस्तु कूर्म्मस्य पादमेते समाश्रिताः॥"

पुरुवंशीये, त्रि॥ (यथा, शकुन्तलायां प्रथमेऽङ्के।

"कः पौरवे वसुमतीं शासति शासितरि
दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु॥")

पौरस्त्यः, त्रि, (पुरो भवः। पुरस्+"दक्षिणापश्चात्पुरसस्त्यक्।" ४। २। ८८। इति त्यक्।) प्रथमः। इत्यमरः। ३। १। ८०॥ (पूर्व्वदिग्भवः। यथा, रघुः। ४। ३४।

"पौरस्त्यानेवमाक्रामन् तान् तान् जनपदान् जयी॥")

पौराणिकः, त्रि, (पुराणमधीते वेद वा। पुराण+"आख्यानाख्यायिकेतिहासपुराणेभ्यश्च।" ४। २। ६०। इत्यस्य वार्त्तिकोक्त्या ठक्।) पुराणवेत्ता। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। १। ४। १। "लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषीयेऽब्रवीदृषीणां सत्रे ऋषीनभ्यागतानुपतस्थे॥" यथा च भागवते। १२। ७। ५।

"त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः।
वैशम्पायनहारीतौ षड्वै पौराणिका इमे॥")

पौरुषं, क्ली, (पुरुष+अण्।) पुरुषस्य भावः। पुरुषस्य कर्म्म। पुरुषस्य तेजः। इति मेदिनी॥

"क्लीबा हि दैवमेवैकं प्रशंसन्ति न पौरुषम्।
दैवं पुरुषकारेण घ्नन्ति शूराः सदोद्यमाः॥"

इत्यग्निपुराणम्॥

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥"

इति हितोपदेशः॥

पौरुषं, त्रि, (पुरुष+अण्।) ऊर्द्ध्वविस्तृतदोः-पार्श्वतृणाग्रम्। पुरुषपरिमाणम्। इत्यमरः। १। ६। २२२॥ (पुरुषवाह्यः। यथा, मनुः। ८। ४०४।

"यद्यं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे॥")

पौरुषेयः, पुं, (पुरुष+"सर्व्वपुरुषाभ्यां णढञौ।" ५। १। १०। इत्यत्र "पुरुषाद्धविकारसमूहतेषु कृतेषु" इत्यर्थेषु ढञ्।) समूहः। (यथा, माघः। २। ४।

"एकाकिनोऽपि परितः पौरुषेयवृता इव॥")

वधः। पुरुषस्य पदान्तरम्। इति मेदिनी॥

पौरुषेयः, त्रि, (पुरुष+ढञ्।) पुरुषजातः। पुरुषविकारः। इति मेदिनी॥ (पुरुषसम्बन्धिनि। यथा, ऋग्वेदे। १०। ८७। १६।

"यः पौरुषेयेण क्रविषा समङ्क्ते॥")

पौरोगवः, पुं, स्त्री, (पुरोऽग्रे गौर्नेयं यस्येति। पुरोगु। ततः प्रज्ञाद्यण्।) यागग्राह्याश्वः। इत्यमरः। २।८।२७॥ (यथा, हरिवंशे। १३६।५८।

"वृषाश्वसौवर्च्चलपुष्कपूर्णान्
पौरोगवोक्षानुपजह्रुरेषाम्॥")

पौरोडाग्निः, पुं, (पुरोडाग्न एव। प्रज्ञाद्यण्।) पुरोडाग्निः। पुरोडाग्निसहचरितो मन्त्रः। इति सिद्धान्तकौमुदी॥

पौरोडाग्निकः, पुं, (पुरोडाग्निसहचरितो मन्त्रः पुरोडाग्निः स एव पौरोडाग्निः। तस्य व्याख्यानमत्र भवो वा। "पौरोडाग्नि-पुरोडाग्निात् ठञ्।" ४। ३। ७०। इति ठञ्।) पुरोडाग्निकः। इति सिद्धान्तकौमुदी॥

पौर्णमासः, पुं, (पौर्णमास्यां भवः। पौर्णमासी+"सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।" ४। ३। १६। इत्यण्।) यागविशेषः। इत्यमरः। २। ७। ४८॥ (यथा, मनुः। ४। २५।

"दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि॥")

तथा हि। अमावस्यायां अमावस्यया यजेत पौर्णमास्यां पौर्णमास्या यजेत इति श्रुतिविहितदर्शपौर्णमासयागयोः कर्म्मस्वरूपप्रापकयोरुत्पत्तिश्रुतीः समामनन्ति। यथा। आग्नेयाष्टाकपालोऽमावस्यायां पौर्णमास्यां चाच्युतो भवति। उपांशुयाजमन्तरा यजति ताभ्यामेवाग्नीषोमीयमेकादशकपालं पौर्णमास्यामेव प्रायच्छत् ऐन्द्रं दधि भवत्यमावास्यायामैन्द्रं पयो भवत्यमावास्यायामिति। ताभ्यामाग्नेयाष्टाकपालोपांशुयाजाभ्याम्। तेन आग्नेयाष्टाकपालोपांशुयाजाग्नीषोमीयैकादशकपालाभ्यां पौर्णमास्याम्। आग्नेयाष्टाकपालेनैन्द्रदधियागेनैन्द्रपयोयागाभ्यामित्यर्थः। आसु श्रुतिषु अमावास्यापौर्णमासीपदानि प्रतिपत्सहितानेतदुभयपराणि। तत्र पूर्व्वयोर्यागारम्भः प्रतिपदोर्यागः। तथा च ऐन्द्रवे पौर्णमास्यौ ऐ अमावास्ये तस्मात् प्रतिपदुपवसन् यजेतापरेद्युरिति श्रुतिः। अस्यार्थः। यावज्जीविकयोर्दर्शपौर्णमासयोः प्रकृतिभूतयोर्विकृतिभूतौ दर्शपौर्णमासौ कौक्कुपाधिकामवेनीयौ पश्चादौ कर्त्तव्यौ।" इति मलमासतत्त्वम्॥

पौर्णमासी, स्त्री, (पूर्णो मासोऽस्यां वर्त्तते इति। पूर्णमासाद्यत् वक्तव्य इत्यत्। ततो ङीप्।) पूर्णिमा। इत्यमरः। १। ४। ७॥

पौर्व्वाह्णिकः, त्रि, (पूर्व्वाह्ण + "विभाषा पूर्व्वाह्णापराह्णाभ्याम्।" ४ । ३ । २३ । इति ठञ् ।) पूर्व्वाह्णे भवः। पूर्व्वाह्णसम्बन्धी । इति सिद्धान्तकौमुदी ॥

पौलस्ती, स्त्री, (पुलस्तेः अपत्यम् । पुलस्त + यञ् । ङीप् । यलोपः ।) कुबेरमाता । इति व्याकरणम् ॥

पौलस्त्यः, पुं, (पुलस्तेरपत्यमिति। पुलस्ति + गर्गादित्वात् यञ् ।) कुबेरः । इत्यमरः । १ । १ । ७२ ॥ रावणः । इति मेदिनी ॥ (यथा, हरिवंशे । ३३ । ३५ ।

"समोच रक्षः पौलस्त्यं पुलस्त्येनानुयाचितः॥")

विभीषणः । इति शब्दरत्नावली ॥

पौलिः, पुं, (पौलनोति । पुल महत्त्वे + ज्वलादित्वात् णः । पौलेन निर्व्वृत्तः । सुतङ्गमादित्वात् इञ् ।) पाकावस्थागतकलायादिः । आरब्धपाकयवसधर्म्मादिः । वह्निना ईषद्दग्धपुटपुटग्रन्थवान् । इति कैचित् । दरदग्धः । इति श्रीधरः । इति भरतः ॥ तत्पर्य्यायः ॥ आपक्वम् २ अभ्युषः ३ । इत्यमरः ॥ अभ्युषः ४ अभ्योषः ५ । इति भरतः ॥

पौलोमी, स्त्री, (पुलोम्नोऽपत्यमिति । पुलोमन् + ङीष् । अनो लोपः ।) शची । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ७ । ६ ।

"विराजमानः पौलोम्या सहार्द्धासनयाद्भुतम्॥")

पौषः, पुं, (पौषी पौर्णमास्यस्मिन्निति । सास्मिन् पौर्णमासीत्यण् ।) वैशाखादिद्वादशमासानामष्टमनवममासः । पुष्यनक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । तत्पर्य्यायः । तैषः २ सहस्यः ३ । इत्यमरः ॥ पौषिकः ४ हैमनः ५ । इति राजनिर्घण्टः ॥ तिष्यः ६ तिष्यकः ७ । इति शब्दरत्नावली ॥ अयं धनुःसंक्रान्तिप्रारभ्यमकरसंक्रान्तिपर्य्यन्तरूपो मुख्यचान्द्रः । लग्नप्रतिपदादिपौर्णमास्यन्तरूपो गौणचान्द्रः । धनूराशिस्थरविकः सौरः । इति स्मृतिः ॥ * ॥ तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।

"निगूढमन्त्रः सुभगाङ्गयष्टिः
परोपकारी पितृवित्तहीनः ।
कदान्वितार्थव्ययलब्धिभिन्नः
पौषप्रसूतः पुरुषः सुधीरः ॥"

पौषी, स्त्री, (पुष्य + "नक्षत्रेण युक्तः ।" इत्यण् । तिष्यपुष्येति यलोपः ।) पुष्ययुक्ता पौर्णमासी । इत्यमरः ॥ पुष्येण युक्ता रात्रिः । इति मुग्धबोधव्याकरणम् ॥

पौष्करं, क्ली, (पुष्करस्येदमिति । पुष्कर + अण् ।) पुष्करमूलम् । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो गुणाश्च यथा,—

"उक्तं पुष्करमूलन्तु पौष्करं पुष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः ॥
पौष्करं कटुकन्तिक्तमुष्णं वातकफज्वरान् ।
हन्ति श्वोथार्त्तिश्वासान् विशेषात् पार्श्वशूलनुत् ॥"

अस्य प्रतिनिषेधो यथा,—

"पौष्कराभावतः कुष्ठम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

पौष्करमूलं, क्ली, (पौष्करं मूलम् ।) पुष्करमूलम् । यथा,—

"मूले पुष्करकाश्मीरपद्मपत्राणि पौष्करे ।"

इत्यमरः ॥

"पौष्करे पुष्करमूले । पुष्करं सुगन्धिद्रव्यं वणिक्ख्यातं तस्य इदं पौष्करं स्यात् पौष्करे मूले पुष्करादौत्सर्गिकोऽण्यः ।" इति भरतः ॥

पौष्करिणी, स्त्री, (पौष्करं पुष्कराणां समूहोऽस्या अस्तीति। पौष्कर + इनि । स्त्रियां ङीप् ।) पुष्करिणी । इति शब्दरत्नावली ॥

पौष्टिकं, क्ली, (पुष्टौ हितमिति । पुष्टि + ठञ् ।) गौरसमये गात्राच्छादनवस्त्रविशेषः । कावाइ इति भाषा ॥ अस्य गुणाः । धनत्वम् । आयुष्यत्वम् । शुचित्वम् । रूपविराजनत्वञ्च । इति राजवल्लभः ॥ धन्यं धनत्वम् । बल्यमिति वा पाठः । पुष्टिर्धनत्वादीनां वृद्धिरित्यभिधीयते । तद्धेतुभूतं कर्म्म । इति दुर्गाभक्तः ॥ (पुष्टिहिते, त्रि । यथा, महाभारते । १२ । २६६ । २८ ।

"सतां वृत्तमधिष्ठाय निर्द्दीनानुज्झितैषिणः ।
मन्त्रवर्त्म न दुष्यन्ति कुर्व्वाणाः पौष्टिकीः क्रियाः ॥")

पौष्यं, त्रि. (पुष्येण निर्व्वृत्तम् । पुष्यस्येदं वेति । पुष्य + अण् ।) पुष्यनिर्म्मितम् । पुष्यसम्बन्धि । यथा, कालिकापुराणे ६७ अध्याये ।

"आसनं प्रथमं दद्यात् पौष्यं दारुजमेव वा ।
वाल्कं वा चार्म्मजं कौशं मण्डलस्योत्तरे त्यजेत् ॥"

पौष्यकं, क्ली, (पुष्येण क्रायतीति। कै + कः । पुष्यक + स्वार्थे अण् ।) कुसुमाञ्जनम् । इत्यमरः ॥

पौष्यी, स्त्री, (पुष्यस्य इयं इति । पुष्य + अण् । गौरादित्वात् ङीष् । पुष्याख्यया प्रसिद्धत्वात् तथात्वम् ।) देशविशेषः । यथा,—

"अथ पुष्यपुरं पौष्यी तथा पाटलिपुत्रकम् ॥"

इति शब्दरत्नावली ॥

पौष्यः, पुं, (पूष्णोऽपत्यमिति । पूषन् + ष्यञ् ।) पूषपुत्रः । स च करवीरपुरस्य राजा । तस्य पुत्रः श्रियांशुलक्षचन्द्रशेखरः । यथा,—

"पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वशास्त्रार्थपारगः ।
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः ॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः ।
ब्रह्मदत्तफलं हस्ते ददेदं तमुवाच ह ॥
इदं फलं ब्रह्मदत्तं विभज्य नृपते ! त्रिधा ।
भोजयेस्ताः स्वजायास्तं प्रहृष्टः शुद्धमानसः ॥
ततः पत्नी स्वयं देवः प्रविवेश वृषध्वजः ।
तत्तृतीयात्तत फलं भूतं त्रिभागं स्वयमेव हि ॥
ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् ।
ततः पत्नं नृपश्रादूर्ल ! गर्भाधाप्ताहिताः सुताः ॥
सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत ।
खड्गत्रयं पृथक् राजा यत्नो भर्गेण भाषितम् ॥
तच्च खड्गत्रयं पौष्यो यथास्थानं नियोज्य च ।
एकं पिङ्गं चकारापु तत्र पुत्रो व्यजायत ॥
तस्य नामाकरोद्राजा ब्राह्मणैः सैः पुरोहितैः ।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमः सम ॥
ब्रह्मावर्त्तनाम्नि रम्ये करवीराह्वये पुरे ।
इक्षुवतीनदीतीरे राजा भूत्वा समोद स ॥"

इति कालिकापुराणे ७६ अध्यायात् सङ्कलितः ॥ (नृपभेदः । स तु गुरुदक्षिणार्थमागताय उत्तङ्काय कुण्डले दत्तवान् । यथा, महाभारते । १ । ३ । २१२ ।

"तस्तुतङ्कं पौष्यः प्रत्युवाच भगवन्चिरेण प्राप्तमासाद्यते भवांश्च गुरुवानतिथिश्चातिथीन् आहं कर्त्तुं क्रियतां यत्न इति॥" एतच्छ्रीपर्व्वविवरणन्तु तत्रैव द्रष्टव्यम् ॥)

प्याट्, य, त्रै । भौ: । इत्यमरः । ३ । ४ । ७ ॥

प्याय, ओ ईं इ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ओ ईं, पीनं सुखम् । उपसर्गात्तु प्रप्यानम् । अस्माद्धे तु प्यानः पीनः स्वेदः । ड, प्यायते । इति दुर्गादासः ॥

प्युष, क उत्सर्गे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । उत्सर्गे उत्सर्गः । क, प्योषयति धनं दाता । इति दुर्गादासः ॥

प्युष, य इर् भागे । दाहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थाद्ययुक्तः । य, प्युष्यति धनं दायादः । इर्, अप्युषत् अप्योषीत् । अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

प्ये, ङ वृद्धौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) अन्तःस्थाद्ययुक्तः । ङ, प्यायते । इति दुर्गादासः ॥

प्र, य, (प्रथयतीति । प्रथ + डः ।) विंशत्युपसर्गान्तर्गतप्रथमोपसर्गः । अस्यार्थाः । गतिः । आरम्भः । उत्कर्षः । सम्भवोभावः । प्राथम्यम् । ख्यातिः । उत्पत्तिः । व्यवहारः । इति दुर्गादासधृतपुरुषोत्तमः ॥

प्रकटं, त्रि, (प्रकटतीति । प्र + कट + अच् ।) अदृश्यम् । अस्य पर्य्यायः प्रकाशग्रन्थे द्रष्टव्यः ।

"प्रकटाप्रकटा चेति लीला सैवं द्विधोच्यते ।"

इति भागवतामृतम् ॥

(यथा च, देवीभागवते । १ । ७ । ६८ ।

"जानन्ति ये न तव देवि ! परं प्रभावं
ध्यायन्ति ते हरिहरावपि मन्दचित्ताः ।
ज्ञातं मयाद्य जननि ! प्रकटं प्रभावं
यद्विष्णुरप्यतितरां विवशोऽथ जीते ॥")

प्रकटितं, त्रि, (प्र + कट + क्त ।) प्रकाशितम् । हैमचन्द्रः ॥ (यथा, देवीभागवते । १ । ७ । ६९

प्रकर

"खट्वाङ्ग मां भगवति ! प्रक्षिपाग्निं यै-
रेभिश्चाङ्गि ते कृत एषां परिस्खल्न मौनम् ।
ब्रह्मादिमौ प्रकटितौ किल कालरूपौ
यद्वा भवानि ! क्षपितुं तु किमिच्छसे त्वम् ॥")

प्रकम्पनः, पुं, (प्रकम्पयतीति । प्र + कपि + णिच् + ल्यु ।) वायुः । इति हेमचन्द्रः ॥ (यथा, माघे । १ । ६१ ।

"विघ्नान्नगारीपरिधानधूनन-
क्षुटाजसाम्यूरुषु लोलचक्षुषः ।
प्रियेव तस्थानपराधबाधिताः
प्रकम्पनेनानुचकम्पिरे सुराः ॥")

नरकविशेषः । इति शब्दरत्नावली । (राक्षस-विशेषः । इति रामायणम् ॥ प्र + कपि + ल्युट् ।) कम्पातिशये, क्ली ॥

प्रकरं, क्ली, (प्रकीर्यते इति । प्र + कॄ + कर्मणि अप् ।) अगुरु । इति मेदिनी । रे, १७८ ॥

प्रकरः, पुं, (प्रकिरतीति । प्र + कॄ + अच् ।) समूहः । (प्रकीर्यते इति । प्र + डु + "ऋदोरप्" । ३ । ३ । ५७ । इति अप् ।) विकीर्ण-कुसुमादिः । इति मेदिनी । रे, १७८ ॥ (यथा, अमरुके । ३ ।

"यत्राग्रयो जगति तत्रागता वसतु कुत्रापि
निस्तुलसुखा
सुग्रामकालसुखसत्राग्रणप्रकरतुल्यकारि-
चरणा ।
कृत्रानिलातिरयपत्राभिरामगुणमित्रामरीसम-
वधूः
कुत्रासदृग्मणिविचित्राजिरः स्फुरितपुत्रादि-
दानविधुरा ॥")

प्रकरणं, क्ली, (प्रक्रियते अस्मिन्निति । प्र + कॄ + आधारे ल्युट् ।) प्रस्तावः । (वृत्तान्तः । इत्यमरः । ३ । १ । ६२ ॥ यथा, महाभारते । ३ । २०३ । २१ ।

"एतत्प्रकरणं राजन्नधिकृत्य युधिष्ठिर ! ।
पतिव्रतानां नियतं धर्म्मेष्वावहितः शृणु ॥")

अभिनेयप्रकारः । रूपकभेदः । इति हेमचन्द्रः ॥ यत्यसन्धिः । इति त्रिकाण्डशेषः ॥ पादः । स तु एकार्थावच्छिन्नश्लोकसमूहः । इति मुग्धबोध-टीकायां दुर्गादासः ॥ (नाटकोक्तप्रकरणं तल्लक्षणादिर्यथा, साहित्यदर्पणे । ६ । २७० — २७१ ।

"भवेत् प्रकरणं वृत्तं लौकिकं कविकल्पितम् ।
अङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा
वणिक् ॥
त्रिवर्गसेवकः शास्त्रविशारदो धीरप्रशान्तकः ॥
विप्रनायकं यथा मृच्छकटिकम् । अमात्यनायकं मालतीमाधवम् । वणिङ्नायकं पुष्पभूषितम् ।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं
क्वचित् ।
तेन भेदत्रयस्यास्य तत्र भेदस्तृतीयकः ॥
क्षितवद्यूतकारादिविटचेटकसङ्कुलः ॥
कुलस्त्री पुष्पभूषिते । वेश्या तु रङ्गदत्ते । ते अपि मृच्छकटिके । अस्य नाटकप्रतिच्छन्दत्वात् प्रायं नाटकवत् ॥")

प्रकरी, स्त्री, (प्रकीर्यते अनेति । प्र + कॄ + अप् । गौरादित्वात् ङीष् ।) नाट्याङ्गम् । चक्रवर्त्तभूमिः । इति शब्दरत्नावली ॥

प्रकर्षः, पुं. (प्र + कृष् + भावे घञ् ।) उत्कर्षः । यथा, काव्यप्रकाशे ।

"गुणप्रकर्षेऽप्यनोऽनुरज्यते
जनानुरागप्रभवा हि सम्पदः ॥"

(यथा च महाभारते । १ । १५६ । ३७ ।

"बालोऽपि यौवनं प्राप्य मानुषेषु विशाम्पते ! ।
सर्व्वाञ्छेषु परं वीरः प्रकर्षमगमद्बली ॥")

प्रकाशः, पुं क्ली, (प्रज्वरः काशः इति प्रादिसमासः ।) मूलादारभ्य ग्राखावधिदृश्य-भागः । गुँड़ी इति भाषा । तत्पर्य्यायः । स्कन्धः २ । इत्यमरः । २ । ४ । १०० । काण्डम् ३ । इति शब्दरत्नावली ॥ दण्डः ४ । इति राज-निर्घण्टः ॥ विटपः । गुल्मः । इति मेदिनी । डे, ११ । (यथा, अमरे । १ । ४ । २७ ।

"मतल्लिका मतल्लीका प्रकाण्डस्तुङ्गनल्लजौ ।
प्रशस्तवाचकाश्चान्यशुभावहो विधिः ॥")

प्रकाण्ड + स्वार्थे कन्प्रत्ययेन प्रशस्तार्थे । यथा, भट्टौ । ५ । ६ ।

"दक्षकामध्वजात्तां यौ वीर ! दक्षःप्रकाण्डकौ ।
वृथा संक्षोऽक्षजातां तौ सम्प्रत्यौ भूमिवर्द्धनौ ॥"

"दक्षःप्रकाण्डकौ प्रशस्तौ राजसौ ।" इति तट्टीकायां जयमङ्गलः ॥)

प्रकाण्डरः, पुं, (प्रकाण्डं राति ग्रहातीति । रा + कः ।) वृक्षः । इति शब्दचन्द्रिका ॥

प्रकामं, त्रि, (प्रगतं कामम्मिति प्रादिसमासः ।) यथेच्छितम् । इत्यमरः ॥ (यथा, महाभारते । ४ । १३ । २६ ।

"चित्रमाल्याम्बरधरा सर्व्वाभरणभूषिता ।
कामं प्रकामं सेवस्व मया सह विलासिनि ! ॥")

प्रकारः, पुं, (प्रभेदकरणं प्रहरणकरणं वेति । प्र + कृ + घञ् ।) भेदः । (यथा, पञ्चदश्याम् । ७ । १७७ ।

"अन्नाति वा नवान्नाति मुङ्क्ते वा स्वेच्छया-
न्यथा ।
येन केन प्रकारेण सुधामयनिनीषति ॥")

साहश्यम् । इत्यमरः । २ । ६ । ५७ ॥

प्रकाश्यं, क्ली, (प्रकाश्यते इति । प्र + काश् + अच् ।) कांस्यम् । इति हेमचन्द्रः ॥ (दीप्तिः । यथा, महाभारते । ३ । १७१ । २७ ।

"पुनः प्रकाश्यमभवत् तमसा यस्यते पुनः ।
भवत्यदृश्यो लोकः पुनरेषु निमज्जति ॥")

प्रकाशः, पुं, (प्रकाशते इति । प्र + काश् + अच् ।) दीप्तः । तत्पर्य्यायः । द्योतः २ आतपः ३ । इत्यमरः । १ । ४ । ३४ ॥ राजनिर्घण्टोक्त-पर्य्यायाः प्रभाशब्दे द्रष्टव्याः ॥ (यथा, पञ्च-दश्याम् । २ । ३८ ।

"निर्व्वातगेहमध्यस्थे प्रकाशतमसी विना ।
न दृष्टं किञ्च ते पश्चे न प्रत्यक्षं वियत् खलु ॥")

प्रदीपः । तत्पर्य्यायः । स्फुटम् २ व्यक्तम् ३ प्रकटम् ४ उच्चलम् ५ अञ्जस् ६ । इति हेम-चन्द्रः ॥ प्रवणः ७ उन्निद्रम् ८ । इति जटा-धरः ॥ प्रद्यावः । इति मेदिनी । शे, २७ ॥ अतिप्रसिद्धः । इति शब्दरत्नावलिश्च ॥

प्रकाशकः, त्रि, प्रकाशकर्त्ता । प्रकाशयतीत्यर्थे (ण्वुल्) वकप्रत्ययः ॥ (यथा, भगवद्गीतायाम् । १३ । ६ ।

"तच्च सर्व्वं निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥")

प्रकाशकज्ञाता, [तृ] पुं, (प्रकाशकस्य ज्ञाता ।) कुक्कुटः । इति शब्दचन्द्रिका ॥ प्रकाशकज्ञातरि, त्रि ॥

प्रकाशात्मा, [त्मन्] पुं, (प्रकाश आत्मा स्वरूपं देहो वा यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥ प्रकाशस्वभावे, त्रि ॥

प्रकाशितं, त्रि, (प्रकाशो जातोऽस्येति । प्रकाश + तारकादित्वात् इतच् । यद्वा, प्र + काश् + णिच् + क्त ।) प्रकाशविशिष्टम् । तत्पर्य्यायः । दर्शितम् २ आविष्कृतम् ३ प्रकटितम् ४ । इति हेमचन्द्रः ॥

प्रकीर्णं, क्ली, (प्रकीर्य्यते क्षेपणीयतयेति । प्र + कॄ विक्षेपे + क्तः ।) अग्रविच्छेदः । इति जटाधरः ॥ चामरम् । इति त्रिकाण्डशेषः ॥

प्रकीर्णः, पुं, (प्रकीर्य्यते दुर्गन्धमनेनेति । प्र + कॄ + क्तः ।) पूतिकरञ्जः । इति राजनिर्घण्टः ॥

प्रकीर्णः, त्रि, (प्रकीर्य्यते क्षेपणीयतयेति । प्र + कॄ + क्तः ।) विक्षिप्तः । विस्तृतः । यथा,—

"प्रकीर्णाभाङ्गामनवेषकारिणीं
सदैव भर्त्तुः प्रतिकूलवादिनीम् ।
परस्य वेश्माभिरतामलज्जा-
मेवंविधां स्त्रीं परिवर्জ্জयामि ॥"

इति लक्ष्मीचरित्रम् ॥

नानाप्रकारमिश्रितः । यथा,—

"प्रकीर्णैः पुष्पाणां चरितचरणोरञ्जलिरयम् ॥"

इति वेणीसंहारः ।

प्रकीर्णकं, क्ली, (प्रकीर्ण + स्वार्थे कन् ।) चामरम् । इत्यमरः । २ । ८ । ३१ ॥ विस्तारः । इति मेदिनी । के, १६६ ॥ ग्रन्थविच्छेदः । इति हेम-चन्द्रः ॥ पापविशेषः । तथा च विष्णुः । यदुक्तं तत् प्रकीर्णकम् ।

"प्रकीर्णपातके ज्ञात्वा गुरुत्वमथ लाघवम् ।
प्रायश्चित्तं बुधः कुर्य्यात् ब्राह्मणानुमते यदा ॥"

अनुक्तं अनुक्तनिष्कृतिकं पापम् ।

"अतिपातकाद्यन्यतमत्वेन विशेषतोऽनुक्तकम् ॥"

इति प्रायश्चित्तविवेकः ॥

प्रकीर्य्यकः, पुं, (प्रकीर्य्य + संज्ञायां कन् ।) तुरङ्गमः । इति मेदिनी । के, १६६ ॥ (यथा, महाभारते । ७ । १५ । ६७ ।

"आरूढान् शिक्षितैर्योधैः शस्त्रदृष्टिपराङ्-
मुखैभिः ।
विध्वस्तचामरकृपान् विप्रविद्धप्रकीर्य्यकान् ॥")

प्रकीर्त्तितं, त्रि, (प्रकीर्त्यते स्मेति । प्र + कॄत् + क्तः ।) कथितम् । यथा,—

"प्रभूतमल्पं कार्यं वा यो नरः कर्त्तुमिच्छति ।
सर्व्वारम्भेण तत् कुर्य्यात् सिंहादेकं प्रकीर्त्तितम्॥"
इति चाणक्यसंग्रहः ॥

प्रकीर्य्यः, पुं, (प्रकीर्य्यते इति । प्र + कॄ + अन्नाद्यादित्वात् यक् ।) करञ्जभेदः । इत्यमरः ॥ नाटाकरञ्ज इति भाषा ॥ क्षुतकरञ्जः । रौठाकरञ्जः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"क्षुतपूर्य्यकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च ।
स चोक्तः पूतिकरञ्जः सोमवल्कश्च स क्षुतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

प्रकुर्वं, क्ली, (प्रकर्षेण कोलति राशीकरोति मेघोकरोति वेति । प्र + कुल + कः ।) प्रघसवपुः । इति त्रिकाण्डशेषः ॥

प्रकृतः, त्रि, (प्रक्रियते स्मेति । प्र + कृ + क्तः ।) प्रकरणप्राप्तः । यथा । प्रकृतमनुसरामः । प्रकर्षेण कृतः । अविकृतः । प्रपूर्व्वकृधातोः कर्म्मणि क्तप्रत्ययः ॥ (प्रकान्तः । यथा, माघे ।१९ ।४२ ।
"प्रकृतजपविधीनामास्थितस्यान्तरङ्गै-
रनुदुरपि हितमौष्ठैरक्षरैर्लक्ष्यमाणैः ॥")

प्रकृतिः, स्त्री, (प्रक्रियते कार्य्यादिकमनयेति । प्र + कृ + क्तिन् ।) स्वभावः । (यथा चरके विमानस्थाने प्रथमेऽध्याये ।
"तत्र प्रकृतिरुच्यते स्वभावो यः स पुनराहारौषधद्रव्याणां स्वभाविको गुर्व्वादिगुणयोगः । तद्यथा मानुषस्तयोः शूकरेणयोश्च ।") योनिः । लिङ्गम् ॥ स्वामी । अमात्यः । सुहृत् । कोषः । राष्ट्रम् । दुर्गम् । बलम् । (यथा, मनौ ।९।२९४।
"स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा ।
सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥"
धर्म्माध्यक्षादिसप्तप्रकृतयो यथा,—
"धर्म्माध्यक्षो धनाध्यक्षः कोषाध्यक्षश्च भूपतिः ।
दूतः पुरोधा दैवज्ञः सप्त प्रकृतयोऽभवन् ॥")
पौराणां श्रेण्यः । इत्यमरः । २ । ८ । १८ ॥
(यथा, मार्कण्डेये । १६ । २० ।
"प्रक्षिप्यैव ततस्तस्मै दत्तात्रेयाय सोऽर्ज्जुनः ।
आनाय्य प्रकृतीः सम्यगभिषेकमयाचत ॥"
स्वरूपावस्था । यथा, हितोपदेशे । २ । १६६ ।
"क्षेदितो मर्द्दितश्चैव रज्जुभिः परिवेष्टितः ।
सूक्ष्मो द्वादशभिर्वर्षैः स्वपुच्छः प्रकृतिं गतः ॥")
स्त्रियाम् । इति हेमचन्द्रः ॥ शक्तिः । (यथा,—
"प्रधानं प्रकृतिः शक्तिर्निद्याचाविद्यतिस्तथा ।
एतानि तस्या नामानि स्त्रियमाश्रित्य याः
स्थिताः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)
योषित् । इति शब्दरत्नावली ॥ परमात्मा । इति धरणिः । पञ्चभूतानि । करणम् । गुह्यम् । जनुः । एकविंशत्यक्षरपादच्छन्दोविशेषः । माता । इति नानार्थरत्नमाला ॥ प्रत्ययात् प्रथमः । स च द्विधा धातुनाम च । इत्यजयपालः ॥ (प्रकर्षेण कृत्यादिकं करोतीति । प्र + कृ + कर्त्तरि क्तिच् ।) भगवतो मायाख्या शक्तिः । सा च परापरभेदेन द्विधा । यथा,—

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत्॥"५॥
इति श्रीभगवद्गीतायां ७ अध्यायः ॥

"एवं श्रोतारमभिसन्धीकृत्य इदानीं प्रकृतिद्वारा सृष्ट्यादिकर्त्तृत्वेन ईश्वरतत्त्वं प्रतिज्ञातं निरूपयितुं परापरभेदेन प्रकृतित्रयमाह भूमिरिति द्वाभ्याम् । भूम्यादीनि पञ्चभूतसूक्ष्माणि मनःशब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना । यदा भूम्यादिशब्दैः पञ्च महाभूतानि सूक्ष्मैः सह एकीकृत्य गृह्यन्ते । अहङ्कारशब्देनैवाहङ्कारं तेनैव तत्कार्य्याणि इन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वम् । मनःशब्देन तु मनसैवोन्नेयं अव्यक्तस्वरूपं प्रधानमित्यनेन प्रकारेण मे प्रकृतिर्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता । चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवान्तर्भावविवक्षयाऽष्टधा भिन्नेत्युक्तम् । तथा च श्वेताश्वतरे इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति ।
'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः ॥'
इति ॥ ४ ॥
अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति । अष्टधा प्रकृतिरुक्ता इयमपरा निकृष्टा जड़त्वात् परार्थत्वाच्च । इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि । परत्वे हेतुः यया चेतनया चेतनस्वरूपया स्वकर्म्मद्वारेणेदं जगद्धार्य्यते ॥" ५ ॥ इति टीकायां श्रीधरस्वामी ॥
सत्त्वरजस्तमसां साम्यावस्था । यथा,—
"सत्त्वं रजस्तमश्चैव गुणत्रयमुदाहृतम् ।
साम्यावस्थितिरेतेषां प्रकृतिः परिकीर्त्तिता ॥
केचित् प्रधानमित्याहुरव्यक्तमपरे जगुः ।
एतदेव प्रजासृष्टिं करोति विकरोति च ॥"
इति मात्स्ये ३ अध्यायः ॥
तत्पर्य्यायः । प्रधानम् २ । इत्यमरः ॥ माया ३ शक्तिः ४ चैतन्यम् ५ । इति राजनिर्घण्टः ॥
तस्या नामान्तराणि यथा,—
"तमोऽव्यक्तं शिवो धाम रजो योनिः सनातनः ।
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ ॥
अनुद्रिक्तमनूनं वाप्यकम्पमचलं ध्रुवम् ।
सदसच्चैव तत्सर्व्वमयुक्तं त्रिगुणं क्षुतम् ।
ज्ञेयानि नामधेयानि मनीषाभिश्चिन्तकैः ॥
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्व्वाणि गतीश्च केवलाः ।
विसृक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्व्वगुणैर्निरामयः ॥"
इति महाभारते आश्वमेधिकपर्व्व ॥ * ॥
सा पञ्चविधा ।

"गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती ।
सावित्री च सृष्टिविधौ प्रकृतिः पञ्चमी स्मृता ॥" * ॥
तस्या व्युत्पत्तिर्यथा,—
"प्रकृष्टवाचकः प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्त्तिता ॥
गुणे प्रकृष्टे सत्त्वे च प्रशब्दो वर्त्तते श्रुतौ ।
मध्यमे रजसि ज्ञेय तिशब्दस्तामसः स्मृतः ॥
त्रिगुणात्मस्वरूपा या सर्व्वशक्तिसमन्विता ।
प्रधाना सृष्टिकरणी प्रकृतिस्तेन कथ्यते ॥
प्रथमे वर्त्तते प्रश्च कृतिश्च सृष्टिवाचकः ।
सृष्टेराद्या च या देवी प्रकृतिः सा प्रकीर्त्तिता ॥" * ॥
तासां उत्पत्तिः स्वरूपञ्च यथा,—
"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः ।
पुमांश्च दक्षिणार्द्धाङ्गात् वामार्द्धाङ्गात् प्रकृतिः स्मृता ॥
सा च ब्रह्मस्वरूपा च या या नित्या सनातनी ।
यथात्मा च तथाशक्तिर्यथाग्नौ दाहिका स्मृता ॥
अतएव हि योगीन्द्रः स्त्रीपुंभेदं न मन्यते ।
सर्व्वं ब्रह्ममयं ब्रह्मन् ! ब्रह्मतः प्रकृतिर्न हि ॥
स्वेच्छामयः स्वेच्छया च श्रीकृष्णस्य विग्रहणा ।
सावित्रेबभूव सहसा मूलप्रकृतिरीश्वरी ।
तदाज्ञया पञ्चविधा सृष्टिकर्म्मणि वेदतः ॥"
दुर्गाप्रकृतिर्यथा,—
"अथ भक्तानुरोधाद्वा भक्तानुग्रहविग्रहा ।
गणेशमाता दुर्गा या शिवरूपा शिवप्रिया ॥
नारायणी विष्णुमाया पूर्णब्रह्मस्वरूपिणी ।
ब्रह्मादिदेवैर्मुनिभिर्मनुभिः पूजिता स्तुता ॥
सर्व्वाधिष्ठातृदेवी सा सर्व्वरूपा सनातनी ।
धर्म्मसत्यपुण्यकीर्त्तियशोमङ्गलदायिनी ॥
सुखमोक्षहर्षदात्री शोकार्त्तिदुर्गनाशिनी ।
शरणागतदीनार्त्तपरित्राणपरायणा ॥
तेजःस्वरूपा परमा तदधिष्ठातृदेवता ।
सर्व्वशक्तिस्वरूपा च शक्तिरीशस्य सम्मतम् ॥
सिद्धेश्वरी सिद्धरूपा सिद्धिदा सिद्धिदेश्वरी ।
बुद्धिर्निद्रा क्षुत्पिपासा छाया तन्द्रा दया स्मृतिः ॥
जातिः भ्रान्तिश्च शान्तिश्च कान्तिर्भ्रान्तिश्च चेतना ।
तुष्टिः पुष्टिस्तथा लक्ष्मीर्वृत्तिर्मासा तथैव च ॥
सर्व्वशक्तिस्वरूपा सा कृष्णस्य परमात्मनः ।
उक्ता श्रुतौ स्मृतिगुणश्चातिस्तुत्यं यथागमम् ॥
गुणोऽत्यल्पोऽल्पतायाश्च अपराश्च निगद्यते॥"१
लक्ष्मीप्रकृतिर्यथा,—
"शुद्धसत्त्वस्वरूपा या पद्मा च परमात्मनः ।
सर्व्वसम्पत्स्वरूपा सा तदधिष्ठातृदेवता ॥
क्षान्ता दान्ता च शान्ता च सुशीला सर्व्वमङ्गला ।
लोभमोहकामरोषाहङ्कारपरिवर्জ্জিতা ॥
भक्तानुरक्ता पतिषु सर्व्वाभ्यश्च पतिव्रता ।
प्राणतुल्या भगवतः प्रेमपात्री प्रियंवदा ॥

सर्वग्रन्थालिका सर्वजीवनीपायरूपिणी ।
महालक्ष्मीश्च वैकुण्ठे पाताले वरदा सती ॥
स्वर्गे च स्वर्गलक्ष्मीश्च मर्त्यानां गृहिणाश्रया ।
सर्वप्राणिषु श्रद्धेषु श्रीभारूपा मनोहरा ॥
प्रीतिरूपा पुण्यवतां प्रभारूपा नृपेषु च ।
वाणिज्यरूपा वणिजां पापिनां कलहाङ्कुरा ॥
दयामयी भक्तिमतो भक्तानुग्रहकातरा ।
सपत्ने सपत्नजा भक्ता सम्पदे च धनाय च ॥
जगाज्जीवं मृतं सर्वं यया दृष्ट्या विना सुने ! ।
मूर्त्तिर्द्वितीया कथिता वेदोक्ता सर्वसम्मता ॥
सर्वपूज्या सर्ववन्द्या साध्वी मान्या निशामय ॥" २ ॥ * ॥

सरस्वतीप्रकृतिर्यथा,—

"वाग्बुद्धिविद्याज्ञानाधिदेवता परमात्मनः ।
सर्वविद्या सर्वरूपा सा च देवी सरस्वती ॥
सद्बुद्धिकविता मेधा प्रतिभा स्मृतिदा सताम् ।
नानाप्रकारविद्यानभेदार्थकल्पनाप्रदा ॥
व्याख्या बोधस्वरूपा च सर्वसन्देहभञ्जिनी ।
विचारकारिणी ग्रन्थकारिणी मूर्त्तिरूपिणी ॥
सरस्वतीतन्त्रमानमालंकारस्वरूपिणी ।
विषयज्ञानवाग्रूपा प्रतिविम्बेषु जीविनाम् ॥
व्याख्या सुधाकरा ग्राम्या वीणापुस्तकधारिणी ।
ग्रन्थ सत्त्वस्वरूपा च सुशीला श्रीहरिप्रिया ॥
हिमचन्दनकुन्देन्दुकुसुदाम्भोजसन्निभा ।
जपन्ती परमात्मानं श्रीकृष्णं रत्नमालया ॥
तपःस्वरूपा तपसां फलदात्री तपस्विनी ।
बुद्धिविद्यास्वरूपा च सर्वसिद्धिप्रदा सदा ॥
यया विना च विश्वेषु मूकी मृतसमः सदा ।
देवी तृतीया गदिता मुक्ता जगदम्बिका ॥
यथागमं यथाकिञ्चित्परां संनिबोध मे ॥"३॥ * ॥

सावित्री प्रकृतिर्यथा,—

"माता चतुर्णां वेदानां वेदज्ञानस्य छन्दसाम् ।
सन्ध्यावन्दनमन्त्राणां तन्त्राणाञ्च विचक्षणा ॥
द्विजातिजातिरूपा च जपरूपा तपस्विनी ।
ब्रह्मतेजोरूपा च सर्वसंस्कारकारिणी ॥
पवित्ररूपा सावित्री गायत्री ब्रह्मणः प्रिया ।
तीर्थानि यस्याः संस्पर्शं दर्शं वाञ्छन्ति शुद्धये ॥
शुद्धस्फटिकसङ्काशा शुद्धसत्त्वस्वरूपिणी ।
परमानन्दरूपा च परमा च सनातनी ॥
परब्रह्मस्वरूपा च निर्वाणपददायिनी ।
ब्रह्मतेजोमयी मूर्त्तिस्तदधिष्ठातृदेवता ॥
यत्पादरजसा पूतं जगत् सर्वञ्च नारद ! ।
देवी चतुर्थी कथिता पञ्चभिर्वर्णयामि ते ॥"४॥

राधाप्रकृतिर्यथा,—

"प्रेमप्राणाधिका देवी या पद्मप्राणरूपिणी ।
प्राणाधिकप्रियतमा सर्वाभ्यः सुन्दरी वरा ॥
सर्वसौभाग्ययुक्ता च मानिनी गौरवान्विता ।
वामार्द्धाङ्गस्वरूपा च गुणेन तेजसा समा ॥
परा परा सारभूता परमाद्या सनातनी ।
परमानन्दरूपा च धन्या मान्या च पूजिता ॥
राजलक्ष्म्यधिदेवी च लक्ष्म्यश्च परमात्मनः ।
राजसूयफलंभूता राजसूयसमर्चिता ॥

रासेश्वरी सुरसिका रासवासनिवासिनी ।
गोलोकवासिनी देवी गोपीवेषविधायिका ॥
परमाह्लादरूपा च सन्तोषहर्षरूपिणी ।
निर्गुणा च शुभाकारा निर्जिताब्जमुखरूपिणी ॥
निरीहा निरहङ्कारा भक्तानुग्रहविग्रहा ।
वेदानुसारध्यानेन विज्ञाता सा विचक्षणैः ॥
दृष्टादृष्टा जगद्वेद्या सुरेन्द्रैर्मुनिपुङ्गवैः ।
वह्निशुद्धांशुकाधाना रत्नालङ्कारभूषिता ॥
कोटिचन्द्रप्रभाजुष्टपुष्टश्रीयुक्तविग्रहा ।
श्रीकृष्णभक्तिदा सैव दात्री च सर्वसम्पदाम् ॥
अवतारे च वाराहे वृषभानुसुता च या ।
यत्पादपद्मसंस्पर्शपवित्रा च वसुन्धरा ॥
ब्रह्मादिभिरदृष्टा या सर्वदृष्टा च भारते ।
क्षीरत्नसारसंभूता लक्ष्मीवक्षःस्थलोज्ज्वला ॥
यथा घने नवघने लोला सौदामिनी सुने ! ।
षष्टिवर्षसहस्राणि प्रतप्तं ब्रह्मणा पुरा ॥
यत्पादपद्मनखरदृष्टये चात्मशुद्धये ।
न च दृष्टापि स्वप्नेऽपि प्रत्यक्षस्यापि का कथा ॥
तेनैव तपसा दृष्टा भुवि वृन्दावने वने ।
कथिता पञ्चमी देवी सा राधा परिकीर्तिता ॥
अंशरूपा कलारूपा कलांशांशसमुद्भवा ।
प्रकृतिः प्रतिविम्बेषु देवस्य सर्वयोषितः ॥
परिपूर्णतमा पञ्चविधा देवी प्रकीर्तिता ।
यायाः प्रधानांशरूपा वर्णयामि निशामय ॥"५॥

गङ्गा यथा,—

"प्रधानांशस्वरूपा या गङ्गा भुवनपावनी ।
विष्णुविग्रहसंभूता हररूपा सनातनी ॥
पापिपापेन्धदाहाय ज्वलदग्निस्वरूपिणी ।
सुखस्वर्गप्रदानाय निर्वाणपददायिनी ॥
गोलोके स्नानप्रस्थानसुखसोपानरूपिणी ।
पवित्ररूपा तीर्थानां सरितां च परा वरा ॥
शम्भुमौलिजटामेरुमुक्तापंक्तिस्वरूपिणी ।
तप्तःसन्तापिनी सद्यो भारते च तपस्विनाम् ॥
चन्द्रपद्मक्षीरनिभा शुद्धसत्त्वस्वरूपिणी ।
निर्मला निरहङ्कारा साध्वी नारायण-
प्रिया ॥"६॥

तुलसी यथा,—

"प्रधानांशस्वरूपा च तुलसी विष्णुकामिनी ।
विष्णुभूषणरूपा च विष्णुपादस्थिता सती ॥
तपःसङ्कल्पपूजादिसद्यःसम्पादिनी सुने ! ।
सारभूता च पुष्पाणां पवित्रा पुण्यदा सदा ॥
दर्शनस्पर्शनाभ्याञ्च सद्योनिर्वाणदायिनी ।
कलौ कलुषशुष्केधदाहायाग्निस्वरूपिणी ॥
यत्पादपद्मसंस्पर्शसद्यःपूता वसुन्धरा ।
यत्स्पर्शदर्शं वाञ्छन्ति तीर्थानि चात्मशुद्धये ॥
यया विना च विश्वेषु सर्वकर्मातिनिष्फलम् ।
मोक्षदा या मुमुक्षूणां कामिनां सर्वकामदा ॥
कल्पवृक्षस्वरूपा च भारते ब्रह्मरूपिणी ।
आयाय भारतानाञ्च प्रजानां परदेवता ॥" २॥

मनसा यथा,—

"प्रधानांशस्वरूपा या मनसा कश्यपालया ।
शङ्करप्रियशिष्या च महाज्ञानविशारदा ॥

नागेश्वरस्य नागस्य भगिनी नागपूजिता ।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥
नागेन्द्रसमयुक्ता सा नागभूषणभूषिता ।
नागेन्द्रैर्वन्दिता सिद्धयोगिनी नागधारिणी ॥
विष्णुरूपा विष्णुभक्ता विष्णुपूजापरायणा ।
तपःस्वरूपा तपसां फलदात्री तपस्विनी ॥
दिव्यं चिरन्तनवर्षं च तपस्तप्तं यया हरेः ।
तपस्विनीषु पूज्या च तपस्विना च भारते ॥
सर्पमन्त्राधिदेवी च ज्वलन्ती ब्रह्मतेजसा ।
ब्रह्मरूपा परमा ब्रह्मभावेन तत्परा ॥
जरत्कारुमुनेः पत्नी साध्वीग्रस्य पतिव्रता ।
आस्तीकस्य मुनेर्माता प्रवरस्य तपस्वि-
नाम् ॥" ३॥

षष्ठी यथा,—

"प्रधानांशस्वरूपा या देवसेना च नारद ! ।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्तिता ॥
शिशूनां प्रतिविम्बेषु प्रतिपालनकारिणी ।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी ॥
षष्ठांशरूपा प्रकृतेस्तेन षष्ठी प्रकीर्तिता ॥
पुत्रपौत्रप्रदात्री च धात्रीति जगतां सती ।
सुन्दरी युवती रम्या सन्ततं भर्तुरन्तिके ॥
स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ।
पूजा द्वादशमासेषु यस्या विश्वेषु सन्ततम् ॥
पूजा च सूतिकागारे परा षष्ठदिने शिशोः ।
एकविंशतिमे चैव पूजा कल्याणहेतुकी ॥
ग्रन्थनियमिता चैषा लिखिता काव्यकुतिः परा ।
मातृरूपा दयारूपा ग्रन्थदत्तजाकृपिणी ॥
जले स्थले चान्तरीक्षे शिशूनां खप्नगोचरे ॥" ४॥

मङ्गलचण्डी यथा,—

"प्रधानांशस्वरूपा च देवी मङ्गलचण्डिका ।
प्रकृतेर्मुखसंभूता सर्वमङ्गलदा सदा ॥
रुष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्तिता ॥
प्रतिमङ्गलवारेषु प्रतिविम्बेषु वन्दिता ।
पञ्चोपचारैर्योषिद्भिर्भक्त्या च परिपूजिता ॥
पुत्रपौत्रधनैश्वर्यं यशोमङ्गलदायिनी ।
लोकसन्तापपापार्त्तिदुःखदारिद्र्यनाशिनी ॥
परितुष्टा सर्ववाञ्छाप्रदात्री सर्वयोषिताम् ।
रुष्टा क्षणेन संहर्तुं शक्ता विश्वं महेश्वरी ॥" ५॥

काली यथा,—

"प्रधानांशस्वरूपा च काली कमललोचना ।
दुर्गाललाटसम्भूता रणे शुम्भनिशुम्भयोः ॥
दुर्गार्द्धांशस्वरूपा सा गुणेन तेजसा समा ।
कोटिसूर्यप्रभाजुष्टपुष्टजाज्वल्यविग्रहा ॥
प्रधाना सर्वशक्तीनां वरा बलवती परा ।
सर्वसिद्धिप्रदा देवी परमा सिद्धयोगिनी ॥
ज्ञानभक्ता ज्ञानतुल्या तेजसा विष्णुमेव च ।
ज्ञानभावनया ग्रन्थज्ञानवर्णा सनातनी ॥
संहर्तुं सर्वब्रह्माण्डं शक्ता निश्वासमात्रतः ।
रक्तं देव्याः समं तस्याः क्रीडया लोकरक्षया ॥
धर्मार्थकाममोक्षाञ्च दातुं शक्ता च पूजिता ।
ब्रह्मादिभिः स्तूयमाना मुनिभिर्मनुभिर्नरैः ॥" ६॥

प्रकृतिः

वसुन्धराप्रकृतिर्यथा,—

"प्रधानांशस्वरूपा च प्रकृतेश्च वसुन्धरा।
आधारस्वरूपा सर्व्वेषां सर्व्वशस्यप्रसूतिका॥
रत्नाकरा रत्नगर्भा सर्व्वरत्नाकरालया।
प्रजाभिश्च प्रजेशैश्च पूजिता वन्दिता सदा॥
सर्व्वोपजीव्यरूपा च सर्व्वसस्यविधायिनी।
यया विना जगत् सर्व्वं निराधारं चराचरम्॥७॥
प्रकृतेश्च कला या या सा निबोध सुनीश्वर!।
यस्य यस्य च या: पत्न्यस्ता: सर्व्वा वर्णयामि ते॥
साध्वी देवी वह्निपत्नी विभु लोकेषु पूजिता।
यया विना हविर्दानं न यज्ञेषु सुरा: क्षमा:॥९
दक्षिणा यज्ञपत्नी च दीक्षा सर्व्वत्र पूजिता।
यया विना च विप्रेषु सर्व्वं कर्म्म च निष्फलम्॥२॥
स्वधा पितृणां पत्नी च मुनिभिर्मनुभिर्नरै:।
पूजिता पितृदानेषु निष्फलेषु यया विना॥३॥
स्वस्तिदेवी वायुपत्नी प्रतिविश्वेषु पूजिता।
आदानेषु प्रदानेषु निष्फलेषु यया विना॥४॥
पुष्टिर्गणपतेः पत्नी प्रतिविश्वेषु पूजिता।
यया विना परिक्षीणा: पुमांसो योषितो भवेत्॥५॥
अनन्तपत्नी तुष्टिश्च पूजिता वन्दिता भवे।
यया विना न सन्तुष्टा: सर्व्वे लोकाश्च सन्ततम्॥६
ईशानपत्नी सम्पत्ति: पूजिता च सुरेश्वरै:।
सर्व्वलोका हरिश्चाश्च विश्वेषु च यया विना॥७॥
धृति: कपिलपत्नी च सर्व्वै: सर्व्वत्र पूजिता।
सर्व्वलोका अधैर्य्या: स्युर्जगत्सु च यया विना॥८
यमपत्नी क्षमा साध्वी सुशीला सर्व्वपूजिता।
सत्यशान्ताश्च दान्ताश्च सर्व्वलोका यया विना॥९॥
क्रीड़ाधिष्ठातृदेवी च कामपत्नी रति: सती।
केलिकौतुकहीनाश्च सर्व्वलोका यया विना॥१०
सत्यपत्नी सती शुक्ति: पूजिता जगतां प्रिया।
यया विना भवे लोका वस्तुसारविहिता: सदा॥११
मोहपत्नी दया साध्वी पूजिता च जगत्प्रिया।
सर्व्वे लोकाश्च सर्व्वत्र निष्ठुराश्च यया विना॥१२
पुण्यपत्नी प्रतिष्ठा सा पुण्यरूपातिपूजिता।
यया विना जगत् सर्व्वं जीवन्मृतपरं सुने!॥१३
सुकर्म्मपत्नी कीर्त्तिश्च धन्या मान्या च पूजिता।
यया विना जगत् सर्व्वं यशोहीनं भवेत् यथा॥१४
क्रिया उद्योगपत्नी च पूजिता सर्व्वसम्मता।
यया विना जगत् सर्व्वमुच्छ्वासमिव नारद!॥१५॥
अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगन्मुक्तमुच्छ्वासं विधिनिर्म्मितम्॥
सत्ये चादर्शनेनाऽपि या च चेतायां सूक्ष्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संहृता भिया॥
कलौ महाप्रमत्ता च सर्व्वत्र व्याप्तिका बलात्।
कपटेन समं भाता भ्रमत्येव गृहे गृहे॥ १६॥
भ्रान्ति-१७ संध्या १८ च भार्य्ये द्वे सुशीलस्य च पूजिता।
याभ्यां विना जगत् सर्व्वमुन्मत्तमिव नारद!॥
शान्तस्य भार्य्याश्चित्रश्च वृद्धि-१९ मेधा २० स्मृति-२१ तथा।
याभिर्विना जगत् सर्व्वं मूढं स्तब्धमं तदा॥

प्रकृतिः

मूर्त्तिश्च धर्म्मपत्नी सा कान्तिरूपा मनोहरा।
परमा सा च विष्णोश्च निराधारा यथा विना॥
सर्व्वश्च शोभारूपा सा लक्ष्मीर्मूर्त्तिमती सती।
श्रीरूपा मूर्त्तिरूपा च मान्या धन्या च पूजिता॥ २२॥
कालाग्निरुद्रपत्नी च निद्रा सा सिद्धयोगिनी।
सर्व्वलोका: समाच्छन्ना मायायोगेन यामिनु॥२३॥
कालस्य निमो भार्य्याश्च सन्ध्या-२४ रात्रि-२५ दिनानि च २६।
याभिर्विना विधात्रा च संख्यां कर्त्तुं न शक्यते॥
क्षुत्-२७ पिपासे २८ मनोभार्य्ये धर्म्मे मान्ये सुपूजिते।
याभ्यां व्याप्तं जगत् सर्व्वं शुष्कचिह्नितमेव च॥
प्रभा च २९ दाहिका ३० चैव ते भार्य्ये तेजसस्तथा।
याभ्यां विना जगत् सृष्टुं विधातापि नशक्नुयात्॥
कालकन्ये मृत्यु-३१ जरे ३२ प्रज्वरस्य प्रिये प्रिये।
याभ्यां जगत् समुच्छ्वासं विधात्रा निर्म्मितं विधौ॥
निद्राकन्या च तन्द्रा ३३ सा प्रीति-३४ रत्या सुखप्रिये।
याभ्यां व्याप्तं जगत् सर्व्वं विधिपुत्रविधेर्विधौ॥
वैराग्यस्य हि जाये च श्रद्धा-३५ भक्ती ३६ च पूजिते।
याभ्यां शून्यञ्जगत् सर्व्वं जीवन्मृतमिदं सुने!॥
अदिति-३७ र्दैवमाता च सुरभी ३८ च गवां प्रसू:।
दितिश्च ३९ दैत्यजननी कद्रुश्च ४० विनता ४१ दनु: ४२॥
उपयुक्ता: सृष्टिविधौ एताश्च प्रकृते: कला:॥*
कलाख्यान्या: सन्ति वक्त्रास्तासु काश्चिन्निबोध मे॥
रोहिणी ४३ चन्द्रपत्नी च संज्ञा ४४ सूर्य्यस्य कामिनी।
घृतरूपा४५ मनोर्भार्य्या ऋचीन्द्रस्य च गेहिनी ४६॥
तारा४७ बृहस्पतेर्भार्य्या वह्निपुत्रस्य स्वरस्वती ४८।
अहल्या ४९ गौतमस्त्री तु सावित्र्या ५० त्रिकामिनी॥
पितॄणां मानसी कन्या मेनका ५१ सात्विकाप्रसू:।
लोपामुद्रा ५२ तथा भूती ५३ कुबेरकामिनी तथा॥
वरुणानी ५४ यमस्त्री च वसोर्भिन्धावली ५५ तथा।
कुम्भी च ५६ दयमस्त्री च ५७ यशोदा ५८ देवकी ५९ सती॥
गान्धारी ६० द्रौपदी ६१ सत्या ६२ सावित्री६३ सत्यवत्प्रिया।
वृषभानुप्रिया साध्वी राधामाता कलावती६४॥
मन्दोदरी ६५ च कौशल्या ६६ सुभद्रा ६७ कैटभी ६८ तथा।

प्रकृतिः

रेवती ६९ सत्यभामा ७० च कालिन्दी ७१ लक्ष्मणा ७२ तथा॥
जाम्बवती ७३ मित्रविन्दा ७४ मित्रविन्दा ७५ तथापरा।
लक्ष्मणा ७६ रुक्मिणी ७७ सीता ७८ सर्व्वलक्ष्मी: प्रकीर्त्तिता॥
कला योजनगन्धा च७९ आत्मभाता मनोरमा।
वाग्देवी तथोषा ८० च चित्रलेखा च ८१ तत्सखी॥
प्रभावती८२ भानुमती८३ तथा मायावती८४ सती।
रेणुका ८५ च भृगोर्माता वृत्तिमाता च रोहिणी ८६॥
दुर्गाभा ८७ च दुर्गाख्या श्रीकृष्णभगिनी सती।
वक्त्रा: सन्ति कलाश्चैव प्रकृतेरेव भारते॥
या याश्च नामदेयास्ता: सर्व्वाश्च प्रकृतेः कला:।
कलांशांशसम्भूता: प्रतिविश्वेषु योषित:॥*॥
योषितामपमानेन प्रकृतेश्च पराभव:।
ब्राह्मणी पूजिता येन प्रतिपुत्रवती सती॥
प्रकृति: पूजिता तेन वस्त्रालङ्कारचन्दनै:।
कुमारी चाष्टवर्षीया वस्त्रालङ्कारचन्दनै:।
पूजिता येन विप्रस्य प्रकृतिस्तेन पूजिता॥*॥
सर्व्वा: प्रकृतिसम्भूता उत्तमाधममध्यमा:।
सत्यांशाश्चोत्तमा ज्ञेया: सुशीलाश्च पतिव्रता:॥
मध्यमा राजसांशांशाश्च भोग्या: प्रकीर्त्तिता:।
सुखसम्भोगवश्याश्च स्वकार्य्ये तत्परा: सदा।
अधमास्तामसांशांशा अज्ञानकुलसम्भवा:॥
दुर्मुखा: कुलटा धूर्त्ता: स्वतन्त्रा: कलहप्रिया:।
पृथिव्यां कुलटा याश्च स्वर्गे चाप्सरसां गणा:॥
प्रकृतेस्तामसांशांशा: पुंश्चल्य: परिकीर्त्तिता:।
एवं निगदितं सर्व्वं प्रकृते: परिकीर्त्तनम्॥*॥
ताश्च सर्व्वा: पूजिताश्च पुण्यक्षेत्रे च भारते।
पूजिता सुरथेनादौ दुर्गा दुर्गतिनाशिनी॥
द्वितीये रामचन्द्रेण रावणस्य वधार्थिना॥
तत्पश्चाज्जगतां माता विभु लोकेषु पूजिता।
जातादौ दक्षपत्न्याश्च निहत्य दैत्यदानवान्॥
ततो देहं परित्यज्य यज्ञे भर्त्तुश्च निन्दया।
जज्ञे हिमवत: पत्न्यां मेने पशुपतिं पतिम्॥
गणेशश्च स्वयं ज्ञेय: स्कन्दो विष्णुजलोद्भव:।
बभूवतुस्तौ तनयौ पश्चात्तस्याश्च गौरिक!॥
लक्ष्मीर्भैरवभूपेन प्रथमे परिपूजिता।
त्रिषु लोकेषु तत्पश्चाद्देवतासुनिमानवै:॥
सावित्री चान्धपतिना प्रथमे परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतासुनिमानवै:॥
आदौ सरस्वती देवी ब्रह्मणा परिपूजिता।
तत्पश्चात्त्रिषु लोकेषु देवतासुनिमानवै:॥
प्रथमे पूजिता राधा गोलोके रासमण्डले।
पौर्णमास्यां कार्त्तिकस्य कृष्णेन परमात्मना॥
गोपिकाभिश्च गोपैश्च वालिकाभिश्च बालकै:।
सर्वा गवां: सुरभ्या च तत्पश्चाज्जगया हरे:॥
तदा ब्रह्मादिभिर्देवैर्मुनिभिर्मनुभिस्तथा।
पुष्पधूपादिभिर्भक्त्या पूजिता वन्दिता सदा॥

एथिव्यां प्रथमे देवी सुपत्नीनेव पूजिता।
ब्रह्मरेखोपदिष्टेन पुण्यक्षेत्रे च भारते॥
जिह्व लोकेषु तत्प्रख्यादाद्यया परमात्मनः।
युध्यधूपादिभिर्भक्त्या पूजिता मुनिभिः सुरैः॥
कलया या: समुद्भूताः पूजिताश्चाच्च भारते।
पूजिता ग्रामदेवाश्च ग्रामे च नगरे मुने!॥
एवं ते कथितं सर्वं प्रकृतेश्चरितं शुभम्।
यथागमं कथयाच्च किं भूयः श्रोतुमिच्छसि॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे प्रकृतिचरितं नामानुक्रमः प्रथमोऽध्यायः॥ * ॥ पुरुषगात्रो-ऽयं प्रकृतेर्नाम उच्चार्यता यथा,—
नारद उवाच।
"आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः।
विपरीतमस्य मां भक्तं वद भक्तजनप्रिय!॥
श्रीनारायण उवाच।
निमित्तमस्य विविधं कथयामि निशामय।
जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता।
गरीयसीति जगतां माता श्रुतिगुणैः पितुः॥
राधाशब्दोति गौरीशेलेवं शब्दः श्रुतौ श्रुतः।
कृष्णराधेशगौरीति लोके न च कदा श्रुतः॥
प्रसीद रोहिणीचन्द्र गृहाणार्घमिदं मम।
गृहाणार्घं मया दत्तं संशया सह भास्कर!॥
प्रसीद कमलाकान्त गृहाण मम पूजनम्।
इति दृष्टं सामवेदे कौथुमे मुनिसत्तम!॥
राधाशब्दोच्चारणादेव स्त्रीलो भवति माधवः।
धाशब्दोच्चारतः पश्चाद्भावत्येव ससम्भ्रमः॥
आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत्।
स भवेच्चात्मगामी च वेदातिक्रमणो मुने!॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५० अध्यायः॥

प्रकृष्टं, त्रि, (प्रकृष्यते इति। प्र+कृष+क्त।) प्रकर्षयुक्तम्। तत्पर्य्यायः। सुखम् २ प्रसुखम्३ प्रवर्हम् ४ वर्य्यम् ५ वरेण्यम्६ प्रवरम् ७ पुरोगम् ८ अनुत्तरम् ९ प्राग्रहरम् १० प्रवेकम् ११ प्रधानम् १२ अग्रेसरम् १३ उत्तमम् १४ अग्र्यम् १५ ग्रामणीः १६ अग्रणीः १७ अग्रिमम् १८ जात्यम् १९ अग्र्यम् २० अनुत्तमम्२१ अनवरार्द्ध्यम् २२ प्रेष्ठम् २३ परार्द्ध्यम् २४ परम् २५। इति हेमचन्द्रः। ६। ७४॥ (यथा, मनुः। ७। १७०।
"यदा प्रकृष्टा मन्येत सर्वास्तु प्रकृतीर्भृशम्।
अतिनिष्कृतं तथात्मानं तदा कुर्वीत विग्रहम्॥"
आजरूम्। यथा, देवीभागवते। १। ६। ८२।
"इत्याकर्ण्य तदा विष्णे विष्णुना प्रभविष्णुना।
जघनोपरि वेगेन प्रकृष्टे शिरसी तयोः॥")

प्रकोष्ठः, पुं, (प्रकुष्यतेऽनेनेति। प्र+कुष निष्कर्षे+"उषिकुषीति।" उणा० २। ४। इति स्थन्।) कफोणेरधोमध्यिबन्धपर्य्यन्तहस्तभागः। इत्यमरः। २। ६। ८०॥ (यथा, रघुः। ३। ५६।
"ततः प्रकोष्ठे हरिचन्दनाङ्किते
प्रमृज्यमानार्द्रवधूरनाहिनीम्।
रघुः शुभाङ्गाङ्गदसङ्गिना पटिच्चा
प्रराजयन्यामसुनाहिसौभगः॥")

प्रक्षेपः, पुं, (प्रक्षिप्यते इति। प्र+क्षिप+घञ्।) प्रकर्षेण क्षेपः। निक्षेपणम्। (यथा, याज्ञवल्क्ये। २। २६४।
"अर्धप्रक्षेपणात् विंशं भागं शुल्कं नृपो हरेत्॥")

प्रक्षेपकः, पुं, (प्रक्षिप्यते इति। प्र+क्षिप+ण्वुल्।) नाराचः। इत्यमरः। २। ८। ८७॥

प्रक्षेपणं, क्ली, (प्र+क्षिप्+ल्युट्।) प्रकर्षेण क्षेपः। निक्षेपणम्। (यथा, याज्ञवल्क्ये। २। २६४।
"अर्धप्रक्षेपणात् विंशं भागं शुल्कं नृपो हरेत्॥")

प्रक्षेपकः, पुं, (प्रक्षिप्यतीति। प्र+क्षिप अवस्कन्दने+ल्युः।) नाराचः। इत्यमरः। २। ८। ८७॥

प्रक्षेपणा, स्त्री, (प्रक्षेपण+टाप्। यद्वा, प्रक्षेपणं अवस्कन्दनमस्त्रा इति। अच्। टाप्।) नाराचः। इत्यमरटीकायां भरतः॥

प्रक्षेपणः, पुं, (प्रक्षिप्यतीति। प्र+क्षिप अवस्कन्दने+ल्युः।) नाराचः। इत्यमरटीकायां भरतः॥

प्रक्षेपणा, स्त्री, (प्रक्षेपण+टाप्।) नाराचः। इत्यमरटीकायां भरतः॥

प्रखरः, पुं (प्रकृष्टः खरः।) इषवज्राहः। कुकुरः। अध्वसरः। अध्वनखरे, त्रि। इति मेदिनी॥

प्रख्यः, त्रि, (प्रख्यातीति। प्र+ख्या ख्याती+कः।) उत्तरपदे तुल्यार्थवाचकः यथा,—
"स्युरुत्तरपदे प्रख्यः प्रकारः प्रतिमो निभः॥"
इति हेमचन्द्रः॥
(यथा, महाभारते। १। २०८। ३१।
"द्विपच्चगरुड़प्रख्यैर्हयैः सौवीरकैर्युतम्।
गुप्तमश्वबलप्रख्यैर्गोपुरैर्मन्दरोपमैः॥"
श्रेष्ठः। यथा, तत्रैव। १२। २०४। ८।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः।
यथादर्शतले प्रख्ये पश्यत्यात्मानमात्मनि॥")

प्रख्यातः, त्रि, (प्र+ख्या+क्त।) प्रकृष्टख्यातियुक्तः। विख्यातः। यथा,—
"यस्य आकरणे वरेण्यघटनास्त्रोताः प्रवव्रे पुरा
प्रख्याता नव वैद्यकेऽपि तिथिनिर्द्धारणार्थं-
मेकोऽद्भुतः॥"
इति सुग्धबोधव्याकरणे तद्धितप्रकरणम्॥

प्रख्यातवप्रकः, पुं, (प्रख्यातो वप्रा जनयिता यस्य। कप्।) विख्यातपितृकः। यथा,—
"स्यादासुताद्यायणोऽसुत्र पुत्रः प्रख्यातवप्रकः॥"
इति हेमचन्द्रः। २। १६६॥

प्रख्यातिः, स्त्री, प्रकृष्टकीर्त्तिः। विख्यातिः। प्रपूर्ब्बख्याधातोः क्तिन्प्रत्ययनिष्पन्ना॥

प्रगण्डः, पुं, (प्रत्यासन्नो गण्डो यस्मिन्यस्य।) कूर्परोपरिकक्षपर्य्यन्तभागः। इत्यमरः। २। ६। ८०॥ कनुर अवधि बगल पर्यन्त इति भाषा॥

प्रगल्भा

प्रगल्भी, स्त्री, (प्रगल्भ + गौरादित्वात् ङीष्) बहिःप्राकारः। दुर्गप्राकारभित्तौ शूराणां उपवेशनस्थानानि। (यथा, महाभारते। १२। ६६। ४३।

"प्रगल्भीः कारयेत् सम्यगाकाशूजननीस्तदा॥")

प्रगतजानुः, त्रि, (प्रगते संश्लिष्टे जानुनी यस्य।) प्रगतजानुकः। इत्यमरटीकायां रमानाथः॥

प्रगतजानुकः, त्रि, (प्रगते जानुनी यस्य। कप्।) यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महदन्तरालं सः। पाषाराक् यक्ति इति भाषा॥ तत्पर्य्यायः। प्रजुः २। इत्यमरः। २। ६। ४७॥ प्रज्ञः ३ प्रगतजानुः ४। इति भरतः॥

प्रगन्धः, पुं. (प्रकृष्टो गन्धो यस्य।) पर्पटः। इति राजनिर्घण्टः॥

प्रगल्भः, त्रि, (प्रगल्भते इति। प्र + गल्भ धार्ष्ट्ये + पचाद्यच्।) प्रत्युत्पन्नमतिः। तत्पर्य्यायः। प्रतिभान्वितः २। इत्यमरः। ३। १। २५॥ (यथा, महाभारते। १२। ६८। ५८।

"प्रज्ञा प्रगल्भं कुरुते मनुष्यं
राजा ह्यप्राम् वै कुरुते मनुष्यान्॥")

प्रगल्भता, स्त्री, प्रगल्भस्य भावः। (प्रगल्भ + तल्।) प्रागल्भ्यम्। तत्पर्य्यायः। उत्साहः २ अभियोगः ३ उद्यमः ४ प्रौढिः ५ उद्योगः ६ कियदेतिका ७ अध्यवसायः ८ ऊर्ज्जः ९। इति हेमचन्द्रः। २। २१९॥ तस्य लक्षणम्। यथा,

"निःशङ्कत्वं प्रयोगेषु बुधैरुक्ता प्रगल्भता॥"

इत्युज्ज्वलनीलमणिः॥

(यथा, कुमारे। ६। ३२।

"आर्य्याप्यरुन्धती तस्य व्यापारं कर्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥")

प्रगल्भा, स्त्री, (प्रगल्भते धृष्टा भवतीति। प्र + गल्भ धार्ष्ट्ये + पचाद्यच्। ततष्टाप्।) नायिकाभेदः। अस्या लक्षणम्। पतिमात्रविषयकेलिकलापकोविदा। अस्याश्चेष्टा रतिप्रीतिः। आनन्दादालसंमोहः। रतिप्रीतिर्यथा,—

"संक्षिप्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निर्व्यीयाधरबिम्बमम्बरमपाकृष्य युद्यत्यलकम्।
देवस्यानुजिनीपतेः सतृदयं जिज्ञासमाने प्रिये
वामाक्ष्णो वलनाञ्चले; श्रवणयोर्नीलोत्पलं
निह्नुते॥"

आनन्दादालसंमोहो यथा,—

"नक्षाङ्कितसुरःस्थलेऽधरतले रदस्य चतं
च्युता वकुलमालिका विगलिता च मुक्तावली।
रतान्तसमये मया सकलमेतदालोचितं
स्मृतिः क्व च पतिः क्व च क्व च तवापि विघ्नोद्यविधिः॥"

सा मानावस्थायां त्रिविधा। धीरा अधीरा धीराधीरा च। अत्यल्पकोपप्रकाशा धीरा। अत्यल्पकोपप्रकाशा अधीरा। यत्किञ्चित्कोपप्रकाशा धीराधीरा। प्रौढ़ाधीरायास्तु रतावौदास्यम्। अधीरायास्तर्ज्जनताड़नादि। धीराधीरायां रतावौदास्यं तर्ज्जनादि च कोपस्य प्रकाशकम्। प्रौढ़ाधीरा यथा,—

"नो तर्ज्यं भजसे न जल्पसि सुधाधाराशुकारा गिरो
ह्रक्पातं कुरुषे न वा परिजने कोपप्रकाशुच्छलात्।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
किं स्यादेव नचेत् पुनः सहचरी कुर्व्वीत साक्षिस्मितम्॥"

प्रगल्भा अधीरा यथा,—

"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्या वासमाशङ्कमाना।
गिरिशमचलकन्या तर्ज्जयामास कम्य
प्रचलबलयवेल्लत्कान्तिभाजा करेण॥"

प्रगल्भा धीराधीरा यथा,—

"तल्पोपान्तसुपेयुषि प्रियतमे साभीप्सितर्थीवधा
काकुव्याकुलवाचि साक्षिहसितस्फुर्जत्कपोलश्रिया।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसचालित-
प्रोष्ठीष्टमयूखमांसलरुचो विस्कारिता दृष्टयः॥"

इति रसमञ्जरी॥

(तल्लक्षणञ्च यथा साहित्यदर्पणे। ३। २०१।

"खरान्धा गाढ़तारुण्या समस्तरतकोविदा।
भावोन्नता दरव्रीड़ा प्रगल्भाक्रान्तनायका॥"

तस्या उदाहरणभेदादिकं तत्रैव विशेषतो द्रष्टव्यम्॥)

प्रगाढ़, त्रि, (प्रकर्षेण गाढ्यते स्मेति। प्र + गाढ + क्तः। "यस्य विभाषा।" ७। २। १५। इति न इट्।) भृशम्। अत्यन्तम्। इत्यमरः। ३। ३। ४४॥ (यथा, महाभारते। ४। ५६। २६।

"अहमिन्द्राद्दृढां सृष्टिं ब्रह्मणः सत्यसङ्गताम्।
प्रगाढे तुमुलं चित्रमभ्यग्निं प्रजापतेः॥")

दृढम्। इति भरतः॥ (यथा, महाभारते। ७। ६७। ४८।

"तत्रान्तरीक्षे बाणानां प्रगाढ़ानां विशाम्पते।
संघर्षेण महार्चिष्मान् पावकः समजायत॥")

घनम्। यथा, सुश्रुते चिकित्सितस्थाने ५ अ;।

"तूष्णीप्रतूष्णयोः क्षौद्रलवणसुदकेन पाययेत् पिप्पल्यादिचूर्णं वा क्षिप्त्वा यवक्षारप्रगाढं सर्पिर्वर्णभिक्षेनसुपक्रमेत्॥")

प्रगाता, [तृ] त्रि, (प्र + गै + तृच्।) उत्तमगायकः। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। २३६। ८।

"ततो गीथाः प्रगातारः कुशला वृत्यवादिते।
धार्त्तराष्ट्रसुपातिष्ठन् कन्याश्चैव सलङ्कृताः॥")

प्रगुणः, त्रि, (प्रकर्षेण गुणो यत्र।) ऋजुः। इत्यमरः। ३। १। ७२॥ (प्रशस्तगुणवति, त्रि। यथा, रघौ। ६। ४६।

"परिचयं चलसच्चनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
अमनयात् प्रगुणाश्च करत्वसौ
तनुमतोऽनुमतः सचिवैर्यथौ॥")

प्रगुणः

प्रगुणः, त्रि, (प्रकर्षेण गुणो यस्य।) प्रशस्तगुणवान्। इत्यमरः। ३। १। ७२॥ (यथा, रघौ। ६। ४६।

"परिचयं चलसच्चनिपातने
भयरुषोश्च तदिङ्गितबोधनम्।
अमनयात् प्रगुणाश्च करत्वसौ
तनुमतोऽनुमतः सचिवैर्यथौ॥")

प्रगृह्य, त्रि, (प्रगृह्यते इति। प्र + ग्रह + "पदास्थेरिवाद्यापपेषु च।" ३।१। ११६। इति क्यप्। "अचिक्ष्येति। ६। २। १६। इति सम्प्रसारणम्।) सन्धिरहितं पदम्। इति सुग्धबोधव्याकरणम्॥ पदपक्षपरतन्त्रबहिर्भूतेषु शब्दपदं निपात्यते। यथा, प्रगृह्यं पदं यत् खरेण न सन्धीयते। इति दुर्गादासः॥ "आप्रगृह्याः स्मृतौ वार्धे।" इत्यमरः॥ प्रगृह्याः पाणिन्यादिस्मृतप्रगृह्यसंज्ञो डादुत्वन्धरहितः आप्रगृह्यः योऽचा न सन्धीयते स इत्यर्थः। स्मृतौ स्मरणे यथा। आ स्मृतं स जटायुरेषः। वार्धे यथा। आ एवं मन्यसे। इति भरतः॥

प्रगे, व्य, (प्रकर्षेण गीयतेऽहनीति। प्र + गै + के।) प्रातः। इत्यमरः। ३। ७। १६॥ (यथा, माघे। १२। १।

"इत्थं रथाङ्गेभनिषादिनाम्नगे
गणो गृहाणामथ तोरणाङ्गणैः।
प्रस्थानकालक्षमवेक्षकल्पना
ह्लतप्रबोधैरुपसेदुषीमुषम्॥")

प्रगेतनः, त्रि, (प्रगे प्रातर्भव इति। प्रगे + "सायचिरमिति।" ४। ३। २३। इति ट्यु ट्युट् च।) प्रगे भवः। प्रातर्भवः। तत्पर्य्यायः। श्वस्तनः २। इति राजनिर्घण्टः॥

प्रग्रहः, पुं. (प्रगृह्यते इति प्रगृह्यतेऽनेनेति वा। प्र + ग्रह + "प्रे वणिजाम्।" ३। ३। ५२। "रश्मौ च।" ३। ३। ५३। इति घञ्भावपक्षे "ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) तुलाकाष्ठम्। अश्वादिरश्मिः। वल्गी। इत्यमरः। ३। ३। २३६॥ नियमनम्॥ (यथा, महाभारते। ३। १७८। १६।

"नहि मे सुखते किञ्चित् कथञ्चित् प्रग्रहं गतः।
गजो वा महिषो वापि षष्ठे काले नरोत्तम!॥")

सृक्कः। रश्मिः। (यथा, गोलाध्याये। ८।

"दृष्टौ प्राच्यां भवति तरणौ प्रग्रहः किं प्रतीच्याम्॥")

सुवर्णालुमहीरुहः। इति मेदिनी॥ कर्णिकारवृक्षः। इति राजनिर्घण्टः॥ (तत्पर्य्यायो यथा,

"आरेवतो राजवृक्षः प्रग्रहश्चतुरङ्गुलः।
आरग्वधोऽथ सम्पाकः शतमालः सुवर्णकः॥"

इति वैद्यकरत्नमालायाम्॥

प्र + ग्रह + भावे अप्। इन्द्रियादीनां निग्रहः। यथा, हरिवंशे भविष्यपर्व्वणि। ८। ७८।

"अर्थो हि केवलं तस्य प्रग्रहो बाह्यगोचरः।
तस्मात् सर्व्वप्रयत्नेन चित्तं रक्ष जनार्द्दन!॥"

धारणम्। यथा, हरिवंशे भविष्यपर्व्वणि २२। ४।

"उद्धवोऽथ महाबुद्धिरक्षसेनो महाबलः।
अन्ये च यादवाः सर्व्वे कवचप्रग्रहे रताः॥"

अवलम्बनम्। यथा, हरिवंशे। ७१। १६६।

"नृपेष्वथ प्रनष्टेषु जगत्प्रग्रहाः प्रजाः।
चक्रेण निर्मिते चैव हत्वा चान्योन्यमाहवे॥
परस्परकृतत्राणाश्च गिरान्दराः सुदुःखिताः।

एवं वदमनुप्राप्ताः कल्किवन्धांशुके तदा ॥" विष्णुः । यथा, महाभारते । १२ । २४६ । ६४ । "प्रयहो निग्रहो ह्यग्रोऽनेकग्रहो ग्रहाग्रजः ॥" ग्रहष्टाखिष्ठाद्यादौ, त्रि । यथा, रामायणे । २ । ८२ । १ । "तामार्यगजसञ्चूर्णां भरतः प्रयहां सभाम् । ददर्श वृद्धिसम्पन्नः पूर्णचन्द्रां निशामिव ॥" "प्रयहा ग्रहष्टैर्व्यग्रिष्ठादिभिर्ग्रहोऽग्रिष्ठानं यस्यां सा ।" इति तट्टीका ॥ उद्यतबाहुः । यथा, रामायणे । ७ । ६५ । १४ । "एवमुक्तस्तु सचिवैः प्राञ्जलिः प्रयहो नृपः । अभ्यवादयत प्राप्तस्तच्छ्रुत्वं सत्यमालिनम् ॥")

प्रयाहः, पुं,(प्रयह्यते इति । प्र + यह + "ग्रे वह्निजाम् ।" ३ । ३।५२ । "ग्रहो च ।" ३ ।३।५३। इति च घञ् ।) प्रयहः । इत्यमरः । ३ । ३ । २३६ ॥ ("ग्रे लिप्सायाम् ।" ३ । ३ । ४६ । इति घञ् । प्रयहणम् । "पात्रप्रयाहेण चरति भिक्षुः ।" इति सिद्धान्तकौमुदी ॥)

प्रयीवः, पुं क्ली, (प्रकर्षेण ग्रीवा ग्रीवावलतिरस्य ।) ग्रहादौ प्राणे धारणं दारुपट्टिका । वातायनम् । इति भूमिः । सुखशाला । इत्येके । अश्वशाला । इति केचित् । इमशीर्षकम् । इति गोवर्द्धनः । इत्यमरटीकायां भरतः ॥

प्रघटावित्, [द्] त्रि, (प्रघटां आडम्बरं वेत्तीति । प्रघटा + विद् + क्विप् ।) शाक्यगडः । इति त्रिकाण्डशेषः ॥

प्रघणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । इति कर्म्मणि अप् । नलच्च ।) बहिर्द्वारप्रकोष्ठकम् । तत्पर्य्यायः । प्रघाणः२ अलिन्दः ३ । इत्यमरः । २ । २ । १२ ॥ आलिन्दः ४ । इति भरतः ॥ ताम्रकुम्भः । लौहसुन्दरः । इति मेदिनी । णे, ६० ॥ (गृहाभ्यन्तरप्रयार्थपिञ्जिका । यथा,— "प्रघाणप्रघणालिन्दा द्वारबाह्यप्रकोष्ठके । गृहाभ्यन्तरप्रयार्थपिञ्जिकायामपि त्रयम् ॥" इति शब्दरत्नावली ॥)

प्रघनः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । नलम् ।) प्रघणः । इति त्रिकाण्डशेषः ॥

प्रघसः, पुं, (प्रकर्षेण अत्तीति । प्र + अद + अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घसलादेशः ।) असुरः । दैत्यः । इति त्रिकाण्डशेषः ॥ (राक्षसभेदः । यथा, महाभारते ।३।२८४।२। "प्रह्लादः पूतनो जम्भः खरः क्रोधवशो हरिः । प्रघसश्चादजश्चैव प्रघसश्चेवमादयः ॥")

प्रघाणः, पुं, (प्रहन्यते इति । प्र + हन + "अगारैकदेशे प्रघणः प्रघाणश्च ।" ३ । ३ । ७६ । अप् । पक्षे हस्वश्च ।) प्रघणः । इत्यमरः । २ । २ । १२ ॥ (यथा, नैषधे । १६ ।११ । "जयति भगवान्नाभीजन्मानिबन्धनवान्धवः किमपि मधवत्प्रासादस्य प्रघाणमुपेयुषाम् । अपसरदरिभ्रान्तप्रस्खलियत्पथमञ्जली लगनपलदभ्रान्तखर्वाचलभ्रमविभ्रमः ॥")

प्रघातः, पुं, (प्रकर्षेण हन्यते यत्रेति । प्र + हन् + घञ् ।) युद्धम् । इति हेमचन्द्रटीका ॥

प्रघाणः, पुं, (प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति । प्र + हन + अप् । हस्वः । न नलम् ।) प्रघणः । इति सङ्क्षिप्तः ॥

प्रघूर्णः, पुं, (प्रघूर्णति भ्रमतीति । प्र + घूर्ण + अच् ।) अतिथिः । इति हेमचन्द्रः ॥ प्रलम्बघूर्णयुक्ते, त्रि ॥

प्रघोषकः, पुं, (प्र + घुष् + भावे घञ् । ततः कन् ।) ध्वनिः । इति जटाधरः ॥

प्रचक्रं, क्ली, (प्रगतञ्चक्रमिति प्रादिसमासः ।) चलितसैन्यम् । प्रस्थितसेना । इत्यमरः ।२ ।८ ।६६॥

प्रचक्षाः, [स्] पुं, (प्रकर्षेण चष्टे वक्तीति । प्र + चक्ष + असि: । न खादेशः ।) दृढस्मृतिः । इत्युणादिकोषः ॥

प्रचण्डः, पुं, (प्रकर्षेण चण्डः उग्रगुणत्वात् ।) श्वेतकरवीरः । इति मेदिनी ॥ (वत्सप्रीनामनृपतेः सुनन्दागर्भजातः पुत्रभेदः । यथा, मार्कण्डेये । ११८ । २ ।

"वलीवलाकश्चण्डश्च प्रचण्डश्च सुविक्रमः ॥")

प्रचण्डः, त्रि, (प्रकर्षेण चण्डः ।) दुर्व्वहः । दुर्धर्षः । प्रगल्भः । (यथा, आर्य्यासप्तशत्याम् । ३३० । "नाहं वदामि सुतनु त्वमशीला वा प्रचण्डचरिता वा । प्रेमस्वभावसुलभं भयमुदयति मम तु हृदयस्य ॥") प्रतापी । इति मेदिनी नानार्थरत्नमाला च ॥ (यथा, भागवते । १ । ७ । २१ । "ततः प्रादुष्कृतं तेजः प्रचण्डं सर्व्वतोदिशम् । प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥")

प्रचण्डमूर्त्तिः, स्त्री, (प्रचण्डा मूर्त्तिर्यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥ प्रतापयुक्तप्रहरीरक्ष ॥

प्रचण्डा, स्त्री, (प्रकर्षेण चण्डा ।) दुर्गायाः अष्टनायिकान्तर्गतनायिकाभेदः । इति कालीपुराणम् ॥ (सा तु कुमलक्षे पीठस्थाने विराजते । यथा, देवीभागवते । ७ । ३० । ७२ । "कुमलक्षे प्रचण्डा तु चण्डिकामरकण्टके ॥") श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

प्रचयः, पुं, (प्रचीयते इति । प्र + चिञ् चयने + "अरच् ।" ३।३। ५६ । इत्यच् ।) समूहः । इति शब्दचन्द्रिका ॥ ग्रथिलाख्यसंयोगः । स च परिमाणजनकः । यथा,— "संख्यातः परिमाणाच्च प्रचयादपि जायते । प्रचयः ग्रथिलाख्यो यः संयोगस्तेन जन्यते । परिमाणन्तूलकादौ नाग्रख्याश्रयनाशतः ॥" इति भाषापरिच्छेदः ॥ (यज्ञादिकरणकपुण्यफलादीनां चयने । यथा, "दृष्टाश्चर्य्यानां प्रजानां यज्ञा प्रचयं करोति ।" इति सिद्धान्तकौमुदी । ३ । ३ । ४० ॥)

प्रचरः, पुं, (प्रचरत्यस्मिन्निति । प्र + चर + आधारे अप् ।) पन्थाः । इति धरणिः ॥ प्रकर्षेण गमनञ्च ॥

प्रचरारूपः, त्रि, प्रचारूपः । प्रचारविशिष्टः । प्रचरत् प्रकाशमानं रूपं स्वरूपं यस्य सः ॥

प्रचलाकः, पुं, (प्रकर्षेण चलतीति । प्र + चल + आकन् ।) शरघातः । ग्रिवखण्डः । शुणङ्गमः । इति मेदिनी । के, १६६ ॥

प्रचलाकी, [न्] पुं, (प्रचलाकः ग्रिवखण्डोऽस्यास्तीति । प्रचलाक + इनिः ।) मयूरः । इति मेदिनी ॥ (यथा, उत्तररामचरिते । २ अङ्के । "कूजत्कुञ्जकुटीरकौञ्चिकघटाघुत्कारवत्- कीचक- स्तम्बाडम्बरमूकमौकुलिकुलक्लौञ्चावलोऽयं गिरिः। एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिता: कूजितै- रुद्वेल्लन्ति पुराणचन्दनतरुस्कन्धेषु कुम्भीनसाः॥")

प्रचलायितं, त्रि, (प्रचल इवाचरतीति । "कर्तुः क्यङ् सलोपश्च ।" ३ । १ । ११ । इति क्यङ् । प्रचलाय-शब्दाद्भावे क्तः ।) निद्रादिना घूर्णितम् । इत्यमरः । ३ । १ । ६२ ॥

प्रचारः, पुं, (प्रचरणमिति । प्र + चर + भावे घञ् ।) प्रचरणम् । व्यक्तः । प्रकाशः । यथा, "इमनकतरुशाखालम्बिछोलङ्गयुग्मं तुहिनकिरणबिम्बे खञ्जरीटप्रचारः ॥" इति शुक्राचार्य्यः ॥ (प्रचरत्यस्मिन्निति । प्र + चर + आधारे घञ् । गवादेश्चरणस्थानम् । यथा, महाभारते । १ । ४० । १८ । "परिश्रान्ताः पिपासार्त्ता आससाद मुनिं वने । गवां प्रचारेष्वासीनं फेनमापिबतां पयः ॥" अश्वानां नेत्ररोगविशेषः । तच्चिकित्सादिकं यथा, अश्ववैद्यके । ३० । ३१—३६ । "प्रच्छादयति यद्दृष्टिं मांसं पर्य्यन्तवर्त्तितम् । प्रचारकाख्यं तं विद्यात् नेत्ररोगं कफात्मकम् ॥ क्षितौ निपात्य तुरगं ततो नेत्रं प्रसादयेत् । कृतकर्म्मा भिषग् विद्वान् वड़िशेनाशिवर्त्मनि ॥ ततस्तीक्ष्णेन शस्त्रेण छिन्द्यात् प्रावरकं बुधः । शोणितस्य यथा पीड़ा जायेत न मनागपि ॥ मुखं तत् पूरयेन्नेत्रं मधुना सैन्धवेन वा । प्रक्षाल्य चोत्थाय ततः शस्त्रजां वेधयेत् शिराम् । कुष्ठेन वचया चव्या तथा चित्रकटुकेन च । प्रतिपानं प्रदातव्यं सुरया लवणैः सह ॥ निर्व्वातं विहितं स्थानं ग्रासे दूर्व्वा च पूजिता । गुरुभक्ष्यं न दातव्यं मधुरञ्च विशेषतः ॥")

प्रचुरं, त्रि, (प्रचोरतीति । प्र + चुर + "इगुपधज्ञेति ।" ३ । १ ।१३५ । इति कः । यद्वा, प्रभवत्चुरायां इति प्रादिसमासः ।) अनेकम् । तत्पर्य्यायः । प्रभूतम् २ प्राज्यम् ३ अदभ्रम् ४ बहुलम् ५ बहु ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूयः ११ भूरि १२ । इत्यमरः । ३।१।६३॥(यथा, भागवते । ५ । १३ । २२ ।

"अहो वृजिनमाखिलजनप्रशोभनं
किं जनभिक्षपरैरप्यनुक्षणम् ।
न यत् क्षुधीकेशयशः कृतात्मनां
महात्मनां वः प्रचुरः समागमः ॥")

प्रचुरपुरुषः, पुं, (प्रचोरतीति । प्र+चुर कि क्ते+कः । प्रचुरश्चासौ पुरुषश्चेति ।) चौरः । इति त्रिकाण्डशेषः ॥ (प्रचुरो बहुलः पुरुषश्चेति कर्म्मधारये ।) बहुनरञ्च ॥

प्रचेतसी, स्त्री, (प्रचेतयति सञ्चेतयतीति । प्र+चित्+णिच्+असच् । गौरादित्वात् ङीष् ।) कटफलः । इति राजनिर्घण्टः ॥ प्रचेतसः कन्या च ॥

प्रचेता, [तृ] पुं, (प्रचेतति युद्धादिस्थाने वीरान् सञ्चिनोतीति । प्र+चित्+तृच् ।) सारथिः । इति हेमचन्द्रः ॥

प्रचेताः, [स्] पुं, (प्रचेततीति । प्र+चित+असुन् ।) वरुणः । इत्यमरः । १ । १ । ६७ ॥ (यथा, रघौ । १ । ८० ।

"हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥"

मुनिविशेषः । (यथा, मनौ । १ । ३५ ।

"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च ॥"

प्रकृष्टं चेतोऽस्य ।) प्रकृष्टहृदि, त्रि । इति मेदिनी ॥ प्राचीनबर्हिराजपुत्रः । यथा,—

"प्राचीनबर्हिर्भगवान् सर्व्वयज्ञेश्वरो हरिः ।
यस्तन्तनयायां वै दश पुत्रानजीजनत् ॥
प्रचेतसस्ते विख्याता राजानः प्रथितौजसः ॥"

इति कौर्म्मे १२ अध्यायः ॥

अपि च ।

"प्राचीनबर्हिरुत्पन्नः पृथिव्यामेकराड्बभौ ।
उपयेमे शतद्रुस्तु सवर्णस्य स वै सुताम् ॥
तस्यां सुषाव सामुद्र्यां दश प्राचीनबर्हिषः ।
सर्व्वे प्रचेतसो नाम धनुर्व्वेदस्य पारगाः ॥
अपृथग्धर्म्मचरणास्तेऽतप्यन्त महत्तपः ।
दश वर्षसहस्राणि सलिलेशगुणाः ॥
प्रजापतिसुतां संप्राप्य भार्य्यां तेषान्तु मारिषा ।
अभवद्दक्षयज्ञार्थे तस्यां दक्षोऽभवत् ततः ॥"

इति मार्कण्डे ६ अध्यायः ॥

(पलदशाकयुक्ते, त्रि । यथा, ऋग्वेदे । २।२३।१० ।

"देवाश्चिन् ते अमुर्य्यप्रचेतसो दुहस्रते यज्ञियं
भागमानशुः ॥"

"हे दुहस्रते ! प्रचेतसः प्रकृष्टज्ञानास्ते त्वदीया देवाश्चिद् देवा अपि।" इति तद्भाष्ये सायणः ॥)

प्रचेलं, क्ली, (प्रचेलतीति । प्र+चेल्+अच् ।) पीतकाष्ठम् । इति शब्दचन्द्रिका ॥

प्रचेलकः, पुं, (प्रकर्षेण चेलति गच्छतीति । प्र+चेल्+ण्वुल् ।) घोटकः । इति शब्दमाला ॥

प्रचोदनी, स्त्री, (प्रचोद्यते रोगो ययेति । प्र+चुद्+णिच्+ल्युट् । ङीप् ।) कण्टकारी । इत्यमरः । २ । ४ । ६४ ॥

प्रचोदितः, त्रि, (प्र+चुद्+क्तः ।) प्रेरितः । यथा,—

"प्रचोदिता येन पुरा सरस्वती ।"

इति श्रीभागवते २ स्कन्धे ४ अध्यायः ॥

प्रच्छ, औ प्र प्रीप्से । इति कविकल्पद्रुमः ॥ (तुदा०-परः-सकः-अनिट् ।) प्रीप्सा ज्ञातुमिच्छा । अप च इत्यस्यैव ज्ञानपक्षे निष्पादनात्। छौ, अप्राक्षीत् । प्र, पृच्छति वार्त्तां गुरुं शिष्यः । इति दुर्गादासः ॥

प्रच्छदः, पुं, (प्रच्छाद्यतेऽनेनेति । प्र+छद+णिच्+करणे घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति उपधाया ह्रस्वः ।) आच्छादनम् । इति शब्दरत्नावली ॥ (यथा, रघुः । १६ । २२ ।

"प्रच्छदास्तरगलिताश्रुबिन्दुभिः
क्रोधभिन्नवलयैर्विवर्त्तनैः ॥")

प्रच्छदपटः, पुं, प्रकर्षेण छाद्यतेऽनेन स चासौ पटश्चेति । आच्छादनपटः । पाछुड़ इति ख्यातः । तत्पर्य्यायः । निचोलः २ । इत्यमरः । २।६।११६॥ निचुलः ३ । इति शब्दरत्नावली ॥ निचोलम् ४ । इति रभसः ॥ निचोली ५ । इति राजदेवः ॥ इत्यमरटीकायां भरतः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"वलीभङ्गाभोगैरलकपतितैः प्रीर्णकुसुमः
क्लियाः सद्भावस्यं कथयति रतं प्रच्छदपटः ॥")

प्रच्छना, स्त्री, (प्रच्छ+बाहुलकात् युच् । टाप् ।) आमन्त्रणा । इति जटाधरः ॥

प्रच्छन्नं, क्ली, (प्र+छद्+क्तः ।) अन्तर्द्वारम् । इत्यमरः । २ । २ । १४ ॥ आच्छन्ने, त्रि ॥ (यथा, महाभारते । ३ । ७१ । ३१ ।

"प्रच्छन्ना हि महात्मानश्चरन्ति पृथिवीमिमाम् ॥")

प्रच्छर्दिका, स्त्री, (प्र+छर्द् वमने+"रोगाख्यायां ण्वुल् बहुलम् ।" ३ । ३ । १०८ । इति ण्वुल् । स्त्रियां टापि अत इत्वम् ।) वमिः । इत्यमरः । २ । ६ । ५५ ॥ (वमनकारके, त्रि ॥)

प्रच्छादनं, क्ली, (प्रच्छाद्यतेऽनेनेति । प्र+छद्+णिच्+ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रावरणम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः । ३ । ३३५ ॥ (नेत्रच्छदम् । यथा, अश्ववैद्यके । २ । १० ।

"प्रच्छादनं भवेन्नेत्रं चाक्षिकूटमतः परम् ॥"

"वर्त्म नेत्रच्छदं प्रच्छादनं प्रच्छादनापरनामकं भवेत् । वर्त्म नेत्रच्छदेऽध्वनीत्यमरः ॥" इति तट्टीका ॥ भावे ल्युट् । गोपनम् । यथा, महाभारते । २ । १६१ । १७ ।

"आत्मप्रच्छादनार्थं वै बाहुवीर्य्यमुपाश्रितः ।
विप्ररूपं विधायेदं मन्ये मां प्रति युध्यसे ॥")

प्रच्छादितं, त्रि, (प्र+छद्+णिच्+क्तः ।) आच्छादितम् । इति हलायुधः ॥

प्रजः, पुं, (प्रजायते जायागर्भे इति । प्र+जन्+डः ।) पतिः । "जायायां प्रविश्य पुनर्जायते इति

ऽयं प्रजः पतिः ।" इति प्रजावतीशब्दटीकायां भरतः ॥

प्रजनः, पुं, (प्रजायतेऽनेनेति । प्र+जन्+करणे ल्युट् । "जनिवध्योश्च ।" ७ । ३ । ३५ । इति न वृद्धिः ।) उपस्थः । इत्यमरः । २ । ६ । ७५ ॥ (स्त्रीगर्भाधादिषु पुंस्त्ववादीनां प्रथमगर्भाधानाय मैथुनाभियोगः । प्रजनं स्त्रीत्वमिति केचित् ॥ प्रसूनां गर्भधारणकालः । इति स्वामी ॥ गर्भा प्रथमगर्भग्रहणाभियोगः । इति सुभूतिः ॥ स्त्रीगवीषु पुंस्त्वानां प्रथमगमनमिति सर्व्वस्वम् ॥ किन्तु वीर्य्यासुपसरं दर्शयेति भट्टिः । इत्यमरटीकायां भरतः ॥ (मैथुनसाधनोपस्थेन्द्रियम् । यथा, मनुः । १२ । १२१ ।

"वाच्यर्थं नियतकृत्स्नन्तु प्रजने च प्रजापतिम् ॥"

प्र+जन्+भावे घञ् । पुत्रोत्पादनम् । यथा, मनुः । ६ । १२१ ।

"उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्येण तं भजेत् ॥"

जनयितरि, त्रि । यथा, भागवते । ८ । ५ । ६७ ।

"दुग्धो मयाऽयं प्रजनः प्रजानां
प्रसीदतां नः स महाविभूतिः ॥"

तथा, भगवद्गीतायाम् । १० । २८ ।

"प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः ॥")

प्रजननं, क्ली, (प्रजायतेऽनेनेति । प्र+जन्+ल्युट् ।) योनिः । (यथा, सुश्रुते । १ । २३ ।

"स्त्रिक्पायुप्रजननललाटगण्डौष्ठपुष्टकर्णफल-
कोषोदरजत्रुसुखाभ्यन्तरसंज्ञाः सुखरोपणीय-
व्रणाः ॥" प्र+जन्+भावे ल्युट् ।) जन्म । इति मेदिनी । ने, १६१ ॥ (यथा, राजतरङ्गिण्याम् । २ । ६१ ।

"वेधाः परां धुरमुमेति परीक्षकाणा-
मिच्छोः फलप्रजननेन कृतश्रमो यः ॥"

धात्वौकर्म्म । यथा, सुश्रुते शारीरस्थाने । १० अध्याये । "ततः क्लोपधाने मृदुविस्रीर्णे प्रयते स्त्रियामासन्नप्रसवायामनुत्तानामप्रकूजनीयाञ्चतसः स्त्रियः परिचतवयसः प्रजननकुशलाः कल्पितसखाः परिचरेयुरिति ॥") प्रजनः । इति विश्वः ॥ (यथा, महाभारते । १। १२० । ३७ ।

"तस्मात् प्रदेष्यास्यद्य त्वां क्षीणः प्रजननात्
स्वयम् ।
सदृशात् श्रेयसो वापि विद्धि पत्यं यशस्विनि ! ॥"

प्रजनयतीति । प्र+जन+ल्युः । प्रजोत्पादके, त्रि । यथा, वाजसनेयसंहितायाम् । १६ । ७८ ।

"इदं हविः प्रजननं मेऽस्तु ॥")

प्रजनिका, स्त्री, (प्रजनयतीति । प्र+जन+णिच्+ण्वुल् । टापि अत इत्वम् ।) माता । इति जटाधरः ॥

प्रजल्पः, पुं, (प्र+जल्प+भावे घञ् ।) वाक्यविशेषः । यथा,—

"असूयैर्ष्यामदयुता योऽवधीरणसूचया ।
प्रियस्य कौशलोद्गारः प्रजल्पः स तु कथ्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

(बहुव्रीहिरयम्। यथा, चण्डीशप्रदीपिकायाम्। १। १५।
"अन्नाद्यारः प्रवासश्च प्रजल्पो नियमस्यहः।
जनसङ्गश्च जौल्यञ्च षड्भिर्योगो विपद्यते॥")
प्रजवः, पुं, (प्रजवनमिति। प्र+जु वेगगतौ+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) प्रकर्षवेगः। प्रपूर्वजुधातोर्भावेऽल्प्रत्ययनिष्पन्नः॥ (यथा, ऋग्वेदे। ७। ३३। ८।
"वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥")
प्रजवी, त्रि, (प्रजवतीति। प्र+जु वेगगतौ+"प्रजोरिनिः।" ३। २। १५६। इति इनिः।) प्रकर्षवेगयुक्तः। इत्यमरः। २। ८। ७२॥
प्रजा, स्त्री, (प्रजायते इति। प्र+जन्+"उपसर्गे च संज्ञायाम्।" ३। २। ९९। इति डः।) सन्ततिः। पिङ्गलाक्षगुणदोषैश्च प्रजा विभिन्ना भवति। यथा, अग्निपुराणे।
"माहेयी पृथुलदोषैश्च पिङ्गपृथुगुणैश्च च।
विभिन्नासु प्रजाः सर्वा भवन्ति भवपृथिवीनाम्॥"
अजः। इत्यमरः। २। ३। ३२॥ (यथा, रघुः। १। २७।
"प्रजानां विनयाधानात् रक्षणात् भरणादपि।
स पिता पितरस्तासां केवलं जन्महेतवः॥"
उत्पत्तिः। यथा, ऋग्वेदे। १०। ७२। ६।
"प्रजाये ऋत्वे वसुपुत्रमार्जीकमाभरत्॥")
प्रजागरः, पुं, (प्र+जाग+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) प्रकर्षेण जागरणम्। इति हलायुधः॥ यथा, अग्निपुराणे।
"देवतानां पितॄणाञ्च घोरं ज्ञात्वा प्रजागरम्।
त्रेतायुगे चतुर्थांशे रावणक्षपणः क्षयात्।
रामं दाशरथिं प्राप्य जगतः क्षयमीयिवान्॥"
(विष्णुः। यथा, महाभारते। १३। १४८। ११५।
"आचारनिलयो धाता पुष्पहासः प्रजागरः॥"
"निद्रावृद्धस्वरूपत्वात् प्रजागरः।" इति तद्भाष्यम्॥ प्राज्ञः। यथा, भागवते। ७। २७। १५।
"ते चक्रवेगानुचराः पुरञ्जनपुरं बहिः।
सर्वतोऽभीयुरावृत्य प्रजागराः॥"
"प्रजागराः प्राज्ञाः।" इति तट्टीकायां स्वामी॥)
प्रजाता, स्त्री, (प्रजातं प्रजननं सुतादीनामुत्पत्तिरित्यर्थः। तदस्या अस्तीति। अच्। ततष्टाप्।) जातापत्या। प्रसूता। इत्यमरः। २। ६। १६॥ (यथा, सुश्रुते शिशुरक्षणाध्याये ६ अध्याये।
"स्त्रीणामपप्रजातानां प्रजातानां तथार्हितैः।
दाहज्वरकरो घोरो जायते रक्तविद्रधिः॥"
"ततोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाहमाणायां स्त्रियः शब्दं कुर्युः प्रजाता प्रजाता धर्मं धर्मं पुत्रमिति तथास्या हर्षेणाप्यायनं प्राणाः। यदा च प्रजाता स्यात् तदैनामभिवेत्तेति काश्चिदस्या अमरा अपत्या वाप्यपत्या वेति॥"
इति चरके शारीरस्थाने ३ष्टमेऽध्याये॥

अग्निविशेषे, पुं। यथा, काल्यायनश्रौतसूत्रे। २०। ३। २०।
"प्रजाति वायव्यम्।" "बलवायां ज्ञानरेतःस्कन्दनः प्रजात इत्युच्यते॥" इति तद्भाष्यम्॥)
प्रजादा, स्त्री, (प्रजां गर्भदोषनिवारणेन सन्ततिं ददातीति। दा+कः। टाप्।) गर्भदात्रीक्षुपः। इति राजनिर्घण्टः॥ प्रजादातरि, त्रि॥
प्रजादानं, क्ली, (प्रजातो जन्ततो दानं मुष्टिरस्य।) रजतम्। इति शब्दचन्द्रिका॥ (प्रजाया दाने आदाने आदाने च॥)
प्रजानती, स्त्री, (प्रजानातीति। प्र+ज्ञा+शतृ+ङीप्।) पण्डिता। प्राज्ञी। इति हेमचन्द्रः। ३। १८६॥ (विशेषवैशम्पति, त्रि। यथा, रामायणे। २। ७२। १७।
"तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम्।
अजानन्नं प्रजानन्नी राज्यलोभेन मोहिता॥")
प्रजापः, पुं, (प्रजाः पातीति। पा रक्षणे+कः।) राजा। इति हेमचन्द्रः। ३। ३५७॥
प्रजापतिः, पुं, (प्रजानां पतिः।) ब्रह्मा। इत्यमरः। १। १। १७॥ (यथा, महाभारते। १। १। ३२।
"यस्मात् पितामहो ब्रह्मे प्रसूरेकः प्रजापतिः।
ब्रह्मा सुरगुरुः स्वायम्भुवः कः परमेष्ठ्यथ॥")
इत्यादिः। (यथा,—
"द्वितीये हि युगे सर्व्वमक्रोधव्रतमास्थितम्।
दिव्यं सहस्रवर्षाणामसुरा अभिदुद्रुवुः॥
तपोविघ्नं श्रमीकर्त्तुन्नपोविघ्नं महात्मनाम्।
पश्यन् समर्थस्तोपेक्षाचक्रे दक्षः प्रजापतिः॥
पुनर्माहेश्वरं भागं ध्रुवं दक्षप्रजापतिः।
प्रायो न कल्पयामास प्रोच्यमानः सुरैरपि॥"
इति चरके चिकित्सास्थाने ढतीयेऽध्याये॥)
महीपालः। इति मेदिनी। ते, २०८॥ (इन्द्रः। यथा, महाभारते। ३। १८५। १६।
"अयमेव विधाता हि तथैवेन्द्रः प्रजापतिः॥")
जामाता। दिवाकरः। वह्निः। त्वष्टा। इति हेमचन्द्रः॥ (यथा, वाजसनेयसंहितायाम् १२। ६१।
"तां विश्वेदेवैर्ऋतुभिः संविदानः
प्रजापतिर्विश्वकर्म्मा विमुञ्चतु॥"
मनुः। यथा, मनौ। १०। ७८।
"न तौ प्रति हि तान् धर्म्मान् मनुराह प्रजापतिः॥")
दश प्रजापतयो यथा, आह्निकतत्त्वे।
"मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्।
प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च।
देवान् सर्व्वानृषीन् सर्व्वांस्तर्पयेदक्षतोदकैः॥"
एकविंशतिप्रजापतयो यथा,—
"ब्रह्मा स्वायम्भुवो भृगुर्धर्म्मस्तथा यमः।
मरीचिरङ्गिराश्चित्र पुलस्त्यः पुलहः क्रतुः॥
वशिष्ठः परमेष्ठी च विश्वसृक् सोम एव च।
कर्दमश्चापि यः प्रोक्तः क्रोधोऽर्व्वाक् क्रीत एव च॥
एकविंशतिसङ्ख्याकाः प्रजापतय एव ते॥"
इति महाभारते मोक्षधर्म्मः॥ *॥

पिता। यथा,—
"जनको जन्मदानाच्च रक्षणाच्च पिता नृणाम्।
ततो विस्तीर्णकरणात् कलया स प्रजापतिः॥"
इति ब्रह्मवैवर्ते गणपतिखण्डे ३४ अध्यायः॥*॥
स्वनामख्यातपीठविशेषश्च॥
प्रजावती, स्त्री, (प्रजाश्वस्या इति। प्रजा+मतुप्। मस्य वः। स्त्रियां ङीप्।) भार्य्याजाया। इत्यमरः। २। ६। ३०॥ ज्येष्ठभार्य्यापत्नी। इति कैश्चित्। इति भरतः॥ (यथा, रघुः। १४। ४५।
"प्रजावती रोहदशंसिनी ते
तपोवनेषु क्षतयाजुरेव।
स त्वं रथी सदृशमहिषीनेवां
प्रापय्य वाल्मीकिपदं स्नुषेनाम्॥"
प्रियव्रतपत्नी। यथा, मार्कण्डेये। ५१। १३।
"प्रियव्रतात् प्रजावत्यां वीरात् कन्या व्यजायत॥")
सन्तानविशिष्टा। (यथा, मार्कण्डेये। ६७। १८।
"साम्प्रतं सर्गकर्त्तृत्वमादिष्टं ब्रह्मणा मम।
सोऽहं पत्नीमभिष्यामि धन्यां दिव्यां प्रजावतीम्॥")
प्रजाहितं, क्ली, (प्रजायै हितम्।) जलम्। इति शब्दमाला॥ प्रजोपकारे, त्रि॥
प्रजिनः, पुं, (प्रकर्षेण जयतीति। प्र+जि+बाहुलकात् नक्।) वायुः। इति शब्दमाला॥
प्रजेश्वरः, पुं, (प्रजानामीश्वरः।) राजा। इति त्रिकाण्डशेषः॥ (यथा, रघुः। ३। ६८।
"तमभ्यनन्दत् प्रथमं प्रबोधितः
प्रजेश्वरः शासनहारिणा हरेः॥")
प्रज्ञः, त्रि, (प्रकर्षेण जानातीति। प्र+ज्ञा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।) पण्डितः। इति प्राच्यशब्दटीकायां भरतः॥ (यथा, माकण्डेयोपनिषदि। ७।
"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्॥") प्रज्ञातजातुकः। इति प्रत्युग्रशब्दटीकायां भरतः॥ वरुणश्च॥
प्रज्ञप्तिः, स्त्री, (प्र+ज्ञा+णिच्+क्तिन्।) सङ्केतम्। इति त्रिकाण्डशेषः॥ (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शनम्।
"विष्णोः प्रज्ञप्तिरेवैका ग्रन्थैरेतैरुदीर्य्यते।
प्रज्ञप्तिरूपो हि हरिः स च सानन्दलक्षणः॥"
ज्ञानम्। ज्ञापनम्। यथा, भागवते। ३। २५। १।
"कपिलस्यास्य संख्याता भगवान्नारायणः।
जातः सत्यमजः साक्षादात्मप्रज्ञप्तये नृणाम्॥"
जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५६॥)
प्रज्ञप्ती, स्त्री, (प्रज्ञप्ति+वा ङीष्।) जिनविद्यादेवीविशेषः। इति हेमचन्द्रः। २। १५६॥
प्रज्ञा, स्त्री, (प्र+ज्ञा+कः। टाप्।) बुद्धिः। (यथा, रघुः। १। १५।
"आचारप्रभवो धर्म्मः धर्म्मस्य प्रभुरागमः॥"
एकाग्रता। यथा, पञ्चदश्याम्। ७। १०६।
"तस्मिन् धीरो विधायैव प्रज्ञां कुर्व्वीत मानवः॥")
प्राज्ञः। प्रकर्षेण जानाति या। इत्यमरः॥

सरस्वती । इति शब्दरत्नावली ॥ बुद्धिर्वैदिक-पर्य्यायः । केतुः १ केतः २ चेतः ३ चित्तम् ४ क्रतुः ५ अक्षुः ६ धीः ७ धृषीः ८ माया ९ वयुनम् १० अभिज्ञा ११ । इत्येकादशप्रज्ञा-नामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

प्रज्ञाकायः, पुं, (प्रज्ञा कायं इवास्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

प्रज्ञाचक्षुः, पुं, (प्रज्ञा एव चक्षुर्यस्य ।) धृत-राष्ट्रः । इति शब्दरत्नावली ॥ (यथा, महा-भारते । १ । १ । १७७ ।

"श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः । ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत ॥")

प्रज्ञानं, क्ली, (प्रज्ञायतेऽनेनेति । प्र + ज्ञा + ल्युट् ।) बुद्धिः । (यथा, महाभारते । ३ । १८५ । १६ ।

"त्वमेव तत्त्वतो मोक्षात् न प्रज्ञानं तवास्ति ह ॥")

चिह्नम् । इत्यमरः । ३।३।१२२ ॥ (यथा, महा-भारते । ५ । ३३ । २६ ।

"नासं दृष्टो ह्युपयुक्ते परार्थे तत् प्रज्ञानं प्रथमं पण्डितस्य ॥"

चैतन्यम् । तल्लक्षणं यथा, पञ्चतन्त्रे । ५ । १ ।

"येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च । स्वादत्ति वेत्ति विजानाति तत् प्रज्ञानमुदीरितम् ॥")

पण्डिते, त्रि । इति भरतद्विरूपकोषः ॥

प्रज्ञी, [न्] त्रि, (प्रज्ञाऽस्त्यस्येति । प्रज्ञा + इनिः ।) पण्डितः । इति भरतद्विरूपकोषः ॥

प्रज्ञुः, पुं, (प्रगते जानुनी यस्य । "प्रसम्भ्यां जानु-नोर्ज्ञुः ।" ५ । ४ । १२८ । इति ज्ञुः ।) प्रगत-जानुकः । इत्यमरः । २ । ६ । ४७ ॥ यस्य जानुनोर्मध्ये नित्यं कादाचित्कं वा महद्दन्त-राले तस्मिन् हयम् । इति भरतः ॥

प्रज्वलितः, त्रि, (प्र + ज्वल + क्तः ।) प्रकृष्टज्वलन-विशिष्टः । यथा,—

"अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । सुवर्णवर्णममलं समिद्धं सर्व्वतोमुखम् ॥"

इति भवदेवभट्टः ॥

प्रज्ञीनं, क्ली, (प्र + ज्ञी गमीगतौ + क्तः ।) पक्षिणां गतिविशेषः । इत्यमरः । २ । ५ । ६७ ॥ प्रथम-ज्ञीनं प्रज्ञीनं ऊर्द्ध्वयनाय क्रमबन्धः । तिर्य्यग्-गमनम् । इत्यन्ये । इति भरतः ॥

प्रज्ञः, पुं, (प्र + "नञ्च पुराणे प्रात् ।" ५ । ४ । ५ इत्यस्य वार्त्तिक० इति नः ।) पुराणः । "पुरा-णार्थे वर्त्तमानात् प्रशब्दात् नो वक्तव्यः ।" इति सिद्धान्तकौमुदी ॥

प्रज्ञप्तः, त्रि, (प्र + ज्ञप + क्तः ।) प्रकर्षेण ज्ञप्तः । प्रज्ञप्तिविशिष्टः । यथा,—

"ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिववरिञ्चिनुतं शरण्यम् । भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ! ते चरणारविन्दम् ॥"

इति श्रीभागवतम् ॥

प्रज्ञप्तिः, स्त्री, (प्रज्ञप्तं ज्ञानमिति । प्र + ज्ञप + भावे क्तिन् ।) प्रज्ञानम् । तत्पर्य्यायः । प्रज्ञि-

ज्ञप्तिः २ अनुनयः ३ । इति हेमचन्द्रः ॥ (यथा, रघौ । ११ । ८६ ।

"राघवोऽपि चरणौ तयोर्निधेः शुश्रुषताभिति वदन् समग्रहीत् । निर्ज्जितेषु तरसा तरस्विनां प्रज्ञप्तय प्रणतिरेव कीर्त्तये ॥")

प्रज्ञयः, पुं, (प्रज्ञयनम् । प्र + ज्ञी + "एरच् ।" ३ । ३ । ५६ । इति अच् ।) प्रीत्या प्रार्थनम् । तत्पर्य्यायः । प्रणयः २ । इत्यमरः । ३।२।२५॥

प्रवरः ३ । इति भरतः ॥ (यथा, रघौ । २।५८ ।

"सम्बन्धमाभाषणपूर्व्वमाहु-र्वृत्तः स नौ वज्रतयोर्व्यनक्ति । तद्भूतनाथानुग ! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् ॥")

प्रेम । (यथा, भगवद्गीतायाम् । ११ । ४ ।

"सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति । अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि ॥")

याच्ञा । विश्रम्भः । निर्व्वाणः । इति मेदिनी । ये, ८६ ॥

प्रज्ञयी, पुं, (प्रज्ञयोऽस्यास्तीति । प्रज्ञय + इनिः ।) स्वामी । इति हेमचन्द्रः ॥ प्रणययुक्ते, त्रि । (यथा,—

"प्रज्ञयिनि विजनार्थे लज्जया मौनभावा प्रति किमिह नवोढा रौति विवौकधाक ॥"

इत्युद्भटः ॥)

प्रज्ञयिनी, स्त्री, (प्रज्ञयिन् + ङीप् ।) भार्य्या । इति हेमचन्द्रः ॥

प्रणवः, पुं, (प्रकर्षेण नूयते स्तूयते आत्मा स्वेष्ट-देवता वानेनेति । प्र + णु स्तुतौ + "ऋदो-रप् ।" ३ । ३ । ५७ । इति अप् । "उपसर्गा-दसमासेऽपि णोपदेशस्य ।" ८ । ४ । १४ । इति णत्वम् । यद्वा, ब्रह्मविष्णुमहेशरूपत्वात् प्रण-म्यते इति । प्र + णम + कर्म्मणि घञ् । संज्ञा-पूर्व्वकत्वात् गुणाभावः । एषोदरादित्वात् मस्य वः ।) ॐकारः । इत्यमरः । १ । ६ । ४ ॥ तस्य पर्य्यायो यथा,—

"ॐकारः प्रणवस्तारो वेदादिर्नृभुजो ध्रुवः । त्रैगुण्यं त्रिगुणो ब्रह्म सत्यो मन्त्रादिरव्ययः ॥ ब्रह्मबीजं चितत्त्वश्च पञ्चरश्मिश्चिदेवतः ॥"

इति बीजवर्णाभिधानम् ॥

अपि च ।

"ॐकारो वर्त्तुलस्तारो वामश्च हंसकारयम् । मन्त्राद्यः प्रणवः सत्यं विष्णुशक्तिश्चिदेवतम् ॥ सर्व्वजीवोत्पादकश्च पञ्चदेवो ध्रुवश्चिकः । सावित्री त्रिगुणो ब्रह्म त्रिगुणो गुणजीवकः ॥ आदिबीजं वेदसारो वेदबीजमतः परम् । पञ्चरश्मिश्चिकूटे च त्रिभवे भवनाशनः ॥ गायत्री बीजपञ्चार्णो मन्त्रविद्याप्रदः प्रभुः । अक्षरं मातृकाहृच्चानादिदेवतमोचनौ ॥"

इति तन्त्रम् ॥ * ॥

(यथा, मन्त्रनिर्णयतन्त्रे । १ । १२ ।

"अकारेण जगत्पाता संहर्त्ता स्यादुकारतः । मकारेण जगत्सृष्टा प्रणवार्थ उदाहृतः ॥"

यथा च ।

"अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः । मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः ॥"

वेदस्याध्ययनारम्भे अध्ययनसमाप्तौ च ब्राह्म-णस्य ॐकारोच्चारकर्त्तव्यतायामुक्तं यथा मनौ । २ । ७३ ।

"ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्व्वदा । स्रवत्यनोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते ॥")

अक्षरोद्धारक्रमो यथा,—

"एकमेवाद्वयं ब्रह्म मायया तु चतुष्टयम् । रोहिण्यौतनयो रामः अकाराक्षरसम्भवः ॥ तेजसात्मकप्रद्युम्न उकाराक्षरसम्भवः । प्रज्ञात्मको निरुद्धो वै मकाराक्षरसम्भवः । अर्द्धमात्रात्मकः शान्तो यस्मिन् विश्वं प्रतिष्ठि-तम् ॥"

इति गोपालतापनीयोपनिषत् ॥ * ॥

स च मान्त्रिकः । यथा,—

"ॐकारश्चाथ शब्दश्च द्वावेतौ ब्राह्मणः पुरा । कण्ठं भित्त्वा विनिर्य्यातौ तेन माङ्गलिकावुभौ ॥"

इति सुग्धबोधटीकायां दुर्गादासः ॥ * ॥

अस्य माहात्म्यं यथा,—

"विश्वपादशिरोग्रीवं विश्वेशं विश्वभावनम् । यत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत् ॥ तदेवाध्ययनं तस्य स्वरूपं ब्रह्मणः परम् । अकारश्च तथोकारो मकारश्चाक्षरत्रयम् ॥ एतान्यिस्रः क्षुता मात्राः सात्त्विकाः सतामसाः । निर्गुणा योगिगम्याश्च अर्द्धमात्रा तु सा क्षुता ॥ गान्धारीति च विज्ञेया गान्धारस्वरसंश्रया । पिपीलिकागतिस्यर्द्धा प्रयुक्ता मूर्द्ध्नि लक्ष्यते ॥ यदा प्रयुक्त ॐकारः प्रतिनिर्य्याति मूर्द्धनि । तदोङ्कारमयो योगी अक्षरे लक्षरो भवेत् ॥ प्राणो धनुः शरश्चात्मा ब्रह्म वेधसुदाहृतम् । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥ ओमित्येते त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः । विष्णुक्रमास्त्रयश्चैव ऋक्सामानि यजूंषि च ॥ मात्राश्चार्द्धं चतस्रस्तु विज्ञेयाः परमार्थतः । तत्र युक्तश्च यो योगी स तत्क्रममवाप्नुयात् ॥ अकारश्चाभवद्भूर्लोक उकारश्चोच्यते भुवः । सवयश्चनो मकारश्च स्वर्लोकः परिकल्प्यते ॥ अक्षा तु प्रथमा मात्रा द्वितीयाक्षरसंज्ञिका । मात्रा तृतीया विच्छक्तिरर्द्धमात्रा परं पदम् ॥ अनेनैव क्रमेणैता विज्ञेया योगभूमयः । ओमित्युच्चारणात् सर्व्वं शब्दितं सदसद्भवेत् ॥ अक्षा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता । तृतीया तु प्लुतार्द्धाख्या वचसः वाक्यगोचरे ॥ इत्येतदक्षरं ब्रह्म परमोङ्कारसंज्ञितम् । यस्तं वेद नरः सम्यक् तथा ध्यायति वा पुनः ॥ संसारचक्रसृतृष्णस्य त्यक्त्वाविविधबन्धनः । प्राप्नोति ब्रह्मनिलयं परमं परमात्मनि ॥

अचौर्यकर्मनिरतस्तु ज्ञात्वा जन्तुमुपस्थितम्।
उत्क्रान्तिकाले संप्राप्य पुनर्योगित्वमृच्छति॥
तस्मादविप्लुतयोगेन विप्लुतयोगेन वा पुनः।
श्रेयांस्यरिष्टानि सदा योगोत्क्रान्तौ न
सीदति॥"

इति श्रीमार्कण्डेयपुराणे ओंकारमाहात्म्यम्॥*॥

"यज्ञोपवीतिदिक्षायां यच्छ्राद्धं यदयज्ञियम्।
यदग्नेयमनुक्तञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वमाविकलं भवेत्॥"

इति तिथ्यादितत्त्वम्॥*॥

"ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्॥"

इति श्रीभगवद्गीतायाम्। ८। १३॥

प्रणादः, पुं, (प्रणदनमिति। प्र+नद+घञ्।) अनुरागशब्दः। इत्यमरः। १। ६। ११॥

"प्रीतिजनितो सुखकण्ठादिशब्दः। प्रीतिजं प्रीतूलतम्। 'अनुरागजते शब्दे प्रणादः प्रीतूलतं वृषाम्।' इति शब्दार्णवः॥ गुणानुरक्तलोकप्रभवः शब्दः। इति मधुमाधवः। अनुरागजन्या जनशब्दः। इति कलिङ्गः।"

इत्यमरटीकायां भरतः॥ तारशब्दः। (यथा, रामायणे। २। ६८। २।

"तेन तत्र प्रणादेन दुःखितः स महीपतिः।
चिच्छेद जीविते श्रद्धां धर्म्मे यशसि चात्मनः॥")

अवणामयः। इति मेदिनी। दे, ३६॥ शिवस्य नामान्तरं कर्णनादः। यथा,—

"कर्णस्रोतःस्थिते याति प्रणादीति विविधान्
स्वरान्।
भेरीनादङ्गशब्दानां कर्णनादः स उच्यते॥"

इति माधवकरः॥

प्रणामः, पुं, (प्र+नम+भावे घञ्।) प्रणतिः। प्रणिपातः। भक्तिश्रद्धातिशययुक्तनमस्कारः। स तु स्वापकर्षबोधकव्यापारविशेषः। इति मुग्धबोधटीकायां दुर्गादासः॥ स चतुर्विधः। अभिवादनम् १ अष्टाङ्गः २ पञ्चाङ्गः ३ करशिरःसंयोगश्च ४। प्रथमस्य लक्षणं तच्छब्दे द्रष्टव्यम्॥ द्वितीयो यथा,—

"पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा।
वचसा मनसा चैव प्रणामोऽष्टाङ्ग ईरितः॥"

तस्य फलम्।

"भूमौ निपत्य यः कुर्य्यात् क्षणेऽष्टाङ्गनतिं सुधीः।
सहस्रजन्मजं पापं त्यक्त्वा वैकुण्ठमाप्नुयात्॥"

तृतीयो यथा,—

"बाहुभ्यामेव जानुभ्यां शिरसा वचसा दृशा।
पञ्चाङ्गोऽयं प्रणामः स्यात् पूजासु प्रवरा-
विमौ॥"*॥

प्रकर्षेण नमनम्। तद्विधिर्यथा, कालिकापुराणे।

"शिरोमन्त्रादयोः कृत्वा बाहुभ्यान्च परस्परम्।
प्रपन्नं पाहि मामीश भीतं जन्तुमहार्णवात्॥"

किञ्चागमे।

"दोर्भ्यां पद्भ्याञ्च जानुभ्यामुरसा शिरसा दृशा।
मनसा वचसा चैति प्रणामोऽष्टाङ्ग ईरितः॥*॥

जानुभ्यामेव बाहुभ्यां शिरसा वचसा धिया।
पञ्चाङ्गकः प्रणामः स्यात् पूजासु प्रवरादिमौ॥"

इति॥*॥

"गरुडं दक्षिणे कृत्वा कुर्य्यात्तत्पृष्ठतो मुधः।
अवश्यञ्च प्रणामांस्त्रीन् मुक्तश्चेदधिकाधिकान्॥"*॥

तथा च नारदपञ्चरात्रे।

"सन्धिं वीक्ष्य हरिं चात्रं गुरून् स्वगुरुमेव च।
द्विचतुर्व्विंशदथवा चतुर्व्विंशत्तदर्द्धकम्॥
नमेत्तदर्द्धमथवा तदर्द्धं सर्व्वदा नमेत्॥"*॥

विष्णुधर्म्मोत्तरे।

"देवार्चादर्शनादेव प्रणमेन्मधुसूदनम्।
स्नानापेक्षा न कर्त्तव्या ह्यशौचे द्विजसत्तमाः॥
देवार्चाङ्घ्रिपूतं हि शुचि सर्व्वं प्रकीर्त्तितम्॥"*॥

अथ नमस्कारमाहात्म्यम्। नारसिंहे।

"नमस्कारः स्तुतो यज्ञः सर्व्वयज्ञेषु चोत्तमः।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

स्कान्दे।

"दक्षप्रणामं कुरुते विष्णवे भक्तिभावतः।
रेणुसङ्ख्यां वसेत् स्वर्गे मन्वन्तरशतं नरः॥"

तत्रैव ब्रह्मनारदसंवादे।

"प्रणम्य दण्डवद्भूमौ नमस्कारेण योऽर्चयेत्।
स यां गतिमवाप्नोति न तां क्रतुशतैरपि।
नमस्कारेण चैकेन नरः पूतो हरिं व्रजेत्॥"

तत्रैव श्रीशिवोमासंवादे।

"भूमिमापीड्य जानुभ्यां शिर आरोप्य वै
सुवि।
प्रणमेद्यो हि देवेशं सोऽश्वमेधफलं लभेत्॥"

तत्रैवान्यत्र।

"तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च।
नारायणप्रणामस्य कलां नार्हन्ति षोड़शीम्॥
प्राणयोगेऽपि नमस्कारं कुर्व्वतः प्राङ्मुखस्य वै।
प्रणतस्यार्च्चितं पापं तत्क्षणादेव नश्यति॥
रेणुमात्रितगात्रस्य कथा देहे भवन्ति ये।
तावद्वर्षसहस्राणि विष्णुलोके महीयते॥"

विष्णुधर्म्मोत्तरे।

"अभिवाद्य जगन्नाथं कृतार्थश्च तथा भवेत्।
नमस्कारक्रिया तस्य सर्व्वपापप्रणाशिनी॥
जानुभ्यामेव पाणिभ्यां शिरसा च विचक्षणः।
कृत्वा प्रणामं देवस्य सर्व्वान् कामानवाप्नुयात्॥"

विष्णुपुराणे।

"अनादिनिधनं देवं दैत्यदानवदारणम्।
ये नमन्ति नरा नित्यं न हि पश्यन्ति ते यमम्॥
ये जना जगतां नाथं नित्यं नारायणं द्विजाः।
नमन्ति न हि ते विष्णोः स्थानादन्यत्र गामिनः॥"

नारदीये।

"एकोऽपि कृष्णस्य कृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय॥"

हरिभक्तिसुधोदये।

"विष्णोर्देवप्रणामार्थं भक्त्या पततां भुवि।
प्राप्तिं प्राप्तं क्षतं क्षुद्रं मोक्षिष्यति पुनः सकृत्॥"

स्कान्दे देवभूतविकुण्डलसंवादे।

"तपस्तप्त्वा नरो घोरमरण्ये म्रियतेऽथिवः।
यत् फलं न समाप्नोति तत्फलं गरुडध्वजम्॥
कृत्वापि बहुशः पापं नरो मोहसमन्वितः।
न याति नरकं गत्वा सर्व्वपापहरं हरिम्॥"

तत्रैव वेदनिधिस्तुतौ।

"अपि पापं दुराचारं नरं त्वत्प्रवणं हरे।
नेक्षन्ते किङ्करा राज्ञो जलूकाक्षपणं यथा॥"

विष्णुपुराणे श्रीयमस्य निजभटानुग्रहणे।

"हरिमभरणाचिंतात्रिपथं
प्रणमति यः परमार्थतो हि मर्त्यः।
तमपगतसमस्तपापपङ्कं
व्रज परिहृत्य यथामिमाप्यसिक्तम्॥"

ब्रह्मवैवर्त्ते।

"प्रत्यागतस्त्वयोच्चार्य
हरिमीशं प्रणमन्ति ये नराः।
न पतन्ति भवाम्बुधौ स्फुटं
पतितानुद्धरति स्म तानसौ॥"

अष्टमस्कन्धे च बलिवाक्ये।

"अहो प्रणामाय कृतः समुद्यमः
प्रपन्नभक्तार्थविधौ समाहितः।
यल्लोकपालैस्त्वदनुग्रहोऽमरै-
रलब्धपूर्व्योऽपचदेऽसुरेऽर्पितः॥"

अतएव नारायणशूरकवौ।

"अहो भाग्यमहो भाग्यमहो भाग्यं वृषाम्यहम्।
येषां हरिपदाम्भोजं शिरो न्यस्तं यथा तथा॥"

किञ्च। नारसिंहे श्रीयमोक्तौ।

"तस्य वै नारसिंहस्य विष्णोरमिततेजसः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

भविष्योत्तरे च जलशेतुप्रसङ्गे।

"विष्णोर्देवजगद्धातुर्जनार्द्दनजगत्पतेः।
प्रणामं ये प्रकुर्व्वन्ति तेषामपि नमो नमः॥"

इत्यादि॥*॥

अथ प्रणामनित्यता। हरिनारदीये मुक्तकोपाख्यानारम्भे।

"सकृद्वा न नमेद्यस्तु विष्णवे शूलपाणिने।
शूकरोपमं विजानीयात् कदाचिदपि नालपेत्॥"

किञ्च। पाद्मे वैशाखमाहात्म्ये यमब्राह्मणसंवादे।

"पद्मनाभो भगवद्वारं नाम गुह्यपरिच्छदम्।
अजित्वा तत्प्रणामादि यान्ति ते नरकौकसः॥"*॥

अथ नमस्कारे निषिद्धानि। विष्णुस्मृतौ।

"अद्यप्रभृति यत्किञ्चित् पुमान् वै धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति यदकृत्वाभिवादनात्॥"

वाराहे।

"यस्तप्राहृतदेहस्तु यो नरः प्रणमेत माम्।
स्त्रियो स जायते मूर्खः सप्तजन्मनि भामिनि!॥"

किञ्चान्यत्र।

"अग्ने पृष्ठे वामभागे समीपे गर्भमन्दिरे।
अपशौचनमस्कारान्न कुर्य्यात् केशवार्चने॥"

अपि च ।
"वक्षोभूमौ निपतितो न शक्तः प्रथमेऽन्तुहुः ।
उत्थायोत्थाय कर्तव्यं दण्डवत् प्रणिपातनम् ॥"
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
नतिविशेषस्तु यामले ।
"त्रिकोणाकारा सर्व्वेषु नतिः शूद्रैः समीरिता ।
दक्षिणाहायवीं गत्वा दिशं तस्याश्च शाम्भवीम् ॥
ततश्च दक्षिणां गत्वा नमस्कारक्रियोच्यते ॥"*॥
एकाङ्गप्रणामविधौ यथा,—
"एकाङ्गप्रणामश्च एकं वापि प्रदक्षिणम् ।
अकाले दर्शनं विष्णोर्ब्रह्मणि पुरुषं पुराणतम् ॥"
इति तन्त्रसारः ॥ *॥
कायिकवाचिकमानसभेदेन प्रत्येकं त्रिविधः ।
यथा, कालिकापुराणे ७० अध्याये ।
"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्रैवोत्तमाधममध्यमः ॥
प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यामवनीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ।
जानुभ्यां क्षितिं संस्पृश्य शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ।
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ॥
अस्पृश्य जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ॥
यः स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्वैदिकैर्वा मन्त्रैर्वा क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥*
इष्टमन्त्रानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
मानसं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकेषु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"*॥
मूलपूजितदेवताप्रणामविधौ यथा,—
"यः मूलेनार्चितं लिङ्गं विष्णुं वा ब्रह्ममेदयदि ।
निष्कृतिस्तस्य नास्त्येव प्रायश्चित्तायुतैरपि ॥"
इति कालीविलासतन्त्रम् ॥
प्रणाद्यः, त्रि, (प्रणीयते इति । प्र + णी + यत्) "प्रणाद्योऽसम्मतौ ।" ३ । १ । १२८ । इति साधुः ।) असम्मतः । (यथा, भट्टिः । ६।६६ ।
"न प्रणाद्यो जनः कश्चित् निकार्य्यं तेऽधितिष्ठति ॥")
अभिलाषविवर्ज्जितः । इति मेदिनी । ये, ८६ ॥ साधुः । इति त्रिकाण्डशेषः ॥ प्रियः । इति सुग्धबोधव्याकरणम् ॥
प्रणाजः, पुं, (प्रणज्यते जलादिर्निःसार्य्यतेऽनेनेति । प्र + णज + घञ् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ प्रणाला इति भाषा ॥
प्रणाजी, स्त्री, (प्रणाज + गौरादित्वात् ङीष् ।) जलनिःसरणमार्गः । इत्यमरः । १ । १० । ३५ ॥ प्रणाला इति भाषा ॥ (यथा, रामायणे । २ । ६२ । २० ।
"सहार्द्धं कलशं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौशल्या कलशार्द्धं प्रणालीव ननोदकम् ॥")
प्रणिधानं, क्ली, (प्रणिधीयतेऽनेनेति । प्र + नि + धा + ल्युट् ।) प्रयत्नः । (यथा, महाभारते । ५ । १०३ । २१ ।
"प्रणिधानेन धैर्य्येण रूपेण वयसा च मे ।
मनःप्रविष्टो देवर्षे ! गुरुकेशाः प्रतिस्मरः ॥") समाधिः । (यथा, रघुः । १ । ७४ ।
"सोऽपश्यत् प्रणिधानेन वसतेः स्वाश्रमाग्रजम् ॥")
पर्य्येषणम् । इति मेदिनी । ने, १८३ ॥ (यथा, सुश्रुते शारीरस्थाने ८ अध्याये ।
"बहवः सुता हीनशस्त्रप्रणिधानेनापविद्धा ॥")
प्रणिधिः पुं, (प्रणिधीयते इति । प्र + नि + धा + किः ।) चरः । (यथा, देवीभागवते । ५।३।६ ।
"प्रणिधिं प्रेषयामास दयारिस्तु गुरोपतिम् ॥")
प्रार्थनम् । इत्यमरः । ३ । ३ । ६६ ॥ अवधानम् । इति भरतः ॥ (दृढरथपुत्रः । यथा, महाभारते । ३ । २१८ । ६ ।
"दृढरथस्य प्रणिधिः कक्षस्य दृढरथः ।
भानुरङ्गिरसो धीर ! पुत्रो वत्सस्य सौरभः ॥")
प्रणिपातः, पुं, (प्र + नि + पत + घञ् ।) प्रणतिः । इति हेमचन्द्रः ॥ (यथा, कुमारे । ३ । ६१ ।
"तस्याः सखीभ्यां प्रणिपातपूर्व्वं
दृष्टस्तनूनः शिशिरावशेषः ।
अकीर्य्यत भ्रान्तकपादहस्ते
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥")
प्रणिहितं, त्रि, (प्र + नि + धा + क्तः ।) न्यासितम् । प्राप्तम् । समाहितम् । इति मेदिनी । ते, २०३ ॥ (मिलितम् । यथा, रामायणे । ४ । २५ । ३४ ।
"ततः प्रणिहिताः सर्व्वा वानर्य्योऽस्य वशानुगाः ।
चुक्रुशुर्वीरवीरेति भूयः क्रोशन्ति ताः प्रियम् ॥")
प्रणीतं, त्रि, (प्र + नी + क्त ।) उपसम्पन्नम् । पाकेन रूपरसादिसम्पन्नसञ्जनादि । इत्यमरभरतौ । चित्रम् । विहितम् । प्रवेशितम् । इति मेदिनी । ते, २२७ ॥ क्षतम् । इति हेमचन्द्रः ॥
प्रणीतः, पुं, (प्रणीयते इति । प्र + नी + क्त ।) संस्कृताग्निः । यज्ञे मन्त्रादिना संस्कृताग्निः । इत्यमरः । २ । ७ । २० ॥
प्रणीता, स्त्री, (प्रणीत + टाप् ।) यज्ञपात्रविशेषः । इति मेदिनी । ते, १२७ ॥
प्रणुतं, त्रि, (प्र + नु + क्त ।) स्तुतम् । इत्यमरः । ३ । १ । १०६ ॥
प्रणेयः, त्रि, (प्रकर्षेण नेतुं शक्यः । प्र + नी + "अचो यत् ।" ३ । १ । ९७ । इति यत् ।) वश्यः । इत्यमरः । ३ । ३ । २५ ॥ (यथा, महाभारते । १२ । ५६ । ६० ।
"अक्षतृप्रणेयो राजेति लोकांश्चैव वदन्त्युत ॥")
प्रतनः, स्त्री, (प्रतनोतीति । प्र + तन + क्विप् ।) विस्तृतिः । वल्ली । इति मेदिनी । ने, १२६ ॥
प्रततं, क्ली, (प्रतति + ङीष् ।) प्रततौ । इत्यमरटीकायां भरतः ॥
प्रतनः, त्रि, (प्र + "नव पुराणे प्रात् ।" ५ । ३ । २५ । इत्यस्य वार्त्ति० इति चकारात् खुट् च ।) पुरातनः । इत्यमरः । ३ । १ । ७७ ॥
प्रतर्कणं, क्ली, (प्र + तर्क + भावे ल्युट् ।) वितर्कः । तत्पर्य्यायः । तर्कः २ वितर्कः ३ ऊहः ४ ऊहः ५ जल्पः ६ वितर्कणम् ७ अध्याहारः ८ अध्याहरणम् ९ जल्पनम् १० । इति शब्दरत्नावली ॥
प्रतर्जं, क्ली, (प्रतर्ज्यते तर्जम् ।) पातालभेदः । इति मेदिनी । जे, १०६ ॥
प्रतर्दनः, पुं, (प्रतर्दं तर्जमस्य ।) विस्तृताङ्गुलियाणिः । चपेटः । इत्यमरः । २ । ६ । ८३ ॥
प्रतानः, पुं, विस्तृतः । प्रपूर्ब्बतनधातोर्घञ्प्रत्ययनिष्पन्नः ॥ (तन्तुः । यथा, रघुः । २ । ८ ।
"लताप्रतानोद्गथितैः स केशैः
रधिज्यधन्वा विचचार दावम् ॥")
वायुरोगविशेषः । तस्य संज्ञान्तरं अपतानकम् । यथा,—
"हृदिं संस्तभ्य संघाच्च हत्वा कण्ठेन कूजति ।
हृदि सक्ते नरः स्वास्थ्यं याति मोहं क्षते पुनः ।
वायुना दारुणं प्राहुरेकं तदपतानकम् ॥"
इति माधवकरः ॥
प्रतानिनी, स्त्री, (प्रतानो विस्तारोऽस्त्यस्या इति । प्रतान + इनिः ।) प्रतानवती । विस्तृतलतादिः । इत्यमरभरतौ ॥
प्रतापः, पुं, (प्र + तप् + घञ् ।) कोपदण्डजतेजः । कोपो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते सः । इति भरतः ॥ तत्पर्य्यायः । प्रभावः २ । इत्यमरः । २ । ८ । २० ॥ (यथा, मनुः । ६ । ३१० ।
"प्रतापयुक्तस्तेजस्वी नित्यं स्यात् पापकर्म्मसु ॥")
पौरुषम् । यथा, रामायणे । २ । १ । ११ ।
"समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ॥"
"प्रतापः क्षतिमात्रेण रिपुहृदयविदारणक्षमं पौरुषं तद्वान् । 'प्रतापौ पौरुषातपौ ।' इति कोषः ।" इति तट्टीकायां रामानुजः ॥) तापः । (यथा, रघुः । ४ । १२ ।
"यथा प्रकाशनाच्चक्षुः प्रतापात् तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥")
तेजः । इति मेदिनी । पे, २० ॥ अवहित्थः । इति राजनिर्घण्टः ॥ (युवराजस्य छत्रे, क्ली । यथा, भोजराजप्रणीतयुक्तिकल्पतरौ ।
"नीलो दण्डश्च वज्रश्च शिरःकुम्भस्तु कानकः ।
सौवर्णं युवराजस्य प्रतापं नाम विस्तृतम् ॥")
प्रतापनं, क्ली, (प्र + तप + णिच् + भावे ल्युट् ।) पीडनम् । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । २६ ।
"कानकं राजतं ताम्रं दैवतैर्यत् प्रतापितम् ।
चिरस्थायि तदाख्यातं विशेषेण प्रतापनात् ॥")

प्रतापन:, पुं, (प्रतापयतीति। प्र+तप्+णिच्+ल्युः।) नरकविशेषः। इति शब्दरत्नावली॥ स च कुम्भीपाकः। इति श्रीभागवतम्॥ (क्षेत्रदायके, त्रि। यथा, स्मृतौ उत्तरतन्त्रे १६ अध्याये। "दत्तकोपाधिवञ्चितः सर्व्वभूतप्रतापनः॥")

प्रतापवः, पुं, (प्रतापं चक्षुरुत्तेजः स्यति नाशयतीति। वो+कः।) शुक्लार्कवृक्षः। इत्यमरः। २। ४। ८१॥ (यथा, भावप्रकाशे।

"श्वेतार्कौ गणरूपः स्याच्छन्दारो वसुकोऽपि च। श्वेतपुष्पो महापुष्पः सवाजार्कः प्रतापवः॥"

प्रतारकः, त्रि, (प्रतारयतीति। प्र+तॄ+णिच्+ण्वुल्।) वञ्चकः। धूर्त्तः। यथा। यो यस्य प्रतारकः स तस्याध्यापकः॥ (यथा च ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याये।

"ग्रन्थन्नाक्रोति वादी यो मिथ्यावादी प्रतारकः। देवद्वेषी गुरुद्वेषी स गोहत्यां जनेद्ध्रुवम्॥")

प्रतारणं, क्ली, (प्र+तॄ+णिच्+भावे ल्युट्।) प्रतारणा। तत्पर्य्यायः। वञ्चनम् २ छलीकरणम्३ अभिसन्धानम् ४। इति हेमचन्द्रः। ३। ४६॥ (यथा, राजतरङ्गिण्याम्। ९। १५७।

"खड्गे दामोदरीये यत्तस्खालौत् खलतं पुरम्। तेनुना तेन तच्चेष्टत् कर्त्तुं सोऽभ्रःप्रतारणम्॥")

प्रतारणा, स्त्री, (प्र+तॄ+णिच्+युच्। टाप्।) वञ्चना। यथा,—

"यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा। उपास्यतां कलौ कण्यजता देवी प्रतारणा॥"

इत्युद्भटः॥

प्रतारित:, त्रि, (प्र+तॄ+णिच्+क्त।) छलप्रतारणः। तत्पर्य्यायः। वञ्चितः २। इति चिन्ताकणेशः॥

प्रति, अ, (प्रथते इति। प्रथ विख्यातौ+बाहुलकात् कतिः।) विंशत्युपसर्गान्तर्गतपञ्चदशोपसर्गः। योगदैवेनाख्य निर्वाह्या ज्ञाता। अस्यार्थाः। प्रतिनिधिः। सुखबद्धाः। यथा प्रद्युम्नः कैशवात् प्रति॥ वीप्सा। व्याप्तुमिच्छा। यथा वृक्षं वृक्षं प्रति सिञ्चति॥ लक्षणम्। चिह्नम्। यथा वृक्षं प्रति विद्योतते विद्युत्॥ इत्थम्भूताख्यानम्। कथञ्चित् प्रकारमापन्नं इत्थम्भूतं तस्याख्यानम्। यथा साधुर्विप्रो मातरं प्रति॥ भागः। खीक्रियमाणोंऽशः। यथा हरं प्रति हराहरम्॥ प्रतिदानम्। गृहीतस्य प्रतिदानम्। यथा भक्तेः प्रह्लादं शम्भोः। विशेषः प्रति भागात् यच्छति। तिलान् गृहीत्वा माषान् ददातीत्यर्थः॥ श्लोकम्। अव्ययम्। यथा। श्लोकप्रति श्लोकप्रति। क्षेपः। निश्चयः। इत्यमरभरतमेदिनीकाराः॥ आवृत्तिः। प्रश्नोक्तिः। विरोधः। समाधिः। इति शब्दबोधटीकायां दुर्गादासः॥ अभिमुखम्। स्वभावः। इति शब्दरत्नावली॥

प्रतिक:, त्रि, कार्षापणेन क्रीतः। "कार्षापणाद्विकन् वक्तव्यः प्रतिरादेश्च वा।" ५। १। २५। इत्यस्य वार्त्तिकोक्त्या टिठन्। कार्षापणिकः। इति सिद्धान्तकौमुदी॥

प्रतिकर्म्म, [न्] क्ली, (प्रत्यङ्गं प्रतिख्यातं वा कर्म्म। श्राकपार्थिवादिवत् समासः।) प्रसाधनम्। वेश्यः। इत्यमरः। २। ६। ६६॥ (यथा, माघे। ५। २७।

"आक्षोर्व्यंतव्यरचितावयवः क्षणेन वेधाजनः क्षतनवप्रतिकर्म्मकाण्यः॥"

प्रतीकारः। यथा, महाभारते। ४। ५६। १८।

"उचिताः स्त्रो वने वासं प्रतिकर्म्मचिकीर्षवः। कोयं नार्हति नः कर्त्तुं सदा समरदुर्म्मदः!॥"

अङ्गसंस्कारः। इति जटाधरः॥ (यथा च रघुवंशे। २। ६। १२१।)

प्रतिकाय:, पुं, (प्रतिगतः कायो यत्र।) शरीरम्। प्रतिरूपकम्। इति जटाधरः॥

प्रतिकार:, पुं, (प्रति+कृ+घञ्।) प्रतीकारः। इति शब्दरत्नावली॥ (यथा, रघुः। ८। ४०।

"प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते॥")

प्रतिकार्य्य:, त्रि, (प्रति+कार्य्य+यत्।) प्रतीकार्य्यः। इत्यमरटीकायां भानुदीक्षितः॥

प्रतिकार्य्य:, त्रि, (प्रति+कार्य्य+यत्।) प्रतीकार्य्यः। इत्यमरटीकायां रमानाथः॥

प्रतिकूप:, पुं, (प्रतिरूपः कूपः।) परिखा। इति हारावली। १७४॥

प्रतिकूलं, त्रि, (प्रतीपं कूलादिति।) अननुकूलम्। विपक्षः। तत्पर्य्यायः। प्रसव्यम् २ अपसव्यम्३ अपष्ठु ४। प्रतीपम्। इत्यमरः। ३। १। ८४॥ (यथा, मनुः। ६। २७५।

"राज्ञः कोषापहर्त्तॄंश्च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्॥")

प्रतिकृति:, स्त्री, (प्रकृष्टा कृतिः।) प्रतिमा। इत्यमरः। २। १०। ३६॥ प्रतिनिधिः। (यथा, रघुः। ८। ६२।

"तेनाष्टौ परिगमिताः समाः कथञ्चित् बालत्वादविनयकृत्तिना हृतोः। साङ्गस्यप्रतिकृतिदर्शनैः प्रियायाः स्वप्नेषु त्वधिकसमागमोत्सवेच॥"

प्रति+कृ+भावे क्तिन्।) प्रतिकारः। इति मेदिनी। ते, २१०॥ (यथा, हरिवंशे। २५७। २२।

"इत्युक्तं देवताः सर्व्वाः ग्रहप्रतिकृतिं पराम्। अवधा दानवाः सर्व्वे ऋते ग्रहरमक्षयम्॥")

प्रतिकृष्टं, त्रि, (प्रति कृष्यते स्मेति। प्रति+कृष्+क्तः।) गर्ह्यम्। हिरादृत्तग्राकर्षितम्। इति मेदिनी। टे, ६४॥

प्रतिकृतं, अ, (कृतं कृतं प्रति।) पौनःपुन्यम्। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। १०।

"प्रतिकृतं वा क्षतरोमविक्रियां प्रताय मौञ्जीं त्रिगुणां बभार याम्। अकारि तत्पूर्व्वनिबन्धया तया सरागमस्या रशनागुणाक्षरम्॥")

प्रतिक्षय:, पुं, (प्रतिक्षिणोति हिनस्ति विषयादीनिति। प्रति+क्षि+अच्।) रक्षकः। इति शब्दरत्नावली॥

प्रतिक्षिप्त:, त्रि, (प्रतिक्षिप्यते स्मेति। प्रति+क्षिप+क्तः।) वारितः। प्रेषितः। इति मेदिनी। ते, २०५॥ अधिक्षिप्तः। इत्यमरः। ३। १। ४२॥ "क्षेपे क्षताधिक्षेपे। अर्हतया परगुणं प्रति दुर्व्वचनमधिक्षेपः अधिक्षिप्यते स्म अधिक्षिप्तः क्तः एवं प्रतिक्षिप्तः। कस्यचित् प्रौढ्यादिकं प्रति अर्हमानेन दुर्व्वचनमधिक्षेपः स यस्य ज्ञातः सोऽधिक्षिप्तः। इति भरतः। केचित्तु। हे प्रेषिते। आहूय प्रेषितो वस्तु प्रतिक्षिप्तः स उच्यते। इति जयदत्तः। इत्याहुः।" इति भरतः॥

प्रतिगतं, क्ली, (प्रतिगुणं गतं गमनम्।) पक्षिगतिविशेषः। यथा,—

"गतागतप्रतिगतसव्यताद्याश्च पक्षिणाम्। गतिभेदाः पक्षियहं कुलायो गोढमक्षियाम्॥"

इति जटाधरः॥

(प्रति+ग्रह+कर्त्तरि क्तः। प्रतियाति, त्रि॥)

प्रतिग्रह:, पुं, (प्रतिग्रहणमिति। प्रति+ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति भावे अप्।) स्वीकरणम्। वैश्यदृष्टम्। (प्रतिगृह्यति निष्क्रीणनादिकमिति। प्रति+ग्रह+"विभाषा ग्रहः।" ३। १। १४३। इति यत्रे अच्।) प्रतिदृग्रहः। (प्रतिगृह्यते इति। प्रति+ग्रह+अप्।) हिरण्यो विधिवद्देयम्। तद्ग्रहः। ग्रहभेदः। इति मेदिनी। दे, ३१॥ ❁॥ ब्राह्मणस्यार्थे: प्रतिग्रहार्जितः। यथा,—

"प्रतिग्रहार्जिता विप्रे क्षत्रिये शस्त्रनिर्जिता। वैश्ये न्यायार्जिताचार्या; शूद्रे शुश्रूषयार्जिता:॥"

अयाचितप्रतिग्रहे दोषाभावो यथा,—

"अयाचितोपपन्ने तु नास्ति दोषः प्रतिग्रहे। अल्पं तं विदुर्हवाक्षज्ञास्तस्मान्नैव निषेधेत्॥ ❁॥ गुरुश्वश्रूपितृभ्यां च हीनैर्वृत्तिविधानतः। सर्व्वतः प्रतिग्रहीयात् न तु दद्यात् कदाचन॥ साधुतः प्रतिग्रहीयादन्यथासाधुतो द्विजः। गुणवानल्पदोषश्च निर्गुणो हि निमज्जति॥ एवं तस्करवृत्त्या वा लब्धा भरणमाचरन्। कृच्छ्रादिभिर्व्रतैः प्राज्ञश्चित्तं द्विजोत्तमः॥"

इति गारुडे २१५ अध्यायः॥ ❁॥

तीर्थे प्रतिग्रहनिषेधो यथा,—

"सुवर्णमथ युक्तात्मा तथैवान्यप्रतिग्रहम्। स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्चनेऽपि वा॥ निष्फलं तस्य तत्तीर्थं यावत्तद्ग्रहणमश्नुते। अतस्तीर्थे न गृह्णीयात् पुण्येष्वायतनेषु च॥"

इति कौर्म्मे १२ अध्यायः॥ ❁॥

राजादितः प्रतिग्रहनिषेधो यथा,—

"न राज्ञः प्रतिगृह्णीयान्न भूमेरपतेरपि। न चान्यस्मादधर्म्मज्ञ निन्दितान् वर्जयेद्बुधः॥"

इति कौर्म्मे उपविभागे १५ अध्यायः॥ ❁॥

विद्यादिहितस्य प्रतिग्रहनिषेधो यथा,—

"हेम भूमिं तिलान् गाञ्च अविद्वांसादादाति यः। भस्मीभवति सोऽग्नाय दातुः स्वाम्निष्फलञ्च तत्॥

तस्मादविद्वान्नादद्यादध्यग्रोऽपि प्रतिग्रहम् ।
विषमन्नमपरिज्ञानो विधिवत्त्वेन नश्यति ॥" *॥
गर्हितप्रतिग्रहादिर्यथा,—
"हस्तिब्रह्मखाजिनाद्यास्तु गर्हिता ये प्रतिग्रहाः।
सद्विप्रास्तान्न गृह्णीयुर्गृह्णन्तस्तु पतन्ति ते ॥
ब्रह्मखाजिनप्रतिग्राही ह्यासां सूक्तविक्रयी ।
नवमाङ्गस्य भोक्ता च न भूयः पुरुषो भवेत् ॥"*॥
आपदि गर्हितप्रतिग्रहकर्त्तव्यता यथा,—
"प्रोक्तप्रतिग्रहाभावे प्रोक्तार्था ह्यददापदि ।
विप्रोऽन्न प्रतिगृह्णन् वा यतस्ततोऽपि याचभाक्॥
गुर्वादिपोष्यवर्गार्थं देवाद्यर्थञ्च सर्व्वतः ।
प्रत्यादद्याद्विजो यस्तु भरणार्थमात्मनोऽपि च ॥
दधिक्षीराज्यमांसानि गन्धपुष्पाम्बुमल्लकान् ।
मृण्मयान्नासवं शाकं प्रत्याख्येयं न कर्हिचित् ॥
अपि दुष्कृतकर्म्मेभ्यः समादद्यादयाचितम् ।
पतितेभ्यस्तथान्येभ्यः प्रतियाञ्चमसंशयम् ।"*॥
प्रतिग्रहीतुं प्रवृत्तस्य लभ्यमानपरित्यागेन स्वर्गो भवति । यथा,—
"प्रवृत्तः प्रतिग्रहीतुं यो वेदवृत्तः सुसंयतः ।
लभ्यमानं न गृह्णाति स्वर्गस्तस्य सुनिश्चितम्॥*॥
प्रतिग्रहस्तथं वापि याचितं यो न यच्छति ।
तत्कोटिगुणितफलो ध्रुवो दातुरवच्छति ॥*॥
दाता च न स्मरेद्दानं प्रतियाही न याचते ।
तावुभौ नरकं यातौ दाता चैव प्रतिग्रही ॥*॥
वदन्ति कवयः केचिद्दानप्रतिग्रहौ प्रति ।
प्रत्यक्षं लिङ्गमेवेह दातृयाचकयोर्बलम् ॥
दातृहस्तो भवेदूर्द्धमधश्चिह्नेन प्रतिग्रही ।
यद्दानं प्रतिगृह्णीयात् प्रतिग्राही ध्रुवन्त्वधः॥"*॥
प्रतिग्रहप्रकारो यथा,—
"भूमेः प्रतिग्रहं कुर्य्याद्भूमिं ज्ञात्वा प्रदक्षिणम् ।
करे गृह्य तथा कन्यां दासदासौ तथा द्विजाः॥
करं हि क्षुद्रे विन्यस्य धर्म्मज्ञो ज्ञेयः प्रतिग्रहः ।
आदाय च गजस्योक्तः कर्णे चाश्वस्य कीर्त्तितः॥
तथा चैकशफानाञ्च सर्व्वेषामविशेषतः ।
प्रतिगृह्णीत गां दक्षे पुच्छे ज्ञात्वाजिनं तथा ॥
आरण्याः पशवः सर्व्वे ग्राम्याः पुच्छे विचक्षणे ।
प्रतिग्रहमधोदृष्ट्वा आदत्ते च तु पादुके ॥
ईषायानु रथो यानमश्वे दक्षन्तु धारयेत् ।
द्रुमाणामथ सर्व्वेषां मूले व्यक्तकरो भवेत् ॥
आयुधानि समादाय तथा भूष्यं विभूषणम् ।
धर्म्मज्ञश्चौ तथा ज्ञात्वा प्रविश्य च तथा गृहम् ॥
अवसीर्य्य तु सर्व्वाणि जलस्थानानि चैव हि ।
उपविश्य च ग्रीवायां सम्पूजयित्वा करेण वा ॥
ब्रह्मण्यस्यान्यथादाय क्षुद्वा वा ब्राह्मणं पठेत् ।
कन्यादाने न तु पठेद्व्याहृतिं च पृथक् पृथक् ॥
प्रतिग्रहा द्विजश्रेष्ठ तत्रैवान्तर्भवन्ति ते ।
द्रव्याणामथ सर्व्वेषां द्रव्यसंग्रवणान्नरः ॥
याचयेज्जलमादाय करेण च प्रतिग्रहम् ।
प्रतिग्रहस्य यो धर्म्मं न जानाति द्विजो विधिम् ॥
स द्रव्यक्लेशसंयुक्तो नरकं प्रतिपद्यते ।
अथापि हि प्रवक्ष्यामि विधिं सर्व्वं विशेषतः ॥ * ॥

वाजिप्रदानेन प्रतिग्रहे वा
दाढ्यग्रहीतोरपि येन पुण्यम् ।
स्वर्गं प्रजायेत ह्रदयुध्यमेतत्
गृहीतयोर्वै विधिवद्विजेन्द्र ॥
कुर्य्यादसौ पञ्चदिनानि पूर्व्वं
पश्चोपचारैर्युतविष्णुपूजाम् ।
कुम्भाङ्कमब्जैर्घृतदुग्धहोमं
यदृक्षाम इत्यादि मरुत्सतीयम् ॥
ओङ्कारपूर्व्वादिभिरन्वितं तं
प्रत्येकमष्टौ जुहुयाद्विजेन्द्रः ।
सूर्य्येण मन्त्रेण च तद्दशौ
यथा प्रयुक्तं विधृतं जुहोति ॥
कुर्य्याच्च गायत्रिजपं सहस्रं
पश्चात् प्रयच्छं तुरगं द्विजाय ।
तद्वत्तथालाभमयं नयेद्वि
दातापि चैतद्व्रतमाविदध्यात् ॥
द्विजाय्यवत् प्राक्तनपापमुक्तौ
द्वावप्यमुं स्वर्गजनं लभेताम् ॥"

इति हरिभक्तिविलासे । ४ । ८ । अध्यायः ॥*॥
अपि च । विष्णुधर्म्मोत्तरे ।
"बीजानां सुहृदाहाय रत्नाभ्यादाय सर्व्वतः ।
वस्त्रं दद्यात्तमाद्दात्रे परिधाय तथा पुनः ॥
आरुह्योपानहौ चैव यानमारुह्य पादुके ।
प्रतिग्रहीता सावित्रीं सर्व्वथैव प्रकीर्त्तयेत् ॥
ततस्तु सार्द्धं द्रव्येण तस्य द्रव्यस्य दैवतम् ।
समाप्नुयेत्ततः पश्चात् कामसृष्ट्या प्रतिग्रहम् ॥
विधिं धर्म्ममयो ज्ञात्वा यस्तु कुर्य्यात् प्रतिग्रहम् ।
दात्रा सह तरत्येव नावादुर्गाण्यसौ द्विजः ॥"
ब्रह्मपुराणे ।
"ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतत्त्वतः ।
अश्वमप्यथ मातङ्गतिलकौद्रांश्च वर्ज्जयेत् ॥
ह्रस्वाजिनतिलग्राही न भूयः पुरुषो भवेत् ।
गृह्यालङ्कारवस्त्रादि प्रतिगृह्य नृतस्य च ।
नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा ॥"
तथा ।
"ब्रह्महत्या सुरापानमपि क्षेयं तरिष्यति ।
आतुरादृद्यदृगृहीतन्तु तत् कथं वै तरिष्यति ॥"
एतदादिदत्तदानं प्रतिग्रहीतुर्दोषजनकम् ॥*॥
एतद्विपरीते विद्यादिरहिततत्त्वेनासमर्थाय च दातुरपि दोषजनकमाह दक्षः ।
"न केवलं हि तद्याति दोषमस्य च गच्छति ।"
तद्वत्तद्वयम् । अतएव याज्ञवल्क्यः ।
"विद्यातपोभ्यां हीनेन न तु याह्यः प्रतिग्रहः ।
यजन् प्रदातारमधो नयत्यात्मानमेव च ॥"
अधो नरकम् ॥ *॥ एतद्दानप्रतिग्रहोत्तरसत्त्व-तपोजपादिभिरात्मतरणक्षमाय स्वेच्छया प्रतिगृह्यते दानं न दोषाय इत्याह विष्णुः ।
"एतानि प्रतिगृह्णाति स्वेच्छयाभ्यर्थितो न तु ।
तस्मै दाने न दोषोऽस्ति यस्त्रातुमपि तारयेत् ॥"
तारयत्प्रकारमाह हारीतः ।
"मन्त्रिवासोगवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् ॥" * ॥ देवलः ।

"प्रतिग्रहं समर्थो हि कृत्वा विप्रो यथाविधि ।
निष्कारयति दातारमात्मानञ्च सतेजसा ॥"
छान्दोग्ये ।
"वेदाङ्गपारगो विप्रो यदि कुर्य्यात् प्रतिग्रहम् ।
न स पापेन लिप्येत पद्मपत्रमिवाम्भसा ॥"
महाभारते ।
"तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च ।
निमित्तेषु च सर्व्वेषु न प्रमत्तो भवेन्नरः ॥"
प्रतिग्रहसमर्थस्य तद्वारणे फलाधिक्यं यथा ।
याज्ञवल्क्यः ।
"प्रतिग्रहसमर्थो हि यादृशे यः प्रतिग्रहम् ।
ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥"
अपवादमाह स एव ।
"कृशाः शाकं पयो मत्स्या गव्याः पुष्पं दधि क्षितिः ।
मांसं श्राद्धासवं धानाः प्रत्याख्येयं न वारि च ॥"
अन्यच्च ।
"गव्यान् मद्यान् कृशान् गन्धान् पुष्पं मक्षीन् दधि ।
मत्स्यान् धानाः पयो मांसं शाकञ्चैव न निर्णुदेत्॥"
मक्षीन् विषादिनिवारकान् ।
"एधोदकं मूलमन्नमभ्युद्धृतञ्च यत् ॥"
अभ्युद्धृतमभ्यर्थं दत्तम् ।
"सर्व्वतः प्रतिगृह्णीयात् मध्योभयदक्षिणाम् ॥"
किमिति न प्रत्याख्येयमित्याह मनुः ।
"अयाचितात्तृतं भोज्यमपि दुष्कृतकर्म्मणः ।
अन्यत्र कृषिवाणिज्यपतितेभ्यस्तथा द्विजः ॥"
प्रतिग्रहमात्रे प्रयोगसारे ।
"प्रतिग्रहं न गृह्णीयादात्मभोगविधित्सया ।
देवतातिथिपूजार्थं यतोऽग्नयस्तमाप्नुयेत् ॥"
अङ्गिराः ।
"कुटुम्बार्थे द्विजः मूढात् प्रतिगृह्णीत याचितम् ।
कदर्य्यमात्मने चैव न हि याचेत कर्हिचित् ॥"
यद्यर्थं याचने निन्दामाह याज्ञवल्क्यः ।
"याच्ञाभङ्गो भवति यज्ञकर्त्रा च्छूभभिच्छतात्॥"

इति मुहिनत्वम् ॥

प्रतिग्राह्यः, पुं, (प्रतिगृह्णाति निष्क्रीवनादिकमिति प्रति + ग्रह् + "विभाषा ग्रहः ।"३ । १ । १४६ । इति ण्यः ।) प्रतिग्रहः । इत्यमरः । २ । ६ । १२८ ॥ (प्रति + ग्रह् + भावे घञ् ।) प्रतिग्रहश्च ॥
प्रतिघः, पुं, (प्रतिहन्यतेऽनेनेति । प्रति + हन् + घः । ऋक्षादित्वात् कुत्वम् ।) क्रोधः । इत्यमरः । १ । ७ । २६ ॥ (यथा, माघे । २५ । ५३ ।
"प्रतिघः श्रुतोऽपि सहसेव
नरपतिगात्रं समाश्रयत् ॥"
प्रतिहन्यतेऽनेनेति ।) प्रतिघातः । इति मेदिनी । घे, १० ॥ मूर्च्छा । इति शब्दरत्नावली ॥
प्रतिघातनं, क्ली, (प्रति + हन् + णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । २१४ ॥
प्रतिघ्नं, क्ली, (प्रतिहन्यतेऽनेनेति । प्रति + हन् + करणे कः ।) अस्त्रम् । इति शब्दचन्द्रिका ॥

प्रतिच्छा

प्रतिच्छन्दः, [स्] स्त्री, (छन्दोऽभिप्रायः । प्रतिगतं छन्दः इति प्रादिसमासः ।) प्रतिरूपम् । इति त्रिकाण्डशेषः ॥ (अकारान्तोऽपि दृश्यते । यथा, राजतरङ्गिण्याम् । १ । ७७ ।
"रत्नः शिरः प्रतिच्छन्दैः स्थिरमप्यतिरूक्षकः ।
यमाय यश्चिरात् प्रादात् तस्मै रत्नः पतिर्भवान् ॥")

प्रतिच्छाया, स्त्री, (प्रतिगता छायामिति ।) प्रतिछतिः । मूर्त्तिसङ्घच्छिलादिनिर्मितप्रतिरूपम् । इत्यमरभरतौ ॥ (यथा, हरिवंशे । १५९ । ३० ।
"मायया च प्रतिच्छाया दृश्यते हि गटाजये ।
देहार्द्धेन तु कौरव्य ! विदिते च प्रभावतीम् ॥")

प्रतिजङ्घा, स्त्री, (प्रतिगता जङ्घाम् ।) अवजङ्घा । इति हेमचन्द्रः । ३ । ४१५ ॥

प्रतिजल्पः, पुं, (प्रतिगतो जल्पम् ।) वाक्यविशेषः । यथा,—
"दुष्टजल्पदभावेऽस्मिन् प्रतिर्नार्थस्तुल्यत्वम् ।
दूषणज्ञानमेवोक्तं यत्र स प्रतिजल्पकः ॥"
इत्युज्ज्वलनीलमणिः ॥

प्रतिजागरः, पुं, (प्रतिजागरणमिति । प्रति + जागृ + घञ् । "जाग्रोऽविचीति ।" ७ । ३ । ८५ । इति गुणः ।) प्रत्यवेक्षणम् । तत्पर्य्यायः । अवेक्षा २ । इत्यमरः । ३ । ३ । २८ ॥ जागरप्रतिनिधिः प्रतिजागरः । हे गृहमवेक्षस्व इत्यादिनियोगस्य इति रायमुकुटः ॥

प्रतिजिह्वा, स्त्री, (प्रतिरूपा जिह्वा ।) तालुमूलस्थक्षुद्रजिह्वा । आलजिव इति भाषा । तत्पर्य्यायः । प्रतिजिह्विका २ माध्वी ३ रसनकाकुः ४ अलजिह्विका ५ । इति शब्दरत्नावली ॥

प्रतिजिह्विका, स्त्री, (प्रतिजिह्वा + स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिजिह्वा । इति त्रिकाण्डशेषः ॥

प्रतिज्ञा, स्त्री, (प्रतिज्ञायते इति । प्रति + ज्ञा + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) कर्त्तव्यत्वप्रकारकज्ञानानुकूलव्यापारः । इत्यनुमितिगदाधरी ॥ साध्यनिर्देशः । इति गौतमसूत्रम् ॥ साध्याभिधायिका वाक् । इति व्यवहारतत्त्वम् ॥ तत्पर्य्यायः । आम् २ प्रतिज्ञानम् ३ अङ्गीकारः ४ प्रतिश्रवः ५ ॐ ६ समाधिः ७ संवित् ८ आगूः ९ आश्रवः १० संश्रवः ११ नियमः १२ अभ्युपगमः १३ वाढम् १४ आज्ञा १५ । इति शब्दरत्नावली ॥ सन्धा १६ सङ्गरः १७ संभावः १८ उररीकारः १९ समयः २० । इति जटाधरः ॥ * ॥ (यथा, गोः रामायणे । २ । ११० । ४ ।
"पूर्वन्तु रामस्तमिहानुयुज्य
श्रुत्वा च वाक्यं भरतस्य तस्य ।
चिकीर्षमाणो रघुनन्दनस्तां
पितुः प्रतिज्ञां च बभूव तूष्णीम् ॥")

प्रतिज्ञारोधो न कर्त्तव्यः । यथा,—
"अयाज्ञ दैत्याधिपते वाच्यं साम यतो फलम् ।
प्रतिज्ञा नावरोद्धव्या स्वल्पकेऽपि च वस्तुनि ॥"
इत्यग्निपुराणम् ॥

प्रतिज्ञ

प्रतिज्ञातं, त्रि, (प्रतिज्ञायते स्मेति । प्रति + ज्ञा + क्तः ।) अङ्गीकृतम् । इत्यमरः । ३ । २ । १०८ ॥ (यथा, मनुः । ८ । १३६ ।
"त्रयो हेये प्रतिज्ञाते पक्षयं शतमर्हति ।
अपह्नवे तद्द्विगुणं तज्जनोरनुशासनम् ॥")

प्रतिज्ञानं, स्त्री, (प्रति + ज्ञा + ल्युट् ।) प्रतिज्ञा । इत्यमरः । ३ । ५ । ५ ॥

प्रतिज्ञेयः, पुं, (प्रतिजानात्यनेनेति । प्रति + ज्ञा + यत् ।) स्तुतिपाठकः । इति भूरिप्रयोगः ॥ (प्रतिज्ञातुं योग्यः ।) प्रतिज्ञातव्ये, त्रि ॥

प्रतितालः, पुं, (प्रतिगतस्तालम् ।) तालविशेषः । यथा, सङ्गीतदामोदरे ।
"तालाः समराख्यश्च वैकुण्ठो वाह्निसंज्ञया ।
कथिताः शङ्करेणैव चत्वारः प्रतितालकाः ॥
तालारो यथा,—
तालाः प्रतितालस्तु चन्द्रक्रीड़े द्रुतद्वयम् ।
दशाक्षरपदेनायं शङ्कारे वर्त्तते रसे ॥ १ ॥
समराख्यो यथा,—
लघुद्रुतौ लघुश्चान्ते नृपताल उदाहृतः ।
दशसंख्याक्षरपदः समरे वीरके रसे ॥ २ ॥
वैकुण्ठो यथा,—
लघुत्रयस्तु वैकुण्ठे प्रतितालः समीरितः ।
अर्कसंख्याक्षरैः पादो हास्ये विपुटतालके ॥ ३ ॥
वाह्निनो यथा,—
वाह्निसंज्ञस्तृतीये तालेलघुरेको द्रुतस्तथा ।
त्रयोदशाक्षरैर्युक्तो रसेऽद्भुते प्रकीर्त्तितः ॥" ४ ॥

प्रतितालो, स्त्री, (प्रतिगता तालमिति । गौरादित्वात् ङीष् ।) तालकोद्घाटनयन्त्रम् । इति हेमचन्द्रः ॥ चाबि इति भाषा ॥

प्रतिदानं, क्ली, (प्रतिदत्तस्य दानं प्रतिरूपं दानं वा ।) विनिमयः । बदलार्पणम् । इत्यमरः । २ । ९ । ८१ ॥

प्रतिदारणं, क्ली, (प्रतिदार्य्यतेऽस्मिन्निति । प्रति + दृ + णिच् + आधारे ल्युट् ।) युद्धम् । इति शब्दमाला ॥

प्रतिदिनं, क्ली, दिनं दिनं प्रति । प्रत्यहम् । यथा,
"ततः प्रतिदिनं वेला वर्द्धते विपलात्मिका ॥"
इति सत्यव्रतसुक्तावली ॥

प्रतिदिवा, [न्] पुं. (प्रतिदीव्यतीति । प्रति + दिव + "कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ।" उणा० १ । १५६ । इति कनिन् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ प्रतिदिनञ्च ॥

प्रतिदेवा, [न्] पुं, (प्रतिदिवन् । पृषोदरादित्वात् साधुः ।) सूर्य्यः । इति शब्दरत्नावली ॥

प्रतिदेयं, त्रि, (प्रति + दा + यत् ।) क्रीतद्रव्यस्य दुष्क्रीतत्वाद्धा पराहृत्य दानम् । यथा,—
"क्रीत्वा मूल्येन यः पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत्तस्मिन्नेवाहनि विद्यतम् ॥"
इति मिताक्षरा ॥

प्रतिध्वनिः, पुं, (प्रतिरूपो ध्वनिरिति ।) प्रतिनादः । गुमर इति भाषा ॥ तत्पर्य्यायः । प्रतिशब्दः २ प्रतिश्रुत् ३ प्रतिध्वानम् ४ । इति

प्रतिध्व

शब्दरत्नावली ॥ (यथा, नैषधे । १२ । १० ।
"वदनकुहरेष्वक्षैर्दृश्यामयं तदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरञ्जसि ॥")

प्रतिध्वानं, क्ली, (प्रतिध्वननमिति । प्रति + ध्वन + घञ् ।) प्रतिध्वनिः । इत्यमरः । १ । ६ । २५ ॥

प्रतिनप्ता, [तृ] पुं, (प्रतिरूपो नप्ता नप्तुः सदृशः इत्यर्थः ।) प्रपौत्रः । इति हेमचन्द्रः ॥

प्रतिनवं, त्रि, (प्रतिगतं नवं नवतामिति ।) नूतनम् । इति जटाधरः ॥ (यथा, मेघदूते । ३८ ।
"पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ॥")

प्रतिनिधिः, पुं, (प्रतिनिधीयते सदृशीक्रियते इति । प्रति + नि + धा + "उपसर्गे घोः किः ।" ३ । ३ । ९२ । इति किः ।) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ सदृशः । (यथा, रघौ । १ । ८२ ।
"सुतां तदीयां सुरभेः सवत्सां प्रतिनिधिं शुचिः ।
आराधयद्यपस्वीकः प्रीता कामदुघा हि सा ॥")
तस्य विवेचनं यथा । "अत्यन्तासामर्थ्ये स्वस्मिन् पुराणम् ।
'पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥'
गरुड़पुराणे ।
'भार्य्यां भर्त्तृव्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा ।
असामर्थ्ये तयोस्ताभ्यां व्रतभङ्गो न जायते ॥'
वराहपुराणे ।
'पितृमातृपतिभ्रातृश्वश्रूगुर्व्वादिभूसुजाम् ।
अदत्वार्थमुपोषित्वा स्वयञ्च फलभाग्भवेत् ॥'
अत्रैव विषये कात्यायनः ।
'दक्षिणा नाम कर्त्तव्या सुश्रूषा विहिता च या ।'
ननु प्रतिनिधौ समेऽपि ब्रह्मौदनब्रह्मस्वयज्ञं कुर्य्यान्नेति चेत् प्रधान एव । तथा च श्रौतीरिकभाष्ये श्रुतिः । 'यां वै काञ्चनयज्ञक्रतिमग्निमाधास्यते यजमानायैव तामाधास्यते इति होवाच इति ।' ब्राह्मणसर्व्वस्वे तु यजमानायेत्यादौ यजमानस्यैव इति पाठे विशेषः । तथा च वरदायां स्कन्दम् । 'यां वै काञ्चनयज्ञक्रतिमग्निमाधास्ते सा यजमानस्यैवेति ।' ऋत्विग्यजमानपदे प्रतिनिधिप्रधानपरे आकाङ्क्षितत्वादिति । अतएव प्रतिनिधिपुत्रादिनाप्यायाज्ञ नः पितर इत्यादिवदनूद्य एव पठ्यते वाक्यस्य काम्यनित्यत्वात्त्व न तथेति ॥ * ॥ अत्र प्रतिनिधिप्रसङ्गेन स्मृत्यनुसारात् किञ्चिल्लिख्यते । कालमाधवीये ।
'काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः ।
काम्येषूपक्रमाद्यूर्द्धमन्ये प्रतिनिधिं विदुः ॥'
अस्यार्थस्तु माधवाचार्य्येणाभिहितः । यथा नित्यनैमित्तिकं प्रतिनिधिनाप्युपक्रम्य कारयेत् । काम्यन्तु स्वसामर्थ्यं परीक्ष्य स्वयमेव उपक्रम्य कुर्य्यात् । असामर्थ्ये तु उपक्रमादूर्द्धं प्रतिनिधिनापि सत्कारयेत् । एतच्च काम्यं श्रौतपरम् । काम्यकर्म्मार्थन्तु अन्यद्वारापूपक्रम्य कुर्य्यात् । तथा च पराशरभाष्ये भ्रातातपः ।

'औतं कर्म्म स्वयं कुर्य्यादन्योऽपि ह्यार्त्तमाचरेत्।
अशक्तौ औतमप्यन्यः कुर्य्यादाचारमन्नतः॥'
अन्नतः उपक्रमात् परतः। अन्यथा नित्य-नैमित्तिकमात्रपरत्वे औतस्मार्त्तभेदेनोपादानं व्यर्थं स्यात्तयोरविशेषादेव प्रतिनिधिलाभात्। अतएव भारतपाठादौ तथा समाचारः॥ * ॥
स्मृत्यर्थसारे।
'नाभावस्य प्रतिनिधिरभावान्तरमिष्यते।'
सजातीयमप्यभावान्तरमभावस्य प्रतिनिधि-र्नेष्यते। भावस्तु कदाचित्। यथोपवासादौ-ब्राह्मणभोजनादि।
'नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्।
औचित्याद्यामभोज्यञ्च यद्दृष्टं तद्विशेषतः।
यावज्जं प्रतिनिधिर्नेष्टो होमकार्य्ये न कुत्रचित्॥
द्रव्यं वैकल्पिकं किञ्चिद्दृश्यञ्च सङ्ख्यितं भवेत्।
तदलाभे सङ्ख्यावज्जं न तु वैकल्पिकान्तरम्॥
उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि।
तत्र मुख्यमनादृत्य गौणेनैव समापयेत्॥
संस्काराणामयोग्योऽपि मुख्य एव हि मन्यते।
न तु संस्कारयोग्योऽन्यो यद्यपि प्रतिरूपकः॥
मुख्ये कार्य्यासमर्थे तु जघन्योऽप्येतस्य नादरः।
प्रतिरूपमुपादाय ग्रन्थमेवोपयुज्यते॥
काष्ठे रूपैस्तथा पर्णैः चीरैः पुष्पैः फलैस्तथा।
गन्धे रसैः सङ्ख्यावज्जं सर्व्वालाभे परं परम्॥
यावज्जावज्जं भवेद्यावज्जमारण्यानामरण्यजम्।
यवाभावे तु गोधूमास्तथा वेणुयवादयः॥
हविष्ये गोघृतं यावज्जं तदलाभे तु माहिषम्।
यावज्जं वा तदलाभे तु साक्षात्तैलं प्रयुज्यते॥
तैलाभावे यदीतव्यं तैलजं तिलसम्भवम्॥'
तैलजं तिलसम्भवं तैलभृष्टतिलपिष्टम्।
'तदभावे तु सर्व्वेषां कौसुम्भं सर्षपोद्भवम्॥
द्रव्यसङ्ख्योऽथ वा यावज्जः पूर्व्वाभावे परः परः।
तदभावे गवादीनां क्रमात् क्षीरं विधीयते॥
तदलाभे दधि यावज्जमलाभे तिल इष्यते।
यत्र मुख्यं दधि क्षीरं तत्रापि तदलाभतः॥
अजादेः क्षीरदध्यादि तदलाभे तु गोघृतम्।
मुख्याभावोऽथवा यावज्जः कार्य्यकारणसम्भवौ॥
अतएव घृताभावे पूर्व्वं दधि ततः पयः॥'
तथा।
'सर्व्वत्र गौणकालेषु कर्म्मचोदितमाचरेत्।
प्रायश्चित्तं वाक्यविभिर्हुत्वा कर्म्म समाचरेत्॥'
माधवे।
'हुतं न लभ्यते यत्र मुख्यक्षीरेण होमयेत्।
क्षीरस्य च दधि श्रेयं मधुनश्च गुडो भवेत्॥'
आयुर्व्वेदेऽपि।
'मधु यत्र न विद्येत तत्र जीर्णगुडो भवेत्॥'
पैठीनसिः। 'काष्ठमूलपर्णपुष्पफलप्ररोहरस-गन्धादीनां खाद्यद्रव्येण प्रतिनिधिं कुर्य्यात्। सर्व्वा-लाभे यवः प्रतिनिधिर्भवति।' काष्ठं नालं प्ररोहोऽङ्कुरः। 'सर्व्वालाभे यव' इति कल्पतरुः॥
अवयव इति नारायणोपाध्यायाः॥ भ्रान्ति-दीपिकायां नारदीयपञ्चरात्रम्।

'अभावे चैव धातूनां हरितालं प्रशस्यते।
गौजातमप्यलाभे तु यव एको विधीयते॥
ओषधीनामलाभे तु सर्व्वदेवा प्रशस्यते।
रत्नानामप्यलाभे तु सुवर्णाचलमुत्तमम्॥
लौहानामप्यलाभे तु हेमपात्रं प्रकल्पयेत्।'
लौहानां तैजसमात्रस्यात्। न्यायप्राप्तप्रति-निधिमधिकृत्य जैमिनिः।
'न देवतामिद्यद्धिक्रियायामिति।' अस्यार्थः। देवताया अग्नेश्च आहवनीयादेः द्रव्यस्य मन्त्रस्य क्रियायाः प्रजापत्यादेरर्थकर्म्मत्वाच्चाङ्ग-भावार्थकत्वेन आरादुपकारकत्वान्न प्रति-निधिः। ब्रीह्यादीनान्तु सन्निपत्योपकारकाणां पुरोडाशसाधनं दृष्टमेव प्रयोजनमिति तत्र प्रतिनिधिरुचित इत्युक्तम्।" इत्येकादशी-तत्त्वम्॥ * ॥ "आरब्धकार्त्तिकादिस्नाने तु बाधादिनासामर्थ्ये पुत्रादिभिः प्रतिनिधिना कारयितव्यं नानुकल्पविधिना नित्यस्नान एव तद्विधानादिति।" इति मलमासतत्त्वम्॥ * ॥
स्वयंकरणासामर्थ्ये अन्यद्वारा। यथा,—"दत्तः।
'स्वयं होमे फलं यत्र तदन्येन न जायते।
ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्-पतिः।
एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि॥'
विट्पतिर्जामाता। एवञ्च ऋत्विगादीतरत्र फलभूयता॥ * ॥ अचाग्नौचाशक्त्या बोधन-दिनात् पूर्व्वं सुचितत्कालजौचित्यरूपाधिकारा-भावेऽपि यद्वरणादिकं क्रियते तत् कर्म्मकाले तस्य नारदोक्तस्वयं प्रवर्त्तनवत् प्रवर्त्तनाय न तु तदानीं प्रतिनिधीयते। अथवा।
'निःशिष्यामिं स्वदारेषु परिकल्प्यार्त्विजन्यया।
प्रवसेत् कार्य्यवान् विप्रो दृष्ट्वैव न चिरं वसेत्॥'
इति छन्दोगपरिशिष्टवदन्यत्रापि प्रतिनिधी-यते। एवं वरणं विनापि क्वचिद्यदि ऋत्विक् प्रवर्त्तते तथापि तत्कर्म्मसिद्धिः। दक्षिणा च तस्मै शुचिकाले दातव्येति। तथा च नारदः।
'ऋत्विक् च विविधो दृष्टः पूर्व्वैर्ऋषिभिः स्वयंकृतः।
यदृच्छया वा यः कुर्य्यादार्त्विज्यं प्रीतिपूर्व्वकम्॥'
यदृच्छया स्वेच्छया।" इति तिथ्यादितत्त्वम्॥
प्रतिपः, पुं, (प्रतिपाति पालयतीति। प्रति+पा+कः।) ब्राह्मणराजापिता। इति शब्द-रत्नावली॥
प्रतिपक्षः, पुं, (प्रतिकूलः पक्ष इति प्रादि-समासः।) शत्रुः। इति हेमचन्द्रः। ३।३६२।
(यथा, रघुवंशटिकायां १० अङ्के।
"अन्योन्यं प्रतिपक्षसंकृतिमिमां लोकस्थितिं बोधय-न्नेष क्रीडति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः॥")
साङ्गत्यम्। यथा,—
"प्रतिबन्धिप्रतिनिधिप्रतिपक्षविरुद्धकाः।"
इति काव्यचन्द्रिका॥
प्रतिवादी च॥

प्रतिपत्, [द्] स्त्री, (प्रतिपद्यते उपलभ्यते-ऽनयेति। प्रति+पद्+करणे क्विप्।) ज्ञान-वाद्यम्। इति चिकाण्डशेषः॥ बुद्धिः। तिथि-विशेषः। तत्पर्य्यायः। पक्षतिः २। इत्यमरः। १।४।१॥ सा च चन्द्रस्य प्रथमकलाक्रियारूपा। दृष्टिरूपा चेत् शुक्ला १ एकाङ्कबोधिता। ज्ञान-रूपा चेत् कृष्णा १७ सप्तदशाङ्कबोधिता॥ * ॥ तस्यां यवक्षया यथा। "सा च कृष्णा द्वितीया-युक्ता ग्राह्या प्रतिपत् चतुर्दशी खण्डिताप-रकृष्णीयात्। शुक्ला अमावास्यायुता ग्राह्या। प्रतिपदाद्यमावास्येति वचनात्। त्रिमुहूर्त्तव्याप्ति-मौक्ते तु सर्व्वत्र न युग्मादरः। तथा च पराश-रः।
'त्रिमुहूर्त्तव्यापिनी या तु सैव पूज्या सदा तिथिः।
न तत्र युग्मादरश्चमन्यत्र हरिवासरात्।'॥
कृष्णापि उपवासे द्वितीयायुता न ग्राह्या। तथा च हेमाद्रिधृतः।
'द्वितीया पञ्चमी वेधाद्दशमी च क्षयोदयौ।
चतुर्दश्यौ चोपवासे हन्युः पूर्व्योत्तरे तिथी॥'
द्वितीया वेधात् योगात् प्रतिपत्तृतीये ह्यनीत्यर्थः। एवमन्यत्र। अन्योपवासपरेऽह्नि विशेषविधानात् आपरह्णीयसामान्यवचनस्य सङ्कोचः॥ * ॥ कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भग-वद्वाक्यम्।
'वीर! प्रतिपदा नाम तव भावी महोत्सवः।
अद्य त्वां नरशार्दूल! कृष्टाः पुष्टाः सलङ्कृताः।
पुण्यदीपप्रदानेन पूजयिष्यन्ति मानवाः॥'
तत्र मन्त्रः।
'बलिराज! नमस्तुभ्यं विरोचनसुत प्रभो।
भविष्येन्द्र सुरारीते पूजेयं प्रतिगृह्यताम्॥'
प्रतिपदा प्रतिपत्तिथ्या। अत्र प्रतिपदि। भवि-ष्यपुराणे तु बलिराजेतिमन्त्रस्य पूर्व्वम्।
'मन्त्रेणानेन राजेन्द्र! समभ्यर्च्य पुरोहितः।'
इत्यर्द्धम्॥
पद्मादपि।
'एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः।'
इत्युक्तमिति॥
पुनर्भविष्यपुराणे।
'अङ्कुरञ्च पुरा द्यूतं सकर्षं सुमनोहरम्।
कार्त्तिके शुक्लपक्षे च प्रथमेऽह्नि भूपते!॥
जितञ्च अङ्कुरञ्चैव जयं देमि च पार्व्वती।
अतोऽर्थाच्छङ्करो दुःखी जितं गौरी सुखोचिता॥
तस्मात् द्यूतं प्रकर्त्तव्यं प्रभाते तत्र मानवैः।
तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं सुखम्॥
पराजयो विदद्यच्च तस्यनाशकरो भवेत्॥'
द्यूतशब्दार्थादिभिः क्रीड़नम्। यथा मनुः।
'अप्राणिभिर्यत् क्रियते तल्लोके द्यूतमुच्यते॥'॥
तत्प्रतिपदमधिकृत्य भविष्योत्तरे।
'यो यो वाङ्मयभावेन तिष्ठत्यस्यां युधिष्ठिर!।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि॥'
तथा।
'महापुण्या तिथिरियं बलिराज्यप्रवर्द्धिनी।

स्नानं दानं हुतगुणं कार्त्तिकेऽस्यां तिथौ भवेत्॥'
प्रतिपदोद्धिजीयोगो यथा। भविष्ये।
'दोर्द्धिजया प्रतिपद्युक्ता मार्गे माघि सितेतरा।
अङ्गारयां यदि लभ्येत सूर्य्यग्रहशतैः समा॥' *॥
तस्याः संज्ञा नन्दा। तत्राभ्यङ्गनिषेधो यथा,—
'नन्दासु नाभ्यङ्गसुपाचरेच्च
चौरञ्च रिक्तासु जयासु मांसम्।
पूर्णासु योषित् परिवर्জ্জनीया
भद्रासु सर्व्वाणि समाचरेच्च॥' *॥
नन्दादिक्रममाह ज्योतिषे।
'नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥'
प्रतिपदादिपञ्चदशतिथिषु पञ्चदशव्रतभक्षण-
निषेधमाह स्मृतिः।
'कृष्णाके चार्थहानिः स्यात् हरिर्व्वा न स्मरेद्-
हरिम्।
बहुसूनुः पटोले स्यान्नखहानिश्च मूलके॥
कलञ्जौ चायते विप्रे तिर्य्यग्योनिञ्च निम्बके।
तीले मरीरनाशः स्यान्नारिकेले च मूर्खता॥
तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका।
ग्रिन्वी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका॥
वार्त्ताकी सुतहानिः स्यात्किंशरोगी च मानवः।
महापापकरं मांसं प्रतिपदादिषु वर्জ্জयेत्॥' *॥
तत्र चौरनिषेधो यथा। चौरं विप्रास्त्रापतिपत्सु वर्জ্জम्।" इति तिथ्यादितत्त्वम्॥ * ॥
तत्र फलतत्त्वम्।
"मणिकनकविभूषासंयुतश्चारुकान्ति-
र्निजकुलकमलोल्लासमार्त्तण्डबिम्बः।
प्रतिपदि गृहिपूर्णो लब्धलक्ष्मा प्रतापी
भवति विमलवेषश्चारुकेशः प्रवेशः॥"
इति कौष्ठीप्रदीपः॥ * ॥
सा अमैर्व्वज्जतिथिः। यथा,—
महातपा उवाच।
"विष्णोर्विभूतिमाख्यातां कथितं ते प्रसङ्गतः।
तिथीनां ब्रह्म महतां कथ्यमानं मया शृण!॥
इत्यभूनो महानग्निर्मन्त्रक्रोधोद्भवो महान्।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो!।
यस्यामहं समस्तस्य जगतः स्यातिमाप्नुयाम्॥
ब्रह्मोवाच।
देवानामथ यज्ञानां मन्वन्तराणाञ्च सत्तम!।
आदौ प्रतिपदा येन जनुष्यसोऽसि पावक!॥
त्वत्पदात् प्रतिपदिकं संभविष्यन्ति देवताः।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति॥
तस्यां तिथौ हविर्य्येण प्राणायज्ञेन सत्तमिना।
तोष्यन्ति तेषां प्रीताः स्युः पितरः सर्व्वदेवताः॥
चतुर्विधानि भूतानि मनुष्याः पशवोऽसुराः।
देवाः सर्व्वे समस्तास्ते प्रीताः स्युस्तर्पिते त्वयि॥
यश्चोपवासं कुर्व्वीत तद्ब्रह्मः प्रतिपद्दिने।
क्षीराज्यगो वा वर्त्तेत ब्रह्म तस्य फलं महत्॥
चतुर्युगानि षट्त्रिंशत्सप्तलोकेशो महीयते।
तेजस्वी रूपसम्पन्नो ब्रह्मवान् जायते नरः॥
इह जन्मन्यसौ राजा स्वर्गलोके महीयते।
तस्यैवभव होऽग्निर्मेऽहस्तामयं वधौ॥

य इदं ब्रह्मयामिश्रं प्रातरुत्थाय मानवः।
अमैर्व्वज्जञ्च पापेभ्यो मुच्यते नात्र संशयः॥"
इति वराहपुराणे महातपोपाख्याने अमैर्व्वज्ज-
तिथिनामाध्यायः॥ * ॥ प्रतिपदि चन्द्रदर्शन-
कारत्वम्। यथा, ज्योतिषे।
"अमावस्याघटीश्रोधा यद्यादर्शसंयुता।
सूर्य्यराकुहटीभ्यश्चेदधिका ह्यग्रते ग्रधी॥"
प्रतिपत्तिः, स्त्री, (प्रतिपदनमिति। प्रति+पद्+
क्तिन्।) ग्रहणम्। (यथा, कुमारे। ५। ४२।
"मनस्विनीनां प्रतिपत्तिरीदृशी॥") प्राप्तज्ञम्। गौरवम्। (यथा, युक्तिकल्पतरौ
चारलक्षणे।
"सुभक्तो राजसु तथा कार्य्यार्था प्रतिपत्तिमान्॥") संप्राप्तिः। (यथा, रघुः। १। १।
"वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ॥") प्रबोधः। (यथा, भागवते। ३। ६। १४।
"चक्षुर्व्वाग्रेण रूपाणां प्रतिपत्तिर्यतो भवेत्॥") पदप्राप्तिः। इति मेदिनी। ते, २०६॥ मीमांसकमते फलशून्यकर्म्माङ्गम्। यथा। देवतोद्देशेन यागादौ त्यक्तहविरादेरग्नौ निःक्षेपः। पूजितप्रतिमादेर्जले विसर्জ্জनमित्यादि। श्राद्धादौ सर्व्वशेषाङ्गकर्म्म यथा। प्रतिपत्तिरूपकर्म्माङ्ग एव प्रतिपाद्याभावे तन्निवृत्तिः। इति तिथ्यादितत्त्वम्॥ * ॥ निर्व्वाह्यिनाङ्गकद्रव्यकरणकाङ्गत्वं प्रतिपत्तिरूपकर्म्माङ्गत्वम्। प्रतिपत्तिकर्म्म उत्तरा क्रिया। यत्र एकेन द्रव्येण कर्म्मद्वयं निर्व्वाह्यते तत्र उत्तरं कर्म्म प्रतिपत्तिकर्म्म। तन्निर्व्वाह्यकत्वं प्रतिपाद्यम्। इति तट्टीकायां काशीरामवाचस्पतिः॥ * ॥ अथ प्रतिपत्तृत्वाधिकरणम्। ग्रहान्निरस्यति लोहितं निरस्यति गुदेनोपयजति सर्व्वं जुहोति। इत्यग्नीषोमीयपशौ श्रूयते। ग्रहान्निरस्यतीति हृदालम्भार्थम्। यथा पशोरुदरवर्त्तिग्रहान् त्यजति तथा लोहितमपि त्यजति। अन्यत्र पशोः पुरोडाशोपक्रमेण होमः। अत्र तु गुदमांसोपक्रमेणेति। तत्र च यज्ञियेभ्यो दत्तावशिष्टेभ्यो ददातीति परिभाषया मांसस्योत्तरा प्रतिपत्तिः प्राप्ता। अत्र सर्व्वहवनेन प्रतिपत्त्यभावात् कर्म्मवैगुण्यं स्यादिति। अत्र सिद्धान्तः। यद्दिकारादुपपत्तिरिति। यदि प्रतिपाद्यं स्यात् तदा प्रतिपत्तिरङ्गमित्यर्थः। इति रामकृष्णीयाधिकरण-कौमुदी॥ * ॥ अपि च।
"उपांशुयाजवद्यत्र शेषकार्य्यं भवेन्न वा।
भवेद्विधेः सर्व्वत्र इत्युक्ता प्रापितत्वतः॥
उक्ताप्यङ्गत्वशेषस्तु भाष्योपस्करकादिवत्।
अतो न प्रतिपत्त्यर्थैः शेषकार्य्यं ततः कथम्॥"
इति माधवीयाधिकरणमालायाम् ५ पादे प्रथमाधिकरणम्॥
प्रतिपत्तिपटहः, पुं, (प्रतिपत्तये पटहः।) वाद्यविशेषः। नागरा इति भाषा। तत्पर्य्यायः। वध्यापटहः २। इति हारावली॥

प्रतिपत्तूर्य्यं, क्ली, (प्रतिपदे संविदे तूर्य्यम्।) द्रगड़वाद्यम्। इति त्रिकाण्डशेषः॥
प्रतिपत्फला, स्त्री, (प्रतिपदं फलमस्याः।) शुक्रकारवेल्ली। इति राजनिर्घण्टः॥
प्रतिपन्नं, त्रि, (प्रतिपद्यते स्मेति। प्रति+पद्+क्तः।) अवगतम्। इत्यमरः। ३। २। १०८॥ (यथा, कुमारे। ४। ३३।
"प्रमदाः प्रतिपत्तिलक्षणा इति
प्रतिपन्नं हि विचेतनैरपि॥")
अङ्गीकृतम्। इति मेदिनी। ने, १८४॥ विक्रान्तः। इति हेमचन्द्रः॥
प्रतिपर्णशिफा, स्त्री, (प्रतिपर्णं शिफा जटा अस्याः।) हवुषी। इति राजनिर्घण्टः॥
प्रतिपादकः, त्रि, (प्रतिपादयतीति। प्रति+पद्+णिच्+ण्वुल्।) प्रतिपत्तिजनकः। बोधकः। (यथा, सर्व्वदर्शनसंग्रहे पूर्णप्रज्ञदर्शने। "ननु सजातीयविजातीयस्वगतनानात्वशून्यं ब्रह्मतत्त्वमिति प्रतिपादकेषु वेदान्तेषु आगमकेषु कथमप्रमाणगुणत्वमिति॥") यथा च। प्रतिपाद्यप्रतिपादकभावश्च सम्बन्धः। इति दिनकरी॥
प्रतिपादनं, क्ली, (प्रति+पद्+णिच्+भावे ल्युट्।) दानम्। प्रतिपत्तिः। बोधनम्। इति मेदिनी। ने, २३६॥ (निष्पादनम्। यथा, महाभारते। १२। २४१। १४।
"क्षेत्रं विमोक्षसमये द्वापरप्रतिपादने॥")
प्रतिपालकः, त्रि, (प्रति+पा+णिच्+ण्वुल्।) पालनकर्त्ता। प्रतिपालयतीति प्रतिपूर्ब्वपाङ्गपाधातोर्ण्वुलन्तस्य निष्पन्नः॥
प्रतिपालनं, क्ली, (प्रति+पा+णिच्+भावे ल्युट्।) रक्षणम्। पोषणम्। यथा। "कुन्त्या प्रकृतस्य कर्णस्य राधाप्रतिपालनात् राधेयत्वं सङ्गच्छते।" इति दुर्गादासः॥
प्रतिपाल्यं, त्रि, (प्रति+पा+णिच्+कर्म्मणि यत्।) प्रतिपालनीयम्। प्रतिपालितव्यम्। प्रतिपूर्ब्वपाङ्गपालरक्षणे इत्यस्मात् कर्म्मणि यप्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते। १३। ७५। २।
"या पुत्रकस्य बहुशः प्रतिपाल्या तदा भवेत्,
अथचैनामरंस्त सुखं क्रीता शुल्कप्रदस्य सा॥")
प्रतिप्रसवः, पुं, (प्रति प्रतिषिद्धं प्रसूते इति, प्रति+प्र+सू+अप्।) निषिद्धस्य पुनर्विधानम्। यथा, प्रायश्चित्ततत्त्वे।
"हविश्युक्रदिने चैव द्वादश्यां श्राद्धवासरे।
इत्यादिना निषिद्धस्य तिलतर्पणस्य तीर्थेतरत्र प्रतिप्रसवमाह स्मृतिः।
अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च॥"
प्रतिप्रसूतः, त्रि, (प्रतिप्रसूते स्मेति। प्रति+प्र+सू+क्तः।) प्रतिप्रसवविशिष्टः। इति मलमासतत्त्वम्॥ पुनःसम्भावितः। यथा,—
"उक्तानि प्रतिसिद्धानि पुनःसम्भावितानि च।
सापेक्षाणिरपेक्षाणि मीमांसान्तीह कोविदैः॥"
इति चतुरङ्गसुक्तावली॥

प्रतिभ

प्रतिफलं, क्ली, (प्रतिफलतीति। प्रति+फल्+अच्।) प्रतिबिम्बम्। यथा.—
"प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्त्रा वासमाशङ्कमाना॥"
इति रसमञ्जरी॥
तुल्यफलम्। फलं फलच्च॥

प्रतिफलनं, क्ली, (प्रति+फल्+ल्युट्।) प्रतिबिम्बम्। यथा,—
"न बिम्बं तद्दिव्यप्रतिफलनलाभादधिगतं
तुलामध्यारोढुं कथमपि न लज्जेत कलया॥"
इत्यानन्दलहरी। ६२॥

प्रतिफलितं, त्रि, (प्रति+फल्+क्त।) प्रतिबिम्बितम्। यथा,—
"मोहातीतो विबुद्धो सुविभिरभिहितो मोहसंक्रान्तमूर्तिः
साक्षी स्नाने तदुत्थे प्रतिफलितवपुः—— ॥"
इत्यादि सुक्तिवादगादाधरी॥

प्रतिफुल्लकः, त्रि, (प्रतिफुल्लति विकसतीति। प्रति+फुल्ल+ण्वुल्।) प्रफुल्लः। इति शब्दचन्द्रिका॥

प्रतिबद्धः, त्रि, प्रतिबन्धविशिष्टः। प्रतिपूर्ब्बबन्धधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥

प्रतिबध्यः, त्रि, (प्रति+बन्ध+यत्।) प्रतिबन्धनीयः। प्रतिबन्धार्हः। यथा। वस्तुतो हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वप्रकारितानूत्यज्ञानवृत्तिप्रकारितानवच्छेदकत्वेनैव प्रतिबध्यत्वं निवेश्यमिति व्याप्त्यनुगमजागदीशी॥

प्रतिबन्धः, पुं, (प्रति+बन्ध+घञ्।) कार्य्यप्रतिघातः। तत्पर्य्यायः। प्रतिहन्धः २। इत्यमरः। ३। २। २७॥ (यथा, रघौ। ८। ८०।
"स तपःप्रतिबन्धमन्युना
प्रमुखाविष्कृतचारुविभ्रमाम्।
अभवत्पदभव मानुषीति तां
भ्रमवेलाप्रलयोर्म्मिजा भुवि॥")

प्रतिबन्धकः, पुं, (प्रतिबध्नातीति। प्रति+बन्ध+ण्वुल्।) विटपः। इति शब्दचन्द्रिका॥ प्रतिरोधके, त्रि॥ (यथा, राजतरङ्गिण्याम्। ३।१६६।
"त्यागिनो निष्फलस्यास्य को दोषोऽस्य महीपतेः।
ममापुण्यन्तु तन्निघ्नं यच्छैथ्यप्रतिबन्धकम्॥")

प्रतिबन्धिः, पुं, (प्रतिबध्नात्यनेनेति। प्रति+बन्ध+इन्।) अनिष्टान्तरप्रसञ्जकं वाक्यम्। प्रतिबन्धः। यथा। प्रतिबन्धेरनुत्तरत्वादाहेति विशेषव्याप्तिजागदीशी॥

प्रतिबल, त्रि, (प्रतिगतं बलमस्य।) समर्थः। शूरः। इति त्रिकाण्डशेषः॥ (प्रतिरूपं बलमस्य।) तुल्यबलः॥ (यथा, महाभारते। १। १५४। ८।
"नायं प्रतिबलो भीम! राक्षसापसदो मम।
सोढुं युधि परिस्पन्दमथवा सर्व्वराक्षसाः॥")

प्रतिभयं, त्रि, (प्रतिगतं भयं यत्र।) भयङ्करम्। इत्यमरः। १। ७। २०॥ (यथा, रामायणे। ६। ६०। ३५।
"दिग्गज्च प्रदिग्गज्चैव बभूवुः शूरसम्मताः।
तमसा पिहितं सर्व्वमासीत् प्रतिभयं महत्॥")
भये, क्ली। इति मेदिनी। ये, १२२॥

प्रतिभा, स्त्री, (प्रतिभाति शोभते इति। प्रति+भा+कः। टाप्।) बुद्धिः। इति हेमचन्द्रः॥ प्रत्युत्पन्नमतित्वम्। इति प्रतिभान्वितशब्दटीकायां भरतः॥ नवनवोन्मेषशालिनी प्रज्ञा। यथाह, रुद्रः।
"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता॥"
(यथा च, महाभारते। १२। २५६। १।
"कच्चिं साधु वसुहितं नियतं ब्रह्मचारिणम्।
प्रतिभा त्वस्ति मे काचित् तां मृषामनुमानतः॥"
प्रतिभायते इति। प्रति+भा+"आतश्चोपसर्गे।" ३। १। १०६। इति अङ्।) दीप्तिश्च॥

प्रतिभान्वितः, त्रि, (प्रतिभया अन्वितः।) प्रगल्भः। प्रत्युत्पन्नमतियुक्तः। इत्यमरः। ३। १। २५॥

प्रतिभासुखः, त्रि, (प्रतिभान्वितं सुखमस्य।) प्रगल्भः। इति हेमचन्द्रः। ३। ७॥

प्रतिभावान्, [त्] त्रि, (प्रतिभा विद्यतेऽस्य। प्रतिभा+मतुप्। मस्य वः।) प्रतिभान्वितः। प्रागल्भ्ययुक्तः। प्रतिभाशब्दादर्थे वतुप्रत्ययेन निष्पन्नः॥ (यथा, कथासरित्सागरे। ७। ३२।
"आगच्छन्तीञ्च सायन्तां कुमारसचिवो हठात्।
अग्रहीदथ सायन्तनमवोचत् प्रतिभावती॥")

प्रतिभाहानिः, स्त्री, (प्रतिभाया हानिः।) बुद्धिनाशः। इति शब्दमाला॥

प्रतिभूः, पुं, (प्रतिरूपः प्रतिनिधिर्वा भवतीति। प्रति+भू+"सुवः संज्ञान्तरयोः।" ३। २। १७६। इति क्विप्। "धनिकाधमर्णयोरन्तरं यस्तिष्ठति विश्वासाय स प्रतिभूः।" इति विद्वान्मनोरमादौ॥) लग्नकः। इत्यमरः। २। १०। ४४॥ जामिन् इति पारस्यभाषा॥ (यथा, प्रद्युम्नविजये। २ अङ्के।
"यत्रैकः प्रतिभूः फलेषु क्रतिनां यज्ञेषु यज्ञेश्वरो
विघ्नस्तोमतमःसमूहतपनः सोऽयं स्वयं
श्रीहरिः॥")
तस्य कर्त्तव्यत्वं यथा,—
"सभापतेः कर्त्तव्यमाह कात्यायनः।
'अथ चेत् प्रतिभूर्नास्ति वादयोग्यस्तु वादिनोः।
स दक्षिणो दिनस्यान्ते दद्याद्भृत्याय वेतनम्॥'
प्रतिभवति तत्कार्य्यं तद्वक्तव्यमिति प्रतिभूलक्षकः।
वादयोग्यः विवादफलस्य साधितधनादिदानस्य दक्षदानस्य च क्षमः। वादिनोः भाषावादिनः उत्तरवादिनश्च। तथा च याज्ञवल्क्यः।
'उभयोः प्रतिभूर्य्याह्यः समर्थः कार्य्यनिर्णये।
प्रतिभुवस्तभावे च राज्ञा संग्रहणं तयोः॥'
राज्ञा संग्रहणं दण्डतुल्याधिकरणम्। निर्णयस्य कार्य्ये धनादिदाने राजदण्डादित्वात् कार्य्यशब्दस्य पूर्ब्बनिपातः। भृत्यस्तद्रक्षको राजनियुक्तः।" इति व्यवहारतत्त्वम्॥

प्रतिमः, त्रि, (प्रतिमातीति। प्रति+मा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः।)

प्रतिमः

उत्तरपदस्थे बहुत्ववाचकः। यथा.—
"क्षुद्रोत्तरपदे प्रज्ञः प्रकारः प्रतिमो विभः॥"
इति हेमचन्द्रः॥
(यथा, रामायणे। २। ४०। १६।
"आर्य्यं हृदयं नूनं राममातुरवंशयम्।
यद्देवगर्भप्रतिमे वनं याति न भिद्यते॥")

प्रतिमा, स्त्री, (प्रतिमीयते इति। प्रति+मा+अङ्। टाप्।) अनुकृतिः। गजदन्तस्य बन्धः। इति मेदिनी। मे, ४८॥ (प्रतिबिम्बम्। यथा, रघुः। ७। ६४।
"निमीलितानामिव पङ्कजानां
मध्ये स्फुरन्तं प्रतिमाशशाङ्कम्॥"
तथा च कुमारे। ७। ३६।
"आत्मानमासक्तमयोपनीते
खड्गे निषक्तप्रतिमं ददर्श॥"
प्रतिमीयते अनयेति करणे अङ्।) मूर्त्तिसदृशच्छन्दादिनिर्म्मितप्रतिकृत्यकम्। तत्पर्य्यायः। प्रतिमानम् २ प्रतिबिम्बम् ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृतिः ६ अर्चा ७ प्रतिनिधिः ८। इत्यमरः। २।१०।३६॥ प्रतिच्छन्दः ९ प्रतिकायः १० प्रतिरूपम् ११। इति हेमचन्द्रः॥*॥ (यथा, महाभारते। १।१७२।२७।
"गिरिपृष्ठे तु सा तस्मिन् स्थिता स्वपितलोचना।
विभ्राजमाना सुमुखी प्रतिमेव हिरण्मयी॥")
देवप्रतिमाघटनप्रमाणादि यथा,—
"विष्णोस्तावत् प्रवक्ष्यामि बाहुगर्भं प्रशस्यते।
शङ्खचक्रधरं धीमन्तं पद्महस्तं गदाधरम्॥
कुक्षाकारं शिरस्तस्य कम्बुग्रीवं शुभेक्षणम्।
तुङ्गनासं शुक्तिकर्णं प्रज्ञान्तोदरशुभक्रमम्॥
क्वचिदष्टभुजं विद्याच्चतुर्भुजमथापि वा।
द्विभुजं वापि कर्त्तव्यं भवेत्तु पुरोधसा॥" *॥
देवमष्टभुजस्यास्य यथास्थानं निबोध मे।
खड्गो गदा शरः पद्मं दक्षिणेषु करेषु तु॥
धनुश्च खेटकश्चैव शङ्खचक्रे च वामतः॥ *॥
चतुर्भुजस्य वक्ष्यामि यथैवायुधसंस्थितिः।
दक्षिणेन गदां पद्मं वासुदेवस्य कारयेत्॥
वामतः शङ्खचक्रे च कर्त्तव्ये भूतिमिच्छता।
त्रिणावतारे तु गदा वामहस्ते प्रशस्यते॥
यथेच्छया शङ्खचक्रमुपरिष्टात् प्रकल्पयेत्।
अधस्तात् पृथिवी तस्य कर्त्तव्या पादमध्यतः।
दक्षिणे प्रणतं तद्वत् गरुत्मन्तं निवेशयेत्।
वामतस्तु भवेल्लक्ष्मीः पद्महस्ता सुशोभना।
गरुत्मानथवा वापि संस्थाप्यो भूतिमिच्छता॥
श्रीश्च पुष्टिश्च कर्त्तव्ये पार्श्वयोः पद्मसंयुते।
तोरणञ्चोपरिष्टाच्च विद्याधरसमन्वितम्॥
देवदुन्दुभिसंयुक्तं गन्धर्व्वमिथुनान्वितम्।
पद्मवल्लीसमोपेतं सिंहव्यालसमन्वितम्।
तथा कल्पलतोपेतं स्तुवद्भिरमरेश्वरैः।
एवंविधो भवेद्विष्णुर्भक्तिभागीनाञ्च पौष्टिकः॥
नवतालप्रमाणास्तु देवदानवकिन्नराः।
अतःपरं प्रवक्ष्यामि मानोन्मानं विशेषतः॥*॥
जातान्तरप्रविष्टानां भावनां यत्नतः स्फुटम्।

आसनेषु: स विज्ञेयो बालाद्यन्तेरणादभि: ॥
तदष्टकेन लिक्षा तु यूका लिक्षाष्टकैर्मता ।
यवो यूकाष्टकं तदष्टभिर्ज्ञेयस्तदङ्गुलम् ॥
खदीयाङ्गुलमानेन हस्तं स्याद्द्वादशाङ्गुलम् ।
मुखमानेन कर्तव्या सर्वावयवकल्पना ॥ * ॥
सौवर्णी राजती वापि ताम्री दलमयी शुभा ।
शैलदारुमयी वापि लौहसीसमयी तथा ॥
रौतिका धातुयुक्ता वा लाक्षाकाष्ठमयी तथा ।
शुभदारुमयी वापि देवतार्चा प्रशस्यते ॥ * ॥
अङ्गुष्ठपर्वादारभ्य वितस्तिर्यावदेव तु ।
गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधै: ॥
आषोडशात् प्रासादे कर्तव्या नाधिका तत: ।
मध्यमेन कनिष्ठा तु कार्या वित्तानुसारत: ॥
द्वारोच्छ्रायस्य यन्मानमष्टधा तत्तु कारयेत् ।
भागद्वयेन प्रतिमा त्रिभागीकृत्य तत् पुन: ॥
पीठिका भागत: कार्या नातिनीचा न
चोच्छ्रिता ।
प्रतिमासूत्रमानेन नव भागान् प्रकल्पयेत् ॥
चतुरङ्गुला भवेद्ग्रीवा भागेन हृदयं पुन: ।
नाभिरष्टाङ्गुल: कार्या भागेनैकेन शोभिता ॥
निम्ने विस्तरके च अङ्गुलं परिकीर्तितम् ।
मेढ्रं भागेनैकेन कल्पयेत् ।
त्रिभागमायतावस्तु जानुनी चतुरङ्गुले ॥
जङ्घे द्विभागे विख्याते पादौ तु चतुरङ्गुलौ ।
चतुर्दशाङ्गुलश्चोर्ध्वं लिङ्गस्य प्रकीर्तित: ॥
उन्मानमिदं प्रोक्तं पृथुत्वं च निबोधत ।
सर्वावयवमानेषु विस्तरं दशधा हिजा: ॥ * ॥
चतुरङ्गुलं ललाटं स्याद्वृत्तं नासा तथैव च ।
द्विरङ्गुलं हनु ज्ञेयमोष्ठश्चाङ्गुलसम्मित: ॥
अष्टाङ्गुलं ललाटन्तु तावच्चाक्षे भ्रुवौ मते ।
अर्द्धाङ्गुला भ्रुवोर्लेखा मध्ये धनुरिवानता ॥
उन्नताग्रा भवेत् पार्श्वे श्लक्ष्णा तीक्ष्णा प्रशस्यते ।
अक्षिणी द्व्यङ्गुलायामे तदर्द्धेनैव विस्तरे ॥
उन्नतोदरमध्ये तु रक्तान्ते शुभलक्षणे ।
तारका च त्रिभागेन कृष्ण: स्यात् पञ्चभागिकी ॥
द्विरङ्गुलं भ्रुवोर्मध्यं नासामूलमथाङ्गुलम् ।
नासाग्रविस्तरं तद्वत् पुटद्वयमथाननम् ॥
नासापुटसमं तद्वदर्द्धाङ्गुलसुदाहृतम् ।
कपोले द्व्यङ्गुले तद्वत् कर्णमूलादिनिर्गते ॥
दन्तच्छदसमं तद्विस्तारो द्व्यङ्गुलो भवेत् ।
अर्द्धाङ्गुला भ्रुवो राजी श्लक्ष्णा सदृशी समा ॥
अर्द्धाङ्गुल: समस्तद्वदुत्तरोष्ठस्तु विस्तरे ।
निष्पावसदृशं तद्वन्नासापुटसमं भवेत् ॥
दक्षकर्णौ ज्योतिस्तुल्यौ च कर्णमूलात् षडङ्गुलौ ।
कर्णौ तु भ्रूसमौ ज्ञेयावूर्ध्वं तु चतुरङ्गुलौ ॥
द्व्यङ्गुलौ कर्णपाली तु मात्रामेकान्तु विस्तृतौ ।
कर्णयोरुपरिष्टाच्च मस्तकं द्वादशाङ्गुलम् ।
ललाटं पृष्ठतोऽर्द्धेन प्रोक्तमष्टादशाङ्गुलम् ।
षट्त्रिंशदङ्गुलश्चास्य परिणाह: शिरोगत: ॥
सर्वेषूक्तिषु चास्य द्विचत्वारिंशदङ्गुल: ।
केशान्तान्तु मुखे तद्वदङ्गुलानि तु षोडश ॥
ग्रीवामध्यपरीणाहश्चतुर्विंशतिरङ्गुल: ।

अष्टाङ्गुला भवेद्ग्रीवा पृथुत्वेन विधीयते ॥
स्तनग्रीवान्तरं प्रोक्तमेकतालं स्वयम्भुवा ।
स्तनयोरन्तरं तद्वद्द्वादशाङ्गुलमिष्यते ॥
स्तनयोर्मण्डलं तद्वद्द्वादशाङ्गुलं परिकीर्तितम् ।
पृथुके मण्डलस्यान्तर्यवमात्रे उभे स्मृते ॥
हितालचापि विस्तारादङ्गुल: श्लक्ष्णसुदाहृतम् ।
कक्षे षडङ्गुले प्रोक्ते बाह्वन्तरलक्षणान्तरे ॥
चतुर्दशाङ्गुलौ पादावङ्गुष्ठस्तु चिरङ्गुल: ।
पञ्चाङ्गुलपरीणाहमङ्गुष्ठाग्रं तथोन्नतम् ॥
अङ्गुष्ठसमा तद्वदायामे स्यात् प्रदेशिनी ।
तस्या: षोडशभागेन हीयते मध्यमाङ्गुली ॥
अनामिकाष्टभागेन कनिष्ठा चापि हीयते ।
पर्वत्रयेण चाङ्गुष्ठो गुल्फौ द्व्यङ्गुष्ठकौ मतौ ॥
पार्ष्णिर्द्व्यङ्गुलमाना तु कलयोर्वा प्रकीर्तिता ।
द्विपर्वाङ्गुलक: प्रोक्त: परीणाहश्च तद्वत् ॥
प्रदेशिनीपरीणाहश्चाङ्गुल: सप्तदाहृत: ।
अन्यासामष्टभागेन हीयते क्रमशो द्विजा: ॥
अङ्गुलेनोच्छ्राय: कार्य: अङ्गुष्ठस्य विशेषत: ।
तदर्द्धेन तु शेषाणामङ्गुलीनामथोच्छ्राय: ॥
अङ्गुष्ठे परिणाहस्तु अङ्गुलानि चतुर्दश ।
जङ्घामध्ये परीणाहस्तथैवाद्द्वादशाङ्गुल: ॥
जानुमध्ये परीणाह एकविंशतिरङ्गुल: ।
जानूच्छ्रायोऽङ्गुल: प्रोक्तो मण्डलं चाङ्गुलं पुन: ॥
ऊरुमध्ये परीणाहश्चाष्टाविंशतिकाङ्गुल: ।
एकत्रिंशोपरिष्टाच्च वृषणौ चाङ्गुलौ पुन: ॥
चाङ्गुलश्च तथा मेढ्रं परीणाहे षडङ्गुलम् ।
मणिबन्धोदयो विद्वान् केशरेखा तथैव च ॥
मणिबन्धपरीणाहश्चतुरङ्गुल इष्यते ।
विस्तारेण भवेत्तद्वत् कटिरष्टादशाङ्गुला ।
द्वात्रिंशतिस्तथा स्त्रीणां स्तनौ च द्वादशाङ्गुलौ ॥
नाभिमध्ये परीणाहो द्विचत्वारिंशदङ्गुल: ।
पुरत: पञ्चपञ्चाशत् कक्षाश्चैव तु वेष्टनम् ॥
कक्षयोरुपरिष्टात्तु स्कन्धौ प्रोक्तौ षडङ्गुलौ ।
अष्टाङ्गुलाच्च विस्तारे ग्रीवाश्चैव तु निर्दिशेत् ॥
परीणाहे तथा ग्रीवां कला द्वादश निर्दिशेत् ।
आयामो भुजयोक्तस्तद्द्विचत्वारिंशदङ्गुल: ॥
कार्श्ये तु बाहुशिखरं प्रमाणे षोडशाङ्गुलम् ।
ऊर्ध्वं यद्बाहुपर्व्वाग्रं विद्याद्द्वादशाङ्गुलम् ॥
तथैकाङ्गुलहीनन्तु द्वितीयं पर्व्व मुच्यते ।
बाहुमध्ये परीणाहो भवेद्दशाङ्गुल: ॥
षोडशोक्त: प्रबाहुस्तु षट्कलोत्यकरो मत: ।
सप्ताङ्गुलं करतलं पञ्चमध्याङ्गुली मता ॥
अनामिका मध्यमाया: सप्तभागेन हीयते ।
तस्यास्तु पञ्चभागेन कनिष्ठा परिहीयते ॥
मध्यमायास्तु हीना वै पञ्चभागेन तर्ज्जनी ।
अङ्गुष्ठपर्व्वजनीमूलादध: प्रोक्तस्तु तत्समः ॥
अङ्गुष्ठपरिणाहस्तु विज्ञेयश्चतुरङ्गुल: ।
शेषाणामङ्गुलीनान्तु भागो भागेन हीयते ॥
मध्यमामध्यपर्व्वन्तु अङ्गुलद्वयमायतम् ।
यवो यवस्तु सर्व्वासां तस्यां तस्यां प्रहीयते ॥
अङ्गुष्ठपर्व्वमध्यन्तु तर्ज्जन्या सदृशं भवेत् ।
यवद्वयाधिकं तद्वदयपर्व्वानुराहृतम् ॥

पर्व्वार्द्धेन नखान् विद्यादङ्गुलीषु समन्ततः ।
स्निग्धं श्लक्ष्णं प्रकुर्व्वीत ईषदक्तं तथाग्रजम् ॥
निम्नपृष्ठं भवेन्मध्ये पार्श्वतः कलयोच्छ्रितम् ।
तथैव केशपर्यन्तः स्कन्धोपरि दृषाङ्गुलः ॥
स्त्रियः कार्यास्तु तद्विस्तनोदरजघनाधिकाः ।
चतुर्दशाङ्गुलायामसुदरं तासु निर्दिशेत् ॥
नानाभरणसम्पन्नाः किञ्चिन्नम्राश्चुभाननाः ।
किञ्चिद्दीर्घं भवेद्वक्त्रमलकावलिवत्तमा ॥
नासा ग्रीवा ललाटञ्च निर्दिष्टाश्चतुरङ्गुलाः ।
अर्द्धाङ्गुलिविस्तारः श्लक्ष्णतीक्ष्णधरपल्लवः ॥
अधिकं नैचयुक्तन्तु चतुर्भागेन निर्दिशेत् ।
ग्रीवावलिश्च कर्तव्या किञ्चिदर्द्धाङ्गुलोच्छ्रया ॥
एवं नारीषु सर्व्वासु देवानां प्रतिमासु च ।
नवतालमिदं प्रोक्तं लक्षणं शासनाग्रजम् ॥ * ॥
अतः परं प्रवक्ष्यामि देवाकारान् विशेषतः ।
दशताल: स्मृतो रामो बलिर्वैरोचनिस्तथा ॥
वराहो नरसिंहश्च सप्ततालश्च वामनः ।
मत्स्यकूर्म्मौ तु निर्दिष्टौ यथाशोभं स्वयम्भुवा ॥
अतः परं प्रवक्ष्यामि रुद्राणाकारमुत्तमम् ।
आपीनोरुभुजस्कन्धलम्बकाञ्चनसप्रभः ॥
शुक्लाकैरश्मिसंघातचन्द्राङ्कितजटो विभुः ।
जटासुकुटधारी च हिरण्यवत्सरोहितः ॥
बाहुवारणहस्ताभो वृत्तलम्बोरुमण्डलः ।
ऊर्द्धकेशस्तु कर्तव्यो दीर्घायतविलोचनः ॥
व्याघ्रचर्म्मपरीधानः कटिसूत्रवयान्वितः ।
हारकेयूरसम्पन्नो भुजङ्गाभरणस्तथा ॥
बाहवश्चापि कर्तव्या नानाभरणभूषिताः ।
पीनोरुगण्डफलकः कुक्षिलाभ्यामलङ्कृतः ॥
आजानुलम्बबाहुश्च सौम्यमूर्त्तिः सुशोभनः ।
खेटकं वामहस्ते तु खड्गश्चैव तु दक्षिणे ॥
शक्तिं दक्षं त्रिशूलञ्च दक्षिणे तु निवेशयेत् ।
कपालं वामपार्श्वे तु नागं खट्वाङ्गमेव च ॥
एकश्च वरदो हस्तस्तथाऽभयबलयोऽपरः ।
वैयाघ्रचर्म्मनकं कृत्वा वृत्त्याभिनयसंस्थितः ॥
वृत्ते दक्षभुजः कार्यो गजासुरवधे तथा ।
तथा त्रिपुरदाहे च बाहवः षोडशैव तु ॥
शूलचक्रं गदा शार्ङ्गं घण्टा तत्राधिका भवेत् ।
तथा धनुः पिनाकञ्च शरो विष्णुमयस्तथा ॥
चतुर्भुजोऽष्टबाहुर्वा ज्ञानयोगेश्वरो मतः ।
तीक्ष्णनासाग्रदशनः करालवदनो महान् ॥
भैरवः श्लक्ष्यते लोके श्मशानायतनसंस्थितः ।
न मूलायतने कार्यो भैरवस्तु भयङ्करः ॥
नारसिंहो वराहो वा तथान्येऽपि भयङ्कराः ।
न हीना नाधिकाङ्गा च कर्तव्या देवता क्वचित् ॥
स्वामिनं घातयेत्सूना कराजवदना तथा ।
अधिका ग्रिक्षिणं हन्यात् क्षया चैवार्थनाशिनी ॥
क्षयोदरी तु दुर्भिक्षं निर्मांसा धननाशिनी ।
वक्रनासा तु दुःखाय संक्षिप्ताङ्गी भयङ्करी ॥
चिपिटा दुःखशोकाय अनेत्रा नेत्रनाशिनी ।
दुःखदा हीनवक्त्रा तु माक्षिप्तादक्षया तथा ॥
हीनाङ्गा हीनजङ्घा च भ्रमोन्मादकरी कृशा ।
वक्रवक्त्रा च राजानं कटिहीना च या भवेत् ॥

पाणिपादविहीनायां जायते मरको महान् ।
अङ्गानामनुविहीना च शुभकर्त्रायकारिणी ॥
पुत्रमित्रविनाशाय हीना वक्षःस्थलेषु या ।
सम्पूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा ।
एवं लक्षणमासाद्य कर्तव्यः परमेश्वरः ॥ * ॥
स्तूयमानः सुरैः सर्वैः समन्ताद्दर्शयेद्वपुः ।
शङ्खेन चन्द्रिना चैव महाकालेन शङ्करम् ॥
प्रथमे लोकपालाश्च पार्श्वे तु गणनायकाः ।
गृध्रदृष्ट्रिरिटिश्चैव भृङ्गवेतालसंवृतः ।
सर्वे सुराश्च कर्तव्याः स्तुवन्तः परमेश्वरम् ॥
गन्धर्वविद्याधरकिन्नराणा-
मथाप्सरोगुह्यकनायकानाम् ।
मयैरनेकैः प्रणतो महेन्द्र-
स्तिष्ठत्प्रवीरैरभिनन्द्यमानम् ॥
पुलाचलक्षैः प्रणतः प्रवाल-
पुष्पोपहारप्रचयं ददद्भिः ।
संस्तूयमानं भगवन्नमोऽयं
नेत्रत्रयेणामरमर्त्यपूज्यम् ॥ * ॥

सूत उवाच ।

अधुना संप्रवक्ष्यामि अर्द्धनारीश्वरं परम् ।
अर्द्धेन देवदेवस्य नारीरूपं सुशोभनम् ॥
दक्षार्द्धे तु जटाभारो बालेन्दुकलया युतः ।
उमार्द्धे तु प्रदातव्यौ सीमन्ततिलकावुभौ ॥
वासुकिं दक्षिणे कर्णे वामे कुण्डलमादिशेत् ।
बालिका पीपरिष्टात्तु कपालं दक्षिणे करे ॥
त्रिशूलं वापि कर्तव्यं देवदेवस्य शूलिनः ।
वामतो दर्पणं दद्यादुत्पलं वा विशेषतः ॥
वामबाहुश्च कर्तव्यः केयूरवलयान्वितः ।
उपवीतश्च कर्तव्यं मणिमुक्तामयस्तथा ॥
स्तनभारमथार्द्धे तु वामे पीनं प्रकल्पयेत् ।
हारार्द्धमुज्ज्वलं कुर्यात् श्रोणयर्द्धे तु तथैव च ॥
लिङ्गार्द्धमूर्द्धं कर्तव्यं व्याघ्राजिनसतांबरम् ।
वामे तल्पपरीधानं कटिब्रह्मत्रयान्वितम् ॥
नानारत्नसमोपेतं दक्षिणं भुजगान्वितम् ।
देवस्य दक्षिणं पादं पद्मोपरिसमाश्रितम् ॥
किञ्चिदूर्द्धन्तथा वामं भूषितं नूपुरेण च ।
रत्नैर्विभूषितान् कुर्यादङ्गुलीश्चङ्गुलीयकान् ॥
बालत्वकं तथा पादं पार्वत्या दर्शयेत् सदा ।
अर्द्धनारीश्वरस्येदं रूपमक्लिष्टदारुतम् ॥ * ॥
उमामहेश्वरस्यापि लक्षणं श्रूयतां द्विजाः ।
संस्थानन्तु तयोर्वक्ष्ये लीलाललितविभ्रमम् ॥
चतुर्भुजं द्विबाहुं वा जटाभारेन्दुभूषितम् ।
लोचनत्रयसंयुक्तमेकस्कन्धधारिणम् ॥
दक्षिणेनोद्धृतं शूलं वामं कुचभरं करम् ।
शौपिचर्मपरीधानं नानारत्नोपशोभितम् ॥
सुप्रतिष्ठं सुवेषञ्च तथार्द्धेन्दुकृतानानम् ।
वामे तु संस्थिता देवी तस्योरौ बाहुगूहिता ॥
शिरोभूषणसंयुक्तैरत्नकैर्ललितानना ।
सबालिका कर्णवती ललाटतिलकोज्ज्वला ॥
मणिकुण्डलसंयुक्ता कर्णिकाभरणा क्वचित् ।
हारकेयूरवलया हरवक्षोवलोकिनी ॥
वामार्द्धं देवदेवस्य शृण्वन्ती लीलया क्वचित् ।
दक्षियन्तु वहिः कृत्वा बाहुं दक्षियतोऽथवा ॥
स्कन्धे वा दक्षिणे कुर्यौ शृण्वत्यङ्गुलिजे: क्वचित् ।
वामे च दर्पणं दद्यादुत्पलं वा सुशोभनम् ॥
कटिब्रह्मत्रयश्चैव नितम्बे स्यात् प्रलम्बकम् ।
जया च विजया चैव कार्त्तिकेयविनायकौ ॥
पार्श्वयोर्द्वयोश्चैव सतोरुवमनुत्तमम् ।
मालाविद्याधरौ चैव वीणावाणधरौ तथा: ।
एतद्रूपमुमेशस्य कर्तव्यं भूतिमिच्छता ॥ * ॥
त्रिवर्गदायकं वक्ष्ये सर्वपापप्रणाशनम् ।
वामार्द्धे माधवं कुर्याद्दक्षिणे मूलपाणिनम् ॥
बाहुद्वयञ्च शङ्खस्य मणिकेयूरभूषितम् ।
शङ्खचक्रधरं प्राज्ञमारक्ताङ्गुलिविभ्रमम् ॥
चक्रस्थाने गदाचापि पाणौ दद्यादधस्तले ।
शङ्खञ्चेवेतरे दद्याद्भूषणं भूषणोज्ज्वलम् ॥
पीतवस्त्रपरीधानं चरणं मणिभूषितम् ।
दक्षिणार्द्धे जटाभारमर्द्धेन्दुकृततत्त्वकम् ॥
भुजङ्गहारवलयं वरदं दक्षिणं करम् ।
द्वितीयञ्चापि कुर्वीत त्रिशूलवरधारिणम् ॥
व्यालोपवीतसंयुक्तं कक्षार्द्धे क्षत्रिवाससम् ।
मणिरत्नैश्च संयुक्तपादं नागविभूषितम् ।
त्रिवर्गदायकञ्चैव कल्पयेद्रूपमुत्तमम् ॥ * ॥
महावराहं वक्ष्यामि पद्महस्तं गदाधरम् ।
तीक्ष्णदंष्ट्राग्रघोरास्यं मेदिनीवामकूपरम् ॥
दंष्ट्राग्रेणोद्धृतां दान्तां धरणीमुत्पलान्विताम् ।
विस्तृतोत्फुल्लनयनात्पुरस्तात् प्रकल्पयेत् ॥
दक्षिणं कटिसंस्थन्तु करन्तस्य प्रकल्पयेत् ।
कूर्मोपरि तथा पादमेकं नागेन्द्रमर्द्धनि ।
संस्तूयमानं लोकेशैः समन्तात् परिकल्पयेत् ॥ * ॥
नारसिंहञ्च कर्तव्यं भुजाष्टकसमन्वितम् ।
रौद्रसिंहासनं तद्वद्विदारितसुखेक्षणम् ॥
लम्बपीनघटाकौक्षं दारयन्तं दितेः सुतम् ।
विनिर्गतान्त्रजालञ्च दानवं परिकल्पयेत् ॥
वमन्तं रुधिरोद्गारं भृकुटीकुटिलेक्षणम् ।
युध्यमानञ्च कर्तव्यं क्वचित् करशतैर्नखैः ॥
परिश्रान्तेन दैत्येन तर्ज्यमानं मुहुर्मुहुः ।
दैत्यं प्रदर्शयेच्चक्र खड्गखेटकधारिणम् ।
स्तूयमानं तथा विष्णुं दर्शयेदमराधिपैः ॥ * ॥
तथा त्रिविक्रमं वक्ष्ये ब्रह्माण्डाक्रमणोज्ज्वलम् ।
वामपार्श्वे तथा बाहुमुपरिष्टात् प्रकल्पयेत् ॥
अधस्ताद्वामनं तावत् कल्पयेत् सकमण्डलुम् ।
दक्षिणे छत्रिकां विद्याद्भुवं दीनं प्रदर्शयेत् ।
भृङ्गारधारिणं तद्वल्लिम्लस्येव पार्श्वतः ॥
बन्धनञ्चापि कुर्वन्तं गरुडस्यस्य दर्शयेत् ॥ * ॥
मत्स्यरूपं तथा मात्स्यं कौर्मं कूर्मान्नतिं न्यसेत् ।
एवं रूपस्तु भगवान् कार्य्यो नारायणो हरिः ॥ * ॥
ब्रह्मा कमण्डलुधरः कर्तव्यः स चतुर्मुखः ।
हंसारूढः क्वचित् कार्य्यः क्वचिच्च कमलासनः ।
वर्णेन पद्मगर्भाभचतुर्बाहुः शुभेक्षणः ॥
कमण्डलुं वामकरे स्रुचं हस्ते च दक्षिणे ।
वामे दण्डधरं तद्वत् स्रुचञ्चापि प्रदर्शयेत् ॥
मुनिभिर्देवगन्धर्वैः स्तूयमानं समन्ततः ।
कुर्वाणमिव लोकांस्त्रीन् शुक्लाम्बरधरं विभुम् ॥
नवयज्ञोपवीतिनम् ।
आज्यस्थाली स्रुवेत् पार्श्वे वेदांश्च चतुरः पुनः ॥
वामपार्श्वे तु सावित्री दक्षिणे च सरस्वती ।
अग्रे च ऋषयस्तद्वत् कार्याः पैतामहे पदे ॥ * ॥
कार्त्तिकेयं प्रवक्ष्यामि तरुणादित्यसन्निभम् ।
कमलोदरवर्णाभं सुकुमारं कुमारकम् ॥
शेखुकैश्चीरकैर्युक्तं मयूरवरवाहनम् ।
स्थानीयखेटनगरे शुभान् द्वादश कल्पयेत् ॥
चतुर्भुजः कर्कटे स्याद्दने ग्रामे द्विबाहुकः ॥
शक्तिः पाशस्तथा खड्गः शरः शूलस्तथैव च ।
वरदश्चैव हस्तः स्यादथवाभयदो भवेत् ॥
एते दक्षिणतो ज्ञेया: केयूरकटकोज्ज्वलाः ।
धनुः पताका सृष्टिश्च तर्जनी च प्रसारिता ॥
खेटकं ताम्रचूडश्च वामहस्ते प्रशस्यते ।
त्रिभुजस्य करे शक्तिर्वामे स्यात् कुक्कुटोऽपरे ॥
चतुर्भुजे शक्तिपाशौ वामतो दक्षिणौ स्रुचिः ।
वरदोऽभयदो वापि दक्षिणः स्यात् सुरीयकः ॥ * ॥
विनायकं प्रवक्ष्यामि गजवक्त्रं त्रिलोचनम् ।
लम्बोदरं चतुर्बाहुं व्यालयज्ञोपवीतिनम् ॥
स्वस्तिकर्णं हस्तिकर्णमेकदंष्ट्रं पृथूदरम् ।
खं दन्तं दक्षिणकरे उत्पलञ्च तथापरे ॥
लड्डुकं परशुश्चैव वामतः परिकल्पयेत् ।
हस्तसंक्षिप्तगमनं पीनस्कन्धाङ्घ्रिपाणिनम् ।
युक्तं वृद्धिऋद्धिभ्यामधस्ताच्छूषिकान्वितम् ॥ * ॥
कात्यायन्याः प्रवक्ष्यामि रूपं दशभुजन्तथा ।
जयाद्यामपि देवानामनुकारानुकारिणीम् ॥
जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ।
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गञ्चक्रन्तथैव च ।
तीक्ष्णधारां तथा शक्तिं दक्षिणे सन्निवेशयेत् ॥
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ।
घण्टां वा परशुं वापि वामतः सन्निवेशयेत् ॥
अधस्ताच्छिरसं तद्वद्विशिरस्कं प्रदर्शयेत् ।
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
मुखे शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ।
रक्तरक्षोक्षिताङ्गञ्च रक्तविप्रुषितेक्षणम् ॥
वेष्टितं नागपाशेन भृकुटीभीषणाननम् ।
सपाशवामहस्तेन मुक्तकेशञ्च दुर्गया ॥
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ।
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ॥
किञ्चिदूर्द्धं तथा वाममसुरं महिषोपरि ।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत् ॥ * ॥
इदानीं सुरराजस्य रूपं वक्ष्ये विशेषतः ।
सहस्रनयनं देवं मत्तवारणसंस्थितम् ॥
पृथूदरञ्चोद्यदनं सिंहस्कन्धं महाभुजम् ।
किरीटकुण्डलधरं पीवरोरुसुशोभनम् ॥
वज्रोपलधरं तद्वन्नानाभरणभूषितम् ।
पूजितं देवगन्धर्वैरप्सरोगणसंस्तुतम् ॥

छत्रचामरधारिण्यौ स्त्रियौ पार्श्वे तु कारयेत् ।
सिंहासनगतं वापि गन्धर्वगणसंयुतम् ॥
इन्द्राणीं वामतस्तस्य कुर्याद्वज्रगदाधरिणीम् ॥
ऋत उवाच ।
प्रभावस्य प्रतिमामिदानीं ब्रूहि तत्त्वतः द्विजाः ।
रथस्थं कारयेद्देवं पद्मस्थं वा सुलोचनम् ॥
सप्ताश्वैकचक्रं च रथस्तस्य प्रकल्पयेत् ।
तुङ्गेन विग्रहेणैव पद्मगर्भसमप्रभम् ॥
नानाभरणभूषाढ्यं सुजाभ्यां धृतपुष्करम् ।
स्कन्धस्थे पुष्करे ते तु लोलयेत इति यदा ॥
षोडशच्छन्नवपुषं क्वचित्क्वचिदु दर्शयेत् ।
वज्रयुग्मसमोपेतं चरणौ तेजसावृतौ ॥
प्रतीहारौ च कर्तव्यौ पार्श्वयोर्देवपिङ्गलौ ।
कर्तव्यौ खड्गहस्तौ च पार्श्वयोः पुरुषावुभौ ॥
लेखनीद्यतहस्तश्च पार्श्वे धातारमग्रयम् ।
नानादेवगणैर्युक्तमेवं कुर्याद्विचक्षणः ॥
अरुणः सारथिस्तस्य पद्मिनीपत्रसन्निभः ।
अश्वौ च वलिसुग्रीवावस्तयौ तस्य पार्श्वयोः ॥
सुवक्त्ररश्मिभिर्युक्ताः सप्ताश्वा रश्मिसंयुताः ।
पद्मस्थं वा रथस्थं वा पद्महस्तं प्रकल्पयेत् ॥*॥
अथेन्दुं लक्षणं वक्ष्ये सर्वकामफलप्रदम् ।
दीप्तं सुवर्णवपुषमर्धचन्द्रासनस्थितम् ॥
बालार्कसदृशच्छत्रस्य वमनश्चापि दर्शयेत् ।
यज्ञोपवीतिनं देवं लम्बकूर्चधरस्तथा ॥
कमण्डलुं वामकरे दक्षिणे वरदाक्षकम् ।
ज्वालाविताननसंयुक्तमजवाहनसुत्वलम् ।
कुक्षस्थाश्चापि कुर्वीत सूर्यं सप्तशिखान्वितम्॥*
तथा यमं प्रवक्ष्यामि दण्डपाशधरं विभुम् ।
महामहिषमारूढं लक्षाञ्जनचयोपमम् ॥
सिंहासनगतश्चापि दीप्ताग्निसमलोचनम् ।
महिषं चित्रगुप्तश्च कराला किङ्करास्तथा ॥
समलाङ्घ्र्योस्तस्य सौम्यासौम्यास्तथा सुराः ॥
राक्षसैश्च तथा वक्ष्ये लोकपालश्च नैर्ऋतम् ।
नरारूढं महाकायं रक्षोभिर्बहुभिर्वृतम् ॥
खड्गहस्तं महानीलं कज्जलाचलसन्निभम् ।
गरयुक्तविमानस्थं पीताम्बरविभूषितम् ॥ * ॥
वरुणश्च प्रवक्ष्यामि पाशहस्तं महाबलम् ।
शुक्लस्फटिकवर्णाभं हारकेयूरसंहतम् ।
नागाधिरूढं वरदं पताकाध्वजसंयुतम् ।
भूषणायतं शान्तं किरीटवरधारिणम् ॥ * ॥
वायुरूपं प्रवक्ष्यामि ध्वजश्च मृगवाहनम् ।
चित्राम्बरधरं शान्तं युवानं कुञ्चितभ्रुवम् ।
मृगाधिरूढं वरदं पताकाध्वजसंयुतम् ॥ * ॥
कुबेरश्च प्रवक्ष्यामि कुक्षलाभ्यामलङ्कृतम् ।
हारकेयूररचितं चित्राम्बरधरं सदा ॥
गदाधरश्च कर्तव्यं वरदं सुकुटान्वितम् ।
गरयुक्तविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्णेन पीतवर्णेन शुक्लैः परिवारितम् ।
महोदरं महाकायं लम्बाष्टकसमन्वितम् ॥
शुक्लैर्नेकुभिर्युक्तं धनध्वजरथेन तथा ॥ * ॥
तथैवेशं प्रवक्ष्यामि ध्वजं ध्वजेश्वराम् ।
त्रिभूषणान्वितं देवं शान्तं वृषगतं विभुम् ॥ * ॥

मातृणां लक्षणं वक्ष्ये यथावद्वसुपूर्वजः ।
ब्रह्माणी ब्रह्मसदृशी चतुर्वक्त्रा चतुर्भुजा ।
हंसाधिरूढा कर्तव्या वामस्रुवकमण्डलुः ॥*॥
महेश्वरस्य रूपेण तथा माहेश्वरी मता ।
जटासुकुटसंयुक्ता वृषस्था चन्द्रशेखरा ।
कपालभूलक्षहस्तवरदाथ चतुर्भुजा ॥ * ॥
कुमाररूपा कौमारी मयूरवरवाहना ।
रक्तवस्त्रधरा तद्वच्छूलशक्तिधरा तथा ॥
हारकेयूरसम्पन्ना लक्वाकुधरा तथा ॥ * ॥
वैष्णवी विष्णुसदृशी गरुडस्था समाश्रिता ।
चतुर्बाहुश्च वरदा शङ्खचक्रगदाधरा ।
सिंहासनगता वापि बालकेन समन्विता ॥ * ॥
वाराहीञ्च प्रवक्ष्यामि महिषोपरिसंस्थिताम् ।
वराहसदृशीं देवीं घण्टाचामरधारिणीम् ।
गदाचक्रधरान्तद्वद्वानवेक्त्रविनायिनीम् ॥ * ॥
इन्द्राणीमिन्द्रसदृशीं वज्रमूलगदाधराम् ।
गजासनगतान्देवीं लोचनैर्बहुभिर्वृताम् ।
सप्तकाञ्चनवर्णाभां सर्वाभरणभूषिताम् ॥ * ॥
तीक्ष्णखड्गधराञ्चद्वद्वे योगीश्वरीमिमाम् ।
दीर्घजिह्वान्त्रकेशीमस्थिखट्वेन मण्डिताम् ।
दंष्ट्राकरालवदनां कुर्याच्चैव क्षुधोदरीम् ॥ * ॥
कपालमालिनीं देवीं मुक्तमालाविभूषिताम् ।
कपालं वामहस्ते तु मांसशोणितपूरितम् ॥
सकेशन्तु शिरो न्यस्य मुखिका दक्षिणे तथा ।
वृषस्था वायसस्था वा निर्मांसा विगतोदरी ।
करालवदना तद्वत् कर्तव्या सा शिलोच्चया ॥*॥
चासृक्पा बहुघण्टा च द्वीपिचर्मधरा शिवा ।
दिग्वासा कालिका तद्वदासभस्था कपालिनी ॥
सुरक्तपुष्पाभरणा वह्निनी ध्वजसंयुता ।
विनायकञ्च कुर्वीत मातृणामग्रिके सदा ॥
वीरेश्वरञ्च भगवान् वृषारूढो जटाधरः ।
वीणाहस्तश्शिमूली च मातृणामग्रतो भवेत् ॥*॥
श्रियन्देवीं प्रवक्ष्यामि नवे वयसि संस्थिताम् ।
सुयौवनां पीनगात्रां रक्तोष्ठीं कुञ्चितभ्रुवम् ॥
पीनोन्नतस्तनतटां मणिकुण्डलधारिणीम् ।
सुमङ्गलं सुखं तस्याः शिरः सीमन्तभूषितम् ॥
पद्महस्तद्विकद्वद्वेवां भूषितां कुण्डलाल्कैः ।
कम्बुकावङ्गगात्रौ च हारभूषौ पयोधरौ ॥
नागहस्तोपमौ बाहू केयूरकटकोज्ज्वलौ ।
पद्मं हस्ते च दातव्यं श्रीफलं दक्षिणे करे ॥
मेखलाभरणाक्रान्तहेमपङ्कजसुप्रभाम् ।
नानाभरणसम्पन्नां शोभनाम्बरधारिणीम् ॥
पार्श्वे तस्याः स्त्रियः कार्याश्चामरव्यग्रपाणयः ।
पद्मासनोपविष्टान्तु पद्मसिंहासनस्थिताम् ॥
करिण्यौ स्नाप्यमाना सा भृङ्गाराभ्यामनेकशः ।
प्रतिपालयन्ती करिणौ भृङ्गाराभ्यां तथापरौ ॥
स्नूयमाना च लोकैस्तैस्तथा गन्धर्वगुह्यकैः ॥*॥
तथैव यक्षिणी कार्या सिद्धासुरनिषेविता ।
पार्श्वयोः कलसौ तस्याश्चोरयोः देवदासयोः ॥
नागाश्चैव तु कर्तव्याः खड्गखेटकधारिणः ।
अधस्तात्प्रकृतिस्त्रीणां नागेरूर्ध्वं च पौरुषी ॥
पद्माश्च सृष्टिं कर्तव्या द्विजिह्वा बहवः समाः ।

पिशाचा राक्षसाश्चैव भूतवेतालजातयः ॥
निर्मांसाश्चैव ते सर्वे रौद्रा विग्रहरूपिणः ।
क्षेत्रपालश्च कर्तव्यो जटिलो विग्रहानलः ॥
दिग्वासा जटिलस्त्वङ्क्त् श्वगोमायुनिषेवितः ।
कपालं वामहस्ते तु शिरः केशसमाहतम् ।
दक्षिणे मुखिकां दद्यादसृग्वसयकारिणीम् ॥*॥
अथातः संप्रवक्ष्यामि द्विभुजं कुसुमायुधम् ।
पार्श्वे चास्यतुर्यं तस्य मकरध्वजसंयुतम् ॥
दक्षिणे पुष्पबाणञ्च वामे पुष्पमयं धनुः ।
प्रीतिः स्याद्दक्षिणे तस्य भोजनोपस्करान्विता ॥
रतिस्तु वामपार्श्वे च व्यजनोपस्करान्विता ।
षट्च षट्पदचैव स्वरः कामातुरस्त्रिया ॥
पार्श्वतो जलवापी च वनं नन्दनमेव च ।
सुशोभनश्च कर्तव्यो भगवान् कुसुमायुधः ॥
संस्थानमीदृशन्तस्य स्याद्विजयं विघ्नवेश्मकम् ।
एतद्वेशतः प्रोक्तं प्रतिमालक्षणं मया ॥
विस्तरेण न शक्नोति वक्तुमप्यतिरूपि द्विजाः ॥"
इति मत्स्यपुराणे देवादीनामुत्कीर्तने प्रतिमालक्षणं नाम २५२ । २५३ । २५४ । २५५ अध्यायाः ॥ * ॥ सा द्विविधा । स्थापनरूपा स्वयं व्यक्तरूपा च । यथा,—
श्रीसदाशिव उवाच ।
"शृणु देवि ! प्रवक्ष्यामि तदनुग्रहमं हरेः ।
स्थापनञ्च स्वयं व्यक्तं द्विविधं तत् प्रकीर्तितम् ॥
शिलादारुहरिद्रादेः कृत्वा प्रतिकृतिं हरेः ।
औत्सर्गागमैः प्रोक्ता क्रियासंस्थापना हि तत् ॥
तत्स्थापनमिति प्रोक्तं स्वयं व्यक्तं हि मे शृणु ।
यस्मिंस्तु निहितो विष्णुः स्वयमेव कृतां भुवि ॥
पाषाणदार्वोरालेख्यैः स्वयं व्यक्तं हि तत् स्मृतम् ।
स्वयं व्यक्ते स्थापने वा पूजयेच्चक्रपुष्करम् ॥
देवतानां मनुष्याणामर्चनार्थं सनातनः ।
स्वयमेव जगन्नाथः सान्निध्यं याति केशवः ॥
यस्य यद्दिव्यदृष्टे भाग्यं तदेवाविर्भूतुवि ।
तदेव पूजयेन्नित्यमन्यस्मिन्न रमेत् सदा ॥
श्रियोऽकृष्यायौ देवयौ विधेरर्थैः शुभानने ! ।
स एवेक्ष्वाकुनाथानां तपसाविरभूद्भुवि ॥
मयापि काम्यां संपूज्यो माधवः कमलापतिः ।
दक्षिणोदधितीरे तु नीलाद्रौ पुरुषोत्तमे ॥
दारुरूपी जगन्नाथो ब्रह्मणा स्थापितः स्वयम् ।
स एव पूज्यः सर्वेषां लोकानां खलु पार्वति ! ॥
नरनारायणः साक्षात् पूज्यो बदरिकाश्रमे ।
गदाधरो गयायान्तु प्रयागे माधवस्तथा ॥
माधवो विधिवत् पूज्यो गङ्गासागरसङ्गमे ।
कपालमोचने तीर्थे कलिङ्गेऽच्युतो हरिस्तथा ॥
विष्णुश्च वह्निरङ्गे तु भीमसूर्भिः शिवे यतः ।
द्वारकायां वासुदेवः कुरुक्षेत्रे रणेश्वरः ॥
नारायणो वङ्कटाद्रौ पूज्यो नित्यं सनातनः ।
स्वयं श्रीभगवान् शम्भो शालि वृन्दावने शुभे ॥
गोविन्दः केशवो नन्दव्रजोद्दामनन्दनो विभुः ।
पूज्यो मदनगोपालगोवर्द्धनधरादिकः ॥
चतुरशीतिके क्षोणी ब्रह्मलोकातीतके शिवे ! ।

कस्मिन्नद्दिनीतीरे महाप्रलयवर्जिते ॥
यदैव कार्य्यारम्भर्थं श्रीगोपीजनवल्लभः ।
यत्र यत्र हरेरर्चा स्वयं ब्रह्मा शुभानने ! ॥
स्थानं तीर्थं तथा क्षेत्रं यज्ञदानमहोत्सवम् ।
संकीर्त्तनं सर्व्वभक्तिस्तथा कार्य्यादिकं जनम् ॥
कायेन मनसा वाचा भक्त्या देवि ! पुनः पुनः ।
तत्र तत्र समागत्य रमेऽहं संस्थसंस्थितः ॥
नाहाङ्गयोगजं ज्ञानमर्चायां विन्दते नृणाम् ।
चक्षुषोर्विषयं प्राप्य ददाति फलमीप्सितम् ॥
सर्व्वावस्थासु सौरभ्यमर्चायां लभते नरः ।
अज्ञानमपि सान्निध्यं सर्व्वदा पृथिवीतले ॥
जम्बुद्वीपे महापुण्ये वर्षे वै भारते शुभे ।
अर्चायां सन्निधिर्वैष्णोर्नेतरेषु कदाचन ॥
तस्माद्वै भारतं वर्षं मुनिभिश्चिन्तयैरपि ।
सेवितं सततं सुभ्रु ! तपोयज्ञक्रियादिभिः ॥
भारतेऽस्मिन् महावर्षे विष्णुः सन्निधिमान् हरिः ।
दक्षद्युम्ने तथा कौर्म्मे सिंहाद्रौ बदरीवने ॥
काञ्च्यां प्रयागे सोमे च शालग्रामाचले तथा ।
नारायणाचले सोमे वराहे वामनाश्रमे ।
एवमाद्याः स्वयं ब्रह्मा सर्व्वकामफलप्रदाः ॥
स्वयमेव हि सान्निध्यं यस्मिन् याति जगद्गुरुः ।
तस्मिंस्तेव स्वयं ब्रह्मा वसन्ति सुरयः शुभाः ॥
महाभागवतश्रेष्ठो विधिना स्थाप्य केशवम् ।
मन्त्रेण कुर्य्यात् सान्निध्यं स्थापनं तद्विधीयते ॥
न तु ब्राह्मादिभिः कार्य्यं सकृत्स्थापनादिकम् ।
श्रीहरेरर्चनं कर्म्म यावोत्सवमथाक्षरम् ॥
यत्किञ्चिद्देवतैः कार्य्यमपरं मन्दिरादिकम् ।
ध्रुवं विष्णुर्न यच्छति ज्ञातमेतद्विदुर्मुखैः ॥"

इति पाद्मोत्तरखण्डे ७१ अध्यायः ॥ * ॥

भगवत्याः प्रतिमाराधनविधिर्यथा,—

ब्रह्मोवाच ।

"शृणु तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं ग्रहराट्टैः फलैर्नृभिः ॥
कर्त्तव्यश्चैव देवेश ! तथा त्वमपि पूजय ।
ग्रहभुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ।
अस्माभाकरो नित्यं तेजसौ विष्णुरीश्वरः ॥
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ।
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ॥
इन्द्रनीलमयीं देवीं विष्णुर्यजति सदा ।
विष्णुत्वं प्राप्तवांस्तेन अक्षुतैकं सनातनम् ॥
देवीं हैममयीं कान्तां धनदोऽर्चयते सदा ।
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ॥
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांस्यिकां देवीं पूजयन्ते विधानतः ।
प्राप्तवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ब्रह्मन् समन्वितम् ॥

देवीमन्नमयीं पुण्यामन्नमर्चयति भावितः ।
अधिकं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ।
तस्मात् देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्चते तत्र सन्धाने तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं वह्निर्यजति पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रवाल्यते परं पदम् ॥
लक्षायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेऽमितविक्रमाः ॥
चपुर्लोहमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
वेत्रीधिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
स्थिरां मणिमयीं पुण्यां लभस्व मनसेप्सिताम् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजिता सदा ।
ददाति सर्व्वलोकानां चिन्तामणिर्यथा स्थिरा ॥"

अपि च ।

"हेमताम्रा च रङ्गाख्या शैलाचिन्तायसापि वा ।
प्रतिभूते स्थिता देवी सर्व्वकामफलप्रदा ॥
यो यस्य आयुधः प्रोक्तस्तल्लिङ्गां प्रतिपूजयेत् ।
देवीं प्रकल्पितेनाथ पुंसां कामायुःसुतश्रीप्रदा ॥
भूते संपूजिता वत्स ! सर्व्वं भवति पूजितम् ।
वार्त्तां वा शैलजां वापि रत्नधातुमयीमपि ॥
विधिना प्राक्तनेनैव दत्त्वाकुम्बिलोचनाम् ।
कारयेद्भक्तिमान् यस्तु देवीं प्राक्तविधारदः ॥"

स्थापनविधिर्यथा,—

"सर्व्वशैलेष्टकाष्ठोत्थं यद्वा धातुविभाजितम् ।
बलभीमण्डपं वत्स ! तावत्तु स्थापने शुभम् ॥
गन्धनैवेद्यधूपेन बलिमाल्यविभूषणैः ।
अधिवासनपूर्व्वन्तु स्थापनीयास्तु तद्विदैः ॥
वेदध्वनिमहाघोषैः स्तोत्रसङ्गीतोपशोभितम् ।
कर्त्तव्यं स्थापनं तासां वस्त्रवादित्रनादितम् ॥
रात्रौ जागरणं तत्र देव्याः पूजार्थदक्षकैः ।
सर्व्वलक्षणसम्पूर्णं सर्व्वोपकरणान्वितम् ॥
वापीकूपतडागादिवाटिकावनशोभितम् ।
वेश्मातूर्य्योपसम्पन्नं ध्वजच्छत्रविभूषितम् ॥
यष्टादर्पणदीपादि देयं द्रव्यं निरूपितम् ।
घटिका तत्र षष्ट्यादि दिनसंख्यार्थसिद्धये ॥
कलेया एकमेकं वा यथाकालमथोद्दिशेत् ।
अनेन विधिना यस्तु मानवः स्थापयेन्नरः ।
इहाज्ञ पूजनीयस्तु मृतो याति परां गतिम् ॥"

इति देवीपुराणे मात्रप्रतिष्ठामहाभाग्यम् ॥*॥

अल्पबुद्धीनां प्रतिमासु देवत्वं यथा,—

"अग्नौ क्रियावतां देवो हृदि देवो मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां सर्व्वत्रो हरिः ॥"

अपि च ।

"अग्नौ क्रियावतां देवो हृदि देवो मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां सर्व्वत्रासर्व्वतः ॥*॥
प्रतिमां लक्षणवतीं यः कुर्य्याच्चैव मानवः ।
कैवल्यञ्च परं लोकमन्वयं प्रतिपद्यते ॥
षष्टिवर्षसहस्राणां सङ्ख्याञ्च महाहवे ! ॥
क्रीडते देववत्तत्र अप्सरोभिः समन्ततः ॥
यः स्थापयेद्धरेरर्चां सुप्रशस्ते शिवेऽहनि ।
पुत्रैः सन्तत्यसम्भोगैश्च मरणं लभेत् ॥ * ॥
संस्थाप्य प्रतिमां विष्णोर्हैमरूप्यसमुद्भवाम् ।
रत्नजां रैतिकीं वापि वह्निदग्धेऽपि वा ॥
महादानेन गोविन्दं सम्यक् संस्थाप्य मानवः ।
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयम् ॥"

इत्यग्निपुराणम् ॥

प्रतिमार्ग,क्ली,(प्रतिमीयतेऽनेनेति । प्रति + मि भावे + घञ् ।) प्रतिबिम्बम् । वाहित्थस्याधोभागः । इत्यमरः । २ । १० । ३६, २।८।३८ । "अस्य वाहित्थस्याधोभागो दत्तयोर्मध्यं प्रतिमानमुच्यते प्रतिमीयते अनेन प्रतिमार्गं कु मिन्न न लोपे अगट् मिन्योरिति डा । प्रतिमार्गं प्रतिच्छाया गजदन्तान्तरालयोरिति क्षीरः ।" इति भरतः । (यथा, महाभारते । ८ । २८ । ३६ ।
"प्रतिमार्गेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
नियन्ता भद्रं नागः प्रासतोमर-
यष्टिभिः ॥"

वह्निललाटदेशः । इति महाभारतटीकायां नीलकण्ठः । ६ । ४५ । ३० ॥ * ॥ साहश्यम् । यथा, ऋग्वेदे । १ । ३२ । ७ ।
"दृळ्हो बधिः प्रतिमानं बुभूषन् ।
पुरुत्रा वृत्रो अशयद्व्यस्तः ॥"
"प्रतिमानं साहश्यम् ।" इति तद्भाष्ये सायणः ॥ प्रतिनिधिः । यथा, ऋग्वेदे । ६ । १८ । १२ ।
"नास्य प्रतिमानमस्ति ।"
"प्रतिमानं प्रतिनिधिर्नास्ति ।" इति तद्भाष्ये सायणः ॥ * ॥ छन्दोज्ञानम् । यथा, भागवते । ७ । ४ । ३५ ।
"यं साधुगाथासदसि दितयोऽपि सुरा नृप ! ।
प्रतिमानं प्रकुर्व्वन्ति किमुताप्ते भवादृशाः ॥"
तथा च महाभारते । ६ । २ । ३६ ।
"उद्यतायुधयः विक्रान्ताः प्रतिमानं धनुष्मताम् ॥"
धान्यादिपरिमाणनिर्द्धारणोपयोगीवादिकम् । यथा, याज्ञवल्क्ये । २ । १०० ।
"तुलाधारणविद्धस्तैरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो देवी ज्ञात्वावतारितः ॥"
मनुसंहितायाञ्च । ८ । ४०३ । श्लोके प्रतीमानं दृश्यते ॥)

प्रतिमार्गकः, पुं, (प्रतिदिशं मार्गो गमनपन्था यस्य । कप् ।) पुरविशेषः । यथा,—
"योमचारिपुरं शोभनदङ्गः प्रतिमार्गकः ॥"
इति जटाधरः ॥
"हरिचन्द्रपुरं शोभनदङ्गः प्रतिमार्गकः ॥"
इति त्रिकाण्डशेषश्च ॥

प्रतिसुक्तः, त्रि, (प्रतिसुच्यते स्मेति। प्रति+सुच्+क्तः।) प्रदिक्षितयज्ञादिः। इत्यमरः। २।८।६५॥ (परिव्यक्तः। यथा, रघुः। ३। ३१।

"यदीतप्रतिसुक्तस्य य धर्म्मेविजयी नृपः।
स्वयं सदैवयाचस्य जहार न तु मेदिनीम्॥"

यहः। यथा, भागवते। ३। १८। १०।

"न ह्यङ्गपाद्मैः प्रतिसुक्तस्य वीरा
विकत्थनं तव यज्ञत्वभद्र॥"

प्रतिसिद्धतः। विष्णुः। यथा, मार्कण्डेये। १५।१।

"नरकात् प्रतिसुक्तस्तु जनिः पतितयाजकः॥"

प्रत्यर्पितः। यथा, रघुः। १६। ५६।

"सहप्रनीभिर्मदरागशोभां
विलोचनेषु प्रतिसुक्तमास्याम्॥")

प्रतियत्नः, पुं, (प्रतियत्यते इति। प्रति+यत्न प्रयत्ने+"यत्नयाचयतरिक्षमञ्जरघो नङ्।" ३। ३। ८०। इति नङ्।) लिप्सा। याच्ञा। उपग्रहः। वन्दी। इत्यमरः। ३। ३। १०६॥ नियत्नादिः। यतो गुणान्तराधानम्। इति भरतः॥ संस्कारः। इति स्वामी॥ (यथा, माघे। ३।५७।

"सुगन्धिनामप्रतियत्नपूर्व्वां
विभ्रन्ति यत्र प्रमदाय पुंसाम्॥"

"यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वां यस्यास्ताम्।" इति तट्टीकायां मल्लिनाथः॥) यत्नसाध्यादिः। इति रामाश्रमः॥ प्रतियत्नः। इति सङ्कटः॥

"प्रतियत्नस्तु संस्कारलिप्सोपग्रहयोर्द्वयोः च॥"

इति मेदिनी। ने, १६६॥

रचना। इति जटाधरः॥ प्रयत्नवति, त्रि। इति विश्वाकर्शेषः॥

प्रतियातना, स्त्री, (प्रतियात्यते अनया इति। प्रति+यत्+णिच्+"ण्यासश्रन्थो युच्।" ३। ३। १०७। इति युच्।) प्रतिमा। इत्यमरः। २। १०। ३६॥ (यथा, माघे। ३।३४।

"अनिन्दिता या विदधे विधात्रा
दृष्टी दृशिद्वा प्रतियातनेव॥")

तुल्यायातना च॥

प्रतियोगः, पुं, प्रतियुज्यत इति। प्रति+युज्+भावे घञ्।) विरोधः। (पुनरुद्योगः। यथा, भागवते। ४। २०। २२।

"इति ब्रुवन्तिजरथः स्वसारथिं
शत्रोः परेषां प्रतियोगशङ्कितः।
शुशाव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत॥"

"प्रतियोगः पुनरुद्योगः।" इति तट्टीकायां श्रीधरस्वामी॥)

प्रतियोगी, [न्] त्रि, (प्रतिरूपं युज्यते इति। प्रति+युज्+घिनुण्।) विरोधी। यथा,—

"अन्योन्यप्रतियोगिकाभ्योन्याभावास्तामानाधिकरण्यम्। इति चिन्तामणिः॥ अन्यप्रतियः। यथा,—

"प्रतियोगिनं कृत्वा प्रतियोगी निवर्त्तते।" इति प्राचीनन्यायिकाः॥

प्रतिरम्भः, पुं, (प्रति+रभ+भावे घञ्। रभ्यते इति।) प्रतिलम्भः। इति त्रिरूपकोषः॥

प्रतिरूपं, क्ली, (प्रतिगतं प्रतिसृतं वा रूपमिति प्रादिसमासः।) प्रतिमा। इति त्रिकाण्डशेषः॥ (यथा, भागवते। ७। १०। २१।

"भवान् मे खलु भक्तानां सर्व्वेषां प्रतिरूपधृक्॥"

त्रि, प्रतिगतं रूपमस्य। अनुरूपः। यथा, महाभारते। १। १०२। ६१।

"आत्मनः प्रतिरूपोऽसौ तस्य इत्यभिधीयते।
त्रिविधस्यापि तस्यायं पूजयामासतुः सुभं॥"

दानवविशेषे, पुं। यथा, महाभारते। १२। २०७। ५१। [मधुः॥")

"विश्वजित् प्रतिरूपश्च दृषाक्षो विष्करो

प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन्।) प्रतिबिम्बम्। इति जटाधरः॥ (यथा, महाभारते। १२। ५८। ७८।

"अग्निदेवैरदेवैश्च प्रतिरूपककारकैः।
श्रेयोसुखोपलापेन वीरघ्नैर्दहनेन च॥")

प्रतिरोधः, पुं, (प्रतिरुध्यते अनेनेति। प्रति+रुध्+करणे घञ्।) तिरस्कारः। इति शब्दस्तोमशब्दटीकायां भरतः॥ (प्रति+रुध्+कर्त्तरि अच्।) सत्प्रतिपक्षः। यथा। पक्षसाध्यसाधनाप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः। इति सत्यभिचारग्रिरोमणिः॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति। प्रति+रुध्+ण्वुल्।) चोरः। इति हेमचन्द्रः। ३। ७५॥

प्रतिरोधी, [न्] पुं, (प्रतिरुणद्धीति। प्रति+रुध्+णिनिः। प्रतिरोधस्तिरस्कारोऽस्यास्तीति वा। प्रतिरोध+इनिः।) चौरः। इत्यमरः। २। १०। २५॥

प्रतिलम्भः, पुं, (प्रति+लभ+भावे घञ्।) लाभः। तत्पर्य्यायः। लम्भनम् २। इति हेमचन्द्रः॥ यथा, श्रीहर्षः।

"नैव नः प्रियतमोभयथासौ
यद्यमुं न दृशते दृश्यते वा।
एकतो हि विगलन्मगुजन्मा-
मन्यतः कथमदःप्रतिलम्भः॥"

प्रतिलोमः, त्रि, (प्रतिगतं लोम आनुकूल्यं यस्यादिति। "अच् प्रत्यन्ववपूर्व्वात्सामलोम्नः।" ५। ४। ७५। इति समासान्तोऽच्प्रत्ययः।) वामः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। १२७।१४।

"बहूनि प्रतिलोमानि पुरा त्वं कृतवान् मयि।
क्षन्तो नारद! सोढानि क्षान्तिरक्षा मयाऽनघ!॥")

विलोमः। यथा,—

"तावुभावप्यसंस्कार्य्यावित्याह श्रुतौ स्थितः।
वैगुण्याज्जन्मनः पूर्व्व उत्तरः प्रतिलोमतः॥"

इति मानवे। ६। ६८॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति। प्रतिलोम+जन्+डः।) प्रतिलोमजातः। उत्तमवर्णां अधमवर्णाज्जातः। यथा,—

"संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः॥"

इति मानवे १० अध्याये॥

प्रतिवचः, [स्] क्ली, (प्रतिरूपं वचः।) प्रत्युत्तरम्। इति हेमचन्द्रः॥ (यथा, देवीभागवते। १। ११। ५४।

"सोमः शुक्रवचः श्रुत्वा किञ्चित् क्रोधसमाकुलः।
भक्त्या प्रतिवचः प्राह शुक्रदूतं तदा शृणु॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम्।) प्रतिवाक्यम्। उत्तरम्। इति त्रिकाण्डशेषः॥ (यथा, कथासरित्सागरे। २। ८।

"न ददाति प्रतिवचनं विक्रमार्कोऽथ रुष्टो वणिजं मौनी।
निश्चेयमाह्यिपुरुषं दृष्ट्वा सञ्जातकं कुरुते॥"

प्रतिनिर्देशः। इति निरुक्तम्। ६। २। ६॥)

प्रतिवसथः, पुं. (प्रतिवसत्यस्मिन्निति। प्रति+वस्+बाहुलकात् अथच्।) ग्रामः। इति हेमचन्द्रः। ३। २७॥

प्रतिवाक्, [च्] स्त्री, (प्रतिरूपा वाक्।) उत्तरम्। इति शब्दरत्नावली॥ (यथा, महाभारते। ५। ७०। ७१।

"लाङ्गलचालनं शैलो प्रतिवाचो विवर्जनम्।
दन्तदर्शनमारावस्तस्तो युद्धं प्रवर्त्तते॥")

प्रतिवाक्यं, क्ली, (प्रतिरूपं वाक्यम्।) उत्तरम्। इत्यमरः। २। ६। १०॥

प्रतिवाणिः, स्त्री, (प्रतिरूपा वाणिः।) प्रत्युक्तिः। प्रत्युत्तरम्। इति भूरिप्रयोगः॥

प्रतिवादी, [न्] त्रि, (प्रतिवादोऽस्यास्तीति इनिः। यद्वा, प्रतिकूलं वदतीति। प्रति+वद्+णिनिः।) प्रतिपक्षः। यथा,—

"यदा त्विदंविधः पक्षः कल्पितः पूर्व्ववादिना।
तदात्तत्पक्षसम्बन्धं प्रतिवादी तदोत्तरम्॥"

इति व्यवहारतत्त्वे बृहस्पतिवचनम्॥

प्रतिवासरः, पुं, (प्रतिगतो वासरम्।) प्रतिदिनम्। तद्दिनम्। इति शब्दरत्नावली। १६८॥ (स्त्री, वासरं वासरं प्रतीति समासे। प्रतिदिनम्। यथा, राजतरङ्गिण्याम्। २। १८७।

"भूतेष्वहर्महनेष्वविजयेष्वागमद्यातः।
नियमो राजकार्य्येषु तस्याभूत् प्रतिवासरम्॥")

प्रतिवासी, [न्] त्रि, (प्रत्यासन्नं वसतीति। प्रति+वस्+णिनिः।) आसन्नवासी। निकटस्थायी। पड़सि इति भाषा। प्रतिवसतीति यङ्लुगन्तात्णिन्प्रत्ययनिष्पन्नः॥

प्रतिविम्बं, क्ली, (प्रतिरूपं विम्बमिति। "कुगतिप्रादयः।" २। २। १८। इति समासः।) प्रतिमा। प्रतिच्छाया। इत्यमरः। २।१०।३६॥ (यथा, पञ्चदश्याम्। १। १५।

"चिदानन्दमयब्रह्मप्रतिविम्बसमन्विता।
तमोरजःसत्त्वगुणा प्रकृतिर्विविधा च सा॥")

प्रतिविद्या, स्त्री, (प्रतीपं विद्या यस्याः।) अविद्या। इत्यमरः। २।४।६६॥ आतइश इति भाषा॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अः।

"मद्दौषधं प्रतिवि
अस्या: प्रर्य्यायो
"विषा त्रतिविषा
मुक्तकन्दा चोपवि
इति भावप्रकाश
प्रतिविष्णु, स्त्री, विष्णु
आकरग्रन्थम् ॥
प्रतिविष्णुकः, पुं, (प्र
विष्णुर्मुकुन्दो हृ
ग्रते इति । कै+
राजनिघण्टः ॥ (
"मुकुन्दः चक्र
इति भावप्रकाश
प्रतिवेशः, पुं, (प्रत
विशन्त्यत्रेति आधा
आसन्नगृहिणी य
(त्रि, आसन्नवर्त्त
"क्षेमस्य प
"प्रतिवेशं समीपे
सायनः ॥)
प्रतिवेशवासी, [न्
वस्+णिनिः ।)
"गो जाने प्रतिवे

प्रतिवेशी, [न्] त्रि
मस्यास्तीति । इ
रत्नावली ॥ (यद
"दृष्ट्वा प्रभात
दोषांश्च मे वद
प्रतिश्यायजं, क्ली, (
आकृत्य भवादी
प्रतिश्रिष्टं, त्रि, (
प्रत्याख्यातम् । (
तम् । इति त्रिक
प्रतिश्रुत्, स्त्री, (प्रा
गतौ + "आतश्चो
क: । टाप् ।) प्रति
प्रतिश्राव्यः, पुं, (प्र
श्रै + "ग्रादृवधा
इति यः ।) पौन
(यथा, सुश्रुते उ
"पार्श्वशूले प्रतिश्य
अस्य संस्कारमुत्तर

"संस्कारमा
क्रोधनुर्वेगन
प्रजागराति
रक्तक्षया मै
संख्यानदोषै
वायुः प्रतिश्य
शाखास्तितोदै
सावोऽनिला

नासाव्यपाकज्वरवक्त्रशोष-
हृल्लोमपीनसवणानि पित्तात् ।
कासारुचिश्रावणनयनप्रसेकाः
कण्ठाद्गुरुः स्रोतसि चाप्य रूक्षः ॥
सर्व्वाणि रूपाणि तु सन्निपातात्
सुप्तः पीनसे तीव्रतरोऽतिदुःखे ।
सर्व्वोऽतिवृद्धोऽहितभोजनात्तु
दुष्टप्रतिश्यायं उपेक्षितः स्यात् ॥"
इति चरके चिकित्साख्याने षड्विंशोऽध्याये ॥)
प्रतिश्रयः, पुं. (प्रतिश्रीयते आश्लिष्यतेति । प्रति+
श्रि + आधारे अच् ।) यज्ञशाला । इति जटा-
धरः ॥ सभा । आश्रयः । इति मेदिनी ।
ये, १२२ ॥ ओकः । इति हेमचन्द्रः ॥ (यथा,
महाभारते । १ । १६६ । ४ ।
"स सम्यक् पूजयित्वा तं विप्रं विप्रप्रभक्षदा ।
ददौ प्रतिश्रयञ्चास्मै सदा सर्व्वातिथिव्रतः ॥"
निवासः । यथा, मनौ । १० । ५१ ।
"यज्ञार्थञ्चप्रधानानां वहिर्ग्रामात् प्रतिश्रयः ॥"
"प्रतिश्रयो निवासः ।" इति मेधातिथिः ॥)
प्रतिश्रवः, पुं, (प्रति + श्रु + "ऋदोरप् ।" ३ । ३ ।
५७ । इति अप् ।) अङ्गीकारः । इत्यमरः ॥
(यथा, राजतरङ्गिण्याम् । ३ । ४२४ ।
"इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् ।
दूरस्तत्क्रान्तमर्य्यादः सङ्गमं तमयाचत ॥")
प्रतिश्रुत्, स्त्री, (प्रतिरूपं श्रूयते इति । प्रति +
श्रु + सम्पदादित्वात् क्विप् ।) प्रतिध्वनिः । इत्य-
मरः । १ । ६ । २५ ॥ (यथा, रघौ । १६ । ४० ।
"यस्यायमन्तर्हितसौधभाज:
प्रवृत्तसङ्गीतमृदङ्गघोषः ।
वियन्नतः पुष्पकचन्द्रशालाः
स्वां प्रतिश्रुत्सुखरां करोति ॥")
प्रतिश्रुतः, त्रि, (प्रतिश्रूयते स्मेति । प्रति + श्रु +
क्तः ।) अङ्गीकृतः । इत्यमरः । ३ । २ । १०६ ॥
प्रतिषिद्धः, त्रि, (प्रति + सिध् + क्तः ।) प्रतिषेध-
विषयः । निषिद्धः । यथा । अप्रतिषिद्धमनुमतं
भवतीति दत्तकचन्द्रिका ॥ (यथा च,—
"सर्व्वेष्वेषु दिवाद्याप्तः प्रतिषिद्धोऽन्यत्र स्त्रीभ्यात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थोऽध्याये ॥)
प्रतिषेद्धा, [ऋ] त्रि, (प्रति + सिध् + तृच् ।)
प्रतिषेधकर्त्ता । तत्पर्य्यायः । माङ्गल्किकः २ ।
इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।
१ । १८१ । १० ।
"यदा तु प्रतिषेद्धारं पापो न लभते क्वचित् ।
तिष्ठन्ति सकलो लोकस्तदा पापेषु कर्म्मसु ॥")
प्रतिषेधः, पुं, (प्रति + सिध् + भावे + घञ् ।)
निषेधः । यथा, मलमासतत्त्वे ।
"प्राधान्यन्तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥"
प्रतिषेधकः, त्रि, (प्रतिषेधतीति प्रति + सिध् +
ण्वुल् ।) प्रतिषेधकर्त्ता । यथा अग्निपुराणे ।
"वत्सरैर्षोडशसहस्रार्द्धं सहस्राणि वसेद्दिवि ।
योऽश्वमेधानपि भवति निरये प्रतिषेधकः ॥"

प्रतिष्कः, पुं, (प्रतिष्कन्दति प्रतिगच्छतीति । प्रति
+ स्कन्द + बाहुलकात् कः ।) दूतः । इति
शब्दरत्नावली ॥
प्रतिष्कग्रः, पुं, (प्रतिकग्रतीति । प्रति + कग्र् +
अच् । बाहुलकात् सुट् ।) सहायः । वार्त्ता-
हरः । पुरोगः । इति मेदिनी । ग्रे, २६ ॥
प्रतिष्कशः, पुं, (प्रतिकश्यतेऽनेनेति । प्रति + कश्
हिंसायाम् + अच् । बाहुलकात् सुट् ।) चर्म्म-
रज्जुः । इति जटाधरः ॥
प्रतिष्कसः, पुं, (प्रतिकसति प्रतिगच्छतीति ।
प्रति + कस् + अच् । सुट् ।) चरः । इति
शब्दरत्नावली ॥
प्रतिष्टम्भः, पुं, (प्रतिष्टम्भनमिति । प्रति + स्तम्भ +
भावे घञ् । सलम् ।) प्रतिबन्धः । इत्यमरः ।
३ । २ । २७ ॥ (यथा, रघौ । २ । ३२ ।
"बाहुप्रतिष्टम्भविहङ्गमस्य-
रभ्यर्णमागस्कृतमस्मयृद्धिः ॥")
प्रतिष्ठः, पुं, (प्रतिष्ठा अस्त्यस्यास्तीति । अच् ।)
सुपार्श्वनामकदेवतार्हदृषिभेदः । इति हेमचन्द्रः ।
१ । ३६ ॥ प्रतिष्ठायुक्ते, त्रि ॥ (यथा, महा-
भारते । ५ । ४६ । ३० ।
"आत्मैव ह्यात्मनं मम जन्म चात्मा
ओतप्रोतोऽहमजरः प्रतिष्ठः ॥)
प्रतिष्ठा, स्त्री, (प्रतितिष्ठतीति । प्रति + स्था +
"आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति भावादौ
अङ् । टाप् ।) गौरवः । (यथा, कथासरित्-
सागरे । २ । ६६ ।
"किञ्च आकरग्रन्थं लोके प्रतिष्ठां प्रापयिष्यति ॥")
स्थितिः । स्थानम् । (यथा, रघुः । १६ । ३५ ।
"वेदिप्रतिष्ठान् वितताध्वराग्नी-
यूपानपश्यच्छतशो रघूणाम् ॥"
आश्रयः । यथा, मार्कण्डेये । ८४ । १० ।
"गौरी त्वमेव ग्रहिमौलिजनप्रतिष्ठा ॥")
यागविशेषः । चतुरक्षरपदम् । इति मेदिनी ।
ते, १६ ॥ * ॥ (क्षितिः । यथा, हरिवंशे ।
२८ । ३७ ।
"य इदं शाश्वतं स्थानमतिष्ठाच्च शतक्रतोः ।
ब्रह्मण्याङ्गारयेद्यापि न स दौरात्म्यमाप्नुयात् ॥"
शरीरम् । यथा, ऋग्वेदे । १० । ७१ । ६ ।
"साकं प्रतिष्ठा कृणुथा सधस्थ ॥")
संस्कारविशेषः ।(यथा, आर्य्यासप्तशत्याम् ।६८६।
"पूजा विना प्रतिष्ठां नाप्नोति न मन्त्रं विना
प्रतिष्ठा च ।
तदुभयविप्रतिपन्नः पश्यतु गौर्ब्राह्मणावाक्यम् ॥")
तद्विधादि यथा,—
मत्स्यपुराणे ।
"चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा ।
समयः सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥
प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे ।
पञ्चमी च द्वितीया च दशमी तथा ॥
दशमी पौर्णमासी च तथा ज्येष्ठा त्रयोदशी ।
आसु प्रतिष्ठा विधिवत् कृता बहुफला भवेत् ॥*

प्रतिष्ठा सर्व्वदेवानां वैष्णवस्य विशेषतः ।
उत्तरायणमापन्ने शुक्लपक्षे शुभे दिने ॥
ज्येष्ठपक्षे च पञ्चम्यामष्टम्यामेव शुक्लतः ।' ॥
शुक्लयजुर्भाष्ये ।
'युगादावयने पुण्ये कार्त्तिकं विषुवद्वये ।
चन्द्रसूर्य्यग्रहे वापि दिने पुण्येऽथ पर्व्वसु ॥
वा तिथिर्यस्य देवस्य तस्यां वा तस्य कीर्त्तिता ।
तस्यामभिषिञ्चेद्वै प्रतिष्ठा मुक्तिदायिनी ॥' ॥
पद्मपुराणे ।
'प्रतिपद्युदगयोक्ता प्रविचारोपगे तिथिः ।
त्रिधा देया द्वितीया तु तिथीनासुत्तमा स्मृता॥
तृतीया तु भवाख्याच्च चतुर्थी तत्सुतस्य च ।
पञ्चमी सोमराजस्य षष्ठी प्रोक्ता गुहस्य च ॥
सप्तमी भास्करस्योक्ता दुर्गायाश्चाष्टमी तथा ।
मातॄणां नवमी प्रोक्ता दशमी वासुकेस्तथा ॥
एकादशी ऋषीणाच्च द्वादशी चक्रपाणिनः ।
त्रयोदशी मनङ्गस्य शिवस्योक्ता चतुर्दशी ।
मम चैव सुविश्रेष्ठ ! पौर्णमासी तिथिः स्मृता॥'
कल्पतरौ देवीपुराणम् ।
'महिषासुरहन्त्राच्च प्रतिष्ठा दक्षिणायने ।
यस्य देवस्य यः कालः प्रतिष्ठाञ्जरोपगे ॥
गर्णापूरग्निलान्यासे शुभदस्तस्य पूजितः ॥'
यस्य देवस्य प्रतिष्ठाञ्जरोपगे यः कालः शुभदस्तस्य गर्णापूरग्निलान्यासे ग्रहारम्भे स कालः पूजित इत्यर्थः ॥ * ॥ प्रतिष्ठासप्तमयोः ।
'भाद्रे वा फाल्गुने वापि चैत्रवैशाखयोरपि ।
ज्येष्ठाषाढ़कयोर्वापि प्रतिष्ठा शुभदा भवेत् ॥' * ॥
भविष्ये ।
'सोमो हस्तत्रितयेव शुक्रश्चैव बुधस्तथा ।
एते सौम्यग्रहाः प्रोक्ताः प्रतिष्ठा यज्ञकर्म्मणि ॥
मत्स्यपुराणम् ।
'आषाढ़े द्वे तथा मूलमुत्तराश्चयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदस्तथा ॥
हस्ताश्विनी रेवती च पुष्या मृगशिरस्तथा ।
अनुराधा तथा स्वाती प्रतिष्ठादौ प्रशस्यते ॥'
दीपिकायाम् ।
'प्राजेशवासवकरादितिभाश्विनीषु
पौष्णामरेज्यवसुभेषु तथोत्तरेषु ।
कर्त्तुः शुभे ग्रहगणे केन्द्रगते च जीवे
कार्य्या हरेः शुभतिथौ विधिवत् प्रतिष्ठा ॥'
प्राजेशादयः । रोहिणीज्येष्ठाहस्तापुनर्व्वस्वश्विनीरेवतीपुष्यानुराधाश्रवणाश्विहस्तोत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदत्रयाणि । * । सर्व्वमङ्गलाङ्कतन्त्रे देवीपुराणम् ।
'यथा द्वादशमे जीवे अष्टमे वाथ भास्करे ।
प्रतिष्ठा कारिता विष्णोर्भद्राभयकरी मता ॥'
कल्पतरौ देवीपुराणम् ।
'चतुर्व्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।'
प्रतिष्ठा ब्राह्मणद्वारैव कर्त्तव्या ।
'कर्त्तुमिच्छति यः पुण्यं मम मूर्त्तिप्रतिष्ठया ॥
अन्येषजीयस्वाचार्य्यत्वेन तत्त्वज्ञसंयुतः ॥
ब्राह्मणः सर्व्ववर्णानां पञ्चरात्रविधारदः ।

ब्राह्मणानामभावे तु क्षत्रियो वैश्यशूद्रयोः ॥
क्षत्रियाणामभावे तु वैश्यः शूद्रस्य कथितः ।
कदाचिदपि शूद्रस्तु न च कार्य्यार्थमर्हति ॥'* ॥
हयशीर्षपाञ्चरात्रे ।
'प्रणवेनाथवा मूलं शिखां वा हृदयेन वा ।
स सर्व्वयातनाभोगी यावदाकूतसंप्लवम् ॥'
यावदाकूतसंप्लवं प्रलयपर्य्यन्तम् । तथा ।
'स्त्रीणामनुपनीतानां शूद्राणाञ्च जनेश्वर ! ।
स्मृतौ नाधिकारोऽस्ति विद्यौ वा गुरुरेऽपि वा ॥' * ॥
प्रतिष्ठाप्रकारस्तु मत्स्यपुराणादावुक्तः । तद्यथा विद्याकरवाजपेयिप्रभृतिभ्यस्तो भविष्यादुक्तः । यथा भविष्यपुराणम् ।
'स्नपनादि यथाशक्ति कृत्वा तन्मूलमन्त्रकम् ।
विन्यसेद्धृदयाम्भोजे प्रतिमासु कृता भवेत् ॥'
आदिपदात् पूजोत्सवहोमादि महाकपिलपञ्चरात्रोक्तकर्म्म च कर्त्तव्यम् । तद्यथा,—
'सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मूलेन मूर्त्तादिपीठान्तं संप्रपूजयेदिति ।
तत्तन्न्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
पूजाञ्च महतीं कुर्य्यात् स्वमन्त्रोक्तां यथाविधि ।
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ॥'
लिपिन्यासस्तु मातृकान्यासः । उक्तञ्च ।
'जपादौ सर्व्वमन्त्राणां विन्यसेन्न लिपिं विना ।
कृतं तन्निष्फलं विद्यात्तस्मात् पूर्व्वं लिपिं न्यसेत्॥'
कार्त्तिमतेऽपि ।
'मातृकायाः षड़ङ्गञ्च मातृकान्यासमेव च ।
सर्व्वेषां प्रथमं ज्ञात्वा पश्चात्तन्त्रोदितं न्यसेत् ॥
एतत्पूजनाच्च मातृकान्यासः पूर्व्वं पश्चात्तन्त्रन्यासः ॥'
क्रमदीपिकायामप्येवं क्रमः । मन्त्रन्यासश्च तत्तन्मन्त्रविधेयोक्तपदवर्णन्यासः । तदभावे मूलमन्त्रेण शिरसि हृत्तन्यासः । तत्त्वन्यासस्तु विष्णुविषयक एव । न्यासप्रमाणानि सारदाक्रमदीपिकोक्तान्यनुसन्धेयानि । * ॥ प्राणप्रतिष्ठामन्त्रस्तु सारदात्रयोविंशतिपटलोक्तः । यथा,—
'पाद्माङ्कुशपुटाग्न्यक्तिर्वाणीबिन्दुविभूषितः ।
याद्याः सप्त सकारान्ता व्योमसत्रेफसंयुतम् ॥
समस्ते हंसमन्त्रः स्यात्ततोऽस्य पदं भवेत् ।
प्राणा इति वदेत् पश्चात् इह प्राणास्ततः परम् ॥
अस्य जीव च इह स्थितोऽस्य पदं भवेत् ।
सर्व्वेन्द्रियाणि वाङ्मनश्चक्षुरन्ततः ॥
श्रोत्रघ्राणपदे प्राणा, इहागत्य सुखं चिरम्,।
तिष्ठन्त्वमिपदूरन्ते प्राणमन्त्रोऽयमीरितः ॥
प्रत्यक्षपदात् पूर्व्वं प्राणाद्यानि प्रयोजयेत् ।
प्रयोगेषु समाख्यातः प्राणमन्त्रो मनीषिभिः ॥'
पाद्माङ्कुशपुटाग्न्यक्तिरित्यनेन प्रथमं पाद्मबीजं श्रीं ततः अग्निबीजं क्रौं वाणी यकारः बिन्दुविभूषितो यं । याद्याः सप्त सकाराद्याः; उद्धृतयकारानुस्वारेण सप्तानामपि तद्भिन्नं बीजं पूर्व्वं पृथगुद्धारस्तु सप्तानामपि

सबिन्दूनाञ्चापनाय । अङ्कुशपाद्मबीजावग्निवरुणबीजानीत्युक्तम् । अत्र पाद्मबीजस्यैवान्तं बीजलेन सर्व्वेषां सबिन्दूनां सप्तम् । राघवभट्टोऽप्येवम् । अन्यस्तु वाणीबिन्दुविभूषिता इति पठित्वा नादबिन्दुविभूषिता इति व्याख्याय याद्या इत्यस्य विशेषणं वदति । ओम् इकारः सप्त ओंकारः इन्दुर्बिन्दुः तेन हीं । अतश्च पाद्माङ्कुशाग्न्यरितग्न्यक्तिमणोः परस्तादुच्चार्य्य यादिसप्तवर्णगुणं सप्तसंख्यमिति प्रपञ्चसारप्रतिष्ठाप्रयोगग्रन्थेन व्योमेति पद्मपुराणाचार्य्यैर्व्याख्यातम् । अग्निवधूः स्वाहा । तेनायं मन्त्रः । श्रीं ह्रीं क्रौं यं रं लं वं शं षं सं हौं हं सः अमुष्य प्राणा इह प्राणाः आमित्यादि अमुष्य जीव इह स्थितः आमित्यादि अमुष्य सर्व्वेन्द्रियाणि आमित्यादि अमुष्य वाङ्मनश्चक्षुश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा। अमुष्य इति षष्ठ्यन्तदेवतानामोपलक्षणम् ।
'अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते ।
अमुष्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत् ।'
इति नारदीयात् ॥
वशिष्ठसंहितायाम् ।
'हृदि हस्तं समिधाय प्राणस्थापनमाचरेत्।' * ॥
प्रागुक्तभविष्यपुराणवचनेन तन्मूलमन्त्रं तत्तद्देवतामन्त्रं च वैदिकतान्त्रिकञ्च ।
'ओङ्कारादिनमोऽन्तेन चतुर्थ्यन्ततत्तद्देवतानामरूपो वा ।"
कालिकापुराणे ।
'प्रतिमायाः कपोलौ द्वौ मृष्ट्वा दक्षिणपाणिना ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा मूर्द्धञ्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठान्तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः चरन्तु च ।
अस्यै देवत्वसंख्याये स्वाहेति यजुरीरयन् ॥
अङ्गमन्त्रैरङ्गमन्त्रैर्वैदिकैरितरैर्नर च ।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥'
अङ्गमन्त्रैः अङ्गन्यासमन्त्रैः । अङ्गमन्त्रैः मूलमन्त्रैः वैदिकैर्मन्त्रैर्ओम्ज्योतिरित्यादिभिः ॥ * ॥
जपनात् पूर्व्वं वल्मीकमृत्तिकादिभिर्लिङ्गैः स्नानमाह हयशीर्षपञ्चरात्रम् ।
'वल्मीकमृत्तिकाभिस्तु गोमयेन समन्ततः ।
स्नानयेच्छिवसंस्पर्शदोषान्नाशयितुं नरः ॥
[illegible]
नमस्तेऽस्तु हरेशानि प्रसीद विघ्नकर्म्मणः ।
प्रभावितापीवनगह्वरे ! तुभ्यं नमो नमः ॥
त्वयि संपूजयामीह नारायणमनामयम् ।
रहिता श्रीस्त्वियदोषैस्त्वद्भक्तियुक्ता सदा भव ॥'* ॥
तेन यथाशक्ति स्नपनादिपूर्व्वकप्रतिमाहृदये तन्मूलमन्त्रविन्यासेन देवताया विशेषसन्निधिः प्रतिष्ठेति । राघवभट्टधृतमहाकपिलपञ्चरात्रेऽपि ।

'प्रतिष्ठाद्रव्यसंविद्भिः प्रतिपूर्व्वश्च तिष्ठतेः ।
बह्वर्थत्वान्निपातानां संस्कारादौ प्रतेः स्थितिः ॥
अर्थेऽस्यमेतस्य गीयते ग्राब्दिकैर्जनैः ।
विग्रेयवस्निधिर्थो तु क्रियते व्यापकस्य तु ॥
सञ्जातौ भावनामन्त्रैः प्रतिष्ठा साभिधीयते ॥'* ॥
लभक्षणा गोमयभक्षणा ।
'अष्टोत्तरं पलशतं स्नाने देयञ्च सर्व्वदा ॥'
पलमाह मनुः ।
'प्रकुञ्चाक्षसमो मासस्ते सुवर्णस्तु षोड़श ।'
पलं सुवर्णाश्चत्वारः । तेनाष्टरक्तिकाधिक-
लौकिकमाषद्वयाधिकतोलकत्रयेण पलं भवति
एवंविधाष्टोत्तरपलशतेन लौकिकषट्काधकशत-
त्रयतोलका इति । एवं वल्मीकमृदादिस्नाने
गायत्र्या वल्मीकमृदा स्नापयेत् । तत्रापि
अष्टोत्तरशतपदं मूलमन्त्रिलिखितन्यायात् ।
गायत्र्या मूलमन्त्रेण वा गन्धोदकस्नाने मुद्गवत्या
एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया देविको
गुरुर्वैजमाणो वा विष्णः नमोऽस्तु इत्यादिमन्त्रौ
देवताम्बरे च तत्तद्देवतावाहनोद्वः । घृतलिङ्ग-
स्नाप्यद्रव्यत्वात् स्त्रीलिङ्गमविरुद्धम् ॥* ॥ यमः ।
'स्नात्वा देवकुलं सर्व्वं प्रतिष्ठाप्य च देवताम् ।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम् ॥'
नारसिंहे ।
'प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत् ।
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरं व्रजेत् ॥
प्रतिष्ठा नरसिंहस्य यः करोति यथाविधि ।
निष्कामो नरशार्दूल ! देहबन्धात् प्रमुच्यते ।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते ॥
विधिवत् स्नापयेद्यस्तु कारयित्वा जनार्दनम् ।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन ॥'
माधवमानसोल्लासे ।
'देवस्य प्रतिमायान्तु यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥'
राजमार्त्तण्डे ।
'पुत्रोत्पत्तौ सदा श्राद्धमन्नप्राश्यनिके तथा ।
चूड़ाकार्य्ये व्रते चैव नाम्नि पुंसवनेऽपि च ॥
पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मनः ।
एतद्वृद्धिकरं नाम गृहस्थस्य विधीयते ॥'
स्कन्द उवाच ।
'कलौ चैकाहसाध्येन प्रतिष्ठां मन्त्रवित्तमात् ।
मध्यमेनाधमेनापि प्रकुर्य्यात्तान्त्रिकैर्नरैः ॥'
तथा ।
'नित्यं नित्यं मतिमान् कुर्य्यादभ्युदयं नरः ।
विप्रान् संपूजयित्वाथ ततो यामपुरं व्रजेत् ॥
गणेशग्रहदिक्पालान् प्रतिकुम्भेषु पूजयेत् ।
स्थण्डिले विधिवद्विष्णुं परिवारगणं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चाप्तैः पञ्चगव्यैः पञ्चपल्लिकरैरपि ॥
तिलतैलैश्च क्षौद्रैश्च कषायैरपि सत्तमाः ।
पञ्चपुण्योदकैर्वापि विप्रवरैरपि सत्तमाः ॥
तुलसीकुन्दमालूरपत्राण्याहृत्य पत्रकम् ।
चम्पकाब्जशमीपद्मकरवीरञ्च पञ्चमम् ॥
क्षत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च ।
कुशवल्मीकसम्भूतं ऋषीणां पञ्चकमीरितम् ॥*॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
कुर्य्यात् प्राज्ञप्रतिष्ठाञ्च होमं कुर्य्यादृथाविधि ।
दक्षिणां विधिवद्दद्यात् पूर्णांर्घं तदनन्तरम् ॥'
इति भविष्यपुराणे उत्तरभागे ६ अध्यायः ॥*॥
'चतुरङ्गुलविस्तारा दीर्घा हस्तत्रयावधि ।
पताका लोकपालानां दण्डानां परिकीर्त्तिताः ।
पञ्चहस्ताश्च वै दण्डाः पताकानां प्रकीर्त्तिताः॥'
ज्योतिषे ।
'दुग्धं सप्तकरञ्चैव घृतं दधि तथा मधु ।
पञ्चाङ्गमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥'* ॥
प्रतिष्ठानन्तरं मात्स्ये ।
'ततः सङ्घं विप्राणामष्टोत्तरशतन्तथा ।
भोजयेच्च यथाशक्त्या पश्चाद्दद्याच्च विंशतिम् ॥'
षोड़शोपचाराः आसनमित्यादि । दशोप-
चाराः पाद्यादि । पञ्चोपचारा गन्धादि ।
'सर्व्वोपचारवस्तूनामलाभे भावनैव हि ।
निर्म्मलेनोदकेनापुपूर्णतेत्याह नारदः ॥' * ॥
नारसिंहे ।
'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥'
कालिकापुराणम् ।
'यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा ।
अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तदुत्तरम् ॥'
देवीपुराणम् ।
'होमो यज्ञादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥'
कात्यायनः ।
'आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥'
अत्र नीराजनमाह पूजारत्नाकरे देवीपुराणम् ।
'घृतमेर्य्यादिनिर्दग्धैर्यद्वर्त्तैश्च पुष्कलैः ।
यावतो दिवसान् वीर ! देवा नीराजनं कृतम् ।
तावत्कल्पसहस्राणि स्वर्गलोके महीयते ॥
भक्ष्या पिष्टप्रदीपाद्यैश्चूतान्त्यादिफलैः ।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः ॥
नवम्यां पर्व्वकालेषु यात्राकाले विशेषतः ।
यः कुर्य्याच्छ्रद्धया वीर ! देवा नीराजनं नरः ।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोकं स गच्छति ॥'
पर्व्वकाल उत्सवकालः । देवा इति स्त्रीत्वम-
विवक्षितं बहुषो निबन्धकारैर्व्याख्यातत्वात्
आचाराच्च ॥ * ॥ अथ प्रतिष्ठितमूर्त्तौ कदा-
चित् पूजाभावेन महाकालिकपञ्चरात्रम् ।
'एकाहपूजाविहतौ कुर्य्यादिग्युग्मकर्षणम् ।
विराजे च महापूजा संप्रोक्षणमतः परम् ॥
मासादूर्द्धमनेकाहपूजा यदि विहन्यते ।
प्रतिष्ठेवेष्यते कैश्चित् कैश्चित् संप्रोक्षणक्रमः ॥'
संप्रोक्षणं ॐ देवस्य त्वेत्यादिना ।
'गवां रसेन संक्षाल्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
सपुष्पं सकुशं पात्रं अर्घदेवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।
तत्तन्मासं विशिष्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
प्राज्ञप्रतिष्ठामन्त्रेण प्राज्ञप्राणमाचरेत् ।
पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि ।
यागहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः ॥'
अग्न्युत्तारणार्थे तु बौधायनः । तासां त्रयाणां
स्नतप्रोक्षणानां देवार्चानां भूयः प्रतिष्ठापयेत् त्र-
तावामग्न्युत्तारणार्थानाम् । प्रकृतिन्यायेन तान्यार्त्तेन-
र्थेनैवाग्नौ हुत्वा पुनः प्रतिष्ठां कारयेदिति
रत्नाकरः । तदा पुण्याहमित्यादि रत्नाकरा-
दयः ॥ * ॥ आदित्यपुराणे ।
'स्खलिते स्फुटिते दग्धे भ्राजमानविवर्जिते ।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दग्धस्नेहेषु नो चक्रुः सन्निधानं दिवौकसः ॥
इति सर्व्वगतो विष्णुः परिभाषामकार ह ॥'
उपचारद्रव्याणि सारदातिलके ।
'पाद्यं श्यामाकदूर्व्वाजविष्णुक्रान्ताभिरिष्यते ।'
तदुक्तलक्षणमिति शेषः ।
'गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम् ॥
जातीलवङ्गकक्कोलैर्जलमाचमनीयकम् ।
आज्यं दधिमधून्मिश्रं मधुपर्कं निवेदयेत् ॥'
कात्यायनः ।
'मधुपर्कं दधिमधुघृतसर्षपसहितं कांस्ये
कांस्येन ।'
गन्धचन्दनकर्पूरकालागुरुभिरीरितः । पुष्पाणि
देवदेयानि ।
'गुग्गुल्वगुरुधूपैरुशीरकरामधूच्छ्रयैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य दैहिकः ।
तत्र तत्र जलं दद्यादुपचाराज्जलाञ्जलेः ॥'
अत्र दृष्टिहोमौ स्नानावश्यकौ यथाशक्ति इत्य-
भिधानात् ॥ * ॥ तथा चाश्वलायनाः यज्ञ-
मखादेन विनापि पूजामाह विष्णुधर्म्मोत्तर-
प्रथमकाण्डम् ।
'पूजा कार्य्या बहिर्वेद्यां अथवा अच्युतार्च्चन ! ।
न त्वयदक्षिणैर्यज्ञैर्यजैरिह कदाचन ॥
विष्णुं देवनिकायस्थं यथाग्निमरिन्दम ! ।
तपसा पूजयेन्नित्यं तस्मादध्यधनो नरः ॥"॥
यद्येकाहे देवप्रतिष्ठावास्तुयागयज्ञोत्सर्गाब्दा-
तन्त्रेण वृद्धिश्राद्धं कुर्य्यात् । गर्ग्गः क्रियमाणे
वितिवचनात् ॥ * ॥ तथा एकस्मिन्नपि अग्नौ
होमद्वयं विधेयम् । एकाग्नावनेकहोमकरण-
पक्षे तन्त्रेण परिसमूहनादिकमाह गोभिलः ।
गवीभ्येकं परिसमूहनमग्नौ वर्हिःपर्य्युक्षण-
माज्यभागाविति ॥ * ॥ पूजादिकन्तु प्रत्येकमेव ।
ब्रह्मपुराणे ।
'देवानां प्रतिमा यत्र दृताभ्यङ्गस्नाना भवेत् ।
पलानि तत्र देयानि अष्टौ पञ्चविंशतिः ॥
अष्टोत्तरशतपलं स्नाने देयञ्च सर्व्वदा ॥'
नारसिंहे ।
यवगोधूमजैर्चूर्णैर्दन्तशौचेन वारिणा ।
प्रक्षाल्य देवदेवेशं यावत्तं लोकमाप्नुयात् ॥

पादपीठन्तु यो दद्यात् विष्णवग्रन्थिसमन्वितम् ।
उच्चासनगतश्च प्रयाच्य सर्व्वमाप्नोति प्रसुप्यते ॥"
इति प्रतिष्ठातत्त्वम् ॥ * ॥
प्रकारान्तरं भाद्रपदे ७८ अध्याये मत्स्यपुराणे च द्रष्टव्यम् ॥

प्रतिष्ठानं, क्ली, (प्रतितिष्ठत्यत्रेति । प्रति + स्था + अधिकरणे ल्युट् ।) नगरविशेषः । विठोर इति ख्यातः । तत्र पुरूरवा राजचक्रवर्त्ती आसीत् । इति महाभारतम् ॥ (यथा, देवीभागवते । ९ । ११ । ९-२ ।
"सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ।
सद्गुणाश्च सुरूपश्च प्रजारञ्जनतत्परः ॥
प्रतिष्ठाने पुरे रम्ये राज्यं सर्व्वनमस्कृतम् ।
चकार सर्व्वधर्म्मज्ञः प्रजारञ्जनतत्परः ॥"
इदं हि गङ्गातीरस्थम् । यथा, हरिवंशे । २६ । ४७—४८ ।
"एवं प्रभावो राजासौदैलस्तु पुरुषोत्तमः ।
देवैः पुण्यतमे चैव महर्षिभिरभिष्टुते ।
राज्यं स कारयामास प्रयागे पृथिवीपतिः ।
उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः ॥")

प्रतिष्ठितः, त्रि, (प्रतिष्ठा जातास्येति । तारकादित्वात् इतच् ।) प्रतिष्ठायुक्तः । (यथा, देवीभागवते । ३ । ६ । ७३ ।
"सदुद्भूतस्वहङ्कारस्तेनाहं कारणं शिवा ।
अहङ्कारश्च मे कार्य्यं त्रिगुणोऽसौ प्रतिष्ठितः ॥")
गौरवान्वितः । यथा,—
"प्रतिष्ठितानाद्याकीर्त्तिर्भरणादतिरिच्यते ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३७ अध्यायः ॥
विष्णुयागः । संस्कृतः । इति प्रतिष्ठाशब्दार्थदर्शनात् ॥

प्रतिसरः, पुं, (प्रतिसरतीति । प्रति + सृ + अच् ।) मन्त्रभेदः । माङ्गल्यम् । कङ्कणम् । ग्रन्थिशुद्धिः । चन्दनम् । इति मेदिनी । रे, २०६ ॥ प्रातःकालः । इति शब्दमाला ॥

प्रतिसरः, पुं क्ली, (प्रतिसरतीति । प्रति + सृ + अच् ।) मङ्गलम् । आरक्षम् । करसूत्रम् । नियोज्ये, त्रि । इति मेदिनी । रे, २०६ ॥

प्रतिसर्गः, पुं, (प्रतिरूपः सर्गः ।) ब्रह्मणः सृष्ट्यनन्तरं दक्षादीनां सृष्टिः । स च पुराणपञ्चलक्षणान्तर्गतलक्षणविशेषः । यथा,—
ऋषय ऊचुः ।
"आदिसर्गस्त्वया सूत ! कथितो विस्तरेण च ।
प्रतिसर्गञ्च ये येषामधिपास्तान् वदस्व नः ॥
सूत उवाच ।
यदाभिषिक्तः सकलाधिराज्ये
पृथुर्धरित्र्यामधिपो बभूव ।
तदौषधीनामधिपश्चकार
यज्ञव्रतानां तपसाञ्च सोमम् ॥
ब्रह्मव्रताराधितशुक्रशुक्र-
ज्ञताधितानस्य च यज्ञगर्भैः ।
अपामधीशं वरुणं धनानां
राज्ये प्रभुं वैश्रवणञ्च सूत ॥
विष्णुं रवीणामधिपं वसूना-
मग्निञ्च लोकाधिपतिश्चकार ।
प्रजापतीनामधिपञ्च दक्षं
चकार शक्रं मरुतामधीशम् ॥
दैत्याधिपानामथ दानवानां
प्रह्लादमीशञ्च यमं पितॄणाम् ।
पिशाचरक्षःपशुभूतयक्ष-
वेतालराजत्वथ भूतपत्निम् ॥
प्राचेयशैलञ्च पतिं गिरीणा-
मीशं सप्तद्वं सरिन्नदानाम् ।
गन्धर्व्वविद्याधरकिन्नराणा-
मीशं पुनश्चित्ररथञ्चकार ॥
नागाधिपं वासुकितक्षकादि-
सर्पाधिपं तक्षकमादिदेश ।
दिग्वारणानामधिपञ्चकार
गजेन्द्रमैरावतनामधेयम् ॥
सुपर्णमीशं पततामथाश्व-
राजानमुच्चैःश्रवसञ्चकार ।
सिंहं मृगाणां वृषभं गवाञ्च
सर्व्वं पुनः सर्व्वनसत्त्वलीनाम् ॥
पितामहः पूर्व्वमथाभ्यषिञ्च-
देनान् पुनः पूर्व्वदिगाधिनाथान् ।
पूर्व्वेण दिक्पालमथाभ्यषिञ्च-
त्राजा सुधर्म्मागमरातिकेतुम् ॥
ततोऽभिषेदुश्चियतश्चकार
सर्व्वेश्वरं ब्रह्मपदाभिधानम् ।
सकेतुमन्तं दिगधीशमीश-
चकार पश्चाद्भुवनाङ्गगर्भः ॥
हिरण्यरोमाणमुदग्दिगीशं
प्रजापतिं मेरुसुतञ्चकार ।
अद्यापि कुर्व्वन्ति दिगामधीशाः
पूर्व्वं वचस्तन्तु सुरोऽभिरक्षाम् ॥
एतैर्भिरेभिः पृथुनामधेयो
नृपोऽभिषिक्तः प्रथमं पृथिव्याम् ।
मन्वन्तरे चापि गते त एव
वैवस्वतस्यक्रुरिमं पृथिव्याम् ॥
गतेऽन्तरे चाक्षुषनामधेये
वैवस्वताख्ये च पुनः प्रवृत्ते ।
प्रजापतिः सोऽस्य चराचरस्य
बभूव सूर्य्यान्वयवंशचिह्नः ॥"
इति मात्स्ये आधिपत्यसेचनं मन्वन्तराधिपत्यं नाम ८ अध्यायः ॥ * ॥ अपि च ।
मार्कण्डेय उवाच ।
"वाराहोऽयं श्रुतः सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः क्षुतः सो वै दक्षाद्यैर्यः कृतः पृथक् ॥
रुद्रो विराड् मनुर्दक्षो मरीच्याद्यास्तु मानसाः ।
यं यं सर्गं पृथक् चक्रुः प्रतिसर्गः स स स्मृतः ॥
विराट्सुतोऽङ्गसंज्ञान् मनून् वैवस्वतं जगत् ।
मनुः स्वयं मनून् सृष्ट्वा चकार बहुधाः प्रजाः ॥
प्रजाः सिसृक्षुः स मनुर्योऽसौ स्वायम्भुवाक्रयः ।
अजनत् प्रथमं सर्गं मनून् सप्तपरान् सुतान् ॥
सारीचिश्चौत्तमिश्च तामसो रैवतस्तथा ।
चाक्षुषश्च महातेजा विवस्वान् परतस्तथा ॥
यक्षरक्षःपिशाचांश्च नागगन्धर्व्वकिन्नरान् ।
विद्याधराप्सरसः विद्वान् भूतगणान् बहून् ॥
मेघान् सविद्युतो दृश्यान् जलाशुशुक्षयादिकान् ।
मत्स्यान् पशूंश्च कीटांश्च जलजान् स्थलजां-
स्तथा ॥
एतान्यन्यानि सर्व्वाणि मनुः स्वायम्भुवः सुतैः ।
सहितः सप्तभिः सोऽस्य प्रतिसर्गः प्रकीर्त्तितः ॥
अन्ये मन्वन्तरे ये ये तैरपि क्षे क्षेऽक्षरेऽक्षरे ।
प्रतिसर्गं स्वयं कृत्वा प्राप्नुवन्ति चराचरम् ॥
यज्ञस्य संभृतं यज्ञात् यूपं प्राचंयज्ञमेव च ।
दर्भैरध्वर्य्यो गुप्तान् सर्व्वान् वराहः सहसान्
पुरा ॥
सुतान् बहून् सप्तसृष्ट्वा दक्षो देवर्षिसत्तमान् ।
महर्षीन् सोमपादींश्च बहून् पितृगणांस्तथा ॥
सृष्टिं प्रवर्त्तयामास प्रतिसर्गोऽस्य स स्मृतः ।
अजायन्त सुखाद्विप्राः क्षत्रिया बाहुशूलतः ॥
ऊर्व्वोर्वैश्याः पदः शूद्राश्चतुर्वर्णाश्चतुर्मुखात् ।
ब्रह्मणः प्रतिसर्गोऽयं ब्राह्मः सर्गस्तु सप्तमः ॥
मरीचेः कश्यपो जातः कश्यपात् सकलं जगत् ।
देवा देत्या दानवाश्च तस्य सर्गः प्रकीर्त्तितः ॥
अत्रैर्नेत्राद्भूवन्ब्रह्मवंशस्तस्योऽभवत् ।
तेन सर्व्वं जगद्व्याप्तं सोमसर्गः प्रकीर्त्तितः ॥
अथर्व्वाङ्गिरसौ दृष्ट्वा पुत्राश्च बहवोऽपरे ।
मन्त्रयज्ञादयो ये वै ते सर्व्वेऽङ्गिरसः स्मृताः ॥
आद्यपाद्या पुलस्त्यस्य पुत्राद्यान्ये च
राक्षसाः ।
प्रतिसर्गाः पुलस्त्यस्य बलवीर्य्यसमन्विताः ॥
क्रतोः पुत्रा बालिखिल्याः सर्व्वेषां भूरितेजसः ।
अङ्गुष्ठपर्व्वसंभूताश्च ज्वलद्ब्राह्मसन्निभाः ॥
प्रचेतसः सुताः सर्व्वे ये वै प्राचेतसाः स्मृताः ।
षष्टिपुत्रसहस्राणि पावकोपमतेजसः ॥
भृकालिनो वशिष्ठस्य पुत्राद्याश्चोर्द्ध्व योगिनः ।
आरुन्धतेयाः प्रद्याद्यृषिश्रेष्ठः सर्ग उच्यते
भृगोश्च भार्गवा जाता ये वै दैत्यपुरोधसः ।
कवयस्ते महाप्राज्ञास्तैर्व्याप्तमखिलं जगत् ॥
नारदाद्यारका जाता विभागानि तथैव च ।
प्रश्नोत्तराण्यथैवाग्र्ये पुण्यं गीतञ्च कौतुकम् ॥
एते दक्षमरीच्याद्याः कृतदारान् बहून् सुतान्
उत्पाद्योत्पाद्य पृथिवीं दिवञ्च समपूरयन् ॥
तेषां सुतेभ्यश्च सुताश्चतुस्सप्ततेभ्यः परे सुताः ।
सप्तसृष्टाः प्रवर्त्तन्ते येऽद्यापि भुवनेषु वै ॥
विष्णोस्तु चक्षुषः क्रव्यो मनसश्चक्रमाः स्मृतः ।
श्रोत्राद्वायुः सप्तसूनो सुखादग्निरजायत ॥
प्रतिसर्गो ह्ययं विष्णोस्तथा चापि दिशो दश ।
कृष्णार्थञ्चक्रमाः पश्चादग्निनेत्राद्वातरत् ॥
भास्करः कश्यपाज्जातो भार्य्यायास्तु समर्पितः ।
ब्रह्मणश्च बहवो जाता भूतग्रामाश्चतुर्विधाः ॥
स्थावरान्तोद्भवाश्च ह्यवमोमायुयोसुखाः ।
ऋक्षमार्जारवदनाः सिंहव्याघ्रमुखाः परे ॥

नानाशस्त्रधराः सर्व्वे नानारूपा महाबलाः ।
एष वः प्रतिसर्गोऽपि कथितो द्विजसत्तमाः ॥"
इति कालिकापुराणे ०६ अध्यायः ॥

प्रतिसर्व्यं, त्रि, (प्रतिगतं सर्व्यं वाममिति ।) प्रतिकूलम् । इति जटाधरः ॥

प्रतिसान्धानिकः, पुं, (प्रतिसन्धानं प्रयोजनमस्येति । प्रतिसन्धान + ठक् ।) मागधः । स्तुतिपाठकः । इति शब्दरत्नावली ॥

प्रतिसीरा, स्त्री, (प्रतिसिनोति प्रतिबध्नातीति । प्रति + सि + "सृसिचिमिलां दीर्घश्च ।" उणा० २ । २५ । इति क्रन् दीर्घश्च । ततष्टाप् ।) यवनिका । अवधायकपटः । इत्यमरः ।२।६।२२०॥

प्रतिसूर्य्यः, पुं, (प्रतिरूपः सूर्य्य इति प्रादिसमासः ।) झकलाभः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । कल्पस्थाने ८माध्याये ।
"प्रतिसूर्य्यः पितृभासो बहुवर्णो महाग्निराः ॥"
उपसूर्य्यकमप्यत्र । यथा, हरिवंशितायाम् । ३७ । २ ।
"प्रतिसूर्य्यानां माला
दण्डभयातङ्कपरिपन्थी ॥")

प्रतिसूर्य्यकः, पुं, (प्रतिसूर्य्य + स्वार्थे कन् ।) झकलाभः । (यथा, उत्तररामचरिते द्वितीयेऽङ्के ।
"सौमान: प्रदरोदरेषु विलसत्सूक्ष्माभ्रसो
या स्वयं
दृश्यन्ते प्रतिसूर्य्यकैरजगरस्वेदद्रवः पीयते ॥"
तद्दर्शस्य चिकित्सा सुश्रुते कल्पस्थाने ८ अध्याये उक्ता । यथा,—
"प्रतिसूर्य्यकदर्शानां सर्पदष्टवदाचरेत् ॥")
उपसूर्य्यकमप्यत्र । इति विश्वः॥ (अस्य शुभाशुभलक्षणम् । यथा, हरिवंशितायाम् ।३७।२-३।
"प्रतिसूर्य्यकः प्रभाक्षो
दिवसक्षतुर्य्यसप्रभः स्निग्धः ।
वैदूर्य्यनिभः स्वच्छः
शुक्लश्च क्षेमसौभिक्षः ॥
पीतो व्याधिं जनय-
त्यशोकरूपश्च प्रज्वलोपाय ।
प्रतिसूर्य्यानां माला
दण्डभयातङ्कपरिपन्थी ॥
दिवसक्षतः प्रतिसूर्य्यो
जलदोदग्दक्षिणे स्थितोऽनिलजत् ।
उभयतः सलिलभयं
नृपसुपरि निहन्त्यधो जनहा ॥")

प्रतिहतः, त्रि, (प्रतिहन्यते स्मेति । प्रति + हन् + क्तः ।) हिंसितः । प्रतिस्खलितः । बद्धः । इति । मेदिनी । तै, २०५ । निराग्रः । यथा,—
"मनोहृतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥"
इति सुग्राहितामरकोषे पाठः । २ । १ । ४२ ॥

प्रतिहस्तकः, पुं, (प्रतिरूपः हस्तोऽवलम्बनरूपो यस्य । कप् ।) प्रतिनिधिः । यथा,—
"आश्रितानां भृतौ स्वामिसेवायां धर्म्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥"
इति हितोपदेशे मित्रलाभे सुहृद्भेदो नाम द्वितीयकथासंग्रहः परिच्छेदः ॥

प्रतिहारः, पुं, (प्रतिविषयं प्रतेर्ऋं वा हरति स्वामिसमीपमानयतीति । प्रति + हृ + अण् ।) द्वारपालः (यथा, देवीभागवते । १ । १७ । ३० ।
"ज्ञानी हि प्रतिहारेण ज्ञानी कश्चिद् द्विजोत्तमः ॥"
प्रति + हृ + आधारे घञ् ।) द्वारः । इति शब्दरत्नावली ॥ (यथा, रघौ । ६ । २० ।
"ततो कृपाणां सुनन्दप्रबंधा
पुंवत्प्रगल्भा प्रतिहाररक्षी ।
प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा ॥"
प्रतिरूपं हरतीति । हृ + अण् ।) मायाकारः । इत्यमरटीकायां भरतः । २ । १० । ११ ॥ (परमेष्ठिनः पुत्रः । यथा, विष्णुपुराणे ।७।१।३७।
"परमेष्ठी ततस्तस्मात् प्रतिहारस्तदन्वयः ॥")

प्रतिहारकः, पुं, (प्रतिरूपं हरतीति । हृ + ण्वुल् ।) मायाकारः । इत्यमरटीकायां भरतः । २ । १० । ११ ॥

प्रतिहासः, पुं, (प्रतिरूपो हासो यस्य ।) करवीरः । इत्यमरः । २ । ४ । ७६ ॥ हासकम्प्रति हास्यञ्च ॥

प्रतीकः, पुं, (प्रतीयते प्राप्यते यत्र वा इति । प्रति + इ + अलीकादयश्चेति ईकन्प्रत्ययेन साधुः ।) एकदेशः । अङ्गम् । (यथा, ऋग्वेदे । ७ । ३६ । १ ।
"वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीक मध्येअग्निः ॥"
"तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवम् ॥" इति तद्भाष्ये सायणः ॥) स्वाङ्गवाचिनिधौ यथा, कौर्म्मे १५ अध्याये ।
"न स्वाङ्गनखवाद्यं वै कुर्य्यान्नाङ्गुलिना पिबेत् ॥"
अपि च, लक्ष्मीचरिते ।
"स्वाङ्गे पीठे च वाद्यं हरति धनपतेः केशवस्यापि लक्ष्मीम् ॥"

प्रतीकूले, त्रि । इत्यमरः ।१।६।७० ॥ विलोमः । इति मेदिनी । के, ११२ ॥

प्रतीकारः, पुं, (प्रतिकरणमिति । प्रति + कृ + घञ् । उपसर्गस्येति पक्षे दीर्घः ।) कृतापकारस्य प्रत्यपकारः । ततुपपर्य्यायः । वैरशुद्धिः २ वैरनिर्य्यातनम् ३ । इत्यमरः । २ । ८ । ११० ॥ (यथा, देवीभागवते । ३ । २५ । ३ ।
"दुर्गया तौ हतौ संख्ये नापराधो ममात्र वै ।
अवश्यम्भाविभावेषु प्रतीकारो न विद्यते ॥")
चिकित्सा । इति शब्दमाला ॥

प्रतीकाशः, पुं, (प्रतिकाशते इति । प्रति + काश् + घञ् । उपसर्गस्य दीर्घः ।) उपमा । इत्यमरः ।२ । १० । ३८ ॥ (यथा, महाभारते । १ । १५४ । ३२ ।
"अद्य त्वां भगिनी रक्तः शुभमाशं मयाचत ।
शुक्लस्यादिप्रतीकाशं सिंधोरेव महाद्विपम् ॥")

प्रतीक्षा, स्त्री, (प्रति + ईक्ष + अङ् ।) प्रतीक्षणम् । अपेक्षा । प्रतिपूर्ब्बेक्षधातोर्भावे अप्रत्ययेन निष्पन्नः ॥ (यथा महाभारते ।८।७०।५२।
"मित्रप्रतीक्षया मुख्य धार्त्तराष्ट्रस्य चोभयोः ।
अपवादतिथिचाभिक्षिभिरेतैर्हि लोभयि ॥")

प्रतीक्ष्यः, त्रि, (प्रतीक्ष्यते इति । प्रति + ईक्ष + ण्यत् ।) पूज्यः । इत्यमरः । ३ । १ । ५ ॥ (यथा, रघौ । ५ । १७ ।
"भक्तिः प्रतीक्ष्येषु कुलोचिता ते
पूर्व्वान् महाभाग ! तयातियेथे ।
अतीतकालक्षमभ्युपैतः
स्वामर्थिभावादिति मे विषादः ॥")
प्रतीक्षणीयः ॥ (यथा, माघे । २ । १०८ ।
"प्रतीक्ष्यं तत्प्रतीक्षायै प्रतिपक्षे प्रतिक्षणम् ॥")

प्रतीची, स्त्री, (प्रतिदिशाम् प्रतिदिशान्ते इत्यर्थः अञ्चति गच्छति स्मेति । अञ्चु गतिपूजनयोः + "ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिकुञ्चाञ्च ।" ३ । २ । ५८ । इति क्विन् अनुनासिलोपो दीर्घश्च । "उदिचश्च ।"४ । १ । ६ । इति ङीप् ।) पश्चिमदिक् । इत्यमरः । १ । ३ । २ ॥ (यथा, महाभारते । ४ । ४१ । १८ ।
"येनासौ अजयत् कृष्णां प्रतीचीं दिशमाश्रिते ।
कलापो ग्रीव तस्यासीन्मादीपुत्रस्य धीमतः ॥"
त्रि, पश्चिमाभिमुखी । यथा, ऋग्वेदे ।१।६२।६।
"विश्वानि देवी भुवनाभिचक्षा
प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती
विश्वस्य वाचमविदन् मनायोः ॥"
"भुवना भुवनानि भूतजातान्यभिचक्षाभिप्रकाशय प्रकाशयन्ति ज्ञापयन्तीवं प्रतीची प्रत्यङ्मुखी सती ।" इति तद्भाष्ये सायणः ॥ प्रतिनिवृत्तमुखी । यथा, ऋग्वेदे । १ । १२३ । ७ ।
"अधातेव पुंस इति प्रतीची गर्त्तारुगिव सनये धनानाम् ॥"
"अधातेव आदरहितेव पुंसः पित्रादीन् प्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी ।" इति तद्भाष्ये सायणः ॥)

प्रतीचीनं, त्रि, (प्रतीचि भवम् । प्रत्यच् + "विभाषाञ्चेरदिक् स्त्रियाम् ।"५ ।३ । ८ । इति खः । अञ्चोपो दीर्घश्च ।) प्रत्यक् । प्रतीच्यां भवः । इति हेमचन्द्रः । २ । ८२ ॥ (पराङ्मुखम् । यथा, ऋग्वेदे । १ । ५५ । ८ ।
"सूरश्चिदा सुधितो अन्तमस्य प्रतीचीनं दर्शये विश्वमायत् ॥"
"विश्वं भूतजातं प्रतीचीनं पराङ्मुखं दर्शये ।" इति तद्भाष्ये सायणः ॥)

प्रतीच्यः, त्रि. प्रतीच्यां भवः। प्रतीचीशब्दाद्भवार्थे-ष्यञ्प्रत्ययनिष्पन्नः॥ पश्चिमदिग्जातः। (यथा, महाभारते। २। ३२। १२।
"रामदत्तान् हारकूर्माच्च प्रतीच्याश्चैव ये नृपाः।
तान् सर्व्वान् खण्डशो चक्रे शासनादेव माधवः॥")

प्रतीपः, त्रि, (प्रतीयते स्म प्रत्येकमगादृवेति। प्रति + इण् + कर्म्मणि कर्त्तरि वा कः।) ख्यातः। इत्यमरः। ३। २। ६॥ (यथा, रामायणे। २। ८। १०।
"प्राप्तां वसुमतीं प्रीतिं प्रतीपां हतविद्विषम्।
उपस्थास्यति कौशल्या दात्रीवत्सं सुता-
मिव॥")

सादरः। ज्ञातः। कृतः। इति मेदिनी। ते, १२५॥ (पुं. विश्वेदेवानामन्यतमः। यथा, महाभारते। १३। ९१। ३२।
"अनुकर्म्मा प्रतीतश्च प्रदाताथानुमांस्तथा॥")

प्रतीतिः, स्त्री, (प्रति + इण् + भावे क्तिन्।) ज्ञानम्। इति जटाधरः॥ (यथा, भाषापरिच्छेदे। ११४।
"अयोग्याभावतो नात्र चरितार्थत्वमुच्यते।
अज्ञात्वा पृथगिदं नेति प्रतीतिस्तिद्धि बाधकम्॥")

ख्यातिः। आदरः। हर्षः। इति प्रतीतशब्दार्थ-दर्शनात्॥

प्रतीपं, त्रि, (प्रतिकूलमापो यस्मिन्। "ऋक्-पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अप्रत्ययः। "ङ्याप्प्रातिपदिकात्।" ४। १। ६१। इति ङीप्।) प्रतिकूलम्। इति हेम-चन्द्रः। ३। १०१॥ (यथा, भागवते। ३। १। १४।
"न एतन्मनोपसृजाव सृज्यं
दाक्षायणीं दुहितरं तत्परेषु।
तिग्मं प्रतीपं यदवन्ति देव
स्तिर्य्यङ्नृसृपसामासु पुराक्षुवाणः॥")

स्त्री, अर्थालङ्कारभेदः। तस्य लक्षणादिकं साहित्यदर्पणे १० परिच्छेदे उक्तम्। यथा,—
"प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते॥
क्रमेण उदाहरणं यथा,—
अस्यास्त्रिस्रसमानकान्तिसलिले मग्नं तदिन्दोर्वरं
मेघैरन्तरितं प्रिये! तव मुखच्छायानुकारी
गतौ।
वेऽपि त्वद्गमनानुकूलपवने राजर्षयः प्रस्ता-
वस्तावद्भ्रुविनोदमात्रमपि मे दैवेन न क्षम्यते।
तद्वक्त्रं यदि सुस्थिता गणिकया वा हेम वा
पैद्दुप्ति-
स्तच्चक्षुर्यदि हारितं कुवलयैस्तच्चेत् स्थितं वा
सुधा।
धिक्कन्दर्पधनुर्भुवौ यदि च ते किंवा बहु ब्रूमहे
यत्तत्पूर्वतरस्तवस्तुविषयः सर्व्वक्रमो वैधयः॥
अत्र वस्त्वादिभिरेव चन्द्रादीनां शोभातिशय-
जनात् तेषां निष्फलत्वम्।
उक्ता चालम्तसुखसंभवमुखस्य वस्तुनः।
कल्पितोऽप्युपमानत्वे प्रतीपं केचिदूचिरे॥

यथा,—
अहमेव गुरुः सुदारुणा-
मिति हालाहल! तात! मास्म दृप्यः।
ननु सन्ति भवादृशानि भूयो
भुवनेऽस्मिन् वचनानि दुर्ज्जनानाम्॥
अत्र प्रथमपादे उत्कर्षातिशय उक्तः। तदनुक्तौ तु नायमलङ्कारः॥")

प्रतीपः, पुं, चन्द्रवंशीय ऋक्षराजपुत्रः। शान्तनु-राजपिता च। इति पुराणं शब्दरत्नावली च॥ (यथा, महाभारते। १। ९७। २०।
"प्रतीपः शान्तनुं पुत्रं यौवनस्थं ततोऽन्वशात्॥"
एतस्य विवरणं तत्तच्छब्दाये विस्तरशो द्रष्टव्यम्॥)

प्रतीपदर्शिनी, स्त्री, (प्रतीपं प्रतिकूलं वामं वा पश्यतीति। दृश् + णिनिः। ङीप्।) स्त्रीभा-जनम्। इत्यमरः। २। ६। २॥

प्रतीरं, क्ली, (प्रतीरयति जलगतिकर्म्मसमाप्तिं नयतीति। प्र + तीर कर्म्मसमाप्तौ + कः।) तटम्। इत्यमरः। १। १०। ७॥

प्रतीवापः, पुं, (प्रत्युप्यते प्रक्षिप्यते अथवा निधि-यतेऽस्मिन्निति। प्रति + वप निधिकादौ + घञ्।) गलितस्य स्वर्णादेर्द्रव्यान्तरेणावचूर्णनम्। इति स्वामी॥ व्यवनम्। निःक्षेपणमिति यावत्। इति सुभूतिः॥ उपद्रवः। इति सुकृटः॥
"आवापस्तु प्रतीवापो मारोरीतिरुपद्रवः॥"
इति राजनिघण्टः॥
इत्यातच्चनशब्दटीकायां भरतः॥ प्रतीवौषध-विशेषः। यथा,—
"उषकादि प्रतीवापं पिबेत् संग्रहणाय वै॥"
इति विद्यधिचिकित्सायां चक्रपाणिदत्तः॥
(यथा च सुश्रुते कल्पस्थाने। ४२ अध्याये।
"मदनफलमज्जकाथं वा पिप्पल्यादि प्रतीवापं तण्डुलं वा निम्बरूपिका कषाययोरन्यतरेण सप्त-पर्णं क्षीरजाधिष्ठितम्॥")

प्रतीवेष्यः, पुं, (प्रतिविध्यते इति। प्रति + विध् + यत्। उपसर्गस्य दीर्घः।) प्रतिवेध्यः। इति शब्दरत्नावली॥

प्रतीवेध्यी, [न्] स्त्री, (प्रतीवेध्योऽस्त्यस्यामिति। प्रतिवेध्य + "अत इनिठनौ।" ५। २। ११५। इति इनिः।) प्रतिवेध्यी। इति शब्दरत्नावली॥

प्रतीहारः, पुं, (प्रतिहियते अनेति। प्रति + हृ + घञ्। उपसर्गस्य दीर्घः।) द्वारः। (प्रतिहर-त्यनेनेति। करणे घञ्।) द्वारपालः। इत्यमरः। २। ८। ६। तस्य लक्षणम्। यथा,—
"दृष्टिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः।
अप्रमादी वदा दक्षः प्रतीहारः स उच्यते॥"
इति चाणक्यसंग्रहः॥
अपि च। मात्स्ये १८८ अध्यायः।
"प्रांशुः सुरूपो दक्षश्च प्रियवादी च चोद्यतः।
चित्तज्ञश्च सदैवार्य्यो प्रतीहारो विधीयते॥"
सन्धिविशेषः। यथा, हारावल्याम्।
"मयास्योपक्षतं पूर्व्वमयमेवोपकरिष्यति।
इति यः क्रियते सन्धिः प्रतीहारः स उच्यते॥"

प्रतीहारी, [न्] त्रि, (प्रतिहरति स्वामिसमीपे सर्व्वविषयमिति। प्रति + हृ + णिनिः। उप-सर्गस्य दीर्घः। यद्वा, प्रतीहारो दण्डधारणमस्या-स्तीति। इनिः।) द्वारी। द्वारार्थकप्रतीहार-शब्दादप्यर्थे ङीप्प्रत्ययेन निष्पन्नः॥

प्रतीहारी, स्त्री, (प्रतीहारोऽस्या अस्तीति। अच्। गौरादित्वात् ङीष्।) द्वाःस्थिता। इति मेदिनी। रे, २८०॥

प्रतीहारः, पुं, (प्रतिरूपो हारोऽस्य। उपसर्गस्य दीर्घः।) करवीरः। इत्यमरः। २। ४। ७६॥

प्रतुदः, पुं, (प्रतुदतीति। प्र + तुद् + घञ्।) शकुनिः। आदिना श्येनः। कङ्कः। काकः। द्रोणकाकः। उलूकः। मयूरः। इति राज-निर्घण्टः॥ अस्यमांसगुणाः।
"लावाद्या विष्किरो वर्गः प्रतुदा जाङ्गला खगाः।
लघवः प्रीतमधुराः कषायाश्च हिता वृषाः॥"
इति राजवल्लभः॥
(यथा च चरके सूत्रस्थाने सप्तविंशाध्याये।
"शुतपत्रो भृङ्गराजः कोयष्टी जीवजीवकः।
कैरातः कोकिलोऽलूको गोपापत्रः प्रियात्मजः॥
लट्वा लट्वाकको वञ्जुर्वटहा खिञ्जिमानकः।
जटी दुन्दुभिवाजावलोलपृष्ठकुलिङ्गकाः॥
कपोतमुद्गशारङ्गखिरिटीकवृयष्टिकाः।
शारिकाकलविङ्कश्च चटकोऽङ्गारचूडकः॥
पारावतः पाकविक इत्युक्ताः प्रतुदा द्विजाः॥"
यथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्ग-यष्टकुलिङ्गयोचोड्डकखिञ्जिमानकघतपत्रकमा-ङ्गलिन्दकमेदाग्निमुखशारिकावल्गुलीगिरिग्रीव-काकदूषकसुग्रीवखञ्जरीटकशारीतदात्यूहप्रभृ-तयः प्रतुदाः॥")

प्रतोदः, पुं, (प्रतुद्यतेऽनेनेति। प्र + तुद् + करणे घञ्।) अश्वादिताड़नदण्डः। चाबुक् इति भाषा। तत्पर्य्यायः। प्राजनम् २ प्रवयणम् ३ तोत्रम् ४ तोदनम् ५। इति जटाधरः॥ (यथा, महाभारते। २। ५४। ८।
"प्रकालयेद्विप्रः सर्व्वाः प्रतोदेनेव सारथिः।
प्रत्यभिज्ञायं दोषां जिघृक्षुर्भरतर्षभ!॥")

प्रतोली, स्त्री, (प्रतुद्यते परिमीयते इति। प्र + तुल् परिमाणे + घञ्। गौरादित्वात् ङीष्।) रथ्या। इत्यमरः। २। २। ६॥ (यथा, रामा-यणे। २। ८०। १८।
"बहुपांसुचयाश्चापि परिखापरिवारिताः।
तत्रेन्द्रनीलप्रतिमाः प्रतोलीवरगोभिताः॥")
अश्वसञ्चारमार्गः। राह इति ख्याते। कुली इति च ख्याते। कङ्कादिमध्यनिम्नेति यौगिकः। दुर्गनगरद्वारे इति केचित्। इति तट्टीकायां भरतः॥

प्रत्तं, त्रि, (प्रदीयते स्मेति। प्र + दा + क्तः।
"अच उपसर्गात् तः।" ७। ४। ४७। इति तादेशः।) दत्तम्। इति शब्दबोधसार-रत्नम्॥

प्रत्नः, त्रि, (प्र+"नञ्च पुराणे प्रात्।" इति चकारात् त्नप्।) पुरातनः। इत्यमरः। ३। १। ७७॥ (यथा, भागवते। ५। २०। ५।
"प्रत्नस्य विष्णो रूपं यत् सत्त्वस्यर्क्षस्य ब्रह्मणः।
अन्तस्य च त्वमीशान स्तूयसे भागमीमहि॥")

प्रत्यक्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अनच्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। (यथा, मनुः। २। २१।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः॥")
पश्चिमकालः। इति मेदिनी। चे, १६॥ (अ, प्रतीच्यां दिशि प्रतीच्या दिशः प्रतीची दिक्षा एवं देशे काले च। "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्ताति:।" ५। ३। २७। इति अस्ताति:। "अर्वस्तातेर्लुक्।" ५। ३। ३०। इति अस्तातेर्लुक्। "लुक् तद्धितलुकि।" १। २। ४९। इति लुक्। दिक्देशकाले। इति मेदिनी। चे, १६॥ प्रतिलोमम्। यथा, भागवते। ४। २२। ३७।
"यः क्षेत्रवित्पतया हृदि विश्वगावि:
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि॥"
प्रतिकूलम्। यथा, महाभारते। ५। ८४। ६।
"प्रत्यग्रहुर्मशानाद्याः प्राङ्मुखाः विन्धुसत्तमाः।
विपरीता दिशः सर्व्वा न प्राशायत किञ्चन॥")

प्रत्यक्पर्णी, स्त्री, (प्रत्यञ्चि पर्णानि अस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २। ४। ८६॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे।
"रक्तोऽन्यो वह्निरो वृत्तफलो धामार्गवोऽपि च।
प्रत्यक्पर्णी केशपर्णी कथिता कपिपिप्पली॥")
द्रवन्ती। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"द्रवन्ती शाबरी चित्रा प्रत्यक्पर्ण्यर्कपर्ण्यपि।
चित्रोपचित्रान्यग्रोधो प्रत्यक्श्रेण्यार्खुकर्ण्यपि॥")

प्रत्यक्पुष्पी, स्त्री, (प्रत्यञ्चि पुष्पाण्यस्याः। पाककर्णेति ङीष्।) अपामार्गः। इत्यमरः। २। ८७। ८॥ (यथा, सुश्रुते। १। ४३।
"प्रत्यक्पुष्पीवटापुष्पीनिम्बकषायाणामन्यतमेनालोड्य मधुसैन्धवयुक्तां मात्रां पाययित्वा वामयेत्॥" पर्य्यायान्तरमस्याः। यथा,—
"खरमञ्जर्य्यपामार्गः प्रत्यक्पुष्पी मयूरकः।
चारमञ्जर्य्यधोघण्टा शिखरी खरमञ्जरी॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्श्रेणी, स्त्री, (प्रतीच्यां श्रेण्यां यस्याः। समाहारविधेरनित्यत्वात् न कप्।) इन्द्रवृक्षः। मूषिकपर्णी। इत्यमरः। २। ४। ८८॥ (अस्याः पर्य्यायो यथा,—
"प्रत्यक्श्रेणी द्रवन्ती च पुत्रश्रेण्यार्खुपर्णिका।
हयपर्ण्यार्खुपर्णी च मूषिका काञ्चिपचिका॥"
इति वैद्यकरत्नमालायाम्॥)

प्रत्यक्ष, त्रि, (प्रतिगतमक्षि इन्द्रियं यत्र। समासे अच्। यद्वा, प्रत्यक्षमस्त्यस्येति। अर्श आदित्वात् अच्।) इन्द्रियग्राह्यम्। तत्पर्य्यायः। ऐन्द्रियकम् २। इत्यमरः। ३। १। ७८॥ (यथा, ब्रह्मवैवर्त्ते। २। १। ५२।
"यत्पादपद्मनखरदृष्टये चात्मशुद्धये।
न च दृष्टश्च स्वप्नेऽपि प्रत्यक्षस्यापि का कथा॥")
अनुभवविशेषः। तत् षड्विधम्। ब्राह्मम् १ रासनम् २ आवणम् ३ चाक्षुषम् ४ आर्षम् ५ मानसम् ६। निर्व्विकल्पकसविकल्पकभेदेन प्रत्येकं द्विविधम्। निर्व्विकल्पकन्तु अतीन्द्रियम्। सविकल्पकं मनोग्राह्यम्। षड्विधप्रत्यक्षे आत्मनस्तु महत्त्वं कारणम्। इन्द्रियं करणम्। विषयेण सह इन्द्रियसन्निकर्षः। अस्य व्यापारः। यथा, भावापरिच्छेदे।
"ब्राह्मजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्।
ब्राह्मस्य गोचरो गन्धो गन्धवादिरपि स्मृतः।
तथा रसो रसज्ञायास्तथा प्रन्थोऽपि च श्रुतः॥
उद्भूतरूपं नयनस्य गोचरो
द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।
विभागसंयोगपरापरत्व-
स्नेहद्रवत्वं परिमाणयुक्तम्॥
क्रियां जातिं योग्यवृत्तिं समवायञ्च साहश्यम्।
गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः॥
उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः।
रूपान्यचक्षुषो योग्यं रूपमत्रापि कारणम्॥
द्रव्याश्रये त्वचो योगो मनसा ज्ञानकारणम्।
मनोग्राह्यं सुखं दुःखमिच्छा द्वेषौ मतिः स्मृतिः॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम्॥
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः॥"
(यथा, विष्णूत्तरखण्डे।
"देवानर्च्चय यत्नेन प्रतिदिनं पुण्यानि जन्मान्तरे
भोगाय प्रयतो महाक्रतुविधौ स्वर्गाय हिंसां कुरु।
इत्थं वञ्चकवञ्चनोत्पथगता बुद्धिस्तवं यावि-
च्चिरादप्रत्यक्षपदार्थसार्थरहितं पश्यानमारोहतु॥"
अ, अक्षि अक्षि प्रतीति वीप्सायां यथार्थत्वेन समासः। अक्ष्णोराभिमुख्यमित्यर्थे। "तत्पुरुषे कृति बहुलम्।" २। १। १४। इत्यव्ययीभावः। "अव्ययीभावे शरत्प्रभृतिभ्यः।" ५। ४। १०७। इत्यत्र "प्रतिपरसमनुभ्योऽक्ष्णः।" इति टच्। इन्द्रियलक्षणम्। अपरोक्षम्। यथा, मनुः। ६। ५२।
"फलस्यानभिसन्धाय क्षेत्रिणां बीजिनामिव।
प्रत्यक्षं क्षेत्रिणामर्थो बीजादृयोनिर्गरीयसी॥")

प्रत्यक्षदर्शनं, त्रि, (प्रत्यक्षं पश्यतीति। प्रत्यक्ष+दृश्+ल्युः। प्रत्यक्षं दर्शनं यस्येति वा।) साक्षी। इति शब्दमाला॥ (क्ली, प्रत्यक्षं दर्शनम्। यथा, महाभारते। ३। ५७। ३६।
"प्रत्यक्षदर्शनं यज्ञे गतिश्चानुत्तमा शुभा।
नैवधाय ददौ शक्रः प्रीयमाणः शचीपतिः॥")

प्रत्यक्षवादी, [न्] पुं, (प्रत्यक्षमेव प्रमाणत्वेन वदतीति। वद्+णिनिः।) बौद्धः। नास्तिकः। इति हेमचन्द्रः॥ (प्रत्यक्षं प्रमाणमिति तच्छीलम्॥ (प्रत्यक्षं वदति यस्तच्छि॥)

प्रत्यक्षी, [न्] त्रि, (प्रत्यक्षमस्त्यस्येति। प्रत्यक्ष+इनिः।) अक्षज्ञः। इति त्रिकाण्डशेषः॥

प्रत्यगात्मापतिः, पुं, (प्रत्यगात्मायाः पश्चिमस्या दिशः अधिपतिः।) वरुणः। इति हलायुधः॥

प्रत्यग्र, त्रि, (प्रतिगतमग्रं श्रेष्ठं प्रथमदर्शनं वास्येति।) नूतनः। इत्यमरः। ३। १। ७७॥ (यथा, महाभारते। ८। ३८। १८।
"दासीनां निष्ककण्ठीनां मागधीनां शतं तथा।
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्वनञ्जयम्॥")
शोभितः। इति जटाधरः॥ (पुं, उपरिचरस्य वसोः पुत्राणामन्यतमः। यथा, भागवते। ६। २२। ६।
"वसुस्तस्योपरिचरो बृहद्रथमुखास्ततः।
कुशाम्बमत्स्यप्रत्यग्राद्यिपाल्याश्च चेदिपाः॥")

प्रत्यग्रथः, पुं, (प्रतीच्यां रथे इव।) अहिच्छत्रदेशः। इति हेमचन्द्रः। ४। २६॥

प्रत्यङ्, [च्] त्रि, (प्रत्यञ्चतीति। प्रति+अनच्+क्विन्।) पश्चिमदिक्। पश्चिमदेशः। पश्चिमकालः। प्रतिपूर्ब्वाच्चधातोः कर्त्तरि विचप्रत्ययेन निष्पन्नः। इति व्याकरणम्॥ (यथा, श्रुतपथब्राह्मणे। १२। ८। २। ३५।
"ऋतवः सर्व्वे पराञ्चः सर्व्वे प्रत्यञ्चः॥"
प्रतिगतः। अभिमुखः। यथा, ऋग्वेदे। १। ५०। ५।
"प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे॥"
"हे सूर्य्य त्वं देवानां विशो मरुद्गणरूपान् देवान्। मरुतो वै देवानां विश इति शुक्लयजुःश्रुतेः। तान् मरुत्संज्ञकान् देवान् प्रत्यङ्ङुदेषि। तान् प्रतिगच्छसुदयं प्राप्नोषि। तेषामभिमुखं यथा भवति तथार्थः। तथा मानुषान् मनुष्यान् प्रत्यङ्ङुदेषि। तत्रापि यथास्मदभिमुखमेव सूर्य्य उदेतीति मन्यन्ते। तथा विश्वं आभं स्वः स्वर्लोकं दृशे द्रष्टुं प्रत्यङ्ङुदेषि। यथा स्वर्लोकवासिनो जनाः सर्व्वेऽपि स्वस्वाभिमुखेन सूर्य्यं पश्यन्तीति।" इति तद्भाष्ये सायणः॥ अन्तर्यामी। इति श्रीधरस्वामी॥ यथा, भागवते। ६। ६। २०।
"प्रत्यञ्चमादिपुरुषमनुपलब्धुः समाहिताः॥")

प्रत्यङ्ग, क्ली, (प्रतिगतमङ्गमिति।) अवयवविशेषः। यथा, शब्दचन्द्रिकायाम्।
"प्रत्यङ्गं कर्णनासाक्षिजङ्घाबाह्वादिकम्॥"
(यथा, रामायणे। २। ७४। १४।
"अङ्गप्रत्यङ्गजः पुत्रो हृदयाज्जायते किल।
तस्मात् प्रियतरो मातुः प्रिया एव सुबान्धवाः॥")
"अतः परं प्रत्यङ्गानि वक्ष्यन्ते। मस्तकोदरपृष्ठनाभिललाटगलवक्षिपृष्ठकक्षस्तनहृदयग्रीवाक्षिगण्डबाहुवक्त्रप्रभृतयो द्वे द्वे विंशति-

रङ्गलयः। श्रोतांसि च वक्ष्यमाणानि। एवप्रत्यङ्गविभाग उक्तः॥" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥ अप्रधानम्। यथा, निरुक्ते। ७।१।५।

"एक आत्मा बहुधा श्रूयते एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्त्यपि॥" अङ्गं अङ्गं प्रति। यथा, गीतगोविन्दे। ११।२१।

"ध्यानं गीतनिबोलचारुहरिणीदृग्भ्यः प्रत्यङ्गमाणिङ्गति॥"

तथा च मनुः। ८। २०८।

"यस्मिन् कर्मण्यि यास्तु स्युरुक्ताः प्रत्यङ्गदक्षिणाः।
स एव ता आदद्रीत भजेरन् सर्व एव वा॥"

कृपविशेषे, पुं। यथा, महाभारते। २।२।२६५।

"महापुराणसम्भाव्यः प्रत्यङ्गः परहा श्रुतिः।
इते चान्धे च राजानः शूलगोऽथ सहस्रशः।
अयर्णोऽयुतशाखाढ्ये संख्याताश्चैव पञ्चशः॥")

प्रत्यङ्गिरा, स्त्री, देवीविशेषः। तस्या ध्यानम्। यथा,—

"शूर्पोपरिसमासीनां रक्ताम्बरवरस्रजाम्।
सर्वाभरणसंयुक्तां गुञ्जाहारविभूषिताम्॥
षोड़शाब्दाञ्च युवतीं पीनोन्नतपयोधराम्।
कपालकर्तृकाहस्तां परमानन्दरूपिणीम्।
वामदक्षिणयोगेन ध्यायेन्नत्वविदुत्तमाम्॥"

इति प्रत्यङ्गिराकल्पोक्तान्तर्गतम्॥

प्रत्यनीकः, पुं, (प्रतिगतः अनीकं युद्धमिति।) शत्रुः। इति हेमचन्द्रः। ३। ३८२॥ (प्रतिपक्षः। विरोधी। यथा, महाभारते। ७। २०। ३६।

"यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेदपि॥"

यथा च सुश्रुते कल्पस्थाने ४६ अध्याये।

"अतीवायतयामास्तु त्वपा येभ्वतुत्तु खलूताः।
तेषु तत्प्रत्यनीकार्थं शुक्लोत्तमानरेव तु॥"

स्त्री, प्रतिपक्षसैन्यम्। यथा, भगवद्गीतायाम्। ११। ३२।

"ऋतेऽपि त्वां न भविष्यन्ति सर्वे
येऽवस्थिताः प्रत्यनीकेषु योधाः॥"

अलङ्कारविशेषः। यदुक्तं काव्यप्रकाशे।

"प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया।
या तदीयस्य तत्तुल्ये प्रत्यनीकं तदुच्यते॥"

उदाहरणं यथा,—

"त्वं विधिर्विलमनोभवरूपः
का च सुन्दरि! भवत्यनुरक्ता।
पञ्चभिर्युगपदेव शरैस्तां
तापयत्यनुशयादिव कामः॥")

प्रत्यन्तः, पुं, (प्रतिगतोऽन्तमिति। अन्तादचः। क्रान्ताद्यर्थे। इति समासः।) म्लेच्छदेशः। इत्यमरः। २। १। ७॥ (प्रान्तदुर्गम्। यथा, रघुः। ४। ४६।

"स गुप्तमूलप्रत्यन्तः सुह्मापाशिरयान्वितः।
षड्विधं बलमादाय प्रतस्थे दिग्विजयाय॥"

"गुप्तौ मूलं खनित्वाऽन्तं प्रत्यन्तः प्राप्तदुर्गवद्येन सः।" इति तट्टीकायां मल्लिनाथः॥

तट्टीग्रजाते, त्रि॥ यथा, बराहसंहितायाम्। ४। २१।

"प्रत्यन्तान् कुरुपाञ्चालयुगुप्तिः प्रहरे कुजेनाहते॥")

सन्निकृष्टे च त्रि॥

प्रत्यन्तपर्वतः, पुं, (प्रत्यन्तः सन्निकृष्टः पर्वतः।) महापर्वतसमीपवर्त्तिक्षुद्रपर्वतः। इत्यमरः। २। ३। ७॥

प्रत्यभियोगः, पुं, (प्रतिरूपोऽभियोगः।) प्रत्यपराधः। यथा,—

"अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत्।
अभियुक्तञ्च नान्येन मोक्षं विप्रकृतिं नयेत्॥"

"अभियुञ्जत इति अभियोगोऽपराधस्तमभियोगमनिस्तीर्यापह्नवेनमभियोक्तारं न प्रत्यभियोजयेदपराधेन न संयोजयेत्। यद्यपि प्रत्यभियुक्तत्वं प्रत्यभियोगरूपत्वेनापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधस्य विषयः। अतः स्वाभियोगानुपमर्दनरूपस्य प्रत्यभियोगस्यायं निषेधः।" इति मिताक्षरा॥

प्रत्यभिवादः, पुं, (प्रति+अभि+वद्+णिच्+भावे घञ्।) अभिवाद्यस्य गुरोराशीर्वचनम्। इति गोयीचन्द्रः॥

प्रत्यभिवादनं, पुं, (प्रति+अभि+वद्+णिच्+भावे ल्युट्।) अभिवाद्यस्य गुरोराशीर्वचनम्। इति गोयीचन्द्रः॥

प्रत्ययः, पुं, (प्रति+इण्+भावकरणादौ यथायथं अच्।) अधीनः। शपथः। ज्ञानम्। (यथा, गारुड़े २३६ अध्याये।

"आयत्तसंस्कारसम्भूतः प्रत्ययो विषयान्वितः॥")

विश्वासः। (यथा, कुमारे। ४। ४५।

"इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।
तत्प्रत्ययाच्च कुसुमायुधबन्धुरेणा-
माश्वासयन् सुचरितार्थपदैर्वचोभिः॥")

हेतुः। (यथा, रघुः। १०। ३।

"अतिष्ठत् प्रत्ययार्थेषु सन्ततिः स चिरं नृपः॥")

रज्जुम्। शब्दः। इत्यमरः। ३। ३। १४७॥ प्रथितत्वम्। आचारः। इति मेदिनी। ये, ८६॥ निश्चयः। (यथा, मनुः। ८। २५३।

"यदि संशय एव स्यान्निष्कामामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥")

स्फोटः। इति हेमचन्द्रः॥ पक्षान्तरकारणम्। वोपदेवेनास्य त्यसंज्ञा कृता। प्रत्ययतीति क्षुभ्नादिषु पाठात्तः। प्रत्ययाः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, रघुः। ११। ५६।

"ता नराधिपसुता कृपालवै-
स्ते च ताभिरगमन् कृतार्थताम्।
सोऽभवद्वरवधूसमागमः
प्रत्ययप्रकृतियोगसन्निभः॥")

सहकारी। इति त्रिकाण्डशेषः॥

प्रत्ययकारिणी, स्त्री, (प्रत्ययस्य विश्वासस्य कारिणी।) मुद्रा। इति त्रिकाण्डशेषः॥ मोहर इति पारस्यभाषा॥

प्रत्ययितः, त्रि, (प्रत्ययो विश्वासः सञ्जातोऽस्येति। प्रत्यय+"तदस्य सञ्जातं तारकादिभ्य इतच्।" ५।२।३६। इति इतच्।) आप्तः। विश्वस्तः। इत्यमरः। ३। ८। १३॥ (यथा, कथासरित्सागरे। १५। ६८।

"तत् श्रुत्वा ब्रह्मदत्तोऽसौ प्रत्ययितान् द्विजान्॥")

प्रत्यर्थी, [न्] त्रि, (प्रतिगतोऽर्थं प्रतिकूलं वा अर्थयते इति। प्रति+अर्थ+णिनिः।) शत्रुः। इत्यमरः। २। ८। ११॥ (यथा, साहित्यदर्पणे। ६ परिच्छेदे।

"नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं वक्षोजौ करिकुम्भविभ्रमकरौमत्युन्नतिं गच्छतः॥")

पुं, प्रतिवादी। इति शब्दरत्नावली॥ (यथा, मनुः। ८। ७६।

"सभाप्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।
प्राड्विवाकोऽनुयुञ्जीत विधिनानेन साक्ष्यम्॥")

अर्थिप्रतिपक्षः। यथा,—

"प्रत्यर्थिनोऽगतो लेखं यथावेदितमर्थिना।
समाप्तासनदर्शाहर्नामभात्यादिचिह्नितम्॥"

"अर्थ्यतेऽत्यर्थः साध्यः। सोऽस्याकीत्यर्थी। तत्प्रतिपक्षः प्रत्यर्थी।" इति मिताक्षरा॥

प्रत्यर्पितं, त्रि, (प्रति+ऋ+णिच्+क्तः।) प्रतिदत्तम्। यथा। "अर्थत्वव्यवहारोऽपि एकस्मिन् वत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितञ्चेति। पुनरन्यस्मिन् वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमानोऽपि यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितञ्चेति वत्सरान्तरे गृहीतं प्रत्यर्पितञ्च नास्मिन् वत्सरे इत्युपयुज्यते।" इति मिताक्षरा॥

प्रत्यवसानं, क्ली, (प्रति+अव+सो+ल्युट्।) भोजनम्। इति हेमचन्द्रः। ३। ८७॥ (पर्य्यायान्तरस्य यथा,—

"अग्निः प्रत्यवसानञ्च भक्तं भोजनाग्नये॥"

इति वैद्यकरत्नमालायाम्॥)

प्रत्यवसितं, त्रि, (प्रति+अव+सो+क्तः।) भक्षितम्। इत्यमरः। ३। २। ११०॥

प्रत्यवस्कन्दः, पुं, (प्रति+अव+स्कन्द+घञ्।) चतुर्विधोत्तरान्तर्गतोत्तरविशेषः॥

प्रत्यवस्कन्दनं, क्ली, (प्रति+अव+स्कन्द+ल्युट्।) चतुर्विधोत्तरान्तर्गतोत्तरविशेषः। यथा,—

"प्रत्यवस्कन्दनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतियह्लब्धमिति वा। यथाह नारदः।

अर्थिना चोदितो योऽर्थः प्रत्यर्थी यदि तत्तथा।
प्रपद्य कारणं ब्रूयात् प्रत्यवस्कन्दनं स्मृतम्॥"

इति मिताक्षरा॥

अपि च ।
"अर्थिनाभिहितो योऽर्थः प्रत्यर्थी यदि तत्तथा।
प्रत्यक्षं कारणं ब्रूयात् प्रत्यवस्कन्दनं हि तत् ॥"
इति अवहारतत्त्वे हरदत्तमिश्रवचनम् ॥
प्रत्यवस्थाता, [तृ] त्रि, (प्रतिपक्षतया अवतिष्ठते इति । प्रति + अव + स्था + तृच् ।) शत्रुः । इति हेमचन्द्रः । २ । ७६२ ॥
प्रत्यवायः, पुं, (प्रत्यवायते इति । प्रति + अव + अय गतौ + घञ् ।) पापम् । दुरदृष्टम् । यथा,
"अयं केचिदुपासस्य दुरितस्य प्रचक्षते ।
अनुत्पत्तिं तथा चान्ये प्रत्यवायस्य मन्यते ॥"
इत्येकादशीतत्त्वे जाबालवचनम् ॥
प्रत्यक्षा, [न्] पुं, (प्रतिरूपः अक्षा ।) लौहिकम् । इति त्रिकाण्डशेषः ॥
प्रत्यहं, व, (अहः अहः प्रति । "नपुंसकादन्यतरस्याम् ।" ५ । ४ । १०८ । इति टच् ।) प्रतिदिनम् । यथा, कुमारसम्भवे ।
"गिरिश्चमुपचचार प्रत्यहं सा सुकेशी ॥"
प्रत्याकारः, पुं, (प्रतिरूपः खड्गेन सहश आकारो यस्य ।) खड्गकोषः । इति हेमचन्द्रः । २ । ४४७ ॥ खाप् इति भाषा ॥
प्रत्याख्यातः, त्रि, (प्रति + आ + ख्या + क्तः ।) दूरीकृतः । तत्पर्य्यायः । प्रत्यादिष्टः २ निरस्तः ३ निराकृतः ४ निर्जितः ५ विप्रकृतः ६ । इत्यमरः ।३।१।४०॥ क्वचित् पुस्तके प्रत्यादिष्टेत्यादिश्लोकमेकमधिकं दृश्यते तत्राद्यचतुष्कं प्रत्यादिष्टे । परचतुष्कं तिरस्कृते । इति तट्टीकायां भरतसुन्दरौ । (यथा, महाभारते । १ । २५६ । ८ ।
"वीरेणाहं तथानेन त्वया वापि यशस्विनि ! ।
प्रत्याख्याता न जीवामि सत्यमेतद्ब्रवीमि ते ॥")
प्रत्याख्यानं, क्ली, (प्रति + आ + ख्या + भावे ल्युट् ।) निराकरणम् । तत्पर्य्यायः । निरसनम् २ प्रत्यादेशः ३ निराकृतिः ४ । इत्यमरः ।३।१।३२ ॥ (यथा, मार्कण्डेये । ६१। ७२ ।
"प्रत्याख्यानादृणं ह्यतुं त्वत्तश्च पापमवाप्स्यसि ॥")
प्रत्यागमः, पुं, (प्रत्यागमनमिति । प्रति + आ + गम् + अप् ।) प्रत्यागमनम् । फिरे आसा इति भाषा ॥ यथा,—
"तीर्थयात्रासमारम्भे तीर्थप्रत्यागमेषु च ॥"
इति प्रायश्चित्ततत्त्वम् ॥
(यथा, हरिवंशे भविष्यपर्व्वणि । ६६ । २४ ।
"किमर्थं ब्रूहि विप्रेन्द्र ! अस्मिन् प्रत्यागमो हि वः ॥")
प्रत्यादिष्टः, त्रि, (प्रत्यादिशति स्मेति । प्रति + आ + दिश् + क्तः ।) प्रत्याख्यातः । तत्पर्य्यायः । निरस्तः २ प्रत्याख्यातः ३ निराकृतः ४ निर्जितः ५ विप्रकृतः ६ । इत्यमरः । ३। १।४० ॥
प्रत्यादेशः, पुं, (प्रत्यादिश्यतेऽनेनेति । प्रति + आ + दिश् + घञ् ।) निराकरणम् । प्रत्याख्यानम् । इत्यमरः । ३ । २ । ३१ ॥ (यथा, मेघदूते । ६६ ।
"प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ॥"
प्रसङ्गनिवारणम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ८ । ३३७ ।
"येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥")
भर्त्तारं प्रति देवानामादेशश्च ॥
प्रत्याघ्राणः, पुं, (प्रतिगतमाघ्राणमीषत्-ग्रन्थो यत्र ।) वातव्याधिविशेषः । तस्य लक्षणमाह ।
"विसृतपार्श्वहृदयं तरेवाग्रयोस्थितम् ।
प्रत्याघ्राणं विजानीयात् कफव्याकुलितानिलम् ॥"
विसृतपार्श्वहृदयं पार्श्वे हृदये विहाय जातं तरेवाघ्राणम् । कफव्याकुलितानिलं कफेनावरुद्धवातम् ॥ * ॥ अथ तस्य चिकित्सा ।
"प्रत्याघ्राणे समुत्पन्ने कुर्य्यात् वमनलङ्घने ।
शीघ्रमादि नियुञ्जीत पूर्ब्ववद्वस्तिकर्म्म च ॥"
इति भावप्रकाशः ॥
प्रत्यालीढं, क्ली, (प्रति + आ + लिह + क्तः ।) धन्विनां पादसंस्थानविशेषः । तच्चोर्द्धस्य वामपादप्रसारे दक्षिणपादसङ्कोचः । इत्यमरटीकायां भरतः ॥ धन्विनामवस्थानविशेषः । यथा,—
"स्यात् प्रत्यालीढमालीढं समं पादं तथापरम् ।
वैशाखं मण्डलस्थेति धन्विनां स्थानपञ्चकम् ॥
स्याद्ऊर्द्धपादसङ्कोचात् वामपादप्रसारणात् ।
प्रत्यालीढमिति प्रोक्तमालीढं तद्विपर्य्ययात् ॥
तुल्यं पादयुगं यत्र समपादसमाह्वयम् ।
विस्तृत्यन्तरितं पादयुगं वैशाखमुच्यते ।
मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ॥"
इति शब्दरत्नावली ॥
(यथा च यादवः ।
"स्थानानि धन्विनां पञ्च तत्र वैशाखमक्षिण्याम् ।
विस्तृत्यन्तरगौ पादौ मण्डलं तोरणाङ्गनौ ॥
समानौ स्यात् समपदमालीढं पदमग्रतः ।
दक्षिणं वाममाकृष्य प्रत्यालीढं विपर्य्ययः ॥")
अधिते, त्रि । इति मेदिनी । ढे, १२ ॥
प्रत्याप्ता, स्त्री, (प्रति किञ्चित् वस्तु लब्धोद्यत आ समन्तात् अश्नुते व्याप्नोतीति । प्रति + आ + अश् + अच् । ततष्टाप् ।) आकाङ्क्षा । यथा, ज्ञानार्णवतन्त्रे ।
"मृदोऽत्र मरीचिकासु पशुवत् प्रत्याप्तया धावति ॥"
प्रत्यासन्नः, त्रि, (प्रति + आ + सद् + क्तः ।) निकटवर्त्ती । इति जटाधरः ॥ (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्ये ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभावयतामार्य्येण ॥")
प्रत्यासरः, पुं, (प्रत्यासिद्यते इति । प्रति + आ + सद् + "सदेरप्" । ३ । ३ । ५७ । इति अप् ।) सैन्यपृष्ठः । इति शब्दरत्नावली ॥
प्रत्यासारः, पुं, (प्रत्यासिद्यते इति । प्रति + आ + सद् + घञ् ।) यूषस्य पञ्चाङ्गः । यूषस्य पञ्चाङ्गसंस्कारान्तरम् । तत्पर्य्यायः । यूषपानिः २ । इत्यमरभरतौ ॥
प्रत्याहरणं, क्ली, (प्रति + आ + हृ + भावे ल्युट् ।) प्रत्याहारः । इति शब्दरत्नावली ॥
प्रत्याहारः, पुं, (प्रति + आ + हृ + भावे घञ् ।) स्वस्वविषयेभ्य इन्द्रियाणामाकर्षणम् । तत्पर्य्यायः । उपादानम् २ । इत्यमरः ॥ प्रत्याहरणम् ३ । इति शब्दरत्नावली ॥ स च योगाङ्गविशेषः । यथा,
"प्रत्याहारश्च तर्कश्च प्राणायामस्तथैव च ।
समाधिर्धारणं ध्यानं षड्ङ्गो योग उच्यते ॥"
इति तट्टीकायां भरतः ॥
प्रत्याहारमाह ।
"शब्दादिष्वनुरक्तानि निग्रह्याक्षाणि योगवित् ।
कुर्य्याच्चित्तानुकारीणि प्रत्याहारपरायणः ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
अपि च ।
"इन्द्रियाणीन्द्रियार्थेभ्यः समाकृष्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेण संस्थितः ॥"
इति गारुड़े २४० अध्यायः ॥
(यथा च पातञ्जले साधनपादे ।
"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ॥" २९ ॥
"स्वस्वविषयसंप्रयोगाभावे चित्तस्वरूपानुकार इन्द्रियाणां प्रत्याहारः ॥" ५४ ॥)
अल्पेन बहूनां ग्रहणम् । यथा, अक्ष इति द्वाक्षरेण सर्व्वेश्वराणां ग्रहणम् । इति भरतः ॥
प्रत्युक्तिः, स्त्री, (प्रतिवचनमिति । प्रति + वच् + भावे क्तिन् । प्रतिरूपा उक्तिरिति वा ।) प्रत्युत्तरम् । इति शब्दरत्नावली ॥
प्रत्युत, व, (प्रति च उत च इति इदः ।) वैपरीत्यम् । यथा । बुधादिवाक्यं तु न नियामकं प्रमाणाभावात् प्रत्युत फलश्रुतेर्गुणफलबोधकमिति । इति निर्णयादित्यतत्त्वे जन्माष्टमीप्रकरणम् ॥ (यथा, मार्कण्डेये । ८५ । २० ।
"विधिनाकरणात् पुंभिरवज्ञाः क्रियते तु यः ।
संयमो सुरुये सोऽस्ते प्रत्युतार्थोपनिषदः ॥")
प्रत्युत्क्रमः, पुं, (प्रत्युत्क्रमणमिति । प्रति + उत् + क्रम् + घञ् ।) प्रयाणप्रयोजनानुकूलप्रयोजनानुष्ठानम् । तत्पर्य्यायः । प्रयोगार्थः २ । इत्यमरः ॥ प्रकृष्टयोगः । इति केचित् । प्रकृष्टयुद्धार्थसंक्रमः प्रयोगः तद्वाच्यः । इति केचित् । प्रयोगो युद्धं तदभिधेय इति केचित् । प्रत्युत्क्रमो युद्धार्थ इति भागुरिः । युद्धार्थं प्रथमाक्रान्तिः । इत्यपरे । जन्मोरम्भे प्रथमयुक्तिः प्रयोगः । इत्यपरे ॥ इति भरतः ॥
प्रत्युत्क्रान्तिः, स्त्री, (प्रति + उत् + क्रम् + क्तिन् ।) प्रत्युत्क्रमः । इत्यमरटीकायां क्षीरस्वामी ॥
प्रत्युत्तरं, क्ली, (प्रतिरूपमुत्तरम् ।) उत्तरं प्रति उत्तरम् । यथा । समेयं भूमिः क्रमागतत्वात् इति वाद्युक्ते समेयं भूमिर्देयत्वेनोपन्यस्यमानत्वात् इति प्रत्युत्तरम् । इति अवहारतत्त्वम् ॥
प्रत्युत्थानं, क्ली, (प्रत्युत्तीर्यते इति । प्रति + उत् + स्था + ल्युट् ।) अभ्युत्थानम् । गात्रोत्थानम् । यथा,—

प्रत्यूषः

"द्वीपान्तरेषु चैतस्यामि त्रिंशता चोडशैव च ।
पूर्णितः परया भक्त्या प्रत्युत्थानादिविधिः ॥"
इति श्रीभागवते । १० । ६८ । २० ॥

प्रत्युत्पन्नः, त्रि, (प्रति+उत्+पद्+क्तः ।) उत्पत्तिविशिष्टः । प्रत्युत्पन्नेषु यद्भावात् कर्मणि सप्तम्यन्तेन विग्रहः ॥

प्रत्युत्पन्नमतिः, त्रि, (प्रत्युत्पन्ना मतिर्यस्य ।) कार्य्यबुद्धियुक्तः । तत्पर्य्यायः । कृत्याकौशलमतिः २ कार्य्यदर्शी ३ तत्कालधीः ४ । इति हेमचन्द्रः ॥ प्रतिभान्वितः । इति जटाधरः ॥ (यथा,—
"प्रत्युत्पन्नमतिर्धीमान् वाक्यज्ञो विश्वारदः ।
आत्मसम्भरो यश्च स भिषक्पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनीयर् ।) धौतांशुकादयम् । इति मेदिनी । ये, ११४॥ (यथा, कुमारे । ७ । ११ ।
"सा मङ्गलस्नानविशुद्धगात्री
यद्धौतप्रत्युद्गमनीयवस्त्रा ॥"
क्वचित् प्रत्युद्गमनीयवस्त्रा इत्यपि पाठः ॥) वस्तुपस्थानयोग्ये पूजनीये च, त्रि । इति शब्दरत्नावली ॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप् ।) प्रत्युत्थानम् । यथा, याज्ञिकदर्पणे द्वितीयपरिच्छेदे । ७१ ।
"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्दूरतः ॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट् ।) प्रत्युत्थानम् । (यथा, प्रबोधचन्द्रोदये २ अङ्के ।
"आर्य्य ! प्रत्यासन्नो महाराजः । तत्प्रत्युद्गमनेन संभावयतामार्य्येण ॥")

प्रत्यूषः, पुं, (प्रतीषति विनाशयति अन्धकारमिति । प्रति+उष् दाहे+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) प्रत्यूषः । प्रातः । इत्यमरटीकायां मथुरेशः ॥ (यथा, पञ्चतन्त्रे । २ । २१२ ।
"प्रत्यूषे च स्वयङ्गमभ्युपेत्य द्वारदेशखितोऽपि विविधपौरस्त्रीस्तुस्तुकतया तामाक्षेपति ॥")

प्रत्यूषः, [स्] स्त्री, (प्रतीषति नाशयत्यन्धकारमिति । प्रति+उष्+"उषः किच्च ।" उणा० ४ । २२१ । इति असिः । स च किच्च ।) प्रत्यूषः । इत्यमरः । १ । ३ । २ । यथा, भरतसङ्गीतग्रन्थे ।
"याति यस्मिं पुरस्कारस्तस्मिंस्तस्मे प्रत्यूषः-
मादिशेत् ॥"

प्रत्यूषः, पुं, (प्रत्यूषति रजति कान्तकान्तिमिति । प्रति+उष् दीप्तौ+कः ।) प्रभातम् । इत्यमरः । १ । ३ । २ ॥ (यथा, मेघदूते । २१ ।
"दीर्घीकुर्व्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ॥")
कर्म्मः । इति शब्दरत्नावली । अग्निः । इति जटाधरः ॥ (यथा, विष्णुपुराणे । १ । १५ । १११ ।
"[illegible] ब्रह्मणस्तस्य यत्प्रमाणं निशादिनम् ।

प्रथितः

आयौ युगच्च सोमच्च वरुणेनाभिनोऽभवः ।
प्रत्यूषच्च प्रभावच्च वसवो नामभिः स्मृताः ॥")

प्रत्यूषः, [ष्] क्ली, (प्रति+उष्+घञ् ।) प्रभातम् । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । २१ ।
"प्रत्यूषस्यमरात्रे तु जीर्णेऽन्ने च प्रकुप्यति ॥")

प्रभूष्णुः, पुं, (प्रभूष्णुरिति । प्रति+ऊष्+क्नु ।) विप्रः । इत्यमरः । २ । २ । १६ ॥ (यथा, मार्कण्डेये । १६ । ५५ ।
"भवतुभ्यभूवादीव मया प्राप्तं भवतु वसम् ।
सर्व्वकामभवत्वापाप्ता प्रत्यूषाः परिवर्णिताः ॥")

प्रत्येकं, क्ली, एकं एकं प्रति । यथा, कर्पूरराजस्तोत्रे ।
"प्रतेरकं वा दशं वा वयमपि च परं वीक्ष्य-
मञ्जस्तुष्टम् ॥"
(यथा च कुमारे । २ । ३९ ।
"एवं यदाह्य भगवन्नाज्ञप्तं नः परैः परम् ।
प्रतेरकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो ! ॥")

प्रथ, क प्रख्याने । ख्यातौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०-च सेट् ।) रेफयुक्तः । क, प्राथयति । इति दुर्गादासः ॥

प्रथ, म ष ड ख्यातौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) रेफयुक्तः । म, प्रथयते । ष, प्रथा । ड, प्रथते गुणो प्रसिद्धः स्यादित्यर्थः । इति दुर्गादासः ॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति । प्रथ+"प्रथेरमच् ।" उणा० ५ । ६८ । इति अमच् ।) प्रधानम् । (यथा, रघुः । १० । ६७ ।
"राम रम्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥")
आदिमः । तत्पर्य्यायः । आदिः २ पूर्व्वः ३ पौरस्त्यः ४ आद्यः ५ । इत्यमरः ॥ अग्रिमः ६ इति जटाधरः ॥ प्राक्० । इत्यमरटीकायां भरतः ॥ (यथा, विष्णुपुराणे । १ । ११ । ५२ ।
"वाङ्मात्रार्थानखिलांश्चित्रं ज्ञानयेत्प्रथमं नरः ॥")

प्रथा, स्त्री, (प्रथ्+"विष्टिदादिभ्योऽङ् ।"३।३।१०४। इत्यङ् । ततष्टाप् ।) ख्यातिः । इत्यमरः । ३ । २ । ६ ॥ (यथा, राजतरङ्गिण्याम् । ५ । १२ ।
"या प्रथामगमन्नेति वापि वाग्यप्रकाशने ॥")

प्रथितः, त्रि, (प्रथ्+क्तः ।) ख्यातः । इत्यमरः । १ । १ । ६ ॥ (यथा, रघुः । ८ । ७६ ।
"तेनावतीर्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भविषक्तदेहः ॥"
खारोचिषमनोः पुत्रे, पुं । यथा, हरिवंशे । ७ । १४ ।
"स्वयंभुवः सुतस्तिस्रोत्तिरापो ह्यग्नीध्रयः स्मृतः ।
प्रथितश्च नभस्यश्च नभ ऊर्ज्जश्चयेव च ।
खारोचिषश्च पुत्राणां मनोस्तात । महात्मनः ॥")

प्रथितिः, स्त्री, (प्रथ्+"पृथिप्रथिभ्यां क्तितौ ।" उणा० ४ । १७२ । इति तिः । स च कित् ।) ख्यातिः । प्रथमत्वातीर्थादि स्त्रियामत्वेन विज्ञेया । इति भरतः ॥

प्रदक्षिणं

प्रथिमा, [न्] पुं, (पृथोर्भावः । "पृथ्वादिभ्य इमनिज्वा ।"५।१।१२२। इति इमनिच् । "प्रथीवृजादीनां नः ।"६।४ । १६१ । इति नः । "टेः ।" ६ । ४ । १५५ । इति टिलोपः ।) पृथोर्भावः । पृथुत्वम् । इति सिद्धान्तकौमुदी ॥ यथा,—
"प्रथिमावच्छब्दाभेन वर्णेन व्यवहार इव वा ।"
इति भरतः । ४ । १७ ॥
त्रि, अतिशयेन पृथुः । पृथुशब्दादतिशयार्थे इमनृप्रत्ययेन सिद्धः । इति वाक्यरत्नम् ॥

प्रथिमिनी, स्त्री, (प्रथिमानमर्हति । प्रथिमन् +"वंशाद्यां मन्ताच्छ ।" ५ । २ । १३० । इति इनिः ।) प्रथिमयुक्तस्त्री । इति सिद्धान्तकौमुदी ॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः । (पृथु+इष्ठन् ।) अतिशयेन पृथुत्वम् । इति सुग्धबोधव्याकरणम् ॥

प्रथुकः, पुं, पृथुकः । इत्यमरटीकायां रायमुकुटः ॥

प्रदः, त्रि, प्रकर्षेण ददाति यः । (प्र+दा+कः ।) प्रदाता । इति सिद्धान्तकौमुदी ॥ (कर्म्मण्यण्युपपदे तु "आतो युच् ।" ३ । २ । ३ । इति युच् । यथा, मनुः । ४ । २३२ ।
"यानशय्यापदो भार्य्यामैश्वर्य्यमभयप्रदः ॥")

प्रदक्षिणं, क्ली, पुं, (प्रगतं दक्षिणमिति । "तिङतिङः प्रभृतीनि च ।" २ । १ । १७ । इति समासः । दक्षिणावर्त्तेन देवादिवसुद्दिश्य गमनम् । यथा "एकं देवा रवौ सप्त सोमे कुर्य्यात्त्रिधावके । चत्वारि केशवे कुर्य्यात्त्रिये चार्द्धप्रदक्षिणम् ॥
इति कर्म्मलोचनम् ॥
सर्व्वदेवतातुष्टिदप्रदक्षिणं यथा,—
"प्रसार्य्य दक्षिणं हस्तं स्वयं गच्छन्निरः पुनः ।
दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः ॥
सङ्कल्पिन्या वेष्टयेत्ता देव्याः प्रीतिः प्रजायते ।
स च प्रदक्षिणो ज्ञेयः सर्व्वदेवैश्चतुष्टिदः ॥
सर्व्वान् कामान् समाप्नोति पञ्चाप्नोत्यमरावतीम् ॥
भुनक्ति ॥
मनसापि च यो दद्यादेवे भक्त्या प्रदक्षिणम् ।
प्रदक्षिणाद्दृढमयीं नरकाणि न पश्यति ॥"
इति कालिकापुराणे ७० अध्यायः ॥ ❁ ॥
अपि च । तन्त्रसारे ।
"दक्षिणाद्यावधीं गत्वा दिशं तस्माच्च याम्यतीम्
ततश्च दक्षिणां गत्वा नमस्कारक्षितीश्वरत् ।
अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम् ।
शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु ॥
यथासवक्रमेणैव सोमसूर्य्यं च अर्च्चयेत् ॥"
सोमसूर्य्यं यजनिःसरणज्ञानम् ।
"प्रसार्य्य दक्षिणं हस्तं स्वयं गच्छन्निरः पुनः ।
दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥
शिखा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम् ।
एकहस्तप्रमाणञ्च एकं वापि प्रदक्षिणम् ॥
अन्यथा दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
(कर्म्मणि, त्रि । यथा, रामायणे । ३ । ४२ । ५१ ।
"प्रदक्षिणीकृतिवधेन पक्षिणा
जटायुषा वृद्धिमता च धीमता ॥"

"प्रदक्षिणेन समर्थेन।" इति तट्टीकायां रामानुजः॥)

प्रदक्षिणा, स्त्री, (प्रगता दक्षिणमिति। "तिसृदृगु प्रथमतीनि च। २। १। १७।" इति समासः।) प्रदक्षिणम्। यथा,—

अथ प्रदक्षिणा।

"ततः प्रदक्षिणां कुर्यान्नत्वा भगवतो हरेः।
नामानि कीर्त्तयन् प्रीत्या तार्क्ष्य साष्टाङ्गवन्दनाम्॥"

प्रदक्षिणाविधानञ्च पाद्मे।

"एकां चक्रां रवेः सप्त तिस्रो दद्यादिनायके।
चतस्रः केशवे दद्यात् शिवे सप्तप्रदक्षिणाम्॥"

प्रदक्षिणामाहात्म्यं वाराहे।

"प्रदक्षिणां ये कुर्वन्ति भक्तियुक्तेन चेतसा।
न ते यमपुरं यान्ति यान्ति पुण्यकृतां गतिम्॥
यक्षिः प्रदक्षिणं कुर्यात् साष्टाङ्गप्रणामकम्।
दशाश्वमेधस्य फलं प्राप्नुयान्नात्र संशयः॥"

स्कान्दे ब्रह्मनारदसंवादे॥

"विष्णोर्विमानं यः कुर्यात् फलाङ्क्षी प्रदक्षिणम्।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः॥"

तत्रैव चातुर्मास्यमाहात्म्ये।

"चतुर्मासं अमीभिस्तु जगत् सर्वं चराचरम्।
क्रान्तं भवति विप्राग्र्य! तत्तीर्थगमनाधिकम्॥"

तत्रैवान्यत्र।

"प्रदक्षिणं तु यः कुर्याद्धरिं भक्त्या समन्वितः।
हंसयुक्तविमानेन विष्णुलोकं स गच्छति॥"

गारुडे।

"प्रदक्षिणेन चैकेन देवदेवस्य मन्दिरे।
फलेन यत् फलं नृणां तच्छृणुष्व नृपात्मज!।
पृथ्वीप्रदक्षिणफलं यत्तत् प्राप्य हरिं व्रजेत्॥"

अन्यत्र च।

"एवं ज्ञात्वा तु यत्नस्य यः कुर्यात्त्रिप्रदक्षिणम्।
सप्तद्वीपवतीपुण्यं लभते तु पदे पदे॥
पठनात्सप्तशतस्तु नामान्येवाथ केवलम्॥"

भक्तिसुधोदये।

"विष्णुं प्रदक्षिणीकुर्वन् यत्रयत्रावतिष्ठते पुनः।
तदेवावर्त्तनं तस्य पुनर्नावर्त्तते भवे॥"

हयशीर्षपाञ्चरात्रीये यमभगीरथसंवादे।

"प्रदक्षिणत्रयं कुर्यात् यो विष्णोर्मनुजेश्वर!।
सर्वपापविनिर्मुक्तो देवेन्द्रत्वं समश्नुते॥"

तत्रैव प्रदक्षिणमाहात्म्ये सुधर्म्मोपाख्यानारम्भे।

"भक्त्या कुर्वन्ति ये विष्णोः प्रदक्षिणचतुष्टयम्।
तेऽपि यान्ति परं स्थानं सर्वलोकोत्तमोत्तमम्॥
तत् स्नातं यत् सुधर्म्मस्य पूर्वेणेन्द्रेण यज्ञजन्मनि।
तस्याप्रदक्षिणाभावात्तद्दाक्षिण्यिरभूदिति॥"

अथ प्रदक्षिणायां निषिद्धं विष्णुस्तुतौ।

"एकहस्तप्रणामञ्च एका चैव प्रदक्षिणा।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम्॥"

अकाले भोजनादिसमये। किञ्च।

"तस्यास्य पुरतो नैव कुर्यात्तैव प्रदक्षिणाम्।
कुर्यादूर्ध्वमरिक्षाक्षं वैष्णवाग्रादवीं प्रभौ॥"

तथा चोक्तम्।

"प्रदक्षिणं न वर्णेभ्यं विप्रुषत्वाच्च कारणम्॥"

इति श्रीहरिभक्तिविलासे ८ विलासः॥

प्रदग्धं, त्रि, (प्र+दह्+क्तः।) प्रकर्षेण दग्धम्। इति मुग्धबोधव्याकरणम्॥

प्रदरः, पुं, (प्र+दॄ विदारणे+"ऋदोरप्।" ३। ३। ५७। इति भावादौ यथायथं अप्।) भङ्गः। वायुः। रत्नभरः॥ विदारः। नारीरजोभेदः। इति मेदिनी॥ * ॥ अस्य नामान्तरं अङ्गप्रदरम्। तत्तु पलितयोग्या रक्तादिधातुचरत्वम्। अस्य निदानम्। यथा,—

"विरुद्धमन्नाध्यशनादजीर्णाद्
गर्भप्रपाताद्रतिमैथुनाच्च।
यानाध्यशोकादतिकर्षणाच्च
भाराभिघाताच्छयनाद्दिवा च॥
अङ्गप्रदरं भवेत् सर्वं साङ्गमर्दं सवेदनम्॥
तस्यातिवृद्धौ दौर्ब्बल्यं भ्रमो मूर्च्छा मरस्तृधा।
दाहः प्रलापः पाण्डुत्वं तन्द्रा रोगाश्च वातजाः॥"

स च चतुर्विधो यथा,—

"तं श्लेष्मपित्तानिलसन्निपाते-
चतुःप्रकारं प्रदरं वदन्ति॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"आमं सपिच्छाप्रतिमं सपाण्डु-
पुलाकतोयप्रतिमं कफात्तु॥"

पैत्तिकस्य तस्य लक्षणम्।

"सपीतनीलासितरक्तसङ्घं
पित्तार्त्तियुक्तं भृशवेगि पित्तात्॥"

वातिकस्य तस्य लक्षणम्।

"रूक्षारुणं फेनिलमल्पमल्पं
वातार्त्तिवातात् पिच्छिलोदकाभम्॥"

सन्निपातजस्य तस्य लक्षणम्।

"सर्व्वैरसैर्पिच्छिलसर्ववर्णं
मज्जप्रकाशं कुणपं त्रिदोषात्।
तत्साध्यसाध्यं प्रवदन्ति तज्ज्ञा
न तत्र कुर्व्वीत भिषक् चिकित्सां॥"

इति माधवकरः॥ * ॥

अस्यौषधं यथा,—

"इक्षुतुल्या वटजाटा पीता क्षौद्रेण वै सह।
प्रदरं हरते रोगं नात्र कार्य्या विचारणा॥"

इति गारुडे १८६ अध्यायः॥ * ॥

अपि च।

"दधा सौवर्चलाजाजीमधूकं नीलसृप्रजम्।
पिबेत् सौद्रयुतं नारी वाताङ्गप्रदरप्रान्तये॥
एषां प्रत्येकं मात्रयम्। सर्व्वमेकीकृत्य दधा कर्षचतुष्टयेन पिष्ट्वा तत्र मात्राष्टकं मधु निःक्षिप्य पेयम्॥ * ॥

"मधुकं कर्षमेकन्तु चतुष्कर्षा सिताम्बुधा।
तण्डुलोदकसंपिष्टां लोहिते प्रदरे पिबेत्॥
वटा जाङ्गुलिकाख्या या तस्या मूलन्तु चूर्णितम्।
लोहिते प्रदरे खादेच्छर्करामधुसंयुतम्॥ * ॥
शुचिस्नाने आतपस्था मूलमुत्तरदिग्भवम्।
नीलसूत्रवलगुण्यां कटिबद्धं धरेत्सकृत्॥ * ॥

रसाञ्जनं तण्डुलतुल्य मूलं
क्षौद्रान्वितं तण्डुलतोयपीतम्।
अङ्गप्रदरं सर्व्वभवं निहन्ति
यावच्च भागौ सह नागरेण॥ * ॥

अश्वोकवल्कलजलाढकयुतं दुग्धं सुपूतीतलम्।
यथाबलं पिबेत् प्रातस्तीव्राङ्गप्रदरनाशकम्॥"

अशोकवल्कलपलं द्राक्षिंशत्पलसंमितेन जलेन निष्पाद्य पेयेन पलाष्टकार्द्धेन सह क्षीरं पलाष्टकमितं विपचेत् तत्तु दुग्धावशेषं कर्त्तव्यं तन्मध्ये पलचतुष्टयमितं दुग्धं पेयं बलिनरा-पेक्षया वा॥ * ॥

"कुशमूलं वटतुल्यं पेषयेत्तण्डुलाम्बुना।
एतत् पीत्वा वरं नारी प्रदरात् परिमुच्यते॥"

इति भावप्रकाशः॥

(तथास्य चिकित्सान्तरं यथा,—

"काकजानुकमूलं वा मूलं कार्पासमेव वा।
पाण्डुप्रदरशान्त्यर्थं पिबेत्तण्डुलवारिणा॥"

"कुशमूलं वटतुल्यं पेषयेत्तण्डुलाम्बुना।
एतत् पीत्वाज्यमाहारी प्रदरात् परिमुच्यते॥"

"प्रदरं हन्ति बलायामूलं दुग्धेन मधुयुतं पीतम्॥"

"गुडेन बदरीचूर्णं मोचमामं तथा पयः।
पीता लाजा च सक्तवः पृथक्प्रदरनाशनाः॥"

इति चक्रपाणिसंग्रहेऽङ्गप्रदराधिकारे॥)

प्रदर्शितः, त्रि, (प्र+दृश्+णिच्+क्तः।) आलोकितः। यथा,—

"क्रियावाचित्वमाख्यातं प्रसिद्धोऽर्थः प्रदर्शितः।
प्रयोगसोऽन्ये मन्यन्ते अनेकार्था हि धातवः॥"

इति मुग्धबोधटीकायां दुर्गादासः॥

प्रदलः, पुं, (प्रकर्षेण दलति दारयतीत्यर्थः। प्र+दल्+अच्।) नाशः। इति जटाधरः॥

प्रदानं, क्ली, (प्र+दा+भावे ल्युट्।) दानम्। इति शब्दरत्नावली॥ प्रलम्भनञ्च। (यथा, मनौ। ३। २४०।

"होमे प्रदाने भोज्ये च यदेभिरभिधीयते॥")

प्रदिक्, [ग्] स्त्री, (प्रगता दिशः।) विदिक्। इति जटाधरः॥ (यथा, महाभारते। १२। १७३। ४६।

"ततो विधानमनसो जनाःक्षुब्धमहौजसः।
यष्टाणि संपरिक्षिप्य ययुः प्रदिशो दिशः॥"

प्रलम्भा दिक्। (यथा, हरिवंशे। १६३। ८।

"प्रदिशो विदिशश्चैव प्रसरान्तरमाश्रिताः।
अन्धकारीकृतं सोम दिनेशो नैव दृश्यते॥")

प्रदिग्धं, क्ली, (प्र+दिह्+कर्म्मणि क्तः।) मांसवञ्जनभेदः। यथा, शब्दचन्द्रिकायाम्।

"मांसं बहुघृतैर्भृष्टं क्षिप्त्वा चोष्णाम्बुना सह।
क्षीरकाद्यैः समायुक्तं परिभुक्तं तदुच्यते॥
तदेव घृततक्राढ्यं प्रदिग्धं सञ्जिनामकम्॥"

चि, प्रक्षिप्तः॥ (क्षपितः। यथा, रामायणे। ५। ५। २८।

"अक्षतैरेवामिव चक्षतैर्वा
मांसप्रदिग्धामिव शैमरेक्षाम्॥")

प्रदीपः, पुं, (प्रकर्षेण दीपयति प्रकाशयति प्रदीप्यते इति वा। प्र+दीप्+क्विप्

प्रदीपः

दीपः । इत्यमरः । २ । ७ । १६८ ॥ तत्पर्य्यायः । कैवर्त्तादीपकः २ कज्जलध्वजः ३ शिखातिलः ४ यज्ञभुजिः ५ ज्योतिर्जातश्चः ६ दशैलजः ७ दीपातिलकः ८ दीपाख्यः ९ वयनोत्सवः १० । इति भरतः ॥ (यथा, रघौ । ५ । १७ ।

"कर्णं तदीयमपि तद्वद धार्य्यं
तद्वच्च मेखलिमयं तनुतत्रताम् ।
न व्याहरात् खादिभिरे कुमारः
प्रवर्त्तितो दीप इव प्रदोषात् ॥")

दीपमाहात्म्यम् । यथा,—

"दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ।
चतुर्वर्गप्रदो दीपस्तस्माद्दीपं प्रयच्छेत् प्रिये ! ॥"

तत्प्रकारा दीपा यथा,—

"तृणप्रदीपः प्रथमस्तिलजस्तेजोद्भवस्ततः ।
कार्पासः पञ्चमिर्व्याख्यातो वा राजिकोद्भवः ॥
दधिजश्चाज्यजश्चैव प्रदीपाः सप्त कीर्त्तिताः ॥"

तस्य पञ्चप्रकारा वर्त्तिका यथा,—

"पद्मतूलभवा दर्भगर्भतूलभवाथवा ।
वालजा वादरी वापि वल्कलोद्भवाथवा ॥
वर्त्तिका दीपतत्त्वेषु सदा पञ्चविधाः स्मृताः ॥"

दीपपात्राणि यथा,—

"तैजसं दारवं लौहं मार्त्तिकं नारिकेलजम् ।
तूलजालोद्भवं वापि दीपपात्रं प्रशस्यते ॥"*॥

दीपदाने दीपस्थापनं भूमौ तन्निषेधश्च यथा,—

"दीपदानाच्च कर्त्तव्यात्तैजसाद्वै च भैरव ! ।
दत्ते च दीपो दातव्यो न तु भूमौ कदाचन ॥
कर्त्तव्यहा वसुमती वहते न त्विदं द्वयम् ।
अकार्य्यपादघातच्च दीपसापच्चतैव च ॥
तस्मादृथा तु पृथिवीं तापं नाप्नोति वै तथा ।
दीपं दद्याच्चाहरहर्देवे अग्नेश्चोऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपसुतदत्तजेन्नरः ।
स ताप्यतापं नरकमाप्नोत्येव शतं समाः ॥ * ॥
सुदत्तवर्त्मः वक्त्रेण; प्राग्भेऽभवे सुदर्शने ।
ऊर्द्धाग्रे दत्तकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
स स दीप इति ख्यातो लोकवह्निस्तु स स्मृतः ॥
वैश्वानरादरः सर्व्वभूमितापविवर्जितः ।
सुस्निग्धः सुन्दरश्चित्तो निर्धूमो नातिदुस्तरः ॥
एतिर्लक्षणवर्त्तिस्तु प्रदीपः श्रीविवृद्धये ।
दीपदत्तस्थिते मुक्तिर्क्षेत्रेणैव प्रपूरिते ॥
एतिर्लक्षणवर्त्तिभ्यां तु चाक्षदीपः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
एतैश्च वर्जितो दीपो मध्यमः परिकीर्त्तितः ।
विहीनः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥"

इति कालिकापुराणे ६८ अध्यायः ॥ * ॥

कार्त्तिके तद्दानफलं यथा,—

"कार्त्तिके मासि यो दद्यात् प्रदीपं घृतैरादिना ।
आकाशे भस्मके वापि स चाक्षयफलं लभेत् ॥"

इति कालिकोत्तरम् ॥ * ॥

अपि च ।

"यमश्चण्डौ हरिं भक्त्या दीपं दत्त्वा दिवानिशम् ।
[illegible] जगत्पतिं हरिं याति दिवं हय ! ॥

प्रदेश

ज्ञात्वापदे विशेषेण तत्र पक्ष दिनानि तु ।
पुण्यानि तेषु यद्दत्तमक्षयं तन्मुखात्मिकम् ॥
इत्यादशां हरिस्तुष्टिप्रद दीपप्रव्याख्या सत्रिका ।
मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा ॥
द्वादश्यां तस्करो राजिदीपमुद्दीप्य यौवतः ।
कारत्वात् परमं प्राप्तो लोकं विष्णोः सनातनम् ॥
चमत्कोऽपि चयोदश्यां दीपान् दत्त्वाथरे; शतान् ।
वेधा जीवावती भूत्वा जगाम स्वर्गमक्षयम् ॥
सुव्रतोऽपि चतुर्दश्यां पूजयित्वा जनार्द्दनम् ।
निर्भीतिः परसंज्ञत्वा विष्णुलोकं जगाम च; ॥
गोपः कश्चिदमावास्यां पूजां कृत्वा च शार्ङ्गिणः ।
सुदुर्जयधनापालो राजराजेश्वरोऽभवत् ॥
तस्माद्दीपाः प्रदातव्या रात्रावस्तमिते रवौ ।
गृहेषु सर्व्वगोष्ठेषु चैत्येष्वायतनेषु च ॥
देवागारेषु रथ्यासु सभास्थानेषु सरःसु च ॥"

इत्यग्निपुराणम् ॥

प्रदीपनः, पुं, (प्रदीपयतीति । प्र+दीप्+णिच्+ल्युः ।) स्थावरविषभेदः । इत्यमरः । २ । ८ । १० ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"काकोलो गरलः चूडो वत्सनाभः प्रदीपनः ।
ग्रौक्तिकेयो ब्रह्मपुत्रो विषं स्थावरलो विषः ॥")

तस्य लक्षणम् यथा,—

"वर्णतो लोहितो यः स्यात् दीप्तिमान् दहनप्रभः ।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥"

इति राजनिर्घण्टः ॥

प्रकाशके, त्रि ॥

प्रदेशः, पुं, (प्रदिश्यते इति । प्र+दिश्+"हलश्च ।" ३ । ३ । १२१ । इति घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६ । ३ । १२२ । इति प्राप्तिको दीर्घाभावः ।) देशमात्रम् । (यथा, हरिवंशे भविष्यपर्व्वणि । ५ । ६६ ।

"गरुडादवरुह्याथ दीपिकादीपिते तदा ।
प्रदेशे पुष्करीकाक्षो स्थितस्तावत्सहामरैः ॥")

तत्पर्य्यायः । आख्यानम् २ आख्या ३ भूः ४ अवकाशः ५ स्थितिः ६ पदम् ७ । इति राजनिर्घण्टः ॥ तर्जन्यङ्गुष्ठयोर्मध्यम् । भित्तिः । इति मेदिनी । शे, २५ ॥ संज्ञा । इति निरुक्तम् । १ । ४ । २ ॥ तत्प्रयुक्तिप्रकारविशेषः । यथा,—

"प्रस्तुतस्यातिक्रान्तस्य वा प्रदेशः । यथा देवदत्तस्यानेन प्रत्यासन्नं तस्यायमदत्तस्यायमेवोद्धरिष्यतीति ।" इत्युत्तरत्र पञ्चघटितमेऽध्याये सुश्रुतेनोक्तम् ॥)

प्रदेशनं, क्ली, (प्रदिश्यते अनेनेति । प्र+दिश्+करणे ल्युट् ।) कृपादेरुपढौकनम् । भेटी इति ख्यातम् । तत्पर्य्यायः । प्राभृतम् २ उपायनम् ३ उपयाचम् ४ उपहारः ५ उपदा ६ । इत्यमरः । २ । ८ । २० । केचित्तु देवताभ्यो भक्त्या मिष्टान्नादिभक्ष्यञ्च प्रीत्या यत् प्रदत्तं ब्राह्मणादि दीयते तत् इत्याहुः । केचित्तु प्राभृतादि इदं मह्यं देवताब्राह्मणराजादिभ्यो यद्दीयते तत्र । उपायनादि चतुष्कं तुभ्यमिदं दीयते मह्यंतु मम कार्य्यं साधनीयमिति यद्दीयते श्रुती इति स्मार्त्ताः । किन्तु यदत्रमेवार्य्यमेवेति ब्राह्मणः । उपायनसुपयाचं प्राभृतञ्चोपदा क्रियाक्रियमाणा । इति भरतः ॥

प्रदेशिनी, स्त्री, (प्रदिश्यते अनयेति । प्र+दिश्+करणे ल्युट् ।) तर्जनी । इत्यमरटीकायां भरतः ॥

प्रदेशिनी, स्त्री, (प्रदिश्यतीति । प्र+दिश्+णिनिः ङीप् ।) तर्जनी । इत्यमरः । २ । ६ । ८२ ॥ (यथा, भट्टाभारते । १ । ८६ । २६ ।

"तेऽदर्शयन् प्रदेशिन्या तमेव नृपसत्तमम् ।
अस्थिभिर्ज्ञातरश्चैव तथाचक्षुश्च दारुजाः ॥"

"खेरङ्गुलेः पादाङ्गुष्ठप्रदेशिन्यौ द्व्यङ्गुलामते । प्रदेशिन्यास्तु मध्यमाङ्गुलिका कनिष्ठिका यथोत्तरं पञ्चमभागहीना ।" इति सुश्रुते शल्यस्थाने ३५ अध्याये ॥)

प्रदेष्टः, पुं, (प्रदिश्यते इति । प्र+दिश् क्षेपणे+तृच् ।) प्रक्षेपः । इति हेमचन्द्रः ॥ (यथा, सुश्रुते शल्यस्थाने । १३ अध्याये ।

"इक्षवश्चाग्निदग्धेऽपि जीवति प्रतिसारयेत् ।
क्षेत्राभ्यङ्गपरीषेकैः प्रदेहैश्च तथा भिषक् ॥"

यथा च "प्रदेहो बातश्लेष्मप्रशमनः सन्धानः शोधनो रोपणः शोषणः शोषवेदनापहश्च तस्योपयोगः व्रताव्रतेषु ।" इति सुश्रुते शल्यस्थानेऽष्टादशेऽध्याये ॥ व्यञ्जनविशेषः । तद्यथा —

"क्षुद्रः क्षपौदनं स्यात् प्रदेहांश्च सुसंस्कृतान् ॥"

इति च तत्र शल्यस्थाने ४६ अध्याये ॥)

प्रदोषः, पुं, (दोषा रात्रिः । प्रारम्भो दोषाया इति प्रादिसमासः । प्रकाशा दोषा रात्रिरत्रेति वा ।) रजनीमुखम् । इत्यमरः । १ । ४ । ६ ॥ तत्तु रात्रेः प्रथमदण्डचतुष्टयम् । यथा,—

"प्रदोषोऽस्तमयादूर्द्धं घटिकाद्वयमिष्यते ॥"

इति तिथ्यादितत्त्वम् ॥

(यथा, कुमारे । ५ । ४४ ।

"वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणाय कल्पते ॥")

दोषः । इति हेमचन्द्रः ॥ (प्रकृष्टो दोषो यस्येति । दुष्ट, त्रि । यथा, माघे । २ । ८८ ।

"ये चान्ये कालयवनप्राग्ज्योतिषकलिङ्गमादयः ।
तम.स्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥"

"ये चान्ये कालयवनप्राग्ज्योतिषकलिङ्गमादयो राजानस्तमःस्वभावाः तमोगुणप्रायाः अतएव तेऽपि प्रदोषं प्रकृष्टदोषम् । प्रदोषो दुष्टरात्रावितिवैद्यवल्लभौ । तामसमेवैनं चैद्यमनुयायिनः अनुयास्यन्ति चाढ्यप्रादिति भावः ॥" इति तट्टीकायां मल्लिनाथः ॥)

प्रद्यु, क्ली, प्रकृष्टा द्यौः स्वर्गो यस्मात् ततः । पुरुषम् । इति हेमचन्द्रटीकायां दुर्गादासः ॥

प्रद्युम्नः, पुं, (प्रकृष्टं द्युम्नं धनं यस्य ।) कन्दर्पः । इत्यमरः । १ । १ । २६ ॥ स वासुदेवस्य चतुर्थांशः । यथा,—

"एकदेवं चतुर्व्यूहं चतुर्धा पुरुषश्रुतः ।
विभेद वासुदेवोऽसौ प्रद्युम्नो हरिरव्ययः ॥

ज्ञात्वदेवायनो बालो विष्णुर्नारायणः स्वयम् ।
अपां तरतमाः पूर्वं खेच्छया प्रभवद्धरिः ॥"
इति कौर्मे ४८ अध्यायः ॥

अपि च ।
"अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ।
वासुदेवः स्वयं शैवः शास्त्रच्च प्रकृतेः परः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १२६ अध्यायः ॥
(मनुजागभेजातो मनोरपत्यभेदः । यथा, भागवते । ४ । १३ । १५–१६ ।
"मनोरपत्यं महिषी विरजान् नड्वला सुतान् ।
पुरुं कुत्सुं त्रितं द्युम्नं सत्यवन्तं ऋतं व्रतम् ॥
अग्निष्टोममतीरात्रं प्रद्युम्नं शिवलक्षुकम् ॥")

प्रद्योतः, पुं, (प्रकर्षेण द्योतः ।) दीप्तिः । इति हलायुधः ॥ (वंशभेदः । यथा, महाभारते । २ । १० । १५ ।
"क्षेमधूर्तः सत्यकर्मा प्रद्योतश्च महाबलः ॥")

प्रद्योतनः, पुं, (प्रद्योतते इति । प्र + द्युत् + "अकर्त्तरीति च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति ल्युट् ।) सूर्यः । इति हलायुधः ॥ (भावे ल्युट् ।) द्युतौ, स्त्री ॥

प्रद्रावः, पुं, (प्र + द्रु + "प्रे द्रुस्रुसुवः ।" ३ । ३ । २७ । इति घञ् ।) पलायनम् । इत्यमरः । २ । ८ । १११ ॥

प्रधर्षं, क्ली, (प्रदधातीति । प्र + धा + "सृपसृजि मन्दिनिधान्यः क्युः ।" उणा० २ । ८१ । इति बाहुलकात् क्युः आतो लोपश्च ।) युद्धम् । इत्यमरः । २ । ८ । १०३ ॥ (यथा, देवीभागवते । ४ । ७ । ५३ ।
"वैरं भवति वित्तार्थं दारार्थं वा परन्तप ।
एवमारहितौ कस्मात् चक्रतुः प्रधनं महत् ॥")
दारत्वम् । इति मेदिनी । ने, ८३ ॥ (प्रकृष्टं धनमस्येति विग्रहे प्रभूतधनविशिष्टे, त्रि ॥)

प्रधानं, क्ली, (प्रधत्ते सर्व्वमात्मनीति । प्र + धा + युच् ।) प्रकृतिः । (यथा, विष्णुपुराणे । १ । १ । २ ।
"सदसद्ब्रह्म यद्रूपं ईश्वरः पुमान्
गुणोर्म्मिसृष्टिस्थितिकालसंज्ञयः ।
प्रधानबुद्ध्यादिजगत् प्रपञ्चकः
स नोऽस्तु विष्णुर्गतिभूतिमुक्तिदः ॥"
महामात्यः । (यथा, मनुः । ७ । २०२ ।
"प्रधानानि च कुर्व्वीत तेषां धर्म्मान् यथोदितान् ।
दण्डैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥"
प्रधत्तेऽनेनाक्षिणी वा । प्र + धा + ल्युट् ।) परमात्मा । बुद्धिः । त्रि, प्रकृष्टम् । तत्पर्य्यायः । प्रशस्तम् २ प्रवेकम् ३ अद्भुतमम् ४ उत्तमम् ५ सुलभम् ६ वर्य्यम् ७ वरेण्यम् ८ प्रवर्हम् ९ अनवरार्घ्यम्१० परार्घ्यम् ११ अग्र्यम् १२ प्राग्रहरम् १३ प्रग्र्यम् १४ अग्र्यम् १५ अग्रीयम् १६ अग्रिमम् १७ । इत्यमरः । ३ । १ । ५७ ॥ (यथा, मनुः । ६ । १२१ ।
"उपस्थेनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत् ॥"

प्रधानः, पुं, (प्रधत्ते इति । प्र + धा + कुः ।) महामात्यः । सेनापत्यादिः । महामात्यः प्रधानः स्यादिति पुंस्काण्डे भोपालितः । इत्यमरटीकायां भरतः ॥ (राजभिदः । यथा, महाभारते । १२ । २३० । १८१ ।
"प्रधानो नाम राजा च अर्द्धं ते ओघमागतः ।
कुले तस्य वसुत्पन्ना सुलभा नाम विद्धि माम् ॥")

प्रधिः, पुं, (प्रधीयते अनेनेति । प्र + धा + "उपसर्गे धोः किः ।" ३ । ३ । ९२ । इति किः ।) नेमिः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, महाभारते । ५ । ५१ । ५८ ।
"मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्मनगामिनः ।
चक्रे प्रधिरिवासक्तो नास्य ध्रुवं पलायितुम् ॥")

प्रधीः, त्रि, (प्रकृष्टा धीर्बुद्धिर्यस्य ।) प्रकृष्टबुद्धियुक्तः । (प्रकृष्टा धीः ।) प्रकृष्टबुद्धौ, स्त्री । इति सुग्धबोधव्याकरणम् ॥

प्रधूपिता, स्त्री, (प्रकर्षेण धूपिता ।) लोहिता । खर्जूरगन्धवहिक् । इति मेदिनी । ते, २०७ ॥ प्रकर्षेण तप्ते दीप्ते च त्रि ॥

प्रनष्टः, त्रि, (प्र + नश् + क्तः ।) प्रकर्षेण नाशयुक्तः ।
"कच्चिदज्ञानसम्मोहः प्रनष्टस्ते धनञ्जय ! ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

प्रनिघातनं, क्ली, (प्र + नि + हन् + णिच् + भावे ल्युट् ।) प्रनिघातनम् । वधः । इति हेमचन्द्रः ॥

प्रपञ्चः, पुं, (प्रपञ्च्यते इति । प्र + पचि अस्तीकरणे + घञ् ।) विपर्य्यासः । विस्तरः । इत्यमरः ॥
"विपर्य्यासो वैपरीत्यं भ्रमो वा मायेति स्वामी ॥"
इति भरतः ॥ सञ्चयः । प्रतारणम् । इति मेदिनी । ने, १५ ॥ संसारः । यथा,—
"मायाकापट्यकल्लोलं पञ्चवल्लाविनिर्गतम् ।
षड्वाग्यायपलोपेतं प्रपञ्चं चातिदुर्लभम् ॥"
इति गुरुपादुकास्तोत्रम् ॥

प्रपञ्चितं, त्रि, (प्रपञ्च्यते स्मेति । प्र + पचि + क्तः ।) विस्तृतम् । भ्रमयुक्तम् । यथा,—
"आत्मानमेवात्मतया विजानतां
तैरेव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते
रज्ज्वामहेर्भोगभवाभवौ यथा ॥"
इति श्रीभागवते । १० । १४ । २५ ॥

प्रपथः, त्रि, (प्रकृष्टः पन्था यत्र ।) शिथिलः । इति भूरिप्रयोगः ॥ (प्रकृष्टः पन्था इति प्रादिसमासः । प्रकृष्टमार्गः । यथा ऋग्वेदे । १० । १७ । ४ ।
"आयुर्विश्वायुः परिपाति त्वा
पूषा त्वा पातु प्रपथे पुरस्तात् ॥")

प्रपदा, स्त्री, (प्रकृष्टा पदेति प्रादिसमासः ।) हरीतकी । इति राजनिर्घण्टः ॥ (हरीतकीग्रन्थेऽस्या विवरणं ज्ञातव्यम् ॥)

प्रपदं, क्ली, (प्रारब्धं प्रगतं वा पदमिति प्रादिसमासः ।) पादाग्रम् । इत्यमरः । २ । ६ । ७१ ॥ (यथा, मनौ । ६ । २२ ।
"भूमौ विपरिवर्त्तेत तिष्ठेद्वापि प्रपदैर्दिनम् ।
आक्रमेत्वाऽथवा विद्वान् सवनेभ्यूपशान्तये ॥")

प्रपन्नः, त्रि, (प्रपद्यते स्मेति । प्र + पद् + क्तः ।) शरणागतः । यथा,—
"गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
कैवल्यञ्च प्रपन्नोऽस्मि किमो जन्तुः करिष्यति ॥"
इति मार्कण्डेयपुराणे जन्तूपाख्यानो नाम ७ अध्यायः ॥

प्रपन्नाडः, पुं (प्रपन्नं अजति भूषयतीति । प्रपन्न + अज् + "कर्म्मण्यण् ।" ३ । २ । १ । टाप् । वृक्षयोरैक्यम् ।) प्रपुन्नाडः । इति रत्नमाला ॥ (विवृतिरस्य चम्पकशब्दे द्रष्टव्या ॥)

प्रपा, स्त्री, (प्रकर्षेण पिबन्त्यस्यामिति । प्र + पा + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । टाप् । धर्म्मार्थं को वा ।) पानीयशालिका । इत्यमरः । २ । २ । ७ ॥ (यथा, मनुः । ८ । ३१८ ।
"यस्तु रज्जुं घटं कूपादुद्धरेच्छिन्धि च त्रयम् ।
तस्य तद्धारयेद्द्रव्यं तस्य तस्मिन् समाचरेत् ॥")
यज्ञशाला । यथा, रामायणे । १ । ७३ । २० ।
"विश्वामित्रं पुरस्कृत्य सुतानन्दश्च धार्म्मिकम् ।
प्रयागमध्ये तु विधिवद्देवेर्द्दिं जला महातपाः ॥"
"प्रयागमध्ये यज्ञशालामध्ये इति कतकः ॥" इति तट्टीकायां रामानुजः ॥)

प्रपाणिः, पुं, (प्रकृष्टः पाणिः । प्रादिसमासः ।) करस्याधोदेशः । पाणितलम् । इति राजनिर्घण्टः ॥ (विषयोऽस्य यथा, "प्रपदप्राङ्गुलौ प्रपाणौ ।" इति चरके विमानेऽष्टमेऽध्याये ॥)

प्रपातः, पुं, (प्रपतत्यस्मादिति । प्र + पत् + "अकर्त्तरि च कारके संज्ञायाम् ।" ३ । ३ । १९ । इति घञ् ।) निरवलम्बनपर्व्वतादिपार्श्वम् । आरुहि इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो वास्ति । तत्पर्य्यायः । अवटः २ भृगुः ३ । इत्यमरः । २ । ३ । ३ ॥ (यथा, देवीभागवते । ४ । ७ । ४६ ।
"मधु पश्यति रूढात्मा प्रपातं नैव पश्यति ।
करोति निन्दितं कर्म्म नरकात् न बिभेति च ॥")
निर्झरः । इति मेदिनी । ते, १२७ ॥ (भावे घञ् ।) अधोवस्त्रम् । जूवस्त्रम् । इति हेमचन्द्रः ॥ (उड्डीनगतिविशेषः । यथा, पक्षितत्त्वे । २ । ५७ । "अथ सम्पातादिकानष्टावुड्डीनगतिविशेषान् वेत्ति । उक्तञ्च ।
सम्पातश्च प्रपातश्च महापातं निपातनम् ।
चक्रं तिर्य्यक् तथा चोर्द्धमष्टमं जवुसंज्ञकम् ॥"
प्रपातनम् । यथा, सुश्रुते चिकित्सितस्थाने । ४० अध्याये ।
"तत्र नस्यं देयं वातामिभूते शिरसि दग्धक्षीणशृङ्गप्रपातदारुणभग्नभैभूतकर्म्मचूर्णितनिरस्तरोगप्रपातनासारोगस्य ग्रीवायामाकुलाकालजवलीपलितप्रादुर्भावहतस्य प्रयोज्यं इति ॥")

प्रपाथी, [न्] त्रि, (प्रपिबतीति । प्र + पा + थिनिः ।) पानकर्त्ता । रसकर्त्ता । इति शब्दबोधव्याकरणम् ॥

प्रपौण्ड

प्रपावर्त्तं, क्ली, (प्रपेव वारिपूरकं वर्त्तम्। यद्वा, प्रकर्षेण पावयतीति। पू+णिच्+कर्त्तरि क्तुः।) वर्त्तभेदः। कामारख्यम्। इति शब्दमाला॥

प्रपितामहः, पुं, (प्रकर्षेण पितामहः पितामहस्यापि पिता।) ब्रह्मा। इति विकाण्डशेषः॥ (यथा, मार्कण्डेयपुराणे। १०१। ९२।

"तस्मिन्नेव तदन्तःस्थो भगवान् प्रपितामहः।
पद्मयोनिः स्वयं ब्रह्मा यः स्रष्टा जगतां प्रभुः॥")

पितामहपिता। इत्यमरः। २। ६। ९३॥ (यथा, मनौ। ३। २२१।

"पिता यस्य तु दुष्टः स्यात्सोऽपीहापि पितामहः।
पितुः स नाम संकीर्त्या कीर्त्तयेत्प्रपितामहम्॥")

प्रपितामही, स्त्री, (प्रपितामह+स्त्रियां ङीष्।) प्रपितामहपत्नी। यथा,—

"स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधामयम्।
पितामही च स्वेनैव स्वेनैव प्रपितामही॥"

इति दायभागः॥

प्रपुनाड़ः, पुं, (पुमांसं नाड़यतीति। नड़ बंधे+अण्। प्रणष्टः पुनाड़ः इति प्रादिसमासः। पृषोदरादित्वात् साधुः।) प्रपुन्नाड़ः। इत्यमरभरतौ॥ (अस्य श्लोकगुणा यथा,—

"कषायपक्वं श्लोकघ्नं वरुणप्रपुनाड़योः।
रूक्षं लघु च शीतञ्च वातपित्तप्रकोपनम्॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

प्रपुन्नड़ः, पुं, (प्रपुनाड़ः। पृषोदरादित्वात् दुस्थः।) प्रपुनाड़ः। इत्यमरभरतौ॥

प्रपुन्नाटः, पुं, (पुमांसं नाटयतीति। नट्+णिच्+अण्। प्रणष्टः पुन्नाट इति प्रादिसमासः।) चक्रमर्दः। इति राजनिर्घण्टः॥

प्रपुन्नाड़ः, पुं, (पुमांसं नाड़यतीति। नड़+अण्। प्रणष्टः पुन्नाड़ इति प्रादिसमासः।) चक्रमर्दकः। चाकुन्दिया इति भाषा। इत्यमरः। २। ४। १७७॥ (विवृतिरस्य चक्रमर्दकशब्दे द्रष्टव्या॥)

प्रपुन्नाल, पुं, (प्रपुन्नाड़ः। ड़स्य लत्वम्।) प्रपुन्नाड़ः। इति भरतसिद्धरूपकोषः॥

प्रपूरिका, स्त्री, (प्रपूर्य्यते कण्टकैरिति। प्र+पूर+कर्म्मणि घञ्। स्वार्थे कन्। यद्वा, प्रपूरयतीति। प्र+पूर+ण्वुल्। टाप्। कापि अत इत्वम्।) कण्टकारी। इति शब्दचन्द्रिका॥

प्रपौण्डरीकं, क्ली, (पुण्डरीक+स्वार्थे अण्। प्रणष्टं पौण्डरीकस्येव पुष्पं यस्य।) हस्तिनां मनुष्याणाञ्च चक्षुषः क्षुद्रविटपः। शालपर्णीपत्रतुल्यपत्रः। पुण्डरिया ख्यातः। इत्यमरभरतौ॥ तत्पर्य्यायः। चक्षुष्यम् २ शीतम् ३ श्रीपुष्पम् ४ पुण्डरी ५। इति रत्नमाला॥ पुण्डर्यम् ६ पुण्डरीयकम् ७ पौण्डरीयम् ८ सुपुष्पम् ९ साधुपुष्पम् १० अधुपुष्पम् ११॥ (यथा, सुश्रुते सूत्रस्थाने १६ अध्याये।

"प्रपौण्डरीकं मधुरं वमथ्नं धनमेव च।
तैलमेभिश्च सम्यक्तं श्रेष्ठं कफमतः क्रियाम्॥"

अस्य गुणाः। चक्षुर्हितत्वम्। मधुरत्वम्। तिक्तत्वम्। शीतत्वम्। पित्तरक्तप्रणश्यत्वं-दाहत्वनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"पौण्ड्र्यं मधुरं तिक्तं कषायं शुक्रलं हिमम्।
चक्षुष्यं मधुरं पाके वर्ण्यं पित्तकफापहम्॥"

इति भावप्रकाशः॥

प्रपौत्रः, पुं, (प्रकर्षेण पौत्रः। पौत्रस्यापि पुत्रत्वात् तथात्वम्।) पौत्रस्य पुत्रः। तत्पर्य्यायः। प्रतिनप्ता २। इति हेमचन्द्रः॥ (यथा, मार्कण्डेयपुराणे। ११०। १५।

"पुत्रान् पौत्रान् प्रपौत्रांश्च तथान्यानिष्टवान्धवान्।
पश्यतो मे हतान् दुःखं किमन्यं हि भविष्यति॥")

प्रपौत्री, स्त्री, (प्रपौत्र+ङीष्।) पौत्रस्य कन्या। इति हलायुधः॥

प्रफुल्लः, त्रि, (फलतीति। फि फलाविशरणे+क्तः। "आदितश्चेति।" ७। २। १६। इति इड्भावः। "निष्ठा।" ७। ४। ८८। इति उत्वं। "अनुपसर्गात् फुल्लक्षीबेति।" ८। २। ५५। इति निष्ठानस्य लः। ततः प्रादिसमासः। यद्वा, प्रफुल्लतीति। प्र+फुल्ल विकसने+अच्।) विकाशयुक्तः। तत्पर्य्यायः। उत्फुल्लः २ संफुल्लः ३ व्याकोषः ४ विकचः ५ स्फुटः ६ फुल्लः ७ विकसितः ८। इत्यमरः। २। ४। ७॥ प्रबुद्धः ९ शुम्भः १० स्मितः ११ उन्मिषितः १२ दलितः १३ स्फुटितः १४ उच्छ्वसितः १५ विजृम्भितः १६ स्मेरः १७ विनिद्रः १८ उन्निद्रः १९ विसृमरः २० हसितः २१। इति हेमचन्द्रः॥ (यथा, रघौ। २। २९।

"स पाटलायां गवि सन्निवर्त्यां
धनुर्धरः केशरिणं ददर्श।
अधित्यकायामिव धातुमय्यां
लोध्रद्रुमं सानुमतः प्रफुल्लम्॥")

प्रबन्धः, पुं, (प्रबध्यते इति। प्र+बन्ध+घञ्।) सन्दर्भः। इति विकाण्डशेषः॥ (प्र+बन्ध+भावे घञ्।) कायादिग्रथनम्। यथा,—

"प्रबन्धोऽयं बन्धोरखिलजगतामस्य सरसाम्॥"

इति हंसदूतः॥

प्रबन्धकल्पना, स्त्री, प्रबन्धस्य कल्पना रचना बहुकृता श्लोकसङ्ख्या कथा।

"प्रबन्धकल्पना श्लोकसङ्ख्या प्राज्ञाः कथां विदुः।
परम्पराश्रया या स्यात् सा मनाख्यायिका क्वचित्॥"

इति कोलाहलाचार्य्यः।

इत्यमरटीकायां भरतः॥

प्रबलः, पुं, (प्रणष्टं बलमिति। प्र+बल प्राणने+अच्।) पल्लवः। इति शब्दमाला॥ (प्रणष्टं बलमस्य।) प्रणष्टबलयुक्ते, त्रि। यथा, मार्कण्डेयपुराणे। ८१। ६।

"आक्रान्तः स महाभागस्तैस्तदा प्रबलादिभिः॥"

प्रणष्टबले स्त्रीलिङ्गः॥

प्रबला

प्रबला, स्त्री, (प्रणष्टं बलमस्याः।) प्रसारिणी। इति राजनिर्घण्टः॥ प्रणष्टबलवती च॥ (यथा, रघौ। ८। ५०।

"बन्धूनां हृतजीवितं मम
प्रबलामालक्षतेव वेदनाम्॥")

प्रवालः, पुं. क्ली, (प्रबलतीति। प्र+बल् प्राणने+"व्यलितिकसलेभ्यो वः।" ३। २। १४०। इति वः। यद्वा, प्र+बल्+णिच्+अच्।) रक्तवर्णवर्त्तुलाकाररत्नविशेषः। पला इति भाषा॥ तस्याधिष्ठात्री देवता मङ्गलः। इति ज्योतिषम्॥ तत्पर्य्यायः। विद्रुमः १। इत्यमरः। २। २। ६९॥ अङ्गारकमणिः २ अम्भोधिबल्लभः ३ भौमरत्नम् ४ रक्ताङ्गः ५ रक्ताकारः ६ लताग्रन्थिः ७। अस्य गुणाः। मधुरत्वम्। अम्लत्वम्। कफपित्तादिदोषनाशित्वम्। स्त्रीणां वीर्य्यकान्तिकरत्वम्। धृते मङ्गलदायित्वञ्च। इति राजनिर्घण्टः॥ *॥ अपि च। सारकत्वम्। शीतत्वम्। कषायत्वम्। स्वादुत्वम्। वान्तिकारित्वम्। चक्षुर्हितत्वम्। धारणे पापापहत्वं नाशित्वञ्च॥ इति राजवल्लभः॥ *॥ तस्य शुभलक्षणं यथा,—

"शुद्धं दृढं घनं वृत्तं स्निग्धं शोणरुचिप्रभम्।
समं गुरु सिराहीनं प्रवालं धारयेत् शुभम्॥"

तस्याशुभलक्षणं यथा,—

"गौरं रङ्गजलाक्रान्तं वक्रच्छिन्नं सकोटरम्।
रूक्षलक्षणं लघु श्वेतं प्रवालमशुभं त्यजेत्॥"

इति राजनिर्घण्टः॥ *॥

तस्योत्पत्त्यादि यथा,—

सूत उवाच।

"आदाय शोणरत्नाश्मं यमस्याकम्पनादिह।
विक्षेप तत्र जायन्ते विद्रुमाः सुमहागुणाः॥
तत्र प्रधानं शुद्धौघलोहिताभं
गुञ्जाफलापुष्पनिभं प्रदिष्टम्।
सजीवकं देवकरोमकञ्च
स्थानानि तेषु प्रभवं सुरागम्॥
अन्यत्र जातञ्च न तत् प्रधानं
मल्लं भवेच्छिल्पिविशेषयोगात्॥
प्रसन्नं कमलं स्निग्धं सुरागं विद्रुमं हि तत्।
धनधान्यकरं लोके विद्यान्निर्भयनाशनम्॥
प्रदीप्ता पुलकस्योक्ता रुधिराख्यस्य वै मणेः।
स्फटिकस्य विद्रुमस्य रत्नज्ञानाय शौनक!॥"

इति गारुड़े ८० अध्यायः॥ *॥

अथ विद्रुमपरीक्षा।

"श्वेतसागरमध्ये तु जायते यत्करी तु या।
विद्रुमा नाम रत्नाख्या दुर्लभा वज्ररूपिणी॥
पाषाणं प्रभवत्येषा प्रयत्नात् क्षपिता सती।
विद्रुमं नाम यत्नेनामनन्ति मनीषिणः॥*॥
ब्रह्मादिजातिभेदेन तच्चतुर्विधमुच्यते।
अरुणं शुभ्ररक्ताभं कोमलं स्निग्धमेव च।
प्रवालं विप्रजातिः स्यात् सुखवेध्यं मनोरमम्।
जवाबन्धूकसिन्दूरदाड़िमीकुसुमप्रभम्।
कठिनं दुर्भेद्यमस्निग्धं वज्रजातिं तदुच्यते॥

पलाशकुसुमाभासं तथा पाटलसन्निभम् ।
वैद्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मध्यकान्तिभम् ॥
रक्तोत्पलदलाकारं कठिनं न चिरद्युति ।
विदग्धं मूढजातिः स्यात्तायुवैश्यं तथैव च ॥*॥
रक्तता स्निग्धता दार्ढ्यं चिरद्युतिः सुवर्णता ।
प्रवालानां गुणाः प्रोक्ता धनधान्यकराः परैः ॥
हिमाद्रौ यत्तु संजातं तद्रक्तमतिनिष्ठुरम् ।
तच्च स्निग्धं भवेद्विम्बकलक्कोतिमधुरैः स्थितैः ।
तस्य धारणमात्रेण विषवेगः प्रशाम्यति ॥*॥
विवर्णता तु खरता प्रवाले दूषणद्वयम् ।
रेखाकाकपदौ विद्धूर्यथा वज्रेषु दोषकृत् ।
तथा प्रवाले सर्वत्र वर्जनीयं विचक्षणैः ॥
रेखा छत्राद्ययुग्मो लक्ष्मीमावर्तः कुलनाशनः ।
पङ्कजो रोगकृत् ख्यातो विन्दुर्धनविनाशकृत् ॥
आसः संजनयेन्नाशं नौलिका मृत्युकारिणी ।
मध्यं मृदुप्रवालस्य रूप्यद्विगुणमुच्यते ॥
धारणेऽस्यापि नियमो जातिभेदेन पूर्ववत् ॥"*॥
तथाहि ।
"विरूपजातिं विषमं विवर्णं
खरप्रवालं प्रवहन्ति ये ये ।
ते मृत्युमेवाचलनि ये वहन्ति
सत्यं वदत्येष शुतौ मुनीन्द्रः ॥"
इति युक्तिकल्पतरौ प्रवालपरीक्षा ॥*॥
(अस्य संशोधनादिकं यथा,—
"कुमार्या तन्तुलीयेन तुल्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि शुद्धयः ॥
मौक्तिकानि प्रवालानि तथा रत्नान्युपलतः ।
तत्तदादिविधवर्णानि स्थिरन्ते नात्र संशयः ॥
श्रीदुग्धेन प्रवालञ्च भावयित्वा तु शुष्कितं ।
मधोरपि तक्रसहितं क्षापयेत्तन्निरोधयेत् ।
पुटाग्निमध्यितापेन म्रियते प्रहरद्वये ॥
इति प्रवालमारणम् ॥"
इति वैद्यकरत्नेन्द्रसंग्रहे मारणमारणाधिकारे॥)
किंशुलयः । (यथा, कुमारे । १ । ३४ ।
"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्यादिशुदस्य तस्या-
स्ताम्रौष्ठपर्यस्तरुचः स्मितस्य ॥")
बीजादृक्षः । इति मेदिनी । ले, १०७ ॥

प्रवालफलं, क्ली, (प्रवालवद्रक्तं फलं यस्य ।) रक्तचन्दनम् । इति भावप्रकाशः ॥

प्रवालिकः, पुं, (प्रवालोऽस्यास्य वाहुल्येनेति । प्रवाल + "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) जीवशाकः । इति राजनिर्घण्टः ॥

प्रवाहुः, पुं, (प्रगतो बाहुमिति ।) कूर्मस्याधोभागः । यथा, विष्णुपुराणे ५ । ५ । १६ ।
"सुखं बाहुप्रबाहू च मनः सर्वेन्द्रियाणि च ।
रक्षणव्याहतैश्वर्यमेव नारायणोऽव्ययः ॥"

प्रवाहुकम्, व, समासकाले । ऊर्ध्वे । प्रवाहिकेति पाठान्तरम् । इति कौमुदीटीकातत्त्वबोधिनी ॥

प्रवुद्धः, त्रि, (प्र + बुध + क्तः ।) पण्डितः । प्रबुद्धः । इति हेमचन्द्रः ॥ (यथा, रघुः । १० । ६ ।
"प्रबुद्धपुण्डरीकाद्यं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारब्धसुखदर्शनम् ॥")
जागरितः । यथा, भट्टिः । ७ । १७ ।
"प्रातस्तरां प्रतिभ्यः प्रबुद्धः प्रबभञ्जविम् ॥"

प्रबोधः, पुं, (प्र + बुधौ + ञ अपगमे + भावे घञ् ।) विनिद्रत्वम् । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेये । ८१ । ६७ ।
"प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधञ्च क्रियतामस्य हनुमेतौ महासुरौ ।")
प्रज्ञाज्ञानञ्च । यथा,—
"तावत् सत्यं जगद्भाति प्रबोधे सत्यसद्भवेत् ॥"
इत्यात्मबोधग्रन्थः ॥
(यथा च रघुः । ५ । ६५ ।
"क्षत्रान्वयाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")

प्रबोधनं, क्ली, (प्र + बुध् + ल्युट् ।) न्यूनपूर्वगात्रस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्वसौगन्ध्योत्पादनम् । तत्पर्य्यायः । अनुबोधः २ । इत्यमरभरतौ । बोधजननञ्च ॥ (जागरणम् । यथा, हरिवंशे । १७७ । ७१ ।
"ततस्तूर्यनिनादैश्च गुह्यगानैश्च मङ्गलैः ।
प्रबोधनं महाबाहोः कृष्णस्याकियतालये ॥"
विकाशः । यथा, पद्मपुराणे कथासुखे ।
"तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा केनाप्युपायेनानुष्ठीयतामिति ॥" तथा च ऋतुसंहारे । ५ । १० ।
"सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ॥")

प्रबोधनी, स्त्री, (प्रबोध्यतेऽनयेति । प्र + बुध् + णिच् + ल्युट् + ङीप् ।) दुरालभा । इति राजनिर्घण्टः ॥ (प्रबुध्यते हरिरत्रेति ।) श्रीहरेरुत्थानैकादश्यादिः ।
अथ प्रबोधनीकृत्यम् ।
"ग्रथ्यन्यामिव कन्यास्यां नीराजोषधिमङ्गलत्वम् ।
प्रबोध्य कृष्णं संपूज्य विधिनारोहयेद्ध्वजम् ॥"
अथ प्रबोधनीकृत्यनित्यता ।
स्कान्दे तत्रैव ।
"जन्मप्रभृति यत् पुण्यं नरैरुपार्जितं भुवि ।
वृथा भवति तत्सर्वं न कृत्वा बोधवासरम् ॥"
अथ प्रबोधनीमाहात्म्यम् । तत्रैव ।
"प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ।
सुस्थिरं कृतबुद्धीनां शृणु त्वं मुनिसत्तम ! ॥
तावद्गर्जन्ति तीर्थानि आसप्तद्वसरांणि च ।
यावन्न प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके ॥
वाजपेयसहस्राणि अश्वमेधशतानि च ।
एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः ॥
दुर्लभश्चैव दुष्प्रापं त्रैलोक्यं सचराचरे ।
तदपि प्रार्थितं विप्र ! ददाति हरिबोधनी ॥
ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः ।
ददात्युपोषिता विप्र ! हेलया हरिबोधनी ॥

मेरुमन्दरतुल्यानि पापान्यतुलितान्यपि ।
एकेनैवोपवासेन दहते हरिबोधनी ॥
पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते ।
एकेनैवोपवासेन ददाति हरिबोधनी ॥"
किञ्च ।
"जातः स एव सुकृती कुलं तेनैव पावितम् ।
कार्त्तिके सुनिशार्दूल ! ज्ञता येन प्रबोधनी ॥
यानि कानि च तीर्थानि त्रैलोक्ये सन्ति च ।
तानि तस्य गृहे सम्यक् यः करोति प्रबोधनीम् ॥
सर्वं ज्ञतं परित्यज्य तुष्टार्थं चक्रपाणिनः ।
उपोष्यैकादशीं सम्यक् कार्त्तिके हरिबोधनीं ॥
किं तस्य बहुभिः ज्ञतैः परलोकप्रसैर्मुने ! ।
सकृदप्युपोषिता येन कार्त्तिके हरिबोधनी ॥
स ज्ञानी स हि योगी च स तपस्वी जितेन्द्रियः ।
स्वर्गमोक्षौ च तस्यास्तामुपोष्य हरिबोधनीम् ॥
विष्णोः प्रियतमा ह्येषा सर्वसारस्य दायिनी ।
इमां सकृदुपोष्यैव मुक्तिभागी भवेन्नरः ॥
प्रबोधनीमुपोष्यैव न गर्भे विशते नरः ।
सर्वधर्म्मान् परित्यज्य तस्मात् कुर्वीत नारद ! ॥
ज्ञानं दानं तपो होमः सप्तहिंश्च जनार्दनम् ।
नरैर्यत् क्रियते विप्र ! प्रबोधन्यां तदक्षयम् ।
महाव्रतमिदं पुत्र ! महापापौघनाशनम् ।
प्रबोधवासरं विष्णोर्विधिवत् सप्तपोषयेत् ॥
इतेनानेन देवेशं परितोष्य जनार्दनम् ।
विराजयन् दिशो दीप्त्या प्रयाति भुवनं हरेः ॥"
पाद्मे च तत्रैव ।
"दुग्धाब्धिभोगिशयने भगवानजस्रो
यस्मिन्दिने स्वपिति चाथ विबुध्यते च ।
तस्मिन्नलभ्यमनसामुपवासभाजां
पुंसां ददात्यभिमतं गरुडाङ्कधायी ॥"
वाराहे च ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या सप्तपोष्या प्रबोधनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशोत्तरम् ॥
उत्तराङ्गारकयुता यदि सा भवति प्रिये ! ।
तदा सा महती पुण्या कोटिकोटिगुणोत्तरा ॥
श्रवणे बोधने चैव कार्त्तिके च सुन्दरि ! ।
उपोष्यैव विधानेन यान्ति मङ्गलतां नराः ॥
एकादशी सोमयुता कार्त्तिकी माघि भाविनि ! ।
उत्तराभाद्रसंयोगे अगम्या सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता फले ॥"
तत्रैव श्रीयमनारदसंवादे ।
"अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं शुने ! ।
कार्त्तिकेऽमलपक्षे तु साक्षाद्देकादशी स्मृता ॥
भक्तिप्रदा हरेः सा तु नाम्ना ख्याता प्रबोधनी ।
या सा विष्णोः परा मूर्त्तिरव्यक्तानेकरूपिणी ॥
सा चिन्ता मानुषे लोके द्वादशी सुविपुलव ! ॥"
श्रीमथुरायाञ्च विशेषतः पाद्मे तत्रैव ।
"तावद्गर्जन्ति तीर्थानि वाजिमेधादयो मखाः ।

मथुरायां प्रिया विष्णोर्बभूवायातिबोधनी ॥
संसारदावतप्तानां कामक्रोधाग्निपायिनाम् ।
श्रीलक्ष्मीपादपद्मस्य सान्निध्यं प्रीतिदं यतः ॥
भवपाशनिबद्धानां वै प्राप्तिकेयं प्रबोधनी ।
कथं न देवते मर्त्यैर्नमुरायां क्रियन्यतः ॥"*॥
अथ विशेषतः प्रबोधन्यां श्रीभगवत्पूजादि-माहात्म्यम् । स्कान्दे तत्रैव प्रबोधनीमाहात्म्ये ।
"वेदयन्ति नरास्तस्यां भक्त्या देवस्य माधवम् ।
वसुपोष्य प्रसुप्तस्य पापैस्ते वसुपार्ज्जिते: ॥
बाल्ये यदार्ज्जितं वस्तु ! यौवने वार्द्धके च यत् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ॥
मुच्यार्द्धं मुनिशार्दूल ! सुगुह्यमपि नारद ! ।
तत् शास्त्रयति गोविन्दस्तिथौ तस्यां प्रपूजित: ॥"
किञ्च ।
"प्रबोधवासरे विष्णो: कुरुते च हरे: कथाम् ।
सप्तद्वीपावनीदाने यत् फलं तद्वदाम्यहम् ! ॥"
वाराहे च ।
"कौतुदस्य तु मासस्य या सिता द्वादशी भवेत् ।
अर्चयेद्यस्तु मां तत्र तस्य पुण्यफलं शृणु ॥
यावल्लोका हि वर्त्तन्ते यावत्स्थास्ये माधवि ! ।
मद्भक्तो जायते तावदन्यभक्तो न जायते ॥"*॥
तस्या अनुष्ठानं यथा,—
ब्रह्मोवाच ।
"शृणु मे भक्तित: पुत्र ! बोधार्थमेकादशीं हरे: ।
उपोष्या येन विधिना तं विप्र ! प्रवदामि ते ॥
कार्त्तिके शुक्लपक्षे तु दशम्यां नियत: शुचि: ।
स्नात्वा देवार्चनं कृत्वा वह्निकार्य्यं यथाविधि ॥
आचान्त: सुप्रसन्नात्मा हविष्यान्नं सुसंस्कृतम् ।
भुक्त्वाचम्य स्वपेत् सम्यक् स्मृत्वा श्रीपतिं च पादयो: ॥
रात्रेश्च पश्चिमे यामे समुत्थाय यथाविधि ।
स्नात्वा मन्त्रपुरीषे तु शौचं कुर्य्यादतन्द्रित: ॥
क्षालयेद्गुलमात्रन्तु शौरदृष्टसमुद्भवम् ।
भस्मवेद्दन्तकाष्ठञ्च खादेच्चामेत् प्रयत्नत: ॥
स्नात्वाङ्गानि तथाद्भिश्च चिरं ध्यायेज्जनार्दनम् ।
अतसीपुष्पसङ्काशं कमलाक्षं चतुर्भुजम् ॥
शङ्खचक्रगदापाणिं पीतवस्त्रं किरीटिनम् ।
प्रसन्नवदनं देवं सर्व्वलक्षणलक्षितम् ॥
ततश्चानुदये वारिस्थितेन परिगृह्य च ।
कुशान्वितं प्रगृह्णीयात् नियमं विष्णुतुष्टये ॥
ध्यात्वा जलं गृहीत्वा तु भानुरूपं जनार्दनम् ।
हस्तार्घं दापयेत् पश्चात् करतोयेन मानवम् ॥
एवमुच्चारयेद्वाक्यं तस्मिन् काले महामुने ! ।
एकादश्यां निराहार: स्थित्वा चैवापरेऽहनि ।
भोक्ष्येऽहं पुण्डरीकाक्ष ! शरणं मे भवाच्युत ! ॥
एवमुक्त्वा तत: सम्यक् नित्यकर्म्म समाधी: ।
समर्पयेद्विधानेन विष्णुं संपूजयेन्मुने ! ॥
सहस्रसंख्यया मन्त्र: सावित्र्यां संजपेद्द्विज: ।
सर्व्वपापक्षयकरीं व्रतस्य परिपूर्त्तये ॥"

इति पाद्मोत्तरखण्डे १०६ अध्याय: ॥ * ॥

अथ प्रबोधकालनिर्णय: । भविष्ये ।
"आ-भा-का-सितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रबोधापवर्त्तनादिकम् ॥"

पाद्मे ।
"पौष्यशुक्लो यदा नास्ति मैत्राद्यमपि नो त्रिषु ।
द्वादश्यामपि तत् कुर्य्यादुत्थानं शयनं हरे: ॥
त्रिषु स्नानो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत् ॥"
वाराहे च ।
"अपादनियमस्तत्र स्नाने वा परिवर्त्तने ।
पादयोगो यदा न स्याद्देवेशापि तदा भवेत् ॥"
किञ्च स्कान्दे ।
"रेवत्यन्तो यदा रात्रौ द्वादश्या च समन्वित: ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥
रेवत्यादिरथान्तो वा द्वादश्या च विना भवेत् ।
उभयोरप्यभावे तु सन्ध्यायाञ्च महोत्सव: ॥"
वाराहे च ।
"द्वादश्यां सन्धिसमये नक्षत्राणामसम्भवे ।
आ-भा-का-सितपक्षेषु शयनावर्त्तनादिकम् ॥"
अतएव पुष्करपुराणे ।
"यस्य यस्य तु देवस्य यन्नक्षत्रं तिथिश्च या ।
तस्य देवस्य तस्मिंश्च शयनावर्त्तनादिकम् ॥"*॥
अथ भगवत्प्रबोधनविधि: ।
"शयन्यामिव निष्पाद्य महापूजां जलाशये ।
स्नानं कृत्वाथ सङ्कल्पं कृत्वा तत्र प्रबोधयेत् ॥"
तत्र मन्त्र: ।
"ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्य्य-
सोमादिभिर्वन्दितपादपद्म: ।
बुध्यस्व देवेश जगन्निवास !
मन्त्रप्रभावेण सुखेन देव ! ॥
इयन्तु द्वादशी देव प्रबोधार्थं विनिर्म्मिता ।
त्वयैव सर्व्वलोकानां हितार्थं प्रेषणायिना ॥
उत्तिष्ठोत्तिष्ठ गोविन्द ! त्यज निद्रां जगत्पते ! ।
त्वयि सुप्ते जगत् सुप्तमुत्थिते चोत्थितं भवेत् ॥
गता मेघा वियच्चैव निर्म्मलं निर्म्मला दिश: ।
शारदानि च पुष्पाणि गृहाण मम केशवेति ॥"
उत्तिष्ठोत्तिष्ठेत्यत्र क्वचिच्चैवम् ।
"त्वयि सुप्ते जगन्नाथे जगत् सुप्तं भवेदिदम् ।
उत्थिते चेष्टते सर्व्वमुत्तिष्ठोत्तिष्ठ माधवेति ॥"
वाराहे च ।
"ब्रह्मेन्द्ररुद्रैरविनम्रभावो
भवान्घ्रिर्वन्दितवन्दनीय: ।
प्राप्ता तव द्वादशी कौतुदाख्या
जागृध्व जागृध्व च लोकनाथ ! ॥
मेघा गता निर्म्मलपूर्णचन्द्र:
शारदपुष्पाणि च लोकनाथ ! ।
अर्घं ददानीति च भक्तिहेतो-
र्जागृध्व जागृध्व च लोकनाथ ! ॥"
श्रुतिश्च । "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले" इत्यादि ।
"ततस्तल्पात् समुत्थाप्य स्नानं चत्वरादिनिस्वने: ।
तीरे सुखं निवेश्याथ प्रार्थयेत्तदनुग्रहम् ॥
तथा हि सप्तदीयस्कन्धे श्रीप्रह्लादस्तुतौ ।
"सोऽसावदभ्रकरुणो भगवान् विवृद्ध-
प्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् ।

उत्थाय विश्वविजयाय च नो विषादं
माध्व्या गिरापनयतात् पुरुष: पुराण: ॥"
इति ।
"तत: पुष्पाञ्जलिं दत्त्वा संस्थाप्य विधिवत् प्रभुम् ।
नीराज्य नामपूर्व्वञ्च वस्त्रादीनि समर्पयेत् ॥"
तथा च ब्राह्मे ।
"एकादश्यान्तु शुक्लायां कार्त्तिके मासि केशवम् ।
प्रसुप्तं बोधयेद्रात्रौ भक्तिश्रद्धासमन्वित: ॥
वृद्धगीतैस्तथा वाद्यैर्नृत्यशुभ्रसामगीतकै: ।
विना पुराणग्रन्थैश्च पुराणश्रवणेन च ॥
वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवै: ।
सुभाषितैरिन्द्रजालैर्भूमिशोभाभिरेव च ॥
पुष्पैर्धूपैश्च नैवेद्यैर्दीपवृक्षै: सुशोभनै: ।
होमैर्भक्ष्यैरपूपैश्च फलै: शाकैश्च पायसै: ॥
दध्योर्विकारैर्मधुना शाल्यान्नाद्यै: सदक्षिणै: ।
कुठेरकस्य मन्त्रार्घ्यं मालत्या नवनेन च ॥"
नवनं पुष्पविशेष: ।
"कुन्दाभ्यां सितरक्ताभ्यां चन्दनाभ्याञ्च सर्व्वदा ।
कुङ्कुमालक्तकाभ्याञ्च रक्तसर्षे: सकुङ्कुमै: ॥
तथा नानाविधै: पुष्पैर्नवैरक्षयाक्षतै: ॥"
एवमेव प्राय: पाद्मे च । तथा स्कान्दे च ।
"बहुपुष्पैर्बहुफलै: कर्पूरागुरुकुङ्कुमै: ॥
हरे: पूजा विधातव्या कार्त्तिके बोधवासरे ॥"
इति ॥
"इत्थं कृत्वा महापूजां महानीराजनं तथा ।
स्वस्तिवाच्यार्पयेत् कृत्वा सपुष्पाक्षतवारिका ॥
वेदस्तुत्यादिना स्तुत्वा स्वस्त्यस्त्वित्यादिना प्रभुम् ।
संप्रार्थ्य गीतवाद्यादिघोषैरारोहयेद्गृहम् ॥"
तथा च भविष्योत्तरे श्रीकृष्णयुधिष्ठिरसंवादे ।
"महातूर्य्यरवै रात्रौ भ्रामयेत् स्कन्दने स्थितम् ॥
उत्थितं देवदेवेशं नगरे पार्थिव: स्वयम् ।
दीपोद्योतकरे मार्गे नृत्यगीतसमाकुले ॥"
अथ रथयात्रामाहात्म्यं भविष्योत्तरे तत्रैव ।
"यं यं दामोदर: पश्येदुत्थितो धरणीधर: ।
तं तं प्रदेशं राजेन्द्र ! सर्व्वं स्वर्गाय कल्पयेत् ॥"
किञ्च ।
"यावत्पदानि कृष्णस्य रथस्याकर्षणं नर: ।
करोति क्रतुभिस्तानि तुल्यानि नरनायक ! ॥
रथस्थं ये निरीक्षन्ते कौतुकेनापि केशवम् ।
देवतानां गणा: सर्व्वे भवन्ति स्वपदादय: ॥
स्त्रियोऽपि मुक्तिमायान्ति रथयात्रापरायणा: ।
पिप्पलाश्वत्थभर्तृकुलं नयन्ति हरिमन्दिरम् ॥
कुर्व्वन्ति नर्त्तकीरूपं रथाग्रे कौतुकान्विताम् ।
अप्सरोभि: सह क्रीड़ां कुर्व्वन्तीन्द्राच्चतुर्हृदम् ॥
ये रथाग्रे प्रकुर्व्वन्ति गीतवाद्यादि मानवा: ।
देवलोकात् परिभ्रष्टा जायन्ते मल्लवेश्वरा: ॥
मौलीन स्कन्दनस्याग्रे गायमानाश्च गायका: ।
वादकै: सह राजेन्द्र ! प्रयान्ति हरिमन्दिरम् ॥
रथोत्सवे सकृद्दृष्ट्वा येषां हर्षोऽपि जायते ।
तेषां न नारकी पीड़ा यावदिन्द्राश्चतुर्दश ॥
रथोत्सवस्य माहात्म्यं कथौ वितनुते हि य:।
पुण्यवृद्ध्या विशेषेण लोभेनाप्यथवा नर: ॥

सप्तद्वीपवसुद्धात्रा रत्नधान्यसमन्विता ।
सशैलवनपुण्याढ्या तेन दत्ता मही भवेत् ॥"
अन्यच्च ।
"बोधनी जगदाधारा कार्त्तिके शुक्लपक्षतः ।
रथस्थो यत्र भगवांस्तुष्टो यच्छति वाञ्छितम् ॥
भजन्ते ये रथारूढं देवं सर्व्वेश्वरेश्वरम् ।
तेषां वाञ्छा फलवती कामानिष्टान् प्रयच्छति ॥
श्रीलक्ष्मारथशोभां ये प्रकुर्व्वन्ति प्रहर्षिताः ।
तेषां मनोरथावाप्तिं यच्छते पुरुषोत्तमः ॥
लक्ष्मास्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
वाञ्छितं तेभ्यो यच्छन्ति नित्यं सूर्य्यादयो ग्रहाः ॥
लक्ष्मास्य रथशोभां ये प्रकुर्व्वन्ति सुहर्षिताः ।
पदे पदे तथा पुत्र ! पुण्यं तेषां प्रयागजम् ॥
रथयात्रास्थिते लक्ष्मे जयेति प्रवदन्ति ये ।
जयेति च पुनर्य्यै वै प्रदत्तं पुण्यं वदाम्यहम् ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
वाराणस्यादितीर्थेषु देवानामेव दर्शने ।
यत् पुण्यं कविभिः प्रोक्तं कार्त्तिकेन च नरेश्वर ! ॥
जयशब्दे कृते विष्णौ रथस्थे तत् फलं लभेत् ।
रथस्थितो वरैर्यस्तु पूजितो धरणीधरः ।
यथालाभोपपन्नैश्च पुष्पैर्भक्त्या समर्चितः ॥
ददाति वाञ्छितान् कामानन्ते च परमं
पदम् ।
मङ्गलं ये प्रकुर्व्वन्ति धूपदीपादिलक्षया लक्षम् ॥
नैवेद्यं पक्वपूजाश्च भक्त्या नीराजनं हरेः ।
रथारूढस्य लक्ष्मास्य संग्रामे हरिवासरे ॥
फलं न लक्षया ज्ञातं जानाति यदि केशवः ।
ब्रह्महत्यारतो गोघ्नः भ्रूणहा ब्रह्मनिन्दकः ॥
महापातकयुक्तोऽपि ब्रह्महा गुरुतल्पगः ।
मद्यपः सर्व्वपापोऽपि कलिकालेन मोहितः ॥
रथायतः पदैकेन मुच्यते सर्व्वपातकैः ॥"
किञ्चान्यत्र ।
"रथारूढे महाविष्णौ ये कुर्व्वन्ति जयस्वनम् ।
पूजाद्यखिलपापेभ्यो मुक्ता यान्ति हरेः पदम् ॥"
किञ्च ।
"रथस्थाकर्षणं पूर्व्वं कुरुते देवनायकः ।
ततः सुराः सिद्धसङ्घा यक्षा गन्धर्व्वमानवाः ॥
इत्यत्र रथयात्राया विधिर्यस्तः स्वतोऽभवत् ।
तथापि वक्ष्यितव्यो विशेषोऽपि वितन्यते ॥"

अथ रथयात्राविधिः ।

"श्रीलक्ष्मे तु रथारूढे लक्ष्मा जयजयध्वनिम् ।
निशम्य च महापूजामाप्नोतीप्सितानि कौमे-
येन ॥"
तथा च विष्णुधर्म्मे ।
"वक्त्रं लोलोत्पलदलधि लसत्कुङ्कलाभ्यां सुनेत्रं
चन्द्राकारं रचिततिलकं चन्दनेनाक्षतैश्च ।
गत्वा लीलां जनसुखकरीं प्रेक्षणीयाक्षतोयं
पद्मावासां सततसुरसा धारयन् पातु विष्णुः ॥
मुक्तः शैलादिवाहैर्मधुरतररवत्किङ्किणीजाल-
मालै-
रत्नौघैर्मौक्तिकानामविरतमधिभिः संभृतैश्चैव
हारैः ।
हेमैः कुम्भैः पताकाग्रिवतरुचिभिर्भूषितः
कैतुमद्भि-
श्चक्रैर्नेमिग्रवन्धो दुरितहरहरेः पातु वेधो
रथो वः ॥
मोदन्तां सुजना ह्यनिन्दितधियः सल्लालिलो-
पद्मवाः
सख्याः सन्तु रसोद्भवाः प्रतिहतामिश्रा रमन्तां
सुखम् ।
रे रैवा गिरिगह्वराणि मह्यनाद्यानु व्रजध्वं भया-
दैत्यारिर्भगवानयं यदुपतिर्यानं समारोहति ॥
पलायध्वं पलायध्वं रे रे दितिजदानवाः ।
संरक्षणाय लोकानां रथारूढो हृषीकेशरी ॥
ततो विचित्रगह्वानि प्रतिष्ठाप्य महाप्रभोः ।
महाप्रसादमालाश्च स्वीकुर्य्यात् परया मुदा ॥"
तत्रैवाह्लादयोक्तम् ।
"भक्त्या यच्छति यो मालां वैष्णवीं मङ्गला-
मयाम् ।
न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥
तस्मात् सर्व्वप्रयत्नेन सर्व्वकामसमृद्धये ।
मालामेतां प्रयच्छीयात् सौख्यमोक्षप्रदायि-
नीम् ॥"
इति ॥
"संचिन्त्याह्लादयमाणश्च श्रीप्रह्लादादिभी रथम् ।
आकृष्य प्रेरयन् पूर्य्यां भ्रामयेद्वैष्णवैः सह ॥"
तथा च भविष्योत्तरे तत्रैव ।
"गृह्यमाणैर्भागवतैर्गीतवादित्रनिस्वनैः ।
भ्रामयेत् स्यन्दनं विष्णोः पुरमध्ये समन्ततः ॥"
किञ्च ।
"प्रबोधवासरे प्राप्ते कार्त्तिके पाण्डुनन्दन ! ।
देवालयेषु सर्व्वेषु पुरमध्ये समन्ततः ॥
भ्रामयेत्तूर्य्यनिर्घोषैः रथस्थं धरणीधरम् ॥"
किञ्च ।
"रथागमे सकुन्दस्य पुरशोभान्तु कारयेत् ।
सर्व्वतो रम्भयोपेतु पताकैरुपशोभितम् ॥
तोरणैर्बहुभिर्युक्तं रम्भास्तम्भैश्च शोभितम् ।
स्थाने स्थाने महीपाल ! कर्त्तव्यं पुण्यसंयुतम् ॥
विचित्ररथशोभा च कर्त्तव्या भाविकैर्नरैरिति ॥
रथेन गच्छन् भगवानुपगन्तोऽखिलैर्जनैः ।
स्वगेहागतवत्तस्याद्योऽन्यथा दोषो महान्
भवेत् ॥" * ॥
अथ रथानुगमनविधयः । तत्रैव ।
"रथेन सह गच्छन्ति प्राग्भूतः पृथतोऽग्रतः ।
विष्णुनैव समाः सर्व्वे भवन्ति अपचाधमाः ॥
रथस्थं ये न गच्छन्ति अममाद्यं जनार्द्दनम् ।
विप्राश्चण्डालसदृशा भवन्ति अपचाधमाः ॥"
किञ्च ।
"येषां गृहागतो याति रथस्थो मधुसूदनः ।
पूजा तैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्ज्जितैः ॥
अनर्चितो यदा याति गृहाद्यस्य महीधरः ।
पितरस्तस्य विमुखा वर्षाणां दश पञ्च च ॥
यः पुनः कुरुते पूजां गृहायाते तु माधवे ।
वसते श्वेतद्वीपे तु यावदिन्द्राश्चतुर्दश ॥"
अन्यच्च ।
"नानुव्रजति यो मोहाद्रथस्थं जगदीश्वरम् ।
ब्राह्मणिदग्धकर्त्तापि स भवेद्ब्रह्मराक्षसः ॥"
इति ॥
"अथ स्वमन्दिरं नीत्वा पूर्व्ववत् पूजयेत् प्रभुम् ।
रात्रौ जागरणं कुर्य्यान्नृत्यैर्वाद्यैर्वैष्णवैः समम् ॥"
अथ प्रबोधनीजागरणमाहात्म्यम् ।
स्कान्दे तत्रैव ।
"पूर्व्वजन्मसहस्रेषु पापं यत् समुपार्ज्जितम् ।
जागरेण प्रबोधस्यां दह्यते तूलराशिवत् ॥
हत्वापि पातकं घोरं ब्रह्महत्यादिकं नरः ।
स्थित्वा जागरणं विष्णोर्धूतपापो भवेद्ध्रुवम् ॥
कर्म्मणा मनसा वाचा पापं यत् समुपार्ज्जितम् ।
जागरेत्तच्च गोविन्दः प्रबोधस्यान्तु जागरे ॥
दुष्प्राप्यं यत् फलं विप्रैरश्वमेधादिभिर्मखैः ।
प्राप्यते तत् सुखेनैव प्रबोधस्यान्तु जागरे ॥
आप्लुत्य सर्व्वतीर्थानि दत्त्वा गां काञ्चनीं महीम् ।
न तत् फलमवाप्नोति यत् लक्ष्मा जागरं हरेः ॥
चन्द्रसूर्य्योपरागे तु यत् फलं परिकीर्त्तितम् ।
तत्सहस्रगुणं पुण्यं प्रबोधस्यान्तु जागरे ॥
स्नानं दानं तपो होमः स्वाध्यायस्तार्च्चनं हरेः ।
तत् सर्व्वं कोटिगुणितं प्रबोधस्यान्तु जागरे ॥
समतीतं भविष्यच्च वर्त्तमानं कुलायुतम् ।
विष्णुलोकं नयत्याशु जागरेण प्रबोधनी ॥
चलन्ति पितरो हृष्टा विष्णुलोकमलङ्कृताः ।
विमुक्ता नारकैर्दुःखैः कर्त्तुः लक्ष्मप्रजागरम् ॥
भार्य्यापत्ये तु ये जाता मानवाः पिङ्गलक्षया ।
तारयेत्ताश्च सन्देहः प्रबोधस्यां तु जागरे ॥"
किञ्च ।
"फलैर्नानाविधैर्दिव्यैः प्रबोधस्यान्तु जागरे ।
पूजे तोयं समादाय अर्घ्यं दद्याज्जनार्द्दने ॥
यत् फलं सर्व्वदानेषु सर्व्वतीर्थेषु यत् फलम् ।
तत् सर्व्वं कोटिगुणितं दत्त्वार्घ्यं बोधवासरे ॥"
प्राह्ने च तत्रैव ।
"अन्यत्रापि प्रिया विष्णोर्जागरे स्यात् प्रबो-
धनी ।
किं पुनर्मथुरायां सा ततो वै जन्मसद्मनि ॥
एकैवैकादशी लक्ष्मजन्मगेहे लता नरैः ।
ततोऽधिकं न कर्त्तव्यं लोके किञ्चन विद्यते ॥
रात्रौ जागरणं तत्र प्रीत्या कुर्व्वन्ति ये नराः ।
संसारे मोहजग्राह्ये सदा जायन्ति जायन्ति ॥"
किञ्च तत्रैव श्रीराधिकोपाख्यानान्ते ।

"प्रबोधनीजागरपुण्यवैभवात्
प्रसन्न दृष्टो विधिवाक्षसज्जगत् ।
चकार रासोत्सवनर्त्तनं सह
वृन्दावनेऽन्याभिरपीह राधया ॥
सा कृष्णमायाकृतगोपरूपिका
लक्ष्मेण लक्ष्मान्तरवाञ्छितेन ।
राधा महाप्रेमभवाप्तुलेन्द्रिया
निशेऽन्यलोकं कथया लतार्थसाम् ॥

तस्मात् प्रबोधनीं लक्ष्मा रात्रौ लक्ष्मा च जागरम् ।
सुमोचितं हरिं दृष्ट्वा का भीः संसारजा द्विजाः ॥

मथुरायान्तु किं वाच्यं जागरे हरिसन्निधौ ।
कार्त्तिके बोधनौ प्राप्य ततः श्रेयः परं न हि ॥
मथुरायां प्रबोधन्यां ज्ञातजागरजस्य हि ।
सम्पूर्णदानतो वैष्णवोऽमोघयद्व्रजराजसम् ॥
जागरस्य च माहात्म्यं गीतवादित्रजन्मनम् ।
हरेः प्रीतिकरं राज्ञे वक्तुं मे नैव शक्यते ॥
यस्तु मासति जागर्त्ति कौमुदीं द्वादशीं नरः ।
सर्व्वलोकान् परित्यज्य विष्णुलोकं स गच्छति ॥"
अतएवोक्तं तत्रैव ।
"राज्यमध्यन्न संत्यज्य स्नीतं निहतकण्टकम् ।
कार्त्तिके मथुरायां ये कौमुदीं जागरं चरेत् ॥"
अथ पारणादिलक्षणम् ।
"प्रातर्नित्यक्रियां कृत्वा स्नात्वा संभोज्य भूसुरान् ।
व्रतन्तु ज्ञानतश्छेदं प्रदद्याद्विष्णवादिकम् ॥
दानं यथाव्रतं तेभ्यो दत्त्वा पारणमाचरेत् ।
प्रवर्त्तयेच्च संयक्तं चातुर्म्मास्यव्रतेषु यत् ॥"
तथा च भविष्योत्तरे तत्रैव ।
"प्रभाते विमले स्नात्वा भोजयेद्व्रतविक्लवैः ॥
घृतक्षीरदधिक्षौद्रकाशारगुडमोदकैः ।
अर्घयेच्चन्दनैर्गन्धैः पुष्पैर्गन्धैर्द्विजोत्तमान् ॥
आचान्तेभ्यस्ततो दद्यात्तारं यत्किञ्चिदेव हि ।
सुवाचा सुमनोऽभीष्टपत्रपुष्पफलादिकम् ॥
चतुरो वार्षिकान्मासान् नियमं यस्तु यत् कृतम् ।
कथयित्वा द्विजेभ्यस्तद्दद्याद्धेनुं सदक्षिणाम् ॥"
एवमेव पाद्मे । तत्रैव किञ्चाधिकम् ।
"चातुर्म्मास्यव्रते विप्राः प्रमादाच्छिद्रवाचनम् ॥"

इति श्रीहरिभक्तिविलासे १६ विलासः ॥

प्रबोधिनी, स्त्री, (प्रबोधयति हरिमिति । प्र + बुध् + णिच् + णिनिः । ङीप् ।) प्रबोधनी । उत्थानैकादशी । यथा,—

वराह उवाच ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या उपोष्या या प्रबोधिनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीफलम् ॥
पूर्व्वभाद्रपदा योगे सैव वा द्वादशी भवेत् ।
अतीव महती तस्यां सर्व्वज्ञत्वमथाक्षयम् ॥
उत्तराङ्गारसहिता यदि चैकादशी भवेत् ।
तदा कोटिगुणं पुण्यं केशवाजभते फलम् ॥
सप्तदेवार्चितं तस्यां सर्व्वं ज्ञातमिहाक्षयम् ।
यथा प्रबोधिनी पुण्या तथा तस्यां क्षपेश्वरिः ॥
उपोष्या हि महाभागे ! अनन्तफलदा हि सा ।
शयने बोधने चैव हरेस्तु परिवर्त्तने ॥
उपोष्यैव विधानेन नरो निर्म्मलतां व्रजेत् ।
तस्मात् सर्व्वप्रयत्नेन द्वादशीं समुपोषयेत् ॥
यदीच्छेत विशालाक्षि ! शाश्वतीं गतिमात्मनः ।
एकादशी सोमयुक्ता कार्त्तिके मासि भामिनि ! ।
उत्तराभद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता प्रिये ! ॥
एकादशी भौमयुता यदा स्यादमृतधारिणि ! ॥
स्नात्वा देवं समभ्यर्च्च्य प्राप्नोति परमं फलम् ।
प्राप्नोति यत्फलं तद्धि द्वादशद्वादशीं नरः ॥
जलपूर्णं तदा कुम्भं स्थापयित्वा विचक्षणः ।
पञ्चरत्नसमोपेतं घृतपात्रयुतं तथा ॥
तस्यां स्वल्पे तु वरितं मत्स्यरूपं जनार्द्दनम् ।
मासमेकं सुवर्णेन सुतप्तेन वरानने ! ॥
स्नापयित्वा विधानेन कुङ्कुमेन विलेपितम् ।
पीतवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥
पूजयेत् कमलैर्देवि ! मङ्गलैः संजितेन्द्रियः ।
मत्स्यं कूर्म्मं वराहञ्च नारसिंहञ्च वामनम् ॥
रामं रामञ्च जामञ्च बुद्धञ्चैव तु कल्किनम् ।
एवं दशावतारांश्च पूजयेद्भक्तिसंयुतः ॥
पुष्पैर्धूपैस्तथा दीपैर्नैवेद्यैर्विविधैरपि ।
संपूज्यैवमलङ्कारैर्विविधैः पूजनञ्चरेत् ॥
ततस्तस्याग्रतो देयं नैवेद्यं पायितं घृतम् ।
एवं संपूज्य गोविन्दं दिवापि कमलेक्षणम् ॥
रात्रौ चोत्थापनं कार्य्यं देवदेवस्य सुव्रते ! ।
प्रभाते विमले स्नात्वा भक्त्या संपूज्य केशवम् ॥
पुष्पधूपादिनैवेद्यैः फलैर्नानाविधैः शुभैः ।
ततस्तु पूजयेद्विद्वानाचार्य्यं भक्तिसंयुतः ॥
अलङ्कारोपहारैश्च वस्त्राद्यैश्च स्वशक्तितः ।
पूजयित्वा विधानेन तं देवं प्रतिपादयेत् ॥
जगदादे जगद्रूप अनादे जगदादिजत् ।
अलक्ष्मायिन् जगद्योने प्रीयतां मे जनार्द्दन ! ॥
अनेनैव विधानेन कृत्वैकादशीं नरः ।
तस्य पुण्यं भवेद्यत्तु तच्छृणुष्व वसुन्धरे ! ॥
यदि वक्त्रसहस्राणां सहस्राणि भवन्ति हि ।
संख्यातुं नैव शक्यन्ते प्रबोधिन्यास्तथा गुणाः ॥
तथापि हे शुभाचेन मुक्त्या वक्ष्यामि तच्छृणु ।
चन्द्रनारार्कसङ्काशमधिरोहायानुत्तमैर्विभिः ॥
सहैव यानमारुह्येमं लोकं वसुन्धरे ! ।
ततः कल्पसहस्रान्ते समद्वीपेश्वरो भवेत् ॥
आयुरारोग्यसम्पन्नो जन्मासीनो भवेत्ततः ।
ब्रह्महत्यां सुरापञ्च स्तेयी च गुरुतल्पगः ॥
पापान्येतानि सर्व्वाणि श्रवणेनैव नाशयेत् ॥
पठ्येच्च धीमानधनोऽपि भक्त्या
शृणोत्यनुष्य इह धीयमानः ।
मुञ्चोति भक्तस्य मतिं ददाति
विकल्मषः सोऽपि दिवं प्रयाति ॥
दुःस्वप्नं प्रशमसुपैति पठ्यमाने
माहात्म्ये भवभयहारके नरस्य ।
यः कुर्य्यादुन्नतवरभेतदध्ययाया
बोधिन्याः किमुत फलन्तु तस्य वाच्यम् ॥
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम् ।
तैरात्मजन्म सफलं कृतं ये व्रतकारकाः ॥"

इति वराहपुराणे प्रबोधिनीमाहात्म्यम् ॥

प्रभञ्जनः, पुं, (प्रकर्षेण भनक्ति वृक्षादीनिति । प्र + भञ्ज् + युच् ।) वायुः । इत्यमरः । १ । १ । ६६ ॥ (यथा, महाभारते । ७ । १५४ । ७८ ।
"घटोत्कचसुतः श्रीमान् भिन्नाञ्जनचयोपमः ।
ररोध श्रीगिमायान्तं प्रभञ्जनमिवाद्रिराट् ॥"
मणिपुराधिपतिराजविशेषः । यथा, महाभारते । १ । २१७ । १८ ।
"राजा प्रभञ्जनो नाम कुलेऽस्मिन् समभूच्च ह ।
अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्तमम् ॥")
भञ्जनकर्त्तरि, त्रि ॥ (यथा, हरिवंशे । २४५ । १३ ।
"प्रभञ्जनो यो लोकानां युगान्ते सर्व्वनाशनः ॥"
यथा च महाभारते । १ । १२३ । १२ ।
"सा वज्रञ्जा विहस्याह पुत्रं देहि सुरोत्तम ! ।
बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम् ॥")

प्रभद्रः, पुं, (प्रकृष्टं भद्रं यस्मात् ।) शिवः । इति राजनिर्घण्टः ॥ (प्रकृष्टो भद्र इति प्रादिसमासः । श्रेष्ठे, त्रि ॥)

प्रभद्रा, स्त्री, (प्रकृष्टं भद्रं यस्मात् । टाप् ।) प्रसारिणी । इति राजनिर्घण्टः ॥

प्रभवः, पुं, (प्रभवत्यस्मादिति । प्र + भू + "अकर्त्तरि च कारके" इत्यधिकारात् अपादानार्थे । "ऋदोरप्" ३ । ३ । ५७ । इति अप् ।) जन्महेतुः । पित्रादिः । आद्योपलब्धिस्थानम् । आद्योपलब्धये प्रथमज्ञानार्थं यत् स्थानं देशः सः । यथा । वाल्मीकिः श्लोकप्रभवः । हिमवान् गङ्गाप्रभवः । इत्यमरभरतौ ॥ अर्पा जलम् । सुनिभेदः । इति हेमचन्द्रः ॥ पराक्रमः । इति मेदिनी । वे, ४१ ॥ जन्म । इति शब्दरत्नावली ॥ (यथा, कुमारे । ५ । ८२ ।
"विवक्षता दोषमपि श्रुतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभवोऽपि कारणं
कथं स जन्यप्रभवो भविष्यति ॥"
सृष्टिः । यथा, देवीभागवते । १ । १६ । २ ।
"महाप्रलया प्रभावेन त्वं मां विस्मृतवान् पुरा ।
प्रभवे प्रलये जाते भूत्वा भूत्वा पुनः पुनः ॥"
साध्यभेदः । यथा, हरिवंशे । १८६ । ४४ ।
"धर्म्मात्तस्मात्प्रभवः कामः साध्यासाध्यान् यतो यतः ।
प्रभवं भवनस्यैवमीशानं सुरभीश्वरम् ॥"
त्रि, प्रभूतः । यथा, ऋग्वेदे । २ । ३८ । ५ ।
"नानौकांसि दुर्य्यो विश्वमायुर्वि तिष्ठते प्रभवः
शोको अग्नेः ॥"
"प्रभवः प्रभूतो अग्नेः शोकस्तेजः ।" इति तद्भाष्ये सायणः ॥)

प्रभविष्णुः, पुं, (प्रभवितुं शीलमस्येति । प्र + भू + "सुवस्च ।" ३ । २ । १३८ । इति इष्णुच् ।) वटुकभैरवस्याष्टोत्तरशतनामान्तर्गतनामविशेषः । यथा । "प्रभविष्णुः प्रभाववान् ।" इत्यादि विश्वसारतन्त्रे आपदुद्धारकल्पः ॥ प्रभुः । यथा,
"न भर्त्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥"
इति दायभागः ॥

प्रकर्षेण भवनशीले, त्रि ॥

प्रभविष्णुता, स्त्री, प्रभुता । प्रभविष्णुशब्दात् भावार्थे तप्रत्ययेन पदं सिध्यतम् ॥ (यथा, राजतरङ्गिण्याम् । २ । ४७ ।
"यत्साध्यानि दुःखानि क्षेपुं न प्रभविष्णुता ।
तज्जडोपाज ! मन्तां मन्युस्तस्य किमङ्गनम् ॥")

प्रभाक

प्रभा, स्त्री, (प्रकर्षेण भातीति। प्र+भा+"आतश्चोपसर्गे।" ३। ३। १०६। इति अङ्।) कुबेरपुरी। इति हेमचन्द्रः। २। १०४॥ (प्र+भा+भावे अङ्।) दीप्तिः। तत्पर्य्यायः। रोचिः २ द्युतिः ३ द्योतिः ४ विभा ५ ओजः ६ भाः ७ रुचिः ८ विभा ९ आलोकः १० प्रकाशः ११ तेजः १२ रुक् १३। इति राजनिर्घण्टः॥ * ॥ (यथा, रामायणे। २।३६।१८।

"अराजयत वैदेही वेश्म तत् सुविभूषिता।
उल्लतोऽंशुमतः काले खं प्रभेव विवस्वतः॥"

तथा च महाभारते। ३। १३। १७।

"रतीव रूपिणी किञ्चमनङ्गाङ्गविहारिणी।
अतीव भ्राजसे सुभ्रु! प्रभेवेन्दोरनुत्तमा॥")

गोपीविशेषः। यथा,—

"दृष्ट्वा प्रभया गोप्या युक्तो वृन्दावने वने।
सद्योमसृग्भ्रमात्रेण तिरोधानं गतं त्वया॥
प्रभा देहं परित्यज्य जगाम सूर्य्यमण्डलम्।
ततश्चक्षुः श्रोत्रञ्च तीव्रं तेजो बभूव ह॥
संविभज्य त्वया दत्तं प्रेम्णाऽस्य वदता पुरा।
विन्दध्वं चक्षुषोर्लोकं लज्जया मद्वचेन च॥
कृताञ्जलय किञ्चिच्च नृपेभ्यश्चापि किञ्चन।
किञ्चित् पुरुषसिंहेभ्यो देवेभ्यश्चापि किञ्चन॥
किञ्चिद्दस्युजनेभ्यश्च नागेभ्यश्चापि किञ्चन।
ब्राह्मणेभ्यो मुनिभ्यश्च तपस्विभ्यश्च किञ्चन॥
स्त्रीभ्यः सौभाग्ययुक्ताभ्यो यशस्विभ्यश्च किञ्चन।
तच्च दत्त्वा तु सर्व्वेभ्यः पूर्व्वं रोदितुमुद्यतः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ११। ५७—६२॥

दुर्गा। यथा,—

"यमस्य भगिनी जाता यमुना तेन सा मता।
प्रभा प्रसादद्योतत्वात् द्योतना चन्द्रार्क-
मालिनी॥"

इति देवीपुराणे ४५ अध्यायः॥ * ॥

(इयं हि सूर्य्यबिम्बे एतन्नाम्ना कीर्त्यते। यथा, देवीभागवते। ७। ३०। ८२।

"देवलोके तथेन्द्राणी ब्रह्मलोके सरस्वती।
सूर्य्यबिम्बे प्रभा नाम मातृणां वेधावी मता॥")

सूर्य्यपत्नी। यथा,—

सूत उवाच।

"विवस्वान् काश्यपात् पूर्व्वमदित्यामभवत् पुरा।
तस्य पत्नीत्रयमभूत संज्ञा राज्ञी प्रभा तथा॥
रेवतस्य सुता राज्ञी रेवन्तं सुषुवे सुतम्।
प्रभा प्रभातं सुषुवे त्वाष्ट्री संज्ञा तथा मनुम्॥"

इति मात्स्ये। ११। २—३॥

(द्वादशाक्षरवृत्तिविशेषः। तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम्।

"वसुयुगविरतिर्नगौ रौ प्रभा॥")

प्रभाकरः, पुं, (प्रभां करोतीति। कृ+"दिवाविभानिशाप्रभेति।" ३। २। २१। इति टः।) सूर्य्यः। (यथा, रघौ। १०। ७३।

"क्षणादुरपधूमत्वात् प्रसन्नत्वात् प्रभाकरः।
रत्नोपप्लुतावास्तामपविद्धमुचाविव॥")

अग्निः। चन्द्रः। (यथा, महाभारते। ७।६६।५।

"तावतीव रथानीकं विसृक्तौ पृतनर्षभौ।
दहतो यथा राहोरास्याच्छुक्लौ प्रभाकरौ॥"

"प्रभाकरौ चन्द्रसूर्य्यौ॥") सत्रुः। इति शब्दरत्नावली॥ अर्कवृक्षः। इत्यमरः। १।३।७८॥ (अष्टममन्वन्तरे देवगणभेदः। यथा, मार्कण्डेयपुराणे। ८०। ६।

"तपस्तप्यन्त सुकृत द्युतिर्ज्योतिः प्रभाकरः॥"

ऋचिर्वत्सीयसुनिविशेषः। यथा, हरिवंशे। ३१। १०।

"ऋचिर्जातोऽग्निवंशे तु तासां भर्त्ता प्रभाकरः।
भद्रायां जनयामास सुतसोमं यशस्विनम्॥"

नागभेदः। यथा, महाभारते। १। ३५। १५।

"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः॥"

मीमांसकप्रभेदः। स च गुरुत्वेन प्रसिद्धः। तस्य मतं दर्शनशास्त्रादौ प्राभाकरमतमिति प्रसिद्धम्। यदुक्तं वेदान्तसारे।५३। "प्राभाकरतार्किकौ तु 'अन्योऽन्तरात्मा आनन्दमय' इत्यादिश्रुतेः सुषुप्तौ बुद्ध्यादीनामभावे लयदर्शनात् अहमस्योऽहं ज्ञानीत्याद्यनुभवाच्च आत्मानमात्मेति वदतः॥" स्त्री, कुशद्वीपस्थवर्षभेदः। यथा, मात्स्ये। १२१। ६८।

"महिषं महिषस्थापि पुनश्चापि प्रभाकरम्॥")

प्रभाकोटः, पुं, (प्रभान्वितः कोट इति मध्यलोपी समासः।) खद्योतः। इति राजनिर्घण्टः॥

प्रभाक्षणः, पुं, (शोभाक्षणः। इति हेमचन्द्रः॥

प्रभातं, क्ली, (प्रकर्षेण भातुं प्रवृत्तमिति। प्र+भा+आदिकर्म्मणि क्तः। यद्वा, प्रकृष्टं भातं दीप्तिरत्रेति।) प्रातःकालः। तत्पर्य्यायः। प्रत्यूषः २ अहर्मुखम् ३ कल्यम् ४ उषः ५ प्रत्युषः ६। इत्यमरः। १। ४। ३॥ दिनादिः ७ निशान्तम् ८ युष्मम् ९ प्रगे १० प्राह्णम् ११। इति राजनिर्घण्टः॥ गोसः १२ गोसङ्गः १३ ऊषः १४ ऊषकम् १५ उषा १६ ऊषा १७ विभातम् १८। इति शब्दरत्नावली॥ * ॥ (यथा,—

"प्रभातं यः स्मरेन्नित्यं दुर्गा दुर्गाक्षरद्वयम्।
आपदस्तस्य नश्यन्ति तमः सूर्य्योदये यथा॥"

इति धर्म्मशास्त्रम्॥)

तत्र दर्शनीया यथा,—

"वैद्यः पुरोहितो मन्त्री ज्योतिषोऽथ चतुर्थकः।
प्रभातकाले द्रष्टव्यो नित्यं स्वश्रेयमिच्छता॥"

इति राजवल्लभः॥

प्रभावः, पुं, (प्र+भू+घञ्।) कोषदण्डजतेजः। तत्पर्य्यायः। प्रतापः २। इत्यमरः। २।८।२०॥

"कोषो धनं दण्डो दमः तद्धेतुत्वात् सैन्यमपि दण्डः ताभ्यां यत्तेजो जायते स प्रतापः प्रभावश्च कथ्यते।" इति भरतः॥ शक्तिः। (यथा,—

"प्रभावतो यथा धात्री लकुचस्य रसादिभिः।
समापि कुरुते दोषत्रितयस्य विनाशनम्॥
क्वचित्तु केवलं द्रव्यं कर्म्म कुर्य्यात् प्रभावतः।
ज्वरं हन्ति शिरोरुङ्घा सहदेवी जटा यथा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रभावः

तेजः। इति हेमचन्द्रः। ३। ४०४॥ (यथा, रामायणे। २। २३। ३८।

"अद्य मेऽस्त्रप्रभावस्य प्रभावः प्रभविष्यति।
राक्षसाप्रसृतां कर्त्तुं प्रसृतस्य तव प्रभो!॥")

प्राप्तिः। इति मेदिनी। वे, ७०॥ (प्रभातजातः सूर्य्यपुत्रः। इति मात्स्ये। ११। ३॥

कलावत्यां जातः खरोचिषो मनोः पुत्रविशेषः। यथा, मार्कण्डेये। ९६। ५।

"ततश्च जज्ञिरे तस्य त्रयः पुत्राः खरोचिषः।
विजयो मेरुनन्दश्च प्रभावश्च महाबलः॥")

प्रभावजः, पुं, (प्रभावात् जायते इति। जन्+डः।) शुक्तिविशेषः। प्रभावो वीर्य्याधिक्यात् तज्जातः। इत्यमरटीकायां भरतः॥ प्रभुत्वसाधकत्वात् दक्षकोषौ प्रभुशक्तिः। इति भरतः॥ (प्रभावजाते, त्रि। यथा,—

"इत्यादिसाध्ये यत् कर्म्म विशिष्टं तत् प्रभावजम्।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रभावान्, [त्] त्रि, (प्रभा अस्त्यस्येति। प्रभा+मतुप् मस्य वः।) प्रभायुक्तः। प्रभाशब्दादस्त्यर्थे वतुप्प्रत्ययेन निष्पन्नम्॥

प्रभावती, स्त्री, (प्रभावत्+ङीप्।) मालिनामकोनविंशवृत्तसार्द्धजाता। गजानां वीजा। इति हेमचन्द्रः। २। २०३॥ त्रयोदशाक्षरच्छन्दः। यथा, श्रुतबोधे। ३। २।

"यस्यां प्रिये! प्रथमकमक्षरद्वयं
तुर्य्यस्तथा गुरु नवमं दशाक्षिमम्।
सान्तं भवेदृयतिरपि चेदृगब्धेः
सालस्यतामनुसरते! प्रभावती॥"

(सूर्य्यपत्नी। यथा, महाभारते। ५। ११७।८।

"रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः॥"

कुमारानुचरमातृगणविशेषः। यथा, तत्रैव। ९। ४६। ३।

"प्रभावती विशालाक्षी पलिता गोनसी तथा॥"

वज्रनाभासुरस्य कन्या। सा तु प्रद्युम्नेन विवाहिता। यथा, हरिवंशे। १४८। ४१।

"तस्यास्ति कन्यारत्नं हि त्रैलोक्यातिशयं शुभम्।
नाम्ना प्रभावती नाम चन्द्राभेव प्रभावती॥"

अङ्गेश्वरचित्ररथस्य स्वनामख्याता भार्य्या। यथा, महाभारते। १३। ४२। ८।

"तस्या हि भगिनी तात! ज्येष्ठा नाम्ना प्रभावती।
भार्य्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य च॥")

प्रभावः, पुं, (प्रभवते यः सः। प्र+भाव्+अच्।) वसुभेदः। इति जटाधरः॥ (यथा, महाभारते। १। ६६। १८।

"प्रत्यूषश्च प्रभासश्च वसवोऽष्टाविति स्मृताः॥"

प्र+भाव्+भावे घञ्।) प्रकृष्टकथनञ्च॥

प्रभासः, पुं, (प्रभासते शोभते इति। प्र+भास्+अच्।) सोमतीर्थम्। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। ८२। ५६—५७।

"ततो गच्छेत राजेन्द्र! प्रभासं तीर्थमुत्तमम्।
तत्र सन्निहितो नित्यं स्वयमेव हुताशनः।
देवतानां मुखं वीर! ज्वलनोऽनिलसारथिः॥

तस्मिंस्तीर्थे नरः स्नात्वा शुचिः प्रयतमानसः ।
अधिरोमातिरात्राभ्यां फलं प्राप्नोति मानवः ॥")
जैनगङ्गाधिपविशेषः । इति हेमचन्द्रः । २।३२॥
(वसुभेदः । यथा, मात्स्ये । ५ । २२ ।
"प्रभूषच्च प्रभासच्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")

प्रभिन्नः, पुं. (प्र+भिद्+क्त ।) करभदहस्ती ।
तत्पर्य्यायः । मत्तेभः २ मत्तः ३ । इत्यमरः ।
२ । ८ । ३६ ॥ ध्वान्तः ४ मदकलः ५ । इति
राजनिर्घण्टः ॥ (यथा, रामायणे । २।१५।४६ ।
"ततो महामेघमहीधराभं
प्रभिन्नमत्तद्विपमप्यचण्डम् ।
रामोपवाह्यं रुचिरं ददर्श
प्रभुक्षयं नागसुदग्रकायम् ॥"
तथा च महाभारते । ७ । २७ । २० ।
"यथा गजवरं क्रुद्धः प्रभिन्नः षष्टिहायनः ।
ह्रदिनीयात्तहृदयः पार्थोऽच्छिन्नाच्छत्रवम् ॥")
प्रहरणभेदविशिष्टे, त्रि॥ (यथा, ऋतुसंहारे । २।५।
"प्रभिन्नवैदूर्य्यनिभैस्तृणाङ्कुरैः
समाचिता मौक्तिकशुक्तिशीतलैः ॥")

प्रभुः, पुं, (प्रभवतीति । प्र+भू+कुः ।) विष्णुः ।
इति शब्दरत्नावली ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३१ ।
"हरश्च हरिनाक्षश्च सर्व्वभूतहरः प्रभुः ॥")
पारदः । इति राजनिर्घण्टः ॥ शब्दः । इति
धरणिः ॥

प्रभुः, त्रि, (प्रभवतीति । प्र+भू+"विप्रसंभ्यो डुसंज्ञायाम् ।" ३ । २ । १८० । इति डुः ।)
अधिपतिः । तत्पर्य्यायः । स्वामी २ ईश्वरः ३
पतिः ४ ईशिता ५ अधिभूः ६ नायकः ७
नेता ८ परिवृढः ९ अधिपः १० । इत्यमरः ।
३ । १ । ११ ॥ पालकः ११ । इति शब्दरत्नावली ॥ (यथा, भगवद्गीतायाम् । ५ । १४ ।
"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः ।
न कर्म्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥")
नित्यः । इति धरणिः ॥ श्रेष्ठः । इति नानार्थरत्नमाला ॥ (यथा, कुमारे । ३ । ४० ।
"बालेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥"
श्रेष्ठः । यथा, मनौ । १० । ३ ।
"वैप्रेभ्योऽत्र प्रजातिभ्यस्तात् नियमस्य च धारणात् ।
संस्कारस्य विशेषाच्च वर्णानां ब्राह्मणः प्रभुः ॥")

प्रभुता, स्त्री, (प्रभोर्भावः । प्रभु+तल् ।) प्रभुत्वम् । ऐश्वर्य्यम् । इति हलायुधः । ७ । १०० ॥

प्रभुभक्तः, पुं, (प्रभोर्भक्तः ।) उत्तमघोटकः । यथा,
"प्रभुभक्ता भक्तिजाश्च कुलीनेषु कुलोत्कटाः ॥"
इति शब्दचन्द्रिका ॥

स्वाम्यनुरक्ते, त्रि । यथा, नागानन्दे ।
"बद्धाञ्जलौ स्वल्पसत्वः सुनिद्रः प्रीतचेतनः ।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् गुणा गुणाः ॥"

प्रभूतं, त्रि, (प्र+भू+क्तः ।) प्रचुरम् । इत्यमरः । ३ । १ । ६३ ॥ (यथा, कलाविलासे । १।८।
"तत्राभूदभिभूतप्रभूतमायानिकायगतघूर्णः ।
सकलकलानिलयानां धुर्य्यः श्रीनूलदेवाख्यः ॥")
उन्नतम् । इति मेदिनी । ते, १२१ ॥ भूतम् ।
उन्नतम् । इति शब्दरत्नावली ॥

प्रभूष्णुः, त्रि, (प्रभवतीति । प्र+भू+"ल्युट्यजिस्वञ्च ग्लुङ्वुः ।" ३ । २ । १३९ । इति ग्लुङ्वुः ।)
क्षमः । शक्तः । इति हेमचन्द्रः । ३ । २५५ ॥

प्रभृति, व. (प्र+भृ+क्तिच् ।) तदादिः । यथा,
"ततःप्रभृति पितरः पिण्डसंज्ञान्तु लेभिरे ॥"
इति तिथ्यादितत्त्वम् ॥

प्रभेदः, पुं, (प्र+भिद्+घञ् ।) भेदः । तत्पर्य्यायः । प्रकारः २ विशेषः ३ भिदा ४
अन्तरम् ५ । इति जटाधरः ॥ (यथा, सुश्रुते
निदानस्थाने १० अध्याये ।
"पित्तात्मको द्रुतगतिर्ज्वरदाहपाक-
स्फोटप्रभेदबहुलः सृजतश्चप्रकाशः ॥"
स्फोटनम् । यथा, रघुः । ३ । ३० ।
"बभूव तेनातिनिरर्गलः सुदुःसहः
कटप्रभेदेन करीव पार्थिवः ॥")

प्रभ्रष्टकं, क्लीं, (प्र+भ्रंशु+क्तः । ततः स्वार्थे कन् ।) शिखालम्बिमाल्यम् । चूड़ानो लम्बमानमाल्यम् । इत्यमरभरतौ । २ । ६ । १३५ ॥

प्रमत्तः, त्रि, (प्रमाद्यति स्मेति । प्र+मद्+गत्यर्थेति क्तः । नध्याख्येति नत्वाभावः ।) प्रमादी ।
अनवधानतायुक्तः । यथा,—
"मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडम् ।
प्रपन्नं विरथं भीतं न रिपुं घ्नन्ति धर्म्मवित् ॥"
इति श्रीभागवते १ स्कन्धे ७ अध्यायः ॥
"मत्तं मद्यादिना । प्रमत्तमनवहितम् । उन्मत्तं ग्रहवातादिना । जडं अनुद्यमम् । प्रपन्नं शरणागतम् । विरथं भयरथम् ।" इति श्रीधरस्वामी ॥
अपरप्रमत्तो यथा,—
"सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
स च राज्ञा नाशयितव्यः । यथा,—
"मन्त्रौषधप्रमत्तानामृत्यानाशायेन्नृपः ॥"
इति मिताक्षरा ॥

प्रमथः, पुं, (प्रमथतीति । प्र+मथ्+अच् ।)
घोटकः । शिवपारिषदः । इति शब्दरत्नावली ॥ स च षट्त्रिंशत्कोटिसंख्यकः । यथा,
"षट्त्रिंशत्तु सहस्राणि प्रमथा द्विजसत्तमाः ।
तत्रैकश्च सहस्राणि भागे षोड़श संस्थिताः ॥
नानारूपधरा ये वै जटाचन्द्रार्द्धमण्डिताः ।
ते सर्व्वे सकलैश्वर्य्ययुक्ता ध्यानपरायणाः ॥
योगिनो मदमात्सर्य्यदम्भाहङ्कारवर्জ্জিताः ।
शौचापापा महाभागाः शुभ्राः प्रीतिकराः परा ॥
न ते परिग्रहं रागं कार्ष्णिं स्म कदाचन ।
संसारविमुखाः सर्व्वे यतयो योगतत्पराः ॥
ध्यानावस्थं महादेवं परिवार्य्य पृतव्रताः ।
स्थिता परिषदं रम्यां तिष्ठन्ति विगतक्लमाः ॥
यदेव परमं ज्योतिश्चिन्मयस्यम्बिकापतेः ।
तदेव ते पारिषदाः सर्व्वे संवेष्टयन्ति तम् ॥
ते कोड़ग्र समाख्याताः कोट्यो ये पृतव्रताः ।
सिंहव्याघ्रादिसारूप्या अग्निमादिसमायुताः ॥*॥
अपरे कामिनः शुभ्राः सुनर्म्मसचिवाः स्मृताः ।
विचित्ररूपाभरणा जटाचन्द्रार्द्धमण्डिताः ॥
हरस्य तुल्या रूपेण विशदा वृषभध्वजाः ।
उमासहायकरुणाभिः प्रमदाभिः समागताः ॥
विचित्रमाल्याभरणा दिव्यस्त्रग्गन्धभूषणाः ।
उमासहायं क्रीड़न्तमनुगच्छन्ति भूषिताः ।
ब्रह्मारवेद्याभरणा अष्टौ ते कोटयो गणाः ॥*॥
अर्द्धनारीश्वराचार्य्ये अर्द्धनारीश्वरं हरम् ।
अनुयान्ति महाभागास्तत्स्वरूपा हरस्य ये ॥
उमासहायो हि यदा रमते स्म सुखं हरः ।
अर्द्धनारीश्वरीरास्तु द्वारपाला भवन्ति ते ॥
आकाशमार्गे गच्छन्तमनुगच्छन्ति नित्यशः ।
ध्यानस्थं परिचर्य्यन्ति सलिलादिभिरीश्वरम् ॥
नानाशस्त्रधराः शुभ्रीर्गणास्तु प्रमथाः स्मृताः ।
प्रमथन्ति च युद्धेषु युध्यमानाञ्छत्रवगान् ।
ते वै महाबलाः शूराः संख्यया नवकोटयः ॥*॥
अपरे गायनास्तालज्ञद्रङ्गपञ्चवादिभिः ।
नृत्यन्ति वाद्यं कुर्व्वन्तो गायन्ति मधुरस्वरम् ॥
नानारूपधराश्चैते वै संख्यया कोटयास्त्रयः ।
सततं चानुगच्छन्ति विचरन्तं महेश्वरम् ॥
सर्व्वे मायाविनः शूराः सर्व्वे शास्त्रार्थपारगाः ।
सर्व्वे सर्व्वत्र सर्व्वज्ञाः सर्व्वे सर्व्वगताः सदा ॥
सङ्कल्पान् सर्व्वभुवनं गत्वा यान्ति पुनः पुनः ।
अणिमाद्यष्टकैश्वर्य्ययुक्तास्ते वै महाबलाः ॥
अपरे रुद्रनामानो जटाचन्द्रार्द्धमण्डिताः ।
देवेन्द्रस्य नियोगेन वर्त्तन्ते चित्रिये सदा ॥
तेषां संख्या चैककोटिस्ते सर्व्वे बलवत्तराः ।
कुर्व्वन्ति हि सदा सेवां हरस्य सततं गणाः ॥
विघ्नयन्ति च पापिष्ठान् धर्म्मिष्ठान् पालयन्ति च ।
अनुयुञ्जन्ति सततं पृतपाशुपतव्रतान् ॥
विघ्नांश्च सततं घ्नन्ति योगिनां प्रयतात्मनाम् ।
षट्त्रिंशत् कोटयश्चैते हरस्य सकला गणाः ॥
वराहगणनाथार्थं हिताय जगतां तथा ।
शूकरस्य च सेवार्थे समुत्पन्ना इमे गणाः ॥
वराहस्य गणान् दृष्ट्वा नरसिंहं तथा हरिम् ।
स्वयं सरभरूपः सन् ध्यायन् नादं यतोऽकरोत् ॥
तच्छीकरास्तुतो जातास्तत्सेवां बहुरूपता ।
क्रूरदृष्ट्या क्रूरयुद्धैः क्रूरशस्त्रैरिमान् गणान् ॥
वराहस्य हतेत्येवं यतः प्रोक्तं कपर्द्दिना ।
ततस्ते क्रूरकर्म्माणः प्रतापाश्च भयङ्कराः ॥
न सदा क्रूरकर्म्माणि ते कुर्व्वन्ति महौजसः ।
दृष्टिमात्रस्य ते क्रूराः क्रूरकर्म्माश्च कार्य्यतः ॥
फलं जलं तथा पुष्पं पत्रं मूलं तथैव च ।
निवेदितानि भुञ्जन्ति वनपर्व्वतसानुषु ॥
आकृत्यापि च राजन्ति पत्रं पुष्पादिकञ्च यत् ।
भवेद्गणस्य यद्भोग्यं तद्भोगास्ते महौजसः ॥
आमिषं नापि चाश्नन्ति हित्वा चैत्रचतुर्द्दशीम् ।
तत्रामिषं हरो भुङ्क्ते चतुर्द्दश्यां मधौ सदा ॥

ततः सर्व्वे गणास्तत्र भुञ्जन्ते पललान्यपि ।
हते वराङ्गस्य गणे भर्गमाराध्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागगतां तदा ।
वचनात् पद्मजातस्य भूतग्रामाश्रितो मतः ॥
यो लोकविहितः पूर्व्वं भूतग्रामश्चतुर्व्विधः ।
यतस्तेभ्योऽधिका यत्नैस्तद्दृढत्वाम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः ग्रभृगणा यथा ।
यदाहारा यदाकारा यत्तत्त्वास्ते महौजसः ॥
य इदं ब्रह्मणान्नित्यमाख्यानं योगसुत्तमम् ।
स दीर्घायुः सदोत्साही योगयुक्तश्च जायते ॥"
इति कालिकापुराणे पारिषदोत्पत्तिर्नाम २६ अध्यायः ॥ (धृतराष्ट्रपुत्राणामन्यतमः । यथा, महाभारते । १ । ११७ । १२ ।
"प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् ॥")

प्रमथनं, क्ली, (प्र + मथ + भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११५ ॥ (यथा, रामायणे । १ । ३ । २७ ।
"त्रासिप्रमथनश्चैव सुग्रीवप्रतिपादनम् ॥"
क्लेशनम् । विलोड़नम् । इति मथधात्वर्थदर्शनात् ॥ (प्रकर्षेण मथतीति । प्र + मथ + ल्युः । प्रमाथके, त्रि । यथा, महाभारते । २।१०२।६२।
"स चाग्निरूपसङ्गम्य देवतुल्यपराक्रमः ।
सर्व्वासामेव नारीणां चित्तप्रमथनो रहः ॥")

प्रमथा, स्त्री, (प्रमथति विरोषादिति । प्र + मथ + अच् ।) हरीतकी । इति मेदिनी । थे, २१ ॥ (गुणादिकमस्य हरीतकीशब्दे ज्ञातव्यम् ॥)

प्रमथाधिपः, पुं, (प्रमथानां अधिपः ।) शिवः । इत्यमरः । १ । १ । ३६ ॥

प्रमथितं, क्ली, (प्रकर्षेण मथितम् ।) निर्जलतक्रम् । इति राजनिर्घण्टः ॥

प्रमदः, पुं, (प्र + मद् + "प्रमदसंमदौ हर्षे ।" ३ । ३ । ६८ । इति अप् ।) हर्षः । इत्यमरः । १।४।२४ ॥ (यथा, कथासरित्सागरे । ६।१६२ ।
"तच्छ्रुत्वा मम राज्ञश्च विषादप्रमदौ द्वयोः ।
अभूतां मेघमालोक्य हंसचातकयोरिव ॥"
प्रमादजननेनेति । प्र + मद् + करणे अप् ।) धुस्तूरफलम् । इति ग्रब्दचन्द्रिका ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८७ ।
"प्रमदो मयः सुपर्णो हयग्रीवश्च वीर्य्यवान् ॥"
वसिष्ठतनयानामन्यतमः । स तु उत्तममन्वन्तरे सप्तर्षिप्रभेदः । यथा, भागवते । ८ । १ । २३ ।
"वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः ।
सत्या वेदश्रुता भद्रा देवा इन्द्रस्तु सत्त्रजित् ॥")

प्रमाद्यतीति । प्र + मद् + कर्त्तरि अच् । यद्वा प्रकर्षेण मदोऽस्य ।) मत्तः, त्रि । इति मेदिनी । दे, ७५ ॥ (यथा, रघौ । १८ । ३७ ।
"प्राविशि प्रमदवद्विहर्त्तुमेव
क्षत्रियाश्रितु विहारविभ्रमः ॥")

प्रमदकाननं क्ली, (प्रमदानां काननम् । "ङ्याप्रातिपदिकात्" ४ । १ । ४३ । इति ङीप् ।) यद्वा, प्रमदाय हर्षाय यत् काननम् ।) प्रमदावनम् । इत्यमरटीकायां भरतः । २ । ४ । ६ ॥

प्रमदवनं, क्ली, (प्रमदानां वनमिति । "ङ्याप्रातिपदिकात्" ४ । १ । ४३ । इति ङीप् ।) राज्ञोऽन्तःपुरोचितवनम् । इत्यमरः । २ । ४ । ७ ॥

प्रमदा, स्त्री, (प्रमदयति पुरुषमिति । प्र + मद हर्षे + णिच् + अच् । यद्वा, प्रमदो हर्षोऽस्त्यस्या इति अच् । टाप् ।) उत्तमयोषित् । इति मेदिनी । दे, ५ ॥ (यथा, कुमारे । ४ । १२ ।
"नयनाग्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥")
चतुर्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा, वृत्तरत्नाकरटीकायाम् ।
"नजभजला गुरुश्च भवति प्रमदा ॥")

प्रमदाकाननं क्ली, (प्रमदानां काननम् ।) प्रमदवनम् । इत्यमरटीकायां भरतः । २ । ४ । ३ ॥

प्रमदावनं, क्ली, (प्रमदानां वनम् ।) प्रमदवनम् । इति ग्रब्दरत्नावली ॥

प्रमनाः, [स्] त्रि, (प्रकृष्टं मनोऽस्य ।) हर्षयुक्तः । इत्यमरः । १ । १ । ७ ॥ (यथा, महाभारते । ८ । ३७ । ४१ ।
"इति बहुपरुषं प्रभाषति
प्रमनसि महपतौ रिपुत्वम् ।")

प्रमयः, पुं, (प्र + मी वधे + भावे अच् ।) वधः । इति हेमचन्द्रः । १ । ३४ ॥ (यथा, राजतरङ्गिण्याम् । १ । ६ ।
"हृष्टं हृष्टं नृपोदन्तं वद्वा प्रमयमीयुषाम् ।
अर्व्वाक्कालभवैर्वार्त्ता यत्प्रबन्धेषु पूर्य्यते ॥")

प्रमा, स्त्री, (प्रमीयते इति । प्र + माङ् माने + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति अङ् । टाप् ।) यथार्थज्ञानम् । तत्पर्य्यायः । प्रमितिः २ । इत्यमरः । ३ । २ । १० ॥ प्रमाणम् ३ । इति ग्रब्दरत्नावली ॥ (यथा, प्रबोधचन्द्रोदये । २य अङ्के ।
"प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि ग्राह्याणि वौद्धैः किमपराध्यते ॥"
यथा च ऋग्वेदे । १० । १३० । ३ ।
"कासीत्प्रमा प्रतिमा किम् ॥"
"यस्य प्रमा प्रमाणमियत्ता का कथम्भूतासीत् ।"
इति तद्भाष्ये सायणः ॥) न्यायमते तद्वति तत्प्रकारकज्ञानम् । भ्रमभिन्नज्ञानम् । अस्याः कारणं गुणः । स च प्रत्यक्षे विशेष्ये विशेषणस्य सम्बन्धः । अनुमितौ साध्यविशिष्टपक्षे परामर्शः । ग्राब्दबोधे योग्यतायाः तात्पर्य्यस्य वा यथार्थज्ञानम् । उपमितौ ग्रब्दे सादृश्यबुद्धिः । यथा,—
"दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः ॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम् ।
सन्निकर्षो गुणस्तु स्यादथ ग्रब्दमितौ पुनः ॥

पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत् ।
ग्रब्दे साकाङ्क्षतादिस्तु भवेदुपमितौ गुणः ।
ग्राब्दबोधे योग्यतायास्तात्पर्य्यस्य वा प्रमा ॥
गुणः स्यादुभयभिन्नस्तु ज्ञानमात्रोच्यते प्रमा ।
अथवा तत्प्रकारं यत् ज्ञानं तद्विशेष्यकम् ॥"
इति भाषापरिच्छेदे । १३१-१३५ ॥
("दोषः इति । अप्रमां प्रति दोषः कारणं प्रमां प्रति गुणः कारणं तथापि पित्तादिरूपा दोषा अननुगताः तेषां कारणत्वम् अन्वयव्यतिरेकाभ्यामेव सिद्धम् । गुणस्य प्रमाजनकत्वन्तु अनुमानात् सिद्धम् । यथा प्रमाज्ञानसाधारणकारणभिन्नकारणजन्याजन्यज्ञानत्वात् अप्रमावत् । न च दोषाभाव एव कारणमस्तिति वाच्यम् । मौक्तः ग्रुक्त इति ज्ञानस्थले पित्तदोषसत्त्वात् ग्रुक्तप्रमोत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्तदोषाभावस्य कारणत्वमपेक्ष्य गुणकारणतायाः न्याय्यत्वात् । न च गुणसत्त्वेऽपि पित्तप्रतिबन्धात् ग्रुक्तौ न शैत्यज्ञानमतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनयेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः । एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वात् । तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति । क्वचित् पीत्तादिभ्रमे पित्तं दोषः क्वचित् चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः । क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्यैवं दोषा भ्रान्तिजनका इत्यर्थः । अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शयति प्रत्यक्षेति । प्रत्यक्षे विशेषणवत् विशेष्यसन्निकर्षो गुणः अनुमितौ साध्यवति साध्याप्यवैशिष्ट्यज्ञानं गुण इति एवमग्रेऽप्यूह्यः । प्रमां निरूपयति भ्रमभिन्नमिति । ननु यत्र ग्रुक्तिरजतयोरिमे रजते इति ज्ञानं जातं तत्र रजतांशेऽपि प्रमा न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवेति । तद्विशेष्यकं तत्प्रकारकं ज्ञानं प्रमा इत्यर्थः । इदन्तु बोध्यम् । येन सम्बन्धेन तद्वत्ता तेन सम्बन्धेन तद्विशेष्यकं तेन सम्बन्धेन प्रकारकत्वं वाच्यम् । तेन कपालादौ संयोगादिना घटादिज्ञाने नातिव्याप्तिः ॥" * ॥)

प्रमाणं, क्ली, (प्रमीयते विज्ञायतेनेति । प्र + मा + ल्युट् ।) विष्णुः । यथा,—
"प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ॥"
इति महाभारते शान्तिपर्व्वणि दानधर्म्मे ॥
नित्यम् । मर्य्यादा । ग्राह्यम् । (यथा,—
"आप्ता ग्रुतिर्वचः स्मृतिर्विभागविद्यो विद्योत्पत्तापदर्शिनश्च । तेषामेवङ्गुणयोगात् यद्वचनं तत् प्रमाणम् । अप्रमाणं पुनर्मत्तोन्मत्तमूर्खैरकृदुष्टादुष्टवचनमिति ।" इति चरके विमानस्थाने चतुर्थेऽध्याये ॥) सत्यवादी । (प्र + मा + भावे ल्युट् ।) दयता । हेतुः । (प्रमिणोतीति । प्र + मा + कर्त्तरि ल्युः ।) प्रमाता । इति मेदिनी । णे, ६९ ॥ प्रमा ।

इति शब्दरत्नावली ॥ निश्चलजीवैकत्ववादार्थं शब्दः । यथा वेदाः प्रमाणं स्मृतयः प्रमाणमित्यादि ॥ प्रमाणाः करणम् । न्याये तु प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि । इत्यत्र बहुवचनान्तोऽपि ॥ (यथा, मनौ । २ । १३ ।
"अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते ।
धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥"
वेदान्तसारे च । "वेदान्तो नाम उपनिषत् प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च॥"
"उपनिषच्छब्दो ब्रह्मात्मैकत्वसाक्षात्कारविषयः । स एव उपनिषत् प्रमाणं तस्याः प्रमारूपायाः करणभूता ।" इति विद्वन्मनोरञ्जनीटीका ॥)

प्रमाणबाधितार्थकः, पुं, (प्रमाणेन बाधितः अर्थो यस्य । ततः कप् ।) तर्कविशेषः । तस्य लक्षणम् । आत्माश्रयादिदोषतुल्यान्यप्रसङ्गत्वम् । स द्विविधः । व्याप्तिग्राहकः विषयपरिशोधकश्च । तत्राद्यो यथा । धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यात् । द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यात्तदा निर्धूमः स्यात् । इति तर्कसंग्रहदीपिकायां ॥

प्रमातामहः, पुं, (प्रकृष्टो मातामहत्वस्यापि जनकत्वादिति । प्रादिसमासः ।) मातामहपिता । यथा, अमरे ।
"पितामहः पितृपिता तत्पिता प्रपितामहः ।
मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः ॥"

प्रमातामही, स्त्री, (प्रकृष्टा मातामही ।) प्रमातामहपत्नी । इति स्मृतिः ॥

प्रमाथः, पुं, (प्र + मथ् + भावे घञ् ।) प्रमथनम् । बलात् हरणम् । इति पुराणम् । (निपात्य भूमौ पैशल्यम् । यथा, महाभारते । ४ । १२ । २७ ।
"क्षतप्रतिक्षतेश्चित्रैर्बाहुभिश्च सुघट्टैः ।
सन्निपातावघूतैश्च प्रमाथोन्माथनैस्तथा ॥"
अस्य टीकायां नीलकण्ठेन मन्थाद्यात् क्षतक्षतयत्नसाधुतम् । यथा,—
"निपात्य पैशल्यं भूमौ प्रमाथ इति कथ्यते ॥"
कुमारस्यानुचरभेदः । यथा, महाभारते । ६ । ४५ । २६ ।
"ततः प्रादादनुचरौ यमः कालोपमावुभौ ।
उन्मादश्च प्रमादश्च महावीर्यौ महाद्युती ।"
शिवपारिषदप्रमथगणः । यथा, हरिवंशे । १७८ । ५३ ।
"ते प्रदीप्तप्रहरणा दैत्यदानवराक्षसाः ।
प्रमाथगणमुख्याश्च प्रायुध्यन् जयमक्षयम् ॥")

प्रमाथी, [न्] त्रि, प्रपूर्वमथधातोः कर्तरि णिन् । पीडनकर्त्ता । मारणकर्त्ता । प्रमथनशीलः । हैहेन्द्रियक्षोभक इत्यर्थः । इति श्रीधरस्वामी ॥ यथा,—
"चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ॥"
अपि च ।
"इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥"
इति श्रीभगवद्गीता ॥

प्रमादः, पुं, (प्र + मद् + भावे + घञ् ।) अनवधानता । इत्यमरः । १ । ७ । ३० ॥ यथा,—
"लोभप्रमादविश्वासैः पुरुषो नश्यते चिरम् ।
तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥"
इति गारुडे नीतिसारे ११५ अध्यायः ॥

प्रमादवान्, [त्] त्रि, (प्रमादोऽस्यास्तीति मतुप् । मस्य वः ।) प्रमादयुक्तः । तत्पर्य्यायः । आक्षः २ असमीक्ष्यकारी ३ खट्वारूढः ४ । इति जटाधरः ॥ (यथा, याज्ञवल्क्ये । १ । १३६ ।
"निद्रालुः क्रूरसङ्कल्पो नास्तिको याचकस्तथा ।
प्रमादवान् भिन्नवृत्तो भवेत्तिर्य्यक्षु तामसः ॥")

प्रमादिका, स्त्री, (प्रमादोऽनवधानताऽस्यस्या इति । प्रमाद + ठन् । टाप् ।) दूषिता कन्या । तत्पर्य्यायः । संवेदा २ दूषिता ३ धर्षकारिणी ४ । इति शब्दरत्नावली ॥

प्रमादी, [न्] त्रि, (प्रमादोऽस्यस्येति । प्रमाद + इनिः ।) प्रमादविशिष्टः । अनवधानतायुक्तः । यदुक्तम् ।
"क्रूरङ्गमातङ्गपतङ्गभृङ्ग-
मीना हताः पञ्चभिरेव पञ्च ।
एकः प्रमादी स कथं न हन्यते
यः सेवते पञ्चभिरेव पञ्च ॥"

प्रमापणं, क्ली, (प्र + मी अ हिंसायाम् + स्वार्थे णिच् + भावे ल्युट् ।) मारणम् । इत्यमरः । ३ । ८ । ११२ ॥ (यथा, मनुः । ११ । १४१ ।
"अस्थिमतान्तु सत्त्वानां सहस्रस्य प्रमापणे ।
पूर्णे चानस्थिनस्त्वल्पे शूद्रहत्याव्रतं चरेत् ॥")

प्रमितः, त्रि, (प्र + मि + क्तः । यद्वा, प्र + मा + क्तः । "द्यतिस्यतिमास्थेति ।" ७ । ४ । ४० । इत्वम् ।) ज्ञातः । इति जटाधरः ॥ (अल्पतमम् । इति विश्वप्रकाशः ॥ यथा, निदाने अर्शोरोगाधिकारे ।
"प्रमिताद्यान्नपानं तीक्ष्णं मद्यं मैथुनसेवनम् ॥"
परिमितम् । यथा, हरिवंशे । १०४ । २७ ।
"प्रमिताक्षराणि वदन् ॥")

प्रमितिः, स्त्री, (प्र + मा वा मि + क्तिन् ।) प्रमा । इत्यमरः । ३ । २ । १० ॥

प्रमीढः, त्रि, (प्र + मिह सेचने + क्तः ।) घनः । मूत्रितः । इति मेदिनी । ढे, ८ ॥ (यथा,—
"खगदोषिणां प्रमीढानां क्षिप्राभिष्यन्दिहिङ्गाम् ।
शिग्रुरिरे लवणं शुष्कमपि वातविकारिणाम् ॥"
इति चरके सूत्रस्थाने द्राक्षादिगणेऽध्याये ॥)

प्रमीतः, त्रि, (प्र + मी अ हिंसायाम् + क्तः ।) मृतः । यज्ञार्थंहतपशुः । इत्यमरः । २ । ८ । ११७ ॥

प्रमीला, स्त्री, (प्रमीलनमिति । प्र + मील संमीलने + "गुरोश्च हलः ।" ३ । ३ । १०३ । इत्यः । ततष्टाप् ।) तन्द्री । इत्यमरः । १ । ३ । १७५ ॥

प्रसुखं, क्ली, (प्रकृष्टं सुखमारम्भः ।) तदालम् । तत्कालः । इति त्रिकाण्डशेषः ॥ (सम्मुखम् । यथा, भगवद्गीतायाम् । २ । ६ ।
"यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्त्तराष्ट्राः ॥")

प्रसुखः, पुं, (प्रकृष्टं सुखं अग्रभागो यस्य ।) पुन्नागवृक्षः । इति शब्दचन्द्रिका ॥ वकुलः । इति शब्दरत्नावली ॥

प्रमुखः, त्रि, (प्रकृष्टं मुखमाद्यं यस्य ।) प्रधानम् । (यथा, कुमारसम्भवे । २ । ६८ ।
"ज्वलज्जटाजिह्मशिखाजटैनं वासुकिप्रमुखा निषेदुः ।
स्थिरप्रदीपप्रतिमेव गुहाद्वाः पर्य्युपासते ॥")
श्रेष्ठः । इत्यमरः । ३ । १ । ५७ ॥ (यथा, हितोपदेशे । ३ । १२४ ।
"बलेषु प्रमुखो हस्ती न तथाश्वो महीपतेः ॥")
प्रथमः । इति मेदिनी । खे, १० ॥ (यथा, महाभारते । २ । ६ । २ ।
"नारदप्रमुखास्तस्यामभ्यर्च्चन्ति द्विजातयः ।
समासीनाः मुनिभिरहं राजर्षिभिस्तथा ॥")
मान्यः । इति शब्दरत्नावली ॥

प्रमुदु, [द्] त्रि, (प्रकृष्टामुत् प्रीतिर्यस्य ।) हृष्टः । इत्यमरः । ३ । १ । १०२ ॥ (प्रहृष्टा मुदिति विग्रहे प्रहर्षशब्दे, स्त्री । यथा, महाभारते । १४ । ७ । ६ ।
"श्रुत्वा तु पार्थिवस्तेषां सम्भ्रमं प्रमुदं गतः ॥")

प्रमुदितः, त्रि, (प्र + मुद् + क्तः । "उदुपधादिति ।" १ । २ । २१ । इति मत्वे क्वित् ।) हृष्टः । इत्यमरः । ३ । १ । १०३ ॥ (यथा, देवीभागवते । २ । १२ । ४७ ।
"वाञ्छत्यद्यो हरिर्योक इवातिकामं
पादाङ्कितं प्रमुदितः पुरुषः पुराणः ॥")

प्रमेहः, पुं, (प्रकर्षेण मेहति क्षरति वीर्य्यादिरनेनेति । प्र + मिह क्षरणे + करणे घञ् ।) रोगविशेषः । तत्पर्य्यायः । मेहः २ मूत्रदोषः ३ । इति राजनिर्घण्टः ॥ बहुमूत्रता ४ । इति हैमचन्द्रः । ३ । १३४ ॥ अस्य निदानम् ।
"आस्यासुखं स्वप्नसुखं दधीनि
ग्राम्यौदकानूपरसाः पयांसि ।
नवान्नपानं गुडवैकृतञ्च
प्रमेहहेतुः कफकृच्च सर्व्वम् ।" ❁ ।
अस्य सम्प्राप्तिर्यथा,—
"मेदश्च मांसञ्च शरीरजञ्च
क्लेदं कफो बस्तिगतः प्रदूष्य ।
करोति मेहान् बहुदोषलक्षणे-
ल्लाघवं पित्तं परिदूष्य चापि ।" ❁
वातिकस्य तस्य लक्षणम् ।
"श्रोत्रेषु दोषेष्ववलम्ब्य धातून्
सन्दूष्य मेहान् कुरुतेऽनिलश्च ।" ❁
तस्य कफजादिभेदेन साध्यादिलक्षणम् ।
"साध्याः कफोत्था दशपित्तजाः षट्
याप्या न साध्याः पवनाच्चतुष्काः ।
समक्रियत्वाद्विषमक्रियत्वा-
च्छास्त्रान्तरत्वाच्च यथाक्रमन्ते ॥
कफः सपित्तः पवनश्च दोषा
मेदोऽम्बुकाम्बुवसाजलौकाः ।

मज्जा रसौजः पिञ्जरत्वच दूष्याः
प्रमेहिणां विंशतिरेव मेहाः ॥" * ॥

तस्य पूर्वरूपम् ।

"दन्तादीनां मलाढ्यत्वं प्रायूषं पाणिपादयोः ।
दाहश्चिरात्प्रसादश्च देहे लट् स्वाद्वास्यता च जायते ॥
सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता ।
दोषदूष्या विशेषेऽपि तत्संयोगविशेषतः ।
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते ॥"*॥

क्रमेण कफजानां दशानां लक्षणानि ।

"अच्छं बहुसितं पूतं निर्गन्धसदकोपमम् ।
मेहत्युदकमेहेन किञ्चिदाविलपिच्छलम् ॥
दधो रसमिवाम्लार्द्रं मधुरं चेक्षुमेहतः ।
क्षारी भवेत् पर्युषितं क्षारमेहेन मेहति ॥
सुरामेही सुरातुल्यसपर्यन्तच्छमधोघनम् ।
संकुरलोमा पिटेन पिटवद्बहुलं सितम् ॥
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति ।
सूनागलू सिकतामेही सिकताकृपिणो मलान् ॥
घृतमेही सुबहुशो मधुरं भृशघृतलम् ।
शनैः शनैः शनैर्मेही मन्दं मन्दं प्रमेहति ॥
लालातन्तुयुतं सूत्रं लालामेहेन पिच्छिलम् ॥"

क्रमेण पित्तजानां षण्णां लक्षणानि ।

"गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥
नीलमेहेन नीलाभं कालमेही मसीनिभम् ।
हारिद्रमेही कटुकं हरिद्रासन्निभं दहन् ॥
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम् ।
विलसुक्तं सलवणं रक्ताभं रक्तमेहतः ॥" * ॥

क्रमेण वातजानां चतुर्णां लक्षणानि ।

"वसामेही वसाभिश्रं वसाभं मज्जयेन्मुहुः ।
मज्जाभं मज्जमिश्रं वा मज्जमेही सुदुर्मुहुः ॥
कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः ।
क्षतौ मत्त इवाजस्रं मूत्रं वेगविवर्जितम् ।
बलासौकं विबद्धत्व हस्तिमेही प्रमेहति ॥"*॥

कफजादिभेदेन तेषामुपद्रवाः ।

"अविपाकोऽरुचिच्छर्दिर्निद्रानाशः सपीनसः ।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम् ॥
वस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः ।
दाहस्तृष्णाल्पिका मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥
वातजानामुदावर्तः कण्यन्तृष्यहृल्लोलताः ।
मूत्रसृष्टिरता शोषः कासः श्वासश्च जायते ॥"

अरिष्टलक्षणम् ।

"यथोक्तोपद्रवारिष्टमतिप्रवृत्तमेव च ।
पिडकापीडितं गाढं प्रमेही हन्ति मानवम् ॥
जातः प्रमेही मधुमेहिनो वा
न साध्यरोगः स हि बीजदोषात् ।
ये चापि केचित् कुलजा विकारा
भवन्ति तांश्च प्रवदन्त्यसाध्यान् ॥ * ॥

सर्व एव प्रमेहास्तु कालेनाप्रतिकारिणः ।
मधुमेहत्वमायान्ति तदासाध्या भवन्ति हि ॥
मधुमेही मधुसमं जायते स किल द्विधा ।
कुप्यै धातुत्रयाद्दोषाद्दोषाहतपथोऽथवा ॥
आद्यस्तु दोषलिङ्गानि सोऽतिमिश्रं प्रदर्शयन् ।
शीघ्रं शनात् शनात् पूर्वो भजते लक्ष्यसाध्यताम् ॥
मधुरं यच्च मेहेषु प्रायो मध्विव मेहति ।
सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः ॥*॥
प्रमेहिणो यदा मूत्रमगाविलमपिच्छलम् ।
विषदं तिक्तकटुकं तदारोग्यं प्रचक्षते ॥"

इति माधवकरः ॥

अस्य दशविधपिडकाः पिडकाशब्दे द्रष्टव्याः ॥

अथ प्रमेहस्य चिकित्सा ।

"श्यामाकककोद्दालो गोधूमयवकावटी ।
कुलत्थाः कथिता भोज्ये पुराणा मेहिनां हिताः ॥
यवान्नविक्षतिमुद्गाः शालयः षष्टिकास्तथा ।
तथा तिक्तानि शाकानि जाङ्गलाः पक्षिणो मृगाः ॥
उद्दालो वनकोद्रवः ॥ * ॥
प्रमेही गुडदुग्धान्यतैलतक्षसुराः सदा ।
अक्षौद्रसर्षपस्नेहान्नूपमांसानि वर्जयेत् ॥ * ॥
सुस्नाहरीतकीलोध्रः कट्फलेन लतं स्नतम् ।
पीतं मधुयुतं हन्ति प्रमेहं कफहेतुकम् ॥ * ॥
पटोलनिम्बामलकाम्रतानां
पिबेत् कषायं मधुना समेतम् ।
उशीरलोध्रार्जुनचन्दनानां
तथा पिबेत् पित्तनिमित्तमेही ॥ * ॥
पाठाग्निरीषदुःस्पर्शातिविषुकर्कितुकैः ।
कपित्थस्य भिषक् क्वाथं हस्तिमेही प्रयोजयेत् ॥
पाठादिभिः सहितस्य कपित्थस्य क्वाथम् ।
गुडघ्याः स्वरसः पेयो मधुना सर्वमेहजित् ॥
हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥
मधुना चेक्षुलं चूर्णमथवाम्लजतूदभवम् ।
लोहजं वाभयोत्थं वा लिह्यान्मेहनिवृत्तये ॥*॥
चन्द्रप्रभावचामुस्ताभूनिम्बसुरदारवः ।
हरिद्रानिशिवा दार्वी पिप्पलीमूलचित्रकम् ॥
त्रिवृद्दन्ती पत्रकञ्च त्वगेला वंशलोचना ।
प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान् ॥
धान्यकं त्रिफला चव्यं विड्ङ्गं गजपिप्पली ।
सुवर्णमाक्षिकं शौधं द्वौ क्षारौ लवणत्रयम् ॥
एतानि टङ्कमात्राणि संगृह्णीयात् पृथक् पृथक् ।
द्विकर्षहतलोहं स्यात्सर्वचूर्णं सिता भवेत् ॥
शिलाजत्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ।
विधिना शोधितैरेतैः कर्षैका गुटिका शुभा ॥
चन्द्रप्रभाभिधाख्याता सर्वरोगप्रणाशिनी ।
निहन्ति विंशतिं मेहान् कृच्छ्राण्यष्टविधं तथा ॥
चतस्रश्चाश्मरीस्तद्वच्चत्वारोऽर्शांस्यशेषतः ।
अष्ठीलां पाण्डुरोगं कामलाञ्च हलीमकम् ॥
कासं श्वासं तथा कुष्ठमग्निमान्द्यमरोचकम् ।
वातपित्तकफाश्चोग्रान् बल्या तृप्या रसायनी ॥
समाराध्य शिवं तस्मात् प्रयत्नाद्गुटिकामिमाम् ।
प्राप्नोति चन्द्रमा यस्मात् तस्माच्चन्द्रप्रभा स्मृता ॥
चन्द्रप्रभाकल्प इति लोके । शौधं चिकटु । द्वौ क्षारौ सर्जिकायवक्षारौ । लवणत्रयम् । सैन्धवं कचकचापि विड्च लवणत्रयमिति चन्द्रप्रभादिवटिका ॥ * ॥

प्रमेहपिडकानां प्राक् कार्यं रक्तविमोक्षणम् ।
पाटनञ्च विपक्वानां ततो व्रणविधिः स्मृतः ॥"

इति भावप्रकाशः ॥

(अस्य प्रकारत्रयपूर्वरूपसम्प्राप्तयस्तथोपद्रवश्च ।
यथा,—

"त्रिदोषकोपननिमित्ता विंशतिप्रमेहविकारास्त्वापरेऽपरिसङ्ख्येया: । तत्र यथा त्रिदोषप्रकोपः प्रमेहानभिनिर्वर्तयति तथानुव्याख्यास्याम: ।

इह खलु निदानदोषदूष्यविशेषेभ्यो विकाराणां विघातभावाभावप्रतिविशेषा भवन्ति । यदा खलु ते त्रयो निदानादिविशेषा: परस्परं नानुबध्नन्त्यथवाप्रकर्षादबलीयांसो वानुबध्नन्ति न तदा विकाराभिनिर्वृत्ति: । चिराच्चाभिनिर्वर्तन्ते तनवो भवन्त्यथवाप्ययथोक्तसर्वलिङ्गा विपर्ययेण विपरीता इति सर्वविकारविघातभावाभावप्रतिविशेषाभिनिर्वृत्तिहेतुवक्त्र: ।

तत्र इमे निदानादि विशेषा: श्लेष्मनिमित्तानां प्रमेहाणामाचयनिवृत्तिकरास्तद्यथा व्यायामकथवचीनकोद्दालकवर्णवधोत्कटतुलकुन्दक मद्यानूपौदकसुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोग: । तथा सर्पिषां नवक्षीरमांसरसपानानां व्याध्यनूपौदकानां मांसानां शाकतिलपललपिष्टान्नपायसक्षीरविकृतीक्षुविकाराणां क्षीरमद्यकदधिनवमधुरलवणप्रायाणामुपयोगो मृज्याव्यायामवर्जनस्वप्नप्रसङ्गो यश्च कश्चिदधिरन्योऽपि श्लेष्मप्रमेहो मूत्रसङ्ग्रहनम: सर्वे: सनिदानविशेष: ।

बहुदोषसंसृष्टा दोषविशेष: बहुवर्णं मेद: मांसञ्च शरीरक्लेद: मूत्रं घ्राणितस्य वसामज्जालसीका रसक्षौद्र: सङ्घाता इति दूष्यविशेषा: ।

व्याख्यामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मप्रकोपमापद्यते प्रागतिभूयस्त्वात् । स प्रकुपित: क्षिप्रमेव शरीरे विसर्पं लभते । शरीरश्लेष्मित्वात् स विसर्पं शरीरे मेदसेवादिनो मिश्रीभावं गच्छति । मेदसश्चैव बहुबन्धत्वान्मेदसश्च गुणानां गुणै: समानगुणभूयिष्ठत्वात् स मेदसा मिश्रीभावं गच्छन् दूषयत्येतद्विकृतत्वात् स विकृतो दुष्टेन मेदसोपहित: शरीरक्लेदमांसाभ्यां संसर्गं गच्छति । क्लेदमांसयोरतिप्रमाणाभिवृद्धित्वात् स मांसे मांसप्रदोषात् पूतिमांसपिडका: शरीरिका कच्छपिकाद्या: सङ्घातत्वप्रकृतिभूतत्वात् शरीरक्लेदं पुनर्दूषयन् मूत्रत्वेन परिणमयति। मूत्रवहानां स्रोतसां बस्तिमेहनप्रभवानां मेद:क्लेदोपहितानि गुरूणि सूक्ष्माण्यासाद्य प्रतिरुध्यते । तत: स्रोसां साधनां वा जनयति प्रकृतिविकृतिभूतत्वात् ।

शरीरक्लेदस्तु श्लेष्ममेदोमिश्र: प्रविगुण मूत्राशये मूत्रत्वमापद्यमान: श्लेष्मिकैरेभिर्गुणैरुपदृश्यते वैषम्यहानिवृद्धियुक्तैरुदयया चैषसंसृष्ट मूत्रमिच्छलाच्छस्निग्धगुरुमधुरसान्द्रप्रसादमर्हस्तञ्च येन गुणेनैकेनानेकेन वा भूयस्तरमुप-

ह्यन्ते। तत्समाख्यां गौडं नागविशेषं प्राप्नोति।

ते तु खल्विमे दशप्रमेहा नाम विशेषेण भवन्ति। तथा उदकमेहश्चेक्षुरालिकारसमेहश्च सान्द्रमेहश्च सान्द्रप्रसादमेहश्च शुक्रमेहश्च शुक्लमेहश्च शीतमेहश्च सिकतामेहश्च शनैर्मेहश्च लालामेहश्चेति।

ते दशप्रमेहाः साध्याः समावयुगमेदःस्थानत्वात् कफस्य प्रधान्यात् समानक्रियत्वाच्च।"

"उष्णाम्ललवणक्षारकटुकाजीर्णभोजनोपसेविनस्तथातितीक्ष्णातपाग्निसन्तापश्रमक्रोधविषमाहारोपसेविनश्च तथात्मकशरीरस्यैव क्षिप्रं पित्तं प्रकोपमापद्यते।

तत् प्रकुपितं तत्रैवानुपूर्व्या प्रमेहानिमान् षट् त्रिंशत्प्रभेदभिन्नान् जनयति। तेषामपि च पित्तगुणविशेषेण नामविशेषाः। तद्यथा,— क्षारप्रमेहश्च कालमेहश्च नीलमेहश्च लोहितमेहश्च मञ्जिष्ठामेहश्च हारिद्रमेहश्चेति ते षड्भिरेव क्षारलवणकटुकविशेषैः पित्तगुणैः पूर्ववत् समन्विताः। सर्व एव ते याप्याः संसृष्टदोषभेदःस्थानत्वात्, विसङ्क्रोपक्रमत्वाच्चेति।"

"कटुकक्षायतिक्तरूक्षजागरणव्यायामवमन-विरेचनास्थापन-शिरोविरेचनातियोग अन्धकारज्ञानघृणाभिघातानपोदकगोकण्डोल्लिकातिसेकजागरणविषमशरीरस्थासात्म्यसेवमानस्य तथात्मकशरीरस्यैव क्षिप्रं वायुः प्रकोपमापद्यते। स प्रकुपितस्तथात्मके शरीरे विसर्पन् यदा वसामादाय मूत्रवहानि स्रोतांसि प्रतिपद्यते तदा वसामेहमभिनिर्वर्तयति॥ * ॥ यदा पुनर्मज्जानं मूत्रवस्तावाकर्षति तदा मज्जमेहमभिनिर्वर्तयति॥ * ॥ यदा लसीकां मूत्राग्नयेऽभिवहन् मूत्रमनुपधं क्षोभयति। लसीकातिबहुत्वादिक्षेपणाच्च वायोः खल्वस्यातिमूत्रप्रवृत्तिसङ्गं करोति। तदा स मत्त इव गजः शरत्समयं मूत्रमवेगं तं हस्तिमेहिनमाचक्षते॥ * ॥ ओजः पुनर्मधुरस्वभावं तदोषादायुः कषायत्वेनाभिसंरुध्य मूत्राग्नयेऽभिवहति तदा मधुमेहं करोति॥ * ॥

तानिमांश्चतुरः प्रमेहान् वातजानसाध्यानाचक्षते। महात्ययिकत्वाद्विप्रतिषिद्धोपक्रमत्वात् तेषामपि च पूर्ववत् गुरुविशेषेण नामविशेषाः। तद्यथा,—वसामेहश्च मज्जमेहश्च हस्तिमेहश्च मधुमेहश्चेति।"

"त्रयस्तु दोषाः प्रकुपिताः प्रमेहानभिनिर्वर्तयिष्यन्त इमानि पूर्वरूपाणि दर्शयन्ति। तद्यथा,—जटिलीभावं केशेषु माधुर्यमास्ये करपादयोः सुप्तता दाहः सुखतालुकण्ठशोषः पिपासामालस्यं मलस्य काये कार्यक्षिप्रेषूपदेहं परिदाहं सुप्तता चाङ्गेषु षट्पदपिपीलिकाभिः शरीरमन्त्राभिसरणं मूत्रे च मूत्रदोषान्वितं शरीरगन्धं निद्रां तन्द्राञ्च सर्वकालमिति।

उपद्रवास्तु खलु प्रमेहिणो ह्यधातीसारज्वरदाहतृष्णाङ्गभेदारोचकाविपाकाः पतिमांसपिडका

अलजीविद्रध्यादयश्च तत् प्रसङ्गाद्भवन्ति।

तत्र साध्यान् प्रमेहान् संशोधनोपशमनैर्यथार्हं सुपरादयेच्चिकित्सेदिति।" इति चरके निदानस्थाने चतुर्थेऽध्याये॥)

प्रमोचनी, स्त्री, (प्रकर्षेण मुच्यतेऽनयेति। प्र+मुच्+ल्युट्+ङीप्।) गवाक्षी। मोक्षुका। इति जटाधरः॥ प्रह्लादमोचनकर्त्तरि, त्रि॥ (यथा, महाभारते। ३। ८४। ५०।

"महाश्रमे वसेद्यात्रिं सर्वपापप्रमोचने॥")

प्रमोदः, पुं, (प्र+मुद् हर्षे+भावे घञ्।) हर्षः। इत्यमरः। १। ४। २४॥ (यथा, देवीभागवते। ४। २४। ५५।

"उत्पाद्य पुत्रजननप्रभवं प्रमोदं
दत्त्वा पुनर्विरहजं किल दुःखभारम्।
त्वं क्रीडसे सुललितैः खलु तैर्विहारै-
र्नोचेत् कथं मम सुतामिरतिर्वृथा स्यात्॥"

आमोदः। स तु गन्धविशेषः। यथा, भागवते। २। ६। २।

"त्रयाणामीषदूनानां घ्राणो मोदप्रमोदयोः॥"

"मोदप्रमोदयोः सामान्यविशेषगन्धयोः घ्राणेन्द्रियं परमायनम्।" इति तट्टीकायां श्रीधरस्वामी॥ नागविशेषः। यथा, महाभारते। १। ५७। ११।

"विहङ्गः शरभो मेदः प्रमोदः संहतापनः॥"

स्कन्दानुचरविशेषः। यथा, तत्रैव। ९। ४५। ६३।

आनन्दश्च प्रमोदश्च स्वस्तिको धनकस्तथा॥")

प्रमोदितः, पुं, (प्र+मुद् हर्षे+क्तः। "उदुपधादिति।" १। २। २१। इति किदभावः। प्रमोदोऽस्य जातः इतच् वा।) कुबेरः। इति शब्दमाला॥ प्रमोदयुक्ते, त्रि॥

प्रमोदिनी, स्त्री, (प्रमोदयतीति। प्र+मुद्+णिच्+णिनिः। ङीप्।) जिह्वनीवृक्षः। इति भावप्रकाशः॥ प्रकृष्टहर्षयुक्ता च॥

प्रम्लोचा, स्त्री, (प्रम्लोचति तापसादीन् प्रति गच्छतीति। प्र+म्लुच् गतौ+अच्। टाप्।) अप्सरोविशेषः। यथा, गारुडे ६० अध्याये।

"तत्र तस्मात्सरोमध्यात् सप्तपत्नौ मनोरमा।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः॥"

प्रयतः, त्रि, (प्र+यम्+क्तः। यद्वा, प्रयतते धर्म्मायार्थमिति। प्र+यत्+अच्।) पवित्रः। इत्यमरः। २। ७। ४५॥ (यथा, मनुः। २। १८३।

"ब्रह्मचार्याहरेन्नित्यं समिधः प्रयतोऽन्वहम्॥"

नम्रः। इति रामायणटीकायां रामानुजः॥ यथा, रामायणे। १। २। २४।

"बाल्मीकिरथ तं दृष्ट्वा महर्षीत्थाय वाग्यतः।
प्राञ्जलिः प्रयतो भूत्वा तस्थौ परमविस्मितः॥"

प्रयत्नविशिष्टे च॥)

प्रयत्नः, पुं, (प्र+यत यत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ्।" ३। ३। ९०। इति नङ्।) प्रकृष्टयत्नः। (यथा, मनुः। ७। ४८।

"वृद्धा च सर्वं तत्त्वेन परराजचिकीर्षितम्।
तथा प्रयत्नमातिष्ठेदयथात्मानं न पीडयेत्॥")

न्यायमते स च त्रिविधः। यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्।
इति प्रयत्नस्त्रिविधः तार्किकैः परिदर्शितः॥
चिकीर्षा तत्साधनेच्छासाधनज्ञानमत्रिक्रया।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्॥
निवृत्तिस्तु भवेद्द्वेधा द्विष्टसाधनताधियः।
यत्नो जीवनयोनिस्तु सर्वप्राणीन्द्रियो भवेत्॥
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम्॥"

इति भाषापरिच्छेदः॥

(तल्लक्षणं यथा, साहित्यदर्पणे।

"प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वराञ्चितः॥")

प्रयत्नवान्, [न्] त्रि. (प्रयत्नोऽस्यास्तीति। प्रयत्न+मतुप्। मस्य वः।) प्रकृष्टयत्नविशिष्टः। तत्पर्य्यायः। प्रतियत्नः२। इति त्रिकाण्डशेषः॥

प्रयस्त, त्रि, (प्र+यस् प्रयत्ने+क्तः।) प्रकृष्टयत्नसुसंस्कृतव्यञ्जनादि। इत्यमरः। २। ९। ४५॥

प्रयागः, पुं, (प्रकृष्टो यागो यत्र। यद्वा यज्ञः प्रकर्षेण भवतीत्यर्थः।) तीर्थभेदः। (प्रकृष्टो यागः।) यज्ञः। (प्रकृष्टा यागाः यज्ञा यस्य यत्नाद्वा।) इन्द्रः। अश्वः। इति मेदिनी। गे, ४१॥ * ॥

अथ प्रयागमाहात्म्यम्।

"ततो गच्छेत धर्म्मज्ञ! प्रयागन्दिविसम्मतम्।
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः॥
लोकपालाश्च सिद्धाश्च ऋषयः पितरस्तथा।
सनत्कुमारप्रमुखास्तथैव च महर्षयः॥
तथा नागाः सुपर्णाश्च सिद्धाश्च ऋतवस्तथा।
गन्धर्व्वाप्सरसश्चैव सरितः सागरास्तथा॥
हरिश्च भगवानास्ते प्रजापतिभिरावृतः।
तत्र त्रीण्यग्निकुण्डानि तयोर्मध्ये तु जाह्नवी॥
प्रयागात् समतिक्रान्ता सर्वतीर्थपुरस्कृता।
तपनस्य सुता तत्र त्रिषु लोकेषु विश्रुता॥
यमुना गङ्गया सार्द्धं सङ्गता लोकभाविनी।
गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम्॥
प्रयागं जघनस्थानमुपस्थस्तस्य वेदिः।
प्रयागं सप्रतिष्ठानं कम्बलाश्वतरावुभौ॥
तीर्थं भोगवती चैव वेदी प्रोक्ता प्रजापतेः॥
तत्र वेदाश्च यज्ञाश्च मूर्त्तिमन्तो महामते!॥
प्रजापतिमुपासन्ते ऋषयश्च महाव्रताः।
यजन्ते क्रतुभिर्देवाश्चापि चक्रधराः सदा॥
ततः पुण्यतमं नास्ति त्रिषु लोकेषु सत्तम!॥
प्रयागं सर्वतीर्थेभ्यः प्रवदन्त्यधिकं द्विजाः॥
श्रवणात् तस्य तीर्थस्य नामसङ्कीर्त्तनादपि।
मृत्तिकालभनाद्वापि सर्वपापैः प्रमुच्यते॥
तत्राभिषेकं यः कुर्य्यात् सङ्गमे संशितव्रतः।
पुण्यं स महदाप्नोति राजसूयाश्वमेधयोः॥
इयं यजनभूमिर्हि देवानामपि सत्तम!।
दत्तं तत्र स्वल्पमपि महदुच्यति सत्तम!॥
न वेदवचनात्तात! न लोकवचनादपि।
मतिरुत्क्रमणं याति प्रयागमरणं प्रति॥

दशतीर्थसहस्राणि षष्टिकोट्यस्तथापराः ।
तेषां सान्निध्यमत्रैव कीर्त्तितं कृतनन्दन ! ॥
यत् पुण्यं त्रिषु लोकेषु वेदविद्यासु यत् फलम् ।
स्नातमात्रस्य तत् पुण्यं गङ्गायमुनसङ्गमे ॥"

इति पाद्मे भूमिखण्डे १२७ अध्यायः ॥ * ॥

अपि च ।

"पुत्रकामः प्रयागे हि स्नायात् पुत्रे सिताऽसिते ॥
धनकामः पुरा प्रोक्तः स्नातो ह्यत्र द्विजोत्तम ! ॥
धनदस्य निधौन् सर्व्वान् तस्माच्चकार माययां ।
नारायणो नरश्चैव वर्षाणामयुतं पुरा ॥
अनाहारः प्रयागेऽस्मिन् स्नातवान् पुण्यसत्तमम् ।
सिद्धिञ्च साधका यान्ति प्रयागेऽस्मिन् द्विजोत्तम ! ॥"

इति पाद्मोत्तरखण्डे २३ अध्यायः ॥ * ॥

अपि च ।

युधिष्ठिर उवाच ।

"भगवन् ! श्रोतुमिच्छामि प्रयागगमनं फलम् ।
स्नातानां का गतिस्तत्र स्नातानामपि किं फलम् ॥
ये वसन्ति प्रयागे तु ब्रूहि तेषान्तु किं फलम् ।
भवता विदितं श्रोतत् तत्त्वं ब्रूहि नमोऽस्तु ते ॥

मार्कण्डेय उवाच ।

कथयिष्यामि ते नृप ! या चेष्टा यत्र तत् फलम् ।
दृष्टा महर्षिभिः सम्यक् कथ्यमानं मया श्रुतम् ॥
यत्र स्नाता दिवं यान्ति ये स्नतास्तेऽपुनर्भवाः ।
यत्र ब्रह्मादयो देवा रक्षां कुर्व्वन्ति सङ्गताः ॥
बहून्यन्यानि तीर्थानि सर्व्वपापहराणि च ।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ॥
संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्त्तनम् ।
षष्टिर्वर्षसहस्राणि यत्रा रक्षन्ति जाह्नवीम् ॥
यमुनां रक्षति सदा सविता सप्तवाहनः ।
प्रयागन्तु विशेषेण स्वयं रक्षति वासवः ॥
मङ्गलं रक्षति हरिः सर्व्वदेवैश्च संस्तुतम् ।
न्यग्रोधं रक्षते नित्यं मूलपाणिर्महेश्वरः ॥
स्नानं रक्षन्ति वै देवाः सर्व्वे पापहरं शुभम् ।
सकर्म्मबन्धनाः लोका नैव गच्छन्ति तत्पदम् ॥
स्वल्पमल्पतरं पापं यदा तस्य नराधिप ! ।
प्रयागं स्मरमात्रस्य सर्व्वमायाति संक्षयम् ॥
दर्शनात्तस्य तीर्थस्य नामसंकीर्त्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ॥
पञ्चकुण्डानि राजेन्द्र ! येषां मध्ये तु जाह्नवी ।
प्रयागं विशतः पुंसः पापं गच्छति तत्क्षणात् ॥
योजनानां सहस्रेषु गङ्गां यः स्मरते नरः ।
अपि दुष्कृतकर्म्मासौ लभते परमां गतिम् ॥
कीर्त्तनान्मुच्यते पापात् दृष्ट्वा भद्राणि पश्यति ।
आधितो यदि वा दीनः क्रुद्धो वापि भवेन्नरः ।
गङ्गायमुनमासाद्य त्यजेत् प्राणान् प्रयत्नतः ॥
दीप्तकाञ्चनवर्णाभैर्विमानैर्भास्वरैर्विभिः ।
ईप्सितान् लभते कामान् वदन्ति मुनिपुङ्गवाः ॥
सर्व्वरत्नमयैर्हर्म्यैर्नानाध्वजसमाकुलैः ।
वराङ्गनासमाकीर्णैर्भोदन्ते शुभलक्षणैः ॥
गीतवादित्रनिर्घोषैः प्रसुप्तः प्रतिबुध्यते ।

यावन्न क्षरते जन्म तावत् स्वर्गे महीयते ॥
तस्मात् स्वर्गात् परिभ्रष्टः शौचकर्म्मा नरोत्तमः ।
हिरण्यरत्नसंपूर्णे सद्मनि जायते कुले ॥
तदेव क्षरते तीर्थं क्षरत्वात्तच्च गच्छति ।
देशस्थो यदि वारण्ये विदेशे यदि वा गृहे ॥
प्रयागं स्मरमात्रस्तु यस्तु प्राणान् परित्यजेत् ।
ब्रह्मलोकमवाप्नोति यदग्नि मुनिपुङ्गवाः ॥
सर्व्वकामफला दृष्टा मही यत्र हिरण्मयी ।
ऋषयो मुनयः सिद्धास्तत्र लोके स गच्छति ॥
शौचश्रद्धाकुले रम्ये मन्दाकिन्याश्च टे शुभे ।
मोदते मुनिभिः सार्द्धं स्वर्गतेनेह कर्म्मणा ॥
सिद्धचारणगन्धर्व्वैः पूज्यते दिवि देवतैः ।
अथ स्वर्गात् परिभ्रष्टो जम्बुद्वीपपतिर्भवेत् ॥
अतः शुभानि कर्म्माणि चिन्त्यमानः पुनः पुनः ।
गुणवान् वित्तसम्पन्नो भवतीह न संशयः ॥
कर्म्मणा मनसा वाचा सत्यधर्म्मप्रतिष्ठितः ।
गङ्गायमुनयोर्मध्ये यस्तु दानं प्रयच्छति ।
सुवर्णमणिमुक्तां वा तथैवान्यत् प्रतिग्रहम् ॥
स्वकार्य्ये पितृकार्य्ये वा देवताभ्यर्च्चनेऽपि वा ।
निष्फलं तस्य तत्तीर्थे यावत् तद्गगनमश्नुते ॥
अतस्तीर्थे न ग्रहीयात् पुण्येष्वायतनेषु च ॥
कपिलां पाटलाभान्तु यस्तु धेनुं प्रयच्छति ।
यावद्रोमाणि तस्या वै सन्ति गात्रेषु सत्तम ! ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"

इति कौर्म्मे प्रयागमाहात्म्ये ३३ अध्यायः ॥*॥

तत्र स्नानविधिर्यथा,—

"गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरौ स्नते ।
आधाने सोमपाने च वपनं सप्तसु स्मृतम् ॥"

इति स्मृतिसमुच्चयलिखितवचनं प्रयागावच्छिन्नगङ्गायां विधायकम् । भास्करक्षेत्रं प्रयागः ।

अपि च । प्रयागमधिकृत्य ।

"केशानां यावती संख्या छिन्नानां जाह्नवीजले ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥"

प्रयागे स्त्रीणामपि मुण्डनं न तु केशानां दाक्षायणच्छेदनमात्रम् । यथा,—

"केशमूलमुपाश्रित्य सर्व्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तान्यत्र वापयेत् ॥"

प्रयागे मुण्डनाकरणे दोषोऽपि ।

"गङ्गायां भास्करक्षेत्रे मुण्डनं यो न कारयेत् ।
स कोटिकुलसंयुक्त आकल्पं रौरवे वसेत् ॥"

इति प्रायश्चित्ततत्त्वम् ॥

प्रयागभयः, पुं, (प्रयागात् प्रस्थानकारिजनात् बिभेति स्वपदपरित्यक्तभूकुर्य्येति । भी + अच् ।) वटः । इति शब्दरत्नमाला ॥

प्रयाणं, क्ली, (प्र + या + ल्युट् । यत्वम् ।) गमनम् । इति हलायुधः । २ । २६७ ॥ यथा,—

"उद्घाटितनवद्वारे पञ्जरे विहगोऽनिलः ।
यस्तिष्ठति तदाश्चर्य्यं प्रयाणे विजयः कुतः ॥"

इत्युद्भटः ॥

तत्पर्य्यायः । प्रस्थानम् २ गमनम् ३ व्रज्या ४ अभिनिर्याणम् ५ प्रयाणकम् ६ । इति हेमचन्द्रः । ३ । ४५३ ॥ अत्र राज्ञां युद्धादिप्रयाणे

वर्णनीयानि यथा । भेरीनिस्वनः १ भूतब्यः २ रजोधूलिः ३ रारभः ४ रवः ५ भयः ६ हृष्यम् ७ वल्गित् ८ भ्रुकुटम् ९ रयः १० । इति कविकल्पलता ॥

प्रयातः, पुं, (प्रकर्षेण यातः । प्र + या + कर्त्तरि क्तः ।) सौमिकः । भृगुः । इति हेमचन्द्रः ॥ गते, त्रि ॥ (क्ली, भावे क्तः । गमनम् । प्रस्थानम् । यथा, छन्दोमञ्जर्य्याम्

"मया क्षोणिः कालिये त्यं कुरु त्वं
सुजङ्घ ! प्रयातं हतं सागराय ॥")

प्रयामः, पुं, (प्र + यम् + घञ् ।) नीवाकः । इत्यमरः । १ । २ । २३ ॥ महार्घ्यहेतोर्धान्यादिषु जनानामादरातिशये तुलाधरताधिक्यम् । इति केचित् । क्रयादरः । इति केचित् । मूल्याधिक्यहेतोर्निश्चयेन परिच्छेदनम् । इति केचित् । इति भरतः ॥

प्रयासः, पुं, (प्र + यस प्रयत्ने + भावे घञ् ।) प्रयत्नः । तत्पर्य्यायः । श्रमः २ क्लमः ३ क्लेशः ४ परिश्रमः ५ आयासः ६ आयामः ७ । इति हेमचन्द्रः । २ । २३४ ॥ (यथा, हठयोगप्रदीपिकायाम् । १ । १५ ।

"अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः ।
जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति ॥")

प्रयुक्तं, त्रि, (प्र + युज् + क्तः ।) प्रकर्षेण युक्तम् । यथा,—

"गुणप्रयुक्ताः परमर्म्मभेदिनः
शरा इवार्थग्रहणा भवन्ति हि ।
तथाविधा ये तु विशुद्धवंशजा
व्रजन्ति चापा इव तैरतिनम्रताम् ॥"

इत्युद्भटः ॥

प्रशस्तसमाधियुक्तम् । प्रशस्तसंयोगविशिष्टम् । प्रशस्तनिबन्धयुक्तम् । प्रशस्तसंयमविशिष्टम् । प्रपूर्व्वयुगधात्वर्थदर्शनात् । हेतौ क्तौ । यथा । न च समवायिनिमित्ताभावप्रयुक्तो नियमेव कार्य्याभावः किन्त्वसमवायिकारणाभावप्रयुक्तोऽपि । इति रश्चिन्तः ॥

प्रयुक्तिः, स्त्री, प्रयोजनम् । प्रपूर्व्वयुजधातोर्भावे क्तिः (क्तिन्) । यथा,—

"तदयं दृश्यतां भार्य्या प्रवीरं पुत्रकाम्यति ।
अहञ्च राजमातङ्गा इति न स्तुः प्रयुक्तयः ॥"

इति प्राचः ॥

(प्रयोगः । यथा, ऋग्वेदे । १ । २५१ । ८ ।

"युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना
मनसो न प्रयुक्तिषु ॥"

"प्रयुक्तिषु प्रयोगेषु ।" इति तद्भाष्ये सायणः ॥)

प्रयुतं, क्ली, (प्रकर्षेण युतम् ।) नियतम् । इति हेमचन्द्रः । ३ । ५१७ ॥ (दशलक्षसंख्या । "एक दशशतसहस्रायुत लक्षप्रयुतकोटयः क्रमशः ।" इति लीलावती । यथा च महाभारते । १ । २५ । १६ ।

"बहूनीह सहस्राणि प्रयुतान्यर्ब्बुदानि च ।
अक्षौहिण्यश्च संख्यातुं पन्नगानां तपोधन ! ॥")

प्रयुक्तार्थः, पुं, (प्रयुक्तः अर्थो यस्य सः।) प्रत्युत्क्रमः। इति प्रयोगार्थशब्दटीकायां रमानाथः। १। २। २६।

प्रयोक्ता, [क्तृ] पुं, (प्रयुनक्तीति। प्र+युज्+तृच्।) उत्तमर्णः। यथा,—

'उत्तमर्णाधमर्णौ तु प्रयोक्तृप्रातिकौ क्रमात्॥'

इत्यमरः। २। ८। ५॥

त्रि, प्रयोगकर्त्ता। (यथा रघुः। ५। ५७।

"संमोहनं नाम सखे! ममास्त्रं
प्रयोगसंहारविभक्तमन्त्रम्।
गान्धर्वमादत्स्व यतः प्रयोक्तु-
र्न चारिहिंसा विजयश्च हस्ते॥"

अनुष्ठाता। यथा, रघुः। ६। ७६।

"पुत्रो रघूणामयमग्रयाणां
महाक्रतोर्विघ्नजितः प्रयोक्ता॥"

नियोगकर्त्ता। यथा, महाभारते। १३। २३। ६२।

"परदाराभिहर्त्तारः परदाराभिमर्षिणः।
परदारप्रयोक्तारस्ते वै निरयगामिनः॥"

नाट्याचार्य्यः। यथा, रघुः। १८। ३६।

"स प्रयोगनिपुणैः प्रयोक्तृभिः
सङ्गरर्षं सह मित्रसन्निधौ॥")

प्रयोगः, पुं, (प्र+युज्+भावकर्म्मादौ यथायथं घञ्।) कार्म्मणम्। वशीकरणम्। प्रयुक्तिः। (यथा, रघुः। २। ४२।

"प्रत्यब्रवीच्चैनमिषुप्रयोगे
तत्पूर्व्वभङ्गे वितथप्रयत्नः॥")

निदर्शनम्। इति मेदिनी। गे, ४४॥ (यथा, प्रबोधचन्द्रोदये। ६। ४३।

"स्वयमात्मेति पर्य्यायस्तेन लोके त्रयोः सह।
प्रयोगो नाम्नयतः स्वत्वमात्मत्वाभ्यवारकम्॥"

घोटकः। इति शब्दमाला॥ (सामान्योपायानुष्ठानम्। यथा, माघे। ११। ६।

"क्षपयन्नयितविद्विषः कलयन्तः प्रयोगा-
नुदधिमवति राज्ये काव्यवद्दुर्विगाहे॥"

अभिनयः। यथा, रघुः। १८। ३६।

"स प्रयोगनिपुणैः प्रयोक्तृभिः
सङ्गरर्षं सह मित्रसन्निधौ॥"

हस्ते ऋणदानम्। स तु धनप्राप्त्युपायेषु अन्यतमः। यथा, मनुः। १०। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

प्रयोगार्थः, पुं, (प्रयोगः अर्थः प्रयोजनं यस्य।) प्रधानप्रयोगानुकूलं प्रयोजनानुष्ठानम्। तत्पर्य्यायः। प्रत्युत्क्रमः २। इत्यमरः। ३।२।२६॥

प्रयोगी, [न्] त्रि, (प्रयोगोऽस्यास्तीति। प्रयोग+"अत इनिठनौ।" ५।२।११५। इति इनिः।) प्रयोगयुक्तः। (यथा, अमरे। २। ७। २०।

"सनूत्रः परिचार्य्योपचार्य्यावग्नौ प्रयोगिणः॥")

प्रयोजकः, त्रि, (प्रयुनक्ति प्रेरयति कार्य्यादौ कर्त्रादीनिति। प्र+युज्+ण्वुल्।) प्रयोगकर्त्ता। नियोगकर्त्ता। कर्त्तरकर्त्तृप्रयोजको कर्त्ता इति उपपदव्याकरणम्॥ (यथा, राजतरङ्गिण्याम्। ६। ११८।

"यान् द्रोणभीष्कन् सभाज्य संविभिजे यशस्करः
तस्य तत्तनयोच्छेदे त एवासन् प्रयोजकाः॥"

नियन्ता। यथा, याज्ञवल्क्ये। १। ५।

"आतातायी वधिष्यंश्च धर्म्मशास्त्रप्रयोजकाः॥")

प्रयोजनं, क्लीं, (प्रयुज्यते इति। प्र+युज्+ल्युट्) कार्य्यम्। (प्रयुज्यतेऽनेनेति। प्र+युज्+करणे ल्युट्।) हेतुः। इति मेदिनी। ने, १८३॥ यथा,

"सर्वस्यैव हि शास्त्रस्य कर्म्मणो वापि कस्यचित्
यावत् प्रयोजनं नोक्तं तावत् तेन प्रयुज्यते॥
सिद्ध्यर्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते।
शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"

इति प्राहुः॥

('प्रयोजनञ्च द्विविधं मुख्यं गौणञ्च। तत्र अन्येच्छानधीनेच्छाविषयत्वं मुख्यप्रयोजनत्वम् अन्येच्छाधीनेच्छाविषयत्वं गौणप्रयोजनत्वम्। तत्राद्यं सुखं तद्भोगो दुःखाभावश्च। द्वितीयं तदुपकारि शयनभोजनादि। तस्य मुख्यप्रयोजनेच्छयैव जन्याया इच्छाया विषयत्वात्तथात्वम्।" इति मुक्तिवादे गदाधरः॥ उद्योगः। यथा

"अथ प्रयोजनम्। प्रयोजनं नाम यदर्थमारभ्यन्त आरभ्याः। यथा यद्यकालमृत्युरस्ति ततोऽहमात्मानमायुष्येरुपचरिष्याम्यनायुष्यैः परिहरिष्यामि कथं न मामकालमृत्युः प्रसहेतेति।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥)

प्रयोज्यः, त्रि, (प्र+युज्+ण्यत्। 'प्रयोज्यनियोज्यौ शक्यार्थे।" ७।३।६८। इति निपातनात् साधुः। प्रयोक्तुं शक्यः। इति मुग्धबोधव्याकरणम्॥ (यथा, मनुः। ३।१५८।

"वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्ममिच्छता॥")

मूलधने, क्लीं॥

प्ररूढः, पुं, (प्ररोहत्यवेति। प्र+रुह+क्तः।) जठरम्। इति मेदिनी। ढे, ८॥ (क्वचित् जरठोऽपि पाठः॥)

प्ररूढः, त्रि, (प्र+रुह+क्तः।) बद्धमूलः। इति मेदिनी। ढे, ८॥ (यथा भागवते। ४। १३। १।

"प्ररूढभावो भगवत्यधोक्षजे
प्रष्टुं पुनस्तं विदुरः प्रचक्रमे॥")

जातः। (यथा, रघुः। १३। ६।

"नाभिप्ररूढाम्बुरुहासनेन
संस्तूयमानः प्रथमेन धात्रा॥")

प्रहृष्टः। इति शब्दरत्नावली॥

प्ररोहः, पुं, (प्ररोहतीति। प्र+रुह+अच्।) अङ्कुरः। इति हेमचन्द्रः। ४। १८५॥ (यथा, कुमारे। ५। ६०।

"द्रुमेषु सद्यः कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः॥"

नन्दीवृक्षः। तत्पर्य्यायो यथा,—

"नन्दीवृक्षोऽम्बुदभेदः प्ररोहो गजपादपः।
कालीवृक्षः शतवरः शौरी च स्वाहनक्षतिः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रलपितः, त्रि, प्रपूर्व्वलपधातोः कर्म्मणि क्तः। कथितः। यथा, काव्यप्रकाशे।

"जनस्थाने श्रुत्वं जनकसुतयाश्चिन्तधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्॥"

प्रलम्बः, पुं, (प्रलम्बते इति। प्र+लम्ब+अच्। यतिदीर्घत्वादेव तथात्वम्।) दैत्यभेदः। स च दनुपुत्रः मनुष्यवध्यः। यथा,—

"एकाश्च शतभोऽरिष्टः प्रलम्बनरकौ तथा।
द्विमूर्द्धवाधनकेशी च पुरः ग्रहोऽथ धेनुकः॥
गवेष्टिको नवाक्षश्च तालकेतुश्च वीर्य्यवान्।
एते मनुष्यवध्यास्तु दनोः पुत्राश्च स्मृताः॥"

इत्यग्निपुराणम्॥

(अयं हि बलदेवेन निहतः। यथा, भागवते १० स्कन्धे १८। अध्याये।

"तत्रोपाश्रय गोपालान् कृष्णः प्राह विहारवित्।
हे गोपा विहरिष्यामो द्वन्द्वीभूय यथायथम्॥
तत्र चक्रुः परिवृढौ गोपा रामजनार्द्दनौ।
कृष्णसङ्घट्टिनः केचिदासन् रामस्य चापरे॥
आचेरुर्विविधाः क्रीड़ा वाह्यवाहकलक्षणाः।
यत्रारोहन्ति जेतारो वहन्ति च पराजिताः॥"

"उवाह कृष्णो भगवान् श्रीदामानं पराजितः।
वृषभं भद्रसेनस्तु प्रलम्बो रोहिणीसुतम्॥
अविषह्यं मन्यमानः कृष्णं दानवपुङ्गवः।
वहन् द्रुततरं प्रागादवरोहणतः परम्॥
"अथागतस्मृतिरभयो रिपुं बलो
विहाय सार्थमिव हरन्तमात्मनः।
रुषाहनच्छिरसि दृढेन मुष्टिना
सुराधिपो गिरिमिव वज्ररंहसा॥
स आहतः सपदि विशीर्णमस्तको
मुखाद्दमन् रुधिरमपस्कृतोऽसुरः।
महारवं व्यसुरपतत् समीरयन्
गिरिर्यथा मघवत आयुधाहतः॥")

वपुषः। पयोधरः। लताङ्कुरः। ग्राम्या। हारभेदः। (भावे घञ्) प्रलम्बनम्। इति मेदिनी। बे १३॥ (देशविशेषः। यथा, रामायणे २।६८।१२।

"न्यस्तेनापरतालस्य प्रलम्बस्योत्तरं प्रति।
निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम्॥"

लम्बमाने, त्रि। यथा, महाभारते १।१८५।१०।

"गूढोत्तरांसान् भुजगेन्द्रभोग-
प्रलम्बबाहून् पुरुषप्रवीरान्॥")

प्रलम्बघ्नः, पुं, (प्रलम्बं हन्तीति। हन्+कः।) बलरामः। इत्यमरः। १। १। २४॥

प्रलम्बभित्, पुं, (प्रलम्बं भिनत्तीति। भिद्+क्विप्) बलरामः। इति हेमचन्द्रः। २। १३८॥

प्रलम्बाक्षः, पुं, (प्रलम्बो लम्बमानः अक्षो यस्य।) दीर्घाक्षकोषविशिष्टः। तत्पर्य्यायः। पुष्करः २ इति हेमचन्द्रः। ३। १२१॥

प्रलम्बितः, त्रि, प्रपूर्व्वलम्बधातोः कर्त्तरि क्तः ॥ प्रकर्षेण लम्बितमाद्यादिः ॥

प्रलयः, पुं, (प्रलीयते लीयते जगदस्मिन्निति। प्र+ली+"एरच्।" ३।३।५६। इत्यच्।) प्रलयः। तत्पर्य्यायः। संवर्त्तः २ कल्पः ३ क्षयः ४ कल्पान्तः ५। इत्यमरः। १।४। २२॥ लयः ६ संक्षयः ७ विलयः ८। इति शब्दरत्नावली॥ प्रतिसर्गः ९ प्रतिसञ्चरः १०। स च नित्यनैमित्तिकप्राकृतात्यन्तिकभेदेन चतुर्धा। यथा,—

कूर्म्म उवाच।

"नित्यं नैमित्तिकञ्चैव प्राकृतात्यन्तिकौ तथा।
चतुर्धायं पुराणेऽस्मिन् प्रोच्यते प्रतिसञ्चरः॥"*

नित्यो यथा,—

"योऽयं संदृश्यते नूनं नित्यं लोके क्षयस्त्विह।
नित्यं संकीर्त्त्यते सद्भिः सुनिभिः प्रतिसञ्चरः॥"

नैमित्तिको यथा,—

"ब्राह्मो नैमित्तिको नाम कल्पान्ते यो भविष्यति।
त्रैलोक्यस्यास्य कथितः प्रतिसर्गो मनीषिभिः॥"

प्राकृतो यथा,—

"महदाद्यं विशेषान्तं यदा संयाति संक्षयम्।
प्राकृतः प्रतिसर्गोऽयं प्रोच्यते कालचिन्तकैः॥"

आत्यन्तिको यथा,—

"ज्ञानादात्यन्तिकः प्रोक्तो योगिनः परमात्मनि
प्रलयः प्रतिसर्गोऽयं कालचिन्तापरैर्द्विजैः॥
आत्यन्तिकश्च कथितः प्रलयो लयसाधनः॥"*

नैमित्तिकप्रलयविस्तारो यथा,—

"नैमित्तिकमिदानीं वः कीर्त्तयिष्ये समासतः॥
चतुर्युगसहस्रान्ते संप्राप्ते प्रतिसञ्चरे।
आत्मसंस्थाः प्रजाः कर्त्तुं प्रतिपेदे प्रजापतिः॥
ततो भवत्यनावृष्टिस्तीव्रा सा शतवार्षिकी।
भूतक्षयकरी घोरा सर्वभूतभयङ्करी॥
ततो यान्यल्पसाराणि शस्यानि पृथिवीतले।
तानि चाद्ये प्रलीयन्ते भूमित्वमुपयान्ति च॥
सप्तरश्मिरथो भूत्वा समुत्तिष्ठन् दिवाकरः।
अतिरश्मिरथो भवति पिबन्नम्भो गभस्तिभिः॥
ततस्ते रश्मयः सप्त पिबन्त्यम्बु महार्णवे।
तेनाहारेण ते सूर्य्या दीप्ताः सप्त भवन्ति हि॥
तस्य ते रश्मयः सप्त सूर्य्या भूत्वा चतुर्दिशम्।
चतुर्लोकमिदं कृत्स्नं दहन्ति शिखिनो यथा।
व्याप्नुवन्त्यथ ते विप्रास्तूर्द्ध्वाधश्च रश्मिभिः।
दीप्यन्ते भास्कराः सप्त दहन्तोऽग्निप्रतापिनः
ते सूर्य्या वारिणा दीप्ता बहुसाहस्ररश्मयः।
खं समावृत्य तिष्ठन्ति निर्दहन्तो वसुन्धराम्॥
ततस्तु पां प्रतापेन दह्यमाना वसुन्धरा।
सार्द्रिनद्यर्णवद्वीपा निर्दग्धा समपद्यत॥
दीप्ताभिः सन्ततार्चिर्भिश्च ज्वालाभिश्च समावृतः।
अधश्चोर्द्धञ्च तिर्य्यक् च समावृत्य सहस्रशः॥
सूर्य्याग्निना प्रसृष्टानां संसृष्टानां परस्परम्।
एकत्वमुपजातानामेकज्वालो भवेत् प्रभुः।
सर्वलोकप्रणाशाय सोऽग्निर्भूत्वाऽन्तकुण्डलो।
चतुर्लोकमिदं कृत्स्नं निर्दहत्यात्मतेजसा॥
ततः प्रलीने सर्व्वस्मिन् जङ्गमे स्थावरे तथा।
निर्द्दग्धा निस्तृणा भूमिः कूर्म्मपृष्ठे प्रकाशते॥
अम्बरीषमिवाभाति सर्व्वमापूरितं जगत्।
सर्व्वमेव तदार्चिर्भिः पूर्णं जाज्वल्यते नभः॥
पातालेषु यानि तीर्थानि समुद्रोदधिगतानि तु।
तत्र तानि प्रलीयन्ते भूमित्वमुपयान्ति वै॥
द्वीपान् पर्वतांश्चैव वर्षाण्यथ समुद्रोदधीन्।
तान् सर्व्वान् भस्मसात् कृत्वा ससात्मा पावकः प्रभुः॥
समुद्रेभ्यो नदीभ्यश्च पातालेभ्यश्च सर्व्वशः।
पिबत्यपः समिद्धोऽग्निः पृथिवीमाप्यितोऽज्वलत्
ततः सम्वर्त्तकः श्रीमानतिक्रम्य महास्तथा।
लोकान् दहति दीप्तात्मा रुद्रतेजोविजृम्भितः॥
स दग्ध्वा पृथिवीन्द्वेवो रसातलमशोषयत्।
अधस्तात् पृथिवीं दग्ध्वा दिवमूर्द्धं दहिष्यति॥
योजनानां शतानीह सप्तसाप्ययुतानि च।
उत्तिष्ठन्ति शिखास्तस्य वायुः सम्वर्त्तकस्य च॥
गन्धर्व्वांश्च पिशाचांश्च सयक्षोरगराक्षसान्।
तदा दहत्यसौ दीप्तः कालरुद्रप्रचोदितः॥
भूर्लोकञ्च भुवर्लोकं स्वर्लोकञ्च तथा महः।
दहेदशेषं कालाग्निः कालो विग्रहवान् स्वयम्॥
व्युष्टेषु तेषु लोकेषु तिर्य्यगूर्द्धमथाग्निना।
तत्तेजः समनुप्राप्य कृत्स्नं जगदिदं शनैः॥
अयोगुडनिभं सर्व्वं तदेवैकं प्रकाशते।
ततो गजकुलाकाराः स्तनितैः समलङ्कृताः॥
उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्त्तका घनाः
कचिन्नीलोत्पलश्यामाः कचित् कुमुदसन्निभाः
धम्रवर्णास्तथा कचित् तथा पीताः पयोधराः।
कचिद्रक्ताभवर्णाश्च स्थूलाः क्षारनिभास्तथा॥
शङ्खकुन्दनिभाश्चान्ये जात्यञ्जननिभाः परे।
मनःशिलानिभाश्चान्ये कपोतसदृशाः परे॥
कचिद् द्राक्षवर्णाभास्तथान्ये क्षारसन्निभाः।
तथा कर्व्वूरवर्णाभा भिन्नाञ्जननिभास्तथा॥
इन्द्रगोपनिभाः कचिद्धरितालनिभास्तथा।
काकाण्डकनिभाः कचिदुत्तिष्ठन्ति घना दिवि
कचित् पर्व्वतसङ्काशाः कचिद्गजकुलोपमाः।
कूटागारनिभाश्चान्ये कचिन्नीलकुलाद्रिभाः॥
बहुरूपा घोररूपा घोरस्वरनिनादिनः।
तदा जलधराः सर्व्वे पूरयन्ति नभस्तलम्॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः
सप्तधा संहतात्मानस्तमग्निं शमयन्त्युत॥
ततस्ते जलदा वर्षं वर्षन्तोऽद्रिहिमोपमाः।
सुघोरमग्निवं सर्व्वं नाशयन्ति च पावकम्॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल।
आदित्यस्तेजोऽभिभूतत्वात्तदाग्निः प्रविशत्यपः॥
नष्टे चाग्नौ वर्षं गते; पयोदा जलसम्भवाः।
प्लावयन्तोऽथ भुवनं महाजलपरिस्रवैः॥
धाराभिः पूरयन्तोदं चोद्यमानाः स्वयम्भुवा।
उद्यन्तः सलिलोर्व्वेयं वेला इव महोदधेः॥
सार्द्रिद्वीपा तथा पृथ्वी जले संछाद्यते शनैः।
आदित्यरश्मिभिः पीतं जलमात्रं तु तिष्ठति॥
पुनः पतति तत्रापो पूर्य्यन्ते तेन चार्णवाः॥
ततः समुद्राः खं वेलामतिक्रान्तास्तु कृत्स्नशः
पर्व्वताश्च विलीयन्ते मही चाप्सु निमज्जति॥
तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे।
योगनिद्रां समास्थाय शेते देवः प्रजापतिः॥
चतुर्युगसहस्रान्तं कल्पमाहुर्मनीषिणः।
वराहो वर्त्तते कल्पो यस्य विस्तार ईरितः॥
असंख्यातास्तथा कल्पा ब्रह्मविष्णुशिवात्मकाः
कथिता हि पुराणेषु मुनिभिः कालचिन्तकैः॥
सात्त्विकेष्वथ कल्पेषु माहात्म्यमखिलं हरेः।
तामसेषु शिवस्योक्तं राजसेषु प्रजापतेः।
सोऽयं प्रवर्त्तते कल्पो वाराहः सात्त्विको मतः॥
अन्ये च सात्त्विकाः कल्पा मम तेषु परिग्रहः।
ध्यानान्तपस्तथा स्नानं लब्ध्वा तेष्वेव योगिनः॥
आराध्य गिरिशं यान्ति तत्परमं पदम्।
सोऽहं सत्त्वं समाधाय मायी मायामयं स्वयम्॥
एकार्णवे जगत्यस्मिन् योगनिद्रां व्रजामि तु।
मां पश्यन्ति महात्मानः सुप्तं काले महर्षयः॥
जनलोके वर्त्तमानास्तपसा योगचक्षुषा।
अहं पुराणपुरुषो भूर्भुवः प्रभवो विदुः॥
सहस्रचरणः श्रीमान् सहस्राक्षः सहस्रपात्।
मन्योऽग्निर्ब्राह्मणा गावः कुशाश्च समिधो मुखम्
प्राक्षणो च स्रुवश्चैव सोमो हुतमयोऽस्म्यहम्।
संवर्त्तको महानात्मा पवित्रं परमं यशः॥
वेदवेद्यः प्रभुर्गोप्ता गोपतिर्ब्राह्मणो मुखम्।
अनन्तस्तारको योगी गतिर्मतिमतां वरः॥
हंसः प्राणोऽथ कपिलो विश्वमूर्त्तिः सनातनः।
चेतज्ञः प्रकृतिः कालो जगद्बीजमथाव्ययम्॥
माता पिता महादेवो मत्तो ह्यन्यन्न विद्यते॥

आदित्यवर्णो भुवनस्य गोप्ता
नारायणः पुरुषो योगमूर्त्तिः।
मां पश्यन्ति यतयो योगनिष्ठा
ज्ञात्वात्मानममृतत्वं व्रजन्ति॥"*॥

प्राकृतप्रलयविस्तारो यथा,—

कूर्म्म उवाच।

"अतः परं प्रवक्ष्यामि प्रतिसर्गमनुत्तमम्।
प्राकृतं प्रममासेन शृणुध्वं गदतो मम॥
गते परार्द्धद्वितये काले लोकप्रकालकः।
कालाग्निर्भस्मसात् कर्त्तुं करोति निखिलं मतिम्॥
आत्मन्यात्मानमावेश्य भूत्वा देवो महेश्वरः।
दहेदशेषं ब्रह्माण्डं सदेवासुरमानुषम्॥
तमाविश्य महादेवो भगवान्कालरोहितः।
करोति लोकसंहारं भीषणं लोकमास्थितः॥
प्रविश्य मण्डलं सौरं कृत्वासौ बहुधा पुनः।
निर्दहत्यखिलं लोकं समसप्तसरूपधृक्॥
न दग्ध्वा सकलं सत्त्वं मन्त्रब्रह्मशिरो महत्।
देवतानां शरीरेषु क्षिपत्यखिलदाहकः॥
दग्धे ह्यग्नेयदेहेषु देवो गिरिवरात्मजा।
एका सा साक्षिणः शश्वोस्तिष्ठते वैदिकी श्रुतिः
शिरःकपालदेवानां कृतसङ्गरभूषणः।
आदित्यचन्द्रादिगणैः पूरयन् व्योममण्डलम्॥

सहस्रनयनो देवः सहस्रास्त्रतिरीश्वरः ।
सहस्रहस्तचरणः सहस्रार्चिर्महाभुजः ॥
दंष्ट्राकरालवदनः प्रदीप्तानललोचनः ।
त्रिशूली क्षत्तिवसनो योगमैश्वरमाश्रितः ॥
पीत्वा तत् परमानन्दं प्रभूतममृतं स्वकम् ।
करोति ताण्डवं देवीमालोक्य परमेश्वरः ॥
पीत्वा मृत्यामृतं देवी भर्तुः परममङ्गला ।
योगमाख्याय देवस्य देहमायाति शूलिनः ॥
स त्यक्त्वा ताण्डवरसं स्वेच्छयैव पिनाकधृक् ।
याति स्वभावं भगवान् दग्ध्वा ब्रह्माण्डमण्डलम्
संस्थितेष्वथ देवेषु ब्रह्मविष्णुपिनाकिषु ।
गुणैरनेकैः पृथिवी विलयं याति वारिषु ।
न वारितत्त्वं सगुणं ग्रसते द्रव्यवाहनः ॥
तैजसं गुणसंयुक्तं वायौ संयाति संक्षयम् ।
आकाशे सगुणो वायुः प्रलयं याति सत्तमाः ॥
भूतादौ च तथाकाशं लीयते गुणसंयुतम् ।
इन्द्रियाणि च सर्वाणि तैजसे यान्ति संक्षयम् ॥
वैकारिके देवगणाः प्रलयं यान्ति सत्तमाः ।
वैकारिकस्तैजसश्च भूतादिर्येति सत्तमाः ॥
त्रिविधोऽयमहङ्कारो महति प्रलयं व्रजेत् ।
महान्तमेभिः सहितं ब्रह्माणमसृतौजसम् ॥
अव्यक्तं जगतो योनिः संक्षरेटकमव्ययम् ।
एवं संक्षत्य भूतानि तत्स्थानि च महेश्वरः ॥
नियोजयत्यथान्योन्यं प्रधानं पुरुषं परम् ।
प्रधानपुंसोरजयोरेष संहार ईरितः ॥
महेश्वरेच्छाजनितो न स्वयं विद्यते लयः ।
गुणसाम्यं तदव्यक्तं प्रकृतिः परिगीयते ॥
प्रधानं जगतो योनिर्मायातत्त्वमचेतनम् ।
कूटस्थश्चिन्मयो ह्यात्मा केवलः पञ्चविंशकः ॥
गीयते मुनिभिः साक्षो महानेकः पितामहः ।
एव संहारकरणो ग्रक्तिर्माहेश्वरो ध्रुवा ॥
प्रधानाद्यं विशेषान्तं दर्शयद्भ इति श्रुतिः ।
योगिनामथ सर्वेषां ज्ञानविघ्नस्वरूपतः ।
आत्यन्तिकस्त्वेव लयं विदधातीह शङ्करः ॥"

इति कौर्मे ।४२।४६। अध्यायो ॥ * ॥

आत्यन्तिकप्रलयविस्तारो यथा,—

औपराशर उवाच ।

"आध्यात्मिकादि मैत्रेय ! ज्ञात्वा तापत्रयं बुधः
उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम् ॥
आध्यात्मिको द्वै द्विविधः शारीरो मानसस्तथा
शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतान्च सः ॥
शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैः ।
गुल्मार्शःक्षयपुण्डासक्ष्यर्दादिभिरनेकधा ॥
तथाक्षिरोगातीसारकुष्ठाद्यामयसंक्षकैः ।
भिद्यते देहजस्तापो मानसं श्रोतुमर्हसि ॥
कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकासूयावमानेर्ष्यामात्सर्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ।
इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥
मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः ।
सरीसृपाद्यैश्च मृगा जन्यते चाधिभौतिकः ॥
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः ।
तापो द्विजवरश्रेष्ठ ! कथ्यते चाधिदैविकः ॥
तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ।
गर्भजन्मजरादेषु स्थानेषु प्रभविष्यतः ॥
निरस्तातिशयाह्लादसुखभावैकलक्षणा ।
भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥
तस्मात्तत्प्राप्तये यत्नः कर्त्तव्यः पण्डितैर्नरैः ।
तत्प्राप्तिहेतुर्ज्ञानञ्च कर्म्म चोक्तं महामुने ! ॥
आगमोत्थं विवेकाद्यं द्विधा ज्ञानं तथोच्यते ।
शब्दब्रह्मागममयं परं ब्रह्म विवेकजम् ॥
अन्धस्तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ।
यथा सूर्य्यस्तथा ज्ञानं यदिदं विवेकजम् ॥
मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तम ! ।
तदेतच्छ्रूयतामत्र सम्बन्धे गदतो मम ॥
द्वे ब्रह्मणो वेदितव्ये शब्दब्रह्म परञ्च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥
द्वे विद्ये वेदितव्ये वै इति चाथर्ब्वणी श्रुतिः ।
परया त्वक्षरप्राप्तिरृग्वेदादिमया परा ॥
यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रमजरमचिन्त्यमजमव्ययम् ।
अनिर्देश्यमरूपञ्च पाणिपादाद्यसंयुतम् ॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम् ।
व्याप्यव्याप्यं यतः सर्व्वं तं वै पश्यन्ति सूरयः ॥
तद्ब्रह्म तत् परं धाम तदेयं मोक्षकाङ्क्षिणाम् ।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् ॥
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः ।
वाचको भगवच्छब्दस्तस्याद्यस्याक्षरात्मनः ॥
एवंनिगदितार्थस्य सतत्त्वं तस्य तत्त्वतः ।
ज्ञायते येन तज्ज्ञानं परमन्यत्त्रयीमयम् ॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज ! ।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः ॥
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते ।
मैत्रेय ! भगवच्छब्दः सर्व्वकारणकारणे ॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्व्वात्मा वासुदेवस्ततः स्मृतः ॥
खादिषड्व्यञ्जनकायाद्यैः पृष्टः केशिध्वजः पुरा ।
नामव्याख्यां ज्ञानलक्ष्यं वासुदेवस्य तत्त्वतः ॥
भूतेषु वसते सोऽन्तर्व्वसन्त्यत्र च तानि यत् ।
धाता विधाता जगतां वासुदेवस्ततः प्रभुः ॥
स सर्व्वभूतप्रकृतिर्विकार-
गुणांश्च दोषांश्च मुने ! व्यतीतः ।
अतीतसर्व्वावरणोऽखिलात्मा
तेनास्तृतं यद्भुवनान्तराणि ॥
समस्तकल्याणगुणात्मको हि
स्वशक्तिलेशावृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः
संसाधिताशेषजगद्धितोऽसौ ॥
तेजोबलैश्वर्य्यमहाद्युतीनां
सवीर्य्यशक्त्यादिगुणैकराशिः ।
परः परेभ्यः सकलाद्यतीतः
पुमानवाक्यो मनसो न यश्च
क्लेशादयः सन्ति परावरेशे ॥
स ईश्वरो व्यष्टिसमष्टिरूपो-
ऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्व्वेश्वरः सर्व्वदृक् सर्व्ववेत्ता
समस्तशक्तिः परमेश्वराख्यः ॥
स ज्ञायते येन तदस्तदोषं
शुद्धं परं निर्म्मलमेकरूपम् ।
संदृश्यते वाप्यवगम्यते वा
तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥"

इति विष्णुपुराणे ६ अंशे आत्यन्तिकप्रतिसञ्चारो नाम ५ अध्यायः ॥*॥ अपि च ।

नारद उवाच ।

"कृतं त्रेता द्वापरञ्च कलिश्चेति चतुर्युगम् ।
दिव्यमेकयुगं ज्ञेयं तस्य या वैकसप्ततिः ॥
मन्वन्तरन्तु तज्ज्ञेयं तै तु यत्र चतुर्दश ।
स कल्पो नाम वै कालस्तदन्ते प्रलयस्तु यः ॥
सा ब्रह्मरात्रो राजेन्द्र ! तत्र शेतेऽम्बुजासनः ।
त्रयो लोकास्तदा राजन् लीयन्ते तन्निमित्ततः ॥
नैमित्तिको लयो नाम दैनन्दिन इतीर्य्यते ॥
एवं दिनप्रमाणेन ब्रह्मणः शतवार्षिकम् ।
आयुः पूर्व्वपरार्द्धे तु परार्द्धे ह्ये प्रकीर्त्तिते ॥
द्विपरार्द्धं व्यतीते तु ब्रह्मणो जगदात्मनः ।
तदा प्रकृतयः सप्त प्रलयं यान्ति भूमिप ! ॥
लयः प्राकृतिको ह्येष लीने ब्रह्मणि भूपते ! ।
अण्डकोषेऽपि सकलः प्रलयं याति सर्व्वशः ॥
पूर्व्वरूपन्तु वक्ष्यामि प्रलयस्यास्य भूपते ! ।
शतवर्षाणि भूमौ हि पर्জ্জन्यो नैव वर्षति ॥
दुर्भिक्षे निर्জने लोके प्रजाः सर्व्वाः क्षुधार्दिताः ।
परस्परं भक्ष्यमाणाः क्षयं यास्यन्ति भूमिप ! ॥
समुद्रे च धरण्याञ्च वृक्षेषु च लतासु च ।
देहे च यो रसस्तं हि रविर्हरति रश्मिभिः ॥
ततः संवर्त्तको नाम ज्वालामाली हुताशनः ।
सङ्कर्षणमुखोत्पन्नो दहत्यनिलसारथिः ॥
सर्व्वं ब्रह्माण्डभाण्डं वै तत्कालश्चोभगर्জितः ।
एवं दग्धं महाराज ! वह्नर्व्वाभ्यां समन्ततः ॥
दग्ध्वा गोमयपिण्डाभं ब्रह्माण्डं सारवर्জितम् ।
प्रचण्डपवनो राजंस्ततो वर्षशतं पुनः ॥
संवर्त्तको नाम महान् ब्रह्माण्डं चालयिष्यति ।
ततो मेघा महाघोरा नानावर्णा अनेकशः ॥
शतं वर्षाणि वर्षन्ति गर्জन्ति च महास्वनाः ।
एकोदकं ततो विश्वं निर्गुणं निर्विकारकम् ॥
भूमेर्गन्धगुणं राजन् ! ग्रसत्यापः समन्ततः ।
गुणनाशात् स्वयं पृथ्वी प्रलयं प्राप्यते तदा ॥
तैजस्त्वपां रसगुणं सगन्धं पिबते बलात् ।
ततः प्रलयमायान्ति राजन्नापोऽपि तत्क्षणात् ॥
तैजसस्तु ततो रूपं रसगन्धसमन्वितम् ।
वायुर्हरति चण्डात्मा तेजःप्रलयमृच्छति ॥
आकाशस्तु ततो वायोः स्पर्शं परगुणैः सह ।
समादत्ते महाराज ! अम्बरेऽथ प्रलीयते ॥
आकाशस्य गुणं शब्दं गुणैरन्यैः समन्वितम् ।
अहङ्कारः समादत्त नभस्तस्मिन् प्रलीयते ॥
तैजसेष्विन्द्रियाण्यूर्द्धवा वैकारिके तथा ।
अहङ्कारे प्रलीयन्ते जगदेतच्चराचरम् ॥
अहङ्कारं भक्षयन्ति ततः सत्त्वादयो गुणाः ।
ग्रसते तान् महाराज ! आद्या प्रकृतिरुच्यते ॥

न तस्याः कालदोषेण परिवामो नरर्षभ ! ।
आधन्तरहिता सा हि नित्यं कारणमव्ययम्॥
अस्मिन्भगवतः सा हि तदेकपरमा च सा ।
दत्युक्तः प्रलयो राजन्! विज्ञस्याज्ञ महामते !॥
यथोत्पत्तिक्रमेणास्य श्रुतक्रमेण लयस्तथा ॥"

इति पाद्मे स्वर्गखण्डे ३८ अध्यायः ॥

(सात्त्विकविकारान्तर्गतविकारविशेषः । तल्लक्षणं यथा, साहित्यदर्पणे । ३ ।१६७ ।
"प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः॥")

प्रलापः, पुं, (प्रलपनमिति । प्र + लप् + भावे घञ् ।) प्रलपनम् । अनर्थकवाक्यम् । निष्प्रयोजनमुक्तत्वादिवचनम् । इत्यमरभरतौ । १ । ६ । १५ ॥ रोगाद्यासुपसर्गोऽयम् ॥ (यथा, भावप्रकाशे ।
"मूर्च्छा प्रलापो वमथुः प्रसेकः सादनं भ्रमः
उपद्रवा भवन्त्येते कृतिञ्च रक्तगेषतः ॥"
अस्य लक्षणं चिकित्सा च यथा,—
खट्वेतुकुपिताहाताद्यसम्बद्धविरर्थकम् ।
वचनं यत्तरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥
सतगरवरतिक्ता रेवताभोदतिक्ता
नलदतुरगगन्धा भारती द्वारहरा ।
मलयजदधमूलीयष्टपुष्पी सुपक्वा
प्रलपनमपहन्यु; पानतो नातिदूरात् ॥
वरतिक्तोऽत्र पपटः नलदमुशीरं भारती ब्राह्मी द्वारहरा द्राक्षा ।" इति भावप्रकाशस्य मध्यखण्डे प्रथमे भागे ॥)

प्रलापक्षा, [न] पुं, (प्रलापं हन्तीति । हन् + क्विप् ।) कुलत्थाख्यानम् । इति राजनिर्घण्टः ॥

प्रलीनता, स्त्री, (प्रलीनस्य निश्चेष्टस्य भावः । प्रलीन + तल् ।) प्रलयः । तत्पर्य्यायः । इन्द्रियस्वापः २ चेष्टानाशः ३ । इति राजनिर्घण्टः ॥

प्रलेहः, पुं (प्रलिह्यते इति । प्र + लिह् + घञ् ।) व्यञ्जनविशेषः । इति पाकराजेश्वरः । दम्पोक्त कोरमा इत्यादि पारस्यभाषा ॥)चिन्तामणौ धृतः प्रलेहप्रकारो यथा,—
"स्थूलानि मांसखण्डानि क्षालितानि च
वारिणा ।
तप्तखेहे विनिक्षिप्य दर्व्या सञ्चालयन् पचेत्॥
तप्तं तत्र विनिःक्षिप्य क्षारवर्गं जलमल्पकम् ।
पचेत् पटपटाशब्दं तस्मिन् मांसे प्रकुर्वति ॥
प्रक्षिपेदाढ़िमीनीरं बहुशेन पचेत् पुनः ।
मांसपिण्डेषु सिद्धेषु देया मुद्गौ सजीरका ॥
ततश्चोत्तार्य्य तन्मांसं पृथक् कुर्य्यात् प्रयत्नतः।
प्रलेहं वाससा पूतं स्थापयेदन्यभाजने ॥
छिन्नना घृतयुक्तेन धूपेन तच्च धूपयेत् ॥"
गौड़देशीयप्रलेहस्तु ।
"छिन्नाद्रं बीजपूरेलालवणैः सम्भृतेन तु ।
कुट्टितामिर्यपिष्टेन तच्च दाड़िमबीजतः ॥
क्षोपणावेसवारस्य प्रलेहो गौड़देशजः ॥
प्रलेहो रुचिदो वह्नेः कफानिलरुजापहः ।
संग्राही पित्तजित् किञ्चिच्छिक्षाक्षालगदान् जयेत् ॥"

पूर्वप्रलेहस्तु ।
"मांसपूरचयोगेन क्षोडाकारं विधाय च ।
स्निग्धं क्षप्तं घृते भृष्टं प्रलेहविधिना पचेत् ॥
पूरचस्य प्रलेहोऽयं विज्ञेयो वातनाशनः ।
क्षयाग्नित्वकारकश्चैव सुखवैरस्यहृद्गुरुः ॥"
शुक्लवर्णः प्रलेहः ।
"घृते वेसरधान्याक्षिछुहृद्धिसंयुते ।
वस्त्रपूतेऽर्द्धसम्पक्वे स्निग्धं मांसं विनिःक्षिपेत्॥"
पीतवर्णस्तु ।
"प्रलेहः पीतवर्णोऽपि कार्य्यः शुक्लप्रलेहवत् ।
विशेषोऽत्र हरिद्रायाः संसर्गः कुङ्कुमस्य वा ॥"
रक्तवर्णोऽपि ।
"तप्तखेहे क्षिपेच्छिछुसंयुक्तं क्षारमर्दकम् ।
धान्यकं लवणाजाजीधौतं मांसञ्च तत् क्षिपेत्
ततोऽर्द्धस्फुटिते मांसे दाड़िमीबीजसंयुते ।
सम्पक्वे घातिमृदुले तक्रं गृह्णीयच्च निःक्षिपेत्॥
तत उत्तार्य्य वस्त्रेण गालयेच्च पयेदपि ।
रक्तवर्णप्रलेहस्य संसिद्ध्यर्थं विनिःक्षिपेत् ॥
करमर्दं दाड़िमस्य स्थाने शेषन्तु पूर्ववत् ॥"
हरितवर्णस्तु ।
"मेथिकाक्षारमर्दाम्लकल्केन चलकारिते ।
घृते मांसं विनिःक्षिप्य पचेच्छुष्कप्रलेहवत् ॥
सिद्धे च गालयेद्वस्त्रे क्षात्वा वर्णप्रयोजनम् ।
ताम्बूलं क्षारजक्षारं देयं हरितहेतुना ॥
अरुचौ रुचिदः सद्यो नानावर्णप्रसाधितः ।
प्रलेहः कफवातघ्नः किञ्चित् पित्तकरो लघुः ॥"
वटकप्रलेहोऽपि ।
"माषस्य पिष्टिका सूक्ष्मा वेसवारेण मयुता ।
बहुधा क्रियते तस्या वटिकावटकादिकम् ॥
आम्रविल्वीफलाकारं लड्डुकावटकादिकम् ।
शुक्लाटकफलाकारं यथावद्विप्रकारजम् ॥
क्षात्वा हि बहुधाधारे खेदितं घृतभार्जितम् ।
सवेसवारजे तक्रे क्षथितं च मनोरमे ॥
निःक्षिप्य चालयेदीषदुत्तार्य्यैलादिवासिते ।
एवन्तु बहुधा कार्य्यो माषमुद्गप्रलेहकः ॥
प्रलेहो वातजिद्वह्नेः शुक्रमांसप्रदो रसः ।
प्रौढानः प्राणयुक्तानां शुक्रदः स्त्रीषरेतसाम् ॥"
मत्स्यप्रलेहस्तु ।
"मांसप्रलेहवत्कार्य्यः प्रलेहो मत्स्यसम्भवः ।
आदौ तैले परं पक्वं सर्वमन्यत्तु पूर्ववत् ॥
वर्णस्य करणे देयं पूर्व्वोक्तं द्रव्यकं हि यत् ।
उद्भूलनं सुगन्धाय दातव्यं पूर्व्वसम्भवम् ॥
मत्स्यखण्डप्रलेहस्तु ।
"सम्यक् प्रक्षालितं मत्स्यं वेसवारेण वेष्टितम्
तप्ततैले क्षिपेत् खण्डं छिन्नसैन्धवमिश्रितम् ।
प्रलेहविधिवत् साध्यो मत्स्यखण्डप्रलेहकः ॥"

प्रवक्ता, [क्तृ] त्रि, प्रकर्षेण वक्ति यः (प्र + वच् + तृच् ।) वेदादिवाचकः । यथा,—
"जातिमात्रोपजीवी वा कामं स्वादब्राह्मणध्रुवः ।
धर्म्मप्रवक्ता नृपतेर्न तु शूद्रः कदाचन ॥
इति मत्स्ये ७ अध्यायः ॥

प्रवचनं, क्लो,(प्रकर्षेण उच्यते इति । प्र + वच् + ल्युट् वेदः । (यथा, अमरकोषे । २।७।१० ।
"अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः ।
तज्ज्ञानुज्ञः समाहृत्य तूष्णीं स्वभिषवे श्रुते ॥"
वेदाङ्गम् । यथा, मनुः । २ । १८४ ।
"यज्ञाः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥"
"प्रकर्षेणैव उच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि तेषु यज्ञाः यज्ञविदः।"इति तत्र कुल्लूकभट्टः ॥ तथा च हरिवंशे । १६७ । ६८ ।
"उवाच वेदांश्चतुरो मन्त्रब्राह्मणकल्पितान् ॥"
प्रकृष्टं वचनमिति कर्म्मधारयः । प्रकृष्टवाक्यम् । इति मेदिनी । ने, १८१ ॥ (यथा, मुण्डकोपनिषदि । ३ । २ । ३ ।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥")

प्रवचनीयः, त्रि,(प्रवक्तीति । प्र + वच् + "भव्यगेयप्रवचनीयेति ।" ३।४।६८। इति कर्त्तरि अनीयर् ।) प्रवक्ता । (प्रोच्यते इति । प्र + वच् कर्म्मणि अनीयर् ।) प्रवाच्यः । इति मेदिनी ये १३२ ।

प्रवणः, पुं, (प्रवन्ते गच्छन्ति जना अनेनेति प्र गतौ + करणे ल्युट्) चतुष्पथः । इत्यमरः ३।३।५६ ।

प्रवणः, त्रि,(प्रवतेऽत्रेति । प्र + अधिकरणे ल्युट क्रमनिम्नभूमिः । (यथा, मनुः । ३ । २०६ ।
"दक्षिणाप्रवणे देशे प्रयत्नेनोपपादयेत् ॥"
उदरम् । प्रह्वः । इति मेदिनी ।णे,५८॥ (यथा, मार्कण्डेये । २३ । ८८ ।
"धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो-
मया ।
यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः ॥")

प्रवयतः । प्रगुणः । वशः । इति त्रिकाण्डः ॥
प्रवृतः । स्निग्धः । इति शब्दरत्नावली ॥
आसक्तः । इति हेमचन्द्रः । ३।४९ ॥ (यथा, विष्णुपुराणे । ६ । १ । ११ ।
"प्रजाहेतोः प्रजानाथ वृष्टाचातुर्वर्ण्यव्यवस्थितौ ।
सम्यक्त्रयासमाचारप्रवणा मुनिसत्तम ! ॥")

क्षीणः इति धरणिः ।

प्रवत्स्यत्पतिका, स्त्री, (प्रवत्स्यन् प्रवासं गमिष्यन् पतिर्यस्याः । कप् ।) नायिकाभेदः । यस्या लक्षणम् । यस्याः पतिरग्रिमक्षणे देशान्तरं यास्यतीव सा अस्याख्या । आकुलवचनत्वातरप्रेक्षणगमनविक्षोपदर्शननिर्वेदसन्तापसम्मोहनिश्वासवाक्यादयः ॥ मुग्धा प्रवत्स्यत्पतिका यथा,—
"प्राचेश्वरी किमपि जल्पति निर्गमाय
यामोदरी वदनमानमयाञ्चकार ।
आली पुनर्भिदुरमेत्य वतानिकुञ्ज-
मुक्तस्तकोकिलकलध्वनिमातताम ॥ १ ॥

मध्या प्रवत्स्यत्पतिका यथा,—
"गन्तुं प्रिये ! वदति निःश्वसितं न दीर्घ-
मासीत्र वा नयनयोर्जलमाविरासीत् ।
आयुर्लिपिं पठितुमिष्टवशः परन्तु
भालस्थलीं किमु करः समुपाजगाम ॥"२॥
प्रौढा प्रवत्स्यत्पतिका यथा,—
"नायं मुञ्चति सुभ्रुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विहिताञ्जलिर्यदुपते ! पृच्छामि सत्यं वद
ताम्बूलं कुसुमं पटीरमुदकं यद्बन्धुभिर्दीयते
तत् स्वादेव परत्र वा किमु विषज्वालावली-
दुःसहम् ॥"३॥
परकीया प्रवत्स्यत्पतिका यथा,—
"न्यस्तं पवनमूर्द्ध्नि पादयुगलं भक्तिर्विमुक्ता गुरौ,
त्यक्ता नीतिरकारि किं न भवतो हेतोर्मया
दुष्कृतम् ।
अङ्गानां शतयातना नयनयोः कोपक्रमो रौरवः
कुम्भीपाकपराभवश्च मनसो युक्तं त्वयि
प्रस्थिते ॥"४॥
सामान्यप्रवत्स्यत्पतिका यथा,—
"मुद्रां प्रदेहि वलयाय भवद्वियोग-
मासाद्य यास्यति वहिः सहसा यदेतत् ।
इत्थं निगद्य विगलन्नयनाम्बुधारा
वाराङ्गना प्रियतमं करयोर्बभार ॥"५॥
इति रसमञ्जरी ॥
प्रवयणं, क्ली, (प्रवीयतेऽनेनेति । प्र + अज गतौ क्षेपणे च + ल्युट् । "वा यौ ।" २ । ४ । ५७ । इति वी । "कृत्यचः ।" ८ । ४ । २९ । इति णत्वम् ।) प्रतोदः । इति हेमचन्द्रः ।३।५५७॥ (प्र + वय गतौ + भावे ल्युट् । प्रकर्षेण गमनम् । इति केचित्) ॥
प्रवयाः, [स्] त्रि, (प्रगतं वयो यस्य ।) वृद्धः । इत्यमरः २ । ६ । ४२ ॥(यथा,रघुः । ८ । १८ ।
"नृपतिः प्रकृतीरवेक्षितुं
व्यवहारासनमाददे युवा ।
परिचेतुमुपांशुधारणां
कुशपूतं प्रवयास्तु विष्टरम् ॥"
पुराणः । इति निघण्टुः । ३ । २७ ॥ यथा, ऋग्वेदे । २ । १७ । ४ ।
"अधा यो विश्वा भुवनानि मज्मनेशानकृत्-प्रवया अभ्यवर्धत ॥")
प्रवरं, क्ली, (प्रव्रियते इति । प्र + वृ + अप् ।) अगुरु । इति भावप्रकाशः ॥ गोत्रम् । श्रेष्ठे, त्रि । इति मेदिनी । रे १७६ ॥ (यथा, मनुः । १० । २७ ।
एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु ।
मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु ॥")
प्रवरः, पुं, (प्र + वृ + अप् ।) सन्ततिः । इति मेदिनी । रे, १७६ ॥ गोत्रप्रवर्त्तकमुनिव्यावर्त्तको मुनिगणः । तथा च यमदग्निगोत्रस्य प्रवराः यमदग्न्यौर्व्ववशिष्ठाः । भरद्वाजगोत्रस्य भरद्वाजाङ्गिरसबार्हस्पत्याः । विश्वामित्रगोत्रस्य विश्वामित्रमरीचिकौशिकाः । अत्रि-गोत्रस्य अत्र्यात्रेयशातातपाः । गौतमगोत्रस्य गौतमवशिष्ठबार्हस्पत्याः । वशिष्ठगोत्रस्य वशिष्ठः । केषाञ्चित् वशिष्ठात्रिसाङ्कृतयः । काश्यपगोत्रस्य काश्यपापारनैध्रुवाः । अगस्त्यगोत्रस्य अगस्तिदधीचिजैमिनयः । सौकालिनगोत्रस्य सौकालिनाङ्गिरसबार्हस्पत्यापारनैध्रुवाः । मौद्गल्यगोत्रस्य और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । पराशरगोत्रस्य पराशरशक्तिवशिष्ठाः । बृहस्पतिगोत्रस्य बृहस्पतिकपिलपार्व्वणाः । काञ्चनगोत्रस्य अवत्सदेवलदेवराजाः । विष्णुगोत्रस्य विष्णुवृद्धिकौरवाः । कौशिकगोत्रस्य कौशिकात्रिजमदग्नयः । कात्यायनगोत्रस्य अत्रिभृगुवशिष्ठाः । आत्रेयगोत्रस्य आत्रेयशातातपसांख्याः । काण्वगोत्रस्य काण्वाश्वत्थदेवलाः । कृष्णात्रेयगोत्रस्य कृष्णात्रेयात्रेयावासाः । साङ्कृतिगोत्रस्य अव्याहारात्रिसाङ्कृतयः । कौण्डिल्यगोत्रस्य कौण्डिल्यस्तिमिककौत्साः । गर्गगोत्रस्य गार्ग्यकौस्तुभमाण्डव्याः । आङ्गिरसगोत्रस्य आङ्गिरसवशिष्ठबार्हस्पत्याः । धनञ्जयकालगोत्रस्य गार्ग्यगौतमवशिष्ठाः । अव्ययगोत्रस्य अव्ययवलिसारस्वताः । जैमिनीगोत्रस्य जैमिन्युतथ्यसाङ्कृतयः । वृद्धिगोत्रस्य कुरुवृद्ध्याङ्गिरोबार्हस्पत्याः । शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलाः । वात्स्यगोत्रसावर्णगोत्रयोः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । आलम्यायनगोत्रस्य आलम्यायनशालङ्कायनशाकटायनाः । वयाघ्रपद्यगोत्रस्य साङ्कृतिः । घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः । केषाञ्चित् कुशिककौशिकबन्धुलाः । शक्तिगोत्रस्य शक्तिपराशरवशिष्ठाः । काण्वायनगोत्रस्य काण्वायनाङ्गिरसबार्हस्पत्यभरद्वाजाजमीढाः । वासुकिगोत्रस्य अत्साभ्यानन्तवासुकयः । गौतमगोत्रस्य गौतमाप्सराङ्गिरसबार्हस्पत्यनैध्रुवाः । केषाञ्चित् गौतमाङ्गिरसावासाः । शुनकगोत्रस्य शुनकशौनकगृत्समदाः । सौपायनगोत्रस्य प्रवराः और्व्वच्यवनभार्गवजामदग्न्याप्नुवतः । इति धनञ्जयकृतधर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥
प्रवर्गः, पुं, (प्रवृज्यते निःक्षिप्यते हविरादिकमस्मिन्निति । प्र + वृज् + अधिकरणे घञ् ।) होमाग्निः । इति हेमचन्द्रः ।३।५०० ॥ (यथा, हरिवंशे । ४१ । ३४ ।
"दक्षिणाहृदयो योगो महासत्रमयो महान् ।
उपाकर्म्मोष्ठरुचकः प्रवर्गावर्त्तभूषणः ॥"
प्रवर्ग्य इति पाठोऽपि दृश्यते ॥)
प्रवर्त्तकः, त्रि, (प्रवर्त्तयतीति । प्र + वृत् + णिच् + ण्वुल् ।) प्रवर्त्तनकारी । प्रवृत्तिजनकः । यथा,
"प्रवर्त्तकं वाक्यमुवाच चोदनां
निवर्त्तकं नैवमुवाच भाष्यकृत् ।
ततश्च विद्यो नाह चोदनास्ति सा
प्रवर्त्तिका या न भवेदिति स्थितिः ॥"
इति संक्षेपशारीरकम् ॥
(यथा च देवीभागवते । १ । १४ । ४२ ।
"प्रथमं पठिता वेदा मया विस्तारिताश्च ते ।
हिंसामयास्ते पठिताः कर्म्ममार्गप्रवर्त्तकाः ॥"
प्रयोजकः । यथा, भागवते । ९ । १७ । ४ ।
"धन्वन्तरिर्दीर्घतमस आयुर्वेदप्रवर्त्तकः ।
यज्ञभुग् वासुदेवांशः स्मृतिमात्रार्त्तिनाशनः ॥")
प्रवर्त्तनं, क्ली, (प्र + वृत् + णिच् + ल्युट् ।) प्रवृत्तिः । यथा,—
"तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते ।
इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम् ॥"
इति काव्यप्रकाशः ॥
आरम्भः । यथा,—
"मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे ।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम् ॥"
इति मिताक्षरा ॥
प्रवर्त्तना, स्त्री, (प्र + वृत् + णिच् + युच् ।) प्रवृत्तिप्रेरणम् । यथा, नैषधे । २ । ६१ ।
"अथवा भवतः प्रवर्त्तना
न कथं पिष्टमियं पिनष्टि न ।
स्वत एव सतां परार्थता
ग्रहणानां हि यथा यथार्थता ॥"
प्रवर्त्तितः, त्रि, (प्र + वृत् + णिच् + क्तः ।) जातः । यथा, रघुवंशे । ५ । ३७ ।
"रूपं तदोजस्वि तदेव वीर्य्यं
तदेव नैसर्गिकमुन्नतत्वम् ।
न कारणात् स्वाद्विभिदे कुमारः
प्रवर्त्तितो दीप इव प्रदीपात् ॥"
प्रवर्द्धनं, क्ली, प्रपूर्ववृधधातोर्भावे अनट् (ल्युट् ।) विवर्द्धनम् । कर्त्तरि (ल्यु) अनप्रत्यये, वृद्धिकारके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"रुरुमांसं समधुरं कषायानुरसं स्मृतम् ।
वातपित्तोपशमनं गुरु शुक्रप्रवर्द्धनम् ॥")
प्रवर्हः, त्रि, (प्रवर्हति प्रवर्द्धते इति । प्र + वृह + अच् ।) प्रधानम् । श्रेष्ठः । इत्यमरः ।३।१।५७।
प्रवलाकी, पुं भुजङ्गः । चित्रमेखलकः । इति विश्वः ॥
प्रवहः, पुं, (प्र + वह + भावे + अच् ।) गृहनगरादेर्व्वहिर्गमनम् । इत्यमरः ।३।१।१८ ॥ (प्रवहतीति । प्र + वह् + अच् ।) वायुः । इति हेमचन्द्रः ॥ सप्तवायन्तर्गतद्वितीयवायुः । स तु आवहवायोरूर्द्ध्वे स्थितः । इति सिद्धान्तशिरोमणिः ॥
"यस्माज्ज्योतींषि वहति प्रवहस्तु न स स्मृतः ।"
इति विष्णुपुराणे २ अंशे १२ अध्यायः ॥
अस्य टीका । "यस्माज्ज्योतींषि प्रकर्षेण वहति तेन स वायुः प्रवहः स्मृतः प्रवहस्यैव भेदाः सर्व्वे वायुस्कन्धाः ॥" (मेघविशेषः । यथा स्कान्दे सह्याद्रिखण्डे । ५ । ६ ।
"आवहः प्रवहश्चैव उद्वहासो महांस्तथा ।
परीवहः पञ्चमश्च विनहश्च परावहः ॥")
प्रवहणं, क्ली, (प्रोह्यते अनेनेति । प्र + वह् + करणे ल्युट् ।) कर्णीरथः । स्त्रीरथवहनार्थ-

मुपरि वस्त्राच्छादितमनुष्यवाह्ययानविशेषः। इत्यमरभरतौ। २। ८। ५२॥ (यथा, मृच्छकटिकनाटके चतुर्थेऽङ्के। "प्रविश्य सप्रवहणखेट इति॥")

प्रवल्हिः, स्त्री, (प्रवल्हते आच्छादयतीति। प्र+वल्ह्+इन्।) प्रवल्हिका। इत्यमरटीकायां भरतः॥

प्रवल्हिका, स्त्री, (प्र+वल्ह्+ण्वुल्। टाप् अत इत्वम्।) प्रहेलिका। इत्यमरः। १। ६। ६।

प्रवल्ही, स्त्री, (प्रवल्हि+पक्षे ङीष्।) प्रवल्हिका। इति भरतः॥

प्रवाक्, [च्] त्रि, (प्रकृष्टा वाग् यस्य।) वाचो युक्तिपटुः यथा,—

"वाचो युक्तिपटुर्वाग्मी वचोज्ञः प्रवचाः प्रवाक्॥"

इति जटाधरः॥

(स्त्री, प्रकृष्टा वागिति प्रादि समासः।)प्रकृष्टवाक्यञ्च॥

प्रवाचकः, त्रि, (प्रकृष्टं वक्तीति। प्र+वच्+ण्वुल्।) प्रकृष्टवक्ता। प्रपूर्ब्ववचधातोः कर्त्तरि ण्वुलप्रत्ययः॥

प्रवाणिः, स्त्री, (प्रकर्षेण ऊयतेऽनयेति। प्र+वे+करणे ल्युट्। ङीप्। निपातनात् ङीपो ह्रस्वः।) तन्त्रशलाका। इति निष्पुवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवाणी, स्त्री, (प्र+वे+ल्युट्+ङीप्।) तन्त्रशलाका। इति निष्पुवाणिशब्दटीकायां भरतः॥ माकु इति भाषा॥

प्रवादः, पुं, (प्रकृष्टो वादः। प्र+वद्+घञ् वा।) परस्परवाक्यम्। यथा, भट्टिः। २। ३६।

"इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू रामनगाविधारौ।
तृणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्यत्॥"

जनरवः। यथा,—

"प्रयास्तऽहं त्वमपि च मम प्रेयसीति प्रवादस्त्वं मे प्राणा अहमपि तवास्मीति हन्त प्रलापः,
त्वं मे तेऽस्यामहमपि च यत्तच्च नौ साधु राधे!
व्याहारे नौ नहि समुचितो युष्मदस्मत्प्रयोगः॥"

इत्यलङ्कारकौस्तुभः॥

प्रवारः, पुं, (प्रवृणोत्यनेनेति। प्र+वृ+करणे घञ्।) प्रवरः। वस्त्रम्। प्रपूर्ब्ववृधातोर्घण्। इति संक्षिप्तसारव्याकरणम्॥

प्रवारणं, क्ली, (प्र+वृ+णिच्+ल्युट्।) काम्यदानम्। इत्यमरः। ३।२।३॥ काम्यस्य कामनीयस्य वस्तुनो वरस्वारब्धादेर्दानम्। काम्येन कामनया वा दानं प्रवारणमुच्यते। काम्यशब्दात्र तन्त्रणोभयार्थः। प्रकर्षेण वार्य्यते संगृह्यते प्रवारणं तच्च महादानम्। प्रवारणं महादानमिति त्रिकाण्डशेषः। इति तट्टीकायां भरतः॥ (प्रकर्षेण वारणमिति।) निषेधः। इति मेदिनी। ने, १०१॥

प्रवासः, पुं, (प्रवसन्त्यस्मिन्निति। प्र+वस्+"हलश्च।" ३। ३। १२१। इति घञ्।) विदेशः। विदेशस्थितिः। यथा,—

"कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता निकृतिं सपत्नी।
रामप्रवासे व्यसपत्नदोषं
जनापवादं सनरेन्द्रमृत्युम्॥"

इति भट्टिः। २। ७॥ * ॥

हादशवर्षाद्युत्तरवार्त्ताकप्रोषितस्य तत्प्रवासादिदिने श्राद्धं कर्त्तव्यम्। यथा,—

"प्रवासवासरे श्रेयं तस्मान्नेन्दुक्षयेऽथवा॥"

इति मिताक्षरा। ३। ७॥ * ॥

प्रवासागतेन गुर्वाद्यभिवादनं कर्त्तव्यम्। यथा,

"विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्ममनुस्मरन्॥
मातृष्वसा मातुलानी श्वश्रूर्थाय पितुः स्वसा।
प्रपूज्या गुरुपत्नीव समास्ता गुरुभार्य्यया॥
भ्रातृभार्य्योपमयाह्या सवर्णाहन्यहन्यपि।
विप्रोष्य भूप! संयाह्या ज्ञातिसम्बन्धियोषितः॥
पितुर्भगिन्यां मातुश्च ज्यायस्याश्च स्वसर्य्यपि।
मातृवद्वृत्तिमातिष्ठन्माता ताभ्यो गरीयसी॥"

इति कौर्म्मे उपविभागे १३ अध्यायः॥

प्रवासनं, क्ली, (प्र+वास+ल्युट्।) वधः। इत्यमरः॥ (प्र+वस्+णिच्+ल्युट्।) प्रवासना। यथा, उत्तररामचरिते।

"सीताप्रवासनपटोः करुणा कुतस्ते॥"

प्रवासी, त्रि, (प्रवसितुं शीलमस्येति। प्र+वस्+"प्रे लपसृदुमथवदवसः।" ३।२।१४५। इति घिनुण्।) प्रवासविशिष्टः। प्रोषितः। विदेशस्थः। यथा,—

"अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिकटेशिकौ।
प्रवासी तद्धनौ ज्ञातिः पाथेयं सम्बलं समे॥"

इति हेमचन्द्रः। ३। १६७॥

(यथा, मार्कण्डेये। १८। ५१।

लक्ष्मीर्लक्ष्मावतां श्रेष्ठा कण्ठस्था कण्ठभूषणम्।
अभीष्टबन्धुदारेषु तथाश्लेषं प्रवासिभिः॥")

प्रवाहः, पुं, (प्र+वह्+भावे घञ्।) प्रवृत्तिः। (यथा, भागवते। ७। ८। ८।

"सत्त्वं कतानगतयो वचसां प्रवाहैः॥"

जलस्रोतः। इति मेदिनी। हे, २१॥ (यथा, रघौ। ५। ४६।

"पूर्व्वं तदुत्पीडितवारिराशिः
सरित्प्रवाहस्खटमुल्ललर्प॥")

व्यवहारः। इति विश्वः॥ प्रकृष्टाश्वः। इति नानार्थरत्नमाला॥ (पुरीषादेर्निर्गमः। यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।

"प्रवाहेण गुदभ्रंशे सूचाघाते कटिग्रहे।
मधूकाज्यशृतं तैलं सर्पिर्वात्यनुवासनम्॥")

प्रवाहकः, पुं, (प्रवहतीति। प्र+वह्+ण्वुल्।) राजसः। इति शब्दमाला॥ प्रकृष्टवहनकर्त्तरि, त्रि॥

प्रवाहिका, स्त्री, (प्रवहति मुहुर्मुहुः प्रवर्त्तते इति। प्र+वह्+ण्वुल्। टाप् अत इत्वम्।) ग्रहणीरुक्। इत्यमरः। २। ६। ५५॥ (यथा, सुश्रुते सूत्रस्थाने। ३१ अध्याये।

"प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्।
पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः॥"

अस्या निदानं ग्रहणीशब्दे द्रष्टव्यम्। अस्याः स्वरूपमाह चरकः।

"अग्न्यधिष्ठानमन्नस्य ग्रहणादग्रहणी मता।
अपक्वं धारयेत् तच्च पक्वं त्यजति वाप्यधः॥"

सुश्रुतोऽपि।

"षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता
आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते॥
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीश्रितः।
तस्मादग्नौ प्रदुष्टे तु ग्रहण्यपि विदुष्यति॥
तस्मात् कार्य्यः परीहारो ज्ञातिसारे विरिक्तवत्॥" * ॥

अतीसारे द्रवधातुप्रवृत्तिः ग्रहण्यान्तु बहुस्थापि मलस्य प्रवृत्तिरिति तयोर्भेदः॥ * ॥ ग्रहणीरोगस्य भेदं संग्रहग्रहणीरोगमाह।

"दृवं घनं सितं स्निग्धं मकटीवेटनं गुरु।
आमं बहु मलोच्छ्रायं सशब्दं मन्दवेदनम्॥
पक्वाम्नामादशाद्धाद्धा नित्यञ्चापि विमुञ्चति।
अन्नकूजतमालस्यं दौर्ब्बल्यं मदनं भवेत्॥
दिवा प्रकोपो भवति रात्रौ शान्तिश्च गच्छति
दुश्चिकित्स्या दुर्निवारा चिरकालानुबन्धिनी॥
सा भवेदामवातेन संग्रहग्रहणी मता॥"

अथ घटीयन्त्राख्यं ग्रहणीरोगमाह।

"प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः।
तं वदन्ति घटीयन्त्रमसाध्यं ग्रहणीगदम्॥"

अथ ग्रहणीरोगस्यारिष्टमाह।

"यैर्लक्षणैः सिध्यति नातिमारुस्तैः स्यान्न साध्यो ग्रहणीगदोऽपि।
हृल्लास्य जायेत यदा गदोऽयं
देहं तदा तस्य विनाशमृच्छेत्॥"*॥

अथ सामान्यग्रहणीरोगस्य चिकित्सामाह।

ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत्।
लङ्घनैर्दीपनीयैश्च मन्दानीसारभेषजैः॥
दोषं सामं निरामञ्च विद्यादतिसारवत्।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत्॥
पेयादि पटु लघ्वन्नं पञ्चकोलादिभिर्युतम्।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक्॥
कपित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता।
यवागूः पाचयत्यामं शक्रत् संवर्त्तयत्यपि॥"

संवर्त्तयति घनीकरोति॥

अथ खड्यूषः।

"मुद्गयूषं रसं तक्रं धान्याजीरकसंयुतम्।
सैन्धवेनान्वितं हृद्यात् खड्यूषमिति कीर्त्तितम्॥"

रसं लघ्वाहिकमांसभवम्॥ * ॥

"कर्षं गन्धकमर्द्धपारदमुभे कुर्य्याच्छुभां कज्जलीं
तावत् तूषणयुग्मपञ्चलवणं तावच्च कर्षं पृथक्।

शुण्ठीं त्रिकटुकं चोरकद्वययुतं सर्व्वार्द्धभागान्वितं
खादेदङ्कमितं प्रवह्निगदवांस्तक्रस्य विल्वेन च॥
लघुनायिकाचूर्णमित्यर्थः॥ इति लघुलाद्यचूर्णम्॥
त्रिकटु त्रिफला चैव विड्भं जीरकद्वयम्।
भल्लातकं यवानी च त्रिभुलवणपञ्चकम्॥
गृहधूमो वचा कुष्ठं रसो गन्धकमभ्रकम्॥
क्षारत्रयाजमोदे च चित्रकं गजपिप्पली॥
मुस्ता मोचरसं पाठा लवङ्गं जातिपत्रकम्।
समभागञ्जनञ्चैषां चूर्णं श्लक्ष्णं विनिर्म्मितम्॥
शुक्राम्लस्य चमच्चन्तु चूर्णतुल्यं प्रदापयेत्।
मन्दाग्निकामदुर्नामग्रहपाण्डुकृच्छ्ररान्॥
विष्टम्भं संयहं शूलं हन्याच्चामातिसारजित्
आमवातापहं बल्यं सूतिकादोषनाशनम्॥
वह्नेर्दीप्तिकरञ्चैव ज्ञानं पिशितभोजनम्।
पथ्यं कार्ष्णिकमत्रापि दधितक्रमथापि वा॥
बृहल्लाद्यचूर्णमिदं लादंभाषितमुत्तमम्॥"
इति बृहल्लाद्यचूर्णम्। बृहन्नायिकाचूर्णमिति
प्रसिद्धम्॥ * ॥
"जातीफलत्वक्पत्रैलापत्रत्वङ्नागकेशरैः।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः॥
तालीशपिप्पलीपथ्यास्थलजारकाचित्रकैः।
शुण्ठीविड्भमरिचैः समभागैर्विचूर्णितैः॥
यावन्त्यतानि सर्व्वाणि दद्याद्भल्लातकानि तावतीम्।
सर्व्वचूर्णसमानांशां प्रदद्या शुभ्रशर्करां॥
कर्षमात्रमिदं खादेन्मधुना प्लावितं जनः।
नाशयेदग्रहणीं कासं क्षयं श्वासमरोचकम्॥"
इति जातीफलादिचूर्णम्॥*॥
चित्रकं पिप्पलीमूलं क्षारौ लवणपञ्चकम्।
व्योषं त्रिभुजमोदाञ्च चव्यञ्चैकत्र चूर्णयेत्॥
वटिका मातुलुङ्गस्य रसेर्वा दाड़िमस्य वा।
कृता विपाचयत्यामं प्रदीपयति चानलम्॥
क्षारौ सर्জिका यवक्षारश्च। लवणपञ्चकमिति।
"सन्धवं रुचकञ्चैव विड्भं सामुद्रकं गड़म्॥"इति॥
व्योषं शुण्ठीपिप्पलीमरिचानि। अजमोदात्र
यवानिका। मातुलुङ्गं बीजपूरकम्। इति चित्र-
कादिवटिका॥*॥
"श्रीफलग्लाटुकल्को नागरचूर्णेन मिश्रितः
गुड़ः।
ग्रहणीगदमत्युग्रं तक्रभुजाशोणितो जयति॥"
श्रीफलग्लाटुः बिल्वस्यामं फलम्। गुड़स्यात्र
भागद्वयम्। इति बिल्वकल्कः॥ * ॥
"चतुष्पलं सुधाकाण्डं त्रिपलं लवणत्रयम्।
वार्त्ताकोः कुड़वञ्चाकमूलाद्बिल्वं तथानलात्
दग्ध्वा द्रवेण वार्त्ताकोर्गुटिका भोजनोत्तरम्॥
भुक्ता भुक्तं पचत्याशु नाशयेद्ग्रहणीगदम्॥
कासं श्वासं तथार्शांसि विनिहन्याच्च हृदामयम्॥"
इति वार्त्ताकुगुटिका॥*॥
"मुस्तकातिविषाबिल्वकौटजं सूक्ष्मचूर्णितम्।
मधुना च समालोढं ग्रहणीं सर्व्वजां त्यजेत्॥"
कौटजं इन्द्रयवः। मुस्तकादिचूर्णम्॥*॥
"श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः।
गुड़ेनाधिकसर्জेन भक्षितेनाशु नश्यति॥"
सर्জः राजः। सर्জरसचूर्णम्॥ * ॥
"बिल्वाब्दग्रक्षयवबालकमोचसिद्ध-
माजं पयः पिबति यो दिवसत्रयेण।
सोऽतिप्रवृद्धचिरजग्रहणीविकारं
सामं सशोणितमसाध्यमपि क्षिणोति॥"
मोचो मोचरसः। क्षिणोति हन्ति॥*॥
"प्रस्थत्रयं त्वामलकीरसस्य
गृहीत्वा दत्त्वार्द्धतुलां गुड़स्य।
चूर्णीकृतैश्च त्रिकजोरचव्य-
व्योषभल्लक्षाक्षवृषाजमोदैः॥
त्रिड्भमिस्रत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टा-
वष्टौ च तैलस्य पचेदयथावत्॥
तं भक्षयेदक्षफलप्रमाणं
यथेष्टचेष्टास्वसुगन्धियुक्तम्।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदगोथाः॥
शाम्यन्ति चायं चिरमन्नरन्ने-
रुतस्य पुंस्त्वस्य च वृद्धिकर्त्तुः।
क्षीणान्तु बल्यामयनाशनः स्यात्
कल्याणको नाम गुड़ः प्रसिद्धः॥
तैले मनाक् त्रिवृद्भृष्टा त्रिसुगन्ध्यं पलं पलम्
सिद्धे निधेयमत्रैव गुड़े कर्षाम्बुपूर्व्वके॥"
इति कल्याणकगुड़ः॥*॥
"पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकञ्च विड्भानि यवानी मरिचानि च॥
त्रिफला चाजमोदा च नलिनी क्षारकस्तथा।
सैन्धवं रौमकञ्चापि सामुद्रं रुचकं विड्म॥
आरग्वधस्य त्वक्पत्रं सूक्ष्मैला चोपकुञ्चिका।
शुण्ठ्यर्द्धमेव प्रत्येकं कर्षसम्मिताः॥
गुड़ः पलान्यत्र चत्वारि कथिता निहि।
त्रिवृतायाः पलान्यष्टौ गुड़स्यार्द्धतुला तथा॥
तिलतैलपलान्यष्टावामलक्या रसस्य तु।
प्रस्थत्रयमिदं सर्व्वं शनैर्म्मृद्वग्निना पचेत्॥
श्रीड्खरं चामलकं बादरं वा यथा फलम्।
तावन्मात्रमिदं खादेदक्षत्रयेद्वा यथानलम्॥
निखिलान् ग्रहणीरोगान् प्रमेहार्शांसि विंशतिम्
उरोघातं प्रतिश्यायं दौर्ब्बल्यं वह्निसंक्षयम्॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्तिं मतिं
स्वरम्।
पित्तपाठान्वयाद्धन्ति रक्तपित्तञ्च विड्भकम्॥
धातुक्षीणो वयःक्षीणः स्त्रीषु क्षीणः क्षयी च यः
तेभ्यो हितश्च बल्यार्थं महाकल्याणको गुड़ः॥"
इति महाकल्याणकगुड़ः॥*॥
कुष्माण्डानां सुपक्वानां स्विन्नानां निष्कुलत्वचाम्
सर्पिःप्रस्थे पलशतं ताम्रपात्रे शनैः पचेत्॥
पिप्पली पिप्पलीमूलं चित्रकं गजपिप्पली।
धान्यकानि विड्भानि नागरं मरिचानि च॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम्॥
एककस्य पलञ्चैकं त्रिवृतोऽष्टौ पलानि च।
तैलस्य च पलान्यष्टौ गुड़ात् पञ्चाशदेव तु॥
आमलक्या रसस्याथ प्रस्थत्रयमुदीरितम्।
तावत् पाकं प्रकुर्व्वीत मृदुना वह्निना भिषक्
यावद्घृतप्रलेपः स्यात्तत्तेनमवतारयेत्।
श्रीड्खरं चामलकं बादरं वा यथा फलम्
तावन्मात्रमिदं खादेदक्षत्रयेद्वा यथानलम्।
अनेनैव विधानेन प्रयुक्तञ्च दिने दिने॥
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान्।
ज्वरमानाहशूलगुल्मोदरविसूचिकाः॥
कामलां पाण्डुरोगञ्च प्रमेहांश्च विंशतिम्।
वातशोणितवीसर्पदद्रूयक्ष्मश्लीमकान्॥
वातपित्तकफान् सर्व्वान् दुष्टान् शुद्धान् समा-
चरेत्।
व्याधिक्षीणा वयःक्षीणाः स्त्रीषु क्षीणाश्च ये
नराः॥
तेभ्यो हितो गुड़ोऽयं स्याद्बल्यानामपि पुष्टदः
हृष्यो बल्यो हृंहणश्च वयसः स्थापनः परः॥"
इति कुष्माण्डकल्याणकगुड़ः॥*॥
अतौसाराधिकारलिखितं बिल्वतैलञ्चात्र क्षि-
तम्। इति भावप्रकाशे ग्रहणीरोगाधिकारः॥
(चिकित्सान्तरमस्या यथा,—
"बालं बिल्वं गुड़ं तैलं पिप्पली विश्वभेषजम्।
लिह्याद्दाते प्रतिहते मशूले सप्रवाहिके॥
पयसा पिप्पलीकल्कः पीतो वा मरिचोद्भवः।
व्याहात् प्रवाहिकां हन्ति चिरकालानुबन्धि-
नीम्॥
कल्कः स्याद्बालबिल्वानां तिलकल्कस्य तत्समः।
दग्धः सराल्लः क्षौद्राढ्यः खड़ो हन्यात् प्रवाहि-
काम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे॥
प्रवाही, स्त्री, (प्रोह्यते इति। प्र+वह्+
घञ्। गौरादित्वात् ङीष्) वालुका। इति
राजनिर्घण्टः॥
प्रविख्यातिः, स्त्री. (प्र+वि+ख्या+क्तिन्।)
अतिप्रसिद्धिः। तत्पर्य्यायः विश्रावः २। इत्य-
मरः। ३। २।२८॥
प्रविदारणं, क्लो, (प्रविदारयन्त्यनेति। प्र+वि+
दृ+णिच्+आधारे ल्युट्।) युद्धम्। इत्यमरः।
२।८।१०३॥ (प्र+वि+दृ+णिच्+भावे
ल्युट्।)अवदारणम्। इति मेदिनी। णे.११३॥
आकीर्णम्। इति शब्दरत्नावली॥ (प्र+वि+
दृ+णिच्+कर्त्तरि लुः। प्रविदारकः, त्रि॥)
प्रवीरः, पुं, पीतकाष्ठम् इति। शब्दचन्द्रिका॥
प्रविश्लेषः, पुं, (प्रकृष्टो विश्लेषो यस्य।) प्रकृष्ट-
विश्लेषः। तत्पर्य्यायः। विधुरम् २। इत्यमरः।
३। २। १०॥ यथा,—
"वैक्लव्येऽपि प्रविश्लेषे विधुरं विकले त्रिषु॥"
इति भरतधृतनानार्थकाण्डशेषः॥
प्रविषा, स्त्री, (प्रकृतं विषमनया।) अतिविषा।
इति जटाधरे। २। ४। ८८॥ (अतिविषा-
शब्दस्य विवरणं ज्ञातव्यम्॥)
प्रविष्टः, त्रि, (प्र+विश्+कर्त्तरि क्तः।) प्रवेश-
विशिष्टः। यथा,—

"स तं प्रविष्टं हृतमाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

प्रवीणः, त्रि, (प्रकृष्टा संज्ञाधिता वीणास्य । यद्वा प्रवीणयति वीणया प्रगायतीति । प्र + वीण + णिच + अच् । वीणया गायकस्यनैपुण्यप्रसिद्धेस्तत्तुल्यनैपुण्यात् तथात्वम् ।) प्रकृष्टं वेत्ति यः तत्पर्य्यायः । निपुणः २ अभिज्ञः ३ विज्ञः ४ निष्णातः ५ शिक्षितः ६ वैज्ञानिकः ७ कृतमुखः ८ कृती ९ कुशलः १० । इत्यमरः । ३ । १ । ४ ॥ (यथा कुमारे । १ । ४८ ।

"विश्वावसुप्रभृतिभिः प्रवीणैः
सङ्गीयमानचरितं पुरारिवादानः ।
अध्वानमध्वान्तविकारलङ्घ-
स्ततार तारापिपखण्डधारी ॥")

प्रवीरः, पुं. (प्रकृष्टो वीरः ।) सुभटः । (यथा, कथासरित्सागरे । २५ । १४५ ।

"इति तस्या वचः श्रुत्वा सप्रवीरोऽप्युवाच तान् ॥"

भौत्यस्य मनोः पुत्रभेदः । यथा, हरिवंशे ७।८८

"अभिमानो प्रवीरश्च जिष्णुः संकन्दनस्तथा ॥"

अत्र क्वचित् प्रवीणोऽपि पाठः ॥ पुरुवंशीयस्य प्रचिन्वतः पुत्रः । यथा, तत्रैव । ३१ । ५ ।

„प्रचिन्वतः प्रवीरोऽभून्मनस्युस्तस्य चात्मजः ॥"

धर्म्मनेत्रस्य उपदानवीगर्भजातः पुत्रभेदः । यथा, तत्रैव । ३२ । ७—८ ।

"नंसोः सुरोधो राजर्षिर्धर्म्मनेत्रः प्रतापवान् ।
ब्रह्मवादो पराक्रान्तस्तस्य भार्य्योपदानवी ॥
उपदानवी सुतान् लेभे चतुरस्तान् सुयोधतः ।
दुष्मन्तमथ सुषन्तं प्रवीरमनघं तथा ॥"

चण्डालपुरुषविशेषः । यथा, मार्कण्डेये ८८ ।

"चण्डालाऽहमिहाख्यातः प्रवीरेति पुरोत्तमे ।
विख्यातो वध्यवधको मृतकम्बलहारकः ॥")

उत्तमे, त्रि । इति धरणिः ॥ (यथा, देवीभागवते । २ । ५ । २० ।

"कुरुप्रवीरं कुरु मां पतिं त्वं
हृया न गच्छेन्नु यौवनं ते ॥")

प्रवृत्तः, त्रि, (प्रवर्त्तते स्मेति । प्र + वृत् + क्तः ।) प्रवृत्तिविशिष्टः । यथा,—

"प्रवृत्त एव स्वयमुज्झितश्रमः
क्रमेण पेष्टं भुवनद्विषामसि ।
तथापि वाचालतया युनक्ति मां
मिथस्त्वदाभाषणलोलुपं मनः ॥"

इति शिशुपालवधे । १ । ४० ॥

आरब्धः । यथा,—

"प्रवृत्तमन्यथा कुर्य्यात् यदि मोहात् कथञ्चन
यतस्तदन्यथा भूतं तत एव समापयेत् ॥"

इति छन्दोगपरिशिष्टम् ॥

प्रकृष्टवर्त्तनविशिष्टश्च ॥ (यथा रामायणे । ७। ८० । १ ।

"अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम् ।
पप्रच्छ च्यवनं विप्रं लवणस्य यथा बलम् ॥

प्रवृत्तिः, स्त्री, (प्रवर्त्तते इति । प्र + वृत् + क्तिन् । प्रवाहः । उदयः । (यथा, मेघदूते । ४ ।

"प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन् प्रवृत्तिम्॥"

प्रवर्त्तनमिति । प्र + वृत् + क्तिन् ।) प्रवर्त्तनम् । (यथा, महाभारते । १२ । ३० । १६ ।

"वहधे हि ततस्तस्य वृद्धिं कामो महात्मनः ।
यथा शुक्लस्य पक्षस्य प्रवृत्तो चन्द्रमाः शनैः ॥"

प्रवर्त्तते व्याप्नोति प्रमिद्धत्वेनेति । प्र + वृत् + क्तिच् । यत्नादिव्यापारः । यथा, महाभारते । १ । १ । २५५ ।

"असच्च सदसच्चैव यस्मादविश्वं प्रवर्त्तते ।
सन्ततिश्च प्रवृत्तिश्च जन्ममृत्युपुनर्भवाः ॥"

"सन्ततिर्ब्रह्मादिः । प्रवृत्तिर्यज्ञादिः ॥"इति तट्टीकायां नीलकण्ठः ॥") अवन्त्यादिदेशः । इति मेदिनी । ते, १३० ॥ हस्तिमदः । इति हेमचन्द्रः ।४। २८० ॥ न्यायमते यत्नविशेषः । अस्याः कारणम् । चिकीर्षा । कृतिसाध्यताज्ञानम् । इष्टसाधनताज्ञानम् । उपादानप्रत्यक्षम् । यथा,—

"प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ।
एवं प्रयत्नविध्यं तान्त्रिकैः परिदर्शितम् ॥
चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा ।
उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् ॥"

इति भाषापरिच्छेदः ॥

(यथा, पञ्चदश्याम् । ६ १७३ ।

"देहादि पञ्चकं यत्तु तदारोहाऽभिमानिता ।
विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ॥"

प्रयत्नसहितादन्तःकरणात् प्रवृत्तिर्जायते । यदुक्तं कामन्दकीये नीतिसारे । १।३३—३५ ।

"आत्मा मनश्च तद्विद्यैरन्तःकरणमुच्यते ।
आभ्यान्तु सप्रयत्नाभ्यां सङ्कल्प उपजायते ॥
आत्मा बुद्धीन्द्रियाण्यर्थो बाह्यकरणमुच्यते ।
सङ्कल्पाध्यवसायाभ्यां मिश्रितस्य प्रकीर्त्तिता ॥
उभे एते हि करणे यत्नानन्तर्य्यके स्मृते ।
तस्मात् प्रवृत्तिसंरोधाद्वाय्वग्निसमनस्कताम् ॥"

"आत्ममनोबुद्धिकर्मेन्द्रियाणां लक्षणमभिधाय बुद्धेरन्तःपरिकल्पनया कारणविभागमभिधातुमाह । आत्मा मनश्चेति । अभिहितेन लक्षणेनेति प्रतिपाद्यते यथा विद्यया माऽन्वयव्यविद्या सा विद्यते येषां ते तद्विदाः कणादाक्षपादादयः तैः तद्विद्यैः आत्मा मनश्च अन्तःकरणमुच्यते । आभ्यां आत्ममनोभ्यां प्रयत्नसहिताभ्यां सङ्कल्पः प्रवृत्तिः इन्द्रियप्रवर्त्तनं उपजायते । बहिःकरणमभिधातुमाह । आत्मा बुद्धीति । आत्मा उक्तलक्षणः । बुद्धिः मनः । इन्द्रियाणि बाह्यरूपाणि । अर्थाः शब्दादयः । कर्मेन्द्रियाणां हि उत्सर्गादिका अर्थाः प्रयोजनानि । एतत् सर्व्वं बहिःकरणम् । सङ्कल्पः सम्यग्भूतार्थकल्पनं अध्यवसायः प्रयत्नविशेषः ताभ्यां अस्य आत्मनः सुखानुभवलक्षणा सिद्धिः प्रकीर्त्तिता । तदेवं अन्तःकरणप्रवृत्तिः प्रयत्नादेव

बहिःकरणप्रवृत्तिरपि अध्यवसायलक्षणात् प्रयत्नादेवेति दर्शितं भवति एतदेव समर्थयन्नाह । उभे एते हीति । उभे एते अनन्तरोक्ते हि स्फुटं करणे अन्तर्बहिःकरणसंज्ञके यत्नानन्तर्य्यके प्रयत्नानन्तरं वर्त्तेते प्रयत्नप्रेरणादित्यर्थः । तस्मादिति । यस्मादेवं तस्मात् प्रवृत्तिसंरोधात् उभयात्मकस्य प्रयत्नस्यैव संरोधं कृत्वा निर्म्मनस्कतां भावयेत् निर्म्मनस्कभावं अभ्यस्येत् यावत् प्रयत्न एव निरुद्धो भवति तावदात्मा मनसा न युज्यते ततश्च विद्यमानमपि मनो नास्त्येव मनःकार्य्याकरणात् । अन्तःकरणविश्लेषात् प्रवृत्तिर्नोपपद्यते । एवमन्तःकरणप्रवृत्त्यभावात् बहिःकरणप्रवृत्तेरप्यभावः । तदभावात् इन्द्रियाणां विषयैः सम्बन्ध एव न स्यात् इति भावः।"इति तट्टीका)

प्रवृत्तिज्ञः, पुं, (प्रवृत्तिं हस्तान्तं जानातीति । ज्ञा + कः ।) चारभेदः । तत्पर्य्यायः । वार्त्तिकः २ वार्त्तायनः ३ । इति त्रिकाण्डशेषः ॥

प्रवृद्धः, त्रि, (प्रवर्द्धते स्मेति । प्र + वृध् + क्तः ।) वृद्धियुक्तः । तत्पर्य्यायः । प्रौढः २ एधितः ३ । प्रसारितः । तत्पर्य्यायः । प्रवृत्तः २ इत्यमरः । ३ । १ । ७६ ॥ (यथा, देवीभागवते । ३।८।२९ ।

"सत्त्वं ममुत्कटं जातं प्रवृद्धं शास्त्रदर्शनात् ।
वैराग्यं तत्फलं जातं तामसार्थेषु नारद ! ॥")

प्रवेकः, त्रि, (प्रविच्यते पृथक् क्रियते इति । प्र + विच् + कर्म्मणि घञ् ।) उत्तमः । प्रधानम् । इत्यमरः । ३ । १ । ५७ ॥ (यथा, भागवते । २ । ९ । ११ ।

"श्यामावदाताः शतपत्रलोचनाः
पिशङ्गवस्त्राः सुरुचः सुपेशसः ।
सर्व्वे चतुर्बाहव उन्मिषन्मणि-
प्रवेकनिष्काभरणाः सुवर्चसः ॥")

प्रवेटः, पुं, (प्रवीयते खाद्यते इति । प्र + वी + बाहुलकात् टः ।)यवः । इति त्रिकाण्डशेषः ॥

प्रवेणिः, स्त्री,(प्रकर्षेण वीयते इति । प्र + वी गतौ + "वाज्याज्वरिभ्यो निः" उणा० ४।४८ । इति निः । णत्वम् । यद्वा, प्रवेणति सौन्दर्य्यं प्राप्नोतीति । प्र + वेण गतौ + इन् । (कुथः वेणी । इति मेदिनी । णि, ६३ ॥)

प्रवेणी, स्त्री,(प्रकर्षेण वीयते इति । प्र + वी गतौ + "वाज्याज्वरिभ्यो निः ।" उणा० ४।४८ । इति निः । णत्वम् । ऋदिकारादिति पाक्षिको ङीष् । वेणी । (यथा, रघौ । १५ । ३० ।

"तत्र सौधगतः पश्यन् यमुना चक्रवाकिणीम् ।
हेमभक्तिमतीं भूमेः प्रवेणीमिव पिप्रिये ॥")

गजपृष्ठस्थचित्रकम्बलम् । इत्यमरः ।२।६।८८॥ (यथा, महाभारते । १५ । २७ । १३ ।

"अजितानि प्रवेणीश्च कुथाश्च कुथवच्च महीपतिः ।
कमण्डलूंश्च खालीश्च पिठराणि च भारत ! ॥
नदीविशेषः । यथा, महाभारते ।३।८८।११।

"प्रवेण्युत्तरमार्गे तु पुण्ये कण्वाश्रमे तथा ।
तापसानामरण्यानि कौत्सितानि यथाश्रुति ॥"

प्रवेशः, पुं, (प्र + विश् + घञ् ।) पीतसुप्तः । इति हेमचन्द्रः । ४ । २१८ ॥
प्रवेशः, पुं, (प्र + विश् + "इसुस । ।" ३ । ३ । १२१ । इति भावे घञ् ।) अन्तर्विगाहनम् । इति हेमचन्द्रः । ६ । १०६ ॥ (यथा, कामन्दकीये नीतिसारे । ७ । ३८ ।
"निर्गमे च प्रवेशे च राजमार्गे समन्ततः ।
घोषयारितजनं गच्छेत् सम्यगाविष्कृतोऽरिति: ॥")
प्रवेशनं, क्ली, (प्रविश्यतेऽनेनेति । प्र + विश् + करणे ल्युट् ।) सिंहद्वारम् । इति हेमचन्द्रः । ४ । ५८ ॥ (प्र + विश् + भावे ल्युट् ।) प्रवेशः । यथा हरिवंशे । १७४ । ११२ ।
"तव योगप्रभावेन शक्यं तत्र प्रवेशनम् ।
किं मे बहुविलापेन श्रूयतां सखि । कारणम्॥"
प्रवेष्टः, पुं, (प्रवेष्टते इति । वेष्ट् वेष्टने + अच् ।) बाहुः । इत्यमरः । २ । ६ । ८० ॥ बाहुनोचभागः । इति शब्दरत्नावली ॥ हस्तिदन्तमांसम् इति हारावली । ३० ॥ गजपृष्ठतल्पनम् । इति त्रिकाण्डशेषः ॥
प्रव्यक्तं, त्रि, प्रव्यज्यते स्मेति । प्र + वि + अन्ज् + क्तः ।) स्फुटम् । इत्यमरः । ३ । १ । ८१ ॥ (यथा सुश्रुते निदानस्थाने द्वितीयाध्याये ।
"जातीष्वेतानि रूपाणि प्रव्यक्ततराणि भवन्ति")
प्रव्रजितः, पुं, (प्र + व्रज् + क्तः ।) बुद्धभिक्षुशिष्यः । तत्पर्य्यायः । चैलुकः २ श्रामणेरः ३ महापात्रकः ४ गोमो ५ इति त्रिकाण्डशेषः ॥ त्रि, प्रव्रज्याश्रमविशिष्टः ॥ (यथा पराशरसंहितायाम् । ४ । २६ ।
नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥"
प्र + व्रज् + भावे क्तः । क्ली संन्यासः । यथा, महाभारते । ५ । १७६ । ५ ।
"अलं प्रव्रजितेनेह भद्रे ! शृणु हितं वचः ।
इतो गच्छस्व भद्रन्ते पितुरेव निवेशनम् ।")
प्रव्रजिता, स्त्री, (प्रव्रजितस्य लिङ्गमिव जटादिकमस्त्यस्या इति । अच् । टाप् ।) सांसी । मुण्डीरी । (प्रव्रजित + टाप् । तापसी । इति मेदिनी । ते, २१० ॥
प्रव्रज्या, स्त्री, (प्र + व्रज + "व्रजयजोर्भावे क्यप् ।" ५ । ३ । ८८ । इति भावे क्यप्प्रत्ययः ।) संन्यासः ॥ (यथा, महाभारते । ३ । १७१ । ७ ।
"बाणवेगं हि कस्तस्य शक्तः सोढुं महात्मनः ।
प्रव्रज्यायां हि मे हेतुः स एव पुरुषर्षभः ॥"
यथा च कुमारे । ६ । ६ ।
"मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्राः प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥"
"अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते 'जटुः परिप्लवो ब्रह्मचारी प्राजापत्यास्तपस्विनः' इति सपत्नीकत्वाभिधानात् 'श्रुतविद्यस्तपस्वीकः तया वानुगतोऽपि वा' ॥ इति वानप्रस्थलोभयथा स्मरणात् ॥" इति मल्लिनाथः ॥ इत्थाप्रव्रज्याश्रितानां निन्दनीयत्वमुक्तम् । यथा, मनौ । ५ । ८९ ।
"इत्थासङ्गरजातानां प्रव्रज्यासु च तिष्ठताम् ।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया ॥"
क्ली, प्रव्रजनम् । यथा, महाभारते । ४ । १७ । ११ ।
"कोऽहि राज्यं परित्यज्य सर्व्वस्वं चात्मनासह ।
प्रव्रज्यायेव दौष्येत विना दुर्य्यूतदेविनम् ॥")
प्रव्रज्यावसितः, पुं, (प्रव्रज्याया अवसितो विच्युतः संन्यासभ्रष्टः । यथा,—
"तथाऽहमित्युपगतः प्रव्रज्यावसितः स्मृतः ॥"
इति दायभागवचनव्याख्यायां क्रमसंग्रहः ॥ (यथा, कात्यायनवचनम् ।
"प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजोत्तमाः ।
निर्व्वासं कारयेद्विप्रं दासत्वं शत्रवेश्ययोः ॥")
प्रशंसा, स्त्री, (प्र + शंस् + भावे अः । स्त्रियां टाप् ।) प्रशंसनम् । तत्पर्य्यायः । वर्णना २ स्तुतिः ३ स्तवः ४ स्तोत्रम् ५ स्तुतिः ६ नुतिः ७ श्लाघा ८ अर्थवादः ९ । इति हेमचन्द्रः । २ । १८४ ॥ (यथा, मनुः । १० । २२७ ।
धर्म्मोपदेशमेवन्तु धर्म्मज्ञाः सन्तो वृत्तिमनुष्ठिताः ।
मन्त्रवर्ज्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥")
आत्मप्रशंसानिषेधो यथा ;—
"न चात्मानं प्रशंसेद्वा परनिन्दाञ्च वर्जयेत् ।
वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत् ॥"
इति कौर्म्मे उपविभागे १५ अध्यायः ॥
प्रशमः, पुं, (प्रशमनमिति । प्र + शम् + भावे घञ् ।) शमता । उपशमः यथा,—
"एतानि दृष्टपापानि प्रशमं यान्तु जाह्नवि !"
इति तिथ्यादितत्त्वम् ॥
(यथा च हरिवंशे । ८८ । ८१ ।
"म तेन वारिणा वह्निस्तत्क्षणात्प्रशमं ययौ॥"
प्रशमनं, क्ली, (प्र + शम् + णिच् + ल्युट् ।) मारणम् । वधः इति हेमचन्द्रः ॥ (प्र + शम् + ल्युट् ।) शमता । प्रशान्तिः । यथा,—
"मन्त्रौषधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ! ।
एवमेव त्वया कार्य्यमस्माकं वैरिनाशनम् ॥"
इति मार्कण्डेयपुराणम् । ८१ । ३५ ।
(प्रतिपादनम् । दानम् । इति कुल्लूकभट्टः ॥ यथा, मनुः । ७ । ५६ ।
"तैः सार्द्धं चिन्तयेच्चित्यं सामान्यं सन्धिविग्रहम् ।
स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च ॥"
स्थिरीकरणम् । प्रशमनेन स्थिरीकरणेन । यथा रघुः । ४ । १४ ।
"लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्दितीयेव शरत्पङ्कजलक्ष्मणा ॥")
इति मल्लिनाथः ॥
प्रशस्तं, त्रि, (प्रशस्यते स्मेति । प्र + शंस् + क्तः ।) श्लक्ष्णम् । इति शब्दरत्नावली ॥ प्रशंसनीयम् । अतिश्रेष्ठम् । इति भरतमल्लिकादिशब्दटीकायां भरतः ॥ (यथा, रघुः । ५ । २५ ।
"विद्वांस्त्वं प्रशस्ते महति मदीये
क्रमा[illegible]सनुयोऽस्मिरिवान्यगारे ॥")
प्रशस्यः, त्रि, प्रशंसनीयः । प्रपूर्ब्बशंसधातोः कर्म्मणि क्यप्प्रत्ययेन निष्पन्नः ॥ (यथा, कामन्दकीयनीतिसारे । ११ । ५५ ।
अपक्षात् तापक्षत्तव्यगनुरक्तिफलप्रदः ।
अदीर्घकालोऽभोष्टश्च प्रशस्यो मन्त्र इष्यते ॥")
प्रशान्, [म] त्रि, प्रकर्षेण शाम्यति यः । (प्र + शम् + क्विप् । "अनुनासिकस्य क्विझलोः क्ङिति ।" ६ । ४ । १५ । इति दीर्घः ।) शान्तः । इति मुग्धबोधव्याकरणम् ॥ (सामर्थ्यं नान्तोऽव्ययोऽयम् ॥)
प्रशान्तः, त्रि, (प्रकर्षेण शान्तः ।) प्रक्षीणश्रमतादिविशिष्टः । यथा —
"प्रशान्तखापदाकीर्णं मुनिशिष्योपशोभितम्॥"
इति मार्कण्डेयपुराणे । ८१ । ९ ।
प्रशास्ता, [तृ] त्रि, (प्रशास्तीति । प्र + शास् + तृच् । "यमितस्कमितीति ।" ७ । २ । ३४ । इति निपातनादिडभावः । यद्वा, 'तृन्तृचौ शंसिवदादिभ्यः संज्ञायाञ्चानिटौ । उणा० २ । ९४ । इति तृण् तृट् च न ।) ऋत्विक् । मित्रम् । इति संक्षिप्तसारोणादिवृत्तिः ॥ शासनकर्त्ता ॥ (यथा, कामन्दकीयनीतिसारे । १३ । ४५ ।
"प्रशास्त्रध्यक्षमेनानां मन्त्रामात्यपुरोधसाम् ।
सम्यक्प्रचारविज्ञानं दुष्टानाञ्चावबोधनम् ॥"
प्रश्नः, पुं, (प्रच्छनमिति । प्रच्छ + "यजयाचयतेति ।" ३ । ३ । ९० । इति नङ् । "क्ङोः शूडिति ।" ६ । ४ । १९ । इति यः । "प्रश्नेचेति" १ । २ । ११७ । इति ज्ञापकात् न गुणसारणम् ।) जिज्ञासा । तत्पर्य्यायः । अनुयोगः २ पृच्छा ३ । इत्यमरः । १ । ६ । १० ॥ (यथा, मनुः । १ । ११५ ।
"सान्त्वप्रश्नविधानञ्च धर्म्म स्त्रीपुंसयोरपि ॥"
"पृच्छा तन्त्रादयाचार्य्य विधिना प्रश्न उच्यते॥"
इति सरके सूत्रस्थाने त्रिंशोऽध्याये ॥)
प्रश्नदूती, स्त्री, प्रश्नस्य दूतीव ।) प्रहेलिका । इति त्रिकाण्डशेषः ॥
प्रश्नी, स्त्री, (पृश्निः पृषोदरादित्वात् रः । वा ङीष् ।) कुण्डिका । इति त्रिकाण्डशेषः ॥
प्रश्रयः, पुं, (प्रश्रयणमिति । प्र + श्रि + भावे अच् ।) प्रणयः । इत्यमरः । ३ । २ । २५ ॥ (यथा कामन्दकीयनीतिसारे । ८ । ८ ।
'अदीर्घसूत्रताक्षौद्रं प्रश्रयः क्षत्रधानता ।
प्रकृतिस्फीतता चेति विजिगीषुगुणाः स्मृताः॥')
प्रश्रितः, त्रि, (प्र + श्रि + क्तः ।) विनीतः । इत्यमरः । ३ । १ । २५ ॥ (यथा, रामायणे । १ । १३ । २ ।
"अब्रवीत् प्रश्रितं वाक्यं प्रसवार्थे द्विजोत्तमम्॥")
प्रश्नयः, त्रि, (प्रज्ञष्टः श्नथः ।) शिथिलः । इति त्रिकाण्डशेषः ॥
प्रष्टा, [ष्टृ] त्रि, (पृच्छतीति । प्रच्छ + तृच् । "ग्रथेति ।" ८ । २ । ३६ । इति षः ।) प्रश्नकर्त्ता । तत्पर्य्यायः । कथंकथिकः २ । इति

त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये ।७५। २८।
"विवेश वह्निशालां वै प्रष्टारं प्राह हव्यभुक्॥")
प्रष्ठः, त्रि, (प्रतिष्ठते अग्रतो गच्छतीति। प्र + स्था + "सुपि स्थः।"३।२।४। इति कः। "प्रष्ठोऽग्रगामिनि।" ८।३।८२। इति षत्वम्।) अग्रगामी। इत्यमरः। २।८।७२॥ (यथा, रघुः। १५।१०।
"आदिष्टवर्त्मा मुनिभिः स गच्छंस्तपतां वरः।
विरराज रथप्रष्ठे बालखिल्यैरिवांशुमान्॥")
प्रष्ठवाट्, [ह्] पुं, प्रष्ठः अग्रगामी सन् वहतीति। प्रष्ठ + वह् + "वहश्च।" ३।२।६४। इति क्विप्। युगपार्श्वगः। इत्यमरः। २।८। ६३॥ शिक्षार्थं युगवाहिपार्श्वयोर्योजितः। इति भरतः॥ योजितं युगपार्श्वे दमनार्थं यं हालिका भ्रामयन्ति सः। इति मधुः॥ युवा गौर्दमनाय योजितः। इत्यन्ये॥
प्रष्ठौ, स्त्री, (प्रष्ठ + ङीष्।) प्रष्ठभार्य्या। अग्रगामिपत्नी। इति जटाधरः॥
प्रष्ठौही, स्त्री, (प्रष्ठवाह् + "वाहः।" ४।१। ६१। इति ङीष्।) बालगर्भिणी। प्रथमगर्भवती गौः। प्रष्ठं प्रथमगर्भं वहति या सा। बाला सती गर्भिणी प्रथमगर्भेत्यर्थः। इति भरतः॥ (यथा, महाभारते। १३।८३। ३३।
प्रष्ठौहीनां पौवराणाञ्च तावद्
अग्र्या गृष्ट्यो धेनवः सुव्रताश्च॥")
प्रस, म प ङ प्रसवे। ततौ। इति कविकल्पद्रुमः (भ्वा०-आत्म०-सक०-सेट्। रेफयुक्ताद्यः। म, प्रसयति। ष, प्रसा। ङ, प्रसते कीर्त्तिं विद्याम्। प्रसते विस्तारयति वेत्यर्थः। इति दुर्गादासः॥
प्रसक्त, क्ली, (प्र + सन्ज + क्त।) नित्यम्। इति जटाधरः॥ (यथा माधवकृतहारीतसंहितायां कासाधिकारे।
"प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव॥"
"प्रसक्तवेगः सततकासवेगः।" इति तट्टीकायां विजयरक्षितः।) तद्वति, त्रि॥ (आसक्तः। यथा, गीतायाम्। १६।१६।
"अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥")
प्रसक्तिः, स्त्री, (प्र + सन्ज + भावे क्तिन्।) प्रसङ्गः (यथा, किरातें। ५।५०।
"मा भूवन्नपथद्वारास्तवेन्द्रियसखाः
सन्तापं दिशतु शिवः शिवां प्रसक्तिम्॥")
अनुमितिः। आपत्तिः। इति सत्यभिचारशिरोमणिः॥
प्रसङ्गः, पुं, (प्र + सन्ज + घञ्। सङ्गतिविशेषः। यथा,—
"स प्रसङ्ग उपोद्घातो हेतुतावसरस्तथा।
निर्वाहकैककार्य्यत्वे षोढा सङ्गतिरिष्यते॥"
तस्य लक्षणम्। स्मृतस्योपेक्षानर्हत्वम्। तदर्थस्तु स्मृतिविषयतापन्नत्वे सति ह्यविषयतानापन्नत्वम्। इत्यनुमितिग्रन्थे गदाधरभट्टाचार्यैः॥*॥ "प्रकरणान्तरेण समापनं प्रसङ्गः। यथा प्रकारान्तरितो योऽर्थोऽसङ्गदुक्तः समाप्यते स प्रसङ्गः। यथा। महाभूतशरीरिसमवायः पुरुषस्तस्मिन् सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरिसमवायः पुरुष इति स खल्वेवं कर्म्म पुरुषविकित्सायामधिक्रियते॥" इत्युत्तरतन्त्रे पञ्चषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥") अन्योद्देशेन प्रवृत्तावन्यस्यापि सिद्धिः। यथा,—
"दृष्टा तु हरते पापं स्पृष्टा तु त्रिदिवं नयेत्।
प्रसङ्गेनापि या गङ्गा मोक्षदा स्तूयते कथं॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
(यथा च देवीभागवते। ३।८।४२।
"अस्पष्टमपि तन्नाम प्रसङ्गेनापि भाषितम्।
ददाति वाञ्छितानर्थान् दुर्लभानपि सर्वथा॥")
प्रसक्तिः। यथा,—
"आनीता भवता यदा पतिरता साध्वी धरित्रीसुता
स्कुर्ज्जद्राक्षसमायया न च कथं रामाङ्गसङ्गीकृतम्।
कर्त्तुं चेतसि पुण्डरीकनयनं दूर्वादलश्यामलं
तुच्छं ब्रह्मपदं भवेत् परवधूसङ्गप्रसङ्गः कुतः॥"
इति नाटकम्॥*॥
प्रस्तावः। यथा,—
तत्रैव गङ्गा यमुना च तत्र
गोदावरी तत्र सरस्वती च।
सर्व्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः॥"
इति पौराणिकाः॥*॥
मैथुनम्। यथा। प्रसङ्गनित्यद्रुतपृष्ठयानादिति कविनिश्चयवचनटीकायां विजयरक्षितः॥ (यथा च देवीभागवते। १।१२।२०।
"ऋषयोऽपि तयोर्धीत्य प्रसङ्गं रममाणयोः।
परिहृत्य ययुस्तूर्णं नरनारायणाश्रमम्॥")
प्रसज्यप्रतिषेधः, पुं, (प्रसज्य प्रवृत्तिं सम्पाद्य प्रतिषेधो निषधः।) निषधविशेषः। तल्लक्षणं यथा,
"अप्रधान्यं विधेयत्व प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्॥"
अस्योदाहरणम्। भोजराजः।
"पीत्वा चैत्र क्षणार्द्धे नवासवं नाचरेद्बुधः।
भवेज्जन्मान्तरे रोगी पितॄणां नोपतिष्ठते॥"
अत्र रोगीतिनिन्दाश्रवणात् प्रसज्यता। नोपतिष्ठते इति श्रवणात् पर्य्युदासता। इति मलमासतत्त्वम्॥
प्रसत्तिः, स्त्री, (प्र + सद् + क्तिन्।) प्रसन्नता। नैर्म्मल्यम्। इति जटाधरः॥
प्रसत्वरी, स्त्री, (प्रसत्वन् + "वनो रच।" ४।१।७। इति ङीप्।) प्रतिपत्तिः। इति संक्षिप्तसारोणादिवृत्तिः॥
प्रसत्वा, [न्] पुं, (प्रसीदतीति। प्र + सद् + क्वनिप्।) धर्म्मः। प्रजापतिः। इति प्रकाशादेव संक्षिप्तसारोणादिवृत्तिः॥

प्रसन्नः, त्रि, (प्रसीदतीति। प्र + सद् + गत्यर्थेति क्तः।) निर्म्मलः। तत्पर्य्यायः। अच्छः २। इत्यमरः। १।१०।१४॥ (यथा, महाभारते। ४। २७। २४।
"रसाः सप्तार्थ गन्धाश्च शब्दाश्चापि गुणान्विताः।
दृश्यानि च प्रसन्नानि यच्च राजा युधिष्ठिरः॥")
सन्तुष्टः। इति मेदिनी नै, ८६॥ (यथा, रघुः। ५।१०।
अपि प्रसन्नेन महर्षिणा त्वं
सम्यग्विनीयानुमतो गृहाय॥")
प्रसन्नता, स्त्री, (प्रसन्न + तल्।) प्रसन्नस्य भावः। तत्पर्य्यायः। प्रसादः २। इत्यमरः।१।३।१६॥ (यथा, हठयोगप्रदीपिकायाम्। २। ७८।
"वपुः कृशत्वं वदने प्रसन्नता
नादस्फुटत्वं नयने सुनिर्म्मले॥"
प्रसन्ना, स्त्री, (प्रसन्न + टाप्।) सुरा। इत्यमरः। २।१०।४०॥ मद्यविशेषः। तस्य गुणाः।
"प्रसन्ना गुल्मवातार्शोविबन्धानाहनाशिनी।
शूलप्रवाहिकाटोपकफवातार्त्तिजिच्छिता॥"
इति राजवल्लभः॥
प्रसादविशिष्टा। यथा, मार्कण्डेये।८१।४३।
"सैषा प्रसन्ना वरदा नृणां भवति सुक्रये॥"
प्रसन्नेरा, स्त्री, (प्रसन्ना निर्म्मला इरा जलमिव। मदिरा। इत्यमरटीकायां भरतः।२।१०।४०॥)
प्रसभः, पुं, (प्रगता सभा सभाधिकारो यस्मात्। बलात्कारः। इत्यमरः। २।८।१०८॥ (यथा, श्रीकण्ठचरिते। ५। ४२।
"यस्मिन् विनिर्म्मितवति प्रसभं प्रकोपादत्युग्रनिग्रहनवानुभवोपदेशम्॥")
प्रसरः, पुं, (प्र + सृ + भावादौ यथायथं अप्।) तन्तुव्रणविटपादेर्विसर्पणम्। प्रकर्षेण निकटे सरणं सर्पणम्। तत्पर्य्यायः। विसर्पः २। इत्यमरभरतौ। ३।२।२३॥ (यथा, रघुः।१६।२०।
"तिरस्क्रियन्ते क्रमितन्तुजालैः
र्विच्छिन्नधूमप्रसरा गवाक्षाः॥"
प्रणयः। वेगः। इति मेदिनी। रे, १८२॥ (यथा, कलाविलासे। १। २१।
"इति विनयनम्रशिरसा तेन वचो युक्तमुक्तमवधार्य्य।
तमुवाच मूलदेवः प्रीतिप्रसरैः प्रसारितोत्साहः॥")
समूहः। इति शब्दरत्नावली॥) यथा, आर्य्यासप्तशत्याम्। ५८९।
"स्तननूतननखलेखालक्ष्मी तव घर्म्मबिन्दुसन्दोहः।
आभाति पट्टसूत्रे प्रविशन्निव मौक्तिकप्रसरः॥"
प्रकृष्टसञ्चरणम्। यथा,—
अत ऊर्द्धं प्रसरं वक्ष्यामः। तेषामेभिरातङ्कग्रन्थैः प्रकुपितानां पर्य्युषितक्षिप्तोदकपिष्ट-
"प्रसाय इवोद्विग्नानां प्रसरो भवति तेषां वायुतापात्तस्मात् प्रसरणहेतुः सन्तप्यतेऽतस्मे सर्पि

रजोभूयिष्टो रजश्च प्रवर्त्तकं सर्व्वभावानाम् । यथा मद्यानुदकसञ्चयोऽतिहृद: सेतुमवदार्य्यापरिणोदकेन व्यामिश्र: सर्व्वत: प्रधावत्येवं दोषा: कदाचिदेकाणी द्विग्र: समस्ता: शोणितसहिता वानेकधा प्रसरन्ति ।" इति सुश्रुते सूत्रस्थाने २१ अध्याय: ॥) युद्धम् । इति विश्व: । नाराच: । इति भूरिप्रयोग: ॥

प्रसरणं, क्ली, (प्र + सृ + भावे ल्युट् ।) सैन्यानां सर्व्वतो व्याप्ति: । तत्पर्य्याय: । चाषार: २ । इत्यमर: । २ । ८ । ८६ ॥ प्रसरणी ३ प्रसर्पणि: ४ प्रसारणी ५ । इति रामाश्रम: ॥ सैन्यानां क्षपणकाष्ठादिहेतवे इतस्ततो गमनम् इति हेमचन्द्र: । १ । ४५५ ॥ (गमनमात्रम् । यथा, कृष्णकर्णामृते । ३ अङ्के ।

"मार्জ্জার: क्षमणे खग: प्रसरणे श्येनो गरुत्मान् रुजने
सुप्तासुप्तमनुष्यवीर्य्यतुलने ब्रह्मा सर्पणे पन्नग:॥"

अभ्यूहनादिकम् । यथा, भागवते । ५ । १ । २८ ।

"वर्द्धिष्यत्यासानुदिनमेधमानप्रमोदप्रसरण-
यौषिण्यव्रीड़ाप्रसुषितहासावलोकरुचिरस्मेरत्वादिभिरिति ॥")

प्रसरणी, स्त्री, (प्र + सृ + "अर्त्तिसृधृञ्यनि: ।" इति अनि: । ङीदिकादिति वा ङीष् ।) प्रसरणम् । इत्यमरटीकायां भरत: । २ । ८ । ८६ ।

प्रसर्पणं, क्ली, (प्र + सृप् + ल्युट् ।) गमनम् । प्रसरणम् । प्रपूर्ब्बसृपधातोर्भावेऽनट्प्रत्यय: ॥ (यथा महाभारते । ३ । १२८ । ६ ।

"प्रसर्पणं महीपाल ! रौप्यायाममितौजस: ।"

गतिसाधने, त्रि । यथा, ऋग्वेदे । १० । ६० । ७

"इदं तव प्रसर्पणं सुबन्धवेदि निरिहि ॥"

वर्त्तमानेदं तव शरीरं तव प्रसर्पणं प्रकर्षेण सर्पणसाधनम् ॥" इति तद्भाष्ये सायन: ॥)

प्रसव:, पुं, (प्र + सू + "ऋदोरप् ।)" ३ । ३ । ५७ । इत्यप् ।) गर्भमोचनम् । तत्पर्य्याय: । प्रसूति: २ इत्यमर: । ३ । २ । १० ॥ यथा, रघु: । ३ । १२ ।

"पति: प्रतीत: प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव ॥"

गर्भग्रहणम् यथा, मनु: । ९ । ७० ।

"यथाविधभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात् सकृत्सकृदृतावृतौ ॥")

उत्पाद: । (जन्म । यथा, रघु: । १ । २२ ।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्य्यय:
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ॥"

"सह प्रसवो जन्म येषां ते सप्रसवा: सोदरा इव ।" इति तट्टीकायां मल्लिनाथ: ॥) अपत्यम् । (यथा, रघु: । ८ । ३० ।

"ऋषिदेवगणस्वधाभुजां
श्रुतयागप्रसवै: स पार्थिव: ।
अनृणत्वमुपेयिवान् बभौ
परिधेर्मुक्त इवोष्णदीधिति: ॥"

फलम् । कुसुमम् । इति मेदिनी । वे, ४२ ॥ (यथा, रघु: । ४ । २३ ॥

"प्रसवै: सप्तपर्णानां मदगन्धिभिराततै: ।
वसुधयैव तन्नागै: समधैव प्रसुप्तवु: ॥"

आम्रा । यथा, वाजसनेयसंहितायाम् । १० । २१ ।

"मरुतां प्रसवेन जय ।" "हे धुर्य्य मरुतां देवानां प्रसवेनाज्ञया त्वं जय शत्रूनिति शेष: ॥" इति तद्भाष्ये महीधर: ॥) प्रसवस्य मासनियमो यथा,—

"नवमे दशमे मासि नारी गर्भं प्रसूयते ।
एकादशे द्वादशे वा ततोऽन्यत्र विकारत: ॥"

इति भावप्रकाश: ॥*॥

प्रसूतिकारकौषधादि यथा,—

"पौतस्तु काञ्चिकं रुद्र ! क्षपितं शरपुङ्खया ।
हिङ्गुसैन्धवसंयुक्तं शीघ्रं स्त्रीणां प्रसूतिकृत् ॥
मातुलुङ्गस्य वै मूलं कटिबद्धं प्रसूतिकृत् ।
अपामार्गस्य वै मूलं योनिस्थञ्च प्रसूतिकृत् ॥
अपामार्गस्य वै मूले गर्भवत्यास्तु नामत: ।
उत्पाट्यमाने सकले पुत्र: स्यादन्यथा सुता ॥
अपामार्गस्य वै मूले नारीणां शिरसि स्थितं ।
गर्भशूलं विनश्येत नात्र कार्य्या विचारणा ॥"

इति गारुड़े १८६ अध्याय: ॥*॥

अपि च

"पाठालाङ्गलिसिंहास्यमयूरकजटै: पृथक् ।
नाभिवस्तिभगालेपात् सुखं नारी प्रसूयते ॥
पाठायास्तु शिफां योनौ या नारी संप्रधारयेत् ।
उष: प्रसवकाले तु सा सुखेन प्रसूयते ॥
तुषाम्बुपरिपिष्टेन मूलेन परिलेपयेत् ।
लाङ्गल्याश्चरणौ सूते क्षिप्रमेतेन गर्भिणी ॥
मातुलुङ्गस्य मूलानि मधुकं मधुसंयुतम् ।
घृतेन सह पातव्यं सुखं नारी प्रसूयते ॥"

इति चक्रपाणिदत्त: ॥*॥

सुखप्रसवमन्त्रो यथा,—

"अस्ति गोदावरीतीरे जम्बला नाम राक्षसी ।
तस्या: स्मरणमात्रेण विप्रस्त्री गर्भिणी भवेत्॥"

सुखप्रसवचक्रं यथा—

"पञ्चरेखा: समुल्लिख्य तिर्य्यगूर्द्धक्रमेण हि ।
पदानि षड्दशापाद्य त्वेकमाद्ये मुनौ लयम्॥
नवमे सप्त दद्यात्तु बाण पञ्चदशे तथा ।
हितीयेऽष्टावष्टमे षट्दिशि हौ षोड़शे श्रुति:॥
एकादिना समं क्षेयमिच्छाङ्कार्द्धं त्रिकोणके ।
तदा द्वात्रिंशदादि: स्याद्यतुष्कोष्ठेषु सर्वत: ॥
दर्शनाद्धारणात्तासां शुभं स्यादेषु कर्मसु ।
द्वात्रिंशत् प्रसवे नार्य्याश्चतुस्त्रिंशद्गमे नृणाम्॥
भूताविष्टेषु पञ्चाशन्मृतापत्यासु वै शतम् ।
द्वासप्ततिस्तु बन्ध्यायां चतु:षष्टौ रणाध्वनि ॥
विषे विंशो धान्यकीटेष्वधात्रिंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिता: ॥"

इति ज्योतिस्तत्त्वम् ॥*॥

तस्य वैकृतं यथा,—

गर्ग उवाच ।

"अकालप्रसवा नार्य्य: कालातीतप्रजास्तथा ।
विकृतप्रसवार्द्धैव युग्मप्रसवनास्तथा ॥
अमानुषा अवक्त्राश्च न जातव्यञ्जनास्तथा ।
क्षीणाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रिय: ॥
पशव: पक्षिणश्चैव तथैव च सरीसृपा: ।
विनाशं तस्य देशस्य कुलस्य च विनिर्द्दिशेत् ॥
निर्व्वासयेत्तां नृपति: सराष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्रा: ।
किमिच्छकैर्ब्राह्मणतर्पणञ्च
लोके तत: शान्तिमुपैति पापम् ॥"

इति माल्ये अद्भुतशान्तिस्त्रीप्रसवविकृतो नाम २०८ अध्याय: ॥*॥

प्रसवाङ्गतत्वं यथा,—

"एको द्वयङ्गयो गाव: सप्ताख्या नवदन्तिन: ।
सिंहप्रसूतिकाश्चैव कथिता: स्वामिघातका: ॥"

तिस्र इति वक्तव्ये छान्दसत्वात् त्रय इत्युक्तम् । सिंहप्रसूताश्च स्त्रियो बोध्या: ।

"भानौ सिंहगते चैव यस्य गौ: संप्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशय: ॥*
अत्र शान्तिं प्रवक्ष्यामि येन सम्यक्प्रशाम्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तै राजसर्षपै: ।
आहुतीनां घृताक्तानामयुतं जुहुयात्तत: ॥"

व्याहृतिभिश्चायं होम: ।

"सोपवास: प्रयत्नेन दद्याद्विप्राय दक्षिणाम्॥"

अपि च ।

"सिंहराशौ गते सूर्य्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते द्विवेयाश्वतरी तथा ॥
तदानिष्टभवेत्किञ्चित् तच्छान्त्यै शान्तिकञ्चरेत्
अस्य वामेतिसूक्तेन तद्विष्णोरितिमन्त्रत: ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन तत: स्नायात् शान्तिसूक्तेन वा पुन:॥"

इत्यद्भुतसागरे नारद: ॥

प्रसवक:, पुं, (प्रसवेन पुष्पादिना कायति शोभते इति । कै + कः ।) पियालवृक्ष: । इति शब्दमाला ॥ (विवृतिर्विशेषोऽस्य पियालशब्दे ज्ञातव्य: ॥)

प्रसवबन्धनं, क्ली, (प्रसवानां पुष्पफलानां बन्धनं यत्र ।) वृन्तम् । इत्यमर: । २ । ४ । १५ ॥

प्रसवस्थली, स्त्री, (प्रसवस्य स्थलीव ।) माता । यथा, महानाटके ।

"इयमियं मयदानवनन्दिनी
विदधनाथजित: प्रसवस्थली ॥"

प्रसविता, [तृ] पुं, (प्रसूते जनयतीति । प्र + सू + तृच् ।) पिता इति शब्दरत्नावली ॥ (अनुज्ञाकर्त्तरि, त्रि । यथा, ऋग्वेदे । ७ । ६ । ३ ।

उद्वेति प्रसविता जनानां महान् केतुरर्णव: सूर्य्यस्य ।"

"जनानां सर्वेषां प्रसविता सर्वेषु कर्म्मसु अनुज्ञाता ॥" इति तद्भाष्ये सायन: ॥)

प्रसवित्री, स्त्री, (प्रसूते इति । प्र + सू + तृच् + ङीप् ।) जनयित्री । (यथा, महाभारते । १२ । २६३ । ८ ॥

"सावित्री प्रसवित्री च वह्निर्वाक् मनसीतत:॥
माता। प्रपूर्वकसूधातो: कर्त्तरि तृच् ङीप् च॥
प्रसव्यं, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्। इत्यमर:। ३। १। ८४॥ प्रदक्षिणम्। यथा, रामायणे। २। ७३। २०॥
"प्रसव्यञ्चापि तच्चक्रुर्हत्विजोऽग्निचितं नृपम्"
प्र+सू+कर्म्मणि यत्। प्रसवनीये च॥)
प्रसह:, पुं, (प्रसहत इति। प्र+सह्+अच्।) बलात्कारेण भक्षकपक्षी। स च कुररश्येनादि:। यथा,—
"प्रसह्य भक्ष्यन्त्येते प्रसहास्तेन कीर्त्तिता:॥"
अस्य मांसगुणा:।
"गुरूष्णमधुरा: स्निग्धा वातघ्ना: शुक्रवर्द्धना:।"
इति राजवल्लभ:।
अपि च भावप्रकाशे।
"काको गृध्र उलूकश्च चिल्लश्च श्यामघातक:।
चाषो भासश्च कुरर इत्याद्या: प्रसहा: स्मृता:॥"
श्यामघातक: बाज इति लोके।
"प्रसहा: कीर्त्तिता एते प्रसह्य हिंस्र भक्षणात्।
प्रसहा: खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥
ते शोषभस्मकोन्मादै: शुक्रक्षीणा भवन्ति हि॥"
प्रसहन:, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।) हिंस्रपशु:। यथा,—
"शार्दूलसिंहशरभर्क्षतरक्षुमुख्या
ये ऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिता: प्रसहना: पललं तटीय-
मग्रे:प्रमेहजठरामयजाड्यहारि॥"
इति राजनिर्घण्ट:॥
आलिङ्गने, क्ली। यथा,—
"परस्परप्रसहनसुखसातिका:
शुचौ सुखे बहुलविधा भिदा मता:॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी॥
(प्र+सह्+भावे ल्युट्।) सहने, क्ली। तद्वति, त्रि॥
प्रसहा, स्त्री, (प्र+सह्+अच्। टाप्।) हृष्टतिका। इति रत्नमाला॥ (गुणादयोऽस्या हृष्टतीशब्दे ज्ञातव्या:॥)
प्रसह्य, व्य, (प्रकर्षेण सोढ्वा इति। प्र+सह्+क्त्वो ल्यप्।) हठाद्यकम्। बलात्कारार्थम्। इत्यमर:। ३। ४। १०॥ (यथा, माघे। १।२७
"प्रसह्य तेजोभिरसङ्गतागते-
रदस्त्वया नुन्नमनुत्तमं तम:॥"
प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण सोढुं शक्ये त्रि। यथा, रघु:। १४। ६२।
"मरुद्भि जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्य:॥")
प्रसह्यचौर:, पुं, (प्रसह्य बलात्कारेण चौर:।) हठात् चौर्य्यकारी। डाकाइत इति लुटेरा इति च भाषा॥ तत्पर्य्याय:। वन्दोकार: २ माचल: ३ चिल्लाभ: ४। इति त्रिकाण्डशेष:॥
प्रसातिका, स्त्री, (सो नाशे+भावे क्तिन्। प्रगता सातिर्नाशो यस्या:। कप्।) अणुब्रीहि:। सूक्ष्मधान्यम्। इति रत्नमाला॥ (यथा, मार्कण्डेये। ३२। ८॥
"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिका:।
नीवारा: पौष्कलाश्चैव धान्यानां पितृदत्तये॥"
प्रसाद:, पुं, (प्र+सद्+घञ्।) प्रसन्नता। नैर्म्मल्यम्। इत्यमर:। १। ३। १६॥ (यथा, "प्रबोधचन्द्रोदये प्रस्तावनायाम्॥
"कल्यान्तवातसंक्षोभलङ्घिताशेषभूभृत:।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधे:॥")
अनुग्रह:। (यथा, रघु:। २। ६८।
"तस्या: प्रसन्नेन्दुमुख: प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव॥")
काव्यप्राण:। स्वास्थ्यम्। प्रसत्ति:। इति मेदिनी। दे, ३५॥ वैदर्भीरीतियुक्तकाव्यगुण:। तस्य लक्षणम्। ग्राम्यशब्दभिन्नव्यङ्ग्यार्थपदवत्त्वम्। यथा,—
"ओज:प्रसादमाधुर्य्यगुणत्रितयभेदत:।
गौड़वैदर्भपाञ्चाला रीतय: परिकीर्त्तिता:।
व्यङ्ग्यार्थपदमग्राम्यं प्रसाद: परिकीर्त्तित:॥"
इति काव्यचन्द्रिका॥ * ॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति य: क्षिप्रं शुष्केन्धनमिवानल:
स प्रसाद: समस्तेषु रसेषु रचनासु च॥"
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषञ्च। यथा,
"आसीद्दशरथो राजा प्रजापालनतत्पर:।
प्रसादं सत्यदेवस्य त्यक्त्वा दु:खमवाप स:॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा
प्रसादनं, क्ली, (प्रसादयतीति। प्र+सद्+णिच्+ल्यु:।) भक्षम्। इति चिकाण्डशेष:॥ (प्र+सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा, बलवर्णप्रसादनमिति राजवल्लभ:॥ (यथा च महाभारते। ४। ६८। २२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")
प्रसादना, स्त्री, (प्र+सद्+णिच्+युच्+टाप्) सेवा। परिचर्य्या। इति हेमचन्द्र:। ३। १६०॥
प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+ल्युट्।) वेग:। इत्यमर। २। ६। ८८॥ (यथा, मनु:। २। २११।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥"
कङ्कतिका। इति भरतधृतामरमाला॥ प्रकृष्टनिष्पत्तिश्च॥ (प्र+साध्+णिच्+ल्यु:। प्रसाधयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।
"यो यज्ञस्य प्रसाधनस्तं तुदेवेष्वातत:॥")
प्रसाधनी, स्त्री, (प्रसाध्यतेऽनयेति। प्र+साध्+ल्युट्। ङीप्।) सिन्दि:। इति मेदिनी। ने, १८५॥ कङ्कतिका। इत्यमर:। २। ६। १६८॥ (यथा, सुश्रुते चिकित्सितस्थाने। २४॥
"केशप्रसाधनी केशा रजोजन्तुमलापहा॥")
तद्युक्तिर्यथा,—

"प्रसाधनी दिङ्नवनागसप्त-
सङ्ख्याभिरङ्गाङ्गुलिभि: क्रमेण।
चतुर्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्यशुभ:सन्दिदा॥
काष्ठजा धातुजा चैव मृज्जा च यथाक्रमम्॥
जाङ्गलानूपसामान्यदेशजानां मही भुजाम्॥
कुवलयदण्डवदुच्चय: काष्ठजाया विनिश्चय:।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥
लौहं सर्व्वेषु सर्व्वार्हमादित्यादिदशाभुवाम्।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी॥
मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते॥
अथापि रत्नविन्यासो न्येषामरदण्डवत्॥"
इति युक्तिकल्पतरु:।
प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति। प्र+साध्+ण्वुल्। टापि अत इत्वम्।) नीवार:। यथा,—
"प्रसाधिका तु नीवारस्तृणान्तमिति च स्मृतम्।"
अस्या गुणा:।
"नीवार: शीतलो ग्राही पित्तघ्न: कफवातजित्॥"
इति भावप्रकाश:॥
(प्रसाधयति अलङ्करोतीति। प्र+साध्+णिच्+ण्वुल्।) वेशकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् त्वरयागमेव॥"
इति कुमारसम्भवे सप्तम: सर्ग:॥
(धान्यविशेष: यथा। "अथनीहि: प्रसाधिका।" इति वैद्यकरत्नमालायाम्॥)
प्रसाधित:, त्रि, (प्र+साधि+क्त:। अलङ्कृत:। इत्यमर:। २। ६। १००॥ प्रकृष्टनिष्पन्न:। निष्पादित:। यथा, सारसंग्रहे।
"तत: प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे।
क्षीरे प्रसाधितं तैलं शुद्धपो बलवर्णकृत्॥"
प्रसार:, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति हेमचन्द्र:। ३। ४८८॥ (यथा, सुश्रुते। १।२६
प्रसाराकुञ्चनाभ्यन्तं नि:शल्यमिति निर्हरेत्॥"
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पञ्चविधकर्म्मान्तर्गतकर्म्मविशेष:। स तु विस्तारकर्म्म:। यथा, भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥"
(परिवर्द्धनम्। यथा, कामन्दकीयनीतिसारे। १३। ३५।
"मित्रामित्रस्थिरज्ञानां भूमीनाञ्च प्रसारणम्॥"
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+ल्युट्। ङीप्।) लताविशेष:। गन्धभादालिया इति भाषा॥ अस्य गुणा:। वातपित्तनाशित्वम्। उष्णत्वम्। बलशुक्रकारित्वञ्च। इति राजवल्लभ:॥ सैन्यानां सर्व्वतो व्याप्ति:। इति प्रसरणशब्दटीकायां भरत:॥
प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनि: ङीप्। लज्जालुलता। प्रसारणी। गन्धभादा-

स्त्रिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चाक्षुषपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिकाऽप्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्रबली १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम् । वातार्शःक्षयपाण्डुमलविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥ प्रसारी, [न] स्त्रि. (प्रसरतीति । प्र + सृ + णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः २ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसितं, क्ली, (प्र + सो + क्तः।) पृथम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३।१।८॥ (यथा, रघौ । ८ । २३ ।

"इति श्रवणे चेन्द्रियेषु च
प्रतिषिद्धपरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो-
रुभयीं सिद्धिमुभाववापतुः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र + सि + करणे क्तिन् ।) बन्धनसाधनरज्ज्वादिगड्डादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्ने विश्व प्रसितिर्नाह वर्त्तवे ।"

"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।" इति तद्भाष्ये सायनः ॥*॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"शूरस्येव प्रसितिः कातिरग्नेः ॥")

प्रसिद्धः त्रि. (प्रसिध्यतीति । प्र + सिध् + गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ३४॥ (यथा, पद्मदशम् । ४ । ५७ ।

"काम्यादिदोषदृष्टाद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥")

प्रसिद्धिः, स्त्री, प्र + सिध् + क्तिन् ।) टङ्कारः । ख्यातिः । इति विकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्याश्चतस्र एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्ध्यर्थं यासु लोको व्यवस्थितः ॥")

भूषा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसूः, स्त्री, (प्रसूते इति । प्र + सू + "सूतसूदिवेति ।" ३।२।६१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"प्रियव्रतां मानसी कन्या मेनका साम्बिकाप्रसूः॥"

घोटकी । इत्यमरः । ३ । ३ । २२८॥ कदली । वीरुत् । इति मेदिनी । से, ४॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रशंसिनी स्यन्दते तु क्षोभिता दुःप्रसूश्च या ॥")

प्रसूका, स्त्री, (प्रसूरेव । प्रसू + स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र + सू + क्तः ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र + सू + क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र + सू + कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूतायाः स्त्रीक्षीरपानं विवर्जयेत् ॥"

यथा च हरिवंशे । ८४ । १०१ ।

"श्रूयन्ते हि स्त्रियो ब्रह्मन् व्यभिचारव्यतिक्रमैः
प्रसूता देवसङ्काशान् पुत्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री, (प्रसूयते इति । प्र + सू + क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"कृष्णा वचा चापि जलेन पिष्टा
मरण्डतैला खलु नाभिलेपात् ।
सूखं प्रसूतिं कुरुतेऽङ्गनानां
निपीडितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र + सू + भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्येव वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ते, १२८ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कश्चिन्मृगीणामनघा प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

" न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २३३ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने ! भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"देवहूतिः कर्दमस्य प्रसूतिदक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सूतोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिज, क्ली, (प्रसूतेरुद्भवमारभ्येत्यर्थः जायते इति । जन् + डः ।) दुःखम् । इत्यमरः।१।८।३।

प्रसून, क्ली,(प्रसूयते स्मेति । प्र + सू + क्तः । ओदित्त्वात् निष्ठातस्य नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १७॥ जाते, त्रि । इति मेदिनी, ने । ८७ ॥

प्रसूनेषुः, पुं, (प्रसूनं पुष्पं इषुर्बाणो यस्य । कामदेवः । इति विकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र + सृ + क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६

"क्षणतिलप्रसृतं प्रकुञ्चं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"

पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

प्रसृतः, पुं, (प्र + सृ + क्तः ।) निकुञ्जपाणिः । अर्द्धाञ्जलिः । इत्यमरः । २ । ६ । ८५॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७ ।

"यद्यनुलिम्पेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र + सृ + क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा,देवीभागवते । १ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति विकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र + सृ + क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते,१२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र + सृ + क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवानृषीन् समभ्यर्च्च्य तत्स्नानोदकमाहरेत् ।
संयाव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयम् ॥"

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"

प्रसृत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया———॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र + सिच् + घञ् ।) सेचनम् । क्षरणम् । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
स्निग्धं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हन्तिमूलकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७९ ॥ प्रसोटिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं,(प्रसीव्यते स्मेति । प्र + सिव + "अकर्त्तरि चेति ।" ३ । ३ । १९ । इति घञ् ।) वीणाङ्गम् । स्यूतः । इति मेदिनी । वे. ४३ ॥

प्रसेवकः, पुं, (प्र + सिव + ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणास्थितालाबूफलम् । इत्यपरे । इति भरतः ॥

"सावित्री प्रसवित्री च वह्निर्वाक् मनसीतत:॥
माता। प्रपूर्वकसूधातोः कर्त्तरि ल्टण् ईप् च॥
प्रसव्यं, त्रि, (प्रगतं सव्यादिति।) प्रतिकूलम्।
इत्यमरः। ३। १। ८४॥ प्रदक्षिणम्। यथा,
रामायणे। २। ७१। २०॥
"प्रसव्यञ्चापि तच्चक्रुर्ऋत्विजोऽग्निचितं नृपम्"
प्र+सू+कर्म्मणि यत्। प्रसवनीये च॥)
प्रसह:, पुं. (प्रसहत इति। प्र+सह्+अच्।)
बलात्कारेण भक्षकपक्षी। स च कुरर-
श्येनादिः। यथा,—
"प्रसह्य भक्ष्यन्ते प्रसहास्तेन कीर्त्तिता:॥"
अस्य मांसगुणाः।
"गुरुष्णमधुरा: स्निग्धा वातघ्नाः शुक्रवर्द्धनाः।"
इति राजवल्लभः।
अपि च भावप्रकाशे।
"काको गृध्रं उलूकश्च चिल्लश्च गजघातकः।
चाषो भाषश्च कुरर इत्याद्याः प्रसहाः स्मृताः॥"
गजघातकः बाज इति लोके।
"प्रसहा: कीर्त्तिता एते प्रसह्य क्षिप्य भक्षणात्।
प्रसहा: खलु वीर्य्योष्णास्तन्मांसं भक्षयन्ति ये॥
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि॥"
प्रसहनः, पुं, (प्रगतं सहनं सह्यगुणो यस्मात्।)
हिंस्रपशुः। यथा,—
शार्दूलसिंहशरभर्क्षतरक्षुमुख्या
येऽन्यान् प्रसह्य विनिहत्य निवर्त्तयन्ते।
ते कीर्त्तिताः प्रसहना: फलं तदीय-
मंशैःप्रमेहजठरामयजाड्यहारि॥"
इति राजनिर्घण्टः॥
आलिङ्गने, क्ली। यथा,—
"परस्परप्रसहनचुम्बनादिकाः
गुचो सुखे बहुलविधा भिदा मताः॥"
इति काव्यप्रकाशटीकाधृतकाव्यकौमुदी॥
(प्र+सह्+भावे क्यट्।) सहने, क्ली।
तद्वति, त्रि॥
प्रसह्या, स्त्री, (प्र+सह्+अच्। टाप्।) वृह-
त्तिका। इति रत्नमाला॥ (गुणादयोऽस्या
वृहतीशब्दे ज्ञातव्याः॥)
प्रसह्य, व्य, (प्रकर्षेण सोढ्वा इति। प्र+सह्+
क्त्वो ल्यप्।) हठाधिकम्। बलात्कारार्थम्।
इत्यमरः। ३। ४। १०॥ (यथा, माघे।१।२७
"प्रसह्य तेजोभिरसङ्गतान्तरै-
रदम्बया नुन्नमनुत्तमं तमः॥"
प्रसोढुं शक्य इति। प्र+सह्+यत्। प्रकर्षेण
सोढुं शक्ये त्रि। यथा, रघुः। १४। ६२।
"मयैव जन्मान्तरपातकानां
विपाकविस्फूर्ज्जथुरप्रसह्यः॥")
प्रसह्यचौरः, पुं, (प्रसह्य बलात्कारेण चौरः।)
हठात् चौर्य्यकारी। डाकाइत इति लुटरा
इति च भाषा॥ तत्पर्य्यायः। वन्दोकारः २
माचलः ३ चिल्लाभः ४। इति त्रिकाण्डशेषः॥
प्रसातिका, स्त्री, (सी नाशे+भावे क्तिन्। प्रगता
सातिर्नाशो यस्याः। कप्।) अगुबोहिः।

सूक्ष्मधान्यम्। इति रत्नमाला॥ (यथा, मार्क-
ण्डेये। ३२। ८॥
"श्यामाकराजश्यामाकौ तद्वच्चैव प्रसातिकाः।
नीवाराः पौष्कलाश्चैव धान्यानां पितृदत्तये॥"
प्रसादः, पुं, (प्र+सद्+घञ्।) प्रसन्नता।
नैर्म्मल्यम्। इत्यमरः। १। ३। १६॥ (यथा,
"प्रबोधचन्द्रोदये प्रस्तावनायाम्॥
"कल्पान्तवातसंक्षोभलङ्घितार्णवभूभृतः।
स्थैर्य्यप्रसादमर्य्यादास्ता एव हि महोदधेः॥")
अनुग्रहः। (यथा, रघुः। २। ६८।
"तस्याः प्रसन्नेन्दुमुखः प्रसादं
गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव॥")
काव्यगुणः। स्वास्थ्यम्। प्रसन्निः। इति
मेदिनी। दे, ३५॥ वैदर्भीरीतियुक्तकाव्यगुणः।
तस्य लक्षणम्। ग्राम्यशब्दभिन्नव्यक्तार्थपद-
वत्त्वम्। यथा,—
"ओजःप्रसादमाधुर्य्यगुणान्वितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः।
व्यक्तार्थपदमग्राम्यं प्रसादः परिकीर्त्तितः॥"
इति काव्यचन्द्रिका॥ * ॥
(तथा च साहित्यदर्पणे ८ परिच्छेदे।
"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः
स प्रसादः समस्तेषु रसेषु रचनासु च॥"
देवनिवेदितद्रव्यं गुरूणां भुक्तावशेषय। यथा,
"आसीद्गोपालजो राजा प्रजापालनतत्परः।
प्रमादं सत्यदेवस्य त्यक्त्वा दुःखमवाप सः॥"
इति स्कान्दे रेवाखण्डे सत्यनारायणव्रतकथा
प्रसादनं, क्ली,(प्रसादयतीति। प्र+सद्+णिच्
+ल्युः।) अस्त्रम्। इति चिकाण्डशेषः॥ (प्र+
सद्+णिच्+ल्युट्।) प्रसन्नताकारकम्। यथा,
बलवर्णप्रसादनमिति राजवल्लभः॥ (यथा च
महाभारते। ४। ६८। २२।
"प्रसादनं पाण्डवस्य प्राप्तकालं हि रोचये॥")
प्रसादना, स्त्री. (प्र+सद्+णिच्+युच्+टाप्)
सेवा। परिचर्य्या। इति हेमचन्द्रः।३।१६०॥
प्रसाधनं, क्ली, (प्रसाध्यतेऽनेनेति। प्र+साध्+
ल्युट्।) वेगः। इत्यमरः। २। ६। ८८॥
(यथा, मनुः। २। २११।
"अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्॥"
कङ्कतिका। इति भरतधृतामरमाला॥ प्रकृष्ट-
निष्पत्तिश्च॥(प्र+साध्+णिच्+ल्युः। प्रसा-
धयितरि, त्रि। यथा, ऋग्वेदे। १०।५३।२।
"यो यज्ञस्य प्रसाधनस्तं तुर्वेष्वातनः॥")
प्रसाधनी स्त्री,(प्रसाध्यतेऽनयेति। प्र+साध्+
ल्युट्। ङीप्।) सिद्धिः। इति मेदिनी। नि,१८५
कङ्कतिका। इत्यमरः। २। ६। १६८॥(यथा,
सुश्रुते चिकित्सितस्थाने। २४॥
"केशप्रसाधनी केशा रजोजन्तुमलापहा॥")
तद्युक्तार्थयथा,—

"प्रसाधनी दिङ्नवनागसप्त-
सङ्ख्याभिरुक्ताङ्गुलिभिः क्रमेण।
चतुर्विधानां पृथिवीपतीनां
सम्पत्तिसौभाग्ययशःसमृद्धिदा॥
काष्ठजा धातुजा चैव शृङ्गजा च यथाक्रमम्॥
जाङ्गलानूपसामान्यदेशजानां मही भुजाम्॥
कृतदण्डवदज्ञेयः काष्ठजाया विनिश्चयः।
कनकं रजतं ताम्रं पित्तलं सीसकं तथा॥
लौहं सर्व्वेषु सर्व्वार्द्धमादित्यादिदशामुषाम्।
राज्ञामेवोपयुज्येत कालकीर्त्तिप्रसाधनी॥
मृगाणां महिषाणाञ्च सिंहजाता प्रसाधनी।
गजदन्तसमुद्भूता राज्ञामेवोपयुज्यते॥
अथापि रत्नविन्यासो ज्ञेयश्चामरदण्डवत्॥"
इति युक्तिकल्पतरुः।
प्रसाधिका, स्त्री, (प्रसाध्यति निष्पादयतीति।
प्र+साध्+ण्वुल्। टापि अत इत्वम्।)
नीवारः। यथा,—
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम्।"
अस्या गुणाः।
"नीवारः शीतलो याही पित्तघ्नः कफवातजित्॥"
इति भावप्रकाशः॥
(प्रसाधयति अलङ्करोतीति।प्र+साध्+णिच्
+ण्वुल्।) वेशकारिणी। यथा,—
"प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचित् द्रुवरागमेव॥"
इति कुमारसम्भवे सप्तमः सर्गः॥
(धान्यविशेषः यथा। "अथ नीहिः प्रसा-
धिका।" इति वैद्यकरत्नमालायाम्॥)
प्रसाधितः, त्रि, (प्र+साधि+क्तः। अलङ्कृतः।
इत्यमरः। २। ६। १००॥ प्रकृष्टनिष्पन्नः।
निष्पादितः। यथा, सारसंग्रहे।
"ततः प्रस्थमितं कल्कं दत्त्वा तोयचतुर्गुणे।
क्षीरे प्रसाधितं तैलं यष्ट्याह्नो बलवर्द्धनात्॥"
प्रसारः, पुं, (प्र+सृ+घञ्।) प्रसरणम्। इति
हेमचन्द्रः। ३। ४८८॥ (यथा, सुश्रुते।१।२६
प्रसाराकुञ्चनाभ्यन्नं निःशल्यमिति निर्हरेत्॥"
प्रसारणं, क्ली, (प्र+सृ+णिच्+ल्युट्।) पञ्च-
विधकर्म्मान्तर्गतकर्म्मविशेषः। स तु विस्तार-
रूपः। यथा, भाषापरिच्छेदे।
"उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनन्तथा।
प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च॥"
(परिवर्त्तनम्। यथा, कामन्दकीयनीतिसारे।
१३। ३५।
"मित्रामित्रहिरण्यानां भूमीनाञ्च प्रसारणम्॥"
प्रसारणी, स्त्री, (प्रसार्य्यते इति। प्र+सारि+
ल्युट्। ङीप्।) लताविशेषः। गन्धभादालिया
इति भाषा॥ अस्य गुणाः। वातपित्तनाशि-
त्वम्। उष्णत्वम्। बलशुक्रकारित्वञ्च। इति
राजवल्लभः॥ सैन्यानां सर्व्वतो व्याप्तिः। इति
प्रसरणशब्दटीकायां भरतः॥
प्रसारिणी, स्त्री, प्रसरतीति। प्र+सृ+णिनिः
ङीप्। लज्जालुलता। प्रसारणी। गन्धभादा-

लिया इति भाषा ॥ तत्पर्य्यायः । सुप्रसरा २ सारिणी ३ प्रसरा ४ सरा ५ चाक्षपर्णी ६ राजबला ७ भद्रपर्णी ८ प्रतानिका ९ प्रबला १० राजपर्णी ११ चन्द्रपर्णी १२ भद्रबला १३ चन्द्रबला १४ प्रभद्रा १५ । अस्या गुणाः । गुरुत्वम् । उष्णत्वम् । तिक्तत्वम् । वातार्शःक्षयशुक्लविष्टम्भनाशित्वञ्च । इति राजनिर्घण्टः ॥

प्रसारी, [न्] त्रि, (प्रसरतीति । प्र + सृ + णिनिः) प्रसरणशीलः । तत्पर्य्यायः । विसृत्वरः २ विसृमरः ३ विसारी ४ । इत्यमरः । ३ । १ । ३१ ॥ (यथा, शिशुपालवधे । १७ । ४४ ।

"प्रसारिणी सपदि नभस्तले ततः
समीरणभ्रमितपरागरूषिता ॥")

प्रसित, क्ली, (प्र + सो + क्तः।) पृथम् । इति शब्दचन्द्रिका ॥ आसक्ते, त्रि । इत्यमरः । ३।१।८॥ (यथा, रघौ । ८ । २३ ।

"इति शब्दादिषु चेन्द्रियेषु च
प्रतिषिद्धपरेषु जाग्रतौ ।
प्रसितावुदयापवर्गयो-
रभयीं सिद्धिमुभावबाधतः ॥")

प्रसितिः, स्त्री, (प्रसिनोति बध्नात्यनयेति । प्र + सि + करणे क्तिन् ।) यन्त्रनमाधनरज्जुनिगड़ादिः । इत्यमरः । ३ । २ । १४ ॥ (ज्वाला । यथा, ऋग्वेदे । २ । २५ । ३ ।

"अग्नेरिव प्रसितिर्नाह धर्त्तवे ।"

"प्रसीयते बध्यतेऽनयेति । प्रसितिर्ज्वाला ।" इति तट्टीकायां सायनः ॥*॥ भावे क्तिन् । प्रबन्धनम् । यथा, ऋग्वेदे । ६ । ६ । ५ ।

"भूरस्येव प्रसितिः त्वातिरग्नेः ॥")

प्रसिद्ध त्रि, (प्रसिध्यतीति । प्र + सिध् + गत्यर्थेति क्तः ।) भूषितः ख्यातः । इति मेदिनी । धे, ३४॥ (यथा, पञ्चदश्याम् । ४ । ५७ ।

"काम्यादिदोषदृष्टाद्याः कामादित्यागहेतवः ।
प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥")

प्रसिद्धिः, स्त्री, प्र + सिध् + क्तिन् ।) टङ्कारः । ख्यातिः । इति त्रिकाण्डशेषः (यथा, कामन्दकीयनीतिसारे । २ । ६ ।

"विद्यायतस्य एवैता इति नो गुरुदर्शनम् ।
पृथक् पृथक् प्रसिद्ध्यर्थं यासु लोको व्यवस्थितः ॥")

भूषा । इति प्रसिद्धशब्दार्थदर्शनात् ॥

प्रसू, स्त्री, (प्रसूते इति । प्र + सू + "सत्सूद्विषेति ।" ३।२।६१ । इति क्विप् ।) माता । इत्यमरः । २ । ६ । २८ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"पितॄणां मानसी कन्या मेनका साग्निकाप्रसूः॥"

घोटकी । इत्यमरः । ३ । ३ । २२८॥ कदली । वीरुत् । इति मेदिनी । से, ४॥ (प्रसवकर्त्री । यथा सुश्रुते उत्तरतन्त्रे ३८ अध्याये ।

"प्रशंसिनी अस्रुते तु क्षोभिता दुःप्रसूश्च या ॥")

प्रसूका, स्त्री, (प्रसूरेव । प्रसू + स्वार्थे कन् ।) वाजिनी । इति राजनिर्घण्टः ॥

प्रसूतं, क्ली, (प्रसूयते इति । प्र + सू + क्तः ।) कुसुमम् । इति मेदिनी । ते, १२४ ॥

प्रसूतः, त्रि, (प्र + सू + क्तः ।) सञ्जातः । (यथा, रघुः । १ । १२ ।

"तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥")

सूतः । इति मेदिनी । ते, १२४ ॥

प्रसूता, स्त्री, (प्रसूते स्म इति । प्र + सू + कर्त्तरि क्तः ।) जातसन्ताना । तत्पर्य्यायः । जातापत्या २ प्रजाता ३ प्रसूतिका ४ । इत्यमरः । २ । ६ । १६ ॥ (यथा सुश्रुते चिकित्सितस्थाने । ३१ ।

"अकाले च प्रसूता स्त्री स्त्रेहपानं विवर्जयेत् ॥"

यथा च हरिवंशे । ८४ । १०१ ।

"श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः
प्रसूता दैत्यसङ्काशान् पुत्रानमितविक्रमान् ॥")

प्रसूतिः, स्त्री, (प्रसूयते इति । प्र + सू + क्तिन् ।) प्रसवः । इत्यमरः । ३ । २ । १० ॥ (यथा,—

"क्षणा वचा चापि जलेन पिष्टा
सरण्डतैला खलु नाभिलेपात् ।
सुखं प्रसूतिं कुरुतेऽङ्गनानां
निपीडितानां बहुभिः प्रमादैः ॥"

इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥ प्र + सू + भावे क्तिन्) उद्भवः । (यथा, शकुन्तलायाम् ४ अङ्के ।

"आद्येव कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् ॥")

तनयः । दुहिता । इति मेदिनी । ते, १२८ ॥ (सन्ततिः । यथा, रघुः । ५ । ७ ।

"कक्षिष्मतीमाशमनघां प्रसूतिः ॥"

कारणम् । यथा, रघुः । २ । ६३ ।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम् ॥"

उत्पत्तिस्थानम् । यथा, महाभारते । १ । २२३ । १४ ।

"त्वं सर्व्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्ने ! भवसि प्रतिष्ठा ॥"

दक्षपत्नी । सा तु सतीजननी । यथा, ब्रह्मवैवर्त्ते । २ । १ । १२८ ।

"दक्षसूतिः कदम्बस्य प्रसूतिदक्षकामिनी ॥")

प्रसूतिका, स्त्री, प्रसूतः सूतोऽस्या अस्तीति । ठन् ।) प्रसूता । इत्यमरः । २ । ६ । १६ ॥

प्रसूतिजं, क्ली, (प्रसूतेरुद्भवमारभ्य त्यर्थः जायते इति । जन् + डः ।) दुःखम् । इत्यमरः।१।८।३।

प्रसून, क्ली, (प्रसूयते स्मेति । प्र + सू + क्तः । ओदित्त्वात् निष्ठातस्य नः ।) पुष्पम् । (यथा, रघुः । २ । १० ।

"अवाकिरन् बाललताः प्रसूनै-
राचारलाजैरिव पौरकन्याः ॥")

फलम् । इत्यमरः । ३ । ४ । १७॥ जाते, त्रि । इति मेदिनी, ने । ८७ ॥

प्रसूनेषुः, पुं, (प्रसूनं पुष्पं इषुर्बाणो यस्य । कामदेवः । इति त्रिकाण्डशेषः ॥

प्रसृतं, क्ली, (प्र + सृ + क्तः ।) पलद्वयम् । इति शब्दमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने ६

"क्षणात्तिलप्रसृतं प्रकुर्य्यं वा प्रातः प्रातरनुसेवेत शीतोदकानुपानम् ॥"

पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

प्रसृतः, पुं, (प्र + सृ + क्तः ।) निकुञ्जपाणिः । अर्द्धाञ्जलिः । इत्यमरः । २ । ६ । ८५॥ (यथा, शतपथब्राह्मणे । ४ । ५ । १० । ७ ।

"यद्यनुलभेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा ॥"

प्रसृतः, त्रि, (प्र + सृ + क्तः ।) प्रहृष्टः । प्रसारितः । इत्यमरः । ३ । १ । ८८ ॥ (यथा, देवीभागवते । २ । १४ । ५ ।

"न शशाक नियन्तुञ्च स व्यासः प्रसृतं मनः ॥")

विनीतः । वेगितः । इति मेदिनी । ते, १२३ ॥ गतः । इति त्रिकाण्डशेषः ॥ नियुक्तः । इति हलायुधः । २ । ३६० ॥

प्रसृता, स्त्री, (प्र + सृ + क्तः । टाप् ।) जङ्घा । इति मेदिनी । ते, १२३ ॥ (विवरणमस्या जङ्घाशब्दे ज्ञातव्यम् ॥)

प्रसृतिः, स्त्री, (प्र + सृ + क्तिन् ।) प्रसृतः । आकुञ्चितपाणिः । इति रायमुकुटः राजनिर्घण्टश्च ॥ (यथा, याज्ञवल्क्ये । २ । ११२ ।

"देवान्यान् समभ्यर्च्च्य तत्स्नानोदकमाहरेत् ।
संस्राव्य पाययेत्तस्माज्जलाञ्जलिं प्रसृतित्रयम् ॥"

सन्ततिः । यथा, महाभारते । ५ । १०१ । ३ ।

"वर्द्धितानि प्रसृत्या वै विनताकुलकर्त्तृभिः ॥"

प्रसूत्या इति वा पाठः ॥ पलद्वयम् । तद्यथा,

"पलाभ्यां प्रसृतिर्ज्ञेया———॥"

इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

प्रसेकः, पुं, (प्रसेचनमिति । प्र + सिच् + घञ् ।) सेचनम् । क्षरणम् । इति मेदिनी । के, १११ ॥ (यथा, ऋतुसंहारे । ३ । ६ ।

"मत्तद्विरेफपरिपीतमधुप्रसेक-
स्निग्धं विदारयति कस्य न कोविदारः ॥"

रोगविशेषः । यथा, सुश्रुते । १ । ४६ ।

"श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् ।
हृल्लिम्लकयूषस्तु कफमेदोगलामयान् ॥")

प्रसेदिका, स्त्री, क्षुद्रारामः । इति हेमचन्द्रः । ४ । १७८ ॥ प्रमोदिका इति क्वचित्पाठः ॥)

प्रसेदिवान्, [स्] त्रि, प्रसन्नः । प्रपूर्व्वसदधातोः कर्त्तरि क्वसुप्रत्ययनिष्पन्नः ॥

प्रसेवः, पुं, (प्रसीव्यते स्मेति । प्र + सिव + "अकर्त्तरि चेति ।" ३ । ३ । १८ । इति घञ् ।) वीणाङ्गम् । सूतः । इति मेदिनी । वे, ४३ ॥

प्रसेवकः, पुं, (प्र + सिव + ण्वुल् । यद्वा, प्रसेव एव । स्वार्थे कन् ।) वीणाप्रान्तवक्रकाष्ठम् । दण्डाधः शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं यच्चर्म्मणा आच्छाद्य दीयते सः । इत्यन्ये । वीणास्थितालाबूफलम् । इत्यपरे । इति भरतः ॥

तत्पर्य्यायः । ककुभः २ । इत्यमरः । १।३।७ ॥ सूत्ररचितभाण्डम् । धोकड़ा इति ख्यातः । तत्पर्य्यायः । स्थूनः २ स्थोनः ३ धौतकटः ४ स्थोतः ५ स्थूतः ६ । इति भरतः ॥ (यथा, सुश्रुते । १ । ९ ।
"दृतिवस्तिप्रसेवकप्रभृतिषूदकपङ्कपूर्णेषु मेद्ययोग्याम् ॥") प्रकृष्टतन्तुसन्तानकर्त्ता च ॥

प्रस्कण्वः, पुं, (प्रगतं कण्वं पापं यस्मादिति । "प्रस्कण्वहरिश्चन्द्रावृषी ।" ६।१।१५२ । इति सुट् ।) ऋषिविशेषः । स च वैदिकसन्ध्यान्तर्गतसूर्य्योपस्थानमन्त्रस्य ऋषिः । (यथा, ऋग्वेदे । १ । ४४ । ६ ।
"प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥")

प्रस्कन्दनं, क्ली, (प्र + स्कन्द + ल्युट् ।) विरेकः । इति रत्नमाला ॥ (यथा, महाभारते । १ । ८४ । २६ ।
"अग्निप्रस्कन्दनपरस्त्वञ्चाप्येवं भविष्यसि ॥")

प्रस्कन्नः, त्रि, (प्रकर्षेण स्कन्नः ।) पतिते, त्रि । इति हेमचन्द्रः ॥

प्रस्तरः, पुं, प्रस्तृणाति आच्छादयति यः । (प्र + स्तृ + पचाद्यच् ।) शिला । पातर इति भाषा । तत्पर्य्यायः । ग्रावा २ पाषाणः ३ उपलः ४ अश्मा ५ दृषत् ६ दृषत् ७ पाषाणकः ८ पाषटोटः ९ सृक्करः १० काचकः ११ शिला १२ ॥ पल्लवादिरचितशय्या । यथा,—
"पल्लवाद्यैर्विरचितं शयनीयं तु संस्तरः ।
प्रस्तरः प्रस्तिरत्यपि प्रस्तारोऽपि च कुत्रचित् ॥"
इति शब्दरत्नावली ॥
(यथा, मनुः । २ । २०४ ।
"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥")
मणिः । इति मेदिनी । रे, १८१ ॥

प्रस्तरिणी, स्त्री, (प्रस्तरस्तदाकारोऽस्त्यस्या इति प्रस्तर + इनिः ङीप् ।) गोलोमिका । इति राजनिर्घण्टः ॥ (विषयोऽस्या गोलोमिकाशब्दे ज्ञेयः ॥)

प्रस्तारः, पुं, (प्र + स्तृ + घञ् ।) तृणवनम् । तत्पर्य्यायः । तृणाटवी २ ऋपः ३ । इति हेमचन्द्रः । ४ । १७७ ॥ पल्लवादिविरचितशयनीयम् । इति शब्दरत्नावली ॥ शय्या । इति हारावली ॥ छन्दःप्रभृतीनां प्रभेदज्ञापकमङ्कितविशेषः । यथा,—
"प्राटे सर्वगुरावाद्यात् लघु न्यस्य गुरोरधः ।
यथापरि तथा शेषं भूयः कुर्य्यादमुं विधिम् ॥
जनं दद्यादगुरूनेव यावत् सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥"
इति छत्तरत्नावली ॥ * ॥
अपि च । अहपत्यार । पढ़म गुरु हेट्ठ ठाणे लहुआ परिठवउ अप्पबुद्धी ए । सरिसा सरिसा पल्ली उव्वरिआ गुरुलह्व देहु ॥ अस्य टीका । एतच्छन्दसां प्रस्तारज्ञानाधीनमिति प्रस्तारं दर्शयति । प्रथमं गुरोरधःस्थाने लघुकं स्थापय आत्मबुद्ध्या सदृशौ सदृशौ पंक्तिरुद्दत्तौ गुरुलघू देहि सदृशौ पंक्तिर्दक्षिणे कार्य्या वामे गुरुलघुभिः पूरणं कार्य्यं इदन्तु मात्राप्रस्तारविषयं तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः अपरत्र लघुर्देयः । वर्णप्रस्तारे तु गुरुणैव पूरणं कार्य्यं तत्रायं प्रकारः आदौ गुरुर्लेख्यः तत्र प्रथमं गुरोरधःस्थाने लघुर्लेख्यः तदक्षिणे चोपरिस्थितपंक्तेः सदृशौ कार्य्यौ वामे च गुरुलघुभिः पूरणं कार्य्यं वामे चैक एकलघुः पतति वर्णप्रस्तारे तु वामे लघुरूपर्णो नास्ति यथा त्रिकलप्रस्तारे । ६६ । प्रथमगुरोरधो लघुर्वामतश्च कलार्द्धपूरणं गुरुणैव कार्य्यं दक्षिणे च पंक्त्यभावः ततो गुरोरधो लघुर्लेख्यः दक्षिणे च लघोरधो लघुर्लेख्यः वामे च कलापूरणं एकेन लघुना कार्य्यं एवं चतुष्कला-६६दावपि बोध्यं यथा अक्षरच्छन्दसि६६एवमन्यत्रापि बोध्यम् ॥ अथ सकलप्रस्तारसंख्या । दव्वीसा सत्तसआतदं सत्तावह सहज्जाइं वाआलिसह लक्खं तेरहकोड़ी समग्गाइं । अस्य टीका । अत्र चैकाक्षरमारभ्य षड्विंशत्यवधिवर्णवृत्तानां प्रस्तारे कियतो संख्येत्यत आह । १३४,२१७,७२६,षड्विंशतिः सप्तशतानि तथा सप्तदशसहस्राणि द्विचत्वारिंशल्लक्षास्त्रयोदशकोट्यः समग्राणि अङ्कस्य वामा गतिरित्यङ्काः स्थाप्याः । इति पिङ्गलः शास्त्रबोधभूषणञ्च ॥

प्रस्तार्य्यम्, [न्] क्ली, नेत्ररोगभेदः । तस्य लक्षणम् ।
"प्रस्तार्य्यम्मं तनुस्तोर्णं श्यावं रक्तनिभं मितं ॥"
इति माधवकरः ॥
अपि च ।
"ममस्ताद्दिस्तृतः श्यावो रक्तो वा मांसमञ्चयः
मन्निपातेन दोषाणां प्रस्तार्य्यम्मं तदुच्यते ॥"
इति रक्षितधृतनिमिः ॥
तस्यौषधम् ।
"कतकस्य फलं शङ्खं त्रायमाणं मैन्धवान्वितम् ।
फेनो रसाञ्जनं चौद्रं विड्ङ्गानि मनःशिला ॥
कुक्कुटाण्डकपालानि वर्त्तिरेषा व्यपोहति ।
तिमिरं पटलं काचमर्म्मशुक्रं तथैव च ॥
कण्डूक्लेदावृतं हन्ति मलसाश्रु सुखावती ॥"
इति चक्रपाणिदत्तः ॥

प्रस्तावः, पुं, (प्र + स्तु + "प्रे द्रुस्तुस्रुवः ।" ३।३।२७ । इति घञ् ।) अवसरः । इत्यमरः । ३ । २ । २४ ॥ प्रसङ्गस्मृतिः ॥ इति भरतः ॥ प्रसङ्गः इति भानुदीक्षितः ॥ (यथा, मृच्छकटिके । ८ अङ्के । "प्रस्तावेनाधिकरणिकस्त्वाद्रष्टुमिच्छतीति ॥") प्रकरणम् । यथा,—
"प्रस्तावदेशकालादिवैशिष्ट्यात्प्रतिभाजुषाम् ॥"
इत्यस्यार्थे काव्यप्रकाशः ॥

प्रस्तावना, स्त्री, (प्रस्तावयति विघ्नाप्रयति कार्य्यादिकमिति । प्र + स्तु + णिच् + युच् । टाप् ।) आरम्भः । इति जटाधरः ॥ सूत्रधारेण सह नटीविदूषकादीनां परस्परविचित्रभाषणम् । तस्या लक्षणम् । यथा,—
"नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्व्वते ॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ॥
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥"
इति साहित्यदर्पणम् ॥

प्रस्तरः, पुं, (प्रस्तरः । निपातनात् इत्वम् ।) पल्लवादिरचितशय्या । इति शब्दरत्नावली ॥

प्रस्तोतः, प्रस्तोमः,] त्रि, (प्र + स्तु + क्तः ।"प्रस्योऽन्यतरस्याम् ।" ८ । २ । ५४ । इति निष्ठातस्य मो वा ।) संस्तुतः । ध्वनितः । प्रपूर्व्वस्तुधातोः कर्म्मणि क्तप्रत्ययः । इति मुग्धबोधव्याकरणम् ॥

प्रस्तुतः, त्रि, प्रस्तूयते स्मेति । प्र + स्तु + क्तः ।) प्रकरणप्राप्तः । यथा,—
"अप्रस्तुतप्रशंसा सा या चैव प्रस्तुताश्रया ॥"
इति काव्यप्रकाशः ॥
प्राकरणिकः । प्रासङ्गिकः । इत्यलङ्कारकौस्तुभः ॥ निष्पन्नः । यथा । प्रस्तुतशब्देमयट् । अन्नं प्रस्तुतं अन्नमयम् । यवागूः प्रस्तुता यवागूमयी । इति कलापतद्धितः ॥ प्रकर्षस्तुतियुक्तः । प्रपूर्व्वस्तुधातोः कर्म्मणि क्तः । उपस्थितः । प्रतिपन्नः । उद्युक्तः । इति लोकव्यवहारदर्शनात् ॥
प्रस्तुतः, त्रि, (प्र + स्तृ + क्तः ।) अन्तरितः । इति त्रिकाण्डशेषः ॥

प्रस्थः, पुं, (प्रकर्षेण तिष्ठतीति । प्र + स्था + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः । यद्वा, प्रतिष्ठतेऽस्मिन्नन्नेन वेति घञर्थे कः ।) परिमाणविशेषः । स तु चतुःकुडवरूपः । इत्यमरभरतौ ॥ आढकचतुर्थांशः । इति लीलावती ॥ द्विशरावपरिमाणम् । इति वैद्यकपरिभाषा ॥ (यथा, सुश्रुते शारीरस्थाने । ८ । अध्याये ।
"बलिनो बद्धदोषस्य वयस्थस्य शरीरिणः ।
परं प्रमाणमिच्छन्ति प्रस्थं शोणितमोक्षणे ॥")

प्रस्थः, पुं, क्ली, (प्र + स्था + कः ।) अद्रेः समभागः । अद्रेरेकदेशः । इति भरतः ॥ तत्पर्य्यायः । स्कन्धः २ सानुः ३ । इत्यमरः । २ । ३ । ५ ॥ (यथा, कुमारे । १ । ५४ ।
"प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किञ्चित् क्षणत्किन्नरमध्यवासं ॥")
उन्नतवस्तु । इति मेदिनी ॥ विस्तारः । यथा,
"दीर्घे प्रस्थे समानञ्च न कुर्य्यान्मन्दिरं बुधः ॥"
इति ब्रह्मवैवर्त्ते जन्मखण्डे १०३ अध्यायः ॥
प्रकृष्टस्थितिविशिष्टे, त्रि ॥

प्रस्थपुष्पः, पुं, (प्रस्थमितं पुष्पमस्य ।) मरुवकः । इत्यमरः । २ । ४ । ७८ ॥ (तत्पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"मारुतोऽसौ मरुवको मरुजश्चरपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥")

स्वल्पपत्रतुलसी । जम्बीरभेद: । इति केचित् ॥ जम्बीरसामान्यम् । इति केचित् । इति तट्टीकायां भरत: ॥

प्रस्थानं, क्ली. (प्र + स्था + ल्युट् ।) विजीगीषो: प्रयाणम् । इत्यमर: । २ । ८ । ९५ ॥ (यथा, देवीभागवते । ५ । ४ । १२ ।
सेनाभियोगं प्रस्थानं बलसंख्या यथार्थत: ।
धीराणाञ्च परिज्ञानं ज्ञात्वा यात्रां त्वरान्वित:॥")
गमनमात्रम् । यथा, पदाङ्कदूते ।
"प्रस्थानन्ते कुलिशकलनाचिह्नितं पण्डिताग्रै:")

प्रस्थानविघ्न:, पुं. (प्रस्थानस्य विघ्न: ।) गमनव्याघात: । यथा । य: पुनर्विवाहावसरे मङ्गलवति वासरे प्रतिष्ठमानस्य तत्प्रस्थानौपयिकं कर्म्म प्रागङ्गीकृत्य तदानीं न करिष्यामीति प्रस्थानविघ्नमाचरति तदसौ द्विगुणां भृतिं दाप्य: । इति मिताक्षरा ॥

प्रस्थापित:, त्रि, (प्र + स्था + णिच् + क्त: ।) प्रेषित: । इति हेमचन्द्र: ॥ प्रकर्षेण स्थापितश्च ॥

प्रस्थिका, स्त्री, (प्रस्थस्तदाकारोऽस्त्यस्या इति । प्रस्थ + ठन् ।) अम्बष्ठा । इति भावप्रकाश: ॥

प्रस्फुट, त्रि, (प्रस्फुटति विकशतीति । प्र + स्फुट् + क: ।) प्रफुल्ल: । इति शब्दरत्नावली ॥ (सुस्पष्ट: । यथा, मार्कण्डेये । २७ । २१ ।
"निष्कृत्य शासनं तस्माद्दृष्ट्वा प्रस्फुटाक्षरम्॥")

प्रस्फोटनं, क्ली, (प्रस्फोट्यतेऽनेनेति । प्र + स्फुट् + णिच् + करणे ल्युट् ।) सूर्पम् । इत्यमर: । २ । ९ । २६ ॥ (प्र + स्फुट् । भावे ल्युट् ।) ताडनम् । विकाशनम् । इति मेदिनी । ने, १८२ ॥ पवनम् । तृणादिशोधनम् । इति हेमचन्द्र: । ४ । ८३ ॥

प्रस्रवण, क्ली, (प्रस्रवति जलमस्मादस्मिन्निति वा । प्र + स्रु + अपादाने अधिकरणे वा ल्युट् । यत्र स्थाने स्रुत्वा जलं गलति तत् । इति भरत: ॥ अधिच्छेदेन स्रवज्जलं यत्र स्थाने पतति यत्र निपत्य च बहुलीभवति तत् । इति स्वाम्युदय: ॥ गिरेरुपरि निर्झरादिप्रभवजलसमघात: इति साहित्य: ॥ (यथा, हरिवंशे । ८ । ५४ । ११ ।
"पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गत: ।
प्रभावञ्च सरस्वत्या: प्रस्रवणं बल: ॥")
अजस्रं मन्दवेगेन स्रवज्जलम् । इति कौक्कट: ॥ तत्पर्य्यायम् । उत्स: २ । इत्यमर: । २ । ३ । ५ ॥ जलप्रस्राव: ३ । यथा, मनु: । ४ । २०३ ।
"स्नानं समाचरेन्नित्यं गर्त्त प्रस्रवणेषु च ॥")
अस्य गुणा: । प्रस्रवणजलं स्वच्छं लघु मधुरं रोचनञ्च दीपनकृत् ॥ इति राजनिर्घण्ट: ॥ (प्र + स्रु + भावे ल्युट् ।) प्रकर्षेण स्रवणम् ॥

प्रस्रवण:, पुं, (प्रस्रवति जलमस्मादिति । प्र + स्रु + अपादाने ल्युट् । माल्यवत्पर्वत: । इति हेमचन्द्र: । ४ । ८५ ॥ स्वेद: । इति त्रिकाण्डशेष: ॥

प्रस्राव:, पुं, (प्रसूयते इति । प्र + सु + "पॄसृस्रुभ्य:।" ३ । ३ । २७ । इति घञ् ।) सूत्रम् । इत्यमर: । २ । ६ । ६७ ॥ गोप्रस्रावमाहात्म्यं यथा, वराहपुराणे ।
"प्रस्रावेण तु य: स्नायात् रोहिण्यां मानवो द्विज: ! ।
सर्वपापकृतान्दोषान् दहत्याशु न संशय: ॥"
(गुणादयोऽस्य सूत्रशब्दे ज्ञातव्या: ॥)

प्रस्वान:, पुं, उच्चैःशब्द: । प्रपूर्ब्बस्वनधातोर्घञ्प्रत्ययेन निष्पन्न: ॥

प्रस्वेद:, पुं, (प्र + स्विद् घर्म्मे च्वौ + घञ् ।) अतिशयघर्म्म: । (यथा, मार्कण्डेये । १२४ । १३ ।
"नरेन्द्रपुत्रा प्रस्वेदजलक्लिन्नानना: समम् ॥")
तस्यौषधं यथा,—
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिपत्रिका ।
जातीफलोलपुगानां लवङ्गस्य फलानि च ॥
अगुरुगौरकाश्मर्य्य: कुष्ठं तगरनालिका ।
गोरोचना प्रियङ्गुश्च चोलं मदनकं नखम् ॥
सरल: समपर्णश्च लाक्षा चामलकी तथा ।
कर्व्वरक: पद्मकश्च एतैस्तैलं प्रसाधितम् ॥
प्रस्वेदमलदौर्गन्ध्यकण्डूकुष्ठहरं परम् ।
पुमान् युवा स्यात् शुक्राढ्य: स्त्रीणाञ्चात्यन्तवल्लभ: ॥
स्त्रीगतं गच्छतं रुद्र ! वन्ध्यापि लभते सुतम्॥"
इति गारुड़े १९८ अध्याय: ॥
(विषयोऽस्य यथा,—
"स्तैमित्यं मधुरास्यता च जड़ता निद्रा च तन्द्रा भृशं
गात्राणां गुरुताऽरुचिर्विरमता रोमाञ्चम: शीतता ।
प्रस्वेद: श्रुतिबाधनञ्च कुरुते नेत्रे च पाण्डुच्छवि-
र्विष्टब्धामलवृत्तिका च वमनं श्लेष्मज्वरैर्वेविदु:"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥)

प्रहृत, त्रि, (प्रहन्यते स्मेति । प्र + हन् + क्त: ।) विततम् । क्षुण्णम् । इति शब्दरत्नावली ॥ प्रकर्षेण हिंसितम् । (यथा. महाभारते । ८ । ३० । ६ ।
"प्रहृतरथनराश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमावृतं बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥")
प्रकर्षेण गतञ्च ॥ (वितार्ड़ितम् । यथा, । भागवते । १० । ७२ । ३८ ।
"इत्थं तयो: प्रहृतयोर्गदयोर्नृवीरौ
क्रुद्धौ स्वमुष्टिभिरयश्मयरिपिष्टाम् ॥"
वाहितम् । यथा, रघु: । १८ । १४ ।
"स स्वयं प्रहृतपुष्कर: कृती
लोलमाल्यबलयो हरन् मन: ।
नक्तकीरभिनयातिलङ्घनो:
पार्श्ववर्त्तिषु गुरुष्वलज्जयत् ॥")

प्रहेनेमि:, पुं, (ग्रहाणां नेमिरिव । निपातनात् षस्य प: ।) चन्द्र: । इति त्रिकाण्डशेष: ॥ (ग्रहनेमिरिति वा पाठ: ॥)

प्रहर:, पुं, (प्रक्षिप्यते डक्कादिरस्मिन्निति । प्र + हृ + घ: । अप् वा ।) वामरस्याष्टभागैकभाग: । पहर इति हिन्दीभाषा । तत्पर्य्याय: । याम: २ । इत्यमर: । १ । ४ । ६ ॥ (यथा, कथासरित्सागरे । ४ । ३७ ।
"सङ्केतकं द्वितीयेऽस्मिन् प्रहरे पर्य्यकल्पयत॥")

प्रहरकुटुम्बी, स्त्री, (प्रहरस्य कुटुम्बी कुटुम्बिनीव") कुटुम्बिनीक्षुप: । इति राजनिर्घण्ट: ॥

प्रहरणं, क्ली, (प्रक्षिप्यतेऽनेनेति । प्र + हृ + करणे ल्युट् ।) अस्त्रम् । इत्यमर: । २ । ८ । ८२ ॥ (यथा, महाभारते । १२ । १६६ । २ ।
"धनु: प्रहरणं श्रेष्ठमतोवाप्य पितामह ! ॥")
कर्णीरथ: । इति तट्टीका सारसुन्दरी ॥ (यथा,) भागवते । ४ । २६ । २ ।
"पञ्चप्रहरणं मायाबलं पञ्चविक्रमम् ॥"
प्रक्षिप्यतेऽस्मिन्निति । युद्धम् । इति हलायुध: । २ । २८८ ॥ (प्र + हृ + भावे ल्युट् ।) प्रहार: ॥ (यथा, महाभारते । ४ । ४ । ७ ।
"यानं प्रहरणं चैव तथैवाग्निषु भारत ! ॥")

प्रहरी, [न्] त्रि, यामिक: । प्रहरो विद्यते अस्येतिप्रहरशब्दाट्टास्यर्थे इन् प्रत्ययेन निष्पन्न: ।

प्रहर्षण:, पुं, (प्रहर्षयतीति । प्र + हृष् + णिच् + ल्यु: ।) बुधवृक्ष: । इति त्रिकाण्डशेष: ॥ हर्षविशिष्ट, हर्षकारके च, त्रि ॥ यथा, महाभारते । १ । २७ । ८ ।
"नानापक्षिरुतं रम्यं कद्रूपुत्रप्रहर्षणम् ॥"
प्र + हृष + भावे ल्युट् । आनन्दे क्ली । यथा, महाभारते । १२ । ३३६ । २५ ।
"अथ व्रतम्यावभृते वागुवाचाशरीरिणी ।
स्निग्धमम्भीरया वाचा प्रहर्षणकरी विभो !")

प्रहर्षणी, स्त्री, (प्रहर्षयतीति । प्र + हृष् + णिच् + ल्यु: । ङीष् ।) हरिद्रा । इति हारावली । त्रयोदशाक्षरपादच्छन्दोभेद: । तस्या लक्षणं यथा । छन्दोमञ्जर्य्याम् । "त्रयाशाभिर्मनजरगा प्रहर्षणीयम् ।" तस्या उदाहरणं यथा,—
"गोपीनामधरसुधारसस्य पाने-
कृत्तज्ञस्तनकलसोपगूहनैश्च ।
आचार्य्यैरपि रतिविभ्रमैर्मुरारे:
संसारे मतिरभवत् प्रहर्षणीह ॥"

प्रहसनं, क्ली, (प्र + हस् + भावे ल्युट् ।) प्रहास: । (प्रहसत्यत्रानेन वा । प्र + हस् + आधारे करणे वा ल्युट् ।) रूपकभेद: । परिहास: । इति मेदिनी । ने, १८० ॥ आक्षेप: । इति हेमचन्द्र: ॥ रूपकभेदस्य लक्षणं यथा,—
"भाणवत्स्मिन्मन्यङ्गलास्याङ्काङ्कैर्विनिर्म्मिते ।
भवेत् प्रहसने वृत्तं निन्द्यानां कविकल्पितम् ॥
तत्र नारभटीलास्यौ विस्कम्भकप्रवेशकौ ।
अङ्गी हास्यरसस्तत्र वीथ्यङ्गानां स्थितिर्न वा ॥
तपस्विभगवद्विप्रप्रभृतिष्वत्र नायक: ।
एको यत्र भवेद्दृष्टो हास्यं तच्छुद्धमुच्यते ॥"
इति साहित्यदर्पणम् ॥

प्रहसन्ती, स्त्री, (प्रहसति प्रकर्षेण विकशतीति । प्र + हस् + शतृ + ङीप् ।) यूथी । इति त्रिकाण्डशेष: ॥ वासन्ती । इति राजनिर्घण्ट: ॥ प्रकृष्टाङ्गारधानी च ॥

प्रहस्तः, पुं, (प्रततः प्रसृतो वा हस्तो यत्र।) विस्तृताङ्गुलिपाणिः। चपेटः। इत्यमरः। २। ६। ८४॥ रावणसेनापतिविशेषः। यथा—
"ततो नीलाम्बूदप्रख्यं प्रहस्तो नाम राक्षसः।
अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा॥"
इति रामायणे लङ्काकाण्डे ८ सर्गः॥

प्रहारः, पुं, (प्रहरणमिति। प्र+हृ+घञ्।) आघातः। यथा, मार्कण्डेये।
"करप्रहारेण शिरस्यामरस्य पृथक् कृतम्॥"

प्रहारणं, क्लो, (प्र+हृ+णिच्+ल्युट्।) काम्यदानम्। इति प्रवारणशब्दटीकायां भारतसुन्दरी॥

प्रहारवल्ली, स्त्री, (प्रहारोपशमा आघातजन्यवेदनादिनाशिका वल्ली लता। शाकपार्थिवादित्वात् मध्यपदलोपः।) मांसरोहिणी। इति भावप्रकाशः॥ (पर्य्यायोऽस्या यथा,—
"मांसरोहिण्यतिरुहा हत्ता चर्म्मकरी कृशा।
प्रहारवल्ली विकशा वीरवत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

प्रहासः, पुं, (प्रकृष्टो हासो यस्य।) शिवः। इति त्रिकाण्डशेषः॥ (कार्त्तिकेयस्य अनुचरविशेषः। यथा, महाभारते। ९। ४५। ६६।
"रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दकः॥"
नागविशेषः। तथा तत्रैव। १। ५७। १५।
"पूर्णाङ्गदः पूर्णमुखः प्रहासः शकुनिर्दरिः॥"
प्रकृष्टो हासो यस्मात्।) नटः। इति धरणिः॥ (प्रकृष्टो हासः प्रकाशो यस्य।) सोमतीर्थम्। इति जटाधरः॥ (प्रकृष्टो हास इति।) अट्टहासः। इति शब्दरत्नावली॥ (यथा, कामन्दकीये। ५। २०।
"न नर्म्मसचिवैः सार्द्धं किञ्चिदप्यप्रियं वदेत्।
ते हि मर्म्माण्यभिघ्नन्ति प्रहासेनापि संसदि॥"

प्रहासी, [न्] पुं, प्रकृष्टं हास्यति हसति च यः। (प्र+हस्+णिच् वा+णिनिः।) हासकारकः भाँड़ इति भाषा। तत्पर्य्यायः। वामन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रीतिदः ६। इति हेमचन्द्रः। २। २४५॥ (हासकारिणि, त्रि। यथा, अथर्ववेदे। ८।६।१४।
"आपाकेक्ष्याः प्रहासिनस्त्वे ये कुर्व्वते॥")

प्रहिः, पुं, (प्रकर्षेण क्रियतेऽत्रेति। प्र+हृ+"प्रहरतेः कूपे।" उणा० ४। १३४। इति इण्। स च डित्।) कूपः। इत्यमरः। २। १०। २६

प्रहितं, क्लो, (प्रधीयते स्मेति। प्र+धा+क्तः।) सूपः। इति हेमचन्द्रः। ३। ६१॥ (प्र+हि प्रेरणे+क्त।) क्षिप्त, त्रि। इति निरस्तशब्दटीकायां भरतः॥

प्रहीणः, त्रि, (प्र+ओ हा त्यागे+क्त। "धुमास्थागेति।" ६। ४। ६६। इति आत ईत्। "आदितश्च।" ८। २। ४५। इति निष्ठातस्य नः। ततो णत्वम्।) परित्यक्तः। प्रपूर्व्वहाधातोः कर्म्मणि क्तः। इति मुग्धबोधव्याकरणम्॥ यथा,—
"प्रहीणपूर्व्वध्वनिनाधिरूढ-
स्तुलामधारेण शरद्घनेन॥"
इति रघुकाव्यम्॥

प्रहुतं, क्लो, (प्रह्रियते स्मेति। प्र+हु+क्तः।) भूतयज्ञः। इति जटाधरः॥ (यथा, मनुः। ३। ७३—७४।
"अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च।
ब्राह्म्यं हुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते॥
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः।
ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम्॥")

प्रहेणकं, क्लो, (प्रहेलकम्। पृषोदरादित्वात् लस्य णः।) पिष्टकविशेषः। तत्पर्य्यायः। वाचनम् २ व्रतोपायनम् ३। इति त्रिकाण्डशेषः॥ प्रहेलकम् ४ वाचनकम् ५। इति हारावली १५२

प्रहेलकं, क्लो, (प्रहिलति स्वादादिना अभिप्रायं सूचयतीव। प्र+हिल भावसूचने+ण्वुल्। प्रहिलति वेष्टयतीति। प्र+हेल ण्वुल् वा।) प्रहेणकम्। इति हारावली। १५२॥

प्रहेलिका, स्त्री, (प्रहिलति अभिप्रायं सूचयतीति। प्र+हिल अभिप्रायसूचने+ण्वुल्। टापि अत इत्वम्।) दुर्विज्ञानार्थप्रश्नः। कूटार्थ भाषिता कथा। हेयालि इति भाषा। तत्पर्य्यायः। प्रवल्हिका २। इत्यमरः। १।६।६॥ प्रवह्लिका ३ प्रवह्लिः ४ प्रवल्ली ५ प्रहेलिः ६ इति भरतः॥ प्रश्नदूती ७ प्रवल्लीका ८। इति शब्दरत्नावली॥ तस्य लक्षणम्।
"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥
सा द्विधार्थौ च शाब्दौ च विख्याता प्रश्नशासने
आर्थी स्यादर्थविज्ञानात् शाब्दी शब्दस्य भङ्गतः॥"
आर्थी। यथा,—
"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः।
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥"
पारीयकुम्भ इति॥ शाब्दी यथा,—
"सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम्।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयन्ति॥"
मारिका। इति विदग्धमुखमण्डनम्॥

प्रह्लादः, पुं, (प्रह्लादते इति। प्र+ह्लाद शब्दे+अच्। यद्वा, प्रह्लादयतीति। प्र+ह्लाद+णिच्+अच्। रलयोरैक्यम्। प्रह्लादः। स च हिरण्यकशिपोः पुत्रः परमवैष्णवः। (यथा, हरिवंशे। ३। ७१।
"हिरण्यकशिपोः पुत्रश्चतुरः प्रथितौजसः।
अनुह्लादश्च ह्लादश्च प्रह्लादश्च यशस्वान्॥")
तस्य चरितादिकं प्रह्लादशब्दे द्रष्टव्यम्॥ (जनपदविशेषः। यथा, महाभारते। ६।८।४६
"मत्ताः सुदेष्णाः प्रह्लादा माहिषाः शशिकास्तथा॥")

प्रह्लादः, पुं, (प्र+ह्लाद+क्तिन्। कृत्वः।) प्रीतिः। (ह्लादेः स्वः स्त्री च।") इति मुग्धबोधव्याकरणम्॥

प्रह्लन्नः, त्रि, (प्र+ह्लाद+क्त। "ह्लादो निष्ठायाम्।" ६। ४। ८५। इति कृत्वः। प्रीतः। इत्यमरः। ३। १। १०३॥

प्रह्लादः, पुं, (प्रह्लादयतीति। प्र+ह्लाद+णिच्+अच्।) प्रह्लादः। स च पूर्व्वजन्मनि शिवशर्म्मणः पुत्रः सोमशर्म्मनामाभूत् ततो दैत्यभावनया मृतः अनन्तरं कमलायां हिरण्यकशिपोः सकाशाद्दैत्यभावेन जातः। यथा,
सूत उवाच।
"स लोष्टेन समं मेने काञ्चनं भूषणं पुनः।
जिताहारः स धर्म्मात्मा निद्रया परिवर्जितः॥
विषयान् स परित्यज्य एकात्मनमपि सेवते।
योगासनसमारूढो निराशो निष्परिग्रहः॥
तस्य वेलां समासाद्य मृत्युकालः समागतः।
आगतान् दानवान् विप्रः सोमशर्म्मा व्यलोकयत्॥
मृत्युकाले तु संप्राप्ते प्राणयात्राप्रवर्त्तके।
शालग्रामे महाक्षेत्रे ऋषीणामेव सन्निधौ॥
केचिद्दन्ति वै दैत्याः केचिद्दन्ति दानवाः।
एवंविधो महाशब्दः कर्णरन्ध्रगतस्तदा॥
तस्यैव विप्रवर्य्यस्य सविप्राः सोमशर्म्मणः।
ज्ञानध्यानात् प्रचलतः प्रविष्टं दैत्यजं भयम्॥
तेन ध्यानेन तस्यापि दैत्यभूतेन वै तदा।
मत्वरं तस्य वै प्राणा गतास्तस्य महात्मनः॥
दैत्यभावेन संयुक्तः स हि मृत्वशं गतः।
तस्माद्दैत्यगृहे जातो हिरण्यकशिपोस्तदा॥
देवासुरे महायुद्धे निहतश्चक्रपाणिना।
युध्यमानेन तेनापि प्रह्लादेन महात्मना॥
सुभृशं वासुदेवं तद्विश्वरूपं विचिन्तितम्।
योगाभ्यासेन पूर्व्वेण ज्ञानमासीन्महात्मनः॥
सम्भार पौर्व्विकं सर्व्वं चरित्रं शिवशर्म्मणः।
सोऽप्यहं सोमशर्म्मा वै प्रविष्टो दानवीं तनुम्॥
कस्य कार्यं कदा पुण्यं केवलं ध्यानमुत्तमम्।
प्रयामि च महापुण्यैर्ज्ञानार्य्यैर्मोक्षदायिभिः॥
समरे पूज्यमाणेन प्रह्लादेन महात्मना।
एवं चिन्ता कृता पूर्व्वं शृणुतां द्विजसत्तम!॥
एतत्ते सर्वमाख्यातं सर्व्वसन्देहनाशनम्॥"
सूत उवाच।
"प्रह्लादे तु हते संख्ये देवदेवेन चक्रिणा।
संह्लादे च महावीर्य्ये तस्मिंश्च कालनेमिनि॥
प्रह्लादस्य तु या माता हिरण्यकशिपोः प्रिया।
प्रह्लादस्य महाशोकैर्दिवा रात्रौ प्रशोचति॥
पतिव्रता महाभागा कमला नाम दुःखिता।
खिद्यमाना दिवा रात्रौ नारदास्तामुवाच ह॥
मा शुचस्त्वं महाभागे पुत्रार्थं पुण्यभागिनि!
निहतो वासुदेवेन तव पुत्रः समेष्यति॥
तद्रूपलक्षणोपेतस्तवोदरे महामतिः।
प्रह्लादेति च वै नाम पुनरस्य भविष्यति॥
विष्णोन आसुरैर्भावैर्वैष्णवेन समन्वितः।

इन्द्रत्वं भोक्ष्यते भद्रे ! सर्वदेवैर्नमस्कृतः ॥
सुखीभव महाभागे ! पुत्रेण तेन वै सदा ।
न प्रकाश्या त्वया देवि ! स्ववार्त्तेयञ्च कस्यचित्
कर्त्तव्यमज्ञानभावैः सुगोप्यं त्वं सदा कुरु ।
एवमुक्त्वा गतो विप्र नारदो मुनिसत्तमः ॥
कमलायाश्चोदरे वै आसीत् तज्ज्ञञ्च चोत्तमम्
पुनः प्रह्लादो वै नाम तस्यां जातो महात्मनः ॥
बालभावं गतो विप्र ज्ञप्त्वा एवं विचिन्त्य च ।
नरसिंहप्रसादेन देवराजोऽप्यभूत् स हि ॥"
इति पाद्मे भूमिखण्डे ५ अध्यायः ॥ *॥
(अनेन सह नरनारायणयोर्युद्धमासीत् । एतद्विवरणन्तु देवीभागवते चतुर्थस्कन्धे नवमाध्याये द्रष्टव्यम् ॥) प्रमोदः । इति विश्वः ॥
(यथा, महाभारते । १ । ७० । ३ ।
"मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥")
शब्दः । इति धरणिः ॥ (नागविशेषः । यथा, महाभारते । २ । १० ।
"प्रह्लादो मूषिकादश्च तथैव जनमेजयः ॥")
प्रह्लः, त्रि, (प्रह्लयते इति । प्र + ह्ल + "सर्व्वधातुभ्य इण्वरिष्ठेति ।" उणा० २ । १५३ । इति वन् । आलोपश्च ।) नम्रः । इत्युणादिकोषः ॥ (यथा, रघुः । १६ । ८० ।
"विभूषणप्रत्युपहारहस्त-
मुपस्थितं वीक्ष्य विशाम्पतिस्तम् ।
सौपर्णमस्त्रं प्रतिसञ्जहार
प्रह्लेष्वनिर्बन्धरुषो हि मन्त्राः ॥")
आसक्तिः । इति हेमचन्द्रः । ३ । ४८ ॥
प्रा, ल पूर्त्तौ । (अदा०-पर० सक० अनिट् ।) ल, प्राति घटं जलेन लोकः । इति दुर्गादासः ॥
प्राक्, व्य, पूर्व्वदिग्देशकालाः । इत्यमरः । ३ । ४ । २३ ॥ प्राची दिक् प्राङ् देशः कालो वा प्राक् । एवं प्राच्या दिशः प्राचो देशात् कालाद्वा आगतः प्रागागतः । एवं प्राच्यां दिशि प्राचि देशे वा वसति प्राग्वसति । दिक्शब्दाद्दिग्देशकाले इति प्रथमापञ्चमीसप्तमीनां स्थात् अचो लुगिति स्थातो लुक् । इति तट्टीकायां भरतः ॥ ("दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिक्देशकालेष्वस्तातिः ।" ५।३।२७ इति अस्तातिः । "अञ्चेर्लुक् ।" ५ । ३ । ३० । अस्तातेर्लुक् । "लुक् तद्धितलुकि ।" १ । २ । ४८ । इति स्त्रीप्रत्ययस्य लुक् ।)पूर्व्वम् । (यथा, मनुः । २ । २९ ।
"प्राक्नाभिवर्द्धनात्पुंसो जातकर्म्मविधीयते ॥")
प्रभातम् । अवान्तरम् । अतीतम् । अयम् । इति हेमचन्द्रः मेदिनी च । चे, ७॥ क्रमप्राप्तिः । इति शब्दरत्नावली ॥
प्राकषिकः, पुं, (प्राकर्षति छिनस्तीति । प्र + आ + कृष् हिंसायाम् + "प्राड्डि पनिकषः ।" उणा० २ । १४ । इति किकन् ।) षिड्गः । मायानर्त्तकः । इत्युणादिकोषः ॥ (परदारोपजीवी । इत्युज्ज्वलदत्तः ॥)

प्राकाम्यं, क्ली, (प्रकामस्य भावः प्रकाम + ष्यञ् ।)शिवस्याष्टविधैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः तच्च इच्छानभिघातः । इत्यमरटीकायां भरतो हेमचन्द्रश्च । २।११६ ॥ (यथा,तत्त्वकौमुद्याम् ।
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥")
स्वाच्छन्द्यानुमतिः । तत्पर्य्यायः । अवसर्गः २ स्वाच्छन्द्यानुमननम् ३ । इति त्रिकाण्डशेषः ॥ (यथा, कुमारे । २ । ११ ।
"व्यक्तो व्यक्तेतरत्वासि प्राकाम्यं ते विभूतिषु॥")
प्राकारः, पुं, (प्रक्रियते इति । प्र + कृ + घञ् । उपसर्ग्यस्य घञीति दीर्घः ।) वप्रोपरि अन्यत्र वा इष्टकादिरचितवेष्टनम् । (यथा, महाभारते । १ । २०८ । २९ ।
"प्राकारेण च सम्पन्नं दिवमाहत्य तिष्ठता ॥")
तत्पर्य्यायः । वरणः २ सालः ३ । इत्यमरः ।२। २ । ३ ॥ प्यालः ४ । इति भरतः ॥ वप्रः ५ । यथा,—
"प्राकाररोधसोर्वप्रः पितृक्रीडारयोरपि ॥"
इति रत्नकोषः ॥
तस्य परिमाणं यथा,—
"ऊर्द्धं षोड़शहस्तेभ्यो नैव कुर्य्यादृहं गृही ।
ऊर्द्धं विंशतिहस्तेभ्यः प्राकारं न शुभप्रदम् ॥"
तस्य द्वारमानम् ।
"प्रस्थे हस्तत्रयात् पूर्वं दीर्घे हस्तचयन्तथा ।
गृहिणां शुभदं द्वारं प्राकारस्य गृहस्य च ॥
न मध्यदेशे कर्त्तव्यं किञ्चिन्न्यूनाधिकं शुभम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अध्यायः
प्राकृतः, त्रि, (प्रकृष्टमकृतमकार्य्यं यस्य ।) नीचः । इत्यमरः ॥ (यथा, देवीभागवते ।१।१५।३१ ।
"अम्बुपातं करोत्यद्य विवशः प्राकृतो यथा ॥")
अविकारकः । यथा, भावप्रकाशे अजीर्णरोगाधिकारे ।
"तदस्ति षष्ठं चाजीर्णं प्राकृतं प्रतिवासरम् ॥
प्राकृतं अविकारकम् ॥"*॥) प्रकृतिसम्बन्धी । यथा,—
"इत्युक्त्वासीदरिस्तूष्णीं भगवानात्ममायया ।
पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः॥"
इति श्रीभागवते दशमस्कन्धे २ अध्यायः ॥
(यथाच मार्कण्डेये । ४५ । ७३ ।
"इत्येष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु सः ॥"
यथा च मनौ । ११ । १५८ ।
न क्रत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत् ॥"
"प्राकृतं प्राजापत्यं प्रकृतौ भवं प्राकृतं सर्वकृच्छ्राणां प्रकृतित्वादेवमुच्यते ।" इति तन्त्राख्ये मेधातिथिः ॥*॥ प्रकृतौ भवस्तत आगतो वा । प्रकृति + "तत्र भवः ।" ४ । ३ । ५३ । "ततआगतः ।" ४ । ३ । ७४ । इति वा अण् ।) भाषाभेदे, क्ली । स च संस्कृतप्रकृतिकः । यथा, अथ प्राकृतम् । अथशब्दानन्तर्य्यार्थोऽधिकारार्थश्च । प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम् । संस्कृतानन्तरं प्राकृतमधिक्रियते । संस्कृतानन्तरं प्राकृतस्यानुशासनम् । सिद्धसाध्यमानभेदसंस्कृतयोनेरेव तस्य लक्षणं न द्वितीयस्य इति ज्ञापनार्थम् । संस्कृतसमन्तु संस्कृतलक्षणेनैव गतार्थम् । प्राकृते प्रकृतिप्रत्ययलिङ्गकारकसमाससंज्ञादयः संस्कृतवद्वेदितव्याः । लोकादिति च वर्त्तते । तेन ऋ ॠ ऌ ॡ ऐ औ ङ ञ ण ष विसर्জनीयप्लुतवर्জा वर्णसमाम्नायो लोकादवगन्तव्यः। ङञौ स्ववर्ग्यसंयुक्तौ भवत एव । ऐदौतौ च कैषाञ्चित् । कैतवं कैअवम् । सौन्दर्य्यं सौअरिअम् । कौरवाः कौअवा । तथा स्वरव्यञ्जनं द्विवचनं चतुर्थीबहुवचनञ्च न तु भवति । अबहुलं बहुलमित्यधिकृतं वेदितव्यमाज्ञापरिसमाप्तेः । ततश्च क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव भवति । इति हेमचन्द्रकृतशब्दानुशासनवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥*॥ (यथा च प्राकृतचन्द्रिकायाम् ।
"प्रकृतिः संस्कृतं तत्र भवत्वात् प्राकृतं स्मृतं
तद्भवं तत्समं देशीत्यनेकमेतत् त्रिधा मतम् ॥"
चण्डाचार्य्यादयस्तु आर्षप्राकृतभेदेन प्राकृतं द्विविधं कल्पयन्ति। जैनबौद्धानां शास्त्रेषु प्राचीनतमनाटकादिषु च आर्षप्राकृतप्रयोगः प्रायशो दृश्यते ॥ कानिचित् विशेषलक्षणानि प्राकृतचन्द्रिकायामुक्तानि । यथा,—
"तत्रार्षं मागधी शौरसेनी पैशाचिकी तथा।
चूलिका पैशाचिकस्याप्यभ्रंशश्चेति षड्विधम् ॥
महाराष्ट्रोद्भवां भाषां प्रकृष्टं प्राकृतं विदुः ।
आकरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥"
नाटकादौ उत्तमस्यापि नायकादेः कदाचित् मत्तादिदोषोपहतस्य प्राकृतकथनं नैव दोषाय यदुक्तं तत्रैव ।
"ऐश्वर्य्यादिप्रमत्तस्य दारिद्र्योपहतस्य च ।
उत्तमस्यापि पठतः प्राकृतं नैव दूष्यति ॥
क्रीड़ार्थं नृपतेरिष्टं प्राकृतञ्च द्विजन्मनाम् ।
भरतेनोदितं प्राज्ञमवाधितमिदं वचः ॥"
नाटकादौ बालस्त्रीहृद्यादीनामगुणान्वितानां प्राकृतकथनमेव युक्ततरम् । यथाह भरतः ।
"गाथासु तु महाराष्ट्रा अन्या नाट्याश्रया मताः ।
बालस्त्रीहृद्यभिन्नानां श्रावकव्याजलिङ्गिनाम् ।
यद्वोपहृष्टमत्तानां प्राकृतं षण्ढकृषिणाम् ॥"*
प्रलयविशेषे, पुं । यथा, विष्णुपुराणे । १।७ । ३८—३९ ।
"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्व्विधः ॥
ब्राह्मो नैमित्तिकस्तत्र यच्छेते जगतः पतिः ।
प्रयाति प्राकृते चैव ब्रह्माण्डं प्रकृतौ लयम् ॥"
प्राकृतज्वर, पुं, (प्राकृतः प्रकृतिसम्बन्धी ज्वरः । वर्षाशरद्वसन्तेषु त्रिषु, ऋतुषु क्रमेण वातपित्तकफज्वरः । यथा, माधवकरः ।
"वर्षाशरद्वसन्तेषु वाताद्याः प्राकृतः क्रमात् ॥"

प्राकृतदोषः, पुं, (प्राकृतो दोषः ।) वर्षाशरद्-वसन्तेषु क्रमेण कुपितो वातः पित्तं कफश्च । यथा, रक्षितः ।

"चयप्रकोपप्रशमाः पित्तस्य प्रावृडादिषु ।
श्लेष्मणः शिशिराद्येषु वार्यार्कोर्म्मादिषु त्रिषु ॥"

प्राकृतप्रलयः, पुं, (प्राकृतः प्रकृतिसम्बन्धी प्रलयः) प्रकृतेर्लयः । तस्य विवरणम् । यथा,—

"निर्गुणस्य च नित्यस्य चाद्यन्तरहितस्य च ।
निमेषाणां सहस्रेण प्रकृतेर्हण्ड उच्यते ॥
षष्टिदण्डात्मकस्तस्य वासरः प्रकीर्त्तितः ।
मासस्त्रिंशद्दिवारात्रैर्वर्षं द्वादशमासकैः ॥
एवं गते शताब्दे च श्रीकृष्णे प्रकृतेर्लयः ।
प्रकृत्याञ्च प्रलीनायां तदैवं प्राकृतो लयः ॥
सर्व्वाः संहृत्य सा चैका महाविष्णोः प्रसूय या
क्षणावत्तसि लीना च मूलप्रकृतिरीश्वरी ॥
शास्त्रा वदन्ति तां दुर्गां विष्णुमायां सनातनीम्
सर्व्वशक्तिस्वरूपाञ्च परां नारायणीं सतीम् ॥
ब्रह्माधिष्ठातृदेवीञ्च क्षणस्य त्रिगुणात्मिकाम् ।
यस्यायया मोहिताश्च ब्रह्मविष्णुशिवादयः ॥
वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते ।
यदर्द्धाङ्गा महालक्ष्मीः प्रिया नारायणस्य च ॥
प्राणाधिष्ठातृदेवीञ्च प्रेम्णा प्राणाधिकां वराम्
शश्वत् प्रेममयीं शक्तिं निर्गुणां निर्गुणस्य च ॥
नारायणश्च शम्भुञ्च संहृत्य स्वगणान् बहून् ।
शुद्धसत्त्वस्वरूपो च क्षणे लीनश्च निर्गुणे ॥
गोपा गोप्यश्च गावश्च सुरभ्यश्च नराधिप ! ।
सर्व्वे लीनाः प्रकृत्याञ्च प्रकृतिः प्रकृतौश्वरे ॥
महाविष्णौ विलीनाश्च सर्व्वे ते क्षुद्रविष्णवः ।
महाविष्णुः प्रकृत्याञ्च सा चैवं परमात्मनि ॥
प्रकृतियोगनिद्रा च श्रीकृष्णनेत्रपद्मयोः ।
अधिष्ठानं चकारैवं मायया चेश्वरेच्छया ॥
प्रकृतेर्व्वासरं यावन्मितं कालं प्रकीर्त्तितम् ।
तावद्वृन्दावने निद्रा कृष्णस्य परमात्मनः ॥
अमूल्यरत्नतल्पे च वह्निशुद्धांशुकान्विते ।
गन्धचन्दनमाल्याढ्ये वायुना सुरभीकृते ॥
पुनः प्रजागरे तस्य सर्व्वसृष्टिर्भवेत् पुनः ।
एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥*॥

अपि च ।

"प्रकृतौ संस्थितो यस्मात् सर्व्वस्तन्मात्रसञ्चयः ।
अहङ्कारमहत्तत्त्वगतो यत् प्राकृतो लयः ॥
प्रकृतौ संस्थितौ व्यक्तमतीतप्रलयस्तु यत् ।
तस्मात् प्राकृतसंज्ञोऽयमुच्यते प्रतिसञ्चरः ॥
अयं यः कथितो विप्राः प्राकृताख्यो महालयः॥"

इति कालिकापुराणे २४ अध्यायः ॥

प्राकृतमानुषः पुं, (प्राकृतः सामान्यो मानुषः) सामान्यमनुष्यः । यथा महाभारते गदापर्व्वणि ।

"एकादशचमूनाथ भीम ! पादेन मा स्पृश ।
पञ्चानामपि यो भर्त्ता नासौ प्राकृतमानुषः ॥"

प्राकृतमित्रं, क्लो, (प्राकृतं स्वाभाविकं मित्रं सुहृत् ।) स्वदेशाव्यवहितदेशावस्थितराजादिः । यथा, माघे । २ । ३६ ।

"सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः
स्यातामभिन्नौ मित्रे च सहजप्राकृतावपि ॥"

अस्य टीका । "ननु चद्दोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत् करोति । सखेति । क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः सखा सुहृत् गरीयान् बलवान् एवं शत्रुश्च कृत्रिमो गरीयान् कुतः हि यस्मात्तौ कृत्रिममित्रशत्रू च कार्य्यतः उपकारापकाररूपकार्य्यवशात् निर्वृत्ताविति शेषः । उक्तकार्य्यापेक्षयैवमनपायादनर्थोन्मित्रामित्रभावोऽपि अनपायीति गरीयस्त्वमिति भावः । सहजप्राकृतौ तु नैवमित्याह स्यातामिति । सहजात: सहजः एकशरीरावयवत्वात् तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि, सहजशत्रुस्तु पितृव्यतत्पुत्रादिः प्रकृत्या सिद्धः प्राकृतः पूर्व्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः । तत्र विषयान्तरः प्राकृतः शत्रुः तदनन्तरः प्राकृतो मित्रं अपि त्वर्थे तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां न त्वात्मकार्य्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे कृत्रिमशत्रुः शत्रुरेव मित्रञ्च मित्रमेवेति कृत्रिमावेव भिन्नौ एवंविधौ गरीयांसौ न तु सहजौ नापि प्राकृतावित्यर्थः । अनेन कृत्रिमत्वं सर्व्वापवादीति सिद्धम् ।" इति मल्लिनाथः ॥

प्राकृतशत्रुः, पुं, (प्राकृतः स्वाभाविकः शत्रुः ।) स्वदेशाव्यवहितदेशावस्थितराजादिः । यथा । "विषयान्तरः प्राकृतः शत्रुः ।" इति माघटीकायां मल्लिनाथः ॥

प्राकृतिकः, त्रि, (प्रकृति + ठञ् ।) प्रकृतिविकारः । प्रकृतिसम्बन्धी । यथा,—

"एवं सर्व्वे प्राकृतिकाः श्रीकृष्णं निर्गुणं विना ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः ॥

(प्रलयविशेषे, पुं । यथा विष्णुपुराणे १।७।३८।

"नैमित्तिकः प्राकृतिकस्तथैवात्यन्तिको द्विज ।
नित्यश्च सर्व्वभूतानां प्रलयोऽयं चतुर्विधः ॥")

प्राक्तनः, त्रि, (प्राक् प्राचि काले देशे प्राच्यां दिशि वा भवः । प्राक् + कालवाचिनोऽव्ययात् ट्यु्ट्युलौ ।) प्रागभवः । यथा । "प्रयेदिरे प्राक्तनजन्मविद्याः ॥" इति कुमारसम्भवम् ॥

अन्यच्च ।

"प्राक्तनेन शुभं सर्व्वं सुखञ्च विभवस्थिरम् ।
दुःखं शोकः प्राक्तनेन विपत् सम्पच्च सास्मृतम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १४अध्यायः॥

अपि च तत्रैव १२८ अध्याये ।

"विधाता लिखितं कर्म्म प्राक्तनं केन वार्य्यते ।
मया भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि ॥"

प्राक्तनकर्म्म, क्लो, (प्राक्तनं पुराभवं कर्म्म अत्रास्य तज्जनकत्वादपि तज्जन्यत्वारोपः ।) भाग्यम् । अदृष्टम् । इति जटाधरः ॥ पुराकृतकार्य्यञ्च ॥

प्राक्फलः, पुं, (प्राक् फलं यस्य ।) पनसः । इति जटाधरः ॥

प्राक्फल्गुनी, स्त्री, (प्राची फल्गुनी ।) पूर्व्वफल्गुनी । यथा । प्राक्फल्गुन्यां लग्नकाले च यस्य । इति कोष्ठीप्रदीपः ॥

प्राक्फल्गुनीभवः, पुं, (प्राक्फल्गुन्यां भव उत्पत्तिर्यस्य ।) बृहस्पतिः । इति शब्दरत्नावली ।३६॥

पूर्व्वफल्गुन्यां जाते, त्रि ॥

प्राक्फाल्गुनः, पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुण + अण् ।) बृहस्पतिः । इति शब्दरत्नावली ॥

प्राक्फाल्गुनेयः, पुं, (प्राक्फल्गुन्यां भव इति । प्राक्फल्गुन + ढञ् ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥

प्राक्षर्य्यं, (प्रखरस्य भावः । प्रखर + ष्यञ् ।) प्रखरत्वम् । तीक्ष्णता । प्रखरशब्दात् भावार्थे ष्यञ्प्रत्ययः ॥

प्रागभावः, पुं, (प्राग्वर्त्ती अभावः ।) संसर्गाभावविशेषः ॥ (यथा, भाषापरिच्छेदे ।१२-१३

सोऽयमस्तु द्विधा संसर्गान्योन्याभावभेदतः ।
प्रागभावस्तथाध्वंसोऽप्यत्यन्ताभाव एव च ॥
एव त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥")

तस्य लक्षणम् । विनाश्यभावत्वम् । इति सिद्धान्तमुक्तावली ॥

प्रागल्भ्य, क्लो, प्रगल्भस्य भावः । प्रगल्भ + ष्यञ् ।) प्रगल्भता । यथा,—

प्रागल्भ्यशून्यस्य नरस्य विद्या
शस्त्रं यथा कापुरुषस्य हस्ते ।
न तस्मिन्नुत्पादयते शरीरे
हृदस्य दारा इव दर्शनाय ॥"

इति ज्योतिस्तत्त्वम् ॥

स्त्रीणामयत्नजभावविशेषः । यथा,—

"प्रागल्भ्यौदार्य्यमाधुर्य्यस्थैर्याधीरत्वकान्तयः ।
दीप्तिश्चायत्नजा भावहावहेलास्त्रियोऽङ्गजाः ॥"

इति हेमचन्द्रः ।४।१७२ ॥

(यथा च साहित्यदर्पणे । ३ । १०२ ।

"निःसाध्वसत्वं प्रागल्भ्यम् ॥" यथा,—

"ममाग्रिष्टाः समाश्वस्यथ्वस्थितासुखनैरपि ।
दृष्टाश्च दयनैः कान्तं दासीकुर्व्वन्ति योषितः ॥"

प्रागुदीचौ, स्त्री, (प्राचौ उदीचौ च दिगिति कर्म्मधारयः । पूर्व्वोत्तरदिक् । ईशानकोणः । यथा तत्रोत्कीर्णवृत्तिकाः प्रागुदीच्यां दिशि क्षिपेत्" इति भवदेवभट्टः ॥

प्राग्ज्योतिषः, पुं, (प्राक् ज्योतिषं नक्षत्रं यत्र । तदुक्तं कालिकापुराणे ।

"अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज ह ।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥"

कामरूपदेशः । इति हेमचन्द्रः । ४ । २२ ॥

स तु नरकराजपुरम् । यथा,—

श्रीभगवानुवाच ।

"करतोया सत्यगङ्गा पूर्व्वभागावधिस्थिता ।
यावल्लौहित्यकास्त्रोतस्तावदेतं पुरं तदा ॥
तत्र देवो महामाया योगनिद्रा जगत्प्रसूः ।
[illegible]रूपमादाय सदा तिष्ठति शोभना ॥

अत्राहि नदराजोऽयं लौहित्यो ब्रह्मणः सुतः।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्वदा।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक!॥
सर्वे क्रीड़ार्थमायाता रहस्यदेशमुत्तमम्।
अत्र श्रीः सर्वतो भद्रा भोग्यमत्र सदा बहु॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्मुखं ससर्ज्ज ह।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम्।
ततो विदर्भराजस्य पुत्रीं मायान्वयां हरिः।
पुत्रार्थे वरयामास नरकस्य स मां गुणैः॥"

इति कालिकापुराणे ३७ अध्यायः॥

(इदानीं प्रसिद्धमासामप्रदेशकियदंशकुचविहार) कामरूपं पुराप्राग्ज्योतिषाख्ययाभिहितम्॥"

प्राग्भारः, पुं, (प्रकृष्टो भारो यत्र।) पर्व्वताग्रभागः। इति विकाण्डशेषः॥ कुत्रचित् प्राग्भाव इति च पाठः॥

प्रायङ्करः, त्रि,(प्रायं प्रकृष्टमयं क्रियतेऽनेनेति। कृ+अप्।) श्रेष्ठः। इत्यमरः। ३। १। ५८। (यथा, रघौ। १६। २३।

"तथेति तस्याः प्रणयं प्रतीतः
प्रत्यग्रहीत्पाग्रहरो वसूनाम्।
पूरय्यभिव्यक्तमुखप्रमादा
शरीरबन्धेन तिरोबभूव॥")

प्रायाटं, क्ली, (प्रायं अटतीति। अट्+अच्।) अघनदधि। इति विकाण्डशेषः॥

प्रायंण,त्रि,(प्रकर्षेणायं भव इति। प्राय+यत्) श्रेष्ठः। इत्यमरः। ३। १। ५८॥ (यथा, महाभारते। ६। ५८। ११।

"कृत्वा हि सुमहत् कर्म्म हत्वा भीष्ममृषान् कुरून्।
जयः प्राप्तो यशःप्रायं वैरञ्च प्रतियाचितम्॥"

प्राग्वंशः,पुं,(प्राञ्चतीति। प्र+अञ्च+क्विन्प्राक् प्राक् वंशः सपत्नीकयजमानादिसमूहोऽत्र।) हविषां हातव्यानां आधारो यदृग्रूपं ततः प्राक् पूर्व्वदेशे यजमानसदस्यादिस्थित्यर्थं गृहम् इत्यमरभरतौ॥ (यथा, हरिवंशे। ४१। ७।

"यूपं समित्कुशं दर्व्वीचमसोलूखलानि च।
प्राग्वंशं यज्ञभूमिञ्च होतारं चयनञ्च यत्॥"

प्राक्चासौ वंशश्चेति कर्म्मधारयः॥) पूर्व्वकुलञ्च॥

प्राघातः, पुं,(प्रकृष्ट आघातोऽस्मिन्। यद्वा, प्राक् न्यतेऽस्मिन्निति। प्र+आ+हन्+आधारे घञ्।) युद्धम्। इति हेमचन्द्रः। ३। ४६१॥

प्राधारः, पुं, (प्राधरणमिति। प्र+धृ प्रस्रवणे+घञ्। "उपसर्गस्य घञ्यमनुष्ये बहुलम्।" ६। ३। १२२। इत्युपसर्गस्य दीर्घः।)घृतादिचरणम्। तत्पर्य्यायः। स्रुगीतः २। इत्यमरः। ३। २। १०॥

प्राघुणः,पुं, (प्राघोणते भ्राम्यतीति। प्र+आ+घुण+कः।) अतिथिः। इति त्रिकाण्डशेषः॥ (कन्प्राघुण+स्वार्थे। प्राघुणकस्त्वतिथौ।

यथा, पञ्चतन्त्रे चतुर्थतन्त्रे।

"तदागच्छ प्राघुणकन्यायेनास्मदावासम॥")

प्राघुणिकः,पुं,(प्राघुण+स्वार्थे ठक्।) अतिथिः। यथा, नैषधे। २। ५६।

"अमितं मधु तत्कथा मम
श्रवणप्राघुणिकीकृता जनैः।
मदनानलबोधनेऽभवत्
खग धाम्या धिगधैर्य्यधारिणः॥"

प्राघूर्णिकः, पुं, (प्र+आ+घूर्ण+भावे घञ्। प्राघूर्णो भ्रमणम्। तत्र साधु इति ठञ्।) अतिथिः। इति हेमचन्द्रः। २। ३३४॥

प्राङ्, त्रि, (प्रकर्षेण अञ्चतीति। प्र+अन्च+"ऋत्विग्दधृक्स्रगिति।" ३। २। ५९। इति क्विन्। "अनिदितां हल उपधायाः क्ङिति।" ६। ४। २४। इति नलोपः। "उगिदचाम्।" इति नुम्। संयोगान्तस्य लोपः। नुमो नकारः। "अ"क्विन् प्रत्ययस्य कुः।" ८। २। ६२। इति कुत्वेन ङकारः।) पूर्व्वदिक्। पूर्व्वदेशः। पूर्व्वकालः। इति मेदिनी कोषे, ७॥

प्राङ्गः,पुं,(प्रकृष्टमङ्गं यस्य।) पणववाद्यम्। इति शब्दरत्नावली॥

प्राङ्गः, पुं, (प्रकृष्टमङ्गनमङ्गं यस्य।) पणवम्। इति शब्दरत्नावली॥ (प्रकर्षेण अङ्गनं गमनं यत्र। गत्वम्।) गृहभूमिः। आङ्गिना इति उठान इति च भाषा। तत्पर्य्यायः। अजिरम् २ चत्वरम् ३ अङ्गनम् ४। इति हेमचन्द्रः। ४। ७०॥ (यथा, भविष्योत्तरे।

"प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः।
पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम्॥")

सूर्य्यविद्धस्य तस्य दोषो यथा,—

"अभद्रदं सूर्य्यविधं प्राङ्गनञ्च तथैव च॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०३ अः॥

प्राङ्न्यायः, पुं, (प्राक् न्यायः।) चतुर्थोत्तरान्तर्गतसंविशेषः। यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थे अनेनाहमभियुक्तस्तु तव चायं व्यवहारभागीयो पराजित इति। उक्तञ्च कात्यायनेन।

"आचारेणावमन्तोऽपि पुनर्नेक्षयते यदि।
सोऽभियोक्तो जितः पूर्व्वं प्राङ्न्यायस्य स उच्यते॥"

इति मिताक्षरा॥

प्राचिका,स्त्री,(प्राञ्चतीति। प्र+अञ्च+क्विन्। टाप्। अत इत्वञ्च।) वनमल्लिका। इत्यमरभरतौ। २। ५। ८॥ डाँश इति भाषा॥

प्राची, स्त्री, (प्रथमं अञ्चति सूर्य्यं प्राप्नोतीति। प्र+अञ्च+"ऋत्विग्दधृक्स्रगिति।" ३।२।५९। इति क्विन्। "उदितश्च।" ४। १। ६। इति ङीप्। पूर्व्वा दिक् इत्यमरः। १।३।१॥ (यथा, महाभारते। १। ८५। १२।

"जनमेजयः खल्वनन्तां नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान्। यः प्राचीं दिशं विजिगाय यावत् सूर्य्योदयात् ततस्तस्य प्राचित्वम्॥") पूजकपूज्ययोरभेदः। यथा,—

"देवाग्रे खस्य चाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः॥"

इति।

"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
सदागमज्ञाः प्रवदन्ति तज्ज्ञे॥"

इति तिथ्यादितत्त्वम्॥

प्राचीनः,त्रि,(प्रागेवेति। प्राक्+"विभाषाञ्चेरदिक् स्त्रियाम्।"५। ४। ८ इति खः खस्य नादेशः। पूर्व्वदिग्देशकालभवः तत्पर्य्यायः। प्राक् २। (यथा, आर्य्यासप्तशत्याम्। ३५१।

"प्राचीनाचलमौलेर्यथा शशी गगनमध्यमधिवसति।
त्वां सखि! पश्यामि तथा छायामिव संकुचद्बाहुम्॥"

यथा च भागवते। ४। २४। १०।

"प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलम्॥"

प्रागग्रम्। यथा, ऋग्वेदे। १। १८८। ४।

"प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्॥"

"प्राचीनं प्रागग्रम्।" इति तद्भाष्ये सायणः॥ प्रकृष्टगन्ता। अपराङ्मुखः। यथा, ऋग्वेदे। १। ५४। ५।

"प्राचीनेन मनसा बर्हणावता।"

"प्राचीनेन प्रकर्षेण गन्त्रा अपराङ्मुखेनेत्यर्थः॥" इति तद्भाष्ये सायणः॥)

पुं,प्राचीरम्। तत्पर्य्यायः आवेष्टकः२ इतिः ३। इति हेमचन्द्रः। ४। ४८॥

प्राचीनपनसः, पुं, (प्राचीनः पनस इति मित्यकर्म्मधारयः।) बिल्वम्। इति त्रिकाण्डशेषः॥

प्राचीनबर्हिः, [स्] पुं, इन्द्रः। इति हेमचन्द्रः। २। ८५॥ (यथा, रघौ। ४। २८॥

स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा।
अहितानलनिर्दग्धैस्तत्कार्य्यमिव केतुभिः॥")

राजविशेषः। (यथा,महाभारते।१२।२०८।६॥

"अत्रिवंशे समुत्पन्नो ब्रह्मयोनिः सनातनः।
प्राचीनबर्हिर्भगवांस्तस्मात् प्रचेतसो दश॥")

यथा च।

"हविर्द्धानात् षड़ाग्नेयी पुत्रानजनयद्व्रतम्।
प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ॥
प्राचीनबर्हिर्भगवान् महानासीत् प्रजापतिः।
हविर्द्धानात् द्विजश्रेष्ठ! यैव संवर्द्धिताः प्रजाः॥
प्राचीनाग्राः कुशास्तस्य पृथिव्यां विश्रुता मुने।
प्राचीनबर्हिर्भगवान् ख्यातो भुवि महाबलः॥
समुद्रतनयायान्तु शतद्रौ मधुपर्यतः।
महतस्तपसः पारं सुवर्णायां महीपतिः॥
सुषुवे दश पुत्रांश्च शुक्लिनां वै प्रचेतसः।
दशवर्षसहस्राणि समुद्रसलिलेशयाः॥"

इति वह्निपुराणे वरसर्गो नामाध्यायः॥

प्राचीना,स्त्री,(प्राचीन+टाप्।)वनतिन्तिका। इत्यमरः।२।४।८५॥ आकनादि इति भाषा॥ रास्ना। इति शब्दचन्द्रिका॥ (प्राचि भवेति। प्राच्+खः। टाप्।) प्राग्भवा च॥ (पाठा।

तत्पर्य्यायौ यथा,—
"पाठाम्बष्ठावष्ठकौ च प्राचीना पाचचेलिका।
एकष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)
प्राचीनामलकं, क्ली, (प्राचीनमामलकमितिनित्यकर्म्मधारयः।) पानीयामलकम्। पानी आमला इति भाषा। तत्पर्य्यायः। वारिवटरम् २। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १। २०८। ४१।
"प्राचीनामलकैर्लोध्रैः रङ्गोलैश्च सुपुष्पितैः॥")
अस्य गुणः। दोषत्रयगरनाशित्वम्। इति भावप्रकाशः॥ (यथा च।
"गरदोषहरं नीपं प्राचीनामलकन्तथा॥"
इति शुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
प्राचीनावीतं, क्ली, (प्राचीनं प्रदक्षिणं आवीयते स्मेति। आ+वी गत्यादौ+क्तः। यद्वा, प्राचीनं आवेतीति। "गत्यर्थेति।" क्तः।) आद्यादौ वामकरे बहिष्कृते सति दक्षिणस्कन्धार्पितयज्ञसूत्रम्। इत्यमरभरतौ।२।७५०॥ तथाहि कौर्म्मे उपविभागे १० अध्याये।
"सव्यं बाहुं समुद्धृत्य दक्षिणे तु धृतं द्विजाः।
प्राचीनावीतमित्युक्तं पित्र्ये कर्म्मणि योजयेत्॥"
प्राचीनावीती, [त्] पुं, (प्राचीनावीतमस्तास्येति। प्राचीनावीत+इनिः।) प्राचीनावीतविशिष्टः। यथा। सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यं कक्षमवलम्बं भवति एवं प्राचीनावीती भवतीति। इति गोभिलः॥ प्रतिष्ठापयति यज्ञोपवीतमिति शेषः। इत्यादिकृतत्त्वम्॥
प्राचीपतिः, पुं, (प्राच्याः पूर्व्वस्या दिशः पतिः।) इन्द्रः। इति त्रिकाण्डशेषः॥
प्राचीरं, क्ली, (प्राचीयते इति। प्र+आ+चिञ् चयने+"सृसिचिमिजां दीर्घश्च।" उणा० २।२५। इति क्रन् दीर्घश्च।) प्राङ्गनो वृतिः। इत्यमरः। २। २। ३॥ पाँचील इति भाषा॥ दुर्गार्थं नगरादेः प्राङ्गभागे वेणुकण्टकवेत्रादिमयो वृतिर्वेष्टनिका। इति भरतः॥ मृण्मय्यामपि वृतौ प्राचीरमुपचारादिति स्वाम्यादयः॥ तत्पर्य्यायः। वृतिः २। इति भट्टः॥ प्राचीनम् ३। इति मुकुटः।
"प्राचीरं प्रावरोऽपि४स्यात् प्राहृतिः५ प्राङ्गनो वृतिः ६।
इष्टकामृत्तिकाद्यैश्च गृहवाह्यादिवेष्टने॥"
इति शब्दरत्नावली॥*॥

अथ प्राचीर निर्णयः।

"गजैरभेद्या मनुजैरलङ्घ्याः
प्राचीरखण्डा नृपतेर्भवन्ति॥
राजदण्डोद्यताः सर्व्वे प्राचीराः पृथिवीभुजः।
विंशतिस्ते तु पञ्चाद्ये पार्श्वयोः पञ्च पञ्च च॥
पश्चात् पञ्च च विज्ञेयाः प्राचीराः पृथिवीभुजः
सर्व्वप्रान्ते त्ववरणो नाम प्राचीर उच्यते॥
प्रतिप्राकारसंस्थानं द्वारं नाभिसुखस्थितम्"॥*

तत्र जयाख्यस्य दीर्घस्य वास्तुखण्डस्य निर्णयः। तद्यथा,—
"राजच्छत्रान्तरे पञ्च राजद्वारे मही पतेः।
राजदण्डत्रये सार्द्धे जयद्वारे प्रतिष्ठिताः॥
अद्वारे राजदण्डार्द्धे प्राचीराः पृथिवीपतेः।
एवं व्यवस्थिते स्थाने मध्यमे तद्धि तिष्ठति॥
राजच्छत्रत्रयं मार्द्दमायामे जयवास्तुनि।
परिणाहे पञ्च राजदण्डास्तिष्ठन्ति मध्यतः॥
राजपट्टाभिधानेन स्थानमेतत्त्रिगद्यते।
अस्मिन् गृहं नृपः कृत्वा सुचिरं सुखमश्नुते॥
अज्ञानाद्यस्तु राजा योऽन्यत्र गृहमारभेत्।
सोऽचिरान्मृत्युमाप्नोति रोगं शोकं भयन्तथा॥
यमदण्डोदयदण्डौ कोणार्द्धतिरुपप्लवः॥
ये चान्ये वास्तुदोषाः स्युः स्थाने दोषाश्च ये पुनः।
न स्पृश्यते राजपट्टैः सर्पैर्गरुडो यथा।
द्विगुणादितरोऽपि स्यात् क्रमाद्वज्रादि वास्तुषु॥
राजच्छत्रमितेऽप्येवं प्राचीरे गुणदोषकौ॥"
इति युक्तिकल्पतरुः॥

प्राचेतसः, पुं, (प्रचेतसोऽपत्यमिति। प्रचेतस्+अण्।) वाल्मीकिमुनिः। इति हेमचन्द्रः। ३।५१०॥ (यथा, रघुः। १५। ६३॥
"अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगदुर्गुरुचोदितौ॥"
प्रचेतसोऽपत्यमात्रम्। विष्णुः। यथा, हरिवंशे। २०३। १४॥
"प्रज्ञया तेजसा योगात्तस्मात् प्राचेतसः प्रभुः।
विष्णुरेव महायोगो कर्म्मणामन्तरङ्गतः॥"
दक्षः। यथा, महाभारते। १। ७५। ५।
"वीरिण्या सह सङ्गम्य दक्षः प्राचेतसो मुनिः।
आत्मतुल्यानजनयत् सहस्रं संशितव्रतान्॥")
प्राचेतसः, [स्] पुं, प्राचीनबर्हींराजपुत्राः। मान्तनित्यबहुवचनान्तोऽयम्। यथा,—
"एवमुक्तास्तु ते पुत्रास्ततः प्राचेतसो दश।
पयोधिमलिलं मग्नास्तपस्तेपे सुदारुणम्॥
पतत्त्रिराजमारूढं नीलोत्पलदलच्छविम्।
दृष्ट्वा प्राचेतसः सर्व्वे गिरोभिरवनीं गताः॥"
इति वह्निपुराणम्॥

प्राच्यः, पुं, (प्राचि भवः। प्राच्+"युप्राग्पागुदक्प्रतीचो यत्।" ४। २। १०१। इति यत्।) शरावत्याः प्रागुत्तरदिग्देशः। इत्यमरः। २। १। ७॥ (पूर्व्वदिग्भवे, त्रि। यथा मार्कण्डेये। ५७। ४२—४४।
"———प्राच्यान् देशान् निबोध मे।
अङ्गारका सुदकरा अन्तर्गिर्य्या बहिर्गिराः॥
यथा प्रवङ्गा वङ्गेया मालदा मालवर्त्तिकाः।
ब्राह्मोत्तराः प्रविजया भार्गवा क्षेयमल्लकाः॥
प्रागज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः।
मल्ला मगधगामल्लाः प्राच्या जनपदाः स्मृताः॥"
पूर्व्वदेशार्थे च, त्रि॥ (यथा, महाभारते। ८। ४५। २८॥
"प्राच्या दामा हृषला दाक्षिणात्याः।
स्तेना वाह्लीकाः सक्तरा वै सुराष्ट्राः॥")

प्राजकः, पुं, (प्राजयति प्रकर्षेण गमयति घोटकादीनिति। प्र+अज्+णिच्+ण्वुल्।) सारथिः। यथा, मनुवचने। ८। १८३॥
"यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य च।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां हिंयतं दमम्"
"यत्र सारथेरकौशल्यादुद्यानमन्यथा गच्छति तत्र हिंसायां अधिष्ठितसारथिनियोगात् स्वामी हिंयतं दण्डं दण्ड्यः स्यादिति कुल्लूकभट्टः।" इति प्रायश्चित्ततत्त्वम्॥
प्राजनं, क्ली, (प्रवोयतेऽनेनेति। प्र+अज्+ल्युट्। "वा यौ।" २। ४। ५७॥ इति पचे व्यभावः।) तोदनम्। इत्यमरः। २। ८। १२॥ पाचनोवाड़ी इति भाषा॥
प्राजापत्यं, क्ली, (प्रजापतिर्देवतास्येति। प्रजापति+"दित्यदित्यादित्यपत्युत्तरपदात् ण्यः।" ४।१।८५। इति ण्यः।) व्रतविशेषः। तत्र दिवसत्रयं रात्रिमात्रभोजनम् २२ ग्रासाः। दिवसत्रयं दिवामात्रभोजनम् २६ ग्रासाः। दिवसत्रयं अयाचितभोजनम् २४ ग्रासाः। दिवसत्रयं उपवासः। यथा,—
"त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्।
त्र्यहं परन्तु नाश्नीयात् प्राजापत्यं चरन् द्विजः॥"
ग्रासमंख्या परागरेणोक्ता।
"सायं द्वाविंशतिग्रासाः प्रातः षड्विंशतिस्तथा
अयाचिते चतुर्विंशः परस्त्वानयनं स्मृतम्॥"
इति प्रायश्चित्ततत्त्वम्॥*॥
तत्तु अगम्यागमनादिप्रायश्चित्तम्। यथा,—
"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुध्येच्चान्द्रायणाद्विप्रः प्राजापत्येन भूमिपः।
वैश्यः शान्तपनाच्छूद्रः पञ्चाशोभिर्विशुध्यति॥
प्रायश्चित्ते कृते दद्याद्गवां ब्राह्मणभोजनम्॥"
इति गारुड़े २२६ अध्यायः॥*॥
रोहिणीनक्षत्रम्। यथा—
"ऐन्द्रे गुरः शशी चैव प्राजापत्ये रविस्तथा।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता॥"
इति प्रायश्चित्ततत्त्वम्॥
(प्रजापतेरपत्यमिति। ण्यः प्रजापतिपुत्रः। यथा, कुमारे। ६। ३४॥
"तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीड़ां प्राजापत्यास्तपस्विनः॥"
प्रजापतेरिदमिति। प्रजापतिसम्बन्धिनि, त्रि। यथा, मार्कण्डेये। ५८। ७१॥
"प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम्।
स्थानमैन्द्रं क्षत्रियाणां सभामेष्वपलायिनाम्)"
प्राजापत्यः, पुं, (प्रजापतेरयमिति। प्रजापति+ण्यः।) "प्रजापतेर्यज्ञ आसीत् प्रयागे।" इति महाभारतीय। १। ५५। १॥ वचनात् तथात्वम्।) प्रयागः। इति त्रिकाण्डशेषः॥ जैनराजभेदः। तत्पर्य्यायः। त्रिपुत्रः २। इति हेमचन्द्रः। ३। ५९॥ कायनामकविवाहः।

सह धर्म्मं चरतां इति नियमं कृत्वा कन्या-दानम्। यथा,—
"दत्त्वा कन्या चरतां धर्म्मं सहजा दीयतेऽर्थिने।
स आयः पावयेत्तज्ज्ञः षट् षड्वंश्यान् सहा-त्मना॥"
इति मिताक्षरा॥
आयः कः प्रजापतिर्देवता अस्येति प्राजापत्य इत्यर्थः। दत्त्वेत्यादृतत्वम्॥ (तथा च मनुः। ३। ३०।
"सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥"
प्राजापत्या, स्त्री, (प्रजापतिर्देवतास्या इति। प्राजापति+यः। स्त्रियां टाप्।) प्रव्रज्या-ग्रमपूर्वकर्त्तव्यप्रजापतिदेवताकसर्व्वस्वदक्षिणा इष्टिः। यथा, मानवे ६ अध्याये।
"प्राजापत्यां निरूप्येष्टिं सर्व्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्-गृहात्॥"
प्राजिता, [क्त] पुं, (प्राजतीति। प्र+अज्+क्त। वोभावाभावः।) सारथिः। इत्यमरः। २। ८। ५८॥ प्रकृष्टगन्तरि, त्रि॥
प्राज्ञः, पुं, (प्रकर्षेण जानातीति। प्र+ज्ञा+कः। ततः प्रज्ञ एव स्वार्थे अण्।) कल्कि-देवस्य ज्येष्ठभ्राता। यथा,—
"कल्किं द्रष्टुं हरेरंशमाविर्भूतञ्च शम्भले।
कविं प्राज्ञं सुमन्त्रञ्च पुरस्कृत्य महाप्रभम्॥"
इति कल्किपुराणे द्वितीय अध्यायः॥
पण्डितः। इत्यमरः। २। ७। ५॥ (यथा,—
"पण्डिते च गुणाः सर्व्वे मूर्खे दोषा हि केवलम्।
तस्मान्मूर्खसहस्रेषु प्राज्ञ एको विशिष्यते॥"
इत्युद्भटः॥)
राजयुक्तः। इति राजनिर्घण्टः॥ (प्रकर्षेण अज्ञः इति विग्रहे मूर्खोऽपि॥)
प्राज्ञः, त्रि, (प्रज्ञ+स्वार्थे अण्। यद्वा, प्रज्ञा-स्वस्येति। अच्।) पण्डितः। (यथा, महा-भारते। १। १४६। १८॥
"धीरेषु विनिवृत्तेषु विदुरः सर्व्वधर्म्मवित्।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत्॥
प्राज्ञः प्राज्ञं प्रलापज्ञः प्रलापज्ञमिदं वचः॥")
दक्षः। इति शब्दरत्नावली॥ (विज्ञः। यथा, मनुः। २। १२३।
"नामधेयस्य ये केचिदभिवादं न जानते।
तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्व्वास्तथैव च॥")
प्राज्ञमानी, [न्] त्रि, (आत्मानं प्राज्ञं मन्यते इति। प्राज्ञ+मन्+णिनिः।) पण्डिताभि-मानी। यथा, चरके।
"दुःखिताय भयार्त्ताय श्रद्दधानाय रोगिणे।
यो भेषजमभिप्राय प्राज्ञमानी प्रयच्छति॥"
प्राज्ञा, स्त्री, (प्रज्ञास्वस्या इति। अच्। टाप्। बुद्धिमती। तत्पर्य्यायः। धीमती २। इत्य-मरः। २। ६। १२॥ बुद्धिः। यथा,—

"प्रज्ञा प्राज्ञा धरा क्षितिः पद्मा संवेदनं विदा"
इति रायमुकुटधृतशब्दार्णवः॥
प्राज्ञी, स्त्री, (प्रज्ञ+स्वार्थे अण्। ङीप्।) स्वयं प्राज्ञी। तत्पर्य्यायः। प्रज्ञा २। इत्यमरः। २। ६। १२॥ पण्डितपत्नी। इति प्राज्ञशब्दटीकायां भानुदीक्षितः॥
प्राज्यं, त्रि, प्रवीयते इति। प्र+अज्+क्यत्। वीभावाभावः।) प्रचुरम्। इत्यमरः। ३। १। ६३॥ (यथा, कुमारे। २। १८।
"स्वागतं स्वानधीकारान् प्रभावैरवलम्ब्य वः।
युगपद्युगबाहुभ्यः प्राप्तेभ्यः प्राज्यविक्रमाः॥"
प्रभूतं आज्यं घृतं यस्येति 'विग्रहे प्रचुरघृत-सम्यक्। प्रज्ञाद्यमाज्यमिति विग्रहे प्रज्ञाद्य-घृते, क्ली॥)
प्राञ्जलः, त्रि, (प्र+अञ्ज+बाहुलकात् अलच्।) सरलः। यथा,—
"ऋजावजिह्मप्रगुणौ प्राञ्जलः सरलोऽपि च।"
इति जटाधरः॥
प्राट्, [ड्] पुं, पृच्छति यः। (प्रच्छ+"क्विप् वचिप्रच्छौति।" उणा० २। ५७। इति क्विप् दीर्घः सम्प्रसारणाभावश्च।) प्रश्नकर्त्ता। इति मुग्धबोधव्याकरणम्॥
प्राड्विवाकः, पुं, (पृच्छतीति प्राट् विविच्य वक्तीति विवाकः। ततः कर्म्मधारयः।) व्यवहारद्रष्टा। जज् इति इङ्गरेजी भाषा। तत्पर्य्यायः। अक्ष-दर्शकः २। इत्यमरः। २। ८। ५॥ व्यवहार-दर्शी ३। इति शब्दरत्नावली॥ ते व्यव-हाराणां ऋणादानादिविवादानां द्रष्टरि निर्णे-तरि धर्म्माध्यक्षे इत्यर्थः। पृच्छति वादिप्रति-वादिवाक्यं प्राट् दृक्ष्यङ्क्ष्वाक् प्राड्इति निपातः विविच्य वक्ति विवाकः कर्त्तरि घञ् प्राट् चासौ विवाकश्चेति प्राड्विवाकः।
"विवादाभ्युगतं पृष्ट्वा पूर्ववाक्यं प्रयत्नतः।
विचारयति यैनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति स्मृतिः। इति भरतः॥
अपि च। अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्व्वचनं विरुद्धाविरुद्धञ्च सभ्यैः सह विवि-नक्ति विवेचयति वेति विवाकः प्राट् चासौ विवाकश्चेति प्राड्विवाकः। उक्तञ्च।
"विवादाभ्युगतं पृष्ट्वा समभ्यस्तात् प्रजल्पतः।
विचारयति यैनासौ प्राड्विवाकस्ततः स्मृतः॥"
इति मिताक्षरा॥
प्राणः, पुं, (प्राणिति जीवति यदुकालमिति। प्र+अन्+अच्। प्राणित्यनेनेति करणे घञ् वा।) ब्रह्मा। इति त्रिकाण्डशेषः॥ ब्रह्मा-कृतः। (यदुक्तम्।
'हृदिप्राणो गुदेऽपानः समानो नाभिसंस्थितः')
वोलः। काव्यजीवः। अनिलः। बलम्। (यथा, हरिवंशे। ८६। ३६।
"बाहुप्राबल्येन शूराणां समाजोत्सवसन्निधौ॥")
पूरिते, त्रि। इति मेदिनी॥ सूक्ष्मशरीरसमष्टु-पहितचैतन्यम्॥ प्राग्गमनवान् नासाप्रस्थान-वर्त्ती वायुः। इति वेदान्तसारः॥ तस्य कर्म्म बहिर्गमनम्। इति श्रीधरस्वामी॥ तस्य रूपं स्थानानि च यथा,—
"इन्द्रनीलप्रतीकाशं प्राणरूपं प्रकीर्त्तितम्।
आस्यनासिकयोर्म्मध्ये हृत्पद्मे नाभिमध्यगे॥
प्राणाख्य इति प्राहुः पादाङ्गुष्ठेऽपि केचन॥"
इति योगार्णवः॥
(यथा महाभारते। १२। ३२८। १५।
"प्राणिनां सर्व्वतो वायुर्येष्टां वर्त्तयते पृथक्।
प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते॥")
पञ्चप्राणविवरणं बहुवचनान्तप्राणशब्दे द्रष्ट-व्यम्॥ धातुः पुत्रः। यथा,—
"आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्य्ये धातृविधातृभ्यां तयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च पिता मम महायशाः॥"
इति मार्कण्डेये दक्षसर्गाध्यायः॥
(घरपुत्रविशेषः। यथा मत्स्यपुराणे। ५। २३-२४
"द्रविणो हव्यवाहश्च नरपुत्रावुभौ स्मृतौ।
कल्यानिन्यां ततः प्राणो रमणः शिशिरोऽपि च॥
मनोहरा धरात् पुत्रानवापाथ हरेः सुता॥")
प्राणकः, पुं, (प्राणैः प्राणेन वा कायतीति। कै+कः।) सत्त्वजातीयः। प्राणिमात्रम्। जीवद्द्रुमः। चोलः। इति मेदिनी। के, ११५॥
प्राणयः, पुं, (प्राणित्यनेनेति। प्र+अन् प्राणने +"शीङ्शपिरुगमीति।" उणा० ३। ११३। इति अयः।) वायुः। (प्राणितीति। कर्त्तरि अयः।) बलवान् इत्युणादिकोषः॥ प्रजा-पतिः। तीर्थम्। इति संक्षिप्तसारोणादिवृत्तिः॥
प्राणदं, क्ली, (प्राणं प्राणनं बलं वा ददातीति। प्राण+दा+"आतोऽनुपेति।" ३। २। ३। इति कः।) जलम्। रक्तम्। इति हेमचन्द्रः। ४। १३६॥ (प्राणदातरि, त्रि। यथा, कथा-सरित्सागरे। २८। ८॥
"अर्थप्रदानमेवाहुः संसारे सुमहत् तपः।
अर्थदः प्राणदः प्रोक्तः प्राणा ह्यर्थेषु कीलिताः॥")
प्राणदः, पुं, (प्राणं ददातीति। दा+कः।) जीवकवृक्षः। इति राजनिर्घण्टः॥
प्राणदा, स्त्री, (प्राणं जीवनं बलं वा ददातीति। दा कः। टाप्।) कण्टिवृक्षः। हरीतकी। इति राजनिर्घण्टः॥ (प्राणदात्री। यदुक्तम्। "यमोहरेः किमाश्चर्य्यं प्राणदा यमदूतिका॥")
प्राणनं, क्ली, (प्र+अन प्राणने+ल्युट्।) जीव-नम्। इति जटाधरः॥ (यथा, भागवते। २। २६। ४१।
"क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोन्दनम्।
तापापनोदो भूयस्त्वमन्नसो हृत्तयस्त्विमाः॥"
चेष्टनम्। यथा, ऋग्वेदे। १। ४८। १०।
"विश्वस्य हि प्राणनं जीवनं त्वे वियदुच्छसि सूनरि॥"
"हे सूनरि उषोदेवि विश्वस्य सर्व्वस्य प्राणि-जातस्य प्राणनं चेष्टनं जीवनं प्राणधारणञ्च।"

इति तट्टीकायां भरतः ॥ प्राणित्यनेनेति करणे घञ् (घञ्) गले, पुं । (इति शब्दचन्द्रिका ॥
प्राणनाथः, पुं, (प्राणानां नाथः ।) पतिः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"वाट्कारमपि प्राणनाथं रोषादपास्य वा ।
यद्वान्तापनयत्याप्नोति कलहान्तरिता तु सा ॥"
स्त्रियां टाप् । पत्नी । यथा, विष्णुस्तोत्रे ।८।
"धात्रीं स्थात्रीं त्रिनेत्रीं प्रकृतिमविकृतिं विश्व यत्रिं विधात्रीं
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥")
प्राणन्तः, पुं, (प्राणित्यनेनेति । प्र + अन् + "कृषि नन्दिग्रहिपचादिभ्यः ल्युण्यादिभ्यः ।" उणा० ३ । १२७ । इति झच् ।) वायुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ रक्षाञ्जनम् । इत्युणादिकोषः ॥
प्राणन्ती, स्त्री, (प्र + अन् झच् । स च णित् । णित्त्वात् ङीष् ।) क्षुत् । छिका । इत्युणादिकोषः ॥
प्राणप्रदा, स्त्री, (प्राणं प्रददातीति । प्र + दा + कः ।) दक्षिणाभेदः । इति रत्नमाला ॥ (प्राणदातरि, त्रि । यथा, कथासरित्सागरे ।२२।८८।
"त्वाञ्च दृष्ट्वाधुनाम्भोयो देवि ! प्राणप्रदः सुहृत्
सार्थवाहसुतः श्रीमान् वसुदत्तो मया कृतः ॥")
प्राणभास्वान्, [त्] पुं, (प्राणेन वायुना जलेन वा भास्वान् उद्दीप्तः । समुद्रः । इति शब्दरत्नावली ॥
प्राणमयकोषः, पुं, (प्राणमयः कोषः आच्छादकः ।) कर्म्मेन्द्रियसहितप्राणादिपञ्चकम् । इति वेदान्तसारः ॥
प्राणसंयमः, पुं, (प्राणानां संयमः ।) प्राणायामः । यथा, "तदशक्तौ तत्तुर्यमेवं प्राणस्य संयमः ॥" इति तन्त्रसारः ॥
प्राणसत्र, [न्] क्ली, प्राणानां सत्रं सङ्घम् ।) शरीरम् । इति केचित् ॥
प्राणसमा, स्त्री, (प्राणानां समा ।) पत्नी । इति हेमचन्द्रः । ३ । १८० ॥ (यथा, गीतगोविन्दे । १ । ३८ ।
"नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥"
प्राणतुल्ये, त्रि । यथा, रामायणे ।१।१।२६ ।
"रामस्य दयिता भार्य्या नित्यं प्राणसमा हिता ॥"
तथा च तत्रैव । २ । ३१ । १० ।
"प्रियः प्राणसमो वश्यो विधेयश्च सखा च मे ॥"
पत्यौ, पुं । इति हेमचन्द्रः । ३ । १८० ॥)
प्राणहारकं, क्ली, (प्राणान् हरतीति । हृ + ण्वुल् ।) वत्सनाभः । इति राजनिर्घण्टः ॥ असुनाशके, त्रि ॥
प्राणाः, पुं, (प्राणित्यनेभिरिति । प्र + अन + करणे घञ् । बहुत्वं । इत्यमरः । २ । ८ । ११८ ॥
"हे अङ्गुलिविहितेषु पञ्चवायुषु । चक्षुरादेषु चक्षवः नाड्यादीति डः । प्राणितीति प्रभिः प्राणाः घञ् । एवमिति बहुवचनात् प्राणा अपि पुं बहुत्वे दृश्यते: बहुप्राणशब्दाभ्यां बहुवचनान्ताभ्यां पञ्चप्राणादय उच्यन्ते न पुनरेकैकाभिधाने बहुवचनम् अतएव प्राणोऽपान इत्युक्तं हृदि प्राणो गुदेऽपान इत्यादि च दृश्यते ।" इति तट्टीकायां भरतः ॥ (यथा, हितोपदेशे । १ । ७१ ।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः ॥")
शरीरस्थपञ्चप्राणा यथा,—
"प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ॥"
शरीरस्था इमे——————————॥"
इत्यमरः । १ । १ । ६७ ॥
"इमे प्राणादयः पञ्च वायवः शरीरं तिष्ठन्ति ते च नियतस्थानस्थाः ॥ यदाहुः ।
"हृदि प्राणो गुदे पानः समानो नाभि-
संस्थितः ।
उदानः कण्ठदेशे च व्यानः सर्वशरीरगः ॥"
एवं तद्व्यापाराश्च यथा,—
अन्नप्रवेशनं मूत्रादेर्युत्सर्गोऽवविधारणम् ।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी ॥"
इति च भरतः ॥
प्राणकरादि यथा,—
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् ।
घृतमृष्टोदकञ्चैव सद्यःप्राणकराणि षट् ॥"
प्राणहराणि यथा,—
"शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तप्तमन्नं दधि
प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥"
इति पाद्मक्रियायोगसारे ॥
प्राणवियोगकालकर्त्तव्यं यथा,—
कण्ठस्थानं गते जीवे भीतिविभ्रान्तमानसः ।
ज्ञात्वा च विह्वलं तत्र क्षिप्रं निःसारयेद्गृहात् ॥
कुशास्तारणमायी च दिशः सर्वा न पश्यति ।
लक्ष्यभूतिमुहूर्त्तान्तु यावज्जीवो न नश्यति ॥
वाचयेत् स्वेष्टभावेन भूमौ देवा द्विजातयः ।
सुवर्णञ्च हिरण्यञ्च यथोत्पन्नेन माधवि ॥
परलोकहितार्थाय गोप्रदानं विधीयते ।
सर्व्वदेवमया गावः ईश्वरेणावतारिताः ॥
अमृतं चरयन्त्यग्र्य प्रचरन्ति महीतले ।
एतासाञ्चैव दानेन क्षिप्रं मुच्येत किल्बिषात् ॥
पश्चात् श्रुतिपथं दिव्यमुत्क्रमेण च श्रावयेत् ।
यावत्प्राणान् प्रमुञ्चेत ज्ञात्वा कर्म्म सुदुष्करम् ॥
दृष्ट्वा सुविह्वलं क्षीणं मम मार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्व्वकम् ॥
मन्त्रेणानेन कर्त्तव्यं सर्व्वसंसारमोचणम् ।
मधुपर्कं त्वरन् गृह्य इदं मन्त्रमुदाहरेत् ॥"
मन्त्रः ।
"गृहाण चेमं मधुपर्कमाद्यं
संसारमोचनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्-प्रियार्थां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
तत्र एतेन मन्त्रेण इत्यादि सर्वमुक्तम् ।
पुरुषो मृत्युकाले तु परलोकसुखावहम् ॥
एवं विनिःसृतात् प्राणात् संसारञ्च न गच्छति
नष्टसंज्ञं समुद्दिश्य ज्ञात्वा कृत्यमथं गतम् ॥
महावनस्थितिं गत्वा गन्धांश्च विविधानपि ।
घृततैलसमायुक्तं ज्ञात्वा वै देहयोधनम् ॥
तेजोऽव्ययकरं वाक्यं तस्यार्थं परिकल्प्य च ।
दक्षिणायां शिरः कृत्वा चक्षिप्ते तं निधाय च ॥
तीर्थावाहनं कृत्वा स्नापनं तस्य कारयेत् ॥
गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गा च यमुना च सरिद्वरा ॥
कौशिकी च पयोष्णी च सर्व्वपापप्रणाशिनी ।
गण्डकी भद्रनामा च सरयुर्बाहुदा तथा ॥
वनानि नववाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः सागरास्तथा
सर्व्वाणि मनसा ध्यात्वा स्नानमेवन्तु कारयेत् ॥
प्राणायतन्तु तं ज्ञात्वा चितां कृत्वा विधानतः ।
तस्यां उपरि तं स्नाप्य दक्षिणाग्रं शिरस्तथा ॥
देवाग्निमुखान् ध्यात्वा गृह्य सूत्रं हुताशनम्
प्रज्वाल्य विधिवत्तत्र मन्त्रमेतदुदाहरेत् ॥"
मन्त्रः ।
"ज्ञात्वा तु दुष्करं कर्म्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरः पञ्चत्वमागतः ॥
धर्म्माधर्म्मसमायुक्तो लोभमोहसमावृतः ।
दहेयं तस्य गात्राणि दैवलोकाय गच्छतु ॥
एवमुक्त्वा ततः शीघ्रं ज्ञात्वा चैव प्रदक्षिणम् ।
ज्वलमानं तदा वह्निं शिरःस्थाने प्रदापयेत् ॥
चातुर्व्वर्ण्येषु संस्कारमेवमेव प्रवर्त्तते पुत्रक ! ।
गात्राणि वाससी चैव प्रक्षाल्य विनिवर्त्तयेत् ॥
स्नानन्तु तदोद्दिश्य दद्यात् पिण्डं महीतले ।
तदाप्रभृति चाग्नीचं दैवकर्म्म न कारयेत् ॥"
इति वराहपुराणे आद्योत्पत्तिनामाध्यायः ॥
प्राधा, स्त्री, (प्राधिति बहुकालमिति । प्र + धन् + अच् । टाप् ।) पत्नीविशेषः । सा चारुणगरुड्योः स्वस्रूः । यथा,—
"पुत्रस्यात्मजः सर्गः प्राणायास्तु निबोधत ।
कन्याः षड्डिति विख्याताः प्राधाया वै विजज्ञिरे ॥
श्येनी भासी तथा क्रौञ्ची धृतराष्ट्री शुनी शुकी
अरुणस्य भार्य्या श्येनी वैनतेयवतो महाबलो ॥
सम्पातिश्च जटायुश्च प्रसूतौ पक्षिणौ सुतौ ।
सम्पातिर्जनयन् पुत्रान् बाहुं शूरान् जटायुषः
भार्य्या गरुत्मतश्चापि भासी क्रौञ्ची शुनी शुकी ॥"
इत्यग्निपुराणम् ॥
प्राणाधिनाथः, पुं, (प्राणानामधिनाथः ।) पतिः । इति हलायुधः । २ । ३४२ ॥
प्राणापानौ, पुं, (प्राणश्च अपानश्च तौ । तदाख्यको वायू । यथा, विष्णुपुराणे ।६।७।४१ ।
"परस्परेणाभिभवं प्राणापानौ यदानिलौ ॥")
अश्विनीकुमारौ । यथा,—
"प्राणापानौ कथं देवावश्विनौ संवभूवतुः ॥"
इति प्रजापाशब्दे ।

ब्रह्मोवाच ।
"तस्यां त्वाट्टाममात्रस्यां मार्कण्डस्तीव्रतेजसा
बीजं निर्वापयामास तच्चक्षं तदिधापतत् ॥
तत्र प्राचक्षयामास योगी चालजितो पुरा ।
वरदानेन च पुनर्मुर्त्तिमन्तौ बभूवतुः ॥
तौ त्वाट्टाममात्रस्तिस्रां जातौ वेन नरोत्तमौ ।
ततस्तावक्षिणौ दत्तौ बीजाते रक्षिमन्दनौ ॥"
इति वाराहे अक्षिनोरुत्पत्तिनामाध्यायः ॥
प्राणायामः,पुं,(प्राणस्य वायुविशेषस्य आयामो रोधः । यद्वा, प्राच आयम्यतेऽनेनेति । आ+यम्+अर्थे घञ् ।) योगाङ्गविशेषः । (यथा, भागवते । ३ । २८ । ११ ।
"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ॥")
तत्प्राकृतिनियमो ज्ञानार्णवे ।
"अनिष्टानामिकाङ्गुष्ठैर्यथासापुटधारणम् ।
प्राणायामः स विज्ञेयस्तज्जनीमध्यमे विना ॥"
स द्विविधः । सगर्भो निर्गर्भश्च । तथा च ।
"सगर्भो मन्त्रजापेन निर्गर्भो मात्रया भवेदिति"
मात्रा च ।
वामजानुनि तत्तस्याभ्रामणं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"
अथ प्राणायामः । सूक्ष्ममन्त्रस्य बीजस्य प्रणवस्य वा षोड़शवारजपेन वामनासापुटे वायुं पूरयेत् तस्य चतुःषष्टिवारजपेन वायुं कुम्भयेत् । तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत् । पुनर्दक्षिणेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । पुनर्वामेनापूर्य्य उभाभ्यां कुम्भयित्वा दक्षिणेन रेचयेत् । तथा च कालीहृदये ।
"प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
अथवा मन्त्रबीजेन यथोक्तविधिना सुधीरिति॥"
शारदमुच्चयेऽपि ।
"विपरीतमतो विद्यौत बुधः
पुनरेव तु तद्विपरीतकमिति ॥"
यौगिके पुनर्मात्रानियमः । तथा च गौतमीये ।
"मन्त्रः प्राणायामः प्रोक्तो यौगिकं कथयामि ते
पूरयेद्वामया विद्वान् मात्राषोड़शसंख्यैति ॥"
यद्वा, चतुःषोड़शाष्टवारजपेन पूरकादिकं कुर्य्यात् । अथवा एकचतुर्द्विवारेण । तथा च तन्त्रान्तरे ।
"पूरयेत् षोड़शभिर्वायुं धारयेत्तच्चतुर्गुणैः ।
रेचयेत् कुम्भकार्द्धेन अथवा तत्तुरीयकैः ॥"
तदशक्तौ तच्चतुर्थमेव प्राणस्य संयमः । अस्य नित्यत्वमाह तत्रैव ।
"प्राणायामं विना मन्त्रपूजने न हि योग्यता॥"
गोपाले तु विशेषो यथा, —
कामबीजस्यैकवारजपेन दक्षिणनासया वायुं रेचयेत् । पुनः सप्तवारजपेन वामनासया वायुं पूरयेत् । नासापुटौ धृत्वा त्रिंशतिवारजपेन वायुं कुम्भयेत् । पुनर्वामेन रेचयेत् । दक्षिणेन पूरयेत् । उभाभ्यां कुम्भयेत् पुनर्दक्षिणेन रेचयेत् । वामेनापूर्य्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत् । तथा च ।
"एवमेव रेचयेत् कामबीजेनैव दक्षवत् पृथक् ।
पूरयेत् सप्तजप्तेन विंशत्या तेन धारयेत् ।
सर्व्वेषु क्षणमात्रेषु बीजेनानेन रेचयेत् ॥"
यदा सूक्ष्ममन्त्रेणैव प्राणायामः । तदा च ।
"पवनसंयमनञ्चसुनाचरेत् ।
यतिश्च जपमन्त्रो मनुमिच्छति ।"
यदि दयाक्षरं जपति तदा दयाक्षरेण चैतच्च चाष्टाविंशतिवारं रेचयेत् ।
"पूरयेद्दामया तद्वदारयेत्तत्प्रमाणतः ।
प्राणायामो भवेदेको रेचपूरकुम्भकैः ॥
अष्टाद्यक्षरेण चेत् द्वादशैवं समाचरेत् ॥"
अन्यमनुभिर्वर्णानुरूपमित्यन्यत्वात् ।
तत्तन्मन्त्रवर्णसंख्यामे रेचकादित्रयं कुर्य्यात् ।
क्रमदीपिकायाम् । रेचयेन्नासतं दक्षया दक्षिणेन । पूरयेद्वामया मध्यनाड्या पुनर्धारयेदित्यादि एतत्तु श्रीक्रममन्त्रविषयं नान्यत्र ।
इति तन्त्रसारः ॥ * ॥ अपि च ।
"आसनं पद्मकाद्युक्तं प्राणायामो मनोजयः ।
मन्त्रध्यानयुतो गर्भो विपरीतो ह्यगर्भकः ॥
अगर्भात्तु सगर्भस्तु प्राणायामस्ततोऽधिकः ।
एवं द्विधा त्रिधाप्युक्तः पूरकात् पूरकः स च ॥
कुम्भको निश्चलत्वात् स रेचनाद्रेचकस्त्रिधा ।
लघुर्द्वादशमात्रः स्याच्चतुर्विंशतिकः परः ॥
षट्त्रिंशन्मात्रिकश्चेष्टः प्रत्याहारश्च रोधनम्॥"
इति गारुड़े ४८ अध्यायः ॥*॥
तस्य फलं यथा,—
"प्रथमे जनयेत् स्वेदं मध्यमेन च वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥"
इति तत्रैव २३० अध्यायः ॥ * ॥
अन्यच्च ।
"यथा पर्व्वतधातूनां ध्मातानां दह्यते मलम् ।
तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात् ॥
प्रथमं साधनं कुर्य्यात् प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदत्रैकं ! शृणुष्व मे ॥
लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः ॥
निमेषोन्मेषणे मात्रा तालो लघ्वक्षरो मतः ।
प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः ॥
प्रथमे जनयेत् स्वेदं मध्यमेन तु वेपथुम् ।
विषादं हि तृतीयेन जयेद्दोषाननुक्रमात् ॥
मृदुत्वं सेव्यमानास्तु सिंहव्याघ्रद्विपद्विपाः ।
यथा यान्ति तथा प्राणो वश्यो भवति योगिनः॥
वश्यं सन्तं यथेच्छातो नागं नयति हस्तिपः ।
तथैव योगी छन्देन प्राणं नयति साधितम् ॥
यथा हि साधितः सिंहो मृगान् हन्ति न मानुषान् ।
तद्वत्सिद्धः पवनः सिद्धिदं न मृत्युं तनुम् ।
तस्मादयुक्तः सदा योगी प्राणायामपरो भवेत्
श्रूयतां मुनिशार्दूलं तस्यावस्थाचतुष्टयम् ॥
ऋद्धिः प्राप्तिश्चाथ सम्भिन्नत्वादथ जयीयते ॥
स्वरूपं मृत्युजयिनोर्यस्मान्मननमुच्यते ॥
कर्म्मभिर्दुष्टदुष्टानां जायते फलसंक्षयः ।
येनसो विक्षयावत्वं यत्र सा ऋद्धिरुच्यते ॥"
दुष्टदुष्टानां पुण्यपापानाम् ।
ऐहिकामुष्मिकान् कामान् सोमसोदाम-
कांश्च यान् ।
निरुध्याशे सदा योगी प्राप्तिः सा सार्व्व-
कामिकी ॥
अतीतानागतानर्थान् विप्रकृष्टतिरोहितान् ।
विजानन्तीन्दुसूर्य्यर्क्षग्रहाणां ज्ञानसम्पदा ॥
तुल्यप्रभावत्वं सदा योगी प्राप्नोति सम्भिदम् ।
तदा सम्भिदिति ख्याता प्राणायामस्य सा
क्षितिः ॥
यान्ति प्रसादं येनाश्च मनः पञ्च च वायवः ।
इन्द्रियाणीन्द्रियार्थाश्च स प्रसाद इति स्मृतः ॥
शृणुष्व च महीपाल ! प्राणायामस्य लक्षणम् ।
युक्तस्य यथायोगं यादृग्विकृतमानसम् ॥"
इति मार्कण्डेयपुराणे योगिचित्तिज्ञानामाध्यायः ॥*॥ अन्यच्च ।
"प्राणाख्यमनिलं वह्निमभ्यासात् कुरुते तु यत्
प्राणायामः स विज्ञेयः सबीजोऽबीज एव च॥
परस्परेणाभिभवं प्राणापानौ यदानिलौ ।
कुरुतः सहितेनेह तृतीयः संयमात् त्रयोः ॥
तस्य चालम्बनवतः स्वरूपं द्विजोत्तम ! ।
आलम्बनमनन्तस्य योगिनोऽभ्यसतः स्मृतम् ॥"
एतेषां टीका ।"प्राणायाममाह प्राणाख्यमिति सबीजः सालम्बनो भगवन्मूर्त्तिध्यानमन्त्रजपसहितः । द्विविधस्यापि तस्य पुनस्त्रैविध्यमाह परस्परेणेति । उच्छ्वासेन मुखनासिकाभ्यां बहिर्निर्गच्छति वायुः स प्राणः । निश्वासेनान्तः प्रविशति यः सोऽपानः । तत्र प्राणहस्वापानहस्वेरभिभवो निरोधो रेचकाख्यः प्राणायामः । एवमपानहस्वा प्राणहस्वेरभिभवः पूरकाख्यः । एवमनेन परस्पराभिभवप्रकारद्वयेन स प्राणायामो द्विधा । तयोर्युगपत्संयमात् कुम्भकाख्यस्तृतीयः प्राणायामः यदा । सहितेनेत्येकमेव पदम् । तत्र चायमर्थः । सहितेन सद्गुरूपदिष्टमार्गेण रेचकपूरकाभ्यां यत् परस्पराभिभूतं द्वयं यच्च कुम्भकेनोभयोः सहाभिभवः । एवमभिभवत्रयेणैव प्राणायाम इति । सबीजस्यालम्बनमाह । तस्य चेति । स्थूलं वक्ष्यमाणं हिरण्यगर्भादिरूपम् ।"इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥ * ॥ गायत्रीप्राणायामो यथा,—
"सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥
प्राणायामत्रयं कृत्वा प्राणायामैस्त्रिभिस्त्रिभिः
अहोरात्रकृतात् पापान्मुच्यते नात्र संशयः ॥
सर्व्वपापहरं प्रोक्तं प्राणायामं द्विजन्मनाम् ।

ततस्त्वभ्यधिकं नास्ति तपः परमपावनम् ॥
प्राणसंधारणं मात्रं कुर्यात्पश्चात्तु तर्पणम् ।
यः कुर्य्यात् प्रयतो नित्यं प्राणायामस्तु तत्त्रयम् ॥
निरोधाज्जायते वायुस्तस्मादग्निस्ततो जलम् ।
त्रिभिः शरीरं सकलं प्राणायामेन शुध्यति ॥
आकैयादानखाग्राच्च तपस्तप्येत् सुदारुणम् ।
आत्मानं शोधयेद्यस्तु प्राणायामैः पुनः पुनः ॥
अवश्यां पौर्णमास्याञ्च सोपवासो जितेन्द्रियः ।
प्राणायामशतं कृत्वा मुच्यते सर्वकिल्बिषैः ॥"
इत्यग्निपुराणम् ॥

प्राणिद्यूतं, क्ली, (प्राणिभिर्मेषादिभिः कृतं द्यूतमिति मध्यपदलोपी समासः ।)पशुपूर्व्वकमेषकुक्कुटादियुद्धम् । तत्पर्य्यायः । समाह्वयः २ । इत्यमरः । २ । १० । ४६ ॥ साह्वयः । ३ । इति शब्दरत्नावली ॥

प्राणिमाता, स्त्री, (प्राणिनां मातेव गर्भदात्रीत्वात् ।)गर्भदात्रीधुपः । इति राजनिर्घण्टः ॥

प्राणिहिता, स्त्री, (प्राणिनां हिता ।) पादुका । इति त्रिकाण्डशेषः ॥ लोकहितकारिणी च ॥

प्राणी, [न्] त्रि, (प्राणाः सन्त्यस्येति । प्राण + "अत इनिठनौ ।"५ । २।११५ । इति इनिः ।) प्राणविशिष्टः । मनुष्यादिः । तत्पर्य्यायः । चेतनः २ जन्मी ३ जन्तुः ४ जन्तुः ५ शरीरी ६ । इत्यमरः । १ । ४ । ३० ॥ (यथा, मनौ । १ । २२ ।
"कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः ।
साध्यानाञ्च गणं सूक्ष्मं यज्ञञ्चैव सनातनम् ॥")

प्राणीत्यं, क्ली, (प्रणीतस्य प्रयोजितस्य भावः । प्रणीत + ष्यञ् ।)ऋणम् । यथा, त्रिकाण्डशेषः ।
"प्राणीत्यऋणमर्थानां प्रयोगः स्यात् कलाम्बिका ॥"

प्राणेशः, पुं, (प्राणानामीशः ।) पतिः इति जटाधरः ॥(यथा, साहित्यदर्पणे १ परिच्छेदे ।
"स्वामिन् ! भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश ! त्रुटितं पयोधरतटे हारं पुनर्योजय ॥")

प्राणेशा, स्त्री, (प्राणानामीशा ।) भार्य्या । इति हेमचन्द्रः ॥

प्रातः, [र्] अ, (प्रातरिति । प्र + अत् + "प्रातरत्" उणा० ५।५९। इति अरन् ।)
प्रभातम् । तत्पर्य्यायः । प्रगे २ । इत्यमरः । ३। ४ ।१९॥ सूर्य्योदयादवधिर्मुहूर्त्तकालः । यथा,—
"प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु॥"
इति तिथ्यादितत्त्वम् ॥
(यथा, रघौ । १ । ९० ।
"प्रयता प्रातरन्वे तु सायं प्रत्युद्व्रजेदपि ॥")

प्रातःकृत्यं, क्ली,(प्रातःप्रभातकालस्य कृत्यं कर्त्तव्या क्रिया ।) प्रभातकर्त्तव्यकर्म्म । तदनुष्ठानं यथा,
"ब्राह्मे मुहूर्त्ते उत्थाय धर्म्ममर्थञ्च चिन्तयेत् ।
कायक्लेशांस्तदुद्भूतान् ध्यायेत्तं मनसेश्वरम् ॥

उषःकालेऽथ संप्राप्ते श्रुत्वा चापश्यकं गुरुः ।
स्नायाद्नदीषु गुह्यासु गौणं श्रुत्वा यथाविधि ॥
प्रातःस्नानेन शुध्यन्ति यैऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टफलं शुभम् ।
ऋषीणां शुचिता नित्यं प्रातःस्नानाच्च संयमः ॥
मुखे मुखस्य सततं स्रवन्त्याः प्रस्रवन्ति हि ।
ततो नैवाचरेत् कर्म्माण्यस्नात्वा स्नानमादितः ॥
अशक्तौ स्नानकर्त्ता च दुःस्वप्नं दुर्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ॥
न च स्नानं विना पुंसां पावनं प्रत्यहं स्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत् ॥
अशक्तावधिरस्कं वा स्नानमस्य विधीयते ।
आर्द्रेण वाससा चाथ मार्জनं कायिकं स्मृतम्
अप्रायत्ये सप्तत्यब्दे स्नानमेव समाचरेत् ।
ब्राह्मादीनि यथाशक्ति स्नानान्याहुर्म्मनीषिणः॥
ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च ।
वारुणं यौगिकं तद्वत् षोढा स्नानं प्रकीर्त्तितम्॥
ब्राह्मन्तु मार्জनं मन्त्रैः कुशैः सोदकबिन्दुभिः।
आग्नेयं भस्मना पादमस्तकादिविधूलनम् ॥
गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम् ।
यत्तु सातपवर्षेण स्नानन्तद्दिव्यमुच्यते ॥
वारुणञ्चावगाह्यन्तु मानसन्त्वात्मवेदनम् ।
यौगिकं स्नानमाख्यातं योगो विष्णुविचिन्तनम्
आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः ॥
मनःशुचिकरं पुंसां नित्यन्तत्स्नानमाचरेत् ।
शक्तश्चेद्दारुणं विद्वान् प्राजापत्यन्तथैव च ॥*॥
प्रक्षाल्य दन्तकाष्ठं वै भक्षयित्वा विधानतः ।
आचम्य प्रयतो नित्यं स्नानं प्रातः समाचरेत् ॥
मध्याह्नकालसमयेऽप्यं हादयाङ्गलसम्मितम् ।
सत्वचं दन्तकाष्ठं स्यात्तस्यार्द्धेन च धावयेत् ॥
चौरिङ्गसमुद्भूतं मालतीसम्भवं शुभम् ।
अपामार्गञ्च विल्वञ्च करवीरं विशेषतः ॥
वर्জयित्वा निन्दितानि शुद्धौत्वेवं यथोदितम् ।
परित्यज्य दिनं पापं भक्षयित्वा विधानतः ॥
नोत्पाटयेद्दन्तकाष्ठं नाङ्गुल्या धावयेत् क्वचित्
प्रक्षाल्य भुक्त्वा तज्जाह्नुच्चौ देशे समाहितः ॥
स्नात्वा सन्तर्पयेद्देवानृषीन् पितृगणांस्तथा ।
सम्पाद्य मन्त्रै रात्मानं कुशैः सोदकबिन्दुभिः॥
आपोहिष्ठाद्यैस्तिसृभिः सावित्र्या वारुणैः शुभैः ।
ॐकारव्याहृतियुतां गायत्रीं देवमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु समासीनो दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति स्मृतिः
या सन्ध्या सा जगत्सूतिर्मायातीता च निष्कला ।
ऐश्वरी तु परा शक्तिस्तत्त्वमस्यसमुद्भवा ॥
ध्यात्वार्कमण्डलगतां विप्रः सन्ध्योपासनमाचरेत्
प्राङ्मुखः सततं विप्रः सन्ध्योपासनमाचरेत् ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदन्यत् कुरुते किञ्चित् न तस्य फलमाप्नुयात्॥

अनन्यचेतसः प्राप्ता ब्राह्मणा वेदपारगाः ।
उपास्य विधिवत् सन्ध्यां प्राप्ताश्च परमां गतिम्
योऽन्यत्र कुरुते यत्नादन्यकार्य्यं द्विजोत्तमः ।
विहाय सन्ध्याप्रगतिं स याति नरकायुतम् ॥
तस्मात् सर्व्वप्रयत्नेन सन्ध्योपासनमाचरेत् ।
उपासितो भवेत्तेन देवो योगतनुः परः ॥
सहस्रपरमां नित्यं शतमध्यां दशावराम् ।
सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः स्थितः
यथोपतिष्ठेदादित्यमुदयन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैर्ऋग्यजुःसामसम्भवैः ॥
उपस्थाय महायोगं देवदेवं दिवाकरम् ।
कुर्व्वीत प्रणतिं भूमौ मूर्द्धा नित्यञ्च मन्त्रतः ॥*
ॐ खं खखोल्काय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥
नमस्ते तृणये तुभ्यं सूर्य्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ॥
भूर्भुवः स्वस्वमोङ्कारः सर्वे रुद्राः सनातनाः ।
पुरुषः सत्यशोऽतस्त्वां प्रणमामि कपर्द्दिनम् ॥
त्वमेव विश्वं बहुधा सदसत् सूयसे च यत् ।
नमो रुद्राय सूर्य्याय त्वामहं शरणं गतः ॥
प्राचेतसे नमस्तुभ्यसुमायाः पतये नमः ।
नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ॥
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ।
नम उमापतये तुभ्यमादित्याय नमोऽस्तु ते ॥
नमस्ते बहुरूपाय त्र्यम्बकाय नमोऽस्तु ते ।
प्रपद्ये त्वां विरूपाक्ष ! महान्तं परमेश्वरम् ॥
स्थिरायये शुद्धं गुप्तमात्मानं सर्व्वदेहिनाम् ।
नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परावृतम् ॥
विश्वं पशुपतिं भीमं नरनारीश्वरीश्वरम् ।
नमः सूर्य्याय रुद्राय भास्वते परमेष्ठिने ।
उषाय सर्व्वभक्षाय त्वां प्रपद्ये सदैव हि ॥*॥
एतद्वै सूर्य्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातःकालेऽथ मध्याह्ने नमस्कुर्य्याद्दिवाकरम् ॥
इदं पुत्राय शिष्याय धार्म्मिकाय द्विजातये ।
प्रदेयं सूर्य्यहृदयं ब्रह्मणा तु प्रदर्शितम् ॥
सर्व्वपापप्रशमनं वेदसारं समुद्धृतम् ।
ब्राह्मणानां हितं पुण्यं ऋषिसङ्घैर्निषेवितम् ॥
यस्तु नित्यं पठेद्वीमान् प्रेक्षमादित्यमण्डलम् ।
महापातकयुक्तोऽपि मुच्यते नात्र संशयः ॥
व्यपोह्यारक्तकुष्ठाद्यैर्व्याधिभिः पीड़ितोऽपि सन्
जप्त्वा शतगुणं स्तोत्रं स श्राद्धो भवति द्रुतम् ॥
भूतग्रहपिशाचादिबीजव्यसनकर्षिभिः ।
स्तुवन् ध्यात्वा हरिं विप्रो मुच्यते महतो भयात्
अथागत्य गृहं विप्रः समाचम्य यथाविधि ।
प्रक्षाल्य वक्त्रं विधिवज्जुहुयाज्जातवेदसम् ॥
ऋत्विक्पुत्रोऽथ पत्नी वा शिष्यो वापि सहोदरः ।
प्राप्यानुज्ञां विशेषेण जुहुयुर्व्वा यथाविधि ॥
पवित्रपाणिः पूतात्मा शुक्लाम्बरधरोत्तरः ।
अनन्यमानसो भूत्वा जुहुयात् संयतेन्द्रियः ॥
विना दर्भेश्च यत् कर्म्म विना मन्त्रेण वा पुनः
राक्षसं तद्भवेत् सर्व्वं नासुरेषु फलप्रदम् ॥*॥

देवतानि नमस्कुर्य्याद्देयमाराधिवेदयेत् ।
दद्यात् पुष्पादिकं तेषां हृद्यांश्चैवाभिवादयेत् ॥
गुरुञ्चैवाभुग्रपासीत हितञ्चास्य समाचरेत् ।
वेदाभ्यासं ततः कुर्य्यात् प्रयत्नान्नियतो द्विजः ॥
जपेदध्यापयेच्छिष्यान् श्रावयेच्च विधारयेत् ।
अवेक्षेत च शास्त्राणि धर्म्मादीनि द्विजोत्तमः ॥
वेदिकांश्चैव नियमान् वेदाङ्गानि विशेषतः ।
उपेयादीश्वरस्थाय योगक्षेमप्रसिद्धये ॥
साधयेद्विविधानर्थान् कुटुम्बार्थे ततो द्विजः ॥"
इति कौर्म्मे उपविभागे १७ अध्यायः ॥ * ॥
अपि च ।
"प्रातः शिरसि शुक्लाब्जे द्विनेत्रं द्विभुजं गुरुम् ।
प्रसन्नवदनं शान्तं स्मरेत्तन्नामपूर्व्वकम् ॥"
ॐ नमो गुरवे तस्मा इष्टदेवस्वरूपिणे ।
यस्य वाक्यामृतं हन्ति विषं संसारसंज्ञकम् ॥"
इति पठेत् ॥
"अहं देवो न चान्योऽस्मि ब्रह्मैवास्मि न
शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥"
इति भावयेत् ।
"लोकेश ! चैतन्यमयाधिदेव
श्रीकान्त विष्णो भवदाज्ञयैव ।
प्रातः समुत्थाय तव प्रियार्थं
संसारयात्रामनुवर्त्तयिष्ये ॥
जानामि धर्म्मं न च मे प्रवृत्ति-
र्जानाम्यधर्म्मं न च मे निवृत्तिः ।
त्वया हृषीकेश ! हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि ॥"
विष्णुपुराणे ।
"प्रबुद्धोऽन्तर्यदर्कमर्घ्यञ्चास्यावरोधिनम् ।
अपोऽद्भ्यां तयोः काममुभयोरपि चिन्तयेत् ॥"
धर्म्मलक्षणन्तु भविष्ये ।
'धर्म्मः श्रेयः समुद्दिष्टं श्रेयोऽभ्युदयसाधनम् ॥"
अतएव जैमिनिः । चोदनालक्षणोऽर्थो धर्म्म
इति । तेन वैदिकलिङ्गप्रतिपाद्योऽर्थो धर्म्मः ।
कोऽर्थो योऽभ्युदयाय इति तु भविष्ये ॥ * ॥
ततः ॐ प्रियदत्ताये भुवे नमः । इति नमस्कृत्य
दक्षिणं चरणं न्यसेत् । छन्दोगपरिशिष्टम् ।
"श्रोत्रियं सुभगामग्निं गाञ्च वाग्निचितं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स विमुच्यते ॥
पापिष्ठं दुर्भगां मद्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत्तत् कलेरुपलक्षणम् ॥"
अतएव व्यासः ।
"धनिनः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥"
महाभारते ।
"कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम् ॥"
मात्स्ये ।
"कार्त्तवीर्य्यार्জ্জुनो नाम राजा बाहुसहस्रभृत्
योऽस्य संकीर्त्तयेन्नाम कल्यमुत्थाय मानवः ॥
न तस्य वित्तनाशः स्यान्नष्टञ्च लभते पुनः ॥"

कार्य्यं प्रातः ॥ * ॥
अथ विण्मूत्रोत्सर्गः । विष्णुधर्म्मोत्तरे ।
"निद्रां जह्यादृष्टौ राम ! नित्यमेवारुणोदये
वेगोत्सर्गं ततः कृत्वा दन्तधावनपूर्व्वकम् ॥
स्नानं समाचरेत् प्रातः सर्व्वकल्मषनाशनम् ॥"
अरुणोदयकालमाह स्कन्दपुराणम् ।
"उदयात् प्राक् चतस्रस्तु नाड़िका अरुणोदयः ।
तत्र स्नानं प्रशस्तं स्यात्तद्धि पुण्यतमं स्मृतम् ॥"
नाड़िका दण्डः । विष्णुधर्म्मोत्तरे ।
"वेगरोधं न कर्त्तव्यमन्यत्र क्रोधवेगतः ।"
आयुर्व्वेदीयेऽपि । न वेगितोऽन्यकार्य्येसिद्धिः
स्यात्तस्मात्त्यक्त्वा साध्यमामयम् । अङ्गिराः ।
"उत्थाय पश्चिमे रात्रेस्तत आचम्य चोदकम् ।
अन्तर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥
वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्জ্জितः ॥
कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः ॥"
लिङ्गपुराणम् ।
"तत्रैकाग्र्यं समुत्थाय कुर्य्यान्मैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतोत्याभ्यधिकं भुवः ॥
तिष्ठेत्तावच्चिरं तत्र नैव किञ्चिदुदीरयेत् ॥"
काल्यमुषःकालम् । मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः । नैर्ऋत्यामित्यानटेशमारभ्य
उत्थायेत्यनेन उपस्थितेः इषुप्रक्षेपयोग्यदेशाद्दूरेः । तद्देशपरिमाणमाह पितामहः ।
"मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम् ।
हस्तानाञ्च शतं सार्द्धं लक्ष्यं कृत्वा विचक्षणः ॥"
आपस्तम्बः ।
मूत्रपुरीषोत्सर्गं कुर्य्यादुत्तरां दिशं दक्षिणापरां वेति ।" दक्षिणापरां नैर्ऋतीम् । मनुः ।
"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥"
यत्तु यमवचनम् ।
"प्रत्यक्शिरस्य पूर्व्वाह्णे त्वपराह्णे च प्राङ्मुखः ।
उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥"
इति तदिच्छाविकल्पार्थं सूर्य्याभिमुखनिरासार्थञ्च न तु नियमार्थं देवलवचनविरोधात् ।
तथा च देवलः ।
"मदेवोदङ्मुखः प्रातः सायाह्णे दक्षिणामुखः ।
विण्मूत्रमाचरन्नित्यं सन्ध्यायां परिवर्জ্জयेदिति"
अत्र प्रातःसायाह्णशब्दौ दिवारात्रिपरौ
पूर्व्वोक्तमनुवचनैकवाक्यत्वात् । सन्ध्यायां परिवर्জ্জयेदिति तु पीड़ितेतरपरम् ॥ * ॥ यमः ।
"कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम् ।
विण्मूत्रे च ततो कुर्य्यादहो कर्णे समाहितः ॥
पृष्ठतः पृष्ठे कण्ठलम्बितं निवीतं तत् पृष्ठलम्बितंनिवीतमापृष्ठदेशावलम्बं ग्राम्यधर्म्मख्यातिनिगमपरिगृहीतवचनात् ।
"नियम्य प्रयतो वाचं संवीताङ्गोऽवगुण्ठितः ॥"
इति मनुवचनाच्च ॥
अत्र संवीतं निवीतं संवीतं मानुष इति तैत्तिरीयश्रुतेः । मानुषे सनकादिलक्षणे । पृष्ठलम्बितं निवीतो वेति वौधायनीयाच्च । ततश्च हारवत्

कृत्वा पृष्ठलम्बितं स्कन्धे इत्यर्थः । एकवस्त्रतापक्षे व्यवस्थामाह सांख्यायनः । यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा अवगुण्ठितः इति । कर्णे दक्षिणे । पवित्रं दक्षिणे कर्णे विण्मूत्रमाचरेदिति स्मृतौ तथा दर्शनात् । अवगुण्ठितः कृतशिरोऽवगुण्ठनः । मनुः ।
"छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च ॥"
महाभारते ।
"प्रत्यादित्यं प्रतिजलं प्रति गाञ्च प्रति द्विजम् ।
मेहन्ति ये च पथिषु ते भवन्ति गतायुषः ॥"
प्रतिः मांसुख्ये ॥ * ॥ मनुः ।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न समस्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः ॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके ।
गवाग्निविप्रानादित्यमपः पश्यंस्तथैव च ॥
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्জ্জनम् ॥"
समस्त्वं प्राणिमत्तरु । संस्थित उत्थितः ।
पर्व्वतनिषेधादेव मस्तकनिषेधे सिद्धे पुनर्निषेधो यत्र पर्व्वतोऽशक्यपरीहारस्तत्रापि मस्तकवर्জ্जनार्थः । अथवा । पर्व्वतमस्तकनिषेधोऽधिकदोषाय ॥ * ॥ वशिष्ठः ।
"आहारनिहारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ।
वाग्बुद्धिगुप्तौ च तपस्तथैव
धनायुषी गुप्ततमे तु कार्य्ये ॥"
निहारो मूत्रपुरीषोत्सर्गः । विहारः स्त्रीसंभोगः । योगः समाधिः । वाग्गिरशुभालापत्यागः । बुद्धिगुप्तिरनिष्टचिन्तात्यागः । हारीतः
"आहारन्तु सदा कुर्य्यान्निहारञ्चैव सर्व्वदा ।
गुप्ताभ्यां लक्ष्मापतेः स्यात् प्रकाशे हीयतेतथा ॥"
विष्णुपुराणम् ।
"सामान्यकाम्बुवायूनां पूज्यानाञ्च न संमुखम्
कुर्य्यात् ष्ठीवनविण्मूत्रसमुत्सर्गञ्च पण्डितः ॥"
आपस्तम्बः । "न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति ।" बृहन्मनुः ।
"करमृद्धोतपात्रेण कृत्वा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ॥"
भरद्वाजः ।
"अथावक्रुत्यविण्मूत्रं लोष्टकाष्ठतृणादिना ।
उदस्तवासा उत्तिष्ठदृदृढं विधृतमेहनः ॥" * ॥
उदस्तवासाः कटिदेशादूर्द्धोच्छ्रितवस्त्रः ।

अथ शौचम् । देवलः ।
"धर्म्मविद्दक्षिणं हस्तमधःशौचे न योजयेत् ।
तथैव वामहस्तेन नाभेरूर्द्धं न शोधयेत् ।
प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया ॥"
कारणाद्रोगादेः । ब्रह्माण्डपुराणम् ।
"उद्धृतोदकमादाय मृत्तिकाञ्चैव वाग्यतः ।
उदङ्मुखो दिवा कुर्य्याद्रात्रौ चेद्दक्षिणामुखः ॥
सुनिर्मिते मृदं दद्यात्सुदन्ते त्वप एव च ॥"

कुर्य्याच्छौचमिति शेषः। मुनिर्निम्ने भरद्वाजोल्लोष्टादिप्रमृष्टे गुदे। उदकपाषाभावे करिष्ये जलाशयात् उदकग्रहणमाह आदित्यपुराणम्।
"रश्मिमात्रं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते।
पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्॥"
तस्मिन् देशे शौचं कर्त्तव्यं यस्माद्रश्मिमात्रव्यवहितं जलं तत्स्थलमेव तीर्थं जलसमीपत्वात्॥*
विष्णुपुराणम्।
"वल्मीकमूषिकोत्खातां मृदमन्तर्जलात्तथा।
शौचावशिष्टां गेहाच्च नादद्यात्ते प्रसञ्जवाम्॥
अन्तःप्राप्तवपश्चाच्च हस्तोत्खातां सकर्दमाम्॥"
मनुदक्षौ।
"एका लिङ्गे गुदे तिस्रस्तथा वामकरे दश।"
उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता॥"
उभयोः करयोः। वामहस्ते दशदानानन्तरं तत्पृष्ठे षड्दानमाह हारीतः। दशमध्ये च षट् पृष्ठे इति। शङ्खदक्षौ।
"तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम्
तिस्रस्तु पादयोर्देयाः शुद्धिकामेन नित्यशः॥"
नखशोधनं तृणादिना नखान्तर्मलशोधनम्।
तिस्र इति हस्तयोरिति शेषः॥ * ॥
पादप्रक्षालनं न कांस्ये कर्त्तव्यमित्याह विष्णुधर्म्मोत्तरम्।
"दर्भैर्न मार्ज्जयेत् पादौ न च कांस्ये प्रधावयेत्॥
दक्षः।
"लिङ्गे तत्र समाख्याता त्रिपर्व्वी पूर्य्यते यया
अर्द्धप्रकृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥
द्वितीया च तृतीया च तदर्द्धं परिकीर्त्तितम्॥"
यदा तु उक्तप्रमाणया मृदा गन्धलेपक्षयो न भवति तदा अधिकयापि कर्त्तव्यम्।
"गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः॥"
इति याज्ञवल्क्यवचनात्॥
गुदादन्यत्र परिमाणमाह यमः।
"मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया।
त्रिपर्व्वी तर्ज्जनीमध्यमानामिकानामग्रपर्व्वत्रयम्॥ * ॥ मूत्रमात्रे तु स्मृतिः।
"एकां लिङ्गे मृदं दद्यात् वामहस्ते तु सप्तयम्
उभयोर्हस्तयोर्दे तु मूत्रशौचं प्रकीर्त्तितम्॥"
ब्रह्मपुराणे।
"पादयोर्द्वे गृहीत्वा च सुप्रक्षालितपाणिमान्
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्"
पादयोर्द्वे एकैका। इदं मूत्रे पुरीषोत्सर्गे तिसृणां विधानात्॥ * ॥ दक्षः।
"यथोदितं दिवा शौचमर्द्धं रात्रौ विधीयते।
आतुरे च तदर्द्धं स्यात् तदर्द्धन्तु पथि स्मृतम्॥"
यथोक्तकारणाभावेऽपि दिवा नक्तं वा निशादिपुरस्कारेणैव वाक्यस्याहृष्टार्थतापत्तेः॥*॥ आपस्तम्बः।
"पथि पादस्तु विज्ञेयो आर्त्तः कुर्य्यादयाबलम्
एतयोर्विरोधस्तु आर्त्तानार्त्ताभ्यां परिहरणीयः। दक्षः।
"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत्॥"
ब्रह्मपुराणे।
"न यावदुपनीयते द्विजः शूद्रस्तथाङ्गना।
गन्धलेपक्षयकरं शौचं तेषां विधीयते॥
प्रमाणं शौचसंख्या वा न लिङ्गे उपदिश्यते।
यावच्च शुद्धिं मन्येत तावत् शौचं समाचरेत्॥"
दक्षः।
"न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धिमभीप्सता।
प्रायश्चित्तं प्रसज्येत विहितातिक्रमे कृते॥
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥"
गन्धलेपक्षये सत्यधिकं न कर्त्तव्यं पूर्व्वोक्तयाज्ञवल्क्यविरोधात्। गन्धलेपाक्षये त्वधिकसंख्ययापि। याज्ञवल्क्यवचनमनुपनीतादिपरं वा पूर्व्वोक्तब्रह्मपुराणैकवाक्यत्वात्॥ * ॥
"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम्॥"
इदन्तु द्विगुणादिकं संख्यामात्रे तदनन्तराभिधानात्। व्याघ्रपादः।
"शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा।
मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथापरम्॥
गङ्गातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः।
आमृत्योः स्नातकस्यैव भावदुष्टो न शुध्यति॥"
स्मृतिः।
"धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारकृतन्तथा।
भुञ्जानमाचमानञ्च नास्तिकं नाभिवादयेत्।
जन्मप्रभृति यत्किञ्चित् चेतसा धर्म्ममाचरेत्।
सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनात्॥"
ऋष्यशृङ्गः।
"यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशोधयेत्।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥"
शौचानन्तरं हारीतः। गोमयेन मृदा वा कमण्डलुं प्रमृज्य पूर्व्ववदुपस्पृश्य आदित्यसोममग्निं वा वीक्षेतेति। अत्र मार्ज्जनानन्तरं क्षालनं अन्यत्र तथादर्शनात्। आचमनानन्तरं आदित्यादिदर्शनं यथासम्भवम्। शौचं कृत्वा मूत्रोच्चारं न पश्येत् दृष्ट्वादित्यमग्निं सोमं वा पश्येदिति॥*॥ अथाचमनविधिः। दक्षः।
"प्रक्षाल्य पाणी पादौ च त्रिः पिबेदम्बु वीक्षितम्।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥
संवृत्य तिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत्।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम्॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः।
नाभिं कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै॥
सर्व्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥"
पादप्रक्षालनं विशेषयति देवलः।
"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेत् शनैः
उदङ्मुखो वा देवत्ये पैत्रके दक्षिणामुखः॥"
शनैरित्वरः। दैवपैत्रकेतरत्रापसव्यः। प्रत्यक्पादावसेचनमिति। प्रत्यक् पश्चिमाभिमुखः।
क्रममाह गौतमः। सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेत्। दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेदिति अर्थापत्तौ तथादर्शनात् सर्व्वत्र तथा कल्प्यते। पारस्करः। सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयतीतिसूत्रेण प्राक् सव्यपादप्रक्षालने सिद्धे सव्यं प्रक्षाल्य दक्षिणं प्रक्षालयतीत्यत्र सव्यग्रहणं सामान्यार्थं तेनान्यस्यापि पादप्रक्षालने सव्यस्यैव प्राथम्यम् अन्यार्थं पुनर्व्वचनमिति न्यायात्। अन्यार्थमधिकारार्थम्। ब्राह्मणस्य दक्षिणं प्रथममिति सूत्रं तस्य पादौ यदि ब्राह्मणः प्रक्षालयति तदा दक्षिणं प्रथममिति न सव्यम्। यथा प्रक्षालयतीत्यनुवृत्तौ आश्वलायनः। दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत् सव्यं शूद्रायेति। स्वयं प्रक्षालने सव्यस्यैव प्राथम्यमिति एवं परिशब्दोऽपि। आचमने पाणिपादप्रक्षालनं सूत्रानुक्तमं। यथा हरिहरावतारः।
"कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः।
निवद्धशिख आसीनो द्विज आचमनन्चरेत्॥
कृत्वोपवीतं मध्याह्ने वाग्यतः कायसंयतः॥"
आपस्तम्बः।
इत्येवमङ्गिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामग्निबन्धाभ्यां पश्चादाचेत संयतः॥
आजानु आमणिबन्धाभ्यामित्यवधू पादानंतत्पर्य्यन्तागुचित्वशङ्कायां अध्वश्रमापनोदनाय अतिश्रयशौचाय वा। अतएवोक्तं अङ्गप्रकर्षात् फलप्रकर्ष इति॥*॥ शिखाबन्धने विशेषमाह ब्रह्मपुराणम्।
"गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः
त्रुटिकाञ्च ततो बद्ध्वा ततः कर्म समाचरेत्॥"
पिबेदित्यचान्तर्जान्वाह याज्ञवल्क्यः।
"अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥
अन्तर्जानु जानुनोर्मध्ये हस्तौ कृत्वेति शेषः।
वाग्यच्छब्दोशानाभिमुखः।
ईशानाभिमुखो भूत्वापस्पृशेत्तु यथाविधि॥"
इति मरीच्यत्रेः।
ब्राह्मेण तीर्थेन अङ्गुष्ठमूलेन।
"कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥"
इति याज्ञवल्क्यात्॥
देशिनी तर्ज्जनी। करस्य दक्षिणस्य। यथा मार्कण्डेयपुराणम्।
"अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै॥"
अत्र द्विजो न स्त्रीशूद्राविति मिताक्षरा॥ अत एव।
"स्त्रियाश्चैवदक्षिणं तीर्थं शूद्रजातेस्तथैव च।
सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः॥"
ब्राह्मतीर्थावरोधे तु मनुः।
"कायत्रैदक्षिणाभ्यां वा न पैत्र्येण कदाचन।"
उक्ततीर्थत्रयस्य ब्रह्मादिनावरोधे करमध्याङ्ग-

काम्येनापि । एवञ्च सर्व्वाविरोधे सुवर्णादि-पात्रेणाप्याचमनं कार्य्यं स्वयमसार्थैरन्येना-चमनं कारयितव्यम् । याज्ञवल्क्यः ।

"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः । क्षत्रकण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ॥ शुध्येरन् स्त्री च शूद्रश्च सकृत् सृष्टाभिरन्ततः॥"

अन्ततः ओष्ठोपान्ते । उत्तरोत्तरमपकर्षात् । अतएव सृष्टाभिरित्युक्तं न तु भक्षिताभिरिति । स्त्री शूद्रो वाथ नित्याग्निः आलनाभ करोष्टयोः इति ब्रह्मपुराणाच्च । आचमनार्थं पाणिपाद-प्रक्षालनमेवेत्येके । इति शूद्राधिकारे गोतमो-क्तेश्च । आचमनाङ्गजलाभावे इदमित्याचारा-ध्यायः । मनुः ।

"क्षत्राभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः । वैश्योऽद्भिः प्राशिताभिश्च शूद्रः सृष्टाभिरन्ततः ॥"

अत्र यद्यावधिप्राशनमुक्तम् अनुपनीतानान्तु स्त्रीशूद्रवदाचमनं न यावदुपनीयेत । इति प्रागुक्तशौचे तथादर्शनात् । मिताक्षरादयो-ऽप्येवम् । अम्बु विशेषयति बौधायनः । पाद-प्रक्षालनाच्छेषेण नाचामेत यद्याचामेत् भूमौ स्रावयित्वाचामेदिति । उशनाः ।

"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः । आचान्तः शतकृत्वोऽपि न कदाचिच्छुचि-र्भवेत् ॥"

कांस्यादिपात्रकरणकाचमनं कांस्यायमनेत्या-दिना निषिद्धमिति केचित् । हस्तेनाचमनेऽपि कांस्यादिपात्रावर्जितं तन्निषिद्धमित्यपरे । आचमनजलनिषेधे शङ्खलिखितौ । न शूद्रा शुष्कैकपाण्या वर्जितेनेति अत्राशुचिपदम् आचमनकर्त्तृभिन्नपरम् । शूद्रसाहचर्य्यात् एक पाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम् । तेन स्वीयवामपाण्यावर्जितमनिषिद्धम् । तथा च कामण्डल्वधिकारे बौधायनः । मूत्रपुरीषे कुर्वन् दक्षिणहस्तेन गृह्णाति सव्येनाचमनीय-मिति । गृह्णाति जलपात्रमिति शेषः । आचा-मेदित्यनुवृत्तौ देवलः ।

"शिखां बद्ध्वा वमित्वा चेन्निर्निक्ते वाससी शुभे । तूष्णीं भूत्वा समादाय नोद्गच्छन्नविलोकयन् ॥ एकवस्त्राः प्राचीनावीति न दत्यादिपारस्कर-दर्शनात् यच्च प्रेतस्नानतर्पणादौ एकवस्त्रत्वं विहितं तत्र तदङ्गत्वादेकवासा एवाचमनं कुर्य्यात् । प्रचेताः ।

"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा । क्षत्रताभिरशब्दाभिश्चतुर्वारान्विराचमेत् ॥"

चतुर्वेति भावशुद्ध्यपेक्षया विकल्पः । न तु फलभूयस्त्वार्थं कल्पनागौरवापत्तेः । वीक्षणा-नुष्णयोर्भट्टभाष्यमाधवाचार्य्यधृतपराशरभाष्य-योरपवादमाह यमः ।

"रात्रावपीक्षितेनापि शुचिरुक्ता मनीषिभिः । उदके नातुराणाञ्च तथोष्णे नोष्णयायिनाम् ॥"

आचामेदित्यनुवृत्तौ वसिष्ठः । प्रद्वाङ्मुखो वा गोस्पर्शनाय स्थानं वपरसदुष्टाभिर्वाच्च स्थरशु-भागमा इति । प्रदरो विदीर्णभूभागः । अशु-भागमाः अशुचिदेशादागताः । यस्मिन् देशे वर्णादिदुष्टमेव तोयं तच्च तदपि ग्राह्यम् । तथा च मरीचिः ।

"येषु स्थानेषु यच्छौचं धर्म्माचारस्य यादृशः । तत्र तत्रावमन्येत धर्म्मस्तत्रैव तादृशः ॥ येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः । येषु स्थानेषु यत्तोयं या च यत्रैव कृत्तिका ॥"

आचमने उदकग्रहणप्रकारं परिमाणञ्चाह भरद्वाजः ।

"आयतं पर्वणां कृत्वा गोकर्णाकृतिवत् करम् । संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥ मुक्ताङ्गुष्ठकनिष्ठाभ्यां ग्रीवेणाचमनञ्चरेत् । मावमज्जनमात्रास्तु मंगुष्ठ त्रिः पिबेदपः ॥"

पाणिना दक्षिणेन । त्रिः पिबेदक्षिणेनापि हस्तेन पुराणोक्तेः । मार्कण्डेयः ।

"सव्येनैव हस्तेन कुर्य्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्ज्जयेत्॥"

मदनपारिजाते हारीतः ।

"यत्पित्र्यस्य पवित्रस्य न तेनाचमनञ्चरेत् ॥"

यत्पनादृत्यन्यिरिति समुद्रकरेऽपि । आचमना-नुवृत्तौ देवलः ।

"न गच्छन्न शयानश्च न चलन्न परान् स्पृशन् । न हसन्नैव संजल्पन्नात्मानञ्चैव वीक्षयन् ॥"

चलन् कम्पमान इति रत्नाकरः ॥ आत्मानं आत्मस्थानं हृदयम् । वीक्षयन्निति स्वार्थे णिच् ।

"केशास्थीवीमधःकायं न स्पृशन् धरणीमपि । यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम्॥"

अधःकायं नाभेरधःप्रदेशम् । करं दक्षिणम् । आचमनानुवृत्तौ गोभिलः ।

"नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ॥"

अन्तरीयमधःपरिधानं तदेकदेशमुत्तरीयं कृत्वा मरीचिः ।

"न बहिर्जानुरुत्वरया नाशनस्थो न चोत्थितः । न पादुकास्थोऽन्यचित्तः शुचिः प्रयतमानसः ॥ उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः । भुक्तासनस्थो नाचामेन्नान्यकाले कदाचन ॥ जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचर-णेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । अन्त-रुदके आचान्तोऽन्तरेव शुद्धः स्यात् नस्मा-दन्तरेकं बहिरेकञ्च कृत्वा पादमाचरेत् सर्वत्र शुद्धो भवतीति । जले तूत्तिष्ठन्नाचामेत् । जानो-रूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्य-तीति विष्णुशर्म्मणः । हारीतः ।

"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् । शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम् ॥"

कात्यायनः ।

"स्नानमाचमनं होमं भोजनं देवतार्च्चनम् । प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥ आचमनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥"

आसनारूढ़पादः आसनारोपितपादतलः । जानुनोर्जङ्घयोः कृतावसक्थिको वस्त्रादिना कृतपृष्ठजानुजङ्घावन्धः । तृतीयेन भेदप्रतीतेः प्रौढ़पादस्य द्विविधत्वं प्रतीयते ॥*॥ अत्र च अनेकोद्धाङ्के दारुशिले भूमिसमे दृष्टकाष्ठ सङ्कीर्णेभृता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात् । व्यासः ।

"शिरः प्राहृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयोः शौचमाचम्योऽप्यशुचि-र्भवेत् ॥"

तथा ।

"अपः पाणिनखाग्रेण आचामेद्यस्तु ब्राह्मणः। सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"

संहत्येति मुखं संहत्य अलोमकोष्ठस्थो यथा न भवतीति तात्पर्य्यम् । तथा च वसिष्ठः ।

"आचान्तः पुनराचामेद्यासो विपरिधाय च । ओष्ठौ च संस्पृश्य तथा यत्र स्यातामलोमकौ॥"

एवञ्च प्रागुक्तहारीतवचने ओष्ठयोर्म्मार्ज्जनमुक्तं तत अलोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षयेत् । तथा च कामधेनावापस्तम्बः । चिराचामेत् क्षत्राभिस्त्रिरोष्ठौ परिमृजेत् द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेति । गोभिलः । त्रिराचामेत् द्विः परिमृजीत पादा-वभ्युक्ष्य शिरोऽभ्युक्षयेदिति इन्द्रियाण्यद्भिः । स्पृशेत् अक्षिणी नासिके कर्णाविति । इन्द्रि-याणि इन्द्रियायतनप्रदेशे भूयोऽवयवमूर्त्तत्वात् तिसृभिरिति तर्जनीमध्यमानामिकाभिः ॥*॥ सर्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठी-नसिः । अग्निरङ्गुष्ठस्तस्मात्तेनापि सर्वाणि स्थानानि स्पृशेत् । निष्ठीवनादावाचमनं यथा । वायुपुराणे ।

"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने ।
उच्छिष्टस्य च सम्भाषादशुचिः पञ्चमस्य च ॥
सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च ।
विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत् ॥
उष्ट्रवायससंस्पर्शे दर्शने चान्त्यवासिनाम् ॥"

हारीतः ।

"स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने-देवमभिगन्तुकाम आचामेदिति।" याज्ञवल्क्यः

"स्नात्वा पीत्वा क्षुते स्वप्ने भुक्त्वा स्त्र्युपसर्पणे ।
आचान्तः पुनराचामेदासो विपरिधाय च ॥"

ब्रह्मपुराणे ।

"होमे भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत् ॥
हिराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्॥"

स्मृतिः ।

"क्षुते निष्ठीविते स्वप्ने परिधानेऽनुपातने ।
कर्म्मस्थं एषु नाचामेत् दक्षिणं श्रवणं
स्पृशेत् ॥"

अत्र हेतुमाह पराशर:।
"प्रभासादीनि तीर्थानि गङ्गाद्या: सरितस्तथा
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत् ॥"
सांख्यायन:।
"आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट्।
विप्रस्य दक्षिणं कर्णं नित्यं तिष्ठन्ति देवता: ॥"
पुराणसारवायुपुराणयो:।
"य: कर्म्म कुरुते मोहादनाचम्यैव नास्तिक:।
भवन्ति हि हृथा तस्य क्रिया: सर्वा न संशय: ॥"*॥
अथ दन्तधावनम्। हृद्यशातातप:।
"मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नर:।
तस्मात् सर्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"
आह्निकादौ तस्य वर्ज्यत्वं यथा। विष्णु:।
"आर्द्रे जन्मर्क्षदिने चैव विवाहेऽजीर्णसम्भवे।
व्रते चैवोपवासे च वर्जयेद्दन्तधावनम् ॥"
दन्तधावनमन्त्रादुदङ्मुख: प्राङ्मुखो वेति ॥*॥
दन्तलग्नस्य दन्ततुल्यत्वं यथा। गौतम:।
"दन्तास्पृष्टे दन्तवदन्यत्र जिह्वाभिघर्षणात् प्राक्
च्युतेरित्येके। च्युतेरासावर्वाङ्नाधिगन्तव्येव
तच्छुचिरिति। जिह्वाभिघर्षणार्थोऽयं दन्तलग्न
अशौचजनकं न भवतीत्यर्थ:। दृष्टश्चानुलभ्य-
मानरसविषयम्। दन्तवद्दन्तलग्नेषु रसवर्ज-
मिति शङ्खवचनात्। जिह्वाभिघर्षणेऽपि अश-
क्यादरणे न दोष:।
"भोजने दन्तलग्नानि निर्हृत्याचमनञ्चरेत्।
दन्तलग्नमसंहार्य्यं लेपं मन्येत दन्तवत् ॥
न तत्र कुर्य्याद्बुधो ह्याद्रणे पुन:।
भवेदशौचमत्यर्थं . . दन्तक्षते ॥"
इति देवलवचनात् ॥
च्युतेरित्युपलभ्यमानरसविषयम्। आस्वा-
लात्तु तद्विगरणित्यर्थ:। अतएव शौल्लणं
यथा न भवति तथा तृणादिना दन्तलग्न-
निःसारणाचरणम् ॥*॥ छन्दोगपरिशिष्टम्।
"नादात्युक्तावर्चयमष्टाङ्गुलमपाटितम्।
सत्वच दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥
उत्थाय नैर्ऋते प्रक्षाल्य शुचिर्भूत्वा समाहित:।
परिजप्य तु मन्त्रेण भक्षयेद्दन्तधावनम् ॥
आयुर्बलं यशो वर्च: प्रजा पशुवसूनि च।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वञ्नो धेहि वनस्पते ॥"
शुचिर्भूत्वा हिराचमनेनेति शेष: ॥*॥ नर-
सिंहपुराणम् ॥
"दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्ततान्।
सर्वे कण्टकिन: पुण्या: क्षीरिणश्च यशस्विन:॥"
प्रमाणं स्थौल्यञ्चाह विष्णु:।
"कनीन्यग्रनिभस्थौल्यं सकूर्चं द्वादशाङ्गुलम्।
प्रातर्भूत्वा च यत्नवान् भक्षयेद्दन्तधावनम् ॥
प्रक्षाल्य भुजौ तज्जाच्छुचौ देशे समाहित:॥"
सकूर्चं दलिताग्रम्। द्वादशाङ्गुलन्तु छन्दोगत-
रेषाम्।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्
अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षडङ्गुलम्।

भक्षयेत् शास्त्रदृष्टानि पर्वस्वपि च वर्जयेत् ॥"
तिथिविशेषे तस्य वर्जनं यथा। नृसिंहपुरा-
णम्।
"प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सत्तमा:।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
अलाभे दन्तकाष्ठानां प्रतिसिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥"
गण्डूषस्य दन्तकाष्ठकार्य्यकारित्वेऽपि न तत्र
मन्त्रान्वय:। शातातप:।
"प्रतिपद्दर्शषष्ठीषु नवम्यां दन्तधावनम्।
पर्वैरन्यत्र काष्ठस्य जिह्वोल्लेख: सदैव हि ॥"
गुवाकादिपत्रैर्दन्तधावनं निषिद्धं यथा। क्रिया-
कौमुद्यां वशिष्ठ:।
"गुवाकतालहिन्तालास्तथा ताडी च केतकी।
खर्জ্জूरनारिकेलौ च मप्तते तृणराजका:॥
तृणराजशिरापत्रैर्य: कुर्य्याद्दन्तधावनम्।
तावद्भवति चाण्डालो यावद्गां नैव पश्यति ॥"
पराशरभाष्ये याज्ञवल्क्य:।
"नष्टकालोष्टपाषाणैरिन्द्राङ्गनिभिस्तथा।
त्यक्त्वा अनामिकाङ्गुष्ठौ वर्जयेद्दन्तधावनम् ॥"
प्रचेता:।
"मध्याह्नस्नानकाले तु य: कुर्य्याद्दन्तधावनम्।
निराशास्तस्य गच्छन्ति देवा: पितृगणै: सह॥"
स्मृति:।
"वमन्तं जृम्भमाणञ्च कुर्वन्तं दन्तधावनम्।
अभ्यक्तशिरसञ्चैव स्नातं नैवाभिवादयेत् ॥"
हारीत:।
"शुचिं देवाभिरक्षन्ति पितर: शुचिमन्वियु:।
शुचेर्विभ्यति रक्षांसि ये चान्ये दुष्टचारिण: ॥"
तथा।
"स्नानं दानं तपस्त्यागो मन्त्रकर्म्मविधिक्रिया:
मङ्गलाचारनियमा: शौचभ्रष्टस्य निष्फला: ॥
शौचन्तु द्विविधं प्रोक्तं बाह्यमाभ्यन्तरन्तथा।
मृज्जलाभ्यां भवेत् बाह्यं भावशुद्धिस्तथापरम्॥"
अथ प्रात:स्नानमन्त्रे। ब्रह्मपुराणम्।
"प्रात:स्नानं तत: कृत्वा मन्त्रेणैव यथोदितम्।
सन्ध्यान्तेऽपि तथा कुर्य्यात् नित्यनैमित्तकं तथा॥
कात्यायन:।
"यथार्हनि तथा प्रातर्नित्यं स्नायादनातुर:।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चैतदमन्त्रवत् ॥
दन्तान् प्रक्षाल्य प्रातरनातुर: स्नायात् ॥*॥
आतुरं विशेषयति आयुर्वेदार्थे।
"स्नानमर्दितनेत्रास्यकर्णरोगातिसारिषु।
आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम् ॥"
तत्कालमाह विष्णु:। प्रात:स्नात्वाऽरुणोदयम-
स्तां प्राचीमवलोक्य स्नायात्। इति समुद्र-
करधृतम् ॥*॥
"मृत्तिकातिलकं कुर्य्यात् स्नात्वा हुत्वा च
भक्तिना।
दुष्टदोषविघातार्थं चाण्डालाद्यादिदर्शने ॥"
उशना:।
"अभावे मृदकेनापि पितृदैवतमर्चयेत् ॥"

ब्रह्माण्डपुराणे।
"कर्म्मादौ तिलकं कुर्य्याद्रूपं तद्वैष्णवं परम्।
गोप्रदानं जपो होम: स्वाध्याय: पितृतर्पणम्॥
भस्मीभवति तत्सर्व्वमूर्द्ध्वपुण्ड्रं विना कृतम् ॥"
ब्राह्मे।
"अङ्गुष्ठ: पुष्टिद: प्रोक्तो मध्यमा पुष्करी भवेत्
अनामिकाथदा नित्यं मुक्तिदा च प्रदेशिनी ॥"
व्यास:।
"ज्ञानयोतीरसम्भूतां हृदं मूर्द्ध्नि बिभर्त्ति य:।
बिभर्त्ति रूपं सोऽर्कस्यतमोनाशाय केवलम्॥"
गोपीचन्दनमाह शातातप:।
"गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम्।
मृदं मूर्द्ध्ना वहेद्यस्तु सर्वपापै: प्रमुच्यते ॥"
ब्रह्माण्डपुराणे।
"ऊर्द्धपुण्ड्रं सदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा
तिलकं वै द्विज: कुर्य्यात्, चन्दनेन यदृच्छया॥
ऊर्द्धपुण्ड्रं द्विज: कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्
अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिज: ॥"*॥
आतुराणान्तु।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ च कर्म्मि-
णाम।
आर्द्रेण वाससा वापि मार्জ্জनं दैहिकं विदु:॥"
इति जाबालवचनात् शिरो विहाय गात्रप्रक्षा-
लनम्। तदशक्तावार्द्रवाससा गात्रमार्জ্জनं
कुर्य्यात् तदनन्तरं सन्ध्यां कुर्य्यात्। एतत्परमेव
प्रात:सन्ध्यां तत: कुर्य्याद् दन्तधावनपूर्वकमिति
याज्ञवल्क्यवचनम्। इत्याह्निकाचारतत्त्वम् ॥
प्रात:सन्ध्या,स्त्री.(सन्धौ भवा। यत् प्रत्यय:। टाप्
प्रात: प्रथमार्द्धीया सन्ध्या।)सन्ध्यादेरपूर्व्वार्द्धम्
तदुत्पत्तिर्यथा।
"तस्मिन् गिरौ चन्द्रभागे वृक्षकोटिततीरगाम्।
सन्ध्यां दृष्ट्वाथ पप्रच्छ वशिष्ठ: सादरन्तदा ॥
वशिष्ठ उवाच।
किमर्थमागता भद्रे! निर्জনं त्वं महीधरम्।
कस्य वा तनया गौरि! किं वा तवचिकीर्षितम्
एतदिच्छाम्यहं श्रोतुं यदि गुह्यं न ते भवेत्।
वदनं पूर्णचन्द्राभ निश्रीकं वा कथं तव ॥
श्रीमार्कण्डेय उवाच।
तत् श्रुत्वा वचनं तस्य वशिष्ठस्य महात्मन:।
दृष्ट्वा च तन्महात्मानं ज्वलन्तमिव पावकम् ॥
शरीरधृग्ब्रह्मचर्य्यसदृशं तं जटाधरम्।
सादरं प्राणपत्याथ सन्ध्योवाच तपोधनम् ॥
सन्ध्योवाच।
यदर्थमागता शैलं सिद्धं तच्चे तपोधन!।
तव दर्शनमात्रेण तच्चे सिद्ध्यति वा विभो!॥
तप: कर्त्तुमहं ब्रह्मन्! निर्জনं शैलमागता।
ब्रह्मणोऽहं मनोजाता सन्ध्या नाम्ना च विश्रुता
नोपदेष्टमहं जाने तपसो मुनिसत्तम!।
यदि ते युज्यते गुह्यं मां त्वं समुपदेशय ॥
एतच्चिकीर्षितं गुह्यं नान्यत् किञ्च न विद्यते।
अज्ञात्वा तपसो भावं तपोवनसुपस्थिता ॥
किन्तया परिगृह्येऽहं वेपते च मन: सदा ॥

श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्वज्ञत्वज्ञो नान्यत् किञ्चन दृष्टवान् ॥
अथ तां नियताहारां तपसेऽतिधृतोद्यमाम् ।
वशिष्ठो मन्त्रयामास गुरुवत् शिष्यवत्सदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्षास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येनिर्तं दृष्टौ तस्यै वाचं दिव्यै च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परित्यीणं जटाव्रातैः पवित्रं मूर्द्धि राजितम् ॥
निरीक्ष्य तपसाविष्टो हरिः प्रोवाच तामिदम्॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहमृते तव ।
स सद्यः क्लीवतां प्राप्य दुर्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
समकल्पान्तजीवी च भविष्यति मह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्वं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्वमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्द्वादशवार्षिके ।
हुतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं कृत्वं मुनिभिर्नोपलक्षिता ।
मत्प्रसादाद्दुहितृजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाल्कनौयोऽस्ति स्वामी मनसि कश्चन
तद्विधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां पस्पर्शार्घ्यपाणिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्ध्वा सूर्यस्य मण्डले ।
गृहं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यद्दूर्द्धभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्यापि पितृणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥
प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः
वैदिके तदनुष्ठानानि यथा । मार्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्र्योध्यानम् १० सावित्र्यैजपः ११ सावित्रीविसर्जनम् १२ आदित्यशुक्लप्रोक्षणम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८॥
तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम्१ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तप्रक्षालनम् ६ आचमनम् ७ सूर्य्यार्घदानम्८ गायत्र्या जलदानम्९ तर्पणम् १० गायत्रीध्यानम् ११ गायत्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ शैलमन्त्रजपः१६ जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितत्त्वे ॥
प्रातःस्नानं, क्ली, (प्रातः प्रभात ४ । १७ ॥ (यत्र०)
प्रभातकर्त्तव्यावगाहनादि । यत्र
"उषःकाले तु संप्राप्ते कृत्वा चावश्यकमेण तान्
स्नायाच्चदोषु शुद्धासु शौचं कृत्वा यथाविधि ॥")
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्ट कर्म हि तत् ।
सुखसुप्तस्य मतं लाभादाः संभवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ।
अलक्ष्मीः कालकर्णी च दुस्वप्नं दुर्विचिन्तितम्
प्रातःस्नानेन पापानि प्रयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्म-
संस्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्
अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुडे २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतीनाञ्चैवमेवं प्राहुः सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षेण चतुरन्वितः ॥
य इच्छेद्बहुपुत्रान् भोगान् चन्द्रसूर्य्यग्रहोपमान्
प्रातःस्नायीभवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥
षट्तिलो माघमासन्तु प्रातःस्नायी हविष्यभुक्
अतियापं महाघोरं मासादेव व्यपोहति ॥
मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य निमज्जेत द्वादशांशं लभेत्तु सः ॥"
प्रातराशः, पुं, (अशनमिति । अश + भावे घञ् ।
आशः । प्रातः प्रातःकाले आशो भोजनम् ।)
प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः
२ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यजन्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः पञ्चहायनो मात्रा प्रातराशाय याचितः ।
तन्नेच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥")
प्रातर्गेयः, पुं, प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगातरये, त्रि ॥
प्रातर्भोक्ता, [क्तृ] पुं, (प्रातर्भुङ्क्ते इति । भुज + तृच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥
प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।)
प्रातराशः । इति जटाधरः ॥
प्रातिका, स्त्री, (प्रातर्नीति । प्र + अत् + खुल् + टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥
प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद् + "कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यभ्युतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
"ऊ यहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ।
तदत् ५ ब्रह्मोवाच ।
पापस्त्वे त् ५ त्राणां गन्धर्वाणाञ्च सत्तम ! ।
आदि यते पातको, येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्पद ण प्रायश्चि दिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रा तिथिरेषा भविष्यति ॥"
विशुध्यनि इति वराहपुराणम् ॥
(प्रतिपदे धातुभि ल्पा भव इति । प्रतिपट + ठक् ।) नास्ति, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम्
प्रातिभाव्यं, क्ली, (प्रतिभू + ष्यञ् । हिपदहृद्दिः ।)
प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥
प्रातिस्विकं, त्रि, (प्रतिस्वं भवः । प्रतिस्व + ठक् ।
असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेशिकम् ३ । इति त्रिकाण्डशेषः ॥
प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।)
प्रातिहारिकः । इत्यमरटीकायां भरतः ॥
प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।)प्रातिहारिकः इत्यमरटीकायां भरतः ॥
प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार + "प्रयोजनम् ।" ५ । १ । १०८ । इति ठञ् ।)
मायाकारः । इत्यमरः । २ । १० । ११ ॥
प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप + अण् ।) प्रतीपपुत्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ५ । १४८ । २ ।
'प्रातीपः शान्तनुस्तात ! कुलस्यार्थे यथोत्थितः॥)

प्राथमकल्पिकः, पुं, (प्रथमकल्प आद्यारम्भः प्रयोजनं यस्य। "प्रयोजनम्।" ५।१।१०८। इति ठञ्। यद्वा, प्रथमकल्पमधीते इति। विद्यालक्षणकल्पान्तादिति वक्तव्यमिति ठक्।) प्रथमारम्भवेदाध्ययनः। प्रथमं ग्रहणीयकल्पं शास्त्रमधीते यः इत्यर्थे ष्ठिकः। तत्पर्य्यायः। शैक्षः २। इत्यमरभरतौ॥

प्राथमिकः, त्रि, (प्रथमे भवः। प्रथम+ठञ्।) प्रथमभवः। यथा। यत्राविरलक्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्यक्त्वार्थं द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु किमर्थम्। इति पक्षताशिरोमणिः॥

प्राथम्यं, त्रि, (प्रथम+ष्यञ्।) प्रथमस्य भावः। यथा, "अस्माभिरेव प्राथम्येन नानामुनीनां वचनैरेवं विधो निबन्धः क्रियते।" इति विजयरक्षितः॥

प्रादुः [स्] व्य, (प्राक्षीति। प्र+अट्+"बाहुलकादेरप्युसिप्रत्ययः।" उणा० २। ११८। इत्यत्र उज्ज्वलदत्तोक्त्या उसिः।) नाम। प्राकाश्यम्। स्फुटत्वम्। तत्पर्य्यायः। आविः२ यथा। प्रादुरासीत्। आविर्भूतः। इत्यमरभरतौ॥ (यथा, रघुः। ११। १५।

"ज्यानिनादमथ गृह्णतो तस्य [illegible]श्चरैः।
प्रादुरास बहुलत्वपाण्डुवि[illegible]क्तवत्॥
ताडका चलकपालकुण्ड[illegible] पुनः।
कालिकेव निविड़ा[illegible]वणे क्षते॥")

प्रकाशः। सभाव्यम्। [illegible]त देव इति शब्दरत्नावली॥

प्रादुर्भावः, पुं, (प्रादुस्+भू+भावे घञ्।) आविर्भावः। यथा,—

"वपुः प्रादुर्भावादनुमितमिदं जन्मनि पुरा॥"
इति कुवलयानन्दः॥

प्रादेशः पुं, (प्रदिश्यते इति। प्र+दिश्+घञ्। "उपसर्गस्य घञि"इति दीर्घः।) तर्जनीमङ्गुष्ठविस्तृताङ्गुष्ठः। इत्यमरः २। ६। ८३॥ (यथा, महाभारते। ५। ५१। १९।

"प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्জ্জুনात्॥

प्रदेश एव। स्वार्थे अण्।) देशमात्रम्। यथा,

"प्रादेशो देशमात्रे च तर्জ্জन्यङ्गुष्ठमध्यमे॥"
इति मेदिनी॥

"अङ्गुष्ठस्य प्रदेशिन्या व्यामः प्रादेश उच्यते॥"
इति देवीपुराणञ्च॥

प्रादेयनं, क्ली, (प्र+आ+दिश्+ल्युट्।) दानम्। इत्यमरः। २। ७। ३०॥

प्रादोषः, त्रि, (प्रदोषस्यायमिति। प्रदोष+अण्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी॥ (प्रदोषं व्याहरतीति। "व्याहरति मृगः।" ४।३।५१। इति अण्। प्रादोषो मृगः। प्रदोषमङ्गचरितं अधीयनं सोढ़मस्य। "तदस्य सोढ़म्।" ४। ३। ५२। इति अण्। प्रादोषः शिष्यः। इति व्याकरणम्॥)

प्रादोषिकः, त्रि, (प्रदोषस्यायमिति। प्रदोष+"निशाप्रदोषाभ्याञ्च।" ४। ३। १४। इति ठञ्।) प्रदोषसम्बन्धी। इति सिद्धान्तकौमुदी।

प्राधान्यं, क्ली, प्रधानस्य भावः। (प्रधान+भावे ष्यञ्।) प्रधानत्वम्। यथा, धर्म्मदीपिकायाम्।

"वेदार्थोपनिबन्धृत्वात् प्राधान्यं हि मनोः स्मृतम्॥"

प्राध्वं, व्य, (प्राध्वनतीति। प्र+आ+ध्वन+डम्।) अनुकूलम्। इत्यमरः। ३। ४। ४॥ (यथा, रघुः। १३। ४३।

'सभाजने मे भुजमूर्জ্জবाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते॥")

प्राध्वः, त्रि, (प्रगतोऽध्वानमिति। "उपसर्गादध्वनः।" ५। ४। ८५। इति अच्।) बहुदूरगामि-रथादिः। इति वोपदेवः॥ दूरपथः। प्रह्वः। बन्धः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। १६२। २७।

"ततः शक्तिं गदां खड्गं धनुश्च भरतर्षभः।
प्राध्वं क्रत्वा नमस्कृत्य कुबेराय वृकोदरः॥")

प्रा[illegible]। [illegible]ोऽन्तः।) अन्तभागः। शेषमध्याह्नस्नानकालकुमारे। ३। ४३।

निराशास्तस्य[illegible]न्तेषु ममत्वनमरुशाखं
स्मृतिः। ध्यानाम्यदं भूतपतेर्विवेश॥"

"वमङ्[illegible]

[illegible]न्तः, [स] व्य, (प्रान्त+तसिल्।) प्रान्तभागे। यथा, प्राचोरं प्रान्ततो हरितः। इत्यमरः। २। २। ३॥

प्रान्तरं, क्ली, (प्रकृष्टमन्तरमवकाशो व्यवधानं वा यत्र।) दूरशून्योऽध्वा। इत्यमरः २।१।१७॥ छायातृजलादिरहिते पथि प्रान्तर दूरं शून्यो दूरशून्यः दूरस्थामी शून्यश्चेति वा दूरशून्यो जलादिवर्জ্জितत्वात् ईदृक् योऽध्वा स प्रान्तरमित्यन्वयः। प्रकृष्टमन्तरं व्यवधानमवकाशोवा अत्रेति प्रान्तरम्। इति भरतः॥ (यथा, महानिर्व्वाणतन्त्रे। १। ६४।

"कृते गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि।
पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः॥")

विपिनम्। कोटरम्। इति मेदिनी॥

प्रान्तशून्यं, क्ली, (प्रान्ते शून्यमस्य।) दूरशून्यपथः। छायादिरहितपथः। इति शब्दरत्नावली॥

प्रापणं, क्ली, (प्र+आप्+ल्युट्।) नयनम्। प्राप्तिः। (यथा, मनुः। २। ९५।

"प्रापणात् सर्व्वकामानां परित्यागो विशिष्यते॥")

प्राप्तिप्रेरणा। प्रकर्षेण आपनम्। आन्तादत्रान्ताद्वा प्रपूर्ब्बापधातोर्भावे अनट् प्रत्ययः॥

प्रापणिकः, पुं, (प्रापणाय हितः। प्रापण+ठक्) उपयुक्तकालः। इति शब्दमाला॥ प्राबोधिकोऽपि पाठः॥

प्राभवं, क्ली, (प्रभोर्भावः। प्रभु+अण्।) श्रेष्ठत्वम्। इति शब्दचन्द्रिका॥

प्राभाकरः पुं, (प्रभाकरस्यायं तन्त्रं वेत्तीति। प्रभाकर+अण्।) मीमांसकविशेषः। यथा,

"व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्ब्बकं

स्वमतेन तदपहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना।" इति व्याप्तिग्रहोपायशिरोमणिः॥ प्राभाकरमते व्याप्तेः सङ्ग्रहदर्शनगम्यत्वंयथा,तस्मात् परिशेषेण सङ्ग्रहदर्शनगम्या सा। इति व्याप्तिग्रहोपायचिन्तामणिः॥

प्राभृतं,क्ली, (प्राभ्रियते स्मेति। प्र+आ+भृ क्त।) उपढौकनम्। इत्यमरः॥ (यथा: कथा सरित्सागरे। १७। १६४।

"तं दत्तप्राभृतं दूतं स संमान्य व्यसर्जयत्॥")

प्राभृतकं, क्ली, (प्राभृत+स्वार्थेकन।) प्राभृतम् तत्पर्य्यायः। कौशलिका २। इति हारावली १५८॥

प्रामाण्यः,पुं,(प्रमाद्यत्यनेनेति। प्र+मद+ण्यत्।) वासकः। इति शब्दचन्द्रिका॥ स्वार्थेण प्रमादः। तस्य भावे, क्ली।

प्रामाणिकः, त्रि, (प्रमाणादागतः। प्रमाण+ठक्।) हैतुकः। मर्य्यादाहः। प्राक्षत्तः। परिच्छेदकः। प्रमाणकर्त्ता। इतिप्रमाणशब्दात् कर्त्तरि णिकप्रत्ययः।

प्रामाण्यं, क्ली, (प्रमाणस्य भावः। प्रमाण+ष्यञ्।) प्रमाकरणत्वम्। प्रमाणशब्दाद्भावार्थे ष्यञ्प्रत्ययः॥ (यथा, मार्कण्डेये। १५। ४३।

"सत्यभूतहितार्थोक्तिर्वेदप्रामाण्यदर्शनम्।
गुरुदेवर्षिसिद्धर्षिपूजनं साधुसङ्गमः॥")

प्रामाण्यवादः, पुं, (प्रामाण्यस्यवादः कथनम्।) प्रमाकरणताकथनम्। तद्दतितत्प्रकारकत्वप्रमात्वकथनम्। चिन्तामणिन्यायग्रन्थविशेषः। इति पूर्व्वाचार्य्याः॥ स यथा। अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशसु विद्यास्थानेष्वभ्यर्हिततमामन्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय। तत्र प्रेक्षावत् प्रवृत्त्यर्थं प्रमाणादिपदार्थतत्त्वज्ञानाद्निःश्रेयसाधिगम इत्यादावमत्र यत्। तेषु प्रमाणाधीना सर्व्वेषां व्यवस्थितिरिति प्रमाणतत्त्वमत्र विविच्यते। इत्यादि गङ्गेशोपाध्यायः॥

प्रामोत्यं क्ली, (प्रमयनमिति। प्र+मी वधे+भावे क्त। तत्र प्रमीतं मरणे साधु इति यञ्। अस्य वधतुल्यत्वात्तथात्वम्।) ऋणम्। इति विकाण्डशेषः। (प्रमीतस्य भाव इति। प्रमीत+ष्यञ्।) मृतत्वञ्च॥

प्रायः, पुं,(प्रकृष्टमयनमिति। प्र+अय+घञ् यद्वा, प्र+इ+"एरच्।" ३। ३। ५६। इत्यच्।) मरणम्। मरणार्थमनशनम्। (यथा, रामायणे। ४। ५३। १२।

"अहं वः प्रतिजानामि न गमिष्याम्यहं पुरीम्
इहैव प्रायमासिष्ये श्रेयो मरणमेव च॥")

तुल्यम्। बाहुल्यम्। इति मेदिनी। यै, ३६॥ (यथा, साहित्यदर्पणे। ३। १११।

"तस्कराः पण्डकाः मूर्खाः सुखप्रायधनास्तथा।
विज्ञेयाः कलहाभीरुकामाद्या आसां (वेश्यानाम्)
प्रायेण वल्लभाः॥"

वयः। इति हेमचन्द्रः॥ (पापम्। तपः। इति स्मृतिः॥ क्ली,प्रवेशः। युद्धम्। यथा, ऋग्वेदे। २। १८। ८।

"उप ज्येष्ठे वरूथे गभस्तौ
प्राये प्राये जिगीवांसः स्याम॥"

"किञ्च प्राये प्राये सोमपानार्थमिन्द्रस्य यज्ञशालायां प्रवेशे प्रवेशे जिगीवांसः शत्रूणां जेतारो भवेम। यद्वा, प्राये प्राये प्रकर्षेण इयते गम्यते योद्धृभिरिति प्रायं युद्धम्। तस्मिन् युद्धे जिगीवांसः शत्रून् जितवन्तो भवेम॥" इति तद्भाष्ये सायनः॥ त्रि, गमकः। यथा, मनौ। ३। २६४।

"प्रक्षाल्यहस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत्।
ज्ञातिभ्यः सत्कृतं दत्त्वाबान्धवानपि भोजयेत्॥"

"प्रक्षाल्येति। तदनु हस्तौ प्रक्षाल्याचम्य ज्ञातिप्रायमन्नं कुर्य्यात्। ज्ञातान् प्रति गच्छतीति ज्ञातिप्रायं कर्म्मण्यण्। ज्ञातीन् भोजयेदित्यर्थः।" इति कुल्लूकभट्टः॥)

प्रायः, [स] अ, (प्र+अय गतौ+असुन्।) बाहुल्यम्। इत्यमरः। ३। ४। १७॥ (यथा, कथासरित्सागरे ६। १२३।

"ततोऽहं शब्दवेधी च ज्ञातवन्तौ क्रमेण ताम्
अत्रान्तरे च प्रायः पर्य्यहीयत वासरः॥")

प्रायश्चित्तं, क्ली, (प्रायस्य पापस्य चित्तं विशोधनं यस्मात्। यदुक्तं स्मृतौ।

"प्रायः पापं समुद्दिष्टं चित्तं तस्य विशोधनम्॥
यद्वा, प्रायस्य तपसः चित्तम् निश्चय इति।
"पारस्करप्रभृतीनि च संज्ञायाम्।" ६। १। १५७। इत्यत्र। "प्रायस्य चित्तिचित्तयोः।" इति वार्त्तिकोक्त्या सुट् निपात्यते च। निरुक्तिस्तु निम्ने द्रष्टव्या।) पापक्षयमात्रसाधनं कर्म्म। यथा, हारीतः। प्रयत्नवाहोपचितमशुभं नाशयतीति प्रायश्चित्तम्॥* (प्रायश्चित्तमिति। यत्तपःप्रभृतिकं कर्म्म उपचितं सञ्चितमशुभं पापं नाशयतीति कृत-तत्-तत्-कर्म्मभिः कर्त्तुः प्रयत्नवाहा गृहत्वादेव तत्प्रायश्चित्तम्। तथाच पुनर्हारीतः। यथा, क्षारोपक्षतदन्तनिर्णेजन प्रक्षालनादिभिर्वासांसि शुध्यन्ति एवं तपोदानयज्ञैः पापकृतः शुद्धिमुपयान्ति। शुद्धि र्नापक्षयम्। यथा, महाभारते।

"अङ्गिरोवान् मलमिव तमो ह्यग्निभयाद्यथा
दानेन तपसा चैव सर्व्वपापमपोहति॥"

तेन पापक्षयमात्रसाधनत्वेन विधिबोधितं कर्म्म प्रायश्चित्तम्। मात्रार्थलाभस्तु प्रयत्नवाद्वित्येवकारार्थकवाशब्दात्। तथाच विष्णुः।

"वा स्याद्विकल्पापमयोरवार्थे च समुच्चये।"

एवञ्च।

"अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे।"

इति विष्णुवाक्यात्राश्वमेधस्यापि प्रायश्चित्तत्वम्। पापक्षयस्वर्गोभयसाधकस्य तु तस्यापि न प्रायश्चित्तत्वम्। प्रायश्चित्तस्य स्वर्गं सादिजनकत्वेऽपि तदंशे विधिबोधितत्वाभावाद्वाससश्चवत्॥ इति प्रायश्चित्ततत्त्वम्॥) तस्य व्युत्पत्तिर्यथा। अङ्गिराः।

"प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥"

निश्चयसंयुक्तस्यापक्षयसाधनत्वेन निश्चितमित्यर्थः॥ * ॥ पापन्तु वैदिकप्रतिपाद्योऽनर्थः अनर्थश्चानिष्टसाधनम्। पापकारणमुक्तं याज्ञवल्क्येन। यथा,—

"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥"*॥

पापविशेषेणावस्थाविशेषमाह मनुः।

"शरीरजैः कर्म्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥
इह दुश्चरितैः केचित् केचित् पूर्व्वकृतैस्तथा।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्य्ययम्॥"

यमः।

"सुरापो ब्रह्महा गोघ्नः सुवर्णस्तेयकृच्चरः।
पतितैः संप्रयुक्तश्च कृतघ्नो गुरुतल्पगः।
एते पतन्ति सर्व्वेषु नरकेष्वनुपूर्व्वशः॥"*॥

प्रायश्चित्तमाहात्म्यं यथा। अङ्गिराः।

"उद्यच्छन् यद्दादित्यस्तमः सर्व्वं व्यपोहति
तद्वत् कल्याणमातिष्ठन् सर्व्वं पापं व्यपोहति॥
पापञ्चेत् पुरुषः कृत्वा कल्याणमभिपद्यते।
मुच्यते पातकैः सर्व्वैर्महाभ्रैरिव चन्द्रमाः॥
कल्याणं प्रायश्चित्तम्॥*॥ तस्यावश्यकर्त्तव्यत्वमाह यमः।

"तपसोक्तैर्विशुध्यन्ति कर्म्मणां वा परिक्षयात्
तस्मात् कर्त्तव्यमेतेषु प्रायश्चित्तं विशुद्धये॥"

कर्म्मणां भोगेन परिक्षयादित्यर्थः॥ * ॥ प्रायश्चित्तार्हत्वमाह मनुः।

"अकुर्व्वन् विहितं कर्म्म निषिद्धन्तु समाचरन्।
प्रसजंस्त्वेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥*॥
अज्ञानादयदि वा ज्ञानात् कृत्वा कर्म्म विगर्हितम्।
तस्माद्विमुक्तिमन्विच्छन् द्वितीयं न समाचरेत्।
प्रायश्चित्तस्य काम्यत्वं नैमित्तिकत्वं नित्यत्वञ्च दर्शयन्। जाबालः।

"काम्यानां सफलार्थञ्च दोषघातार्थमेव च।
अतः काम्यं नैमित्तिकञ्च प्रायश्चित्तमिति स्थितिः॥
चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये।
निन्द्यार्थ लक्षणैर्युक्ता जायन्ते निष्कृतेनमः॥*॥
ज्ञानाज्ञानकृतपापयोः प्रायश्चित्तभेदो यथा। अङ्गिराः।

"अकामतः कृते पापे प्रायश्चित्तं न कामतः।
स्याच्चकामकृते यत्तु द्विगुणं बुद्धिपूर्व्वके॥"*

अथ प्रायश्चित्तनिरूपणोपस्थानम्।

तत्राङ्गिराः।

"कृते निःसंशये पापे न भुञ्जीतानुपस्थितः।
भुञ्जानो वर्द्धयेत् पापमसत्यं पर्षदि ब्रुवन्॥
सचेलं वाग्यतः स्नात्वा क्लीबवासाः समाहितः।

उपस्थाय ततः शौचमास्तिमान् धरणीं गतः।
गानेश्च शिरसा चैव न च किञ्चिदुदाहरेत्॥"
उपस्थानञ्च ब्राह्मणान् वस्त्रादिना तोषयित्वा कार्य्यम्। महत्सु पापेषु राज्ञोऽप्युपस्थितिः कार्य्येत्याह देवलः।
"स्वयं वा ब्राह्मणैः क्षुद्रक्षुल्लपदोषे विधीयते।
राज्ञा च ब्राह्मणैश्चैव महत्सु परिचक्षते॥"*
परिषदमाहाङ्गिराः।
"एकविंशतिसंख्याकैर्मीमांसावेदपारगैः।
वेदाङ्गकुशलैश्चैव परिषत् संप्रकल्पयेत्॥
चातुर्विद्यो विकल्पी च अङ्गविद्धर्म्मपाठकः।
त्रयश्चाश्रमिणो ह्येताः पर्षत् स्यात्तु दशावरा॥"
मनुः।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे पर्षत् स्यात्तु दशावरा॥"
अङ्गिराः।
"एषा तु लघुकार्य्येषु मध्यमेषु तु मध्यमा।
महापातकिशोध्येषु शतशो भ्रूय एव वा॥"
प्रदर्शनार्थमिदम्। यावद्भिरेव निरूपणं तावद्भिरेव परिषत्। दृष्टार्थत्वादेव तस्याः। तथा च यमः।
"एको द्वौ वा त्रयो वापि यदब्रूयुर्धर्म्मपाठकाः।
स धर्म्म इति विज्ञेयो नेतरेषां सहस्रशः॥*"॥
प्रायश्चित्ताकथने दोषो यथा,—
"आर्त्तानां मार्गमाणानां प्रायश्चित्तानि यै द्विजाः।
जानन्तो न प्रयच्छन्ति तेऽपि तद्दोषभागिनः॥
अनर्हैस्तैरनाहूतैरपृष्टैश्चैव संसदि।
प्रायश्चित्तं न वक्तव्यं जानद्भिरपि जल्पतः॥
न्यायतो मार्गमाणस्य क्षत्रियादेः प्रणामिनः।
अन्तरा ब्राह्मणं कृत्वा व्रतमेतत् समादिशेत्॥
हारीतः।
"यथावयो यथाकालं यथाप्राणञ्च ब्राह्मणे।
प्रायश्चित्तं प्रदातव्यं ब्राह्मणैर्धर्म्मपाठकैः॥
तस्मात् क्षुद्रमथाप्यर्हं पादं वापि विधानतः।
ज्ञात्वा बलाबलं कालं प्रायश्चित्तं प्रकल्पयेत्॥"
अशक्तावनुग्रहमाह पराशरः।
"दुर्ब्बलेऽनुग्रहः कार्य्यस्तथा वै शिशुवृद्धयोः।
अतोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रही भवेत्॥"
स्त्रीहादिनानुग्रहे दोषो यथा,—
"स्त्रीहत्या यदि वा लोभात् मोहादज्ञानतोऽपि वा।
कुर्व्वन्त्यनुग्रहं ये तु तत् पापं तेषु गच्छति॥"
शास्त्रीयप्रायश्चित्तमुद्दाहृत्य पश्चादनुग्रहः कार्य्य इत्याहाङ्गिराः।
"ज्ञात्वा पूर्व्वमुदाहारं यथोक्तं धर्म्मवक्तृभिः।
पश्चात्कार्य्यानुसारेण शक्त्या कुर्व्वन्त्यनुग्रहम्॥
हस्त्यादिभेदात् प्रायश्चित्तं यथा,—
"अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्हं मर्हन्ति स्त्रिया रोगिण एव च॥"

अथ पापनिष्क्रमणादिः।

तत्र मनुः।
"ख्यापनेनानुतापेन तपसाध्ययनेन च।
पापकृन्मुच्यते पापात्तथा दानेन चापदि॥"
आपदीत्यनेन अध्ययनतपसोर्दानमनुकल्पइत्युक्तम्। एतच्च साध्यतिरिक्तविषयम। हिंसायान्तु दानं मुख्यम्। यथा, भविष्ये।
'हिंसात्मकानां सर्व्वेषां कीर्त्तितानां मनीषिभिः।
प्रायश्चित्तकदम्बानां दानं प्रथम उच्यते॥"
तथा मनुः।
"दानेन वधनिर्णेकं सर्पादीनामशक्नुवन्।
एकैकशश्चरेत् कृच्छ्रं द्विजः पापापनुत्तये॥"*॥
सामान्यप्रायश्चित्तानि यथा, संवर्त्तः।
"हिरण्यदानं गोदानं भूमिदानं तथैव च।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
यमः।
"शोधनेन शरीरस्य तपसाध्ययनेन च।
पापकृन्मुच्यते पापात् दानेन च दमेन च॥"
मनुः।
"कृत्वा पापं हि सन्तप्य तस्मात् पापात्प्रमुच्यते
नैवं कुर्य्यां पुनरिति निवृत्त्या पूयते नरः॥"
विष्णुपुराणम्।
"प्रायश्चित्तान्यशेषाणि तपःकर्म्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्॥"
यमः।
"गवाह्निका देवपूजा वेदाभ्यासः सवित्रवः।
नाशयन्त्याशु पापानि महापातकजान्यपि॥"
गौतमः। "हिरण्यं गौर्व्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि। एतान्येवानादेशे विकल्पेन क्रियेरन् एनसि लघुनि लघूनि गुरुणि गुरूणि।" विष्णुपुराणम्।
"एवं विषयभेदाहं व्यवस्थाप्यानि पुत्रक!।
प्रायश्चित्तानि सर्व्वाणि गुरूणि च लघूनि च॥
अन्यथा हि महाबाहो! लघूनामुपदेशतः।
गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्॥"
महाभारते।
"यत्किञ्चिदकार्य्यशतं कृत्वा कृतं गङ्गाभिषेचनम।
सर्व्वं दहति गङ्गाम्भस्तूलराशिमिवानलः॥"
व्रतानि शुद्धिकारणान्याह विश्वामित्रः।
"कृच्छ्रं चान्द्रायणादीनि शुद्धभ्युदयकारणम्।
प्रकाशे वा रहस्ये वा संशयेऽनुक्तके स्फुटे॥
प्राजापत्यः शान्तपनः शिशुकृच्छ्रः पराकृकः।
अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यः कृच्छ्रातिकृच्छ्रकः॥
महाशान्तपनः शुद्धैस्तप्तकृच्छ्रस्तु पावनः।
जलोपवासकृच्छ्रश्च ब्रह्मकूर्च्चस्तु शोधकः॥
एते समस्ता व्यस्ता वा प्रत्येकमेकशोऽपि वा।
पातकादिषु सर्व्वेषु पापकेषु प्रयत्नतः॥
कार्य्यास्त्वान्द्रायणेयुक्ताः केवला वा विशुद्धये।
शिशुचान्द्रायणं प्रोक्तं यतिचान्द्रायणं तथा॥
यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति।
उपवासस्त्रिरात्रं वा मास पक्षस्तदर्द्धकम्॥
षड्दहादशाहादि कार्य्यं शुद्धिफलार्थिना।
उपपातकयुक्तानामनादिष्टेषु चैव हि॥
प्रकाशे च रहस्ये च अभिसन्ध्याद्यपेक्षया।
जातिग्रन्थिगुणान् दृष्ट्वा सकृदुच्चरितं तथा॥
अनुबन्धादिकं दृष्ट्वा सर्व्वं कार्य्यं यथाक्रमम्॥"
प्रकाशयुक्ते पापे व्रतानि मुख्यानि। रहस्ययुक्ते जपादीनि। यथा प्राजापत्यादीन्यभिधाय मनुः
"एतैर्द्विजातयः शोध्या व्रतैरापादितैनसः।
अनापादितपापांस्तु मन्त्रैर्होमैस्तु शोधयेत्॥"
देवलः।
"प्रकाश्य उक्तं यत्किञ्चित् त्रिंशभागो रहस्यके।
त्रिंशभागः षष्टिभागः कल्पो ज्ञात्वाद्यपेक्षया॥

इति प्रायश्चित्तविवेकः॥

अथ प्रायश्चित्तपूर्व्वाङ्गकृत्यम्। अङ्गलिखितौ।
"वाप्य केशनखान् पूर्व्वं हुतं प्राश्य वह्निर्निशि।
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत्।
प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्नशेत्॥"
केशधारणेच्छायां द्विगुणव्रतादिकमाह हारीतः
"राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः
केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्॥
केशानां धारणार्थन्तु द्विगुणं व्रतमाचरेत्।
द्विगुणे तु व्रते चीर्णे द्विगुणा दक्षिणा भवेत्॥"
विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम्।
ऋते महापातकिनो गोघ्नस्तुल्यावकीर्णिनः॥"
मधवाक्षीणां विशेषमाह भवदेवभट्टधृतं वचनम्।
"वपनं नैव नारीणां नानुव्रज्या जपादिकम्।
न गोष्ठे शयनं तासां न च दद्यादृगवाजिनम्॥
सर्व्वान् केशान् ममृज्य क्लेदयेदङ्गुलिद्वयम्।
सर्व्वत्रैवं हि नारीणां शिरसो मुण्डनं स्मृतम्॥"
अथ धेनूमूल्यव्यवस्था। तत्र संवर्त्तः।
"प्राजापत्यव्रताशक्तौ धेनुं दद्यात् पयस्विनीम्।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः॥"
पयस्विनीमिति विशेषणं दुग्धोपयोगाय। सा च वत्सं विना न सम्भवति। अतः सवत्साया एव दानं मुख्यम्। तदभावे यथोचितं मूल्यम्। तदभिप्रेत्य पुराणान्तरम्। द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेदिति कात्यायनवचनात् षट्त्रिंशत्पणमितमिति कृत्वा पठन्ति।
"धेनुः पञ्चभिराख्याता मध्यानां त्रिपुराणिकी।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता॥"
प्रायश्चित्तोत्तरकर्त्तव्यानि। यथा भविष्ये।
"क्रियते शुद्धये यत्तु ब्राह्मणानान्तु भोजनम्।
शुद्ध्यर्थमिति तत् प्रोक्तं वैनतेय! मनीषिभिः॥
जाबालः।
"आरम्भे सर्व्वकृच्छ्राणां समाप्तौ च विशेषतः।
आज्येनैव हि शालाग्नौ जुहुयादाहुतीः पृथक्
आढ्यं कुर्य्याद्व्रतस्यान्ते गोभिरण्यादिदक्षिणम्॥
प्रायश्चित्तानन्तरं गोभ्यो यवसं दद्यात्। यदि तु गावस्तृप्तलक्षणं न गृह्णीयुस्तदा पुनस्तत्प्रायश्चित्तमनुतिष्ठेत्। यथा हारीतः। स्वशिरसा यवसमादाय गोभ्यो दद्यात् यदि ताः प्रमुदिता न गृह्णीयुरयेनं प्रवर्त्तयेयुः। एवं कृतप्रायश्चित्तम् कृतरथा न। इति प्रायश्चित्ततत्त्वम्॥*॥

अथ प्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि लिख्यन्ते।

अथातिपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
ब्राह्मणस्य मातृमसनं दुष्टिद्यूतं सुरागमनञ्च।	अज्ञानतो द्विगुणद्वादशवार्षिकव्रतम्। तच्च महापातके द्रष्टव्यम्। ज्ञानत एतद्द्विगुणम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
क्षत्रियवैश्यशूद्राणां मातृदुष्टिद्यूतसुरागमनम्।	तुषाग्निप्रवेशेन मरणम्। चतुर्विंशतिवार्षिकव्रतं वा। एतच्च अकामतः कामतस्तद्द्विगुणम्। मातृदुष्टिद्यूतसुरागामपि एतद्व्रतादिकं कारणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
अकामतो ब्राह्मणकर्तृकब्रह्मवधः।	द्वादशवार्षिकव्रतम्। यथा मनुः। "ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत्। भैक्ष्याण्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम्। भिक्षाशी विचरेद्ग्रामं वन्धैर्यदि न जीवति॥"	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं हिरण्यादिकं वा।	१०० गावः। तदशक्तौ १०० कार्षापणाः।
कामतो ब्राह्मणकर्तृकब्रह्मवधः।	याज्ञवल्क्योक्तप्रकारेण मरणम्। तथा। लोमभ्यः स्वाहेति ऋचा लोमप्रभृति वै तनुम्। मन्त्रान्तां जुहुयाद्वापि मन्त्रैरेभिर्यथाक्रमम्। एतत्तु कलौ ब्राह्मणेतरपरम्। तदशक्तौ द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ज्ञानतो ब्राह्मणकर्तृकब्राह्मणीगर्भवधः।	ब्रह्मवधप्रायश्चित्तम्। अज्ञानत एतदर्धम्। अनुपनीतबालकवधेऽप्येवम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अकामतः सवनस्थब्राह्मणवधः	द्विगुणद्वादशवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
कामतः सवनस्थब्राह्मणवधः।	तद्द्विगुणम्। ४८ अष्टचत्वारिंशद्वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
ब्राह्मणकर्तृकमातृसोदरभ्रातृगुरुस्त्रीयाश्रिताग्नीनां वधः।	४८ अष्टचत्वारिंशद्वार्षिकव्रतम्। एतच्च कामतः। अकामत एतदर्धम्।	७२० धेनवः।	२१६० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	४०० गावः। अशक्तौ ४०० कार्षापणाः।
ज्ञानतो ब्राह्मणकर्तृकवेदपारगाततायिब्राह्मणवधः।	१२ वार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अज्ञानतस्तस्य वधः।	तदर्धम्। ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। तदशक्तौ ५० कार्षापणाः।
ज्ञानतोऽज्ञानतो वा ब्राह्मणकर्तृकपतितब्राह्मणवधः।	तथा।	तथा	तथा।	तथा।
अकामत आचार्यादिब्राह्मणवधः।	एकवार्षिकव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। तदशक्तौ ८।/६॥ कार्षापणाः।
कामतस्तस्य वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतः क्षत्रियकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तद्विगुणम्। तच्च २४ वार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।

अथ मद्यापातकानि।	प्रायश्चित्तानि।	तदग्रतो धेनुदानम्।	तदग्रतो चूर्णीदानम्।	दक्षिणा।
कामतस्तद्वधः। अकामतो वैश्यकर्तृकब्रह्मवधः।	तद्द्विगुणम्। ब्राह्मण कर्तृकवधप्रायश्चित्तत्रिगुणम्। तच्च २६ वार्षिकव्रतम्।	तद्द्विगुणम्। ५४० धेनवः।	तद्द्विगुणम्। १६२० कार्षापणाः।	तद्द्विगुणम्। ३०० गावः। अग्रतो ३०० कार्षापणाः।
कामतो वैश्यकर्तृकब्रह्मवधः।	७२ वार्षिकव्रतम्।	१०८० धेनवः।	३२४० कार्षापणाः।	६०० गावः। अग्रतो ६०० कार्षापणाः।
अकामतः शूद्रकर्तृकब्रह्मवधः।	ब्राह्मणकर्तृकवधप्रायश्चित्तचतुर्गुणम्। तच्च ४८ वार्षिकव्रतम्।	७२० धेनवः।	२१६० कार्षापणाः।	४०० गावः। अग्रतो ४०० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अकामतो ब्राह्मणकर्तृकब्राह्मणीवधः।	ब्रह्मवधप्रायश्चित्तार्द्धम्। तच्च ६ वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अग्रतो ५० कार्षापणाः।
कामतस्तद्वधः।	तद्द्विगुणम्। क्षत्रियस्य ब्राह्मणीवधे ब्राह्मणकर्तृकवधप्रायश्चित्त-द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्। अनेकब्राह्मणवधे प्रायश्चित्तस्यैकत्वम्। यदेव साक्षाद्वधकर्तुः प्रायश्चित्तं तदेव खल्वप्रवर्त्तुरनुग्राहकस्य अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य च पादहीनम्। वध्यप्रतिरोधकस्य अनुग्राहकस्य प्रवृत्त-प्रवर्त्तकरूपप्रयोजकस्य च अर्द्धम्। अन्-मन्तुनिमित्तिनश्च पादः। अग्रतो स्त्री-बालवृद्धानां सर्व्वत्रार्द्धम्।	तद्द्विगुणम्।	तद्द्विगुणम्।	तद्द्विगुणम्।
अज्ञानतो ब्राह्मणस्य पेष्टीसुरा-पानम्। हिरण्यक्षगौड़ीमा-ध्वीपानञ्च।	अग्निसमस्पर्शानां सुरागोमूत्रजलदुग्धघृत गोमयरसानामन्यतमस्यामरणात् पा-नम्। चतुर्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	२०० गावः। अग्रतो २०० कार्षापणाः।
अज्ञानतो ब्राह्मणस्य तासां पानम्।	एतदर्द्धम्। तत्तु द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	१०० गावः। अग्रतो १०० कार्षापणाः।
अज्ञानतः क्षत्रियस्य पैष्टी-सुरापानम्।	नववार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम्।	१३५ धेनवः।	४०५ कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	७५ गावः। अग्रतो ७५ कार्षापणाः।
अज्ञानतो वैश्यस्य पैष्टीसुरा-पानम्।	षाड्वार्षिकव्रतम्। ज्ञानत एतद्द्विगुणम् स्त्रीबालवृद्धानामर्द्धादिकम्।	९० धेनवः।	२७० कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	५० गावः। अग्रतो ५० कार्षापणाः।
अज्ञानतो ब्राह्मणकर्तृकब्राह्मणस्वाम्यिकाशीतिरत्निकापरिमितसुवर्णस्तेयम्। ज्ञानतस्तत्कर्तृकतत्स्तेयम्।	अपहृतद्रव्यं तस्यानुरूपं मूल्यं वा स्वामिने दत्त्वा द्वादशवार्षिकव्रतं करणीयम्।	१८० धेनवः।	५४० कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	१०० गावः। अग्रतो १०० कार्षापणाः।
	एतद्द्विगुणं २४ वार्षिकव्रतम्। गुणवद्-ब्राह्मणकर्तृके तु सर्वत्रार्द्धम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अग्रतो २०० कार्षापणाः।
ज्ञानतः क्षत्रियवैश्यशूद्रकर्तृक-ब्राह्मणस्वाम्यिकाशीतिरत्नि-कापरिमितसुवर्णस्तेयम्।	राजकर्तृकमुपलाघातेन मरणम्। चतु-र्विंशतिवार्षिकव्रतं वा।	३६० धेनवः।	१०८० कार्षापणाः। तल्लभ्य-स्वर्णादि वा।	२०० गावः। अग्रतो २०० कार्षापणाः।

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अज्ञानतस्तत्कर्तृकतत्स्वामिकतत्सुवर्णस्तेयम्।	द्वादशवार्षिकव्रतं स्त्रीबालहत्यानामर्धम्। एकस्योभयधर्मावरुद्धे पादः।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा	१०० गावः। अशक्तौ १०० कार्षापणाः।
ज्ञानतो गुर्वङ्गनागमनम्। अथात् विप्रादगमनम्। शूद्रस्य ब्राह्मणीगमनञ्च।	गुरुतल्पगः पापमभिभाष्य तप्ते लोहमये शय्यात्। ज्वलन्तीं लोहप्रतिमां तृणमयीं प्रतिमां वा आलिङ्ग्य म्रियेत। स्वयंवा शिश्नवृषणावुत्कृत्य अञ्जली निधाय आमरणात् नैर्ऋतीमिष्टिमातिष्ठेत्।			
	चतुर्विंशतिवार्षिकव्रतं वा कुर्यात्। गुर्वङ्गनायामपि एतत् करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
अज्ञानतो गुर्वङ्गनागमः।	द्वादशवार्षिकव्रतम्। बालहत्ययोरर्धम्। एतच्चातुर्वर्ण्यविषयम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
चतुर्णां महापातकिनां संसर्गः।	ज्ञानतः सकृत् प्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
तत्र गुरुसंसर्गो यथा। पतिताचार्यात् वेदाध्ययनम्। १। पतितशिष्याय वेदाध्यापनम्। २। पतितेन ऋत्विजा ज्योतिष्टोमादियजनम्। ३। पतितस्य ज्योतिष्टोमादिनिष्पादनरूपयाजनम्। ४। पतितेन पतितया वा परिणयनम्। ५। स्तेयादिपतितान्यब्राह्मणीगमनम्। ६। पतितावस्य पतितेन सहैकपात्रे भोजनम्। ७।	अज्ञानतः सकृत्प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतो द्वितीयसंसर्गिणः नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतो द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतस्तृतीयसंसर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतस्तृतीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	ज्ञानाज्ञानतश्चतुर्थसंसर्गिणः प्रायश्चित्ताभावः। ब्रह्मघातिनां क्षत्रियवैश्यशूद्राणां ज्ञानाज्ञानतः संसर्गे तु क्रमेण एतस्य द्विगुणं त्रिगुणं चतुर्गुणं ज्ञेयम्।			
तत्र लघुसंसर्गो यथा। उपनयनं विना पतिताय वेदाध्यापनम्। १। पतितात्तादृशाध्ययनम्। २। पतितयजमानस्य अष्टकादियज्ञयाजनम्। ३। पतितेन ऋत्विजाष्टकादियज्ञयजनम्। ४ पतितस्यब्राह्मणीगमनम्। ५। पतितशूद्रागमनम्। ६। अपतितावस्य पतितेन सहैकपात्रे भोजनम्। ७। पतितोच्छिष्टभोजनम्। ८।	ज्ञानतः षण्मासमसंसर्गप्रथमसंसर्गिणोऽष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतः षण्मासमसंसर्गे प्रथमसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	ज्ञानतः षण्मासमसंसर्गे द्वितीयसंसर्गिणो नववार्षिकव्रतम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
	अज्ञानतः षण्मासमसंसर्गे द्वितीयसंसर्गिणः सार्धचतुर्वार्षिकव्रतम्।	६८ धेनवः।	२०२॥० कार्षापणाः।	३८ गावः। अशक्तौ ३७॥० कार्षापणाः।
	ज्ञानतः षण्मासमसंसर्गे द्वितीयसंसर्गिणः षाड्वार्षिकव्रतम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
	अज्ञानतः षण्मासमसंसर्गे द्वितीयसंसर्गिणस्त्रैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	अतुर्थसंसर्गिणो ज्ञानाज्ञानतः प्रायश्चित्ताभावः।			

अथ महापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
महापातकिनां लघुतरसंसर्गो-यथा। एकाध्यापनयाना-दिः। ततो लघुतर आलाप-स्वर्यनिःश्वासादिः।	एभिश्च त्रिभिर्लघुतरसंसर्गैरेको लघु-संसर्गः।			
	ज्ञानतस्त्रिभिर्लघुसंसर्गैर्वत्सरेण साम्यम्। तेनाष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षा-पणाः। तन्नभ्य-स्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	अज्ञानतो वत्सरद्वयेन।	तथा।	तथा।	तथा।
	ज्ञानत एकैकशो वत्सरत्रयेण।	तथा।	तथा।	तथा।
	अज्ञानाद्वत्सरषट्केन।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमा-नत्वात् ज्ञानतो वत्सरत्रयेण पातः।	तथा।	तथा।	तथा।
	संलापादीनां त्रयाणां एकैकयानादिसमा-नत्वादज्ञानाद्वर्षषट्केन पातः। तेना-ष्टादशवार्षिकव्रतम्।	२७० धेनवः।	८१० कार्षा-पणाः। तन्नभ्य-स्वर्णादि वा।	१५० गावः। अशक्तौ १५० कार्षापणाः।
	ज्ञानादेकैकशो वत्सरनवकेन।	तथा।	तथा।	तथा।
	अज्ञानादेकैकशोऽष्टादशवत्सरैः पातः।*। नवविधपापान्वितानां मध्यात् येन पापीयसा यः संसृष्टः स तस्य व्रतं पादहीनं कुर्यात्॥ एतच्च प्रथमसंस-र्गिणाम्। द्वितीयसंसर्गिणां द्विपाद-हीनम्। तृतीयसंसर्गिणां त्रिपादहीनं सर्वत्र ज्ञेयम्॥*॥ संसर्गाणामुक्त-कालन्यूनाधिक्ये भागहारेण प्रायश्चित्त-न्यूनाधिक्यं ज्ञेयम्॥*॥ रघुनन्दन-भट्टाचार्यमते कलौ लघुसंसर्गेषु प्रति-ग्रहादिषु पातित्याभावात् तत्प्रायश्चि-त्ताभावः।			
पतितोत्पन्नत्वमपि महापात-किसंसर्गविशेषः।	यस्य पतितस्य यत् प्रायश्चित्तं तस्य पातित्य-दशायां जातस्य पुत्रस्य तत् तृतीय-भागप्रायश्चित्तम्। तदानीं तज्जातायाः कन्यायाः पतितोत्पन्नपुत्रप्रायश्चित्ततृती-यभागप्रायश्चित्तम्।			

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
समुत्कर्षे अनृतम्। तत्र समुत्-कर्षनिमित्तं वाचा क्रियया वा अन्यथा प्रतिपादनं यथा शूद्रस्य ब्राह्मणोऽहमिति वचनं यज्ञोपवीतधारणञ्च। अथवा परस्य सम्यग्जाति-विद्योत्कर्षे सति नायं ब्रा-ह्मणो न च किञ्चिदयं जा-नीते इत्यनृतवचनम्। १। राजगामिपैशुन्यम्। तत्तु राजनि निर्दोषस्य दोष-ख्यापनम्। २। गुरोरलीक-निर्बन्धः। स तु गुरोर्जन्म-दातुर्मृषादोषाभियोगः। ३।	द्वादशवार्षिकव्रतम्। एतच्च ज्ञानात्यन्ता-भ्यासतः॥*॥ एतच्चाध्यादृयदुपपातके दृश्यते तदज्ञानादिना लघुविषयश्चेत्या-दिव्यवस्थेयम्॥*॥ यच्च वशिष्ठवचनं ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात्। विष्णुः। समुत्कर्षानृते गुरोश्चालीकनिर्बन्धे तदा-चारणे च मासं पयसा वर्तेत। आचारणं परदारगमनाभिशापः। वशिष्ठः। गुरोश्चालीकनिर्बन्धे सचेल-स्नातो गुरुं प्रसादयेत् प्रसादात् पूतो भवति। एतानि प्रमादादिकृते बो-ध्यानि।	१८० धेनवः।	५४० कार्षापणाः	१०० गावः। अशक्तौ १०० कार्षापणाः।

अथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्वोदानम्।	दक्षिणा।
एतानि त्रीणि ज्ञानतः अत्यन्ताभ्यासे अज्ञानकृतब्रह्महत्यासमानि। यागस्थयोः क्षत्रियवैश्ययोर्व्वधः। ४। गर्भिणीवधः। ५। रजस्वलावधः। ६। अग्निगोवधः। ७। ब्राह्मणव्यतिरिक्ताविज्ञातगर्भवधः। ८। प्रत्यागमनवधः। ९। एतानि च अज्ञानकृतब्रह्महत्यासमानि।				
ब्रह्मोज्झता। सा च असच्छास्त्राभियोगेन अधीतवेदविस्मरणम्। १। वेदनिन्दा। अथवा अन्यतश्च।२। चौटसाक्ष्यम्। ३। सुहृद्वधः। स च ब्राह्मणव्यतिरिक्तमित्रवधः। ४। गर्हितान्नजग्धिः। सा च ज्ञानतोऽत्यन्ताभ्यासेन अभ्यञ्जान्न भोजनम्। ५। गर्हितान्नजग्धिः। ज्ञानतोऽत्यन्ताभ्यासेन छत्राकलशुनादिभोजनम्। ६। एतानि षट् अज्ञानकृतसुरापानसमानि।	द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणसम्बन्धिनिःक्षेपहरणम्। १। न्यासस्वर्णरजतभूमिवस्त्रधेनुमणीनां ७ स्वाभ्यासेन हरणम्। एतानि सप्त ब्राह्मणस्वामिकाद्योतिरिक्तकापरिमितसुवर्णस्तेयसमानि।	ज्ञानतो द्वादशवार्षिकव्रतम्। अज्ञानतस्त्रादर्धम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
सपिण्डस्त्रीगमनम्। १। ब्राह्मणकुमारीगमनम्। २। चाण्डालादिस्त्रीगमनम्। ३। सवर्णमित्रस्त्रीगमनम्। ४। पुत्रस्यासवर्णस्त्रीगमनम्। ५। धीरसेतरपुत्रभार्य्यागमनम्। ६। पितृष्वसृगमनम्। ७। मातृष्वसृगमनम्। ८। गन्तारमेत्य हीनवर्णपितृपत्नीगमनम्। ९। पितृव्यपत्नीगमनम्। १०। मातामहपत्नीगमनम्। ११। मातुलपत्नीगमनम्। १२। श्वश्रूगमनम्। १३। स्वसृगमनम्। १४। ज्येष्ठभ्रातृपत्नीगमनम्। १५। राजपत्नीगमनम्। १६। श्रोत्रिय-	ज्ञानतो मद्यापातकोक्तप्रकारेण मरणं तद्वै कल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	२६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	अज्ञानतो१२ द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पञ्चपुरुषाधिकगामिनौनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासव्यभिचारिण्याः सप्तमगमने अर्थात् सप्तमपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः।	११० कार्षापणाः। पादोनधेनुचतुष्टयस्य मान्यत्वात्।	यथाशक्ति।

यथानुपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
पत्न्यागमनम्।१७। ऋत्विक्पत्न्यागमनम्। १८। उपाध्यायपत्न्यागमनम्। १९। मित्रपत्न्यागमनम्। २०। स्वसृसख्यागमनम्। २१। असवर्णाजातदुहितृगमनम्।	अज्ञानादारोहणमात्रे सम्बन्धविप्रकर्षे वा पराकस्तप्तकृच्छ्रो वा।			
२२। आचार्यपत्न्यागमनम्। २३। अरण्यागतागमनम्। २४। प्रव्रजितागमनम्।२५। धात्र्यागमनम्। २६। साध्व्यागमनम्। २७। निःक्षत्रियागमनम्। २८। वर्णोत्तमागमनम्।२९। एतानि गुरुतल्पगमनसमानि। *	ज्ञानतो महापातकोक्तप्रकारेण मरणम्। तद्वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्।	३६० धेनवः।	१०८० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	२०० गावः। अशक्तौ २०० कार्षापणाः।
इति चतुःप्रकाराख्यनुपातकानि मिलित्वा एकपञ्चाशत्संख्येयानि।	अज्ञानतो द्वादशवार्षिकव्रतम्।	१८० धेनवः।	५४० कार्षापणाः। तन्मूल्यं स्वर्णादि वा।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	पञ्चपुरुषाधिकगामिनीनामासां गमने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्द्धसप्तधेनुसंकलनात्।	यथाशक्ति।
	अभ्यासस्थभिचारिण्याः सकृद्गमने अर्थात् समपुरुषगामिन्या गमने पराकः।	५ धेनवः।	१५ कार्षापणाः	यथाशक्ति।
	अष्टमादिपुरुषगामिन्या गमने तप्तकृच्छ्रम्	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयस्य ग्राह्यत्वात्।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ। धेनुदानम्।	तदशक्तौ। चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्त्तृकप्रायोपवेशनाद्यकृतब्राह्मस्वस्वामिकगवोवधः।	त्रैमासिकव्रतम्। तद्यथा। कृतसक्षिखवपनो व्यापादितायाः गोर्यन्मांसमकृतपरिधानोत्तरावगुण्ठनो मासमेकं गोमूत्रेण यवागूकृतान् यवान् पिबन् गोष्ठे वसेत्। अपरमासद्वये उषोष्यापरदिनं सायं स्वल्पं भुञ्जीत। जितेन्द्रियो गोमूत्रेण स्नानं चरेत्। दिवा गवानुगमनं ऊर्द्धं तिष्ठन् गोरजःपानञ्च चरेत्। गोः शुश्रूषां नमस्कारञ्च कुर्य्यात्। रात्रौ वीरासनं वसेत्। तिष्ठन्तीषु गोष्वनुतिष्ठेत्। व्रजन्तीषु तास्वनुव्रजेत् आसीनासु तास्वासीनः। वीतमत्सरः। आतुरामभिगच्छन्तीं पतितां पङ्कलग्नां भयनिमित्तैर्वीरव्याघ्रादिभिराक्रान्तां च गां सर्व्वशक्तिभिर्विमोचयेत्। शीतवर्षातपेषु मारुते भग्ने वाति वा गोभ्यो गृहमकृत्वा आत्मत्राणं न कुर्य्यात् आत्मनः अन्येषां वा गृहचत्वरखलेषु भक्षयन्तीं पिबन्तं वत्सञ्च निवारणाभिप्रायेण न कथयेत्। एतद्विधानेन यो गामनुगच्छति स गोहत्याकृतपापात् प्रमुच्यते। एकं हृष्टं दम्यं गाञ्च दक्षिणां दद्यात्। एतदशक्तौ वेदविद्भ्यः सर्व्वस्वं दद्यात्। एतच्चतुर्थायण्यादिविषयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	१२ धेनवो भवदेवभट्टसम्मताः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः तन्मूल्यं स्वर्णादि वा। ५१ कार्षापणाः	१ वृषः १० गावः अशक्तौ १५ कार्षापणाः। तथा।

यथोपपापातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकाज्ञानकृतगवीवधः।	सार्द्धमासिकव्रतम्। तद्यथा। गोष्ठे गोसमीपे गोघ्नः स्थितिं कुर्य्यात्। तत्रैव स्थितो शयनञ्च। शक्तुयावकपयोदधिसरगोमयानां भक्षणं क्रमशः कुर्य्यात्। नखरोमविवर्जितश्मश्रुवदनश्चरित्। जितेन्द्रियो वीतमत्सरश्च भवेत्। यथाशक्ति गायत्रीञ्च जपेत्। सार्द्धमासे पूर्णे सति विप्रान् भोजयेत्। गां तन्मूल्यं वा दक्षिणां दद्यात्। अनेन विधानेन गोघ्नः पापान्मुच्यते। एतद्व्रतं गोस्वामिने तत्प्रतिरूपं गवान्तरं यथोक्तमूल्यं वा दत्त्वा कर्त्तव्यम्। स्त्रीशूद्रबालहत्यानामर्द्धं प्रायश्चित्तम्।	६ धेनवो भवदेवभट्टसम्मताः। ९ धेनवो बहुसम्मताः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादि वा। २५॥० कार्षापणाः। बहुसम्मताः। सार्द्धधेनुसङ्कलनात्।	१ गौः। अशक्तौ १ कार्षापणः। सार्द्धसप्ते ७॥० कार्षापणाः।
अज्ञानकृतशूद्रकर्तृक-ब्राह्मणस्वामिकगवीवधः।	त्रैमासिकव्रतार्द्धम्। अज्ञानतस्त्वदर्द्धम्।	६ धेनवो भवदेवभट्टसम्मताः। ९ धेनवो बहुसम्मताः।	१८ कार्षापणाः। २५॥० कार्षापणाः। बहुसम्मताः। तन्मूल्यस्वर्णादि वा।	१ गौः। अशक्तौ १कार्षापणः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतम्। तद्यथा। षण्मासान् तन्मूत्रेण परिवृतो गोग्रासाहर्त्ता गाव्रतो यवाग्वा गोभिरेव सञ्चरन् तत्पापात् विमुच्यते।	१२ धेनवः।	३६ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतक्षत्रियस्वामिकगवीवधः	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
शूद्रकर्तृकाज्ञानकृत-क्षत्रियस्वामिकगवीवधः।	षाण्मासिकव्रतार्द्धम्।	६ धेनवः।	१८ कार्षापणाः। तन्मूल्यस्वर्णादिवा	यथाशक्ति।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतद्व्रतार्द्धम्। स्त्रीशूद्रबालहत्यानां सर्व्वत्रार्द्धम्।	३ धेनवः।	९ कार्षापणाः। तन्मूल्यस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यस्वामिकगवीवधः।	द्विगुणं मासव्रतम्। मासव्रतं यथा। मासैकं पञ्चगव्यपानं गोष्ठे वासः गवानुगमनं गोमतीजपः।	१० धेनवः।	३० कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
तत्कर्तृकाज्ञानकृततत्स्वामिकगवीवधः।	एतदर्द्धम्।	५ धेनवः।	१५ कार्षापणाः। तन्मूल्यस्वर्णादि वा	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतशूद्रस्वामिकगवीवधः।	४ प्राजापत्यानि।	४ धेनवः।	१२ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतशूद्रस्वामिकगवीवधः।	२ प्राजापत्ये। स्त्रीशूद्रबालहत्यानां सर्व्वत्रार्द्धम्। एकस्य स्त्रीत्वशूद्रत्वाद्युभयधर्म्मवत्त्वे प्रायश्चित्तपादः।	२ धेनू।	६ कार्षापणाः। तन्मूल्यस्वर्णादि वा।	यथाशक्ति।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः।	द्विगुणं त्रैमासिकव्रतम्। अज्ञानतस्त्वदर्द्धम्।	२४ धेनवो भवदेवभट्टसम्मताः। ३४ धेनवो बहुसम्मताः।	७२ कार्षापणाः। १०२कार्षापणाः। बहुसम्मताः।	२ वृषौ २० गावः। अशक्तौ ३० कार्षापणाः।
ब्राह्मणस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकाज्ञानकृतवधः	त्रैमासिकव्रतम्। अज्ञानतस्त्वदर्द्धम्।	१२धेनवः। १७ धेनवो बहुसम्मताः।	३६ कार्षापणाः। ५१ कार्षापणाः। बहुसम्मताः।	१० वृषः १० गावः। अशक्तौ १५ कार्षापणाः।

३२८
प्रायश्चि

यथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	द्विगुणं षाण्मासिकव्रतम् । अज्ञानतस्तदर्धम् ।	२४ धेनवः ।	७२ कार्षापणाः ।	यथाशक्ति ।
क्षत्रियस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतम् । अज्ञानतस्तदर्धम् ।	१२ धेनवः ।	३६ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	चतुर्गुणं मासिकव्रतम् । अज्ञानतस्तदर्धम् ।	२० धेनवः ।	६० कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	द्विगुणं मासिकव्रतम् । अज्ञानतस्तदर्धम् ।	१० धेनवः ।	३० कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	८ प्राजापत्यानि । अज्ञानतस्तदर्धम् ।	८ धेनवः ।	२४ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	४ प्राजापत्यानि । अज्ञानतस्तदर्धम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकाधमशूद्रस्वामिकगवां वधः ।	२ प्राजापत्ये । अज्ञानतस्तदर्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
ज्ञानकृतशूद्रकर्तृकाधमशूद्रस्वामिकगववधः ।	१ प्राजापत्यम् । अज्ञानतस्तदर्धम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	४ प्राजापत्यानि । अज्ञानतस्तदर्धम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
अधमशूद्रस्वामिकगर्भिणीकपिलादोग्ध्रीहोमधेनुसुव्रतानां गवां शूद्रकर्तृकज्ञानकृतवधः ।	२ प्राजापत्ये । अज्ञानतस्तदर्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादः । अज्ञानतस्तदर्धम् ।	५ धेनवः ।	१२॥० कार्षापणाः । सपादधेनुचतुष्टयसङ्कलनात् ।	३॥० कार्षापणाः ।
ब्राह्मणस्वामिकाया गोर्गात्रसञ्चितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादद्वयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	८ धेनवः ।	२५॥० कार्षापणाः । सार्धाष्टधेनुसङ्कलनात् ।	७॥० कार्षापणाः ।
ब्राह्मणस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	त्रैमासिकव्रतपादद्वयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालवृद्धानामर्धम् । चैतन्ययुक्तगर्भवधे ज्ञातृत्वमेव प्रायश्चित्तम् ।	१३ धेनवः ।	३८।० कार्षापणाः । पादोनत्रयोदशधेनुसङ्कलनात् ।	११।० कार्षापणाः ।
क्षत्रियस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवधः ।	षाण्मासिकव्रतपादः । अज्ञानतस्तदर्धम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णोदानम् ।	दक्षिणा ।
क्षत्रियस्वामिकाया गोर्गात्रसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	षाण्मासिकव्रतपादद्वयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
क्षत्रियस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	षाण्मासिकव्रतपादत्रयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् । चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम् ।	९ धेनवः ।	२७ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकाया गोरुत्पन्नमात्रगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानज्ञतवधः ।	द्विगुणमासव्रतस्य पादः । अज्ञानतस्तदर्धम् ।	३ धेनवः ।	७॥० कार्षापणाः । सार्धद्वयधेनुसङ्कलनात् ।	यथाशक्ति ।
वैश्यस्वामिकाया गोर्गात्रसम्मितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकवधः ।	द्विगुणमासव्रतस्य पादद्वयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	द्विगुणमासव्रतस्य पादत्रयम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	८ धेनवः ।	२२॥० कार्षापणाः । सार्धसप्तधेनुसङ्कलनात् ।	यथाशक्ति ।
शूद्रस्वामिकाया गोरुत्पन्नगर्भस्य अर्थात् गर्भग्रहणदिनात् सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	१ प्राजापत्यम् । अज्ञानतस्तदर्धम् ।	१ धेनुः ।	४ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकाया गोर्गात्रसम्मितगर्भस्य अर्थात् मासद्वयोपरिसावनमासद्वयानतिक्रान्तगात्राद्यवयवोत्पन्नगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	२ प्राजापत्ये । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकाया गोर्निष्पन्नसकलगात्रचैतन्यरहितगर्भस्य अर्थात् चतुर्थमासोपरि सावनमासद्वयानतिक्रान्तगर्भस्य ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	३ प्राजापत्यानि । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् । चैतन्ययुक्तगर्भवधे कृत्स्नमेव प्रायश्चित्तम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्वामिकानामतिह्रस्वातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	त्रैमासिकव्रतार्धम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	८ धेनवः ।	२५॥० कार्षापणाः । सार्धाष्टधेनुसङ्कलनात् ।	७॥० कार्षापणाः ।
क्षत्रियस्वामिकानामतिह्रस्वातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	षाण्मासिकव्रतार्धम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
वैश्यस्वामिकानामतिह्रस्वातिक्रूरातिबालातिरोगिणीनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानज्ञतवधः ।	१ मासव्रतम् । अज्ञानतस्तदर्धम् । स्त्रीशूद्रबालहत्यानामर्धम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
शूद्रस्वामिकानामतिह्रस्वातिक्रूरातिबालातिरोगिणीनां	२ प्राजापत्ये । अज्ञानतस्तदर्धम ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।

यथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ धनदानम्।	दक्षिणा
गवां ब्राह्मणक्षत्रियवैश्यकर्तृकप्रयत्ननिष्पन्नप्राणहतवधः।	स्त्रीशूद्रबालहत्यानामर्धम्।			
ब्राह्मणस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नप्राणहतवधः।	द्विगुणत्रैमासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	३४ धेनवः।	१०२कार्षापणाः।	२ वृषौ २० गावः। अशक्तौ ५० कार्षापणाः।
क्षत्रियस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नप्राणहतवधः।	द्विगुणषाण्मासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	२४ धेनवः।	७२कार्षापणाः।	यथाशक्ति।
वैश्यस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नप्राणहतवधः।	चतुर्गुणमासव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	२० धेनवः।	६० कार्षापणाः।	यथाशक्ति।
शूद्रस्वामिकानां बहूनां गवां ब्राह्मणक्षत्रियवैश्यकर्तृकैकप्रयत्ननिष्पन्नप्राणहतवधः।	८ प्राजापत्यानि। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्। स्त्रीत्वाद्युभयधर्म्मवत्त्वे पादः। प्रयत्नभेदे प्रायश्चित्तान्तरम्।	८ धेनवः।	२४कार्षापणाः।	यथाशक्ति।
अज्ञानतबहुकर्तृकब्राह्मणस्वामिकैकगवीवधः।	प्रत्येकं त्रैमासिकव्रतपादः। अज्ञानतस्तदर्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्गलनात्।	३॥० कार्षापणाः।
अज्ञानतबहुकर्तृकक्षत्रियस्वामिकैकगवीवधः।	प्रत्येकं षाण्मासिकव्रतपादः। अज्ञानतस्तदर्धम्।	३ धेनवः।	८ कार्षापणाः।	यथाशक्ति।
अज्ञानतबहुकर्तृकवैश्यस्वामिकैकगवीवधः।	प्रत्येकं द्विगुणमासव्रतपादः। अज्ञानतस्तदर्धम्।	२ धेनवः।	७॥० कार्षापणाःमार्द्धत्रयधेनुसङ्गलनात्	यथाशक्ति।
अज्ञानतबहुकर्तृकशूद्रस्वामिकैकगवीवधः।	प्रत्येकं प्राजापत्यम्। अज्ञानतस्तदर्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
द्वाभ्यामेकगवीवधः।	यद्यत्स्वामिकाया गोर्वधेयद्यत्प्रायश्चित्तमुक्तं प्रत्येकंसम्पूर्णं तत्तत् प्रायश्चित्तम्।			
द्वाभ्यामेकप्रयत्ननिष्पन्नबहुगवीवधः।	यद्यत्स्वामिकाया गोर्वधे यद्यत्प्रायश्चित्तं प्रत्येकं तद्द्वैगुण्यम्।			
एकप्रयत्ननिष्पन्नबहुकर्तृकबहुगवीवधः।	प्रत्येकं तत्तद्वधोक्तव्रतपादद्वयम्।			
एकप्रयत्ननिष्पन्नाभ्यासकृतबहुकर्तृकबहुगवीवधः।	प्रत्येकं तत्तद्वधोक्तव्रतद्विपादप्रायश्चित्तावृत्तिः।			
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकंकहायनगवीवधः।	त्रैमासिकव्रतपादः। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	५ धेनवः।	१२॥० कार्षापणाः। सपादधेनुचतुष्टयसङ्गलात्।	३॥० कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकद्विहायनगवीवधः।	त्रैमासिकव्रतार्धम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	९ धेनवः।	२५॥० कार्षापणाः। सार्धाष्टधनुसङ्गलनात्।	७॥ कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणस्वामिकत्रिहायणगवीवधः।	पादन्यूनत्रैमासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	१२ धेनवः।	३८॥० कार्षापणाः।पादोनत्रयोदश धनुसङ्गलनात्।	११॥० कार्षापणाः।
अज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकैकहायनगवीवधः।	षाण्मासिकव्रतपादः। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकद्विहायनगवीवधः।	मासिकव्रतपादद्वयम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	६ धेनवः।	१८कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकक्षत्रियस्वामिकत्रिहायणगवीवधः।	पादन्यूनषाण्मासिकव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	८ धेनवः।	२७कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकैकहायनगवीवधः।	मासैकव्रतार्धम्। अज्ञानतस्तदर्धम्।	३ धेनवः।	७॥० कार्षापणाः। सार्धद्वयधेनुमङ्कलनात्	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकद्विहायनगवीवधः।	मासव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकवैश्यस्वामिकत्रिहायणगवीवधः।	पादोनं द्विगुणमासव्रतम्। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	८ धेनवः।	२२॥० कार्षापणाः। सार्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकैकहायनगवीवधः।	१ प्राजापत्यम्। अज्ञानतस्तदर्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ज्ञानकृतब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकद्विहायनगवीवधः।	२ प्राजापत्ये। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ज्ञानकृत ब्राह्मणक्षत्रियवैश्यकर्तृक शूद्रस्वामिकत्रिहायणगवीवधः।	३ प्राजापत्यानि। अज्ञानतस्तदर्धम्। स्त्रीशूद्रबालहत्यानामर्धम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेणाहारप्रचारनिर्गमरोधनिमित्तवधः।	प्राजापत्यपादः।	१ धेनुः।	॥० पणाः। धेनुपादसङ्कलनात्	यथाशक्ति।
	क्षेत्रज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादः। इदन्तु सर्वस्वामिकायाः सर्ववयस्कायाः गोः सर्वकर्तृकवधे बोद्धव्यम्।	२ धेनू।	५॥८० कार्षापणाः। पादार्धोनधेनुद्वयसङ्कलनात्।	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण अकालबन्धना यथा बन्धननिमित्तवधः।	प्राजापत्यपादद्वयम्।	१ धेनुः।	१॥० कार्षापणाः। धेन्वर्धसकलनात्।	यथाशक्ति। ग्रन्थौ १२॥०
	क्षेत्रज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणपादद्वयम्। एतदपि सर्वस्वामिकायाः सर्ववयस्कायाः गोः सर्वकर्तृकवधे बोद्धव्यम्।	४ धेनवः।	११।० कार्षापणाः। पादोनधेनुचतुष्टयसङ्कलनात्।	य अथौ ५० नी २५
क्षीणाया गोरक्षीणत्वभ्रमेण शस्यशकटादियोजननिमित्तवधः।	प्राजापत्यपादत्रयम्।	१ धेनुः।	२।० कार्षापणाः। पादोनधेनुसङ्कलनात्।	यथाशक्ति।
	क्षेत्रज्ञाने तु चान्द्रायणपादत्रयम्।	६ धेनवः।	१६॥८ कार्षापणाः पादोनसार्धसप्तधेनुसङ्कलनात्	यथाशक्ति।
क्षीणाया गोरक्षीणत्वभ्रमेण कूपावटादिषु भयादिना निपातनेन शास्त्रीयदण्डनिपातनेन च वधः।	प्राजापत्यम्।		३ कार्षापणाः।	यथाशक्ति।
	क्षेत्रज्ञाने प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणम्। एतदपि सर्वस्वामिकादिविषयम्। यदयत्स्वामिकयदयत्	१ धेनुः। ८ धेनवः।	२२॥० कार्षापणाः। सार्धसप्तधेनुसङ्कलनात्।	यथाशक्ति।

अघोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पूर्वोदानम्।	दक्षिणा।
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रेतरस्वामिकगवापालननिमित्तवधः।	कर्तृकायदृग्वधे यदृग्प्रायश्चित्तमुक्तं अप्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य तत्तत्प्रायश्चित्तस्य पादत्रयम्। प्रवृत्तप्रवर्त्तकरूपप्रयोजकस्य पादद्वयम्। अल्पप्रवृत्तरूपानुग्राहकस्य पादत्रयम्। बध्यप्रतिरोधकरूपानुग्राहकस्य पादद्वयम्॥ सैतिकर्त्तव्यताकप्राजापत्यम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्। इति कर्त्तव्यता यथा। सशिखं वपनं कार्य्यं त्रिसन्ध्यमवगाहनम्। मृद्भैर्वापि खुरैर्युक्तं लाङ्गलव्रणादिभिः॥ आर्द्रमेव हि तद्वर्म्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्॥ ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्य्याद्ब्राह्मणभोजनम्। अनड्वत्संहितां गाञ्च दद्याद्विप्राय दक्षिणाम्॥ इति पराशरोक्ता।	२ धेनू।	६ कार्षापणाः।	१ वृषः १ गौः। अशक्तौ ६ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकशूद्रस्वामिकगवापालननिमित्तवध।	प्राजापत्यद्वयम्। स्त्रीशूद्रबालवृद्धानामर्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रेतरस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः। अप्राप्तदम्यावस्था तु त्रिहायणपर्य्यन्तम्।	सैतिकर्त्तव्यताकप्राजापत्यपादः।	धेनोरर्द्धस्वामित्वात् १ एका धेनुः।	१॥० कार्षापणाः।	१॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रस्वामिकाप्राप्तदम्यावस्थगोवत्सापालननिमित्तवधः।	प्राजापत्यव्रतत्रयपादः।	धेनोरर्द्धस्वामित्वात् १ एका धेनुः।	१॥० कार्षापणाः	यथाशक्ति।
उत्सृष्टव्रषवत्सतर्य्योर्वधः।	भूतपूर्वस्वामिकगववधप्रायश्चित्तद्विगुणम्। पूर्वस्वाम्यज्ञाने ब्राह्मणस्वामिकगववधद्विगुणप्रायश्चित्तम्।			
वधः। एकप्रयत्ननिष्पन्नकर्तृकबहुगवां ज्ञानज्ञतब्राह्मणकर्तृकब्रा	दशरात्रं वज्रव्रतम्। मासार्द्धं यवपानम्। प्राजापत्यं वा। वज्रव्रतं यथा। गोमूत्रेण समायुक्तं यावकञ्चोपयोजयेत्। एकाहमेव कृच्छ्रोऽयमुक्तश्चाग्निरसा स्वयम्। सर्व्वपापहरो दिव्यो नाम्ना वज्र इति स्थितः॥*॥ मृत्तभक्षादिना यत्नमाभ्यन्तरे गोर्मरणे अल्पूनं वधप्रायश्चित्तं कारणीयम्। गुरुणा समेन वा तेन प्रायश्चित्तेन मृत्तभक्षादिप्रायश्चित्तसिद्धिः। यत्नासोत्तरमरणे मृत्तभक्षादिप्रायश्चित्तमात्रं कर्त्तव्यम्॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
गवां मुष्कमोषः।	यत्कर्तृकयत्स्वामिकगववधे यत्प्रायश्चित्तमुक्तं तत्कर्तृकतत्स्वामिकगवमुष्कमोषे तत्प्रायश्चित्तम्। मृत्युलिङ्गच्छेदयोस्तुल्यत्वाभिमानात्। अत्र प्रयोजकभेदस्यार्द्धं पादोनञ्च।			

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
ब्राह्मणस्य स्वयं ब्राह्मणकर्तृकब्राह्मणकटादियोजनम् ।	प्राजापत्यद्वयम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
योषिद्वां ब्राह्मणकर्तृकब्राह्मणकटादियोजनम् ।	४ प्राजापत्यानि । ब्राह्मणेतरेषां प्राजापत्यद्वयम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
उत्सृष्टपत्युः कपिलायाश्च ब्राह्मणकर्तृकब्राह्मणकटादियोजनम् ।	यतिचान्द्रायणद्वयम् । ब्राह्मणेतरेषां यतिचान्द्रायणैकम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
गोमांसखादके गोविक्रयविनिमयादिः ।	विक्रयादिमात्रे अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधप्रायश्चित्तार्द्धम् । गोमांसखादककर्तृकतद्धववधे तु अज्ञानकृततत्तत्कर्तृकतत्तत्स्वामिकगववधोक्तसंपूर्णप्रायश्चित्तम् ।			

अथ गोवधापवादः ।

तत्र पराशरः ।

"धूर्य्येषु वहमानेषु दण्डेनाभिहतेषु च । काष्ठेन लेष्टुना वापि पाषाणेन तु ताडितः ॥ मूर्च्छितः पतितश्चैव मृतो वा सद्य एव च । एवंगतानां धूर्य्याणां प्रवक्ष्यामि यथाविधि ॥ उत्थितस्तु पदं गच्छेत् पञ्च सप्त दशापि वा । ग्रासं वा यदि गृह्णाति तोयं वा पिबति स्वयम् । पूर्वव्याधिविनष्टानां प्रायश्चित्तं न विद्यते ॥" संवर्त्तः । "यज्ञे गोचिकित्सायां मृद्गर्भविमोचने । यज्ञे हते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते ॥ औषधं खे हुमाहारं ददतोब्राह्मणेषु च । प्राणिनां प्राणहत्यर्थं प्रायश्चित्तं न विद्यते ॥ दारुच्छेदशिराभेदप्रयत्नैरुपकुर्वताम् । द्विजानां गोहितार्थं वा प्रायश्चित्तं न विद्यते ॥" याज्ञवल्क्यः । "क्रियमाणोपकारे तु मृते विप्रे न पातकम् । विपाके गोव्रणानाञ्च भेषजाग्निक्रियासु च ॥" मिताक्षराधृतपराशरवचनम् । "कूपे खाते च धर्म्मार्थं गृहदाहे च ये मृताः । ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यते ॥" भवदेवभट्टधृतवचनम् । "शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च । यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते ॥" संवर्त्तः । "देवद्रोण्यां विहारे च कूपेष्वायतनेषु च । एषु गोषु प्रपन्नासु प्रायश्चित्तं न विद्यते ॥" देवद्रोणी स्वयम्भूलिङ्गादावस्थानगङ्गम् । विहारो गवां मैथुनम् । आयतनं गोमानिबन्धनस्थानम् । अत्र कूपायतनकर्तुर्दोषाभावो न तु गोस्वामिनः । इति प्रायश्चित्तविवेकप्रायश्चित्ततत्त्वस्मृतिसारमौर्ख्यदलनमतं गोवध प्रायश्चित्तं समाप्तम् ॥ * ॥

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
ब्राह्मणक्षत्रियकर्तृकज्ञानकृतक्षत्रियवधः ।	अज्ञानकृत ब्रह्महत्याप्रायश्चित्तपादः । स तु त्रैवार्षिकव्रतरूपः ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
ब्राह्मणक्षत्रियकर्तृकाज्ञानकृतक्षत्रियवधः ।	सार्द्धवार्षिकव्रतम् ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशक्तौ १२॥० कार्षापणाः ।
वैश्यकर्तृकज्ञानकृतक्षत्रियवधः	षाड्वार्षिकव्रतम् ।	९० धेनवः ।	२७० कार्षापणाः ।	५० गावः । अशक्तौ ५० कार्षापणाः ।
वैश्यकर्तृकाज्ञानकृतक्षत्रियवधः	त्रैवार्षिकव्रतम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
शूद्रकर्तृकज्ञानकृतक्षत्रियवधः	नववार्षिकव्रतम् ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ७५ कार्षापणाः ।
शूद्रकर्तृकाज्ञानकृतक्षत्रियवधः	सार्द्धचतुर्वार्षिकव्रतम् ।	सार्द्धसप्तषष्टिधेन्वसम्भवात् ६८ धेनवः ।	२०२॥० कार्षापणाः ।	३८ गावः । अशक्तौ ३७॥० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यकर्तृकज्ञानकृतवैश्यवधः ।	ब्रह्महत्याव्रताष्टमभागः । स च सार्द्धवार्षिकव्रतरूपः ।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः ।	६७॥० कार्षापणाः ।	१३ गावः । अशक्तौ १२॥० कार्षापणाः ।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानकृतवैश्यवधः ।	ब्रह्महत्याव्रतषोड्शभागः । स च नवमासिकव्रतरूपः ।	सपादैकादशधेन्वसम्भवात् १२	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६।० कार्षापणाः ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ वर्णीदानम्।	दक्षिणा
शूद्रकर्तृकब्राह्मणजातवैश्यवधः।	ब्रह्महत्याव्रतचतुर्थभागः। स च वैवार्षिक व्रतरूपः।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
शूद्रकर्तृकाब्राह्मणजातवैश्यवधः।	ब्रह्महत्याव्रताष्टमभागः। स च सार्द्धवार्षिकव्रतरूपः।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१२ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकब्राह्मणजातशूद्रवधः।	ब्रह्महत्याव्रतषोड्शभागः। स च नवमासिकव्रतरूपः।	सपादैकादशधेन्वसम्भवात् १२ धेनवः	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाब्राह्मणजातशूद्रवधः।	ब्रह्महत्याव्रतद्वात्रिंशत्तमभागः। स च सार्द्धचतुर्मासिकव्रतरूपः। सर्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	पादोनाधिकसार्द्धषड्धेन्वसम्भवात् ६ धेनवः।	१६॥० कार्षापणाः।	४ गावः। अशक्तौ ३।० कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकक्षत्रियजातक्षत्रियशूद्रवधः।	ब्रह्महत्याव्रतद्वादशभागः। स च वार्षिकव्रतरूपः। अज्ञानतस्त्वे तदर्द्धम्।	१५ धेनवः।	१५ कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥= कार्षापणाः।
सर्व्ववर्णकर्तृकब्राह्मणजातप्रतिलोमजातवधः अर्थात् अपकृष्टशूद्रवधः।	चान्द्रायणव्रतम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः	२२॥० कार्षापणाः।	यथाशक्ति।
सर्व्ववर्णकर्तृकब्राह्मणजातापकृष्टशूद्रवधः।	पराकव्रतम्। सर्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वादिधर्म्मद्वयवत्त्वे पादः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
ब्राह्मणकर्तृकब्राह्मणजातब्राह्मणीवधः।	षाड्वार्षिकं महाव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	८० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
क्षत्रियकर्तृकब्राह्मणजतब्राह्मणीवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। १०० कार्षापणा वा।
वैश्यकर्तृकब्राह्मणजतब्राह्मणीवधः।	अष्टादशवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	२७० धेनवः।	८१० कार्षापणाः।	१५० गावः। १५० कार्षापणा वा।
शूद्रकर्तृकब्राह्मणजतब्राह्मणीवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। सर्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभयधर्म्मवत्त्वे पादः।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
ब्राह्मणक्षत्रियकर्तृकब्राह्मणजातक्षत्रियावधः।	वैवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। २५ कार्षापणा वा।
वैश्यकर्तृकब्राह्मणजतक्षत्रियावधः।	षाड्वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	८० धेनवः।	२७० कार्षापणाः।	५० गावः। ५० कार्षापणा वा।
शूद्रकर्तृकब्राह्मणजतक्षत्रियावधः।	नववार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। सर्वत्र बालवृद्धस्त्रीणामर्द्धम्। एकस्य बालत्वाद्युभयधर्म्मवत्त्व पादः।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यकर्तृकब्राह्मणजातवैश्यावधः।	वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। ८।/६॥ कार्षापणा वा।
शूद्रकर्तृकब्राह्मणजतवैश्यावधः।	द्विवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम् एकस्य स्त्रीत्वाद्युभयधर्मवत्त्वे पादः।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१३॥ कार्षापणाः।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकशूद्रावधः।	वार्षिकव्रतम्। अज्ञानतस्तु एतदर्द्धम्। स्त्रीबालवृद्धानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्मवत्त्वे पादः।	१५ धेनवः।	४५कार्षापणाः।	८ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
आत्रेयीवधः। आत्रेयी त्रिविधा। अत्रिगोत्रा ऋतुस्नाता गर्भिणी च।	यत्कर्तृकयद्वर्णस्त्रीवधे यत्प्रायश्चित्तं तद्गुणम्।			

अघोपपातकानि।	प्रायश्चित्तानि।	तदग्रजो धेनुदानम्।	तदग्रजो चूर्णीदानम्।	दक्षिणा।
ब्राह्मण कर्तृकाज्ञानज्ञतसज्ञत्-सवर्णाभिचरितब्राह्मणीवधः।	वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अग्रजो ८।/६॥ कार्षापणाः।
क्षत्रियकर्तृकाज्ञानज्ञतसज्ञत् सवर्णाभिचरितब्राह्मणीवधः।	द्विवार्षिकव्रतम्। अज्ञानस्त्वे तदर्धम्।	३० धेनवः।	९० कार्षापणाः।	१० गावः। अग्रजो १९॥/१३॥ कार्षापणाः।
वैश्यकर्तृकाज्ञानज्ञतसज्ञतसवर्णाभिचरितब्राह्मणीवधः।	त्रैवार्षिकव्रतम्। अज्ञानतस्त्वे तदर्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अग्रजो २५ कार्षापणाः।
शूद्रकर्तृकाज्ञानज्ञतसज्ञत्सवर्णाभिचरितब्राह्मणीवधः।	चतुर्वार्षिकव्रतम्। अज्ञानतस्त्वे तदर्धम्। बालवृद्धस्त्रीणामर्धम्। एकस्य उभयधर्म्मवत्त्वे पादः।	६० धेनवः।	१८० कार्षापणाः।	३४ गावः। अग्रजो ३३।/६॥ कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानज्ञतो भ्रूयो व्यभिचरिताया अधमवर्णाभिचरिताया ब्राह्मण्या वधः।	द्वृतिदानम्। ज्ञानज्ञते तु द्वैगुण्यम्। क्षत्रियस्य एतद्द्विगुणम्। वैश्यस्य त्रिगुणम्। शूद्रस्य चतुर्गुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियकर्तृकाज्ञानज्ञतो भूयो व्यभिचरिताया अधमवर्णाभिचरिताया क्षत्रियाया वधः।	धनुर्दानम्। कामतो द्वैगुण्यम् वैश्यस्य एतद्द्विगुणम्। शूद्रस्य त्रिगुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यकर्तृकाज्ञानज्ञतो भूयो व्यभिचरिताया अधमवर्णाभिचरिताया वैश्याया वधः।	छागदानम्। कामतस्त्वे तद्द्विगुणम्। शूद्रस्य एतद्द्विगुणम्।	•	•	यथाशक्ति।
ब्राह्मणक्षत्रियवैश्यशूद्रकर्तृकाज्ञानज्ञतोभूयो व्यभिचरिताया अधमवर्णाभिचरिताया शूद्राया वधः।	मेषदानम्। ज्ञानतो द्वैगुण्यम्। सर्वत्र स्त्रीबालवृद्धानामर्धम्। एकस्य उभयधर्म्मवत्त्वे पादः। प्रयोजकादीनां पाद पादहानिः।	•	•	यथाशक्ति।
ब्राह्मणकर्तृकाज्ञानज्ञतब्राह्मणीगर्भवधः।	द्वादशवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अग्रजो १०० कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानज्ञतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अग्रजो २५ कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानज्ञत वैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अग्रजो १२॥० कार्षापणाः।
ब्राह्मणकर्तृकाज्ञानज्ञत शूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अग्रजो ६।० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानज्ञतब्राह्मणीगर्भवधः।	चतुर्विंशतिवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	२६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अग्रजो २०० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानज्ञतक्षत्रियागर्भवधः।	त्रैवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अग्रजो २५ कार्षापणाः।
क्षत्रियकर्तृकाज्ञानज्ञतवैश्यागर्भवधः।	सार्द्धवार्षिकव्रतम्। अज्ञानतोऽर्धम्।	सार्द्धद्वाविंशतिधेन्वसम्भवात् २३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अग्रजो १२॥० कार्षापणाः।
क्षत्रियकर्तृकाज्ञानज्ञतशूद्रागर्भवधः।	नवमासिकव्रतम्। अज्ञानतोऽर्धम्।	सपादैकादशधेन्वसम्भवात् १२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अग्रजो ६।० कार्षापणाः।
वैश्यकर्तृकाज्ञानज्ञतब्राह्मणीगर्भवधः।	षट्त्रिंशद्वार्षिकव्रतम्। अज्ञानतोऽर्धम्।	१८ धेनवः। ५४० धेनवः।	१६२० कार्षापणाः।	१०० गावः। अग्रजो १०० कार्षापणाः।

३२६
प्रायश्चि

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
वैश्यकर्तृकब्राह्मणजातक्षत्रिया-गर्भवधः ।	षाड्वार्षिकव्रतम् । अज्ञानतोऽर्धम् ।	८० धेनवः ।	२७० कार्षापणाः ।	५० गावः । अशक्तौ ५० कार्षापणाः ।
वैश्यकर्तृकब्राह्मणजातवैश्यागर्भ-वधः ।	सार्धवार्षिकव्रतम् । अज्ञानतोऽर्धम् ।	सार्धत्रिंशति-धेन्वसम्भवात् २१ धेनवः ।	६७॥० कार्षापणाः ।	१२ गावः । अशक्तौ १२॥० कार्षापणाः ।
वैश्यकर्तृकब्राह्मणजातशूद्रागर्भ-वधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्धम् ।	सपादैकादशधेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६।० कार्षापणाः ।
शूद्रकर्तृकब्राह्मणजातब्राह्मणी-गर्भवधः ।	अष्टचत्वारिंशद्वार्षिकव्रतम् । अज्ञानतोऽर्धम् ।	७२० धेनवः ।	२१६० कार्षापणाः ।	४०० गावः । अशक्तौ ४०० कार्षापणाः ।
शूद्रकर्तृकब्राह्मणजातक्षत्रिया-गर्भवधः ।	नववार्षिकव्रतम् । अज्ञानतोऽर्धम् ।	१३५ धेनवः ।	४०५ कार्षापणाः ।	७५ गावः । अशक्तौ ७५ कार्षापणाः ।
शूद्रकर्तृकब्राह्मणजातवैश्यागर्भ-वधः ।	त्रैवार्षिकव्रतम् । अज्ञानतोऽर्धम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
शूद्रकर्तृकब्राह्मणजातशूद्रागर्भ-वधः ।	नवमासिकव्रतम् । अज्ञानतोऽर्धम् । ब्राह्मण्यादिगर्भे पुंस्त्वेन ज्ञाते विशेषेणाज्ञाते घोरं प्रायश्चित्तम् । स्त्रीत्वेन ज्ञाते सर्वत्रार्धं प्रायश्चित्तं द्रष्टव्यम् । सर्वत्र स्त्रीबालवृद्धानामर्धम् । प्रयोजकादीनां पादपादहानिः ।	सपादैकादश-धेन्वसम्भवात् १२ धेनवः ।	३३॥० कार्षापणाः ।	७ गावः । अशक्तौ ६।० कार्षापणाः ।
यद्यपि गजाश्वादिवधः सङ्करीकरणपापमिदं तथापि हिंसासामान्यादुपपातकप्रकरणे तत्प्रायश्चित्तं निरूप्यते ।				
हयसामान्यपशुघातः । हयेति ग्रहणात् यागाश्वे प्रायश्चित्ताद्यभावः ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
राजसम्बन्ध्युत्तमगजवधः ।	पञ्चनीलवृषदानम् ।	•	२५ कार्षापणाः ।	यथाशक्ति ।
अत्यन्तोत्तमवाजिराजभवधः ।	चान्द्रायणम् ।	८ धेनवः । सार्ध-मर्धेन्वसम्भवात्	२२॥० कार्षापणाः ।	यथाशक्ति ।
अश्ववधः ।	वामोयुगदानम् । एतच्च ज्ञानतः । अज्ञानतस्तदर्धम् ।	•	•	यथाशक्ति ।
मृगमहिषवराहकुञ्जरगवयत-रक्षुऋक्षवानरसिंहव्याघ्रभू-षनचमररुरुकादीनां वधः ।	अहोरात्रोपवासाम्लं घृतघटदानम् । एतच्चाज्ञानत एकवधविषयम् । ज्ञानतो द्वैगुण्यम् ।	•	उपवासासामर्थ्ये अष्ट पणाः ।	यथाशक्ति ।
अजाद्यादिवधः ।	त्रिरात्रोपवासः । एतदज्ञानतोऽत्यन्तधार्मिकब्राह्मणकर्तृकमेकवधे वेदितव्यम् ।	•	१॥० कार्षापणाः	हिरण्यं वस्त्रं वा ।
	शशस्य एकहायनवृषदानम् ।	•	वृषमूल्यम् ५ कार्षापणाः ।	यथाशक्ति ।
	अशक्तस्य धेनुदानम् । तदशक्तौ प्राजापत्यव्रतम ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अभ्यासे मासं यावकपानम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
मार्जारगोधानकुलमण्डूकश्व-पतत्रिमूषिकसर्पवधः । पतत्री गृहपक्षी ।	व्रतं क्षीरपानम् । पादिकं कृच्छ्रं वा । एतत्तमकृताज्ञानविषयम् । ज्ञानतोऽभ्यासे द्वादशरात्रं कृच्छ्रम् । स्त्रीशूद्रबालवृद्धानामर्धम् ।	•	१ कार्षापणः ।	यथाशक्ति ।
		यत्किञ्चिदधिक सपादधेन्वसम्भवात् २ धेनू ।	४ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	क्षणासर्पवधे तीक्ष्णायसीङ्कोलिकादानमादौ कर्त्तव्यम्। सर्पजातीयषण्ढवधे पलालभारः सौसकमाषश्च दातव्यः। एतज्ज्ञानतः। एतदशक्तौ व्रतादिकं कर्त्तव्यम्।			
अथ सामान्यपक्षिवधः।	नक्तव्रतम्। विरक्षिपरिमितरौप्यदानं वा।	०	⁄१३।— पणौ। नक्तव्रतस्योपवासतृतीयभागत्वात्।	यथाशक्ति।
	कामतोऽत्यभ्यासे शूद्रहत्याव्रतम्। गुरुगोवधव्रतं वा। स्त्रीशूद्रबालहत्यानामर्द्धम्। एकस्य स्त्रीत्वाद्युभयधर्म्मत्वे पादः।	१२ धेनवः।	३६ कार्षापणाः।	३ गावः। अशक्तौ ६।० कार्षापणाः।
अथ विशेषपक्षिवधः। बकबलाका-हंससारसकारण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूक शुकशारिकातित्तिरिमयूरकाककलविङ्ककालञ्जकमद्गुकपीतपारावतादीनां वधः।	अहोरात्रोपवासः सर्वबीजदानञ्च। एतदज्ञानविषयम्।	०	उपवासानुकल्पः ॥० पणाः। सर्व्वबीजमूल्यम्। ० पणाः।	यथाशक्ति।
	ज्ञानकृते त्र्यहोपवासः। शुक्लस्य गोदानम्। तत्रायं विशेषः। शुकवधे द्विहायनगवदानम्। क्रौञ्चवधे त्रिहायणगवदानम्। क्रौञ्चशुकभासमयूरश्येनगृध्रवधे वत्सतरीदानम्। अत्र वृषदानवत्सतरीदानयोर्व्यवस्था शक्ताशक्तविषयिका। एतद्दानाशक्तानां व्रतादिकम्।	०	१॥० कार्षापणः।	यथाशक्ति।
कोकिलशुककपोतकपिञ्जलकुक्कुटटिट्टिभखञ्जरीटानां पुरुषभारपरिमितानां वधः।	उत्कृष्टशूद्रहत्याव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।⁄६॥ कार्षापणाः।
मक्षामण्डूकमकरशिशुमारादिजलचरवधः।	मण्डूकवत्स्यहत्याव्रतम्। एतज्ज्ञानतः सकृद्वधे।	०	१ कार्षापणः।	⁄११॥—पणौ।
	अहोरात्रोपवासः यथाशक्तिलवणदानञ्च। एतत् कामतः सकृत्। अभ्यासात्यन्ताभ्यासयोस्तु मलावहप्रायश्चित्तेदर्शयिष्यते।	०	॥० पणाः उपवासानुकल्पः। १॥० कार्षापणः। लवणमूल्यम्।२।	⁄३॥=पणाः।
अथ सामान्यनस्थिप्राणिवधः।				
सहस्रसंख्यकानां अस्थिमतां कृकलासादीनां ज्ञानकृतवधः।	आब्दिकं शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।⁄६ कार्षापणाः।
अनस्थां क्रमिकीटपतङ्गभ्रमरदंशमशकमक्षिकादीनां शकटपूरितमितानां ज्ञानकृतवधः।	आब्दिक शूद्रहत्याव्रतम्। अज्ञाने षाण्मासिकम्।	१५ धेनवः।	४५ कार्षापणाः।	८ गावः। अशक्तौ ८।⁄६ कार्षापणाः।
अस्थिमतां प्रत्येकं वधः।	पणदानम्।	०	०	यत्किञ्चित्।
अनस्थां प्रत्येकं वधः।	प्राणायामः। पणदानं वा।	०	०	तथा।
अन्नशाकादिगुडादिसर्व्वरसफलपुष्पजातप्राणिवधः।	दिनमेकं घृतमात्रभोजनम्। एतदज्ञाने ज्ञाने तद्द्वैगुण्यम्।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे कृच्छ्रातिकृच्छ्रम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
फलवद्वृक्षवल्लतागुल्मच्छेदनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
अफलवतामेतेषां छेदनम् ।	अष्टोत्तरसाध्यहस्तच्छेदम् ।	०	२ कार्षापणौ ।	यथाशक्ति ।
अत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम् ।	चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
अभ्यासादत्यन्तोत्कृष्टफलवद्वृक्षच्छेदनम् ।	आब्दिकव्रतम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	९ गावः । अशक्तौ ८।/६॥ कार्षापणाः ।
चैत्यवृक्षश्मशानसीमपुण्यस्थानसुरालयजातवृक्षच्छेदनम् । विंशतिसंख्यकोपजीव्यवृक्षच्छेदनम् । ख्यातवृक्षच्छेदनञ्च ।	पूर्वोक्तवृक्षच्छेदनप्रायश्चित्तद्वैगुण्यादि । सर्वत्र स्त्रीशूद्रबालवृद्धानामर्द्धम् ।			
वापीकूपारामसेतुसभातडागवप्रदेवतायतनभेदनम् ।	ब्राह्मणेभ्यो निवेद्य चतस्र आहुतीर्जुहुयात् । इदं विष्णुरिति प्रथमां मानस्तोके इति द्वितीयां विष्णोः कर्म्माणीति तृतीयां पादोऽस्यान्यामिति चतुर्थीं यां देवतामुद्दिश्यादयति तस्यै देवतायै । ब्राह्मणान् भोजयेत् । एतत् सकृदल्पोपघातविषयम् । अभ्यासे महोपघाते च प्राजापत्यम् । दण्डश्च । यथा । सकृदल्पोपघाते प्रथममाहसः २५० पणाः । अभ्यासे महोपघाते उत्तममाहसः । १००० पणाः ।			
देवताया उत्कृष्टप्रतिमाभेदनच्छेदनदहनहरणानि ।	चान्द्रायणम् । वाप्यादिभेटनोक्तायतस्र आहुतयः । उत्तमसाहसो दण्डश्च । १००० पणाः ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
देवताया अपकृष्टप्रतिमाभेदनच्छेदनदहनहरणानि ।	प्राजापत्यम् । पूर्वोक्तचतुराहुत्यादिदानम् । प्रथमसाहसो दण्डश्च । २५० पणाः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अथाभिचारः । स तु परहिंसार्थं जपहोमादिकर्म ।	अतिकृच्छ्रम् । एतत् सकृदाचरणे । अभ्यासे प्रायश्चित्तावृत्तिः । इति हिंसाप्रायश्चित्तम् ॥८॥	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
व्रात्ययाजनम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
मूत्रेण मृतस्य दहनवहनादिकम् ।	सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
अथाभक्ष्यभक्षणम् । अभक्ष्यं षड्विधम् । जातिदुष्टम् १ क्रियादुष्टम् २ कालाश्रयविदूषितम् ३ संसर्गाश्रयदुष्टम् ४ सङ्कल्पेरितम् ५ स्वभावतो दुष्टम् ६ । जातिदुष्टं लशुनगृञ्जनपलाण्डुच्छत्राकखेतवार्त्ताकीलालिकावर्त्तुलाकारालाबूरूपम् १ क्रियादुष्टं पतितसंस्पृष्टम २ कालदुष्टं बासरं चिरसंस्थितञ्च ३ संसर्गदुष्टं सुरालशुनपैयूषादियुक्तम् ४ सङ्कल्पेरितं विचिकित्सितान्नम् ५ स्वभावदुष्टं पुरीषादि ६ ।	चान्द्रायणम् । एतदुत्कृतरविषयम् । विशेषानिर्देशेच्छेयम् ।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपरञ्च। संघातान्नम्। शूद्रोपनीतान्नम्। पतितोपनीतान्नम्। शूद्रवेश्मस्थान्नञ्च।				
शूद्रस्य पक्वान्नभक्षणम्।	ब्राह्मणस्य त्र्यहोपवासः। एतदज्ञानतः।	१ धेनुः। अर्द्धधेन्वमशक्तेः।	१॥कार्षापणः।	यथाशक्ति।
	ज्ञानतः प्राजापत्यम्। आपदि भक्षणे मनस्तापः द्रुपदां शतजपो वा। क्षत्रियादीनां पादपादहानिः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अभ्यासात् शूद्रस्य पक्वान्नभक्षणम्	ब्राह्मणस्य मासयावकपानम्। क्षत्रियादीनां पादपादहानिः।	२धेनू।	६ कार्षापणाः।	यथाशक्ति।
शूद्रस्यामान्नभक्षणम्।	उक्तप्रायश्चित्ततुरीयभागः। आपदि भक्षणे प्रायश्चित्ताभावः।			
अथ रजकगैलूषवेणुचर्मोपजीविकैवर्त्तादन्त्यजान्नभक्षणम्।	चान्द्रायणम्। एतत् ज्ञानाभ्यासविषयम्। अज्ञाने त्वर्द्धम्।	८ धेनवः सार्द्धमर्द्धधेन्वमशक्तेः	२२॥० कार्षापणाः।	यथाशक्ति।
	ज्ञानतोऽष्टधाभ्यासे कृच्छ्राब्दव्रतम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥⁄१६॥ कार्षापणाः।
	अज्ञानतोऽष्टधाभ्यासे एतदर्द्धम्। एतत्, ब्राह्मणविषयम्। क्षत्रियादीनां पादपादहानिः।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।⁄८॥ कार्षापणाः।
सकृदज्ञानकृतान्त्यजोच्छिष्टाशनम्।	ब्राह्मणस्य चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	क्षत्रियस्य तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य तप्तकृच्छ्रार्द्धम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य तप्तकृच्छ्रपादः। ज्ञानत एतद्द्वयम्।	१धेनुः।	३ कार्षापणाः।	यथाशक्ति।
कापालिकान्नभक्षणम्।	ज्ञानात् कृच्छ्राब्दम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥⁄१६॥ कार्षापणाः।
	अज्ञानात् चान्द्रायणद्वयम्। एतदष्टधाभ्यस्तविषयम्। एतत् सर्व्वं ब्राह्मणस्य। क्षत्रियादौ पादपादहानिः।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
चाण्डालश्वपचक्षत्तृसूतवैदेहकमागधायोगवानामन्त्यावसायिनामन्नभक्षणम्।	ब्राह्मणस्य कामतः सकृद्भोजने चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	बलाद्भोजने पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अज्ञानतोऽष्टचत्वारिंशद्वारभोजने द्वादशवार्षिकव्रतम्। ज्ञानतस्त्वतुर्विंशतिवारभोजने एतदेव।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
	ज्ञानतोऽष्टचत्वारिंशद्वारभोजने चतुर्विंशतिवार्षिकव्रतं अन्यवहार्य्यता च।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
	सकृज्ज्ञानत आमान्नभोजने त्रिरात्रोपवासः। सर्व्वत्र क्षत्रियादीनां पादपादहानिः।	०	१॥० कार्षापणः।	यथाशक्ति।
	आपदि पक्वान्नभोजने क्षत्रियस्यसान्तपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	वैश्यस्य षड्रात्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	शूद्रस्य त्रिरात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
चाण्डालपतितादीनामुच्छिष्टान्नभक्षणम्।	द्विजस्य पराकः।	५ धेनवः।	१५कार्षापणाः।	यथाशक्ति।
	शूद्रस्य कृच्छ्रम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयं ज्ञानतो द्विगुणा-			

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
अथ सामान्याभोज्यान्नभोजनम्।	त्र्यहोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
	एतत् सकृदज्ञानविषयम्।			
	ज्ञाने प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	क्षत्रियादीनां पादपादहानिः।			
अभोज्यान्नानि यथा। अनधीतवेदारब्धयज्ञान्नम्। ग्रामयाजिकृष्टोप्तयज्ञान्नम्। स्त्रीक्लीबदुष्टयज्ञान्नम्। मत्तक्रुद्धातुराणामन्नम्। केशेन कीटेन वा सह पक्वमन्नम्। कामतः पादस्पृष्टमन्नम्। भ्रूणघ्नादिपतितावेक्षितान्नम्। रजस्वलास्पृष्टान्नम्। पतत्रिणावलीढमन्नम्। शुना स्पृष्टमन्नम्। गवाघ्रातमन्नम्। घुष्टान्नम्। घोषणया दत्तमन्नमित्यर्थः। गणान्नम्। मठब्राह्मणसंघान्नमित्यर्थः। गर्हाकान्नम्। विद्वज्जुगुप्सितान्नम्। स्तेनान्नम्। गायनान्नम्। तक्षान्नम्। वार्धुषिकान्नम्। दीक्षितान्नम्। दीक्षणीययागानन्तरं यज्ञसमाप्तिपर्यन्तं तद्यागकर्तृरन्नमित्यर्थः। कदर्यस्यान्नम्। रज्ज्वादिनावबद्धस्यान्नम्। अयोनिगर्हयुक्तस्यान्नम् अभिशस्तस्यान्नम्। क्लीबान्नम्। पुंश्चल्यन्नम्। दाम्भिकान्नम्। छद्मना धर्माचारिणोऽन्नमित्यर्थः। गुल्मान्नम्। पर्य्युषितान्नम्। गूढाच्छिष्टान्नम्। चिकित्सकान्नम्। व्याधान्नम्। क्रूरान्नम्। उच्छिष्टभोजिनामन्नम्। उग्रस्यान्नम्। दारुणकर्मणो जातिविशेषस्य वा अन्नमित्यर्थः। सूतिकोद्देशेन पक्वमन्नम्। पर्य्याचान्तम्। आचमनव्यवहितान्नमित्यर्थः एकपंक्तिस्थानन्यानवमत्य यत्रान्ने भुज्यमाने केनचिदाचमनं क्रियते तत् पर्य्याचान्तमिति कुल्लूकभट्टः। अनर्चितान्नम्। अर्चोहिंस्यान्नया दत्तमन्नमित्यर्थः। तथामांसम्। अवीरान्नम्। द्विषदन्नम्। नगराधिपान्नम्				

यथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा
पतितान्नम् । अवक्षुतान्नम् । अवक्षुतसहितान्नमित्यर्थः । पिशुनान्नम् । अकृतिनामन्नम् । कूटसाक्ष्यन्नमित्यर्थः । यन्त्रफलविक्रायकान्नम् । शैलूषान्नम् । तुन्नवायान्नम् । क्षत्रघ्नान्नम् । कर्म्मारान्नम् । निषादान्नम् । रङ्गावतारकान्नम् । स्वर्णकारान्नम् । वेणुजीविनामन्नम् । औषधविक्रायकान्नम् । ग्रहतामन्नम् । आखेटकान्नार्थं शुनः पोषकाणामन्नमित्यर्थः । शौण्डिकवृत्तिहिलान्नम् । चेलनिर्णेजकस्यान्नम् । वस्त्रधावकस्यान्नमित्यर्थः । रङ्गकान्नम् । कुसुम्भादिना वस्त्ररागकारकस्यान्नमित्यर्थः । नृशंसान्नम् । गृहस्थितोपपतिकान्नम् । उपपतिमर्शकान्नम् । गेहे ज्ञातं भार्य्याजारं ये सहन्ते तेषामन्नमित्यर्थः । स्वाजितान्नम् । अनिर्दशं प्रेतान्नम् । अनिर्गताशौचस्य सूतिकान्नमित्यर्थः । अतुष्टिकरान्नञ्च ॥७०॥	एतेषामभोज्यानामन्यतमानां भक्षणे पूर्वोक्तमुपवासः । एष सकृदज्ञानविषयः ।	•	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञाने प्राजापत्यम् । क्षत्रियादीनां पादपादहानिः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
चाण्डालादिपतितसृष्टान्नभक्षणम् ।	प्राजापत्यम् । एतत्सकृदज्ञाने ब्राह्मणविषयम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अत्र पतितपदं सर्वधर्म्मबहिष्कृतवाचि यवनादिम्लेच्छपरं उच्छिष्टान्नभोजनप्रकरणे तथा लिखनात् अतएव चण्डालसृष्टान्नभक्षणप्रतिज्ञायां पतितपदं पृथक् न लिखितम् ।	ज्ञाने द्वे गुरुणम् । अभ्यासे तु प्रायश्चित्तानुक्तिः । क्षत्रियादीनां पादपादहानिः । एतत्कुक्ष्यादिष्वभ्यासे द्वेयम् । रजकादिसृष्टान्नभक्षणे तु एतदर्द्धम् ।			
पतितस्पर्शे पक्वतप्तान्नस्य भोजनम् ।	याज्ञवल्क्योक्तचतुरहःसाध्यं तप्तकृच्छ्रम् ।	सपादधेन्वसम्भवात् २ धेनू ।	३॥० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानत एतदर्द्धम् । अभ्यासे प्रायश्चित्तानुक्तिः ।			
	अत्यन्ताभ्यासे चान्द्रायणम् । क्षत्रियादीनां पादपादहानिः । चाण्डालादिस्पर्शे एतद्बोधितव्यम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
गृध्रादिस्पृष्टान्नस्य केशकीटोपहतान्नस्य च भक्षणम् ।	एकोपवासः ।	•	॥० पणाः ।	यथाशक्ति ।
हविष्यान्नभक्षणम् । तत्तु देवतापित्रतिथिभक्षणवर्जितान्नम् ।	प्राणायामत्रयम् घृतमात्रभोजनञ्च । एतदज्ञानतः । ज्ञानतो द्वे गुरुणम् ।	०	॥० पणाः ।	यथाशक्ति ।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
हयामांसभक्षणम् । तत्तु पित्तदेवाचनरहितं मांसम् ।	प्राजापत्यव्रतम् । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः । अभ्यासे प्राजापत्यावृत्तिः । एतत् रोगिदैवपित्तकर्म्मनिमन्त्रितेतरविषयम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
सामान्याभक्ष्यमांसभक्षणम् ।	सप्तरात्रयवागूपानम् । एतत् सकृदज्ञाने । ज्ञानतो द्वैगुण्यम् । क्षत्रियादीनां पादपादहानिः । एतदभ्यासे प्रायश्चित्तावृत्तिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
खगोकुक्कुरोष्ट्रग्रामकादिपक्षिनखातिरिक्तपक्षिनखक्रव्यादग्राम्यकुक्कुटानां मांसभक्षणम् । विड्वराहनरमांसभक्षणञ्च ।	ब्राह्मणानां सकृदज्ञानतः प्राजापत्यम् । पुनरुपनयनञ्च । ज्ञाने तु द्वैगुण्यम् । अभ्यासे उपनयनसहितप्रायश्चित्तावृत्तिः । उपनयनाशक्तौ चान्द्रायणं तदशक्तौ धेन्वष्टकम् । क्षत्रियादीनां पादपादहानिः ।	१ धेनुः ।	३ कार्षापणाः ।	अनड्वत्सहितगौः । अशक्तौ ६ कार्षापणाः ।
हंसमद्गुकाकोलकाकखञ्जरीटमत्स्यादवलाकाशुकसारिकाचक्रवाकप्लवकोककलविङ्कहरिज्जवालसारमदात्यूहभासकोकिलमण्डूकभुजगानामन्यतमस्य मांसभक्षणम् ।	विप्रस्याज्ञानतः सकृद्भोजने त्रिरात्रोपवासः । ज्ञानतो द्वैगुण्यम् । ज्ञानाभ्यासे प्रायश्चित्तावृत्तिः । क्षत्रियादीनां पादपादहानिः ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
मत्स्यभक्षणम् ।	विप्रस्य कामतस्त्र्यहोपवासः । अकामत एतदर्द्धम् । क्षत्रियादीनां पादपादहानिः ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
पृष्ठमांस-गर्भशय्याभूम्यन्तर्गतपक्वमांसर्जीषपक्वमांसशुनामांसशुष्कमांसानामन्यतमस्य भक्षणम् । शुना घातनस्थलोत्पन्नं मांसम् ।	कामतः सकृदभक्षणे त्र्यहोपवासः । अकामत एतदर्द्धम् । अभ्यासे प्रायश्चित्तावृत्तिः । एतत् ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
		०	॥० पणाः ।	यथाशक्ति ।
षष्ठ्यां पञ्चपर्वसु च स्त्रीतैलमांससम्भोगः क्षुरकर्म च ।	एकाहोपवासः । अभ्यासे प्रायश्चित्तावृत्तिः । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः ।	०	॥० पणाः ।	यथाशक्ति ।
हयोष्ट्रायसपूपशष्कुलीक्षुरमांसयावशिग्रुलोहितहस्तिनिर्य्यासामेध्यप्रभवानां भक्षणम् ।	कामतस्त्र्यहोपवासः । अज्ञानतस्तदर्द्धम् । एतद्ब्राह्मणस्य । क्षत्रियादीनां पादपादहानिः ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
एकाकिमिष्टान्नभक्षणम् ।	एकाहोपवासः । अभ्यासे द्वैगुण्यम् ।	०	॥० पणाः ।	यथाशक्ति ।
अम्लेक्षारपर्य्युषिताम्लदधिवर्জ্জ্যलवणभक्षणम् ।	अज्ञानत एकाहोपवासः । ज्ञानतस्त्र्यहोपवासः । अभ्यासे द्वैगुण्यम् ।	०	॥० पणाः ।	यथाशक्ति ।
		०	१॥०कार्षापणः ।	यथाशक्ति ।
वाग्दुष्टभावदुष्टभावदुष्टभाजनपक्वद्रव्यभक्षणम् ।	अभ्यासे त्रिरात्रयावकपानम् ।	०	॥० पणाः ।	यथाशक्ति ।
शूद्रभाजने भिक्षकांस्ये च भोजनम् ।	अहोरात्रोपवासः पञ्चगव्यपानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
कुम्भीभक्षणम् ।	द्वादशरात्रं पयःपानम् ।	कपाट्धेन्वसम्भवात् २ धेनू ।	३॥० कार्षापणाः ।	यथाशक्ति ।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
लशुनपलाण्डुग्रञ्जनभक्षणम्। कृपरसादिभिर्लशुनादितुल्यद्रव्यभक्षणञ्च।	ज्ञानतश्चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानात्तप्तकृच्छ्रम्।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
	चिरतराभ्यासे संवत्सरयावकपानम्।	१५ धेनवः।	४५ कार्षापणाः।	यथाशक्ति।
	एतदुभयत्र पुनरुपनयनमपि शूद्राणामुपनयनतुल्यचान्द्रायणेन सह प्रजापतेः पादः।			
सजातीयसूतसूतकिनां पक्वान्नभक्षणम्।	ज्ञानतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अज्ञानात् त्राह्मोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अभ्यासे द्वैगुण्यादिकम्।			
सूतसूतकिनां ब्राह्मणक्षत्रियवैश्यशूद्राणामामान्नस्य ब्राह्मणकर्तृकभक्षणम्।	विप्रस्यामान्ने प्राणायामः। क्षत्रियस्यामान्ने शतगायत्रीजपः। वैश्यस्यामान्ने पञ्चशतगायत्रीजपः। शूद्रस्यामान्ने अष्टसहस्रगायत्रीजपः। अभ्यासे द्वैगुण्यम्।			
सूतकिसूतकिजलपानम्।	ब्राह्मणस्य पञ्चगव्यं पीत्वा उपवासः। एतत् सकृदज्ञाने ज्ञाने तु द्वैगुण्यम्। अभ्यासे त्वावृत्तिः। तज्जलस्पर्शे स्नानमात्रम्। क्षत्रियादीनां पादपादहानिः।	०	॥० पणाः।	यथाशक्ति।
नवश्राद्धान्नभोजनम्। नवश्राद्धन्तु साग्नीनां चतुर्थपञ्चमनवमैकादशाहकियमाणं निरग्नीनान्तु आदाश्राद्धमात्रम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
प्रथममासिकश्राद्धान्नभोजनम्।	पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
त्रिपक्षे प्रेतश्राद्धान्नभोजनम्।	अतिकृच्छ्रम्।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
द्विमासादिषण्मासपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
षण्मासादूर्द्धमब्दपर्य्यन्तं प्रेतश्राद्धान्नभोजनम्।	पादकृच्छ्रम्।	०	१ कार्षापणः।	यथाशक्ति।
पुनराब्दिकश्राद्धान्नभोजनं अर्थात् सपिण्डीकरणान्नभोजनम्। एतत् स्मार्त्तमतं मूलपाणिमते तु द्वितीयसांवत्सरिकान्नभोजनम्।	एकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
पतत्यनन्तरितहस्तदत्तानां पक्वहस्तदत्तानां शूद्रादत्तानाञ्चघृततैललवणव्यञ्जनपानीयपायसमाक्षिकफाणितगोरसशाकानां भक्षणम्।	हस्तसाध्यमान्नपनम्। एतत् ज्ञानतः। अज्ञानादर्द्धम्। लौहपात्रेण परिवेशनेऽप्येतदेव प्रायश्चित्तं ज्ञेयम्। एतद्ब्राह्मणस्य। क्षत्रियादीनां पादपादहानिः।	०	१ कार्षापणः।	यथाशक्ति।
अदत्तापोशानस्य अकृतमौनस्य च भोजनम्।	अष्टोत्तरशतगायत्रीजपः। एतद्द्विजानामनापद्विषयम्।	०	०	०
अकृताचमनस्य पानभोजनम्।	अष्टोत्तरसहस्रगायत्रीजपः उपवासो वा। अभ्यासे द्विगुणादि। एतत् कटुकषायताम्बूलेक्षुव्यतिरिक्तभोजनविषयम्।	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यज्ञोपवीतरहितकर्तृकाज्यभोजनम्।	स्नानं शतगायत्रीजपः उपवासश्च।	०	॥० पणाः।	यथाशक्ति।
रेतोमूत्रपुरीषाणामन्यतमस्य भक्षणम्।	स्नानतश्चान्द्रायणम्।	८ धेनवः। सार्द्धसप्तधेन्वसम्भवात् पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	अज्ञानतस्तप्तकृच्छ्रम्।		११।० कार्षापणाः।	यथाशक्ति।
	बलात्कारे प्राजापत्यम्। सर्व्वत्र द्विजातीनां पुनः संस्कारश्च।	१ धेनुः।	१ कार्षापणाः।	यथाशक्ति।
विण्मूत्रादिदूषितफलादिभक्षणम्।	संसर्गमात्रे कृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सविलष्टे अर्थात् महत्संसर्गे कृच्छ्रार्द्धम्। एतत् रसास्वादनानुपलम्भनपक्षे अज्ञानतः सकृद्विषयम्। ज्ञानतो द्वैगुण्यम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	रसाद्युपलम्भे तु गोतमोक्ततप्तकृच्छ्रादशाङ्कसाध्यम्। अज्ञानत उपलम्भे अर्द्धम्। क्षत्रियादीनां पादपादहानिः।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः।	११।० कार्षापणाः।	यथाशक्ति।
मृल्लोष्टभोजनम्।	अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	अभ्यासे याज्ञवल्क्योक्तचतुरहसाध्यतप्तकृच्छ्रम्।	सपादधेन्वसम्भवात् २ धेनू।	३॥० कार्षापणाः	यथाशक्ति।
ब्रह्मचारिणां मधुमांसभोजनम्।	ज्ञानतः प्राजापत्यम्। अज्ञानात् अर्द्धम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
ब्रह्मचारिणामामिषभाण्डपक्वान्नभोजनम्।	चाहं कृशमूलविपक्वक्षीरपानमात्रम्। एतदज्ञानतः।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	०	२ कार्षापणौ।	यथाशक्ति।
देवतातिथिभृत्यादिवर्जनभोजनम्।	अभ्यासे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अस्थ्यादिदूषितान्नभोजनम्। अस्थिशब्दोऽत्राभक्ष्यास्थिमात्रवचनम्।	स्नात्वार्कमर्चयित्वा घृतमात्राशनम्।	०	॥० पणाः।	यथाशक्ति।
मत्स्यकण्टकशम्बूकशङ्खशुक्तिकपर्दकभक्षणम्।	पञ्चगव्यमात्रभक्षणम्।	०	॥० पणाः।	यथाशक्ति।
पुंसवनसीमन्तोन्नयनकर्म्मणि भोजनम्।	स्नानाभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥०कार्षापणाः	यथाशक्ति।
	अज्ञानाभ्यासे तदर्द्धम्।	८ धेनवः।	११।०कार्षापणाः	यथाशक्ति।
	सकृदज्ञाने विष्णुक्तकृच्छ्रपादः।	०	॥० पणाः।	यथाशक्ति।
	सकृज्ज्ञाने द्वैगुण्यं कृच्छ्रार्द्धम।	०	१॥०कार्षापणः।	यथाशक्ति।
जातकर्म्मादिसंस्कारान्नभोजनम्।	अज्ञानतोऽसपिण्डानां द्वादशाध्यं मान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
	ज्ञानतो द्वैगुण्यम्।	०	२ कार्षापणौ।	यथाशक्ति।
भोजनकाले गुदस्रावः।	अहोरात्रमुपित्वा पञ्चगव्यपानम्। एतत् सकृन्निर्गोर्णग्रासे।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्तग्रासाशने त्रिरात्रोपवासः।	०	१॥०कार्षापणः।	यथाशक्ति।
भोजनकाले मृतसूतकाद्यशौचे तदन्नभक्षणम्।	ग्रासभोजने एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सकलान्नभोजने त्रिरात्रोपवासः। अभोजने स्नानमात्रम्।	०	१॥०कार्षापणः।	यथाशक्ति।
तैलाभ्यङ्गादिस्नानार्हस्यात्रुतस्नानस्य भोजनम्।	स्नात्वा अष्टोत्तरसहस्रगायत्रीजपः। अभ्यासे प्रायश्चित्तावृत्तिः।	०	०	०

अधोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
परिक्षितनीलीवस्त्रस्य भोजनम् ।	अज्ञानतश्चिरात्रोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
स्वकीयोच्छिष्टभोजनम् ।	लक्ष्यादः । एतत् सकृदज्ञानतः ।	०	॥० पणाः ।	यथाशक्ति ।
	अभ्यासे द्वैगुण्यादिकम् । त्यक्तभाजने भोजनेऽप्येवम् ।			
ब्राह्मणकर्तृकब्राह्मणोच्छिष्टभोजनम् ।	मद्याक्षुतिभिरामन्त्र्य जलं पीत्वा उपवसेत् ।	०	॥० पणाः ।	यथाशक्ति ।
	एतत् सकृदज्ञानतः ।			
	ज्ञानात् द्वैगुण्यम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
ब्राह्मणकर्तृकक्षत्रियोच्छिष्टभोजनम् ।	सकृदज्ञाने चाहं ब्राह्मोरसविपक्वक्षीरपानमात्रम् ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
	ज्ञाने द्वैगुण्यम ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकवैश्योच्छिष्टभोजनम् ।	सकृदज्ञाने त्र्यहोपवासः ब्रह्मसुवर्चला पानञ्च ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणकर्तृकशूद्रोच्छिष्टभक्षणम् ।	सकृदज्ञाने षड्रात्रोपवासः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानात् द्वैगुण्यम ।			
	ज्ञानाभ्यासे चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियादीनां पादपादानिः । एतन्मातृपितृज्येष्ठभ्रातृणामुच्छिष्टव्यतिरिक्तविषयेतेषामुच्छिष्टस्याभोज्यत्वात्			
विड्वालकाकमूषिकनकुलश्वगवां उच्छिष्टभोजनम् ।	त्र्यहोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	एतत् सकृज्ज्ञानतः ।			
	अज्ञाने ब्रह्मसुवर्चलां पीत्वोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
	ब्रह्मसुवर्चला तु पीतकुसुमसूर्य्यावर्त्तः ।			
	अत्यन्ताभ्यासे अतिकृच्छ्रम् ।	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
ब्राह्मणस्य कुत्सितषड्रसौ भोजनम् । षड्रसोः कुत्सितत्वन्तु निन्दितब्राह्मणाद्युपवेशनेन जलादिना षड्रसिभेदमन्तरेण च भवति ।	अहोरात्रोपवासः स्नानं पञ्चगव्यपानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
	एतत् ज्ञानतः ।			
	क्षत्रियषड्रसौ भोजने नक्तव्रतम् ।	०	।० पणाः ।	यथाशक्ति ।
	वैश्यषड्रसौ एकरात्रोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
	शूद्रषड्रसौ त्रिरात्रोपवासः ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
षड्रसिषु एकस्योत्थाने भोजनम् ।	द्वादशमाध्यमान्तपनम् ।	०	१ कार्षापणः ।	यथाशक्ति ।
	एतद्ब्राह्मणस्य ।			
	क्षत्रियादीनां पादपादहानिः ।			
	एतज्ज्ञानतः सकृत् । अज्ञानतोर्द्धम् ।			
सुराभाजनस्थजलपानम् ।	पक्षं यावकपानम् । एतज्ज्ञानतः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानतोऽर्द्धम् ।			
मद्यभाण्डस्थजलपानम् ।	सप्तरात्रं यावकपानम् । एतज्ज्ञानतः ।	०	१॥०कार्षापणः ।	यथाशक्ति ।
	अज्ञानतोर्द्धम् ।			
	सुरासंसृष्टरेतोमूत्रादिदूषितजलादिपाने तु चतुरहमाध्यं तप्तकृच्छ्रम् ।	सपादधेन्वसम्भवात् २ धेनू ।	३॥० कार्षापणाः ।	यथाशक्ति ।
	एतदपि स्वाद्वनुपलब्ध्यावभ्यासे ।			
चण्डालकूपभाण्डोदकपानम् ।	ब्राह्मणस्य सान्तपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियस्य प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वैश्यस्य प्राजापत्यार्द्धम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	शूद्रस्य प्राजापत्यपादः ।	०	॥० पणाः ।	यथाशक्ति ।
	एतत् सर्व्वं ज्ञानतः ।			
	अज्ञानादेतस्यार्द्धम् ।			
[illegible]	[illegible]	-	॥० पणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनूदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
चण्डालस्पृष्टक्षीरजलादिपानम्।	त्रिरात्रमुपोष्य पञ्चगव्यपानम्। एतत् ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानात् द्वादशाध्यसान्तपनम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजखानितकूपादिजलपानम्।	उपवासपूर्वकपञ्चगव्यपानम्। एतदज्ञानतः	०	॥० पणाः।	यथाशक्ति।
	ज्ञानात् द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
अन्त्यजभाण्डस्थजलादिपानम्	ब्राह्मणस्यद्वादशाध्यं ब्रह्मकूर्चं व्रतम्। एतत् अज्ञानतः। ज्ञानतो द्वैगुण्यम्।	०	१ कार्षापणः।	यथाशक्ति।
	शूद्रस्य नोपवासः पञ्चगव्यपानमात्रम्। ब्रह्मकूर्चं यथा। "अहोरात्रोषितोभूत्वा पौर्णमास्यां विशेषतः। पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥" पञ्चगव्यं यथा। "गोमूत्रात् द्विगुणं सूत्रं सर्पिस्तिद्याच्चतुर्गुणम्। क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि॥" अथवा। "गोमूत्रमाषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः॥ गोमूत्रवदृतस्योक्तास्तदर्धेन कुशोदकम्॥"	०	॥० पणाः।	यथाशक्ति।
शूद्रोदकपानम्।	उपोष्य बिल्वपद्मपलाशकुशानामुदकमात्रपानम्। एतद्द्वादशाध्यं ज्ञानतः सकृत्पाने। अज्ञानाद्दर्भम्। नवभाण्डोदकपाने प्रायश्चित्ताभावः।	०	१ कार्षापणः।	यथाशक्ति।
पीतशेषपानीयपानम्। केवलवामहस्तेन जलपानञ्च।	त्रिरात्रोपवासः। एतच्च ज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानतोऽर्धम्।	०	॥० पणाः।	यथाशक्ति।
	एतत् प्रायश्चित्तं ग्रासशेषाशनादिष्वपि ज्ञेयम्।			
	शूद्रपीतशेषजलपाने तु ब्राह्मणस्य चान्द्रायणम्।	सार्द्धसप्तधेन्वसदात्तधेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
अपादिजलपानम्। आदिना कूपजलाहरणार्थं घटस्थजलं द्रोणीजलं खड्गादिकोषस्थजलञ्च।	मद्यलशानम्। उपवासत्रयं। एतत् सकृज्ज्ञानतः। आपदि दोषाभावः।	०	॥० पणाः।	यथाशक्ति।
विण्मूत्रसंसृष्टकूपजलपानम्।	त्रिरात्रोपवासः। एतदज्ञानतः।	०	१॥० कार्षापणः।	यथाशक्ति।
	ज्ञानतः सान्तपनम्।	२ धेनू।	६ कार्षापणाः।	तथा।
विण्मूत्रसंसृष्टकुण्डस्थजलपानम्।	अज्ञानतः सान्तपनम्। ज्ञानतो द्वैगुण्यम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
शवदूषितजलपानम्। एतत्मानुषेतरामेध्यपक्षिनखशवदूषितकूपजलपानपरम्।	ब्राह्मणस्य त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	क्षत्रियस्य द्वाहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	वैश्यस्यैकाहोपवासः।	०	॥० पणाः।	यथाशक्ति।
	शूद्रस्य नक्तम्।	०	।० पणाः।	यथाशक्ति।
	सर्वेषां व्रतान्ते पञ्चगव्यपानम्। एतत् ज्ञानतः। अज्ञानतोऽर्धम्। एतदक्लिन्नशवे।			
	ज्ञानतः क्लिन्ने षड्रात्रोपवासः। एतत् सर्वं मानुषशवेतरपरम्। मानुषशवे द्विगुणम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे पराकः।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनूदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा
अपेयक्षीरपानम्। तत्क्षीरविकारपानञ्च। अपेयक्षीरं यथा। अनिर्दशानां गोमहिषीच्छागीनां क्षीरम्। औष्ट्रं ऐकशफं आविकञ्च। सन्धिनीक्षीरम्। सन्धिनी हृषाक्रान्ता। विवत्साक्षीरम्। अरण्यमृगीक्षीरम्। स्त्रीक्षीरम्। स्रवद्दग्धाक्षीरम्। यमसूक्षीरम्। विवत्साया अन्यवत्सायाश्च क्षीरम्। मथितक्षीरम्। छागवर्जं द्विस्तनीक्षीरम्। अमेध्यभुजः क्षीरम्। व्रणादिदूषितस्तनीक्षीरञ्च।	ज्ञाननोभ्यासे पञ्च यावकपानम्। अज्ञाननोऽर्धम्। क्षत्रियादौ पादपादहानिः। अत्र उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरुपनयनञ्च। इति अभक्ष्यभक्षणप्रायश्चित्तम् ॥*॥	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ स्तेयम्। मणिमुक्ताप्रवालाश्ममयलौहकास्योपस्कानां हरणम्।	द्वादशाहं कृच्छ्रभक्षणम्। तत् षड्डुपवासात्मकम्। अपहृतद्रव्यं स्वामिने दत्त्वेतत् करणीयम्। अत्र च सकृदभ्यासकालदेशद्रव्यस्वाम्यपहर्तृगुणदोषाद्यपेक्षया उत्कृष्टापकृष्टद्रव्ययोर्व्यत्ययदोषः समधनोयः।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
रजताश्वगोभूमिकन्यानां सकृत् हरणम्। एतत् ब्राह्मणासम्बन्धिविषयम्। अत्र कन्यापदं अधमकन्यापरम्।	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
उक्तेतरक्षुद्रपशुहरणम्।	प्राजापत्यम्। अभ्यासे चान्द्रायणम्।	१ धेनुः। ८ धेनवः।	३ कार्षापणाः। २२॥० कार्षापणाः।	यथाशक्ति। यथाशक्ति।
धान्याम्बरधनानां हरणम्। अत्र क्षेत्रादिकं धनं गवादि।	अब्दकृच्छ्रम्। एतत् ब्राह्मणकर्तृकक्षत्रस्वामिकदशकुम्भ्याधिकधान्यस्तेये ज्ञेयम्। कुम्भपरिमाणं यथा। दशद्रोणं भवेत् खारी। कुम्भोऽपि द्रोणविंशतिः।	१५ धेनवः। ०	४५ कार्षापणाः। १॥० कार्षापणः।	यथाशक्ति। यथाशक्ति।
	द्विकालभोजनोचितभक्ष्यभोज्यान्नहरणे त्रिरात्रं पञ्चगव्यपानमात्रम्। भक्ष्यं मोदकादि। भोज्यं शाल्यादि। एककालभोजनोचितान्नहरणे एकरात्रं पञ्चगव्यमात्रपानम्। धनमपि एतत्परिमाणधान्यमूल्यमवसेयम।	० ०	॥० पणाः।	यथाशक्ति।
मनुष्यादिस्तेयम्। तत्तु दासदासीक्षेत्रगृहकूपवापीजलानां हरणम्।	चान्द्रायणम्। क्षेत्रादीनान्तु उपयोगातिशयादाद्यात्सादपेक्षयात्रैव प्रायश्चित्तं गुरुलाघवमिति।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
गुडादिस्तेयम्। आदिना कार्पाससर्पिर्लवणधान्यपक्वान्नौषधतैलगन्धाद्यवक्षोपानत्कांस्यलौहताम्रसीसकादयः।	कृच्छ्रपादः। एतत् सकृद्धरणविषयम्। अभ्यासे द्विगुणम्। अत्र किञ्चिदधिकद्रोणत्रयस्य धान्यस्य तावद्धान्यमूल्यानाद्यान्नपाद्य हरणे एतद्वेदितव्यम्।	०	॥० पणाः।	यथाशक्ति।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
तृणादिस्तेयम्। आदिना काष्ठद्रुमचेलचर्म्मामिषेक्षुतक्रमूलपुष्पवैदलसूत्रगन्धानां ग्रहणम्। वैदलं वेणुघटितभाण्डम्। गन्धः कस्तूर्य्यादिः। अवापवादः। अस्तेयमन्यै काष्ठमस्तेयञ्च तृणं गवे।	त्रिरात्रोपवासः। तृणादीनां हरणे मासैकव्रतम्। मासार्द्धव्रतञ्च। ग्रहमुनिना यदुक्तं तत् कालदेशापहर्तृस्वामीगुणदौर्गत्याभ्यासानभ्यासकामाकामापेक्षया उत्तरोत्तरापकृष्टद्रव्यापहारे च वेदितव्यम्।	०	१॥० कार्षापणः।	यथाशक्ति।
जीविकाहरणम्।	यस्य यस्य वर्णस्य वृत्तिच्छेदः तत्तद्वर्णवधोक्तं प्रायश्चित्तं कर्त्तव्यम्।			
	अल्पद्रव्यापहारे चान्द्रायणम्। अत्र चोत्तमाधमत्वे प्रयोजकादिकं सकृदभ्यासौ ज्ञानाज्ञाने च संवीक्ष्य वधोक्तपादार्द्धादिव्यवस्थोह्यनीया।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
देवद्विजद्रव्यापहरणम्।	संवत्सरमप्सु मज्जनं अघमर्षणावर्त्तनञ्च। यद्यत्र गुरुप्रायश्चित्तं मुन्यन्तरोक्तं तदत्यन्ताभ्यास उत्तमसम्बन्धादपेक्षया समूह्यम्। इति स्तेयप्रायश्चित्तम् ॥०॥			
अथ अगम्यागमनम्। तत्र सवर्णासु अस्वजनस्त्रीगमनम्। तच्च ब्राह्मणस्य श्रोत्रियभार्य्यागमनम्।	सकृद्गमने चैवार्षिकव्रतम्।	४५ धेनवः।	१३५ कार्षापणाः।	२५ गावः। अशक्तौ २५ कार्षापणाः।
	द्वितीये षाड्वार्षिकं तृतीये नववार्षिकं चतुर्थे संपूर्णं द्वादशवार्षिकम्।			
	अश्रोत्रियनिर्गुणभार्य्यागमने द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१२ कार्षापणाः।
क्षत्रियस्य क्षत्रियभार्य्यागमनम्।	द्वैवार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्। अभ्यासे द्वैगुण्यादिकम्।	३० धेनवः।	९०कार्षापणाः।	१७ गावः। अशक्तौ १६॥/१२ कार्षापणाः।
वैश्यस्य वैश्यभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
शूद्रस्य पत्न्ययज्ञानुष्ठायिन्यायदत्तशूद्रभार्य्यागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
शूद्रस्यान्यशूद्रागमनम्।	षाण्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्य क्षत्रियागमनम्।	सार्द्धवार्षिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२३ धेनवः।	६७॥० कार्षापणाः।	१३ गावः। अशक्तौ १२॥० कार्षापणाः।
ब्राह्मणस्य वैश्यागमनं विशिष्टशूद्रागमनञ्च।	षाण्मासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	८ धेनवः।	२२॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१३॥ कार्षापणाः।
ब्राह्मणस्याधमशूद्रागमनम।	सार्द्धमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	२ धेनू।	५॥/० कार्षापणाः।	१ गौः। अशक्तौ १ कार्षापणः।
क्षत्रियस्य वैश्यभार्य्यागमनं सच्छूद्रागमनञ्च।	नवमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	१२ धेनवः।	३३॥० कार्षापणाः।	७ गावः। अशक्तौ ६।० कार्षापणाः।
क्षत्रियस्याधमशूद्रागमनम्।	वैमासिकव्रतम्। एतत् सकृज्ज्ञानतः। अज्ञानादर्द्धम्।	४ धेनवः।	११।० कार्षापणाः।	२ गावौ। अशक्तौ २ कार्षापणौ।
वैश्यस्य सच्छूद्रागमनम्।	वार्षिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	१५ धेनवः।	४५कार्षापणाः।	९ गावः। अशक्तौ ८।/७ कार्षापणाः।
वैश्यस्याधमशूद्रागमनम्।	सार्द्धचातुर्मासिकव्रतम्। एतज्ज्ञानतः। अज्ञानादर्द्धम्।	६ धेनवः।	१६॥/० कार्षापणाः।	३ गावः। अशक्तौ ३/१ कार्षापणाः।
अथ प्रतिलोमस्त्रीगमनम्। तत्र शूद्रस्याज्ञानतो ब्राह्मणीगमनम्।	द्वादशवार्षिकव्रतम्। ज्ञानात् गुर्व्वङ्गनागमनोक्तप्रकारेणमरणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	वैकल्पिकं चतुर्विंशतिवार्षिकव्रतम्। एतद्ब्राह्मण्यापि करणीयम्।	३६० धेनवः।	१०८० कार्षापणाः।	२०० गावः। अशक्तौ २०० कार्षापणाः।
वैश्यस्याज्ञानतो ब्राह्मणीगमनम्।	नववार्षिकव्रतम्। ज्ञानाद्वै गुरुयम्। ब्राह्मण्यापि एतत् कार्य्यम्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
क्षत्रियस्याज्ञानतो ब्राह्मणीगमनम्।	षाड्वार्षिकव्रतम्। ज्ञानाद्वै गुरुयम्। ब्राह्मण्यापि एतत् कार्य्यम्।	९० धेनवः।	२७० कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः।
यद्यपि शूद्रस्य ब्राह्मणीगमनं महापातकत्वेन तथा क्षत्रियवैश्ययोर्ब्राह्मणीगमनमनुपातकत्वेन चोक्तं तथाप्यनुलोमगमनं तावदुपपातकमेव तत्प्रसङ्गादसवर्णत्वेन प्रतिलोमस्त्रीगमनप्रायश्चित्तमप्युक्तमतो न वैषम्यमिति।				
शूद्रस्याज्ञानतः क्षत्रियागमनम्।	नववार्षिकव्रतम्। ज्ञानाद्वै गुरुयम्। क्षत्रियाया अप्येतत्।	१३५ धेनवः।	४०५ कार्षापणाः।	७५ गावः। अशक्तौ ७५ कार्षापणाः।
वैश्यस्याज्ञानतः क्षत्रियागमनं शूद्रस्याज्ञानतो वैश्यागमनञ्च। अथ ममोत्तमवर्णद्वित्रिपुरुषव्यभिचरितसवर्णामवर्णस्त्रीगमनम्।	नवमाधिकषाड्वार्षिकव्रतम्। ज्ञानाद्वै गुरुयम्। क्षत्रियाया वैश्यायाश्चाप्येतत्।	१०२ धेनवः।	३०३॥० कार्षापणाः।	५७ गावः। अशक्तौ ५६।० कार्षापणाः।
तत्र ब्राह्मणस्य ममोत्तमवर्णद्वित्रिपुरुषव्यभिचरितशूद्रागमनम्।	सकृद्गमने मासार्द्धं गोमूत्रसिद्धयावकपानम्	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	अभ्यासे मासं गोमूत्रसिद्धयावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य ममोत्तमवर्णद्वित्रिपुरुषव्यभिचरितक्षत्रियागमनम्। तथाविधवैश्यागमनञ्च।	सकृद्गमने मान्तपनम्। अभ्यासे प्रायश्चित्तावृत्तिः।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
अथ चातुवर्ण्यस्वैरिणीगमनम्। स्वैरिणीचतुःपुरुषगामिनौ। सा द्विविधा। कैनचिदनवरुद्धा अवरुद्धा च।	ब्राह्मणस्य स्वैरिण्या ब्राह्मण्या गमने त्रिरात्रोपवासः ब्राह्मणाय मृगाजिनदानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधक्षत्रियाया गमने त्रिरात्रोपवासः धनुर्दानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधवैश्याया गमने त्रिरात्रोपवासः अयःशिलादानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	तथाविधशूद्राया गमने त्रिरात्रोपवासः उटकुम्भदानन्तथा संमार्जनीदानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
ब्राह्मणस्य शूद्रान्त्यजादिगामिन्यस्वैरिणीगमनम्।	द्वादशवार्षिकव्रतम्। क्षत्रियादौ पादपादहानिः। विप्रादस्वैरिणीचाण्डालस्वैरिणीगमनेऽप्येवम्। सर्व्वत्राभ्यासे द्विगुणम्।	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
ब्राह्मणबन्धकीगमनम्। बन्धकी चात्र स्वभर्त्तुरतिरिक्तपुरुषगामिनी।	कमण्डलुदानम्।	०	०	यथाशक्ति।
क्षत्रियबन्धकीगमनम्।	आयुधदानम्।	,,	,,	यथाशक्ति।

अधोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
वैश्यबन्धकीगमनम् ।	प्रतोददानम् ।	०	०	यथाशक्ति ।
शूद्रबन्धकीगमनम् ।	स्नानपुरःसरप्राणायामः । एतानि बन्धकीगमनप्रायश्चित्तानि सवर्णानुलोमप्रतिलोमविषयाणि ॥*॥	०	०	०
अथ व्युत्क्रमविवाहः । तत्र ब्राह्मणस्य प्रथमतः क्षत्रियादिविवाहः ।	दारव्यतिक्रमो ह्यराजिनं वह्निर्लोम परिधाय दारव्यतिक्रमिणे भिक्षां देहीति समाचारणि चरेत् । सा हृत्तिः षण्मासान् । दारव्यतिक्रमी ब्राह्मणक्षत्रियवैश्यकन्याविवाहमकृत्वा यो ब्राह्मणः शूद्राविवाहं करोति स उच्यते । एतदनापदि सकृदज्ञानविषयम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	आपदि त्वाह ज्ञातातपः । ब्राह्मणो राजन्यापूर्व्वां द्वादशरात्रं चरित्वा निर्व्विशेत् तां त्वेवोपगच्छेत् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वैश्यापूर्व्वां तप्तकृच्छ्रम् ।	सप्तादधेन्वसंभवात् २ धेनू ।	३॥० कार्षापणाः ।	यथाशक्ति ।
	शूद्रापूर्व्वां कृच्छ्रातिकृच्छ्रम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	अनापदि ज्ञानाभ्यासे मनूक्तमेवार्षिकव्रतम् ।	४५ धेनवः ।	१३५ कार्षापणाः ।	२५ गावः । अशक्तौ २५ कार्षापणाः ।
वैश्यागमनम् । पञ्चाधिकपुरुषगामिनी वैश्या रजस्वलागमनम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अभ्यासे चान्द्रायणम् ।	८ धेनवः ।	२२॥० कार्षापणाः	यथाशक्ति ।
	त्रिरात्रोपवासः । घृतप्राशनञ्च । एतत् कामतः सकृद्गमने । अभ्यासे तु द्वे गुण्यादिकम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
क्षत्री भार्य्यानभिगमनम् ।	त्रिरात्रोपवासः ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	ज्ञानाभ्यासे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणा. ।	यथाशक्ति ।
पर्व्वसु स्त्रीगमनम् ।	एकोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
श्राद्धदिने मैथुनम् ।	एकोपवासः ।	०	॥० पणाः ।	यथाशक्ति ।
दिवामैथुनम् ।	एकाहं यावकपानम् । नग्नस्य स्नाने नग्नपरस्त्रीदर्शनेऽप्येवं प्रायश्चित्तम् । अभ्यासे प्रायश्चित्तार्द्धम् ॥*॥	०	०	०
अथ स्त्रीव्यभिचारः ।	समोत्तमवर्णेषु सकृदुपगमे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	द्विरभ्यासे पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	त्रिरभ्यासे चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
अन्त्यजागमनम् । अर्थात् रजकचर्म्मकारनटवरुडकैवर्त्तमेदभिल्लचण्डालोञ्छवृत्तिषु स्त्रीषु गमनम् ।	अज्ञानतश्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	ज्ञानेऽर्द्धं गुण्यम् ।			
	चतुर्व्विंशतिवारगमने द्वादशवार्षिकव्रतम् एतदज्ञानतः । ज्ञानतो द्विगुण्यम् । अभ्यवहार्य्यता च ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
कापालिकस्त्रीगमनम् ।	ज्ञानाद्दृढकृच्छ्रम् ।	३० धेनवः ।	९० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानाच्चान्द्रायणद्वयम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
अथ तिर्य्यग्योनिगमनम् । तत्र गोवर्জ্জपशुगमनम् । गोगमनम् ।	सचेलस्नानपूर्व्वकं गोभ्यो यवसभारदानम् इदं सकृद्गमने ।			
	गोवधोक्तमासिकव्रतम् । एतत् सकृद्गमने ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	अभ्यासे संवत्सरं प्राजापत्यम् ।	३० धेनवः ।	९० कार्षापणाः ।	१७ गावः । अशक्तौ १६॥*१६। कार्षापणाः ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
	अत्यन्ताभ्यासे द्वादशवार्षिकव्रतम्। क्षत्रुपपातके अगम्यागमनप्रायश्चित्तं समाप्तम् ॥ * ॥	१८० धेनवः।	५४० कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः।
अथ परिवेदनादि।	ज्येष्ठेऽनिर्विष्टे कनीयान्निर्विशन् परिवेत्ता परिविष्टो ज्येष्ठः। परिवेदनीया कन्या परिदायी दाता। परिक्रर्त्ता याजकः। ते सर्व्वे पतिताः। एतेषां प्रायश्चित्तम्।			
	संवत्सरं प्राजापत्यम्। एतत् कामतः। अकामतोऽर्द्धम्। अत्रापवादः। "देशान्तरस्थक्लीवैकवृषणानमङ्गोदरान्। वैद्याभिमन्नपतितशूद्रतुल्यातिरोगिणः॥ जड़मूकान्धबधिरकुब्जवामनकुगठकान्। अतिवृद्धानभार्य्यांश्च क्षयिमन्नाबृषस्य च। धनहस्तिप्रमत्तांश्च कामतः कारिषस्तथा। कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति॥"	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥८/१६। कार्षापणाः।
ब्रात्यत्वम् अर्थात् सावित्रीपतितत्वम्। षण्डशब्दपर्य्यन्तमुपनयनाभावे ब्राह्मणस्य ब्रात्यत्वम्। एकविंशतिवर्षपर्य्यन्तमुपनयनाभावे क्षत्रियस्य ब्रात्यत्वम्। त्रयोविंशतिवर्षपर्य्यन्तमुपनयनाभावे वैश्यस्य ब्रात्यत्वम्।	पितृमातृरहितनिःस्वजनस्य सावित्रीपतितं प्राजापत्यत्रयम्। यथाविध्युपनयनञ्च। आलस्यानवधानादिना सावित्रीपतितं तु ब्रात्यस्तोमयागः।	३ धेनवः।	९ कार्षापणाः।	यथाशक्ति।
	तद्दैकल्पिकं दिनत्रयाधिकमासचतुष्टयसमाप्यमृद्दालकव्रतम्। तद्व्रतं यथा। द्वौ मासौ यावकेनवर्त्तयेत् मासं पयसा अर्द्धमासमामिक्षया अष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमभक्तस्थः अहोरात्रमुपवसेत्।	मपादनवधेन्वसम्भवात् १० धेनवः।	२९॥० कार्षापणाः।	यथाशक्ति।
	दर्भोपप्लवादिना सावित्रीपतने एकविंशतिरात्रं गव्यतिमिश्रयावकपानम्। तत उपनयनम्।	४ धेनवः।	९॥० कार्षापणाः।	यथाशक्ति।
अथावकीर्णम्। अर्थात्ब्रह्मचारिणो योषिद्गमनम्।	षण्मासं ब्रह्महत्याव्रतम्। खरचर्मपरिधानञ्च।	मार्द्धमसधेन्वसम्भवात् ८ धेनवः।	२९॥० कार्षापणाः।	५ गावः। अशक्तौ ४/१४ कार्षापणाः।
	अब्दं संवत्सरं ब्रह्महत्याव्रतम्।	१५ धेनवः।	४५ कार्षापणाः।	९ गावः। अशक्तौ ८।/६॥ कार्षापणाः।
पितृष्वसृसूतादिपरिणयनम्। मातृष्वसृसूतादिना मातृसूतासामानार्षेयसपिण्डासगोत्रासमानप्रवरादीनां ग्रहणम्।	चान्द्रायणम्। त्यागानन्तरं मातृवद्भरणम्। एतत्स्नानतः अज्ञाने क्रच्छ्राब्दपादः।	मार्द्धमसधेन्वसम्भवात् ८धेनवः। ४ धेनवः।	२२॥० कार्षापणाः। ११।० कार्षापणाः।	यथाशक्ति। यथाशक्ति।
अग्न्युत्सादनम्। अर्थात् अग्निहोत्रिणामग्नित्यागः।	कामतः संवत्सरोत्सर्गे चान्द्रायणम्।	मार्द्धमसधेन्वसम्भवात्८धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	द्विवर्षोत्सर्गे सोमायनचान्द्रायणे। एतदनुसारेणोनाधिककालयाकल्पम्।	मार्द्धाष्टधेन्वसम्भवात् ९ धेनवः।	२५॥० कार्षापणाः।	यथाशक्ति।
गुरुस्त्रस्य चिरतरकालानग्नित्वम्।	गोवधोत्तरं मासिकव्रतम्। अल्पकाले अनाधाने च चान्द्रायणम्।	३२ धेनवः।	३६ कार्षापणाः।	१० गावः। १ वृषः। अशक्तौ १५ कार्षापणाः।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा
ब्राह्मणस्य वेदानध्ययनं यज्ञाकरणं पुत्रानुत्पादनञ्च । अनाश्रमित्वम् ।	त्रैमासिकं गोव्रतम् ।	१२ धेनवः ।	३६ कार्षापणाः ।	१ वृषः । १० गावः । अशक्तौ १५ कार्षापणाः ।
	संवत्सरे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	वर्षद्वये अतिकृच्छ्रम् :	३ धेनवः ।	९ कार्षापणाः ।	यथाशक्ति ।
	वर्षत्रये कृच्छ्रातिकृच्छ्रम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
	अत ऊर्द्धं चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
सूर्योदयास्तकालयोः शयनम् ।	सकृदाचरणे स्नानम् । अभ्यासे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
ब्रह्मचारिणः सन्ध्यादीनामतिक्रमः । आदिना अग्नीन्धनाकरणं भैक्ष्यचर्य्याकरणञ्च ।	अरोगिणो निरन्तरं सप्तरात्रमकरणे अवकीर्णिव्रतम् । तत्तु खरचर्मपरिधानपूर्व्वकषण्मासिकं ब्रह्महत्याव्रतम् एतदूनं ऊनं अधिके अधिकम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	५ गावः । अशक्तौ ४/१४ कार्षापणाः ।
अनातुरगृहस्थस्य सन्ध्यास्नानाग्निकनित्यक्रियापातः ।	दिनैकनित्यक्रियातिपाते एकाहोपवासः ।	०	६ रक्तिकरजतम्	यथाशक्ति ।
	दिनत्रयक्रियातिपाते कृच्छ्रार्द्धम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	वर्षैकनित्यक्रियातिपाते एकदिनक्रियातिपातप्रायश्चित्तानुसरणेन प्रायश्चित्तम् ।	०	२ पल ६ तोलक ४ माषकमितरजतम ।	यथाशक्ति ।
शूद्रव्यतिरिक्तायाज्ययाजनम् । अयाज्याञ्च निन्दितप्रतिग्रहादिना निन्दितब्राह्मणादयः ।	शतगायत्रीजपः ।	०	०	०
	अभ्यासे सहस्राधिकं चान्द्रायणं वा । दक्षिणात्यागाच्च पूतो भवति ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
शूद्रयाजनम् ।	लोभादिना याजने अर्जितभुक्तावशिष्टधनस्यागाधजले प्रक्षेपपूर्व्वकं ब्रह्मचारिणे दानपूर्व्वकं वा चान्द्रायणं पुनरुपनयनञ्च । अष्टशतवणब्रह्मसुवर्णलाभानञ्च । एतदशक्तौ तद्धनं परित्यज्य त्रिंशत्पुराणाः प्रदातव्याः ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	खेटादनुप्रसङ्गादिना याजने द्रव्यत्यागपूर्व्वकं प्राजापत्यम् । अज्ञानतः प्राणायामसहस्रम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
शूद्रप्रतिग्रहः ।	सकृत्प्रतिग्रहे त्रिसहस्रगायत्रीजपः । अभ्यासे चान्द्रायणम् । एतच्च द्रव्यत्यागपूर्व्वकं कार्य्यम ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
उच्छास्त्रवर्त्तिक्षत्रियनृपतिप्रतिग्रहः ।	षष्ठे काले चारात्रं मासैकं जलवासः प्रचुरतर्पणञ्च । मासोपवासेनैवास्य मङ्गलनम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
अथान्त्यजप्रतिग्रहः । स च अयाचितपुष्पफलशाकमूलकणक्षाद्यधान्यपयोमांसदधिशय्यागन्धकुङ्कुमगन्धमणिमत्स्यादीतरविषयः ।	स्नानादष्टचत्वारिंशद्वाराभ्यासात् द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
	ब्रह्मज्ञानात् द्विरभ्यासे तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	स्नानात् द्विरभ्यासे चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
चाण्डालप्रतिग्रहः ।	अज्ञानात् अष्टचत्वारिंशद्वाराभ्यासात् द्वादशवार्षिकव्रतम् ।	१८० धेनवः ।	५४० कार्षापणाः ।	१०० गावः । अशक्तौ १०० कार्षापणाः ।
	अज्ञानात् सकृत्कृते तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	ज्ञानात् सकृत्कृते चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
पतितप्रतिग्रहः ।	ज्ञानात् सकृत्कृते चान्द्रायणम् । अज्ञानात्तदर्द्धम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
प्रायश्चित्तद्वयग्रहणम्।	त्रिसहस्रगायत्रीजपः मासैकं गोष्ठे पयःपानं वा। एतत् लघुतरपापप्रायश्चित्तद्वयग्रहणे।	०	०	०
स्वभावाव्याहृतलक्षणाजिनोभयतोमुखीमृगयादिप्रतिग्रहः।	उत्तममृगयादिप्रतिग्रहे दशसहस्रगायत्रीजपः। मध्यमे पञ्चसहस्रगायत्रीजपः। अधमे अष्टोत्तरसहस्रसावित्रीजपः। द्वादशरात्रं पयोव्रतञ्च। अत्यन्तनिषिद्धलक्षणाजिनोभयतोमुखीप्रतिग्रहे लक्षगायत्रीजपः।			
अथ ब्राह्मणस्य क्षत्रियवैश्यवृत्त्या धनार्जनम्।	संवत्सरे चान्द्रायणम्। संवत्सराभ्यन्तरे मासैकद्विकादौ चान्द्रायणभागहारः कल्प्यः। संवत्सरार्द्धं द्वैगुण्यत्रैगुण्यादिकं कल्प्यम्। आपत्काले दोषाभावः।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य सेवावृत्तिधनार्जनम्।	प्राजापत्यत्रयं पुनरुपनयनञ्च। द्रव्यत्यागपूर्वकं करणीयम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य गीतादिना धनार्जनम्।	चान्द्रायणम्। लघुप्रायश्चित्तस्याप्यवघट्टार्थत्वम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
ब्राह्मणस्य शूद्रसेवनम्।	चान्द्रायणम्। चिरनरकालाभ्यासे त्रैवार्षिकव्रतम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। ४५ धेनवः।	२२॥० कार्षापणाः। १३५ कार्षापणाः।	यथाशक्ति। २५ गावः। अशक्तौ २५ कार्षापणाः।
अविक्रेयविक्रयः। ब्राह्मणस्याविक्रेयद्रव्याणि यथा। लवणं पक्वान्नं मधु क्षीरं दधि घृतौदकं सर्वगन्धोपलं लाक्षा रक्तवासः गुडं तैलं ग्राम्यपशुं एकशफं कृमिं सर्वारण्यपशुं विद्यां यानं खानं गोशकृज्जलं रसं विषं तिलं शाकं नीलीं कौशेयवासः चर्म तक्रामांसं सुरा सोमं केशं गोधूमं कन्यां हिङ्गुं गुग्गुलुं सर्जरसं हरितालं मनःशिलाञ्जनं गैरिकं क्षारं मणिं मौक्तिकं प्रवालं रत्नं नखं व्याहीधिषं शुक्तिं वेणुं वेणवं स्नायुपात्रं पुष्पं मूलं तृणं कार्पासं भस्मास्थि पिण्याकं त्वपुं सीसकं लवणलोहोदुम्बरं खड्गपात्रादि इत्यविक्रेयाणि।	सकृत्कृते चिराचोपवासः। द्विरभ्यासे प्राजापत्यम्। अत्यन्ताभ्यासे चान्द्रायणम्। निखिलविक्रये बहुनरकालाभ्यासे या त्रिसवनस्नानाधःशयनचतुर्थकालभोजनरूपसंवत्सरव्रतम्। गृहस्थात्मत्राणादि दोषाभावः।	१ धेनुः। सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः। १५ धेनवः।	३ कार्षापणाः। २२॥० कार्षापणाः। ४५ कार्षापणाः।	३ गावः। अशक्तौ ८।० कार्षापणाः।

अधोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णादानम्।	दक्षिणा।
निन्दितदेशगमनम्। तत्तु तीर्थयात्राव्यतिरेकेण। निन्दितदेशा यथा। कारस्करकलिङ्गोड्रान्ध्रपवरङ्गगन्धरभूमिलयसिन्धुसौराष्ट्रसौवीरप्रत्यग्रदेशाङ्गवङ्गकलिङ्गादयः।	एतान् गत्वा तत्रैव चिरमुषित्वा गङ्गादिगमनम्। तदशक्तौ पुनरुपनयनम्।			
असत्याभिधानम्।	अतिचिरवासे पुनरुपनयनं चान्द्रायणञ्च।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सकृदसत्यभाषणे क्षणात्क्षरणम्।			
	अत्यन्ताभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अतिबहुतरकालाभ्यासे माससाध्यचान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	साक्षिणोऽसत्यभाषणे ज्ञानाज्ञानतो द्वादशवार्षिकव्रतमित्युक्तमनुपातके। विवाहभयमैथुनबालप्रतारणपरीहासगोब्राह्मणक्षत्रियस्त्रीराजस्वप्राणात्ययसर्वधनापहारविषयेषु मिथ्याकथने दोषाभावः।			
उच्छिष्टस्य चाण्डालादिदर्शनम्।	दर्शने एकरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	सम्भाषणे द्विरात्रोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	संस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	सहगमने सचैलस्नानम्। अनुच्छिष्टस्य दर्शने सूर्यादिदर्शनम्। सम्भाषणे ब्राह्मणसम्भाषणम्। इदं ज्ञाने।			
उच्छिष्टस्य सूर्यादिदर्शनम्। आदिना नक्षत्रचन्द्रौ। कामत इदम्।	एकोपवासः।	०	६ रक्तिकरजतम्।	यथाशक्ति।
तैलाभ्यक्तादिमूत्रोच्चारसमुत्सर्गः। आदिना अनाचान्तशुक्रमिमैथुनिनः।	एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
विप्रायाद्यादिमध्यगमनम्। आदिना श्मशानोगवीर्यङ्गणम्।	कामतोऽत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	सकृदभ्यासादिषु तु स्नानकव्रतलोपप्रायश्चित्तम्। एकदिनाभोजनम्। तदाकृतिश्चोच्यते।	०	॥० पणाः।	यथाशक्ति।
अधो पादप्रतापनम्। कुत्सेन पादसम्मार्जनञ्च।	एकोपवासः। इदं सकृत्करणे। अभ्यासे द्वैगुण्यादिकम्।	०	॥० पणाः।	यथाशक्ति।
गुरोर्ब्राह्मणस्य च तिरस्कारः।	दर्पेण हुङ्कारे त्वङ्कारे वादेन जये वासमा वन्धने लगेन ताडने च शिरं प्रसाद्य दिनमेकमुपवासः। अनतीवतुसंरम्भः सकृज्ज्ञेयम्।	०	॥० पणाः।	यथाशक्ति।
	ग्राम्यीयविवादे दर्पात् पुनः पुनर्जये ज्ञात्वा प्रणिपत्य त्रिरात्रोपवासः।	०	१॥० कार्षापणाः।	यथाशक्ति।
	प्रसादनः पादेन सूर्यं एकरात्रोपवासः अभिवादनं प्रसादनञ्च। क्रोधादिना अनुबन्धापेक्षया व्याहृताजापत्यादिकं कल्प्यम्।	०	॥० पणाः।	यथाशक्ति।
	महापातकेन ब्राह्मणस्य विरूपाभिधाने ब्राह्मच्छातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।

अथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ पणादानम् ।	दक्षिणा ।
	उपपातकेन ब्राह्मणस्य विरूपाभिधाने प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	अतिभंशकरपातकोपपातकादन्यत्रा-क्रोशस्य लघुगुरुभावं प्रतिसन्धाय एक-रात्रत्रिरात्रषड्रात्रोपवासाः ।			
	प्रतिषुत्थादानादौ अल्पत्वबहुत्वाभ्याम् एक-रात्रत्रिरात्रषड्रात्रोपवासाः ।			
	देवधिषणब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रति जीवनाक्रोशे उलमुकेन शिक्षा दाहौ हिरण्यदानञ्च । गुरुब्राह्मणभिन्न प्रत्याक्रोशने प्रतिताडने च दोषाभावः ।			
मिथ्याब्राह्मणगुरुपथः । यावज्जीवमकृतगुरुपथश्च ।	विप्रस्य वधसंयुक्तमिथ्यागुरुपथे चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	यावज्जीवमकृतगुरुपथे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
अभिशापकरणम् ।	मासमद्यभक्षणम् ।	१३ धेनवः ।	३६ कार्षापणाः ।	यथाशक्ति ।
	गायत्र्या वसिष्ठोक्तगुह्यवतीनां वा शत जपश्च ।			
	एतत् सकृन्मद्यापानकादभिशापे ।			
	उपपातके त्वभ्यासतो द्वैयम् ।			
	श्यामद्यापानकाभिशापाभ्यां त्वावृ-त्तिनारतम्यात् प्रायश्चित्ततारतम्यं क-ल्प्यम् ।			
	मद्यापानकादन्यत्र एकविंशतिरात्रं सु वर्चलापानम् ।			
	स्तेनवर्जन उत्तमवर्णाभिशापे प्रतिलो-मोक्तदण्डव्यवस्थया प्रायश्चित्तं कल्प्यम् ।			
अनृताभिशप्तना ।	मासं कृच्छ्रम् ।	सार्द्धधेनुद्वयासम्भवात् ३ धेनवः ।	७॥० कार्षापणाः ।	यथाशक्ति ।
	मद्यापानकाभिशापे द्विमासं कृच्छ्रम् ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	एतदभिशापकालानिक्रमे द्वैयम् ।			
	अभिशापकालनिर्णयप्रवृत्तस्य उपपातकादिना अभिशप्तस्य कृच्छ्रम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
आरूढपतितत्वम् । आधिक्रौधादिना सन्यासवाक्यमुच्चार्य योगृहस्थाश्रममाश्रयितुमिच्छति स आरूढपतितः तस्य भावः ।	षण्मासान् प्राजापत्यम् ।	१५ धेनवः ।	४५ कार्षापणाः ।	यथाशक्ति ।
	एतत् सन्यासग्रहणान्तरनिवृत्तानाम् । चिरतरकालसन्यासनिवृत्तस्य ब्राह्मणस्य स्वपदाकृतपूर्वकनिन्दनम् । क्षत्रिय विशोर्दास्यकरणम् ।			
	यावज्जीवव्रतानुष्ठानप्रवृत्तयोः ब्रह्मचारिवानप्रस्थयोः स्वधर्मनिवृत्तयोश्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
जलाग्न्यादिभ्रष्टना । आदिना उद्बन्धनप्रव्रज्यानशनविषप्रपतनप्रायोपवेशभृग्वग्निघातेभ्यो भंशनम् ।	चान्द्रायणं नवकृच्छ्रद्वयं वा । अभ्यासे त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च । जातकर्मादिसंस्काराश्च ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
वयोऽत्यत्ययपत्तिः	चिताभस्मनाः प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	त्रिसन्ध्यं गोमयगोमूत्राभ्यां स्नानम् । त्रीणि पञ्चगव्यबुध्नोदकमात्रपानञ्च । दत्त नाभ्यधोदेशदंशविषयम् ।			
	नाभेरूर्ध्वं क्रम्युत्पत्तौ षड्रात्रमुपवासः ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।

यथोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ वृषोदानम् ।	दक्षिणा ।
	शिरसि क्रिमिदंशने दृषदश्चिणायुक्तस्नानं सप्तकृच्छ्रं वा ।	पादोनधेनुचतुष्टयासम्भवात् ४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
श्वादिदंशः । आदिना शृगाल खरमार्ज्जकव्याघ्रराक्षोक्षव-राहपुंश्चलीवानरवायसानां दंशनम् ।	पादयोरक्षधिरदंशने जले प्राणायामः घृतप्राशनञ्च । पादयोरतिगाढ़दंशने तदा १६ प्राणायामाः । नाभेरधोगाढ़दंशने ब्रह्मचारिणस्त्वहः सायं पयःपानम् ।			
	गृहस्थस्य चिरात्रमुपवासः ।	०	१।० कार्षापणः ।	यथाशक्ति ।
	एकाहमग्निहोत्रिणः ।	०	॥० पणाः ।	यथाशक्ति ।
	नाभ्यूर्द्धं दंशने एतद्द्वैगुण्यम् । बाह्वोश्चतुर्गुणम् । मूर्ध्नि षोड़शगुणम् । इदं सरुधिरदंशने । नाभेरूर्द्धं मनिगाढ़दंशने सागरगनदीस्नानपूर्ब्बकोपवासः घृतं प्राणायामावर्त्तनञ्च ।			
	व्रतस्थस्य श्वादिदंशने चिरात्रोपवासः सघृतयावकपानञ्च । बालस्यात्यन्ते अशक्तत्वे वा नदीयपापक्षयं संकल्प्य पित्रादिः प्रायश्चित्तं कुर्य्यात् । दष्टस्थानस्य गायत्र्यष्टसहस्राभिमन्त्रणपूर्ब्बकमुल्मुकेन दहनम् । चतुर्भिः कलसैर्नदीसङ्गमे वा स्नानम् । स्त्रियास्तु विशेषः । उदितसोमनक्षत्र दर्शने समुद्रदर्शने वा । कृष्णपक्षे चन्द्रगमनदिगदर्शनम् ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
विप्रादिहते चात्मघातस्थले वा अशुपातजलादिस्नानम् ।	दहनवहनकटक्रियातर्पणआह्वादौ नमस्कृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	नक्षत्रस्य केवलस्पर्शे अशुपाते वा एकाहोपवासः ।	०	६ रक्तिकरजतम् ।	यथाशक्ति ।
	अभ्यासे अनड्वत्सहितगोदक्षिणायुक्तनमस्कृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	१ वृषः । १ गौः । अशक्तौ ६ कार्षापणाः ।
	आत्मघातिनः स्नेहात् दाहादिकरणे नमस्कृच्छ्रसहितचान्द्रायणम् । बलात्कारेण उद्बन्धनभ्रष्टस्य पादच्छेदन दहनवहनेषु मासं भैक्ष्यभक्षणं त्रिसवनस्नानञ्च । एतेन दहनवहनादिकरणे असम्बन्धिनां कृच्छ्रपादः ।	१२ धेनवः ।	३४॥० कार्षापणाः ।	यथाशक्ति ।
	दहनवहनव्यतिरेकेण कामतः सर्व्वाङ्गीनाभ्यासस्पर्शे प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	तथैवाभ्यासे तप्तकृच्छ्रम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
	द्विजस्य शूद्रशवानुगमने चिरात्त्रायीशं नदीं समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतप्राशनम् । अवर्त्तीमासाद्य १००८ गायत्रीजपो वा । द्विजस्य द्विजशवानुगमने १०८ गायत्रीजपः । शूद्रस्य सर्व्वशवानुगमने स्नानम् ।			
बलात्कारितस्त्रीच्छेदास्याशुभकर्म्म ।	स्त्रीच्छेदाघाताद्यैर्दस्युभिः उच्छिष्टमार्ज्जनोच्छिष्टभक्षणखरोष्ट्रविड्वराहमांसभक्षणस्त्रीच्छेदीसङ्गतदोषस्त्रीसङ्गभोजना-			

अघोपपातकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ । चूर्णोदानम् ।	दक्षिणा ।
	दिक्षुत्वसितकर्म्म बलाच्चासेकं कारितस्य निरभिज्ञातेः प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	सायेच्चान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	क्षत्रियवैश्ययोः परावः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	शूद्रस्य मासार्द्धं यावकपानम् ।	१ धेनुः ।	६ कार्षापणाः ।	यथाशक्ति ।
	वत्सरादूर्द्धं वर्षचतुष्टयं यावत् भागहारेण प्रायश्चित्तमूहनीयम् । तदूर्द्धं तत्समत्वात् पतितत्वेन प्रायश्चित्तान्तराभावाच्चरणम् ।			
अनुदकमूत्रपुरीषकरणम् ।	सचैलस्नानं गोस्पर्शश्च ।			
	अभ्यासे एकोपवासः सचैलस्नानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
जलाद्यशौचमुच्चिद्रघटप्रक्षेपः ।	मासं यावकपानम् । एतदभ्यासे ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	स्नानेन दुष्टदानस्य चिरात्रोपवासः । इदमाद्यः प्रहरत इति जपश्च ।	०	१॥० कार्षापणाः ।	यथाशक्ति ।
	अज्ञानस्य कौतूहलादिना नग्नस्नानम् ।	४ धेनवः ।	१२ कार्षापणाः ।	यथाशक्ति ।
अन्योन्यानुक्तदृष्टोत्पादनम् । अर्थान्तेऽच्छेदकरणम् ।	अहोरात्रमनश्नन् भूत्वा पयःपानम् ।	०	५ रजतमाषकाः ।	धनुर्ईरुच्च ।
शुक्रधनुःपलाशाग्निदर्शकत्वम् ।	इदं शुक्रधनुरिति व्यपदिश्य कामतो दर्शयित्वाहोरात्रोपवासः ।	०	३ रूप्यमाषकाः ।	यथाशक्ति ।
श्राद्धनिमन्त्रितब्राह्मणानाकानम् ।	यतिचान्द्रायणम् ।	४ धेनवः ।	११।० कार्षापणाः ।	यथाशक्ति ।
देवागारक्षतेष्टकाकाष्ठशिलादिना गृहकरणम् ।	प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
निष्ठीवनादि । आदिना वातकर्म्मदन्तशिष्टान्नतत्तुल्यनिन्द्यभक्षणावासःपरिधानानि ।	आचमनम् । गोपृष्ठस्पर्शः । अर्कदर्शनम् । दक्षिणश्रवणस्पर्शो वा । अत्र पूर्व्वाभावे नतः परम् । इन्द्रियप्रस्रष्टा मेध्यस्य सुखस्पर्शे स्नानम् ।			
यमानां व्रतोपव्रतभङ्गः । व्रतानि यथा । अहिंसासत्यास्तेयमैथुनवर्জ্জनानि । उपव्रतानि यथा । अक्रोधगुरुशुश्रूषाप्रमादशौचाहारशुद्धीनि ।	अहोरात्रोपवासपूर्व्वकचान्द्रायणम् ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	रमणेच्छया स्त्रीसम्भोगगमने प्राणायामस्नानपूर्व्वकसान्नपनम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	असङ्कल्पे उपवासः प्राणायामस्नानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
	अकामतः पशुकृमिहिंसायां कृच्छ्रातिकृच्छ्रम् ।	६ धेनवः ।	१८ कार्षापणाः ।	यथाशक्ति ।
	चान्द्रायणं वा । इन्द्रियदौर्ब्बल्यात् स्त्रीदर्शनात् स्कन्दने षोड़शप्राणायामाः । स्त्रियं विना कामतो दिवास्कन्दने त्रिरात्रोपवासः प्राणायामस्नानाचरणञ्च । रात्रौ स्कन्दने स्नानपूर्व्वकद्वादशप्राणायामाः ।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	एकान्नमधुमांसानामश्नतप्रत्यक्षलवणानामभोज्यानामेकैकस्य भोजने प्राजापत्यम् । योगिनां प्रमादे योगेन शुद्धिः । ज्ञानिनां ज्ञानमेव शुद्धिकारणम् । ब्रह्मचारिणोऽकामतः स्वप्ने रेतस्स्खलने स्नानम् । अर्कार्घनम् । घिः पुनर्मामित्यृचो जपश्च ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।

अथोपपातकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
व्रतभङ्गः।	लोभाज्ञानात् प्रमादाद्वा व्रतभङ्गे उपवासत्रयं केशश्मश्रुवपनञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
उत्कटासभयाजनम्।	कामतः सक्तदारोहणे नग्नस्नाने च प्राणायामः।			
	अभ्यासे चिरात्रोपवासः। अवघानेनारोहणे नग्नस्य ईषदभ्यक्तस्नानभोजने च प्राणायामशतम्। अत्र उपपातकगणपठितेषु यत्र प्रायश्चित्तं नोक्तं तत्रोपपातकसामान्यप्रायश्चित्तमेव ज्ञातव्यम्। तत्तु मनूक्तं चैमासिकं गोव्रतं चान्द्रायणं वा। याज्ञवल्क्योक्तं मासं पयःपानं पराको वा। एतान्येव प्रायश्चित्तानि पापस्य गुरुलाघवमवगम्य व्यवस्थेयानि॥ * ॥	०	१॥० कार्षापणः।	यथाशक्ति।

अथ जातिभ्रंशकरपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
ब्राह्मणपीड़ाकरणम्। लघुनादिमद्ययोर्ग्राह्यम्। मिथ्ये कौटिल्यम्। पुंसि मैथुनञ्च।	कामतः साम्लपनम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अकामतः प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	एतदभ्यासे।			
	अत्रार्थे विशेषः।			
	ब्राह्मणावगोरणे प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणे दण्डादिनिपातने अतिकृच्छ्रम्।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणस्य ग्रीवानीत्पादने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	ब्राह्मणाङ्गच्छेदने कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।
	दृग्गोदानञ्च।			

अथ सङ्करीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
खराश्वोष्ट्रगवेभशक्तिच्छागमेषमहिषाणां वधरूपाणि।	सक्तत्करणे मासं यावकपानम्।	२ धेनू।	६ कार्षापणाः।	यथाशक्ति।
	अभ्यासे कृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथापात्रीकरणपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णोदानम्।	दक्षिणा।
निन्दितेभ्यो धनादानम्। वालिश्यम्। शूद्रसेवनम्। असत्प्रभाषणञ्च।	सक्तत्करणे चतुरब्दसाध्यं तप्तकृच्छ्रं शीतकृच्छ्रं वा।	सपादधेन्वसम्भवात् २ धेनू।	३॥०कार्षापणाः।	यथाशक्ति।
	अभ्यासे महासान्तपनम्।	६ धेनवः।	१८ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे चान्द्रायणम्।	सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः।	२२॥० कार्षापणाः।	यथाशक्ति।

अथ मलावहपापानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
कृमिकीटपक्षिणां हननम्। मद्यानुगतद्रव्यभोजनम्। फलकाष्ठपुष्पाणां स्तेयम्। अधैर्य्यम्। तच्च गीतश्रवणादि। अल्पेऽपचये अत्यन्तवैकल्यञ्च।	सप्तरात्रं पयोयावकपानम्।	०	॥०१२	यथाशक्ति।
	अभ्यासे तप्तकृच्छ्रम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अत्यन्ताभ्यासे तप्तकृच्छ्रातिकृच्छ्रम्।	५ धेनवः।	१५ कार्षापणाः।	यथाशक्ति।
	एषु चतुर्षु यत्र यत्र प्रायश्चित्तविशेषो नोक्तस्तत्रैव बोध्यम्।			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ चूर्णीदानम्।	दक्षिणा।
यदनुक्तं तत्प्रकीर्णकम्। इति वचनात् अतिपातकाद्यष्टान्यतमत्वेन विशेषतोऽनुक्तानि पापानि।	चान्द्रायणम्। पराकः। तुलापुरुषः। गवानुगमनम्। प्राजापत्यम्। एतानि सर्व्वपापप्रणाशकानि। पापस्य गुरुलाघवं वीक्ष्य प्रायश्चित्तान्येतानि शिष्टैर्व्यवस्थेयानि।			
अथास्पृश्यस्पर्शनम्। तच्च चाण्डालरजस्वलापतितसूतिकाशवशवस्पृक्चिताङ्गारास्थिकग्राम्यकुक्कुटवराहादीनां स्पर्शनम्।	अनुच्छिष्टस्य चाण्डालादिस्पर्शे अकामतः सचेलं सशिरस्कं स्नानम्। कामतः सचेलस्नानम्। महाव्याहृतिभिर्होमः। घृतप्राशनञ्च। चिताधूमस्पर्शे ऋतुकालीनमैथुने दुःस्वप्ने वमने विरेके श्मश्रुकर्म्मणि यूपभस्मपञ्चनखशवसञ्छृतदस्थ्नां स्पर्शे स्नानपूर्व्वकं प्रक्षालितवस्त्रपरिधानम्। अकृतौ मैथुने मूत्रपुरीषत्यागवच्छुद्धिः।			
	सर्व्वाङ्गस्पर्शे त्रिरात्रोपवासः। रात्रौ शववर्जास्पृश्यस्पर्शने सुवर्णं प्रक्षिप्य अग्निं सन्निधाप्य दिवाहृतजलैः स्नानम्। सर्व्वत्र प्रागन्नप्राशनात् शिशोरभ्युक्षणम्। प्राक् चूडाकरणात् बालस्याचमनम्। प्रागुपनयनात् कुमारस्य स्नानम्।	०	१॥० कार्षापणः।	यथाशक्ति।
अथोच्छिष्टस्य चाण्डालादिस्पर्शः। आदिना पतितरजस्वलान्त्यजश्वसूकरमद्यभाण्डानां ग्रहणम्।	सद्यः स्नात्वा परदिने प्रायश्चित्तं करणीयम्।			
	ऊर्द्ध्वोच्छिष्टस्य प्राजापत्यम्।	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
	कामाभ्यासे सान्तपनम्।	४ धेनवः।	१२ कार्षापणाः।	यथाशक्ति।
	अज्ञाने त्रिरात्रोपवासः। पञ्चगव्यपानञ्च।	०	१॥० कार्षापणः।	यथाशक्ति।
	अर्द्धोच्छिष्टस्य अर्थादनिर्णीताशस्य आमाशनोच्छिष्टस्य च प्राजापत्यपादः।	०	॥० पणाः।	यथाशक्ति।
	आपदि ज्ञानात् विशेषो यथा।			
	मूत्रत्यागाशौचिनः शवादिस्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	पुरीषत्यागाशौचिनः शवादिस्पर्शे दिनद्वयमुपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	मैथुनाशौचिनः शवादिस्पर्शे दिनत्रयमुपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	पानाशुचीनां शवादिस्पर्शे दिनचतुष्टयमुपवासः।	०	२ कार्षापणौ।	यथाशक्ति।
अथ तैलाभ्यक्तस्य चाण्डालादिस्पर्शः।	उपवासः। पञ्चगव्यपानञ्च। चाण्डालोदकसंस्पृष्टस्य स्नानम्।	०	॥० पणाः।	यथाशक्ति।
	उच्छिष्टस्य चाण्डालोदकस्पर्शे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्यदानम्।	दक्षिणा।
अथ रजकादिस्पर्शः। आदिना चर्मकारवेणधीवरनटानां ग्रहणम्।	अनुच्छिष्टस्य द्विजस्य रजकादिभिरकामतः स्पर्शे आचमनम्।			
	कामतः शिरोयतिरिक्ताङ्गस्पर्शे तदङ्गप्रक्षालनपूर्वकमाचमनम्।			
	शिरःस्पर्शे स्नानम्।			
	उच्छिष्टस्य तु ब्राह्मणस्यानुच्छिष्टचर्मकारादिस्पर्शे एकरात्रं पयःपानम्।			
	उच्छिष्टचर्मकारादिकसृक्कस्पर्शे त्रिरात्रोपवासान्ते घृतप्राशनम्। स्नानन्तूर्द्धमुच्छिष्टविषयत्वेदम्।	०	१॥० कार्षापणः।	यथाशक्ति।
	अज्ञानतस्तदङ्गम्।	०	॥० पणाः।	यथाशक्ति।
अथोच्छिष्टस्य ब्राह्मणस्योच्छिष्टसच्छूद्रस्पर्शः।	एकोपवासानन्तरं पञ्चगव्यपानम्। कामत इदम्।	०	॥० पणाः।	यथाशक्ति।
	अकामेऽधोच्छिष्टे नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	पुनः स्पर्शेऽप्येवम्।			
अथोच्छिष्टोच्छिष्टसवर्णस्पर्शः।	द्वयोरेवोच्छिष्टयोर्ब्राह्मणयोरन्योन्यस्पर्शे तदन्नत्यागपूर्वकं स्नानम्।			
	अत्र उच्छिष्टस्य विप्रस्यानुच्छिष्टविप्रस्पर्शे दोषाभाव एव। एतत्कामतः।			
	कामतो नक्तपूर्वं घृताशनम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	उच्छिष्टब्राह्मणस्योच्छिष्टक्षत्रस्पर्शे नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	तादृग्वैश्यस्पर्शे उपवासः।	०	॥० पणाः।	यथाशक्ति।
	भुक्तान्नयोः सवर्णयोः परस्परस्पर्शे तदन्नत्यागपूर्वकं स्नानं प्राणायामश्च।			
	अज्ञानात्तदन्नभोजने परेद्युर्नक्तं पञ्चगव्यपानम्। तदन्ते भोजने न दोषः।			
	ज्ञानात् उपवासानन्तरं ब्रह्मकूर्चपानं हविष्यभोजनञ्च।	०	॥० पणाः।	यथाशक्ति।
	शूद्रस्यापि विण्मूत्राश्रवणादुच्छिष्टोच्छिष्टसंस्पर्शे एतदेव। नक्ताघृत्तौ रजतरक्तिकाद्वयं देयम्।			
अथ नीलीवस्त्रपरिधानम्।	अहोरात्रोपवासानन्तरं पञ्चगव्यपानम्। इदमज्ञाने।	०	॥० पणाः।	यथाशक्ति।
	ज्ञाने द्वैगुण्यम्।			
	पालनाद्विक्रयात्तदृत्तेरुपजीवनात् त्रीणि शस्त्राणि।	३ धेनवः।	६ कार्षापणाः।	यथाशक्ति।
	नीलीवस्त्रधारिणां स्नानदानतपोहोमस्वाध्यायपितृतर्पणमहायज्ञानां वृथात्वम्। स्त्रीणां क्रीड़ार्थसंयोगे त्रयनीये न दोषः।			
अथ पलाण्डुलशुनादिस्पर्शः। आदिना सुरामद्यगृद्योच्छिष्टानां ग्रहणम्।	अनुच्छिष्टस्य द्विजस्य कामतः स्पर्शे त्वाचं कुम्भजलपानं सावित्रीशतजपश्च।	०	१॥० कार्षापणलभ्यकाञ्चनम्।	यथाशक्ति।
	सद्योच्छिष्टस्य स्पर्शे नक्तम्।	०	२ रजतरक्तिके।	यथाशक्ति।
	क्षतपुरीषोत्सर्गस्य पलाण्डुलशुनादिस्पर्शे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	अनुच्छिष्टस्य द्व्यहोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	एतत्त्रयमकामतः।			
	अनुच्छिष्टस्य स्पर्शे केवलं स्नानम्।			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्योदानम्।	दक्षिणा।
	अधोच्छिष्टस्य कामतः सुरेतरमद्यस्पर्शे अकामतः मूत्रोच्छिष्टस्य जग्ध्वादीनाञ्च स्पर्शे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	कामतः सुराया दर्शने स्नानं प्राणायामशतं घृतप्राशनञ्च।			
	अकामतः सुरायाः स्पर्शने प्राशे चाप्येवम्।			
	कामतस्तस्याः स्पर्शे प्राशे च जातिभ्रंशकरपापस्य प्रायश्चित्तं ज्ञेयम्। असोमपायिनां सुरापसम्बन्धिसुराप्राशे उदकमज्जनं शिरश्चमर्षणं घृतप्राशनञ्च।			
अधोच्छिष्टस्य महादिपुरीषस्पर्शः। आदिना शकाकङ्कगृध्रादिग्रहणम्।	अधोच्छिष्टस्य सचेलस्नानम्।			
	ऊर्ध्वोच्छिष्टस्योपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
अथानुच्छिष्टस्य मलस्पर्शः। मला यथा। "वसामूत्रमलक्लेदमज्जाश्रुश्लेष्मविट्कर्णविप्रुषः। स्वेदाश्रुदूषिका श्लेष्मा दशैते नृणां मलाः॥"	पूर्व्वेषां वर्णानां नाभेरधः करद्वये च स्पर्शे मृज्जलाभ्यां क्षालनम्। उत्तरेषां वर्णानां नाभेरधः करद्वये च स्पर्शे केवलजलेन क्षालनम्। नाभेरूर्द्धं विण्मूत्रप्रभृतिस्पर्शे स्नानम्। चक्षुषि ओष्ठे बाहुकरयोश्च स्पर्शे गोमयेनोदकेन क्षालनं स्नानं उपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	श्वमार्जारखरोष्ट्रशूकरादिभिर्मेध्यस्पर्शे सचेलं स्नानम्।			
	एतदपि अनुच्छिष्टस्य नाभ्यूर्द्धलेपोपहतविषयम्। अध उच्छिष्टविषयञ्च।			
	काकबलाहकाभ्यां विलिप्तस्य श्रोत्रमुखाप्रविष्टामेध्यलिप्तशरीरस्य च तदङ्गक्षालनं स्नानञ्च। अमेध्यानि यथा। "मानुषास्थि शवं विष्ठा रेतो मूत्रासवं वसा। स्वेदाश्रुदूषिका श्लेष्मा मद्यमामेध्यमुच्यते॥" एषां देहात् प्रच्युतानामेवामेध्यत्वम्। मद्यविण्मूत्रविप्रुषां मुखमक्षलस्पर्शे मृत्तिकागोमयैर्लेपनं स्नानं उपवासः। तद्भक्षे पञ्चगव्यपानञ्च। अत्र विशेषो यथा। परस्य मानुषस्यास्थिवसाविष्ठाशवमूत्ररेतोमज्जशोणितानां स्पर्शे लेपमार्जनं स्नानं आचमनञ्च। आत्मसम्बन्धिनामेतेषां स्पर्शे परिमार्ज्जनमाचमनञ्च।	०	॥० पणाः।	यथाशक्ति।
अथ मानुषास्थिस्पर्शः।	सचेलमानुषास्थिस्पर्शे स्नानम्।			
	कामतः स्पर्शे स्नानं गायत्र्याष्टशतजपः। घृतप्राशनं चिराचमनञ्च।			
	कामतोऽभ्यासे चिरात्राशौचाभ्यासे ह्रस्वपादः।	०	॥० पणाः।	यथाशक्ति।
	निःस्नेहस्य स्पर्शे आचमनं गोस्पर्शे अर्कदर्शनं वा। कामतोऽभ्यासे अहोरात्राशौचाभ्यासे एतानि कार्य्याणि।			
अथ रजस्वलाया स्पर्शः।	सचेलस्नानम्।	०	०	०
अथ रजस्वलायाः सवर्णासवर्णरजस्वलास्पर्शः।	रजस्वलाया ब्राह्मण्याः सवर्णरजस्वलास्पर्शे एकरात्रोपवासः। पञ्चगव्यपानञ्च। घृतम् कामतः।	०	॥० पणाः।	यथाशक्ति।

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ मूल्योदानम्।	दक्षिणा।
	अकामतस्तदर्हं अर्थान्नक्तव्रतम्।	०	१० पणाः।	यथाशक्ति।
	रजस्वलाया ब्राह्मण्याः शैवधर्मरजस्वलायाः अर्थात् क्षत्रियादिरजस्वलायाः अर्थे षड्रात्रोपवासः। एतच्च कामतः। अकामतस्तदर्हम्।	१ धेनुः।	२ कार्षापणाः।	यथाशक्ति।
	रजस्वलायाः शूद्रायाः सवर्णरजस्वलार्थे एकरात्रोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	सवर्णयो रजस्वलयोरन्योन्यार्थे एकोपवासः पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	अत्यन्ताधमरजस्वादिरजस्वलार्थे दशहसार्धं ब्रह्मकूर्चव्रतम्। एतच्च कामतः। अकामतस्तदर्हम्। एतत् सर्वं मुद्धिकालानन्तरं अर्थात् पञ्चमेऽहनि कार्यम्।	०	१ कार्षापणन्यूनकाञ्चनम्।	यथाशक्ति।
अथ रजस्वलायाः यतितप्राजापत्यादिरर्थः। आदिना अन्त्यजवायसयोर्ग्रहणम्।	प्रथमेऽह्नि अर्थे त्रिरात्रोपवासः।	०	१॥० कार्षापणः।	यथाशक्ति।
	द्वितीयेऽह्नि दशोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयेऽह्नि अहोरात्रोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थेऽह्नि विशुद्धिस्नानात् पूर्वं अर्थे नक्तम्। एतच्चाकामतः।	०	१ रौप्यमाषकम्।	यथाशक्ति।
	कामतः अर्थे सर्वत्र त्रिरात्रोपवासः। तदन्ते अजाघ्राता कारयितव्या च।	०	१॥० कार्षापणः।	यथाशक्ति।
अथ रजस्वलायाः उच्छिष्टमूढाश्वमूकरादिरर्थः। आदिना जम्बुकखरयाय्यकुक्कुटानां ग्रहणम्।	प्रथमद्वितीयदिनयोरुच्छिष्टमूढार्थे दशोपवासः।	०	१ कार्षापणः।	यथाशक्ति।
	तृतीयदिने अर्थे एकोपवासः।	०	॥० पणाः।	यथाशक्ति।
	चतुर्थदिने अर्थे नक्तम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	कुक्कुटादिरर्थे सर्वत्र नक्तमेव। एतच्च प्रायश्चित्तं विशुद्धिस्नानानन्तरं कर्तव्यम्।	०	२ रजतमाषकौ।	यथाशक्ति।
	एकदशाहौ रजस्वलायाश्चाण्डालार्थे अहोरात्रोपवासः। पञ्चगव्यपानञ्च।	०	॥० पणाः।	यथाशक्ति।
	रजस्वलाया उच्छिष्टचाण्डालादिरर्थे द्विजस्त्रीणां प्राजापत्यम्। मूढाया धेनुदानम्। इदं तु प्रायश्चित्तेषु रजस्वलात्वमेव निमित्ततो न ब्राह्मण्यादिभ्यो विशेषः। अत्रापवादः। "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरग्रामदाहे च मृष्टा-मृष्टिं न दूष्यति॥"	१ धेनुः।	३ कार्षापणाः।	यथाशक्ति।
अथ चाण्डालादिसूकरः। आदिना श्वपाकपुक्कसयोर्ग्रहणम्।	संवत्सरैकचाण्डालसूकरे मासैकं गोमूत्रयावकाहारः। एतत् प्रायश्चित्तं यौनादिवर्जितसंसर्गविषयम्।	१२ धेनवः।	३६ कार्षापणाः।	१०० गावः। अशक्तौ १०० कार्षापणाः। अभावे सर्वस्वम्।
	बालवृद्धस्त्रीमूढानामर्धम्। आधोक्षजाह्वालाः। सप्तमूर्तं स्त्रविराः। चौर्ये प्रायश्चित्ते ब्राह्मणभोजनम्। एतत् प्रायश्चित्तं ब्राह्मणक्षत्रियविशां तुल्यमेव।	६ धेनवः।	१८ कार्षापणाः।	५० गावः। अशक्तौ ५० कार्षापणाः। अभावे सर्वस्वार्धम्।

अथ प्रकीर्णकानि ।	प्रायश्चित्तानि ।	तदशक्तौ धेनुदानम् ।	तदशक्तौ चूर्णीदानम् ।	दक्षिणा ।
	पूर्वोक्तकालादन्यकालसङ्करे चान्द्रायणम् ।	सार्द्धसप्तधिन्वत्सम-वातृ ८ धेनवः ।	२२॥० कार्षापणाः ।	यथाशक्ति ।
	स्वल्पसङ्करे पराकः ।	५ धेनवः ।	१५ कार्षापणाः ।	यथाशक्ति ।
	अज्ञानस्वल्पकाले तप्तकृच्छ्रद्वयम् ।	२ धेनू ।	६ कार्षापणाः ।	यथाशक्ति ।
	शूद्रस्यान्न प्राजापत्यम् ।	१ धेनुः ।	३ कार्षापणाः ।	यथाशक्ति ।
	चाण्डालादिसङ्करे गृहादिशुद्धिर्यथा । भवनदहनं अर्थात् तृणाग्निज्वालासंवृतम् । पवनं अर्थात् पूर्वभित्तिकाकर्षणेन भित्तिकान्तरदानम् । सर्वभाजनभाण्डभेदनम् । दारवाणां तक्षणम् । शुक्तिरजतसुवर्णशैलानामद्भिः प्रक्षालनम् । कांस्यताम्राद्यायसाकरे अर्थादग्नौ शुद्धिः । सौवीरपयोदधितक्राणां परित्यागः । लाक्षादिरसधान्यादिद्रव्याणां रक्षणम् । घृतादीनां तापनञ्च ।			
	एकस्मिन्नेव कूपे द्विजानां चाण्डालानाञ्च सह जलपानं कुर्वतां संसर्गदुष्टानां उपवासः । पञ्चगव्यपानञ्च ।	०	॥० पणाः ।	यथाशक्ति ।
	बालापत्यारोगिगर्भिणीवृद्धानां नक्तम् ।	०	२ रजतरक्तिके ।	यथाशक्ति ।
	बालानां प्रहरद्वयमभोजनम् ।	०	१ रजतरक्तिका ।	यथाशक्ति ।
	चर्मकारादीनामविज्ञातसङ्करे तु चाण्डालसङ्करप्रायश्चित्तस्य षष्ठो भागः कर्तव्यः । संज्ञानां एकस्मिन्नुपहते तस्यैव शोधनम् । न तु तत्सृष्टिनां सर्वेषां शोधनम् । एकशास्त्रापाषाणादौ चाण्डालादिभिः सहारोहणे ब्राह्मणस्य स्नानमात्रम् ।			
	तत्र फलभोजने ब्राह्मणानुज्ञापनं सचैलस्नानं अहोरात्रोपवासः पञ्चगव्यपानञ्च । एतद्भावधाने ।	०	॥० पणाः ।	यथाशक्ति ।
	सन्निधाने त्रिरात्रोपवासः । पञ्चगव्यपानञ्च ।	०	१॥० कार्षापणः ।	यथाशक्ति ।
	एतदुभयं ज्ञानविषयम् । अज्ञाने एकवृक्षादौ चाण्डालादिभिः सह फलभोजनं अघमर्षणम् । एकावयवविहारापरस्परास्पर्शेऽपि स्नानादिकम् । अत्रापवादः । "रथ्याकर्दमतोयानि नावः पन्थानएव च । स्पर्शनान्न प्रदूष्यन्ति पक्वेष्टरचितानि च ॥" पक्वानि इष्टकासमूहः । पक्वेष्टरचितानि मठादीनि । द्वितीयसंसर्गितृतीयसंसर्गिणोर्हस्तपादप्रक्षालनपूर्वकमाचमनम् । चतुर्थसंसर्गे दोषाभावः ।			
	इत्यशुद्ध्यशौचप्रायश्चित्तम् ॥ * ॥			
अथ रहस्यपापानि ।	रहस्यजाते पापे रहस्यप्रायश्चित्तं करणीयम् । अन्येनाविदितमित्यर्थः । तत्र यदि कर्त्ता स्वयं प्रायश्चित्तानभिज्ञस्तदा तत्तत्पापस्य किं रहस्यप्रायश्चित्तमिति सामान्येन प्रायश्चित्ताभिज्ञं पृष्ट्वा रहस्यं प्रायश्चित्तं कुर्यात् । तत्र यदि			

अथ प्रकीर्णकानि।	प्रायश्चित्तानि।	तदशक्तौ धेनुदानम्।	तदशक्तौ पणदानम्।	दक्षिणा।
	मरणान्तिकं प्रायश्चित्तं तत्र रहस्यव्रतेऽपि मरणमेव कर्त्तव्यम्। यत्र तु व्रतादिकं तत्र जातिभ्रक्तियुगषड्डुड्डाद्यपेक्षया प्रकाशव्रतप्रायोक्तप्रायश्चित्तस्य विंशतिभागत्रिंशद्भागषष्टिभागाः कल्प्याः।			
	अथवा महापातकेष्वकामतो मनूक्तमाब्दिकं व्रतं कर्त्तव्यम्।	१५ धेनवः।	४५ कार्षापणाः।	६ गावः। अशक्तौ ८।८॥ कार्षापणाः।
	कामतो द्वैगुण्यम्।	३० धेनवः।	९० कार्षापणाः।	१७ गावः। अशक्तौ १६॥८।३॥ कार्षापणाः।
	अन्येषु पापेषु गुरुलाघवापेक्षया प्राणायामशतमेव एकाहद्व्यहत्र्यहक्रमेण मासं षण्मासं संवत्सरं वाभ्यसनीयम्। व्रतकरणाशक्तेनापि अपहोमध्यानतीर्थसेवादानवेदाभ्यासादयः कार्य्याः। इति रहस्यप्रायश्चित्तम्॥			

इति मूलपापिक्षतप्रायश्चित्तविवेकोक्तनवविधपापानां प्रायश्चित्तानि समाप्तानि॥ * ॥

प्रायिकं, त्रि, (प्रायेण प्राये वा भवमिति। प्राय + ठक्।) बाहुल्ये भवम्। यथा। "दैवयज्ञाने तु प्रायिकमरणं ज्ञात्वा प्रवृत्तस्य चान्द्रायणादिकम्।" इति प्रायश्चित्ततत्त्वम्॥

प्रायुहेषी, [न्] पुं, (प्रायुधि प्रकृष्टयुद्धादिस्थाने हेषते शब्दायते इति। हेष् + णिनिः।) घोटकः। इति शब्दचन्द्रिका॥

प्रायोज्यं, त्रि, (प्र + आ + युज् + णिच् + यत्।) प्रयोजनार्हम्। यथा। प्रायोज्यं न विभज्येत। यदृत्यस्य प्रयोजनार्हं पुस्तकादि तच्चार्त्वैः सह न विभजनीयमिति दायभागः॥

प्रायोपविष्टः, त्रि, (प्रायेण मरणार्थमनशनेन उपविष्टः।) प्रायोपवेशनविशिष्टः। यथा,—

"प्रायोपविष्टं गङ्गायां परीतं परमर्षिभिः॥"

इति श्रीभागवतम्।

"प्रायेण मृत्युपर्य्यन्तानशनेनोपविष्टम्।" इति तट्टीकायां श्रीधरस्वामी॥

प्रायोपवेशः, पुं, (प्रायेण मृत्युनिमित्तकानशनेन उपवेशः स्थितिः।) सङ्कल्पपूर्ब्बकानशनस्थितिः। यथा,—

"प्रायोपवेशो राजर्षेर्विप्रशापात् परीक्षितः॥"

इति श्रीभागवते १२ स्कन्धः॥

प्रारब्धं, क्ली, (प्रकृष्टमारब्धं स्वकार्य्यजननायेति।) प्रालब्धम्। पूर्ब्बशरीरारम्भकादृष्टविशेषः। यथा,—

"प्रारब्धकर्म्मणां भोगादेव क्षयः॥" इति स्मृतिः।

"प्रारब्धमन्नरूपमिमानमूल्यः।"

इति श्रीभागवतम्॥

"प्रारब्धकर्म्मविक्षेपाद्वासना तु न मुञ्चति॥"

इति भगवद्गीतायां मधुसूदनसरस्वती च॥

(प्र + आ + रभ् + कर्म्मणि क्तः। कृतारम्भे, त्रि। यथा, रघौ। १४। ७।

"अथाभिषेकं रघुवंशकेतोः
प्रारब्धमानन्दजलैर्जनन्याः।
निर्वर्णयामासुरमात्यवृद्धा-
स्त्रीर्थाहृतैः काञ्चनकुम्भतोयैः॥")

प्रारब्धिः, स्त्री, (प्र + आ + रभ् + क्तिन्।) मज्जनरज्जुः। इति हारावली॥

प्रारम्भः, पुं, (प्र + आ + रभ् + भावे घञ्। सुम् च।) प्रकर्षेण आरम्भः। यथा, स्मृतिः।

"प्रारम्भे कर्म्मणां विप्रः पुष्करीकं स्मरेद्धरिम्॥"

(प्रारभ्यते इति। प्र + आ + रभ् + कर्म्मणि घञ्। सुम् च। कर्म्म। यथा, मार्कण्डेयपुराणे। ५१। १७।

"शुभाशुभञ्च कुशलैः कुमारोऽन्यो ब्रवीति वै।
तत्रापि दुष्टे वाक्येऽपि प्रारम्भत्यागएव च॥"

प्रकृष्ट आरम्भो योगो यस्येति विग्रहे। योगी। यथा, रघुः। १०। ६।

"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम्।
दिवसं प्रारब्धमिव प्रारब्धसुखदर्शनम्॥")

प्रार्थनं, क्ली, (प्र + अर्थ + ल्युट्।) प्रकर्षेण याचनम्। तत्पर्य्यायः। याच्ञा २ अभिप्रार्त्तिः ३ याचना ४ अर्थना ५ प्रार्थना ६। इति शब्दरत्नावली॥ (यथा, महाभारते। ३। १३६। ३७।

"युगक्षयकृता धर्म्माः प्रार्थनानि विकुर्व्वते।
यतन् कलियुगं नाम अचिराद् यत् प्रवर्त्तते॥")

प्रार्थना, स्त्री, (प्र + अर्थ + णिच् + युच्।) प्रकर्षेण याचनम्। (यथा, महाभारते। ३।३१२।८१।

"सन्तो दिग्जलमाकाशं गौरवं प्रार्थना लघुम्।
आहुस्य ब्राह्मणः कालः कथं वा यज्ञ! मन्यसे॥")

प्रार्थनीयं, क्ली, (प्रार्थ्यते इति। प्र + अर्थ + णिच् + अनीयर्।) द्वापरयुगम्। इति शब्दरत्नावली॥ प्रार्थनाविषये, त्रि॥ (यथा, पञ्चतन्त्रे। २। ११६।

"ततस्तयोः स्वभूपं दृष्ट्वा एकस्य वरः प्रार्थनीयः॥")

प्रार्थितः, त्रि, (प्रार्थ्यते स्मेति। प्र + अर्थ + क्तः।) याचितः। (यथा, देवीभागवते। २। ६। ५६।

"प्रार्थिता पतिना कुन्ती दद्यौ मन्त्रं दयान्विता।
एकपुत्रप्रवर्त्तेन मान्द्री पतिमते स्थिता॥")

प्रचुसंरुद्धः। अभिक्षिप्तः। इति मेदिनी॥ हृतः। इति त्रिकाण्डशेषः॥

प्रालम्बं, क्ली, (प्रालम्बते इति। लबि अवस्रंसने + अच्।) कण्ठात् कण्ठलम्बमानमाल्यम्। इत्यमरः। २।६।१३६॥ (यथा, रघौ। ६। १७।

"विलम्बमंसादपरो विलम्बी
रत्नानुविद्धाङ्गदकोटिलग्नम्।
प्रालम्बमुत्कृष्य यथावकाशं
विनाय सार्द्धोक्षतचारुवक्त्रः॥"

प्रकर्षेण लम्बमाने, त्रि॥)

प्रालम्बिका, स्त्री, (प्रालम्बते इति। अच्। संज्ञायां कन्। टाप् अत इत्वम्।) स्वर्णरचितलम्बलिका। सुवर्णहारः। इत्यमरः। २।६।१०७॥

प्रालेयं, क्ली, (प्रकर्षेण लीयन्ते जीना भवन्ति पदार्था अत्रेति प्रलयो हिमालयस्तस्मात् आगतम्। प्रलय + अण्। "लेलयसिभ्यां युग्लयानौ यादेरियः।" ७। ३। २। इति यस्येयादेशः।) हिमम्। इत्यमरः। १। ३। १८॥ (यथा, देवीभागवते। ७। ५। १७।

"नरनारायणौ चैव पेरतुल्यप उत्तमम्।
प्रालेयाद्रिं समागत्य तीर्थे बदरिकाश्रमे॥")

प्राक्षेयांशुः, पुं, (प्राक्षेयाणि क्षिप्राणि तद्वत् द्युतिर्यस्य वा अंशवो यस्य ।) चन्द्रः । इति हलायुधः ॥ (यथा, माघे । ६ । ८७ ।
"रत्नं नारीवेटधितुमलङ्कारिभिः कामसाधून्
प्राक्षेयांशोः सपदि रुचयः शान्तमालान्तराया: ॥")

प्राक्षटः, पुं, (प्र + अव + अट् + अच् । पृषोदरादित्वात् साधुः ।) अवः । इति जटाधरः ॥

प्रावरः, पुं, (प्राहृणोत्यनेनेति । प्र + आ + हृ + करणे अप् ।) प्रावौरम् । इति शब्दरत्नावली ॥

प्रावरणं, क्ली, (प्राहृणोत्यनेन गात्रमिति । प्र + आ + हृ + करणे ल्युट् ।) उत्तरीयवस्त्रम् । तत्पर्य्यायः । प्रच्छादनम् २ संव्यानम् ३ उत्तरीयकम् ४ । इति हेमचन्द्रः ॥ (यथा, राजतरङ्गिण्याम् । ४ । ६७४ ।
"यत्कञ्चोपाहृतप्राङ्गचारुप्रावरणादि सः ।
गौरवार्हान् दुराचारैः सचिवान् पर्य्यधापयत् ॥")

प्रच्छदावरणञ्च ॥

प्रावारः, पुं, (प्राव्रियते गात्रमनेनेति । प्र + आ + वृ + करणे घञ् ।) उत्तरावस्त्रः । उत्तरीयवस्त्रम् ॥ इत्यमरः ॥ (यथा, महाभारते ।२।४८।६।
"आच्छादयति प्रावाराग्र्याणि पिहितोदरम् ।
आजानेया वहन्त्यश्वाः कैनाणि हरितः स्रजः ॥")

प्रावारकोटः, पुं, (प्रावारस्य कोटः ।) कोटविशेषः । तत्पर्य्यायः । कुणः २ । इति जटाधरः ॥

प्रावृट्, [ष्] स्त्री, (प्रकर्षेण आ सम्यक्प्रकारेण च वर्षतीति । प्र + आ + वृष् + क्विप् । प्रावर्षत्यत्रेति आधारे क्विप् वा । यद्वा, वर्षणमिति वृट् प्रकृता वृडृच । "नक्षिवृतिवृधीति ।" ६ । ३।१२६ । इति पूर्वपदस्य दीर्घः ।) वर्षाकालः । श्रावणभाद्रमासौ । इत्यमरः । १ । ४ । १८ ॥ (यथा, रघौ । ६ । ५१ ।
"अथास्य चाम्भः पृषतोक्षितानि
ग्रैवेयगन्धीनि शिलातलानि ।
कलापिनां प्रावृषि पश्य वृत्तं
कान्तासु गोवर्द्धनकन्दरासु ॥")

प्राहृत्यः, पुं, (प्रावृषः अत्ययो नाशो यत्र ।) शरत्कालः । इति राजनिर्घण्टः ॥

प्राहृतं, त्रि, (प्राव्रियते स्मेति । प्र + आ + वृ + क्तः ।) प्रच्छदावरणम् । ओढ़नवस्त्रम् । इति भरतः ॥ तत्पर्य्यायः । निवीतम् २ । इत्यमरः ॥ निवृतम् ३ । इति तट्टीकायां स्वामी ॥

प्राहृतिः, स्त्री, (प्राहृणोति प्रकर्षेण आच्छादयति इन्द्रियग्रामनेति । प्र + आ + हृ + करणे क्तिन् ।) प्रावौरम् । इति शब्दरत्नावली ॥ (मनुः । यथा, सर्व्वदर्शनसंग्रहे ग्रैवदर्शने ।
"प्राहृतौ यत्नं कर्म्म मायाकार्य्यचतुर्विधम् ।
प्राधानाख्यं समाधिन धर्म्मेणाजैव कौशिका ॥"
"अस्यार्थः । प्राहृणोति प्रकर्षेणाच्छादयत्यात्मनो इन्द्रियाणि इति प्राहृतिः स्वाभाविकमनुचिमेव इति ॥")

प्राहृषा, स्त्री, (प्राहृष् + इजन्तात् टाप् वा ।) वर्षाकालः । वर्षाकालः । इति त्रिकाण्डशेषः ॥

प्राहृषायणी, स्त्री, (प्राहृषायां अवनतृदृभवो यस्याः । गौरादित्वात् ङीष् ।) कपिकच्छुः । इत्यमरः ।२।४।६॥ आलकुशी इति भाषा ॥

प्राहृषिकः, पुं, (प्राहृषि वर्षाकाले कायति शब्दायते इति । के + कः । अलुक्समासः ।) मयूरः । इति धरणिः ॥ (प्राहृषि भवः । प्राहृष् + ठक् ।) प्राहृट्कालभवे, त्रि ॥

प्राहृषेण्यः, पुं, (प्राहृषि भवः प्राहृट् देवतास्य वेति । प्राहृष् + "कालेभ्यो भवत्रे ।" ४।२।३४। इति "प्रहृष एण्यः ।" ४ । ३ । २० । इति एण्यः ।) कदम्बवृक्षः । इति मेदिनी ॥ कुटजवृक्षः । धाराकदम्बः । इति राजनिर्घण्टः ॥

प्राहृषेण्यः, त्रि, (प्राहृषि भव इति । प्राहृष् + एण्यः ।) प्राहृट्कालभवः । इति मेदिनी ॥ (यथा, रघौ । १ । ३६ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्राहृषेण्यं पयोवाहं विद्युदैरावताविव ॥")

प्राहृषेण्यता, स्त्री, (प्राहृषेण्य + टाप् ।) कपिकच्छुः । रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

प्राहृत्यं, क्ली, (प्राहृषि भवमिति । यत् ।) वैदूर्य्यम् । इति राजनिर्घण्टः ॥ प्राहृषि भवे, त्रि ॥

प्राहृत्यः, पुं, (प्राहृषि भव इति । प्राहृष् + यत् ।) कुटजः । धाराकदम्बः । विकङ्कटकः । इति राजनिर्घण्टः ॥

प्राग्रिकं, क्ली, (प्रकर्षेण अग्रिकं यत्र ।) पिलुपर्णः । इति जटाधरः ॥ (प्र + अग्र् + कर्म्मणि क्तः ।) भक्ष्यते, त्रि ॥

प्राग्रिकः, पुं, (प्रश्नाय तदुत्तरप्रदानाय साधुरिति । प्रश्न + ठक् ।) सभ्यः । इति त्रिकाण्डशेषः ॥ प्रश्नकर्त्तरि, त्रि ॥

प्रासः, पुं, (प्रास्यते क्षिप्यते इति । प्र + अस् + "हलश्च ।" ३।३।१२१ । इति घञ् ।) कुन्तास्त्रम् । इत्यमरः ।२।८।८३॥ कौंच इति भाषा ॥ (यथा, महाभारते । ६ । ६७ । २३ ।
"गदाभिरसिभिः प्रासैर्षाष्टीकैश्चातपत्रभिः ॥"
अस्य आकृतिलक्षणादिकं यदुक्तं शुक्रनीतौ तदुयथा,—
"प्रासाख्यस्तु चतुर्हस्तं दण्डवृक्षं क्षुराननम् ॥"
यथाच ।
"प्रासस्तु सप्तहस्तः स्यादौक्षलेन तु वैष्णवः ।
लौहग्रीवस्त्रिकोणश्च कौशेयस्त्रवकाञ्चितः ॥
आकर्षश्च विकर्षश्च धूननं वेधनं तथा ।
चतस्र एता गतय उक्ताः प्रासं समाश्रिताः ॥")

प्रासकः, पुं, (प्रास + संज्ञायां स्वार्थे वा कन् ।) प्रासास्त्रम् । प्राशकः । इति हेमचन्द्रः ॥

प्रासङ्गः, पुं, (प्रसज्यते इति । प्र + सञ्ज् + घञ् । उपसर्गस्येति दीर्घः) युगम् । इत्यमरः । २ । ८ । ५७ ॥ जोयालि इति भाषा । "अनयोः शुक्रस्य सम्बन्धि अवधि सम्बन्धं वा यत् युगं ततोऽन्यत् यत् यस्यानां दमनकाले सम्बन्धते तत् युगं प्रासङ्गः ।" इति भरतः ॥ (यथा, महाभारते । १२ । ६४ । १६ ।
"विघ्नाद्यायामनङ्वाहं धेनुं दत्वा च दुग्धदाम् ।
सप्रासङ्गञ्च शुक्रस्य सधान्यं वस्त्रसंयुतम् ॥")

प्रासङ्गः, पुं, (प्रासङ्गं वहतीति । प्रासङ्ग + "तद्वहति रथयुगप्रासङ्गम् ।"४।४।७६। इति यत् ।) युगवोढृबधः । इत्यमरः । २ । १ । ६४ ॥

प्रासादः, पुं, (प्रसीदन्त्यस्मिन्निति । प्र + सद् + "हलश्च ।" ३ । ३ । १२१ । इत्याधारे घञ् । "उपसर्गस्य घञ्यमनुष्ये बहुलम् ।" ६।३।१२२। इति उपसर्गस्य दीर्घः ।) देवभूभुजां गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा, देवीभागवते । २ । ६ । ४२ ।
"इत्युक्त्वा सचिवान् राजा कल्पयित्वा सुरक्षकान् ।
कारयित्वाथ प्रासादं सप्तभूमिकमुत्तमम् ॥")

तल्लक्षणादि यथा,—

सूत उवाच ।
"प्रासादानां लक्षणन्तु वक्ष्ये शौनक ! तच्छृणु ।
चतुःषष्टिपदं क्षेत्रं दिग्विदिक्षूपकल्पितम् ॥
चतुष्कोणं चतुर्भिश्च द्वाराणि कुर्य्यसंख्यया ।
चत्वारिंशद्भिरंशैश्च भित्तीनां कल्पना भवेत् ॥
ऊर्द्धञ्चैवसमा लक्ष्मा लक्ष्मार्द्धेन गुणं भवेत् ।
गर्भविस्तारविस्तीर्णा मुक्ताद्या च विधीयते ॥
तन्निभागेन कर्त्तव्या पञ्चभागेन वा पुनः ।
निर्गमस्तु मुक्ताद्याया उच्छ्रयः शिखरार्द्धगः ॥
चतुर्धा शिखरं कृत्वा त्रिभागे वेदिबन्धनम् ।
चतुर्थे पुनरस्यैव कक्षभागसमं सारकम् ॥ * ॥
अथवापि समं वास्तु कृत्वा बोढ्रंशभागिकम् ।
तस्य मध्ये चतुर्भागमादौ गर्भन्तु कारयेत् ॥
भागद्वादशको भित्तिं ततस्तु परिकल्पयेत् ।
चतुर्भागेण भित्तीनामुच्छ्रयः स्यात् प्रमाणतः ॥
द्विगुणः शिखरोच्छ्रायो भित्त्युच्छ्रायाच्च मानतः ।
शिखरार्द्धस्य चार्द्धेन विधेयास्तु प्रदक्षिणाः ॥
चतुर्द्दिक्षु तथा ज्ञेयो निर्गमस्तु तथा बुधैः ।
पञ्चभागेन संभज्य गर्भमानं विचक्षणः ॥
भागमेकं गृहीत्वा तु निर्गमं कल्पयेत् पुनः ।
गर्भलक्षसमो भागाद्यतो लक्षणलक्षणः ॥
एतत् सामान्यतो दृष्टं प्रासादस्य हि लक्षणम् ।
लिङ्गमानमथो वक्ष्ये पीठो लिङ्गसमो भवेत् ॥
द्विगुणेन भवेद्गर्भः समन्ताच्छौनक ! ध्रुवम् ।
तद्विधा च भवेद्भित्तिर्जङ्घा तद्विस्तरार्द्धगा ॥
द्विगुणं शिखरं प्रोक्तं जङ्घायाश्चैव शौनक ! ।
पीठं गर्भावरं कर्म्म तच्चागेन मुखाग्रकम् ॥
निर्गमस्तु समाख्यातः ग्रैवं मूलवदेव तु ।
लिङ्गमानः स्मृतो ज्ञेयो द्वारमानमथोच्यते ॥*॥
कराद्यं वेदवत् कृत्वा द्वारं भागाष्टकं भवेत् ।
विस्तरेण समाख्यातं द्विगुणं वेष्टकया भवेत् ॥
द्वारवत् पीठमध्ये तु ग्रैवं सुषिरकं भवेत् ।
पार्श्वकं ग्रैवकं भित्तिर्द्वारार्द्धेन परिग्रहात् ॥
तद्विस्तारसमा जङ्घा शिखरं द्विगुणं भवेत् ।

मुखाद्वा पूर्ववत्कुर्यात् निर्गमोच्छ्रायकं भवेत् ॥
मण्डपे मानमेतत्तु स्वरूपव्यापकं वदे । * ।
त्रैवेदं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
इत्थं ज्ञात्वा तु मानेन बाह्यभागविनिर्गतम् ।
मेरुः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भमानं द्विगुणं कुर्यान्मेरुमानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥*॥
प्रासादानाञ्च वक्ष्यामि मानं योनिञ्च नामतः ।
वैराजः पुष्पकाख्यश्च कैलासो मालकाह्वयः ॥
त्रिपिष्टपश्च पञ्चैते प्रासादाः सर्वयोनयः ।
प्रथमश्चतुरस्रो हि द्वितीयस्तु तदायतः ॥
वृत्तो वृत्तायताख्योऽष्टास्रश्चैव च पञ्चमः ।
एतेभ्य एव सम्भूताः प्रासादाः सुमनोहराः ॥
सर्वेषामेतिभूतेभ्यश्चत्वारिंशच्च एव च ।
मेरुश्च मन्दरश्चैव विमानश्च तथापरः ॥
भद्रकः सर्वतोभद्रो रुचको वर्द्धमानकः ।
नन्दिवर्द्धनसंज्ञश्च श्रीवत्सश्च नवैत्यमी ॥
चतुरस्रात् समुद्भूता वैराजादिति गण्यताम् ।*।
वलभी गृहराजश्च शालागृहश्च मन्दिरम् ॥
विमानश्च तथा ब्रह्ममन्दिरं भवनं तथा ।
उत्तमं शिविका चैव नवैते पुष्पकोद्भवाः ॥*॥
वलयो दुन्दुभिः पद्मो महापद्मस्तथापरः ।
भद्रकः सर्वतोभद्रो रुचको वर्द्धमानकः ॥
गुवाकृत्तस्तथाख्यश्च वृत्ताः कैलाससम्भवाः ।*।
गजोऽथ वृषभो हंसो गरुडः सिंहनामकः ॥
भूमुखो भूधरश्चैव श्रीजयः पृथिवीधरः ।
वृत्तायतः समुद्भूतो नवैते मालकाह्वयात् ॥*॥
वज्रं चक्रं तथाख्यश्च मुष्टिकं वर्द्धमानकम् ।
वज्रः खड्गिकखड्गौ च गदा श्रीवृक्ष एव च ॥
विजयो नामतः खेटकिष्किपक्षसमुद्भवाः ।*।
त्रिकोणपञ्चमर्द्धेन्दु चतुष्कोणं द्विरष्टकम् ॥
यत्र तत्र विधानत्वं संस्थानं मण्डपस्य तु ।
राज्यञ्च विजयश्चैवमायुर्वर्द्धनमेव च ॥
पुष्पलाभः श्रियः पुष्टिस्त्रिकोणादिक्रमाद्भवेत् ॥*॥
कुर्यात् त्र्यादिसंख्या वा द्वारि गर्भगृहस्तथा ।
मण्डपः समसंख्याभिर्गुम्फितः सूत्रनक्षया ।
मण्डपस्य चतुर्थांशाद्वारः कार्यो विजानता ॥
सार्द्धांशवाच्चकोपेतो निर्गमाद्वोऽथवा भवेत् ।
सार्द्धभित्तिप्रमाणेन भित्तिमानेन वा पुनः ॥
भित्तेर्हैगुण्यतो वापि कर्णया मण्डपाः क्वचित् ।
प्रासादे मञ्जरी कार्या चित्रा विषमभूमिका ॥
परिमाणनिरोधेन रेखा वैषम्यभूमिका ।
आधारस्तु चतुर्द्वारश्चतुर्मण्डपशोभितः ॥
गृहयुक्तसमायुक्तो मेरुप्रासाद उत्तमः ।
मण्डपास्तस्य कर्णेषु भद्रैस्त्रिभिरलङ्कृताः ॥
घटनाकारमानानां भिन्ना भिन्ना भवन्ति ये ।
त्रियस्रो येषु साधारा विराधाराश्च केचन ॥
प्रतिच्छन्दकभेदेन प्रासादाः सम्भवन्ति ते ।
अन्योन्यसङ्करात्तेषां घटना नाम भेदतः ॥
देवतानां विशेषाय प्रासादा बहवः स्मृताः ।
प्रासादे नियमो नास्ति देवतानां स्वयम्भुवाम् ॥
तस्मादेव देवतानाञ्च पूर्वमानेन कारयेत् ।

चतुरस्रायताश्चैव चतुष्कोणसमन्विताः ॥
चन्द्रशालान्विताः कार्या मेरोर्गिखरसंयुताः ।
पुरतो वाहनानाञ्च कर्णया लघुमण्डपाः ॥
नाट्यशाला च कर्णया द्वारदेशसमाश्रया ।
प्रासादा देवतानाञ्च कार्या दिक्षु विदिक्षुपि ॥
द्वारपालाञ्च कर्णया सुखा गत्वा पृथक् पृथक् ।
विदिक्षिदूरतः कार्या मठास्तत्रोपजीविनाम् ॥
प्राङ्मुखा जगती कार्या बलपुष्पजलान्विता ।
प्रासादेषु सुरान् स्थाप्य पूजाभिः पूजयेन्नरः ॥
वासुदेवं सर्वदेवान् सर्वभाक् तद्गृहादिषु ॥"
इति गारुडे प्रासादकीर्तनं नाम ४७ अध्यायः ॥
(यथाच ।
"एतत् सामान्यमुद्दिष्टं प्रासादस्येह लक्षणम् ।
अथान्यच्च प्रवक्ष्यामि प्रासादं लिङ्गमानतः ॥
लिङ्गपूजाप्रमाणेन कर्णया पीठिका बुधैः ।
पीठिकार्द्धेन भागः स्यात्तस्यानेन तु भित्तयः ॥
बाह्यमिति प्रमाणेन उत्सेधस्तु भवेत्ततः ।
भित्युच्छ्रायात्तद्विगुणः शिखरस्य समुच्छ्रयः ॥
शिखरस्य चतुर्भागा कर्णया स्यात् प्रदक्षिणा ।
प्रदक्षिणायास्तु समस्त्रयस्तो मण्डपो भवेत् ॥
तस्य चार्द्धेन कर्णस्यस्त्रयस्तो सुखमण्डपः ।
प्रासादाग्रिगतौ कार्यौ कपोतौ गर्भमानतः ॥
ऊर्द्धभित्युच्छ्रयात्तस्य मञ्जरीं तु प्रकल्पयेत् ।
मञ्जर्याश्चार्द्धभागेन शुकनासं प्रकल्पयेत् ॥
ऊर्द्धं तथार्द्धभागेन वेदिबन्धो भवेदिह ।
वेद्युपरि यज्ञेषं कण्ठमामलसारकम् ॥
एवं विभज्य प्रासादं शोभनं कारयेद्बुधः ।
अथान्यच्च प्रवक्ष्यामि प्रासादस्येह लक्षणम् ॥
गर्भमानेन प्रासादप्रमाणं ब्रह्मणा द्विजाः ।
विभज्य नवधा गर्भं मध्ये लिङ्गस्य पीठिका ॥
प्रादक्षकञ्च रुचिरं पार्श्वतः परिकल्पयेत् ।
मानेनानेन विस्तारो भित्तीनान्तु विधीयते ॥
पादे पञ्चगुणं कृत्वा भित्तीनान्तूच्छ्रयो भवेत् ।
स एव शिखरस्यापि द्विगुणः स्यात् समुच्छ्रयः ॥
चतुर्धा शिखरं भज्य अर्द्धभागद्वयस्य वा ।
शुकनासं प्रकुर्वीत तृतीये वेदिका मता ॥
कण्ठमामलसारन्तु चतुर्थे परिकल्पयेत् ।
कपोतयोस्तु संहारो द्विगुणोऽस्य विधीयते ॥
शोभनैश्च प्रवालीभिरलङ्कैश्च विभूषितः ।
प्रासादेषु तृतीयस्तु मया तुभ्यं निवेदितः ॥
सामान्यमपरं तद्वत प्रासादं ब्रह्मणा द्विजाः ।
त्रैवेदं कारयेत् चैत्यं यत्र तिष्ठन्ति देवताः ॥
इत्थं ज्ञात्वा तु मानेन बाह्यभागविनिर्गतम् ।
मेरुः पादेन विस्तीर्णा प्रासादस्य समन्ततः ॥
गर्भमानं द्विगुणं कुर्यान्मेरुमानं भवेदिह ।
स एव भित्तिरुत्सेधो द्विगुणः शिखरो मतः ॥
प्राग्ग्रीवपञ्चभागेन निर्यासस्तस्य शोभते ।
कारयेच्छिखरं तद्वत् प्राकारस्य विधानतः ॥
प्राग्ग्रीवं तस्य मानेन निष्क्रामेण विशेषतः ।
कुर्यादृक्षस्य भागेन प्राग्ग्रीवं कर्णसूत्रतः ॥
कारयेत् कलशं तत्र गर्भान्ते द्वारमूर्जितः ।
एवन्तु त्रिविधं कुर्यात् ज्येष्ठमध्यकनीयसम् ॥

लिङ्गमानात् भेदेन रूपभेदेन वा पुनः ।
इति सामान्यतः प्रोक्ता मानतः ब्रह्मणा मया ॥
मेरुमन्दरकैलासपुष्पभिद्भवनजातयः ।
विमानच्छन्दकस्तद्वत्तुरङ्गस्तथैव च ॥
अष्टास्रः षोडशास्रश्च वर्तनः सर्वभद्रकः ।
वलभी नन्दनश्चैव नन्दिवर्द्धन एवच ॥
सिंहो वृषः सुपर्णश्च पद्मकोऽथ वसुप्रकः ।
प्रासादानां मतः प्रोक्तो विभागं ब्रह्मणः द्विजाः ॥
घृतब्रह्मचतुर्द्वारो भूमिकाषोडशोच्छ्रितः ।
नागाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश प्रोक्तः कैलासो नवभूमिकः ।
विमानश्छन्दकस्तद्वदनेकशिखरान्वितः ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धनः ।
विंशाङ्गकसमायुक्तो नन्दनः वसुदाहृतः ॥
षोडशाङ्गकसंयुक्तो नानारूपसमन्वितः ।
अनेकशिखरस्तद्वत् सर्वतोभद्र उच्यते ॥
चन्द्रशालासमापेतो विज्ञेयः पञ्चभूमिकः ।
वलभी छन्दकस्तद्वच्छकनासजयान्वितः ॥
वृषस्योच्छ्रायतस्तुल्यो मण्डलश्च विवर्जितः ।
सिंहः सिंहगतिर्ज्ञेयो गजो गजसमस्तथा ॥
कुम्भः कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रयः ।
अङ्गुलीपुटसंस्थानपञ्चाङ्गकविभूषितः ॥
षोडशाम्रः समन्तात्तु विज्ञेयः स वसुप्रकः ।
पार्श्वयोश्चन्द्रशालास्तु उच्छ्रयो भूमिकाक्षयम् ॥
तथैकपद्मकः प्रोक्तः उच्छ्रयो भूमिकाक्षयम् ।
षोडशास्रः स विज्ञेयो विचित्रशिखरः शुभः ॥
नगराजस्तु विख्यातः चन्द्रशालाविभूषितः ।
प्राग्ग्रीवेण विशालेन भूमिका स चतुस्समाः ॥
अनेकचन्द्रशालस्तु गजप्रासाद उच्यते ।
पर्यन्तगरुडाजो वै गरुडो नामनामतः ॥
सप्तभूम्युच्छ्रयस्तद्वच्चन्द्रशालाक्षयान्वितः ।
भूमिकास्तु षडग्रीतिर्व्यास्रः सर्वतो भवेत् ॥
तथान्यो गरुडस्तद्वदुच्छ्रायो दशभूमिकः ।
पद्मकः षोडशास्रस्तु भूमिक्षयमथाधिकः ॥
पद्मतुल्यप्रमाणेन श्रीवृक्ष इति स्मृतः ।
पञ्चाङ्गकस्त्रिभूमिस्तु गर्भे स्तम्भचतुष्टयः ॥
वृषो भवति नाम्ना यः प्रासादः सार्वकामिकः ।
सप्तका; पञ्चकाश्चैव प्रासादा ये मयोदिताः ॥
सिंहस्य ते समा ज्ञेया ये चान्येऽस्यप्रमाणतः ।
चन्द्रशालैः समोपेताः सर्वे प्राग्ग्रीवसंयुताः ॥
रेष्टिका दारवाश्चैव शैलजाश्च मनोरमाः ।
मेरुश्च घृतहस्तः स्यान्मन्दरः पञ्चशैलकः ॥
चत्वारिंशत्तु कैलासस्त्रिंशद्विमानकः ।
नन्दिवर्द्धनकस्तद्वद्विंशद्भद्रः वसुदाहृतः ॥
विंशद्भिर्नन्दनः प्रोक्तः सर्वतोभद्रकस्तथा ।
एते षोडशहस्ताः स्युश्चत्वारो देववल्लभाः ॥
कैलासो नगराजस्तु विमानच्छन्दको गजः ।
एते द्वादशहस्ताः स्युरेतेषां सिंहनादकः ॥
गरुडोऽष्टकरो ज्ञेयः सिंहो दश उदाहृतः ।
एवमेव प्रमाणेन कर्णया; शुभलक्षणाः ॥
यद्यदाच्छादनामानां मानमुक्तं प्रशस्यते ।
तथा मेरोर्मयः शस्त्र ज्येष्ठमिश्राः शुभावहाः ॥

प्राङ्नेत

मौहूर्त्तिकादयश्चारौ मध्यमाश्च उदाहृताः ।
तथा चिंत्रादयः पञ्च कनिष्ठाः सुभटा मताः ॥"
इति विश्वकर्म्मप्रकाशे ५ अध्यायः ॥)

प्रासादकुकुटः, पुं, (प्रासादस्य देवभूभुजां यद्यस्य कुक्कुट इव । सर्व्वदा प्रासादविचारित्वादस्य तथात्वम् ।) पारावतः । इति चिकाण्डशेषः ॥

प्रासिकः, पुं, (प्रास: प्रहरणमस्येति । प्रास + "प्रहरणम् ।" ४।४।५७। इति ठक् ।) प्रासाख्य-धारी । प्रासप्रहारी । तत्पर्य्यायः । कौन्तिकः २ । इत्यमरः । ५ । ८ । ७० ॥

प्राक्षिकः, त्रि, (प्रक्ष + "सम्भवत्यवहरति पचति ।" ५ । १ । ५२ । इति ठञ् । प्रक्षपरिमितधान्यादेः समावेशकः अवहारकः पाचकश्च ।) प्रक्षं सम्भवति प्राक्षिकः कटाहः । प्रक्षं खलिन् समावेशयतीत्यर्थः । प्राक्षिकी ब्राह्मणी । प्रक्षमवहरति पचति वेत्यर्थः । इति सिद्धान्तकौमुदी ॥ (प्रक्षं परिमाणमस्येति । "तदस्य परिमाणम् ।" ५ । १ । ५७ । इति ठञ् । प्रक्षपरिमितः । यथा, सुश्रुते चिकित्सितस्थाने । १० अध्याये । "यवकोलकुलत्थांश्च प्राक्षिकात् सलिलद्रोणे निःक्वाथयेति ॥" प्रक्षेण क्रीतमिति । "तेन क्रीतम् ।"५ । १ । ३७ । इति ठञ् । प्रक्षक्रीतः ॥ प्रक्षस्य वापः । "तस्य वापः ।" ५ । १ । ४५ । इति ठञ् । प्रक्षपरिमितव्रीह्यादिवपनयोग्ये क्षेत्रे । यथा, शब्दरत्नावल्याम् ।
"द्रोणाढकवार्य्यादेर्वापादौ लौकिकस्तथा ।
स्यादाढकिकखारीकौ उत्तमर्णादयश्चिषु ।
आदिष्वां प्राक्षिकादिश्च पाकादौ लौकिको
ऽपि च ॥")

प्राङ्, पुं, वृत्योपदेशः । इति शब्दमाला ॥ निर्व्विसर्गोऽयम् प्रपूर्ब्बनिवसनञ्धातोः क्विपमप्येवम् ॥ (यथा, भट्टिः ।
"प्राङ् स रामं भरतोऽपि सम्यक् ॥")

प्राङ्, पुं, (प्रथमश्च सदङ्चेति । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । "अञ्चेर्लुगसेभ्यः ।" ५ । ४ । ८८ । इति अञ्चेर्लुक् । "अञ्चोऽदन्तात् ।" ८ । ३ । ७ । इति सत्वम् ।) पूर्ब्बाशः । इत्यमरः । १ । ४ । ३ ॥ (यथा, सुश्रुते । ६ । १८ ।
"अन्नपानानि यथोक्तानि प्राङ्मुखायाङ्गराजिषु ॥"
तदभिमानिनी देवता च । यथा, भागवते । ७ । १५ । ५४ ।
"अग्निः सूर्य्यो दिवा प्राङ्मुखो रात्रौ उत्तरं स्वराट् ॥"*॥
प्रक्षदहर्थमेवेति विग्रहे । "तिङतिङः प्रक्षतोऽपि च ।" २ । १ । १७ । इत्यव्ययीभावः । प्रक्षदिनयुते, त्रि ॥)

प्राङ्, त्रि, पूर्ब्बाङ्गे । इति सिद्धान्तकौमुदी ॥

प्राङ्नेतनः, त्रि, (प्राङ्नेत भवः । "सायंचिरंप्राह्णे प्रगेऽव्ययेभ्यष्टयुट्युलौ तुट् च ।"४ ।३। २३ । इति ट्युल् तुट् च ।) पूर्ब्बाङ्गभवनञ्जौ । इति सिद्धान्तकौमुदी ॥

प्रियकः

प्राङ्नेतरां, त्र, (द्वयोरतिशयेन प्राङ्नेत । प्राङ्नेत + "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ।" ५।४।११ । इति आमि तरप् । "तरप्तमपौ घः ।" ५।३।५५ । इति घः ।) अतिशयपूर्ब्बाङ्गे । इति मुग्धबोधव्याकरणम् ॥

प्रियः, पुं, (प्रीणातीति । प्री + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः ।) भर्त्ता । इत्यमरः ।२।६।३५॥ (यथा, आर्य्यासप्तशत्याम् । ३४० ।
"प्रणमति पश्यति चुम्बति संश्लिष्यति पुलकसङ्कुलितैरङ्गैः ।
प्रियसङ्गाय स्फुरितां वियोगिनी वामबाहुलताम् ॥"
जामाता । यथा, मनुः । ३ । २१८ ।
"राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् ।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः ॥"
कार्त्तिकेयः । यथा, महाभारते स्कन्दनामानुकीर्त्तने । ३ । २२१ । ५ ।
"अमोघस्त्वनघो रौद्रः प्रियश्चन्द्रनभक्षया ॥")
ऋषिविशेषः । इति जटाधरः ॥ जीवकौषधम् । इति राजनिर्घण्टः ॥ ऋद्धिनामौषधम् । वृद्धे, त्रि । इति मेदिनी ॥ (यथा, महाभारते ।
"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।
प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः ॥")
प्रियोऽप्रियञ्च कार्य्यवशाद्भवति । यथा,—
"न हि कस्य प्रियः को वा विप्रियो वा जगत्त्रये ।
काले कार्य्यवशात् सर्व्वे भवन्त्येवाप्रियाः प्रियाः ॥"
इति श्रीहरिभक्तिविलासे ५ अध्यायः ॥

प्रियंवदः, पुं, (प्रियं वदतीति । वद् + "प्रियवशे वदः खच् ।" ३ । २ । ३८ । इति खच् । मुम् ।) खेचरः । गन्धर्व्वभेदः । (यथा, रघुः । ५।५३।
"अवेहि गन्धर्व्वपतेस्तनूजं
प्रियंवदं मां प्रियदर्शनस्य ॥")
प्रियभाषिणि, त्रि । इति शब्दरत्नावली ॥ तत्कारणं यथा, दानसागरे शिवपुराणम् ।
"गोसहस्रप्रदातारो भूमिदातार एव च ।
ये सुवर्णप्रदातारस्तथा सर्व्वे प्रियंवदाः ॥"
(द्वादशाक्षरछन्दोभेदे, स्त्री । तल्लक्षणं यथा, वृत्तरत्नाकरे ।
"मुनि भवैर्नभचरैः प्रियंवदा ॥")

प्रियकः, पुं, (प्रिय + स्वार्थे संज्ञायां वा कन् ।) पीतशालकः । (यथा, रामायणे । २ । ७१ । १२-१३ ।
"तत्र रम्ये वने वासं कृत्वासौ प्राङ्मुखो ययौ ।
उद्यानभूम्निदानायाः प्रियका यत्र पादपाः ॥
प्राप्यांस्तु प्रियकान् प्राप्य शीघ्रगास्याय वाजिनः ।
अभुक्ताप्याथ भरतो वाहिनीं त्वरितो ययौ ॥")
नीपः । (यथा, हरिवंशे । ७२ । १५ ।
"प्रियकैः पुष्पितैः गौरैः श्यामं वाजातनैः क्वचित् ।
कठोरद्रुमसाभाति गिरेर्यूरुतं वनम् ॥")
चित्रकरः । (यथा, माघे । ४ । ६२ ।
"रुचिरचित्रतनूरुहशालिभिः
र्विचलितैः परितः प्रियकद्रुभैः ॥"

प्रियङ्गु

पत्तिविशेषः । यथा, महाभारते ।३।१५८।५१। "प्रियकैश्चातकैश्चैव तथान्यैर्विविधैः खगैः ॥") अलिः । प्रियङ्गुः । कुङ्कुमम् । इति मेदिनी ॥ धाराकदम्बः । अग्निशिखः । इति राजनिर्घण्टः ॥ (स्कन्दानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ६२ ।
"प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान् ॥")

प्रियङ्करः, त्रि, (प्रियं करोतीति । प्रिय + ङ + "सोमप्रियमद्रेरञ् च ।" ३ । २ । ४४ । इति अकारात् खच् । मुम् ।) प्रियकारकः । यथा,
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितुः प्रियङ्करो भर्त्ता क्षेमकारस्त्वमप्यिनाम् ॥"
इति भट्टिः । ५ । ७७ ॥
(दानवविशेषः । यथा, कथासरित्सागरे । ४७ । २४ ।
"महाबुद्धिबलाख्यौ च प्रियङ्करशुभङ्करौ ।
एते महारथा यत्तत्त्वविधर्म्मरुचौ तथा ॥")

प्रियङ्करी, स्त्री, (प्रियङ्कर + गौरादित्वात् ङीष् ।) हरिद्रावल्ली । क्षेतकण्टकारी । अश्वगन्धा । इति राजनिर्घण्टः ॥

प्रियङ्गुः, स्त्री, (प्रियं गच्छतीति । प्रिय + गम् + गमयृदित्वात् कुप्रत्ययेन साधुः ।) स्वनामख्यातसुगन्धिवृक्षविशेषः । (यथा, महागन्धपतिस्तोत्रे । १० ।
"वामे चक्रगदाधरः स भगवान् क्रोडो प्रियङ्गोः स्तवं
हस्तोद्यच्छुकपालिमञ्जरिकया देवो धरण्या सह ॥")
तत्पर्य्यायः । श्यामा २ महिलाह्वया ३ लता ४ गोवन्दनी ५ गुन्द्रा ६ फलिनी ७ फली ८ विश्वक्सेना ९ गन्धफली १० कारम्भा ११ प्रियकः १२ । इत्यमरः ।२।४।५५॥ प्रियवल्ली १३ फलप्रिया १४ गौरी १५ वृक्षा १६ कङ्कुः १७ कङ्कुनी १८ भङ्गुरा १९ गौरवल्ली २० सुभगा २१ पर्व्वभेदिनी २२ सुभा २३ पीता २४ मङ्गल्या २५ श्रेयसी २६ । अस्या गुणाः । शीतलत्वम् । तिक्तत्वम् । दाहपित्तास्रदोषभ्रमवान्तिज्वरवक्रजाड्यनाशित्वम् । इति राजनिर्घण्टः ॥ तुवरत्वम् । अनिलनाशित्वम् । रक्तातियोगदौर्गन्ध्यस्वेदगुल्मकृच्छ्रविषमोहनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥ राजिका । पिप्पली । कङ्कुः । इति मेदिनी ॥ कट्फली । इति धरणिः ॥

प्रियजनः, पुं, (प्रियो जनः ।) कृष्णलोकः । (यथा, आर्य्यासप्तशत्याम् । ६१६ ।
"सखि ! दुरवगाहमहनो विदधानो विप्रियं प्रियजनेऽपि ।
खल इव दुर्लक्षक्षत विनतसुखस्योपरि स्थितः कोपः ॥")
प्रौढ़भावज्ञः । यथा, उज्ज्वलनीलमणौ ।
"प्रौढ़भावानुविज्ञो यस्तस्य प्रियजनोऽत्र सः ॥"

प्रियजीवः, पुं, (प्रियो जीवो यस्य यस्मिन् वा ।) प्रोषाकदम्बः । इति राजनिर्घण्टः ॥

प्रियतम:, पुं, मधूरश्रिखाद्रुच:। इति शब्दचन्द्रिका ॥ (अयमेषामतिशयेन प्रिय:। प्रिय + तमप्।) अतिशयप्रिये, त्रि ॥

प्रियतर:, त्रि, (अयमनयोरतिशयेन प्रिय:। प्रिय + तरप्।) अनयोरतिशयेन प्रिय:। इति व्याकरणम् ॥ (यथा, गो० रामायणे। २। ३८। ७।

"प्राणेभ्योऽपि प्रियतरो ज्येष्ठो भ्राता गुरुश्च ते। तस्मादस्य प्रयत्नेन शरीरं प्रतिपालय ॥")

प्रियता, स्त्री, (प्रिय + तल्।) प्रियस्य भाव:। दाईम्। इत्यमर:। १।७।२७॥ (यथा, मनु:। ५।५०।

"न भक्षयति यो मांसं विधिं हित्वा पिशाचवत्। स लोके प्रियतां याति व्याधिभिश्च न पीड्यते॥")

प्रियतोषण:, पुं, (प्रियस्य तोषणं यस्मात्। यद्वा, प्रियं तोषयतीति। तुष् + णिच् + ल्यु:।) षोड़शवत्सरातिरिक्तरतिबन्धविशेष:। तस्य लक्षणं यथा,—

"चारौ पादौ खड्गखेन धारयेच्चरणोपरि। स्तनापीड़कर: कामी कामयेत प्रियतोषण: ॥"

इति रतिमञ्जरी ॥

प्रियस्य दुष्टिकारिणि, त्रि ॥

प्रियत्वं, क्ली, (प्रियस्य भाव:। प्रिय + त्व।) प्रियता। तत्पर्य्याय:। प्रेम २ प्रेमा ३ स्नेह: ४ प्रणय: ५ दाईम् ६ प्रियता ७ स्निग्धता ८। इति शब्दरत्नावली ॥

प्रियदर्शन:, त्रि, (प्रियं दर्शनं यस्य।) सुदृश्य:। तत्पर्य्याय:। चक्षुष्य: २। इति जटाधर: ॥ (यथा, रघु:। १। ४७।

"तत्तद्भूमिपति: पत्रैर्व्यदर्शयत प्रियदर्शन:। अपि लक्षितमज्ञानं बुबुधे न बुधोपम: ॥")

प्रियदर्शन:, पुं, (प्रियं दर्शनं यस्य।) शुकपक्षी। शौरिकाहृच:। इति जटाधर: ॥ (गन्धर्व्वविशेष:। यथा, रघु:। ५। ५६।

"अवेहि गन्धर्व्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥")

प्रियप्रायं, क्ली, (प्रियस्य प्राय: यत्र।) प्रियवाक्यम्। तत्पर्य्याय:। चटु २ चाटु ३। इति हेमचन्द्र:। २। १७८ ॥

प्रियप्रेप्सु:, त्रि, (प्रियं प्रेप्सतीति। प्र + आप् + सन् + उ:।) इष्टार्थोद्युक्तम्। उन्मुख:। इति जटाधर: ॥

प्रियमधु:, पुं, (प्रियं मधु मद्यं यस्य।) बलराम:। इति हेमचन्द्र:। २। १३८ ॥

प्रियवर्णी, स्त्री, (प्रियो वर्णो यस्या:। गौरादित्वात् ङीष्।) प्रियङ्गु:। इति जटाधर: ॥

प्रियवल्ली, स्त्री, (प्रिया मनोज्ञा वल्ली लता।) प्रियङ्गु:। इति राजनिर्घण्टु: ॥

प्रियवादी, [न्] त्रि, (प्रियं मनोज्ञं वदतीति। वद् + णिनि:।) मनोज्ञवक्ता। यथा, चाणक्ये।

"को ऽतिभार: समर्थानां किं दूरं व्यवसायिनाम्। को विदेश: सविद्यानां क: पर: प्रियवादिनाम्॥"

(यथा च भट्टौ। २। १७४।

"शुलभा: पुरुषा राजन्! सततं प्रियवादिन:। अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभ:॥")

प्रियव्रत:, पुं, (प्रियं व्रतं यस्य।) स्वायम्भुवमनुपुत्र:। यथा,—

"प्रियव्रतोत्तानपादौ मनो: स्वायम्भुवस्य तु। द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥"

इत्यग्निपुराणम् ॥

(प्रियाणि व्रतानि यस्येति विग्रहे व्रतप्रिये, त्रि। यथा, ऋग्वेदे। १०। १५०। ३।

"अग्ने देवानावह न: प्रियव्रतान् मरुद्भीराय प्रियव्रतान् ॥")

प्रियसखा:, पुं, (प्रिय: सखा च हितकारित्वात्। "राजाह:सखिभ्यष्टच्।" ५।४।९१। इति टच्।) खदिर:। इति शब्दचन्द्रिका ॥ प्रियश्चासौ सखा चेति। (प्रियबन्धु:। यथा, मेघदूते। १२।

"आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलम्॥")

प्रियस्य सखा इति च। इति व्याकरणम् ॥

प्रियसत्यं, क्ली, (प्रियं सत्यमिति कर्म्मधारय:।) सुनृतवाक्यम्। इति हेमचन्द्र:। २। १७८ ॥ (प्रियं सत्यं यस्येति विग्रहे सत्यप्रिये, त्रि ॥)

प्रियसन्देश:, पुं, (प्रियं सन्दिश्यतीति। प्रिय + सम् + दिश् + अच्।) चन्यकदृच:। इति शब्दचन्द्रिका ॥ (प्रिय: सन्देश इति कर्म्मधारय:।) प्रियसंवादश्च ॥

प्रियसालक:, पुं, (प्रिय: साल:। ततः स्वार्थे कन्।) असनवृक्ष:। इति राजनिर्घण्टु: ॥ पेयासाल इति ख्यात: ॥

प्रिया, स्त्री, (प्रिय + टाप्।) नारी। इति शब्दरत्नावली ॥ भार्य्या। इति हेमचन्द्र: ॥ (यथा, कुमारे। ३। ३८।

"पुष्पासवार्द्रकलितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे ॥")

एला। इति शब्दचन्द्रिका। मल्लिका। मदिरा। इति राजनिर्घण्टु: ॥ वार्त्ता। इति धरणि: ॥ (पञ्चाक्षरच्छन्दोविशेष:। इति छन्दोमञ्जरी ॥)

प्रियाम्बु:, पुं, (प्रियमम्बु यस्य।) आम्रवृक्ष:। इति राजनिर्घण्टु: ॥ तत्फले क्लीवत्वञ्च क्वचित्। (जलप्रिये, त्रि ॥)

प्रियाल:, पुं, (प्रियाय हिताय अलति पर्य्याप्नोतीति। अल + अच्।) वृक्षभेद:। पियाल इति भाषा। अस्य बीजं चिरञ्जीति प्रसिद्धम्। तत्पर्य्याय:। चार: २ अक्षड: ३ स्थिरस्कन्ध: ४ ललन: ५ चारक: ६ बहुवल्क: ७ वनद्रु: ८ तापसप्रिय: ९ क्षीरबीज: १० उपवट: ११ मज्जबीज्य: १२। इति राजनिर्घण्टु: ॥ पियाल: १३। इत्यमर:। २। ४। १५॥ बहुत्वत्वल्क: १४ राजादनम् १५ तापसेष्ट: १६ वनकद्रु: १७ धनु:पट: १८। अस्य गुण:। पित्तकफास्रनाशित्वम्॥ तत्फलगुणा:। मधुरत्वम्। गुरुत्वम्। स्निग्धत्वम्। वरत्वम्। मरुत्पित्तदाहज्वररक्तविषापहत्वञ्च। तन्मज्जगुणा:। मधुरत्वम्। गुरुत्वम्। पित्तानिलाम-

क्षत्वम्। कृमित्वम्। दुर्ज्जरत्वम्। स्निग्धत्वम्। विष्टम्भित्वम्। आमवर्द्धनत्वञ्च। इति भावप्रकाश:॥ अपि च।

"चारस्य च फलं पक्वं दृष्यं शीतलमल्पं गुरु। तद्बीजं मधुरं दृष्यं पित्तदाहार्शिनाशनम्॥"

इति राजनिर्घण्टु:॥

प्रियाला, स्त्री, (प्रियाय अलतीति। अल + अच् + टाप्।) द्राक्षा। इति राजनिर्घण्टु:॥

प्रियोदितं, त्रि, (प्रियाय प्रियेण वा यदुदितम्। प्रियमुदितमिति वा।) चाटुवाक्यम्। इति शब्दरत्नावली ॥ प्रियवाक्यविषय:॥ (प्रियकथितवाक्यञ्च ॥)

प्री, क तर्पणे। इति कविकल्पद्रुम:॥ (चुरा० पर०-सक०-अनिट्।) क, यं प्राययन्ति कविरुक्तिरसायनानि। इति फलायुध:॥ प्रीणयत्यपीति केचित्। इति दुर्गादास:॥

प्री, ड य प्रीतौ। कान्तौ। इति कविकल्पद्रुम:॥ (दिवा०-आत्म०-अक०-अनिट्।) प्रीतिरिह प्रीतीभाव:। ड य, य: प्रीयते प्रजायितु। इति फलायुध:। इति दुर्गादास:॥

प्री, ञ तर्पणे। इति कविकल्पद्रुम:॥ (क्या०-उभ०-सक०-अनिट्।) ञ, प्रयति प्रयते। इति दुर्गादास:॥

प्री, ञ ग कान्तौ। तर्पणे। इति कविकल्पद्रुम:॥ (क्या०-उभ०-अक०-सक० च-अनिट्।) तर्पणमिह प्रीतीभाव: प्रीतीकरणञ्च। ञ ग, प्रभु: प्रीणातु विष्णुरुक्। प्रीणाति बान्धवजनानिति फलायुध:। प्रीणीते। इति दुर्गादास:॥

प्री:, स्त्री, (प्री + क्विप्।) प्रीति:। इति कविकल्पद्रुमधातुटीकायां दुर्गादास:॥ प्रथमा विभक्ति:। यथा, "क्विप्: प्रीड्रीभ्रीचीपीषीभ्य:। स्यादीनि त्रीणि त्रीणि क्रमात् प्रीड्रीभ्रीचीपीषीभ्रीसंज्ञानि स्यु:।" इति मुग्धबोधव्याकरणम्॥

प्रीण:, त्रि, (प्र + "नञ्च पुराणे प्रात्।" ५।४।२५। इत्यस्य वार्त्तिकोक्त्या ख:।) पुरातन:। इति त्रिकाण्डशेष:॥ प्रीत:। इति व्याकरणम्॥

प्रीणनं, क्ली, (प्री + स्वार्थे णिच् + ल्युट्। धूञ् प्रीञोरिति गुक्।) तृप्तिकरणम्। तत्पर्य्याय:। तर्पणम् २ अवनम् ३। इत्यमर:। ३। २। ११॥ (यथा, महानिर्व्वाणतन्त्रे। २। ४७।

"तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्। तदाराधनतो देवि! सर्व्वेषां प्रीणनं भवेत्॥")

प्रीणस:, पुं, गरुड:। इति राजनिर्घण्टु:॥

प्रीत:, त्रि, (प्रीञ् प्रीणने + क्त:।) प्रीतियुक्त:। तत्पर्य्याय:। हृष्ट: २ मत्त: ३ हृत: ४ प्रहृष्ट: ५ प्रमुदित: ६। इत्यमर:। १।१।१०३॥ मुदित:७। (यथा, महाभारते। ४। ७०। २।

"प्रीतोऽस्मि पुरुषव्याघ्र! न भयं विद्यते तव। सर्व्वान्ददामि ते ग्रामान् रक्षि रक्षविशारद!॥")

स्त्री, गर्भे। इति मेदिनी। ते, ३३ ॥

प्रीति:, स्त्री, (प्रीञ् तर्पणे + भावे क्तिन्।) तृप्ति:। (यथा, रामायणे। १। ५८। १२।

"प्रतिष्ठां मम राजेन्द्र ! निर्भयेनेतुमर्हसि ।
पुत्रयोरुभयोरेव प्रीतिं जनयतेऽनघे ॥")
तत्पर्य्यायः । सुत् २ प्रमदः ३ हर्षः ४ प्रमोदः ५ आमोदः ६ सम्मदः ७ आनन्दथुः ८ आनन्दः ९ घृणी १० शातम् ११ सुखम् १२ । इत्यमरः । १ । ४ । २४ ॥ केचित्तु । सुहृदिष्टसमागमे प्रीतौ । आनन्दाद्यादिपञ्चकं सुखे इत्याहुः इति भरतः ॥ इष्टदर्शनजन्यं सुखम् । इति मोक्षधर्म्मे नीलकण्ठः ॥ कामपत्नी । इति मेदिनी । ते, २४ ॥ सा पुरा अनङ्गवती वेश्या आसीत् विभूतिद्वादशीव्रतं ज्ञात्वा रत्या: सपत्नी जाता । यथा,—
"वेश्यानङ्गवती नाम विभूतिद्वादशीव्रतम् ।
समाप्य माघमासस्य द्वादश्यां लवणाचलम् ॥
निवेदयन्ती गुरवे मुख्याश्चोपस्करान्विताम् ।
अलंकृत्य कुधीकेशं सौवर्णामरमादपम् ॥
सा चानङ्गवती वेश्या कामदेवस्य साम्प्रतम् ।
पत्नी सपत्नी संजाता रत्याः प्रीतिरिति श्रुता ॥"
इति मात्स्ये ८२ अध्यायः ॥
विष्कम्भादिसप्तविंशतियोगान्तर्गत द्वितीययोगः । तत्र जातफलम् ।
"प्रसूतिकाले यदि प्रीतियोगो
नरो न्नरोगः सुखवान् विनीतः ।
रक्तानुरक्तो विदुषां प्रपन्नः
संप्राप्तितो यच्छति वित्तमेव ॥"
इति कोष्ठीप्रदीपः ॥
प्रेम । इति मेदिनी । ते, २४ ॥
प्रीतिजुषा, स्त्री, (प्रीतिं जुषते सेवते इति । जुष् सेवने + कः । टाप्) अनिरुद्धपत्नी । उषा । इति शब्दरत्नावली ॥ (प्रीतिभाजि, त्रि ॥)
प्रीतिदः, पुं, (प्रीतिं ददातीति । दा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भण्डः । भाँड़ इति भाषा । तत्पर्य्यायः । वासन्तिकः २ केलिकिलः ३ वैहासिकः ४ विदूषकः ५ प्रहासी ६ । इति हेमचन्द्रः ॥ हर्षसुखप्रेमदातरि, त्रि ॥
प्रीतिदत्तं, क्ली, (प्रीत्या दत्तमिति ।) प्रीत्या दत्तवस्तु । यथा, मिताक्षरायाम् ।
"प्रीत्या दत्तन्तु यत् किञ्चित् स्वम्या वा स्वसुरेण वा ।
भ्रातृभ्यां पतिकर्त्रैव प्रीतिदत्तं तदुच्यते ॥"
भावे क्तप्रत्यये प्रीतिदानञ्च ॥
प्रीतिभोज्यं, त्रि, (प्रीत्या भोज्यम् ।) प्रीत्या भक्षणीयमन्नादि । यथा,—
"अन्नानि प्रीतिभोज्यानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन् येषामन्नता वयम् ॥"
इति महाभारते । ५ । ६१ । २५ ॥
प्रुष्, ङ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-अनिट् ।) रेफयुक्तः । ङ, प्रपते । इति दुर्गादासः ॥
प्रुष, उ दहि । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् । उदित्त्वात् क्त्वेट् ।) उ, प्रोषित्वा प्रुष्ट्वा । दहि भस्मीकरणे । इति दुर्गादासः ॥
प्रुष, ग सेके । पूर्त्तौ । क्षेपे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सेके पूर्त्तौ च सक०-क्षेपे अक०-सेट् ।) ग, प्रुष्णाति प्रुषोद । सेकस्थाने मोचनमिति धातुप्रदीपभ्रमः । इति दुर्गादासः ॥
प्रुष्टः, त्रि, (प्रुष् दहि + क्तः ।) दग्धः । इत्यमरः । ३ । १ । ६६ ॥ (यथा, राजतरङ्गिण्याम् । ६ । १४४ ।
"सा यागज्वलने राजललना प्रीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ।
उपर्य्यस्या निरस्ताशोः प्रुष्टाः कुसुमवृष्टयः ॥")
प्रुष्वः, पुं, (प्रुष्णाति स्निह्यति सिषर्त्ति वेति । प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् टाप् ।) ऋतुः । (प्रोषति दहतीति ।) दिवाकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
प्रुष्वा, स्त्री, (प्रुष्णाति सिञ्चतीति । प्रुष् + "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ।" उणा० १ । १५१ । इति क्वन् । टाप् ।) जलबिन्दुः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, शतपथब्राह्मणे । ५ । ३ । ४ । १६ । "अथ प्रुष्वा यज्ञाति ॥")
प्रेक्षणं, क्ली, (प्रेक्षते पश्यत्यनेनेति । प्र + ईक्ष + करणे ल्युट् ।) चक्षुः । इति शब्दरत्नावली ॥ (भावे ल्युट् ।) दर्शनम् । यथा, रसमञ्जरौ ।
"सञ्चारो रतिमन्दिरावधि पदन्यासावधि
प्रेक्षणम् ॥"
प्रेक्षणकूटः, पुं, (प्रेक्षणस्य कूटः ।) चक्षुर्गोलकः । यथा, पाण्डुरोगपूर्व्वरूपे माधवकरः ।
"त्वक्पोटनष्ठीवनगात्रसाद-
स्तद्भक्षणप्रेक्षणकूटशोथाः ॥"
प्रेक्षा, स्त्री (प्रकर्षेण ईक्षते ययेति । प्र + ईक्ष + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) प्रज्ञा । (यथा, महाभारते । ३ । १३६ । ७ ।
"सा तत्रे सर्व्वमाचष्ट यवक्रीभाषितं शुभा ।
प्रत्युक्तञ्च यवक्रीतं प्रेक्षापूर्व्वं तथात्मना ॥")
गृत्यैक्षणम् । इत्यमरः । ३ । ३ । २२३ ॥ (यथा, मनौ । ६ । ८४ ।
"प्रतिघ्नन्नपि वेदज्ञो न मद्यमभ्युदयेष्वपि ।
प्रेक्षासमाजं गच्छेद्वा सा दक्षा ज्ञानसानि षट् ॥"
प्र + ईक्ष + भावे अः । टाप् ।) ईक्षणम् । इति भरतः ॥ (यथा, भागवते । ३ । १६ । ७ ।
"यत्सेवया चरणपद्मपवित्ररेणुं
सद्यः क्षतास्खिलमलं प्रतिलब्धशीलम् ।
न श्रीर्विरक्तमपि मां विजहाति यस्याः
प्रेक्षालवार्थमितरे नियमान् वहन्ति ॥")
प्रोक्षा । इति शब्दरत्नावली ॥ (प्रोभा । यथा, भागवते । ३ । ८ । २५ ।
"प्रेक्षां क्षिपन्तं हरितोपलाद्रेः
सन्ध्याब्भ्रनीवेरुरुरुक्मश्मश्रुं ।
रक्तोदधारोर्ध्वधिसौभगस्त्र-
वनस्रजो वेणुभुजाङ्घ्रिपाङ्घ्रेः ॥"
"हरितोपलाद्रेर्मरकतशिलामयपर्व्वतस्य प्रेक्षां प्रोभां क्षिपन्तं स्वलावण्यातिशयेन तिरस्कुर्व्वन्तम् ॥" इति तट्टीकायां स्वामी ॥)
प्रेक्षृ [तृ] त्रि, (प्र + ईक्ष गतौ + ग्रह ।) चलनविशिष्टः । संचलिविशिष्टः । यथा,—
"व्याक्षिप्तदृष्टखटकामुखमाक्षिपन्त-
प्रेक्षन्नखांशुचयसंवलितोऽम्बिकायाः ॥"
इत्यादिमत्तशतके । १ ॥
प्रेक्षा, स्त्री, (प्रेक्षते गम्यतेऽनयेति । प्र + ईक्ष गतौ + करणे घञ् । टाप् ।) दोला । इत्यमरः । २ । ८ । ५६ ॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये । "नाग्निगोगुरुब्राह्मण-प्रेक्षादम्यत्यन्तरेणाभियायात् ॥"॥) पर्य्यटनम् । अन्यगतिः । संवेग्नानान्तरम् । इति मेदिनी । क्षे, १ ॥ दृश्यम् । इति धरणिः ॥
प्रेक्षितं, त्रि, (प्र + ईक्ष गतौ + क्तः ।) काम्यितम् । इत्यमरः । ३ । १ । ८७ ॥
प्रेक्षोल, तृ क चापले । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-अक०-सेट् ।) अन्तःस्थलतीयोपधः । अपिप्रेक्षोलत् । चापलं चञ्चलीभावः । इति दुर्गादासः ॥
प्रेक्षोलनं, क्ली, (प्रेक्षोल्यते चञ्चल्यतेऽनेनेति । प्रेक्षोल + करणे ल्युट् ।) दोला । इति हेमचन्द्रः ॥ (भावे ल्युट् । कम्पनम् । यथा, सुश्रुते निदानस्थाने ८ अध्याये । "विरेचनप्रेक्षोलनाजीर्णगर्भशयानप्रभृतिभिर्विशेषैर्बन्धनाच्युते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः ॥")
प्रेक्षोलितं, त्रि, (प्रेक्षोल + क्तः ।) दोलितम् । तत्पर्य्यायः । तरलितम् २ लुलितम् ३ प्रेङ्खितम् ४ धुतम् ५ चलितम् ६ कम्पितम् ७ धूतम् ८ वेल्लितम् ९ आन्दोलितम् १० । इति हेमचन्द्रः ॥
प्रेतः, पुं, (प्र + इ गतौ + क्तः ।) नरकस्थप्राणी । इत्यमरः । १ । १ । ५८ ॥ भूतभेदः । क्षते, त्रि । इति मेदिनी । ते, १० ॥ (यथा, मनुः । ३ । २४७ ।
"आचार्य्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवत् वृत्तिमाचरेत् ॥")
वैदिकविधानेन और्द्धदेहिकाभावात् विष्णुद्वेषाच्च बहुनरकभोगान्ते प्रेतशरीरं भवति । यथा,—
लोमश उवाच ।
"सतो बहुतिथे काले स राजा पक्षसां गतः ।
वैदिकेन विधानेन न लेभे और्द्धदेहिकम् ॥
विष्णुद्वेषसमाक्रान्तं युगानां सप्तविंशतिम् ।
भुक्त्वा च यातनां यामीं निरयेषु नरको नृपः ॥
समया गिरिराजस्तु पित्र्याचोऽभूत्तदा महान् ॥"
तस्य रूपं यथा,—
"देवद्युतिरधीयानः शुश्राव करुणामयः ।
समागत्य ततस्तत्र तं पित्र्याचं ददर्श सः ॥
विकरालमुखं दीनं पिङ्गाक्षनयनं भृशम् ।
ऊर्द्धमूर्द्धजसञ्चाशं यमदूतमिवापरम् ॥
चलज्जिह्वञ्च लम्बोष्ठं दीर्घनक्रुधिराकुलम् ।
दीर्घाङ्घ्रिं शुष्कतुण्डञ्च गर्त्ताक्षं शुष्कपञ्जरम् ॥"
इति पाद्मोत्तरखण्डे १६ अध्यायः ॥*॥

प्रेतत्वादिभवकर्म्माणि यथा,—
"हविर्च्छ्वसति मार्जारी ये गोविघ्नं नार्चयन्ति ये।
जभ्मते गोत्रविद्याच्च सुतीर्थेषितृखाच्च ये॥
सुवर्णं वस्त्रताम्रञ्च रत्नमन्नं घृतं जलम्।
आर्त्तेभ्यो न प्रयच्छन्ति सर्व्वे सुप्तदारकाः॥
मद्यस्त्रञ्च स्त्रीधनानि लोभादेव हरन्ति ये।
वसेव हरणा वापि धूर्त्ताश्च परवञ्चकाः॥
नास्तिकाः कुहकाचौरा ये चान्ये वकवृत्तयः।
बालहत्यासुरस्त्रीषु निर्दयाः सत्यवर्জ্জিताः॥
अस्निदा मरदा ये च ये चान्ये कूटसाक्षिणः।
अगम्यागामिनः सर्व्वे ये चान्ये ग्रामयाजिनः॥
आधानरहितसन्ना वर्णादिधर्म्मवर्জ্জिताः।
देवोपदेवदमुखरस्तोयचादिसेविनः॥
सर्व्वदा मादकद्रव्यपानमत्ता हरिद्विषः।
देवतोच्छिष्टपतितदुष्यान्नान्नभोजिनः॥
असत्कर्म्मरता नित्यं सर्व्वपातकपापिनः।
पाषण्डधर्म्मचरणाः पुरोधोवृत्तिजीविनः॥
पिशुनाढ्यकुलापत्यदारत्यागिनश्च ये।
ये कदर्य्याश्च कुत्साश्च नास्तिका धर्म्मदूषकाः॥
व्रजन्ति स्वामिनं युद्धे व्रजन्ति शरणागतम्।
गवां भूमेश्च हर्त्तारो ये चान्ये रत्नदूषकाः॥
महादोषेषु सर्व्वेषु प्रतिग्रहरताश्च ये।
परदोषरता ये च तथा ये प्राणिहिंसकाः॥
परापवादिनः पापा देवतागुरुनिन्दकाः।
कुप्रतिग्राहिणः सर्व्वे सम्भवन्ति पुनः पुनः॥
प्रेतराक्षसपैशाचतिर्य्यग्दुष्टकृयोनिषु।
न तेषां सुखलेशोऽस्ति इह लोके परत्र च॥"
इति पाद्मोत्तरखण्डे १८ अध्यायः॥*॥

पञ्चप्रेतोपाख्यानं यथा,—
ब्राह्मण उवाच।
"प्रेतानां नाम जातीनां युष्माकं सम्भवः कथम्।
किन्तु कारणसंयुक्तं यूयमीदृग्विधा नामकाः॥
प्रेता ऊचुः।
अहं खादु सदा शुद्धा दद्यां पर्य्युषितं सदा।
एतत्कारणसंयुक्तं नाम पर्य्युषितं मम॥१॥
क्षुधिता बहवोऽनेन विप्राद्या भुक्तकाङ्क्षिणः।
एतत् कारणसंयुक्तं क्षुत्सुखमिमं विदुः॥२॥
ग्रीष्मं गच्छति विप्रेण याचितः क्षुधितेन वै।
पश्चाद्दुष्टे द्विजः शीघ्रमेव शीघ्रक उच्यते॥३॥
यद्दोपरि सदा शुद्धे खादु द्विजभयेन हि।
द्विजाय कुत्सितं दत्त्वा एष रोहक उच्यते॥४॥
मौनेकापि क्षिरो नित्यं याचितो विलिखेन्महीम्।
अलाकमपि पापिष्ठो लेखको नाम एष वै॥५॥
लेढ्यं च लेखको याति रोहकः पार्श्वतःशिराः।
शीघ्रकः पङ्गतां प्राप्तः क्षुत्सुखोऽभवत्॥"
प्रेतानामाहारो यथा,—
द्विज उवाच।
"ये जीवा भुवि तिष्ठन्ति सर्व्वे आहारलालकाः।
युष्माकमपि आहारं श्रोतुमिच्छामि तत्त्वतः॥
प्रेता ऊचुः।
अन्नं आहारमलाकं सर्व्वसत्त्वविगर्हितम्।
लेह्यञ्चूष्यपुरोडाश यौवितासु मलेन च॥
एष्टव्यानि अन्नपौत्राणि प्रेता भुञ्जन्ति तत्र वै॥
स्त्रीभिर्जग्धानि जीर्णानि संकीर्णापहृतानि च।
मलेनातिदुगुप्तानि प्रेता भुञ्जन्ति तत्र वै॥
भयलज्जाविहीनानि पतितैः सेवितानि च।
अन्योन्यदत्तयुक्तानि प्रेता भुञ्जन्ति तत्र वै॥
कलहान्वितशोकानि अश्रुशोभानि मत्सरैः।
सवर्च्चस्कानि भाक्तानि प्रेता भुञ्जन्ति तत्र वै॥
बलिमन्त्रविहीनानि द्विजाहृतानि यानि तु।
नियमव्रतहीनानि प्रेता भुञ्जन्ति तत्र वै॥
गुरवो नैव पूज्यन्ते क्षीजितानि मलानि च।
सक्रोधान्यपविद्धानि प्रेता भुञ्जन्ति तत्र वै॥
भुञ्जन्ति भिन्नभाण्डेषु मर्य्यादारहितेषु च।
अन्योन्योच्छिष्टयुक्तेषु तत्र प्रेतास्तु भुञ्जते॥
सकेशमाश्विकोच्छिष्टं पूतिपर्य्युषितं तथा।
सक्रोधञ्च सशोकञ्च तत्र प्रेतेषु भोजनम्॥
सनग्नं भोजनं यच्च नोत्तरीयं पदासनम्।
सोष्णीषं सासुरीकञ्च तत्र प्रेतेषु भोजनम्॥
अर्द्धस्नातं महास्नातं सोत्तप्तिन्नं पतितं तथा।
दुर्भुक्तं गोत्रिकञ्चैव तत्र प्रेतेषु भोजनम्॥
सौनिकं म्लतकञ्चैव रजसं कलुषीकृतम्।
निर्द्दोषं क्षमिवच्चाग्रे यद्युक्तं प्रेतिकन्तु तत्॥
एतत्ते कथितं सर्व्वं यत् प्रेतेष्वेव भोजनम्।
निर्विशाः प्रेतजात्या वै पृच्छामस्त्वां द्विजोत्तम!॥"*॥

प्रेतत्वाभावकारणं यथा,—
"न प्रेतो जायते येन येन चैवेह जायते।
एतत् सर्व्वं समासेन प्रब्रूहि वदतां वर!॥
ब्राह्मण उवाच।
एकरात्रं त्रिरात्रं वा कृच्छ्रं चान्द्रायणादिकम्।
व्रतंश्वपुत्रियो यस्तु न प्रेतो जायते नरः॥
मिष्टान्नपानदानाच्च सततं अध्वयाजिनः।
देवपूजाकरो नित्यं न प्रेतो जायते नरः॥
त्रिरग्निरेकपक्षाग्निर्निरग्निर्वाप्युपासकः।
सर्व्वभूतदयापन्नो न प्रेतो जायते नरः॥
तुल्यमानापमानश्च तुल्यः काञ्चनलोष्टयोः।
तुल्यः शत्रौ च मित्रे च न प्रेतो जायते नरः॥
देवतातिथिपूजासु गुरुकार्य्येषु नित्यशः।
वेदशास्त्ररतो नित्यं न प्रेतो जायते नरः॥
जितक्रोधो महोत्सर्गश्रद्धासङ्गविवर्জ্জितः।
क्षमाक्रोधसुशीलश्च न प्रेतो जायते नरः॥
देवतातिथिपूजासु पर्व्वसंधिक्षणेषु च।
पर्व्वदेवालयाश्चैव न प्रेतो जायते नरः॥"*॥

प्रेतत्वकारणं यथा,—
"मूढान्नं यो द्विजो भुङ्क्ते यः क्रामति द्विजोत्तमम्।
वृत्तिहा द्विजदेवेषु स प्रेतो जायते नरः॥
मातरं पितरं वृद्धं भ्रातरं बान्धवजनं तथा।
लोभात् त्यजति यः कोपं स प्रेतो जायते नरः॥
अयाज्ययाजकश्चैव याज्यञ्च परिवर्জ্জयेत्।
मूढागुरुश्च कर्त्ता च स प्रेतो जायते नरः॥
कुज्योतिषि कुविद्यासु कुजनेषु कुदेशकः।
मूढसेवाकरो राज्ञां स प्रेतो जायते नरः॥
सेवकाज्ञापहर्त्ता यः सेवकस्वपरिग्रहः।
तादृग्भावेऽपि जायेत प्रेतो ब्राह्मणनिन्दकः॥
द्विजादुत्क्रमितो मुक्ते मूढान्नं वा द्विजस्य तु।
मूढजैव द्विजः प्रेतो निरन्नादुपजायते॥
गीतवाद्यरतो नित्यं मद्यपक्षौनिषेवणात्।
दूतमांसप्रियो वस्तु स प्रेतो जायते नरः॥
दयारहितो दयामांसो दयाबादी दयामतिः।
निन्दको द्विजदेवानां स प्रेतो जायते नरः॥
दृष्टं वाक्यं गुरुं विप्रं योऽवमन्य भुनक्ति वै।
कन्यां ददाति मुल्केन स प्रेतो जायते नरः।
न्यासापहर्त्ता मित्रघ्नः परपाकरतस्तथा।
विश्वम्भघाती कूटस्थ स प्रेतो जायते नरः॥
निर्द्दोषान् सुहृदो नारीक्षणेत् कारणात्
पाति यः।
धनमीक्षेत यस्तेषां स प्रेतो जायते नरः॥
हस्त्यश्वरथयानानि क्षतशय्यासनानि यः।
क्षौमाजिनञ्च शस्त्राणि अन्यायतस्तु गतो द्विजः॥
तथोभयसुखीं कालं सशैलां मेदिनीं द्विजः।
कुरुक्षेत्रस्य यद्दानं चाण्डालात् पतितात्तथा।
मासिकेऽपि नवश्राद्धे भुक्त्वा प्रेतान्न मुच्यते॥
ब्रह्महा गोवधी स्त्रैणो सुरापो गुरुतल्पगः।
भूमिकन्यापहर्त्ता यः स प्रेतो जायते नरः॥
लालासङ्करजन्मानं वर्णसङ्करजन्मतथा।
योनिसङ्करजश्चापि स प्रेतो जायते नरः॥
विक्रीणाति विषं शुक्लं तिलानां लवणस्य तु।
गवां केशतरिणां मोहात् विक्रयात् प्रेतनां
व्रजेत्॥
कूटमाप्ये च तौल्येन क्रयं क्रीणाति विक्रयात्।
मद्यतक्रपयोदध्नां स प्रेतो जायते नरः॥
क्षीरक्तो मद्यपाने तु क्षणमात्रमुधावति।
निमन्त्रेमित्तिकेऽदाता स प्रेतो जायते नरः॥"
इत्यग्निपुराणम्॥*॥

मनुष्याणां आतिवाहिकदेहानन्तरं प्रेतदेहो भवति। यथा, विष्णुधर्म्मोत्तरे।
"ततश्चाशैव गृह्णाति शरीरमातिवाहिकम्।
आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव!॥
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्।
प्रेतपिण्डैस्ततो दत्तैर्देहमाप्नोति भार्गव!॥
भोगदेहमिति प्रोक्तं क्रमादेव न संशयः।
प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्॥
ब्रह्मादिकेभ्यो देवेभ्य आकल्पं नैव विद्यते।
तच्चास्य यातना घोराः शीतवातातपोद्भवाः॥
ततः सपिण्डीकरणे बान्धवैः स हि नीयते नरः।
पूर्व्वं संवत्सरे देहमतोऽन्यं प्रतिपद्यते॥
ततः स नरकं याति स्वर्गं वा स्वेन कर्म्मणा॥"
इति शुद्धितत्त्वम्॥

प्रेतकार्य्यं, क्ली, (प्रेताय प्रेतस्य वा कार्य्यम्।) मृतस्य दाहादिसपिण्डीकरणान्तं कर्म्म। यथा,
"अकृत्वा प्रेतकार्य्याणि प्रेतस्य धनहारकः।
वर्षाणां यदधे प्रोक्तं तद्भवतं नियतश्चरेत्॥"
इति दायतत्त्वम्॥
(यथाच महाभारते। १।१०६। ६५।

"धर्म्मोक्ता च तु माङ्गल्यचिन्ताग्रोकपरायणः। प्रेतकार्य्याणि सर्व्वाणि तस्य सव्यग्रकारवत्॥")

प्रेतयज्ञः, क्ली, (प्रेतस्य यज्ञः।) श्राद्धानम्। इति हेमचन्द्रः। ३। ५५॥

प्रेततर्पणं, क्ली, (प्रेतस्य तर्पणम्।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखेन जलदानम्। यथा। "अद्य प्रेततर्पणे तिलोक्षिति विशेषोपादानात् कर्य्यादिद्वारेणापि तिलैरेव तर्पणं प्रतीयते॥ तदनुद्धारं यथा। अपः सर्व्वे गवाश्विनो अद्या पितृपदस्थाने प्रेतपदोल्लेखेन द्विनीयानां तर्पयेयुः पितृशब्दोच्चारणेऽपि पितृहा भवति। इतीव अमुकगोत्रं प्रेतं अमुकदेवशर्म्माणं तर्पयामि। इति वामगानां प्रयोगः। यजुर्व्वेदिनान्तु अमुकगोत्र प्रेत अमुकदेवशर्म्मन् इत्यन्त। इति सम्बोधनान्तवाक्यम्।" इति मुद्रितत्त्वम्॥

प्रेतदेहः, पुं क्ली, (प्रेतस्य देहः।) प्रेतशरीरम्। यथा,—

"क्षते सपिण्डीकरणे नरः संवत्सरात् परम्। प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"

इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरीयवचनम्॥ पूरकपिण्डदानेन तदुत्पत्तिर्यथा,—

"शिरस्त्रात्रेण पिण्डेन प्रेतस्य क्रियते तदा। द्वितीयेन तु कर्णादिनासिकासु समासतः॥ गलांसभुजवक्षांसि तृतीयेन यथाक्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥ जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा। सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥ दन्तलोमास्थ्यष्टमेन वीर्य्यञ्च नवमेन तु। दशमेन च पूर्णत्वं क्षुत्पता क्षुदिपर्य्ययः॥"

इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

प्रेतनदी, स्त्री. (प्रेतस्य नदी।) वैतरणी। इति शब्दरत्नावली॥

प्रेतपक्षः, पुं, (प्रेतप्रियः पक्षः।) मीनसंक्रान्त्यन्तरितपक्षः। तत्र मृतस्य पार्व्वणविधिना सांवत्सरिकं श्राद्धं कर्त्तव्यम्। यथा,—

"आषाढ्याः पञ्चमे पक्षे कन्यार्के वै दिवाकरे। यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्॥ नभो वाथ नभस्यो वा मलमासो यदा भवेत्। तदाप्रः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥" इति। तत्र मृतस्य।

"सपिण्डीकरणादूर्द्धं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्याद्वर्ज्जयित्वा मृताहनि॥ अमावास्यां त्रयो यस्य प्रेतपक्षेऽथवा पुनः। सपिण्डीकरणादूर्द्धं तस्योक्तः पार्व्वणो विधिः॥"

इति शुद्धोक्तेन प्रत्याब्दिकं पार्व्वणविधिना कर्त्तव्यम्। इति मलमासतत्त्वम्॥ * ॥ तत्र निषिद्धदिनेऽपि तिलतर्पणं कर्त्तव्यम्। यथा, स्मृतिः।

"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके। निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम्॥"

इति च मलमासतत्त्वम्॥

प्रेतपटहः, पुं, (प्रेतस्य पटहः।) मरणकाले वादनीयवाद्यविशेषः। तत्पर्य्यायः। मरुत् २ मरुद्भभेरुकः ३। इति त्रिकाण्डशेषः॥

प्रेतपतिः, पुं, (प्रेतानां पतिः।) यमः। इति त्रिकाण्डशेषः॥ (यथा, मार्कण्डेये। १०८। ४।

"दक्षः प्रेतपतेः पुत्रस्तिर्द्देवसेनापतेस्तथा। अन्येषाञ्चैव देवानामायुधानि च विश्वकृत्। चकार तेजसा भानोर्भास्वराण्यरिघ्नाशये॥")

प्रेतपिण्डः, पुं, (प्रेताय देयः पिण्डः।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतसम्बन्धकपिण्डाकारान्नम्। यथा,—

"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके। भागेनैव तु पिण्डं यत्तदन्नस्य पूरकम्॥"*॥

तत्तत्पिण्डस्य प्रेताङ्गकरणत्वं यथा, ब्रह्मपुराणे।

"शिरस्त्रात्रेण पिण्डेन प्रेतस्य क्रियते तदा। द्वितीयेन तु कर्णादिनासिकासु समासतः॥ गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च॥ जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा। सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड्यः॥ दन्तलोमास्थ्यष्टमेन वीर्य्यञ्च नवमेन तु। दशमेन तु पूर्णत्वं क्षुप्ता क्षुदिपर्य्ययः॥"*॥

तदकरणे दोषो यथा,—

"प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम्। प्रज्ञाग्न्यादिकेभ्यो दैवेभ्य आकल्पं नैव विद्यते॥"*॥

पूरकपिण्डदानादेरिदानिकर्त्तव्यता यथा। पारस्करः। प्रेताय पिण्डं दत्त्वा अवनेजनदानप्रत्यवनेजनेषु नामग्राहं गृह्णाये तां रात्रिं विहायसि क्षीरोदके निदध्युः प्रेताच त्वादि पिब चेदं क्षीरमित्युच्चार्य्येति। अत्र दानशब्देन पिण्डदानमुक्तं बहुवचनात्। तेनावनेजनपिण्डदानप्रत्यवनेजनेषु नामग्राहं नाम गृहीत्वा प्रेतपिण्डानुष्ठानं समाप्यम्। विहायसि रात्रौ क्षीरोदके प्रेताच त्वादि पिब चेदं क्षीरमित्युच्चार्य्य निदध्युः।

"प्रथमेऽहनि यो दद्यात प्रेतायान्नं समाहितः। बलास्रावस्तु चाण्डेषु स एव प्रददात्यपि॥"*॥

प्रथमपिण्डकर्त्तृनियमवत् प्रथमपिण्डदव्यनियममाह मुनः पुलस्त्यः।

"प्रथमेऽहनि यद्दत्तं तदेव स्याद्द्वयादिकम्। सप्तः श्रौत्रेऽपि दातव्याः सर्व्वेऽपि वृषभस्तथा॥ आद्यश्राद्धे प्रदातव्याः प्रथमे लेक एव हि। द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि॥ एकस्तोयाञ्जलिस्त्वेवं प्राथमेकस्य दीयते। द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा॥ पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च। अष्टमेऽष्टौ च नवमे नवैव दशमे दश॥ येन स्युः पञ्चपञ्चाशत् तोयस्याञ्जलयः क्रमात्। तोयपात्राणि सावत्सि संयुक्तानि तिलादिभिः॥"

इति शुद्धितत्त्वम्॥

प्रेतपुरं, क्ली, (प्रेतानां पुरम्।) यमालयः। यथा,

"यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।

तावत् आद्धस्य कालः स्यात् मृत्वं प्रेतपुरं तदा॥"

इति आद्धतत्त्वम्॥

प्रेतराज्ञी, स्त्री, (प्रेतानां विद्याधरभेदानां राज्ञीवापसर्पणकारित्वात्।) तुलसी। इति रत्नमाला॥

प्रेतवर्त्म, क्ली, (प्रेतानां वर्त्मनिव।) श्मशानम्। इति हेमचन्द्रः। ३। ५५॥

प्रेतवाहितः, त्रि, (प्रेतेन वाहितः।) भूतावेशः। इति त्रिकाण्डशेषः॥

प्रेतशिला, स्त्री, (प्रेतानां प्रेतेभ्यो वा वा शिला।) पिण्डदानार्थगयास्थितप्रस्तरविशेषः। यथा,—

ब्रह्मोवाच।

"येयं प्रेतशिला ख्याता गयायां वा शिला स्थिता। प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि॥ धर्म्मेण धारिता भूत्वे सर्व्वदेवमयी शिला। प्रेतत्वं ये गता पुण्या पितरो ब्रह्मवादयः। तेषामुद्धरणार्थाय यतः प्रेतशिला ततः॥ यतोऽत्र मुनयो भूपा राजपत्न्यादयः सदा। तस्यां शिलायां आद्धादिक्रियाहो ब्रह्मलोकगाः॥ गयासुरस्य यत्पुण्यं तस्य पृष्ठे शिला यतः। सुकण्ठो गिरिरित्युक्तात् सर्व्वदेवमयो ह्ययम्॥ सुकण्ठस्य पादेषु यतो ब्रह्मसरोमुखाः। अरविन्दवनन्तेषु तेन चैवोपलक्षितः॥ अरविन्दो गिरिर्नाम क्रौञ्चपादाङ्कितो यतः। तस्माद्विहिः क्रौञ्चपदः पितृणां ब्रह्मलोकदः॥ गदाधरादयो देवा आद्या आदौ अवस्थिताः। शिलारूपेण च यस्मात्तस्माद्देवमयी शिला। गयाशिरस्त्वादयित्वा गुरुत्वादास्थिता शिला॥*॥ स्नात्वा प्रेतशिलादौ तु चरणाम्बुक्षतेन च। पिण्डं दद्यादिमैर्मन्त्रैरावाह्य च पितॄन् यदान्॥ अस्मत्कुले मृता ये च गतिर्येषां न विद्यते। तेषामावाहयिष्यामि दर्भपृष्ठे तिलोदकैः॥ पितृवंशे मृता ये च मातृवंशे च ये मृताः। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ मातामहकुले ये च गतिर्येषां न जायते। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ अजातदन्ता ये केचित् ये च गर्भेषु पीडिताः। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ बन्धुवर्गाश्च ये केचिन्नामगोत्रविवर्जिताः। स्वगोत्रे परगोत्रे वा गतिर्येषां न विद्यते। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ उदक्यनष्टता ये च विषशस्त्रहताश्च ये। आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम्॥ अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे। विद्युत्चौरहता ये च तेषां पिण्डं ददाम्यहम्॥ रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ असिपत्रवने घोरे कुम्भीपाके च ये गताः। तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्॥ अन्येषां मातृवाक्यानां प्रेतलोकनिवासिनाम्।

प्रेतशौ

तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥
असंख्यातनसंख्या ये पेता यमपुरालये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
आब्रह्मस्तम्बपर्यन्तं जगत् खेन कर्मणा ।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा ॥
ये केचित् प्रेतरूपेण वर्तन्ते पितरो मम ।
ते सर्वे तृप्तिमायान्तु पिण्डदानेन सर्वदा ॥
ये मे पितृकुले जाताः कुले मातृकुलेऽपि च ।
गुरूणामुद्वहन्तां ये चान्ये बान्धवा हताः ॥
ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपाश्चामगर्भा ये ज्ञाताज्ञाताः कुले मम ।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
वाशिष्ठाः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव ! पिण्डकार्ये गदाधर ! ।
तत्रैते वाचो भवताद्य अक्षयोऽहं तृणत्रयात् ॥"
इति गारुडे गयामाहात्म्ये । ८५-८६ । अध्यायौ ॥

प्रेतशौचं, क्ली, (प्रेते सति प्रेतस्य वा शौचम् ।) मृतसंस्कारादि । यथा,—

याज्ञवल्क्य उवाच ।
"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः ।
जन्मद्विगे विशेषेण कुर्यादुदकमन्वहम् ॥
आप्तप्रायादनुज्ञाप्य इतरो ज्ञातिभिर्मृतः ।
यमदृष्टं तथा जप्यं अपद्विजौकिकाग्निना ॥
न दग्धस्य उपेतस्येदाहिताग्नेर्हुतार्थवत् ।
अप्रमादादृतुमादावपि ज्ञातयो नृपयज्वनः ॥
अप्र नः शोचदहनेन पितृदिष्टमुखाः ।
एवं मातामहाचार्यप्रेतानाप्योदकक्रियाः ॥
कामोदकाः सन्निपुत्रसञ्जीयन्त्यमुरत्विजः ।
नाममोत्रेण स्नुदकं सकृत् सिञ्चन्ति बान्धवाः ॥
मासवत्यतिसन्धेना न कुर्युरुदकक्रियाम् ।
न ब्रह्मचारिणो ब्राह्मा योषितः कामगास्तथा ॥
सुरापाश्चालचाण्डाला नाग्नौचोदकभाजनाः ।
असौ न रोदितव्यं हि स्त्रीणां जीवसंक्षतिः ॥
क्रिया कार्या यथाशक्ति तस्मै गच्छेदयं हानु
प्रति ।
विदग्ध्वा निखनेद्वापि नियता द्वारि वेश्मनः ॥
आचम्याथाभिसुदकं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य ज्वलाग्निं पदं पुनः ॥
प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि ।
ईक्षणं तत्तृतीयाच्छुद्धिः परेषां ज्ञानसंयमात् ॥
श्रोत्रलक्षाग्नना भूमौ स्वपेयुस्ते पृथक् पृथक् ।
पिण्डयज्ञादृता देयं प्रेतायाद्यं दिनत्रयम् ॥
जलमेकाहमाकाशे स्थाप्यं चौरश्च नग्नये ।
वेतालोपासना कार्या क्रियाश्च स्मृतिचोदिताः ॥
आदग्धजन्मनः सद्य आचूडान्नैष्ठिकी स्मृता ।
शिराव्रमात्रताद्दग्धाद्दग्धराशमतः परम् ॥

प्रेता

शिराव्रं दग्धराशं वा श्रावमाशौचमुच्यते ।
जन्मद्विगे उभयोः सूतकं मातुरेव हि ।
अन्तरा जन्ममरणे त्रीणाहोभिर्विशुद्धति ॥
दश द्वादश वर्षाणां तथा पञ्चदशैव च ।
त्रिंशद्दिनानि च तथा भवति प्रेतसूतकम् ॥
अष्टवर्षान्तकन्यासु बालेषु च त्रिरात्रकम् ।
गुर्वन्ते बान्धवानूचानमातुलश्रोत्रियेषु च ॥
अगौरसेषु पुत्रेषु भार्य्यास्वन्यगतासु च ।
त्रिरात्रराजनि तथा तदहः सुद्धिकारणम् ॥
हतानां वृषगोविप्रैरन्त्यं चाण्डालजातिनाम् ।
विषाद्यैश्च हतानाञ्च नाग्नौचं पृथिवीपते ॥
सन्निपतितज्वरातिसारविसूचिका तथा ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपत्स्वपि हि कष्टासु सद्यःशौचं विधीयते ॥
कालोऽग्निः कर्म्मजन्तूनां ज्ञानं तपो जलम् ।
यच्चाप्तापो निराहारः सर्व्वेषां शुद्धिहेतवः ॥"
इति गारुडे १०६ अध्यायः ॥

प्रेतश्राद्धं, क्ली, (प्रेताय प्रेतोद्देश्यकं वा श्राद्धम् ।) प्रेतोद्देश्यकश्राद्धम् । तदनुष्ठानं यथा । तत्र गोभिलः । अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नामीकरणं नात्र विश्वेदेवाः खदितमिति क्षत्रियस्य । उपतिष्ठतामित्यत्र स्थाने अभिरम्यतामिति विशस्तोऽभिरतोऽस्त्रीति प्रतिवचनमेतत् प्रेतश्राद्धमिति । इति श्राद्धतत्त्वम् ॥ * ॥ तच्च भवश्राद्धं तत्तु सापिण्डकर्मेत्यं चतुर्थपञ्चमनवमैकादशाद्येषु प्रेतश्राद्धम् । यथा यमः ।
"चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
तत्र दीयते जन्तोस्तत्प्रेतश्राद्धमुच्यते ॥"
इति श्राद्धविवेकः ॥ * ॥
सापिण्डिरणाभयकर्मेत्यं आद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धम् । यथा,—
"द्वादश प्रतिमास्थानि आद्यं मासिके तथा ।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोडशम् ॥"
इति श्राद्धतत्त्वम् ॥*॥
अम्बुघटश्राद्धम् । तत्तु संवत्सरं यावत् प्रत्यहं प्रेतोद्देश्यकान्नजलदानरूपम् । यथा । पारस्करः । अहरहरन्नमम्भो ब्राह्मणायोदकुम्भञ्च दद्यात् पिण्डमप्येके निरूपयन्ति । दर्शनीत्यर्थः । इति श्राद्धविवेकः ॥ * ॥ गयादितीर्थश्राद्धादिप्राप्तिनिमित्तमेकोद्दिष्टश्राद्धम् । यथा,—
"पितृयज्ञस्तु निर्व्वर्त्त्य मासिके श्राद्ध एव तु ।
श्राद्धं प्रतिरुचौ चैव मातापित्रोर्न्नाहनि ॥
असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ॥
तेनाम्बुघटश्राद्धे स्नानाहविहितमासिके तथा
विष्णुस्तीर्थश्राद्धादिप्राप्तौ प्रेतश्राद्धकरणेच्छायां
मातापित्रोर्न्नाहनि च असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ।" इति श्राद्धतत्त्वम् ॥

प्रेता, स्त्री, (प्रेत + स्त्रियां टाप् ।) प्रेतभावापन्ना । यथा । विष्णुरोम तत् सदित्यादि अमुकगोत्राया: प्रेताया अमुकदेव्या अशौचान्ताद्दितीयेऽह्नि अमुकगोत्राया: प्रेताया: प्रेतत्व-

प्रेमा

विमुक्तिपूर्व्वकस्वर्गलोकगमनकामः सोपकरणचन्दनाङ्कितधेनुदानमहं करिष्यामि । इति सौरहा ॥ * ॥ मृता । यथा,—
"प्रेतायाः पुत्रिकायाश्च भर्त्रा धनमहैत्य-पुत्रायाः ।" इति दायभागे श्रीजीमूतवाहनः ॥

प्रेम, य, (प्र + इ + घञ् ।) लोकान्तरम् । तत्पर्य्यायः । अमुत्र २ । इत्यमरः । ३ । ४ । ८ ॥ (यथा, मनुः । २ । ६ ।
"श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥")

प्रेम, [न्] क्ली, पुं, (प्रियस्य भावः । प्रिय + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति प्रादेशः । यौ तर्पणे + मनिन् वा ।) सौहार्द्यम् । तत्पर्य्यायः । प्रेमा २ प्रियता ३ हार्द्दम् ४ स्नेहः ५ । इत्यमरः । १ । ७ । २७ ॥ (यथा, देवीभागवते । १ । १४ । २४ ।
"इत्युक्त्वा आसः सुकं प्राप्तं प्रेम्णोत्थाय सस्वजुमः ।
आलिलिङ्ग सुहृदार्यां स्नेहं तस्य चकार ह ॥")
नर्म्म । इति मेदिनी । मे, ६४ ॥

प्रेमपातनं, क्ली, (प्रेम्णः स्नेहस्य पातनं यस्मात् । प्रेम्णा पातनं यस्येति वा ।) रोदनम् । तत्पर्य्यायः । इति शब्दचन्द्रिका ॥

प्रेमभक्तिः, स्त्री, (प्रेम्णा भक्तिः ।) स्नेहयुक्तश्रीकृष्णसेवा । विष्णौ कालिकममता । तल्लक्षणं यथा, नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसंयुता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैरिति ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥"*॥
अथ प्रेमसञ्चारिचिह्नानि यथा,भागवते ७ स्कन्धे ७ अध्याये श्रीप्रह्लादस्य बालानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥
यदा यदध्यक्ष इव क्वचिद्ग्रह-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्द्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
इति श्रीहरिभक्तिविलासे १२ विलासः ॥

प्रेमा, [न्] पुं, (प्रिय + इमनिच् । प्रीं तर्पणे + मनिन् वा ।) स्नेहः । इत्यमरः । १ । ७ । २७ ॥ अस्य लक्षणं यथा,—
"सर्व्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे ।
यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः ॥"
इत्युज्ज्वलनीलमणिः ॥
वासवः । वायुः । इति मेदिनी । मे, ६४ ॥

प्रेमाश्लिङ्गनं, क्ली, (प्रेम्णा यदाश्लिङ्गनम् ।) स्नेहेन परिष्वङ्गः । नायकनायिकयोराश्लिङ्गनविशेषः । तल्लक्षणं यथा । नायकघटितं नायिकयैकपार्श्वेन वेष्टयित्वा द्वितीयं पार्श्वं तस्य जङ्घोपरि स्थापयित्वा यदाश्लिङ्गनं तत् । इति कामशास्त्रम् ॥

प्रेमी, [न्] त्रि, (प्रेम अस्यास्तीति । इनिः ।) प्रेमयुक्तः । स्नेहविशिष्टः । प्रेमशब्दादस्यर्थे इनिप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

प्रेयसी, स्त्री, (इयमनयोरतिशयेन प्रिया । प्रिय + ईयसुन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति प्रादेशः । स्त्रियां ङीप् ।) प्रियतमा नारी । तत्पर्य्यायः । दयिता २ कान्ता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ प्रेष्ठा ९ प्रणयिनी १० । इति हेमचन्द्रः ॥

प्रेयान् [स्] पुं, (अयमनयोरतिशयेन प्रियः । प्रिय + ईयसुन् । प्रादेशः ।) पतिः । तत्पर्य्यायः । दयितः २ कान्तः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः ८ प्रेष्ठः ९ प्रणयी १० । इति हेमचन्द्रः ॥ अतिप्रिये, त्रि । इति जटाधरः ॥

प्रेरणं, क्ली, (प्र + ईर् + णिच् + ल्युट् ।) प्रेषणम् । पाठान इति भाषा । यथा, नैषधे । ३ । ५५ ।

"धिक् चापले वनसिमवनसलतं
यत्प्रेरणादुत्तरलीभवत्या ॥"

प्रेरणा, स्त्री, (प्र + ईर् + णिच् + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) चोदना । (यथा, मेघदूते । ७० ।

"क्षीणाः क्षीणाः प्रथमविकला प्रेरणा चूर्णमुष्टिः ॥")

फलभावना । विधिरिति यावत् । इति धर्म्मदीपिका ॥

प्रेरितः, त्रि, (प्र + ईर् + क्तः ।) प्रेषितः । यथा,—

"नपुंसकमिति ज्ञात्वा प्रियायै प्रेरितं मनः ।
मनस्त्वयैव रमते वृथाः पाञ्चजनिना वयम् ॥"

इति प्राचीनाः ॥

प्रेरी [न्] पुं, (प्रकर्षेण ईर्ते इति । प्र + ईर् गतौ + "प्र ईरण्यदोस्तुट् च ।" उणा० ४।१२६। इति अनिप् तुट्‌आगमश्च ।) सप्तर्षिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रेरेरी, स्त्री, (प्रकर्षेण ईर्ते इति । प्र + ईर् गतौ + "प्र ईरण्यदोस्तुट् च ।" उणा० ४।१२६। इति अनिप् तुट् च । "वनोरच ।" ४ । १ । ७। इति ङीप् रक्षान्तादेशः ।) नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रेष, च्छ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ॥)

प्रेषः, पुं (प्र + इष् + घञ् ।) प्रेषणम् । पीड़ा । इति जटाधरः ॥

प्रेषणं, क्ली, (प्रेष् + भावे ल्युट् ।) प्रेरणम् । यथा,

"आनीयात् प्रेषणे भृत्यान् बान्धवान् भोजनागमे ।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥"

इति चाणक्यसंग्रहः ॥

प्रेषितं, त्रि, (प्रेष् + क्तः ।) प्रेरितम् । तत्पर्य्यायः । प्रज्ञापितम् २ प्रतिष्ठितम् ३ प्रतिष्ठतम् ४ । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । २ । ११ । ४६ ।

"प्रेषितोऽहं महाभाग ! ब्रह्मणैव त्वां विवक्षया ।
कथितं प्रभुणा यच्च तद् ब्रवीमि महामते ! ॥")

प्रेष्ठः, त्रि, (अयमेषामतिशयेन प्रिय इति । प्रिय + इष्ठन् । प्रादेशः ।) अतिशयप्रियः । इत्यमरः । ३ । १ । १११ ॥

प्रेष्ठा, स्त्री, (प्रेष्ठ + टाप् ।) प्रेयसी । इति हेमचन्द्रः ॥ अङ्गना । इति शब्दरत्नावली ॥

प्रेष्यः, त्रि, (प्र + इष् + कर्म्मणि यत् ।) दासः । इत्यमरः । ३ । १ । ७३ ॥ (यथा, मनौ । ३ । १५३ ।

"प्रेष्यो ग्रामस्य राज्ञश्च कुलस्यो ग्रावदण्डकः ॥")

प्रेरणीयश्च ॥

प्रेषः, पुं, (प्र + इष् + घञ् । "प्राडूढोढ्योढ्येषेष्येषु ।" ६ । १ । ८६ । इत्यस्य वार्त्तिकोक्त्या वृद्धिः ।) प्रेष्यः । प्रहणम् । उन्नादः । प्रेषणम् । इति मेदिनी । षे, ६ ॥

प्रेष्यः, पुं, (प्र + इष् + कर्म्मणि यत् । "प्राडूढोढ्योढ्येषेष्येषु ।" ६ । १ । ८६ । इत्यस्य वार्त्तिकोक्त्या वृद्धिः ।) प्रेष्यः । इत्यमरटीकायां भरतः ॥ (यथा, कुमारे । ६ । ५८ ।

"जङ्गमं प्रेष्यभावे यः स्थावरं चरणाङ्कितम् ।
विभक्तानुभयं मन्ये हिरूपमपि मे वपुः ॥"

स्त्री. प्रेष्यस्य भावः । दासकर्म्म । यथा, कथासरित्सागरे । ३० । ६५ ।

"गवादिरत्नकान् पुत्रान् भार्य्यां कर्म्मकरीं निजाम् ।
तस्य दत्वा गृहाभ्यर्णे प्रेष्यं कुर्व्वन्नवास सः ॥")

प्रोक्तं, त्रि, (प्रकर्षेण उच्यते स्मेति । प्र + वच् + क्तः ।) कथितम् । प्रकर्षेणोक्तम् । यथा,—

"अस्मदीयमुखप्रोक्तं निखं भागवतं शृणु ॥"

इति श्रीभागवतम् ॥

प्रोक्षणं, क्ली, (प्र + उक्ष सेचने + ल्युट् ।) यज्ञार्थपशुहननम् । इत्यमरः । २ । ७ । २६ ॥ (यथा, महाभारते । ५ । १७ । ६ ।

"य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम् ।
एते प्रमाणं भवतः उताहो नेति वासव ! ॥"

आहादनुचितसंस्कारः । यथा, भागवते । ८ । ६ । ८ ।

"चोदितः प्रोक्षणायाह दुष्टमेतदकर्म्मकम् ॥")

वधः । सेचनम् । इति मेदिनी । णे, ६४ ॥ (यथा, मनुः । ५ । ११८ ।

"अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन तल्यानामद्भिः शौचं विधीयते ॥")

प्रोक्षितं, त्रि, (प्र + उक्ष + क्त ।) सिक्तम् । सिक्तम् । इति मेदिनी । ते, १३६ ॥ यज्ञार्थं मन्त्रैः संस्कृतमांसादि । यथा,—

"भक्षयेत् प्रोक्षितं मांसं ब्राह्मणानाञ्च काम्यया ।
देवे नियुक्तः श्राद्धे वा नियमे तु विवर्ज्जयेत् ॥"

आरण्यानामिदानीन्तनप्रोक्षणापेक्षा नास्ति । यथा, महाभारते ।

"आरण्याः सर्व्वदेवत्या प्रोक्षिता सर्व्वशो मृगाः ।
अगस्त्येन पुरा राजन् ! मृगया येन पूज्यते ॥"

इति तिथ्यादितत्त्वम् ॥

प्रोज्झासनं, क्ली, (प्र + उद् + जस् हिंसायाम् + णिच् + ल्युट् ।) मारणम् । इति हेमचन्द्रः । ३ । ३७ ॥

प्रोज्झितं, त्रि, (प्र + उज्झ + कर्म्मणि क्तः ।) त्यक्तम् । यथा, श्रीभागवते । १ । १ । २ ।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम् ॥"

प्रोञ्छनं, क्ली, (प्र + उञ्छ + ल्युट् ।) प्रमार्जनम् । लोपनम् । मोछा इति भाषा ॥ यथा,—

"प्रोञ्छनैर्वामपादेन दरिद्रो भवति ध्रुवम् ।
वैरिनाशकरं प्रोक्तं कवचं वज्रकारकम् ॥"

इति रुद्रयामले वैरिहरकालीकवचम् ॥

प्रोक्षः, पुं, (प्रकर्षेण अक्षते निष्पीवनादिकं प्राप्नोतीति । प्र + अक्षि गतौ + अच् । एषोदरादित्वात् अस्य उत्वम् ।) मतदृग्यङ्गः । पीगदान इति भाषा । यथा,—

"स्यादाचमनकः प्रोक्षः कटकोलः पतद्ग्रहः ॥"

इति शब्दरत्नावली । ४७ ॥

प्रोतं, क्ली, (प्र + वेञ् स्यूतौ + क्तः । यजादित्वात् सम्प्रसारणम् ।) वस्त्रम् । इति जटाधरः ॥

प्रोतं, त्रि, (प्र + वेञ् + क्तः । यजादित्वात् सम्प्रसारणम् ।) खचितम् । इति मेदिनी । ते, ३७ ॥ स्यूतम् । (यथा, श्रीकृष्णचरिते । १५ । २५ ।

"गोरत्नमालापरिरम्भविजृम्भभस्य
रम्भोरुभिः सह विलासिजनस्य कामः ।
प्रोतं विधातुमिव चेतसि रागसूत्रं
रोमाञ्चसूचिनिचयं प्रचुरीचकार ॥")

ग्रन्थितम् । इति हेमचन्द्रः ॥

प्रोतोत्सादनं, क्ली, (प्रोते स्यूते सति प्रोतानां वस्त्राणां वा उत्सादनं उत्तोलनं उत्पाटनं वा यत्र ।) वस्त्रकुट्टिमम् । छत्रम् । इति त्रिकाण्डशेषः ॥

प्रोत्फुल्लः, पुं, (प्रकर्षेण उत्फुल्लतीति । प्र + उत् + फुल्ल + अच् ।) वृक्षविशेषः । तत्पर्य्यायः । सिंहलाङ्गूलः २ हट्टी ३ हट्टा पिप्पा ५ । इति शब्दमाला ॥

प्रोत्फुल्लं, त्रि, (प्रकर्षेण उत्फुल्लम् । प्र + उत् + फुल्ल विकासे + कर्म्मणि अच् वा ।) विकसितम् । यथा,—

"ये वर्द्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपद्मकुलरञ्जसुरभीलसाङ्गाः ।
ते साम्प्रतं विधिवशाद्गमयन्ति कालं
निम्नेषु पार्वतुसुमेषु करीलकेषु ॥"

इति भामिनीविलासः ॥

प्रोत्साहः, पुं, (प्र + उत् + सह + घञ् ।) प्रहर्षोत्साहः । "कर्म्मसु दृढ़यत्नकारको भावः उत्साह इति मधुः ॥ कर्म्मसु दृढ़यत्नकारको भावः उत्साह

इति रमानाथः ॥ कर्म्मसु प्रत्यय उत्साह इति नयनानन्दः । अग्रजे बलोद्यम उत्साह । इति केचित् ।" इत्यमरटीकायां भरतः ॥ (यथा, कथासरित्सागरे । १६ । ८० ।

"सोऽस्याः प्रोत्साहविश्लेषदुःखं यावद्व्यपोहति ।
तावत् पद्मावतीपार्श्वं प्रययुस्ते महत्तराः ॥")

प्रोथ, क्र अ पर्य्याप्तौ । इति कविकल्पद्रुमः ॥(भ्वा०-उभ०-अक०-सेट् ।) रेफयुक्तः । क्र, अपुप्रोथत् । अ, प्रोथति प्रोथते । पर्य्याप्तं सामर्थ्यम् । पुप्रोथाक्षे न कञ्चन । पर्य्याप्तं परिपूर्णता । इति गोविन्दभट्टः । इति दुर्गादासः ॥

प्रोथः, पुं, क्ली, (प्रथते इति । प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक् निपातनात् गुणः । यद्वा, प्रोथते इति । प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः ।) अग्रनासिका । इत्यमरः । २ । ८ । ४६ ॥ (यथा, माघे ११ । ११ ।

"रिरक्षयिषति भूयः प्रथ्यमग्रे विकीर्णं
पटुतरप्रपलोष्टः प्रस्फुरत्प्रोथमग्रः ॥"

सूकरनासिकाग्रि । यथा, देवीभागवते । ५ । २८ । २५ ।

"वाराही सूकराकारा गूढ़प्रोथा सटाभृता ॥")

प्रोथः, पुं, (प्रोथते इति । प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । यद्वा, प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक् । निपातनात् गुणः ।) कटी । इति मेदिनी । थे, १० ॥ घाटकः । इति त्रिकाण्डशेषः ॥ स्त्रीगर्भः । इति विश्वः ॥ गर्भः । भौवण्यम् । स्त्रिक् । अग्रसुखम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

प्रोथः, त्रि, (प्रथते इति । प्रथ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः ।" उणा० २ । १२ । इति थक् । निपातनात् गुणः ।) अध्वगः । इति मेदिनी । थे, १० ॥ प्रथितः । इति त्रिकाण्डशेषः ॥ स्थापितः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रोथः, पुं, (प्रथ दाहे + भावे घञ् ।) सन्तापः । इति राजनिर्घण्टः ॥

प्रोषितः, त्रि, (वस् + क्त । इट् । सम्प्रसारणम् । प्रकृष्टदूरं उषितः ।) प्रवासगतः । यथा,—

"आशासे सुहृदा दूरे प्रोषिते मलिना क्षमा ।
म्रियते म्रियेत या पत्यौ सा स्त्री क्षेया पतिव्रता ॥"

इति सुद्धितत्त्वम् ॥

(दूरीभूतः । यथा, कलाविलासे । १ । १४ ।

"प्रिश्लिष्टदृष्टस्मितविभ्रमाणां
रुचिरः प्रभामण्डलमण्डनश्रीः ।
तीक्ष्णांशोरिव सङ्गजः
प्रोषितितिमिरः करोत्यागाः ॥")

प्रोषितभर्तृका, स्त्री, (प्रोषितो विदेशगतो भर्त्ता यस्याः । समासान्तकप्प्रत्ययः ।) विदेशस्थपतिका । इति जटाधरः ॥ स्त्रीयादिनायिकाभेदः । तस्या लक्षणं यथा । देशान्तरे गते भर्त्तरि सन्तापाकुला प्रोषितभर्तृका । अस्याश्चेष्टा दशावस्था । यथा । | पद्मिलिलाषः १ चिन्ता २ स्मृतिः ३ गुणोत्कीर्त्तनम् ४ उद्वेगः ५ विलापः ६ उन्मादः ७ व्याधिः ८ जड़ता ९ निधनम् १० । सम्भा प्रोषितभर्तृका यथा,—

"दुःखं दीर्घतरं वहन्त्यपि सखीवर्गाय यो भाषते
ग्रैवालैः ग्रथनं खजन्त्यपि पुनः प्रीते न वा लज्जया ।
कण्ठे गद्गदवाचमञ्चति दृशा धत्ते न वाष्पोदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद वेतोभवः ॥"

मध्या प्रोषितभर्तृका यथा,—

"वासस्तस्य वपुषो वलयन्तस्य
हस्तस्य सेव जघनस्य च रत्नकाञ्ची ।
वाचालभङ्गसुभगे सुरतौ समस्त-
मद्याधिकं भवति तनु सखि किन्निदानम् ॥"

प्रगल्भा प्रोषितभर्तृका यथा,—

"माला बालाम्बुजदलमयी मौक्तिकी हारयष्टिः
काञ्ची स्यात् प्रसरति हरौ सुभ्रुवः प्रस्थितेव ।
अन्यद्वस्तु किमपि धमनौ विद्यते वा नवेति
ज्ञातुं वाछोरहह वलयं पाणिमूलं प्रयाति ॥"

परकीया प्रोषितभर्तृका यथा,—

"स्मरः पञ्चास्त्रं दहति तदपि भ्रूसंज्ञया गृह्णते
सद्यो मर्म्मरुजक्रया न च तया संलक्ष्यते प्राणिना ।
यातुर्वाञ्छि सुहृज्जनस्य वचसा प्रत्युत्तरं दीयते
श्वासः किन्तु न सूच्यते हुतवहक्रूरः क्रूरद्रोहया ॥"

सामान्यवनिता प्रोषितभर्तृका यथा,—

"विरहविदितमन्मथप्रेम विश्वास्य कान्तः
पुनरपि वसु तस्मादेत्य मे दास्यतीति ।
मरिचनिचयमक्ष्णोर्न्यस्य वाष्पोदबिन्दून्
लुनति च पुरयोषिद्वारदेशोपविष्टा ॥"

इति रसमञ्जरी ॥

(अस्याः अकर्त्तव्यं यदुक्तं चिन्तामणौ तद्यथा,

"हास्यं परगृहे यानं समाजोत्सवदर्शनम् ।
क्रीड़ां शरीरसंस्कारं त्यजेत् प्रोषितभर्तृका ॥")

प्रोष्ठः, पुं, (प्रकृष्टः ओष्ठोऽस्येति । "ओष्ठोत्वयोः समासे वा ।" २ । १ । ६४ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) प्रोष्ठौष्ठ्यः । इत्यमरटीकायां रायमुकुटः ॥ (जनपदविशेषः । यथा, महाभारते । ६ । ६ । ६२ ।

"वृकाः कोरकाः प्रोष्ठाः समवेगवशास्तथा ॥"

गौः । इति सिद्धान्तकौमुदी । ५ । ४ । १२० ॥)

प्रोष्ठपदः, पुं, (प्रोष्ठौ गौरस्येव पादौ यस्य सः ।

"सुप्रातसुश्वसुदिवेति ।" ५ । ४ । १२० । इति अच् प्रत्ययेन साधुः । प्रोष्ठपदी नक्षत्रविशेषयुक्तपूर्णिमासी यत्र मासे । अण् । पक्षे न वृद्धिः ।) भाद्रमासः । इत्यमरः ॥ (नक्षत्रविशेषः । यथा, महाभारते । ६ । ६ । १४ ।

"शुक्रः प्रोष्ठपदे पूर्व्वे समारुह्य विरोचते ॥"

यथा च मार्कण्डेये । २१ । १५ ।

"अजाविकं प्रोष्ठपदे विन्देद्गावांश्चयोत्तरे ॥"

गोतुल्यपदयुक्ते, त्रि । इति व्याकरणम् ॥)

प्रोष्ठपदाः, स्त्री, (प्रोष्ठौ गौरस्येव पादा यासाम् ।

"सुप्रातसुश्वेति ।" ५ । ४ । १२० । इति बहुव्रीहावच् पक्षावच्च निपातितः ।) पूर्व्वभाद्रपदनक्षत्रम् २५ । उत्तरभाद्रपदनक्षत्रम् २६ । तत्पर्य्यायः । भाद्रपदाः २ । इत्यमरः । १ । ३ । २२ ॥ ते पूर्व्वभाद्रपदोत्तरभाद्रपदासु प्रोष्ठौ गौः भद्रश्च गौः तस्येव पादा आसां तासु तथा । पूर्व्वे प्रोष्ठपदे ते उत्तरे तु भाद्रपदे ते समुदायस्यासां चतुःसंख्य इति बहुवचनम् । कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वाद्द्विवचनम् । इति भरतः ॥ भाद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते तिरोहितावयवभेदपक्षे एकवचनम् । प्रोष्ठपदाशब्देन तु द्वित्वावयवभेदपक्षे बहुवचनमिति मैत्रेयः । इति रायमुकुटः ॥

प्रोष्ठपदी, स्त्री, (प्रोष्ठपदाभिर्युक्ता पौर्णमासी । अण् । स्त्रियां ङीप् ।) भाद्री पूर्णिमा । यथा,—

"प्रोष्ठपद्यामतीतायां तथा क्षत्रा क्षयोदयौ ।
एतासु आद्धकालान् वै निबोधाह प्रजापतिः ॥"

इति तिथ्यादितत्त्वम् ॥

अपि च ।

"लिखित्वा तत्र यो दद्याद्धेमसिंहसमन्वितम् ।
प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिम् ॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी ॥

प्रोष्ठपादः, त्रि, (प्रोष्ठपद + "सन्धिवेलेति ।" ४ । ३ । १६ । इत्यण् । "जे प्रोष्ठपदानाम् ।" ७ । ३ । १८ । इति उत्तरपदस्याचामादेरचो वृद्धिः ।) प्रोष्ठपदासु जातः । इति सिद्धान्तकौमुदी ॥

प्रोष्ठी, स्त्री, पुं, (प्रकृष्टः ओष्ठो यस्याः । "ओष्ठोत्वयोः समासे वा ।" नासिकोदरोष्ठेति जातिरिति वा ङीष ।) मत्स्यभेदः । पुँटी माछ इति भाषा । तत्पर्य्यायः । शुकरी २ शूकरः ३ । इत्यमरः ॥ श्वेतकोलः ४ । इति शब्दरत्नावली ॥ तस्या गुणाः । निक्तत्वम् । कटुत्वम् । स्वादुत्वम् । शुक्रकारित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभः ॥ स्निग्धत्वम् । आध्मानशूलरोगनाशित्वम् । श्रेष्ठत्वञ्च । इति राजनिर्घण्टः ॥

प्रोष्ठः, पुं, (प्रोच्यते वितर्क्यते विकल्पव्याकुलितैरिति । प्र + ऊह + घञ् ।) वृक्षिचरणः । पर्व्व । इति विश्वमेदिन्यौ । थे, ५ । गजचरणपर्व्व । इति त्रिकाण्डशेषशब्दरत्नावल्यौ ॥

प्रोढ़ः, त्रि, (प्रकर्षेण ऊह्यते वितर्क्यतेऽसौ इति । प्र + ऊह + कः ।) निपुणः । (प्र + ऊह + भावे घञ् ।) तर्कः । इति मेदिनी । ढे, ६ ॥

प्रौढ़, त्रि, (प्रोच्यते स्मेति । प्र + वह + क्तः । सम्प्रसारणम् । "प्रादूहोढोढ्येषैष्येषु ।" इति वृद्धिः ।) वर्द्धितम् । तत्पर्य्यायः । प्रवृद्धम् २ वर्धितम् ३ । इत्यमरः । ३ । १ । ७६ ॥ (यथा, मेघदूते । २७ ।

"लक्ष्म्यकान्तं पुलकितमिव प्रौढ़पुष्पैः कदम्बैः ॥")

प्रगल्भः। इति हेमचन्द्रः। ६। १३१॥ (यथा, रघुः। ६। ५८।
"आसादिमाश्चटुले: करतः सुनेत्रे:
प्रौढ़प्रिया नयनविभ्रमचेष्टितानि॥")
निपुणः। इति राजनिर्घण्टः॥ (यथा, भागवते। ३। २। ६।
"ईक्षितया: पूर्वप्रौढ़ा एकारामाश्च सात्वता:॥")
प्रकर्षेण जढ़ः॥

प्रौढ़पादः, पुं, (प्रौढ़: पादो यस्य।) आसनारोपितपादतलः। आसनोपरिपादतलद्वयसंयोगपूर्व्वकोपवेशः। वक्षादिना क्षतपृष्ठजानुजङ्घान्वयः। वक्षादिद्वारा पृष्ठजानुजङ्घाद्वयदृढ़बन्धनपूर्व्वकोपवेशः। यथा,—
"आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा।
क्षतावसक्थिको यस्तु प्रौढ़पाद: स उच्यते॥
स्नानमाचमनं होमं भोजनं देवतार्चनम्।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम्॥"
इति कात्यायनः॥ *॥

अनेकोद्वाहे दारग्रिहे भूमिसमे दृढ़काश्च संकीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात्। इत्यद्भिकतत्त्वम्॥

प्रौढ़ा, स्त्री, (प्रौढ़+टाप्।) नायिकाभेदः। तत्पर्य्यायः। चिरिण्टी २ सुवया: ३ प्रगल्भा ४ दृढ़रजाः ५। इति राजनिर्घण्टः॥ यथा,—
"बाला तु तरुणी प्रौढ़ा दृष्ट्वा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा॥"
चिरग्रहणादूर्द्धं पञ्चपञ्चाशद्वर्षपर्य्यन्तं प्रौढ़ावस्था। यथा,—
"आषोड़शी भवेद्बाला तरुणी चिंशता मता।
पञ्चपञ्चाशती प्रौढ़ा भवेद्दृष्ट्वा तत: परम्॥"
अस्या वशत्वकारणं यथा,—
"अलङ्कारादिभिर्बाला तरुणी रतियोगत:।
प्रेमदानादिभि: प्रौढ़ा दृष्ट्वा च दृढ़ताड़नात्॥"
तस्या रसभेदो यथा,—
"बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी।
प्रौढ़ा करोति दृष्ट्वैव दृष्ट्वा मरणदा भवेत्॥"
इति रतिमञ्जरी॥

सुग्धादिविविधालम्बनतप्रगल्भा नायिका। तत्र प्रौढ़ा लक्षिता यथा,—
"भासुद्दीप्त विपक्षपक्षलदृग: पादाम्बुजालक्तकै-
राजिघ्रानमानतीक्षतसुखी चिन्तापितेवाभवत्।
रुद्धं मोक्तवती न वा क्षतवती निश्वासकोष्णा-
दृग:
प्रातर्मङ्गलमङ्गला करतलादादर्शमादर्शयत्॥"

प्रौढ़ा कलहान्तरिता यथा,—
"अकरो: किमु नेत्रयोरिमानं
किमकार्षी: करपल्लवे निरोधम्।
कलहं किमधा: क्रुधा रसज्ञे
क्षितमर्थं न विदन्ति देवदृशा:॥"

प्रौढ़ा उत्कण्ठिता यथा,—
"आतन्वन्कुसुमस्रजि प्रियचिरश्लाघवन्धौ
नातक्षमक्षिणि प्रियक्षिमिर प्रबोद।

दृच्छामि किञ्च नवनीरधराभिरामो
रामोदर: कथय किं न समाजगाम॥"

प्रौढ़ा वासकसज्जा यथा,—
"क्षतं वपुषि भूषणं चिकुरधोरणी धूपिता
लता भवनसन्निधौ क्रमुकवीटिकासम्भृता:।
अकारि हरिणीदृशा भवनमेत्य हेतुस्त्विषा
स्फुरत्कनककैतकीकुसुमकान्तिभिर्दुर्दिनम्॥"

प्रौढ़ाभिसारिका यथा,—
"स्फुरदूरुसिजभारभङ्गुराङ्गी
किसलयकोमलकान्तिना पदेन।
अथ कथय कथं सहेत गन्तुं
यदि न निशासु मनोरथो रथ: स्यात्॥"

प्रौढ़ा प्रवत्स्यत्पतिका यथा,—
"नायं हन्ति सुधुवामपि तनुत्यागे वियोगज्वर-
स्तेनाहं विहितास्मि यैर्दयिते! पृच्छामि सत्यं वद।
ताम्बूलं कुसुमं पटीरमुदकं यद्बन्धुभिर्दीयते
तत् स्यादत्र परत्र वा किमु विषज्वालावली-
दु:सहम्॥"
इति रसमञ्जरी॥

अन्यत् प्रगल्भाशब्दे द्रष्टव्यम्॥

प्रौढ़ि:, स्त्री, (प्र+वह+क्तिन्। प्राडूढेति वृद्धि:।) सामर्थ्यम्। इति सुग्धबोधव्याकरणम्॥ तत्पर्य्यायः। उत्साह: २ प्रगल्भता ३ अभियोग: ४ उद्यम: ५ उद्योग: ६ क्रियादैनिका ७ अध्यवसाय: ८ ऊर्ज्ज: ९। इति हेमचन्द्र:। २। २१४॥ (यथा, कथासरित्सागरे। १४। ६३।
"यथा यथा च दम्पत्यो: प्रौढ़िं परिणयो ययौ।
तयोस्तथा तथा प्रेम नवीभावमिवाययौ॥")

प्रौढ़:, त्रि, (प्र+ओढ़ाञ् अपनयने+अच्।) निपुण:। इति केचित्॥

प्रौष्ठपद:, पुं, (प्रोष्ठौ गौरस्येव पादा यासामिति प्रोष्ठपदा नक्षत्रविशेषा:। तद्युक्ता पौर्णमासी। प्रोष्ठपद+"नक्षत्रेण युक्त: काल:।" ४।२।३। इति अण्। ङीप्। प्रौष्ठपदी पौर्णमास्यस्मिन्। प्रौष्ठपदी+"सास्मिन् पौर्णमासीति।" ४।२।२१। इति अण्।) भाद्रमास:। इत्यमरः। १।३।२२॥ (यथा, महाभारते। १३। १०६। २८।
"प्रौष्ठपदस्तु यो मासमेकाहारो भवेन्नर:।
धनाढ्यो रूपवानग्र्यमैश्वर्यं प्रतिपद्यते॥"
प्रौष्ठपदासु भवे, त्रि। इति सिद्धान्तकौमुदी। ७। ३। १८॥)

प्रौढ़:, पुं, (प्र+जढ़+क:। प्राडूढेति वृद्धि:।) प्रकर्षेणोढ़:। इति सुग्धबोधव्याकरणम्।

प्रस्ज, ञ भक्षणे। इति कविकल्पद्रुम:॥ (भ्वा०-उभ०-सक०-सेट्।) अस्त:स्रष्टतीययुक्त:। ञ, प्रस्ज्यति प्रस्ज्यते। इति दुर्गादास:॥

प्रस्तः, पुं, (प्रस्ज्यते भक्ष्यते विहगादिभिरिति। प्रस्ज+कर्म्मणि घञ्।) वृक्षविशेषः। पाकुड़ इति भाषा। तत्पर्य्यायः। जटी २ पर्कटी ३। इत्यमरः॥ पर्कटिः ४ प्लक्षः ५ प्लीक्षः ६ जटिः ७। इति शब्दरत्नावली॥ कपीतनः ८ चोरी ९

सुपार्श्वः १० कमलक्षुः ११ प्लक्षी १२ अवरोहशाखी १३ गर्दभाक्षः १४ कपीतकः १५ जटप्ररोहः १६ प्लवकः १७ प्लवङ्गः १८ महावलः १९॥ वृक्षवर्गपर्य्यायः। क्षुधः २० सुगृहीतः २१ प्रीतवर्द्धकः २२ पुष्पः २३ महावरोहः २४ वृक्षपर्णः २५ पिप्पलिः २६ भिदुरः २७ मङ्गल्यायः २८। अस्य गुणाः। कटुत्वम्। कषायत्वम्। शिशिरत्वम्। रक्तदोषमूर्च्छाभ्रमप्रलापनाशित्वञ्च। इति राजनिर्घण्टः॥ क्षयरोगिगदग्राहपित्तकफशोषरक्तपित्तनाशित्वम्। पर्कटी च स्त्रियामपि। इति भावप्रकाशः॥ कन्दरालक्षः। द्वीपभेदः। अश्वत्थवृक्षः। इति मेदिनी। ये, १७॥ पचकः। इति हेमचन्द्रः॥

प्लक्षद्वीपः, पुं, (प्लक्षतरुपलक्षितो द्वीपः।) सप्तद्वीपान्तर्गतद्वीपविशेषः। तस्य विवरणं यथा,
सूत उवाच।
"जम्बुद्वीपस्य विस्तारद्विगुणेन समन्वितः।
संवेष्टयित्वा क्षीरोदं प्लक्षद्वीपो व्यवस्थितः॥
प्लक्षद्वीपे च विप्रेन्द्राः सप्तासन् कुलपर्व्वताः।
स्वस्वायताः सुपर्व्वाणः सिद्धसंघनिषेविताः॥
गोमेदः प्रथमस्तेषां द्वितीयश्चन्द्र उच्यते।
नारदो दुन्दुभिश्चैव सोमश्च ऋषभस्तथा॥
विभ्राजः सप्तमः प्रोक्तो ब्रह्मणोऽत्यन्तवल्लभः।
तत्र देवर्षिगन्धर्व्वैः सिद्धैश्च भगवानजः॥
उपास्यते स विश्वात्मा साक्षी सर्व्वस्य विश्वसृक्।
तेषु पुण्या जनपदा नाधयो व्याधयोऽपि च॥
न तत्र पापकर्म्माणः पुरुषा वा कदाचन।
तेषां नद्यः सप्त चैव वर्षाणान्तु वसुप्रदाः॥
तासु ब्रह्मर्षयो नित्यं पितामहमुपासते।
अनुतप्ता शिखी चैव विपाशा त्रिदिवा क्षमा॥
अमृता सुकृता चैव नामतः परिकीर्त्तिताः।
स्तुदनश्चक्षसंख्याताः सरांसि सुबहून्यपि॥
न वै तेषु युगावस्थाः पुरुषा वै चिरायुषः।
आर्य्यकाः कुरवश्चैव विदग्धा भाविनस्तथा॥
ब्रह्मक्षत्रियविट्शूद्रास्तस्मिन् द्वीपे प्रकीर्त्तिताः।
इज्यते भगवान् सोमो वर्णैस्तत्र निवासिभिः॥
तेषाञ्च सोमसायुज्यं सारूप्यं सुनिपुङ्गवाः।
सर्व्वे धर्म्मपरा नित्यं नित्यं सुदितमानसाः॥
पञ्चवर्षसहस्राणि जीवन्ति च निरामयाः॥"

इति कौर्म्मे भुवनकोषे ४६ अध्यायः॥ *॥

अपि च "ऋषिरुवाच। अतःपरं प्लक्षादीनां प्रमाणलक्षणसंस्थानतो वर्षविभाग उपवर्ण्यते। जम्बुद्वीपो यावत्प्रमाणविस्तारस्तावता क्षारोदधिना परिवेष्टितो यथा मेरुर्जम्बूाख्येन। लवणोदधिरपि ततो द्विगुणविशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन। प्लक्षो जम्बुप्रमाणो द्वीपाख्यातिकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वः। तस्याधिपतिः प्रियव्रतात्मज इध्मजिह्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य आत्मजेभ्य आकल्प स्वयमात्मयोगेनोपरराम। शिवं वयसं सुभद्रं शान्तं क्षेम

मन्दरमभयमिति वर्षाणि । तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः । मणिकूटो वज्रकूट इन्द्रसेनो ज्योतिष्मान् सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतुशैलाः । अरुणा नृमणा आङ्गिरसी सावित्री सुप्रभाता ऋतम्भरा सत्यम्भरेति महानद्यः । यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतङ्गोर्ध्वायनसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधोपमसन्दर्शनप्रजनना: स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते । प्लक्षस्य विष्णो रूपं यत् सत्यस्यैष ब्रह्मणः । अन्तस्थ च ऋत्विज सूर्यमात्मानमीक्षते ॥ प्लक्षादिषु पञ्चसु पुरुषाणामायुरिन्द्रियमोजः सहो बलं बुद्धिर्विक्रम इति च सर्वेषामौत्पत्तिकी सिद्धिरविप्लवेन वर्तते । प्लक्षश्च समानेनेक्षुरसोदेनावृतः ।" इति श्रीभागवते ५ स्कन्धे २० अध्यायः ॥

प्लव, ङ गत्याम् । (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःखण्डतीययुक्तः । ङ, प्लवते । प्लु ङ इत्यने नैवेदसिद्धे अस्य पाठः प्लविष्यते प्लवते इत्यादि सिद्धयर्थः । इति दुर्गादासः ॥

प्लव, क्ली, (प्लवते इति । प्लु + अच् ।) कैवर्त्तीसुस्तकम् । (अस्याः पर्य्यायो यथा,—
"कुटन्नटं दासपुरं वालेयं परिप्लवम् ।
प्लवगोपुरगोवर्द्दकैवर्त्तीसुस्तकानि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गन्धद्रव्यम् । इति मेदिनी । वे, १८ ॥ प्लुतगे, त्रि ॥

प्लवः, पुं, (प्लु + "वहेरप् ।" ३ । ३ । ५७ । इत्यप् ।) प्लवनम् । (यथा, हरिवंशे । १२२ । १०१ ।
"सागरानूपविपुलां प्रागुदक्प्लवशीतलाम् ।
सर्व्वतोदधिमध्यस्थामभेद्यां त्रिदशैरपि ॥"
प्लवतेऽनेनेति करणे अप् ।) भेलः । (यथा, सुश्रुते । १ । ४५ ।
"प्लवा ह्येते अदृढा यज्ञरूपा
अष्टादशोक्तमवरं येषु कर्म्म ।
एतच्छ्रेयो येऽभिनन्दन्ति मूढा
जराम्रत्युं ते पुनरेवापि यन्ति ॥"
प्लवते सन्तरतीति । प्लु + अच् ।) भेकः । अविः । शपथः । कपिः । जलकाकः । (यथा, मनुस्मृते । १ । ४५ ।
"प्लवानामिन्द्रुरक्षांसि ।")
कुलकः । प्लवङ्गः । पर्कटीद्रुमः । कारण्डवविहगः । प्लव्दः । प्रतिगतिः । इति मेदिनी । वे, १६ ॥ प्रेरणम् । प्लुः । इति शब्दरत्नावली ॥ जलान्नम् । इति हेमचन्द्रः । ३ । ५४६ ॥ पलवः । इति त्रिकाण्डशेषः ॥ पोलो इति भाषा ॥ जलकुक्कुटः । इति मिताक्षरा ॥ (यथा, मनौ । ५ । १२ ।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम् ।
सारसं रज्जुवालञ्च दात्यूहं शुकसारिके ॥"
वक्रविशेषः । यथा, रामायणे । २ । १०३ । ४३ ।
"रथाङ्गहंसा मत्तूहाः प्लवाः कारण्डवाः परे ।
तथा पुंस्कोकिलाः क्रौञ्चा विसंज्ञा भेजिरे दिशः ॥"

"प्लवा वकविशेषाः ।" इति तट्टीकायां रामानुजः ॥) जलचरपक्षिमात्रम् । यथा,—
"हंससारसकाकाम्बवकक्रौञ्चसरारिकाः ।
नन्दीमुखीशकादम्बा बलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥"
एतेषां मांसगुणाः ।
"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥"
इति भावप्रकाशः ॥

प्लवकः, पुं, (प्लवते इवेति । प्लु + अच् । ततः स्वार्थे संज्ञायां वा कन् ।) खड्गधारादिनर्त्तकः । तत्पर्य्यायः । केलकः २ । इति त्रिकाण्डशेषः ॥ केकलः ३ नर्त्तुः ४ केलिकोवः ५ कलायनः ६ । इति शब्दरत्नावली ॥ चक्काल: । इति हलायुधः ॥ (सन्तरणोपजीवी । यथा, महाभारते । १३ । २३ । १५ ।
"गायना नर्त्तकाश्चैव प्लवका वादकास्तथा ।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम् ॥")
भेकः । प्लवः । इति राजनिर्घण्टः ॥

प्लवगः, पुं, (प्लवेन प्लुतगत्या गच्छतीति । गम् + "अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) वानरः । (यथा, रघुवंशे । १२ । ७० ।
"स सेतुं बन्धयामास प्लवगैर्वनगोचरैः ।
रसातलादिवोन्मग्नं गौरं स्वप्नाय भोगिनः ॥")
भेकः । सूर्य्यसारथिः । इति मेदिनी । गे, ४२ ॥ प्लवपक्षी । इति शब्दरत्नावली ॥ गिरीषवृक्षः । इति राजनिर्घण्टः ॥

प्लवगतिः, पुं, (प्लवेन गतिर्यस्य ।) भेकः । इति शब्दचन्द्रिका ॥ (प्लवस्य भेकादेर्गतौ प्लुतगतौ च, स्त्री ॥)

प्लवङ्गः, पुं, (प्लवेन प्लुतगत्या गच्छतीति । गम् + "गमश्च ।" ३ । २ । ४७ । इति खच् । "खच डिदा वाच्यः ।" इति ङित् । ङित्वात् टेर्लोपः । मुमागमः ।) वानरः । इत्यमरः । २ । ५ । ३ ॥ (यथा, रामायणे । २ । २५ । १८ ।
"प्लवङ्गा ऋक्षिका दंशा मशकाश्चैव कानने ।
वरीवृषाश्च कीटाश्च माभूवन् गहने तव ॥"
"प्लवङ्गा वानराः ।" इति तट्टीकायां रामानुजः ॥) नद्यः । इति शब्दचन्द्रिका ॥ प्लवङ्गः । इति राजनिर्घण्टः ॥

प्लवङ्गमः, पुं, (प्लवेन गच्छतीति । गम् + "गमश्च ।" ३ । २ । ४७ । इति खच् । सुमागमः ।) भेकः । वानरः । इत्यमरः । ३ । ३ । १३७ ॥ (यथा, रामायणे । ४ । ६२ । ११ ।
"एष्यन्ति प्रेषिताश्चैव रामदूताः प्लवङ्गमाः ।
आख्येया राममहिषी त्वया तेभ्यो विहङ्गम ! ॥")
प्लुतगतियुक्ते, त्रि ॥

प्लवङ्गः, त्रि, (प्लवते इति । प्लु + खच् ।) प्लवङ्गः । कामनिरङ्कुशभूत्यादिः । यथा,—

"प्रागुदक्प्लवनां भूमिं कारयेत् यजतो नरः ॥"
इति तिथ्यादितत्त्वे मत्स्यपुराणम् ॥
(क्ली, प्लु + ल्युट् । प्लवः । यथा,—
"प्लवनञ्चासनं वापि नेच्छेद्वापि प्लवोत्तरम् ।
नाभ्यासपौ न प्लवनं न यानं नापि वाहनम् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

प्लावं, क्ली, (प्लवस्य फलम् । "प्लवादिभ्योऽञ् ।" ४ । ३ । १६४ । इत्यञ् । विधानसामर्थ्यात् तस्य फले न लुक् ।) प्लक्षवृक्षस्य फलम् । इत्यमरः । २ । ४ । १८ ॥ प्लवस्य विकारः । प्लवस्य समूहः । प्लवस्य भावः । प्लवस्येदम् । प्लवस्य हितम् । इत्यादि आकरग्रन्थम् ॥ (प्लवसम्बन्धिनि, त्रि । यथा,—
"नैयग्रोध औदुम्बर आश्वत्थ प्लाक्ष इत्यौभो भवन्त्येते वै गान्धर्व्वाप्सरसां गृहाः स्त्र एव॥"
इति तैत्तिरीयसंहितायाम् । ३ । ४ । ८ । ४ ॥)

प्लावनं, क्ली, (प्लु + णिच् + ल्युट् ।) प्लवप्रयत्नोर्द्ध्वप्रापणम् । उथ्लन इति भाषा । यथा,—
"तापनं छेदनं तैलानां प्लावनं गोरसस्य च ।
तस्मात्सुदृतं शुद्धेत् कठिनन्तु पयो दधि ॥"
इति शुद्धितत्त्वम् ॥ * ॥
मज्जनम् । वस्तुतरजलसंयोगः । यथा,—
"एतत् श्रुत्वा वचो राजा प्राप्तिस्तत भगीरथः ।
यत्र तानि शरीराणि सागराणां महात्मनाम् ॥
प्लावनार्थं नरश्रेष्ठ ! पुण्येन सलिलेन ह ॥"
इति महाभारते । ३ । १११ अध्यायः ॥

प्लाविनं, त्रि, (प्लु + णिच् + क्तः ।) जलादिमज्जनादि । यथा,—
"सुप्रसन्नां सुवदनां कलहारैर्निजान्तराम् ।
सुधाप्लाविनभूपृष्ठामाद्रगन्धानुलेपनाम् ॥"
इति गङ्गावाक्यावली ॥
(यथा च देवीभागवते । २ । ८ । १० ।
"पुरी सा वासुदेवस्य प्लावितोदधिना तदा ॥")

प्लिह, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-परः०-सक०-सेट् ।) अन्तःखण्डतीययुक्तः । ङ, प्लेहते । इति दुर्गादासः ॥

प्लिहा, [न्] पुं, (प्लेहते वृद्धिं गच्छतीति । प्लिह + कनिन् ।) प्लीहरोगः । यथा, यज्ञतन्त्रिहान्नानि सुखादिव चिरन्नन्ति वैद्यकम् । इत्यमरटीकायां भरतः ॥ (यथा, याज्ञवल्क्ये । ३ । ८ ।
"वपावसावहननं नाभिः क्लोम यकृत् प्लिहा ।")

प्लीहन्, पुं, (प्लीहानं वर्द्धयति । वृध + टक् ।) वृक्षविशेषः । रोहड़ा इति ख्यातः । तत्पर्य्यायः । रोही २ रोहितकः ३ प्लीहशत्रुः ४ दाडिमपुष्पकः ५ मांसदलः ६ यज्ञद्रुमी ७ वल्लच्छदः ८ । इति शब्दचन्द्रिका ॥ रौहितेयः ९ रोहितः १० रोहीतकः ११ रोही १२ । इति शब्दरत्नावली ॥ (अस्य गुणाः रोहितकशब्दे द्रष्टव्याः ॥)

प्लीहशत्रुः, पुं, (प्लीह्नः शत्रुर्नाशकत्वात् ।) प्लीहन्वृक्षः । इत्यमरः । २ । ४ । ४६ ॥ (यथा, वैद्यकरत्नमालायाम् ।
"रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ॥")

प्लीहा

प्लीहा, स्त्री, (प्लिह + क। एषोदरादित्वात् दीर्घः। स्त्रियां टाप्।) प्लिहरोगः। यथा, यत्तत्प्लीहि च लक्ष्यते। इति वाग्भटस्थानं। इत्यमरटीकायां भरतः॥

प्लीहा, [न्] पुं, (प्लिह + "अशुचिजनिपूषनृप्लीह-प्लिति।" उणा० १। १५८। इति कनिन् प्रत्ययेन साधुः।) कुक्षिवामपार्श्वस्थमांसखण्डम्। पिला इति ख्यातम्। तत्पर्य्यायः। गुल्मः २ प्लिहा ३। इत्यमरभरतौ॥ अस्य निदानम्।

"विदाह्यभिष्यन्दिरसस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ
प्लीहेत्यमेतज्जठरं वदन्ति॥
तद्वामपार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥"

इति माधवकरः॥ *॥

रक्तजस्य तस्य लक्षणम्।

"क्रमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम्।
मोहो रक्तोद्गरत्वञ्च ज्ञेयं रक्तजलक्षणम्॥"*॥

पैत्तिकस्य तस्य लक्षणम्।

"ज्वरः सपिपासश्च सदाहो मोहसंयुतः।
पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते॥"

श्लैष्मिकस्य तस्य लक्षणम्।

"प्लीहा मन्दरुजः स्थूलः कठिनो गौरवान्वितः।
अरोचकयुतः शीतः प्लीहा कफज उच्यते॥"

वातिकस्य तस्य लक्षणम्।

"नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीडितः।
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते॥
दोषत्रितयरूपाणि प्लीह्यसाध्ये भवन्ति हि॥"

अथ तस्य चिकित्सा।

"पानयो युक्तितः क्षारः क्षीरेणादधिसुक्तिजः।
तथा दुग्धेन पानस्याः पिप्पल्यः प्लीहशान्तये॥१॥
अक्षप्रमं सजवणं पुटदग्धं सुचूर्णितम्।
निहन्ति मस्तुना पीतं प्लीहानमपि दारुणम्॥२॥
शिग्रु चिकटुकं कुष्ठं यवक्षारश्च सैन्धवम्।
मातुलुङ्गरसापेतं प्लीहशूलहरं रजः॥ ३॥
पालाशक्षारतोयेन पिप्पली परिभाविता।
प्लीहगुल्मार्शसां मन्थी वह्निमान्द्यहरी मता॥४॥
रक्तेन जम्बीरफलस्य शुद्ध-
नाभीरजः पीतमयप्रमेव।
शाखप्रमाणं गुमयेदशेषं
प्लीहामयं कूर्मसमानमाशु॥ ५॥
शरपुङ्खमूलकल्कक्षकेशाजोक्षितः पीतः।
प्लीहानं यदि न हरते श्लेष्मोऽपि तदा जले
प्लवते॥ ६॥
सुपक्वबदरारक्त रसः क्षौद्रसमन्वितः।
पीतः प्रथमतश्चैव प्लीहानं नेह संशयः॥ ७॥
सुस्निग्धं शाखजीपुष्पं निशापर्य्युषितं नरः।
राजिकाचूर्णसंयुक्तं खादेत् प्लीहोपशान्तये॥"८॥

इति भावप्रकाशः॥ *॥

प्लुषिः

"पिप्पलीमधुपानाच्च यथा मधुरभोजनात्।
प्लीहा विनश्यते क्षिप्रं तथा॥ ९॥
कैतकीपत्रजं क्षारं घृतेन सह भक्षयेत्।
तक्रेण घृतपुष्टाभ्यां पीत्वा प्लीहां विना-
शयेत्॥" १०॥

इति गारुडे १८७। १८८ अध्यायौ॥

("श्लोणितकफप्रसादजं हृदयं तदाश्रया हि धमन्यः प्राणवहाः। तस्याधो वामतः प्लीहा फुप्फुसश्च॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥ अस्य सहेतुकलक्षणादीनि यथा,—

"अग्निस्त्यानिसंक्षोभाद् यानयानाभिचेष्टितैः।
अतिव्यवायभाराध्ववमनव्याधिकर्शनैः॥
वामपार्श्वाश्रितः प्लीहा श्वयुः स्थानात् प्रवर्द्धते।
श्लोणितं वा रसादिभ्यो विवृद्धं विवर्द्धयेत्॥

इति तस्य प्लीहा कठिनोऽश्मीलेवादौ वर्द्धमानः कक्षोपसंस्थान उपलभ्यते स चोपेक्षितः क्रमेण कुक्षिं जठरमग्न्याधिष्ठानञ्च परिक्षिपन्नुदरमभिनिर्व्वर्त्तयति॥

तस्य रूपाणि। दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपासाङ्गमर्द्दच्छर्द्दिमूर्च्छाङ्गसादकासश्वासहृद्दुष्परानाहाग्निनाशकाश्यास्यवैरस्यपर्व्वभेदकोष्ठवातशूलान्यपि चोदरमरुद्वर्णं विवर्णं वा नीलहरितहारिद्ररोजिमद्भवति।"

चिकित्सास्य यथा,—

"पिप्पलीं तिलकं हिङ्गु नागरं हस्तिपिप्प-
लीम्।
भल्लातकं प्रियङ्गुफलं त्रिफलां कटुरोहिणीम्॥
देवदारुहरिद्रे द्वे सरलानिविषे वचाम्।
कुष्ठं सुरसं तथा पञ्च लवणानि प्रकल्प्य च।
दधिसर्पिर्वसातैलमद्ययुक्तानि दाहयेत्॥
अन्तर्धूममतः क्षारात् विडालपदकं पिबेत्।
मदिरा दधिमण्डोष्णजलारिष्टसुरासवैः॥
क्षुद्रोगं श्वयथुं गुल्मं प्लीहार्शो जठराणि च।
विद्रधिकाहृदावर्त्तं वातष्ठीलाञ्च नाशयेत्॥"

इति चरके चिकित्सास्थानेऽष्टादशेऽध्याये॥)

प्लीहारिः, पुं. (प्लीहायाः अरिः शुक्लसाधकत्वात्।) अम्लवेतसः। इति शब्दचन्द्रिका॥ (प्लीहनाशकवटिकौषधविशेषः। यथा,—

"हिङ्कषं लौहभस्मापि कर्षं ताम्रं प्रदापयेत्।
शुद्धसूतं तथा गन्धं कर्षमात्रं भिषग्वरः॥
खरगोजिनं पलं भस्म लिम्पाकाङ्क्षीत्वचः पलम्।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिसंज्ञकम्॥
नवगुञ्जामितं खादेदथ निम्बं हि पूतवान्।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः॥"

इति प्लीहारिरसः॥ *॥

इति वैद्यकरसेन्द्रसंग्रहे प्लीहाधिकारे॥)

प्लीहाशत्रुः, पुं. (प्लीहायाः शत्रुः।) प्लीहघ्नवृक्षः। इति केचित्॥

प्लुषिः, पुं, (प्लुष्यति दहतीति। प्लुष दाहे + "प्लुषिकुषिशुषिभ्यः कित्।" उणा० १। १५५। इति कित्।) अग्निः। इत्युणादिकोषः। क्षेत्रः। यद्वदाहः। इति संक्षिप्तसारोणादिवृत्तिः॥

प्लुष्टः

प्लुष, ड दाहे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) अन्तःशल्यतीव्रयुक्तः। ड, प्लवते। इति दुर्गादासः॥

प्लुत, क्ली, (प्लु + क्तः।) अन्यगतिविशेषः। स च त्वरया भाव्येन गतिः। इत्यमरभरतौ॥ (यथा, भट्टिकाव्ये। ३। १३२।

"अथ यः पुच्छतोऽस्य ग्रीवैरविग्रहो ध्रुवः।
अन्तरुत्पद्यते कश्चित्तदप्लुत उच्यते॥")

तिर्य्यग्गतिः। इति कलिङ्गः॥ (यथा, कथासरित्सागरे। २७। १५६।

"तिर्य्यक्चक्षुस्तिर्य्यगेवास्य पेतुर्वक्रप्लुता जगाः॥")

प्लुतः, पुं, (प्लुतं प्लुतवद्गतिरस्त्यस्मीति। प्लुत + अच्।) त्रिमात्रवर्णः। इति मेदिनी। ते, ३५॥ यथा,—

"एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥"

इति दुर्गादासादिधृतप्राचीनकारिका॥

(तथाच।

"दूराह्वाने च गाने च रोदने च प्लुतो मतः॥"

इति च दुर्गादासधृतवचनम्॥

प्लु + क्तः।) अन्यगतियुक्ते, त्रि॥ (यथा, हरिवंशे। ८८। ८४।

"रामादनन्तरं कृष्णः प्लुतो वै वीर्य्यवत्तरः।
ताभ्यामेव प्लुताभ्याञ्च चचालोद्भ्रान्तितो गिरिः॥"

अन्तर्गोजर्थत्वात् भ्रान्तिः। यथा, हरिवंशसंहितायाम्। ५। ५४।

"सञ्चरन्ते तमसि जगज्जलप्लुतं भवति सुदिन-
मभयञ्च॥"

सिक्तः। यथा, याज्ञवल्क्ये। १। २३५।

"अग्नौ करिष्यन्नादाय पृक्षाज्यं घृतप्लुतम्॥"

व्याप्तः। यथा, भागवते। ३। २। १७।

"यस्यानुरागप्लुतहासरास-
लीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल लब्धशोभाः॥")

प्लुष, ड दहि। भस्मीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। ड्लावेट्।) ड, प्लोषित्वा प्लुष्टा। इति दुर्गादासः॥

प्लुष, ग सेके। पूर्त्तौ। क्षेपे। इति कविकल्पद्रुमः॥ (क्रया०-पर०-सक०-क्षेपे अक०-सेट्।) ग, प्लुष्णाति। इति दुर्गादासः॥

प्लुष, य ल दहि। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःशल्यतीव्रयुक्तः। य, प्लुष्यति। ल, अप्लुषत्। पुप्लोष। इति दुर्गादासः॥

प्लुषः, पुं, दहनम्। इति शब्दमालाभाषायां अन्तप्रत्ययः॥

प्लुष्टः, त्रि, (प्लुष् + क्तः। "यस्य विभाषा।" ७। २। १५। इति इट् न।) दग्धः। इत्यमरः। ३। १। ६६॥ (यथा, ऋतुसंहारे। १। २७।

"पटुतरपवनाहताद् द्रुतप्लवप्रसरोद्धताः
प्रदवपवनवेगतः क्षितिरुहांशुष्कपर्णाः॥"

अस्य लक्षणं यथा,—
"तच्च यद्विवर्णं भ्रुवतेऽतिमात्रं तत् भ्रुटम् ॥
चिकित्साह्य यथा,—
"दन्तस्योपग्रमार्थाय चिकित्सां संप्रचक्षते ।
भ्रुटस्याग्निप्रतप्तेन कार्य्यमुल्लघनौषधम् ॥
शरीरे क्षिप्तभूयिष्ठे क्षिप्तं भवति भोजितम् ॥
प्रलघ्या क्षुदकं पीतं स्कन्दयत्यतिभोजितम् ।
तस्मात् सुखयति क्षुण्णं तत् पीतं कथञ्चन ॥"
इति सुश्रुते सूत्रस्थाने द्वात्रिंशेऽध्याये ॥)

फुस, इर् य दाहे । विभागे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) अन्तःस्थद्वितीययुक्तः । इर्, अफुसत् आफोसीत् । य, फुस्यति । इति दुर्गादासः ॥

फेव, फ्रु ङ सेवने । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) अन्तःस्थद्वितीययुक्तः । फ्रु, अपिफ्रेवत् । ङ, फ्रेवते । इति दुर्गादासः ॥

फ्रोषः, पुं, (फ्रुष दाहे+भावे घञ् ।) दाहः । इत्यमरः । १ । २ । ६ ॥ (यथा, श्रीकण्ठचरिते । ४ । १७ ।
"हरीषु किन्नरीलोकं धत्ते यः फ्रोषविप्लवे ।
न्यासीन्नतमनङ्गेन भाक्तागारमिव स्वकम् ॥"
पित्तविकारविशेषः । तद्यथा । "पित्तविकारा-ञ्चत्वारिंशदत जर्द्धं व्याख्यास्यन्ते । तद्यथा ओषश्च फ्रोषश्च दाहश्च दवथुश्च धूमकश्चाम्लकश्च इत्यादिना ॥" इति चरके सूत्रस्थाने विंशेऽध्याये ॥)

फ्ला, ल भक्षणे । इति कविकल्पद्रुमः ॥ (अदा०-पर०-सक०-अनिट् ।) ल, फ्लाति । इति दुर्गादासः ॥

फ्ला, स्त्री, (फ्ला+भावे क्विप् ।) भक्षणम् । इति त्रिकाण्डशेषः ॥

फ्लातं, त्रि, (फ्ला+क्तः ।) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥

फ्लानं, क्ली, (फ्ला+भावे ल्युट् ।) भोजनम् । इति हेमचन्द्रः । ३ । ८८ ॥

फ

फ, पकारः । द्वाविंशतितमव्यञ्जनवर्णः । (पवर्गस्य द्वितीयवर्णश्च ।) अस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् ।
"उपूपध्मानीयानामोष्ठौ ॥") तस्य तत्त्वं यथा,—
"फकारं शृणु चार्वङ्गि ! रक्तविद्युल्लतोपमम् ।
चतुर्व्वर्णप्रदं वर्णं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं सदा त्रिगुणसंयुतम् ।
आत्मादितत्त्वसंयुक्तं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रे पञ्चमपटलः ॥ * ॥
"वक्रा वामगता रेखा ततोऽधःसङ्गता भवेत् ।
तस्मादूर्द्धगता भूत्वा दक्षमारभ्य कुण्डली ॥
ब्रह्मा रुद्रश्च विष्णुश्च कुण्डली ब्रह्मरूपिणी ।
माया वामाद्दक्षिणतः क्रमशः परिकीर्त्तिता ॥"
इति वर्णोद्धारतन्त्रम् ॥

तत्पर्य्यायः ।
"फकारश्च महेशानि ! शिखी चैव जनार्द्दनः ॥"
इति रुद्रयामलोक्तवर्णाभिधानम् ॥
अस्य ध्यानं यथा,—
"प्रलयाम्बुदवर्णाभां कलञ्जिकां चतुर्भुजाम् ।
भक्ताभयप्रदां नित्यां नानालङ्कारभूषिताम् ॥
एवं ध्यात्वा फकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"फः सखी दुर्गिणी धृत्वा वामपार्श्वे जनार्द्दनः ।
वधा घोरः शिखा रौद्री फेत्कारः घ्राणिनी-प्रियः ॥
उमा विहङ्गमः कालः कुञ्जिनीप्रियपावकौ ।
प्रलयाग्निर्नीलपादोऽक्षरः पशुपतिः शुभी ॥
फुत्कारो यामिनी वक्ता पावनो मोहवल्लभः ।
निष्फलत्यागहङ्कारः प्रयागो ग्रामणीः फलम् ॥"
इति नानातन्त्रशास्त्रम् ॥
(पद्मादौ अस्य प्रयोगेन भयसम्भावना । यदुक्तं हरत्नाकरटीकायाम् ।
"रोधः सौख्यं सुदं नः सुखभयमरणक्लेशदुःखं पवर्गः ॥")

फं, क्ली, (फक्क असह्यावहारे+डः ।) रूक्षोक्तिः । फुत्कृतिः । निष्फलभाषणम् । इति मेदिनी । फे, १ ॥

फः, पुं, यज्ञसाधनम् । स्फ्यम् । झञ्झावातः । इति मेदिनी । फे, १ ॥ वर्द्धकः । जम्भानिष्क्रारः । स्फुटः । फललाभः । इति विश्वः ॥ संज्ञाविशेषः । यथा । "हसोऽन्तः फः । हसौ विरामश्च फसंज्ञः स्यात् ।" इति मुग्धबोधव्याकरणम् ॥

फक्क, असह्यावहारे । ग्लानौ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोपघः । फक्कति खलः कुत्सितं व्यवहरतीत्यर्थः । फक्कति वृद्धो मन्दं गच्छतीत्यर्थः । इति दुर्गादासः ॥

फक्किका, स्त्री, (फक्क+"घात्वर्थनिर्देशे ण्वुल् वक्तव्यः ।" इति वार्त्तिकोक्त्या ण्वुल् । टापि अत इत्वम् ।) असह्यावहारः । फांकि इति भाषा । तत्पर्य्यायः । घोषम् २ देष्यम् ३ पूर्व्वपक्षः ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । २ । ६५ ।
"फक्किकाभाषितभाष्यफक्किका
विषमा कुण्डलनामवापिता ॥")
न्यायसम्बन्धिव्याख्या । यथा,—
"श्रीमता मथुरानाथतर्कवागीशधीमता ।
विधदीक्ष्य दर्य्यन्ते दिनीयमणिफक्किकाः ॥"
इत्यनुमानखण्डटीकारम्भे मथुरानाथः ॥

फञ्जिका, स्त्री, (भनक्ति रोगानिति । भञ्ज आमर्दने+ण्वुल् । पृषोदरादित्वात् भस्य फः । टापि अत इत्वम् ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८६ ॥ (यथा, वैद्यकरत्नसारसंग्रहे ज्वराधिकारे दृढचूडामणिरसे ।
"निर्गुण्डी फञ्जिका वासा रविमूलचिकाटके: ॥"
"फञ्जिका ब्राह्मणयष्टिका ।" इति तट्टीका ॥)
देवताड़ः । दुरालभा । इति शब्दचन्द्रिका ॥

फञ्जिपर्णिका, स्त्री, (भनक्ति रोगानिति भञ्जि । पृषोदरादित्वात् भस्य फः । फञ्जि रोगहारकं पर्णं यस्याः । कप् । टाप् । अत इत्वम् ।) आखुपर्णी । इति रत्नमाला ॥ (विस्तृतिरस्या आखुपर्णीशब्दे ज्ञातव्या ॥)

फञ्जी, स्त्री, (भनक्ति रोगानिति । भञ्ज+अच् । पृषोदरादित्वात् भस्य फः । गौरादित्वात् ङीष् ।) भार्गी । इति राजनिर्घण्टः ॥ (यथा, वैद्यकचक्रपाणौ ज्वराधिकारे ।
"अल्पता नागरफञ्जीव्याघ्रीपर्णीवसाधितः
क्वाथः ।
पीतः सकणाचूर्णः कासश्वासौ निहन्त्याशु ।"
तथाचास्या गुणाः हारीते प्रथमस्थाने दशमेऽध्याये ।
"वत्सादनी तथा फञ्जी तेजपर्णी तु सिंहिका ।
चक्रमर्द्दक इत्यन्ये दुर्ज्ञेरा वातकोपना: ॥")

फट्, य, अनुकरणशब्दः । अस्त्रबीजम् । यथा । फड़स्त्रं शस्त्रमायुधम् । इति बीजवर्णाभिधानम् ॥ * ॥ प्राणिकुम्भचालने अर्घ्यपात्रचालने अर्घ्यजलेन पूजोपकरणाभ्युक्षणे अन्तरीक्षगविघ्नोत्सारणे विकिरक्षेपणे गन्धपुष्पाभ्यां करशोधने अघमर्षणे पापपुरुषनाड़ने कराङ्गन्यासे नैवेद्यप्रोक्षणे होमाग्नेः क्रव्यादांशत्यागे होमाग्न्यावाहने तदग्निप्रोक्षणादौ च फड़िति मन्त्रस्य प्रयोगः ॥ (यथा, भागवते । ६ । ८ । १० ।
"सविसर्गं फड़न्तं तत् सर्व्वास्त्रेषु विनिर्दिशेत् ॥"
विघ्नौघादौ, त्रि । यथा, वाजसनेयसंहितायाम् । ७ । ३ । "देवाश्चयो यमो वेड़े सतसत्यसुपरि प्रुता भङ्गेन हतोऽसौ फट् ॥"
"असौ देष्यो हतो निहतः सन् फट् विघ्नौघो भवत् निष्फला विघ्नरचो अस्य क्रियमाणस्येतरूपम् । फलतीति फट् डलयोरैक्यम् । स्वाहाकारस्थाने फड़ित्यभिचारे प्रयुज्यते ।" इति तन्त्रसारे वेददीपे महीधरः ॥)

फटः, पुं क्ली, (स्फुट विकसने+घञ्यञ्च् । पृषोदरादित्वात् साधुः) फला । इत्यमरभरतौ ॥
फटा, स्त्री, (फट+स्त्रियां टाप् ।) फला । (यथा, पद्मपुराणे । ३ । ८३ ।
"निर्व्विशेषापि सर्पस्य कर्णेषा महती फटा ।
विषं भवति मा वापि फटाटोपो भयङ्करः ॥")
दम्भः । इति मेदिनी । टे, २३ ॥ कितवः । इति हेमचन्द्रः ॥ * ॥
"स्यात् पवर्गद्वितीयादि फटायान्तु स्फटापि
च ॥"
इतिभरतधृतशब्दभेदः ॥

फड़िङ्गा, स्त्री, (फड़िति शब्दं डङ्गति गच्छतीति । डङ्ग गतौ+अच् । टाप् ।) झिङ्गिका । इति शब्दचन्द्रिका ॥ फड़िङ्ग इति भाषा ॥

फण, ण निःस्नेहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) फेणतुः फणतुः । निःस्नेहः अनायासेनोत्पत्तिः । फणति वाञ्छितं श्रीमताम् । अनायासेन जातम् । अस्नेह आत्मस्व

निष्ठायां अनायासजातं फाण्टं इत्यमरः॥ अतएव रमाणार्थोऽपि घटादौ पञ्च गतौ इत्यत्र गतेरर्थत्व। फाण्यति जगोऽनायासेन जनयतीत्यर्थे इत्याह। इति दुर्गादासः॥

फण, मि अ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मि, फणयति फाणयति। अ, पैणयतुः पफणतुः। इति दुर्गादासः॥

फण:, [च], (फणति विस्तृतिं गच्छतीति। फण+अच्।) सर्पस्य विस्तृतमस्तकम्। यथा। फटायान्तु फणा द्वयोरित्यमरः॥ प्रधानोर्ध्वं कारणं फणम्। इति क्षीरस्वामी॥ सत्पर्य्यायः। फणा २ फणम् ३ फटा ४ फट: ५ स्फट: ६ स्फटा ७। इत्यमरभरतौ॥ दर्व्वी ८ भोग: ९ स्फुट: १०। इति हेमचन्द्र:।४।३८१॥ स्फुटा ११ दर्वि: १२ फटी १३। इति शब्दरत्नावली॥ (यथा, महाभारते।१२।११४।१५।

"परिवादं ब्रुवाणो हि दुरात्मा वै महाजने।
प्रकाशयति दोषांस्तु सर्प: फणमिवोच्छ्रितम्॥"

जन्तूनां मर्म्मांण्यविशेष:। यथा, सुश्रुते।३।६।

"जन्तूनां मर्म्मांण्यत: शङ्खौ धमन्योऽसृक् मातृकाः द्वे लोहितके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावपाङ्गौ द्वायुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि ब्रह्मलाटकाधिपतिरिति॥")

फणकर:, पुं, (फण: कर इवास्येति। फणस्य करो वा।) सुजङ्ग:। इति शब्दरत्नावली॥

फणधर:, पुं, (धरतीति। धृ+अच्। फणस्य धर:।) सर्प:। इति शब्दरत्नावली॥

फणधरधर:, पुं, (फणधरस्य सर्पस्य धर:।) शिव:। इति कविकल्पलता॥

फणभृत्, पुं, (फणं बिभर्त्तीति। भृ+क्विप् नुक् च।) सर्प:। इति हेमचन्द्र:।४।३६६॥ (यथा, राजेन्द्रकर्णपूरे।७।

"व्याघ्रोमतङ्गे व्यगाद्धवत्ये निर्धौतदिङ्मुक्तके देवत्वदृग्यन्ति प्रणान्तमसि प्रौढे जगत् प्रेयसि।
केलाद्यन्ति महीभृत: फणभृत: प्रोद्यन्ति पाथोधय:
क्षीरोदन्ति सुरद्विषन्ति करिणो हंसन्ति पुंस्कोकिला:॥")

फणवान्, [न्] पुं, (फणोऽस्यास्तीति। फण+मतुप्। मस्य व:।) सर्प:। इति शब्दरत्नावली॥

फणा, स्त्री, (फणति प्रसारसङ्कोचं गच्छतीति। फण गतौ+अच्। टाप्।) सर्पफटा। इत्यमर:।१।८।६॥ (यथा, अभिज्ञानशाकुन्तले ६ अङ्के।

"स्खलति चलितेन्धनोऽग्निर्विप्रकृत: पन्नग: फणां कुरुते।
तेजस्वी संक्षोभात् प्राय: प्रतिपद्यते तेज:॥")

फणाकर:, पुं, (करोतीति। कृ+अच्। फणाया कर:।) सर्प:। इति शब्दरत्नावली॥

फणाधर:, पुं, (धरतीति। धृ+अच्। फणाया धर:।) सर्प:। इति शब्दरत्नावली॥

फणाभर:, पुं, (बिभर्त्तीति। भृ+घञ्+अच्। फणाया भर:।) सर्प:। इति हारावली। १५॥

फणावान्, [त्] पुं, (फणाऽस्यास्तीति। फणा+मतुप्। मस्य व:।) सर्प:। इति शब्दरत्नावली॥

फणिकेसरं, क्ली, (फणीव केसरोऽस्य।) नागकेसरम्। इति राजनिर्घण्टः॥ (गुणादयोऽस्य नागकेसरशब्दे ज्ञातव्या:॥)

फणिखेल:, पुं, (फणिना सह खेलतीति। खेल+अच्।) भारतीपक्षी। इति चिकाण्डशेष:॥ भारद इति भाषा॥

फणिचक्रं, क्ली, (फण्याकारं चक्रम्।) विवाहादिकर्म्मसु शुभाशुभज्ञानार्थं सप्तविंशतिनक्षत्रघटितसर्पाकारचिनाङ्किकचक्रम्। यथा,—

"अश्विन्यादि लिखेच्चक्रं सर्पाकारं चिनाङ्किकम्।
तत्र वेधवशाज्ज्ञेयं विवाहादौ शुभाशुभम्॥
चिनाङ्कीवेधनक्षत्रमश्विन्याद्यायुगोत्तरा:।
हस्तेन्द्रमूलवारुण्य: पूर्व्वभाद्रपदास्तथा॥
याम्य: सौम्यो गुरुर्योनिश्चित्रा मित्रजलाश्रयम्।
धनिष्ठा चोत्तरा भाद्रा मध्यनाड्यां व्यवस्थिता:॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके।
उत्तरा अवणा पौष्णं एतन्नाड्यां व्यवस्थिता:॥
अश्व्यादिनाड्यावेधर्क्षं षष्ठं द्वितीयकं क्रमात्।
याम्यादितुर्य्यतुर्य्यञ्च कृत्तिकादिदृष्टकम्॥
एवं निरीक्षयेद्वेधं कन्यामर्क्षे गुरौ सुरे।
पतयस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे॥
एकनाड्यस्यधिष्ठानि यदि स्युर्वरकन्ययो:।
तदा वेधं विजानीयादृग्गुर्व्वादिषु नर्त्तव च॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वध:।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो भवेत्।
द्वयोर्जन्मभयोर्व्विद्धे न कर्त्तव्यं कदाचन॥
एकनाड्यां स्थिता चेत् स्याद्वरर्क्षं नाशाय चाङ्गना।
तस्मान्नाड्यधो वीक्ष्यो विवाहे शुभमिच्छता॥
प्राङ्नाथा वेधतो भर्त्ता मध्यनाड्यो भयन्तथा।
पृष्ठनाड्यां वधे कन्या म्रियते नात्र संशय:॥
एकनाड्यां स्थिता यत्र गुरुर्मन्त्रश्च देवता।
तत्र वेधं रुजं मृत्युं क्रमेण फलमादिशेत्॥
समासन्ने वधे शीघ्रं दूरवेधे चिरेण तु।
वेधान्तरभमानेन वर्षे दुष्टं प्रजायते॥
प्रभु: पतयाङ्गना मित्रं देशो ग्राम: पुरं गृहम्।
एकनाड्यागता भक्ष्या अभक्ष्या वेधवर्ज्जिता:।
एकराश्यादियोगे तु नाड्यादोषो न विद्यते॥"

इति ज्योतिस्तत्त्वम्॥

अपि च।

"सर्पाकारो घटनविशेष:
क्षत्तिकादियमदैवतर्क्ष:।
एषे सुतहतिसकुटरोग:
क्रोडे कान्तापुत्रवियोग:।
मध्ये रेखे विहितविवाह
उभयोर्भरणं वदति वराह:॥
क्रोडे एषे यत्र उद्दामम्
मध्ये क्रोडे बहुसम्मानम्।
मध्ये एषे भवति विवाहो
बहुसुतवित्तमिति च मुनिराह॥"

इति समयप्रदीप:॥*॥

तस्य विन्यासो यथा,—

एषे १ ६ ७ १२ १३ १८ १९ २४ २५



मध्ये २ ५ ८ ११ १४ १७ २० २३ २६

क्रोडे ३ ४ ९ १० १५ १६ २१ २२ २७॥

फणिजिह्वा, स्त्री, (फणिजिह्वेव आकृतिरस्यस्या इति अच्।) महाशृतावरी। महाशतमूली। इति राजनिर्घण्टः॥

फणिजिह्वक:, पुं, (फणिनामुज्जिह्वक: वह्निष्कारक उत्पादक इति यावत्। पृषोदरादित्वात् साधु:। फणितुल्यबहुपत्रपुष्पत्वात् तथात्वम्।) क्षुद्रपत्रतुलसी॥ (रक्तवर्णतुलसी च। तत्पर्य्यायश्च यथा, वैद्यकरत्नमालायाम्।

"सुगन्धाको गन्धनामा तीक्ष्णगन्ध: फणिज्जक:॥")

जम्बीरभेद:। इति केचित्॥ जम्बीरसामान्य:। इति केचित्॥ तत्पर्य्याय:। सम्बीरज: २ मरुवक: ३ पृथ्वीपुष्प: ४ जम्बीर: ५। इत्यमरभरतौ॥ (यथा,—

"मारुतोऽसौ मरुवको मरुत्कररपि स्मृत:।
फणी फणिजिज्जकश्चापि पृथ्वीपुष्प: सम्बीरज:॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

फणिन्, त्रि, (फण गतौ+क्त:।) गत:। नि:क्रान्त:॥

फणितल्पग:, पुं, (फणी शेष एव तल्पं फणितल्पं तल्पिन् गच्छतीति। गम+ड:।) विष्णु:। सर्पशय्यायां गच्छति य:। इति व्युत्पत्ति:॥

फणिप्रिय:, पुं, (फणिनां प्रिय: भक्ष्यत्वात्।) वायु:। इति शब्दरत्नावली॥

फणिफेन:, पुं, (फणिनां फेन इव उग्रगुणत्वात्।) अहिफेन:। आफिं इति भाषा। यथा,—

"जातीफलं टङ्कणमम्लकञ्च
हिङ्गुलगन्धं परिमर्द्द्य यामम्।
भागद्वयं स्यात् फणिफेनकस्य
गान्धालिकापत्ररसेन मर्द्द्यम्॥"

इति रत्नावली॥

फणिवल्ली, स्त्री, (फणीव दीर्घा वल्ली।) नागवल्ली। इति राजनिर्घण्टः॥

फणिहल्ली, स्त्री, (फणिनो हल्लीति। हल्+ड+ङीप्।) गन्धनाकुली। इति राजनिर्घण्टः॥

फणिहृत्, स्त्री, (फणिनो हरति स्वगन्धेन अपसारयतीति। हृ+क्विप्। तुगागमश्च।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥

फणी, [न्] पुं, (फणाऽस्यास्तीति। फणा+"ब्रीह्यादिभ्यश्च।"५।२।११६। इति इनि:।) सर्प:। इत्यमरः॥ (यथाच सुश्रुते कल्पस्थाने ४ अध्याये।

"श्वेता दर्व्वीकरा: सर्पा: फणिन: शीघ्रगामिन:।
मण्डलैर्विविधैश्चित्रा: पृथवो मन्दगामिन:॥"

तद्दंशनप्रतीकारविधिर्यथा,—
"फणिनां विषवेगे तु प्रथमे घृतमिश्रितं हरेत् ।
द्वितीये मधुसर्पिर्भ्यां पाययेत्तदगदं भिषक् ॥
तस्यकर्म्मोद्भवे युक्त्या तृतीये विषनाशने ।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
घृतोपचारं कृत्वादौ भिषक्पञ्चमवस्थयोः ।
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम्॥
तमसे त्वपीड्येन शिरस्तीक्ष्णेन बोधयेत् ।
तीक्ष्णमेवाञ्जनं दद्यात्तीक्ष्णाग्र्यैश्च मूर्द्धि च ॥
कुर्य्यात्काकपदं चर्म्म साङ्गुष्ठं पिप्पिलं क्षिपेत्॥"
इति च सुश्रुते कल्पस्थाने पञ्चमेऽध्याये ॥)
सर्पिणीनामकौषधिः । इति राजनिर्घण्टः ॥
(केतुः । यथा, गरुडभावप्रकाशे ।
"कविरत्यन्तधवलः फणी ज्ञेयः शुभिस्तथा ॥"
मौलकं अस्य विषयो यथा,—
"रसो गन्धदृगः सोमोऽयं
फणी पिप्पलीवेष धुस्तूरपिष्टः
जयेत् सन्निपातं द्विगुञ्जाप्रमाणं
भवेदर्कमूलाम्बु सशोषघ्नगम् ॥"
इति वैद्यकरत्नसारसंग्रहे ज्वराधिकारे पञ्चवक्त्ररसे ॥ मरुवकनामौषधं यथा,—
"मारुतोऽसौ मरुवको मरुजरूपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थप्रथ्यः सभीरगः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)
फणीश्वरः, पुं. (फणिनामीश्वरः ।) अनन्तः । इति शब्दरत्नावली ॥
फणः, पुं, (फणति । फण गतौ + "अमन्ताड्डः ।" उणा० १ । ११३ । इति डः ।) जठरम् । इत्यादिकोषः ॥
फणकारी, पुं, (फणं इत्यव्यक्तशब्दं करोतीति । फण + णिनिः ।) पक्षिमात्रम् । इति शब्दचन्द्रिका ॥
फणं, क्ली, (फणतीति । फण + अच् । नस्य णत्वम् ।) फलकम् । इत्यमरटीकायां भरतः ॥
फणवकं, क्ली, पूगफलम् । इति हारावली ।२३७॥
फणशीर्षः, पुं, (स्फुरतीति । स्फुर स्फुरणे + "फर्फरीकाद्यच्च ।" उणा० ४ । २० । इति ईकन् षातोः फर्फराईयच्च ।) कपेटः । माईव, क्ली । इति मेदिनी । के, २०० ॥
फर्फरीका, स्त्री. (फर्फरीक + टाप् ।) पादुका । (स्फुरतीति ईकन् । टाप् । मनसि स्फुरणादेव तथात्वम् ।) मदनः । इति संक्षिप्तसारोणादिवृत्तिः ॥
फल, निष्पत्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।)
"इह नवसुकोमला मनीनां
हृदिकरसम्फलिता: फलन्ति भावाः ॥
इति भारविः ॥
निष्पादनेऽपि वाल्मीकिः ।
फलति स्म यस्य चरितस्तोत्राय दिवा गिरः ॥"
इति दुर्गादासः ॥
फल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ज, पाल; फल;। इति दुर्गादासः ॥
फल, छि आ भिदि । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट् ।) छि, फुल्लोऽस्ति । आ, फलितं फुल्लतं तेन । फलति काष्ठं कुठारः । इति दुर्गादासः ॥
फलं, क्ली, (फलतीति । फल निष्पत्तौ वि फला विशरणे वा + अच् ।) लाभः । (यथा, शकुन्तलायाम् । २ अङ्के ।
"शान्तमिदमाश्रमपदं स्फुरति च बाहुः
कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र ॥")
ग्रास्यम् । (यथास्य भक्षणविधिः ।
"फलानि सर्व्वभक्ष्याणि प्रदद्याद्वै दलेषु च ॥"
"फलानि सर्व्वभक्ष्याणि परिशुष्काणि यानि च ।
तानि दक्षिणपार्श्वे तु शुक्लानस्योपकल्पयेत् ॥"
इति सुश्रुते कल्पस्थाने । ४६ अध्यायः ॥
यथा च शकुन्तलायाम् ।
"उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ॥")
फलकम् । (शारिफलकार्थे यथा, महाभारते । ४ । १ । २४ ।
"वैदूर्य्यान् काञ्चनान् दान्तान् फलैर्ज्योतीरसैः सह ।
क्षौद्राद्यान् लोहितान्तांश्च निर्व्वत्स्यामि मनोरमान् ॥")
हेतुफलम् । इत्यमरः ॥ जातीफलम् । शुण्ठिः । त्रिफला । (यथा,—
"हरीतकी चामलकी विभीतकमिदं त्रयम् ।
त्रिफला फलमित्युक्तं तच्च ज्ञेयं फलत्रिकम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
कक्कोलम् । इति मेदिनी । ले, ३६ ॥ वाताम्रम् । आर्द्रकम् । इति शब्दरत्नावली ॥ फालः । इति हेमचन्द्रः ॥ दानम् । इति धरणिः ॥ शुल्कः । यथा,—
"अफलो भुज्यते मेघः सफलस्तु न भुज्यते ।"
इति रामायणम् ॥
(प्रमेयभेदः । यथा,—
"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम् ॥" इति गौतमसूत्रम् ।
तत्रैव फलसूत्रम् यथा । "प्रवृत्तिदोषजनितोऽर्थः फलम् ॥" "सुखदुःखसंवेदनं फलम् । सुखविपाकं कर्म्मेदुःखविपाकञ्च तत् पुनर्देहेन्द्रियविषयबुद्धिषु सत्सु भवतीति सह देहादिभिः फलमभिप्रेतम् । तथाहि प्रवृत्तिदोषजनितोऽर्थः फलमेतत् सर्व्वं भवति तदेतत् फलमुपादत्ते तदुपादत्ते हेयं ज्ञात्वा तत्त्यक्तुमुपादेयमिति मत्वा हानोपादानयोर्निष्ठा पर्य्यवसानं वाप्ति स खल्वयं हानोपादानमीक्षमाणो लोकः ।" इति वात्स्यायनः ॥) जीवस्य कर्म्मफलभुक्तिर्यथा,—
"जीवः कर्म्मफलं भुङ्क्ते आत्मा नित्यः स एव च ।
आत्मनः प्रतिबिम्बश्च देही जीवः स एव च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः ॥
दानफलं यथा,—
"यथा फलन्ति शस्यानि मूलानि वाधिकानि च ।
क्षयकाले चैत्रमेदे पात्रभेदे फलं तथा ॥
सामान्यदिवसे विप्रे दानं समफलं भवेत् ।
अमायां रविसंक्रान्त्यां फलं शतगुणं भवेत् ।
चातुर्मास्यां पौर्णमास्यामनन्तं फलमेव च ॥
ग्रहणे शशिनः कोटिगुणञ्च फलमेव च ।
सूर्य्यस्य ग्रहणे चापि ततो दशगुणं भवेत् ॥
अक्षयायामक्षयश्चैवासंख्यं फलमुच्यते ।
एवमन्यत्र पुण्याहे फलाधिक्यं भवेदिह ॥
यथा दाने तथा स्नाने जपेऽन्यत्पुण्यकर्म्मसु ।
एवं सर्व्वत्र बोद्धव्यं नराणां कर्म्मणां फलम् ॥
सामान्यदेशे दानञ्च विप्रे समफलं भवेत् ।
तीर्थे देवगृहे चैव फलं शतगुणं स्मृतम् ॥
गङ्गायाञ्च कोटिगुणं क्षेत्रे नारायणे फलम् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
यथा क्षेत्रे कोटिगुणं तथा च विष्णुमन्दिरे ।
केदारे च लक्षगुणं हरिहारे तथा फलम् ॥
पुष्करे भास्करक्षेत्रे दशलक्षगुणं फलम् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं क्रमेण च ॥
सामान्यब्राह्मणे दानं सममेव फलं भवेत् ।
लक्षं त्रिसन्ध्यपूते च पण्डिते च जितेन्द्रिये ॥
विष्णुमन्त्रोपासके च बुधे कोटिगुणं भवेत् ।
एवं सर्व्वत्र बोद्धव्यं फलाधिक्यं गुणं भवेत् ॥
यथा दण्डेन सूत्रेण शरावेण जवेन च ।
कुम्भं निर्म्माति चक्रेण कुम्भकारो ह्यहो सुधीः ।
तथैव कर्म्मसूत्रेण फलं धाता ददाति च ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३४ अध्यायः ॥७॥
स्वप्नियफलस्य विष्णुदेयत्वं यथा,—
"भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि च ।
फलञ्च वल्लभं यच्च तत्तद्देयं जनार्द्दने ॥"
इत्यग्निपुराणम् ॥ * ॥
दृष्टफलहारा फलपातननिषेधो यथा,—
"न पातयेदिष्टकाभिः फलानि वै फलेन तु ।
न स्नेहभावां श्लिष्येत नाकर्षेच्च पदाग्रतः ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
कर्म्मजन्यशुभाशुभदुरदृष्टसम्भवस्वर्गनरकादि ।
तच्चिविधं यथा,—
"अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु सन्न्यासिनां क्वचित् ॥"
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥
"अनिष्टं नारकिकम् । इष्टं दैवकम् । मिश्रं मानुषकम् । एवं त्रिविधं पापस्य पुण्यस्य उभयमिश्रस्य च कर्म्मणो यत् फलं प्रसिद्धं तत् सर्व्वमत्यागिनामेव प्रेत्य परत्र भवति तेषां त्रिविधकर्म्मसम्भवात् न तु सन्न्यासिनां क्वचिदपि भवति ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥
वेदादीनां फलम् । यथा, वह्निं प्रति मरीचिवाक्यम् ।
"स तं प्राह फलं वृद्धि वेदस्य च धनस्य च ।
दारसूनुसुखस्य विप्राद्यैः स्वर्गापवर्गवाञ्छितैः ॥

वह्निरुवाच ।
अग्निहोत्रफला वेदा दत्तमुक्तफलं धनम् ।
रतिपुत्रफला दारा: शीलवृत्तफलं श्रुतम् ॥"
इति वह्निपुराणे नित्यान्वाधानविधिनामाध्याय: ॥७॥ जपादिसंयोगे फलस्यान्यत्वं यथा,
"तण्डुलोप्युक्षिसंयोगाल्लवणयोगेन पिष्टकम् ।
फलं क्षितयसंयोगादन्नं भवति तत्त्वतः ॥"
इति रामार्चनचन्द्रिकाधृतवचनमिति केचित् ॥
फल:, पुं, (फलतीति । फल + अच् ।) कुटज-वृक्ष: । इति शब्दरत्नावली ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कपित्थकारिकाफलपटोलवार्त्ताकुकारवेल्लक-कैटिकाकेवुकोदम्बुकपर्प्यटकाकिरातनिक्तककर्कोट-कादिरुक्षोष्णातकवैम्बकरौहाटरुषकार्कपुष्पीप्र-भृतीनि ॥")
फलकं, क्ली, पुं, (फल + संज्ञायां कन् ।) चर्म्म । इत्यमर: । २ । ८ । ६० ॥ ढाल इति भाषा ॥ (यथा, विष्णुपादादिकेशान्तवर्णनस्तोत्रे । ६६ ।
"ग्राह्यं वाह्यं जपाह्यं फलकमरिगदे पद्मपूजौ सदृश्यम्
विभ्राणा: शुभ्रजालं मम दनु हरेर्बाहवो मोक्षकामम् ॥")
फलक:, पुं, (फल + संज्ञायां कन् ।) अस्थिखण्डम् । इति जटाधर: ॥ नागकेशरम् । इति शब्द-चन्द्रिका ॥ काष्ठादिफलकम् । यथा,—
"पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
इति व्यवहारतत्त्वे व्यास: ॥
(यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकादुद्गतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥")
रञ्जकपट्टम् । धोपार पाट इति भाषा । यथा,
"शालमलं फलके श्लक्ष्णे निर्व्याङ्गासीसि रञ्जक: ।
न च वासांसि वासोभिर्नैरेन्न च वासयेत् ॥"
इति मिताक्षरा ॥
फलकपाणि:, पुं, (फलकं पाणौ यस्य ।) चर्म्मी । इत्यमर: ॥ २ । ८ । ७१ ॥ ढाली इति भाषा ॥
फलककोशा, स्त्री, (फलेन फलकाया ।) वनकोलि: । इति केचित् ॥
फलकाम:, त्रि, (फलं कामयते इति । कम + अच् ।) कर्म्मफलकामी । यथा,—
"धर्म्मेणाधिगमिका मूढ़ा: फलकामा नराधमा: ।
अर्थयन्ति जगन्नाथं ते कामान्नाप्नुवन्त्युत ॥"
इति मलमासतत्त्वधृतविष्णुधर्म्मोत्तरीयषष्ठीय-काम्योपवासवचनम् ।
फलकी, [न्] पुं, (फलकं फलकाकारोऽस्यास्तीति । फलक + इनि: ।) मत्स्यभेद: । फसुर इति भाषा । (गुणादिकमस्य फलिमत्स्ये ज्ञात-व्यम् ।) फलकान्विते, त्रि । इति मेदिनी । ने, १६ ॥
फलक्षार:, पुं, (फले फलावच्छेदे क्षार: ।) प्राणीया-भलकम् । इति शब्दचन्द्रिका ॥
फलकेशर:, पुं, (फले केशरा इवास्य ।) नागी-केसरवृक्ष: । इति जटाधर: ॥
फलकोषक:, पुं, (फलं शुष्क इव कोषो यत्र । तत: कन् ।) शुष्क: । इति त्रिकाण्डशेष: ॥ (विस्तृति-रस्य शुष्कशब्दे ज्ञातव्या ॥)
फलग्रहि:, त्रि, (फलं गृह्णातीति । ग्रह + इन् ।) फलीग्रहि: । यथासमयं फलधरवृक्ष: । इत्यमर-टीकायां भरत: ॥
फलग्राही, [न्] पुं, (फलं गृह्णातीति । ग्रह + णिनि: ।) वृक्ष: । इति धरणि: ॥ फलग्रहण-कर्त्तरि, त्रि ॥
फलचमस:, पुं, दधिमिश्रितवटलकचूर्णम् । इति आह्निकतत्त्वम् ॥
फलचोरक:, पुं, (फलं चोर इवास्य कन् ।) चोरक-नामगन्धद्रव्यम् । इति राजनिर्घण्ट: ॥
फलत्रयं, क्ली, (फलस्य त्रयम् ।) द्राक्षापरूष-काश्मर्य्य: । (यथा,—
"द्राक्षापरूषकाश्मर्य्य: फलत्रयमुदाहृतम् ॥"
इति वैद्यकपरिभाषायाम् ॥)
त्रिफला । इति शब्दचन्द्रिका ॥
फलत्रिकं, क्ली, (फलस्य त्रिकम् ।) त्रिफला । (यथा,—
"प्रथाविभीतधात्रीणां फलै: स्यात्त्रिफला समै: ।
फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शुण्ठीपिप्पलीमरिचानि । इत्यमर: । २ । ६ । १११ ॥
फलद:, पुं, (फलं ददातीति । दा + "आतोऽनुप-सर्गे ।" ३ । २ । ३ । इति क: ।) वृक्ष: । इति धरणि: ॥
फलद:, त्रि, (फलं ददातीति । दा + क: ।) फल-दाता । यथा,—
"विशुद्धफलदा कन्या निष्कामाणां विमुक्तिदा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
फलपञ्चाङ्गं, क्ली, अल्पपञ्चफलम् । इति राज-निर्घण्ट: ॥
फलपाक:, पुं, (फलेषु पाकोऽस्य ।) करमर्द्दक: । इत्यमरटीकायां भरत: ॥ प्राणीयामलकम् । इति शब्दचन्द्रिका ॥
फलपाकाम्ला, स्त्री, (फलपाकेनाम्लो नाम्नो यस्या: ।) ओषधि: । धान्यकदल्यादि: । इत्यमर: । २ । ४ । ७ ॥
फलपाकी, [न्] पुं, (फलपाकोऽस्यास्तीति । इनि: ।) गर्द्दभाण्ड: । इति रत्नमाला ॥ (यथास्य पर्य्याय: ।
"गर्द्दभाण्डो गण्डमुण्डो द्वितीय: क्षिप्रपाकवृक्षौ ॥"
इति च वैद्यकरत्नमालायाम् ।)
फलपुष्प:, पुं, (फलं पुष्प इव यस्य ।) वरकालु: । इति त्रिकाण्डशेष: ॥
फलपुष्पा, स्त्री, (फलानि पुष्पाणीवास्या: ।) पिण्ड-खर्জ্জूरी । इति राजनिर्घण्ट: ॥
फलपूर:, पुं, (फलेन पूर: पूर्त्त: ।) बीजपूर: । इत्यमर: । २ । ४ । ७८ ॥ (विवरणमस्य बीज-पूरशब्दे ज्ञातव्यम् ॥)
फलपूरक:, (फलपूर + स्वार्थे कन् ।) बीजपूर: । इति भावप्रकाश: ॥
फलप्रद:, त्रि, (फलं प्रददातीति । प्र + दा + "आतश्चोपसर्गे ।" ३ । १ । १३६ । इति क: ।) फलदाता । यथा,—
"श्रीबीहि भो: फलानीति श्रुत्वा सत्वरमच्युत: ।
फलार्थी धान्यमादाय ययौ सर्व्वफलप्रद: ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलप्रिया, स्त्री, (फलेन प्रीणातीति । प्री + क: । टाप् ।) प्रियङ्गु: । इति राजनिर्घण्ट: ॥ (गुणा-दयोऽस्या प्रियङ्गुशब्दे ज्ञेया: ॥)
फलभाक्, [ज्] त्रि, (फलं भजते इति । भज + "भजो ण्वि: ।" ३ । २ । ४८ । इति ण्वि: ।) फलभागी । यथा,—
"मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वश: ।
उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत् ॥"
इति तिथ्यादितत्त्वधृतब्रह्मखण्डभविष्यपुराण-वचनम् ॥
फलभूमि:, स्त्री, (फलाय कर्म्मफलभोगाय भूमि: ।) कर्म्मफलभोगस्थानम् । यथा,—
"भरतान्यैरावतानि विदेहाश्च कुरून् विना ।
वर्षाणि कर्म्मभूम्य: स्यु: शेषाणि फलभूमय: ॥"
इति हेमचन्द्र: । ४ । १२ ॥
फलमुष्टा, स्त्री, (फलेन मुष्टा श्रेष्ठा ।) अज-मोदा । इति राजनिर्घण्ट: ॥
फलमुष्टिका, स्त्री, (फले फलावच्छेदे मुष्टिका क्षुद्रमुष्टि इव ।) पिण्डखर्জ্জूर: । इति शब्द-माला ॥
फललक्षणा, स्त्री, (फलहेतुका लक्षणा ।) प्रयो-जनवती लक्षणा । यथा, साहित्यदर्पणे ।
"यत्रास्य गौणमुख्यत्वाद्विधा स्यु: फललक्षणा: ।"
फलवर्त्तुलं, क्ली, (फलं वर्त्तुलमस्य ।) कार्पासम् । इति राजनिर्घण्ट: ॥
फलवान्, [न्] त्रि, (फलमस्यास्तीति । फल + मतुप् । मस्य व: ।) फलयुक्तवृक्ष: । तत्पर्य्याय: । फलिन: २ फली ३ । इत्यमर: ॥ फलित: ४ । इति राजनिर्घण्ट: ॥ (यथा, मनु: । १ । ४७ ।
"अपुष्पा: फलवन्तो ये ते वनस्पतय: स्मृता: ।
पुष्पिण: फलिनश्चैव वृक्षास्त्वुभयत: स्मृता: ॥")
फलविक्रयिणी, त्रि, (फलविक्रयोऽस्या अस्तीति । इनि: । ङीप् ।) फलविक्रेत्री । कुञ्जड़ानी इति हिन्दी भाषा । यथा,—
"फलविक्रयिणी तस्य श्रुतधान्यकरद्वयम् ।
फलैरपूरयद्वत्रै: फलभाजमपूरि च ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्याय: ॥
फलवृक्षक:, पुं, (फलप्रधानो वृक्ष: । संज्ञायां कन् ।) पनस: । इति राजनिर्घण्ट: ॥ (पनसशब्देऽस्य विशेषो व्याख्यात: ॥)
फलशाकं, क्ली, (फलमेव शाकम् ।) षड्विधशाका-न्तर्गतफलरूपशाकम् । यथा, राजवल्लभे ।
"पत्रं पुष्पं फलं शाकं कन्दं संक्षेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यादथोत्तरम् ॥"

फलगुाडवः, पुं, दाड़िमः। इति त्रिकाण्डशेषः॥
फलग्राही [न्], त्रि, (फलेन ग्राहयते स्वार्थं इति। ग्राह्+णिनिः।) फलाश्रयः। यथा,—
"परसमवेतधात्वर्थफलग्राहित्वं कर्म्मत्वम्॥"
इति कर्म्मलक्षणे सारमञ्जरी॥
फलग्रैथिरः, पुं, (ग्रैथिरं ग्रामनाम अस्य ग्रैथिरम्। फलं ग्रैथिरं यस्य।) वदरवृक्षः। इति राजनिर्घण्टः॥
फलश्रुतिः, स्त्री, (फलस्य कर्म्मफलस्य श्रुतिः श्रवणम्।) कर्म्मफलश्रवणम्। यथा,—
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयो विवक्षया प्रोक्तं यथा भैषज्यरोचनम्॥"
अपि च।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥"
इति श्रीभागवते ११ स्कन्धः। इति मलमासतत्त्वम्॥
फलश्रेष्ठः, पुं, (फलानां फलवृक्षाणां श्रेष्ठः।) आम्रवृक्षः। इति शब्दचन्द्रिका॥
फलसः, पुं, पनसवृक्षः। इत्यमरटीकायां भरतः॥
फलसेहः, पुं, (फले स्नेहो यस्य।) आखोटवृक्षः। इति राजनिर्घण्टः॥
फलहारी, स्त्री, कालो। फलं हरति या ष्टान् वस्तिति कर्म्मोपपदहृञ् धातोः घञि ईप्प्रत्ययनिष्पन्नोऽयं शब्दः। सा श्रेष्ठपञ्चदश्यां वस्तु-फलाद्युपहारैः पूजनीया। यथा,—
"श्रेष्ठे माघि अमायां वै मध्यरात्रे महेश्वरि!।
पूजयेत् कालिकां देवीं नानाद्रव्योपहारकैः॥
तत्रैव सितपक्षे तु पञ्चदश्यां निशार्द्धके।
पूजयेच्च फलैर्नैवैः शक्तितो वापि कालिकाम्॥"
इति मायातन्त्रे १७ पटलः॥
फला, स्त्री, भिक्षिरिहाक्षुपः। इति राजनिर्घण्टः॥ (भूमौ। तत्पर्य्यायो यथा,—
"भूमौ भक्तफला तुङ्गा केशगुच्छी फलाश्रिया।
भङ्गुरा च तथा लक्ष्मीः भूमीरः सालिपर्णिका स्मृता॥")
फलाढ्या, स्त्री, (फलेन आढ्या सम्पन्ना।) काष्ठकदली। इति राजनिर्घण्टः॥
फलाध्यक्षं, स्त्री, (फलानामध्यक्षमिव।) राजादनवृक्षः। इत्यमरः। २। ४। ४५॥ (क्वचित्, पुं। अस्य पर्य्यायः।
"राजादनः फलाध्यक्षो राजन्यः क्षीरिकाप्रिय॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
फलानामधिपतते, त्रि॥
फलादनः, पुं, (फलानामदनोभक्षकः। यद्वा, फलानां अदनं भक्षणं यस्य।) शुकपक्षी। इति हेमचन्द्रः। ४। ४०२॥ फलभक्षके, त्रि॥
फलाम्लः, पुं, (फलेषु सत्सु अम्लो नाम्नो यस्य।) वंशः। इति शब्दमाला॥
फलाम्लं, स्त्री, (फलमम्लं यस्य।) वृक्षाम्लम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अ॥
"मद्यं मद्योचितानान्तु सर्व्वमांसेषु पूजितम्।
अमद्यपानात्सदृशं फलाम्लं वा प्रशस्यते॥")

फलाम्लः, पुं, (फलमम्लमस्य।) अम्लवेतसः॥ इति राजनिर्घण्टः॥
फलार्थी [न्], त्रि, (फलं अर्थयते इति। अर्थ्+णिनिः।) फलकामी। यथा,—
"सर्व्वसङ्कल्पेषु कर्म्मणा प्रतिष्ठा विधिना बुधैः।
फलार्थिभिस्त्वप्रतिष्ठं यज्ञाग्निष्फलमुच्यते॥"
इति मठप्रतिष्ठातत्त्वधृतहयशीर्षपञ्चरात्रीय-सङ्कर्षणकाण्डीयवचनम्॥
फलाशनः, पुं, (फलानि अत्तीति। अद्+ल्युः।) शुकपक्षी। इति त्रिकाण्डशेषः॥ फलभक्षके, त्रि॥
फलासङ्गः, पुं, (फलेषु आसङ्गः।) फलासक्तिः॥ यथा,—
त्यक्त्वा कर्म्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः॥"
इति श्रीभगवद्गीतायां ४ अध्यायः॥
फलिः, पुं, (फल+इन्।) मत्स्यविशेषः। फलुई इति भाषा। अस्य गुणाः। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। बलकारित्वम्। शुक्रवर्द्धनत्वञ्च। इति राजवल्लभः॥
फलिका, स्त्री, (फलमस्या अस्तीति। फल+ठन्। टाप्।) निष्पावी। इति राजनिर्घण्टः॥ (फला स्वार्थे कनि अत इत्वम्। पृषोदरादेरयभागः। यथा, आर्य्यासप्तशत्याम्। ३३५।
"न प्राप्यसे कराभ्यां हृदयान्नायेषि वितनुषे बाधाम्।
त्वं मम भग्नावस्थितकुसुमायुधविग्रह-फलिकेव॥")
फलिनं, त्रि, (फल+तारकादित्वात् इतच्।) फलमस्य जातम्। इति सुग्धबोधव्याकरणम्॥ (यथा, देवीभागवते। २। १७। १२।
"संपश्यन् विविधान् देशान् लोकांश्च वित्त-धर्म्मिकः।
वनानि पादपांश्चैव क्षेत्राणि फलितानि च॥")
वृक्षे, पुं। इति धरणिः॥ शैलेये, क्ली। इति राजनिर्घण्टः॥
फलिनः, त्रि, (फलानि सन्त्यस्येति। फल+"बहुलमन्यत्रापि।" उणा० २। ४६। इति इनच्।) फलवान्। इत्यमरः। २। ४। ७॥ पनसे फलवति वृक्षे च पुं। इति राजनिर्घण्टः॥
फलिनी, स्त्री, (फलमस्या अस्तीति। इनिः। ङीप्।) प्रियङ्गुवृक्षः॥ (पर्य्यायोऽस्या यथा,—
"प्रियङ्गुः फलिनी कान्ता लता च महिलाह्वया।
गुच्छा गुच्छफला श्यामा विश्वक्सेनाङ्गना प्रिया॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
यथा, रघौ। ८। ६१।
"मिथुनं परिकल्पितं त्वया सहकारः फलिनी च सन्निभौ
अविधाय विवाहसत्क्रियामनयो र्गम्यत इत्यसाम्प्रतम्॥")
अग्निशिखावृक्षः। इत्यमरः। २। ४। १३६॥

फली, [न्] त्रि, (फलमस्त्यस्मीति। फल+इनिः।) फलयुक्तवृक्षादिः। इत्यमरः। २। ४। ७॥
फली, स्त्री, (फलमस्त्यस्या इति अर्शआदिभ्यः अच्। स्त्रियां ङीप्।) प्रियङ्गुवृक्षः। इत्यमरः। २। ४। ७॥ (यथा, वैद्यकरत्नमालायाम्।
"विश्वक्सेना प्रिया कान्ता प्रियङ्गुः फलिनी-फली॥"
फलि+वा ङीष्।) फलिमत्तृक्षः। इति शब्दमाला॥
फलुः, पुं, जलभेदः। इत्युणादिकोषः॥
फलेग्रहिः, पुं, (फलं गृह्णातीति। फल+ग्रह+"फलेग्रहिरात्मम्भरिश्च।" ३।२।२६। इति उपपदस्य एदन्तत्वं ग्रहेरिन् प्रत्ययश्च निपात्यते।) यथासमयं फलधरवृक्षः। ऋतुप्राप्तौ फलानि गृह्णाति धारयतीति फलेग्रहिः ग्रहृत्तृजन्तादिलादिना इः सर्व्वे फले इति निर्देशात् एकारः। किंवा फले गृह्णाति इति फलेग्रहिः कर्म्मण्याधारविवक्षा निपातनात् सप्तम्या अलुक् लुकि फलग्रहिश्च फलेग्रहिः फलग्रहिरिति वाच्यम्। इह ग्रहिर्धारणार्थः स्वीकारार्थश्च अत्र धारणार्थे दृश्य एव रूढिः। स्वीकारार्थे तु क्रियाशब्दस्तेव यथा फलेग्रहीन् हंसि वनस्थानीनामिनि भट्टिः॥ इति रायमुकुटादयः। इत्यमरटीकायां भरतः॥ फलग्रहणकर्म्मणि, त्रि॥
फलेग्राहिः, पुं, (फले गृह्णातीति। ग्रह+इन्। एषोदरात् इष्टिः। निपातनात् सप्तम्या अलुक्।) (फलेग्रहिः। इति शब्दरत्नावली॥
फलेन्द्रः, पुं, (फलेन इन्द्रः ऐश्वर्य्यशालीव। इन्द्रफलत्वादेवास्य तथात्वम्।) इन्द्रजम्बुः। तत्पर्य्यायः। नन्दः २ राजजम्बुः ३ महाफला ४ सुरभिपत्रा ५ महाजम्बुः ६। अस्य गुणाः। स्वादुत्वम्। विष्टम्भित्वम्। गुरुत्वम्। रोचनत्वञ्च। इति भावप्रकाशः॥
फलेपुष्पा, स्त्री, (फले फलसुखे पुष्पं यस्याः। सप्तम्या अलुक्।) क्षुद्रक्षुपविशेषः। गूमा इति हिन्दीभाषा। तत्पर्य्यायः। द्रोणा २ द्रोणपुष्पी ३। अस्या गुणाः। गुरुत्वम्। स्वादुत्वम्। रूक्षत्वम्। उष्णत्वम्। वातपित्तकारित्वम्। क्षारत्वम्। लवणत्वम्। स्वादुपाकत्वम्। कटुत्वम्। भेदकत्वम्। कफामकामलाशोथनमक्षासव्रणनाशित्वञ्च। इति भावप्रकाशः॥
फलेरुहा, स्त्री, (फले रोहतीति। रुह+कः। सप्तम्या अलुक्।) पाटलिवृक्षः। इत्यमरः। २। ४। ५४॥ (अस्याः पर्य्यायो यथा,—
"पाटलालिप्रिया श्यामा ताम्रपुष्पी फलेरुहा।
कामदूती कुबेराक्षी कुम्भी तोयाधिवासिनी॥"
इति वैद्यकरत्नमालायाम्॥)
फलेसक्तः, त्रि, (फले सक्त आसक्तः।) फलासक्तः। फलकामी। यथा, भगवद्गीतायाम्।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्॥
अयुक्तः कामकारेण फलेसक्तो निबध्यते॥"

'फलेवृद्धः मम फलायेवं कर्म्म करोमीत्येवं फलेवृद्धो नितरां बन्धं प्राप्नोति।' इति भक्तमालतत्त्वम् ॥

फलोत्तमा, स्त्री, (फलेषु उत्तमा।) काकली-द्राक्षा। इति राजनिर्घण्टः॥ (दुग्धिका। तत्पर्य्यायो यथा,—

"उत्तमा दुग्धिका दुग्धी फलोत्तमा फलिन्यपि॥"

इति वैद्यकरत्नमालायाम्॥)

फलोत्पत्तिः, पुं, (फलाय उत्पत्तिरस्य। प्रशस्तफलानां उत्पत्तिरत्र वा।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

फलोदयः, पुं, (फलस्य उदयो यत्र।) लाभः। सुरालयः। हर्षः। इति शब्दरत्नावली॥ (फलस्य उदयः।) फलोत्पत्तिः। यथा, रघुः।

"सोऽहमाजन्मशुद्धानामाफलोदयकर्म्मणाम्।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्॥"

फल्गुः, पुं, (फल निष्पत्तौ+"ज्वलादयश्च फलिभ्यः कः।" उणा० ३।४०। इति कः। ज्वलेश्च कलिभ्य इति पाठस्य विकल्पितत्वात् बाहुलकात् क इत्येके।) विसारिताङ्गम्। इत्यमरादिकोषः॥

फल्गु, त्रि, (फल निष्पत्तौ+"फलिपाटिनमिमनिजनामिति।" उणा० २। १६। इत्युः मुगागमश्च।) असारम्। इत्यमरः। ३। १। ५६॥ (यथा, माघे। ३। ७६।

"तरीषु तत्रत्यमफल्गु भाण्डं
सांयात्रिकानावपनीभ्यनन्दत्॥")

निरर्थकम्। इति त्रिकाण्डशेषः॥ (यथा, देवीभागवते। ५। १५। ६२।

"न फल्गुवाक्यैः प्रतिबोधनीयो
राजा तु वीरेरिति नीतिशास्त्रम्॥"

सामान्यम्। क्षुद्रम्। यथा, भागवते।१।१३।४७।

"अहस्तानि सहस्तानामपदानि चतुष्पदाम्।
फल्गूनि तत्र महतां जीवो जीवस्य जीवनम्॥")

फल्गुः, स्त्री, (फल निष्पत्तौ+उः। गुणागमश्च।) गयास्थनदीभेदः। तस्या माहात्म्यादि यथा,—

सार्द्धक्रोशद्वयं मानं गयायां परिकीर्त्तितम्।
पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः॥
तत्र पिण्डप्रदानेन क्षत्रियत्वं प्रयास्यति।
गयाजनार्द्दनादेव कूपाद्योत्तरमाश्रितात्॥
एतत्तयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते।
तत्र पिण्डप्रदानेन पितॄणां परमा गतिः॥
एतस्यां यानि तीर्थानि ये ह्रदाः सरांसि च।
फल्गुतीर्थं गमिष्यन्ति वारमेकं दिने दिने॥"

इति गारुडे ८३ अध्यायः॥

अन्यत् गयाशब्दे द्रष्टव्यम्॥॥ काकोडुम्बरिका। इत्यमरः॥ काकडुसुर इति भाषा॥ (अस्याः पर्य्यायो यथा,—

"भद्रा मलपूः फल्गुः स्यात् काकडुम्बरिका च सा॥"

इति वैद्यकरत्नमालायाम्॥)

अस्या गुणाः। गुरुत्वम्। शीतलम्। स्वादुत्वम्। क्षतिकारित्वञ्च। इति राजवल्लभः॥ रेणुभेदः। यादु इति प्रसिद्धः। मिथ्यावाक्यम्। इति शब्दरत्नावली॥ वसन्तर्त्तुः। इति जटाधरः॥

फल्गुदा, स्त्री, (फल्गुरिति नाम ददाति धारयतीति। दा धारणे+कः।) गयानदी। यथा,

"तत्र देवी गया नाम पुण्यदेशोऽतिविश्रुतः।
नदी च फल्गुदा नाम पितॄणां स्वर्गदायिनी॥"

इति हरिवंशे भविष्यपर्व्वणि ५६ अध्यायः॥

फल्गुनः, पुं, (फलति कार्य्यादिकमनायासादिति। फल निष्पत्तौ+"फलेर्गुक् च।" उणा० ३। ५६। इति उनन् गुगागमश्च। फल्गुन्यां फल्गुनीनक्षत्रे जातः इति वा। "अविष्ठा फल्गुन्यनुराधेति।" ४।३।३४। इति जातार्थे-प्रत्ययस्य लुक्। "लुक् तद्धितलुकि।" १।२।४६। इति स्त्रीप्रत्ययस्य च लुक्। एतन्निरुक्तिस्तु फाल्गुनशब्दे द्रष्टव्या।) अर्জ্জुनः। फाल्गुन-मासः। इत्यमरटीकायां भरतः॥ (फल्गुनीभवे, त्रि। इति सिद्धान्तकौमुदी॥)

फल्गुभालः, पुं, (फल्गुनेन अलतीति। अल+अच्।) फाल्गुनमासः। इति भूरिप्रयोगः॥

फल्गुनी, स्त्री, (फल्गुन+गौरादित्वात् ङीष्।) नक्षत्रविशेषः। तच्च पूर्व्वफल्गुनी उत्तर-फल्गुनी च। इति भरतधृतगोवर्द्धनशब्दः॥ (यथा, महाभारते। ४। ४२। १६।

"उत्तराभ्याञ्च पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः॥")

काकोडुम्बरिका। इति राजनिर्घण्टः॥ (फल्गुन्यां जाता। अविष्ठाफल्गुनीति अणो लुकि लुकतद्धितलुकीति स्त्रीप्रत्ययस्य च लुकि फल्गुन्यषाढाभ्यां टाबौ वक्तव्यौ इति वार्त्तिकोक्त्या टः। टित्वात् ङीप्॥)

फल्गुवाटिका, स्त्री, (फल्गूनां वाटीव इवार्थे कन्।) काकोडुम्बरिका॥ इति राजनिर्घण्टः॥ ("गुणादयोऽस्याः काकोदुम्बरिकाशब्दे ज्ञेयाः॥")

फल्गुशुल्काकः, पुं, (फल्गुना तृष्णेनाकायति शोभते इति। आ+कै+कः।) श्योनाक-प्रभेदः। इति राजनिर्घण्टः॥

फल्गूत्सवः, पुं, (फल्गूनामुत्सवः।) फल्गु-करञ्जगोविन्दोत्सवः। दोलयात्रा इति ख्यातः। यथा, दोलयात्रापद्धतिः।

"गोविन्दानुग्रहीतन्तु यात्राङ्गं तत् प्रकीर्त्तितम्।
फल्गूत्सवं प्रकुर्व्वीत पक्षाहानि त्र्यहाणि वा॥"

फल्यं, क्ली, (फलाय हितमिति। फल+यत्।) कुसुमम्। इति शब्दचन्द्रिका॥

फलकी [न्] पुं, (फलकः फलकस्तदाकारोऽस्त्य-स्येति। इनि।) मत्स्यविशेषः। इति शब्द-माला॥ फलुई इति भाषा।

फलफलः, पुं, रूपवान्। इति जटाधरः॥ कुलार वातास इति भाषा॥

फाः, पुं, सन्तापः। निष्फलभाषणम्। यथा,—

"फिः कोपे फाश्च सन्तापे तथा निष्फलभाषणे॥"

इति शब्दरत्नावली॥

दृष्टिः। बर्हकः। यथा "फा दृष्टौ बर्हके पुमान्।" इति विश्वः॥

फाटकी, स्त्री, (स्फुट+स्वुल्। ङीष्। पृषोदरादित्वात् साधुः।) स्फटी। इति राजनिर्घण्टः॥

फाणिः, स्त्री, (फाणयतीति। फण गतौ+णिच्+इन्।) गुडः। खरभः। इत्युणादिकोषः॥

फाणितं, क्ली, (फण गतौ+णिच्+क्तः।) अर्द्धा-वर्णितेक्षुरसः। फेणीति ख्यातम्। इत्यमर-भरतौ॥ (यथा, महाभारते।१३।६७।२६।

फल्गुनी पूर्व्वसमये ब्राह्मणानासुपोषितः।
भक्ष्यान् फाणितसंयुक्तान् दत्वा सौभाग्य-
मृच्छति॥")

अस्य गुणाः। गुरुत्वम्। अभिष्यन्दित्वम्। हृद्यत्वम्। कफशुक्रबलत्वम्। वातपित्तश्रमनाशि-त्वम्। मूत्रवस्तिविशोधनत्वञ्च॥ * ॥

"इक्षो रसस्तु यः पक्वः किञ्चिन्नाढ़ो बहुद्रवः।
स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया॥"

इति भावप्रकाशः॥

(यथा च।

"शिरोरुर्धेऽञ्जनं कुर्य्यात् फाणितं मधुसंयुतम्॥"

इति वैद्यकचक्रपाणिसंग्रहे नेत्ररोगाधिकारे॥

"फाणितं शुक्रबलकृत् सर्पिर्दैधिमधोऽन्यकाङ्क्षिकम्।
तर्पणं मूत्रकृच्छ्रघ्नसुदावर्त्तहरं पिबेत्॥"

इति चरके सूत्रस्थाने २५ अध्याये॥)

फाण्टं, त्रि, (फण्यते क्षीयते। फण गतौ+"क्षुध-स्फान्ताध्वान्तेति।" ७। २। १८। इति निपा-तनात् साधुः।) अनायासलब्धम्। इत्यमरः। ७। १। ८४॥ कषायभेदः। यथा,—

"चिरप्रोषितायै हृदितः फाण्ट इत्यभिधीयते।"

अपि च।

"क्षुण्णद्रव्यपले सम्यक् जलसुखं विनिःक्षिपेत्।
पात्रे चतुःपलमिति ततस्तु स्रावयेज्जलम्॥
सोऽयं फाण्टव: फाण्टो भिषग्भिरभिधीयते॥"

इति वैद्यकपरिभाषा॥

(तथास्य प्रस्तुतविधिः।

"सद्योऽभिषु पूतस्तु फाण्टस्तत्कालकल्पने॥"

इति वाभटकल्पस्थाने षष्ठेऽध्याये॥)

फाणं, क्ली, (फलाय हितम्। फल+अण्। यद्वा, फल्यते विदार्य्यते भूमिरनेनेति। फल+घञ्।) हलोपकरणम्। इति मेदिनी। णे, ३४॥

फालः, पुं, (फल्यते विदार्य्यते क्षेत्रमनेनेति। फल+करणे घञ्।) लाङ्गलस्यभूमिविदारक-लौहः। फल्यते विदार्य्यते भूमिरनेन सः। तत्पर्य्यायः। लाधिकः २। इत्यमरः।१०।८।१३॥ लाधकः ३। फलम् ४। इति भरतः॥ लाधिका ५। फालम् ६। इति सुकुटः॥ कुशिकम् ७। इति हेमचन्द्रः। ३। ५५५॥ महादेवः। बल-देवः। कार्षासवस्त्रे, त्रि। इति मेदिनी। ले, ३४॥ नवविधदिव्यान्तर्गतोऽष्टमदिव्यम्। तस्य विधि-र्यथा। दृष्टस्रष्टिः।

"आयसं द्वादशपलघटितं फालमुच्यते।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्॥

अग्निवर्णं ततश्चौरो जिह्वया लेढयेत् सकृत् ।
न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥"
चौरोऽत्र गोचौरः । गोचौरस्य प्रदातव्यं तप्त-फालावलेढनमिति स्मृतिरिति मैथिलाः ॥
अत्रापि त्वमग्ने इत्यादिमन्त्रानन्तरं आयसं लेलिहानस्य जिह्वयापि समाधिर्हेतिति पितामहोक्तेः प्राङ्विवाकग्रीष्माभ्यामग्निमन्त्रणं कार्यम् ॥*॥ तत्र प्रयोगः । लौकिकचत्वारिंशत्-पलोन्मितं लौहघटितमष्टयवमध्यात्मकाङ्गुलाष्ट-दीर्घं तथाविधचतुरङ्गुलप्रस्तारं फालमग्नौ तापयेत् । तत्र प्राङ्विवाको धर्म्मावाहनादिहवनान्तं कर्म्म कृत्वा दक्षिणां दत्त्वा,—
'ॐ त्वमग्ने देवानां त्वं सत्यं ब्रह्मवादिनाम् ॥
जठरस्थोऽसि भूतानां ततो वेत्सि शुभाशुभम् ।
पापं पुनासि वै यस्मात्तस्मात् पावक उच्यते ॥
पापेषु दह्यमानानामर्चिष्मान् भव पावक ! ।
अथवा शुभभावेन प्रीतो भव हुताशन ! ॥
त्वमग्ने सर्व्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यान्ति मानवाः ॥
अयञ्चाराभिगृप्तोऽयं मानुषः सुष्ठिमिच्छति ।
तदेनं संग्रयादस्मान्मैतत्त्यागुमर्हसि ॥'
इत्यैतैः फालस्थमग्निं अभिमन्त्रयेत् । ग्रीष्मस्तु प्रतिग्रापत्यं शिरसि निधाय ।
'त्वमग्ने सर्व्वभूतानामन्तश्चरसि पावक ! ।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं करे मम ॥'
इत्यनेनाभिमन्त्र्य अग्निवर्णं फालं जिह्वया सङ्ग-लिह्यात् न दग्धश्चेत्तदा शुद्धः ।" इति द्वितत्त्वम् ॥

फालक्षतः, त्रि, (फालेन क्षतः ।) फालेन कर्षित-भूम्यादिः । यथा, मानवे । ४ । ७६ ।
"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे ।
न फालकृष्टे न जले न चित्यां न च पर्व्वते ॥"

फालाः, पुं, (फालयन्तीति । फल + णिच् + अच् ।) जम्बीरबीजानि । इति दुर्गटीकाटिप्पनीधृत-क्षेमचन्द्रः ॥

फाल्गुनः, पुं, (फलति निष्पादयतीति । फल् + "फलेर्गुक् च ।" उणा० ३ । ५६ । इति उनन् ततो गुक् । ततः प्रज्ञाद्यण् । यद्वा फल्गुन्यां फल्गुनीनक्षत्रे जातः फल्गुनः । स एव । अण् ऋतन्निष्ठक्तिर्यथा, महाभारते । ४ । ४२ । १६ ।
"उत्तराभ्यान्तु पूर्व्वाभ्यां फल्गुनीभ्यामहं दिवा ।
जातो हिमवतः पृष्ठे तेन मां फाल्गुनं विदुः ॥")
गुडाकेशः । नदीजङ्घः । अर्জ্জुनश्च । तपस्य मासः ॥ यथा,—
"फाल्गुनस्तु गुडाकेशो नदीजार्জ্জुनभूरुहे ।
तपस्यसंज्ञे मासे तत्पूर्णिमायान्तु फाल्गुनी ॥"
इति दन्त्यनान्तवर्गे मेदिनी ॥
अतएव ।
"फाल्गुने रागमे चैत्रे वसन्तमिच्छन्ति वर्व्वराः ।"
इति कारिका वसन्तिका । अत्र अयत्वमिच्छन्तीति अकारप्रश्लेषो भाषानाम् ॥ * ॥

(फाल्गुनी पौर्णमासी अस्मिन्निति । "विभाषा फल्गुनीश्रवणाकार्त्तिकीचैत्रेभ्यः ।" ४।२।२३। इति छे अण् ।)
वैशाखादिद्वादशमासान्तर्गतैकादशमासः । फल्गुनीनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे सः । इति तु प्रायिकाभिप्रायम् । स च त्रिविधः । सुखचान्द्रो गौणचान्द्रः सौरश्च । यथा । कुम्भस्थरविप्रारम्भशुक्लप्रतिपदादिदर्शान्तो मासो सुखचान्द्रः । सुखचान्द्रफाल्गुनमासीयपौर्णमास्यन्तः शुक्लप्रतिपदादिको मासो गौणचान्द्रः । कुम्भराशिस्थरविभोगोपलक्षितकालात्मको मासः सौरः । इति मलमासतत्त्वम् ॥*॥ तत्पर्य्यायः । तपस्यः २ फाल्गुनिकः ३ फल्गुनः ४ । इत्यमरभरतौ ॥ वत्सरान्तकः ५ । इति राजनिर्घण्टः ॥ * ॥ तस्य जातफलम् ।
"प्रियंवदः सज्जनवल्लभश्च
परोपकारी विमलाशयश्च ।
दाता पितार्च्चा प्रमदाभिलाषी
स्यात् फाल्गुने यस्य जनस्य जन्म ॥"
इति कोष्ठीप्रदीपः ॥
अथ फाल्गुनजन्यम् । तच्च माघ्यनन्तरं फाल्गुनलक्षणाद्यर्थं कालप्राकट्यात्मकप्राकट्योपकरणत्वेन आहृं कर्म्मत्वम् ॥ * ॥ गौणचान्द्र-फाल्गुनलक्षणचतुर्दश्यां शिवरात्रिव्रतम् । यद्दिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी तद्दिने व्रतमुभयव्याप्यनुरोधात् । यदा पूर्व्वेद्युर्निशीथ-व्यापिनी परेद्युः प्रदोषमात्रव्यापिनी तदा पूर्व्वे-द्युर्व्रतं प्रधानकालव्याप्यनुरोधात् । यदा तु पूर्व्वेद्युर्न निशीथव्याप्तिः परेद्युश्च प्रदोषव्यापिनी तदा परेद्युः प्रदोषव्यापिनीति वचनात् ॥ * ॥ सुखचान्द्रफाल्गुनशुक्लद्वादशी गोविन्दद्वादशी ।
"फाल्गुने शुक्लपक्षस्य पुण्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥"
महापातकनाशकामो गङ्गायां स्नानमहं करिष्ये । अत्र पद्मपुराणीयो मन्त्रः ।
"महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशी प्राप्य तानि मे हर जाह्नवि ! ॥"
फाल्गुनपौर्णमास्यां दोलयात्रा । तीर्थचिन्ता मणौ स्कन्दपुराणम् ।
"नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमम् ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेत् ॥"
स्कन्दपुराणीयपुरुषोत्तममाहात्म्ये त्रिंशाध्याये ।
"फाल्गुन्यां क्रीडनं कुर्य्यात् दोलायां मम भूपते ! ॥"
इति ज्ञातव्यम् ॥

फाल्गुनानुजः, पुं, (फाल्गुनादनुपश्चात् जायते इति । अनु + जन् + ड ।) वसन्तकालः । इति हारावली ॥ अर्জ্জुनस्य कनिष्ठभ्राता च ॥

फाल्गुनिकः, पुं, (फाल्गुनी पौर्णमास्यस्मिन् मासे इति । "विभाषा फाल्गुनीश्रवणेति ।" ४ । २ । २३ । इति ठक् ।) फाल्गुनमासः । इत्यमरः । १ । ४ । १५ ॥

फाल्गुनी, स्त्री, (फल्गुनीभिर्युक्ता पौर्णमासी । "नक्षत्रेण युक्तः कालः ।" ४ । २ । ३ । इति अण् । ततो ङीप् ।) फाल्गुनमासस्य पूर्णिमा । इति मेदिनी । ने, ८६ ॥ पूर्व्वफल्गुनीनक्षत्रम् । उत्तरफल्गुनीनक्षत्रम् । इत्यमरटीकायां भरतः ॥

फिः, पुं, पापः । निष्फलवाक्यम् । इत्येकाक्षर-कोषः । कोपः । इति शब्दरत्नावली ॥

फिरङ्गः, पुं, (फिरङ्ग इति शब्देन कायति शब्दा-यते इति । के + कः ।) पक्षिविशेषः । फिङ्गा इति भाषा । तत्पर्य्यायः । कुलिङ्गः २ कलिङ्गः ३ धूम्याटः ४ । इति शब्दमाला । भृङ्गः ५ । इत्यमरः ॥

फिरङ्गः, पुं, (फौ पापे क्रोधे वा रङ्गोऽनुरागो यस्य ।) खनामख्यातस्लेच्छदेशः । यथा,—
"पूर्व्वाम्नाये नवशतं षड्घोनीः प्रकीर्त्तिताः ।
फिरङ्गभाषया मन्त्राः सेवां संसाधनाद्भुवि ॥
अधिपा मल्लनागाश्च संग्रामेष्वपराजिताः ।
एरेवा नव षट् पञ्च लङ्घनाश्चापि भाविनः ॥"
इति मेरुतन्त्रे २६ प्रकाशः ॥
रोगविशेषः । अथ फिरङ्गस्य निरुक्तिमाह ।
"फिरङ्गसंज्ञके देशे बाहुल्येनैव यद्भवेत् ।
तस्मात् फिरङ्ग इत्युक्तो व्याधिर्व्याधिविशारदैः ॥"
तस्य विप्रकृष्टं निदानमाह ।
"ग्रन्थिरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥
व्याधिरागन्तुजो ह्येष दोषाणामत्र संक्रमः ।
भवेत्तस्मात् लक्षयेत्तेषां लक्षणैर्भिषजां वरः ॥"
फिरङ्गिण्याः प्रसङ्गत इति विशेषार्थम् ॥ * ॥
रूपमाह ।
"फिरङ्गस्त्रिविधो ज्ञेयो बाह्याभ्यन्तरतस्तथा ।
बहिरन्तर्भवश्चापि तेषां लिङ्गानि च ब्रुवे ॥
तत्र बाह्यः फिरङ्गः स्यादिस्फोटसदृशोऽत्यर्थकः ।
स्फुटितो व्रणवद्ज्ञेयः सुखसाध्योऽपि स क्षुतः ॥
सन्धेराभ्यन्तरः स स्याद्भयोर्लक्षणैर्युतः ।
कष्टदोऽतिथिरस्यायी कष्टसाध्यतमश्च सः ॥"
उपद्रवान् आह ।
"कार्श्यं बलक्षयो नासाभङ्गो वङ्क्षे च ग्रन्थता ।
अस्थिशोथोऽस्थिवक्रत्वं फिरङ्गोपद्रवा अमी ॥"
साध्यत्वादिकमाह ।
"बहिर्भवो भवेत् साध्यो नूतनो निरुपद्रवः ।
आभ्यन्तरस्तु कष्टेन साध्यः स्यादयमामयः ॥
बहिरन्तर्भवो जीर्णः पौराणस्तोपद्रवैर्युतः ।
बोध्यो व्याधिरसाध्योऽयमिति वृद्धाश्चयः पुरा ॥"
अथ फिरङ्गस्य चिकित्सा ।
"फिरङ्गसंज्ञकं रोगं रसः कर्पूरसंज्ञकः ।
अवश्यं नाशयेदेतदूचुः पूर्व्वे चिकित्सकाः ॥
लिख्यते रसकर्पूरप्राप्तये विधिरुत्तमः ।
अनेन विधिना खादन्नुखे शोथं न विन्दति ॥
शोधमभ्रं संशोध्य विदध्यात् कज्जलीकृतिम् ।
तच्चूर्णे निःक्षिपेत् क्षुतं चतुर्गुञ्जामितं भिषक् ॥
ततस्तु गुटिकां कुर्य्यादृद्धया न स्यात्रयो वह्निः ।

फिरङ्गि

लक्षचूर्णं जवक्षार्द्धं तां वटीमवधूलयेत् ॥
दन्तशुद्धौ यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकाम्लजवर्जान्यजेत् ॥
अममातपमध्वानं विशेषात् स्त्रीनिषेवणम् ॥
इति कर्पूररसः ॥ १ ॥

पारदष्टङ्कमानः स्यात् खदिरष्टङ्कसंमितः ।
आकारकरभक्षापि गन्धष्टङ्कद्वयोन्मितः ॥
टङ्कत्रयमितं चौद्रं खल्ले सर्व्वं विनिःक्षिपेत् ।
मंमर्द्द तस्य सर्व्वस्य कुर्य्यात् सप्त वटीर्भिषक् ॥
स रोगी भक्षयेत् प्रातरेकैकामनुना वटीम् ।
वर्जयेदम्लजवजौ फिरङ्गस्य नश्यति ॥
इति सप्तगुणिकावटी ॥ २ ॥

पारदः कर्षमात्रः स्यात्तावदेव हि गन्धकः ।
तद्द्विगुणा अयमाषाः स्युस्तेषां कुर्य्याच्च कज्जलीम् ॥
तस्याः सप्त वटीः कुर्य्यात्ताभिर्हूमं प्रयोजयेत् ।
दिनानि सप्त तेनैव स्यात् फिरङ्गान्तो न संशयः ॥
इति धूमप्रयोगः ॥ ३ ॥

पीतपुष्पवलापत्ररसेष्टङ्कमितं रसम् ।
द्वाभ्यां मर्द्दयेत्तावत् यावत् स्तब्धो न दृश्यते ॥
ततः संखेदयेद्वस्त्रादेवं वासरसप्तकम् ।
त्यजेज्जवमम्लञ्च फिरङ्गस्तेन नश्यति ॥ ४ ॥

चूर्णयेन्निम्बपत्राणि पथ्यां निम्बाष्टमांसिकाम् ।
धात्रीञ्च तावतीं रात्रिं निम्बयोर्द्वयभागिकाम् ॥
ग्राह्यमानमिदं चूर्णमम्बुनोदम्भसा सह ।
फिरङ्गं नाशयत्येव वाह्यमाभ्यन्तरं तथा ॥ ५ ॥
सोपचीनिभवं चूर्णं ग्राह्यमानं समाक्षिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेज्जवर्जं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जनः ।
सैन्धवं स हि भुञ्जीत मधुरोपरसं हि तत् ॥ ६ ॥
अष्टांकर्षमितं क्षौद्रं क्षारद्वयकर्षैः सह ।
खल्ले विमर्द्दयेत्तच्च पलार्द्धं गुग्गुलुं क्षिपेत् ॥
तच्चार्द्धकर्षमं कुष्ठं त्रिफलाच्च पृथक् पृथक् ।
अष्टांकर्षमितं सर्व्वं चूर्णयित्वा तु निःक्षिपेत् ॥
तत् सर्व्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेदष्टांकर्षमितं रसम् ॥
व्रणः फिरङ्गरोगोत्थस्तस्यावश्यं विनश्यति ।
अन्योऽपि चिरजातोऽपि प्रणाश्यति महाव्रणः ॥
अनङ्गक्षयतः प्रोथो मुखस्य च न जायते ।
वर्जयेदम्ल लवणमेकविंशतिवासरान् ॥ ७ ॥
इति फिरङ्गाधिकारः ।" इति भावप्रकाशः ॥

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिरङ्गानां रोटीति वा ।) रोटिकाविशेषः । पाओरोटी इति पाँउरुटि इति च भाषा । सा तु तालस्याथवा खर्জ্জूरस्य रसेन मधुरिकाजलेन वा मिश्रितां गोधूमकणिकामधिकृत्यालसुत्तमं संमर्द्द्य गोलाकारं स्थूलं स्थूलं निर्म्माय तन्दूरयाकेन निष्पादिता भवति । इति पाकराजेश्वरः ॥

फिरङ्गिणी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेनास्त्यस्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—

"गान्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणीऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥"
इति भावप्रकाशः ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनिः ।) फिरङ्गदेशोद्भवपुरुषः । अस्य प्रभावं पूर्व्वशब्दे द्रष्टव्यम् ॥

फुः, पुं, मन्त्रकम् । तुच्छवाक्यम् । इति विश्वः ॥

फुक्कः, पुं, (फुत्कारशब्देन कायति शब्दायते इति । फु + कै + कः ।) पक्षी । इति शब्दचन्द्रिका ॥

फुटः, त्रि, (स्फुटतीति । स्फुट + कः । पृषोदरादित्वात् साधुः ।) सर्षपशाकः । इति हेमचन्द्रः । ४ । ३८१ ॥

फु(फ)त, य, अनुकरणशब्दः । इति फुत्कारशब्ददर्शनात् । (यथा, "बालः पयसा दग्धो दध्यपि फुत्कृत्य भक्षयति ।" इति प्रायः ॥) तुच्छभाषणम् । इति केचित् ॥

फुत्कारः, पुं, (फुदित्यव्यक्तशब्दं करोतीति । फु + कृ + घञ् ।) अग्निः । इति शब्दचन्द्रिका ॥

फुत्कारः, पुं, (फु + भावे घञ् । फुदित्यव्यक्तशब्दस्य कारः करणम् ।) फुत्करणम् । फु इति फुँक् इति च भाषा । फुत्कारयति पावके आहुतिनिषेधो यथा, निषादितत्वे ।
"अस्थ्नि रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके ॥
क्षणार्द्धेऽपि सुदुर्गन्धे तथा लिखति मेदिनीम् ।
आहुतिं जुहुयादृत्यस्तु तस्य नाशो भवेद्ध्रुवम् ॥"

फुत्कृतिः, स्त्री, (फुदित्यव्यक्तशब्दस्य कृतिः करणम् ।) फुत्कारः । यथा, काव्यचन्द्रिका ।
"स्फुर्ज्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्सम्भ्रमा ॥"

फुप्फुसः, पुं, पुप्फुसः । कोष्ठविशेषः । स च हृदयनाड्याकाशलम्बाग्रयविशेषः । प्रवाप्पड़ा फुलका कापासे इति च लोके । इति सुश्रुतः ॥ यथा,—
"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृद्बुक्कौ फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥"
इति माधवकरः ।
अस्य व्याख्या । "आमस्य स्थानं आमाशयः । नाभेरूर्द्धम् । अग्नेः स्थानं पच्यमानाशयः नाभिमध्यम् । पक्वस्य स्थानं पक्वाशयः नाभेरधः । मूत्रस्य स्थानं वस्तिः । रुधिरस्य स्थानं यकृत्प्लीहानौ । हृत् हृदयं रक्तरसपाकमलवदयः ग्रोथितमलस्तज्ज्ञः उक्तुकः स चाम्लदेशे व्यवस्थितः पुरीषाधानम् । फुप्फुसः हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः ।" इति विजयरक्षितः ॥ (यथा च ।
"तदामे फुप्फुसः प्रोक्तो दक्षिणार्द्धे यकृत्समम् ।
उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये ग्राह्यधरेणोक्तम् ॥)

फुल्लतिः, स्त्री, (फल्ल + क्तिन् । "ति च ।"७।३।८८। इति अत उत् ।) फलनम् । इति सुग्धबोधव्याकरणम् ॥

फुल्लः

फुल्ल, विकासे । इति कविकल्पद्रुमः ॥ (भ्वा०-परo-अक०-सेट् ।) द्रष्टा । लट्यात्मः । विकास इह कस्य न गताविति इत्यात्मस्य घञि रूपम् । विपूर्ब्बस्त्वेनार्थान्तरवाचितया विकसनमित्यर्थः । फुल्लति मल्लीकलिका । इति दुर्गादासः ॥

फुल्लः, पुं, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । पि फला विसरणे + क्तः । "आदितश्च ।"७।२।१६ । इति इडभावः । "ति च ।" ७ । ४ । ८२ । इति उत्वम् । अनुपसर्गात् । फुल्लक्षीवेति ।"८।२।५५। इति निष्ठा तस्य लः ।) विकसितः । इत्यमरः । २।४।८ ॥ (यथा, महाभारते । १ । १२८ । ४१ ।
"अलभ्य सुमुखे पक्षं फुल्लैर्जलरुहैरिव ॥")
पुष्पम् । फुल्ल इति भाषा । यथा,—
"श्रीपञ्चम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा ॥"
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] क्ली, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेदः । यथा,—
"मो गौ नौ तौ गौ गुरुश्चयतुरजैः फुल्लदाम
प्रसिद्धम् ॥"
उदाहरणं यथा,—
"ग्रथ्नल्लोकानां प्रकटितकथनं ध्वस्तमालोक्य कंसं
कृष्णचेतोभिख्यिदिवसतिभिर्योगसंस्थैर्षि-
सङ्घम् ।
सुग्धामोदेन स्थगितदशदिग्भोगमाकृष्टभृङ्गं
मौलौ देत्यारेर्न्यपतदनुपमं खस्तरोः फुल्लदाम ॥"
इति छन्दोमञ्जरी ॥

फुल्लपालः, पुं, (फुल्लं फलतीति । फल + अण् ।) सूपवासः । इति त्रिकाण्डशेषः ॥

फुल्लपोकः, पुं, (फल + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकनुप्रत्ययेन निपातनात् साधुः ।) देशः । सर्षः । इति संक्षिप्तसारोणादिवृत्तिः ॥

फुल्ललोचनः, पुं, (फुल्ले विकसिते लोचने यस्य ।) जगद्विशेषः । इति शब्दचन्द्रिका ॥ प्रफुल्ललोचनयुक्ते, त्रि ॥

फुल्लिः, स्त्री, विकाशः । दृढ्धातुकथने निष्ठक्तिर्वा इति संक्षिप्तसारोक्तेः भावे इप्रत्ययेन निष्पन्नः ॥

फेनः, पुं, (स्फायते वर्द्धते इति । स्फाय + "फेनमौनौ ।" उणा० ३ । ६ । इति नक् फे-शब्दादेशश्च । मतान्तरे शवम् । इत्यमरान्तपाठस्तु गरीयान् ।) फेनः । तरलद्रवोपर्य्युत्थितबुद्बुदाकारवस्तु । फेना इति भाषा । यथा,—
"पयःफेननिभा शय्या दान्ता रुक्मपरिच्छदा ॥"
इति पुराणम् ॥
क्षीरोदः । इत्यमरः । २ । ६ । १०५ ॥ बुद्बुदफेना इति भाषा । अस्य मद्यव्यवहारस्य प्रमाणं यथा,—
"हंसश्वेतो नदीतीरे निगदैः संप्रतीक्षिते ।
यथा सारस्वता मद्या अन्तरे फेनसङ्गता ॥"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥

फेण(न)प:, पुं, स्वयंपतितपलाशादिजौषधिसुनिविशेष:। यथा, श्रीभागवते। ३। १२। ४१।
"वैखानसा वालिखिल्यौदुम्बरा: फेनपा वने।
न्यासे कुटीचक: पूर्वे बह्वोदो हंसनिष्क्रियौ॥"
"वने स्थिताश्चत्वार:। तत्र वैखानसा: अक्षरपक्वतृणय:। वालिखिल्या: नवेऽन्ने लब्धे पूर्वसञ्चितान्नत्यागिन:। औदुम्बरा: प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृते: फलादिभिर्जीवन्त:। फेनपा: स्वयं पतितै: फलादिभिर्जीवन्त:। कुटीचक: स्वाश्रमधर्म्मप्रधान:। बह्वोद: कन्दमूलसञ्चयनीलक्ष्य ज्ञानाभ्यासप्रधान:। हंसो ज्ञानाभ्यासनिष्ठ:। निष्क्रिय: प्राप्ततत्त्व:। एते च सर्व्वे यथोत्तरं श्रेष्ठा:।" इति तट्टीकायां श्रीधरस्वामी॥ (फेणं पिबतीति। फेण+पा+क:। फेनपानकर्त्तरि, त्रि। यथा, महाभारते। १। ६४। २२।
"फेनपांश्च तथा वत्सान्न दुहन्ति स्म मानवा:॥")
फेली(नी), स्त्री, (स्फायते वर्द्धते इति। स्फाय+नक्। गौरादित्वात् ङीष्।) स्वनामख्यातमिष्टान्नविशेष:। यथा, ऊर्ज्जमञ्जर्याम्।
"वटो वेशवारान्नवञ्चेन फेली-
समं पर्पट: शिग्रुबीजेन याति॥"
फेत्कारिणी, स्त्री, (फेत् करोतीति। क्त+णिनि:। ङीप्।) तन्त्रविशेष:। यथा,—
"उच्चण्डभैरवं नारसिंहं रामरभैरवम्।
शिवाकारं मलिन्याद्यमचिताङ्गादि यामलम्॥
सिद्धयोगेश्वरं तन्त्रं योगिनीजालमम्बरम्।
दृष्ट्वा श्रुत्वा विधिं फेत्कारिणीतन्त्रं विरच्यते॥"
इति प्रथमश्लोकद्वयम्॥
"फेत्कारिणीतन्त्र इयं मयोक्ता
ज्ञात्वा समस्तागमसारभूता।
मुक्तोर्विवाप्याय धनाय धर्म्म-
मोक्षाय सम्यक् प्रयतो नियोज्या॥"
इति फेत्कारिणीतन्त्रस्य घोषश्लोक:॥
फेत्कारीय:, पुं, तन्त्रविशेष:। तन्त्रसारादिसंग्रहे फेत्कारीये इति ग्रासनं लिखितम्॥
फेन:, पुं, (स्फायते वर्द्धते इति। स्फाय+"फेनमीनौ।" उणा० ३। ३। इति नक् फेभ्रुब्दादेशश्च।) फेण:। फेना इति भाषा। तत्पर्य्याय:। क्षिप्तोर:२ अब्धिकफ:३। इत्यमर:। २। ६। १०५॥ क्षिप्तोर:४। इति शब्दरत्नावली॥ समुद्रकफ:५ जलहास:६ फेनक:७। इति चिकित्साशब्दार्थचन्द्रिका॥ स्फायते फेन: स्फायी च वृद्धौ नाञ्चीति ङेन: निपातनात् सलुक् इत्यमरटीकायां भरत:॥ अस्य इत्यमरनाम्नस्य प्रमाणान्तरं यथा,
"वाणीरं गगनं फेनमूलञ्च इत्यमान्वितम्।
आकुर्शंगनमिच्छन्ति केचिच्चूर्णाभ्यमान्वितम्॥"
इति भरतसेनविरचितं सुखलेखनम्॥
(यथा, रघु:। १३। ११।
"मातङ्गनक्रै: सहसोत्पतद्भि-
र्भिन्नान् विधा पद्म ससृजे फेनान्॥"
तरङ्गस्योपरिसम्तिष्ठतबुद्बुदाकारवस्तुमात्रम्। यथा, महाभारते। १। ३। ५२।
"भो: फेनं पिबामि यमिमे वत्सा मातृणां स्तनान् पिबन्त उद्गिरन्ति॥" *॥ उग्रश्रवसश्च पुत्र:। यथा, हरिवंशे। ३१। ७८।
"उग्रश्रवो महाराज! फेनस्यस्य सुतोऽभवत्॥")
फेनक:, पुं, (फेन+स्वार्थे संज्ञायां वा कन्।) फेन:। इति चिकित्साशब्दार्थचन्द्रिका॥ पिष्टकविशेष:। अस्य गुणा:। लघुत्वम्। रूक्षत्वम्। शुक्रकारित्वम्। पित्तवायुनाशित्वञ्च। इति राजवल्लभ:॥ (यथा च सुश्रुते। १। ७६।
"क्षुद्वा: पथ्यतमास्तेषां लघव: फेनकादय:॥"
माषमार्ष्णनादिवत् क्रियाविशेष:। तस्य गुणा यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"ऊर्व्वो: सङ्कनयत्यासु फेनक: स्थैर्य्यलाघवे।
कण्डूकोठानिलक्लम्भमलरोगापहश्च स:॥")
फेनका, स्त्री, (फेनेन कायतीति। कै+क:। टाप्।) जलप्रक्षतशालिचूर्णम्। इति शब्दचन्द्रिका॥
फेनदुग्धा, स्त्री, (फेन इव दुग्धं यस्या:।) दुग्धफेनीक्षुप:। इति राजनिर्घण्टे:॥
फेनल:, त्रि, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ६६। इति चात् लच्।) फेनवान्। इति सिद्धान्तकौमुदी॥
फेनवान्, [न्] त्रि, (फेनोऽस्यस्येति। "फेनादिलच्च।" ५। २। ६६। इत्यत्र अन्यतरस्यामित्यनुवृत्ते: पक्षे मतुप्। मस्य व:।) फेनिल:। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ३। १४३। २०।
"तत्र सागरगा ह्याप: कीर्य्यमाणा: समन्तत:।
प्रादुरासन् सुकक्षुधा: फेनवत्यो विशाम्पते!॥")
फेनवाही, [न्] पुं, (फेनवत् शुभ्रतां वहतीति। वह्+णिनि:।) वस्त्रम्। इति शब्दमाला॥
फेना, स्त्री, (फेनोऽस्ति बाहुल्येनास्या:। फेन+अच्। टाप्।) सातलाक्षुप:। इति राजनिर्घण्टे:॥
फेनाभ्र, क्ली, (फेनस्याभ्रम्।) बुद्बुदम्। इति हारावली। २०५॥
फेनायमान:, त्रि, (फेनसदृशमाचरतीति। फेन+"फेनाय्येति वाच्यम्।" ३। १। १६। इत्यस्य वार्त्तिकोक्त्या क्यङ्। ततः शानच्।) उत्थितफेन दुग्धादि:। फेन इव आचरति य: इत्यर्थे फेनशब्दात् क्यप्रत्ययानन्तरं शानप्रत्ययेन निष्पन्न:॥ (यथा, महाभारते। ६। ३। ६७।
"प्रतिस्रोतोवहा नद्य: सरित: स्रोतोदका:।
फेनायमाना: कूपाश्च नर्दन्ति वृषभा इव॥")
फेनाग्नि:, पुं, (फेन इवाग्निर्वेद्यं यस्य। फेनेन वृत्रासुरनाशनादेवास्य तथात्वम्।) इन्द्र:। इति शब्दमाला॥ (अनयोर्वृत्तान्तो यथा, देवीभागवते। ६। ६। ५५—५६।
"इति सञ्चिन्त्य मनसा कथं हन्यां रिपुं रणे।
अजेयं सर्व्वदा सर्व्वदेवैश्च दानवैस्तथा॥
यदि हन्मं न हन्म्यद्य वर्द्धयिष्यो महाबलम्।
न श्रेयो मम नूनं स्यात् सर्व्वथा रिपुरक्षणात्॥
अथो फेनं तदाधत्त समुद्रे पर्व्वतोपमम्।
नार्द्रं शुष्को न पाषाणोऽयं न च शुल्कमिदं तथा॥
अथो फेनं तदा शक्रो जघान किल लीलया।
परां शक्तिञ्च सञ्चार भक्त्या परमया युत:॥
स्तुतमाता तदा देवी खार्थं फेने व्यधापयत्।
वज्रं तदाहृतं तस्य चकार हरिसंयुतम्॥
फेनाहृतं पविं तस्य शक्रस्क्षिप्तं तं प्रति।
सहसा निपपातासु वज्राहत इवाचल:॥")
फेनिका, स्त्री, (फेन इवाकृतिरस्यस्या:। फेन+ठन्। टाप्।) पक्वान्नविशेष:। खाजा इति भाषा। यथा,—
"समिताया घृताद्याया वर्त्तीर्दीर्घा: समाचरेत्।
तास्तु सन्निहिता दीर्घा: पीठस्योपरि धारयेत्॥
वेल्लयेद् वेल्लनेनैता यथैका पर्पटी भवेत्।
ततस्तुरिकया तासु संलग्यामेव कर्त्तयेत्॥
ततस्तु वेल्लयेद्भूय: सङ्कर्षेण च पीडयेत्।
घृतक्षिप्तं घृतं तोयं मिश्रितं सङ्कटं भवेत्॥
तत: संतप्य तां लोष्ट्रीं विदधीत पृथक् पृथक्।
पुनस्तां वेल्लयेत् लोष्ट्रीं यथा स्याज्जलजालता:॥
ततस्ता सुपचेदाज्ये भवेयुश्च पुटा: स्फुटा:।
सुगन्धया शर्करया तदुत्थूलनमाचरेत्॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणै:।
तत: किञ्चिल्लघुरियं विशेषोऽयमुदाहृत:॥"
इति भावप्रकाश:॥
फेनिलं, क्ली, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ६६। इति इलच्।) कोलिफलम्। (अस्य पर्य्यायो यथा,—
"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं बदरं मधु।
अलक्ष्मीघ्ना कृष्णा कोली विषमो भयकण्टका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मदनफलम्। सफेने, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। १५६। १०।
"उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु॥")
फेनिल:, पुं, (फेन+इलच्।) अरिष्टवृक्ष:। इत्यमर:। २। ४। ३१॥ हारिद्रु इति ख्यात:॥ (अस्य पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्य: शुभ्रवर्णोऽर्थसाधक:।
रक्तबीज: पीतफेन: फेनिलो गर्भपातन:॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) बदरवृक्ष:। इति राजनिर्घण्टे:॥ (स्त्रियां टाप्। जलब्राह्मी। यथा, सुश्रुते उत्तरतन्त्रे ३८ अध्याये।
"अम्लपिष्टै: सुधीतैश्च फेनिलाग्लपवेल्लया॥")
फेर:, पुं, (फे इति शब्दं राति यच्छतीति। रा यद्वर्णे+क:।) शृगाल:। इति शब्दरत्नावली॥
फेरण्ड:, पुं, (फे इत्यव्यक्तशब्देन रण्डतीति। रण्ड+अच्।) शृगाल:। इति हेमचन्द्र:। ४। ३५५॥

बेवः, पुं, (बे इति शब्दो यस्य ।) शृगालः । इत्यमरः ।२।५।५ ॥ (यथा, कथासरित्सागरे । ४७ । ५३ ।
"शृण्वतां तरतां दृक्षे नदतां घोरवाय सः ।
शूराणां भैरवाणाञ्च भूतानाञ्चाभवद्भयः ॥")
राक्षसः । इति मेदिनी । बे, ४४ ॥ धूर्ते क्लिंबे च, त्रि । इति शब्दरत्नावली ॥

बेसः, पुं, (बे इति शब्देन दीर्घतीति । दल भ्वादौ + मितद्रादित्वात् डुः ।) शृगालः । इत्यमरः । २ । ५ । ५ ॥ (यथा, भागवते ।८।१६।७।
"यद्वेषु वेध्वतिभयो नार्च्चिताः सलिलैरपि ।
यदि नियन्ति ते नूनं भैरराजसृगोपमाः ॥")

बेल, भृ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भृ, अबिबेलत् बिबेलतुः ।
इति दुर्गादासः ॥

बेलं, क्ली, (बेल्यते दूरे निक्षिप्यते इति । बेल + घञ् ।) भुक्तसक्तुभक्षितम् । उच्छिष्टम् । इति शब्दरत्नावली ॥

बेलक:, पुं, (बेल + स्वार्थे संज्ञायां वा कन् ।) भुक्तसक्तुभक्षितम् । इति जटाधरः ॥

बेला, स्त्री, (बेल्यते इति । बेल + "गुरोश्च हलः ।" ३ । ३ । १०३ । इति अः । टाप् ।) भुक्तसक्तुभक्षितम् । इत्यमरः । २ । ६ । ५६ ॥

बेलिः, स्त्री, (बेल + इन् ।) उच्छिष्टम् । इति जटाधरः ॥

बेलिका, स्त्री, (बेलिरेव । स्वार्थे कन् ।) उच्छिष्टम् । बेलाशब्दात् स्वार्थे णिकप्रत्ययेन निष्पन्ना ॥

बेली, स्त्री, (बेलि + "ऋदिकारादक्तिनः ।" इति पक्षे ङीष् ।) भुक्तसक्तुभक्षितम् । इति शब्द रत्नावली ॥

ब

ब, वकारः । स च त्रयोविंशत्यङ्गवर्णः । (पवर्गस्य तृतीयवर्णश्च ।) तस्योच्चारणस्थानं ओष्ठः । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् ।
"उपूपध्मानीयानामोष्ठौ ॥") तस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"बकारं शृणु चार्व्वङ्गि ! चतुर्वर्गप्रदायकम् ।
शरच्चन्द्रप्रतीकाशं पञ्चदेवमयं सदा ॥
पञ्चप्राणात्मकं वर्णं त्रिविन्दुसहितं सदा ॥"
(वङ्गीयवर्णमालायामस्य स्वरूपमाह ।)
"त्रिलोचनरूपिणी रेखा विष्णोर्ग्रन्थिस्वरूपिणी ।
माया मुक्तिः परा शेया ध्यानमस्य प्रचक्षते ॥"
अस्य ध्यानं यथा,—
"बीजवर्णां त्रिनयनां बीजाम्बरधरां पराम् ।
नागहारोज्ज्वलां देवीं द्विभुजां पद्मलोचनाम् ॥
एवं ध्यात्वा बकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रयोगमन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिविधाक्षतलेपितम् ।
स्वयं कुङ्कुलिनीं देवीं ततस्तं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"बो वर्णो भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः ग्रिखिवाहो युगन्धरः ।
सुखविष्णुर्बली घण्टा योद्धा त्रिलोचनप्रियः ॥
क्लेदिनी तापिनी भूमिसुगणिन्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
वह्नापुरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यजिङ्घौ अग्निः कुम्भस्तृतीयकौ ॥"
इति नानातन्त्रशास्त्रम् ॥
बंहिष्ठः, त्रि, (अयमेषामतिशयेन बहुलः । बहुल + "अतिशायने तमबिष्ठनौ ।" ५ । ३ । ५५ । इति इष्ठन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इति बंहि-आदेशः ।) अतिशयबहुलः । इत्यमरः ॥ (यथा, महाभारते । १२ । ३२८ । ३६ ।
"योऽग्निः संयोज्य जीवात्मानं पर्य्यन्याय प्रयच्छति ।
उद्वहो नाम बंहिष्ठस्तृतीयः स सदागतिः ॥")
बंहीयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुलः । बहुल + "द्विवचनविभज्योपपदे तरबीयसुनौ ।" ५ । ३ । ५७ । इति ईयसुन् । "प्रियस्थिरस्फिरोरुबहुलेति ।" ६ । ४ । १५७ । इति बंहि-आदेशश्च ।) अतिशयबहुलः । अयमनयोरतिशयेन बहुः इत्यर्थे बहुशब्दादीयसुप्रत्ययेन निष्पन्नः । इति मुग्धबोधमतम् ॥
ब:, पुं, वरुणः । कुम्भः । इति शब्दरत्नावली ॥
"बः पुमान् वरुणे सिन्धौ भगे लोके गतेऽपि च ।
गन्धर्वे तनुसन्ताने पुंस्येव वपने स्मृतः ॥"
इति मेदिनी । बे, १ ॥ * ॥
तस्य सांकेतिकनामानि यथा । युगन्धरः १ सुरभिः २ सुखविष्णुः ३ संहारः ४ वसुधाधिपः ५ । इति बीजवर्णाभिधानम् । भूधरः ६ द्रुमगण्डः ७ । इति रुद्रयामलोक्तबीजाभिधानम् ॥
अपि च ।
"बो वर्णो भूधरो मार्गो घर्घरी लोचनप्रियः ।
प्रचेताः कलसः पक्षी स्थलगण्डः कपर्द्दिनी ॥
पृष्ठवंशो भयामातुः ग्रिखिवाहो युगन्धरः ।
सुखविष्णुर्बली घण्टा योद्धा त्रिलोचनप्रियः ।
क्लेदिनी तापिनी भूमिसुगणिन्द्रबलिप्रियः ।
सुरभिर्मुखविष्णुश्च संहारो वसुधाधिपः ॥
वह्नापुरं चपेटा च मोदको गगनं प्रति ।
पूर्व्वाषाढ़ामध्यजिङ्घौ अग्निः कुम्भस्तृतीयकौ ॥"
इति तन्त्रान्तरम् ॥
ब(व)क, ट ङ कौटिल्ये । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक० च-सेट् ।) कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । ट, वङ्कते । ङ, वङ्कते काष्ठं कुटिलं स्यादित्यर्थः । वङ्कते काष्ठं कुटिलं करोतीत्यर्थः । इति दुर्गादासः ॥
ब(व)कः, पुं, (ब(व)ङ्कते कुटिलीभवतीति । वङ्कि + अच् । एषोदरादित्वात् नलोपः ।) खनाम-
ख्यातपक्षिविशेषः । तत्पर्य्यायः । कङ्कः २ । इत्यमरः । २ । ५ । २२ ॥ द्वारवलिसुक् ३ कङ्केरः ४ मुक्तवायसः ५ दीर्घजङ्घः ६ वकोटः ७ मृदुबलिप्रियः ८ । इति शब्दरत्नावली ॥ निशैतः ९ ग्रिखी १० चन्द्रविहङ्गमः ११ । इति त्रिकाण्डशेषः ॥ तीर्थसेवी १२ तापसः १३ मीनघाती १४ ऋषाध्यायी १५ निश्चलाङ्गः १६ दाम्भिकः १७ । इति राजनिर्घण्टः ॥ अस्य मांसस्य गुणाः ।
"मुरारिवककाकाश्च दात्यूहाः पवनाशनाः ॥"
इति रत्नावली ॥
अपि च ।
"हंससारसकाकाश्च वककौञ्चमुरारिकाः ।
नद्दीसुखीसकादम्बबलाकाद्याः प्लवाः स्मृताः ॥
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः ॥
कुलेचराः प्लवाश्चापि कोग्रस्याः पादिनस्तथा ।
मत्स्या एते समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो वह्निसादनाः ।
श्लेष्मलाः पिच्छलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनश्चैते हि प्रायोऽपथ्यतमाः स्मृताः ॥"
इति भावप्रकाशः ॥
स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । ग्रिववल्ली २ पाशुपतः ३ एकाष्ठीलः ४ वसुः ५ । इत्यमरः ॥ एकाष्ठीला ६ वृकः ७ वसुकः ८ वसूकः ९ । इति शब्दरत्नावली ॥ वकपुष्पः १० ग्रिवमल्ली ११ । इति शब्दरत्नावली ॥ काकशीर्षः १२ स्थूलपुष्पः १३ ग्रिवप्रियः १४ काकनामा १५ वसुहृदः १६ स्वपूरकः १७ रक्तपुष्पः १८ सुनिस्तरः १९ अगस्तिः २० वङ्गसेनकः २१ । इति रत्नमाला ॥ अगस्त्यः २२ शीघ्रपुष्पः २३ सुनिद्रमः २४ व्रणारिः २५ दीर्घफलकः २६ वकपुष्पः २७ सुरप्रियः २८ ।
"सितपीतनीललोहितकुसुमभेदाच्चतुर्विधो-
ऽगस्तिः ।
मधुरग्निग्निरदोषश्रमकासविनाशनश्च भूतघ्नः ॥"
तथा च ।
"अगस्तिं ग्निग्निरं शीतं त्रिदोषघ्नं श्रमापहम् ।
बलासकासवैषम्यभूतघ्नञ्च बलावहम् ॥"
इति राजनिर्घण्टः ॥
अपि च ।
"अगस्तिकुसुमं शीतं चातुर्थकनिवारकम् ।
नक्तान्ध्यनाशनं तिक्तं कषायं कटुपाकि च ।
पीनसश्लेष्मपित्तघ्नं वातघ्नं मुनिभिर्मतम् ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि ।
कटुपाकानि तिक्तानि कासक्षयकराणि च ॥"
इति राजवल्लभः ॥
"बकः पाशुपतश्चैव ग्रिवापीडश्च सुव्रतः ।
वसुकश्च ग्रिवाङ्गश्च ग्रिवेष्टः क्रमपूरकः ॥
ग्रिवमल्लिः ग्रिवाजादः ग्राम्भवो रविसंमितः ।

बकनि

बकोऽतिगुरुशिरश्चिक्कणो मधुरो मधुगन्धकः ॥
पित्तदाहकफच्छर्द्यास्रमेहहारी च दीपनः ॥"
इति च राजनिर्घण्टः ॥
"शिवमल्ली मामुपत्र एकाष्ठीला बुको वसुः ।
बुकोऽगुणः कटुस्तिक्तः कफपित्तविषापहः ।
योनिशूलक्षयादाहकृच्छ्रशोथास्रनाशनः ॥"
इत्यपि भावप्रकाशः ॥
साजश्यकारः । यथा,—
"————————ग्रो वाग्मो वपरो बकः ।"
इति बीजवर्णाभिधानम् ॥ * ॥
कुबेरः । रक्षोविशेषः । इति मेदिनी । के, ३० ॥ स च भीमेन हतः । (यथा महाभारते । २ । ६५ । ७३ ।
"तस्यामेकचक्रायां बकं नाम राक्षसं हत्वा पाञ्चालमगरमभिगताः ॥") अत्र कोधे पवर्गीय बकारादौ पतिनोऽयं शब्दः किन्तु अमरटीकायां भरतेन अन्तःस्थबकारादिवचबक-धातुभ्यां क्रमेण घप्रत्ययेन अनुप्रत्ययेन च साधितः ॥ * ॥ यन्त्रविशेषः । यथा,—
"जलकच्छपपातालदोलाभूधरवालुकाः ।
बकाद्या यन्त्रभेदाः स्युर्वेधान्धाद्याश्च मूषिकाः ॥"
इति शब्दचन्द्रिका ॥
अस्य विवरणं यथा, वैद्यके ।
"दीर्घकण्ठकाचकूप्या गिलयेत् स्वल्पभाजकम् ।
तिर्यक् क्षिप्त्वा पचेत् पुल्यां बकयन्त्रमिति स्मृतम् ॥"
असुरविशेषः । स च श्रीकृष्णेन हतः । यथा,—
"सं सं वत्सकुलं सर्वे पाययिष्यन्त एकदा ।
गत्वा जलाशयाभ्यासं पाययित्वा पपुर्जलम् ॥
ते तत्र ददृशुर्बाला महासत्त्वमवस्थितम् ।
तप्त सुवज्रनिर्भिन्नं गिरेः कूटमिव च्युतम् ॥
स वै बको नाम महानसुरो बकरूपधृक् ।
आगत्य तरसा कृष्णं तीक्ष्णतुण्डोऽग्रसद्बली ॥
कृष्णं महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ।
बभूवुरिन्द्रियाणीव विना प्राणं विचेतसः ॥
तं तालमूलं प्रदहज्ज्वलमग्निवद्
गोपालसूनुं पितरं जगद्गुरोः ।
चञ्चद्दृशं सद्य उतिरुषाच्छनं बक-
स्तुण्डेन हन्तुं पुनरभ्यपद्यत ॥
तमापतन्तं स निगृह्य तुण्डयो-
र्दोर्भ्यां बकं कंससखं सतां गतिः ।
पश्यत्सु बालेषु ददार लीलया
मुदावहो वीरणवद्विदारिणम् ॥"
इति श्रीभागवते १० स्कन्धे ११ अध्यायः ॥
ब(व)कचिचिका, स्त्री, मत्स्यविशेषः । तत्पर्य्यायः । बकाची २ । इति हारावली । १८८ ॥
ब(व)कजित्, पुं, (बकं जितवान् इति । जि + क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ श्रीकृष्णश्च ॥
ब(व)कधूपः, पुं, (बक इव शुभ्रवर्णो धूपः ।) बक-धूपः । इत्यमरटीका ॥
ब(व)कनिसूदनः, पुं, (निसूदयति हन्तीति । सूदि + ल्युः । बकस्य निसूदनो घातकः ।) भीमसेनः । इति हेमचन्द्रः । ३ । ३७२ ॥ श्रीकृष्णश्च ॥

बकारिः

ब(व)कपञ्चकं, क्ली, (बकोपलक्षिताः पञ्च तिथयो यत्र कर्म्मणि । बकोऽपि तत्र नाश्नीयादिति वचनादेव तथात्वम् ।) कार्त्तिकशुक्लैकादश्यादिपञ्चतिथ्यात्मकम् । यथा,—
"तत्रैकादश्यादितिथिपञ्चके बकपञ्चकम् ।
बकोऽपि तत्र नाश्नीयान्नात्यश्नेत्र कदाचन ॥
इति वचनात् ।" इति तत्त्वतत्त्वम् ॥
"किञ्च । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।
'एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च ज्ञातव्यं घृतेलासु नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभक्षणमेव च ॥'
तत्र च मांसभक्षणनिषेधे कार्त्तिकमासतच्छुक्ल-पक्षतदेकादश्यादिपञ्चदिनानि मुक्ताभुक्तभेदात् प्राप्ततारतम्याद्वा निषिद्धानि ।" इति तिथ्यादितत्त्वम् । अपि च ।
"एकादशीं समारभ्य यावत् पञ्चदशी भवेत् ।
बकोऽपि तत्र नाश्नीयान्मांसञ्च किं नरः ॥"
इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥
ब(व)कपुष्पः, पुं, (बक इव बकं पुष्पं यस्य ।) बक-वृक्षः । इति शब्दरत्नावली ॥ (बकस्य पुष्पम् ।) अगस्तिकुसुमे, क्ली ॥
ब(व)कवृत्तिः, पुं, (बकस्येव स्वार्थसाधिका वृत्तिर्यस्य ।) बकतुल्यवर्त्तनविशिष्टः । यथा,—
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान् ।
हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥
तस्य लक्षणं यथा,—
"अत्यन्तगूढदृष्टिर्नैजनिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥
अपि च ।
"अधोदृष्टिर्नैजनिकः स्वार्थसाधनतत्परः ।
शठः स्निग्धो विनीतश्च बकवृत्तिरुदाहृतः ॥"
इति पाद्मोत्तरखण्डे ११५ अध्यायः ॥
ब(व)कवैरी, [न्] पुं, (बकस्य वैरी घातकत्वात् ।) भीमसेनः । इति घटाधरः ॥ श्रीकृष्णश्च ॥
ब(व)कव्रती, [न्] पुं, (बकव्रतमस्यास्तीति इनिः ।) मिथ्याविनीतः । बकवृत्तिः । इति घटाधरः ॥
तस्य लक्षणं यथा,—
"अधोदृष्टिर्नैजनिकः स्वार्थसाधनतत्परः ।
शठो मिथ्याविनीतश्च बकव्रतधरो द्विजः ॥"
इति दानसागरे मनुः ॥
ब(व)काची, स्त्री, बकचिचिकामत्स्यः । इति हारावली । १८८ ॥
ब(व)कारिः, पुं, (बकस्य अरिः ।) श्रीकृष्णः । यथा,
"तदा बकारिं सुरलोकवासिनः
समाकिरन्नन्दनमल्लिकादिभिः ।
समीडिरे चानकदुन्दुभिस्वने-
ष्वदूरतोऽप्य गोपालसुता विसिस्मिरे ॥"
इति श्रीभागवते । १० । ११ । ५२ ॥
(भीमसेनश्च । बकराक्षसघातकत्वात् ॥)

बकुलः

ब(व)कुलः, पुं, (ब(व)कति कौटिल्ये + "मदिबुरादयश्च ।" उणा० १ । ७२ । इति उरच् प्रत्ययेनास्य साधुत्वं बकैर्नखोपखेलुभ्यां लत्वञ्च दत्तः ।) खनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । केसरः २ । इत्यमरः । २ । ४ । ६७ ॥ केशरः ३ । इति भरतः ॥ बकुलः ४ सिंहकेसरः ५ वरलक्षः ६ सीधुगन्धः ७ सुकूलः ८ सुकुलः ९ । इति शब्दरत्नावली ॥ क्षीरस्रवमधु १० दोहलः ११ मधुपुष्पः १२ सुरभिः १३ भ्रमरानन्दः १४ स्थिरकुसुमः १५ शारदिकः १६ करकः १७ सीसंज्ञः १८ विशारदः १९ गूढपुष्पकः २० घन्वी २१ मदनः २२ मद्यामोदः २३ चिरपुष्पः २४ ॥ (यथा, महाभारते । १ । ६३ । ४२ ।
"पुन्नागैः कर्णिकारैश्च बकुलैर्दिव्यपाटलैः ॥") अस्य गुणाः । घ्राणतर्पणत्वम् । कृमिघ्नत्वम् । विषदोषनाशित्वम् । मधुरत्वम् । कषायत्वम् । मदाढ्यत्वम् । हर्षदायकत्वञ्च ॥ तत्कुसुमगुणाः । रुच्यत्वम् । शीताढ्यत्वम् । सुरभित्वम् । घ्राणतर्पणत्वम् । मधुरत्वम् । स्निग्धत्वम् । कषायत्वम् । मलसंग्रहकारकत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बकुलो मधुगन्धश्च सिंहकेसरकस्तथा ।
बकुलस्तु वरोऽगुणः कटुः पाके रसे गुरुः ॥
कफपित्तविषश्वित्रकृमिदन्तगदापहः ॥"
इति भावप्रकाशः ॥
तत्फलगुणाः ।
"बकुलं मधुरं ग्राहि दन्तस्थैर्यकरं परम् ॥"
तत्पुष्पगुणाः ।
"पद्मं कषायं मधुरं शीतं पित्तकफास्रजित् ।
तद्वन् बकुलपुन्नागकङ्केल्लीपाटलम् ॥"
इति राजवल्लभः ॥
अस्योत्पत्तिर्यथा, —
"विचरन्तं तदा भूयो मदैर्णं कुसुमायुधः ।
आरात् स्थित्वाथसा धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमथनो दृष्ट्वा क्रोधाध्मातहृदा हरः ।
स्मरमालोकयामास शिवायाश्चरणान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो ज्वलितोऽपि ।
प्रादहत्न तदा ब्रह्मन् ! पादादारभ्य कल्मषम् ॥
प्रदह्यमानौ चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज धनुः शैघ्रं तच्चकाराथ पन्नगा ॥
यदासीन्मुष्टिबन्धस्तद्बकपुष्पं महाप्रभम् ।
स चम्पकसमज्ञानः सगन्धाढ्यो गुणान्वितः ॥
नाङ्गुष्ठानं शुभाकारं यदासीद्वकभूषितम् ।
तज्जातं केशवारण्यं बकुलं नामतो वरम् ॥
या च कोटी शुभा ह्यासीदिन्द्रनीलविभूषिता ।
जाता सा पाटला रम्या भृङ्गराजविराजिता ॥
नाङ्गोपरि तथा मुष्टौ स्थानं चक्रमखिप्रभम् ।
पद्मगुल्माभवज्जाती पुन्नागः किरणोज्ज्वला ॥
कर्णे सुरक्ता अधः कोषाः स्थानं विद्रुमभूषितम् ।
तस्मात् बहुपुटा मल्ली संजाता विविधा सुने ॥"
इति श्रीवामनपुराणे ६ अध्यायः ॥

(शिवः । यथा, महाभारते तस्य सहस्रनाम-कीर्तने । १३ । १७ । २०८ ।
"वह्निको वडवी इष्टो वडवामुखसन्निभः ।
वारयीवो महाजत्रुरजोजश्च महौषधः ॥")

व(व)डुला, स्त्री, (बकुल + टाप् ।) कटुका । इति राजनिर्घण्टः ॥

व(व)डुली, स्त्री, (बकुल + गौरादित्वात् ङीष् ।) काकोली । इति शब्दचन्द्रिका ॥

व(व)डूलः, पुं. (बकुल । पृषोदरादित्वात् दीर्घः ।) बकुलवृक्षः । इति शब्दरत्नावली ॥

व(व)डेरका, स्त्री, (बकानां बकसदृशानां डेरकं गतिर्यत्र ।) बलाका । वातावर्त्तितशाखा । इति मेदिनी । के, २०२ ॥

वडोटः, पुं, बकः । इति त्रिकाण्डशेषः ॥

वड, पैण्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) पैण्यमिह सामर्थ्यम् । वडति वीरो योद्धुं समर्थः स्यादित्यर्थः । इति दुर्गादासः ॥

व(व)ड्वा, स्त्री, (बलं वानीति । बल + वा + कः । टाप् । डलयोरैक्यात् लस्य डत्वम् ।) घोटकी । इत्यमरः । २ । ८ । ४३ ॥ (यथा, महाभारते । १ । २२६ । ४५ ।
"वड्वानान्तु मुख्यानां चन्द्रांशुसमवर्चसाम् ।
ददौ जनार्दनः प्रीत्या सहस्रं हेममण्डितम् ॥"
अस्या दुग्धगुणा यथा,—
"रूक्षोष्णं वड्वायास्तु क्षीरं श्लेष्मानिलापहम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
वड्वारूपधारिणी सूर्य्यपत्नी संज्ञा । यथा, मार्कण्डेयपुराणे । ७७ । २३ ।
"सूर्य्यतापमनिच्छन्ती तेजसस्तस्य विभ्यती ।
तपश्चचार तत्रापि वड्वारूपधारिणी ॥"
अस्या विशेषविवरणन्तु तत्रैव विशेषतो द्रष्टव्यम् ॥
तृतीया सूर्य्यपत्नी । इति केचित् । यथा, भागवते । ८ । १३ । ८—९ ।
"विश्वस्वतश्च ह्ये भार्ये विश्वकर्म्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ! ये प्राग्भिहिते तव ॥
तृतीया वड्वाभिधे नाम्नी संज्ञासुतास्वसुः ।
यमौ यमी आद्यदेवश्चायायाश्च सुतान् शृणु ॥")
अश्विनीनक्षत्रम् । इति ज्योतिषम् ॥ (नारी-विशेषः । इति हेमचन्द्रः ॥ दासी । यथाह नारदः ।
"भक्तदासश्च विज्ञेयस्तथैव वड्वाकृतः ॥"
वासुदेवस्य स्वनामख्याता परिचारिका । इति हरिवंशः । १५ । ३ ॥) वाड्वाग्निः । अस्योत्पत्तिर्यथा,—
"अपाकाग्निगता देवाः क्रुद्धं दृष्ट्वा महेश्वरम् ।
प्रसीद जगतां नाथ ! कामे क्रोधं परित्यज ॥
इति स्म वदतां तेषाममराणां तदानलः ।
ललाटचक्षुःसम्भूतो भक्षाकाङ्क्षीज्वलोभवम् ॥
ब्रह्मा क्रोधान्तं ज्वलोर्ध्वशुक्लं सकलान् जगान् ।
वड्वारूपिणं चक्रे देवानां पुरतस्तदा ॥
वड्वा तां तदा देवाः क्रौञ्चां ज्वालासुखीं सुभाम् ।
दृष्ट्वा निर्विण्णमनसो बभूवुः पूर्व्वपीड़िताः ॥
वड्वां तां समादाय तदा ज्वालासुखीं विधिः ।
सागरं प्रययौ लोकहिताय जगतां प्रभुः ॥
गत्वाथ सागरं ब्रह्मा प्रोवाच परिपूजितः ।
यथावत्तेन विप्रेन्द्राः समयञ्च निदेशयन् ॥
अयं क्रोधो महेशस्य वड्वारूपधृक् त्वया ।
ज्वालासुखः सदा धार्य्यो यावन्न विलयाम्यहम् ॥
यदा त्वामहमागत्य वदामि सरितांपते ! ।
तदा त्वया परित्याज्यः क्रोधोऽयं वड्वासुखः ॥
भोजनं भवतस्तोयमेतस्य तु भविष्यति ।
यत्रादौ विधाष्यत्यं यथा नो यासि चान्तरम् ॥
इत्युक्तो ब्रह्मणा सिन्धुरङ्गीचक्रे तदा क्रुधम् ।
धर्त्तुं वड्वाधरं गर्भोचाग्न्यक्षयमक्षरम् ॥
ततः प्रविष्टो जलधौ पावको वड्वामुखः ।
वार्य्यांचविजहंसस्य ज्वालामालातिदीपितः ॥"
इति कालिकापुराणे ४१ अध्यायः ॥
(नदीविशेषः । यथा, महाभारते । ३ । २२१ । २४ ।
"तमसा नर्म्मदा चैव नदी गोदावरी तथा ।
वेत्रोपवेत्रा भीमा च वड्वा चैव भारत ! ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८२ । ८८ ।
"ततो गच्छेत वड्वां त्रिषु लोकेषु विश्रुताम् ।
पश्चिमायान्तु सन्ध्यायां उपस्पृश्य यथाविधि ॥")

व(व)ड्वाकृतः, पुं. (वड्वया दास्या कृतः ।)
प्रच्छन्नदासात्मजतदासविशेषः । यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वड्वाकृतः ॥"
इति नारदः ॥
वड्वा दासी तत्तोभाद्गीलतदास्यः । इति दायक्रमसंग्रहः ॥ क्वचित् वड्वाभृतो वड्वा कृतोऽपि पाठः ॥

व(व)ड्वाग्निः, पुं, (वड्वायाः समुद्रस्थितायाः घोटक्या मुखस्योऽग्निः ।) समुद्रस्थाग्निः । (अस्य विवरणन्तु वड्वानलशब्दे द्रष्टव्यम् ॥)

व(व)ड्वानलः, पुं, (वड्वाया अनलः ।) वड्वाग्निः । तत्पर्य्यायः । सलिलेन्धनः २ वड्वामुखः ३ काक-ध्वजः ४ वाजिजः ५ स्कन्दाग्निः ६ हयधुक् ७ काष्ठधुक् ८ । इति त्रिकाण्डशेषः ॥ और्व्वः ९ वाड़वः १० । इत्यमरः । १ । १ । ५६ ॥ उर्व्वस्य ऋचेरपत्यम् और्व्वः ण्वः । वड्वायां विद्यमानो वाड़वः ण्वः । वड्वाया अनलो वड्वानलः । आधाराधेयभावसम्बन्धः । पुरा किल उर्व्वेण मुनिना अयोनिजं पुत्रमिच्छता वामो मथितं तस्य ज्वालामयः पुरुषो जातः स च समुद्रे वड्वामुखे अवस्थापितः । इति पौराणिकाः ॥ इति तट्टीकायां भरतः ॥ * ॥ तस्य विवरणं यथा,—
"और्व्वस्तु तपसाविष्टो निवेशयोरुं सुताग्नये ।
समर्थयैकेन दर्भेण सुतस्य व्रतधारिणम् ॥
तस्योरुं सहसा भित्त्वा ज्वालामाली ह्यनिन्दनः ।
जगतो दहनाकाङ्क्षी पुत्रोऽग्निः समपद्यत ॥
और्व्वस्योरुं विनिर्भिद्य और्व्वो नामाग्नको-ऽनलः ।
दिधक्षन्निव लोकांस्त्रीन् जज्ञे परमकोपनः ॥
उत्पन्नमात्रश्चोवाच पितरन्दीनया गिरा ।
क्षुधा मे बाधते तात ! जगद्भक्षे त्वजस्व माम् ॥
त्रिदिवारोहिभिर्ज्वालैर्नभोमार्गो दिशो दश ।
निर्दहन् सर्व्वभूतानि वहसे योऽम्बुकोऽनलः ॥
एतस्मिन्नन्तरे ब्रह्मा मुनिमौर्व्वं समागतः ।
उवाच वार्य्यतां पुत्रो जगत्क्षयं दयां कुरु ॥
अस्यापत्यस्य ते विप्र ! करिष्ये स्थानमुत्तमम् ।
सत्यमेतन्मम वचः शृणु त्वं वदतांवर ! ॥
और्व्व उवाच ।
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मेऽद्य भगवान् शिवः ।
मनसेनाद्दहतोऽपि परमाणुमयाय वै ॥
प्रभातकाले संप्राप्ते काङ्क्षितस्ये समागमे ।
भगवंस्तपितः पुत्रः कैर्वये प्राप्नुति सुखम् ॥
कुत्र वास्य निवासः स्याद्भोजनन्तु किमात्मकम् ।
विधास्यतीह भगवान् धैर्य्यमुक्तं महौजसः ॥
ब्रह्मोवाच ।
वड्वामुखेऽस्य वसतिः समुद्रे वै भविष्यति ।
मम योनिर्जलं विप्र ! तव मे नोयदं सुखम् ॥
अत्राहमासे नियतं पिबन् वारिमयं हविः ।
तद्वर्द्धिष्यव पुत्रस्य विदुजन्मानयंच तम् ॥
ततो युगान्ते भूतानां मेघवाहश्च पुष्कर ! ।
सङ्कर्षणौ विचरिष्यावो निष्पुराब्रह्मराविह ॥
ऊर्ध्वोऽग्निरन्तकाले तु सलिलाशी मया कृतः ।
दहनः सर्व्वभूतानां सदेवासुररक्षसाम् ॥
एवमस्त्विति तं सोऽपि संहृतज्वालमण्डलः ।
प्रविवेशार्णवसुखं विप्रनष्टान्तरप्रभम् ॥"
इति माक्षे १५० अध्यायः ॥
(महेन्द्रदहनाय हरनेत्रसमुद्भूतोऽग्निरपि वड्वा-नलः । अस्य प्रमाणादिकं वड्वाग्निशब्दे द्रष्टव्यम् ॥)
लङ्कायां दक्षिणे पृथिव्याश्चतुर्थभागरूपस्थान-विशेषः । इति सिद्धान्तशिरोमणिः ॥ (वटि-कौषधविशेषः । यथा,—
"शुद्धताम्रस्य भागैकं मरिचस्य तथैव च ।
विषं तत्तुल्यकं दद्यात् तत्सर्व्वं श्लक्ष्णचूर्णितम् ॥
लाङ्गलीरससंयुक्तं तत्सर्व्वं पुटके पचेत् ।
रक्तिकाद्वितयं वापि त्रितयं वा प्रकल्पते ॥
दोषे दोषसमायुक्तभिषग्दोषशमनो भवेत् ।
भक्षयेत् पवने दोषे वड्वानलसंज्ञितम् ॥
इति वड्वानलो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)

व(व)ड्वामुखः, पुं, (वड्वाया घोटक्या मुखमाश्रय-त्वेनास्यास्य । अर्श आदित्वात् अच् ।) वड्वा-नलः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । ६७ । २२ ।
"सा यत्रैवार्णवगता तत्रैव वड्वामुखे ॥"
महादेवस्य सुखमित्येके । यथा, महाभारते । ७ । २०० । १११ ।
"तस्य देवस्य यद्वक्त्रं समुद्रे तदतिष्ठत ।
वड्वामुखेति विख्यातं पिबत्तोयमयं हविः ॥"
महादेवस्य नाममेदः । यथा, महाभारते । १३ । १७ । ५५ ।

"विष्णुः प्रसादितो यज्ञः सहस्रो वड़वासुखः ॥"
कूर्मस्य दक्षिणकुक्षिस्थजनपदविशेषः । यथा, मार्कण्डेये । ५८ । १० ।
"कूर्मस्य दक्षिणे कुक्षौ वाह्लपारसवापरम् ।
काम्बोजाः पह्लवाश्चैव तथैव वड़वामुखाः ॥")
वटिकौषधविशेषः । यथा,—
"शुद्धसूतं समं गन्धं त्रसतालाभ्रटङ्कणम् ।
सामुद्रञ्च यवक्षारं खर्जिकेलवणागरम् ॥
अपामार्गस्य च क्षारं पलाशयवजस्य च ।
प्रत्येकं सूततुल्यं स्यादम्लयोगेन मर्दयेत् ॥
दक्षिणस्योदवेद्यायौ मर्दयित्वा पुटेषु च ॥
माषमात्रः प्रदातव्यो रसोऽयं वड़वामुखः ।
अङ्गवीं विविधां हन्ति संग्रहण्यर्शसी ज्वरम् ॥
इति वड़वामुखो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ग्रहण्यधिकारे ॥)

व(व)ड़वासुतौ, पुं, (वड़वाया घोटकीरूपायाः त्वष्टृसुतायाः संज्ञायाः सुतौ ।) अश्विनीकुमारौ । यथा, हेमचन्द्रः ।
"स्वर्वैद्यावश्विनीपुत्रावश्विनौ वड़वासुतौ ॥"
(तयोरुत्पत्तिकथा यथा, हरिवंशे ।८।४६—५१।
"गच्छ देव ! निजां भार्यां कुरुं चरति सोत्तरान् ।
वड़वारूपमास्थाय वने चरति दारुणे ॥
स तथा रूपमास्थाय स्वभार्यारूपलीलया ।
दर्शयं योगमास्थाय खां भार्यां वड़वां ततः ॥
अदृश्यां सर्वभूतानां तपसा नियमेन च ।
वड़वायुधा राजंस्त्रयीमकुनोभयाम् ॥
सोऽश्वरूपेण भगवांस्तां सुखे समभावयत् ॥
मैथुनाय विवेहन्तौ परपूर्वयथाक्रमम् ।
सा तन्निरवमच्छुक्रं नासिकार्या विवस्वतः ॥
देवौ तस्यामजायेतामश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ ह्यश्विनाविति ॥")

व(व)ड़वास्रुतः, पुं, (वड़वया दास्या स्रुतः ।) वड़वास्रुतः । यद्ददग्रदासाज्जातस्तद्दासविशेषः । यथा, वड़वाग्रहदासी तथा स्रुतस्तत्तोमेन तासुद्वाह्य दासत्वेन प्रविष्टः । इति भिताक्षरा ॥

वड़िग्रं, क्ली, (वलिनो मत्स्यान् ग्रसति नाशयतीति । ग्रसो + कः । तस्य ड़त्वम् ।) मत्स्यधरणार्थं वक्रकौड़िकण्टकविशेषः । वँड़शी इति भाषा । तत्पर्य्यायः । मत्स्यवेधनम् २। इत्यमरः । २।१०।२६ ॥ वलिग्रम् ३ वड़िशी ४ वड़िशा ५ । इति भरतः ॥ वलिशी ६ मत्स्यवेधनी ७ । इति तन्त्रिकाशब्दरत्नम् ॥ वलिसी ८ वलिसम् ९ वरिशी १० वलिग्रिः ११। इति शब्दरत्नावली ॥ मत्स्यभेदनम् १२ । इति जटाधरः ॥ (यथा, मद्भाभारते । १ । २८ । १० ।
"यद्यत् कण्ठमनुप्राप्तो निगीर्णं वड़िशं यथा ।
एवमेवाहारवत् पुत्र ! तं विद्यात् ब्राह्मणर्षभम् ॥",

वड़िशी, क्ली, (वड़िश + गौरादित्वात् ङीष् ।) वड़िग्रम् । इति शब्दरत्नावली ॥

वद्य, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) वद्यति । इति दुर्गादासः ॥

वद्यः, पुं, (वद्यतमिति । वद्य् + अप् ।) शब्दः । इत्यमरटीकायां रमानाथः ॥

व(व)णिक्, [ज्] पुं, (पण्यते क्रयविक्रयादिना व्यवहरतीति । पण + "पणीराद्येच्च वः ।" उणा० २ । ७० । इति इजि: पस्य च वः ।) क्रयविक्रयकर्त्ता । वाणिज्यकारकः । तत्पर्य्यायः । वैदेहकः २ सार्थवाहः ३ नैगमः ४ वणिजः ५ पण्याजीवः ६ आपणिकः ७ क्रयविक्रयिकः ८ । इत्यमरः ।२ । ६ । ७८ ॥ वैदेहः ९ विदेहः १० वाणिजः ११ वाणिजिकः १२ क्रायिकः १३ विक्रयिकः १४ । इति भरतोऽयः ॥ वाणिजकः १५ वाणिज्यकारः १६ । इति शब्दरत्नावली ॥ (यथा, माघे । १२ । २६ ।
"स्थाणौ निषङ्गिणयमसि क्षणमप्युरः
सुप्तोच्च लाभाय क्षतक्रयो वणिक् ॥")
करणान्तरम् । इति मेदिनी । जे, २६ ॥ वैश्यः । इति राजनिर्घण्टः ॥ (वाणिज्ये अधिकारादेवास्य तथात्वम् ॥ करणविशेषः । यथा, हरिवंशसंहितायाम् । ६६ । ७ ।
"क्षत्रियोऽयहायजानि गरे
वणिजिभुवकार्यं वणिग्युतयः ॥")

व(व)णिक्, [ज्] क्ली, (पण्यते व्यवहीयते इति । पण + इजि । पस्य वः । अभिधानात् क्लीवम् ।) वाणिज्यम् । इति मेदिनी । जे, २६ ॥

व(व)णिक्बन्धुः, पुं, (वणिजः पण्याजीवस्य बन्धुर्धनदत्वात् ।) नीलीवृक्षः । इति शब्दचन्द्रिका ॥

वणिग्भावः, पुं, (वणिजो भावः ।) वाणिज्यम् । वणिजां धर्म्मः । तत्पर्य्यायः । सत्यानृतम् २ । इत्यमरः ॥ वाणिज्यम् ३ वाणिज्या ४ वणिक्पथः ५ । इति जटाधरः ॥ वणिज्यम् ६ । इति शब्दरत्नावली ॥

व(व)णिग्वहः, पुं, (वहतीति । वह + अच् । वहः । वणिजां वाणिज्यद्रव्याणां वहः ।) उष्ट्रः । इति शब्दचन्द्रिका ॥

व(व)णिजः, पुं, (वणिगेव । वणिज् + स्वार्थे अण् । व्यभिधानात् न वृद्धिः ।) वणिक् । इत्यमरः । २ । ६ । ७८ ॥ यवाटीकादशकरणान्तर्गतसङ्करणम् । तज्ज्ञानफलं यथा, कोष्ठीप्रदीपे ।
"प्राज्ञः क्षत्रज्ञो गुणवान् गुणज्ञो
वणिग्जनप्राप्तमनोरथः स्यात् ।
यस्य प्रहस्तौ वणिजाभिधानं
भाक्तप्रधानं हविषां हि तस्य ॥"

व(व)णिज्यं, क्ली, (वणिजो भावः कर्म्म वा । वणिज् + "दूतवणिग्भ्यां यः ।" ५ । १ । १२६ । इत्यत्र काशिकोक्तेर्यः ।) वाणिज्यम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये । ५० । ७६ ।
"त्रिभिः पूर्वगुणैर्युक्तं पाशुपाल्यवणिज्ययोः ॥")

वणिज्या, स्त्री, (वणिजां कर्म्म । वणिज् + यः । टाप् । स्वभावात् स्त्रीलिङ्गोऽयम् ।) वाणिज्यम् । (यथा, कथासरित्सागरे । १३ । ६८ ।
"ततः स तत्पिता तेन तनयेन समं ययौ ।
द्वीपान्तरं क्षुधार्त्तेनोर्वशिव्याप्यपदेशतः ॥")

वद्दर, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-अक०-सेट् ।) वद्दति पर्व्वतः । आवादीत् अवदीत् । हसादेः सेम इत्यादिना वा दीर्घः । ह्रस्वश्चेदादौ इत्यादिना वा दीर्घः । ह्रस्वश्चेदादौ इत्यादिनेत्यन्यत्रादिति प्राचः । इति दुर्गादासः ॥

व(व)द्दरं, क्ली, (वद्दति क्षिरीभवति छिन्नेऽपि पुनः प्ररोहतीति । वद्द + अरः ।) सैविकलम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"सुद्दिप्रभाजं वद्दरं सैवं सिवितिकाफलम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कार्पासफलम् । कोलिफलम् । इति हेमचन्द्रः ॥ शृगालकोलिः । शीयाकुल इति भाषा । वद्दति क्षिरीभवति छिन्नस्यापि पुनःप्ररोहणात् । वद्दरं वृक्षफलेऽपि क्लीवम् । इति भरतः ॥ तत्पर्य्यायः । घोण्टा २ । इत्यमरः ॥ गोपघोण्टा ३ । इति सुभूतिः ॥ वक्तिकोलिः ४ गोपघण्टी ५ वद्दरीच्छदा ६ शृगालकोलिः ७ कर्कन्धुः ८ । इति रत्नकोषः ॥ वादिरम् ९ । इति शब्दरत्नावली ॥ अस्य विवरणं कोलशब्दे द्रष्टव्यम् ॥*॥ वृहत्कोलिः । तत्पर्य्यायः । सौवीरम् २ । इति रत्नमाला ॥* ॥ कोलिमात्रम् । तत्पर्य्यायः । कर्कन्धुः २ वद्दरी ३ कोलम् ४ विनिलम् ५ कुवलम् ६ घोण्टा ७ सौवीरम् ८ अजाप्रिया ९ कुहा १० कोलिः ११ विषरः १२ भयकण्टकः १३ । इति भावप्रकाशः ॥ कैर्वारकः १४ गुड़फलः १५ वालेष्टः १६ फलशेखिरः १७ हड़बीजः १८ वृत्तफलः १९ कण्टकी २० वक्रकण्टकः २१ सुरसः २२ सुफलः २३ स्वच्छः २४ कर्कन्धः २५ वद्दरः २६ कोला २७ कोली २८ कुवली २९ स्वादुफला ३० शबरशबी ३१ पिच्छिला ३२ कुवलः ३३ । इति च शब्दरत्नावली ॥ (यथा, भागवते । ४ । ८ । ७२ ।
"चिराज्जाते चिराज्जाते कपित्थवद्दराङ्गनः ।
आत्मवृत्त्यनुसारेण मासं निर्व्वर्त्तयन् हरिम् ॥")
अस्य गुणाः । मधुरत्वम् । कषायत्वम् । अम्लत्वञ्च ॥ परिपक्वस्य तस्य गुणाः । मधुराम्लत्वम् । उष्णत्वम् । कफकारित्वम् । पवनानिसारदग्धमदोषार्शोविनाशित्वम् । दध्यत्वञ्च । इति राजनिर्घण्टः ॥ राजवद्दरभूवद्दरलघुवद्दराणां पर्य्यायगुणास्तत्तच्छब्दे द्रष्टव्याः ॥*॥ अथ वद्दरविशेषाणां लक्षणानि गुणाश्च ।
"पक्वमानं सुमधुरं सौवीरं वद्दरं महत् ।
सौवीरं वद्दरं प्रोक्तं भेदनं गुरु शुक्रलम् ॥
दृंहणं पित्तदाहास्रक्षयवह्न्यनिवारणम् ॥*॥
सौवीरान्यत्र संपक्वं मधुरं कोलमुच्यते ॥
कोलन्तु वद्दरं प्राहु रुच्यमुष्णञ्च वातजित् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥*॥
कर्कन्धुः क्षुद्रवद्दरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रवद्दरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेद्यमिदन्तु सर्व्वं लघु हृद्यान्नमाचक्षते ॥"
इति भावप्रकाशः ॥

ब(व)दरः, पुं, (बदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति। बद् + अर।) कोलिवृक्षः। तत्पर्य्यादिगुणाः।
"बदरस्य फलेपत्रे ज्वरदाहविनाशनः।
तथा विस्फोटशमनौ बीजं नेत्रामयापहम्।"
इति राजनिर्घण्टः॥
अस्य पर्य्यायः फलगुणाश्च स्त्रीवलिङ्गबदरशब्दे द्रष्टव्याः॥ * ॥ देवसर्षपवृक्षः। इति राजनिर्घण्टः॥ कार्पासास्थि। इति मेदिनी॥ कापासेर बिचि इति भाषा॥ तच्च अन्तःस्थबकारादिशब्दमध्ये गृहीतोऽयम्॥

ब(व)दरफली, स्त्री, (बदरस्येव फलमस्याः। बदरफल + ङीप्।) भूबदरी। इति राजनिर्घण्टः॥

ब(व)दरवल्ली, स्त्री, (बदरा बदरफलवद्फला वल्ली लता।) भूबदरी। इति राजनिर्घण्टः॥

बदरा, स्त्री (बदति छिन्नायामपि पुनः प्ररोहणात् स्थिरीभवति या। बद् + बाहुलकादरः। टाप्।) वराहक्रान्ताभूः। (तत्पर्य्यायो यथा,
"वाराहीकन्द एवाथो वर्म्मकारालुको मतः।
अनूपसम्भवे देशे वाराह इव लोमवान्।
विदारी स्वादुकन्दा च सा तु क्षीरी सिता स्मृता॥
दुग्धगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना यष्टिर्बदरेत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कार्पासीवृक्षः। इत्यमरः। २। ४। २१६॥ एलापर्णी। इति मेदिनी। रे, २०७॥ विष्णुक्रान्ता। इति विश्वः॥

बदराम्लकं, क्ली, (बदरफलमिवाम्लकम्।) प्राचीनामलकम्। इति शब्दरत्नावली। १०२॥

बदरिः, स्त्री, (बद + बाहुलकादरिः।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

बदरिकाश्रमः, पुं, क्ली, (बदरिकाविच्छिन्न आश्रमः।) तीर्थविशेषः। (असौ च हिमालयपर्व्वतैकदेशे श्रीनगरसमीपे अलकनन्दानद्याः पश्चिमस्तीरे अवस्थितः।) स तु नारायणस्य आसस्य आश्रमः। यथा, महाभारते। ३ धौम्यतीर्थयात्रापर्व्वणि ८०। २३—३२।
"नारायणो विभुर्विष्णुः शाश्वतः पुरुषोत्तमः।
तस्यातिमहतः पुण्या विशालां बदरीमनु॥
आश्रमः श्रूयते पुण्यस्त्रिषु लोकेषु विश्रुतः।
उत्तानोत्तप्रवहा गङ्गा श्रीमतोत्तप्रवहा पुरा॥
सुवर्णशिखला राजन्! विशालां बदरीमनु।
ऋषयो यत्र देवाश्च महाभागा महौजसः॥
प्राप्य नित्यं नमस्यन्ति नारायणमजं विभुम्।
यत्र नारायणो देवः परमात्मा सनातनः॥
तत्र क्षत्तर्जगत् पार्थ! तीर्थान्यायतनानि च।
तत् पुण्यं तत् परं ब्रह्म तत्तीर्थं तत्तपोवनम्॥
तत् परं परमं दैवं भूतानां परमेश्वरम्।
शाश्वतं परमञ्चैव धातारं परमं पदम्॥
यं विदित्वा न मुह्यन्ति विद्वांसः शास्त्रदृष्टयः।
तत्र देवर्षयः सिद्धाः सर्व्वे चैव तपोधनाः॥
आदिदेवो महायोगी यत्राद्ये मधुसूदनः।
पुण्यानामपि तत् पुण्यं तत्र ते संशयोऽस्तु मा॥
एतानि राजन्! पुण्यानि पृथिव्यां पृथिवीपते!।
कीर्त्तितानि नरश्रेष्ठ! तीर्थान्यायतनानि च॥
एतानि वसुभिः साध्यैरादित्यैर्मरुद्गणैः।
ऋषिभिर्ब्रह्मकल्पैश्च सेवितानि महात्मभिः॥
चरन्नेतानि कौन्तेय! सहितैर्ब्राह्मणादिभिः।
शान्तभिश्च महाभागैरलकां विहरिष्यसि॥"
(तथा च भागवते। ७। ११। ६।
"योऽवनीयात्मनोऽङ्घ्रीन दास्यायर्षेर्याचतो दमात्।
लोकानां स्वस्तयेऽभ्राजे तपो बदरिकाश्रमे॥")

बदरी, स्त्री, (बदर + गौरादित्वात् ङीष्। बदरि + ऋदिकारादिति पक्षे ङीष् वा।) कोलिवृक्षः। इत्यमरः। २।४।२६॥ (अस्याः पर्य्यायो बदरशब्दे द्रष्टव्यः। यथा, भागवते। १। ७। ३।
"तस्मिन् स आश्रमे व्यासो बदरीषण्डमण्डिते॥")
कार्पासी। इति शब्दरत्नावली॥ कपिकच्छुः। इति राजनिर्घण्टः॥ (बदर्याः फलम् हरीतक्यादित्वात् ङीषन्तेति विकारार्थस्य लुक्। बदरीफलम्॥)

बदरीच्छदा, स्त्री, (बदर्याश्छदा इव छदा यस्याः।) हस्तिकोलिवृक्षः। गुडनखी। इति रत्नमाला॥

बदरीपत्रः, पुं, (बदर्याः पत्रमिव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (यथा,—
"बदरीपत्रकल्कं वा घृतभृष्टं सलैन्धवम्।
स्वरोपघाते कासे च लेहमेतत् प्रयोजयेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे॥)

बदरीपत्रकं, क्ली, (बदरीपत्र + स्वार्थे कन्।) नखीनामगन्धद्रव्यम्। इति जटाधरः॥

बदरीफला, स्त्री, (बदर्याः फलमिव फलं यस्याः।) नीलघण्टापालिका। इति शब्दमाला॥

बदरीशैलः, पुं, (बदरीवहुलः शैलः पर्व्वतः।) हिमालयपर्व्वतैकदेशः। बदरीवनं बदरिकाश्रम इति च ख्यातः। स तु श्रीनगराख्यदेशे अलकनन्दानदीपश्चिमतीरे वर्त्तते। इति पुराणान्तरम्॥

बद्धं, त्रि, (बध्यते स्म इति। बन्ध + कर्म्मणि क्तः।) बन्धनयुक्तम्। बाँधा इति भाषा। तत्पर्य्यायः। सन्दानितम् २ सृतम् ३ उद्धितम् ४ सन्दितम् ५ सितम् ६। इत्यमरः। ३। १। ६५॥ निगडितम् ७ गडम् ८ कीलितम् ९ यन्त्रितम् १० संयतम् ११। इति हेमचन्द्रः॥ (यथा, मनुः। ६। ३०८।
"वरणैस्तु यथा पाशैर्बद्ध एवाभिदृश्यते।
तथा पापानियन्तॄणीयात् प्रतमेतद्धि वारुणम्॥"
तथा च मेघदूते। ७६।
"तत्रार्थे च स्फटिकफलका काञ्चनीवासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढ़वंशप्रकाशैः॥"
तथा च श्राद्धतत्त्वे २ अङ्के।
"छायावद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु॥")

बद्धगुदं, क्ली, (बद्धं गुदं पायुर्यस्य।) उदररोगविशेषः। तस्य निदानं यथा,—
"यस्यान्नमन्नेऽपक्वेऽपि भिभ्भी
बालाश्मभिर्वा पिहितं यथावत्।
वर्च्चीयते तस्य मलः स दोषात्
गुदे गुदेः बद्धरवच्च नाद्याम्॥
निरुध्यते तस्य गुदे पुरीषं
गिरेरिवोच्चादपि चाध्यमध्यम्।
कुक्षाभिमध्ये परिदह्यतेऽति
तस्योदरं बद्धगुदं वदन्ति॥"
इति माधवकरः॥ * ॥
तस्य चिकित्सा यथा। "स्निग्धस्विन्नस्याधःकक्षाधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य गिरीष्य बद्धगुदस्यान्त्रप्रतिरोधकरमन्त्रानं वालं वापोद्ध्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा वाह्यं व्रणमुदरस्य सीव्येत् छिन्नयोर्यथोक्तेन विधानेन च रोपयेत्।" इति सुश्रुते चिकित्सितस्थाने १४ अध्यायः॥ (तथास्य संकारमलक्षणम्।
"पक्वाशये: सङ्कोचेन शुष्के वैद्यायने गुदे।
उदावर्त्तस्तथार्शोभिरन्त्रसंलग्नकेन वा॥
अपानो मार्गसंरोधात् हृत्वायुं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्ध्वा जनयत्युदरं ततः॥"
तस्य रूपाणि।
"शूलादाटोपहृल्लासानाध्मानोद्गारविड्ग्रहान्।
दीर्घत्वारोचकाविपाकवर्च्चोमूत्रसङ्गानाशङ्केद्
बस्तिगुदरोगाभिगुप्तमूलान्यपि चोदरं मूढ़वातं
स्थिरमलजनीलराजीसिरावनद्धमवाजिकं वा
प्रायो नाभ्युपरिगोपुच्छवदभिनिर्व्वर्त्तयति दुर्जयत्वात्
बद्धगुदोदरमिति विद्यात्॥"
तथास्य चिकित्सा।
"स्निग्धाय बद्धोदरिणे दद्यं तीक्ष्णौषधान्वितम्।
सनेललवणं दद्यात् निरूहं सानुवासनम्॥"
इति चरके चिकित्सितस्थाने त्रयोदशोऽध्याये॥)

बद्धप्नि, क्ली, बद्धपाखि। सुश्रुतः। इति पुराणान्तरम्॥ बद्धाप्नीति च पाठः॥

बद्धफलः, पुं, (बद्धानि फलानि यस्येति।) करञ्जवृक्षः। इति राजनिर्घण्टः॥ (विशेतिरस्य करञ्जशब्दे ज्ञातव्या॥)

बद्धमुष्टिः, त्रि, (बद्धा दृढ़ा दानाग्निवृत्त्या वा मुष्टिर्यस्येति।) दृढ़मुष्टिः। कृपणः। यथा, मनौ। ३। ८५।
"सजीवमर्थधिमुखे वदन्त्य-
स्तव त्रपा नेदृगुबद्धमुष्टेः॥"

बद्धमूलं, त्रि, (बद्धं मूलं यस्येति।) दृढ़मूलम्। उत्पाटनागर्हमूलम्। यथा, माघे। २। ३८।
"त्वया विप्रकृतश्चेयो रुक्मिणी हरता हरेः।
बद्धमूलस्य मूलं हि मद्वैरस्तरोः स्त्रियः॥"

बद्धरसालः, पुं, (बद्धो रसेन आर्द्रतः अतएव रसालः रसवान्।) विविधराजाज्ञालङ्घना-

युक्तमात्रः । तत्पर्य्यायः । चक्रतलात्रः २ मध्यात्रः ३ सितजात्यकः ४ वनेच्यः ५ मध्यपानस्थः ६ मदनेच्छापलः ७ । तस्य कोमलफलगुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदत्वञ्च । तस्य सुपक्वफलगुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

बद्धग्रिखः, त्रि, (बद्धा ग्रिखा चूड़ा यस्येति ।) ग्रिखुः । इति मेदिनी । खे, १५ ॥ ग्रिखाबन्धनविग्रिष्टः । यथा, प्रायश्चित्ततत्त्वधृतवचनम् ।

"सदोपवीतिना भाव्यं सदा बद्धग्रिखेन तु ।
विग्रिखो ह्युपवीतञ्च यत् करोति न तत् कृतम् ॥"

बद्धग्रिखा, स्त्री, (बद्धा ग्रिखा यस्याः ।) उच्चटा । इति मेदिनी । खे, १५ ॥ (बद्धा ग्रिखा केग्रकलापो यस्याः ।) सञ्चद्धकेग्रा च ॥

बध, क बन्धे । इति कविकल्पद्रमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, बाधयति । इति दुर्गादासः ॥

बध, ड जिन्दे । बन्धे । इति कविकल्पद्रमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ड, बीभत्सते खलं लोकः । बधते तत्र साध्वो न प्रयुञ्जन्ते । इति रमानाथः ।

'मावधिष्ठा जटायुं मां सीतां रामाहमेधिषि ।'
इति भट्टिः । ६ । ७१ ॥ इति दुर्गादासः ॥

बधिरः, त्रि, (बध्नाति कर्णमिति । बन्ध + "इषिमदिसुदीति ।" उणा० १ । ५२ । इति किरच् ।) अवगेन्द्रियरहितः । श्रुतिशुक्तिहीनः । काला इति भाषा । तत्पर्य्यायः । एडः २ । इत्यमरः । २ । ६ । ४८ ॥ कलः ३ अवगापटुः ४ । इति शब्दरत्नावली ॥ उच्चैःश्रवाः ५ । इति संक्षिप्तसारोणादिवृत्तिः ॥ (यथा, मनुः । ११ । ५२ ।

"दृष्टं कर्म्मविशेषेण जायन्ते सङ्किगर्हिताः ।
अङ्गमूकान्धबधिराविकृताकृतयस्तथा ॥"

बाधिर्य्यनिदानं यथा,—

"यदा शब्दवहं वायुः श्रोत्रमावृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"

इति माधवकरः ॥

असाध्यबाधिर्य्यमाह ।

"बाधिर्य्यं बालवृद्धोत्थं चिरोत्थञ्च विवर्ज्जयेत् ।"

इति भावप्रकाशः ॥*॥

अस्यौषधम् ।

"कर्णमूले कर्णनादे बाधिर्य्ये क्षेड एव च ।
चतुर्ष्वपि च दोषेषु सामान्यं भेषजं स्मृतम् ॥
ग्रङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कटूष्णं कर्णयोर्बाधिर्य्यमेतत् स्याद्दिनाग्रहम् ॥१॥
कर्णमूले कर्णनादे बाधिर्य्ये क्षेड एव च ।
पूरणं कटुतैलेन हिङ्गं वातघ्नमौषधम् ॥ २ ॥
ग्रिखरिग्वारजवारिसमृतकर्कटेन साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणात् ॥
ग्रिखरी अपामार्गः ॥ ६ ॥
अर्कं मूलेन विल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सञ्जञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम् ॥

क्षीरमज्ञाजं यावत् । विल्वतैलम् ॥ ४ ॥"इति भावप्रकाशः ॥ यथा च ।

"शुष्कमूलकमुक्तीनां चारो हिङ्गुलवागरम् ।
सुध्यं चतुर्गुणं दृष्ट्वा तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रिमयञ्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"५

इति गारुडे १८७ अध्यायः ॥

ब(ब)धूः, स्त्री, (बध्नाति प्रेम्णा या । बन्ध + ऊः नलोपश्च । अन्तःस्थवादौ तु वहति संसारभारं उह्यते भर्त्रादिभिरिति वा । वह + "वहेर्धश्च ।" उणा० १ । ८५ । इति ऊः धश्चान्तादेशः ।) नारी । स्नुषा । एका । इत्यमरः । ३ । ३ । १०१, २ । ४ । १३३ ॥ (अस्याः पर्य्यायो यथा,—

"एका स्यादृजाक्षणी देवी मरुन्माला लता लघुः ।
समुद्रान्ता वधूः कोटिवर्षालङ्कारापिकेत्यपि ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥)

ग्रारिवौषधिः । ग्रटी । (अस्याः पर्य्यायो यथा,

"ग्रटी पलाग्री षड्ग्रन्था सुवला गन्धकुलिका ।
गन्धारिका गन्धबधूर्बन्धुः पृथुपलाग्निका ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

नवोढ़ा । (यथा, रघुः । ७ । ४ ।

"वरः स बध्वा सह राजमार्गं
प्राप ध्वजच्छायनिवारितोष्णम् ॥")

भार्य्या । इति मेदिनी । धे, १४ ॥ भरतेन अमरकोषटीकायां पवर्गीयबकारादिबन्धधातुना निष्पादितोऽयम् । मेदिनीकारेण तु अन्तःस्थवकारादिशब्दमध्ये संगृहीतः ॥ अथ नववध्वा हिरागमनयात्रा । सप्ताष्टमदशमद्वादशषष्ठचतुर्थवर्षाणि निषिद्धानि । माघाः मार्गशीर्षफाल्गुनवैशाखा विहिताः । पक्षः शुक्लः । पुष्यस्वातीहस्ताधनिष्ठोत्तराषाढोत्तरफल्गुन्युत्तरभाद्रपदरेवतीमृगशिरोरोहिणीपुनर्व्वसुपूर्व्वाषाढा अनानि नक्षत्राणि विहितानि । सोमबुधबृहस्पतिशुक्राणां वाराः विहिताः । तिथयो याचाप्रकरणोक्ताः । चन्द्रताराशुद्धौ कालशुद्धौ चाद्य स्वर्णवारवेलादिकं शूलादीन् परित्यज्य कर्त्तव्या । इति ज्योतिषम् ॥

"दत्ते पाणिग्रहे भ्रातुः पितुः प्रतिग्रहं प्रति ।
पुनरागमनं बध्वास्तद्धिरागमनं विदुः ॥
विवाहमासि प्रथमं बध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्यं युग्माद्यब्दं विजानता ॥
मृता पितृगृहे नारी मृतः स्वामिगृहे यदि ।
दौर्भाग्यं जायते तस्याः प्रपन्नि कुलनायिकाः ॥"

इति ज्योतिस्तत्त्वम् ॥

बधूजनः, पुं, (बधूरेव जनः ।) योषित् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ३ । ५२ ।

"स्थितिप्रतिष्ठोऽपि सुखारविन्दे-
बधूजनस्तन्मधवाकार ॥")

बधूटगयनं, क्लो, (बधूटीनां गयनमिव । पृथोदरादिकारस्याकारः ।) गवाक्षः । यथा,—

"वातायनं गवाक्षः स्याद्बधूटगयनञ्च या ॥"

इति त्रिकाण्डशेषः ॥

बधूटिः } स्त्री, (अल्पवयस्का बधूः । अल्पार्थे
बधूटी, } टिः । पक्षे ङीष् । यद्वा, बधू + "वयस्यचरम इति वाच्यम् ।" ॥ । १ । २० । इत्यस्य वार्त्ति० इति ङीष् ।) पुत्रभार्य्या । इति भरतधृतरभसकोषः । सुवासिनी । इति हेमचन्द्रः ॥ अन्या बधूः । यथा,—

"नूतनजलधरकान्तये गोपबधूटीदुकूलचौराय ।
तस्मै नमः सनाथाय संसारमहीरुहस्य बीजाय ॥"

इति भाषापरिच्छेदः । १ ॥

बधूत्सवप्रसवः, पुं. (बध्वा उत्सव आर्त्तवः स इव प्रसवः पुष्पादिर्यस्य ।) रक्ताशोकः । इति राजनिर्घण्टः ॥

बध्न, क्लो, (बध्नातेऽनेनेति । बन्ध + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ।) शीर्षकम् । इत्यमरः ॥ बध्नमिति पठति स्वामी ॥ (अस्य पर्य्यायो यथा,—

"शीर्षं बध्नञ्च बध्नञ्च योगेष्टं नागनामकम् ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

बध्नी, स्त्री, (बध्नातेऽनया । बन्ध + "सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् ङीष् ।) चर्म्मरज्जुः । इत्यमरः । २ । १० । १३ ॥ बध्नी द्विरेफेति कैश्चित् । बद्धौ चर्म्मबन्धे भवा बाद्धी दोर्घादिरिति चक्रुः ॥

बन, ट ड उ याचने । इति कविकल्पद्रमः ॥ (तना०-आत्म०-द्विक०-सेट् । क्रावेट् ।) ट ड, बनुते । उ, बनिला बला । इति दुर्गादासः ॥

बन्ध, औ ग बन्धे । इति कविकल्पद्रमः ॥ (क्रया०-पर०-सक०-अनिट् ।) औ, अबान्त्सीत् । ग, बध्नाति । बन्धान्तं ग्रह तृच तृच ग्रपर्य्यः किं धृषे निर्ब्बन्धसे । इत्यपपाठः । निर्ब्बन्धते इति पाठमिति रमानाथः । वस्तुतस्तु अस्य ग्रगन्तानित्यतया नेरभावे आत्मनेपदे च सिद्धम् । इति दुर्गादासः ॥

बन्ध, क बन्धे । इति कविकल्पद्रमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, बन्धयति । इति दुर्गादासः ॥ (यथा, रामायणे । २ । ८३ । ४ ।

"बन्धयिष्यति वा पाशैरथवास्मान् वधिष्यति ॥")

बन्धः, पुं, (बन्ध + हलश्चेति घञ् ।) आद्धिः । बन्धनम् । इति मेदिनी । धे, ६ ॥ शरीरम् । इति हेमचन्द्रः ॥ (कर्म्मजनिताहृष्टद्वारात् हेत्वा हेत्वान्तरोत्पत्तेः शरीरस्य तथात्वम् ।) यन्त्रादि वेष्टनम् । इति शब्दरत्नावली ॥ तद्विवरणं यथा,

"रूपाष्टकैर्विनिर्म्मुक्तो भवस्य बन्धः
कर्म्मः स्वरूपमिह युग्मशरीरकस्य ।
एकीकृतं रसनिशाकरयुग्मशुक्र-
ग्रैवं मनो भवति पिञ्जपदं यदस्य ॥
यद्भूमिसप्तकमुदीरितपिञ्जपदं
वसुलोचनरन्ध्रगजैर्गुणितम् ।
रविभूधरचिन्मृदुयोगकृत-
मायव्ययस्थितिकरत्वपदम् ॥"

रूपाष्टकैरेकाधीना विनिहतः पूरितो भवनस्य बन्धः दीर्घप्रकारमिलितश्चक्षा; अन्यच्च तत्संख्यार्थं शुन्यद्वयेनान्वितं द्विपञ्चाग्न्युत्तरशतपूरितम् एकीकृतं पूर्वार्द्धेन मिलितं रसनिशाकरयुग्मशुन्यद्वीपं षोडशाधिकद्विशतशून्याधिकं तत्संख्यार्थं पिञ्जपदसंज्ञं गृहस्य भवति तद्गृहभूमिसमाहतपिञ्जपदं वसुजोपनरन्ध्रगजैः। अष्टद्विनवाष्टभिर्यथाक्रमं शुन्यितं पूरितं यथाक्रमं रविभूधरचिंशद्गुणोगकृतं द्वादशसप्तचिंशत्सप्तविंशतिभिर्हतं गृहस्य यथाक्रममायव्ययस्थितिरूपपदं भवतीत्यर्थः।

"यदृच्छयमिते बन्धे भरण्या योगतो यथा।
आयाद्यो भवत्यत्र वसुघट्तिथियुङ्मिताः॥
अत्र भक्तं हीयते पश्चात्तदेवायाति।
प्रत्यक्पश्चिमयोर्भे भविष्यं विदिक्षु दक्षनादि।
पूर्वोत्तरयोर्गृहयोरग्न्यादिभानि स्युः।
यत्र तु द्वीपो नास्ति तत्र द्वारकाङ्कः द्वीपः॥
द्वीपाङ्केन भजे शोध्ये द्वीपाभावे तु द्वारकात्।
अङ्कादेव भजं शोध्यमिति तत्त्वविदाम्मतम्॥
दृष्टुल्लात्॥
यथाधिकं न कर्त्तव्यं गृहमायाधिकं शुभम्॥"
इति ज्योतिस्तत्त्वम्॥ * ॥

षोढ़शप्रकारा रतिबन्धा यथा, रतिमञ्जर्य्याम्। ३०—४१।

"पद्मासनो नागपदो लतावेष्टोऽर्द्धसम्पुटः।
कलिङ्गं सुन्दरश्चैव तथा केशर एव च॥
द्विजोष्ठो गरसिंहोऽपि विपरीतस्तथापरः।
शुष्को वै धेनुकश्चैव सप्तत्वक्षतः परः।
सिंहासनो रतिनागो विद्याधरस्तु षोढ़शः।"
(एतेषां लक्षणानि तत्रैव। ४२-५७। उक्तानि। यथा,—

"वक्षोभ्याञ्च समालिङ्ग्य नारीं पद्मासनोपरि।
रमेन्नाढ्यं समाक्रम्य बन्धोऽयं पद्मसंज्ञकः॥
पादौ स्वस्वयुगे कृत्वा क्षिपेज्जिह्वं भगे लघु।
प्ररमेत् कामुको नारीं बन्धो नागपदो मतः॥
बाहुभ्यां पादयुग्माभ्यां वेष्टयित्वा रमेत् स्त्रियम्।
लघु लिङ्गं ताड़येद् योनौ लतावेष्टोऽयमुच्यते॥
स्त्रीपादावन्तरीक्षे तु किञ्चिद्भूमौ च जानुनि।
स्तनयोर्मर्द्दनं पीड़ा बन्धोऽयं मर्द्दसंपुटः॥
स्त्रीपादद्वयमाक्रम्य दक्षाङ्गिलक्ष्य ताड़नम्।
योनिमापीड़येत् कामी बन्धः कुलिङ्गसंज्ञकः॥
नारीपादद्वयं कामी धारयेदूर्द्धदेशतः।
कुर्यो कृत्वा पीड़येद्वं बन्धोऽयं रतिसुन्दरः॥
स्त्रियो जङ्घे समाधाय दोर्भ्यां गाढञ्च मर्द्दनम्।
पुनः प्रपीड़येद् योनिं बन्धः केशरसंज्ञकः॥
कृत्वि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ।
यथेष्टं ताड़येत् योनिं बन्धो द्विजोष्ठसंज्ञकः॥
पादौ संगोप्य योनौ च दक्षाङ्गिलप्रवेशनम्।
दक्षयोर्वेष्टनं गाढ़ं बन्धो वृषिंदसंज्ञकः॥
पादमेकतरौ कृत्वा द्वितीयं कटिसंस्थितम्।
नारीञ्च रमेत् कामी विपरीतस्तु बन्धकः॥
मार्गोपरि पदौ कृत्वा योनौ लिङ्गेन ताड़येत्।
बाहुभ्यां ताड़येद्गाढं शुष्कयो बन्ध एव सः॥
शुप्तां स्त्रियं समालिङ्ग्य स्वयं शुप्तो रमेत् पुनः।
यस्मिन् बन्धे योगौ बन्धोऽयं धेनुकः स्मृतः॥
नारीपादौ च हस्तेन धारयेत् भजके पुनः।
लतापीतकरो कामी बन्धश्चोलकसंज्ञकः॥
स्वयं भग्नाहयं बाहौ कृत्वा योन्यिन्यदृश्यम्॥
स्तनौ पृष्ठा रमेत् कामी बन्धः सिंहासनो मतः॥
पीड़येदुरुयुग्मेन कामुकः कामिनीं यदि।
रतिनागः समाख्यातः कामिनीनां मनोहरः॥
नार्य्याश्चोरुयुगं पृष्ठा कराभ्यां ताड़येत् पुनः।
रमयेन्निर्भरं कामी बन्धो विद्याधरो मतः॥"
इति॥)

संज्ञाप्रभेदेन अन्योऽपि बन्धोऽस्ति। यथा,—

"कामप्रदो विपरीतो नागरो रतिपाशकः।
केयूरः प्रियतोषश्च ततः समपदस्तथा॥
ततश्चैकपदो ज्ञेयः सम्पुटश्चार्द्धसम्पुटः।
ततः स्वभवश्चैव ततो तु रतिसुन्दरः॥
ऊरुपीड़करश्चान्यो ततश्चोरुक्रमः स्मृतः।
वेष्टको हंसकोलस्तु ततो लोलासनस्तथा॥
अष्टादशक्रमाद्बन्धाः स्त्रीणां वक्षुःसुखप्रदाः।
पुंसां सुखकराश्चैव कथितास्तु क्रमात्ततः॥"
इति स्मरदीपिका॥ * ॥

अनभिसन्धितकर्म्मैकर्तृबन्धाभावो यथा,—

"पक्षच्छेदाने रम्भं शुद्धतेऽनभिसन्धितैः।
फलैस्तथोपभोगैश्च पूर्वकर्म्मशुभाशुभैः॥
एवं न बन्धो भवति कुर्व्वतः कारकं विना।
न च बन्धाय तत् कर्म्म भवत्यनभिसन्धितम्॥"
इति मार्कण्डेयपुराणम्॥
(हठयोगप्रदीपोक्ता योगसाधकबन्धा यथा, तत्रैव। ३। ५५—५७।

अथोड्डीयानबन्धः।

"बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः।
तस्मादुड्डीयनाख्योऽयं योगिभिः समुदाहृतः॥
उड्डीनं कुरुते यस्मादविश्रान्तं महाखगः।
उड्डीयानं तदेव स्यात् तत्र बन्धोऽभिधीयते॥
उदरे पश्चिमं तानं नाभेरूर्द्ध्वञ्च कारयेत्।
उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेसरी॥"
अथ मूलबन्धः। तल्लक्षणादिकमुक्तं तत्रैव ३। ६१—६२।

"पार्ष्णिभागेन सम्पीड्य योनिमाकुञ्चयेद्गुदम्।
अपानमूर्द्धमाकृष्य मूलबन्धोऽभिधीयते॥
अधोगतिमपानं वा ऊर्द्धगं कुरुते बलात्।
आकुञ्चनेन तं प्राहुर्मूलबन्धं हि योगिनः॥"
अथ जालन्धरबन्धः। अस्य लक्षणादिकमुक्तं तत्रैव। ३। ७०—७१।

"कण्ठमाकुञ्च हृदये स्थापयेच्चिबुकं दृढम्।
बन्धो जालन्धराख्योऽयं जराम्रुत्युविनाशकः॥
बध्नाति हि शिराजालमधोगामि नभोजलम्।
ततो जालन्धरो बन्धः कण्ठदुःखौघनाशनः॥")

बन्धकं, क्ली, (बध्नातीति। बन्ध + ण्वुल्।) ऋणाय स्थापितं वस्तु। बाँधा इति भाषा। इति आधिशब्दरत्नावल्यां अमरः॥ इदानीमाधि-

निरूप्यते। आधिर्नाम यद्गीतस्य धनस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयत इत्याधिः। स च द्विधेव। ज्ञातकालोऽज्ञातकालश्च। पुनश्चैकैकशो द्विविधः गोप्यो भोग्यश्च। यथाह नारदः।

"आधिक्रियत इत्याधिः स च विज्ञेयो द्विजत्तमाः।
ज्ञातकालापनेयश्च यावद्देयोज्ञतस्तथा॥
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यश्चथैव च॥"

ज्ञाते काले आधानकाल एवासुक्तिम् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्यो मोचनीय इत्यर्थः देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयम् उद्यतो यावद्देयोऽयतः यद्गीतधनमूल्यपर्य्याप्तावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः। एषश्चतुर्विधस्याधेर्विशेषमाह।

"आधिः प्रणश्येत् द्विगुणे धने यदि न मोच्यते।
काले कालकृतो नश्येत् फलभोग्यो न नश्यति॥"

प्रयुक्ते धने स्वल्पतया वृद्धा कालक्रमेण द्विगुणीभूते यत्राधिरधमर्णेन व्यवहारेण मोच्यते तदा गृह्यधमर्णस्य धनं प्रयोक्तुः स्वभवति। कालकृतः ज्ञातकालः आदितात्यादिषु पाठात् कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् दैशुद्धात् प्रागूर्द्धं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। ज्ञातकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः। काले कालकृतो नश्येदिति। अज्ञातकालस्य भोग्यस्य नाशाभाव उक्तः फलभोग्यो न नश्यतीति पारिशेष्यादाधिः प्रणश्येदित्यतदज्ञातकालगोप्याधिविषयमवतिष्ठते दैशुद्ध्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्द्विगुणविषयप्रतीक्षां कर्त्तव्यं दृष्टफलविचलनात्।

"स्थिरधने द्विगुणीभूते पूर्णे काले ज्ञतावधौ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च।
तदन्नराधनं दत्त्वा बन्धं बन्धमवाप्नुयादिति॥"
विष्णुः।

"गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ स्थापिते।
नष्टो देयो विनष्टश्च दैवराजकृतादृते॥"

गोप्याधिस्तालकटाद्यारेऽपभोगेन वृद्धिर्भवति। अन्येऽप्युपभोगे सत्यपि वृद्धिर्वारितव्या धर्म्मयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्दतालकटाद्यादौ भोग्याधौ वृद्धिके स्थापिते स्थानं व्यवहारोचितं मन्यते नो वृद्धिरिति सम्बन्धः। नष्टो विज्ञप्तिं गतस्तालकटाद्यादिश्चिह्नभेदादिना पूर्ववज्ज्ञात्वा देयः तच्च गोप्याधिर्नष्टश्चेत् पूर्ववत् ज्ञात्वा देयः। उपभुक्तोऽपि चेत् वृद्धिरपि ज्ञातव्या भोग्याधिर्यदि नष्टस्तदा पूर्ववत् ज्ञात्वा देयः। वृद्धिस्थाने वृद्धिर्वा ज्ञातव्या। विनष्टे ज्ञातव्यत्वं गाढं प्राप्तः सोऽपि देयो ज्ञात्वादिद्वारेण तद्दाने वृद्धिकं ज्ञातं लभते

यदि न ददाति तदा मूलनाशः। 'विगते मूलनाशः स्यादेवराजस्तताडते।' इति नारदवचनात्। देवराजस्तताडते। देवमयूदकदेहोपन्नवादि। देवस्तताडिनाग्न्यादिना। तथा स्वापराधरहितताद्यावस्तसात्। देवराजस्ते तु विनाशे सद्वृद्धिकं मूलं दातव्यमधमर्णेनाधमर्णं वा यथाह।

"क्षीतस्वापहृते चैव राज्ञा चैवापहारिते।
आधिरन्योऽथ कर्त्तव्यो देयं वा धनिने धनमिति॥"

तत्र क्षीतस्वापहृत इति देवस्तोपलक्षणम्। अपि च।

"आधेः स्वीकरणात् सिद्धौ रक्षमाणोऽप्यसारताम्।
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत्॥
आधिर्गोप्यस्य भोग्यस्य च स्वीकरणादुपभोगादाधियद्वसंसिद्धिर्न साक्षिलिखनमात्रेण नाप्युद्धेयमात्रेण यथाह नारदः।

"आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा।
सिद्धिरस्योभयस्यापि भोगो यत्नस्तु नान्यथा॥"

अस्य च फलम्।

"आधौ प्रतिगृहीते क्रीते पूर्वा तु बलवत्तरेति।"

या स्वीकारात्मा क्रिया सा पूर्वा बलवती स्वीकाररहिता तु पूर्वापि न बलवतीति स आधिः प्रयत्नेन रक्षमाणोऽपि कालवशेन यद्यसारतामियात् तदा सद्वृद्धिकमूलाद्दयात्पर्य्याप्तं गतस्तदाधिरन्यः कर्त्तव्यः। धनिने वा धनं देयं रक्षमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति स्थापितम्। आधिः प्रणष्टेद्विगुणं दातव्यमाह।

"चरित्रबन्धकक्षतं सद्वृद्ध्या दापयेद्धनम्।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत्॥"

चरित्रं शोभनाचरितम्। चरित्रेण बन्धकं चरित्रबन्धकम्। तेन यत् द्रव्यमात्मसात् कृतं पराधीनं वा कृतम्। एतदुक्तं भवति धनिनः स्वच्छाप्रयत्नेन बहुमूल्यमपि द्रव्यमाधीकृत्वा धमर्णेनाल्पमेव द्रव्यमात्मसात् कृतम्। यदि वाधमर्णस्य स्वच्छाप्रयत्नेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेव धनिनाधमर्णाधीनं कृतमिति तद्धनं नृपो दृष्ट्वा सद्य दापयेत् अयमाशयः। एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति। तथा सत्यङ्कारकृतं करणं कारः भावे घञ् सत्यस्य कारः सत्यङ्कारः कारे सत्यागदस्येति सुम् सत्यङ्कारेण कृतं सत्यङ्कारकृतम्। अयमभिसन्धिः। यदा बन्धकार्पणसमय एव इत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यम्। नाधिनाश्य इति तदा तद्विगुणं दापयेदिति। अन्योऽर्थः। चरित्रशब्देन तद्राज्ञानामिष्टोत्पादिजनितमपूर्वमुच्यते यत्र तदेवाधीकृत्य यत् द्रव्यमात्मसात् कृतम्। तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश्य इति। आधिप्रणष्टादित्युक्ते। सत्यङ्कारकृतमिति क्रयविक्रयादिव्यवस्थानिर्व्याहत्यार्थं यद्यङ्गुलीयकादिपरहस्ते न्यस्तं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यं तथापि वैनाङ्गुलीयकाद्यर्पितं स एव चैद्व्यवस्थातिवर्त्ती तेन तदेव दातव्यम्। इतरथेद्व्यवस्थातिवर्त्ती तदा तदैवाङ्गुलीयकादिद्विगुणं प्रतिदापयेदिति। किञ्च।

"उपस्थितस्य मोक्षस्य आधिः स्तेनोऽन्यथा भवेत्।
प्रयोजकेऽसति धनं कुर्वेऽन्यस्याधिमाप्नुयात्॥"

धनदानेनाधिमोक्षायोपस्थितस्याधिर्मोक्षयो धनिना दृष्टिलोभेन न स्थापयितव्यः। अन्यथा अमोक्षणे स्तेनचौरवद्दण्डो भवेत् असन्निहिते पुनःप्रयोक्तरि कृते तदाग्रहीते सद्वृद्धिकं धनं निधायाधमर्णः स्वीयं बन्धकं गृह्णीयात्। अथ प्रयोक्ताप्यसन्निहितस्तदाग्राह्यं धनस्य ग्रहीतारो न सन्ति यदि वा असन्निहिते प्रयोक्तरि आधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्त्तव्यमित्यपेक्षित आह।

"तत्कालक्षतमूल्यो वा तत्र तिष्ठेदृद्धिकः।"

तस्मिन् काले यत्तस्याधेर्मूल्यं तत् परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊर्द्धं धनं वर्द्धते यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति यावद्वा तन्मूल्यमधमर्णेनि प्रयच्छति। यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश्य इति विचारितस्तत्तन्मूल्यकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते वाधमर्णे धनिना किं कर्त्तव्यमित्यत आह।

"विनाधारक्षकादापि विक्रीणीत सवाधिकम्।"

धारकादधमर्णादिना अधमर्णे असन्निहिते साक्षिभिस्तदानेन सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः। यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश्य इति न विचारितम्। तदा आधिः प्रणष्टेद्विगुणं द्रव्यस्याधिनाश्यः। विचारितं त्वयं पक्ष इति॥*॥ भोग्याधौ विशेषमाह।

"यदा तु द्विगुणीभूतन्तमाधौ तदा खलु।
भोक्ष्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने॥"

यदा प्रयुक्तं धनं स्वजनया वृद्ध्या द्विगुणीभूतं तदाधौ क्षते तदुत्पन्ने आधुत्पन्ने द्विगुणे धनिनः प्रविष्टे धनिनाधिर्भोक्तव्यः। यदि वाधमर्णेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्भोक्तव्य इति परिभाषया कारणान्तरेण वा भोगाभावेन तदा द्विगुणीभूतन्तद्धनादाधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्भोक्तव्यः। अधिकोपभोगे तदपि देयम्। सर्व्वथा सद्वृद्धिकमूल्यार्णापाकरणार्थाध्युपभोगविषयमिदं वचनम्। तमेनं क्षयाधिमाचक्षते लौकिकाः यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मूल्यादानं तावदुपभुञ्जते एवाधिम् एतदेव अदीकृतं वृद्धयतिना

"————————ऋणी बन्धमवाप्नुयात्।

पक्षभोग्यं पूर्वकालं दत्त्वा ग्रहीत्वा धनम्॥
यदि प्रकर्षितं तत् स्यात्तदा न धनभाग्धनी।
ऋणी च न लभेद्धन्यं परस्परमतं विना॥"

अस्यार्थः। पक्षं भोग्यं यस्याधौ पक्षभोग्यो बन्ध आधिः स च द्विविधः सद्वृद्धिमूल्यापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च तत्र च वृद्धिमूल्यापाकरणार्थे बन्धं पूर्वकालं पूर्वः कालो यस्याधौ पूर्वकालस्तमाप्नुयाद्धनी। यदा सद्वृद्धिकं मूल्यं मूलद्वारेण धनिनः प्रविष्टन्तदा बन्धमवाप्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थन्तु बन्धं सामकं दत्त्वाप्नुयाद्धनी। बन्धं मूल्यं सममेव सामकम्। अस्यापवादमाह। यदि प्रकर्षितं तत् स्यात्तद्बन्धकं प्रकर्षितमतिशयितं वृद्धेरभ्यधिकफलं यदि स्यात्तदा न धनभाग्धनी। सामकं न लभेद्बन्धं मूल्यमदत्त्वैवर्णी बन्धमवाप्नुयादिति यावत्। अथाप्रकर्षितं तद्बन्धकं वृद्धेरप्यपर्य्याप्तन्तदा सामकं दत्त्वापि बन्धं लभेताधमर्णः वृद्धिसमदत्त्वैव लभेतार्थः। पुनरुभयापवादमाह। परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमतभावे यदि प्रकर्षितं दत्त्वाप्युक्तम्। परस्परानुमतौ तूत्तरत्रमपि बन्धकं यावन्मूलादानलाभवदुपभुञ्जते धनी जिह्नत्वमपि मूलमात्रदाने नैवाधमर्णो लभते। इतिमिताक्षरा॥

बन्धकः, पुं, (बन्ध+स्वार्थे कन्।) विनिमयः। इति विश्वमेदिनौ॥ आधिः। इति मुग्धबोधवृत्तौ॥ रतद्विजकः। इति जटाधरः॥ (बध्नातीति। बन्ध+ण्वुल्। बन्धनकर्त्तरि, त्रि। यथा, देवीभागवते। ५। १। ६६।

"न नारी न धनं गेहं न पुत्रा न सहोदराः।
बन्धनं प्राणिनां राजन्नहङ्कारस्तु बन्धकः॥")

बन्धकी, स्त्री, (बध्नाति मानवमिति। बन्ध+ण्वुल्। गौरादित्वात् ङीष्।) पुंश्चली। इत्यमरः। २। ६। १०॥ (यथा, मार्कण्डेयपुराणे। ३४। ८८।

"न बन्धकीभिर्न नटैर्बन्धकीपतिभिस्तथा॥")

दासी। इति मेदिनीहेमचन्द्रौ॥ पञ्चपुरुषगामिनी। (यथा, महाभारते। १। १२३। ७४।

"नातश्चतुर्थं प्रसवमापन्नाप्यधिकं वदन्ति।
अतःपरं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत्॥")

बन्धनं, क्ली, (बन्ध+भावे ल्युट्।) बन्धनक्रिया। बाँधा इति भाषा। तत्पर्य्यायः। उद्गानम् २। इत्यमरः। २। ८। २६॥ अङ्कनम् ३ बन्धः ४ संयमनम् ५। इति मुग्धबोधवृत्तौ॥ (यथा, हितोपदेशे। १। ६५।

"आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥")

बधः। इति मेदिनी। ने, ८७॥ हिंसा। इति मुग्धबोधवृत्तौ॥ रज्जुः। इति हैमचन्द्रः॥ बध्नातेऽनेनेति करणल्युट्पक्षे त्रि॥ (बध्नातेऽस्मिन् इति अधिकरणे ल्युट्। कारागारम्। बन्धनस्थानम्। यथा, भागवते। ६। २। २५।

बन्धुजी

"महादेवस्य देवस्य जातो भोजेऽवबन्धने ॥"
बन्ध + कर्मणि इञ्। महादेवस्य नामभेदे, पुं। यथा, महाभारते। १३। १७। १००।
"बन्धनो बन्धकर्त्ता च सुबन्धनविमोचनः ॥"
बन्धनकर्त्तरि, त्रि। यथा, तत्रैव। १३।१७।११।
"बन्धनस्थसुरेन्द्राणां युधि मुक्तिविनायनः ॥")

बन्धनागार, क्ली, (बन्धनाय बन्धनस्य वा आगारम्।) कारागारम्। इत्यमरः। २। ८। ११६ ॥

बन्धनालय, पुं, (बन्धनाय बन्धनस्य वा आलयः।) कारागारम्। इत्यमरः। २। ८। ११६ ॥

बन्धनस्थ, पुं, (बन्धाय स्तम्भः।) वृक्षिबन्धनस्तम्भः। तत्पर्य्यायः। आलानम् २। इत्यमरः। २। ८। ४९ ॥ गुक्कुः ३ अघोड़ः ४। इति शब्दरत्नावली ॥

बन्धिमं, क्ली, (बन्ध + इमच्।) कामदेवः। इत्युणादिकोषः ॥ बन्धेऽवयवम्। इति संक्षिप्तसारोणादिवृत्तिः ॥

बन्धु, पुं, (बन्ध बन्धने + "बन्धुस्कन्धिन्दिपीति।" उणा० १।११। इति उः।) स्नेहेन मनो बध्नाति यः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ ज्ञातिः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ४४ ॥ दायादः ७ गोत्रः ८। इति शब्दरत्नावली ॥ बन्धवश्च त्रिविधाः। आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्।
"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुःपितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥"
तत्र चात्मरक्तत्वात् प्रथममात्मबन्धवो धनभाजस्तदभावे पितृबन्धवस्तदभावे मातृबन्धव इति क्रमो वेदितव्यः। बन्धूनामभावे आचार्य्यः। इति मिताक्षरा ॥ * ॥ (यथा, मनुः। ७।२१६।
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यदुत्तरम् ॥"
"बन्धुः पितृव्यादिः।" इति तट्टीकायां कुल्लूकभट्टः ॥) बन्धूकः। (यथा, अग्निपुराणे। २८।
"अभ्यर्च्य बन्धुपुष्पमालयेति ॥")
स्निग्धम्। (यथा, मेघदूते। ३४।
"बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः ॥")
भ्राता। इति मेदिनी ॥ (यथा, रघुः। १२।१२।
"अथानाथाः प्रकृतयो मातृबन्धुनिवासिनम्।
भीतैरागायथामासुर्भरतं क्लान्तसाधुभिः ॥")

बन्धुक, पुं, (बन्ध + उकः। यद्वा, बन्धुर्बन्धूकवृक्ष एव। बन्धु + स्वार्थे कन्।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥

बन्धुजीव, (बन्धुरिव जीवयति रक्षादिनेति। बन्धु + जीव + अच्।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥ (यथा, रघुः। ११। २५।
"दीक्षा वेदिमव रक्तविकृषि-
र्बन्धुजीवपृथुभिः प्रदूषिताम् ॥")

बन्धुजीवकः

बन्धुजीवकः, पुं, (बन्धुवत् जीवयति रक्षादिना इति। बन्धु + जीव + ण्वुल्। यद्वा, बन्धुजीव एव। स्वार्थे कन्।) बन्धूकवृक्षः। इत्यमरः। २। ४। ७२ ॥

बन्धुता, स्त्री, (बन्धोर्भावः बन्धूनां समूहो वा इति। "वर्णदृढादिभ्यष्ट्यञ्।" ५।१।१२३। इति तल्।) बन्धूनां समूहः। बन्धोर्भावः। इत्यमरः। २।६।३५॥ (यथा, ऋग्वेदे। ४। ४। ११।
"महो राजामि बन्धुता वचोभिः ॥")

बन्धुदत्तम्, क्ली, (बन्धुना दत्तम्।) पितृमातृभ्यां दत्तं स्त्रीधनम्। यथा। याज्ञवल्क्यः।
"बन्धुदत्तं यथा शुल्कमन्वाधेयकमेव च।
अप्रजायामनीतायां बान्धवास्तद्वाप्नुयुः ॥"
बन्धुदत्तपदेन कन्यादानार्थं यत् पितृभ्यां दत्तं तदुच्यते। इति दायभागः ॥

बन्धुरं, क्ली, (बन्ध बन्धने + "मन्थुराद्यच।" उणा० १। ४२। इति उरप्रत्ययेन निपातनात् साधुः।) सुकुटम्। इति शब्दरत्नावली ॥ (रथबन्धनम्। यथा, महाभारते। ३। ४२। ३१।
"अन्ये छत्रं वरूथञ्च बन्धुरञ्च तथापरे।
गन्धर्वा बहुसाहस्रास्तिलशो बधमन्वयुः ॥"
तथा च भागवते। ४। २६। १।
"हौत्रं हिरण्मयमेकात्तं त्रिवेणुं पञ्चबन्धुरम् ॥")

बन्धुरः, पुं, (बन्ध + "मन्थुराद्यच।" उणा० १।४२। इति उरः निपातनात् साधुः।) स्त्रीचिह्नम्। तिलकवृक्षः। बन्धूकः। वर्धिरः। हंसः। इति मेदिनी। रे, १८८। विदूरः। इति हेमचन्द्रः ॥ ऋषभौषधम्। इति राजनिर्घण्टः ॥ वकः। विहङ्गः। इति शब्दरत्नावली ॥

बन्धुरः, त्रि, (बन्ध + उरः।) रम्यम्। (यथा, महाभारते। १५।
"श्रेयः स्रोतः स दैयाच्चम विमलहृदो बन्धुरं सिन्धुराजः।")
नम्रम्। इति मेदिनी। रे, १८८ ॥ उन्नतानतम्। इत्यमरः ॥ (यथा, रघुः। १६। ४७।
"बध्नाति मे बन्धुरगामि चक्षु-
र्द्वयं: कक्षुद्यामिव चित्रकूटः ॥")

बन्धुरा, स्त्री, (बन्धुर + टाप्।) पतिव्रतोषा। इति मेदिनी। रे, १८० ॥

बन्धुराः, पुं, ग्रहाश्वः। इति मेदिनी। रे, १८० ॥ बहुवचनान्तोऽयम् ॥

बन्धुलः, पुं, (बन्धुं लातीति। बन्धु + ला + कः।) असतीसुतः। इत्यमरः। २। ६। २६ ॥ (यथा, स्कन्दकटिकलाटके चतुर्थे अङ्के।
"परदारहलजिता: परान्नपुष्टाः
परपुरुषैर्जनिता: परान्नभासु।
परधननिरता गुणैश्चवाच्या
गजकलभा इव बन्धुला नमाम: ॥")
बन्धूकः। इति शब्दरत्नावली ॥

बन्धुल, त्रि, (बन्धून् लाति स्नेहेन गृह्णातीति। बन्धु + ला + कः।) सुन्दरः। नम्रः। इत्यजयपालः ॥

बन्धूकः

बन्धूकः, पुं, (बध्नाति चौदार्य्येण चित्तमिति। बन्ध + "ऊलूकादयश्च।" उणा० ४। ४१। इति ऊकः।) पीतपुष्पालकः। इति मेदिनी। के, १०८॥ पुष्पहरचण्डिकेशः। बाँदुली इति बङ्गभाषा। दोपहरिया इति हिन्दी भाषा। तत्पर्य्यायः। रक्तकः २ बन्धूजीवकः ३। इत्यमरः। २।४।७३॥ बन्धुकः ४ बन्धुः ५ बन्धुलः ६ बन्धुजीवकः ७ बन्धुजीवः ८ बन्धुजिः ९ बन्धुरः १०। इति शब्दरत्नावली ॥ रक्तः ११ माध्याह्निकः १२। इति भावप्रकाशः ॥ ओष्ठपुष्पः १३ अर्कबल्लभः १४ मध्यन्दिनः १५ रक्तपुष्पः १६ रागपुष्पः १७ हरिप्रियः १८। अस्य गुणाः।
"असितसितपीतलोहितपुष्पविशेषात् चतुर्विधो बन्धूकः।
ज्वरहरो विविधारिष्टहृपिण्डाग्निमान्द्यप्रसादनः बस्तिशुद्धिकरः स्यात् ॥"
इति राजनिर्घण्टः ॥
"बन्धूकः कफरक्तघ्नो रक्तपित्तहरो लघुः ॥"
इति भावप्रकाशः ॥
स्त्रियाम्, स्त्री। बन्धूक इति ख्यातम्। यथा,—
"बन्धूको बन्धुजीवे स्यात् क्षुद्रपे स्यान्नपुंसकम् ॥"
इति हेमचन्द्रः ॥

बन्धूकपुष्पः, पुं, (बन्धूकस्य बन्धूजीवस्य पुष्पमिव पुष्पं यस्य।) पीतपुष्पालः। इत्यमरः। २।४।४४॥ बीजकः। इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"बीजकः पीतसारश्च पीतपुष्पालक इत्यपि।
बन्धूकपुष्पः प्रियकः सर्ज्जकक्षासनः स्मृतः ॥")

बन्धूरः, पुं, (बन्ध बन्धने। बन्ध + "मन्थुराद्यच।" उणा० १। ४२। इत्यत्र ऋर्ज्जूरादित्वादूरप्रत्ययेन सिद्धम् इत्यज्जदत्तः।) विवरम्। इत्युणादिकोषः ॥

बन्धूरः, त्रि, (बन्ध + ऋर्ज्जूरादित्वादूरप्रत्ययः।) रम्यः। नम्रः। यथा, रभसे।
"बन्धूरबन्धुरौ रम्ये नम्रे हंसे तु बन्धुरः ॥"
उन्नतानतम्। स्वभावात् यदुन्नतं उपाधिवशादीषन्नतं तत्। क्वचिदुन्नतं क्वचिदानतं स्थलादिकम्। इति केचित्। इत्यमरटीकायां भरतः ॥

बन्धूलिः, पुं, (बन्ध बन्धने। बन्ध + ऊलि।) बन्धूकवृक्षः। इति शब्दरत्नावली ॥

बन्ध्य, त्रि, (बन्ध + यक्।) ऋतुप्राप्तावविफलरहितस्त्र्यादिः। (यथा, रघुः। १। ७०।
"सिक्तं स्वयमिव स्नेहाद्बन्ध्यमात्रमयादयम् ॥")
तत्पर्य्यायः। अफलः २ अफलेधी ३। इत्यमरः। २। ४। ७ ॥ विफलः ४ निष्फलः ५। इति राजनिर्घण्टः ॥ बन्धनीयः। इति बन्धधातोः कर्म्मणि यप्रत्ययः ॥ (यथा, याज्ञवल्क्यः। २।२४६।
"अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ॥"
पुं, निबन्धितवादिः सेतुः। यथा, मिताक्षरायाम्।
"सेतुश्च द्विविधो ज्ञेयः स्नेयो बन्धस्तथैव च।
स्नेयप्रवर्त्तनात् स्नेयो बन्धः स्यात्तन्निवर्त्तनात् ॥")

वन्ध्या. स्त्री, (वन्ध+"अन्ध्यादयश्च।" उणा० ४।१११। इति यक्।) अप्रजस्त्री। इति मेदिनी॥ बाँजा इति भाषा॥ (यथा, भागवते। ६। १४।१२।
"रूपौदार्य्यवयोजन्मविद्येश्वर्य्यश्रियादिभिः।
संपन्नस्य गुणैः सर्व्वैश्चिन्ता वन्ध्यापतेरभूत्॥"
वन्ध्या स्त्री अष्टमे वर्षे अधिवेदनीया भवति यथाह मनुः। ९। ८१।
"वन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा॥")
अपत्यमूढगौः। तत्पर्य्यायः। वष्या २। इत्यमरः। २। ६। ६६॥ बालास्त्रीगन्धद्रव्यम्। इति शब्दचन्द्रिका॥ तृणलीविशेषः। यथा,—
"वन्ध्या च तृणली ज्ञेया तृणली च मृतप्रजा।
अपरा तृणली ज्ञेया कुमारी या रजस्वला॥"
इति प्रायश्चित्तविवेके उशनसो वचनम्॥*॥
योनिरोगविशेषः। यथा,—
"उदावर्त्ता तथा वन्ध्या विप्लुता च परिप्लुता।
वातला योनिजो रोगो वातदोषेण पञ्चधा॥"
तस्या लक्षणं यथा,—
"या फेनिलमुदावर्त्ता रजःस्रावेण मुञ्चति।
वन्ध्या निरार्त्तवा ज्ञेया विप्लुता नित्यवेदना॥
परिप्लुता या भवति गान्धर्व्ये वृजा भृशम्।
वातला कर्कशास्त्रस्रा शूलनिस्तोदपीड़िता॥"
तस्याश्चिकित्सा यथा,—
"वला सिता सातिवला मधूकं
वटस्य मुष्कं गजकेशरञ्च।
एतच्चतुष्कीरघृतैर्निपीय
वन्ध्या सुपुत्रं नियतं प्रसूते॥
अश्वगन्धाकषायेण सिद्धं दुग्धं घृतान्वितम्।
ऋतुस्नातानृजा प्रातः पीत्वा गर्भं दधाति हि॥
पृथ्वीमूलं वन्ध्यायाः मूलं दुग्धेन कन्यया।
पिष्ट्वा पीत्वा ऋतुस्नाता गर्भं धत्ते न संशयः॥
कुशदाटमूलं धातक्याः कुसुमानि वटाङ्कुराः।
नीलोत्पलं पयोयुक्तमेवं गर्भप्रदं ध्रुवम्॥
या वला पिबति प्रातर्यष्टिपिष्टं
क्षीरेण सर्पिरसितं सितया युतं वा।
सा सूतं जनयतीह नान्यथा॥"
इति भावप्रकाशः॥
(चिकित्सान्तरमस्या यथा,—
"पिप्पल्यः मद्यवेरञ्च मरिचं केशरन्तथा।
घृतेन सह पातव्यं वन्ध्यापि लभते सुतम्॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे।
"वला चातिवला यष्टिमधूकैरा मधुसंयुता।
वन्ध्यागर्भंकरी पीता नाम कार्य्या विचारणा॥"
इति भैषज्यरत्नावली क्षीरोगाधिकारे॥)
वन्ध्याकर्कोटकी, स्त्री, (वन्ध्यायाः कर्कोटकी। पुत्रदात्रीतया वन्ध्यायाः उपकारित्वी अतोऽस्याख्यायाम्।) तिक्तकर्कोटकी। बाँझ-करला इति बाँझकरोल इति च हिन्दीभाषा। तत्पर्य्यायः। वन्ध्या २ देवी ३ नागारातिः ४ नागदन्ती ५ मनोज्ञा ६ पथ्या ७ हिता ८ पुत्रदा ९ सुकन्दा १० श्रीकन्दा ११ वन्दनी १२ ईश्वरी १३ सुगन्धा १४ सर्पदमनी १५ विषकण्टकिनी १६ परा १७ कुमारी १८ भूतदन्ती १९। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। कषायत्वम्। स्त्रावरादिविषघ्नत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।
"वन्ध्याकर्कोटकी देवी कन्या योगेश्वरीति च।
नागारिर्भेक्षदमनी विषकण्टकिनी तथा॥
वन्ध्याकर्कोटकी लघ्वी कफपित्तव्रणापहा।
सर्पदर्पहरी तीक्ष्णा विसर्पविषहारिणी॥"
इति भावप्रकाशः॥
व(व)ध्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) व(व)कारादिः। ओष्ठ्यवर्गचतुर्थोपधः। व(व)ध्रति। इति दुर्गादासः॥
वध्रवी, स्त्री. (वध्रोः ग्रीवास्त्रेयं पत्नी। वध्रु+अण् +ङीप्। न वृद्धिः।) दुर्गा। इति भूरिप्रयोगः॥
वध्रिः, पुं, (वध्र+इन्।) वध्रम्। इति केचित्॥ (भरद्वाजवंशेऽपि धारके च त्रि। यथा, ऋग्वेदे। ६। २३। ४।
"गव्येयाभि सवना हरिभ्यां
वध्रिर्वज्रं पपि: सोमं दृढ़ाः॥")
वध्रुः, पुं. (बिभर्त्ति भरति वा। भृ+"कुभ्रञ्च।" उणा० १। २३। इति कुहिलच्च।) अग्निः। ग्रीवः। (यथा, महाभारते १३। महादेवस्य सहस्रनामकथने। १७। १४८।
"ध्रुवो वध्रुधरो वध्रुः राजराजो निरामयः॥")
विष्णुः। (यथा, महाभारते १३। विष्णोः सहस्रनामकथने। १४९। २६।
"वध्रो वध्रुगिरा वध्रुर्विश्वयोनिः सुविक्रमः॥")
विप्रालः। नकुलः। इति मेदिनी॥ (यथा, मार्कण्डेये। १५। ६।
"सञ्जायते महावक्त्रो मूषिको वध्रुसन्निभः॥")
सुनिविशेषः। इति हेमचन्द्रः॥ देवभेदः। इति शब्दरत्नावली॥ सितावरणाकः। इति राजनिर्घण्टः॥ खलतिः। इति हेमचन्द्रः।३।१२७॥ (कपिलो वर्णः। इति मेघातिथिः॥ तद्गुणयुक्ते तु वाच्यलिङ्गः। यथा, मनुः। ४। १३०।
"नाक्रामेत्कामतश्छायां वध्रुगो दीक्षितस्य च॥"
सोमपादसुतः। यथा, भागवते ९।२४।१।
"रोमपादसुतो वध्रुर्बभ्रोः कृतिरजायत।"
देवातिथसुतः। यथा, तत्रैव। ९। २४। ६।
"वध्रुर्देवातिथसुतस्तयोः श्लोकौ पठञ्जगुः॥"
ययातिपुत्रस्य द्रुह्योः सुतः। यथा, तत्रैव। ९। २३। १७।
"द्रुह्योश्च तनयो वध्रुः सेतुस्तस्यात्मजस्ततः॥"
पक्षगन्धर्व्वपतिषु अन्यतरः। यथा, रामायणे। ७। ४१। ४२।
"तत्र गन्धर्व्वपतयः पञ्च सूर्य्यसमप्रभाः।
श्रेष्ठाश्च ग्रामणीः ग्रीवः सुको वध्रुश्चैव च॥"
विश्वामित्रपुत्रभेदः। यथा, महाभारते। १३। ४। ५०।
"अष्टौलश्च गृत्समश्च वध्रुः कालपथश्चथा॥"
विश्वामित्रस्य पुत्रः। स तु यादवानामग्रतमः। यथा, हरिवंशे। ६४। ४८।
"वसुर्वध्रुः सुविज्ञश्च सभाक्षश्चैव वीर्य्यवान्।
यदुप्रवीरा विख्याता लोकपाला इवापरे॥"
यथा च माघे। २। ४०।
"आलप्यालमिदं वध्रोर्मत्त दारानपाहरत्॥"
स च विनष्टप्राये यादवकुले पथि मच्छन् दस्युभिर्हतः। तत्कथा च महाभारते। १६। मौषलपर्व्वणि द्रष्टव्या॥ स्त्री, कपिला गौः। सा च निधि अजानता एरण्डेन छत्रेण हता। यथा, भागवते। ६।१२। ६।
"खड्गमादाय तरसा प्रलीनोडुगणे निधिं।
अजानन्नहनद्भोः शिरः ग्रावणि जघ्नुषा॥")
वध्रुः, त्रि, (बिभर्त्तीति। भृ+"कुभ्रञ्च।" उणा० १। २३। इति कुहिलच्च।) पिङ्गलः। इत्यमरः॥ (यथा, कुमारे। ५। ८।
"ववन्ध बालारुणवध्रवल्कलं
पयोधरोत्सेधविशीर्णसंहतिः॥"
यथा च रघुः। १५। १६।
"धूमधूम्रो वसागन्धी ज्वालाबध्रुशिरोरुहः॥")
वध्रुधातुः, पुं, (वध्रुः पिङ्गलो धातुः।) सुवर्णगैरिकम्। इति राजनिर्घण्टः॥
वध्रुवाहनः, पुं, मणिपुरस्य राजविशेषः। स च चित्राङ्गदायां अर्জ্জुनाज्जातः। यथा,—
"करेणुमत्यां नकुलो निरमित्रं तथार्জ্জुनः।
इरावत्यसृजत्पुत्रौ वै सुतायां वध्रुवाहनम्॥
मणिपुरपतेः सोऽपि तत्पुत्रः पुत्रिकासुतः॥"
इति श्रीभागवते। ९। २२। ३२॥
अपि च।
वैशम्पायन उवाच।
"श्रुत्वा तु नृपतिः प्राप्तं पितरं वध्रुवाहनः।
निर्ययौ विनयेनाथ ब्राह्मणार्घपुरःसरः॥
मणिपुरेश्वरस्त्वेवमुपायान्तं धनञ्जयः।
नाभ्यनन्दत् स मेधावी क्षात्रधर्म्ममनुस्मरन्॥"
"भर्त्तारं निहतं दृष्ट्वा पुत्रञ्च पतितं भुवि।
चित्राङ्गदा परिक्षिप्ता प्रविवेश रणाजिरे॥"
इति महाभारते। १४। ७८ अध्यायः॥
(अस्यार्জ্জुनादिना युद्धादिकं तत्रैव विस्तरशो द्रष्टव्यम्॥)
वध्र, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वध्रति। इति दुर्गादासः॥
वर्ब्ब, गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) वर्ब्बति। इति दुर्गादासः॥
वर्ब्बटः, पुं, (वर्ब्ब+अटन्।) राजमाषः। इति चिकित्सशेषः॥ वर्ब्बटी इति ख्यातः॥ (विवृतिरस्या राजमाषशब्दे ज्ञेया॥)
वर्ब्बटी, स्त्री. (वर्ब्बट+गौरादित्वात् ङीष्।) पयस्यायोषा। वीरिमेदः। इति मेदिनी। टे, ५१॥
वर्ह, ङ छृतौ। हिंसायाम्। दाने। वाप्ति। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-

सेट्।) देवोपधः। ड, वर्धते। इति दुर्गादासः॥

बल, क ड निरूपणे। इति कविकल्पद्रुमः॥ (पुरा०- आत्म०-सक०- सेट्।) क ड, बालयते धर्मं धीरः। अयं कैश्चिन्न मन्यते। इति दुर्गादासः॥

बल, क म जीवने। इति कविकल्पद्रुमः॥ (पुरा०-पर०-अक०-सेट्।) बलयति। इति दुर्गादासः॥

बल, ड दाने। वधे। निरूपणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, बलते। इति दुर्गादासः॥

बल, ज धान्यावरोधे। जीवने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अक०च-सेट्।) बालः; बलः। धनस्य भावो धान्यं सदृद्धिलस्य अवरोधः प्रतिबन्धः; धान्यावरोधः। बलति पुण्यहीनं विधिः। पुण्यहीनस्य सदृद्धिं प्रतिबध्नाति इत्यर्थः। अयमर्थो अन्येन्न मन्यते। बलत्यनेन लोकः। इति दुर्गादासः॥

ब(व)लं, क्ली, (बलते विपक्षान् हन्ति। बल + घञ्। यद्वा बल्+अच्।) सैन्यम्। (यथा, भागवते।१।१०। "अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्। पर्याप्तमिदमेतेषां बलं भीमाभिरक्षितम्॥") स्थौल्यम्। सामर्थ्यम्। अस्य गौणस्य पर्य्यायः। इन्द्रियम् २ नरः ३ सङ्घः ४ गौण्यम् ५ श्यामं ६ सुखम् ७ शक्तिः ८ पराक्रमः ९ प्राणः १०। इत्यमरः।२।८।१०२॥ मङ्गः ११ सृग्व १२। इति शब्दरत्नावली॥ ऊर्ज्जः १३। इति जटाधरः॥ नदृवैदिकपर्य्यायः। ओजः१ पा(वा)जः२ प्रवः३ नरः४ नवः५ स्वधः६ गर्द्धः७ वाघः८ वृत्रहम् ९ तविषी १० सुषम् ११ सुष्णम् १२ सूनम् १३ दक्षः १४ वीळुः १५ स्थौरम् १६ सहः १७ यहः १८ वधः १९ वर्गः २० वृजनम्२१ वृक् २२ मज्मना २३ पौंस्यानि २४ धर्णसिः २५ इषिरम् २६ स्वभ्रासः २७ शुष्मरम् २८। इत्यष्टाविंशतिर्बलनामानि। इति वैद्यनिघण्टौ। २। ६॥ (यथा, मनुः। २। ५५। "पूजितं ह्यशनं नित्यं बलमूर्জ্জञ्च यच्छति॥") मनुः गर्भस्थबालकस्य षष्ठे मासि भवति। इति सुश्रुतबोधः॥ गन्धरसः। रूपम्। इति मेदिनी। ले, ३७॥ शुक्रम्। इति हेमचन्द्रः।३।२८३॥ (यथाह सुश्रुतः। "धातूनां यत्परं तेजस्तत् खल्वोज इतीह बलमित्युच्यते॥") वपुः। इति जटाधरः॥ (यथा, रामायणे। ७। १। ११। "कीदृशो वै प्रभावोऽस्य किं बलं कः पराक्रमः॥")

बलवत्। इति शब्दरत्नावली॥ दक्षः। इति शब्दचन्द्रिका॥ (बलमस्यास्तीति। बल + अण् आत्वञ्च।) बलयुक्ते, त्रि। इति मेदिनी॥*॥

सप्तौषधबलराजि बलवृद्धराजि च यथा,—
"सप्तौषधबलराजीञ्च वाजाभ्यङ्गं सुभोजनम्।
सप्तौषधबलराजीञ्च अध्वानं मैथुनं ज्वरः॥"

बलकारकौषधं यथा, गारुडे। ११५।१६६ अः।
"घृतामलकचूर्णं वै मधुना उदकेन वा।
बलानि कुरुतां नाशाया प्रबुधे भक्षयं घृतम्॥"
पारिभाषिकबलानि। यथा,—
"विद्याभिजनमित्राणि दृष्टिसत्यधनानि च।
तपःसहायवीर्य्याणि दैवञ्च दशमं बलम्॥"
इति महाभारते आपद्धर्म्मः॥
अपि च।
"अबलस्य बलं राजा बालस्य रुदितं बलम्।
बलं मूर्खस्य मौनन्तु तस्करस्यानृतं बलम्॥"*॥
अपि च।
"क्षत्रियाणां बलं युद्धं व्यापारश्च बलं विशाम्।
भिक्षा बलं भिक्षुकाणां सूत्राणां विप्रसेवनम्॥
हरौ भक्तिर्बलं तेषां वैष्णवानां बलं हरिः।
हिंसा बलं खलानाञ्च तपस्या च तपस्विनाम्॥
बलं वेश्यास्च वेश्यानां योषितां यौवनं बलम्।
बलं प्रतापो भूपानां बालानां रुदितं बलम्॥
सतां सत्यं बलं मिथ्या बलमेषामसतां सदा।
अनुरागानामनुगमः स्वप्नमानाञ्च सञ्चयः॥
विद्या बलं पक्षिणानां वाणिज्यं वणिजां बलम्।
शस्त्रास्त्रसुकर्म्मशीलानां शास्त्रीयं साहसं बलम्॥
धनं बलञ्च धनिनां शुचीनाञ्च विशेषतः।
बलं विवेकः शास्त्राणां गुणिनां बलमेषणा॥
गुणो बलञ्च गुणिनां शौराणाञ्चौर्य्यमेव च।
विप्रवाक्यञ्च कापट्यमधर्म्मस्तस्करिणां बलम्॥
हिंसा च हिंसजन्तूनां सतीनां पतिसेवनम्।
वरस्त्रीणां सुरागाञ्च शिष्याणां गुरुसेवनम्॥
बलं धर्म्मो गृहस्थानां भक्ष्याणां राजसेवनम्।
बलं स्तेयः स्तावकानां ब्रह्म च ब्रह्मचारिणाम्॥
यतीनाञ्च सदाचारो न्यासः सन्न्यासिनां बलम्।
पापं बलं पातकिनां सुभक्तानां हरिर्बलम्॥
पुण्यं बलं पुण्यवतां प्रजानां नृपतिर्बलम्।
फलं बलञ्च वृक्षाणां जलधीनां जलं बलम्॥
जलं बलञ्च शस्त्राणां मनुष्याणाञ्च जलं बलम्।
ग्लानिर्बलञ्च भूपानां विप्राणाञ्च विशेषतः॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डे ३५ अध्यायः॥

ब(व)लः, पुं, (बलते निरूपयति स्वेष्टमिति। बल + अच्। बलदेवपक्षे नामैकदेशग्रहणादपि सिध्यति भीमादिवत्।) काकः। (यथा, महाभारते। ७। ६। २५। "यथा श्येना बलाः काङ्का वायसाश्च सहस्रशः॥") बलदेवः। इत्यमरः॥ (यथा, भागवते।४।५।१६। "पुत्रो ह्यपालयत् दत्तान् कलिङ्गस्य यथा बलः॥") अस्य पत्न्यादीनां नामानि यथा,—
"रेवतीं नाम तनयां रेवतस्य महीपतेः।
उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ॥"
इति विष्णुपुराणे। ५। २५। १६॥
वरुणवृक्षः। इति शब्दचन्द्रिका॥ (वायुना प्रदत्तः कार्त्तिकेयानुचरभेदः। यथा, महाभारते। ९। ४५। ४२।
"बलश्चातिबलश्चैव महाबलौ महाबलौ।
प्रददौ कार्त्तिकेयाय वायुर्भरतसत्तम!॥"

रामपुत्रस्य कुशस्यान्वये जातस्य पारियात्रस्य पुत्रविशेषः। यथा, भागवते। ९। १२। २।
"देवानीकबलोऽनीहः पारियात्रोऽथ तत्सुतः।
ततो बलः खलक्षात्रबलाभोऽर्कसम्भवः॥"
दनायुषः पुत्रविशेषः। यथा, महाभारते। १। ६५। ३६।
"दनायुषः पुत्राश्चत्वारोऽसुरपुङ्गवाः।
विक्रान्तो बलवीरौ च वृत्रश्चैव महासुरः॥"
मेघः। इति निघण्टुः। १। १०॥) दैत्यविशेषः। इति मेदिनी। ले, १७॥ तस्य विवरणं यथा,—
"आसीद्दैत्यो बली नाम महाबलपराक्रमः।
देवगन्धर्व्वयज्ञानां यक्षेन्द्रभयकारकः॥
येन विष्णुभयं त्यक्त्वा भग आत्मा प्रपीड़िताः।
अग्निज्वालरुचश्च बलाश्च बह्वीश्वलाः॥
संयम्य येन नागेन्द्रा महाभोगा महाविषाः।
गरुड़श्च बलो भग्नः सदाशामभिवर्त्तिनः॥
येन संलिख्य शृङ्गेन्द्रः कङ्काकारकारितः।
क्रीड़ार्थं येन विप्रेन्द्र! गिरयः प्रथिता भुवि॥
तेन देवाः सब्रह्मेन्द्रा दिवः सर्व्वे बलाधिताः।
दत्तं स्थानन्तु पातालं समयं शरणं गतम्॥
तथा ते भयमापन्ना मानं त्यक्त्वा गता गुरुम्।
पृच्छन्ति विनयात् सर्व्वे गुरुस्तु क्षिप्तकारिणः॥
कैनोपायेन देवानां स्वर्गवासो भवेद्विज!।
भवान् हि नयवेत्ता च उपायं वद पृच्छताम्॥
त्वमेव ग्राह्यवेत्ता च हितः शुक्रस्य शिष्यगः।
ग्रहोदधिनिमग्नानामतिपोतो भव द्विज!॥
एवं पृष्टः स देवैस्तु गुरुर्मन्त्रमन्त्रवीत्॥
बृहस्पतिरुवाच।
यद्यं दानवः शुक्र! न युद्धे भवतो वशः।
रणे न क्षयमायाति अजेयः समरे यतः॥
अतः कपटमास्थाय प्रार्थनीयः क्रतुं प्रति।
दानात् सत्यबलोपेतः स्वकायमर्थितेऽपि॥
अतस्तस्य प्रार्थयिता विष्णुर्मायामहोदधिः।
द्विजरूपधरो भूत्वा याचनाय वधाय च॥
गुरुणा चोदिता देवाः स्तुताश्चे विधिनम्रति।
गताः सर्व्वे नतः शान्ता यत्र देवो जगाद्दनः॥
माधवेन तदा देवा दृष्टा भयसमाकुलाः।
क्रमाद्यथासनसंलापैः सर्व्वे ते संस्तुता भृशम्॥
संपृच्छितास्तदा सर्व्वे किमायातावदन् सुराः॥
देवा ऊचुः।
बलेन बलिना देव! सर्व्वे विद्यासिना वयम्।
मायावी तं वधे तस्य नान्योपायो भवेत् क्षणिन्॥
विष्णुरुवाच।
करोमि भवतामिष्टं किन्त्वसौ बलसंयुतः।
सात्त्विकी नयवेत्ता च धर्म्मात्मार्थपारगः॥
गूढमन्त्रविचारी स्याद्धर्म्मैकशरणनिश्चयः।
तस्य मायां कथं कर्त्तुं शक्यते सुरसत्तमाः॥
पुरैका भवते विद्या मम दत्ता तु मूलिना।
मोहिनी नाम विख्याता मोहं सा कुरुते भृशम्॥
ततोऽहं तस्य नाशाय करामि परमेश्वरीम्।
स्मरित्वा परमां विद्यां द्विजभावो जगाद्दनः॥

मध्वक्षायसुवेषश्च वेदपाठी सविस्तरः ।
परियाही कृताग्रस्य चपयन्नो व्रजेदृषजेत् ॥
यद्यर्थं याचनां कस्य करोमि काश्यतां मम ।
तं दृष्ट्वा सूर्यतेजोभसुक्तो विप्रेन्द्रजन् स च ॥
बलक्षे यज्ञनिध्यत्तिं करोति द्विजसत्तम ! ।
हेमकूटे महाशैले तिष्ठते दानवोत्तमः ॥
सर्व्वज्ञोऽपि महामायी वञ्चनाय तदा गतः ।
मोहिनीं जपमानस्तु विद्यां परमसिद्धिदाम् ॥
विचित्रं ददृशे राजन्न पुरं सर्व्वपुरोत्तमम् ।
प्राविशद्देवं वेदात्मा पठमानो जगार्हणः ॥
दानवस्तु पुरं रम्यं जगाति त्वं महोत्तम ! ।
द्वारं गतोऽसुरेन्द्रस्य कूर्म्मां प्राध्ययनं तदा ॥
द्वारपालो वदत्येवं श्रुत्वा वेदध्वनिं शुभम् ।
पुराणि रत्नानि शुभं ददामि याचतां वर ! ॥
इदं दानं द्विजश्रेष्ठ ! दुर्लभञ्च महामते ! ।
तेनोक्तं दर्शनं द्वाःस्थ दीयतां दनुसत्तमे ॥
तदा स पूर्व्वमादिष्टः प्रेषयामास तं नृपम् ।
बलिनं बलसम्पन्नं दानवं सुरमर्द्दनम् ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रीत्यावभाषत ।
किमायातो भवांश्चात्र कार्य्यं विप्र ! तदुच्यिम् ॥
मोहिनीं जपमानस्तु वदते द्विजसत्तमः ॥

ब्राह्मणोवाच ।

अहं संप्रेषयामास विद्धि मां कश्यपात्मजम् ।
यज्ञाः सैन्द्रैः समाख्या ऋषिभिश्चासुरा-
धिप ! ॥
तस्य निष्पत्तये नाथ ! आगतोऽहं तवान्ति-
कम् ।
दानं मे दीयतां राजन् ! सिध्यते येन तन्मखः ॥

बल उवाच ।

येन संसिध्यते यज्ञो देवानश्वो द्विजोत्तम ! ।
तथा चाहं धनं दास्ये स्थिरमद्य ददामि ते ॥

ब्राह्मणोवाच ।

येन संसिध्यते यज्ञो देवानामसुराधिप ! ।
तद्देयं तच्च आदिष्टं सत्यमत्रावयोरपि ॥

बल उवाच ।

याच्यतां येन ते कार्य्यं सत्यं विप्र ! ददामि ते ।
संस्मृत्य मोहिनीं विद्यां वदते द्विजसत्तमः ॥

ब्राह्मण उवाच ।

न मे धनैः स्वदारैर्वा न भूम्या गजवाजिभिः ।
रत्नैः कार्य्यं महाबाहो ! देहयज्ञोऽसुरा-
धिप ! ॥
येन निष्पद्यते यज्ञः सुखदश्च दिवौकसाम् ।
तमहं याचयिष्यामि देयतां तद्धनं तव ॥
सत्यं कार्य्यं मम भद्रं ऋषीणाञ्च विशेषतः ।
देवार्थं तव कार्य्येण सिध्यते तन्मखोत्तमः ॥
तदा दत्ता तवुक्तेन दानवेन महात्मना ।
विष्णुनापि स्वचक्रेण शिरस्यभिहतोऽसुरः ॥
प्राक्तनं देहमुत्सृज्य दिव्यकायस्वभूत्तदा ।
तस्यावयवसंजाता वज्रात्मा रत्नजातयः ॥
लोचने सुरतेजांसि पद्मरागाणि चाभवन् ।
विप्रमुखात्प्रदानेन कायो रत्नाकरोऽभवत् ॥"

इति देवीपुराणे ४० अध्यायः ॥

ब(व)लजः, पुं, (बलात् जायते इति । बल + जन + ड ।) चन्द्रः । इत्यमरः ।१।५।१२॥ बलतीति क्विप् बलं अत्यर्थक्विप् यच् बलस्य इति वा संयोगवान् । इति रायमुकुटः ॥ अवलक्षते इति बलजः यच् अकारलोपः । इति स्वाम्याख्यः ॥ इतञ्चते अञ्चः ख्यकारादिः ॥ (यथा, माघे । ६ । ३४ ।

"हिरदृदन्तबलक्षमलक्षत
स्फुरितवक्त्रकृतग्रहविक्रियम् ॥")

बलजं, क्ली, (बलात् जायते इति । बल + जन + ड ।) चेतम् । पुरद्वारम् । इत्यमरः ।१।३।९१॥ मुस्तम् । (धान्यराशिः । इति वैजयन्ती ॥ यथा, माघे । १४ । ७ ।

"त्वं समीरण इव प्रतीक्षितः
कर्षकेण बलजानु पुपूषता ॥")

युद्धम् । इति मेदिनी ॥ बलजन्ये, त्रि ॥

बलजा, स्त्री, (बलात् बलक्षतत्राणसंयुद्धादिकात् जायते या। बल + जन + ड + टाप् ।) वरयोषा। यूथी । इति मेदिनी । जे, २६ ॥

बलती, स्त्री, प्रासादोपरिमञ्जलिका । इति पुराणम् ॥

बलदः, पुं, (बलं ददातीति । बल + दा + कः ।) लोधकः । इति राजनिर्घण्टः । पौष्टिककर्म्मोक्त-होमाग्निः । यथा । पौष्टिके बलदः स्मृतः । इति तिथ्यादितत्त्वम् ॥ (वृषभः । यथा, कथा-सरित्सागरे । ३७ । १५३ ।

"ऋग्वेदुः प्रणयक्रीडाद्याजाच्च मम सूचकम् ।
गर्वोऽवधारणं दास्तत्तृतीयं बलदोऽभवम् ॥")

बलदातरि, त्रि ॥ (यथा, ऋग्वेदे ।३।५३। १८। "बलं तोकाय तनयाय जीवसे त्वं हि बलदा असि ॥")

बलदा, स्त्री, (बलद + टाप् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—

"गन्धाल्या वाजिनामादिरश्वगन्धा हयाह्वया ।
वराङ्गकर्णी वरदा बलदा कुष्ठगन्धिनी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलदीपता, स्त्री, (बलस्य दीपना ।) ग्लानिः । इति हेमचन्द्रः ॥

बलदेवः, पुं, (बलेन दीव्यतीति । दिव + अच् ।) बलरामः । तत्पर्य्यायः । बलभद्रः २ प्रलम्बघ्नः ३ अच्युताग्रजः ४ रेवतीरमणः ५ रामः ६ कामपालः ७ हलायुधः ८ नीलाम्बरः ९ रौहिणेयः १० तालाङ्कः ११ सुघनी १२ हली १३ मुषलध्वजः १४ सीरपाणिः १५ कालिन्दीभेदनः १६ बलः १७ । इत्यमरः ।१।१।२४॥ रुक्मिदर्पघ्नः १८ मधुप्रियः १९ हलधरः २० हलभृत् २१ हालभृत् २२ सौनन्दी २३ गुप्तवरः २४ संवर्त्तकः २५ बली २६ । इति शब्दरत्नावली ॥ (यथा भागवते ।८। १। ३३ । "तदृगच्छ देवदेवांशो बलदेवो महाबलः ॥")

अस्य ध्यानम् ।

"बलदेवं द्विबाहुञ्च गौरकुन्देन्दुसन्निभम् ।
वामे हलायुधधरं सुघनं दक्षिणे करे ॥

हालाजोत्तं नीलवस्त्रं देवावस्त्रं स्मरेत् परम् ॥"

इति कालिकापुराणम् ॥

(अयं हि शेषवर्षेशांशावतारः । यथा, महाभारते । १ । ६७ । १५१ ।

"शेषस्यांशश्च नागस्य बलदेवो महाबलः ॥"

नाम्नामस्य कारणानि बलभद्रशब्दे द्रष्टव्यानि ॥) वायुः । इति मेदिनी । वे, ६२ ॥

बलदेवा, स्त्री, आयमाणौषधिः । इति मेदिनी । वे, ६२ ॥ (गुणादयोऽस्याश्चायमाणाशब्दे ज्ञातव्याः ॥)

बलप्रघ्नः, स्त्री. (प्रघ्नते इति प्रघ्नजननी । बलस्य बलदेवस्य प्रघ्नः ।) रोहिणी । बलराममाता । इति शब्दरत्नावली ॥

बलभद्रः, पुं. (बलं भद्रं श्रेष्ठमस्य । यद्वा, बलमस्यास्तीति बलः । अर्शआद्यच् । बली बलवानपि भद्रः सौम्यः ।) बलदेवः । इत्यमरः ।१।१।२४॥ अनन्तः । बलग्राली । इति हेमचन्द्रः ।२।१९६॥ लोध्रः । इति शब्दचन्द्रिका ॥ गवयः । इति राजनिर्घण्टः ॥ बलदेवस्य नाम्नां कारणानि यथा,—

"ज्ञानं निरूपितं नाम्नां कलिस्थस्य यथाश्रुतम् ।
ज्येष्ठस्य हलिनो नाम्नः सङ्कर्षं शृणु मङ्गलात् ॥
गर्भसङ्कर्षणादेव नाम्ना सङ्कर्षणः स्मृतः ।
नाट्यशास्त्रोऽस्यैव वेदेषु तेनानन्त इति स्मृतः ॥
बलदेवो बलोद्रेकाद्बली च हलधारणात् ।
सितिवासो नीलवासात् सुघनी सुघनायुधात् ।
रेवतीसम्भोगाद्रेवतीरमणः स्वयम् ॥
रौहिणीगर्भवासात्तु रौहिणेयो महामतिः ।
इत्येवं ज्येष्ठपुत्रस्य सुतं नाम निवेदितम् ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १६ अध्यायः ॥

विष्णुपूजनोक्ताष्टदलपद्मस्थयोगिविशेषः । यथा,

"सर्व्वत्र मङ्गलं कार्य्यं वासुदेवस्य पूजने ।
एवमेव नृपश्रेष्ठ ! निष्फलं चान्यथेतरत् ॥
बलभद्रश्च कामश्च अनिरुद्धस्तदुद्भवः ।
नारायणस्तथा ब्रह्मा विष्णुः षष्ठः प्रकीर्त्तितः ॥
नरसिंहो वराहश्च योगिनोऽष्टौ प्रकीर्त्तिताः ।
पूर्व्वाद्यष्टदलेष्वेतान् वर्णतो मन्त्रतः पृथक् ॥
पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ।
बलभद्रसुखानान्तु योगिन्यः पूज्य पार्थिव ! ॥
आद्यायुत्कर्षिणी श्रेया ज्ञाना पश्चात् क्रिया
परा ।
योगा प्रज्ञा सत्येच्छानी अनुप्रानी तथा क्षमी ॥
सर्व्वाश्चतुर्भुजाः प्रोक्ताः शङ्खचक्रगदाधराः ।
योगिन्यो बलभद्रस्तु कामं विधियुते तथा ॥
विधे रूपन्तु पूर्व्वोक्तं हलञ्च सुघनन्तथा ।
शङ्खचक्रञ्च धत्ते स गदां पार्श्वस्थितास्तथा ॥"

इति कालिकापुराणे ८२ अध्यायः ॥

(पर्व्वतविशेषः । यथा, भागवते । ५।२०।२६। "इत्येषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्तैव । एतेषां उत्तरतो बलभद्रः पुलस्त्येश्वर; सहस्रशीर्षो देवशेषो महानस्त इति ॥")

बलवि

बलभद्रा, स्त्री, कुमारी। आर्यमाता। इति मेदिनी। ३, २८४॥ (अस्याः पर्य्यायो यथा,—
"बलभद्रा आर्यमाता आर्यन्ती गिरिसानुजा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बलभद्रिका, स्त्री, (बलभद्रैव। बलभद्रा + स्वार्थे कन्। टापि अत इत्वम्।) आर्यमाता। इत्यमरः। २। ४। १५०॥

बलरामः, पुं, (रम + भावे घञ्। बलेन रामो रमणं यस्य।) बलदेवः। यथा,—
"बलरामानुजः श्रीमान् गजेन्द्रस्तुतपाठकः॥"
इति नारदपञ्चरात्रे चतुर्थरात्रीयः ८ अध्यायः॥
अस्य ध्यानम्।
"अन्तरे दिव्य उद्याने हरिचन्दनसंज्ञके।
तन्मध्यस्थात् स्वर्णपीठे विचित्रे मणिमण्डपे॥
तन्मध्ये मणिमाणिक्यदिव्यसिंहासनोज्ज्वले।
तदोपरि च रेवत्या सहपूर्णहलायुधम्॥
ईश्वरस्याभयानन्तमभिन्नगुणरूपिणम्।
शुद्धस्फटिकसंकाशं रक्ताम्बुजदलेक्षणम्॥
नीलशैलधरं स्निग्धं दिव्यगन्धानुलेपनम्।
कुङ्कुमाङ्कितसर्व्वाङ्गं दिव्यभूषाम्बरस्रजम्॥
मधुपाने सदासक्तं मदाघूर्णितलोचनम्।
सुबलं दक्षिणे पार्श्वे बलरामं सदा स्मरेत्॥"
इति कश्चिन्निबन्धः॥

बलल्लः, पुं, (बलं लातीति। बल + ला + कः।) बलरामः। इत्यमरटीकायां भरतः॥

बलवत्, त्र, (बलमस्यास्तीति। बल + मतुप्। मस्य वः।) अतिशयम्। इत्यमरः। ३। ४। १॥ (यथा, शाकुन्तले प्रस्तावनायां सूत्रधारस्योक्तिः।
"बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥")

बलवान् [त्], त्रि, (बलमस्यास्तीति। बल + मतुप्। मस्य वः।) बलविशिष्टः। तत्पर्य्यायः। मांसलः २ अंशुलः ३। इत्यमरः। ३। ६। ४४॥ वीर्य्यवान् ४ बली ५। इति शब्दरत्नावली॥ (यथा, मनुः। १। ७६।
"आकाशात्तु विकुर्व्वाणात् सर्व्वगन्धवहः शुचिः।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः॥")

बलवर्द्धिनी, स्त्री (बलं वर्द्धयतीति। बल + वृध् + णिनिः। ङीप्।) जीवकौषधिः। इति अटाधरः॥

बलविन्यासः, पुं, (बलानां सैन्यानां विन्यासेन दुर्भेद्यत्वेन न्यासः स्थापनम्।) युद्धार्थं सैन्यस्य व्यूहविशेषे विभज्य दुर्भेद्यत्वनिमित्तं स्थापनम्। तत्पर्य्यायः। व्यूहः २। इत्यमरः। २। ८। ७६॥ (बलविन्यासास्तु मकरपद्मादिभेदात् बहवः। तत्र संक्षेपतो मनुना युद्धयात्रार्थं कैश्चिन्निर्द्दिष्टाः। यथा, मानवे। ७। १८७—१९१।
"दण्डव्यूहेन तन्मार्गे यायात्तु शकटेन वा।
वराहमकराभ्यां वा सूच्या वा गरुडेन वा॥
यतश्च भयमाशङ्केत् ततो विस्तारयेद्बलम्।
पद्मेन चैव व्यूहेन निविशेत सदा स्वयम्॥
सेनापतिबलाध्यक्षौ सर्व्वदिक्षु निवेशयेत्।
यतश्च भयमाशङ्केत् प्राचीं तां कल्पयेद्दिशम्॥
शुक्रांश्च स्थापयेदग्रात् शतसंघान् समन्ततः।

बला

स्थाने युद्धे च कुशलानभीरूनविकारिणः॥
संहतान् योधयेदल्पान् कामं विस्तारयेद्बहून्।
सूच्या वज्रेण चैवैतान् भूयिष्ठं भूय योधयेत्॥")

बलसूदनः, पुं, (बलं तन्नाम्ना प्रसिद्धं असुरं सूदयतीति। बल + सूद + ल्यु।) इन्द्रः। इति हलायुधः॥ (यथा, देवीभागवते ५। ३। १३।
"गोपिद्रुहं गृहाणाशु युद्धाय बलसूदन!॥"
विष्णुः। इति देवीपुराणे ३७ अध्यायः॥)

बलस्थितिः, स्त्री, (बलानां स्थितिरवस्थानं यत्र। अधिकरणात् स्त्रीत्वम्।) शिविरम्। इति त्रिकाण्डशेषः॥

बलहा, [न्], पुं, (बलं सामर्थ्यं हन्तीति। बल + हन् + क्विप्।) क्षेपा। इति शब्दरत्नावली॥ (बलं तन्नामानमसुरं हन्तीति। इन्द्रः॥ परबलविनाशके, त्रि। यथा, हरिवंशे। ११०। ४५।
"तत्राहं युध्यमानस्तु भ्रातास्य बलहा बली।
स्थितो ममाग्यतः शूरो गदापाणिर्हलायुधः॥")

ब(व)ला, स्त्री, (कार्य्यकारित्वेन बलमस्त्यस्याः। बल + अर्श आद्यच् तनष्टाप्।) क्षुपविशेषः। बाला इति वाड़ियाला इति भाषा। तत्पर्य्यायः। बाल्यालकः २। इत्यमरः। २। ४। १०७॥ समङ्गा ३ ओदनिका ४ भद्रा ५ भद्रोदनी ६ खरकाण्डिका ७ कल्याणिनी ८ भद्रबला ९ मोटा १० पाटी ११ बलाढ्या १२। इति राजनिर्घण्टः॥ घृतपाकी १३ बाच्या १४ वाटी १५ विनया १६ बाल्यालकी १७ वाटिका १८। इति शब्दरत्नावली॥ अपि च।
"बाल्यालको बाल्यपुष्पी समांसा विमला बला।
श्वेतवाड़ियाला इति भाषा॥
ऋष्यप्रोक्ता त्वतिबला पीतपुष्पी महाबला।
पीतवाड़ीयाला।" इति रत्नमाला॥ अस्या गुणाः। अतितिक्तत्वम्। मधुरत्वम्। पित्तातिसारनाशित्वम्। बलवीर्य्यप्रदत्वम्। पुष्टिकफरोगविषशोधनत्वञ्च। इति राजनिर्घण्टः॥ अथ बलाचतुष्टयनामादि।
"बला बाल्यालिका बाल्या सैव बाल्यालकोऽपि च।
महाबला पीतपुष्पा सहदेवी च सा स्मृता॥
ततोऽप्यतिबला ऋष्यप्रोक्ता कङ्कतिकासह।
गाङ्गेरुकी नागबला भद्रा हृस्वा गवेधुका॥
बलाचतुष्टयगुणाः।
बलाचतुष्टयं शीतं मधुरं बलकान्तिदम्।
स्निग्धं वातहरं सद्यो वृष्यं पित्तासृक्शमनाग्रणम्॥
बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करम्।
मूत्रातिसारं हरति दुष्टमेतन्न संशयः॥"
इति भावप्रकाशः॥
"स्निग्धायुष्या बला वृष्या वातहिध्मो वातपित्तजित्॥"
इति राजनिर्घण्टः॥
(विद्याविशेषः। सा च ब्रह्मणः सुता। विश्वामित्रेण रामाय प्रदत्ता। अस्याः प्रभावात् क्षुधातृष्णादिजनितक्लेशो न भवेत्। यथा, रामायणे। १। २२। ११—२२।

बलाका

"अधार्द्धयोजनं गत्वा सरय्वा दक्षिणे तटे।
राजेति मधुरां वाणीं विश्वामित्रोऽभ्यभाषत॥
गृहाण वत्स! सलिलं माभूत् कालविपर्य्ययः।
मन्त्रग्रामं गृहाण त्वं बलामतिबलां तथा॥
न श्रमो न ज्वरो वा ते न रूपस्य विपर्य्ययः।
न च सुप्तं प्रमत्तं वा धर्षयिष्यन्ति नैर्ऋताः॥
न बाहोः सदृशो वीर्य्ये पृथिव्यामस्ति कश्चन।
त्रिषु लोकेषु वा राम! न भवेत् सदृशस्तव॥
बलामतिबलाञ्चैव पठतस्तात राघव!॥
न सौभाग्ये न दाक्षिण्ये न ज्ञाने बुद्धिनिश्चये।
नोत्तरे प्रतिवक्तव्ये समो लोके तवानघ!॥
एतद्विद्याद्वये लब्धे न भवेत् सदृशस्तव।
बला चातिबला चैव सर्व्वज्ञानस्य मातरौ॥
क्षुत्पिपासे न ते राम! भविष्येते नरोत्तम!॥
बलामतिबलाञ्चैव पठतस्तात राघव!॥
विद्याद्वयमधीयाने यशश्चाग्र्यं भविष्यति॥
पितामहसुते ह्येते विद्ये तेजःसमन्विते।
प्रदातुं तव काकुत्स्थ! सदृशं हि पार्थिव!॥
कामं बहुगुणाः सर्व्वे त्वय्येते नात्र संशयः।
तपसा सम्भृते चैते बहुरूपे भविष्यतः॥
ततो रामो जलं स्पृष्ट्वा प्रहृष्टवदनः शुचिः
प्रतिजग्राह ते विद्ये महर्षेर्भावितात्मनः॥
विद्यासमुदितो रामः शुशुभे भीमविक्रमः।
सहस्ररश्मिर्भगवान् शारदीव दिवाकरः॥")

ब(व)लाकः, पुं, (बलेन अकतीति। बल + अक + घञ्वा।) बकजातिः। इति भरतः॥ (पुरुषपुत्रः। स च पीतगङ्गस्य जङ्घोः पौत्रः। यथा, भागवते। ९। १५। ३।
"जङ्घोस्तु पूरुतस्तस्य पुत्रो बलाकवाजकोऽजकः॥"
वनसर्पीपुत्रभेदः। यथा, मार्कण्डेये। ११८। २।
"तस्य तस्यां सुनन्दायां पुत्रा द्वादश जज्ञिरे।
प्रांशुः प्रचीरः सूरश्च सुचक्रो विक्रमः क्रमः॥
बली बलाकश्चक्रश्च प्रचक्रश्च सुविक्रमः॥"
जातूकर्ण्यस्य मुनेः शिष्यविशेषः। यथा, श्रीभागवते। १२। ६। ५८।
"जातूकर्ण्यश्च तच्छिष्यः संहितां स्वसंहिताम्।
बलाकपैलजाबालविरजेभ्यो ददौ मुनिः॥"
राक्षसभेदः। यथा, मार्कण्डेये। ६६। ६७।
"तां जहाराद्रितनयो बलाको नाम राक्षसः॥"
स्वनामख्यातो व्याधविशेषः। यथा, महाभारते। ८। ६६। ४०।
"मृगव्याधोऽभवत् कश्चित् बलाको नामभारत॥")

ब(व)लाका, स्त्री, (बलते इति। बल संवरणे + बलाकादयश्च।" उणा० ४। २४। इति अक। यद्वा, बलेन अकतीति। बल + अक कुटिलगतौ + घञ्वाद्यच्।) बकजातिविशेषः। (यथा, मनुः। ५। १४।
"बकश्चैव बलाकाश्च काकोलं खञ्जरीटकम्॥")
तत्पर्य्यायः। विषकण्ठिका २। इत्यमरः। २। ५। ८५॥ विषकण्ठी ३ बलाकी ४। इति शब्दरत्नावली॥ कारण्डिका ५ लिङ्गलिका ६। इति अटाधरः॥ विषकण्ठी ७ शुष्काङ्गा ८

दीर्घकन्धरा ६ धर्म्मालु १० कासुकी ११ श्लेष्मा १२ मेघानन्दा १३ जलाश्रया १४। बलेन शुक्ला दूरन्तर्हसकृति। बल बल्ल संवरणे बलाकादय-श्चेत्याकन् बलाका। इति रायमुकुटशब्दतत्त्वोत्पत्ति-हृयेन पवर्गीयबकारादिरन्तबकारादिश्चायं ग्रन्थः॥*॥ अस्या मांसगुणाः। वायुनाशित्वम्। स्निग्धत्वम्। हृद्यत्वम्। वृष्यत्वम्। कफपित्त-हरत्वम्। हिमत्वञ्च। इति राजवल्लभः॥ सारस-हंसबलाकाचक्रकौञ्चादयो जले प्लवनात् प्लव-संज्ञाः कथितास्ते तत्मांसं गुरुत्वाच्च बलदायि। अपि च।

"अन्ये बकबलाकाद्या गुरवः प्राणिभक्षणात्।"

इति राजनिर्घण्टः॥

अन्यच्च।

"हंससारसकाकाच्चबकक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"

इति भावप्रकाशः॥

(कासुकी। इति शब्दरत्नावली॥)

बलाञ्चिता, स्त्री, (बलेन अञ्चिता।) रामवीणा। इति शब्दरत्नावली॥

बलाटः, पुं, (बलेन अट्यते प्राप्यते इति। अट्+घञ्।) मुखः। इति हेमचन्द्रः॥

बलात्, अ, (बलमस्तीति। बल+अत्+क्विप्।) हठात्। बलादिति निपातो हठार्थे इति स्वामी। इत्यमरटीकायां भरतः॥ यथा,—

"बलात् संदूषयेद्यस्तु परभार्य्यां नरः क्वचित्।
वधदण्डो भवेत्तस्य नापराधो भवेत् स्त्रियाः॥"

इति मात्स्ये २०१ अध्यायः॥

बलात्कारः, पुं, (बलात्करणम्। बलात्+कृ+भावे घञ्।) हठात्करणम्। तत्पर्य्यायः। प्रसभम् २ हठः ३। इत्यमरः। २। ८।१०८॥ हठात्कारः ४ प्रसभः ५। इति शब्दरत्नावली॥

"मत्ताभियुक्तस्त्रीबालबलात्कारकृतञ्च यत्।
तदप्रमाणं लिखितं भयोपधिकृतन्तथा॥"

इति कृत्यादाने मिताक्षरायां याज्ञवल्क्यवचनम्॥

(यथा, रघुः। १०। ४७।

"ग्रामयन्निव पौलस्त्यबलात्कारकषायितैः॥")

बलात्मिका, स्त्री, (बलमेव आत्मा स्वरूपं यस्याः।) हस्तिशुण्डीवृक्षः। इति शब्दरत्नावली॥

बलात्मा, स्त्री, (बलाय आत्मा श्रेष्ठा।) बला। इति राजनिर्घण्टः॥ (बलात्मशब्दस्यास्य विवरणं शब्दार्थम्॥)

बलानुजः, पुं, (बलस्य बलरामस्य अनुजः कनिष्ठः।) श्रीकृष्णः। इति पुराणम्॥

बलामोटा, स्त्री, (बलमामोटयतीति। बल+आ+मुट्+अच्। टाप्।) नागदमनी। इति भावप्रकाशः॥ (अस्या गुणाः।

"बलामोटा कटुस्तिक्ता लघुः पित्तकफापहा।
मूत्रकृच्छ्रव्रणान् रक्तो नाशयेच्छ्लीपदग्रहान्॥

सर्व्वत्रग्रहप्रशमनी निःशेषविषनाशिनी।
जयं सर्व्वत्र कुरुते धनदा सुमतिप्रदा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

बलायः, पुं, (अयतीति अयः प्रापकः। बलस्य अयः।) वरुणवृक्षः। इति शब्दचन्द्रिका॥ (गुणादयोऽस्य वरुणशब्दे ज्ञातव्याः॥)

बलारातिः, पुं, (बलस्य तन्नाम्ना प्रसिद्धस्यासुरस्य अरातिः शत्रुः।) इन्द्रः। इत्यमरः। १।१।४६॥

बलालकः, पुं, (बलाय अलति समर्थो भवतीति। बल+अल्+ण्वुल्।) धात्रीफलम्। इति शब्दचन्द्रिका॥

बलाशः, पुं, (बलमश्नातीति। बल+अश+अण्।) श्लेष्मा। इति हेमचन्द्रः। ३। १०६॥ (यथा,

"बलाशं एवायतमुन्नतञ्च
श्लोकं करोत्यन्नगतिं निवार्य्य॥"

कण्ठगतरोगविशेषः। तल्लक्षणं यथा,—

"गले च श्लोकं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम्।
मर्म्मच्छिदं दुस्तरमेतमाहु-
र्बलाशसंज्ञं निपुणा विकारम्॥"

इति सुश्रुते निदानस्थाने षोड़शोऽध्याये॥ इत्यसाल्लोऽप्ययं शब्दो दृश्यते॥)

बलासमः, पुं, वृक्षः। इति त्रिकाण्डशेषः॥

ब(ब)लाहकः, पुं, (बलेन हीयते इति। बल+हा+कन्। यद्वा, वारीणां वाहकः। पृषोदरादित्वात् साधुः।) मेघः। (यथा, कुमारे। १। ४।

"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

मुस्तकः। इत्यमरः। १। ३। ६॥ पर्व्वतः। दैत्यविशेषः। नागविशेषः। इति मेदिनी॥ (यथा, महाभारते। २। ८। ८।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ॥"

बलाहकसर्पस्तु दत्त्वीकरणामन्तर्गतः। इति सुश्रुते कल्पस्थाने ४ अध्यायः॥) रमागर्भोद्भवः कल्किदेवपुत्रः। यथा,—

"तथा रमा सिते पक्षे वैशाखे द्वादशीदिने।
जामदग्न्याद्व्रतं चक्रे पूर्णं वर्षचतुष्टयम्॥
पट्टसूत्रं करे बद्ध्वा भोजयित्वा द्विजान् बहून्॥
भुक्त्वा हविष्यं क्षीरान्नं भूमिशं स्वामिना सह॥
बुभुजे पृथिवीं सर्व्वामपूर्व्वां स्वजनैर्वृता।
सा पुत्रौ सुषुवे साध्वी मेघमालबलाहकौ॥
देवानामुपकर्त्तारौ यज्ञदानतपोव्रतौ।
महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ॥"

इति कल्किपुराणे ३२ अध्यायः॥

श्रीकृष्णरथाश्वविशेषः। यथा, —

"स्यन्दनस्तु घृतानन्दः सारथिश्चास्य दारुकः।
तुरङ्गाः शैव्यसुग्रीवमेघपुष्पबलाहकाः॥"

इति त्रिकाण्डशेषः॥

(यथाच भागवते। १०। ५३। ४।

"स चाश्वैः शबलैर्युक्तं रथमास्थाय तूर्णगैः।
युक्तं रथमुपानीय तस्थौ प्राञ्जलिरग्रतः॥"

जयद्रथस्य भ्रातृविशेषः। यथा, महाभारते। ३। २५७। १२।

"जयद्रथो नाम पतिः श्रुतस्ते
सौवीरराजः सुभगे! स एषः।
तस्यापरे भ्रातरोऽतीवसत्त्वा
बलाहकाणीकविदारणाद्याः॥"

नदविशेषः। स तु जयद्रथसमुद्गामी। यथा, मात्स्ये। १२०। ७२।

"बलाहकश्च ऋषभश्चको मैनाक एव च।
विनिर्विद्धाः प्रनिर्हिद्धं निमग्ना लवणाम्बुधिम्॥"

कुशद्वीपस्थपर्व्वतविशेषः। यथा, तत्रैव। १२१। ५५।

"बलाहकस्तृतीयस्तु भास्वरनामयो गिरिः॥"

तारापीड़स्य राज्ञः स्वनामख्यातो बलाधिकारी। यथा, कादम्बर्यां चन्द्रापीड़विवाहाभ्यामकथने। "चन्द्रापीड़मानेतुं राजा बलाधिकृतं बलाहकनामानं आकृष्य दृष्टसुरराजबल-प्रदानपरिवर्त्तनमभिप्रयुक्तोऽहमिति प्राहिणोत्॥")

बलाहकन्दः, पुं, (बलं आहरतीति बलाहरत्वा-दृढः कन्दः।) गुलञ्चकन्दः। इति राजनिर्घण्टः॥

बलिः, पुं, (बल्यते दीयते इति। बल दाने+"सर्व्व-धातुभ्य इन्।" उणा० ४। ११७। इतीन्।) करः। राजग्राह्यो भागः। (यथा, मनुः। ७। ८०।

"सांवत्सरिकमाप्तैश्च राष्ट्रादाहारयेद्बलिम्॥"

"राजा प्रकृतिरात्मेर्षिभ्यास्यं धान्यादिभाग-मात्मवेत्।" इति कुल्लूकभट्टः॥) उपहारः। पूजासामग्री। इत्यमरभरतौ॥ (यथा, मार्क-ण्डेये। ८३। ८।

"इदमुक्तो बलिश्चैव निजगात्राहृगुल्लिखौ॥")

चामरदक्षः। बलिवैश्वनामकपञ्चमहायज्ञान्त-र्गतभूतयज्ञः। इति हेमचन्द्रः। ३। ४८६॥ (गृहस्थो हि पञ्चसूनापापेन प्रतिदिनं संबध्यते। तन्निष्कृ-त्यर्थं प्रत्यहं पञ्च महायज्ञाः कर्त्तव्याः। यथाह मनुः। ३। ६८—७१।

"पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्॥
तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥
पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः।
स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते॥"

"पशुवधस्थानं सूना। सूना इव सूना हिंसा-स्थानगुणयोगात्। चुल्ल्यादयः पञ्च गृहस्थस्य जीवहिंसास्थानानि। चुल्ली उद्धानी। पेषणी हस्तदृषल्लिका। उपस्करः शब्दोपकरण-कुशसंमार्जन्यादिः। कण्डनी उदूखलशब्दवती। उदकुम्भो जलाधारकलशः।" इति तट्टीकायां कुल्लूकभट्टः॥ * ॥ गृहस्थानां बलिरूपभूत-यज्ञस्य प्रतिदिनकर्त्तव्यतया तस्य विस्तृतिरुच्यते। गृहस्थः अनन्यचित्तो देवताध्यानपर एव होमान् कृत्वा प्राच्यादिषु दिक्षु बलिं हरेत्। तत्प्रकारमाह। प्राच्यां इन्द्राय नमः। इन्द्र-

पुरुषेभ्यो नमः। दक्षिणस्यां यमाय नमः। यमपुरुषेभ्यो नमः। पश्चिमायां वरुणाय नमः। वरुणपुरुषेभ्यो नमः। उत्तरस्यां सोमाय नमः। सोमपुरुषेभ्यो नमः। मनु मनौ।३।८७। "इत्यन्नकाम्यनीरूभ्यः साधुभ्यो बलिं हरेत्।" इत्युक्तेः अन्नकाय नमः। अन्नकपुरुषेभ्यो नमः इत्यादिप्रयोगः साधुः स्यात्। अत उच्यते यद्यपि शब्दादवगम्यत्वाद्देवतान्तस्यान्नकाम्यनीरूशब्देरेवोद्देशो युक्तस्तथापि वक्तुमानुष्ठानसंवादाद्वचनस्य च यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यो सोमाय सोमपुरुषेभ्य इति प्रतिदिग्गमिति पाठात् यथोक्त एव प्रयोगः। मरुद्भ्यो नमः इति द्वारे बलिं दद्यात्। जलेऽद्भ्यो नमः। मुषलोलूखले वनस्पतिभ्यो नमः। वास्तुपुरुषस्य शिरःप्रदेशे उत्तरपूर्वस्यां दिशि श्रियै नमः इति बलिं दद्यात्। वास्तुपुरुषस्य पादप्रदेशे दक्षिणपश्चिमायां दिशि भद्रकाल्यै नमः। इत्यनेन दद्यात्। केचित्तु गृहस्थप्रयतस्य शिरःस्थान-भूप्रदेशे श्रियै नमः। चरणभूप्रदेशे भद्रकाल्यै नमः इत्याहुः। ततो गृहमध्ये ब्रह्मणे पतये नमः वास्तोः पतये नमः इत्यनेन बलिं हरेत्। गृहाकाशे विश्वेभ्यो देवेभ्यो नमः। दिवाचरेभ्यो भूतेभ्यो नमः। दिवानक्तचारिभ्यो भूतेभ्यो नमः इत्यनेन दद्यात्। गृहस्योपरिस्थितसर्वदेवसर्वात्मभूतये नमः इत्यनेन बलिं दद्यात्। केचित् बलिदातुः पृष्ठदेशमध्यभूभागे सर्वात्मभूतये नम इत्यनेन दद्यादित्याहुः। ततो बलिदाता प्राचीनावीतिना दक्षिणामुखेन च सता उक्तबलिदानावशिष्टं सर्वमन्नं दक्षिणस्यां दिशि पितृभ्यः स्वधा इत्यनेन देयम्। ततोऽन्यदन्नं पात्रे समुद्धृत्य यथा रजसा न संसृज्यते तथा भुवि शनकैः अपतितचाण्डालपापरोगिवायसकृमिप्रभृतिभ्यो दद्यात्। एवं नित्यं कुर्वन् परं स्थानमश्नुतेति॥ * ॥) यथा,—

"येऽर्चयन्ति सदा विष्णुं निष्कामेनान्तरात्मना।
न ते भूयोऽभिजायन्ते श्वपाकेषूपजायते॥
एवं पूज्य विधानेन अतिथिं भोजयेत्ततः।
सायं प्रातर्यदन्नं स्याद्धुत्वाग्निं तेन तद्बलिम्॥"

इति याज्ञवल्क्यपुराणम्॥*॥

"ततोऽग्नेस्तर्पणं कुर्याद्दत्वाच बलिमित्यथ।
ब्रह्मणे गृहमध्ये तु विश्वेदेवेभ्य एव च॥
अन्वन्तरिक्षं वसुहिम्र प्राग्दक्षां बलिं क्षिपेत्।
प्राच्यां शुक्राय याम्यायां यमाय बलिमाहरेत्॥
प्रतीच्यां वरुणायैव सोमायोत्तरतो बलिम्।
दत्वाद्वारे विधात्रे च बलिं द्वारे गृहस्य च॥
अधोमुखे च बलिं दद्यात् गृहेभ्यश्च समन्ततः।
नक्तञ्चरेभ्यो भूतेभ्यो बलिमाकाशतो हरेत्॥
पितृणां निर्वपेच्चैव दक्षिणाभिमुखः स्थितः।
गृहस्थस्तत्परो भूत्वा सुसमाहितमानसः॥
ततस्तोयमुपादाय निखेदाचमनाय वै।
स्थानेषु निक्षिपेत् प्राज्ञस्तत्तद्देवतोद्दिश्य देवताः॥
एवं गृहबलिं कृत्वा ततो गृहपतिः शुचिः।
आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात्॥
सभ्यश्च सपशेभ्यश्च वयोभ्यश्चावपेद्भुवि।
वैश्वदेवं हि नामैतत् सायं प्रातरदाहृतम्॥"

इति मार्कण्डेयपुराणम्॥*॥

अथ बलिः। वैश्वदेवपश्चाद्भूमौ जलं क्षिप्त्वा तच्छेषान्नेन साङ्गुष्ठेन दैवतीर्थेन ॐ विश्वेभ्यो देवेभ्यो नमः इति बलिं दद्यात् तदुपरि जलमन्त्रेण मन्त्रेण दद्यात् एवं सर्वत्र जलप्रक्षेपः। तदुत्तरे ॐ सर्वेभ्यो देवेभ्यो नमः। उभयोर्दक्षिणे प्राचीनावीती पातितवामजानुर्दक्षिणामुखो दक्षिणाग्रकुशत्रयोपरि सतिलमन्नं भूमकुशत्रयेण पित्र्यतीर्थेन ॐ पितृभ्यः स्वधा। ततः सर्वेषां बलीनामुपरि सर्वत्र प्रत्येकं जलनिषेकः। तत उपवीती दैवतीर्थेन बलिपात्रप्रक्षालनोदकेनान्नेन ऐणाख्यां ॐ यक्ष्मणे नमस्तेऽस्तु मा मा हिंसीः ॐ यक्ष्मणे नमः इत्यनेन दद्यात् जलञ्च देयम्॥ इत्यावश्यकबलिः॥*॥

अथ काम्यबलिः। बलीनां पश्चिमे जलेनोत्तराग्रां रेखां कृत्वा भूमौ जलं दत्त्वा,—

"ॐ देवा मनुष्याः पशवो वयांसि
सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता
ये चान्नमिच्छन्ति मया प्रदत्तम्॥
पिपीलिकाः कीटपतङ्गकाद्या
बुभुक्षिताः कर्म्मनिबन्धदेहाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं
तेभ्यो विसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धु-
र्नैवान्नसिद्ध्यै तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्
प्रयान्तु तृप्तिं सुदिना भवन्तु॥
ॐ भूतानि सर्वाणि तथान्नमेत-
दृक्षञ्च विष्णुं यतोऽन्यदस्ति।
तस्मादहं भूतनिकायभूत-
मन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एष
तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं
तेषामिदन्नोऽस्तु सुदिना भवन्तु॥"

इत्यन्नार्थं बलिं दद्यात्।

"ॐ ऐन्द्रवारुणवायव्या सौम्या वै नैर्ऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्॥"

ॐ वायसेभ्यो नम इति पुनर्जलं देयम्।

भूमौ जलं दत्त्वा,—

"ॐ श्वानौ द्वौ श्यावशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ॥"

ॐ श्वभ्यां नमः ततः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ चण्डालपतितपापरोगिभ्यो नमः पुनर्जलं देयम्। भूमौ जलं दत्त्वा ॐ धर्म्मराजशुनाभ्यां नमः ततः पुनर्जलदानम्।

ततो जलं स्पृष्ट्वा अग्निं विसृज्य नमस्कृत्य संप्राप्ते जले क्रियमाणे बलीनामग्नौ जले वा क्षिपेत् पिण्डवत्। अन्नाभावे केवलजलेन पात्रान्तरस्थजले कुर्यात्। ततः कुशकुसुमसहितं जलपूर्णं ताम्रादिपात्रं हस्ते निधाय महादेव ऋषिर्विराड्गायत्री छन्द इन्द्रो देवता प्राणाग्निकर्म्मणि जपे विनियोगः। ॐ कदाचित्स आभूवदूती सदा हवः सखा कया सचिष्ठया वृता। ॐ कदा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढाचिदारुजे वसु। ॐ अभीषुणः सखीनामविता जरितॄणां शतमूतये भवेह। इति वामदेवं मौनी ज्ञानाग्नौ जिः पठित्वा ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु। ॐ स्वस्तीति जिः पठेत्। पार्व्वणश्राद्धादिकरणे पार्व्वणादिकं कृत्वैव वैश्वदेवादिकं कार्य्यं राज्ञावपि पाकसत्त्वे यत्किञ्चिद्दग्धसत्त्वे वा वैश्वदेवबलिकर्म्मणी कुर्यात्। मृदन्नं ब्राह्मणाभावे मन्त्रार्थं भावयन् नमो नम इति मन्त्रेण कुर्यात्। अविभक्तानामेककरणादेव सर्व्वेषां सिद्धिः। इत्याह्निकाचारप्रयोगतत्त्वम्॥ *॥ नवश्राद्धबलिर्विधा,—

"गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम्।
याव्यकं मङ्गलायैव क्षीरान्नं सोमसूनवे॥
दध्योदनञ्च जीवाय शुक्राय तु घृतौदनम्।
शनैश्चराय लशुरमाजमांसञ्च राहवे॥
खिचौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्च्चयेत्॥"

सर्व्वभक्ष्यैस्तु तत्तद्द्रव्याभावे यथालाभोपपन्नैर्भक्ष्यैः। इति श्राद्धयज्ञतत्त्वम्॥ *॥

इलभेदः। इति मेदिनी। (अयं सावर्णस्य मनोरन्तरे इन्द्र आसीत्। यथा, मार्कण्डेये।८०।१०।

"तस्मिन्नो भविष्यन्तु बलिर्वैरोचनिर्मुने।॥")

स च दैत्यो विरोचनपुत्रः। तस्य अशनायां पत्न्यां बाणाख्यं पुत्रशतं जातम्। इति श्रीभागवतम्॥ यथा,—

"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान्।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः।
महमाहुर्ऋष्टश्च कम्बे हे च बलेः सुते॥
बलेः पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः।
बाणोयो नाम विख्यातो गवो विक्रान्तपौरुषः॥"

इतिभिपुराणम्॥

तस्य पूर्व्वजन्मवृत्तान्तो यथा,—

शुक्र उवाच।

"धर्म्मध्वजो नाम बभूव राजा
विदर्भदेशे निजधर्म्मशीलः।
यज्वा सुवाग्मी सुभगः कर्म्मकर्त्ता
स विष्णुभक्तोऽनुदिनं महात्मा॥
तस्य त्वमासीन्नृपतेः सुभृत्यो
देष्टा द्विजानां पिशुनोऽविवेकी।
देष्टा गुरूणां सततं खदाता
नो साध्वसं ते वत पारलौक्यम्॥

एवंविधस्तं कृपसत्तमेन
प्रोक्तः कुरुष्वाघविनाशनाय ।
स्नानं हरेर्येन सुखं हि लभ्यते
लोके परे गत्वहतेन वापि ॥
श्रुत्वा भवांस्तद्वचनप्रकार
स्नानं त्वनेनापि जनार्दनस्य ।
दानं तथा गोः शतवान् विधात्रा
तस्मात् फलं विद्धि तवाप्रमेयम् ॥
एवं त्वया प्राप्तमशेषराज्यं
देवासुराणामहतं विपक्षैः ।
संलभ्यसे त्वं पुनरेव सर्वं
संपूजयन् भक्तियुतः सुरेशम् ॥"

इत्यग्निपुराणम् ॥

बलिराजयज्ञे वामनदेवभिक्षा । यथा,—

लोमहर्षण उवाच ।

"सपत्नैस्तनयासुखीं दृष्ट्वा संक्षुभितो बलिः ।
पप्रच्छोशनसं शुक्रं प्रणिपत्य कृताञ्जलिः ॥
आचार्य शोभमायाति साग्निभूभृद्गुना मही ।
कस्माच्च नासुरान् भागान् प्रतियज्ञन्ति वद्वयः ॥
इति पृष्टोऽथ बलिना काव्यो वेदविदांवरः ।
उवाच दैत्याधिपतिं चिरं ध्यात्वा महामतिः ॥
अवतीर्णो जगद्योनिः कश्यपस्य गृहे हरिः ।
वामनेनेह रूपेण परमात्मा सनातनः ॥
न नूनं यज्ञमायाति तव दानवपुङ्गव ! ।
तस्य पादप्रविक्षेपाद्दियं प्रचलिता मही ॥
इयमस्य जगद्धातुर्माया तस्यास्य सात्वतः ।
तन्निधानादसुरा भागार्हा नासुरोत्तम ! ॥
शुक्रते नासुरान् भागानपि तेन जयोऽमयः ।
शुक्रस्य वचनं श्रुत्वा तूष्णीमास्ते बलिः ॥
धन्योऽहं कृतपुण्यश्च यतो जगत्पतिः स्वयम् ।
यज्ञमध्यागतो ब्रह्मन् ! मत्तः कोऽन्योऽधिकः
पुमान् ।
यं योगिनः सदोद्युक्ता परमात्मानमव्ययम् ॥
द्रष्टुमिच्छन्ति देवोऽसौ ममाध्वरमुपेष्यति ।
यन्नयाचार्य ! कर्तव्यं तन्ममादेष्टुमर्हसि ॥

शुक्र उवाच ।

त्वयास्य दैत्याधिपते ! स्वल्पकेऽपि हि वस्तुनि ।
प्रतिज्ञा नैव वोढव्या वाच्यं साम तथा फलम् ॥

बलिरुवाच ।

ब्रह्मन् ! कथमहं ब्रूयामन्येनापि हि याचितः ।
नास्तीति किमु देवेशे संसाराघौघहारिणि ॥

लोमहर्षण उवाच ।

इत्येवं वदतस्तस्य सम्प्राप्तः स जनार्दनः ।
सर्वदेवमयोऽचिन्त्यो मायावामनरूपधृक् ॥
तं दृष्ट्वा यज्ञवाटस्था प्रविष्टमसुराः प्रभुम् ।
जग्मुः प्रभावात् क्षोभञ्च तेजसा तस्य निष्प्रभाः ॥
स चार्घ्यमादाय बलिः प्रोद्गतपुलकोद्गमः ।
पूजयामास गोविन्दं प्राह चेदं महासुरः ॥

बलिरुवाच ।

सुवर्णरत्नसंघातान् गजाश्वमहिषांस्तथा ।
स्त्रियो वस्त्राण्यलङ्कारान् गावः कृष्णश्च पुष्कलम् ।
तद्दामि तद्गृह्यतेदं ममार्थो सततं प्रियः ॥
इत्युक्तो दैत्यपतिना प्रीतिगर्भान्वितं वचः ।
प्राह स्मितगभीरं भगवान् वामनाकृतिः ॥
ममाधिग्रस्तार्थाय देहि भूमिं पदत्रयम् ।
सुवर्णाश्वगजादि तदर्थिभ्यः प्रदीयताम् ॥
एतच्छ्रुत्वा तु गदितं वामनस्य महात्मनः ।
ददौ तस्मै महाबाहुर्वामनाय पदत्रयम् ॥
प्राणौ तु पतिते तोये वामनोऽभूद्वामनः ।
सर्वदेवमयं रूपं दर्शयामास तत्क्षणात् ॥
जित्वा लोकत्रयं क्षत्रं हत्वा चासुरपुङ्गवान् ।
पुरन्दराय त्रैलोक्यं ददौ विष्णुरुरुक्रमः ॥
सुतलं नाम पातालमधस्ताद्वसुधातलम् ।
बलेर्दत्तं भगवता विष्णुना प्रभविष्णुना ॥
अथ दैत्येश्वरं प्राह विष्णुः सर्वेश्वरेश्वरः ।
यत्त्वया सलिलं दत्तं गृहीतं पाणिना मया ॥
कल्पप्रमाणं तत्तस्मात् भविष्यत्यायुरुत्तमम् ।
वैवस्वते तथातीते बले ! मन्वन्तरे तथा ॥
सावर्णिके तु संप्राप्ते भवानिन्द्रो भविष्यति ।
इदानीं सुतलं दत्तं सर्वं शुक्राय सर्वदा ॥
यदा सुरेषु विप्रेषु विरोधं त्वं करिष्यसि ।
बन्धिष्यति तदा पाशो वारुणो घोरदर्शनः ॥

बलिरुवाच ।

तत्रासनो मे पाताले भगवन् ! भवदाज्ञया ।
किं भावि भुवि दानस्य भोगोपयोगकम् ॥

श्रीभगवानुवाच ।

दानान्यविधिदत्तानि श्राद्धान्यश्रोत्रियाणि च ।
हुतान्यश्रद्धया यानि तानि दास्यन्ति ते फलम् ॥
अदक्षिणाश्च या यज्ञाः क्रियाश्चाविधिना हुताः ।
फलानि तव दास्यन्ति सुधौतान्यव्रतानि च ॥
उदर्केण विना पूजा विना दर्भेण या क्रिया ।
आज्येन च विना होमं फलदास्ते च ते बले ! ॥"

इति वामनपुराणे ३१ अध्यायः ॥*॥

ययातिवंशोद्भवसुनयोराजपुत्रः । यथा, विष्णु पुराणे । ४ । १८ । १ । "तितिक्षोरपि रुचदथः पुत्रोऽभूत् तस्यापि हेमः हेमस्य सुतपाः सुतपसश्च बलिः ॥" (तथा च भागवते । ९ । २३ । ४ ।
"ततो होमोऽथ सुतपा बलिः सुतपसोऽभवत् ॥"
सुनिविंशधः । यथा, महाभारते ।२।४।१०।
"अर्चावसुः सुमित्रश्च मैत्रेयः सुनयो बलिः ॥")
देवतोद्देशेन घातार्थपशुकल्पनच्छागादिः । यथा, भविष्ये ।
"अजानां महिषाणाञ्च मेषाणाञ्च तथा वधात् ।
प्रीणयेद्दुर्विधिवत् दुर्गां मांसशोणितसंभवैः ॥"
इति ।

प्रभुघातपूर्वकरक्तश्रीर्यथोल्लिखितम् । यथा,—
"स्थाने नियोजयेद्दक्षं शिरश्च सप्रदीपकम् ।
एवं दत्वा बलिं पूर्णं फलं प्राप्नोति साधकः ॥"
इति च दुर्गातन्त्रतत्त्वम् ॥ * ॥

तच्छेदनार्थखड्गलक्षणमाह निबन्धतन्त्रे ।
"दारुणाकुलिको सुद्या दीर्घा हात्रिंशदङ्गुलः ।
षड्ङ्गुलस्तु विस्तारः खड्गः काम्या विधूपमः ॥
हृदयेनैव खड्गेन बलिं पूर्वसुखस्थितम् ।
अधोत्तरवक्त्रञ्च स्वयं पूर्वाननस्तथा ॥"*॥
सङ्कल्पद्वारेण बलिहननं तदभावे दोषश्चाह तत्रैव ।
"हन्यादेकप्रहारेण स्वयं वा चान्यतोऽपि वा ॥
यद्यप्येकेन घातेन बलिश्छेदो न जायते ।
तदन्यं खाद्य च महान् कर्तुर्हानिः पदे पदे ॥"
तत्रान्तरे ।
"एकखड्गप्रहारेण पशुर्यत्र न छिद्यते ।
तदा विघ्नं विजानीयात् कर्तुर्वा हेतुरेव वा ॥"
निबन्धेऽपि ।
"यद्यौष्ठानिर्घातहानिश्चार्धहानिस्ततः परम् ।
पुत्रहानिः सुते सद्यः तदसद्यः शिवक्षयः ॥
अतः सद्यो महेशानि ! तस्मात्तेनैव होमयेत् सुधीः ।
होमादेव भवेच्छान्तिर्नान्यथेत्येव न संशयः ॥"*॥
प्रकारान्तरप्राप्तिमाह तत्रैव ।
"हन्यादेकप्रहारेण चान्यथा दोषमाप्नुयात् ॥
तच्छान्तये जपेद्दिद्यां कालीं वा तारिणीं पराम् ।
सहस्रं जुहुयात्तांसैर्होमयेद्वा खदिरादिकम् ॥
रुधिरं तस्य पात्रस्थं न तु देयं कदाचन ।
बलिमन्यं समादाय भगवत्यै निवेदयेत् ॥"*॥
निबन्धे ।
"यद्यप्येकेन घातेन मस्तको नैव छिद्यते ।
तदन्यं महतो हानिः कर्तुः पुत्रादिसम्भवाम् ॥
यस्मात् प्रजायते देवि ! ततः शान्तिं समाचरेत् ॥
आनीय महिषं तत्र घातयित्वा च तत्र वै ।
साग्निभिर्लोमसहितैर्जुहुयान्महेषि ! यथार्थतः ॥
तच्छान्तये जपेद्दिद्यां कालीं वा तारिणीं पराम् ।
अयुतं परमेशानि ! सहस्रं वापि साधकः ॥
सहस्रं जुहुयात्तांसैर्हुत्वा वह्नौ सुसंस्कृतेऽनले ।
ब्राह्मणं वा गुरुं वापि वरयेद्वसुभिः प्रिये ! ॥
पालितं वरयेद्वाथ बहुमानपुरःसरः ।
ततः स्वर्णं ब्राह्मणाय तस्मै दद्यात् शुभाशये ॥
एवञ्चेदृयजमानस्य शान्तिर्भवति निश्चयः ।
कृतस्तस्यैव ग्रहणं स्यात् दृष्टिरुद्वत्सरावधि ॥*
अथवा सर्वतोभद्रे नवकुम्भं निधापयेत् ।
सौवर्णं राजतं वापि ताम्रं वा तेजसन्तु वा ।
मार्त्तिकं वा चरेत्तत्र वित्तशाठ्यं न चाचरेत् ॥
तत्रैव कालिकां तारां तथा महिषमर्हणीम् ।
यजेद्वा त्रिपुरां देवीं समस्तरक्षिमक्षितिम् ॥
कुलदापैस्तथा वस्त्रैर्धनधान्यादिभिः प्रिये ! ।
पूजयेत् परमेशानीं वित्तशाठ्यविवर्जितः ॥
बलिमन्यं छागलं वा तत्रैव च सुलक्षणम् ।
वामयित्वा पुरोभागे चतुर्धा शोणितं क्षिपेत् ॥
अपरं शोणितं तत्र राक्षसे खर्परे क्षिपेत् ।
अष्टाङ्गमिश्रणं हुत्वा वक्ष्यमाणविधानतः ॥
एकेन वटुकादींश्च तथैकेनापि भैरवान् ।
अपरेणापि शेषेण ग्रामस्थेन योगिनीगणम् ॥
तर्पयित्वा ततः पश्चाद्धोमकर्मसमाचरेत् ।
दक्षिणाग्रं ततः कृत्वा पत्रैरामरुहद्भवैः ॥
यथाशक्ति महेशानि ! भूयो दद्यात् घटे यजेत् ।
घटवक्त्रे वटाश्वत्थप्लक्षोदुम्बरशाखिकाम् ॥

ब्रह्मकूर्चेन शिरःस्थित्य चषकं सपलाक्षतम् ।
पिधाय ब्रह्मबक्त्रेण सौमेनाच्छादयेत् पुनः ॥
जप्त्वा नत्वा ततः साध्यं नत्वामीश सुहृद्दृढम् ।
नदतस्तु पचवाद्येषु सुहृत्सु क्षोभमे सुधीः ॥
अभिषिञ्चेन्नाष्टकार्घैर्वर्धमानश्च साधकः ।
सप्तशलाभिर्नारीभिः शिशुपुण्याहनादिनम् ॥
अक्षीणानां द्विजातीनामाशीर्भिरादरः सरम् ।
करेणास्य शिरः स्पृष्ट्वा प्रयुञ्जीतामिषं पुनः ॥
भद्रमस्तु शिवश्चास्तु महामाया प्रसीदतु ।
रक्षन्तु त्वां सदा देवाः सम्यदः सन्तु सर्वदा ॥
अथोत्थायाभिषिक्तः सन् तोषयेद्ब्राह्मणान् धनैः ।

एवमेद्यजमानस्य शान्तिर्भवति नित्यदा ॥
प्रसङ्गादुक्तविघ्नस्य शान्तिकर्म निरूपितम् ।
सर्वसम्पत्करं पुंसां सर्वसौभाग्यसिद्धिदम् ।
भूमौ च दुर्निमित्तादावप्येवं शान्तिमाचरेत् ॥"
इति शिवस्तन्त्रोक्तबलिविघ्नशान्तिसंग्रहः ॥*॥
अन्यच्च ।
"एकखड्गप्रहारेण पशुर्यत्र न हन्यते ।
तदा विघ्नं विजानीयाद्दातुर्वा हेतुरेव वा ॥"
प्रायश्चित्तमाह ।
"छिन्याद्देकप्रहारेण अन्यथा दोषमावहेत् ।
तच्छान्त्यर्थे जपेद्दित्वा दुर्गाबीजसहस्रकम् ।
सहस्रं जुहुयाद्धेन प्रदद्यात् स्वर्णमाषकम् ॥"
इति ब्रह्मवैवर्ते घोषणानिमित्तैरुक्तम् ॥*॥
अपरञ्च कालिकापुराणे ।
"खड्गप्रहारेण कदाचिच्छेदनं मुख्यमिष्यते ।
छेदनेन छिदयेद्दृष्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वाथ राजेन्द्र । ब्रह्महत्यामवाप्नुयात् ॥"
मत्स्यसूक्ते ।
"छेदयेत्तीक्ष्णखड्गेन प्रहारेण सकृद्बुधः ॥"
इति दुर्गोत्सवतत्त्वम् ॥
पश्वादिबलिदानविधिर्यथा,—
"बलिदानविधानञ्च शृणुष्व मुनिसत्तम ! ।
मायार्थं महिषं छागं दद्यान्मेषादिकन्तथा ॥
सहस्रवर्षं सा प्रीता दुर्गा मायानिदानतः ।
महिषेण वर्षशतं दशवर्षञ्च छागलात् ॥
वर्षमेकेन कृष्णाखैः पक्षिभिश्चैरिणैस्तथा ।
दशवर्षं शशासैः सहस्राब्दञ्च गण्डकैः ॥
शल्यिभिः पिष्टनिर्माणैः पक्षाखं पशुभिस्तथा ।
मांसं सुधाखादिफलैरक्षतैरिति नारद ! ॥
युग्मं व्याधिहीनञ्च सदङ्गं लक्षणान्वितम् ।
विशुद्धमविकाराङ्गं सुवर्णं पुष्टमेव च ॥
शिशुना बलिना दातुर्हन्ति पुत्रञ्च पक्षिका ।
छेदनेन गुरुजनं छागेन बान्धवन्तथा ॥
कुलञ्चैवाधिकाङ्गेन हीनाङ्गेन प्रजास्तथा ।
कामिनीं खड्गभङ्गेन कालीन भ्रातरन्तथा ॥
घण्टिकेन भवेन्नष्टपुत्रविघ्नञ्च चिक्रमस्तके ।
श्मश्रुं मिश्रं ताम्रपृष्ठे भस्मश्रीः पुच्छहीनके ॥
मायातीनाञ्च निर्णीतं शृणुष्व मुनिसत्तम ! ।
ब्रह्मात्मजन्मवेदोक्तं पशुहानिर्यतिक्रमे ॥"*॥

अथ नरबलिः ।
"पितृमातृविहीनञ्च युवकं व्याधिवर्जितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विशुद्धञ्च सच्छूद्रं मूलकं वरम् ।
तद्बन्धुभ्यो धनं दत्त्वा क्रीतं मूल्यादिरेकतः ॥
स्नापयित्वा च तं धर्म्यं संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
नत्वा वर्षं भ्रामयित्वा चरद्वारेण यत्नतः ।
वर्षान्ते च समानीय दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दत्त्वाज्यायासमेव च ।
दत्त्वैवं कथितं सर्वं बलिदानप्रसङ्गतः ॥"*॥
अपि च ।
"सप्तम्यां पूजनं कृत्वा बलिं दत्त्वाद्विचक्षणः ।
अष्टम्यां पूजनं कृत्वा बलिदानविवर्जितम् ॥
अष्टम्यां बलिदानेन विपत्तिर्जायते ध्रुवम् ।
दत्त्वाद्विचक्षणो भक्त्या नवम्यां विधिवद्बलिम् ॥
बलिदानेन विप्रेन्द्र ! दुर्गाप्रीतिर्भवेन्नृणाम् ।
हिंसाजन्यञ्च पापञ्च लभते नात्र संशयः ॥
उत्सर्गकर्त्ता दाता च क्रेता पोष्टा च रक्षकः ।
अन्नपश्चाद्विरोद्धा च सप्तैते वधभागिनः ॥
योऽयं हन्मि स तं हन्मि येति वेदोक्तमेव च ।
कुर्वन्ति वैष्णवा पूजां वैष्णवास्तेन हेतुना ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे । ४१-४२ । अध्यायौ ॥

श्रीभगवानुवाच ।
"क्रमन्तु बलिदानस्य स्वरूपं रुधिरादिभिः ।
यथा स्यात् प्रीतये सम्यक् तथा वक्ष्यामि पुत्रकौ ॥
वैष्णवीतन्त्रकल्पोक्तः क्रमः सर्वत्र सर्वदा ।
साधकैर्बलिदानेषु ग्राह्यः सर्वसुरस्य तु ॥
पक्षिणः कच्छपा ग्राहा मत्स्या नवविधा मृगाः ।
महिषो गोधिका गावश्छागो वभ्रुश्च शूकरः ॥
खड्गश्च शल्लसारश्च गोधिका सरभो हरिः ।
ग्राहं लब्ध्वा नरञ्चैव स्वगात्ररुधिरन्तथा ।
चण्डिकाभैरवादीनां बलयः परिकीर्तिताः ॥
बलिभिः साध्यते मुक्तिं बलिभिः साध्यते दिवम् ।
बलिदानेन सततं तोषयेत् पुरुषान् नृपः ॥*॥
मत्स्यानां कच्छपानाञ्च रुधिरैः सततं शिवा ।
मांसैरेकत्रिमासायि ग्राहैर्मांसैस्तु चीनथ ॥
मृगाणां गोधिकानेर्दैवी नराणामपि गोधिकैः ।
अष्टौ मासानवाप्नोति तृप्तिं कल्पावधि च सा ॥
गोगोधिकानां रुधिरैर्वार्षिकीं तृप्तिमाप्नुयात् ।
शल्लसारस्य रुधिरैः शूकरस्य च गोधिकैः ।
आप्नोति सततं देवी तृप्तिं द्वादशवार्षिकीम् ॥
अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् ।
महिषाणाञ्च खड्गानां रुधिरैः शतवार्षिकीम् ।
तृप्तिमाप्नोति परमां ग्राहशल्लरुधिरैस्तथा ॥
सिंहस्य सरभस्याथ स्वगात्रस्य च गोधिकैः ।
देवी तृप्तिमवाप्नोति सहस्रं परिवत्सरान् ॥
मांसैरपि तथा प्रीती रुधिरैर्यस्य यावती ।
शल्लसारस्ते खड्गं तथा मत्स्यञ्च रोहितम् ।
ग्राहौनसशुशुकापि फलं तेषां पृथक् शृणु ॥*॥
शल्लसारस्य मांसेन तथा खड्गेन चण्डिका ।

वर्षान् पञ्चशतान्येव तृप्तिमाप्नोति केवलाम् ॥
रोहितस्य तु मत्स्यस्य मांसैर्वार्ष्णीनसस्य च ।
तृप्तिमाप्नोति वर्षाणां शतानि त्रीणि सप्तया ॥
शिःशिरंशिशिरश्चीक्षः श्येनो दृष्टश्चजापतिः ।
वार्ष्णीनसः प्रोच्यतेऽसौ हये वधे च सत्तमः ॥
नीलग्रीवो रक्तशीर्षः शुक्लपादः शितच्छदः ।
वार्ष्णीनसः स्यात् पक्षीशो मम विष्णोरतिप्रियः ॥
नरेण बलिना देवी सहस्रं परिवत्सरान् ।
विधिदृष्टेन चाप्नोति तृप्तिं लक्षं शिवाभिधैः ॥
नारेणैवाथ मांसेन शिवहस्राब्दि वत्सरान् ।
तृप्तिं प्राप्नोति कामाख्या भैरवी मम रूपधृक् ॥
मत्स्यपूतं शोणितन्तु पीयूषं जायते सदा ।
मत्स्यकच्छापि तस्यास्ति मांसञ्चापि सदा शिवा ॥
तस्मात्तु पूजने दद्याद्देवैः शीर्षञ्च लोहितम् ।
भोज्ये होमे च मांसानि नियुञ्जीताद्विचक्षणः ॥
पूजासु नाम मांसानि दद्याद्वै साधकः क्वचित् ।
ऋते तु लोहितं शीर्षमस्तं तन्तु जायते ॥*॥
कृष्णाखमिक्षुदण्डञ्च मद्यमासवमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥
चन्द्रहासेन कर्त्रा वा छेदनं मुख्यमिष्यते ।
दात्रासिधेनुकक्रकचकुलाभिस्तु मध्यमम् ।
क्षुरक्षुरप्रभल्लैश्चैवाधमं परिकीर्तितम् ॥
एभ्योऽन्यैः शस्त्रिवाद्यैर्बलिच्छेदः कदापि न ।
नाप्नोति देवी बलिं तन्तु दाता च्छुमवाप्नुयात् ॥
छेदनेन छिदयेद्दृष्यस्तु प्रोक्षितं साधकः पशुम् ।
पक्षिणं वा ब्रह्महत्यां सोऽवाप्नोति सुदुःसहाम् ।
नामन्त्रा खड्गन्तु बलिं नियुञ्जीत विचक्षणः ॥
खड्गस्यामन्त्रणे मन्त्रा यावन्तः कथिताः पुरा ।
महामायाबलौ ते वै योज्यास्तत्रोदिता बुधैः ॥
तैः सार्द्धमेते मन्त्रास्तु योज्याः खड्गाभिमन्त्रणे ।
पूजने प्राग्दादीनां कामाख्याद्या विशेषतः ॥
ह्रीं कालीति ततो देव्या वज्रेश्वरिपदन्तथा ।
ततोऽन्तु लौहदण्डाय नमः शीर्षे तु योजयेत् ॥
संपूज्यानेन मन्त्रेण खड्गमादाय पाणिना ।
कालरात्र्यास्तु मन्त्रेण तं खड्गमभिमन्त्रयेत् ॥
नेत्रबीजस्य मध्यन्तु हिरादन्तं प्रयोजयेत् ।
ततोऽन्तु कालीति विकटदंष्ट्रेऽन्तु तत्पदम् ॥
हान्तादीनां ङतीयेन स्वरेणैकादशेन च ।
योजितो नादबिन्ध्यां दौ तत्पश्चान्नियोजयेत् ॥
फेत्कारिणिपदं तस्मात् खादय छेदयेति च ।
सर्वदुष्टानिति ततो द्विर्मारय युगलापकम् ॥
खड्गेन छिन्धि छिन्धीति ततः किल किलेति वै ।
ततश्चिकि चिकीत्येव ततः पिब पिबेति च ॥
ततोऽन्तु रुधिरञ्चैव स्त्रौं स्त्रौं किरि किरीति च ।
कालिकायै नम इति कालरात्र्यास्तु मन्त्रकम् ॥
छेदनेन तु मन्त्रेण करवालेऽभिमन्त्रिते ।
कालरात्रिः स्वयं तस्मिन् प्रसीदत्यरिहानये ॥*॥
बलेः पूर्वोदिता मन्त्रा नित्यं याज्यास्तु साधकैः ।
अयं मन्त्रस्तु वक्तव्यस्तस्य छेदाविधानये ॥
यस्यार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्माद्दयस्व वधोऽवध्यः ॥

ततो देवतमुद्दिश्य कामतमुद्दिश्य चात्मनः ।
छेदयेत्तेन खड्गेन बलिं पूर्व्वानतं तु तम् ॥
अथवोत्तरवक्त्रन्तं स्वयं पूर्व्वमुखस्तथा ।
पूर्व्वोक्तान् सैन्धवादींस्तु रक्ते वस्त्रं नियोजयेत् ॥
सौवर्णे राजतं ताम्रं दैत्यं पञ्चपुटञ्च वा ।
माहेयं काञ्चमथवा यज्ञकाष्ठमयञ्च वा ।
पात्रं रुधिरदानाय कर्त्तव्यं विभवावधि ॥
न लौहे वाङ्कले वापि दैत्ये वाङ्गेऽथ सैसके ।
दद्यान्नक्तं बलीनान्तु भूमौ क्वचि त्स्वेऽथवा ॥
न घटे भूतले वापि न क्षुद्रे पानभाजने ।
रुधिरादि प्रदद्यात्तु भूतिकामो नरोत्तमः ॥
नरस्य तु सदा रक्तं माहेये तैजसेऽथवा ।
दद्यान्नरपतिस्तन्तु न पुटादौ कदाचन ॥*॥
हयमेधशते दद्यान्न कदाचिद्धयं बलिम् ।
तथा दिक्पालमेधेषु गजं दद्यान्नराधिपः ॥
न कदाचित्तथा दैत्ये प्रदद्याद्धयहस्तिनौ ।
हयाकर्षे चामरन्तु बलिं दद्यान्नराधिपः ॥
सिंहं व्याघ्रं नरञ्चापि खगाजरुधिरन्तथा ।
न दद्याद्ब्राह्मणो मद्यं तथा दैत्ये कदाचन ॥
सिंहव्याघ्रनरान्दत्त्वा ब्राह्मणो नरकं व्रजेत् ।
इहापि स्यात् स दीनायुः सुखसौभाग्यवर्जितः ॥
खगाजरुधिरं दत्त्वा चाण्डहत्यामवाप्नुयात् ।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते ॥
न लक्षसारं वितरेद्बलिन्तु क्षत्रियः क्वचित् ।
दत्तः लक्षसारन्तु ब्रह्महत्या भवेद्ध्रुवम् ॥
यत्र सिंहस्य व्याघ्रस्य नरस्य विधिनो वधः ।
ब्राह्मणोक्ते तु वस्त्रादौ तत्रायं विहितः क्रमः ॥
छत्वा घृतमयं व्याघ्रं नरं सिंहञ्च भैरव ! ।
अथवा पूपविहितं यवचोदमयञ्च वा ।
घातयेच्छस्त्रहासेन तेन मन्त्रेण संस्कृतम् ॥*॥
प्रभूतबलिदाने तु द्वौ वा त्रीन् वायनः क्षतान् ।
पूजयेत् प्रमुखान् छत्वा सर्व्वान् तन्त्रेण साधकः ।
सामान्यपूजा कथिता बलीनां पूर्व्वतो मया ।
विशेषो यत्र यत्रास्ति तत्रतः शृणु भैरव ! ॥*॥
महिषं प्रददौ दैत्ये भैरवे भैरवाय वा ।
अनेनैव तु मन्त्रेण तथा तं पूजयेद्बलिम् ॥
यथा वाहं भवान् देहि यथा वहसि चक्षिकाम् ।
तथा मम रिपून् हिंस शुभं वह बलापक ! ॥
यमस्य वाहनत्वन्तु वरूथधरणाय च ।
आयुश्चित्तं यशो देहि कालराय नमोऽस्तु ते ॥
खड्गस्य तु यदादानं क्रियते तत्र मन्त्रवम् ।
बलेनाभ्युक्ष्य कुर्व्वीत गृह्यतामिति भाषयन् ॥
दैत्ये पिचे च सुभगः खड्गस्त्वं खड्गसन्निभः ।
छिन्धि विघ्नान् महाभाग ! गृह्यतान नमोऽस्तु ते ।
प्रदाने लक्षसारस्य मन्त्रोऽयं परिकीर्त्तितः ।
लक्षसार ! ब्रह्मदत्तं ब्रह्मतेजोविवर्द्धन ।
चतुर्व्वेदमयः प्राज्ञः प्रज्ञां देहि यशो मम ॥*॥
तथा वरभपूजायां मन्त्रमेतन् प्रकीर्त्तितम् ।
त्वमङ्गात् सर्व्वमङ्गलभागसमुद्भव ! ।
अष्टमूर्त्ते महाभाग भैरवाय नमोऽस्तु ते ॥
यथा भैरवरूपेण वराहो निहतस्त्वया ।
तथा वरभरूपेण रिपुं विघ्नान्निहन्यहम् ॥

हरिस्त्वं हररूपेण यथा वहसि चक्षिकाम् ।
तथाशुभानि मे नित्यं वहुविघ्नांश्च खादय ॥
त्वं हरिः सिंहरूपेण जगत्त्रयहरूपिणम् ।
जघान येन वक्त्रेण हिरण्यकशिपुं हरन् ।
दत्तोऽयं सिंहपूजायां क्रम उक्तो मयानघ ! ॥*॥
नरे खगाजरुधिरे पर्य्यायं शृणु भैरव ! ।
पीठे चैद्दीयते मद्यं बलिं दद्यात् श्मशानके ॥
श्मशानं हैरकाख्यञ्च तत्पूर्व्वं प्रतिपादितम् ।
कामाख्यालिलये पीठे तत्रादौ विद्धि तत्क्रमम् ॥
मम रूपं श्मशानन्तु भैरवास्यन्तु कथ्यते ।
तत्राङ्गत्वं तपःसिद्धौ विभागन्तु भविष्यति ॥
पूर्व्वोक्तौ भैरवाख्ये तु समुत्तरदिनैरस्य च ।
दक्षिणांघ्रौ शिरो दद्यात् भैरवा मुखमालया ॥
रुधिरं पश्चिमांघ्रौ तु हैरकाख्ये नियोजयेत् ।
दत्त्वा संपूज्य च नरं विसृज्यागमनक्रमे ॥
पीठश्मशानेषु बलिं नेत्रेषु बलिदापकम् ।
अन्यत्रापि यतो यत्र दीयतेऽयं महाबलिः ॥
तत्राप्यन्यत्र चोत्सृज्य छित्त्वाग्रं शिरोऽन्त-
तम् ।
निवेदयेत् साधकस्तु विसृज्य न विलोकयेत् ॥*॥
सुखार्त्तं मनुजं दीनं पूर्व्वोक्तैः नियमाग्रनम् ।
मांसमैथुनभोग्येन हीनं सक्तचन्दनोक्षितम् ॥
क्षतोत्तरासुखं तन्तु तत्रैव च देवताः ।
पूजयेत्तच्च गत्वा तु देवतेन च मानुषम् ॥
ब्रह्मरन्ध्रे तु ब्रह्माणं ललामाद्याच्च मेदिनीम् ।
कर्णयोस्तु तथाकाशं जिह्वायां सर्व्वतोमुखम् ॥
ज्योतींषि नेत्रयोर्विष्णुं वदने परिपूजयेत् ।
ललाटे पूजयेच्चन्द्रं शुक्रं दक्षिणनासतः ॥
वामनासे तथा वह्निं ग्रीवायां समवर्त्तिनम् ।
कैलासाद्रिं हृदि मध्ये भ्रुवोश्चापि प्रपूजयेत् ॥
नासामूले च पवनं स्कन्धे चापि धनेश्वरम् ।
हृदये सर्व्वराजन्तु पूजयित्वा पठेदिदम् ॥
नरवर्य्य ! महाभाग सर्व्वदेवमयोत्तम ।
रक्ष मां शरणापन्नं सपुत्रपशुबान्धवम् ॥
सराज्यं मां सदापत्यं चतुरङ्गबलान्वितम् ।
रक्षन् परित्यज प्राणान् मरणे नियते सति ॥
महातपोभिर्दानैश्च यत्नेनैव साध्यते नृणाम् ।
तत्ते ददामि महाभाग ! त्वत्तोऽपि प्राप्नुहि श्रियम् ॥
राक्षसाश्च पिशाचाश्च वेतालाद्याः सरीसृपाः ।
नृपाश्च रिपवस्त्वान्ये न मां ते घ्नन्तु त्वत्कृते ॥
त्वत्कृपाकटाक्षालिनैः घ्राणिनेरङ्गसंयुतैः ।
आद्यायस्त्वामवन्दत्वा मरणे नियते सति ॥
एवं संपूज्य विधिवत् पूर्व्वतन्त्रेण पूजयेत् ।
पूजितो मनुरूपोऽयं दिक्पालाधिष्ठितो
भवेत् ॥
अधिष्ठितस्तथान्यैश्च ब्रह्माद्यैः सकलैः सुरैः ।
क्षतपापोऽपि मनुजो निष्पापो न तु जायते ॥
तस्य निष्कल्मषस्यापु पीयूषं घ्राणितं भवेत् ।
प्रीणाति च महादेवी जगन्माया जगन्मयी ॥
सोऽपि कायं परित्यज्य मानुषं न चिराच्छुभः ।
भवेद्गणानामधिपो मयापि सहसत्कृतः ॥
इतोऽन्यथा पापयुतं मलमूत्रवसायुतम् ।

तं बलिं नहि गृह्णाति कामाख्याप्यपि गामतः ॥
अन्येषां महिषादीनां बलीनामथ पूजनात् ।
कायो मेध्यत्वमायाति रक्तं गृह्णाति वै शिवा ॥
अन्येभ्योऽपि च देवेभ्यो यदा यद्यत् प्रदीयते ।
तदर्चितं प्रदद्यात्तु पूजिताय सुराय वै ॥*॥
कार्णं चक्षुश्चानिष्टं रोगिजञ्च गलन्नखम् ।
क्लीवं हीनाङ्गमथवा दुष्टलिङ्गं गलद्व्रणम् ॥
श्वित्रिणञ्चातिदुष्टञ्च महापातकिनन्तथा ।
अष्टादशकवर्षीयं शिशुं क्षुतकसंयुतम् ॥
ऊर्द्धं संवत्सराच्चापि मद्यगुडनिपातिनम् ।
बलिकर्म्मणि चैतांस्तु वर्ज्जयेत् पूजितानपि ॥
पशूनां पक्षिणाञ्चापि नराणाञ्च विशेषतः ।
स्त्रियं न दद्यात्तु बलिं दत्त्वा नरकमाप्नुयात् ॥*॥
संघातबलिदानेषु योषितं पशुपक्षिणोः ।
बलिं दद्यान्नरेषु स्यात् संघातपूजितम् ॥
न त्रिमासीयकाच्छागं पशुं दद्यात् शिवाबलिम् ।
न च त्रिपलकाच्छागं प्रदद्याद्वै पतत्रिणम् ॥
काणाक्षत्वादिदुष्टन्तु न पशुं पक्षिणन्तथा ।
देवे दद्यादृथा मन्त्रं तथैव पशुपक्षिणौ ॥
छिन्नलाङ्गूलकर्णादि भग्नदन्तत्वयेव च ।
भग्नशृङ्गादिकञ्चापि न दद्यात्तु कदाचन ॥
न ब्राह्मणं बलिं दद्यात् चाण्डालमपि पार्थिव ! ।
नोत्सृष्टं द्विजदेवेभ्यो भूपतेस्तनयं तथा ॥
रणे न विजितं दद्यात्तनयं रिपुभूभृतः ।
स्वपुत्रं भ्रातरं वापि पितरञ्च विरोधिनम् ॥
विट्पतिञ्च न दद्यात्तु भागिनेयञ्च मातुलम् ।
अमुक्तात्मापि दद्यात्तु तथाक्षतान् दृगाङ्गिजान् ॥
उक्तालाभे प्रदद्यात्तु गर्हभञ्चोष्ट्रमेव च ।
लाभेऽन्येषां न वितरेदृद्यात्तमुभं खरन्तथा ॥
सम्पूज्य विधिवन्मन्त्रं पशुं पक्षिणमेव वा ।
संछिद्य चापि मन्त्रेण मन्त्रेणैव निवेदयेत् ॥*॥
नारं सत्यं शिरोरक्तं देया: सम्यङ्निवेदयेत् ।
छागस्तु वामनो दद्याच्छिरं वितरतु पुरः ॥
पश्चिमं वामनो दद्यादग्रतो हेड्डयोगिनम् ।
क्रव्यादानां पशूनान्तु पश्चिमाच्च शिरोऽग्रजम् ॥
वामे निवेदयेत् पार्श्वे जलजानाञ्च सर्व्वशः ।
लक्षसारस्य कूर्म्मस्य खड्गस्य शुष्कस्य च ॥
ग्राहाणामथ मत्स्यानामथ एव निवेदयेत् ।
सिंहस्य दक्षिणं दद्यात् खड्गिनोऽपि च
दक्षिणे ॥
पृष्ठदेशं न वदात्तु शिरो वा रुधिरं बले: ।
उपस्थं रसनं वापि यथेष्टं वितरेन्नरम् ॥
यः कश्चिद्राजपुरुषो नान्यस्यापि कदाचन ।
बलिदानदिनात् पूर्व्वदिवसे तु बलिं नरम् ॥
मानसोक्तैर्निमन्त्र्य देवीक्षेत्रालयेन च ।
गन्धदारेत्यनेनापि खड्गशौर्यं निधाय च ॥
तस्मिन् खड्गे च गन्धादि दत्त्वा तेनाधि-
वासयेत् ॥
गन्धादिकन्तु खड्गस्थं गले तस्य प्रदापयेत् ॥
अम्बेऽम्बिकेति मन्त्रेण रौद्रेण भैरवस्य च ।
एवन्तु संस्कृते मद्ये देवी रक्षति तं बलिम् ॥
न तस्य बाधयश्चापि क्षुद्रता रजनौ न च ।

बलिः

न खनेत् दूषयेत् वापि शालुनूपांस्तज्जलादिकम् ॥*॥
छिन्नं नरस्य शीर्षन्तु पतितं यच्च यच्च च ।
यत् शुभाशुभं वापि पश्वादीनाञ्च तत् ग्रसेत् ॥
छिन्नं शिरस्त्वयेद्यावत् वारं दिग्यच राक्षसे ।
पतितं राज्यहानिञ्च विनाशञ्च विनिर्दिशेत् ॥
पूर्वोक्तमियाग्यवारण्यवायव्यादिगतं क्रमात् ।
श्रियं पुष्टिं भयं लाभं पुत्रलाभं धनं तथा ॥
क्रमाद्विनिर्दिशेन्नारं छिन्नशीर्षन्तु भैरव ! ।
उत्तरादिक्रमादेव महिषस्यापि मस्तकः ॥
पतितो वायुकाष्ठाग्नं लक्षयेद्दूयत् ग्रसेच्च तत् ॥
भोज्यं हानिस्तथैश्वर्य्यं वित्तं रिपुभयो भयम् ।
राज्यलाभं श्रियञ्चापि क्रमात्तद्दिद्धि भैरव ! ॥
पशूनाञ्चैव सर्व्वेषां छागादीनामशेषतः ।
एवं फलं क्रमाद्विद्यादृते जलभवाञ्जौ ॥
अन्यच्च तु श्रियं दद्यात् पतितं ग्रसितं शिरः ॥
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
नराणां पशुपक्ष्यादिव्याहारीनाञ्च रोगदः ॥
लोलकं चक्षुषोर्जातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य तदा हानिं विनिर्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति लोलकम् ।
छिन्ने निवेदिते वैरिभूपस्यत्युं तदादिशेत् ॥
अन्येषामथ पश्वादिजीवानां शिरसोऽपि वा ।
निर्गतं लोलकं धत्ते परां भीतिं गदन्तथा ॥
हसति छिन्नशीर्षेऽसौ स्यात् रिपुभयः ।
क्रौष्टुहिरायुषो दृष्टिः सदा दातुरसंशयः ॥
यद्यद्वाक्यं निगदति तथा भवति चाचिरात् ।
हुङ्कारादाज्यहानिः स्यात् क्ष्वेडमात्राच्च

पञ्चताम् ॥

देवानां यदि नामानि भाषते छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् षण्मासाभ्यन्तरे तदा ॥
रुधिरादानकाले तु ग्रसनन्मूत्रे यदि स्रवेत् ।
कार्यं तदाधमर्णो वा दातुः स्याच्चरणं तथा ॥
आक्षेपाद्धामपादस्य महारोगः प्रजायते ।
अन्यत्राक्षेपचरणैः कल्याणमुपजायते ॥*॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
अङ्गुष्ठानामिकाभ्यान्तु किञ्चिदुद्धृत्य भूतले ॥
महाकौशिकमन्त्रेण निक्षिपेदलिमुत्तमम् ।
देवेभ्यः एतनादिभ्यो नैर्ऋत्यां दिशि पूर्व्वतः ॥
महिषः पञ्चवर्षो यः पञ्चविप्रनिवारिकः ।
बलिर्देयो नरो देयः तस्य रक्तन्तु भूतले ॥
नेत्रबीजत्रयं कामबीजं ज्ञात्वात् प्रजापतिः ।
वह्निबीजं षडक्षराभ्यां संपुटञ्च तथापरः ॥
स एवैतावतार्थेनावदादिवर्णांशसंयुतः ।
षडक्षरग्रन्थाभिरुद्धृत्योद्धृत्यथापरः ॥
द्विर्नासिकाबीजकाभ्यां कौशिकीत्यभिमन्त्रणम् ।
एष बलिः स्वाहेति च मन्त्रोऽयं कौशिकः स्मृतः ॥
नृपो वैरिबलिं दद्यात् खड्गमाभाष्य पूर्व्वतः ॥
महिषं वाथवा छागं वैरिनाम्नाभिमन्त्र्य च ।
छेदयेत् एकवारं वा त्रिधा तस्य च मस्तके ॥
छित्त्वा तस्योत्तमाङ्गन्तु देवेभ्यो दद्यात् प्रयत्नतः ॥
यदा यदा रिपोर्वह्निबलिदानं तदापरम् ।
दद्यात्तथा शिरश्छित्त्वा रिपोस्तस्य क्षयाय च ॥

बलिः

प्राग्वत्प्रतिष्ठाच्च रिपोः कुर्य्यात्तच्छिरम् पश्चाद्वध ।
तच्छिरन्तु त्रीणि रिपुप्राणाः स्त्रीयस्ते विपदा युताः ॥
आदौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिनाम्नस्मुरुच्चेति स्वाहेत्यन्तेति तं पुनः ॥
वह्निभार्य्यांततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
खयं स वरी यो देहि तमिमं पशुरूपिणम् ॥
विनाशय महामारि स्वां स्वां खादय खादय ॥
हत्यनेन तु मन्त्रेण बलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं द्राक्षरास्थां निवेदयेत् ।
महानवम्यां शुरदि यद्येवं दीयते बलिः ।
तदा तदाद्यभवेन्नित्यैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रणीते दहने शुचौ ।
एवं दत्त्वा बलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥*॥
नाभेरधस्तादुधिरं पृष्ठभागस्य च प्रिये ! ।
खगाचरुधिरं दद्यान्न कदाचन साधकः ॥
नोष्ठस्य चिबुकस्यापि नेन्द्रियाणाञ्च मानवः ।
कण्ठाधो नाभितश्चोर्द्ध्वं बाह्वोः पार्श्वे तथा ॥
प्रदद्याद्रुधिरं धीमान् नात्रिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णान्तस्य च बाह्वोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्ध्वं हृद्भागस्य यतस्ततः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽधःकं प्रदद्यात् जङ्घोनापि च साधकः ।
न च रोगाविलाद्भक्षान्नाप्यघातात्च भैरव ! ॥
तदर्थं च क्षताघातात् सम्भवो लुब्धमानसः ।
हृत्वं रक्तं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये स्फाले च मानवः ।
निधाय देव्यै दद्यात्तु तद्रक्तं चन्द्रमस्तके ॥
खगानां छुरिकाखड्गं संकुलादि यदस्त्रकम् ।
घातेन हृद्रक्तस्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्गृह्णाति शोणितम् ।
तत्प्रमाणाच्चतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाङ्गच्छेदमथाचरेत् ॥
यः खङ्गहृदयसंज्ञानं मांसं माषप्रमाणतः ।
तिलमुद्गप्रमाणाद्वा देव्यै दत्त्वा तु भक्तितः ।
षण्मासाभ्यन्तरे तस्मात् कामानिष्टमवाप्नुयात् ॥
बाह्वोस्तु स्कन्धयोर्वापि यो दद्याद्दीपवर्त्तिकाम् ।
हृदये वा खड्गपात्रं विना भक्ष्यात्तु साधकः ।
क्षणमात्रेण तद्दीपप्रदानस्य फलं ग्रसेत् ॥
भुक्त्वा च विपुलान् भोगान् देवीलोके महीयते ।
कल्पत्रयन्तु संस्थाय सार्व्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छित्त्वा सपदीपं शिवापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पूतमूर्त्तिरिह भुक्त्वा मनोरमान् ।
भोगांस्तेन मदुग्रहगो गणानामधिपो भवेत् ॥
नरस्य शीर्षमादाय साधको दक्षिणे करे ।
वामे सरुधिरं पात्रं गृहीत्वा निशि चाध्वनः ॥
यावद्राजं स्थितो मर्त्यो राजा भवति नेह वै ।
हते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
क्षणमात्रं बलीनां यः शिरोरक्तं करद्वये ।
गृहीत्वा चिन्तयेद्देवीं पुरस्थितां मानवः ।
स कामानिह संप्राप्य देवीलोके महीयते ॥

बलिः

महामाये ! जगन्नाथे ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद वरदा भव ॥
इत्युक्त्वा मूलमन्त्रेण गतिपूर्व्वं विचक्षणः ।
खगाचरुधिरं दद्यान्मानवः सिंहसन्निभः ॥
येनात्तमांसं सत्त्वेन ददामीश्वरि ! भूतये ।
निर्व्वाणं तेन सत्त्वेन देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण खमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पन्नं प्रदीपं परमं शुचिम् ॥
दीपयन् मांसमिश्रन्तं दीपं ह्रौं ह्रौं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्याद्विचक्षणः ॥
महानवम्यां शुरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं छित्त्वा रिपुं मेषमयमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् छित्त्वा तस्य तु मस्तकम् ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिलौ घोरघोरा धारविहिंसकः ।
ब्रह्मशिरश्चाम्बिकाशिरश्चमसुक्चारिसत्तमम् ॥
भाल्लो विसर्गसहितः स च विन्दुयुतोऽपरः ।
ब्रह्माग्नियोगसन्त्रेण विन्दुना च समन्वितः ।
शिरश्छित्त्वा बलिं दद्यात् छित्त्वा तस्य तु मस्तकम् ।
अनेनैव तु मन्त्रेण विन्दुना च समन्वितः ।
षड्भो बलिप्रयोक्तः खड्गः स्कन्दविशाखयोः ॥
रक्तहवेः संचयित्वा छत्रिमं तं रिपुं बलिम् ।
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्याधरं छित्त्वा रक्तवस्त्रधरन्तथा ।
कण्ठे बद्ध्वा रक्तसूत्रेणाभौ ग्रन्थञ्च क्षत्रियम् ।
दक्षोत्तरशिरः स्कन्धं छित्त्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय ते नमस्तुभ्यम् ।
चतुर्दशस्वरायिभ्यां संयुक्तः स परः शमः ॥
परतः परतः पूर्व्वं चन्द्रबिन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै बलिं हरेत् ॥
चतुर्दशस्वरायिभ्यां पञ्चतीयस्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै बलिं

हरेत् ॥

कुटिलाक्षौ क्षयापिङ्गवर्णौ रक्तांशुधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दधिरे तथा ॥
बिभ्रतौ कपालञ्च कर्त्तृकञ्चापि वामतः ।
चिन्तयेत् नरमुण्डानां मालासुरभि बिभ्रतौ ॥
विकटौ दशनैर्भीमैर्गणेशौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्देव्याः पुरतः संस्थितौ सदा ॥
यत्रे मासि सिते पक्षे चतुर्दश्यां विशेषतः ।
बलिभिर्महिषैश्छागैर्मांसैश्च भैरवरूपिणम् ।
तोषयेच्छतुभिर्मन्त्रैस्तेन तुष्याम्यहं सुतौ ॥
चक्रिकाबलिदानेन बलेः शीर्षं जलेन तु ।
अभिषिच्य तु मन्त्रेण मूलेनैव निवेदयेत् ॥
देवत्वं प्राणतु बहुधा चालितं पूर्व्वमर्पितम् ।
योजेत् कामस्य सिद्ध्यै तु सिद्ध्यभावच्च साधकः ॥
सिंहप्रेतो रथस्थोऽयं योगपीठस्य सन्निभः ।
ध्यायेद्दूयस्मिन् महामाया सिद्धिं बोधयते नमः ॥
अनेनामन्त्रितं शीर्षं न चिराद्दूयति वेपते ।
तत्कार्यस्य तदा सिद्धिरसिद्धिस्तु विपर्य्ययात् ॥
एवं दत्त्वा बलिं वीरो यथोक्तविधिनासुना ।
बलिदानादेव चतुर्व्वर्गमाप्नोत्यसंशयम् ॥

एवं बलिप्रदानस्य क्रमो रूपस्तथैव च।
कथितो रुधिराध्याय उपचारान् शृणुष्व मे ॥"
इति कालिकापुराणे ६६ अध्यायः ॥

बलिदाननिषेधो यथा,—
"जीवानुकम्पां विज्ञातुं ततो दुर्गां सदाशिवः।
पप्रच्छ परमप्रीत्या गूढमेतद्वचो मुदा ॥
सर्व्वे विष्णुमया जीवास्तद्भक्ताश्च कथं शिवे!।
श्रुतं मया तवोद्देशे कुर्य्युः कामनया पशुम्।
महान् सन्देह इति मे ब्रूहि भद्रे! सुनिश्चितम् ॥
शङ्करी तद्वचः श्रुत्वा शिववक्त्रविनिर्गतम्।
भीतात्मानं हि ब्रह्मर्षे! प्रत्युवाच सदाशिवम् ॥
श्रीपार्व्वत्युवाच।
ये ममाग्रेनमिमुक्ता प्राणिहिंसनतत्पराः।
तत्पूजनं ममामेध्यं यद्दोषात्तदधोगतिः ॥
मद्दृष्टे शिव! कुर्व्वन्ति तामसा जीवघातनम्।
आकल्पकोटिनिरये तेषां वासो न संशयः ॥
मम नाग्रेथवा यज्ञे पशुहत्यां करोति यः।
अपि तन्निष्कृतिर्नास्ति कुम्भीपाकमवाप्नुयात् ॥
देवे पैत्रे तथात्मार्थे यः कुर्य्यात् प्राणिहिंसनम्।
कल्पकोटिशतं शम्भो! रौरवे स वसेत् ध्रुवम्।
यो मोहाज्ज्ञानतोदेहिहत्यां कुर्य्यात् सदाशिव!।
एकविंशतिजन्मानि तत्तद्योनिषु जायते ॥
यज्ञे यज्ञे पशून् हत्वा कुर्य्यात् शोणितकर्द्दमम्।
स पच्येन्नरके तावद्यावच्छोमानि तस्य वै ॥
हन्ता कर्त्ता तथोत्सर्गकर्त्ता धर्त्ता तथैव च।
तुल्या भवन्ति सर्व्वे ते ध्रुवं नरकगामिनः ॥
ममोद्देशे पशून् हत्वा नरकं प्राप्नुयाद्ध्रुवम्।
यो मूढः स तु पूयोदे वसेदयुतं न संशयः ॥
देवतान्तरमन्त्रेण यज्ञे स्वेच्छया तथा।
हत्वा जीवांश्च यो भक्षेत् नित्यं नरकमाप्नुयात्।
यत्रे यज्ञे पशून् हत्वा यः कुर्य्यादसृक्कर्द्दमम्।
तेन तेन प्राप्यते स्वर्गो नरकं केन गम्यते ॥
उपदेष्टा वधे हन्ता कर्त्ता धर्त्ता च विक्रयी।
उत्सर्गकर्त्ता जीवानां सर्व्वेषां नरकं भवेत् ॥
मधुपर्कस्य वधायापि प्राणिनां क्रयविक्रये।
तथा दृष्ट्वा क्रतौ हत्वा कुम्भीपाको भवेद्ध्रुवम्।
स्वयं कामाग्नयो भूत्वा योऽज्ञानेन विमोहितः।
हत्वान्यान् विविधान् जीवान् कुर्य्याच्चमाम
शङ्कर! ॥
तदाच्यवंशसम्भूतिज्ञानिदारादिसम्यदाम्।
अचिराद्वै भवेन्नाशो मृतः स नरकं व्रजेत् ॥
देवयज्ञे पितृश्राद्धे तथा मातृश्चकर्म्मणि।
तस्यैव नरके वासो यः कुर्य्याज्जीवघातनम् ॥"
तथा।
"मदाज्ञेन पशून् हत्वा यो भक्षेत् सह
बन्धुभिः।
तावच्चलोमसंख्याब्दैरसिपत्रवने वसेत् ॥
आवयोरन्यदेवानां नाम्ना च परकर्म्मणि।
यः संयोज्य पशून् हन्यात् सोऽनन्तामिसमा-
मुयात् ॥
पशून् हत्वा तथा त्वां मां योऽर्चयेच्छ्रद्धयान्वितः।

तावन्नरके वासो यावच्चन्द्रदिवाकरौ ॥
निर्व्वह्निभक्षतुल्यं तत् बहुदुःखेन यत् ज्ञानम्।
यस्मिन् यज्ञे प्रभो मूढो! जीवहत्या भवेद्
ध्रुवम् ॥
यज्ञमारभ्य चेत् मूढः कुर्य्याद्वै पशुघातनम्।
स तदाधोगतिं गच्छेदितरेषाञ्च का कथा ॥
आवयोः पूजनं मोहाद्यदि कुर्य्युर्नरोत्तमाः।
पतन्ति कुम्भीपाके ते भवन्ति पशवः पुनः ॥
फलकामास्तु वेदोक्तैः पशोरालभनं मखे।
पुनस्तत्तत् फलं भुक्त्वा ये कुर्व्वन्ति पशुवधः ॥
स्वर्गकामोऽश्वमेधं यः करोति विधिमार्गतः।
तद्रोमाग्रे पतेद्धत्यः स जन्मानि भवार्णवे ॥
ये हताः पशवो लोकैरिह स्वार्थेषु कोविदैः।
ते परत्र तु तान् हन्युस्तथा खड्गेन शङ्कर! ॥
आत्मपुत्रकलत्रादिहितसम्पत्तिकृतेच्छया।
यो दुरात्मा पशून् हन्यादात्मादीन् घातयेत्
स तु ॥
जानन्ति नो वेदपुराणतत्त्वं
ये कर्म्मठाः पण्डितमानयुक्ताः।
लोकाधमास्ते नरकं पतन्ति
कुर्व्वन्ति मूर्खाः पशुघातनञ्च ॥
येऽज्ञानिनो मन्दधियोऽज्ञतार्थाः
भवे पशुं घ्नन्ति न धर्म्मशास्त्रम्।
जानन्ति नाकं नरकं न मुक्तिं
गच्छन्ति घोरं नरकं नरास्ते ॥
मुह्यन्ति अज्ञानतया विदन्ति मूढा
न धर्म्ममार्गं परमार्थतत्त्वम्।
पापं न पुण्यं पशुघातका ये
पूयोदवासो भवतोऽद्य तेषाम् ॥
जीवानुकम्पां न विदन्ति मूढा
भ्रान्ताश्च येऽसत्पथिनो न धर्म्मम्।
स्वार्थान् भवे प्राणिवधं न कुर्य्यु-
स्ते यान्ति मर्त्याः खलु रौरवाख्यम् ॥
तत्तस्तु खलु जन्तूनां घातनं नो करिष्यति।
शुद्धात्मा धर्म्मवान् ज्ञानी प्राणार्त्ते नैव मानवः ॥
यदीच्छेदात्मनः क्षेमं त्यक्त्वा ज्ञानं तदा नरः।
जीवान् कानपि नो हन्यात् सङ्कटापन्न एव चेत् ॥
सम्पत्तौ च विपत्तौ वा परलोकेच्छुकः पुमान्।
कदाचित् प्राणिनो हत्यां न कुर्य्यात्तत्त्ववित्
सुधीः ॥
मानवो यः परत्रेह तत्त्वमिच्छेत् सदाशिव!।
सर्व्वविघ्नमयत्वेन न कुर्य्यात् प्राणिनां वधम् ॥
वधादत्ति यो मर्त्यो जीवान् तत्त्वज्ञधर्म्मवित्।
किं पुण्यं तस्य वक्ष्येऽहं ब्रह्माद्यं स तु रक्षति ॥
यो रक्षेत् घातनात् मूढो! जीवमात्रं दया-
परः।
क्षमाप्रियतमो नित्यं सर्व्वरक्षां करोति सः ॥
एकस्मिन् रक्षिते जीवे त्रैलोक्यं तेन रक्षितम् ॥
वधान् शङ्कर! वै येन तस्माद्रक्षेन्न घातयेत् ॥"
तथा,—
"पशुहिंसा विधिर्यत्र पुराणे निगमे तथा।
उक्तो रजस्तमोभ्यां स केवलं तमसापि वा ॥

नरकस्यार्गलेवार्थं संसाराय प्रवर्त्तितः।
यत्तत्तत्कर्म्मभोगेन गमनागमनं भवेत् ॥
सर्व्वेण तावत्तत्त्वे स विधिर्नैव शङ्कर!।
प्रवृत्तिनो निवृत्तिस्तु यद्यपि सात्त्विकी क्रिया।
एवं नानाविधं कर्म्म पशोरालभनादिकम्।
कामाग्नयः फलाकाङ्क्षी जुह्वाज्ञानेन मानवः ॥
पश्चात्तज्ज्ञानतिना च्छित्वा ज्ञानाद्यां तामसीं
सदा।
यमभीतिहरं भक्त्या यदि गोविन्दमाश्रयेत् ॥"
इति पाद्मोत्तरखण्डे। २०४।२०५। अध्यायौ ॥

ब(व)लिः, स्त्री, (बलति संवृणोतीति। बल संवरणे + इन्।) जरया त्वक्चर्म्म। तत्-पर्य्यायः। चर्म्मनरङ्गः २ वलिः ३ वक्त-नरङ्गः ४। इति राजनिर्घण्टः। जठरा-वयवः। (यथा, कुमारे। १। ३६।
"मध्येन सा वेदिविलग्नमध्या
बलिव्यं चारु बभार बाला ॥")
गुह्यदारुप्रभेदः। इति मेदिनी। ले, ५ ॥ गुदा-ङ्कुरः। यथा,—
"पक्वाला मारुतः पित्तं कफो गुदबलिव्रयम्।
सर्व्व एव प्रकुप्यन्ति गुदजागां समुद्भवे ॥
तत्तदादीनि दुःखानि बहुव्याधिकराणि च।
सर्व्वेदेहोपतापीनि प्रायः क्षणभनानि च ॥*॥
वाताद्यास्तु बली जातास्त्रयोदोषास्त्वजाते च।
अर्शांसि सुखसाध्यानि न शिरोनपतिनानि च ॥
बहुजानि चिरोद्भवानि यानि चाभ्यन्तरा बलिम्।
जायन्तेऽर्शांसि संश्रित्य तान्यसाध्यानि निर्दि-
शेत् ॥"
इति माधवकरः ॥
(यथा च। "तत्र क्षालाक्षप्रतिबद्धमर्द्दपक्वाङ्कुरं गुदमाहुस्तस्मिन् बलयस्त्रिस्रोऽधश्चाङ्कुराकार-भूताः प्रवाहणी विसर्ज्जनी संवरणी चेति। चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः। गुदावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। गजनालनिभाश्चापि वर्त्तनः संप्रकीर्त्तिताः ॥"
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ॥
गन्धकः। तत्पर्य्यायो यथा,—
"गन्धको गन्धिकश्चापि गन्धपाषाण इत्यपि।
सौगन्धिकश्च कथितो बलिर्बलरसापि च ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलिका, स्त्री, (बलेव। बला + स्वार्थे कन्। टापि अत इत्वञ्च।) अतिबला। इति राज-निर्घण्टः ॥

बलिदानं, क्ली, (बलेः पूजोपकरणस्य देवतो-द्देशेन संकल्पितत्यागादेर्वा दानम्।) श्रीजग-न्नाथदेवस्यान्नादिनैवेद्यविशेषदानम्। यथा,—
अथ बलिदानम्।
"ततो यवनिकां विधानयसाय यथाविधि।
विश्वक्सेनाय भगवन्नैवेद्यांशं निवेदयेत् ॥
यथा च पञ्चरात्रे श्रीनारदवचनम्।

विष्वक्सेनाय दातव्यं नैवेद्यं तच्छतांशकम् ।
पादोदकं प्रदातव्यं विष्णो चक्रेश्वराय च ॥ * ॥
तदधिकारी ।
तस्यादौ प्रापयेत् पात्रान्नैवेद्यांशं वसुन्धरेत् ।
सर्व्वदेवस्वरूपाय पराय परमेष्ठिने ॥
श्रीकृष्णसेवायुक्ताय विष्वक्सेनाय ते नमः ।
इत्युक्त्वा श्रीहरेर्वामे तीर्थक्षालं समर्पयेत् ।
पशूनां वा सहस्राणामन्यथा निष्फलं भवेत् ॥
पश्चाच्च बलिरित्यादिश्लोकायुच्चार्य वैष्णवः ।
सर्व्वेभ्यो वैष्णवेभ्यश्च पशूनां विनिवेदयेत् ॥ * ॥
तौ च श्लोकौ ।
बलिर्विभीषणो भीमः कपिलो नारदोऽर्জ্জुनः ।
प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः ॥
विष्वक्सेनोद्धवाक्रूराः सनकाद्याः शुकादयः ।
श्रीकृष्णस्य प्रसादोऽयं सर्व्वं गृह्णन्तु वैष्णवाः ॥ इति ।
इदं यद्यपि युज्येत दर्पणार्पणतः परम् ।
तथापि भक्तवात्सल्यात् तच्छास्त्राचापि सम्भवेत् ॥
अथ बलिदानमाहात्म्यम् । नारसिंहे ।
ततस्तदग्रतोसीत्य पार्षदेभ्यः समन्ततः ।
पुण्यात्मतेर्विमित्तेन बलिं यस्तु प्रयच्छति ॥
बलिना वैष्णवेनाथ हताः सन्तो दिवौकसः ।
शान्तिं तस्य प्रयच्छन्ति श्रियमारोग्यमेव च ॥”
इति श्रीहरिभक्तिविलासे ८ विलासः ॥
देवोद्देशेन यथाविधिपूजोपहारत्यागः । दुर्गादि-
देवतोद्देशेन सङ्कल्पपूर्व्वकच्छागादिपशुघात-
नम् । यथा,—
“बलिदानेन सततं जयेच्छत्रून् कृपान् कृप ! ॥”
इति कालिकापुराणम् ॥
अस्य विधिनिषेधौ बलिशब्दे दृश्यौ ॥ * ॥
अथ बलिदानक्रमः । स्वयमुत्तराभिमुखः पूर्व्वा-
भिमुखं बलिं अक्षयावयवं सुन्दरं कृष्णपृष्ठं
माल्यं कण्ठे वेष्टयित्वा स्नातं समानीय क्षता-
क्षालिः पठेत् ।
“ॐ वाराही यमुना गङ्गा करतोया सरस्वती ।
कावेरी चन्द्रभागा च सिन्धुभैरवसागराः ॥
पशुस्नानविधानाय सान्निध्यमिह कल्पय ॥”
इति तीर्थान्यावाह्य ॐ अग्निः पशुरासीत्तेनायजन्त स एतल्लोकमजयत्तस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैना अपः । ॐ
वायुः पशुरासीत्तेनायजन्त स एतल्लोकमजय-
त्तस्मिन् वायुः स ते लोको भविष्यति तं जेष्यसि पिबैना अपः । ॐ सूर्य्यः पशुरासीत्तेनायजन्त
स एतल्लोकमजयत् तस्मिन् सूर्य्यः स ते लोको
भविष्यति तं जेष्यसि पिबैना अपः । ॐ वाचस्ते
सुम्नमि प्राणांस्ते सुम्नमि श्रोत्रस्ते सुम्नमि
मेढ्रस्ते सुम्नमि पायुस्ते सुम्नमि । मनस्त
आप्यायतां वाक् त आप्यायतां प्राणस्त आप्या-
यतां चक्षुस्त आप्यायतां श्रोत्रस्त आप्यायतां
यस्ते क्रूरं यदा स्थितं तत्त आप्यायतां तत्ते
निष्कायतां तत्ते सुध्यतु सुमद्भ्यः स्वाहा । इति
मन्त्रैः क्षापयित्वा ॐ मेघाकारस्त्वममधे पशुं
बन्धय बन्धय सङ्कल्पावयवं पशुं बन्धय बन्धय
ब्रह्माङ्गस्वरूपस्त्वमसे पशुं बन्धय बन्धय हूः
फट् स्वाहा ॐ ह्रां ह्रीं ह्रूं चां चण्डिकायै
इमं पशुं प्रोक्षामि स्वाहा । इति प्रोक्षणम् ।
ततः सङ्कल्पावयवं पशुं मोचं कुरु कुरु
स्वाहेति मोचं कृत्वा ललमस्तेति ललाटे सिन्दूरं
दत्त्वा ॐ छागपशवे नम इति पाद्यादिकं दत्त्वा
एतदधिपतये ॐ अग्नये नमः एतत्सम्प्रदानी-
यायै ह्रीं दुर्गायै नमः इति पुष्पं दत्त्वा पशोः
रङ्गदेवताः पूजयेत् । यथा, शिरसि ॐ रुधिर-
वदनायै नमः ललाटे ॐ प्राङ्गिण्यै नमः भ्रूमध्ये
ॐ भद्रायै नमः चक्षुषोः ॐ त्रिनेत्रायै नमः
कर्णयोः ॐ पार्व्वत्यै नमः घ्राणे ॐ गौर्य्यै नमः
चिबुके ॐ चण्डिकायै नमः दन्तपङ्क्तौ ॐ
उग्रचण्डिकायै नमः जिह्वायां ॐ चण्डघण्टायै
नमः मुखे ॐ विरूपाक्षायै नमः ग्रीवायां ॐ
चक्षायै नमः । एष्ठे ॐ महाभैरवे नमः उदरे
ॐ वैष्णव्यै नमः चतुर्भुजे ॐ चक्रप्रियायै नमः
पार्श्वयोः ॐ सर्व्वेभ्यौ नमः कटिदेशे ॐ विरू-
पाक्षायै नमः खुरायै ॐ कौशिक्यै नमः लाङ्गूले
ॐ प्रचण्डिकायै नमः सर्व्वाङ्गेषु पञ्चधिष्ठाद्देव-
साध्यो नमः । इति संपूज्य उन्मूलेन । विष्णुः
ॐ तत् सदद्याश्विने मासि शुक्ले पक्षे असुक-
तिथौ वार्षिकमहारक्षाकालीनदुर्गामहोत्सवे असुक-
गोत्रस्य श्रीअसुकस्य दुर्गाप्रीतिकामनया दुर्गा-
देव्यै इमं पशुं वह्निदेवतं तुभ्यमहं घातयिष्यामि
इत्युत्सृज्य ललाञ्जलिः पठेत् ।
“ॐ छाग ! त्वं बलिरूपेण मम भाग्यादुप-
स्थितः ।
प्रणमामि ततः सर्व्वरूपिणं बलिरूपिणम् ॥
यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयिष्यामि तस्मादृयज्ञे वधोऽवधः ॥
पशुयोनिप्रसूतोऽसि पूजार्होमादिकर्म्मसु ।
तुष्टा भवतु मा देवी सरक्तपिशितैस्तव ॥
चण्डिकाप्रीतिदानेन दातुरापद्विनाशनः ।
चामुण्डाबलिरूपाय बले ! तुभ्यं नमोऽस्तु ते ॥”
ततः “पशुपाशाय विद्महे शिरश्छेदाय धीमहि ।
तन्नः पशुः प्रचोदयात् ।” इति कर्णे जपेत् ।
ततः खड्गमानीय ह्रीं इति बीजाक्षरं
लिखित्वा ध्यायेत् ।
“ज्वलत्पिङ्गाकपाणिञ्च कालरात्रिस्वरूपिणम् ।
उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥
रक्ताम्बरधरञ्चैव पाशहस्तं कुटुम्बिनम् ।
पिबमानञ्च रुधिरं भुञ्जानं क्रव्यसंहतिम् ॥”
एवं खड्गं ध्यात्वा गृहीत्वा,
“ॐ रसनात्वं चण्डिकायाः सुरलोकप्रसाधकः ।”
इत्यभिमन्त्र्य ह्रीं ह्रीं खड्गाय नम इति
पाद्यादिभिः संपूज्य पुनर्मुष्टौ ॐ मङ्गलदेवाय
नमः । धारे ॐ यमाय नमः । अग्रे ॐ ब्रह्मणे
नमः ।
“ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरा-
सदः ।
श्रीगर्भो विजयश्चैव धर्म्मपाल ! नमोऽस्तु ते ॥
इत्यष्टौ तव नामानि स्वयम्भुवानि वेधसा ।
नमस्ते छत्रिका तुभ्यं गुरुदैवो महेश्वरः ॥
शिरस्यञ्च शरीरस्ते धाता देवो जगद्गुरुः ।
पिता पितामहो देवस्त्वं मां पालय सर्व्वदा ॥
नीलजीमूतसङ्काशस्तीक्ष्णदंष्ट्रः शशोदरः ।
भावशुद्धो मयञ्चैव अतितेजास्त्वमेव च ॥”
ॐ तीक्ष्णदंष्ट्राय नम इति पुष्पं दत्त्वा ह्रां ह्रीं
फट् इति खड्गमादाय ॐ कालि कालि ब्रजे-
श्वरि लौहदण्डाय नम इति जपित्वा छागस्य
ग्रीवायां खड्ग ! त्वं ग्रीवां छिन्धि छिन्धि फट्
फट् स्वाहा । इति पूर्व्वाभिमुखं बलिं स्वयमुत्त
रामुखः उत्तराभिमुखं बलिं स्वयं पूर्व्वाभिमुखो
वा सकृत्प्रहारेण छिन्द्यात् । ततो ब्रह्मयाद्य-
पात्रे रुधिरमादाय चतुर्भागं कृत्वा ऐशान्यां
ॐ विदारिकायै नमः आग्नेय्यां ॐ पूतनायै
नमः नैर्ऋत्यां ॐ पापराक्षस्यै नमः वायव्यां
ॐ कौशिक्यै नमः । ॐ तत् सदद्यामुके मासि
असुकपक्षेऽसुकतिथौ वार्षिकमहारक्षाकालीनदुर्गा-
महोत्सवे असुकगोत्रस्य श्रीअसुकस्य दशवर्षा-
वच्छिन्नश्रीदुर्गाप्रीतिकामः श्रीदुर्गादेव्यै छागपशु
रुधिरं दास्यामि इति सङ्कल्प्य ।
ॐ कालि कालि महाकालि कालिके पाप-
हारिणि ।
ग्रीवाच्छिन्नञ्च बलिं गृह्ण वरदे वामलोचने ॥”
एष रुधिरबलिः ॐ इत्ययक्षेति मन्त्रेण दद्यात् ।
ततः ऐं ह्रीं श्रीं कौशिकि रुधिरेणाप्यायता-
मिति वदेत् । ततः शिरसि ज्वलद्ग्निं दत्त्वा
ॐ तत् सदद्यामुके माघ्यसुकपक्षेऽसुकतिथौ
वार्षिकमहारक्षाकालीनदुर्गामहोत्सवे असुकगोत्रस्य
श्रीअसुकस्य श्रीमद्दुर्गादेव्यर्गलाभिवर्द्धनद्वारेण
अभिपूजनसहपनपर्य्याप्तजनितपूर्व्वपूर्व्वाधिकपुण्य-
प्राप्तिकामो दुर्गादेव्यै सप्तदीपच्छागपशुमांसं
दास्यामीति सङ्कल्प्य एष सप्तदीपच्छागपशु-
मांसबलिः ह्रीं दुर्गायै नम इत्युत्सृजेत् ।
“ॐ जय त्वं सर्व्वभूतेषु सर्व्वभूतसमाश्रिते ।
रक्ष मां निजभूतेभ्यो बलिं गृह्णन्तु नमो-
ऽस्तु ते ॥
ततः खड्गरुधिरमादाय ।
“ॐ यं यं क्षृणामि पादेन यं यं पश्यामि
चक्षुषा ।
स स मे वश्यतां यातु यदि शक्रसमो भवेत् ॥”
इति ललाटे तिलकं कुर्य्यात् । मेषघाते तु मेषे-
त्युक्त्वेन योज्यम् । मेषरुधिरदाने तु एकवर्षाव
च्छिन्नदुर्गाप्रीतिकामः । प्रभूतबलिदाने तु दौ
वा त्रीन् वा अयन: कृत्वा संप्रोक्ष्य ततस्तत्पशुभ्यः
नम इति संपूज्य छाग त्वमित्येकवचनान्तेन
प्रयोगः । पक्षान्तरेप्येवम् । वाक्ये तु एतान्
पशून् तुभ्यमहं घातयिष्ये । रुधिरदाने तु
एतान् रुधिरबलीन् दास्यामि इति सङ्कल्प्य
प्रत्येकेन दद्यात् शीर्षदानमप्येवम् । ततो ब्रह्म-
मन्त्रं यथाशक्ति जप्त्वा समर्प्य प्रणमेदिति शब्दि-
कल्पतरुपुराणोक्तपद्धतिः ॥ * ॥

बलिदा

अथ तान्त्रिकबलिदानविधिः। "तत्र सुलक्षणं पशुं देव्यग्रे संस्थाप्य वक्ष्यमाणविधिना उत्सृजेत्। तदुक्तं यामले।

'देव्यग्रे स्थापयित्वा तु पशुं लक्षणसंयुतम्।
स्वेनसर्वपविक्षेपात् भूतानुत्सारयेत्ततः॥'

अस्त्रोदकेन संप्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुण्ठ्य धेनुमुद्रयावलोक्य गन्धपुष्पाद्यैः पशुं संपूज्य मूलेन सप्तधा तत्त्वमुद्रया प्रोक्षणं कृत्वा कर्णे इमं मन्त्रं पठेत्। पशुपाशाय विद्महे विश्वकर्म्मण्यै धीमहि तन्नो जीवः प्रचोदयात्। ततो हूं कालि कालि वज्रेश्वरि लौहदण्डाय नमः इति मन्त्रेण खड्गं पूजयेत्। ततः खड्गास्त्रायमध्यगूलं क्रमेण पूजयेत्। यथा हूं वागीश्वरीबलाभ्यां नमः। हूं लक्ष्मीनारायणाभ्यां नमः। हूं उमामहेश्वराभ्यां नमः। ततो ब्रह्मविष्णुशिवशक्तियुक्ताय खड्गाय नमः। इति सर्व्वत्र पूजयित्वा प्रणमेत्।

'खड्गाय खरधाराय मुक्तिकार्य्यार्थतत्पर!।
पशुश्चेद्यत्त्वया ग्रीवं खड्गनाथ! नमोऽस्तु ते॥'

ततो महावाक्यं असुकदेवतायोत्तिकामः अमुकदेव्यै इमं पशुं तुभ्यमहं संप्रदे। ततो निवेदयेत्।

'यथोक्तेन विधानेन तुभ्यमस्तु समर्पितम्॥'

ततो बलिं छिन्द्यात्। ततो रुधिरं समांसं देव्यै दद्यात्। ततोऽवशिष्टं वटुकादिभ्यो बलिं दद्यात् यथा हूं वां वटुकाय नमः। इति गन्धादिभिः संपूज्य पूर्ब्ववन्मन्त्रेण वायव्ये बलिं दद्यात्। हूं यां योगिनीभ्यो नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण ईशाने बलिं दद्यात्। हूं क्षां क्षेत्रपालाय नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण नैर्ऋत्यां बलिं दद्यात्। हूं गां गणपतये नमः इति संपूज्य पूर्ब्ववन्मन्त्रेण आग्नेय्यां गणेशाय बलिं दद्यात्।" इति तन्त्रसारः॥ * ॥ (ननु "मा हिंस्यात् सर्व्वाभूतानि" "अहिंसा परमो धर्म्मः।" इत्यादि वचनात् कर्त्तव्यैव सर्व्वथा हिंसा कथं तर्हि हिंसाप्रवृत्तिः शुभादृष्टजनकत्वेन शास्त्रेणोपदिष्टा अतोऽवोचाम। अथ वैधहिंसाविचारः। 'मा हिंस्यात् सर्व्वाभूतानि' इत्यत्र सर्व्वशब्दस्य आपेक्षार्थपरतया एतद्विधिमनुलक्ष्य 'वायव्यं श्वेतमालभेत' इत्यादि विधिर्विषयाप्राप्तिरूपया वैधातिरिक्तविषयत्वं सर्व्वाः सर्व्वाणि छन्दसि वेदनेन तत्रैव सिद्धम्। यद्यपि नाना दर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैस्तत्त्वकौमुद्यां अभिहितं न च 'मा हिंस्यात् सर्व्वाभूतानि' इति सामान्यशास्त्रं विशेषशास्त्रेण 'अग्नीषोमीयं पशुमालभेत' इत्यनेन बाधेन इति वाच्यं विरोधाभावात्। विरोधे हि बलीयसा दुर्ब्बलं बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्। तथाहि 'मा हिंस्यात् इति निषेधेन हिंसाया अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रतुत्वं तत्रमपि। न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति विरोधः। हिंसा हि पुरुषस्य दोषमावहति क्रतोश्चोपकरिष्यतीत्यनेन तदपि सांख्यनये। मीमांसकमते तु विरोध एव तथाहि गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं कार्य्यं इति निषेधविध्यर्थस्य बाधं विना अग्नीषोमीयपशुालम्भनविषयकं कार्य्यमिति भावविध्यर्थ उपपद्यते। भट्टनये तु अङ्गे यथा तथास्तु। न च मुख्यपशुयागे पुरुषार्थैकपशुहिंसनस्यार्थसाधनत्वं अनर्थसाधनत्वञ्चोपपद्यते विरोधात्। वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव क्रतौ विधेरेव स्वभावो यः स्वविषयस्य साक्षात् परम्परया वा पुरुषार्थसाधनत्वमवगमयति अन्यथाङ्गानां प्रधानोपकारकत्वमपि नाङ्गीक्रियेत। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्टसाधनत्वं अनर्थसाधनत्वं बलवदनिष्टसाधनत्वं न चानयोरेकत्र समावेश इति। अतएवोक्तं 'तस्मादृत्विजो वधोऽवधः' इति। नन्वेवं 'श्येनेनाभिचरन् यजेत' इत्यत्र श्येनस्य शत्रुवधरूपेष्टसाधनत्वमवगतं 'अभिचारो मूलकर्म्म च।' ११।६७। इति मनुना उपपातकगणमध्ये पाठात् अनिष्टसाधनत्वमवगतम्। तद्धनत्वयजुपपद्यतामिति चेन्नैवं 'आततायिनमायान्तं हन्यादेवाविचारयन्।' ८। ३५। इत्येकवाक्यतया आततायिन्यत्रे इष्टसाधनत्वं अनाततायिन्यत्रे तूपपातकत्वेन बलवदनिष्टसाधनत्वमित्यविरोध एव॥" इति तिथितत्त्वम्॥)

बलिध्वंसी, [न्] पुं, (बलिं तदाख्यया प्रसिद्धं दैत्यविशेषं ध्वंसयतीति। बलि + ध्वंस + णिनि। वामनरूपेण बलेः सर्व्वस्वग्रहणादस्य तथात्वम्। यद्वा, बलिना पूजोपहारेण अविद्यां ध्वंसयितुं शीलमस्य।) विष्णुः। इत्यमरः। १। १। २१॥ (भगवता वामनरूपधरेण बलिप्रति यज्ञगमनपूर्ब्बकं तत्सकाशात् सर्व्वस्वं गृहीतमित्यनत्कथा बलिशब्दे द्रष्टव्या॥)

बलिन्, त्रि, (बलिः ग्रन्थिलं चर्म्म अस्त्यास्मिन्निति। बलि + इनिः।) बलिभः। जरया श्लथचर्म्मयुक्तः। इत्यमरः। २। ६। ४५॥

बलिनन्दन, पुं, (बलेरसुरस्य प्रसिद्धस्य दैत्यस्य नन्दनः पुत्रः।) बाणासुरः। इति शब्दरत्नावली॥ (अयं खलु यादवश्रेष्ठेन भगवता कृष्णेन सह युद्धमकरोत्। तपःप्रभावप्रभूतप्रभो महादेवश्च स्वयमस्य द्वारिकत्वमकार। तद्विवरणादिकं हरिवंशे १७३ अध्यायमारभ्य १८३ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ बलेः ययातिवंशीयस्य राज्ञः नन्दनः सेवजः पुत्रः इति व्युत्पत्त्या अङ्गवङ्गकलिङ्गाद्याः। यदुक्तं, विष्णुपुराणे। ४। १८। १। "हेमात् सुतपसस्तस्मात् बलिः यस्य त्वेते दीर्घतमसा अङ्गवङ्गकलिङ्गसुह्मपुण्ड्राख्या बालेया क्षत्रमवर्द्धयन्॥")

बलिनी, स्त्री, (बलं देयत्वेनास्त्यस्या इति इनिः। ङीप्।) वाद्यालकः। इति शब्दचन्द्रिका॥

बलिपुष्टः, पुं, (वैश्वदेवेन बलिना पुष्टः।) काकः। इत्यमरः। २। ५। २०॥

बलिपु

बलिपोदकी, स्त्री, (बलेः पोदकी उपोदकी।) उपोदकी। इति राजनिर्घण्टः॥

बलिप्रियः, पुं, (बलिसुपहारं प्रीणातीति। बलि + प्री + क।) लोध्रवृक्षः। इति शब्दचन्द्रिका॥ (बलिर्वैश्वदेवबलिः प्रियो यस्य इति व्युत्पत्त्या काकः। उपहारप्रिये वाच्यलिङ्गः॥)

बलिभः, त्रि, (बलिश्चर्म्मसंकोचोऽस्त्यस्येति। बलि + "तुन्दिबलिवटेर्भः।" ५। २। १२८। इति भः।) बलिनः। इत्यमरः। २। ६। ४५॥

बलिभुक्, [ज्] पुं, (बलिं वैश्वदेवबलिं गृहस्थादत्तद्रव्यं वा भुङ्क्ते इति। भुज् + क्विप्।) काकः। इत्यमरः। २। ५। २०॥ (यथा, भागवते। १। १८। ३३।

"अहो अधर्म्मः पालानां पीव्नां बलिभुजामिव॥")

बलिमन्दिरं, क्ली, (बलेः स्वनामख्यातस्य राज्ञो मन्दिरमालयः। बलिश्चिं वामनरूपाय विष्णवे सर्व्वस्वं दत्त्वा प्रह्लादेन सह पातालं निवसति इति पौराणिकी कथाऽनुसन्धेया।) अधोलोकः। पातालम्। इति शब्दमाला॥

बलिमत्, [न्] त्रि, (बलिश्चर्म्मसंकोचोऽस्त्यस्येति। बलि + मतुप्।) बलिनः। जरया श्लथचर्म्मयुक्तः। इत्यमरटीका॥ (बलिः पूजोपहारं विद्यतेऽस्येति व्युत्पत्त्या उपहारविशिष्टः। यथा, रघुः। १४। १५।

"वाल्मीकेराश्रमो बलिमत्तिकेत-
मालोक्यापोढशस्त्रं पितुर्विवेश॥")

बलिमुखः, पुं, (बलिर्मुखे यस्य। यद्वा, बलिश्चर्म्मसंकोचस्तद्युक्तं मुखं यस्य।) वानरः। इत्यमरटीकायां रमानाथः॥

बलिष्ठः, पुं, (अतिशयेन बलवान् + बलवत + इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्। प्रशस्यभारद्वाजकुलादस्य तथात्वम्।) ऋक्षः। इति राजनिर्घण्टः॥ (धर्म्मसावर्णिकमन्वन्तरान्तर्गत ऋषिभेदः। यथा, मार्कण्डेये। ८४। १८।

"हविष्मांश्च बलिश्चैव कविरञ्जनधारुणिः।
निरस्त्रश्चानघश्चैव विरिष्ठाश्चो महामुनिः॥
सप्तर्षयोऽन्तरे तस्मिन्नमिदेवश्च सप्तमः॥"

इलयोरैक्यात् क्वचित् वरिष्ठश्चेति पाठो दृश्यते॥)

बलिष्ठः, त्रि, (अतिशयेन बलवान्। बलवत + इष्ठन्। विन्मतोर्लुगिति मतुपो लुक्।) अतिशयबलवान्। यथा,—

"प्रायश्चित्तं विना पूता त्वमेव शुद्धमानसा।
अकामा या बलिष्ठेन न स्त्री दारेण दूष्यति॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५५ अध्यायः॥

बलिष्ठा यथा। वायुः १ विष्णुः २ गरुडः ३ हनूमान् ४ यमः ५ महाबराहः ६ नरसिंहः ७ सत्यसिद्धा ८ गजः ९ पृथुराजः १० भरतरामः ११ वाली १२ बलिः १३ भीमः १४ सती १५ शेषः १६ पुराकृतम् १७। इति कविकल्पलता॥

बलिष्णु:, त्रि, (बध्नाति बध्नति इति। बल + इष्णुच्।) अपमानित:। इत्युणादिकोष:॥

ब(व)लिसद्म, [न्] क्ली, (बलेरसुरादनस्य सद्म निकेतनम्।) रसातलम्। इत्यमर:। १।१।८। १॥

ब(व)लिहा, [न्] पुं, (बलिं हन्ति इति। बलि + हन् + क्विप्। वामनरूपेण बलेः सर्वस्वापहरणादस्य तथात्वम्।) विष्णु:। इति हेमचन्द्र:॥

ब(व)ली, [न्] पुं, (बलमस्यास्तीति। बल + "बलादिभ्यो मतुवन्यतरस्याम्।" ५। २। १२६। इति पक्षे इनि:।) बलराम:। इति शब्दरत्नावली॥ उक्ष:। महिष:। वृषभ:। शूकर:। कफ:। कुन्दवृक्ष:। इति जटाधर:॥ माष:। (स्वनामख्यातो वल्लीपुत्र:। यथा, मार्कण्डेये। १२८। २।

"बली बलाकश्चाक्षश्च प्रचण्डश्च सुविक्रम:॥")

बलयुक्ते, त्रि। तत्पर्य्यायः। अंशुल:। २ निर्दिग्ध:। ३ मांसल:। ४ उपचित:। ५। इति हेमचन्द्र:। ३। १२२॥ (यथा, मार्कण्डेये। ६४। ८६।

"सार्द्धं न बलिभि: कुर्य्यान्न च नूतनै

निन्दितै:॥")

ब(व)ली, स्त्री, (बलि + पक्षे ङीष्।) बलि:। अन्यत् शब्दार्थे। इत्यमरटीकायां भरत:॥ (यथा, —

"कृष्णं तण्डुलचूर्णितं कृत्वा घृतमाल्किसंयुतम्।

भक्षणात् स्वप्नवेलायां वलीपलितनाशनम्॥"

इति वैद्यकभैषज्यधन्वन्तरीरसायनाधिकारे॥)

ब(व)लीक, क्ली, (बलानि संहत्योनीति। बल संवरणे + "अलीकादयश्च।" उणा० ४।२५। इति कीकन्।) पटलप्रान्तम्। इत्यमर:। २। ६। १४॥ छाँपि इति भाषा॥ (यथा, माघे। ३। ५३।

"यस्यामसेवन्त नमद्वलीका:

समं वधूभिर्वलभीर्युवान:॥")

ब(व)लीमुख:, पुं, (बलीयुक्तं मुखं यस्य।) वानर:। इत्यमर:। २। ५। ३॥

ब(व)लीयान्, [स्] त्रि, (अतिशयेन बलवान्। बलवत् + ईयसुन्।) अतिशयबलयुक्त:। यथा,—

"आगमादपयोर्मध्ये बलीयानागमो विधि:॥"

इति दुर्गादासटीका॥

ब(व)लीवर्द्द:, पुं, (ईर्ल्लाति: वर् वरणम्। वर् ईप्सायां क्विप्। ईश्च वर् च ईवरौ तौ ददातीति ईवर्द्द:। बलमस्यास्तीति बली। तत्तो बली च ईवर्द्दश्च इति।) वृष:। इत्यमर:। २। ८। ५८॥ (यथा, कथासरित्सागरे। २०। २७।

"संयोज्याथ बलीवर्द्दयुगं रचितमङ्गल:।

क्षत्वा बलिं तस्य तरोरारेभे क्षपितुं स:॥")

तीर्थयात्रायां तदारूढस्य दोषो यथा,—

"बलीवर्द्दसमारूढ: प्रयत्नं तस्यापि यत् फलम्।

मरके वसते घोरे गवां क्रोधे हि दारुणे॥

बलिञ्च न प्रयच्छन्ति पितरस्तस्य देहिन:॥"

इति माघे ८८ अध्याय:॥

ब(व)ल्य, क्ली, (बलाय हितम्। बल + "वृद्धाच्छ कठजिलसेनिरटञ्ण्यञ्यमेति।" ४।२।८०। इति य:।) प्रधानधातु:। शुक्रम्। बलकरे, त्रि। इति मेदिनी। ये, ४०॥ (यथा,—

"बृंहणबल्यो लघुनो हितश्च

स्निग्धो गुरुस्वादरसोऽथ बल्य:॥"

इति हारीते कल्पस्थाने तृतीयेऽध्याये॥)

बल्य:, पुं, (बलाय शुक्राय हित:। बल + य:।) वृद्धभिक्षुक:। इति त्रिकाण्डशेष:॥

बल्या, स्त्री, (बलाय हिता। बल + "वृद्धाच्छ कठेति।" ४। २। ८०। इति य:। ततष्टाप्।) अतिबला। अश्वगन्धा। शिम्बीवृक्षभेद:। प्रसारिणी। इति राजनिर्घण्टः॥

बल्ह, ड क्लृतौ। हिंसायाम्। दाने। वाचि। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) अन्तःस्थान्तत्वाद्योपध:। ड, बल्हते। इति दुर्गादास:॥

बष्कयणी } स्त्री, (बष्कयस्य वत्सस्य अस्या:। बष्कय + प्राग्दिव्यतीयः
बष्कयिणी } पक्षे इनि:। अट्कुप्वाङ्नुमव्यवायेऽपि। इति णत्वम्। ततो ङीष्।) चिरप्रसूता गौ:। इत्यमरभरतौ॥ (यथा, सिद्धान्तकौमुद्याम्। ३। १। ६५।

"पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्क-

यणीप्रवक्तृत्रोत्रियाध्यापकधूर्त्तजरतीः॥")

बह्, त्रि, (बंहते इति। बंहि वृद्धौ + "लञ्चिबंह्योर्नलोपश्च।" उणा० १।७०। इति कुर्नलोपश्च।) त्र्यादिसंख्या॥ अनेकम्। विपुल:। इति मेदिनी। हे, ६॥ तत्पर्य्यायः। प्रभूतम् २ प्रचुरम् ३ प्राज्यम् ४ अदभ्रम् ५ बहुलम् ६ पुरुहम् ७ पुरु ८ भूयिष्ठम् ९ स्फिरम् १० भूय: ११ भूरि १२। इत्यमर:। ३। १। ९३॥ तद्वैदिकपर्य्यायः। उरु १ तुवि २ पुरु ३ भूरि ४ प्रभ्वत् ५ विश्वम् ६ परिवृढा ७ आजनि: ८ घृतम् ९ सहस्रम् १० सलिलम् ११ कृवित् १२। इति द्वादश बहुनामानि। इति वैद्यनिघण्टौ। ३। १॥ (यथा, मनु:। ७। ८६।

"अल्पं वा बहु वा प्रेत्य दानस्यावाप्यते फलम्॥"

तथा, तत्रैव। ८। ७७।

"एकोऽलुब्धस्तु साक्षी स्याद्बह्व: शुध्योऽपि न स्त्रिय:॥"

बहुमतम्। बहुमानम्। यथा, रघु:। १२। ८८।

"रामस्तुलितकैलासमरातिं बहुमन्यत॥")

बहुक:, पुं, (बहु + संज्ञायां कन्।) कर्कट:। अर्क:। दारुहरिद्र:। जलखातक:। इति मेदिनी। के, १२८॥ ("संख्याया: अतिशयदन्तायाः कन्।" ५। ३। २२। इति कन्। बहुभि: क्रीतं, त्रि।)

बहुकण्टक:, पुं, (बहूनि कण्टकान्यस्य।) क्षुद्रगोक्षुर:। यवास:। हिन्ताल:। इति राजनिर्घण्टः॥

बहुकण्टका, स्त्री, (बहूनि कण्टकान्यस्या:।) अग्निदमनी। इति राजनिर्घण्टः॥

बहुकण्टा, स्त्री, (बहव: कण्टा: कण्टकानि यस्या:।) कण्टकारी। इति राजनिर्घण्टः॥ (विहितिरस्या: कण्टकारीशब्दे ज्ञातव्या॥)

बहुकन्द:, पुं, (बहव: कन्दा यस्य।) सूरण:। इति राजनिर्घण्टः॥

बहुकन्दा, स्त्री, (बहव: कन्दा यस्या:।) कर्कटी। इति राजनिर्घण्टः॥

बहुकर:, पुं, (बहु कार्य्यं करोतीति। बहु + कृ + "दिवाविभानिशाप्रभेति।" ३। २। २१। इति ट:।) उष्ट्र:। इति त्रिकाण्डशेष:॥

बहुकर:, त्रि, (बहु करोति शुभं संमार्ष्टि इति। बहु + कृ + ट:।) मार्जनकारी। तत्पर्य्यायः। खलपू: २। इत्यमर:। २। १। १७॥ भूमिसम्मार्ज्जक:। ३। इति शब्दरत्नावली॥ बहुकार्य्यकर्त्ता। यथा, भट्टि:। ५। ७८।

"निहन्ता वैरकाराणां सतां बहुकर: सदा।

पारम्पर्यक्रमस्यास्य शक्रैरस्तकरो रवी॥"

बहुकरी, स्त्री, (बहु करोति शुभं संमार्ष्टि इति। बहु + कृ + ट:। ङीष्।) सम्मार्ज्जनी। इति हेमचन्द्र:। ७। ८२॥

बहुकर्णिका, स्त्री, (बहव: कर्णा इव पत्राणि यस्या:।) आखुकर्णी। इति राजनिर्घण्टः॥

बहुकूर्च:, पुं, (बहूनि कूर्चानि यस्य।) मधुनालिकेरिक:। इति राजनिर्घण्टः॥

बहुगन्धं, क्ली, (बहुर्गन्धो यस्मिन्।) चन्दनम्। इति राजनिर्घण्टः॥ (दारचिनी इति भाषा॥)

बहुगन्ध:, पुं, (बहुर्गन्धो यस्मिन्।) कुन्दवृक्ष:। इति राजनिर्घण्टः॥ (उग्रगन्धे, त्रि॥)

बहुगन्धदा, स्त्री, (बहुगन्धं ददाति या। बहुगन्ध + दा + क।) कस्तूरी। इति राजनिर्घण्टः॥ (गुणादयोऽस्या: कस्तूरीशब्दे ज्ञातव्या॥)

बहुगन्धा, स्त्री, (बहुर्गन्धो यस्याम्।) चम्पककलि:। यूथिका। क्षुद्रजीरक:। इति राजनिर्घण्टः॥

बहुगर्ह्यवाक्, [च्] त्रि, (बहु गर्ह्या बहु निन्दिता वाग् यस्य।) कुत्सितबहुवादी। इत्यमर:॥

बहुग्रन्थि:, पुं, (बहवो ग्रन्थयो यस्य।) भार्ङ्गक:। इति शब्दचन्द्रिका॥ (भाङ इति भाषा॥)

बहुच्छिद्रा, स्त्री, (बहु यथा स्यात्तथा छिद्यते लूयते। बहु + छिद् + क।) कन्दगुडूची। इति राजनिर्घण्टः॥

बहुत:, [स्] अ, (बहुभ्य इत्यर्थे बहुशब्दात् "पञ्चम्यास्तसिल्।" ५। ३। ७। इति तसिल्प्रत्यय:॥) बहुभ्य:॥

बहुतन्त्रि:, त्रि, (बहवस्तन्त्रयो यस्य।) बहुतन्त्रविशिष्ट:। यथा। बहुतन्त्रि: काय:। बहुतन्त्री ग्रीवा। बहुतन्त्रि गात्रम्। यथा च। विभज्य नक्तं दिवमत्ततन्त्रिगीतिं किराते दृश्यैकारान्ततन्त्रिशब्दस्य प्रयोग:। इति संक्षिप्तसार:॥

बहुतन्त्री:, त्रि, (बहवस्तन्त्रयो यस्मिन्।) बहुतन्त्रविशिष्ट:। यथा। बहुतन्त्रीग्रीवा बहुतन्त्रीधर्मनी। इति सिद्धान्तकौमुदी॥ एवं बहुतन्त्री: काय:। बहुतन्त्रि गात्रम्॥

बहुतन्त्रीक:, त्रि, (बहुतन्त्री + स्वार्थे कन्।) बहुतन्त्रविशिष्ट:। यथा। बहुतन्त्रीका वीणा।

बहुधा

इति सिद्धान्तकौमुदी ॥ एवं बहुतन्त्रीकः पटः । बहुतन्त्रीकं वस्त्रम् ॥

बहुतरकविग्रः, पुं, (बहुतराणि कविग्राणि धान्य-ग्रीर्षाणि यस्य ।) रागीधान्यम् । इति राज-निर्घण्टः ॥

बहुता, स्त्री, बहूनां भावः । बहुग्रब्दात् तलौ भावे इति तप्रत्ययः ॥

बहुतिक्ता, स्त्री, (बहुस्तिक्तो रसो यस्याः ।) काकमाची । इति राजनिर्घण्टः ॥

बहुतिथः, त्रि, (बहु + "बहुपूगगणसङ्घस्य तिथुक्" । ५ । २ । ५२ । इति तिथुक् । मुग्ध-बोधमते "बहुगणपूगसंघातात्तिथट् तस्योपच ।" ७ । ४२ । इति तिथट् ।) बहूनां पूरणः । इति व्याकरणम् ॥ (यथा, मार्कण्डेयपुराणे । २२ । १ ।

"ततः काले बहुतिथे गते राजा पुनः सुतम् ।
प्राह गच्छास्य विप्राणां त्राणाय वर
मेदिनीम् ॥")

बहुत्व, अ, (बहु + "सप्तम्यास्त्रल् ।" ५ । ३ । १० । इति त्रल् ।) बहुषु । इति सिद्धान्तकौमुदी ॥

बहुत्वं, क्ली, बहूनां भावः । बहुग्रब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते । १ । ३५ । ४ ।

"बहुत्वान्नामधेयानि पन्नगानां तपोधन ! ॥")

बहुदलक, [क] पुं, (बहवो दलाः यस्य ।) भूर्ण-वृक्षः । इति ग्रब्दरत्नमाला ॥

बहुदलजः, पुं, (बहुदलाग्रेव । बहुदल + स्वार्थे कन् । भूर्णवृक्षः । इति हेमचन्द्रः । ४ । २१० ॥

बहुदक्षिकः, त्रि, (बहवो दक्षाः सन्त्यस्य । बहु-दक्ष + ठन् ।) बहुदक्षविग्रिष्टः । यथा । बहु-दक्षिका नगरी बहुदक्षिको ग्रामः । इति सिद्धान्तकौमुदी ॥

बहुदुग्धः, पुं, (बहूनि दुग्धानि अपक्वावस्थायां यस्य । यद्वा, बहूनि दुग्धानीव शुक्लवस्तून्यस्य ।) गोधूमः । इति राजनिर्घण्टः ॥

बहुदुग्धा, स्त्री, (बहु दुग्धं यस्याः ।) बहुक्षीरा गौः । तत्पर्य्यायः । वह्वला २ । इति हेमचन्द्रः । ४ । २३५ ॥ (क्षुद्रोदृग्धः । बहुदुग्धविग्रिष्टत्वात् ॥)

बहुदुग्धिका, स्त्री, (बहुदुग्धा + स्वार्थे कन् । टाप् । अत इत्वम् ।) क्षुद्रोदृग्धः । इति ग्रब्द-चन्द्रिका ॥

बहुधा, अ, (बहु + "विभाषा बहोर्धा विप्र-कृष्टकाले ।" ५ । ३ । २० । इति धा ।) बहु प्रकारम् । इति व्याकरणम् ॥ (यथा, ऋग्वेदे । १ । १६४ । ४६ ।

"इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरि-श्वानमाहुः ॥"

तथा, गीतायाम् । ६ । १५ ।

"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥"

"केचित्तु विश्वतो मुखं सर्व्वात्मकं मां बहुधा नक्षत्ररुद्रादिरूपेणोपासते ॥" इति तट्टीकायां श्रीधरस्वामी ॥)

बहुपा

बहुधारं, क्ली, (बह्वी धारा यस्य ।) वज्रम् । इति राजनिर्घण्टः ॥

बहुनाडिकः, त्रि, (बहुनाडि + कन् ।) क्रूरः । इति सिद्धान्तकौमुदी ॥

बहुनाड़ीकः, त्रि, (बह्व्यो नाड्यो यस्मिन् । बहु-नाड़ी + कप् ।) दिवसः । इति संक्षिप्तसारः ॥ क्रूरः । इति सिद्धान्तकौमुदी ॥

बहुनादः, पुं, (बहुर्महान् नादः ग्रब्दो यस्य ।) मेघः । इति राजनिर्घण्टः ॥

बहुपटुः, त्रि, ईषदूनः पटुः । इति व्याकरणम् ॥ बहुषु कर्म्मसु दक्षश्च ।

बहुपत्रं, क्ली, (बहूनि पत्राण्यस्य ।) अश्वकर्णम् । इति राजनिर्घण्टः ॥

बहुपत्रः, पुं, (बहूनि पत्राणि दलान्यस्य ।) पलाण्डुः । इति राजनिर्घण्टः ॥ अनेकपत्रयुक्ते, त्रि ॥

बहुपत्रा, स्त्री, (बहुपत्र + टाप् ।) तरुणी-पुष्पम् । इति राजनिर्घण्टः ॥ (भूम्यामलकी । तत्पर्य्यायो यथा, —

"भूम्यामलकिका प्रोक्ता ग्रिवा तामलकीति च ।
बहुपत्रा बहुफला बहुवीर्य्याऽम्बष्ठापि च ॥")

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपत्रिका, (बहुपत्रा + संज्ञायां स्वार्थे वा कन् । टापि अत इत्वम् ।) भूम्यामलकी । मेथिका । (अस्याः पर्य्यायो यथा,

"मेथिका मिथिनिर्मेथिदीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामस्था मिश्रपुष्पा च कैरवी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महाशतावरी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपत्र + गौरादित्वात् ङीष् ।) लिङ्गिनी । गृहकन्या । तुलसी । असुका । दृहती । गोरक्षदुग्धा । इति राजनिर्घण्टः ॥

बहुपर्णः, पुं, (बहूनि पर्णानि पत्राणि यस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ अनेक-पत्रयुक्ते, त्रि ॥

बहुपर्णिका, स्त्री, (बहुपर्ण + संज्ञायां कन् । टापि अत इत्वम् ।) आखुकर्णी । इति राजनिर्घण्टः ॥

बहुपर्णी, स्त्री, (बहुपर्ण + गौरादित्वात् ङीष् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, —

"मेथिका मिथिनिर्मेथिदीपनी बहुपत्रिका ।
बोधिनी बहुबीजा च जातिगन्धफला तथा ॥
वल्लरी चैव कामस्था मिश्रपुष्पा च कैरवी ।
कुञ्जिका बहुपर्णी च पित्तजिद्वायुवृद्धिधा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुपात्, [द्] पुं, (बहवः पादो यस्य । अनेक-ग्रिफावत्त्वादस्य तथात्वम् ।) वटवृक्षः । इत्य-मरः । २ । ४ । ३२ ॥

बहुपादः, पुं, (बहवः पादा यस्य । अनेकग्रिफा-वत्त्वादस्य तथात्वम् ।) वटवृक्षः । इति राज-निर्घण्टः ॥ (यथा,—

बहुप्र

"वटो रक्तफलः प्ररूढी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणो वाणो बहुपादो वनस्पतिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

अनेकपादविग्रिष्टे, त्रि । यथा, भागवते । ४ । २६ । २ ।

"पुरुषं पुरञ्जनं विद्यात् यदानक्त्यालयः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥"

तथा च महाभारते । १४ । ४२ । ३७ ।

"द्विपादबहुपादानि तिर्य्यग्गतिमतीनि च ॥")

बहुपुत्रः, पुं, (बहवः पुत्राः सन्ततयो यस्य ।) सप्तपर्णः । इति ग्रब्दचन्द्रिका ॥ अनेकसुत-विग्रिष्टे, त्रि ॥ (यथा, हरिवंशे । ३ । ६४ ।

"बहुपुत्रस्य विदुषश्चतस्रो विद्युतः स्नुषाः ॥")

बहुपुत्री, स्त्री, (बहवः पुत्राः पुत्रसङ्घमूलानि यस्याः ।) शतमूली । इति रत्नमाला ॥ (शत-मूलीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

बहुपुष्पः, पुं, (बहूनि पुष्पाणि यस्य ।) पारिभद्र-वृक्षः । इति राजनिर्घण्टः ॥

बहुपुष्पिका, स्त्री, (बहुपुष्पा + संज्ञायां कन् । अत इत्वम् ।) धातकी । इति राजनिर्घण्टः ॥

बहुप्रजः, पुं, (बह्व्यः प्रजा यस्य ।) सुप्रजस्त्वम् । इति राजनिर्घण्टः ॥ शूकरः । इति हेम-चन्द्रः । ४ । ३५७ ॥ बहुसन्ततिविग्रिष्टे, त्रि ॥ (छन्दसि तु "बहुप्रजाश्छन्दसि ।" ५ । ४ । १२० । इति असुभागमः । यथा, सिद्धान्तकौमुद्यां वैदिकप्रक्रियायाम् ।

"बहुप्रजा निर्ऋतिमाविवेग्र ॥")

बहुप्रतिज्ञः, त्रि, (बह्व्यः प्रतिज्ञाः यस्मिन् ।) अनेक-पदसङ्घार्थ-पूर्व्वपक्ष-विग्रिष्ट-अवधारः । यथा । "यत्तु अनेकपदसङ्घार्थः पूर्व्वपक्षो न सिद्ध्यतीति । तत्र यद्यनेकवस्तुसङ्घार्थे इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वापहृतमित्येवविधस्यादृष्टत्वात् । ऋणादानपदसङ्घे पक्षाभास इति चेत् सदपि न मदीया रूपका अनेन दृष्टा यष्टीनाः सुवर्णञ्चास्य हस्ते निक्षिप्तं मदीयं क्षेत्रम-पहरति क्षेत्रादीनां पक्षत्वमिष्यते एव । किन्तु क्रियाभेदात् क्रमेण अवधारो न युगपदित्येतावत् । यथाह कात्यायनः ।

'बहुप्रतिज्ञं यत् कार्य्यं अवधारेषु निश्चितम् ।
कामन्तदपि मुञ्चीयाद्राजा तत्त्वबुभुत्सयेति ॥'

तस्मादनेकपदसङ्घार्थः पूर्व्वपक्षो युगपन्न सिध्य-तीति तस्यार्थः ।" इति मिताक्षरा ॥ अनेक-प्रतिज्ञायुक्ते, त्रि ॥

बहुप्रदः, त्रि, (प्रददातीति प्रदः । प्र + दा + क । बहूनां प्रदः ।) प्रचुरदाता । तत्पर्य्यायः । वदान्यः २ स्थूललक्षः ३ दानशौण्डः ४ । इत्य-मरः । २ । ७ । ६ ॥ स्थूललक्षः ५ दानवीरः ६ दानपूर्णः ७ । इति ग्रब्दरत्नावली ॥ (पुं, महादेवः । यथा, महाभारते १३ । शिवसहस्र-नामकथने । १७ । १०८ ।

"कुलधारी कुलकर्त्ता बहुविद्यो बहुप्रदः ॥")

बहुप्रदः, स्त्री. (बहून् प्रसूते इति । बहु + प्र + सू + क्विप् ।) बहुसन्तानप्रसवकारिणी । तत्पर्य्यायः । क्षमिला २ । इति हेमचन्द्रः । ३।२२२॥

बहुफलः, पुं, (बहूनि फलानि यस्य ।) कदम्बवृक्षः । इति मेदिनी । ले, १५७ ॥ विकङ्कतः । तेजःफलः । इति राजनिर्घण्टः ॥

बहुफला, स्त्री, (बहूनि फलानि यस्याः ।) चर्चिका । मार्कवयष्टी । काकमाची । अपुनर्नवा । ग्रन्थाकुली । क्षुद्रकारवेल्ली । इति राजनिर्घण्टः ॥ भूम्यामलकी । इति भावप्रकाशः ॥

बहुफलिका, स्त्री, (बहुफला + संज्ञायां कन् । अत इत्वम् ।) भूवदरी । इति राजनिर्घण्टः ॥

बहुफली, स्त्री. (बहुफल + ङीप ।) स्वर्णक्षीरः । इति राजनिर्घण्टः ॥ आमलकी । इति मेदिनी । ले, १५७ ॥

बहुभेना, स्त्री. (बहुः फेनो यस्याः ।) सातला । इति राजनिर्घण्टः ॥

बहुबलः, पुं, (बहु अतिशयं बलं यस्य ।) सिंहः । इति राजनिर्घण्टः ॥ अतिशयबलयुक्ते, त्रि ॥

बहुमञ्जरी, स्त्री, (बहवो मञ्जर्यो यस्याः ।) तुलसी । इति भावप्रकाशः ॥

बहुमलः, पुं. (बहूनि मलानि यस्य ।) सीसकम् । इति रत्नमाला ॥ अनेकमलयुक्ते, त्रि ॥

बहुमार्गः, स्त्री, (बह्वयो मार्गा यस्मिन् । चतुर्हिंषु पथसत्त्वात् तथात्वम् ।) चत्वरम् । इति हेमचन्द्रः । ४ । ५४ ॥ अनेकपथयुक्ते, त्रि ॥

बहुमूर्त्तिः, स्त्री, (बह्वी मूर्त्तिर्यस्याः ।) वनकार्पासः । इति शब्दचन्द्रिका ॥ नानाकारश्च ॥ (बहुमूर्त्तिधरः त्रि । पुं, शङ्करासवत् जन्तुविशेषः । बहुरूपी इति ख्यातः ॥ विष्णुः । यथा, महाभारते । १३ । १४८ । ६० ।

"अनेकमूर्त्तिरव्यक्तः शतमूर्त्तिः शतानन: ॥"

बहुमूर्द्धा, [न्] पुं, (बह्वयो मूर्द्धानो यस्य । "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" इति श्रुतेस्तथात्वम् ॥) विष्णुः । इति शब्दरत्नावली ॥

बहुमूलः, पुं, (बहूनि मूलानि यस्य ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (अस्य पर्य्यायो यथा,—

"इक्षुर्बहुमूलश्च वाटीदीर्घः सुरच्छदः ॥"

इति वैद्यकरत्नमालायाम् ॥)

श्लिष्णुः । स्थूलसरः । इति राजनिर्घण्टः ॥ अनेकमूलयुक्ते, त्रि ॥

बहुमूलकं, क्ली, (बहुमूल + कन् ।) उशीरम् । इति भावप्रकाशः ॥ (वीरणम् । तत्पर्य्यायो यथा, —

"खाडीरकं वीरणकवीरञ्च बहुमूलकम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बहुमूलकः, पुं, (बहुमूल एव । बहुमूल + स्वार्थे कन् ।) इक्षुः । इति जटाधरभूरिप्रयोगौ ॥

बहुमूला, स्त्री, (बहुमूल + टाप् ।) गुडाचरी । इति राजनिर्घण्टः ॥

बहुमूल्ली, स्त्री, (बहुमूल + ङीप् ।) भाकुची । इति राजनिर्घण्टः ॥

बहुमूल्यं, त्रि, (बहूनि मूल्यानि यस्य ।) महार्घवस्तु । तत्पर्य्यायः । महाघनम् २ । इत्यमरः । २ । ६ । ११३ ॥

बहुरश्मिका, स्त्री, (बहूनि रश्म्यादि यस्याः । बहुरश्मु + टाप् । संज्ञायां कन् । टापि अत इत्वम् ।) मेदा । इति राजनिर्घण्टः ॥

बहुरसा, स्त्री, (बहु रसो यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (रसवती स्त्री ॥)

बहुरहा, स्त्री, (बहु यथा तथा रोहतीति । बह् + क । टाप् ।) कन्दगुडूची । इति राजनिर्घण्टः ॥

बहुरूपः, पुं, (बहूनि रूपाणि यस्य ।) सर्जरसः । इत्यमरः । २ । ६ । १२८ ॥ शिवः । विष्णुः । कामदेवः । सरटः । इति मेदिनी । के, २७ ॥ ब्रह्मा । केशः । इति शब्दरत्नावली ॥ (रुद्रः । यथा, भागवते । ६ । ६ । १८ ।

"अजैकपादहिर्ब्रध्नो बहुरूपो महानिति ॥"

प्रियव्रतपुत्रस्य मेधातिथेः पुत्रभेदो वर्षभेदश्च । यथा, भागवते । ५ । २० । २५ । "तस्यापि प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः सोऽपि विभज्य सप्त वर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजव-मनोजव-पवमान-धूम्रानीक-चित्ररेफ बहुरूप-विश्वाधारसंज्ञान् ।" इति ॥) वृहद्विशेषः । इति त्रिकाण्डशेषः ॥ नानारूपयुक्ते, त्रि ॥ (यथा, मनुः । १ । ४८ ।

"तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना ॥")

बहुरूपकः, पुं, (बहुरूप + स्वार्थे कन् ।) जाहकजन्तुः । इति राजनिर्घण्टः ॥

बहुरूपा, स्त्री, (बहुरूपस्य शिवस्य स्त्री । टाप् ।) दुर्गा । यथा,—

"अरूपा परभावत्वाद्बहुरूपा क्रियात्मिका ।
जाता ग्रीलेन्द्रगेहे सा शैलराजसुता ततः ॥"

इति देवीपुराणे ४५ अध्यायः ॥

बहुरेखा स्त्री, (बह्वी बहुला रेखा करस्यादिचिह्नम् ।) प्रचुरदीर्घचिह्नम् । बहुरेखायुक्तानां दीर्घो यथा,—

"रेखाभिर्बहुभिः क्लेशं स्वल्पाभिर्धनहीनताम् ।
रक्ताभिः सुखमाप्नोति ज्ञाताभिः प्रेष्यतां व्रजेत्॥"

इति गारुडे ६४ अध्यायः ॥

बहुरेताः, [स्] पुं, (बहु रेतो यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

बहुरोमा, [न्] पुं, (बहूनि लोमानि यस्य ।) मेषः । इति शब्दरत्नावली । ८० ॥ लोमशे, त्रि ॥

बहुलं, क्ली, (बंहते वृद्धिं गच्छतीति । बंहि वृद्धौ कुलच् । नलोपश्च ।) आकाशम् । इति मेदिनी ॥ सितमरीचम् । इति राजनिर्घण्टः ॥

बहुलं, त्रि, (बहूनर्थान् लातीति । बहु + ला + क ।) प्रचुरम् । (यथा, मनुः । ४ । ६० ।

"नाधार्म्मिके वसेद्ग्रामे न चाधिबहुले भृशम् ॥")

क्षत्रियवर्णः । इति मेदिनी । ले, ११८ ॥

बहुलः, पुं, (बहूनर्थान् लातीति । बहु + ला + क ।) अग्निः । क्षत्रियश्चः । इति मेदिनी । ले, ११८ ॥ (यथा, कुमारे । ४ । १२ ।

"बहुलेऽपि गते निशाकर-
क्षतपुण्यां दुःखमग्न ! मोक्ष्यति ॥"

महादेवः । यथा, महाभारते ।१३। १७ ।१२८।

"मन्यामो बहुलो वायुः सकलः सर्व्वजोचनः ॥")

बहुलगन्धा स्त्री, (बहुलो गन्धो यस्याः ।) इला । इति राजनिर्घण्टः ॥

बहुलच्छदः, पुं, (बहूनि च्छदानि यस्य ।) रक्तशिग्रुः । इति राजनिर्घण्टः ॥

बहुलवर्णं, क्ली, (बहूनि लवणानि यस्मिन् ।) औषरकम् । इति राजनिर्घण्टः ॥

बहुला, स्त्री, (बहूनर्थान् लाति या । बहु + ला + क । टाप् ।) गोलिका । इला । (यथा,—

"इला लोला च बहुला एलोका त्रिपुटापि च ।
भद्रैला हरिद्रैला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

गौः । इति मेदिनी । ले, ११७ ॥ दुर्गाविशेषः । यथा,—

"इत्युक्ता सा तेन मुनिना निःश्वस्य रविमण्डलात् ।
बहुला नागता तूर्णं प्रह्वं मानसभूषणः ॥
प्रत्यक्षं तत्र सावित्री गायत्री बहुला तथा ।
सरस्वती च तुष्टा पद्मेना मानसाचले ॥"

इति कालिकापुराणे । २३ अध्यायः ॥ (नदीभेदः । यथा, मार्कण्डेये । ५७ । ३६ ।

"सौनाश्चैव तुखाराश्च बहुला वाह्लवो नराः ॥"

खनामख्याता उत्तमराजपत्नी । यथा, मत्स्ये । ६६ । ६ ।

"बाभ्रव्यां बहुलां नाम उपयेमे स धर्म्मवित् ।
उत्तानपादतनयः ध्रुवोमिन्न इवोत्तमः ॥")

बहुलाः, स्त्री. क्षत्रियकामलक्षणम् । विद्यबहुवचनान्तोऽयं शब्दः । इति मेदिनी । ले, ११७ ॥

बहुलीकृतं, त्रि, (अबहुलं बहुलं कृतम् । अभूततद्भावे च्विः ।) अपनीततुषधान्यादि । बड़ोलान इति भाषा । तत्पर्य्यायः । पूनम् २ । इत्यमरः । २ । ६ । २३ ॥ (विधूतौलीकृतम् । यथा, मार्कण्डेये । २१ । ६२ ।

"पराक्रमवता वीर ! त्वया तद्बहुलीकृतम् ॥")

बहुवल्कः, पुं, (बहूनि वल्कानि यस्य ।) पियालः । इति राजनिर्घण्टः ॥

बहुवल्ली, स्त्री, द्रोहिण्युपः । इति राजनिर्घण्टः ॥

बहुवारः, पुं, (बहूनि वारयतीति । बहु + वृ + णिच् + अण् ।) वृक्षविशेषः । बहुवार इति ख्यातः । तत्पर्य्यायः । प्रेङ्खुः २ प्रीतः ३ प्रेङ्खानः ४ प्रेङ्खातकः ५ उद्दालः ६ उद्दालकः ७ । इति शब्दरत्नावली ॥ सेतुः ८ । इत्यमरटीकायां भरतः ॥ अस्य फलगुणाः । शिफलत्वम् । प्रेङ्खालत्वम् । शुक्रकारित्वम् । गुरुत्वम् । दुर्जरत्वम् । मधुरत्वञ्च । इति राजवल्लभः ॥

बहुवारकः, पुं, (बहूनि वृक्षादीनि वारयतीति । बहु + वृ + णिच् + ण्वुल् ।) वृक्षविशेषः। (अस्य

गुणा बहुवारशब्दे उक्ताः। बहुवार इति ख्यातः। यथा, मनुसंहितायाः।५।६। श्लोकस्य टीकायां कुल्लूकभट्टः। "गोषु बहुवारकथनं गोभवं पेयूषं नवप्रसूतायाः गोः क्षीरमधिसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत्॥")

बहुविधः, त्रि, (बहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।८३॥ (यथा, गीतायाम्। ४।३२।

"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥")

बहुविलीर्णा, स्त्री, (बहु यथा स्यात् तथा विलीर्णा।) कुचिकाकृच्छः। इति शब्दचन्द्रिका॥ कुचर इति भाषा॥

बहुवीजं, क्ली, (बहूनि बीजानि यस्य।) गरुडगाछम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आढ्यशब्दे द्रष्टव्याः॥

बहुवीर्य्यः, पुं, (बहु वीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ नक्तमालीयवृक्षः। ग्लाक्षलिवृक्षः। मरुवः। इति राजनिर्घण्टः॥

बहुवीर्य्या, स्त्री, (बहु वीर्य्यं तेजो यस्याः।) भूम्यामलकी। इति राजनिर्घण्टः॥

बहुव्रीहिः, पुं, षट्समासान्तर्गतसमासविशेषः। (सुग्धबोधमते।) अस्य सांकेतिकसंज्ञा हः। यथा, अन्यार्थानां दानां हसंज्ञः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति बोपदेवः॥ स च तुल्याधिकरणानां पदानां अन्यार्थत्वे स्यादिति बोध्यम्। यथा पीताम्बरादि। भिन्नाधिकरणानान्तु पुत्राय धनमस्य ब्रियाय विद्या अस्य इत्यादौ न स्यात्। समासके इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः। एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्व्वं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं विलोचनः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरता क्वचित् क्वाप्यविशेषणं पूर्व्वं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन यथाश्रुतखेरगतेरिति। अदेखिनं भर्त्तुरपक्षितोदयमिति। स वृत्तचूड़स्खलकाकपक्षकैरित्यादि रघुः॥ सुखजातः सुरायौतो वृत्तगन्धो माल्यधारक इति। एवं जातदन्तः दृष्टजातः जातश्मश्रुः क्षतजातः पीतनेत्रः तैलपीतः पीतदृतः घृतपीतः ऊढभार्य्यः भार्य्योढ़ः मृतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अन्याहितः आहिताग्निः पुत्रजातः जातपुत्रः जातयामः यामजातः दुःखजातः जातदुःखः शङ्कुकर्णः कर्णशङ्कुः इत्यादि बोध्यम्। एवमुद्यतचक्रः चक्रोद्यतः उद्यतासिः असिद्यतः उद्यतगदः गदोद्यतः उद्यतखड्गः खड्गोद्यत इति। आयुधेभ्यो नित्यं पूर्व्वमिति जौमराः॥ यथा उद्यतचक्र इत्यादि। एवं सर्व्वनामसके

लात् पूर्व्वम्। सर्व्वेषां। संख्यासर्व्वनाम्नोः संख्यापूर्व्वं स्यात्। द्विपरः त्रिपूर्व्वः। सप्तम्यन्तमन्यादेः। सप्तम्यन्तं यदं पूर्व्वं स्यात्र चन्द्रादेः। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् क्षीरलुक्। चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूड़ः पद्मनाभः मूलपाणिः कुशहस्तः। प्रियो वा। गुड़प्रियः प्रियगुड़ः। किञ्च आरूढ़ो वानरो यं स आरूढ़वानरो वृक्षः। दृष्टः लक्षो येन स दृष्टलक्षो भक्तः। दत्ता भूमिर्यस्मै स दत्तभूमिर्द्विजः। निर्गताः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। बहूनि नक्षत्राणि यत्र तद्बहुनक्षत्रमाकाशम्। इति द्वितीयान्तान्यपदार्था बहुव्रीहयः सर्व्वैर्मन्यन्ते। स्वमते तु प्रथमान्तान्यपदार्थोऽपि यथा सह माघा वर्त्तते योऽसौ समाघकः एवं सपक्षकः सनामकः आक्षणमानिनीत्यादि। इति दुर्गादासः॥ * ॥ (बहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रभूतधान्ययुक्ते, त्रि। यथा,—

"इन्दो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष! कर्म्मधारय येनाहं स्यां बहुव्रीहिः॥"
इति प्राचीनाः॥

बहुशृङ्गः, पुं, (बहवः शृङ्गवो यस्य।) घटकः। इति शब्दचन्द्रिका॥ (बहुशृङ्गविशिष्टे, त्रि। स्तनीयायां निशौ पटोलभक्षणेन बहुशृङ्गुः स्यात्। यथा, तिथितत्त्वे।

"कुष्माण्डे चार्थहानिः स्यादृद्धौ न स्मरेद्धरिम्।
बहुशृङ्गुः पटोले स्यात् धनहानिस्तु मूलके॥")

बहुशः, अ, (बहूनि ददाति करोत्यादि वा। बहु+"बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्।" ५।४।४२। इति शस्।) बहूनि। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ५२।२८।

"कथ्यन्ते बहुशश्चैते पिता पुत्रत्रयञ्च यत्॥")

बहुशल्यः, पुं, (बहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

बहुशालः, पुं, (बहुभिः शालते इति। बहु+शाल+अच्।) खट्टी। इति राजनिर्घण्टः॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (बह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्विस्तारोऽवयवो वा यस्य।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ वेडुर्बाग्र इति भाषा॥ अनेकसन्ततियुक्ते, त्रि॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य।) विष्णुकन्दः। इति राजनिर्घण्टः॥

बहुसारः, पुं, (बहुः सारः क्षिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (बहुसार-

विशिष्टे, त्रि। यथा, शतपथब्राह्मणे। १२। ७।१।१॥ "स य एव बहुसारः॥")

बहुसुता, स्त्री, (बहुः सुतः सन्ततिर्मूलं वा यस्याः।) घृतमूली। इत्यमरः। २।४।१५॥

बहुसूः, स्त्री, (बहून् सूते या। बहु+सू+क्विप्।) शूकरी। इति शब्दरत्नावली॥ बहुप्रसवा च॥

बहुसूनिः, स्त्री, (बहुः सूनिः प्रसवो यस्याः।) बहुपत्या गौः। इत्यमरः। २।८।७॥ बहुसन्तानप्रसवा च॥

बहुसूवा, स्त्री, (बहु यथा स्यात् तथा सूयते या। बहु+सू+अच्। टाप्।) शूद्रकीदृक्षः। इति शब्दचन्द्रिका॥ अनेकसन्तानप्रसूता च॥

बहुस्वनः, पुं, (बहुः प्रचण्डः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

बहूपत्यः, पुं स्त्री, (बहूनि अपत्यानि यस्य।) शूकरः। मूषकः। इति राजनिर्घण्टः॥ बहुसन्तानयुक्ते, त्रि॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति। बहु+अश्+णिनि।) बहुभोजनशीलः। यथा, चाणक्ये। ६८।

"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च षडेते श्वानतो गुणाः॥"
(बह्वी आशा यस्य।) बह्वाशाविशिष्टः॥ (धृतराष्ट्रपुत्रविशेषे, पुं। यथा, महाभारते। १।११७।१६।

"आदित्यकेतुर्बह्वाशी नागदन्तोऽयशाय्यपि॥")

बह्वृक, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन्।) सूक्ते, क्ली। इति सुग्धबोधव्याकरणम्॥ "बह्व्य ऋचोऽधीनया येन इति व्युत्पत्त्या ऋग्वेदज्ञे ब्राह्मणे, पुं। यथा, मनुः। ३।१४५।

"यज्ञेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्॥"
केचित् बह्वृच इत्यकारान्तमिच्छन्ति॥)

बह्वृची, स्त्री, (बह्वृचस्य ऋग्वेदज्ञस्य पत्नी। बह्वृच+ङीप्।) ऋग्वेदज्ञपत्नी। इति जटाधरः॥ (बह्व्य ऋचोऽधीनया यया इति विग्रहे अधीयर्थनामाधीची स्त्री। अबह्वृचबह्वृचाभ्यां तयैवेति वचनात्। "ऋक्पूरब्धूःपथामानक्षे।" ५।४।७४। इत्यप्रत्ययः समासान्तः। "ओतश्च शरणैः सह" इति जातित्वात् ङीप्। यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुरा कल्पेऽस्तदासीत्। यथाह यमः।

"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति॥)

बा(वा)ढ़, क्व ड आप्तावे। स्थाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। आप्तावः उच्चस्थानम्। इति दुर्गादासः॥) बोपदेवेन अन्तःस्थवकारादौ सूचीतः॥ (बाढ़ते। अदिषत चढि न दृश्यः। अबबाढ़यत्॥)

बा(वा)ढ़व, क्ली, (बढ़वानां समूहः। बढ़वा+"खण्डिकादिभ्यश्च।" ४।२।४५। इत्यण्।) बढ़वासमूहः। इत्यमरः॥ (बढ़वाया इद-

मिति। वड्वा+अच्। वड्वासम्बन्धिनि, त्रि। यथा, स्मृतौ। २। ४५।
"दीपवीयमचक्षुष्यं वाड्वं दधि वातलम्॥")

वा(वा)ड्व:, पुं, (वाड्वं यज्ञान्तरालं वाति प्राप्नोतीति। वाड्+वा+क:।) ब्राह्मण:। (वड्वायां घोटक्यां जात:। वड्वा+अण्।) वड्वानल:। इत्यमर:॥ तत्पर्य्यायः। और्व्व: २ संवर्त्तक: ३ अग्नि: ४ वड्वामुख: ५। इति हेमचन्द्र:॥ (यथा, मार्कण्डेये। ६६। ६४।
"महोदधेर्ज्जठरगतश्च वाड्वो
भवान् विभूत्या परया करे स्थित:॥")

वा(वा)ड्वाग्नि:, पुं, (वड्वा समुद्रस्था घोटकी तत्सम्बन्धि:।) वड्वानल:। इति जटाधर:॥ (यथा, माघे। ११। ४५।
"पयसि सलिलराशेर्नक्तमन्तर्निमग्न:
स्फुटमनिशमतापि ज्वालया वाड्वाग्नि:॥")

वा(वा)ड्वाग्र्य:, पुं, (वाड्वेषु ब्राह्मणेषु अग्र्य:श्रेष्ठ:।) ब्राह्मणश्रेष्ठ:। यथा,—
"इत्याकर्ण्य वचस्तस्य वाड्वाग्र्यस्य धीमत:।
पप्रच्छ हृष्टमानस्कस्तीर्थयात्राविधिं मुनिम्॥"
इति पाद्मे पातालखण्डे १६ अध्याय:॥

वा(वा)ड्वेयौ, पुं, (वड्वाया घोटकरूपधारिण्या: सूर्य्यपत्न्या अपत्ये पुमांसौ। वड्वा+ढक्।) अश्विनीकुमारौ। इति शब्दमाला॥

वा(वा)ड्यं, क्ली, (वाड्वानां ब्राह्मणानां समूह:। वाड्व+"ब्राह्मणमाणवकवाड्वात् यत्।" ४।२। ४२। इति यत्।) ब्राह्मणसमूह:। इत्यमर:॥

वाड्विड्भव:, पुं, (वाड् ब्राह्मणं तस्मै हन्यते इति। वाड्+हन्+क्यु।) वार्त्ताकु:। इति रत्नमाला॥

वाढ्, क्ली, (वाह प्रयत्ने+क्त:। "शुभ्रस्वाम्नध्वान्तेति।" ७। २। १८। इति निपातनात् साधु:।) अतिशय:। (यथा, कथासरित्सागरे। २४। ६८।
"वाढं मया सा नगरी हृता विद्यार्थिना सता॥")

प्रतिज्ञा। इत्यमर:। ३। ३। ४४॥ वाढमित्यव्ययमपीति हेमा:। इति भरत:॥
"वाढं किमु दृढे क्षीवमनुमत्यामथ किमु॥"
इति नानार्थरत्नमाला॥
(सत्यम्। यथा, रघु:। १६। ५२।
"वाढमेतु दिवमेतु पार्थिव:
कर्म्म साधयति पुत्रजन्मने॥")

वा(वा)ढ:, पुं, (वहनं वाढ:। वह्+क्तस्याञ्चेति। वाढ+अच्।) अश्वविशेष:। सिर इति भाषा। तत्पर्य्यायः। पृथुनक्र: २ विग्रिय: ३ अजिम्मग: ४ खग: ५ आशुग: ६ कलम्ब: ७ मार्गण: ८ शर: ९ पत्री १० रोप: ११ इषु: १२। इत्यमर:। २। ८। ८६॥ चित्रपुङ्ख: १३ शायक: १४ वीरसर: १५ तूणशेड: १६ काण्ड: १७ विपर्ण्यक: १८ शर: १९ वाजी २० पत्रवाह: २१ अक्षकरञ्जक: २२॥ सौहित्यवाढस्य पर्य्यायः। प्रत्यूढनक: १ सोढनाड: २ नाराच: ३॥ निम्नगावाढस्य पर्य्यायः। प्रथित: १ निरक्ष: २॥ विषाक्तवाढस्य पर्य्यायः। तीक्ष्ण: १ विषक्त: २ दिग्ध: ३॥ तीरो विध्यजसायके। इति शब्दरत्नावली॥ ॥ (यथा, ऋग्वेदे। ६। ७५। १७।
"यत्र बाणा: संपतन्ति कुमारा विशिखा इव।
तत्रा नो ब्रह्मणस्पतिरदिति: शर्म्म यच्छतु
विश्वहा शर्म्म यच्छतु॥")

बलिराजस्य ज्येष्ठपुत्र:। यथा,—
"बले: पुत्रशतं ख्यातो बाणज्येष्ठस्ततो द्विजा:।
बाण: सहस्रबाहु: स्यात् सर्व्वास्त्रगुणसंयुत:॥
तपसा तोषितो यस्य पुरे वसति भूतभृक्।
महाकालत्वमगमत् स्वाम्यं यस्य पिनाकिन:॥"
इति मत्स्यपुराणे ५ अध्याय:॥
(अस्य जन्मादिविवरणन्तु बाणयुद्धशब्दे द्रष्टव्यम्। विस्तृतिस्तु हरिवंशे विष्णुपर्व्वणि १७३ अध्यायमारभ्य द्रष्टव्या॥) गोस्तन:। केवल:। इति मेदिनी। णे, २७॥ अग्नि:। इति त्रिकाण्डशेष:॥ काष्ठावयव:। इति विश्व:॥ भद्रमुञ्ज:। इति राजनिर्घण्टु:॥ (पुं, क्ली, नीलझिण्टी। इति वैद्यकरत्नमाला॥ यथा, माघे। ६। ४६।
"विकचवाणदलावलयोधिकं
रुरुचिरे रुचिरेक्षणविभ्रमा:॥"
वण्यते शब्द्यते इति। वण शब्दे+"वाकर्णेरिच्च कारके संज्ञायाम्।" ३। २। १६। इति घञ्। वाक्। इति निघण्टु:॥ इक्ष्वाकुवंशीयोऽयोध्याराज: स्वनामख्यातो विष्णुभक्ते: पुत्र:। यथा, रामायणे। १। ७०। २०—२३।
"इक्ष्वाकोस्तु सुत: श्रीमान् कुक्षिरित्येव विश्रुत:।
कुक्षेरथात्मज: श्रीमान् विकुक्षिरुदपद्यत॥
विकुक्षेस्तु महातेजा बाण: पुत्र: प्रतापवान्।
बाणस्य तु महातेजा अनरण्य: प्रतापवान्॥"
कादम्बरीप्रणेता कविविशेष:। यथा, कादम्बर्य्यां कविवंशवर्णने।
"सरस्वतीपाणिसरोजसम्भृत-
ग्रन्थदृष्टोमश्रमनोकराक्षत:।
यशोऽशुशुक्लीकृतसप्तविष्टपात्
सत: सुरो बाण इति व्यजायत॥
द्विजेन तेनाजनि कक्षकोक्षया
महाश्मशोमोहमलीमसाक्षया।
अलक्षवेदग्धविलासमुग्धया
धिया निबद्धेयमतिद्वयी कथा॥"
अयमेव हर्षचरितप्रणेता इति केचित्॥)

वा(वा)णगङ्गा, स्त्री, (बाणेन प्रकटिता गङ्गा नदी-विशेष:।) रावणबाणनिर्भिन्नसोमेश्वरगिरि-भवनदीविशेष:। यथा,—
"सोमेशाद्दक्षिणे भागे बाणेनाद्रिं विभिद्य वै।
रावणेन प्रकटिता जलधारातिपुण्यदा।
बाणगङ्गेति विख्याता या त्रिलोकपवित्रिणी॥
स्नात्वा तु बाणगङ्गायां दृष्ट्वा बाणेश्वरं विभुम्।
गङ्गास्नानफलं प्राप्य मोदते देववद्दिवि॥"

इति वाराहे सोमेश्वरादिलिङ्गमहिमावर्णनक्षेत्रमहिमा विवेकादिमहिमा नामाध्याय:॥

वा(वा)णदण्ड:, पुं, (बाणस्य दण्ड:।) बाणदण्ड:। तत्पर्य्यायः। वेमा २। इति हेमचन्द्र:॥

वा(वा)णपुङ्खा, स्त्री, (बाणस्य+पुङ्खा।) शरपुङ्खा। इति राजनिर्घण्टु:॥

वा(वा)णपुरं, क्ली, (बाणस्य राज्ञ: पुरं नगरम्।) बाणराजनगरम्। तत्पर्य्यायः। शैवीकोट: २ कोटीवर्षम् ३ ऊषावनम् ४ शोणितपुरम् ५। इति त्रिकाण्डशेष:॥ आषेयम् ६ ऊषावनम् ७ कोट्टवीपुरम् ८। इति शब्दरत्नावली॥

वा(वा)णभट्ट:, पुं, ग्रन्थकारविशेष:। (स तु बाण-सूर्य्यादिशतकप्रणेता।) "ननु मङ्गलं कथं क्रियते मङ्गलाद्विघ्नध्वंस: विघ्नध्वंसात् पारिप्सितसिद्धिरिति चेन्न। बाणभट्टादेर्मङ्गले सत्यपि ग्रन्थसमाप्त्यभावात् माघादौ मङ्गलाभावेऽपि समाप्तिदर्शनात्।" इति मुग्धबोधटीकायां दुर्गादास:।

वा(वा)णयुद्धं, क्ली, (बाणेन सह युद्धम्।) बाणराजेन सह श्रीकृष्णस्य संग्राम:। तस्य विवरणम्। यथा,—
श्रीशुक उवाच।
"बाण: पुत्रशतज्येष्ठो बलेरासीन्महात्मन:।
सहस्रबाहुर्यद्येन साक्षेत्रोक्षयमृच्छति॥
भगवान् सर्व्वभूतेश: शरण्यो भक्तवत्सल:।
वरेण्य श्छन्दयामास स तं वव्रे पुराधिपम्॥
स एकदाह गिरिशं पार्श्वस्थं वीर्य्यदुर्म्मद:।
किरीटेनार्कवर्णेन संस्पृशंस्तत्पदाम्बुजम्॥
नमस्ये त्वां महादेव! लोकानां गुरुमीश्वरम्।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम्॥
दो:सहस्रं त्वया दत्तं परं भाराय मेऽभवत्।
त्रिलोक्यां प्रतियोद्धारं न लभे लब्धते समम्॥
कण्डूत्या निभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम्।
आद्यायां चूर्णयन्नद्रीन् भीतास्तेऽपि प्रदुद्रुव:॥
तन् श्रुत्वा भगवान् क्रुद्ध: केतुस्ते भज्यते यदा।
त्वद्दर्पघ्नं भवेन्मूढ! संयुगं मत्तमेन तै॥
इत्युक्त: कुमतिस्तूष्णीं स्वगृहं प्राविशन्नृप!।
प्रतीक्षन् गिरिशादेशं स्वकीर्त्तिघ्नमधी: कुधी:॥
तस्योषा नाम दुहिता स्वप्ने प्रादुष्किता रतिम्।
कन्यालभत कान्तेन प्राग्दृष्टश्रुतेव सा॥
सा तत्र तमपश्यन्ती क्वासि कान्तेतिवादिनी।
सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशम्॥
बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता।
सख्यपृच्छत् सखीवृत्तां कौतूहलसमन्विता॥
कं त्वं मृगयसे! सुभ्रु! कीदृग्रूपो मनोरथ:।
हस्तग्राहं न तेऽद्यापि राजपुत्र्युपलक्षये॥
ऊषोवाच।
दृष्ट: कश्चिन्नर: स्वप्ने श्याम: कमललोचन:।
पीतवासा बृहद्बाहुर्योषितां हृदयङ्गम:॥
तमहं मृगये कान्तं पाययित्वाधरं मधु।
क्वापि यात: स्पृहयतीं क्षिप्त्वा मां हृदि मार्गये॥

चित्रलेखोवाच ।
अनन्यनेयेऽनेष्यामि विलोक्यां यदि भाषते ।
तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश ॥
इत्युक्ता देवगन्धर्वसिद्धचारणपन्नगान् ।
दैत्यविद्याधरान् यक्षान् मनुजांश्च यथालिखत् ॥
मनुजेषु च सा वृष्णीञ्छूरमानकदुन्दुभिम् ।
अनिरुद्धं विलिखितं वीक्षोषावाऽसुखी ह्रिया ।
सोऽवसाविति प्राह जयमाना मधीपते ! ॥
चित्रलेखा समाज्ञाय पौत्रं कृष्णस्य योगिनी ।
ययौ विहायसा राजन् ! द्वारकां कृष्णपालिताम् ॥
तत्र सुप्तं सुपर्यङ्के प्रद्युम्नं योगमास्थिता ।
गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥
सा च तं सुन्दरवरं विलोक्य सुरितावना ।
दुर्लक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समम् ॥
परार्ध्यवासः स्रगलंधूपदीपासनादिभिः ।
पानभोजनभक्ष्येश्च वाक्यैः सुश्रूषणार्चितः ॥
गूढः कन्यापुरे पुम्भिः प्रद्युम्नः कृष्णया तया ।
नाहर्गणान् स वुबुधे ऊषयापहृतेन्द्रियः ॥
तां तथा यदुवीरेण हृत्यमानां हृतत्रपाम् ।
वैतुभिर्लक्षयाञ्चक्रुरापीनां दुरवच्छदैः ॥
भटा आवेदयाञ्चक्रू राजंस्ते दुहितुर्व्रजम् ।
विचेष्टितं लक्षयामः कन्यायाः कुलदूषणम् ॥
अनपायिभिरस्माभिर्गुप्तायाश्च गृहे प्रभो ! ।
कन्याया दूषणं पुंभिर्दुष्प्रेक्षायाश्च विद्महे ॥
ततः प्रत्यवितो बाणो दुहितुः श्रुतदूषणः ।
त्वरितः कन्यकागारं प्राप्तोऽसाद्योदृयदूद्वहम् ॥
कामात्मजं तं भुवनैकसुन्दरं
श्यामं पिशङ्काम्बरमम्बुजेक्षणम् ।
दृढद्भुजं कुञ्चितकुन्तलत्विषा
स्मितावलोकेन च मण्डिताननम् ॥
दीव्यन्तमक्षैः प्रियया मृगयां
तदङ्गसङ्गस्नपकुङ्कुमस्रजम् ।
बाहोर्दधानं मधुमल्लिकाश्रितां
तस्याश्च आलीक्यमवेक्ष्य विस्मितः ॥
स तं प्रविष्टं भवनाततायिभि-
र्भटैरनेकैरवलोक्य माधवः ।
उद्यम्य मौर्वीं परिघं व्यवस्थितो
यथान्तको दण्डधरो जिघांसया ॥
जिघृक्षया तान् परितः प्रसर्पतः
शुनो यथा शूकरयूथपोऽहनत् ।
ते चक्रुरापतन्तो भवनाद्विनिर्गता
निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः ॥
तं नागपाशैर्बलिनन्दनो बली
घ्नन्तं स्वसैन्यं रुषितो बबन्ध ह ।
स्वसा भृशं शोकविषादविक्लवा
बद्धं निशम्याश्रुकलाक्षरोदीत् ॥"

इति श्रीभागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कन्धे बाणयुद्धे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीशुक उवाच ।
"अपश्यतात्मनिरुद्धं तद्भूनाथश्च भारत ! ।
चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म च ।
प्रययुः शोणितपुरं हृष्याः कृष्णदिदृक्षवः ॥
प्रद्युम्नो युयुधानश्च गदः साम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेता सर्वतो दिशम् ।
रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
बाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुहयोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
प्राद्युम्नस्य बाणपुत्रैश्च बाणेन सह सात्वतैः ॥
ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ।
गन्धर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
शङ्करानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ।
डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ॥
भूतमातृपिशाचांश्च कृष्णोऽस्त्रान् ब्रह्मरोचसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः प्रायुङ्क्त तेऽपि तान् ॥
पृथग्विधानि प्रायुङ्क्त गिरिशायुधजालानि प्राङ्मिषे ।
प्रत्यस्त्रैः शमयामास प्राङ्नारायणपार्षदः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्वतम् ।
आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वाथ गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
बाणस्य पृतनां शौरिर्व्यधमन्नासिभिः शितैः ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ।
असृग्विसृजन् गात्रेभ्यः शिखिना प्राद्रवद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेतुर्मुषलकार्दितौ ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्वशः ॥
वीक्षितं भगवान् स्वबलं हृष्टा बाणोऽत्यमर्षितः ।
जग्राम भगवान् संख्ये रथी द्विव्यं सात्यकिम् ॥
धनूंष्याकृष्य युगपद्बाणाः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोटवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया ॥
ततस्तिर्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ।
बाणस्य तावद्विरथश्छिन्नधन्वाविशत् पुरम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिराक्षिपात् ।
अभ्यधावत दाम्नाहं दहन्निव दिशो दश ॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजत् ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥
माहेश्वरः समाक्रन्दत् वैष्णवेन बलार्दितः ।
अलब्ध्वा भयमन्यत्र भीतो माहेश्वरो ज्वरः ॥
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।
नमामि त्वामजं शुद्धं परेशं
सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्नै-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहं ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥

श्रीभगवानुवाच ।
त्रिशिरस्ते प्रसन्नोऽहं यतु ते मज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्दनम् ॥
ततो बाहुसहस्रेण नानायुधधरो नृप ! ।
सुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः ॥
बाहुषु च्छिद्यमानेषु बाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥

श्रीरुद्र उवाच ।
त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मानमाकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बुरेतो
द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्वी ।
चन्द्रो मनो यस्य दृगर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बुवाहाः
केशा विरिञ्चो धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्म्म-
स्त्वं वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्मस्य गुप्त्यै जगतो भवाय ।
वयञ्च सर्वे भवतानुभाविता
विभावयामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्यः खदृग्धेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्वगुणप्रसिद्ध्या ॥
यथैव सूर्यः पिहितः स्वछायया
छायाञ्च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनञ्च भूमन् ॥

बलाबामोक्षितधिय: पुत्रदारमयादिषु ।
उन्मज्जन्ति निमज्जन्ति प्रवक्ता दधिगार्यवे ॥
देवदत्तमिमं लब्ध्वा इलोकमजितेन्द्रिय: ।
यो नादियेत तत्पादौ स प्रोच्यो ब्राह्मण-
बन्धक: ॥
बन्धो विद्यते मर्त्यं आत्मानं प्रियमीश्वरम् ।
विषयेष्वेन्द्रियार्थेषु विषमत्वाच्च तं त्यजेत् ॥
अहं ब्रह्मादय विबुधा तुलयन्त्यामलाशया: ।
सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरम् ॥
तं त्वां जगत्स्थित्युदयान्तहेतुं
समं प्रशान्तं सुहृदात्मदैवम् ।
अनन्यमेकं जगदात्मकेतुं
भवापवर्गाय भजाम देवम् ॥
अयं ममेष्टो दयितोऽनुवर्ती
मयाभयं दत्तमसह्य देव ! ।
सम्पाद्यतां तद्भवत: प्रसादो
यथा हि ते दैत्यपतौ प्रसाद: ॥
श्रीभगवानुवाच ।
यदात्थ भगवंस्तात: करवाम प्रियन्तव ।
भवतो यद्व्यवसितं तन्मे साध्वनुमोदितम् ॥
अवध्योऽयं ममाप्येष वैरोचनसुतोऽसुर: ।
प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वय: ॥
दर्पोपशमनायास्य प्रवृत्ता बाहवो मया ।
छिन्नश्च बलं भूरि यच्च भारायितं भुव: ॥
चत्वारोऽस्य सुता: शिष्टा भविष्यन्त्यजरामर: ।
पार्षदमुख्यो भवतो न कुतश्चिद्भयोऽसुर: ॥
इति लब्धाभयं लब्धं प्रणम्य शिरसासुर: ।
प्राञ्जलि रथमारोप्य स बन्धा सपुपानयत् ॥
अर्चोहिणया परिहृतं सुवास:समलङ्कृतम् ।
सपत्नीकं पुरस्कृत्य ययौ तदनुमोदित: ॥
स राजधानीं समलङ्कृतां ध्वजै-
र्मणारमेभूषितमार्गचत्वराम् ।
विवेश वाद्यानकदुन्दुभिस्वनै-
रभ्युद्यत: पौरसुहृज्ज्ञातिभि: ॥
य एतत् लब्धविजयं शङ्करेण च संयुगम् ।
संस्मरेत् प्रातरुत्थाय न तस्य स्यात् पराजय: ॥"
इति श्रीभागवते महापुराणे पारमहंस्यां
संहितायां वैयासिक्यां दशमस्कन्धे बाणासुर-
संग्रामे श्रीकृष्णविजयलक्षणनामोऽध्याय: ॥

बा(बा)णलिङ्गं, क्ली. (बाणार्चनार्थं लब्धं लिङ्गम् ।
अन्यास्य निरुक्तिरुक्ता हेमाद्रौ। यथा,—
"बाण: सदाशिवो देवो बाणो बाणान्तरो-
ऽपि च ।
तेन यस्मै लब्धं तस्माद्बाणलिङ्गमुदाहृतम् ॥")
नर्म्मदायामुद्भवश्चिह्नलिङ्गम् । तस्य विवरणम् ।
यथा,—
"नर्म्मदाजलमध्यस्थं बाणलिङ्गमिति स्मृतम् ।
बाणलिङ्गे स्वयम्भूते चक्रकालाङ्कयं स्थितम् ॥
बाणाख्यवृषभं कार्य्यं शुभ्रोर्णवेद्यभद्रगात् ।
बाणाख्याद्विभागोऽयं बाणलिङ्गे न विद्यते ।
तदर्पितं जलं बाणं बाणं प्रसादसंज्ञया ॥
शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभि: ।
यतश्च सर्व्वलिङ्गेभ्यस्तस्मि पूज्यतमं मतम् ॥
चतुरङ्गुलसुच्छ्रायं रम्यं वेदिकया युतम् ।
उत्तमं लिङ्गमाख्यातं पञ्चलक्षसुसाधितम् ॥
तदर्द्धं मध्यमं प्रोक्तं तदर्द्धमवरं स्मृतम् ।
तस्य न्यूनं पूजनीयं न कदापि न तत्फलम् ॥
यदाद्यं शिवलिङ्गञ्च स्थूलस्थूलं प्रशस्यते ।
बालग्रामो नार्म्मदश्च सूक्ष्मसूक्ष्मो विशिष्यते ॥"
पार्थिवादिलिङ्गापेक्षया बाणलिङ्गस्य श्रेष्ठत्वम्
यथा,—
"लोमजेषु तु लिङ्गेषु पार्थिवं श्रेष्ठमुच्यते ।
कठिनेषु तु पाषाणं पाषाणात् स्फाटिकं परम् ॥
स्फाटिकात् पद्मरागञ्च काश्मीरं पद्मरागत: ।
काश्मीरात् पुष्परागोत्थमिन्द्रनीलोद्भवं ततः ॥
इन्द्रनीलाच्च गोमेदं गोमेदाद्विद्रुमोद्भवम् ।
विद्रुमाच्चौल्लिकं श्रेष्ठं तस्मात् श्रेष्ठन्तु राजतम् ॥
हैरण्यं राजतात् श्रेष्ठं हैरण्याद्वैरकं वरम् ।
वैरकात् पारदं श्रेष्ठं बाणलिङ्गं ततः परम् ॥"
इति मेरुतन्त्रे ६ प्रकाश: ॥
अथ बाणलिङ्गलक्षणम् । वीरमित्रोदयधृत-
कालोत्तरे ।
"बाणलिङ्गं तथा ज्ञेयं मुक्तिमुक्तिप्रदायकम् ।
उत्पत्तिं बाणलिङ्गस्य लक्षणं शृणुत: मुने ॥
नर्म्मदादेविकायाञ्च गङ्गायमुनयोस्तथा ।
सन्ति पुण्यनदीनाञ्च बाणलिङ्गानि षण्मुख ! ॥
इन्द्रादिपूजितान्यत्र तच्चिह्नैर्विहितानि च ।
सदा सन्निहितस्तत्र शिव: सर्व्वार्थदायक: ।
इन्द्रलिङ्गानि ताम्राहु: साम्राज्यार्थप्रदानि च ॥"
इतीन्द्रलिङ्गलक्षणम् ॥
"आरुणं शिखकीलालसुच्छायार्थं करोत्यलम् ।
आग्नेयं तच्छक्तिनिभमथवा शक्तिलाञ्छितम् ।
इदं लिङ्गवरं ख्यात्य तेजसाधिपतिर्भवेत् ॥"
इत्याग्नेयलिङ्गलक्षणम् ॥
"दण्डाकारं भवेद् याम्यमथवा रसनाङ्कितं ।
यदृयदुक्तं सह तेन निर्मितं ज्ञायते तदा ।
निर्मितं निधनत्वेन क्रियते स्थापितेन तु ॥"
इति याम्यलिङ्गलक्षणम् ॥
"राक्षसं खड्गसदृशं ज्ञानयोगफलप्रदम् ।
कर्करादिप्रलिप्तन्तु कुण्डकुक्षियुतं तथा ।
राक्षसं निष्कृते लिङ्गं गार्हस्थे न सुखप्रदम् ॥"
इति नैर्ऋतलिङ्गलक्षणम् ॥
"वारुणं वर्त्तुलाकारं पाशाङ्कं चालिवर्जितम् ।
दृष्टं सुखादैर्वत्सलसंभोगाप्तन्तु मध्यगे ॥"
इति वारुणलिङ्गलक्षणम् ॥
"लक्षं ध्वजं नवारुक्षं ध्वजाभं ध्वजभूषणम् ।
मस्तके स्थापितं तस्य न्यूनन्यूनमितस्ततः ॥"
इति वायुलिङ्गलक्षणम् ॥
"तूणपाशगदाकारं गुह्यकैश्वर्य्य मध्यगम् ॥"
इति कुबेरलिङ्गलक्षणम् ॥
"दिनं वाप्यथवा रात्रिं ग्रस्याकृद्विकरैर्बलम् ।
अस्थिमूलाङ्कितं रौद्रं त्रिमुखत्वेन वर्त्तसम् ॥"
इति रौद्रलिङ्गलक्षणम् ॥
"चतुर्व्वर्त्तमयं वापि वैष्णवं ज्ञायतेऽथवा ।
वैष्णवं शङ्खचक्राङ्कगदाजादिविभूषितम् ॥
श्रीवत्सकौस्तुभाङ्कञ्च सर्व्वसिद्धासनाङ्कितम् ।
वैनतेयसमाङ्कं वा तथा विष्णुपदाङ्कितम् ॥
वैष्णवं नाम तत् प्रोक्तं सर्व्वैश्वर्य्यफलप्रदम् ॥"
इति वैष्णवलिङ्गलक्षणम् ॥
"ब्राह्मण्यादिसंस्थन्तु ब्रह्माङ्कं श्रीविवर्द्धनम् ।
पद्माङ्कं खड्गिकाङ्कं वा श्रीवत्साङ्कं विभूतये ॥"
इत्यपि वैष्णवलिङ्गलक्षणम् ॥
हेमाद्रिधृतलक्षणकाण्डे ।
नारद उवाच ।
"अथ वक्ष्यामि ते विप्रचिह्नमेकादशं परम् ।
अवज्ञादृश्यमं पापानि नाशमायान्ति तत्-
क्षणात् ॥
मधुपिङ्गलवर्णाभं ब्रह्मकुक्षलिकायुतम् ।
स्वयम्भुलिङ्गमाख्यातं सर्व्वसिद्धैर्निषेवितम् ॥
नानावर्णसमाकीर्णं जटामुकुटसमन्वितम् ।
ऋत्वङ्गयाङ्कयं लिङ्गं सुरासुरनमस्कृतम् ॥
दीर्घाकारं शुभ्रवर्णं ब्रह्मविष्णुसमन्वितम् ।
नीलकण्ठं समाख्यातं लिङ्गं पूज्यं सुरासुरैः ॥
शुक्लाभं शुक्लकेशञ्च नेत्रत्रयसमन्वितम् ।
त्रिलोचनं महादेवं सर्व्वपापप्रमोदनम् ॥
ज्वलल्लिङ्गं जटाजूटं ब्रह्माभं स्थूलविग्रहम् ।
कालाग्निरुद्रमाख्यातं सर्व्वसत्त्वैर्निषेवितम् ॥
मधुपिङ्गलवर्णाभं श्वेतयज्ञोपवीतकम् ।
श्वेतपद्मसमासीनं चन्द्ररेखाविभूषितम् ।
प्रलयाख्यसमायुक्तं त्रिपुरारिसमाश्रयम् ॥
शुभ्राभं पिङ्गलजटं मुक्तमालाधरं परम् ।
त्रिशूलधरमीशानं लिङ्गं सर्व्वार्थसाधनम् ॥
त्रिशूलडमरुधरं शुभ्ररक्ताङ्गभागत: ।
अर्द्धनारीश्वराख्यानं सर्व्वदेवैरभीष्टदम् ॥
ईषद्रक्तमयं कान्तं स्थूलं दीर्घं सुमुज्ज्वलम् ।
महाकालं समाख्यातं धर्म्मकामार्थमोक्षदम् ॥
एतत्तु कथितं तुभ्यं लिङ्गचिह्नं महर्षिभि: ।
एकेनैव कृतार्थ: स्यात् बहुभि: किमु सुव्रत ! ॥"
इति बाणलिङ्गचिह्नानि ॥
वीरमित्रोदयधृतकालोत्तरे ।
"उक्ताङ्कं श्रेयसे योज्यं शुभ्रोर्णमलं विवर्ज्जयेत् ।
यमवर्णन्तु यल्लिङ्गं यमाङ्कं वा कमण्डलुम् ॥
दण्डाङ्कं सूत्रचिह्नं वा ब्रह्मज्ञानान्वितं मतम् ।
शुभ्रिवर्णं महाकालं नन्दीशं पद्मरागवत् ॥
पद्मरागनिभं सर्व्वं महाभं सिद्धिपूजितम् ।
मौक्तिकाभं नीलनिभं रुद्रादिद्यै: प्रपूजितम् ॥
वसुदै: सेन्द्रयज्ञेशगुह्यकैर्यातुधानकै: ।
नानावर्णमयं नीलं शुभ्राङ्कमब्जप्रभम् ॥"
इति बाणलिङ्गलक्षणम् ॥
वीरमित्रोदयधृतम् ।
"इत्येतत् लक्षणं प्रोक्तं परीक्षातत्त्वकोविदै: ।
स्त्रिःसप्तप्रकारं वा तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं श्रेयं पाषाणसम्भवम् ॥"
तुलाकरणन्तु तण्डुलेन । अपरतुलादिषु तण्डुला
यदधिका: स्युस्तदा तल्लिङ्गं यद्विणां पूज्य-
मवधार्य्यं लिङ्गवेदधिकं तदोष्टशतपूज्यम्

इति किंवदन्तीति हेमाद्रिधृतलक्षणकाण्डे ॥
स्कन्दसंहितायाम् ।
"सप्तजन्मसुकाकृष्टं दृष्ट्वेति न हीयते ।
बाणलिङ्गमिति ख्यातं शैवं नार्मदमुच्यते ॥
त्रिपञ्चवारं यस्यैव तुलासाम्यं न जायते ।
तदा बाणं समाख्यातं शैवं पाषाणसम्भवम् ॥"
वीरमित्रोदये ।
"नर्मदा वा प्रक्षिपेद्यो यदा तदुपलभ्यते ।
बाणलिङ्गं तदा विद्धि स्थूलं सुखविवर्द्धनम् ॥"
इति बाणलिङ्गपरीक्षा ॥
बाणभूस्थूलपत्तिरपि तत्रैव ।
"अथ बाणं समाख्यानं यथा वक्ष्ये तथाशृणु ।
बाणः सदाशिवो देवो बाणो बाणान्तरोऽपि च ॥
तेन यत्नेन कर्तव्यं तस्माद्बाणलिङ्गसुदाहृतम् ।
सदा सन्निहितस्तत्र शिवः सर्वार्थदायकः ॥
स्तनप्रतिष्ठं तल्लिङ्गं बाणाख्येन शिवेन च ।
पङ्कजस्य फलाकारं कुड्मलस्य समाकृति ॥"
पङ्कजफलं पद्मबीजम् ॥ पङ्कजस्फुटाकारं कुड्मलं मुकुलं
टाक्षसमाकृतीति हेमाद्रिधृतलक्षणकाण्डे पाठः ।
"भुक्तिमुक्तिप्रदश्चैव बाणलिङ्गसुदाहृतम् ॥"
याज्ञवल्क्यसंहितायां देवीं प्रति शिववाक्यम् ।
"प्रशस्तं नार्मदं लिङ्गं पङ्कजस्फुलाकृति ।
मधुवर्णं तथा शुक्लं नीलं मरकतप्रभम् ॥
हंसहिङ्गुलाभं पुनः श्यामलायां प्रशस्यते ।
स्वयं संभवते लिङ्गं गिरितो नर्मदाजले ॥
पुरा बाणासुरेणाङ्गं प्रार्थितो नर्मदातटे ।
अविमुक्तं गिरौ तत्र लिङ्गरूपी महेश्वरः ।
बाणलिङ्गमपि ख्यातमतोऽर्थाच्छतगुणोत्तरम् ॥
अन्येषां कोटिलिङ्गानां पूजने यत् फलं लभेत् ।
तत् फलं लभते मर्त्यो बाणलिङ्गैकपूजनात् ॥"
तथा ।
"ताम्री वा स्फाटिकी स्वार्णी पाषाणी राजती तथा ।
वैदिकी च प्रकर्तव्या तत्र संस्थाप्य पूजयेत् ॥
प्रत्यहं योऽर्चयेल्लिङ्गं नार्मदं भक्तिभावतः ।
ऐहिकं किं फलं तस्य मुक्तिस्तस्य करे स्थिता ॥"
इति प्रत्यहबाणलिङ्गपूजाफलम् ॥
स्कन्दसंहितायाम् ।
"संस्थाप्य श्रीबाणलिङ्गं रत्नकोटिगुणं भवेत् ।
रत्नलिङ्गे ततो बाणात् फलं कोटिगुणं स्कन्दम् ॥
गुणान्तु रत्नलिङ्गस्य वक्तुं शक्नोति शङ्करी ।
सिद्धयो रत्नलिङ्गे स्युरखिलाद्याः सुसंस्थिताः ॥"
केदारखण्डे ।
"रत्नधातुमयान्येव लिङ्गानि कथितान्यपि ।
पवित्राण्येव पूज्यानि सर्वकामप्रदानि च ॥
एतेषामपि सर्वेषां काश्मीरं हि विशिष्यते ।
काश्मीरादपि लिङ्गाच्च बाणलिङ्गं विशिष्यते ॥
बाणलिङ्गात् परं नान्यत् पवित्रमिह दृश्यते ।
ऐहिकामुष्मिकं सर्वं पूजाकर्तुः प्रयच्छति ॥"
इति बाणलिङ्गप्रशंसा ॥
निम्बलिङ्गमाह तत्रैव ।
"सकृत्तैले बाणलिङ्गे तु पुत्रदारक्षयो भवेत् ।
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद्ध्रुवम् ॥
एकपार्श्वस्थिते धेनुपुत्रदारधनक्षयः ।
शिरसि स्फुटिते वापि व्याधिमरणमेव च ॥
छिद्रलिङ्गेऽर्चिते वापि विदेशगमनं भवेत् ।
लिङ्गं च कर्षितां दृष्ट्वा व्याधिमान् जायते पुमान् ।
अल्पवृत्तिविलाभे तु गोधनानां क्षयो भवेत् ॥"
हेमाद्रिधृतम् ।
"तीक्ष्णाग्रं वक्रपृष्ठं च त्रासलिङ्गं विवर्जयेत् ।
अतिस्थूलं चातिह्रस्वं स्वल्पं वा भूषणान्वितम् ।
गृहे विवर्जयेन्नाढक् तद्धि मोक्षार्थिनो
हितम् ॥"
इति दुष्टबाणलिङ्गलक्षणम् ॥
शुभलिङ्गमाह वीरमित्रोदये ।
"अर्धहं कपिलं लिङ्गं घनाभं मोक्षकाङ्क्षिणाम् ।
लघु वा कपिलं स्थूलं गृही नैवार्चयेत् क्वचित् ॥
पूजितव्यं गृहस्थेन वर्तुलं भ्रमरोपमम् ।
तनुसर्पीठमपीठं वा मन्त्रसंस्कारवर्जितम् ।
सिद्धिमुक्तिप्रदं लिङ्गं सर्वप्रासादपीठगम् ॥"
इति शुभबाणलिङ्गलक्षणम् ॥
स्कन्दसंहितायां भैरववाक्यम् ।
"बाणासुरः पुरा भद्रे ! शिवस्यातीव वल्लभः ।
जितः क्रोधोऽनुरक्तश्च शिवपूजाविधौ दृढः ॥
वह्निहो निपुणश्चैव शिल्पज्ञो लक्षणान्वितः ।
दिने दिने स्वयं दृष्ट्वा लिङ्गं स्थाप्य प्रपूजयेत् ॥
एवं वर्षशतं देवि ! दिव्यमानेन पूजयेत् ।
तदा लङ्गलिसुलभः प्रत्यक्षः शङ्करो भवेत् ॥
शङ्कर उवाच ।
तुष्टोऽहं तव हे बाण ! वरं ब्रूहि किमिच्छसि ।
शङ्करस्य वचः श्रुत्वा बाणो वचनमब्रवीत् ॥
यदि तुष्टोऽसि देवाय मह्यं त्वं मद्भक्तप्रिय ।
क्लिष्टोऽहं तव देवेश ! लिङ्गं कृत्वा दिने दिने ॥
तत्तल्लक्षणसंसिद्धलक्षणं शास्त्रनिर्मितम् ।
शास्त्रार्थो दुर्लभो देव ! सिद्धश्चार्थश्च दुर्लभः ॥
तस्माच्चं यदि मे तुष्टो लिङ्गं देहि सुलक्षणम् ।
सर्वकामप्रदानार्थं सर्वसत्त्वानुकम्पनम् ।
सर्वेषाञ्च हिताथाय प्रसादं कुरु शङ्कर ! ॥
इत्येवं वचनं तस्य शिवः परमकारुणम् ।
श्रुत्वा कैलासशृङ्गात् शङ्करेण विनिर्मिताः ॥
लिङ्गानां कोटिसंख्याश्च तथा चैव चतुर्दश ।
सिद्धलिङ्गं तदा तत्र सर्वं मङ्गल्यं स्वयम् ॥
अयोध्यैवं सुसम्पूर्णं बाणस्य च समर्पितम् ॥
अक्षय्यफलदं बाणं स्थाप्यमानञ्च सिद्धयः ।
संपूज्य बाणः सद्भावं ज्ञात्वा प्रणयनम्रधीः ॥
तद्भावं स्वपुरं नीत्वा नगं चिन्तयते शुचिः ।
अशक्यं यदि संसिद्धं स्थाप्यमानं दिने दिने ॥
मत्वानां सिद्धिहेत्वर्थं बाणस्थाने सुमेरवे ।
लिङ्गानां कालिकागर्त्ते सप्तिनासु त्रिकोटयः ॥
श्रीशैले कोटयस्तिस्रः कोट्येका कन्यकाश्रमे ।
माहेश्वरे च कोटिस्तु कन्यातीर्थे तु कोटिका ॥
मरुन्द्रे चैव नेपाले एकैका कोटिरेव च ।
बाणाख्यैर्यत् स्मृतं लिङ्गं बाणलिङ्गमतः स्मृतम् ॥
बाणो वा शिव एतुल्लक्षणत्वात् बाणमुच्यते ॥
तस्मात्तेन प्रदेशेन पुण्यस्थानेन तेन वा ।
स्थितं तच्छिवसन्नाहं शिवस्यान्तिकमिष्यते ॥"
हेमा तदाकृतिलक्षणवसुमत्यो।पि ।
"स्वयम्भुलिङ्गवज्ञाबलिङ्गं सुरे खरुक्षये ।
सहस्रफलमन्यस्मादृषया स्थापनपूजने ॥
श्रीशैले कालिकागर्त्ते लिङ्गानौ कन्यकाश्रमे ।
कन्यातीर्थे वने याने महेन्द्रे वा सुरेश्वरे ॥
स्थितानि बाणलिङ्गानि शिवेनैव कृतानि तु ॥"
सिद्धान्तशेखरे बाणलिङ्गान्यधिकृत्य ।
"नदनेकप्रकारं स्यादन्यवर्णमयोद्भवम् ।
लक्ष्मलक्षणविहीनञ्च बाणं तत् पृथुलाश्मकम् ॥"
बाणलिङ्गेष्वावाहनादि न कर्तव्यम् । तदुक्तं
भविष्ये ।
"बाणलिङ्गानि राजेन्द्र ! स्थितानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं न च ॥" इति
योगसारे पञ्चमपरिच्छेदे ।
"ब्राह्मे मुहूर्ते चोत्थाय यः स्मरेद्बाणलिङ्गकम् ।
सर्वत्र जयमाप्नोति सत्यं सत्यं महेश्वर ! ॥"
अथ बाणलिङ्गध्यानं तत्रैव ।
ॐ प्रणवं मुक्तिसंयुक्तं बाणाख्यञ्च महाप्रभम् ।
कामबाजान्वितं देवि संसारदहनक्षमम् ॥
यद्वकारादिसोजातं बाणाख्यं परमेश्वरम् ।
एवं ध्यात्वा बाणलिङ्गं यजेत्तं परमं शिवम् ॥
मनसा गन्धपुष्पाद्यैः संपूज्यास्त्रं मनुं स्मरेत् ॥"
तथा ।
"प्राणायामं ततः कृत्वा बाणलिङ्गन्तु तोषयेत् ।
तदिष्टदेवमोंकारं विभाव्य वाग्भवं जपेत् ॥
ततो जपं समाप्याथ स्तवेनानेन तोषयेत् ॥"
अथ स्तवः ।
"ॐ बाणलिङ्ग महाभाग संसाराब्धेर्हि मां प्रभो ! ॥
नमस्ते योगरूपाय नमस्ते यज्ञयोनये ॥
संसाराकारिणे तुभ्यं नमस्ते ज्ञानरूपधृक ।
प्रमत्ताय महेन्द्राय कालरूपाय वै नमः ॥
दक्षनाय नमस्तुभ्यं नमस्ते योगकारिणे ।
भोगिनां भोगकर्त्रे च मोक्षदात्रे नमो नमः ॥
नमः कामाङ्गनाशाय नमः कलुषहारिणे ।
नमो विश्वप्रदात्रे च नमो विश्वस्वरूपिणे ॥
बाणस्य वरदात्रे च रावणस्य क्षयाय च ।
रामस्यानुग्रहार्थाय राज्याय भरतस्य च ॥
सुरेभ्यो यागदात्रे च राक्षसानां क्षयाय च ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥
ॐ दाक्षिकाग्नियुक्ताय महामायाप्रियाय च ।
भगप्रियाय सर्वाय वैरिणां निग्रहाय च ॥
परिव्राजाय योगिनां कौलिकानां प्रियाय च ।
कुलाङ्गनानां भक्ताय कुलाचाररताय च ॥
कुलभक्ताय योगाय नमो नारायणाय च ।
मधुपानप्रमत्ताय योगेशाय नमो नमः ॥
कुलनिन्दाप्रणाशाय कौलिकानां सुखाय च ।
कुलयोगाय शिष्टाय शुद्धाय परमात्मने ॥
परमात्मस्वरूपाय लिङ्गमूलालयाय च ।
सर्वेश्वराय सर्वाय शिवाय शिवेशाय च ॥
इदमेतत् परमं स्तवं बाणलिङ्गस्य शङ्कर ! ।

यः पठेत् वाणकग्रेहो गाणपत्यं लभेत सः ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
वाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ॥
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ॥
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
वाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
वाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पश्चनां यज्ञनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यं यं नाराधयेद्देवं सर्व्वं तन्निष्फलं भवेत् ॥"

इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीश्वरसंवादे वाणलिङ्गस्तोत्रं समाप्तम् ॥

वा(बा)णधारः, पुं. (बाणं परसुरूपहरं धारयतीति । धृ + णिच् + अण् ।) भटाद्योलाङ्गुलिमन्नाहः । तत्पर्य्यायः । वारवाणः २ वारणः ३ । इति शब्दरत्नावली ॥ चौलक ४ । इति हारावली । १६७ ॥ (स्त्रीवेऽपि ङीष्यते । यथा, सुश्रुते । ४ । २४ ।
"वाणधारं स्त्रजावर्णनैकोबलविवर्द्धनम् ॥")

वा(बा)णसुता, स्त्री, (बाणस्य बाणासुरस्य सुता ।) ऊषा । इति शब्दरत्नावली ॥

वा(बा)णहा, [न्] पुं, (बाणं बाणासुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

वा(बा)णा, स्त्री, पुं, (वण्यते शब्द्यते इति । वण + घञ् । टाप् ।) नीलझिण्टी । इत्यमरः । २ । ४ । ७४ ॥

वा(बा)णा, स्त्री, बाणमूलम् । इति मेदिनी । णे, २७ ॥

वा(बा)णारिः, पुं, (बाणस्य बाणासुरस्य अरिः ।) विष्णुः । इति केचित् ॥

वा(बा)णाश्रयः, पुं, (बाणस्याश्रयः ।) धनुः । इति हलायुधः ॥

वा(बा)णासनं, क्ली, (बाणस्य आसनम् ।) धनुः । इति हलायुधः ॥

वा(बा)णिजः, पुं, (वणिजेव । वणिज् + अण् ।) वणिक् । इत्यमरः ॥ वाड्वाग्निः । इति त्रिकाण्डशेषः ॥

वा(बा)णिजिकः, पुं, (वणिजेव । वणिज् + ठक् ।) वाड्वाग्निः । वणिक् । इति मेदिनी ॥ (वाणिजकोऽप्यत्र । यथा, मनुः । ६ ।२८१ ।
"यत्तु वाणिजके दद्यात् नेह नामुत्र तत्फलेत् ॥")
धूर्त्तः । इति शब्दरत्नावली ॥

वा(बा)णिज्य,क्ली,(वणिजो भावः कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिभेदः । इत्यमरः ॥ वणिजः कर्म्म भावो वा । वाणिज्येऽपि दृश्यते । इति भरतः ॥ तत्पर्य्यायः । सत्याकृतम् २ वाणिज्या ३ वणिक्पथः ४ । इति जटाधरः ॥ (यथा, मार्कण्डेये । ५१ । ५४ ।
"श्रद्धां वाणिज्यलाभे च ग्लानिं कुर्व्वन्तु मे सदा ॥")

क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
"मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विगुणं दण्डौ हानौ च कल्पितम् ॥"

यः पुनर्वणिक् औष्ट्रिकार्पासादेः पण्यस्याष्टमांशं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पणानां द्विगुणं दण्डनीयः । अपहृतस्य पुनर्दानस्य दण्डौ हानौ च दण्डस्यापि दण्डिहानौ कल्पेत् ॥

"भेषजस्नेहलवणगन्धधान्यगुडादिषु ।
पण्येषु प्रक्षिपन् क्षोमं पणान् दाप्यस्तु षोडश ॥"

भेषजमौषधद्रव्यं स्नेहो घृतादिः गन्धद्रव्यसुधीरादि व्यादिशब्दाद्विद्रुमरिचादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दण्डः ॥

किञ्च ।
"स्त्रक्चन्दनमणिस्तूचाय:काष्ठवल्कलवाससाम् ।
अजानतो जानतश्च विक्रेयाष्टगुणो दमः ॥"

न विद्यते बहुमूल्या जातिर्यस्मिन् स्त्रक्चन्दनादिके सदृजातिः तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन स्फटिकायां सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कार्पासपटे वर्णोत्कर्षाधानेन रक्तमिति विल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्यं लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य दृष्यस्तच्चर्म्मादेः पण्यस्याष्टगुणो दण्डो वेदितव्यः ॥

"सदृशपरिवर्त्तेन सारभाण्डस्य क्षत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विगुणो दण्डो मूल्यदृष्टौ च तद्विगुणः ॥"

सदृशं भिन्नाभं सूत्रेण सह वर्त्तत इति सदृशं करण्डकम् । परिवर्त्तनं व्यत्यासः । योऽन्यदेव सूत्रानां पूर्णं करण्डकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूलभूते पणे भिन्ने न्यूने न्यूनपणमूल्यमिति । यावत्तस्मिन् कृत्रिमे विक्रीयते पञ्चाशत्पणो दण्डः पणमूल्ये पुनः शतं द्विपणमूल्ये द्विगुणो दण्ड इत्येवं मूल्यदृष्टौ दण्डवृद्धिरनेया ॥ * ॥ वणिजः प्रत्याह ।
"सभूय कुर्व्वतामर्घं सवार्थकारग्रहिष्यताम् ।
अर्घस्य क्षयं वृद्धिं वा जानतां दम उत्तमः ॥"

राजनिरूपितार्घस्य क्षयं वृद्धिं वा जानतोऽपि वणिजः सभूय मिलित्वा कारूणां रजकादीनां ग्रहिष्यतां चित्रकरादीनां सवार्थं पौढाकरमर्घान्तरं लाभलोभात् कुर्व्वतः पञ्चसाहसं दण्डनीयाः ॥ * ॥ किञ्च ।
"सभूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहसः ॥"

ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थ्यमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभिः ॥ * ॥ केन पुनरर्घेण पणितव्यमित्याह ।
"राजनि ख्याप्यते योऽर्घः प्रत्यहं तेन विक्रयः ।
क्रयो वा निखवस्तस्माद्वणिजां लाभसत्क्षतः ॥"

राजनि सन्निहिते सति यस्तेनार्घः ख्याप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्यः । निर्गतः स्रवो निस्रवोऽवयवः तस्माद्राजनिरूपितादयो निस्रवः स एव वणिजां लाभकारी न पुनः स्वच्छन्दपरिकल्पितात् । मनुना चार्घकरणे विशेषो दर्शितः ।
"पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्व्वीत नृपतिः प्रत्यक्षमर्घसंस्थापनं नृप ! ॥"

इति ।

किञ्च ।
"स्वदेशपण्ये च गृहं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु यः सद्यः क्रयविक्रयी ॥"

स्वदेशप्राप्तपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं गृहं पणयुते पणपञ्चकं लाभं गृह्णीयात् । परदेशप्राप्ते पुनः पण्ये गृहपञ्चकमूल्ये दशपणान् लाभं गृह्णीयात् । यस्य पण्यस्य यद्दिवस एव विक्रयः सम्पद्यते । यः पुनः कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्षः कल्प्यः । एवञ्च यथार्घे निरूपिते पणयुते पञ्चपणो लाभो भवति तथैवार्घे राज्ञा स्वदेशपण्यविषये स्थापनीयः ॥ * ॥ परदेशपण्ये अर्घनिरूपणप्रकारमाह ।
"पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अघाटगुणयुक्तन्तु कार्य्यः क्रेतुर्विक्रेतुरेव च ॥"

देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डयन्त्रणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगण्य पण्यमूल्येन सह मेलयित्वा यथा पणयुते दशपणो लाभः सम्पद्यते तथा क्रेतृविक्रेतोरनुग्रहकाम्योऽर्घो राज्ञा स्थापनीयः ॥ * ॥ प्रासङ्गिकं परिसमाप्याधुना विक्रीयासम्प्रदानमभ्युक्रमते । तत्स्वरूपं नारदेनाभिहितम् ।
"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥"

तच्च विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुनः षड्विधत्वं तेनैव प्रत्यपादि ।
"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा ।

षड्विधस्तस्य तु वृधेर्दानादानविधि: स्मृत: ॥
गणिकं तुलिमं मेयं क्रियया रूपत: श्रिया ॥"
इति ॥
गणिकं क्रमुकफलादि। तुलिमं कुङ्कुमादि। मेयं घृताद्यादि। क्रियया वाहदोहादिरूपयो-पलक्षितमश्वमहिष्यादि। रूपत: पण्याङ्गनादि। श्रिया दीप्त्या मरकतपद्मरागादि ॥*॥ इत्येतत् षट्प्रकारमपि पण्यं विक्रीयासंप्रयच्छतो दण्डमाह।
"गृहीतमूल्यं य: पण्यं क्रेतुर्नैव प्रयच्छति।
सोदयं तस्य दाप्योऽसौ दिनाभं वा दिनागते॥"
गृहीतं मूल्यं यस्य पण्यस्य विक्रेता तद्गृहीत-मूल्यं तद्यदि विक्रेता प्रार्थ्यमानाय स्वदेशग्रामिणे क्रेत्रे न समर्पयति। तच्च पण्यं यदि क्रयकाले बहुमूल्यं सत् कालान्तरेऽल्पमूल्यमेव लभ्यते तदार्घह्रासजनितोय उदयो वृद्धि: पण्यस्य स्थावरजङ्गमात्मकस्य तेन सहितं पण्यं विक्रेता क्रेत्रे दापनीय:। यदा मूल्यह्रासजन: पण्यस्योदयो नास्ति किन्तु क्रयकाले यावदेव यतो मूल्यस्येयत्पण्यमिति प्रतिपन्नं तावदेव तदा तत् पण्यमादाय तस्मिन् देशे विक्रीयमाणस्य यो लाभस्तेनोदयेन सहितं द्विकं त्रिकमित्यादि प्रतिपादितवृद्धिरूपोदयेन वा सहितं क्रेत्रे दापयेत्। स्थावरजङ्गमात्मकस्य पण्यस्य क्रयकालापेक्षया देशान्तरे विक्रयकाले मूल्यवृद्धिर्यदि भवति तदा क्रेतुरेव सा वृद्धि: पण्यवृद्धिरिति न विक्रेतु: किञ्चिदपि दातव्यम्। ॥*॥ यदाह नारद:।
"अर्घवृद्धेर्हीयेन सोदयं पण्यमावहेत्।
स्थानिनामेष नियमो दिनाभं दिनिवारिणाम्॥"
इति ॥
यदा त्वर्घमहत्त्वेन पण्यस्य न्यूनभावस्तदा तस्मिन् पण्ये वस्त्रगृहादिके य उपभोग: तदाच्छादनसुखनिवासादिरूपो विक्रेतुरुक्त-सहितं पण्यमसौ दाप्य:। यदाह नारद:।
"विक्रीय पण्यं मूल्येन य: क्रेतुर्न प्रयच्छति।
स्थावरस्य व्ययं दाप्यो जङ्गमस्य क्रियाफलम्॥"
इति ॥
विक्रेतुरुपभोग: व्यय उच्यते। क्रेतु: सम्बन्धि-त्वेन क्रीयमाणत्वान्न पुन: कुत्रचिन्नगृह्यघाता-दिरूप:। तस्य तु।
"उपहन्येत वा पण्यं दह्येतापहियेत वा।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छत:॥"
इत्यनेनोक्तत्वात्।
यदा त्वसौ क्रेता देशान्तरात् पण्यमहणार्थ-मागतस्तदा तत् पण्यमादाय देशान्तरे विक्री-यमाणस्य यो लाभस्तेन सहितं पण्यं विक्रेता क्रेत्रे दापयितव्य:। अथ च क्रीतपण्यसमर्पण-नियमोऽनुग्रयाभावे द्रष्टव्य:। सति त्वनुग्रये क्रीत्वा विक्रीय वा किञ्चिदित्यादि मनूक्तं वेदितव्यम् ॥*॥ किञ्च।
"विक्रीतमपि विक्रेयं पूर्वक्रेतर्यथोच्यते।
हानिश्चेत् क्रेतृदोषेण क्रेतुरेव हि सा भवेत्॥"
यदा पुनर्नातानुग्रय: क्रेता पण्यं न जिघृक्षति तदा विक्रीतमपि पण्यं अन्यत्र विक्रेयम्। यदा पुनर्विक्रेत्रा दीयमानं क्रेता न गृह्णाति तच्च पण्यं राजदैविकेनोपहतं तदा क्रेतुरेवासौ हानिर्भवेत्। पण्यात्मद्रव्यरूपेण क्रेतृदोषेण नाशितत्वात् ॥*॥ अपि च।
"राजदैवोपघातेन पण्ये दोषमुपागते।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छत:॥"
यदा पुन: क्रेत्रा प्रार्थ्यमानमपि पण्यं विक्रेता न समर्पयति अज्ञातानुग्रयोऽपि तच्च राज-दैविकेनोपहतं भवति तदासौ हानिर्विक्रेतुरे-वानोऽन्यद्दुष्टं पण्यं विनष्टसदृशं क्रेत्रे देयम्॥ किञ्च।
"अन्यहस्ते च विक्रीतं दुष्टं वा दुष्यदूयदि।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्॥"
य: पुनर्विनैवानुग्रयमेकस्य हस्ते विक्रीतं पुन रन्यस्य हस्ते विक्रीणीते सदोषं वा पण्यं प्राच्छा-दितदोषं विक्रीणीते तदा तत्पण्यमूल्यात् द्विगुणो दमो वेदितव्य:। ॥*॥ नारदेनाप्यत्र विशेषो दर्शित:।
"अन्यहस्ते तु विक्रीय योऽन्यस्मै तत्प्रयच्छति।
द्रव्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु॥
निर्दोषं दर्शयित्वा तु सदोषं य: प्रयच्छति।
स मूल्याद्द्विगुणं दाप्यो विनयं तावदेव ते॥"
इति ॥
सर्वत्रायं विधिर्दत्तमूल्ये पण्ये द्रष्टव्य:। अदत्त-मूल्ये पुन: पण्ये वाङ्मात्रक्रये क्रेतृविक्रेत्रो-र्नियमकारिण: समयादृते प्रवृत्तौ निवृत्तौ वा न कश्चिद्दोष:॥ *॥ यदाह नारद:।
"दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तित:।
अदत्तेऽन्यत्र समयान्न विक्रेतुरविक्रय:॥" इति॥
विक्रयानुग्रयोरभिहित: क्रीतानुग्रयस्वरूपं तु प्राक् प्रपञ्चितमधुना तदुभयसाधारणं धर्म्म-माह।
"नयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुग्रय: कार्य: कुर्वन् षड्भागदण्ड-भाक्॥"
परीक्षितक्रीतपण्यानां क्रयोत्तरकालं क्रय-कालपरिमाणतोऽर्घवृद्धानां वृद्धिमपश्यता क्रेत्रा-नुग्रयो न कार्य:। विक्रेत्रा च महार्घनियन्त्रणं पण्यस्यापश्यता नानुग्रयितव्यम्। वृद्धिनय-परिज्ञाने पुन: क्रेतृविक्रेत्रोरनुग्रयो भवतीति यतिरेकादुक्तमवति। अनुग्रयकालावधिश्च नारदेनोक्त:।
"क्रीत्वा मूल्येन य: पण्यं दु:क्रीतं मन्यते क्रयी।
विक्रेतु: प्रतिदेयं तत् तस्मिन्नेवाहनि विक्षतम्॥
द्वितीयेऽह्नि ददत् क्रेता मूल्याच्चिंशांशमा-पदेन।
द्विगुणस्तु तृतीयेऽह्नि पुरत: क्रेतुरेव तत्॥"
इति ॥
अपरीक्षितक्रयविक्रये पुन: पण्यवैगुण्यनिबन्ध-नानुग्रयावधि र्दृष्टैकपक्षसमाहेत्यादिना दर्शित एव। तदनया वाचो युक्त्या वृद्धिनयपरिज्ञान-स्यानुग्रयकारणत्वमवगम्यते। यथा पण्यपरी-क्षाविधिबलात् पण्यदोषाणां अत: पण्यदोषे

तदृद्धिनयकारणचिन्तयाभावेऽनुग्रयकालाभ्य-न्तरेऽपि यद्यनुग्रयं करोति तदा पण्यषड्भागं दण्डनीय:। अनुग्रयकारणसद्भावेऽपि अनुग्रय-कालातिक्रमेणानुग्रयं कुर्वतोऽप्ययमेव दण्ड:। उपभोगेनाविनश्वरेषु स्थिरार्घेष्वनुग्रयकालाति-क्रमेणानुग्रयं कुर्वतो मनूक्तो दण्डो द्रष्टव्य:।
"परेण तु दशाहस्य न दद्यान्नापि दापयेत्।
आददानो ददच्चैव राज्ञा दण्ड्य: शतानि षट्॥"
इति मिताक्षरायां विक्रीयासम्प्रदानं नाम प्रकरणम्॥
अथ क्रयशक्ति:।
"कृषीदलधिवाणिज्यं प्रकुर्वीतास्वयं क्षतम्।
आपत्काले स्वयं कुर्वन् नैनसा लिप्यते द्विज:॥
लब्धलाभ: पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्।
ते तुष्टास्तस्य तं दोषं शमयन्ति न संशय:॥
वणिक् कृषीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्।
वणिक् कृषीन्यदोष: स्यात् ब्राह्मणाग्राच्च पूज-नात्॥"
इत्याह्निकतत्त्वम्॥
वा(वा)णिज्या, स्त्री, (वाणिज्य+टाप्। अभिधा-नात् स्त्रीत्वम्।) वाणिज्यम्। इति जटाधर:॥
वा(वा)ध, क्र उ विहतौ। इति कविकल्पद्रुम:॥ (भ्वा०-आत्म०-सक०-सेट्।) क्र, बाधते। ऊर्जं न सर्वेष्वधिको बबाधे। इति रघु:॥ २।१४॥ इति दुर्गादास:॥
वा(वा)धक:, पुं, (वा(वा)धते इति। बाध+ण्वुल्।) स्त्रीरोगविशेष:। यथा,—
"रक्तमार्गो तथा घण्टी चाकुरी जलकुमारक:।
चतुर्विधो बाधक: स्यात् स्त्रीणां सुनिविभाषित:॥
तेषां स्वभावं वक्ष्यामि यथाग्राह्यं विधानत:।
एतेषां पूजनं कार्यं जनै: सन्तानकाङ्क्षिभि:॥
नि:सारणं स्थापनञ्च बलिदानं जपस्तथा।
कर्त्तव्यो गुरुवाक्येन यथाग्राह्यं विचक्षणै:॥
चतुर्विधो बाधकस्तु जायते ऋतुकालत:॥"
तस्य लक्षणं यथा,—
"यथा कक्षा तथा नाभेरध: पार्श्वे स्तनेऽपि च।
रक्तमार्गोप्रदोषेण जायते फलहीनता॥
मासमेकं द्वयं वापि ऋतुयोगो भवेद्यदि।
रक्तमार्गोप्रदोषेण फलहीना तदा भवेत्॥"
इति रक्तमार्गा:॥
"नेत्रे हस्ते भवेज्ज्वाला योनौ चैव विशेषत:।
लालासंयुतरक्तञ्च घण्टीबाधकयोगत:॥
मासैकेन भवेद्यस्या ऋतुस्नानद्वयं तथा।
मलिना रक्तयोनि: स्यात् घण्टीबाधकयोगत:॥"
इति घण्टा:॥

"उद्वेगो गुरुता देहे रसस्रावो भवेद्ध्रुवम् ।
नासेरधो भवेन् मूलं चाङ्कुरः स तु बाधकः ॥
ऋतुहीना चतुर्मासं त्रिमासं वा भवेद्यदि ।
ज्ञयाङ्गी नरपादे च ज्वाला चाङ्कुरयोगतः ॥"
इति चाङ्कुरस्य ॥
"समूला च सगर्भा च मुष्कदेहाग्ररक्षिका ।
जलकुमारस्य दोषेण जायते बलहीनता ॥
या ज्ञयाङ्गी भवेत् स्थूला बहुकालऋतुस्रुता ।
गुरुस्रावी खल्परक्ता जलकुमारस्य दूषणात् ॥"
इति जलकुमारस्य ॥
इति वैद्यकम् ॥ बाधाजनके, त्रि ॥ (यथा, मार्कण्डेये । ३४ । १६ ।
"धर्म्मो धर्म्मानुबन्धार्थो धर्म्मो नाशार्थ-
बाधकः ॥")

बा(वा)धर्न, क्ली, (बाध + ल्युट् ।) पीड़ा । इति शब्दरत्नावली ॥ प्रतिबन्धकत्व ॥ (बाधते इति । बाध + ल्युः । पीड़ादातरि प्रतिबन्धके च त्रि । यथा, हरिवंशे । ६५ । ५३ ।
"श्रुतां कथयिष्यामि यत्तोभौ शत्रुबाधनौ ॥")

बा(वा)धा, स्त्री,(बाध + टाप् ।) पीड़ा । इत्यमरः । २ । ६ । ३ ॥ (यथा, मार्कण्डेये । २७ । ३ ।
"दुर्वृत्ता: सन्ति शतशो ज्ञातवः पापयोनयः ।
तेभ्यो न स्यात् यथा बाधा तथा नीतं त्वं तथा
कुरु ॥")

निषेधः । इति हेमचन्द्रः ॥

बा(वा)धिनः, त्रि, (बाध + क्त ।) बाधायुक्तः । निवर्त्तः । यथा । मङ्गलनविघ्ननिषेधेन यद्बाधितं तद्बाधितमेव । इति सुबोधटीकायां दुर्गादासः ॥

बाधिर्य्यं, क्ली, (बधिरस्य भावः । बधिर + ष्यञ् ।) बधिरस्य भावः । कर्णरोगविशेषः । तस्य निदानम् । यथा,—
"यदा शब्दवहं वायुः स्रोत आवृत्य तिष्ठति ।
शुद्धः श्लेष्मान्वितो वापि बाधिर्य्यं तेन जायते ॥"
इति माधवकरः ॥
अस्यौषधं यथा,—
"शुष्कमूलकशुण्ठीनां चारो द्विप्रसृतागरम् ।
शुक्तं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णशूलञ्च पूयस्रावञ्च कर्णयोः ।
क्रमयञ्च विनश्यन्ति तैलस्यास्य प्रपूरणात् ॥"
अपि च ।
"प्रस्थे द्वे गरुडमालानां क्वाथयेद्दोषमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ।
काञ्जिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ॥
पुनर्नवा गोक्षुरकं सैन्धवं शुण्ठणं वचा ।
सरलं सुरदारुञ्च हरितौ कण्टकारिका ॥
नस्यपानाञ्जनैश्चैव कर्णशूलं हरुग्रहम् ।
बाधिर्य्यं सर्व्वरोगञ्च अथर्व्वाह्व महेश्वर ! ॥"
इति गारुडे १९८ अध्यायः ॥
(सप्तम्यधिकारणमस्य यथा,—
"स एव शब्दाभिवहा यदा श्रिवाः
कफानुयातो बहुशस्तिष्ठति ।
तदा नरस्याप्रतिकारसेविनो
भवेत्तु बाधिर्य्यमसंशयं खलु ॥"
इत्युत्तरतन्त्रे विंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥
अस्य चिकित्सा यथा,—
"सामान्यतो विशेषेण बाधिर्य्ये पूरणं हितम् ।
गवां मूत्रेण विस्रावि पिष्ट्वा तैलं विपाचयेत् ॥
सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकविल्वोभिः सिद्धं वाते पयस्यथ ॥
सिद्धं वा विस्रवि:क्षीरे घृतीभूतं तदुद्धृतम् ।
पुनः पक्वेद्दशगुणैः सितामधुकचन्दनैः ॥
विस्रावि गाढं तत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ।
वातबाधिर्य्ये यश्चोक्तो विधिः स च हितो भवेत् ॥"
इति च सप्तैकविंशतितमेऽध्याये तेनैवोक्तम् ॥)

बाध्य, त्रि, (बाध + यत् ।) बाधनीयम् । बाधितव्यम् । निवर्त्तम् । यथा । साङ्गचिताखिलङ्गदर्शनात् प्रकरणमिदं बाध्यम् । इति ब्रह्मसूत्रस्य समन्वयाधिकरणे भाष्यटीकायां भामती ॥ (यथा, मार्कण्डेये । ६६ । ४० ।
"नाहं खारीपिचुसमः क्षीरबाधो वा जलेचरि ! ॥")

बाध्यता, स्त्री, (बाध्यस्य भावः । बाध्य + तल् ।) बाध्यत्वम् । बाध्यस्य भावः इत्यर्थे तप्रत्ययनिष्पन्नोऽयं शब्दः ॥

बान्धकिनेयः, त्रि, (बन्धक्या अपत्यं पुमान् । बन्धकी + "कल्याण्यादीनामिनङ् ।" ४ । १ । १२६ । इति ढक् इनङ् च ।) असतीसुतः । इत्यमरः । २ । ६ । २६ ॥

बान्धवः, पुं, (बन्धुरेव । बन्धु + "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) ज्ञातिः । इत्यमरः । २ । ६ । ४४ ॥ सुहृत् । इति मेदिनी । वे, ४५ ॥ (यथा, मनुः । ५ । ७० ।
"नातिदयस्य कर्णेया बान्धवैरुदकक्रिया ॥")
अस्य विवरणं बन्धुशब्दे द्रष्टव्यम् ॥

बाभ्रवी, स्त्री, (बभ्रोर्महादेवस्य पत्नी । बभ्रु + अण् + ङीप् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ (यथा, मार्कण्डेये । ८१ । २१ ।
"मेधे सरस्वति वरे भूति बाभ्रवि तामसि ! ॥")

बारकोरः, पुं, द्वारपालौ । बाहुः । यूका । वणिग्वेधिनी । नीराजितहयः । इति मेदिनी । रे, २८६ ॥

बार्ज्जटीरः, पुं, वपुः । आन्त्रास्थि । अङ्कुरः । शाखिकाभुतः । इति हेमचन्द्रः ॥

बार्हस्पत्यं, त्रि, बृहस्पतिसम्बन्धि । बृहस्पतेरिदं इत्यर्थे (अण्) प्रत्ययेन निष्पन्नम् ॥

बार्हस्पत्यः, पुं, (बार्हस्पत्यं बृहस्पतिप्रोक्तं शास्त्रं अधीयानत्वेनास्त्यस्येति । अर्श आदित्वादच् ।) नास्तिकः । यथा, हेमचन्द्रः ।
"स्याद्वादवाद्याहतः स्याच्छून्यवादी तु सौगतः ।
नैयायिकस्त्वक्षपादो योगः सांख्यस्तु कापिलः ॥
वैशेषिकः स्यादौलूक्यो बार्हस्पत्यस्तु नास्तिकः ।
चार्व्वाको लौकायतिकश्चेति षड्पि तार्किकाः ॥"
(बृहस्पतिना प्रोक्तमिति । बृहस्पति + अण् ।) नीतिशास्त्रे, क्ली । इति केचित् ॥ बृहस्पतेरिदमिति वा । बृहस्पति + "दित्यदित्यादित्यपत्युत्तरपदाण् ण्यः ।" ४ । १ । ८५ । इति ण्यः ।) बृहस्पतिसम्बन्धिनि, त्रि ॥

बाल, क्ली, पुं, (बलतीति । बल + णः ।) गन्धद्रव्यविशेषः । बाला इति ख्यातम् । इति मेदिनी ॥ तत्पर्य्यायः । ह्रीवेरम् २ वर्हिष्ठम् ३ उदीच्यम् ४ केश्यनामकम् ५ अम्बुनामकम् ६ । इत्यमरः । २ । ४ । १२२ ॥ ह्रिवेरम् ७ बर्हिष्ठम् ८ । इति भरतः ॥ बालकम् ९ वारिदम् १० इति शब्दरत्नावली ॥ वरम् ११ ह्रीवेरकम् १२ केश्यम् १३ यज्ञम् १४ पिङ्गम् १५ ललनाप्रियम् १६ कुन्तलोशीरम् १७ कचामोदम् १८ । अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । पित्तवान्तिदाहज्वरकुष्ठातिसारश्वासव्रणनाशित्वम् । केशहितत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"बाला बाल्यालिका बाह्या सैव वाट्यालिकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥
सतीक्ष्णातिबला ह्रस्वप्रोक्ता कङ्कतिकासह्व ।
गान्धिकाकी गान्धबला ह्रस्वा ह्रस्वा गवेधुका ॥
अस्य गुणाः ।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत् ।
स्निग्धं ग्राहि समीरासृपित्तास्रक्षतनाशनम् ॥
बालाचतुष्टयविशेषगुणाः ।
बलामूलत्वचश्चूर्णं शीतं सक्षीरशर्करम् ।
मूत्रातिसारं हरति दुष्टमेतन्न संशयः ॥
हरेन्महाबला लक्ष्मीं भवेद्बालानुलोमनी ।
हन्यादतिबला मोहं पयसा सितया सह ॥"
इति भावप्रकाशः ॥

बालः, त्रि, (बलतीति । बल प्राणने + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः ।) मूर्खः ॥ (यथा, मनुः । २ । १५३ ।
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदम् ॥"
"वैयाघ्रोऽवधारणे अज्ञ एव बालो भवति मत्स्यवधयाः ।" इति तट्टीकायां कुल्लूकभट्टः ॥) अर्भकः । इति मेदिनी । ले, ४० ॥ द्वितीयस्य पर्य्यायः । माणवकः २ । इत्यमरः । २ । ६ । ४२ ॥ बालकः ३ माणवः ४ किशोरः ५ वटुः ६ सुधिन्धयः ७ वटुकः ८ किशोरकः ९ । इति शब्दरत्नावली ॥ पाकः १० गर्भः ११ शिशकः १२ पृथुकः १३ शिशुः १४ शावः १५ अर्भः १६ शिम्बकः १७ शिम्बः १८ । इति राजनिर्घण्टः ॥ स तु षोड़शवर्षपर्य्यन्तः प्रथमवयस्कः । यथा,—
"आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते ।
वृद्धः स्यात् सप्ततेरूर्द्धं वर्षीयान् नवतेः परम् ॥"
इति स्मृतिः । इति भरतः ॥
तस्य रक्षकाः सर्व्वदेवताः । यथा,—
"अनाथबालवृद्धानां रक्षकाः सर्व्वदेवताः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः
अथ बालस्य परिचर्य्याविधिः ।
"बालमङ्गे सुखं दद्यान्न चैनं तर्ज्जयेत् क्वचित्

सहसा बोधयेन्नैव नायोग्यमुपवेशयेत् ॥"
अयोग्यमुपवेशनासमर्थम् ।
"नाजस्रं स्थापयेत् क्रोडे न चिरं शयने क्षिपेत् ।
रोदयेच्च क्षणित् कार्यं विधिमावश्यकं विना ॥"
आवश्यको विधिः भेषजदानतैलाभ्यङ्गोद्वर्त्तनादि॥
तच्चित्तमनुवर्त्तेत तं सदैवानुमोदयेत् ।
संसेवितमना एकं नित्यमेवाभिवर्द्धयेत् ॥
बालातपस्पर्द्दृष्टिधूमानलजलादिनः ।
निष्कोपस्थागतस्यापि रक्षेद्बालं प्रयत्नतः ॥"
बालस्य स्वभावाहितान्याह ।
"अभ्यङ्गोद्वर्त्तने स्नानं नेत्रयोः रञ्जनं तथा ।
वसनं स्नेहु यत्तच्च तथा स्नेहनुलेपनम् ॥
जन्मप्रभृति प्रथ्यानि बालस्येतानि सर्व्वथा ॥"
बालस्य कवलादेः समयमाह ।
"कवलः पञ्चमाद्वर्षाद्विंशुतेश्चैव मैथुनम् ॥"
बाल्यादेरवधिमाह सुश्रुतः ।
"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा ।
जन्मषोड़शवर्षन्तु नरो बालो निगद्यते ॥
त्रिविधः सोऽपि दुग्धाशी दुग्धान्नाशी तथान्न-
भुक् ॥
दुग्धाशी वर्षपर्य्यन्तं दुग्धान्नाशी शरद्वयम् ।
तदूर्द्धं स्यादन्नाशी एवं बालस्त्रिधा मतः ॥
मध्ये षोड़शसप्तत्योर्मध्यमः कथितो बुधैः ।
चतुर्धा मध्यमं प्राहुर्युवा द्वात्रिंशतो मतः ॥
चत्वारिंशत्समा यावत्तिष्ठेद्दीर्घादिपूरितः ।
ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः ॥
वीर्य्यादीत्यादिशब्देन रसादिसप्तधात्विन्द्रिय-
बलोत्साहा उच्यन्ते । क्षीणः सप्तधात्विन्द्रिय-
बलोत्साहैर्हीनः ।]
ततस्तु सप्ततेरूर्द्धं क्षीयधातुरसादिकः ॥
क्षीयमाणेन्द्रियबलः क्षीयमाणो दिने दिने ।
वलीपलितखालित्ययुक्तः कर्म्मसु चाक्षमः ॥
कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः ॥
बाल्ये त्रिवर्द्धते श्लेष्मा पित्तं स्याच्चयमाश्रितम् ।
वार्द्धके वर्द्धते वायुर्विचार्य्यैतदुपक्रमेत ॥
उपक्रमेत् चिकित्सेत् ॥ तत्रान्तरे तु ।
बाल्यं वृद्धिश्च विर्मेधा त्वग्दृष्टिः शुक्रशिक्रमौ ।
वृद्धिः कर्म्मेन्द्रियं रेतो जीवितं दशतो वृसेत् ॥"
इति भावप्रकाशः ॥
(अथ बालाशौचम् ।
"नवमादिमासजातबालस्याशौचकालाभ्यन्तर-
मरणे मातापित्रोरस्पृश्यत्वं युक्तम् । तदेव
स्वजातोत्तजननाशौचम् । ज्ञातीनान्त्वशौचं
नास्ति । नवमादिमासन्यूनजातयोस्तु कन्या-
पुत्रयोः पित्रादि सपिण्डानां मातुश्च जनना-
शौचम् । तच्च ब्राह्मणानां दशाहं भूदानां
मासः । पुत्रजन्मनि पितुः सचैलस्नानं पुत्रमुख-
दर्शनात् परं पुनः सचैलस्नानम् । पुत्रकन्याजनने
ब्राह्मण्या दशाहानन्तरं लौकिककर्म्माधिकारः॥
पुत्रजनने ब्राह्मण्या विंशतिरात्रौत्तरस्नानात्
वैदिककर्म्माधिकारः । कन्याजनने तु ब्राह्मण्या
मासोत्तरस्नानात् वैदिककर्म्माधिकारः ।
शूद्रायाः कन्यापुत्रजनने त्रयोदशाहोत्तरं
लौकिककर्म्माधिकारः वैदिककर्म्मणि तु मासो-
त्तरस्नानात् शुद्धिः । एतत् सर्व्वं कन्यापुत्रयो-
र्विद्यमानत्वे बोध्यम् ॥
जननाशौचोत्तरं षण्मासाभ्यन्तरमजातदन्त-
मरणे मातापित्रोरेकाहः । सपिण्डानान्तु सद्यः
शौचम् ॥ षण्मासाभ्यन्तरेऽपि जातदन्तस्य
मरणे मातापित्रोरेकाहः । सपिण्डानामेकाहः ।
षण्मासोपरिद्विवर्षपर्य्यन्तं पित्रोरेकाहः । सपिण्डा-
नामप्येकाहः क्षतचूड़े एकाहः क्षतचूड़े त्र्याहः । द्विवर्षो-
परिमासत्रयाधिकषड्वर्षपर्य्यन्तमनुपनीतबालक-
स्य मरणे मातापित्रादिसपिण्डानां त्र्याहः ॥
तन्मध्येऽप्युपनीतस्य मरणे दशाहः । मासत्रया-
धिकषड्वर्षोपरि मरणे पित्रादिसपिण्डानां
दशाहः ॥
शूद्रस्य षण्मासाभ्यन्तरे अजातदन्तस्य मरणं
चिरात्रम् । जातदन्तस्य पक्षाहः । षण्मा-
सोपरिद्विवर्षाभ्यन्तरे अक्षतचूड़मरणे पक्षाहः ।
तत्रापि क्षतचूड़मरणे द्वादशाहः । द्विवर्षोपरि
षड्वर्षाभ्यन्तरे मरणे द्वादशाहः । अत्रापि
क्षतोद्वाहेऽपि मासो ग्रहीतव्यः षड्वर्षोपरि-
मासः ॥ * ॥ "बालकजननान्तरकर्त्तव्यमाह
वैद्यकं । यथा,—"अथ बालं क्षौमपरिवृतं
क्षौमवस्त्रान्तरितायां शय्यायां शाययेत् । पीलु-
बदरीनिम्बपल्लवकशाखाभिश्चैनं वीजयेत् ।
स्नुह्यर्कं चास्याहरहस्तेलपिण्डमवचारयेत् ।
धूपयेच्चैनं रक्षाग्निधूपैः । रक्षोघ्नानि चास्य
पाणिपादशिरोग्रीवास्ववबध्नीयात् सिलाजतु-
सर्षपकल्कांश्चाग्नौ प्रक्षिपेत् । अधिष्ठाने
चास्य प्रज्वालयेत् । वाग्यतोपासनीयश्चावेक्षेत ॥
ततो दशमेऽह्नि मातापितरौ कृतमङ्गल-
कौतुकौ स्वस्तिवाचनं कृत्वा नाम कुर्य्यातां
यदभिप्रेतं नक्षत्रनाम वा ॥
ततो यथावत्तं धात्रीस्तन्येयाक्षुण्णप्रमाणां
मधुमवयसमरोगां घृतलवणौमक्षपलामलोलु-
पामल्पप्रामस्थां प्रसन्नक्षीरामलक्षौद्रामल
क्षौद्रकृतलीमयङ्गामक्षसनिनीं जीवद्वत्सां दोग्ध्रीं
वत्सलामक्षुद्रकर्म्मिणीं कुले जातामतो भृशि
क्लेश गुणैरन्विनां प्रयामामारोग्यबलवृद्धये
बालस्य । तत्रोद्वृत्ततनो करालं कुर्य्यात । लम्ब-
स्तनीं नासिकामुखं छादयित्वा मरणमापा-
दयेत् । ततः प्रणस्तायां तिथौ शिरःस्नान
मङ्गलवासःसमुदग्रमुखं शिशुमुपवेश्य धात्रीं
प्राङ्मुखीमुपवेश्य दक्षिणं स्तनं घृतलवणपरि
प्लुतमभिमन्त्र्य मन्त्रेणानेन पाययेत् ।
चत्वारः सागरास्तुभ्यं स्तन्यपोः क्षीरवाहिकाः ।
भवन्तु सुभगे नित्यं बालस्य बलवृद्धये ॥
पयोऽस्तनरसं पीत्वा कुमारस्त्वं सुभानने ।
दीर्घमायुरवाप्नोतु देवाः प्राग्यान्तु यथा ॥
अतोऽन्यथा नानात्वोपयोगस्यासात्म्यात्
आधिजन्म भवति । अपरिप्लुतेऽप्यतिस्तन्य-
स्तन्यपूर्णस्तनपानादुत्क्लिष्टस्रोतसः शिशोः
कासश्वासयमीप्रादुर्भावः । तस्मादेवं विधानं
स्तन्यं न पाययेत् ॥"
"बालं पुनर्नाचुखं गृह्णीयान्न चैनं तर्ज्जयेत्
सहसा न प्रतिबोधयेदित्रासभयात् सहसा
नापहरेदुत्क्षिपेद्वा वातादिविघातभयान्नोपवे-
शयेत् कौड्यभयात् नित्यचैनमनुवर्त्तेत प्रिय-
श्रुतैरजिघांसुः । एवमनभिहतमनाश्चाभिवर्द्धते
नित्यसुदयसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च
भवति । वातातपविद्युदग्न्यपाद्गलतामूल्या-
गारनिम्नस्थानगृहच्छायादिभ्यो दुर्दर्शोपसर्ग
तश्च बालं रक्षेत् ।
नाशुचौ विसृजेद्बालं नाकाले विषमे न च ।
नोग्रमारुतवर्षेषु रजोधूमोदकेषु च ॥
क्षीरसात्म्यतया क्षीरमात्रं गव्यमथापि वा ।
दद्यादात्तन्यपर्य्यायैर्बालानां क्षीरमात्रया ॥"
इति सुश्रुते शारीरस्थाने दशमेऽध्याये ॥)
बा(वा)लः, पुं. (बलति मस्तकं रक्षति संदूषोसौनि
वा । बल + णः ।) शिरोभवाच्छादनविशेषः ।
चुल इति भाषा । तत्पर्य्यायः । चिकुरः२ कचः
३ केशः ४ कुन्तलः ५ कुञ्चरः ६ शिरोरुहः ७
शिरसिरुट् ८ शिरोरुट् ९ शिरजः १० । इति
शब्दरत्नावली ॥ चोटकशिखा । तत्पर्य्यायः ।
किशोरः २ । इत्यमरः ॥ अश्वबालधिः । करि
बालधिः । नारिकेलः । इति मेदिनी । ले, ३६ ॥
पञ्चवर्षीयबालः । यथा.—
"पञ्चवर्षो गजो बालः स्यात् पोतो दशवर्षकः ॥"
इति हेमचन्द्रः ॥
(यथा, भागवते । ६ । १० । ६ ।
"यो लोकवीरसमितौ धनुरैशसत्त्वं
सीतास्वयंवरगृहे त्रिशतोपनीतम् ।
आदाय बालगजलीलमदेज्यघोषं
सज्यीकृतं नृप ! विकृष्य बभञ्ज मध्ये ॥")
पुच्छः । इति शब्दरत्नावली ॥ (यथा, कुमारे ।
१ । ४८ ।
"लज्जा निरस्ता यदि चेतसि स्या-
दसंशयं पर्व्वतराजपुत्र्याः ।
तं कंचुपाशं प्रणमय्य कण्ठे-
बालप्रियत्वं शिथिलं नयस्व ॥")
मल्लविशेषः । इति शब्दचन्द्रिका ॥
बालकं क्ली, (बाल + स्वार्थे कन् ।) क्षीरम् ।
इति राजनिघण्टः ॥ (अस्य गुणा यथा,—
"बालकं शीतलं रूक्षं लघुदीपनपाचनम् ।
क्षुत्तृष्णासारुचिवीसर्पकुष्ठामानिसारजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
अश्वलीयकम् । पारिभाद्यम् । इति विश्वः ॥
बालकः, पुं, (बाल एव । बाल + स्वार्थे कन् ।)
शिशुः । (यथा, मार्कण्डेये । ५२ । ५३ ।
"भूतानां मातृभिः सार्द्धं बालकानान्तु
प्राजये ॥")
अश्वः । हयबालधिः । हस्तिबालधिः । अश्वरो-
यकम् । क्षीरम् । बलयम् । इति मेदिनी ।
के, १५७ ॥ केशः । इति विश्वः ॥ ॥

बालखि

बालाशौचं यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया॥
यदि गर्भो विपद्येत स्रवते वापि योषितः।
यावच्छ्मश्रु क्षिपेत् गर्भस्तावद्विद्यात् सूतकम्॥
आ नामकरणात् सद्य आ चूडान्नादहर्दिनम्।
आ व्रतस्थाग्निरादेव तदूर्द्धं दशभिर्दिनैः॥"
इति गारुडे १०६ अध्यायः॥

बालरक्षा रक्षा यथा,—
"आदाय रक्षां संजप्ता यशोदापि ततो द्विज!।
गोपुच्छभ्रामणीभिस्तु बालदोषमपाकरोत्॥
गोपुरीषमुपादाय नन्दगोपोऽपि मन्त्रकैः।
ललाटे प्रददौ रक्षां कुर्वन्निदमुदीरयन्॥
नन्द उवाच।
रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः।
यस्य नाभिसमुद्भूतपङ्कजादभवज्जगत्॥
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत्।
वराहरूपधृक् देवः स त्वां रक्षतु केशवः॥
नखाङ्कुरविनिर्भिन्नैरिवशत्रुस्थलो विभुः।
नृसिंहरूपी सर्वत्र स त्वां रक्षतु केशवः॥
वामनो रक्षतु सदा भवन्तं यः क्षणादभत्।
त्रिविक्रमः क्रमाक्रान्तत्रैलोक्यः स्फुरदायुधः॥
शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः।
गुह्यं सजठरं विष्णुर्हृषीकेशोऽवताद्धनौ॥
मुखं बाहू प्रबाहू च मनः सर्वेन्द्रियाणि च।
रक्षत्वशेषनैर्भर्यस्तव नारायणोऽव्ययः॥
प्रार्च्छत्कृत्यग्रहाश्चक्रनादहताः स्वयम्।
गच्छन्तु प्रेतकूष्माण्डा राक्षसा ये सबाधिताः॥
त्वां पातु दिक्षु वैकुण्ठो विदिक्षु मधुसूदनः।
खुरौकेशोऽम्बरे भूमौ रक्षतु त्वां मधोधरः॥
एवं ब्रुवन्नयनो नन्दगोपेन बालकः।
घ्रायितः शकटास्याधो बालपर्य्यङ्किकातले॥"
इति विष्णुपुराणे। ५। ५॥

बालकप्रिया, स्त्री, (बालकानां प्रिया।) इन्द्रवारुणी। कदली। इति राजनिर्घण्टः॥

बालभृमिः, पुं, (बालस्य केशस्य भृमिः।) केशकीटः। इति जटाधरः॥

बालक्रीड़नं, क्ली, (बालस्य क्रीड़नम्। क्रीड़+भावे ल्युट्।) बालखेला। यथा,—
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रक्रमः॥"
इत्यादि महानाटकम्॥

बालक्रीड़नकः, पुं, (बालानां क्रीड़नकः क्रीड़नत्वम्। बालका हि कपर्दकेन क्रीड़न्तीति प्रसिद्धेरयात्वम्।) कपर्दकः। इति राजनिर्घण्टः॥

बालखिल्याः, पुं, बालखिल्यमुनिः। यथा,—
"विधिना निर्मिता पूर्व्वं वेदी परमपावनी।
अग्निवेश्यादिमुनयो बालखिल्यादयः स्मृताः॥"
इति हरिवंशे पितृकूटमाहात्म्ये १ अः॥
(बालखिल्यास्तु अङ्गुष्ठपरिमिताः षष्टिसहस्रसंख्यकाः। यथा, मार्कण्डेये। ५७। २४।
"क्रतोस्तु सन्ततिर्भार्य्या बालखिल्यानसूयत।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्ध्वरेतसाम्॥

बालग्र

अङ्गुष्ठपरिमितमुक्तमेतेषान्देहपरिमाणम्।
यथा, महाभारते। १। ६१। ८—६।
"अथापश्यद्वपीन् कृशान् अङ्गुष्ठोदरपर्व्वणः।
प्रलाग्रदृष्टिप्रमाणैकां सहितान् वहतः पथि॥
क्लिश्यमानान् मन्दबलान् गोघ्नदृष्टे संकुलोदके॥")

बालगर्भिणी, स्त्री, प्रथमगर्भवती गौः। तत्पर्य्यायः। प्रष्ठौही २। इत्यमरः। २। ६। ७०॥ पलोली ३। इति जटाधरः॥ बालगर्भवती ४। इति शब्दरत्नावली॥

बालगोपालः, पुं, (बालः शिशुमूर्त्तिधरो गोपालः।) श्रीकृष्णमूर्त्तिविशेषः। यथा,—
"तीरपयोनिधिदृष्टनिवासं
हास्यकटाक्षवशंवदनादम्।
ग्रामलसुन्दरदृश्यविलासं
तं प्रणमामि च बालगोपालम्॥"
इति नारदपञ्चरात्रे गोपालाष्टकम्॥

बालग्रहः, पुं, (बालानां बालकानां ग्रहः।) बालकहन्तृग्रहविशेषः। (यथा, मार्कण्डेये। ६२। २७।
"बालग्रहाभिभूतानां बालानां शान्तिकारकम्॥")
इतेषां विवरणम्। यथा,—
"बालग्रहा अनाचारात् पीड़यन्ति शिशुं यतः।
तस्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः॥"
अथ बालग्रहाणां नामाद्याह।
"स्कन्दग्रहस्तु प्रथमः स्कन्दापस्मार एव च।
शकुनी रेवती चैव पूतना गन्धपूतना॥
पूतना शीतपूर्व्वा च तथैव मुखमण्डिका।
नवमो नैगमेयश्च प्रोक्ता बालग्रहा अमी॥"
अथ ग्रहागामुत्पत्तिमाह।
"नवस्कन्दादयः प्रोक्ता बालानां ये ग्रहा अमी।
श्रीमन्तो दिव्यपुरुषा नारीपुरुषविग्रहाः॥
एते स्कन्दस्य रक्षार्थं कृत्तिकोमाग्निमुखिभिः।
सृष्टाः शरवणस्थस्य रचितस्य सतेजसा॥
स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
बिभर्त्ति चापरां संज्ञां कुमार इति संयुतः॥"
अयं हि कार्त्तिकेयादन्यः।
"स्कन्दापस्मारसंज्ञो यः सोऽग्निना तत्समद्युतिः।
स च स्कन्दसखो नाम्ना विशाख इति चोच्यते॥
ग्रहाः स्त्रीवियहा ये ते नानारूपाः प्रकीर्त्तिताः।
देवानां कृत्तिकानां ते भागा राजसतामसाः॥
नैगमेयस्तु पार्श्वस्थो रुष्टो ह्येषां ततो ग्रहः।
कुमारस्य हि देवस्य गुह्यस्यालसमोऽस्ति वै॥
ततो भगवति स्कन्दे सुरसैन्यापतौ स्थिते।
उपतस्थुर्ग्रहा स्थित्वा दीप्तशक्तिधरं गुहम्॥
ऊचुः प्राञ्जलयस्तेन वृत्तिर्नो दीयतामिति।
तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्॥
ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्।
तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत्॥
परस्परोपकारेण वर्त्तते धार्य्यते तथा।
देवा नरान् प्रीणयन्ति तिर्य्यग्योनींस्तथैव च॥
यथाकालं प्रदत्तास्तु उग्रमन्त्राहिमानिले;।

बालग्र

रक्षन्नलिनमस्कारैर्जपहोमैस्तथैव च॥
सम्यक् प्रयुक्तैश्च नरः प्रीणयत्यपि देवताः।
भागधेयं विभक्तञ्च पैशं किञ्चिन्न विद्यते॥
तदयुग्मार्कं शुभा वृत्तिर्बालेभ्येव भविष्यति॥"
अथ बालग्रहाणां बालग्रहणकारणमाह।
"कुलेषु येषु नेज्यन्ते देवाः पितर एव च।
ब्राह्मणाः साधवो वापि गुरवोऽतिथयस्तथा॥
निवृत्तपैशाचाचारेषु तथा कृतनिसर्गेषु।
निवृत्तभिक्षाबलिषु भक्तकाम्यगृहेषु च॥
गृहेषु तेषु बालांस्तान् ग्रहा हिंसन्त्यगृह्णिताः।
तच्च वो विपुला वृत्तिः पूजा चैव भविष्यति॥
एवं ग्रहाः समुत्पन्ना बालान् हिंसन्ति चाप्यथ।
ग्रहोपसृष्टा बालाः स्युर्दुश्चिकित्स्यसमाकृतः॥"
अथ सामान्यग्रहजुष्टानां बालानां लक्षणान्याह।
"त्रस्यादुद्विजते बालः क्षणान्नश्यति रोदिति।
नखैर्दन्तैर्दारयति धात्रीमालामनेव च॥
ऊर्द्धं निरीक्षते दन्तान् खादेत् कूजति जृम्भते।
भ्रुवौ क्षिपति दन्तौष्ठः फेनं वमति वासकृत्॥
श्यामोऽति निद्रि जागर्त्ति शूलार्त्तो भिन्नविट्स्वरः।
मनुष्यगोचितगन्धञ्च न घ्राति यथा पुरा॥
दुर्ब्बलो मलिनाङ्गश्च नष्टसंज्ञोऽपि जायते।
सामान्यग्रहजुष्टस्य लक्षणं समुदाहृतम्॥"
अथ विशिष्टग्रहजुष्टानां लक्षणान्याह।
"स्कन्दाङ्गः स्तब्धजङ्घान्त्रिकुक्षिनद्धिट्-
वक्त्रोष्ठो हतचरश्चैकपक्षनेत्रः।
उद्विग्नः सललितचक्षुरस्थिरोदी
स्कन्दार्त्तो भवति च गाढ़दृष्टिवक्त्रः॥
निःसंज्ञो भवति पुनर्लभेत संज्ञां
संस्तब्धः करचरणैश्च वृश्चतीव।
विण्मूत्रे स्रवति विनद्य मुञ्चमाद्यः
फेनं वा वमति च तत्त्वज्ञाभिजुष्टः॥"
तत्त्वज्ञाभिजुष्टः स्कन्दापस्मारयुक्तः।
"स्कन्दाङ्गो भयचकितो विवृद्धनाभिः
साशब्दस्रवणपरीपीड़ितः शकृन्मान्।
स्फोटैश्च प्रचिततनुः सदाहपाकै-
र्विज्ञेयो भवति शिशुः शतः शकुन्या॥
रक्तास्यो हरितमलोत्तिपाक्षुदेहः
प्रायो वा सुखकरपाकवेदनार्त्तः।
ग्रस्तानिशयितनग्नरुग्नकर्णनासं
रेवत्या भृशमभिपीड़ितः कुमारः॥
स्तब्धाङ्गः स्वपिति न वासरे न रात्रौ
विड्भिन्नं विरुतति काकसुल्काङ्गगन्धिः।
छर्द्यार्त्तो क्षुधिततनूरुहः कुमार-
क्ष्णाल्लुभवति च पूतनागृहीतः॥
यो हेहि स्तनमसि न कासहिक्का-
च्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः।
दुर्ब्बर्णः सततमथापि योऽभ्यन्धि-
स्तं ब्रूयाद्भिषगथ गन्धपूतनार्त्तम्॥
आक्रन्दन् परिचकितः सुवेपमानः
संज्ञानो भवति यथाक्रकूजयुक्तः।

यस्याङ्गो भग्नमतिसार्यते च यो वै
तं ब्रूयाद्भिषगथ घृतेन पूतनार्तम् ॥
स्नानाङ्गः सरुधिरपाणिपादवक्त्रो
यश्चाग्नौ कलुषशिराश्चतोदरो यः ।
स ज्ञेयः ग्रिसुरथ रक्तमक्षिकार्तः
सोद्वेगो भवति च मूत्रयत्यभीक्ष्णम् ॥
यः फेनं वमति विनम्यते च मध्ये
सोद्वेगो विहसति वोर्ध्वमीक्षमाणः ।
कूजेच्च प्रततमधो वसास्रगन्धि-
र्निर्मांसो भवति स नैगमेयजुष्टः ॥"

अथ सामान्यग्रहजुष्टानां चिकित्सामाह ।

सङ्घासुखतिकोदीच्यब्राह्मणस्नानं ग्रहापहम् ।
सङ्घा ग्राम्यवर्गौ ।

"सप्तच्छदामयनिशाचन्दनैश्चानुलेपयेत् ।
सर्षपक्वं जलं स्नात्वा सर्षपारिष्टपल्लवाः ॥
विडालविड्जालोममेषग्रङ्गी वचा मधु ।
धूपः ग्रिग्वोर्ध्वरोमोऽयमगदो ग्रहनाशनः ॥
बालग्राम्यौषधकर्माणि कार्याणि ग्रहशान्तये ।
वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ॥
सारिवा सैन्धवश्चैव पिप्पली घृतमष्टमम् ।
सिद्धं घृतमिदं मेध्यं पिबेत् प्रातर्दिने दिने ॥
दृढस्मृतिः क्षिप्रमेधा कुमारो बुद्धिमान् भवेत् ।
न पिशाचा न रक्षांसि न भूता न च मातरः ॥
न भवन्ति कुमाराणां पिबतामष्टमङ्गलम् ॥"

अष्टमङ्गलं घृतम् ॥

अथ विग्रिग्रहजुष्टानां चिकित्सामाह ।

"सोमवल्लीमिन्द्रवृक्षं वन्दाकं विषजं ग्रमीम् ।
स्नगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"

तत्र स्कन्दग्रहजुष्टस्य चिकित्सामाह ।

"स्कन्दग्रहोपसृष्टस्य कुमारस्य प्रशस्यते ।
वातघ्नद्रुमपत्राणां क्वाथेन परिषेचनम् ॥
देवदारुश्च रास्नाया मधुरेषु गणेषु च ।
सिद्धं वर्षाभ्च सक्षीरं पातुमस्मै प्रदापयेत् ॥
वर्षाभूः सर्षपिञ्जोको वचा काकादनी घृतम् ।
सङ्घाब्राह्मिबलाश्चापि रोमाण्युद्भूपनं भवेत् ॥"

काकादनी श्वेतगुञ्जा ।

सोमवल्लीमिन्द्रवृक्षं वृन्दाकं विषजं ग्रमीम् ।
स्नगादन्याश्च मूलानि ग्रथितानि विधारयेत् ॥"

सोमवल्ली सोमलता । इन्द्रवृक्षं कक्षुभम् ।
स्नगादनी इन्द्रवारुणी ।

रक्तानि माल्यानि तथा पताकां
रक्तांश्च गन्धान् विविधांश्च भक्ष्यान् ।
घृतञ्च देवाय बलिं निवेद्य
सकुक्कुटं स्कन्दगृहे निधाय ॥
स्नानं शिरार्चं निशि चत्वरेषु
कुर्यात् परं ग्रालियवैर्निवेद्य ।
गायत्रियुक्ताभिरथाङ्गिरस्यं
प्रक्षालयेदाहुतिभिश्च धीमान् ॥

रक्षामतः प्रवक्ष्यामि बालानां पापनाशिनीम् ।
अहन्यहनि कर्तव्या याभिरङ्गिरसस्तिः ॥
तपसा तैजसाश्चैव यशसा वयसा तथा ।
विधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु ॥

ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः ।
देवसेनाग्रिपुहरः पातु त्वां भगवान् गुहः ॥
देवदेवस्य महतः पावकस्य च यः सुतः ।
गङ्गोमाकृत्तिकानाञ्च स ते ग्रर्म्म प्रयच्छतु ॥
रक्तमाल्याम्बरधरो रक्तचन्दनभूषितः ।
रक्तग्रिखवपुर्देवः पातु त्वां क्रौञ्चहूदनः ॥"

अथ स्कन्दापस्मारयग्रहजुष्टस्य चिकित्सामाह ।

"विश्वः ग्रिरीषो गोलोमी सुरसादिश्च यो गणः ।
परिषेकः प्रयोक्तव्यः स्कन्दापस्मारशान्तये ॥"

गोलोमी श्वेता दूर्व्वा । सुरसादिगणो यथा,—

"सुरसा श्वेतसुरसा पाठा पक्ष्मी फणिज्झकः ।
सौगन्धिकं भूस्तृणको राजिका श्वेतवर्व्वरी ॥
कट्फलं खरपुष्पा च कासमर्द्दश्च गुल्मकी ।
विड्भ्रमथ निर्गुण्डी कर्णिकार उदुम्बरः ॥
बला च काकमाची च तथा च विषमुष्टिका ।
कफक्रिमिहरः ख्यातः सुरसादिरयं गणः ॥"

सुरसा लघुतुलसी । श्वेतसुरसा श्वेततुलसी ।
पक्ष्मी भार्गी । फणिज्झकः मरुवकः । सौगन्धिकं कच्चूरम् । भूस्तृणकः सुगन्धतृणम् ।
खरपुष्पा वर्व्वरी । कासमर्द्दः कसौंदी । विषमुष्टिका वक्ष्यते ॥ * ॥

"अष्टमूत्रविपक्वञ्च तैलमभ्यञ्जने हितम् ।"

मूत्राष्टकमाह ।

"गोजाविमहिषाश्वानां खरोष्ट्रकरिणामथा ।
मूत्राष्टकमिति ख्यातं सर्व्वग्राम्येषु सम्मतम् ॥
क्षीरीवृक्षकषायेण काकोल्यादिगणेन च ।
विपक्तव्यं घृतं पश्चाद्दातव्यं पयसा सह ॥
काकोल्यादिगणो यथा,—

"काकोली क्षीरकाकोली जीवकर्षभकस्तथा ।
ऋद्धिर्द्वे द्वित्तथा मेदा महामेदा गुडूचिका ॥
सुनिषण्णो मायपर्णी पद्मकं वंशरोचना ।
यष्टी प्रपौण्डरीकञ्च जीवन्ती मधुयष्टिका ।
द्वाभ्यां चेति गणो ज्ञात्वा काकोल्यादिकहीरितः ।
स्तन्यक्षयहृद्दौर्ब्बल्य-पित्तरक्तानिलापहः ।
उत्पादनं बला द्विक्षुयुक्तमत्र प्रकीर्त्तितम् ॥
गवीलूकपुरीषाणि कृत्वा हस्तिनखो घृतम् ।
वृषभस्य च रोमाणि योन्यान्युद्भूपनं सदा ॥
अजस्रं कुक्कुटी विष्ठां मर्कटीञ्चापि धारयेत् ॥"

अजस्रं यवासा इति लोके । कुक्कुटी ग्राम्यस्त्री ।

"पक्वान्नामानि मांसानि प्रसन्नं रुधिरं पयः ।
सक्षौद्रं निवेद्याथ स्कन्दापस्मारिणे वटे ॥"

वटे वटतले बलिं निवेदयेदित्यन्वयः ।

तेन स्कन्दापस्मारिणा स्नानं कारयेदित्यन्वयः ।

"चतुष्पथे कारयेच्च स्नानं तेन ततः पठेत् ।
स्कन्दापस्मारसंज्ञो यः स्कन्दस्य दयितः सखा ।
विग्राजः स ग्रिशोरस्य ग्रिवायास्तु शुभाननः ॥"

अथ गृध्रकुनीग्रहजुष्टस्य चिकित्सामाह ।

"गृध्रकुनीग्रहजुष्टस्य कार्य्यं वैद्येन जानता ।
वैनसाम्रकपित्थानां क्वाथेन परिषेचनम् ॥
क्षीरैरम्बुकोशीरसारिवोत्पलपद्मकैः ।
लोधप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिग्धेच्छमुम् ॥"

प्रदिग्धेत् लिम्पेत् । रूपमिह्निरार्ष्यत्वात् ।

"स्कन्दग्रहोक्ता धूपाश्च क्रिया अत्र भवन्ति हि ।
स्कन्दापस्मारशमनं घृतमत्रापि पूजितम् ॥
घृतावरी गवेधुका नागदन्ती निदिग्धिका ।
लक्ष्मणा सहदेवाश्च हृद्यतीत्यपि धारयेत् ॥"

गवेधुका वड़ी रुद्रवारुणी । नागदन्ती नागहुली इति लोके प्रसिद्धा ।

"तिलतण्डुलकं माष्यं हरितालं मनःग्रिलाम् ।
बलिरेष निकुम्भेषु निवेद्यो नियतात्मना ॥
निकटे च प्रयोक्तव्यं स्नानमस्य यथाविधि ।
श्वेतग्रिरीषगन्धाश्वकुष्ठगुग्गुलुसर्षपैः ॥
सिद्धमभ्यञ्जने तैलं धारणं पूर्व्वमेव तु ।
ग्रकुनीग्रहशान्त्यर्थं प्रवेहं कारयेद्धितम् ॥
कुर्य्याच्च विविधां पूजां ग्रकुन्याः कुसुमैः शुभैः ।
निकुम्भोक्तेन विधिना क्षपयेत्तं ततः पठेत् ॥
अन्तरीक्षचरा देवी सर्व्वालङ्कारभूषिता ।
अधोमुखी खड्गहस्ता ग्रकुनी ते प्रसीदतु ॥
दुर्दर्शना महाकाया पिङ्गाक्षी भैरवस्वरा ।
लम्बोदरी ग्रकुकर्णी ग्रकुनी ते प्रसीदतु ॥"*॥

अथ रेवतीग्रहजुष्टस्य चिकित्सामाह ।

"अश्वगन्धाजशृङ्गी च शारिवाथ पुनर्नवा ।
सङ्घा विदारी क्षीराणां क्वाथेन परिषेचनम् ॥
अजशृङ्गी मेढ़ाशृङ्गी । सङ्घा सैवलीपुष्पजातिः ।
तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्व्वरसे तथा ।
पलङ्कषायां बलदे तथा गौरकदम्बके ॥
सर्व्वरसः रालः पलङ्कषा गुग्गुलुः । बलदं लामज्जकमुशीरवर्त्मीतक्षवि: । गौरकदम्बकः क्षारिदकः । हरदुया कदम्ब इति लोके ।
धवाश्वकर्णककुभप्रियालकीतिन्दुकेषु च ।
काकोल्यादौ गणे चापि सिद्धं सर्पिः पिबेच्छिशुः ।
अश्वकर्णः शालु इति लोके प्रसिद्धः ।
कुलत्थाः शुङ्गवर्णाश्च प्रदेहः सास्रगन्धिकः ।
गवीलूकपुरीषाणि यवान् यवफले घृतम् ॥
सन्ध्ययोरुभयोः कार्य्यमेतदुद्भूपनं शिशोः ॥
यवफलो वंशाङ्कुरः ।
शुक्लाः सुमनसो लाजाः पयःग्राम्योदनं दधि ।
बलिर्निवेद्यो गोलोम्नि रेवत्ये प्रयतात्मना ॥
गोलोम्नि गोहे ।
स्नानं धात्रीकुमाराभ्यां सङ्गमे कारयेद्भिषक् ।
नानावस्त्रधरा देवी चित्रमाल्यानुलेपना ॥
चलत्कुण्डलिनी ग्रामा रेवती ते प्रसीदतु ।
उपासते यां सततं देव्यो विविधभूषणाः ।
लम्बा करालाविकला तथैव बहुपुत्रिका ।
रेवती शुष्कनासा च तुभ्यं देवी प्रसीदतु ॥*॥

अथ पूतनाग्रहजुष्टस्य चिकित्सामाह ।

कपोतवङ्का ग्रीवाको वदरः पारिभद्रकः ।
व्याघ्रीलता चैव योज्याः स्नुह्यास्नानां परिषेचने
कपोतवङ्का ग्राम्या इति लोके । पारिभद्रं निम्बः । व्याघ्रीलता अपराजिता ।
नवा पयस्या गोलोमी हरितालं मनःग्रिला ।
कुष्ठं सर्व्वरसश्चैव तैलार्थे कल्क इष्यते ॥

नखा पयस्या नूतना चोरविहारी। गोलोमी श्वेतदूर्वा।
छिन्नं छुन्नं तगाचीर्या संछिन्नं मधुमेऽपि च।
कुष्ठतालीसखदिरा: स्यन्दनोऽर्जुन एव च॥
पनस: कङ्कुभश्चापि मञ्जानो वटस्य च।
कुक्कुटाख्यि तृतश्चापि धूपनं सर्व सर्वपै:॥
स्यन्दन: स्यन्दन इत्येव नाम्ना प्रसिद्ध:।
काकादनीं चित्रफलां विल्वीं गुञ्जाञ्च धारयेत्।
काकादनी श्वेतगुञ्जा। चित्रफला इन्द्रदिग्वारुणी।
मनुष्यौदनं बलिं दद्यात् क्षत्रियं पललं तथा।
सरावसंपुटं कृत्वा तस्मै मूले गृहे भिषक्।
उत्तरेष्टाग्नाभिधिक्तस्य ग्रिघो: क्षपनमिष्यते॥
कुष्ठतालीसखदिरं चन्दनं स्यन्दनं तथा।
देववाह वचा हिङ्गु कुष्ठं गिरिकदम्बक:।
एला हरेणवश्चापि योज्या उद्धूपने सदा॥
मलिनाम्बरसंवीता मलिना रूक्षकुन्तला।
मूत्रागाराश्रया देवी दारकं पातु पूतना॥*॥
अथ गन्धपूतनाग्रहजुष्टस्य चिकित्सामाह।
निम्बद्रुमाणां पञ्चेषु क्षीरं कार्योऽभिषेचने।
निम्बद्रुमानाह।
निम्ब: पटोल: खुरा च गुडूची वासकस्तथा।
विसर्पकुष्ठनुत् स्थानं गणोऽयं पञ्चतिक्तक:॥
पिप्पली पिप्पलीमूलं वर्षा मधुरको मधु।
प्रालपर्णीद्वयी च तृनार्थं समभाहरेत्॥
सर्वगन्धै: प्रदेहश्च गात्रे चाभ्यङ्गोच्च घृततैले:॥
सर्वगन्धै: कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनै:।
अन्यत्रोक्तं घृततैले: चन्दनकर्पूरै: न तु कस्तूरी-
कुङ्कुमागुरुभिस्तेषामसुलभत्वात्।
पुराणं कौक्कुटं केशचर्म सर्पभवन्तथा।
नीलीञ्चाभीक्ष्णशो वासो धूपनायोपकल्पयेत्॥
कुक्कुटीं मर्कटीं विल्वीमनन्ताञ्चापि धारयेत्।
मांसमामं तथा पक्वं शोणितञ्च चतुष्पथे।
निवेद्यमन्नञ्च गृहे ग्रिघो: क्षपनमिष्यते॥
करालां पिङ्गलां शुक्लां कषायाम्बरसंवृताम्।
देवीं बालमिमं पीतां रक्षत्वं गन्धपूतने॥"*॥
अथ घृतपूतनाग्रहजुष्टस्य चिकित्सामाह।
गोमूत्रं वस्तमूत्रञ्च सुस्ताचामरदारु च।
कुष्ठञ्च सर्वगन्धांश्च तैलार्धमवधारयेत्॥
सर्वगन्धान् चन्दनादीन्।
रोहिणीनिम्बखदिरपलाशकुभत्वच:।
नि:क्वाथ्य तस्मिन्नि:क्वाथे सर्पीरे विपचेद् घृतम्॥
गृधोलूकपुरीषाणि बस्तगन्धा महिलत्वम्।
निम्बपत्राणि च तथा धूपनार्थं समाहरेत्॥
धारयेदपि गुञ्जाञ्च बलां काकादनीं तथा।
नखा सुक्नैनेचापि सर्पैश्छीतपूतनाम्॥
जलाशयान्ते बालस्य क्षपनञ्चोपदिश्यते।
जलाशयान्ते जलाशयतीरे।
देवे देवक्षौपहारो बालस्य रुधिरं तथा॥
सुक्नैदनाग्निनी देवी सुराशोणितपायिनी।
जलाशयस्था शिवं पातु त्वां शीतपूतना॥"*॥
अथ सुखसक्तिकाग्रहजुष्टस्य चिकित्सामाह।

कपित्थं बिल्वतर्कारीवासागन्धर्वहस्तका:।
कुबेराक्षी च योज्या: स्नुवालाजां परिषेचने॥
तर्कारी गणिकारि इति लोके। गन्धर्वहस्तका:
श्वेत एरण्ड:। कुबेराक्षी माढ़रि इति लोके।
खरवेर्भृङ्गराजां तथैव हयगन्धया।
तैलं वचाञ्च संयोज्य पचेदभ्यङ्गनं ग्रिघो:॥
भृङ्गराज: भंगरा इति लोके।
वचा सर्जरसं कुष्ठं सर्पिषोद्धूपने हितम्॥
वर्णकं चूर्णकं माल्यमङ्गनं पारदं तथा।
मन:शिलाञ्चोपहरेत् गोष्ठमध्ये बलिन्नत:॥
पायसं सपुरोडाशं नक्तमर्ध्यसुपाहरेत्।
मन्त्रपूताभिरद्भिश्च नवैव स्नपनं हितम्॥
अनाभिमन्त्रणमन्त्रमाह।
अलङ्कृता कामवती सुभगा कामरूपिणी।
गोष्ठमध्यालयस्था पातु त्वां सुखसक्तिका॥*॥
अथ नैगमेयग्रहजुष्टस्य चिकित्सामाह।
विल्वाग्निमन्थपूतीकै: कार्यं स्यात् परिषेचनम्।
पूतीक: घोराकरञ्ज इति लोके प्रसिद्ध:।
प्रियङ्गुशरलानन्ताशतपुष्पाकुटन्नटै:।
पक्वैस्तैलं सगोमूत्रं दधिमस्तुक्काञ्जिकै:॥
कुटन्नटं वितुन्नकनाम्नो वृक्षविशेषस्य त्वक्।
गुडतनां इति लोके प्रसिद्धा। सुस्ताकृति:
मूषाकारो वा।
वचां वयस्यां जटिलां गोलोमीं चापि धारयेत्।
वयस्या आमलकी गुडूची वा।
उत्तरादनं हितञ्चात्र स्कन्दापस्मारनाशनम्॥
मर्कटोलूकमूत्राक्तां पुरीषाणि पिलद्यहे।
धूम: सुप्रजसे कार्यो बालस्य हितमिच्छता॥
पिलद्यहे नैगमेयग्रहे।
तिलनखुलकं माल्यं भक्ष्यांश्च विविधानपि।
कौमारपिलमेषाय प्रक्षमूले निवेदयेत्॥
मेषाय नैगमेयग्रहाय।
व्यधस्तात् चीरवृक्षस्य स्नपनञ्चोपदिश्यते॥
अजाननस्तलाधिभु: कामरूपी महाबल:।
बालं पालयिता देवो नैगमेयोऽभिरक्षतु॥"

इति भावप्रकाश:॥

(तथास्य लक्षणान्तरं चिकित्सितञ्च यथा,—
"बलिग्रान्तीहकर्माणि कार्याणि ग्रहग्रान्तये।
मन्त्रवायं प्रयोक्तव्यस्तत्रादौ सर्वकामिक:॥
ॐ नमो भगवते गरुड़ाय ग्रामकाय सत्यस्वरूपाय स्वाहा। ॐ कं खं टं पं शूं वैनतेयाय नम:। ॐ ह्रीं हुं फं।
बालदेहप्रमाणेन पुष्पमालान्तु सर्वत:।
प्रथमे सुक्किकाभक्तबलिर्देयस्तु ग्रान्तिक:।
ॐकारो सुवर्णपक्षो बालकं रक्ष रक्ष स्वाहा॥
ॐ नारायणाय नम:॥"
"प्रथमे दिवसे मासे वर्षे वा गृह्णाति गन्धा नाम मातृका तथा गृहीतमात्रस्य प्रथमं भवति ज्वर:। चक्षुरुन्मीलयति गात्रसुद्वेजयति न ग्रेते क्रन्दति स्तन्यं न गृह्णाति। आँत्कारश्च भवति। बलिन्नस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्तिकां गृहीत्वा पुत्त-

लिकां कृत्वा शुक्लौदन: शुक्लपुष्पं सप्तभक्ता: सप्तप्रदीपा: सप्तस्त्रिका: सप्तवटका:। सप्तसक्तुलिका: जम्बुद्विका गन्धताम्बूलं मत्स्यमांसं सुरामद्यभक्तञ्च पूर्वस्यान्दिशि चतुष्पथे मध्याह्ने बलिर्दातव्य: अन्यत्पूर्वं जलकुम्भे निक्षिप्य स्नान्युदकेन स्नापयेत्। रसोनसिद्धार्थक मेषलङ्गनिम्बपत्राग्निवनिर्मोल्मैर्बालकं धूपयेत्। ॐ नमो नारायणाय अमुकस्य आधिं हन हन सुख सुख स्वाहा एवं दिनत्रयं बलिं दत्वा चतुर्थे दिवसे ब्राह्मणं भोजयेत्। तत: सम्यद्यते शुभम्॥
द्वितीये दिवसे मासे वर्षे वा गृह्णाति सुनन्दा नाम मातृका। तथा गृहीतमात्रस्य प्रथमं भवति ज्वर:। चक्षुरुन्मीलयति गात्रसुद्वेजयति न ग्रेते क्रन्दति स्तन्यं न गृह्णाति आँत्कारश्च भवति।
बलिन्नस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्।
तक्रलं कृसरपृक्तं गृहीत्वा दधिगुडकृसरमिश्रितं सुरावैकं गन्धताम्बूलं पीतपुष्पं पीतसप्तध्वजा:। चत्वार: प्रदीपा: दग्धस्त्रिका: मत्स्यमांससुरास्तिलचूर्णञ्च पश्चिमस्यान्दिशि चतुष्पथे बलिर्दातव्य:। दिनानि त्रीणि क्षिपेत्तत्र तत: स्नान्युदकेन स्नापयेत्। ग्रिघनिर्मोल्मसिद्धार्थमार्जारलोम उशीरबालकगुग्गुलुधूपं दद्यात्। ॐ नमो नारायणाय अमुकस्य आधिं हन हन सुख सुख ह्रीं फट् स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् तत: सम्यद्यते शुभम्। तृतीये दिवसे मासे वर्षे वा गृह्णाति पूतनानाम-मातृका तथा गृहीतमात्रेण प्रथमं भवति ज्वर:। गात्रसुद्वेजयति स्तन्यं न गृह्णाति सृष्टिं वधाति क्रन्दति जृम्भं निरीक्षते। बलिन्नस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्तिकां गृहीत्वा पुत्तलिकां कृत्वा रक्तचन्दनं गन्धताम्बूलं रक्तसप्तध्वजा:। सप्तप्रदीपा: सप्तस्त्रिका:। पश्चिमांससुरामद्यभक्तं दक्षिणस्यान्दिशि अपराह्णे चतुष्पथे बलिर्दातव्य:। ग्रिघनिर्मोल्मगुग्गुलुसर्षपनिम्बपत्रमेष शृङ्गैर्दिनत्रयं धूपयेत्। ॐ नमो नारायणाय अमुकस्य आधिं हन हन सुख सुख स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् तत: सम्यद्यते शुभम्॥
चतुर्थे दिवसे मासे वर्षे वा गृह्णाति सुख-सुक्किकानाम मातृका तथा गृहीतमात्रेण प्रथमं भवति ज्वर:। ग्रीवां नामयति चक्षुरुन्मीलयति स्तन्यं न गृह्णाति रोदिति स्वपिति सृष्टिं वधाति बलिन्नस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटन्तिकां गृहीत्वा पुत्तलिकां कृत्वा उत्पलपुष्पं गन्धं ताम्बूलं दग्धध्वजा: दीपाश्चत्वार:। त्रयोदश स्त्रिका: मत्स्य-मांससुरामद्यभक्तञ्च उत्तरस्यां दिशि अपराह्णे बलिर्देय: चतुष्पथे। ॐ नमो नारायणाय अमुकस्य आधिं हन हन मथ मथ स्वाहा। चतुर्थे

दिवसे ब्राह्मणान् भोजयेत् ततः सम्यद्यते शुभम्।

पञ्चमे दिवसे मासे वर्षे वा गृह्णाति कटपूतना नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रसुङ्मिजयति स्तब्धं न गृह्णाति सृष्टिं बध्नाति। बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। कुम्भकारचक्रस्य स्तिकां गृहीत्वा पुत्तलिकां विधाय गन्धताम्बूलं शुक्लपुष्पं शुक्लौदनं पञ्च ध्वजाः पञ्च प्रदीपाः पञ्चवटकाः ऐशान्यां दिशि बलिर्दातव्यः। घ्राण्युदकेन स्नापयेत्। ग्रिवनिर्मोक्षसर्पनिर्मोक गुग्गुलु निम्बपत्रबालकङ्कतैर्धूपं दद्यात्। ॐ नमो नारायणाय असुकस्य आधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्यद्यते शुभम्॥ षष्ठे दिवसे मासे वर्षे वा गृह्णाति शाकुनिकानाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रभेदं दर्शयति दिवारात्रानुत्यानं भवति। जृम्भं निरीक्षते। बलिं तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा शुक्लपीतरक्तपुष्पगन्धताम्बूलानि दद्यात् दीपाः। दश मीनध्वजाः दश स्वस्तिकाः दश वटकाः। क्षीरजम्बुडिकाः। मत्स्यमांससुरा आमेय्यान्दिशि निष्क्रान्ते मध्याह्ने बलिर्दातव्यः। घ्राण्युदकेन स्नापयेत्। ग्रिवनिर्मोक्षरसोनगुग्गुलुसर्पनिर्मोकनिम्बपत्रबालकङ्कतैर्धूपं दद्यात्। ॐ नमो नारायणाय असुकस्य आधिं चूर्णय चूर्णय हन हन स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्यद्यते शुभम्॥

सप्तमे दिवसे मासे वर्षे वा गृह्णाति शुष्करेवती नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रसुङ्मिजयति सृष्टिं बध्नाति रोदिति। बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। रक्तशुक्लपुष्पं गन्धताम्बूलरक्तौदनं क्षीरराजयोदश स्वस्तिकाः त्रयोदश सप्तधुलिकाः जम्बुडिकाः मत्स्यमांससुराः त्रयोदश ध्वजाः पञ्च प्रदीपाः। पश्चिमस्यान्दिशि ग्रामनिष्क्रान्तेऽपराह्णे दत्त्वामाश्रित्य बलिर्दातव्यः। घ्राण्युदकेन स्नापयेत्। गुग्गुलुमेषशृङ्गसर्षपोग्रौर बालकङ्कतैर्धूपयेद्दद्यात्। ॐ नमो नारायणाय दीप्ततेजसे हन हन सुच सुच स्वाहा॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्यद्यते शुभम्।

अष्टमे दिवसे मासे वर्षे वा गृह्णाति अर्यका नाम मालका तया गृहीतमात्रेण प्रथमं भवति ज्वरः। मुखगन्धः पूतिगन्धश्च जायते। आहारं न गृह्णाति गात्रसुङ्मिजयति। बलिस्तस्य प्रवक्ष्यामि ततः सम्यद्यते शुभम्। रक्तपीतध्वजाः चन्दनं पीतपुष्पं सप्तधुलयः पर्पटिका मत्स्यमांससुराः जम्बुडिकाः प्रत्यहं बलिर्दद्यात्॥ ॐ नमो नारायणाय वैलोक्यविजयाय चतुर्दिग्गामीश्वराय आधिं हन हन सुच सुच जल ज्वल दह दह ॐ ह्रीं फट् स्वाहा॥ चतुर्थे दिवसे ब्राह्मणान् भोजयेत् ततः सम्यद्यते शुभम्।

नवमे दिवसे मासे वर्षे वा गृह्णाति खलिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। शिरः कर्षयति गात्रभेदं दर्शयति सृष्टिं बध्नाति। निद्रातितरा स्याद्बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। नद्युभयतटस्तिकां गृहीत्वा पुत्तलिकां निर्माय शुक्लवस्त्रेण वेष्टयेत्। शुक्लपुष्पं शुक्लौदनं गन्धताम्बूलं शुक्लाः त्रयोदश ध्वजाः त्रयोदश प्रदीपाः त्रयोदश स्वस्तिकाः त्रयोदश मत्स्यमांससुराः। उत्तरदिग्विभागे ग्रामनिष्क्रान्ते बलिं दापयेत्। घ्राण्युदकेन स्नापयेत्। गुग्गुलुनिम्बपत्रगोधूमगोघृतङ्कश्वेतसर्षपधूपैर्धूपं दद्यात्। ॐ नमो नारायणाय चतुर्भुजाय हन हन सुच सुच स्वाहा। चतुर्थदिवसे ब्राह्मणान् भोजयेत्ततः सम्यद्यते शुभम्।

दशमे दिवसे मासे वर्षे वा यदि गृह्णाति निर्ऋता नाम मालका। तया गृहीतमात्रेण प्रथमं भवति ज्वरः। गात्रसुङ्मिजयति ओंकारं करोति पुरीषमूत्रञ्च बहु भवेत्। बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। पारावारस्य स्तिकया पुत्तलिकां कृत्वा रक्तचन्दनगन्धताम्बूलादिभिर्भूषयित्वा पञ्च वर्णाः पञ्च ध्वजाः पञ्च प्रदीपाः पञ्च स्वस्तिकाः पञ्च पुत्तलिका मत्स्यमांससुराः वायव्यान्दिशि बलिन्दद्यात्। काकविष्ठागोमांसगोघृतङ्करसोनमाञ्जारोमनिम्बपत्रधूपैर्धूपयेत्। ॐ नमो नारायणाय चण्डिनरूपाय हन हन सुच सुच स्वाहा। चतुर्थे दिवसे ब्राह्मणान् भोजयेत्ततः सम्यद्यते शुभम्॥

एकादशे दिवसे मासे वर्षे वा यदा गृह्णाति पिलिपिच्छिका नाम मालका। तया गृहीतमात्रस्य प्रथमं भवति ज्वरः। आहारं न गृह्णाति। जृम्भं दृष्टिर्भवति गात्रभङ्गश्च भवति ओंकारश्च भवति। बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। पिष्टकेन पुत्तलिकां कृत्वा रक्तचन्दनरक्तं तस्या मुखं दुग्धेन सिञ्चेत् पीतपुष्पं गन्धताम्बूलं सप्त प्रदीपा अष्टौ वटका अष्टौ सप्तधुलिका अष्टौ पूरिका मत्स्यमांससुराः पूर्वस्यान्दिशि बलिर्दातव्यः। घ्राण्युदकेन स्नापयेत्। ग्रिवनिर्मोक्ष गुग्गुलु गोघृतङ्कसर्पनिर्मोकधूपैर्धूपयेत्। ॐ नमो नारायणाय सुच सुच स्वाहा। चतुर्थेदिवसे विप्रान् भोजयेत्तेन सम्यद्यते शुभम्॥

द्वादशे दिवसे मासे वर्षे वा यदा गृह्णाति कामुका नाम मालका। तया गृहीतमात्रस्यादौ जायते ज्वरः। हसित्वा वदति अङ्गुल्या तर्जयति क्रामति निःश्वसिति। सुहुर्मुहुर्म्लायति। आहारं न करोति। बलिस्तस्य प्रवक्ष्यामि येन सम्यद्यते शुभम्। क्षीरेण पुत्तलिकां कृत्वा शुक्लकुसुमं गन्धताम्बूलं शुक्लाः सप्त ध्वजाः। सप्त सप्तधुलिकाः॥ सप्त प्रदीपाः।

करञ्जेन दधिभक्तेन सर्वकर्मबलिं दद्यात् घ्राण्युदकेन स्नापयेत्। श्वेतसर्षपगुग्गुगुग्गुलुग्रिवनिर्मोक्षधूपैर्धूपयेत्। ॐ नमो नारायणाय आधिं सुच सुच हन हन स्वाहा। चतुर्थे दिवसे विप्रान् भोजयेत्। ततः सम्यद्यते शुभम्॥

इति रावणोक्तं बालतन्त्रं समाप्तम्॥

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे।)

बालवर्ण्यः, पुं, (बालस्य बालकस्येव वर्ण्या यस्य।) कार्त्तिकेयः। इति त्रिकाण्डशेषः॥ बालकस्य चरित्रे, क्ली॥

बालतनयः, पुं, (बालानि नवोद्गतपत्राणि तनयानीव यस्य।) खदिरवृक्षः। इत्यमरः। २।४।१६६॥ (गुणादयोऽस्य खदिरशब्दे ज्ञातव्याः॥) बालकपुत्रश्च॥

बालतन्त्रं, क्ली, (बालाय बालकरक्षार्थं तन्त्रमुपायः ग्राह्यं वा।) गर्भिणीचर्य्या। तत्पर्य्यायः। कुमारभृत्या २ गर्भिण्युपेक्षणम् ३। इति त्रिकाण्डशेषः॥ (अस्य विवरणन्तु सुश्रुते उत्तरस्थाने १ अध्याये। यथा, "ग्रहं बालानां कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं वाजीकरणसंज्ञमिति॥" कौमारभृत्यस्य वा बालतन्त्रस्य लक्षणमाह तत्रैव। "कौमारभृत्यं नाम कुमारभवनधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्॥" बालतन्त्रोक्ता रोगाः यथा तत्रैव ३ अध्याये।

"ग्रहग्रहानिधानं स्कन्दस्य च निषेधनम्।
अपस्मारग्रहाणाञ्च रेवत्याश्च पुनः पृथक्॥
पूतनायास्तथान्धाया मङ्किका घोरपूतना।
नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा॥
कौमारतन्त्रमित्येतत् शारीरेषु प्रकीर्तितम्॥"
एतेषां विवरणन्तु बालग्रहशब्दे द्रष्टव्यम्॥)

बालहृत्, क्ली, (बालं नवजातं हृत्तम्।) नवहृत्तम्। तत्पर्य्यायः। ग्रध्नम् २। इत्यमरः। २।४।३६७॥ (यथा, रघौ ७।२६ श्लोकटीकायां मल्लिनाथः। गङ्गायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि मुख्यानि बालहृत्तानि यस्मिन् तत्॥")

बालदलकः, पुं, (बालानि दलानीव दलानि यस्य। यद्वा बाल इव क्षुद्रं दलं यस्य। ततः स्वार्थे कन्।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥

बालधिः, पुं, (बालाः केशाः धीयन्तेऽत्र। बाल + धा + कि।) केशयुक्तलाङ्गूलम्। इत्यमरः। २।८५०॥ (यथा, किरातं। १२। ४७।

"चमरीगणैः स्निग्धबलस्य
बलवति भयेऽप्युपस्थिते।
वपुषितनिषु विषक्तदृष्टयु-
स्त्रियबालबालधिधिरादृते धृतिः॥")

बालपत्रः, पुं, (बाल इव क्षुद्रं पत्रं यस्य।) खदिरवृक्षः। इत्यमरटीकायां भरतः॥ यवासः। इति राजनिर्घण्टः॥ (बालं पत्रमिति विग्रहे।) क्ली। नूतनपर्णम्॥ (यथास्य पर्य्यायः॥

"खदिरो रक्तसारश्च गायत्री दन्तधावनः।
कण्टकी बालपत्रश्च बहुगुणश्च यष्टिमधुः॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

बालपत्रकः, पुं, (बालपत्र एव। स्वार्थे कन्।) खदिरवृक्षः। इति त्रिकाण्डशेषः॥

बालपाठ्या, स्त्री, (बालपाठी केशसन्दृष्टे साधुः तत्र साधुरिति यत्।) सीमन्तिकाख्यितखर्जादि-रञ्जितपट्टिका। सिँती इति भाषा। तत्पर्य्यायः। परिनद्धा २। इत्यमरः।२।६।१०६॥ बालपाठ्यञ्जितमणिः। इति तट्टीकायां भरतः॥

बालपुष्पिका, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः। ततः स्वार्थे कन् कापि अत इत्वम्।) यूथिका। इति राजनिर्घण्टः॥ (विवृतिरस्या यूथिकाशब्दे निर्द्देक्ष्यते॥)

बालपुष्पी, स्त्री, (बालानि क्षुद्राणि पुष्पाणि यस्याः सा।) यूथिका। इति जटाधरः॥

बालभद्रकः, पुं, (बालेऽपि भद्र इव। ततः स्वार्थे कन्।) विल्वभेदः। तत्पर्य्यायः। शाम्भवः २। इति शब्दचन्द्रिका॥

बालभैषज्यं, क्ली, (बालं भैषज्यम्। यद्वा, बालस्य शिशोर्भैषज्यम्।) रसाञ्जनम्। इति राज-निर्घण्टः॥ बालकस्यौषधञ्च॥ (तद्यथा,—
"भैषज्यं पूर्व्वसृष्टिं नराणां यज्ञुरादिषु।
कार्य्यमत्रैव बालानां मात्रा तस्य कनीयसी॥"
इति वैद्यकचक्रपाणिसंगृहे बालरोगाधिकारे॥)

बालभोज्यः, पुं, (बालानां भोज्यः।) चणकः। इति राजनिर्घण्टः॥ बालकभक्षणीये, त्रि॥

बालमक्षिका, स्त्री, (बाला क्षुद्रा मक्षिका इव।) क्षुद्रमक्षिका। छिट्‌का इदुर इति भाषा। तत्पर्य्यायः। गिरिका २। इत्यमरः।२।५।१०॥ चिक्कः ३ वेणुजनकुलः ४ चिका ५। इति शब्द-रत्नावली॥

बालयज्ञोपवीतकं, क्ली, (बालं यज्ञोपवीतम्। ततः स्वार्थे कन्।) उपवीतिविशेषः। तत्पर्य्यायः। उरस्कटः २ पञ्चवटः ३। इति त्रिकाण्डशेषः॥

बालराजं, क्ली, (बालः स्वल्पोऽपि राजते इति। राज+घञर्थे क।) वैदूर्य्यम्। इति शब्दरत्ना-वली॥ बालकश्रेष्ठे, पुं॥

बालरोगः, पुं, (बालस्य रोगः।) बालकस्य व्याधिः। तस्य निदानं लक्षणानि चाह।
"धात्र्याश्च गुरुभिर्भोज्यैर्विषमैर्दोषजैस्तथा।
दोषा दैवैः प्रकुप्यन्ति ततः स्तन्यं प्रदूषयति॥
मिथ्याहारविहारिण्या दुष्टा वातादयः स्त्रियाः।
दूषयन्ति पयस्तेन जायन्ते व्याधयः शिशोः॥
वातदुष्टं शिशुः स्तन्यं पिबन् वातगदातुरः।
श्यामस्वरः क्षामाङ्गः स्याद्वह्विष्मान्मारुतः॥
स्निग्धो भिन्नमलो बालः कामलापित्तरोगवान्।
तृष्णातुरास्यसर्व्वाङ्गः पित्तदुष्टं पयः पिबन्॥
श्लेष्मदुष्टं पिबन् क्षीरं लालासुः श्लेष्मरोगवान्।
निद्रार्दितो जडः सूनवल्लालास्यश्चक्षणः शिशुः॥
[illegible] ये।

बालानामपि ते तद्वद्दोषा भिषगुपक्रमैः॥
बालानामेव ये रोगा भवन्ति महतां न च।
तालुकण्टकमुक्तांस्तानवधारय यत्नतः॥"
तत्रादौ तालुकण्टकमाह।
"तालुमांसे कफः कुद्धः कुरुते तालुकण्टकम्।
तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते॥
तालुपानात् क्षतद्वेषः क्षुच्छ्वासात् पानं प्लवद्-द्रवम्।
लड्डुकिकण्ठास्यरुजा ग्रीवादुर्ब्बलता घसिः॥"
पानं क्षतस्य। प्लवद्द्रवं द्रवरूपम्॥
अथ महापद्मकमाह।
"विसर्पेस्तु शिशोः प्राणनाशनः शीर्षवस्तिजः।
पद्मवर्णो महापद्मरोगो दोषत्रयोद्भवः।
मुखाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत्॥"
पद्मवर्णः लोहितवर्णः तत्र शीर्षजो विसर्पः मुखाभ्यां हृदयं याति हृदयात् गुदं व्रजेत्। एवं वस्तितो गुदं याति। गुदतो हृदयं हृदया-च्छिरो याति इति बोद्धव्यम्॥
अथ कुकूणकमाह।
'कुकूणकः क्षीरदोषात् शिशूनामेव वर्त्मनि।
आयते तेन तत्रेक्षं कण्डूरं प्रस्रवेन्मुहुः॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासाप्रघर्षणम्।
मुक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः॥'
कुकूणकः कोयुआ इति लोके ख्यातः॥ * ॥
अथ सुप्तिगुदपाकमाह।
'वातेनाधोगतेना मिः सरुजा सुप्तिरुच्यते।
बालस्य गुदपाकाख्यो व्याधिः पित्तेन जायते॥'
अथाहिपूतनं आह।
'शुक्लक्षतसमायुक्तेऽधोनेत्रपाते शिशोर्भवेत्।
स्विन्ने वा स्राव्यमाणस्य कण्डू रक्तकफोद्भवा॥
कण्डूयनात्ततः क्षिप्रं स्फोटाः सास्रा भवन्ति।
एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥
स्विन्ने स्वेदिते॥ * ॥ अथाजगल्लीमाह।
स्निग्धा सवर्णा ग्रथिता निरुजा मुखसन्निभा।
कफवातोत्थिता ज्ञेया बालानामजगल्लिका॥'
ग्रथिता गुम्फितेव। मुखसन्निभा। मुखाकृतिः॥
अथ पारिगर्भिकमाह।
'मातुः कुमारी गर्भिण्याः स्तन्यं प्रायः पिबन्नपि।
कासामिसादवमथुतन्द्राकार्श्यारुचिभ्रमैः॥
युज्यते कोष्ठदुष्ट्या च तमाहुः पारिगर्भिकम्।
रोगं परिभवाख्यञ्च तत्र युञ्जीत दीपनम्॥'
पिबन्नपीत्यपिशब्दाद्यपिबन्नपि पारिगर्भिकः।
अहीड़ी इति लोके।
परिभवाख्यं परिभवेति नामान्तरम्॥ * ॥
अथ दन्तोद्भेदकान् रोगानाह।
'दन्तभेदः शिशोः सर्व्वरोगाणां कारणं स्मृतम्।
विशेषाच्छूरविड्भेदकासच्छर्द्दिरीरुजम्॥
अभिष्यन्दस्य पोथक्या विसर्पस्य च जायते॥'
कारणमित्यनयः। पोथक्याः सर्व्वरोगविशेषस्य॥
अथ बालरोगाणां चिकित्सा।
'भैषज्यं पूर्व्वसृष्टिं मनुजानां यज्ञुरादिषु।
तदेव कार्य्यं बालानां किन्तु दाहादिकं विना॥'

दाहादिकं विना अग्निदाहादिप्रकारवमनविरे-चनशिराव्यधादिकं विना। महाकष्टे चोत्पन्ने वमनविरेकाद्यं दद्यात्। यत आह सुश्रुतः।
विरेकवस्तिवमनानृते कुर्य्याच्च नाल्पयादिति।
अल्पयात् विनाशकरकष्टात् ऋते विना॥
'त एव दोषा दूष्याश्च ज्वराद्या आशयाश्च ते।
अतस्तदेव भैषज्यं मात्रा तस्य कनीयसी॥'
अस्य बालस्य। कनीयसीमात्रामाह विश्वा-मित्रः।
'विड्भ्रूफलमात्रन्तु जातमात्रस्य भेषजम्।
अनेनैव प्रमाणेन मासि मासि प्रवर्द्धयेत्॥'
विड्भ्रूपरिमितं भेषजं चूर्णीकृत्य विंवा कल्को-कृत्याथवाबलेहीकृत्य दद्यादित्यर्थः। तत्कालान्तरं तत्रैवाभिहितम्।
'प्रथमे मासि बालाय देया भेषजरक्षिका।
अवलेह्या तु कर्त्तव्या मधुसर्पिःसमायुते॥
एकैका वर्द्धयेत्तावद्यावत् संवत्सरो भवेत्।
तद्दूर्द्धं मात्रवृद्धिः स्याद्यावत् षोड़शवत्सरः॥'
एकैकां रक्तिकाम् तद्दूर्द्धं वर्षोपरि मात्रवृद्धिः प्रतिवर्षं पञ्चशुक्लात्मकस्य मात्रस्य वृद्धिर्भवति। शुक्लाः पञ्चाद्यमाषक इत्यमरसिंहः॥
'ततः स्थिरा भवेत्तावद्यावद्वर्षाणि सप्ततिः।
ततो बालकवन्मात्रा हासनीया शनैः शनैः॥'
ततः षोड़शवत्सरोपरि।
'चूर्णकल्काबलेहानामियं मात्रा प्रकीर्त्तिता।
कषायस्य पुनः सैव विज्ञातव्या चतुर्गुणा॥
क्षीरस्य स्निग्धोदियमौषधं क्षीरसर्पिषा।
धात्र्यास्तु केवलं देयं न क्षीरेणापि सर्पिषा॥'
क्षीरान्नादस्य पूर्ब्बवत् क्षीरसर्पिषा। प्रकारा-न्तरेणौषधपानमाह सुश्रुतः।
'येषां गदानां ये योगाः प्रवक्ष्यन्ते गदङ्करैः।
तेषु तत्कल्कसंसिद्धौ पाययेत स्निग्धं क्षतौ॥'
अवक्षतानां बालानामभ्यङ्गरक्षाधिस्नानोपाय-माह।
'अङ्गप्रत्यङ्गदेशे तु रुजा यत्रास्य जायते।
मुहुर्मुहुः स्पृशति तं स्पृश्यमानेन रोदिति॥
निमीलिताक्षो मूर्च्छत्यो रोगे नो धारयेच्छिरः।
वस्तिस्थे मूत्रसङ्गात्तौ क्षुधाऽऽर्त्तोऽपि न गच्छति॥
विण्मूत्रवातसङ्गैकलक्ष्याच्छर्द्यादिनाऽऽकुलजनैः।
कोष्ठे आधीन् विजानीयात् सर्व्वत्रस्यांश्च रोदनैः॥'
अथादौ ज्वरस्य चिकित्सामाह।
'सर्व्वं निवार्य्यते बाले स्तन्यं तेन निवार्य्यते।
मात्रया लङ्घयेद्वापि स्निग्धोरेतद्विलङ्घनम्॥'
मात्रया लङ्घयेत् लघु भोजयेत्।
'भद्रमुस्ताभयाविल्वपटोलमधुकैः कृतः।
क्वाथः कोष्णः स्निग्धोरेच नि:शेषज्वरनाशनः॥'
भद्रमुस्तादिक्वाथः सर्व्वज्वरेषु॥ * ॥
'धनञ्जयाश्वगन्धाङ्कोलीचूर्णं क्षौद्रेण संयुतम्।
स्निग्धोल्वणातिसारघ्नं कासं श्वासं वमिं हरेत्॥'
अश्वगन्धा अतिविषा। चतुर्भद्रिका ज्वराति-सारेषु॥

'विल्वस्य पुष्पाणि च धातकीनां
जलं सलोध्रं गजपिप्पली च ।
जाताबलेहौ मधुना विमिश्रौ
बालेषु योज्यावतिसारितेषु ॥'

जलं बाला । विल्वादिजाताबलेहौ। अतीसारेषु॥

'समङ्गाधातकीलोध्रसारिवाभिः कृतं जलम् ।
दुर्ब्बरेऽपि ग्रिग्नोर्दद्यमतीसारे समाधिकम् ॥'

समङ्गा लज्जालुमूलम् । समङ्गादिजाथो दुर्ब्बरेऽतीसारे ॥ * ॥

'विड्गान्यजमोदा च पिप्पलीनक्तमालानि च ।
एषामाजीर्ण्य चूर्णानि सुखं तप्तेन वारिणा ।
आमे प्रवृत्तेऽतीसारे कुमारं पाययेद्भिषक् ॥'

विड्गादिचूर्णमतीसारे ॥ * ॥

'मोचरसः समङ्गा च धातकी पद्मकेशरम् ।
पिष्टैरेतैर्यवागूः स्याद्रक्तातीसारनाशिनी ॥'

मोचरसलज्जालुमूलबालैफलकमलकेशरसमुदिततोला १ नक्तमालीछल्य यवागूः साधनीया । मोचरसादियवागू रक्तातिसारे ॥ * ॥

'नागरातिविषामुस्तावालकैरुदयैः कृतम् ।
कुमारं पाययेत् प्रातः सर्व्वातीसारनाशनम् ॥'

नागरादिजाथः सर्व्वातीसारे ॥ * ॥

'लाजासक्तुयष्टिमधुका गुर्करा क्षौद्रमेव च ।
तण्डुलोदकयोगेन क्षिप्रं हन्ति प्रवाहिकाम् ॥'

लाजादिचूर्णं प्रवाहिकायाम् ॥ * ॥

'रजनी सरलो दारुहरिद्रा गजपिप्पली ।
वृक्षिपर्णी घृताक्ता च लोढ्रं माक्षिकसर्पिषा ॥
दीपनं ग्रहणीं हन्ति मारुतार्शःसकामलाम् ।
ज्वरातीसारपाण्डूनं बालानां सर्व्वरोगनुत् ॥'

रजन्यादिचूर्णं ग्रहण्यादौ ॥ * ॥

'पौष्करातिविषाशृङ्गीमागधीधन्वयासकैः ।
कृतं चूर्णन्तु सक्षौद्रं ग्रिग्नूनां पञ्चकासजित् ॥'

पौष्करादिचूर्णं कासेषु ॥ * ॥

'पौष्करातिविषावासाकणाशृङ्गीरसं लिहन् ।
मधुना सुच्यते बालः कासैः पञ्चभिरुच्छ्रितैः ॥'

पुष्करादिरसः कासेषु ॥ * ॥

'व्याघ्रीकुसुमसंजातकेशरैरवलेहिका ।
मधुना चिरसंजातान् ग्रिग्नोः कासान् व्यपोहति ॥'

कासे ॥ * ॥

'व्याघ्रं शर्करया युक्तं तण्डुलोदकसंयुतम् ।
पानमेतत् प्रदातव्यं कासश्वासापहं ग्रिग्नोः ॥'

व्याघ्रादिपानं कासश्वासयोः ॥ * ॥

'द्राक्षावासाभयालाजाचूर्णं क्षौद्रेण सर्पिषा ।
लोढ्रं श्वासं निहन्त्याशु कासञ्च तमकं तथा ॥'

तमकं श्वासभेदम् । द्राक्षादिचूर्णं कासश्वासयोः ॥

'चूर्णं कटुकरोहिण्या मधुना सह योजयेत् ।
हिक्कां प्रशमयेत् क्षिप्रं छर्द्दिञ्चापि चिरोत्थिताम् ॥'

हिक्कायां छर्द्यां च ॥ * ॥

'व्याघ्राखिलाजविभृत्यं सक्षौद्रं छर्द्दिमुद्धरेत् ॥'

छर्द्याम् ॥ * ॥

'पीतं पीतं वमेद्यस्तु क्लम्यं तं मधुसर्पिषा ।
द्विवार्त्ताकी फलरसं पञ्चकोलञ्च लेहयेत् ॥'

द्विवार्त्ताकी हृद्गतीह्ययम् ॥ * ॥

'पञ्चकोलानि पिप्पलीपिप्पली-
मूलचव्यचित्रकनागराणि ॥'

पञ्चकोलानि ॥ * ॥

'क्षीरेक्षुरकैरण्डौद्रं लौढ्रं तण्डुलाम्बुरं परम् ।
घृतेन सिन्धुविन्ध्यैलाछिन्नभागैरजोल्लिहन् ॥
आमार्शं वातिकं शूलं हन्यात्तोयेन वा ग्रिग्नुः॥'

आमार्शे वातशूले च ॥ * ॥

'कणोषणाम्बिकाक्षौद्रक्षौद्रसैन्धवैः कृतः ।
मूत्रयेद्यं प्रयोक्तव्यः ग्रिग्नूनां लेह उत्तमः ॥'

मूत्राघाते ॥ * ॥

'यदा तु दुर्ब्बलो बालः खादन्नपि च वह्निमान् ।
विदारीकन्दगोधूमयवचूर्णं घृतप्लुतम् ॥
खादयेत्तदनु क्षीरं पूतं समधुशर्करम् ॥'

कार्य्ये ॥ * ॥

'सुरसकुशाश्वबीजानि भद्रदारुकलिङ्गकान् ।
पिष्ट्वा तोयेन संलिप्येल्लेपोऽयं ग्रीथकृच्छ्रिणोः ॥'

ग्रीथे ॥ * ॥

'पटोलत्रिफलारिष्टहरिद्राक्वथितं पिबेत् ।
घृतमधुसर्पविस्फोटज्वरान् शान्तये ग्रिग्नुः ॥'

घृतमधुसर्पविस्फोटज्वरेषु ॥ * ॥

'गृहधूमनिशाकुष्ठराजिकैरञ्जयेत् ग्रिग्नोः ।
लेपस्तक्रेण हन्यात्तु सिध्मपामविचर्च्चिकाम् ॥
सारिवातिललोध्राणां कषायो मधुकस्य च ।
संस्रावित्रि सुखे शस्तो धावनार्थं ग्रिग्नोः सदा ॥'

मुखस्रावे ॥ * ॥

'व्यक्तत्वग्दलचौद्रैर्मुखपाके प्रलेपनम् ॥'

मुखपाके ॥ * ॥

'पिप्पलीत्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतम् ।
बालो रोदिति यत्तस्मै लेढ्रं दद्यात् सुखावहम् ॥'

रोदने ॥ * ॥

'हरीतकी वचा कुष्ठं कल्कं माक्षिकसंयुतम् ।
पीत्वा कुमारः क्षत्येन मुच्यते तालुकण्टकात् ॥'

तालुकण्टके ॥ * ॥

'फलत्रिकं लोध्रपुनर्नवे च
सशृङ्गवेरं दृढगोदयञ्च ।
आलेपनं श्लेष्महरं सुखोष्णं
कुकूणके कार्य्यमुदाहरन्ति ॥'

कुकूणके ॥ * ॥

'स्नुक्षीरेणाग्नितप्तेन क्षीरसिक्तेन सोष्मणा ।
स्वेदयेदुत्थितां नाभिं ग्रीथक्लेशोपशान्तये ॥'

नाभिग्रीथे ॥ * ॥

'नाभिपाके निशालोध्रप्रियङ्गुमधुकैः कृतम् ।
तैलमभ्यञ्जने शस्तमभिघाप्यवधूलनम् ॥
दग्धेन च्छागमूत्रक्तता नाभिपाकेऽवचूर्णनम् ।
लक्तचूर्णैः क्षौरिणां वापि कुर्याच्चन्दनरेणुना ॥'

नाभिपाके ॥ * ॥

'गुदपाके तु बालानां पिप्पलीं कारयेत् क्रियाम् ।

रसाञ्जनं विशेषेण पानलेपनयोर्हितम् ॥
मूलयष्ट्यञ्जनैश्चूर्णं ग्रिग्नूनां गुदपाकनुत् ॥'

अञ्जनं रसाञ्जनम् । गुदपाके ॥ * ॥

'मूलत्वक्क्षीरयष्ट्याह्वैर्लेपो हन्योऽहिपूतने ॥'

अहिपूतने ॥ * ॥

'पारिगर्भिकरोगे तु पूज्यते वह्निदीपनम् ॥'

पारिगर्भिके ॥ * ॥

'दन्तपालिन्तु मधुना चूर्णेन प्रतिसारयेत् ।
धातकीपुष्पपिप्पल्योर्धात्रीफलरसेन वा ॥
दन्तोत्थानभवा रोगाः पीडयन्ति न बालकम् ।
जाते दन्ते हि ग्राम्यन्ति यतस्तद्धेतुका गदाः ॥'

दन्तोद्भेदजरोगेषु ॥ * ॥

'सौवर्णं सुकृतं चूर्णं कुष्ठं मधु घृतं वचा ।
मत्स्याक्षकः शङ्खपुष्पी मधु सर्पिः सकाञ्चनम् ॥
अर्कपुष्पीमधु घृतं चूर्णितं कृतकं वचा ।
सहेमचूर्णं कैटर्य्यं श्वेता दूर्व्वा घृतं मधु ॥
चत्वारोऽभिहिताः प्राप्ता अर्द्धश्लोकसमापनाः ।
कुमाराणां वपुर्मेधाबलपुष्टिकराः स्मृताः ॥'

सावर्णचूर्णम् । चतुष्वपि योगेषु मालितसुवर्णचूर्णम् । मत्स्याक्षकः ब्राह्मी इति लोके प्रकम इत्येके । अर्कपुष्पी अर्कसदृशपुष्पलता । कैटर्य्यं कटफलम् । श्वेता दूर्व्वाविशेषभेदं पर्य्यालोचिनः । संवत्सरं यावदेते योगाः प्रयोज्याः द्वादशवर्षाणीति केचित् ॥ * ॥

'बालानाञ्च वपुर्मेधाबलपुष्टिकराः स्मृताः ।
लाक्षारसे समे तैलं मस्तुल्यञ्च चतुर्गुणं ॥
राखाचन्दनकुष्ठाब्दाब्जिगन्धानिशायुतैः ।
मूलाब्दादारुयष्ट्याह्वसर्व्वातिक्ताहरेणुभिः ॥
संसिद्धं ज्वररोगघ्नं बलवर्णकरं ग्रिग्नोः ।"

लाक्षादितैलं बालेषु ॥ * ॥ इति भावप्रकाशे बालरोगाधिकारः ॥

बालवायजं क्ली, (बालवाये वैदूर्य्यप्रभवे देशविशेषे जायते इति । जन्+ड ।) वैदूर्य्यम् । इति त्रिकाण्डशेषः ॥ (विशेषविवरणमस्य वैदूर्य्यशब्दे द्रष्टव्यः ॥)

बालवासः [स्] क्ली, (बालानां लोम्नां बालैर्निर्म्मितं वा वासः ।) कम्बलनिर्म्मितवस्त्रम् । बालकस्य वस्त्रञ्च । इति केचित् ॥

बालवाह्यः पुं, (बालाः ग्रिग्नवो वाह्या यस्य । एते खलु कस्मिंश्चिदुपस्थिते भये ग्रिग्नून् पृष्ठे निधाय पलायन्त इति प्रसिद्धेरस्याख्यम् ।) वनच्छागः । इति हारावली । ८१ ॥ बालकवह्नयेऽपि त्रि ॥

बालव्यजनं, क्ली, (बालस्य चमरीपुच्छस्य बालेन वा निर्म्मितं व्यजनम् ।) चामरम् । तत्पर्य्यायः । रोमगुच्छः २ प्रकीर्णकम् ३ । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । २३ ।

"लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चञ्चरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः ॥"

बालार्कः

बालकस्य अञ्जनञ्च ।
"बालयञ्जनमोजस्यं मणिकादीन् व्यपोहति ।"
इति हयशुक्लः ॥

बालव्रतः, पुं, मङ्गुचीधनामकपूर्व्वजिनविशेषः ।
इति त्रिकाण्डशेषः ॥

बालसन्ध्याभः, पुं, (बालसन्ध्या इव आभा यस्य ।)
अरुणवर्णः । इति हेमचन्द्रः ॥

बालसूर्य्यः, स्त्री, (बालः सूर्य्य इव) वैदूर्य्यमणिः ।
इति त्रिकाण्डशेषः ॥ प्रातःकालीनसूर्य्यः, पुं ॥

बालसूर्य्यकः, स्त्री, (बालसूर्य्य एव । बालसूर्य्य + स्वार्थे कन् ।) वैदूर्य्यम् । इति शब्दरत्नावली ॥

बालहस्तः, पुं, (बाला हस्त इव मणिकादीनां निवारकत्वात् ।) बालधिः । लोमयुक्तलाङ्गूलम् । इत्यमरः ॥ (केशानां हस्तः समूहः अ । केशसमूहश्च हस्त्युच्चयदन्तः ॥)

बाला, स्त्री, (बालाः केशा इव पदार्था विद्यन्ते यस्याः । बाल + अर्श आद्यच् ततष्टाप् ।) नारिकेलः । हरिद्रा । मल्लिकाभेदः । अलङ्कारभेदः । मेध्यम् । त्रुटिः । स्त्री । इति मुद्राङ्किता मेदिनी ॥ घृतकुमारी । श्रीवेरम् । इति शब्दचन्द्रिका ॥ अम्बष्ठा । नीलझिण्टी । इति राजनिर्घण्टः ॥ एकवर्षवयस्का गौः । यथा,—
"वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी ।"
इति प्रायश्चित्ततत्त्वम् ॥
षोडशवर्षीया स्त्री । सा षोडशवर्षकाले च प्रशंसनीया हर्षदा च । इति राजवल्लभः ॥ (यथा, रतिमञ्जर्य्याम् ।
"बाला स्त्री प्राणदा प्रोक्ता तरुणी प्राणहारिणी ।
प्रौढ़ा करोति दुःखार्त्तं वृद्धा मरणमादिशेत् ॥"
यथा, मेघदूते । ८३ ।
"गाढ़ोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वाल्यरूपाम् ॥"
कन्यामात्रेऽपि । यथा, मार्कण्डेये । २१ । ३८ ।
"दृश्यञ्च मूर्च्छामगत् कारणं यत् प्रचक्ष्व तत् ।
त्वयि प्रीतिमती बाला दर्शनादेव मानद ! ॥"
पञ्चवर्षा स्त्रिया बाला । इति हारीते । १ । ५ ।)
अनड्वाहिवार्षिकी कन्या । तस्यास्तद्वयस्कबालस्य च अग्निसंस्कारादिनिषेधो यथा,—
"अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः ।
न तेषामग्निसंस्कारो न पिण्डं नोदकक्रिया ॥"
इति गारुड़े १०७ अध्यायः ॥

बालाक्षी, स्त्री, (बालाः केशा इवाक्षिसदृशं पुष्पं यस्याः ।) केशपुष्पाहृक्षः । तत्पर्य्यायः । मालती२ दुर्गापुष्पी ३ केशधारिणी ४ । इति शब्दचन्द्रिका ॥

बालार्कः, पुं, (बालो नवोदितोऽर्कः सूर्य्यः ।) प्रातःकालीनसूर्य्यः । यथा,—
"रक्तवस्त्रपरीधानां बालार्कसदृशीं तनुम् ॥"
इत्यादि विश्वसारे अगदाग्नीध्यानम् ॥
सूर्य्यः । यथा,—

बालिप्रः

"मुक्त्वामांसं स्त्रियो हत्वा बालार्कस्तरुणं दधि ।
प्रभाते मैथुनं निद्रा यशः प्राणहराणि षट् ॥"
इति चाणक्यम् ॥

बालिः, पुं (बाले केशे जातः । बाल + इञ् ।) कपिविशेषः । तत्पर्य्यायः । ऐक्षः २ वाली ३ ।
इति त्रिकाण्डशेषः ॥ (अयमेव श्रीरामेण हतः । अस्य जन्मादिकविवृतिस्तु बालिन् शब्दे द्रष्टव्या ।)

बालिका, स्त्री, (बाला एव । बाल + स्वार्थे कन् । टाप् अत इत्वम् ।) बाला । कन्या । बालुका । पञ्चकाहला । कर्णभूषणम् । इति मेदिनी । के, १३० ॥ एला । इति शब्दरत्नावली ॥ कन्यास्वरूपलक्षणे यथा,—
"कन्या देया स्वयं प्रोक्ता कन्यारूपा तु मूलिनी ।
यावद्दत्तसयोनिः स्यात्तावद्देवी सुरारिहा ॥"
इति देवीपुराणम् ॥

बालिखिल्याः, पुं, पुलस्त्यकन्यायां सन्नत्यां क्रतोः षष्टिसहस्रसंख्यकपुत्त्रा ऋषिविशेषाः । यथा,—
"प्रोत्या पुलस्त्यो भगवान् दक्षात्रिमहजत् प्रभुः ।
पूर्व्वजन्मनि सोऽगस्त्यः सुतः स्वायम्भुवेऽन्तरे ॥
दद्याङ्गुं तथा कन्यां सन्नतिर्नाम नामतः ।
पुत्त्राणां षष्टिसाहस्रं सन्नतिः सुषुवे क्रतोः ॥
ते वालिखिल्यसर्व्वे वालिखिल्या इति स्मृताः ॥"
इति कौर्म्मे १२ अध्यायः ॥
अपि च ।
"क्रतोश्च सन्नतिर्भार्य्या बालिखिल्यानसूयत ।
षष्टिर्यानि सहस्राणि ऋषीणामूर्द्धरेतसाम् ॥"
इति मार्कण्डेयपुराणे हरिवंशः । ५२ । २४ ॥
तेषामङ्गुष्ठपरिमाणस्य प्रमाणं यथा,—
"अथापश्यदृषीन् कृशानङ्गुष्ठोदरवर्ष्मणः ।
पलाशपत्त्रिकामेकां सङ्क्षिपतः वहतः पथि ॥
प्रलीनान् स्वप्नवाङ्गेषु निराहारांस्तपोधनान् ।
क्लिश्यमानान् मन्दबलान् गोष्पदे संप्लुतोदके ॥"
इति महाभारते । १ । ६१ ॥
बालखिल्योऽपि पाठः । यथा, "ऋग्वेदाल्लगत बालखिल्यमेकादशसूक्तं बालखिल्याः शंसन्ति प्राणा वै बालखिल्याः । इति चरणव्यूहभाष्यम् ॥

बालिनी, स्त्री, अश्विनीनक्षत्रम् । इति हेमचन्द्रः ॥

बालिश्यं, क्ली, (बालाः सन्ति यस्य इति बाली मस्तकस्तेन श्रीयते यत्र । श्री + आधारे ड ।) उपधानम् । इति शब्दमाला ॥ (ब्राह्मणादिराकृतिगणः । इति पाणिनिः । ५ । १ । १२४॥)

बालिशः, त्रि, (बाड़ + इन् । ह्रस्य लत्वं । बालिं दृष्टिं शस्यतीति । बालि + शो + आतोऽनुपसर्गे कः ।) शिशुः । (यथा, भागवते ।४।१४।२३।
"बालिशा बत यूयं वा अधर्म्मे धर्म्ममानिनः ॥"
बालिशा शिशुवृत्तय इत्यर्थः ॥) मूर्खः । इति मेदिनी । शे, २६ ॥ (यथा, मनुः । ३ । १७६ ।
"अपाङ्क्तो यावतः पाङ्क्तान् भुञ्जानानवपश्यति ।
तावतां न फलं तत्र दाता प्राप्नोति बालिशः ॥"
"बालिशोऽयः ।" इति तट्टीका ॥)

बाली

बालिहन्ता, पुं, (बालेर्बालिनो वा वानरराजस्य हन्ता ।) श्रीरामचन्द्रः । इति शब्दरत्नावली ॥ (बालिवधकथा यथा, रामायणे । ४ । १६ । २७—३६ ।
"ऋक्षपुत्त्रो महावीर्य्यः सुग्रीवः परिवीयत ।
बालिना भ्रमदर्पेण सुग्रीवो मन्दविक्रमः ॥
बालिनं प्रति सामर्षो दर्शयामास राघवम् ।
दृष्ट्वेः सप्तसालेः शिखरैर्वज्रकोटिनिभैर्दृढैः ॥
सुहृद्भिर्ज्ञातिभिः पङ्क्तिर्बाकुभिश्च पुनः पुनः ।
तयोर्युद्धमभूद्घोरं हृषभसदृशयोरिव ॥
तौ शोणितार्द्रौ युध्येतां वानरौ वनचारिणौ ।
मेघाविव महाघ्नन्तौ सलिलार्त्तौ परस्परम् ॥
क्षीयमाणमथापश्यत् सुग्रीवं वानरेश्वरम् ।
प्रेक्षमाणं दिशश्चैव राघवः स मुहुर्मुहुः ॥
ततो रामो महातेजा आर्त्तं दृष्ट्वा हरीश्वरम् ।
स शरं वीक्षते वीरो बालिनो वधकाङ्क्षया ॥
ततो धनुषि सन्धाय शरमाशीविषोपमम् ।
पूरयामास तच्चापं कालचक्रमिवान्तकः ॥
तस्य ज्यातलघोषेण त्रस्ताः पञ्चशरेश्वराः ।
प्रदुद्रुवुर्गजाश्चैव युगान्त इव मोहिताः ॥
सृक्कस्तु वदनिर्घातैः प्रदीप्ताग्निशिखोपमैः ।
राघवेण महाबाहो बालिवक्षसि पातितः ॥
ततस्तेन महातेजा वीर्य्ययुक्तः कपीश्वरः ।
वेगेनाभिहतो बाली निपपात महीतले ॥)
षोडशदेशान्तर्गतग्रामविशेषश्च ॥

बाली, [न्] पुं, (बालः केश उत्पत्तिस्थानत्वेन विद्यते यस्य । बाल + इनिः । वामनिरुक्तिश्च यथा, रामायणे ।
"अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव सः ॥")
इन्द्रपुत्त्रवानरराजविशेषः । स तु श्रीरामचन्द्रेण हतः । तस्योत्पत्तिर्यथा,—
"मेरुर्नगवरः श्रीमान् जाम्बूनदमयः शुभः ।
तस्य यन्मध्यमं शृङ्गं सर्व्वदेवतपूजितम् ॥
तस्मिन् दिव्या सभा रम्या ब्रह्मणः सुमहात्मनः ।
तस्यामासे सदा देवः पद्मयोनिश्चतुर्म्मुखः ॥
योगमभ्यसतस्तस्य नेत्राभ्यां यदभूत् सलम् ।
तदृक्षरूपं भगवता धारितं चक्षितश्च तत् ॥
निःक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्त्तृणा ।
तस्मिन्नृक्षो रामः वानरः संबभूव ह ॥
उत्तरं मेरुशिखरं गतस्तत्र च दृष्टवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ॥
आप्लुत्य चापतत्तस्मिन् क्षुब्धे वानरसत्तमः ॥
उत्प्लुत्य ततस्तस्मात् स हृदादुत्थितः प्लवगः पुनः ॥
तस्मिन्नेव क्षणे राम ! स्त्रीत्वं प्राप स वानरः ॥
तद्रूपमद्भुतं दृष्ट्वा त्याजितौ धैर्य्यमात्मनः ।
ततस्तस्यां सुरेन्द्रेण स्वप्नं शिरसि पातितम् ॥
अनावाद्यैव तां नारीं सन्निवृत्तमथाभवत् ।
ततः सा वानरपतिं जग्मे वानरमीश्वरम् ॥
अमोघरेतसस्तस्य वासवस्य महात्मनः ।
बालेषु पतितं बीजं बाली नाम बभूव ह ॥
भास्करेणापि तस्यां वै कन्दर्पवशवर्त्तिना ।

वालुका

बीजं निक्षिप्तं शीतायां विधानमनुवर्णत ।
शीतायां प्रतिसं बीजं सुग्रीवः समजायत ॥"
इति रामायणे उत्तरकाण्डे । ३७ सर्गः ॥
अपि च ।
"वानरेन्द्रं महेन्द्राभमिन्द्रो वालिनमात्मजम् ।
सुग्रीवं जनयामास तपनस्तपतां वरः ॥"
इति रामायणे बालकाण्डे १७ सर्गः ॥
"ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त इव पादपः ॥"
इति किष्किन्धाकाण्डे १७ सर्गः ॥
(बालाः केशाः सन्त्यस्य ।) बालविशिष्टे, त्रि ॥
बालीशः, पुं, न्यूनज्ञत्वरोगः । इति शब्दरत्नावली ॥
बा(वा)लुः, स्त्री, (वलते अनेन । वल प्राणने । वल + उलच् ।) एलवालुकनामकगन्धद्रव्यम् । इत्युणादिकोषः ॥
बा(वा)लुकं, क्ली, (बालुरेव । स्वार्थे कन् ।) एल बालुकम् । इत्यमरः । २ । ४ । १२१ ॥
बा(वा)लुकः, पुं, पानीयाम्बुः । इति राजनिर्घण्टः ॥
बा(वा)लुका, स्त्री, (बालुक + टाप् ।) रेणुविशेषः । बालि इति भाषा । तत्पर्य्यायः । सिकता २ सिक्ता ३ शीतला ४ क्षुण्णशर्करा ५ प्रवाही ६ महाक्षुण्णा ७ क्षुण्णा ८ पाणीयवर्णिका ९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । सन्ताप-श्रमनाशित्वञ्च ।
"सेकप्रयोगतश्चैव शाखाशैथिल्यनिलापहा ॥"
इति राजनिर्घण्टः ॥
शाखा हस्तपादादि ॥ कर्कटी । इति जटाधरः ॥ कर्पूरः । यक्षविशेषः । इति शब्दचन्द्रिका ॥
बा(वा)लुकागड्डः, पुं, (बालुकायाः गड्डमिति तस्मात् चरति यः । बालुका + गड्ड चरणे + पचाद्यच् । बालुकाजातत्वादस्य तथात्वम् ।) मत्स्यविशेषः । बालिया इति भाषा । तत्पर्य्यायः ॥ सिताङ्गः २ । इति हारावली । १६० ॥
बा(वा)लुकातिक्ता, स्त्री, (बालुकावद्बाला स्वरूपो यस्याः । कन् अत इत्वम् ।) शर्करा । इति शब्दचन्द्रिका ॥ (बालुका आत्मा यस्य ।) बालुकामये, त्रि ॥
बा(वा)लुकाप्रभा, स्त्री, (बालुकानामुष्णरेणूनां प्रभा यस्याम् । अत्युष्णबालुकापरिव्याप्तत्वादस्य तथात्वम् ।) नरकविशेषः । इति हेमचन्द्रः । ५ । ३ ॥
बा(वा)लुकामयं, त्रि, (बालुका + मयट् ।)सिकता-मयम् । इति सेकप्रयोगशब्दटीकायां भरतः ॥
बा(वा)लुकायन्त्रं, क्ली, (बालुकाया यन्त्रम् ।) औषधपाकार्थयन्त्रविशेषः । यथा,—
"भाण्डे वितस्तिगम्भीरे मध्ये निहितकूपके ।
कूपिकाकण्ठपर्य्यन्तं बालुकाभिश्च पूरिते ॥
भेषजं कूपिकासंस्थं वह्निना यत्र पच्यते ।
बालुकायन्त्रमेतद्धि यत्नतस्तत्त्वबुधैः स्मृतम् ॥"
इति भावप्रकाशः ॥

बालेयः

बा(वा)लुकास्वेदः, पुं, (बालुकाभिर्विहितः स्वेदः ।) तप्तबालुकाभिस्तापनम् । यथा,—
"वातश्लेष्मजते स्वेदान् कारयेदुष्णनिर्मितान् ।
स्निग्धः स्वेदो निषिद्धोऽत्र पित्ता केवलवातजान् ॥
खर्परभरटपटस्थितकाङ्किकसंसिक्तबालुकास्वेदः ।
ग्रथयति वातकफामयमल्लकमूलाङ्गभङ्गादीन् ॥
स्रोतसां मार्दवं कृत्वा नीत्वा पावकमाग्र्यम् ।
हत्वा वातकफस्तम्भं स्वेदो ज्वरमपोहति ॥"
इति भावप्रकाशः ॥
बा(वा)लुकी, स्त्री, (बलति बालयति वा । बल-प्राणने + उक । स्त्रियां ङीप् ।) कर्कटीभेदः । तत्पर्य्यायः । बहुफला २ स्निग्धफला ३ श्वेतकर्कटी ४ श्वेतरुहा ५ काण्डिका ६ मृदुला ७ । अस्या गुणाः ।
"बालुकी वातघ्नमनी शीता स्निग्धा श्रमापहा ।
पित्तास्रघ्नमनी रुच्या कुरुते कासपीनसौ ॥
स्याद्बालुकी गुरुर्दि वर्षजदोषकर्त्री
हैमन्तजा च खलु पित्तहरा च रुच्या ।
स्निग्धं करोति खलु पौनसमर्द्धपक्का
पक्का त्वतीवमधुरा फलकारिणी च ॥"
इति राजनिर्घण्टः ॥
बा(वा)लुकी, स्त्री, कर्कटी । इति चिकाण्डशेषः ॥
बा(वा)लुङ्गिका, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
बा(वा)लुङ्गी, स्त्री, कर्कटी । इति शब्दरत्नावली ॥
बा(वा)लूकः, पुं, (बलते प्राणान् हन्ति यः । बल ड वधे + ऊक ।) विषभेदः । इति हेमचन्द्रः । ४ । २ । ३ ॥
बा(वा)लेयः, पुं, (बलये उपकरणाय साधुः । बलि + "छन्दिरुपधिबलेर्ढञ्" ५ । १ । १३ । इति ढञ् ।) राजभः । इत्यमरः । २ । ९ । ७७ ॥ (यथा, मार्कण्डेये । ५० । ८५ ।
"एकच्छागं द्विबालेयं त्रिगवं पञ्चमाहिषम् ।
षड्भ्यं सप्तमानङ्गं गृहं यस्यासु गोधय ॥"
बलेः स्वनामख्यातस्य दैत्यस्यापत्यं पुमान् । बलि + ढञ् ।) दैत्यविशेषः । इति धरणिः ॥ (बलिः विरोचनपुत्रस्तस्य बाणज्येष्ठं पुत्रशतं जातम् तेषां च बालेयनाम्ना विख्याताः । यदुक्तमग्नि-पुराणे ।
"विरोचनस्य पुत्रस्तु बलिरेकः प्रतापवान् ।
बलेः पुत्रशतं जज्ञे राजानः सर्व्व एव ते ॥
तेषां प्रधानाश्चत्वारो विक्रान्ताः सुमहाबलाः ।
सहस्रबाहुर्ब्रह्मज्ञ कण्व इत्यपि बलेः सुताः ॥
बलेः पुत्रास्तु पौराण्य शतमेवोत्थ सहस्रशः ।
बालेयो नाम विख्यातो गणो विक्रान्तपौरुषः ॥"
जनमेजयवंशोद्भवस्य सुतपसो राज्ञः पुत्रो बलिरस्य पञ्च पुत्राश्च बालेयाः । यथा, हरि-वंशे । ३१ । ६०—६३ ।
"तेनस्य सुतपा जज्ञे जज्ञे सुतपसो बलिः ।
जातो मानुषयोनौ तु स राजा काञ्चनेक्षुधिः ॥
महायोगी स तु बलिर्बभूव नृपतिः पुरा ।
पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि ॥

बाल्मीकिः

अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ।
पुण्ड्रः कलिङ्गश्च तथा बालेयं पञ्चमुच्यते ॥
बालेया ब्राह्मणाश्चैव तस्य वंशकरा भुवि ।
बलेस्तु ब्रह्मणा दत्ता वराः प्रीतेन भारत ! ॥")
अङ्गारवल्लरी । इति विश्वः ॥ बालमूलक-कम् । इति राजनिर्घण्टः ॥
बालेयः, त्रि, (बालाय हितः । बाल + ढञ् ।) लघुः । बालहितः । इति मेदिनी ॥ (बलये उपहाराय हितः । बलि + "छन्दिरुपधि-बलेर्ढञ् ।"५ । १ । १३ । इति ढञ् । तत्फलः ॥ यथा, सिद्धान्तकौमुद्याम् । "बालेयाश्चक्षुला: ॥" बलियोग्यः । यथा, रघौ । १४ । ७७ ।
"पृथ्वीं फलत्यागैवमाहवनयो
बीजञ्च बालेयमक्षरोहि ।
विनोदयिष्यन्ति नवाभिषङ्गा-
मुदारवाचो मुनिकन्यकाभ्याम् ॥"
विल्वफलनाम्नो वृक्षस्य त्वचि स्त्री । तत्पर्य्यायो यथा,—
"कूटशटं दासपुरं बालेयं परिपेलवम् ।
प्रवगोपुरगोनर्दकैवर्तीसुखकानि च ॥
मुखावत्तं पेलवपुटं शुक्राभं स्यादिवल्वकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
बालेयशाकः, पुं, (बालेयः बलिप्रियः शाकः ।) ब्राह्मणयष्टिका । इत्यमरः । २ । ४ । ८० ॥
बालेष्टः, पुं, (बालानां इष्टः प्रियः ।) वदरः । इति राजनिर्घण्टः ॥ बालकाभिलषिते, त्रि ॥
बालोपवीतं, क्ली, (बालानां बालकानां उपवीतम् ।) बालकपरिधानवस्त्रम् । तत्पर्य्यायः । पञ्चावटम् २ उरस्कटम् ३ । इति हारावली । ४८ ॥ द्विजबालकानां यज्ञसूत्रञ्च ॥
बाल्मीकिः, पुं, वल्मीकस्यापत्यम् । (वल्मीक + इञ् ।) वल्मीकप्रभवो यस्मात् तस्माद्बाल्मीकि-रित्यसौ इति ब्रह्मवैवर्त्तोक्तेः । वल्मीकप्रभवत्वेन गौणी पुत्रादिवद्गौणस्य वल्मीकापत्यत्वं मुख्यो-त्वेव साधुरपत्यार्थः । यद्वा वल्मीक इति ऋषि-विशेषस्य संज्ञेत्याहुः ॥ मुनिविशेषः । यथा,—
"तपःस्वाध्यायनिरतं तपस्वी वाग्विदाम्वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥"
इति रामायणप्रथमश्लोकः ॥
अपि च । ततस्तदनुग्रहलब्धं रामचरितं सर-हस्यं निरवशेषं तत्प्रसादादेव सम्यक् विज्ञाय भूलोकवर्त्तिनां चतुर्णां वर्णानां तापत्रयविमो-चनाय ब्रह्मांशभूत एव भगवान् प्राचेतसो वाल्मीकिः सकलनिगमकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यापरब्रह्मविद्याविलास भूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुश-लवाभ्यामगाययत् । इति तट्टीका ॥ अपि च ।
"नारायणात्मकः सर्व्वे तेषां रामोऽग्रजोऽभवत् ।
रावणान्तकरो राजा रघूणां वंशवर्द्धनः ॥
वाल्मीकिर्यस्य चरितं चक्रे भार्गवसत्तमः ॥")

बाहुः

बाह्यं, (बाहुस्य भावः कर्म्म वा। बाहु + "पत्यन्त-पुरोहितादिभ्यो यक्।" ५। १। १२८। इति यक्।) बाहुस्य भावः। तत्पर्य्यायः। क्षिप्रम् २ प्रेष्यम् ३। इत्यमरः॥ तच्च यौवन-वर्षपर्य्यन्तम्। आषोडशाद् भवेद्बाल इत्युक्तेः। इति भरतः॥ (यथा मनुः। ५। १४८।

"बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने॥"

"वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा।
जन्मतोऽब्द वर्षं तु नरो बालो निगद्यते॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

बा(वा)ह्यः (ह्यः) पुं, (वाहयति नेत्रे इति। वाह + "अर्य्यह्रिह्यग्र्यवाह्यरूपपपेतव्याः।" उणा। १। २७। इति यः। निपात्यते च।) उक्षा। अश्वः। इत्यमरः। १। १। १३०॥ (यथा, रघौ। ८। ७०।

"अकरोत् पृथिवीरक्षामपि
सुतग्राह्यारसवाह्यदूषितान्॥")

बाह्यः, पुं, } (बाहुरेव। एषोदरादित्वात् साधुः।)
बाह्या, स्त्री, } बाहुः। इत्यमरटीकायां रमानाथः॥ (यथाह उज्ज्वलदत्तः। १। १८।

"अकारान्तोऽपि बाहुशब्दो भुजवाचकः। यथा च। बाह्वोश्चभुजयोः पुमानिति दामोदरः। टायवन्तोऽयं। बाहुर्बाहा भुजाभुजः। भुवाहा इति वासवदत्तायां सुबन्धुश्चेषः॥")

बाह्वाबाह्वि, अ, बाहुभिर्बाहुभिः प्रवृत्तं यद् युद्धं तत्। इति सुग्धबोधव्याकरणम्॥

बाहुः, पुं, स्त्री, (बाधते प्रत्यूहं इति। बाध + "अर्जिदृशिकम्यमिपंसिबाधाट्लिपधिभ्रक्ष्वक्ष्वीर्घहकाराच्च।" उणा। १। २८। इति कुप्रत्ययोऽन्तस्य हकारादेशश्च।) कक्षाटाद्भुज्यमध्यन्तावयवविशेषः। तत्पर्य्यायः। भुजः २ प्रवेष्टः ३ दोः ४। इत्यमरः। २। ६। ८०। दोषः ५ बाहः ६। इति जटाधरश्चन्द्ररत्नश्च॥ तद्दैर्घ्यपर्य्यायाः। आयती १ अथवा २ अनीकम् ३ अक्षवाणा ४ विनंसुषी ५ गभस्ती ६ कक्षती ७ बाहू ८ भूरिजौ ९ क्षिपस्ती १० प्रजङ्घरी ११ भरिजे १२। इति द्वादश बाहुनामानि। इति वैद्यनिघण्टौ २ अध्यायः॥*॥ (यथा ऋग्वेदे। ५। ५७। ६।

"ऋष्टयो वो मरुतो अंसयोरधि
सह ओजो बाह्वोर्वो बलं हितम्॥"

बृषलक्षणकबाहुलक्षणञ्च। यथा,—

"निर्मांसौ चैव भग्नाभौ शिरौ च विपुलौ भुजौ।
आजानुलम्बिनौ बाहू वृत्तौ पीनौ नृपेश्वरे॥"

इति गारुडे ६६ अध्यायः॥

(अस्य शुभाशुभलक्षणञ्च सामुद्रके। यथा,

"ऊर्द्धबाहुः पुरुषो बधबन्धनमाप्नुयात्।
दीर्घबाहुर्भवेद्राजा वसुदेववचनं यथा॥
प्रलम्बबाहुरैश्वर्य्यं प्राप्नुयान्नृपसंयुतम्।
ह्रस्वबाहुर्भवेद्दासः प्रेष्यकरस्तथा॥
वामावर्त्तभुजा ये तु ये च दीर्घभुजा नराः।
संपूर्णबाहवो ये तु राजानस्ते प्रकीर्त्तिताः॥

बाहुक

पुरुषस्य दक्षिणबाहुशब्दे स्त्रियो वामबाहुशब्दे सुखं तद्विपरीते तु असुखम्। यथा शाकुन्तले १ अङ्के।

"ग्राह्यमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र॥"

बाहुर्दक्षिणबाहुः। यथं वरस्त्रीलाभरूपम्॥

"वामेतरभुजशब्दो वरस्त्रीलाभसूचकः॥"

इतिवचनात्॥)

कूर्परस्य ऊर्द्धभागः। यथा,—

"सुखं बाहू प्रबाहू च मनः सर्व्वेन्द्रियाणि च।
रक्षत्यष्टानेभ्यस्तेनैव नारायणोऽव्ययः॥"

अस्य टीका। बाहू प्रबाहू च कूर्परस्य ऊर्द्धाधोभागौ। इति विष्णुपुराणे। ५। ५॥

बाहुकः, पुं, नलराजा। तत्पर्य्यायः। पुण्यश्लोकः २ अश्ववित् ३ नैषधः ४। इति त्रिकाण्डशेषः॥ (पुष्करेण कृतराज्यो हि नलः अश्ववैगुण्यात् विपिने दमयन्तीमपहाय प्रगच्छन् दावानल-परीतमगलभयादाक्रोशन्तं कर्कोटकनामानं नागमवलोक्य तत उद्धृतवान्। अथ प्रसन्नस्यास्य पन्नगस्योपदेशात् ऋतुपर्णस्य राज्ञो नगरं गत्वा बाहुक इत्यभिधित्सस्तस्यैव राज्ञः घोटकपरिचर्य्यायां नियुक्तोऽभवत्। यदुक्तं महाभारते। ३। ६७। १-७।

"नाम्नाऽन्यन्नामहिते नागे प्रययौ नैषधो नलः।
ऋतुपर्णस्य नगरं प्राविशद्दशमेऽहनि॥
स राजानमुपातिष्ठत् बाहुकोऽहमितिब्रुवन्।
अश्वानां वाहने युक्तः पृथिव्यां नास्ति मत्समः॥
अर्थकृच्छ्रेषु चैवाहं प्रष्टव्यो नैपुणेषु च।
अन्नसंस्कारमपि च जानाम्यन्यैर्विशेषतः॥
यानि शिल्पानि लोकेऽस्मिन् यच्चैवान्यत् सुदुष्करम्।
सर्व्वं यतिष्ये तत् कर्त्तुमृतुपर्ण! भरस्व माम्॥
ऋतुपर्ण उवाच।
वस बाहुक! भद्रन्ते सर्व्वमेतत् करिष्यसि।
शीघ्रयाने सदा बुद्धिर्हियते मे विशेषतः॥
स त्वमात्मिह योगं तं येन शीघ्रा हया मम।
भवेयुरश्वाध्यक्षोऽसि वेतनं ते शतं शताः॥
त्वासुपास्यास्यतश्चैव नित्यं वार्ष्णेयजीवलौ।
एताभ्यां रंस्यसे सार्द्धं वस वै मयि बाहुक!॥"

कौरव्यकुलोद्भवो नागभेदः। यथा महाभारते। १। ५७। १३।

"बाहुकः सुभ्रुवेरश्च धर्म्मकः प्रातरासकौ।
कौरव्यकुलजाश्चैते प्रविष्टा हयवाहनम्॥")

बाहुकुण्ठः, त्रि. (बाह्वोर्बाहोर्वावयवयोः कुण्ठः।) कुण्ठितबाहुयुक्तः। कोपा इति भाषा। तत्पर्य्यायः। कुन्यः २ दोर्गण्डः ३ इति जटाधरः॥

बाहुकृत्यः, पुं. (बाहुरिव कृत्यानि आचरतीति। बाहु + कृत्य + पचाद्यच्।) पत्रः। यथा,—

"गरुत्पक्षच्छदाः पत्रं पतत्रञ्च तनूरुहम्।
देहधिर्देहकोषश्च बाहुकृत्यञ्च कथ्यते॥"

इति शब्दचन्द्रिका॥

बाहुदा

बाहुजः, पुं, (बाहुभ्यां जायते यः। बाहु + जन् + ड।) "ब्राह्मणोऽस्य मुखमासीत् बाहू राजन्यः कृतः। ऊरूतदस्य यद्वैश्यः पद्भ्यां शूद्रोऽभ्यजायत॥" इति श्रुतेरुक्तार्थम्। क्षत्रियः। इत्यमरः। २। ८। १। (यथा,—

"वत्स! वाराणसीं गच्छ यं विश्वेश्वरवल्लभाम्।
तत्र राजा दिवोदासः काशिराजोऽस्ति-
बाहुजः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कीरः। स्वयंजातफलः। इति मेदिनी। जे, २७॥

बाहुजाड्यं क्ली, (जे + भावे + क्यङ्। बाह्वोर्जाड्यं यस्मात्।) अस्त्राघातनिवारणार्थबाहुबन्धलौहादि। तत्पर्य्यायः। बाहुजम् २। इति हेमचन्द्रः। ३। ४३३॥

बाहुदन्ती, [न्] पुं, (बहवो दन्ता यस्य स बहुदन्त ऐरावतः स एव बाहुदन्तः। स्वार्थे अण्। बाहुदन्तोऽस्यास्तीति इनिः।) इन्द्रः। इति भूरिप्रयोगः॥

बाहुदा, स्त्री, (बाहू ददाति या। बाहु + दा + आतोऽनुपसर्गेति।" ३। २। ३। इति कः। लिखितस्य मुनेर्बाहुप्रदानादस्यास्तथात्वम्।) नदीविशेषः। तत्पर्य्यायः। सैतवाहिनी २। इत्यमरः॥ कदाचिल्लिखिताख्यस्य मुनेर्ब्रह्मसुतस्य शङ्खस्य शून्याश्रमे फलभक्षणाद्राजा बाहू च्छिन्नौ मां चास्यां नद्यां तपस्यतस्तस्य पुनर्जातावितरि। इत्यमरटीकायां भरतः॥ *॥ (एतत्कथा यथा, महाभारते। १३। २३। १७—४०। व्यास उवाच।

"अचाणुदाक्षरन्नीममितिहासं पुरातनम्।
ब्रह्मस्य लिखितस्यास्तां भ्रातरौ संगितव्रतौ॥
तयोरावसथावास्तां रम्यौ द्वौ पृथक् पृथक्।
नित्यं पुष्पफलैर्देवपेतौ बाहुदामनु॥
तत: कदाचिल्लिखित: शङ्खस्याश्रममागत:।
यदृच्छयाथ शङ्खोऽपि निष्क्रान्तोऽभवदाश्रमात्॥
सोऽभिगम्याश्रमं भ्रातु: शङ्खस्य लिखितस्तदा।
फलानि पातयामास सम्यक्परिणतान्युत॥
अभ्युपादाय विप्रर्षि भक्षयामास स द्विज:।
तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागत:॥
भक्षयन्तन्तु तं दृष्ट्वा शङ्खो भ्रातरमब्रवीत्।
कुत: फलान्यवाप्तानि हेतुना केन त्वादृशि॥
सोऽब्रवीत् भ्रातरं ज्येष्ठमुपहृत्याभिवाद्य च।
इत एव गृहीतानि मयेति प्रहसन्निव॥
तमब्रवीच्छया शङ्खस्तीव्ररोषसमन्वित:।
स्तेयं त्वया कृतमिदं यस्मान्मादृक्षया स्वयम्॥
गच्छ राजानमासाद्य स्वकर्म्म कथयस्व वै।
अदत्तादानमेवं हि कृतं पार्थिवसत्तम!॥
स्तेनं मां त्वं विदित्वा च स्वधर्म्ममनुपालयन्।
क्षिप्रं धारय चौरस्य मम हस्तं नराधिप!॥
इत्युक्तस्तस्य वचनात् सुतुष्टं स नराधिपम्।
अभ्यगच्छन् महाभागो लिखित: शंसितव्रत:॥
सुतुष्टस्तस्य पाणिभ्य: शूला लिखितमागतम्।

बाहुयु

अभ्यगच्छन् सहामात्यः पद्भ्यामेव जनेश्वरः ॥
तमग्रवीत् समागम्य स राजा धर्म्मावत्तमम् ।
किमागमनमाचक्षु भगवन् ! ब्रूहमेव तत् ॥
एवमुक्तः स विप्रर्षिः सुबाहुमिदमब्रवीत् ।
प्रतिश्रुत्य करिष्येति श्रुत्वा तत्कर्त्तुमर्हसि ॥
अभिहृतानि गुरवे फलानि मनुजर्षभ ! ।
भक्षितानि महाराज ! तच्च मां बाधि मा चिरम् ॥

सुबाहुरुवाच ।

प्रमाणञ्चेन्मनो राजा भवतो दृढधार्म्मिकः ।
अनुज्ञातोऽपि तया हेतुः स्याद्ब्राह्मणगर्भ ! ॥
स भवानभ्यनुज्ञातः शुचिकर्म्मा महाव्रतः ।
ब्रूहि कामानतोऽन्यांस्त्वं करिष्यामि हि ते वचः ॥

व्यास उवाच ।

स ऋच्यमानो ब्रह्मर्षिः पार्थिवेन महात्मना ।
मांसं स वरयामास तस्माद्दृढाद्दने वरम् ॥
ततः स पृथिवीपालो लिखितस्य महात्मनः ।
करौ प्रच्छेदयामास पृतदक्षो जगाम सः ॥
स गत्वा भ्रातरं प्राह्मणरूपोऽजोदिदम् ।
पृतदक्षस्य दुर्बुद्धेर्भवांस्तत्त्वमुमर्हसि ॥

प्राह्म उवाच ।

न क्रुधे तव धर्म्मज्ञ ! न त्वं दूषयसे मम ।
धर्म्मेषु ते व्यतिक्रान्तस्तस्मै निष्कृतिः कृता ॥
स गत्वा बाहुदौ शीघ्रं तर्पयस्व यथाविधि ।
देवानृषीन् पितॄंश्चैव मा चाधर्म्मे मनः कृथाः ॥
तस्य तद्वचनं श्रुत्वा प्राह्मस्य लिखितस्तदा ।
अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे ॥
प्रादुरासां ततस्तस्य करौ जलजसन्निभौ ।
ततः स विस्मितो भ्रातुर्दर्शयामास तौ करौ ॥"

नदीयं पुरा प्रसेनजिद्राज्ञो गौरी नाम आसीत् । ततः क्रुद्धेन भर्त्राभिशप्ता नदीरूपा जाता । यथा, हरिवंशे । १२ । ५ ।

"लेभे प्रसेनजिद्राज्ञो गौरीं नाम पतिव्रताम् ।
अभिशप्ता तु सा भर्त्रा नदी वै बाहुदा कृता ॥"

पूरुवंशीयस्य परीक्षिन्नाम्नो नृपतेर्भार्य्यायां बाहुदा । यथा, महाभारते । १ । ९५ । ४२ ।

"परीक्षित् खलु बाहुदासुपयेमे सुयशां नाम तस्यामस्य जज्ञे भीमसेनः ॥) बाहुदात्री च ॥

बाहुभूषा, स्त्री, (बाह्वोर्भूषयोर्भूषा भूषणम् ।) केयूरम् । इति हेमचन्द्रः । २ । २२६ ॥ बाहुभूषणमात्रञ्च ॥

बाहुभेदी, [न्] पुं. (बाहुं भिनत्तीति । बाहु + भिद् + णिनिः ।) विष्णुः । इति भूरिप्रयोगः । बाहुभेदके त्रि ॥

बाहुमूलं, क्ली, (बाह्वोर्मूलम् ।) कक्षः । बगल इति भाषा । इत्यमरः । २ । ६ । ३९ ॥ (यथा साहित्यदर्पणे । ३ । १२३ ।

"काचि कुन्तलसंयमनसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत्स्फुटम् ॥")

बाहुयुद्धं, क्ली, (बाह्वो र्बाहुभ्यां वा युद्धम् ।) भुजाभ्यां संग्रामः । मल्लयुद्धम् । तत्पर्य्यायः । निर्युद्धम् २ ॥ तस्य क्रमो यथा,—

बाहुस

"क्षतप्रतिक्षतैश्चित्रैर्बाहुभिश्च सकङ्कटैः ।
सन्निपातावधूतैश्च प्रमाथोज्झनतोक्षणैः ॥
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूननिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रहृताभिहतैरपि च ॥
ग्लानाकान्तक्षपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाक्षनिर्घातैः शिरोभिश्चावघट्टनैः ॥
तद्युद्धमभवद्घोरमग्रह्यं बाहुतेजसा ।
बलप्राणैश्च शूराणां समाजोत्सवसन्निधौ ॥"

इति विराटपर्व्वणि १२ अध्यायः ॥

सकङ्कटः कङ्कटः करघर्षणजः किणस्तत्सदृशैरित्यर्थः । क्षतप्रतिक्षतैः परप्रयुक्तप्रतिक्षतैः । चित्रैर्विचित्रैर्बन्धैरिति घोषः । सन्निपातैत्यादि । एते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसङ्घर्षणैः । अवधूतैर्बहुमुष्टिभुजाघातैः । प्रमाथैः पातयित्वा घर्षणैः । उज्झनैः अन्तरौरसी भुजाभ्यां मथनैः । क्षेपणैः स्थानात् प्रक्षालनैः । वराहोद्धूननिस्वनैः । "अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तथैव यः । क्षिपस्य भूमेः स भवेद्वराहोद्धूननिस्वनः ॥ तर्जन्यङ्गुष्ठमध्यन प्रसारितकरौ हि यः । सन्दंशास्तलाख्यस्तु संग्रहो वक्ष्यमिष्यते ॥" अर्द्धचन्द्रतुल्यमल्लमुष्टिर्वज्रमित्यर्थः । "प्रहृताङ्गुलिहस्तेन प्रहृष्टैः प्रकृतैः खुना । द्विगुणोक्षतबाहुर्यस्तदीयार्थं यथाबलम् ॥ प्रहारः स ग्लानाख्यः स्यात् पादोद्धूतः पदाहतम् ॥" जानुभिश्चाक्षनिर्घातैः पाषाणघोरसदृशाङ्गनिभिः करणैर्न्यञ्चघट्टनानि तैः । बलप्राणेन बलोत्कर्षेण । इति तट्टीकायां ॥ (यथा, मार्कण्डेयपुराणे । ८३ । १३ ।

"ततः सिंहः समुत्पत्य गजकुम्भान्तरस्थितः ।
बाहुयुद्धेन युयुधे तेनोत्क्षिप्तश्च धारितः ॥")

बाहुलं, क्ली, बाहुचाणम् । इति हेमचन्द्रः । ३ । ४३३ ॥ (बहुल + अण् ।) बहुलभावश्च ॥

बाहुलः, पुं, अग्निः । इति शब्दरत्नावली ॥ (बहुला कृत्तिका तया युक्ता पौर्णमासी बाहुली । बाहुली पौर्णमासी यस्मिन् । सास्मिन् पौर्णमासीत्यण् ।) कार्त्तिकमासः । इत्यमरः । १ । ४ । १८ ॥

बाहुलेयः, पुं. (बहुलानां कृत्तिकादीनामपत्यं पुमान् बहुला + ढक् ।) कार्त्तिकेयः । इत्यमरः । १ । १ । ४२ ॥

बाहुसहस्रभृत्, पुं, (बाहूनां सहस्रं बिभर्त्तीति । क्विप् । "बहुस्रस्य पिति किति तुक् । ६ । १ । ७१ । इति तुक् च ।) कार्त्तवीर्य्यार्জ্জুनः । इति चिकाण्डशेषः ॥ (अस्य बाहुसहस्रप्राप्तिकथा यथा, महाभारते । १३ । १५२ । ७८ ॥

"स वरेऽन्विच्छतस्तस्य नृपो वचनमब्रवीत् ।
सहस्रबाहुर्भूयां वै चलमध्ये ततोऽन्यथा ॥
मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे ।
विक्रमेण महीं सर्व्वां जयेयं संगतव्रतः ॥"

परशुरामो हि अस्य बाहुसहस्रं परशुना

बीभत्सः

छिनत्ति । अस्य विवरणादिकं कार्त्तवीर्य्यशब्दे द्रष्टव्यम् ॥)

बाहुबाहवि च, बाहुभिर्बाहुभिर्यद् युद्धं तत् । हाताहाति इति भाषा । इति मुग्धबोधव्याकरणम् ॥

बिट् ट अंशे । अवयव इत्यर्थः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ट विण्टति । विण्टतिर्ग्रन्थ इत्यन्ये तत्पर्य्यमेवायं धातुपाठेऽयम् । इति दुर्गादासौणादिकटीका ॥

बिल क भ्र विभेदने । इति कविकल्पद्रुमः ॥ (चुरा०-तुदा०-च-पर०-सक०-सेट् ।) क, बेलयति । भ्र बिलति । इति दुर्गादासः ॥

बिस ट्ट् य क्षेपे । इति कविकल्पद्रुमः । (दिवा०-पर० सक०-सेट् ।) य बिस्यति । ट्ट् अबिसत् अबैसीत् । अस्मात् पुषादित्वाल्लिं ङ इत्यन्ये । इति दुर्गादासः ॥

बीभत्सः, पुं (बीभत्स्यतेऽतेन । बध + सन् + करणे घञ् ।) अर्জ্জुनः । इति मेदिनी । से, २६ ॥

बीभत्सः, त्रि, (बीभत्सा घृणास्यञ्च । अर्श-आद्यच् ।) क्रूरः ॥ (यथा महाभारते । १ । १ । २१० ।

"यदाभीषं द्रोणकृपादिभिस्ते-
र्हतान् पाञ्चालान् द्रौपदेयांश्च सुप्तान् ।
कृतं बीभत्समयशस्यञ्च कर्म्म
तदा नार्य्यस्ते विलपाय सञ्जय ! ॥")

घृणाम्रा ॥ (यथा, मार्कण्डेये । १६ । १८ ।

"तथापि प्रणता भार्य्या तमभ्यर्च्य ददेघनम् ।
सं तथाप्यतिबीभत्सं सर्व्वश्रेष्ठमभ्यर्च्य ॥")

विज्ञप्तिः । इति मेदिनी । से, २६ ॥ (यथा,—

"दुष्टदर्शि. पृथक्सर्व्वबीभत्सालोकनादिभिः ।"

इति माधवकरजनरविनिश्चये छद्मधिकारे ॥

बीभत्सालोकनं विज्ञप्तिदर्शनमिति तट्टीकायां विजयरक्षितसेनोक्तम् ॥) पापी । इत्यजयः ॥ ग्रहणादष्टरसान्तर्गतषष्ठरसः । तत्पर्य्यायः । विज्ञप्तम् २ । इत्यमरः ॥ तस्य लक्षणादि यथा, साहित्यदर्पणे । ३ । २६३ ।

"जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसरुधिरप्लुतमेदास्थ्यालम्बनं मतम् ।
तत्रैव कृमिपातोऽस्य सञ्चारी दीपनस्तदाहृतम् ।
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मताः स्युर्व्याधिमोहापस्मारादयः ॥"

अस्य रसस्योदाहरणं यथा तत्रैव ।

"उन्मज्योन्मज्य जन्तुं प्रथममथ पृथूच्छोथ-
भूयांसि मांसा-
न्यंसस्फिक् पृष्ठपिण्डाद्वयवसुलभान्युत्पपूनीनि
जग्ध्वा ।
अन्तःपर्य्यन्तनेत्रः प्रकटितदशनः प्रेतराट्टः
करास्ता-
दुत्क्षाद्यास्थिसंघं स्वपुटगतमपि क्षयमक्षय-
मत्ति ॥")

वेक्षतच्च। यथा। अस्थिग्रीलितपादाग्रमभिन्नस्निग्धितवैक्लवमिश्रमभिनन्दः। इयमिदं दृश्ये क्लीवम्। तदालम्बने तु मांसग्रीलितादौ त्रिषु। इति तट्टीकायां भरतः॥

वीभत्सुः, पुं, (वीभत्सतीति। वध + सन् + उ। पृषो न्यायपथेन धातुहलन्तादस्य तथात्वम्। यतस्त्रिलिङ्गता। यथा, महाभारते ४। ४२। १८।

"न कुर्य्यां कर्म्म वीभत्सं युध्यमानः कथञ्चन।
तेन देवमनुष्येषु वीभत्सुरिति विश्रुतः॥")

अर्জ্জुनः। यथा,—

अर्জ্জुनः फाल्गुनो जिष्णुः किरीटी श्वेत-
वाहनः।
वीभत्सुर्विजयः कृष्णः सव्यसाची धनञ्जयः॥

इति महाभारते। ४। ४२। ८॥

वृक्ष, क्लि आदिग्रन्थे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा० पर०-सक०-पक्षे अक०-सेट्। पञ्चमस्वरी कोपधः। चुरादिपक्षे कथने भ्वादिपक्षे वृक्षरादिग्रन्थेऽयमिति रमानाथः। क्लि, वृक्षयति वाचा बहुलोकः। वृक्षति श्वा। इति दुर्गादासः॥

वृक्ष, त्रि, (वृक्षयति वृक्षवृक्ष इत्यव्यक्तशब्दं करोतीति। वृक्ष + पचाद्यच्।) वर्षोऽभ्यन्तरमांस-विशेषः। तत्पर्य्यायः। अग्रमांसम् २ हृदयम् ३ कृत् ४। इत्यमरः। २। ६। ८४॥ केचित्तु वृक्षात् पृथगेव हृदयाभ्यन्तरमांसविशेषे पद्माकारे हृदयादिद्वयमाहुः। धातोरनेकार्थत्वात् वृक्षते स्वादुत्वात् हृद्यत्व वृक्षं वृक्ष कि आदि ग्रन्थे घञ्। नाम्नः पुंलिङ्गोऽयम्। स्त्रीलिङ्गः पीयूषे। इति स्वामी॥ वृक्षा स्त्री वृक्षः पुमानपि। ग्रीवाशिरसु स्त्रियां वृक्षा वृक्षस्तु समये द्वयोरिति रभसात्। महादित्वात् स्त्रियां वृक्षीत्यपि। वृक्षनाम्नां क्लीवमधुत्पन्नमिति रुद्रकलिङ्गादयः॥ उरस्यपि च वृक्षायां हृदयं मानसेऽपि चेति चिकाण्डशेषः॥ वृक्षग्रन्थस्य उकारस्य अकारादेशे तथैव हृक्षादिरूपत्व। अथच तन्मांसमेति अग्रमांसं वृक्षस्याग्रं संसृष्टीभूतं मांसं वृक्षाग्रमांसमित्येकं नामेत्यर्थे। इति तट्टीकायां भरतः॥

वृक्षः, पुं, (वृक्षयति ग्रन्थायते इति। वृक्ष + अच्।) छागः। इति चिकाण्डशेषः॥ समये पुं. स्त्री। इति रभसः॥

वृक्षणं, क्ली, (वृक्ष क्लि आदिग्रन्थे + भावे ल्युट्।) वृक्षरग्रन्थः। तत्पर्य्यायः। भक्षणम् २। इति हेमचन्द्रः। ६। ४३॥

वृक्षा, स्त्री, (वृक्ष + टाप्।) वृक्षम्। इत्यमरटीकायां भरतः। ग्रीवाशिरम्। इति रभसः॥

वृक्षा, [न्] (वृक्ष + क्विनिन्।) पुं. वृक्षम्। इत्यमरटीकायां भरतः॥

वृक्षाग्रमांसं, क्ली, (वृक्षस्याग्रमांसं।) हृदयम्। इत्यमरटीकायां रायमुकुटः॥

वृक्षारः, पुं, (वृक्ष क्लि आदिग्रन्थे भावे घञ्। वृक्षं निनादस्य कारः करणम्। "एकवर्ज्यत्रयो यत्र मध्यमस्तत्र लुप्यते" इति न्यायात् मध्यस्य ककारस्य लोपः।) सिंहध्वनिः। इति हारावली। १६४॥

वृक्षी, स्त्री, (वृक्ष + गौरादित्वात् ङीष्।) वृक्षम्। इत्यमरटीकायां भरतः॥

वृट, क्लि छिंसे। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) क्लि वोटयति वोटति। इति दुर्गादासः॥

वृड, ग्लि उत्सर्गे। संहृतौ। इति कविकल्पद्रुमः॥ (कुटा०-तुदा०-पर०-सक०-सेट्।) ग्लि वृड्डति अवृड्डीत् वृवोड् इति दुर्गादासः॥

वृड्, इर् ण उ निष्कामणे। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अवृडत् अवोडीत्। ण वोडति वोडते। उ वोडित्वा वृत्वा। निष्कामणमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

वृद्धः, पुं. (वृध्यते स्म इति। वृध + क्त। यद्वा भावे क्त वृद्धं ज्ञानमस्यास्तीति अर्शआद्यच्।) भगवद्दशावतारविशेषः। स तु दशावतारान्तर्गत-नवमावतारः। यथा,—

"ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम्।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति॥"

इति श्रीभागवते १ स्कन्धे ३ अध्यायः॥

अञ्जनस्य सुतः। अजिनसुत इति पाठे अजिनोऽपि स एव। कीकटेषु मध्ये गयाप्रदेशे। इति श्रीधरस्वामी॥ सनुपर्य्यायः। सर्व्वज्ञः २ सुगतः ३ धर्म्मराजः ४ तथागतः ५ समन्तभद्रः ६ भगवान् ७ मारजित् ८ लोकजित् ९ जिनः १० षड़भिज्ञः ११ दशबलः १२ अद्वयवादी १३ विनायकः १४ मुनीन्द्रः १५ श्रीघनः १६ शास्ता १७ मुनिः १८। इत्यमरः। १। १। १३॥ धर्म्मः १९ त्रिकालज्ञः २० धातुः २१ बोधिसत्त्वः २२ महाबोधिः २३ आर्य्यः २४ पद्मज्ञानः २५ दशार्हः २६ दशभूमिगः २७ चतुर्विंशद्गुणज्ञानकृत्तः २८ दशपारमिताधरः २९ द्वादशाङ्गः ३० त्रिकायः ३१ संगुप्तः ३२ दयाकुर्च्चः ३३ खजित् ३४ विज्ञानमात्रकः ३५ महामैत्रः ३६। इति हेमचन्द्रः। २। १४६॥ धर्म्मचक्रः ३७ महामुनिः ३८ असमः ३९ क्षसमः ४० मैत्री ४१ बलः ४२ गुणाकरः ४३ अकनिष्ठः ४४ त्रिगुरुः ४५ बुधः ४६ वज्री ४७ वागीशः ४८ जितारिः ४९ अर्हन्तः ५० अर्हन् ५१ महासुखः ५२। इति शब्दरत्नावली॥ महाबलः ५३। इति जटाधरः॥*॥

ईश्वरनिरूपणे बुद्धविशेषाणां मतमाह। सर्व्वज्ञ इति सौगताः। निरावरण इति दिगम्बराः। लोकव्यवहारसिद्ध इति चार्व्वाकाः। शरीरादन्यैव चैतन्यमि गौरोऽहं जानामीत्याद्यनुभवेन गौरत्वज्ञानवत्तयोः सामानाधिकरण्यानुभवादिति चार्व्वाकाणां मतञ्च। तेषां मते जगतः क्षणभङ्गुरत्वं नत्वस्तु क्षणभङ्गः पूर्व्वपूर्व्वाकारोत्तरपूर्व्वोत्पत्तिरूपा च पूर्व्वसिद्ध एव कुर्व्द्रूपलाक्षाजातिविशेषः क्षरत्क्षणकत्वाश्रयेऽनेक इति न दोषः। इति कुसुमाञ्जलिप्रथमस्तवकटीकायां रामभद्रः॥*॥ बुद्धानां दशविधमतभेदमाह।

"बहस्पति पुत्र आहेति १ बृहस्पतिसुतस्तथा।
देह आहेति २ चार्व्वाको इन्द्रियाण्यपरे ३
च ते॥
तेऽपरे प्राण ४ मनोऽन्ये ते मन ५ आहेति
वादिनः।
बुद्धिरात्मेति६ बौद्धा वै शून्यमाहेति७ तेऽपरे॥
याज्ञिका यत्पुरुषं सर्व्वज्ञं ८ सौगता विदुः।
निरावरण ९ माहुर्यं दिगम्बरमतानुगाः॥
चार्व्वाकाश्चापि लोकानां व्यवहारप्रसिद्ध-
कम् १०॥"

इत्यात्मप्रकाशः॥*॥

पक्षिणः। बुध्यते, त्रि। इति मेदिनी। धे, १०॥

(बुद्धावतारस्य विवरणं यथा,—

इह खलु बौद्धागमसमयेषु सम्बोधाः पञ्चविंशतिर्बुद्धा इष्यन्ते। तेषां शुद्धोदनौरसात मायादेवीगर्भजातः शाक्यसिंहसर्व्वार्थसिद्धार्कबन्धुगौतमेति नामचतुष्टयेन प्रसिद्धोऽस्मिन्नसमः लोकविश्रुतो बुद्धः कपिलवस्तुनगरे कलेरश्वत्थः शतनवद्व्यधिकद्विसहस्रमितेषु गतेष्वब्देषु शुक्लवासरे सुरद्विषां सम्मोहनाय साक्षाद्विवेकमूर्त्तिः स्वेच्छाविग्रहेण प्रादुर्बभूव।

अथ स वयसा सह क्रमेण शीलगुणसाहसरूपौदार्य्यबलवीर्य्यादिभिर्वर्द्धते स्म। उदिते यौवने पित्राज्ञया स शाक्यान्वयजां मनोज्ञां रूपलावण्यवतीं दण्डपाणितनयां गोपाजामनुमतामुपयेमे।

जननसमयेऽस्य गणकाश्चक्रुतवान् नरेश्वरः शुद्धोदनः आधिगत्तजराजर्जरसाधिसहजनदर्शनाज्ञातवैराग्यः पुत्रस्ते गृहं सन्त्यक्ष्यतीति। तस्मात् सञ्जातशङ्को राजा शिल्पिभिरुपवनपरिवृतं सुगुप्तं रम्यं धर्म्मोदयं भूभृवलं निर्म्मापयामास। तत्रासौ युवतीजनपरिवेष्टितमुपच्छन्दितं विषयविसृष्टचेतसं तनयं निष्क्रमणम् स्वच्छन्देनानुवासयन्। अथ गच्छति कालेऽस्य शिथिलीबभूव भोगसम्बन्धः। ततः कारागारमिव प्रतीयमानं निष्कुटनिकेतं विहायास्य धरण्या नानाख्यानं द्रष्टुमिच्छा सञ्जाता। ततः सोऽन्यै पित्रे शुद्धोदनाय सम्बोधयामास पर्य्यन्तं नगरं प्रजानाञ्चाहिमवत्प्रायं धिक्कोकयितुं वासना मे बलवतीति। राजा प्रथमं निवारयितुमियेष प्रलोभनेन। स नैव तु ततो विरराम। अथ विज्ञाय निर्बन्धं पुत्रस्य मन्त्रिणमादिदेश, कुमारे शाक्यसिंहे भ्रमितुमारब्धे राष्ट्रे मे जरातुरसन्त्यासिन्द्रियमादवाः केनापि कारणेन राजवर्त्मनि गोपनिष्क्रान्तमिति विघोषयेति। तथानुष्ठिते कुमारः रथमारुह्य

बुद्धः

सारथिनासह बहिर्निर्गन्तुमभिप्रस्थितवान्। ततश्चतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्त्विति प्राजोषि। नगरं चौत्सुक्यात्सौ मनसि महां हर्षं प्राप्तवान्।
अथ स जरया जर्जरतनुं मानवमेकं ददर्शवान्। ततः प्राक् कदाचिदपि स तादृक्षिंशो जगतो दुःखं नानुभूतवान् दृष्टानीं निरीक्ष्य प्रथमं तं जरायस्तं विवरजस्यं विज्ञातुं कुतूहलौ सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष दुर्बल अल्पप्राण
उच्छ्वस्यमान बधिरलम्बायुगड्डः।
श्वेतशिरो विरलदन्तलम्बाङ्गरूप
आलम्ब्य दण्ड व्रजतेऽसुखं स्खलन्त॥

सारथिराह।

एषो हि देव! पुरुषो जरयाभिभूतः
क्षीणेन्द्रियः सुदुःखितो बलवीर्यहीनो।
बन्धुजनेन परिभूत अनाथभूतः
कार्यासमर्थ अपविद्ध वनेव दारुः॥

बोधिसत्त्व आह।

कुलधर्मो एष जगस्य स्थितं भवादि
अथवापि सर्वजगतोऽस्य ध्रुवस्था।
क्षिप्रं भवादि वचनं यथभूतमेत-
च्छ्रुत्वा तथार्यसिह योनि संचिन्तयिष्ये॥

सारथिराह।

नैतस्य देव! कुलधर्मे न राष्ट्रधर्मः
सर्वं जगस्य जरयौवनधर्षयाति।
तुभ्यंपि मादृशिवान्धवज्ञातिसंघो
जरया असुखं न हि अन्यगतिर्जनस्य॥"

बोधिसत्त्व आह।

धिक् सारथे! अनुधबालजनस्य बुद्धि-
र्यदयौवनेन मदस्त जरां न पश्यी।
आवर्तयाश्विह रथं पुनरद्य प्रवेश्ये
किं मह्य क्रीडरतिभिर्जरयाभितस्य॥"

इति ललितविस्तरे १४ अध्याये।

अथ शाक्यसिंहः सारथिं सन्दिदेश रथं संचालयेति। गत्वा नगरस्य दक्षिणे द्वारि व्याधिग्रस्तं यातनापरीतपुरुषमेकमीक्षाचक्रे। ततः स सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष रूपविवर्णगात्रः
सर्वेन्द्रियेभि विकलो गुरु प्रश्वसन्तः।
सर्वाङ्गमुक्त उदराकुल प्राप्तदुःखो
नूनं पुरीष स्वकि लिष्ठति कुत्सनीये॥"

सारथिराह।

एषो हि देवपुरुषः परमं ग्लानो
व्याधीभयं उपगतो मरणान्तप्राप्तः।
आरोग्यतेजरहितो बलविप्रहीनो
अन्यान्यचीप्रसृतो स्वपरायत्तश्च॥"

बोधिसत्त्व आह।

"आरोग्यता च भवते यथ स्वप्नक्रीडा
व्याधिर्भयश्च इम दुःखम घोररूपम्।
को नाम विज्ञपुरुषो इम दृष्ट्व लोके
क्रीडारतिश्च जनयेदसुसंस्थितो वा॥"

बुद्धः

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य रथवरं पुनरपि पुरवरे प्रविशत्।
इति हि भिक्षवो बोधिसत्त्वोऽपरेण कालसमयेन पश्चिमेन नगरद्वारेणोद्यानभूमिमभिनिष्क्रामन्नद्राक्षीत् पुरुषं मृतं कालगतं मार्गे समारोपितं पैतृविसानीकृतं ज्ञातिसङ्घपरिवृतं सर्वैरुदद्भिः क्रन्दद्भिः परिदेवमानैः प्रकीर्णकेशैः पार्श्वावकीर्णशिरोभिरुरांसि साक्रन्दद्भिरुत्क्रोशद्भिः पृष्ठतोऽनुगच्छद्भिः। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष मञ्चोपरिगृहीतो
उद्वहन केशगत पांसु शिरे क्षिपन्ति।
परिगारयित्व विरवन्तुरस्ताडयन्तो
नानाविलापवचनानि उदीरयन्तः॥"

सारथिराह।

"एषो हि देवपुरुषो नतु जम्बुद्वीपे
न हि भूय मातृपितृ द्रक्ष्यति पुत्रदारान्।
अपहाय भोगयशमातृपितृमित्रज्ञातिसङ्घं
परलोक प्रातु न हि द्रक्ष्यति भूय ज्ञातिम्॥"

बोधिसत्त्व आह।

"धिग्यौवनेन जरया समभिद्रुतेन
आरोग्य धिग्विविधव्याधिपराहतेन।
धिग्जीवितेन पुरुषो न चिरस्थितेन
धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः॥
यदि जर न भवेया नैव व्याधिर्न मृत्यु-
स्तथपि च महदुःखं पञ्चस्कन्धं धरन्तो
किं पुन जरव्याधिमृत्यु नित्यानुबद्धा:
साधु प्रतिनिवर्त्य चिन्तयिष्ये प्रमोक्षम्॥

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य तं रथवरं पुनरपि पुरं प्राविशत्। इति हि भिक्षवो बोधिसत्त्वस्यापरेण कालसमयेनोत्तरेण नगरद्वारेणोद्यानभूमिमभिनिष्क्रामतस्तरुणमेव देव पुत्रेबोधिसत्त्वस्यानुभावेनैव तस्मिन् मार्गे भिक्षुरभिनिर्मितोऽभूत्। अद्राक्षीद्बोधिसत्त्वस्तं भिक्षुं प्राप्तं दान्तं संयतं ब्रह्मचारिमनति चिरप्रचलुर्युगमात्रप्रेक्षिणं प्रासादिकेनेर्यापथेन सम्पन्नं प्रासादिकेनाभिक्रमप्रतिक्रमेण सम्पन्नं प्रासादिकेनालोकितावलोकितेन प्रासादिकेन सङ्घाटीपात्रचीवरधारणेन मार्गे स्थितम्। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष प्राप्त प्रशान्तचित्तो
नीचोत्तिप्रचक्षु व्रजते युगमात्रदर्शी।
कायायवक्त्रवसनो सुप्रशान्तचारी
पात्रं गृहीत्व न च उद्वत उन्नतो वा॥

सारथिराह।

एषो हि देवपुरुष इति भिक्षुनामा
अपहाय कामरतयः सुविनीतचारी।
प्रव्रज्यप्राप्तः समसालम्बमार्गो
संरागद्वेषविगतो तिष्ठति भिक्षुचर्यया॥

बोधिसत्त्व आह।

बुद्धः

साधु सुभाषितमिदं मम रोचते च
प्रव्रज्य नाम विदुभिः सततं प्रशस्ता।
क्षिप्रमालम्बन्त परमक्षेमिवन्त यत्र
सुखजीवितं सुमधुरमस्तं ध्रुवञ्च॥"

इति ललितविस्तरे १५ अः।

ततः संक्षुब्धचित्तोऽसौ सर्वीयं सुहृज्जनं विवेद्य। दिवसेऽस्मिन् राहुलमाता पुत्रोऽस्य समजनि। राजा शुद्धोदनः स्वाङ्गजस्य श्रमणवृत्तान्तं सर्वं निशम्याश्व सञ्जातसंवेगं शुद्धमानसः चतुर्षु नगरद्वारेषु सैनापृष्ठान् यन्त्रियति स्म तस्य परिरक्षणार्थम्।
रतिरसाभिज्ञान् युवतिजनानन्यःपुरेषु बहुतरान् प्रेषयामास बोधिसत्त्वस्य प्रमोक्षणाय। अथागता रजनी, सिद्धार्थस्तु चित्तं आकुलितमनीव गेहात् प्रव्रज्य भैक्ष्यचरणार्थम्। ततो कृत्यादिप्रमोदात् परं निद्रिताः सर्वा युवतीर्विलोक्य गृहयानात् शनैः शनैरुत्थितो अवोचत्।

"तत्र काश्चिद्वृषभसदृक्षाः काश्चिद्-
विधुतकेश्यः काश्चिद्विकीर्णाभरणाः काश्चिद्-
विन्यस्तमुकुटाः काश्चिद्विहस्तैरंगैर्विगोपितगात्र्याः
काश्चिद्विसंस्थितमुखाः काश्चिद्विपरिवर्तितशयनाः काश्चित् प्रस्रवन्त्यो लालाभिः काश्चिद्-
हसन्त्यः काश्चित् प्रहसन्त्यः काश्चित्प्रलपन्त्यः
काश्चिद्गात्राणि कटकटायन्त्यः काश्चिद्विवर्ण-
वदनाः काश्चिद्विसंस्थितरूपाः काश्चित् प्रलपितवाङ्मात्राः काश्चिद्विघ्निमवदनाः काश्चिद्वृ-
द्धाटितमधीर्घाः काश्चिदवगुण्ठितमधीर्घाः काश्चिद्विपरीतवर्तितसुखमशयनाः काश्चित् प्रध्मात-
शरीराः काश्चिद्विभग्नगात्राः काश्चिन्निकुब्जाः
खुरखुरायमानाः काश्चिन्नरदन्तसुपगुह्य परिवर्तितशीर्षशरीराः काश्चिद्वीणावल्लकीमृदङ्ग-
मुरजपाणयः काश्चिद्वेणुं दन्तैः कटकटायन्त्यः
काश्चिन् क्रिम्यलनकुलसम्पलाढ्यकर्षितवात्-
भाक्षाः; काश्चिन्निमेषोन्मेषपरिवर्तनयनाः काश्चिद्विदृतास्या एवं सदृशं धरणीतलगतमनसः-
पुरं निरीक्ष्यमाणो बोधिसत्त्वः प्रध्यानसंज्ञा सुतूपादयति स्म।" तत्रेदमुच्यते।

"तां दृष्ट्व उद्विग्न स लोकनाथः
करुणां विनिश्चस्य इदं जगाद।
अहो बता सङ्कुगता प्रजेयं
कथं रतिं विन्दति रात्रिसौम्ये॥
अतिमोहनमाहते पुरुषेसि-
कामगुणैर्निर्गुणसंज्ञिनः।
विहगपङ्करगता यथा महि
लभन्ति कदाचिद् विनिःसृतम्॥"

इति ललितविस्तरे। २५ अध्याये॥

अतीतेऽथ निशीथे सिद्धार्थोऽवलोक्य सर्वान् "जरामरणप्रलपितसत्त्वपरिमोचनस्य समयो सुपस्थितो मे।" अनेन चेतसाभिसञ्चास्य। विज्ञप्तोऽन्यपालोऽवदत् राजपुत्रस्य ते सञ्चाचलनमनुचितं न समर्थोऽपि सञ्चाचालयितुं यदुत बोद्धुम्।

सिद्धार्थ आह।
"विषयिणः सर्वेन्द्रिया यथा दुष्टे-
न्द्रियहिंसा मीढपटा यथाशुचिः।
विषाशुगा: सर्वसुखस्य हन्दक
ज्ञात्वा हि कामान् विजयते रतिः॥"
हन्दक अस्य वाणि दुःखप्रतामर्षिता पूर्व-
मज्ञानात्।
अन्धनाद्यनाक्षादृणाक्षर्जनैः कामद्वेषतो-
मैत्र्या नो च निर्विरभूत्॥
संक्लेशसागरं प्रमदवनमतच्च
मोहाकुलं हृदिजालाकुलम्।
अन्धभूतं पुरा ज्ञानसंज्ञा-
यद्दोकारका वैदनायोत्तिष्ठता इमे॥
अनैश्वर्याणतः सम्भूता चलचपला-
विलमेघैः समा विद्युद्भिः सदृशाः।
ओदविन्दूपमा अल्पतुच्छा असाराः
असाला च मूढस्वभावा इमे सर्वशः॥
अवसन्नमभिवस्त्र नावामिमालावाऽवतीर्य
संसार ओघैरहं तारयिष्येऽनन्तं जगत्।
शोकसंसारकान्तारशोषोन्मिरागत्यहा-
ज्ञानुले वैराकुले दुस्तरे एव चित्तं मम॥
तदालम्बनोत्तीर्य इदं भवार्णवं
सर्वैरहत्यैर्यन्नेश्वरात्मकम्।
स्वयं तरित्वा च अनन्तरं जगत्
स्वयेऽजरामरे शिवे।"

ललितविस्तरे १५ अध्याये।

अतस्तदस्य! प्रव्रजान्धुनैव सत्वरमागत्यात्मम्।
तथानुष्ठिते सिद्धार्थोऽसौ क्षीतनयगुरुजनान्
सर्वान् राज्यमैश्वर्यञ्च विहायात्यमारुह्य
निर्गतः। जिजनगराद्दादशयोजनदूरस्थितं
मगधराज्यं प्राप्य तत्रैव वहिरात्रमसन्निधौ
इन्द्रकमन्यवस्थितं विहाय कौण्डियमपहाय
विम्बिसार मगधजनपदसमेताकौ वैशालीं नाम-
नगरीमुपतस्थे। तत्र आराडकालामनामा
जिनगुरुवस्त्रिज्ञातकश्चिरेवात्मसौत्, सिद्धार्थो-
ऽस्य शिष्योऽभूत्। आहैकदा गुरुः, पवित्रचेता
मनुर्भस्मिमान् पुरुष एवात्मं ब्रह्मचर्यं चरीतुम्,
तदुच्च सर्वमैश्वर्यम्। हृदि यस्य विमलो
विद्याप्रदीपः प्रदीप्तमः स्नेहमयसनपटुर्भवेत्।
न तस्य सुखदमैश्वर्यविभूषितसुरवचनम्।
ततः सम्प्रतीं शिष्यततिस्निग्धानस्य सत्यकनाम्नः
साधोः समीपं गत्वा ज्ञानेन तत्प्रावर्यं गत्व-
शीर्षं जगाम। तयोश्चावितमनेन यद् ब्राह्मणाः
मनसाच बोधस्वरूपं तदुभयविमुक्तं कायमानसं
विशोधयन्ति तदधिमुत्पादयितुमात्मैकाग्रहृद्य-
वर्तनश्चिव वैपल्यं भजते। शुष्ककाष्ठस्वरूपहृद्य-
वर्तनेन यथा तत्प्रमणोरथा मानवाश्चरत्
कायमनसोर्विमुक्तयोः सतोः सतश्च बोध-
लाभः सुखः। ततःपरमसौ बोधिसत्त्वो गत्वा
मानसद्वयविज्ञानं विजयं तत्रैवोपेतुं मनो
दधे। परमतत्त्वेनानेन कायमुक्तिं चित्तमुक्तिञ्च
विहाय आकाशानन्त्यं बुद्धेरं आत्मं स्वार।
अनासौ वस्तिंचिद्विज्ञे नास्तीत्येकिञ्चा वस्तिं-
चिद्वा तदुभयमेवं नास्तीत्येकमात्मं मनसि
मत्वा वस्तिंचिदुपोद्वलेन वा ज्ञानं
विलुप्तं मुख्यच्छक्तिसंवीर्यो बभूव। ततोऽसौ
देहमित्यं निमज्य नर्तुं क्षमोऽहं न समर्थोभवेय-
मिति विचिन्त्य पीवरकरमाहारं जघाच।
दिवसेऽस्मिन् शुद्धोदनः स्वप्नं ददर्श शिवः पुत्रो
मे मणिमुक्तादिविभूषितवारवरूपेण उदुम्बर-
तरुमारोहत्। वेलोच्चलोकाः पूजनायास्या-
मन्छन्तीव, यद्योदराणि मोघापरवाणी ददर्श
स्वप्नं विविधम् स्वयं ग्राम्यसिंहश्च मत्व,
यथा जगद्विजितं गृह्य मे, विम्बयक्षमिव सुमेरु-
शिखरमुपधानीभूतं मे, वामदक्षिणकरद्वयं मे
प्राच्यपश्चिमसमुद्रोपरि पादावुभौ मे दक्षि-
णाब्धौ प्रक्षिप्ते, नाभिकमलात् मे वनस्पतिः
शिरिकाष्टशैलापूरितमखिलं नभः। ततश्चो-
त्थायाथौ जगद्विलोभितायाः सुजातानामि-
कायाः कन्यायाः सकाशात् भिक्षां जग्राह।
एतः सिद्धार्थो ध्यानं दधार, निर्वाणे पथि तस्य
सततं परिपन्थी सन्नपि दुर्निवारो मारः पराजितो ध्यानवीरेण योगिसिंहेन पलायनं चक्रे।
ततश्चास्यैव बन्धमोक्षस्य तनये सतेते तस्मा रतिश्च
योगिप्रवरस्य मोहनाय, विफलानि तु जाता-
न्यनयोर्मनोरथानि। ततः सर्वेभ्यः क्लेशेभ्यो
विमुक्तः सिद्धार्थो बोधञ्च विमलं लेभे। तदाद्या-
वधिरूढयोगः मनस्यस्य सुखरे प्रतिफलितं
सकारणमखिलं जगत्। ततश्च चिन्तयामास सः
जीवानां जन्म, तेषु च जीवस्य संयोगो वियोग-
श्चैव दुःखदुःखान्येतानि। न जानीते मानवश्चत्
मोहजालेनाहतो दुर्विषहं दुःखं सहत इति।
ततः कस्मादागतं जरामरणमिति चेतसा ज्ञाते
प्रश्ने तेनैव निश्चिनोति सः, यज्जन्म एवागच्छति
जरामरणमिति, श्रुतस्तर्हि ह्यागतं जन्म
किमस्य वा कारणम्? संसारादज्ञाज्ञातिर-
तश्च भव एव कारणमत्र। भवस्तर्हि श्रुत
आयतः किमस्य वा कारणं? उपादानादागतो
भवस्तदुपादानमेवास्य कारणम्। कस्मादुपा-
दानमायातस्तर्हि किमस्य वा कारणं? तृष्णाया
आगतस्तदुपादानमतस्तृष्णैव कारणमस्येति। तर्हि
श्रुत आयाता तृष्णा कारणं वा किमस्याः?
वेदनाया आगता तृष्णा अतो वेदनैव कारण-
मस्याः। श्रुत आयाता वेदना, अस्या वा किं
कारणम्? स्पर्शादायाता वेदना, अतः स्पर्श
एव कारणं वेदनाया इति। स्पर्शस्तर्हि श्रुत
आयातः किं वा कारणमस्य?। षड़ायतनता
दागतः स्पर्शस्ततोऽस्य कारणं न एवेति।
श्रुत आयातं षड़ायतनं कारणं वा किमस्य?
नामरूपाभ्यामागतं षड़ायतनम् अतएवास्य
कारणमेव तदिति। श्रुतस्तर्ह्यायाति नामरूपे
कारणं वा किमनयोः? विज्ञानादागते नाम-
रूपेऽतोऽनयोः कारणं विज्ञानमिति। श्रुत
आगतं विज्ञानमस्तर्हि कारणं वा किमस्य?
संस्कारादागतं विज्ञानमतोऽस्य कारणं न
एवेति। संस्कारस्तर्हि श्रुत आयातः कारणं
वा किमस्य? अविद्याया आगतः संस्कार-
स्ततोऽस्य कारणमविद्येति।
एतदिदानीमविद्येव कारणं जगतोऽखिलस्य।
ततो विलोमेन प्रकटीभूतं वस्तु अविद्यायाः
संस्कारः संस्कारादु विज्ञानम्, विज्ञानात्तामरू-
पाणां नामरूपाणां षड़ायतनम्, षड़ाय-
तनात् स्पर्शः, स्पर्शाद् वेदना, वेदनायाश्चृष्णा
तृष्णाया उपादानम् उपादानात् संसारः
संसाराज्जातिः जातेर्जरामरणमिति।
प्रकारेणानेनोत्पन्नो दुःखस्कन्धो जीवायाम्।
तर्हिदानीं प्रतिभातं अविद्येव सकलस्य कार-
णस्य निरन्तरायमविद्यायां सुतो दुःखस्कन्धः
क्रमेण तस्मात् जन्मजरामरणं दुःखं विलाप-
क्लेशाः पीड़ा च सर्वे दूरे पलायन्ते। एवं
जीवानामहेति चिन्ताक्षणे सर्वलोकः।
उदिते तस्मिन् मनःसंयोगेन ज्ञानं दर्शनं विद्या
स्फुरितैश्चैव सर्वं प्रत्यक्षीभवति। तत इदानीं
सिद्धार्थो बुद्धः सञ्जातः।
ततश्चागतोऽत्र विम्बिसारसमेता राजा बुद्धस्य
श्रीपादपद्मवन्दनाय। सोऽस्मै स्वपदिदेश
"अहिंसा परमो धर्मः।" इत्यतस्तमनुस्मृत्य
तद्धर्मं निर्व्याजमोचयाम्बिधेति।
ततोऽसौ बुद्धो नैरञ्जनायाश्चो नदीं खिरिका-
वनञ्च व्रजन् उज्जनसुपवनं प्रतस्थे। अत्र स
जनपदाग्रहाचरादुपोषधमक्षीक्षतवान्। तत
स्तस्मात् स्थानान्निर्गत्य गत्वा नाडाकं पुण्डरिकं
लोहितवस्तुकं मन्थपुरं चारविपुरञ्च क्रमेण
गत्वा व्रजा च काशिकासुपतस्थे, अत्राक्ष
कौण्डिन्यः सिद्धः शिष्योऽभूत् बुद्धस्य धाम्ना
ज्ञानकौण्डिन्यं चकार। तावेऽस्मिन् बहु-
संख्याका लोका आगत्यागत्य बुद्धस्य शिष्या
अभवन्।
ततः काश्यीधान्यः स उरुविल्वाख्यिं वैभाजी-
नामकं ग्रामं प्रययौ तत्र नैरञ्जनतीरे धाम्ना
उरुविल्वाकाश्यपः सहाधिकविंशतिभिः शिष्य-
शतैरुपगतः प्रतिवसति स्म। लोका आग-
त्यागच्छन्तिति। बुद्धो भगवान् समीपं गत्वा
ज्ञानोपदेशं विमलं शिष्यं तं चकार।
इत्था मुक्तिमलौकिकीं बहवो लोका विन्दिता
धर्मं बौद्धं गृहीतवन्तः।
तदा विम्बसारो मगधराजः शुश्राव भगवान्
बुद्धदेवः प्राप्त इति। श्रुत्वा समीपं गत्वा च
परमया भक्त्याक्ष शिष्यत्वं स्वीचकार। ततो
नगरो स्वीयां नगरीं गन्तुं विसस्मरासास
तम्। अथाहाक्ष प्रभवं बुद्धः। आरीपुत्रोऽथ
मौद्गलायनोऽक्ष शिष्योऽभवत्।
श्रुतवान् कोशलपतिः प्रसेनजित् बुद्धो देवो
राजगृहे चेतसीमे प्रतिवसत्यनुनेति। श्रुत्वा च
तत्र त्वरितं बुद्धसन्निधिमुपाच, पूर्वकाश्यप:
परिव्राजकसोऽक्ष वैराकुलपक्षयः अधितकेशः

यत्नस्य दृश्यते अन्ये च मन्त्रयो बुद्धर्मवस्थितन्ति, न ते लोके कदापि बुद्धमाचां परिचावयितुं शेकुरिति भवान् किं न जानाति अहं बुद्ध इत्यालापं परिचावयितुम्। बुद्धस्तम् 'कुमार-दर्शनस्वर्गं, आवयामास तेनोन्मीलितचक्षुः क्षिप्तोऽभूत्तस्य तत: प्रसेनजित् कोशलराजः। दीक्षिते राजि कोशलेश्वरे बुद्धः शुद्धोदनाय संवादं प्रेषयामास "राजन्! पुत्रस्ते पथादिदार्शी जन्तुविदारणमकरोत्। तेनैव कोऽपि जनस्तस्यां पापीयस्यां वारयामास, शुद्धोदनः प्राञ्जलिराकाशे इत्वार्तं परो सुखमवाप। आनेतुं पुत्रं कपिलवस्तुनगरीमाजे दूतं पुनः पुनः प्रेषितवान् यो यः प्रयाति दूतोऽस्य वक्त्रं न स पुनः प्रतिनिवृत्तः क्षितोऽस्य दीक्षितस्यैव। शुद्धोदनः साधु कालुदायीति-नामानं प्रजेव तत्र प्रेषितवान्। उदायी प्राञ्जलिरादृतीकार यदि चार्हं दीक्षितोऽप्य-भविष्यम् वारमेकमपि प्रतिनिवर्तिष्ये। उदायी बुद्धस्य समीपं गत्वैव दीक्षितः। बुद्धस्तं प्रतिज्ञा-परिपूरणाय शुद्धोदनस्यान्तिकं प्रेषयामास। उदायी गत्वाह राजानं भो भूप! देवो बुद्धो ऽभिजिगमिषुर्नगरमवधातुमिच्छुर्नगर्याम् विहारे-ऽवधातुमिवेव वः। राजा जेतवनस्यामिव न्यग्रोधारामं कपिलवस्तुनगरे विरचयाञ्चमन-मस्य प्रतीक्षाचक्रे। तत्रागत्य बुद्धो न्यग्रोधारामे सन्निषण्णवान्। अथागत्य पितरौ शुद्धोदनोऽन्त-रीक्षगतवाक्य अर्धं अर्धं प्राञ्जलयन्तवच्च क्षिप्त्वा अभूवन्। तत्रावसानसमये बुद्धस्य पालयित्री गौतमी वनिता यशोधरा च भैक्षाश्रमं गृहीत-वत्यौ पुत्रोऽपि राहुलोऽजातकविद्यो जनकेन दीक्षितः।

ततो बुद्धो गृध्रकूटमागत्य वसतिमचक्रे। समये-ऽस्मिन् देवदत्तोऽस्य ज्ञातिजः भ्रातुः क्षिप्तिमं दाक्षिण्यादानिनाय। तेन च निहन्तुं बुद्धं कूटयन्त्रं विरमायि। अनेनाहतो बुद्धो यथां प्राप विक्षेपावसरे यन्त्रस्य तं बुद्धं विरचिन्तुः कुम्भीरस्तत्प्रहारेण प्राक्षिप्यत्याज।

काले ऽस्मिन् विप्रकारे मागधे प्रयत्नं गते अजातशत्रुर्नाम्नो दुर्ज्ञातो मगधं शशास, देव-दत्तोऽस्य मित्रमासीत्। एकदाजातशत्रुबुद्ध-सन्निधावागत्य प्रपच्छ तं "नानाकर्मसु व्यासक्तो मनुष्यो धनमक्षीरसुपार्जयितुं यतते, प्राप्य तु वाञ्छितं धनं सुखी च भवति, धर्मं तथा तु विधाय मनसेहपं सुखं प्रत्यक्षमाप्नुयात् किम्? बुद्धः प्रत्युवाच किं कर्मणा यागेन होमेन वा। त्यागत्यागौ विषयौ अधमोत्तमत्वाच्च निरस्कारपुरस्कारौ च तद्वत् विद्यते। पितरौ ज्ञातीयौ च क्षिप्त्वा जगति प्राप्तवान् महा-यशम्, सर्वे पथि प्रविदन्ति च एव जनमेव मन्यन्ति। क्षिप्त्वा यज्ञयोरायो-ऽयौ निर्याणं क्षीणं लभते च पुनरायाति सः। दृष्टयादिभूतचतुष्टयेऽस्य यथाक्रमं भूतान्ये-क्षीभवन्ति। दृश्यतुपदेशेन बुद्धस्य अजातशत्रोः सांमत्यं तत् क्षणादेव प्रवलं बभूव। सोऽस्य जुगुप्सापात्रमासीत् स इदानीं भक्तिपात्रमजा-भूत्। अजातशत्रुर्बुद्धाद् दीक्षां जयाच।

अथ कूटाद्बुद्धः पाटलीग्राममाजगाम। कपि-लवास्तुनगरस्थो बुद्धोऽनेन श्रुतोऽभि। सम्भाव्यं तं पथि मल्लराजौ चतुर्हिंशं निरीक्षाचक्रे, आनन्दोऽस्य परिचरो जिज्ञासयामास किमित्थं निरीक्षसे व्यापारयंश्चक्षुरीति। बुद्ध आह आनन्द! परिक्षाखेऽहमिमं लोकमिदानीम्। ततः स आजग्मतुः जनुग्रामं भक्तग्रामं हस्ति-ग्रामम् अथाच दृष्ट्वा मल्लराजः ग्रामा-नतिक्रम्य भोजनगरं प्राप्तः। स्थावादक्षाज्ञ-नुकाक्षमक्षावसमागत्यावस्थितः। अथ कुक्क-नाख्यो धातुगोलकाद् वणिग्विशेषादाहार्यं गृहीतवान्।

ततोऽधावानन्दं सम्बोधयामास भो नगरीं कुशीं गच्छामि। अतःपरं सधागतो नगरीं पावा-मतिक्रम्य नदीं हिरण्यवतीं तीर्त्वा विविक्तं वनमेकं प्राप्तः। अथानन्दं प्राह पार्श्वयोरहन्तीव्रवेदनया समाक्रान्तोऽस्मि, अतोऽहमत्रैव तिष्ठामीति। आनन्दो जलमानिनाय प्रचाल्य पादौ बुद्धो ध्यानं समाजलभे। कालेऽस्मिन्नागत्य पुक्कशो मल्लराजः पादौ बुद्धस्य प्रपूजयामास। बुद्धोऽस्य दीक्षां चकार। सोऽस्मै दत्तवान् सौवर्णालङ्कार-द्वारान् प्रणम्य च प्रस्थितः। गते मल्लराजे आनन्दं प्राह बुद्धः प्रेयान् मे आनन्द! तं परि-धापयालङ्कारान् सौवर्णालङ्केति। तथानु-ष्ठिते तदानीं देहस्य ज्योतिर्धाख्याखिलं जगद् आलोकितमिवासीत्। भक्तिभरेणानन्दः प्राह भगवन्! न इदं कदापि मयाऽभवतोऽमेतादृग्-सौष्ठवं देहस्य। दृश्यस्य तावत् कथय कारणमत्रेति। चकार प्रत्युत्तरं बुद्धो देवो निशेष आनन्द! निर्वास्यतः प्रदीपस्य शिखे-वाङ्गकान्तिर्मे शुद्धत्वान्नेत्यत्र कारणम्।

अनन्तरमुभौ मिलित्वा हिरण्यवत्यास्तीरे आज-ग्मतुः। बुद्धस्तत्र स्वीयं समस्तं परिच्छदं परि-धायैकवसनो नत्वा हिरण्यवत्याः कुशाग्र नगर्यां उभययोर्मध्यदेशस्थं वनं विविक्तं विवेश। पथि प्राह आनन्दं क्लान्तस्य मे शय्यां विधत्स्वेति। आनन्दः शय्यां सञ्चीचकार, सुप्तो-त्थितो बुद्ध आनन्दाय भिक्षुकार्यां कर्त्तव्यं कृत्स्नं विनयं माहकादीनि धर्मसंस्थास्युप-दिदेश। आनन्दस्तत्सर्वं समाहितेन मनसा जघाह। तत आनन्दमादिदेश साधुमहि-दृश्ययोर्मध्ये शय्यां स्थापय निशीथेऽद्य मे शीघ्रं विधानीहीति। ततो बुद्धस्यैव समाधिमाधाय स्वपार्थिवं ज्योतिरवलोकयामास ततोऽसौ चिन्तयति स्म निर्वाणम्।

मत्तः परमानन्दो नरोऽयं संज्ञावाच्य विजजित्वास्मृतयाद्योऽधिरक्षारत्ना तमाह बुद्ध आनन्द! संचारोऽमसंचारः चारो निर्मरत्व-मेव तदर्थं यतस्वेति। इत्थं परमसुखासुर्बुद्धदेवो निर्वाणं प्राप।

इत्थं च हरेरवतारः—

"विवोधं विज्ञानमयीं प्रभां प्रभु-र्जगत्प्रदीपः प्रथितः प्रभाकरः।
बुद्धः स राशिर्मेत्रसां महोज्ज्वलो ज्वलंश्च विश्वाभयदं परं ततः॥
प्रचाल्य चैतोमलमल्पमोमयं प्रहृत्तृष्णारसदूषितं विभुः।
प्रबोधधाराधरभूरिवारिभी रराज देवो भुवि बोधभास्करः॥"

कुशीनगरस्थिते सुकृटबन्धनचैत्येऽस्य क्षिप्त्वा: देहं भस्मीभूतं चक्रुः। क्षिप्त्वा देहभस्मावशेषार्थं विवदमानेन शिरसापि भस्मभिरेभिरष्टप्रदेशेष्वष्टौ चैत्या निर्मिता भवन्तिति॥)

बुद्धत्वं, क्ली, (बुद्धं स्वरूपाकारतो ज्ञातं ज्ञप्तम्।) स्वौपधिकम्। तोत् इति भावा। इति सिद्धान्त-शेखरः॥

बुद्धिः, स्त्री, (बुध्यतेऽनयेति। बुध्+क्तिन्।) निश्चयात्मिकान्तःकरणवृत्तिः। इति वेदान्त-सारः॥ सविकल्पकज्ञानम्। इति चण्डी-टीकायां नागभट्टः॥ तत्पर्यायः। मतीषा २ धीः ३ प्रज्ञा ४ शेमुषी ५ मतिः ६ प्रेक्षा ८ उपलब्धिः ९ चित् १० संज्ञित् ११ प्रतिपत् १२ आप्तिः १३ चेतना १४। इत्यमरः। १।५।१॥ धारणा १५ प्रतिपत्तिः १६ मेधा १७ मननम् १८ मनः १९ ज्ञानम् २० बोधः २१ बुद्धेशः २२ संज्ञा २३ प्रतिभा २४। इति राजनिर्घण्टः॥ आत्मजा २५ पक्षा २६ विज्ञा-नम् २७। इति शब्दरत्नावली॥ * ॥ अस्याः स्वरूपं यथा,—

"बुद्धिर्विवेचनारूपा सा ज्ञानजननी मुनौ॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे २९ अध्यायः॥

अस्या अध्यात्माधिभूताधिदैवतानि यथा,—

"अध्यात्मं बुद्धिरित्याहुः मनश्चिन्तयितारिणी।
अधिभूतञ्च मन्तव्यं ब्रह्मा तत्राधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व॥ * ॥

सा च सात्त्विकराजसतामसभेदेन त्रिविधा। सात्त्विकी यथा,—

"प्रवृत्तिञ्च निवृत्तिञ्च कार्याकार्ये भयाभये।
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ!
सात्त्विकी॥"

राजसी यथा,—

"यया धर्ममधर्मञ्च कार्यञ्चाकार्यमेव च।
अयथावत् प्रजानाति बुद्धिः सा पार्थ!
राजसी॥"

तामसी यथा,—

"अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ!
तामसी॥"

इति श्रीभगवद्गीता॥

तस्या: पञ्च गुणा यथा,—
"दृष्टानिष्टविभक्तिश्च अध्यवसाय: समाधिता।
संशय: प्रतिपत्तिश्च बुद्धे: पञ्च गुणान् विदु:॥"
इति मलमासतत्त्वे औद्वाहिकी:।
दृष्टानिष्टविभक्ति: दृष्टानिष्टानां इन्द्रियविषयाणां विभक्तिर्भाग: विभक्त्या इन्द्रियद्वारे:। अध्यवसाय: उत्साह:। समाधिता चित्तस्यैर्यं चित्तवृत्तिनिरोध इत्यर्थ:। संशय: कोटिद्वयकृत् ज्ञानम्। प्रतिपत्ति: प्रत्यक्षादिप्रमाणवृत्ति:। इति तट्टीका॥ ॥ तस्या: अन्य गुणा यथा—
"शुश्रूषा श्रवणञ्चैव ग्रहणं धारणन्तथा।
ऊहोपोहोऽर्थविज्ञानं तत्त्वज्ञानञ्च धीगुणा:॥"
इति हैमचन्द्र:॥ ॥
तस्या वृत्ति: प्रकाश यथा। प्रमाणम् १ विपर्यय: २ विकल्प: ३ निद्रा ४ स्मृति: ५। इति पातञ्जलम्॥ ॥ बुद्धिविषयकरा यथा,—
"ओक: ओकश्च ओकश्च कामो मोह: परासुता।
ईर्षा मानो विचिकित्सा दयाश्रद्धा शुश्रुषता॥
द्वादशैते बुद्धिनाशहेतवो मानसा मला:।"
इति कालिकापुराणे १८ अध्याय:॥ ॥
अपि च।
"बुद्धिविषयकरा एते मायकाश्चवञ्चिका:॥"
बुद्धिहङ्किरा यथा,—
"निम्नाटरूक्षदृष्टाश्च बुद्धिहङ्किरा मता:॥
बुद्धिविषयकरानिमं त्यजेन्नाशा च भोजनं।
भोजयेदन्धकं बुद्धिहङ्किरेषु नृपोत्तम!॥"
इति कालिकापुराणे ८६ अध्याय:॥ ॥
आगमते सा विष्णुगुण: पुनर्द्विविधा अनुभूति: स्मृतिश्च। यथा,—
"विष्णुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूति: स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥
प्रत्यक्षमथानुमितिस्तथोपमितिशब्दजे।"
इति भाषापरिच्छेद:॥
बुद्धिमान्, [न्] त्रि, (बुद्धिर्विद्यते यस्य। बुद्धि + मतुप्।) बुद्धियुक्त:। ज्ञानवान्। यथा,—
"तद्गुण्यते यद्विषयस्तद्गुणं
स बुद्धिमान् यो न करोति पापम्॥"
इति गारुडे १५५ अध्याय:॥
बुद्धिवल्लभ:, पुं, (बुद्धौ बुद्ध्या लभते कार्य्यं इति भाव:। वल्लभ:।) मन्त्री। इति हलायुध:॥ मन्त्रा: लाक्षाद्यकर्णी च॥
बुद्धीन्द्रियं, क्ली, (बुद्धेर्बुद्धात्मकं वा इन्द्रियम्।) ज्ञानेन्द्रियम्। यथा,—
"मन: कर्णौ तथा नेत्रे रसना त्वक् च नासिके।
बुद्धीन्द्रियमिति प्राहु: ग्रन्थतोऽर्थविचक्षणा:॥"
इति शब्दरत्नावली॥
(यथा मनु:। २। ९०-९२।
"ओत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वश:।
कर्म्मेन्द्रियाणि पञ्चैषां पाय्वादीनि प्रचक्षते॥

एकाग्रं मनो यैषं सदुपेक्षोभयात्मकम्।
यद्वित् जिते जितावेतौ भवत: पञ्चकौ तत:॥"
बुद्बुद:, पुं, वर्त्तुलाकारजलविकार:। जलबिन्दुवो इति भाषा इति च ख्यात:। बुद्बुदोऽम्बुबोट इत्यपि। इत्यमरभरतौ॥ अन्यच।
"अच्छच्छाया लघादग्नौ चक्षिषा पर्व जलम्।
वेश्यारागा: क्षणे प्रीति: पङ्क्तिर्बुद्बुदोपमा:॥"
इति गारुडे १५ अध्याय:॥
गर्भस्यावयवविशेष:। यथा,—
"पञ्चरात्रेण कलनं बुद्बुदाकारतां व्रजेत्॥"
इति सुश्रुत:॥
(यदुक्तं यथा,—
"प्रथमेऽहनि रेतस्य संयोगात् कलनञ्च यत्।
जायतेबुद्बुदाकारं श्लेष्मितञ्च दशाहनि॥"
इति शारीरे शारीरस्थाने प्रथमेऽध्याये॥)
बुध, इर् अ अ वेदने। इति कविकल्पद्रुम:॥ (भ्वा०-उभ०-सक०-सेट्। क्वलादिरयम्।) इर् अबुधत् अबोधीत्। अ बोध: बुध:। अ बोधति बोधने। इति दुर्गादास:॥
बुध, औ विज्ञापने। इति कविकल्पद्रुम:। (भ्वा०-पर०-सक०-अनिट्।) औ बोद्धा। बोधति गुरु:। इति दुर्गादास:॥
बुध, य ङ औ वेदने। इति कविकल्पद्रुम:॥ (दिवा०-आत्म०-सक०-अनिट्।) य ङ बुध्यते ग्राह्यं सुधी:। औ बोद्धा। इति दुर्गादास:॥ (जागरार्थे अकर्म्मकोऽपि। यथा, रघौ।१०।६।
"ते च प्रापुरदभ्रन्तं बुबुधे चादिपूरुष:॥"
"आदिपुरुषो विष्णुश्च बुबुधे योगनिद्रां जहौ इत्यर्थ:।" इति तट्टीका॥)
बुध:, पुं, (बुध्यते य:। "बुध + इगुपधज्ञाप्रीकिर: क:।" ३। १। १३५। इति क:।) पण्डित:। तत्पर्य्याय:। विद्वान् २ विपश्चित् ३ दोषज्ञ: ४ सत् ५ सुधी: ६ कोविद: ७ धीर: ८ मनीषी ९ ज्ञ: १० प्राज्ञ: ११ संख्यावान् १२ पण्डित: १३ कवि: १४ धीमान् १५ ऋषि: १६ क्रती १७ क्षत्रि: १८ लब्धवर्ण: १९ विचक्षण: २० दूरदर्शी २१ दीर्घदर्शी २२। इत्यमर:। २। ७। ५॥ विदग्ध: २३ दूरदृक् २४ ऋरी २५ वेदी २६ दृढ: २७ बुध: २८ विधानग: २९ प्रश्निल: ३०। इति शब्दरत्नावली॥ अक्त: ३१ प्राप्तरूप: ३२ सुरूप: ३३ अभिरूप: ३४ बुधान:३५ कवितावेदी ३६ वप्रा ३७ विदित: ३८ कवि: ३९। इति जटाधर:॥ (यथा, नवरत्ने। १।
"अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्ब्रह्मं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं श्लोकेन कुर्य्यादृजुम्॥")
नवग्रहान्तर्गतचतुर्थग्रह:। स च ब्रह्मक्षत्रि-भार्य्यातारागर्भे चन्द्रात्। तत्पर्य्याय:। रौहिणेय: २ सौम्य: ३। इत्यमर:। १। ३। २६। सौम्य ४ विद् ५ ज्ञ: ६ बोधन: ७ इन्दुपुत्र: ८। इति ज्योतिस्तत्त्वम्॥ ॥ तस्य जन्मादि-

वृत्तान्तं यथा। "महाबलिनश्च बलवद्दैत्यगुरो-र्देवगतेस्तारां नाम पत्नीं भगवान्। बलुध्यस्तु इत्यत्रातिचोदितेन भगवता ब्रह्मणा चोदितस्य समवेत्य दैवाद्विभार्यासमागोऽपि न तुष्टोच। तस्य इत्यत्रातिद्विषादुधना पार्थिव्याशोऽभूत। अङ्गिरसश्च बलाद्बादुपत्यत्रयिणो भगवान् स्वो इत्यत्रात: बाह्यायनकरोत्। ततश्चोद्यता ततोऽपि बलवत्तुष्टा: समस्ता एव देवदानवनिकाया महान्तमुद्यमयन्त:। इत्यत्रातेरपि सकलदेवसेनयत्राय: ग्रहोऽभवत्। एवं तयो रतीव्य: संग्रामसारानिमित्तसारसमवगामाभवत्। ततश्च समस्तग्रहाध्यक्षगुरुश्च बल-पुरोगमा देवा: दैवैश्च वाक्षिवरावया बुद्धत्व:। एवच देवासुराहवक्षोभक्षुब्धसप्तसमुद्रमेवेव जगद् ब्रह्माणं शरणं जगाम। ततश्च भगवान् पुण्यनयं गुरुरमसुरान् दैवांश्च निवार्य्य इत्यत्रातये तारामदात्। तारान्त:प्रवयामासचोच्च इत्यत्रातिराह। नैव सम यैवे भवद्भ्यान्नुतो धार्य्यत उत्पत्तेनं अकामकमतिभारैरेवेति। सा च तेनैवमुक्ता पतिव्रता भर्तृवचनात्तस्मिंश्चो-काक्षमे गर्भमुत्सृज्य। स चोत्सृष्टमात्र इत्यत्रति-तेजसा देवानां तेजांस्याधिक्षेप। इत्यत्रातिमिच्छ तस्य कुमारस्यातिचारुतया लोभिलाषौ इत्वा देवा: वसुमत्यसम्बोधाद्वारां पप्रच्छु:। सत्यं कथयाख्याकमतिसुभगे! कस्या-यमात्मज: सोमस्याथ इत्यत्रातेरित्युक्तापि सा तारा ह्रिया न किञ्चिदुवाच। बहुशोऽप्य-भिहिता यदासौ देवेभ्यो नाचचक्षे तत: स कुमारस्तां ग्रामुत्सृजत: प्राह च। दुष्टाख्य! कस्याऽऽम तातं माख्यासि। अद्यैव ते अलीक-लज्जावत्याख्यया ग्राक्षिमममद्यं करोमि। यथा नैवमन्याप्यतिमन्यरवचना भविष्यतीति। अथ भगवान् पितामहस्तं कुमारं सन्निवार्य्य स्वयमपृच्छत्तारां। कथय वत्से! कस्याय-मात्मज: सोमस्याथ इत्यत्रातेरित्येवमुक्ता लज्जा-वड़माह सोमस्येति। तत: स्फुरदरुणिमा-मलकपोलकान्तिर्भगवतुकुपतिरात्मिञ्च कुमारं साधु साधु वत्स! प्राज्ञोऽसीति बुध इति नाम चक्रे। इति विष्णुपुराणे ४ अंशे ६ अध्याय:॥ मत्स्यपुराणे चतुस्त्रिंशाध्याये विशेषोक्तायम्। सूत उवाच।
"तत: संवत्सरस्यान्ते द्वादशादित्यसन्निभ:।
दिव्यपीताम्बरधर: पीताभरणभूषित:॥
सर्व्वास्त्रशास्त्रविद्विद्वान् क्षत्रियास्त्रप्रवर्त्तक:।
राज्ञ: सोमस्य पुत्रत्वाद्राजपुत्रो बुध: स्मृत:॥
जातमात्र: स तेजांसि सर्व्वास्त्रेषाक्षिपद्बली।
ब्रह्मादयस्तत्र ते जग्मुर्देवा देवर्षिभि: सह॥
इत्यत्रातिगते सर्व्वे जातकर्म्मोत्सवं तदा।
पप्रच्छुश्च सुरास्तारां केन जात: कुमारक:॥
तत: सा लज्जिता तेषां न किञ्चिदवदत्तदा।
पुन: पुनस्तदा एता लज्जयन्ती वराङ्गना।
सोमस्येति चिरादाह ततोऽयाद्विबुध: सुतम्।

बुधवा बुधाष्ट बुधः

बुध इत्यक्षरोच्चारं प्राहाग्राच्च भूतले ।
अभिषेकं ततः कृत्वा ब्रह्मामकरोद्विभुः ।
महत्पात्रं ददाथाथ ब्रह्मा ब्रह्मर्षिसंवृतः ।
पप्रच्छतां सर्वभूतानां सर्वेषान्तरधीयत ।
दक्षोदरे च तस्मिंस्तं बुधः पुत्रमजीजनत् ।"
अन्यत् सर्वमाख्यानमेकमेव । * । अस्य वर्णः दूर्वाश्यामः । स च उत्तरदिङ्मुखमूढ-आत्मवर्णवेदरथोद्युक्तमिषितरथमिथुनराशिमरकतमणिमयमहैश्वाणामधिपतिः । अस्य मित्रं आदित्यः शुक्रश्च । अस्य ग्रन्थुः ग्रहौ । अस्य राशिभोगः अष्टादश दिनानि । इति ज्योतिःशास्त्रम् । * । स तु मगधदेशोद्भवः । अधिवंशजातः । ह्रस्वकरदीर्घः । पीतवर्णः । वैश्यजातिः । चतुर्भुजः । वामोर्द्धक्रमतश्चक्रमेवरखड्गमवाप्तारी । खड्गाक्षः । खिन्नवाहनः । सौम्यः । पीतवस्त्रः । अस्याधिदेवता नारायणः । प्रत्यधिदेवता विष्णुः । धनिष्ठानक्षत्रचतुष्टयादस्यां जातः । इति बुधग्रहतत्त्वम् । * । स च धामचारी । शुभग्रहः । नीलवर्णः । सुवर्णग्रहस्वामी । वर्तुलाकृतिः । स्थिरः । दक्षकाष्ठसंचारी । वातपित्तप्रधानकः । क्लीवग्रहः । प्रातःकाले प्रबलः । पश्चिमस्वामी । सकलरत्नप्रियश्च । इति ज्योतिषम् । अस्य वारे जातव्रतं यथा,—

"सुखी गुरुज्ञः कुशलः क्रियाही
विज्ञानधाली मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥"

इति कोष्ठीप्रदीपः ॥*॥

कर्मवंशीयराजविशेषः । यथा,—

"तस्मात् क्षतिरथस्यैव देवामीढ़स्ततो बुधः ।
बुधाच्च विबुधश्चैव तस्माच्चाष्टतिरजनः ॥"

इत्यग्निपुराणम् ॥

(वेगवती राज्ञः पुत्रः । यथा, भागवते । ९ । २ । ३० ।

"तत्सुतः केशलस्तस्मात् वत्सुमान् वेगवांस्ततः ।
बुधस्तस्माभवद् यस्य तृणबिन्दुर्महीपतिः ॥")

बुधचक्रं, क्ली (बुधस्य ग्रहविशेषस्य चक्रम् ।) बुधग्रहस्य स्वस्वाराद्दादग्रहिनोत्तरराशिनक्षत्रस्वारनक्षत्रावधिग्रहविभक्तिनक्षत्रघटितनक्षत्रभाग्रहणार्थवराकारचक्रम् । यथा,—

"भोगो सुखैकमथ ऋद्धिं चतुर्थं रोगः
षष्ठाब्धिमे सुखहतं सुखदं सुतेऽब्ध ।
दुःखं पराब्धिसुयशो रवि सप्तराज्यं
लाभोऽष्टमे द्विभगतेति वर्तं बुधस्य ॥"

इति समयाचक्रम् ॥

बुधतातः, पुं, (बुधस्य ग्रहविशेषस्य तातः पिता ।) चन्द्रः । इति शब्दचन्द्रिका ॥

बुधरत्नं, क्ली, (बुधप्रियं रत्नम् । प्राकपार्थिवादित्वात् समासः ।) मरकतमणिः । इति राजनिर्घण्टः ॥

बुधवारः, पुं, (बुधस्य वारः ।) बुधग्रहस्य वासरः ।

यथा,—

"वैः सुता आदौ भादि अष्टमी रोहिणी-
सुता ।
किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥"

इति तिथ्यादितत्त्वम् ॥

(अस्मिन् व्रतत्वं यथा, कोष्ठीप्रदीपे ।

"सुखी गुरुज्ञः कुशलः क्रियाही-
विज्ञानधाली मतिमान् विनीतः ।
मृदुस्वभावः कमनीयमूर्ति-
र्बुधस्य वारे प्रभवो मनुष्यः ॥")

बुधवाहः, पुं, यज्ञम् । यज्ञपुरुषः । इति संक्षिप्तसारोद्धारादिहतिः ॥

बुधसुतः, पुं, (बुधस्य सुतः पुत्रः ।) पुरूरवाः । इति पुराणम् । (यदुक्तं हरिवंशे । २९ । १ ।

"बुधस्य तु महाराज ! विद्वान् पुत्रः पुरूरवाः ।
तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥"

अयं हि इलागर्भसंभूतः ॥ बुधस्य बुद्धदेवस्य सुतः पुत्र इति विग्रहे । बुद्धपुत्रो राहुलः । स तु यशोधरायां गर्भसंभूतः ।)

बुधा, स्त्री, (बोधयति रोगिणं या । बुध् + "इगुपधेति ।" ३ । १ । १३५ । इति कप्रत्ययेन टाप् ।) अटामांसी । इति शब्दचन्द्रिका । (गुणादिकमस्या अटामांसीशब्दे ज्ञातव्यम् ॥)

बुधाङ्गः, पुं, (बोधयति बुध्यते वा । बुध बोधने + युधिबुधिदृग्भ्यः किच्च ।" उणा० २ । ९० । इति आसच् किच्च ।) गुरुः । विष्णुः । इति मेदिनी । गे, २९ ॥ ब्रह्मवादी । प्रियवादी । इत्युणादिकोषः ॥ कविः । इति जटाधरः ॥

बुधाष्टमी, स्त्री, (बुधवारयुता अष्टमी । प्राकपार्थिवादित्वात् समासः ।

"अष्टमीबुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥"

इति वचनादस्याख्यायाम् ।) व्रतविशेषः यथा । बुधाष्टमीव्रतं चैत्रमौषशुक्लियुग्यनादीतरकाले कर्तव्यम् । यदाह राजमार्तण्डः ।

"पतङ्गे मकरे याते देवे आयति माधवे ।
बुधाष्टमीं प्रकुर्वीत वर्जयित्वा तु चैत्रकम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मघौ तथा ।
बुधाष्टमीं न कुर्वीत हता स्यात् पुरातनम् ॥"

एतद्व्रतमारब्धमपि चैत्रादौ न कर्तव्यमिति । यथा स्मृतिः ।

"मौने धनुषि देवेशे सुप्ते ऽम्बुहरिणे तथा ।
बुधाष्टमीं न कुर्वीत पूर्वविद्धामपि क्वचित् ॥"

इति व्रतकालविवेकः ॥*॥

अपि च ।

"अष्टमी बुधवारेण पक्षयोरुभयोर्यदा ।
भविष्यति तदा तस्यां व्रतमेतत् कथा पुरा ॥
तस्यां नियमकर्तारो न स्युर्दुर्गतिभाजनाः ।
तच्छुलस्याष्टसंख्यानां वर्णयित्वाकृतीदयम् ॥
भक्तं सङ्कल्पिताभ्यां कामनाभ्यां समाचरेत् ।
आत्मपत्रपुटे कृत्वा यो मुक्तं कुशवेष्टितं ॥

कालशिखाशिखोपेतं कार्यं तस्य वर्णं भवेत् ।
पूर्वं पक्षोपचारेण पूजयित्वा जलाग्रये ॥
घृतसिक्तो दक्षिणां दद्यात् कर्पूरैः सह कुङ्कुमान्वितम् ।
पुं बुधायेति मौलार्कैः सार्कैः वा कमलादिके ॥
नाजघाणधरं ध्यानं दत्ते चाङ्गानि क्रमशः ।
बुधाष्टमीव्रतं पूजा होतव्या प्रतिसिद्धिदम् ॥*॥
पुरे पाटलिपुत्राख्ये वैरो नाम द्विजोत्तमः ।
तस्य भार्या च तस्याभूत् कौशिकः पुत्र
उत्तमः ॥
दुहिता विजया नाम धनपालो ह्यभोऽभवत् ।
गृहीत्वा कौशिकस्तत्र भीक्षे गच्छन्ततोऽगमत् ॥
गोपालकैर्दत्तघटैः क्षीरक्षपयतो बलात् ।
गच्छन्तः स च उत्थाय वर्त्म तस्याम दुःखितः ॥
जलार्थं विजया यान्तं आत्मा तां चाह च साध्व-
यात् ।
पिपासितो ह्यत्र जलार्थी आगतोऽस्य वरोवरम् ।
दिक्षजोऽत्र पूजादि कृत्वा चाप्यस्य विक्षितः ॥
स च गत्वा ययाचेऽम्भं सानुजोऽहं पुनुक्षितः ।
स्त्रियोऽब्रुवन् व्रतं कर्तुं दास्यामश्च कुरु व्रतम् ।
तत्पर्यन्तमनयागार्थं पूजयामासतुर्बुधम् ।
पुटकद्वयं गृहीत्वान्नं भुनुजाते प्रदत्तवम् ॥
स्त्रियौ गता गतौ तौ तु धनपालमपश्यताम् ।
चौरैर्हृतं गृहीत्वाथ प्रदोषे प्राप्तवान् गृहम् ॥
वीरश्च दुःखितं मत्वा रात्रौ सुप्ता यथासुखम् ।
लग्नश्च त्वरितं कृत्वा कस्य देया सुता मया ।
यमायैवमवोदद्दुःखात् स चायाद्व्रतसङ्-
गुलात् ॥
स्वर्गं गतौ च पितरौ व्रतं राज्याय कौशिकः ।
चक्रेऽयोध्यामहाराज्यं दत्त्वा च भगिनीं ययौ ॥
यमोऽपि विजयामाह दत्त्वा त्वं पुरान्तरम् ।
गोहाटयाख्यञ्च गते यमे सा च तथाकरोत् ॥
अपश्यज्जातरं स्वां सा यामिकां पाशधारिणम् ।
अथोचिवा कौशिकाय आचख्यावा विसृष्टि-
दम् ।
व्रतं चक्रे ततो दत्त्वा माता तत्राक्षरद्व्रतम् ।"
इति गारुडे बुधाष्टम्यादि १९१ अध्यायः ॥*॥

विस्तरस्तु ब्रह्मपुराणोक्तबुधाष्टमीव्रतपद्धतौ द्रष्टव्यः ॥

बुधित, त्रि, (बुध्यते स्म । क्तः । बुध् + क्त ।) बुद्धम् । ज्ञातम् । इत्यमरः । १ । २ । १०८ ॥

बुधिलः, त्रि, (बुध्यते यः । बुध् + क्विलच् ।) विद्वान् । इत्युणादिकोषः ॥

बुधः, पुं, (बध्नातीति । बन्धबन्धने "बन्धेर्धिच्च ।" उणा० १ । ५ । इति कः धिच्च ।) दूर्वाश्यामलम् । इत्यमरः । २ । ४ । १२ । (अग्रहेयः । अयभासः । यथा, अथर्ववेदे । २ । १६ । ३ ।

"यद्वस्य वृक्ष आबीनाद्धा इन्द्रो मघवानमि-
तिच्छतु ।")

शिवः । यथा,—

"शिवेश वृक्षं चरणं क्षितावना
गुरुं समारोढुमथोपचक्रमुः ।"

इति हरिवंशे राजर्षीश्वरः । इति भरतः ॥

बुध्, इद् अ ड विज्ञाने। (इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इद् अबुधत् अबुत्सीत्। अ बुन्धति बुध्यते। ड बुधित्वा बुद्धा। विज्ञानमनमालोचनं प्रविज्ञानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"यद्यसौ ग्रहबलेन हिंस्रेणेति बुबुध्व सः॥")

बुन्ध, इद् अ ड विज्ञाने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इद् अबुधत् अबुन्धीत्। अ बुन्धति बुन्धते। ड बुधित्वा बुद्धा। विज्ञानमनमालोचनं प्रविज्ञानमिति यावत्। इति दुर्गादासः॥

बुध, ड बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क बुन्धयति॥ इति दुर्गादासः॥

बुधाग्रः, पुं, (आचार्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ३।
"दधिक्रावाणं बुबुधानो
अग्निमुषसञ्च उर्विया गाम्॥")

बुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे+"धातोः कर्मणः समानकर्तृकादिच्छायां वा।" ३। १। ७। इति सन्। सनः "ञ्नित्यादिर्नित्यम्।" २। १। १०२। इत्यञ्जनङाप्।) क्षुधा। इत्यमरः। २। ९। ५४॥ (यथा, रामायणे। २। २८। १८।
"अतीवबालस्त्वमिदं बुभुक्षा चास्ति नित्यम्रः।
भयानि च महान्त्यत्र ततो दुःखतरं वनम्॥")

बुभुक्षितः, त्रि, (बुभुक्षा भोजनेच्छा सञ्जातास्य। बुभुक्षा+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। ९०। १०५।
"अजीगर्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः।
न ह्यालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥")

बुभ्र, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बोभ्रयति प्रजाः पशवः। नालजवर्गाद्यादिरयमिति केचित्। इति दुर्गादासः॥

बुलिः, स्त्री, (बुल+इन् किच्च।) भगम्। इति हेमचन्द्रः। ३। २७३।

बुसं, क्ली, (बुस्यते उत्सृज्यते यत्। बुस्थिर् उत्सर्गे+"इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् वलं विभाषया।) बुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"जम्बीमेवमुपतोषमाणाभिलाषकुल्माषमाषबुसदेवसुधारोधाः। इति महाभारतमध्ये पुरुषोत्तमः। इति भरतः॥

बुस, य इद् ज्ञानौ। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) य बुस्यति जलं मेघः त्यजतीत्यर्थः। इद् अबुसत् अबोसीत्। अस्मात् पृषोदरादित्वान्नित्यं ड इत्यन्ये। इति दुर्गादासः॥

बुसं, क्ली, (बुस्यते तुच्छत्वादुत्सृज्यते इति। बुस्थिर् इद्उत्सर्गे+"इगुपधज्ञाप्रीकिरः कः।"३।१।१३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कडङ्गरः २। इत्यमरः। २। ९। २२॥ बुसम् २। इति भरतः॥ बूसम् ३। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आपिः स्वः कृणुतेयद्धते बुसम्॥"
"बुसमुदकम्॥" इति सायणः॥)

बुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बुस्तयति खलं लोकः। बुस्तयति धीरं साधुः। इति दुर्गादासः॥

बुस्तं, क्ली, (बुस्यते अनादियते यत्। बुस्त क अनादरे+घञ्। यद्वा बुस्यते त्यज्यते स्म इति। बुस्थिर् उत्सर्गे कर्म्मणि क्तः।) मांसपिण्डकविशेषः। स्यालीभृष्टमांसम्। पनसादिफलस्यासारभागः। इत्यमरभरतौ॥ भोँता इति ख्यातः॥

बूकं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वाद्दीर्घः।) बुक्कम्। हृदयम्। इत्यमरटीकायां रमानाथः॥

बूकं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वाद्ढकारः।) बुक्कम्। इत्यमरटीकायां सारसुन्दरी॥

बृ गि वृत्तौ। भृत्याम्। इति कविकल्पद्रुमः॥ (प्यादि, क्र्यादि०-पर०-सक०-सेट्।) गि बृणोति बूर्णः बूर्णिः। इति दुर्गादासः॥

बेकटः, पुं, मनुष्यभेदः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

बोकड़ी, स्त्री, वस्त्राञ्चौ। इति राजनिर्घण्टः॥

बोद्धा, त्रि, (बुध्यते यः। बुध्+तृच्।) बोधकर्त्ता। यथा,—
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अज्ञानोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"
इति भर्तृहरिः॥

बोधः, पुं, (बोधनमिति। बुध्+भावे घञ्।) ज्ञानम्। इति त्रिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। १।
"वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने।
तमुल्लापादिना बोधमनयन्निर्ममात्मकम्॥"
अयं हि बुद्ध्युत्पत्तिः। तथाहि मार्कण्डेये।५०।२७।
"बोधं बुद्धिक्षया लज्जा विनयं वपुरालयम्।
अवसायं प्रजज्ञे वै सैमं ग्लानिरलक्षयत्॥"
ऋषिविशेषः। यथा मार्कण्डेये। ७६। २८॥
"तथाच सुतो हैमिन्या गृहीता च सुतच्च सा।
बोधस्य द्विजसत्तमस्य गृहे नीतवती पुनः॥"
सूर्य्यरूपभेदः। यथा, मार्कण्डेये।१०१। १६।
"बोधश्चावगतिश्चैव स्फूर्त्तिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः॥"
जागरणकालः। चैतन्यम्। यथा, मार्कण्डेये। ८१। ६७।
"प्रबोधश्च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥")

बोधकः, पुं, (बोधयतीति। बुध्+णिच्+ण्वुल्।) ज्ञापकः। इति शब्दमाला॥ पुस्तकान्तरे बाधकोऽपि पाठः। बोधजनके त्रि॥ (यथा, साहित्यदर्पणे। २। ४।
"वर्णाः पदं प्रयोगार्हान्वितैकार्थबोधकाः॥")

बोधकरः, पुं, (करोतीति करः। ज्ञ+ट। बोधस्य प्रबोधस्य करः।) विज्ञाप्ते बोधकारकः॥ तत्पर्य्यायः। वैतालिकः२। इत्यमरः।२।८।९७॥

बोधज्ञः, पुं, (बोधं अभिप्रायं जानातीति। । बोध+ज्ञा+क।) अभिप्रायवेत्ता। श्रीहलायः। यथा,—
"सर्व्वभावविदां श्रेष्ठो बोधज्ञः कामशास्त्रवित्।
कामिनीं बोधयामास वासयामास वक्षसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५३ अध्यायः॥

बोधनं, क्ली, (बुध्+णिच्+ल्युट्।) ज्ञापनम्। इति मेदिनी। ने, ६६॥ वेदनम्। विज्ञापनम्। इति बुधधात्वर्थदर्शनात्॥ (उद्दीपनम्। यथा माघे। ६। ६७।
"समयेन तेन चिरसुप्तमनो-
भवबोधनं समबोधयत॥"
"मनोभवस्य कामस्य बोधनं उद्दीपनं यस्मिन्।" इति तट्टीकायां मल्लिनाथः। ज्ञानम्। यथा, रघौ। ६। ७६।
"परिचयं चलनस्खलितापने
भयरुषोश्च तदिङ्गितबोधनम्॥"
"तेषां चलनस्खलायां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति।" इति तट्टीकायां मल्लिनाथः॥) दुर्गायाः बोधनं यथा। देवीपुराणे।
"इदे मास्यसिते पक्षे कन्यारात्रिगते रवौ।
नवम्यां बोधयेद्देवीं कौशिकीं सुखमङ्गलैः॥"
अत्र लक्षादित्वादिदे इत्यपि गौणान्वितपरम्। अतएव कालकौमुद्यादिधृतम्। यथा,—
"कर्कित्यर्के हरौ सुप्ते शुक्लषष्ठ्यामधिन्यगे।
तुलायां बोधयेद्देवीं दृष्टिके तु जगद्धनम्॥"
इति॥
बोधयेदिति शेषः। तत्रापि नवमीबोधनं कन्यायामेव तथैव सम्भवात् तेन सिंहार्के तुलार्केऽप्याश्विनत्वेन वाक्यरचना। एवं प्रतिवर्षं कर्णवत्यादार्द्रादिनक्षत्रज्ञानेऽपि बोधनादिकार्य्यम्। नक्षत्रयोगस्तु पञ्जातिशुद्ध्याद्य। तथा च लिङ्गपुराणम्।
"मूलाभावेऽपि सप्तम्यां केवलायां प्रबोधयेत्।
तथा तिथ्यन्तरेष्वेवन्तेषु च पक्षोदयः॥"
यथाह देवलः।
"तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्।
योगाभावे तिथिर्ग्राह्या देवाः पूजनकर्म्मणि॥"
मूलानवम्यामार्द्रायोगो विधौ मन्ले च श्रूयते। तथा च लिङ्गपुराणम्।
"कन्यायां मूलयुक्ते तु पूजयित्वार्द्रमे दिवा।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः॥"
चतुर्थपादे गोतमादिवचनैः मूलेनेति कालिकापुराणे पाठः।
"इदे मास्यसिते पक्षे नवम्यामार्द्रयोगतः।

बोधनं

श्रीहरिं बोधयामित्वां यावत् पूजां करोम्यहम्॥
यै रावणस्य वधार्थाय रामस्यानुग्रहाय च।
अकाले ब्रह्मणा बोधो देवानामधि कृतः पुरा॥"
इति मन्त्रलिङ्गम्॥

अकाल इति तु राजसिकेन हरिव्यायनस्य। तथाच श्रुतिः। तमसस्पदौ मौञ्जिराहतुः मधुश्च माधवश्च वासन्तिकावृतुः शुक्रश्च शुचिश्च ग्रैष्मावृतुः। अथैतदुत्तरायणं देवानां दिनं तपश्च तपस्यश्च वार्षिकावृतुः इषश्च ऊर्जश्च शारदावृतुः सहश्च सहस्यश्च हैमन्तिकावृतुः। अथैतद्दक्षिणायनं देवानां रात्रिरिति। एवञ्च। राज्ञापेव महामाया ब्रह्मणा बोधिता पुरा। तथैव च नराः कुर्युः प्रतिसंवत्सरं नृपेत्येतद्विषयम्॥ अतएव लिङ्गपुराणकालिकापुराणयोर्द्वितीयेषुक्तम्। एवञ्च कालिकापुराणे बोधने रात्राविति पदं देवतारात्रिपरम्। ततश्च पूर्व्वाह्णे नवम्यामार्द्रायुक्तायां बोधनं पूर्व्वाह्णेनरकाल एव आर्द्रालाभे द्विवेत्यत्र दिवापदात्तत्रापि बोधनं अन्यथा दिवापदं व्यर्थं स्यात्। ज्योतिषार्णवे चक्रतस्तं वराहेण।

"कन्यादिमीनपर्य्यन्तं यत्र संप्राप्यते शिवः।
तत्र बोधः प्रकर्त्तव्यो देवा राज्ञां शुभप्रदः॥"

शिव आर्द्रा। एवञ्चोभयदिने पूर्व्वाह्णे नवमीलाभे परत्रार्द्रालाभे परत्र बोधनं न तु युग्मात् पूर्व्वत्र। युग्मबाधकपूर्व्वाह्णस्य बाधकत्वचानुरोधात् दिवा नवम्यालाभे तु पूर्व्वाह्ण एव नवम्यां उभयत्र पूर्व्वाह्णलाभे पूर्व्वदिन एव युग्मात्। अत्र केवलनवम्यां बोधनविधेर्नक्षत्रस्यापि गुणत्वलाभात्।

"माघेऽथ फाल्गुने वापि भवेद्वै माघसप्तमी।
माकरीति च यत्प्रोक्तं तत्प्रायोवृत्तिदर्शनात्॥"
इति॥

सौरामसात् माकर्य्यादिवत् आर्द्रायोग इत्यस्य प्रायिकत्वेनाभिधानं प्रतीयते। ततश्चार्द्रारहितबोधने मन्त्रान्तरानुपदेशात् तन्मन्त्रः प्रणवयुक्तत्वेन प्रयुज्यते।

"यज्ञनक्षत्रिरिक्तञ्च यच्छिद्रं यदयज्ञियम्।
यदमेध्यमशुद्धञ्च यातयामञ्च यद्भवेत्।
तदोङ्कारप्रयुक्तेन सर्व्वमेवाविकलं भवेत्॥"
इति योगियाज्ञवल्क्यात् षष्ठ्यां बोधनेऽप्येवम्॥
नवमीबोधनासामर्थ्ये तु षष्ठ्यां सायं बोधनम्। तथा भविष्ये।

"षष्ठ्यां विल्वतरौ बोधं सायंसन्ध्यासु कारयेत्॥"

सन्ध्योक्ता वराहेण।

"अर्द्धास्तमयात् सन्ध्या यत्तोभूता न तारका यावत्॥"

षष्ठ्यां बोधने तु प्रागुक्तं यै रावणस्य वधार्थायेति अष्टमम्यान्विते षष्ठ्यां सायाह्ने बोधयाम्यहं इति पठेत्। यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठीलाभः तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम्। यदा तूभयदिने सायं षष्ठ्यलाभस्तदा परेऽहनि पूर्व्वाह्णे षष्ठ्यां बोधनम्।

"बोधयेद्विल्वशाखायां षष्ठ्यां देवीं यजेत च।
षष्ठ्यां बोधने तु नक्षत्रानुपदेशान्न तदादरः॥"
इति तिथ्यादितत्त्वम्॥

बोधनी

बोधनी, स्त्री, (बुध्+भावे ल्युट्। ङीप्। बोधः। (बोधयतेऽनया। बुध्+णिच्+करणे ल्युट्। अन्यथा हि सुप्तिर्यो बोधयते असोऽस्य तथात्वम्।) पिप्पली। इति मेदिनी। (बुध्यतेऽस्याम्। बुध्+अधिकरणे ल्युट्। स्त्रियां ङीप्। अस्यां हि योगनिद्राया हरेः प्रबोधनात्तथात्वम्।) कार्त्तिकशुक्लैकादशी। सा तु उत्थानैकादशी। यथा,—

"प्रयत्नो बोधनीमध्ये या कृतैकादशी भवेत्।
सैवोत्थाप्या प्रयत्नेन नान्या कृता कदाचन॥"
इति तिथ्यादितत्त्वम्॥

अपि च।

"तावन्नश्यन्ति तीर्थानि याज्ञिमेधादयो मखाः।
मथुरायां प्रिया विष्णोर्यावन्नायाति बोधनी॥"
इति हरिभक्तिविलासे पद्मपुराणवचनम्॥

बोधनीय, त्रि, (बुध्+कर्म्मणि अनीयर्।) बोध्यः। बोधितव्यः। बोधयोग्यः॥

बोधवासरः, पुं, (बोधस्य भगवतो मायानिद्रायाः प्रबोधस्य वासरः।) भगवतः प्रबोधदिनम्। उत्थानैकादशी। यथा,—

"कल्पप्रभृति यत् पुण्यं नरैरोपार्जितं भुवि।
वृथा भवति तत् सर्व्वं न ज्ञात्वा बोधवासरम्॥"
इति हरिभक्तिविलासधृतस्कन्दपुराणवचनम्॥

बोधान, पुं, (बुध्यते इति। बुध्+आधारे घञ्।) पीठम्। विज्ञः। बुधभेदः। इति शब्दरत्नावली॥

बोधिः, पुं, (बुध+"सर्व्वधातुभ्य इन्।" उ। १।१३०। इति इन्।) समाधिभेदः। पिप्पलवृक्षः। इति मेदिनी। धे, १९॥ (यथास्य पर्य्यायः।

"पिप्पलो बोधिरश्वत्थश्चलदलो गजाशनः॥"
इति वैद्यकरत्नमालायाम्॥)

बोधः। इति चिकाण्डशेषः॥ ज्ञानरि, त्रि। इत्यु-णादिकोषः॥

बोधित, त्रि, (बुध्+णिच्+क्त।) ज्ञापितम्। यथा,—

"राज्ञापेव महामाया ब्रह्मणा बोधिता पुरा॥"
इति तिथ्यादितत्त्वम्॥

बोधितरः, पुं, (बोधिरेव तरुः।) अश्वत्थवृक्षः। इति हेमचन्द्रः। ४। १९७॥ (युगादयोऽस्याश्वत्थशब्दे दृश्याः॥)

बोधितव्य, त्रि, (बुध+णिच्+तव्य।) ज्ञापितव्यम्। यथा। बोधितव्योऽयं पूर्व्वपक्षः। इति शाङ्करभाष्यम्॥

बोधिद्रुमः, पुं, (बोधिरेव द्रुमः।) अश्वत्थवृक्षः। इत्यमरः। २। ४। २०॥

बोधिवृक्षः, पुं, (बोधिरेव वृक्षः।) अश्वत्थवृक्षः। इति राजनिर्घण्टः॥

बौद्ध

बोधिसत्त्वः, स्त्री, (बोधि बोधयत् सत्त्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १७६॥ (यथा, कथासरित्सागरे। २२। ३५।

"इत्याकुर्व्वोधिसत्त्वांशः सोऽन्यो बोधितवाङ्मतात्। शुकनासादधिवात् कर्त्तुमपि कथामुखं क्षमौ॥")

बौद्ध, त्रि, (बुद्धेन प्रणीतम्। बुद्ध+अण्।) बुद्धप्रणीतनिरीश्वरशास्त्रम्। तत् सर्व्वैः ब्राह्मणकारैः खण्डितं अनादृतम्। इति श्रीभागवतम्। बौद्धशास्त्रसंस्थापनकर्त्ता बुद्धसूतिः। यथा,—

"प्राह वाचस्पतिं देवः पौरोडाशे रवेः सुतैः।
न यज्ञभागो राज्यं मे निर्जितस्य हनिष्यति!।
राज्यलाभाय मे यत्नं विधत्तध्वं विधत्सकाधिप!॥"
ततो हनिष्यतिः शाक्यमकरोद्दनुदर्शितम्।
गृहस्थाग्निविधानेन पौरोडाशेन च कर्म्मणा॥
गत्वाथ मोहयामास राजपुत्रान् हनिष्यतिः।
जिनधर्म्मं समास्थाय वेदवाह्यं स वेदवत्॥
वेदत्रयीपरिभ्रष्टांश्चकार धिषणाधिपः।
वेदवाह्यान् परिज्ञाय हेतुवादसमन्वितान्।
जघान शक्रो वज्रेण सर्व्वधर्म्मबहिष्कृतान्॥"
इति मात्स्ये २४ अध्यायः॥

(बौद्धदर्शनं यथा, सर्व्वदर्शनसंग्रहे। "अथ बौद्धैरभिधीयते यदभ्यधायि अविनाभावी दुर्बोध इति तदवाधीयः तादात्म्यतदुत्पत्तिभ्यामविनाभावस्य सुज्ञानत्वात्। तदुक्तम्,

"कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्।
अविनाभावनियमो दर्शनादर्शनान्न॥"
इति॥

अन्वयव्यतिरेकाविनाभावनिश्चायकाविनिपक्षे साध्यसाधनयोरभिचारो दुरवधारो भवेत् भूते भविष्यति वर्त्तमाने अनुपलभ्यमानेऽपि अभिचारशङ्काया अनिवारत्वात्। ननु तथाविधस्थले सावकेऽपि मते अभिचारशङ्का दुरपहरेति चेत् सैवं योग्यः विनापि कारणं कार्य्यमुत्पद्यमानमिमेवंविधायाः शङ्काया बाधातावधिकतया निवृत्तत्वात्। तदेव ज्ञायमानेन यज्ञिमाग्रज्ञायमाने बाधाभावो यावतरेयुः तदुक्तं बाधाभावधियाग्रहेति। तस्माच्चादुत्पत्तिनिश्चयेव अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेतोः प्रत्यक्षोपलम्भानुपलम्भसव्यपेक्षनिबन्धनः। कार्य्यस्योपलब्धेः प्राग्नुपलब्धः कारणोपलब्धे सत्युपलब्धः उपलब्धस्य पश्चात् कारणानुपलम्भादनुपलब्धः इति पञ्चकारणयां धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते तथा तादात्म्यनिश्चयेनाविनाभावो निश्चीयते यदि शिंशपा वृक्षत्वमतिपतेत् ज्ञानमेव जनयादिति विपक्षे बाधकप्रवृत्तेः अप्रवृत्ते तु बाधके भूयः सहभावोपलम्भेऽपि अभिचारशङ्कायाः को निवारयिता। शिंशपात्वस्यौव तादात्म्यनिश्चयो वृक्षोऽयं शिंशपेति सामानाधिकरण्यबलादुपपद्यते। न ज्ञायमानभेदे तत् सम्भवति पर्य्यायशब्देन युगपदपि प्रयोगाभावात् ज्ञाप्यज्ञानभेदे सर्व्वत्रैवोपलम्भात्। तस्मात्

कार्यालाभो कारणमात्रानन्तमनुभावयत इति सिद्धम् ।

यदि क्वचित् प्रामाण्यमनुमानस्य नाङ्गीक्रियते तं प्रति ब्रूमात् अनुमानं प्रमाणं न भवतीत्येतावन्मात्रमुच्यते तच्च न किंचन साधनमुपन्यस्यते उपन्यस्यते वा । न प्रथमः एकाकिनो प्रतिज्ञा हि प्रतिज्ञातं न साधयेदिति न्यायात् । नापि चरमः अनुमानं प्रमाणं न भवतीति ब्रुवाणेन त्वया अग्निरनुष्णत्ववचनस्योपन्यासे मम माता वन्ध्येतिवद्व्याघातापातात् । किंच प्रमाणतदाभासव्यवस्थापनं तत्समानजातीयत्वादिति वदता भवतैव स्वीकृतं स्वभावानुमानम् । परतश्च विप्रतिपत्तिस्तु वचनलिङ्गेनेति ब्रुवता कार्यलिङ्गकमनुमानम् अनुपलब्धेश्च क्वचिदर्थे प्रतिषेधयतानुपलब्धिलिङ्गकमनुमानम् । तथाचोक्तं तथागतैः ।

"प्रमाणान्तरसामान्यस्थितिरन्यधियां गतेः ।
प्रमाणान्तरसद्भावः प्रतिषेधाच्च कस्यचित् ॥"

इति ॥

परार्थानुमानाच्च सूरिभिरिति यत्तथ्यभूयस्त्वभयादुपरम्यते ।

ते च बौद्धाश्चतुर्विधया भावनया परमपुरुषार्थं वर्णयन्ति । ते च माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाभिः प्रसिद्धा बौद्धा यथाक्रमं सर्वशून्यत्व-बाह्यशून्यत्व-बाह्यार्थानुमेयत्व-बाह्यार्थप्रत्यक्षत्वदर्शनानुसरिष्यन्ते । यद्यपि भगवान् बुद्ध एक एव बोधयिता तथापि बोद्धव्यानां बुद्धिभेदाच्चातुर्विध्यं यथा गतोऽस्तमर्कः रज्जुके चारचौरानृजुनादयः स्वेष्टानुसारेणाभिसरन्तपरस्परहरणसदाचरणादिसमर्थं बुध्यन्ते । सर्वं क्षणिकं क्षणिकं दुःखं दुःखं स्वलक्षणं स्वलक्षणं शून्यं शून्यमिति भावनाचतुष्टयमुपदिष्टं द्रष्टव्यम् । तत्र क्षणिकत्वं तावदादिमानां सत्त्वेनानुमानं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति । न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य तावदादिमतां प्रत्यक्षसिद्धत्वात् व्यापकाद्दृष्टात् व्याप्याद्दृष्टिन्यायेन व्यापकक्रमाक्रमव्याद्दृत्तावक्षणिकात् सत्त्वव्याद्दृत्तेः सिद्धत्वाच्च । तत्रार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति परस्परविरोधे हि न प्रकारान्तरस्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधत इति न्यायेन व्याघातस्योद्घटनात् । तौ च क्रमाक्रमौ ह्यादिमः सकाशाद्दृष्टाद्वर्तमानौ अर्थक्रियामपि व्यावर्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम् ।

ननु क्षणिकस्यार्थक्रियाकारित्वं किं न स्यादिति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि यत्स्वभावार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्यादिमः सामर्थ्यमस्ति नो वा । आद्ये तयोरविराकरणप्रसङ्गः समर्थस्य चेपात्मनि यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्ये समर्थस्तथार्थं भाव इति प्रसङ्गानुमानाच्च । द्वितीयेऽपि कदापि न कुर्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा हि शिलाशकलमङ्कुरे न चैव वर्तमानार्थक्रियाकरणकाले दृष्टवर्तिन्यमाणे अर्थक्रिये करोतीति सहिपर्ययाच्च । ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण क्रमणमुपपद्यते इति चेत् तर्ह्येतं भवान् पृष्टो व्याचष्टां सहकारिणः किं भावस्योपकुर्वन्ति न वा न चेत् नापेक्षणीयास्ते अकिंचित्करत्वं तेषां तादात्म्यायोगात् । उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते न वा भेदपक्षे आगन्तुकस्यैव तस्य कारकत्वं स्यात् न भावस्यात्मिकस्य आगन्तुकानिष्पायात्मत्वव्यतिरेकानुविधायित्वात् । कार्यस्य । तदुक्तम् ।

"वर्षातपाभ्यां किं योन्यङ्कुरभेदयोस्तयोः
फलम् ।
तस्योपमर्दने सोऽपि स्वतुल्यभेदसत्फलः ॥"

इति ।

अथ भावस्तैः सहकारिभिः सहैव कार्यं करोतीति स्वभाव इति चेत् अत्र तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा स्वं कार्यं कुर्यात् स्वभावस्थानपायात् । किंच सहकारिजन्योऽतिशयः किमनिशयान्तरमारभते न वा उभयथापि प्रागुक्तदूषणप्रायाणवर्षणप्रसङ्गः । अतिशयान्तरारम्भपक्षे बहुसुखानवस्थादौस्थ्यमपि स्यात् अतिशये जनयितव्ये सहकार्यन्तरापेक्षायां तत्परम्परापात इत्येकानवस्थाऽवश्यंभावी तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थैरर्थैराधीयमाने बीजस्यातिशये बीजसदृशादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत् बीजव्यतिरिक्तमादधानं सहकारिसापेक्षमेवार्थं अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत । तस्मादतिशयार्थमपेक्षमाणैः सहकारिभिरतिशयान्तरमाधेयं बीजे तस्मिन्नप्युपकारे पूर्ववन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वं सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता । अथोपकारः कार्यार्थमपेक्षमाणोऽपि बीजादिनिरपेक्षं कार्यं जनयति सहापेक्षो वा । प्रथमे बीजादेरहेतुत्वमापतेत् । द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेयः एवं च तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयाऽवस्था स्थिरा भवेत् । एवमपेक्षमाणोपकारेण बीजादौ धर्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाभ्यामतिशयपरम्परापात इति तृतीयाऽवस्था दुरवस्था स्यात् । अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽतिशयात्मा सिद्धः अन्यथातिशयात्मा कुर्विद्रूपादिपदवेदनीया आयत इति शक्तिं समापि मनोरथपथेन ।

तस्मादात्मिकयार्थक्रिया दुर्घटा नाप्यक्रमेण घटते विरुद्धधर्माध्यासात् । तथाहि युगपत्सकलकार्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्तते न वा । प्रथमे तत्कालवत् कालान्तरेऽपि तावत् कार्यकारणमापतेत् । द्वितीये स्थायित्वक्षतिप्राप्ता क्षणिकभक्तिस्तवीयादावङ्कुरादिजननप्रार्थनामनुधरेत् । यद् विरुद्धधर्माध्यासं तन्नाना यथा शीतोष्णे । विरुद्धधर्माध्यासश्चायमिति बलवद्भिः प्रतिबन्धसिद्धिः । न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गसहिपर्ययसिद्धत्वात्तत्सामर्थ्यसाधकौ प्रसङ्गसहिपर्ययौ प्रायुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यत्कथंचनासमर्थं तत्तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद्यदा यत् करोति तत्तदा तच्च समर्थं यथा सामग्री स्वकार्यं करोति चायमतीतानागतकाले तत्कालवर्तिन्यावर्थक्रिये भाव इति प्रसङ्गप्रत्ययः विपर्ययः । तस्मादिमपक्षे क्रमयौगपद्यव्याहत्या व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गसहिपर्ययबलात् गृहीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम् । तदुक्तं ज्ञानश्रिया ।

"यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च
भावा अमी
सत्ताग्रहस्तिरिहार्थकर्मणि मितेः सिद्धेषु सिद्धा
न वा ।
नाप्येकेव विरुध्यते परकृतेनापि क्रियादर्शनेत्।
द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्रा-
म्यति ॥" इति ॥

न च क्षणभङ्गाभ्युपगमादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात् । न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः प्रयोजकगौरवापत्तेः अनुगतत्वानुगतबुद्धिशब्दपराहतेश्च सर्वथमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु कृष्णकङ्कतकणीषु गृञ्जवच्चाप्रतिभासनाच्च । किंच सामान्यं सर्वगतं स्वाश्रयसर्वगतं वा प्रथमे सर्ववस्तुसङ्करप्रसङ्गः अप्रसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन स्वविषयसर्वगतमिति । किंच विद्यमाने घटे वर्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तत्रादागच्छत् सम्बध्यते अनागच्छद्वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः । किंच विनष्टे घटे सामान्यमवतिष्ठते विनश्यति स्थानान्तरं गच्छति वा प्रथमे निराधारत्वापत्तिः द्वितीये नित्यत्ववाचो युक्तयुक्तिः

क्षणीये मनस्यप्रवृत्तिः इत्यादि दूषणमयुक्तत्वात् सामान्यमप्रामाणिकम्। तदुक्तम्।
"अन्यत्र वर्तमानस्य ततोऽन्यस्यानवस्थिति।
तस्मादचलतः स्थाणोर्दृष्टिरित्यतियुक्तता॥
यच्चासौ वर्णते भावस्तेन सम्बध्यते न तु।
तद्देशिनश्च आप्नोति किमप्येतन्महाद्भुतम्॥
न याति न च तत्रासीदस्ति पश्चान्न चांशवत्।
जहाति पूर्वं नाधारमहो अवसनस्थितिः॥"
इति॥

अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अङ्ग अन्यापोहालम्बन एवेति सम्प्रोच्यमानमनुमन्यते इति अलमतिप्रसङ्गेन।

सर्वस्य संसारस्य दुःखात्मकत्वं सर्वतीर्थकरसम्मतम् अन्यथा तन्निमित्तत्यागे तेषां तन्निवृत्त्युपाये प्रवृत्त्यनुपपत्तेः। तस्मात् सर्वं दुःखं दुःखमिति भावनीयम्। ननु किंविदिति दृष्टे दृष्टान्तः कथनीय इति चेन्नैवं स्वलक्षणानां तथात्वे सविकल्पकतया स्वलक्षणाभावात् नैतेन सदृशमपरमिति वस्तुमयत्वात्। ततः स्वलक्षणं स्वलक्षणमिति भावनीयम् एवं शून्यं शून्यमित्यपि भावनीयं स्वप्ने जागरणे च न मया दृष्टमिदं रजतादीनि विशिष्टनिषेधस्योपलम्भात्। यदि दृष्टं सत् तदा तद्विशिष्टस्य दर्शनस्मरणस्तम्भाया अधिष्ठानस्य च सन्निधानस्य रजतस्रोतोजलाम्बरस्य च समवायादेः सर्वं स्यात् न चैतदिष्टं कस्यचिद्वादिनः। न चार्द्धजरतीयमुचितं न हि कुक्कुट्या एको भागः पाकाय अपरो भागः प्रसवाय कल्पतामिति कल्प्यते। तस्मादध्यक्षाधिष्ठानतत्सम्बन्धदर्शनस्मर्तृणां मध्ये एकस्यानेकस्य वा असत्त्वे निषेधविषयत्वेन सर्वस्यासत्त्वं बलादापतेदिति भगवतोपदिष्टे माध्यमिकावतारोत्तमप्रज्ञा इत्यमालोचयत् भिक्षुपादप्रसारन्यायेन सप्तभङ्ग्याद्यभिधानसुखेन स्याद्यित्वानुकूलवेदनीयत्वानुगतसर्वसत्त्वसम्मतत्वावर्जनेन सर्वशून्यतायामेव पर्यवसानम्। अनुत्पन्नं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तथाहि यदि घटादेः सत्त्वं स्वभावतस्तर्हि कारकव्यापारवैयर्थ्यम्। असत्त्वं स्वभाव इति पक्षे प्राचीन एव दोषः प्राङ्नास्यात्। यथोक्तम्।
"न सतः कारकापेक्षा दीपादेरिव युज्यते।
कार्यस्यावश्यभावो हेतुः स्यपुष्पादेरिवासत॥"
इति॥
विरोधादितरौ पक्षावनुपपन्नौ तदुक्तं भगवता अवतारावतारे
"बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते।
अतो निरभिलाप्यास्ते निःस्वभावाश्च दर्शिताः॥"
इति॥
"इदं वस्तुबलायातं यदहन्ति विपश्चितः।
यथा यथार्थाचिन्त्यन्ते विशीर्यन्ते तथा तथा॥"
इति च॥
न क्वचिदपि पक्षे व्यवतिष्ठत इत्यर्थः। इदानीं अवधारयन् न सम्प्रयवधारयत् संदिग्धा वक्ष्यन्ति। अत एवोक्तम्
"परिव्राट्कापालिकशुनामेकस्यां प्रमदातनौ।
कुणपः कामिनी मद्य इति तिस्रो विकल्पना॥"
इति॥
तदेवं भावनाचतुष्टयसमुत्पन्निखिलवासनानिवृत्तौ परनिर्वाणं शून्यरूपं सेत्स्यतीति यत्नं कृतार्थाः नास्माकमुपदेष्यं किंचिदस्तीति। यिन्वेत्यादि योगस्याचारश्चेति इयं करणीयम्। तत्राप्राप्तस्यार्थस्य प्राप्तये पर्यनुयोगो योगः गुरुक्तस्यार्थस्याङ्गीकरणमाचारः गुरुक्तस्याङ्गीकरणादुत्तमाः पर्यनुयोगस्याकरणादधमाश्च अतस्तेषां माध्यमिका इति प्रसिद्धिः। गुरुक्तभावनाचतुष्टयं बाह्यार्थस्य शून्यत्वं चाङ्गीकृत्याभ्यन्तरस्य शून्यत्वमङ्गीकृतं कथमिति पर्यनुयोगस्य करणात् केषाञ्चिद् योगाचारप्रथा। यथा हि तेषां परिभाषा स्वयं वेदनं तावदङ्गीकार्यम् अन्यथा जगदान्ध्यं प्रसज्येत। तत् कीर्तितं धर्मकीर्तिना।
"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति॥"
बाह्यं बाह्यं नोपपद्यत एव विकल्प्यानुपपत्तेः। अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात्। अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः सज्जनकत्वादिति तदपि बालभाषितं वर्तमानावभासविरोधात् इन्द्रियादेरपि बाह्यत्वप्रसङ्गाच्च। किञ्च बाह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा। न चरमः क्रमयौगपद्याविकल्पादिना तन्निराकरणात्। न प्रथमः असौक्ष्म्यत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च। यथोक्तम्
"षट्केन युगपद्योगात् परमाणोः षडंशता।
तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः॥"
इति॥
तस्मात् स्वव्यतिरिक्तबाह्यविरहात्तदालिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम्। तदुक्तम्
"नाद्योऽनुभाव्यो बुद्ध्याख्ये तस्या नानुभवोऽपरः।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते॥"
इति॥
ग्राह्यग्राहकयोरभेदज्ञानुमानतः यद्वेद्यते येन वेदनेन तत्तनो न भिद्यते यथा ज्ञानेनात्मा वेद्यते सैव नीलादयः। भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् सदुत्पत्तेरनियामकत्वात् यच्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः अक्षाद्यनादिरविच्छिन्नप्रवाहाभेदवासनैव निमित्तम्। यथोक्तम्।
"सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्द्वादिवादवत्॥" इति॥

"अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्यग्राहकसंक्षिप्तभेदवानिव लक्ष्यते॥"
इति च॥
न च रजतीयविषयादि सम्बन्धमाद्यानामोदयोपार्जितमोदकानां स्यादिति वैदूषितं वस्तुतो वेद्यवेदकाकारविधुरा अपि बुद्धयश्चक्षुरादिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकारकल्पनया तिमिरादुपप्लुतानां केशोण्डुकादीनामभेदवदनादुपप्लवज्ञानानामर्थाकारक्षोपपत्तेः पर्यनुयोगायोगात्। यथोक्तम्
"अवेद्यवेदकाकारा यथा ज्ञानैर्निरीक्ष्यते।
विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा॥
तथा ज्ञानावलम्ब्येयं केशादिज्ञानभेदवत्।
यदा तदा न सम्बोद्धा ग्राह्यग्राहकलक्षणा॥"
इति॥
तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति सिद्धम्। ततश्च प्रागुक्तभावनाप्रचयबलान्निखिलवासनोच्छेदविगलितविविधविषयाकारोपप्लवविशुद्धविज्ञानोदयो मोक्षोदय इति। अन्ये तु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात्। न च सम्बोपलभ्यनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात्। ननु भेदे सम्बोपलभ्यनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यात्मसंवेदनया च भेदेन प्रतिभासमानतया एकदेशैकैककालत्वलक्षणसहक्षणिकसमभावाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नेदमिति प्रतिपत्तिः प्रत्ययाद्यविशेषात्। अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्देशेन प्रतिभासत इति न च सम्बाद्यसुलेख इति। यथोक्तम्।
"परिच्छेदान्तरालोऽयं भागो बहिरिव स्थितः।
ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः॥"
इति॥
"यदन्तर्नीयतत्वं तद्बहिर्वदवभासते॥"
इति च॥
तदयुक्तं बाह्यार्थाभावे तदन्यविरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः हि वस्तुनिष्ठो वन्ध्यापुत्रवदवभासत इति चेत्यावानाचक्षीत भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं तत्प्रामाण्ये भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गात् अविसंवादाद्भेदादेरेव संविदाना बाह्यमेवोपादत्ते जगदुपेक्षन्तेऽबाह्यमिति अवस्थादर्शनाच्च। एवञ्चायमभेदसाधको हेतुर्नीलमयप्रायसौधन्यायवदाभासतां भजेत अतोबहिर्वदिति वदता बाह्यं बाह्यमेवेति भावनीयमिति भवदीय एव बाह्यो भवन्तं ग्रहरेत्।
ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निहितस्य विषयस्योत्पादे ज्ञाने साकारत्वसम्पत्तेतया

समर्थयितेव चाकारेण तत्त्वार्थस्याहमेवतोपपत्तेः; अतश्च पर्यनुयोज्यपरिहारो ऽप्यनया दिशातात्। "भिन्नजातं खलु बाह्यमिति चेत् बाह्यता विदुः। हेतुलक्षणमेव न लक्षणाकारापेक्षत्वमम्॥"

इति॥

तथाच यथा पुष्टा भोजनमनुमोदते यथा च भावना क्षेत्रः; यथा वा लक्षणमेव क्षेत्रः; तथा ज्ञानाकारोऽपि क्षेयमनुमेवम्। तदुक्तम्

"अर्थेन घटयत्येनां न हि मुक्तां कचित्क्वचित्।
तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपता॥"

इति॥

न हि चित्तचैत्तेव तद्देहना युक्ता तस्याः सर्वज्ञाविशेषात् सामु वाक्यमाधिपत्यं सरूपयितुं यदयेदिति च। तथाच वाक्यार्थसद्भावे प्रयोगः ये केचिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तापेक्षाः; यथा अविचक्षणत्वजिज्ञासिते मयि वचनगमनप्रतिभाया विचक्षणजिज्ञासितृत्वज्ञानरहितानापेक्षाः; तथाच विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखेन इति। तत्रालयविज्ञानं नामाहमाख्यं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम्। यथोक्तम्

"तत्र खादालयविज्ञानं यदहमेवेदमाख्यदम्।
तत् खात्मप्रवृत्तिविज्ञानं यन्नीलादिवस्तुल्लिखेत्॥"

इति॥

तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्वाच्योऽर्थो बाह्य एव न वासनापरिपाकप्रत्ययः; कादाचित्कत्वात् कदाचिदुत्पाद इति वैदिकम्। विज्ञानवादिनये हि वासनानामेकसन्तानवर्तिनामालयविज्ञानानां तत्तत्प्रवृत्तिजननशक्तिः; तस्माच्च स्वकार्योत्पादं प्रत्याभिमुख्यं परिपाकः; तस्य च प्रत्ययः; कारणं खसन्तानवर्तिपूर्वक्षणः; कल्पीयते सन्तानान्तरनिबन्धनत्वानङ्गीकारात्। ततश्च प्रवृत्तिज्ञानजननालयविज्ञानवर्तिनोऽसनापरिपाकं प्रति सर्वेऽप्यालयविज्ञानवर्तिनः क्षणाः समर्था एवेति वक्तव्यं न चैकोऽपि न समर्थः; स्यादालयविज्ञानसन्तानवर्तित्वाविशेषात्। सर्वे समर्था इति पक्षे कार्योत्पादानुपपत्तिः; ततश्च कादाचित्कत्वनिर्वाहाय शब्दस्पर्शरूपरसगन्धविषया; सुखादिविषया; यद्यपि प्रत्ययाच्चतुरः प्रत्ययान् प्रतीत्योत्पद्यन्ते इति चतुरङ्गानिच्छताप्यक्षमतिना स्वानुभवमनाक्षाद्य परिच्छेत्तव्यम्। ते चत्वारः; प्रत्ययाः; पञ्चिद्वाः; आलम्बनसमनन्तरसहकार्याधिपतिरूपाः; तत्र ज्ञानपदवेदनीयस्य नीलाद्यवभासस्य चित्तस्य नीलाद्यजनप्रत्ययात् नीलाकारता भवति समनन्तरप्रत्ययात् प्राचीनज्ञानाद्बोधरूपता सहकारिप्रत्ययादालोकाद्यनुरोधिपतिप्रत्ययाद्विषयप्रकाशप्रतिनियमः; चित्तस्य ज्ञानस्य दृश्यादिव्यावहारस्य प्राणेर्निर्भासनं चक्षुरधिपतिर्भवितुमर्हति लोके नियामकत्वाधिप-

तित्वोपलम्भात्। एवं चित्तचैत्तालम्बानां सुखादीनां चत्वारि कारणानि ग्रहणानि एवं चित्तचैत्तालम्बनः पञ्चविधः रूपविज्ञानवेदनासंज्ञासंस्कारसंग्रहः। तत्र रूप्यत इति रूपम् इति च व्युत्पत्त्या सविषयाक्षोन्द्रियाणि रूपस्कन्धः। आलयविज्ञानप्रवृत्तिविज्ञानप्रवाहो विज्ञानस्कन्धः। प्राक्तनस्वसन्तानसमुत्पन्नजन्यः सुखदुःखादिप्रत्ययप्रवाहो वेदनास्कन्धः। गौरित्यादिशब्दोल्लेखिसविज्ञानप्रवाहः संज्ञास्कन्धः। वेदनास्कन्धविषयेषु रागद्वेषादयः क्लेशा उपक्लेशाश्च मदमात्सर्यादयो धर्माधर्मौ च संस्कारस्कन्धः।

तदिदं सर्वं दुःखं दुःखायतनं दुःखास्पदमिति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादयेत्। अत एवोक्तं दुःखसमुदायविरोधमार्गाख्यानि आर्यस्य बुद्धाभिमतानि तत्त्वानि। तत्र दुःखं प्रतिक्षणं समुदायो दुःखकारणं तद्विविधं प्रत्ययोपनिबन्धनो हेतूपनिबन्धनश्च। तत्र प्रत्ययोपनिबन्धनस्य संग्राहकं श्लोकमुदाहरन्ति। यदेतत् कार्यं ये अन्ये हेतवः प्रत्ययन्ति गच्छन्ति तेषामयमानानां हेतूनां भावः प्रत्ययत्वं कारकसमवायः; तत्त्वाभावस्य पुनर्न चेतनस्य कस्यचिदिति श्लोकार्थः; यथा बीजहेतुरङ्कुरो धातूनां पृथ्वीनां समवायाज्जायते। तत्र पृथिवी धातुरङ्कुरस्य काठिन्यं गन्धञ्च जनयति अप्धातुः स्नेहं रसञ्च जनयति तेजोधातुः रूपमौष्ण्यञ्च वायुधातुः स्पर्शनं चलनञ्च आकाशधातुरवकाशं शब्दञ्च ऋतुधातुर्यथायोगं पृथिव्यादिकम्। हेतूपनिबन्धनस्य च संग्राहकं श्लोकम् तत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितेर्वैषां धर्म्माणां धर्मता धर्म्मस्थितिता धर्म्मनियामकता च प्रतीत्य समुत्पादानुलोमतेति। तथागतानां बुद्धानां मते धर्म्माणां कार्यकारणरूपाणां या धर्म्मता कार्यकारणभावरूपा एषोत्पादादनुत्पादाद्वा स्थिता यस्मिन् सति यदुत्पद्यते तस्य कारणस्य कार्यमिति धर्म्मतेत्यस्य विवरणं धर्म्मस्य कार्यस्य कारणानतिक्रमेण स्थितिः; स्वार्थिकस्तल्प्रत्ययः; धर्म्मस्य कारणस्य कार्ये प्रति नियामकता। नन्वयं कार्यकारणभावस्तेनानन्तरेण न सम्भवतीति अत उक्तं कारणे सति तत्प्रतीत्य प्राप्य समुत्पादे अनुलोमता अनुसारिता या सैव धर्म्मता उत्पादादनुत्पादाद्वा धर्म्माणां स्थिता न चात्र कश्चिच्चेतनोऽधिष्ठातोपलभ्यत इति श्लोकार्थः। यथा प्रतीत्य समुत्पादस्य हेतूपनिबन्धः बीजादङ्कुरोऽङ्कुरात् काण्डं काण्डान्नालो नालान्नभेत्ततः शूकं ततः पुष्पं ततः फलं न चात्र बाह्ये समुदाये कारकं बीजादि कार्यमङ्कुरादि वा चेतीयते अहमङ्कुरं निर्वर्तयामि अहं बीजेन निर्वर्तित इति। एवमाध्यात्मिकेष्वपि कारणद्वयमवसन्तव्यम्। पुरःस्थिते प्रमेयार्थौ यत्यविचारभीरुभिरुपरम्यते। तदुभवनिरोधः तदनन्तरं विमलज्ञानोदयो वा मुक्तिः तन्निरोधो

मार्गो मार्गः। स च सत्यज्ञानं तच्च प्राचीनभावनाबलाद्भवतीति प्रकृतं दृष्टकं कृत्यज्ञानं दृष्टवतां कथितं भवतश्च कृत्यज्ञानं दृष्टवतः; सौत्रान्तिका भवन्तीति प्रकरणाभिनिवेशतया सौत्रान्तिकसंज्ञा लब्धेति। केचन बौद्धा बाह्येषु गन्धादिषु आन्तरेषु रूपादिस्कन्धेषु सत्स्वपि तथानाख्यामुत्पादयितुं सर्वं शून्यमिति प्राथमिकान् विनेयानवतीर्य्य भगवान् द्वितीयांस्तु विज्ञानमात्रव्यवहारविदान् विज्ञानमेवैकं सदिति तृतीयांश्चुभयं सत्यमित्याश्रितान् विज्ञेयमनुमेयमिति क्षेमं विदधौ भाषितं सर्वज्ञो वैभाषिकाख्या ख्याताः। एवा हि तेषां परिभाषा समुच्चिनोति विज्ञेयाद्बुमेयव्यवहारे प्राज्ञस्यापि कस्यचिदप्यर्थेष्वाभावेन आत्मसंवेदनज्ञानाभावेनानुमानप्रवृत्त्यनुपपत्तेः; सकललोकानुभवविरोधश्च। तत्त्वार्थो द्विविधः; ग्राह्योऽध्यवसेयश्च तत्र ग्रहणं निर्विकल्पकरूपं प्रमाणं कल्पनापोढत्वात् अध्यवसायः सविकल्पकरूपोऽप्रमाणं कल्पनाज्ञानत्वात्। तदुक्तम्।

"कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्।
विकल्पो वस्तुनिर्भासादसंवादादुपप्लवः॥"

इति॥

"ग्राह्यं वस्तुप्रमाणं हि ग्रहणं यदितोऽन्यथा।
न तदस्तु न तज्ज्ञानं शब्दलिङ्गेन्द्रियादिजम्॥"

इति च॥

ननु सविकल्पकस्याप्रामाण्ये कथं ततः प्रवृत्तस्यार्थप्राप्तिः; संवादश्चोपपद्यतामिति चेन्न तद्धि प्रमाणविषयमविचिकल्पज्ञानवेव पारम्पर्येणार्थप्रतिलम्भसम्भवेन तदुपपत्तेः। अवधिर्यं सौत्रान्तिकप्रस्तावे प्रपञ्चितमिति नेह प्रतन्यते। न च विनेयाशयानुरोधिनोपदेशभेदः साम्प्रदायिको न भवतीति भणितव्यं यतो भणितं बोधचित्तविवरणे

"देशना लोकनाथानां सत्त्वाशयवशानुगाः।
भिद्यन्ते बहुधा लोके उपायैर्बहुभिः किल॥
गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा।
भिन्ना हि देशना भिन्ना शून्यताऽद्वयलक्षणा॥"

इति॥

द्वादशायतनपूजा क्षेयस्करीति बौद्धमते प्रसिद्धम्।

"अर्थानुपार्ज्य बहुधा द्वादशायतनानि ते।
परितः पूजनीयानि किमन्यैरिह पूजितैः॥
ज्ञानेन्द्रियाणि पञ्चैव तथा कर्मेन्द्रियाणि च।
मनो बुद्धिरिति प्रोक्तं द्वादशायतनं बुधैः॥"

इति॥

विवेकविलासे बौद्धमतमित्यमभ्यधायि।

"बौद्धानां सुगतो देवो विश्वञ्च क्षणभङ्गुरम्।
आर्यसत्याख्यया तत्त्वचतुष्टयमिदं क्रमात्॥
दुःखमायतनञ्चैव ततः समुदयो मतः।
मार्गश्चेत्यस्य च व्याख्या क्रमेण श्रूयतामतः॥
दुःखं संसारिणः स्कन्धाश्चैते च पञ्च प्रकीर्तिताः।
विज्ञानं वेदना संज्ञा संस्कारो रूपमेव च॥

पञ्चेन्द्रियाणि मुग्धाद्या विषयाः पञ्च मानसम्।
धर्माधिष्ठानमेतानि द्वादशायतनानि तु ॥
रागादीनां मलोऽयं स्यात् सप्तदेति हृदां हृदि।
आत्मात्मीयस्वभावाख्याः स स्यात् सप्तदशः पुनः॥
चक्षिका: सर्वसंस्कारा इति या भावना स्थिरा।
स मार्ग इति विज्ञेयः स च मोक्षोऽभिधीयते ॥
प्रत्यक्षमनुमानञ्च प्रमाणद्वितयं तथा।
चतुःप्रस्थानिका बौद्धाः स्वाता वैभाषिकादयः॥
अर्थो ज्ञानान्वितो वैभाषिकैरेष वस्तु मन्यते।
सौत्रान्तिकैस्तु प्रत्यक्षगम्योऽर्थो न बहिर्मतः॥
आकारसहिता बुद्धिर्योगाचारस्य सम्मता।
केवलां संविदं स्वच्छां मन्यन्ते मध्यमाः पुनः॥
रागादिक्लेशसन्तानभावनाच्छेदसम्भवा।
चतुर्ष्वपि बौद्धानां मुक्तिरेषा प्रकीर्तिता॥
क्षान्तिः क्षमाक्षतुर्मौक्ष्यं चौरं पूर्वाह्णभोजनम्।
सङ्घो रक्ताम्बरत्वञ्च त्रिष्वेते बौद्धभिक्षुभिः॥"
इति॥

इति सर्वदर्शनसंग्रहे बौद्धदर्शनम्॥)

(बुद्धेरिदमिति बुद्धपत्त्या वाच्यलिङ्गः। बुद्धसम्बन्धि वस्तु॥)

बौद्धः, पुं, (बुद्धं बुद्धशास्त्रं वेत्तीति। बुद्ध + अण्।) बुद्धशास्त्रावलम्बी। तत्पर्य्यायः। भिन्नकः २ क्षपणः ३ अर्हतीकः ४ वैनायिकः ५। इति विकाण्डशेषः॥

बौधः, पुं, (बुधस्यापत्यं पुमान्। बुध + अण्।) बुधस्य पुत्रः। स च पुरूरवाः। इति हेमचन्द्रः। १। २६५॥

बध, च औ ताडे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक० अनिट्।) च विध्यति बुध्नं शूरः। औ अबात्सीत्। कश्चित्तु द्विर्भूतस्यात्रिकारीभूतयकारस्य अधैर्यकारो वर्ण्यः अन्यत्र दन्त्यः इति मत्वान् सनि विध्यत्सतीत्याह। इति दुर्गादासः॥

बुध, क उत्सर्गे। (चुरा०-पर०-सक०-सेट्।) क बोधयति धनं दाता। बोधं त्रिकटु। इति दुर्गादासस्तधातुदीपिकायां गोविन्दभट्टः॥

बुध, ग्रन्थे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) ब्रुधति। इति दुर्गादासः॥

ब्रुततिः, स्त्री, (ब्रुधन्ती ततिर्विस्तृतिर्यस्याः। पृषोदरादित्वात् साधुः। यद्वा, प्रततोनीति। तनदुनविस्तारे "क्तिच् क्तौ च संज्ञायाम्।" ३। ३। १७४। इति क्तिच्। पृषोदरादित्वात् पस्य वः।) लता। विस्तारः। इत्यमरः॥

ब्रध्नः, पुं, (ब्रध्नयत्यनेन + "वर्त्मन्नधिबुधी च। उणा० ३। ५। इति नक् ब्रधादेशश्च।) सूर्य्यः। (यथा, ऋग्वेदे। १। ६। १।
"युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः।
रोचन्ते रोचना दिवि॥")
इत्यमूलम्। अर्कवृक्षः। इत्यमरः। २। ४। १५। शिवः। इति हेमचन्द्रः॥ मेदिनीकारेणात्रान्यः स्व

बकारादौ निक्षिप्तोऽयं शब्दः॥ (दिवम्। अयः। इति निघण्टुः॥ चतुर्ष्वप्यमलोभीष्टस्य पुरुषभेदः। यथा, मार्कण्डेये। १००। ३२।
"शुक्लश्चाभीरो ब्रह्मश्च भरतोऽथ हरस्तथा।
तैलङ्गो द्रुवलश्चैव भौलश्चेति मधोः सुताः॥")
रोगविशेषः। तस्य लक्षणं यथा,
"अभ्यभिष्यन्दिगुर्वाम्लसेवनान्निचयं गतः।
करोति यस्त्रिदोषोऽयं दोषो बहुगुणस्त्रिषु॥
ज्वरमूलाङ्गसादार्त्तं तं ब्रध्नमिति निर्दिशेत्॥"
इति माधवकरः॥

तस्य चिकित्सा।
"भद्रश्रेरुकतैलेन सम्यक् कक्षोऽभ्यक्तो भवेत्।
क्षाराग्निसेवासंयुक्तो ब्रध्नरोगहरः परः॥
अजाजीहपुषाकुष्ठं गोमेदवदरान्वितम्।
कार्ष्णिकेन तु संपिष्टं तक्रपेयो ब्रध्नजित् परः॥"
गोमेदं पक्वम्। तथा च निघण्टौ धन्वन्तरिः।
"पक्वं दलाभयं रामं गोमेदं रसनाह्वयम्॥"
इति भावप्रकाशः॥
(अस्य सन्न्यासिलक्षणं यथा,—
"यस्य वायुः प्रकुपितः श्लोपमूलकरस्वरम्।
वंक्षणादूरुषण्डौ याति ब्रध्नस्तस्योपजायते॥"
इति चरके सूत्रस्थानेऽष्टाविंशोऽध्याये॥)

ब्रह्म, क्ली, (बृंहति वर्द्धते निरतिशयमहत्त्वलक्षणवृद्धिमान् भवतीत्यर्थः। बृहिवृद्धौ + बृंहेर्नोऽच्।" उणा० ४। १४५। मनिन् नकारस्याकारः। रलयोश्च।) वेदः। (यथाह श्रुतिः।
"तस्माद्वेतद्ब्रह्मनामरूपमन्नञ्च जायते॥"
तथा च भागवते। १। १। १।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः॥"
वेदान्तमते 'वस्तु सच्चिदानन्दाद्वयं ब्रह्म तथा अज्ञानादिसकलजडसमूहोऽवस्तु।' 'ब्रह्मैव नित्यं वस्तु तदन्यदखिलमनित्यम्।' तथाहि,—
"यस्यादर्वाक् संवत्सरोऽहोभिः परिवर्त्तते।"
तदेव ज्योतिषां ज्योतिः। नित्यं विभु सर्वगतं सूक्ष्मम्। आकाशवत् सर्वगतञ्च नित्यः। अजो नित्यः शाश्वतः सत्यं ज्ञानमनन्तं ब्रह्म रातेर्दातुः परायणं यत्र नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति सभूमा यो वै भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मणि नित्यत्वं विशुद्धसत्त्वस्य पुंसः प्रतिभाति। तथा, नैवेह किञ्चनाग्र आसीत् मृत्युनैवेदमावृतमासीत्। आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चनमिषत् सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं नेति नेति नेह नानास्ति किञ्चन यन्नान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पम् अथ यदल्पं तन्मर्त्यम्।" इत्यादि श्रुतिवचनेभ्यो ब्रह्मणोऽन्यत् भेदप्रपञ्चोऽविद्यावच्च तस्यैव पुंसः प्रतिभाति। तथानुमानमपि यथा, विमतोऽपेतनवर्णोऽनिलो विभुत्वात् घटपटवन्ना-

दिवत् इति। अनेन हि विभक्तस्वाभाविकभेदवत्ते तस्मिन्नयुक्तप्रमाणानुरूपत्वं ब्रह्मणोऽविभक्तस्य निखिलमपि अर्थादवगच्छति। इति वेदान्तसारे विद्वन्मनोरञ्जनीटीका॥ तथ श्रुतिवाक्यानि यथा, "सत्यं ज्ञानमनन्तं ब्रह्म। विज्ञानमानन्दं ब्रह्म।" "आनन्दो ब्रह्मेति व्यजानात् आनन्दरूपममृतं यद्दु विभाति। यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद्ब्रह्मेति।" इत्यादिसंक्षेपं श्रुतिवचनमनुसन्धेयम्॥")

तपस्। तपः। इत्यमरः। ३। ३। २२४॥
ब्रह्म चतुर्विधं यथा। विराट् १ हिरण्यगर्भः २ ईश्वरः ३ तुरीयः ४। इति वेदान्तसारः॥
अस्य लक्षणम्। यथा, आत्मबोधे।
"यज्ज्ञाभात्परो नाभो यत्सुखात्परं सुखम्।
यज्ज्ञानात्परं ज्ञानं तद्ब्रह्मेत्यवधारयेत्॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत्॥
तिर्यगूर्द्धमधःपूर्णं सच्चिदानन्दमद्वयम्।
अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
अतद्व्यावृत्तिरूपेण वेदान्तैरुपलक्ष्यते यत्।
अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत्॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत्।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम्॥
सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्यवत्॥"
अपि च। "सत्यमानन्दमद्वयमनन्तमेकरूपं वाङ्मनसोऽगोचरं सर्वगं सर्वातीतं चिदेकरसं ईक्षणकालापरिच्छिन्नमपादमपि श्रोत्रगमपाणि च सर्वग्रहमचक्षुरपि सर्वदृक् अश्रोत्रमपि सर्वश्रोतृ अचिन्त्यमपि सर्वज्ञं सर्वज्ञित्वकर्तृ सर्वशक्ति सर्वेषां स्वस्थितिलयकर्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति॥" शुद्धबुद्धस्वभाव इत्यौपनिषदाः। १। आदित्यवर्णं विद्वं इति कापिलाः। २। लोकवर्त्मविधात्राद्यैरपराजुष्टो निर्माणकायमधिष्ठाय सम्यग्दायप्रवृत्तोऽनुग्राहकश्चेति पातञ्जलाः। ३। लोकवेदविरुद्धैरपि विलेपः स्वतन्त्रश्चेति महापाशुपताः। ४। शिव इति शैवाः। ५। पुरुषोत्तम इति वैष्णवाः। ६। पितामह इति पौराणिकाः। ७। यज्ञपुरुष इति याज्ञिकाः। ८। सर्वज्ञ इति सौगताः। ९। विरावरज इति दिगम्बराः। १०। उपास्यत्वेन ईप्सित इति मीमांसकाः। ११। लोकव्यवहारविद्वं इति चार्वाकाः। १२। आवदुल्लोपयन्न इति नैयायिकाः। १३। विश्वकर्मेति शिल्पिनः। १४। इति कुसुमाञ्जलिवृत्तिः॥ योगशास्त्रमते।
"ब्रह्मतेजोमयं शुक्लं यस्य सर्वमिदं दृशः।
एकस्य मूर्तं भूतस्य तुर्यं खाद्यवलक्षणम्॥
इति महाभारते मोक्षधर्मे॥

तस्य टीका। ब्रह्मणः स्वरूपलक्षणद्वारविस्तरार्थमाह। ब्रह्मतेजोमयमिति। तेजोमयं ज्ञानालम्बनम्। मुख्यं बीजभूतम्। यच्च सर्व्वनिर्दग्धः दग्धबीजं ज्ञेयं सर्व्वं यच्चेकञ्च भूतं सर्व्वं च तु विनर्त्तवारिनामिवाखिलं भूतस्य विश्वस्य अक्षयितस्य तच्च सर्व्वं ज्ञावरजङ्गमोपाधिवशात् द्वयं द्वेधा। तच्च चतुर्व्यूहनिर्गुणभेदेन द्विविधं यथा,

"ब्रह्मैकं मूर्त्तिभेदेन गुणभेदेन वत्ततम्।
तद्ब्रह्म द्विविधं वस्तु सगुणं निर्गुणं शिव!॥
मायाधिपतिः यः सगुणो मायातीतश्च निर्गुणः।
स्वेच्छामयश्च भगवान्निच्छया विकरोति च॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिस्वरूपः सदा।
केचिदेकं वदन्त्येवं ब्रह्म ज्योतिः सनातनम्॥
केचिदन्ये द्विविधं ब्रह्म प्रकृतिपूर्व्वकम्।
ब्रह्म ये च वदन्त्येकं प्रकृतिपुरुषयोः परम्॥
तन्नाङ्गवति सौ द्वौ च तद्ब्रह्म सर्व्वकारणम्।
अथवैकं परं ब्रह्म द्विविधं भवतीच्छया॥
इच्छाशक्तिश्च प्रकृतिः सर्व्वशक्तिस्वरूपः सदा।
तच्चाद्यच्च सगुणः स शरीरी च प्राकृतः॥
निर्गुणश्चाच्च निर्लिप्तः अशरीरी निरञ्जनः।
स चात्मा भगवान्नित्यः सर्व्वाधारः सनातनः॥
सर्व्वेश्वरः सर्व्वसाक्षी सर्व्वशक्ति फलप्रदः।
शरीरं द्विविधं ब्रह्मन्! नित्यं प्राकृतमेव च॥
नित्यं विनाशरहितं नश्वरं प्राकृतं सदा।
अहं त्वञ्चापि भगवन्नावयोर्नित्यविग्रहः॥
आवयोरंशभूता ये प्राकृता नश्वरविग्रहाः।
ब्रह्मादयश्चराश्चाच्च मदंशा विष्णुरूपिणः॥
ममाप्येवं द्विधा रूपं द्विभुजञ्च चतुर्भुजम्।
चतुर्भुजोऽहं वैकुण्ठे पद्मया पार्षदैः सह॥
गोलोके द्विभुजोऽहञ्च गोपीभिः सह राधया।
द्विविधं मे वदन्त्येवं वौ प्रधानौ तु तत्त्वतः॥
पुरुषश्च सदा नित्यो नित्या प्रकृतिरीश्वरी।
सदा तौ द्वौ च संसिद्धौ सर्व्वथा पितरौ शिव!॥
सशरीरौ निःशरीरौ स्वेच्छया सर्व्वरूपिणौ।
प्राधान्यञ्च यथा पुंसः प्रकृतेश्च तथा सदा॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७३ अध्यायः॥

ब्रह्मवयोर्दा प्रति श्रीकृष्णवाक्यं यथा,—

"मामेव परमं ब्रह्म भगवन्तं सनातनम्।
ध्यायं ध्यायं पुनर्बुद्धिं यास्यथ परं पदम्॥"

इति तत्रैव १२७ अध्यायः॥

सगुणस्य तस्य नवधा रूपं यथा,—

"योगिनो यं वदन्त्येवं ज्योतीरूपं सनातनम्१।
ज्योतिरभ्यन्तरे नित्यरूपं भक्ता वदन्ति यम्२॥
वेदा वदन्ति सन्तं यं३ नित्यमाद्यं विचक्षणाः४।
यं वदन्ति सुराः सर्व्वे परं स्वेच्छामयं प्रभुम्५॥
सिद्धेन्द्रा मुनयः सर्व्वे सर्व्वरूपं वदन्ति यम्६।
ममाभिन्नत्वतोयच्च योगीन्द्रः शङ्करो वदेत्७॥
सर्व्वं धाता च प्रवदेत् कारणानाञ्च कारणम्८।
शेषो वदेत्तत्त्वं यं नवधा रूपमीश्वरम्९॥
तत्त्वज्ञानेन यच्चां यं बहुविधं रूपमीश्वरम्।
वेदज्ञानानेकरूपं वेदानामेकमेव च॥
पुराणानामनेकरूपं तत्त्वज्ञानविधिं स्मृतम्।
व्यासो नित्यत्वतोयच्च ब्रह्मतं शङ्करोऽवदीत्॥
नित्यं वैशेषिकाद्यास्तं वदन्ति च विचक्षणाः।
सांख्यो वदति तं देवं ज्योतीरूपं सनातनम्॥
मीमांसा सर्व्वरूपञ्च वेदान्तः सर्व्वकारणम्।
पातञ्जलोऽप्यनन्तञ्च वेदाः सत्यस्वरूपकम्॥
स्वेच्छामयं पुराणञ्च भक्ताश्च नित्यविग्रहम्॥"

इति तत्रैव १२८ अध्यायः॥

सगुणनिर्गुणभेदेन तस्य चतुर्धा रूपं यथा,—

"चतुर्विभागः संसृष्टौ चतुर्धा संस्थितः स्थितौ।
प्रलये च करोत्यन्ते चतुर्भेदो जनार्दनः॥
एकेनांशेन ब्रह्मासौ भवत्यत्तत्त्वगर्भिमान्।
मरीचिमिश्राः यतयः प्रजानामन्वभागतः॥
कालस्तृतीयस्तस्यांशः सर्व्वभूतानि चापरः।
इत्थं चतुर्धा संसृष्टौ वर्त्ततेऽसौ रजोगुणः॥
एकांशेन स्थितौ विष्णुः करोति परिपालनम्।
मन्वादिरूपी चान्येन कालरूपी परेण च॥
सर्व्वभूतेषु चान्येन संस्थितिं कुरुते स्थितः।
सत्त्वं गुणमुपाश्रित्य जगतः पुरुषोत्तमः॥
आश्रित्य तमसो वृत्तिमन्तकाले तथा प्रभुः।
रुद्ररूपो भगवानेकांशेन भवत्यजः॥
अन्यान्यकादिरूपेण भागेनान्येन वर्त्तते।
कालस्वरूपो भागोऽन्यः सर्व्वभूतानि चापरः॥
विनाशं कुर्व्वतस्तस्य चतुर्द्धैवं महात्मनः॥"

इति विष्णुपुराणे १ अंशे २१ अध्यायः॥

ब्रह्मध्यानं यथा,—

"ब्रह्मध्यानं प्रवक्ष्यामि मायातत्त्वविमर्द्दकम्।
यत्कृत्वाज्ञानमि प्राज्ञस्तदयं ज्ञेज्ज्ञानमात्मनि॥
ध्यानं मनसि संयम्य हृदये इच्छेत् श्रेय आत्मनि।
देहेन्द्रियमनोबुद्धिप्राणाहङ्कारवर्जितम्॥
वर्जितं भूततन्मात्रैर्गुणजन्मादिभिः।
स्वप्रकाशं निराकारं सदानन्दमनादिमत्॥
नित्यं शुद्धं बुद्धमुक्तं सत्यमानन्दमद्वयम्।
तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम्॥
अहं ब्रह्मेत्यवस्थानं समाधिरिति गीयते।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्॥
आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः।
यस्य विज्ञानवानात्मा युक्तेन मनसा सदा॥
न स तत्पदमाप्नोति युक्तेन मनसा सदा।
स तत्पदमवाप्नोति स हि भूयो न जायते॥
विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।
सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्॥
अहिंसादि यमः प्रोक्तः शौचादिर्नियमः स्मृतः।
आसनं पद्मकाद्युक्तं प्राणायामो मरुज्जयः॥
प्रत्याहारो जयः प्रोक्तो ध्यानमीश्वरचिन्तनम्।
मनोधृतिर्धारणं स्यात् समाधिर्ब्रह्मणः स्मृतः॥"

साकारस्य तस्य ध्यानं यथा,—

"अमूर्त्तं चेतु स्थिरो न स्यात्ततो मूर्त्तं विचिन्तयेत्।
कृपयन्नत्रिकामध्ये ब्रह्मचक्रमहाजवात्॥

शीतलक्षीरसुभगस्तो वत्समाली स्थिरा सुतः।
नित्यः शुद्धो बुद्धियुक्तः सिद्धानन्दाक्षयः परः॥
आत्मानं परमं ब्रह्म परमज्योतिरेव तु।
चतुर्व्विंशतिसंख्यैः स ब्राह्मणामखिलाखिलः॥
द्वारकादिद्विजावासंज्ञो ज्ञेयः पूर्व्वोऽपि वा हरिः।
मनसोऽभीप्सितं प्राप्य देवो वैमानिको भवेत्॥
निष्कामो मुक्तिमाप्नोति मूर्त्तौर्ध्वायन् स्तुवन् क्षमम्॥"

इति गारुडे मूर्त्तान्तर्गतध्यानं ४४ अध्यायः॥

ब्रह्मपदप्राप्तिकारणं यथा,—

"ब्रह्मण्याधाय कर्म्माणि निःसङ्गः त्यक्तवर्जितः।
प्रसन्नेनैव मनसा कुर्व्वाणो याति तत्पदम्॥"

इति कूर्म्मपुराणे १ अध्यायः॥

सर्व्वं ब्रह्म यथा,—

"ब्रह्मैवेदं जगत् सर्व्वं ब्रह्मणोऽन्यन्न विद्यते।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका॥"

इत्यात्मबोधः॥

ब्रह्मकन्यका, स्त्री, (ब्रह्मणः कन्यका सुता।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्राह्मी। इति राजनिर्घण्टः॥

ब्रह्मकर्म्मसमाधिः, पुं. ब्रह्मण्येव कर्म्मात्मके समाधिश्चित्तैकाग्र्यं यस्य। यथा, श्रीभगवद्गीतायाम्। ४। २४।

"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना॥"

ब्रह्मकुण्डं, क्ली, (ब्रह्मणा निर्म्मितं कुण्डं सरोवरम्।) ब्रह्मणा निर्म्मितसरोवरविशेषः। यथा,

"पाण्डुनाथस्योत्तरस्यां ब्रह्मकुण्डाख्यं सरः।
ब्रह्मणा निर्म्मितं पूर्व्वं स्नानाय स्वर्गवासिनाम्॥
आयामेन शतत्रयं विस्तीर्णेन तदर्द्धकम्।
सर्व्वपापहरं पुण्यं देवलोकात् समागतम्॥
तत्र स्नानमत्रः।
कमण्डलुसमुद्भूत ब्रह्मकुण्डाक्षतजल!।
हर मे सर्व्वपापानि पुण्यं स्वर्गञ्च साधय॥
इत्यनेन तु मन्त्रेण स्नाति तस्मिन् सरोजले।
पाण्डुनाथञ्च संपूज्य विष्णुसायुज्यमाप्नुयात्॥
ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

इति कालिकापुराणे ८२ अध्यायः॥

ब्रह्मकूटः, पुं. (ब्रह्मा कूटे शिखरे यस्य।) पर्व्वतविशेषः। यथा, कालिकापुराणे ८२ अध्यायः॥

"ब्रह्मकुण्डजले स्नात्वा पूजयित्वा उमापतिम्।
ब्रह्मकूटं समारुह्य मुक्तिमेवाप्नुयान्नरः॥"

ब्रह्मकूर्च, क्ली, (ब्रह्मणो ब्राह्मणस्य कूर्चमिव।) व्रतविशेषः। यथा।

"रजस्वले तु वै भार्य्यावन्योन्यं स्पृशतो यदि।
सर्व्वे पञ्चगव्यन्तु ब्रह्मकूर्चमतःपरम्॥"

पञ्चगव्यपानं व्रतदयं तैवोपवासः। ब्रह्मकूर्चमाह जाबालः।

"अहोरात्रोषितो भूत्वा गोमयात्तां विशुद्धयतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चविधिः स्मृतः॥"

नदशुक्ली पुराणेकं दानवम्। इति प्रायश्चित्ततत्त्वम्। (ब्रह्मपुराणेऽपि अस्य अन्यथा यथा। नरस्तु चतुर्दश्यां पूर्णिमायाममावास्यायामा पञ्चम्यं चविष्यान्नं वा भक्षयेत्। यस्तु पौर्णमासीषु ब्रह्मसूक्तं जुहुयात् तस्य सर्व्वपापक्षयो भवेत्। यस्तु मासेन द्विःकुर्य्यात् स यथेष्टगतिमाप्नुयात्॥)

ब्रह्मकोशी, स्त्री, (ब्रह्मणः कोशीव।) अजमोदा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या अजमोदाशब्दे ज्ञेयाः॥)

ब्रह्मगर्भा, स्त्री, (ब्रह्मैव गर्भो यस्याः।) आदित्यभक्ता। इति राजनिर्घण्टः॥

ब्रह्मगिरिः, पु, (ब्रह्मणो गिरिः पर्व्वतः।) ब्रह्मशैलः। इति शब्दरत्नावली॥ (नीलकूटाभिधेयकामाख्याविषयस्य पूर्व्वभागे स्थितोऽयम्।) यथा, कालिकापुराणे ८२ अध्याये।

"अतस्तु नीलकूटाख्यं कामाख्यानिलयं परम्।
तत्पूर्व्वभागे वसति ब्रह्मा ब्रह्मगिरिं पुरः॥"

ब्रह्मघ्नी, स्त्री, ब्रह्महत्या। इति राजनिर्घण्टः॥ (ब्रह्माणं ब्राह्मणं हन्तीति। ब्रह्म + हन् + टक्। ततो ङीप्।) ब्रह्मघातिनी च॥

ब्रह्मचर्य्य, क्ली, (ब्रह्मणे वेदार्थं चर्य्यं आचरणीयम्।) आश्रमविशेषः। यथा, गारुडे ६४ अध्याये।

"ब्रह्मचर्य्यस्थितो नैकमन्नमद्यादनापदि।
ब्राह्मणः कामभक्षीवात् आहे व्रतमपीडयन्॥
मधु मांसं तथाश्नीयमित्यादि परिवर्जयेत्।
प्रतिवेदं ब्रह्मचर्य्यं द्वादशाब्दानि षट् च वा॥
यद्वाप्यग्निमभिक्षे वैश्यान्नमेव वोढ्वा॥"

(ब्रह्मचर्य्ये अष्टाङ्गमैथुनप्रतिषेधः। यद्यथा।

"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"

एतच्च स्त्रीपुरुषयोः साधारणम्। पुंसः स्त्रीस्मरणादि भूयस्त्वम्। स्त्रियाश्च पुरुषस्मरणादिराधिक्यम् अतएवाह मनुः। ५। १६०॥

"मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः॥"
"ब्रह्मचर्य्यं व्यवस्थिता अक्षतपुरुषान्तरमैथुना॥"

इति कुल्लूकभट्टः॥

यमभेदः। यथा, पातञ्जले। २। ३०।

"अहिंसासत्यास्तेयब्रह्मचर्य्यापरिग्रहा यमाः॥"

"ब्रह्मचर्य्यमुपस्थनियमः।" वीर्य्यधारणमित्यर्थः इति भाष्यम्॥ एतच्च कलियुगे नास्ति। यथाह महानिर्व्वाणतन्त्रे।

"ब्रह्मचर्य्याश्रमो नास्ति वानप्रस्थोऽपि न प्रिये।
गार्हस्थ्यो मैथुनस्यैव आश्रमौ द्वौ कलौ युगे॥")

ब्रह्मचारी, स्त्री, (ब्रह्मणा वेदेन चारयति आचरतीति। ब्रह्म + चर + णार्थे णिच् + कर्त्तरि घञ्। ङीप्) भार्य्या। इति राजमाला॥

ब्रह्मचारिणी, स्त्री, (ब्रह्मणि वेदे चरतीति, ब्रह्म + चर् + णिनिः। स्त्रियां ङीप्।) दुर्गा। यथा, देवीपुराणे ५५ अध्याये।

"वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी॥"

ब्रह्मजीवकः। इति राजनिर्घण्टः॥ ब्रह्मजीवाकः। इति रत्नमाला॥ ब्रह्मचर्य्यव्रतधारिणी। यथा,

"आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी।
यो धर्म्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम्॥"

इति मनुः। ५। १५८॥

ब्रह्मचारी, [न्] पुं, (ब्रह्म ज्ञानं तपो वा आचरति अर्जयत्यवश्यम्। ब्रह्म + चर + आवश्यके णिनिः।) प्रथमाश्रमी। इति भरतः॥ उपनयनानन्तरं नियमं कृत्वा गुरोः सन्निधौ स्थित्वा वाङ्मयेदाध्ययनं करोति यः। स द्विविधः। उपकुर्व्वाणः नैष्ठिकश्च। तत्र नियमा यथा,—

"यद्यस्य विहितं चर्म्म यत्सूत्रं या च मेखला।
यो दण्डो यच्च वसनं तत्तस्य व्रतेष्वपि॥
सेवते मासु नियमान् ब्रह्मचारी गुरौ वसन्।
संनियम्येन्द्रियग्रामं तपोवृद्ध्यर्थमात्मनः॥
नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम्।
देवताभ्यर्चनञ्चैव समिदाधानमेव च॥
वर्ज्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि यानि सर्व्वाणि प्राणिनाञ्चैव हिंसनम्॥
अभ्यञ्जनमञ्जनञ्चोपानच्छत्रधारणम्।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम्॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम्।
स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत् क्वचित्।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः॥
स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेत्॥
उदकुम्भं सुमनसो गोशकृन्मृत्तिकाकुशान्।
आहरेद्यावदर्थानि भैक्षञ्चाहरहश्चरेत्॥
वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्म्मसु।
ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥
गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत्॥
सर्व्वं वापि चरेद्ग्रामं पूर्व्वोक्तानामसम्भवे।
नियम्य प्रयतो वाचमभिशस्तांस्तु वर्ज्जयेत्॥
दूरादाहृत्य समिधः सन्निदध्याद्विहायसि।
सायं प्रातश्च जुहुयात् ताभिरग्निमतन्द्रितः॥
अकृत्वा भैक्षचरणमसमिध्य च पावकम्।
अनातुरः सप्तरात्रमवकीर्णिव्रतञ्चरेत्॥
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती।
भैक्षेण व्रतिनो हि स्यादुपवाससमा स्मृता॥
व्रतवद्देवदैवत्ये पित्र्ये कर्म्मण्यथर्षिवत्।
कामममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते॥
ब्राह्मणस्यैव कर्म्मैतदुपदिष्टं मनीषिभिः।
राजन्यवैश्ययोस्त्वेवं नैतत् कर्म्म विधीयते॥
चोदितो गुरुणा नित्यमप्रचोदित एव वा।
कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च॥
शरीरस्यैव वाचश्च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिर्तिष्ठेदीक्षमाणो गुरोर्मुखम्॥
नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः।
आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः॥
शय्यासनस्थश्चैवैनं स्यात् सर्व्वदा सुसंयतः।
उत्तिष्ठेत् प्रथमं चास्य चरमञ्चैव संविशेत्॥
प्रतिश्रवणसम्भाषे शयानो न समाचरेत्।
नासीनो न च भुञ्जानो न तिष्ठन् पराङ्मुखः॥
आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः।
प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः॥
पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः॥
नीचं शय्यासनञ्चास्य सर्व्वदा गुरुसन्निधौ।
गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्॥
नोदाहरेदस्य नाम परोक्षमपि केवलम्।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम्॥
गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः॥
परीवादात् खरो भवति श्वा वै भवति निन्दकः।
परिभोक्ता कृमिर्भवति कीटो भवति सूचकः॥
दूरस्थो नार्द्धयेदेनं न क्रुद्धो वाप्रियं क्षिपेत्।
यस्यासनञ्चाधिशयीत यानं वास्याभिवादयेत्॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह।
असंश्रवे चैव गुरोर्न क्षिपेदपि कीर्त्तयेत्॥
गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्॥
विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु।
प्रतिषेधत्सु चाधर्म्यान् हितञ्चोपदिशत्सु च॥
श्रेयःसु गुरुवद्वृत्तिं नित्यमेव समाचरेत्।
गुरुपुत्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु॥
बालः समानजन्मा वा शिष्यो वा यज्ञकर्म्मणि।
अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति॥
उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने।
न कुर्य्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्॥
गुरुवत् प्रतिपूज्याः स्युः सवर्ण्या गुरुयोषितः।
असवर्ण्यास्तु संपूज्याः प्रत्युत्थानाभिवादनैः॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्
गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः।
पूर्णविंशतिवर्षेण गुरुणैषा विधीयते॥
स्वभाव एव नारीणां नराणामिह दूषणम्।
अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः॥
अविद्वांसमलं लोके विद्वांसमपि वा पुनः।
प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम्॥
माता स्वसा दुहित्रा वा न विविक्तासनो भवेत्
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥
कामन्तु गुरुपत्नीनां युवतीनां युवा सुधि।
विधिवद्वन्दनं कुर्य्यादसावहमिति ब्रुवन्॥
विप्रोष्य पादग्रहणमन्वहञ्चाभिवादनम्।
गुरुदारेषु कुर्व्वीत सतां धर्म्ममनुस्मरन्॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥

सक्तो वा जटिलो वा स्नातयवा स्नाच्छिखा-
जटः ।
नैनं ग्रामेऽभिनिर्गोचेत् सूर्यो नाभ्युदियात्
क्वचित् ॥
नक्तेरभ्युदियात् सूर्यः सूर्यानं कामचारतः ।
निर्गोचेद्ग्राम्यविज्ञानाज्जपन्नुपवसेद्दिनम् ॥
सूर्येण चाभिनिर्मुक्तः सूर्यानोऽभ्युदितश्च यः ।
प्रायश्चित्तमकुर्व्वाणो युक्तः स्यान्महतैनसा ॥
आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः ।
सुचौ देशे जपन् जप्यमुपासीत यथाविधि ॥"
इति मानवे । २ । १७४-१२२ ॥
अपि च । औशनसे उवाच ।
"दारः क्षतोपनयनो वेदाहरणतत्परः ।
गुरुशुश्रूषणरतो भूयाद्ब्रह्मचारी समाहितः ॥
शौचाचारवता तत्र कार्य्यं सुश्रूषणं गुरोः ।
व्रतानि चरता गुरुणा वेदाश्च क्षतबुद्धिना ॥
उभे सन्ध्ये रविं भूप ! तथैवाग्निं समाहितः ।
उपतिष्ठेत्तथा कुर्य्याद्गुरोरप्यभिवादनम् ॥
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चासति ।
ग्रिष्यो गुरौ नृपश्रेष्ठ ! प्रतिकूलं न संभजेत् ॥
तेनैवोक्तः पठेद्वेदं नान्यचित्तः परःस्थितः ।
अनुज्ञातश्च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥
अवगाहेदपः पूर्णमाचार्य्येणावगाहिताः ।
समिज्जलादिकञ्चास्य कर्म्म कुर्य्यादुपानयेत् ॥
गृहीत्वाज्ञामथ वेदञ्च ततोऽनुज्ञामवाप्य वै ।
गार्हस्थ्यमावसेत् प्राज्ञो नित्यव्रतविकृतिः ॥"
इति विष्णुपुराणे । ३ । ६ । १-७ ॥
अपि च । गारुडे ४८ अध्याये ।
"भिक्षाचर्य्यांश्च शुश्रूषा गुरोः स्वाध्याय एव च ।
सन्ध्याकर्म्माग्निकार्य्यञ्च धर्म्मोऽयं ब्रह्मचारिणः ॥"
स तु द्विविधः । यथा, कौर्म्मे २ अध्याये ।
"ब्रह्मचार्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ।
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ॥
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ।"
(गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५५ ।
"ब्रह्मचारी बहुगुणः सुवर्णेति विश्रुतः ।
विश्वावसुर्भूमन्यञ्च सुचन्द्रश्च गुरुस्तथा ॥")
ब्रह्मजन्मन्, पुं, (ब्रह्मणो जायते य इति ब्रह्मजः ।
ब्रह्म + जन् + ड । आत्मातीति मनुः । मन् + क्विः ।
मनः कर्म्मधारयः ।) समष्टिस्थूलदेहाभिमानि-
विराट् । स च हिरण्यगर्भोऽपि सर्व्वज्ञः ।
यथा, कठोपनिषदि । १ । १७ ॥
"त्रिनाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत् तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥"
पुनरपि कर्म्मश्रुतिमेवाह त्रिनेति । त्रिना-
चिकेतः त्रिब्रह्मो नाचिकेतोऽग्निः चितो येन स
त्रिनाचिकेतः तद्विज्ञानलक्षणक्रियाकलापानुष्ठानवान्
वा । त्रिभिर्माहपित्र्याचार्य्यैरेत्य प्राप्य सन्धिं
सन्धानं मोक्षायनुग्रहणं यथावत् प्राप्येत्येतत् ।
तद्धि प्रमाणकारणं मुमुक्षूणामवश्यमस्ति ।
यथा माहमाणिक्याद्यैः । वेदस्मृतिविधिदृष्टैर्वा
प्रत्यक्षानुमानागमैर्वा तैभ्यो हि विमुक्तिः
प्रत्यक्षा । त्रिकर्म्मकृत् इत्याध्ययनदानानां कर्त्ता
तरति अतिक्रामति जन्म च मरणञ्च जन्ममृत्यू ।
किञ्च ब्रह्मजज्ञमिति । ब्रह्मजज्ञं ब्रह्मणो
हिरण्यगर्भाज्जातो ब्रह्मजः ब्रह्मजज्ञौ
सूचयति ब्रह्मजज्ञः सर्व्वज्ञो सूचौ तं देवं द्योतन-
ज्ञानादिगुणवन्तं ईड्यं स्तुत्यं विदित्वा ग्राप्तः
निचाय्य दृष्ट्वा च आत्मभावेन इमां स्वबुद्धि-
प्रत्यक्षां शान्तिं उपरतिं अत्यन्तमेति अतिशयेने-
नेति वैराग्यं पदं ज्ञानकर्म्मसमुच्चयानुष्ठानेन
प्राप्नोतीत्यर्थः । इति शङ्कराचार्य्यकठभाष्यम् ॥
ब्रह्मजटा, स्त्री, (ब्रह्मणो जटेव संहता ।)
दमनकवृक्षः । इति राजनिर्घण्टः ॥
ब्रह्मजीवी, [न्] पुं, (ब्रह्मणा वेदेन वेदोक्त-
नौतादिकर्म्मणा वृत्त्यर्थं जीवतीति । ब्रह्म +
जीव् + णिनिः ।) द्विजकार्य्येण वृत्त्यर्थं परि-
चारकः । यथा । अनृतवाक् तस्करो राजभृत्यो
वृषलीपतिर्वार्द्धुषिकोऽभिशस्तोऽवरयाजनाद्योह-
यन्ती रङ्गोपजीवी नागरिकः सूदोपाध्यायो
वृषलीपतिर्भाक्षिको नक्षत्रोपजीवी नक्षत्रवृत्ति-
र्ब्रह्मजीवी चिकित्सकः कैवलकः पुरोहितः
कितवो मद्यपः कूटकारकोऽपण्यविक्रयी मनुष्य-
पशुविक्रेता चेति तानुद्धरेत् समेत्य न्यायतो
राजाज्ञयवस्थया सर्व्वद्रव्यत्यागेन चतुर्थकाला-
हारान् सम्वत्सरं त्रिसवनमुपस्पृशेयुरुक्तस्थाने
देवपितृतर्पणं गवाह्निकक्षेत्रेवं व्यवस्थाप्याः ।
इति मिताक्षरायां प्रायश्चिताध्याये प्रचेतसो
वचनम् ॥
ब्रह्मज्ञः, पुं, (ब्रह्म जानातीति । ब्रह्म + ज्ञा + क ।)
श्रीगोपालः । यथा,—
"वाग्दाता वाक्प्रदो वाग्मी नाथो ब्राह्मण-
रक्षकः ।
ब्रह्मज्ञो ब्रह्मजत् ब्रह्मा ब्रह्मकर्म्मप्रकाशकः ॥"
इति नारदपञ्चरात्रे गोपालसहस्रनामस्तोत्रे ८
अध्यायः ॥
(विष्णुः । यथा महाभारते । १३ । १४८ । ८४ ।
"ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"
कार्त्तिकेयः । यथा, महाभारते । ३ । २३१ । ११ ।
"ब्रह्मण्यो वै ब्रह्मजो ब्रह्मविद्यं
ब्रह्मण्येषो ब्रह्मवतां वरिष्ठः ।
ब्रह्मप्रियो ब्राह्मणसत्तमो यं
ब्रह्मज्ञो वै ब्राह्मणानाञ्च नेता ॥")
ब्रह्मज्ञः, त्रि, (ब्रह्म जानातीति । ब्रह्म + ज्ञा + क ।)
ब्रह्मवेत्ता । यथा,—
"स ब्रह्मज्ञः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ।
शौनाचारक्रमाचारैर्यो यजेताग्निभिर्नरः ॥"
इति शौनाचारप्रयोगविधिः ॥
ब्रह्मज्ञानं, क्ली, (ब्रह्मणि ब्रह्मविषये यज्ज्ञानम् ।)
ब्रह्मविषयकज्ञानम् । इति समञ्जसावृत्तिः ॥ *॥
तत्त्वमस्यादिवाक्यजन्यप्रतिपत्तिरूपाक्षाद्-
ज्ञानम् । इति वेदान्तसारसुबोधिनिका ॥ "मिथ्या-
वासनाविरचितविविधसंसारभिन्नभिन्नज्ञानम् ॥"
इतिसुक्तिवादः ॥ * ॥ "क्षीणकर्म्मविपाकाश्रय-
निवर्त्तनहिरण्यगर्भविषयकं ज्ञानम् ।" इति
वेदान्यतीभूषणपादजलमतम् ॥ *॥ "प्रकृतिपुरु-
षयोर्विवेकविषयज्ञानम् ।" इति तत्रैव सांख्य-
मतम् ॥ तथा च ।
सूत उवाच ।
"वेदान्तसांख्यविज्ञानब्रह्मज्ञानं प्रदाम्यहम् ॥
अहं ब्रह्म परंज्योतिर्विष्णुरित्येव चिन्तयन् ।
सूर्य्ये सहस्रोऽपि यथा न ज्योतिरेकं विधा
क्षितम् ॥
यथा सर्पिः शरीरस्थं गवां न कुरुते बलम् ।
निर्गतं कर्म्मसंयुक्तं दत्तं तासां प्रजायते ॥
तथा विष्णुः शरीरस्थो न करोति हितं नृणाम् ।
विनाराधनया देवः सर्व्वगः परमेश्वरः ॥
आरुरुक्षुमनीनान्तु कर्म्मज्ञानसदाश्रमम् ।
आरूढयोगदृष्टानां ज्ञानं त्यागः परं मतम् ॥
ज्ञातुमिच्छति यद्यादौ रागद्वेषोऽथ जायते ।
लोभो मोहः क्रोध एतैर्युक्तः पापं नरश्चरेत् ॥
हृत्पद्मपत्रसुन्दरं वाक् चतुर्थी चतुष्टयम् ।
एतत् सुसंयतं यस्य स विप्रः काव्यते बुधैः ॥
परचित्तं न यश्चाति हिंसां न कुरुते तथा ।
नाक्षक्रीडारतो यस्तु तस्य हस्तौ सुसंयतौ ॥
परस्त्रीवर्जनपरस्तस्योपस्थं सुसंयतम् ।
अलोलुपो मितं भुङ्क्ते जठरं तस्य संयतम् ॥
सत्यं हितं मितं ब्रूते यः सदा तस्य वाग् यता ।
यस्य संयतान्येतानि तस्य किं तपसाऽपरैः ॥
ऐक्यं यद्बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वदा ।
विश्वेश्वरे परे देवे ध्यानमेतत् प्रकीर्त्तितम् ॥
भ्रुवोर्मध्ये स्थितां बुद्धिं विषयेषु युनक्ति यः ।
जीवो जाग्रदवस्थायामेवमाहुर्विपश्चितः ॥
इन्द्रियाणां समुपरमे मनसि स्यात्यवस्थिते ।
स्वप्नान् पश्यत्यसौ जीवो वासनाभ्यन्तरानघ ॥
हृदि स्थितः स तमसा मोहितो न स्मरत्यपि ।
यदा कस्य कुतो वेत्ति सुषुप्तिरिति कथ्यते ॥
जायतो यस्य नो तस्मीर्न मोहो न श्रमक्षया ।
उत्पद्यते न जानाति शब्दादिविषयान् वशी ॥
इन्द्रियाणि समाकृत्य विषयेभ्यो मनक्षया ।
बुद्ध्याहङ्कारमपि च प्रलया बुद्धिमेव च ॥
संयम्य प्रकृतिञ्चापि चिच्छक्त्या केवले स्थितः ।
पश्यत्यात्मनि चात्मानमात्मनात्मप्रकाशकम् ॥
चिद्रूपमन्तं शुद्धं निष्क्रियं व्यापकं शिवम् ।
तुरीयावस्थायामाख्यितोऽयौ न संशयः ॥
शब्दादयो गुणाः पञ्च सत्त्वात्मासु गुणात्मसु ।
पुर्य्यष्टकस्य पञ्चस्य पञ्चाग्रयश्च तानि हि ॥
साम्यावस्था गुणवतां प्रकृतिश्चेव कर्त्रिका ।
कर्त्रिकायां स्थितो जीवो देही चिद्रूप एव हि ॥
पुर्य्यष्टकं परित्यज्य प्रकृतिञ्च गुणात्मिकाम् ।
यदा याति तदा जीवो याति मुक्तिं न संशयः ॥
शरीरेण चतुर्भागः कर्म्म बुद्धीन्द्रियाणि च ।
त्रिपञ्चकं विनश्येत यति पुर्य्यष्टकं सदा ।
सत्त्वार्य्येणैव जीवेन योगसेवी हि मुक्तिभाक् ॥

ब्रह्मचर्य्या

प्राणायामो जपश्चैव प्रत्याहारोऽथ धारणा ।
ध्यानं समाधिरित्येते षड्योगस्य प्रसाधकाः ॥
पापक्षयो देवतानां प्रीतिरिन्द्रियसंयमः ।
मनसः स्थिरता तेभ्यस्तत्त्वालोकश्च सर्व्वदा ॥
गायत्र्या प्रणवेनाथ माययाः प्राणसंयमः ।
जपध्यानयुतो गर्भस्तेन हीनस्त्वगर्भकः ॥
षट्त्रिंशदनुमात्रिकः श्रेष्ठश्चतुर्विंशतिमात्रिकः ।
मध्या द्वादशमात्रास्तु ओंकारं सततं जपेत् ॥
श्रुत्वा यथाक्षरं सम्यक् ग्रन्थं गौर्याति संसुखी ।
प्रणवे च स्थिते तद्वत् परं ब्रह्म न संशयः ॥
चारके प्रणवे अग्ने परं ब्रह्म प्रवीदति ।
अष्टाक्षरश्च मन्त्रो गायत्री द्वादशाक्षरा ॥
सर्व्वेषामिन्द्रियाणान्तु प्रवृत्तिर्विषयेषु या ।
निवृत्तिर्मनसा तस्यां प्रत्याहारः प्रकीर्त्तितः ॥
इन्द्रियाणीन्द्रियार्थेभ्यः समाकृत्य स्थितो हि सः ।
मनसा सह बुद्ध्या च प्रत्याहारेषु संस्थितः ॥
प्राणायामैर्द्वादशभिर्यावत् कालस्तनो भवेत् ।
यत्नावत् कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ॥
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
तुष्टे तु नियतो युक्तः समाधिः सोऽभिधीयते ॥
ध्यायन्न चलते यस्य मनोऽभिध्यायते भृशम् ।
प्राप्यावधिकृतं कालं यावत् सा धारणा स्थिता ।
ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ॥
ध्येये मनो निश्चलतां याति ध्येयं विचिन्तयन् ।
यतस् ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ॥
ध्येयमेव हि सर्व्वत्र ध्येयत्वलयतां गतः ।
पश्यति हेतुरहितं समाधिः सोऽभिधीयते ॥
मनः संकल्परहितमिन्द्रियार्थेषु चिन्तयन् ।
यस्य ब्रह्मणि संलीनं समाधिस्थः स कीर्त्तितः ॥
ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः ।
मनस्तन्मयतां याति समाधिस्थः स कीर्त्तितः ॥
चिन्तस्थास्थिरता भ्रान्तिर्दौर्मनस्यं प्रमादता ।
योगिनां कथिता दोषा योगविघ्नप्रवर्त्तकाः ॥
स्थित्यर्थं मनसः सर्व्वं स्थूलरूपं विचिन्तयेत् ।
तद्भ्रान्तं निश्चलीभूतं सूक्ष्मस्थं स्थिरतां व्रजेत् ॥
न विना परमात्मानं चिच्चिन्मात्रं विद्यते ।
चिद्रूपं तमेवेह इति ज्ञात्वा न मुह्यति ॥
ओंकारं परमं ब्रह्म ध्यायेदक्षयितं विभुम् ।
चैतन्यचिन्मात्ररहितं जपेच्चार्घ्यान्वितम् ॥
हृदि चिच्चिन्तयेत् पूर्व्वं प्रधानं तस्य चोपरि ।
नमो ब्रह्मणया सर्व्वं मङ्गलत्रितयं क्रमात् ॥
ब्रह्मरन्ध्रान्वितं तस्मिन् पुरुषं जीवसंज्ञितम् ।
तस्योपरि गुणैश्वर्य्यमहत्तत्त्वं सरोरुहम् ॥
ज्ञानन्तु कर्णिका तत्र विज्ञानं केसरं स्मृतम् ।
वैराग्यं नालं तत्कन्दो वैष्णवो धर्म्म उत्तमः ॥
कर्णिकायां स्थितं पद्मं जीवपद्मिनीपतिं विभुम् ।
ध्यायेदुरसि संयुक्तमोङ्कारं मुक्तिसाधकम् ॥
अकारश्चक्षि च पुरुषस्थितो मात्राः प्रकीर्त्तिताः ।
अर्द्धमात्रा परं ब्रह्म श्रेयोऽध्यात्मविदुत्तमैः ॥
ध्यायन् यदि त्यजेत् प्राणान् याति ब्रह्मण्य-
सैत्रिकम् ।

ब्रह्मण्यः

हरिं संस्थाप्य देहेऽत्र ध्यायन् योगी च
तुष्टिभाक् ॥
आत्मानमात्मना वेत्ति पश्यन्ति ध्यानचक्षुषः ।
सांख्यबुद्ध्या तथैवान्ये योगिनान्ये तु योगिनः ॥
ब्रह्मप्रकाशकं ज्ञानं भवबन्धविभेदकम् ।
तत्रैकचित्ततायोगी तुष्टिदो नात्र संशयः ॥
जितेन्द्रियात्मनःकर्त्ता ज्ञानवान्नो हि यो भवेत् ।
स तुष्टः कथ्यते योगी परमात्मन्यवस्थितः ॥
आसनस्थानविधयो न योगस्य प्रसाधकाः ।
चित्तस्थजनकाः सर्व्वे विकाराः परिकीर्त्तिताः ॥
शिशुपालः सिद्धिमागात् स्वरूपाभ्यासगौरवात् ।
आश्रमाः सर्व्व एवेह पूर्व्वराजे परे तथा ॥
योगाभ्यासं प्रकुर्व्वन्तः पश्यन्त्यात्मानमात्मना ।
सर्व्वभूतेषु कारुण्यं विद्वेषं विषयेषु च ॥
गुणग्रिन्नोदरादिश्च कुर्व्वन् योगी विमुच्यते ।
इन्द्रियेरिन्द्रियार्थांस्तु न जानाति नरो यदा ॥
काष्ठवत् ब्रह्मसंलीनो योगयुक्तस्तदा भवेत् ॥
सर्व्वे वर्णाः स्त्रियः सर्व्वाः स्नात्वा पापानि
भक्षणात् ।
ध्यानाग्निनामलाः सन्तो लभन्ते परमां गतिम् ।
मथनात् दृश्यते ह्यग्निस्तद्वत् ध्यानेन वै हरिः ॥
ब्रह्मात्मनोर्यदैकत्वं स योगश्चोत्तमोत्तमः ॥
वाङ्मनोदृष्टयेर्मुक्तिर्न नाम्नःस्यैः स्याद्दृयमादिभिः ।
सांख्यज्ञानेन योगेन वेदान्तश्रवणेन च ।
प्रत्यक्षतात्मनो या हि सा तुष्टिरभिधीयते ॥
अनात्मन्यात्मरूपत्वमसतः सत्स्वरूपता ।
दुःखाभावे तथा सौख्यं माया विद्याधिना-
ग्निनी ॥"

इति गारुडे ब्रह्मज्ञाने २४० अध्यायः ॥

ब्रह्मज्ञानी, [न्], (ब्रह्मज्ञानं विद्यतेऽस्य । ब्रह्मज्ञान + इन् ।) ब्रह्मज्ञानविशिष्टः । यथा,—
"कुशूलाकुशूलाद्यतिरहितः समदर्शकः ।
लिङ्गाश्रमपरित्यागी ब्रह्मज्ञानी निगद्यते ॥"

इति प्रबुद्धानन्ददीपिका ॥

तेनापि ब्रह्मभक्तिः कर्त्तव्या । यथा,—
ब्रह्मानन्देन पूर्णोऽहं तेनानन्देन पूर्णधीः ।
तथापि मूढ्यमात्मानं मन्ये ब्रह्मरतिं विना ॥"

इति पाद्मे पातालखण्डे जाबालिं प्रति ब्रह्मविद्यावचनम् ॥

ब्रह्मण्यः, पुं, (ब्रह्मणे हितः । ब्रह्मन् + "खलयवमाषतिलवृषब्रह्मणश्च ।" ५ । १ । ७ । इति यत् ।
"येषाभावकर्म्मणोः ।" ६ । ४ । १६८ । इत्यनुप्रहात्वा ।) विष्णुः । यथा, महाभारते १३ । १४८ । ८१ ।
"ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥"

अपि च ।
"ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥"

इत्याह्निकचन्द्रिका ॥

ब्रह्मण्यदेवतः । इत्यमरः । २ । ४ । ४१ ॥ सुब्रह्मण्यम् । तूलतः । इति राजनिर्घण्टः ॥

ब्रह्मद्

ब्रह्मेश्वरः । (स्त्री । दुर्गा । यथा महाभारते ६ । २२ । २६ ।
"वैश्वानरमहापुण्ये ब्रह्मद्ये ब्रह्मवेदनि ।
जम्बूकटकचैत्येषु नित्यं सन्निहितालये ॥")

ब्रह्मणि साधौ त्रि । इति मेदिनी । दे, ६६ ॥

ब्रह्मण्यदेवः, पुं, (ब्रह्मण्यो देवः ।) श्रीकृष्णः । यथा,—
"नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥"

इति नारदीयपुराणम् ॥

(यथा च भागवते । ७ । २१ । ६७ ।
"ब्रह्मण्यदेवः पुरुषः पुरातनो
नित्यं हरिर्यच्चरणाभिवन्दनात् ॥")

ब्रह्मतालः, पुं, चतुर्मुखतालः । स तु, द्रुततालात्मकः । तत्र ७ मात्राः । मात्रा तु, क च ट त पु इति प्रत्याहारानुसारेणकालः । सैव लघुमात्रा । तद्दर्द्धं द्रुतमात्रा । तत्सप्ते ७ लघवः ६ द्रुताः । ० । ०० । ००० । यथा,—
"चतुर्मुखाभिधे ताले जगत्तानन्तरं श्रुतः ॥"

इति सङ्गीतदामोदरः ॥

ब्रह्मतीर्थं, क्ली, (ब्रह्मणस्तीर्थम् ।) पुष्करतीर्थम् । इति राजनिर्घण्टः ॥ पुष्करतीर्थञ्च ॥ (तत्र स्नानफलम् । यथा, महाभारते । ३ । ८३ । १०५ ।
"ततो गच्छेत राजेन्द्र ! ब्रह्मणस्तीर्थमुत्तमम् ।
तत्र वर्णावरः स्नात्वा ब्राह्मण्यं लभते नरः ।
ब्राह्मणश्च विशुद्धात्मा गच्छेत परमां गतिम् ॥")

ब्रह्मत्वं, क्ली, ब्रह्मणो भावः । ("ब्रह्मणस्त्वः ।" ५ । १ । १३६ । इति त्वः ।) तत्पर्य्यायः । ब्रह्मभूयम् २ ब्रह्मसायुज्यम् ३ । इत्यमरः । २ । ७ । ५२ । ब्रह्मसापूज्यम् ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । ५७ । ६० ।
"ब्रह्मत्वममरैर्गम्यं देवत्वं मरुतस्तथा ॥")

ब्रह्मदण्डः, पुं, (ब्रह्मणो ब्राह्मणस्य दण्डः सिद्धयर्थः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥ धर्म्मशास्त्रस्य सिद्धयर्थः । यथा,—
"धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम् ।
एकेन ब्रह्मदण्डेन सर्व्वा निहता मम ॥"

इति रामायणे विश्वामित्रवाक्यम् ॥

(ब्रह्मणो ब्राह्मणस्य प्रापकरूपो दण्डः ।) ब्रह्मप्राप्यः । यथा, —
"ब्रह्मदण्डहता ये च विद्युदग्निहताश्च ये ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥"

इति तिथ्यादितत्त्वम् ॥

(अयं हि राजधर्म्मे प्रभुणाप्युपायः । यदुक्तं महाभारते । २ । ५ । २९६ ।
"कचिदस्यपि वर्म्माणि ब्रह्मदण्डश्च तैरघ ! ।
विषयोगाश्च सर्व्वे विहिताः प्रभुणाप्युत ॥")

ब्रह्मदण्डी, [न्], (ब्रह्मणे ब्रह्मोपासनार्थं दण्डो यस्यासौ दण्डः ।) सन्न्यासपरिग्रहः । तत्पर्य्यायः । अवधूती २ अक्षपथधनका ३ । अस्या गुणाः । कटुत्वम् । उष्णत्वम् । कफशोषादिनाशकत्वञ्च ।

इति राजनिर्घण्टः ॥ (यथा भारते १८६ अध्याये ।
"ब्रह्मदत्तो तु पुत्रेण जाते पाणे पतीकरा ॥")
ब्रह्मदत्तः, पुं, इक्ष्वाकुवंशप्रभवराजविशेषः । तत्पर्य्यायः । ब्रह्मकुलः २ । इति हेमचन्द्रः । ३ । ३५८ ॥ (यथा महाभारते । २ । ८ । २० ।
"ब्रह्मदत्तस्त्रिजनैव राजोपरिचरस्तथा ॥"
स्वायम्भुवात्तो भीपपुत्रः । यथा, भागवते । ६ । २१ । २५ ।
पारक्ष्य तनयो भीपस्तस्य पुत्रशतं त्वभूत् ।
स लब्ध्वा मुक्तकन्यायां ब्रह्मदत्तमजीजनत् ॥"
ब्रह्मा दत्त इति विग्रहे वाक्यलिङ्गः । यथा, रामायणे । ३ । १८ । ३८ ।
"अमोघा इवयज्ञेमे ब्रह्मदत्ता: सुतेजसः ।
दत्ता मह्यं महेन्द्रेण तूणी चाक्षयसायकौ ॥")
ब्रह्मदर्भा, स्त्री, (ब्रह्मणे हितो दर्भो यस्याः ।) यमानिका । इत्यमरः । २ । ४ । १४५ ॥ (यथास्याः पर्य्यायः ।
"यमानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका ।
सैवोक्ता दीप्यका दीप्या तथा स्यादृषवसा कृया ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
ब्रह्मदाय, क्ली, (ब्रह्मणो ब्राह्मणस्य हितकरो दायः ।) खगामन्यानात्यत्याकारदत्तविशेषः ॥ तत्पर्य्यायः । मूद: २ पूष: ३ क्रमुक: ४ ब्रह्मण्य: ५ तूलम् ६ । इत्यमरः । २ । ७ । ४१ ॥ पलाशिकम् ७ । इति वाचस्पतिः ॥ तलम् ८ । इति भरतः ॥ पूग: ९ पृथ: १० । इति शब्दरत्नावली ॥ (क्रतुकार्य्ये पर्य्यायो यथा,
"तूल: स्थूलश्च पूगश्च क्रतुको ब्रह्मदारु च ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
ब्रह्मदेव:, पुं, (ब्रह्मा ब्राह्मणरूपी देव: ।) प्रेतयोनिप्राप्तब्राह्मण: । इत्येतिहास्म ॥
ब्रह्मनालं, क्ली, (ब्रह्मणो ब्रह्मलोकप्राप्तेर्नालमिव ।) काञ्च्यां पञ्चतीर्थस्य पूर्वभागे पितामहेश्वरलिङ्गस्याधस्तीर्थविशेषः यथा,—
"पितामहेश्वरं लिङ्गं ब्रह्मनालोपरिस्थितम् ।
पूजयित्वा नरो भक्त्या ब्रह्मलोकमवाप्नुयात् ॥
ब्रह्मस्रोत:समीपे तु कृतं कर्म शुभाशुभम् ।
नरो मनसतामेति शुभमेव ततश्चरेत् ॥
अनल्पमपि यत् कर्म कृतमत्र शुभाशुभम् ।
प्रलयेऽपि न तस्यात्र प्रलयो मुनिसत्तम ! ॥
नाभितीर्थमिदं प्रोक्तं नाभीभूतं यत: क्षिते: ।
अपि ब्रह्माण्डगोलस्य नाभिरेषा शुभोदया ॥
सा माध्यकर्षिकेकीर्यं नाभिगाम्भीर्यभूमिका ।
ब्रह्माण्डगोलकं सर्व्वं यस्यामेति लयोदयम् ॥
ब्रह्मनालं परं तीर्थं क्षितौ लोकेषु विश्रुतम् ।
तत्र स्नात्वा नर: स्नात: कोटियज्ञफलं हरेत् ॥
ब्रह्मनाले पतेद्येषामपि कीटसमाकृतम् ॥
ब्राह्मणमक्षयान्तस्ते न विशन्ति कदाचन ॥"
इति स्कन्दपुराणे काशीखण्डे विष्णुमाधवाभिविष्णुसंवादे वैष्णवतीर्थमाहात्म्ये नाम ६१ अः ॥

ब्रह्मनिर्व्वाणं, क्ली, (ब्रह्मणि परब्रह्मे निर्व्वाणं लय:।) ब्रह्मणि निर्वृत्ति: । यथा, श्रीभगवद्गीतायाम् । २ । ७२ ।
"एषा ब्राह्मी स्थिति: पार्थ ! नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्व्वाणमृच्छति ॥"
ब्रह्मपद्मं, क्ली, (ब्रह्मवल्लदाख्यया प्रसिद्धस्य दृषस्य पद्मम् । पलाण्डुपद्मम् । यथा,—
"भोजनं ब्रह्मपद्मेषु कथयालोचनं हरे: ।
दर्शनं वेणुवादनाच्च महापातकनाशनम् ॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये ११८अः ॥
ब्रह्मपर्णी, स्त्री, (ब्रह्मेव विस्तीर्णानि आमूलं स्थितानि पर्णानि यस्या: ।) दृक्षपर्णी । इति राजनिर्घण्टः ॥
ब्रह्मपवित्र:, पुं, (ब्रह्मणि वेदोक्तकर्म्मणि पवित्र: ।) कुशः । इति राजनिर्घण्टः ॥
ब्रह्मपादप:, पुं, (ब्रह्मा तदाख्यया प्रसिद्ध: पादप:।) पलाण्डुवृक्ष: । इति हेमचन्द्रः । ४ । २०२ ॥
ब्रह्मपुत्र:, पुं, विषभेद: । इत्यमरः । १ । ८ । १० ॥ तस्य लक्षणं यथा,—
"वर्त्तुल: कपिलो य: स्यात्तथा भवति सारक: ।
ब्रह्मपुत्र: स विज्ञेयो जायते मलयाचले ॥"
इति भावप्रकाशः ॥
(पर्य्यायोऽस्य यथा,
"काकोली गरल: स्तेको वत्सनाभ: प्रदीपन: ।
प्रौक्तिकेयो ब्रह्मपुत्रो विषं स्याद्गरलो विष:॥"
इति वैद्यकरत्नमालायाम् ॥
ब्रह्मण: पुत्र: । सत्यम् । धर्म्म: । मरीच्यादि: ॥ मनु: । यथा मार्कण्डेये । ८४ । ११ ।
"मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमत: ।
सुखासीना निरुद्वाक्ष त्रि:प्रकारा: सुरा: स्मृता: ॥"
नारद: । वशिष्ठ: ॥) शैवभेद: । नदभेद: । इति मेदिनी: । रे, २८५ ॥ ग्रीवस्य पर्य्यायः । अमोघाबन्धन: २ लौहित्य: ३ लोहित: ४ । इति शब्दरत्नावली ॥ * ॥ अस्य नदस्योत्पत्तिमाहात्म्यं यथा,—
सगर उवाच ।
"अमोघायां कथं जज्ञे लौहित्यो ब्रह्मण: सुत: ।
कथं शान्तनुभार्य्यायां रेत: स कमलासव: ॥
पारक्ष्यैणेयपुत्रो वा कथं जज्ञे पितामहात् ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व द्विजोत्तम ! ॥
और्व्व उवाच ।
शृणु त्वं नृपशार्दूल ! कथयामि महत्तरम् ।
आख्यानं ब्रह्मपुत्रस्य लौहित्यस्य महात्मन: ॥
हरिवर्षे महावर्षे शान्तनुर्नाम नामत: ।
मुनिराजीक्षणागामी ज्ञानवान् सुतपोधन: ॥
तस्य भार्य्या महाभागा अमोघाख्या महासती ।
हिरण्यगर्भस्य सुतेस्तुहृद्दाश्रमोद्भवा ॥
तया सार्द्धं स कैलासमर्य्यादापर्व्वतेऽवसत् ।
लौहित्याख्यस्य सरसस्तीरे वै मत्तमादने ॥
एकदा स तपोनिष्ठो निजपुण्याग्निगोचरे ।

जगाम वनमध्यस्तु चित्तन् बहुफलानि च ॥
तस्मिन्नवसरे ब्रह्मा सर्व्वलोकपितामह: ।
तत्राजगाम यत्रास्ति अमोघा शान्तनो: प्रिया॥
तां दृष्ट्वा देवगर्भाभां युवतीमतिसुन्दरीम् ।
मोहितो मदनेनासु तयाभूद्भूधितेन्द्रिय: ॥
उद्दीरितेन्द्रियो भूत्वा जिघृक्षुस्तां महाबलीम् ।
अथाधावत्तदा ब्रह्मा सत्वरो मदनार्दित: ॥
धावमानं विधातारं दृष्ट्वामोघा महाबला ।
मैवं मैवमिति प्रोक्ता पर्णशालां जगौयत ॥
इदमोवाच धातारममोघा कुपिता तदा ।
पर्णशालान्तरगता द्वारमाश्रित्य तत्क्षणात् ॥
अकार्य्यं न मया कार्य्यं मुनिपत्न्या विगर्हितम् ।
बलात् प्रसह्य चास्यं तत्तया त्वाच शुभाव्यहम् ॥
अमोघया चैवमुक्ते विधातुश्च तदा नृप ! ।
रेतश्चस्कन्द च तदैवाश्रमे शान्तनोर्मुने: ॥
च्युते रेतसि धातापि हंसयानं समाश्रित: ।
लज्जयातिपरीतात्मा द्रुतं वै स्वाश्रमं ययौ ॥*॥
गते वेधसि शान्तनुर्निजमाश्रममागत: ।
आगत्य दृष्ट्वा हंसानां पदचौभं तथा भुवि ॥
तेजश्च पतितं भूमौ विधातुर्व्वजनोपमम् ।
अमोघां परिपप्रच्छ पर्णशालान्तरस्थिताम् ॥
किमेतदत्र सुभगे ! प्रवृत्तं दृश्यते तु यत् ।
पक्षिणाञ्च पदचौभस्तेजश्चैव कौङ्गुम् ॥
सा तस्य वचनं श्रुत्वा शान्तनुं मुनिसत्तमम् ।
अमर्षितेव व्यगदद्राकुला विकलानना ॥
हंसयुक्तस्यन्दनेन कोऽप्यागच्च चतुर्मुख: ।
कमण्डलुकरो भीरु रतिं मां समयाचत ॥
ततो मया भर्त्सित: स कुटवाक्यरलीनया ।
प्रधाव्य तेज: स यातो मया शापभयार्दित: ॥
कुरु तत्र प्रतीकारं यदि मुक्तोऽपि शान्तनो ! ।
न हि मां धर्षणां सोढुं कश्चित् मुक्तोऽपि जीवति ॥
स तस्या वचनं श्रुत्वा स्वयं ब्रह्मा समागत: ।
इति निश्चित्य मनसा तत्र ध्यानपरोऽभवत् ॥
दिव्यज्ञानेन स ज्ञात्वा देवकार्य्यमुपस्थितम् ।
तीर्थावतारणञ्चापि हिताय जगतां मुनि: ।
ज्ञात्वोदकं चिन्तयित्वा स्वभार्य्यामिदमब्रवीत् ॥
इदं तेजो ब्रह्मणस्तं पिबामोघे ! ममाज्ञया ।
हिताय सर्व्वजगतां देवकार्य्यार्थसिद्धये ॥
भवत्या निकटं ब्रह्मा स्वयमेव समागत: ।
त्वामप्राप्य स महात्मा आवयो: स समर्थ्य च ।
गतो निजाश्रमं तत्तं कर्त्तुमर्हसि मद्वच: ॥
तत् श्रुत्वा शान्तनोर्वाक्यममोघातीव लज्जिता
शान्तयन्तीव तं प्राह पतिं भक्त्या महाबलौ ॥
ब्राह्मणस्य तेजो घास्यामि न चैतत् विमनस्कता
अवश्यं यदि कर्त्तव्यं पीत्वा तं मयि चोत्सृज ॥
ततस्तस्या वच: श्रुत्वा युक्तं तच्च शान्तनु: ।
स्वयं पीत्वा च तत्तेजस्तस्या गर्भे व्यसेचयेत् ॥
संक्रामितैः शान्तनुना तेजोभिर्ब्रह्मण: सती ।
गर्भं दधावामोघाख्या हिताय जगतां तत: ॥
तस्यां काले तु संप्राप्ते जज्ञातो ब्रह्मसञ्चय: ।
तस्मिंश्चे तनयश्चापि नीलवाहा: किरीटधृक् ॥

रत्नमालासमायुक्ता रक्तगौरश्च ब्रह्मवत् ।
चतुर्भुजः पद्मविद्यावरशक्तिधरस्तथा ।
शिखिमारशिरस्थश्च तुल्यकायो जलोत्करैः ॥
तं आनश्च तथाभूतं ब्राह्मणुर्लोकब्राह्मणः ।
चतुर्णां पर्वतानाञ्च मध्यदेशे न्यवेशयत् ॥
कैलासस्योत्तरे पार्श्वे दक्षिणे गन्धमादनः ।
आदधिः पश्चिमे मेरोः पूर्वे सम्भवैकाश्रयः ॥
तेषां मध्ये स्वयं कृत्वा पर्वतानां विधेः सुतः ।
ब्रह्मात्मिवदृषे नित्यं ग्रहदीव निशाकरः ॥
तं नोयमध्यगं पुत्रमासाद्य दुहिता स्वयम् ।
क्रमतस्तस्य संस्कारानकरोद्देहशुद्धये ॥
अथ काले बहुतिथे यतीते ब्रह्मणः सुतः ।
नोयराशिस्वरूपेण बहुधे पद्म योजनान् ॥
तस्मिन् देवाः पयुः सर्वदुर्दितीय इव सागरे ।
प्रीतामलजले कुन्दे देवब्राह्मरसां गवैः ॥
तस्मिन्नवसरे रामो जामदग्न्यः प्रतापवान् ।
चक्रे मातृवधं घोरमनृतं पितुराज्ञया ॥
तस्य पापस्य मोक्षाय स्वपितुस्त्रीपदेशतः ।
स जगाम महाकुण्डं ब्रह्मास्यं स्नातुमिच्छया ॥
तत्र स्नात्वा च पीत्वा च मातृहत्यां व्यपानयत् ।
वीर्यं परशुना छित्वा तत्र चामवतारयत् ॥*॥
अपि च ।
ब्रह्मकुण्डात् स्रुतः सोऽथ कासारे लोहितार्ण-
वे ।
कैलासोपत्यकायान्तु व्यपतद्ब्रह्मणः सुतः ॥
तस्यापि सरसस्तीरं समुत्थाय महाबलः ।
कुठारेण दिशं पूर्वामनयद्ब्रह्मजः सुतम् ॥
ततोऽपरस्यापि गिरिं हैमशृङ्गं विभिद्य च ।
कामरूपाख्यं पीठमवाहयद्भुं हरिः ॥
तस्य नाम विधिश्चक्रे स्वयं लोहितगङ्गकम् ।
लौहित्यात् सरसो जातो लौहित्याख्यस्ततोऽ-
भवत् ॥
स कामरूपमखिलं पीठमाप्लाव्य वारिणा ।
शोषयन् सर्वतीर्थानि दक्षिणं याति सागरम् ॥
प्रागेव दिव्ययुगानां स ब्रह्मा ब्रह्मणः सुतः ।
पुनः प्रयाति लौहित्ये स्नात्वा द्वादशयोजनम् ॥*॥
चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नाति लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रन्तु सकलं मासं शुचिः प्रयतमानसः ।
लौहित्यतोये यः स्नाति स कैवल्यमवाप्नुयात् ॥"

इति कालिकापुराणे ८४ । ८५ अध्यायः ॥

अन्यच्च ।

मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीम् ।
पित्रेदद्योकलतिकाः खादयाल्लौहित्यवारिणि ॥
पुनर्वसौ हरौ जन्मे चैत्रे मासि सिताष्टमीम् ।
लौहित्ये विरजे स्नायात् सर्वपापैः प्रमुच्यते ॥*॥
स्नानमन्त्रो यथा,—
"पृथिव्यां यानि तीर्थानि सरितः सागरादयः ।
सर्वे लौहित्यमायान्ति चैत्रे मासि सिताष्टमीम् ॥
ब्रह्मपुत्र महाभाग ब्राह्मणैः कुलनन्दन ! ।
अमोघागमसम्भूत पापं लौहित्य मे हर ॥"

इति तिथ्यादितत्त्वधृतब्रह्मपुराणवचनम् ॥

ब्रह्मपुत्री, स्त्री, (ब्रह्मणः पुत्री कन्या ।) सरस्वती नदी । इति हेमचन्द्रः । ४ । १५१ ॥ वाराहीकन्दः । इति राजनिर्घण्टः ॥

ब्रह्मपुरी, स्त्री, (ब्रह्मणः पुरी ।) विधातुर्धाम । यथा । भूलोकान्तरीक्षस्वर्गलोकादि ब्रह्माण्डोदरवर्त्ति च ब्रह्मपुरीनामकं त्रैलोक्यस्वरूपं मम हृदयमध्ये वाह्ये च सूर्य्यमण्डलमध्यवर्त्ति तेजसा स एकीभूतं ज्योतिरहमिति चिन्तयन् जपं कुर्य्यात् । इति गायत्रीव्याख्या ॥ * ॥ काशी । यथा,—

"विद्याप्रबोधोदयजन्मभूमि-
र्वाराणसी ब्रह्मपुरी दुरत्यया ॥"

इति प्रबोधचन्द्रोदयनाटकम् ॥

ब्रह्मबन्धुः, पुं. (ब्रह्मणो बन्धुरिव ।) अधिक्षेपः । निन्दितब्राह्मणः । निर्द्वेषः । अयाज्यनामक ब्राह्मणः । इत्यमरः । २ । ७ । १०३ ॥ तथा हि । अधिक्षेपे निन्दायां गम्ये अधिक्षेप्यो ब्रह्मबन्धुः । यथा ब्रह्मबन्धो ! किमेतत्ते इति । अधिक्षिप्यतेऽसौ अधिक्षेपोऽधिक्षेप्यः कर्म्मणि घञ् वा । ब्रह्मैव बन्धुरस्य नास्य । ब्रह्मकर्म्माभावात् निन्दा अधिक्षेपे समासोऽभिधानात् । ब्रह्मबन्धुः निर्द्वेषो यस्य देवाग्नाम न श्रूयते च ब्रह्मबन्धुरितिनिर्द्वेष्यते इत्यर्थः । स्त्रियां ("ऊङुतः ।" ४ । १ । ६६ । इति ऊङ् ।) ब्रह्मबन्धूः । ब्रह्मबन्धुर्ब्राह्मणजातिविशेषे च । ब्राह्मणजातिविशेषे निर्द्वेषो ब्रह्मबन्धुरधिक्षेपे इति बोपालितः । इति भरतः ॥*॥ (यथा, मार्कण्डेये । ७५ । ६० ।

"ब्रह्मबन्धोः सुता न त्वं बाले ! नैव तपस्विनः ।
सुता त्वं मम यो देवान् कर्त्तुमन्यान् समुद्यतः
सदे ॥")

तस्य दैहिकवधनिषेधो । यथा, भागवते १ स्कन्धे ।

"वपनं द्रविणादानं स्थानान्निर्यापणन्तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥"

ब्रह्मभूतिः, स्त्री, (ब्रह्मणो भूतिरङ्गसम्पदिव भूतिर्यस्याः ।) सन्ध्या । इति शब्दरत्नावली ॥ (ब्रह्मणो भूतिरुत्पत्तिर्यस्या इति विग्रहे वाच्यलिङ्गः ॥)

ब्रह्मभूमिजा, स्त्री, (ब्रह्मभूमेर्जायते या । ब्रह्मभूमि + जन + ड । टाप्) सिंहली । इति राजनिर्घण्टः ॥

ब्रह्मभूयं, क्ली, (ब्रह्मणो भावः । ब्रह्म + भू + "सुपो भावे ।" ४ । १ । १०७ । इति क्यप् ।) ब्रह्मत्वम् । इत्यमरः । २ । ७ । ५२ ॥ (यथा मनुः । १२ । १०२ ।

"वेदाभ्यासार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥"

"अस्मिन्नेव लोके तिष्ठन् ब्रह्मभूयाय ब्रह्मत्वाय कल्पते ।" इति तट्टीकायां कुल्लूकभट्टः ॥ मोक्षः । यथा गीतायाम् । १४ । २६ ।

"मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥"

"ब्रह्मभूयाय ब्रह्मभावाय मोक्षावाप्तये समर्थो भवति ।" इति तट्टीकायां स्वामी ॥)

ब्रह्ममर्ष्यभ्रत्, पुं, (ब्रह्मणो मूर्द्धभ्रत् शिरोमणिरिव ।) शिवः । इति वटुकभैरवस्य पञ्चाशदधिकसहस्रनामाख्यस्तोत्रम् ॥

ब्रह्ममेखलः, पुं. (ब्राह्मणां ब्रह्मचारिणां मेखला पुंवद्भावः ।) सुङ्गः । इति केचित् ॥

ब्रह्मयज्ञः, पुं, (ब्रह्मणो ब्रह्मणे वा यज्ञः ।) विधिना वेदस्याध्ययनम् । शिष्याणामध्यापनञ्च । इत्यमरभरतौ ॥ यथा, मनौ । ३ । ७० ।

"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतोनृयज्ञोऽतिथिपूजनम् ॥"

ब्रह्मयष्टिः, स्त्री. (ब्रह्मणो यष्टिरिव ।) भार्गी । इति शब्दरत्नावली ॥ (इक्ष्वाकुवीथ्यः । यथा, गारुडे १९२ अध्याये ।

"ब्रह्मयष्टिफलं पिष्टं वारिणा तैल सेवितः ।
तैल पृष्टं रक्तदोषः प्रणश्यति न संशयः ॥"

ब्रह्मणो ब्राह्मणस्य यष्टिर्लगुडः । विप्रयष्टिः ॥)

ब्रह्मयोनिः, पुं, (ब्रह्मणो योनिरुत्पत्तिस्थानम् ।) ब्रह्मगिरिः । इति शब्दरत्नावली ॥ (ब्रह्मप्राप्तिकारणब्रह्मध्यानम् । यथा मनुः । १० । ७१ ।

"ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्म्मण्यवस्थिताः ।
ते सम्यगुपजीवेयुः षट् कर्म्माणि यथाक्रमम् ॥"

"ये ब्राह्मणा ब्रह्मप्राप्तिकारणब्रह्मध्याननिष्ठाः स्वकर्म्मानुष्ठाननिरताश्च ते षट्कर्म्माणि वक्ष्यमाणान्यध्यापनादीनि क्रमेण सम्यगनुतिष्ठेयुः ॥"

इति तट्टीकायां कुल्लूकभट्टः ॥ अपरस्य ब्रह्मणो योनिरुत्पत्तिकारणम् । यद्वा ब्रह्म सत् योनिः सर्व्वेषामुत्पत्तिकारकं ब्रह्म । यथा, मुण्डकोपनिषदि । ३ । १ । ३ ॥

"यदा पश्यः पश्यते रुक्मवर्णम्
कर्त्तारमीशं पुरुषं ब्रह्मयोनिम् ॥"

तीर्थविशेषः । यथा महाभारते । ३ । ८३ । १३१ ।

"ब्रह्मयोनिं समासाद्य शुचिः प्रयतमानसः ।
तत्र स्नात्वा नरव्याघ्र ! ब्रह्मलोकं प्रपद्यते ॥"

ब्रह्मा योनिरुत्पत्तिकारणं यस्य इति विग्रहे वाच्यलिङ्गः । यथा हरौ । १ । ६४ ।

"त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना ।
सानुबन्धा कथं न स्युः सम्यदो मे निरापदः ॥"

यथा च मार्कण्डेये । २३ । ३० ।

जगद्धात्रीमजं देवीं मारिराधयिषुः शुभाम् ।
स्तोत्रे प्रवव्रे शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

ब्रह्मयोनी, स्त्री, (ब्रह्मा योनिरुत्पत्तिकारणं यस्याः । स्त्रियां पक्षे ङीप् ।) कुरुक्षेत्रे सरस्वतीतीरे पृथूदकनिकटे तीर्थविशेषः । तत्र ब्रह्मणा चत्वारो वर्णाः सृष्टाः । यथा,—

"सरस्वत्यास्तु तीरे यः संध्योदासनमाचरेत् ।
पृथूदके जपन्परो नैनं क्षो मरणं जयेत् ॥
तत्रैव ब्रह्मयोन्यस्ति ब्रह्मणा यत्र निर्मिताः ।
पृथूदकं समासाद्य सरस्वत्याश्च सेवितः ॥
चतुर्वर्णश्च यत्रार्यमार्गस्थावसरोऽभवत् ।
तस्माभिधायतः सृष्टिर्ब्रह्मणो ब्रह्मचक्रिणः ॥

सुखानी ब्राह्मणा जाता बाहुभ्यां क्षत्रिया-
स्तथा ।
ऊरुभ्यां वैश्यजातीया: पद्भ्यां शूद्राश्चतोऽभवन् ॥
चातुर्व्यर्ण्यं ततो दृष्ट्वा आश्रमस्थान् सुतांस्तत: ।
एवं परिहितं लोकं ब्रह्मयोनीतिसंज्ञितम् ॥
तत्र जाता सुखिकाम: पुनर्योनिं न पश्यति ।"
इति वामनपुराणे ६८ अध्याय: ॥

ब्रह्मरन्ध्रं, क्ली, (ब्रह्मण: परमात्मन: अधिष्ठानाय-
रन्ध्रं आकाश: यद्वा, ब्रह्मणे ब्रह्मप्राप्तये रन्ध्रम् ।
एतन्मूलेन प्राणोत्क्रमणे ब्रह्मलोकप्राप्तिरस्य
तथात्वम् ।) ब्रह्मसाक्षात्कार: । ब्रह्मलाभ इति भाषा ।
यथा । ॐ नम: ब्रह्मरन्ध्रे । इति तन्त्रसार: ॥
अपि च । ब्रह्मरन्ध्रसरसीरुहोदरे इत्यादि
सुखपादुकाक्षोभम् । (यथा च षट्चक्र-
प्रदीपिकायाम् । ३ । १६ ।
"ब्रह्मा सुखुम्नामेदं ज्ञात्वा वायुश्च मध्यगम् ।
स्थित्वा सदैव सुखुम्ने ब्रह्मरन्ध्रे निरोधयेत् ॥")

ब्रह्मराक्ष:, पुं, (राक्षेरयं राक्ष: । ब्रह्मणो राक्ष: ।)
ब्राह्मणराक्षस: । इति श्रीधरस्वामी ॥ यथा,—
"ब्रह्मराक्ष उपाकृत्ते वासुदेवानुमोदिना: ।
अनिच्छन्तो ययुर्मोक्षं स्वगृहान् भगवत्प्रिया: ॥"
इति श्रीभागवते । १० । ३३ । ४८ ॥

ब्रह्मराजि:, पुं, ब्राह्मणश्रेष्ठ: । इति हेमचन्द्र: ॥
ब्रह्मस्वानं ददाति ददाति य: । ब्रह्मशब्दात्
राधातोर्नान्दीति क्विप्प्रत्ययनिष्पन्नोऽयम् । इति
तट्टीका ॥ ब्रह्मणो निष्पाया स्त्री । सा देव-
सहस्रयुगेन भवति । इति पुराणम् ॥ (मनुष्य-
कालपरिमाणतो ब्रह्मणो रात्रिपरिमाणमुच्यते ।
नैमेषपरिमाणकालो निमेष: । अष्टादशनिमे-
षास्तु काष्ठा । त्रिंशत् काष्ठास्तु कला । त्रिंशत्
कलास्तु मुहूर्त: । तथास्तु द्वादश मिलिता एको
सुहूर्त: ।
"तास्तु त्रिंशत्कलास्तु सुहूर्तो द्वादशा-
स्त्रियाम् ॥"
इत्यमर: । १ । ४ । ११ ॥
मनुमते तु त्रिंशत्कला मिलिता एको सुहूर्त:
स्यात् यदुक्तं तत्रैव । १ । ६४ ।
"त्रिंशत्कला सुहूर्त: स्याद्दिवारात्रस्तु तावत: ॥"
ते त्रिंशत्सुहूर्ता एकोऽहोरात्र: । अहो-
रात्रास्तु पञ्चदशसंख्यका एक: पक्ष: । पक्षस्तु
शुक्लकृष्णभेदात् द्विविध: । तात्र्यासुभार्य्यां
पक्षाभ्यां मास: स्यात् । मासस्तु पित्र्ये रात्र्य-
हनी । कृष्णपक्षस्तु पितृणामह: शुक्लपक्षस्तु
तेषामरी । तद्भिर्मासैरयनं भवेत् । अयनन्तु
दक्षिणोत्तरभेदात् द्विविधम् । ताभ्यामयनाभ्यां
वत्सर: स्यात् । वत्सरस्तु देवे रात्र्यहनी ।
उत्तरायणं देवानामह: दक्षिणायनन्तु रात्रि: ।
मानुषाणां यत्कृतत्रेतायुगचतुष्टयं तदैव युगं
ज्ञेयम् । एवं देवयुगसहस्रेण ब्रह्मणोऽह:
देवयुगसहस्रेण च रात्रिर्भवति । तथा च
स्मृतौ । १ ७१ । श्लोकस्य टीकायां कुल्लूकभट्ट: ।
"विष्णुपुराणे मानुषचतुर्युगसहस्रेण ब्रह्मणो-
ऽहर्भवतीत्युक्त्वा तावत्येव रात्रिरित्युक्तम् ।
तथा च विष्णुपुराणम् ।
"ज्ञातं जेतादापरञ्च कलिश्चेति चतुर्युगम् ।
प्रोच्यते तत्सहस्रन्तु ब्रह्मणो दिवसो मुने ! ॥"
तथा च मनु: । १ । ६८-७१ ।
"ब्राह्मस्य तु क्षपाह्नस्य यत्प्रमाणं समासत: ।
एकैकशो युगानान्तु क्रमशस्तन्निबोधत ॥
चत्वार्याहु: सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविध: ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥
यदेतत्परिसंख्यातमादावेव चतुर्युगम् ।
एतद्द्वादशसाहस्रं देवानां युगमुच्यते ॥
दैविकानां युगानान्तु सहस्रं परिसंख्यया ।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च ॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदु: ।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जना: ॥"
"यदेतदिति । एतस्य श्लोकस्यादौ यदेतच्चातुर्युगं
चतुर्युगं परिगणितं एतद्देवानां युगमुच्यते ।
चतुर्युगशब्देन सन्ध्यासन्ध्यांशयोरप्राप्तिरूढ्या-
माह एतद्द्वादशसाहस्रमिति स्वार्थेऽण् । चतु-
र्युगैरेव द्वादशसहस्रसंख्यैर्दिव्यं युगमिति तु
मेधातिथेर्मतमो नादरणीय: मनुनानन्तरं दिव्य-
युगसहस्रेण ब्रह्मणोऽस्याप्यभिधानात् ॥" इति
तट्टीकायां कुल्लूकभट्ट: ॥)

ब्रह्मराक्षस:, पुं. (आदौ ब्रह्मा ब्राह्मण: पश्चात्
राक्षस: कुकर्म्मभि: राक्षसयोनिं गत: ।)
भूतविशेष: । यथा,—
"संयोगं प्रमितैर्गत्वा परस्त्रैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षस: ॥"
इति मानवे । १२ । ६० ॥
(स च यज्ञविघ्नकारी भूतयोनिगतत्वात् ।
यथा. रामायणे । १ । ११ । ७१ ।
"ब्रध्नोऽवाप्तमयं यज्ञो नाग्नक्लेन महीक्षिता ।
नचैवाश्रद्दधानेन न चाल्पदक्षिणेन च ॥
छिद्रं हि मृगयन्त्येव यज्ञघ्ना ब्रह्मराक्षसा: ॥")
महादेवस्य गणविशेष: । यथा,—
"डाकिनीर्जातुधानांश्च वेतालान् सविनायकान् ।
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्ष-
सान् ॥"
इति श्रीभागवते माध्यमुखे ६१ अध्याय: ॥
पारिभाषिकब्रह्मराक्षस: । यथा,—
"मद्यै: स्त्री कच्छपश्चैव वाजी वधिर एव च ।
मद्दोतार्थं न शृण्वन्ति पश्यैते ब्रह्मराक्षस: ॥"
इति अवहारप्रदीप: ॥

ब्रह्मरीति:, स्त्री, (ब्रह्मवर्त्मा रीति: ।) पित्तलभेद: ।
यथा, हेमचन्द्र: । ४ । २१४ ॥
"पित्तलारेऽथारकूट: कांसिलोहं सुवर्णकम् ।
हिरी रीरी च रीतिश्च पीतलोहं सुलोहकम् ॥
ब्राह्मी तु राज्ञी कांसिला ब्रह्मरीतिर्मनेश्वरी ॥"
राजरीति: । इति राजनिर्घण्टु: ॥ (तथाच:
पर्य्यायान्तरम् ।
"पित्तलञ्चारकूटं स्यात्कांसारीरीतिरेव च कथ्यते ।
राजरीतिर्मनोरीति: कांसिका पित्तलापि च ॥"
इति वैद्यकरत्नमालायाम् ।
ब्रह्मणो ब्राह्मणस्य रीतिश्च ॥)

ब्रह्मर्षि:, पुं, (ब्रह्मा ब्राह्मण: ऋषि: । यद्वा,
ब्रह्म वेदं परब्रह्म वा ऋषति वेत्ति इति । ब्रह्म-
ऋषिसुनिगण: । इति हेमचन्द्र: ॥ (यथा,
रामायणे । १ । ६३ । २०—२१ ।
"ब्रह्मवस्तु वच: श्रुत्वा विश्वामित्रस्तपोधन: ।
प्राञ्जलि: प्रणतो भूत्वा प्रत्युवाच पितामहम् ॥
ब्रह्मर्षित्वमनुप्राप्तं आर्जितैः कर्म्मभि: शुभै: ।
यदि मे भगवान्नाह ततोऽहं विजितेन्द्रिय: ॥"
तथा च महाभारते । १३ । १८ । ३७ ।
"ततो वैश्यवशोऽभैत्सं अहोबकमनिन्दितम् ।
विधिवत् कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥")

ब्रह्मर्षिदेश:, पुं, (ब्रह्मर्षीणां देश: वासयोग्य-
स्थानम् ।) कुरुक्षेत्रादिदेशचतुष्टयम् । यथा,
"कुरुक्षेत्रञ्च मत्स्याश्च पाञ्चाला: शूरसेनका: ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तर: ।
एतद्देशप्रसूतस्य सकाशादग्रजन्मन: ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवा: ॥
इति मानवे ।२ । १९-२०॥

ब्रह्मलोक:, (ब्रह्मणो लोको भुवनम् ।) ब्रह्मणो
भुवनम् । यथा,—
"सत्यस्तु सप्तमो लोको ह्यपुनर्भवकारिणाम् ।
ब्रह्मलोक: समाख्यातो ह्यप्रतीघातलक्षण: ॥"
इति देवीपुराणम् ॥
अपि च ।
"षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृत: ॥"
अस्य टीका । जनलोकापेक्षयैव षड्गुणेन
द्वादशको ह्युच्छ्रायेण तपोलोकानन्तरं सत्य-
लोक: । न तु तपोलोकात् षड्गुणेनेति मन्त-
व्यम् । तथासत्याश्चत्वारिंशद्गुणो ह्युच्छ्राय-
त्वेन ब्रह्मादेः तस्यावकाशाभावात् । सूर्य्याच-
न्द्रमसोरन्त: कोश: स्मृ: पञ्चविंशतिरिति
श्रुतेश्च । सत्यलोक एव कार्य्याभेदेन ब्रह्म-
धिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयम् । एवञ्च
भूतलादूर्द्धं पञ्चदशलक्षोत्तराण्ययोविंशतिकोट्यो
भवन्ति । सत्यलोकादूर्द्धञ्च पञ्चदशलक्षोनको-
टिद्वयादण्डकटाह इति ज्ञेयम् । अपुनर्मारका:
पुनर्जन्मशून्या: । इति विष्णुपुराणे । २ अं । ७ अ: ॥
(ब्रह्मैव लोक: । तुरीयब्रह्मस्वरूपम् । यदुक्तं
श्रुतिपथब्राह्मणे । १४ । ७ । १ । ३१ ।
"एषोऽस्य परमो लोक एषोऽस्य परम आनन्द
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुप-
जीवन्ति । स यो मनुष्याणां राद्ध: समृद्धो
भवति । अन्येषामधिपति: सर्व्वैर्मानुषकै:
कामै: सम्पन्नतम: स मनुष्याणां परम
आनन्द: । अथ ये शतं मनुष्याणामानन्दा: ।
स एक: पितॄणां चिरलोकानामानन्द: । अथ
ये शतं पितॄणां चिरलोकानामानन्दा: स एक

कर्म्मदेवानामानन्दः; ये कर्म्मणा देवत्वमभिसम्पद्यन्ते अथ ये घृतं कर्म्मदेवानामानन्दाः। स एक आजानदेवानामानन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं आजानदेवानामानन्दाः। स एको देवलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं देवलोक आनन्दाः। स एको गन्धर्वलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं गन्धर्वलोक आनन्दाः। स एकः प्रजापतिलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। अथ ये घृतं प्रजापतिलोक आनन्दाः। स एको ब्रह्मलोक आनन्दो यच्च श्रोत्रियोऽवृजिनोऽकामहतः। एषः ब्रह्मलोकः सम्राट्॥ शिवः यथा, महाभारते। १३। १७। १४२।

"निर्व्वाणं ज्ञानमेवेह ब्रह्मलोकः परागतिः॥")

ब्रह्मवद्यं, क्ली, (ब्रह्म वेदस्तस्य वदनम्। "वद सुपि क्यप् च।" ३। १। १०६। इति भावे यत्।) ब्रह्मणो वाक्यम्। इति त्यप्रकरणे मुग्धबोधटीकायां दुर्गादासः॥

ब्रह्मवद्या, स्त्री, (ब्रह्मणा वेदेन उद्यते या। "वदः सुपि क्यप् च।" ३। १। १०६। इति कर्म्मणि यत् स्त्रियां टाप्।) कथा। इति मुग्धबोधव्याकरणे त्यप्रकरणम्॥

ब्रह्मवर्चसं, क्ली, (ब्रह्मणो वेदस्य तपसो वा वर्चस्तेजः। "ब्रह्मक्षत्रिभ्यां वर्चसः।" ५। ४। ७८। इति अच्।) ब्राह्मणस्य वृत्ताध्ययनर्द्धिः। इत्यमरः। २। ७। ३६॥ अस्य टीका। वेदबोधितस्याचारस्य परिपालनं वृत्तम्। व्रतयज्ञपूर्ब्बकं गुरुमुखेन वेदाभ्यासोऽध्ययनम्। तयोर्द्धिक्षतपरिपालनजतस्तेजस उपचयो ब्रह्मवर्चसं स्यात्। ब्रह्मक्षत्रिराजेति अः। इति भरतः॥ तपःस्वाध्यायजं यच्च तेजस्तु ब्रह्मवर्चसम्। इति जटाधरः॥ (तथा च मनुः।४।६७।

"ऋषयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः।
प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च॥")

ब्रह्मवर्म्म, पुं, (ब्रह्मणां ब्राह्मणानां वर्म्म; वर्म्मवत् यस्मिन्।) ब्रह्मावर्म्मदेशः। इति शब्दरत्नावली॥ (सरस्वतीतटस्थो देवसभो मैथ्यगतोऽयं प्रदेशः॥)

ब्रह्मवर्द्धनं, क्ली, (ब्रह्मणस्तपसो वर्द्धनं यस्मात्।) ताम्रम्। इति हेमचन्द्रः। ४। १०६॥

ब्रह्मवादः, पुं, (ब्रह्मणो वेदस्य वादो वदनं पठनमिति यावत्।) वेदपाठः। तत्पर्य्यायः। श्रुताध्ययनम् २। इति शब्दरत्नावली। २२१॥ (यथा भागवते। ४। २२। ६२।

"इहास्मत्तिर्ब्रह्मवादे आत्मवत्त्वे स्वयं हरिः॥"

ब्रह्मणो ब्रह्मनिर्णयस्य वादः कथनमिति विग्रहे ब्रह्माधिकारेण तत्त्वनिर्णयवाक्यम्॥ ब्रह्मवादो वेदपाठोऽस्यास्तीति ब्रह्मवादविग्रहे, चि। यथा, हरिवंशे। ८१। ३४।

"ब्राह्मणैर्ब्रह्मवादैश्च पुराणोऽयं हि गीयते॥")

ब्रह्मवादी, [न्] पुं, (ब्रह्मवादो वेदपाठोऽस्यास्तीति। ब्रह्मवाद+इनि।) वेदवक्ता। तत्पर्य्यायः। वेदान्ती २। इति जटाधरः॥ यथा, गीतायाम्। १७। २४।

"तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥")

ब्रह्मवादिनी, स्त्री, गायत्री। यथा,—

"आयाहि वरदे देवि! त्र्यक्षरे ब्रह्मवादिनि!॥"
इत्यादि गायत्र्या आवाहनम्॥

ब्रह्मविद्या, स्त्री, (ब्रह्मणो ब्रह्मविषयिणी या विद्या।) ब्रह्मज्ञानम्। यथा,—

"न्यायागतधनः शान्तो ब्रह्मविद्यापरायणः।
स्वधर्म्मपालको नित्यं सोऽन्तस्तस्याय कल्पते॥"
इति कौर्म्मे १ अध्यायः॥

(दुर्गा। यथा, महाभारते। ६। २२। २७।

"त्वं ब्रह्मविद्या विद्यानां महानिद्रा च देहिनाम्।
स्कन्दमातर्भगवति! दुर्गे कान्तारवासिनि!॥")

ब्रह्मविन्दुः, पुं, (ब्रह्मणो विन्दुः।) वेदपाठे सुखनिर्गतविन्दुः। इति भरतः॥

ब्रह्मवृक्षः, पुं, (तदाख्यया प्रसिद्धो वृक्षः। यद्वा, ब्रह्मणे वेदकर्म्मार्थं यो वृक्षः।) पलाशवृक्षः। इति हलायुधः॥ उडुम्बरः। इति रत्नमाला॥

ब्रह्मवृत्तिः, स्त्री, (ब्रह्मणो ब्राह्मणस्य वृत्तिर्जीवनोपायः।) ब्राह्मणस्य जीवनोपायः। यथा,—

"स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेत् यः।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥"
इति श्रीभागवतम्॥

ब्रह्मवेदः, पुं, (ब्रह्मणो वेदः ज्ञानम्।) ब्रह्मज्ञानम्। यथा,—

"प्राणायामः परं ब्रह्म परमात्मा चतुर्मुखः।
प्राणायामः पदं विष्णोर्ब्रह्मवेदस्वरूपकम्॥"
इति गीतासारः॥

ब्रह्मवेदिः, स्त्री, (ब्रह्मणो वेदिरिव।) देशविशेषः। यथा,—

"ब्रह्मवेदिः कुरुक्षेत्रं पञ्चरामह्रदान्तरम्॥"
इति हेमचन्द्रः। ४। १६॥

ब्रह्मवैवर्त्त, क्ली, (विवृतिरेव वैवर्त्तम्। स्वार्थे अण्। ब्रह्मणो वैवर्त्तं विवर्त्तो विवृतिर्यत्र।) यथा च ब्रह्मवैवर्त्ते ब्रह्मखण्डे। १। ५८।

"विवृतं ब्रह्म कार्त्स्न्येन ज्ञानेन यत्र गौतम!।
ब्रह्मवैवर्त्तकं तेन प्रवदन्ति पुराविदः॥")

अष्टादशमहापुराणान्तर्गतदशमपुराणम्। यथा,

"अष्टादशसहस्रञ्च ब्रह्मवैवर्त्तमीरितम्।
सर्व्वेषाञ्च पुराणानां सारमेव विदुर्बुधाः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अः॥

ब्रह्मशल्यः, पुं, (ब्रह्मैव सन्नं शल्यमयभागो यस्य। अतिसूक्ष्मावयवत्वात्तथात्वम्।) सीसकम्। इति रत्नमाला॥ बाबला इति भाषा॥

ब्रह्मशासनं, क्ली, (ब्रह्मणः शासनं निर्णयो उपदेशो वा यस्मिन्।) ब्रह्मविचारग्रन्थः। तत्पर्य्यायः। धर्म्मकौलकः २। इति शब्दरत्नावली॥ ब्रह्मणः आत्मा। नवद्वीपस्य पूर्ब्बदक्षिणकोणे गङ्गापारे ग्रामविशेषे, पुं॥ (ब्रह्मणो विधातुः शासनम्। वेदः॥ प्रतिपादितमेतत् ईश्वरारहस्ये ४ पादे १०९ अध्याये॥)

ब्रह्मसंहिता, स्त्री, (ब्रह्मणः संहिता।) भगवत्सिद्धान्तसंग्रहग्रन्थविशेषः। यथा,—

"अध्यायपञ्चसम्पन्ना भगवद्ब्रह्मसंहिता।
ज्ञानोपनिषदां सारैः सहिता ब्रह्मणोदिता॥"
इति ब्रह्मसंहितायां भगवत्सिद्धान्तसंग्रहे मूलसूत्राख्यपञ्चमाध्यायस्य जीवगोस्वामिप्रतटीका॥

ब्रह्मसम्भवः, पुं, द्विपृष्ठनामकवैनविशेषः। इति हेमचन्द्रः॥

ब्रह्मसर्पः, पुं, (ब्रह्म ब्रह्मात् सर्पः।) सर्पविशेषः। तत्पर्य्यायः। फलाहलः २ अश्वलाला ३। इति त्रिकाण्डशेषः॥

ब्रह्मसायुज्यं, क्ली, (युनक्तीति युजः। "इगुपधेति।" ३। १। १३५। कः। ततः "तेन सहेति।" २। २। २८। इति बहुव्रीहिः। "बोपसर्जनस्य।" ६। ३। ८२। इति सभस्य सः। ततः सयुजस्य भावः सायुज्यं। यद्वा, योजयतीति युक् सम्पदादित्वात् क्विप्। ततो बहुव्रीहिरुक्तनः; सयुजो भावः। ततः ब्रह्मणः सायुज्यं योजकत्वम्।) ब्रह्मणो भावः। तत्पर्य्यायः। ब्रह्मभूयम् २ ब्रह्मत्वम् ३। इत्यमरः। २। ७। ५२॥ ब्रह्मसायुज्यम् ४। इति शब्दरत्नावली॥ (सुग्धबोधमतेऽस्य व्युत्पत्तिर्यथा।) ब्रह्मणो भवनं तादृश्यं ब्रह्मभूयं भूहृन; ब्रह्मणि क्यप्। त्वतौ भावे इति त्वे ब्रह्मत्वं। योजनं युक् तत्सहितः सयुक् तद्भावः सायुज्यं ततो ब्रह्मणा विग्रहः। इति भरतः॥

ब्रह्मसावर्णिः, पुं, (ब्रह्मपुत्रो सावर्णिः।) दशम मनुः। अस्मिन् मन्वन्तरे विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्याः देवाः। हविष्मदाद्याः सप्तर्षयः। भूरिसेनाद्या मनुपुत्रा भविष्यन्ति। इति श्रीभागवतम्।८।१३।२१-२२॥ अन्यच्च।

"मन्वन्तरे तु दशमे ब्रह्मपुत्रस्य धीमतः।
सुरसेना विरुद्धाश्च द्विपकाराद्यथा क्षुताः॥
घृतसंज्ञा हि ते देवा भविष्यन्ति च वै मनौ।
तत्पुत्राणां घृतं भावि तद्देवानां तदा घृतम्॥
प्राप्तिरिन्द्रस्तदा भावी सर्व्वैरिन्द्रगुणैर्युतः।
सप्तर्षींस्तु निबोध त्वं ये भविष्यन्ति वै तदा॥
आपो ऋष्यिर्हविष्मांश्च सुकृती सत्य एव च।
नाभागोऽप्रतिमश्चैव वाग्विष्णुश्चैव सप्तमः॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणः सुवीर्य्यवान्।
घृतायोकोऽथ वृषभो अनघिनो जयद्रथः॥
भूरिद्युम्नः सुवर्चाश्च तस्येते तनया मनोः।"
इति ब्रह्मसावर्णिकम्।
इति मार्कण्डेयपुराणे॥ ९३। ११-१६॥

ब्रह्मसूः, पुं, प्रद्युम्नः । इत्यमरः । १ । १ । २८ ॥ कामदेवः । इत्यमरमाला ॥ अनिरुद्धपक्षे ब्रह्माणं सूतवान् ब्रह्मसूः ॥ (सूङ्प्राणिप्रसवे । "अन्येभ्योऽपि दृश्यते ।" ३ । २ । १७८ । क्विप् ।) कल्पान्तरे निजानिरुद्धमूर्त्तेर्भगवतो ब्रह्मा जातः । तथा च ब्रह्मपुराणम् । अनिरुद्धात्ततो ब्रह्मा तन्नाभिकमलोद्भवः ॥ कामदेवपक्षे । ब्रह्म तपः सुवति प्रेरयति ब्रह्मसूः । षू प्रेरणे ("अन्येभ्योऽपि दृश्यते ।" ३।२।१७८ इति) क्विप् । इति भरतः । (कामेनैव सर्व्वतपःसु प्रवर्त्तनादस्य तथात्वम् ॥)

ब्रह्मसूत्रं, क्ली, (ब्रह्मणि वेदाध्ययनकाले उपनयनसमये इत्यर्थः धृतं यत् सूत्रम् ।) यज्ञसूत्रम् । तत्पर्य्यायः । पवित्रम् २ यज्ञोपवीतम् ३ द्विजायनी ४ । इति त्रिकाण्डशेषः ॥ उपवीतम् ५ सावित्रम् ६ सावित्रीसूत्रम् ७ । इति शब्दरत्नावली ॥ (यथा भागवते । ८ । १८ । १४ ।
"तस्योपनीयमानस्य सावित्रीं सविताब्रवीत् ।
बृहस्पतिर्ब्रह्मसूत्रं मेखलां कश्यपोऽददात् ॥"
तटस्थलक्षणपरं उपनिषद्वाक्यम् । ब्रह्मनिर्णयसूत्रम् । यथा गीतायाम् । १३ । ४ ।
"ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥"
अस्य व्याख्याने श्रीधरस्वामिना यदुक्तं तदुच्यते । "ऋषिभिर्वशिष्ठादिभिर्योगशास्त्रेषु ध्यानधारणादिविषयत्वेन वैराग्यादिस्वरूपेण बहुधा गीतं निरूपितम् । विविधैर्विचित्रैर्नित्यनैमित्तिककाम्यकर्म्मादिविषयैश्छन्दोभिर्वेदैर्नानापूजनीयदेवतारूपेण गीतं ब्रह्मणः सूचेः पदैश्च ब्रह्म सूच्यते सूच्यते एभिरिति ब्रह्मसूत्राणि यतो वा इमानि भूतानि जायन्ते इत्यादीनि तटस्थलक्षणपराणि सत्यं ज्ञानमनन्तं ब्रह्मेत्यादीनि तैश्च बहुधा गीतम् । किञ्च हेतुमद्भिः सदेव सौम्येदमग्र आसीत् कथमसतः सज्जायत इति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयातीत्यादि युक्तिमद्भिः । अन्यात् अपानचेष्टां कः कुर्य्यात् प्राण्यात् प्राणव्यापारं वा कः कुर्य्यादिति श्रुतिपदयोरर्थः । विनिश्चितैरुपक्रमोपसंहारैकवाक्यतया असन्दिग्धार्थप्रतिपादकैरित्यर्थः । तदेवमनेकविस्तरेणोक्तं दुःसंग्रहं संक्षेपतस्तुभ्यं कथयिष्यामि तत् शृणु इत्यर्थः । यद्वा "अथातो ब्रह्मजिज्ञासा" इत्यादीनि ब्रह्मसूत्राणि गृह्यन्ते तान्येव ब्रह्म पद्यते निश्चीयते एभिरिति पदानि तैर्हेतुमद्भिरीक्षतेर्नाशब्दं आनन्दमयोऽभ्यासादित्यादि युक्तिमद्भिर्विनिश्चितार्थैः ॥)

ब्रह्मसूनुः, पुं, (ब्रह्मणः सूनुः पुत्रः ।) इक्ष्वाकुवंशोद्भवराजविशेषः । तत्पर्य्यायः । ब्रह्मदत्तः २ । इति हेमचन्द्रः । ३ । ३२८ ॥ (ब्रह्मपुत्त्रे वशिष्ठादौ च ॥)

ब्रह्मस्वं, क्ली, (ब्रह्मणो ब्राह्मणस्य स्वं धनम् ।) ब्राह्मणसम्बन्धि धनम् । तस्य हरणे दोषो यथा,
"ब्रह्मस्वं वा गुरुस्वं वा देवस्वं वापि यो हरेत् ।
स सतत इति ज्ञेयो महापापी च भारते ॥
अवटोदे वसेत् सोऽपि यावदिन्द्रशतं शतम् ।
ततो भवेत् सुरापीतो ततः शूद्रस्ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४९ अध्याय ॥

ब्रह्महत्या, स्त्री, ब्रह्मणो हननम् ॥ (हनस्त च । ३ । १ । १०८ । इति भावे क्यप् तकारोऽन्तादेशश्च । स्त्रीत्वं लोकात् ।) ब्राह्मणवधः । यथा,
"एकदा च गुरोः कोपात् प्रकृतेरवहेलनात् ।
ब्रह्महत्या वध्यभूतो बभूव हतचेतसः ॥"
तस्या रूपं यथा,—
"रक्तवस्त्रपरीधाना वृद्धा स्त्रीवेशधारिणी ।
सप्ततालप्रमाणा सा शुष्ककण्ठौष्ठतालुका ॥
दृष्ट्वा प्रमाणदशना महाभीतश्च कातरम् ।
धावन्तं परिधावन्ती बलिष्ठा हतचेतनम् ॥
खड्गहस्ता हतार्त्तं तं दयाहीना च मूर्च्छितम् ॥
इन्द्रो दृष्ट्वा च तां घोरां स्मारं स्मारं गुरोः पदम् ॥
विवेश मानससरो मृणालसूत्रमध्यतः ।
तत्र गन्तुं न शक्ता सा ब्रह्मणः शापकारणात् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ४७ अः ॥
आतिदेशिकब्रह्महत्या यथा,—
यम उवाच ।
"श्रीकृष्णे च तदर्च्चायां अन्यमूर्त्तौ प्रकृतौ यथा ।
शिवे च शिवलिङ्गे वा सूर्य्ये सूर्य्यमणौ यथा ॥
गणेशे वा तदर्च्चायामेवं सर्व्वत्र सुन्दरि ! ।
यः करोति भेदबुद्धिं ब्रह्महत्यां लभेत्तु सः ॥
स्वगुरौ स्वेष्टदेवे च जन्मदातरि मातरि ।
करोति भेदबुद्धिं यो ब्रह्महत्यां लभेत्तु सः ॥
वैष्णवेष्वन्यभक्तेषु ब्राह्मणेष्वितरेषु च ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
हरेः पादोदकेष्वन्यदेवपादोदके तथा ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
यो मूढो विष्णुनैवेद्ये चान्यनैवेद्यके तथा ।
करोति समतां यो हि ब्रह्महत्यां लभेत्तु सः ॥
सर्व्वेश्वरेश्वरे कृष्णे सर्व्वकारणकारणे ।
सर्व्वाद्ये सर्व्वदेवानां सेव्ये सर्व्वात्मनात्मनि ॥
माययानेकरूपे वाप्येक एव हि निर्गुणे ।
करोत्यन्येन समतां ब्रह्महत्यां लभेत्तु सः ॥
पितृदेवार्च्चनं पौर्व्वापरं वेदविनिर्म्मितम् ।
यः करोति निषेधञ्च ब्रह्महत्यां स विन्दति ॥
ये निन्दन्ति हृषीकेशं तन्मन्त्रोपासकं तथा ।
पवित्राणां पवित्रञ्च ब्रह्महत्यां लभन्ति ते ॥
ये निन्दन्ति विष्णुमायां विष्णुभक्तिप्रदां सतीम् ।
सर्व्वशक्तिस्वरूपाञ्च प्रकृतिं सर्व्वमातरम् ॥
सर्व्वदेवीस्वरूपाञ्च सर्व्वाद्यां सर्व्ववन्दिताम् ।
सर्व्वकारणरूपाञ्च ब्रह्महत्यां लभन्ति ते ॥
कृष्णजन्माष्टमीं रामनवमीं पुण्यदां पराम् ।
शिवरात्रिन्तथा चैकादशीं वारं रवेस्तथा ॥
पञ्च पर्व्वाणि पुण्यानि ये न कुर्व्वन्ति मानवाः ।
लभन्ते ब्रह्महत्यां ते चाण्डालाधिकपापिनः ॥
अम्बुवाच्यां भूखननं जले शौचादिकञ्च ये ।
कुर्व्वन्ति भारते वर्षे ब्रह्महत्यां लभन्ति ते ॥
गुरुञ्च मातरं तातं साध्वीं भार्य्यां सुतं सुताम् ।
अनाथां यो न पुष्णाति ब्रह्महत्यां लभेत्तु सः ॥
विवाहो यस्य न भवेत् न पश्यति सुतन्तु यः ।
हरिभक्तिविहीनो यो ब्रह्महत्यां लभेत्तु सः ॥
हरेरनैवेद्यभोजी नित्यं विष्णुं न पूजयेत् ।
पुण्यं पार्थिवलिङ्गं वा ब्रह्महत्यां लभेत्तु सः ॥
अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च ब्रह्महत्यां लभेत् तु सः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । ३० । १४४-१५६ ॥
तथा च मनुः । ११ । ५४-५५ ।
"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥
अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥"
तथा च चिन्तामणिधृतदेवीभागवतवचनम् ।
"निद्राभङ्गः कथाच्छेदो दम्पत्योः प्रीतिभेदनम् ।
शिशुमातृविभेदश्च ब्रह्महत्या समं स्मृतम् ॥")
ब्रह्महत्याप्रायश्चित्तं प्रायश्चित्तशब्दे महापातकप्रायश्चित्तव्यवस्थायामादौ द्रष्टव्यम् ॥

ब्रह्महा, [न्] पुं, (ब्रह्माणं ब्राह्मणं हतवान् । ब्रह्म + हन् + "ब्रह्मभ्रूणवृत्रेषु क्विप् ।" ३ । २ । ८७ । इति क्विप् ।) ब्रह्मघ्नः ब्राह्मणवधकर्त्ता । यथा,—
"ब्रह्महा द्वादशाब्दानि कुटीं कृत्वा वने वसेत् ।
भिक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरोध्वजम् ॥
भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति ।
ब्रह्महत्यापनोदाय मितभुक् संयतेन्द्रियः ॥
स सर्व्वस्वं वेदविदे ब्राह्मणायोपपादयेत् ।
धनं वा जीवनायालं गृहं वा सपरिच्छदम् ॥"
इति प्रायश्चित्तविवेकः ॥
तस्य नरकभोगान्ते जन्मानि यथा,—
"श्वसूकरखरोष्ट्राणां गोऽजाविमृगपक्षिणाम् ।
चण्डालपुक्कशानाञ्च ब्रह्महा योनिमृच्छति ॥"
इति मानवे । १२ । ५५ ॥

ब्रह्महविः, [स्] क्ली, (ब्रह्मैव हविरर्प्यमाणमाज्यम् ।) अर्प्यमाणं हविरपि ब्रह्मैव । यथा,—
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्म्मसमाधिना ॥"
इति श्रीभगवद्गीतायाम् । ४ । २४ ॥

ब्रह्महुतं, क्ली, (ब्रह्मणि ब्राह्मणे हुतम् दत्तम् । ब्रह्मपदमत्र उपलक्षणं तेन कुमारे बोध्यम् ।) पञ्चमहायज्ञान्तर्गतयज्ञविशेषः । स तु नृयज्ञः । अतिथिपूजनरूपः । इति जटाधरः ॥

ब्रह्मा, [न्] पुं, (बृंहति वर्द्धते यः । बृहि वृद्धौ + "बृंहेर्नोऽच्च ।" उणा० ४ । १४५ । मनिन् नकारस्याकारश्च ।) ऋत्विग्भेदः । तस्य स्थापनविधिर्यथा । ततः प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा ब्रह्मस्थापनं कुर्य्यात् । समाप्यपञ्चाशत्कुशमयरचितं दिर्देशावर्त्तमर्द्धमुखं दर्भवटुं अधीतवेदं ब्राह्मणं वा कृत-

सुस्रुवाख्यं वा कमण्डलुं वा ब्रह्मतीर्थेन परिकल्प्य धारासहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशं गत्वा अरणिमाचान्तरिते देशे पूर्ब्वाभिमुखो वारिधारां दत्त्वा तदुपरि प्राग्दग्भ्यां कुशाभ्यामास्तीर्य्य पश्चिमाभिमुखोऽनुपविश्य स्थितेन। वामहस्तानामिकाङ्गुष्ठाभ्यामास्तीर्य्यकुशमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। तत अप उपस्पृश्य दक्षिणपादेन सव्यपादमवष्टभ्य उत्तराभिमुखीभूय आस्तीर्णकुशानङ्गिरभ्युक्ष्य प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणब्रह्मपक्षे तु ब्राह्मण एव सीदामीति ब्रूयात् अनेन कुशोपरि पूर्ब्वाग्रं कुशब्राह्मणं ब्राह्मणब्रह्मपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अङ्गिरभ्युक्ष्य कुशकुसुमेरर्च्चयेत्। ततस्तेनैव पथा प्रत्यागत्य आसने पूर्ब्वाभिमुख उपविशो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मत्वेनारोपितो ब्रह्मा अयज्ञीयवाक्यं वदेत् तदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्रीच्छन्दो विष्णुर्देवता अयज्ञीयवाग्वचननिमित्तजपे विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले इति जपेत्। कुशादिब्रह्मपक्षे तु कर्म्मकर्त्तुरेव ब्रह्मत्वाब्रह्मत्वावेक्षणादिब्रह्मकार्य्यकर्त्तृत्वादयज्ञीयवाग्वचननिमित्तंस एव जपेत्। इति भवदेवभट्टः॥ * ॥ योगभेदः। स तु विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चविंशतियोगः। तत्र जातफलम्।

"नानाशास्त्राभ्याससंलीनकालो
वर्णाचारैः संयुतश्चारुकीर्त्तिः।
शान्तो दान्तो जायते चारुकर्म्मा
क्षतौ यस्य ब्रह्मयोगप्रयोगः॥"

इति कोष्ठीप्रदीपः॥

विधः। इति मेदिनी॥ अर्हदुपासकविशेषः। इति हेमचन्द्रः॥ सृष्टिकर्त्तृदेवताविशेषः। ब्रूंहति प्रजा इति। तत्पर्य्यायः। आत्मभूः २ सुरज्येष्ठः ३ परमेष्ठी ४ पितामहः ५ हिरण्यगर्भः ६ लोकेशः ७ स्वयम्भूः ८ चतुराननः ९ धाता १० अजयोनिः ११ हृहिणः १२ विरिञ्चिः १३ कमलासनः १४ स्रष्टा १५ प्रजापतिः १६ वेधाः १७ विधाता १८ विश्वसृक् १९ विधिः २०। इत्यमरः॥१।१।१६-१७॥ हृषणः २१ विरिञ्चः २२ स्वयम्भुः २३ पद्मयोनिः २४ पद्मासनः २५ विश्वसृष्टिविधिः २६। इति भरतः॥ देवदेवः २७ पद्मगर्भः २८ गुणसागरः २९ वेदगर्भः ३० वह्निरेताः ३१ स्वभूः ३२ सत्यधारामः ३३ सुधावर्षी ३४ जपप्रीतः ३५ स्वसम्भवः ३६ लोकनाथः ३७ महावीर्य्यः ३८ सरोजी ३९ मनुप्राजः ४० नाभिजन्मा ४१ बहुरूपः ४२ जटाधरः ४३ चतुर्मुखः ४४ कञ्जजः ४५ प्रभुः ४६ पितामहः ४७ पद्मनाभः ४८ अब्जजः ४९ अष्टकर्णः ५० हंसरथः ५१ सर्व्वकर्णः ५२ चतुर्मुखः ५३। इति शब्दरत्नावली॥ कः ५४। इत्येकाक्षरकोषः॥ आः ५५ घृतपश्चनिवासः ५६ स्वायम्भुवमनुपिता ५७। इति कविकल्पलता॥ मः ५८। इति प्रणवव्याख्या॥ (नाभिजन्मा ५९। अब्जजः ६०। पूर्ब्बः ६१। निधनः ६२। कमलोद्भवः ६३। सदानन्दः ६४। रजोमूर्त्तिः ६५। सत्यकः ६६। हंसवाहनः ६७। इति कस्मिंश्चिदमरकोषे दृश्यते।१।१।१७॥) तस्य स्वरूपं यथा,—

मार्कण्डेय उवाच।

"ततो ब्रह्माणमासीनं दर्शयामास पुष्करे।
वरदं तोयराशिस्थं ब्रह्माणञ्च यथा पुरा॥
तत्रस्थं पद्मगर्भाभं ब्रह्माणं जगतः पतिम्।
ज्योतीरूपं प्रकाशार्थं सृष्ट्यर्थञ्च पृथग्गतम्॥
शरीरिणं स ददृशे ब्रह्माणान्तर्गतं सुरैः।
चतुर्भुजं प्रकाशन्तं ज्योतिर्भिः कमलासनम्॥
तत्रैव च त्रिधाभूतं वपुर्ब्रह्मा ददर्श सः।
ऊर्द्धमध्यात्तमागेस्तु ब्रह्मविष्णुशिवात्मिकान्॥
अधोर्द्धभागो वपुषो ब्रह्मत्वमगमत्तथा।
मध्यो यथा विष्णुभूतां ददर्शाम्बुजसम्भुताम्॥
एकमेव शरीरन्तु त्रिधाभूतं सुरैर्मुहुः।
हरौ ददर्श स्वे गर्भे तथा सर्व्वमिदं जगत्॥
कदाचिद्दैवयोगेन कार्य्यं ब्राह्मे कार्य्ये लयं व्रजेत्।
ब्राह्मे तथा वैष्णवे च ग्राम्ये वैष्णवे तथा॥
ग्राम्ये वैष्णवे कार्य्ये ब्राह्मे चाप्यथ ग्राम्यगम्।
गच्छन्तं लीनतां ग्राम्यैरेकताञ्च सुरैर्मुहुः॥
ददर्श वामदेवोऽपि भिन्नं चाप्यथ ग्राम्यगतम्।
परमात्मनि गच्छन्तं लीनतां तद्वपुश्च यत्॥"

इति कालिकापुराणे १४ अध्यायः॥ * ॥

तस्य पूजाविधिर्यथा।

"ब्रह्म राजन्नवह्निस्थो ब्रह्मणः पूजनक्रमम्॥
ब्रह्मबीजं पुरा प्रोक्तं यन्त्रं पूर्ब्वन्तथैव तु।
तेनैव तन्तु संपूज्य परं निर्व्वाणमाप्नुयात्॥
एतस्य चाङ्गमन्त्रन्तु यथा भर्गेण भाषितम्।
वेतालभैरवाद्यांस्तु रूपञ्च शृणु भूमिप!॥
तस्य मन्त्रोद्धारो यथा,—
"पद्मतीयञ्च वह्निञ्च शीर्षस्वरसमन्वितः।
चन्द्रबिन्दुसमायुक्तो ब्रह्ममन्त्रः प्रकीर्त्तितः॥
अनेनैव तु मन्त्रेण ब्रह्माणं यः प्रपूजयेत्।
स कामानिष्टं संप्राप्य ब्रह्मलोके प्रमोदते॥"

तस्य ध्यानं यथा,—

"ब्रह्मा कमण्डलुधरश्चतुर्व्वक्त्रश्चतुर्भुजः।
कदाचिद्रक्तकमले हंसारूढः कदाचन॥
वर्णेन रक्तगौराङ्गः प्रांशुस्तुङ्गाङ्ग उन्नतः।
कमण्डलुवामकरे स्रुवो दक्षे तु दक्षिणे॥
दक्षिणाधस्तथा माला वामाधश्च तथा स्रुवः।
आज्यस्थाली वामपार्श्वे वेदाः सर्व्वेऽयतः स्थिताः॥
सावित्री वामपार्श्वस्था दक्षिणस्था सरस्वती।
सर्व्वे च ऋषयो ह्याद्ये कुर्य्युर्देभिश्च चिन्तनम्॥
चतुष्कोणं चतुर्द्वारमष्टपद्मसमन्वितम्।
चतुष्कोणे वसुतन्तु शुक्लमण्डलयुक्तयुक्तयोः॥
सम्पार्च्चनादिकं सर्व्वं ब्राह्मात्मा प्रतिमत्तयः।
आत्मा उत्तरतन्त्रोक्ता योगपीठेऽङ्गकादिका॥"

तस्य पूजाक्रमो गायत्री च यथा,—

"आधारशक्तिप्रमुखांस्तथा सर्व्वान्तु पूजयेत्।
अष्टपत्रेषु पद्मस्यान् दिक्पालान् प्रपूजयेत्॥
पद्मासनाय विद्महे हंसारूढाय धीमहि।
तन्नो ब्रह्मप्रचोदयात्॥
एषा तु ब्रह्मगायत्री पूजयेदनया विधिम्।
निर्म्माल्यधारी चैतस्य सनत्कुमार उच्यते॥
उपचाराः पूर्ब्ववत्तु नैवेद्यञ्चरुरक्षिता।
रक्तकौशेयवस्त्रन्तु ब्रह्मप्रीतिकरं परम्॥
आज्यं सपायसं सर्पिस्तिलयुक्तस्य भोजनम्।
सितरक्तसमायुक्तं चन्दनं परिकीर्त्तितम्॥
पार्श्वयोः शङ्करं विष्णुं पूजने पूजयेन्नरः।
सवादीन् करसंस्थांस्तु मध्ये परिपूजयेत्॥
सरस्वतीञ्च सावित्रीं हंसं पद्मन्तथैव च।
अयं विग्रहः कथितः प्रजासृष्ट्यस्य रक्षवत्॥
पद्मबीजभवा माला जपकर्म्मणि कीर्त्तिता।
पूर्णादर्वी तिथौ ग्राह्ये पूजाकर्म्मणि सर्व्वदा॥
क्षीरेणार्घ्यं प्रदद्यात्तु सर्व्वदा ब्रह्मणे नृप!।
अयत्ने कथितो भूप! यथा भर्गेण भाषितः॥
दर्शयता स्वपुत्राभ्यां कामरूपाक्रयं शुभम्।
यस्य तत्र विधिश्चैव साधकः परिपूजयेत्॥
पीठे सम्यक् पूजयित्वा परं निर्व्वाणमाप्नुयात्।"

इति कालिकापुराणे ८२ अध्यायः॥

तस्यापूज्यत्वकारणम् यथा। मोहिन्युवाच।

"उत्तिष्ठ जगतीनाथ! पारं कुरु ह्यरार्णवे।
निमग्नां दुस्तरे घोरे कर्णधार! भयानके॥
अतीवनिर्জ্জনस्थाने सर्व्वजन्तुविवर्জ্জिते।
सुगन्धिवायुना रम्ये पुंस्कोकिलकृतस्तुते॥
सन्तप्तं त्वज्जनस्कामां दासीं जन्मनि जन्मनि।
क्रीणीहि दानिपण्येनामूल्यरत्नेन सत्वरम्॥
इत्युक्ता मोहिनी सत्यो जगत्सृष्टञ्च ब्रह्मणः।
विचकर्ष करं वस्त्रं सस्मिता कामविह्वला॥
विस्मयाय समर्थं धाता तामुवाच भयातुरः।
पीयूषतुल्यवचनं परं विनयपूर्ब्वकम्॥"

ब्रह्मोवाच।

"ब्रूहि मोहिनि! मदाज्ञं सत्यं सारं हितं स्फुटम्।
न कुरु त्वञ्च त्रैलोक्ये स्त्रीजातीनामपत्रपाम्॥
त्यज मामम्बिके! पुत्रं सुतं निष्कामभेव च।
स्वकर्म्मयोग्यं दासिकं युवानं पश्य सम्प्रति॥
निषेकाद्यास्तु यत्नेन पत्नी गुरुर्भर्त्ता शुभाशुभम्।
मन्त्रः शिल्पमपत्यञ्च सर्व्वमेतन्न संशयः॥
त्वया सह मम स्वर्गेनिर्व्वन्धो नास्ति सुव्रते!।
सुतं मद्वदा यत् कर्म्म सर्व्वं दैवनिबन्धनम्॥
इत्युक्तवन्तं ब्रह्माणं धारन्तं मत्पदाम्बुजम्।
विचकर्ष पुनर्वेधा कामेन हतचेतना॥
एतस्मिन्नन्तरे शीघ्रं स्थानं तत्र सुमनोहरम्।
आजग्मुर्मुनयः सर्व्वे ज्वलन्तो ब्रह्मतेजसा॥
दृष्ट्वा तांश्च मुनिश्रेष्ठानागतांश्च मनेच्छया।

तत्राज मोहिनी घोरं दीक्षया कमलोद्भवम् ॥
तत्रोवास जगद्धाता सहामरगणैस्तथा सा ।
प्रजेशैर्मुनयश्चैव भक्तिनम्रात्मकन्धराः ॥
आग्निष्वं युयुजे ब्रह्मा वाजयामास तान् प्रभुः ।
तेषु मध्ये प्रजज्वाल यथा तारासु चन्द्रमाः ॥
पप्रच्छुर्मुनयो देवं कथमेषा सवाग्निके ।
स्वर्वेश्यानाथ प्रवरा मोहिनीत्येवमेव च ॥
श्रुत्वा तु मुनयो वचनमुवाच तान् प्रजापतिः ॥

ब्रह्मोवाच ।

अपूर्वं दृश्यतेऽत्र चिरं स्थित्वा शुभाननाः ।
उवाचेदं परिम्लाना यथा कन्या पितुः पुरः ॥
दृष्ट्वा जगतां धाता जहास मुनिसंसदि ।
जहसुर्मुनयः सर्वे सर्वज्ञात्वाच्च राधिके ! ॥
सर्वं रहस्यं विज्ञाय जगत्स्रष्टुश्च मानसम् ।
सद्यःकोप कुलटा हास्यव्याजेन संवदि ॥
सर्व्वाङ्गकम्पमाना सा कुलटा कुटिलानना ।
रक्तपङ्कजनेत्रा च कोपस्फुरिताधरा ॥
उत्थाय च सभामध्ये तेषाञ्च पुरतः स्थिता ।
संबुधोवाच ब्रह्माणं दृष्ट्वाकन्या यथा तथा ॥

मोहिन्युवाच ।

अये ब्रह्मन् ! जगन्नाथ ! वेदकर्त्ता त्वमेव च ।
किंवा वेदप्रविहितं कर्म्म किन्त्विह नास्ति मे ॥
विचारं मनसा स्वेन कुरु वेदविदां गुरो ! ।
स्वकन्यायां यतस्मृत्वा स कथं हसति नर्मकीम् ॥
निर्लज्जनाट्यभीत्येव स्वर्वेश्या सर्व्वगामिनी ।
सतां कर्म्म विरुद्धं यत्तदत्यन्तविडम्बनम् ॥
दासीसुरूपां विनीतां च देवेन शरणागताम् ।
यतो हसति गर्व्वेण ततोऽपूज्यो भवाचिरम् ॥
अचिराद्गर्वभङ्गस्ते करिष्यति हरिः स्वयम् ।
निशोथ शरणं ब्रह्मन् ! वेश्यायाश्चैव साम्प्रतम् ॥
तवैव वचनं स्तोत्रं मन्त्रं गृह्णाति यो नरः ।
भविता तस्य विघ्नश्च न यास्यत्युपहास्यताम् ॥
भविता चार्चिकी पूजा देवतानां युगे युगे ।
तव माघ्याश्च संक्रान्त्यां न भविष्यति सा पुनः ॥
कल्पान्तरेऽथ कल्पे वा देवे देवान्तरेऽथ ते ।
पुनः पूजा न भविता या गता सा गतैव च ॥
इत्युक्त्वा मोहिनी घोरं जगाम मदनालयम् ।
तेन सार्द्धं रतिं लब्ध्वा बभूव विह्वला पुनः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे मोहिनीशाप-ब्रह्मदर्पभङ्गप्रस्तावः ६३ अध्यायः ॥

तस्य सृष्टिक्रमो यथा । मनुरुवाच ।

"चतुर्मुखत्वमगमत् कस्मात्लोकपितामहः ।
कथञ्च लोकानसृजद्ब्रह्मा ब्रह्मविदांवरः ॥"

मत्स्य उवाच ।

"तपश्चचार प्रथममसराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यं शब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसा न्यायविद्या च प्रमाणाल्लक्षणान्विता ॥"
तस्य मानसदग्रपुत्रसृष्टिर्यथा,—
"वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनवः पूर्व्वसृष्टा ये जाता वै तेन मानसाः ॥
मरीचिरभवत् पूर्व्वं ततोऽत्रिर्भगवानृषिः ।
अङ्गिराश्चाभवत् पश्चात् पुलस्त्यश्चैव दक्षजम् ॥
ततः पुलहनामा वै ततः क्रतुरजायत ।
प्रचेताश्च ततः पुत्रो वशिष्ठश्चाभवत् पुनः ॥
पुत्रो भृगुरभूत्तस्य नारदोऽपि चिरादभूत् ।
दशैमान् मानसान् ब्रह्मा जनयत् पुत्रानथो-
जनयत् ॥"

तस्य शारीरदशपुत्रसृष्टिर्यथा,—
"शारीरानथ वक्ष्यामि मानसेभ्यो निबोधत ।
अङ्गुष्ठाद्दक्षिणाद्दक्षप्रजापतिरजायत ॥
धर्म्मस्तनान्तादभवद्धृदयात् कुसुमायुधः ।
भ्रूमध्यादभवत् क्रोधो लोभश्चाधरसम्भवः ॥
बुद्धेर्मोहः समभवदहङ्कारादभूदजः ।
प्रमोदश्चाभवत् कण्ठान्नन्दश्चुलुचितो नृप ! ॥
रम्भः करमध्यात्तु ब्रह्मणस्तनुरभूत्ततः ।
एते नव सुता राजन् ! कन्या च दशमी पुनः ॥
अङ्गजा इति विख्याता दशमी ब्रह्मणः सुता ॥"
तस्य चतुर्मुखत्वस्य कारणं यथा,—
"ततः स्वदेहसम्भूतामात्मजामित्यकल्पयत् ।
दृष्ट्वा तां योषितस्तावत् कामबाणार्दितो विभुः ।
अहो रूपमहो रूपमिति चाह प्रजापतिः ॥
ततो वशिष्ठप्रमुखा भगिनीमिति चुक्रुशुः ।
ब्रह्मा न किञ्चिदुद्दिश्य तन्मुखालोकनाददे ॥
अहो रूपमहो रूपमिति प्राह पुनः पुनः ।
ततः प्रजामनक्षां तां पुरस्तादभ्यलोकयत् ॥
अथ प्रदक्षिणश्चक्रे सा पितुर्वरवर्णिनी ।
पुत्रेभ्यो लक्षितस्यास्य तद्रूपालोकनेच्छया ।
आविर्भूतं ततो वक्त्रं दक्षिणं पाण्डुगण्डवत् ॥
विलम्बयत्युरदोष्ठञ्च पाण्डास्यतुदगात्ततः ।
चतुर्थमभवत् पश्चादामं कामशरातुरम् ॥
ततोऽन्यदभवत्तस्य कामातुरतया तथा ।
उत्पतन्त्याश्चादाकाशमालोकनकुतूहलात् ॥
तदर्थं यत् कृतं तेन तपः परमदारुणम् ।
तत् सर्व्वं नाशमगमत् स्वसुतोपगमेच्छया ॥
तेनास्य वक्त्रमभवत् पञ्चमन्तस्य धीमतः ।
आविर्भवञ्जटाभिश्च तद्वक्त्राच्छशिनोऽप्रभुः ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ * ॥

नव ब्रह्माणो यथा, मार्कण्डेयपुराणे ।
"भृगुं पुलस्त्यं पुलहं क्रतुमङ्गिरसन्तथा ।
मरीचिं दक्षमत्रिञ्च वशिष्ठञ्चैव मानसम् ।
नव ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥"
कल्पभेदे तस्य जन्मानि यथा,—
"त्वत्तो मे मानसं जन्म प्रथमं द्विजपूजितम् ।
चाक्षुषं वै द्वितीयं मे जन्म चासीत् पुरातनम् ॥
तत्प्रसादात्तु मे जन्म तृतीयं वाचिकं महत् ।
ततः श्रवणजं चापि चतुर्थं जन्म मे विभो ! ॥
नासत्यञ्चापि मे जन्म ततः पञ्चममुच्यते ।
अण्डजं चापि मे जन्म ततः षष्ठं विनिर्म्मितम् ॥
इदञ्च सप्तमं जन्म पद्मजन्मेति मे प्रभो ! ।
सर्गे सर्गे त्वहं पुत्रस्तव त्रिभुवनर्षभ ! ॥"

इति महाभारते शान्तिपर्व्वणि मोक्षधर्म्मे

अनिरुद्धरूपविष्णुं प्रति पाद्मकल्पीयब्रह्मवचनम् ॥ * ॥ तस्य पतनकालो यथा,—
"द्वाविंशद्दण्डकीयन्तु तथा वृन्दाष्टकं भवेत् ।
खर्वत्रयं निखर्वञ्च शङ्कुत्रययुतं तथा ॥
पद्मैकं वसुधाञ्च त्रयो ब्रह्मसमागते ।
ब्रह्मा विष्णुहरे चैव पतत्येव वह्नौ ते ॥
मनीषिभक्तया विष्णुरक्षणुयस्य शङ्करः ।
ईश्वरस्य तथा चार्चा स सांख्यप्रकृतेस्तथा ॥
अतः परं परे धाम्नि कालसंख्या न विद्यते ।
ब्रह्मणोऽतः परं संख्या नास्ति चैतन्मतं हि नः ॥"
अपि च ।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
योगिगम्यागतः श्वेते त्रैलोक्यग्रासदुःखितः ॥
जलस्थैर्योगिभिर्दृष्टिस्त्यमानोऽजसम्भवः ।
शतीतायान्तु शुक्लायां स बुद्धा ह्यजते पुनः ॥
एवन्तु ब्रह्मणो वर्षं तथा वर्षशतं भवेत् ।
शते वर्षे शते ब्रह्मा परमात्मनि लीयते ॥"

इत्यग्निपुराणम् ॥

ब्रह्माग्रभूः, पुं, (ब्रह्मणोऽग्रे सम्मुखे भवतीति । भू + क्विप् । यद्वार्थं ब्रह्मणो देहाज्जातत्वात्तथात्वम् ।) घोटकः । इति हारावली । ५२ ॥

ब्रह्माञ्जलिः, पुं, (ब्रह्मणे वेदपाठार्थं कृतो योऽञ्जलिः ।) सामवेदपाठे स्वरविभागार्थं योऽञ्जलिः क्रियते सः । अध्ययनस्यादावन्ते च गुरवे प्रणवोच्चारणपूर्व्वकोऽञ्जलिः क्रियते सः । तत्पाठार्थत्वात् ब्रह्मणोऽञ्जलिः । इत्यमरटीकायां भरतः । २ । ७ । ३६ ॥ (यथा, मनुः । २ । ७०-७१ ।
"अधीयमानस्त्वाचार्य्यो लघुवासा जितेन्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं सहि ब्रह्माञ्जलिः स्मृतः ॥")

ब्रह्माणी, स्त्री, (ब्रह्माणमर्थति कीर्त्तयतीति । अर्थ शब्दे कर्म्मण्यण् । ङीप् । यद्वा, ब्रह्माणमानयति जीवयतीति । अनद्यतनप्राज्ञे एषणादरणात् कर्म्मणि अण् । ततो "गौरादिभ्यः" ४ । १ । ४१ । इति ङीप् "टिड्ढाणञ्" इत्यादिना ङीप् पूर्व्वपदादित्वञ्च ।) ब्रह्मणः पत्नी । इति शब्दमाला । ब्रह्मणोऽङ्गशरीरात् तस्या उत्पत्तिर्नामान्तरञ्च यथा,—
"ततः संजपतस्तस्य भित्त्वा देहमकल्मषम् ।
स्त्रीरूपमर्द्धमकरोदर्द्धं पुरुषरूपवत् ॥
शतरूपा च सा ख्याता सावित्री च निगद्यते ।
सरस्वती च गायत्री ब्रह्माणी च परन्तप ! ॥"

इति मत्स्यपुराणे ३ अध्यायः ॥ * ॥

अपि च ।
"हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥"

इति मार्कण्डेयपुराणे । ८८ । १४ ॥ * ॥
(इयं हि पूर्णशक्तेर्दुर्गायाः कलाशक्तिः । यदुक्तं मार्कण्डेये । ६० । ३६ ।

देव्युवाच ।
"एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट ! मय्येव विलीनो मद्विभूतयः ॥
ततः समस्ताख्या देवी ब्रह्माणी-प्रमुखा जयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥") दुर्गा । यथा,—
"ब्रह्माणी ब्रह्मजननाद्ब्रह्माचरपरा मता ॥"
इति देवीपुराणे ४५ अध्यायः ॥*॥
रेणुकानामगन्धद्रव्यम् । इति रत्नमाला ॥ राजनीतिः । इति राजनिर्घण्टः ॥
ब्राह्मं, क्ली, (ब्रह्मणो जगत्सृष्टुरिदम् । चतुर्दशभुवनगोलकः । यद्वा, ब्रह्मणा विश्वस्रष्ट्रा ज्ञातमज्ञम्।) भुवनकोषः । विश्वगोलकः । यथा,—
"ब्रह्माक्षरचनाख्यानं श्रूयतां सावधानतः ।
ब्रह्माक्षरचनार्थञ्च भक्ता जानन्ति यत्नतः ॥
सुनयश्च सुराः सन्तः किञ्चिज्जानन्ति दुःखतः ।
जानामि विश्वसर्ब्बार्थं ब्रह्मज्ञानो महेश्वरः ॥
धर्म्मः सनत्कुमारश्च नरनारायणावृषी ।
कपिलश्च गणेशश्च दुर्गा लक्ष्मीः सरस्वती ॥
वेदाश्च वेदमाता च सर्ब्बज्ञा राधिका स्वयम् ।
एते जानन्ति विश्वार्थं नान्यो जानाति कञ्चन ॥
वैधव्यार्थञ्च सुधियः सर्ब्बे विज्ञातुमक्षमाः ।
नित्याकाणो यथात्मा च तथा नित्या हरेर्दृशः ॥
यथा नित्या च प्रकृतिस्तथैव विश्वगोलकः ।
गोलोकश्च यथा नित्यस्तथा वैकुण्ठ एव च ॥
एकदा मयि गोलोके रासे कृत्वं प्रकुर्ब्बति ।
आविर्भूता च वामाङ्गाद् बाला षोड़शवार्षिकी ॥
श्वेतचम्पकवर्णाभा शरच्चन्द्रसमप्रभा ।
अतीवसुन्दरी रम्या रमणीनां परात्परा ॥
ईषद्धास्या प्रसन्नास्या कोमलाङ्गी मनोहरा ।
बन्धुजीवांशुकाधाना रत्नाभरणभूषिता ॥
यथा जलदपङ्क्तिश्च बलाकाभिर्विभूषिता ।
सिन्दूरबिन्दुना चारुचन्द्रचन्दनबिन्दुभिः ॥
कस्तूरीबिन्दुभिः सार्द्धं सीमन्ताधःस्थलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणसुस्निग्धकिरणोज्ज्वला ॥
रत्नकुण्डलयुग्मेन गण्डस्थलसमुज्ज्वला ।
कुङ्कुमालक्तकस्तूरीचारुचन्दनपत्रकैः ॥
विचित्रैश्च सुचित्रैश्च मुक्तापोलक्षलोज्ज्वला ।
खगेन्द्रचञ्चुविलसन्नासा चारुः सुशोभिता ॥
गजेन्द्रगण्डनिर्म्मुक्तमुक्ताभूषणभूषिता ।
लक्ष्मा विमुक्तमुक्ताभदन्तपङ्क्तिमनोहरा ॥
दलिता ललितातीव पक्वबिम्बाधरा वरा ।
शुद्धतप्तसुवर्णेन्दुनिन्दास्या पद्मनिन्दितलोचना ॥
शरत्सुधाकरनिर्भोद्विन्नसुचारुकज्जलोज्ज्वला ।
अमूल्यरत्ननिर्म्माणकेयूरकटकोज्ज्वला ॥
मणीन्द्रराजराजीभिः शङ्खयुग्मकरोज्ज्वला ।
रत्नाङ्गुरीयकैरेभिरन्वितानुलिभूषिता ॥
रत्नेन्द्रराजराजेन जघनश्रोणिरञ्जिता ।
रत्नपाषकराजीभिः पादाङ्गुलिविराजिता ।
सुन्दरालक्तरागेण चरणाधःस्थलोज्ज्वला ॥
गजेन्द्रगामिनी रामा कामिनी वामलोचना ।
मां दृष्ट्वैव तटाच्चैव रमणी रमणोत्सुका ॥
राधे संभूय रामा सा दधाव पुरतो मम ।
तेन राधा समाख्याता पुराविद्भिः प्रपूजिता ॥
प्रहृष्टप्रकृतिश्चास्याश्चेन प्रकृतिरीश्वरी ।
प्रकृष्टा स्यात् सर्ब्बकार्य्येषु तेन प्रकृतिः प्रकीर्त्तिता ॥
सर्ब्बाधारा सर्ब्बरूपा मङ्गलार्हा च सर्ब्बतः ।
सर्ब्बमङ्गलदृष्टा सा तेन स्यात् सर्ब्बमङ्गला ॥
वैकुण्ठे सा महालक्ष्मीर्म्मूर्त्तिभेदे सरस्वती ।
प्रसूय वेदान् विदिता वेदमाता च सा सदा ॥
सावित्री सा च गायत्री धात्री त्रिजगतामपि ।
पुरा संहृत्य दुर्गाञ्च सा दुर्गा च प्रकीर्त्तिता ॥
तेजःसु सर्ब्बदेवानामाविर्भूता पुरा सती ।
तेनाद्यप्रकृतिर्ज्ञेया सर्ब्बासुरविमर्द्दिनी ॥
सर्ब्वानन्दा च सानन्दा दुःखदारिद्र्यनाशिनी ।
प्रपन्नानां भयदात्री च भक्तानां भयहारिणी ॥
दक्षकन्या सती सा च शैलजा तेन पार्ब्बती ।
सर्ब्बाधारस्वरूपा सा कलया सा वसुन्धरा ॥
कलया तुलसी गङ्गा कलया सर्ब्वयोषितः ।
सृष्टिं करोमि च यया तया धृत्वा पुनः पुनः ॥
दृष्ट्वा तां रासमध्यस्थां मम क्रीड़ा तया सह ।
बभूव सुचिरं तात ! यावद्वै ब्रह्मणः शतम् ॥
अत्यङ्गनं कौतुकञ्च महाहङ्कारमोपसिनम् ।
तयोर्द्वयोर्म्मरागिः सुस्राव रासमण्डले ॥
तस्माज्जलोद्भवं जज्ञे गत्वा कामसरोवरम् ।
पपात चर्म्मधाराधो वेगेन विश्वगोलके ॥
बभूव जलपूर्णञ्च ब्रह्माण्डानाञ्च गोलकम् ।
जलपूर्णं पुरा सर्ब्वं सृष्टिशून्यं व्रजेश्वर ! ॥
हङ्कारान्ते च तस्याञ्च वीर्य्याधानं मया कृतम् ।
दधार गर्भं सा राधा यावद्वै ब्रह्मणः शतम् ॥
सुषाव सा तदण्डे च द्विधा तत् परमाद्भुतम् ।
चुकोप देवी तं दृष्ट्वा रुरोद विषसाद सा ॥
पादेन प्रेरयामास तमधो विश्वगोलके ।
स पपात जले तात ! सर्ब्वाधारो महान् विराट् ॥
दृष्ट्वापत्यं जलस्थञ्च मया घ्राता च सा पुरा ।
अनपत्या च सा राधा मत्घ्राणेन पुरा विभो ! ॥
तेन प्रकृत्या क्रमतो दुर्गा लक्ष्मीः सरस्वती ।
वयसः परिपूर्णा सा प्रकृत्याच्च सुनिश्चितम् ॥
देव्योऽन्याश्चापि कामिन्यो न प्रकृत्या व्रजेश्वर ! ।
कलया प्रभवो यासां कलांशांशेन वा व्रज ॥
जज्ञे महान् विराट् तेन छिद्रेण कलयाश्रयः ।
अन्तस्तासुष्ठपीयूषं मया दत्तं पपौ च सः ॥
जले स्थावरूपञ्च स शेते निजकर्म्मभिः ।
उपाधानं जलं तल्पं तस्य योगबलेन च ॥
तस्य लोम्नाञ्च कूपानि जलपूर्णानि सन्ततम् ।
प्रत्येकं क्रमतस्तेषु शेते क्षुद्रविराट् पुनः ॥
सहस्रपत्रं कमलं जज्ञे क्षुद्रस्य नाभितः ।
तत्र जज्ञे स्वयं ब्रह्मा तेनायं कमलोद्भवः ॥
तत्राविर्भूय स विधिश्चिन्ताग्रस्तो बभूव च ।
कस्त्वाहेति कः माता मे पिता वा कः च बान्धवः ॥
दिव्यं त्रिलक्षवर्षञ्च ययाम कमलान्तरे ।
ततो दृष्ट्वा पद्मलग्नं सस्मार तपसा च माम् ॥
तदा मया दत्तमन्त्रं जजाप कमलान्तरे ।
दिव्यं सप्तवर्षलक्षं नियतं संयतः मुनिः ॥
तदा मत्तो वरं लब्ध्वा सृष्टा सृष्टिमकारयत् सः ।
मायया प्रतिब्रह्माण्डे ब्रह्मविष्णुशिवात्मकाः ॥
दिक्पाला द्वादशादित्या रुद्राश्चैकादशापि वा ।
नव ग्रहाष्टौ वसवो देवाः कोटित्रयस्तथा ॥
ब्राह्मणक्षत्रविट्शूद्रा यक्षगन्धर्वकिन्नराः ।
भूतादयो राक्षसाद्याश्चैवं सर्ब्वं चराचरम् ॥
विश्वे विश्वे विनिर्म्माणं स्वर्गाः सप्त क्रमेण वै ।
सप्तसागरसंयुक्ता सप्तद्वीपा वसुन्धरा ॥
काञ्चनीभूमिसंयुक्ता तमोयुक्तस्थलं ततः ।
पातालाश्च तथा सप्त ब्रह्माण्डमेभिरेव च ॥
विश्वे विश्वे चन्द्रसूर्य्यौ पुण्यक्षेत्राश्च भारतम् ।
तीर्थान्येतानि सर्ब्वत्र गङ्गादीनि व्रजेश्वर ! ॥
यावन्ति लोमकूपानि महाविष्णोः क्रमेण च ।
विश्वान्येव हि तावन्ति ह्यसंख्यानि पितर्भुवम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ।८४।५२-१०२॥
अपि च ।
"देवीगुणत्रयाविष्टमखण्डञ्च कोटिविस्तरम् ।
ब्रह्मादिस्तम्बपर्य्यन्तसुत्पन्नं सचराचरम् ॥
अण्डे हिरण्यगर्भस्य यदूर्द्धं गर्भसंस्थितम् ।
तत्रोत्पन्नमिदं लोमकूपानि त्रीणि भवेत् ॥
अधोर्द्धं काञ्चनमयश्चतुरस्रोच्छ्रितो महान् ।
उत्पन्नः स चतुःपद्मो मेरुर्देवसमाश्रयः ॥
पृथिवी पद्मदिक् क्षेत्रं मेरुस्तस्य तु कर्णिका ।
युगाब्धकोटिविस्तीर्णं तत्र स्थित्वा रथं रविः ।
देवीवशवर्त्ती देवैर्याति तस्य प्रदक्षिणम् ॥"
इति देवीपुराणम् ॥
अथ ब्रह्माण्डगोलमाह ।
"भूभूधरश्चिदग्रदानवमानवाद्या
ये यावच्च धिष्ण्यगगनेश्वरचक्रकक्षाः ।
लोकत्रयस्थितिरुपर्य्युपरिप्रदिष्टा
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथाण्डोदितं ब्रह्माण्डमानं पूर्ब्बोक्तमपि प्रसङ्गादनुवदति ।
कोटिघ्नैर्नवनन्दषट्कनखभूभूभृद्गुणाङ्केन्दुभिर्व्याप्तैः प्राक्तविदो वदन्ति नभसः कक्षामिमां योजनैः ।
तद्ब्रह्माण्डकटाहसम्पुटघटे कैश्चिज्जगुर्वेष्टनं
कैश्चित् प्रोचुरहर्गणाब्जकर्णगिरिं पौराणिकाः सूरयः ॥
करसलकलिताम्रफलवदमलं
सकलं विदन्ति ये गोलम् ।
दिनकरकरनिकरनिहततमसो
नभसः परिधिरदितश्चेः ॥
ब्रह्माण्डमेतन्मितमस्तु नो वा
कर्णे ग्रहः क्रामति योजनानि ।
यावन्ति पूर्ब्बैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः ॥

ब्रह्माण्डं

महादानविशेषैः । यथा,—
मत्स्य उवाच ।
"अथातः संप्रवक्ष्यामि ब्रह्माण्डविधिमुत्तमम् ।
यच्छ्रुत्वा सर्वदानानां महापातकनाशनम् ॥
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
ऋत्विङ्मण्डपसंभारभूषणाच्छादनादिकम् ॥
लोकेशावाहनं तद्वदधिवासनकं यथा ।
कुर्य्याद्विप्रप्रजाढ्यैर्मासषड्भाग एव हि ॥
कलसद्वयसंयुक्तं ब्रह्माण्डं काञ्चनं बुधः ।
हिमाचलसंयुक्तं षड्वेदाङ्गसमन्वितम् ॥
लोकपालाष्टकोपेतं मध्यस्थितचतुर्मुखम् ।
शिवाच्युताब्जशिखरसप्तमाब्धिसमन्वितम् ॥
यज्ञादित्यमरुद्गर्भं महारत्नसमन्वितम् ।
चित्रकैरकुलग्रस्तं यावदायामविस्तरम् ॥
कौशेयवस्त्रसंवीतं तिलद्रोणोपरि न्यसेत् ।
तथाष्टादश धान्यानि समन्तात् परिकल्प-
येत् ॥
पूर्व्वेणानन्तशयनं प्रद्युम्नं पूर्व्वदक्षिणे ।
प्रकृतिं दक्षिणे देवीं सङ्कर्षणमतः परम् ॥
पश्चिमे चतुरो वेदानग्निरुद्रमतः परम् ।
अग्नितुत्तरतो हैमं वासुदेवमतःपरम् ॥
समन्ताद्गुरुपीठस्थानर्चयेत् काञ्चनान् बुधः ।
स्थापयेद्रत्नसंयुक्तान् पूर्णकुम्भान् दशैव तु ॥
दशैव धेनवो देयाः सहैमाम्बरदोहनाः ।
पादुकोपानहच्छत्रचामरासनदर्पणैः ॥
भक्ष्यभोज्यान्नदीपैस्तु फलमाल्यानुलेपनैः ।
होमाधिवासनान्ते तु स्थापितो वेदपुङ्गवैः ।
दक्षसूत्रारयेन्नत्वा त्रिः कृत्वाथ प्रदक्षिणम् ॥
नमोऽस्तु विश्वेश्वर ! विश्वधाम
जगत्समस्तेऽखिल भगवन्नमस्ते ।
सप्तर्षिलोकामरभूतलेश !
गर्भेण चाहं वितरामि रत्नाम् ॥
ये दुःखिनस्ते सुखिनो भवन्तु
प्रयान्तु पापानि चराचराणाम् ।
त्वद्दानग्रस्ताहतपातकानां
ब्रह्माण्डदोषाः प्रलयं व्रजन्तु ॥
एवं प्रणम्यामरविश्वगर्भं
दत्त्वाद्विजेभ्यो दशधा विभज्य ।
भागद्वयं तत्र गुरोः प्रकल्प्य
समं भजेच्छेषमतः क्रमेण ॥
स्वल्पे तु होमे गुरुरेक एव
कुर्य्यादधैकाग्निविधानयुक्त्या ।
स एव संपूज्यतमोऽत्यविद्वे-
र्यथोक्तवस्त्राभरणादिकेन ॥
इत्थं य एतदखिलं पुरुषोऽत्र कुर्य्याद्
ब्रह्माण्डदानमधिगम्य महद्विमानम् ।
निर्धूतकल्मषविशुद्धतनुर्मुरारे-
रानन्दजत्वदसुपेति सहाब्जरोभिः ॥
सन्तारयेत् पितृपितामहपुत्रपौत्रान्
बन्धुप्रियातिथिकलत्रसुताधिकः सः ।
ब्रह्माण्डदानफलमेतदवाप्य विप्रः
प्राप्नोत्यनेन जननीकुलमप्यशेषम् ॥

ब्रह्मात्म

इति पठति शृणोति वा य एतत्
सुरभवनेषु गृहेषु धार्म्मिकाणाम् ।
मतिमपि च ददाति मोदतेऽसौ
त्रिदशपतेर्भवने सहाब्जरोभिः ॥"
इति मत्स्यपुराणे महादानानुकीर्त्तने ब्रह्माण्ड-
दानको नाम २५० अध्यायः ॥०॥ अपि च ।
"इदानीं कार्त्तिकी येयं वर्त्तते ऽद्य नराधिप ! ।
ब्रह्माण्डं सर्वसस्याढ्यं भूतरत्नौषधीयुतम् ॥
देवदानवयक्षैश्च युक्तमेतत् सदा विभो ! ।
एतद्धेममयं कृत्वा सर्व्वोषधिरसान्वितम् ॥
सरत्नं पुरुषं कृत्वा कार्त्तिक्यां हादशीदिने ।
अथवा पञ्चदश्यां वै कार्त्तिक्याञ्चैव नान्यतः ॥
पुरोहिताय गुरवे दापयेद्भक्तिमान्नरः ।
ब्रह्माण्डोदरवर्त्तीनि यानि भूतानि पार्थिव ! ।
तानि दत्तानि तेन स्युः समासात् कथितं तव ॥
यो यज्ञैर्यजते राजन् ! सहस्रवरदक्षिणैः ।
स कोटेर्द्विगो यज्ञस्य ब्रह्माण्डस्य विप्रतः ॥
यः पुनः सकलञ्चेदं ब्रह्माण्डं दातुमिच्छति ।
तेन यज्ञं सुतं दत्तं पठितं कीर्त्तितं भवेत् ॥"
वराह उवाच ।
"एतत् श्रुत्वा ततो राजा हैमकुम्भे प्रकल्पनम् ।
ब्रह्माण्डस्यथये प्रादात् सविधानञ्च तत्त्वतः ॥
सर्व्वकामैः सुसम्पन्नो ययौ स्वर्गं नराधिपः ॥"
इति वराहपुराणम् ॥

ब्रह्मात्मभूः, पुं, (ब्रह्मण आत्मनः शरीरात् भवतीति । ब्रह्मात्मन् + भू + क्विप् ।) अत्रिः । इति शब्दमाला ॥ (अस्य ब्रह्मशरीरजातत्वमुक्तं बृहदारण्यकोपनिषदि १।२।१-७। तद्यथा,—
"प्राणा वै यज्ञो वीर्य्यं तत्प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमधियत तस्य शरीर एव मन आसीत् । सोऽकामयत मेधं म इदं स्यादात्मन्वनेन स्यामिति । ततोऽश्वः समभवद्यदश्वत्तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् ।" अत्र शाङ्करभाष्यं यथा,—
"प्राणाश्चक्षुरादयः । वै यज्ञो यज्ञोहेतुत्वात्तेषु हि सत्सु स्यादिति भवति । तथा वीर्य्यं बलमस्मिन् शरीरे । तदुत्क्रान्तप्राणो यद्वत्स्वो बलवान् भवति । तस्मात् प्राणा एव यज्ञो वीर्य्यं चास्मिन् शरीरे । तदेवं प्राणलक्षणं यज्ञोवीर्य्यमुदक्रामत् उत्क्रान्तवत् तदेवं यज्ञोवीर्य्यभूतेषु प्राणेषूत्क्रान्तेषु शरीरान्निष्क्रान्तेषु तच्छरीरं प्रजापतेः श्वयितुमुच्छूनभावङ्गतमधियतामेध्यत्वाभवत् । तस्य प्रजापतेः शरीरान्निर्गतस्यापि तस्मिन्नेव शरीरे मन आसीत् । यथा कस्यचित् प्रिये विषये दूरङ्गतस्यापि मनो भवति तद्वत् । स तस्मिन्नेव शरीरे गतमनाः सन् किमकरोदिति ॥ उच्यते सोऽकामयत कथं मेध्यं मेधार्हं यज्ञियं मे ममेदं शरीरं स्यात् । किंवात्मन्वी आत्मवान् यज्ञेन शरीरेण शरीरवान् स्यामिति प्रविवेश्य । यस्मात्तच्छरीरं मध्ययोगाद्गतयज्ञोवीर्य्यं सदश्वदश्वयत् ततस्तस्मादश्वः समभवत् । ततोऽश्वनामा प्रजापतिरेव स्वयादश्व उच्यते । यस्माच्च पुनः

ब्रह्मावर्त्त

स्तत्प्रवेशात् गतयज्ञोवीर्य्यत्वादमेध्यं सन्मेध्यमभूत् तदेव तस्मादेवाश्वमेधस्याश्वमेधनाम्नः क्रतोरश्वमेधत्वमश्वमेधनाम लाभः ॥")
ब्रह्मादनी, स्त्री, हंसपदी । इति राजनिर्घण्टः ॥
ब्रह्मादिजाता, स्त्री, (ब्रह्मणः आदिजाता सम्भूता । क्वचित् ब्रह्माभिजाता इति पाठो दृश्यते ।) गोदावरी । इति राजनिर्घण्टः ॥
ब्रह्मापेतः, पुं, (ब्रह्मणं ब्रह्मतेजःस्वरूपं सूर्य्यमुपेत उपगतः ततः पृषोदरात् साधुः ।) माघमासे सूर्य्यनिकटस्थितराक्षसः । यथा,—
"त्वष्टा च यमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मापेतोऽथ ऋतजिद्बृहत्तराद्यश्च सप्तमः ॥
माघमासे वसन्त्येते सप्त मैत्रेय ! भास्करे ।"
इति विष्णुपुराणे । २ । १० । १५ ॥

ब्रह्मारण्यं, क्ली, (ब्रह्मणो वेदस्य अरण्यमिव ।) वेदपाठभूमिः । इति त्रिकाण्डशेषः ॥
ब्रह्मार्पणं, क्ली, (ब्रह्मैवार्पणमिति विग्रहे यदर्पणं तद्ब्रह्मैव । यथा, गीतायाम् । ४ । २४ ॥
"ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणाहुतम् ॥"
"ब्रह्मार्पणं येन करणेन प्रकारेण ब्रह्मविद्भिरभावपर्यंतं तद्ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति यथा शुक्तिकायां रजताभावं पश्यति तद्दृष्टयते ब्रह्मैवार्पणमिति यथा यद्रजतं तच्छुक्तिकैवेति । ब्रह्म अर्पणमित्यसमस्ते पदे यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः । इति शाङ्करभाष्यम् ॥) ब्रह्मणि समर्पणम् । तत्पर्य्यायः । तत्कारो यथा,
"ब्रह्मणा दीयते देयं ब्रह्मणे संप्रदीयते ।
ब्रह्मैव दीयते चेति ब्रह्मार्पणमिदं परम् ॥
नाहं कर्त्ता सर्व्वमेतद्ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
प्रीयतां भगवानीशः कर्म्मणानेन शाश्वतः ।
करोति सततं बुद्ध्या ब्रह्मार्पणमिदं परम् ॥
यद्वा फलानां संन्यासं प्रकुर्य्यात् परमेश्वरे ।
कर्म्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् ॥"
इति कूर्म्मपुराणे ४ अध्यायः ॥

ब्रह्मावर्त्तः, पुं, (ब्रह्मणा ब्रह्मनिष्ठब्राह्मणानामावर्त्त इव । बहुलब्राह्मणाश्रयत्वादस्य तथात्वम् ।) देशविशेषः । तत्पर्य्यायः । सपोवटः २ । इति त्रिकाण्डशेषः ॥ तत्परिमाणादि यथा,—
"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥
तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः ।
वर्णानां सान्तरालानां स सदाचार उच्यते ॥
कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्व्वमानवाः ॥
इति मानवे, २ । १७-२० ॥
(तीर्थविशेषः । यथा, महाभारते ३।८३।५०।
"ततो गच्छेत धर्म्मज्ञ ! ब्रह्मावर्त्तं नराधिप ! ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्मलोकमवाप्नुयात् ॥")

अपरञ्च तत्रैव । १ । ८४ । ४० ।
"ब्रह्मावर्त्ते ततो गच्छेत् ब्रह्मचारी समाहित:।
अश्वमेधमवाप्नोति सोमलोकञ्च गच्छति ॥")

ब्रह्मासनं, क्ली, (ब्रह्मणो ब्रह्मप्राप्तेर्वा आसनम् ।) ध्यानासनम् । योगासनम् । इत्यमर: ।२।७।४०॥ ध्यानं परमार्थचिन्तनम् । योगश्चित्तवृत्तिनिरोधमात्रम् । ध्यानं निराकारभावनम् । योग: साकारभावनमिति वा । तयो: पद्मस्वस्तिकादासनं यत् तत्र ब्रह्मासनं स्यात् । इति भरत: ॥ (आसनविशेष: । तल्लक्षणं यथा,—
"ब्रह्मासनं तदा वक्ष्ये यत्कृत्वा ब्राह्मणो भवेत्।
एकपादसुरौ दत्त्वा तिष्ठेद्ब्रह्मासनं भवेत् ॥"
ब्रह्मण आसनमितिविग्रहे ब्रह्मासनम् ॥)

ब्रह्माक्षं, क्ली, (ब्रह्मस्वरूपमक्षम् ।) ब्रह्मस्वरूपाक्षम् । यथा, देवीपुराणे ।
"तदा रामेण क्रुद्धेन ब्रह्माक्षं प्रति रावणे ।
नारायणविघातार्थं चिन्तितं चतुराननम् ॥
सुब्रह्मेखलदक्षाक्षसुवदर्भलताजिनम् ।
कृष्णाररावबकुलमागत्य पुरत: स्थितम् ॥"

ब्रह्मिष्ठा, स्त्री, (अतिशयेन ब्रह्म । ब्रह्म + इष्ठन् + टाप् च ।) दुर्गा । यथा,—
"ब्रह्मिष्ठा वेदमातृत्वात् गायत्री चरणाश्रया ।
वेदेषु चरते यस्मात्तेन सा ब्रह्मचारिणी ॥"
इति देवीपुराणे ४५ अध्याय: ॥

ब्रह्मी, स्त्री, (मेधाजनकत्वात् ब्रह्मणे हिता । ब्रह्म + अण् । वाहुलकात् न वृद्धि: । ततो ङीप् ।) पङ्गगरुकमनुष्य: । इति त्रिकाण्डशेष: ॥ पाँकाल इति भाषा । फञ्जिकाशृङ्ग: । शाकभेद: । ब्रमी इति भाषा । इति मेदिनी । मे, १८ ॥ ब्रह्मीशाकस्य पर्य्याय: । मनुष्याह्वी २ सुरसा ३ वयस्था ४ ब्रह्मचारिणी ५ । इति रत्नमाला ॥ (यथा, भैषज्यरत्नावल्यां कुष्ठरोग चिकित्सायाम् ।
"तैलतुल्यं घृतं तत्र खरसञ्च पृथक् पृथक् ।
ब्रह्मकालवचाब्राह्मी तुल्यांशिग्रुपुत्रिका ॥")
अस्या गुणा: । मेध्यत्वम् । स्वरकारित्वम् । पित्तकफनाशित्वञ्च । इति राजवल्लभ: ॥ अस्या: पर्य्यायान्तरं गुणाश्च ब्राह्मीशब्दे द्रष्टव्या: ॥

ब्रह्मीघृतं, क्ली, (ब्रह्मीजातं घृतम् ।) औषधविशेष: । सारस्वतघृतमिति ख्यातम् । यथा,—
"सप्तमूलपत्रासत्याद्य ब्रह्मीं प्रक्वाल्य वारिणा ।
उदूखले क्षोदयित्वा रसं वस्त्रेण गालयेत् ॥
रसे चतुर्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ।
हरिद्रा मालती कुष्ठं दृक्षती सहरीतकी ।
एतैर्वा पलिकैर्भागै: क्षीरात्तु कार्षिका: स्मृता:॥
पिप्पल्योऽथ विडङ्गानि सैन्धवे शर्करा यथा ।
सर्व्वमेतत् समालोड्य शुभैर्ब्रह्मयिना पचेत् ॥
एतत्प्राशितमात्रेण वाग्मिमुद्धि: प्रजायते ।
स्मरराजप्रयोगेण किन्नरै: सह गीयते ॥
अङ्गराजप्रयोगेण स्वरो भवति कोकिल: ।
मासमेकं प्रयोगेण भवेत् श्रुतिधरो नर: ॥
पञ्च गुञ्जात् प्रमेहांश्च कासं पञ्चविधं जयेत् ।
वन्ध्यागर्भञ्च नारीणां नराणामल्परेतसाम् ।
घृतं सारस्वतं नाम बलवर्णायुष:प्रदम् ॥"
इति जयनारायणसेनचिकित्सारत्नसंग्रह: ॥
(अपरञ्च ।
"ब्रह्मीरसे वचाकुष्ठशङ्खपुष्पीभिरेवच ।
पुराणं मेधसृक्षाद्यघृतमपस्मारनाशनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ॥)

ब्रह्मोक्तं, त्रि, ब्रह्मणि आ सम्यक् प्रकारेण उक्तं ग्रथितम् । ("लोपोऽस्योमाङो: ।" इति सूत्रेण अकार लोप: ।) इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोत्तरं, त्रि, ब्रह्मा ब्राह्मण: उत्तर: प्रधानं यस्य । ब्राह्मणस्वामिकभूम्यादि । इति व्यवहार प्रसिद्धम् ॥ (देशभेद: । इति मात्स्यम् ।१२०।५०॥)

ब्रह्मोद्यं, क्ली, (ब्रह्मणो वेदस्य वदनम् । ब्रह्म + वद् + क्यप् ।) ब्रह्मणो वाक्यम् । इति सुग्धबोधव्याकरणम् ॥

ब्रह्मोद्या, स्त्री, (ब्रह्म + वद् + क्यप् + टाप् ।) ब्रह्मण: कथा । इति सुग्धबोधव्याकरणम् ॥ (यथा, मनु: । २ । २३१ ।
"ब्रह्मोद्याञ्च कथा: कुर्य्यात् पितृणामेतदीप्सितम् ॥"
"परमात्मनिरूपणपरा: कथाश्च कुर्य्यात् ।"
इति तट्टीकायां कुल्लूकभट्ट: ॥)

ब्रह्मोपनेता, [तृ] पुं, (ब्रह्माणं ब्राह्मणं उपनयते इति । ब्रह्म + उप + नी + तृच् । उपनयनहेतुकदक्षत्वात्तथात्वम् ।) पलाशवृक्ष: । इति राजनिर्घण्टु: ॥ ब्राह्मणोपनयनकर्त्ता च ॥

ब्रह्मौदनं, क्ली, (ब्रह्मणे देयमोदनम् ।) यज्ञे ऋत्विग्भ्यो दत्तमन्नम् । इति वैद्यिका: । (यथा, अथर्ववेदे । ४ । ३५ । ७ ।
"ब्रह्मौदनं विश्वजितं पचामि शृतस्तु मे अग्रधानस्य देवा: ॥")

ब्राह्मं, क्ली, (ब्रह्मण इदम् । ब्रह्मन् + "तस्येदम् ।" ५।३।१२०। इत्यण् । 'नस्तद्धिते ।' ६।४।१४४। इति टिलोप: ।) ब्रह्मसौवर्च्चं । तच्च अङ्गुष्ठस्य मूले वर्त्तते । इत्यमर: ॥ २ । ७ । ५१ ॥ अनेन तीर्थेन द्विजस्याचमनं यथा, आह्निकतत्त्वे ।
"अन्तर्जानुशुचौ देशे उपविश्य उदङ्मुख: ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥
अङ्गुष्ठोत्तरतो रेखा या पाणेर्दक्षिणस्य च ।
एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥"
ब्रह्मपुराणम् । यथा,—
"ब्राह्मं प्राजापत्यं वैष्णवञ्च त्रैवं भागवतं तथा ॥"
इति मलमासतत्त्वधृतविष्णुपुराणवचनम् ॥
(ब्रह्मसम्बन्धिनि, त्रि । यथा, मनु: । १ । ६८ ।
"ब्राह्मस्य तु क्षपाहस्य यत्प्रमाणं समासत: ।
एकैकस्यो युगानाञ्च क्रमशस्तन्निबोधत ॥"
ब्रह्मा देवतास्य इति । ब्रह्मन् + "तस्य देवता ।" ४ । २ । २४ । इत्यण् । टिलोप: । ब्रह्मदेवताकमन्त्रादि । यथा, रघु: ।१२ । ८७ ।
"अमोघं सन्दधे बाणे धनुष्येवाधिगुर्द्धर: ।
ब्राह्ममस्त्रं प्रियाप्रोक्तग्रन्थिन्यस्तैर्यवौषधम् ॥")

ब्राह्म:, पुं, (ब्रह्मणोऽपत्यं पुमान् इति । ब्रह्मन् + "तस्यापत्यम् । ४ । १ । ९२ । इत्यण् । "नस्तद्धिते ।" ६ । ४ । १४४ । इति टिलोप: ।) नारद: । इति जटाधर: ॥ (ब्रह्मण इदमिति अण् ।) विवाहविशेष: । यथा,—
"वरमाहूय यथाशक्त्यलङ्कृता कन्या यस्य दीयते स: ।"
यथा,—
"आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्म्म: प्रकीर्त्तित: ॥"
इत्युद्वाहतत्त्वम् ॥
("रात्रेश्च पश्चिमे यामे सुप्तोत्थौ ब्राह्म उच्यते ।" इति नियमात् रात्रिशेषयामाद्वयस्थितोऽरुणोदयात् प्राक्तद्धटयात्मको कालविशेष: । यथा, मनु: । ४ । ९२ ।
"ब्राह्मे मुहूर्त्ते बुद्ध्येत धर्म्मार्थौ चानुचिन्तयेत् ॥")

ब्राह्मणं, क्ली, (ब्रह्मन् + अण् न टिलोप: ।) ब्रह्मसंघात: । ब्राह्मणसमूह: । वेदभाग: । इति मेदिनी । ने, ६७ ॥

ब्राह्मण:, पुं, ब्राह्मणो विप्रस्य प्रजापतेर्वा अपत्यम् । ब्रह्म वेदमधीते वा स: । इति भरत: ॥ (ब्रह्मन् + अण् "ब्राह्मोऽजातौ ।" ६ । ४ । १७१ । इति टिलोप: ।) तत्पर्य्यायं: । द्विजाति: २ अग्रजन्मा ३ भूदेव: ४ वाडव: ५ विप्र: ६ । इत्यमर: ॥ २ । ७ । ४ । ॥ द्विज: ७ सूत्रकण्ठ: ८ ज्येष्ठवर्ण: ९ अग्रजातक: १० द्विजन्मा ११ वक्त्रज: १२ मैत्र: १३ वेदवास: १४ नय: १५ गुरु: १६ । इति शब्दरत्नावली ॥ ब्रह्मा १७ षट्कर्म्मा १८ द्विजोत्तम: १९ । इति राजनिर्घण्टु: ॥* ॥ अयं सर्व्ववर्णश्रेष्ठ: । ब्राह्मणो सुखाप्यात: । ब्रह्मद्वीपे तस्य संज्ञा हंस: । शाल्मलद्वीपे सुनिधर: । कुशद्वीपे कुशल: । क्रौञ्चद्वीपे गुरु: । शाकद्वीपे ऋतव्रत: । पुष्करद्वीपे सर्व्वे एकवर्णा: । अस्य शास्त्रनिरूपितधर्म्माख्य: अध्ययनं यजनं दानञ्च । जीविकाक्षत्रिय: अध्यापनं याजनं प्रतिग्रहञ्च । अयमाश्रमचतुष्टयवान् भवति । यथा । ब्रह्मचारी गृहस्थ: वानप्रस्थ: सन्यासी च । क्षत्रियवैश्ययोस्तु क्रमश एकैकपादहीनमिति बोध्यम् । इति श्रीभागवतम् ॥ * ॥ ब्राह्मणोत्पत्तिया-
वेद्यास्तु ब्राह्मणाज्जातो ब्राह्मण: । यथा,—
"ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मण: स्यान्न संशय:।
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥"
इति महाभारते अनुशासने । ४७ । २८ ॥
तस्य लक्षणं यथा,—
"जात्या कर्म्मेण वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यल्लिङ्गैर्ब्राह्मं स द्विज उच्यते ॥"
इति वह्निपुराणम् ॥
अपि च ।
"न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च य: ।
सर्व्वभूतेष्वभयदस्तं देवा ब्राह्मं विदु: ॥

अहेरिव गणाद्भीतः सौहित्यान्नरकादिव।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः॥
येन केनचिदाच्छन्नो येन केनचिदाशितः।
यत्र क्वचन शायी च तं देवा ब्राह्मणं विदुः॥
विसृष्टं सर्वसङ्गेभ्यो गृहिणमाकाशवत् स्थितम्।
अनिमेकचरं शान्तं तं देवा ब्राह्मणं विदुः॥
जीवितं यस्य धर्मार्थं धर्मो हत्यर्थमेव च।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः॥
निराशिषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः॥"

इति महाभारते मोक्षधर्मः॥*॥

अपि च। विष्णुरुवाच।

"विप्रस्य लक्षणं ब्रूहि त्वद्भक्तिः का च तत्त्वतः।
यतस्तवानुग्रहेण वाग्वाणाः ब्राह्मणाः कृताः॥

कल्किरुवाच।

वेदा मामीश्वरं प्राहुरव्यक्तं व्यक्तिमत् परम्।
ते वेदा ब्राह्मणमुखे नाना धर्माः प्रकाशिताः॥
यो धर्मो ब्राह्मणानां हि सा भक्तिर्मम पुष्कला।
तयाहं तोषितः श्रीशः संभवामि युगे युगे॥
ऊर्ध्वेषु चिह्नितं सूत्रं सध्यानिमिनं शुभे।
तन्मूलयमधोसूत्रं यज्ञसूत्रं त्रिवृद्भवेत्॥
त्रिगुणं तद्व्यस्तियुक्तं वेदप्रवरमस्तकम्।
शिरोधरान्नाभिमध्यात् एकार्द्धपरिमाणकम्॥
यत्तु विद्वां नाभिमितं सामगानामयं विधिः।
वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम्॥
रुद्राक्षचन्दनादीनां धारणेमिलकं द्विजः।
भाले त्रिपुण्ड्रं कर्तव्यं कण्ठपर्यन्तमुज्ज्वलम्॥
एकमङ्गुलिमानन्तु त्रिपुण्ड्रं तत्त्रिधाकृतम्।
ब्रह्मविष्णुशिवाख्यानं दर्शनात् पापनाशनम्॥
ब्राह्मणानां करे स्वर्गो वाचो वेदाः करे हरिः।
गात्रे तीर्थानि यागाश्च नाड्यां प्रकृतिरिच्छया॥
सावित्री कण्ठकुहरा हृदयं ब्रह्मसद्मनम्।
तेषां स्नानान्तरे धर्मैः एष धर्मः प्रकीर्तितः॥
भूत्वा ब्राह्मणा राजन्। पूज्या वन्द्याः सदृक्षिभिः।
चातुराश्रम्यकुशला मम धर्मप्रवर्तकाः॥
ब्राह्मणाद्यापि ज्ञानदुग्धान्नपोषिता मम प्रियाः।
तेषां वचः पालयितुमवतारः कृता मया॥
महाभाग्यं ब्राह्मणानां सर्वेषामप्रणाशनम्।
कल्किदोषहरं श्रुत्वा मुच्यते सर्वतो भयात्॥"

इति कल्किपुराणे ४ अध्यायः॥*॥

अपि च।

"कर्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम्।
स्वधर्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते॥"

इति ब्रह्मवैवर्ते गणेशखण्डे ३५ अध्यायः॥*॥

अपि च।

"जातकर्मादिभिर्यस्तु संस्कारैः संस्कृतः शुचिः।
वेदाध्ययनसम्पन्नः षट्सु कर्मस्ववस्थितः॥
शौचाचारपरो नित्यं विघसाशी गुरुप्रियः।
नित्यव्रती सत्यरतः स वै ब्राह्मण उच्यते॥
सत्यं दानमथोऽद्रोह आनृशंस्यं क्षमा घृणा।
तपश्च दृश्यते यत्र स ब्राह्मण इति स्मृतः॥*॥

तस्य धर्मो यथा,—

ब्राह्मणस्य तु यो धर्मस्तं ते वक्ष्यामि केवलम्।
दममेव महाराज! धर्ममाहुः पुरातनम्॥
स्वाध्यायाभ्यसनेनैव तत्र कर्म समाप्यते।
तच्चेद्वित्तमुपागच्छेदनमानं स्वकर्मभिः॥
अकुर्वाणं विकर्माणि आत्मं प्रज्ञानतर्पितम्।
कुर्वीनोपेत्य सन्तानमथ दद्याद्यजेत च॥
संविभज्यापि भोक्तव्यं धनं सद्भिरितीष्यते।
परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः॥
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते।"

इति पाद्मे स्वर्गखण्डे २६ अध्यायः॥*॥

तस्य माहात्म्यादि यथा,—

"सर्वेषामेव वर्णानां ब्राह्मणः परमो गुरुः।
तस्मै दानानि देयानि भक्तिश्रद्धासमन्वितैः॥
सर्वदेवात्मको विप्रः प्रत्यक्षत्रिदशो भुवि।
स तारयति दातारं दुस्तरे विश्वसागरे॥

हरिभक्तिरुवाच।

सर्ववर्णगुरुर्विप्रस्त्वया प्रोक्तः सुरोत्तम!।
तेषां मध्ये च कः श्रेष्ठः कस्मै दानं प्रदीयते॥

ब्रह्मोवाच।

सर्वेऽपि ब्राह्मणाः श्रेष्ठाः पूजनीयाः सदैव हि।
अविद्या वा सविद्या वा नात्र कार्या विचारणा॥
स्त्रीयादिदोषलिप्ता ये ब्राह्मणा ब्राह्मणोत्तम!।
आत्मभ्यो द्विगुणस्तेऽपि परेभ्यो न कदाचन॥
अनाचारा द्विजाः पूज्या न च शूद्रा जितेन्द्रियाः।
अभक्ष्यभक्षका गावः कोला सुमनसो न च॥
माहात्म्यं भूमिदेवानां विशेषादुच्यते मया।
तत्र स्नेहाद्द्विजश्रेष्ठ! निशामय समाहितः॥
क्षत्रियाणाञ्च वैश्यानां शूद्राणां गुरवो द्विजाः।
अन्योन्यं गुरवो ज्ञेयाः पूजनीयाश्च भूसुर!॥
ब्राह्मणं प्रणमेद्यस्तु विष्णुबुद्ध्या नरोत्तमः।
आयुः पुत्राश्च कीर्तिश्च सम्यक्तस्य वर्द्धते॥
न च नौति द्विजं यस्तु मूढधीर्मानवो भुवि।
सुदर्शनेन तच्छीर्षं छेत्तुमिच्छति केशवः॥"

पूज्यादिहस्तब्राह्मणस्य प्रणामनिषेधो यथा,—

"पूज्यहस्तं पयोहस्तं देवहस्तञ्च भूसुर!।
न नमेद्ब्राह्मणं प्राज्ञस्तैलाभ्यङ्गितविग्रहम्॥
जलस्थं देवतास्नानं ध्यानमञ्जितचेतसम्।
देवपूजाञ्च कुर्वन्तं न नमेद्ब्राह्मणं बुधः॥
बहिष्क्रियां प्रकुर्वन्तं भुञ्जानञ्च द्विजोत्तम!।
तथा सामानि गायन्तं न नमेद्ब्राह्मणं बुधः॥
ब्राह्मणा यत्र तिष्ठन्ति बहवो द्विजसत्तम!।
प्रत्येकन्तु नमस्कारस्तत्र कार्यो न धीमता॥
कृताभिवादनं विप्रं भक्त्या यो नाभिवादयेत्।
स चाण्डालसमो ज्ञेयो नाभिवाद्यः कदापि च॥
कृतप्रणामं तनयं नमेतां पितरौ न च।
कृतप्रणामाः सर्वेऽपि नमस्कार्या द्विजैर्द्विजाः॥
क्षतदोषान् द्विजान् गाश्च न द्विषन्ति विचक्षणाः।
द्विषन्ति वापि मोहेन तेषां रुष्टः सदा हरिः॥
याचकान् ब्राह्मणान् यस्तु कोपदृष्ट्या प्रपश्यति।

क्रूरोग्रदर्शनं तस्य नेत्रयोः कुरुते यमः॥
विप्रनिर्भर्त्सनं मत्वा येन वक्त्रेण कुर्वते।
तस्मिन् वक्त्रे यमस्तप्तं लौहपिण्डं ददाति वै॥
ब्राह्मणो यदृगुद्दिष्टे शुद्धे तदृगुद्दिष्टे केशवः स्वयम्।
देवताः सकला एव पितरश्च सुरर्षयः॥"

तस्य पादोदकादिमाहात्म्यं यथा,—

विप्रपादोदकं यस्तु कणमात्रं वहेद्बुधः।
देहस्थं पातकं तस्य सर्वमेवाशु नश्यति॥
कोटितीर्थाह्वमध्येषु सन्ति तीर्थानि यानि वै।
तीर्थानि तानि सर्वाणि वसन्ति द्विजपादयोः॥
विप्रपादोदकैर्नित्यं सिक्तं स्याद्यस्य मस्तकम्।
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः॥
सर्वपापानि घोराणि ब्रह्महत्यादिकानि च।
सद्य एव विनश्यन्ति विप्रपादाम्बुधारणात्॥
त्रयाणां वाधयः सर्वे परमक्लेशदायकाः।
गच्छन्ति विलयं सद्यो विप्रपादाम्भसाप्लवात्॥
यिच्चर्मं यानि तोयानि दीयन्ते विप्रपादयोः।
तैस्तृप्ताः पितरः स्वर्गे तिष्ठन्त्याचन्द्रतारकम्॥
प्रक्षाल्य विप्रचरणौ दूर्वाभिर्यो ऽर्चयेद्बुधः।
तेनार्चितो जगत्स्वामी विष्णुः सर्वसुरोत्तमः॥
विप्राणां पादनिर्माल्यं यो मर्त्यः शिरसा वहेत्।
सत्यं सत्यमहं वच्मि तस्य मुक्तिर्हि शाश्वती॥

तस्य प्रदक्षिणफलम्।

"विप्रं प्रदक्षिणीकृत्य वन्दते यो नरोत्तमः।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा॥"

तस्य पादसेचनफलम्।

यो दद्यात् फलताम्बूलं विप्राणां पादसेचने।
इह लोके सुखं तस्य परलोके ततोऽधिकम्॥
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।
मोक्षार्थी लभते मोक्षं विप्रपादस्य सेचनात्॥
रोगी रोगात् प्रमुच्येत पापी मुच्येत पातकात्।
मुच्येत बन्धनाद्बद्धो विप्राणां पादसेचनात्॥
अनपत्याश्च या नार्यो मृतापत्याश्च याः स्त्रियः।
वन्ध्यापत्या जीववत्सा स्युर्विप्रपादसेचनात्॥"

इति पाद्मे क्रियायोगसारे २० अध्यायः॥

तस्य सन्ध्याया अकरणे दोषो यथा,—

"नोपास्ते यः पूर्वां नोपास्ते यस्तु पश्चिमाम्।
स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः॥"

तस्य सन्ध्याकरणफलं यथा,—

"यावज्जीवनपर्यन्तं यस्त्रिसन्ध्यं करोति च।
स च सूर्यसमो विप्रस्तेजसा तपसा सदा॥
तत्पादपद्मरजसा सद्यः पूता वसुन्धरा।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः।
ततः पापानि यान्त्येव वैनतेयादिवोरगाः॥

सन्ध्याया अकरणे दोषो यथा,—

"न यजन्ति सुरास्तेषां पितरः पिण्डतर्पणम्।
स्वेच्छया च द्विजातेश्च त्रिसन्ध्यरहितस्य च॥"

तस्य निन्दितकर्माणि यथा,—

"विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः।
एकादशीविहीनश्च विषहीनो यथोरगः॥
हरेर्नैवेद्यभोजी न धावको वृषवाहकः।

ब्राह्मणः

शूद्रान्नभोजी विप्रश्च विष्ठाकीटो यथोरगः ॥
ग्रामयाजी च शूद्राणां यो विप्रो वृषलीपतिः ।
शूद्राणां सूपकारी च शूद्रयाजी च यो द्विजः ।
असिजीवी मसीजीवी विष्ठाकीटो यथोरगः ॥
यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ।
भगजीवी वार्द्धुषिको विष्ठाकीटो यथोरगः ।
यः कन्याविक्रयी विप्रो यो हरेर्नामविक्रयी ।
यो विद्याविक्रयी विप्रो विष्ठाकीटो यथोरगः ॥
क्रव्यादेषु च दिग्भोजी मत्स्यभोजी च यो द्विजः ।
शिलापूजादिरहितो विष्ठाकीटो यथोरगः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः ॥*॥
अपि च ।
"यदि शूद्रां व्रजेद्विप्रो वृषलीपतिरेव सः ।
स भ्रष्टो विप्रजातेश्च चाण्डालात् सोऽधमः
स्मृतः ॥
विष्ठासमश्च तत्पिण्डो मूत्रं तस्य च तर्पणम् ।
तत्पितॄणां सुराणाञ्च पूजने तत्समं सति ॥
कोटिजन्मार्जितं पुण्यं सन्ध्याचानपवार्जितम् ।
द्विजस्य वृषलीभोगान्नश्यत्येव न संशयः ॥
ब्राह्मणश्च सुरापीती विड्भोजी वृषलीपतिः ।
हरिवासरभोजी च कुम्भीपाकं व्रजेद्ध्रुवम् ॥"
अपि च ।
"करोत्यशुद्धां सन्ध्याञ्च सन्ध्यां वा न करोति यः ।
जिसन्ध्यं वर्जयेद्यो वा सन्ध्याहीनश्च स द्विजः ॥
नारायणक्षेत्रादितीर्थे तस्य प्रतिग्रहदोषो यथा,
"तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे ।
वाराणस्यां वदर्यांच गङ्गासागरसङ्गमे ॥
पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले ।
हरिद्वारे च केदारे सोमे बदरिकाश्रमे ॥
सरस्वतीनदीतीरे पुण्ये वृन्दावने वने ।
गोदावर्यांच कौशिक्यां चित्रवेण्यांच हिमालये ।
एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च ॥"
पारिभाषिकमहापातकिब्राह्मणा यथा,—
"शूद्रसम्भोगजन्यायां यामयाजीति कीर्तितः ।
देवोपजीवजीवी च देवलश्च प्रकीर्तितः ॥
शूद्रपाकोपजीवी यः सूपकारः प्रकीर्तितः ।
सन्ध्यापूजाविहीनश्च प्रमत्तः पतितः स्मृतः ॥
एते महापातकिनः कुम्भीपाकं प्रयान्ति ते ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे २७ अध्यायः ॥*॥
विप्राणामाग्नीध्रवरणं पूर्णस्वस्त्ययनं यथा,—
"आग्नीध्रं कर्त्तुमर्हन्ति प्रसन्नमनसा द्विजम् ।
पूर्णस्वस्त्ययनं सद्यो विप्राग्नीध्रवरणं ध्रुवम् ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
ब्राह्मणस्य स्वधर्मो यथा,—
"ब्राह्मणस्य स्वधर्मश्च त्रिसन्ध्यमर्चनं हरेः ।
तत्पादोदकनैवेद्यभक्षणञ्च सुधाधिकम् ॥
अन्नं विष्ठा जलं मूत्रमनिवेद्यं हरेर्नृप ! ।
भवन्ति शूकराः सर्वे ब्राह्मणा यदि भुञ्जते ॥
आजीवं भुञ्जते विप्रा एकादश्यां न भुञ्जते ।
कृष्णजन्मदिने चैव शिवरात्रौ सुनिश्चितम् ॥

ब्राह्मणः

तथा रामनवम्याञ्च यतः पुण्यदिवासरे ।
ब्राह्मणानां स्वधर्मश्च कथितो ब्रह्मणा नृप ! ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ५६ अध्यायः ॥
गृहस्थब्राह्मणनियमा यथा,—
"वेदं वेदौ तथा वेदानधीत्य तु समाहितः ।
तदर्थमभिगम्याथ तत्र स्नायाद्विजोत्तमः ॥
गुरवे तु धनं दत्त्वा स्नायीत तदनुज्ञया ।
चीर्णव्रतोऽथ सुस्नातो गृहस्थः स्नातुमर्हति ॥
वेदवीक्षारयेद्दृष्टिमस्तचासमथोत्तरम् ।
यज्ञोपवीतद्वितयं सोदकञ्च कमण्डलुम् ॥
छत्रचोष्णीषममलं पादुके चाप्युपानहौ ।
रौक्मे च कुण्डले धार्ये क्षौमकौशेयनस्त्रः शुचिः ॥
स्वाध्याये नित्ययुक्तः स्याद्दृष्टिमार्गं न धारयेत् ।
अन्यत्र कार्यतो विप्रो न रक्तां बिभृयात् स्रजम् ॥
शुक्लाम्बरधरो नित्यं सुगन्धः प्रियदर्शनः ।
न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
न रक्तमुत्सृजेच्छास्य धृतं वासो न कुण्डिकाम् ।
नोपानहौ स्रजं वाथ पादुके च प्रयोजयेत् ॥
उपवीतमलङ्कारं कुम्भान् क्षौमाजिनानि च ।
नापरेषां परीदध्याद्वासो न विकृतं वसेत् ॥
आहरेद्विधिवद्दारान् गृहस्थाश्रमतः शुभान् ।
रूपलक्षणसंयुक्तां योनिदोषविवर्जितान् ॥
अमातृगोत्रप्रभवामसमानार्षगोत्रजाम् ।
आहरेदुद्वाहजो भार्यां शीलशौचसमन्विताम् ॥
ऋतुकालाभिगामी स्यादृषिवत् पुत्रोत्पत्तिजायते ।
वर्जयेत् प्रतिषिद्धानि प्रयत्नेन दिनानि तु ॥
षष्ठ्यष्टमी पञ्चदशी द्वादशी च चतुर्दशी ।
ब्रह्मचारी भवेन्नित्यं तद्भक्तव्रतयाहनि ॥
आदधीतावसथ्याग्निं जुहुयाच्चानवेदसम् ।
व्रतानि स्नातको नित्यं पावनानि च पालयेत् ॥
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः ।
अकुर्वाणः पतत्याशु नरकानतिभीषणान् ॥
अभ्यसेत् प्रयतो नित्यं वेदं यज्ञान् क्षापयेत् ।
कुर्यादृतूक्तानि कर्माणि सन्ध्योपासनमेव च ॥
सत्यं समधिकैः कुर्यादुपेयादीश्वरं सदा ।
देवतान्यपि गच्छेत्तु कुर्याद्वाप्यभिपोषणम् ॥
न धर्मं ख्यापयेद्विद्वान् न पापं गूहयेदपि ।
कुर्वीतात्महितं नित्यं सर्वभूतानुकम्पकः ॥
वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च ।
वेशवाग्बुद्धिसारूप्यमाचरन् विचरेत् सदा ॥
मुनिस्मृत्युदितं सम्यक् साधुभिर्यच्च सेवितम् ।
तमासेवेत नियतं नेहेतान्यच्च कर्हिचित् ॥
येनास्य पितरो याता येन याताः पितामहाः ।
येन यान्ति सतां मार्गं तेन गच्छन्नरिष्यति ॥
नित्यस्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतिमान् ।
सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ॥
सन्ध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः ।
अनलसयुरुदारात्मा गृहस्थः प्रशस्यते ॥
वीतरागभयक्रोधो लोभमोहविवर्जितः ।
सावित्रीजापनिरतः श्रद्धावान् सुच्यते गृही ॥
मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः ।
दाता यज्ञो देवभक्तो ब्रह्मलोके महीयते ॥

ब्राह्मणः

त्रिवर्गसेवी सततं देवतानाञ्च पूजनम् ।
कुर्यादहरहर्नित्यं नमस्येत् प्रयतः सुरान् ॥
विभागशीलः सततं क्षमायुक्तो दयात्मकः ।
गृहस्थस्तु समायुक्तो न गृहे न गृही भवेत् ॥
क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः ।
अध्यात्मं नित्यता ज्ञानमेतद्ब्राह्मणलक्षणम् ॥
एतल्लक्षणसम्पन्नो विपरीतो द्विजोत्तमः ।
यथाशक्ति चरन् कर्म निन्दितानि विवर्जयेत् ॥
विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ।
गृहस्थो मुच्यते बन्धान्नात्र कार्या विचारणा ॥
विगर्हितक्रमत्यागहिंसाबन्धवधात्मनाम् ।
अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा ॥
सुदुःखेष्विव कारुण्यं परदुःखेषु सौहृदात् ।
दया यतयः प्राहुः साधोर्धर्मस्य साधनम् ॥
चतुर्दशानां विद्यानां धारणं हि यथार्थतः ।
विज्ञानमित्तरं विद्याद्यत्र धर्मो विवर्धते ॥
अधीत्य विधिवद्विद्यामर्थज्ञेवोपलभ्य तु ।
धर्मकार्यान्निवृत्तश्चेन्न तद्विज्ञानमिष्यते ॥
सत्येन लोकं जयति सत्यन्तत् परमं पदम् ।
यथा भूतप्रसादस्तु सत्यमाहुर्मनीषिणः ॥
दमः परोरावनतिः शमः प्रज्ञा प्रसादजः ।
अध्यात्मशरं विद्याद्यत्र गत्वा न शोचति ॥
यथा स देवो भगवान् विद्यते यत्र विद्यते ।
साक्षादेव महादेव ! तज्ज्ञानमिति कौशिकम् ॥
तस्मिन्सत्यपरो विद्वान्नित्यमक्रोधनः शुचिः ।
महायज्ञपरो विप्रो लभते तदनुत्तमम् ॥
धर्मस्यायतनं यत्नाच्छरीरं परिपालयेत् ।
न हि देहं विना तात ! पुरुषैर्विद्यते परः ॥
नित्यं धर्मार्थकामेषु युक्तीत नियतो द्विजः ।
न धर्मवर्जितं काममर्थं वा मनसा स्मरेत् ॥
सीदन्नपि स्वधर्मेण नत्वधर्मं समाचरेत् ।
धर्मो हि भगवान्देवो गतिः सर्वेषु जन्तुषु ।
भूतानां प्रियकारी स्यान्न परद्रोहकर्मधीः ॥
न वेददेवतानिन्दां कुर्यान्नैव न सम्वदेत् ।
यस्त्वेवं नियतो विप्रो धर्माध्यायं पठेत् शुचिः ।
अध्यापयेच्छ्रावयेद्वा ब्रह्मलोके महीयते ॥"
इति कौर्मे उपविभागे १७ अध्यायः ॥
अपि च । सूत उवाच ।
"आनृशंस्यं क्षमा सत्यमहिंसा दममार्दवम् ।
ध्यानं प्रसादो माधुर्यमार्जवं शौचमेव च ॥
इज्या दानं तपः सत्यं स्वाध्यायो ह्यात्मनिग्रहः ।
व्रतोपवासौ मौनञ्च स्नानं पैशुन्यवर्जनम् ॥
अभियुक्तो सुनिश्चेष्टा यः सदा वर्त्तते द्विजः ।
हुत्वा तु पावकं सर्वं परं ब्रह्माधिगच्छति ॥
अविद्वो वा सविद्वो वा निरग्निः साग्निकोऽपि
वा ।
यो विप्रक्तपसा युक्तः स परं स्वर्गमाप्नुयात् ॥
सर्वेषामुत्तमं श्रेष्ठं विमुक्तिफलदायकम् ।
ब्राह्मणस्य तपो वक्ष्ये तन्मे निगदतः शृणु ।
सायं प्रातश्च यः सन्ध्यामुपास्ते स्थिरमानसः ॥
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ।
तपसा भाविलो देव्या ब्राह्मणः पूतकिल्बिषः ॥

न क्षीदेत् प्रतिगृह्णन् सन्नयि पृथ्वीं ससागराम् ।
हे सन्ध्ये उपतिष्ठेत गायत्रीं प्रयतः शुचिः ॥
यत्तस्य दुष्कृतं नक्तं पूर्वतः परतोऽपि वा ।
यज्ञदानरतो विद्वान् ब्राह्मवेदस्य पाठकः ॥
गायत्रीध्यानपूतस्य कलां नार्हन्ति षोडशीम् ।
एवं विधिविधानेन विनिर्दहति पातकम् ॥
उभे सन्ध्ये उपासीत तस्मान्नित्यं द्विजोत्तमः ॥
तस्य देहापवित्रत्वं यथा,—
"यथा देहापवित्रत्वं विप्रादीनां यतो भवेत् ।
देवर्षे ! शृणु तत्सर्वं नराणामानुपूर्विकम् ॥
जातके मृतकेऽशौचे जलौकाभिः कृते तथा ।
अपवित्रो द्विजातीनां देहः सन्ध्यादिकर्म्मसु ॥
अपूतमनुदक्सर्गे नरो मूत्रपुरीषयोः ।
अशुद्धश्चाशुचौ चैव ब्रह्मयज्ञजपादिषु ॥
रक्तपाते नखच्छेदे क्षते खड्गादिभिः कृते ।
विप्राद्देरशुचिः कायः शस्त्राघातैः कण्टकादिभिः ॥
मृतकेक्षाननोच्छिष्टेऽपवित्रः क्षतमैथुने ।
शृणु ब्राह्मणादीनां शरीरं क्षुरकर्म्मणि ॥
ज्वरादिभिस्तनुःपरिरोगैर्युक्ते द्विजन्मनाम् ।
वपुरप्रयतं पूजादानहोमजपादिषु ॥
धूमोद्गारे वमौ आद्यपतितान्नादिभोजने: ।
तथा च रेतःस्खलने मलदेहापवित्रता ॥
अपवित्रं द्विजातीनां वपुः स्याद्दाहदर्शने ।
गर्हितदानग्रहणे पतिते पातकादिभिः ॥
अग्नीष्वात्तेन शुद्धिः स्याज्ज्ञातके मृतके द्विज ! ॥
सर्वेषामाशौचादीनां मनोः सन्ध्यादिकर्म्मसु ॥"

इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥

अथ आह्नीयब्राह्मणनिर्णयः ।

मान्धातोवाच ।

"कीदृशेभ्यः प्रदातव्यं भवेच्छ्राद्धं महामुने ! ।
द्विजेभ्यः किंगुणिभ्यो वा तन्मे व्याख्यातुमर्हसि ।

नारद उवाच ।

ब्राह्मणान् परीक्षेत्तत्र्यवर्गाक्षयौ नृप ! ।
दैवे कर्म्मणि पित्र्ये च न्याय्यमाहुः परीक्षणम् ॥
दैवतैः पूजयन्लोकं दैवतेन हि तेजसा ।
उपैति तस्माद्दैवेभ्यः सर्व्वेभ्यो दापयेन्नरः ॥
श्राद्धे तथ महाराज ! परीक्षेद्ब्राह्मणं बुधः ।
कुलशीलवयोरूपैर्विद्ययाभिजनेन च ॥
तेषामन्ये पङ्क्तिदूषास्तस्मात्ते पङ्क्तिपावनाः ।
अपाङ्क्तेयास्तु ये राजन् ! कीर्त्तयिष्यामि तान् शृणु ॥"

अपाङ्क्तेया यथा,—

क्षितयो भूमहा यक्ष्मी प्रपुत्राको निराकृतिः ।
ग्रामप्रेष्यो वार्द्धुषिको गायनः सर्व्वविक्रयी ॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
वार्द्धुषिको राजदूतस्तैलिकः कूटकारकः ॥
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तया क्लीवः शिल्पं यश्चोपजीवति ॥
प्रव्रज्याकारश्च कुण्डी च मित्रध्रुक् पारदारिकः ।
अनधीतानुपाध्यायः काण्डपृष्ठश्चैव च ॥
अभिशस्तः परिक्रामेदृणः शूना दृष्ट एव च ।
परिवित्तिस्तु यश्च स्याद्दुष्कर्म्मा गुरुतल्पगः ॥
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशा ब्राह्मणा ये च अपाङ्क्तेयास्तु ते मताः ॥
रक्षांसि गच्छते हव्यं यदेषान्तु प्रदीयते ।
आद्धे भुक्ता महाराज ! दुष्कर्म्मा गुरुतल्पगः ॥
आद्धं नाश्नुयते तस्य पितरोऽपि न भुञ्जते ।
सोमविक्रयिणे दत्तं विड्भानुत्वं भवेन्नृप ! ॥
भिषजे शोणितसमं नष्टं देवलके तथा ।
अप्रतिष्ठं वार्द्धुषिके निष्फलं परिकीर्त्तितम् ॥
बहुवाणिजके दत्तं नेह नामुत्र तद्भवेत् ।
भस्मन्येव हुतं हव्यं तथा पौनर्भवे द्विजे ॥
ये तु धर्म्मध्वजैस्तेषु चरित्रापगतेषु च ।
हव्यं कव्यं प्रयच्छन्ति तेषां तन्नाय नश्यति ॥
ज्ञानपूर्व्वन्तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चितम् ॥
एतान् विद्धि महाबाहो ! अपाङ्क्तेयान् द्विजाधमान् ।
श्रद्धामात्रमपेक्षन्तु ये कुर्व्वन्त्यल्पबुद्धयः ॥
यद्धिं काणः शुनं खञ्जः शिवो यावन् प्रपश्यति ।
पङ्क्त्यां समुपविष्टायां तावद्दूषयते नृप ! ॥
यद्दक्षिणेन शूद्रेण यद्भुक्तं दक्षिणासुखः ।
सोपानत्कञ्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम् ॥
अक्षय्यते च यद्दत्तं यच्च अल्पादिवर्जितम् ।
सर्व्वं तदसुरेन्द्राय ब्रह्मा भागमकल्पयत् ॥
श्यामस्य पङ्क्तिदूषास्य नावेक्षेरन् कथञ्चन ।
तस्मात् परिहृते श्यामे श्यामां श्राद्धे विवर्जयेत् ॥
तिलैर्विरहितं श्राद्धं क्षतं क्रोधवशेन च ।
यातुधानाः पिशाचाश्च विप्रलुम्पन्ति तद्धविः ॥
अपाङ्क्तेयो यतः पङ्क्त्यां भुञ्जानो नैव पश्यति ।
तावत् फलाद्भ्रंशयति दातारं तस्य वालिशम् ॥"

पङ्क्तिपावना यथा,—

"इमे हि मनुजश्रेष्ठ ! विज्ञेयाः पङ्क्तिपावनाः ।
विद्यावेदव्रतस्नाताः ब्राह्मणाः सर्व्व एव हि ॥
सदाचारपराश्चैव विज्ञेयाः पङ्क्तिपावनाः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ॥
ऋतुकालाभिगामी च धर्म्मपत्न्यां यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पङ्क्तिं पुनात्युत ॥
अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्म्मशीलः स्वकर्म्मनिरतश्च यः ॥
ये च पुण्येषु तीर्थेषु अभिषिक्तकृतश्रमाः ।
मखेषु च समर्त्तेषु भवन्त्यवभृतप्लुताः ॥
अक्रोधना ह्यचपलाः शान्ता दान्ता जितेन्द्रियाः ।
सर्व्वभूतहिता ये च आर्द्धमेतान्निमन्त्रयेत् ॥
एतेषु दत्तमक्षय्यमेते वै पङ्क्तिपावनाः ।
यतयो मोक्षधर्म्मज्ञा योगाः सुचरितव्रताः ॥
ये चैनिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद् ये च शाकरणे रताः ॥
अधीयते पुराणं ये धर्म्मशास्त्राणि चाप्युत ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अध्याः सर्व्वेषु वेदेषु सर्व्वप्रवचनेषु च ॥
यावदेते प्रपश्यन्ति पङ्क्त्यां तावत् पुनन्ति च ।

ततो हि पावनात् पङ्क्त्या उच्यन्ते पङ्क्तिपावनाः ॥
अदूषिताधुपाध्यायः स वेदस्याश्रमं व्रजेत् ।
ऋत्विग्भिरनुज्ञातः पङ्क्त्या हरति दुष्कृतम् ॥
अथ चेद्वेदवित् सर्व्वैः पङ्क्तिदोषैर्विवर्जितः ।
न च स्यात् पतितो राजन् ! पङ्क्तिपावन उच्यते ॥
तस्मात् सर्व्वप्रयत्नेन परीक्ष्यामन्त्रयेद्विजान् ।
स्वकर्म्मनिरतान् शान्तान् कुले जातान् बहुश्रुतान् ॥
यस्य मित्रप्रधानानि आद्धानि च हवींषि च ।
न प्रीणाति पितॄन् देवान् स्वर्गञ्च न स गच्छति ॥
ब्राह्मणो ज्ञानधौतायां तृप्तादिरिव शाम्यति ।
तस्मिन् आद्धं न दातव्यं न हि भस्मनि हूयते ॥
ऋषीणां समये नित्यं ये चरन्ति महीपते ! ।
निश्चिताः सर्व्वधर्म्मज्ञास्तान् देवा ब्राह्मणान् विदुः ॥
स्वाध्यायनिष्ठानिरता ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च योक्त्रज्ञाः कर्म्मनिष्ठाश्च पार्थिव ! ॥
कथानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भूमिप ! ।
तत्र ये ब्राह्मणान् केचिन्न निन्दन्ति हि ते वराः ॥
ये तु निन्दन्ति जल्पेषु न तान् आद्धेषु योजयेत् ।
ब्राह्मणा निन्दिता राजन् ! हन्युरूर्द्धं पुरुषं सदा ॥
वैखानसानां वचनन्तर्षीणां श्रूयते नृप ! ।
दूरादेव निरीक्षेत ब्राह्मणान् वेदपारगान् ॥
प्रियो वा यदि वा द्वेष्यस्तेषां न आद्धमावपेत् ॥"

इति पाद्मे स्वर्गखण्डे आद्धपात्रनिर्णयो नाम ३५ अध्यायः ॥

आततायिब्राह्मणवधे दोषाभावो यथा,—

"आत्मानं हन्तुमायान्तमपि वेदान्तपारगम् ।
न दोषो हनने तस्य न तेन ब्रह्महा भवेत् ॥
प्रायश्चित्तं हिंसकानां न वेदेषु निरूपितम् ।
वधे समुचिते तेषामित्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २५ अध्यायः ॥

(ऋ, मन्त्रेतरवेदभागः । आद्यङ्कोपन्यास तन्निरसनपूर्व्वकं तल्लक्षणमाह ऋग्वेदभाष्योपोद्घातप्रकरणे यथा। "तत्र ब्राह्मणस्य तत्त्वं नास्ति । कुतः ? वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्तिव्याप्तेः प्रोधयितुमशक्यत्वात् । पूर्व्वलिखितभाग एकः । भागान्तराणि च कानिचित् पूर्व्वैरुदाहृतानि संगृहीतानि ।

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परक्रिया पुराकल्पो व्यवधारणकल्पना ॥" इति ।
तेन ह्यत्र क्रियते इति हेतुः १ । तद्ब्राह्मणत्वमिति निर्व्वचनम् २ । अमेध्या वै माषाः इति निन्दा ३ वायुर्वै क्षेपिष्ठा देवता इति प्रशंसा ४ । तद्व्याचिकीर्षुः कुहवानो मा हौषमिति संशयः ५ । यजमानेन सम्मितोऽग्निर्भवतीति विधिः ६ । माषानेव मह्यं पचन्तीति परक्रिया ७ पुरा ब्राह्मणा अभैषुरिति पुराकल्पः ८ । यावतोऽग्नान् प्रतियज्ञीयान्तावतो वारुणांश्चतुष्कपालान्

निर्वपेदिति विशेषावधारणकल्पना ६। एवमन्यदपि उदाहार्यम्॥ न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणम्। मन्त्रेष्वपि हेत्वादिसद्भावात्। इन्द्रवोवासुग्नन्तिष्टौति हेतुः। उदानिषुर्महीरिति तस्मादृक्सूक्तमिति निर्वचनम्। मोघमन्नं विन्दते अप्रचेताः इति निन्दा। अग्निर्मूर्धादिवः इति प्रशंसा। अधः खिदासीदुपरिस्विदासीदिति संशयः। वसन्ताय कपिञ्जलानालभत इति विधिः। सहस्रमयुतादद्दिति परकृतिः। यज्ञेन यज्ञमयजन्त देवा इति पुराकल्पः। इति करणचतुष्टयं ब्राह्मणमिति चेत् न इत्यादा इत्यजया इत्यपच इति ब्राह्मणो गायेदित्यस्मिन् ब्राह्मणेन मानवे मन्त्रेतिव्याप्तेः। इत्याहेत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेन्न राजाग्निहं भगं भक्षीत्याह यो वा रथाः शुचिरस्मीत्याह इत्यनयोर्मन्त्रयोरतिव्याप्तेः आख्यायिकारूपं ब्राह्मणमिति चेन्न यमयमीसंवादछन्दोदावतिव्याप्तेः। तस्मान्नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते भ्रमः मन्त्रब्राह्मणरूपौ द्वावेव वेदभागौ इत्यङ्गीकारात् मन्त्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणहयं जैमिनिः सूत्रयामास तच्चोदकेषु मन्त्राख्येषु ब्राह्मणशब्द इत्यादि॥"

विष्णुः। यथा, महाभारते। १३। १४६। ८४।

"ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मजो ब्राह्मणप्रियः॥"

शिवः। यथा, तत्रैव। १३। १७। १३३।

"गर्भस्थितमजं रुद्रं ब्रह्मा ब्रह्मविद् ब्राह्मणो गतिः॥"

ब्रह्म जानातीति शुनुपत्न्या परब्रह्मवेत्तरि, त्रि॥)

ब्राह्मणभुवः, पुं, (ब्राह्मणवंशोत्पन्नतया वेदोक्तकर्म्माकुर्व्वन्नपि आत्मानं ब्राह्मणं ब्रवीतीति। ब्राह्मण + भू + क + बाहुलकात् न वधादेयुः।) ब्राह्मणजातिमात्रोपजीवी। यथा,—

"विप्रः संस्कारयुक्तो न नित्यं सन्ध्यादि कर्म्मयः।
नैमित्तिकन्तु नो कुर्य्यात् ब्राह्मणभुव उच्यते॥
युक्तः स्यात् सर्व्वसंस्कारैर्द्विजस्तु नियमव्रतैः।
कर्म्म किञ्चिन्न कुरुते वेदोक्तं ब्राह्मणभुवः॥
गर्भाधानादिभिर्यैस्तैस्तथोपनयनेन च।
न कर्म्मैतान्न चाधीते स ज्ञेयो ब्राह्मणभुवः॥
अध्यापयति नो शिष्यान्नाधीते वेदसत्तमम्।
गर्भाधानादिसंस्कारैर्यैर्तः स्याद्ब्राह्मणभुवः॥"

इति पाद्मोत्तरखण्डे १०६ अध्यायः॥

तस्य दाने फलविशेषो यथा,—

"सममब्राह्मणे दानं द्विगुणं ब्राह्मणभुवे।
अधीते शतसाहस्रमनन्तं वेदपारगे॥"

इति मानवे ७। ८५॥

ब्राह्मणयष्टिका, स्त्री, (ब्राह्मणस्य यष्टिरिव। ततः स्वार्थे संज्ञायां वा कन् अत इत्वञ्च।) वृक्षविशेषः। वामनहाटी इति भाषा। तत्पर्य्यायः। पञ्चिका २ ब्राह्मणी ३ पद्मा ४ भार्गी ५ अङ्गारवल्ली ६ वालेयशाकः ७ वर्व्वरः ८ वर्व्वकः ९। इत्यमरः। २। ४। ८६॥ ब्राह्मयष्टिः १० ब्राह्मयष्टी ११ पञ्चीका १२ यष्टी १३ ब्राह्मयष्टिका १४ दुर्व्वरा १५ अङ्गारवल्लरी १६ वालेयः १७ ब्राह्मिका १८। इति शब्दरत्नावली॥ भृगुभवा १९ पद्या २० खरशाकः २१ पञ्चिका २२। अस्या गुणाः।

"भार्गी रूक्षा कटूष्णा च श्वयथ्वामा वाचनी लघुः।
दीपनी तुवरा गुल्मरक्तनुन्नाग्नयेद्ध्रुवम्॥
श्लेष्मकासकफश्वासपीनसज्वरमारुतान्।"

इति भावप्रकाशः॥

ब्राह्मणयष्टी, स्त्री, (ब्राह्मणस्य यष्टीव।) भार्गी। इति राजनिर्घण्टः॥

ब्राह्मणहितः, त्रि, (ब्राह्मणस्य हितः।) ब्राह्मणस्य हितकारी। तत्पर्य्यायः। ब्राह्मण्यः २। इति जटाधरः॥

ब्राह्मणायनः, पुं, (ब्राह्मणस्यापत्यम्। "नडादिभ्यः फक्।" ४। १। ९९। इति फक्।) शुद्धसन्तानजो विप्रः। इति चिकाण्डशेषः॥

ब्राह्मणी, स्त्री, पञ्चिका। एका।

("सृक्काङ्क ब्राह्मणीदेवी मरुज्जाला लता लघुः।
सप्तद्राम्ना वधूः कोटिवर्षालब्धो पिकेत्यपि॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ भार्गी। तत्पर्य्याया यथा,—

"पद्मा गन्धर्व्वहस्ताक्षा काञ्ची चाङ्गारपर्णयपि।
भार्य्यम्बष्ठिका ब्राह्मी ब्राह्मणी ब्रह्मचारिणी॥"
"हरेणुरेणुका कौन्ती ब्राह्मणी हैमवल्लिनी॥"

इत्यमरभेदैकरत्नमालायाम्॥

ब्राह्मण + ङीष्।) ब्राह्मणपत्नी। इति विश्वः। (यथा, मनुः। ८। ३७६।

"ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्॥")

वरटी। इति चिकाण्डशेषः॥ पिपीलिकाभेदः। तत्पर्य्यायः। मूलपूर्व्विका २। इति हेमचन्द्रः॥

ब्राह्मणागमने दोषो यथा,—

"कुलटाविप्रपत्नीनां गमने सुरविप्रयोः।
ब्रह्महत्याव्रतार्द्धन्तु पापकन्तु भवेद्ध्रुवम्॥
सासासुसम्भिनानाञ्च गमने सर्व्वतुर्थकम्।
त्यागे धर्म्मो नास्ति पापमित्याह कमलोद्भवः॥
विप्रपत्नीसतीनाञ्च गमनेन बलेन चेत्।
ब्रह्महत्याव्रतं पापं भवेदेव मुनौ श्रुतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः॥

(वृद्धिः। इयं हि भगवता ब्राह्मणीरूपेण कल्पिता अर्জ্জुनाय कथिता। यथा, महाभारते १४। ३४। ११-१२।

अर्জ্জुन उवाच।

"क्व नु सा ब्राह्मणी ब्रह्मन्! क्वासौ श्रीब्राह्मणर्षभः।
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽनघ!॥

श्रीभगवानुवाच।

मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम्।
क्षेत्रज्ञ इति यच्चोक्तः सोऽहमेव धनञ्जय॥"

तीर्थविशेषः। यथा, महाभारते। ३। ८३। ५५।

"ततो वै ब्राह्मणीं गत्वा ब्रह्मचारी जितेन्द्रियः।
पञ्चयज्ञेन यानेन ब्रह्मलोकं प्रपद्यते॥")

ब्राह्मण्यं, क्ली, (ब्राह्मणानां समूहः। ब्राह्मण + "ब्राह्मणमाणवकवाडवाद्यत्।" ४। २। ४२। इति यत्।) ब्राह्मणसमूहः। इत्यमरः। २। ७। ४१॥ ब्राह्मणत्वम्। इति मेदिनी। ये, ६७। (यथा, मनुः। ३। १७।

"भूदां श्रवणमारोप्य ब्राह्मणो याम्यधोमुखम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥")

ब्राह्मण्यः, पुं, ब्राह्मणसमूहः। इति शब्दमाला॥

ब्राह्मसुकूर्म्मः, पुं, (ब्राह्मो ब्रह्मदेवताको सुकूर्म्मः।) अरुणोदयकालस्य प्रथमदण्डद्वयम्। ब्राह्मसुकूर्म्ममाह पितामहः।

"रात्रेश्च पश्चिमे यामे सुकूर्म्मो ब्राह्म उच्यते।"

पश्चिमे यामे गोधाङ्घ्रिप्रहरे। गोधाङ्घ्रिप्रहरे ब्राह्मो सुकूर्म्म इति मदनपारिजातात्। तत्रापि सूर्य्योदयात् प्राक् अर्द्धप्रहरे द्वौ सुकूर्म्मौ तत्राद्यो ब्राह्मः द्वितीयो रौद्रः। इत्याह्निकतत्त्वम्॥ * ॥

"ब्राह्मे सुकूर्म्मे चोत्थितेन स्मर्त्तव्यं मायुषः।
शरीरचिन्ता निर्व्वर्त्त्य मेध्यं कर्म्म समाचरेत्॥"

इति राजवल्लभः॥

तत्कालत्वं प्रातःकृत्यशब्दे दृश्यम्। ब्राह्मो सुकूर्म्मः। स तु एकसप्ततिनिकालः।

"दैविकानां युगानान्तु सहस्रं ब्राह्मो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागश्चतुर्दशः॥"

इति लिङ्गपुराणदर्शनात्।

ब्राह्माहोरात्रः, पुं, (ब्रह्मणोऽहोरात्रः।) ब्रह्मणो दिनयामिन्यौ। स तु देवयुगसहस्रद्वयेन भवति। स च कृतां कल्पद्वयकालः। तत्र दिनसुदयकल्पः रात्रिश्च लयकल्पः। इत्यमरटीकायां भरतः॥

"दैविकानां युगानान्तु सहस्रं परिसंख्यया।
ब्राह्ममेकमहर्ज्ञेयं तावती रात्रिरेव च॥
तद्वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः।
रात्रिञ्च तावतीमेव तेऽहोरात्रविदो जनाः॥"

इति मानवे १। ७३॥

ब्राह्मिका, स्त्री, (ब्राह्मी एव। संज्ञायां स्वार्थे वा कन् अतइत्वञ्च।) ब्राह्मयष्टिका। इति शब्दरत्नावली॥

ब्राह्मी, स्त्री, (ब्रह्मण इयम्। ब्रह्म + अञ्। टिलोपः। स्त्रियां ङीप्।) दुर्गा। यथा,—

"इदमस्मच्छरीरं यदप्रमेयं प्रमाणतः।
इदमिच्छोर्ममित्युक्तं ब्राह्मी देवी ततः स्मृता॥"

इति देवीपुराणे ४५ अध्यायः॥

शिवस्याष्टमाष्टकान्तर्गतमाष्टशक्तिविशेषः। सा च ब्रह्मशक्तिः। सरस्वती। शाकभेदः। तत्पर्य्यायः। मत्स्याक्षी २ वयस्था ३ सोमवल्लरी ४। इत्यमरः। २। ४। १३७॥ चत्वारि सोमलतायां। ब्राह्मीशाके इति केचित्। इति तट्टीकायां भरतः॥ (यथा, गारुडे १६६ अध्याये।

"वचा चिकटुकञ्चैव लवणं चूर्णसत्तमम्।
ब्राह्मीरसे भावितञ्च मधुसर्पिःसमन्वितम्।

सप्ताहं भक्षितं कुर्यात्सर्वशास्त्रेष्वयं मतिं पराम् ॥") अस्या गुणाः कथ्यमाणत्वादत्र उक्ताः। सरस्वती ५ लोभा ६ सुरभेदा ७ सुवर्चला ८ कपोतवेगा ९ वैधात्री १० दिव्यलेखा: ११ मङ्गीवधी १२ लावण्यभुजी १३ सौम्यजता १४ सुरेष्टा १५ ब्रह्मकन्यका १६ मङ्गूकमाता १७ मङ्कुनी १८ सुरसा १९ मेधा २० धीरा २१ भारती २२ धरा २३ परमेष्ठिनी २४ दिशा २५ शारदा २६। अस्या गुणाः। हिमत्वम्। कषायत्वम्। तिक्तत्वम्। वातास्रपित्तनाशित्वम्। बुद्धिप्रज्ञामेधाकारित्वम्। आयुर्वर्द्धकत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"ब्राह्मी कपोतवल्ली स्यात् सोमवल्ली सरस्वती॥"

अथ ब्रह्ममाङ्कुनी।

"मङ्कुपर्णी माङ्कुनी स्याद्वी दिव्या मङ्कुपर्ण्यपि॥"

अस्या गुणाः।

"ब्राह्मी हिमा धरा तिक्ता लघुर्मेध्या च शीतला।
कषाया मधुरा स्वादुपाकायुष्या रसायनी॥
सर्व्वा स्मृतिप्रदा कुष्ठप्रमेहास्रकासजित्।
विषशोथज्वरहरी मङ्कुब्रह्ममङ्कुपर्णिनी॥"

इति भावप्रकाशः॥ * ॥

ब्रह्मिका। वामनहाटी इति भाषा। ब्रह्मगङ्गमनुष्यः। पोकाल इति भाषा। सोमवल्लरी। सोमलता इति ख्याता। इति मेदिनी॥ ब्रह्मण्योनिम्ननी। बड़ी मालकङ्गनी इति हिन्दी भाषा। मनुस्याची। मच्छाड़ी इति छड्डमछरिया इति च हिन्दी भाषा। वाराहीकन्दः। छिलमोचिका। इति राजनिर्घण्टः॥ छिंचा इति भाषा। रोहिणीनक्षत्रम्। इति हेमचन्द्रः॥ (ब्रह्म + अण् + ङीप्।) ब्रह्माधिष्ठातृदेवताकत्वात् तथात्वम्॥ सूर्य्यमूर्त्तिः। यथा, मार्कण्डेये। १०६। ७१।

"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः।
त्रिधा यस्य स्वरूपन्तु भानोर्भास्वान् प्रसीदतु॥"

त्रि, ब्रह्मप्राप्तियोग्या। यथा, मनुः। २। ९८।

"स्वाध्यायेन व्रतैर्होमै स्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥")

ब्रह्मभवा। यथा गीतायाम्। २। ७२।

"एषा ब्राह्मी स्थितिः पार्थ! नैनां प्राप्य विमुह्यति॥")

ब्राह्मीकन्दः, पुं, (ब्राह्म्याः कन्द इव कन्दो यस्य।) वाराहीकन्दः। इति राजनिर्घण्टः॥

ब्राह्म्यी, स्त्री, विद्या। ब्रह्मम्। इति धरणिः॥ (ब्रह्मण इदम्। ब्रह्मन् + अण्।) ब्रह्मसम्बन्धिनि त्रि। (यथा, मार्कण्डेये। ६। २८।

"चतुर्दश गुणो ह्येष कालो ब्राह्मो मयेरितः॥")

निर्यकारब्राह्मशब्दार्थोऽप्यत्र॥ (यथा, रघुः। १२। ६७।

"ब्राह्मस्त्रं प्रियाधीनप्रत्यूहनिष्फलौषधम्॥")

ब्रुवत् [त] त्रि, (ब्रवीतीति। ब्रू + शतृ।) अध्यत्। वक्ता। यथा,—

"इति निःसंशये पापे न शुद्धोत्तापचिन्तितः।
शुद्धात्मा वर्द्धयेत् पापमसत्यं संवदन् ब्रुवन्॥"

इति प्रायश्चित्ततत्त्वम्॥

ब्रुवाणः, त्रि, (ब्रूते इति। ब्रू + शानच्।) वक्ता। यथा,—

"इति ब्रुवाणो मधुरं हितञ्च
तमाङ्गिरश्चेष्टितयज्ञभूमिम्।
रामं मुनिः प्रीतिमना महात्मा
यज्ञांशि राज्ञां भिजिघक्षयिष्यन्॥"

इति भट्टिः। २। ४०॥

ब्रूल च उक्तौ। इति कविकल्पद्रुमः॥ (अदा०-उभ०-द्विक०-सेट्।) ल च ब्रवीति। ब्रूते। विभ्रूतिः कटके ब्रूतेऽत्र अरविन्दितकार्य्यस्यानित्यत्वात्र वचादेशः। इति दुर्गादासः॥

भ

भ भकारः। स च अष्टाविंशतिवर्णात्मकः पवर्गीयचतुर्थो वर्णः। अस्योच्चारणस्थानं ओष्ठः। इति शाकरभाष्यम्॥ (तथा च सिद्धान्तकौमुद्याम्। उपूपध्मानीयानामोष्ठौ॥") तस्य स्वरूपादि यथा,—

"भकारं शृणु चार्व्वङ्गि! स्वयं परमकुण्डली।
महामोक्षप्रदं वर्णं तरुणादित्यसंप्रभम्॥
पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा।"

इति कामधेनुतन्त्रम्॥

(वर्णोद्धारतन्त्रे) तस्य लिखनक्रमो यथा,—

"ऊर्द्धाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव अत ऊर्द्धगता पुनः॥
ब्रह्मा शम्भुश्च विष्णुश्च क्रमतस्तासु तिष्ठति॥"

अस्य लेखनप्रकारान्तरं यथा,—

"किञ्चिदाकुञ्चिता रेखा वामदक्षिणतो गता।
ततो वक्रा वामगता तासु वाग्याद्याः क्रमात्॥
ऋजुमात्रा मध्यगता कोणाद्यगता पुनः।
महाग्नेयस्वरूपा सा ध्यानमस्य प्रचक्षते॥"

तद्यथा,—

"तडित्प्रभां महादेवीं नागकङ्कणशोभिताम्॥
षड्भुजां वरदां भीमां रक्तपङ्कजलोचनाम्॥
रक्तवस्त्रपरीधानां रक्तपुष्पोपशोभिताम्।
चतुर्वर्गप्रदां देवीं साधकाभीष्टसिद्धिदाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"

तन्त्रमन्त्रमन्त्रो यथा,—

"त्रिशूलसहितं वर्णं त्रिबिन्दुसहितं प्रिये!।
आत्मादितत्त्वसंयुक्तं भकारं प्रणमाम्यहम्॥"

इति वर्णोद्धारतन्त्रम्॥

तस्य नामानि यथा,—

"भः क्षिप्रा भ्रमरो भीमो विश्वमूर्त्तिर्निशाभवम्।
हिरण्यो भूरयो मूलं यज्ञश्चन्द्रस्य वाचकः॥
नक्षत्रं भ्रमणा दीप्तिर्भयो भूमिः पयो नभः।
नाभिर्भद्रं महावायुर्विश्वमूर्त्तिर्विनायकः॥

प्राणाख्या तापिनी यथा विश्वरूपी च चण्डिका।
भीमसेनः सुधासेनः सुखो मायापुरं हरः॥"

इति तन्त्रान्तरम्॥

भं, क्ली, (भातीति। भा दीप्तौ + बाहुलकात् डः।) नक्षत्रम्। इत्यमरः। १। ३। २२॥ (यथा, सूर्य्यसिद्धान्ते। १। २६।

"प्राग्गतिस्तमनक्षेषां भगणैः पञ्चभं गतिः।
परिवाहवशाद्विद्वान् तद्ग्राह्यं भानि साधते॥")

यहः। इति शब्दरत्नावली॥ राशिः। यथा,—

"राशिनामानि च शेषं भवद्भं ग्रहनाम च॥"

इति ज्योतिस्तत्त्वम्॥

भः, पुं, (भातीति। भा दीप्तौ + बाहुलकात् डः।) शुक्राचार्य्यः। इति मेदिनी। भे, १॥ अमरः। इत्येकाक्षरकोषः। आत्मा। इति शब्दरत्नावली॥

भक्तं, क्ली, (भज्यते क्षीयते भजसेवायां + कर्म्मणि क्तः।) अन्नम्। इत्यमरः। २। ९। ४८॥

अथ भक्तस्य नामानि साधनं गुणाश्च।

"भक्तमन्नं तथान्नञ्च क्वचित् क्रूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिक्षा दीदिविः पुंसि भाषितः॥"

सुधौतांस्तण्डुलान् स्फीतांस्तोये पञ्चगुणे पचेत्।
तद्भक्तं प्रहृतक्षोणि विग्रहं गुणवत्तमम्॥
भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु।
अधौतमल्पं ग्रीतं गुर्व्वरुचं कफप्रदम्॥"

इति भावप्रकाशः॥

हरये निवेदितान्नस्य नित्यं भक्षणे फलं यथा,

"ये विप्रा हरये दत्त्वा नित्यमन्नञ्च भुञ्जते।
उच्छिष्टभोजनास्तेषां हरिर्दास्यं ददेन्नरः॥"

हरये अदत्त्वा तद्भक्षणे दोषो यथा,—

"न दत्त्वा हरये भक्ष्यं भुञ्जते ये कदाचिदपि।
पुरीषसदृशं वस्तु जलं मूत्रसमं भवेत्॥
भूदत्त्वेहरिभक्तश्च नैवेद्यभोजनोत्सुकः।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति॥"

अन्नदानफलं यथा,—

"अन्नञ्च सर्व्वजीवेभ्यः पुण्यार्थं दातुमर्हति।
दत्त्वा विप्रिदजीवेभ्यो विप्रिदं फलमाप्नुयात्॥
अतो दत्त्वा मानुषेभ्यो लभतेऽदगुणं फलम्।
ततो विप्रिदभूतेभ्यो दत्त्वा तद्द्विगुणं फलम्॥
दत्त्वान्नं वैद्यजातिभ्यस्तत्त्वाद्दगुणं फलम्।
दत्त्वान्नं क्षत्रियेभ्योऽपि वैद्यानां द्विगुणं भवेत्॥
क्षत्रियाणां शतगुणं विप्रेभ्योऽन्नं प्रदाय च।
विप्राणाञ्च शतगुणं ब्राह्मणे ब्राह्मणे फलम्॥
ब्राह्मज्ञानां शतगुणं भक्ते विप्रे लभेद्ध्रुवम्।
स चान्नं हरये दत्त्वा भुङ्क्ते भक्त्या च सादरम्॥
विष्णवे भक्तविप्राय दत्त्वा दातुश्च यत् फलम्।
तत् फलं लभते नूनं भक्तब्राह्मणभोजने॥
भक्ते तुष्टे हरिस्तुष्टो हरौ तुष्टे च देवताः।
भवन्ति सिद्धाः ब्राह्मणाश्च यथा मूलविधेः
पठनात्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २१ अध्यायः॥

तस्य एकादश्यां पापान्नभयं भक्षणे दोषश्च यथा,—
"एकादश्यामागतायां पावयन्त्यां जगत्त्रयम्।
स्थातव्यमन्नमाश्रित्य भवता पापपूरुष!॥
अन्नमाश्रित्य तिष्ठन्तं भवन्तं पापपूरुषम्।
न हनिष्यति मनुर्मूर्तिरियमेकादशी तिथिः॥
तस्मादन्नं न भोक्तव्यं कदाचिदपि सत्तमैः।
आत्मनो हितमिच्छद्भिः संप्राप्ते हरिवासरे॥
संसारे यानि पापानि तान्येवैकादशीदिने।
अन्नमाश्रित्य तिष्ठन्ति पुष्करीकैत्यजान्नया॥
कृत्वैतां सर्वपापानि नरकान्निष्कृतिर्भवेत्।
न निष्कृतिर्भवेत्तस्या भुञ्जतां हरिवासरे॥
मर्त्या भक्तानि यावन्ति भुञ्जते हरिवासरे।
प्रतिभक्तं ब्रह्महत्याकोटिजं पातकं लभेत्॥
सर्वपापान्नयं भक्तं त्यक्तव्यं हरिवासरे।
मोहादद्ये भुञ्जते वापि ते ज्ञेया: पापिनां वराः॥"

इति पाद्मे क्रियायोगसारे २१ अध्यायः॥

वर्जनीयान्नं यथा,—
"नान्नात् शूद्रस्य विप्रोऽन्नं मोहाद्वा यदि वाञ्छतः।
स शूद्रयोनिं व्रजति यस्तु भुङ्क्ते ह्यनापदि॥
यस्यान्नान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्।
जीवन्नेव भवेत् शूद्रो मृतः श्वा चाभिजायते॥
ब्राह्मणक्षत्रियविशां शूद्रस्य च सुरेश्वरः।
यस्यान्नमोदरस्थेन मृतस्तद्योनिमाप्नुयात्॥
राजान्नं नष्टकान्नञ्च तक्षोच्छिष्टकारिणः।
गणान्नं गणिकान्नञ्च षण्ढान्नञ्चैव वर्जयेत्॥
चक्रीपशुजीविरजकतस्करध्वजिनां तथा।
गान्धर्वस्तेयहारान्नं सूतकान्नं विवर्जयेत्॥
कुलालचित्रकर्मान्नं वाधुषेः पतितस्य च।
पौनर्भवस्य कान्नस्य वार्द्धुषेः पतितस्य च॥
सुवर्णकारग्लेषधाधिनस्यातुरस्य च।
चिकित्सकस्य चैवान्नं पुंश्चल्या दाम्भिकस्य च॥
क्लीवनास्तिकयोरन्नं देवनिन्दकस्य च।
सोमविक्रयिणश्चान्नं सूपकस्य विशेषतः॥
भार्य्याजितस्य चैवान्नं यस्य चोपपतिर्गृहे।
उन्मत्तस्य कदर्यस्य तथैवोच्छिष्टभोजनः॥
अपङ्क्त्यान्नञ्च संघान्नं ब्रह्मघ्नस्यैव चैव हि।
क्लीवस्यान्त्यावसिनश्चान्नं भर्त्रोज्झितस्य चैव हि॥
भीतस्य रुदितस्यान्नं अवक्रुष्टं परिक्षतम्।
ब्रह्मद्विषः पापरतेः आहिताग्नेः सूतकस्य च॥
वृथापाकस्य चैवान्नं श्रावान्नं श्वशुरस्य च।
अप्रजानान्तु नारीणां क्षत्रान्नस्य तथैव हि॥
कदन्नान्नं विशेषेण ग्लहविक्रयिणस्तथा।
शौण्डान्नं नालिकान्नञ्च भिषजामन्नमेव च॥
विद्वज्जननस्यान्नं परिवित्तान्नमेव च॥
पुनर्भुवो विशेषेण तथैव दधिषूपतेः।
अवज्ञातञ्चावधूतं सरोगं विक्रयान्वितम्।
गुरावपि न भोक्तव्यमन्नं सत्कारवर्जितम्॥
दुष्कृतं हि मनुष्यस्य सर्वमन्नेष्वनुष्ठितम्।
योऽयस्यान्नेन जीवेत स तस्यान्नाति किल्बिषम्॥"
"आभीरः कुलमित्रञ्च गोपालो दासनापितौ।
एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्॥
कुशीलवः कुम्भकारः शैलकर्मक एव च।
एते शूद्रेषु भोज्यान्ना दत्त्वा स्वर्गं प्रयान्ति वै॥"

इति कौर्मे उपविभागे १६ अध्यायः॥

तस्य सुखत्वं पारिभाषिकत्वञ्च यथा,—
"तण्डुलोऽम्बुमिसंयोगाल्लवणयोगेन पिष्टकम्।
फलं क्षितिसंयोगादन्नं भवति तत्त्रयात्॥"
इति रामार्चनचन्द्रिकाधृतयमवचनमिति कश्चित्॥
(धनम्। यथा, मनौ। ११। ७।
"यस्य चैवार्थिकं भक्तं पर्य्याप्तं भृत्यवृत्तये।
अधिकं वापि विद्येत स सोमं पातुमर्हति॥"
"भक्तं धनम्।" इति तट्टीकायां मेधातिथिः।)

भक्तः, त्रि, (भजते स्नेहेति। भज सेवायां + क्तः।) तत्परः। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १७३। १४।
"नत्वां दृष्ट्वा पुनरन्यां द्रष्टुं कल्याणि! रोचये।
प्रसीद वरवर्णाऽहन्ते भक्तं मां भज भाविनि!॥"
पुण्यविषयकानुरागो भक्तिस्तद्वांश्च।) अथ श्रीभगवद्भक्तलक्षणानि। लिङ्गपुराणे।
"व्रतकर्मगुणज्ञानभोगजन्मादिमत्स्वपि।
शैवेष्वपि च लिङ्गस्य भक्ताः सन्ति तथा तथा॥
श्रीभागवते एकादशस्कन्धे। उत्तमभक्ता यथा,
"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि यादृशः।
भजन्त्यनेन भावेन ते मे भक्ततमा मताः॥"
मध्यमभक्तो यथा,—
"ईश्वरे तदधीने वा बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"
प्राकृतभक्तो यथा,—
"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"

इति औद्वारभक्तिविलासः॥

अपि च।
"भक्तानां लक्षणं ब्रह्मन् भक्तानुग्रहकारक!।
येषां स्मरणमात्रेण सद्यः पूतो नराधमः॥
हरिभक्तिविहीनाश्च महाहङ्कारसंवृताः।
स्वप्रशंसारता धूर्ताः शठाश्च साधुनिन्दकाः॥
पुनन्ति सर्वलोकानि येषां स्नानावगाहनात्।
येषाञ्च पादरजसा पूता पादोदकाक्षतैः॥
येषां सन्दर्शनं स्पर्शं देवा वाञ्छन्ति भारते।
सर्वेषां परमो लाभो वैष्णवानां समागमः॥
न सन्त्यघानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन विष्णुभक्ताः क्षणादहो!॥

सौतिरुवाच।

महालक्ष्मीवचः श्रुत्वा लक्ष्मीकान्तश्च सस्मितः।
निगूढतत्त्वं कथितुमृषिश्रेष्ठोपचक्रमे॥

श्रीनारायण उवाच।

भक्तानां लक्षणं लक्ष्मि! गूढं श्रुतिपुराणयोः।
पुण्यस्वरूपं पापघ्नं सुखदं भक्तिमुक्तिदम्।
सारभूतं गोपनीयं न वक्तव्यं खलेषु च॥
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यति।
वेदान्तवेदवेदाङ्गात् पवित्रं वदन्ति हि॥
पुरश्चर्याशतं पूर्वं पूतं तन्त्रसमाश्रितः।
स्वर्गस्थं नरकस्थं वा मुक्तिमाप्नोति तत्क्षणात्॥
ये: कैश्चिदपि वा जन्म लब्धं येषु च जन्तुषु।
जीवन्मुक्तास्ते च पूता यान्ति काशीं हरेः पदम्॥
मद्भक्तियुक्तो मत्पूजानियुक्तो मद्गुणान्वितः।
मद्गुणज्ञानयोगेन मन्निविष्टश्च सन्ततम्॥
सगद्गदः सानुनयः स्वात्मविस्मृत एव च।
न वाञ्छन्ति सुखं मुक्तिं सालोक्यादिचतुष्टयीम्॥
ब्रह्मत्वममरत्वं वा तद्वाञ्छा मम सेवने।
इन्द्रत्वञ्च मनुत्वञ्च देवत्वञ्च सुदुर्लभम्॥
स्वर्गराज्यादिभोगञ्च स्वप्ने च नहि वाञ्छति।
ब्रह्माद्यानि विनश्यन्ति हेवा ब्रह्मादयस्तथा।
कल्याणभक्तियुक्तञ्च मद्भक्तो न प्रणश्यति।
भ्रमन्ति भारते भक्ता लब्ध्वा जन्म सुदुर्लभम्॥
तेऽपि यान्ति मर्त्यो पूता नत्वं तीर्थ ममालयम्॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५ अध्यायः॥

अपि च।
"रतिः कृष्णकथायाञ्च यस्याश्रुपुलकोद्गमः।
मनो निमग्नं यस्यैव स भक्तः कथितो बुधैः॥
पुत्रदारादिकं सर्वं जानाति श्रीहरेरपि।
आत्मना मनसा वाचा स भक्तः कथितो बुधैः॥
दयास्ति सर्वभूतेषु सर्वं कृष्णमयं जगत्।
यो जानाति महाज्ञानी स भक्तो वैष्णवोत्तमः॥

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥

भगवद्भक्ता यथा, तत्रैव ३ अध्याये।
मद्भक्ताश्चैव निःशङ्काः कर्म्मनिर्मूलकारकाः।
नाहं गच्छामि भक्तानां संहारे नित्यदेहिनाम्॥
भक्ता ममानुगा नित्यं मत्पादाब्जतत्परायणाः।
अहं भक्तात्मिके नित्यं तेषां रक्षणहेतवे॥
सर्वे नश्यन्ति ब्रह्माण्डे प्रभवन्ति पुनः पुनः।
न मे भक्ताः प्रणश्यन्ति निःशङ्काश्च निरापदः॥

हरिभक्तिमाहात्म्यं यथा,—
द्विजानां हरिभक्तानां प्रभावो दुर्लभः श्रुतौ।
येषां पादाब्जरजसा सद्यः पूता वसुन्धरा॥
तेषाञ्च पादचिह्नं यत्तीर्थं तत् परिकीर्तितम्।
तेषाञ्च स्पर्शमात्रेण तीर्थमापः प्रयान्ति॥
आलिङ्गनात् सदालापात्तेषामुच्छिष्टभोजनात्।
दर्शनात् स्पर्शनाच्चैव सर्वपापात् प्रमुच्यते॥
भ्रमणे सर्वतीर्थानां यत् पुण्यं स्नानतो भवेत्।
हरिदासस्य विप्रस्य तत् पुण्यं दर्शनाल्लभेत्॥

इति तत्रैव २१ अध्यायः॥

विविधभक्तलक्षणं यथा,—
भक्तानां विविधानाञ्च लक्षणं श्रूयतामिति।
श्रवणाद्यासरतो भक्तो मन्नामगुणकीर्तिषु॥
मनो निवेदयेत्तत्रैव संसारसुखकारणम्।
दास्यं विना न वाञ्छन्ति सालोक्यादिचतुष्टयम्॥
नैव निर्वाणमुक्तिञ्च सुधापानमभीप्सितम्।
ध्यायते मत्पदाब्जञ्च पूजयेद्भक्तिभावतः॥
श्रीहेतुः किं तस्य देवः सङ्कल्परक्षितस्य च।
सर्वसिद्धिं न वाञ्छन्ति तैरणिमादिकमीप्सितम्॥

ब्रह्मत्वममरत्वं वा सुरत्वं सुखकारणम् ।
वाञ्छन्ति निश्चलां भक्तिं मदीयामतुलामपि ॥
स्त्रीपुंविभेदो नाद्येषु सर्व्वजीवेषु भिन्नता ।
तेषां विद्वेश्वराद्याश्च प्रवरा मम वल्लभाः ॥
क्षुत्पिपासादिकां निद्रां लोभमोहादिकं रिपुम् ।
त्यक्त्वा दिवानिशं मां च ध्यायते च दिगम्बरः ॥
स मद्भक्तोत्तमो नन्द ! श्रूयतां मध्यमादिकम् ॥"
"यावत्कः कर्म्मसु रतो पूर्व्वप्राक्तनतः शुचिः ॥
करोति सततञ्चैव पूर्व्वकर्म्मनिकृन्तनम् ।
न करोत्यपरं यस्मात् सङ्कल्परहितश्च यः ॥
सर्व्वं ब्रह्मस्य यत्किञ्चिन्नाहं कर्त्ता च कर्म्मणः ।
कर्म्मणा मनसा वाचा सततं चिन्तयेदिति ॥
न्यूनभक्तश्च तत्पूतः स च प्राकृतिकः स्मृतौ ।
यमं वा यमदूतं वा स्वप्नेन च न पश्यति ॥
पूरयागां सहस्रञ्च पूर्व्वं भक्तः समुद्धरेत् ।
पुंसां पूतं मध्यमञ्च तच्चतुर्थञ्च प्राकृतः ॥
भक्तश्च त्रिविधस्तात ! कथितश्च सवाञ्छया ॥"
इति तत्रैव ८४ अध्यायः ॥
ब्रह्मभक्तशरीरे तीर्थादीनि यथा,—
"पृथिव्यां यानि तीर्थानि पुण्यान्यपि च जाह्नवि ! ।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम् ॥
मद्भक्तपादरजसा सद्यः पूता वसुन्धरा ।
सद्यः पूतानि तीर्थानि सद्यः पूतं जगत्तथा ॥
मन्मन्त्रोपासका विप्रा ये मदुच्छिष्टभोजिनः ।
मामेव नित्यं ध्यायन्ते ते मत्प्राणाधिकाः प्रियाः ।
तदुपस्पर्शमात्रेण पूतो वायुश्च पावकः ।
कलेर्दुःखमहमणि मद्भक्ताः सन्ति भूतले ॥
एकवर्णा भविष्यन्ति मद्भक्तेषु गतेषु च ।
मद्भक्तशून्या पृथिवी कलिग्रस्ता भविष्यति ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १२८ अः ॥
भगवद्भक्तमाहात्म्यं यथा,—
"संस्मृतः कीर्त्तितो वापि दृष्टः स्पृष्टोऽपि वा प्रिये ! ।
पुनाति भगवद्भक्तश्चाण्डालोऽपि यदृच्छया ॥"
इति वाराहे उपरिविभागे प्रबोधिनीमाहात्म्यम् ॥ हरिभक्तकर्त्तव्यानि यथा,—
"हरेश्चरितमीशस्य सर्व्वलोकेषु कीर्त्तनम् ।
वैष्णवेषु च कार्य्येषु भक्तः कुर्य्यादहर्निशम् ॥
दासीदासांश्च यत्किञ्चित् स्वकीयं वस्तु चात्मनः ।
ब्रह्मभक्तस्य गार्हस्थ्यं सर्व्वं कृष्णे निवेदनम् ॥"
भक्तस्य लक्षणान्तरं यथा,—
"प्रेम्णा संजातया भक्त्या तनुस्तनपुलकाञ्चनः ।
बिभर्त्त्यलौकिकं भक्तो वदेद्धसति नृत्यति ॥
परमानन्दयुक्तोऽसौ कचिद्रायति नन्दति ।
क्रन्दत्यच्युतभावेन गद्गदेन पुनः पुनः ॥
अनुगृह्णाति भजेत् गोविन्दमनुमोदते ।
तरेदेव विष्णुमायां दुस्तरां सुनिमोहिनीम् ॥
सर्व्वेश्वरत्वबुद्ध्या यो भजेदीशं सनातनम् ।
स तत्त्ववादी भक्तश्च सर्व्वभूतसुहृत्तमः ॥"
इति पाद्मोत्तरखण्डे १०१ अध्यायः ॥*॥

भक्तत्यागे दोषो यथा,—
"ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा ।
तुल्यमेभिर्महापापं भक्तत्यागादुदाहृतम् ॥
भजन्तं भक्तमत्यन्यमदुष्टं त्यजतः सुखम् ।
नेह नामुत्र पश्यामि तस्मात् भक्त ! दिवं व्रज ॥"
इति मार्कण्डेयपुराणे हरिश्चन्द्रोपाख्यानम् ॥
(ऋतविभागः । यथा, लीलावत्याम् ।
"भक्तो हरः शुध्यति यद्गुणः स्यात् ॥")
भक्तकरः, पुं, (भक्तं भजनं करोतीति । क + टः ।) क्षत्रियमधुपः । यथा, शब्दचन्द्रिकायाम् ।
"वृक्षधूपे भक्तकरो गिरिः स्यात् समगन्धकः ॥"
भक्तकारके त्रि ॥
भक्तकारः, त्रि, (भक्तमन्नं करोतीति । क + "कर्म्मण्यण् ।"३ । २ । १ । इत्यण् ।) पाचकः । भक्तमन्नं करोति पचति यः । तत्पर्य्यायः । सूदः २ औदनिकः ३ गुणः ४ भक्ष्यंकारः ५ सूपकारः ६ सूपः ७ आरालिकः ८ वल्लवः ९ । इति हेमचन्द्रः ॥
भक्तता, स्त्री, भक्तत्वम् । भक्तस्य भाव इत्यर्थे (तल्) तप्रत्ययेन निष्पन्ना ॥
भक्ततूर्य्य, क्ली, (भक्तस्य तद्भोजनकालस्यावेदकं यद्वा भक्ते तद्भोजनकाले वादनीयत्वेनार्य्यम् ।) भोजनकाले वादनीयतूर्य्यम् । तत्पर्य्यायः । नृपमानम् २ । इति त्रिकाण्डशेषः ॥
भक्तदासः, पुं, (भक्तेनान्नमात्रेण दासः ।) पञ्चदशदासान्तर्गतदासविशेषः । यथा,—
"भक्तदासश्च विज्ञेयस्तथैव वडवाकृतः ।
सुभिक्षेऽपि भक्तेन ज्ञातव्यस्तद्दास्यः । इति दायक्रमसंग्रहः ॥ (यथा, मनौ । ८ । ४१५ ।
"ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ ।
पैत्र्यिको दण्डदासश्च सप्तैते दासयोनयः ॥")
भक्तमण्डः, पुं क्ली, (भक्तस्यान्नस्य मण्डः ।) अन्नसारः । भातर माड़ इति भाषा । तत्पर्य्यायः । मासरः २ आयामः ३ निःसावः ४ । इत्यमरः ॥ (भक्तस्य भजनशीलस्य मण्डोभूयतम् ।) पिच्छा ५ । इति जटाधरः ॥
भक्तिः, स्त्री, (भज्यते इति । भज + क्तिन् ।) विभागः । सेवा । इति मेदिनी । ते, ३६ ॥ गौणवृत्तिः । भक्ती । (अनुरागविशेषः । पूर्व्वेष्वनुरागो भक्तिरित्युपदेशः ॥ ईश्वरे परानुरक्तिः ।
"अथातो भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे ।" इति शाण्डिल्यसूत्रम् ॥ उपासना । परमेश्वरविषये परमप्रेम । उपास्याकाराकारितचित्तवृत्त्याद्यत्तिरूपा परिपक्वनिदिध्यासनाख्या श्रवणमननाभ्यासफलभूता अनुरक्तिः ॥
"नहीदृग्देहात् परमस्ति किञ्चित् ।" इति बुद्धिपूर्व्विका चित्तवृत्तिः । सा च परमप्रीत्यधीना ॥ यथा, विष्णुपुराणे । १ । २० । १८-१९ ।
"नाथ ! योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि ।
या प्रीतिरविवेकानां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ॥"

"हे अच्युत ! त्वयि मे अच्युता ऐकान्तिकी भक्तिरस्तु । एकान्तभक्तिः परमप्रीत्यधीनेति तां प्रीतिं प्रार्थयते येति यादृशी प्रीतिर्विषयेषु आसक्तानां सा तादृशी प्रीतिर्मे हृदयात् मापसर्पतु मापयातु हृदये सदा तिष्ठत्वित्यर्थः ॥"
इति तट्टीकायां श्रीधरस्वामी ॥ चन्दनादिभिस्तिलकादिरचना । यथा, रघौ । १३ । ५५ ।
क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गधवैव पंक्तिः ।
अन्यत्र कालागुरुदत्तपत्रा
भक्तिर्भुवश्चन्दनकल्पितेव ॥")
अङ्गा । इति हेमचन्द्रः ॥ (भक्तिविवरणं यथा,—
"भज इत्येष वै धातुः सेवायां परिकीर्त्तितः ।
तस्मात् सेवा वुधैः प्रोक्ता भक्तिः साधनभूयसी ॥
इति गारुड़े २३१ अध्यायः ॥*॥
अथ श्रीमद्भक्तिलक्षणं तृतीये श्रीकापिलेये ।
"देवानां गुणलिङ्गानामानुश्रविककर्म्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी ॥
अथ विशेषलक्षणानि । श्रीगौतमीयतन्त्रे ।
"देवतायाञ्च मन्त्रे च तथा मन्त्रप्रदे गुरौ ।
भक्तिरष्टविधा यस्य तस्य तुष्यः प्रसीदति ॥
तद्भक्तजनवात्सल्यं पूजायाञ्चानुमोदनम् ।
सुमना अर्च्चयेन्नित्यं तदर्थे एभवर्जनम् ॥
तत्कथाश्रवणे रागस्तदर्थे चाङ्गविक्रिया ।
तदनुस्मरणं नित्यं यस्तन्नाम्नोपजीवति ॥
भक्तिरष्टविधा ह्येषा यस्मिन् म्लेच्छेऽपि वर्त्तते ।
स मुनिः सत्यवादी च कीर्त्तिमान् स भवेन्नरः ॥"
सप्तमस्कन्धे श्रीप्रह्लादोक्तौ ।
"श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ।
क्रियते भगवत्यध्वा तन्मन्येऽधीतमुत्तमम् ॥"
तत्रैव श्रीनारदयुधिष्ठिरसंवादे ।
"श्रवणं कीर्त्तनञ्चास्य स्मरणं महतां गतेः ।
सेवेज्यावनतिर्दास्यं सख्यमात्मनिवेदनम् ॥"
पाद्मे कार्त्तिकमाहात्म्ये श्रीयमधर्म्मकंसुसंवादे ।
"श्रवणं कीर्त्तनं पूजा सर्व्वकर्म्मार्पणं स्तुतिः ।
परिचर्य्या नमस्कारः प्रेम स्वात्मार्पणं हरौ ॥"
तत्रैवोत्तरखण्डे शिवपार्व्वतीसंवादे ।
"आद्यन्तु वैष्णवं प्रोक्तं शुक्लचक्राङ्कनं हरेः ।
धारणञ्चोर्द्धपुण्ड्राणां तन्नाम्नाञ्च परिग्रहः ॥
अर्थेनञ्च जपो ध्यानं तन्नामस्मरणं तथा ।
कीर्त्तनं श्रवणञ्चैव वन्दनं पादसेवनम् ।
तत्पादोदकसेवा च तन्निवेदितभोजनम् ॥
तदीयानाञ्च संसेवा द्वादशैतानिष्ठता ।
तुलसीरोपणं विष्णोर्दैवदेवस्य शार्ङ्गिणः ॥
भक्तिः षोड़शधा प्रोक्ता भवबन्धविमुक्तये ॥"
इति च ।
किञ्च ।
"दर्शनं भगवन्मूर्त्तेः सार्थनं शेषसेवनम् ।

आघ्राणं धूपशेषादेर्निर्माल्यस्य च धारणम् ॥
दृष्टं भगवदग्रे च तथा वीक्षादिवादनम् ।
लक्षणलीलाद्यभिनयः श्रीभागवतसेवनम् ॥
पञ्चाक्षमालादिधृतिरेकादश्यादिजागरः ।
प्रासादरथयात्राद्यत्रेयं ग्राह्यानुसारतः ॥
लिखिता भगवद्धर्म्मा भक्तानां लक्षणानि च ।
तानि ज्ञेयानि सर्व्वाणि भक्तेर्वै लक्षणानि च ॥
तेषु ज्ञेयानि गौणानि मुख्यानि च विवेकिभिः ।
यद्धिरङ्गान्तरङ्गाणि प्रेमसिद्धौ च तानि
यत् ॥
भेदास्तु विविधा भक्तेर्भक्तभावादिभेदतः ।
मुक्ताफलादिग्रन्थेभ्यो ज्ञेयास्तल्लिखनैरलम् ॥
प्रेमभक्तौ च सिद्धायां सर्व्वेऽर्थाः सेवकाः स्वयम् ॥
भगवांश्चातिवश्यः स्यात्तिस्रोऽवस्थाः सुल-
क्षणम् ॥"

अथ प्रेमभक्तिलक्षणम् । नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैः ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥
चिह्नानि प्रेमसम्पत्तेर्बाह्यान्याभ्यन्तराणि च ।
क्रियन्त्युल्लिखितान्यस्या महिमैव विलिख्यते ॥"
अथ प्रेमसम्पत्तिचिह्नानि सप्तमस्कन्धे श्रीप्रह्ला-
दस्य बालानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यते च ॥
यदा ग्रहग्रस्त इव क्वचिद्धसत्या-
क्रन्दति ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे ! जगत्पते !
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
एकादशे च श्रीकवियोगीश्वरोक्तरे ।
"स्मरन्तः स्मारयन्तश्च मिथोऽघौघहरं हरिम् ।
भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचि-
द्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥

श्रीभागवदुद्धवसंवादे च ।
"कथं विना रोमहर्षं द्रवता चेतसा विना ।
विनानन्दाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः ॥
वाग्गद्गदा द्रवते यस्य चित्तं
रोदित्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च
मद्भक्तियुक्तो भुवनं पुनाति ॥
यद्योक्तभक्तियुक्तौ तु भगवच्चरणाम्बुजम् ।
प्रेरणागतभावेन क्षतक्लेशोऽतिमात्रयेत् ॥"
इति हरिभक्तिविलासे ११ विलासः ॥
अपि च । उत्तमभक्तेर्लक्षणं यथा,—
"अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ॥
तथा नारदपञ्चरात्रे ।
"सर्व्वोपाधिविनिर्म्मुक्तं तत्परत्वेन निर्म्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥"
श्रीभागवतस्य तृतीयस्कन्धे च ।
"अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ।
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।
स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः ॥"
इति ॥

सा उत्तमा भक्तिः षड्विधा यथा,—
"क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षिणी च सा ॥"
तत्राद्यायाः क्लेशघ्नत्वम् ।
"क्लेशास्तु पापं तद्बीजमविद्या चेति ते त्रिधा ॥"
शुभदत्वं यथा,—
"शुभानि प्रीणनं सर्व्वजगतामनुरक्तता ।
सद्गुणाः सुखमित्यादीन्याख्यातानि मनी-
षिभिः ॥"
मोक्षलघुताकृद्यथा,—
"मनागेव प्रकटितायां हृदये भगवद्दशौ ।
पुरुषार्थास्तु चत्वारस्तृणायन्ते समन्ततः ॥"
सुदुर्लभा यथा,—
"साधनौघैरनासङ्गैरलभ्या सुचिरादपि ।
हरिणा चाशु दैवेति द्विधा सा स्यात् सुदुर्लभा ॥"
सान्द्रानन्दविशेषात्मा यथा,—
"ब्रह्मानन्दो भवेदेष चेत् परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥"
श्रीकृष्णाकर्षिणी यथा ।
"श्रुत्वा हरिर्म्मे प्रभवस्त्रियवर्गसमन्वितम् ।
भक्तिर्वशीकरोतीति श्रीकृष्णाकर्षिणी च सा ॥"
सा उत्तमा भक्तिर्द्विधा यथा,—
"सा भक्तिः साधनं भावः प्रेमा चेति त्रिधो-
दिता ॥"

साधनभक्तिर्यथा,—
"क्लेशघ्नित्वसाधनं साध्यभावा सा साधनाभिधा ।
नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता ॥"
भावभक्तिर्यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमाकृण्य कृदसौ भाव उच्यते ॥"

प्रेमभक्तिर्यथा,—
"सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः ।
भावः स एव सान्द्रात्मा बुधैः प्रेमा निगद्यते ॥"
इति भक्तिरसामृतसिन्धौ पूर्व्वविभागः ॥
भक्तिमान् [न्] त्रि. (भक्तिरस्यास्तीति । भक्ति +
"तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ ।
इति मतुप् ।) भक्तियुक्तः । यथा,—
"गुणवान् पुत्रवान् श्रीमान् कीर्त्तिमान् भक्ति-
मान् भवेत् ।
ऐहिके परमैश्वर्य्यमन्ते नाथपदं व्रजेत् ॥"
इति ब्राह्मवीतब्राह्मगीतमङ्काकालभैरवस्तोत्रम् ॥
अपि च ।
"अन्येऽपि ये विकर्म्मस्था: शूद्राद्या नीचजातयः ।
भक्तिमन्तः प्रशस्यन्ते कालेन मयि सङ्गताः ॥"
इति कौर्म्मे ७ अध्यायः ॥
भक्तियोगः, पुं, (भक्तेर्योगः भक्त्या वो योग इति
वा ।) परमेश्वरे भजनसम्बन्धः । यथा,—
"भक्तियोगप्रकाशाय लोकस्यानुग्रहाय च ।
सन्यासाश्रममास्थाय ज्ञानवैराग्यनामधृक् ॥"
इति चैतन्यभागवतम् ॥
अपि च ।
"वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम् ॥"
इति श्रीभागवते १ स्कन्धे २ अध्यायः ॥
(भक्तियोग उच्यते । यथा, गीतायाम् । १२ ।
१-२ । १४-२० ।
"एवं सततयुक्ता ये भक्तास्त्वां पर्य्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१॥
श्रीभगवानुवाच ।
मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥२॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।
सर्व्वारम्भपरित्यागी यो मे भक्तः स मे
प्रियः ॥ १६ ॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् यः स मे
प्रियः ॥ १७ ॥
समः शत्रौ च मित्रे च तथा मानापमानयोः ।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्ज्जितः ॥१८॥
तुल्यनिन्दास्तुतिर्म्मौनी सन्तुष्टो येन केनचित् ।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो
नरः ॥ १९ ॥
ये तु धर्म्मामृतमिदं यथोक्तं पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे
प्रियाः ॥" २० ॥
भक्तिरसः, पुं, भक्तिरेव रसः । यथा,—
"विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः ।
स्वादयन् हृदि भक्तानामानीता श्रवणादिभिः ।

एवा ज्ञायते; स्यादीभावा भक्तिरसो भवेत् ॥"
इति भक्तिरसामृतसिन्धुः ॥

भक्तिकः, पुं, (भक्तिं भक्तौ वार्तीति । वा + क; ।) साधुघोटकः । यथा,—
प्रभुभक्ता भक्तिलाभ कुलीनेषु कुलोत्कटाः ।
इति शब्दचन्द्रिका ॥
भक्तिदासरि त्रि ॥

भक्ष क भक्षे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क भक्षयति । इति दुर्गादासः ॥

भक्ष ञ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ० सक०-सेट् ।) ञ भक्षति भक्षते । इति दुर्गादासः ॥

भक्षकः, त्रि, (भक्षयतीति । भक्ष + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) खादकः । भक्षणपरः । तत्पर्य्यायः । घस्मरः २ अत्तरः ३ । इत्यमरः । ३ । १ । १२० ॥ (यथा, हितोपदेशे । १ । ३५ ।
"भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
मृगजातान् पाशबद्धोऽसौ मृगः काकेन
रक्षितः ॥")

भक्षटकः, पुं, (भक्ष + अटन् । ततः संज्ञायां कन् ।) क्षुद्रगोक्षुरकः । इति राजनिर्घण्टः ॥

भक्षणं, क्ली, (भक्ष + भावे ल्युट् ।) हवेतरद्रव्यग्रासाधःकरणम् । तत्पर्य्यायः । न्याद: २ स्वदनम् ३ खादनम् ४ अशनम् ५ निघसः ६ वल्भनम् ७ अभ्यवहारः ८ जक्षः ९ जक्षणं १० ग्रहः ११ प्रत्यवसानम् १२ घासः १३ आहारः १४ प्राशनम् १५ अवज्ञाशम् १६ विज्ञाशम् १७ भोजनम् १८ जेमनम् १९ अदनम् २० । इति हेमचन्द्रः ॥ द्रव्यविशेषस्य भक्षणनिषेधो यथा, कर्म्मलोचने ।
"ग्रामशाकं वृथामांसं करञ्च मथितं दधि ।
तर्ज्जन्या दन्तधावञ्च सद्यो गोमांसभक्षणम् ॥"

भक्षणीयं, त्रि, (भक्ष + अनीयर्) भक्ष्यद्रव्यम् । भक्षणयोग्यम् । इति भक्षधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ (यथा, पञ्चतन्त्रे । ४ । २५ । "तन्न भक्षणीयम् । त्वद्वचनेन भक्षणीयास्ते दायादाः ।") तत्प्रापणविधिर्यथा, पाकराजेश्वरे ।
"पुरस्ताद्भक्षणं पात्रं सुविस्तीर्णं मनोरमम् ।
तत्र भक्ष्यं परिग्राह्यं मध्यभागे सुसंवृतम् ॥
सूपं सर्पिः पलं शाकं पिष्टमन्नन्तु मस्त्यकम् ।
स्थापयेद्दक्षिणे पार्श्वे भुञ्जानस्य यथाक्रमम् ॥
पक्वेष्टाद्याः द्रवाः सर्व्वे पानीयं पानकं पयः ।
चोष्यं सन्धानकं लेह्यं भक्षपार्श्वे निधापयेत् ॥
सर्व्वान् दक्षुविकारांश्च पक्वान्नं पायसं दधि ।
पुरतः स्थापयेद्भोक्तुर्दयोः पंक्त्योश्च मध्यतः ॥"

भक्ष(क्ष्य)पत्रा, स्त्री, (भक्षं वा भक्ष्यं भक्षणीयं पत्रमस्याः ।) नागवल्ली । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्या नागवल्लीशब्दे ज्ञातव्या ॥)

भक्षितं, त्रि, (भक्ष्यते स्मेति । भक्ष + कर्म्मणि क्तः ।) ज्ञातभक्षणवस्तु । (यथा, हितोपदेशे ।१।
"भक्षितेनापि भवता नाहारो मम पुष्कलः ॥")
तत्पर्य्यायः । चर्व्वितम् २ लिप्तम् ३ प्रत्यवसितम् ४ गिलितम् ५ खादितम् ६ ज्ञातम् ७ अभ्यवहृतम् ८ अन्नम् ९ जग्धम् १० ग्रस्तम् ११ ग्लस्तम् १२ अशितम् १३ भक्तम् १४ । इत्यमरः । ३ । २ । ११० ॥ भक्षितम् १५ । इति शब्दरत्नावली ॥

भक्ष्यं, त्रि, (भक्ष्यते इति । भक्ष + ण्यत् ।) भक्षितव्यम् । भक्षणीयम् । यथा । 'प्रतिपदि कुष्माण्डं न भक्ष्यम् । दशम्यां कलम्बी न भक्ष्या ।' इति स्मृतिसर्व्वस्वम् ॥ अपि च, हितोपदेशे ।
"मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकदिनं याति अत्र भक्ष्यो धनुर्गुणः ॥"
(भक्ष्यद्रव्याणि तेषां गुणादिकञ्च यथा,—
"वक्ष्याम्यतःपरं भक्ष्यान् रसवीर्य्यविपाकतः ।
भक्ष्याः क्षीरक्षतावत्या वृष्या हृद्या: सुगन्धिनः ॥
अदाहिनः पुष्टिकराः दीपनाः पित्तनाशनाः ॥
तेषां प्राणकरा हृद्या घृतपूराः कफावहाः ।
वातपित्तहरा वृष्या गुरवो रक्तमांसलाः ॥
वृंहणा गौडिकाभक्ष्या गुरवोऽनिलनाशनाः ।
अदाहिनः पित्तहराः शुक्रला: कफवर्द्धनाः ॥
मधूपस्कसंयावाः पया क्षीते विशेषतः ।
गुरवो वृंहणाश्चैव मोदकास्तु सुरज्जराः ॥
दीपनो दीपनः स्वर्य्यः पित्तघ्नः पवनापहः ।
गुरुर्भक्षितमात्रेण सद्यः प्राणबलप्रदः ॥
हृद्यः सुगन्धिमधुरः स्निग्धः कफकरो गुरुः ।
वातापहस्तृप्तिकरो बल्यो विष्यन्दनः स्मृतः ॥
वृंहणा वातपित्तघ्ना भक्ष्या बल्यास्तु सामिताः ।
हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः ॥
मुक्तादिवेणुवाराणां पूर्णा विष्टम्भिनो मताः ।
वेसवारैः सर्पिषिग्धैः सम्पूर्णा गुरवृंहणाः ॥
पालला: श्लेष्मजनना: पुष्कला: कफपित्तला: ।
वीर्य्योष्णाः पैष्टिका भक्ष्याः कफपित्तप्रकोपणाः ॥
विदाहिनो नातिबला गुरवश्च विशेषतः ।
वेदला लघवो भक्ष्याः कषायाश्छर्दिमारुताः ॥
विष्टम्भिनः पित्तसमाः श्लेष्मघ्ना भिन्नवर्च्चसः ।
बल्या वृष्यास्तु गुरवो विज्ञेया माषसाधिताः ॥
कृषिका विकृता भक्ष्या गुरवो नातिपित्तलाः ।
विरूढककृता भक्ष्या गुरवोऽनिलपित्तलाः ॥
विदाहीतल्लकृजनना रूक्षा दृष्टिप्रदूषणाः ।
हृद्याः मृगस्निनो वृष्या लघवो घृतपाचिताः ॥
वातपित्तहरा बल्या वर्णहृष्टिप्रसादनाः ।
विदाहिनस्तैलकृता गुरवः कटुपाकिनः ॥
उष्णा मारुतदृष्टिघ्नाः पित्तलास्त्वकप्रदूषणाः ।
फलमांसैक्षवविकृतितिलमाषोपसंस्कृताः ॥
भक्ष्या बल्यास्तु गुरवो वृंहणा हृद्यप्रियाः ।
कपालाङ्गारपक्वास्तु लघवो वातकोपनाः ॥
सुपक्वास्तनवश्चापि भूयिष्ठं लघवो मताः ।
सकिलाटादयो भक्ष्या गुरवः कफवर्द्धनाः ॥"
"आप्लावितमसंकीर्णं सुचिकार्य्यं महानसम् ॥
तत्राग्नेर्गुणसम्पन्नमन्नं भक्ष्यं सुसंस्कृतम् ।
सुखी देवे सुसंगुप्तं वसुपत्रापवेष्टितम् ॥"
"हृतं काष्ठायसे देयं पैया देया तु राजसे ॥

भक्ष्याभक्ष्य

फलानि सर्व्वभक्ष्याणि प्रदद्याद्दैवतेषु च ।
परिशुष्कप्रदिग्धानि सौवर्णेषु प्रकल्पयेत् ॥
प्रदद्याच्च रसांश्चैव राजतेषूपहारयेत् ।
कट्वराणि खड्गांश्चैव सर्व्वान् ग्रैवेषु दापयेत् ॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च ।
दद्याद्दैवेषु पात्रेषु रागषाड्वसडङ्कान् ॥
पुरस्ताद्दक्षिणे पात्रे सुविस्तीर्णे मनोरमे ।
सूदः सूपौदनं दद्यात् प्रदेहांश्च सुसंस्कृतान् ॥
फलानि सर्व्वभक्ष्याणि परिशुष्कानि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रदद्याच्च रसांश्चैव पानीयं पानकं पयः ।
खड्गान् यूषांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुडविकारांश्च रागषाड्वसडङ्कान् ।
पुरस्तात् स्थापयेत् प्राज्ञो द्वयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।"
इति सुश्रुते सूत्रस्थाने ४६ अध्याय. ॥)

भक्ष्यकारः, त्रि, (भक्ष्यं भक्ष्यद्रव्यं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) पिष्टकविक्रयजीवी । पिष्टकशिल्पी । इतिभरतः ॥ तत्पर्य्यायः । आपूपिकः २ कान्दविकः ३ । इत्यमरः । २ । ९ । २८ ॥ पूपिकः ४ पूपविक्रयी ५ मोदकादिविक्रयी ६ । इति शब्दरत्नावली ॥

भक्ष्याभक्ष्यं, क्ली, (भक्ष्यमभक्ष्यञ्च ।) खाद्याखाद्यद्रव्यम् । यथा, —
"भक्ष्याभक्ष्याण्यनेकानि ब्राह्मणस्य विशेषतः ।
अत्र शिष्टा यथा ब्रूयुस्तथा कार्य्यविनिर्णयः ॥"
इत्येकादशीतत्त्वे शङ्खवचनम् ॥ * ॥

नारद उवाच ।
"भक्ष्यं किंवाप्यभक्ष्यञ्च द्विजानां गृहिणां प्रभो ! ।
यतीनां वैष्णवानाञ्च विधवाब्रह्मचारिणाम् ॥
किं कर्त्तव्यमकर्त्तव्यमभोग्यं भोग्यमेव च ।
सर्व्वं कथय सर्व्वज्ञ ! सर्व्वेश ! सर्व्वकारण ! ॥"

श्रीमहेश्वर उवाच ।
"कश्चित्तपस्वी विप्रश्च निराहारो चिरं मुनिः ।
कश्चिन् समीरणाहारो फलाहारी च कश्चन ॥
अन्नाहारी यथा लोके गृही च गृहिणीयुतः ।
येषामिच्छा च या ब्रह्मन् ! तेषां विविधा गतिः ॥
हविष्यान्नं ब्राह्मणानां प्रशस्तं गृहिणां सदा ।
नारायणोच्छिष्टमिष्टमनिवेद्यमभक्ष्यकम् ॥
अन्नं विष्ठा जलं मूत्रं यद्विष्णोरनिवेदनम् ।
विष्णुसूत्रं सर्व्वशास्त्रोक्तमन्नञ्च हरिवासरे ॥
ब्राह्मणः कामतोऽश्नञ्च यो भुङ्क्ते हरिवासरे ।
त्रैलोक्यजनितं पापं सोऽपि भुङ्क्ते न संशयः ॥
न भोक्तव्यं न भोक्तव्यं न भोक्तव्यञ्च नारद ! ।
गृहिभिर्वैष्णवैरन्नं संप्राप्ते हरिवासरे ॥
यद्दी ग्रैवञ्च ग्राह्यञ्च ब्राह्मणो ज्ञानदुर्ब्बलः ।
प्रयाति कालसूत्रञ्च भुक्त्वा च हरिवासरे ॥
कृमिभिः भ्रालमानेन्च भक्षितश्चन तिष्ठति ।
विष्णुसूत्रभक्षं कृत्वा यावदिन्द्राश्चतुर्द्दश ॥
जन्माष्टमीदिने रामनवमीदिवसे हरेः ।
शिवरात्रौ च यो भुङ्क्ते सोऽपि द्विगुणपातकी ॥

उपवासासमर्थश्चेत् फलमूलजलं पिबेत् ।
नष्टे शरीरे स भवेदन्यथा चात्मघातकः ॥
सकृद्भुक्ते हविष्यान्नं विष्णोर्नैवेद्यमेव च ।
न भवेत् प्रत्यवायी स चोपवासफलं लभेत् ॥
एकादश्यामनाहारो यद्दो विप्राश्च भारत ! ।
ते च तिष्ठन्ति वैकुण्ठे यावदै ब्रह्मणो वयः ॥
गृहिणां शैवशाक्तानामिदमुक्तञ्च नारद ! ।
विष्णवस्तो वैष्णवानां यतीनां ब्रह्मचारिणाम् ॥
नित्यं नैवेद्यभोजी च श्रीकृष्णस्य च वैष्णवः ।
नित्यं व्रतोपवासानां जीवन्मुक्तो लभेत् फलम् ॥
वाञ्छन्ति तस्य संस्पर्शं तीर्थानि सर्वदेवताः ।
आलापं दर्शनञ्चैव सर्वपापप्रणाशनम् ॥
हविष्यमन्नं पृथुकं शुद्धं दैवविशेषके ।
नात्यन्तशुद्धं विप्राणां भक्षणे च निवेदने ॥
अभक्ष्यञ्च यतीनाञ्च विधवाब्रह्मचारिणाम् ।
ताम्बूलञ्च यथा ब्रह्मन् ! तथैते वस्तुनी ध्रुवम् ॥
ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र ! गोमांससदृशं ध्रुवम् ॥
सर्वेषां ब्राह्मणानाञ्च अभक्ष्यं शृणु नारद ! ।
यदुक्तं सामवेदे च हरिणा चाङ्गिरःक्रमे ॥
ताम्रपात्रे पयःपानं उच्छिष्टे घृतभोजनम् ।
दुग्धं लवणसार्द्धञ्च सद्यो गोमांसभक्षणम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
रौप्यञ्च ताम्रपात्रस्थं सर्वं मद्यं घृतं विना ॥
उत्थाय वामहस्तेन यत्तोयं पिबति द्विजः ॥
सुरापीती स विज्ञेयः सर्वधर्मबहिष्कृतः ॥
अनिवेद्यं हरेरन्नं भक्ष्यं गोघ्नञ्च नित्यशः ।
पीतशेषं जलञ्चैव गोमांससदृशं मुने ! ॥
वार्निङ्गनफलञ्चैव गोमांसं कार्त्तिके स्मृतम् ।
माघे च मूलकञ्चैव कलञ्जी शयने तथा ॥
श्वेतवर्णञ्च तालञ्च मस्तकं मत्स्य एव च ।
सर्वेषां ब्राह्मणानाञ्च त्याज्यञ्च सर्वदेशतः ॥
मत्स्यांश्च कामतो भुक्त्वा चोपवासंत्रयं वसेत् ।
प्रायश्चित्तं ततः कृत्वा शुद्धिमाप्नोति ब्राह्मणः ॥
प्रतिपत्सु च कूष्माण्डमभक्ष्यमर्धनाशनम् ।
द्वितीयायाञ्च बृहतीभोजको न स्मरेद्धरिम् ॥
अभक्ष्यञ्च पटोलञ्च मुक्तवृद्धिकरं परम् ।
तृतीयायाञ्चतुर्थ्यांच मूलकं धननाशकम् ॥
कलङ्कारञ्चैव पञ्चम्यां बिल्वभक्षणम् ।
तिर्यग्योनिं प्रापयेत् षष्ठ्याञ्च निम्बभक्षणम् ॥
रोगवृद्धिकरञ्चैव सप्तम्यां तालभक्षणम् ।
नारिकेलफलं भक्ष्यमष्टम्यां वृद्धिनाशनम् ॥
तुम्बी नवम्यां गोमांसं दशम्याञ्च कलम्बिका ।
एकादश्यां तथा शिम्बी द्वादश्यां पूतिका तथा ॥
त्रयोदश्यान्तु वार्त्ताकीभक्षणं पुत्रनाशनम् ।
चतुर्दश्यां माषभक्षं महापापकरं परम् ॥
पञ्चदश्यां तथा मांसमभक्ष्यं गृहिणां मुने ! ।
गृहिणां प्रोक्षितं मांसं भक्ष्यमन्यदिने दिने ॥
मांसञ्च रक्तशाकञ्च कांस्यपात्रे च भोजनम् ।
निषिद्धं शयने चैव कूर्ममांसञ्च प्रोक्षितम् ॥
रात्रौ च दधिभक्तञ्च शयनं सन्ध्ययोर्दिने ।
रजस्वलावीक्षणञ्च पुंश्चलीनामभक्ष्यकम् ॥

शूद्राणां याजकानाञ्च शूद्रान्नान्नमेव च ।
अभक्ष्याणाञ्च विप्रर्षे ! यदन्नं वृषलीपतेः ॥
ब्रह्मन् ! वार्द्धुषिकान्नञ्च गणकानामभक्ष्यकम् ॥
अग्रदानीद्विजानाञ्च चिकित्सकाकारकस्य च ।
हस्ताच्चित्राहरौ तैलमग्राह्यञ्चाप्यभक्ष्यकम् ।
श्वेते रक्ते भाद्रपदे मांसं गोमांसतुल्यकम् ॥"
इति ब्रह्मवैवर्ते ब्रह्मखण्डे २७ अध्यायः पाद्मे स्वर्गखण्डे ३१ अध्यायश्च ॥

नारद उवाच ।

"वर्णानाञ्च चतुर्णाञ्च भक्ष्याभक्ष्यञ्च साम्प्रतम् ।
विपाकं कर्म्मणाञ्चैव सर्वेषां प्राणिनामपि ॥
कथयस्व महाभाग ! कारणानाञ्च कारण ! ।
त्वत्तोऽन्यं कञ्च पृच्छामि नितान्तं सत्त्व-
सोम्पर ! ॥

श्रीभगवानुवाच ।

भक्ष्याभक्ष्यं चतुर्णाञ्च वर्णानाञ्च यथोचितम् ।
वेदोक्तं शृणु तात ! सावधानं निगामय ॥
क्षयः पात्रे पयःपानं गव्यं सिद्धान्नमेव च ।
भक्ष्यादिकं मधु गुडं नारिकेलोदकं तथा ॥
फलं मूलञ्च यत्किञ्चिदभक्ष्यं मनुरब्रवीत् ।
दग्धान्नं तप्तसौवीरमभक्ष्यं ब्रह्मणा मतम् ॥
नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु ।
गव्यञ्च ताम्रपात्रस्थं सर्वं मद्यं घृतं विना ॥
ताम्रपात्रे पयःपानमुच्छिष्टे घृतभोजनम् ।
दुग्धं सलवणञ्चैव सद्यो गोमांसभक्षणम् ॥
अभक्ष्यं मधुमिश्रञ्च घृतं तैलं गुडं तथा ।
आर्द्रकं गुडसंयुक्तमभक्ष्यं श्रुतिसम्मतम् ॥
पौनर्भवे जलञ्चैव माघे च मूलकं तथा ।
द्विर्भोजनञ्च दिवसे सन्ध्ययोर्भोजनं तथा ॥
भक्ष्यञ्च रात्रिशेषे च ध्रुवं प्राज्ञः परित्यजेत् ।
पानीयं पायसं चूर्णं घृतं लवणमेव च ॥
खरिकं लवणञ्चैव क्षीरं नक्रं तथा मधु ।
हस्ताहस्तगृहीतञ्च सद्यो गोमांसभक्षणम् ॥
कर्पूरं रौप्यपात्रस्थमभक्ष्यं श्रुतिसम्मतम् ।
परिवेषणकारी चेद्भोक्तारं स्पृशते यदि ॥
अभक्ष्यञ्च तदन्नञ्च सर्वेषामेव सम्मतम् ।
नकुलानां गरुडानां मक्षिकाणाञ्च पक्षिणाम् ॥
सर्पाणां शूकराणाञ्च गर्दभानां विशेषतः ।
मार्जाराणां द्वमाणानां कुक्कुराणां व्रजेश्वर ! ॥
आत्मनामपि सिंहानां त्याज्यं मांसं नृणां सदा ।
जलौकसाञ्च नक्राणां गोधिकानां तथैव च ॥
मण्डूकानां कर्कटानां चञ्चुकानाञ्च निश्चितम् ।
गवाञ्च चमरीणाञ्च कलौ मांसमभक्ष्यकम् ॥
हस्तिनां घोटकानाञ्च नृणामेव च रक्षसाम् ।
दंशस्य मशकस्यैव मक्षिका च पिपीलिका ॥
अन्येषाञ्च निषिद्धानां लोके वेदे व्रजेश्वर ! ।
वानराणां भल्लकानां शरभाणां तथैव च ॥
निषिद्धं श्वगणानाञ्च गर्दभानाञ्च मांसकम् ।
अभक्ष्यं महिषाणाञ्च दुग्धं दधि घृतं तथा ॥
खरिकञ्च तथा चक्रं विप्राणां नवनीतकम् ।
मांसमृक्षेः शवसकं तस्य दुग्धादिकं तथा ॥
वर्णानाञ्च चतुर्णाञ्चाप्यभक्ष्यञ्च श्रुतौ श्रुतम् ।

अभक्ष्यमाद्यैकश्चैव सर्वेषाञ्च रवेर्दिने ॥
पर्य्युषितं जलञ्चान्नं विप्राणां दुग्धमेव च ।
वर्णानाञ्च चतुर्णाञ्चाप्यौदार्यस्य च भक्षणम् ॥
तदन्नञ्च सुरातुल्यं गोमांसाधिकमेव च ।
अवीरान्नञ्च यो भुङ्क्ते ब्राह्मणो ज्ञानदुर्बलः ।
पितृदेवार्चनं तस्य निष्फलं मनुरब्रवीत् ॥
ब्राह्मणानां वैष्णवानामभक्ष्यं मत्स्यमेव च ।
इतरेषामभक्ष्यञ्च पञ्चपर्व्वसु निश्चितम् ॥
पितृदेवार्चनेषु च भक्ष्यं मांसं न दूषितम् ।
पञ्चपर्व्वसु त्याज्यञ्च सर्वेषां मनुरब्रवीत् ॥
असंस्कृतञ्च लवणं तैलञ्चाभक्ष्यमेव च ।
भक्ष्यं पवित्रं सर्वेषां वह्निसंस्कृतम् ॥
एकहस्ते घृतं तोयमभक्ष्यं सर्वसम्मतम् ।
आविलं क्रिमिदुष्टञ्चापरिशुष्कञ्चनिर्म्मलम् ॥
अभक्ष्यं ब्राह्मणानाञ्च वैष्णवानां विशेषतः ।
अनिवेद्यं हरेरेव यतीनां ब्रह्मचारिणाम् ॥
पिपीलिकाभिश्रितञ्च मधु गव्यं गुडं तथा ।
यत्किञ्चिदन्नं वा तात ! न भक्ष्यञ्च श्रुतौ श्रुतम् ॥
पक्षिभक्ष्यं कीटभक्ष्यं शुष्कं पक्वफलन्तथा ।
काकभक्ष्यमभक्ष्यञ्च सर्वेषां द्वयमेव च ॥
घृतपक्वं तैलपक्वं मिष्टान्नं शूदसंस्कृतम् ।
अभक्ष्यं ब्राह्मणानाञ्च शूदभ्रष्टं चिपीटकम् ॥
सर्वेषामशुचीनाञ्च जलमग्नं परित्यजेत् ।
अशौचान्तात् परदिने शुद्धमेव न संशयः ॥
विपाकः कर्म्मणामेव दुष्करः श्रुतिसम्मतम् ।
भक्ष्याभक्ष्यञ्च कथितं यथाज्ञानं व्रजेश्वर ! ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
"भक्ष्याभक्ष्यञ्च ते शिष्य ! वदितव्यं तदन्तरे ।
कदीरस्य वधः प्रोक्तः फलान्यौदुम्बरस्य च ॥
सद्यो भक्ष्यो भवेत्तेन अभक्ष्या पूतिवासिका ।
न भक्षणीयं वाराहं मांसं मत्स्यस्य सर्वथा ॥
अभक्ष्या ब्राह्मणैर्नित्यं दीक्षितैर्हि न संशयः ॥"
इति वाराहे ब्राह्मणदीक्षालक्षणनामाध्यायः ॥

भक्ष्यालावुः, स्त्री, (भक्ष्या भक्षार्हा अलावुः ।) राजालावुः । इति राजनिर्घण्टः ॥

भगं, क्ली. पुं. (भज्यते अनेनात्मा यैति एतदाश्रित्यैव कन्दर्पं सेवते इति भावः । भजसेवायाम् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "खनो च च ।" ३।३।१२५। धिनुकरणमन्यतोऽप्ययमिति विज्ञापनार्थेम् इति वृत्तिकृद्भट्टोजीदीक्षितः ।) स्त्रीचिह्नम् । तत्पर्य्यायः । योनिः २ । इत्यमरः ।२।६।७६॥ वराङ्गम् ३ उपस्थः ४ क्षेत्रमन्दिरम् ५ । इति राजनिर्घण्टः ॥ (भजन्त्यनेनेति भगो मेढ्रम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन हयमपि कथ्यते । इति भावप्रकाशस्य मध्यखण्डे चतुर्थे भागे ॥

"ब्रह्मा बृहस्पतिर्विष्णुः सोमः सूर्य्यस्तथाश्विनौ ।
भगोऽथ मित्रावरुणौ वीरं ददतु मे सुतम् ॥"
इति वामटे शारीरस्थाने प्रथमेऽध्याये ॥)

रतिगृहम् ६ अन्तरम् ७ अधरम् ८ अवाच्यदेशः ९ प्रकृतिः १० अपत्यम् ११ क्षेत्रकूपः १२

भग:

अप्रदेश: २३ प्रकृति: १४ पृथ्वी १५ संसारमार्ग: १६ गुप्तम् १७ क्षरागारम् १८ क्षरध्वजम् १९ रत्नाङ्गम् २० रतिकृद्वरम् २१ कलत्रम् २२ अध: २३। इति शब्दरत्नावली॥ तस्य लक्षणम्। यथा,—

"विस्तीर्णञ्च गभीरञ्च द्विविधं भगलक्षणम्।"

तद्गुणा यथा,—

"कूर्म्मपृष्ठं गजस्कन्धं पद्मगन्धं सुकोमलम्।
अकोमलं सुविस्तीर्णं पश्यते च भगोत्तमा:॥"

तद्दोषा यथा,—

"श्रोणिलं निम्नमत्युच्चं रोमशं कामदृग् परम्।
इत्युक्तं कामशास्त्रज्ञैर्भगदोषचतुष्टयम्॥
विस्तीर्णं सुपलं योन्यं गभीरे वंशबीजकम्।"

इति रतिमञ्जरी॥

तस्य शुभाशुभलक्षणम्। यथा,—

"शुभ: कमठपृष्ठाभो गजस्कन्धोपमो भग:।
वामोन्नतस्तु कन्याज: पुत्रजो दक्षिणोन्नत:॥
आखुरोमा गूढमणि: स्वाग्निष्ट: संहत: पृथु:।
तुङ्ग: कमलवर्णाभ: शुभोऽश्वत्थदलाकृति:॥
क्रकङ्गखुरकूर्मो यच्छिक्रोष्टरसन्निभ:।
रोमशो विकृतास्यश्च दुश्चनासोऽतिदुर्भग:॥
प्रावर्त्तो भगो यस्या: सा गर्भमपि नेच्छति।
चिपिट: कर्पराकार: किङ्करीयद्दरी भग:॥
वंशपत्रनिभो गजशरोत्पलनासिक:।
विकट: कुटिलाकारो लम्बगल्लस्तथाशुभ:॥"

इति स्कान्दे कार्त्तिकखण्डे ३७ अध्याय:॥

भौ:। धैर्य्यम्। इच्छा। ज्ञानम्। वैराग्यम्। कीर्त्ति:। माहात्म्यम्। ऐश्वर्य्यम्। (यथा, भागवते। २। ७। ८।

"यद्वैराजसत्पथगतं द्विजवाक्यदण्ड-
निर्भृष्टपौरुषभगं निरये पतन्तम्॥"

"निर्भृष्टं हतं पौरुषं भगमैश्वर्य्यञ्च यस्य।" इति तट्टीकायां स्वामी॥) यज्ञ:। धर्म्म:। मोक्ष:। इति मेदिनी। गे, १४॥ पुंसां गुदमुष्क-मध्यभाग:। इति राजनिर्घण्टः॥ भौ:। यज्ञ:। सौभाग्यम्। (यथा, भागवते। १। १७। १०।

"यस्य राष्ट्रे प्रजा: सर्व्वास्त्रयस्त्रयी साध्वा-
साधुभि:।
तस्य मत्तस्य नश्यन्ति कीर्त्तिरायुर्भगो गति:॥"

"भगो भाग्यम्।" इति तट्टीकायां स्वामी॥) कान्ति:। सूर्य्य:। ग्रामणीग्रह:। चन्द्र:। इत्यनेकार्थध्वनिमञ्जरी॥ पूर्ब्बफल्गुनीनक्षत्रम्। यथा, ज्योतिस्तत्त्वे।

"अत्तसामाघयुक्ताश्च भगे सर्पिस्तदक्षरे॥"

भग: पुं, (भज्यते इति। भजसेवायां+"पुंसि संज्ञायां घ प्रायेण।" ३। ३। ११८। इति घ। "खनो घ च।" ३। ३। १२५। इति घित्करणाद् वा घ।) रवि:। इति मेदिनी॥ गे, १४। ज्ञानवैराग्ययोर्धर्म्मे। यथा,—

"ज्ञानवैराग्ययोर्धर्म्मे भगमज्ञे तु भास्करे।"

इति यज:॥"

(भजनीये, त्रि। यथा, ऋग्वेदे। १। १६। ५।

"इन्द्रो भगो वाजदा अस्य गाव:
प्रजायन्ते दक्षिणा अस्य पूर्व्वी॥"

"भग: सर्व्वैर्भजनीय: स इन्द्र:।" इति तद्भाष्ये सायण:॥ द्वादशादित्यभेद:। यथा, ऋग्वेदे। २। २७। १।

"इमा गिर आदित्येभ्यो घृतस्नू:
सनाद्राजभ्यो जुह्वा जुहोमि।
शृणोतु मित्रो अर्य्यमा भगो नस्तुवि
जातो वरुणो दक्षो अंश:॥"

यथा च महाभारते। १। ६५। १५-१६।

"धाता मित्रोऽर्य्यमा शक्रो वरुणस्त्वंश एव च।
भगो विवस्वान् पूषा च सविता दशमस्तथा॥
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते।
जघन्यजस्तु सर्व्वेषामादित्यानां गुणाधिक:॥"

दक्षांशो वीरभद्रोऽस्य भगस्य दृष्टयज्ञे नेत्रे उत्पाटितवान्। यथा, भागवते। ४। ५। १८।

"भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि।
उज्जहार सदस्योऽक्ष्णा य: प्रपश्यन्तमसत्सुचम्॥"

ऐश्वर्य्यादिषट्कम्। यदुक्तम्।

"ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशस: श्रिय:।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥"

भोगास्पदत्वम्। यथा, भागवते।१।१६।२६।

"प्राग्लभ्यं प्रश्रय: शीलं सह ओजो बलं भग:।
गाम्भीर्य्यं स्थैर्य्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृति:॥"

"भग: भोगास्पदत्वम्।" इति तट्टीकायां श्रीधरस्वामी॥ मूलमस्तुलाभिमानी। यथा, रामायणे। ३। १२। १८।

"विष्णो: स्थानं महेन्द्रस्य स्थानञ्चैव विवस्वत:।
सोमस्थानं भगस्थानं स्थानं कौबेरमेव च॥"

"भग: मूलमस्तुलाभिमानी।" इति तट्टीकायां रामानुज:॥)

भगण:, पुं, (भानां नक्षत्राणां गण: समूह:।) नक्षत्रसमूह:। शीघ्रगामिनां ग्रहाणामल्पेन कालेन मन्दगामिनां ग्रहाणां महता कालेन पूर्ब्बगत्या यातानां पश्चिमगत्या परिवर्त्तनेनाश्विन्यादिरेवत्यन्तनक्षत्रभोगकाल:। षष्टिविकलाभि: कला षष्टिकलाभिर्भागस्त्रिंशद्भागैरापूर्य्यते स राशिभिर्भगण:। यथा,—

"शीघ्रगस्यान्यथाल्पेन कालेन महताल्पग:।
तेषान्तु परिवर्त्तेन पौष्णान्तं भगण: स्मृत:॥
विकलानां कलाषष्ट्या तत्षष्ट्या भाग उच्यते।
तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते॥
युगे सूर्य्यशुक्राणां खचतुष्करदार्णवा:
४३२०००।
कुजार्किगुरुशीघ्राणां भगणा: पूर्ब्बयायिनाम्॥
इन्दो रसाग्निचित्रीयुसप्तभूधरभागणा:
५७७५३३६।
दस्रभाष्टरसाङ्काब्धिलोचनानि कुजस्य तु
२२८६८३२॥
बुधशीघ्रस्य भूनर्त्तुखाद्रिचन्द्राङ्कनेत्रभव:
१७९३०९०।

भगद

दृङ्नखते: खदस्राब्धिवेदषड्वसुयक्षतथा
६६४२२०॥
सितशीघ्रस्य षट्सप्तत्रियमाग्निखभूधरा:
७०२२३७६।
भूनेर्भृङ्गसुषट्पक्षरसवेदनिशाकरा:१४६५६८॥
चन्द्रोच्चस्याग्निभूम्याग्निवसुसर्पार्णवा
४८८२०३ युगे।
वामं पातस्य सर्पाग्नियमाग्निशिखिदस्रका:
२३२२३८॥
इति सूर्य्यसिद्धान्त:॥*॥

अपि च। ग्रहाणां मन्दोच्चानां चलोच्चानां ग्रहपातानाञ्च भगणान् श्लोकषट्केनाह। अर्कभृकवधपर्य्यया विधेरब्धि कोटिगुणिता रदाश्रय:। ४३२०००००० इत एव गुणितोवि-भूभुवां कीर्त्तिताश्च भगणैरुलोचजा:॥ १॥

खाब्धभस्वाब्धभगणानामेरिन्द्रियशाधरादिविहया
५७७५३३०००० हिमद्युते:।
युग्मयुग्मशरनागलोचनत्र्यालषस्वयमाग्निनोऽ-
ब्जज:२२९६८२८५२२॥२॥
सिन्धुसिन्धुरनवाङ्गोऽकुषट्चाङ्कसप्ताग्निगो
१७८३६६६८६८४ ग्रहोच्चजा:।
पक्षपक्षयुगषट्कलोचनङ्खाब्धिषड्गुणमिता
३६४२२६४५५ युरोर्मनो:॥ ३॥
दिनन्दवेदाङ्कगजाग्निलोचनदिशून्यशैला:
७०२२३८६४१२ सितशीघ्रपर्य्यया:।
भृङ्गकृनन्दद्विनगाङ्कनागषट्कृतेन्दव:
सूर्य्यसुतस्य पर्य्यया:१४६५६७२६८॥४॥
खाब्धाब्धयो४८०२८ाक्षगजेषुदिग्विषद्विपाब्धयो
६८०१०५८५८ द्राङ्कयमा २६२ रदाश्रय:३३२।
शूरेन्दिभा८५५ खाक्षरसा:६५ इक्षुसागरा:४१
स्यु: पूर्ब्बगत्या तरणीन्दुपर्य्यया:॥५॥
गजाष्टिभक्षचिरदाग्निन:२६२३१११६८कुभद्र-
साग्निन:२६७ कुट्टिशरा: ५२१ क्रमर्क्षय: ६३।
त्रिनन्दनागा ८६३ युगकुञ्जरेषवो ५८४
निशाकराद्दास्तगपातपर्य्यया:॥६॥"

इति सिद्धान्तशिरोमणि:॥*॥

ग्रहाणां पूर्ब्बगमनेन कल्पे याते पर्य्यया:। तथा मन्दोच्चानाञ्च प्राग्गत्या यतावन्त:। पातानां पश्चिमगत्या यतावन्तो भवन्ति। अत्रोपपत्ति: सा तु तद्भाषाकुशलेन तत्तच्चेत्रसंस्थागज्ञेन सत्-गोलनैव श्रोतुं शक्यते नान्येन। ग्रहमन्दशीघ्र-पाता: स्वस्वमार्गेषु गच्छन्त एतावत: पर्य्ययान् कल्पे कुर्व्वन्तीत्यत्रागम एव प्रमाणम्। इति तट्टीका॥

भगदत्त:, पुं, (भगमैश्वर्य्यं दत्तमस्मै इति।) नरकराजस्य ख्यातपुत्र:। स तु प्राग्ज्योतिषपुराधिप:। यथा,

"ऋतुमत्यान्तु जायायां कालेन नरक: क्रमात्।
भगदत्तं महाप्राज्ञं मदत्तं सुमालिनम्॥
चतुरो जनयामास पुत्रांस्तांश्च क्षितेः सुत:॥"

श्रीभगवानुवाच।

"भारावतरणे देवि! नरकस्य वध: पुरा।
त्वयैव प्रार्थितो यस्मात् तेनायौ निहतो मया॥

पालयिष्योऽस्य सन्तानं देवि ! त्वद्वचनादहम् ।
प्राग्ज्योतिषेऽभिषेक्ष्यामि वत्सरं भगदत्तकम् ॥
पृथिव्यां नारदेनैव सहितः केशवस्तदा ।
भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ।
अभिषिच्य तदा भूमं पुरमध्ये न्यवेशयत् ॥"

इति कालिकापुराणे ३८ अध्यायः ॥

(यथा च महाभारते । २ । २६ । ८ ॥
"स तानपि महेष्वासान् विजिग्ये भरतर्षभ ! ।
तेरेव सहितैः सर्वैः प्राग्ज्योतिषमुपाद्रवत् ॥"
तत्र राजामहानासीद्भगदत्तो विशाम्पते ! ।
तेनासीत् सुमहद्युद्धं पाण्डवस्य महात्मनः ॥")

भगदैवतं, क्ली, (भगो योनिर्दैवतं देवता यस्य ।) पूर्व्वफल्गुनीनक्षत्रम् । तत्तु दृङ्मसंज्ञकनक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।
"विशाखानलतोयानि वैश्यं भगदैवतम् ।
वृषा पौष्णो यमः सर्पो जन्मभाच्चैवतैः क्रमात् ॥"

भगन्दरः, पुं, (भगं गुह्यसुष्कमध्यस्थानं दारयतीति । "इ + खिच् + पूः सर्व्वयोर्दारिसहोः ।" ६ । २ । ३२ । इत्यत्र । "भगे च दारेरिति वक्तव्यम् ।" इति काशिकोक्तेः खच् । "खचि ह्रस्वः ।" ६ । ३ । ६३ । इति ह्रस्वः । सुमुच ।) अपानदेशे व्रणरोगविशेषः । तस्य रूपमाह । "गुदस्य ह्यङ्गुले पार्श्वे पार्श्वतः पिड़कार्त्तिवत् । भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत् ॥" अर्त्तिवत् पीड़ावत् । पञ्चविधः वातकफैकिकसैन्निपातिकशल्यजभेदैः ॥ भगन्दरशब्दस्य निरुक्तिमाह भोजः ।
"भगं परिसमन्ताद्यो गुदवस्तौ नयेत् च ।
भगवद्दारयेद्दृष्यात्तस्मादेष भगन्दरः ॥"
भजन्त्यनेनेति भगं मेहनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् ॥ पूर्व्वरूपादीनि यथा,—
"कटीकपालनिस्तोददाहकण्डूरुजादयः ।
भवन्ति पूर्व्वरूपाणि भविष्यति भगन्दरे ॥"
कटीकपालमत्र कटीफलकम् ॥ वातिकं घृतपीनकसंज्ञं भगन्दरमाह ।
"कषायरूक्षैरतिकोपितोऽनिलः
क्षपानदैन्यैः पिड़कां करोति याम् ।
उपेक्षणात् पाकमुपैति दारुणं
ततश्च भिन्नारुणफेनवाहिनीम् ॥
तत्रागमो मूत्रपुरीषरेतसां
व्रणैरनेकैः घृतपीनकं वदेत् ।
दारुणं अतिदारुणात् । व्रणैरनेकैः सूक्ष्ममुखैः । घृतपीनकच्छायानी तत्तुल्यम् ॥ पैत्तिकमुद्भवोद्भवसंज्ञमाह ।
"प्रकोपणैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां गुदे नराम् ।
तदाशुपाकाद्विषमपूतिवाहिनीं
भगन्दरञ्चोद्भवसंज्ञमादिशेत् ॥"
आशुपाकात् विषमपूतिवाहिनीम् । शीघ्रपाकात् उग्रदुर्गन्धवाहिनीञ्च । तद्धि तं भगन्दरं उद्भवसंज्ञञ्च । पिड़कालीनवक्तव्यतयोद्भवोवाचारलेन ॥ * ॥ शैष्मिकपरिस्रावित्वसंज्ञमाह ।
"कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
श्लेष्मावभासः कफजः परिस्रावी भगन्दरः ॥"
कठिनः पिड़कावस्थायां परिस्रावी निरन्तरं स्रवणशीलः ॥ * ॥ सान्निपातिकशल्यजकावर्णसंज्ञमाह ।
"बहुवर्णरुजास्रावाः पिड़का गोस्तनोपमाः ।
शम्बूकावर्त्तवत्राड़ी शम्बूकावर्त्तको मतः ॥"
बहुवर्णरुजास्रावाः बहुशब्दो वर्णादिभिः प्रत्येकं सम्बध्यते । नाड़ी स्रावमार्गः ॥ * ॥ मूत्रादिमुख्यमार्गसंज्ञमाह ।
"शतावर्त्तिः पायुगतावृजुर्वृते
ऋजुत्वात् स्युः क्रमयो विदार्य्यते ।
प्रजायते मार्गमनेकधा सुखं-
ब्रंशेत्तमुख्यार्गभगन्दरं वदेत् ॥
वृतात् कण्टकादिना नखेन
कण्डूयनादिना वाभिघातात् ।
शतिः स्रावः उख्यार्गभगन्दरम् । एतस्य क्रमिक्षतमार्गैः पुरीषादिनिर्गमादुख्यार्गसंज्ञा ॥"
कष्टसाध्यमसाध्यत्वाह ।
"घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥
वातमूत्रपुरीषाणि शुक्रञ्च क्रमयत्यधः ।
भगन्दरात् स्रवन्त्यस्तु नाशयन्ति तमासुरम् ॥"
अथ भगन्दरस्य चिकित्सा । यथा,—
"अथास्य पिड़कामेव तथा यत्नादुपाचरेत् ।
शुद्धामसृतिसेकार्त्तेर्यथा पाकं न गच्छति ॥
पुनर्नवास्तताशुष्कोपिड़िकावदरैः कृतः ।
लेपाय पिड़कावस्थे कल्कः शुद्धो भगन्दरे ॥
पयःपिष्टैस्तिलारिष्टमधुकैः शोधने कृतः ।
लेपो भगन्दरे शुद्धः पंक्तिके वेदनावति ॥"
अरिष्टो निम्बः ॥
"सुमनाधाय पत्राणि गुड़ूची बिल्वमेव च ।
सैन्धवं नक्तमालिप्ते लेपाद्यन्ति भगन्दरम् ॥"
सुमना जातिस्तस्याः पत्रम् ।
"पिड़कानामपक्वानामपनयपूर्व्वकम् ।
कर्म्म कुर्य्यादिदकाले भिन्नानां व्रणवत् क्रिया ॥
निम्बार्कार्कोरविन्दुत्यपुराश्वघ्ननक्तकैः ।
सिद्धमभ्यञ्जने तैलं भगन्दरहरं परम् ॥"
पुरो गुग्गुलुः । अश्वघ्ननक्तकाः करवीरपत्राणि । निम्बादितैलम् ॥ * ॥
"त्रिफलापूरलाक्षाणां त्रिपक्षांशैकयोगिता ।
गुटिका शोथगुल्मार्शोभगन्दरवनाशिता ॥"
नवबाधिको गुग्गुलुः ॥ * ॥
"शस्त्रक्रियापि कथिता शस्त्रसाध्ये भगन्दरे ।
सा च तेनैव कर्त्तव्या शस्त्रशास्त्रमवेत्य यः ॥
यावान्मेढ्रं गुदं वृद्धं एषणी गुरुणि च ।
रूढव्रणोऽपि यत्नेन वर्त्तयेद्दक्षरं नरः ॥"

इति भावप्रकाशे भगन्दराधिकारः ॥

अपि च ।
"लङ्घनं स्वेदनं लेपविस्रावणविरेचनैः ।
रक्तमोक्षादिभिः शीघ्रं गुदजां पिड़कां जयेत् ॥
तथा यत्नं भिषक् कुर्य्याद्यथा पाकं नियच्छति ।
अपक्वं वाथ पक्वं वा जलौकापातनं हितम् ॥
तदभावे तु शस्त्राभ्यामिदं रक्तस्य मोक्षणम् ॥"
वटपत्राष्टकाशुष्कीगुड़्च्याः सपुनर्नवाः ।
पिड़का तु पिड़कारूढे लेपः शस्तो भगन्दरे ॥
श्यामावस्त्राक्रिया प्रोक्ता पक्वावस्त्राक्रियोच्यते ॥
चुम्बकाषाटलाक्षारवल्लिदाहादिकं क्रमम् ।
विधाय व्रणवत् कार्य्यं, यथा दोषो यथाबलम् ॥
जन्त्वर्कदुग्धदार्व्वीभिर्वर्त्तिं कृत्वा भगन्दरे ।
दद्यात् सर्व्वशरीरस्थो नाड़ीदोषात् प्रयोगराट् ॥

तिलाभयालोध्रमरिष्टपत्रं
निशा वचा कुष्ठमगारधूमः ।
भगन्दरे नाड्यपदंशयोश्च
दुष्टव्रणे शोधनरोपणोऽयम् ॥
सुनोऽस्यिदृष्टं त्रिफलारसेन
विड़ालकास्थि त्वथवा विलेपनात् ।
चिरप्रभूतं व्रणरोगदुष्टं
भगन्दरं नाशमुपैति नूनम् ॥ * ॥
जम्बूकमांसं भुञ्जीत प्रकारैर्व्यञ्जनादिभिः ॥"
शृगालमांसव्यञ्जनं स्वाद्यम् । अथवा शूकरमांसव्यञ्जनं स्वाद्यम् ॥
"त्रिकटु त्रिफला मुस्तं विड़ङ्गान्तश्चित्रकम्
शुण्ठेला पिप्पलीमूलं हरिद्रा सुरदारु च ॥
तुम्बरुं पुष्करं चव्यं त्रिशाला रजनीद्वयम् ।
विड़ं सैन्धवलवणौ सैन्धवं गजपिप्पली ॥
यावन्त्येतानि चूर्णानि तावद्गुणगुग्गुलुः ।
कोलप्रमाणां गुटिकां खादयेन्मधुना सह ॥
भगन्दरं नासकासं नयं कीर्णव्रणोदरम् ।
नाड़ीदुष्टव्रणानाहकुष्ठोन्मादाश्मरीक्रमीन् ॥
मेहान्वृद्धिं गुदौगम्यं शीघ्रमेव च ।
सन्निपातिको हन्ति गुग्गुलुः सर्व्वरोगहा ॥"
गुदौगम्यमित्यत्र गुदपार्श्वशूलमित्यपि पाठः ॥
सन्निपातिगुग्गुलुः ॥ * ॥
"चित्रकार्कौ त्रिवृत्पाठौ मलपूहयसारकौ ।
सुधा वचा जाङ्गलिका हरितालं सुवर्चलाम् ॥
ज्योतिष्मतीञ्च संचूर्ण्य तैलं वैद्यो विपाचयेत् ।
व्रणद्विस्यन्दनं नाम तैलमुक्तं भगन्दरे ॥
शोधनं रोपणञ्चैव सुवर्णकरणं स्मृतम् ।"
विस्यन्दनतैलम् ॥ * ॥
"क्षतस्य द्विगुणेन शुद्धबलिना कल्कायसोभिः क्षारं
पिड़ानाभ्रमयं समक्षमुलिनं पात्रं विधायोपरि ।
स्वेद्यं यामयुगं सभक्षपिठरे जम्बूजलैः सप्तधा
साद्धं तत्पुटयेत् भगन्दरहरो गुह्योक्तिना स्यादिति ॥"
जम्बूजलैरित्यत्र निम्बूजलैरिति च पाठः ।
भगन्दरहरो रसः ॥ * ॥
"शुद्धसूतं समं गन्धं त्रयाणां सदृशं कृतम् ।
जीरकं सैन्धवं तुल्यं तिक्तकोषातकीद्रवैः ॥

पित्वा तज्जपनाद्यन्ति भक्षणाच्च भगन्दरम् ।
रक्तः कालाग्निरुद्रोऽयं गुञ्जैकं वस्तुजिद्वदेत् ॥"
कालाग्निरुद्रो रक्तः ॥ ७ ॥
इति भावप्रदीपिकायां भगन्दरचिकित्साध्यायः ॥
अपि च । गारुडे १८८ अध्याये ।
"गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भगन्दरः ॥"
(अस्य प्रकारत्रयस्यचिकित्सितं यथा,—
स्निग्धस्निग्धस्वभावत्व-
प्रवाहणाद्युत्कटत्वाच्चदृष्टेः ।
गुदस्य पाके पिडका दृष्टाशिः
पक्वप्रभिन्ना तु भगन्दरः स्यात् ॥
विरेचनक्षेत्रविपाटनञ्च
विशुद्धमार्गस्य च तैलदाहः ।
स्यात् क्षारसञ्जेन सुपाचितेन
छिन्नस्य चास्य व्रणवच्चिकित्सा ॥"
इति चरके चिकित्साख्याने सप्तदशोऽध्याये ॥)
भगभञ्जकः, पुं, (भगं योनिच्छायामपाश्रित्य भञ्जयति औषिकां निर्व्याहयतीति । भञ्ज + ण्वुल् ।) कुक्कुरः । इति महाभारते दानधर्मः ॥ कोटरा इति भाषा ॥ तस्याश्चभक्षणनिषेधो यथा,—
"यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुक्कुरान्नं यत्र तस्यान्नं भुक्त्वा चान्द्रायणञ्चरेत् ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥
भगवती, स्त्री, (भगः ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना ॥" इत्युक्तलक्षणम् षड्ऐश्वर्यमस्त्यस्येति । भग + "तदस्यास्त्यस्मिन्निति मतुप् ।" ५ । २ । ९४ । इति मतुप् । मस्य वः ।
"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुवादयः ॥"
इति काशिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः । ततः स्त्रियां ङीप् ।) पूज्या । गौरी । इति मेदिनी । ते, ७१४ ॥ (सा च प्रकृतिरूपिणी महामाया देवी । यथा, मार्कण्डेये । ८१ । ७२ ।
"ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥") सरस्वती । यथाह पौराणिकाः ।
"सा मां पातु सरस्वती भगवती निःशेष-
जाड्यापहा ॥"
गङ्गा । यथा, शङ्कराचार्यकृतगङ्गास्तोत्रे ।
"भगवति ! भवदीयभागलेशा-
दयमखिलः सुरलोकवल्लभोऽभूत् ॥"
तस्याः स्वरूपं यथा,—
"यथा त्वं हि भगवान् नित्या भगवती तथा ।
स्वमायया तिरोभूता तत्रैवं प्राकृते लये ॥
आब्रह्मस्तम्बपर्य्यन्तं सर्व्वं मिथ्यैव सृष्टिमम् ।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा ॥
विष्ण्वाद्यर्थादिकं सर्व्वं यद्यामक्षि युगे युगे ।
विद्यादिदेवि भगो ह्येवस्तेन भगवती स्मृता ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५४ अध्यायः ॥

अपि च ।
"सेवते या सुरैः सर्व्वैर्ब्रह्मविष्ण्वादिभिः सदा ।
धातुर्भवेति सेवायां भगवत्येव सा स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
तस्याः प्रतिमाविधेयस्य पूजने फलविधेयो यथा,
ब्रह्मोवाच ।
"शृणु तस्याः सुराश्रेष्ठ ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शङ्करादैः फलेप्सुभिः ॥
कर्त्तव्यस्तेन देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ॥
अक्षमालाकरो नित्यं तेनासौ विबुधावरः ।
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ॥
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ।
रत्नशैलमयीं देवीं विष्णुरर्च्चयते सदा ॥
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ॥
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांसिकां देवीं पूजयन्ते विधानतः ।
प्राप्तवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवां देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतायुषौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ऋद्ध्या समन्वितम् ॥
देवीमन्नमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥
ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चते तत्र संप्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
सुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ते पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्यते परं पदम् ॥
क्षणायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥
अपक्वीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
शैलोद्भिदां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ते सदाकालं चर्च्चिकां सुरनायिकाम् ॥
त्वया त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पूज्य लभसे मनसेप्सितान् ॥
कामान् सुरवराश्रेष्ठ ! कामिकैः पूजितैः सदा ।
ददाति सर्व्वलोकानां चिन्तामणिर्यथा शिवा ॥"
इत्याद्ये देववतारे प्रथमविधिपूजामाहात्म्ये ६८ अध्यायः ॥ तस्ये गृहदाहस्य फलं यथा,—

ईश्वर उवाच ।
"देवा गृहन्तु यः शुक्रकरार्पयति शोभनम् ।
सर्व्वोपकरणैर्युक्तं सकपाटार्गलान्वितम् ॥
वह्निना सहितं भव्यं हव्यं वितानं दर्पणानि च ।
दत्त्वा सुरवर्यादि नित्यं वस्त्रोत्तमानि च ॥
देवीशास्त्रार्थवेत्तारं पूजयं भवने शुभम् ।
एवं प्रवर्त्तते यस्तु तस्य पुण्यफलं शृणु ॥
दशपूर्व्वापरांस्तात ! आत्मनञ्चैकविंशतिम् ।
उद्धृत्य च कुलं पापाद्ब्रह्मलोके महीयते ॥
गच्छते भगवती यत्र परा परमपूजिता ।
तत्र कल्पान्तरं यावद्भुक्त्वा भोगान् मनो-
रमान् ॥
पुनः कालादिहायातः पृथिव्यामेकराड्भवेत् ।
सम्पत्त्यवाहनोपेतः शास्त्रः पुरपरिच्छदः ॥
पुनर्देवा द्विजातीनां तद्भक्तानां प्रियो भवेत् ॥
कन्यासम्पूजको नित्यं देवीशास्त्रार्थपारगः ।
लभते परसद्भावं तदन्ते शिवतां व्रजेत् ॥
देवा गृहन्तु यः शुक्र ! सम्मार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंवृतः ॥
तदागच्छेच्छिवालोकं सर्व्वकालफलप्रदम् ।
देवा गृहन्तु यः शुक्र ! गोमयेनानुलेपयेत् ॥
स्त्रियो वा यदि वा पुंसः षण्ढाश्चस्तु निरन्त-
रम् ।
स लभेदीप्सितान् कामान् देवा लोकञ्च
गच्छति ॥"
इत्याद्ये देववतारे ४२ अध्यायः ॥
भगवद्भक्तः, पुं, (भगवती भगवत्या वा भक्तः ।) श्रीशक्तिभक्तियुक्तः । अथ भगवद्भक्तानां लक्षणानि । सामान्यतः लैङ्गे ।
"विष्णुरेव हि यस्यैष देवता वैष्णवः स्मृतः ॥"
अत्र विशेषः ।
"व्रतकर्म्मसुभक्तानभोगजन्मादिमत्स्वपि ।
शैवेष्वपि च लक्षणस्य भक्ताः सन्ति तथा तथा ॥"
तत्र व्रतिषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम् । तथा च स्कान्दे श्रीमार्कण्डेय-भगीरथसंवादे ।
"दग्धमीप्सितसंयुक्तं दिनं वैष्णवसञ्ज्ञकम् ।
सुपास्यते महीपाल ! ते वै भागवता नराः ॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः ।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते ॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरसान्वितां ।
अश्नाति साधयेद्यस्तु स वै भागवतो नरः ॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च ।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः ॥"
कर्म्मसु भगवदर्पणादिना तदाज्ञावृद्ध्या वा भक्तिहेतुसदाचारपरता तत्रैव ।
"धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम् ।
पचनं विप्रमुख्यार्थं श्रेयांसे वैष्णवा नराः ॥
अभ्यागतं पथि श्रान्तं कालेऽन्न गृहमागतम् ।
योऽतिथिं पूजयेद्भक्त्या वैष्णवः स न संशयः ॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः ।
सुचयस्त्यक्तरागा ये सदा भागवता हि ते ॥"

पाद्मे वेणुगीतमाहात्म्ये श्रीनारदाम्बरीषसंवादे। यथा,—
"जीवितं यस्य धर्म्मार्थे धर्म्मो हर्य्यर्थमेव च।
अहोरात्राश्च पुण्यार्थे तं मन्ये वैष्णवं जनम्॥"
लैङ्गे च।
"विष्णुभक्तिसमायुक्तान् औत्सर्गाग्निप्रवर्त्तकान्।
प्रीतो भवति यो ब्रह्मा वैष्णवोऽसौ प्रकीर्त्तितः॥"
गुणवत्सु भक्तिहेतुकृपालुत्वादिसद्गुणशीलता तत्रैव।
"परदुःखेनाप्यदुःखं मन्यन्ते ये नृपोत्तम!।
भगवद्धर्म्मनिरतास्ते नरा वैष्णवा नृप!॥"
भागवतदशमस्कन्धे श्रीकपिलदेवभूतिसंवादे। यथा,—
"तितिक्षवः कारुणिकाः सुहृदः सर्व्वदेहिनाम्।
अजातशत्रवः शान्ताः साधवः साधुभूषणाः॥"
पञ्चमस्कन्धे ऋषभदेवस्य पुत्रानुशासने। यथा,
"महतसेवां द्वारमाहुर्विमुक्तेस्तमोद्वारं योषितां सङ्गिसङ्गम्।
महान्तस्ते समचित्ताः प्रशान्ता विमन्यवः सुहृदः साधवो ये॥"
एकादशस्कन्धे श्रीभगवदुद्धवप्रश्नोत्तरे। यथा,—
"कृपालुरकृतद्रोहस्तितिक्षुः सर्व्वदेहिनाम्।
सत्यसारोऽनवद्यात्मा समः सर्व्वोपकारकः॥
कामाद्यशुभितधीर्दान्तो मृदुः शुचिरकिञ्चनः।
अनीहो मितभुक् शान्तः स्थिरो मच्छरणो मुनिः॥
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः।
अमानी मानदः कल्यो मैत्रः कारुणिकः कविः॥"
विष्णुपुराणे यमनद्भटसंवादे। यथा,—
"न चलति निजवर्णधर्म्मतो यः
समममतिरात्मसुहृद्विपक्षपक्षे।
न हरति न च रजति किञ्चिदुच्चैः
स्थिरमनसं तमवेहि विष्णुभक्तम्॥"
अन्यासु भक्तिहेतुज्ञानवत्ता एकादशे। यथा,—
"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥
त्रयाणामेकभावानां यो मां पश्यति सूरयः।
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥
अर्च्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥"
भोगवत्सु भक्तिहेतुभोगानासक्तता हरियोगेश्वरोत्तरे। यथा,—
"यद्दीव्यापीन्द्रियैरर्थान् यो न द्वेष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"
सज्जनविद्यादिमत्सु भक्तिहेतुनिरभिमानिता तत्रैव। यथा,—
"न यस्य जन्मकर्म्मभ्यां न वर्णाश्रमजातिभिः।
सज्जतेऽस्मिन्नहंभावो देहे वै स हरेः प्रियः॥
भावः कथञ्चिन्नत्वेव प्राणानासक्तमानिता।
भक्तिनिष्ठापका जातास्तत्तो ह्युत्तममतोदिता॥"
निष्ठापकाः परिपाकं प्रापकाः॥ *॥
ग्रन्थेषु श्रीग्रन्थवल्लभाभेदकता बृहन्नारदीये।
"ग्रन्थे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"
इति॥*॥
"अन्यच्च तेषां भगवच्छास्त्रार्थपरतादिकम्।
साक्षाद्भक्त्यात्मकं सूक्ष्मं लक्षणं लिख्यतेऽधुना॥"
श्रीभागवतशास्त्रपरता स्कान्दे।
"येषां भागवतं शास्त्रं सदा तिष्ठति सन्निधौ।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीवितादधिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"
वैष्णवसम्मानलिप्सा लैङ्गे।
"विष्णुभक्तमथायान्तं यो ब्रूते सुमुखप्रियः।
प्रह्लादादि करोत्येव वासुदेवे यथा तथा।
स वै भक्त इति ज्ञेयः स पुनाति जगत्त्रयम्॥
ऋक्सामाथर्वगिरः प्रह्लादेन तथा भागवतेरिताः।
प्रणामपूर्व्वं श्रुत्वा यो वदेद्वै वैष्णवो हि सः॥
भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"
गारुडे।
"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु सतात्मत्वान्महाभागवतो हि सः॥*॥
श्रीतुलसीसेवानिष्ठा बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकण्ठा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृत्तिकं येच्च ते वै भागवतोत्तमाः॥"*॥
श्रीभगवत्कथापरता बृहन्नारदीये श्रीभगवन्मार्कण्डेयसंवादे।
"मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"
स्कान्दे श्रीभगवदर्জ্জুनसंवादे।
"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति यः।
शृण्वते मत्कथायाश्च स वै भागवतोत्तमः॥"
दशमस्कन्धे तत्रैव।
"मदाश्रयाः कथा मृष्टाः शृण्वन्ति कथयन्ति च।
तप्यन्ति विविधास्तापा नैषाञ्जन्तचेतसः॥"*॥
नामपरता बृहन्नारदीये तत्रैव।
मन्नामश्रवणासक्तास्ते वै भागवतोत्तमाः॥
येऽभिनन्दन्ति नामानि हरेः शृण्वन्ति हर्षिताः।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥"
तत्रैवान्यच्च।
"अन्येषामुदयं दृष्ट्वा येऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्मरणपरता। तत्र स्वधर्म्मनिष्ठया रागादेरादिनिवृत्त्या स्मरणं श्रीविष्णुपुराणे यमनद्भटसंवादे।
"न चलति खलैः श्रीभगवत्पदार-
विन्दे वितनुमनालमनवेहि विष्णुभक्तम्।
कलिकलुषमलेन यस्य गात्रा
विमलमतेर्मलिनीभवत्यलेपम्।
मनसि सततमर्हणं महत्त्वं
वसतमवेहि हरेरतीव भक्तम्॥
कनकमपि रजस्वलेव पुंसा
लशमिव यः समवैति वै परत्वम्।
भवति च भगवत्यनन्यचेताः
पुरुषवरं समवेहि विष्णुभक्तम्॥
स्फटिकगिरिरिवातिनिर्म्मलः स विष्णु-
र्मनसि नृणां न च मत्सरादिदोषः।
न हि तुहिनमयूखरश्मिपुञ्जे
भवति खरांशुनदीप्तिजः प्रतापः॥
विमलमतिरमत्सरः प्रशान्तः शुचि-
चरितोऽखिलजन्तुमित्रभूतः।
प्रियहितवचनोऽनुमानमायो
वसति सदा हृदि तस्य वासुदेवः॥
वसति हृदि सनातने च तस्मिन्
भवति पुमान् अगतोऽस्य सौम्यरूपः।
स्थितिरसमतिरन्यमात्मनोऽल्प-
कथयति चारुतयैव शास्त्रपोतः॥"
अन्यविजयेन वैराग्यादिना च स्मरणं श्रीहरियोगेश्वरोत्तरे।
"देहेन्द्रियप्राणमनोधियां यो
जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः।
संसारधर्म्मैरविमुह्यमानः
स्मृत्या हरेर्भागवतप्रधानः॥
त्रिभुवनविभवहेतवेऽप्यकुण्ठ-
स्मृतिरजितात्मसुरादिभिर्विमृग्यात्।
न चलति भगवत्पदारविन्दा-
ल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः॥
भगवत उरुविक्रमाङ्घ्रिशाखा-
नखमणिचन्द्रिकया निरस्ततापे।
हृदि कथमुपसीदतां पुनः स
प्रभवति चन्द्र इवोदितेऽर्कतापः॥"
पूजापरता स्कान्दे तत्रैव।
"येऽर्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"
लैङ्गे।
"विष्णुक्षेत्रे शुभार्थेषु करोति क्षेत्रसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"
वैष्णवधर्म्मनिष्ठतादि प्राग्वोत्तरखण्डे।
"तापादिपञ्चसंस्कारी नवेज्याकर्म्मकारकः।
अर्थपञ्चकविद्विप्रो महाभागवतो हि सः॥"
तापः तप्तसुधारकं तदादिपञ्चसंस्कारयुक्तः।
पञ्चसंस्काराश्च तत्रैवोक्ताः। [इति।
"तापः पुण्ड्रञ्च नामास्यो यागश्च पञ्चमः॥"

अक्षार्थः। नाम श्रीलक्ष्मदाशेत्यादि। मन्त्रः श्रीगुरोः सकाशात् मन्त्रग्रहणम्। याग: होम-पूर्वकयजनविधिदीक्षाग्रहणमित्यर्थः। नवदीक्षा-कर्मणीति पूजाबन्धमित्रलक्षणानि अवणादीनि पाद्योक्तार्घपाद्यादीनि वा सर्वेषां तेषां पूजाङ्ग-त्वात्। तानि च तत्रैवोक्तानि। यथा,—

"अर्चनं मन्त्रपठनं यागयोगौ महात्मनः।
नामसङ्कीर्तनं सेवा तन्निष्ठैरङ्गमं तथा।
तदीयाराधनं चर्या नवधा भिद्यते शुभे!॥"

अर्थपञ्चकं चत्वारो चत्वारो धर्म्मादयः पुरु-षार्थाः पञ्चमपुरुषार्थश्च भक्तिः। यदा पञ्च-तत्त्वानि अनात्मात्मपरमात्मपरमेश्वरतद्भक्तानां याथार्थ्यानि। इति तट्टीका॥ * ॥

एकान्तिता गारुडे।

"एकान्तेन सदा विष्णौ यस्माद्वै परायणाः।
तस्मादैकान्तिनः प्रोक्तास्तद्भागवतचेतसः॥"

तद्विज्ञानेनानन्यपरता एकादशे उद्धवप्रश्नोत्तरे।

"ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि
यादृशः।
भजन्त्यनन्यभावेन ते मे भागवता मताः॥"

भागवते। ११। २। ४०।

"न कामकर्म्मबीजानां यस्य चेतसि सम्भवः।
वासुदेवैकनिलयः स वै भागवतोत्तमः॥"

सा च एकान्तिता चतुर्द्धा। तत्र धर्म्मानादरेण श्रीमद्भवप्रश्नोत्तर एव।

"आज्ञायैवं गुणान् दोषान् मयादिष्टानपि
स्वकान्।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च
सत्तमः॥"

गीतायाञ्च।

सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्व्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥
यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठताम्॥"

अन्यसर्व्वनिरपेक्षता भागवते श्रीमद्भगवदुद्धव-संवादे ऐलोपाख्याने।

"सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शिनः।
निर्म्ममा निरहङ्कारा निर्द्वन्द्वा निष्परिग्रहाः॥"

सैव तृतीये श्रीकपिलदेवभूतिसंवादे।

"त इते साधवः साध्वि! सर्व्वसङ्गविवर्ज्जिताः।
सङ्गस्तेष्वथ ते प्रार्थ्यः सङ्गदोषहरा हि ते॥"

विप्राकुलत्वेऽपि मनोरतिपरता स्कान्दे।

"यस्य ब्रह्मङ्गतस्यापि कीर्त्तौ रमते मनः।
क विष्णुता च भक्तिर्वै स वै भागवतो नरः॥
आपन्नस्य यस्येह भक्तिरव्यभिचारिणी।
नान्यत्र रमते चित्तं स वै भागवतो नरः॥"

प्रेमैकपरता च भागवते पञ्चमस्कन्धे श्रीऋषभ-देवस्य पुत्रानुशासने।

"मे वा मयीश क्षतसौहृदार्था
जनेषु देहम्भरवार्त्तिकेषु।
यदीह आयासउदर्कतिमत्तु
न प्रीतियुक्ता यावदर्थाश्च लोके॥"

रति सिद्धं धनं वा।

"विद्या प्रेमैकपरता प्रेम्णः स्वात्मारतत्वतः।
उत्तमा मध्यमा चासौ कनिष्ठा चेति भेदतः॥"

तत्रोत्तमा यथा एकादशे हरियोगेश्वरोत्तरे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
खेष्टदेवस्य भावं यः सर्व्वभूतेषु पश्यति।
भावयन्ति च तान्यस्मिन्नित्यर्थः सत्तमः सताम्॥"

तृतीये श्रीकपिलदेवभूतिसंवादे।

"मय्यनन्येन भावेन भक्तिं कुर्व्वन्ति ये दृढ़ाम्।
मत्कृते त्यक्तकर्म्माणस्त्यक्तस्वजनबान्धवाः॥"

एकादशे श्रीहरियोगेश्वरोत्तरे च।

"विलङ्घयति वै स्वर्गं न यस्य वाक्या-
स्तरिरवग्राभिहितोऽप्यघौघनाशः।
प्रणयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः॥"

तत्रैव मध्यममाह हरियोगेश्वरोक्तावेव।

"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः॥"

कनिष्ठता तत्रैव।

"अर्चायामेव हरये पूजां यः श्रद्धयेहते।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः॥
अल्पया पूजनं प्रेमबोधकं भक्त इत्यपि।
प्रेम्णो हि करणात्तस्य स्वलं भक्तानपेक्षणात्॥
लक्षणानि च वाच्यानि भक्तैर्लक्ष्याणि तान्यपि।
बन्धनादीनि विद्यन्ते येषु भागवता हि ते॥
एतानि लक्षणान्यत्र गौणमुख्यादिभेदतः।
लक्षणानि तथान्यानि विवेच्यानि पराण्यपि॥
ईदृग्लक्षणवन्तः स्युर्दुर्लभा बहवो जनाः।
दिष्ट्या हि मम्यो भक्तं न वर्त्तन्ते इतस्ततः॥"

अतएवोक्तं मोक्षधर्म्मे नारदीये।

"जायमानं हि पुरुषं यं पश्येन्मधुसूदनः।
सात्त्विकः स तु विज्ञेयो भवेन्मोक्षार्थनिश्चयः॥"

इति श्रीहरिभक्तिविलासे १० विलासः॥

भगवान्, [न्] (भग: "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥" इत्युक्तलक्षणं षड्ऐश्वर्य्यमस्यास्तीति। भग + मत्वर्थयोगे मतुप् मस्य वः।) पुं. बुद्धः। इत्यमरः। १। १। १३॥ श्रीकृष्णः। यथा,—

"भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः।
वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥"

इति श्रीभागवते १० स्कन्धे २९ अध्यायः॥

पूज्ये त्रि। इति मेदिनी॥ भगवत्स्वरूपं यथा,

"मधुरव्याह वेदार्थं स्तुत्वा यत्तुनिशम्य च।
तदेतत् श्रूयतामत्र संबन्धे मदतो मम॥
द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परञ्च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥
द्वे विद्ये वेदितव्ये वै इति चाथर्व्वणी श्रुतिः।
परया त्वक्षरप्राप्तिर्ऋग्वेदादिमयापरा॥
यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्द्देश्यमरूपञ्च पाणिपादाद्यसंयुतम्॥
विभुं सर्व्वगतं नित्यं भूतयोनिमकारणम्।
व्याप्याव्याप्तं यतः सर्व्वं तं वै पश्यन्ति सूरयः॥
तद्ब्रह्म तत् परं धाम तद्ध्येयं मोक्षकाङ्क्षिणा।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः॥
वाचको भगवच्छब्दस्तस्यात्मस्वरूपिणः।
एवं निगदितार्थस्य ब्रह्मणः परमस्य तत्॥
ध्यायते येन तज्ज्ञानं परमव्ययमीश्वरम्॥
अशब्दगोचरस्यापि तस्यैव ब्रह्मणो द्विज!।
पूजायां भगवच्छब्दः क्रियते ह्यौपचारिकः।
शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्त्तते।
मैत्रेय! भगवच्छब्दः सर्व्वकारणकारणे॥
संभर्त्तेति तथा भर्त्ता भकारोऽर्थद्वयान्वितः।
तेनागमयिता स्रष्टा गकारार्थस्तथा शृणु!॥
ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गना॥
वसन्ति यत्र भूतानि भूतात्मन्यखिलात्मनि।
स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः॥
एवमेष महाशब्दो! भगवानिति सत्तम!।
परमब्रह्मभूतस्य वासुदेवस्य नान्यगः॥
तत्र पूज्यपदार्थोक्तिपरिभाषासमन्वितः।
ग्रन्थोऽयं नोपचारेण अन्यत्र स्युपचारतः॥
उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति॥
ज्ञानशक्तिबलैश्वर्य्यवीर्य्यतेजांस्यशेषतः।
भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः॥"

इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥

अपि च।

"परमात्मा च भगवान् विष्वक्सेनो जनार्द्दनः।
तच्छक्तिमान् भागवतो नाध्यपुरुषेह जायते॥
भगवच्छासनाक्षमी भगवच्छासनप्रियः।
भगवद्भक्तिमाप्याय वत्स! भागवतो भव॥
भगवान् भूतभव्येशो भूताद्यप्रभवोऽव्ययः।
भावेन तं भजस्वेशं भवभञ्जकरं हरिम्॥
भजस्व भावेन विभुं भगवन्तं भवेश्वरम्।
ततो भागवतो भूत्वा भवबन्धात् प्रमोक्ष्यसि॥"

इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानु-ग्रासनो नामाध्यायः॥ अन्यच्च।

"महतां क्षुद्रजन्तूनां सर्व्वेषां जीविनां सदा।
सदा पाता च भ्राता च भगवान् कथ्यतेविधिः॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २५ अध्यायः॥

षड्ऐश्वर्य्यान्वितः। स च परमेश्वरः। तन्नाम-विशेषस्य सेवनं यथा,—

"अथ श्रीभगवन्नाम सदा सेवेत सर्व्वतः।
तस्माहात्म्यञ्च विख्यातं सङ्क्षेपेणाह लिख्यते॥
अथ श्रीभगवन्नामविशेषस्य च सेवनम्।
ऋषिभिः कृपयादिष्टं तत्तत्कामहतात्मनाम्॥"

अथकामविशेषेण श्रीभगवन्नामविशेषसेवामाहा-त्म्यम्। तत्र पापक्षयार्थं कौर्म्मे। यथा,—

"श्रीशब्दपूर्व्वं जयशब्दपूर्व्वं
जयध्वादुत्तरतस्तथा हि।
श्रिः सप्तमी वरसंज्ञनाम
अन्तं निहन्त्यादपि विप्रवर्य्याम्॥"

महाभयनिवारणार्थं तत्रैव ।
"श्रीपूर्णो वरसिंहो हिर्ज्यादुत्तरतस्तु सः ।
चिःसप्तलो जप्रस्तु महाभयनिवारणः ॥"
कालविशेषे तु मङ्गलार्थं विष्णुधर्मोत्तरे मार्कण्डेयवज्रसंवादे ।
"पुरुषं वामदेवञ्च तथा सङ्कर्षणं विभुम् ।
प्रद्युम्नमनिरुद्धञ्च क्रमादर्च्चेत् कीर्त्तयेत् ।"
अर्च्चेत् संवत्सरादिषु पञ्चसु ।
"बलभद्रं तथा शम्भुं कीर्त्तयेदयनद्वये ।
माधवं पुष्करीकाक्षं तथा वै भोगशायिनम् ॥
पद्मनाभं हृषीकेशं तथा देवं त्रिविक्रमम् ।
ऋतमेषु राजशार्दूल ! वसन्तादिषु कीर्त्तयेत् ॥
विष्णुञ्च मधुसूदनं तथा देवं त्रिविक्रमम् ।
वामनं श्रीधरञ्चैव हृषीकेशं तथैव च ॥
दामोदरं पद्मनाभं केशवञ्च यदूत्तमम् ।
नारायणं माधवञ्च गोविन्दञ्च तथा क्रमात् ॥
चैत्रादिषु च मासेषु देवदेवमनुस्मरेत् ।
प्रद्युम्नमनिरुद्धञ्च पक्षयोः शुक्लयोः ॥
सर्व्वः शुक्लः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
आदिमादिषु वारेषु क्रमादेवमनुस्मरेत् ॥
विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतभृद् भूतकृद् भावो भूतात्मा भूतभावनः ॥
अशक्तः पुष्करीकाक्षो विश्वकर्म्मा शुचिश्रवाः ।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
अग्राह्यः शाश्वतो धाता ब्रह्मर्षिसाध्यनुस्मरेत् ॥
देवदेवस्य नामानि शुक्लादिषु यादव ! ।
ब्रह्माणं श्रीपतिं विष्णुं कपिलं श्रीधरं प्रभुम् ॥
दामोदरं हृषीकेशं गोविन्दं मधुसूदनम् ।
भूधरं गदिनं देवं शुक्लिनं पद्मिनं तथा ॥
चक्रिणञ्च महाराज ! प्रथमादिषु संस्मरेत् ॥"
प्रथमादिषु प्रतिपदादिषु ।
"सर्व्वं वा सर्व्वदा नाम देवदेवस्य यादव ! ॥
नामानि सर्व्वाणि जनार्द्दनस्य
कालश्च सर्व्वः पुरुषप्रवीरः ।
तस्मात् सदा सर्व्वगतस्य नाम
गाह्यं यथेष्टं वरदस्य राजन् ! ॥"
विविधकामसिद्धये च पुलस्त्योक्तौ ।
"कामः कामप्रदः कान्तः कामपालस्तथा हरिः ।
आनन्दो माधवश्चैव कामसंसिद्धये जपेत् ॥
रामः परशुरामश्च वृष्णिवंशो विष्णुरेव च ।
विक्रमश्चैवमादीनि जप्यान्यरिजिगीषुभिः ॥
विद्यामन्वेषता नित्यं जप्यः पुरुषोत्तमः ।
दामोदरं बन्धगतो नित्यमेव जपेन्नरः ॥
केशवं पुष्करीकाक्षमनिशं हि तथा जपेत् ।
नेत्ररोगासु सर्व्वासु हृषीकेशं भजेत च ॥
अच्युतञ्चाप्यनन्तञ्चैव जपेदौषधकर्म्मणि ।
संग्रामाभिमुखो गच्छन् संस्मरेदपराजितम् ॥
चक्रिणं गदिनञ्चैव शार्ङ्गिणं खड्गिनं तथा ।
शेषाद्यौ प्रथमन्यस्तं दिक्षु प्राच्यादिषु स्मरेत् ॥
अजितञ्चाधिपञ्चैव सर्व्वं सर्व्वेश्वरं तथा ।
संस्मरेत् पुरतो भक्त्या अवतारेषु सर्व्वदा ॥

नारायणं सर्व्वकालं शुचिप्रस्खलनादिषु ।
मङ्गलञ्चापरीक्षासु देवतायासु सर्व्वतः ॥
दस्युवैरिनिषेधेषु व्याघ्रसिंहादिसङ्कटे ।
अन्धकारे तमस्तीव्रे नरसिंहमनुस्मरेत् ॥
अग्निदाहे सलुण्ठने संस्मरेच्चलशायिनम् ।
गरुडध्वजानुस्मरणादापदो मुच्यते नरः ॥
स्नाने देवार्च्चने होमे प्रश्निपाते प्रदक्षिणे ।
कीर्त्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥
स्थापने वित्तधान्यादेरध्याने च दुष्टजे ।
कुर्व्वीत तन्मना भूत्वा अनन्ताच्युतकीर्त्तनम् ॥
नारायणं गदाशार्ङ्गधरं श्रीधरं पुरुषोत्तमम् ।
वामनं खड्गिनञ्चैव दुःस्वप्ने सदा स्मरेत् ॥
महार्णवादौ पर्व्वतकुशाग्निषु नरः स्मरेत् ।
बलभद्रं सङ्कटार्थे सर्व्वकर्म्मसु संस्मरेत् ॥
जगत्पतिमपत्यार्थे स्तुवन् भक्त्या न सीदति ।
श्रीघ्रं सर्व्वाभ्युदयिकी कर्म्मण्याशु प्रकीर्त्तयेत् ॥
अरिष्टेषु च घोरेषु विघ्नोक्तञ्च सदा जपेत् ।
मरुत्पपातामिजलबन्धनादिषु स्मरेत्सु ॥
स्वतन्त्रपरतन्त्रेषु वासुदेवं जपेद्बुधः ।
सर्व्वार्थशक्तियुक्तस्य देवदेवस्य चक्रिणः ॥
यथाभिरोचते नाम तत् सर्व्वार्थेषु कीर्त्तयेत् ।
सर्व्वार्थसिद्धिमाप्नोति नाम्नामेकार्थता यतः ॥
सर्व्वाण्येतानि नामानि परस्य ब्रह्मणो हरेः ॥"
एवं विष्णुधर्म्मोत्तरे च मार्कण्डेयवज्रसंवादे ॥
किञ्च ।
"कूर्म्मं वराहं मत्स्यं वा जलप्रतरणे स्मरेत् ।
भ्रान्तिघ्नमग्निजनने जपेन्नाम त्वखण्डितम् ॥
गरुडध्वजानुस्मरणादापदो मुच्यते नरः ।
ज्वरशूलशिरोरोगविषवीर्य्यञ्च शाम्यति ॥
बलभद्रन्तु युद्धार्थी ब्रह्मारम्भे हलायुधम् ।
उत्तारणं वाजिन्यार्थी रामममुदये नृप ! ॥
माङ्गल्यं मङ्गलं विष्णुं माङ्गल्येषु च कीर्त्तयेत् ।
उत्तिष्ठन् कीर्त्तयेद्विष्णुं प्रबुध्यन् माधवं नरः ॥
भोजने चैव गोविन्दं सर्व्वत्र मधुसूदनम् ॥"
तत्रैवान्यत्र ।
"औषधे चिन्तयेद्विष्णुं भोजने च जनार्द्दनम् ।
शयने पद्मनाभञ्च मैथुने च प्रजापतिम् ॥
संग्रामे चक्रिणं क्रुद्धं स्थानभ्रंशे त्रिविक्रमम् ।
नारायणं विषोत्सर्गे श्रीधरं प्रियसङ्गमे ॥
जलमध्ये वराहञ्च पावके जलशायिनम् ।
कानने नरसिंहञ्च पर्व्वते रघुनन्दनम् ॥
दुःस्वप्ने स्मर गोविन्दं विपत्तौ मधुसूदनम् ।
मायासु वामनं देवं सर्व्वकार्य्येषु माधवम् ॥"
किञ्च ।
"कीर्त्तयेद्वासुदेवञ्च अद्युक्तेष्वपि यादव ! ।
कार्य्यारम्भे तथा राजन् ! यथेष्टं नाम कीर्त्तयेत् ॥
सर्व्वाणि नामानि हि तस्य राजन् !
सर्व्वार्थसिद्धौ तु भवन्ति पुंसः ।
तस्मादभीष्टं खलु यद्यन्नाम
सर्व्वेषु कार्य्येषु जपेत भक्त्या ॥"
इति श्रीहरिभक्तिविलासे ११ विलासः ॥

भगवद्गीतादिलक्षणम् । यथा, महाभारते भगवद्गीतायाम् ।
"अर्जुनेतत् प्रहृष्टं मे हृदयान्नापसर्पति ।
यद्गोविन्देति चुक्रोश कृष्णे ! मां दूरवासिनम् ॥"
आदिपुराणे श्रीकृष्णार्জ্জুनसंवादे ।
"गीता तु मम नामानि गायेथास्त्वं सदा बुधौ ।
इदं ब्रवीमि ते सत्यं क्रीतोऽहं तेन चार्জ্জুन ! ॥
गीता च मम नामानि यदन्ति मम सन्निधौ ।
तेषामहं परिक्रीतो नान्यक्रीतो जनार्द्दनः ॥"
एवं श्रुत्वा च मम नामानीत्यादि । विष्णुधर्म्मे प्रह्लादेन ।
"जितं तेन जितं तेन जितं तेनेति निश्चितम् ।
त्रिलोक्ये वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥"
इति तत्रैव १२ विलासः ॥
भगवत्सान्निध्यलक्षणानि यथा । हयशीर्षे ।
"तस्मिन्नेव मुहूर्त्ते तु हर्षो वा भयमेव च ।
चक्षुर्भ्रमो विभ्रमो वा आसो वा जायते यदि ॥
रोमोद्गमः परमोहो वा स्रवितं परमं तथा ।
अश्रुनाशो मुतिर्वा स्यात् गात्राणां वाथ
वेपथुः ॥"
रोमोद्गमो मौढ्यविशेषः । परमोहो मूर्च्छा ।
"वैराग्यं नेत्रयोर्वा स्याद्दर्पः कन्दर्प एव वा ।
परमो विस्मयो वाथ दिशो वा शून्यते ध्वनिः ॥
दिव्यगन्धादिबोधो वा गन्धर्व्वनगरस्य वा ।
दर्शनं जायते काले तस्मिन् सुरगणाश्रितम् ॥
नरा नार्य्योऽथ दृश्यन्ते गायन्तोऽथ हसन्ति वा ।
नन्दितूर्य्यरवो वापि श्रूयते छन्दसां ध्वनिः ॥
दिव्यगन्धा रसा वापि एकस्यापि भवन्ति हि ।
लिङ्गैरेतैर्विजानीयात् तत्र सन्निहितं हरिम् ॥
प्रभा चैव विशेषेण ज्वलतीव च दृश्यते ।
स्फुरन्तीव च दृश्यन्ते प्रतिमा च विशेषतः ॥
स्फुरन्निव जनः कश्चित् क्षयमान इव क्वचित् ।
वीक्ष्यमाणो जनस्तत्र प्रहृष्ट इव लक्ष्यते ॥
एतैस्तु लक्षणैर्ज्ञेयस्तत्र सन्निहितो हरिः ।
विशेषादथवा पश्येच्चक्रचापोपमं क्वचित् ॥
क्वचिं वज्रप्रभां पश्येत् पद्मरागप्रभां यथा ।
सौदामिनीप्रभां पश्येत् प्रतिमायां क्वचिद्यदि ॥
एतैर्लिङ्गैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ।
बधिरा इव केचित्तु मूका इव तथापरे ।
विभ्रान्ता इव केचिच्च जड़ा इव तथापरे ॥
धावन्त इव केचित्तु पतन्त इव चापरे ।
नृत्यन्त इव चाप्यन्ये मत्ता इव तथा यदि ।
चित्रस्था इव केचित्तु विवशा इव केचन ।
भवन्ति तत्र योज्ञस्याः प्रमत्ता इव चापरे ।
लिङ्गैरेतैस्तु बोद्धव्यस्तत्र सन्निहितो हरिः ॥"
इति श्रीहरिभक्तिविलासे १८ विलासः ॥
(शिवः । यथा, महाभारते । १३ । १७।१२७।
"निवेदनः सुखाजातः सुगन्धारो महाधनुः ।
गन्धपाली च भगवान् उत्थानः सर्व्व-
कालेज्याम् ॥")
भगार्ह, त्रि, (भजति सुखादुःखादिकं सर्व्वजन्यमनेनेति भज्यते अनेनेति वा । भज + "पीयु-

क्षिप्यां कालणिति।" क्षया० ३।७६। बाहुलकाद् भवेरपीति उज्ज्वलदत्त:, इति कालण्। नड्वादिलात् कुलच।) दुष्करोडि:। यथा। भगाजं नरमस्तकम्। इति क्वचित् अटाधर:॥ भगस्य महादेवस्य अयं भूषणमितिघुतपत्ति:॥

भगाजी, [ङी] पुं, (भगाजं दुष्करपालं भूषणत्वेनास्यस्येति इनि:।) शिव:। इति त्रिकाण्डशेष:॥ (चक्षीकाजी भगाजी च। इति उज्ज्वलदत्तधृतो राजशेखरश्च।)

भगिनी, स्त्री, बन्धोदरा। तत्पर्य्यायः। स्वसा २। इत्यमर:॥२।६।५६॥ भगं यश: विद्यादिलो ग्रथदाने विद्यतेऽस्या इति इनिप्रत्ययेन भगिनी। इति तट्टीकायां भरत:॥ (भगं योनिरस्या अस्तीति। भग+इनि: ङीप्।) स्त्रीमात्रम्। यथा,—

"भगिन्या च समाक्रान्तो भगिनी प्रकृतिर्नरी॥"
इति शब्दचन्द्रिका॥

भगिनीपति:, पुं, (भगिन्या: पति:।) स्वभर्त्ता। तत्पर्य्यायः। आवुत्त: २ भाम: ३। यथा,—

"भगिनीपतिरावुत्तो भावो विद्वानथावुक:॥"
इति माधवोक्तामर:॥२।७।१२॥

"अहो भगिन्यहो भाम! मया वां वत याचना।
पुत्रवान् इवापत्यं सुहृदोर्द्विषिना: सुता:॥"
इति श्रीभागवते १० स्कन्धे ७ अध्याय:॥

भगीरथ:, पुं, (भं ज्योतिश्चक्रमलं गौर्वाङ्मयं तत्र रथ इन्द्रियाणि रथ इवास्य।) दिलीपराजपुत्र:। कपिलशापेन भस्मीभूतानामधःपतितानां पितृणामुद्धरणायानेन मर्त्यलोके गङ्गा आनीता। यथा, मात्स्ये १२ अध्याय:।

"अंशुमन्नाम विख्यात:। तस्य पुत्रो दिलीपस्तु दिलीपात्तु भगीरथ:॥
येन भागीरथी गङ्गा तप: कृत्वावतारिता।
भगीरथस्य तनयो नाभाग इति विश्रुत:॥"

भगो:, पुं, (हे भगवन्!। इति सुग्धबोधव्याकरणम्। संक्षिप्तसारश्च॥ (सम्बोधनवाचकावेमौ॥)

भगोल:, पुं, (भानां नक्षत्राणां गोल:। नक्षत्रसमूहेन विरचित: गोलाकार: पदार्थ इत्यर्थ:।) भपञ्जरम्। नक्षत्रचक्रम्। यथा। इदानीं भगोलमाह।

"याम्योत्तरक्षितिजवृत्तं सुदृढं विदध्या-
दाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्।
षष्ट्यङ्गमत्र सममण्डलवत्तृतीयं
नाड्याश्रयञ्च विधुवद्वलयं तदेव॥"

यथा खगोले क्षितिजं याम्योत्तरञ्च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिस्थं कृत्वा तदुपरि अन्यत्तृतीयं सममण्डलाकारं घटीषष्ट्या चाङ्कितं कार्य्यं तन्नाड़ीवृत्तं विधुवत् वृत्तसंज्ञम्॥ * ॥

इदानीं क्रान्तिवृत्तमाह।

"क्रान्तिवृत्तं गृहाङ्कं विधेयं भ-
मत्र च भानुश्च भार्द्धं कुभा भानुत:।
क्रान्तिपात: प्रतीपं तथा प्रस्फुटा
क्षेपपातश्च तत्स्थानकाभ्यङ्कयेत्॥

अथाभ्यन्तरतृतीयमण्डलेन वृत्तं कृत्वा तत्र मेषादीन् प्रकल्प्य द्वादशराश्योऽङ्कनीया:॥"

तत्क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते दक्षिणोत्तरमिति तथा दक्षिणार्द्धान्तरे भूभा च। तथा तत्र क्रान्तिपातो मेषादिर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाता: प्रस्फुटा विलोमं भ्रमन्ति। अत: क्रान्तिपातादीनि स्थानानि तत्राङ्कानि॥ इदानीं क्रान्तिवृत्तनिवेशमाह।

"क्रान्तिपाते च पातान्नवघटकान्तरे
नाड़िकावृत्तलग्नं विदध्यादिदम्।
पातत: प्राक् त्रिभे विद्धभागेऽदक्
दक्षिणे तेन भागेनैवंभागेऽपरे॥"

क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यच्चिह्नं कार्य्यम्। ते चिह्ने नाड़ीवृत्तेन संसक्ते कृत्वा पातचिह्नात् एवत: त्रिभेऽन्तरे नाड़ीवृत्तादागच्चतुर्विंशत्या उत्तरतो यथा भवति। अपरभागे त्रिभेऽन्तरे दक्षिणतश्च तैर्भागैर्यथा भवति तथा बध्नीयात्॥ * ॥ इदानीं विमण्डलमाह।

"नाड़िकामण्डले क्रान्तिवृत्तं यथा
क्रान्तिवृत्ते तथा क्षेपवृत्तं न्यसेत्।
क्षेपवृत्तन्तु राश्यङ्कितं तच्च च
क्षेपपातेषु चिह्नानि कृत्वोक्तधत्॥
क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च
क्षेपपाते षषड्भे च कृत्वा युतिम्।
क्षेपपातात्यत: पृथक्तच्च चिह्ने
क्षेपभागै: स्फुटै: सौम्ययाम्ये न्यसेत्॥
ग्रीष्मकर्णेन भक्ताश्चिह्नभव्या गुणा:
स्यु: परक्षेपभागा ग्रहाणां स्फुटा:।
क्षेपवृत्तानि तेषां विदध्यात् पृथक्
स्वस्ववृत्ते भ्रमन्तीन्दुपूर्व्या ग्रहा:॥"

अस्य श्लोकस्य समग्रस्य व्याख्यानम्। यथा क्रान्तिवृत्तं पृथक् कृतं एवं विमण्डलमपि राश्यङ्कं पृथक् पृथक् कृत्वा तत्र मेषादेर्यत्र स्फुटक्षेपपातं दत्त्वायं चिह्नं कार्य्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयो: सम्पातं कृत्वा तस्मात् षड्भेऽन्तरे अन्यच्च सम्पातं कृत्वा क्षेपपातात्यन्तश्चिह्नेऽन्तरे क्रान्तिवृत्तादुत्तरत: स्फुटै: क्षेपभागै: पृथक्तच्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणत: स्थिरं कृत्वा विमण्डलं निवेशनीयम्। अथ पठिता ये विक्षेपभागास्ते चिह्ना ग्रीष्मकर्णेन भक्ता: स्फुटा ज्ञेया:॥ * ॥ अथानुपात:। यदि कर्णाग्रं एतावद्भारं तर्हि चिह्नाग्रे कियदिति। यतो भगोले चिह्नमेव व्यासार्द्धम्। एवं चन्द्रादीनां घट्विमण्डलानि कार्य्याणि। स्वस्वविमण्डले ग्रहा भ्रमयन्ति॥ इदानीं क्रान्तिं विक्षेपञ्चाह।

"नाड़िका मण्डला तिर्य्यगग्रापम:
क्रान्तिवृत्तावधि: क्रान्तिवृत्ताक्षर:।
क्षेपवृत्तावधिस्तिर्य्यगेव स्फुटो
नाड़िकावृत्तखेटान्तरालोऽपम:।
क्रान्तिवृत्ते स्फुटग्रस्थानं तच्च
नाड़ीवृत्तादुपर्य्यग्रान्तरं सा क्रान्ति:॥"

अथ विमण्डले च यद्यद्यस्थानं तस्य क्रान्तिवृत्तात् यत्तिर्य्यगन्तरं च विक्षेप:। अथ विमण्डलस्थग्रस्य नाड़ीवृत्तादुपर्य्यग्रान्तरं सा स्फुटा क्रान्ति:॥ * ॥ इदानीं क्रान्तिपातमाह। विधुवत्क्रान्तिवलययो: संपात: क्रान्तिपात: स्यात्। तद्गता: सौरोक्ता अश्वा अयुतत्रयं कल्पे॥ अयनचलं यदुक्तं सङ्गालाद्यै: स एवायम्। तत्पर्य्ये तद्गता: कल्पे गोऽक्ष्णुनन्दगोचन्द्रा: १९९९९९॥ तत् सङ्गातं पातं क्षिप्त्वा खेटोऽपम: साध्य:। क्रान्तिवशात्तच्चरसुदयाच्चरदलमापमे तत: क्षेप्या:। क्रान्त्यर्थं पात: क्रान्तिपात:। पातो नामसख्यात: कयो: विधुवत्क्रान्तिवलययो:। नहि तयोर्मेषादावेव सम्पात:। किन्तु सख्यापि चलनमस्ति। ये अयनचलवभागा: प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागा:। मेषादे: पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विधुवद्वृत्तं लभ्यमित्यर्थ:। नहि क्रान्तिपातोऽस्तीति वक्तुं न शक्यते। प्रत्यक्षेण तस्योपलब्धत्वात्। उपलब्धिप्रकारमग्रे वक्ष्यति। स कथं ब्रह्मगुप्तादिभिर्विपुलैरपि नोक्त इति चेत्। तदा स्वल्पत्वात्तैर्नोपलब्ध:। इदानीं बहुत्वात् साम्प्रतैरुपलब्ध:। अतएव तस्य गतिरस्तीत्यवगतम्। यद्येवमप्युपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिध्यादिवत् कथं तैर्नोक्त:। सत्यम्। अत्र गणितस्कन्धे उपपत्तिमानेवागम: प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते तान्येव मन्दोच्चस्थानानि यान्येव विक्षेपाभावस्थानि तान्येव पातस्थानानि किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तच्च मन्दोच्चपातानां गतिरस्ति। चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा। सा च कियती तदुच्यते। यैर्भागैरुपलक्षितस्थानानि तानि गणितेनागच्छन्ति। तद्भगणसम्भवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नैवम्। यद्यन्यैरपि भगणैस्तान्येवस्थानानि आगच्छन्ति। तदा कतरस्यागतेः प्रामाण्यम्। सत्यम् नहि साम्प्रतोपलब्धानुसारिणी कापि गतिरङ्गीकर्त्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमतो ब्रह्मगुप्तादीनां समानधर्म्मिण एव उत्पत्स्यन्ते। तदुपलब्धानुसारिणीं गतिमुररीकृत्य ग्रहाणि आकरिष्यन्ति। अतएवायं गणितस्कन्धो महामतिभिर्दृष्ट: सन् अनाद्यनन्ते कालेऽपि क्षितिलयं न याति। अतोऽस्य क्रान्तिपातस्य भगणा: कल्पेऽयुतत्रयं सावत् सूर्यसिद्धान्तोक्ता:। तथा सङ्गालाद्यैर्यदयनचलनमुक्तं स एव क्रान्तिपात:। ते गोऽक्ष्णुनन्दगोचन्द्रा उत्पद्यन्ते। अत्र च ते वा ये वा भगणा भवन्तु। यदा येऽपि विपुलैरुपलभ्यन्ते तदा स एव क्रान्ति-

पात इत्यर्थः। तं विलोमं क्रान्तिपातं यष्टौ प्रक्षिप्य क्रान्तिः साध्या। इदानीं विक्षेपपातानाह। एवं क्रान्तिविमण्डलसम्पातात् क्षेपपाताः स्युः। चन्द्रादीनां चक्राः क्षेपानयने तु ते योज्याः।

"मन्दस्फुटो द्राक् प्रतिमण्डले खे
यष्टौ भमत्यत्र च तस्य पातः।
पातेन युक्ता गणितागतेन
मन्दस्फुटात् खेचरतः ध्रुवोक्तात्॥
पातेऽथवा शीघ्रफलं विलोमं
क्षेपात्मकं स्फुटाक्षेण युताच्छरोक्तः।
चन्द्रस्य कक्षावलये हि पातः
स्फुटाह्निधोर्मध्यमपातयुक्तात्॥"

तथा क्रान्तिवृत्तविमण्डलयोः सम्पातः क्षेपपातः। तं यष्टौ प्रक्षिप्य क्षेपः साध्यः। एतदुक्तं भवति क्रान्तिपातः प्रसिद्धः। यथा तं यष्टौ प्रक्षिप्य क्रान्तिः साध्यत एव क्षेपपातं यष्टौ प्रक्षिप्य क्षेपः साध्य इत्यर्थः। अथ विक्षेपपातो मन्दस्फुटे यत् प्रक्षिप्यते तत्कारणमाह। मन्दस्फुटो द्राक् प्रतिमण्डल इत्यादि। यतः शीघ्रप्रतिमण्डले मण्डलस्फुटगत्या यष्टौ भमति तत्र च वृत्ते पातः। अतो गणितागतपातं मन्दस्फुटे प्रक्षिप्य क्षेपः साध्यते। शेषं स्पष्टार्थम्॥ * ॥ इदानीं शुक्रयोर्विशेषमाह।

"ये चात्र पातभगणाः कथिता ध्रुवस्थे
खे शीघ्रकेन्द्रभगणैरधिका यतः स्युः।
खस्थाः सुखार्थमुदिताश्चलकेन्द्रयुक्तौ
पातौ तयोः पतितचक्रभयौ विधेयौ॥
चलाद्विधोश्चः किल केन्द्रविद्धे
केन्द्रे सपाते शुचरस्तु योज्यः।
अतश्चलात् पातयुताद् ध्रुवस्थोः
सुधीभिराद्यैः ध्रुवविद्धिरुक्ता॥"
"स्फुटोनशीघ्रोच्चयुतौ स्फुटौ तयोः
पातौ भगोले स्फुट एव पातः॥"

ननु शुक्रयोः शीघ्रोच्चपातयुतिं केन्द्रं कृत्वा यो विक्षेप आनीतः स शीघ्रोच्चस्थाने एव भवितुमर्हति न ध्रुवस्थाने। यतो ध्रुवोच्चमत्र वर्ण्यते। अत इदमनुपपन्नमिव प्रतिभाति। तथा ब्रह्मसिद्धान्तभाष्ये। शुक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्नतस्तस्यापि ध्रुवस्थ भवत्योपलब्धिरेव वासना। नान्यत् कारणं वक्तुं शक्यत इति चतुर्वेदे नाप्यध्यवसायोऽत्र कृतः। अत्रोच्यते। येऽत्र शुक्रयोः पातभगणाः पठितास्ते शीघ्रकेन्द्रभगणैर्युताः सन्तस्तद्भगणा भवन्ति। तथा च माधवीये सिद्धान्तचूडामणौ पठिताः। अतोऽत्यभगणभवः पातः स्वशीघ्रकेन्द्रेण युतः कार्यः। शीघ्रोच्चाद्ध्रुवे शोधिते शीघ्रकेन्द्रं लभ्यते न पाते क्षेपकेन्द्रकरणार्थं ध्रुवः क्षेप्यः। अतस्तुल्यशीघ्रक्षेपकयोः नीचे सति शीघ्रोच्चपातयोग एवावशिष्यत इत्युपपन्नम्। किञ्च। मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्डले चलकेन्द्रं तत्पाते क्षेपं युज्यते। एवं सति सति क्षेपकेन्द्रं मन्दफलेनाप्तरहितं स्यात्। तदयुक्तम्। इतरकेन्द्रस्यानुपपत्तेः। अतो मन्दफलं पाते यत्नं देयम्। यतोऽनुपातसिद्धं चलकेन्द्रं मध्योनं शीघ्रोच्चं भवति। यत्तु भगोले क्रान्तिवृत्तं तत् कक्षावृत्तं तत्र यद्विमण्डलं तत्र स्फुटग्रहः। तत्स्फुटपातयोगो हि विक्षेपकेन्द्रं अतः स्फुटपातस्थाने सम्पातं कृत्वा ततस्त्रिभेऽन्तरे स्फुटौ-क्रान्तेः परमक्षेपार्धे: प्राग्वदुत्तरे दक्षिणे च विन्यस्यम्। तथा यत्ते विमण्डले स्फुटग्रहस्थाने विक्षेपः स्फुटविक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः॥ * ॥ इदानीं ग्रहगोले विशेषमाह।

"ग्रहस्य गोले कथितापमण्डलं
प्रकल्प्य कक्षावलयं यथोदितम्।
निबध्य शीघ्रप्रतिवृत्तमस्मिन्
विमण्डलं तत् पठितैः ध्रुवार्धैः।
मध्योऽत्र पातो ध्रुवदृग्ग्रहाभ्यां
स्वशीघ्रकेन्द्रेण युतौ तु योज्यौ॥"

भगोल एव तावद्ग्रहगोलः कल्प्यः तत्र स्फुट एव पातः। अथ यदि तदन्यग्रहगोलोऽन्यो निबध्यते तदा तत्र यथोक्तविधुवदुत्तं क्रान्तिवृत्तञ्च वृत्ता कक्षामण्डलं प्रकल्प्य तत्र छिद्यकोक्तविधिना शीघ्रप्रतिमण्डलं वृत्ता तत्र प्रतिमण्डले गणितागतपातं मेषादेर्विलोमं गणयित्वा तत्र चिह्नं कार्यम्। अथ त्रिज्या व्यासार्धमेवाग्यदृत्तं राश्यङ्कं विमण्डलाग्रे कृत्वा तत्रापि मेषादेर्यत्नं पातार्थे चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः सम्पातचिह्ने प्रथमं सम्पातम्। ततो भाद्यन्तरं द्वितीयं कृत्वा पाताद्ग्रहः पृष्ठतश्च त्रिभेऽन्तरे परमविक्षेपार्धे: पठितैः प्रतिवृत्तादुत्तरे दक्षिणे च विमण्डलं स्पष्टम्। तत्र मन्दस्फुटगत्या पारमार्थिको ग्रहो भ्रमति। अतो मेषादेरनुलोममन्दस्फुटौ विमण्डले देयः। स तत्रस्थः प्रतिमण्डलात् यावतान्तरेण विक्षिप्तवान् तत्प्रदेशे विक्षेपः। यतो वृत्तसंपातस्थे यष्टौ विक्षेपाभावः त्रिभेऽन्तरे परमो विक्षेपो मध्योनुपातेन। अतो वृत्तसम्पातग्रहयोरन्तरं ज्ञेयम्। तदन्तरं पातग्रहयोगे कृते भवति। पातस्य विलोमगत्वात्। संयोगः ध्रुवार्धं केन्द्रम्। यदि त्रिज्यातुल्यया केन्द्रज्यया परमशरक्षुण्णाभीष्टज्यानया क इति फलं प्रतिमण्डलविमण्डलयोर्विक्षेपयोरन्तरं स्यात्। विमण्डलग्रहाद्भूमध्यगं सूत्रं तद्भूमध्यग्रहान्तरं स च शीघ्रकर्णः। यदि भूमध्यात् कर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे कियानिति द्वितीयत्रैराशिकम्। आद्ये त्रिज्या हरौ द्वितीये गुणः। तयोर्लब्धे केन्द्रज्यायाः परमशरगुणायाः कर्णो हरः फलं कक्षावृत्तसूत्रयोर्विक्षेपयोरन्तरं स्फुटशरः॥ * ॥ इदानीमहोरात्रवृत्तमाह। दृश्यक्रान्तिवृत्तोन्मण्डलयोर्मध्ये याक्षिकाक्षाहोरात्रवृत्ताक्षयं तच्च वृत्ता। घटीनाञ्च यद्यापि क्षितिजस्य विषुवन्मण्डलं ध्रुवौ वा समौ तथापि क्रान्तिवृत्तोन्मण्डलयोरन्तरे सर्वतो याक्षिकाक्षाहोरात्रवृत्ताक्षयं तच्च वृत्ता। घटीनाञ्च यद्या-

भङ्गं

दृश्येऽस्य विषुवन्मण्डलं ध्रुवौ वा समौ। याक्षीक्षणाद्युत्तरतो दक्षिणतो वा सर्वमण्डलक्रान्तिसुल्यान्तरे यद्वृत्तं लिखति तदहोरात्रवृत्तं तेन वृत्तेन तस्मिन् दिने दृश्यभमण्डलार्धं स्यात्। तस्य वृत्तस्य याक्षार्धं ध्रुवौ॥ * ॥ इदानीमभ्यदाह। अथ कक्ष्या मेषाद्या ध्रुवलोमं क्रान्तिपाताद्भात् एवा मेषादीनां ध्रुवराशिवृत्तानि भवीयात्। नाड़ीवृत्तोभयसन्धौ त्रीणि त्रीणि क्रमोत्क्रमाणानि। क्रान्तिपातादारभ्य त्रिंशत्त्रिंशद्भिर्भागैरन्यान् मेषादीन् प्रकल्प्य तदग्रेषूक्तवदहोरात्रवृत्तानि भवीयात्। तानि च नाड़ीवृत्तोभयसन्धौ त्रीणि भवन्ति। सान्येव क्रमोत्क्रमतः सायनांशार्कस्य द्वादशराशीनाञ्च॥ * ॥ इदानीमस्योपसंहारः। एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः। इति सिद्धान्तशिरोमणौ भग्रहयुतिवासनाभाष्यं समाप्तम्॥

भग्नं, त्रि, (भनज्+क्तः। संयोगाद् विश्लिष्टत्वात् तथात्वम्।) पराजितम्। इति हेमचन्द्रः॥ त्रुटितम्। चूर्णितम्। भाङ्गा इति भाषा। यथा, भट्टिः।

"चिरकालोषितं जीर्णं कीटनिष्कुषितं धनुः।
किं चित्रं यदि रामेण भग्नं चक्षियकान्तिके॥"

भग्नं, क्ली, (भज्यते आमर्द्यते विश्लिष्यते इति। भञ्ज+क्तः) रोगविशेषः। अथ भग्नाधिकारः। तत्र भग्नस्य भेदमाह।

"भग्नं समासाद्विविधं द्रुताग्र!
काण्डे च सन्धावपि तत्र सन्धौ।
उत्पिष्टविश्लिष्टविवर्तितानि
निर्भग्नगतं क्षिप्तमथ बहुधा॥"

भग्नमत्र भावार्थे क्तप्रत्ययेन भग्नं भङ्गः स चात्र विश्लेषोऽभिप्रेतः। तेन भग्नमत्रास्थिविश्लेषलक्षणम्। समासात् संक्षेपात्। द्रुताग्र! हे अग्निवेश्य!। यतश्चरकेऽग्निवेश्यस्य द्रुताग्नीति नामान्तरमुक्तम्। काण्डे सन्धिपर्यन्ते एकखण्डे। अस्थिसन्धौ द्वयोरस्थ्नोः सन्धानस्थाने। तत्र सन्धौ उत्पिष्टादिभेदैः षट्प्रकारं भग्नं भवति। खण्डवक्रत्वेन सन्धिभग्नस्थाने विवरणम्। उत्पिष्टेत्यादि। अधः अधोभागम्॥ * ॥ सन्धिभग्नस्य सामान्यं लिङ्गमाह।

"प्रसारणाकुञ्चनवर्जनोत्था-
वक्त्वार्तिविद्वेषणमेतदुक्तम्।
सामान्यतः सन्धिगतस्य लिङ्ग-
मुत्पिष्टसन्धेः क्षयतः समस्तात्॥
विश्लेषतो वाऽपिभवा रुजश्च
विश्लिष्टके सौ च रुजा च नित्यम्॥"

वर्तनं परिवर्तनम्॥ * ॥ उत्पिष्टस्य लिङ्गमाह। उत्पिष्टसन्धेः उत्पिष्टः द्वाभ्यामस्थिभ्यां पिष्टः सन्धिर्यस्य तस्य। तस्मात् उभयभागस्थयोः। विश्लिष्टमाह विश्लिष्ट इत्यादि। सौ उभयतः स्थौ। रुजा च नित्यं सदा रुजाधिक्या भवतीत्युत्पिष्टाख्यं भग्नम्॥ * ॥ विवर्तितनिर्भग्नक्षिप्तानां भेदागतानाह।

भग्नं

"विवर्तिते पार्श्वगतश्च तीव्रा-
स्तिर्यग्गते तीव्रतरो भवन्ति ।
क्षिप्ते ऽतिमूलं विषमश्च वक्त्रो:
क्षिप्ते त्वधो वक्त्र विवर्धनश्च ॥"

विवर्तिते सन्धावसृक्ते । अस्थिन्नयोपरिवर्तिते पार्श्वगत: सन्धिस्थितास्थिखण्डत्रयपार्श्वयो रुज: । तिर्यग्गते सन्धिगते । एकस्मिन्नस्थि सन्धिस्थानं त्यक्त्वा तिर्यग्गते क्षिप्ते वक्त्रो: ऊर्ध्वगन्त्रो: । एकस्मिन्नस्थि परस्मात्स्थ्नि उपरिगते । वक्त्रो: अतिमूलं तच्च विषमं कदाचिदधिकं कदाचिन्न्यूनम् । अध:क्षिप्ते सन्धिगते एकस्मिन्नस्थि अधोगते । वक्त्र सन्धेर्विघट: विवर्तनश्च ॥ * ॥ काण्डभग्नमाह । भग्नश्च काण्डे बहुधा प्रयाति विशेषतो नामभिरेव तुल्यम् । भग्नं काण्डे काण्डविषये बहुधा बहुभि: प्रकारै: प्रयाति । अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम् । बहुविधत्वञ्च काण्डभग्नस्य पृथक् लक्षणं वक्ष्यं किन्तु काण्डनामभिरेव तुल्यत्वम् । कर्कटकादिनामानुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम् ॥ * ॥ तान् प्रकारानाह ।

"काण्डे खत: कर्कटकाभ्वकर्णौ
विचूर्णितं पिच्छितमस्थि छल्लितम् ।
काण्डेषु भग्नं त्वनिपातितञ्च
मज्जागतं विस्फुटितञ्च वक्त्रम् ॥"

छिन्नं द्विधा द्वादशधा च काण्डे । अत: सन्धिभग्नानन्तरं काण्डे काण्डभग्ने तदाह । कर्कटक: अस्थिविशेषपूर्वको मध्ये प्रोन्नत: पार्श्वयोरवनत: कर्कटतुल्यरूपत्वात् कर्कट: । अश्वकर्ण: अश्वकर्णवद्विपुलास्थिनिर्गमादश्वकर्ण: । विचूर्णितं चूर्णितमस्थि तच्च ग्रन्थ्यर्बुदाभ्यां बोद्धव्यम् । पिच्छितमस्थि निर्यन्त्रितं बहुशोथम् । छल्लितं विश्लिष्टं सन्धिरूपम् । काण्डेषु भग्नं काण्डभग्नम् । यद्यपि कर्कटकादि सर्वमेव काण्डभग्नं तथापि इयं काण्डभग्नसंज्ञाविशिष्टा । अत्र भग्नं भङ्ग: त्रुटि: तेन सर्वथा त्रुटितं पृथग्भूतं त्वचि स्थितं यत्र काण्डं तत्काण्डभग्नम् । अतिपातितं अशेषेण छित्त्वा पातितमस्थि । मज्जागतं अस्थ्नोऽवयवोऽस्थिमध्ये प्रविश्य मज्जानं गतम् । विस्फुटितं स्फोटविदीर्णं वक्त्रं स्थानं त्यक्त्वा कुक्षीभूतम् । छिन्नं द्विधा एकं विदीर्णं सत् खण्डं अपरं विदीर्णं द्विधाभूतम् । द्वादशधा च काण्डे । काण्डे च भग्नं द्वादशधेत्यन्वय: । तच्चोक्तमेव कर्कटकादि ॥ * ॥ काण्डभग्नस्य सामान्यं लक्षणमाह ।

"अस्वाङ्गसा शोथरुजातिदृद्धि:
संपीड्यमाने भवतीह शब्द: ।
अर्शांसि यच्चं स्पन्दनतोदमूलं
सर्वास्वसास्तु न शब्दलाभ: ॥"
भग्नस्य काण्डे खलु चिह्नमेतत् ॥"

अर्शांसीति काण्डभग्नस्य विशेषणं स्पन्दनं नाड्यो स्फुरणं मूलं मूर्छनेव यथा । रुजा सामान्या पीडा । सर्वास्वसास्तु सूचनाविशेषं । कष्टसाध्यमाह ।

"अस्थ्यग्निनोऽनालवतो जन्तोर्वातालकस्य च ।
उपद्रवैर्वा जुष्टस्य भग्नं लङ्घेव सिध्यति ॥"

अनालवतो रोगप्रतीकारे यत्नरहितस्य । वातालकस्य च वातप्रकृते: । उपद्रवै: ज्वराध्मानमोहस्फुरणपुरीषवक्त्रादिभि: ॥* ॥ असाध्यमाह ।

"भिन्नं कपालं कण्डान्तु सन्धिमुक्तं तथा
च्युतम् ।
अचलं प्रतिपिष्टञ्च वर्जयेत्तच्चिकित्सक: ॥"

कपालं जानुनितम्बांसगलकतालुशङ्खशिरोऽस्थीनि कपालानि तथा च्युतं तथा क्षिप्तम् । प्रतिपिष्टं उत्पिष्टम् । पुनरसाध्यमाह ।

"असंक्षिप्तकपालञ्च ललाटे चूर्णितञ्च यत् ।
भग्नं गुदे स्तने एके ग्रस्तं मूर्द्धनि वर्जयेत् ॥"

असंक्षिप्तकपालमिति भग्नविशेषणम् । स्तने स्तनयोरन्तरे उरसि । मूर्द्धनि मूर्द्धस्थाने ॥* ॥ अपरमप्यसाध्यमाह ।

"सम्यक्संक्षितमप्यस्थि दुर्न्यासाद्दुष्टबन्धनात् ।
संक्षोभाद्वापि यद्यङ्गक्रियां नच्छेत् विकृतं भवति तदर्जयेत् ॥"

सम्यक्संक्षितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दु:स्थापनात् संभग्नमपि दुष्टबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना सञ्चलनात् यद्वा क्रियां गच्छेत् विकृतं भवति तदर्जयेत् ॥ अस्थिविशेषेण भग्नविशेषमाह ।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥"

तरुणास्थीनि बालकास्थिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति । तेनात्र वक्रतालक्षणं भग्नम् । नलकानि नलाहीनि नाड्रीवत् सरन्ध्राण्यस्थिपर्वाणि भिद्यन्ते अस्थ्यन्तरानुप्रवेशादिदीर्यन्ते । कपालानि जानुनितम्बांसगलकतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि इला: स्फुटन्ति चुटन्ति । अस्थीनि तरुणानलककपालरुचकवलयभेदात् पञ्चविधानि । तत्र रुचकानि चेति । चकारादलयान्यपि चुटन्तीति बोद्धव्यम् ।

"पार्ष्णयो: पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु ।
पादयोरपि चास्थीनि वलयानि बभाषिरे ॥"

अथ भग्नस्य चिकित्सा ।

"भग्ने लेपाय मञ्जिष्ठामधुकाभ्यामुपेषितम् ।
घृतधौतघृतोन्मिश्रं प्रालिपिष्टञ्च लेपनम् ॥"

लेपात् पिष्टिकलवणैरन्नीका फलरजोभ्यां वा । सद्योऽभिघातजनिता रागरुजा व्यथयत: प्रशाम्यन्ति ।

"सघृतक्षौद्रसंहारं लाक्षागोधूममर्जुनम् ।
सन्धिभग्नेऽस्थिसम्भग्ने पिबेत् क्षीरेण वा पुन: ॥"

घृतेन पिबेत् क्षीरेण वेत्यर्थ: । अस्थिसंहार: हड्डसिंहार इति लोके ।

"रजोगामधुजाक्षाभ्यसिताकल्कं घृतप्लुत: ।
छिन्नभिन्नद्रुताभ्यञ्च सन्धानमचिराद्व्रजेत् ॥"

भग्नघ्ना

"लाक्षास्थिसंहृत् कटुभाङ्गजाभ्या
चूर्णौजना नागबला पुरश्च ।
संभग्नसन्धास्थिरुजो निहन्या-
दङ्गानि कुर्यात् कुलिशोपमानि ॥"

अस्थिसंहृत् हड्डसिंहार । लाक्षादिगुग्गुलु: ॥
"मांसं मांसरस: क्षीरं सर्पिर्यूषा: कलायज: ।
हंसजस्यान्नपानञ्च देयं भग्नाय जानता ॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम् ।
रूक्षमन्नं श्रमञ्चापि भग्न: सेवेत न क्वचित् ॥"

इति भावप्रकाशे भग्नाधिकार: ॥

(अथास्य निदानं यथा । पतनपीडनप्रहारास्फोटनशालकटगदगुलगम्भृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्यमाणं द्विविधमेवोपलभ्यते सन्धिमुक्तं काण्डभग्नञ्च । इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये ॥

अथ भग्नचिकित्सा ।

"भग्नास्थिञ्च नरं दृष्ट्वा तस्य वक्ष्यामि भेषजम् ।
मणिबन्धे कूर्परे च जानौ भग्ने कटौ तथा ॥
पृष्ठवंशे विभग्ने च साध्यान्येतानि सत्तम ! ।
ग्रीवादेशे चैकवस्तौ रोहिण्यां कूर्परादधः ॥
स्कन्धकूर्परमध्ये च तथा च त्रिकमध्यत: ।
उरसि क्रोडके चैव विभग्नं तदसाध्यकम् ॥
विभग्नञ्च नरं दृष्ट्वा वैद्यपुत्रेण बन्धयेत् ।
भग्नयेन्नवनीतेनैरण्डपत्रेण वेष्टयेत् ॥
उष्णाम्भसा सेचयेच्च बद्धेच्च मृदु बन्धयेत् ।
धवार्जुनकदम्बानां वल्कलं काञ्जिकेन तु ॥
पिष्ट्वा क्षिप्त: प्रलेपश्च तेन सौख्यं प्रजायते ।
खेदयेत्तानि चोष्णेन आवासं कारयेत् पुन: ॥
एवं क्रिया समापन्नो ततो बन्धं विमोचयेत् ।
एकाङ्गान्तरिते नापि पूर्ववत्तत् प्रबन्धयेत् ॥
यावद्दृग्न्यिं न बध्नाति तावन्न व्यायमेन्नरम् ॥"

इति हारीते चिकित्सितस्थाने । ५६ अ: ॥

अथ पथ्यविधि: ।

"घृतान्नुसेचनं पङ्क्तिपदेहो बन्धनक्रिया ।
शालिप्रियङ्गुगोधूमा मुद्गो लघुतरौलयो: ॥
नवनीतं घृतं क्षीरं तैलं माक्षिको मधु ।
पटोलं लशुनं ग्रीष्मे पत्तूरो वालमूलकम् ॥
द्राक्षा धात्री बकवल्ली लाक्षा यद्यपि दुर्लभम् ।
तत्सर्वं भिषजा नित्यं देयं भग्नाय जानता ॥"

अथान्नपथ्यविधि: ।

"लवणं कटुकं क्षारमद्यं मैथुनमातपम् ।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥"

इत्यायुर्वेदपथ्यापथ्यमग्नस्य भग्नाधिकारे ॥)

भग्नपादर्च, क्ली, (भग्नपदं ऋचम् ।) पुष्करास्यवृत्तषट्कम् । यथा,—

"पुरस्तेक्षुतरावाढ़ा क्षत्तिकोत्तरफल्गुनी ।
पूर्वभाद्रं विशाखा च यदैते पुष्करा: स्मृता: ॥
भग्नपादर्चसंयोगात् द्विरीषा द्वादशी यदि ।
सप्तमी चार्कमन्दारे जायते जारजो भुवम् ॥"

इति ज्योतिषतत्त्वम् ॥

भग्नपृष्ठः, पुं, (भग्नं पृष्ठमस्मिन् ।) वल्गुकः । इति त्रिकाण्डशेषः ॥ तुटितमेरुदण्डः । यथा,—
"भग्नपृष्ठकटिग्रीवं खञ्जहस्तं क्षुधातुरम् ।
कर्षेन्न लिखितं पुत्रं यत्नेन परिपालयेत् ॥"
इति प्राचीनवचनम् ॥
(भग्नं पृष्ठं यस्य । तुटितमेरुदण्डे, त्रि ॥)

भग्नसन्धिः, पुं, (भग्नः सन्धिरस्माद् वा ।) शरीरस्य सन्धिस्थानभङ्गरोगविशेषः । तस्यौषधं यथा,—
"अभया त्रिफला घोषः सर्वैरेभिः समीक्षितैः ।
तुल्यो गुग्गुलुना योज्या भग्नसन्धिप्रसारकः ॥"
इति गारुडे १७५ अध्यायः ॥

भग्नसन्धिकं, क्ली, (भग्नो विश्लिष्टः दग्धः सन्धिः संज्ञानोऽत्र ।) घोलम् । इति शब्दचन्द्रिका ॥

भग्नात्मा, पुं, (भग्नः क्रमेण हीन आत्मा देहो यस्य । क्षणप्रतिपदादिक्रमेणैकैककलाच्छेदेन भग्नदेहत्वादस्य तथात्वम् ।) चन्द्रः । इति शब्दचन्द्रिका ॥

भग्नाग्रः, त्रि, (भग्ना अग्रा यस्य । हृताग्रः । दीर्घत्वाभङ्गयुक्तः । यथा,—
"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥"
इत्याह्निकतत्त्वम् ॥

भग्नी, स्त्री, (भगिनी । पृषोदरादित्वात् साधुः ।) भगिनी । इति द्विरूपकोषः ॥

भङ्कारी, स्त्री, (भमित्यव्यक्तशब्दं करोतीति । ङ्ग + अण् । गौरादित्वात् ङीष् ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्क्ता, [क्तृ] त्रि, भङ्गकर्त्ता । भञ्जधातोः कर्त्तरि तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, मनौ ।८।२८८।
"प्राकारस्य च नेतारं परिखानाञ्च पूरकम् ।
द्वाराणाञ्चैव भङ्क्तारं शिघ्रमेव प्रवासयेत् ॥"

भङ्गः, पुं, (भज्यते इति । भञ्ज + कर्म्मणि घञ् ।) तरङ्गः । इत्यमरः । १ । १० । ५ ॥ पराजयः । (भञ्ज् + भावे घञ् ।) भेदः । रोगविशेषः । इति मेदिनी । गे, १४ ॥ (रोगविशेषार्थे यथा,—
"पातघातादिभिर्हेधा भङ्गोऽस्थ्नां सन्धिसन्धितः ।
प्रसारणाकुञ्चनयोरशक्तिः सन्धिसुप्तता ॥
इतरस्मिन् भृशं शोफः सर्व्वावस्थास्वतिव्यथा ।
अशक्तिश्चेष्टितेऽप्येवं पीथमाने सशब्दता ॥
समासादिति भङ्गस्य लक्षणं बहुधा तु तत् ।
भिद्यते भङ्गभेदेन तस्य सर्व्वस्य साधनम् ॥
यथास्वादुपयोगाय तथा तदुपदेक्ष्यते ।
प्राप्यायुदारि यत्सक्थि स्थौल्यं शब्दं करोति यत् ।
यच्चाक्षिशेफः प्रविशेन्मध्यमस्थो विदारितः ।
भग्नं तथाभिघातेन किञ्चिदेवावशेषितम् ॥
उन्नम्यमानं क्षतवत् यच्च मज्जति मज्जति ।
तद्वातश्लेष्मणाग्नेयवातलास्थाग्निनामपि ॥
भिन्नं कपालं यत्कथ्यां सन्धिमुक्तं च्युतञ्च यत् ।
लक्षणं प्रतिपिष्टस्य भग्नं यत्तद्विवर्ज्जयेत् ॥
अवसृष्टकपालञ्च ललाटं चूर्णितन्तथा ।
यच्च भग्नं भवेच्छङ्खशिरः पृष्ठललान्तरे ।
सन्धिभग्नमपाङ्गे तु दुर्व्वाधादुपजायते ॥
संशोभादपि यत्रास्थ्नि दुर्व्वाधादुपजायते ।
आदितो यच्च दुर्ज्ञातमस्थिसन्धिरयापि वा ॥
तरुण्यास्थीनि शुष्यन्ते भज्यन्ते जलजानि तु ॥
कपालानि विभिद्यन्ते स्फुटन्त्यन्यानि भूयसा ।
अथावनतमुन्नम्यमुन्नतञ्चापपीडयेत् ॥
आस्फोटनिश्चिप्रमधो गतञ्चोपरि वर्त्तयेत् ।
आच्छादनोत्पीडनोन्नामचर्म्मसंस्तम्भबन्धनैः ॥
सन्धीन् शरीरजान् सर्व्वान् चलाग्र्यचलानपि ।
स्रंसते: स्थापनोपायैः सम्यक् संस्थाप्य निश्चलम् ॥
पट्टैः प्रभूतसर्पिर्भिर्वेष्टयित्वा सुखेच्छतः ।
कदम्बोदुम्बराश्वत्थसर्ज्जार्জ্জुनपलाशजैः ॥
वंशोद्भवैर्वा पृथुभिस्तनुभिः सुनिवेशितैः ।
सुश्लक्ष्णैः सुपरिस्रब्धैर्वस्त्रलैः शुष्कलैरपि ॥
कुशाक्ष्ये: समं बध्नं पट्टस्योपरि योजयेत् ।
ग्रन्थिरेषु हि बन्धेन सम्यैः स्थैर्य्यं न जायते ।
गाढ़नातिरुजादाहपाकस्रावयुतम्भवः ।
बाह्याभ्यन्तरौ धर्म्मे सम्यग्बन्धोऽत्र हेतवे ॥
साधारणे तु पक्षाहाद्भङ्गदोषवशेन वा ।
स्नेहोधादिक्रमायेत्थं ततः स्नौतेन सेचयेत् ॥
तं पक्वस्तम्भपक्वेन पयसा तु सवेदनम् ।
सुखोष्णं वावचार्य्यं स्नाक्षक्तैलं विजानता ॥
विभज्य देशं कालञ्च वातघ्नौषधसंयुतम् ।
प्रणतं सेकलेपाभ्यां विदध्याद्भृशमुष्णतया ॥
यष्टिक्षीरं स सर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्नः स्नौतलं लाक्षया युतम् ॥
सवणस्य तु भग्नस्य व्रणो मधुघृतोत्तरैः ।
कषायैः प्रतिसार्य्योऽथ स्नैग्धो भङ्गोदितः क्रमः ॥
लम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान् वैद्यो बन्धनेनोपपादयेत् ॥
तान् समान् सुस्थितान्ज्ञात्वा फलिनीरोध्र-
कट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥
धातकीरोध्रचूर्णैर्वा रोहत्यास्तु तथा व्रणाः ।
इति भङ्ग उपक्रान्तः स्थिरधातोरुक्तौ द्विमे ॥
मांसलस्यास्थिदोषस्य सुसाध्यो दारुणोऽन्यथा ।
पूर्व्वमध्यान्तवयसामेकैकस्मिंस्त्रिगुणैः क्रमात् ॥
मासैः स्थैर्य्यं भवेत् सन्धेर्यथोक्तं भजतो विधिम् ।
कटीजङ्घोरुभग्नानां कपाटशयनं हितम् ॥
यत्नवार्थं तथाकीलाः पञ्च कार्य्या निबन्धनाः ।
जङ्घोर्व्वोः पार्श्वयोर्द्वौ द्वौ तलस्यैकश्च कीलकः ॥
श्रोण्यां वा पृष्ठवंशे वा वक्ष्यत्यातुरयोक्तया ।
विमोक्षे भग्नसन्धीनां विधिमेवं समाचरेत् ॥
सन्धीञ्चिरविमुक्तांश्च स्विन्नस्विन्नान् स्पृशेन्नरान् ।
उक्तविधानैर्बृंहणा च यथास्वं स्थानमाचरेत् ॥
व्यस्तसन्धिभग्ने रूढे तु विषमोत्थणसाधिते ।
आपोथ्य भङ्गं यमयेत्ततो भग्नवदाचरेत् ॥
भग्नं जेति यथा पाकं प्रयत्नेन तथा भिषक् ।
पक्वमांसासिरास्नायुसन्धिः स्नेहं न गच्छति ॥
वातव्याधिविनिर्दिष्टान् क्षीरान् भग्नस्य
योजयेत् ॥"
इति वाभटे उत्तरस्थाने । २७ अध्यायः ॥)

कौटिल्यम् । भग्नम् । विच्छित्तिः । इति हेम-चन्द्रः ॥ (विच्छित्त्यर्थे व्यवहारो यथा,—
"भङ्ग्धातुविभागो वियोगः सन्धिपर्य्यायः ।
सन्धानविरोधः स भङ्गः क्षतोत्क्षतभावः । इति चरके शारीरस्थाने पञ्चमेऽध्याये ॥)
रोगमात्रम् । इति राजनिर्घण्टः ॥ गमनम् । जलनिर्गमः । इत्यजयपालः ॥ (नागभेदः । यथा, महाभारते । १ । ५७ । ६ ।
"उच्छिखः शरभो भङ्गो विश्वसेनो विरोचनः ॥")

भङ्गवासा, स्त्री, (भङ्गेन वासः सौरभमस्याः ।) हरिद्रा । इति शब्दरत्नावली ॥

भङ्गसाधः, त्रि, (भङ्गं वक्रभावं अनार्ज्जवत्वमित्यर्थः स्यति यवस्यति यत् या क्रिया इति यावत् भङ्गसमर्थयतीति अर्थ + अच् । कौटिल्यव-सायक्रियार्थित्वादस्य तथात्वम् ।) कुटिलः । इति शब्दरत्नावली ॥

भङ्गा, स्त्री, (मन्यते इति । मनुञ् + "हलश्च ।" ३ । ३ । १२१ । इति वार्त्तिकात् घञ् टाप् ।) वृक्षविशेषः । तत्पर्य्यायः । मातुलानी २ । इत्य-मरः ।२।६।२०॥ (अस्याः पर्य्याया गुणाश्च यथा,
"भङ्गा मङ्गा मातुलानी मादिनी विजया जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ॥
तीक्ष्णोष्णा पित्तला मोहमन्दाग्न्यक्षिरुग्निनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हे भङ्गार्य्या भङ्गा काञ्चीरेषु खनामख्याता ।
इति सुभूत्यादयः । इति भरतः ॥ अस्याः फलं कलायपरिमाणमिति सर्व्वस्वम् । इति सारसुन्दरी ॥ अस्या गुणाः । यथा,—
भङ्गा मद्ये मृगाक्ष्ये । इति सुकुटधृतवचः ॥ विवृत्तिः । तेउड़ी इति भाषा । यथा,—
"त्रिभण्डी रेचनी भङ्गा कलिङ्गा परिपाकिनी ॥"
इति शब्दचन्द्रिका ॥
औषधविशेषः । भाङ् इति सिद्धि इति च भाषा । यथा,—
"त्रैलोक्यविजया भङ्गा विजयेन्द्राग्नयं जया ॥"
इति शब्दचन्द्रिका ॥
अस्या गुणाः विजयाशब्दे द्रष्टव्याः ॥

भङ्गारः, पुं, (भङ्गेन अनिति इति । अन् + अच् ।) मत्स्यविशेषः । भाङ्गन इति भाषा । तत्-पर्य्यायः । दीर्घजङ्घः २ । इति शब्दमाला ॥

भङ्गारी, स्त्री, (भङ्गारी पृषोदरात् साधुः ।) दंशः । इति त्रिकाण्डशेषः ॥

भङ्गिः, स्त्री, (भज्यतेइति । भनुज + इन् । वङ्कादित्वात् कुत्वम् ।) विच्छेदः । (यथा, रघौ ।१३ । ६८ ।
"यानादवातरदूरमङ्गीतलेन
मार्गेण भङ्गिरचितस्फटिकेन रामः ॥")
कौटिल्यभेदः । इत्यमरभरतौ ॥ विन्यासः । इति कलिङ्गः ॥ (भङ्गं करोतीति । भनुज + क्विप् + डः ।) कल्लोलः । इत्यजयपालः ॥ भङ्गः । इत्यन्ये ॥ व्याजः । छलनिभः । इति रभसः ॥

भङ्गिमा, [न्] पुं, (भङ्ग + वार्त्तिकात् स्वार्थे इमनिच् ।) भङ्गिः । यथा,—

"अयरे मच्चलं जाद इत्तोत्तामूलहरिमा।
पावजाय! किमेत्तलं वेण्णिम्मायमहिमा॥"
इति माधवनिकाः॥

भक्ती, स्त्री, (भक्ति+ऋदिकारादिति पक्षे ङीप्।) भक्तिः। यथा,—
"जानामि मानमलघाङ्गि! तवो विभङ्गीं
भङ्गीभयं नयनयोरपि चातुरीञ्च।
आभीरनन्दनमुखाम्बुजसङ्गपंची
वंशीरवो यदि न मामवशीकरोति॥"
इत्युद्भटः॥

भक्तुरः, त्रि, (भज्यते स्वयमेवेति। भञ्ज+"भञ्जभासमिदो घुरच्।"३।२।२६१। इति कर्म्मकर्त्तरि घुरच्। किच्चात् कुत्वमिति कार्ष्णिका। स्वयं भञ्जनशीलः। यथा, भागवते।७।७।४३।
"कामान् कामयते काम्यैर्यदर्थमिह पूरुषः।
स वै देहस्तु पारक्यो भङ्गुरो याव्ययेति च॥")
कुटिलः। इति जटाधरः॥

भङ्गुरः, पुं, (भञ्ज+घुरच्। कुत्वञ्च।) नद्या वङ्कः। इति शब्दमाला। नदीर वाँक इति भाषा॥

भङ्गुरा, स्त्री, (भङ्गुर+टाप्।) अतिविषा। प्रियङ्गुः। इति राजनिर्घण्टः॥ (अतिविषाशब्दे प्रियङ्गुशब्दे चास्य विषयो द्रष्टव्यः॥)

भङ्गं, क्ली, (भङ्गाया भवनं क्षेत्रमिति। भङ्ग+"विभाषा तिलमाषोमाभङ्गाल्लुभ्यः।" ५।२।४। इति पक्षे यत्।) भङ्गाक्षेत्रम्। तत्पर्य्यायः। भाङ्गीनम् २। इत्यमरभरतौ॥ (भङ्गमर्हतीति। भङ्ग+दक्षादिलाद् यत्। भङ्गार्हे त्रि॥)

भचक्रं, क्ली, (भानां राशीनां चक्रम्। भानां खखसंस्थानविशेषैर्विरचितो गोलाकारः पदार्थः।) राशिचक्रम्। यथा,—
"अमावस्यां भचक्रेऽस्मिन् ध्रुवो नाभौ व्यवस्थितः।
आदाचक्रे विष्णुभौमौ शुक्रजीवशनैश्चराः॥
राहुः केतुरगस्त्यश्च नक्षत्राण्यथ राशयः।
यदा हिमु च अदासु मेरोर्भूगोलकोद्भवा॥
छाया भवेत्तदा रात्रिः स्याच्च तद्विरजाहिनम्।
सूर्य्येन्दोरपरागस्तु गोलकच्छायया भवेत्॥
अन्योन्ययोक्षयोरेव आपयोरेव कारणात्॥
आवसोर्णौ तु आवेति तच्चातः पूर्व्वपश्चिमौ॥
तत्र पुण्यफलाङ्गागः क्षतो राहोस्तु विष्णुना॥"
इत्याद्ये वह्निपुराणे ग्रहभेदनामाध्यायः॥*॥

अथ भचक्रभ्रमणव्यवस्थामाह।
"निरक्षदेशे क्षितिमध्यगोपरौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ।
तदाक्षितं खे भवभञ्जवत् सदा
भ्रमच्चक्रं विभक्षकोपरि॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा स्वाक्षनभश्चमण्डलम्।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः॥
योजनसंज्ञा मार्त्ते१६००गुणिता
कुवरिक्षिप्तास्ते१६०० भवन्त्यंशाः।
भूमौ कक्षायां या भागेष्वी
योजनानि च चक्रम्॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

(भागां वक्षणाञ्चां चक्रमितिविषये वक्षणचक्रम्। नक्षत्रवलहच्च॥)

भज, इक् भाषि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इक् भञ्जयति। भाषि दीप्तौ। इति दुर्गादासः॥

भज, क पाके। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक० सेट्।) क भाजयति। विभाजने इति प्राचः। विभाजनं दानम्। इति दुर्गादासः॥

भज, ञ औ भाग्यसेवयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्।) ञ विभजति विभजते धनं भाता। औ अभाक्षीत् ज्ञाञ्चं साधुः। इति दुर्गादासः॥

भजनु [तृ] त्रि, (भजति विभजतीति वा। भज+ल्युट् घञादेयः।) भागकर्त्ता। सेवाकर्त्ता। इति भजधातोः कर्त्तरि ग्रहप्रत्ययेन निष्पन्नम्॥

भजनं, क्ली, (भज+भावे ल्युट्।) भागः। सेवा। इति भजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम्।
"दाराक्षे ये भजनसङ्घायाः
पुत्राक्षे ये तद्भनकायाः।
धनमपि तद्धरिभजनार्थं
नो चेदेतत् सर्व्वं व्यर्थम्॥"
इति मोहमुद्गरः॥

भजमानः, त्रि, (भजते फलमनुबध्नातीति। भज+"ताच्छील्यवयोवचनशक्तिषु चानश्।" ३।२।१२६। इति आनश्। शानच् वा।) न्याय्यम्। न्यायागतद्रव्यादिः। इत्यमरः। २।८।२४॥ भागकर्त्ता। सेवाकर्त्ता। इति भजधातोः कर्त्तरि शानप्रत्ययेन निष्पन्नम्॥ (सात्वतनृपस्य पुत्रभेदः। यथा, भागवते।९।२४।६।
"पुरद्रोणवसुनः पुत्रस्तस्याप्यासीत् सात्वततः।
भजमानो भजिर्दिव्योऽन्धकवृष्ण्यधोऽन्धकः॥")

भञ्जकः, त्रि, (भञ्ज+ण्वुल्।) भञ्जनकर्त्ता। भनक्ति यः इत्यर्थे भनृजधातोः कर्त्तरि ण्वुलप्रत्ययेन निष्पन्नः॥

भञ्जन्, त्रि, वर्त्तमानभञ्जनाश्रयः। इति भनृजधातोः कर्त्तरि शतृप्रत्ययेन निष्पन्नम्॥

भञ्जनं, क्ली, मोटनम्। इति भनृजधातोर्भावे अनट्प्रत्ययेन निष्पन्नम्॥ (यथा, महाभारते।१२।५८।६२।
"यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्जिताः।
अवमर्दः प्रतीघातः केतनानाञ्च भञ्जनम्॥")

भञ्जनकः, पुं, (भनक्ति आमर्दयतीति। भञ्ज+ल्युः। ततः स्वार्थे संज्ञायां वा कन्।) सुश्रुतोक्तविषौषधः। तस्य निदानादि यथा,—
"यत्नं यत्नं भवेद्भक्षा दग्धभञ्जश्च जायते।
ज्वरातिसारतो व्याधिः स भञ्जनकसंज्ञितः॥"
इति माधवकरः॥

भट्टः, पुं, (भनक्तीति। भञ्ज+बाहुलकात् अदप्रत्ययः।) वैद्यकजीवृततरः। तत्पर्य्यायः। काश्विनः २। इति त्रिकाण्डशेषः॥

भट्टा, स्त्री, (भनक्ति भयादिकमिति। भञ्ज+अच्। टाप्।) अन्नपूर्णा। यथा,—
"भौतिहा भयहन्त्री च भावनाघप्रणाशिनी।
भीमाङ्गवासिनी भट्टा भित्तिसंवित्तिवर्द्धिनी॥"
इति तन्त्रयामले तन्त्रविद्यारत्नस्तवम्॥

भट, भृतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) भृतिरिह पोषणम्। कर्म्मण्यण्-मिति गोविन्दभट्टः। भटति भृत्यं स्वामी। इति दुर्गादासः॥

भट म भाषणे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट् घटादिः।) म भटयति। भाषणं कथनम्। इति दुर्गादासः॥

भटः, पुं, (भज्यते भियते इति। यद्वा भटतीति। भट+अच्।) योद्धा। इत्यमरः। २।८।६१॥ (यथा, भागवते।८।१०।६।
"उद्धैः केचिदिभैः केचिदपरे युयुधुः खरैः,
केचिन्नौरसखैर्खरैश्चेदीपिभिर्हरिभिर्भटाः॥"
श्रीधरभटः। इति हेमचन्द्रः॥ वीरः। (यथा, नैषधे।१।१३२।
"यद्दे पदे खलि भटा रणोद्भटा
न तेषु हिंसारस एव पूर्य्यते।
धिगीदृशं त्वे नृपते! कुविक्रमं
कृपाश्रये यः कृपणे प्रतन्यते॥")
पामरविशेषः। इति मेदिनी। टे, २४॥ रजनीचरः। इति शब्दरत्नावली॥ वर्णसङ्करविशेषः। यथा,
"वर्त्तकाराङ्गटो जातो नाटिक्यां वरवाहकः॥"
इति पराशरसंहितेः॥

भटा, स्त्री, (भट+टाप्।) रजवाहकी। इति रत्नमाला। राखालगुसा इति भाषा॥

भटित्रं, क्ली, (भटति भक्षयते येति। भट्+इत्र।) मूलपक्वमांसादि। इत्यमरः। २।९।४५॥ कावाव इति पारस्यभाषा॥

भट्टः, पुं, (भटतीति। भट्+बाहुलकात् तन्।) जातिविशेषः। भाट इति भाषा। तस्योत्पत्तिर्यथा,—
"वैश्यायां शूद्रवीर्य्येण पुमानेको बभूव च।
स भट्टो बादकश्च सर्व्वेषां स्तुतिपाठकः॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥
अपि च।
"क्षत्रियाद्विप्रकन्यायां भट्टो जातोऽतिवाचकः।"
इति युधिष्ठिरपरशुरामसंवादे जातिवर्णसङ्कथनम्॥ शिविरात्तिके राज्ञा तस्य वासो देयः। यथा,
"ब्राह्मणं क्षत्रियं वैद्यं सच्छूद्रं गणकं शुभम्।
भट्टं वैद्यं पुण्यकारं स्थापयेत् शिविरान्तिके॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १०१ अः॥

भट्टाचार्य्यः, पुं, (भट्टः सुतातभट्टः। आचार्य्यः सुश्रुताचार्य्यः तौ तुल्यतया तत्तातामिन्नत्वेना-

रक्तेति । भक्त् ।) तुलारूढमङ्गुलं न्यायग्राह्यम् उदयनाचार्यमतं न्यायग्राह्यम् एतदुभयग्राह्यवेत्ता । एतदुभयमतं जानाति यः इत्यर्थे ठक्छेकाविति कारकात् कर्मणि अधिता उपपदवेन विभक्तः ॥

भक्तारः, त्रि, (भटतीति । भट्+क्विप् । भट् चासौ तारश्चेति कर्मधारयः । एषोदरादित्वात् साधुः । यद्वा भटं स्वामित्वं अश्नुतीति । अश् ।) पूज्यः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ७ । ८६७ ।

"गोनर्दिजारभक्तारप्रमुखकलवादयः ।
बहवो हर्षदेवेन कारागारं प्रवेशिताः ॥")

भक्तारकः, पुं, (भक्तार । संज्ञायां कन् ।) नाट्योक्तौ राजा । इत्यमरः ।१।७।१३॥ देवः । तपोधनः । इति मेदिनी । के, ६५० ॥ पूज्ये त्रि । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।६।२४०।

"प्रविश्य ततः कोपात् पुरं शुभधरादिषु ।
भक्तारकामठेष्विह्वा भूयः पुत्रं यवज्यत ॥")

भक्तारकवारः, पुं, (भक्तारः संज्ञायां कन् । भक्तारकः सूर्य्यः तस्य वारः ।) रविवारः । यथा,—

"सखे ! त्वायुनिर्म्मितपाषाणस्तम्भ भक्तारकवारे कथमेतान् दर्शे: त्वमागामि ॥" इति द्वितीयदेशे १ परिच्छेदे स्तम्भं प्रति जम्बूकवाक्यम् ॥

भक्तिः, पुं, खनामख्यातरामकथाश्रयमहाकाव्यम् । तत्तु वलभीवास्तव्यश्रीस्वामिसुभक्तमहाब्राह्मणमहावैयाकरणेन कृतम् । इति जयमङ्गलकृता तट्टीका ॥ इतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम् ॥

भक्तिनी, स्त्री, (भक्तं स्वामित्वमस्या अस्तीति । भक्त+इनिः+ङीप् ।) नाट्योक्तौ अन्तःपुराधिका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ ब्राह्मणभार्य्या । इति मेदिनी । ने, ३१ ॥

भक्त दक् शिवे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । इदित् ।) शिवं कल्याणक्रिया वेदेष्वेव । प्रतारणे प्रसिद्धोऽयम् । दक् भक्षयति प्रतारको सुग्धं धनदानाङ्गीकारेण । इति दुर्गादासः ॥

भक्त ट ड वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) परिभाषण इति गोविन्दभट्टः । परिहास इति चतुर्भुजः । ट भक्तते ड भक्तते विदुर्गौ लोकः । इति दुर्गादासः ॥

भट्टः, पुं, (भक्तीति । भक्त ट ड परिहासे परिभाषणे वा+अच् ।) वर्णसङ्करजातिविशेषः । स तु क्षेटात् तीवरकन्यायां जातः । यथा,—

"क्षेटक्षीवरकन्यायां जनयामास वत्सरान् ।
भाजं भटं मातरञ्च भट्टं कोजञ्च कन्दरम् ॥"

इति ब्रह्मवैवर्ते ब्रह्मखण्डे १० अध्यायः ॥

भक्तिकः, पुं, (भक्तीति । भक्ति+"वलिकल्यनिमहिभक्तिभक्तीति ।" उणा०-१ । ५५ । इति इलच् ।) सेवकः । शूरः । इत्युणादिकोषः ॥

भक्त क्ष शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-दिक०-सेट् ।) क्ष अवीभक्तत् अवभाक्षीत् । ष पेक्ष यत्नवाचकम् । श्रीजयदेवकृतहरिसेवं भक्तति परमरमणीयम् । इति दुर्गादासः ॥

भक्तितं, त्रि, (भक्त+क्तः ।) शब्दितम् । कथितम् । यथा,—

"श्रीजयदेवभक्तितमिदमद्भुतकेशवकेलिरहस्यम् ।"

इति गीतगोविन्दः ॥

भक्तिः, स्त्री, (भक्यते इति । भक्त+क्तिन् ।) वाक्यम् । इति भूरिप्रयोगः चिकाण्डशेषश्च ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५४ ।

"नियन्त्रिता यद्भक्तितिक्षदृग्भ्रोरीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नेयत्तावान्नितः पुनः ॥")

भक्टाकी, स्त्री, (भक्यते भक्ष्यते वा । भट् भृतौ भक्षणे वा+"पिनाकादयश्च ।" उणा० । ४ । १५ । इति आक । निपात्यते च । गौरादित्वात् ङीष् ।) वार्त्ताकी । इत्यमरः । २ । ४ । १२४ ॥ डहली । इति रत्नमाला ॥ (टक्काकम् । तत्पर्य्यायो यथा,—

"टक्काकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टकापि च ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भक्टुकः, पुं, (भक्टतीति । भक्ट-उकन् ।) द्रव्योनाकहृक्षः । इति रत्नमाला ॥ क्वचित् भक्कुकोऽपि पाठः ॥

भक्तः, पुं, (भक्तते इति । भक्ट भर्त्सने+अच् ।) अश्लीलभाषी । भाँड़ इति भाषा । इति संक्षिप्तसारोणादिवृत्तिः ॥ तत्पर्य्यायः । चाटुपटुः २ । इति भूरिप्रयोगः ॥

भक्तकः, पुं, (भक्त+संज्ञायां कन् ।) खञ्जनपक्षी । इति जटाधरः ॥

भक्तनं, क्ली, (भक्ट+भावादौ ल्युट् ।) खलीकारः । कदर्थनम् । युद्धम् । इति मेदिनी । ने, १०० ॥

भक्तहासिनी, स्त्री, (भक्तेन खलीकारेण हसति या । हसु+णिनिः । ङीप् ।) शशिका । इति शब्दरत्नावली ॥

भक्तिः, स्त्री, (भक्ट+इन् ।) वीचिः । इति हारावली ॥

भक्तिका, स्त्री, भक्तिका । इति शब्दरत्नावली ॥

भक्तिरः, पुं, (भक्तिल+रलयोरैक्यम् ।) शिरीषवृक्षः । यथा । भक्तिलो भक्तिरो नेमीति भरतधृतवाचस्पतिः ॥

भक्तिलः, पुं, (भक्तते परिहसतीवेति भाषते इवेति वा । भक्ट+"वलिकल्यनिमहिभक्टि भक्तीति ।" उणा० १ । ५५ । इति इलच् ।) शिरीषवृक्षः । इत्यमरः । २ । ४ । ६३ ॥ (तत्पर्य्यायो यथा,—

"शिरीषो भक्तिलो भक्तो भक्तीरश्च कपीतनः ।
शुकपुष्पः शुकतरुश्छेदपुष्पः शुकप्रियः ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भक्तिलः, त्रि, (भक्ट+क्विप् ।) शुभः । दूतः । इत्युणादिकोषः ॥ स्त्रियां । इति संक्षिप्तसारोणादिवृत्तिः ॥

भक्ती, स्त्री, (भक्तते इति । भक्ट-इन् ।) शक्तिकारादिति पक्षे ङीष् ।) भक्तिका । इत्यमरः । २ । ४ । ६१ ॥ (पर्य्यायोऽस्या यथा,—

"भक्तिका विकसा चिल्ली चमसा काजनेक्षिका ।
भक्तकपर्णी भक्तीरी भक्ती शोभाञ्जनोऽपि ॥
दृक्षायण्यरुणा काला दक्षाक्षी दक्षपक्षिका ।
भक्तीनकी शक्तीरी च मञ्जूषा वक्षरक्षिणी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—

"शिरीषो भक्तिलो भक्ती भक्तीरश्च कपीतनः ।
शुकपुष्पः शुकतरुश्छेदपुष्पः शुकप्रियः ॥"

श्वेतशिरीषस्य । तत्पर्य्यायो यथा,—

"श्वेतशिरीषस्तु भक्ती स्यात् शिरीषः शिरीषोऽपि च ।
सर्व्वानुभूतिः सरसा सिंहीझा रेवतीति च ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भक्तीनकी, स्त्री, (भक्ती सती तनोतीति । तन+अच् । गौरादित्वात् ङीष् ।) भक्तिका । इति भावप्रकाशः ॥

भक्तीरः, पुं, (भक्ति+बाहुलकात् ईरन् ।) समक्षिशलुपः । तक्षुलीयशाकः । (यथा,—

"तक्षुशीयो मेघनादः काक्षेरुक्षक्षुरेरकः ।
भक्तीरक्षक्षुली बीजो विषघ्नश्चाल्पमारिषः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (वटवृक्षः । यथा, रामायणे । ३ । ७५ । २४ ।

"मालतीकुन्दगुल्मेषु भक्तीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥"

"भक्तीरो वटः ।" इति तट्टीकायां रामानुजः ।)

भक्तीरलतिका, स्त्री, (भक्तीर इव लतति इति । लतिः सौत्रो धातुः+अच् । स्वार्थे कन् । टाप् अत इत्वम् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

भक्तीरी, स्त्री, (भक्तीर । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इत्यमरः ॥

भक्तीलः, पुं, (भक्तीर । रलयोरैक्यम् ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥

भक्तुकः, पुं, (भक्ट+उकन् ।) मतुरुविशेषः । भाकुर इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । दृष्यत्वम् । शुक्रकरत्वम् । गुरुत्वम् । विदग्धित्वम् । रक्तपित्तहरत्वञ्च । इति भावप्रकाशः ॥ शाकभेदश्च । इति रत्नमाला ॥

भद्र दक् सुखे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) दक् भक्षयति सुखं कल्याणक्रिया । इति दुर्गादासः ॥

भद्र ट ड वर्षे । प्रीतौ । सुखे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्-इदित् ।) ट भक्षते । ड भक्षते पक्षितः सदा । इति दुर्गादासः ॥

भद्रन्तः, पुं, (भक्षते इति । भदि कल्याणे+"भक्षेर्नंजोपश्च ।" उणा० १ । १३० । इति अन्त् । नलोपश्च ।) बौद्धलोकविशेषः । इति हेमचन्द्रः ॥ नाथादेर्नीचतः । सुतेजः । पूर्विके, त्रि । इत्युणा-

शिवोक्तः। (अस्य प्रश्नस्य। दक्षयज्ञादौ। २। १६०। दक्षयज्ञाख्यो ऽध्यायः। यथा, ब्रह्मवैवर्ते। ४८। १७८।
"तथाभिश्च यथाशक्ति तं अदत्तमभिगम्य च।
यदिच्छेत्कार्यारो भक्त्या श्रीमि वर्णाग्र्यसेवनः॥")
भद्राकः, पुं, क्ली, (भद्रमिति। भद्रि+"मिना-कादयश्च।" उणा०। ३। १५। इति आकः। वलीवत्वं च।) मङ्गलम्। दक्षयज्ञादिकोषः॥
भद्रं, क्ली, (भद्रमिति। भद्रि कल्याणे+"अर्जेनाद्यत्वचविप्रकृष्टजघन्यसुरभद्रेभ्योमिति।" उणा०। २। २८। इति रन्। निपात्यते च।) मङ्गलम्। (यथा, ऋग्वेदे। २। २६। २।
"यत्रश्च वीर! प्रविधि मनायतो भद्रं मनः
कृणुष्व वृत्रतूर्ये॥"
यथा च कामन्दकीयनीतिसारे। १३। १२।
"किरीटमभिषिक्तेषु नद्रेषु आत्मवारिषु।
आत्मना विहितं पापं पुरुषो भद्रमश्नुते॥")
सुखम्। कल्याणम्। इति मेदिनी। रे, ७१॥
भद्रं, क्ली, क्ली, (भद्रि+रन् निपात्यते च।) वरवर्णिनीयः। इति मेदिनी। रे, ७२॥
तत्तु विद्धिभद्रालेन प्रसिद्धमनुभद्रम्। इति ज्योतिषम्॥
भद्रः, पुं, (भद्रमिति भद्रि+रन् निपातितश्च।) शिवः। क्षुद्रकोटः। वृषभः। कदम्बकः। करि-जातिविशेषः। इति मेदिनी। रे, ७०॥ नव-मुद्राधरणान्तर्गतजिनभेदः। रामशरः। सुमेरुः। इति हेमचन्द्रः॥ क्षुद्रो। इति राजनिर्घण्टः॥ (चन्दनम्। तत्पर्य्यायो यथा,—
"श्रीखण्डं चन्दनं गन्धो भद्रः श्रीखण्डपर्णिकः।
मलयारो मलयजस्तथा चन्द्रतुलिश्च सः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वाभ्रभौलिकानां पद्धतिविशेषः। यथा,—
विष्णुर्नागः स्खलपिलमृत्स्नो रुद्रो गुप्तः पाली भद्रः।
इति कुलाचार्य्यकारिका॥ (वसुदेवस्य पुत्र-भेदः। यथा, भागवते। ६। १४। ४०।
"सुभद्रो भद्रबाहुश्च दुर्म्मदो भद्र एव च।
पौरवाक्षनया ह्येते भूताया द्वादशाभवन्॥"
वरोवरविशेषः। यथा, मत्स्यपुराणे।२१२।४६।
"अवन्तोद्भवं मानवश्च सितोदं भद्रवंशिनम्।
तेषामुपरि चत्वारि वरीयि च वनानि च॥"
तृतीयमन्वन्तरमन्वादेवगणभेदे अनुचर-वान्तोऽयम्। यथा, भागवते। ८। १। २४।
"यज्ञिश्चतयया: यज्ञ ऋषय: प्रमदादय:।
यज्ञा वैदशुता भद्रा देवा इन्द्रस्तु सत्यजित्॥"
वाराहकल्पमन्वन्तरे विष्णोर्देक्षियज्ञभंजात तुषित-नामकदेवगणभेदः। यथा, भागवते।४।१।६-७।
"सा कामयाना भगवानुवाह यज्ञं पतिं:।
सुदाया लोकमायज्ञोऽजनयद्वादशात्मजान्॥
तोष: प्रतोष: सन्तोषो भद्र: शान्तिरिडस्पति:॥
इध: कविर्विभु: स्वह्न: सुदेवो रोचनो द्विषट्॥"
वर्णान्तरविशेषः। यथा, ब्रह्मवैवर्तपुराणे। शुभ-शोधे। ७० अध्याये।
"अत्रश्च क्षिप्रिरीतश्च यज्ञो वेदूर्यपर्वत:।
ऋषिज: पिङ्गलो भद्र: शुरश्च मद्राचल:॥"
एकादशद्वापरयोगो महिषस्य अभिमन्युनावतार विशेष:। यथा, ब्रह्मखण्डे। २७ अध्याये।
"एकादशद्वापरे तु आसन्तु विदथो यदा।
तदाग्रजं भविष्यामि गङ्गाद्वारे युगान्तिकं॥
भद्रो नाम महातेजास्त्वापि मम पुत्रका:।
भविष्यन्ति महात्मानो सुतप्ता वेदपारगा:॥")
भद्र:, त्रि, (भद्रमिति। भद्रि कल्याणे रन्। निपात्यते च।) श्रेष्ठ:। साधु:। इति मेदिनी। रे, ७२॥ (यथा, पञ्चतन्त्रे। १। २६।
"भद्र! कण्टक! अयं तावदस्तम्भो पिङ्गलक उदकमवहणार्थं वसुनाकच्छमवतीर्य स्थित:॥")
भद्रकं, क्ली, (भद्र+संज्ञायां स्वार्थे वा कन्।) भद्रमुस्तकम्। इति रत्नमाला॥ (देवदारु-शब्दस्य विषयोऽभिहित:॥) मनोज्ञे, त्रि। इति विकाण्डशेष:॥
भद्रकः, पुं, (भद्र+संज्ञायां कन्।) देवदारु:। इति शब्दरत्नावली॥
भद्रकाष्ठः, पुं, (भद्रः काष्ठो यस्य।) गोक्षुरः। इति राजनिर्घण्टः॥
भद्रकाली, स्त्री, (भद्रा मङ्गलमयी चासौ काली चेति कर्म्मधारयः। यद्वा, भद्रं कल्याणं कालयतीति। भद्र+कल गतौ+णिच्+ण्वुल्।" ४। १। १। इति ङीप्।) गन्धाली। कात्यायनी। इति मेदिनी। ले, १५८। तस्या उत्पत्तिर्यथा,—
श्रीऔर्व्व उवाच।
"शृणु त्वं नृपशार्दूल! भद्रकाली यथा पुरा।
प्रादुर्भूता महाभागा महिषेण सदैव तु॥
महिषासुर एवासौ विद्वांसं निर्जिग्रि पर्व्वते।
स्वप्नं प्रदर्शयौ वीरो दारुणं घोरदर्शनम्॥
महामायां भद्रकाली छित्त्वा खड्गेन कार्मुकम्।
पपौ तस्य च रक्तानि व्याहितास्यातिभीषणा॥
ततः प्रातर्भययुतः स देवो महिषासुरः।
तामेव पूजयामास सुचिरं भावुगल्लदा॥
आराधिता तदा देवी महिषेणासुरेण वै।
प्रादुर्भूता भद्रकाली सुखे: षोड़शभिर्युता॥
ततः प्रणम्य महिषो महामायां जगन्मयीम्।
उवाचेदं वचो नम्रमूर्त्तिर्भक्तियुतोऽसुर:॥
महिष उवाच।
देवि! खड्गेन संछिद्य शोभितानि शिरो मम।
मया शुक्लानि दत्तानि मया स्वप्ने सुनिश्चितम्॥
अवश्यं तत्त्वया कार्य्यं मया ज्ञातं प्रमाणत:।
एतद्रुधिरपानं मे तत्त्वैकं देहि मे वरम्॥
वधस्तवाहं वाञ्छामि संशय: परमेश्वरि!।
ममापि तत्र नो दु:खं नियति: केन लङ्घते॥
किन्तु त्वयैव सहित: शम्भुराराधित: पुरा।
मम पिता महर्षेण जात: पश्चादहं तत:॥
मयाप्याराधित: शम्भु: प्राप्ताचेदाक्षया वरा:।
मन्वन्तरत्रयं यावदसुरं राज्यमुत्तमम्।
अकण्टकं मया भुक्तमनुतापो न विद्यते॥
वाभ्रभौलिव सुविधा सुतोऽहं शिवकारणात्।
भौमन्तिनी विनाशं ते करिष्यति न संशय:॥
पुरा सुनिं तपस्यन्तं दौम्यं ब्राह्मं घोरतमम्।
सुनि: काव्यायनाख्यश्च शिष्यं शिष्यवत्सिके॥
दिव्यस्त्रीरूपमतुलं ज्ञात्वा कौतुकात्तदा।
मया संमोहितो विप्रोऽत्यजन्मूढ़स्तदा तप:॥
न दूरात् संस्थितेनार्द्धं सुनिना काव्यसूनुना।
ज्ञाता माया तदा शुभ्र: शिष्यार्थे क्रोधदीप्तिमा॥
यस्मात्त्वया मे शिष्योऽयं मोहितस्तपसश्च्युत:।
ततस्त्वया स्त्रीरूपेण ततस्त्वां स्त्री भविष्यति॥
इति मां शप्तवान् पूर्व्वं सुनि: काव्यायन: पुरा।
तस्य शापस्य कालोऽयमागतश्च वसुधरिते!॥
देवेन्द्रत्वं मया प्राप्तं सुखं त्रिभुवनं क्षमम्।
किञ्चित्र शोच्यं तत्रास्ति वाभ्रभौलिव हि यज्ञया॥
तस्मात्त्वां वै प्रपन्नोऽहं प्रार्थ्य शोचं हि यज्ञया।
तद्देहि देवि दुर्गे! त्वं भूयस्तुभ्यं नमो नम:॥
श्रीदेव्युवाच।
"प्रार्थनीयो वरो यस्ते तं वृणु त्वं महासुर!।
दास्यामि ते वरं प्रार्थ्यं संशयो नात्र विद्यते॥"
महिष उवाच।
"यज्ञभागमहं भोक्तुमिच्छामि त्वत्प्रसादत:।
यथा यज्ञेषु सर्व्वेषु पूज्योऽहं स्यां तथा कुरु॥
त्वत्पादसेवां न त्यक्ष्ये यावत् सूर्य्य: प्रवर्त्तते।
एवं वरद्वयं देहि यदि देयो वरो मम॥"
श्रीदेव्युवाच।
"यज्ञभागा: सुरेभ्यश्च कल्पिता वै पृथक् पृथक्।
भागो न विद्यते चान्यो यद्दास्यामि तवासुरा॥
किन्तु त्वयि मया युद्धे निहते महिषासुर!।
नैव लक्ष्यसि मत्पादं ततस्त्वां संत्यजाम्यहं॥
मम प्रवर्त्तते पूजा यत्र यत्र च तत्र ते।
पूज्यश्चिरञ्च तत्रैव कार्योऽयं तव दानव!॥
इति श्रुत्वा वचस्तस्या: प्रणम्य महिषासुर:।
वरं प्राप्येह मुदित: प्रसन्नवदनस्तदा॥
उवाचेदं! भद्रकालि! दुर्गे देवि! नमोऽस्तु ते।
प्रभूता मूर्त्तयो देवि! भवत्या: सकलाम्बिका:॥
काभिस्ते मूर्त्तिभि: पूज्यो यज्ञोऽहं परमेश्वरि!॥
तत् समाचक्ष्व यदि मे भवत्येह कृपा शुभा।"
श्रीदेव्युवाच।
"यानि नामानि लोकानि त्वयेह महिषासुर!।
तासु मूर्त्तिषु संभूत: पूज्यो लोके भविष्यसि॥
उग्रचण्डेति या मूर्त्तिर्भद्रकाली त्वहं पुन:।
यया मूर्त्या त्वां हनिष्ये सा दुर्गेति प्रकीर्त्तिता॥
एतासु मूर्त्तिषु सदा पादयजो सुखी सदा।
पूज्यो भविष्यसि त्वं वै देवानामपि रक्षसाम्॥
आदिष्टश्चा उग्रचण्डाद्यमूर्त्तीनां त्वं निहत: पुरा।
द्वितीयस्त्वरौ तु भवान् भद्रकाल्या मया हत:॥
दुर्गारूपेणाधुना त्वां हनिष्यामि महासुरम्।
किन्तु पूर्व्वं न गृहीतस्त्वं मया पादोच्छये॥
अधुना प्रार्थितवरो गृहीत: पूर्व्वकायधो:।
गृहीतश्च मयात्मं यज्ञभागोपभुक्तये॥"
इति कालिकापुराणे ५८ अध्याय:॥
गङ्गाया: पश्चिमे तीरे ग्रामविशेषश्च॥

भद्रदात्री, स्त्री, (भद्राय दात्रते इति। दात्र+अच्। गौरादित्वात् ङीष्।) भद्रमुस्ता। इति राजनिर्घण्टः॥

भद्रकुम्भः, पुं, (भद्रस्य भद्राय वा कुम्भोऽथवा भद्रः कुम्भः।) पूर्णकुम्भः। इत्यमरः। २। ८। ९२॥

भद्रगन्धिका, स्त्री, (भद्रो गन्धोऽस्यास्तीति। ठन्। टाप्।) सुरसकम्। इति रत्नमाला॥

भद्रङ्करः, त्रि, (भद्रं करोतीति। कृ+"बाहुलकात् खच्। सुम् च।) मङ्गलकारकः। तत्पर्य्यायः। क्षेमङ्करः २ क्षेमकारः ३ भद्रकरः ४ शुभङ्करः ५ अरिष्टतातिः ६ शिवतातिः ७ शुभ्रकरः ८। इति भूरिप्रयोगः॥

भद्रचूड़ः, पुं, (भद्रा चूड़ास्य।) लङ्घाख्यायी। इति शब्दचन्द्रिका। लङ्घासिज इति भाषा॥

भद्रजः, पुं, (भद्राय जायते इति। जन+डः।) इन्द्रयवः। इति राजनिर्घण्टः॥ (गुणादयोऽस्मिन्नयवशब्दे ज्ञातव्याः॥)

भद्रतरङ्गी, स्त्री, (भद्रा तरङ्गीव।) कुलकट्यः। इति राजनिर्घण्टः॥ (तथास्या अन्यतरः पर्य्यायः।

"कुलको भद्रतरङ्गी टङ्कतुण्ड्योऽतिकेसरः।
मङ्गा चङ्गा कण्टकाढ्या गौलालिकुल-
सङ्कुला॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भद्रतुरङ्गं, क्ली, (भद्रा तुरगा अत्र।) अम्बूद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। यथा,—

"माल्यवज्जलधिमध्यवर्त्ति यत्तत्तु भद्रतुरगं
जगुर्बुधाः।"

इति सिद्धान्तशिरोमणौ गोलाध्यायः॥

भद्रदन्तिका, स्त्री, (भद्रा दन्तिका।) इन्द्रीवृक्षभेदः। भद्रदन्ती इति ख्याता। तत्पर्य्यायः। कैशुद्रदा २ भिषग्भद्रा ३ जयावहा ४ आवर्त्तकी ५ जयराज्ञी ६ जयाह्वा ७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रेचनत्वम्। कृमिमूलकुष्ठामदोषवातोन्मादमेदनाशित्वञ्च। इति राजनिर्घण्टः॥

भद्रदारु, क्ली, पुं, (भद्रं दारु।) देवदारु। इत्यमरभरतौ॥ वरणकाष्ठम्। इति रत्नमाला॥

भद्रदार्व्वादिकः, पुं, (भद्रदारु आदौ यस्य कप्।) औषधगणविशेषः। यथा। भद्रदारुकुष्ठहरिद्रावरङ्गमेषशृङ्गीवलातिबलार्ष्टगलकच्छुरासहकोकुवेराक्षीवीरतरुषट्चरान्मिमन्यवतृणाद्यैरक्षाञ्जमेदकाजकार्कपेशुतावरीपुनर्नवावासुकवसिरकाञ्जनकभार्गीकाण्डासीहृच्छिवालोमशूरपरूषकेरण्यवकोलकुलत्थप्रभृतीनि। इति सुश्रुतसंस्थानस्य संशोधनसंग्रहनीयाध्यायः॥ * ॥

अपिच।

"देवदारु हरिद्रे द्वे वरङ्गः कुष्ठमेव च।
मङ्गाधिकं नागबला श्यामला गरलोऽपरः॥
पाटला चाम्लगुन्द्रा च मुष्की पाषाणभेदिका।
घृतावरी चार्कपत्रं शुकूची गजिकादिका॥
पुनर्नवा च वाल्लूकस्तम्बावर्त्तकाजलम्।
गोशृङ्गं मूरणञ्चैव कुमुण्डं वर्षाभिकम्॥
जलपलाशिशुद्रुवकेभवराम्बादिको गणः॥"

इति शब्दचन्द्रिका॥ * ॥

इतरग्रन्थे चतुर्दशगणादि न प्राप्यते॥

भद्रनामा, [मन्] पुं, (भद्रं नाम यस्य।) काष्ठकुष्ठपक्षी। इति त्रिकाण्डशेषः। काठठोक्रा इति भाषा॥

भद्रनामिका, स्त्री, (भद्रं नामास्याः। कप्। टाप्। अत इत्वम्।) वायसीवृक्षः। इति रत्नमाला। बहला इति भाषा॥

भद्रनिधिः, स्त्री, (भद्रा निधयोऽत्र।) महादानविशेषः। यथा,—

इन्द्र उवाच।

"विधानं ब्रूहि मे ब्रह्मन्! दानस्यास्य महानिधेः।
यथा देव! विशेषेण विष्णोरानन्दकारकम्॥"

ब्रह्मोवाच।

"पुण्यां तिथिं प्राप्य तु पौर्णमास्यां
तथोपरागे ग्रहणिस्करयोर्वा।
चतुर्युगादिव्यतिपातयोर्वा
प्रबोधने प्रस्वपनेऽथ विष्णोः॥
कुर्य्यादथोड्डमरमेव कुम्भं
हिरण्मयेनेन यथाबलश्रद्धया।
तथा निधानञ्च सुराजतं स्याद्-
हिरण्यभारेण तु पूरयेत्तत्॥
तदर्द्धतोऽर्द्धेन तदर्द्धतो वा
स्वशक्तितः स्वर्णपलैः शतेन।
तदर्द्धमध्येन तु वित्तशाठ्या
पलत्रयादूनमथो न कुर्य्यात्॥
तन्नाजभाण्डे कनकं निधेयं
सवज्रनीलोत्तमपद्मरागम्।
सुसूक्तवैदूर्य्यसविद्रुमञ्च
तदाजतं पात्रमधोसुखं स्यात्॥
एवन्तु तं भद्रनिधिं सुविद्वान्
ज्ञात्वासने प्रावरणोपयुक्ते।
कृष्णोत्तरे दर्भमयाजिनाढ्ये
सपादुकोपानयुगच्छत्रयुक्ते।
तं चौमवस्त्रोत्तमयुग्मयुक्तं
सम्पूजयेच्चन्दनवारिपुष्पैः।
आदौ तु पश्चान्नतमाप्य विप्रं
संवाप्य संसारतरं समर्थ्य।
तथेश्वरं पावकमेव कृत्वा
आमन्त्रयेद्भद्रनिधिं तनस्तम्॥
श्रीखण्डकर्पूरसकुङ्कुमेन
पद्माक्षरं नाम श्रियः प्रलिख्य।
नमस्तथोद्धारयुतञ्च पात्रे
तद्राजतेऽप्येवमथार्च्चयेत्ताम्॥
त्वया समस्तामरसिद्धयक्ष-
विद्याधरेन्द्रोरगकिन्नरेन्द्रैः।
मन्त्रैर्मदिद्याक्षरदानवेन्द्रै-
र्युतं कृतं विश्वमिदं नमस्ते॥
समस्तसंसारकरी त्वमेव
विभोः सदाबन्धमयी च माया।
वसन्तकल्याब्जनिभः उमापि-
र्हरिप्रिये! भद्रनिधे! नमस्ते॥
एवं संपूज्य विधिना ततो विप्रञ्चयाचेत्।
किरीटाङ्गदनिष्कास्यकुण्डलाङ्गुलिभूषणैः॥
अलंकृत्य हरिं यद्वत् पीताम्बरधरं ततः।
पूजयेदच्युतं ध्यात्वा मन्त्रेणानेन भक्तिमान्॥
भूदेवोऽसि विभो! नित्यं नित्यानन्दमयो
हरे!॥
हर मे दुष्करं ब्रह्म! जगदीश्वर! नमोऽस्तु ते॥
भूदेव! भगवान् भर्ग भवभङ्गकरेश्वर!॥
भवभूतिकरो नित्यो! प्रभविष्णो नमोऽस्तु ते॥
एवं पूज्य हरिं ध्यात्वा तं हिरण्यं ब्रह्मरूपिणम्।
ततो भद्रनिधिं दद्यान्मन्त्रेणानेन वासव!॥
खगोलोद्धारणीजाद्यौ विप्रनाम तथान्तरः।
यवदर्भतिलैः सार्द्धसुदकं संपरिक्षिपेत्॥
पितृसन्तारणार्थाय नित्यानन्दविवृद्धये।
सर्व्वापौरुषविघाताय विष्णोर्दानं मया कृतम्॥
तदनेन सदत्तेन धातुत्रययुतेन च।
सद्यौमाम्बरयुक्तेन साद्यूर्ध्वपादुकेन च॥
सासनेन सच्छत्रेण चामरोपानहेन च।
सदानन्दनिधानेन प्रीयतां विष्णुरीश्वरः॥
एवमुच्चार्य्य तं दद्याद्विप्राय हरिरूपिणे।
गोप्येण विधिना दद्याद्वेमसंख्यां न कीर्त्तयेत्॥
प्रकीर्त्तिते कोटियुगायुतं फलं
प्रगोपिते कल्पशतेन संचयः।
इतीयमज्ञो न तु कीर्त्तयेत् सुधी-
र्निधानमध्ये निहितञ्च यद्धनं॥
एवं कृते स्यात्सुतः कृतात्मा
तपेन्न च स्वामरकं कदाचित्।
प्रयाति विष्णोः पदमक्षयं तत्
शिवालकानन्दमयं सदाख्यम्॥"

इत्याद्ये वह्निपुराणे भद्रनिधिदानंनामाध्यायः॥

भद्रपदा, स्त्री, (भद्रं पदमासाम्।) भाद्रपदा। पूर्व्वभाद्रपदोत्तरभाद्रपदानक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥ (यथा, हरिवंशे। ८। २।

"गङ्गा तु पवनस्याग्र्या
नलानिषेतामद्भात् त्रिभास्त्रियः।
गोदीप्यामश्विन्यः
पौष्णं दे चापि भद्रपदे॥")

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। ङीष्।) कटभरादृक्षः। इति शब्दमाला॥ (गुणादिकमस्याः कटभराशब्दे विवृतम्॥)

भद्रपर्णी, स्त्री, (भद्राणि पर्णान्यस्याः। गौरादित्वात् ङीष्।) गाम्भारी। इत्यमरः। २। ४। १६॥ (अस्याः पर्य्यायो यथा,—

"गाम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका॥
काश्मरी काश्मरी धीरा काश्मर्य्यः पीत-
रोहिणी।
जयन्तिका मधुरसा मङ्गल्यकुसुमिकापि च॥")

प्रपौण्डरीकी। इति जटाधरः॥ (अस्याः पर्य्यायो यथा.—

"प्रसारणी राजबला भद्रपर्णी प्रतापनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
"प्रसारणी च गन्धाली भद्रपर्णी कटम्भरा ॥"
इति वैद्यकरत्नमालायाम् ॥
यथा, शतपथब्राह्मणे ।३।४।१।१६। इत्यस्य भाष्ये
"काण्वां भद्रपर्णां प्रकृतौ पलाशवैकङ्कता-
दीनामैच्छिकत्वाच्च नियमविधिः ॥")

भद्रबलः, पुं, (भद्रं मङ्गलं बलमस्य ।) बलरामः । इति शब्दमाला ॥

भद्रमल्लिका, स्त्री, (भद्रा मल्लिका ।) गवाक्षी । इति शब्दमाला ॥

भद्रसङ्गः, पुं, (भद्रो सङ्ग इति कर्म्मधारयः ।) सङ्गभेदः । रामशर इति शरपत इति च भाषा । तत्पर्य्यायः । शरः २ बाणः ३ तेजनः ४ इक्षुवेष्टनः ५ । अथ सङ्गस्य पर्य्यायः । सङ्गः १ सङ्गातकः २ बाणः ३ स्थूलदर्भः ४ सुमेधसः ५ । एतयोर्गुणाः ।
"सङ्गद्वयन्तु मधुरं तुवरं शिशिरं तथा ।
दाहतृष्णाविषश्रमक्षयपित्तरोगजित् ॥
दोषत्रयहरं वृष्यं मेखलाकृत्प्रयुज्यते ॥"
इति भावप्रकाशः ॥

भद्रसुक्तकः, पुं, (भद्रो सुक्तकः ।) नागरसुक्तकः । इत्यमरः ।२।४।१४०॥ (तत्पर्य्यायो यथा,—
"मेघाख्यं सुक्तकं सुक्ता गार्द्धयं भद्रसुक्तकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

भद्रसुक्ता, स्त्री, (भद्रा सुक्ता ।) नागरसुक्तकः । तत्पर्य्यायः । वराङ्गी २ गुन्द्रा ३ ग्रन्थिः ४ भद्रकाण्डी ५ कण्डेरः ६ क्रोडेष्टा ७ कुरुविन्दाख्या ८ सुगन्धिः ९ ग्रन्थिला १० हिमा ११ बल्या १२ राजकण्डेरः १३ कच्छोत्या १४ सुक्ता १५ अर्णोदः १६ वारिदः १७ अम्भोदः १८ मेघः १९ जीमूतः २० अब्दः २१ नीरदः २२ अम्बुम् २३ घनः २४ गार्द्धयः २५ । अस्या गुणाः । कषायत्वम् । तिक्तत्वम् । शीतत्वम् । प्राचनत्वम् । पित्तज्वरकफश्वासित्वम् । संग्राहित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"सुक्तकं न स्त्रियां सुक्तं त्रिषु वारिदनामकः ।
कुरुविन्दश्च संज्ञातोऽपरः क्रोडकण्डेरकः ॥
भद्रसुक्तञ्च गुन्द्रा च तथा नागरसुक्तकः ।
सुक्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम् ॥
कषायं कफपित्तास्रदाहज्वरविषव्रणजित् ।
अनूपदेशे यज्जातं सुक्तकं तत् प्रशस्यते ॥
तथापि मुनिभिः प्रोक्तं वरं नागरसुक्तकम् ॥"
इति भावप्रकाशः ॥

भद्रसेनः, पुं, स्त्री, (भद्रः सुभद्रो सेनः ।) इन्द्रसेनम् । इत्यमरः । २ । ४ । ६० ॥ (विवरणमस्य इन्द्रसेनशब्दे ज्ञातव्यम् ।)

भद्रसैन्धवः, पुं, (भद्रा सैन्धवोऽस्य ।) ऐरावतहस्ती । इति त्रिकाण्डशेषः ॥

भद्रस्वत्, क्ली,(भद्रमश्वोऽस्मिन्निति । मतुप् मस्य वः ।) देवराष्ट्रम् । इति राजनिर्घण्टः ॥

भद्रस्वती, स्त्री, (भद्रं विद्यतेऽस्याम् । भद्र + मतुप् । मस्य वः । ङीप् ।) भद्रपर्णी । इति चटाधरः ॥ (कट्फलः । अस्य पर्य्यायो यथा,—
"कट्फलः सोमवल्कश्च कैटर्यः कुम्भिकापि च ।
शीतपर्णी काकुतुदिका भद्रा भद्रवतीति च ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
कल्याणविशिष्टे, त्रि । यथा, महाभारते । ४ । २४ । १८ ।
"इमाश्च नः प्रियां वीर ! वाचं भद्रवतीं
वद ॥"
श्रीकृष्णस्य नाग्नजितीगर्भजाता कन्या । यथा, हरिवंशे । १६० । १०-११ ।
"मित्रवाहुः सुनीथश्च नाग्नजित्याः प्रजाः स्मृताः ।
भद्रकालो भद्रविन्दः कन्या भद्रवती तथा ॥"
मधोर्माता । यथा, हरिवंशे । ३६ । ३ ।
"आर्क्षोऽजस्रवसः पुत्रः पुरुहान् पुरुषोत्तमः ।
मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरूद्वह ! ॥")

भद्रवर्म्मा, [न्] पुं, (भद्रेण त्रायति आत्मानमिति विग्रहः । त्र + मनिन् ।) नवमल्लिका । इति शब्दचन्द्रिका ॥ (विषयोऽस्य नवमल्लिकाशब्दे ज्ञातव्यः ।)

भद्रवल्ला, स्त्री, (भद्रा वल्ला ।) लताविशेषः । गन्धभादालिया इति भाषा । तत्पर्य्यायः । सरला २ प्रसारणी ३ कटम्भरा ४ राजबला ५ । इत्यमरः । २ । ४ । १५३ ॥ अस्याः पर्य्यायान्तरं गुणाश्च प्रसारणीशब्दे दर्शयाः ॥ बला । इति राजनिर्घण्टः ॥

भद्रवल्लिका, पुं, (भद्रा वल्लिका ।) गोपवल्ली । इति रत्नमाला । अनन्तमूल इति भाषा ॥

भद्रवल्ली, स्त्री, (भद्रा चासौ वल्ली चेति कर्म्मधारयः ।) मल्लिका । माधवीलता । इति राजनिर्घण्टः ॥ लताविशेषः । मदनमाली इति छायरमाली इति च भाषा । तत्पर्य्यायः । ग्रातभीरुः २ भूमिमल्ला ३ अष्टपादिका ४ । इति रत्नमाला ॥

भद्रश्रयं, क्ली, (भद्राय श्रीयते गृह्यते इति । श्रि + कर्म्मणि अच् ।) चन्दनम् । इति रत्नमाला ॥

भद्रश्रीः, पुं, (भद्रा श्रीरस्य ।) चन्दनवृक्षः । इत्यमरः । २ । ६ । १३१ ॥

भद्रसोमा, स्त्री, (भद्रः सोम इवास्या इव इति । टाप् ।) गङ्गा । इति शब्दमाला ॥ (कुरुवर्षस्थनदीविशेषः । यथा, मार्कण्डेये । ५८ । २३ ।
"तस्मिन् कुलाचलौ वर्षे तन्मध्ये च महानदी ।
भद्रसोमा प्रयात्युर्व्वीं पुण्यामलजलौघिनी ॥")

भद्रा, स्त्री, (भद्र + अजादित्वात् टाप् ।) राज्ञा । लक्ष्मणा । सोमनदी । तिथिभेदः । सा तु द्वितीया सप्तमी द्वादशी च ॥ प्रसारणी । (अस्याः पर्य्यायो यथा,—
"प्रसारणी राजबला भद्रपर्णी प्रतापनी ।
सरणी सारणी भद्रा बला चापि कटम्भरा ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
कट्फलम् । अनन्ता । इति मेदिनी । रे, ७१ ॥ जीवन्ती । अपराजिता । नीली । बला । ग्रन्थी । वचा । दन्ती । हरिद्रा । श्वेतदूर्व्वा । काञ्चरी । (पर्य्यायोऽस्या यथा,—
"शीतपर्णी काञ्चरी भद्रा गान्धारी गोपभद्रिका ।
कुतुहा च सदाभद्रा कट्फला लक्षदृन्तिका ॥"
इति वैद्यकरत्नमालायाम् ॥
चक्रमूरः । तत्पर्य्यायो यथा,—
"चक्रिका चर्म्मदृक्षी च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वायुघ्ना सुवासरा ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
सारिवाविशेषः । गौः । इति राजनिर्घण्टः ॥ काकोलुञ्चरिका । इति रत्नमाला ॥ (भद्राश्ववर्षस्थनदीभेदः । यथा, मार्कण्डेये । ५६ । ७ ।
"प्लोता प्लवावती भद्रा चक्रावर्त्तादिका-
स्तथा ॥")
गङ्गायाश्चित्रोतोऽन्तर्गतस्रोतोविशेषः । तस्य उत्तरे कुरुवर्षीयस्थनद्यः । इति पुराणं शब्दमाला च ॥ वृक्षशुक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ लक्ष्मी ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० शिवा ११ लोकेश्वरात्मजा १२ खदूरवासिनी १३ वेला १४ नीलवरस्त्री १५ ग्रन्थिनी १६ महातारा १७ वसुधारा १८ धनच्छदा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥ छायागर्भजाता कन्या । यथा,—
"यमलौ तु ततस्तस्यां जनयामास भास्करः ।
शनैश्चरञ्च भद्राञ्च छायायाममिततेजसौ ॥
तथा च तेजसा विष्णोस्तस्य चक्रमवर्त्तयत् ।
तदप्रतिहते युद्धे दानवान्तकरीक्षया ।
तद्भगिनी सुखतो भद्रा नियुक्तैवं विगर्हिता ॥"
इति वह्निपुराणे वैष्णवतीर्थकीर्त्तनम् ॥
सुभद्रा । यथा, —
"आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥"
इति स्कान्दे भगवद्वाक्यम् ॥ * ॥
विदभद्रा यथा,—
"एकादश्यां चतुर्थ्यान्तु पौषार्द्धे शुक्लपक्षके ।
अष्टमीपौर्णमास्योस्तु पूर्व्वार्द्धे विदिवज्जवः ॥
लक्षपक्षे तृतीयायां दशम्याञ्च परार्द्धतः ।
सप्तम्याञ्च चतुर्दश्यां पूर्व्वार्द्धे विदिरीरिता ॥
विहाय विषरोदांसि विदिं सर्व्वत्र वर्जयेत् ।
विदिर्यत्रे विदग्धे हि पुत्रे कार्य्यं जयावहम् ॥"
कर्म्मप्रकाशे तस्या अङ्गविशेषो यथा,—
"नाभ्यस्तु पञ्चवदनं गलकक्षयेका
वक्षो दशैकसहिता नियतं चतस्रः ।
नाभिः कटिः वदन पुच्छलता च तिस्रो
विदेर्भुवं निगदितोऽङ्गविभाग एषः ॥"
अङ्गविशेषे कार्य्यभंसादिफलम् यथा,—
"मुखे कार्य्यभंसो भवति मरणञ्च गलके
धनध्वंसो नित्यञ्च कटितटैर्बन्धिविलयः ।

कलिनाभीदेशे विजयमथ पृष्ठे च जगदुः
ग्रीरीरे भद्रायाः दृषभिति फलं सर्व्वसुखयः ॥"
अनुवसुमुनितिथियुगदृग्ग्रिवगुणसंख्यासु तिथिषु पूर्व्वाद्यास्वम्। आयाति विष्टिरेषा दृष्टे शुभदा पुरस्क्रियाशुभा ॥ चतुर्दश्यादिषु पूर्व्वायामादिसुखं भवतीत्यर्थः। इति ज्योतिस्तत्त्वम् ॥

भद्राकरणं, क्ली, (भद्र+डाच्। स+ल्युट्।) सुखनम्। इति हेमचन्द्रः ॥

भद्रालयः, पुं, (भद्रः हितकर आलय इव रक्षाकरत्वात्।) खड्गः। इति त्रिकाण्डशेषः ॥

भद्रारकः पुं, अष्टादशशतद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला ॥

भद्रालपचिका, स्त्री, (भद्राय अलति पर्य्याप्नोतीति। अल्+अच्। भद्रालं पत्रं यस्याः। कप्। टाप्। अत इत्वम्।) गन्धाली। इति शब्दमाला ॥

भद्राली, स्त्री, (भद्र+अल्+अच्। भद्राल+गौरादित्वात् ङीष्।) गन्धाली। इति शब्दमाला ॥

भद्रावती, स्त्री, (भद्रमस्त्या अस्तीति। मतुप्। मस्य वः। संज्ञायां पूर्व्वपदस्य दीर्घः।) कट्फलवृक्षः। इति राजनिर्घण्टः ॥

भद्राश्रयः, पुं, (भद्रस्याश्रयः।) चन्दनम्। इति शब्दचन्द्रिका ॥

भद्राश्वं, क्ली, (भद्रा अश्वा अत्र।) भुवि जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति त्रिकाण्डशेषः ॥ तद्विवरणं यथा। माल्यवतः पूर्व्वपार्श्वे पूर्व्वगङ्गिका एकशृङ्गाद्योजनसहस्राणि मानसन्च च भद्राश्वा नाम जनपदाः भद्रशालवनञ्च तत्र व्यवस्थितं कालाधृष्टयाः पुरुषाः स्त्रियाः पद्मवर्णिनः स्त्रियः कुमुदवर्णाः दशवर्षसहस्राणि च तेषामायुष्कञ्च च पञ्च कुलपर्व्वताः तद्यथा, श्वेतवर्णः मालाख्यको वरजस्वः त्रिपर्व्वा नीलश्चेति तद्विनिर्गता वङ्क्षो वक्षुदृक्षः स्थितानां देशानां तान्येव नामानि ते च देशाः एताः नदीः पिबन्ति। तद्यथा, सीता सुवाहिनी हंसवती कावेरी सुरसा ग्राहावती इक्षुनदी अङ्गारवाहिनी हरितोया सोमावर्णा घृतह्रदा वनमाला वसुमती हंसा पर्व्वा पक्षवङ्गा धनुष्मती मणिवप्रा सुवक्षभागा विभासिनी क्षत्रवतीया पुण्योदा नागवती शिवा शैवालिनी मणितटा चीरोदा वरुणावती विष्णुपदी महानदी हिरण्यक्षत्यक्षाद्या सुरावती वामोदा पताकाक्षेमेता महानद्यः एताश्च गङ्गासमाः कीर्त्तिताः आजन्मानं पापं विनाशयन्ति स्नुवनञ्च कोटिगुणाश्च नद्यैर्य्ये पिबन्ति ते दशवर्षसहस्रायुषः सदोमाभक्ता इति। इति वाराहे भुवनकोषे वङ्गसेना ॥ अपि च। तथैवेक्षाकृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं प्रपथतुः केतुमालभद्राश्वयोः सीमानं विदधाते। मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिग्गमवस्थगिरय उपकल्पाः। चतुर्मु

एतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहाश्चत्वारिंशदधिकपरिणतयः शतयोजनपरिणाहाः। कुबेराश्चत्वारः पयोमधिक्षुरसदध्यन्नाद्याः यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ! धारयन्ति। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति। येष्वमरपरिवृढाः सह सुरललनालङ्गायूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति। मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतगिरेर्गिरिशिखरस्थूलानि फलान्यमृतकल्पानि निपतन्ति। तेषां विशीर्य्यमाणानां अतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनानदीनदो नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणोत्तरतस्तुपप्लावयति। यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धिवातो दशयोजनं समन्तादनुवासयति। एवं जम्बूफलानामतिगुरुणिपातविशीर्य्यमाणानामनस्थिप्रायाणामिभकायनिभानां रसेन जम्बुनदी नाम नदी मेरुमन्दरगिरिशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दति। तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वायुसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति यदुह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्रादिभरणरूपेण खलु धारयन्ति। यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वगिरेरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति यो ह्युपयुञ्जानानां मुखनिर्व्वासितो वायुः समन्तात् शतयोजनमनुवासयति। एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्याम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्त्यस्तमुत्तरेणेलावृतमुपयोजयन्ति यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्यादयस्तापविशेषा भवन्ति यावज्जीवं सुखनिरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कचिकूटग्रिग्रिरपतङ्गरुचकनिषधश्रितिवासकपिलशङ्खवैदूर्य्यजारुधिहंसऋषभनागकालञ्जरनीलादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपकल्पाः। जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिक्षेपोऽभितो दिशं परितश्चकास्ते काञ्चनगिरिः। मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपकल्पा पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति तामनुपरितो लोक-

पालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपकल्पाः। इति श्रीभागवते ५ स्कन्धे शुवनकोषवर्णने २१ अध्यायः ॥

भद्रासनं, क्ली, (भद्राय लोकहिताय आसनम्।) कृपासनम्। इत्यमरः। २। ८। ३१ ॥ (योगिनामासनविशेषः। यथा, तन्त्रसारे।
"सीवन्याः पार्श्वयोर्न्यस्येद्गुल्फयुग्मं सुनिश्चलम्।
भद्रासनं भवेदेतद्योगिभिः परिकल्पितम् ॥")

भद्रेश्वरः, पुं, (भद्रः शुभदश्चासावीश्वरश्चेति भद्रात्मकः मङ्गलमय ईश्वरो वेति।) कच्छग्रामस्थशिवः। यथा,—
"उत्तिष्ठ कान्त! गच्छावः कच्छग्रामं सुखोभनम्।
तया सार्द्धं जगामाथ कच्छग्रामं वसुन्धरे! ॥
भद्रेश्वरनिमित्तं हि द्रव्यञ्च कथितं शुभम्।
नित्यञ्च शुक्लते यत्र पाञ्चजन्यं समर्पितम् ॥
दृष्ट्वा भद्रेश्वरं देवं चक्रतीर्थफलं लभेत्।
कच्छग्रामाच्छतगुणं चक्रतीर्थं वसुन्धरे! ॥"
इति वाराहे मथुरामाहात्म्ये चक्रतीर्थप्रभावो नामाध्यायः ॥

शिवप्रायार्थं दुर्गाराधितहिमालयस्थपार्थिवशिवलिङ्गम्। यथा,—
"तवार्थाय यदीष्यामि मन्दरीनु शिवमदृग्रे।
यत्रेह यजमीड्यत्वा स्तम्भयश्चेश्वरः कृतः ॥
असौ भद्रेश्वरत्वेवं ख्याते लोके भविष्यति।
देवदानवगन्धर्व्वा यत्किञ्चिदुरगोरगाः ॥
पूजयिष्यन्ति सततं मानवाश्च शुभेक्षवः ॥
इति वामनपुराणे ७६ अध्याये उमां प्रति शिववाक्यम् ॥ गङ्गायाः पश्चिमतीरे गरिष्यास्यामस्योत्तरे पाषाणमयशिवलिङ्गविग्रहो यामविग्रहश्च ॥

भद्रेला, स्त्री, (भद्रा एला।) स्थूलेला। इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रेला हरितेला च चन्द्रबाला च विष्णुटिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भद्रोदनी, स्त्री, (भद्रं उदनमिति अनयेति। उद्+अन्+अच्। गौरादित्वात् ङीष्।) बला। नागबला। इति राजनिर्घण्टः ॥

(भनज, ओ ध क्यौ मोटने। इति कविकल्पद्रुमः ॥ रुधा०-पर०-सक०-अनिट्। ध, भनक्ति ॥)

भन्द्रिलं, क्ली, (भद्रि+इलच्।) शुभम्। इत्यजादिकोषः ॥ कम्यः। धूतः। इति संक्षिप्तसारोद्धादिवृत्तिः ॥

भनृधुकः, पुं, भारतवर्षान्तर्गतदेशविशेषः। यथा,
"लक्षाध्वसार एवापि यामार्द्धं भनृधुकाः
खसाः ॥"
इति स्कान्दे कुमारिकाखण्डे वङ्कीश्वरमाहात्म्यनामाध्यायः ॥

भपञ्जरं, क्ली, (भानां नक्षत्राणां पञ्जरम्।) नक्षत्रचक्रम्। इति शिरोमणिरोमणिः ॥

भपतिः, पुं, (भानां नक्षत्राणां पतिः ।) चन्द्रः । इति हेमचन्द्रः ॥

भल्लः, पुं. (भस् इत्यव्यक्तशब्देन भातीति । भा + कः ।) मक्षिका । इति शब्दरत्नावली ॥ धूमः । इति त्रिकाण्डशेषः ॥

भल्लातिका, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरं बाहुल्यमाजाति ददातीति । आ + जा + कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्वस्य ह्रस्वत्वम् ।) भल्लातकी । इति त्रिकाण्डशेषः ॥ काँख इति भाषा ॥

भल्लातकी, स्त्री, (भस्मित्यव्यक्तशब्दस्य भरमालातीति । आ + ला + कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ॥

भल्लाधारः, पुं, मगधराजविशेषः । तत्पर्य्यायः । बैम्बिकः २ । इति हेमचन्द्रः ॥

भयं, क्ली, (भी + "एरच् ।" ३ । ३ । ५६ । इत्यच "भयादीनामुपसंख्यानं नपुंसके स्वादिनिवृत्त्यर्थम् ।" इति वार्त्तिकोक्त्या अपादाने अच् ।) विभेत्यस्मात् सत् । इति भरतः ॥ अस्य लक्षणं यथा,

"रौद्रशब्दा तु जनितं चित्तवैक्लव्यदं भयम् ।"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

अपि च । रामविषयस्य विनाशके वस्तुपस्थिते तन्निवारणाद्यासामर्थ्यमालम्बनो मन्यमानस्य दैन्यालक्षणचित्तवृत्तिविप्लवो भयम् । इति भगवद्गीतायां २ अध्याये मधुसूदनसरस्वती ॥ अन्यच्च । परतः स्वानिष्टसम्भावना भयम् । यथा । बाह्याहिभीति बाह्याधीनत्वेन स्वीयमरणं सम्भावयति । इति २ व्युत्पत्तिवादे गदाधरभट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः । १ । ७ । २१ ॥ उद्वासः ७ साधुसंभवः ८ प्रतिभयम् ९ । इति शब्दरत्नावली ॥ आतङ्कः १० आशङ्का ११ भिया १२ । इति हेमचन्द्रः ॥ आगते भये अभीतवत् स्थातव्यम् । यथा,—

"तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
उत्पन्ने तु भये तीव्रे स्थातव्यं तैरभीतवत् ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥

कुङ्कुमपुष्पम् । घोरे, त्रि । इति मेदिनी । ये, ४१ ॥ पुं रोगः । इति राजनिर्घण्टः ॥ (निर्भयैः पुङ्खभेदः । यथा, महाभारते । १ । ६६ । ५५-५६ ।

"तस्यापि निर्भयैर्भार्य्या वैभृता येन राक्षसाः ।
घोराङ्गस्त्राक्षयाः पुत्राः पापकर्म्मरताः सदा ॥
भयो महाभयश्चैव बभूवुर्भूतान्तकक्षया ।
न तस्य भार्य्या पुत्रो वा कश्चिदस्यन्तको हि सः ॥"

द्रोणस्य यशोरभिमतिनामिकायां पत्न्यां जातः पुत्रभेदः । यथा, भागवते । ६ । ६ । १२ ।

"द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥"

यवनराजविशेषः । यथा, भागवते ।४।२७।२३।

"ततो विनदसङ्ख्याः कम्बवो यवनेश्वरम् ।
मयोपदिष्टमाज्ञाय वध्रिं नाम्ना भयं प्रतिम् ॥")

भयङ्करं, त्रि, (भयं करोतीति । भय + ङ + "भेषजिभयेषु खच् ।" ३ । २ । ३३ । इति खच् । तुमुन्च ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । १४ । ८६ ।

"एकैकभयङ्करैः एष्टं नित्यमस्योपसृज्यते ॥")

पुं, कुक्कुरपक्षी । इति राजनिर्घण्टः ॥

भयखिखिमः, पुं, (भयाय शत्रुभयजनकाय खिखिमः ।) संग्रामपटहः । इति पुरुषोत्तमः ॥

भयद्रुतः, त्रि, (द्रु + क्तेरि क्तः । भयेन द्रुतः ।) भीत्या पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ७२ ॥

भयनाशिनी, स्त्री, (भयं रोगभयं नाशयतीति । भय + नश् + णिच् + णिनि; ।) आर्यमाया जता । इति राजनिर्घण्टः ॥ भयनाशकर्त्री च ॥

भयभीतः, त्रि, (भयेन भीतः ।) त्रासितातङ्कितः । यथा, वह्निपुराणे ग्रिविराजोपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।
नातो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति खेचर ! ॥"

भयभट्टः, त्रि, (भयेन भट्टः ।) भयद्रुतः । इति जटाधरः ॥

भयानकः, पुं, (विभेत्यस्मादिति । भी + "आनकः ग्रीड्भियः ।" उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के, २०५ ॥ स तु ग्रहणाद्यद्भुतरसात्मगतवस्तुरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्री नीचप्रकृतिः श्यामो मतस्तत्त्वविचारदैः ॥
यस्माद्भयायते भीतिस्तदालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पादिप्रेक्षणादयः ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसंभ्रान्तिदृत्याद्या अभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मग्नः कच्चुकिकञ्चुकस्य विधृतिं यावादयं
वामनः ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

भयानकः, त्रि, (भी + आनकः ।) भयङ्करः । इत्यमरः । १ । ७ । २० ॥ (यथा, भगवद्गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥"

भयापहः, पुं. (भयं अपहन्तीति । हन् + "अन्येभ्योऽपि दृश्यन्ते ।" ३ । २ । १०१ । इति डः ।) राजा । इति त्रिकाण्डशेषः ॥ (भयनाशके, त्रि ॥)

भयावहः, त्रि, (आवहतीति । आ + वह् + अच् । भयस्यावहः इति ।) भयङ्करः । इति हेमचन्द्रः ॥ (तथा, भगवद्गीतायाम् । १ । ३५ ।

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, (भरतीति । भृ + घञ्वादयच् ।) अतिशयः । इत्यमरः । १ । २ । ६६ ॥ (यथा, गीतगोविन्दे । ४१ ।

"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ॥"

भारः । यथा, भागवते । १ । ३ । २६ ।

"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्म्मणि, त्रि । (यथा, ऋग्वेदे ।१०।१००।२।

"भराय सु भरत भागमृत्वियं
प्र वायवे शुचिपे क्रन्ददिष्टये ॥"

"भराय सर्व्वेषां पोषकाय ।" इति तद्भाष्ये सायणः ॥ संग्रामः । यथा, ऋग्वेदे ।४।३८।५।

"उत स्वेनं वस्यमघिं न तायुं
मनुष्पाशमित्या रिणन्ति ।
मनुष्पाशमित्या रिणन्ति विश्वे अरेषु ॥"

"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायणः ॥)

भरटः, पुं. (बिभर्त्तीति । भृ + "जनिदाच्युषटक्षटमहिघृषिनमिभ्रस्ज्य इत्वञ्चिति ।" उणा० । ३ । १०३ । इति अटच् ।) कुम्भकारः । इत्युणादिकोषः ॥

भरणं, क्ली, (भ्रियतेऽनेनेति । भृ + करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ ॥ (भृ + भावे ल्युट् ।) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीडने चास्य तस्मात्तूर्णं तं भरेत् ॥"

इति दायभागः ॥

भरणः, पुं, (भरतीति । भृ + ल्यु ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ॥

भरणी, स्त्री, (भरण + गौरादित्वात् ङीष् ।) घोषकलता । इति मेदिनी । णे, ६८ ॥ अश्विन्यादिसप्तविंशतिनक्षत्राणामष्टादशनक्षत्रम् । तत्पर्य्यायः । यमदैवता २ । इति हेमचन्द्रः ॥ सा तारकात्रयमितर्क्षकोष्ठाकृतिः । तस्या अधिष्ठात्री देवता यमः । यथा,—

"तारकात्रयमिति ऋक्षकोष्ठके
मध्यगे दिविषदञ्जनी यमे ।
पङ्क्तयाक्षिसुजसंख्यकाः कला; ॥

दं १ । ४५ । इति कालिदासकृतज्योतिर्विज्ञानम् ॥ सा च उपरिगाऽन्तर्गता । अधोमुखगाऽन्तर्गता च । विद्यार्द्धभूमिखननं प्रशस्ता । इति ज्योतिस्तत्त्वम् ॥ तत्र जातफलम् ।

"सदापकीर्त्तिर्हि महापवादो
नानाविनोदैश्च विनीतकालः ।
अक्षे विलासी चपलः खलः स्यात्
प्राप्तिप्रवीणो भरणीषु जातः ॥"

इति कोष्ठीप्रदीपः ॥

भरतः

भरतीभूः, पुं, (भरतो भूरुत्पत्तिस्थानं यस्य ।) राजुपर्वतः । इति हेमचन्द्रः ॥

भरतीयः, त्रि, भरतस्येयः । येयः । अधातोः कर्म्मणि अनीयप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ५ । १५० । १७ ।
"सर्व्वं भवतु ते राज्यं पञ्च ग्रामान् विसर्ज्जय ।
अवश्यं भरतीया हि पितुस्ते राजसत्तम ! ॥")

भरतः, पुं, (बिभर्त्तीति । भृ + "अन्येभ्योऽपि दृश्यन्ते ।" उणा० । १ । १२८ । इति अतन् ।) स्वामी । । भूपालः । इषः । इत्यादिकोषः ॥ भूः । क्षमिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरण्यं, क्ली, (भरतौ साधु । "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) क्लम् । वेतनम् । इत्यमरः । २ । १० । ९९ ॥

भरण्यभुक्, त्रि, (भरण्यं वेतनं भुनक्ति इति । भुज + क्विप् ।) कर्म्मकरः । क्लं गृहीत्वा कर्म्मकारकः । । इत्यमरः । ३ । २ । १६ ॥

भरण्या, स्त्री, (भरण्य + अजादित्वात् टाप् ।) वेतनम् । इत्यमरटीकायां स्वामी ॥

भरण्याक्षा, स्त्री, (भरण्या आक्षा व्याप्या यस्याः ।) पर्व्वपुष्पी । इति शब्दचन्द्रिका ॥ रामदूतीति ख्याता ॥

भरण्युः, पुं, (कण्ड्वादिगणीयभरण्यधातुः । ततो बाहुलकात् उप्रत्ययः ।) भरण्युः । सिक्थम् । इति शब्दमाला ॥ अग्निः । चन्द्रमाः । ईश्वरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भरतः, पुं, (बिभर्त्ति स्वाङ्गमिति । बिभर्त्ति लोकानिति वा । भृ + "भृञ्जिधारिसहितनिभ्यः कतन् ।" उणा० ३ । ११० । इति अतन् ।) नाट्यशास्त्रम् । मुनिविशेषः । स तु अलङ्कारादिशास्त्रस्य कर्त्ता । (भरतस्य शिष्यः । तस्येदमित्यण् । अञो लुक् ।) नटः । रामानुजः । दौष्मन्तिः । इति मेदिनी । ते, १३७-३८ ॥ शुक्रः । तन्तुवायः । इति विश्वः ॥ क्षेत्रम् । भरतात्मजः । इति हेमचन्द्रः ॥ दुष्मन्तराजपुत्रभरतस्य पर्य्यायः । शाकुन्तलेयः २ दौष्मन्तिः ३ सर्व्वदमनः ४ । इति त्रिकाण्डशेषः ॥ यस्यर्षिभिर्गुरुक्षेत्रे मन्त्रवर्णं क्षतमन्यमेधं क्षतवान् । पञ्चाग्नयोऽजक्षयं एव मन्यान् नानाविधान् यज्ञानकरोत् । सप्तविंशतिसहस्रवत्सरानेकच्छत्रं राज्यं क्षतवान् । तस्योत्पत्तिर्यथा,—
"दुष्मन्तो मृगयां यातः कण्वाश्रमपदं गतः ।
तत्रासीनां स्वप्रभया मद्रयन्तीं रमामिव ।
विलोक्य तस्यो तुष्टेऽ देवमायामिव स्त्रियम् ।
बभाषे तां वरारोहां भटैः कतिपयैर्वृतः ॥
तद्दर्शनप्रमुदितः संनिवृत्तपरिश्रमः ।
पप्रच्छ कामसन्तप्तः प्रहसन् श्लक्ष्णया गिरा ॥
का त्वं कमलपत्राक्षि ! कस्यासि हृदयङ्गमे ! ।
किं चिकीर्षितं चात्र भवत्या निर्ज्जने वने ॥
श्रोतुं राजन्यतनयां वेद्म्यहं त्वां सुमध्यमे ! ।
न हि चेतः पौरवाणामधर्म्मे रमते क्वचित् ॥

श्रीशुकदेवजीवाच ।
विश्वामित्रात्मजैवाहं त्वत्तो मेनकया वने ।
वेदेनङ्गवान् कण्वो वीर ! किं करवाम ते ॥
आस्तां तावदिदान्त्र ! मद्गृहामर्हसे नः ।
शुष्यन्तां सखि गोदारा उच्यतां यदि रोचते ॥
श्रीदुष्मन्त उवाच ।
उपपन्नमिदं सुभ्रु ! जातायाः कुशिकान्वये ।
स्वयं हि वृणुते राज्ञां कन्यका सदृशं वरम् ॥
ओमित्युक्ते यथाधर्म्मसुपयेमे शकुन्तलाम् ।
गान्धर्व्वविधिना राजा देशकालविधानवित् ॥
अमोघवीर्य्यो राजर्षिर्महिष्यां वीर्य्यमादधे ।
श्वोभूते स्वपुरं यातः कालेनासूत सा सुतम् ॥
कक्षः कुमारस्य वने चक्रे सप्तचिताः क्रियाः ।
बद्धा स्कन्धे तरसा क्रीडति स्म स बालकः ॥
तं दुरत्ययविक्रान्तमादाय प्रमदोत्तमा ।
हरेरंशांशसम्भूतं भर्त्तरन्तिकमागमत् ॥
यदा न जगृहे राजा भार्य्यापुत्रावनिन्दितौ ।
शृण्वतां सर्व्वभूतानां खे वागाहाशरीरिणी ॥
माता भस्त्रा पितुः पुत्रो येन जातः स एव सः ।
भरस्व पुत्रं दुष्मन्त ! मावमंस्थाः शकुन्तलाम् ॥
रेतोधाः पुत्रो नयति नरदेव ! यमक्षयात् ।
त्रायस्व धाता गर्भस्य सत्यमाह शकुन्तला ॥
पितर्य्युपरते सोऽपि चक्रवर्त्ती महायशाः ।
महिमा गीयते तस्य हरेरंशभुवो भुवि ॥
चक्रं दक्षिणहस्तेऽस्य पद्मकोशोऽस्य पादयोः ।
ईजे महाभिषेकेण सोऽभिषिक्तोऽधिराड्विभुः ॥
मघवत्याग्रता मेध्यैरङ्गायामनु वाजिभिः ।
मामतेयं पुरोधाय यमुनामनु च प्रभुः ॥
अष्टसप्ततिमेध्याश्वान् ववन्थ प्रददक्षिणम् ।
भरतस्य हि दौष्मन्तेरग्निः साचीगुणे चितः ॥
सहस्रं बद्धमो यस्मिन् ब्राह्मणा गा विभेजिरे ।
त्रयस्त्रिंशच्छतं त्वश्वान् बद्धा विश्रापयत् कृपान् ॥
दौष्मन्तिरत्यगाज्जायां देवानां गुरुमायवीं ।
स्वगान् सुक्षत्रः क्षत्त्राद्यान् त्रिशतेन परीवृतान् ॥
अदात् कर्म्मभि मघवान् नियुतानि चतुर्दश ।
भरतस्य महत् कर्म्म न पूर्व्वे नापरे कृपाः ॥
नैवापूर्णं व प्राप्तास्ति बाहुभ्यां त्रिदिवं यथा ।
किरातहूणान् यवनान् म्लेच्छान् कङ्कान् खशाञ्छकान् ॥
अम्लक्षयत्कृपांश्चाहन् म्लेच्छान् दिग्विजये ऽखिलान् ।
जित्वा पुरासुरा देवान् ये रसौकांसि भेजिरे ॥
देवस्त्रियो रसां नीताः प्रातिभिः पुनराहरत् ।
सर्व्वान् कामान् दुदुहतुः प्रजानां तस्य रोदसी ॥
समाम्नायवसाहस्रीर्दिक्षु चक्रमवर्त्तयत् ।
स सप्ताट् लोकपालाख्यमैश्वर्य्यमधिराट् श्रियम् ॥
चक्रवाक्षत्रजितं प्राणान् मन्युमृत्युपरारम च ।
तस्यासन् नृप ! वैदर्भ्यः पत्न्यस्तिस्रः सुसम्मताः ॥
जघ्नुस्त्यागभयात् पुत्रान्नानुरूपा इतीरिते ॥"

इति श्रीभागवते ९ स्कन्धे २० अध्यायः ॥*॥

ऋषभदेवात् इन्द्रदत्तजयन्त्यां कन्यायां जातशतपुत्रान्तर्गतज्येष्ठपुत्रः । यथा । "अथ च भगवान्

भरतः

ऋषभदेवः स्वं वर्षं कर्म्मक्षेत्रमनुमन्यमानः पृथिवीगृहकुलवासो लब्धवरैर्बहिरनुज्ञातो यज्ञमेधिनां कर्म्मानवृश्चमानो जयन्तामिन्द्रदत्तायासुभयविधं कर्म्म समाम्नायमभियुञ्जानमात्मजानामात्मसमानानां शतं जनयामास । येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आसीत् येनेदं वर्षं भारतमिति व्यपदिशन्ति ।" इति श्रीभागवते ५ स्कन्धे ४ अध्यायः ॥ * ॥ पावकपुत्रः । यथा,—
"पावनो लौकिको ह्यग्निः प्रथमो यज्ञभुग् स्मृतः ।
ब्रह्मौदनाग्निसंज्ञस्तु पुत्रो भरत नाम विश्रुतः ॥"
इति मात्स्ये अग्निवंशो नाम ४८ अध्यायः ॥
रामानुजभरतस्य जन्म यथा,—
"भरतो नाम कैकेय्यां जज्ञे सत्यपराक्रमः ।
साक्षादिष्वोश्चतुर्भागः सर्व्वैः सद्गुणैर्युतः ॥"
तस्यानुगमः शत्रुघ्नः । यथा,—
"भरतस्यापि शत्रुघ्नो जघन्यावरजो हि सः ।
प्राणैः प्रियतरो नित्यं तस्य चासीत्तथा प्रियः ॥"
स कुशध्वजकन्यां माण्डवीं परिणीतवान् । यथा,
"भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः ।
अस्य धर्म्मात्मनो राजन् ! रूपेणाप्रतिमं भुवि ॥
सुताद्वयं नरश्रेष्ठ ! पत्न्यर्थं वरयामहे ।
तमेवमुक्त्वा जनको भरतश्चाभ्यभाषत ॥
गृह्यतां पाणिमाख्याः पाणिना रघुनन्दन ! ॥"
स नन्दिग्रामे राज्यं कृतवान् । यथा,—
"सवल्कलजटाधारी मुनिवेषधरः प्रभुः ।
नन्दिग्रामेऽवसद्वीरः सबन्धुर्भरतस्तदा ॥
सबालव्यजनं छत्रं धारयामास स स्वयम् ।
भरतः शासनं सर्व्वं पादुकाभ्यां निवेदयन् ॥
ततस्तु भरतः श्रीमानभिषिच्यार्य्यपादुके ।
तदधीनस्तदा राज्यं कारयामास सर्व्वदा ॥"
इति रामायणे बालकाण्डे । १८ । ७२ । ७३ अध्यायः । अयोध्याकाण्डे २४ अध्यायश्च ॥
तस्य द्वौ पुत्रौ । यथा,—
"भरतस्यात्मजौ वीरौ तक्षः पुष्कल एव च ।
मातुलेन युधाजिन्नौ धर्म्मज्ञौ सुसमाहितौ ॥
भरतस्यायतः कृत्वा कुमारौ सबलानुगौ ।
निहत्य गन्धर्वसुतान् हे पुरे विभजिष्यतः ॥"
इति रामायणे उत्तरकाण्डे १०१ अध्यायः ॥

भरतखण्डं, क्ली, भारतवर्षान्तर्गतकुमारिकाखण्डम् । यथा,—
"कुमारिकेति विख्याता यस्या नाम्ना प्रकथ्यते ।
इदं कुमारिकाखण्डं चतुर्वर्गफलप्रदम् ॥
यथा क्षतावनीयञ्च नानाग्रामादिकल्पना ।
इदं भरतखण्डञ्च यथा सम्यक् प्रकल्पितम् ॥"
इति स्कान्दे कुमारिकाखण्डे भूसंस्थितिनामाध्यायः ॥

भरतपुत्रकः, पुं, (भरतस्य नाट्यशास्त्रप्रवेतुः पुत्रकः ।) नटः । इति हेमचन्द्रः ॥

भरतप्रस्तः, स्त्री, (प्रस्तते इति । प्र + स्त + क्विप् । प्रस्तः । भरतस्य प्रस्तः ।) नीकपी । इति शब्दरत्नावली ॥

भरद्वाजयज्ञः, पुं, (भरतस्य अयनम् ।) औदामयज्ञः । यथा, यौगदेवः ।
"प्रीते च चित्तशुद्धये मम मौनभूम्नो-
ज्योऽभवन्नृहरिधामयजामदग्न्याः ।
यो॓भूद्भुवं भरताध्वजज्ञयज्ञः
कल्पी ततश्च भविता प्रहरिष्यतेऽरीन् ।"

भरथः, पुं, (बिभर्त्तीति । भृञ् + "भृञ्जिधृ ।" उणा० १ । ११५ । इति अथप्रत्ययः । स च चित् ।) लोकपालः । हलायुधादिकोषः ॥

भरद्वाजः, पुं, (द्वाभ्यां जायते इति । जन् + डः । ततः पृषोदरादित्वात् डाजः सङ्करः । म्रियते मद्भिरिति । भृ + अप् । भरः । भरश्चासौ द्वाजश्चेति कर्म्मधारयः ।) मुनिविशेषः । स च उतथ्यपत्न्यां ममतायां दृहस्पतिवीर्य्याज्जातः । तस्य जन्मविवरणं यथा । "ततोऽस्य विनये पुत्रजन्मनि पुत्रार्थिने मरुत्सोमयाजिने दीर्घतमसा पार्ष्ण्यापाच्छादृहस्पतिवीर्य्यादुतथ्यपत्नी-ममतायामुत्पन्नो भरद्वाजाख्यो नाम पुत्रो मद्भिर्दत्तः । अत्रापि नामनिर्वचनश्लोकः पठ्यते ।
'मरुद्भि र्भरद्वाजमिमं भर द्वाजं दृहस्पते ! ।
यातौ यद्वत्ता पितरौ भरद्वाजस्ततश्चयम् ।' इति ।
भरद्वाजश्च तस्य विनये पुत्रजन्मनि मरुद्भिर्दत्तो विनयसंग्रामवाप ।"* । अस्य टीका । विनये अर्थे सति । अत्रैव प्रमितिहासः । दृहस्पतेरुतथ्यस्योतथ्यस्य ममताख्या पत्नी गर्भिण्यासीत् । तस्यां दृहस्पतिः कामाभिभूतो वीर्यं ससर्ज्जन् । तच्च गर्भं प्रविशद्गर्भेणैव स्थानसङ्कोचभयात् पार्ष्ण्याप्रहारेणापास्तं बहिः पतितमपि अमोघवीर्य्यतया दृहस्पतेर्भरद्वाजनामपुत्रोऽभूत् । गर्भस्थेन दृहस्पतिना तस्मादेवापराधादन्धो भवेति शप्तो दीर्घतमा नामाभवत् । तच्च भरद्वाजनामनिरुक्तिपरः तत्पित्रोर्विवादकरोऽयं श्लोको देवैः पठितः । हे मूढे ममते द्वाजं द्वाभ्यामावाभ्यां जातमिमं पुत्रं त्वं भर रक्ष । एवं दृहस्पतिनोक्तेन ममता तमाह हे दृहस्पते ! द्वाजं द्वाभ्यां जातमिममेकाकिनी किमित्यहं भरिष्यामि । त्वमिमं भरेति परस्परदत्तात्तं पुत्रं त्यक्त्वा यस्मात् पितरौ ममताबृहस्पती ततो यातौ । ततो भरद्वाजाख्योऽयम् । पाठान्तरे एवं विवदमानौ । यद्दुःखात् यन्निमित्ताद् दुःखात् पितरौ यातावित्यर्थः । तदेवं ताभ्यां त्यक्तो मरुद्भिर्भृतः । मरुत्सोमाख्येन च यागेनाराधितेर्मरुद्भिर्दत्तस्य विनये पुत्रजन्मनि सति दत्तत्वाद्भरद्वाजत्वं ज्ञातव्यम् । इति विष्णुपुराणे ॥ अंशे २९ अध्यायः ॥ * ॥ (द्वारग्रहापरोऽत्रैव आत्रेयः । यथा, देवीभागवते । १ । ३ । २६ ।
"एकादशोऽथ विहितो भरद्वाजस्ततःपरम् ।
जयोदये चात्रिरिक्षो धर्म्मेऽपि चतुर्दशे ॥"
यथा च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"रोगाः कार्श्यकरा बलक्षयकरा दैहस्य चेष्टाहरा-
इष्टा इन्द्रियशक्तिसंक्षयकरा वर्णाङ्गपीड़ा-
कराः ।
धर्म्मार्थौषधिजक्षमासुखहिते मद्भाविघातक्षमा
बलात्
प्राणानापु हरन्ति सन्ति यदि ते क्षेमं कुतः
प्राणिनाम् ॥
तत्तेषां प्रशमाय कञ्चन विधिञ्चिन्वो भवद्भिर्वुधै-
र्योग्यैरित्यभिधाय संसदि भरद्वाजं मुनिं
तेऽब्रुवन् ।
त्वं योग्यो भगवन् ! सहस्रनयनं याचस्व लब्धं
क्रमा-
दायुर्व्वेदमधीत्य यं गदभयाद्युक्ता भवामो
वयम् ॥")

पृषिविशेषः । भारद्व इति भाषा । तत्पर्य्यायः । याघाटः २ । इत्यमरः । २ । ५ । १५ ॥ भरद्वाजकः ३ । इति शब्दरत्नावली ॥ (गोत्रभेदः । यथा, मनौ ।
"भार्गवाः कार्य्यपश्चैव वात्स्याः सावर्णकस्तथा ।
भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥"
इत्यादि गोत्रशब्दे द्रष्टव्यम् ॥ भृ + अच् । भरत् + वाजः । संक्रियमाणहविर्लक्षणान्ने यजमानादौ, त्रि । यथा, ऋग्वेदे । १ । ११६ । १८ ।
"यदयातं दिवोदासाय वर्त्तिर्भरद्वाजायाश्विना
हयता ॥"
"भरद्वाजाय संक्रियमाणहविर्लक्षणान्नाय यजमानाय ।" इति तद्भाष्ये सायनाचार्य्यः ॥)

भरद्वाजकः, पुं, (भरद्वाज + स्वार्थे कन् ।) याघाटपक्षी । इति शब्दरत्नावली ॥

भरिणी, स्त्री, (भरो बिभर्त्ति हरतीति । भृ + णिनिः । गौरादित्वात् ङीष् । पृषोदरादित्वात् पूर्व्वादीर्घश्च साधुः ।) हरिद्रर्णः । हलायुधादिकोषः ॥

भरित्र, त्रि, (हरित्रः । पृषोदरादित्वात् हस्य भः ।) हरिद्वर्णः । हलायुधादिकोषः ॥ पुष्टः । भारयुक्तः । भरोऽस्य जात इत्यर्थे इतप्रत्ययेन निष्पन्नः ॥

भरिमा, [न्] पुं, (भृ + "हृभृहसृस्तृभ्य इमनिच् ।" उणा० ४ । १४० । इति भावे इमनिच् ।) भरत्वम् । हलायुधादिकोषः ॥ (म्रियते इति । कुटुम्बः । इत्यञ्जनदत्तः ॥)

भरः, पुं, (भरति बिभर्त्ति जगदिति । भृञ् भरणे + "भृञ्जिधृशासिवसिघट्टिभ्यश्च उः" उणा० १ । ७ । इति उः ।) विष्णुः । इति सिद्धान्तकौमुद्यामरसुधादिवृत्तिः । समुद्रः । स्वामी । इति संक्षिप्तसारोणादिवृत्तिः । स्वर्गम् । शिवः । इति मेदिनी । रे, ६६ ॥

भरज, पुं, (भरेति शब्देन व्रजतीति । व्रज् + क ।) क्षुद्रशलभः । इति हेमचन्द्रः ॥

भरटकं, क्ली, (भृ + बाहुलकात् उट । संज्ञायां कन् ।) भरटाभिधम् । इति हेमचन्द्रः ॥

भर्गः, पुं, (भ्रस्यते कामादिरनेनेति । भ्रस्ज् + "इगुपध ।" इति घञ् ।) शिवः । इत्यमरः ॥ (यथा, कथासरित्सागरे । १ । ३७ ।
"प्रभुणाच ततो भर्गः पुरा दक्षमखापतेः ।
देवि! त्वच तथाज्ञाच यज्ञो॓ऽयमवन्ध्यकः ।
स मह्यं भवतीं प्रादात् धर्म्मादिभ्यो॓ऽपरा-
श्च ताः ॥

प्रीतिहोत्रस्य पुत्रः । यथा, भागवते ।६।१७।६।
"प्रीतिहोत्रो॓स्य भर्गो॓तो भार्गभूमिरभूत्नृप ॥")

आदित्यान्तर्गतं तेजः । यथा,—
"आदित्यान्तर्गतं वर्च्चो भर्गाख्यं तन्मुनीड्यभिः ।
जन्मजन्मनि विनाशाय दुःखस्य चिन्तयस्व च ॥
ध्यानेन पुरुषो यत्र द्रष्टव्यः क्षयमश्नुते ।"
इत्यादित्यतत्त्वम् ॥

भर्गः, [स्] क्ली, (भर्ज्जते इति । भृज्ज भर्ज्जने + "अर्त्तिसृधृभ्यः कुच्च ।" उणा० ४ । २५५ । इति असुन् कुत्वं चान्तादेशः ।) ज्योतिः । इति सिद्धान्तकौमुद्यामरसुधादिवृत्तिः ॥ (यथा, ऋग्वेदे । ३ । ६२ । १० ।
"तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥")

भर्य्यः, पुं, (भृज् + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् । चजोरिति कुत्वम् ।) भर्गः । इत्यमरटीकायां भरतस्वामिकृतौ ॥

भर्जनं, क्ली, (भृज् + ल्युट् ।) भृष्टिः । इति शब्दमाला ॥ भाजा इति भाषा ॥

भर्गीयं, त्रि, (भर्ग + तथ ।) भरत्वीयम् । पौरवीयम् । यथा, दायभागटीकाधृतवचनम् ।
"दृष्टौ च मातापितरौ साध्वी भार्य्या सुतः
स्त्रियुः ।
अप्यकार्य्यशतं कृत्वा भर्त्तव्या मनुरब्रवीत् ।"

भर्त्ता, [तृ] पुं, (बिभर्त्ति पुष्णाति पालयति धारयतीति वा । भृञ् धारणपोषणयोः + "तृच् हृषौ ।" ३ । १ । १३३ । इति तृच् ।) अधिपतिः । (यथा, रघौ । १ । ७४ ।
"सोऽपश्यत् प्रतिघातेन सम्भृतः क्षत्रतेजसम् ।
भावितात्मा सुतो भर्त्तुरधेनं प्रसवे यतः ॥")

तत्पर्य्यायः । अधिपः २ ईशः ३ नेता ४ परिवृढः ५ अधिभूः ६ पतिः ७ इन्द्रः ८ स्वामी ९ नाथः १० आर्य्यः ११ प्रभुः १२ ईश्वरः १३ विभुः १४ ईशिता १५ रुद्रः १६ नायकः १७ इति हेमचन्द्रः ॥ (विष्णुः । प्रपञ्चाधिष्ठानत्वेन भरणात् ॥) धातरि पोषरि च त्रि इति मेदिनी । ते, १८ ॥ (यथा, ऋग्वेदे । १० । २२ । १ ।
"भर्त्ता वचस्य दृक्षोः पिता पुत्रमिव प्रियम् ।")

विवाहिताया; पतिः । यथा, महाभारते १ । १०४ । २८ ।
"भार्य्यायां भरद्वाजर्षे भर्त्ता गर्भः स्मृतः बुधैः ।
अहं त्वां भरतं ज्ञात्वा जातमन्तर्गतं तदा ।
शिशुकालं अमेयात्मा न भरेयं महातपः ॥")

भर्तृमती, स्त्री, (भर्त्तारं दृक्षीति । दृक्ष + टक् ङीप् ।) पतिघातिनी । इति महाभारतम् ।

भर्तृदारकः, पुं, (भर्त्ता म्रियते इति । दृङ् आदरे + वार्त्तमि घञ् । ततः स्वार्थे कः ।) राजोक्तः युवराजः । इत्यमरः । १ । ७ । १२ ॥

भर्तृदारिका, स्त्री, (भर्तृदारक+टापि अत इत्वम्।) गाङ्गेयी राजसुता। इत्यमरः। १। ७। १२॥

भर्तृहरिः, पुं, स्वनामख्यातः काव्यकर्तृराजविशेषः। इति जटाधरः। स च विक्रमादित्यभ्राता॥ (अयमेव गन्धर्वसेनात् दाक्षीगर्भजातः। यथा, राजावल्याम्। ७। १-२।
"अथ कालेन कियता रममाणो मही तले।
दाक्षां गन्धर्वसेनस्तु पुत्रमेकमजीजनत्॥
तस्य भर्तृहरीत्येवं नाम चक्रे महामतिः॥")

भर्तृ, क ड ञ भर्तृते। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-उभ० च-सक०-सेट्।) रेफयुक्तः। दन्त्यवर्णाद्योपधः। भर्त्तो भर्त्तनम्। भर्त्तनस्यपकारगौरित्यमरः। २। ६। २४॥ क ड, भर्त्तयते स्वयं राजा। ञ, भर्त्तयति भर्त्तयते। अयमात्मनेपदीत्यन्ये। कदाचित् परस्मैपदार्थो अकारः। इति दुर्गादासः॥

भर्तृयज्ञं, क्ली, (भर्तृ+क्युट्।) अपकारगीः। इत्यमरः। २। ६। २४॥ चौरोऽसि त्वां घातयिष्यामि इत्याद्यपकारार्थं वचनम्। इति भरतः॥ तत्पर्य्यायः। जुगुप्सा २ निन्दा ३ जुगुप्सनम् ४ गर्हा ५ गर्हणम् ६ निन्दनम् ७ कुत्सनम् ८ परिवादः ९ परीवादः १० जुगुप्सनम् ११ आक्षेपः १२ अवर्णः १३ निर्वादः १४ अपक्रोशः १५। इति शब्दरत्नावली॥ (भर्तृ+ष्यञ्। भर्तृसनाप्यत्रार्थे। यथा, कथासरित्सागरे। ३२। ५१।
"इत्यादि भर्तृसनां श्रुत्वा गच्छद्भिस्तैः समं स च।
विवशः प्रययौ विद्युदत्तलक्ष्मीं बभूव च॥")

भर्तृसपत्निका, स्त्री, (भर्तृस्पर्द्धते स्पर्द्धति। भर्तृस्पर्द्ध+ण्वुल्। भर्तृसं निन्दितं पत्यं यस्याः। कप्। टाप्। अत इत्वम्।) मङ्गलाजीवा। इति राजनिर्घण्टः॥ (भर्तृस्पत्निकापि पाठः॥)

भर्म्म, क्ली, (भ्रियतेऽनेनेति। भृ+बाहुलकात् मन्।) स्वर्णम्। क्षतिः। नाभिः। इति हिरूपकोषः॥

भर्म्मन्, [तृ] क्ली, (भरति भ्रियते वेति। भृञ्+"सर्वधातुभ्यो मनिन्।" उणा० ४।१४४। इति मनिन्।) वेतनम्। इति हेमचन्द्रः॥ स्वर्णम्। घृतपूरम्। इत्यमरः। २।६।८४॥ नाभिः। इति विश्वः॥ (भरत्रम्। यथा, ऋग्वेदे। १०।८८।१।
"हविष्यान्तमजरं स्वर्विदि दिविस्पृशाहुतं
घृतस्नुवं।
तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया
पप्रथन्त॥"
"भर्म्मणे भरणाय।" इति तद्भाष्ये सायनः॥)

भर्म्मण्या, स्त्री, (भर्म्मणि भरणे साधुरिति। भर्म्मन्+यत्। टाप्।) वेतनम्। इति हेमचन्द्रः॥

भर्ब, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफोपधः। भर्बति। इति दुर्गादासः॥

भर्ब्ब, हिंसे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-सक०-सेट्।) भर्ब्बति। अन्तःस्थवान्तोऽयम्। इति दुर्गादासः॥

भल, क ड निरूपणे। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, भालयते। इति दुर्गादासः॥

भल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, भलते। इति दुर्गादासः॥

भलता, स्त्री, (भालतीति। भा+बाहुलकात् डः। भा चासौ लता चेति कर्म्मधारयः।) राजबला। इति शब्दरत्नावली॥

भलन्दनः, पुं, काव्यकुब्जदेशीयनृपविशेषः। यथा,
"कलावती काव्यकुब्जे बभूवायोनिसम्भवा।
जातिस्मरा महासाध्वी सुन्दरी कमला कला॥
काव्यकुब्जे नृपश्रेष्ठो भलन्दन उदारधीः।
सं तां संप्राप योगान्ते यज्ञकुब्जसमुत्थिताम्॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः॥

भल, ड दानवधनिरूपणेषु। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) अदयान्तः। ड, भलते। इति दुर्गादासः॥

भल्लः, पुं, (भल्लते इति। भल्ल+अच्।) भल्लूकः। इत्यमरः। २। ५। ७॥ (देशभेदः। यथा, हरिवंशे १४। ३०।
"ब्रह्मपुरदार्व्वाभीर-
वनराज्यकिरातचीनकौलिन्दाः।
भल्लापलोजजटासुर-
कुनटखसखोषकुक्षिकाराट्याः॥")

भल्लः, पुं क्ली, (भल्लते हन्यते इति। भल्ल+अच्।) शस्त्रभेदः। इति मेदिनी शब्दमाला च। भाला इति भाषा॥ (यथा महाभारते। ७। १४०। ६।
"प्रगाढदृढसन्धित्वे लाघवे वेधने तथा।
क्षुरनाराचभल्लानां विपाठानाञ्च तत्त्ववित्॥"
अनेन देहविद्धशल्यादिकमुद्धरति। यथा,—
"स च शल्योद्धरणकः प्रोच्यते वैद्यकागमे।
नाराचशक्तिशूलाद्यैर्भल्लैः कुन्तैश्च तोमरैः॥"
इति हारीते प्रथमे स्थाने द्वितीयेऽध्याये॥)

भल्लकः, पुं, (भल्ल+स्वार्थे कन्।) भल्लूकः। इति हिरूपकोषः॥ (पक्षिभेदः। यथा, भागवते। ३। १०। २३।
"काकण्वकङ्कगृध्रामिषभल्लकबर्हिणः।
हंससारसचक्राङ्काकोलूकादयः खगाः॥")

भल्लपुच्छी, स्त्री, (भल्लस्य पुच्छमिव पुच्छं यस्याः।) गवेधुका। इति शब्दचन्द्रिका॥ गोरक्षतण्डुला इति ख्याता॥

भल्लाटं, क्ली, ग्रामिध्वजराजपुरम्। यथा,—
"सेनागणैः परिवृतः कल्किर्नाराधकः प्रभुः।
भल्लाटनगरं प्रायात् खड्गशुक्लसमन्वितः॥"
इति कल्किपुराणे। २२ अध्यायः॥
(दक्षसेनस्य पुत्रे, पुं। यथा, हरिवंशे। २०। १२।
"विष्वक्सेनस्य पुत्रोऽभूत् दक्षसेनो महीपतिः।
भल्लाटो तत्कुमारोऽभूद्राधेयेन हतः पुरा॥")

भल्लातः, पुं, (भल्लं भल्लाकृतिमिव अतति आत्मानं ज्ञापयतीति। अत+अच्।) भल्लातकवृक्षः। इति राजमाला॥ (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"भल्लातभावतश्चित्रं भल्लशब्देऽधिभावतः॥")

भल्लातकः, पुं, (भल्ल इवातनतीति। अत+ण्वुल्। यद्वा, भल्लात+स्वार्थे कन्।) वृक्षविशेषः। भेला इति भाषा। तत्पर्य्यायः। अरुष्करः २ भल्लातः ३ शोफवृन्त ४ वह्निनामा ५ वीरतरुः ६ त्रिफलत ७ भूतनाशनः ८। इति राजमाला॥ भल्लातकी ९ अग्निसुखी १० वीरवृक्षः ११। इत्यमरः॥ निर्दहनः १२ तपनः १३ अनलः १४ ज्वलनः १५ शौलबीजः १६ वातारिः १७ स्फोटबीजकः १८ पृथग्बीजः १९ धनुर्द्रुमः २० बीजपादपः २१ वह्निः २२। (यथा, सुश्रुते। कल्पस्थाने। ४६।
"उष्णोदकानुपानन्तु क्षेत्राणामथ शुष्यते।
अन्ते भल्लातकक्षेत्रात् क्षेत्राणीश्वरकाणया॥")

अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। उष्णत्वम्। क्रिमिकफवातोदरानाहप्लीहदुर्नामनाशित्वञ्च। तत्फलगुणाः। कषायत्वम्। मधुरत्वम्। कोष्णत्वम्। कफार्शिःप्रमेहानाहविबन्धमूलजठराध्मानक्रिमिनाशित्वञ्च। तन्मज्जगुणाः। विशेषेण दाहघ्नत्वम्। पित्तापहत्वम्। तर्पणत्वम्। वातारीपक्वहारित्वम्। दीपिजनकत्वम्। पित्तनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।
"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः।
तथैवाग्निसुखी भल्लो वीरवृक्षश्च शोफवृन्त॥
भल्लातकफलं पक्वं स्वादुपाकरसं लघु।
कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम्॥
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम्।
कृमार्शोग्रहणीगुल्मप्लीहानाहज्वरक्रमीन्॥
तन्मज्जा मधुरो दृष्यो दृंहणो वातपित्तहा।
दृक्तमारुष्करं स्वादु पित्तघ्नं केशमांसकृत्॥
भल्लातकः कषायोष्णः शुक्लो मधुरो लघुः।
वातश्लेष्मोदरानाहकृच्छार्शोग्रहणीगदान्॥
हन्ति गुल्मज्वरं चित्रवह्निमान्द्यक्रमिव्रणान्।"
इति भावप्रकाशः॥

अन्यच्च।
"भल्लातकफलं स्निग्धं क्रिमिदुर्नामनाशनम्।
दन्त्यग्नेयकरं प्राहुः कषायं मधुरञ्च तत्॥
भल्लातदग्धं मधुरं कषायं वातकोपनम्॥"
इति राजवल्लभः॥

भल्लातकी, स्त्री, (भल्लातक+गौरादित्वात् ङीष्।) भल्लातकवृक्षः। इत्यमरः॥

भल्लिका, स्त्री, (भल्ल+अच्। स्वार्थे कन्। टाप्। अत इत्वम्।) भल्लातकः। इति शब्दचन्द्रिका॥

भल्ली, स्त्रि, (भल्ल+गौरादित्वात् ङीष्।) भल्लातकः। इति शब्दरत्नावली॥ (अस्याः पर्य्यायः।

"भक्तातर्त्तं शिव शोत्तमवच्चोऽवच्चरोऽधिकः।
तथैवाधिसखो भक्तो वीरहच्च शोपकृत्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भक्तुकः, पुं, (भक्तुक+पृषोदरादित्वात् दीर्घः।) भालूकः। इत्यमरः॥

भक्लूकः, पुं, (भक्षते इति। भक्ष+"उलूकादयश्च।" उणा० ४। ४१। इति ऊकप्रत्ययेन साधुः।) जन्तुविशेषः। भालूक इति भाषा। तत्पर्य्यायः। ऋक्षः २ भल्लः ३ सप्रक्षः ४ दुर्धर्षः ५ भक्लुकः ६ एडकदृष्टिः ७ भाविष्टः ८ दीर्घकेशः ९ चिराद्युः १० दुरुहः ११ दीर्घदर्शी १२। इति राजनिर्घण्टः॥ भालुकः १३ भालूकः १४ ऋक्षः १५ भालूकः १६ भौलुकः १७। इति शब्दरत्नावली॥ (यथा, महाभारते। १२। ११६। ६।
"सिंहव्याघ्रगजाः क्रूरा मत्ताश्चैव महागजाः।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः॥"
कोशस्थप्राणिविशेषः। तद्यथा,—
"गृध्रगह्वनखद्युक्तिग्राह्यभल्लूकप्रभृतयः कोशस्थाः।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
भल्लोकप्रभेदः। (यथास्य पर्य्यायः।
"भल्लोकाको भूतपुष्पश्च पूतिदृष्टो सुनिद्रमः।
दीर्घदन्तश्च कङ्कालो भल्लूकदृष्टकोऽरुणः॥"
इति वैद्यकरत्नमाला॥)
भल्लूरः। इति राजनिर्घण्टः॥

भवं, क्ली, (भवति भूयते वा। भू+अच् अप् वा।) भवम्। इति राजनिर्घण्टः॥ चाकला। इति भाषा॥

भवः, पुं, (भूयते इति। भू+भावे अप्।) जन्म। (यथा, याज्ञवल्क्ये। १। १६४।
"भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः॥"
भवत्यस्मादिति। भू+अपादाने अप्। शिवः। इत्यमरः॥ यथा, श्रुतपथब्राह्मणे। ६।१।३।१५।
"तमब्रवीद् भवोऽसीति तदृषदस्य तन्नामाजरोत्पर्जन्यरूपमभवत् पर्जन्यो वै भवः॥")
स च जलमूर्त्तिः। यथा,—
"भवाय जलमूर्त्तये नमः।"
इति पार्थिवशिवलिङ्गपूजाप्रयोगः॥
(भवति प्रभवत्यनेनेति। भू+अप्।) क्षेमः। (यथा, महाभारते। १। २२१। २८।
"को हि नाम भवेनार्थी साहसेव समाचरेत्॥"
भवति उत्पद्यतेऽस्मिन्निति। भू+आधारे अप्।) संसारः। (यथा, मार्कण्डेये। १८। ७।
"अनवस्थं तयैवेयं देवी सर्व्वभवात्मिका॥")
सत्ता। प्राप्तिः। इति मेदिनी॥

भवकः, पुं, (भवतीति। भू+ण्वुल्।) आग्नीध्रीयकः। इति संक्षिप्तसारः॥

भवक्षरः, पुं, (भवस्य बन्धस्य क्षरः ध्वंसकारकः।) दावानलः। इति शब्दमाला॥

भवत्, त्रि, (भाति विद्यते इति। भा+क्वसुप्रत्ययः।) युष्मदर्थम्। अस्य धातोर्व्वसुप्रत्ययेन निष्पन्नम्। तस्य जित्रूपये रूपम्। भवान्

भवती भवत्। (यथा, मार्कण्डेये देवीमाहात्म्ये। ८५। ५।
"भवतां नाशनायाशु तच्चक्षातु परमापदः॥")
वर्त्तमानार्थम्। इति मेदिनी। ते, १२०॥ अस्य धातोः शतृप्रत्ययेन निष्पन्नम्। तस्य जित्रूपये रूपं भवन् भवन्ती भवत्॥ (यथा, मनौ। १२। ८०।
"चातुर्व्वर्ण्यं त्रयो लोका चत्वारश्चाश्रमाः पृथक्।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति॥")
भवती, स्त्री, (भवत्+ङीप्।) वाग्भेदः। स तु विवाक्तः। इति शब्दरत्नावली॥ दीप्तिमती। यथा। वाल्मीकिकृतगङ्गास्तोत्रम्।
"स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं
प्रार्थये॥"
भवदारु, क्ली, (भवाख्यं भवप्रियं वा दारु।) देवदारुवृक्षः। इति राजनिर्घण्टः॥

भवदीयं, त्रि, (भवत्+"भवतष्ठक्छसौ।" ४।२। ११५। इति छस्। ततः "यस्येति च।" ६।४। १४८। इति भस्य लोपः।) भवत इदम्। युष्मत्सम्बन्धि। यथा, उद्भटे।
"श्रुत्वातिदूरे भवदीयकीर्त्तिं
कर्णौ च तुष्टौ न च चक्षुषी मे।
हृषीविवाहं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय॥"
(यथा, भागवते। ६। १८। ३६।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः॥")

भवनं, क्ली, (भवत्यस्मिन्निति। भू+अधिकरणे ल्युट्।) गृहम्। (यथा, मनौ। ११। १८।
"स त्वन्तु तं घटं प्राप्य प्रविश्य भवनं स्वकम्॥"
प्रासादः। यथा, महाभारते। ३।५४।१६।
"ईश्वरस्य भवनं विविशाते सुपूजितौ॥"
भू+भावे ल्युट्।) भावः। इति मेदिनी॥ (यथा, "जनु प्राणसतो घटस्य भवनं दृश्यते॥"
इति सार्किकाः॥)

भवनाशिनी, स्त्री, (भवं संसारं जन्मादिकं वा नाशयति उत्सारयति नाशयितुं शीलमस्येति वा। नश+णिच्+णिनिः।) सरयूनदी। इति पुराणम्॥

भवनीयं, त्रि, (भवितुमर्हमिति। भू+अनीयर्।) भवितव्यम्। भव्यम्। उत्पत्तार्हम्। इति सुग्धबोधव्याकरणम्॥

भवन्तः, पुं, (भवन्नत्रेति। भू+"दृभूवहिवसीति।" उणा० ३।१२८। इति झच्। स च विद्वद्वति।) कालभेदः। स तु वर्त्तमानः। इत्युणादिकोषः॥ (भान्ति इति। भा+क्वसुप्रत्ययः।) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽयम्॥ (यथा, महाभारते। १। ५७। २।
"कं वै भवन्तः कक्षासौ यस्याहं दूत ईक्षितः॥")

भवन्तिः, पुं, (भू+"सुवो भिच्।" उणा० ३। ५०। इति भिच्।) वर्त्तमानकालः। इत्युणादिकोषः संक्षिप्तसारोणादिवृत्तिश्च॥

भवभूतिः, पुं, (भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा। शिवोपासन-

वेषाञ्च विद्यानुत्पत्तिस्तथात्मम्।) कविविशेषः स च भोजराजस्य पण्डितः। मालतीमाधवादिनाटकर्त्ता च। तत्पर्य्यायः। भूमभः २। इति जटाधरः॥ (यथा, राजतरङ्गिण्याम्। ४। १४४।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु।) महादेवस्य ऐश्वर्य्यञ्च॥

भवत्, [द्] स्त्री, (भवे जन्मादिप्रपञ्चे संसारे दीव्यति अनेनेति भवे जन्मान्ते दीव्यत्यनेन वेति। दिव्+क्विप्।) प्रेतपटहः। इति त्रिकाण्डशेषः॥

भवात्मजा, स्त्री, (भवस्य शिवस्य आत्मजेति।) मनसादेवी। इति शब्दमाला॥

भवादृक्, भवादृक्षः, भवादृग्भः } [ष्] त्रि, युष्मत्सदृशः। भवानिव दृश्यते य इति युष्मत्पदात् भवच्छब्दपूर्व्वकदृशधातोः कर्म्मणि क्विमेव क्विप्टक्सक्प्रत्ययेन निष्पन्नः। इति व्याकरणम्॥

भवानी, स्त्री, भवस्य भार्य्या। (भव+"इन्द्रवरुणभवशर्व्वेति।" ४। १। ४६। इति स्त्रियां ङीष् ततः आनुक् चागम इति।) दुर्गा। इत्यमरः। १।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः।
भवः कामस्तथा सृष्टिर्भवानी परिकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥
(यथा, हरिवंशे भविष्यपर्व्वणि। १६। ६।
"भवानी तत्र मे देव! परिचर्य्यां तदाभवत्॥")।

भवानीगुरुः, पुं, (भवान्याः शिवपत्न्या गुरुः पिता।) हिमालयपर्व्वतः। इति हैमचन्द्रः॥

भवाभीष्टः, पुं, (भवे अभीष्टः।) गुग्गुलुः। इति राजनिर्घण्टः॥

भवाब्धिः, पुं, (भवः अब्धिरिवेत्युपमितसमासः। भव एव अब्धिर्वा।) संसाररूपसमुद्रः। यथा,
"धीरं सदा परिभवप्रभवाब्धिपोतं
सोपानपञ्चकमधिष्ठितमन्तरङ्गम्।
भक्त्यार्पितं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः॥

भवायनी, स्त्री, (भवः शिव एवायनमाश्रयस्थानमस्याः। शिवशिरसि स्थितत्वादस्याश्चथात्वम्।) गङ्गा। इति शब्दरत्नावली॥ (भवायनी लोके॥)

भविकं, क्ली, (भवः प्रभाव ऐश्वर्य्यादिकमित्यर्थः उत्पाद्यत्वेनास्त्यस्येति ठन्।) मङ्गलम्। तद्वति त्रि। इत्यमरः॥

भविकः, त्रि, (भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच्।) अतीतोत्पत्तिकः। भूतः। इति जटाधरः॥

भवितव्यं, त्रि, भवनीयम्। भव्यम्। इति भविष्यत्काले कर्म्मणि भावे च कृत्याईप्रेषाद्युत्साहप्राप्तकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम्। इति व्याकरणम्॥ यथा, वह्निपुराणे।

"न भवद्भ्यामहं द्रोग्धो नार्यं राजापराध्यति।
भवितव्यमनेनैव येनाहं विषयं गतः॥"

भवितव्यता, स्त्री, (भवितव्य+भावे तल्।) भाग्यम्। इति जटाधरः॥ (यथा, कथासरित्सागरे। २७। ८६।

"तन्मम्राक्षीत् तावत् त्वं कथयिष्याम्यहञ्च ते।
यदस्तु कोऽन्यथा कर्त्तुं प्रभुर्हि भवितव्यताम्॥")

भविता, [तृ] त्रि, (भू+द्रौत्यार्थे तृच्।) भवनशीलः। इति भरतः॥ साधु भवनशीलः। इति सुकटः। तत्पर्य्यायः। भूष्णुः २ भविष्णुः ३। इत्यमरः॥ (भविष्यदर्थेऽपि तृच्प्रत्ययः स्यात् यथा, मार्कण्डेये। २४। २६।

"गन्ता भाव्यो भविष्यतीति वर्ज्जयित्वा महालसाम्।")

भविनः, पुं, (भवाय काव्यादिप्रकाशाय इनः सूर्य्यः इव। ततः पृषोदरादित्वात् साधुः।) काव्यकर्त्ता। इति त्रिकाण्डशेषः॥

भविलः, पुं, (भू+"क्षमिकल्यनिमहिभक्षिभक्षिग्रक्षिपिक्षितुक्षिकुकिभूभ्य इलच्।" उणा०। १। ५५। इलच्।) खिङ्गः। इति त्रिकाण्डशेषः। भयः। इति सिद्धान्तकौमुद्यामुणादिपादः॥

भविष्णुः, त्रि, (भू+"सुयजध।" ३।२।१३८। इति इष्णुच्। भवतेर्घातोस्त्रन्दसि विषये तच्छीलादिषु इष्णुच् प्रत्ययो भवतीति काशिका।) भविता। इत्यमरः॥

भविष्यः, त्रि, (भू+लटः सदेति ग्रहस्यट् च ततो विभाषायां एषोदरात् तस्य लोपः।) भविष्यत्कालः। इति हेमचन्द्रः॥ (यथा, हरिवंशे। ८१। २८।

"अयं भविष्ये कथितो भविष्यकुशलैर्द्विजैः॥")

पुराणविशेषे, क्ली। यथा,—

"चतुर्दशं भविष्यं स्यात्तथा पञ्चशतानि च॥"
इति श्रीभागवते १२ स्कन्धे १३ अः॥

(फलविशेषे, क्ली॥)

भविष्यत्, त्रि, (भू+लटः शतृस्यट् च।) कालविशेषः। तस्य लक्षणम्। वर्त्तमानप्रागभावप्रतियोगित्वम्। इति सारमञ्जरी॥ वर्त्तमानकालोत्तरकालीनोत्पत्तिकत्वम्। इति शिरोमणिप्रकाशतपदार्थटीकायां रघुनाथः। तत्पर्य्यायः। अनागतम् २ भवितव्यम् ३ प्रगेतनम् ४ वर्त्स्यत् ५ वर्षिष्यमाणम् ६ आगामि ७ भावि ८। इति राजनिर्घण्टः॥ अद्यतने भवे क्षौ दूरभवे सौ। इति सांप्रदायिकः। यथा श्वो भविता वर्षान्तरे भविष्यति। इति दुर्गादासः॥

भव्यं, क्ली, (भवतीति भूयते इति वा। भू+"भव्य गेयेति।" ३।१।१०८। इति यत्। भव्यादयः शब्दाः कर्त्तरि वा निपात्यन्ते। इति काशिका।) फलविशेषः। चालता इति भाषा॥ तत्पर्य्यायः। भवम् २ भविष्यम् ३ भावनम् ४ वक्रफलम् ५ कोमलफलम् ६ पिच्छिलबीजम् ७। अम्ल गुणाः। अम्लत्वम्। कटुत्वम्। उष्णत्वञ्च। बालस्य तस्य गुणः। वातकफापहत्वम्। पक्वस्य तस्य गुणः। मधुराम्लत्वम्। रुचिकारित्वम्। श्रमभ्रमहरत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"भव्यं स्वादु कषायाम्लं क्षुधामान्द्यविशोषणम्।
तदेव पक्वं दोषघ्नं गुरु ग्राहि विषापहम्॥"
इति राजवल्लभः॥

अस्थि। इति मेदिनी। ये, ४३॥

भव्यं, त्रि, (भवतीति। भू+कर्त्तरि निपातनात् वा यत्।) शुभम्। (यथा, भागवते। ४। १४। ३०।

"भव्याय भव्यवाक्यायां तत्रे विदुर! चक्रुषुः॥")

सत्यम्। योग्यम्। भावि। इति मेदिनी शब्दरत्नावली च॥ (यथा, मार्कण्डेये। ७६। ७।

"भूतभव्यभवन्नाथः प्रसन्न चैतत् अयं द्विज!॥")

श्रेष्ठम्। यथा, भागवते। १। १५। १७।

"यत्पादपङ्कजभवाय भजन्ति भव्याः।"

"भव्याः श्रेष्ठाः।" इति तट्टीकायां स्वामी॥ प्रसन्नम्। यथा, रामायणे। १। ६२। ७।

"स मे नाथो जगन्नाथस्य भव भव्येन चेतसा।"

भव्येन प्रसन्नेन चेतसेति तट्टीकायां रामानुजः॥)

भव्यः, पुं, (भवति उत्पद्यते भू+निपातनात् कर्त्तरि वा यत्।) कर्म्मरङ्गवृक्षः। इति मेदिनी। ये, ४२॥ रसभेदे, पुं क्ली। इति शब्दरत्नावली॥

भव्या, स्त्री, (भव्य+टाप्।) उमा। गजपिप्पली। इति मेदिनी। ये, ४२॥

भष, वृक्के। पिशुनोक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अनुदात्त-सक०-सेट्।) वृक्षः कुक्कुरादिकर्त्तृकशब्दः। भषति स्म। भषत्यनेनेदं खलः खण्डयतीत्यर्थः। भर्त्सने इति प्राचः। भषति स्म पाल्यं शब्देन निर्भर्त्सयतीत्यर्थः। इति रमानाथः। इति दुर्गादासः॥

भषः, पुं, (भवतीति। भष कुक्कुरादि शब्दे+अच्।) कुक्कुरः। इति रत्नमाला॥

भषकः, पुं, स्त्री, (भषतीति। भष+"कृञ् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणा० २। ३२। इति कुन्।) कुक्कुरः। इत्यमरः। २। १०। २२॥

भषजं, क्ली, (भष्+क्युट्।) दशनम्। कुक्कुरशब्दः। इति हेमचन्द्रः॥

भषा, स्त्री, सर्षपशोरी। इति रत्नमाला॥

भषी, स्त्री, (भष+स्त्रियां जातित्वात् ङीष्।) शुनी। इति शब्दरत्नावली॥

भस, र लि द्युतौ। भर्त्सने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सक० च सेट्।) र वैदिकः। लि, बभस्ति। इति दुर्गादासः॥

भसत्, क्ली, (बभस्तीति। भस्+"शृदृभसोऽदिः।" उणा० १। १२६। इति अदिः।) काष्ठम्। अश्मसंज्ञम्। अशनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

भसत्, [द्] स्त्री, (भस+अदिः।) भास्करः। योनिः। इति मेदिनी॥ सांवत्सरः। आरक्षवर्त्मनी। इत्यमरः। २। ४। १२३॥ काशः। इति त्रिकाण्डशेषः॥

भसनः, पुं, (बभस्तीति। भस्+ल्युः।) अमरः। इति भूरिप्रयोगः॥

भसन्नः, पुं, (बभस्तीति। भस+घञ्बाहुलकात् भस्च्।) काशः। इति त्रिकाण्डशेषः॥

भसितं, क्ली, (भस्+क्त।) भस्म। इति हेमचन्द्रः॥ (यथा, शिवपुराणे वायुसंहितायाम्। २६। ४१।

"चन्दनं वामदेवाख्ये हरितालञ्च गौरवे।
ईशाने भसितं केचिदालेपनमितीडयम्॥")

भसत्चक्रः, पुं, (भासां नक्षत्राणां चक्रः।) दैवज्ञः। इति शब्दरत्नावली॥

भस्का, स्त्री, (भस्यते इति। भस दीप्तौ+अन्+टाप्। भस्का ततः स्वार्थे कन्। "भस्त्रेषाजाङ्घेति।" ७।३।४७। इति इत्वं च। स्त्रियां योऽकारस्तस्य इत्वं न भवति उदीचामाचार्य्याणां मतेन। इति काशिका।) चर्म्मप्रसेविका। इति शब्दरत्नावली॥

भस्त्रा, स्त्री, (भस्यतेऽनयेति। भस+"हुयमाभ्रस्जिभ्यस्त्रन्।" उणा० ४। १५७। इति त्रन् अजादित्वात् टाप्।) अग्निदीपकचर्म्मनिर्म्मितयन्त्रविशेषः। भाथी इति याँता इति च भाषा। तत्पर्य्यायः। चर्म्मप्रसेविका २। इत्यमरः। २। १०। ३३॥ चर्म्मप्रसेवकः ३। इति भरतः॥ भस्त्राका ४ भस्त्रका ५ भस्त्री ६। इति शब्दरत्नावली॥ भस्त्रिका ७। इति व्याकरणम्॥ (यथा, भागवते। ६। २०। २१।

"माता भस्त्रा पितुः पुत्रो येन जातः स एव सः।
भरस्व पुत्रं दुष्मन्त! मावमंस्थाः शकुन्तलाम्॥")

भस्त्राका, स्त्री, भस्त्रा। इति शब्दरत्नावली॥

भस्त्री, स्त्री, (भस्यतेऽनयेति। भस्+त्रन्। गौरादित्वात् ङीष्।) भस्त्रा। इति शब्दरत्नावली॥

भस्म, [न्] क्ली, (बभस्तीति। भस् भर्त्सदीप्त्योः+"सर्व्वधातुभ्यो मनिन्।" उणा० ४। १४४। इति मनिन्॥ दग्धकाष्ठादिविकारः।) शिवाङ्गभूषणम्। छाइ इति भाषा। यथा,—

"अस्नाङ्गभूषणं भस्म विभूतिर्भूतिरङ्ग तु।"
इति शब्दरत्नावली॥

तद्यथा कामदेवशरीरजम्। यथा,—

"प्रसीद सर्व्वभूतेश! भक्ता त्वन्मयता वयम्।
इति स्तुवतां तेषाममराणां तदानघः।
ललाटचक्षुःसम्भूतो भस्माकार्षीज्जगोभवम्॥
दग्ध्वा कामं तदा वह्निर्ज्वालामालातिदीपितः।
संस्तम्भितोऽथ विधिना चरं गन्तुं शशाक न॥
महादेवोऽथ तद्भस्म मनोभवशरीरजम्।
आदाय सर्व्वगात्रेषु भूतिशेषं तदाकरोत्॥
शेषेणैवाखिलं भस्माशेष यमादाय तदा हरः।
जगतोऽनर्थदे काले विधाय विधिवज्जले॥"
इति वाह्निकापुराणे ४१ अध्यायः॥

भल्लक्षणं यत्र विषक्षाणामज्ञानं तत्संज्ञेयज्ञानम्। यथा,—
"आयुर्वेदं भल्लना ज्ञानं वायवं गोरजः स्मृतम्।"
इति वाग्भटः॥
शिवपूजार्थं ललाटे तस्य धारणमावश्यकम्।
यथा,—
"विना भल्लशिरपूर्वं च विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥"
इत्याह्निकतत्त्वम्॥
तेन कांस्यमुद्दिश्येषा,—
"अम्लवर्गैरमक्ष्याय; कांस्यं शुध्यति भल्लना।
अम्लक्षाल्यच रैवच पुनःपाकेन रत्नवयम्॥"
इति शुद्धितत्त्वम्॥*॥
अक्षरीविकारः। यथा,—
"शुक्लेराधिकनामेषो भल्लाक्षोऽक्षरीवेक्षणम्।
अक्षर्या; शुक्लेरा क्षेया तुल्यलक्षणवेदना॥"
इति सुश्रुते निदानस्थाने अक्षरीनिदानम्॥
भल्लकं, क्ली, (भल्ल+संज्ञायां कन्।) रोगभेदः। भल्लकोट इति ख्यातः। विड्गः। (यथास्य पर्य्यायः।
"अनुज्ञं भल्लकं रेणुः क्रिमिघ्नं चित्रलक्षुजम्।
क्रिमिघ्नच्च विड्गच्च गर्हभं तच्च केवलम्॥"
इति वैद्यकरत्नमालायाम्॥)
कलधौतम्। इति मेदिनी। के, १९३॥*॥
भल्लकस्य निदानसंप्राप्तिपूर्व्वकं लक्षणमाह।
"कट्टादिरूक्षान्नसुजां नराणां
क्षीणे कफे मारुतपित्तवृद्धौ।
अतिप्रवृद्धः पवनान्वितोऽग्नि-
र्भुक्तं जलाद्वस्य करोति यस्मात्।
तस्मादसौ भल्लकसंज्ञकोऽभू-
दुपेक्षितोऽयं पचते च धातून्॥"
भल्लकस्य सोपद्रवमरिष्टमाह।
"छर्द्यरोचकदाहमूर्च्छादीन् लक्षैर्वाद्यभिसञ्जयान्।
पक्वान्नमांसघृताद्यांश्च क्षिप्रं नाद्यादिदं ध्रुवम्॥"
इति भावप्रकाशः॥
(अत्र तीक्ष्णाग्निद्यास्याने विजयेनोक्तम्। तीक्ष्णत्वहेतुना भल्लकस्यावरोधः। अत्यन्ततीक्ष्णाग्निरेव हि भल्लकमित्युच्यते॥ यदुक्तं चरके चिकित्सास्थाने ऊनविंशेऽध्याये। भल्लकचिकित्सामाह।
"वरे क्षीणकफे पित्तं कुपितं मारुतानुगम्।
क्षीणत्वा पावकस्थाने बलमग्नेः प्रयच्छति॥
तथा तस्यबलो दीप्तो विवृद्धो वानिलोऽनलः।
परिभूय पचत्यन्नं तेनान्नादास्य सुदुर्मुदुः॥
पक्वान्नं सततं धातून् शोषितादीन् पचत्यपि।
ततो दौर्बल्यमाप्नोति क्षुत्क्षोपनमेवरम्॥
मुक्तेऽन्ने लभते ग्लानिं जीर्णमात्रे प्रताम्यति॥"
"तमग्निं गुरुभिस्तस्यातीसमधुरविष्वलैः॥
अन्नपानैर्नेवेच्छाग्निं दीप्तमग्निमिवाम्बुभिः।
सुदुर्मुदुरजोर्जोऽपि भोज्यान्यस्योपहारयेत्॥
निरिन्धनोऽनलं ज्ञात्वा यथैवं न विषादयेत्।
मक्षिकार्जेश्वरं ज्ञात्वा तथिभक्षान्नदं यते॥"
इति श्रीकालिकापुराणे ८१ अध्यायः॥
भल्लाटकः, पुं, (भल्ल आटयते अर्द्यते इति। आ+अट+बाहुलकात् घञ्।) कर्पूरः। इति चिकित्साशेषः॥ (विषयोऽस्य कर्पूरशब्दे ज्ञातव्यः॥)
भा, ल च दीप्तौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-अक०-अनिट्।) ल, भाति। च, भा। इति दुर्गादासः॥
भा, स्त्री, (भा दीप्तौ+"विड्विदादिभ्योऽङ्।" ३। ३। १०४। टाप्।) प्रभा। दीप्तिः। इत्यमरः। १। ४। ३४॥ (यथा, राजसूयसंहितायाम्। १०। १२।
"भाये दार्व्वाहारमिति॥")
भाः, [स] पुं, (भासते इति। भास दीप्तौ+"भासभासधुविद्युतोर्जिपृच्छ्यावस्तुवः क्विप्।" ३। २। १७७। इति क्विप्।) सूर्य्यः। इति चिकित्साशेषः॥ (स्त्री, दीप्तिः। इत्यमरः। १। ३। ३४॥ यथा, ऋग्वेदे। १। ४६। १०।
"अभूद्भा उ अंशवे हिरण्यं प्रति सूर्य्यः॥")
भाकुटः, पुं, (भया दीप्त्या कुटतीति। कुट+क।) मनुष्यविशेषः। भैकटी इति भाषा॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। दग्धत्वम्। श्लेष्मकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः॥
भाकुटः, पुं, (भायुक्ताः कुटाः शिखराणि यस्य।) पर्व्वतभेदः। मनुष्यभेदः। इति मेदिनी। टे, ५३॥
भाकोषः, पुं, (भानां दीप्तीनां कोष इव।) सूर्य्यः। इति चिकित्साशेषः॥
भाक्तं, त्रि, (भक्तेः गौण्यावृत्तेरागतमिति। भक्ति+अण्।) पारिभाषिकम्। गौणम्। लाक्षणिकम्। औपचारिकम्। यथा। "तत्त्वेवं परत्र सप्तमे मासि क्रियमाणस्य कर्म्म भाक्तमाविकलम्। इति पैठीनसिः।" इति तिथ्यादितत्त्वम्॥ (भक्तस्येदमिति तस्येदमित्यण्।) भक्तमस्मै दीयते नियुक्तमिति च॥ (भक्तमस्मै दीयते नियुक्तमिति। भक्त+"भक्तादण्यतरस्याम्।" ४। ४। ६८। इत्यण्। अन्नेन पोष्ये च॥)
भाक्तिकः, त्रि, (भक्तमस्मै नियुक्तं दीयते इति। भक्त+"भक्तादण्यतरस्याम्।" ४। ४। ६८। इति पक्षे ठक्।) अन्नेन पोष्यः। भक्तमस्मै दीयते। इति सिद्धान्तकौमुदी॥
भागः, पुं, (भज्यते इति। भज भागसेवयोः+कर्म्मणि घञ्।) अंशः। इत्यमरः। २। ८। ८८॥ रूप्यार्द्धकः। भाग्यम्। एकदेशः। इति शब्दरत्नावली॥ राशेस्त्रिंशद्भागैकभागः। यथा,—
"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरवचनम्॥
(भज+भावे घञ्। भजनम्। भगानामैश्वर्य्याणां समूहः इति अण्। ऐश्वर्य्यसमूहः॥)
भागधेयं, क्ली, (भाग एव। भाग+"भागकृतागमश्च घेयः।" इति घेयप्रत्ययः। अभिधानात्पुंसकत्वम्।) भाग्यम्। इत्यमरः। २। ८। २८॥

गवेयः, पुं, (भागेन घोषते इति। घा + कर्म्मणि यत्।) राजकरः। इत्यमरः। २। ८। २७॥
दायादः। इत्यजयपालः॥

भागवतं, क्ली, (भगवतो भगवत्या वेदम्। भगवत् + तस्येदमित्यण्।) अष्टादशपुराणान्तर्गतमहापुराणविशेषः। स च वेदव्यासप्रणीतद्वादशस्कन्धद्वात्रिंशत्तत्रिशतसाध्यायसमन्वितद्वादशसहस्रश्लोकसंख्याक-भगवन्माहात्म्यवर्णन-प्रधानको ग्रन्थः। यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे।
"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्।
प्रौष्ठपद्यां पौर्णमास्यां स याति परमं पदम्॥
अष्टादशसहस्राणि पुराणं तत् प्रकीर्त्तितम्।"
पुराणान्तरे च।
"यस्मोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः।
यत्रयोपत्रह्मविद्या यत्र वृत्रवधस्तथा॥
गायत्र्या च समारम्भस्तद्वै भागवतं विदुरिति॥"
पद्मपुराणे च अम्बरीषं प्रति गौतमवचनम्॥
"अम्बरीष! शुकप्रोक्तं नित्यं भागवतं शृणु।
पठस्व स्वसुखेनापि यदीच्छसि भवच्छयमिति॥"

इति श्रीभागवतटीकायां श्रीधरस्वामी॥

(तत्र तावत् पुराणेषु भागवतद्वयं प्रसिद्धम्। एकं महापुराणान्तर्गतमपरमुपपुराणान्तर्गतम्। लोकेऽप्युपलब्धौ द्वयोर्देवीभागवतनाम्ना विष्णुभागवतनाम्ना चाख्यैव। तत्रैकं महापुराणान्तर्गतमन्यदुपपुराणान्तर्गतमित्यपि निर्व्विवादमेव। तथापि किं देवीभागवतं महापुराणमन्यदुपपुराणमथवा विष्णुभागवतं महापुराणमन्यदुपपुराणमिति संशये कैश्चित् विष्णुभागवतमेव महापुराणमिति वदन्ति। कैश्चित् देवीभागवतमेव महापुराणमिति वदन्ति। तत्र प्रथमपक्षैकदेशिनः कैश्चिदुपपुराणेषु द्वितीयं भागवतं नाम्न्येव महापुराणेष्वेकं भागवतं प्रसिद्धम्। तच्च विष्णुभागवतमेव न देवीभागवतम्। देवीभागवतन्तु निर्म्मूलमेवेति वदन्ति। द्वितीयपक्षैकदेशिनोऽपि विष्णुभागवतं वोपदेवप्रणीतमिति वदन्ति। वस्तुतस्तूभयोरपि पुराणयोः पुराणमतभेदेन महापुराणत्वमुपपुराणत्वञ्च। ननु महापुराणेष्वेकं भागवतं प्रसिद्धम्। तदुपपुराणेषु द्वितीयमस्तीति चेन्न। कूर्म्मगरुडपाद्मादिमहापुराणेषु द्वितीयस्य ग्रन्थस्य परिगणनात्। तथाहि हेमाद्रौ दानप्रस्तावे कूर्म्मपुराणीयाष्टादशपुराणानुक्रमे,—
"अन्यान्युपपुराणानि मुनिभिः कथितानि तु।
आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्॥"
इत्यादि॥
"पराशरोक्तं प्रवरं तथा भागवताह्वयम्॥" इति। तथा गारुडे तत्त्वरहस्ये द्वितीयांशे धर्म्मकाण्डे प्रथमाध्याये प्रथमतो महापुराणानां सात्त्विकादिभेदेन विभागमुक्त्वा लघुपुराणानां सात्त्विकादिभेदेन विभागप्रदर्शनपरे ग्रन्थेऽप्युक्तम्।

"पुराणं भागवतं दौर्गं नन्दिप्रोक्तं तथैव च।
मानुषत्वं रौद्रकल्पं भैरवञ्च तथैव च॥"
इति॥
तथा तत्पूर्व्वमपि।
"विष्णुधर्म्मोत्तरे चैव तच्च भागवतं तथेति॥"
तच्च भागवतं तथेति पाठे तच्च भागवतमित्यर्थः। तदुविशेषणेन चोत्तमत्वं सूचितम्। तथा पाद्मे भूकूर्म्मपरीक्षायाम्।
"आद्यं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।
इत्यादि॥
"तथैव गदितं राम! पुराणं कापिलं तथा।
वाराहं ब्रह्मवैवर्त्तं शुकुनेषु प्रशस्यते।
शैवं भागवतं दौर्गं भविष्योत्तरमेव च॥" इति॥
तथा पाद्मे भागवतमाहात्म्ये एकोनविंशेऽध्याये उपपुराणेषु।
"शैवमादिपुराणञ्च देवीभागवतं तथा॥" इति॥
तथा मधुसूदनसरस्वतीकृतसर्व्वशास्त्रार्थसंग्रहेऽप्युपपुराणमध्ये भागवतं परिगणितम्। नागोजीभट्टादिभिश्च धर्म्मशास्त्रग्रन्थेष्वेवमन्यैरपि निबन्धकारैरिति। ननु देवीभागवतस्य।
"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्॥"
इति प्रथमाध्यायस्थस्ववचनेनाष्टादशमहापुराणेषु पञ्चममिदं पुराणमिति स्वस्य महापुराणत्वं बोधयतः कथमन्यपुराणमुपपुराणत्वं बोधयेन्नूनमेवं क्वचिद्दृश्यरमिति चेन्न। नारदीयगरुडवायव्यादित्यपुराणानां स्वसुखेनान्यसुखेन वा महापुराणत्वेन गीयमानानामन्यपुराणेषूपपुराणत्वस्य व्यवस्थापनात्। पुराणमतभेदेन कस्यापि पुराणस्य महापुराणत्वोपपुराणत्वसिद्धया तद्विरोधाभावात्। पुराणभेदेन मतभेदस्तु बहुशः प्रसिद्धः। वैष्णवपुराणेषु सात्त्विकत्वं शैवपुराणेषु तामसत्वं वैष्णवपुराणमतेन। शैवपुराणेषु सात्त्विकत्वं वैष्णवपुराणेषु तामसत्वम्।
"दश शैवपुराणानि सात्त्विकानि विदुर्बुधाः।
तामसानि च चत्वारि वैष्णवानि प्रचक्षते॥"
इति स्कान्दे॥
शैवपुराणमतेनैवं प्रकारान्तरेति। तथाहि नारदीयस्य पुराणस्य स्वान्तर्गतमहापुराणग्रन्थसङ्ख्या स्वसुखेनैव स्वात्मनो महापुराणत्वं बोधयतः।
"महत्यं भद्रयं चैव ब्राह्मत्रयं वचतुष्टयम्।
आलिंपाग्निपुराणानि कूर्म्मलिंगवराहमेव च॥"
इति वचनेन वक्ष्यमाणसूत्रसपुराणवचनेन च महापुराणत्वमहिभूतत्वं बोध्यते। आलिंपाग्नीत्यत्राऽऽलिशब्देनादित्यपुराणं तथा शैवपुराणस्य स्वसुखेन स्वस्य महापुराणत्वं बोधयतो महत्यं भद्रयमित्येव यत्नं तद्महिभूतत्वं बोधयति। ननु वायव्यं पुराणमेव शैवं शिवप्रतिपादकत्वात्तस्य च वचतुष्टयपदेन संग्रहात्तदुदाहरणं न सम्भवतीति चेन्न। सूतसंहितायां।
"ब्राह्मञ्च वैष्णवं पाद्मं शैवं भागवतं तथा।
भविष्यं ब्रह्मवैवर्त्तं मार्कण्डेयञ्च वामनम्॥

आग्नेयं वायवं मात्स्यम्।" इति वचनेन वायवपुराणयोः परस्परं पृथक्त्वेन परिग[illegible] तथा वायवपुराणस्य स्ववचनेन [illegible] पुराणत्वं बोधयतो वक्ष्यमाणशैवपुरा[illegible] महापुराणबहिर्भूतत्वं बोधयति। त[illegible] पुराणस्यापि आलिंपाग्निपुराणानीति [illegible] पुराणसम्मतपाठेन महापुराणत्वम्। लिङ्गकूर्म्मस्कान्दमिति क्वचित् पुराणसम्म[illegible] महापुराणबहिर्भूतत्वं यथा चैतेषां क्वचित् पुराणेषु महापुराणत्वेन [illegible] पुराणत्वेन ग्रहणम्। तथा देवीभागव[illegible] भविष्यतीति को विरोधः। मतभेदेनोभ[illegible] वचनयोः प्रमाणत्वात्। ननु अन्यान्यु[illegible]णानि मुनिभिः कथितानि लिङ्गादि[illegible] रुपपुराणानि व्यासान्यमुनिप्रणीतान्येव [illegible] देवीभागवतं तु व्यासप्रणीतमेवेति। तस्य [illegible] पुपुराणेष्वन्तर्भाव इति चेन्न। नारद[illegible] वायव्यादित्यपुराणेषु व्यासप्रणीतत्वेऽपि क[illegible] पुराणमते उपपुराणत्वदर्शनान्महापुराणत्व[illegible] स्वीकारात्। प्रायशः कथा सम्भिप्राये[illegible] तद्वचनम्। इत्थं भागवतद्वयस्य महापु[illegible] राण-मध्ये उपपुराणमध्ये च सत्त्वसिद्धौ कस्य [illegible] पुराणस्य मते किं भागवतं महापुराणान्तर्गत[illegible] चेदुच्यते। शैवपुराणमते मात्स्यपुराणम देवीभागवतमेव महापुराणमिति। त[illegible] शैवपुराणे उत्तरखण्डे मध्यमेश्वराभि[illegible] ये ग्निवाक्षश्वरेण व्यासेन महापुराणानि [illegible] तानीत्युक्त्वानन्तरं तेषां नामान्यष्टादशोक्ता तेषां योगरूढ्यानां नाम्नां निर्व्वचनं तत्रैव कृतम्। तद्यथा,—
"यत्र ब्रह्मा स्वयं तत्त्वं ब्रह्मा साक्षाच्चतुर्म्मुखः।
तस्मात्तद्ब्राह्मं समाख्यातं पुराणं प्रथमं शुभे!॥"
तत्त्वं इति सुनिसम्बोधनम्।
"पद्मकल्पस्य माहात्म्यं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातं पुराणञ्च द्वितीयकम्॥
पराग्नरज्ञानं यत्तु पुराणं विष्णुबोधकम्।
तदेव व्यासकथितं पुत्रपित्रोरभेदतः॥
यत्र पूर्व्वोत्तरे खण्डे शिवस्य चरितं बहु।
शैवमेतत् पुराणं हि पुराणज्ञा वदन्ति च॥
भगवत्याश्च दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं तत्तु देवीपुराणकम्॥
नारदोक्तं पुराणन्तु नारदीयं प्रचक्षते॥
यत्र ब्रह्माभवत्तत्त्वं! मार्कण्डेयो महामुनिः।
मार्कण्डेयपुराणं हि तदाख्यानञ्च सम्मतम्॥
अग्नियोगात्तदाग्नेयं भविष्योक्तैर्भविष्यकम्।
विवर्त्तनाद्ब्रह्मणस्तु ब्रह्मवैवर्त्तमुच्यते॥
लिङ्गस्य चरितोक्तत्वात् पुराणं लिङ्गमुच्यते।
वराहस्य च वाराहं पुराणं द्वादशं शुभे!॥
यत्र स्कन्दः स्वयं वक्ता श्रोता साक्षात्तमेश्वरः।
तत्तु स्कान्दं समाख्यातं वामनस्य तु वामनम्॥
कौर्म्मं कूर्म्मस्य चरितं मात्स्यं मत्स्यस्य
कौर्त्तितम्।

मंत्रकल्पं स्वयं वक्ता यत्तद् गायत्रसंज्ञकम् ॥
ब्रह्माक्षरचरितोत्पत्तात् ब्रह्माकं परिकीर्तितम् ॥"

अत्र क्वचिद्वक्तृसम्बन्धः क्वचिच्छ्रोतृसम्बन्धः क्वचित्प्रतिपाद्यसुरथदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्वरसमेव दर्शितम्। तत्र भागवतनाम्नो निर्वचनवाक्यमेतत्।

"भगवन्नाम्न दुर्गायाश्चरितं यत्र विद्यते।
तत्तु भागवतं प्रोक्तं न तु देवीपुराणकम् ॥"

अनेन च वाक्येन भगवत्या इदं भागवतमिति व्युत्पत्त्या ग्रन्थप्रतिपाद्यसुरथदेवताचरितसम्बन्धः। प्रवृत्तिनिमित्तमिति स्वरसमेव दर्शितम्। का सा भगवतीत्यपेक्षायामाह दुर्गाया इति। तत्तु भागवतं तु शब्दो निश्चयार्थकः। तदेव भागवतपदवाच्यं प्रोक्तमित्यर्थः। न तु पुराणान्तरमतप्राप्तं विष्णुभागवतं महापुराणान्तर्गतं भागवतमित्यर्थे इति श्रीवपुराणेन स्वमतं प्रदर्शितम्। कश्चिदेतत् पुराणान्तरमतेन उपपुराणं जानीयात्तन्नाह न तु देवीपुराणकमिति। पुराणकमित्यत्र कप्रत्ययोऽल्पार्थकः। अल्पे इति स्मरात् पुराणकमल्पं पुराणमिति यावत्। देव्याः पुराणकं देवीपुराणकम्। यदिदमुक्तं तद्देव्या उपपुराणं नैवास्तीत्यर्थः। अनेन च वाक्येनान्यस्य महापुराणत्वनिषेधेन स्वाभिप्रेतस्य च उपपुराणत्वनिषेधेन श्रीमद्देवीभागवतस्यैव महापुराणत्वं बोधयति व्यासः। सुरथेन भगवतीचरितप्रतिपादकस्य महापुराणमध्ये कस्यचित् पुराणस्यान्यस्याभावात्। ननु नारदादिपुराणवचनबलात् विष्णुभागवतस्य महापुराणान्तर्गतत्वे निश्चिते निश्चिते तद्बलात् भागवतद्वयस्य मतभेदेन महापुराणत्वकल्पनापेक्षया यत्किञ्चित् भगवतीचरितस्यान्विच्यने ग्रहणेनानेन वचनेन विष्णुभागवतनाम्न एव निरुक्तिः स्तुतेति कुतो न कल्प्यते। वर्ण्यते च विष्णुभागवते दशमस्कन्धे किञ्चिद्दित्यवाप्यस्याचरितमिति चेन्न। तथा सति सुनेर्विष्णुभागवतविषय एव तात्पर्यसत्त्वे भगवत इदं भागवतमित्येव व्युत्पत्तिं कुर्यान्नहि कश्चिन्मुनेः शिरसि भारः स्यादिति। यत् स्वाभिप्रेतां युक्तां निरुक्तिं त्यक्त्वा निष्प्रयोजनोऽनभिप्रेतां निरुक्तिं करोति। किञ्च सर्वत्रैतद्वचनप्रकरणे

"यत्र पूर्वोत्तरे स्कन्धे श्रीवस्य चरितं बहु।
श्रीवमेतत् पुराणं हि पुराणज्ञा वदन्ति च ॥"

इति बहुवचनेनैकुचरितसुरथचरितसम्बन्धरूपप्रवृत्तिनिमित्तस्यैवाभिप्रेतत्वं सुनेरवसीयते। मतभेदेन पुराणभेदकल्पना तु नार्षेव नवीनाक्षि। पूर्वोक्तयुक्त्या नारदश्रैववायव्यादिपुराणेष्वन्यत्रापि सत्त्वात्। अस्तु वा गौरवं नहि तद्बलात् मुनेस्तात्पर्यमन्यथाकर्तुं कश्चिदीष्टे। तस्मात् पूर्वोक्तं तात्पर्यं विहायान्यतात्पर्येणान्यार्थकरणं महासाहसमेव। ननु लक्षणवाक्यमेतत्। ततश्च दुर्गाचरितं यत्र वर्ण्यते तद्भागवतमित्यर्थः। तच्च न देवीभागवतं भवितुमर्हति। तस्य तल्लक्षणलक्ष्यत्वे न तु देवीपुराणकमिति निषेधविषयत्वेन निषेधविधोः समानविषयत्वापत्तेः। किन्तु विष्णुभागवतमेव। ननु तथाप्येतल्लक्षणमन्यपुराणेष्वतिप्रसक्तमिति चेन्न। यथा वृत्रासुरवधलक्षणमन्यपुराणेषु प्रसक्तमपि यथा लक्षणत्वेन गृहीतम्। तद्वदत्रापि सम्भवादिति चेन्न। पूर्वोक्तनिरुक्तिवचनप्रकरणस्थत्वविरोधात्। किञ्च लक्षणवाक्यमेतदिति पक्षेऽप्येतस्य लक्षणस्य महापुराणोद्देशेनैव सम्भवादुपपुराणेष्वस्य प्रसक्त्यभावाद्देवीपुराणकालिकापुराणयोरुपपुराणत्वस्य निश्चितत्वात् तत्रैतल्लक्षणस्य प्रसक्तिरेव नास्तीति नन्वस्तु देवीपुराणकमिति निषेधो व्यर्थ एव स्यात्। तस्माद्देव तद्वचनस्य पूर्वोक्त एवार्थः। किञ्च लक्षणवाक्यमेतदिति पक्षे यत् किञ्चिच्चरितं गृह्यते उत यावच्चरितम्। यत्किञ्चिच्चरितस्य सर्वमहापुराणेषु सम्भवाद्देवीपुराणमात्रनिषेधेन न निर्वाहः। तस्माद्देवीपुराणस्यैव निषेधसारस्यात्र भगवतीचरित्रमेव ग्राह्यम्। तदा तव नाभीष्टार्थसिद्धिः। मुख्यत्वेन विष्णुभागवते दुर्गाचरितस्याभावान्नमेव स्वभीष्टार्थसिद्धिः। निषेधविधोः समानविषयकत्वरूपं दूषणन्तु नैव सम्भवति। प्रकरणबलात् तात्पर्ये निश्चिते तद्विधयं विहायैव निषेधप्रवृत्तेः। वृत्रासुरवधोपलक्षणं तु गायत्र्यारम्भविशिष्टमिति न तदतिप्रसक्तं तस्मात् पूर्वोक्त एव तद्वचनार्थ इति तद्वचनाद्देवीभागवतं महापुराणं न तु विष्णुभागवतमिति श्रीवपुराणमतम्। अत्र च नियमद्वयस्य पूर्वोक्तस्य सम्भवाद्विष्णुभागवतविषये तथा नियमद्वयाभावादिदं श्रीवपुराणमतमेव सुरथमन्यपुराणमतं लोकदृष्टीति नियमद्वयप्रदर्शकव्यासवाक्येन स्पष्टमेव बोधितमिति सुधियो विभावयन्तु। किञ्च।

"श्रीवमादिपुराणञ्च देवीभागवतं तथा।"

इति पाद्मवचनसंवादितया,—

"नवरात्रे तु देवेशि! दौर्गं भागवतं पठेत्।
जपेत् सप्तशतीं चण्डीं नियमेन समाहितः॥"

इति दुर्गातन्त्रिकीकृतयामलवचनेन तथा,—

"देवीभागवतं नित्यं पठेद्भक्त्या समाहितः।
नवरात्रे विशेषेण श्रीदेवीप्रीतये सदा॥"

इति महेशठक्कुरकृतदुर्गाप्रदीपधृतदेवीयामलवचनेन च सप्तमाग्रस्य देवीभागवतस्य सर्वोपपुराणमध्ये एव निवेशात्।

"तत्र भागवतं पुण्यं पञ्चमं वेदसम्मितम्।"

इति प्रथमस्कन्धस्थस्य महापुराणेषु पञ्चममिदं पुराणमित्यर्थकस्य देवीभागवतोक्तवचनस्य निरालम्बनत्वादप्रामाण्यापत्तेः। मन्यते तु तस्य विषयलाभान्नाप्रामाण्यं तद्वचनप्रामाण्यादपि देवीभागवतमेव महापुराणमिति। किञ्च

"यदिदं कालिकाख्यं तन्मूलं भागवतं स्मृतम्।"

इति वचनं तदपि देवीभागवतस्यैव महापुराणत्वं बोधयति। तथाहि।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तथा तेभ्यो विनिर्गतम्॥"

इति मात्स्यवचनेनोपपुराणानां महापुराणमूलकत्वनियमादिदं कालिकापुराणं किमुपपुराणमूलकमित्याकाङ्क्षायां तन्निवर्तनकमिदं वाक्यं यदिदं कालिकाख्यं पुराणं तन्मूलं तस्य मूलं भागवतं विदुरिति हि तस्यार्थो निबन्धकारैर्दर्शितः। यथान्यान्युपपुराणान्येकैकशो महापुराणान्निर्गतानि तद्वदिदं भागवतादुत्पन्नमिति यावत्। तच्च भागवतं न वैष्णवं तन्मूलं भवितुमर्हति। देव्युपपुराणस्य देवीपुराणमूलकत्वे एव सामञ्जस्यात्। श्रीवोपपुराणानां श्रीवेभ्य एव वैष्णवोपपुराणानां वैष्णवेभ्य एवोत्पत्तिदर्शनादिति देवीभागवतमेव तन्मूलमिति तस्य महापुराणत्वं सिद्धम्। यत्र तु क्वचित् क्वचित् महापुराणमूलकत्वमप्रसिद्धं तत्र यथायोग्यमनुमेयमिति। किञ्चादित्यपुराणेऽप्यादि देवीभागवतमेव महापुराणम्। तथाहि आदित्यपुराणे रक्तासुरवधप्रस्तावे।

"या जघ्ने महिषं दैत्यं क्रूरं वृत्रासुरं तथा।
सा त्वं रक्तासुरं हत्वा स्वाराज्यं ते प्रदास्यति॥"

इति वचनम्। अनेन वचनेन देवीभागवते स्वसम्मतिर्दर्शिता। न हि देवीभागवतातिरिक्तसर्वपुराणेषु देवीतन्त्रतो वृत्रासुरवधः क्वचिदप्यस्ति। इन्द्रतन्त्रस्यैव तस्य सत्त्वात् केवलं देवीभागवत एव देवीतन्त्रतः सोऽस्ति। तदभिप्रायेण तु देवीभागवते स्वसम्मतिर्दर्शितेति युक्तमेव। अनन्तरञ्च तत्रैव पुराणदानप्रस्तावे।

"ददाति सूर्यभक्ताय यस्तु भागवतं द्विजाः।
सर्वपापविनिर्मुक्तः सर्वव्याधिविवर्जितः॥
लोकेऽस्मिन्नृपतिं साग्रमन्ते वैष्णवतां पदम्॥"

इति पठितम्॥

अत्र च स्वसम्मतं भागवतमेव ग्रहीतुमुचितम्। किञ्चेदं वचनं देवीभागवतपक्षे एव स्वरसतः सङ्गच्छते। प्रथमश्लोके एकादशद्वादशस्कन्धयोश्च सविस्तरं गायत्रीविधानसहस्रनामादेः कथनात् सूर्यस्य गायत्रीदेवतात्वात्। तद्भागवतपक्षे तु वैकुण्ठं गच्छेदित्येव वदेदिति। किञ्च

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति। वेदे त्रिपदा गायत्रीति गायत्रीलक्षणं श्रूयते। तेन च त्रिपाच्छन्दोऽधिकृत्य यत्र धर्मविस्तरो वर्ण्यते तद्भागवतमिति तदर्थः। त्रिपाच्छन्दश्च देवीभागवते प्रथमश्लोके।

"सर्वचैतन्यरूपां तामाद्यां विद्याञ्च धीमहि।
बुद्धिं या नः प्रचोदयात्॥" इति श्रूयते।

न विष्णुभागवते तच्छब्दोऽस्ति तुल्यार्थत्वसम्भवे भागवतीपदस्य लक्षणया धीमद्दीलार्थकरणेन विष्णुभागवतपरत्वकल्पनमस्य वचनस्य तु बाधकमेव। क्वचित्पुराणेषु यदि तादृग्वाक्येव विष्णुभागवतपराणि वचनानि सन्ति। तत्र गत्यन्तराभावादस्तु लक्षणा। उदासीने मात्स्यवाक्ये तु तुल्यविषयत्वसम्भवे बाधुचिता। यत्पाद्मादिकपुस्तकेषु क्वचित्तुच्चरणश्लोकोऽपि दृश्यते तथापि सम्प्रत्यां गुप्तवतीटीकाकारादिभिर्लिखितात्श्लोकस्यैव बाधातत्वेन स एव सांप्रदायिकः पाठ इति बोध्यम्। यत्तु गायत्र्यर्थेन विष्णुध्यानं न तु शिवशक्तिसूर्यादिध्यानमित्युक्तं तत्तु नास्तिकत्वमूलकमेव।

"मैत्रायणीयानां भर्गो वै रुद्रः।" इति श्रुतौ प्रणवगायत्रादिसर्वमन्त्रेषु पुराणादिषु च शिवसूर्यशक्त्यादिरूपार्थस्योक्तत्वाच्च तदुदाहृतमात्स्येयवाक्यन्तु विरोधले नापेक्षं स्यादतिस्तुत्यमानमिति न्यायात् स्तावकमेवेति। किञ्च।

"त्रयीवेद्यब्रह्मविद्या यच्च वृत्रवधस्तथा।
गायत्र्या च समारम्भस्तद्वै भागवतं विदुः।"

इति पुराणान्तरवाक्यमपि देवीभागवतस्यैव महापुराणत्वबोधकम्। तथा हि त्रयीवेद्यनामासुरो देवीभागवते प्रथमस्कन्धे प्रसिद्धस्तेनोपासिता ब्रह्मप्रतिपादिका विद्या स्त्रीदेवतो मन्त्रः। सा विद्या यत्र वर्णते तद्भागवतमित्यर्थः। स चैतादृगुपासिता विद्या चेत्युभयमपि तत्रैव प्रथमस्कन्धे दर्शितम्।

"अपन्नेकाक्षरं मन्त्रं मायाबीजात्मकं मम॥"

इत्यादिना॥

ननु विष्णुभागवते पञ्चमस्कन्धेऽपि त्रयीवेद्यमन्त्रस्य सत्त्वादिदं वचनमुभयभागवतसाधारणमिति चेन्न। नारदीये नारदादितिलकादिनिबन्धेषु च।

"मन्त्राः पुंदेवताः प्रोक्ता विद्याः स्त्रीदेवताः स्मृताः॥"

इत्यादिवचनैः स्त्रीदेवत्वमन्त्रेष्वेव विद्याशब्दप्रयोगो न पुंदेवत्वमन्त्रेष्विति प्रतिपादनात्। क्वचित् पुंदेवत्वमन्त्रे तथाप्रयोगस्तु गौणः। न च गौणार्थमादाय तद्वचनस्य विष्णुभागवतपरत्वं कल्पितुमुचितम्। तत्त्यागे कल्पदोषापत्तेः। तस्मान्न तद्वचनमुभयसाधारणमिति देवीभागवतस्यैव महापुराणत्वं बोधयति। किञ्च सारस्वतस्य कल्पस्येति मात्स्यवचनादपि देवीभागवतमेव महापुराणम्। अत्र त्वेवं प्रकरणसूचिः।

ऋषय ऊचुः।

"पुराणसंख्यामाचक्ष्व सूत! विस्तरतः क्रमात्।"

इति सूतिप्रश्नोत्तरं ब्रह्मणाऽभिहितं पूर्वं यत्तदुक्तं पद्मकल्पवृत्तान्ताश्रयं पाद्मं वराहकल्पवृत्तान्ताश्रयं वैष्णवं श्वेतकल्पवृत्तान्ताश्रयं वायवीयमित्येवं तत्तत्कल्पवृत्तान्ताश्रयाणि पुराणान्युक्त्वा तदुत्तरम्।

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः।
वृत्रासुरवधोपेतं तद्भागवतमिष्यते॥" इति॥
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तदृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इत्युक्त्वा ततोऽन्यान्यपि महापुराणान्येव तत्तत्कल्पवृत्तान्ताश्रयाणि दर्शितानि। पश्चादुपपुराणकथनार्थंसुपभेदान् प्रवक्ष्यामीति प्रतिज्ञाय पद्मपुराणान्तर्गतसनत्कुमारसंहितां निर्गतमेवं नन्दिसाम्बादित्यसंज्ञकान्युक्त्वा अन्योपपुराणान्यपि महापुराणेभ्य एव निर्गतानीति।

"अष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते।
विजानीध्वं द्विजश्रेष्ठास्तदा तेभ्यो विनिर्गतम्॥"

इति वचनेन स्मृतवृद्धिरुक्तवान्। ततः।

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च॥"

इत्यादिना पुराणलक्षणान्युक्त्वा,—

"सात्त्विकेषु च कल्पेषु महात्म्यमधिकं हरेः।
राजसेषु च कल्पेषु माहात्म्यं ब्रह्मणो विदुः।
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते॥"

इति वचनेन पुराणप्रतिपाद्यहरिब्रह्माग्निहरसरस्वतीपितॄणां माहात्म्यसम्बन्धात् कल्पानां सात्त्विकराजसतामसत्वसङ्कीर्णत्वभेदेनातुर्विध्यमुक्तवानिति। तत्र कल्पानां तत्तद्देवतासम्बन्धज्ञानन्तु तत्तत्कल्पाश्रिततत्तत्पुराणप्रतिपाद्यमुख्यदेवताज्ञानेनैव बोध्यम्। अन्यप्रकारस्य क्वचिदपि पुराणेष्वनुपलम्भात्तथैव सति।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः।
तदृत्तान्तोद्भवं लोके तद्भागवतमिष्यते॥"

इति वचनं भागवतस्य लक्षणप्रतिपादकं प्रतिपादितम्। तदर्थस्तु यथा गारुडकल्प इत्यत्र गरुडस्यायं गारुडः। यथा वा वाराहकल्प इत्यत्र वराहस्यायं वाराह इति व्युत्पत्तिः प्रसिद्धा। तद्वदेव सरस्वत्या अयं सारस्वत इति विग्रहः।

"सरस्वत्याख्यया कल्पो गौरीकल्पस्तथैव च॥"

इति कल्पनामसु सरस्वतीकल्पत्वेनैव कथितत्वाच्च। मत्स्यपुराणे उपन्याध्याये।

"सङ्कीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यते॥"

इति वचनेन तथैवोक्तत्वाच्च ब्रह्मविष्णुरुद्राग्निकल्पवद्गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च तादृग्सारस्वतकल्पसम्बन्धिनो ये देवमनुष्यादितृत्तान्तास्तेभ्य एव उत्पत्तिर्यस्मात् तत्पुराणं भागवतं विदुः। तदृत्तान्तप्रदर्शकं यत् पुराणं तद्भागवतसंज्ञकमिति यावत्। अत्र च तत्तद्देवतानामाविर्भावाश्रया ये ये कल्पास्ते तत्तन्नाम्ना व्यवह्रियन्ते। एतच्च तत्तन्नामककल्पाश्रितेषु पुराणेषु तत्तद्देवताया एव मुख्यत्वेनोत्पत्तिप्रदर्शकवाक्यैर्लक्ष्मीकल्पादिकल्पाश्रितकूर्मपुराणादिषु सर्वत्र प्रसिद्धमेव। तथा च सरस्वत्या आविर्भावप्रतिपादकं पुराणं यत् तद्भागवतमित्यतिरहस्यार्थः। तत्र सारस्वतकल्प इति पदेनैव कल्पस्य सरस्वतीसम्बन्धे बोधिते तस्य सङ्कीर्णत्वं सङ्कीर्णेषु सरस्वत्या इति वचनेनेश्वरप्रेरणां विनापि यद्भागवतमेव। अस्मिंश्च वचने भागवतपदेन विष्णुभागवतस्य ग्रहणं वन्ध्यापुत्रीयमेव। तत्र मुख्यत्वेन सरस्वत्याविर्भावश्रवणात्। विष्णुभागवते द्वितीयस्कन्धे। "पाद्मं कल्पमथो वक्ष्ये।" इति वचनेन स्वमुखेनैव स्वस्य पाद्मकल्पकथाश्रयत्वोक्तत्वात्। तद्विरोधाच्च न च पाद्मकल्प एव सारस्वतः। सरस्वान् सप्तमस्तस्माज्जातं कल्पं सारस्वतं तस्य कल्प इति व्युत्पत्तेरिति वाच्यम्।

"पद्मकल्पस्य वृत्तान्तं तत्र यस्मादुदाहृतम्।
तस्मात् पाद्मं समाख्यातम्॥"

इति पूर्वोदाहृतग्निपुराणवचनेन।

"एतदेव यदा पाद्ममभूद्वैरञ्चमं जगत्।
तदृवृत्तान्ताश्रयं तद्वत् पाद्ममित्युच्यते बुधैः॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह कथ्यते॥"

इति मत्स्यपुराणवचनेन।

"सारस्वतस्य कल्पस्य मध्ये येस्युर्नरामराः।"

इति वचनेन च पाद्मकल्पसारस्वतकल्पयोः पृथक्कथनात्। किञ्च सारस्वतकल्पपाद्मकल्पयोरेकत्वे पद्मकल्पस्य प्रतिपादकं पुराणद्वयं पाद्मं भागवतञ्चेत्येव वदेत् किञ्च पद्मकल्पस्य वृत्तान्तमित्यत्राभिधेयपदार्थो यो वृत्तान्तो लोकविश्रुत इति न्यायेन पूर्वं वृद्धाकल्पं प्रसिद्धं पाद्मग्रन्थं विहायाप्रसिद्धं सारस्वतग्रन्थं पाद्मग्रन्थस्य वाचकं कृत्वा सारस्वतपदघटितकल्पने प्रयोजनाभावः। किञ्च सरस्वत्याख्या कल्प इत्यादेः। पूर्वोक्तस्य सारस्वतपदनिरूक्तार्थकस्य वचनसमूहस्य विरोधश्च। न च पाद्मकल्पसारस्वतकल्पयोः पृथक्त्वे भिन्नकल्पेषु मत्स्यपुराणान्तिमाध्याये कौर्मेतेषु सारस्वतपदेन पाद्मस्य ग्रहणं न स्यादिति वाच्यम्। प्रभासखण्डे भिन्नकल्पेषु विष्णुज्वल्यादिनवकल्पसुपमानकल्पानां ग्रहणेऽपि तेषां कल्पानां यथा मात्स्यान्तिमाध्याये न ग्रहणं तथा पाद्मस्यापि न ग्रहणमित्यस्य तुल्यत्वात्। यदि तेषां पर्यायत्वेन कुत्रचिदन्तर्भावः क्रियते तर्ह्यत्रापि कुत्रचिदन्तर्भावोऽस्तु अतएव विष्णुभागवतस्य प्रबन्धटीकाकारैश्च पिङ्गकल्पे एव पूर्वार्द्धान्ते पद्मस्योद्भवात् पिङ्गकल्पपदेन पाद्मसंग्रहो वेदितश्च इत्युक्तम्। पुराणकल्पकथनप्रस्तावे सारस्वतकल्पपाद्मकल्पयोः पृथक्करणेन सारस्वतपदेन पाद्मस्य सर्वथा न ग्रहणम्। वस्तुतस्तु भिन्नकल्पा ब्रह्मवह्निभिन्नत्वात्मकाः भिन्नत्वनिधिषु प्रतिपदादिषूत्पद्यन्ते। भूर्भुवःस्वः भूर्भुवःस्वश्च इत्यादयस्तयभिन्नकल्पाः। पाद्मादयश्च वायुपुराणोक्ता दिनकल्पा ब्रह्मणः प्रतिदिवसेषूत्पद्यन्ते इति दिनकल्पतिथिकल्पानां सुतरां भेदात्तिथिकल्पेषु दिनकल्पानां पाद्मादीनां न ग्रहणमिति सिद्धान्तः।

ननु विष्णुभागवतस्यारम्भतः पाद्मकल्पाश्रयत्वेऽपि तत्रत्यकल्पलक्षणस्यैव सारस्वतकल्पाश्रयत्वेनैव तस्य च द्वादशस्कन्धे वक्तात्।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामरा: ॥"
इति वचनस्य विष्णुभागवतं विषयोऽस्त्वीत्यादुक्तदत्तवत् । तच्चाज्ञानजन्यत्वस्य सारस्वतकल्पभवत्व-प्रतिपादकानां वचनानां निर्मूलत्वात् सकलत्वेऽपि सम्भवि पुराणे यस्य कल्पस्य प्रथमत: प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियम: सर्वपुराणे तथा दृष्टत्वात् । तथा च ज्ञानजन्यत्वस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात्पाद्मकल्पकथाया: प्रथमतो विद्यमानत्वस्य स्वेनैवोक्तत्वाच्च । न सारस्वतस्य कल्पस्येति वचनस्य विष्णुभागवतं विषय: । किञ्च ज्ञानजन्यत्वस्य यथा दशमस्कन्धे श्रवणं तदा सर्वपुराणेषु तत्कथनं वर्णत एवेति सर्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्वपुराणानि भागवतपदवाच्यानि स्युस्तस्मात्सारस्वतकल्पस्य यत्र प्रथमत: प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्तस्माद्दशमस्कन्धे देवीभागवतमेवाक्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति । किञ्च शिवपुराणे उमा-संहितायाम् ।

"ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने ।
महाविद्या जगद्धात्री सर्वविद्याधिदेवता ॥
द्वादश्यां फाल्गुनस्येव शुक्लायां समभूत्पुन: ॥"
इति वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिने एव सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ कल्पभाद्यप्रकरणे नागरखण्डे ।

"सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च ।" इति ॥

तथा च सरस्वत्या: कल्प इत्यर्थकस्य ।
"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामरा: ॥"
इति वचनस्य सर्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यम् । किञ्च तस्य यत्रत्वे तस्य हरिमाहात्म्यप्रतिपादकत्वात् । तदाश्रितकल्पस्य सात्त्विकत्वमेवायास्यति ।
"सात्त्विकेष्वेव कल्पेषु माहात्म्यमधिकं हरे: ।"
इति वचनात् । ततश्च संकीर्णेषु सरस्वत्या इति वचनेन सारस्वतकल्प इति ज्ञात्वा च पारम्हंस्यसामग्र्येव कर्तव्या स्यात् । अतो विष्णु-भागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽस्त्विच्छतापि वक्तव्यत्वात्तस्मात् सारस्वतस्य कल्पस्येति वचनाद्देवीभागवतमेव महापुराणम् । अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वच-नम् । तदुक्तं देवीभागवते प्रथमस्कन्धे ।

"तस्यासु सात्त्विकी पुत्री राजसी तामसी तथा ।
महालक्ष्मी: सरस्वती महाकालीति ता: स्त्रिय: ।
तासां तिसृणां पुत्रीणां देव्याद्यौकारसम्भव: ।
कृष्णार्थं च समाख्यात: सर्ग: प्राकृतविग्रहे: ॥"
इति ।

"अमृतोद्भवशुक्लोक्तं नित्यं भागवतं ह्यत: ।"
इति वचनमपि शुक्लाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि सङ्गच्छते । भवति हि

देवीभागवतं शुक्लायैव प्रोक्तं व्यासेनेति । किञ्च
"अष्टादशपुराणानि कृत्वा सत्यवतीसुत: ।
भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥"
इति मात्स्यवचनमपि देवीभागवतस्यैव महा-पुराणत्वं बोधयति । अष्टादशपुराणोत्तरं भारतस्य जातत्वात् । भारतोत्तरत्वं विष्णु-भागवतस्य जातत्वात् । भारतोत्तरत्वकालं निर्विशो व्यासश्चकारेति विष्णुभागवते एवोक्त-त्वात् । ननु
"वेदव्याखा: पुराणानि वेदाश्च भारतं तथा ।
श्रुत्वा सम्मोहसंमूढोऽभवं राजन् ! मम-
स्यपि ॥"
इति देवीभागवते तृतीयस्कन्धे एवोक्तत्वात्त-स्यापि सविरोधस्तदवस्थ एवेति चेन्न । मन्यते तदानीं ग्रन्थो नैव जात: किन्तु जनमेजयं प्रति एवं वक्ष्यतीति ज्ञानचक्षुषा ज्ञात्वा भार-तात् पूर्वमेव देवीभागवतं श्रुतमित्यर्थस्य कल्प-नात् । स्वन्यते तु तथा कल्पयितुं न शक्यते । यत:श्लोकीभागवतोपदेशस्य जायमानत्वात् । उपदेशात् पूर्व तज्ज्ञानाभावस्यावश्यं कल्प-नीयत्वात् । यदि तथापि पूर्वं व्यासस्य ज्ञान-मस्तीति स्वीक्रियते तदा वक्ष्यमाण: सर्वोऽर्थ-वाद: स्यात् । ततश्च ग्रन्थसारस्यभङ्गप्रसङ्ग इत्यास्तां तावत् । वस्तुतस्तु वेदव्याखा: पुराणा-नीति पाठोऽसङ्गत इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोध: । यत्तु पाद्मे भागवत-माहात्म्ये श्रीमद्भागवतकथाश्रवणाय समा-गतानां परिगणनप्रसङ्गे ।
"वेदाश्चानि च वेदाश्च मन्वाद्यश्चानि संहिता: ।
दृश्यन्ते पुराणानि षट्त्रिंशाखानि समाययु: ॥"
इत्युक्तम् । तत्र आधुनिकपुराणानामष्टादशत्वा-दष्टादशेति वक्तव्ये सप्तदशत्वोक्ति: श्रीमद्भागवत-स्याष्टादशत्वं गमयति तस्याष्टादशान्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे वाष्टादशानां श्रोतृत्वसम्भवेन श्रोतुमागतानां पुराणाना-मष्टादशत्वानुक्तेर्निर्बीजत्वप्रसङ्गात् । एवं पाद्मे
"सप्तदशपुराणानि कृत्वा सत्यवतीसुत: ।
नाप्नवाञ्छमसा तोषं भारतेनापि भामिनि ! ॥
चकार संहितामेतां श्रीमद्भागवतीं पराम् ॥"
इति सप्तदशत्वोक्ति: श्रीमद्भागवतस्यैवेतां संहि-तामिति निर्देशस्याष्टादशत्वं गमयति । देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्य-नुक्तेर्निर्बीजत्वप्रसङ्गादित्यादुक्तदत्तवत् । तेषा-मेव वचनैर्विष्णुभागवतस्याष्टादशपुराणान्त-र्गतत्वं न सिध्यति । किन्तु देवीभागवतस्यैवेति वार्द्धुषिकत्वं कुर्व्याणो मूलमेव विनाशितवा-निति न्याय आगत: । तथा हि भारतं व्यास-मुखाच्छ्रुत्वा तत्र सन्दिहान: क्रौष्टुकिर्मार्कण्डेयं प्रत्यागत्य सन्देहं पृष्टवान् तस्मै मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान् । तदुक्तं मार्कण्डेय-पुराणे
"तदिदं भारताख्यानं वक्ष्यते श्रुतिविस्तरम् ।

तत्त्वतो ज्ञातुकामोऽहं भवन्तमुपस्थित: ॥"
इति ।

तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् । तथैव स्वदुक्तरीत्यैव विष्णुभागवतमपि । तथा च भारतात् पूर्वं षोडशपुराणान्येव सिद्धानि । तथा च पूर्वोक्तवचनमध्ये षोडशैवोक्ते सप्तदशोक्तत्वात् । देवीभागवतमेव महापुरा-णमन्यथा सप्तदशत्वपूर्तिर्न स्यात् । तस्मात्तद्वच-नप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिध्यति न तु विष्णुभागवतम् । भारतात् पूर्वं सप्तदशमदीयभागवतसहितानि मार्कण्डेयमष्टा-दशमुभयमतसिद्धमेव विष्णुभागवतस्य भारतो-त्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्यासा-भावादित्येवं लाघवेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु किञ्च पाद्मे ।
"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुडञ्च तथा पाद्मं वाराहं शुभदर्शने ! ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"
इत्युक्त्वा च भागवतस्य सात्त्विकत्वमुक्तम् । सात्त्विकेषु पुराणेष्वित्यत्र कौर्मोक्त्या च सात्त्विक-पुराणानां विष्णुपरत्वमुक्तम् । अतो विष्णुपर-मेव भागवतमष्टादशपुराणान्तर्गतं न तु देवी-भागवतमिति । अपि च स्कान्दे प्रभासखण्डे ।
"चतुर्भिर्भगवान् विष्णुर्ब्रह्मा तद्वच्च रवि: ।
अष्टादशपुराणेषु त्रिषु त्रिषु भगवान् भव: ॥"
इत्युक्तम् । स्कान्दे सौरसंहितायाञ्च ।
"कथ्यते दशभिर्विप्रा: पुराणै: परमेश्वर: ।
चतुर्भिर्भगवान् विष्णुर्ब्रह्मा प्रकीर्तित: ॥
एकेनापि तथैकेन भगवांश्चक्रभास्कर: ॥"
इत्युक्तमप्योऽपि विष्णुभागवतमष्टादशान्तर्गतं नत्वन्यदित्यादुक्तदत्तवत् । वस्तुमते मत्स्योक्त-सात्त्विकराजसतामसशङ्कीर्णपुराणेषु मध्ये अयाणां अवस्था पूर्ववचनैरुक्तयोक्ता । सङ्कीर्ण-पुराणानान्तु नोक्ता । तेषां केषु पुराणेष्वन्तर्भाव इति वद । करिष्यामि कुत्रचिदिति चेन्मम मतेऽपि श्रीभगवता विष्णुशक्तिरूपाभिमानेन मन्त्राधिष्ठात्री देवता वेदमाता दुर्गा दुर्ज्ञेय-ध्यानभानुं गुरुञ्च इति श्रीक्रमदीपिकोक्तप्रका-रेण विष्णुमन्त्राणां दुर्गाया: अधिष्ठातृत्वेन तयोरैक्याद्वा ततुप्रतिपादकभागवतस्य वैष्णवे-ष्वेवान्तर्भावात् । अतएव
"हरिर्ह्यां रविर्ह्यां ह्याभ्यां चक्रीविष्णु-
र्यतौ ।
ह्याभ्यां ब्रह्मा समाख्यात: त्रिषु त्रिषु भगवान्
शिव: ॥"
इति वचनं सङ्गच्छते । वस्तुतस्तु द्वयोरपि भागवतयोरङ्गीक्रियते प्रमाणत्वात् । विष्णुभाग-वतपक्षपातिनां वचनानामस्माकं विरोधाभावेन तत्रापने प्रयोजनाभाव एव । तथा च नार-दीयादिपुराणमतेन श्रीविष्णुभागवतं मह्या-पुराणं तद्वचनानि प्रविष्टान्येवेति न लिखितानि । देवीभागवतन्तु तत्रैव उपपुराणम् । त्रैव-

मात्स्यपुराणादिमते तु देवीभागवतं महापुराणम्। विष्णुभागवतमर्थादुपपुराणमिति सिद्धम्। अत्र केचिद्देवीभागवतस्यातिलघ्वी देवीयामलतन्त्रस्यम्।

"श्रीमद्भागवतं नाम पुराणं वैष्णवमितम्।
पारीक्षितायोपदिष्टं सत्यवत्यङ्गजन्मना॥
तत्र देव्यवताराश्च बहवः प्रतिपादिताः॥"

इति।

तथा

"इदं रहस्यचरितं राधोपासनमुत्तमम्।
व्यासाय मम भक्ताय प्रोक्तं पूर्वं मयाद्रिजे!॥
मत्तो रहस्यं ज्ञात्वैव राधामाहात्म्यमुत्तमम्।
एतस्य विस्तरं चक्रे श्रीमद्भागवते तथा॥
नारदे ब्रह्मवैवर्ते लोकानां हितकाम्यया॥"

इति।

सौभाग्यकल्पलतायां संहारभैरवतन्त्रस्थं वचनं लिखन्ति। तत्र परे विवदन्ते। तदुभयमपि गौरवभिया न लिख्यत इति॥ * ॥)

तत्र विष्णुभागवते प्रथमस्कन्धे परिक्षिन्नारदयोरुपाख्यानम्। विप्रशापात् परीक्षितस्य प्रायोपवेशः। शुकपरीक्षितसंवादश्च ॥१॥*॥ द्वितीयस्कन्धे। योगधारणयोरुत्क्रान्तिः। नारदाजयोः संवादः। अवतारानुगीतम्। महदादिक्रमेण सृष्टिश्च॥ २॥ * ॥ तृतीयस्कन्धे। विदुरोद्धवसंवादः। चतुःसनेत्ययोः संवादः। पुराणसंहिताप्रश्नः। महापुरुषसंस्थितिः। प्राकृतिकः सर्गः। वैकृतिकाः सप्त सर्गाः। ब्रह्माण्डसम्भूतिः। विराट्पुरुषोत्पत्तिः। कालस्य स्थूलसूक्ष्मस्य गतिः। पाद्मसम्भवः। अम्भोधेर्भुव उद्धारणा। हिरण्याक्षवधः। ऊर्ध्वतिर्यग्नवार्क सर्गः। रुद्रसर्गः। अर्द्धनारीनरस्य सर्गः। यतः स्वायम्भुवमनुः स्त्रीणां आद्या प्रकृतिः प्रतिरूपा च। कर्दमप्रजापतेर्धर्मपत्नीनां सन्तानः। भगवत्कपिलावतारः। कपिलेन देवहूतिसंवादश्च ॥३॥*॥ चतुर्थस्कन्धे। नवब्रह्मसमुत्पत्तिः। दक्षयज्ञविनाशनम्। ध्रुवचरितम्। पृथोः प्राचीनबर्हिषश्च चरितम्। नारदस्य संवादश्च ॥४॥*॥ पञ्चमस्कन्धे। प्रियव्रतचरितम्। द्वीपसमुद्रादिवर्षनद्युपवर्णनम्। ज्योतिश्चक्रस्य संस्थानम्। पातालनरकस्थितिश्च ॥ ५ ॥ * ॥ षष्ठस्कन्धे। दक्षजन्म। तत्पुत्रीणां सन्ततिः। यतः देवासुरनरतिर्यङ्गगवगादयः। त्वाष्ट्रस्य जन्म च ॥ ६ ॥ * ॥ सप्तमस्कन्धे। दितेः पुत्रयोर्जन्मनम्। प्रह्लादचरितञ्च ॥ ७ ॥ * ॥ अष्टमस्कन्धे। मन्वन्तरानुचरितम्। गजेन्द्रविमोक्षणम्। मन्वन्तरावतारः। हयग्रीवादयोऽवतारः। जगदुत्पत्तेः कौर्म्ममात्स्यनारसिंहवामनरूपाणि। क्षीरोदमथनम्। देवासुरयुद्धञ्च ॥ ८ ॥ * ॥ नवमस्कन्धे। राजवंश्यानुकीर्त्तनम्। इक्ष्वाकुजन्म तद्वंशः। सुद्युम्नवंशः। इलोपाख्यानम्। तारोपाख्यानम्। सूर्य्यवंश्यानुकथनम्। ग्राह्यादृग्गसौकन्यसुकन्यातिककुत्स्थ-ब्रह्माङ्गमान्धातृसौभरिरामाणां चरितम्। निमेरङ्गपरित्यागः। जनकानां सम्भवः। परशुरामजन्म। क्षत्रो निःक्षत्रीकरणम्। ययातिनहुषभरतशान्तनुतत्सुतयदूनां वंश्यानुकीर्त्तनञ्च ॥ ९ ॥ * ॥ दशमस्कन्धे। श्रीकृष्णस्य वसुदेवगृहे जन्म। गोकुले तस्य वृद्धिः। तस्य पूतनापयःपानम्। शकटोच्चाटनम्। तृणावर्त्तवधः। बकवत्सयोर्वधः। अघासुरवधः। धात्रा वत्सपालावगूहनम्। ब्रह्मा सह धेनुकस्य वधः। प्रलम्बवधः। गोपालानां दावाग्नेः परित्राणम्। कालीयदमनम्। महाहेर्मुञ्चमोचनम्। कन्यानां व्रतचर्य्या। यज्ञपत्नीभ्यः प्रसादः। विप्राध्वरानुग्रहणम्। गोवर्द्धनोद्धारणम्। शक्रसुरभिकर्त्तृककृष्णस्य यज्ञाभिषेकः। रात्रिषु स्त्रीभिः क्रीड़ा। शङ्खचूड़स्य वधः। केशिवधः। अक्रूरागमनम्। रामकृष्णयोर्मथुराप्रस्थानम्। व्रजस्त्रीणां विलापः। मथुरालोकनम्। गजमुष्टिकचाणूरकंसादीनां वधः। सान्दीपनेर्मृतपुत्रानयनम्। उद्धवरामाभ्यां सह हरिणा यदुचक्रस्य प्रियकरणम्। जरासन्धसमानीतबहुसैन्यवधः। यवनेन्द्रस्य घातनम्। कुशस्थल्या निवेशनम्। पारिजातहरणम्। रुक्मिणीहरणम्। बाणेन सह युद्धम्। प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणम्। चैद्यपौण्ड्रकशाल्वदन्तवक्रशम्बरद्विविदपीठमुरपञ्चजनानां माहात्म्यं वधश्च। वाराण्स्या दाहः। पाण्डवान् निमित्तीकृत्य भूमेर्भारावतरणञ्च ॥ १० ॥ * ॥ एकादशस्कन्धे। विप्रशापापदेशेन स्वकुलसंहारः। उद्धवसंवादः। उद्धवाय आत्मविद्याकर्म्मविनिर्णयकथनम्। आत्मयोगानुभावतो मर्त्यपरित्यागश्च ॥ ११ ॥ * ॥ द्वादशस्कन्धे। युगलक्षणवृत्तिः। कलौ नृणामुत्पत्तिः। चतुर्विधप्रलयः। त्रिविधोत्पत्तिः। परिक्षिद्देहत्यागः। व्यासकर्त्तृकशाखाप्रणयनम्। मार्कण्डेयस्य सत्कथा। ह्यग्रीवस्य विन्यासश्च ॥१२॥*॥

इति श्रीभागवते १२ स्कन्धे अनुक्रमणिकाध्यायः॥

भागवत, त्रि, (भगवान् हरिः भगवती दुर्गा वास्य देवतेति। भगवत्+"तस्य देवता।"४।२।२४। इति अण्।) भगवद्भक्तः। तस्य लक्षणम्। यथा,

"सर्व्वदेवान् परित्यज्य नित्यं भगवदाश्रयः।
एतल्लक्षणसंयुक्तो भागवत उच्यते॥"

इति पाद्मोत्तरखण्डे ६६ अध्यायः॥ * ॥

स च यमदूतैर्दृश्यः। यथा,—

"ये तु भागवता लोके तन्निष्ठास्तत्परायणाः।
पूजयन्ति सदा विष्णुं ते च त्याज्याः सुदूरतः॥"

इति वह्निपुराणे दूतान् प्रति यमवचनम्॥

स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

"इदमौशनसंयुक्तं दिनं वैष्णववल्लभम्।
ये नुपासते महीपाल! ते वै भागवता नराः॥
प्राप्यायये न चान्यन्ति दिनं प्राप्य हरेर्नराः।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम्।
अन्यां तु वाधयेद्दृष्ट्वा स वै भागवतो नरः॥
भक्तिर्न्ने विष्णुता येषां न च्युतानि व्रतानि च।
सुप्रियः श्रीपतिर्येषां ते स्युर्भागवता नराः॥
सदाचाररताः शिष्टाः सर्व्वभूताङ्गकल्पकाः।
शुचयस्त्यक्तरागा ये सदा भागवता हि ते॥"

एकादशस्कन्धे।

"सर्व्वभूतेषु यः पश्येद्भगवद्भावमात्मनः।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः॥
न यस्य स्वपर इति वित्तेष्वात्मनि वा भिदा।
सर्व्वभूतसमः शान्तः स वै भागवतोत्तमः॥"

हरियोगेश्वरोत्तरे।

"मद्दीक्षापीन्द्रियैरर्थान् यो न हृष्टि न काङ्क्षति।
विष्णोर्मायामिदं पश्यन् स वै भागवतोत्तमः॥"

हरहनारदीये।

"द्विषे च परमेशाने विष्णौ च परमात्मनि।
समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः॥"

स्कान्दे।

"येषां भागवतं शास्त्रं सदा तिष्ठति वेश्मनि।
पूजयन्ति च ये नित्यं ते स्युर्भागवता नराः॥
येषां भागवतं शास्त्रं जीविताद्धिकं भवेत्।
महाभागवताः श्रेष्ठा विष्णुना कथिता नराः॥"

लैङ्गे।

"भोजनाच्छादनं सर्व्वं यथाशक्त्या ददाति यः।
विष्णुभक्तस्य सततं स वै भागवतः स्मृतः॥"

गारुड़े।

"येन सर्व्वात्मना विष्णुभक्त्या भावो निवेशितः।
वैष्णवेषु सतात्यन्तमद्धाभागवतो हि सः॥"

हरहनारदीये।

"तुलसीकाननं दृष्ट्वा ये नमस्कुर्व्वते नराः।
तत्काष्ठाङ्कितकण्ठा ये ते वै भागवतोत्तमाः॥
तुलसीगन्धमाघ्राय सन्तोषं कुर्व्वते तु ये।
तन्मूलमृत्तृता येच ते वै भागवतोत्तमाः॥
मत्कथाश्रवणे येषां वर्त्तते सात्त्विकी मतिः।
तद्वक्तरि सुभक्ताश्च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"मत्कथां कुरुते यस्तु मत्कथाश्च शृणोति च।
ह्रष्यते मत्कथायाश्च स वै भागवतोत्तमः॥"

हरहनारदीये।

"मज्ज्ञानाश्च मद्भक्ता मद्भक्तजनलोलुपाः।
मन्नामश्रवणासक्ताश्चे वै भागवतोत्तमाः॥
ये ऽभिनन्दन्ति वामानि हरेः शृण्वन्ति चरितम्।
रोमाञ्चितशरीराश्च ते वै भागवतोत्तमाः॥
अन्येषामुदयं दृष्ट्वा ये ऽभिनन्दन्ति मानवाः।
हरिनामपरा ये च ते वै भागवतोत्तमाः॥"

स्कान्दे।

"ये चार्चयन्ति सदा विष्णुं यज्ञेशं वरदं हरिम्।
देहिनः पुण्यकर्म्माणः सदा भागवता हि ते॥"

लैङ्गे।

"विष्णुक्षेत्रे शुभान्येव करोति स्नेहसंयुतः।
प्रतिमाञ्च हरेर्नित्यं पूजयेत् प्रयतात्मवान्॥
विष्णुभक्तः स विज्ञेयः कर्म्मणा मनसा गिरा।
नारायणपरो नित्यं भूप! भागवतो हि सः॥"

ब्राह्मोत्तरखण्डे ।
"सार्वादिपञ्चसंस्कारो वर्षेण्याब्जैकारकः ।
अर्घपञ्चविहिप्रो मद्याभामवतो द्वि च ः ॥
एकान्नेन वहा विष्णौ वक्राहेवे परायणाः ।
तस्माद्वैकान्तिनः प्रोक्ताब्रह्मणावतपेतसः ॥"
एकादशस्कन्धे ।
"ब्राह्मणाब्राह्मणाश्च ये वै मां यावानु यथाक्षि
बाहवः ।
भजन्त्यनन्यभावेन ते वै भागवता मताः ॥
न कामकर्मबीजानां यस्य चेतसि सम्भवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ॥"
स्कान्दे ।
"यस्य ब्रह्मगतस्यापि केशवे रमते मनः ।
न विच्युता च भक्तिर्वै स वै भागवतो नरः ॥
आपन्नस्य यस्यैव भक्तिरव्यभिचारिणी ।
नान्यत्र रमते चित्तं स वै भागवतो नरः ॥"
हरिवंशेश्वरोत्तरे ।
"विद्वज्जनस्य हृदयं न यस्य वाचा-
हरिरवज्ञाभिहितोऽप्यघौघनाशः ।
प्रश्रयरसनया धृताङ्घ्रिपद्मः
स भवति भागवतप्रधान उक्तः ॥"
मध्यममाह तत्रैव ।
"ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ।
प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥"
कनिष्ठमाहैव ।
"अर्चायामेव हरये पूजां यः श्रद्धयेहते ।
न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥"
इति श्रीहरिभक्तिविलासे १० विलासः ॥
भागिकं, त्रि, (भाग + "भागाद्यच् ।" ५।१।७६ ।
इति पक्षे ठन् ।) दक्षार्धदक्षसुतादि । सुदी
टीका इत्यादि भाषा । यथा । भागो दक्षार्धादि-
रस्मिन् दीयते भाव्यं भागिकं प्रोक्तम् । भाग्या
भागिका विभूतिः । इति सिद्धान्तकौमुदी ॥
भागिनेयः, पुं, (भगिन्या अपत्यम् । भगिनी +
"स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।)
भगिनीपुत्रः । तत्पर्य्यायः । स्वसीयः २ । इत्य-
मरः ।२ ।६।३२ ॥ स्वसियः २ । इति शब्दरत्ना-
वली ॥ स च सुखप्रतिनिधिः । यथा,—
"ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ
विट्पतिः ।
अभिरेव हुतं यत्तु बहुतं स्वयमेव हि ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
तस्यावश्यापोष्यत्वम् यथा,—
"पितृव्यगुरुदौहित्रान् भर्तुः स्वसीयमातुलान् ।
पूजयेत् कन्यपुत्राभ्यां दुहितापातिथीन् स्त्रियः ॥"
इत्यपुत्रधनाधिकारे दायभागः ॥ * ॥
भागिनेयदत्तकत्वं शूद्रस्यैव न तु द्विजानाम् ।
यथा, दत्तकचन्द्रिकायां शौनकवचने ।
"दौहित्रो भागिनेयश्च शूद्रेषु क्रियते सुतः ।
ब्राह्मणादिषये नास्ति भागिनेयः सुतः क्वचित् ॥"
तत्करणे मातुलस्य पञ्चिमग्रौचम् । यथा ।
"पञ्चिमी योनिसम्बन्धे बान्धवेषु तथैव च ।
योनिसम्बन्धे मातृव्यसौयपितृव्यसौयभागिनेयेषु ।
मातुलमरणे भागिनेयस्यापि पञ्चिमग्रौचम् ।"
इति शुद्धितत्त्वम् ॥
भागिनेयी, स्त्री, (भगिनी + ढक् । स्त्रियां ङीप् ।)
भगिन्याः स्त्रीअपत्यम् । भाग्वी इति भाषा ।
भगिनीशब्दात् स्त्रीअपत्यार्थे स्त्रीत्वे विवक्षादीप्-
प्रत्ययनिष्पन्ना । इति व्याकरणम् ॥
भागीरथी, स्त्री, (भगीरथेयम् । भगीरथ + अण् ।
ङीप् ।) गङ्गा । इत्यमरः । १ । १० । ३१ ॥
पृथिव्यां तस्यावतरणम् । यथा,—
सूत उवाच ।
"ततो भगीरथो राजा तपः परमदुश्चरम् ।
कृत्वा सन्तोषयामास उमाकान्तं महेश्वरम् ॥
धारयायामुमत्वा तं जगाम ब्रह्मणोऽन्तिकम् ।
ततो भगीरथः प्राह गङ्गा ब्रह्मन् ! विसृज्यताम् ॥
स तच्छ्रुत्वा वचस्तस्य सम्मान्य विबुधप्रियम् ।
गङ्गां प्रस्थापयामास सापतद्ब्रह्मणोऽन्तिकात् ॥
वायुना प्रेर्यमाणापि आकाशपथगा नदी ।
विख्याताकाशगङ्गेति तत्र संज्ञेषिता गजैः ॥
विष्णोः पदं समायाता तस्माद्विष्णुपदीति सा ।
पूज्यमाना सुरैः सिद्धैर्मुनिविद्याधरोरगैः ॥
सुरालयमनुप्राप्ता तस्माद्देवनदी तु सा ।
ततस्तात् प्रपतिता गङ्गा भ्रमोः शिरसि संस्थिता ॥
धृतैकेनैव तेनापि भ्रमुणा योगमायया ।
दिव्यं वर्षशतं साग्रं पुनराराधितेन वै ॥
सृष्टा भगीरथेनैव सप्तधा विनिर्गता ।
जटाजूटात् प्रपातोर्द्वं मेरोस्तस्मात्ततोऽगमत् ॥
देवैः परिवृता गङ्गा हेमकूटञ्च पर्व्वतम् ।
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्व्वतम् ॥
तामायान्तीं तु रोधाय खलीनो नाम दानवः ।
पार्व्वतं रूपमास्थाय वर्षाणान्तु शतैर्द्विजाः ॥
ततो भगीरथो राजाराधयामास कौशिकम् ।
स तुष्टः प्रददौ नागं वाहनं वै भगीरथः ॥
समारुह्यागमत्तत्र यत्र वृद्धा भगीरथी ।
तेन नागेन तं दैत्यं संविदार्य न सङ्गतः ॥
पुनश्च तां समाधाय महेन्द्रैरावणो गजः ।
महीतलं समापेदे स यावन्नागसाक्षयम् ॥
तस्मादुद्याघटनाद्विप्रा अभून्नागपुरं वरम् ।
प्लावयन्ती महीं गङ्गा जह्नोराश्रममभ्यगात् ॥
तां दृष्ट्वाथ पपौ सोऽपि प्रहस्य कुपितो मुनिः ।
जह्नुना नाशितां दृष्ट्वा गङ्गां त्रिपथगां नदीम् ॥
सशोकस्तोषयामास जह्नुं भगीरथो मुनिम् ।
समोच्य कर्णरन्ध्रेण गङ्गा स दक्षिणेन ताम् ॥
पुनस्ताञ्जाह्नवीं भूत्वा सुतां तस्य मुनेस्तथा ।
ततः सा विविधान् देशान् पर्व्वतांश्च तथा-
श्रमान् ॥
संप्लाव्य वारिणा भूयो जगाम पूर्व्वसागरम् ॥
यत्र तत्रोदकं तस्यौ तस्याः पुण्यमभूद्विजाः ।
सतीर्थं सर्व्वमर्त्यानां तारणं पापनाशनम् ॥
ततः सम्पूरयामास सप्तधा सर्व्वतो दिशम् ।
प्रपन्नं सागरैः सर्व्वं ततः पातालमाविशत् ॥
सागरार्थं ततोऽवाप्तात् संज्ञाश्च वारिणा ततः ।
देवैः संपूज्यमानापि जगाम ब्रह्मणोऽन्तिकम् ॥
अभुक्ते सागराः स्वर्गे ब्रह्मणोपहताश्च ये ।
रक्षकाले विनिर्दिष्टा गङ्गाया ब्रह्मणा स्वयम् ॥
भवद्भिरनिशं पूज्या कर्त्तव्यं विघ्ननाशनम् ॥
सूत उवाच ।
एतद्वः कथितं सर्व्वं यथावतरणं दिवः ।
गङ्गायाश्चैव माहात्म्यं भूयश्च गदतो मम ॥"
इत्याद्ये वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
तस्या सुखनामानि यथा,—
वराह उवाच ।
"धर्म्मस्तु द्रवरूपेण ब्रह्मणा निर्म्मितः पुरा ।
यदै गङ्गेति विख्याता ह्यङ्ग स्तोत्रं वसुन्धरे ! ॥
किन्तेनामसहस्रेण सुखानां सुखैः सुविस्तरैः ।
यानि नामानि सुखानि तानि वक्ष्याम्यशेषतः ॥
गङ्गा भागीरथी पुण्या जाह्नवी सुरनिम्नगा ।
विष्णुपादाब्जसम्भूता भ्रमोः शिरसि संस्थिता ॥
सुमेरुशृङ्गसंस्रुता हिमाचलसुतापरा ।
शृङ्गकुन्देन्दुधवला महापातकनाशिनी ॥
नदीश्वरी त्रिपथगा वैष्णवी सुरसम्प्रिया ।
धर्म्मद्रवी भोगवती विन्ध्यपादविदारिणी ॥
क्षमा शान्तिः प्रभाशान्तिः पुण्यदा पूतिका
शिवा ।
महानदी शुभसखी शुभा मकरवाहिनी ॥
ब्रह्मदण्डात् परिभ्रष्टा सौम्यरूपातिशोभना ।
मुनिभिः पूजिता सर्व्वैः सर्व्वैर्देवैर्नमस्कृता ॥
महायज्ञमयी देवी मर्त्यानामुपकारिणी ।
सर्व्वत्र दुर्लभा गङ्गा त्रिभिः स्थानैर्विशेषतः ॥
गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥
इदं स्तोत्रं मया ख्यातं पूर्व्वसृष्टं स्वयम्भुवा ।
यः पठेत् प्रातरुत्थाय तस्य नश्यति दुर्गतिः ॥
यत् पापं यौवने बाल्ये कौमारे वार्द्धके च यत् ।
तत् सर्व्वं विलयं याति तोयस्पर्शं जलं यथा ॥
कीर्त्तिं प्रीतिं महालक्ष्मीमायुरारोग्यसन्ततिम् ।
ददाति जाह्नवी तुष्टा सर्व्वभावेन माधवि ! ॥"
इति वाराहे सर्व्वपापप्रशमनगङ्गास्तवः ॥
अपि च ।
ब्रह्मोवाच ।
"श्रोतुमिच्छामि देवेश ! लक्ष्मीकान्त ! जगत्
प्रभो ! ।
विष्णो ! विष्णुपदीस्तोत्रं पापघ्नं पुण्यकारणम् ॥
श्रीनारायण उवाच ।
शिवसंगीतसंयुक्तं श्रीब्रह्माङ्गदवोद्भवाम् ।
राधाङ्गद्रवसंयुक्तां तां गङ्गां प्रणमाम्यहम् ॥
या ब्रह्मदण्डेरादौ च गोलोके रासमण्डले ।
सन्निधाने गुरुरस्य तां गङ्गां प्रणमाम्यहम् ॥
गोपैर्गोपीभिराकीर्णे शुभे राधामहोत्सवे ।
कार्त्तिकीपूर्णिमायातां तां गङ्गां प्रणमाम्यहम् ॥
कोटियोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
समाहृता या गोलोकं तां गङ्गां प्रणमाम्यहम् ॥
षष्टिलक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।
समाहृता या वैकुण्ठं तां गङ्गां प्रणमाम्यहम् ॥
विंशल्लक्षयोजना या ततो दैर्घ्ये चतुर्गुणा ।

भागुरिः

आहृता ब्रह्मलोकं या तां गङ्गां प्रणमाम्यहम् ॥
त्रिंशल्लक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आहृता शिवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आहृता ध्रुवलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये सप्तगुणा ततः ।
आहृता चन्द्रलोकं या तां गङ्गां प्रणमाम्यहम्॥
षष्टिसहस्रयोजना या दैर्घ्ये दशगुणा ततः ।
आहृता सूर्य्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
लक्षयोजनविस्तीर्णा दैर्घ्ये च षड्गुणा ततः ।
आहृता सत्यलोकं या तां गङ्गां प्रणमाम्यहम् ॥
दशलक्षयोजना या दैर्घ्ये पञ्चगुणा ततः ।
आहृता या तपोलोकं तां गङ्गां प्रणमाम्यहम्॥
सहस्रयोजनायामा दैर्घ्ये दशगुणा ततः ।
आहृता जनलोकं या तां गङ्गां प्रणमाम्यहम् ॥
सहस्रयोजनायामा दैर्घ्ये सप्तगुणा ततः ।
आहृता या च कैलासं तां गङ्गां प्रणमाम्यहम्॥
शतयोजनविस्तीर्णा दैर्घ्ये दशगुणा ततः ।
मन्दाकिनी येन्द्रलोके तां गङ्गां प्रणमाम्यहम् ॥
पाताले या भोगवती विस्तीर्णदशयोजना ।
ततो दशगुणा दैर्घ्ये तां गङ्गां प्रणमाम्यहम् ॥
क्रोशैकमात्रविस्तीर्णा ततः क्षीणा च कुत्रचित् ।
क्षितौ चालकनन्दा या तां गङ्गां प्रणमाम्यहम्॥
सद्यो या क्षीरवर्णा च जेनायामिन्दुसन्निभा ।
द्वापरे चन्दनाभा च तां गङ्गां प्रणमाम्यहम् ॥
जलप्रभा कलौ या च नान्यत्र पृथिवीतले ।
स्वर्गे च नित्यं क्षीराभा तां गङ्गां प्रणमाम्यहम् ॥
यस्याः प्रभावमतुलं पुराणे च श्रुतौ श्रुतम् ।
या पुण्यदा पापहन्त्री तां गङ्गां प्रणमाम्यहम् ॥
यत्तोयकणिकास्पर्शैः पापिनाञ्च पितामह ! ।
ब्रह्महत्यादिकं पापं कोटिजन्मार्जितं दहेत् ॥
इत्येवं कथितं ब्रह्मन् ! गङ्गापद्यैकविंशतिः ।
स्तोत्ररूपञ्च परमं पापघ्नं पुण्यकारकम् ॥
नित्यं यो हि पठेद्भक्त्या संपूज्य च सुरेश्वरीम् ।
अश्वमेधफलं नित्यं लभते नात्र संशयः ॥
अपुत्रो लभते पुत्रं भार्य्याहीनो लभेत् प्रियाम्।
रोगात् प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥
अस्यकीर्त्तिः सुधया स्वर्गे भवति पण्डितः ॥
यः पठेत् प्रातरुत्थाय गङ्गास्तोत्रमिदं शुभम् ॥
शुभं भवेत् दुःस्वप्नं गङ्गास्नानफलं लभेत् ।"

इति गङ्गास्तोत्रम् ॥

नारायण उवाच ।

"भगीरथोऽनेन स्तोत्रेण स्तुत्वा गङ्गाञ्च

नारद ! ।

जगाम तां गृहीत्वा च यत्र यत्राञ्च सागराः ।
वैकुण्ठं ते ययुस्तूर्णं गङ्गायाः स्पर्शवायुना ॥
भगीरथेन सानीता तेन भागीरथी स्मृता ।
इत्येवं कथितं सर्वं गङ्गोपाख्यानमुत्तमम् ॥
पुण्यदं मोक्षदं सारं किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे गङ्गोपाख्यानेऽष्टमः ॥

भागुरिः, पुं, स्मृतिशास्त्रकारभेदादिकर्तृमुनिविशेषः । तत्पर्य्यायः । भृगुतुल्यकः २ । इति जटाधरः ॥

भाजितं

(यथा । "यदि भागुरिरलोपमवाप्योरुपसर्गयोः ।" इति सिद्धान्तकौमुदी ॥)

भाज्यं, क्ली, (भज्यतेऽनेन इति । भज + "कृदृशीर्य्यत् ।" ३ । १ । १२४ । इति ण्यत् । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) प्राक्तनशुभाशुभकर्म्म । तत्पर्य्यायः । दैवम् २ दिष्टम् ३ भागधेयम् ४ नियतिः ५ विधिः ६ । इत्यमरः । २ । ४ । १८ ॥ प्राक्तनकर्म्म ७ भागः ८ भवितव्यता ९ । इति जटाधरः ॥ अदृष्टम् १० । इति शब्दरत्नावली ॥ फलोन्मुखीभूतपूर्व्वदैहिकशुभाशुभं कर्म्म । इति मलमासतत्त्वम् ॥ (यथा,—

"समुद्रमन्थने लेभे हरिर्लक्ष्मीं हरो विषम् ।
भाग्यं फलति सर्व्वत्र न विद्या न च पौरुषम् ॥"

इति प्राचः ॥

उत्तरपदगुणीभूतत्वम् । यथा, हरिवंशे । २० । १ ।

"अवज्ञानिलहस्तार्द्रा-
भरणीभाग्योपगः सुतोऽर्कस्य ।
प्रचुरसलिलोपगूढां
करोति धात्रीं यदि स्निग्धः ॥"

भागो दृङ्गादिरस्मिन् दीयते इति । भाग + "भागाद्यच् ।" ५ । १ । ४६ । इति यत् ।) भागिके, त्रि । इति सिद्धान्तकौमुदी ॥ (भागमर्हति । भाग + "दृङ्गादिभ्यो यत् ।" ५ । १ । ६६ । इति यत् ।) भागार्हम् । (भज + ण्यत् । भजनीयम् ॥)

भाङ्गौनं, त्रि, (भङ्गाया भवनं क्षेत्रमिति । "विभाषा तिलमाषोमाभङ्गाण्णञ्यः ।" ५ । २ । ४ । इति यञ् ।) भङ्गाक्षेत्रम् । तत्पर्य्यायः । भाङ्गम् २ । इत्यमरक्षेमचन्द्रौ ॥ (यथा, शब्दरत्नावल्याम् ।

"एवं माष्यन्तु माषीयं कौद्रवं कोद्रवीणवत् ।
तथा भाङ्गञ्च भाङ्गीनमुन्मौनमित्यपि ॥")

भाज, तृ क पृथक्कृतायाम् । इति कविकल्पद्रुमः ॥ (अदन्तपुरा० - परo - सकo - सेटo ।) अवभाजत् घनं भाल्लवर्गः । इति दुर्गादासः ॥

भाजनं, क्ली, (भाज्यते इति । भाज पृथक्करणे + ल्युट् ।) पात्रम् । इत्यमरः । २ । ९ । ३३ ॥ (यथा, महाभारते । १३ । १११ । १०२ ।

"राजतं भाजनं दत्त्वा कपोतः संप्रजायते ।")

योग्यम् । इति मेदिनी । ने, १०१ ॥ (यथा, कथासरित्सागरे । ३४ । २०५ ।

"तस्माच्छिक्षितात्मा राजा स्यादयुक्तदण्डो विपश्चिद्वित् ।
प्रजानुरागाद्यैर्वं हि स भवेद्भाजनं श्रियः ॥")

"यः संवादयते नित्यं योऽभिवादात्तिलिप्सति ।
यश्च तप्तो न तपति तृट् सोऽर्थस्य भाजनम् ॥"

इति मत्स्यपुराणम् ॥

आढकपरिमाणम् । इति वैद्यकपरिभाषा ॥

भाजितं, त्रि, (भाज्यते स्मेति । भाज + क्त ।) पृथक्कृतम् । विभक्तम् । इति भाजधातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नम् ॥ (भाजे + क्त ।)भागे, क्ली ॥

भाण्डं

भाण्डी, स्त्री, (भाण्यते इति । भाण + कर्म्मणि घञ् । भाण + "आजसदृक्षवर्गौषधाजभाजभागेति ।" ४ । १ । ४९ । इति ङीष् ।) अङ्गनविशेषः । अन्यत्र भाणा । इति स्त्रीरत्नटीकायां दुर्गादासः ॥

भाण्यं, त्रि, भागार्हम् । भाजनीयम् । इति भाजधातोः कर्म्मणि यप्रत्ययेन निष्पन्नम् ॥

भाटकः, पुं, क्ली, (भटतीति । भट पोषणे + ण्वुल् ।) व्यवहारार्थं दत्तग्रकटादिलभ्यधनम् । इति हलायुधः ॥ भाड़ा इति भाषा ॥ अथ ग्रहादिभाटकम् ।

"परभूमौ गृहं कृत्वा भाटयित्वा वसेत्तु यः ।
स तदृग्रहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥
स्तोमं विना वसित्वा तु परभूमावनिच्छतः ।
निर्गच्छंस्तृणकाष्ठानि न गृह्णीयात् कथञ्चन ॥"

कात्यायनः ।

"गृहवाप्यादयस्तानि गृहीत्वा भाटकेन यः ।
स्वामिनो नार्पयेद्यावत्तावद्राप्यः स भाटकम् ॥"

वापी परकृता प्रतिष्ठितेति विवक्षितम् ।

"हस्त्यश्वगोखरोष्ट्रादीन् गृहीत्वा भाटकेन यः ॥
स्वामिनो नार्पयेद्यावत् तावद्राप्यः स भाटकम् ॥"

दक्षमनुः ।

"यो भाटयित्वा शकटं नीत्वा नान्यत्र गच्छति ।
भाटं न दद्याद्राप्योऽसावनूढ़स्यापि भाटकम् ॥"

शकटं हस्तीत्यादेरप्युपलक्षणम् । अनूढ़स्यावाहितस्यापि शकटादेः । इति विवादचिन्तामणिः ॥

भाण्डः, पुं, (भण्यतेऽनेति । भण + अधिकरणे घञ् ।) नाटकादिदृश्यकाव्यकान्तर्गतरूपकविशेषः । इति हेमचन्द्रः । २ । २६८ ॥ तस्य लक्षणादि यथा,—

"भाण्डः स्याद्धूर्त्तचरितो नानावस्थान्तरात्मकः ।
एकाङ्क एक एवात्र निपुणः पण्डितो विटः ॥
रङ्गे प्रकाशयेत् स्वेनानुभूतमितरेण वा ।
सम्बोधनोक्तिप्रत्युक्तैः कुर्य्यादाकाशभाषितैः ॥
लास्ययोर्वीरशृङ्गारौ नीत्यसौभाग्यवर्णनैः ।
तत्र तिष्टत्तसुत्पाद्य वृत्तिः प्रायेण भारती ॥
सुखनिर्व्यहणे सन्धौ लास्याङ्गानि दशापि च ॥
अकाकाशभाषितरूपं परवचनमपि स्वयमेवानुवदनुत्तरप्रत्युत्तरं कुर्य्यात् । शृङ्गारवीररसौ च सौभाग्यप्रौढ्यवर्णया लक्ष्येत् । प्रायग्रहणात् कौशिक्यपि वृत्तिर्भवति । उदाहरणं यथा मधुकरः ।" इति साहित्यदर्पणे ६ परिच्छेदः ॥

भाण्डं, क्ली, (भण्यते भक्षति वेति । भण् शब्दे + "अमन्ताड्डुः ।" उणा० १ । ११३ । इति डुः । ततः प्रज्ञादित्वादण् ।) पात्रम् । (यथा, महाभारते । १३ । ११ । १०२ ।

"दत्त्वा तु काञ्चनं भाण्डं क्षमियोनौ प्रजायते ॥")

वणिग्द्रव्यजातम् । भूषा । अस्त्रभूषा । इति मेदिनी । डे, २१ ॥ (यथा, महाभारते । ७ । २६ । २३ ।

"विप्रविड्भूभावजाश्चिन्नभाक्ताः पराश्वः ।
चारोद्वाहुरगाः पैतुर्मेषिणाः पार्थमार्गजैः ॥")
नष्टभाक्तस्य दत्तादिविधिर्यथा,—
"अराजदैविकं नष्टं भाक्तं दाप्यस्तु वाङ्मयः ।
प्रख्यातविप्रकर्त्रैव प्रदाप्यो द्विगुणं धनम् ॥
भाक्तं यदनमागच्छेत् यदि वाङ्मयदोषतः ।
दाप्यो यत् तत्र नष्टेषु देवराजशासनात् ॥"
इति मिताक्षरायां नारदः ॥
नदीकूलजलयमभम् । इति हेमचन्द्रः । ४ । ६२ ॥
(भक्तं इति । भक्ति + अण् । भक्तस्य भावः इत्यण् ।) भक्तवृत्तिः । इत्यजयपालः ॥ भाँड़ामि इति भाषा ॥

भाङ्गः, पुं, गङ्गैभाङ्गस्वरः । इति शब्दचन्द्रिका ॥

भाङ्गपुटः, पुं, (भाङ्गे पुटो यस्य ।) नापितः । इति जटाधरः ॥

भाङ्गपुष्पः, पुं, सर्षपविशेषः । तत्पर्य्यायः । कौङ्कुटिकन्दलः २ । इति चिकाण्डशेषः ॥

भाङ्गागारः, पुं, (भाङ्गानां पात्रादीनामागारः ।) यज्ञविशेषः । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मन्थरः २ । इति शब्दमाला ॥
(यथा, महाभारते । १२ । ६६ । ५४ ।
"भाङ्गागारायुधागारान् कोषागारांश्च सर्व्वशः ।
अन्नागारान् गजागारानवलोकाधिकरणानि च ॥")

भाङ्गारी, [न्] पुं, (भाङ्गारोऽधिकारित्वेनास्यास्तीति । भाङ्गार + इनिः ।) भाङ्गाराध्यक्षः । भाँड़ारी इति भाषा । यथा, व्यवहारप्रदीपे ।
"क्षुधितस्तृषितः कामी विद्यार्थी क्षधिकारकः ।
भाङ्गारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥

भाङ्गिः, पुं, (भङ्ग + इन् । पृषोदरादित्वात् साधुः ।) नापितस्य क्षुराद्याधारः । भाँड़ि इति भाषा । इति भाङ्गिवाङ्मयशब्ददर्शनात् ॥

भाङ्गिलः, पुं, (भाङ्गिरस्यास्तीति । भाङ्गि + लच् ।) नापितः । इति शब्दमाला ॥

भाङ्गिवाङ्मः, पुं, (भाङ्गिं क्षुराद्याधारं वहतीति । वह + अण् ।) नापितः । इति शब्दमाला ॥

भाङ्गीरः, पुं, (भङ्ग + ईरच् । पृषोदरादित्वात् साधुः ।) वटवृक्षः । इति जटाधरः ॥ ब्रजमण्डलान्तरे षोड़शवटवनमध्ये द्वितीयवटवनम् । यथा,—
"वङ्गेतवटमादौ तु भाङ्गीराख्यं वटं द्वयम् ॥"
इति नारायणभट्टकृतव्रजभक्तिविलासः ॥

भात, क्ली, (भा दीप्तौ + क्तः ।) प्रभातम् । इति शब्दमाला । (भा + भावे क्तः ।) दीप्तिः ॥ नदति, त्रि ॥

भातिः, स्त्री, (भा + क्तिन् ।) शोभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।
"अस्तद्वयुर्भातिविभूषणायुधै-
रव्यक्तचिद्व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः
संपद्यतोदेवजतिर्यथा नटः ॥")

भानुः, पुं, (भातीति । भा + "कृमिमथिजनिभा-भ्यां त्नुश्च ।" उणा० १ । ७१ । इति नुः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ दीप्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भानुः, पुं, (भानौ सौरमासेऽस्तीति । भानौ + "वासिन् सौरमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता सौरमासी यस्मिन् मासि सः । वैशाखादिद्वादशमासानामेतत्पञ्चमभागः । तत्पर्य्यायः । नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ । इत्यमरः । १ । ४ । १७ ॥ स च द्विविधः । सिंहस्थरविकालः सौरः । १ । सिंहस्थरवारभ्यशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः । कन्याप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्रः ।२। इति मलमासतत्त्वम् ॥*॥ तत्र जातफलम् ।
"नभस्यमासे खलु जन्म यस्य
धीरो मनोज्ञश्च नराङ्गनानाम् ।
रिपुप्रमाथी कुटिलोऽतिमर्म्मा
प्रपन्नभर्त्ता च भवेत् सदासः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
तत्र गोः प्रसवे नारदः ।
"भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र घ्राणिं प्रवक्ष्यामि येन सम्प्रसूते शुभम् ।
प्रसूता तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तानामयुतं सुहुयात्ततः ॥"
आहुतीनां घृताक्तानामयुतं सुहुयात्ततः ॥"
आहुतिभिश्चायं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
इति ॥
तथा ।
"सिंहराशौ गते सूर्य्ये गोः प्रसूतिर्यदा भवेत् ।
पौषे च मद्दिषी सूते दिवैवाश्वतरी तथा ।
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै घ्राणिकं चरेत् ॥
अस्य वामेतिसूक्तेन तद्दिशोरिति मन्त्रतः ।
जुहुयाच्च तिलाज्येन घृतमष्टोत्तराधिकम् ॥
इत्युक्तविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् घ्राणिसूक्तेन वा पुनः ॥
मधराजौ निशीथे वा यदा गौः क्रन्दते तदा ।
याम्ये वास्य गृहे वापि घ्राणिकं पूर्ब्बवद्दिशेत् ॥"
संक्रमणोत्तरषोड़शदण्डात्मकपुण्यकालाभ्यन्तरे गोः प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्ब्बकघ्राणिः कार्य्य इति विशेषः । तदतिरिक्तसिंहस्थरवौ गोः प्रसवे घ्राणिमात्रं कर्त्तव्यं न गोः प्रदानम् । विशेषविस्तृतादद्भुतसागरग्रन्थीयवचनजातमीमांसायुक्तादवधारणीयम् ॥ * ॥ अथ भाद्रशुक्लम् । तत्र जन्माष्टमीव्रतप्रमाणान्वितरात्रेऽनुसन्धेयम् । भाद्रपदपौर्णमास्यवच्छिन्नभाद्रकृष्णाष्टम्यां रात्रिमध्ये सकलाष्टमीरोहिणीयोगरूपजयन्तीयोगे तत्रैवोपवासः । उभयदिने वैष्णवे परदिने । जयन्तयोगे तु रोहिणीयुक्ताष्टम्यां उभयदिने रोहिणीयुताष्टमीयोगे परदिने । रोहिण्ययोगे तु निशीथव्यापिन्यामष्टम्याम् । उभयदिने निशीथव्याप्ते तदव्याप्ते वा परदिने इति ।

तत्र प्रयोगः पूर्ब्बदिने संयमं विधाय तद्दिने कृतप्रातःस्नानादिराचान्तः । ॐ क्लीं क्लीं इति पठित्वा ॐ तद्विष्णोः परमं पदमित्यादिमन्त्रेण नारायणं संस्मृत्य ॐ सत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्तालत्रयात्मके कृष्णतिलजलाधारे ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । यद्युपवासदिने प्रातः सप्तमी तदाष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । ततः सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्टासिचं उदासिचन्नुतपवा प्रस्तुतमादित्यदेवो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मेपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य
"ॐ वासुदेव सङ्कर्षण सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्द्धरात्रोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यशोविन्द त्रिधोत्तिजम् ।
तन्मे सुक्षतु मां चाहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
इति पठेत् ।
तत आह्निकं समाप्याहोरात्रे तत्तत्प्रतिमासु पटादिषु वा आवाहनविसर्জ্জनसहितं शालग्रामे घटादिस्थजले वा आवाहनविसर्জ্জनरहितं पूजयेत् । ततो ध्यानम् ।
"माचापि बालकं सुप्तं पर्य्यङ्के शयनोचितम् ।
श्रीवत्सवक्षःपूर्णाङ्गं नीलोत्पलदलच्छविम् ॥"
इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् । इदमासनं ॐ कृष्णाय नमः । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नमः ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । ततो दधिमधुघृतालकं मधुपर्कमानीय एष मधुपर्कः ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । लौकिकघटाधिकक्षतजलतोलकपरिमितान्नं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नमः । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नमः । इदं वस्त्रं इदमाभरणम् एष गन्धः इदं पुष्पम् एष धूपः एष दीपः इदं नैवेद्यम् ॐ विष्णवे विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः । इत्यनेन नैवेद्यं दत्त्वा आचमनीयं च। ततो नमो देव्यै शिवै नमः । इति मन्त्रेण शिवां पूजयेत्। ततः सप्तशतीविधिवार्षिं संकल्प्य धृतशिवाभ्याम्। ॐ धर्म्माय धर्म्मेश्वराय धर्म्मेपतये धर्म्मसम्भवाय

गोविन्दाय नमो नमः स्वाहा। इत्यग्नेर्नाडी-
त्रयसप्तसमिदाज्यतिलमधौ वा जुहुयात्। ततो
गुरुहस्तेन वत्सोर्धारां भित्तौ दद्यात्। ततो
नाड़ीच्छेदं भावयेत्। ॐ षष्ठ्यै नम इति षष्ठीं
पूजयेत्। ततो भगवतः श्रीकृष्णस्य नामकरणान्न-
प्राशनचूड़ाकरणोपनयनोद्वाहसंस्कारान् भाव-
येत्। ततः प्रणवादिनमोऽन्तेन तत्तन्नामभिः
पूजयेत्। ॐ देवक्यै नमः एवं वसुदेवाय यशो-
दायै नन्दाय रोहिण्यै चण्डिकायै बलदेवाय
दत्ताय गर्गाय चतुर्भुजाय इत्यनेन यथाशक्ति
पञ्चोपचारैः पूजयेत्। ततः शङ्खेन कुशपुष्प-
चन्दनजलान्यादाय भूमौ जानुनी पातयित्वा,
ॐ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव!।
गृहाणार्घ्यं मयादत्तं रोहिण्या सहितो मम॥
ॐ सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय
गोविन्दाय नमो नमः। इत्यर्घ्यं दद्यात्। ततः
प्रणामसमन्त्रौ।
"ॐ ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये
नमः।
नमस्ते रोहिणीकान्त! सुधावास नमोऽस्तु ते॥
नभोमण्डलदीपाय क्षीरोदाय धृतात्मने।
कलाभिर्वर्द्धमानाय नमश्चन्द्राय चारवे॥"
ततश्च।
"अजं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम्।
वासुदेवं हृषीकेशं माधवं मधुसूदनम्॥
वराहं पुष्करीकाक्षं नृसिंहं दैत्यसूदनम्।
दामोदरं पद्मनाभं केशवं गरुड़ध्वजम्॥
गोविन्दमच्युतं देवमनन्तमपराजितम्।
अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारिणम्॥
अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम्।
नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम्॥
पीताम्बरधरं नित्यं वनमालाविभूषितम्।
श्रीवत्साङ्कं जगत्सेतुं श्रीकान्तं श्रीधरं हरिम्।
प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये॥"
इति स्तवः॥
ततः प्रणमेत्।
"प्रणमामि सदा देवं वासुदेवं जगत्पतिम्।
त्राहि मां सर्वदेवेश हरे! संसारसागरात्॥"
ततः प्रार्थयेत्।
"ॐ त्राहि मां सर्वपापघ्न दुःखशोकार्णवाहरे!।
सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे॥
देवकीनन्दन श्रीश हरे संसारसागरात्।
त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाहरे!॥
दुर्मतिं क्षायसे विष्णो ये स्मरन्ति सकृत्सकृत्।
सोऽहं देवातिदुर्वृत्तस्त्राहि मां दुःखसागरात्॥
पुण्यराज नियमोऽहं मायाविज्ञानसागरे।
त्राहि मां देवदेवेश! त्वत्तो नान्योऽस्ति
रक्षिता॥"
इति प्रार्थयेत्॥
"यद्बाल्ये यच्च कौमारे बाल्ये यच्च यौवने।
तत् पुण्यं वृद्धिमाप्नोतु प्रार्थं हर हलायुध!॥"
इति वदेत्॥

ततो वृत्तगीतवाद्यस्तवैः कालं नयेत्। पर-
दिने प्रातःस्नानादिकं कृत्वा भगवन्तं श्रीकृष्णं
यथाविधि संपूज्य दुर्गायाश्च महोत्सवः कार्यः।
ततो ब्राह्मणान् भोजयेत् तेभ्यो दक्षिणां दद्यात्
सुवर्णादि यत् किञ्चिदिष्टतमं श्रीकृष्णो मे प्रीयता-
मिति।
"ॐ यं देवं देवकी देवी वसुदेवादजीजनत्।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः॥
सुब्रह्मवासुदेवाय गोब्राह्मणहिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥
शान्तिरस्तु शिवञ्चास्तु हृत्पुष्पार्घ्यं विसर्जयेत्॥"
ततश्चोपवासपरदिने तिथिनक्षत्रयोरवसाने
पारणम्। यदा तु महानिशायाः पूर्वमेकतर-
स्यावसानं अन्यतरस्य महानिशायां तदनन्तरं
वा तदेकतरावसाने पारणम्। यदा तु महानि-
शायामुभयस्थितिः तदा उत्तरवसाने पारणं
कुर्यात्। तत्र मन्त्रः। ॐ सर्वाय सर्वेश्वराय
सर्वपतये सर्वसम्भवाय गोविन्दाय नमो नमः।
पारणानन्तरन्तु समापनमन्त्रः। ॐ भूताय
भूतेश्वराय भूतपतये भूतसम्भवाय गोविन्दाय
नमो नमः। इत्यनेन व्रतं समापयेत्॥*॥
भाद्रशुक्लपञ्चमीमधिकृत्य भविष्योत्तरे।
"तथा भाद्रपदे मासि पञ्चम्यां भक्तवत्सलः।
यक्षालिखे नरो भक्त्या शङ्खपद्मादिचर्चके॥
पूजयेन्नवपुष्पैश्च सर्पिर्गुग्गुलुधूपयेत्॥
तस्य तुष्टिं समायान्ति पन्नगाश्चक्रकादयः।
आसप्तमात् कुलात्तस्य न भयं सर्पतो भवेत्।
तस्मात् सर्वप्रयत्नेन नागान् संपूजयेन्नरः॥
इयमेवालेख्यनागपञ्चमीति वाचस्पतिमिश्राः।
आलेख्यनागाः कर्कोटकादयः पूर्वलिखिताः
पूजा च श्रावणपञ्चमीविधिरिति बोध्यम्॥*॥
अथ हरेः पार्श्वपरिवर्त्तनम्। तत्र द्वादश्यां
सन्धिसमये नक्षत्राणामसम्भवे। आभाका-
लितपक्षेषु ग्रथनावर्त्तनादिकमिति ब्रह्मपुरा-
णात्॥ भाद्रशुक्लद्वादश्यां श्रवणमध्ययुक्तायां
सन्ध्यासमये द्वादशाभ्यन्ताभावे एकादश्यादिषु
पादयोगे तदभावेऽपि द्वादश्यां केवलायां वा
जलाद्विकः स्वयं सन्ध्यायां देवं संपूज्य।
"ॐ वासुदेव जगन्नाथ पार्श्वेयं द्वादशी तव।
पार्श्वेन परिवर्त्तस्व सुखं स्वपिहि माधव!॥"
इति प्राञ्जलिः पठेत्॥
"त्वयि सुप्ते जगन्नाथ! जगत् सुप्तं भवेदिति।
प्रबुद्धे त्वयि बुध्येत जगत् सर्वं चराचरम्॥"
इत्यनेन पूजयेत्॥*॥
अथ सिंहार्के चतुर्थ्यां चन्द्रदर्शनप्रायश्चित्तम्।
सिंहार्कमधिकृत्य ब्रह्मपुराणम्।
"नारायणोऽभिप्रायस्तु सिंहाकरमरीचिषु।
स्थितचतुर्थ्यामद्यापि मनुष्याणामपैति यः॥
अतश्चतुर्थ्यां चन्द्रन्तु प्रमादाद्दृष्ट्वा मानवः।
पठेद्वाचयिकावाक्यं प्राङ्मुखो वाप्युदङ्मुखः॥"
अभिप्रायो मिथ्यापवादविषयीभूतः। सोऽभि-
प्रायः अद्यापि मनुष्यान् प्रतेत्। ततश्च
प्राङ्मुख उदङ्मुखो वा कुशप्रतिकृतिजलान्यादाय

ॐ अद्येत्यादि सिंहार्कचतुर्थीचन्द्रदर्शनजन्य-
पापक्षयकामो धार्मेयीव्रताङ्गमहं पक्षिष्ये। इति
संकल्प्य।
"ॐ सिंहः प्रसेनमवधीत् सिंहो जाम्बवता
हतः।
सुकुमारक! मा रोदीस्तव ह्येष स्यमन्तकः॥"
इति विष्णुपुराणोक्तं धार्मेयीव्रताङ्गं पठेत्॥*॥
अथानन्तव्रतम्। तच्च भाद्रे पूर्वाह्णव्याप्तशुक्लभाद्रे
व्रतम्। उभयदिने चेत् परदिने युञ्जात्। व्रतानु-
ष्ठानविधिस्तु पक्षतौ ज्ञेयः॥*॥ अथानन्तार्घ्या-
दानम्। प्रमाणन्तु तिथिनक्षत्रेऽनुसन्धेयम्।
सिंहस्थरविकर्कस्थसूर्येण सौरमासादेः। कन्यार्क-
संक्रान्तिपूर्वदिनमध्याह्नोत्तरे शतशाखादिकुशा-
ङ्कितकलशकृतजलान्यादाय ॐ तत् सदित्यनुषार्य
ॐअद्येत्यादि सर्वाभिलषितसिद्धिकामोऽनन्त-
पूजनमहं करिष्ये इति संकल्प्य आचम्य
जले वा दक्षिणामुखः एतत् पात्रम् ॐ अन-
न्ताय नमः। सितपुष्पाक्षतयुक्तं जलं शङ्खेन
गृहीत्वा इदमर्घ्यम्।
ॐ कालपुरुषप्रतीकाश अधिमासतनयव।
सिंहार्कतनयोः पूत्र कृष्णयोने नमोऽस्तु ते॥
ॐ अनन्ताय नमः। एवमाचमनीयस्नानीय-
गन्धपुष्पधूपदीपनैवेद्यादिकं दद्यात्।
ॐ त्रातापिर्भक्षितो येन वातापिश्च महासुरः।
सगुप्तः क्षोभितो येन स मेऽनन्तः प्रसीदतु॥"
इति प्रार्थयेत्॥ इति ब्रह्मतत्त्वम्॥

भाद्रपदः, पुं. (भाद्रपदाचन्द्रयुक्ता पौर्णमासी
भाद्रपदी सा यत्र मासे सः। भाद्रपदी + अण्।)
भाद्रमासः। इत्यमरः। १। ४। १७॥ (यथा,—
"ते तु भाद्रपदाख्येन हिमाख्येन चाख्याताः।
तद्यथा। भाद्रपदाश्वयुजौ वर्षाः।" इति
सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥)
भाद्रपदा, स्त्री, पूर्वभाद्रपदानक्षत्रम्। उत्तर-
भाद्रपदानक्षत्रम्। तत्पर्य्यायः। प्रौष्ठपदा २।
इत्यमरः। १। ३। २०॥
भाद्रमातुरः, पुं, (भद्रमातुरपत्यमिति। भद्रमाता +
"मातुरुत्संख्यासम्भद्रपूर्व्यायाः।" ४। १। १२५।
इति अण्। "उत्कादेरञ्तादेश्च।" इति वार्त्तिकात्।) सतीतनयः। "सत्यासु तनये साक्षा-
न्नुरवद्भाद्रमातुरः।" इति हेमचन्द्रः। ३। २१०॥
भानुः, पुं, (भाति चतुर्दशभुवनेषु स्वप्रभया दीप्यते
इति। भा + "दाभाभ्यां नुः।" उणा॰ १।
१२। इति नुः।) सूर्य्यः। (यथा, महा-
भारते। ३। ३। २४।
"अनन्तः कपिलो भानुः कामदः सर्वतोमुखः॥"
विष्णुः। यथा, तत्रैव। १३। १४८। २७।
"सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः॥"
प्राधायाः पुत्रभेदः। यथा, तत्रैव। २१४५। ४८।
"विश्वासस्तस्य भानुश्च सुचन्द्रो दस्यमञ्जघा।
हव्येशा देवसम्भव्या प्राधायाः परिकीर्त्तिताः॥"
अङ्गिरःस्वरूपस्य पुत्रभेदः। यथा, तत्रैव।
३। २२०। ८।

"नयसच्च मनुं पुत्रंभानुचाप्यङ्गिराः सृजत्।"
यादवविशेषः। यथा, हरिवंशे। १४७। २।
"कन्या भानुमती नाम भानोर्दुहितरं नृप!।
जग्राहालक्षधाम्नोऽग्नौ निशुम्भो नाम दानवः॥")
किरणः। (यथा, ऋग्वेदे। ६। ६४। २।
"अदादृक्षत्रविषा विभास्फुते द्यौर्भानवो
न्नाभयन्नम्॥"
"भानवो रश्मयः।" इति तद्भाष्ये सायणः॥)
अर्कवृक्षः। इत्यमरः। २। ४। ३६॥ प्रभुः।
राजा। इति धरणिः॥ इत्यर्थैतृपिङ्गविशेषः।
इति हेमचन्द्रः। २। १४॥

भानुः, स्त्री, (भासतीति। भा+नुः) भानुमती।
इति शब्दरत्नावली॥ (दक्षकन्याभेदः। यथा,
मत्स्यपुराणे। ५। १५।
"अनुजां देवमातॄणां प्रभाविस्तरमादितः।
मदलतीं वसुधामीं लक्ष्मीं भानुरजीजनत्॥")

भानुपत्नी, स्त्री, (भानुरिव दीप्तिमत् पत्रमस्याः।)
कदली। इति जटाधरः॥

भानुमती, स्त्री, (भानु+मतुप्+ङीप्।) विक्रमादित्यराजपत्नी। यथा,—
"देवगुरोः प्रसादेन जिह्राये मे सरस्वती।
तिष्ठाहं नृप! यामि भानुमत्याश्चितं यथा॥"
इति वररुचिः॥
(दक्षदौहित्रस्य दुहिता। या च अर्कसंज्ञातेः पत्नी।
"यथा, महाभारते। १। ६५। १५।
"अर्कसंज्ञातिः सत्यजनयीर्यदुहितरमुपयेमे भानुमतीं नाम। तस्यामस्य जज्ञे सार्व्वभौमः॥"
अधिपः। प्रथमा सुता। यथा, महाभारते।
३। २१७। ३।
"प्रजासु तासु सर्व्वासु रूपेणाप्रतिमाभवत्।
देवी भानुमती नाम प्रथमाङ्गिरसः सुता॥"
यादवभानोः कन्या। यथा, हरिवंशे। १४७।२।
"कन्या भानुमती नाम भानोर्दुहितरं नृप।।"
दुर्योधनपत्नी। यथा, वेणीसंहारनाटके २ अङ्के।
"आर्ये! एषा भानुमती देवी पत्युः समरविजयार्थंगुरया निर्वर्त्तितगुरुप्रादक्षिण्यनान्यप्रभृति आरब्धनियमा बालोद्याने तिष्ठतीति॥"
गङ्गा। यथा, काशीखण्डे। २६। १२६।
"भक्तिमुक्तिप्रदा भिन्नो भक्तस्वर्गापवर्गदा।
भागीरथी भानुमती भाग्यं भोगवती क्षितिः॥")

भानुमान्, [न्] पुं, (भानवः सन्त्यस्येति। भानु+मतुप्।) सूर्य्यः। इति शब्दरत्नावली॥ (यथा, कुमारसम्भवे। १। ६५।
"अथोपनिन्ये गिरिणाय गौरी
तपस्विने तान्त्रसचा करेण।
विद्योतिता भानुमतो मयूखै-
र्मन्दाकिनी पुष्करबीजमालाम्॥"
कलिङ्गदेशजनृपतिविशेषः। यथा, महाभारते।
६। ५१। १२।
"भानुमांस्तु ततो भीमं शरवर्षेण वारयन्।
जघान वत्सदन्तानां सादयानो बलक्षयम्॥"

जैह्मिध्वजस्य पुत्रः। यथा, भागवते। ६। १६। २१।
"भानुमांश्चास्य पुत्रोऽभूच्छतजुच्चस्तु तत्-
सुतः॥")
दीप्तियुक्ते, त्रि॥ (यथा, महाभारते। १। ३०। ४०।
"चन्द्रमाश्चापि च भानुमन्ति ह्रदानि च॥")

भानुवारः, पुं, (भानोर्वारः।) रविवारः। यथा,—
"अमावास्या दादशी च संक्रान्तिश्च विशेषतः।
एताः प्रशस्ताश्चिथयो भानुवारश्चथैव च॥
अत्र स्नानं जपो होमो देवतानाञ्च पूजनम्।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्॥"
इति तिथितत्त्वे सम्बन्धवचनम्॥

भानेमिः, पुं, (भानां प्रभाचक्राणां नेमिरिव।)
सूर्य्यः। इति त्रिकाण्डशेषः॥

भाम, ड क्रोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ड, भामते। इति दुर्गादासः॥

भाम, तृ क कोपने। इति कविकल्पद्रुमः॥ अदन्त-पुरा०-पर० अक०-सेट्।) अवभामत्। इति दुर्गादासः॥

भामः, पुं, (भामनमिति। भाम क्रोधे+घञ्।)
क्रोधः। (यथा, ऋग्वेदे। ५। २। १०।
"मदेचिदस्य प्रवणेषु भामा
न वरन्ते परिबाधो अदेवीः॥"
"भामाः क्रोधा दीप्तयो वा।" इति तद्भाष्ये सायणः॥ भातीति। भा+"अर्त्तिस्तुसुहुसृधृ-क्षिक्ष्विभ्यो मन्।" उणा०। १। १४६। इति मन्।) सूर्य्यः। (भा+भावे मन्।) दीप्तिः। इति मेदिनी। मे, २१॥ भगिनीपतिः। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ६। १६। ७६।
"गुरुं मित्रं तथा भामं पुत्रञ्च भगिनीं तथा॥")

भामकः, पुं, (भाम एव। स्वार्थे कन्।) भगिनीपतिः। इति शब्दरत्नावली॥

भामा, स्त्री, (भामते इति। भाम्+अच्+टाप्।)
कोपना स्त्री। इति शब्दरत्नावली॥

भामिनी, स्त्री, (भामते इति। भाम्+णिनिः+ङीप्।) कोपना स्त्री। इत्यमरः। २। ६। ४॥
स्त्रीमात्रम्। इति राजनिर्घण्टः॥ (यथा, भागवते। ६। १८। ६।
"एकदा दानवेन्द्रस्य पुत्रिका नाम कन्यका।
सखी सहस्रसंयुक्ता गुरुपुत्री च भामिनी॥"
तुम्बुरनामकगन्धर्वस्य दुहिता। यथा, मार्कण्डेयपुराणे। १२८। ७।
"राजपुत्र! सुतेयं मे भामिनी नाम मानिनी।
अभिशापादगन्धर्वस्य विप्रजातमयाभवत्॥")

भामिनीविलासः, पुं, (भामिन्या विलासो यत्र।)
जगन्नाथमिश्रपण्डितराजप्रणीतकाव्यग्रन्थविशेषः। तस्याद्यश्लोकोऽयम्।
"दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिष्यन्तः कायद्रयाद्दमसमधृतोला: खलु जवा:।
इदानीं लोकेऽस्मिन्नुपमविरहान्मानवपतेः
नवानां पात्रित्रं प्रकटयतु कस्मिन् नृपतिः॥
तस्य पुत्रिका। इति श्रीमत्पण्डितराजजग-

न्नाथविरचिते भामिनीविलासे प्राक्तनाविकः प्रथमो विलासः। अङ्गारवर्णनं द्वितीयो विलासः। श्रीकृष्णगुणानुवर्णनं तृतीयो विलासश्च॥

भामी, [न्] त्रि, (भामः क्रोधोऽस्यास्तीति। भाम+"अत इनिठनौ।" ५। २। ११५। इति इनि।) क्रोधी। (तेजस्वी। यथा, ऋग्वेदे। १। ७७। १।
"यथा दाधीमामये काण्वे देवस्तुतोऽवते भामिनी गीः॥"
"भामिनी तेजस्विनी।" इति तद्भाष्ये सायणः॥)

भारः, पुं, (ह्रियते इति। भृञ् भरणे+"आतश्चोपसर्गे कारके संज्ञायाम्।" ३। ३। १६। इति घञ्।) विंशतितुलापरिमाणम्। इत्यमरः॥ तच्च अष्टसहस्रतोलकात्मकमिति यावत्। मेदिनी। रे, ७२॥ गुरुत्वञ्च॥ (गुरुत्वगुणवदस्तु॥)

भारङ्गः, पुं, उत्तरकुरुवर्त्तिदेशजगरुडपक्षी। इति पुराणम्॥

भारतं, क्ली, (भरतानां भरतवंशीयानामिदं इतो वा यत्र इत्यण्। यद्वा, भारं चतुर्वेदादिशास्त्रेभ्योऽपि सारार्थं तनोतीति। तनु+डः।) पञ्चमवेदः। इति मेदिनी। ते, १२८॥ तच्च व्यासप्रणीतलक्षश्लोकात्मकमहाभारतसंज्ञकेतिहासः। तस्य अवयवादिफलं यथा,—
"भारतं ह्यनुयाज्यं भारतं परिकीर्त्तयेत्।
भारतं भवने यस्य तस्य ह्यक्षगतो भवः॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुवपुःसुताय।
पुण्याच्च भारतकथां शृणुयाच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा।
ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठचतुष्पदाम्॥
यथेतिहासानीतिहासानां तथा भारतमुच्यते॥
यश्चेनं श्रावयेत् श्राद्धे ब्राह्मणान् पादमन्ततः।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते॥
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते।
भ्रूणहत्याकृतञ्चापि पापं जह्यादसंशयः॥"
इति महाभारतम्॥*॥

तद्दृष्टान्तो यथा,—
ब्रह्मोवाच।
"भारतं संप्रवक्ष्यामि भारावतरणं शुभः।
यत्रे कृष्णो युधामानः पाण्डवादिनिमित्ततः॥
विष्णुनाभ्यब्जजो ब्रह्मा ब्रह्मपुत्रोऽत्रिरत्रिजः।
सोमस्ततो बुधस्तस्मादैलश्चापि पुरूरवाः॥
तस्मादायुस्ततो भूभृदयातिर्भरतः कुरुः।
ययातनुशस्य वंशेऽभूद्गङ्गायां शान्तनोः सुतः॥

भीष्मः सर्वशुभैर्युक्तो ब्रह्मवैवर्तपारगः ।
शान्तनोः सत्यवत्याश्च द्वौ पुत्रौ संबभूवतुः ॥
चित्राङ्गदस्तु गन्धर्वः पुत्रं चित्ररथोऽवधीत् ।
अथो विचित्रवीर्योऽभूत् काशिराजसुतापतिः ॥
विचित्रवीर्ये त्वयाते आसाद्यतृतीयेऽनोऽभवत् ।
धृतराष्ट्रोऽम्बिकापुत्रः पाण्डुरम्बालिकासुतः ॥
सुनिष्कायान्तु विदुरो गान्धार्यां धृतराष्ट्रतः ।
दुर्योधनप्रधानास्तु शतसंख्या महाबलाः ॥
पाण्डोः कुन्त्याश्च माद्र्याश्च पञ्च पुत्राः प्रजज्ञिरे ।
युधिष्ठिरो भीमसेनः अर्जुनो नकुलस्तथा ।
सहदेवश्च पञ्चैते महाबलपराक्रमाः ॥
कुरुपाञ्चालयोर्वैरं दैवयोगाद्भूव ह ।
दुर्योधनेन वीरेण पाण्डवाः वसुधहृताः ।
दग्धा जतुगृहे वीरास्ते मुक्ताः सुधियामलाः ॥
ततस्तु एकचक्रायां ब्राह्मणस्य निवेशने ।
विप्रवेषा महात्मानो निहत्य बकराक्षसम् ॥
ततः पाञ्चालविषये द्रौपद्यास्ते स्वयंवरम् ।
विज्ञाय वीर्यमुख्यां तां पाण्डवा उपयेमिरे ॥
श्रोत्रभीष्मानुमत्या च धृतराष्ट्रः समानयत् ।
अर्द्धं राज्यं ततः प्राप्य इन्द्रप्रस्थे पुरोत्तमे ॥
राजसूयं ततश्चक्रुः सभां कृत्वा यतव्रताः ।
अर्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ॥
वासुदेवस्य भगिनीं मित्रं देवकिनन्दनम् ॥
गान्धारं नाम सद्विद्यं चित्रं लोकेषु विश्रुतम् ।
अक्षय्यान् शायकांश्चैव तथाभेद्यञ्च दंशनम् ॥
स तेन धनुषा वीरः पाण्डवो जातवेदसम् ।
कृष्णद्वितीयो बीभत्सुरतर्पयत वीर्यवान् ॥
कृपान् दिग्विजये जित्वा रत्नान्यादाय वै ददौ ।
युधिष्ठिराय महते भ्रात्रे नीतिविदे सदा ॥
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः परिवारितः ।
जितो दुर्योधनेनैव मायाद्यूतेन पापिना ।
कर्षद्दुःशासनमते स्त्रियंतेन प्रकुर्वते ।
अथ द्वादशवर्षाणि वने तेपुर्महत्तपः ॥
सधौम्या द्रौपदीसत्या सुनिरुद्धाभिसंवृता ।
ययुर्विराटनगरं गुप्तरूपेण संस्थिताः ॥
वर्षमेकं महाप्राज्ञा गोपद्वादिमपालयन् ।
ततो ज्ञाताः स्वकं राष्ट्रं पार्थयामासुराहृताः ॥
पञ्च ग्रामानर्हराज्यं वीरा दुर्योधनं नृपम् ।
याचन्तः कुरुक्षेत्रे युद्धचक्रुर्बलान्विताः ॥
अक्षौहिणीभिर्दशभिः सप्तभिः परिवारिताः ।
एकादशभिरुद्युक्ताश्चेपि दुर्योधनादयः ॥
आसीद्युद्धं सर्वमार्गे देवासुरबलोपमम् ।
भीष्मः सेनापतिरभूदादौ दौर्योधने बले ॥
पाण्डवानां शिखण्डी च तयोर्युद्धं बभूव ह ।
अस्त्रास्त्रैर्महाघोरं दशरात्रं शरार्णवैः ॥
शिखण्ड्यर्जुनबाणैश्च भीष्मः शरशिखैश्चितः ।
उत्तरायणमीक्षाय ध्यात्वा देवं गदाधरम् ॥
उक्त्वा धर्मान् बहून् वर्षोत्तर्पयित्वा पितॄन् बहून् ।
आनन्दे तु पदे लीनो विमले सुखविग्रहे ॥
ततो द्रोणो ययौ योद्धुं द्रुपदुद्युम्नवे वीर्यवान् ।
दिनानि पञ्च तद्युद्धमासीत् परमदारुणम् ॥
च हते पृथिवीपाला हताः पार्थाश्वसागरे ।
श्रोत्रमाश्वास्य पुत्रेण द्रोणोऽपि स्वर्गमाप्नुयात् ॥
ततः कर्णो ययौ योद्धुमर्जुनेन महात्मना ।
द्विदयं महद्युद्धं कृत्वा पार्थाश्वसागरे ॥
विमर्दः सुमहांस्तत्र तत्र प्राप च वीर्यवान् ।
ततः शल्यो ययौ योद्धुं धर्मराजेन धीमता ॥
द्विसार्द्धेन हतः शल्यो वाजैर्ज्वलनसन्निभैः ।
दुर्योधनोऽथ वेगेन गदामादाय वीर्यवान् ॥
अभ्यधावत वै भीमं कालान्तकयमोपमम् ।
अथ भीमेन वीरेण गदया विनिपातितः ॥
अश्वत्थामा ततो द्रौणिः सुप्तं सैन्यं ततो निशि ।
जघान बाहुवीर्येण पितुर्वधमनुस्मरन् ॥
धृष्टद्युम्नं जघानाथ द्रौपदेयांश्च वीर्यवान् ।
द्रौपद्यां रोदमानायामश्वत्थाम्नः शिरोमणिम् ।
ऐषीकास्त्रेण तं जित्वा जयाहार्जुन उत्तमम् ॥
युधिष्ठिरः समाश्वास्य स्त्रीजनं श्रोत्रसङ्गतम् ।
ज्ञात्वा सत्यं दैवांश्च पितॄनथ पितामहान् ।
आश्वासितोऽथ भीष्मेण राज्यञ्चैवाकरोन्नृपः ॥
विष्णोर्मौञ्जेऽश्वमेधेन विधिवद्दक्षिणावता ।
राज्ये परिक्षितं स्थाप्य यादवानां विनाशनम् ॥
श्रुत्वा तु मौसले राजा जग्मौ नामसहस्रकम् ।
विष्णोः स्वर्गं जगामाथ भीमाद्यैर्भ्रातृभिर्युतः ॥"

इति गारुडे १५० अध्यायः ॥*॥

वर्षभेदः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतनवमवर्षः । तद्विवरणं यथा,—
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने ! ।
कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम् ॥
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ।
विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च ।
तिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ! ॥
इतः स्वर्गश्च मोक्षश्च मध्यञ्चान्तश्च गम्यते ।
न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते ॥
भारतस्यास्य वर्षस्य नव भेदान्निबोधत ।
इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ॥
नागद्वीपस्तथा सौम्यो गान्धर्वस्तथ वारुणः ।
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ॥
योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् ।
पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः ॥
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः ।
इज्यायुद्धवणिज्याद्यैर्वर्तयन्तो व्यवस्थिताः ॥
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः ।
वेदस्मृतिमुखाद्याश्च पारियात्रोद्भवा मुने ! ॥
वर्णाशासुरसाद्याश्च नद्यो विन्ध्यविनिःसृताः ।
तापी पयोष्णी निर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥
गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा ।
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः ॥
कृतमाला ताम्रपर्णी प्रमुखा मलयोद्भवाः ।
त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः ॥
ऋषिकुल्या कुमार्याद्याः शुक्तिमत्पादसम्भवाः ।

आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः ॥
ताभिस्ते कुरुपाञ्चालमध्यदेशादयो जनाः ।
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः ॥
ओड्राः कलिङ्गा मगधा दाक्षिणात्याश्च सत्त्वशः ।
तथापरान्ताः सौराष्ट्राः शूराभीराश्चार्बुदाः ॥
मारुका मालवाश्चैव पारियात्रनिवासिनः ।
सौवीराः सैन्धवा हूणाः साल्वा शाल्वसाक्षिणः ॥
मद्रा रामाश्चाम्बष्ठाः पारसीकादयस्तथा ।
आसां पिबन्ति सलिलं वसन्ति सरितां सदा ॥
सभोपतो महाभाग ! कृतपुण्यजनाकुलाः ।
चत्वारि भारते वर्षे युगान्यत्र महामुने ! ॥
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् ।
तपस्यन्ति यतयो जुह्वते चात्र यज्विनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् ।
पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञपतिर्विष्णुरन्यद्वीपेषु चान्यथा ।
तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! ॥
यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः ।
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! ॥
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्ममहीमनन्ते
तस्मिल्लयं ये त्वमलाः प्रयान्ति ॥
जानीम नैतत् क वयं विलीने
स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ॥

नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया ।
लक्षयोजनविस्तार संक्षेपात् कथितं तव ॥
जम्बुद्वीपं समावृत्य लक्षयोजनविस्तरः ।
मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्वृहिः ॥"

इति श्रीविष्णुपुराणे २ अंशे २ अध्यायः ॥७॥

आत्मनः वर्षे जन्मकारणं तत्त्वावाप्तिञ्च यथा,—
"प्लक्षजम्बुतपः कृत्वा जन्मेदं भारते जनैः ।
करोति सफलं जन्म श्रुत्वा हरिकथान्वितम् ॥
अर्चनं वन्दनं मन्त्रजपः शिवनमेव च ।
स्मरणं कीर्तनं ध्यानदृष्टयवलम्बीक्षितम् ॥
निवेदनं खस्य दास्यं नवधा भक्तिलक्षणम् ।
करोति सफलं जन्म ह्येतानि च भारते ॥"*॥

अस्य पुण्यक्षेत्रत्वं कर्मभूमित्वं परिमाणञ्च यथा,—
"कर्मणां फलभोगाच्च स्वर्गेऽसौ सुरसुन्दरि ! ।
नैव स्वर्गे न पातालेऽप्यस्ति जम्बूद्वीपे यथा शुभम् ॥
ज्ञात्वा शुभाशुभं कर्म पुण्यक्षेत्रे च भारते ।
अन्यत्र तत्फलं भुङ्क्ते स्वर्गे कर्मविवर्जितात् ॥

हिमालयादाहत्तुं पुण्यदेशं भारतम् ।
मेधं कर्मफलाप्तानां तपःक्षेत्रम् ॥
लब्ध्वा तत्र जन्म जीवो वर्धितो विष्णुमायया ।
ब्रह्मत्वं करोति विषयं विहाय सेवकं हरेः ॥
ज्ञात्वा तत्र महत् पुण्यं स्वर्गं गच्छति पुण्यवान् ।
एवमेव स्वर्गफलाच्च चिरं स्वर्गे प्रमोदते ॥
स्वर्गमायच्छति यदा विहाय मानवीं तनूम् ।" इति श्रीमार्कण्डेयपुराणे श्रीदत्तात्रेयचरिते ।१।५८। अध्यायः ॥

भारतः, पुं, (भरतस्य इमेरयमिति । भरत+अण् ।) भटः । इति भटाधरः ॥ अग्निः । इति त्रिकाण्डशेषः ॥ (भरतस्य गोत्रापत्यमिति । भरत+अण् ।) भरतस्य गोत्रापत्यम् ॥ (यथा, महाभारते । १ । ११ । ७४ ।
"तथाऽयौघमहत्त्वेतत् कर्म्म भौमस्य भारत ! ॥")

भारतवर्षं, क्ली, (भारतं भरतसम्बन्धि वर्षमिति ।) जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । यथा,—
"हिमाद्रं दक्षिणं वर्षं भरताय ददौ पिता ।
तस्माच्च भारतं वर्षं तस्य नाम्ना महात्मनः ॥"
तस्य च भागा यथा,—
"भारतस्यास्य वर्षस्य नवभेदान्निबोध मे ।
सप्तमान्तरिता ह्येतास्ते त्वगम्याः परस्परम् ॥
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् ।
नागद्वीपस्तथा सौम्यो गान्धर्वो वारुणस्तथा ॥
अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः ।
योजनानां सहस्रं वै द्वीपोऽयं दक्षिणोत्तरात् ॥
पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्मृताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्तःस्थिता द्विज ! ॥
इज्यायुद्धवणिज्याद्यैः कर्म्मभिः शतपावनाः ।
तेषां संव्यवहारश्च एभिः कर्म्मभिरिष्यते ॥
स्वर्गापवर्गप्राप्तिश्च पुण्यं पापञ्च वै तथा ।
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ॥
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ।
तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥
विशालोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः ।
कोलाहलः सवेभाद्रो मन्दरो दर्दुराचलः ॥
वातपर्णो वैद्युतश्च मैनाकः सुरसस्तथा ।
तुङ्गप्रस्थो नामगिरिर्गोपतिः पाण्डुराचलः ॥
पुष्पवांश्चित्रवप्ताश्च रैवतोऽम्बुद एव च ।
ऋष्यमूकः सगोमन्तः कूटशैलः शतस्तरः ॥
श्रीपर्व्वतश्चकोरश्च शतशृङ्गोऽथपर्व्वताः ।
तैर्विभक्ता जनपदा म्लेच्छाश्चार्य्याश्च भागशः ।
ते; पौरवे धरिच्छेत्रा भाता; सप्तद्विजोत्तम ! ॥
गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथापगा ।
यमुना च शतद्रुश्च वितस्ताऽरावती कुहूः ॥
शोभनी दृषद्वती च वाहुदा च दृषद्वती ।
विपाशा देविका वेदस्मृतिर्विपाशा गण्डकी तथा ।
कौशिकी चापरा विप्र ! हिमवत्पादनिःसृताः ॥
वेदस्मृतिर्वेतवती रोधिनी सिन्धुरेव च ।
वेत्रा च कान्धवा चैव सप्तगोदा मही तथा ॥
पादा वर्णाशती कूपी शिप्रिका वेत्रवत्यपि ।
विप्रा क्षपत्नी च तथा पारिपात्राश्रयाः स्मृताः ॥
शोणो महानदश्चैव नर्म्मदा सुरसा क्रिया ।
मन्दाकिनी दशार्णा च चित्रकूटा तथापगा ॥
चित्रोत्पलाच तमसा करतोया पिशाचिका ।
तथान्या पिप्पला ओजो विपाशा वञ्जुला नदी ॥
सरोरुजा सुक्तिमती मधुली विदिवा क्रतुः ।
ऋक्षपादप्रसूता वै तथान्या वेगवाहिनी ॥
शिप्रा पयोष्णी निर्विन्ध्या तापी च विषधावती ।
वेणा वैतरणी चैव शिनीवाली कुसुद्वती ॥
तोया चैव महागौरी दुर्गा चान्तःशिवा तथा ।
विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥
गोदावरी भीमरथी कृष्णवेणा तथापगा ।
तुङ्गभद्रा सुप्रयोगा वाह्या कावेर्य्यथापगा ।
सह्यपादविनिष्क्रान्ता इमास्ताः सरिदुत्तमाः ॥
कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती ।
मलयाद्रिसमुद्भूता नद्यः प्रोक्तजलाश्चिमाः ॥
पिङ्गसोमनिकुल्या च इक्षुला वित्तिवालया ।
लाङ्गुलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः ॥
ऋषिका च कुमारी च मन्दगा मन्दवाहिनी ।
कृष्णा वेणाग्निनी चैव शुक्तिमत्प्रभवाः स्मृताः ॥
सर्व्वाः पुण्याः सरस्वत्यः सर्व्वा गङ्गाः सप्तद्रगाः ।
विश्वस्य मातरः सर्व्वाः सर्व्वाः पापहराः स्मृताः ॥
अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम ! ।
प्रावृट्कालवहाः सन्ति सर्व्वकालवहाश्च याः ॥
मत्स्याः कुमूलाः कुल्याश्च कुन्तलाः काश्मिकोमूलाः ॥
अर्ब्बुदाश्च पुलिन्द्राश्च समकाश्च शकैः सह ।
मध्यदेशे जनपदाः प्रायशोऽमी प्रकीर्त्तिताः ॥
सह्यस्य चोत्तरेणैव यत्र गोदावरी नदी ।
पृथिव्यामपि तत्कायां स प्रदेशो मनोरमः ॥
गोवर्द्धनपुरं रम्यं भार्गवस्य महात्मनः ।
वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ॥
अपरान्ताश्च सूद्राश्च पह्लवाश्चर्म्मखण्डिकाः ।
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥
शूलहृदा ललित्याश्च पारदाहारहूणिकाः ।
माठरा रङ्गकङ्काः कैकया दशमालिकाः ॥
क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ।
काम्बोजा दरदाश्चैव वर्व्वरा बहुलौकिकाः ॥
नीचाश्चैव तुषाराश्च पह्लवा वाह्लतोदराः ।
आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः ॥
लम्पकाः क्षत्रकाराश्च चूलिका आङ्गवैः सह ।
अपधाश्चालिमद्राश्च किरातानाश्च जातयः ॥
तामसा हंसमार्गाश्च काश्मीराः कुलनाम्नया ।
चूलिका कुडुकाश्चैव जर्ज्जा दार्व्वाश्चैव च ॥
एते देशा उदीच्यास्तु प्राच्यान् देशान्निबोध मे ।
अन्तर्वाला हुण्डरका अन्तर्गिरिबहिर्गिराः ॥
तथा प्रवङ्गा वङ्गेया मलदा मलवर्त्तिकाः ।
प्रद्योतिराश्च मद्राश्च विदेहाश्चाम्बष्ठिकाः ।
प्राग्ज्योतिषाश्च मद्राश्च विदेहाश्चाम्बष्ठिकाः ॥
मल्ला मगधगोमेदाः प्राच्या अपि पदाः स्मृताः ॥
अथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यासहैव च ॥
सेतुका मूषिकाश्चैव कुमारा वानवासिकाः ।
महाराष्ट्रा माहिषिकाः कलिङ्गाश्चैव सर्व्वशः ॥
आभीराः सह शैवोका आटव्याः शबराश्च ये ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥
पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः ।
तैलिकाः कुन्तला ह्यन्ध्रा उड्रिड्रा मालकारकाः ॥
दाक्षिणात्याश्चिमे देशा अपरान्तास्त्रिबोध मे ।
सौपारकाः कालनदा दुर्गालाटीयकैः सह ॥
कारस्करा जोहजङ्घा वानेया राजभद्रकाः ।
तोषलाः कोशलाश्चैव त्रैपुरा विदिशाश्रयाः ॥
तुषाराम्बरमालाश्चैव माटवी वैदर्भैः सह ।
पुलिन्द्राश्च सुग्रीवाश्च रूपपाल्लामसैः सह ॥
तथा कुलमियाश्चैव सर्व्वे चैव कारस्कराः ।
नासिक्याश्चाथ ये चान्ये ये चैवान्तरचर्म्मगाः ।
मालकच्छाः समाहेयाः सर्व्वे सारस्वतैः सह ।
कच्छीयाश्च सुराष्ट्राश्च आवन्त्याश्चार्ब्बुदैः सह ॥
इत्येते दक्षिणापथाश्च प्रोक्ता विन्ध्यनिवासिनः ।
मलजाश्च कक्षाश्च मेकलाश्चोत्कलैः सह ॥
उत्तमर्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ।
अनूपास्तुण्डिकेराश्च वीरहोत्रा अवन्तयः ॥
एते जनपदाः सर्व्वे विन्ध्यपृष्ठनिवासिनः ॥
अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ॥
निर्हारा हंसमार्गाश्च कुपथाः कुहकाः खसाः ।
कुलाः प्रावरकाश्चैव जर्ज्जा दर्म्माः सकूपकाः ॥
त्रिगर्त्ता मालवाश्चैव किरातानामथैः सह ।
शतमेनादिकाश्चाथ चतुर्थगणतो विधिः ॥
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितम् ॥
दक्षिणे परतो ह्यस्य पूर्व्वेण च महोदधिः ।
हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः ॥
सहस्रद्वारतं वर्षं सर्व्वबीजं द्विजोत्तम ! ।
देवत्वममरैर्गम्यं देवत्वं मर्त्यता तथा ॥
नरगन्धर्वसुरचरा योनीरुद्भूत सरीसृपाः ।
स्थावराणाश्च सर्व्वेषामतो ब्रह्मन् ! शुभाशुभैः ॥
प्रयान्ति कर्म्मभूर्ह्येषा यावन्मोक्षेषु विद्यते ।
देवानामपि विप्रर्षे ! सदैवेह मनोरथः ॥
अपि मानुषमाद्यायो देवत्वात् प्रच्युताः क्षितौ ।
मनुष्याः कुरुते तत्तु यत्र ग्रस्तं सुरासुरैः ॥
स्वकर्म्मनिगडैर्यस्तैः स्वकर्म्मोपग्रहैः सुखैः ।
न किञ्चित् क्रियते कर्म्म सुखक्षेमोपदंहितैः ॥"
इति श्रीमार्कण्डेयपुराणे भारतखण्डवर्णनं नामाध्यायः ॥ ५७ ॥ * ॥ अपि च ।
"भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः ।
मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः ।
कूटकः कोल्लः सह्यो देवगिरिर्ऋष्यमूकः ।
श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः ।
शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो ।
गोवर्द्धनो रैवतकः कज्जलो गोकामुखः ।

रम्यकोज: कामगिरिरिति चाग्नेये शुतसङ्कल्प: शोणाङ्गेयां नितम्बप्रभवा नदा नदाश्च सन्त्यसंख्याता:। एतावानयो भारत: प्रजा नामभिरेव पुवन्नीनामाख्याना चोपबृंहणाति चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णवेणा भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती सिन्धु: शोणश्च नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृशद्वती गोमती सरयूरोधवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्य:। अस्मिन्नेव वर्षे पुरुषैरुत्तमाभि: शुक्लोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिवमानुषनारकगतयो वह्व आत्मन आनुपूर्व्येण सर्वा एव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गोऽपि भवति। योऽसौ भगवति सर्व्वभूतात्मनि वासुदेवे क्षेत्रज्ञेऽनिवरुद्धेऽनिलयने परमात्मनि वासुदेवे जनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिबन्धनहारेण यदा हि महापुरुषपूरुषप्रसङ्ग:। अतएव हि देवा गायन्ति।

"अहो बतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरि:।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकस्पृहा हि न:॥
किं दुष्करैर्न: क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा सुजयेन मनस्विन:।
न यत्र नारायणपादपङ्कज-
च्युति: प्रसूतिप्रलयैरिवोत्सवात्॥
अजायुषां स्यान्नरकायुषां भवान्
पशायुषां भारतभूजयो वर:।
सजीव मर्त्यो यदि ते मतिक्षिन:
संन्यस्य संयात्यभयं पदं हरे:॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रया:।
न यत्र यज्ञेशमखा महोत्सवा:
सुरेशलोकोऽपि न वै स सेव्यताम्॥
प्रायो मृजापिशुनेह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापचोदनाम्।
न चैदृयतैरन्न पुनर्मृतायते
भूयो बलीवा इव यान्ति बन्धनम्॥
ये: श्रद्धया वर्हिषि भागशो हवि-
र्निरूप्तमिष्टं विधिमन्त्रवस्तुत:।
एकं: पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्ण: स्वयमाशिषां प्रभु:॥
तत्तं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यत:।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम्॥
यद्यत्र न: स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म: स्या-
दर्वे हरिर्यद्गजतां गुं तनोति॥

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपानद्यौ चैव उपदिशन्ति सागरान्तरेश्चाम्बेयश्च रमां भद्रां परितो निषधनिलिम्पकुमुदाख्यम्। तद्यथा। सर्वप्रस्थचन्द्रशुक्ल आवर्तनो रमणको मन्दहरिण: पाञ्चजन्य: सिंहलो लङ्केति। एवं तव भारतोत्तमजम्बूद्वीपवर्षविभागो यथोपदेशमुपवर्णित:।" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्याय:॥
(विष्णुपुराणे च। २ अंशे २ अध्याये।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्तति:॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥"२॥
अपरञ्च।
"अत: संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्यत: पुरुषा मुने!॥३॥
अत: स्वर्गश्च मोक्षश्च मध्यमञ्चच गम्यते।
नरकस्थञ्च मर्त्यानां कर्म्मभूमौ विधीयते॥"५॥
अपि च।
"चत्वारि भारते वर्षे युगान्यत्र महामुने!।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित्॥६॥
तपस्यन्ति मुनयो जुह्वते चात्र यज्वन:।
दानानि चात्र दीयन्ते परलोकार्थमादरात्॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमय:॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम!।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥२३॥
गायन्ति देवा: किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूय: पुरुषा: सुरत्वात्॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्ममहीमनन्ते
तस्मिल्लयं येऽमलाश: प्रयान्ति॥२५॥
आस्तीम नैतत् क्व वयं विलोने
स्वर्गापदे कर्म्मजि देवसन्यम्।
प्राप्स्याम धन्या: खलु ते मनुष्या
ये भारते नस्त्रियविप्रहीना:॥"२६॥)

भारती, स्त्री, (भृ+अतच्। स्त्रियां ङीप्।) वचनम्। (यथा, कुमारे। ६। ९८।
"तमर्थमिव भारत्या सुतया योक्तुमर्हसि॥")
सरस्वती। (यथा, कालिदास:।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि! नमस्ते॥")
पक्षिभेद:। वृत्तिभेद:। इति मेदिनी। ते, १३८। यथा,—
"झङ्कारे कौशिकी वीरे सात्वत्यारभटी पुन:।
रसे रौद्रे च बीभत्से वृत्ति: सर्व्वत्र भारती॥"
भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्-व्यापारो वदात्मक:। इति साहित्यदर्पणस्य ६ परिच्छेद:॥ नारी। इति राजनिर्घण्ट:॥
(शङ्कराचार्यशिष्यतोटकस्य शिष्याचात्मन्यतमस्य उपाधिविशेष:। यथा, प्राक्तोविद्यारण्यवधूतप्रकरणे।
"विद्याभारेण सम्पूर्ण: सर्व्वभारं परित्यजेत्।
दु:खभारं न जानाति भारती परिकीर्त्तिता॥"
नदीविशेष:। यथा, महाभारते। ३।२२१।२५।
"भारती सुप्रयोगा च कावेरी सुलुरा तथा॥")
भारद्वाजं, क्ली, अस्थि। इति हैमचन्द्र:। ३।२८६॥
भारद्वाज:, पुं, (भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा। भरद्वाज+"अश्वयवनाण्मण्डूकाद्विदाद्यिभ्योऽञ्।" ४।१।१०४। इति अञ्।)
गोत्राचार्य:। (यथा, महाभारते। ७।६। २६।
"तत: प्रयातं सहसा भरद्वाजे महारथे।
आर्ष्टिषेणेन घोरेण वसुधा समकम्पत॥")
ऋषिभेद:। इति मेदिनी। जे, १४। अमरसिंह:। इति शब्दरत्नावली। मङ्गलग्रह:। इति ज्यौतिषतत्त्वम्। वाजाटपक्षी। द्रोणसुत:। इति हैमचन्द्र:। (देशभेद:। यथा, "शकयवनांदूभारद्वाजे।" ४। २। १३५। इति सूत्रे "भारद्वाजग्रहणोऽपि द्रोणवचन एव नगोत्रशब्द:।" इति काशिका। भरद्वाजवंशीये, त्रि। यथा, महाभारते। १। १११। ३।
"इति सञ्चिन्त्य गाङ्गेयस्तदा भारतसत्तम!।
गोत्राय वेदविदुषे भारद्वाजाय धीमते।
पाठयामास कौरव्यांश्चैव दत्तौ शिष्यान्नरर्षभ!।")
भारद्वाजी, स्त्री, वनकार्पासी। इति शब्दरत्नावली। (नदीभेद:। यथा, महाभारते। ६। ८। २६।
"शोणाच्च शिच्छिलायां च भारद्वाजीञ्च निम्नगाम्।
कौशिकीं निम्नगां घोरां वासुदामच चक्रमाम्॥")
भारद्य: पुं, (भां दीप्तिं रयते प्राप्नोतीति। रय गतौ+पदाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका। भारद इति भाषा।
भारयष्टि:, स्त्री, (भारस्य यष्टि:।) भारयष्टनदण्ड:। बाँक इति भाषा। तत्पर्य्यायः। विष्कम्भिका २। दण्डमर:। २। १०। ३०॥
भारवं, क्ली, (भारं वातीति। भार+वा+"आतोऽनुपसर्गे।" ३। २। ३। इति क:।) धनुर्गुण:। इति त्रिकाण्डशेष:॥
भारवाह:, पुं, (भारं वहतीति। वह+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) भारिक:। इत्यमर:। २।१०। १५॥ (यथा, महाभारते। ३। १३३। १।
"अन्यस्य पत्या वधिरस्य पत्या:
स्त्रियाश्च पत्या भारवाहस्य पत्या:॥")
भारवाही, स्त्री, (भारवाह+गौरादित्वात् ङीष्।) नौका। इति राजनिर्घण्ट:॥

भारद्वि:, पुं, ऋषिविशेषः। स च किरातार्जुनीय-भारतमल्लयत्नवर्णी। तत्पर्य्यायः। भूतपुत्रः २। इति त्रिकाण्डशेषः। तस्य मतस्य प्रथम-श्लोकोऽयम्।

"त्रिय: कुरूणामधिपश्च पाण्डवी
प्रजासु वृत्तिं समयुक्त वेदितुम्।
स चक्रिणश्चौ विदित: समाययौ
युधिष्ठिरं द्वैतवने वनेचर:॥"

भारद्वाज:, पुं, काव्यौणादिकगणसूत्रम्। इति मुग्धबोधिनी॥

भारद्वर:, पुं, (हरतीति। हृ+अदाद्यच्। भारस्य हर:।) भारवाहक:। इति शब्दरत्नावली॥

भारहार:, पुं, (भारं हरतीति। हृ+अण्।) भारवाहक:। इति शब्दरत्नावली॥

भारि:, पुं, (हृभस्य अरि:। पृषोदरादित्वात् इकोप:।) शिव:। इति हेमचन्द्र:॥

भारिक:, पुं. (भारोऽस्ति वाह्यतया। "अत इनिठनौ।"५।२।११५। इति ठन्।) भार-वाहक:। भारी इति ख्यात:। तत्पर्य्यायः। भारवाह: २। इत्यमर:। २।१०।१५॥ भारहर: ३ भारहार: ४। इति शब्दरत्ना-वली॥ (यथा, कथासरित्सागरे।६७।५६।

"तस्य चाध्यासता: केचित् तस्थु: काष्ठ-
भारिका:॥")

भारिट:, पुं, पक्षिविशेषः। तत्पर्य्यायः। ग्राम-चटक: २ शैप्रिय: ३ कलभक्षक: ४। इति राजनिर्घण्टः॥

भारी, [न्] पुं,(भारोऽस्यास्तीति। भार+इनि:।) भारवाहक:। इत्यमरटीकायां रमा-नाथ:॥ (यथा, मनौ। २। ११८।

"चक्रिणो दशमीस्थस्य रोगिणो भारिण: स्त्रिया:।
स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च॥")

भारयुक्ते, त्रि॥

भारोद्वी, स्त्री, (भारं वहतीति। वह+क्विप्। स्त्रियां ङीप्। ततः प्रज्ञादित्वात् अण्।) भारवाहिका। इति शुग्धबोधव्याकरणम्॥

भार्गव:, पुं, (भृगोरपत्यम् तद्गोत्रापत्यमिति। भृगु+अण्।) परशुराम:। शुक्राचार्य्य:। (यथा, महाभारते। १। ६६। ७५।

"तस्त्रिन्नियुक्ते विधिना योगक्षेमाय भार्गवे।
अन्वसृत्पादयामास पुत्रं भृगुरनिन्दितम्।")

धर्म्मी। गज:। इति मेदिनी। वे, ७५॥ भारत-वर्षमध्ये प्राच्यदेशान्तर्गतदेशविशेषः। यथा,—

"ब्रह्मोत्तरा: प्रविजया भार्गवा ब्रह्मवर्द्धका:॥"

इति मार्कण्डेयपुराणम्॥

(कुलाल:। यथा, महाभारते।१।१६२।१।

"गत्वा तु तां भार्गवकर्म्मशालां
पार्थौ पृथां प्राप्य महानुभावौ॥"

"भृगु: कायटङ्कि: जीविकार्थे भृगुवा अव-धरतीति भार्गव: कुलाल:।" इति तट्टीकायां नीलकण्ठ:॥ मार्कण्डेय:। यथा, महाभारते। १३। ३२। १५।

"दक्षस्य ते अमरान् चत्वारोऽमिततेजस:।
पृथिवीकाश्यपत्वाप्ति: प्रजादाश्च भार्गव:॥"

शौनक:। यथा, महाभारते। १। १८। ६।

"तपेति चाश्रयोदृविष्णुर्ब्रह्मा वह भार्गव:॥"

भृगुवंशीये, त्रि॥ (यथा, महाभारते। ३। ६६। ७१।

"ब्रह्मन् रामस्य राजेन्द्र! भार्गवस्य च धीमत:॥")

भार्गवप्रिय:, पुं, (भार्गवस्य प्रिय:।) हीरक:। शुक्राधिष्ठातृदेवताकत्वात्॥

भार्गवी, स्त्री, (भार्गव+ङीप्।) पार्व्वती। (भृगोरपत्यं स्त्री। भृगु+अण्+ङीप्।) लक्ष्मी:। (अस्या भृगुसुतात्वसूत्रं यथा, विष्णु-पुराणे। १।६।१४६।

"एतत् ते कथितं ब्रह्मन्! यन्मां त्वं परि-
पृच्छसि।
श्रीरासौ श्रीयथा जाता पूर्व्वं भृगुसुता सती॥")

दूर्व्वा। इति मेदिनी। वे, ४५॥ (यथा, वैद्यक-रत्नमालायाम्।

"सहस्रवीर्य्या दूर्व्वा तु मङ्गल्या भार्गवी
स्मृता॥")

गोलदूर्व्वा। इति शब्दरत्नावली॥ (यथास्या: पर्य्यायः।

"गोलदूर्व्वा बहुफला भार्गवी शुभपर्व्विका।
शुभ्रं सहस्रवीर्य्या च शुभवल्ली च कीर्त्तिता॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ (भृगुवंशीय-स्त्रीमात्रे। यथा, महाभारते। १। ७१। ३१।

"ब्रह्मर्षिरार्षितोऽसीति पृष्टस्तामाह भार्ग-
वीम्।
हसोऽहमिति चाचख्यौ पृष्टो ब्राह्मण-
कन्यया॥")

भार्गी, स्त्री, (भृज्+घञ्। भर्गोऽस्यस्या इति। "ज्योत्स्नादिभ्य उपसंख्यानम्।" ५।२।११०३। इत्यस्य वार्त्तिके। इति अण्। ततो ङीप्।) वृक्षविशेषः। बामनहाटी इति भाषा। तत्-पर्य्यायः। गर्हभाण्डी २ पद्मी ३ अङ्गार-वल्लरी ४ ब्राह्मी ५ ब्राह्मण यष्टिः ६ वाग्वारिः ७ भृङ्गजा ८ पद्मा ९ यष्टिः १० भारद्वी ११ वतारिः १२ कामजित् १३ सुरूपा १४ भ्रमरेष्टा १५ भृङ्गमाला १६। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कासश्वास-शोफव्रणकृमिमेदोऽक्षिरुजापित्तत्वञ्च। इति राज-निर्घण्टः॥ अन्यत् ब्राह्मण्यष्टिकाशब्दे द्रष्टव्यम्॥

भार्द्वाजी, स्त्री, (भारद्वाजी। पृषोदरादित्वात् साधुः।) भारद्वाजी। वनकार्पासी। इति शब्दरत्नावली॥

भार्य्या, स्त्री, (भरणीया इति। भृ+"ऋहलो-र्ण्यत्।" ३।१।१२४। इति ण्यत्। टाप्। यद्वा भर्या हीनत्वा आर्या।) वैदविधा-नेनोढ़ा। विधिपूर्व्वकविवाहिता। तत्पर्य्यायः। पत्नी २ पाणिगृहीती ३ द्वितीया ४ सह-धर्म्मिणी ५ जाया ६ दारा: ७ सहधर्म्मिणी ८ धर्म्मचारिणी ९ दार: १० कलत्रम् ११ कलत्रवत्रम् १२। इति शब्दरत्नावली। अस्या: प्रशंसा यथा,—

"सा भार्य्या या प्रियं ब्रूयात् स पुत्रो यत्र
जीवति।
स जीवति गुणो यस्य धर्म्मो यस्य स जीवति॥
शुद्धधर्म्मविहीनो यो निष्फलं तस्य जीवनम्।
सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रियंवदा॥
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-
व्रता।
नित्यस्नाता सुगन्धा च नित्यञ्च प्रियवादिनी॥
अल्पभुक् स्वल्पभाषी च सततं मङ्गलेप्सुका।
सततं धर्म्मसहिता सततञ्च पतिप्रिया॥
सततं प्रियवक्त्री च सततं ऋतुकामिनी।
पितृदेवक्रियायुक्ता सर्व्वसौभाग्यवर्द्धिनी॥
यस्यैतद्गुणो भवेद्भार्य्या देवेन्द्रो न स मानुष:॥"

अस्या दोषा यथा,—

"यस्य भार्य्या विरूपाक्षी कलहा कलहप्रिया।
उत्तरोत्तरवादा स्यात् सा जरा न जरा जरा॥
य स्य भार्य्याश्रितान्यस्य परवेश्माभिकाङ्क्षिणी।
कुक्रिया व्यक्तलज्जा च सा जरा न जरा जरा॥"
"यस्य भार्य्या गुरुस्था च भर्त्तारमनुगामिनी।
अल्पाल्पेन तु सन्तुष्टा सा प्रिया न प्रिया प्रिया॥
दुष्टा भार्य्या शठं मित्रं भृत्याश्चोत्तरदायका:।
ससर्पे च गृहे वासो मृत्युरेव न संशय:।
आपत्सु मित्रं जानीयात् युद्धे शूरं धने शुचिम्।
भार्य्याञ्च विभवे क्षीणे दुर्भिक्षे च प्रियातिथिम्॥"

इति गारुड़े नीतिसारे १०८।१०९ अध्यायौ॥ (तथा च महाभारते। १। ७४। ३६—४५।

"सा भार्य्या या गृहे दक्षा सा भार्य्या या
प्रजावती।
सा भार्य्या या पतिप्राणा सा भार्य्या या पति-
व्रता॥
अर्द्धं भार्य्या मनुष्यस्य भार्य्या श्रेष्ठतम: सखा।
भार्य्यामूलं त्रिवर्गस्य भार्य्यामूलं तरिष्यत:॥
भार्य्यावन्त: क्रियावन्त: सभार्य्या गृहमेधिन:।
भार्य्यावन्त: प्रमोदन्ते भार्य्यावन्त: श्रियान्विता:॥
सखाय: प्रविविक्तेषु भवन्त्येता: प्रियंवदा:।
पितरो धर्म्मकार्य्येषु भवन्त्यार्त्ताश्च मातर:॥
कान्तारेष्वपि विश्रामो जनस्याध्वनिकस्य वै।
य: सदार: स विश्वास्यस्तस्माद्दारा: परा गति:॥
संसारन्तमपि प्रेतं विषमेष्वेकपातिनम्।
भार्य्यैवान्वेति भर्त्तारं सततं या पतिव्रता॥
प्रथमं संस्थिता भार्य्या पतिं प्रेक्ष्य प्रसीदति।
पूर्व्वं मृतञ्च भर्त्तारं पश्चात् साध्वनुगच्छति॥")

हरिवंशे तिरुवाच।

"यस्य नास्ति सती भार्य्या यद्गृहे प्रियवादिनी।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
सुशीला सुन्दरी भ्राता गता यस्य गृहोदरात्।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्॥
भार्य्याहरन्ता धनिता दुहिता यस्य च प्रसूता।

अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
दैवेनापहृता यस्य प्रतिबाधा प्रतिव्रता ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
यस्य माता गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
प्रियापुत्रं गृहं यस्य पूर्णं स्त्रीधनबन्धुभिः ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥
भार्य्याभूषा वनसमाः सभार्य्याश्च गृहा गृहाः ।
गृहिणी च गृहं प्रोक्तं न गृहं गृहमुच्यते ॥
अशुचिः स्त्रीविहीनश्च देवे पैत्रे च कर्म्मणि ।
यदन्नं कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
दाक्षिकाग्निहोत्रिहीनश्च यथा मन्त्रो हुताशनः ।
प्रभाहीनो यथा सूर्य्यः शोभाहीनो यथा शशी ॥
शक्तिहीनो यथा जीवो यथात्मा च तनुं विना ।
विनाधारं यथा धैर्य्यं यथेशः प्रकृतिं विना ॥
न च शक्तो यथा यज्ञः फलदां दक्षिणां विना ।
कर्म्मिणे च फलं दातुं शक्तोऽन्नबलमेव च ॥
विना स्वर्गं स्वर्गकारो यथाशक्तः स्वकर्म्मणि ।
यथाशक्तः कुलालश्च वस्तिकाष्ठविना द्विजाः ॥
तथा गृही न शक्तश्च सन्ततं सर्व्वकर्म्मणि ।
भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ॥
भार्य्यामूलं सुखं शश्वद्गृहस्थानां गृहे सदा ।
भार्य्यामूलः सदा हर्षो भार्य्यामूलश्च मङ्गलम् ॥
भार्य्यामूलश्च संसारो भार्य्यामूलश्च सौरतम् ।
यथा रथश्च रथिनां गृहिणश्च तथा गृहम् ।
सारथिस्तु यथा तेषां गृहस्थानां तथा प्रिया ॥
सर्व्वरत्नप्रधानश्च क्षीरदः दुग्धसादपि ।
सा गृहीता गृहस्थैर्नवेत्याह कमलोद्भवः ॥
यथा जलं विना पद्मं पद्मं शोभां विना यथा ।
तथैव च गृहं शश्वद्गृहिणीं गृहिणीं विना ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥

तस्या आवश्यत्वं यथा,—

"अनपत्यात्च दुर्वृत्तां कुलजाच्च पतिव्रताम् ।
त्यजेद्यः सन्यासी ब्रह्मचारी यतीति वा ॥
वाणिज्ये वा प्रवासे वा चिरं दूरं प्रयाति यः ।
तीर्थाय तपसे वापि मोक्षार्थं जन्म लब्धितुम् ॥
न मोक्षस्तस्य भवति धर्म्मस्य स्खलनं ध्रुवम् ।
अभिशापेन भार्य्याया नरकञ्च परञ्च ॥
इहैव च यशोनाश इत्याह कमलोद्भवः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११२ अः ॥

बहुभार्य्यस्यैकस्या भजने दोषादि यथा,—

"शृणुष्व धर्म्मव्याख्यार्थं तत् शृणुष्व गिरापते ! ॥
बहुदारः पुमान् यस्तु रागाद्वैकां भजेत् स्त्रियम् ।
स पापभाक् स्त्रीजितश्च तस्याग्नौचं सनातनम् ॥
यद्दुःखं जायते स्त्रीणां स्वाम्यसम्भोगजं यथा ।
न तत्र गदितुं दुःखं किञ्चिदस्ति विदुषाम् ॥
शतीञ्चतुमतीं जायां यो नयेत् पुरुषाधमः ।
ऋतुपर्व्वसु गर्व्वेण भूयश्चा च हि जायते ॥
भार्य्या स्यादृतावरायेवी तावत् कालं विरोधकम् ।
तस्यास्तु यत्नमे किञ्चित् विहितञ्चापि नाचरेत् ॥
बहुभार्य्यस्य भार्य्याजातुमैथुनगामिनम् ।
न किञ्चिदिष्यते कर्म्म ग्राह्यञ्चापि यदीरितम् ॥
तोषयेत् सततं भार्य्या विधिवत् पाणिपीडिताः ।
तासां तुष्टा तु कल्याणमकल्याणमतोऽन्यथा ॥
सद्गुरो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
यया विरुध्यते स्वामी सौभाग्यमदहङ्कया ।
सपत्नीसङ्गमं कर्त्तुं सा स्वादेच्छा भवान्तरे ॥
इहापि लोके वाप्यत्रमधर्म्मञ्चापि विन्दति ।
न च पितृकुलं स्वामिकुलं तस्याः प्रमोदते ॥
विरुध्यमाने पत्यौ यत् सपत्न्या वा प्रवर्त्तिते ।
अतीव दुःखं भवति तदकल्याणलक्षणयोः ॥"

इति कालिकापुराणे २० अध्यायः ॥

रजस्वला भार्य्या अत्याज्या । यथा,—

"न विनोतीह यो दारान् रजसा कलुषीकृतः ।
प्रेतपैत्र्याकृतं कुक्षे रेतश्चाच पिबत्यसौ ॥
यो जहाति रजः स्नात्वा पित्र्यं स्वं तेजसा नरः ।
सोऽश्नाति फलमर्य्यस्य यो न दद्याद्धुतं पुनः ॥
यो बिभर्त्ति स मत्तो वै बहूनां रजसि स्थितः ।
रेतः पिबन्ति तन्मध्ये पितृभ्यो योऽप्यपिण्डदः ॥
यो जहाति हि निर्ह्रीको भार्य्याञ्चैव रजस्वलाम् ।
शुद्धिमान् संयतः स्नात्वा गर्भस्य दुरितं वहेत् ॥"

इति वह्निपुराणम् ॥

कालविशेषे तद्गमनविधेयो यथा,—

"न दिवापि स्त्रियं गच्छेत् कदाचिदिच्छयापि च ।
न पर्व्वसु न सन्ध्यासु नार्त्तवं नातुरासु च ॥
नोदक्यां न दिवा गच्छेन्न सगर्भां न हतप्रजाम् ।
अभिगच्छेदविद्वान् यस्तदायुःक्षयमेव च ॥
वन्ध्याष्टमे परित्याज्या नवमे च मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
न वक्त्रेऽभिगमं कुर्य्यात् पाणिग्राही तु योषितः ।
कुर्य्याच्चेत् पितरस्तस्य पतन्ति रेतसोभुजः ॥
भार्य्याधीनं सुखं पुंसां भार्य्याधीनो धनागमः ।
भार्य्याधीना मखोत्पत्तिर्भार्य्याधीनः सुखोदयः ॥
यत्र भार्य्या गृहं तत्र भार्य्याधीनो गृही वसेत् ।
न गृहेण गृहस्थः स्यात् भार्य्यया कथ्यते गृही ॥"

इति पराशरस्मृतिः ॥

भार्य्याटः, पुं, (भार्य्यया अटति वर्त्तते इति । अट गतौ + पचाद्यच् ।) अन्यार्थं स्वस्त्रीदाता । इति त्रिकाण्डशेषः ॥

भार्य्याटिकः, पुं, (अट गतौ + भावे घञ् । भार्य्यया आटो गतिर्भ्रमणं वा अस्यास्येति । भार्य्याट + ठन् ।) स्त्रीजितः । हरिवंशोक्तः । इति मेदिनी । के, २०५ ॥ (सुनिविशेषः । इति हेमचन्द्रः ॥)

भार्य्यापती, पुं, (भार्य्या च पतिश्च तौ । "दाम्पत्यादिषु परम् ।" २ । २ । ३१ । इति साधुः ।) योषित्पती । विवाहिवचनान्नोऽयं शब्दः । तत्पर्य्यायः । दम्पती २ जम्पती ३ जायापती ४ । इत्यमरः । २ । ६ । ३८ ॥

भार्य्यायः, पुं, (भार्य्यां कान्तीति । कै शब्दे + उच् ।) कदम्बभेदः । स्त्रीरूपा परभार्य्यायां पुत्रोत्पादकः । क्लैबभेदः । इति मेदिनी । दे, २६२ ॥

भार्य्यावत्, पुं, (भार्य्यावत् प्रियो दृश्यः ।) प्रसन्नदृश्यः । इति राजनिर्घण्टः ॥

भाल, क्ली, (भाज दीप्तौ + भावे घञ् । भां जाति प्रकाशतीति । जा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) भ्रुवोरूर्द्धभागः । कपाल इति भाषा । तत्पर्य्यायः । ललाटम् २ अलिकम् ३ गोधि ४ । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।

"स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु ।
प्राचीव्रज ! घटितं पयोधरतटे हारं पुनर्योजय ॥")

तेजः । इति मेदिनी । ले, ४२ ॥

भालदर्शनं, क्ली, (भाले ललाटे दर्शनमस्येति ।) सिन्दूरम् । इति शब्दचन्द्रिका ॥

भालदृक्, [ग्] पुं, (भाले ललाटे दृक् नेत्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११० ॥

भालाक्षः, पुं, (भालस्थेव अक्षी यत्र भागे अक्षी यस्येति वा ।) करपत्रम् । ब्राह्मणभेदः । रोहितमत्स्यः । महालक्ष्मीसम्पन्नपुरुषः । कक्षपः । हरः । इति मेदिनी । के, १२१ ॥ (भालस्थ अक्षः ।) ललाटचित्रञ्च ॥

भाललोचनः, पुं, (भाले ललाटे लोचनं नेत्रं यस्य ।) शिवः । इति भालदृग्शब्ददर्शनात् ॥ (यथा, काशीखण्डे । २६ । १३० ।

"भाललोचनभावज्ञा भूतभव्यभवत्प्रभुः ॥")

भालुकः, पुं, (भलते हिनस्ति प्राणिनः इति । भल हिंसायाम् + बाहुलकात् उकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा, भरतधृतकोषान्तरे ।

"भालुको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लूकः ॥"

भालूकः, पुं, (भलते हिनस्ति जीवानिति । भल + "जलकादयश्च ।" उणा० । ४ । ४१ । इति ऊकः । ततः प्रज्ञाद्यण् ।) भल्लूकः । यथा,—

"भालूको भालुको भल्लोऽच्छभल्लोऽच्छोऽपि भल्लूकः ॥"

इति भरतधृतकोषान्तरम् ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भाल्लूकः, पुं, भल्लूकः । इत्यमरटीकायां भरतः ॥

भावः, पुं, (भावयति चिन्तयति पदार्थानिति । भू + णिच् + घञ्यादयश्च । भवतीति । भू + "भय तेर्णिच्च वक्तव्यम् ।" इति काशिकोक्तेर्वा ।) नाट्योक्तौ विद्वान् । मानसविकारः । सत्ता । (यथा, श्रीमद्भगवद्गीतायाम् । २ । १६ ।

"नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥")

स्वभावः । अभिप्रायः । (यथा, रामायणे । २ । २ । १६ ।

"तस्य धर्मार्थविदुषो भावसाद्भाव सर्वशः ।
भावना वस्तुतश्चात्र पौरजानपदैः सह ॥")
चेष्टा । आत्मा । जन्म । दृत्यमरः ।३।३।२०६ ॥
(चित्तम् । यथा, मनुः । ४ । २२७ ।
"दानधर्मं निषेवेत नित्यमैहिकपौष्टिकम् ।
परिपुष्टेन भावेन प्राप्नुयादात्मनो भक्तिम् ॥")
क्रिया । लीला । पदार्थः । (यथा, रघुः ।३।४१।
"अतीन्द्रियेष्वप्युपपन्नदर्शनो
बभूव भावेषु दिलीपनन्दनः ॥")
विभूतिः । बुधः । जन्तुः । रत्नादिः । इति मेदिनी ।
वे, २१ ॥ गौरवितः । अभिनयान्तरम् । इति
त्रिकाण्डशेषः ॥ (विषयः । यथा, हितोपदेशे ।
"अवश्यम्भाविनी भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥"
पर्य्यालोचना । यथा मनुः । ६ । ८० ।
"यदा भावेन भवति सर्व्वभावेषु निस्पृहः ।
तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् ॥"
प्रेम । यथा, गीतायाम् । १० । ८ ।
"इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥")
धात्वर्थः । (यथा, मुग्धबोधे व्याकरणम् ।)
"हेत्वाद्यकालभावे वाटे: ।" क्रियान्तरापेक्षि
क्रियाविशिष्टः तत्र सप्तमी विहिता तथा च
मुग्धबोधटीकायां रामतर्कवागीशः । "यस्य
क्रियया क्रियान्तरमपेक्ष्यते स इह भावः ॥")
योनिः । उपदेशः । इति धरणिः ॥ संसारः ।
दृत्यमेकार्थकोषः ॥ नवग्रहाणां ग्रथनादिद्वादश-
चेष्टाः । यथा,—
"ग्रथनश्चोपवेशश्च नेत्रपाणिः प्रकाशनम् ।
गमनं गमनेच्छा च सभायां वसतिस्तथा ॥
आगमनं भोजनञ्च दृत्यलिप्सा च कौतुकम् ।
निद्रा सप्तानां भावाश्च द्वादशेते प्रकीर्त्तिताः ॥"
भावानयनक्रमो यथा,—
"यद्राशौ विद्यते खेटस्तेन तं परिपूरयेत् ।
पुनरंशेन संपूर्य्य स्वर्क्षं तच्च नियोजयेत् ॥
आतदक्षं तथा लग्नमेकीकृत्य सदा बुधैः ।
रविश्चा भागहारेण शेषं कार्य्यं नियोजयेत् ॥
अंशेन नवसंख्यया । स्वर्क्षं यद्राशां लग्न-
लग्नम् । तद्यथा,—
"विप्राक्षावनलोयानि वैश्यं भगदैवतम् ।
पुष्या पौष्णोयम: सर्पो लग्नभान्यर्कत: क्रमात् ॥"
अश्वो राशिः । यदा मेषे यद्यस्तदा १ एक-
पूरितयद्यसंख्याकः । यदा वृषे यद्यस्तदा २
द्विपूरितो यद्यसंख्याकः कार्य्यः ॥ ७ ॥ जाया-
सुतस्थसुतपुत्रस्थदशिकोऽस्थानस्थितपापयद्राशां
निद्राग्रथनभावयोः फलम् ।
"निद्राया च यदा पापो जायास्थाने शुभं वदेत् ।
यदि पापः शुभैर्दृष्टो नाशुभैश्च कदाचन ॥
यदि वा ग्रथनेच्छा स्याच्छयने यदि वेक्षितः ।
तदा नारीवशं तस्य प्राप्तो भवति निश्चितम् ॥
शुभाशुभैर्यदा दृष्टः शुभस्थश्चमलक्षितः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥
सुतस्थाने स्थितः पापो निद्रायां ग्रथनेऽपि वा ।

तदाशुभं भवेत्तस्य नात्र कार्य्या विचारणा ॥
तुङ्गस्थाने खगे वा त्रिकोणे वा यदा भवेत् ।
अपत्यस्थ तदा तस्य प्राप्तो जायते नात्र संशयः ॥
शुभग्रहो यदा तत्र क्रूरो वा यदि वेक्षितः ।
तदा प्रथमापत्यस्य नाशो भवति निश्चितम् ॥
व्यत्युस्थाने स्थितः पापो निद्रायां ग्रथनेऽपि वा ।
तदालनोऽपत्यतः स्याज्जालनोऽपरतोऽपि वा ॥
शुभग्रहो यदा तत्र व्यत्युस्थानेऽपि संस्थितः ।
तदा च मरणं तस्य व्यत्युस्थाने विशेषतः ॥
पापग्रहैर्यदा दृष्टः शुभो वा ग्रथनोचितः ।
तदा तस्य शिरश्छेदो मुनिना परिकीर्त्तितः ॥
एवं क्रमेण बोद्धव्यं ग्रहभावे सुबुद्धिना ।
बलाबलविचारेण जायते च शुभाशुभम् ॥
ज्योतिर्विद्सु च सर्व्वेषु परिहारः कृतो मया ।
ग्रथनादिकभावेषु ज्ञानार्थञ्चोपदेशतः ॥
एकादशे वा दशमालये वा
धनालये वा यदि वा विलग्ने ।
पापेन युक्तो न शुभग्रहश्चे-
त्तथापि सिद्धिं महतीं वदन्ति ॥"
फलं यथा,—
"भग्नदृष्टिः पित्तमूली च जायते ग्रथने नरः ।१।
उपवेशे भवेच्छ्रान्तो ग्रामवर्त्मश्रमा नरः ॥२॥
नेत्रपाणौ भवेत् क्रूरो जलदोषो भवेन्नरः ।३।
पुण्यवान् धार्म्मिकश्चैव धनवांश्च प्रकाशने ॥४॥
गमने च रवेर्जातः क्षपणो धनसंयुतः ।
बहुभाषी क्षमी क्रोधी शुभचित्तः सदा
भवेत् ॥ ५ ॥
अल्पभोक्ता द्रुतगामी दीर्घायुर्दृप्तवल्लभः ।
शूरः श्रीमान् सुशीलश्च गमनेच्छाभवो नरः ॥६॥
सभायाञ्च रवेर्जातः खलो दाता क्षमी भवेत् ।
दयालुः पण्डितो धीमान् गुणवान् पण्डित-
प्रियः ॥ ७ ॥
आगमने भवेन्मूर्खः कुरूपो धनवान् भवेत् ।८।
भोजने भक्तको मांसलुब्धो महाबपुर्बली ॥९॥
दृत्यलिप्सौ सुन्दरो वाग्मी पण्डितस्य प्रहा-
प्रियः ।१०।
उत्साही च महाभोगी कौतुके च दिवाकरे ॥११॥
दाता भोक्ता प्रियः पुत्रकलत्राढ्यो न संशयः ।
लिङ्गे देहे करे चैव गुह्ये रोगी तथैव च ।
निद्रायाञ्च भवेद्भानोः क्रोधनो रक्तनेत्रकः ॥१२॥
इति रवेस्तृतीयं बलाबले वा बोध्यम् ॥*॥
"ग्रथने च विधौ क्रोधी दरिद्रो बहुलम्पटः ।१।
उपवेशे महारोगी धनवांश्च भवेन्नरः ॥ २ ॥
नेत्रपाणौ नेत्ररोगी स्त्रीपरो बहुभाषकः ।
क्रूरः खलोऽतिशूरश्च जायते च विधौ तदा ॥३॥
प्रकाशने निष्प्रतापो धनवांश्च भवेन्नरः ।
दक्षो बुद्धिमान् दाता च परदारेषु लम्पटः ।४।
अरोगी वित्तदा चैव क्रूरकर्म्मा धनान्वितः ।
शिरोरोगी रक्तमूली जायते गमने विधौ ॥५॥
मायामतिमंदाक्रोधी लम्पटो च भवेन्नरः ।
गमनेच्छुविधौ जातो धनहीनो भवेत्तदा ॥६॥
दाता च धार्म्मिकश्चैव राजपात्रो भवेत् सदा ।

सभायाञ्च विधौ नित्यं जायते पुरुषोत्तमः ॥७॥
नित्यक्रोधी महादुःखी भवेदासमने विधौ ।८।
भोजने च भवेद्भुक्तो मद्यकश्च महाक्षरः ॥९॥
यो जातो वृत्यलिप्सायां गुरुवान् धार्म्मिको
भवेत् ।
बहुपात्रो धनी दाता जायते नात्र संशयः ॥१०॥
कौतुके च भवेद्योगी नानाविद्यासु तत्परः ।
उत्साही च महाक्रोधी जायते च सुनिश्चि-
तम् ॥११॥
निद्रायां दृढरोगी स्यात् क्लेशपापसमन्वितः ।
पुत्रशोकमहादुःखी नित्यं भ्रमति मेदिनीम् ॥१२
इति चन्द्रस्य ॥ * ॥
ग्रथने च कुजे जातो मद्यौषधकुक्कुरक्षतः ।
क्षणक्रोधी महादक्षः क्षपणो जायते नरः ॥१॥
उपवेशे यदा भौमे जायते च नराधमः ।
धनवान् क्रूरकर्म्मा च निष्ठुरो जातिवर्जितः ॥२॥
नेत्रपाणौ च यो जातः अक्षिरोगी भवेन्नरः ।
पुत्रदारधनैर्युक्तो दारिद्र्येणैव दृश्यते ॥ ३ ॥
प्रकाशने कुजे जातो धनवान् पण्डितः सुधीः ।
नारी च म्रियते तस्य प्रथमा च विशेषतः ॥ ४॥
गमने च यदा जातः प्रवासी नित्यदुःखितः ।
शरीरे च भवेद्रोगः कण्ठादिकुष्ठदूषकः ॥५॥
प्रवासी गमनेच्छायां गुदरोगी भवेच्च सः ।
धनहीनः कुकर्म्मा च जायते क्षितिजस्य च ॥६
सभायाञ्च यदा जातो धार्म्मिको बहुसम्मतः ।
गुरुवांश्च महादाता शिरोरोगी भवेद्ध्रुवम् ॥७
कुजस्यागमने नित्यं खञ्जो भवति नान्यथा ।
कर्णरोगी पित्तमूली जायते च नराधमः ॥८॥
भोजने भूमिजस्यापि यो जातो मांसलुब्धकः ।
दृढक्रायो महाक्रोधी नित्योत्साही धना-
न्वितः ॥ ९ ॥
कुजस्य वृत्यलिप्सायां यो जातो धनवान् भवेत् ।
दाता भोक्ता सदा मानी राजपात्रो भवेच्च
सः ॥ १० ॥
कौतुके क्षितिजस्यापि जातो भवति पण्डितः ।
नानाधनेन संयुक्तो बहुपुत्रो द्विभार्य्यकः ॥११॥
निद्रायां भूमिपुत्रस्य यो जातो भूरि एव सः ।
कलहो बान्धवैः साद्धं शोकक्लेशसमन्वितः ॥१२
इति मङ्गलस्य ॥
"बुधस्य ग्रथने जातो धनवान् क्षुधितः सदा ।
अल्पक्लेशो भवेदापि खञ्जो भवति नान्यथा ॥१॥
उपवेशे च यो जातः प्रवासी जायते ध्रुवम् ।
कवितागुणधीयुक्तो गौरवर्णो महाशयः ॥२॥
नेत्रपाणौ च यो जातः स्त्रीपरादिसमन्वितः ।
चक्षुरोगी विशेषात् स्यात् पुत्रनाशी भवेद्-
ध्रुवम् ॥ ३ ॥
प्रकाशने भवेज्जातो राजपात्रो धनान्वितः ।
नानाधनेन संयुक्तो जायते वेदमार्गगः ॥ ४ ॥
गमने यो नरो जातः प्रवासी नित्यदुःखितः ।
शरीरे क्षतमाप्नोति नित्यरुग्णो भवेच्च सः ॥५॥
यो जातो गमनेच्छायां जल्पको दुष्टचित्तकः ।
स्त्रीपरो दुष्टभार्य्यश्च कामुको बहुभाषकः ॥६॥

भावः

सभायाञ्च बुधे जातो मूर्खो भवति पण्डितः ।
धनवान् धार्मिकश्चैव चिररोगी भवेत् नरः ॥७॥
क्रूरः खलो धनमूर्खः पापग्रीवो भवेन्नरः ।
बुधस्यागमने विघ्नं जायते च नराधमः ॥८॥
भोजने च भवेत् सौख्य धनहीनो भवेन्नरः ।
परद्वेषी प्रवासी च शोकग्रासश्रयान्वितः ॥९॥
यो जातो वृत्यलिप्सायां धनवान् पण्डितः कविः ।
उत्सवाढ्यो च महाक्षुद्रो भुनक्ति सुख-
मद्भुतम् ॥ १० ॥
कौतुके च यदा जातो भवेत् सर्व्वजनप्रियः ।
अर्शोरोगी दृढयुक्तो धनवानल्पग्रत्यकः ॥११॥
निद्रायाञ्च यदा जातः सर्व्वदुःखैकपात्रताम् ।
नानाक्लेशमवाप्नोति रोगशोकयमक्षयम् ॥१२॥"
इति बुधस्य ॥ * ॥

"धनवान् लम्पटः श्यामः स्थूलो व्रणरुजान्वितः ।
जीवस्य ग्रयने जातो मानवो नात्र संशयः ॥१॥
उपवेशे गुरोर्जातो बहुभाषी च रोगवान् ।
पशुघाती महाग्निघ्नो श्रीपदी रोगसंयुतः ॥२॥
नेत्रपाते गुरोर्जातः काणरोगी धनी भवेत् ।
व्रतादिचरणे नित्यं जायते नात्र संशयः ॥३॥
गुरोः प्रकाशे धनवान् लिङ्गगुह्ये रुजान्वितः ।
दन्तो लम्पटपापी च श्यामवर्णो रुजान्वितः ॥४॥
सर्पभीतो गूढकर्म्मा साहसी गमनोन्मुखे ।
परवित्तेन धनवान् पुमान् भवति वाक्पतौ ॥५॥
गुरोश्च गमनेच्छायां जातो भवति मानवः ।
मूकी धनी प्रवासी च सेवाकर्म्मणि तत्परः ॥६॥
वक्ता दाता च धनवान् राजसेवान्वितो नरः ।
मूलरोगी भवेन्नित्यं सभायां वाक्पतौ स्थिते ॥७॥
धार्मिकस्तीर्थविज्ञानी धनी चागमने गुरोः ।
परदारेषु संलुब्धो जायते नात्र संशयः ॥८॥
भोजने बहुसौख्याढ्यो मांसलुब्धो महासुरः ।
कामुकः प्रियवाक्यश्च जायते नात्र संशयः ॥९॥
वृत्यलिप्से घटो वाग्मी धनवान् सात्विकस्तथा ।
महदैश्वर्यसंयुक्तो जीवस्य च भवेन्नरः ॥१०॥
कौतुके च गुरोर्जातो धनवान् धार्मिकः सदा ।
वृत्योत्सवाढ्यो महत्सङ्गो भुनक्ति सुखमद्-
भुतम् ॥ ११ ॥
निद्रायाञ्चैव यो जातश्चक्षूरोगी भवेच्च सः ।
कृपणो बहुभाषी च दुःखितो भ्रमते
महीम् ॥ १२ ॥"
इति गुरोः ॥ * ॥

"शुक्रस्य ग्रयने जातो लम्पटो बहुभाषकः ।
दन्तरोगी महाक्रोधी नीचो भवति नित्यशः ॥१॥
उपवेशे तथा जातो बलवान् दाम्भिकः सदा ।
नित्यप्रवासी रोगी च जायते नीचसंस्थिते ॥२॥
नेत्रपाते भृगोर्दुःखी रोगशोकसमन्वितः ।
धनहीनो महारोगी मानवः स्यान्न संशयः ॥३॥
भृगोः प्रकाशने जातो विद्याधनसमन्वितः ।
दाता च धार्मिकश्चैव कीर्त्तिमान् जायते नरः ॥४॥
शुक्रस्य गमने जातः पादमूले रुजान्वितः ।
नित्योत्सवाढ्यो महाग्निघ्नो भवेत्तीर्थगतो
नरः ॥ ५ ॥

गमनेच्छौ यदा जातो भ्रातृनाशो भवेद्ध्रुवम्
माता च म्रियते तस्य ग्रीष्मे व्याधिसंयुतः ॥६॥
सभायाञ्च भृगोर्जातो राजयाजी महाधनी ।
कुलग्रीली महादक्षः केवलं मूलरोगवान् ॥७॥
भृगोरागमने जातो दुःखितो बहुलम्बटः ।
दृढरोगी पुत्रग्रोकी जायते च नराधमः ॥८॥
शुक्रस्य भोजने जातो बलवान् दाम्भिकः सदा ।
महाधनी भवेन्नित्यं वाग्मित्वेन विशेषतः ॥९॥
यो जातो वृत्यलिप्सायां स वाग्मी जायते ध्रुवम् ।
पाण्डित्यं कविता चैव वर्द्धते च दिने दिने ॥
यदि चैव भवेन्नीचे शुक्रो भवति निश्चितम् ।
तुङ्गस्थाने विशेषेण राजपात्रो महाधनी ॥
कामुको बहुकान्तश्च परयोषित्प्रियः सदा ।
श्यामवर्णरुजा भागी याज्ञिको बहुभा-
षकः ॥१०॥
शुक्रस्य कौतुके जातो धनवान् सात्विकः सदा ।
महाक्षुद्रो महाबन्धुः कौतुकी च भवेत् सदा ॥
बहुपुत्रकलत्रश्च नानासुखसमन्वितः ।
नीचे तद्विपरीतः स्यात् दुःखशोकसम-
न्वितः ॥ ११ ॥
निद्रायाञ्च भृगोर्जातो भवेद्रोगी स निश्चितम् ।
नित्यक्लेशी महादुःखी जायते नात्र संशयः ॥
जायायाञ्च सुतस्थाने यदि निद्रा भृगोर्भवेत् ।
तदा सर्व्वविनाशः स्याद्विद्यूना परिकी-
र्त्तितः ॥१२॥"
इति शुक्रस्य ॥ * ॥

"ग्रयने च शनेर्जातो लम्पटो बहुभाषकः ।
गुह्यस्थाने भवेद्रोगी कोष्ठवृद्धिश्च जायते ॥
लग्नात् सप्तमगे चैव ग्रयनस्थः शनैश्चरः ।
तदा नित्यप्रवासी स्याच्छत्रुघ्नो भवेच्च सः ॥१॥
उपवेशे यदा जातः श्रीपदी दृढसंयुतः ।
धनहीनो भवेत्तस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाते यदा जातो मूर्खो भवति पण्डितः ।
धनवान् धार्मिकश्चैव द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशगे च यो जातो राजपात्रो भवेच्च सः ।
नानागुणैश्च गुणवान् धार्मिकः पण्डितः शुचिः ॥"
मतान्तरं ।
आयास्थाने च लग्ने च प्रकाशगे यदा शनिः ।
तदा सर्व्वविनाशः स्याज्ज्ञातिध्वंसो भवेद्
ध्रुवम् ॥ ४ ॥
गमने च यदा जातः पादमूले रुजान्वितः ।
तीर्थे च गतिमाप्नित्यं पुत्रदारैर्विवर्ज्जितः ॥५॥
यो जातो गमनेच्छायां श्रीपदी रोगसंयुतः ।
दन्तारोगी महाक्रोधी कृपणः परनिन्दकः ॥६॥
सभायाञ्च शनेर्जातः पुत्रदारधनैर्युतः ।
सर्व्वत्र लभते वित्तं नानारत्नसमन्वितम् ॥७॥
आगमने यदा जातो महाक्रोधी रुजान्वितः ।
सर्पादिभिश्च संदष्टो ज्ञातिनाशी भवेद्ध्रुवम् ॥८॥
भोजने चैव यो जातो मन्दाग्निश्च महानपि ।
अर्शोरोगी तथा शूली चक्षूरोगी भवेच्च सः ॥९॥
यो जातो वृत्यलिप्सायां वर्णको बहुभाषकः ।
जीवनो दुःखितश्चैव प्रवासी परसेवकः ॥१०॥

कौतुके च शनेर्जातो राजपुत्रो महाशयः ।
दाता भोक्ता महादक्षो धार्मिकः पण्डितः
शुचिः ॥ ११ ॥
निद्रायाञ्च शनेर्जातो धनवान् पण्डितः शुचिः ।
चक्षूरोगी पित्तशूली द्विभार्य्यो बहुपुत्रकः ॥
विद्योन्नतश्च धर्म्मज्ञो कर्म्मज्ञो च कदाचन ।
यदि दैवाद्भवेन्निद्रा नाशो भवति निश्चितम् ॥
कर्म्मनाशो धर्म्मनाशः क्षुधार्त्तो दुःखितः सदा ।
नित्यप्रवासी रोगी च कार्य्यनाशः पदे पदे ॥
स्वमित्रगेहे षष्ठे वा केन्द्रे वा स्वगृहे पुनः ।
तदा सर्व्वं विनाश्यैव वैपरीत्येन चिन्तनम् ॥
आयायाञ्च सुतस्थाने यदि निद्रा भवेत् पुनः ।
तदा सर्व्वं शुभं विद्याद्विद्युना परि-
कीर्त्तितम् ॥ १२ ॥
इति शनेः ॥ * ॥

ग्रयने च यदा राहोर्जन्म यस्य भवेत् पुनः ।
तस्य क्लेशो महादुःखं जायते च न संशयः ॥१॥
उपवेशे च यो जातः श्रीपदी रोगसंयुतः ।
बहुहानिर्नरेन्द्रस्य पीड़ा भवति नित्यशः ॥२॥
नेत्रपाते यदा जातश्चक्षूरोगी भवेद्ध्रुवम् ।
सर्पाघातो महाभीतिर्द्विभार्य्यो बहुभाषकः ॥३॥
प्रकाशगे च यो जातो धनवान् धार्मिकः पुनः ।
नित्यप्रवासी क्लेशाढ्यो सात्विको धार्मिकः
शुचिः ॥ ४ ॥
गमने चैव यो जातो नानारोगैर्घृणक्षयः ।
दम्भाचारी महाक्रोधी पिशुनः परनिन्दकः ॥५॥
यो जातो गमनेच्छायां बहुपुत्रो महाधनः ।
पण्डितो गुणवान् दाता जायते च नरोत्तमः ॥६॥
सभायाञ्च यदा जातः कृपणो धनसंयुतः ।
नानागुणैश्च गुणवान् धार्मिकः पण्डितः
शुचिः ॥ ७ ॥
आगमने च यो जातो लम्पटो बहुभाषकः ।
सुहृद्बन्धुविनाशः स्यान्नानारोगैश्च जायते ॥८॥
भोजने च महाक्रोधी मन्दाग्निश्च रुजान्वितः ।
कृपणः कलहाढ्यश्च दुःखितो नित्यसेवकः ॥९॥
यो जातो वृत्यलिप्सायां खञ्जो भवति नाशया ।
पुत्रनाशो भवेत्तस्य जायानाशो भवेद्ध्रुवम् ॥१०॥
कौतुके च यदा जातो गुणैः सर्व्वैः समन्वितः ।
नानाधनैश्च धनवान् राजसेवासु तत्परः ॥
यदि दैवाद्भवेत्क्लीबो स्वगृहे वा कदाचन ।
तदा सर्व्वं वैपरीत्यं जायते च न संशयः ॥११॥
यो जातो रात्रुनिद्रायां दुःखितः सर्व्वतस्तया ।
नानास्थाने गतो वापि धनपुत्रविवर्ज्जितः ॥
जायायाञ्च सुतस्थाने यदि निद्रा विधुन्तुदः ।
तदा सर्व्वं वैपरीत्यं धनजायासमन्वितः ॥१२॥
नानाग्रामं समालोक्य क्षियते सत्यसंयुतः ।
बलाबलविचारेण युक्त्या सञ्चिन्तयेद्बुधः ॥"
इति यवनानां ग्रयनादिद्वादशभावविवेकः
समाप्तः ॥ इति जातरत्नः कोष्ठीप्रदीपश्च ॥
अथ तत्त्वादिद्वादशभावाः ।
ते च नराणां जन्मजन्मावधिकद्वादशस्थानानि ।
यथा,—

"धामर्थे तनु वक्त्रके वसुपदे वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने बोधञ्च धर्म्मि-
ष्ठतयेत् ।
बन्धुं वाप्तसुखात्ययापि तपो धीमत्पुत्रात्मतः
षष्ठेऽरिं व्रततिर्विधौ मदपदे कामं स्त्रियं यत्नं च ॥
रन्ध्रायुर्व्ययतोऽष्टमे गुरुतपो भाग्यानि चिन्तनतो
मायाज्ञात्यदलक्षयो दशमभे कुर्य्यात्तदश्चिन्त-
नम् ।
प्राप्त्याप्तायव चिन्तयेद्विबपदे जन्मे तु मन्त्रि-
तयौ
सौम्यस्वामियुतौ च लग्नचपचयस्थेषां स्थितिस्तत्यया ॥
इति द्वादशभावविवेकः ॥
अरातिव्रजयोः षष्ठे चाष्टमे रन्ध्रयुरन्ध्रयोः ।
व्ययस्थ द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
अरात्यादिभावापवादः ॥
अथ तत्त्वादिद्वादशभावस्थग्रहफलम् ।
"लग्ने सूर्य्येऽक्षिरोगी घृणिनि वलयुतो रूप-
वान् वित्तयुक्तो
भौमे खड्गः सुवाग्मी घृणधरतनये सर्व्व-
शास्त्रार्थवेत्ता ।
जीवे दाता पवित्रः सुकविरथ गते भार्गवे
मल्लवेश्यः
सौरौ कस्तूरिगात्रक्षमसि च नियतं वञ्चितो
धर्म्महीनः ॥ १ ॥
विक्षेऽर्के चैव रोगी सततगदयुतो रात्रिनाथे
धनाढ्यो
भौमे नित्यं प्रवासी क्षतिसुतधनवान् सोमपुत्रे
प्रधानः ।
जीवे लक्ष्मीप्रमोदी विलपति भृगुजे दर्पितः
स्त्रीनिकेतः
सौरौ दीनोऽति नित्यं तमसि च नियतं चौरि-
कावित्तजीवी ॥ २ ॥
भातर्य्यर्के सधर्म्मः स भवति नियतं भालहा
रात्रिनाथे
द्विसो भौमेऽनुजानां सपदि वधकरो भूमिका-
वृत्तिजीवी ।
सौम्ये सत्यस्य कर्त्ता भवति सुरगुरौ कामदेव-
स्वरूपः
शुक्रे राज्याधिकारी रविजदनुजयोर्भालहन्ता
धनाढ्यः ॥ ३ ॥
अर्के वन्ध्यो सदुःखी स्वजनपरिहतः प्रीतगो
जारुरोगी
भौमे कृष्णाम्बरासी भवति घृणिसुते भालपुत्रा-
न्वितोऽपि ।
जीवे रत्नोपभोगी विदघरिपुगुरौ सर्व्वसौख्या-
धिकारी
सौरौ गेहे निवासी भवति घृणिरिपौ मन्द-
कर्म्मा कुपेलः ॥ ४ ॥
पुत्रस्थेऽर्के नरोऽसौ प्रथमसुतहतः सिंहराशौ
सुपुत्रः
सोमे सर्व्वाधिकारी भवति धरजिते पुत्रशोका-
कुलोऽसौ ।
सौम्ये सुखः सुदेहः प्रचुरधनयुतो देवपूज्ये
सुपुत्रः
वन्ध्यायुत्तो हि शुक्रे रविजदनुजयोः पुत्रपौत्रै-
र्विहीनः ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहितः सौम्यवन्धे
गतायुः
पूर्व्वे शुक्रश्च हन्याद्भवति धरजिते क्षीणदेहो-
ऽतिदीनः ।
सौम्ये भ्रात्राप्तयुक्तस्त्रिदशपतिगुरौ राज्य-
सौख्योपभोगी
दैत्याचार्य्येऽतिरोगी रविजदनुजयोः पापभुक्-
नित्यदुःखी ॥ ६ ॥
पत्न्यामर्के च जायापतिरतिविसुखौ प्रीतरक्षौ
सुपुत्रः
सुखी भूयान्नरोऽसौ भवति धरजिते क्षीण-
भार्य्यश्च नूनम् ।
सौम्ये सुखः सुदेहस्त्रिदशपतिगुरौ भ्रात्रवेत्ता
शतायुः ।
शुक्रे पुत्रप्रमोदी रविजदनुजयोर्क्षीणभार्य्यश्च
नूनम् ॥ ७ ॥
मृत्यौ चार्के सदृत्युर्भवति च नियतं प्रीतरक्षौ
गतायु-
र्भूमेः पुत्रे सुरोगी घृणधरतनये मूलरोगी
विकर्म्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्म्मिक-
स्तीर्थगोऽसौ
सौरौ मूली गतायुर्भवति विधुरिपौ वेदसुत्तो
गतायुः ॥८॥
धर्म्मे चार्के नरोऽसौ विविधधनयुतः प्रीतगौ
पुण्यकर्म्मा
लक्ष्मीवान् पुण्यचेता भवति धरजिते देव-
वित्तापहारी ।
सौम्ये धर्म्मा सुशीलस्त्रिदशपतिगुरौ राज-
तुल्यः सुकर्म्मा
शुक्रे तीर्थानुरागी रविजदनुजयोः पापशीलः
सदुःखी ॥९॥
कर्म्मण्यर्के प्रतापी प्रचुरधनयुतः स्त्रीपदो
क्रोधदृष्टिः
सोमे श्रेष्ठान्वितोऽसौ विविधधनयुतो भूमिजे
बन्धुहीनः ।
निश्चोत्साही च सौम्ये प्रचुरधनयुतो देव-
पूज्येऽभिमानी
स्त्रियक्षीणोऽपि शुक्रे नृपतिसमधनः सौरिदेशे
सुखी च ॥१०॥
आये चार्के नरोऽसौ पिठधनसहितः प्रीतगौ
चारुशीलो
भौमे नित्यं स रोगी घृणधरतनये सर्व्वदा
क्रोधयुक्तः ।
जीवे श्रीमान् प्रदाता करितुरगपतिर्भार्गवे
शास्त्रविज्ञः
व्ययौ रत्नादियुक्तो रविजदनुजयोः क्रूरकर्म्मा
कुपेलः ॥११॥

अर्के वंशे वयेऽसौ पुरजनरहितः पर्व्वरोगी
सदुःखी
सोमे खेदान्वितोऽसौ भवति धरजिते क्रूतरक्तो
विदुष्टिः ।
सौम्ये धर्म्मार्थकारी दिनकररहिते देवपूज्ये-
ऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयोः क्रूरकर्म्मा
कुपेलः ॥१२॥
इति ज्योतिस्तत्त्वम् ॥*॥
स्त्रीणां यौवनकाले स्वभावजाद्यविंशत्यलङ्कारा-
स्तत्रगतानुद्दीपनप्रथमाजङ्कारः । यथा,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ॥"
तत्र भावः ।
"निर्व्विकारात्मके चित्ते भावः प्रथममिच्छया ॥"
अङ्गतः प्रभृति निर्व्विकारे मनसि उद्बुद्धमात्रो
विकारो भावः । यथा,—
"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेदः ॥*॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराद्या विधायकाः ।
भावा विभावजनिताश्चित्तवृत्तय ईरिताः ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयोः ।
समानार्थतया चात्र द्वयमेकेन लक्ष्यते ॥"*॥
पूर्व्वोक्तमानसविकाररूपभावस्य विवरणं यथा,
रजःसत्त्वतमोमयश्चित्तविकारो भावः । चित्त-
वृत्तिविशेषो भाव इत्यर्थे । अतएव मनो-
विकारो रत्यादिर्भाव उक्तः । भावयति जनयति
रसान् भावः अण् । तथा च भरतः ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोक्तिषु ॥"
भावाश्च त्रिविधाः स्थायिनो व्यभिचारिणः
सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काश्रान्तयालस्यमदक्षमाः ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृतिः स्मृतिः ॥
व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
स्वप्नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
चतस्त्रिंशदमी भावाः प्रयान्ति रससंस्थितम् ॥"
सात्त्विका यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति ॥
रत्यादयः स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभि-
चारित्रयस्त्रिंशत् स्वेदादयः सात्त्विका अष्टौ
चेति ऊनपञ्चाशद्भावाः पञ्चाशद्भावा इत्यर्थे ।
इत्यमरटीकायां भरतः ॥

(प्रधानव्यभिचारिप्रभृतयो भावशब्देनोच्यन्ते । यदुक्तं साहित्यदर्पणे द्वितीयपरिच्छेदे ।
"सञ्चारिणः प्रधानानि देवादिविषया रतिः । उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।")
भगवद्भावो यथा,—
"शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक् ।
रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यते ॥"
इति भक्तिरसामृतसिन्धुः ॥*॥

भावकः, पुं, (भाव एव स्वार्थे कन् ।) भावः । मानसो विकारः । इति हलायुधः ॥ (भवतीति । भू + कर्त्तरि ण्वुल् ।) सत्ताश्रये, त्रि । इति संक्षिप्तसारः ॥

भावतः, त्रि, (भवत अयमिति । भवत् + अण् ।) भवदीयः । ब्राह्मणभवच्छब्दाद्यञ्प्रत्ययनिष्पन्नः । इति सिद्धान्तकौमुदी ॥

भावतकः, त्रि, (भवतामयमिति । भवत् + "भवत छक्छसौ ।" ४ । २ । ११५ । इति छक् ।) भवदीयः । भवच्छब्दात् छकप्रत्ययनिष्पन्नः । इति सिद्धान्तकौमुदी ॥ यथा, भट्टिकाव्यसर्गे ।
"भावतकं इदवत्खेतदस्माकमधि सुतीवितम् ॥"

भावनं क्ली, (भू + णिच् + ल्युट् ।) भव्यम् । इति राजनिर्घण्टः ॥ चालता इति भाषा ॥ (भावे ल्युट् ।) भावना । इति मेदिनी । ने, १०१ ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"सुखदुःखादिभिर्भावैर्भावस्वद्भावभावनम् ॥"
भावयतीति । भू + णिच् + ल्युः । उत्पादके, त्रि । यथा, महाभारते । १ । २२४ । ४५ ।
"इष्टेव च स राजानं प्रकरो लोकभावनः ।
उवाच परमप्रीतः श्वेतकिं नृपसत्तमम् ॥")

भावना, स्त्री, क्ली, (भू + णिच् + युच् ।) ध्यानम् । (यथा, गीतायाम् । २ । ६६ ।
"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥")
पर्य्यालोचनम् । अधिवासनम् । इति मेदिनी । ने, १०१ ॥ त्रिविधा भावना यथा,—
"त्रिविधा भावना विप्र ! विश्वमेतन्निबोध मे ।
ब्रह्माख्या कर्म्मसंज्ञा च तथा चैवोभयात्मिका ॥
ब्रह्मभावात्मिका ह्येका कर्म्मभावात्मिकापरा ।
उभयात्मिका तथैवान्या त्रिविधा भावभावना ॥
सनन्दनादयो ब्रह्मभावभावनया युताः ।
कर्म्मभावनया चान्ये देवाद्याः स्थावरान्ताः ॥
हिरण्यगर्भादिषु च ब्रह्मकर्म्मात्मिका द्विधा ।
बोधाधिकारयुक्तेषु विद्यते भावभावना ॥"
इति विष्णुपुराणे ६ अंशे ७ अध्यायः ॥
त्रिविधभावनाश्रयजीवात्मकत्वात्तदुपचारेण त्रिविधा भावनेत्युच्यते । एतद्धि हरेः स्थूलं रूपम् । अतः परस्वरूपप्राप्त्युपायत्वात् तत्र प्रथमं मनः सन्धार्य्यमिति भावः । भावना नाम ज्ञानविशेषजा वासना । तां त्रिविधामपि संज्ञादिभिरति ब्रह्मेति । तामेव विषयभेदेनविशेष विविनक्ति ब्रह्मभावनात्मिकेति । भावभावना भावो वस्तु तद्विषया भावना त्रिविधा ।

तत्र वयं ब्रह्मैव भावयामः । वयं कर्म्मैव कुर्म्मः । वयन्तूभयमिदमनुसन्धम इत्येवं त्रिविधा भावना । भावनायुक्तान् जीवानुदाहरति सनन्दनादय इति द्वाभ्याम् । इति तट्टीका ॥

भावबोधकः, पुं, (भावस्य रत्यादेर्बोधकः अनुभावकः ।) अनुभावः । इत्यमरः । २ । ७ । २१ ॥ भावस्य रत्यादेर्बोधकः स्वयको गुणक्रियादिरनुभावः । अनुभाव्यते प्रतीतियोग्यतां नीयते रत्यादिरनेनेति अनुभावः घञ् । तत्र इतरेऽनुभावाः लोचनवासुर्य्यभ्रूक्षेपाद्याः । हासस्य च कपोलाकुञ्चनानासोन्मुकुलनाद्योऽनुभावा एवं अन्यत्रानुसन्धेयम् । किंवा भावानुभावयतीति अनु अनुभावो सुखरागादिः । इति तट्टीकायां भरतः ॥

भावदृप्तः, पुं, (भावः सत्ता दृप्तः प्रवृत्तोऽस्मादिति । यद्वा, भावः स्वहिः तत्र दृप्तः प्रवृत्तः ।) ब्रह्मा । इति सन्ध्याख्यायां स्मृतिः ॥

भावाटः, पुं, (भावं भावेन वाटयतीति । अट् + अण् अच् वा ।) भावकः । साधुः । निपुणः । कामुकः । नटः । इति मेदिनी । टे, ५२ ॥

भावानुगा, स्त्री, (भावं सूक्ष्मपदार्थमनुगच्छतीति । अनु + गम् + डः । टाप् ।) छाया । इति राजनिर्घण्टः ॥ (भक्त्यादिना अनुगते, त्रि ॥)

भावानीना, स्त्री, (भावेषु सूक्ष्मपदार्थेषु आनीना ।) छाया । इति राजनिर्घण्टः ॥

भावितः, त्रि, (भाव्यते स्मेति । भू + णिच् + क्तः ।) वासितः । प्राप्तः । इति मेदिनी । ते, १४० ॥ विशोधितः । (यथा, महाभारते । १३ । १४ । ३८ ।
"ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः ।
तेषामेवात्मनात्मानं दर्शयत्येष तुष्टयः ॥")
चिन्तितः । मिश्रितः । भू क सुद्धिचिन्तयोर्मिश्रणे च इत्यस्मात् आत्मात् क्तप्रत्ययनिष्पन्नोऽयम् ॥ (समर्पितः । यथा, महाभारते । १ । ५ । ६० ।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम् ।
यदीश्वरे भगवति । कर्म्म ब्रह्मणि भाषितम् ॥"
"भगवति भावितं समर्पितम् ।" इति तट्टीकायां श्रीधरस्वामी ॥ चिन्तितः । यथा, तत्रैव चिकित्सितस्थाने । ९ अध्याये ।
"भक्षातकान् वासयेत्तु चारे प्राङ्मुख-
भाविनम् ॥")

भाविनी, स्त्री, (भवतीति । भू + "भूवादिगृधृभ्यो णिनन् ।" उणा० ४ । १०० । इति णिनन् ।) त्रैलोक्यम् । स्वर्गमर्त्यपातालम् । इत्युणादिकोषः ॥

भाविनी, स्त्री, स्त्रीविशेषः । इत्यमरः ॥ भावः प्रहारचेष्टाविशेषो विद्यतेऽस्याः भाविनी । इति तट्टीकायां भरतः ॥ (यथा, हरिवंशे । ११७ । ३६ ।
"सा हि तस्याभवद्भार्य्या पत्नी ब्रह्मसुता भाविनी ।
पतिव्रता गुणोपेता रूपयौवनगुणान्विता ॥")
स्त्रीमात्रम् । इति राजनिर्घण्टः ॥ (स्वरूपस्य मात्रगब्दानामन्यतमा । यथा, महाभारते । ८ । ४६ । ११ ।
"एतत् ते सर्व्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
मात्राभिः पञ्चभिर्हीनं पञ्चमात्रमिदं जगत् ॥")

"शुभलक्षणा शुभलक्षणा लक्षणज्ञा च भाविनी ।
यदुवंशो यत्नगृहीता भवताद्यो च भारत ! ॥")
वर्त्तमानप्रागभावप्रतियोगिनी च ॥

भावी, [न्] त्रि, (भविष्यतीति । भू + "सुयजो ।" उणा० ४ । ८ । इति इनिः । च च द्वित्वम् ।) भविष्यत्कालादिः । वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकः । यथा,—
"वीरप्रतिपदा नाम तव भावी महोत्सवः ॥"
इति कार्त्तिकशुक्लप्रतिपदमधिकृत्य बलिं प्रति भगवद्वाक्यम् । इति तिथ्यादितत्त्वम् ॥

भावुकं, क्ली, (भवतीति । भू + "जवपतपदस्थाभूवृषेति ।" ३ । २ । १५४ । इति उकञ् ।) मङ्गलम् । (यथा, प्रद्युम्नविजये १ अङ्के ।
"ब्रह्मन् ! सर्व्वत्र कुशलमस्माकम् । अपि भावुकं वः सुरार्य्याणाम् ॥")
तद्वति, त्रि । इत्यमरः । १ । ७ । २५ ॥

भावुकः, पुं, (भू + उकञ् ।) नाट्योक्तौ भङ्गिनीपतिः । इति हेमचन्द्रः ॥

भावुकः, त्रि, भवनाश्रयः । भवति यः । इति कर्त्तरि भूधातोर्ण्वुकप्रत्ययेन निष्पन्नः ॥ रसविशेषभावनाचतुरः । इति श्रीधरस्वामी ॥ यथा,—
"निगमकल्पतरोर्गलितं फलं
शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं
मुहुरहो रसिका भुवि भावुकाः ॥"
इति श्रीभागवते । १ । १ । ३ ॥
लक्षपलितप्रियान्वयसुलक्षणसुभगाढ्यशब्देभ्यः पदभूधातोरभूतसद्भावार्थे कर्त्तरि वाच्ये खुञ्प्रत्ययेन लक्षभावुक इत्यादयश्च निष्पन्नाः ॥

भाव्यं, क्ली, अवश्यभवित्वम् । इति भूधातोरवश्यम्भावार्थे भावे ण्यत्प्रत्ययेन निष्पन्नम् । यथा । विप्रेण सुचिना भाव्यम् । इति सुबोधव्याकरणम् ॥ प्रयोगदर्शनात् कर्त्तरि च तत्र त्रि । यथा —
"ज्ञानस्य कारणं नास्ति दैवाधिष्ठितकर्म्मजः ।
भावीज्ञेयस्तु यत्नार्थं तत्र ब्रह्मापि बाधकः ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

भाष, ङ क्ष वाचि । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म० सक० सेट् ।) ङ, भाषते । क्ष, अभीभषत् अवभाषत् । इति तट्टीकायां दुर्गादासः ॥

भाषणं, क्ली, (भाष् + भावे ल्युट् ।) कथनम् । यथा । "संलापो भाषणं मिथः ।" इत्यमरः ॥ (यथा, सम्बन्धदर्शने । आर्च्चनदर्शने ।
"हास्यलोभभयक्रोधप्रलापान्नैर्नरन्तरम् ॥
आलोक्य भाषणीयापि भाषयेत् संयुतं सतम् ॥")

भाषा, स्त्री, (भाष्यते व्याकरणव्यवहारादिना प्रयुज्यते इति । भाष् + "सुरोच्च हलः ।" ६ । ३ । १०२ । इत्यप्रत्ययः । टाप् ।) रागिणीविशेषः । इति हलायुधः ॥ वाक्यम् । वाग्देवता । तत्पर्य्यायः । ब्राह्मी २ भारती ३ गीः ४ वाक् ५ वाणी ६ सरस्वती ७ आहारः ८ उक्तिः ९ भणितम् १० भाषितम् ११ वचनम् १२ वचः

भाषा

१३। इत्यमरः।१।६।१॥ अथोदाहरणम्। पूर्वमनृतं मागधिशब्दतायां दैवतायाच्च। इति तद्धीकायां भरतः॥ शाकारीवाटवाद्रमाहीरा यवना। संस्कृतम् १ प्राकृतम् २ उकारी ३ मद्राराट्टी ४ मागधी ५ मिश्राद्धमागधी ६ शाकाभीरी ७ अवन्ती ८ द्राविड्यो ९ ओड्रीया १० पाञ्चाला ११ प्राच्या १२ वाह्लीका १३ रङ्किका १४ दाक्षिणात्या १५ शैवाचारी १६ आवन्ती १७ पौरसेनी १८। एतासां लक्षणोदाहरणानि प्राकृतलक्षेश्वराकरादौ द्रष्टव्यानि॥

अथ भाषाविभागः।

"युक्तव्याजामनीचानां संस्कृतं स्यात् सतामपि।
पौरसेनी प्रयोक्तव्या ताद्धीवाच्च योषिताम्॥
आसाद्येव तु मागध्यां मद्राराट्टीं प्रयोजयेत्।
अभीरोक्ता मागधी भाषा राजान्तःपुरचारिणाम्॥
पेटानां राजपुत्राणां श्रेष्ठिनाञ्चार्द्धमागधी।
प्राच्या विदूषकादीनां धूर्त्तानां स्यादवन्तिका॥
योधनागरिकादीनां दाक्षिणात्या हि दीव्यताम्।
शकारादां शकादीनां शाकारीं संप्रयोजयेत्॥
वाह्लीकभाषा दियानां द्राविड्यो द्रावड़ादिषु।
आभीरेषु तथाभीरी शाकारी पुक्कसादिषु॥
आभीरी शाबरी चापि काष्ठपक्षोपजीविषु।
तथैवाङ्गारकारादौ शैवाचारी स्यात् पिशाचवाक्।
पेटोद्यानध्वजीवानामपि स्यात् पौरसेनिका॥
बालानां वञ्चकानाञ्च नीचव्यङ्गविचारिणाम्।
उच्चतानामातुराणां वैव स्यात् संस्कृतं क्वचित्॥
ऐश्वर्य्येण प्रमत्तस्य दारिद्र्योपकृतस्य च।
भिक्षुवञ्चकधूर्त्तादीनां प्राकृतं संप्रयोजयेत्॥
संस्कृतं संप्रयोक्तव्यं लिङ्गिनीधूर्त्तमासु च।
दैवीमक्षिप्ततावेशाद्यापि कैश्चित्तयोदितम्॥
सहेलो नीचपात्रस्तु सहेली तस्य भाषितम्।
कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः॥
द्योधित्रसखीबालवेश्याकितवाक्षरसां तथा।
दैवज्ञार्थं प्रवासस्थं संस्कृतञ्चाप्यराक्षरा॥
एवमुदाहरणान्याकारेषु बोद्धव्यानि। भाषालक्षणानि भाषार्णवे। इति साहित्यदर्पणे ६ परिच्छेदः॥

अथ भाषापादः।

तत्र भाषास्वरूपमाह तुः कात्यायनश्च लक्षयति।
"प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारयान्वितम्।
निश्चितं लोकसिद्धञ्च पद्यं पद्यविदो विदुः॥
लक्ष्याक्षरः प्रभूतार्थो निःसन्दिग्धो निराकुलः।
विरोधिविकारैर्मुक्तो विरोधिप्रतिरोधकः॥
यदा त्वेवंविधः पक्षः कथितः पूर्ववादिना।
दद्यात्तत्रैव सत्कारं प्रतिवादी तदोत्तरम्॥
प्रतिज्ञा साध्यनिर्देशिका वाक्। तस्या दोषैः परस्परविरुद्धार्थपदादिभिरुक्तं साध्यं साधनाङ्गीभिमतं पद्यं विदुः। अन्यथा प्रतिज्ञादोषैरेव साधनदोषः स्यात्। अतएवोक्तम्।

भाषा

"वचनञ्च प्रतिज्ञार्थं तदवयेक्ष च पक्षता।
अवद्वारेण वक्तव्ये अवहारेषु वादिभिः॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते। नारदेनापि।
"वारस्तु अवहारार्था प्रतिज्ञा वसहाकृता।
तद्हानौ क्षीयते वादी तदंशाहुत्तरो भवेत्॥"
उत्तरो विजयी। यद्यप्यत्रत्य साध्यं सद्विशिष्टधर्म्मोपाधर्म्मी पक्ष इति भेदः तथाप्यत्र वाक्प्रस्तार्य्यत्वादिधर्म्मविशेषविशिष्टतया धर्म्मिबोधधर्म्मपदैरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम्। उपसंहारे च एवंविधः पक्ष इति। मिताक्षरायान्तु। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरमित्युक्तम्। भाषार्थस्तूक्ता भाषास्वरूपप्रपञ्चमाह। स्वभाक्षर इति। निराकुलः पौर्व्वापर्य्यविपर्य्यासादिशून्यः। तथ।
"धृते च अवहारे च प्रवृत्ते यत्तकर्म्मणि।
यानि पञ्चानुदासीनाः कर्त्ता तानि न पश्यति॥"
इति यत्नसंग्रहवचनादुदासीनेभ्यो ज्ञाता शोधयेत्॥ *॥ तच्छोधनमाह हरहृतिः।
"न्यूनाधिकं पूर्व्वपक्षं तावदादौ विशोधयेत्।
न एवादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ॥"
तल्लिखनप्रकारमाह व्यासः।
"पाक्षुलेखेन पत्रके भूमौ वा प्रथमं लिखेत्।
न्यूनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत्"
पत्रकं काष्ठादिपट्टकम्। कात्यायनः।
"पूर्व्वपक्षं स्वभाषोक्तं प्राड्विवाकोऽथ लेखयेत्।
पाक्षुलेखेन पत्रके ततः पत्रेऽभिलेखयेत्॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम्।
उत्तरेणावरुद्धस्य निहृतं शोधनं भवेत्॥
अन्यदुक्तं लिखेद्योऽन्यदर्थिप्रत्यर्थिनां वचः।
चौरवच्छासयेत्तन्तु धार्म्मिकः पृथिवीपतिः॥"
स्वभाषोक्तमसम्भिन्नम्। एतच्च स्वरविशेषादिना तुल्येयम्। अतएव याज्ञवल्क्यः।
"छलं निरस्य भूतेन अवहारान्नयेन्नृपः।
भूतमप्यनृतन्यक्कं क्षीयते अवहारतः॥"
भूतं तत्त्वार्थसम्बन्धम्। नारदः।
"भूतं तत्त्वार्थसम्बन्धं प्रमादाभिहितं छलम्।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता॥
मनुष्यचित्तवैचित्र्यात् परीक्ष्या साधसाधु वा।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति॥
पशुस्त्रीभूम्यलाभादौ ज्ञास्योऽप्यर्थान्न क्षीयते॥"
सर्व्वेष्वर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति। अथोदाहरणं पशुस्त्रीत्यादि। अर्थविवादमङ्गीकृत्यनृतविवादेषु प्रमादाभिधाने प्रकृतार्थादन्यार्थोद्धोषित इति गम्यते। यथाहमनेन शिरसि घातेन ताडितः इत्यभिधाय केवलं छलेन ताडितः इति वदन्न केवलं दण्ड्यः पराजीयते च। ततश्च त्वं मद्भृत्यं घातयसि मम ऋणदानेन गृहीतस्तावद्धनकालादिति भाषाशरीरम्। एतच्च संस्कृतदेश्यभाषान्यतरेण यथाशोधं वक्तव्यं लेख्यं वा। लक्षणाभावेऽपि वादिप्रतिवादिसाहसार्थत्वात्। अतएवाभावनेऽपि तथोक्तं विष्णुधर्म्मोत्तरे।

भाषा

"संस्कृतैः प्राकृतैर्वाक्यैः शिष्टसङ्कल्पनः।
देशभाषानुपायेन बोधयेत् स गुरुः स्मृतः॥
इति अवहारतत्त्वम्॥
भाषापरिच्छेदः, पुं, विश्वनाथन्यायपञ्चाननभट्टाचार्य्यविरचितन्यायपरिभाषात्मकग्रन्थः। अस्य आद्यश्लोकः।
"नूतनवलक्षधरकक्षये गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहौदधेश्च नौकाय॥"
तस्यायमन्यश्लोकः।
"सोऽयं क इति बुद्धिस्थ आत्मावलम्बते।
तदेवौपधमित्यादौ सजातीयेऽपि दर्शनात्॥"
अस्य टीका सिद्धान्तमुक्तावली॥
भाषापादः, पुं, (भाषायाः पादः।) चतुर्व्याहृतावहारान्तर्गतप्रथमपादः। तस्य लक्षणं यथा,—
"अर्थवद्धर्म्मसंयुक्तं परिपूर्णमनाकुलम्।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥
प्रसिद्धमविरुद्धञ्च निश्चितं साधनक्षमम्।
संक्षिप्तं निखिलार्थञ्च देशकालाविरोधि च॥
वर्षर्तुमासपक्षाहोवेलादेशप्रवेशवत्।
स्थानावसथसाध्यान्याजात्याकारवयोयुतम्॥
साध्यप्रमाणसंख्यावदालम्बप्रत्यर्थिनाम च।
परात्मपूर्व्वजानेकराजनामभिरङ्कितम्॥
क्षमालिङ्गालपौरुषवत्कथिताक्षर्णोदायकम्।
यदावेदयते राज्ञे तद्भाषेत्यभिधीयते॥"
इति मिताक्षरायां अवहाराध्यायः॥
अस्य विवरणं भाषाशब्दे द्रष्टव्यम्॥
भाषितं, क्ली, (भाष्यते इति। भाष्+भावे क्तः।) वचनम्। इत्यमरः।१।६।१॥(यथा, मनौ।८।२३।
"आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥"
भाष्यते स्मेति। भाष्+कर्म्मणि क्तः।) कथिते त्रि॥ (यथा, कामन्दकीये नीतिसारे।५।२७।
"प्रविश्य सानुरागस्य चित्तं चित्तज्ञचक्षुषः।
समर्थयंश्च तत्पक्षं साधु भाषेत भाषितः॥")
भाष्यं, क्ली, (भाष्यते विस्तृततया वर्ण्यते इति। भाष्+ण्यत्।) चूर्णिः। इति व्याकरणम्॥ (भाष्यविवरणग्रन्थः। तस्य लक्षणम्।
"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥"
इति लिङ्गादिसंग्रहटीकायां भरतः॥ सूत्रोक्तार्थप्रपञ्चकम्। इति हेमचन्द्रः॥ (भाष्यते अर्च्यते। ण्यत्।) ग्रहविशेषः। इति माधवीये मधुरेशः॥ (भाष्+ण्यत्।) व्याकरणे त्रि॥
भाष्यकारः, पुं, (भाष्यं चूर्णिं करोतीति। भाष्+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) महाभाष्यकर्त्ता मुनिः। तत्पर्य्यायः। गोनर्दीयः २ पतञ्जलिः ३ चूर्णिकृत् ४। इति त्रिकाण्डशेषः॥
"अक्षपञ्च भाष्यकारञ्च कुमाराभ्यौयधियाप्रभौ।
नैव ग्रहीतुमुधीः पारं किमन्ये जडबुद्धयः॥
इति दुर्गासिंहः॥
भास ञ क ङ भाषि। दीप्तौ। इति कविकल्पद्रुमः॥ (भा०-आस०-अक०-सेट्।) ञ

अवीभवत् अवभासत्। न भासते। इति दुर्गादासः॥

भास्, स्त्री, (भासते इति। भास+"भासभास-विद्युतोर्जिपृजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) प्रभा। अस्य ग्रन्थस्य प्रथमान्त-रूपं भाः। इत्यमरः। १। ४। ३४॥ मयूखः। इति मेदिनी। से, ७॥ इच्छा। इति धरणिः॥

भास्, पुं, (भासते इति। भास+भावे क्विप्।) दीप्तिः। (यथा, महाभारते। ८। ५८। ३१।

"चक्रवत्चक्रभासेव वरुणेचाक्षकुण्डले।")

(भासते गावोऽत्र। भास+आधारे क्विप्।) गोष्ठम्। (भासते दीप्यते इति। भास्+कर्मणि क्विप्।) कुक्कुटः। सूर्यः। इति विश्वः। खगाम-खातपक्षिविशेषः। तत्पर्य्यायः। ग्रामकुक्कुटः २। इति हेमचन्द्रः॥ (यथा, महाभारते। १। १३४। ७०।

"क्षत्रियं भासमारोप्य दण्डाग्रे शिखिभिः कृतम्। अभिज्ञातं कुमारार्थं जलभूतमुपादिशत्॥"

पर्व्वतभेदः। यथा, महाभारते।१४।१६।३४॥

"हिमवान् पारियात्रश्च सह्यो विन्ध्यस्त्रिकूट-वान्।

श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्व्वतः॥")

(स्त्रियां ङीप्। भासायाः कन्या। यथा, महा-भारते। १। ६५। ३६।

"अनवद्यां मनुं वंशासुरां मार्गवप्रियाम्। अनूपां सुभगां भासीमिति प्राधा व्यजायत॥")

भास्, [त्] क्लीं, (भास्+क्विप्।) दीप्तिः। इति द्विरूपकोषः॥

भासन्तः, पुं, (भासते इति। भास्+तृभूवहि-वसिभासीति।" उणा० ३।१२८। इति झच्।) सूर्य्यः। चक्रः। इत्युणादिकोषः॥ भासपक्षी॥ इति मेदिनी। ते, १३६॥ नक्षत्रम्। इति हेमचन्द्रः॥

भासन्तः, त्रि, (भासते इति। भास+झच्।) सुन्दराकारः। इति मेदिनी। ते, १३६॥

भासन्ती, स्त्री, (भासन्त। गौरादित्वात् ङीष्।) नक्षत्रम्। इत्युणादिकोषः॥

भासुः, पुं, (भास्+बाहुलकादुः।) सूर्य्यः। इति त्रिकाण्डशेषः॥

भासुरं, क्लीं, (भासते इति। भास्+"भञ्जभास-मिदो घुरच्।" ३। २। १६१। इति घुरच्।) कुटीवधम्। इति जटाधरः॥

भासुरः, पुं, (भास+घुरच्।) स्फटिकः। इति त्रिकाण्डशेषः॥ वीरः। इति धरणिः। कर्म्मणि घुरप्रत्ययनिष्पन्नत्वेन दीप्तियुक्ते, त्रि॥ (यथा, किरातार्জ্জुनीये। ५। ५।

"मणिमयूखचयाञ्जनभासुराः
सुरवधूपरिभुक्तलतागृहाः॥")

भासुरपुष्पा, स्त्री, (भासुराणि पुष्पाण्यस्याः। टाप्।) हस्तिकाली। इति राजनिर्घण्टः॥

भास्वरं, क्लीं, (भाः करोतीति। अच्+"दिवा-विभानिशाप्रभा भास्वरानानन्दादीति।" ३।२। २१। इति टः।) सुवर्णम्। इति राजनिर्घण्टः॥

भास्करः, पुं, (भाः करोतीति। अच्+"दिवा-विभेति।३।२।२१। इति टः।) सूर्य्यः। (यथा, मनौ। २। ४८।

"प्रतिमृज्ञेक्षितं दक्षमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेदभ्यर्चनं यथाविधि॥")

अग्निः। इति मेदिनी। रे, १६१॥ वीरः। इति धरणिः॥ अर्कवृक्षः। इति राजनिर्घण्टः॥ भास्कराचार्य्यः। स च सिद्धान्तशिरोमण्यादि-ज्योतिर्ग्रन्थकर्त्ता॥

भास्करप्रियः, पुं, (भास्करस्य प्रियः।) पद्मराग-मणिः। इति केचित्। चुन्नि इति भाषा॥

भास्करेष्टा, स्त्री, (भास्करस्य इष्टा।) आदित्य-भक्ता। इति राजनिर्घण्टः॥

भास्वरं, क्लीं, (भासते इति। भास्+"स्फेग्र भासघिसकसो वरच्। ३। २। १७५। इति वरच्।) कुष्ठौषधम्। इति शब्दचन्द्रिका॥

भास्करः, पुं, (भासते इति। भास्+"स्फेग्र भासघिसकसो वरच्।३।२।१७५। इति वरच्।) दिनम्। इति राजनिर्घण्टः॥ सूर्य्यः। इति केचित्। दीप्तियुक्ते, त्रि। इति मुग्धबोध-व्याकरणम्। (यथा, महाभारते।१।११।११।

"स कौस्तुभं परिव्यज्य रूपं विप्रर्षभस्तदा। स्वं रूपं भास्करं भूयः प्रतिपेदे महाद्युतिः॥"

सूर्य्यस्यानुचरविशेषः। स च भगवता सूर्य्येण तारकासुरवधसहायार्थं स्कन्दाय दत्तः। यथा, महाभारते। ६। ४५। १०।

"सुभ्राजो भास्करश्चैव यौ तौ सूर्य्यानुयायिनौ। तौ सूर्य्यः कार्त्तिकेयाय ददौ प्रीतः प्रतापवान्॥")

भास्वान्, [त्] पुं, (भास्वः सन्त्यस्येति। भास्+"तदस्यास्त्यस्मिन्निति मतुप्।" ५।२।९४। इति मतुप्। मस्य वः।) सूर्य्यः। (यथा, मार्क-ण्डेयपुराणे। १०१। १६।

"यथा चाराधितो देवो लोकदित्यो ददात्यपि च। आरोग्यमर्थसम्पदं तेन देवेन भास्वता॥")

अर्कवृक्षः। इत्यमरः॥ दीप्तिः। इति हेमचन्द्रः॥ वीरः। इति मेदिनी॥ दीप्तिविशिष्टे, त्रि॥ (यथा, कुमारसम्भवे। १। २।

"यं सर्व्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥"

प्रकाशकः। यथा, मनौ। १। ७०।

"वायोरपि विकुर्व्वाणादिरोचिष्णु तमोनुदम्। ज्योतिरुत्पद्यते भास्वत्तद्रूपगुणसुच्यते।"

"भास्वत् प्रकाशकम्।" इति तट्टीकायां कुल्लूक-भट्टः॥)

भिक्ष, ङ लाभार्थलोभोक्तिक्षिप्तौ। इति कवि-कल्पद्रुमः॥ (भ्वा०-आत्म०-याचने द्विक०-लाभे लोभोक्तौ च सक०-क्षिप्तौ अक०-सेट्।) अर्थी याचनम्। लोभादुक्तिर्लोभोक्तिः। ङ, भिक्षते भूमिं कृषाणः पक्षिणः। लभत इत्यर्थः। भिक्षते दातारं धनं भिक्षुः। याचत इत्यर्थः। भिक्षते

दातारं दीनः। लोभादुक्तीत्यर्थः। भिक्षते जनः। क्षिप्तवतीत्यर्थः। इति दुर्गादासः॥

भिक्षा, स्त्री, (भिक्ष याचनादौ+"सुरोच इलः।" ३। ३। १०२। इति अः। ततष्टाप्।) लोभ-याचनम्। याच्ञेति भाषा इति च भाषा। तत्पर्य्यायः। याच्ञा २ अर्थना ३ अर्हणा ४। इत्यमरः। ३। २। ४॥ प्रार्थनम् ५ याचना ६। इति शब्दरत्नावली॥ (तदुक्तम्। "वाणिज्ये वसते लक्ष्मीस्तदर्द्धं कृषिकर्म्मणि। तदर्द्धं राजसेवायां भिक्षायां नैव नैव च॥")

सेवा। भृतिः। इति नानार्थे अमरः॥ भिक्षितवस्तु। इति मेदिनी॥ (या च याच-ञ्चमाना। यावन्माता भवेद्भिक्षेति ज्ञातात्तप-त्यचनात्॥ यथा, मनुः। ३। ६७।

"ज्ञात्वैतद्दलिकर्म्मैवमतिथिं पूर्व्वमाद्रयेत्। भिक्षाञ्च भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे॥")

उपनीतस्य भिक्षाविधिर्यथा,—

"भिक्षामाहृत्य गुरवे यतीभ्यः प्रयतो-ऽन्वहम्।

निवेद्य गुरवेऽश्नीयादाहृत्यावसथादनुज्ञया॥ भवत्पूर्व्वचरेद्भैक्षमुपनीतो द्विजोत्तमः। भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥ मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत्॥ सवासीयश्चैवमेव सार्व्ववर्णिकमेव वा। भैक्षमाचरणं प्रोक्तं पतितादिविवर्जितम्॥ वैदयबन्धुरहीनानां प्रशस्तानां स्वकर्म्मसु। ब्रह्मचार्य्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥ गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्जयेत्॥ सर्व्वहारि चरेदृभैक्षं पूर्व्वं क्लानामसम्भवे। नियम्य प्रयतो वाचं दिशश्चानवलोकयन्॥ समाहृत्य तु तद्भैक्षं यावदर्थममायया। सुञ्जीत प्रयतो नित्यं वाग्यतोऽन्यमानसः॥ भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती। भैक्षेण व्रतिनो हृत्तिरुपवाससमा स्मृता॥"

इति कूर्म्मपुराणे उपविभागे १२ अध्यायः॥७॥

सायं प्रातर्भिक्षाटनाभावो यथा,—

"कारयित्वा तु कर्म्माणि ज्ञातिभ्यश्चान्नमाहरेत्। सायं प्रातर्गृहाद्वारान् भिक्षार्थं नावचक्षयेत्॥"

इति तत्रैव १५ अध्यायः॥ ७॥

सा त्रिविधा यथा,—

"ब्रह्मचारिमथार्य्यं वा भिक्षां वा भिक्षितो द्विजः। दद्यादतिथये नित्यं वृद्धेभ्यं परमेश्वरम्॥ भिक्षामाहृत्य सायञ्च भक्त्या ब्राह्मणसत्तमम्। पुष्कलं ब्रह्मचारिणं तथा तृप्तमनुव्रजेत्॥ गोदोहमात्रं कालं वै प्रतीक्षेदतिथिः स्वयम्। अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा॥ भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे। दद्यादन्नं यथाशक्ति स्वर्थिभ्यो लोभवर्जितः॥ सर्व्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत्॥"

इति तत्रैव १७ अध्यायः॥

भिक्षुः

भिक्षाकः, पुं, (भिक्षते इति । भिक्ष + "अच-भिक्षकटवृञ्गृहः वाकन् ।" ३ । २ । १५५ । इति वाकन् ।) भिक्षुकः । इति सिद्धान्तकौमुदी ।

भिक्षाकी, स्त्री, (भिक्षाक + स्त्रियां ङीष् ।) भिक्षुकी । इति शब्दबोधशब्दरत्नम् ॥

भिक्षाचरः, पुं.स्त्री, (भिक्षां चरतीति । भिक्षा + चर + "भिक्षासेनादायेषु च ।" ३ । २ । १ । ७ । इति टः ।) भिक्षुकः । इति सिद्धान्तकौमुदी ॥ (जमदग्नेर्ऋषेः पुत्रः । यथा, राजतरङ्गिण्याम् । ८ । १७ ।

"राज्ञां विभवमानां यं भोगो दर्पकृपालकः ।
जातं जमदग्निपुत्राणामन्तरं गुरुभिः सितुम् ।
आहुश्चामैकमाचष्टाभक्षभिक्षाचराभिधम् ॥")

भिक्षाटनं, क्ली, (भिक्षार्थमटनं गमनम् ।) भिक्षार्थेगमनम् । यथा,—

"अर्द्धं रामवधैरिक्षा गिरिजायार्द्धं हरस्याहृतं
हैतेयं जगतीतले जरदरीभावः वसुन्धीजति ।
ब्रह्मा वारिधिमम्बरं शशिकला नागाधिपः
क्ष्मातलं
सर्व्वस्वमधीश्वरस्यमगमत् त्वां माद्य भिक्षा-
टनम् ॥"

इत्युद्भटः ॥

भिक्षाग्निलं, क्ली, (भिक्षाग्निनो भिक्षुकस्य भावः । भिक्षाग्निन् + त्व ।) मैथुनम् । इति हारावली ॥

भिक्षाशी, [न्] त्रि, (भिक्षां अत्तीति । अद्य + णिनिः ।) भिक्षुकः । इत्युणादिकोषः ॥ यथा,—

"भिक्षाशी विचरेद्ग्रामं वर्ज्येयेदि न जीवति ॥"

इति प्रायश्चित्तविवेकः ॥

भिक्षुः, पुं, (भिक्षणशीलः । भिक्ष याचने + "सनाशंसभिक्ष उः ।" ३ । २ । १६८ । इति उः ।) ब्रह्मचर्य्याश्रमचतुर्थ्यान्तर्गतचतुर्थाश्रमी । आश्रमशब्दोऽयं धर्म्मेपरो धर्म्मपरश्च । इति भरतः ॥ तत्पर्य्यायः । परिव्राट् २ कर्म्मन्दी ३ पाराशरी ४ मस्करी ५ इत्यमरः । ३ । ७ । ४२ ॥ परिव्राजकः ६ पराशरी ७ व्रजकः ८ । इति शब्दरत्नावली ॥ तस्य धर्म्मो यथा,—

"भिक्षोर्धर्म्मं प्रवक्ष्यामि तन्निबोधत सत्तमाः ।
यमाद्यैरयुक्तात्मा ज्ञानेदिं सर्व्वदैवहि चिन्तयेत् ॥
प्राणायामैस्त्रिभिर्म्मन्ते तु अग्निमारोप्य चात्मनि ।
सर्व्वभूतहितः शान्तश्चिदक्षी सकमण्डलुः ॥
सर्व्वारम्भं परित्यज्य भिक्षार्थी ग्राममाश्रयेत् ।
अप्रमत्तश्चरेद्भैक्षं यावान्ने नातिलक्षितः ॥
रहिते भिक्षुकैर्व्याप्ते यावामावसलोलुपः ।
भवेत् परमहंसो वा एकदण्डी यमादिकृत् ॥
विद्वद्योगस्त्यजन् देहमक्षतत्वमिहाप्नुयात् ।
योगभ्रष्टस्तु मिलभुक् परां सिद्धिमवाप्नुयात् ॥
ब्राह्मणातिथिप्रियो ज्ञानी यदी भावेऽपि मुच्यते ।"

इति मार्कण्डे २०३ अध्यायः ॥ * ॥

अपि च ।

"चतुर्थश्चाश्रमो भिक्षोः प्रोच्यते यो मनी-
षिभिः ।
तस्य लक्षणं ब्रह्मतो मम श्रोतुं कृपार्हसि ॥
पुत्रमध्यगतश्चेदु ब्रह्मलोको नराधिप ! ।
चतुर्थमाश्रमस्थानं गच्छेन्निर्द्वृतमत्सरः ॥
नैवर्णिकांश्चयेत् सर्व्वानारम्भानवनीपते ! ।
भिक्षादिह समो मैत्रः समलोष्टेव जन्तुषु ॥
अराग्नुजाक्षजादीनां वाङ्मनःकर्म्मभिः क्वचित् ।
युक्तः कुर्व्वीत न द्रोहं सर्व्वसङ्गांश्च वर्जयेत् ॥
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे ।
तथा तिक्तेष्वयथा प्रीतिर्द्वेषो वा नास्य जायते ॥
प्राणयात्रानिमित्तञ्च व्यवहारे मुक्तबन्धने ।
काले प्राप्तस्त्वर्त्तानां भिक्षार्थे पर्य्यटेद् गृहान् ॥
कामः क्रोधस्तथा दर्पमोहलोभादयश्च ये ।
तांस्तु दोषान् परिज्ञाय परिव्राड्निर्म्मलो भवेत् ॥
अभयं सर्व्वसत्त्वेभ्यो दत्वा यश्चरते मुनिः ।
न तस्य सर्व्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥

ज्ञात्वाग्निहोत्रं स्वशरीरसंस्थं
द्वारीरमग्निञ्च मुखे जुहोति ।
विप्रस्तु भैक्षोपगतैर्हविर्भि-
स्त्रिभाग्निना स व्रजति स्व लोकान् ॥
मोक्षाश्रमं यश्चरते यथोक्तं
शुचिः सुसङ्गुप्तमनुद्विजुक्तः ।
अनिन्दनं ज्योतिरिव प्रशान्तं
स ब्रह्मलोकं श्रयति द्विजातिः ॥"

इति विष्णुपुराणे ३ अंशे ६ अध्यायः ॥ * ॥

बुद्धभेदः । इति जटाधरः । आवश्यौषधः । इति राजनिर्घण्टः । कोकिलाण्डः । इति भावप्रकाशः ॥

भिक्षुकः, पुं, स्त्री, (भिक्षुरेव । भिक्षु + स्वार्थे कन् । यद्वा, भिक्षते इति । भिक्ष + उक ।) भिक्षोपजीवी । तत्पर्य्यायः । मार्गणः २ याचकः ३ वनीयकः ४ याचकः ५ । इति जटाधरः ॥ अर्थी ६ । इत्यमरः ॥ (यथा, मनुः । ३ । २४३ ।

"ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् ।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् ॥"

पारिभाषिकभिक्षुका यथा, अत्रिः ।

"ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥")

भिक्षुसंघाटी, स्त्री. (भिक्षुं संघटते इति । भिक्षु + सम् + घट + अच् । गौरादित्वात् ङीष् ।) चीवरम् । इति हेमचन्द्रः ॥ यथा, सुश्रुते उत्तरतन्त्रे ३३ अध्याये ।

"पुरीषं कौक्षटं कृत्वा चर्म्मभर्त्वचमन्तथा ।
क्षौमञ्च भिक्षुसंघाटीं धूपनायोपकल्पयेत् ॥")

भिक्षः, पुं. (भक्ष्यते इति । भक्ष + कः । पृषोदरादित्वात् साधुः ।) भिक्षाशुपः । इति राजनिर्घण्टः ॥

भिक्षकः, (भिक्ष । स्वार्थे कन् ।) भिक्षाशुपः । इति राजनिर्घण्टः ॥

भिक्षा, स्त्री, (भिक्ष + अजादित्वात् टाप् ।) सुपविशेषः । भिक्षी इति ख्याता । तत्पर्य्यायः । भिक्षौतकः २ भिक्षः ३ भिक्षकः ४ सैव-

भिक्षा

शलभः ५ चतुष्पदः ६ चतुःपुष्पः ७ सुपाकः ८ अक्षपक्वकः ९ वरपर्णः १० हरबीजः ११ । अस्या गुणाः । अक्षरसत्वम् । ज्ञानत्वम् । ग्राहित्वम् । रुचिकरत्वञ्च । इति राजनिर्घण्टः ॥

भिक्षौतकः, पुं, (भिक्षौ सतौ तकति शब्दयतीति । तक + अच् ।) भिक्षाहृत्यः । इति राजनिर्घण्टः ॥

भित्तं, क्ली, (भिद्यते स्मेति । भिद् + क्तः । "भित्तं शुक्लम् ।" ८ । २ । ५९ । इति सिद्धान्तकारस्य नलाभावो निपात्यते ।) खड्गम् । इत्यमरः । १ । ६ । १६ ॥

भित्तिः, स्त्री, (भिद्यते इति । भिद् + क्तिन् ।) यद्वादेर्मृत्पिण्डादिमयी इतिः । काँच इति भित् इति च ख्याता । तत्पर्य्यायः । कुड्यम् २ । इत्यमरः । २ । २ । ४ ॥ भित्तिका ३ कुड्यम् ४ कुड्यकम् ५ । इति शब्दरत्नावली ॥ (यथा, विश्वकर्म्मप्रकाशे । पञ्चमाध्याये ।

"मानेनानेन विस्तारो भित्तीनाम्तु विधीयते ।
यादे पञ्चगुणं ज्ञात्वा भित्तीनामुच्छ्रयो भवेत् ॥")

प्रभेदः । सन्धिभागः । अवकाशः । इति विश्वः । प्रदेशः । इति शब्दरत्नावली ॥ (यथा, रघौ । ५ । ४९ ।

"अधोपरिष्टाद् भ्रमरैर्भ्रमद्भिः
प्राक् सूचिताम्भःसलिलप्रवेशः ।
निर्धौतदानामलगण्डभित्तिः
वैन्यः सरित्तो गज उज्जमज्ज ॥")

भित्तिका, स्त्री, (भिद्यते भिनत्ति वेति । भिदिर विदारणे + "ज्ञातिभिदिजनिभ्यः क्तिन्,, उणा० ३ । १४७ । इति तिकन् । क्तिन् स्यात् ।) कुड्यम् । इति शब्दरत्नावली ॥ पक्षी । इति हेमचन्द्रः ॥

भित्तिचौरः, पुं, (चोरयतीति । चुर + अच् । चौर एव स्वार्थे अण् । चौरः । भित्तया कुड्यादिभेदेन चौरः ।) चौरविशेषः । खिँदाल चोर इति भाषा । तत्पर्य्यायः । खानिनः २ कूटच्छिद् ३ । इति शब्दरत्नावली ॥

भित्तिपातनः, पुं, (पातयतीति । पत + णिच् । कर्म्मणि ल्युः । भित्तीनां पातनः ।) महाजलवकः । इति राजनिर्घण्टः ॥

भिद्, [द्] स्त्री, (भिद्यते इति । भिद् + "सर्व्वधातुभ्यः कुरच्छयुजविदभिदेति ।" ३ । २ । ६१ । इति क्विप् ।) प्रभेदः । इति जटाधरः ॥ (भिनत्तीति । भिद् + तच्छीलादिषु "अन्यतोऽपि दृश्यते ।" इति क्विप् ।) भेदकर्म्मणि त्रि ॥ (यथा, ऋग्वेदे । ७ । १०४ । ८ ।

"भिनत्पुरो न भिदो अदेवीर्न नमो वधरदेवस्य पीयोः ॥")

भिद दर् औ न ध भिदि । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) भित् क्रियदवयवविदारणम् । न ध भिनत्ति भिन्ते कूलं नदी । ऋौ मेना । दर् अभिदत् अभैत्सीत् । इति दुर्गादासः ॥

भिदकं, क्ली, (भिनत्तीति । भिद् + "बहुलमन्यापि ।" उणा० २।३७। इति कुन् ।) वज्रम् । खड्गे, पुं । इत्युणादिकोषः ॥

भिदा, स्त्री, (भेदनमिति भिद् + "विदभिदादिभ्योऽङ् ।" ३।३ ।१०४। इति । अङ् । टाप् ।) वज्रादेर्विदारणम् । चेरा इति भाषा । तत्पर्य्यायः । विदरः २ स्फुटनम् ३ । इत्यमरः । २।२।५॥ अन्याकम् । इति शब्दचन्द्रिका ॥ भेदः । यथा । प्रायश्चित्तस्य पूर्व्वार्द्धलक्षणं वाक्यभिदा तथा । इति प्रायश्चित्ततत्त्वम् ॥

भिदिः, पुं, (भिनत्तीति । भिद् + "कृमृदृरुहिभिदिच्छिदिभ्यश्च ।" उणा०४। १४२ । इति इः । स च कित् ।) वज्रम् । इति हेमचन्द्रः ॥

भिदिरं, क्ली, (भिनत्ति विदारयतीति । भिद् + "इषिमदिसुदिक्षिदिच्छिदिभिदिमन्दीति ।" उणा० १ । ५२ । इति किरच् ।) वज्रम् । इत्यमरटीकायां भरतः विकाण्डशेषश्च ॥

भिदुः, पुं, (भिनत्ति विदारयतीति । भिद् + "तृभिदिघिशीङ्भ्यः ।" उणा० १ । २४ । इति कुः ।) वज्रम् । इति त्रिकाण्डशेषः ॥

भिदुरं, क्ली, (भिनत्तीति । भिद् + "विदिभिदिच्छिदेः कुरच् ।" ३। २ ।१६२। इति । कुरच् ।) वज्रम् । इत्यमरः । २ । १ । ५० ॥ अन्यतरे पुं । इति राजनिर्घण्टः ॥

भिद्यः, पुं, (भिनत्ति कूलमिति । भिद् + "सिद्भी हृौ नदे ।" ३ । १ । ११५ । इति क्यप् । निपातितश्च ।) नदः । इति हेमचन्द्रः ॥ सुग्धबोधव्याकरणञ्च ॥ (यथा, भट्टौ । ६ । ५६ ।
"सहस्रशस्तावयवौ यदान् भिद्योद्यसन्निभान् ।
विध्यतारामिव ख्यातां ग्रवरीमापतुर्वने ॥")

भिन्नः, पुं, क्ली, (भिनत्तीति । भिद् "स्फायितञ्चि वञ्चिप्रकिञ्चिवञ्चिलुञ्चिपिलपीति ॥" उणा० ३ । १३ । इति रक् ।) वज्रम् । इति त्रिकाण्डशेषः उणादिकोषश्च ॥

भिन्दिपालः, पुं, (भिदि + इन् । भिन्दिं विदारणं पालयतीति पालि + अण् ।) ह्रस्वप्रमाणकाण्डः । बालिकाख्यमिति ख्यातम् । इति भरतः ॥ ह्रस्वशैप्यलगुडः । इति स्वामी ॥ तत्पर्य्यायः । क्षेपणः २ । इत्यमरः । २ । ८ ।८१॥ (यथा, वैद्यशास्त्रसंहितायाम् । ३ ।
"भिन्दिपालस्तु वक्राग्रो नलाग्रोर्ध्वो दृढच्छिरः ।
ह्रस्वमात्रोत्सेधयुक्तः करक्षेपितमण्डलः ॥"
भिन्दिवालः भिन्दिवाणश्चापि द्वयोरेव पाठद्वयं दृश्यते ।)

भिन्नः, त्रि, (भिद्यते स्मेति । भिद् + क्तः ।) भेदविशिष्टः । भाङ्गा इति भाषा । तत्पर्य्यायः । दारितः २ । भेदितः ३ । इत्यमरः । ३।१।१००॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । भविष्यपर्व्वणि । ५३ । १६ ।
"आत्मतुल्यात्मजाविष्टं प्रविष्टं बहुभिः कृतम् ।
आकारं विकटं भिन्नं निर्मर्यादमसाधुकम् ॥")

भिन्नकः, पुं, (भिन्न + संज्ञायां कन् ।) बौद्धः । यथा,
"भिन्नकः क्षपणोऽर्हन्को बौद्धो वैनायिकः स्मृतः ॥"
इति त्रिकाण्डशेषः ॥
(भिन्न + "अनत्यन्तगतौ क्तात् ।" ५ । ४ । ४ । इति कन् । ईषद् भिन्ने, त्रि ।)

भिन्नगात्रिका, स्त्री, (भिन्नं गात्रमस्याः । कप् । टाप् । अत इत्वम् ।) कर्कटी । इति शब्दचन्द्रिका ॥

भिन्नभिन्नात्मा, [न्] पुं, (भिन्नभिन्नो भेदयुक्त आत्मा यस्य ।) चणकः । इति शब्दचन्द्रिका ॥

भिन्नयोनी, स्त्री, (भिन्नं योनयतीति । युज् + क्विप् + ङिः । ङीप् ।) पाषाणभेदकवृक्षः । इति भावप्रकाशः ॥

भिन्नार्थकः, त्रि, (भिन्नोऽर्थो यस्य । कप् ।) अन्यः । इत्यमरः । ३ । १ । ८२ ॥

भिया, स्त्री, (भीयते इति । भी + "सिद्भिदादिभ्योऽङ् ।" ३। ३ । १०४ । इति अङ् । इयङ् । टाप् ।) भयम् । इति हेमचन्द्रः । २ । ३०१ ॥

भिरिण्टिका, स्त्री, श्वेतसुद्रा । इति राजनिर्घण्टः ॥

भिल्ल, पुं, (भेलयति भिलतीति वा । भिल् + बाहुलकात् । अच् ।) म्लेच्छजातिविशेषः । भील इति भाषा । यथा, हेमचन्द्रे ।
"भाला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छजातयः ॥"
अपि च ।
"रजकश्चर्म्मकारश्च नटो बरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ॥"
इति प्रायश्चित्ततत्त्वम् ॥
स च ब्राह्मणकन्यायां तीवराज्जातः । यथा,—
"पुलिन्दमेदभिल्लाश्च पुल्लो मल्लश्च धावकः ।
कुन्दकारो बोक्कलो वा क्षत्तो वल्लिमल्लया ।
इति वै तीवराज्जाताः कन्यायां ब्राह्मणस्य च ॥"
इति पराशरसंहितिः ॥

भिल्लगवी, स्त्री, (भिल्लानां गवी ।) गवयी । इति राजनिर्घण्टः ॥

भिल्लतरुः, पुं, (भिल्लप्रियत्वात् । भोजपुष्पेऽपि भिल्लादयोऽलङ्कुर्व्वन्तीति प्रसिद्धेरस्य तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिल्ली, स्त्री, (भिल्ल + ङीप् । भिल्लानां प्रियत्वादस्यास्तथात्वम् ।) लोध्रः । इति राजनिर्घण्टः ॥

भिष्, दग्जये । चौरभ्वादुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) भिषक् भेषजं भेषति । इति दुर्गादासः ॥

भिषक्, [ज्] बिभेति रोगो यस्मादिति । भी + औषाम् + "भियः षुक् वुगन्तश्च ।" उणा० १ । १०७ । इति अधिः षुगागमो वुगन्तश्च ।) वैद्यः । इत्यमरः । २ । ६ । ५७ ॥ (अस्य प्राशस्त्यादिकं यथा,—
"भिषगनुभूयमतिमान् अतः स्वगृहमध्यपि ।
परं प्रयत्नमातिष्ठेत् प्राणदः स्याद् यथा नृणाम् ॥
तदेव युक्तं भैषज्यं यदारोग्याय कल्पते ।
स च त्रेव भिषजां श्रेष्ठो रोगेभ्यो यः प्रमोचयेत् ॥
सम्यक् प्रयोगं सर्व्वेषां सिद्धिराख्यातिकर्म्मणाम् ॥
सिद्धिराख्यातिसञ्चैव गुणैर्युक्तं भिषक्तमम् ॥"
इति चरके सूत्रस्थाने प्रथमेऽध्याये ॥
"एतदध्ययनमधीयमधीत्य च कर्म्माण्यवहितस्तु पासितशस्त्रभयो हि भिषग्याजार्हो भवति ॥"
यस्तु केवलशास्त्रज्ञः कर्म्मसूपरिनिष्ठितः ।
स मुह्यत्यातुरम्प्राप्य प्राप्य नौरिवाम्बुधिम् ॥
यस्तु कर्म्मसु निष्णातो बाह्यां शास्त्रावधिं श्रुतः ।
स सत्सु पूजां नाप्नोति वधमार्च्छति राजतः ॥
उभावेतावनिपुणावसमर्थौ खकर्म्मणि ।
अर्द्धवैद्यधराधेतावेकपक्षाविव द्विजौ ॥
ओषधीरुद्धतकक्षास्तु शस्त्राग्निविविधोपमाः ।
भवन्त्यशेषपशुतालक्षादीनां विवर्जनेन ॥
हेत्वादिष्वनभिज्ञो यः क्षेत्रादिषु च कर्म्मसु ।
स विज्ञेयो जगं लोभात् कुर्व्वेद्यो नृपदोषतः ॥
यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने ।
आदर्शे कर्म्मणिर्योढुं छिन्नाग्रः स्वन्दनो यथा ॥"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दक्षनीयभिषक् यथा,—
"अज्ञातौषधिमज्ञस्तु यश्च वाधीरतत्त्ववित्।
रोगिभ्योऽर्थं समादत्ते स दक्षश्चौरवद्भिषक्॥"
इति ज्योतिस्तत्त्वम्॥
तस्याज्ञस्याभोज्यानं यथा,—
"मूढान्नं वाडवो सुक्ता तथा दुश्चरितादिनः।
चिकित्सकस्य क्रूरस्य तथा स्त्रीन्द्रगजीविनाम्।
गौल्किकान्नं कुतिकान्नं सुक्ता मासं व्रती भवेत्॥"
व्रती यावकेन। तत्र वैद्यहृदयम्। इति प्रायश्चित्तविवेकः॥ अपि च।
"पूयविण्मिश्रितक्लान्नं पुंश्चल्याश्चान्नमिन्द्रियम्।
विष्ठा वार्द्धुषिकस्यान्नं मूत्रविक्रयिणो मलम्॥"
इति मानवे ४ अध्यायः॥
(धृतधन्वनः वैद्यजः पुत्रः। यथा, हरिवंशे। १८। ६।
"धृतवर्म्मणि चक्षेत्रां धृतधन्वा तु मध्यमः।
वैद्यवंश्यत्वात् तस्य भिषग्वेतरजश्च यः॥"
औषधम्। यथा, ऋग्वेदे। १। २४। ६।
"घृतं ते राजन् भिषजः सहस्रसुत्वो
गभीरा सुमतिष्टे अस्तु॥"
"हे राजन्! वरुण! ते तव घृतं भिषजः सहस्रं बन्धनिवारकाणि घृतसंयुक्तानि औषधानि वैद्या वा सन्ति॥" इति तद्भाष्ये सायणः॥)
भिषक्प्रिया, स्त्री, (भिषजः प्रिया।) गुडूची। इति राजनिर्घण्टः॥
(विवृतिरस्या गुडूचीशब्दे ज्ञातव्या॥)
भिषग्जितं, क्ली, (भिषजा जितम्।) औषधम्। इति चिकित्साशेषः॥ (चिकित्सा॥ यथास्य पर्य्यायः।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
इति वैद्यकरत्नमालायाम्॥)
भिषग्भद्रा, स्त्री, (भिषजि औषधे वैद्ये वा भद्रा शुभदायिका।) भद्रदन्तिका। इति राजनिर्घण्टः॥
भिषङ्माता, [ऋ] स्त्री, (भिषजां मातेव।) वासकः। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायः।
"वासको वाजिका वासा भिषङ्माता च सिंहिका।
सिंहास्यो वाजिदन्ता स्यादटरूषोऽटरूषकः॥
आटरूषो हयघ्नश्च सिंहपर्णश्च स स्मृतः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
भिषृक्षटा, स्त्री, (भिक्षाभोजं टीकते इति। टीक गतौ+"अन्येभ्योऽपीति डः। ततः पृषोदरादित्वात् साधुः।) दधाभक्तम्। इत्यमरः। २। ९। ४६॥ अस्य रूपान्तरम्। भिक्षिटा। भिक्षिटा। भिक्षिडा। भिक्षिका। इति तट्टीकायां भरतसेनः॥
भिक्षा, स्त्री, (भक्ष्यतेति। भक्ष सौत्रौ+वाहुलकात् सः। छन्दसि दृष्टत्वमितीत्वम्। वाहुलकात् सः।

भिक्षेति भाष्यप्रयोगाज्जोकेऽपि। यद्वा, भेदनमिति भित्। भिद्+क्विप्। भिदं क्षतीति। क्षो+"आतोऽनुपसर्गे कः।" इति कः। पृषोदरादित्वात् साधुः।) अन्नम्। इत्यमरः। २। ९। ४८॥ (अस्याः पर्य्यायो यथा,—
"भक्तमन्नं तथान्नञ्च जक्षितं कूरञ्च कीर्त्तितम्।
ओदनोऽस्त्री स्त्रियां भिक्षादीदिविः पुंसि भाषितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
भिक्षिटा, स्त्री, (भिक्षामन्नं टीकते इति। टीक गतौ+डः। पृषोदरादित्वात् साधुः।) दधान्नम्। इत्यमरटीकासारसुन्दरी॥
भी, ग गि भृत्याच्च। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-अनिट्।) ग, भीगाति। गि, भिगाति। भीग्, भीगिः। गिनेव क्र्यादित्वसिद्धौ गग्रहणं घ्रादित्वविकल्पार्थं चकारात् भीत्याच्च। इति दुर्गादासः॥
भी, भि भि भीत्याम्। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-अक०-अनिट्।) भि, भीतोऽस्ति। भि, बिभेति। इति दुर्गादासः॥
भीः, स्त्री, (भी भीत्याम्+सम्पदादित्वात् क्विप्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, आर्य्यासप्तशत्याम्। ६८७।
"पूर्व्वाधिको यद्विषयाम् बहुमानः प्रेमगर्भविश्वासः।
भीरधिकेयं कथयति रागं बालाविभक्तमिव॥")
भीतं, क्ली, (भी लि भीत्याम्+क्तः।) भयम्। भययुक्ते, त्रि। इति मेदिनी। ते, ४०॥ (यथा, मनुः। ७। ६४।
"यस्तु भीतः परावृत्तः संग्रामे हन्यते परैः।
भर्त्तुर्यद्दुष्कृतं किञ्चित् तत्सर्व्वं प्रतिपद्यते॥")
भीतिः, स्त्री, (भी+क्तिन्।) भयम्। इत्यमरः। १। ७। २१॥ (यथा, मार्कण्डेये। ८४। १६।
"दुर्गे! स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥")
कन्या। इति विश्वः॥
भीमं, त्रि, (बिभेत्यस्मादिति। भी+"भियः क्रुग्वा।" उणा० १। १४७। बिभेतेर्मक् धातोर्वा युगागमश्च। इति मक्।) भयहेतुः। तत्पर्य्यायः। भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भयानकम् ७ भयङ्करम् ८ प्रतिभयम् ९। इत्यमरः। १। ७। २०॥ (यथा, रघुः। १। १६।
"भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः॥")
भीमः, पुं, (बिभेत्यस्मादिति। भी+मक्।) भयानकरसः। यथा,—
"भयानको भयस्यादिभावः कालाधिदैवतः।
स्त्री नीचप्रकृतिः श्यामो मतस्तत्त्वविचारदैः॥"
इत्यमरटीकायां भरतः॥
शिवः। (यथा, मार्कण्डेये। ५२। ७।
"अयं सर्व्वं तथेशानं तथा पशुपतिं प्रभुः।
भीमसत्यं महादेवस्तथाच स पितामहः॥"
विष्णुः। यथा, महाभारते। १३।१४९।५२।
"अतुलः शूरभो भीमः समयज्ञो हविर्हरिः॥")
मध्यमपाण्डवः। (यथा, महाभारते। १। १२३। १३।
"तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः॥"
अस्य विवरणादिकं भीमसेनशब्दे द्रष्टव्यम्॥)
अम्बष्ठजः। इति मेदिनी। मे, २१॥ महादेवस्याष्टमूर्त्तान्तर्गताकाशमूर्त्तिः। यथा। भीमाय आकाशमूर्त्तये नमः। इति तिथ्यादितत्त्वे शिवपूजाप्रयोगः॥ (गन्धर्व्वविशेषः। यथा, महाभारते। १। ६५। ४१।
"भीमसिंहबलश्चैव विख्यातः सर्व्वविद्वयौ॥"
पुरुवंशीयस्य ईलिनस्य पुत्रः। यथा, तत्रैव। १। ८४। १८।
"ईलिनो जनयामास दुष्मन्तप्रमुखान् सुतान्।
दुष्मन्तं शूरभीमौ च प्रवसुं वसुमेव च॥")
भीमनादः, पुं, (भीमो भैरवो नादो यस्य।) सिंहः। इति शब्दचन्द्रिका॥ (भीमो नादः शब्दः। इति विशेषे भयानकशब्दः। यथा, चातकाष्टके। १।
"वातैर्विधूनय विभीषय भीमनादैः
सङ्चूर्णय त्वमथवा करकाभिघातैः।
त्वद्वारिबिन्दुपरिपालितजीवितस्य
नान्या गतिर्भवति वारिद! चातकस्य॥"
भयानकशब्दविशिष्टे, त्रि। यथा, महाभारते। १। १५६। ३१।
"भीमनादं सुतान्वोढुं तीक्ष्णदंष्ट्रं महारवम्॥")
भीमरथः, पुं, (भीमो भयानको रथोऽस्य।) तामसमनुवंशजातासुरविशेषः। स च कूर्म्मरूपिणा हरिणा हतः। यथा,—
"हरिणा कूर्म्मरूपेण हतो भीमरथोऽसुरः॥"
इति गारुड़े गयामाहात्म्ये ८६ अध्यायः॥
(धृतराष्ट्रस्य पुत्रभेदः। यथा, महाभारते। १। ११७। ११।
"उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः॥")
भीमरथी, स्त्री, जलानामधिष्ठात्रीविशेषः। यथा,—
"सप्तसप्ततिके वर्षे सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम सरितां दुरतिक्रमा॥"
इति शब्दमाला॥
अपि च।
"सप्तसप्ततिवर्षाणां सप्तमे मासि सप्तमी।
रात्रिर्भीमरथी नाम सरितामतिदुस्तरा।
तामतीत्य नरो योऽसौ दिवापि यदि जीवति॥
क्रतुभिस्तानि तुल्यानि सुवर्णशतदक्षिणैः।
गतिः प्रदक्षिणं विष्णोर्जल्पनं मन्त्रभावनम्।
ध्यानं निद्रा सुधा चान्नं भीमरथ्याः पलस्तुतिः॥"
इति वैद्यकम्॥
नदीभेदः। यथा राजनिर्घण्टे।
"गजापद्मा भीमरथी च वङ्गा
पद्मा च लक्ष्मा जलसाध्वगा शुभैः॥"

(दर्यं हि सङ्गमपर्वतोऽभवा। यथा, विष्णुपुराणे। २। ३। १२।
"गोदावरी भीमरथी कृष्णवेण्यादिकास्तथा।
सङ्गमादोऽभवा नद्यः सर्वाः पापभयापहाः॥")

भीमविक्रान्तः, पुं, (भीमश्चासौ विक्रान्तश्चेति।) सिंहः। इति विकाण्डशेषः॥ भयानकविक्रम-विशिष्टे, त्रि॥

भीमश्रावणः, पुं, (भीमं श्रावणं यस्य।) यमः। इति शब्दरत्नावली॥

भीमसेनः, पुं, मध्यमपाण्डवः। स च कुन्तीगर्भे पवनाज्जातः। तत्पर्य्यायः। भीमः २ वीरवेद्यः ३ वृकोदरः ४ वकजित् ५ कीचकजित् ६ किर्म्मीरजित् ७ जरासन्धजित् ८ हिडिम्बजित् ९ कटप्रस्थः १० नागबलः ११ गुदाकरः १२। इति शब्दरत्नावली॥ तस्य जन्मविवरणं यथा,
"धार्म्मिकस्तं सुतं जज्ञे पाण्डुस्तां पुनरब्रवीत्।
प्राहुः क्षात्रं बलं ज्येष्ठं बलज्येष्ठं सुतं कुरु॥
ततस्तयोक्ता भर्त्रा तु वायुमेवाजुहाव सा।
तस्यामथ महावाहुर्भीमो भीमपराक्रमः॥
समप्यतिबलं जातं वायुवाचाग्रणीरिणाम्।
सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत!॥
इदमन्यद्भुतञ्चासीज्जातमात्रे वृकोदरे।
यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत्॥
कुन्ती क्षत्रभयोद्विग्ना सहसोत्पतिता किल।
नाबुध्यत तं सुप्तसुतमङ्के स्वे वृकोदरम्॥
वज्रसंहननः सोऽथ कुमारो व्यपतद्गिरौ।
पतता तेन शतधा शिला गात्रैर्विचूर्णिता॥"
इति महाभारते आदिपर्व्वणि पाण्डवोत्पत्ति-नामाध्यायः॥
(गन्धर्व्वविशेषः। यथा, महाभारते। १। १७३। ५२।
भीमसेनोग्रसेनौ च जवापुरनघक्षया।")
कर्पूरभेदः। यथा,—
"पीतालो भीमसेनश्चदशुचितकरः शङ्करा-वाससंज्ञः
पांसुः पिण्डोऽजसारश्चदशु हिमयुता वालुका जटिका च।
पश्चादस्यास्तुषारश्चदुपरि सहिमः शीतलः पत्रिकाख्या
कर्पूरश्चेति भेदा गुणरसमहसा वैसदृश्येन ज्ञेयाः॥"
इति राजनिर्घण्टः॥

भीमहासं, क्ली, (भीमे भीमादौ हासः प्रकाशो यस्य।) हरितालम्। इति शब्दरत्नावली॥ वुद्धिर सुता इति भाषा॥ भीमहासमपि पाठः॥

भीमा, स्त्री, (भी + मक् + स्त्रियां टाप्।) दुर्गा। इति शब्दरत्नावली॥ रोचनाञ्जनशब्दयोः। इति शब्दचन्द्रिका॥ कन्या। इति शब्दमाला॥ (नदीविशेषः। तद्यथा,—
"कावेरी वीरकान्ता च भीमा चैव पयोष्णिका।
विभावरी विशाला च गौरीदा मदनप्रसा॥
गार्व्वती चापरा नद्यो दक्षिणादिगमा स्त्रियः॥"
इति वाराहे प्रथमे स्थाने सप्तमेऽध्याये॥)

भीमादेवी, स्त्री, दुर्गा। यथा,—
"पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले।
रक्षांसि क्षयमिष्यामि मुनीनां त्राणकारणात्॥
तदा मां मुनयः सर्व्वे स्तोष्यन्त्यानम्रमूर्त्तयः।
भीमादेवीति विख्यातं तन्मे नाम भविष्यति॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

भीमैकादशी, स्त्री, (भीमेनोपलक्षिता एकादशी। प्राकृतपार्थिवादित्वात् समासः।) भैमी। सा च माघशुक्लैकादशी। भीमद्वादशीत्वेन ख्याता च। यथा,—

मत्स्य उवाच।
"पुरा रथन्तरे कल्पे परिप्रष्टो महात्मना।
मन्दरस्थो महादेवः पितामहो ब्रह्मणा स्वयम्॥

ब्रह्मोवाच।
कथमारोग्यमैश्वर्य्यमनन्तममरेश्वर!।
स्वल्पेन तपसा देव! भवेज्जोषोऽथ वा कृताम्॥
किमज्ञातं मया देव! तत्प्रसादाद्वदोचज!।
स्वल्पकेनापि तपसा महत् फलमिहोच्यते॥

मत्स्य उवाच।
इति पृष्टः स विश्वात्मा ब्रह्मणा लोकभावनः।
उमापतिस्त्ववाचेदं मनसः प्रीतिकारकम्॥

ईश्वर उवाच।
अस्मादयत्नरान् कल्पात् त्रयोविंशतिमो यदा।
वाराहो भविता कल्पस्तस्य मन्वन्तरे शुभे॥
वैवस्वताख्ये संजाते सप्तमे सप्तलोकपृक्।
द्वापराख्यं युगं तस्मिन् सप्तविंशतिमे तदा॥
तस्यान्ते स महाबाहो वासुदेवो जनार्द्दनः।
भारावतरणार्थाय विधा विष्णुर्भविष्यति॥
पैतायनो मुनिस्तद्वदौद्दालकिर्योऽथ कौण्डवः।
कंसादिदर्पमथनः केशवः श्लोकनायकः॥
पुरी द्वारवती नाम सांप्रतं वा कुशस्थली।
दिव्याद्भुतसमायुक्तामधिवासाय शार्ङ्गिणः॥
त्वया ममाज्ञया ब्रह्मन्! करिष्यति जगत्पतेः।
तस्यां कदाचिदासीनः सभायाममितद्युतिः।
भार्य्याभिर्दशभिः सार्द्धं भूभृद्भिर्भूरिदक्षिणैः॥
कुरुभिर्देवगन्धर्व्वैरभिगः कैटभार्द्दनः।
प्रवृत्तासु पुराणीषु धर्म्मसम्बन्धिनीषु च॥
कथासु भीमसेनेन परिपृष्टः प्रतापवान्।
त्वया पृष्टस्य धर्म्मस्य रहस्यस्यास्य भेदतः॥
भविता स तदा ब्रह्मन्! कर्त्ता चैव वृकोदरः।
प्रवर्त्तकोऽस्य धर्म्मस्य पाण्डवानुमहाबलः॥
तस्य नीलो वृको नाम जठरे हव्यवाहनः।
मया दत्तः स धर्म्मात्मा तेन चासौ वृकोदरः॥
अतीवाप्राद्यौवनश्च नागायुतबलो महान्।
भविष्यत्यजरः साक्षात् कन्दर्प इव बुद्धिमान्॥
धार्म्मिकस्याप्यशक्तस्य तीव्रमित्वादुपोषणे।
इमं व्रतमशेषाणां व्रतानामधिकं यतः॥
कथयिष्यति विश्वात्मा वासुदेवो जगद्गुरुः।
अशेषयज्ञफलदमशेषाघविनाशनम्॥
अशेषदुष्टशमनमशेषसुरपूजनम्।
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम्।
भविष्यञ्च भविष्याणां पुराणानां पुरातनम्॥

वासुदेव उवाच।
यद्यष्टमीचतुर्द्दश्यां द्वादशीष्वथ भारत!।
अन्येष्वपि दिनर्क्षेषु न शक्तस्तपोविधुम्॥
ततः पृच्छामिमां भीम! तिथिं पापप्रणाशिनीम्।
उपोष्य विधिनानेन शक्रोद्विग्नो यं पदम्॥
माघमासस्य शुक्लस्य यदा शुक्ला भवेत्तदा।
घृतेनाभ्यञ्जनं कृत्वा तिलैः स्नानं समाचरेत्॥
तथैव विष्णुमभ्यर्च्य नमो नारायणाय च।
लक्ष्मीं पादौ संपूज्य शिरः सर्व्वात्मनेति च॥
वैकुण्ठायेति वै कण्ठमुरः श्रीवत्सधारिणे।
शङ्खिने चक्रिणे तद्वदिदं वरदाय वै॥
सर्व्वे नारायणस्येव संपूज्या वाहवः क्रमात्।
दामोदरायेत्युदरं नेतुं पद्मधराय वै॥
कण्ठं सौभाग्यनाथाय बाहुनौ भूतधारिणे।
नमो नीलाय वै कट्टे पादौ विश्वक्षिणे पुनः॥
नमो देवेति नमः स्नानं नमो लक्ष्म्यै नमः शिरे।
नमः पुष्ट्यै नमस्तुष्ट्यै धृत्यै क्षुत्यै तथा शिखे॥
नमो विश्वकृताय वायुवेगाय पक्षिणे।
विघ्नप्रमाथिने नित्यं गरुडध्वजाभिपूजयेत्॥
एवं संपूज्य गोविन्दमुमापतिविनायकौ।
गन्धैर्माल्यैस्तथा धूपैर्भक्ष्यैर्नानाविधैस्तथा॥
गव्येन पयसा सिद्धं क्षीरान्नमथ वाग्यतः।
सर्पिषा सह भुक्त्वा च गत्वा घृतपदं बुधः॥
न्यग्रोधस्कन्धधावनमथवा खादिरं बुधः।
गृहीत्वा धावयेद्दन्तानाचान्तः प्राङ्मुखस्ततः॥
क्रूयात् सायन्तनीं कृत्वा सन्ध्यामक्षमिते रवौ।
नमो नारायणायेति स्नानार्द्रं गृहमं गतः॥
एकादश्यां निराहारः समभ्यर्च्य च केशवम्।
रात्रिञ्च सकलां स्थित्वा जागरञ्च प्रयत्नतः॥
सर्पिषा विप्लवद्दीपं हुत्वा ब्राह्मणपुङ्गवे।
सहैव पुष्करीकाक्ष! द्वादश्यां पारणं मम॥
करिष्यामि यतात्मानं निर्विघ्नान्तु तव प्रसादात्।
एवमुक्त्वा स्वपेद्भूमावितिहासकथां पुनः॥
श्रुत्वा प्रभाते संजाते नदीं गत्वा विशाम्पते!।
स्नानं कृत्वा यदा तद्वत् पापस्नानमिवर्जयेत्॥
उपास्य सन्ध्यां विधिवत् कृत्वा च पितृतर्पणम्।
प्रणम्य च हृषीकेशममलाभ्यर्च्य चेश्वरम्॥
गृहस्य पुरतो भक्त्या मण्डपं कारयेद्बुधः।
दशहस्तमथार्द्धं वा करान् कुर्य्याच्चतुरश्रयोः!॥
चतुर्हस्तां शुभां कुर्य्याद्वेदीमारनिसम्मिताम्।
चतुर्हस्तप्रमाणञ्च विप्रस्येत्थञ्च तोरणम्॥
आरोप्य कलसं तत्र दिक्पालान् पूजयेत्ततः।
मासमात्रेण संपूर्णमघःक्षयाजिनं स्थितः॥
तस्य धारान्तु शिरसा धारयेत् सकलां निशाम्।
धाराभिर्भूरिभिर्हव्यं वेदविदो विदुः॥
यस्मात्तस्मात् कुरुश्रेष्ठ! धारां धार्य्यः क्षमान्वितः।
तथैव विष्णोः शिरसि क्षीरधाराः पयस्विनीः॥
अरत्निमात्रं कृत्वा च स्नानं तत्र निवेशयेत्।
योनिरूपञ्च तं ज्ञात्वा ब्राह्मणैर्वेदपारगैः॥
तिलांश्च विष्णुदेवत्यैर्मन्त्रैरेकाक्षिवर्जितैः।

ज्ञात्वा च वैद्यवर्यं सम्यक् चरुं गोक्षीरसंयुतम् ।
निष्पावाढ्यप्रमाणं वै धारोष्णाभ्यक्त पातयेत् ॥
जलकुम्भान् महावीर! स्नापयित्वा ततोदयम् ।
भर्त्रेणाभिविधेर्युक्तान् चितवस्त्रैरलङ्कृतान् ।
घृतासीकुम्भरैः प्राज्ञैः पञ्चरत्नसमन्वितान् ॥
चतुर्भिर्वेदघोषैश्च मङ्गल्यं कार्यं उद्यतैः ।
ततश्चापस्तुभिश्चैव यजुर्भिश्च परायणैः ॥
वैद्यवाक्यानि च सामानि चतुरः सामवेदिनः ।
अग्निदग्धैश्चहितान्यभितः परिपाठयेत् ॥
एवं स्नातस्तु तान् विप्रान् वस्त्रमाल्यानुलेपनैः ।
पूजयेद्गुरुणैव कटकैर्वलयैः शुभैः ॥
वासोभिः शुचिभिश्चैव वित्तशाठ्यविवर्जितैः ।
एवं स्नातिस्नाता वै गौतमज्वलनिस्वनैः ।
ततश्चाचम्य च पुनर्दिगुणं सर्वमेव तु ॥ ७ ॥
ततः प्रभाते विमले वसुत्याय त्वयोदय ।
स्नातं वै दन्तान् कृत्वैव ! सौवर्णसुखसंयुताः ॥
मधुस्त्रिवीः श्रीफलवतीः कांस्यदोहनसंयुताः ।
रौप्यखुराः सवत्साश्च चन्दनेनाभिषेचिताः ॥
तासु सिद्धां ततो भक्त्या भक्ष्यभोज्यैश्च तर्पितान् ।
ब्राह्मणान् सर्वानन्नैर्नानाविधैस्तथा ॥
सम्पूज्य वाचारवलमात्मना च विसर्जयेत् ॥
अनुमन्त्र्य पदान्तौ पुत्रभार्यासमन्वितः ।
प्रीयतामत्र देवेशः केशवः क्लेशनाशनः ॥
शिवश्च हृदये विष्णुर्विष्णोश्च हृदये शिवः ।
यथान्तरं न पश्यामि तथा मे स्वस्ति चायुषः ॥
एवमुच्चार्य तान् कुम्भान् गायेत्र गायनांश्च ।
वासोभिश्चैव सर्वेषां मङ्गलानि प्रापयेद्बुधः ॥
अभावे बहुगव्यानामेकामपि सुसंस्कृताम् ।
गव्यां दद्याद्गुरौ भीम! सर्व्वोपस्करसंयुताम् ॥
इतिहासपुराणानि वाचयित्वातिवाहयेत् ।
तद्दिनं नरशार्दूल! य इच्छेद्विपुलां श्रियम् ॥
तस्मात्वं सत्यमालम्ब्य भीमसेन! विमत्सरः ।
कुरु व्रतमिदं सम्यक् कथादृष्टमयोदितम् ।
त्वया व्रतमिदं वीर! त्वन्नाम्ना भविष्यति ।
सा भीमद्वादशी देवी सर्वपापहरा शुभा ।
या तु कल्याणिनी नाम पुरा कल्पेषु पठ्यते ॥"

त्वमादिकर्त्ता भव भौकरेऽस्मिन्
कल्पे महावीरवरप्रधान! ।
यस्याः स्मरणकीर्त्तनमप्यशेषं
विनष्टपापस्त्रिदशाधिपः स्यात् ॥
दृष्ट्वा च यामस्वरसामपीयू-
षेणाप्लुतामप्यभवान्तरेषु ।
आभीरकन्येति कुतूहलेन
सैवोर्व्वशी संप्रति नाकपृष्ठे ॥
जातापि सा वैद्यकुलोद्भवापि
पुलोमकन्या पुरुहूतपत्नी ।
तथापि तस्याः परिचारिकेयं
मम प्रिया संप्रति सत्यभामा ॥
ज्ञातः पुरा मङ्गलमेव तद्व-
त्तेजोमयं देवशरीरमाप ।
अस्याश्च कल्याणिनि वैद्यजातु
वक्षस्यधारेव यथा शरीरम् ॥

इदमेव व्रतं भद्रेऽनुष्ठेयं
वैष्णुभिश्चैव पुरा सुरादिभिश्च ।
बलमस्य न शक्यतेऽभिवक्तुं
यदि जिह्वाकोटयो भवेयुः ॥
कलिकल्मषविदारिभीमनाम-
मिति कथयिष्यति यादवेन्द्रबन्धुः ।
अपि नरकगतान् पितॄनशेषा-
नमलसुवर्णमिवैव यः करोति ॥
य इदमनघं शृणोति चातिभक्त्या
परिपठतीह परोपकारहेतोः ।
तिथिमिह सकलार्थभाजनस्त्रै-
लव चरणेन च साम्यतामुपैति ॥
कल्याणिनी नाम पुरा बभूव
या द्वादशी माघदिनेऽभिपूज्या ।
सा पाण्डुपुत्रेण कृता भविष्य-
ज्जनप्रपूज्यानघ! भीमपूर्व्वा ॥"

इति मत्स्यपुराणे भविष्यद्वतोद्देशे भीमद्वादशी नाम ६५ अध्यायः ॥

भीरुः, त्रि, (बिभेतीति । भी भये + "भियः क्रुकन्नौ ।" उणा० २ । ९ । इति क्रुः ।) भयशीलः । (यथा, मनौ । ७ । ६२ ।
"तेषामर्थे नियुञ्जीत शूरान् दक्षान् कुलोद्गतान् ।
शुचीनाकरकर्म्मान्ते भीरूनन्तर्निवेशने ॥")
तत्पर्य्यायः । भक्तः २ भौरुकः ३ भीलुकः ४ । इत्यमरः । ३ । १ । २६ ॥ भीलुः ५ । इति शब्दरत्नावली ॥

भीरुः, स्त्री,(बिभेतीति । भी + "भियः क्रुकन्नौ ।" ३ । २ । १७४ । इति क्रुः ।) भयशीला स्त्री । भयप्रकृतिका । इत्यमरभरतौ ॥ (यथा, विष्णुपुराणे । २ । १५ । ६६ ।
"सत्यं भीरु ! वदत्येतत् परिहासोऽथवा शुभे ! ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहासितम् ॥")
शतावरी । इति धरणिः, अमरश्च ॥ (यथा,—
"बहुपुत्री वरा भीरुः शतमूली शतावरी ।
महापुरुषदत्ता च पीवरीन्दीवरी वरी ॥"
इति वैद्यकरत्नमालायाम् ॥)
कण्टकारी । इति शब्दचन्द्रिका । शतपादिका । इति शब्दरत्नावली ॥ अजा । छाया । स्त्री । इति राजनिर्घण्टः ॥

भीरुः, पुं, (बिभेतीति । भी + कुः ।) शृगालः । इति शब्दमाला ॥ आखुः । इति राजनिर्घण्टः ॥ इक्षुभेदः । इति रत्नमाला ॥ अस्य गुणाः । श्लेष्मकारित्वम् । स्वादुत्वम् । आविदाहित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

भीरुकं, क्ली, (भीरु + संज्ञायां कन् ।) वनम् । इति शब्दरत्नावली ॥

भीरुकः, पुं, (भीरु + स्वार्थे संज्ञायां वा कन् ।) पेचकः । इति शब्दरत्नावली ॥ इक्षुभेदः । भीरुरी इति हिन्दीभाषा ॥ (यथा, सुश्रुते सूत्रस्थाने । ४५ अध्याये ।
"पौण्ड्रको भीरुकश्चैव वंशकः शतपोरकः ।
कान्तारशालपर्णीश्च काण्डेक्षुः क्षुद्रिपत्रकः ॥")

अस्य गुणाः । यथा, भावप्रकाशे ।
"वातपित्तप्रशमनो मधुरो रसपाकयोः ।
सुग्राही दीपनो बल्यः पौण्ड्रको भीरुकस्तथा ॥"
भीरुकः, त्रि,(बिभेतीति । भिभी भये + "भियः क्रुकन् ।" उणा० २ । ३१ । इति क्रुकन् ।) भययुक्तः । इत्यमरः ॥ कातरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भीरुपत्री, स्त्री,(भीरुरिव पत्राण्यस्याः । गौरादित्वात् ङीष् ।) शतमूली । इत्यमरः ।२।४।१०१॥

भीरुहृदयः, पुं, (भीरु हृदयमस्य ।) अजः । इति जटाधरः ॥

भीरुः, स्त्री, (भीरु + "ऊडुतः ।" ४ । १ । ६६ । इति ऊङ् ।) भयशीला नारी । इत्यमरटीकायां भरतः ॥

भीलभूषणा, स्त्री, (भूषयतीति । भूष् + कर्मणि ल्युः । टाप् । भीलानां भूषणा ।) गुञ्जा । इति राजनिर्घण्टः ॥

भीलुः, त्रि, (बिभेतीति । भी + कलुः ।) भीरुः । भयशीलः । इति शब्दरत्नावली ॥

भीलुकः, पुं, (बिभेतीति । भी + "भियः क्रुकन्नौ । ३ । २ । १७४ । इति कन् ।) भीरुः । इत्यमरः । ३ । १ । २६ ॥ (यथा, कथासरित्सागरे । ३२ । ५२ ।
"एतदेवानिमित्तं नः किमन्येनाधभीलुक ! ।
यक्षमन्नाभिरागीतः काकपक्षी पदे पदे ॥")
भल्लूकः । इति शब्दरत्नावली ॥

भीषणः, पुं, (भीषयते इति । भी + णिच् + "भियो हेतुभये षुक् ।" ७ । ३ । ४० । इति षुक् । भीषिधातुरुक्तो नन्द्यादित्वात् ल्युः ।) भयानकरसः । इत्यमरटीकायां भरतः, मेदिनी च ॥ कुन्दुरुकः । कपोतः । हिन्ताकः । इति राजनिर्घण्टः ॥ शिवः । इति शब्दरत्नावली । ग्रहकी इति मेदिनी ॥ (भवोत्पादने क्ली, । यथा, महाभारते । १५ । ७ । ४ ।
"व्यसनं भेदनञ्चैव शुचेर्नाशकारयेत्तः ।
कर्षणं भीषणञ्चैव युद्धे चैव बलक्षयम् ॥")

भीषणः, त्रि, (भीषयते इति । भी + णिच् + ल्युः । युगागमश्च ।) गाढः । दारुणः । इति मेदिनी । षे, ६८ ॥ (यथा, रघौ । १२ । ४० ॥
"पर्य्यायालानमथ क्षिप्रं विक्षताक्षिः प्रविश्य सः ।
वैरूप्यपौनरुक्त्येन भीषणां तामयोजयत् ॥")

भीष्मः, त्रि, (बिभेत्यस्मादिति । भी + "भिषः ष्मन् वा ।" उणा० । १ । १४७ । इति ष्मक् । वा युगागमश्च ।) भयानकम् । इत्यमरः ।१।७।२०॥ (यथा, शतपथब्राह्मणे । १९ । ६ । १ । ६ ।
"सङ्कोचाच भीष्मं वस भोः पुरुषाद वा ।"
"भीष्मं भयङ्करं ।" इति तद्भाष्ये महीधरः ॥)

भीष्मः, पुं, (बिभेत्यस्मादिति । भी + मक् । युग् वेति पक्षे युक् ।) भयानकरसः । इत्यमरटीकायां भरतः ॥ शिवः । राक्षसः । इति हेमचन्द्रः ॥ गाङ्गेयः । स च शान्तनुराज-

चक्रवर्तिनो गङ्गायां भार्य्यायां जातः। स परम-धर्म्मात्मा महावीरः। येन पितुर्दाशकन्या-विवाहार्थं पितुराज्यं त्यक्तं, यच्च तस्य विवाहं त्यक्त्वा जह्नुरेना जातः। इति श्रीभागवतम्॥

तत्कथोत्पत्तिर्यथा,—

"अथ तामब्रुवन् जाते पुत्रे प्रहसतीमिव।
उवाच राजा दुःखार्त्तः परीक्षन् सुतमात्मनः॥
मा वधीः काशि कस्यासि किंच हंसि सुता-
मिति।
पुत्रस्त्रि! सुमहत् पापं संप्राप्तं ते सुगर्हितं!॥"

गङ्गोवाच।

"पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतांवर!।
जीवंस्तु मम वाक्योऽयं यथा स समयः कृतः॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता।
देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह॥
अष्टौ ये वसवो देवा महाभागा महौजसः।
वशिष्ठशापदोषेण मानुषत्वमुपागताः॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते।
मद्विधा मानुषी धात्री लोके नास्ति कदाचन॥
तेषाञ्च जननीहेतोर्मानुषत्वमुपागता।
जनयित्वा वसूनष्टौ जिता लोकाक्षयाक्षयाः॥
देवानां समयश्चैव वसूनां संश्रुतो मया।
जातं जातं मोक्षयिष्ये अन्यतो मानुषादिति॥
तत्ते शापादिनिर्म्मुक्ता आपवस्य महात्मनः।
स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महा-
व्रतम्॥
एष पर्य्यायवासो मे वसूनां वसुधा कृतः।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्॥"

इत्यादिपर्व्वणि भीष्मोत्पत्तिनाम १०० अध्यायः॥

भीष्मजननी, स्त्री, (भीष्मस्य जननी माता।) गङ्गा। इति राजनिर्घण्टः॥

भीष्मपञ्चकं, क्ली, (भीष्मेण ज्ञानमुपदिष्टं वा पञ्चकं एकादश्यादितिथिर्म्मान्तपञ्चतिथिकर्त्तव्यम्।) कार्त्तिकशुक्लपक्षीयैकादश्यादितिथिर्म्मान्तपञ्च-तिथिकर्त्तव्यव्रतविशेषः। यथा,—

श्रीनारद उवाच।

"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च दिनं महत्।
माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो!॥
कथं ज्ञानञ्च किं दानं को विधिः कस्य पूजनम्।
किं फलं केन वाकारि तन्मे कथय विस्तरात्॥"

ब्रह्मोवाच।

शृणु भीष्मपञ्चकस्येदं माहात्म्यं विधिपूर्व्वकम्।
वक्ष्यामि फलसंयुक्तं येनेदञ्च कृतं पुरा॥
अयोध्या नगरी या च कलिकल्मषनाशिनी।
वैष्णवी खगैरम्या च कलिकल्मषनाशिनी॥
शङ्खचक्रधरयस्यां विष्णुचक्रप्रतिष्ठिता।
तस्यामासीन्नरवरः सत्यधर्म्मोद्भवो सुने!॥
अतिथिर्नाम देवर्षे! धर्म्मात्मा नैकयज्ञकृत्।
तेन दत्तं पुरा राज्ञा कृतं यज्ञमनुत्तमम्॥
भार्य्यया चन्द्रभाविन्या सार्द्धं भीष्मस्य पञ्चकम्।
विधीयः परिपप्रच्छ वशिष्ठं तद्विधिं द्विज!॥"

वशिष्ठ उवाच।

"शृणु राजन्! प्रवक्ष्यामि व्रतं सौभाग्य-
दायकम्।
रहस्यं भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम्॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्येकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूजिता।
पञ्चभीष्मभिति ख्यातं तिथयः पुण्यदाः स्मृताः॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा सभार्य्यः पुरुषो नद्यादौ विमले जले॥
तर्पयेद्भीष्मवर्म्माणं कुरवंशपितामहम्।
पितृभिस्तिलयुक्तैश्च जलाञ्जलिभिरव्रतैः॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे॥
सम्पूज्य कौरवश्रेष्ठं कुर्य्यादाचमनं ततः।
अर्घ्यं दत्वा विधानेन चन्दनादिभिरार्चनः।
अर्घ्यं दद्यादतन्द्रात्मा च मन्त्रेणानेन भूपते!॥
वसुनामवताराय शान्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे॥
इत्थं समापयेद्देवव्रत! भीष्मपञ्चविधिं नरः।
नियमेनोपवासेन पञ्चगव्येन वा पुनः॥
पयोमूलफलाहारैर्हविष्यैर्नानाविधैरपि।
नरो वा यदि वा नारी सुकृतापो दिवं व्रजेत्॥
भुक्त्वा स विपुलान् भोगान् कार्त्तिकं न
त्यजेद्धि यः।
अतोऽग्रतो नयेत् पञ्चभीष्माख्यं हरिपूजितम्॥
श्रुत्वेदमद्भुतं भक्त्या त्वत्सखा सह।
दम्पती च यथा भीष्मं लब्ध्वा तौ सुमहाफलम्॥
स्वस्त्ययनेन विप्रेन्द्र! श्रुतं तात्यां हि तत् पुरा।
प्राप्तं राज्यं महीमेनां समुदवलयान्विताम्॥
प्रभुज्य प्रचुरान् कामान् व्रतकामौ यथा सुने!।
दिव्याम्बराभरणौ तौ दिव्यमाल्यानुलेपिनौ॥
दिव्यदेहविमानेन सर्व्वकिन्नरसेवितौ।
अप्सरोगीततूर्य्येण स्तूयमानौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चव्रताच्छुने!॥"

ब्रह्मोवाच।

"इत्येतत् कथितं वत्स! माहात्म्यं कार्त्तिकोद्भवम्।
भीष्मपञ्चकमाहात्म्यं सैतिहासं पुरातनम्॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते भक्तिरच्युते।
निश्चलः कायमनसा वचसा सुमनीभव॥"

"शृण्वन्ति मर्त्याश्च पठन्ति ये वै
भूखण्डमध्ये भगवद्गुणान् सुने!।
मनिश्च लब्ध्वा भगवत्प्रणेतृन्
कथासुपेक्षस्य पुरं प्रयान्ति॥
कलिमलमपकृत्य प्राणिनो दैवदैव
सुभगसकलभोगान् भोजयित्वा च यान्ति।
हरिपुरममरेशैर्गीतवादोद्यमाले-
र्विहितमकलज्वालाक्षोभयन्ते हरिं ये॥
एतत् कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्म्मुक्तः स याति लभते रतिम्॥"

इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १९२ अध्यायः॥

अपि च।

"यदा हरेर्व्रतं भेद्यं तदा स्यादन्तिमायने।
चातुर्म्मास्ये ततस्तस्मात् कार्त्तिके भीष्मपञ्चकम्॥
ततः भेदनमं सुत्र एकादश्यां समाचरेत्।
स्नायात्रिकालं पित्रादीन् यथावैरर्घयेद्धरिम्॥
यजेज्जौनी घृताद्यैस्तु पञ्चगव्येन वारिभिः।
आपयित्वाथ कर्पूरसर्व्वैर्वासुलेपयेत्॥
घृताक्तगुग्गुलोर्धूपं द्विजः पञ्चदिनं दहेत्।
नैवेद्यं परमान्नन्तु अपेदक्षोत्तरं श्रुतम्॥
ॐ नमो वासुदेवाय घृतनीक्षितिजोदकम्।
षड्क्षरेण मन्त्रेण स्नाद्यान्तेन तु होमयेत्॥
प्रथमेऽहि हरेः पादौ यजेत् पद्मैस्तितीयके।
विल्वपत्रैर्जानुदेशं नाभिं भृङ्गेण चापरे॥
स्रक्त्यौ विल्वैर्जवाभिश्च पञ्चमेऽहि शिरोऽर्चयेत्।
मालत्या भूमिशायी स्यान्नीलमयं प्राशयेत्
क्रमात्॥
गोमूत्रक्षीरदधि च पञ्चमे पञ्चगव्यकम्।
नक्तं कुर्य्यात् पञ्चदश्यां व्रती स्यादुक्तिमुक्ति-
भाक्।"

इति गारुडे भीष्मपञ्चाख्यितं नाम १२३ अध्यायः॥

वकपञ्चकम्। यथा,—

"आरभ्येकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत् प्रीतये भीष्मपञ्चकं यदि शृणुयात्॥
तथा धर्म्मोव्रतं पौर्णमास्यां कुर्व्वीत कार्त्तिके।
तथा रूक्षा शुक्लायामक्षयं नवमीव्रतम्॥
एतानहर्दिवसञ्चाहि मासोपोषणमेव च।
समर्थः कार्त्तिके कुर्य्यात् श्रुत्वा प्राग्वादितो
विधिम्॥"

इति श्रीहरिभक्तिविलासे १६ विलासः॥

भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं दुर्लभत्वात्।) हिमालयोत्तरदेशजातमुज्ज्वलवर्णप्रस्तरविशेषः। तल्लक्षणादि यथा,—

व्रत उवाच।

"हिमवत्युत्तरे देशे वर्त्मे पतितं सुरद्विषस्य।
सम्प्राप्तमुत्तमानामाकरजं भीष्मरत्नानाम्॥
शुक्लाः शुक्लाजनिभाः शुक्लाकसन्निभाः
प्रभावन्तः।
प्रभवन्ति तत्तज्जन्या वज्रनिभा भीष्मपाषाणाः।
हिमादिप्रतिबद्धं शुद्धमपि अद्धया विभर्त्ति यः।
भीष्ममणिं धीवादिह्न स सम्यदं सर्व्वदा लभते॥
गुरुयुक्तस्य तस्येव घारणाद्भुतिपुण्य!।
विषाणि तानि नश्यन्ति सर्व्वायैव महीतले॥"

विषमाणाबाधर्म्मे ये समरत्नविषाणिनः, अमी-
षेऽपि।
दंष्ट्रिदन्तनखशृङ्गरसिंघव्याघ्रादयो हिंस्राः॥
तस्योनकवलितजन्तिनो भवन्ति भयं न चापि
समुपस्थितम्।
भीष्ममणिधारणयुक्तः सम्यक् संप्राप्नोत्यभिलषितम्॥
पिङ्गनपर्व्वे पिङ्गा इत्यिवैदूर्य्यादिकौ भवति॥
ग्राम्यस्यदूभूतान्यपि सर्पाक्षव्याघ्रवृश्चिक-
विषाणि।
खलिकाग्निवैरितस्करभयानि भीष्माणि नश्यन्ति

शुक्र

वैजयन्तकाङ्क्षाभं प्रवरं पीतप्रभं प्रभाक्षीणम्।
मणिमुक्तिं विवर्णं दूरात् परिवर्जयेत् प्राज्ञः॥
लक्षं प्रकल्प्यमेषां विबुधवरैर्दैग्रकालविज्ञानात्।
दूरे भूतानां बहु किञ्चिन्निकटप्रकल्पानाम्॥"
इति गारुडे भौक्तरत्नपरीक्षा नाम ७६ अः॥

भौग्यः, क्ली, (भौग्यं क्षते प्रक्षते इति। क्ष प्रक्षये + क्विप्।) अन्नम्। इत्यमरः। २। १०। ३१॥

भौग्याष्टमी, स्त्री, (भौग्यस्य अष्टमी भौग्यनाम्निका अष्टमी वा।) माघशुक्लाष्टमी। तत्र भौग्यस्य तर्पणादिकं कर्त्तव्यम्। यथा, भविष्योत्तरे।
"शुक्लाष्टम्यान्तु माघस्य दद्याद्भौग्याय यो जलम्।
संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥"
धवलधृता स्मृतिः।
"अष्टम्यान्तु सिते पक्षे भौग्याय तु तिलोदकम्।
अन्नञ्च विधिवद्दद्युः सर्व्वे वर्णा द्विजातयः॥"
सर्व्वे वर्णा इत्युपादानात् ब्राह्मणस्यापीदमधिकारः। द्विजातय इति सम्बोधनम्। स्मृतिरत्नाकरे विष्णुधर्म्मोत्तरम्।
"मध्याह्नव्यापिनी ग्राह्या अष्टमी भौग्याष्टमी तिथिः।
स्नाने च तर्पणे दाने व्याप्ता सूर्य्योदयो परा॥
यदा कदाचित् कुर्य्याद्वा गता सूर्य्योदयो परा।
पूर्व्वस्यामेव कर्त्तव्यं तर्पणं भानुमेव च॥
यदैकस्मिन् भवेन्नाम्नि कदाचिन्नाकरो द्वयम्।
भौग्याष्टमी तदा यापि तदा व्याप्ता परा तिथिः॥
ब्राह्मणस्यान्यवर्णानां यः करोत्यौद्देहिकम्।
सप्तजन्मसमौ याति दुष्टं लोके परत्र च॥"
इति मरीचिवचनन्तु भौग्यस्तुतिरपरम्॥
तथा च स्मृतिः।
"ब्राह्मणाद्यास्तु ये वर्णा दद्युर्भौग्याय नो जलम्।
संवत्सरकृतं पुण्यं तत्क्षणादेव नश्यति॥
अत्रवर्णजलदाननिषेधस्तु प्रकरणबलादपि भाक्तादिविषय इति श्रीदत्तः॥ तर्पणमन्त्रस्तु।
"वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च।
अपुत्राय ददाम्येतत् सलिलं भौग्यवर्म्मणे॥
भौग्यः ग्राम्यनयो वीरः सत्यवादी जितेन्द्रियः।
आभिरद्भिरवाभोतु पुत्रपौत्रोचितां क्रियाम्॥"
इत्याद्यंशमन्त्रः। पुत्रपौत्रोचितामित्यभिधानात् पिण्डकर्म्मरीत्या। ब्राह्मणः पिण्डतर्पणानन्तरं क्षत्रियस्तु तत्पूर्व्वं तर्पयेत्। इति संवत्सरप्रदीपादयः॥ इति तिथ्यादितत्त्वम्॥

शुक्ल, त्रि, (शुच् + कर्म्मणि क्तः।) भक्षितम्। इत्यमरः। ३। २। ११॥ (यथा, मनुः। २।५५।
"पूजितं ह्यशनं नित्यं बलमूर्জ्জञ्च यच्छति।
अपूजितन्तु तद्भुक्तमुभयं नाशयेदिदम्॥"
उपभुक्तम्। यथा, रघुः। ४। ७।
"मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।
तथाप्यनन्यपूर्व्वेव तस्मिन्नासीद्वसुन्धरा॥"
भावे क्तः।) भक्षणे, क्ली। इति त्रिकाण्डशेषः॥
(यथा, रामायणे। २। ५८। १२।
"आसितं शयितं भुक्तं क्व नु रामस्य कीर्त्तय।
कौसिल्याञ्चैवमेतेन यथातिरिव साधुषु॥")

शुक्ति

सक्तसक्तुञ्जितं, त्रि, (आदौ शुक्तं पश्चात् सक्तुञ्जितं परित्यक्तम्। ज्ञातानुज्ञिप्रवत्तमात्रः।) पूर्व्वं शुक्तं ततः क्षीरं पश्चात् सक्तुञ्जितं त्यक्तम्। तत्पर्य्यायः। पेलवं २। इत्यमरः। २। ६।५६॥ पिच्छम् ३ पेलि: ४। इति भरतधृतरभसः॥

शुक्तिः, स्त्री, (शुच् + क्तिन्।) भोजनम्। इति शब्दरत्नावली॥ भोगः। यथा,—
"शुक्तिस्त्रिपुरुषी सिद्धेदपरेषां न संशयः।
अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिद्ध्यति॥
आचार्य्यो ग्रोधयेद्शुक्तिमागमस्थापि संवदि।
तत्सुतो शुक्तिमेवैकां पौत्रादिषु न किञ्चन॥"
इति दायतत्त्वम्॥
(यथा, मनुः। ८। २५२।
"एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥")
रविर्भुक्तिर्यथा,—
"साङ्गसप्तभसे मेषे वसुः सार्द्धो घटे वृषे।
दर्शेषु मकरे इन्दे पलानि प्रतिवासरम्।
कुलीरसिंहप्रमदातुलालिकार्म्मुकेषु च।
पलान्येकादश तथा रविभुक्तिं प्रचक्षते॥"
इति ज्योतीरत्नमाला।
भोगः। दखल इति पारस्यभाषा। स च प्रमाणचतुष्टयान्तर्गतप्रमाणविशेषः। यथा। लिखितात्भावे दिव्यमाह याज्ञवल्क्यः।
"प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते॥"
इति व्यवहारतत्त्वम्॥
तद्विवरणं यथा। अथ भुक्तिः। तत्र याज्ञवल्क्यः।
"पञ्चतोऽनुगतो ह्यग्निर्भूमेर्विंशतिवार्षिकी।
परेण भुज्यमानाया धनस्य दशवार्षिकी॥"
विवादमकुर्वतः समक्षं भूस्वामिनः परेणापि क्रयादिना भुज्यमानायाः भूमेर्विंशतिवर्षनिवृत्ता स्वत्वहानिः। अत्र लोकव्यवहारकर्म्मत्वाद्वर्षगणना सावनेन। यथा च विष्णुधर्म्मोत्तरम्।
"सवाक्यपारुष्यान्यत्र सावनेन
लौक्यञ्च यत् स्याद्व्यवहारकर्म्मणि॥"
तत्रैव।
"सावने च तथा मासि विंशत्या भुक्तयः स्मृताः॥"
इति।
विशेषमति याज्ञः।
"यस्यामि विंशतिं यस्य भूर्भुङ्क्ते तु परेरिह।
सति रात्रि समर्थस्य तस्य सेह न सिध्यति॥"
समर्थस्य बालत्वादिदोषरहितस्य। धनस्य दशवर्षनिवृत्ता स्वत्वहानिः। तथा च मनुः।
"यत्किञ्चिद्दशवर्षाणि सन्निधौ प्रेक्षते धनी।
भुज्यमानं परैरन्यैः न स तल्लब्धुमर्हति॥"
यत्किञ्चिद्धनजातं समक्षमेव प्रीत्यादिषति-

शुक्तिः

रेकेण परैर्दशवर्षाणि भुज्यमानं स्वामी तूष्णीं प्रेक्षते मा भुज्यतामिति प्रतिषेधं न रचयति नासौ तल्लब्धुं योग्यो भवति तच्च तस्य स्वाम्यं नश्यतीत्यर्थः। गौतमः। अजड़ापौगण्डधनं दशवर्षभुक्तं परैः सन्निधौ भोक्तुरिति। जड़ो विकलेन्द्रियः। पौगण्डः पूर्णोऽनुत्पन्नश्मश्रुगण्डः। तदाह नारदः—
"बाल आधोड़शाद्वर्षात् पौगण्डश्चापि
यावते॥"
अत्रापौगण्डः प्रकीर्त्तित इति कुल्लूकभट्टेन लिखितम्। तन्नाष्टमेऽपि अपौगण्डस्तु पौगण्ड इति विरूपकोषादविरोधः। तस्मादाद्यजनादिरिव वचनाद्दशवर्षविंशतिवर्षादिकालोभोग एव स्वत्वं जनयति। यथा कालप्राप्तिवशेन बीजमङ्कुरं जनयति तरुत्वञ्च कुसुममिति। स्वामिना चापरिज्ञातोऽपि ग्राह्योक्तकालीनभोगात् स्वाम्यमन्यस्य भवति। यथा जयेन राज्ञः पररात्कृषण इति। एवमेव श्रीकरमालोकजोल्लोकभवदेवभट्टशूलपाणिकुल्लूकभट्टचण्डेश्वररत्नवर्द्धमानोपाध्यायप्रभृतयः॥ व्यवहारोऽप्येतादृगेव। एतद्विरुद्धवचनान्यन्यथा व्याख्येयानि। तत्रोपेक्षया स्वत्वहानिं शास्त्रा च स्वत्वमाह नारदः—
"भुज्यमानान् परैरर्थान् यस्मान्मोहादुपेक्षते।
समक्षं तिरतोऽप्यस्य तान् शुक्तिः कुरुते बली॥"
यत्तमाह बृहस्पतिः—
"व्यावरं सिद्धिमाप्नोति भुक्त्वा क्षेत्रमुपेक्षया।"
उपेक्षया क्षमया। तत्कारश्च स्वामिनः सुप्तोन्मत्तत्वमदेशस्थत्वव्यासङ्गत्वादि। एवञ्च विंशतिवर्षात् पूर्व्वं स्वत्वसिद्ध्यर्थकवर्षत्रयपालनाद्येवत्पन्नत्रय एव स्वत्वम्। एवं दशवर्षात् पूर्व्वं स्वत्वसिद्ध्यर्थोदशपालनाद्येकत्रयुक्तादौ एव स्वत्वम्। तत्तत्कालपरत्वन्तु भूमौ गवादिधने च स्वत्वमिति। पूर्व्वं तत्तत्ताग्रकभोगे तु चौर्य्यदोषो भवत्येव॥ * ॥ भोगे तु स्वत्वहानिमाधाद्दीनां यावर्णयति पञ्चतोऽनुगत इत्यभिधाय याज्ञवल्क्यः—
"आधिसीमोपनिःक्षेपजड़बालधनैर्विना।
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि॥"
आधिर्बन्धकद्रव्यम्। उपनिःक्षेपः।
वासनस्थमनाख्याय वसुदं यन्निधीयते॥"
इति नारदोक्तेः॥
वासनस्थं निःक्षेपाधारभूतवस्त्वादिस्थम्। वसुदं धान्यादियुतम्। जड़ो बुद्धिविकलः। बालोऽप्राप्तषोड़शवर्षः। उपनिधिः प्रीत्या भोगार्थमर्पितः। ततश्च आध्यादिभिर्जड़ादिधनैश्च विना अन्यानि धनानि उक्तभोगकालेन स्वामिनो नश्यन्ति इतानि तु स्वामिनो न नश्यन्ति न वा भोक्तुर्भवन्ति॥ * ॥ मिताक्षरायां स्मृतिः—
"द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया।
सुप्तिरेव तु गुर्व्वी स्यान्न दिवं न च साधिकः॥"

याज्ञवल्क्यः ।
"आगमो ह्यधिको भोगादिना पूर्व्वक्रमागतात् ।
आगमः कारणं तत्र भुक्तिः श्लोकापि यत्र नो ॥
आगमस्तु हृतो येन योऽभियुक्तस्ततस्तरेत् ।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥
योऽभियुक्तः परेतः स्यात्तस्य रिक्थी ततस्तरेत् ।
न तत्र कारणं भुक्तिरागमेन विना हृता ॥"
भूम्यादेरागमः पूर्व्वपुरुषक्रमादागतभोगाद्-बलवान् । अतः क्रमागतभोग आगमाद्बलवान् । तथा च हृहस्पतिः—
"अनुमानाद्गुरुः साक्षी साक्षिभ्यो लिखितं गुरु ।
अवाप्ता त्रिपुरुषी भुक्तिस्तेभ्यो गरीयसी ॥"
त्रिपुरुषभोगमाह व्यासः—
"प्रपितामहेन यद्भुक्तं तत्पुत्रेण विना च तम् ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपौरुषः ॥
पिता पितामहो यस्य जीवेच्च प्रपितामहः ।
अयाप्यं जीवतां भोगो विज्ञेयस्त्रैकपूरुषः ॥"
आगमोऽपि बलवान् न भवति यत्र श्लोकापि भुक्तिर्नास्ति । तथा च नारदः ।
"विद्यमानेऽपि लिखिते जीवत्स्वपि च साक्षिषु ।
विप्रोषितः स्थावराणां यत्र भुक्तं न तत् स्थिरम् ॥"
इति दीपकलिका ॥
यत्र वादिनौ स्वस्वागमबलप्रवृत्तौ आगमयोश्च पूर्व्वापरभावो न निर्णीयते तत्र यस्य भुक्तिस्तस्यागमो बलीयान् न त्वन्यस्येत्यर्थ इति मिताक्षरा । अर्थात् यत्रागमपौर्व्वापर्य्यनिश्चयस्तत्र ।
"सर्व्वेष्वेव विवादेषु बलवद्भुक्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्व्वा तु बलवत्तरा ॥"
इति याज्ञवल्क्यवचनान्निर्णयः ॥
आगमस्त्रिधा स आ सम्यग्गम्यते प्राप्यते स्वं भवति येन क्रयादिना स आगम इति व्यवहारमाहुका ॥ आगमः साक्षिप्रत्ययादिकमिति याज्ञवल्क्यदीपकलिका ॥ आगमो धनोपार्ज्जनोपायः क्रयादिरिति मैथिलाः ॥ तत्रान्येनाभियुक्त आगमकर्त्ता तत्कूटतासुद्धरेत्तत्पुत्रपौत्रौ नागममुद्धरेतां किन्तु भुक्तिरेव तत्र प्रमाणम् । विप्रोषयति हृहस्पतिः ।
"आहर्त्ता ग्रोधयेद्भुक्तिमागमस्यापि संशये ।
ततस्ततो भुक्तिमेवैकां पौत्रादिषु न किञ्चन ॥"
इति मूलपाठधृतम् ॥
ततः पुत्रादौ न किञ्चनेति मैथिलधृतम् ॥ आहर्त्ता अर्জ্জनकर्त्ता । अत्र पुत्रस्य भुक्तिर्ग्रोधनमात्रम् । भुक्तिर्ग्रोधनमाहतुर्व्यासकात्यायनौ ।
"सागमो दीर्घकालश्च निश्चितोऽन्यस्वजोज्झितः ।
प्रत्यर्थिसन्निधानश्च पश्चाद्भोग इष्यते ॥"
प्रमाणमिति शेषः । सागमः क्रयादियुक्तः । अत्र च भूमिविषयकविंशतिवर्षधनविषयकदशवर्षान्यूनकालभोगपरः । योऽभियुक्त इति यो भोगे क्रियमाणे परेणाभियुक्तः परेतो मृतः स्वस्यागममुद्धृतवान् तदा तत्पुत्रादिरेव तमुद्धरेत् । तथाह नारदः ।
"अथाक्रुष्टविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थः संग्रोध्यो न तु भोगो निवर्त्तयेत् ॥
भोगः केवलभोगः । तथा च स एव । आदौ तु कारणं दानं पश्चाद्भुक्तिस्तु सागमेति । अत्र स विवादभोगः परस्परेतरपरः । तथाविधभोगस्यागमं विनापि प्रामाण्यात् । तथा च व्यासः ।
"वर्षाणि विंशतिं भुक्ता स्वामिनाध्याहृता सती ।
भुक्तिः सा पौरुषी भूमेर्द्विगुणा तु स्त्रिपौरुषी ॥
त्रिपौरुषी तु त्रिगुणा न तत्रान्वेष्य आगमः ॥"
एतद्वचनमसमञ्जभोगविषयकमिति यमश्चविंशतिवर्षभोगविषयकवचनेनाविरुद्धम् । एतादृक्स्मृत्युक्तकाल एव कात्यायनः ।
"स्वार्णकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
असार्णे त्वागमाभावात् क्रमात्त्रिपुरुषागता ॥"
यद्दिवर्षैकपुरुषभुक्तौ त्रिपुरुषभुक्तिश्चपदेनास्य फलमाह न तत्रेत्यादि । अतएव नारदः ।
"अन्यायेन तु यद्भुक्तं पित्रा पूर्व्वतरैरपि ।
न तच्छक्यमपाकर्त्तुं क्रमात्त्रिपुरुषागतम् ॥"
अन्यायेनेत्यत्रागममिति मूलपाठधृतपाठः । तुरप्यर्थः । पित्रा सह पितरमादा त्रिभिरित्यर्थः । यतु ।
"अनागमन्तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं प्राप्तं हरेयुर्देवनोपतिः ॥"
इति दण्डविधायकव्यासवचनं तद्धर्म्मशास्त्रविरोधात् न सुख्यार्थपरम् । तदाह स एव ।
"यत्र विप्रतिपत्तिः स्याद्धर्म्मशास्त्रार्थशास्त्रयोः ।
अर्थशास्त्रोक्तमुत्सृज्य धर्म्मशास्त्रोक्तमाचरेत् ॥"
एवमेव मूलपाठिः । वस्तुतस्तु अनागममिति दण्डविधायकवचनं स्त्रीधननरेन्द्रधनपरम् ।
"स्त्रीधनञ्च नरेन्द्राणां न कदाचन जीर्य्यति ।
अनागमं सुप्यमानमपि वर्षशतैरपि ॥"
इति स्मृतिनिषेधकनारदवचनैकवाक्यत्वात् । यत्र विप्रतिपत्तिः स्यादिति वचनस्यायमेतदुदाहरणम् । यत्रैकस्य जयेऽवधार्य्यमाणे मित्रलब्धिरपरस्य जयेऽवधार्य्यमाणे धनलब्धिश्च ।
"स्थिरगृहभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः ।
अतो यतेत तत्प्राप्तावित्ति वेदविदां मतम् ॥"
इति याज्ञवल्क्योक्तार्थशास्त्रमुत्सृज्य क्रोधलोभविवर्জ্জितं इति धर्म्मशास्त्रमवलम्ब्य व्यवहारं पश्येत् । अतएव ।
"सभ्येनावश्यवक्तव्यं धर्म्मार्थसहितं वचः ।"
इति कात्यायनोक्तमिति । भवदेवस्तु व्यासवचनम् प्रतिवादिनोऽसन्निधाने पुरुषैकदयभोगाभिप्रायं चेपुरुषिकभोगस्य तत्रापि प्रमाणत्वादित्याहुः ॥

अथ भुक्तिस्वत्वापवादः ।

तत्र हृहस्पतिः ।
"भुक्तिस्त्रैपुरुषी सिद्धा दशपूर्व्वा न संशयः ।
अनिहत्य सपिण्डत्वे सकुल्यानां न सिद्ध्यति ॥
अस्वामिना च यद्भुक्तं गुरुशैवापथादिकम् ।
सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते ॥

विद्वान् श्रोत्रियेभ्यश्च राज्ञामावेदयेच्च यः ।
हृदीर्घेणापि कालेन तेषां तत्तु न सिद्ध्यति ॥"
आगमो विक्रयस्यागम् । विद्वान् आगन्ता ।
इति च अवधारणम् ॥
भुक्तिप्रदः, पुं, (भुक्तिं भोगं ददातीति । प्र+दा+"आतश्चोपसर्गे ।" ३ । १ । १३६ । इति कः ।) सुग्रः । इति राजनिर्घण्टः ॥ भोगदातरि, त्रि ॥
भुग्नः, त्रि, (भुज कौटिल्ये+क्तः । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य नः ।) रोगादिना कुटिलीकृतः । तत्पर्य्यायः । वक्रः २ । इत्यमरः । ३ । १ । ८२ ॥ वक्रः । इति भुजधात्वर्थदर्शनात् । (यथा,—
"सास्रृग्वो कलुषे रक्ते भुग्ने कुत्सितपक्ष्मणी ।
अक्ष्णी पिच्छिलापार्श्वे त्रुट्यत्पक्ष्माक्षिगह्वरम् ॥"
इति वाभटे निदानस्थाने द्वितीयेऽध्याये ॥
यथा, च भट्टिः । ११ । ८ ।
"पीने भटस्योरसि वीक्ष्य भुग्नां
स्तनुत्वचः पाणिरुहान् सुमध्या ॥")
भुज, ओ ग्र औ वक्रगौ । इति कविकल्पद्रुमः ॥ (तुदा०-परः सकः-अनिट् ।) वक्रत्वमिति वक्रं करोतीति औ रूपम् । ओ, भुग्नः । ग्र, सुजति गत्या वायुः । औ, भोक्ता । इति दुर्गादासः ॥
भुज, ध औ भोगे । भङ्गे । इति कविकल्पद्रुमः ॥ (तुधा०-परः सकः-अनिट् ।) ध, भुनक्ति । औ, अभौक्षीत् । भोगं पालनम् उपभोगश्च तस्मात् पालने परस्मैपदम् । इति बोधम् । भुनक्ति पृथिवीं राजा पालयतीत्यर्थः । उपभोगे तु दृष्टो जनो दुःखप्रहाणे भुङ्क्ते इति, दिवं मरुत्वानिव भोक्ष्यते महीमिति रघुः । एवं सुखमुपभुङ्क्ते इत्यादि च बोध्यम् । भुजोऽनवने इत्यत्र अनवनमात्मसंभावनपूजनेऽपि उपभोगस्य भक्षणजन्यतृप्तिजनकत्वविवक्षया सिद्धिरिति विद्यावागीशः । इति दुर्गादासः ॥
भुजः, पुं स्त्री, (भुजति वक्रो भवतीति । भुज+"हृग्रुधभ्रस्जीति ।" ३ । १ । १३५ । इति कः । यद्वा, भुज्यतेऽनेनेति । भुज+"हलश्चेति ।" ३ । ३ । १२१ । इति घञ् । इत्यत्र काशिकोक्तेः घञ् ।"भुजन्युजौ पाणियुपनायोः ।"७।३।९९। इति घञि गुणाभावः कुत्वाभावश्च निपात्यते ।) तत्पर्य्यायः । बाहुः २ प्रवेष्टः ३ दोः ४ । इत्यमरः । २ । ६ । ८० ॥ बाहुः ५ बाहा ६ भुजा ७ दोषः ८ दोषा ९ । इत्यमरटीकायां भरतः ॥ करः १० । इति मेदिनी । जे, १३ ॥ (यथा, रघुः । २ । ७४ ।
"भुजे भुजङ्गेश्वरशायिनश्चरे
भुवः स भूमेर्गुरुमात्मसञ्जम् ॥")
तस्य शुभाशुभलक्षणम् यथा,—
"कक्षा चाम्बरदा मेढा सुगन्धिर्भूरोमिका ।
अन्यथा अर्थहीनानामतौ निःस्वश्च रोमशौ ॥
निर्मांसौ चैव सुप्ताक्षौ शिरौ च विपुलौ भुजौ ।

भुजङ्गः

आजानुलम्बिनौ बाहू यस्यौ भीमौ नृपेश्वरे ।
विःखातां दोस्मतौ यस्यौ मेढौ करिकरप्रभौ ।"
इति गारुडे ६६ अध्यायः ॥
(दक्षिमुखः । यथा, महाभारते ।३।२७०।२१।
"नकुलस्तस्य बाहस्य वर्मीपमपरिवर्तिनः ।
अविद्धार्थं भुजं सम्यक् शत्रूणेव निरङ्कुशम् ॥")
मल्लक्रीडोपकरणार्थं राज्ञिप्रभृतीनां दण्डकाष्ठप्रभृतिः ।
राज्ञिप्रभृतिषु दण्डकाष्ठपर्यन्तमेकैकन्यूनप्रमाणविशेषः ।
यवराज्ञिभ्योऽधिकं यत् तदा हादशराज्ञिभ्यः
क्षोणश्च भुजः स्यात् । यथा,—
"दोस्त्रिभोर्णं त्रिभोर्हस्तै-
रूनोऽष्टाधिकं स्याद्भुजोनं त्रिभम् ।
कोटिरेकैकं त्रिभिर्भैः स्यात् पदं
सर्वमल्लोत्तमहाद्यर्थोऽयं वा भवेत् ॥"
इति मल्लावचारः ॥
हस्तस्य परिमाणविशेषः । यथा,—
"कोटिचतुष्टयं यत्र दोष्णयं तत्र का स्मृतिः ।
कोटिं दोः कर्णतः कोटिस्मृतिभ्याञ्च भुजं वदे ॥
दण्डो बाहुर्युगः स्यात्तत्पर्यायौ दिग्गजेन्द्रौ बाहुः ।
आद्ये चतुरत्नि वा सा कोटिः कोणिका तत्रज्ञैः ॥
तत्तत्कोर्वोगपदं कर्णः दोः, कर्णबाह्ययोर्विवरात् ।
भग्नं कोटिः तच्छ्रुतिस्तत्कोरन्तरात् पदं बाहुः ॥"
इति शीघ्रावबोधे हस्तव्यवहारः ॥
भुजकोटरः, पुं, (भुजस्य कोटर इव ।) कक्षः ।
इति हेमचन्द्रः । ५ । ३५३ ॥
भुजगः, पुं, (भुजं वक्रं गच्छतीति । गम् + डः । इ।
८।३८। इत्यत्र "खच डिदित्वाद्यः ।" वार्त्तिकोक्तेः
डित् । ततः टिलोपः ।) सर्पः । इत्यमरः ।
२ । ८ । ६ ॥ (यथा, मेघदूते । ६२ ।
"लक्ष्मीं हित्वा भुजगवलयं घ्नन्मुना दत्तहस्ता ।
क्रीडाशैले यदि च विचरत् पादचारेण गौरी ॥")
भुजगदारकः, पुं, (भुजगं दारयतीति । दृ +
णिच् + ण्वुः ।) गरुडः । इति राजनिर्घण्टः ॥
भुजगाभोजी, [न्] पुं, (भुजगं आ सम्यक्प्रकारेण
भुङ्क्ते इति । भुजग + आ + भुज + णिनिः ।)
मयूरः । इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, (भुजगस्य अशनः ।) गरुडः ।
इति राजनिर्घण्टः ॥
भुजगाशनः, पुं, (भुजगमश्नातीति । अश + ल्युः ।
भुजगः अशनं यस्येति वा ।) गरुडः । इति
त्रिकाण्डशेषः ॥
भुजङ्गः, पुं, (भुजं वक्रं गच्छतीति । गम + खच् ।
"खच डिदाद्यः" इति वार्त्तिकोक्तेः डित्त्वात्
टिलोपः ।) सर्पः । (यथा, रघुः । ६ । ७८ ।
"आक्रान्तपूर्व्वमिव सप्तविधं भुजङ्गं
प्रोवाच कोऽयमतिः प्रथमापराद्धः ॥")
विटः । इत्यमरः । १ । ८ । ६ । मेदिनी च ॥
(यौगम् । तद्यथा,—
"यौगं यत्र यत्र योगेष्टं नागनामकम् ॥"
नागनामकम् । नागः भुजङ्ग इत्यादि ।)
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अवरश्च तदर्थे ।

भुजङ्गा

"चिह्नहीना भुजङ्गस्य गन्धपीयूषपल्लवम् ॥
सुरतालक्तपोर्द्वौ द्वौ वल्लीकोऽङ्गनास्तनम् ।
अन्यन्मौक्तिकं जातं पद्मं विमलमञ्जनम् ॥"
इति वाभटे उत्तरतन्त्रे त्रयोदशेऽध्याये ॥)
भुजङ्गघातिनी, स्त्री, (भुजङ्गं सर्पं तद्विषं वा
हन्तीति । हन + णिनिः । स्त्रियां ङीप् ।)
उच्चटिङ्गः । कट्फलिका इति ख्यातः । तत्-
पर्य्यायः । छदिः २ सर्पाक्षी ३ क्षुद्रकरी ४
अजा ५ । इति शब्दचन्द्रिका ॥ सर्पनाशिनी च ॥
भुजङ्गजिह्वा, स्त्री, (भुजङ्गस्य जिह्वेव आकृतिः
यस्याः ।) महाचमड़ा । इति राजनिर्घण्टः ॥
(भुजङ्गस्य जिह्वा ।) सर्परसना च ॥ (विवरण-
मस्या महाचमड़ाशब्दे ज्ञातव्यम् ॥)
भुजङ्गप्रयातं, क्ली, (भुजङ्गवत् प्रयातं गतिरिव
भङ्गीमान् शब्दविन्यासो यस्य ।) हादशाक्षर-
पादच्छन्दः । यथा, कालिदासकृतश्रुतबोधे ।
"यदाद्यचतुर्थेन तथा सप्तमेन
त्रयेणाक्षरं दृश्यमेकादशाद्यम् ।
शरश्चन्द्रविद्वेषिवक्त्रारविन्दं
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥"
(अधिकन्तु छन्दःशब्दे ज्ञातव्यम् ।)
भुजङ्गभुक्, [ज्] पुं, (भुजङ्गं भुङ्क्ते इति । भुज +
क्विप् ।) गरुड़ः । इति शब्दरत्नावली ॥ मयूरः ।
इत्यमरः । २ । ५ । ३० ॥ (मयूरार्थे पर्य्यायो
यथा,—
"मयूरश्चन्द्रकी केकी मेघनादो भुजङ्गभुक् ।
शिखी शिखावलो बर्हो शिखण्डी नीलकण्ठकः ॥
सुकलापाङ्गः कलापी च मेघनादः कलाप्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)
भुजङ्गभोजी, [न्] पुं, (भुजङ्गं भुङ्क्ते इति ।
भुज + णिनिः ।) राजसर्पः । इति हेमचन्द्रः ॥
भुजङ्गमः, पुं, (भुज कौटिल्ये + इगुपधेति कः ।
भुजः कुटिलोभवन् गच्छतीति । भुज +
गम् + "गमेः सुपि वाच्यः ।" ३ । १ । ३८८ ।
इत्यस्य वार्त्तिकात् खच् । "खचडिदाद्यः ।" इति
डिद्भावे टिलोपाभावः ।) सर्पः । इत्य-
मरः । २ । ८ । ६ । (यथा, रघुः । ६ । ७७ ।
"आरूढमद्रीनुदधीन् वितीर्णं
भुजङ्गमानां वसतिं प्रविष्टम् ॥")
सीसके, क्ली । इति राजनिर्घण्टः ॥
भुजङ्गलता, स्त्री, (भुजङ्गवत् कुटिला तत्प्रिया
वा लता ।) नागवल्ली । इति राजनिर्घण्टः ॥
भुजङ्गहा, [न्] पुं, (भुजङ्गं हन्तीति । हन् +
क्विप् ।) गरुड़ः । इति त्रिकाण्डशेषः ॥
भुजङ्गाक्षी, स्त्री, (भुजङ्गस्य अक्षीव पृथ्वं यस्याः ।
"अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ । इति अच् ।
गौरादित्वात् ङीष् ।) रात्रा । इत्यमरः ।
२ । ४ । ११५ ॥ (राज्ञा भेदनाद् इति शब्दे ।
तस्याः पर्य्यायान्तरम् ।
"वाङ्गली सरसा नागसुगन्धा गन्धवाङ्गली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाक्षी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भुजिष्या

भुजङ्गाख्यः, पुं, (भुजङ्गस्य आख्या आख्या यस्य ।)
नागकेशरः । इति शब्दमाला वर्णनामके,
त्रि ॥
भुजङ्गिरः, [स्] क्ली, (भुजस्य शिर इव ।)
स्कन्धः । इत्यमरः । २ । ६ । ७८ ॥
भुजा, स्त्री, (भुज + टाप् ।) बाहुः । करः । इति
मेदिनी । जे, १२ ॥ (यथा, शिशुपालवधे ।७।७१।
"अविरतकुसुमावचायखेदा
द्विहितभुजाजतयैकयोपलब्धम् ॥")
भुजाकण्टः, पुं, (भुजायाः करस्य कण्ट इव ।)
दन्तनखः । इति हेमचन्द्रः ॥
भुजादण्डः, पुं, (भुजायां बाहोर्दण्ड इव ।) हस्तः ।
इति त्रिकाण्डशेषः ॥
भुजान्तरं, क्ली, (भुजयोरन्तरं मध्यम् ।) क्षौमम् ।
इत्यमरः । २ । ६ । ७७ ॥ (वक्षः । यथा, रघुः । ६ । ४ ॥
"दिशो दशेव द्विरदानुभाभ्यां
प्रविश्य भीमासुरयोर्निषेदुषीः ।
पपावनास्वादितपूर्व्वमाशुगाः
कृतज्ञतेनेव मनुष्यशोणितम् ॥"
भुजस्यान्तरं प्रभेदः ।) हस्तप्रभेदश्च ॥
भुजिः, पुं, (भुनक्ति भुङ्क्ते वा सर्व्वमिति ।
भुज + "भुजेः किच्च ।" उणा० ४ । १३९ । इति
इः । स च कित् । सर्व्वभक्षकत्वादस्य तथा-
त्वम् ।) वह्निः । इत्युणादिकोषः ॥ (भुज + भावे
इः । भोगः । यथा, ऋग्वेदे । ८ । ६१ । ६ ।
"आसवं सवितुर्यथा भगस्येव भुजिं हुवे ।
अग्निं वसुदवाससम् ॥"
"सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव
भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च
वसुद वाससमग्निं आहुवे आह्वयामि ।" इति
तद्भाष्ये सायणः ॥ * ॥ भोक्तरि, त्रि । यथा,
ऋग्वेदे । ८ । ८ । २ ।
"भुजी हिरण्यपेशसा कवी नमोरचेतसा ॥"
"हे भुजी हविषां भोक्तारौ ।" इति तद्भाष्ये
सायणः ॥)
भुजिष्यः, पुं, (भुनक्ति खाद्यवस्त्विति भुज्यते
इति वा भुज + "ऋचिभुजिभ्यां किष्यन् ।"
उणा० ४ । १७८ । इति किष्यन् ।) क्षेत्रजः ।
दासस्तक्षम् । दासः । इति मेदिनी । ये, ६८ ॥
(यथा, माघे । १५ । ६३ ।
"किमद्भो नृपः समममीभि-
रुपपतिसुतैर्न पञ्चभिः ।
वधमभिहत भुजिष्यमसुं
सह धानया खविरराजकन्यया ॥")
रोगः । इति संक्षिप्तसारोणादिवृत्तिः ॥
भुजिष्या, स्त्री, (भुजिष्य + टाप् ।) दासी ।
(यथा, रघुः । ६ । ५६ ।
"अथाङ्गदाश्लिष्टभुजं भुजिष्या
हैमाङ्गदं नाम कलिङ्गनाथम् ।
आसेदुषीं सादितयूथपूथं
वाजामवाजेन्द्रसखीं वभाषे ॥")
शम्बिका । इति मेदिनी । ये, ६६ ॥

भुवनं

भुज्युः, पुं, (भुज्यतेऽनेति। भुज भक्षणे + "भुजि-नहिभ्यां युक्त्युकौ।" उणा० ३। २१। इति युक्।) भाजनम्। इत्यादिकोषः। २। २०३॥ भाजनम्। (भुङ्क्ते सर्व्वमिति। भुज + कर्त्तरि युक्।) अग्निः। इति संक्षिप्तसारोणादिवृत्तिः॥ (स्वनामख्यातराजविशेषः। यथा, ऋग्वेदे। ४। २७। ४।

"ऋजिप्या वृमिन्द्रावतो न भुज्युं
प्लवितो जभार इहतो अधिक्षोः॥"

भुनक्ति पालयतीति। भुज पालने + युक्। रक्षके, त्रि। यथा, ऋग्वेदे। ८। २२। २।

"पूर्व्यामहं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम्॥"

"भुज्युं भुजपालने सर्व्वस्य रक्षकम्॥" इति तद्भाष्ये सायणः॥)

भुक्त, [त्] त्रि, (भुज् + क्त।) भोगकर्त्ता। भुजधातोः क्तप्रत्ययनिष्पन्नोऽयम्॥

भुक्तिः, पुं, (भुज् + क्तिन्।) भोगकर्त्ता। यथा,—

"भुञ्जानो वर्द्धयेत् पापमसत्यं संसदि ब्रुवन्।"
इति प्रायश्चित्ततत्त्वम्॥

(तथा च।

"अग्निनोदकं युक्त्वा भुञ्जानश्चान्तरा पिबेत्॥"
इति सुश्रुते शल्यस्थाने। ४ अ०।)

भुरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति। भृञ् + "भृञ उच्च।" उणा० २। ७२। इति इजिः। धातोरुकारान्तादेशः।) पृथिवी। इत्यादिकोषः॥ (द्विवचनान्तत्वे। बाहू। द्यावापृथिव्यौ च। यथा, ऋग्वेदे। ४। २। १४।

"रथं न क्रन्तो अपसा भुरिजो
ऋतं येमुः सुध्य आशुषाणाः॥"

"भुरिजोः विश्वतः कर्म्मकरणसामर्थ्यं पदार्थान् वेति भुरिजौ बाहू तयोः। यद्वा, भुरिजोः देवान् मनुष्यांश्च बिभर्त्तीति भुरिजौ द्यावापृथिव्यौ।" इति तद्भाष्ये सायणः॥)

भुवनं, क्ली, (भवन्त्यस्मिन् भूतानीति। भू + "भूसृ-धृञ्यसृजिभ्यश्छन्दसि।" उणा० २। ८०। इत्यत्र बहुलवचनाद्भावायामपि प्रयुज्यते।" इत्युज्ज्वल-दत्तोक्त्या क्यन्।) जगत्। (यथा, भट्टिः। १।१।

"गुरुर्भरं भुवनहितक्षमेण यं
सनातनः पितरमुपागमत् स्वयम्॥")

सलिलम्। गगनम्। जलम्। इति मेदिनी। ने, १०२॥ चतुर्दशभुवनानि यथा,—

"चतुर्दशविधं ह्येतद् भूतसर्गं प्रकीर्त्तितम्।
भूर्भुवः स्वर्महश्चैव जनश्च तप एव च॥
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः।
जम्बूः प्लाक्षः कुशः क्रौञ्चः शाल्मलो मेरुपुष्करः।
सप्तद्वीपाः प्रधानानि क्षुपद्वीपैस्तु संयुताः॥
लवणः क्षीरसंज्ञश्च सुतोदो दधिसंज्ञकः।
सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत्।
पातालाः सप्त तेषान्तु पुष्करिण्यश्च ताः स्मृताः॥
उत्तराः कुरवो रम्यं वर्षं हैमवतं तथा।
भद्राश्वं केतुमालञ्च तथा वर्षमिलावृतम्॥
भारतं हरिवर्षञ्च तथा किंपुरुषाह्वयम्।
एतान्यष्टौ तु वर्षाणि पुण्यानि कथितानि तु॥
इन्द्रद्युम्नः कसेरुश्च ताम्रवर्णो गभस्तिमान्।
नागद्वीपी तथा सौम्यो गन्धर्व्वो वारुणस्तथा॥
सागराख्यस्तु नवमो भेदभारतवार्षिकः।
इदन्तु भारतं वर्षं कर्म्मभूमिरिति स्मृतम्॥
शेषाणि द्वीपवर्षाणि भोगस्थानानि सर्व्वशः।
भागीरथी पावनी च हरिणी ह्लादिनी तथा॥
सीता वक्षुश्च सिन्धुश्च सप्त गङ्गाः प्रकीर्त्तिताः।
सुप्रभा काञ्चनी चैव विद्युता सुमनोहरा॥
वसुधोघवतादा च सुवस्तुविमलोदका।
एता गङ्गास्तु विख्याताः सप्त पुण्यप्रदाः शुभाः॥
हिमवान् हेमकूटश्च निषधो नीलपर्व्वतः।
श्वेतश्च शृङ्गवान्मेरुर्माल्यवान् गन्धमादनः॥
मन्देहो मलयः सह्यः शुक्तिमान्ऋक्षवानपि।
विन्ध्यश्च पारियात्रश्च कैलासो मन्दरस्तथा॥
लोकालोको महांश्चैषु तथैवोत्तरमानसः।
एते विंशतिविख्याताः पर्व्वताश्चास्मृथा वराः॥
अतलं सुतलञ्चैव वितलञ्च गभस्तिमत्।
महातलं रसातलं पातालं सप्तमं स्मृतम्॥
कृष्णभौमं शिलाभौमं पातालं नीलरक्तिकम्।
रक्तपीतश्वेतवर्णभौमानि च भवन्त्यपि॥
पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम्।
सुधिरं तानि कथ्यन्ते भुवनानि चतुर्दश॥"
इति वह्निपुराणम्॥

(भूतजातम्। यथा, ऋग्वेदे। १। १५७। ५।

"युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वग्नः।"

तथा च वाजसनेयसंहितायाम्। ६। ५।

"यस्यामिदं विश्वं भुवनमाविवेश तस्यां नो देवः सविता धर्म्म साविषत्॥" * ॥ भावनम्। यथा, ऋग्वेदे। १०। ८८। १।

"तस्य भर्म्मणे भुवनाय देवा धर्म्मणे कं स्वधया पप्रथन्त॥" * ॥ पुं, मुनिविशेषः। यथा, महाभारते। १३। २६। ८।

"विनयाद्भुवनो धौम्यः श्रुताग्र्यो ऽवाप सत्तमः॥")

भुवनकोष(ग्रन्थ, पुं, (भुवनस्य कोष इव।) भूगोलः। (अस्य विवरणं श्रीभागवते पञ्चमस्कन्धे। १६। १७। १८। अध्याये द्रष्टव्यम्। तथाच।

"जम्बुप्लक्षशाल्मलकुशक्रौञ्च-
शाकपुष्करसंज्ञाः सप्त द्वीपाः।
लवणेक्षुसुरासर्पिर्दधिदुग्धस्वच्छोदकसंज्ञैः पर-
खरदिगुणैः।
सप्तसप्तभिर्वलयाकारैस्ते द्वीपाः परिधिष्ठिताः॥
योऽसौ मनुपुत्रः प्रियव्रतो नाम स सप्तद्वीपा-
धिपतिर्बभूव। तस्य अग्नीध्रादयो दश पुत्रा
बभूवुः॥१॥ तयः प्रव्रजिताः। त्रिवर्गाः सप्तानां
सप्त द्वीपाः पित्रा दत्ताः। तत्र जम्बुद्वीपाधि-
पतेरग्नीध्रस्य नव पुत्रा जाताः॥

नाभिः किंपुरुषश्चैव हरिवर्षः इलावृतः।
रम्यो हिरण्मयश्चैव कुरुभद्राश्च केतुमान्॥५॥
नववर्षाणि विभज्य पुत्रेभ्यः पित्रा दत्तानि वर्षं
प्रविष्टता। अग्नीध्रोऽयं हिमाह्वयम्। यस्याधि-
पतिर्नाभेः ऋषभः पुत्रो बभूव॥६॥ ऋषभाद्भरतो
भरेण चिरकालं धर्म्मेण पालितत्वादिदं भारतं
वर्षमभूत्। इलावृतस्य मध्ये मेरुः सुवर्णमय-
श्चतुरशीतिसहस्राणि योजनानि तस्योच्छ्रायः।
षोडशसहस्रमप्यधस्तादवगाढः तद्विगुणो मूल-
विस्तारः॥६॥ तस्याधो ब्रह्मणः पुरी। ऐन्द्रादि-
क्रमेण चामरावती। आग्नेय्यामग्नेर्ज्वलती।
याम्यां यमस्य संयमनी। नैर्ऋत्यां निर्ऋतेर्भय-
करी। वारुण्यां वरुणस्य विभावरी। वायव्यां
वायोर्गन्धवती। उदीच्यां सोमस्य विभावरीति
नववर्षान्वितं जम्बूद्वीपं पुण्यपर्व्वतैः पुण्यनदी-
भिरन्वितम्॥७॥ किंपुरुषादीन्यष्टवर्षाणि पुण्य-
वतां भोगस्थानानि साक्षाद्भारतवर्षमेकं कर्म-
भूमिश्चातुर्वर्ण्यपूरुषम्॥८॥
तत्रैव कर्म्मभिः स्वर्गं यान्ति प्राप्यन्ति मानवाः।
मुक्तिञ्चैव निष्कामैः प्राप्यते ज्ञानकर्म्मभिः॥९॥
अधोगतिमितो विप्र! यान्ति वै पापकारिणः।
ये पापकारिणस्तान् विद्धि पातालतले नरके
कोटिसमन्वितान्॥१०॥ अथ सप्तकुलपर्व्वताः
कथ्यन्ते। माहेन्द्रः। मलयः शुक्तिमान् ऋक्षवान्
सह्यपर्व्वतः विन्ध्यः पारियात्रः। इत्येते भारतं
कुलपर्व्वताः॥११॥ नर्म्मदासुरसाऋषिकुल्याभी-
मरथीकृष्णावेणीवञ्जभागानाख्यपर्णी इत्येताः;
सप्त तद्यः गङ्गायमुनागोदावरीतुङ्गभद्राकावेरी-
सरयूरित्येता महानद्यः पापघ्न्यः॥१२॥
जम्बुनाम्ना च विख्यातं जम्बूद्वीपमिदं शुभम्।
लक्षयोजनविस्तीर्णमिदं श्रेष्ठं तु भारतम्॥१३॥
अग्नीध्रादिपुत्रा अनघाः निष्कामा ये स्वध-
र्म्मेण नरसिंहं यजन्ति ते तत्र निवसन्ति अधि-
कारक्षयात् मुक्तिं च प्राप्नुवन्ति॥१४॥ जम्बोः
स्वादूदकाख्याः सप्त पयोधयः। ततः परा
हिरण्मयी भूमिः। ततो लोकालोकपर्व्वतः
सप्त भूमीकः॥१५॥ अस्योपरि अन्तरिक्ष-
लोकः खेचराणां रम्यस्तदूर्द्धं स्वर्गलोकः॥१६॥
स्वर्गस्थानं महापुण्यं प्रोच्यमानं निबोध मे।
भारते जन्मपुण्यानां देवानामपि चाजनम्॥१७॥
मध्ये पृथिव्यामग्नीध्रो भास्वान् मेरुर्हिरण्मयः।
योजनानां सहस्राणि चतुरशीतिसुच्छ्रितः॥१८॥
प्रविष्टः षोडशाधस्ताद्धरण्यां धरणीधरः।
तावन्मानाच्च पृथिवी पूर्व्वतश्च समन्ततः॥१९॥
तस्य ब्रह्मभयं मूर्द्धि स्वर्गो यत्र प्रतिष्ठितः।
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम्॥२०॥
मध्यमं पश्चिमं पूर्व्वं मेरोः ब्रह्मादि लोकि वै।
मध्यमं स्फाटिकं ब्रह्म वैदूर्य्यमधिकामयम्॥२१॥
इन्द्रनीलमयं पूर्व्वं माणिक्यं पश्चिमं स्मृतम्।
योजनानां सहस्राणि नियुतानि चतुर्दश॥२२॥
उच्छ्रितं मध्यमं ब्रह्म स्वर्गो यत्र विधिष्ठितः।
अग्नभाग्नरितं ब्रह्म मूर्द्धि ब्रह्मादिविष्ठितम्।

पूर्वतत्तदद्वयोर्मध्ये अन्तरं मध्यमस्य च ।
त्रिविष्टपो नाकपृष्ठे स्वरा: सन्ति त्रिपृंसका:॥२७॥
आनन्दोऽथ प्रमोदश्च स्वर्गद्वारे तु मध्यमे ।
चैत्यश्च पौष्टिकश्चैव उपशोभनमञ्जकौ ॥ २५ ॥
आकाश: स्वर्गराजा वै स्वर्गद्वारे तु पश्चिमे ।
त्रिमेधो विरजद्वार: सौभाग्यख्यातिविभ्रमा:॥२६॥
स्वर्गाश्चैव द्विजश्रेष्ठ ! पूर्वद्वारे समाश्रिता: ।
एतानि विद्धि स्वर्गा वै त्रिविष्टा मेरुमूर्द्धनि ॥२७॥
अग्निष्टोमादिकर्तारो यज्ञानां तपसां तथा ।
तत्रैव विवसन्ति स्म जना: क्रोधविवर्जिता:॥२८॥
अजप्रमोदे नाकस्थं प्रमोदं वह्निसाधने ।
मृगुप्रपाते सौख्यं च रत्नं वैवास्वतं निर्मलम् ॥२९॥
अनाद्यके तु संन्यासे मतो गच्छेत्त्रिविष्टपम् ।
ऋतुयाजी नाकपृष्ठं अग्निहोत्री च निर्वृतिम् ॥ ३० ॥
तद्वागतूपकर्त्ता च लभते पौष्टिकं द्विज: ।
सुवर्णदायी सौभाग्यं लभन् स्वर्गतप:फलम् ॥३१॥
घृतकाशे महावह्निं प्रज्वालयति यो नर: ।
सर्वकामसमृद्धार्थाः स्वर्गं सोऽपरमं लभेत्॥३२॥
हिरण्यमोदप्रदाने हि निरहङ्कारमाप्नुयात् ।
भूमिदानेन सुखेन लभते शान्तिकं पदम् ॥३३॥
रौप्यदानेन स्वर्गं तु निर्मलं लभते नर: ।
अश्वदानेन पृथ्वायां कन्यादानेन मङ्गलम् ॥३४॥
द्विजेभ्यश्चैवं दत्वा दत्वा वस्त्राणि भक्तित: ।
श्वेतं तु लभते स्वर्गं यत्र गत्वा न शोचति ॥३५॥
कपिलामोक्षदानेन परमार्थं महीयते ।
गोवृषस्य प्रदानेन स्वर्गं मन्वयमाप्नुयात् ॥३६॥
माघमासे सरित्स्नायी तिलधेनुप्रदस्तथा ।
छत्रोपानद्दाता च स्वर्गं याम्युपशोभनम् ॥३७॥
देवतायतनं कृत्वा द्विजगुप्तिकरस्तथा ।
तीर्थयात्रापरश्चैव स्वर्गराज्ये महीयते ॥ ३८ ॥
एकान्नभोजी यो मर्त्यो नक्तभोजी च नित्यश:।
उपवासी चिरात्स्वर्गे: शान्त: स्वर्गं सुखं लभेत् ॥ ३९ ॥
सरित्स्नायी जितक्रोधो ब्रह्मचारी दृढव्रत: ।
निर्मलं स्वर्गमाप्नोति यथाभूतचिंते रत: ॥४०॥
विद्यादानेन मेधावी निरहङ्कारमाप्नुयात् ।
येन येन हि भावेन यद्यद्दानं प्रयच्छति ॥४१॥
तत्तत्फलमवाप्नोति यद्यदिच्छति मानव: ।
चत्वारि अतिदानानि कन्या गौर्भू: सरस्वती॥४२॥
नरकाद्दुद्धरन्त्येते अपवाहनदोहनात् ।
अन्नं सर्वाणि दानानि आत्मविद्यः प्रयच्छति ॥ ४३ ॥
संप्राप्य न निवर्त्तन्ते स्वर्गं शान्तमनामयम् ।
अङ्गे तु पश्चिमे यत्र ब्रह्मा तत्र स्थित: स्वयम्॥४४॥
पूर्वमङ्गे सुखं विष्णु: मध्ये चैव शिव: स्थित: ।
अत: परं तु विप्रेन्द्र ! स्वर्गांश्चापरिमितं ब्रजेत्॥४५॥
विमलं विपुलं सुखसुवर्णपरिवर्तितम् ।
प्रथमे तु कुमारस्तु स्थितोऽथ मातर: स्थिता:॥४६॥
तृतीये विष्णुमन्त्रार्था तुर्ये विद्याधरा द्विज ॥
पञ्चमे यातनाश्चान्या च षष्ठे तु विषयाहृत:॥४७॥

भू

नवमे तु तथा दक्ष आदित्यो दशमे पथि ॥४८॥
भूर्लोकाच्छतसाहस्रादूर्द्धं चरति भास्कर: ।
योजनानां सहस्रे द्वे विष्कम्भवलयं तत: ॥ ४९ ॥
त्रिगुणं परिवार्यैव सूर्यबिम्बं प्रभास्वत: ।
सोमपुर्यां विभावर्यां मध्याह्ने चार्यमा यदा ।
महेन्द्रसाम्परावर्त्ता तदा तिष्ठति भास्कर: ॥५०॥
मध्याह्ने समरावर्त्ता यदा भवति भास्कर: ।
तदा संवर्तने याम्ये तत्रोत्तांस्तु प्रदक्षते ॥५१॥
मेरुं प्रदक्षिणं कुर्वन् भानवेव सविता यदा ।
ध्रुवाधारक्षयोत्तिष्ठन् वालिखिल्यादिभि:
स्तुत: ॥ ५२ ॥
इति श्रीनरसिंहपुराणे भुवनकोशे त्रिंशोऽध्याय: ॥ ३० ॥)

भुवन्यु:, पुं, (भवतीति। "कन्युच् त्रिपेच्च।" उणा० ३।५१। इति यकारात् भूधातोरपि कन्युच्।) सूर्य:। वह्नि:। चन्द्र:। इति मेदिनी। ये, ८८॥ प्रभु:। इत्यजादिकोष:॥

भुवर्लोक:, पुं, (भुवश्चासौ लोकश्चेति।) भूरादिसप्तलोकानामन्तर्गतद्वितीयलोक:। यथा,—
"भूमिसूर्यान्तरं यच्च सिद्धादिसुनिसेवितम्।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम!॥"
इति विष्णुपुराणे। २ अंशे ७ अध्याय:॥
(यथा च भागवते। २।५।८।
"भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य नाभित:।
हृदा स्वर्लोक उरसा महर्लोको महात्मन:॥")

भुव:, [स्] अ, (भवतीति। भू+"भूरुब्भ्यां किन्।" उणा० ४।२१६। इति असुन् स च किन्।) आकाश:। इति हेमचन्द्र:॥ (महाव्याहृतिभेद:। यथा, मनु:। २।७६।
"अकारञ्चाप्युकारञ्च मकारञ्च प्रजापति:।
वेदत्रयान्निरदुहत् भूर्भुव: स्वरितीति च॥")

भुवि:, [स्] स्त्री, (भवतीति भवत्यस्मिन् रत्नादीनि वा। भू+"सृवृभूशुषिमुषिभ्य: कित्।" उणा० २।१२३। इति इसिन्। स च कित्।) वसुधा:। इत्युणादिकोष:॥

भू, सत्तायाम्। इति कविकल्पद्रुम:॥ (भ्वा०-पर०-अक०-सेट्।) सत्तैव द्विविधा। उत्पत्तिर्विद्यमानता च। भवति मनुष्योऽथवा विष्णु:। इति दुर्गादास:॥

भू, क्त मुद्धिचिन्तयो:। भिन्नमेति। इति कविकल्पद्रुम:। (चुरा०-पर०-सक०-सेट्।) क, हृद्यवद्भावयति द्विज: सर्व्वान्। अयोऽर्था:। इति दुर्गादास:॥

भू, क ड प्राप्तौ। इति कविकल्पद्रुम:॥ (चुरा०-आत्म०-सक०-सेट्।) क ड, भावयते। इति दुर्गादास:॥

भू, न प्राप्तौ। इति कविकल्पद्रुम:। (भ्वा०-उभ०-सक०-सेट्।) न, भवति भवते धनं घोर:। भवत्येव कथायां प्राप्तिसम्भवज्ञापकमिति महान्त:। भवते दुरितक्षयं यशोऽक्षतुभिर्भावयते

भूकर्ण्यु

आलालनेपरिणं मत्वा प्राप्तौ परस्मैपदं कथार्थस्वेवानिकार्थत्वात् समाधत्ते। इति दुर्गादास:॥
भू,य,(भू+क्विप्।) रसातलम्। इति हेमचन्द्र:॥
भू:, स्त्री, (भवन्त्यस्मिन्निति। भू+अधिकरणे क्विप्।) पृथिवी। इत्यमर:। २।१।२॥ (यथा, मनु:। ७।६।
"न चैनं शुचि भुञ्जीत क्वचिदप्यभिवीक्षितम्॥"
यथा च वैद्यकरत्नमालायामस्या: पर्य्याय:।
"भूर्भूमि: पृथिवी पृथ्वी मेदिनी वसुधार्वणि:।
क्षितिरुर्व्वी मही क्ष्मा धरा कुर्वसुन्धरा॥")
स्थानमात्रम्। इति मेदिनी। मे, १॥ (यथा, भागवते। ६।७।३१।
"यच्छक्तयो वदतां वादिनां वै
विवादसंवादसुवो भवन्ति॥"
यज्ञाग्नि:। इति जटाधर:॥
भूक, क्ली, (भवन्तीति। भू+"खुक्षभूमुधिसुधिभ्य: कक्।" उणा०३।४१। इति कक्।) छिद्रम्। काल:। इति मेदिनी। के, ३०॥
भूक:, पुं, (भू+कक्।) अन्धकार:। इति शब्दमाला॥
भूकदम्ब:, पुं, (भुवि कदम्ब इव।) अलम्बुषवृक्ष:। इति रत्नमाला॥ लोकसीम। इति भाषा॥
भूकदम्बक:, पुं, (भूकदम्ब+संज्ञायां कन्।) यवानी। इति राजनिर्घण्टु:॥ (विहतिविशेषोऽस्य यवानीशब्दे ज्ञातव्य:।)
भूकन्द:, पुं, (भुव: पृथिव्या: कन्द इव।) मञ्जिष्ठा। इति राजनिर्घण्टु:॥ शुक्लकुड़ो। इति भाषा॥
भूकम्प:, पुं, (भुव: पृथिव्या: कम्प:।) भूमिकम्पनम्। स च अद्भुतविशेष:। यथा, अद्भुतसागरे।
"मेघे दृष्टिकरे गज: प्रचलति वाताहिभि:
क्षुब्धते
चापि मीनकुलीरमे च वृषभे सर्वं चलेत् कच्छप:।
यूके कुम्भधरे सगेन्द्रमिथुने कन्यान्वगे पन्नग-
क्षोभैकतमो यदि प्रचलति क्षौणी तदा
कम्पते॥
"कच्छपे मरणं क्षेमं मरणञ्चापि मज्जने।
सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे॥
प्रथितनरेश्वरमरणं सवयवाम्भोजमारुतयो:।
क्षुद्भयमतिवृद्धिभिरपरीक्ष्यं जगत्यापि॥
त्रिचतुर्थपञ्चमदिने मासे वर्षे त्रिपञ्चके।
भवति यदा भूकम्प: प्रधानवृक्षप्रवाहं क्षुभते॥"
स च भूमिजोत्पातविशेष:। यथा,—
"चरस्थिरभवं भौमं भूकम्पमपि भूमिजम्।
जलाग्नयानां वैक्लव्यं भौमन्तदपि द्वीपिनम्॥
भौमं भाग्यक्षयं क्षेमं चिरेण परिपच्यते।"
इति ज्योतिस्तत्त्वम्॥
भूकर्ण्डारक:, पुं, क्षुद्रविशेष:। छोटालचोड़ा

जलः २ भूरीशुः ३ लघुग्रीवः ४ लघुपिच्छिलः५ लघुग्रीतः ६ क्षुद्रजलः ७ लघुभूतद्रुमः ८ भूकर्ब्बुदारः ९। अस्य गुणाः। मधुरत्वम्। क्रमिश्लेष्मनाशित्वम्। वातप्रकोपकत्वम्। किञ्चित् ग्रीतत्वम्। खर्ज्जूरादत्वच्च। इति राजनिर्घण्टः॥

भूकलः, पुं, (भुवः पृथिव्याः कलः।) दुर्विनीताश्वः। इति राजनिर्घण्टः॥

भूकल्पः, पुं, (भुवि पृथिव्यां कल्पः इव भुवः कल्प इति वा।
"तस्य कल्पस्यांशसंज्ञिजस्य कल्पोपमः।
वसुदेव इति ख्यातो गोषु तिष्ठति भूमले॥"
इति हरिवंशीयवचनेनास्य कल्पांशसम्भूतत्वात् तथात्वम्।) वसुदेवः। इति त्रिकाण्डशेषः॥

भूकाकः, पुं, (भुवि ख्यातः काकः।) स्वल्पकङ्कः। क्रौञ्चः। नीलकपोतः। इति शब्दरत्नावली॥

भूकुक्षी, स्त्री, (भुवि कुक्षीव।) भूपाटली। इति राजनिर्घण्टः॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव।) विदारी। इति राजनिर्घण्टः॥

भूकेशः, पुं, (भुवः पृथिव्याः केश इव।) शैवलः। वटः। इति मेदिनी। शे, २६॥

भूकेशा, स्त्री, (भूकेश+टाप्।) राक्षसी। इति शब्दरत्नावली॥

भूकेशी, स्त्री, (भूकेश+स्त्रियां ङीष्।) अवल्गुजः। इति मेदिनी। शे, २७॥

भूक्षित्, पुं, (भुवं क्षिणोतीति+क्षिद्+क्विप्।) शूकरः। इति त्रिकाण्डशेषः॥

भूखर्ज्जूरी, स्त्री, (भूसंलग्ना खर्ज्जूरी। प्राकृतार्थिवादिवत् समासः।) क्षुद्रखर्ज्जूरी। तत्पर्य्यायः। भूयुक्ता २ वसुधाखर्ज्जूरिका ३ भूमिखर्ज्जूरी ४। अस्या गुणाः। मधुरत्वम्। ग्निग्धत्वम्। दाहपित्तहरत्वञ्च। इति राजनिर्घण्टः॥

भूगरं, क्ली, (भुवः पृथिव्या गरम्।) विषम्। इति राजनिर्घण्टः॥

भूगर्भः, पुं, भवभूतिः। स च मालतीमाधवादिनाटककर्त्ता। इति जटाधरः॥ (भूः सर्व्वभूतात्मभूता पृथ्वी गर्भे कुक्षौ यस्येति। विष्णुः। यथा, महाभारते। १३। १४८। २१।
"हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥")

भूगोलः, पुं, (भूर्गोल इव।) भुवनकोषः। (यदुक्तं सूर्य्यसिद्धान्ते।
"मध्ये समन्तादस्य भूगोलो योजने स्थितः।
बिभ्राणः परमां मूर्त्तिं ब्रह्मणो धारणात्मिकाम्॥")
तस्य विवरणम्। यथा,—
"प्रलयेषु महान् जातोऽहङ्कारो महतः पुनः।
तस्मादपि च भूतादेरभ्रः सम्भोऽथ रूपकम्॥
रसो गन्धश्च पञ्चैव गुणा नाम प्रकीर्त्तिताः।
पञ्चेमानि महाभाग! महाभूतानि सम्भवात्।
तेभ्य एव प्रजातानि सर्व्वाणि गुणवन्ति च॥
भूमिरापस्तथा वायुरग्निराकाशमेव च।
गुणोत्तराणि सर्व्वाणि तेषां भूमिः प्रधानतः॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः।
भूमावेते गुणाः प्रोक्ता दूषयन्ति परतः क्रमात्॥
चत्वारोऽप्सु गुणा ब्रह्मन्! गन्धस्तत्र न वर्त्तते।
शब्दः स्पर्शश्च रूपञ्च त्रय एव हि तेजसि॥
शब्दः स्पर्शोऽथ वायोस्तु आकाशे शब्द एव हि।
एते पञ्च गुणाः प्रोक्ता महाभूतेषु पञ्चसु॥
वर्त्तन्ते सर्व्वभूतेषु येषु लोकाः प्रतिष्ठिताः।
अन्योन्यं नातिवर्त्तन्ते सत्यगभवति वै तदा॥
यदा तु विषमं भावमापद्यन्ति परस्परम्।
तदा देहवियोगः स्याद्देहिनां नान्यथा द्विज!॥
अनुपूर्व्या विनश्यन्ति जायन्ते चापि सर्व्वशः।
सर्व्वाण्यपरिमेयानि तदैषां रूपमैश्वरम्॥
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः।
तेषां मनुष्यास्तत्त्वज्ञा प्रमाणानि प्रचक्षते॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम्॥
जम्बुद्वीपं प्रवक्ष्यामि घातुस्तायन महामुने!॥
परिमण्डलो महाभाग! द्वीपोऽसौ चक्रवत् स्थितः।
नदीगिरिप्रतिच्छन्नो विविधैः पत्तनैरपि॥
धनैर्जनपदैर्वृत्तैस्तथा पुण्यफलोपगैः।
लवणेन समुद्रेण समन्तात् परिवारितः॥
प्रागायतो महाभाग! वर्द्धते रत्नपर्व्वतः।
अवगाढ़ो ह्युभयतः सागरौ पूर्व्वपश्चिमौ॥
हिमवान् हेमकूटश्च निषधश्च नगोत्तमः।
नीलः श्वेतः शृङ्गवांश्च रत्नधातुविचित्रितः॥
अयुतानि योजनानि उच्छ्रायास्तेषु कीर्त्तिताः।
पृथुत्वे च द्विसाहस्रयोजनास्ते च पर्व्वताः॥
तेषामन्तरविष्कम्भे नवसाहस्रयोजनः।
वर्षं वर्षं प्रमाणन्तु वर्षाणि च वदामि ते॥
तत्र पुण्या जनपदास्तेषु वर्षेषु तापस!।
वसन्ति तेषु सर्व्वाणि सत्त्वानि विविधानि च॥
दक्षिणे भारतं वर्षमुत्तरे लवणोदधेः।
कुलादेव महाभाग! तस्य सीमा हिमालयः॥
ततः किंपुरुषं वर्षं हेमकूटादधस्ततः।
हरिवर्षं ततो ह्येयं निषधोऽवधिरुच्यते॥
एवमेवोत्तरे भागे वर्षाणि च तपोधन!।
कुरुवर्षं भिन्नुकूलात् शृङ्गवानवधिः स्मृतः॥
हिरण्मयं ततो वर्षं नीलवत्स्यावधिः स्मृतः।
रम्यकञ्च ततो वर्षं नीलश्वेतावधिः स्मृतः॥
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु।
प्रागायतो महाभाग! माल्यवान्नाम पर्व्वतः॥
पश्चिमे तु तथैवास्ते पर्व्वतो गन्धमादनः॥
पूर्व्वे लवणकूलात्तु भद्राश्वं नाम वर्षकम्॥
माल्यवानवधिश्चास्य केतुमालश्च पश्चिमे।
गन्धमादनसीमान्तं नवसाहस्रयोजनम्॥
परिमण्डलस्तयोर्मध्ये मेरुः कनकपर्व्वतः।
आदित्यतरुणाभासो विधूम इव पावकः॥
लक्षयोजन उच्छ्रायो मूर्द्ध्नि द्वात्रिंशदेव च।
योजनानां सहस्राणि मूले षोडश तु स्मृतः॥
विस्तृतः स महाभाग! भूमिमूर्द्धं गतश्च तु।
प्रविष्टमल्पभूम्यां वै षोडशैव सहस्रकम्॥
ऊर्द्धमन्तश्च तिर्य्यक् च लोकानावृत्य तिष्ठति।
तस्य चैवाहनं वर्षं सर्व्वतः परिकीर्त्तितम्॥
विहगः सुमुखो यस्तु सुपर्णस्तात! उच्यते।
स वै विचिन्तयामास सौवर्णं शैलमाश्रितम्॥
मेरुरत्नसमध्यानमवराजाच्च पक्षिणाम्।
अविशेषकरो यस्मात्तस्मादेनं श्रयाम्यहम्॥
तमादित्योऽनुपर्य्येति सततं ज्योतिषां वरः।
चक्रमाश्रित्य सततं वायुश्चैव प्रदक्षिणम्॥
स पर्व्वतो महाभाग! दिव्यपुष्पसमन्वितः।
भवनैरावृतः सर्व्वैर्जाम्बूनदमयैः शुभैः॥
तत्र देवगणा ब्रह्मन्! गन्धर्व्वासुरराक्षसाः।
अप्सरोगणसंघुष्टाः क्रीडन्ति सर्व्वदा द्विज॥
अवरुग्भकरात्तस्य मन्दरो मेरुमन्दरः।
सुपार्श्वः कुमुदश्चेति चतुर्दिक्षु स्थिता द्विज!॥
अयुतयोजनोत्साहास्तावद्विस्तारसंयुताः।
चतुर्व्वेतेषु धर्म्मेश! चूतजम्बूकदम्बकाः॥
न्यग्रोधाश्चापि चत्वारः पादपा ब्राह्मणर्षभ!।
सहस्रयोजनोत्साहास्तावद्विटपविस्तृताः॥
केतुभूताः पर्व्वतानां विशालाः शतयोजनम्।
ह्रदाश्च तत्र चत्वारः पयोमधिक्षुवारिदाः॥
देवोद्यानानि चत्वारि हे चैत्ररथनन्दने।
सर्व्वतोभद्रमित्येवं तथा वैभ्राजकं वनम्॥
तेषु देवस्त्रियो नित्यं विहरन्ति सुरैः सह।
गन्धर्व्वाः किन्नराश्चैव तथान्ये सिद्धचारणाः॥
गायन्तो मधुरं दिव्यं स्त्रीभिः क्रीडन्ति तापस!।
चूतो यो मन्दरोत्सङ्गे युतयोजनसुच्छ्रितः॥
फलान्यमृतकल्पानि पतन्त्यस्य समन्ततः।
तेषां विशीर्य्यमाणानां रसेनाजनि वा नदी॥
अरुणोदा नाम सैव वहते मन्दराच्चलात्।
यज्जलस्पर्शमात्रेण भवतीन्द्रियदोषजाः॥
स्वेदश्वसौरभेणापि समन्ताद्योजनम्।
सुगन्धयति वातेन वातस्यायत! तद्बलम्॥
एवं जम्बुफलानाञ्च पतनात् मेरुमन्दरे।
हस्तिकायप्रमाणानां रसेनाता महानदी॥
सैव जम्बूनदी नाम दक्षिणेन इलावृतम्।
तीरयोरुभयोरेव जम्बूरसपरिप्लुता॥
मृत्तिकैव सुवर्णं स्यात् वार्य्यकैरस्य वायुना।
तत्र जाम्बूनदं हैम नानाभरणसंचितम्॥
देवोपदेवगन्धर्व्वा धारयन्ति सदा स्त्रिया।
यो वै मन्दरकूटस्थ सुपार्श्वोपरि तापस!॥
तत्कोटरेभ्यः पञ्चैव मधुधाराः स्रवन्ति वै।
प्रस्थायामपरीणाहाः पञ्चिमेव इलावृतम्॥
यासां रसेन सुरभिः सुखसौरभवायुना।
सुगन्धयति धर्म्मेश! समन्तात् शतयोजनम्॥
कुसुदाग्रनिरूढो यः शतवल्शो वटो महान्।
ऊर्द्ध्वमेकशतं तस्य उत्तरेण इलावृतम्॥
पयसिनीदधिमधुदाः तत्फलाम्बुरसाः।

भूगोलः

गुरुसवेति पक्षेव जाता रत्नविभेदजात् ॥
बलीपलितहीनेन्द्रजराद्योषो न विद्यते ।
कुरङ्गकुरवः शुद्धाः शुनयः सिंहरक्षया ॥
वैडूर्यश्च विभूटश्च पर्वतौ रत्नसंभवौ ॥
पनसश्चिबजौ वामविशिवासविकूटकाः ।
हंसवैदूर्यकपिला द्वौ कालञ्जरजाबधी ॥
गिरयो मूलदेशे तु सुमेरोः परिकल्पिताः ॥
जठरो देवकूटश्च द्वौ गजौ मेरुपूर्वतः ।
अष्टादशसहस्राणि योजनान्युच्छ्रायतौ ॥
पृथुतुङ्गौ द्विषाहस्रयोजनं तावदेव हि ॥
पवनः पारियात्रश्च मेरोः पश्चिमतः स्थितौ ॥
तथा प्रमाणौ कैलासकरवीरौ तु दक्षिणे ।
त्रिशृङ्गमकरौ तद्वत्तथा त्रिशृङ्गमकरौ तथा ॥
अष्टाभिरेतैर्गिरिभिर्भाति काञ्चनपर्वतः ।
मेरोर्मूर्द्धनि विप्राग्र्य ! मध्ये विष्णुपदः पुरी ।
चतुरस्रा शातकौम्भी योजनायतविस्तृता ॥
दिक्पालानां तथा पूर्व्यः पूर्व्यादिषु यथाक्रमम् ।
अष्टपुर्योऽष्टतुर्येण भागेन परिकल्पिताः ॥
तत्र ब्रह्मा च रुद्रश्च शक्रश्चापि सुरेश्वरः ।
समेत्य विविधैर्यत्नैर्यजन्ते भूरिदक्षिणैः ॥
तुष्टुवुर्नारदश्चैव विश्वावसुहाहाहूहूः ।
अभिगम्याम्बरेशं स्तुवन्ति विविधैः स्तवैः ॥
समर्थयो महात्मानः कश्यपश्च प्रजापतिः ।
तत्र गच्छन्ति भद्रं ते सदा पर्व्वणि पर्व्वणि ॥
तस्यैव मूर्द्धन्युपरि काञ्ची हैमेत्युदीर्यते ।
तस्य हैमानि रत्नानि तस्यैमे रत्नपर्वताः ॥
तस्मात् कुबेरो भगवांश्चतुर्थं भागमश्नुते ।
तस्य कर्णाग्रं वित्तस्य मनुष्येभ्यः प्रयच्छति ॥
पार्श्वे तस्योत्तरे दिव्यं सर्व्वर्तुकुसुमान्वितम् ।
कर्णिकारवनं रम्यं शिलाजालसमावृतम् ॥
तत्र साक्षाज्जगद्धात्री भीमेभूतैः समावृतः ।
पार्व्वत्या सह देवेशो रमते भूतभावनः ॥
कर्णिकारस्रजं मालां दधद्यादवलम्बिनीम् ॥
तस्य शैलस्य शिखरात् क्षीरधारा महामते ! ।
विश्वरूपा परिमिता भीमनिर्घोषनिस्वना ॥
पुण्या पुण्यतमैर्जुष्टा गङ्गा भागीरथी शुभा ।
तां धारयामास तदा दुर्धरां पर्व्वतैरपि ॥
धृतं वर्षसहस्राणां शिरसैव पिनाकधृक् ।
मेरोस्तु शिखराद्दिवो भिद्यमाना चतुर्दिशा ॥
सीता चालकनन्देति यद्भद्राश्वेति कीर्त्तिता ।
सीता तु ब्रह्मसदनात् कैलासादिमहाचलान् ॥
अतिक्रम्य प्रवहती गन्धमादनमूर्द्धसु ।
पतिता द्विज ! वर्षं च भद्राश्वं प्लावती क्रमात् ।
प्राच्यां दिशि महाभाग ! प्रविष्टा लवणोदधिम् ॥
माल्यवच्छिखराद्यद्वत्तु: पतिता केतुमालके ।
प्रतीच्यां दिशि विप्रेन्द्र ! प्रविश्य सरित्पतिम् ॥
भद्रा चोत्तरतो मेरुशिखरात् पतिता गिरीन् ।
अतिक्रम्य ततः शृङ्गवतः शृङ्गाङ्गेण पातुका ।
उत्तरांश्च कुरून् प्राप्य प्रविष्टा लवणार्णवम् ॥
तथैवालकनन्दा च पतन्ती गिरिमूर्द्धसु ।
हिमालयं विनिर्भिद्य भारतं वर्षमेत्य च ।
दक्षिणाभिमुखेति दक्षिणाब्धिं द्विज ! ॥

भूगोलः

मेरोस्तु पश्चिमे पार्श्वे केतुमालो महामते ! ।
आयुर्दशसहस्राणि वर्षाणां तत्र मानवे ॥
सुवर्णवर्णाश्च नराः स्त्रियश्चाप्सरसोपमाः ।
वीतरोगशोकभया निरुपमानन्दवर्द्धिनः ।
जायन्ते मानवास्तत्र प्रवालकनकप्रभाः ॥ ७ ॥
गन्धमादनशृङ्गेषु कुबेरः सह राक्षसैः ।
अप्सरोगणगन्धर्व्वैर्मोदते गुह्यकाधिपः ॥
गन्धमादनपार्श्वे तु गन्धर्व्वेलाः सहस्रशः ।
एकादशसहस्राणि वर्षाणां परमायुषः ॥
तत्र जुष्टा नराः सर्व्वे बलवीर्यपराक्रमाः ।
स्त्रियश्चोत्पलपत्राभाः सर्व्वाः सुप्रियदर्शनाः ॥
उत्तराः कुरवश्चैव भारतत्व महामते ! ।
धनुःसंस्थे महाभाग ! दिवर्षे दक्षिणोत्तरे ॥
इलावृतं मध्यमन्तु पञ्चवर्षाणि चैव हि ।
उत्तरोत्तरमेतेभ्यो वर्षमुद्दिश्यते गुणैः ॥
अपरेषु च वर्षेषु सर्व्वेषु भारतं विना ।
आयुःप्रमाणं लोकानां दशवर्षसहस्रकम् ॥
यत्रमेषा महाभाग ! पृथिवी पर्व्वतैश्चिता ॥"
इति पद्मपुराणे भूमिखण्डे भूगोलवर्णने १२८ अध्यायः ॥

श्रीव उवाच ।

"नवस्वतेषु वर्षेषु भगवान् भूतभावनः ।
अनुग्रहाय लोकानामास्ते मायावपुर्हरः ॥
इलावृते तु भगवान् भव एकः सहोमया ।
आस्ते विहारनिरतो नान्यस्तत्र पुमान् द्विज ! ॥
भवानीशापतो ब्रह्मन् ! प्रविशन्न कदाचन ।
यत्र प्रविष्टो मोहेन सुतो वैवस्वतस्य वै ॥
इलः स्त्रीभावमापन्नो यस्यां जातः पुरूरवाः ।
तत्र सङ्कर्षणं देवं कलां विष्णोर्महात्मनः ।
भवो भवान्या सहितः स्तौति भक्तिसमन्वितः ॥
भद्राश्वे द्विज ! वर्षे तु हयग्रीवाख्यतिर्हरिः ।
वसते वर्षपुरुषाख्यं स्तुवन्ति जगद्गुरुम् ॥ ७ ॥
हरिवर्षे तु भगवान्नरसिंहवपुर्धरः ।
स्तूयते दैत्यपतिना प्रह्लादेन महात्मना ॥
केतुमाले च भगवान् कामदेवस्वरूपवान् ।
प्रजापतेर्दुहितृभिः सहैव रमया सदा ॥
स्तूयते परया भक्त्या जगज्जोवनरूपधृक् ॥ ७ ॥
रम्यके भगवानास्ते मत्स्यरूपी व्ययाव्ययः ।
मनुर्वैवस्वतस्तत्र स्तौति भक्त्या स्तवैः स्तवैः ॥ ७ ॥
हिरण्मये तु भगवानास्ते कूर्म्मतनुं दधत् ।
प्रेताधिराजस्तं स्तौति भक्त्या परमया युतः ॥
कुरुवर्षे च भगवान् वराहः संस्तुते जनैः ।
तं देवी यं क्षितिः स्तौति सङ्कर्षणपतिभिः सह ॥
वर्षे किंपुरुषे ब्रह्मन् ! भगवानादिपूरुषः ।
सीतया विरहव्याप्त सततं लक्ष्मणाग्रजः ॥
तत्र किंपुरुषैः सार्द्धं भक्त्या मारुतनन्दनः ।
पार्श्विसेनेन च सह स्तौति भक्त्या विभावितः ॥
भारते च तथा वर्षे नरनारायणात्मकौ ।
नारदः स्तौति भगवान् भगवन्तौ ज्ञतानतिः ॥
द्वीपेऽस्मिन् सप्त सप्त: सन्ति गिरयः सरितस्तथा ।
ईषाच्च बहवो ब्रह्मंस्तेषां ख्यास्युक्रमात् ॥
मेरोरुत्तरतः सर्व्वान् पर्य्यायेण प्रधीन्यहम् ।

भूगोलः

दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे ॥
उत्तराः कुरवो नाम पुण्याः सिद्धनिषेविताः ।
तत्र द्रुमा मधुमतो नित्यं पुष्पफलोपगाः ॥
सुगन्धीनि च पुष्पाणि फलानि रसवन्ति च ।
सर्व्वे कामदुघा द्रुमा जनाः कामप्रपूरिकाः ॥
अपरे चौरिको नाम तरवो सुनिपुङ्गव ! ।
ये स्रवन्ति सदा क्षीरं रसैरुत्तमसन्निभम् ॥
वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ।
सर्व्वा मणिमयी भूमिः कृत्रिमाकृत्रिमैर्युता ॥
सर्व्वर्तुसुखदा नित्यं पङ्कधूलिकरवर्जिता ।
स्वर्गभोगावशेषेण जायन्ते तत्र मानवाः ॥
शुक्लाभिजनवर्णाश्च सर्व्वे चारुसुखान्विताः ।
मिथुनानि च जायन्ते स्त्रियः सुरसुतोपमाः ॥
तेषान्तु क्षीरिणां क्षीरं पिबन्त्यक्षतसन्निभम् ।
मिथुनं जायते काले समन्ताच्च प्रवर्द्धते ॥
तुल्यरूपगुणोपेतं तुल्यवेषव्ययक्षया ।
निरामया निराबाधाः सदागन्धविवर्जिताः ॥
एकादशसहस्राणि तत्र वर्षाणि वै जनाः ।
जीवन्ति ते महाभाग ! न चान्योन्यं घ्नन्ति च ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः ।
तान्निर्हरन्ति हस्तान् दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो ब्रह्मन् ! आख्याताश्चे समासतः ।
हिरण्मये रम्यके च एष धर्म्मः प्रकीर्त्तितः ॥
मेरोः पार्श्वमहं पूर्व्वं वक्ष्ये ब्रह्मन् ! यथातथम् ।
भद्राश्वे भद्रश्रवा नाम तत्र ब्रह्मन् ! महीपतिः ॥
भद्रसालवनं यत्र कालाम्रश्च महाद्रुमः ।
कालाम्रो नाम वृक्षोऽसौ सिद्धचारणसेवितः ॥
योजनैकशतोत्सेधो नित्यपुष्पफलः शुभः ।
तत्र ते पुरुषाः श्वेताश्चोयुक्ता महाबलाः ॥
कुसुदाभाः स्त्रियस्तत्र चारुवासाः सुलोचनाः ।
चन्द्राभचारुरूपाश्च पूर्णेन्दुसदृशाननाः ॥
नृत्यगीतकलाभिज्ञाश्चन्द्रोत्तलकान्तयः ।
दशवर्षसहस्राणि तत्रायुर्ब्राह्मणर्षभ ! ॥
कालाम्ररसपानेन नित्यं सुस्थिरयौवनाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
सदर्शनो नाम महान् जम्बूवृक्षः सनातनः ।
सर्व्वकामफलः पुण्यः सिद्धचारणसेवितः ॥
द्वीपख्यातिकरः श्रीमान् सहस्रयोजनोच्छ्रितः ।
अरत्नीनां सहस्रञ्च शतानि दश पञ्च च ॥
परिणाहस्तु वृक्षस्य रसानां रसभेदिनाम् ।
तदाख्यादित्यवर्णाश्च जायन्ते तत्र मानवाः ॥ ७ ॥
तथा माल्यवतः शृङ्गे ह्यायते वृक्षवाहकः ।
नाम्ना सञ्जयको नाम कालाग्निः प्रलयेऽनलात् ।
तथा माल्यवतः शृङ्गे पूर्व्वे पूर्व्वानुशब्दिकाः ।
योजनानां सहस्राणि पञ्चषष्टाख्यवान् द्विज ! ॥
महारजतसङ्काशा जायन्ते तत्र मानवाः ।
ब्रह्मलोकच्युताः सर्व्वे जायन्ते तत्र वै नराः ॥
तपश्चरन्ति ते तीव्रं भवन्ति क्रूरैरेतसः ।
रत्नवार्यन्तु भूतानां न विद्यन्ति दिवाकरम् ॥
षष्टिस्तानि सहस्राणि षष्टिरेव शतानि च ।
अस्तमस्तामतो यान्ति परिवार्य दिवाकरम् ॥

भूगोलः

षष्टिं वर्षसहस्राणि षष्टिमेव शतानि च ।
आदित्यतन्त्रे सर्वं विद्यते ग्रन्थिमण्डलम् ॥"
इति मात्ये भूमिखण्डे भूगोले १२६ अध्यायः ॥*॥

श्रीव उवाच ।

दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु ।
वर्षं रम्यकं नाम जायन्ते तत्र मानवाः ॥
सुखाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः ।
दशवर्षसहस्राणि शतानि दश पञ्च च ॥
जीवन्ति ते महाभाग ! नित्यं मुदितमानसाः ।
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ॥
वर्षं हिरण्मयं नाम तत्र हैमवती नदी ।
तत्र चायं महाभाग ! पक्षिराट् पतगोत्तमः ॥
यज्ञानुयाज्ञ बहवो धनिनश्च महाबलाः ।
एकादशसहस्राणि वर्षाणां ते महामते ! ॥
आयुःप्रमाणं जीवन्ति शतानि दश पञ्च च ।
पद्मानि च विचित्राणि जीर्यन्ते ब्राह्मणर्षभ ! ॥
एकं मणिमयं तत्र द्वितीयं रौप्यमद्भुतम् ।
सर्वरत्नमयश्चैव तृतीयं तत्र शोभते ॥
यत्र स्वयम्भा देवो नित्यं वसति शाश्वतः ।
हैमकूटस्तु सुमहान् कैलासो नाम पर्वतः ॥
यत्र वै भगवान् राजा गुह्यकैः सह मोदते ।
अक्षुण्णरेव कैलासं मैनाकं पर्वतं प्रति ॥
हिरण्यशृङ्गः सुमहान् दिव्यो मणिमयो गिरिः ।
तस्य पार्श्वे महद्दिव्यं सुप्रकाशनवालुकम् ॥
रम्यं विष्णुसरो नाम यत्र राजा भगीरथः ।
दृष्ट्वा पुण्यापगां गङ्गामुवास बहुलाः समाः ॥
यूपा मणिमयाश्चत्र चैत्याश्चापि हिरण्मयाः ।
तत्रेष्ट्वा तु गतः सिद्धिं सहस्राक्षो महायशाः ॥
यदा भूतपतिर्यत्र सर्वलोकैः सनातनः ।
उपास्यते सौम्यतेजा यत्र भूतैः समन्ततः ॥
नरनारायणौ ब्रह्मा मनुः स्थाणुश्च पञ्चमः ।
तत्र दिक्षा त्रिपथगा प्रथमन्तु प्रतिष्ठिता ॥
ब्रह्मलोकात्परिभ्रष्टा सप्तधा प्रतिपद्यते ।
वक्षोदसा वा शलिनी पावनी च सरस्वती ॥
जम्बूनदी च सीता च गङ्गा सिन्धुश्च सप्तमी ।
अधिष्ठिता दिव्यसङ्घाः प्रभावैश्च समन्विता ॥
उपास्यते यत्र सत्रं सहस्रयुगपर्यये ।
इज्याडश्वा च भवति तत्र तत्र सरस्वती ॥
एता दिशः सप्त गङ्गाश्चिषु लोकेषु विश्रुताः ।
रक्षांसि वै हिमवति हैमकूटे तु गुह्यकाः ॥
सर्पा नागाश्च निवसे नीलर्क्षश्च तपोवनम् ।
दैत्यासुराणां सर्वेषां श्वेतपर्वत उच्यते ॥
गन्धर्वा निवसे नित्यं नीले ब्रह्मर्षयस्तथा ।
ऋक्षवांश्च महाभाग ! देवानां प्रतिसञ्चरः ॥
इक्षवोऽपि महाभाग ! तत्र वर्षाण्यनुक्रमात् ॥
भूतान्यपि निविष्टानि प्रतिमन्ति ध्रुवाणि च ॥
तिर्यक्त्वञ्चिर्बहुविधा ह्रसन्ते दैवमानुषी ।
अक्षया परिसंख्यातुं मह्या तु मुनिसत्तमा ॥
इलावृते तु भगवान् भवान्या सह मोदते ।
इत्येवमादौ वर्षाणि कथितानि तवानघ ! ॥*॥
कर्मक्षेत्रं महापुण्यं भारतं अस्य सांप्रतम् ।
त्रिषमिश्रश्च दैवश्च मनोर्वैवस्वतस्य च ॥

भूगोलः

पृथोस्तु ब्रह्मन् ! वैराजस्य तथैवाकोर्महात्मनः ।
ययातेरम्बरीषस्य मान्धातुर्नहुषस्य च ॥
तथैव मुचुकुन्दस्य शिबेरौशीनरस्य च ।
सोमकस्य च राजर्षेर्गाधेश्चैव महात्मनः ॥
ऋषभस्य तथैलस्य दिलीपस्य महात्मनः ।
कुशिकस्य च धर्मज्ञ ! वृषस्य नृपतेस्तथा ॥
अन्येषाञ्च महाभाग ! क्षत्रियाणां बलीयसाम् ॥
श्रोतुमिच्छामि तत्त्वेन ब्रह्मन् ! सर्वपापप्रणाशनम् ॥
मन्दरो मलयः सह्यः सुक्तिमाञ्ऋक्षवानपि ।
विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥
तेषां सहस्रशो ब्रह्मन् ! गिरयस्तु समीपतः ।
धातुचित्राः सत्त्ववन्तो महात्मक्षिजसावृताः ॥
आर्या म्लेच्छाश्च धर्मज्ञ ! तैर्मिश्राः पुरुषा द्विज ! ।
नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् ॥
शुतद्रुं चन्द्रभागाञ्च विपाशां स्थूलवालुकाम् ।
गोदावरीं नर्मदाञ्च यमुनाञ्च महानदीम् ॥
कृष्णवेणीं विपाशाञ्च वाहुदां सरितामुराम् ।
नदीं वेत्रवतीञ्चैव पयोष्णीं देविकामपि ॥
वेदस्मृतिं वेदवतीं चित्रसेनाञ्च निम्नगाम् ।
करीषिणीं चित्रवहां कृष्णवेणां सुपुण्यदाम् ॥
इरावतीं वितस्ताञ्च शिवामिक्षुलां क्षमिम् ।
गोमतीं धूतपापाञ्च निचितां लोहितावतीम् ॥
कौशिकीं शिवां कृत्यां सरयुञ्च महामते ! ।
चर्मण्वतीं वेत्रवतीं चन्द्रनाञ्च महानदीम् ॥
रक्षस्यां घृतकुल्याञ्च दृषद्वतीमथापि च ।
इरावतीं पयोष्णीञ्च वाजिनीं पुरमालिनीम् ॥
पूर्णाभिरामां धीराञ्च वामीं घृतवतीमपि ।
पलाशिनीं पापहरां सुप्रयोगां महामते ! ॥
कावेरीञ्चुकुकाञ्चापि वेत्रां भीमरथीमपि ।
रक्षस्यां घृतकुल्याञ्च कृष्णवेरां महानदीम् ॥
पलाशिनीं पापहरां हेमां घृतवतीं तथा ।
मदन्तीं प्रवरां मेलां महेन्द्रां पाटलावतीम् ॥
पुरावतीमनुष्याञ्च कृष्णवेरां महानदीम् ।
सदानीरामधृष्याञ्च तथा वीरवतीमपि ॥
करीषिणीमग्निवतीञ्च विपुलां वहिरण्वतीम् ।
सहाकान्तां शिवाञ्चैव पञ्चमीञ्च महानदीम् ॥
विद्यां वीरकराञ्चापि विश्वामित्रां कपिञ्जलाम् ।
वसुं सुवसां गौरीञ्च कुवेरामलवाहिनीम् ॥
रथचित्रां ज्योतिरथां सुकृवेल्यां महानदीम् ।
वेलन्दीं पिञ्जलाञ्चैव सुकृवेल्यां महानदीम् ॥
विदिशां लक्षवेल्याञ्च हविःसावां महायशाम् ।
सन्ध्यां समाधां वेदाख्यां भारद्वाजीञ्च निम्नगाम् ॥
ग्रीवाञ्च पिच्छिलाञ्चैव कौशिकीं विन्ध्यगामपि ।
दुर्गां मन्दाकिनीञ्चैव ब्रह्ममेध्यां ह्रदावतीम् ॥
परोक्षामथ रोहीञ्च सामान्यां वरदामपि ।
सुरसां तपसां दासीं पर्णाशाञ्च महानदीम् ॥
मालवीं दृषभां भासां ब्रह्ममेध्यां ह्रदावतीम् ।
एताश्चान्याश्च बह्व्यो वै महानद्यो द्विजर्षभ ! ॥
यदा निरामया ब्रह्मा मन्मना मन्यवाहिनी ।
चित्रोपला चित्ररथा दुर्गापि पापहारिणी ॥
ब्रह्मण्या च महागौरी गोधा चापि महानदी ।

भूगोलः

मुक्तिमती मनङ्गा च मञ्जला वाहिनी तथा ॥
कुमारी चाविकुल्या च नदी मन्दाकिनी तथा ।
सुवर्णा च तथा गङ्गा मारिषा च सरस्वती ॥
लौहित्यं करतोया च तथैव हरकाक्षया ।
विश्वस्य मातरश्चैता: सर्वाश्चैव महाफलाः ॥
तथा नद्यश्चप्रधाना: शतशश्च सहस्रशः ।
इत्येता: सरितो ब्रह्मन् ! समाख्याताश्चयानघ ! ॥
वक्ष्यामि पर्वतांश्चापि भारते वर्षे ये द्विज ! ।
मलयो मन्दरश्चैव मैनाकश्च त्रिकूटकः ॥
ऋषभः कूटकः कोलः सह्यो देवगिरिस्तथा ।
श्रीशैलो ऋष्यमूकश्च मुक्तिमाञ्ऋक्ष एव च ॥
श्रोणश्च पारियात्रश्च रैवतः ककुभस्तथा ।
गोवर्धनश्चित्रकूटो गौरो गोकर्ण एव च ॥
कोकामुख इन्द्रकीलस्तथा कामगिरिर्द्विज ! ।
अतःपरं जनपदान् वक्ष्यामि द्विजसत्तम ! ॥
विख्याता: कुरुपाञ्चाला: शाल्वा मात्स्येय-
जाङ्गलाः ।
मत्स्या: कुशट्टा मौलेया भोजा: सिन्धुकुलि-
न्दकाः ॥
सुरसेना: पुलिन्दाश्च कुलयः कोशिकोशलाः ।
माषाजाः कौशलाश्चैव शोधा मालास्तथैव च ॥
वैदिमत्स्यकरूषाश्च मेकपृष्ठा युगन्धराः ।
उत्तमाश्च दशार्णाश्च काशयोऽपरकाशयः ॥
कुन्तयोऽवन्तयश्चैव मलजा विजयास्तथा ।
आधिराज्याः सकुट्टाश्च चक्रवक्रातयः शुकाः ॥
मानवाख्योपवाहाश्च यवनोमान एव च ।
वार्जीका वाटधानाश्च शुकुलाशुभ्रमेरुजकाः ॥
मद्रा: सुदेष्णा: प्रहारा मल्लिषा: शुक्तिकाह्वया ।
अपरान्ता: परान्ताश्च आभीरा: काल-
तोयकाः ॥
अटवीशिखराश्चैव मेरुभूताश्च मारिष ! ।
उपविद्यानुविद्याश्च अङ्गला: कुरुवर्णकाः ॥
कुहाः परान्ता मार्देया मागधा मालवञ्चटाः ।
अन्ध्राश्च बहवो ब्रह्मन् ! कक्षा: सानुप-
निष्कुटाः ॥
बहिर्गिरेयोऽङ्गमलदा अन्तर्गिरेयकाश्चैव च ।
सक्तुत्तरा: प्राग्वणेया: सुदेष्णा वासुनाह्वया ॥
शुका विशाला निषधा भागेवाश्च द्विजर्षभ ! ।
पुष्पा भोगा: किरातानां तथैवानर्तनैर्ऋताः ॥
तोरणाः शूरसेना: कुन्तला: कुशलास्तथा ।
तिलभारा मलावाश्च मान्धारा दर्शकास्तथा ॥
काश्मीरा: सिन्धुसौवीरा दर्विका वनयका-
म्बजाः ।
अभीसाहा कुलूताश्च मधुमन्ता: सुकुन्दकाः ॥
रत्नवट्टाश्च धर्मज्ञ ! शौचका वाजिकास्तथा ।
दर्शेयरा जता दर्भा: सुधामान: सुमल्लिकाः ॥
वनायवो दशा: पार्श्वरोमाण: कुक्षिकास्तथा ।
रत्नवट्टाश्च धर्मज्ञ ! वाह्यामरथोरगाः ॥
रम्भा: करीषकाश्चापि कुलिन्दोपत्यकास्तथा ।
कच्छा गोपालकक्षाश्च अटिका वाणवासिकाः ॥
किराता बर्बरा: सिद्धा: पार्श्वकौरुषास्तथा मारिष ॥

भोक्ष्यन्ते चेह ये विप्रा देवैस्तुल्यान्वितप्रभाः ॥
तथापरे जनपदा दक्षिणा ब्राह्मणर्षभ ! ।
द्रविडाः कैरलाः प्राच्या विकल्पवनवासिकाश्च ॥
कोङ्कणकाश्च चोलाः सौह्रदा मलका मलाः ।
अभिन्नुतसवर्णेला कोङ्कवेङ्कटमालवाः ॥
एलकाः कोरलाः प्राच्याः कुकुराराङ्कार-
मारिकाः ।
तथैव चिल्लचूलिकाश्चित्रास्ताः साङ्गसैन्धवाः ॥
समङ्गाः सवकाश्चैव तथैवापरवर्मकाः ।
सूपकाश्चनवाजाश्च पुलिन्दा बर्बरैः सह ॥
सुनिवाटाः शिवाढाश्च खरा वैरवणास्तथा ।
विदर्भा ऋषिकाः काकजनाश्च ब्राह्मणर्षभ ! ॥
यवनाश्च शकाश्चीनाश्चक्षुमाः परतङ्गणाः ।
खसदरदाः कुलत्थाश्च हारहूणा म्लेच्छजातयः ॥
उत्तरापथनिर्देशा म्लेच्छा हूणाः पारसिकैः सह ।
तथैव च मलाश्चीना दशार्णा दशमालिकाः ॥
अङ्गवङ्गकलिङ्गाश्च पह्लवा गिरिगह्वराः ।
शाकोकाश्चाल्लचाराश्च वैद्यग्रामकुलानि च ॥
शूद्राभीराश्च दरदा ये चान्ये म्लेच्छभूमयः ।
आग्नेयाश्च भरद्वाजास्तथैव क्रूरगोमकाः ॥
क्षेमकाश्च कलिङ्गाश्च किरातानाश्च जातयः ।
तोमरा हंसमार्गाश्च तथैव करभञ्जकाः ॥
इति चान्ये जनपदाः प्राच्योदीच्याश्चतैव च ।
उद्देशेन मया देशास्तव संकीर्तिता द्विज ! ॥
वर्षं तु भारतं ब्रह्मन् ! विवर्तस्य फलं भवेत् ।
दुह्यते कामधुग्धेनुर्भूमिः सम्यगनुष्ठिता ॥
तस्मिन् शुभाशुभं कर्म यथोक्तफलदं नृणाम् ।
अन्यानि यानि वर्षाणि भूमिखण्डानि तानि वै ॥
भारते विहितं कर्म यागध्यानादिलक्षणम् ।
यत्तं जनयते सम्यक् विकर्म नरकाय्यपि ॥
तत्र सिद्धा नरा ब्रह्मन् ! तपसाराधनेन च ।
प्रयान्ति परमं लोकमपवर्गं च मानिव ! ॥
ज्ञानं चेता द्वापरस्य कलिस्य ब्राह्मणर्षभ ! ।
भारते तु क्रमेणैव भवन्ति हि युगानि वै ॥
चत्वारि च सहस्राणि वर्षाणां ब्राह्मणर्षभ ! ।
आयुःसंख्या कृतयुगे संख्याता भारते द्विज ! ॥
त्रीण्येव तु सहस्राणि त्रेतायां भारते नृणाम् ।
द्वे सहस्रे द्वापरे तु शतमेकं कलौ स्मृतम् ॥
तथापि च स्थितिर्नास्ति कलौ ब्राह्मणसत्तम ! ।
गर्भस्थाश्च म्रियन्ते च तथा जाता म्रियन्ति च ॥
महायज्ञा महाश्रद्धा ज्ञानिनो धर्मतत्परा: ।
तपस्विनो ब्राह्मणिष्ठा: कृते जायन्ति मानवा: ॥
त्रेतायां सर्ववर्णाश्च स्वधर्मनिरता: सदा ।
द्वापरे च महाभाग ! क्रूराश्च परहिंसका: ॥
कृष्णाश्चातिकृशाश्चैव क्रोधना दुष्कृते रता: ।
कलौ खलु भविष्यन्ति भारते तापस ! प्रजा: ॥
सर्वेषामपि वर्षाणां भारतं प्रवरं द्विज ! ।
सिध्यन्ति मानवा यस्य हरिभक्तिपरायणा: ॥
प्रायो भागवता: सर्वे भारते द्विजसत्तम ! ।
नानारूपाणि तीर्थानि फलदानि नृणामपि ॥
जम्बूद्वीपो मया प्रोक्तो लक्षयोजनविस्तृत: ।
क्षारोदेन प्रमाणेन वेष्टितो लवणाम्भसा ॥

अष्टावत्र उपद्वीपा मुनिभि: परिकीर्तिता: ।
विष्णुमध्ये महाभाग ! नानाविधजनाश्रिता: ॥
नामानि तेषां वक्ष्यामि शृणु वात्स्यायन
द्विज ! ।
सगरस्य सुतैरश्वान्वेषणे परितो महीम् ॥
खनद्भि: कथिता विप्र ! द्वीपा अष्टौ महार्णवे ।
सर्वप्रस्रवणप्रख्या: सिंहलावर्तनौ यथा ॥
पञ्चजन्यसखा मध्यहरिणो रमणकाह्वय: ।
लङ्केति कथिता विप्र ! जम्बुद्वीपस्य तेऽन्तरा ॥"
इति पाद्मे भूमिखण्डे भूगोलवर्णने १३०
अध्याय: ॥ * ॥

ऋषय ऊचु: ।
"शाल्मलीपं प्रवक्ष्यामि शृणु वात्स्यायन द्विज ! ।
यत्प्रमाणं जम्बुद्वीपस्य तथैव लवणोदधे: ॥
ततो द्विगुणमानोऽसौ शाल्मलीपो महामते ! ।
जम्बुद्वीपस्य च यथा वेष्टनं लवणाम्भसा ॥
समानेन प्रमाणेन पुर: परिखया यथा ।
परिखाया उपवनं यथा भवति वेष्टनम् ॥
शाल्मलीपस्तथैवासौ संवेष्ट्य लवणोदधिम् ।
द्विगुणयोजनायामो वर्तते द्विजसत्तम ! ॥
तत्र जम्बूप्रमाणोऽस्ति द्वीपख्यातिकरस्तरु: ।
प्लक्षो नाम महाभाग ! स्वर्णवर्णोऽग्निधाम च ॥
तत्र वर्षाणि सप्तैव सुभद्रं यवसं शिवम् ।
अन्नताश्चमप्राप्तानि क्रमादभयमित्यपि ॥
सप्तैव सीमागिरयो मत्ता: सप्त च कीर्तिता: ।
मणिकूटो वज्रकूटो ज्योतिष्मान्निन्द्रसेनक: ॥
हिरण्यष्ठीवो मेघमाल: सुपर्ण: सैतुगैलका ।
अरुणनृमणा चैव सावित्र्यसिवमौ तथा ॥
सप्तम्भवा सुप्रभा च वात्स्यायन ! घृतम्भवा ।
एता: सप्त महानद्यो दर्शनादेव पावना: ॥
वर्णानां ब्राह्मणादीनां तत्र नामान्यनुक्रमात् ।
हंसश्चैव पतङ्गश्चोर्ध्वायनश्च तृतीयक: ॥
सत्याङ्गश्च चतुर्थो वै सर्वे धर्मार्थकोविदा: ।
अन्ये च पर्वतास्तत्र सप्तैव महाफला: ॥
प्रामाण्यतो महाभाग ! मलयो नाम पर्वत: ।
ततो मेघा: प्रवर्षन्ति प्रभवन्ति च सर्वत: ॥
तत: परेण विप्रेन्द्र ! जलधारस्तु पर्वत: ।
तस्माद्दृश्यन्ति वै सोमं वासव: पृथिवीजले ॥
वर्षासु हि ततो वृष्टिस्तत: सस्यसमुद्भव: ।
रैवतो नाम तत्रार्य गिरिर्यत्र प्रतिष्ठित: ॥
रैवतो नाम नक्षत्रं कृत्स्नते दिवि मोदिता ।
उत्तरेण तु तस्यार्य श्यामो नाम गिरिर्महान् ॥
प्रायु: श्रीमान्महामेघप्रभयोज्ज्वलविग्रह: ।
यस्य श्रिया श्यामवर्णा: प्रजास्तत्र महामते ! ॥
अत:परं महाभाग ! दुर्गो नाम महागिरि: ।
केशरी केशरयुतो यस्मादात: प्रवर्तते ॥
प्लक्षो नाम महाद्वीपो यत्र पूज्यस्तु शङ्कर: ।
तत्र गच्छन्ति सिद्धाश्च चारणा देवतानि च ॥
धार्मिकाश्च प्रजा ब्रह्मन् ! जरामृत्युविवर्जिता: ।
दीर्घायुष: सत्ववरा वर्तन्ते भोगवर्जिता: ॥
यत्रत्यान्या महापुण्या गङ्गा च बहुधा मता ।
महानदी नलिनला सीताथो वेधिका तथा ।

सप्तसप्तां घृतार्चिषं तत्र: संख्या न विद्यते ॥
तत्र पुण्या जनपदाश्चत्वारो लोकसम्मता: ॥
मगाश्च मगकाश्चैव मानसा मन्दगास्तथा ॥
मगा ब्राह्मणभूयिष्ठा: सर्वकर्मसिरता द्विज ! ।
मगेषु तु राजन्या धार्मिका: सर्वकामदा: ।
मानसे च महाभाग ! वैश्यधर्मनिवेशिन: ।
मन्दगेषु तथा शूद्रा: शूरा धर्मार्थचिन्तिता: ॥
न तत्र राजा विप्रेन्द्र ! न दण्डो न च दण्डिता ।
सधर्मेणैव ते सर्वे रक्षन्ति च परस्परम् ॥*॥
प्लक्षद्वीपसमानेन सप्तैवेक्षुरसो वहि: ।
इक्षुरसजलेनैव नानारत्नवता द्विज ! ॥
शाल्मलोऽपि तथा द्वीप: प्लक्षाद्विगुणमानत: ।
चतुर्लक्षयोजनेन सुरोदेनावृतो महान् ॥
यत्र वै शाल्मली नाम द्विजक्षयोजनोच्छ्रिता ।
द्वीपख्यातिकरो वृक्ष: सुपर्णेन कृतालय: ॥
तत्र वर्षाणि सप्तैव कथ्यन्तेऽत्र सुरोत्तमम् ।
सौमनस्यं रमणकं देववर्षमिति क्रमात् ॥
पारिभाद्रमाप्यायनमभिज्ञातमिति द्विज ! ।
सैतुगैलाश्च सप्तैव सुरस: शुक्लपङ्कज: ॥
वामदेवश्च कुन्दश्च कुमुद: पुष्पवर्षक: ।
सहस्रमुनिरिति ब्रह्मन् ! सप्त: सप्तैव कीर्तिता: ॥
अनुमति: सिनीवाली सप्ता राका सरस्वती ।
रजनी च कुहूश्चैव महानद्य: सुपुण्यदा: ॥
तत्र विप्रादयो वर्णा: क्रमात्रामानि बिभ्रति ।
आद्य: श्रुतधरो वर्यस्ततो वीर्यधर: स्मृत: ।
वसुन्धरस्तृतीयस्तु चतुर्थस्तु इषन्धर: ।
सर्वे ते सोममात्मानं भगवन्तं यजन्ति हि ॥
सरोदं परिवेष्ट्योऽथ ततो द्विगुणमानक: ।*।
कुशद्वीपो घृतोदेन समानेनावृतो द्विज ! ॥
कुशस्तम्बो महांस्तत्र द्वीपख्यातिं करोति च ।
ज्वाज्वल्यमानो दीप्तेन महाज्वलनरश्मिवत् ॥
तत्र वर्षाणि सप्तैव समानानि प्रमाणत: ।
वसुदानं दृढरुचिमभिगुप्तं महामते ! ॥
सत्यव्रतं विप्रनाम देवनामेति सप्तमम् ।
सप्तैव सीमागिरय: कीर्तिता द्विजसत्तम ! ॥
वक्षुश्चैव चतु:शृङ्ग: कपिलश्चित्रकूटक: ।
देवानीक ऊर्ध्वरोमा द्रविणेति सप्तम: ॥
महानद्यश्च सप्तैव सर्वपापप्रणाशना: ।
रसकुल्या मधुकुल्या मित्रविन्दा च मानद ! ॥
श्रुतविन्दा देवगर्भा मन्त्रमाला घृतच्युता ।
तत्र विप्रादयो वर्णा नामान्तरभृतो द्विज ! ॥
कुशल: प्रथमो वर्ण: कोविदस्तृतीयक: ।
अभिज्ञस्तृतीयस्तु चतुर्थ: कुलक: स्मृत: ॥
ते सर्वे ज्ञानसम्पन्ना आत्मविद्यास्वरूपिण: ।
भजन्ते भगवन्तं वै कर्मबन्धविमुक्तये ॥*॥
घृतोदश्च तथा द्वीपो द्विगुण: क्रौञ्चसंज्ञक: ।
क्षीरोदेन समानेन वेष्टितो ब्राह्मणर्षभ ! ॥
क्रौञ्चो नाम गिरिर्यत्र द्वीपख्यातिकरो महान् ।
महासेनगुहाव्याप्तस्ततश्चिन्नो महामते ! ॥
क्षीरोदेनाभिषिक्तश्च सततं वीचिसञ्चयै: ।
वर्षाणि तत्र सप्तैव तेषां नामानि मे शृणु ॥
आद्यो मधुरुहो मेघपृष्ठश्चापि सुधातिग: ।

लोहितार्णः सुधामा च भ्राजिष्ठश्चापि सप्तमः।
गिरयश्चापि सप्तैव वर्षसीमाकरा द्विज!।
शुक्लोऽथ वर्द्धमानश्च भोजन उपबर्हणः॥
नन्दनो नन्दनश्चैव सर्वतोभद्र इत्यपि।
सप्त तत्र महानद्यः पावना ब्राह्मणर्षभ!॥
अभया चान्तरौघा च ह्यनिरूपवती तथा।
तीर्थवत्यार्यका मुक्ता पवित्रवत्यपि स्मृता॥
विप्रादयस्तथा वर्णाः स्याता नामान्तरेण तु।
पुरुषः प्रथमो वर्णो द्वितीयो ऋषभः स्मृतः॥
तृतीयो द्रविणो नाम दैवसंज्ञश्चतुर्थकः।
मूर्त्तिं जलमयीं विष्णोर्ध्यायन्ति च यजन्ति च॥*॥
एवं परस्तात् क्षीरोदात् प्राक्कदीपो द्विजर्षभ!।
आयामेन च विस्तीर्णो द्वात्रिंशल्लक्षयोजनः॥
दधिमण्डोदकेनैव समानेन च विस्तृता।
परीतो भाति तत्राद्रिः प्राको नाम मणीरुहः॥
दीपख्यातिकरः श्रीमान् वासयन् द्वीपमेव तम्।
वर्षाणि तत्र सप्तैव पुरोजवमनोजवौ॥
धूम्राभीको वेपमानो विश्वाधारश्च मारिष!।
बहुरूपश्चित्ररेणो गिरयोऽपि च सप्त वै॥
ईशान उरुशृङ्गश्च बलभद्रो महानसः।
शतकेशुवनामा च सहस्रस्रोत एव च॥
दैवपालोऽपि सप्तैते वर्षसीमप्रवर्त्तकाः।
नद्यः सप्तैव विख्याता आयुर्द्धारणया द्विज!॥
सदस्मृतिः पञ्चनदी मिश्रं निरपराजिता।
विख्यातोभयसृष्टिश्च महापुण्या महाफलाः॥
विप्रादयस्तथा वर्णाः स्याता नामान्तरेण तु।
आद्यो ऋतव्रतो नाम तत्र सत्यव्रतः स्मृतः॥
दानव्रतानुव्रतौ च तृतीयश्च चतुर्थकः।
भगवन्तं वायुरूपं भजन्ते च यजन्ति च॥*॥
तथैव दधिमण्डोदात् परस्तात् पुष्करो महान्।
द्विगुणेन प्रमाणेन द्वीपः स्वादूदकेन तु॥
परिवीतः समानेन सिन्धुना ब्राह्मणर्षभ!।
यत्र पुष्करमत्युच्चं ज्वलज्ज्वलनसन्निभम्॥
द्वीपख्यातिकरं पत्रसहस्रायुतशोभितम्।
यदाद्धुरासनं विश्वसृजस्तस्य प्रजापतेः॥
द्वीपमध्येऽवधिगिरिरेक एव महामते!।
स मानसोत्तरो नाम प्राकार इव वेष्टकः॥
तस्य पूर्वापरौ पार्श्वौ देवर्षे! तत्र मारिष!।
सिन्धोर्विष्टम्भकौ नित्यं गिरेर्विष्टम्भकं परम्॥
रमणकं धातकण्डं च वर्षे नामतः स्मृते।
मानं तस्य गिरेर्विप्रायुतयोजनसङ्ख्यितम्॥
तावदेव तथायामस्तस्योपरि पुराणि च।
चत्वारि लोकपालानामिन्द्रादीनां द्विजर्षभ!॥
यः परिक्रममाणस्य मेरुं विप्र! विवस्वतः।
लङ्घां बिभर्त्ति प्रत्येकशक्रं सप्तपुरालकम्॥
अध्यासते च तौ पार्श्वौ प्रजानस्य महाबलाः।
तत्र संज्ञान्तरं नास्ति वर्णानां ब्राह्मणर्षभ!॥
स्वादूदकस्य परतो लोकालोकाचलो महान्।
लोकस्य चाप्यलोकस्य मध्ये गिरिवरः स्थितः॥
प्राकार इव संवेष्ट्य लोकान् सर्वान्महामते!।
लोकालोकाचलो नाम तेनासौ परिकीर्त्तितः॥
मानसोत्तरमेर्नोस्तु अन्तरे यावती मही।
तावती काञ्चनी भूमिर्लोकालोकात्परे द्विज!॥
यच्च प्रक्षिप्तं वस्तु कथञ्चिन्नोपलभ्यते।
सौवर्णी काञ्चिदद्दीप्ता सर्व्वतश्च प्रभाषिणी॥
अतः सर्व्वाणि सत्त्वानि तां भूमिं वर्जयन्ति हि।
लोकालोको गिरिर्यस्तु लोकान्ते वर्त्तते महान्॥
आवृणोति स तेजांसि सूर्य्यादीनामपि द्विज!।
तमतिक्रम्य ज्योतींषि क्षमन्ते न प्रवर्त्तितुम्॥
तावद्भ्राजत्वान् ब्रह्मन्नायामेन च तादृशः।
आयामविस्तरे पृथ्वी पञ्चाशत्कोटियोजना॥
तस्याश्चतुर्थभागोऽयं लोकालोकाचलो गिरिः।
तस्योपरिष्टाच्चत्वारो गजेन्द्राः सुमहाबलाः॥
नियुक्ता ब्रह्मणा भूमिं करैराजघ्न संस्थिताः।
भगवानपि तत्रैव विष्वक्सेनादिभिर्वृतः॥
पार्षदप्रवरैर्नित्यं भुजैर्बहुभिरच्युतैः।
धारयन् जगतीमास्ते आत्मरूपमपि मारिष!॥
योऽलर्विस्तार एतस्या भूभ्यास्ते परिवर्त्तनः।
तावती भूर्लोकाख्या ब्राह्मसन्मसाहृता॥
ततो योगेश्वरगतिर्योगिनां प्राप्यसुत्तमम्।
स्थानं भगवतः साक्षात् श्वेतद्वीप इतीर्य्यते॥
इति ते कथितं ब्रह्मन्! भूगोलस्योपवर्ण-
नम्॥

सूत उवाच।

य इदं शृणुयात् स्तुत्यं भूगोलस्यानुवर्णनम्।
प्रदक्षिणीकृता तेन सप्तैवावनकानना।
ससागरा च सद्वीपा सवर्षा च वसुन्धरा॥
इति श्रीपद्मपुराणे भूमिखण्डे भूगोलवर्णनं नाम
१३१ अध्यायः॥*॥ ज्योतिश्चक्राख्यभूगोलम्॥
यथा,—
"चिह्नं साध्वसुपैति यत्करयतः क्षिप्रं
प्रसादात्तथा
यस्याक्षिपदाक्षरं क्षणनिरतं लक्षिलक्षलोला-
वली।
वृत्यन्ती सुखरङ्गगेव सुतिनां स्वाङ्गारती
भारती
सं नाथ प्रणिपत्य गोलममलं वक्ष्यावबोधं
कुरु॥"
गोलग्रन्थकथने कारणमाह।
'मध्यात्तं नुसदां यदत्र गणितं तस्योपपत्तिं'
विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न
क्षयम्।
गोले सा विमला करामलकवत् प्रत्यक्षतो
दृश्यते
तस्मादस्य उपपत्तिबोधविषये गोलप्रबन्धोद्यतः॥'
अथ गोलग्रन्थस्य गोलाभिज्ञगणकोपहासमाह।
'भोज्यं यथा सर्व्वरसं विनाज्यं
राज्यं यथा राजविवर्ज्जितञ्च।
सभा न भातीव सुवक्त्रहीना
गोलानभिज्ञो गणकस्तथैव॥
वादी वाक्यरसं विनैव विदुषां यद्वत् प्रविद्वत्-

भूगोलः भूगोलः भूगोलः

सदः
ब्रह्मण्यमतिः क्षमावान् पटुपटुभूभङ्गपक्षो-
क्षिभिः।
द्वीपः सप्तुपदावमेति गणको गोलानभिज्ञ-
स्तथा
ज्योतिर्चित्रं वदसि प्रगल्भगणकाग्रग्रामणीर्यो-
क्षिभिः॥'
अथ गोलस्वरूपमाह।
'दृष्टान्त एवावनिभगणार्द्धा
संस्थानमानप्रतिपादनार्थम्।
गोलः स्फुटः खेचरविग्रहश्च
प्राज्ञैरतः स्याद्गणितेन ग्रन्थः॥'
अथ गणितप्रशंसामाह।
'ज्योतिःशास्त्रफलं पुराणगणकैरादेश्य दृष्टुच्यते
नूनं तज्जगदक्षितः पुनरयं तत्प्रत्यहं दृश्यते।
ते गोलाभिधयोऽन्तरेण गणितं गोलोऽपि न
ज्ञायते
तस्मात् यो गणितं न वेत्ति स कथं गोलादिकं
ज्ञास्यति।'
अथ ज्योतिषशास्त्रमवश्याधिकारिलक्षणमाह।
'द्विधिगणितसुक्तं व्यक्तमव्यक्तसंज्ञं
तदवगमनशक्तः शास्त्रशास्त्रे पटिष्ठः।
यदि भवति तदेदं ज्योतिषं भूरिभेदं
प्रपठितुमधिकारी सोऽन्यथा नाधिकारी॥'
व्याकरणवक्तमाह।
'यो वेद वेदवदनं सदनं हि सत्यब्र-
ह्मांऽ सवेदमपि वेद किमन्यशास्त्रम्।
यस्मादतः प्रथममेतदधीत्य धीमान्
शास्त्रान्तरस्य भवति श्रवणेऽधिकारी॥'
अथ गोलग्रन्थस्य प्रवृत्त्यर्थमन्योक्तप्रकारेणाह।
'गोलं शातु तव यदि मतिर्भास्करीयं ग्रन्थं त्वं
गो संक्षिप्तो न च बहु वृथा विस्तरः शास्त्र-
तत्त्वम्।
लीलावत्याः सुललितपदः प्रस्तरस्तः स यत्ना-
द्विद्वन्! सिद्धान्तसदसि पठनां पक्षितालिं जनस्य॥'
अथ भूसंस्थानं श्लोकद्वयेन आह।
'भ्रमद्भचक्रचक्रान्तर्गगने गगनेश्वरैः।
दृष्टा धृता धरा केन येन नेयमिषादृषः॥
किमाकारा कियद्व्याना नानाशास्त्रविचार-
णात्।
कोडगद्वीपकुलाद्रीन्द्रसप्तदैर्घ्यादितोच्यताम्॥'
अथ यन्त्रस्फुटीकरणोपपत्तिप्रश्नं श्लोकद्वयेनाह।
'संसिद्धा युगशाद्युगादिभगणैः खेटोच्चु-
पातैश्च यैः
स्यात्तस्यास्फुटता कथं कथमभूत् तारोन्नति-
र्नैकधा।
किं देशान्तरसूत्रमान्तरमथो वाक्यान्तरं किञ्चरं
किंवोभंखलु चक्रतश्च तदिदं ब्रह्मात! मातः
स्फुटः॥
किं कैलं किमु वैक्रतं किमु फलं किञ्चाक्षजं
तत्फलं
कस्मात्तत्फलवर्द्धितः कुतश्च रहितः क्षिप्तस्फुटो

किं इत्थं कर्मणे तपोदयाद्यत्समये देवा विदधु-
र्बुधाः
सर्वं मे विमलं यदागमगमं गोलं विजानासि
चेत् ॥'

अथ त्रिप्रश्नोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह ।

'मकरस्थः किल सूरो रजनी तनु-
दिनमानौ गजकोत्तरगोऽजगे ।
तनु तद्विपरीतौ मद्गती निगदा
यदि वित्थज्ञ ! दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिशाखिनां
द्युमणिवर्त्मनितश्च सुरद्विषाम् ।
त्रिदश किं ग्रहिमाद्यमितं तथा
युगसहस्रयुगं दुहितुस्य किम् ॥'

अथ रात्र्युदयमानकालभेदप्रश्नाह ।

'भवनस्थस्य किलार्कजवाः समाः
त्रिमसमेः समयैः खलु रात्र्यः ।
वसुप्रयाणुदयं किमु गोलवि-
द्यविषयेष्वखिलेष्वपि ते समाः ॥'

अथ द्युज्याकुज्यादिसंज्ञानप्रश्नं द्वाभ्यामाह ।

'द्युज्याकुज्यायमसमनरात्र्यासवलम्बादिकानां
विद्वन् ! गोले वियति हि यथा दर्शय चेत्र
संज्ञाम् ॥'

अथ चन्द्रार्कयोर्ग्रहयोः दिक्कालभेदादुपपत्ति-
प्रश्नान् श्लोकोत्तरार्द्धेनाह ।

'तिग्मांशे चेत् ग्रह उडुपतेः किन्न भागोत्तरार्धो
दक्षो: प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम् ॥'

लग्नं वद किं का च गतिमतिमनां वर ! ।
तत्संस्कृतिश्चिरयौ वार्धी किं ते सिद्धे कुतः कुतः ॥'

अथ ग्रहोन्नतौ चक्रस्य युक्तस्य चयदृद्धिप्रश्न-
माह ।

'युक्तस्य द्विगुणस्य महसो छाया: कुतस्त:
कुत:
सदृक्तत्समतोऽप्यहो भ्रमवग्राद्दोषानिषङ्गा-
दिव ।
संप्राप्याथ पुनस्त्रयीतनुमतस्तस्याग्रये नैव किं
मुक्तस्य भ्रमयस्तथैव महसो दृद्धेरिति सदृक्त-
ताम् ॥'

अथ ग्रहभग्नप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं
विबुधेन्द्रादिसर्गे पृथिव्यादीनां तत्त्वानामादित्यत्वं
सिद्धिसाधनाज्जनैकबीजं परं ब्रह्म मनसा
प्रविप्रवादौ तावत् तज्जयमाह ।

'यस्मात् शुभ्रप्रभृतिपुरुषाभ्यां महानस्य गर्भे-
ऽहं जातोऽभूत् खलग्निखिलोर्वसत: संभ-
तैश्च ।

ब्रह्माहं यज्जठरगमहीएडनिष्ठो विरिञ्चि-
र्विश्वं ह्यत्र खलति परमं ब्रह्म तत्तत्समाद्यम् ॥'

अथ भूमेः शक्त्यपमाह ।

भूमेः पिण्डः ग्रहाकृष्णकविरविकुजेज्यार्किं-
नक्षत्रकक्षा
धृत्यैतृप्तो धृत:सन्नहनिशमनिलश्चोमतेजो-
मयोऽयम् ।

नाधाधारः खमुल्का विवति च नियतं तिष्ठतो-
ऽस्य एते
सिद्धं विश्वस्य ह्यत्र सदसुजमनुजादिद्वयं
सममात् ॥
सर्वतः पर्वतारामग्रामचैत्यद्रुमैधित: ।
कदम्बकुसुमग्रन्थि: केसरप्रकरैरिव ॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता
तां निराकुर्वन्नाह ।

मूर्त्ता धर्त्ता चेद्धरित्र्याश्चतस्र-
श्चत्वार्यब्धेरप्येवमज्ञानवत्त्वा ।
अन्ये कल्प्या चेत् स्वशक्ति: किमाद्ये
किं नो भूमि: सादसर्त्तेश्च सर्त्ति: ॥'

अथ कथमियं भूमे: स्वशक्तिरित्याशङ्कां परि
हरन्नाह ।

'यथोच्चताकौनलयोश्च शीतता
विधौ द्युति: के कठिनत्वमश्मनि ।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा: खलु वस्तुशक्तय: ॥
आकृष्टशक्तिश्च मही तया यत्
स्वस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति
समे समन्तात् क्व इयं यत: खे ॥'

अथ बौद्धानां युक्तिमाह ।

'अपङ्करस्य समन्तावलोका-
दाधारशून्या कुरितिप्रतीति: ।
स्वयं न दृष्टं गुरु च क्षमात:
खेऽध: प्रयातीति वदन्ति बौद्धा: ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तावुदयं व्रजेताम् ।
यदम्बरेवमनर्घवादान्
नवीन्यतस्तान् प्रतियुक्तियुक्तम् ॥'

अथ तेषां युक्तिभङ्गमाह ।

'भू: खेऽध: स्वयं यातीति बुद्धिर्बौद्ध ! सुधा
कथम् ।
यातायातस्य दृष्टापि खे यत् चित्रं गुरु क्षितिम् ॥'

अथ जिनानां युक्तिभङ्गमाह ।

'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो दृशाक्षया: ।
भार्केन्दूनां विलोक्याद्धा ध्रुवमत्यपरिश्रमम् ॥'

भूगोलस्य समतां निराकर्त्तुमाह ।

'यदि समा सुकुरोदरसन्निभा
भगवती धरणी तरणि: क्षिते: ।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्षते ॥
यदि गिरान्नगक: कनकाचल:
किमु सदन्तरग: स न दृश्यते ।
उदगयं नयु मेरुरधोमुखा
कथमुदेति स दक्षिणभागत: ॥'

अथ प्रत्यक्षविरोधग्रहां निरस्यन्नाह ।

'समो यत: स्यात् परिधि: घृतांशु:
पृथ्वी च पृथ्वी नितरां तनीयान् ।
मरुच्च तत्पृष्ठमतस्त्र तस्था
वमेव तस्य प्रतिभात्यत: सा ॥'

लोकस्य भूपरिधिप्रमाणस्य खण्डनिमाह ।

'पुरान्तरं चेद्दिनसप्तरं स्यात्
तदन्तरिक्षेबलवेगतो किम् ।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं त्रिदक्तं परिधे: प्रमाणम् ॥'

तदेव दृढीकुर्वन्नाह ।

'निरक्षदेशात् क्षितिगोलपृष्ठे
भवेदवन्ती शशिनेव यद्वात् ।
तदन्तरं गोलघृणंयुगं स्याद्
भमाणमक्षाद्वद किं तदुक्तम् ॥
ग्रहोन्नतिग्रहयुतिग्रहणोदयास्त-
च्छायादिकं परिधिना घटतेऽनुना हि ।
नान्येन तेन जगदुक्तमधीप्रमाण-
प्रामाण्यमन्वयबुजा यतिदेवकेन ॥'

अथ भूगोलपुरनिवेशमाह ।

'लङ्का कुमध्ये यमकोटिरस्या:
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्तल: सिद्धपुरं सुमेरु:
सौम्येऽथ याम्ये वडवामुखञ्च ॥
कुरुक्षपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ।
वसन्ति मेरौ सुरसिद्धसंघा
और्वे च सर्वे नरका: सदैत्या: ॥
यो यत्र तिष्ठत्यवनीतलस्य-
मालावमस्या उपरिस्थितश्च ।
स मन्यतेऽत: कुचतुर्थसंस्था
मिथश्च ते निर्मगिवामनन्ति ॥
अध:शिरस्का कुरुलान्तरस्था
च्छाया मनुष्या इव नीरनीरे ।
अनाकुलाक्षीर्यगधःस्थितास्च
तिष्ठन्ति ते तत्र वयं यथाच ॥'

अथ द्वीपानां समुद्राणाञ्च संख्यामाह ।

'भूमेरर्द्धं चारब्धिजोदकस्थं
जम्बूद्वीपं प्राहुराचार्यवर्या: ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य शास्त्रे
चारब्धीरादब्धयो नाम तेषु: ॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दनन्तरमन्तरश्मि: क्षीरवद्यस्मादभूत् ।
महितचरजपद्म: पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मात्-
मद्यस्य च स्वादुजलस्य चाब्धि: ।
स्वादूदकान्तर्वडवामुखीऽसौ
पाताललोका: पृथिवीपुटाश्च ॥
चतुष्पदा मक्षिमशांपुशुप्रकाया
एतेषु वासुरमला: पशवो वसन्ति ।
दीर्घाश्च दिव्यरमणीरमणीयदेहै:
सिद्धाश्च तत्र हि लसत्कनकावभासै: ॥
ग्राकं ततः ग्राल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
वसुप्रयोर्दीपसुहाहरन्ति ॥'

भूगोलः

अथ जम्बुद्वीपमध्ये गिरिनिवेशवशेन नवखण्डा-
न्याह ।

'लङ्कादेशाद्धिमगिरिवदक् षैमकूटश्च तस्मा-
त्तस्मात्सान्यो निषध इति ते सिन्धुपर्यन्त-
दैर्घ्याः ।

इयं सिद्धादुदगपि पुरात् सङ्गवच्छुक्रशीला-
वर्षाख्येयं जगुरिह बुधा अन्तरे गौरिदेशात् ॥

'भारतवर्षमिदं खण्डात्
किन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्-
विद्धि हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यमकोटिपतनाद्-
रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तौ
अन्तरालमनयोरिलावृतम् ॥
माल्यवच्छलधिमध्यवर्ति
यत्तत् भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं
केतुमालकमिला कलाविदः ॥
निषधनीलसुगन्धसुमाल्य-
कैरलमिलावृतमाल्यवभौ ।
अमरकेलिकुलाय समाकुलं
रुचिरकाञ्चनचित्रमहीतलम् ॥'

अथ मेरुसंस्थानमाह ।

'इह हि मेरुगिरिः किल मध्यगः
कनकरत्नमयस्त्रिदशालयः ।
दृढिमजन्मकुपद्मजकर्मि-
केति च पुराविदः समवर्णयन् ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य
सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुवृक्षाः
कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बुफलामलगजमदसतः प्रवृत्ता
जाम्बूनदीरसयुता मदभूत् सुवर्णम् ।
जाम्बूनदं हि सदनः सुरसिद्धसंघाः
पुष्णत् पिबन्त्यमृतपानपराङ्मुखास्ते ॥
वर्णं तथा चित्ररथं विचित्रं
तैत्रप्रभरौनन्दननन्दनञ्च ।
पुण्याश्रयं यत् पुलिनं सुराणां
स्यादिष्ट वैभ्राजमिति प्रसिद्धम् ॥
सरोवरैतैश्चतुरश्च मानसं
महाह्रदं चैतजलं यथाक्रमम् ।
सरःसु रामारमणश्रमालसाः
सुरा रमन्ते जलकेलिलालसाः ॥
सप्तप्रकाञ्चनमयं त्रिखरत्रयञ्च
मेरौ सुरारिकपुरारिपुराणि तेषु ।
तेषामधः पुलमलञ्चलनानलकानां
रक्षोऽम्बुपानिलगणौघपुराणि चाधौ ॥'

तत्र अन्यविशेषमाह ।

'विष्णुपदीविष्णुपदात् पतिता मेरौ चतुर्धा सीत्
विष्कम्भाचलमस्तकगुरुतरः संगता गता
विपति ।

भूगोलः

सीताख्या भद्राश्वं खण्डमनुव्रजति भारतं वर्षम्
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून्
याता ॥

या वर्णितामिललिता दृष्टा स्पृष्टावगाहिता
पीता ।
उक्ता स्मृता स्तुता वा पुनाति पङ्क्तिमपि पापिनः
पुरुषान् ॥

या चलिते दलिताखिलवन्धो
गच्छति वलगति तत्पिङ्गसंघः ।
प्राप्ततटो विजितान्तकदूतो
याति नरो निरयात् सुरलोकम् ॥'

अथ भारतवर्षमध्ये नव खण्डानि सप्त कुला-
चलांश्चाह ।

'ऐन्द्रं कसेरुसकलं किल ताम्रपर्ण-
मध्यन्नभस्तिमदृतञ्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥
वर्षञ्चतस्रनिरिहैव कुमारिकाख्ये
गोपेषु चान्त्यजजना निवसन्ति सर्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः
सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः ॥'

अथ लोकव्यवस्थामाह ।

'भूर्लोकाख्यो दक्षिणो यत्तदेशा-
दस्मात् सौम्योऽयं भुवः स्वश्च मेरुः ।
लभ्यः पुण्यैः खे मरुद्भ्यो ध्रुवोऽतो-
ऽनध्यानन्त्यैः खेचरैः सत्यमन्यैः ॥'

दिग्व्यवस्थामाह ।

'लङ्कापुरेऽर्कस्य यदोदयः स्या-
त्तदा दिनार्धं यमकोटिपुर्यां ।
अधस्तनः सिद्धपुरेऽस्तकालः
स्यादौमके रात्रिदलं तदैव ॥
यमोदितोऽर्कः किल तत्र पूर्व्यां
तत्रापरां यत्र गतः स चास्तम् ।
तत्रास्तमेतोऽर्क उदेति तस्मा-
त्तदुद्भवैर्मेरुरिति प्रसिद्धम् ॥'

अथ विशेषमाह ।

'अधोऽन्वितो: कुचतुर्थभागे
प्राच्यां दिशि स्याद्यमकोटिरेव ।
ततश्च पश्चात् भवेदवन्ती
लङ्कैव तस्याः ककुभि प्रतीच्याम् ॥
तथैव सर्वत्र यतो हि यत्र स्यात्
प्राच्यां ततस्तत्र भवेत् प्रतीच्याम् ।
निरक्षदेशादिरत्र तस्मात्
प्राचीप्रतीच्यौ च विचित्रसंज्ञे ॥'

अथ भचक्रभ्रमणव्यवस्थामाह ।

'निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत्तथा
भ्रमच्चक्रं निजमस्तकोपरि ॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा खात्ततमत्वमञ्जसम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-

भूगोलः

रुदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भार्धैर्१६०गुंणिता
कुपरिधिस्तु ४६१० भवत्यंशाः ।
भूमौ कक्षायां वा
भागेभ्यो योजनानि च लब्धम् ॥'

अथ देवदैत्यानां ध्रुवसंस्थानमाह ।

'सौम्यं ध्रुवं मेरुगताः क्षमध्ये
याम्यञ्च दैत्या निजमस्तकोर्ध्वे ।
सव्यापसव्यं भ्रमदभचक्रं
विलोकयन्ति क्षितिजप्रवृत्तम् ॥'

उत्तरगोले क्षितिजाद्ध्रुवं परितो भ्रमन्तमादि-
त्यम् ।
सव्यं निरीक्ष्य सततं पश्यन्त्यसुरा अपसव्यं
याम्ये ॥

इन्द्रात्तमारोहति यैः क्रमेण
तैरेव वृत्तैरवरोहती नः ।
यत्रैव दृष्टः प्रथमं स दैवै-
स्तत्रैव नित्यं विलोक्यते किम् ॥
इदं सुराणामयनं यदुत्तरं
निशेतरत् सांहनिकैः प्रकीर्तितम् ।
दिनोद्भवेऽर्के दिनमेव तत्सतं
निशा तथा तत्फलकौर्मनाथ वै ॥
विधूर्ध्वभागे पितरो वसन्तः
स्वाधःसुधादीधितिमामनन्ति ।
पक्षन्ति तेऽर्कं निजमस्तकोर्ध्वे
दर्शे यतोऽस्मादुभयं तदेषाम् ॥
लग्ने दर्शे पक्षदलेऽभ्युदेति
शुक्रोऽस्तमेत्य तत एव सिद्धम् ।
भाद्वांशरत्वान्न विधोरधःस्थं
तत्कालशीघ्रः खलु पौर्णमास्याम् ॥
यदन्तिकूरगतो दृष्टिभः क्षितेः
सततमाप्रलयं रविमीक्षते ।
भवति तावदयं ग्रहितस्य तद्-
युगसहस्रयुगं द्युनिशं विधेः ॥'

अथ भूपरिधिमानं प्राक्थितमपि विशेषार्थ-
माह ।

'प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दा-
अथ ४६१०
ङ्गद्यायः कुभुजङ्गपायकभुवः सिद्धांशके
१
नाधिकः । १५८१।२४

एकत्रीशफलं यथा युगगुणखांशुच्छरादाहतो
४८५३०१४
भूमेः कन्दुकमालवत् कुपरिधिर्व्याचष्टे
प्रस्फुटम् ॥'

भूपृष्ठफलस्य लङ्कोन्नतस्य ध्रुवमाह ।

'इदं कन्दुकपृष्ठजालवदिलामौले फलं अक्षितं
लङ्कायास्य घनांशकोऽपि न भवेद्यस्मात्फलं
खाब्धिवम् ।
तत् प्रत्यक्षविरुद्धमेतदखिलं नैवाद्य वा चाद्य वा
ये प्रौढ़ा गणका विचारपटवस्तत्त्वाऽवबुद्ध्या
भवन् ।

अथ तदुपपत्तिमाह ।
'यत् परिधिर्द्वयब्धिघ्नं कृत्वा लब्धा किलांशुकम् ।
तेनार्द्धं छाद्यते गोलः किञ्चिदूनञ्च दृश्यते ॥
गोलक्षेत्रफलाद्यत्नाद्यत्क्षेत्रफलं यतः ।
चार्द्धद्विगुणितात्सत्रं तावदेवापरं दले ॥
एवं यत्नगुणात् क्षेत्रफलात् पृष्ठफलं खलु ।
नाधिकं जायते तेन परिधिघ्नं कृतः कृतम् ॥
कृतक्षेत्रफलं यत्नात् परिधिघ्नं न युक्तिमत् ।
दुष्टत्वादृणितस्यास्य दुष्टं भूपृष्ठजं फलम् ॥"
अथान्यथा प्रतिपाद्यते ।
'गोलस्य परिधिः कल्पो वेदब्ध्यब्धिमितैर्मितः ।
सखपुप्लगरेखाभिर्यद्दामलकके स्थितः ॥
दृष्टान्ते वप्रकाक्षेत्रं प्रागुक्तपरिधेर्मितात् ।
कर्णाधःस्थरेखाभिर्गोले यत्नात् प्रकल्प्यते ॥
तत्रैकवप्रकक्षेत्रफलं खखैः प्रसाध्यते ।
सर्व्वत्रैवं विभज्यार्द्धहीनं त्रिज्यार्द्धभाजितम् ॥
एवं वप्रफलं तत् स्याद्गोलद्यासप्तमं यतः ।
परिधिद्यासघातोऽयं गोलपृष्ठफलं स्फुटम् ॥'
अथ भूमेः प्रलयभेदान् प्रलयत्वाह ।

'दृङ्मितिर्यैरहि भुवः समन्तात्
स्याद्योजनं भूभवभूनिपूर्व्वैः ।
ब्राह्म्ये लये योजनमात्रदृङ्मि-
र्गोऽयं भुवः प्राकृतिकैरखिलायाः ॥
दिने दिने यत्क्षियते हि भूते-
र्देहस्थितं तं प्रलयं वदन्ति ।
ब्राह्मं लयं ब्रह्मदिनान्तकाले
भूतानि यद्ब्रह्मतनुं व्रजन्ति ॥
ब्रह्मात्मये या प्रकृतिं प्रायान्ति
सर्व्वाणयतः प्राकृतिकं लयोक्ताः ।
लीनाल्पतः कर्म्मपुटाल्पत्वात्
पृथक् क्रियन्ते प्रकृतेर्विकारैः ॥
ज्ञानाग्निदग्धाखिलपुण्यपापा
मनः समाधाय हरौ परेशे ।
यद्योगिनो यान्ति विहारिमक्षा-
दात्यन्तिकं तेति लयस्तुरीयः ॥'
अथ ब्रह्माण्डगोलमाह ।

'भभ्वधरक्षितिदण्डवमानवाद्या
ये याश्च विष्टपगणेश्वरचक्रकक्षाः ।
लोकत्रयस्थितिकरैर्ण्यपरिग्रहिता
ब्रह्माण्डभाण्डजठरे तदिदं समस्तम् ॥"
अथाम्बोक्तं ब्रह्माण्डमानं पूर्व्वोक्तमपि प्रश्नाद्यनुवदति स्म ।
कोटित्रयेऽब्जनवघट्कनखाभ्रभूभृद्भुजङ्गेन्दुभि
र्व्याप्तिः ब्राह्मविधो वदन्ति गणित स्तत्रामिमां योजनैः ।
१८०९२०६२०००००००० ।
तद्ब्रह्माण्डकटाहसम्पुटतटे केचिच्चतुर्वेदनं
केचित् पोचुरहश्चतुष्टयकरिं पौराणिकाः
सूरयः ॥

करतलकलितामलक-
वदमलं सकलं विदन्ति ये गोलम् ।
दिवसकरकरविकरविहत-
तमसो गणकः परिधिवदितस्तेः ॥

ब्रह्माण्डमेतच्चिन्तमस्तु गो वा
कल्पे यथः कामति योजनानि ।
यावन्ति पूर्व्वैरिह तत्प्रमाणं
प्रोक्तं खकक्षाख्यमिदं मतं नः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोषः समाप्तः ॥
भूच्छायं, क्ली, स्त्री, (भुवश्छाया । "विभाषासेनासुराच्छायाशालानाम् ।" २ । ४ । २५ । इति तत्पुरुषे विभाषया नपुंसकम् । छायाबाहुल्ये तु केवलं स्त्रीत्वं) अन्धकारः । इति शब्दमाला ॥
भूजम्बुः, पुं, (भुवो जम्बुरिव ।) उपरत्नविशेषः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य भूनागशब्दे द्रष्टव्यः ॥)
भूजम्बूः, स्त्री, (भूवो जम्बूरिव सादृश्यात्) विकङ्कतफलम् । गोधूमः । इति मेदिनी । बे, १४ ॥ भूमिजम्बूः । इति राजनिर्घण्टः ॥
भूतं, क्ली, (भू + क्तः ।) युक्तम् । न्यायः । न्यादिः । पृथिव्यप्तेजोवाय्वाकाशपञ्चकम् । (यथा, मनुः । १२ । १४ ।
"तासान्तु भूतसम्पृक्तो महान् क्षेत्रज्ञ एव च ॥
उत्पादयति भूतेषु स्थितं तं वाप्य निष्कृतः ॥"
"स च त्रिविधो वैकारिकस्तैजसो भूतादिरिति । भूतादिरपि तैजससहायात्तन्मात्रतामापन्नेभ्यो भूतानि शब्दतन्मात्रात्मकमाकाशं स्पर्शतन्मात्रात्मकं वायुं रूपतन्मात्रात्मकं तेजो रसतन्मात्रात्मिका आपो गन्धतन्मात्रात्मिका पृथिवीति । तदुक्तम् । शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति । तेषां विशेषाः शब्दस्पर्शरूपरसगन्धास्तेभ्यो भूतानि व्योमानिलानलजलोर्व्व्यः ।" इति सुश्रुते शारीरस्थाने प्रथमेऽध्याये ।)
कृतम् । सत्यम् । इत्यमरभरतौ ॥ पिशाचादिः । (यथा, श्रीभागवते । ३ । १७ । २१ ।
"एषा घोरतमा वेला घोराणां घोरदर्शना ।
चरन्ति यस्यां भूतानि भूतेशानुचराणि ह ॥")
जन्तुः । इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा, मनुः । ६ । ८ ।
"स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्व्वभूतानुकम्पकः ॥"
स्थावरजङ्गमात्मकं द्रव्यम् । यथा, मनुः । ८ । ९० । ९ ।
"रक्षन् धर्म्मेण भूतानि राजा वध्यांश्च घातयन् ।
यजतेऽहरहर्यज्ञैः सहस्रशतदक्षिणैः ॥")
वस्तुतत्त्वम् । यथा,—
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं छीयते व्यवहारतः ॥
छलं प्रमादाभिहितम् । निरस्य परिहृत्य । भूतेन वस्तुतत्त्वानुसरणेन । व्यवहारान्नयेदन्तं कुर्य्यात् । यस्मादनृतमपि वस्तुतत्त्वमपि अनुपन्यस्तमनभिहितं छीयते छादितमुपगच्छति व्यवहारतो व्यवहारेण साक्ष्यादिभिः । तस्माद्भूतानुसरणं कर्त्तव्यम् । यथार्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा सत्यत्वेन सभ्यप्रतिपादयितव्यं साक्ष्यादिभिरुपायैस्तथा सति साक्ष्यादिभिरेवार्थेनैव निर्णयो भवतीति ॥ अथ सर्व्वथापि भूतानुसरणं न शक्यते कर्त्तुं तथा सति साक्ष्यादिभिर्निर्णयः कार्य्यस्त्वनुकल्पः । यथोक्तम् । भूतच्छलानुसारित्वाद्व्यवहृतिः समुदाहृता । भूतन्तत्त्वार्थयुक्तं यत् प्रमादाभिहितं छलमिति ॥ तत्र भूतानुसारी व्यवहारो मुख्यः । छलानुसारी त्वनुकल्पः ।
इति मिताक्षरायां व्यवहाराध्यायः ॥
भूतं, त्रि, (भाव्यते स्मेति । "आदृगमहनजनः किकिनौ लिट् च ।" ३ । २ । १७१ । इति भावे क्तः । भू + क्तः । भूतिरस्यास्तीति वा । अर्श-आदित्वात् अच् । अभवदिति वा । भुवो गत्यर्थ इति । भूतार्थे कर्त्तरि क्तः ।) प्राप्तौ । जन्तुः । (यथा, ऋग्वेदे । १ । २७ । ६ ।
"धिया चक्रे वरेण्यो भूतानां गर्भमादधे ॥"
यथा च चरके शारीरस्थाने तृतीयेऽध्याये ॥
"भूतानाञ्चतुर्व्विधा योनिर्जरायुजाण्डजस्वेदोद्भिदः ।")
अतीतम् । (यथा, कथासरित्सागरे । १ । २४ ।
"भूतं भवद् भविष्यद् वा किं तत् स्यात् जगति प्रिये ।
भवती यन्न जानीयादिति शब्दोऽणुवाचकः ॥")
कृतम् । (यथा, सुश्रुते चिकित्सितस्थाने । १० अध्याये ।
"गोधूमद्भूतानां वा यवानां शक्तून् कारयित्वा ।")
सत्यम् । सद्यम् । इत्यमरभरतौ ॥ प्राप्तम् । (यथा, महाभारते । १३ । ६४ । १५ ।
"यद् ब्राह्मणसुखात् प्राप्तं प्रतियच्छन्ति वै यवः ।
भूतात्मानो महात्मानस्ते न यान्ति परा-भवम् ॥"
"भूतः प्राप्तो वशीकृत आत्मा चित्तं येन ॥"
इति तट्टीकायां नीलकण्ठः ।) सत्यम् ।
इति मेदिनीशब्दरत्नावल्यौ ॥ (यथा शाकुन्तले । प्रथमाङ्के । "सूत्रधारः । सङ्गीतम् । आर्य्ये ! कथयामि ते भूतार्थम् ।") भूतकालस्य पर्य्यायो यथा । कृतम् २ अतीतम् ३ छन्नम् ४ निभृतम् ५ गतम् ६ । इति राजनिर्घण्टः ॥ उत्तरपदस्थ एव भूतशब्दः समार्थ इति शाब्दिकाः । यथा देवभूतोऽयम् । इति भरतः ॥ (उत्तरपदस्थ भूतशब्दः स्वरूपार्थोऽपि । यथा, मनुः । १ । ५ ।
"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्व्वतः ॥")
भूतः, पुं. (भू + कर्त्तरि क्तः ।) देवयोनिविशेषः । स च अधोमुखोर्द्धमुखादिः पिशाचभेदो ब्रह्मानुचरो बालग्रहः । इत्यमरभरतौ ॥ (यथा, मार्कण्डेयपुराणे । ५१ । ५३ ।
"विधिपेष्वनुयात्रेषु बालं भिन्नञ्च कीर्त्तयेत् ।
भूतानां मातृभिः सार्द्धं बालकानान्तु शान्तये ॥")
कुमारः । इति मेदिनी । ते, ४१ ॥ योगीन्द्रः । इति शब्दरत्नावली ॥ ब्रह्मचतुर्थांशौ । इति त्रिकाण्डशेषः ॥ * ॥ भूतनागशब्दस्य । यथा,
"श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा ।
तेन वस्त्रप्रदानं स्याद्भूतग्रहस्य विग्रहम् ॥

भूतम्नी

अगस्त्यपुष्पनस्यो वे समरीचच भूतहृत् ।
भृङ्गवर्म्मे वे हिक्कु निम्बपत्राणि वै यवाः ।
गौरसर्षप एभिः स्यात्क्षेपो भूतहरः कृतः ॥
गोरोचना मरीचानि पिप्पली सैन्धवं मधु ।
अञ्जनं क्षतमेभिः स्याद् यक्षभूतहरं शिव ! ॥
अपि च ।
"वचा चिकटुकश्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा चपला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बचिकटुगोमूत्रेणावचर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादग्रहाजघ्नीश्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"

इति गारुडे १६२ । १६६ अध्यायः ॥

शम्भुगजभूता यथा,—

"हते वराहस्य गले भर्गमासाद्य ते गणाः ।
चतुर्भागाः स्वयं भूत्वा भूतं कर्म्मेति वै जगुः ॥
भूतत्वमभवत्तेषां चतुर्भागवतां तदा ।
वचनात् पद्मजातस्य भूतग्रामास्ततो मताः ॥
यो लोकविदितः पूर्व्वं भूतग्रामश्चतुर्विधः ।
यतस्तेभ्योऽधिका यस्मैज्जडभूतग्राम उच्यते ॥
इति वः सर्व्वमाख्यातं भूताः शम्भुगणा यथा ।"

इति कालिकापुराणे २६ अध्यायः ॥

(वसुदेवस्य पौरवीगर्भजातद्वादशपुत्राणां ज्येष्ठतमः । यथा, भागवते । ६ । २४ । ४७ ।
"पौरव्यास्तनया ह्येते भूताद्या द्वादशाभवन् ॥")

भूतकेशः, पुं, (भूतस्य केश इव ।) स्वनामख्यातद्रव्यम् । तत्पर्य्यायः । गोलोमी २ । इत्यमरः । २ । १० । १११ ॥ भूतकेशी ३ अल्पकेशी ४ केशी ५ । इति रत्नमाला ॥ भूतानां केश इव भूतकेशः क्षीवत्वेति केचित् । स्त्री चैतन्ये । अथ द्वयोर्भूतकेशी गोलोमी भूतकेशिकेति वाचस्पतिः । इति भरतः ॥

भूतकेशी, स्त्री, (भूतकेश + गौरादित्वात् ङीष् ।) भूतकेशः । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ६० अध्याये ।
"गोलोमी चाजलोमी च भूतकेशी जटा तथा ॥")

दीप्तालिका । नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

भूतक्लान्तिः, स्त्री, (भूतानां क्लान्तिः ।) भूतावेशः । इति राजनिर्घण्टः ॥

भूतगन्धा, स्त्री, (भूतः मर्द्दनं विनापि प्रकटितोगन्धोऽस्याः ।) सुरानामगन्धद्रव्यम् । इति जटाधरः ॥

भूतघ्नः, पुं, (भूतं हन्तीति । हन् + टक् ।) उडुः । इति हेमचन्द्रः ॥ लशुनः । भूतकेशः । इति राजनिर्घण्टः ॥ भूतनाशके त्रि ॥ (यथा, तन्त्रसारे ।
"भूतघ्नैस्तु विधीकैस्तैर्विद्रुताः क्रूरचेतसः ।
भूतप्रेतपिशाचाश्च वेताला भैरवादयः ॥")

भूतघ्नी, स्त्री, (भूतं हन्तीति । हन् + टक् + ङीप् ।) तुलसी । इति राजनिर्घण्टः ॥ सुरिक्तिका । इति रत्नमाला ॥

भूतच

भूतचतुर्द्दशी, स्त्री, (भूतप्रिया भूतोद्देशे क्रिया कर्त्तव्या वा चतुर्द्दशी । मध्यपदलोपी समासः ।) कार्त्तिककृष्णचतुर्द्दशी । सा एव यमचतुर्द्दशी । तत्फलं यथा, पाद्मे ।
"चतुर्द्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयसोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशयः ॥"

स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्द्दश्यां विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥"

किञ्च पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पितृको न कुर्वीत तर्पणं यमभीरुयोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ॥
देवत्वञ्च पितृत्वञ्च यमस्यास्ते हि रूपता ॥
नक्तं यमचतुर्द्दश्यां यः कुर्य्याच्छिवसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा श्वेतपोषणान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्द्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः ॥"

किञ्च ।
"अमावास्याश्चतुर्द्दश्याः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः ॥"

इति श्रीहरिभक्तिविलासः ॥

अपि च । लैङ्गे ।
"कार्त्तिके कृष्णपक्षे च चतुर्द्दश्यां दिनोदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः ॥
अपामार्गयुतञ्चैव भ्रामयेच्छिरसोपरि ।
ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ॥
नरकाय प्रदानञ्च दीपः संपूज्य देवताः ।
नरकाय नरकनिवृत्तये ।
अर्थोऽभिधेयो वै वस्तु प्रयोजनमित्यपि ॥
इति निवृत्तावपि नादर्थ इत्यनेन चतुर्थीविधानात् । अपामार्गभ्रामणमन्त्रः ।
प्रोतलोष्ठसमायुक्तसकण्टककलान्वित ।
हर पापमपामार्ग ! भ्राम्यमाण: पुनः पुनः ॥
अतः प्रदोषसमये दीपान् दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥
भविष्ये ।
कार्त्तिके भौमवारे च चित्रा कृष्णा चतुर्द्दशी ।
तस्यामाराधितः स्याणुर्नयेच्छिवपुरं ध्रुवम् ॥
यां काञ्चित् सरितं प्राप्य कृष्णपक्षे चतुर्द्दशीम् ।
यमुनायां विशेषेण नियतस्तर्पयेद्दृयमान् ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् दद्याज्जलाञ्जलीन् ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥"

भूतभा

आचारादन्यचतुर्द्दश्यामाचमनीयं कर्त्तव्यम् । तच्च निर्णयान्तरम् ।
"ओकं केशवकान्तुकं वरवपं कालञ्च निम्बं जयां
प्रालिङ्गीं हिजमोचिकाञ्च पटुकं प्रौलम्बं गुडूचीलता ।
भण्टाकीं मुनिवल्लकं शिवदिने खादन्ति ये मानवाः
प्रेतत्वं न च यान्ति कार्त्तिकदिने कृष्णे च भूतेतिथौ ॥"

जयां जयन्तीं पटुकं पटोलं प्रौलम्बं मुलम्बा इति ख्यातम् । मुनिवल्लकं मुनबिया इति ख्यातम् । इति तिथ्यादितत्त्वम् ॥

भूतजटा, स्त्री, (भूतस्य जटेव तत्सदृशत्वात् ।) जटामांसी । इति शब्दमाला ॥ (पर्य्यायो यथा,
"जटामांसी भूतजटा जटिला च तपस्विनी ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) गन्धमांसी । इति राजनिर्घण्टः ॥

भूतद्रावी, [न्] पुं. (भूतान् पिशाचान् द्रावयतीति । द्रु + णिच् + णिनिः ।) भूताङ्कुशवृक्षः । रक्तकरवीरः । इति राजनिर्घण्टः ॥

भूतद्रुमः, पुं, (भूतप्रियो द्रुमः ।) श्वेताम्लकवृक्षः । इति राजनिर्घण्टः ॥

भूतधात्री, स्त्री, (भूतानि धरतीति । धृ + ष्टच् । + ङीप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, बृहन्नारदीयपुराणे संहितायाम् । ८ । ३० ।
"निम्बन्नग्नालोत्पलवाहिन्यस्त्वा
भयोर्वसुकासुपथान्तवैराम् ।
संहृल्लोकां कलिदोषमुक्तां
सर्व्वं तदा प्राप्नुहि च भूतधात्रीम् ॥")

भूतनाथः, पुं, (भूतानां नाथः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, रघुः । २ । ५८ ।
"तद्भूतनाथानुग । नार्हसि त्वं ॥")

भूतनायिका, स्त्री, (भूतानां नायिका निदानिका ।) दुर्गा । इति हेमचन्द्रः ॥

भूतनाशनं, क्ली. (भूतानि प्राणिजातानि नाशयत्यनेनेति । नश् + णिच् + ल्युट् ।) रक्तचन्दनम् । इति राजनिर्घण्टः ॥

भूतनाशनः, पुं, (भूतान् नाशयतीति । नश् + णिच् + ल्युः ।) भल्लातकः । इति रत्नमाला ॥ सर्षपः । इति राजनिर्घण्टः ॥

भूतपक्षी, स्त्री, (भूत इव छायां पक्षं यस्याः । ङीष् ।) तुलसी । इति राजनिर्घण्टः ॥

भूतपुष्पः, पुं, (भूतयुक्तं प्राणिविशिष्टं पुष्पं यस्य ।) प्लक्षवृक्षः । इति रत्नमाला ॥

भूतपूर्णिमा, स्त्री, (भूतानां पूर्णिमा ।) आश्विनी पूर्णिमा । तत्पर्य्यायः ॥ शारदी २ कौमुदी ३ अश्वयुजी ४ घृतपर्व्वा ५ रत्नभूतिः ६ कोजागरा ७ । इति शब्दरत्नावली ॥

भूतब्रह्मा, [न्] पुं, (भूतानामयं ब्रह्मा ब्राह्मणः ।) ब्राह्मणः । इति शब्दमाला ॥

भूतभावनः, पुं. (भूतानि शिवादीनि भावयति जनयतीति । भू + णिच् + ल्युः ।) विष्णुः ॥

(यथा, महाभारते । १३ । १४६ । १४ ।
"भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥"
महादेवः । यथा, महाभारते ।१३।१७।३३ ।
"अभिवाद्यो महाजन्मा तपस्वी भूतभावनः ॥")
षट्कर्मैरवः । इति विश्वसारतन्त्रोक्तं तस्याष्टोत्तरशतनामात्मकं स्तवनाम ॥ (भूतानि भावयति पालयतीति । भूतपाजके, त्रि । इति श्रीधरस्वामी ॥ यथा गीतायाम् । ६ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥")

भूतभृत्, पुं, (भूतानि बिभर्त्तीति । भृ + क्विप् । तुगागमश्च) विष्णुः । यथा, महाभारते ।१३।१४६।१४।
भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः । इति तस्य सहस्रनामस्तोत्रम् ॥ (भूतधारके, त्रि । यथा, गीतायाम् । ६ । ५ ।
"भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥")

भूतमारी, स्त्री, (भूतानि मारयतीति । भूत + मृ + णिच् + णिनिः ।) चौड़ानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

भूतयज्ञः, पुं, (भूतार्थो यज्ञः । भूतानि कृम्यादिप्राणिजातानि तान्युद्दिश्य यो यज्ञ इति वा निजं मार्जंस्याकरणीय पञ्चयज्ञेषु यज्ञभेदः ।) भूतबलिः । तै तु पञ्चमहायज्ञान्तर्गतबलिवैश्वदेवकर्म्मणी । यथा, भूतेभ्यो बलिहरणं भूतयज्ञः । इति हारीतसूत्रम् ॥ अस्यानुष्ठानं बलिशब्दे द्रष्टव्यम् । (यथा, मनुः । ३ । २१ ।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा ।
नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् ॥")

भूतलिका, स्त्री, (भूतलं पृथ्वीतलं आधारत्वेन अस्त्यस्या इति । भूतल + इन् टाप् ।) पृक्का । इति राजनिर्घण्टः ॥

भूतवासः, पुं, (भूतानां वासो यत्र ।) कलिद्रुमः । इत्यमरः । २ । ४ । ५८ ॥ (तथा च पर्य्यायः । "विभीतकस्तु कलिलः स्यात्कर्षफलस्तु सः । कलिद्रुमो भूतवासस्तथा कलियुगालयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
महादेवः । यथा, हरिवंशे उत्तरपर्व्वणि । १५ । ३२ ।
"भूतवास नमस्तुभ्यं सर्व्ववास नमोऽस्तुते ॥")

भूतविक्रिया, स्त्री, (भूतानामिव विक्रियास्याम् ।) अपस्मारः रोगः । इति राजनिर्घण्टः ॥

भूतवृक्षः, पुं, (भूतप्रियो वृक्षः ।) प्लक्षोदुम्बरवृक्षः । इति मेदिनी । के, ५६ ॥

भूतवेणी, स्त्री, (भूतानामिव वेणीरस्याः । गौरादित्वात् ङीष् ।) श्वेतशेफालिका । इत्यमरः । २ । ४ । ७१ ॥ (विशेषोऽस्याः श्वेतशेफालिकाशब्दे द्रष्टव्यः ॥)

भूतशुद्धिः, स्त्री, (भूतानां देहारम्भकपृथिव्यादिपञ्चभूतानां शुद्धिः शोधनम् ।) पूजादौ बीजविशेषन्यासाभ्यां चित्तस्थितपापपुरुषदहनपूर्व्वकशरीरशोधनम् । तत्प्रयोगो यथा । रमिति जलधारया वह्निप्राकारं विचिन्त्य तन्मध्ये उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं सूक्ष्माधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थितसाधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवायुाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुष्त्वक्श्रोत्र वाक्पाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपपञ्चविंशतितत्त्वानि जीवानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकज्जलवर्णं पापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत् । दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोड़शवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारोत्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् । ठमिति चन्द्रबीजं शुक्लवर्णं वामनासायां ध्यात्वा तस्य षोड़शवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तत्कालललाटस्थचन्द्रादगलितसुधया मातृकावर्णात्मिकया समस्तदेहं विरचय्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत् । मात्रासंख्यया वा ॥*॥
तदुक्तं गौतमीये ।
"सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिवस्थाने परमात्मनि देशिकः ॥
धूम्रवर्णं ततो वायुबीजं परिचिन्तयेच्छिखम् ।
पूरयेदिडया वायुं सुधीः षोड़शमात्रया ॥
मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया ।
द्वात्रिंशन्मात्रया मन्त्री रेचयेत् पिङ्गलाख्यया ॥
पूरयेदनया चैव सञ्चिन्त्य नीलमारुतम् ।
रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितम् ॥
तेन पूरकयोगेन मात्रया षोड़शाख्यया ।
चतुःषष्ट्या मात्रया च निर्हरेत् कुम्भकेन च ।
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभम् ।
ब्रह्महत्याशिरस्कञ्च स्वर्गलोकभुजद्वयम् ॥
सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ।
तत्संसर्गि महादुष्टमङ्गप्रत्यङ्गपातकम् ॥
उपपातकरोमाणं रक्तचक्षुष विलोचनम् ।
खड्गचर्म्मधरं क्रुद्धमेवं कृत्वा विचिन्तयेत् ॥
मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तम् ।
एवं संदह्य परितो द्वात्रिंशन्मात्रया ततः ॥
भस्मना सहितं मन्त्री रेचयेदिडया पुनः ।
वामनाड्यां चन्द्रबीजं कुन्देन्दुयुतसप्रभम् ॥
भालेन्दुराजे संयोज्य ततः षोड़शमात्रया ।
सुषुम्नया चतुःषष्टिमात्रया तोयबीजकम् ॥
ध्यात्वामृतमयीं दृष्टिं पञ्चाग्नेयीं कपिर्णीम् ।
तया देहं विशुद्ध्यैव मनसा पिङ्गलाध्वना ॥
द्वात्रिंशन्मात्रया मन्त्री लं बीजेन दृढं नयेत् ।
स्वस्थाने हंसमन्त्रेण पुनस्तेनैव वर्त्मना ॥
जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः ।
इति ज्ञात्वा भूतशुद्धिं मातृकान्यासमाचरेत् ॥*
संक्षेपभूतशुद्धिर्यथा । पुरश्चरणचन्द्रिकायाम् ।
"अथवान्यप्रकारेण भूतशुद्धिर्विधीयते ।
धर्म्मकन्दसमुद्भूतं ज्ञानमालासुशोभनम् ॥
ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकम् ।
स्वीयहृत्कमले ध्यायेत् प्रणवेन विकासितम् ॥
ज्ञात्वा तत्कर्णिकासंस्थं प्रदीपकलिकानिभम् ।
जीवात्मानं हृदि ध्यात्वा मूले सञ्चिन्त्य कुण्डलीम् ।
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत् ॥"
इति तन्त्रसारः ॥

भूतसञ्चारः, पुं, (भूतस्य सञ्चारः ।) भूतोन्मादरोगः । तत्पर्य्यायः । आवेशः २ भूतक्रान्तिः ३ ग्रहागमः । इति राजनिर्घण्टः ॥

भूतसञ्चारी, [न्] पुं, (भूतेषु सञ्चरति इति भूत + सम् + चर णिनिः ।) दावानलः । इति शब्दमाला ॥

भूतसर्गः, पुं, (सृज्यते इति । सृज + भावे घञ् । भूतानां सर्गः ।) भूतसृष्टिः । (यथा, मार्कण्डेयपुराणे । ४७ । ३१ ।
"प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः ।
तन्मात्राणां द्वितीयस्तु भूतसर्गः स उच्यते ॥")
"ब्राह्मं प्रजापतीयञ्च सौम्यमैन्द्रमथैव च ।
गान्धर्व्वमथ कौबेरं रक्षःपैशाचमासुरम् ॥
स्थावरं पाशवं मार्गं सार्पं शाकुनिकन्तथा ।
चतुर्दशविधं ह्येतद्भूतसर्गं प्रकीर्त्तितम् ॥"
इति वह्निपुराणोक्तं क्रीवत्वमार्गम् ॥

भूतसारः, पुं, (भूतः गतः सारो यस्य ।) प्लक्षोदुम्बरभेदः । इति राजनिर्घण्टः ॥

भूतहन्त्री, स्त्री, (भूतानि हन्तीति हन + क्विप् + ङीप् ।) वन्ध्याकर्कोटकी । नीलदूर्व्वा । इति राजनिर्घण्टः ॥

भूतहर, पुं, (भूतानि हरतीति हृ + अच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

भूतहारि, [न्] क्ली, (भूतानि हरतीति हृ + णिनिः ।) देवदारु । इति राजनिर्घण्टः ॥

भूता, स्त्री, (भूत + टाप् ।) लक्षणचतुर्दशी । यथा, स्कान्दे ।
"ब्रह्मकोदरमध्ये तु यानि तीर्थानि सन्ति वै ।
पूजितानि भवन्तीह भूतायां पारणे कृते ॥"
अपि च ।
"त्रिवरात्रिव्रते भूतां कामविद्धां विवर्ज्जयेत् ॥"
इति तिथ्यादितत्त्वम् ॥

भूताङ्कुशः, पुं, (भूतानामङ्कुश इव निवारकत्वात् ।) खनामख्यातवृक्षः । तत्पर्य्यायः । चण्डकः २ क्षुरकः ३ तीक्ष्णः ४ क्रूरः ५ चण्डः ६ रामोद्दीपनसंज्ञः ७ भूतनाशी ८ यज्ञहाख्यः ९ । अस्य गुणाः । तीव्रगन्धत्वम् । उत्कटत्वम् । उष्णत्वम् । कटुत्वम् । भूतग्रहादिदोषघ्नत्वम् । कफवातनिकृन्तनत्वञ्च । इति राजनिर्घण्टः ॥

भूताधि

भूतात्मा, [त्मन्] पुं, (भूतानामात्मा ।) देहः । (यथा, मनुसंहितायाम् । १२ । १२ ।
"यः करोति तु कर्म्माणि स भूतात्मोच्यते बुधैः ॥"
"यः पुनरेष आपादान् करोति शरीराख्यः स पृथिव्यादिभूतारब्धत्वात् भूतात्मेति पण्डितैरुच्यते ॥" इति तट्टीकायां कुल्लूकभट्टः ॥)
परमेष्ठी । इति मेदिनी । ने, २०० ॥ शिवः । युद्धम् । इति शब्दरत्नावली ॥ विष्णुः । यथा,
"भूतकृत् भूतभृत् भावो भूतात्मा भूतभावनः ॥"
इति महाभारते दानधर्म्मः ॥
(जीवात्मा । यथा, मनुसंहितायाम् । ५ । १०६ ।
"अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति ।
विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ॥"
यथा च तत्रैव शारीरस्थाने प्रथमेऽध्याये ।
तस्मिंश्चरमसंन्यासे सकलाः सर्ब्बवेदनाः ।
समग्रा ज्ञानविज्ञाना निवृत्तिं यान्त्यशेषतः ॥
अतःपरं ब्रह्मभूतो भूतात्मा नोपलभ्यते ।
निःसृतः सर्ब्बभावेभ्यश्चिद्धं यस्य न विद्यते ॥
गतिर्ज्ञविदां ब्रह्म तच्चाक्षरमलक्षणम् ।
ज्ञानं ब्रह्मविदाञ्चात्र नाज्ञस्तज्ज्ञातुमर्हतीति ॥")

भूतारिः, क्ली, (भूतानां अरिः; तन्निवारकत्वात् अभिधानात् क्लीवत्वम् ।) हिङ्गु । इति राजनिर्घण्टः ॥
भूतार्णः, त्रि, (भूतेन ऋतः) भूताविष्टः । इति हैमचन्द्रः । ३ । १५५ ॥
भूतालो, स्त्री, (भूतानामालीव) भूपाटली । सुगली । इति राजनिर्घण्टः ॥
भूतावासः, पुं, (भूतानामावासः) विभीतकवृक्षः । इति राजनिर्घण्टः ॥ विष्णुः । यथा,—
"भूतावासो वासुदेवः सर्ब्बासुनिलयो लयः ॥"
इति महाभारते दानधर्म्मः ॥ (शरीरम् । यथा, मनुसंहितायाम् । ६ । ७७ ।
"जरायोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यञ्च भूतावासमिमं त्यजेत् ॥"
शाखोटः । तत्पर्य्यायो यथा,—
"शाखोटः पीतकनको भूतावासः खरच्छदः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
भूताविष्टः, त्रि, (भूतेन आविष्टः) पिशाचग्रस्तः । तन्त्रान्तरचक्रम् यथा,—
"पश्चरेखाः समुल्लिख्य तिर्य्यगूर्द्धकमेण हि ।
पदानि षड्दशाप्यत्र लिखेन्मायां सुनौ त्रयम् ॥
नवमे सप्त दत्त्वाथ वाहं पञ्चदशे तथा ।
द्वितीयेऽष्टावसमे षट् द्विप्रि ह्रौं षोडशे स्मृतिः ॥
एकादिना घमं शेषमिच्छाङ्गार्द्धं त्रिकोणके ।
तदा ह्राविंशद्गदादिः स्याच्चतुष्कोष्ठेषु मन्त्रतः ॥
दर्शनाकारवत्तासां सुभं स्यादेषु कर्म्मसु ।
ह्राविंशत् प्रसवे नार्य्याश्चतुस्त्रिंशद्भये नृणाम् ॥
भूताविष्टेषु पञ्चाशन्नष्टनाशान्तु वै मृतम् ।
ह्रासप्तत्रिंशु वन्ध्यायां चतुःषष्टौ रजाश्रवि ॥
विषे विंशौ शास्त्रकोटेष्वष्टाविंशतिरेव च ।
चतुरष्टौ च बालानां रोदने परिकीर्त्तिताः ॥"
इति ज्योतिस्तत्त्वम् ॥

भूतिकं

१	८	१८	२१
२०	२१	४	६
७	२	२३	१७
२२	१६	५	९
५०	५०	५०	५०

भूताविष्टः, त्रि, (भूतेन आविष्टः ।) भूतक्रान्तः । भूतादिना रोगग्रस्तः । (यथा,—
"भूताविष्टेषु पञ्चाशन्नष्टनाशान्तु वै मृतम् ।"
इत्यादि ज्योतिस्तत्त्वम् ॥ भूतविशेषाणामावेशसमयाः । यथा,—
"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि ।
गन्धर्व्वाः प्रायशोऽह्न्यां यक्षाश्च प्रतिपद्यथ ॥
क्षणदापत्ती च पितरः पक्षस्यामपि चोरगाः ।
रक्षांसि निशि पैशाचाश्चतुर्द्दश्यां विशन्ति च ॥
दर्पणादीन् यथाच्छाया ग्रहीष्णो प्राणिनो यथा ।
स्वमणिं भास्करार्चिश्च यथा देहञ्च देहभृत् ॥
विशन्ति च न दृश्यन्ते परब्रह्मस्वरूपिणम् ।"
इति सुश्रुते उत्तरतन्त्रे षष्टितमेऽध्याये ॥)
भूतावेशः, पुं, (भूतानामावेशः) भूतसञ्चारः । भूते पाओया इति भाषा । अस्य पर्य्याय आवेशशब्दे द्रष्टव्यः ॥
भूतिः, स्त्री, (भवत्यनयेति । भू + "क्तिच् क्तौ च संज्ञायाम् ।" ३ । ३ । १७४ । इति क्तिच् ।) महादेवस्य अणिमाद्यष्टप्रकारवैभवम् । इत्यमरः । १ । १ । ३८ ॥ ध्रुम्भुधूनभस्म । इत्यमरटीकायां भरतः ॥ भस्म ॥ (यथा, शिशुपालवधे । १ । ४ ।
"त्वया क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन भास्वता ॥")
सम्पत्तिः । (उत्तरोत्तरवृद्धिः । यथा, भगवद्गीतायाम् । १८ । ७४ ।
"यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्द्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥")
हस्तिग्रहकारः । इति मेदिनी ते, ४० ॥ (हस्तिग्रहकारोक्तं गजमन्त्रणम् । यथा, मेघदूते । १६ ।
"रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां ।
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥")
जातिः । इति विश्वः ॥ (पिङ्गलभेदः । यथा मार्कण्डेयपुराणे । ८६ । ४३ ।
"विश्वो विश्वभुगाराध्यो धर्म्मो धन्यः सुभावनः ।
भूतिदो भूतिकृद् भूतिः पितृणां ये गणा नव ॥"
लक्ष्मीः । यथा, भागवते । ४ । १ । ४ ।
"यस्तयोः पुरुषः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् ।
या स्त्री सा दक्षिणा भूतेरंशभूतानपायिनी ॥"
भूतेर्लक्ष्म्याः । इति तट्टीकायां श्रीधरस्वामी ॥) वृद्धिनामौषधम् । रोहिषतृणम् । भूतृणम् । इति राजनिर्घण्टः ॥ (भवनमिति । भू + क्तिन्) उत्पत्तिः । सत्ता । इति भूधात्वोर्भावे क्तिन्प्रत्ययेन निष्पन्नम् ॥
भूतिकं, क्ली, (भू + क्तिच् । संज्ञायां कन् ।) भूनिम्बः । कट्फलम् । इत्यमरः । २ । ४ । ८ ।

भूतृणः

कट्फलम् । यमानी । वनसारः । इति हेमचन्द्रः ।
भूतिकः, पुं, (भूति । संज्ञायां कन् ।) यमानी । इति रत्नमालाराजनिर्घण्टौ ॥
भूतिकामः, पुं, (भूतिं कामयते इति । कम् + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) राजमल्ली । हड्डसारिः । इति केचित् । ऐश्वर्य्याभिलाषिणि, त्रि । यथा । वायवं श्वेतमालभेत भूतिकामः । इत्यधिकरणमालायां द्वितीयपादे ज्योत्यष्टकाण्डे विध्यर्थवादबोधिका श्रुतिः ॥
भूतिकीलः, पुं, (भूतेः शुक्लादिसम्पत्तेः कीलः इव जलदत्वात् ।) भूखातः । इति शब्दमाला ॥ खाना इति भाषा ॥
भूतिगर्भः, पुं, (भूतिः कविलसम्पत्तिर्गर्भेऽन्तर्यस्य । यद्वा भूतिशब्दः उपाधिलाभोऽन्तर्यस्य ।) भवभूतिकविः । इति भूरिप्रयोगः ॥
भूतिनिधानं, क्ली, (निधीयतेऽस्मिन्निति । नि + धा + अधिकरणे + ल्युट । ततः भूत्या निधानमिति, षष्ठीसमासः ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥
भूतिमान्, [न्] त्रि, ऐश्वर्य्ययुक्तः । भूतिरस्त्यस्य । इत्यर्थे मनुप्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते । ६ । २०६ । ४२ ।
"आत्मज्ञान् भूतिमांश्चैव सुखी भवति पण्डितः ॥")
भूतीकं, क्ली, (भूतिक । पृषोदरात् साधुः ।) भूनिम्बः । यमानी । भूक्षत्रम् । कट्फलम् । इति मेदिनी । के, १३५ ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३९ अध्याये ।
"यवो पर्पटकं मुस्तं भूतीकमथ कट्फलम् ॥"
यथा च भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
"कृष्णं रोहिषं देवजग्धं गौरुल्लिकल्पया ।
भूतीकं श्यामपीतञ्च श्यामकं धूमगन्धिकम् ॥")
भूतृणं, क्ली, (भूतक्लृप्तम् ।) गन्धतृणम् । गन्धखड़ इति भाषा । तत्पर्य्यायः । गन्धवेरुड़म् २ रौहिषम् ३ गौमयप्रियम् ४ । इति रत्नमाला ॥ पटम् ५ रामकर्पूरम् ६ सुगन्धम् ७ भूरम् ८ श्यामकम् ९ श्यामकम् १० पौरम् ११ देवजग्धकम् । इति रत्नमालान्तरम् ॥ (यथास्य पर्य्यायः ।
"गुग्गुलीजन्तु भूतीकं सुगन्धं जन्तुकप्रियम् ।
भूतृणन्तु भवेच्छ्वा मालाकृत्तकमित्यपि ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
भूतृणः, पुं, (भूतक्लृप्तः ।) भूक्षत्रम् । सुगन्धरोहिष इति परिमलदशाङ्गानि च अस्यैवेमे प्रसिद्धाः । तत्पर्य्यायः । रौहिषः २ भूतिः ३ भूतिकः ४ कुटुम्बकः ५ मालाकृत्तः ६ यमानिका ७ छत्रः ८ अतिच्छत्रकः ९ गुग्गुलीजः १० सुगन्धः ११ गुच्छालः १२ पुंस्त्रियन्धः १३ वधिरः १४ अतिगन्धः १५ छत्तरोधः १६ अरेणुकः १७ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । वातवह्नभूतग्रहाविषज्वरातिसारदोषनाशित्वञ्च । इति [illegible]

भूनागः

नागः, पुं, (भूतानां प्राच्यादीनां प्रभवादीनां वाक्यबन्धाद्वाच्च नागः।) शिवः। इत्यमरः। १।१।२२॥ (यथा, राजतरङ्गिण्याम्। १।२०।

"खेचरैः सम्भाविते देशे च तदुचितत्वये नृपः।
तपः सन्तोषितोऽसौमे भूतेशात् सुतमी सुतम्॥")

भूतलं, क्ली, (भुवि उत्तमम्।) सुवर्णम्। इति हेमचन्द्रः। ३।९०॥

भूतरीभवा, स्त्री, (भूतर्यां भूमिले भवतीति। भू+अच्। ङीप्।) आखुपर्णी। इति भावप्रकाशः॥

भूदारः, पुं, (भुवं दारयतीति। दृ+कर्म्मण्यण्। ३।२।१। इत्यच्।) सूकरः। इत्यमरः। २।५।२॥

भूदेवः, पुं, (भुवो भुवि वा देवः।) ब्राह्मणः। इत्यमरः। १।७।४॥

भूधनः, पुं, राजा। भूरेव धनं यस्य सः। इति केचित्॥

भूधरः, पुं, (धरतीति। धृ+पचाद्यच्। भुवां धरः इति षष्ठीसमासः।) पर्व्वतः। इति हेमचन्द्रः॥ (यथा, मार्कण्डेयपुराणे। ५७।११।

"तेषां सहस्रशश्चाग्ने भूधरा ये समीपगाः॥")

तद्भेदः। यथा,—

"अलकश्चपणासालनीलाभूधरवासुकाः।
वकाद्या यत्नभेदाः स्युर्वैद्यान्त्राद्याच्च मूधकाः॥"

इति शब्दचन्द्रिका॥

(यथाचास्य अवतारः।

"द्विपलं शुद्धसूतस्य सूतार्द्धं गन्धकस्तथा।
कन्यागोरेव संमर्द्द्य दिनमेकं निरन्तरम्॥
तद्वा तद्भूधरे यत्ने दिनैकं मारयेत् पुटे।"

इति वैद्यकरसेन्द्रसारसंग्रहे सारखण्डसारबाधिकारे॥

शिवः। यथा, महाभारते। १३।१४।१५१।

"भूधरो भोगमौलिश्च नागकुण्डलकुण्डली॥"

इन्द्रः। यथा, भागवते। ३।१३।४०।

"इंद्राग्नकोष्ठा भगवत्प्रयता
विराजते भूधर! भूः सभूधरा।
यथा वनान्निःसरतो दता धृता
मतङ्गजेनास्य सपत्नपद्धतौ॥")

भूधात्री, स्त्री, (भूतया धात्री।) भूम्यामलकी। इति राजनिर्घण्टः। (यथास्य गुणाः।

"भूधात्री वातलस्तिक्ता कषाया मधुरा हिमा।
पित्तासृक्कासपित्तास्रकफकृच्छ्रक्षतापहा॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

वटुकभैरवः। इति विश्वसारतन्त्रे तस्य ध्यानमन्त्रोक्तम्॥

भूधः, पुं, (भुवं धरतीति। धृ+मूलविभुजादित्वात्। ३।२।५। इत्यस्य वार्त्तिकोक्त्या कः।) पर्व्वतः। इति हेमचन्द्रः। ३।६३॥

भूधराः, पुं, उपरत्नविशेषः। तत्पर्य्यायः। क्षितिभागः २ भूभागः ३ रत्नभागुकः ४ क्षितिजः ५ क्षितिभागुः ६ रत्नतुण्डकः ७। अस्य गुणाः। यज्ञभारत्वम्। नानाविधानुकारत्वम्।

भूपदो

रत्नजातत्वम्। ततुपत्वस्य विषापहत्वञ्च। इति राजनिर्घण्टः॥

भूनिम्बः, पुं, क्षुपविशेषः। चिरायता इति भाषा। (यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये।

"अधूकभूनिम्बयष्टिका इति समभागाः काथ्याः स्युः।")

तत्पर्य्यायः। अनार्य्यतिक्तः २ कैरातः ३ रामसेनकः ४ किरातितिक्तः ५ हैमः ६ काण्डतिक्तः ७ किरातकः ८। इति राजनिर्घण्टः॥ कटुतिक्तः ९। इति भावप्रकाशः॥ (तथा चास्य पर्य्यायान्तरम्। वैद्यकरत्नमालायाम्।

"किरातितिक्तं कैरातं भूनिम्बः काण्डतिक्तकः॥")

अस्य गुणाः। वातिकत्वम्। तिक्तत्वम्। कफपित्तज्वरापहत्वम्। व्रणसंरोपणत्वम्। पथ्यत्वम्। कुष्ठकण्डूतिप्रीपनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"किरातकोऽन्यो नेपालः सोऽतितिक्तो ज्वरान्तकः।
किरातः सारको रूक्षः शीतलस्तिक्तको लघुः॥
सन्निपातज्वरश्वासकफपित्तास्रदाहजित्।
कासप्रीपहृद्वाक्कृच्छ्रज्वरव्रणजिदीरितः॥"

इति भावप्रकाशः॥

अस्य गुणपर्य्यायान्तरे किरातितिक्तशब्दे दृश्ये॥

भूनीपः, पुं, (भूमिलग्नो नीपः। शाकपार्थिवादित्वात् समासः।) भूमिकदम्बः। इति राजनिर्घण्टः॥

भूनेता, [तृ] पुं, (भुवो नेता नायकः।) राजा। इति केचित्॥

भूपः, पुं, (भुवं पाति रक्षतीति। पा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) राजा। इत्यमरः। २।८।१॥ अर्थलोभेन प्रजादण्डकरणे तस्य पापं यथा।

"अर्थलोभेन यो भूपः प्रजादण्डं करोति च।
दुष्किलाशाच्च कुरुते स तल्लोमाब्दं वसेद्ध्रुवम्॥
ततो दुष्किलजातिश्च सप्तजन्मसु भारते।
ततो नरश्चाङ्गहीनो व्याधी मुद्गो भवेन्नरः॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः॥

भूपतिः, पुं, (भुवः पतिः।) वटुकभैरवः। यथा,

"भूधरो भूधराधीशो भूपतिर्भूधरात्मकः।"

इति विश्वसारतन्त्रोक्तभैरवस्तोत्रम्।

राजा। यथा,—

भूपत्नी यस्य पत्नी सा तु भवति कथं भूपती रामचन्द्रः।

इति रामायणे कैकयीवाक्यम्॥

ऋषभौषधम्। इति राजनिर्घण्टः॥

भूपदः, पुं, (भुवि पदानि मूलान्यस्य।) वृक्षः। इति शब्दचन्द्रिका॥

भूपदी, स्त्री, (भुवि पदं यस्याः। गौरादित्वात् ङीष्।) मल्लिका। इत्यमरः। २।४।७०॥ (यथास्याः पर्य्यायः।

"मल्लिका मदयन्ती च शीतभीरुश्च भूपदी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भूमयो

भूपलाशः, पुं, (भुवि पलाशमस्य।) हरितालः। विशाखी इति भाषा। यथा,—

"अधोऽकः सुवलश्च भूपलाशो विशल्यजत्।"

इति रत्नमाला॥

भूपाटली, स्त्री, (भुवि जाता पाटलीव।) वृक्षविशेषः। भूयातानि इति वैद्यवाद्यदी इति च हिन्दीभाषा। तत्पर्य्यायः। भूकुम्भी २ भूनाली ३ रक्तपुष्पिका ४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। पारदे प्रयोजकत्वञ्च। इति राजनिर्घण्टः॥

भूपालः, पुं, (भुवं पालयतीति। पालि रक्षणे+"कर्म्मण्यण्।" ३।२।१। इत्यच्।) राजा। इति शब्दमाला॥ (यथा, मार्कण्डेये। १८।३।

"यदर्थं याचते मुक्तं तदविघ्नादयन् हयः।
पलाशानां द्वादशं भागं भूपालाय बलिंजगः॥"

सोमपालस्य पुत्रः। यथा, राजतरङ्गिण्याम्। ८।३३६५।

"सोमपालात्मजो भूभृद् भूपालः प्राप्ततत्क्षया॥")

भूपत्नी, स्त्री, (भुवः पत्नी।) क्षीता। इति शब्दरत्नावली॥ [रामचन्द्रः॥"

("भूपत्नी यस्य पत्नी स भवतु कथं भूपती

इति रामायणम्॥)

भूपेष्टः, पुं, (भूपानामिष्टः।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

भूभर्त्ता, [र्तृ] पुं, (भुवो भर्त्ता। "याचकादिभिश्च।" २।२।९। इति षष्ठीसमासः।) पृथिवीपतिः। इति विद्वान्मनोरमायां तत्पुरुषसमासः॥ (यथा, राजतरङ्गिण्याम्। ३।२६१।

"तस्मिन्नहनि भूभर्त्रा शोकाग्निःशमतामियम्॥")

भूभुक्, [ज्] पुं, (भुवं भुनक्ति पालयतीति। भुज्+"सज्ञायां भृञ्जिधारिसहितपीति।" ३।२।४१। इति क्विप्।) राजा। इति जटाधरः॥ (यथा, कामन्दकीयनीतिसारे। ४।६१।

"सापत्नारातिदुर्गाणि भुवः शास्त्रपदाङ्कुशाः।
निवासाय प्रपद्यन्ते भूभुजां भूतिमिच्छताम्॥")

भूभृत्, पुं, (भुवं बिभर्त्तीति। भृ+क्विप्। "ब्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशांषः।" ८।२।३६। इति षत्वम्।) राजा। (यथा, रघौ। ११।८१।

"तेन भूमिनिहितैककोटि तत्
काम्मुकञ्च वलिनाधिरोपितम्।
निघ्नता च रिपुराज भूभृतां
भूमणीव रुव घूमकेतवः॥")

पर्व्वतः। इति मेदिनी। ते, १४०॥ (यथा, कुमारसम्भवे। ६।१।

"अथ विश्वात्मने गौरी सन्दिदेश शिवः
सखीम्।
दृता मे भूभृतां नाथः प्रमाथीभिरयतामिति॥")

भूमयी, स्त्री, (भू+मयट्+ङीप्।) क्षमा। सा तु कर्म्मपत्नी। इति शिवाकल्पद्रुमः॥ अदाम्नदे, त्रि॥

भूमा, [न्] पुं, बहुत्वम्। यथा। "भूयोभूम-भूयिष्ठाः।" बहोरोयस्विमन् इष्ठान्तस्य एते निपात्यन्ते। इति सुग्धबोधव्याकरणम्॥ ईयसोर्यस् ईयस्यादौ बहोर्भूरादेशः। ईयस्विनोरादिलोपः। इष्ठे यकारागमश्च निपात्यते। अतिशयेन बहुः भूयान्। बहोर्भावः भूमा। अतिशयेन बहुः भूयिष्ठः। इति तट्टीकायां दुर्गादासः॥ बहुत्वविशिष्टः। तच्च वाच्यलिङ्गः। यथा। भूयः भूम। इति प्रभूतशब्दपर्य्यायेऽमरटीकायां रमानाथः॥*॥ विराट्पुरुषः। यथा। "यच्च नान्यत् पश्यति नान्यत् शृणोति नान्यद्विजानाति स भूमा यो भूमा तदमृतम्।" इत्यादि श्रुतिभ्यो ब्रह्मनित्यत्वं सत्यमुद्धस्य प्रतिभाति। इति वेदान्तसारटीका॥

भूमिः, स्त्री, (भवन्ति भूतान्यस्यामिति। भू+ "भुवः किति।" उणा० ४। ४५। इति मिः। स च कित्।) पृथिवी। स्थानमात्रम्। इति मेदिनी। मे, २२॥ (यथास्या पर्य्यायः।
"भूर्भूमिः पृथिवी पृथ्वी मेदिनी वसुधावनिः।
क्षितिरुर्वी मही क्ष्मा च धरा कुर्वसुन्धरा॥"
इति वैद्यकरत्नमालायाम्॥)
जिह्वा। इति संक्षिप्तसारोणादिवृत्तिः॥ योगिनामवस्याविशेषः। यथा,—
"निरुद्धे चेतसि पुरा सविकल्पसमाधिना।
निर्विकल्पसमाधिस्तु भवेदभ्यासिकः॥
युक्तिस्थते खतत्त्वादौ दिनीये परबोधितः।
अन्ते युक्तिस्थते नैव सदा भवति तत्त्वयः॥
एवं प्राग्भूमिविद्वावुत्तरोत्तरभूमये।
विधेया भगवद्भक्तिस्तां विना सा न सिध्यति॥"
इति गीतागूढार्थदीपिकायां मधुसूदनसरस्वती॥
भूमेः पर्य्यायादयः पृथिवीशब्दे दृश्याः। अस्या गुणाः।
"भूमेः स्थैर्यं गुरुत्वञ्च काठिन्यं प्रसवार्थता।
मन्थो गुरुत्वं श्लिष्टत्वं संघातः स्थापना धृतिः॥"
इति महाभारते मोक्षधर्मः॥
अस्यार्थः। स्थैर्यमचाञ्चल्यम् १। गुरुत्वं पतनप्रतियोगी गुणः २। काठिन्यम् ३। प्रसवार्थता धान्याद्युत्पत्तिक्षमत्वम् ४। मन्थः ५। गुरुत्वं पिण्डवृद्धिः ६। श्लिष्टत्वं मन्थनसामर्थ्यम् ७। संघातः स्निग्धावयवत्वम् ८। स्थापना मनुष्यादाश्रयम् ९। धृतिः पाञ्चभौतिके मनसि यो धृत्यंशः। इति तट्टीका॥ ७॥
भूमिदानमाहात्म्यम् यथा,—
"सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन्! विप्रायाक्लिष्टकर्मणे॥
अक्षुब्धमानसो वापि न भवेत् पृथिवीपतिः।
न भूमिदायवद्दानं पवित्रमिह विद्यते॥
भूमिं यः प्रतियह्णाति भूमिं यश्च प्रयच्छति।
उभौ तौ पुण्यमाप्नोतौ नियतं स्वर्गगामिनौ॥
यत्किञ्चिद्भूमिदानन्तु सर्व्वदानोत्तमोत्तमम्।
महीपते! नरः कोऽपि भूमिदो भूमिमाप्नुयात्॥
भूमिदानसमं दानं नास्त्यत्र पृथिवीतले।
तस्मात्तदत्यमलञ्चैव मुक्तिसुक्तिसुखप्रदम्॥
यथा तथा प्रकारेण भूमिदाता तु भूमिपः।
सुखी स्यात् सर्व्वकालेषु चान्ते स्वर्गमवाप्नुयात्॥
इदमेवमतरं वापि भूमिदानं महत्तमम्।
यः कश्चिद्ब्राह्मणे दत्त्वा भवतीह महीपतिः॥
सर्व्वथा सर्व्वदा देया धरित्री ब्राह्मणस्य तु।
ब्राह्मणैनैव न ज्ञातुं शक्यते जनैरपि॥
ज्ञात्वा स्नानादिकं कर्म्म विप्रभूमिं नरो बलात्।
करोति यदि राजेन्द्र! तत् सर्व्वं निष्फलं भवेत्॥
ब्राह्मणाद्दानमादाय विनाशुश्राव पार्थिव!।
तथा सत्परिशोधञ्च तत्तन्मूल्यादिकं विना॥
विप्रभूमौ भूसुरोऽपि देवं मैत्रं तथाचरम्।
हरिस्मृ तथारामप्रासादमण्डपं गृहम्॥
स्नानादिस्थानं सेतुबन्धनं भवनं गवाम्।
सधान्यफलमूलादिशाकादिक्षेत्रमेव च॥
पशूनां वसनं पुष्पोद्यानं वृक्षादिरोपणम्।
सवटाश्वत्थतुलसीधात्रीबिल्वादिरोपणम्॥
नित्यं नैमित्तिकं काम्यं स्नानसन्ध्यादिकं तथा।
पञ्चयज्ञं तथेड्याद्यादिकमेतत्तु चापरम्॥
श्रीकृष्णसेवनं भक्तभक्तिसोढ्यपूर्व्वकम्।
का कथा वेतरेषान्तु न कुर्य्यात् पारमार्थिकः॥
यः कर्म्मफलकामेप्सुर्न करोत्यत्र कर्म्म च।
कुरुते मत्तनामोच्चादन्यानादा श्रमादिनः।
नृपते! कुर्व्वतामेतत् सर्व्वं स्यान्निष्फलं ध्रुवम्॥
यद्वा मिरथवा तस्य संपूर्णं फलमेव च।
असौ लोके हि धर्म्मात्मा ज्ञानी च सर्व्वधर्म्मवित्॥
विवेकी धर्म्मशास्त्रज्ञः पुराणागमवेदवित्।
वेदान्तज्ञो सुधीः साधुः कार्य्यादिषां महीपते!।
न कुर्य्याद्भिन्नरत्नं ब्राह्मणोद्धरकल्मषम्॥"
इति पाद्मोत्तरखण्डे ३६ अध्यायः॥*॥
अपि च। दक्षसंहितः।
"यद्दिनं वर्षसहस्राणि स्वर्गे तिष्ठति भूमिदः।
उच्छ्रिता चातुमन्ता च तावन्ति नरके वसेत्॥
तथा।
भूमिं दत्त्वा तु यः पश्चं कुर्य्याच्चन्द्रार्ककालिकम्।
अनाच्छेद्यमनाहार्य्यं दानमेतत्तु तद्विदुः॥
महाभारते।
अपि पापकृतो राज्ञः प्रतियह्णन्ति साधवः।
पृथिवीं नाम्नदिच्छन्ति पावनीं जगतीं यथा॥
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम्।
दाने वाप्यथवादाने नामास्याः परमं प्रियम्॥"
दानादानकाले यत् प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दानञ्च प्रतिग्रहीतव्या च। भूमेः पूजायां दानवाक्ये च प्रियदत्तेति विशेषणम्। भूमिर्विष्णुदेवताका। षष्टिवर्षसहस्रावच्छिन्नस्वर्गवासः फलम्। प्रतिग्रहे तद्भूमेः प्रदक्षिणमात्रम्। भूमेरसन्निधाने तासुद्दिश्य प्रदक्षिणम्। इति मुहूर्त्ततत्त्वम्॥७॥ आर्द्राद्यपादे रवौ भूमौ रजोयुक्ता भवति तत्काले पाठादिविशेषो यथा ज्योतिषे।
"रजोयुक् क्ष्माम्बुवाची च रौद्राद्यपादगे रवौ।
तस्यां पाठो वीजवापो गाहिभीर्दुग्धपानतः॥
रजोयुक् क्ष्मा ऋतुमती पृथ्वी। ज्योतिषे।
यस्मिन् मासे सङ्क्रान्तुर्यत्काले निपुणं वदेत्।
अम्बुवाची भवेन्नित्यं पुनस्तत्काजवारयोः॥"
मत्स्यसूक्ते।
"धरण्याश्चतुमत्वाच्च भूमिकम्पे तथैव च।
अन्तरागमने चैव विद्या नैव पठेद्बुधः॥"
इति तिथ्यादितत्त्वम्॥*॥
"न स्वाध्यायं वषट्कारं न हेषिष्टपूजनम्।
शलानां योजनञ्चैव वीजानां वपनं तथा॥
दिनत्रयं न कुर्व्वीत यावत् पृथ्वी रजस्वला॥
यतिनो ब्रह्मचारिणश्चैव विधवा च द्विजस्त्रियः।
अम्बुवाचीदिनेनैव पाकं कृत्वा न भक्षयेत्॥
स्वपाकं परपाकं वा अम्बुवाचीदिने तथा।
भक्षणं नैव कुर्वीत चाज्ञाजानसमं क्षुतम्॥"
इति राजमार्त्तण्डः॥
अम्बुवां भूमिमाह देवलः।
'सा अमेध्या मलिना दुष्टा दत्तक्षिनयाशुद्धमा भवति।' अशुमेध्या यथा,—
"प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चाण्डालैर्दृषितं यत्र यत्र विण्मूत्रते भुवः॥
विण्मूत्रोपहतं यत्तु कुणपो यत्र दृश्यते।
एवं कलुषभूयिष्ठा भूरमेध्येति लक्ष्यते॥"
कुणपः शवः। दुष्टा यथा,—
"क्षमिकीटपदङ्गेहैर्दृषिता यत्र मेदिनी।
दृष्टापकर्षणैः क्षिप्तैर्वान्तैश्च दुष्टा प्रकीर्त्तिता॥"
दृष्टा मलीभूतशेषा। मलिना यथा,—
"नखदन्तलवं लत्यकेशपांसुरजोमलैः।
भस्मपङ्कलवैर्वापि प्रच्छन्ना मलिना भवेत्॥
नाशाश्च मुक्तिमाह।
"दहनं खननं भूमेरुपलेपनवापने।
पञ्चस्वप्यथवैतेषु शौचं पञ्चविधं स्मृतम्॥"
वापनं बहिरन्तरेण पूरणम्। अशुमेध्याशुद्धं पक्षं वा। दृष्टायाः द्विकं त्रिकं वा। मलिनायाः दहनादीनामेकधा शोधनमाह देवलः।
"पक्षधा वा चतुर्द्धा वा भूरमेध्या विशुध्यति।
द्विधा दृष्टा त्रिधा वापि शुध्यते मलिनैकधा॥"
अन्यपक्षप्रकारमाह मनुः।
"सम्मार्जनेनाङ्गनेन सेकेनोल्लेखनेन च।
गवाञ्च परिवासेन भूमिः शुद्धति पञ्चधा॥"
सम्मार्जनं झटाद्यपनयनम्। अङ्गनं गोमयेनोपलेपनम्। सेको जलेन प्रक्षालनम्। उल्लेखनं तक्षणम्। परिवासो गवोपवेशनम् अत्र सेकपरिवासयोर्निर्लेपप्रक्षालनाद्दृष्टस्य अन्येषामशेषाणामेध्यानिष्टविषयत्वम्। ब्रह्मपुराणे।
"ग्रामाद्दक्षगतं त्यक्त्वा नगराद्वा चतुर्गुणम्।
भूमेः सप्तगुणं शुद्धिः स्यादूर्द्धञ्च लोको न विद्यते॥"
दक्षं चतुर्हस्तः। नगरं महाग्रामः। इति गोपालपक्षानवच्छेदशुद्धिविषयः॥७॥ भूमौ सर्व्वशेषजलादिविशेषो यथा,—
"न भूमौ विलिखेदङ्कं मलं न मुखजे लिखेत्।

भूमिख

न सुप्ता सुखमर्कं स्यात्यं न सुखमाचरेत्तु तत् ॥
भूमध्ये यत्रयी चैव अक्षरं याथ पुष्कलम् ।
भूमौ तिष्ठति देवेशि ! तच्चतुर्थन्तु ब्रह्मता ।
तस्मात् भवति देवेशि ! तत्कालात्तत् परिवर्जयेत् ॥"

इति योगिनीतन्त्रे तृतीयभागे ७ पटलः ॥

भूमिकदम्बः, पुं, (भूमिजातः कदम्बः । मध्यपदलोपी कर्मधारयादिवत् समासः ।) कदम्बविशेषः । तत्पर्य्यायः । भूतौघः २ भूमिजः ३ भद्रपल्लभः ४ जलपुष्पः ५ वृत्तपुष्पः ६ विषमः ७ ब्रह्मदारकः ८ । अस्य गुणाः यथा, राजनिर्घण्टे ।

"भिक्तदम्बाः कटूष्णाश्च वृष्या दोषहरा हिमाः ।
कषायतिक्ताः पित्तास्रा वीर्य्यवृद्धिकराः पराः ॥"

भूमिका, स्त्री, (भूमिरिव भायतीति । के + कः । स्त्रियां टाप् । यद्वा । भूमिरेव स्वार्थे कन् । टाप् ।) दृचना । वैद्यान्तरपरिभाषा । इति मेदिनी ॥

भावाभि भावेऽधिष्ठानात्तद्देशास्तु भूमिकाः ।
इति हेमचन्द्रः ॥

भूमिः । भूमिरेव भूमिका स्वार्थे कप्रत्ययेन निष्पन्ना । इति भाकरणम् ॥ वेदान्तमते चित्तस्यावस्थाविशेषः । यथा । क्षिप्तं मूढं विक्षिप्तं एकाग्रं निरुद्धं इति पञ्चभूमयः । आसुरसम्बन्धाकृष्टदेहवासनासु वर्त्तमानं चित्तं क्षिप्तभूमिका । १ । निद्रातन्द्रादियुक्तं चित्तं मूढभूमिका । २ । कदाचिद्ध्यानयुक्तं चित्तं क्षिप्तादिद्वितयतया विक्षिप्तभूमिका । ३ । तत्र क्षिप्तमूढयोः समाधित्वग्रहेऽपि नास्ति विक्षिप्ते तु समाधित्वग्रहस्तदितरत् भूमिद्वयं समाधिः । एकाग्रे मनसि सम्भूतमर्थं प्रद्योतयति क्षिणोति च क्लेशान् कर्म्मबन्धनानि शथयति निरोधमभिमुखीकरोतीति यः प्रज्ञालोको योग एकाग्रभूमिका । ४ । सर्व्ववृत्तिनिरोधरूपा संप्रज्ञातसमाधिर्निरुद्धभूमिका । ५ । इति वेदान्तसंज्ञानिरूपणग्रन्थः ॥

भूमिखर्ज्जूरिका, स्त्री, (भूमिजाता खर्ज्जूरिका ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । खादी २ दुरारोहा ३ क्षुद्रफला ४ । अस्या भेदाः गुणाश्च ।

"भूमिखर्ज्जूरिका खादी दुरारोहा क्षुदुच्छदा ।
अथ क्षुद्रफला काककर्कटी खादुमस्त्रिका ॥
पिण्डखर्ज्जूरिका ज्ञेया सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोक्षनाकारा परादीपादिदागता ॥
भायन्ते पश्चिमे देशे सा खर्ज्जूरीति कीर्त्तिता ॥
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ।
स्निग्धं रुचिकरं हृद्यं चतुष्यवरं गुरु ॥
तर्पणं रक्तपित्तघ्नं पुष्टिवृष्यमुदाहृतम् ।
कोष्ठमारुतहृद्रोगं वातश्लेष्मकफापहम् ॥
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम् ।
मद्यं मद्यभवं पित्तमद्योद्भूतगदान्तकृत् ॥
मद्यतीक्ष्णा गुरुरुष्णा खजखर्ज्जूरिका स्मृता ॥
खर्ज्जूरीतरतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्मकरं वृष्यं दीपनं बलशुक्रकृत् ॥"

इति भावप्रकाशः ॥

भूमिखर्ज्जूरी

भूमिखर्ज्जूरी, स्त्री, (भूमिजाता खर्ज्जूरी ।) भूमिखर्ज्जूरिका । इति राजनिर्घण्टः । अस्या गुणपर्य्यायाः भूखर्ज्जूरीशब्दे द्रष्टव्याः ॥

भूमिचम्पकः, पुं, (भूमिजातश्चम्पकः ।) पुष्पवृक्षविशेषः । भूँइचाँपा इति भाषा । तत्पर्य्यायः । ताम्रपुष्पः २ वन्धिवत्वः ३ दृढत्वः ४ । इति शब्दचन्द्रिका ॥ अस्य मूलं व्रणपाकारकम् ॥

भूमिजं, क्ली, (भूमेर्जायते इति । जन् + डः ।) गोरोचनवर्णम् । इति राजनिर्घण्टः ॥

भूमिजः, पुं, (भूमेः पृथिव्या जायते इति । जन् + डः ।) मङ्गलग्रहः । नरकराजः । इति मेदिनी । जे, २७ ॥ भूमिकदम्बः । मनुष्यः । इति राजनिर्घण्टः ॥ (भूमिजाते, त्रि । यथा, विष्णुधर्म्मोत्तरे ।

"वरस्त्रिरभवं भौमं भूकन्यमपि भूमिजम् ॥")

भूमिजगुग्गुलुः, पुं, (भूमिजो गुग्गुलुः ।) आग्नापुरगुग्गुलुः । तत्पर्य्यायः । देवमेदजः २ दुर्गाक्षः ३ आग्नापुरसम्भवः ४ मध्वारः ५ मेदजः ६ महिषासुरसम्भवः ७ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । कफवातनाशित्वम् । उष्णवीर्य्यत्वम् । भूतघ्नत्वम् । मेध्यत्वम् । सौरभ्यत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुः, स्त्री, (भूमिजाता जम्बुः ।) क्षुद्रजम्बुः । तत्पर्य्यायः नादेयिका २ नादेयी ३ भूजम्बुः ४ भूमिजम्बुका ५ । इति शब्दरत्नावली ॥ काकजम्बुः ६ प्रीतपल्लवा ७ । इति रत्नमाला ॥ नादेयिका च नादेयी भूजम्बुर्भूमिजम्बुका ।
भूमिजम्बुलतायां स्यात् केचित्तु भूमिचम्पके ॥
इति शब्दरत्नावली ॥

भूमिजम्बूः, स्त्री, (भूमिजाता जम्बूरिति मध्यपदलोपी समासः ।) भूलम्बूः । क्षुद्रजम्बूः । तत्पर्य्यायः । हृस्वफला २ भद्रवल्लभा ३ दृढा ४ भूजम्बूः ५ भ्रमरेष्टा ६ प्रियभक्षा ७ काष्ठजम्बूः ८ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । श्लेष्मपित्तनाशित्वम् । हृद्यत्वम् । संग्राहित्वम् । क्षुत्कण्ठदोषनाशित्वम् । वीर्य्यपुष्टिदत्वञ्च । इति राजनिर्घण्टः ॥

भूमिजम्बुका, स्त्री, (भूमिजम्बू + स्वार्थे कन् । टाप् ।) भूमिजम्बूः । इत्यमरः । २ । ४ । ३८ ॥

भूमिजा, स्त्री, (भूमेर्जायते इति । जन् + डः । टाप्) सीता । इति विकाण्डशेषः मेदिनी च । जे, २७ ॥

भूमिजीवी, [न्] पुं, (भूम्या तत्कर्षणादिना जीवतीति । जीव् + णिनिः ।) वैश्यः । इति शब्दरत्नावली ॥

भूमिदेवः, पुं, (भूमौ देव इव भूम्या देव इव वा ।) ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, किरातार्জ্জুनीये । २ । ६ ।

"अद्य क्रियाः कामदुघाः क्रतूनां
सभ्याग्निभिः सम्यति भूमिदेवाः ।
आसंस्तरैरक्षि जगत्सु जात
[illegible]")

भूमीस

भूमिपः, पुं, (भूमिं पाति रक्षतीति । पा + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) राजा । इति जटाधरः ॥ (यथा, महाभारते । १ । १०० । ८ ।

"धौतशौलभयाधाराः सुखस्पर्शविबोधनाः ।
पतिं भारतगोप्तारं समपद्यन्त भूमिपाः ॥")

भूमिपत्रः, पुं, (भूमिः पत्र इव यस्य ।) वाताम्बः । इति हारावली ॥

भूमिपिण्डाग्रः, पुं, (भूमौ पिण्डाग्र इव तद्वदाकृतिमत्त्वात् ।) तालवृक्षः । इति हारावली ॥ (विवरणमस्य तालवृक्षशब्दे द्रष्टव्यम् ॥)

भूमिमङ्गः, पुं, (भूमिं मङ्गयति भूषयतीति । मङ्ग + घञ् ।) अट्टपादिका । इति रत्नमाला ॥ मदनसालीति द्वापरमाली इति च भाषा ॥

भूमिमङ्गलभूषणा, स्त्री, (भूमिमङ्गलं भूषयतीति । भूषि + ल्युः + टाप् ।) माधवीलता । इति राजनिर्घण्टः ॥

भूमिरक्षकः, पुं, (रक्षतीति । रक्ष + ण्वुल् । भूमेः रक्षकः । गमनकाले भूमेरुपरि पादाप्रदानात् तथात्वम् ।) वाताम्बः । इति भूरिप्रयोगः ॥

भूमिलाभः, पुं, (भूमेर्लाभोऽत्र ।) क्षेत्रुः । इति भूरिप्रयोगः ॥ (भूमेर्लाभः ।) भूमिप्राप्तिश्च ॥

भूमिलेपनं, क्ली, (भूमिर्लिप्यतेऽनेनेति । लिप् + ल्युट् ।) गोमयम् । इति हेमचन्द्रः । ४ । ३३८ ॥ (भूमेर्लेपनम्) भूमेर्लेपश्च ॥

भूमिवर्द्धनः, पुं, क्ली, (भूमिर्वर्द्धतेऽनेनेति । वृध् + णिच् + ल्युट् । स्त्रीदधार्थिवांशप्रदानेन भूमेर्वर्द्धनादस्य तथात्वम् ।) गवः । इति हेमचन्द्रः ॥

भूमिसम्भवा, स्त्री, (भूमेः सम्भव उत्पत्तिर्यस्याः ।) सीता । इति जटाधरः ॥

भूमिस्पृक्, [ग्] पुं, (भूमिं स्पृशतीति । स्पृश् + "स्पृशोऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मानुषः । वैश्यः । इति मेदिनी । ग्वे, ३८ ॥ चौरविशेषः । अन्धः । खञ्जः । इति शब्दरत्नावली ॥

भूमी, स्त्री, (भूमिः । "ऋदिकाराद्ग्रामिणः ।" इति पक्षे ङीष् ।) भूमिः । इति भरतधृतरूपकोषः ॥

भूमीन्द्रः, पुं, (भूम्यामिन्द्र इव । भूमेः इन्द्र ईश्वरो वा ।) राजा । इति शब्दरत्नावली ॥

भूमीरुहः, पुं, (भूम्यां रोहतीति । रुह + कः ।) वृक्षः । यथा,—

"दीर्घाक्षायुता यथा विरहिणीश्वासाञ्चिता वायवो
यामिन्यश्च यथा कुलवधूहृष्टिः सरोजा प्रिये ! ।
छाया वाञ्छितमा वधोऽवनितावाक्यीव भूमीरुहा
निष्यन्दाः सुचिरादृथा मिलितयोर्यूनोर्मिथो हृदयः ॥"

इत्युद्भटः श्लोकः ॥

भूमीरुहः, पुं, (भूमेः सम्भवते उत्पद्यते उत्पद्यते

हिन्दी भाषा। तत्पर्य्यायः। हारहातुः २ वरहातुः ३ खरच्छदः ४। अस्य गुणाः। शिशिरत्वम्। रक्तपित्तप्रशादत्वञ्च। इति भावप्रकाशः॥

भूम्यामलकी, स्त्री, (भूमिस्था आमलकी प्राक् मार्थिवादित्वात् समासः) क्षुपविशेषः। भूँइ आमला इति भाषा। तत्पर्य्यायः। बहुपुत्री २ जङ्घा ३ अधस्था ४ ताली ५ तामलकी ६ अजटा ७ क्षुद्रफला ८ क्षेत्रामलकी ९। इति रत्नमाला॥ क्षितुन्नकः १० भटा ११ अमला १२ अजभटा १३ ताली १४ शिवा १५। इत्यमरः। २।४।१२७॥ भाटा १६ मला १७ भाटामला १८ अमलाजभटा १९। इत्यमरटीकायां भरतः॥ भूम्यामलकिका २० शिवामलकी २१ बहुपुत्रा २२ बहुफला २३ बहुबीर्य्या २४ भूधात्री २५। अस्या गुणाः। वातकारित्वम्। तिक्तत्वम्। कषायत्वम्। मधुरत्वम्। शिशत्वम्। पिपासावाक्षपित्तास्रकफपाण्डुरुजनाशित्वञ्च। इति भावप्रकाशः॥

भूम्यामली, स्त्री, (भूम्या आमलते आत्मानं धारयतीति। आ+मल्+अच्। ङीष्।) भूम्यामलकी। अदनेली इति हिन्दी भाषा। भूँइ आमला इति बङ्गभाषा। तत्पर्य्यायः। तमाली २ ताली ३ तमालिका ४ उच्चटा ५ ढड़पादी ६ क्षितुन्ना ७ क्षितुन्निका ८ भूधात्री ९ चारटी १० दृष्या ११ विघ्नी १२ बहुपत्रिका १३ बहुबीर्य्या १४ अहिभयदा १५ विश्वपर्णी १६ हिमालया १७ अजभटा १८ वीरा १९। अस्या गुणाः। कषायत्वम्। अम्लत्वम्। पित्तमेहदाहनाशित्वम्। शिशिरत्वम्। व्रणरोधार्शोघ्नमलत्वञ्च। इति राजनिर्घण्टः॥

भूम्याकुल्यं, क्ली, (भूमिमाकोलति आच्छादयतीति। आ+कुल्+क। ततः यत्।) क्षुपविशेषः। भूमितलक् इति हिन्दी भाषा। तत्पर्य्यायः। कुडुकेतु २ मार्कवीयम् ३ मधौषधम् ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। व्रणकुष्ठामविषनाशित्वञ्च। इति राजनिर्घण्टः॥

भूयः, [स्] व, (सुखे भावाय यस्यति यतते इति। भू+यस्+क्विप्।) पुनरर्थम्। इति शब्दरत्नावली॥ (यथा, विष्णुपुराणे। २।४।२४।
"यद्योक्तं यच्च नैवोक्तं मयात्र परमेश्वर!।
तत् सर्व्वं मे नमस्तुभ्यं भूयो भूयो नमो नमः॥")

भूयान्, [स्] त्रि, (अयमनयोरतिशयेन बहुरिति बहु+"द्विवचनविभज्योपपदे तरबीयसुनौ।" ५।३।५७। इति ईयसुन्। "बहोर्लोपोभू च बहोः।" ६।४।१५८। इतीयसुन ईलोपः भूरादेशश्च।) बहुतरः। इति मेदिनी। ने, ३०॥ (यथा, मनुसंहितायाम्। २।१६७।
"प्रजानां विनु पर्व्वेषु भूयांसि गुणवन्ति च।")

भूयिष्ठं, त्रि, (अयमेषामतिशयेन बहुरिति। बहु+इष्ठन्। "इष्ठस्य यिट् च।" ५।३।५५।

इति यिडागमो बहोः स्थाने भूरादेशश्च।) प्रचुरः। इत्यमरः। ३।१।६१॥ (यथा, ऋग्वेदे। ८।८५।३।
"इन्द्रस्य वज्र आयसो मिमिक्ष इन्द्रस्य बाहोर्भूयिष्ठमोजः॥")

भूयुक्ता, स्त्री, (भुवा+युक्ता।) भूमिशर्करी। इति राजनिर्घण्टः॥

भूरि, क्ली, (भवति भूयते वेति। भू+"अदिभूदिभूशुभिभ्यः क्रिन्।" उणा०। ४।६५। इति क्रिन्।) स्वर्णम्। इत्यमरः। ३।१।६१॥

भूरिः, पुं, (भवतीति। भू+"अदिभूदिभूशुभिभ्यः।" उणा० ४।६५। इति क्रिन्।) विष्णुः। ब्रह्मा। शिवः। इति मेदिनी। रे, ७३॥ वासवः। इति शब्दरत्नावली॥ (सोमदत्तस्य पुत्रभेदः। यथा, महाभारते। १।१८७।१४।
"कौरव्यः सोमदत्तस्य पुत्राश्चास्य महारथाः।
समवेताश्चयः शूरा भूरिर्भूरिश्रवाः प्रभुः॥")
प्रचुरे, त्रि। इत्यमरः। ३।१।६३॥ (यथा, ऋग्वेदे। ७।४।२।
"संयोवनायुवते शुचिदन्भूरि
चिद्रासमिदधति द्यवः॥")

भूरिक्, [ज्] स्त्री, (भरति सर्व्वं धरतीति भृञ्। भृञ उच्च।" उणा० २। ७२। इति इञ्। स च क्विन् धातोरकारान्तादेशश्च। पृषोदरादित्वात् साधुः।) पृथिवी। इति विद्वान्कौमुदाशब्दादिवृत्तिः॥

भूरिगन्धा, स्त्री, (भूरिः प्रचुरो गन्धोऽस्याः। ततष्टाप्।) पुरानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (गन्धाढ्यायाञ्च, त्रि॥)

भूरिगमः, पुं, (भूरिभिर्भारैर्गच्छतीति। भूरि+गम+"अन्येष्वपि दृश्यते।" ३।२।१७८। इति डप्।) गर्दभः। इति राजनिर्घण्टः॥

भूरिदावा, [न्] पुं, भूरि ददाति यः। (भूरि+दा+वनिप्। प्रचुरदाता। इति सुग्धबोधव्याकरणम्॥ (यथा, ऋग्वेदे। २।२०।१०।
"माहं मघोनो वरुणप्रियस्य भूरिदाव्नः
आविदं शूनमापेः॥")

भूरिदुग्धा, स्त्री, (भूरीणि दुग्धानि निर्य्यासा यस्याः।) वृश्चिकाली। इति राजनिर्घण्टः॥ (गुणादयोऽस्या वृश्चिकालीशब्दे ज्ञातव्याः॥)

भूरिपत्रः, पुं, (भूरीणि पत्राण्यस्य।) उच्चटालक्षम्। इति राजनिर्घण्टः॥

भूरिपत्रिकतरा, स्त्री, (भूरि प्रचितं कैशुकमाकं दायति शोधयति इति दैप्+कः। टाप्।) पाकुरपत्री। इति राजनिर्घण्टः॥

भूरिपुष्पा, स्त्री, (भूरीणि पुष्पाण्यस्याः।) घृतपुष्पा। इति राजनिर्घण्टः॥

भूरिप्रेमा, [न्] पुं, (भूरिः प्रेमा प्रेयस्यं यस्य।) चक्रवाकः। इति राजनिर्घण्टः॥

भूरिफेना, स्त्री, (भूरयः फेना यस्याः।) सप्तलाहयः। इत्यमरः। २। ४। १३१॥ चामारजवा इति भाषा॥

भूरिमला, स्त्री, (भूरि बलं यस्याः।) अतिबला। इति राजनिर्घण्टः॥

भूरिमल्ली, स्त्री, (भूरि मल्लते इति। मल्ल+अच् ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥

भूरिमायः, पुं, स्त्री, (भूरी माया यस्य।) शृगालः। इत्यमरः। २। ५। ५॥

भूरिशः, [स्] व, बहुशः। बहुशब्दार्थात् शसः शस् वेति कारकभूरिशब्दात् स्वार्थेशस्प्रत्ययनिष्पन्नोऽयं शब्दः। इति सुग्धबोधव्याकरणम्॥ (भूरीणि भूरीणि इति वीप्सायां शस्। (यथा, महानिर्व्वाणतन्त्रे। १।५२।
"बहुपत्नीसगादीनि गर्हितान्यपि भूरिशः॥")

भूरिश्रवाः, [स्] पुं, (भूरि श्रवो यशोऽन्नादिकं तितं यशो यस्य सः। यद्वा भूरीणि श्रवांसि सोमदत्तराजपुत्रः। यथा, महाभारते। १।१८७।१४।
"समवेताश्चयः शूराः भूरिर्भूरिश्रवाः प्रभुः॥")
स तु अर्জ্জुनसात्यकिभ्यां हतः। इति महाभारतम्॥ (बहुयशोविशिष्टे, त्रि॥)

भूरुक्षी, स्त्री, (भुवं पृथिवीं रुक्षति भुवि रोहतीति वा। भू+"वध+घा वह+वः पृषोदरादित्वात् वकार उकारौ गौरादित्वात् ङीष्।) गौहलिनी वृक्षः। इत्यमरः। २। ४। ५६॥ (भूरुक्षीति च सर्व्वानन्दः।) हातिशुँड़ा इति भाषा॥

भूरुहः, पुं, (भुवि रोहति प्रादुर्भवतीति भू+रुह+कः।) वृक्षः। इति शब्दमाला॥ (यथा, माघे। ७।५०।
"इदमिदमिति भूरुहाम्बुवृत्तेः।")

भूर्जः, पुं, (ऊर्ज+घञ्। भूः ऊर्जो यत्र यस्य। भुवि ऊर्জ্জयते इति भू+ऊर्ज+अच् वा।) स्वनामख्यातवृक्षविशेषः। भोजपत्र इति हिन्दीभाषा। (यथा, रघौ। ४। ७१।
"भूर्जेषु मर्म्मरीभूता कीचकध्वनिहेतवः।")
तत्पर्य्यायः। वल्कदुमः २ सुर्जः ३ सुत्वचः ४ भूर्जपत्रकः ५ शिवत्वक् ६ शिवदुमः ७ रक्षापत्रः ८ विशिवत्वक् ९ भूसत्वः १० ऋदुमत्वः ११ ग्रन्थिलत्वचः १२। इति राजनिर्घण्टः॥ भूर्जपत्रः १३ चर्म्मी १४ बहुत्वचत्वक्; १५। इति भावप्रकाशः॥ क्षुत्रपत्रः १६ शिवः १७ शिरश्छदः १८। इति रत्नमाला॥ ऋदुत्वक् १९। इत्यमरः। २। ४। ४६। पत्रपुष्पकः २०। इति भरतधृतमधुः॥ सुत्रः २१ बहुपटः २२ बहुत्वक्; २३ ऋदुत्वचः २४। इति भरतधृतस्वामी॥ अस्य गुणाः। वलकारित्वम्। क्षयरक्तनाशित्वञ्च। इति राजवल्लभः॥ कटुत्वम्। कषायत्वम्। उष्णत्वम्। भूतरक्षाकरत्वम्। त्रिदोषशमनत्वम्। पक्वत्वम्। दुष्टकीटिक्षनाशित्वञ्च। इति राजनिर्घण्टः॥ कर्फरोगपित्तरक्तक्षमेदविषहरत्वञ्च। इति भावप्रकाशः॥ (यथा, वाभटे शरीरस्थाने प्रथमेऽध्याये॥
"भूर्जेष्वाज्यशिखीशुभीवर्षाभूकुष्ठकर्षपैः।
एषक् हान्यां क्रमशोवा योगिकैपत्रमूषणम्॥")

भूमयः

भूर्जकण्टकः, पुं, वनस्पतिजातिविशेषः। इति जटाधरः॥ (यथा, मनौ। १०। ३१।
"ब्राह्मात्तु जायते विप्रात् मायायां भूर्जकण्टकः॥")

भूर्जपत्रः, पुं, (भुवि जर्जरीभ्यः उपदेवजातिभ्यः पत्राण्यस्य।) भूर्जवृक्षः। इति रत्नमाला॥ (यथा, रामायणे। २। ८४। २४।
"कुशचीरपुनागभूर्जपत्रोत्तरच्छदान्॥")
तथा चास्य पर्य्यायः।
"भूर्जपत्रः त्वचो भूर्जश्चर्मी बहुलवल्कलः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

भूर्भिः, स्त्री, (बिभर्त्ति सर्व्वमिति। भृ+"दृणिधृशिभ्यामिभिः।"उणा॰ ४। ५२। इति निः बिभर्तेर्बुगागमश्च।) पृथिवी। मर्त्यभूमिः। इत्युज्ज्वलादिकोषः॥ (भर्त्ता। यथा, ऋग्वेदे। ७।८७।२।
"आत्मा ते वातो रज आनवीनोत्
पशुं गै भूर्णिर्यवसे स यवान्॥"
"भूर्णिर्भर्त्तातो भर्त्ता।" इति तद्भाष्ये सायणः॥)

भूर्लोकः, पुं, (भूः संज्ञको लोकः। प्राकृतपार्थिवादिवत् समासः।) अन्तरीक्षादधो लोकः। मर्त्यलोकः। तस्य लक्षणं यथा,—
"पादगम्यञ्च यत्किञ्चित् वस्तुजातं पृथिवीमयम्।
स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः॥"
इति विष्णुपुराणे। २ अंशे ५ अध्यायः॥
चरणचारयोग्यं गिरिग्रिस्वरादि यावत् तावदूर्द्धो भूर्लोक इत्यर्थः। विस्तारो मयोदितः सर्व्वतो लोकालोकावधिः पञ्चविंशतिकोटिप्रमाणः। इति तट्टीकायां स्वामी॥ अस्य विवरणं सर्व्वत्रैव द्वितीयादिचतुर्थाध्यायेषु भूगोलग्रन्थे च द्रष्टव्यम्॥ (यथा, भागवते। २। ५। ३८।
भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः॥")

भूलता, स्त्री, (भुवि लता।) गुडूची। इति राजनिर्घण्टः॥

भूल्लता, स्त्री, (भुवि जाता इव।) किंशुकः। इति हेमचन्द्रः। ४। २६६॥

भूवदरी, स्त्री, (भूलता वदरी प्राकृतपार्थिवादिवत् समासः।) क्षुद्रकोली। झाड़बेर इति हिन्दीभाषा। तत्पर्य्यायः। क्षितिवदरी २ वल्लीवदरी ३ वदरवल्ली ४ लघुवदरी ५ वदरयष्टी ६ कृष्णवदरी ७। अस्या गुणाः। मधुराम्लत्वम्। कफवातविकारहारित्वम्। पक्वत्वम्। दीपनत्वम्। माधवत्वम्। किञ्चित् पित्तास्रवातित्वम्। रुच्यत्वञ्च। इति राजनिर्घण्टः॥

भूषः, पुं, (भुवि शेते इति। भू+शीङ्+"अधिकरणे शेतेः।"३। २। १५। इति अच्।) वेतसजातीयादिः। एतेषां मांसगुणाः। गुरुत्वम्। रूक्षत्वम्। मधुरत्वम्। स्निग्धत्वम्। वातघ्नाग्निजनकत्वम्। शुक्रकारित्वञ्च। इति राजवल्लभः॥ विष्णुः।

भूषणं

यथा,—
"भूतयो भूषणो भूतिर्विभूतिर्भोगनाशनः॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥

भूषिष्णुः, पुं, (भुवि ख्याता शैलुः प्राकृतपार्थिवादिवत् समासः।) भूकर्ब्बुदारकः। इति राजनिर्घण्टः॥

भूष किं भूषयौ। इति कविकल्पद्रुमः॥ (चुरा॰ उभ॰ सक॰ सेट्।) किं भूषयति भूषति हारो जनम्। इति दुर्गादासः॥

भूषणं, क्ली, (भूष्यते अनेनेति। भूष+करणे ल्युट्।) अलङ्कारः। इति हेमचन्द्रः॥३।३१३॥ (यथा, चाणक्यसंग्रहे। ८।
"नक्षत्रभूषणं चन्द्रो नारीणां भूषणं पतिः॥")
देवदेयभूषणादि यथा,—
"भोग्यभूषोत्तमं नित्यं भूषणानि ग्रहाण मे।
किरीटञ्च शिरोरत्नं कुण्डलञ्च ललाटिका॥
तालपत्रञ्च हारञ्च ग्रैवेयकमथोर्म्मिका।
प्रालम्बिका रत्नसूत्रमुत्तुङ्गोऽथर्क्षमालिका॥
पार्श्वद्योतो नखद्योतो भ्रूकूलीच्छादकस्तथा।
कटिलम्बं माणवको मुद्रतारा ललम्बिका॥
अङ्गदौ बाहुवलयः शिखाभूषणमिञ्जिका।
प्रागण्डबन्धं तद्भाणं नाभिपूरोऽथ मालिका॥
सप्तकी ग्रहलञ्चैव हस्तपत्रञ्च वर्णकः।
जङ्घसूत्रञ्च नीवी च सुदृष्टिवृत्तं प्रकीर्णकम्॥
पादाङ्गदं हंसकञ्च नूपुरं क्षुद्रघण्टिका।
सुखपट्टमिति प्रोक्ता अलङ्काराः सुशोभनाः॥
चत्वारिंशदमी प्रोक्ता लोके वेदे च सौख्यदाः।
अलङ्काराः प्रदानेन चतुर्व्वर्गप्रदायकाः॥
एतेषां पूजनं कृत्वा प्रदद्यादिष्टसिद्धये।
तेषां देवतमुद्धार्य्य पूजयेत् विधिवत्ततः॥
शिरोगतानि चादद्यात् सौवर्णानि तु सर्व्वदा।
षट्कारत्नादिकानीह भूषणानि तु भैरव!॥
ग्रैवेयकादि हंसान्तं सौवर्णं राजतञ्च वा।
निवेदयेत् देवेभ्यो नान्यतैजससम्भवम्॥
रौतिवङ्गादिसंजातं पात्रोपकरणादिकम्।
दद्यादायसवर्জ্জन्तु भूषणं न कदाचन॥
घण्टाचामरकुम्भादि पात्रोपकरणादिकम्।
तद्भूषणान्तरे दद्याद् यत्नात्तदुपभूषणम्॥
सर्व्वं ताम्रमयं दद्यादृयत्किञ्चिद्भूषणादिकम्।
सर्व्वत्र सर्व्ववस्तूनामर्द्धपाचे ततोऽधिकम्॥
पूजार्द्धपात्रं नैवेद्याधारपात्रञ्च पात्रकम्।
औष्ठ्यरं सदा विष्णोः प्रीतिदं तोषदं तदा॥
ताम्रे देवाः प्रमोदन्ते ताम्रे देवाः सदा स्थिताः।
सर्व्वप्रीतिकरं ताम्रं तस्मात्ताम्रं प्रयोजयेत्॥
स्तोपयोगे नरः कुर्य्याद्देवागामपि भैरव!।
यौवोद्देशे रौप्यन्तु न कदाचिच्च भूषणम्॥
प्रावारः गात्रपात्रञ्च गेण्डुकं ग्रहमेव च।
पर्य्यङ्कादि यदन्यच्च सर्व्वं तदुपभूषणम्॥
अयोमयन्ते कांस्यन्ते यद्भूषणं भवेत्।
सर्व्वरौप्यस्य चाभावे स्वर्णाद्यं विनियोजयेत्॥
एतेषां भूषणादीनां यद्दातुं शक्यते नरैः।
तत्तद्दद्यात् तदभावे तु सर्व्वमेव प्रदापयेत्॥

भूषितः

चतुर्व्वर्गप्रदं नित्यं भूषणं सर्व्वसौख्यदम्।
तुष्टिपुष्टिप्रीतिकरं यथाशक्तीह्यजेत्॥
इदं ते भूषणं प्रोक्तं सर्व्वदेवस्य तुष्टिदम्।"
इति कालिकापुराणे ६८ अध्यायः॥
अथालङ्कारयुक्तिः। तदुद्धारश्चिह्नमुच्यते।
"रेवत्यश्विधनिष्ठासु हस्तादित्रिषु पञ्चसु।
गुरुशुक्रबुधस्वाहि वस्त्राभरणधारणम्॥
अनिष्टेष्वपि निर्द्दिष्टं वस्त्राभरणधारणम्।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सन्नतौ॥
शिरस्यं सुकुटं हारः कुण्डलाभ्यान्दृशस्तथा।
कङ्कणं बालकश्चैव मेखलाद्यावितीह क्रमात्॥
प्रधानभूषणार्थेषु यथा स्वं याति निश्चयः।
पद्मरागश्च वज्रञ्च विजयो गोविन्दस्तथा॥
सुक्तावैदूर्य्यनीलञ्च यथा मरकतं क्रमात्।
आदित्यादिग्रहाणां सर्व्वसम्पत्तिदायकाः॥
सुवर्णमपि घटना सर्व्वधातुषु युज्यते।
प्रधानभूषणेष्वेवमप्रधाने न निश्चयः॥
प्रधानभूषणं प्रायः शिरस्को ह्यभिधीयते।
तस्य प्रधानभूतत्वादित्याह भृगुनन्दनः।
सुखदा मणयः सुद्दा दुःखदा दोषघातिनः॥"
इति युक्तिकल्पतरुः॥

तद्धारणफलम् यथा,—
"भूषणं भूषयेदङ्गं यथायोग्यविधानतः।
शुचिसौभाग्यसन्तोषदायकं कारणं सुतम्॥
यशस्तेजिकरं पुष्टिकरं दुःखप्रणाशनम्।
पापदौर्भाग्यशमनं रत्नाभरणधारणम्॥
माणिक्यं तरणेः मुक्ताममनं तुक्तायजम्
प्रोतजो-
मांशेयस्य च विद्रुमो निगदितः सौम्यस्य
जातसुतम्।
देवेज्यस्य च पुष्परागमसुराचार्य्यस्य वज्रं शनेर्-
नीलं निर्म्मलमन्ययोश्च गदिते गोमेदवैदूर्य्यके॥
वाहः सर्व्वगन्धरत्नानां धारणं प्रीतिवर्द्धनम्।
रत्नोत्तमर्थमोक्तं सौभाग्यकरमुत्तमम्॥"
इति भावप्रकाशः॥

भूषणः, पुं, (भूयते भक्तैरिति भूष्यतेऽनेनेति वा। भूष+ल्युः वा ल्युट्।) विष्णुः। यथा,—
"भूतयो भूषणो भूतिर्विभूतिर्भोगनाशनः॥"
इति तस्य सहस्रनामस्तोत्रम्॥
(राजविशेषः। यथा, कथासरित्सागरे। ४७। १६।
"वसुदत्तादयश्चेते राजानोऽधैरथा इमे।
अङ्गुरी सुविशालश्च दक्षिभूषणयोमिलाः॥")

भूषा, स्त्री, (भूष+भावे अः टाप् च।) अलङ्क्रिया। इत्यमरः। २। ६। १०१॥ (यथा, भागवते। ३। २२। २२।
"दृष्ट्वोः मर्य्यदात् प्रीता भूषावासःपरिच्छदान्॥")

भूषितः, त्रि, (भूष+क्तः।) अलङ्कृतः। इत्यमरः। २। ६। १००॥ (यथा, भट्टिः। ६। ७३॥
"भूषाकीलोकिलक्षुद्भिर्वाग्भिः पक्षं सचाम्ब।
रौचनैर्भूषितां पश्यामक्षाक्षं क्षुद्वाधिषम्॥")

भृकुंसः, त्रि, (भू+गुकु।) भवनशीलः। तत्-पर्य्यायः। भविष्णुः २ भविता ३। इत्यमरः। ३। १। २६॥ साधुभवनशीलः। इति तट्टीकायां रायमुकुटः॥ (यथा, मनौ। ७। १३५।

"यद्भिषं चैव वर्षं च ब्राह्मणश्च बहुश्रुतम्।
नावमन्येत वै भूम्नः क्षत्रियानपि कदाचन॥"

"भूम्नः, धनाद्युदिना वर्द्धनशीलः।" इति तट्टीकायां कुल्लूकभट्टः॥)

भूसुतः, पुं, (सुवः दृथिव्याः सुतः।) मङ्गलग्रहः। इति शब्दमाला॥ (यथा, ज्योतिर्विद्याभरणे। २। ५५।

"मङ्गलाच्छीघ्रपरिधेः सप्तमे भृगुभूसुतौ॥")

सीतायाम् स्त्री॥

भूस्तृणं, क्ली, (भूमध्यं हव्यं भुवस्तृणमिति वा। पारस्करादित्वात् सुट्।) भूस्तृणम्। इत्यमरः। २। ५। १६७॥ (यथा, मनौ। ६। १४॥

"वर्जयेन्मधुमांसञ्च भौमानि कवकानि च।
भूस्तृणं शिग्रुकञ्चैव श्लेष्मातकफलानि च॥")

अस्य पर्य्यायगुणा यथा,—

"गुच्छबीजञ्च भूतीकं सुगन्धं सोमवल्लिकम्।
भूस्तृणन्तु भवेत्पक्वं मालातृणकमित्यपि॥
भूस्तृणं कटुकं तिक्तं तीक्ष्णोष्णं रोचनं लघु।
विदाहि दीपनं रूक्षमनेत्र्यं मुखशोधनम्।
अतृष्णं बहुविट्कञ्च पित्तरक्तप्रदूषणम्॥"

इति भावप्रकाशः॥

भूस्तृक्, [ग्] पुं, (भुवं स्तृणातीति स्तृ+क्विन्।) मनुष्यः। इति हेमचन्द्रः। ३। २॥

भूस्वर्गः, पुं, (भुवि स्वर्ग इव अमरलोकधारणात्।) सुमेरुपर्व्वतः। इति जटाधरः॥

भृञ्, भृलि टुभृञ् भृञ् } भृतिपुष्टोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-अनिट्। जि-भ्रा०-उभ०-सक०-अनिट्।) भृतिर्भरणं पुष्टिः पोषणम्। लि च "बिभर्त्ति गृह्णिनं गृह्णुर्बिभृते जनकः सुतम्। टुभृञ् भृत्रिमम्। भ्वादिपक्षे भृतिः पूरणम्। च भरति कुक्षिमद्रिर्जनः। भरते। इति दुर्गादासः॥

भृकुंशः, पुं, (कुसि+अच्। कुसो भावदीपनम्। एषोदरादित्वात् सस्य शत्वम्। भुवा कुशो भावप्रकाशः इङ्गितज्ञापनं यस्य। निपातनात् सम्प्रसारणम्।) भुकुंशः। स्त्रीवेषधारी नटपुरुषः। इत्यमरटीकायां रमानाथः॥

भृकुंसकः, पुं, (भृकुंस एवेति स्वार्थे कन्।) भुकुंशः। इति शब्दरत्नावली॥

भृकुटिः, स्त्री, (कुट कौटिल्ये इति कुट+इन्। भ्रुवः कुटिः कौटिल्यं निपातनात् वा सम्प्रसारणम्।) भ्रूकुटिः। यथा,—

"रचितभ्रुकुटिबन्धं नन्दिना द्वारि वर्त्तते।"

इति भरतधृतहरविलासः॥

भृकुटी, स्त्री, (भृकुटि। स्त्रियामादित्वात् ङीष्।) भ्रूकुटिः। इत्यमरटीकायां भरतः॥ भृकुटी-कुटिलाननौ। इति मार्कण्डेयपुराणे देवीमाहात्म्ये च॥

भृगुः, पुं, (तपसा भृज्यते पक्वतपादिभिर्वेति। भ्रस्ज+"ग्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च।" उणा० १। २६। इति कुः सम्प्रसारणं सलोपः, ग्यङ्गादित्वात् कुत्वञ्च। यद्वा भृज्यतीति क्विप्। भृक् ज्वाला तया सङ्गोत्पन्न इति उ:।) मुनिविशेषः। स तु ब्रह्मणश्चर्षो जातः। (यथास्योत्पत्तिर्नामनिरुक्तिश्च महाभारते। १३। ८५। १०५—१०६।

"पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवधर्मिणैः।
भङ्गित्वेव भृगुः पूर्व्वमङ्गरेभ्योऽङ्गिराभवत्॥
अङ्गारसंभवाच्चैव कविरित्यपरोऽभवत्।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद् भृगुः स्मृतः॥")

अस्य भार्य्या कर्द्दममुनिकन्या ख्यातिः। पुत्रः धाता विधाता च। कन्या श्रीः। इति श्रीभागवतम्॥ अपि च।

सूत ऊचुः।

"कथितस्ते यदा सर्गः दृष्टः सूत त्वयाधुना।
भृगुसर्गात् प्रभृत्येव सर्गो नः कथ्यतां पुनः॥"

सूत उवाच।

भृगोः ख्याता सुतूत्पन्ना श्रीः पूर्व्वमुदधेः पुनः।
तथा धाता विधाता च तस्यां जातौ भृगोः सुतौ॥

आयतिर्नियतिश्चैव मेरुकन्ये महाप्रभोः।
धातुर्विधातुस्ते भार्य्ये मयोर्जातौ सुतावुभौ॥
प्राणश्चैव मृकण्डुश्च मार्कण्डेयो मृकण्डुतः।
ततो वेदशिरा जज्ञे प्राणस्य द्युतिमान् सुतः॥
ततो वंशो मुनिश्रेष्ठा विस्तरं भार्गवो गतः।

इत्याद्ये वह्निपुराणे वरसर्गनामाध्यायः॥*॥

भृगुः। मुकुरञ्च। इति मेदिनी। गे, १५॥ साधुः। यमदग्निः। इति हेमचन्द्रः॥ अरण्य-कण्टकयाग्निगिरिपार्श्वोच्चदेशः। निरवलम्बन-पर्व्वतादिपार्श्वः। आरढ़ि इति ख्यातम्। यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति। अतएव भृगुपतनमित्यादिप्रयोगो दृश्यते। इति भरतः॥ तत्पर्य्यायः। प्रपातः २ अवटः ३। इत्यमरः। २। ३। ४॥ दरट् ४। इति जटाधरः॥ पतनस्थानम् ५। इति शब्दरत्नावली॥

भृगुपतिः, पुं, (भृगूणां तद्वंशीयानां पतिः।) परशुरामः। इति शब्दरत्नावली॥ (यथा, गीतगोविन्दे। १। १०।

"केशवधृतभृगुपतिरूप! जय जगदीश! हरे!।

तथा च मेघदूते। १। ५६।

"हंसद्वारं भृगुपतियशो वर्त्म यत् क्रौञ्च-रन्ध्रम्।")

भृगुसुतः, पुं, (भृगोः सुतः।) शुक्रः। इति शब्द-रत्नावली॥ परशुरामश्च॥

भृगुस्वामिपतिः, पुं, परशुरामः। इति शब्दरत्नावली॥ भृगुस्वाम्यतिरिक्तपि पाठः॥

भृङ्गं, क्ली, (बिभर्त्तीति। डुभृञ् भरणे। "भृञः कित् डुट् च।" उणा० १। १२४। इति मन्। स च कित् डुट्चागमश्च।) जघनम्। गुह्यकम् इति ख्यातम्। इत्यमरः। २। ५। १६॥ (यथा,—

"लक्ष्म्यञ्च वराङ्गं स्याद्भृङ्गञ्चेघनगोत्-कटम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

अभ्रकम्। इति राजनिर्घण्टः॥

भृङ्गः, पुं, (बिभर्त्यनुरागमिति। भृञ्+"भृञः कित् डुट् च।" उणा० १। १२४। इति मन्। स च कित् डुट् च।) भ्रमरः। कज्जिलपक्षी। इत्यमरः। २। ५। १६। झिङ्गा इति भाषा॥ (अस्य पर्य्यायाः धूम्राटशब्दे द्रष्टव्याः।) अस्य मांसगुणाः। मधुरत्वम्। स्निग्धत्वम्। कफशुक्र-विवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ झिङ्गः। भृङ्गराजः। इति मेदिनी गे, १५॥ (यथास्य पर्य्यायः।

"भृङ्गराजः केशराजो भृङ्गः पत्रङ्ग मार्कवम्॥

इति वैद्यकरत्नमालायाम्॥

तथा च पर्य्यायान्तरम्।

"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

भृङ्गारः। भृङ्गरोलः। इति शब्दरत्नावली॥

भृङ्गकः, पुं, (भृङ्ग। संज्ञायां कन्।) राजवासन-पक्षी। यथा,—

"अथ भृङ्गो भृङ्गराजो भृङ्गको राजवासनः॥"

इति शब्दरत्नावली॥

भृङ्गजं, क्ली, (भृङ्ग इव आयत इति। जन+डः।) अगुरु। इति रत्नमाला॥ (गुणा-स्यास्यागुरुशब्दे विदिताः॥)

भृङ्गजा, स्त्री, (भृङ्गज+स्त्रियां टाप्।) भार्गी। इति राजनिर्घण्टः॥

भृङ्गपर्णिका, स्त्री, (भृङ्ग इव काष्ठात् भृङ्गवर्ण पर्णमस्याः इति ङीष्। ततः स्वार्थे कन् टाप् अत इत्वञ्च। ईकारस्य ह्रस्वत्वम्।) खर्पोटा। इति शब्दचन्द्रिका॥

भृङ्गप्रिया, स्त्री, (भृङ्गाणां प्रिया। प्रचुर-मधुत्वात्।) माधवीलता। इति राज-निर्घण्टः॥

भृङ्गलतिका, स्त्री, (भृङ्गस्य भृङ्गराजस्येव लता-मस्याः कः। अजातित्वचलत्वात् टाप्। काप्य अत इत्वञ्च।) अमरच्छत्री। इति राज-निर्घण्टः॥

भृङ्गरजः, पुं, (भृङ्गात् रञ्जयतीति अन्तर्भूतण्यर्थाद् रञ्जोऽच्। एषोदरादित्वात् न लोपः।) भृङ्गराजः। इति भावप्रकाशः॥ (यथा,—

"भृङ्गरजश्चित्रकोत्पलशाल्मलि-
लोहपुरीषसमन्वितकारि॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्राधिकारे॥)

भृङ्गरजाः, [स्] पुं, (रञ्जयतीति। अन्तर्भूतण्यर्थात्: रञ्जे "सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति असुन्। ततो "रञ्जेश्च।" ६।४।२६। इति नलोपः। ततो भृङ्गाणां रजाः रञ्जकः। अथवा भृङ्ग इव लक्ष्यवर्णं रजः परागोऽस्य।) भृङ्गराजः। इत्यमरटीकायां भरतः॥

भृङ्गराजः, पुं, (भृङ्गइव राजते इति। भृङ्ग+राज्+अच्। प्रथमारेफ भृङ्गवत् केशपक्षकीकरणात्तथात्वम्।) क्षुपविशेषः। केसुरिया इति वङ्गभाषा। भिंगरिया इति हिन्दीभाषा। तत्पर्य्यायः। केशराजः २ भृङ्गः ३ पत्रङ्गः ४ मार्कवः ५। इति रत्नमाला॥ भृङ्गाक्षः ६ केशरञ्जनः ७ शिखप्रियः ८ अङ्गारकः ९ केश्यः १० कुन्तलवर्द्धनः ११। अस्य गुणाः। तिक्तत्वम्। उष्णत्वम्। चक्षुष्यत्वम्। केशरञ्जनत्वम्। कफामयोपशमित्वम्। तत्र नीलो रसायनः। इति राजनिर्घण्टः॥ अपि च।

"भृङ्गराजो भृङ्गरजः मार्कवो भृङ्ग एव च।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातजुत्।
केश्यश्चक्ष्यः कृमिश्वासकासश्लीपामयापहृत्॥
इत्थो रसायनो बल्यः कुष्ठनेत्राग्निरोगजित्॥"

इति भावप्रकाशः॥

पक्षिविशेषः। (यथा, महाभारते ३।१०८।७। शुकनेत्र विचित्राङ्गैः कूजद्भिर्विविधा गिरः। भृङ्गराजैस्तथा हंसैर्दात्यूहैश्चक्रकुक्कुटैः॥") भ्रमरः। इति मेदिनी। जे, १४॥ यक्षभेदः। इति धरणिः॥

भृङ्गरिटिः, पुं, (भृङ्ग इव रटति इति। भृङ्ग+रट+इन्। एषोदरादित्वादिकारागमः।) शिवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरीटः, पुं, (भृङ्गरिटि। एषोदरात् ईत्वम्।) शिवद्वारपालः। इति भूरिप्रयोगः॥

भृङ्गरोलः, पुं, (भृङ्ग इव रौति। भृङ्ग+रु+बाहुलकात् ओलच्। अस्य भृङ्गतुल्यगुणत्वात्तथात्वम्।) कीटविशेषः। भौमरुल इति भाषा। तत्पर्य्यायः। विषखड्गा २ वरोलः ३ खड्गपटपदः ४। इति त्रिकाण्डशेषः॥

भृङ्गवल्लभः, पुं, (भृङ्गाणां वल्लभः प्रियः।) धारावरुणः। भूमिकदम्बः। इति राजनिर्घण्टः॥

भृङ्गवल्लभा, स्त्री, (भृङ्गाणां वल्लभा।) भूमिजम्बूः। इति राजनिर्घण्टः॥

भृङ्गशोधरः, पुं, (भृङ्गाणां शोधरस्तुल्यः।) केशराजः। इति त्रिकाण्डशेषः॥

भृङ्गसन्दा, स्त्री, (भृङ्गाणामागन्दो यस्याः यष्ठ्यां तत्पुरुषः। भृङ्गाणां आनन्दा आनन्दकरी वा।) यूथिका। इति राजनिर्घण्टः॥

भृङ्गाभीष्टः, पुं, (भृङ्गाणां अभीष्टः प्रियः। मधु बाहुलकात्।) आम्रवृक्षः। इति राजनिर्घण्टः॥ तन्नवकुलपलयोः स्त्री॥

भृङ्गारं, स्त्री, (डुभृञ् धारणपोषणयोरिति। भृ+"भृङ्गारभृङ्गारौ।" उणा० ३। १३६। इति आरन् निपातनात् डुभृ गुक् च।) लवङ्गम्। सुवर्णम्। इति राजनिर्घण्टः॥

भृङ्गारः, पुं, (भृ+आरन् डुभृ गुक् च। अथवा "भृङ्गं जलमिथर्त्तीनेनेति।" भृङ्ग+ऋ+करणे घञ्। इत्यमरटीकायां रघुनाथः॥ स्वर्णघटितवारिपात्रम्। (यथा मार्कण्डेयपुराणे। ८।२०३। "नाद्य पश्यामि ते हस्तं भृङ्गारमथवा पुनः॥") तत्पर्य्यायः। कनकालुका २ इत्यमरः॥ गुडुकः ३ गडुकः ४। इति शब्दरत्नावली॥ भृङ्गराजः। इति जटाधरः॥ अथ भृङ्गारोद्देशः।

"राज्ञोऽभिषेकपात्रं यद्भृङ्गार इति तच्छतम्।
तदष्टधा तस्य मानमाख्यातिश्चापि चाष्टधा॥
शौवर्णं राजतं भौमं ताम्रं स्फाटिकमेव च।
वान्दनं लौहजं पार्श्वमेतदष्टविधं मतम्॥
भानुर्दिङ्नवसप्ताष्टरन्ध्रलोकसुरोक्षिताः।
अष्टावष्टौ समाख्याता आयामपरिणाहयोः॥
द्विचतुर्वाणवेदाब्धिबाणखप्नाम्नसृक्तिका।
प्रथाक्रमं सप्तदृष्टमादित्यादिदृशां भुवाम्॥
प्रवरागस्तथा वज्रं वैदूर्य्यमौक्तिकन्तथा।
नीलं मारकतञ्चैव सुक्ता च सप्त कीर्त्तिताः॥
भृङ्गारसप्तके न्यस्ता न भौमो मज्जिमर्हति।
ज्ञानकं सर्व्वसाधारं सर्व्वेषामुपयुज्यते॥
ज्ञानकन्तु क्षितीशानां सर्व्वसाधारं सार्व्वयोगिकम्।
शुक्लपक्षेष्टकारं प्रत्यहं विन्यसेत् क्रमात्॥
चतुर्विंशानां भूपानां चान्द्रः सर्व्वत्र गृह्यते।
श्वेतं रक्तं तथा पीतं कृष्णं चन्दनमुच्यते॥
एतेषां सलिलैः सेकश्चतुर्णां स्याच्छ्रीभुजाम्।
मञ्जो पद्मश्च नीलश्च तथा कृष्णापराजिता।
एषां पुष्पाणि कोशेषु चतुर्जातिमहीभुजाम्॥
हीरकं पद्मरागश्च वैदूर्य्यं नीलमेव च।
चत्वारो मणयो ध्येयाश्चतुर्णां सेचनाम्भसि॥
इत्थं निश्चित्य यः कुर्य्यान् नृपतिः सेकमात्मनः।
स चिरायुर्भवेद्भोगी इतोऽन्यस्यान्यथाचरन्॥"

इति युक्तिकल्पतरौ भृङ्गारोद्देशः॥

भृङ्गारिः, स्त्री, (भृङ्गं भृङ्गवद्वर्णमृच्छतीति। ऋ+इन्।) कैवर्तकापुष्पम्। इति राजनिर्घण्टः॥

भृङ्गारिका, स्त्री, (भृङ्ग+ऋ+"कर्म्मण्यण्।" ३। २। १। इति अण्। भृङ्गारः तत्र जन्। टाप् अत इत्वञ्च।) झिल्लिका। यथा,—

"झिल्लीका झिल्लिका वर्षकरी भृङ्गारिका च सा।"

इति हेमचन्द्रः। ४। ८२॥

भृङ्गारी, स्त्री, (भृङ्गमिवर्णं रूपेणाचरतीति "कर्म्मण्यण्।" ३।२। १। इति अण्। भृङ्गारस्यापत्यं स्त्री इति वा ङीष्। रस्य लत्वे भृङ्गाली च।) झिल्ली। इत्यमरः। २। ५। १८॥

भृङ्गाक्षः, पुं, (भृङ्गमाक्षयते आर्हते इति। आ+क्षे+कः।) जीवकः। भृङ्गराजः। इति राजनिर्घण्टः॥ (विस्तृतिरस्य जीवकभृङ्गराजशब्दयोर्द्रष्टव्या॥

भृङ्गाक्षा, स्त्री, (भृङ्गमाक्षयते आर्हते। भृङ्ग+आ+क्षे+कः स्त्रियां टाप्।) भ्रमरच्छली। इति राजनिर्घण्टः॥

भृङ्गिः, पुं, (बिभर्त्तीति। भृ+बाहुलकात् गिक् डुट् च।) भृङ्गी। यथा,—

"प्राप्ता गणाधिपत्यं त्वं नाम्ना भृङ्गिरिति स्मृतः।"

इति वामनपुराणे ४५ अध्यायः॥

भृङ्गिणी, स्त्री, (भृङ्गवत् वर्णो अस्या अस्तीति इनिः। ङीप्।) वटीवृक्षः। इति राजनिर्घण्टः॥

भृङ्गी, स्त्री, (भृ+गक्+डुट्+गौरादित्वात् ङीष्।) अतिविषा। इति राजनिर्घण्टः॥

भृङ्गी, [न्] पुं, (भृङ्गः भृङ्गवर्णोऽस्यास्तीति। इनिः।) वटवृक्षः। इति राजनिर्घण्टः॥ शिवद्वारपालविशेषः। तत्पर्य्यायः। भृङ्गिरिटिः २ भृङ्गरीटः ३ गणः ४ बाढ़ीदेवः ५ अग्निविग्रहः ६। इति त्रिकाण्डशेषः॥ भृङ्गरिटिः ७। इति भूरिप्रयोगः॥ तस्य जन्मकारणं यथा,—

ईश्वर उवाच।

"रतिमाजेन गोमायां मत्पुत्रः संभविष्यति।
महामैथुनसंत्यागात् स्त्रीपुत्री च भार्व्वती॥
तस्मादहन्तु देवानां वचनाद्ब्रह्मयन्त्रया।
अस्यै महामैथुनन्तु किन्त्वेकं कथनामरः!॥
येन मे सुमहत्तेजो महामैथुनकारणम्।
धार्य्यं तेजस्विनं देवमाक्षयन्त्रमरास्तु तम्॥
यो निष्कम्पो निर्व्विकारो भूत्वा तेजो यहीष्यति।
तस्मै वदन्तु चिदग्राख्यन्ते तेजः शरीरजम्॥"

श्रीऔर्व्व उवाच।

"इत्यजवचः श्रुत्वा देवा ब्रह्मपुरोगमाः।
हरतेजोग्रहायाथ वीतिहोत्रं यशुर्द्रियाः॥
अथ ब्रह्माज्ञयामन्त्र्य तथानुज्ञाप्य पावकम्।
सर्व्वा देवगणाः सर्व्वे हरलयपुरिदं ययुः॥"

श्रीदेवा ऊचुः।

"एष वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनवीर्य्यन्तु त्वत्तेजः संग्रहीष्यति॥
इत्युक्ता चिदग्राः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निदेशयामासुः शुभाय सर्व्वदेहिनाम्॥
ततः षड्वक्त्रं स्वं रेतो वादित्ते दहनानने।
उत्सृज्य महावाहुर्महामैथुनकारणम्॥
अथापुनृह्यमाणस्य तेजसः शुभ्रभद्भुतः।
अक्षद्वयमतिक्रम्य गिरिमध्ये पपात ह॥
तयोः कारणयोः सद्यः सम्भूतौ शुक्लराजतौ।
एको भृङ्गसमः श्रीमान् भिन्नाञ्जनचिभोऽपरः॥
भृङ्गी तस्य तदा ब्रह्मा नाम भृङ्गीति चाकरोत्।

महाकालैकरूपस्य महाकालेति लोकभृत्॥
ततस्तौ लालयामास भृङ्गिरः प्रमथोत्करैः।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ॥
प्रवृद्धौ तौ महाकालौ हरोमाप्रतिपालितौ।
क्रमान्नवीयसौ ज्ञात्वा तौ हरो हरि व्ययोजयत्॥"

इति कालिकापुराणे ४५ अध्यायः॥

तस्य वानरमुखत्वकारणं तच्छापेन हरपार्श्वलोकापिमनुष्यजन्मग्रहणं यथा,—

"यदा सा नर्म्मदे याता गौरी स्मरहरान्तिकम्।
तदा भृङ्गिमहाकालौ द्वाःस्थौ हरि प्रतिष्ठितौ।
नर्म्मोदयतटे सा देवी सुरूपधर्म्मिलक्षवन्धना।
निःस्तृता रतिसङ्केतशालाया जलजानना॥
तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम्।
अयोग्यां वीक्षितुं चान्यैर्दध्यौ जन्तुर्न यं प्रियम्॥
ददर्शातुर्महात्मानौ नातिक्षुद्रात्ममानसौ।
भृङ्गी चापि महाकालः प्राप्तकालश्च कोपनः॥
दृष्ट्वा तौ मातरं दीनौ तदा भूतावधीसुखौ।
चिन्ताच्च जग्मतुस्तीव्रां निर्गच्छन्तरुणत्तमम्॥
तौ पश्यन्तौ तदा देवी ददर्श हिमवत्सुता।
चुकोप च तदापर्णा वाक्यञ्चेदमुवाच ह॥
एवम्भूतान्तु मां कस्मादसम्बद्धामपश्यताम्।
भवन्तौ तनयौ शुद्धौ स्त्रीमर्य्यादाविवर्जितौ॥
तस्मादिममसर्य्यादां भवन्तौ निरपत्रपौ।
अकुर्वन्तां ततो भूयाद्भवतोर्जन्म मानुषे॥
मानुषीं योनिमासाद्य ममावेशवशेषतः।
भविष्यतो भवन्तौ तु ग्राम्यान्नगसुखौ भुवि॥
तौ ग्राम्यःसुखौ तु तदा विमनस्कौ हरात्मजौ।
ग्रामं तस्या न सेहाते प्रोचतुश्चेदमद्रिजाम्॥
नियोजितौ यथा हरि महेशेन त्वया सह।
तथा नियोगं कुर्व्वन्तौ तिष्ठावो हरि संयतौ।
दृष्टान्निःसरणं शैलादावेव न हि युज्यते॥
तस्मात्तत्र प्रतीकारं ब्रूतु मातरनिन्दिते!।
त्वं मानुषी स्थितौ भूत्वा हरो भवतु मानुषः॥
मानुषस्य हरस्यावां जायायां हरतेजसा।
भवत्यावापि मानुष्या भविष्यावस्तथोदरे॥
अथ काले व्यतीते तु सर्व्वज्ञो वृषभध्वजः।
तद्वाचि कर्म्म ज्ञात्वेव मानुषो ह्यभवत् स्वयम्॥
ब्रह्मणो दक्षिणाङ्गुष्ठाद्यो ब्रह्मसुतोऽभवत्।
अदितिस्तनयसुता जाता ततः पूषाऽभवत्॥
पूष्णः पुत्रोऽभवत् पौष्यः सर्व्वग्राम्यार्थपारगः।
यस्य तुल्यो नृपो भूमौ न भूतो न भविष्यति॥
स पुत्रहीनो राजाभूत् पौष्यो नृपतिसत्तमः।
दैवे वयसि संप्राप्ते भार्य्याभिस्तिसृभिः सह॥
पौष्यः परमया भक्त्या ब्रह्माणं पर्य्यतोषयत्।
तस्य प्रसन्नो भगवान् ब्रह्मा लोकपितामहः॥

ब्रह्मोवाच।

ब्रूहि पौष्य! यथा भावी पुत्रस्तव कुलोद्वहः।
तदहं ते वदिष्यामि भार्य्याभिस्तप समाचर॥
इदं फलं गृहाण त्वं मया दत्तं नृपोत्तम!।
अजीर्णं बहुले काले प्राप्तेऽपि सुरसं सदा॥
सुखमेतत् समादाय यावत् संवत्सरत्रयम्।
आराधय महादेवं सुप्रसन्नो भविष्यति॥
यथा संभाषते भर्गः फलमेतत्तथा भवान्।
करिष्यति फलं राजन्! भार्य्याभिस्तिसृभिः सह॥
इत्युक्त्वा प्रययौ ब्रह्मा राजापि सह भौरुभिः।
हरं यष्टुं समारेभे भक्त्या परमया युतः॥
स तु वर्षत्रयेऽतीते महादेवो जगत्पतिः।
पौष्यस्य नृपतेः सम्यक् प्रसन्नादर्थसिद्धये॥
ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः।
ब्रह्मदत्तफलं हस्ते ह्यर्पयंस्तमुवाच ह॥

ईश्वर उवाच।

इदं फलं ब्रह्मदत्तं विभज्य नृपते! त्रिधा।
भोजयेस्ताः स्वजायास्त्वं प्रहृष्टः सुखमानसः॥
एकस्या जठरे घोरं भार्य्यायास्ते भविष्यति।
अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति॥
अधो नाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति॥
ततः स्वल्पत्रयं भूप! यथास्थानं पृथक् पृथक्।
योजयिष्यति पश्चात्ते पुत्र एको भविष्यति॥
ततः फले स्वयं देवः प्रविवेश वृषध्वजः।
तत्क्षणात् तत् फलं भूतं त्रिभागं स्वयमेव हि।
ततः समुचिते काले प्राप्ते नाभिस्तु भक्षितम्॥
तत् फलं नृपशार्दूल! गर्भोऽभाग्याद्विसाः शुभाः।
सम्यग् गर्भकाले तु गर्भेभ्यः समजायत॥
स्वल्पत्रयं पृथक् राजा यथा भर्गेण भाषितम्।
तच्च स्वल्पत्रयं पौष्यो यथास्थानं नियोज्य च॥
एकं पिण्डं चकाराशु तच्च पुत्रो व्यजायत।
तस्य पुत्रस्य तदा राजन्! सहजेन्दुकला शुभा॥
तस्य नाम्नाकरोद्राजा ब्राह्मणैः सैः पुरोहितैः।
चन्द्रशेखर इत्येवं कान्त्या चन्द्रसमप्रभः॥
यस्मै निसृष्टामन्यानां गर्भे जातो यतो हरः।
अतस्तन्नामकनामाभूत् प्रथितो देवलोकयोः॥"

इति कालिकापुराणे ४६ अध्यायः॥

"अवतीर्णे महादेवे पौष्यगायासु स्वेच्छया।
मानुषेण प्रमाणेन तेन सम्वत्सरद्वये।
गिरिजापि ककुत्स्थस्य राज्ञो भार्य्यास्वजायत॥"
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः।
तस्य भार्य्या महाभागा भर्गदेवस्य पूजिका।
सा मनोज्ञाधिनी नाम्ना पूजिता पतिवल्लभा।
पुत्रो न विद्यते तस्याश्चादर्थं सा गृहान्तरे।
निभृतं स्वस्थितं कृत्वा चण्डिकां समपूजयत्॥
पूज्यमाना महादेवी चण्डिका राजभार्य्यया।
पार्व्वत्यपि स्वयं तस्या गर्भे काले विवेश ह॥
सा मनोज्ञाधिनी देवी सुषुवे तनयां शुभाम्।
तां दृष्ट्वा हारसंयुक्तां शरच्चन्द्रोपमां शुभाम्॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्॥
तेनैव हारचिह्नेन तस्या तारावतीति वै।
नाम्नाकरोत् पिता काले यथोक्ते नृपसत्तम!॥
तस्यास्तु यौवनोद्भेदं दृष्ट्वा राजा सुतैः सह।
ककुत्स्थः कारयामास समयेऽथ स्वयम्वरम्॥
स्वयं सा पार्व्वती देवी वव्रे च चन्द्रशेखरम्॥
इति स्वयं महादेवो मानुषीं योनिमाश्रितः।
पार्व्वती च स्वयं जाता नरयोनावनिन्दिता॥
यथा भृङ्गी महाकाल एतयोरभवत् सुतः।
तथा त्वं श्रृणु राजेन्द्र! कथयामि समुद्भवम्॥
अथोमया समं देवो विषयी चन्द्रशेखरः।
आजगाम तदा गच्छन् प्रासादं प्रतिसं नृप!॥
दृष्ट्वोथ चरणौ तासुमायाः सहसौ गुरुः।
सर्व्वलक्षणसम्पूर्णां मायावत्येव माधवीम्॥
तां दृष्ट्वा जगदीशानो गौरीं वृषभकेतनः।
इयं ते मानुषी सृष्टिः प्रिये! तारावतीति या॥
भृङ्गी महाकालयोस्तु जन्मने विहिता स्वयम्।
त्वतो ह्यजन्यकालोऽहं जाया मनुभिरीश्वरि॥

इदानीं स्वयमाख्यां भूमौ प्रविश्य भाविनि!।
तत उत्पादयिष्यामि महाकालञ्च भृङ्गिणम्॥

श्रीदेव्युवाच।

ममैव मानुषी सृष्टिरियं वृषभकेतन!।
विधास्यामि तवैव वचनादुत्पादय सुतद्वयम्॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ।
महादेवोऽपि तस्यान्तु कामार्थं वसुपद्मितः॥
ततः सापर्णयाविष्टा देवी तारावती सती।
कामयानं महादेवं स्वयमेवाभवन्मुदा॥
कामावसानं तस्यान्तु सद्योजातं सुतद्वयम्।
अभवत् नृपशार्दूल! तथा प्राक्कल्पजन्मनम्॥
ततस्तयोर्नाम चक्रे नारदो वचनात् नृप!।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः॥
वैनाशस्तद्भ्रः ज्ञातो वैनाशोऽभूत्तथापरः।
इति चक्रे तयोर्नाम देवर्षिर्ब्रह्मणः सुतः॥
अन्यांश्च सर्व्वसंस्कारानारदो मुनिसत्तमः।
चकार क्रमशो वाक्याच्चन्द्रशेखरभूभृतः॥"
इति कालिकापुराणे ४७। ४८। ४९ अध्यायेभ्यः संकलितम्। तस्य जन्मनः प्रकारान्तरं यथा,

वैश्य उवाच।

प्रपद्ये देवमीशानं त्र्यम्बकं चन्द्रभूषणम्।
महादेवं महाज्ञानं विश्वस्य जगतः पतिम्॥
अयोनिमजरं देवं त्रैलोक्याधिपतिं भवः।
आश्वासनकरं शास्त्रं वाक्यविद्याप्रसूत्तमम्॥
अहो तुष्टोऽसि ते राजन्! स्वयेनानेन सुव्रत!।
बहुनात्र किमुक्तेन मनुसमीपं व्रजिष्यसि॥
उपित्वा सुचिरं कालं मम मायोद्भवः पुनः।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत्॥
हिरण्याक्षवधे जन्म प्राप्य वृद्धिं गमिष्यसि।
पूर्व्वाधर्म्मेण घोरेण वेदनिन्दाकृतेन च॥
यास्यिसे नरकं घोरं तत्र दुःखं बहुविधम्।
देवं मूलेन चैवात्र तोषयिष्यसि यास्यिसम्॥
तत्राप्यकल्मषो भूत्वा लब्धा मां भक्तितः पुनः।
प्राप्य मन्वधिपत्यं त्वं नाम्ना भद्रश्रिरिति श्रुतः।
मनुसन्निधानं स्थित्वा त्वं ततः सिद्धिं गमिष्यसि॥"
ततः कालान्तरे अन्धकासुरवधानन्तरं महादेववाक्यम् यथा,—
"सिद्धोऽसि दानवपते! परितुष्टोऽस्मि तेऽनघ!।
वरं वरय भद्रं ते यमिच्छसि विवाञ्छितम्॥

अम्बक उवाच ।
अम्बिका जननी मह्यं भगवांस्त्र्यम्बकः पिता ।
वन्दामि चरणौ मातुर्वन्दनीया ममाम्बिका ॥
वरदोऽपि यदीशान ! तदृणातु विजयं मम ।
शारीरं मानसं वाचनं दुष्कृतं दुर्विचिन्तितम् ॥
तथा मे दानवो भावो अपयातु महेश्वर ! ।
स्थिरा स्थाप्यत्व भक्तिस्तु वरमेतं प्रयच्छ मे ॥
महेश्वर उवाच ।
एवं भवतु दैत्येन्द्र ! पापं ते यातु संक्षयम् ।
मुक्तोऽसि दैत्यभावाच्च भक्तो गणपतिर्भव ॥
इत्येवमुक्ता वरदः मूलायादवतार्य तम् ।
निर्मोच्य निजहस्तेन चक्रे निर्व्रणमस्यकम् ॥
ततः सदेवतो देवान् ब्रह्मादीनाजुहावर्षिः ।
ते निर्वृतमनस्कानो नमस्यन्तस्त्रिलोचनम् ॥
गणात् स गन्धी चाहूय सन्निवेश्य तदग्रतः ।
भक्तिं दर्शयामास सुवक्त्रयोऽस्यकेति हि ॥
ते दृष्ट्वा दानवपतिं संपृक्ष्यपिप्रितं रिपुम् ।
गणाधिपत्यमापन्नं प्रणुद्य सुवृषध्वजम् ॥"
इति वामनपुराणे ।७७।८५।९० अध्यायेभ्यः संकलितम् ॥

भृङ्गीटकः, पुं, (भृङ्गाः अतिविशायाः फलमिव फलं यस्य ।) आम्रातकवृक्षः । इति राजनिर्घण्टः ॥

भृङ्गीशः, पुं, (भृङ्गिणो भृङ्गवो ईशः ।) महादेवः । इति शब्दरत्नावली ॥

भृङ्गेरिटिः, पुं, (भृङ्गे भृङ्गविषये रिटति । अभिलषतीति । भृङ्ग + रिट् कर्मणि टः । अलुक् समासः ।) भृङ्गी । इति त्रिकाण्डशेषः ॥

भृङ्गेष्टा, स्त्री, (भृङ्गाणामिष्टा ।) वृत्तकुमारी । भार्गी । तरणी । काकजङ्घा । इति राजनिर्घण्टः ॥

भृज भृं ड भर्जने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक० सेट् ।) भर्जनं पाकविशेषः । ड भृक्तः । ड भर्जते तद्भुक्तान् जनः । इति दुर्गादासः ॥

भृञ्जनः, पुं, (भृज्यन्ते तण्डुलादयोऽस्मिन्निति । भृज् + "भृञ्जधृभ्रस्जिभ्यश्चन्दसि ।" उणा० ३ । ८० । इति ल्युन् ।) भ्रष्टरोधः । इति उज्ज्वलादिकोषः । भाजना खोला इति भाषा ॥

भृत, त्रि, भरणीयः । इत्याश्विकलक्षणम् । पुष्टः । इति भृञ्जाशोः कर्मणि क्तप्रत्ययेन निष्पन्नम् ॥

भृतकः, पुं, (म्रियते इति । भृ + कर्मणि क्तः । ततः स्वार्थे कन् । यद्वा, भृतेन वेतनेन उपजीवतीति कन् ।) वेतनोपजीविकर्मकरः । तत्पर्यायः । भृतिभुक् २ कर्मकरः ३ वैतनिकः ४ । इत्यमरः । २ । १० । १५ ॥ (यथा, मनौ ।३।१५६। "भृतकाध्यायको यश्च भृताध्यापितश्च यः ॥")

भृतिः, स्त्री, (म्रियते अनयेति । भृ + क्तिन् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ मूल्यम् । भरणम् । इति मेदिनी । तौ, ४२ ॥ भृतिर्वेतनं भृतकर्मणेऽदत्तम् । तत्तु यज्ञविद्यादत्ताभ्यर्जनदक्षिणेव; । यथा नारदेन च । दत्तं यज्ञविद्यं श्रोत्रमदत्तं योऽधीयानमिति प्रतिषिद्धं दत्तादत्तयोः स्वरूपं विवृतम् ।
"पशुमत्कं भृतिमुद्धा क्षेत्रात् प्रत्युपकारतः ।
क्षीणुक्काहृतमहार्थं च दत्तं दानविदो विदुः ॥"
इति मिताक्षरा ॥

भृतिभुक्, [ज्] पुं, (भृत्या भृतौ उपजीवनीत्यर्थः । भुज् + कर्मणि क्विप् ।) भृतकः । इत्यमरः । २ । १० । १५ ॥

भृत्यः, पुं, (भ्रियते इति । भृ + "भृञोऽसंज्ञायाम् ।" ३ । १ । ११२ । इति क्यप् । "ह्रस्वस्य पिति कृति तुक् ।" ६ । १ । ७१ । इति तुगागमश्च ।) दासः । इत्यमरः । २ । १० । १७ ॥ (तथास्य पर्य्यायान्तरम् ।
"परिकर्म्मा परिचरः सहायः परिचारकः ।
प्रेष्यो भक्त उपस्थाता सेवको ऽभिधवोऽनुगः ॥"
इति वैद्यकरत्नमालायाम् ॥)
तस्य लक्षणं यथा,—
सूत उवाच ।
"भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
निर्दोषतया यथार्हेषु विविधेष्वेव कर्म्मसु ॥
भृत्यपरीक्षणं वक्ष्ये यस्य यस्य हि यो गुणः ।
तमिमं संप्रवक्ष्यामि यदृच्छा कथितानि च ॥
यथा चतुर्भिः कनकं परीक्ष्यते
तुलाघर्षणच्छेदनतापनेन ।
तथा चतुर्भिर्भृतकः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्म्मणा ॥"
कुलशीलगुणोपेतः सत्यधर्म्मपरायणः ।
रूपेण सुप्रसन्नश्च राज्ञाध्यक्षो विधीयते ॥
सत्यरूपपरीक्षाज्ञस्त्रैवर्गिकपरीक्षकः ।
बलाबलपरिज्ञाता सैनाध्यक्षो विधीयते ॥
इङ्गिताकारतत्त्वज्ञो बलवान् प्रियदर्शनः ।
अप्रमादी प्रमाणी च प्रतीहारः स उच्यते ॥
मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः ।
सर्व्वशास्त्रसमालोकी स्मृत्य साधुः स लेखकः ॥
बुद्धिमान् मतिमांश्चैव परचित्तोपलक्षकः ।
क्रूरो यथोक्तवादी च दूत एष विधीयते ॥
समस्तशास्त्रतत्त्वज्ञः पण्डितोऽथ जितेन्द्रियः ।
शौर्य्यवीर्य्यगुणोपेतो धर्म्माध्यक्षो विधीयते ॥
पित्रोपेतामहो दत्तः प्राज्ञश्च सत्यवाचकः ।
शौचयुक्तः सदाचारी क्षपकारः स उच्यते ॥
आयुर्व्वेदस्य नाभ्यासः सर्व्वज्ञः प्रियदर्शनः ।
आथर्व्वणीलगुणोपेतो वैद्य एष विधीयते ॥
वेदवेदाङ्गतत्त्वज्ञो जपहोमपरायणः ।
आशीर्व्वादपरो नित्यमेष राजपुरोहितः ॥
इति गारुडे ११२ अध्यायः ॥

भृत्या, स्त्री, (म्रियतेऽनया भरणमिति वा । भृ + "संज्ञायां समजनिषदनिपतमनविदषुञ् श्रीङ् भृञिभ्यः ।" ३ । ३ । ९९ । इति क्यप् । स्त्रियां टाप् ।) वेतनम् । इत्यमरः । २ । १० । ३८ ॥ (भरणक्रिया । यथा, ऋग्वेदे । १ । ८७ । १६ ।
"आसन्निषून् हृत्सु कोमयी मूनृत
यया भरायसे जोषात् ॥")

भृमिः, पुं, (भ्रमति भ्राम्यति वेति । भ्रम् + "भ्रमेः संप्रसारणञ्च ।" उणा० ४ । १२० । इति इन् कित् सम्प्रसारणञ्च ।) वायुविशेषः । घूरत्या वातास इति भाषा । जलादिभ्रमणम् । इत्युणादिकोषः ॥ (त्रि, कर्म्मनिर्व्वाहकः । यथा, ऋग्वेदे । १ । ३१ । १६ ।
"आपिः पिता प्रमतिः सोम्यानां
भृमिरस्यृषिकृन्मर्त्यानाम् ॥"
"भृमिर्भ्रामकः कर्म्मनिर्व्वाहक इत्यर्थः ।" इति तद्भाष्ये सायणः ॥ भ्रमणशीलः । यथा, ऋग्वेदे । ३ । ६२ । १ ।
"इमा उ वां भृमयो मन्यमाना
युवावते न तुज्या अभूवन् ॥"
"भृमयः भ्रमणशीलाः ॥" इति तद्भाष्ये सायणः ॥ वीणाविशेषे स्त्री । यथा, ऋग्वेदे ।२।३३।१ ।
"अग्नयो न शुशुचाना ऋणोचिषो भृमिं धमन्तो अपगा अदृक्षत ॥"
"यद्वा, भृम्याख्यो वीणाविशेषस्तं धमन्तो वादयन्तः ॥" इति तद्भाष्ये सायणः ॥)

भृग्, इर् य उ अग्रःपते । इति कविकल्पद्रुमः ॥ (दिवा०-पर० अक०-सेट् ।) इर् अभृग्यत् अभर्ग्गीत् । पुषादित्वान्नित्य ङ इत्यन्ये । य अभृग्यति भृग्यत्यरिपनाकिनीति त्रिलायुधः ॥ उ भर्ग्गित्वा भट्टा । इति । दुर्गादासः ॥

भृग्वं, क्ली, (भृग्यति प्राचुर्य्येण वर्णते इति भृग्य + कः ।) अतिशुभ्रः । तद्वति, त्रि । इत्यमरः । १ । ७० ॥ (यथा, भारवौ । १९ । ३६ ।
"भृग्यमाराधने यत्नः खाराध्यस्य मघोनः ॥"
भृग्यम्, य, (भृग्य + कः ।) प्रकर्षार्थः । सुष्ठुरर्थः । शोभनम् । इति शब्दरत्नावली ॥

भृग्वन्, [द्] पुं, पाषाणः । इति शब्दरत्नावली ॥

भृष्टः, त्रि, (भ्रस्ज् + कर्म्मणि क्तः ।) अजोपसेकं विना पक्वः । इति हेमचन्द्रः ॥ भाजा इति भाषा ॥

भृष्टतण्डुलः, पुं, (भृष्टश्चासौ तण्डुलश्चेति कर्म्मधारयः ।) भर्জনবিশিষ্টধান্যতণ্ডুলঃ । খোল ভাজা ইতি ভাষা । অস্য গুণাঃ ।
"सुगन्धिः कफपित्तघ्नः पित्तलो भृष्टतण्डुलः ॥"
इति राजवल्लभः ॥

भृष्टयवः, पुं, (भृष्टश्चासौ यवश्चेति ।) भর্জ্জনবিশিষ্টযবঃ । যব ভাজা ইতি ভাষা । তৎপর্য্যায়ঃ । धानाः २ । इत्यमरः ॥ वाटुकम् ३ । इति शब्दचन्द्रिका ॥ अस्य गुणा धानाशब्दे द्रष्टव्याः ॥

भृष्टान्नं, क्ली, (भृष्टं अन्नम् ।) भृष्टतण्डुलः । सुड़ि इति भाषा । तत्पर्य्यायः । कुडरम् २ व्याकम् ३ । इति शब्दचन्द्रिका ॥

भृष्टिः, स्त्री, (भ्रस्ज् + भावे क्तिन् ।) भर्জ্জনম् । भूर्ज्जवाटिका । इति मेदिनी । टे, ६५ ॥

भृ गि भृतौ । भृणि । भर्त्ता । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक० सेट् ।) गि भृणाति भूर्णः । भूर्णिः । भृणि भर्जने । इति दुर्गादासः ॥

भेका

भेकः, पुं, (बिभेतीति इति। भी+"एजभीकाग्राद्यल्यसीति।" उणा०। ३। ४१। इति कन्। जन्तुविशेषः। व्याङ् इति भाषा। तत्पर्य्यायः। मण्डूकः २ वर्षाभूः ३ घालूरः ४ प्लवः ५ दर्दुरः ६। इत्यमरः।१।१०।२४॥ वृष्टिभूः ७ वालूरः ८। इति तट्टीका॥ प्लवङ्गमः ९ जङ्घः १० प्लवगः ११ प्लवः १२ नन्दनः १३ गूढपर्वा १४ अजिह्मः १५ चित्तमोहनः १६। इति शब्दरत्नावली॥ नन्दकः १७ क्षतालयः १८ रेकः १९। इति त्रिकाण्डशेषः॥ मण्डः २० हरिः २१ लुलुकः २२। क्वचित् पुस्तके लूलकोऽपि पाठः। घालूकः २३ कटुरवः २४। अस्य मांसगुणाः। सद्योबलकरत्वम्। अमङ्गलदाहश्रमभेदक्षयकुष्ठकफहृद्रोगाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥ मेघः। इति मेदिनी। के, १०। (यथा, आर्य्यासप्तशत्याम्। ७५१।

"संदृश्यते दीनुदधिर्निदाघसमयो न भेकमपि॥")

भेकटः, पुं, (भेक इव टलति। भेक+टल+कः।) मत्स्यभेदः। यथा। तुल्यौ भेकटवेकटौ। इति द्विरूपकोषः॥

भेकजिः, पुं, मत्स्यविशेषः। भाङ्गन इति भाषा। अस्य गुणाः। मधुरत्वम्। शीतत्वम्। दृष्यत्वम्। श्लेष्मकरत्वम्। गुरुत्वञ्च। इति राजवल्लभः। भेकलिः। इति च पाठः॥

भेकपर्णी, स्त्री, (भेकाक्रान्ति पर्णमस्याः ङीष्।) मण्डूकपर्णी। इति केचित्॥ (यथा,—

"तत्सर्व्वं कन्यकाद्वादेर्मण्डूकेनावचेत्तथा।
भेकपर्णीरसेनैव गुञ्जाद्वयवटीं पिबेत्॥"

इति वैद्यकरत्नसारसंग्रहे दृष्टलोमनाथरसे॥)

भेकसुक् [ज्] पुं, (भेकं सृजति इति। सृज्+क्विप्। वर्णः। इति त्रिकाण्डशेषः॥

भेकी, स्त्री, (भेक+"जातेरस्त्रीविषयादयोपधात्।"४।१।६३। इति ङीष्।) भेकप्रिया। तत्पर्य्यायः। घिली २ मण्डूपदी ३ वर्षाभी ४ इत्यमरः। १।१०।२४॥ अन्येऽपीवन्नभेकपर्य्याया एतद्वाचकाः। मण्डूकपर्णीदृष्यः। इति रत्नमाला॥ (यथास्याः पर्य्यायान्तरम्।

"भेकी मण्डूकपर्णी च मण्डूकी मूलपर्य्यपि॥"

इति रत्नमालायाम्॥)

भेड़ः, पुं, (भी+बाहुलकात् डः। अस्योत्वम् ण मुडत्वं च।) मेषः। इति हेमचन्द्रः।४।३४३। अस्य भाषा भेड़ा॥

भेड़ी, स्त्री, (भेड़+ङीष्।) भेड़भार्य्या। अजी। अस्या दुग्धगुणाः।

"आविकं जघनं स्वादु स्निग्धोष्णञ्चाक्षरोपमम्।
अल्पं तर्पणं केश्यं गुरुपित्तकफप्रदम्।
गुरुकासेऽनिलोद्भूते केवले चाविके वरम्।"

इति भावप्रकाशः॥

भेत्ता, [त्तृ] त्रि, (भिनत्तीति। भिद्+तृच्।) भेदकर्त्ता। यथा, रघवहारतन्त्रे।

"कुटाजपाखिविज्ञेयः सेतुभेत्ता वनीपतः॥"

भेदः

भेदः, पुं, (भिद्+घञ्।) शत्रुबलीकरणोपायचतुष्टयान्तर्गततद्भेदोपायः। तत्पर्य्यायः। उपजापः २। इत्यमरः। २। ८। २१॥ परतो विश्लेष आत्मसात् करणं भेदः। इति भरतः॥ तद्विशेषो यथा,—

मनुरुवाच।

"परस्परन्तु ये दुष्टाः क्षुद्रा भीतावमानिताः।
तेषां भेदं प्रयुञ्जीत भेदसाध्या हि ते मताः॥
ये तु येनैव दोषेण परस्मान्नापि बिभ्यति।
ते तु तद्दोषपातेन भेदनीया भृशं सतः॥
आलीयां दर्शयेदार्य्यां परस्माद्दर्शयेन्नयम्।
एवं हि दर्शयेद्विद्वान् यथावद्व्यवमानयेत्॥
संहता हि विना भेदं शक्येरापि सुदुःसहाः।
भेदमेव प्रशंसन्ति तत्तान्नयविशारदाः॥
स्वसुखेनाभयेद्भेदं भेदं परसुखेन च।
परौक्ष्यं साधु मन्येत भेदं परसुखाच्छुतम्॥
भेद्याः स्वकार्य्यसुद्दिश्य कुशलैर्ये हि भेदिताः।
भेदितास्ते विनिर्दिष्टा नैव राजार्थवादिभिः॥
अन्नःकोपो बहिःकोपो यत्र स्यात्तां महीक्षिताम्।
अन्नःकोपो महांस्तत्र बाह्यकः पृथिवीक्षिताम्॥
सामन्तकोपो बाह्यस्तु कोपः प्रोक्तो मनीषिभिः।
महिषीयुवराजाभ्यां तथा सेनापतेर्नृप!॥
अमात्यमन्त्रिभ्यां चैव राजपुत्रात्तथैव च।
अन्नःकोपो विनिर्दिष्टो दारुणः पृथिवीक्षिताम्॥
बाह्यकोपे समुत्पन्ने सुमहत्यपि पार्थिवः।
सुहृन्मात्रस्तु मद्भाग! क्षीणमेव बली भवेत्॥
अपि शक्रसमो राजा अन्नःकोपेन गच्छति।
क्षोऽन्नःकोपःप्रयत्नेन तस्मादन्तेऽन्तकोपितः॥
परतः कोपमुत्पाद्य भेदेन विजिगीषुणा।
ज्ञातीनां भेदनं कार्य्यं परेषां विजिगीषुणा॥
रक्षणञ्चैव प्रयत्नेन ज्ञातिभेदस्य कारणम्।
ज्ञातयः परितप्यन्ते सततं परितप्य यम्॥
तथापि तेषां कर्त्तव्यं सुमहद्भीरिव चेतसा।
महद्भं दाममानाभ्यां भेदस्तेभ्यो भयङ्करः॥
न ज्ञातिरनुगृह्णाति न ज्ञातिर्दण्डमिच्छति।
ज्ञातिभिर्भेदनीयास्तु रिपवस्तेन पार्थिवैः॥
भिन्ना हि ज्ञातयः रिपवः प्रभूताः
स्वल्पेन चैवेन निहन्तुमाशाः।
सुसंहतानां हि ततस्तु भेदः
कार्य्यो रिपूणां नयशास्त्रविद्भिः॥"

इति मानसे राजधर्म्मे २२२ अध्यायः॥७॥ छेदः। विशेषः। विदारणम्। इति मेदिनी। दे, १२॥ (तथा च कामन्दकीये। १५। १६।

"पुरञ्च प्रहाय यदा समर्थ-
स्तदाभियायाज्जहते कषाय।
पुनः प्रवर्षन्नविसृष्टएष:
प्राप्नोति तोयं खलु पार्ष्णिभेदम्॥")

विरेकः। यथा, वाक्यार्णवघण्टके।

"कार्षे घृतमधुयुक्तां वक्त्रति मद्यते खेदमेदोपवासा
वह्निमान्द्ये च पिबेत् सर्पिश्चित्तमलिप्तं वारिपानं
कफार्त्तौ॥"

भेदिः

भेदकः, त्रि, (भिद्+ण्वुल्।) विदारकः। यथा, मनौ। ६। २८५।)

("संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः।
प्रतिकुर्य्याच्च तत् सर्व्वं पञ्च दद्याच्छतानि च॥"

विरेचकौषधादिः। (विरेचकौषधार्थे विषयो यथा,

"नवज्वरे च ये योगा भेदकाः परिकीर्त्तिताः।
ते तथैव प्रयोक्तव्या वीक्ष्य देहमलादिकम्॥"

इति वैद्यकरत्नसारसंग्रहे विरेकाधिकारे॥)

एषक्कारकः। यथा। "भेदयति अन्यपदार्थं एषक् करोतीति भेदकं णाच्या शिवः शीर्षेण गार्ग्यः।" इति कारकटीकायां दुर्गादासः॥ अपि च।

"भेद्यभेदकयोः क्लिष्टं सम्बन्धोऽन्योन्यमिष्यते।
क्लिष्टो यद्यपि सम्बन्धः षष्ठ्यातत्पतिस्तु भेदकात्॥"

इति कलापटीकायामसमर्पृच्छकारिकायाम्॥

("सामान्यस्य भेदको विशेषः प्रकारः।" इति च ५। १। ६८। दत्तस्य। कालिकाक्षतिः॥)

भेदनं, क्लीं, (भिद्यतेऽनेनेति भिद्+ल्युट्।) छिद्रम्। इति राजनिर्घण्टः॥ विदारणम्। इति भिदधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥ (भेदकारके, त्रि॥ यथा, भागवते। १। २६। २।

"यदाकुर्वन्त्यये तत्र ते शूद्रयन्त्यतिभेदनम्।
"अच्छद्वारनिर्यन्त्रकमिति स्वामिव्याख्यानम्॥"

विरेचनकारके च। यथा च सुश्रुते।१।१८८।१४॥

सर्व्वं मित्तकरं मद्यमम्लं दीपनरोचनम्।
भेदनं कफवातघ्नं छर्द्यं वह्निविशोधनम्॥")

भेदनः, पुं, ("भिद्यतेऽनेनेति।" भिद्+ल्युट्।) अम्बष्ठजः॥ (भिनत्ति भूमिमिति। भिद्+कु:॥ शूकरः। इति राजनिर्घण्टः॥

भेदितः, त्रि, (भिद्+क्त+कर्म्मणि क्तः।) भिन्नः। दारितः। इत्यमरः। ३। १। १००॥

भेदी, [न्] पुं, (भेत्तुं शीलमस्येति। भिद्+णिनिः।) अम्बष्ठजः। इति राजनिर्घण्टः॥ (गुणादयोऽस्याश्वेतसशब्दे विज्ञेयाः॥)

भेदकभेदि तद्विशिष्टे च त्रि॥ (यथा भागवते। ३। १५। ३३।

"शुनुपादिदं क्षुद्रभेदि भयं मतोऽस्य॥")

भेदुरं, क्लीं, (भिदुर+पृषोदरादित्वात् साधुः।) भिदुरम्। वज्रम्। इति द्विरूपकोषः॥

भेरः, पुं, (बिभेत्यस्मादिति। भी+अधिभ्यां रन्चेति। उणा०। २। २८। इति रन्।) पटहः। भेरी। दुन्दुभिः। इति संक्षिप्तसारोद्धारादित्तिः॥

भेरिः, स्त्री, (बिभ्यति शत्रवोऽस्या इति। भी+"बहुलाद्यच्च।" उणा०।४।१६६। इति क्रिन्। बाहुलकाद् गुणः।) दुन्दुभिः। तत्पर्य्यायः। आनकः २ दुन्दुभिः ३। इत्यमरः। २।७।६॥ भेरी ४ आनकदुन्दुभिः ५ आनकदुन्दुभी ६। इति तट्टीकायां भरतः॥ (यथा, "यतो भेरिवेणुवीणाशङ्खतालमृदङ्गझल्लरीप्रभृतिभेदेन शब्दा अनेकविधाः।" इति पञ्चतन्त्रे प्रथमतन्त्रम्॥)

भेरी, स्त्री, (बिभेति शब्दभयादस्मा इति। भी+क्विप्। ह्रस्वादिकारादिति पक्षे ङीप्।) भेरी। इत्यमरटीकायां भरतः॥

वराह उवाच।

"भेरीशब्दमजानता तु वसु मां प्रतिबोधयेत्।
बधिरो जायते भूजे! जन्मैकञ्च न संशयः॥
तत्र वक्ष्यामि सुभ्रोणि! प्रायश्चित्तं मम प्रियम्।
किञ्चिदादृ येन सुध्यते भेरीताडनमोहितः॥
यस्य कस्यचिच्चाबस्य शुक्लपक्षे तु द्वादशीम्।
आकाशशयनं कृत्वा घौतं सुध्यते किञ्चिदात्॥
य एतेन विधानेन वसुधे! कर्म्म कारयेत्।
अपराधं न मच्छेत मम लोकाय गच्छति॥"
इति वराहपुराणे भेरीताडनापराधप्रायश्चित्तम्॥

(यथा च, सुश्रुते। २। २७। ६।

"एतेन भेषैः पटहाश्च दिग्धा
वाद्यमाना विषमाशु कुर्युः॥")

भेषजं, क्ली, गर्भधारणम्। भयागर्के, त्रि। इति शब्दरत्नावली॥

भेषजा, स्त्री, (भेषज+टाप्।) देवताविशेषः। यस्निर्णीभेदः। इति मेदिनी। जे, ६४॥ सा देवता काली। यथा,—

"त्रिकोणनिलया नित्या परमाक्षरसंस्थिता।
महाविद्येश्वरी चैता भेषजा कुलसुन्दरी॥"
इति कालीकुलसर्व्वस्वे श्रीशिवपरशुरामसंवादे आद्यायाः सहस्रनामस्तोत्रम्॥

भेषं, त्रि, (भी+"भयेष्टाग्यवक्षेति।" उणा०२। २८। इति इन् रक्ष्च षलम्।) भीरुः। भयम्। इति मेदिनी। षे, ४२॥ भयञ्च। इति शब्दरत्नावली॥

भेषः, पुं, (भी+इन् षलम्।) ज्वरः। सन्निपातरोगः। इति मेदिनी। षे, ४२॥ भेषजम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भेषजः, पुं, क्ली, (भेष+स्वार्थे कन्।) तत्त्वादि तत्प्रशमनसाधनवस्तु। भेला इति भाषा। तत्पर्य्यायः। ज्वरः २ कोजः ३ उड्डूपम् ४ उड्डुपम् ५ तारजः ६ तारजः ७ तारकः ८। इति शब्दरत्नावली॥ तरीषः ९। इति जटाधरः॥

भेष, भ्वा० न भये। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) भ्व अबिभेषत्। न भेषति भेषते बिभेषे। इति दुर्गादासः॥

भेषजं, क्ली, (भिषजोवैद्यस्येदमिति अण् निपातनादैत्वम्। यद्वा, भेषं रोगं जयतीति। जि+डः। औषधम्। इत्यमरः। २। ६। ५०॥ ("अस्ति भेषजमोजसः।" इति ऋक्संहिता। २। ३३।७।) अथ भेषजभक्षणविधिमाह।

"भेषजमध्यहरेत् प्रभाते प्रायशो बुधः।
कषायांस्तु विशेषेण तत्र भेदस्तु दर्शितः॥
भेषः पञ्चविधः प्रोक्तो भेषज्यग्रहणे कृताम्।
किञ्चित् सूर्य्योदये याति तथा दिवसभोजने।
सायमन्ने भोजने च तदुक्तापि तथा विधिः॥

तत्र प्रथमः कालः।

'प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः।
लेखनार्थे च भेषज्यं प्रभाते नान्नमाहरेत्॥'

अथ द्वितीयः कालः।

'भेषज्यं विशुद्धेऽन्ने भोजनाग्रे प्रशस्यते।
अन्नौ चित्रभोज्येच मिश्रं दधिरमाहरेत्॥
समानवाते विशुद्धे मन्देऽग्नौ वह्निदीपनम्।
दद्याद्भोजनमध्ये च भेषज्यं कृशलो भिषक्॥
आमकोपे तु भेषज्यं भोजनान्ते समाहरेत्।
हिक्काश्वेपककम्पेषु पूर्व्वमन्ने च भोजनात्॥'

अथ तृतीयः कालः।

'उदाने कुपिते वाते स्वरभङ्गादिकारिणि।
व्यायम्यादिकं देयं भेषज्यं साध्यभोजने॥
प्राणे प्रदुष्टे साध्यस्य भुक्तस्यान्ते प्रदीयते।
औषधं प्रायशो धीरैः कालोऽयं स्यात् तृतीयकः॥'

अथ चतुर्थः कालः।

सुकुमारकुशे बालवृद्धस्त्रीक्षीणमानवेषु च।
सान्नञ्च भेषजं दद्यादिति कालश्चतुर्थकः॥'

अथ पञ्चमः कालः।

'ऊर्द्ध्वगेषु विकारेषु लेखने दृंहणे तथा।
पाचने शमने देयमनन्नं भेषजं भिषग्॥'

इति पञ्चमः कालः॥

निरन्नस्य भेषजस्य गुणमाह।

'वीर्य्याधिकं भवति भेषजमन्नपक्वौ
दद्यात्तदामयमसंशयमाशु चैव॥
तद्बालवृद्धयुवतीन्दुभिरप्युपेतं
ग्लानिं परां नयति चाशु बलक्षयञ्च॥'

सान्नस्य भेषजस्य गुणमाह।

'क्षीघ्रं विपाकमुपयात्यबलं न हिंस्या-
दन्नाहृतं न च गुरुर्वदनाभिरेति।
एतद्धितं स्थविरबालबलाङ्गनाभ्यः
प्राग्भोजनाद्यदधिकं किल तच्च सद्यः॥'

सद्यः अन्नाहृतवत् भेषजमिति शेषः।

'औषधञ्चैव भुक्तं भोजनञ्चैव यदौषधं पीतम्।
न करोति गदोपशमं प्रकोपयत्यधरोगांश्च॥'

पीतमित्युपलक्षणम्। लीढ़ादि च।

'अनुलोमोऽनिलः स्वास्थ्यं क्षुत्पुष्पासुमनः कृतः।
लघुत्वमिन्द्रियोद्गारशुद्धिजीर्णौषधाज्ञप्तिः॥
क्षमो दाहोऽप्रसदनं श्रमस्तृष्णाभिरोधकः।
अरतिर्बलहानिश्च मावशेषौषधाज्ञप्तिः॥'

अथ भेषजभक्षणविधिमाह चरकः।

'देवान् गुरूंश्च यथा विप्रान् पूजयित्वा प्रयत्न च।
आशिषश्च समादाय श्रद्धया भेषजं भजेत्॥
रसायनमिवर्षीणां देवानामिव चामृतम्।
सुधैवोत्तमनागानां भेषज्यमिदमस्तु ते॥
ब्रह्मदक्षाश्विरुद्रेन्द्रभूचन्द्रार्कानिलाग्नयः।
ऋषयः औषधिग्रामा भूमिदेवाश्च पान्तु वः॥'

इत्याद्याशिषः॥

'औषधं हेमरजतताम्रभाजनपरिस्थितम्।
भिषगालोकनस्थाने प्रसन्नमनसेक्षयेत्॥
प्रशान्तरूपविज्ञाय पीत्वा मन्त्रमधोहरम्।
निःक्षिप्याचम्य वलिकं ताम्बूलानुपयोजयेत्॥'

अथ भेषजानां विधानानि।

'खरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ।
शेषाः कषायाः प्रथिते लघवः स्युर्यथोत्तरम्॥'

तत्रादौ खरसविधिः।

'आर्द्रतात्तत्क्षणात्तस्मात् द्रव्यात् स्वस्मात् रसं-
द्रवेत्।
वस्त्रनिष्पीड़ितो यश्च खरसो रस उच्यते॥'

अथ कल्कविधिः।

'द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सलिलं भवेत्।
प्रक्षिप्य गालयेद्वस्त्रे तज्जलं कर्षसम्मितम्॥
कल्के मधु घृतं तैलं देयं द्विगुणमात्रया।
सिता गुरुः समं दद्याद्द्रवा देयाश्चतुर्गुणाः॥'

अथ क्वाथविधिः।

'पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत्।
तत्पात्रे क्वाथयेद्यावदष्टमांशावशेषितम्॥
कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलम्॥'

षोड़शिकं षोड़शगुणम्॥ *॥

अथ हिमविधिः।

'क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतम्।
निशोषितं हिमः स स्यात्तथा शीतकषायकः॥'

अथ फाण्टविधिः।

'क्षुण्णद्रव्यपले सम्यक् जलसृष्टं विनिःक्षिपेत्।
मृत्पात्रे कुड़वोन्मानं ततस्तु स्रावयेत् पुटात्॥
स स्यात् चूर्णद्रवः फाण्टस्तज्ज्ञानं द्विपलोक्षितम्।
घौतं सिता गुड़ादींस्तु कर्षमात्रात् विनिःक्षिपेत्॥'*॥

अथ तण्डुलजलविधिः।

'कल्पितं तण्डुलपलं जलेऽष्टगुणिते क्षिपेत्।
भावयित्वा जलं यात्यं देयं सर्व्वत्र कर्म्मसु॥'

अथ मन्थविधिः।

'जले चतुर्गुणे शीते क्षुण्णं द्रव्यपलं क्षिपेत्।
मृत्पात्रे मन्थयेत् सम्यक् तस्माच्च द्विगुणं
पिबेत्॥'

अथ चूर्णविधिः।

'अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम्।
तत् स्याच्चूर्णं रजःशोषक्षयाजीर्णसञ्जिता॥
चूर्णे गुरुः समो देयः शर्करा द्विगुणा मता।
चूर्णेतु भक्षितं क्षिप्तं देयं शीतजलद्रवैः॥'

अथ भावनाविधिः।

'द्रवेण यावता सम्यक् चूर्णं सर्व्वं प्लुतं भवेत्।
भावनायाः प्रमाणन्तु चूर्णं प्रोक्तं भिषग्वरैः॥'

अथ पुटपाकविधिः।

'पुटपक्वस्य कल्कस्य खरसो यद्यते बलः।
अतस्तु पुटपाकानां युक्तिरभ्योद्यते मया॥
पुटपाकस्य पाकोऽयं लेपस्याङ्गारवर्च्चसा।
लेपश्च दार्द्रकं स्नूयं कुर्याद्दार्द्रकमात्रकम्॥
काश्मरीवटजम्बादिपत्रैर्वेष्टनसुत्तमम्।
पलमात्रो रसो यात्रः कर्षमात्रं मधु क्षिपेत्॥
कल्कचूर्णद्रवाद्यास्तु देयाः कोलमिता बुधैः॥'

अथोल्लोदकविधिः।

'अष्टमेनांशुनैवेह चतुर्थेनार्द्धेन वा।

अथवा क्षायमेनैव सिद्धसुखोदकं पिबेत् ॥'

अथ क्षीरपाकविधिः ।

'क्षीरमष्टगुणं द्रव्यात् क्षीरात्क्षीरं चतुर्गुणम् ।
क्षीरावशेषं तत्पीतं मूलमामोद्भवं जयेत् ॥'

अथावलेहविधिः ।

'क्षायादियेत् पुनः पाकात् घनत्वं सा रसक्रिया ।
सोऽवलेहश्च लेहश्च तन्मात्रा स्यात् पलोन्मिता ॥'

अथ वटिकाविधिः ।

'वटिका अथ कथ्यन्ते तन्नामवटिका वटी ।
मोदको गुटिका पिण्डी गुडो वर्त्तिश्चयोच्यते ॥
लेहवत् साध्यते वह्नौ गुडो वा शर्करापि वा ।
मुद्गगुडुच्यां क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी ॥'

अथ सन्धानविधिः ।

'द्रवेषु चिरकालस्थं द्रव्यं यत् सन्धितं भवेत् ।
आसवारिष्टमेवेह्यत् प्रोच्यते भेषजोचितम् ॥'

अथ धातूनां प्रोधनमारणविधिः । तत्र प्रोधनविधिः ।

'पत्तलीकृत्य पत्राणि क्षेप्तो वह्नौ प्रतापयेत् ।
निक्षिपेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥
गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा ।
एवं क्षेप्तः परेद्याच्च धातूनां प्रोधनं भवेत् ॥'*॥

अथ सर्जस्य मारणविधिः ।

'सर्जस्य त्रिगुणं क्षतमम्लेन सह मर्दयेत् ।
तद्गोलकसमं गन्धं निक्षाद्यधरोत्तरम् ॥
गोलकञ्च ततो वह्नौ सरावसंपुटे ।
चिंशदनोपलैर्दद्यात् पुटान्येवं चतुर्दश ।
निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः ॥"

अथ क्षीरपानविधिः ।

क्षीरञ्चतुर्विधं प्रोक्तं घृतं तैलं वसा तथा ।
मज्जा च तत् पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ॥

अथ पञ्चकर्माणि ।

प्रथमं वमनं पश्चाद्विरेकश्चानुवासनम् ।
एतानि पञ्च कर्माणि निरूहैर्नोत्तरं तथा ॥

अथ मलवर्त्तिविधिः ।

घृताभ्यक्ते गुदे क्षिप्ता शलाका स्नायुसन्निभा ।
मलप्रवर्त्तिनी वर्त्तिः मलवर्त्तिश्च सा स्मृता ॥

अथ नस्यकर्मविधिः ।

नस्यं तत् कथ्यते धीरैर्नासाज्ञाद् यद्दीयते ।
नावनं नस्यकर्मेति तस्य नाम द्वयं मतम् ॥

अथ धूमपानविधिः ।

धूमस्तु षड्विधः प्रोक्तः धूमनो दृंहणस्तथा ।
रेचनः कासहा चैव वामनो मद्यधूपनः ॥

अथ गण्डूषकवलग्रहितिसारणविधिः ।

तत्र गण्डूषः ।

क्षीरक्षीरकषायादिद्रवैः सम्यङ्मानतम् ।
आपूर्णं क्षीयते तावद्विधिर्गण्डूषधारणे ॥

अथ कवलः ।

वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे ।
अर्द्धं निःक्षिप्य संचर्व्य निष्ठीवेत् कवले विधिः ॥

अथ प्रतिसारणम् ।

एलानिशासुखानां चूर्णैकस्यावचेदके ।
घृतेर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥

अथ स्नेहविधिः ।

स्नेहश्चतुर्विधः प्रोक्तस्तापोपाश्वस्नेहसंज्ञितः ।
उपनाह्यो द्रवः स्नेहः सर्व्वे वातामिहारिणः ॥

अथ कर्णपूरणविधिः ।

स्नेहयेत् कर्णदेशन्तु किञ्चित्तु पार्श्वशायिनः ।
मद्ये सौवीरके तैले कोष्णे श्रोत्रं प्रपूरयेत् ॥
कर्णञ्च पूरितं स्नेहैरुष्णं पञ्चशनानि वा ।
सहस्रं वापि मात्राणां श्रोत्रकण्डूरिरोगहृत् ॥
रसाद्यैः पूरणं कर्णे भोजनात् प्राक् प्रशस्यते ।
तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते ॥*॥

अथालेपविधिः ।

अथालेपस्य नामानि लेपलेपनलिम्पयः ।
दोषघ्नो विविधो वर्ण्यः स च लेपक्रिया मतः ।
न रात्रौ लेपनं कुर्य्यात् सुप्तमाभ्यङ्गमाचरेत् ॥

अथ प्रोञ्छितस्नावणविधिः ।

प्रोञ्छितं स्नावयेच्छोरामयं प्रशमीत्य च ।
प्रस्थं प्रस्थार्द्धमथवा प्रस्थार्द्धार्द्धमथापि वा ॥
प्रथमकाले स्वभावेन प्रोञ्छितं स्नावयेन्नरः ।
त्वग्दोषमस्थिप्रोथाद्या न स्युः रुधिरपानतः ॥

अथाच्योतनविधिः ।

क्षायक्षौद्रासवक्षेद्रविद्रुतां यत्तु पातनम् ।
द्वयङ्गुलोन्मीलिते नेत्रे प्रोक्तमाच्योतनं हितम् ॥

अथ विडालकविधिः ।

विडालको वह्निर्लेपो नेत्रे पक्ष्मविवर्ज्जिते ।
तस्य मात्रा परिज्ञेया मुखालेपविधानवत् ॥

अथ तर्पणविधिः ।

वातातपरजोहीने देशेऽव्युत्तालशायिनः ।
आधारौ माषचूर्णेन क्लिन्नेन परिमर्ज्जितौ ॥
समौ दृढावसम्बाधौ कर्णपौ नेत्रकोषयोः ।
पूरयेदूर्द्धमस्त्रेण विलीनेन सुखोदकैः ॥

अथाञ्जनविधिः ।

"अथ सम्यग्दोषस्य प्राग्मर्दनमाचरेत् ।
अञ्जनं क्रियते नेत्रे तद्दृष्ट्यर्थाञ्जनं मतम् ॥

अथ प्रत्यञ्जनविधिः ।

गतदोषमपेतास्रं प्रपश्यन् सम्यगात्मना ।
प्रत्याख्याति यथादोषं कार्य्यं प्रत्यञ्जनं ततः ॥

इति भावप्रकाशः ॥*॥

अथ भेषजकरणभक्षणदिनम् । तत्र तिथयः विधिभिन्नाः शोभनाः । वाराः रविसोमबुधेज्यशुक्रस्थिरमित्रक्षाणाम् । नक्षत्राणि पुष्यहस्तपुनर्वसुपूर्व्वाषाढापूर्व्वभाद्रपदाश्वमरुत्यदितिधनिष्ठाखात्यभिजानि । जन्मर्क्षञ्च निषिद्धम् ।

"लग्नानि मिथुनकन्याधनुर्मीनसंज्ञकानि ।
तत्र गुरुबुधशुक्रेषु सत्सु प्रशस्तानि ।"

इति ज्योतिषतत्त्वम् ॥

(करणं पुनर्भेषजम् । भेषजं नाम तत् यदुपकरणाय उपकल्प्यते भिषजो धातुसाम्याभिनिर्वृत्तौ प्रयतमानस्य विशेषतश्चोपायान्तेभ्यः । तद्विविधं अपायमेदात् दैवव्यपाश्रयं युक्तिव्यपाश्रयञ्च । तत्र दैवव्यपाश्रयं मन्त्रौषधमणिमङ्गलबल्युपहारहोमनियमप्रायश्चित्तोपवासस्वस्त्ययनप्रणिपातगमनादि । युक्तिव्यपाश्रयं संशोधनोपशमने चेष्टाश्च इष्टसेनाः । एतच्चैव भेषजमङ्गमेदादपि त्रिविधं द्रव्यभूतमद्रव्यभूतञ्च, तत्र यद्द्रव्यभूतं तदुपायाभिज्ञतम् । उपायो नाम भयदर्शनविस्मापनस्तोभनहर्षणभर्त्सनवधबन्धस्वप्नसंवाहनादिरूपो भावः यथोक्ताः सिद्धुपायाश्च । यत्तु द्रव्यभूतं तदमनादिषु योगसुपैति । तच्चापौरुषपरीक्षा, इदमेवं प्रकृत्या एवंगुणमेवंप्रभावमस्मिन् देशे जातमस्मिन् ऋतौ एवं गृहीतमेवं निहितमेवमुपस्कृतमनया मात्रया युक्तमस्मिन् ऋतौ एवंविधस्य पुरुषस्यैतावन्तमोजसमग्निबलं वैषम्यं उपशमयति वा अन्यदपि चैवंविधं भेषजमभूतसाधनेनानेन वा विशेषेण युक्तमिति ।

इति चरके विमानस्थानेऽष्टमेऽध्याये ॥)

भेषजाङ्गं, क्ली, (भेषजस्य औषधस्य अङ्गमवयवइव ।) अनुपानम् । इति शब्दरत्नावली ॥

भैक्षं, क्ली, (भिक्षायां समूह इति । भिक्षा + भिक्षादिभ्योऽण् ।" ४ । २ । ३८ । इत्यण् ।) भिक्षासमूहः । इत्यमरः । २ । ७ । ४७ ॥ अपि च ।

"भिक्षाप्राप्तमनुद्दिष्टयोगात् प्राक्षैनाद्यनिमन्त्रितम् ।
अयाचितन्तु तद्भैक्षं भोक्तव्यं मनुरब्रवीत् ॥"

इति प्रायश्चित्ततत्त्वधृतोशनसो वचनम् ॥

(भिक्षैव स्वार्थे अण् । भिक्षा ॥ भिक्षाभवे भिक्षालब्धे वा त्रि॥)

भैक्षजीविका, स्त्री, (भैक्षेण जीविका ।) भिक्षया जीवनोपायः । तत्पर्य्यायः । पैक्षिण्यम् २ । इति त्रिकाण्डशेषः ॥

भैक्षभुक् [ज्] त्रि, भैक्षाशी । भिक्षाशी । भैक्षं भुङ्क्ते यः । इति कर्त्तरि क्विप्प्रत्ययेन । निष्पन्नं ॥ (यथा, महाभारते १३ । ४ । ६६ । ७ ।

"गुरुणा समनुज्ञातो भुञ्जिताश्रममङ्गनासेवम् ।
द्विविधभैक्षभुगपि स्यान्नाशनविहारवान् ॥")

भैमी, स्त्री, (भीमेनोपासिता भीमस्य इयं वेति । भीम + अण् ङीप् ।) भीमैकादशी । यथा, अथ भैमी । विष्णुधर्म्मोत्तरे ।

"स्नानार्थं यत्र घरे माघे मासि प्रजायते ।
एकादश्यां सिते पक्षे सोपवासो जितेन्द्रियः ।
द्वादश्यां षट्तिलाचारं कृत्वा पापात् प्रमुच्यते ।
तिलजायी तिलोदन्वी तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिलो नावसीदति ॥"

मत्स्यपुराणे ।

"यद्यस्यां चतुरश्रायां द्वादश्यामथ भारत ! ।
अन्येष्वपि दिनेष्वेषु न शक्तस्त्वमुपोषितुम् ॥
ततः पुण्यामिमां भौमतिथिं पापप्रणाशिनीम् ।
उपोष्य विधिनानेन गच्छ विष्णोः परं पदम् ॥
भौमतिथिं भैमीमिव ज्ञानात् एकादशीम् ।
इत्येकादशीतत्त्वम् ॥*॥

अपि च ।

पितामह उवाच ।

"माघमासे शुक्लपक्षे सूर्यर्क्षेण युता पुरा ।
एकादशी तथा चैषा भीमेन समुपोषिता ॥
आश्चर्यन्तु व्रतं दृष्ट्वा पितृणामसृजो भवेत् ।
भीमद्वादशीति विख्याता प्राणिनां पुण्यवर्द्धिनी ॥
तत्रैव विधानेयं ब्रह्महत्यादि नाशयेत् ।
विनिहन्ति महापापं कुपुत्रो विषयं यथा ।
कुपुत्रस्तु कुलं यद्वत् कुभार्य्या च पतिं यथा ।
अधर्मश्च यथा धर्म्मं कुमन्त्री च यथा नृपम् ॥
अज्ञानेन यथा ज्ञानं शौचाच्चाशौचता यथा ।
अश्रद्धया यथा श्राद्धं सत्यैवानृतमेव यथा ॥
हिंसं यथोत्तमादन्नादनर्घ्याच्च वस्तुनः ।
यथा प्रकीर्त्तनाद्दानं तपो वै विलयाद्यथा ॥
अग्निहोत्रं यथा पुत्रो गावो दूरगतं यथा ।
क्रोधेन च यथा ज्ञानं यथा वित्तमवर्द्धनात् ॥
यथा समीक्षणाज्ज्ञानं फलाच्च यजनक्रियाः ।
तथैव पापनाशाय प्रोक्तेयं द्वादशी शुभा ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
युगपद्दुष्कृतानि नहि हन्ति त्रिपुष्करम् ॥
न चापि नैमिषक्षेत्रं कुरुक्षेत्रं प्रभासकम् ।
कालिन्दी यमुना गङ्गा न रेवा न सरस्वती ॥
न चैव सर्व्वतीर्थानि एकादश्याः समानि च ।
न दानं न जपो होमो न चान्यत्सुकृतं क्वचित् ॥
एकतः पृथिवीदानमेकतो हरिवासरः ।
तयोरप्येषा महापुण्या ह्यमेकादशी परा ॥
अस्मिन् वराहवपुषः कृत्वा देहस्य हाटकम् ।
घटोपरि नवे पात्रे कृत्वा वै ताम्रभाजने ॥
सर्व्वबीजानि तं विप्राः सितवस्त्रावगुण्ठिते ।
रुक्मिरत्नप्रदीपाद्यैः कृत्वा पूजां प्रयत्नतः ॥
वराहाय नमः पादौ क्रोडाकृतये नमः कटिम् ।
नाभिं गम्भीरघोराय उरः श्रीवत्सधारिणे ॥
बाहुं सहस्रशिरसे ग्रीवां सर्व्वेश्वराय च ।
मुखं सर्व्वात्मने पूज्य ललाटं प्रभवाय च ।
कृष्णाः घृतमयुस्वार्थं पूज्या देवस्य चक्रिणः ॥
विधिना पूजयित्वा तु कृत्वा जागरणं निशि ।
श्रुत्वा पुराणं देवस्य माहात्म्यप्रतिपादकम् ॥
ब्राह्मणेभ्यो दत्त्वा तु याचकाय शुभाय च ।
कनकक्रोडसहितं सन्निवेद्य परिच्छदम् ॥
पश्चात्तु पारणं कुर्य्यान्नातिस्निग्धः सुसंवृतः ।
एवं कृत्वा नरो विप्रा न भूयः क्लेशभाग् भवेत् ॥
उपोष्यैकादशीं पुण्यां सुव्रते वै क्षणक्षयात् ।
सद्योऽभिलषितावाप्तिः कृत्वा सर्व्वमनोरथम् ॥"

इति गारुडे एकादशीमाहात्म्ये १२७ अध्यायः ॥ (भीमस्य राज्ञः अपत्यं अण् स्त्री । भीमराजनन्दिनी दमयन्ती । यथा, महाभारते । ३ । ६४ । २२ ।

"भाविष्यति वा नृपसुता भैमी तस्याथ कस्यचित् ।")

भैरवं, त्रि, (भीरोर्हितं आवश्यत् । भीरु + अण् ।) भयानकम् । इत्यमरः । १ । ७ । २० । (यथा, महाभारते । १ । १६१ । २७ ।

"सक्थ्ना च कटीदेशे यस्य वासवि पाण्डवः ।
सद्यो द्विगुणं चक्रे रूपवत्तं भैरवं रवम् ॥")

अस्य पर्य्यायाः भयङ्करशब्दे द्रष्टव्याः ॥

भैरवः, पुं, (भीर्भयङ्करो रवो यस्य । इति भीरव । ततः स्वार्थे अण् ।) शङ्करः । इति मेदिनी । वे ४६ ॥ भयानकरसः । इत्यमरटीकायां भरतः ॥ महादेवः । इति शब्दरत्नावली ॥ रागभेदः । इति हेमचन्द्रः ॥* अथ भैरवावाहनमुत्पत्तिर्यथा,

"दैत्याधिपः सनुप्रत्य हरोरसि गदां क्षिपन् ।
संस्थितस्तु महायोगी सर्व्वाधारः प्रजापतिः ॥
गदापातक्षतादभूरि चतुर्धाऽङ्गाद्यापतत् ।
पूर्व्वधारासमुद्भूतो भैरवोऽग्निसमप्रभः ॥
विद्याराजेति विख्यातः पद्ममालाविभूषितः ।
तथा दक्षिणधारोत्थो भैरवः प्रेतमास्थितः ॥
कालराजेति विख्यातः कृष्णाञ्जनसमप्रभः ।
नागराजेति विख्यातनक्रमालाविभूषितः ॥
पश्चाद्धारासमुद्भूतो भैरवः शूलभूषितः ।
रुरुश्चन्द्रराजेति विख्यातः इन्द्रायुधसमप्रभः ॥
भूमिधाराद्भवो ज्ञेयो भैरवः फलभूषितः ।
स्थाणुः क्षितिधराजेति गौराङ्गसमप्रभः ॥
ततोऽभूद्देवराजेति भैरवः क्षतजाद्यथ ।
उग्रराजो बभूवाथ क्षतजाद्भैरवोऽपरः ॥
एवं हि सप्तरूपोऽसौ कथ्यते भैरवो मुने ! ।
विप्रराजोऽथमः प्रोक्तो भैरवाष्टकमुच्यते ॥"

इति वामनपुराणे अन्धकवरप्रदाने भैरवप्रादुर्भावे ६७ अध्यायः ॥ * ॥

शारदीयदुर्गापूजायां अष्टौ पूज्यभैरवा यथा,

"आदौ महाभैरवञ्च संहारभैरवं तथा ।
असिताङ्गभैरवञ्च रुरुं भैरवमेव च ॥
ततः कालं भैरवञ्च क्रोधभैरवमेव च ।
ताम्रचूडं चन्द्रचूडं अन्ते च भैरवद्वयम् ॥
इत्यान् संपूज्य मध्ये च नवशक्तीश्च पूजयेत् ॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे दुर्गोपाख्याने ६१ अध्यायः ॥

ताम्रचूडचन्द्रचूडयोः स्थाने कपालभैरवरुद्रभैरवौ ज्ञेयौ । इति तत्रैव गणपतिखण्डे ४१ अध्यायः ॥* अपि च ।

"असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्तसंज्ञकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥"

इति तन्त्रसारः ॥*॥

शिवगणाधिपभैरवो यथा,—

"नन्दी भृङ्गी महाकालो वेतालो भैरवस्तथा ।
अष्टौ भूता महेशस्य वीतभीताक्षपोषणाः ॥
धर्म्मपृष्ठधरौरेण प्राप्तिरं तपसो बलात् ।
गणानामाधिपत्यन्तु ते जानन्ति हरं परम् ॥"

इति कालिकापुराणे ४४ अध्यायः ॥*॥

अरवीरपुरराजचन्द्रशेखरपत्नीतारावतीगर्भे महादेवाज्ञातपुत्रः । स च पुरा भृङ्गी बभूव पार्व्वतीशापात् वानरमुखो भूत्वा भैरव इति ख्यातः । यथा,—

"प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं वसुमक्षितः ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्नृपशार्दूल ! तथा प्राक्षाञ्जनाननम् ॥
ततस्तयोर्नाम चक्रे नारदो वचनान्नृप ! ।
ज्येष्ठो भैरवनामाभूत् भीरोः पुत्रो भयङ्करः ।
वेतालसदृशः श्रेष्ठो वेतालोऽभूत्तथापरः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥*॥

अपि च ।

"योऽसौ भृङ्गी हरसुतो महाकालोऽपि भर्गजः ।
तावेव गौरीशापेन वानरत्वमुपागतौ ॥
वेतालभैरवौ जातौ पृथिव्यां नृपवेश्मनि ।
यथा भृङ्गिमहाकालावुत्पन्नौ प्राक् तथा शृणु ।
योऽसौ महाभैरवाख्यः सकायः शारभो वरः ।
भैरवः पृथगेवायं गणाध्यक्षो हरात्मजः ॥"

इति कालिकापुराणे ४५ अध्यायः ॥*॥

दुर्जयाख्यगिरिस्थभैरवो यथा,—

"तस्मात्तु भैरवो देवो भर्गवङ्गमलोद्भवः ।
दुर्जयाख्ये वरगिरौ स्वर्गस्योपमभूमिनि ॥
योऽसौ शरभरूपस्य मध्यस्कन्धादिभैरवः ।
स एव भैरवाख्योऽयं पञ्चवक्त्रस्य मन्त्रकैः ।
संपूज्य तत्र मतिमान् स याति शिवलोकताम् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥*॥

भैरवस्य मन्त्रो यथा,—

"केवलः सपरो हादिः षड्भरसमन्वितः ।
चन्द्रबिन्दुसमायुक्तं हृदयस्यैव बीजकम् ॥
भैरवं पार्श्वनाथन्तु वनमालिस्वरूपिणम् ।
वाराहेण तु बीजेन पूजयेत्तु विधानतः ॥
सपरौ हावनुस्वारविसर्गाभ्यां समन्वितौ ।
महाभैरवमन्त्रोऽयं भैरवं तेन पूजयेत् ॥"

इति कालिकापुराणे ६२ अध्यायः ॥*॥

अस्य ध्यानं यथा,—

"भैरवः पार्श्वनाथश्च रक्तगौरश्चतुर्भुजः ।
गदां पद्मञ्च शक्तिञ्च चक्रञ्चापि करेषु च ।
विभ्रद्दंष्ट्राः पुरोभागे पूज्योऽयं विघ्नरूपधृक् ॥"

इति तत्रैव ६० अध्यायः ॥*॥

अस्य गायत्री यथा,—

"महाभैरव विद्महे कैलिरूपाय धीमहि ।
तन्नः कामी भैरवस्तु देवी नित्यं प्रचोदयात् ॥
इयं भैरवरूपस्य गायत्री मे प्रतिष्ठिता ।
अथेदमांसमद्यादिभोजनाय मया धृतः ॥
महाभैरवरूपोऽयं तथा क्षीरतिलक्रमे ।
अयन्तु वाम्यभावेन पूज्यो मद्यादिभिः सदा ॥"

इति कालिकापुराणे ७७ अध्यायः ॥

अथ महाविद्यादीनां भैरवविरूपत्वं यथा,—

शिव उवाच ।

"शृणु चार्व्वङ्गि शुभगे ! कालिकायाश्च भैरवम् ।
महाकालं दक्षिणायाः दक्षभागे प्रपूजयेत् ॥
महाकालेन वै सार्द्धं दक्षिणा रमते सदा ।
तारायाः दक्षिणे भागे अक्षोभ्यं परिपूजयेत् ॥
समुद्रमथने देवि ! कालकूटं समुत्थितम् ।
सर्व्वे देवाः सदाराश्च महाक्षोभमवाप्नुयुः ॥
क्षोभादिरहितं यस्मात् पौनं हालाहलं विषम्
अतएव महेशानि ! अक्षोभ्यः परिकीर्त्तितः ॥

तेन सार्द्धं महामाया तारिणी रमते सदा ।
महाचिपुरसुन्दर्य्या दक्षिणे पूजयेत् शिवम् ॥
पञ्चवक्त्रं त्रिनेत्रञ्च प्रतिवक्त्रे सुरेश्वरि ! ।
तेन सार्द्धं महादेवी सदा कामकुतूहला ॥
अतएव महेशानि ! पञ्चमौलि प्रकीर्त्तिता ।
श्रीमद्भुवनसुन्दर्य्या दक्षिणे त्र्यम्बकं यजेत ॥
स्वर्गे मर्त्ते च पाताले या चाद्या भुवनेश्वरी ।
रमया रमते तेन त्र्यम्बकस्तेन कथ्यते ॥
सप्तलिङ्गे समाख्यातः सर्व्वतन्त्रे प्रपूजितः । ।
भैरव्या दक्षिणे भागे दक्षिणामूर्त्तिसंज्ञकम् ॥
पूजयेत् परयत्नेन पञ्चवक्त्रं तमेव हि ।
छिन्नमस्तादक्षिणांशे कबन्धं पूजयेत् शिवम् ॥
कबन्धपूजनाद्देवि ! सर्व्वसिद्धीश्वरो भवेत् ।
धूमावती महाविद्या विधवारूपधारिणी ॥
बगलाया दक्षभागे एकवक्त्रं प्रपूजयेत् ।
महाकालेति विख्यातं जगत्संहारकारकम् ॥
मातङ्गीदक्षिणांशे च मतङ्गं पूजयेत् शिवम् ।
तमेव दक्षिणामूर्त्तिं जगदानन्दकारकम् ॥
कमलाया दक्षिणांशे विष्णुरूपं सदाशिवम् ।
पूजयेत् परमेशानि ! स सिद्धो नात्र संशयः ॥
पूजयेदन्नपूर्णाया दक्षिणांशे च रूपकम् ।
महामोक्षप्रदं देवं दशवक्त्रं महेश्वरम् ॥
दुर्गाया दक्षिणे देवि नारदं परिपूजयेत् ॥
नकारः स्यादिकर्णो च दकारः पालकः सदा ।
रेफः संहाररूपश्चालङ्कारः परिकीर्त्तितः ॥
अन्यासु सर्व्वविद्यासु ऋषिर्यः परिकीर्त्तितः ॥
स एव तस्या भर्त्ता च दक्षभागे प्रपूजयेत् ॥"

इति षोडशतन्त्रप्रथमपटले ॥

(भैरवबलिविषयः । यथा, कालिकापुराणे ।
यश्चिञ्चः कच्छपाग्राहा मनुष्या नवविधा नगाः ।
महिषा गोधिका गावश्छागो वभ्रुश्च सूकरः ।
खड्गश्च लवणासारश्च गोधिका शरभो हरिः ।
ग्राहो लग्नश्च नरश्चैव खगात्रवधिरस्तथा ॥
चञ्चिकाभैरवादीनां बलयः परिकीर्त्तिताः ।
बलिभिः साध्यते मुक्तिर्बलिभिः साध्यते दिवम् ॥)

अथ भैरवरागस्य विवरणम् । हनुमन्मते षड्-रागमध्ये प्रथमरागः । महादेवमुखान्निर्गतः । अस्य जातिः औडवः । अर्थात् धैवतनिषाद-षड्जगान्धारमध्यममिति पञ्चस्वरमिलनः । अस्य ग्रहं धैवतस्वरः । प्रहरद्वयौ प्रातःकालः अस्य गानसमयः । रागमालायाम् अस्याकारः महादेवाकारवत् । अर्थात् सुन्दर-सन्यासी । भस्मदग्धितवदनः । जटामस्तकः । जटापतद्गङ्गाजलः । कण्ठगभूषितहस्तः । ललाटार्द्धचन्द्रः । त्रिनेत्रः । सर्पवेष्टितस्कन्धबाहुः । भालतिलकः । स्कन्धस्थव्याघ्रचर्म्मा । अथवा दीपिचर्म्मपिधृक्षः । गजमुण्डमालः । त्रिशूल-हस्तः अथवा सव्यस्थप्रोथितत्रिशूलः । पार्श्वस्थवृषश्च । अस्य रागिण्यः पञ्च । यथा । भैरवी वैराटी मधुमाधवी सिन्धवी बङ्गाली च । अस्याष्टौ पुत्राः । यथा । हर्षः तिलकः पुरीयः माधवः स्वच्छः बलनेच्छः मधुः पञ्चमश्च ।

कल्लिनाथमते तु भैरवश्चतुर्थरागः । अस्य रागिण्यः षट् । यथा । भैरवी गुज्जरी भाषा वेलावली कर्णाटी रगतंसा वङ्गसंज्ञेति च केचित् । एतन्मते पूर्व्ववत् अष्टौ पुत्राः । किन्तु तिलकपुरीयपञ्चमस्थाने देवगान्धारललित-मालकौशविलावला लिखिताः । सोमेश्वर-मतेऽपि रागिण्यः षट् । यथा । भैरवी गुज्जरी रेवा गुणकली बङ्गाली बकुली च । तन्मते रागिण्या सहास्य गानसमयो योज्यः ॥ भरतमते तु अस्य रागिण्यः पञ्च यथा । मधु-माधवी ललिता वरारी वाहाकली भैरवी च । तन्मतेऽपि अस्याष्टौ पुत्राः । यथा देवगान्धारः ललितः हर्षः विलावलः माधवः बङ्गालः वैभासः पञ्चमश्च । एषामष्टौ भार्य्या यथा । सूहा वेलावली गोरडी कुम्भारी अन्धाली बकुलगुज्जरी पटमञ्जरी सिरवी च । इति सङ्गीत-शास्त्रम् ॥ * ॥ मतान्तरे भैरवरागस्य भार्य्या यथा । भैरवी बङ्गाली वरारी मध्यमा मधु-माधवी सिन्धवी च । तत्पुत्रा यथा । कोञ्चकः अजयपालः ग्रामः खरनादः गुडः ढोलश्च । तत्पुत्रवध्वो यथा । अष्टौ रेवा बकुला मोहिनी रम्भेली सूहा च । अत्र ग्रीभा इति साधः पाठः । इति नारदपुराणम् ॥

(नागभेदः । यथा, महाभारते १।५७।१६।
"भैरवो मुखवेदाङ्गः पिण्डाङ्गस्फोटपारकः ॥")

भैरवी, स्त्री, (भैरव + ङीप् ।) चामुण्डा । यथा,
"चामुण्डा चण्डिका चर्म्ममुण्डा मार्जारकर्णिका ।
कर्णमोटी महाजम्बा भैरवी च कपालिनी ॥"

इति हेमचन्द्रः ।२।१५०॥

भैरवीविद्येयं यथा । त्रिपुरभैरवी १ सम्पत्-प्रदा भैरवी २ कौलेशभैरवी ३ सकलसिद्धिदा भैरवी ४ भयविध्वंसिनी भैरवी ५ चैतन्यभैरवी ६ कामेश्वरी भैरवी ७ षट्कूटा भैरवी ८ नित्या भैरवी ९ रुद्रभैरवी १० भुवनेश्वरी भैरवी ११ त्रिपुरबाला भैरवी १२ नवकूटा भैरवी १३ अन्नपूर्णा भैरवी १४ । आसां मन्त्रा यथा,—

अथ त्रिपुरभैरवी ।

"वियद्भृगुहुनाग्न्यो भौमिको विष्णुरीश्वरः ।
वियत्तदादिकेनामिश्रितं वामाक्षिविन्दुमत् ॥
आकाशभृगुवह्निस्थो मनुः सर्व्वेष्टसाधकः ।
पञ्चकूटात्मिका विद्या देवी त्रिपुरभैरवी ॥"१॥

अथ सम्पत्प्रदा भैरवी ।

यथाक्षौ त्रिपुरा बाला तथा त्रिपुरभैरवी ।
सम्पत्प्रदा नाम तस्याः शृणु निर्म्मलमानसे ॥
शिवचन्द्रौ वह्निसंस्थौ वामभं तदनन्तरम् ।
कामराजं तथा देवि ! शिवचन्द्रान्वितं ततः ॥
पृथ्वीबीजान्तवक्त्राढ्यं तारार्णं शृणु वल्लभे ! ।
अक्तिबीजे महेशानि ! शिववह्नी नियोजयेत् ॥
कुमार्य्याः परमेशानि ! विद्या सर्व्वत्र वैष्णवम् ।
त्रिपुरा भैरवी देवी महासम्पत्प्रदा प्रिये ! ॥२॥

अथ कौलेशभैरवी ।

सम्पत्प्रदाभैरवीवद्विद्या कौलेशभैरवीम् ।

वसाद्या सेव देवेशि ! त्रिषु बीजेषु पार्व्वति ! ।
इयन्तु वसुराद्या स्यात् पूजाध्यानादिकं तथा ॥ ३ ॥

अथ सकलसिद्धिदा भैरवी ।

एतस्या एव विद्यायाः आद्यन्ते देवसंयुते ।
तदेयं परमेशानि ! माद्या सकलसिद्धिदा ।
सम्पत्प्रदाभैरवीवत् ध्यानपूजादिकं तथा ॥४॥

अथ भयविध्वंसिनी भैरवी ।

सम्पत्प्रदा भैरवी आद्यन्ते रेफसंयुता चैतदा भयविध्वंसिनी भैरवी भवति । दक्षिणामूर्त्तौ तथादर्शनात् । पूजादिकन्तु सम्पत्प्रदावत् ॥ ५ ॥

अथ चैतन्यभैरवी ।

"वाग्भवं बीजमुद्धार्य्य जीवप्राणसमन्वितम् ।
सकला भुवनेशानी द्वितीयं बीजमुद्धरेत् ॥
जीवं प्राणं वह्निसंस्थं शक्तिस्वरसमन्वितम् ।
विसर्गाढ्यं महेशानि ! विद्या चैलोक्यमोहिका ॥"

ऋष्यादिन्यासः । शिरसि दक्षिणामूर्त्तये ऋषये नमः । मुखे पङ्क्तिश्छन्दसे नमः । हृदि चैतन्यभैरवी देवतायै नमः ॥ ६ ॥

अथ कामेश्वरी भैरवी ।

"कामेश्वरी च रुद्राणी पूर्व्वसिंहासने स्थिता ।
एतस्या एव विद्यायाः बीजत्रयमुदाहृतम् ॥
तदन्ते परमेशानि ! विश्वक्लिन्ने महद्वये ।
एतस्या एव नाम्नीयं रुद्राणी परमेश्वरि ! ॥७॥

अथ षट्कूटा भैरवी ।

डाकिनी राकिणी बीजे लाकिनी काकिनी-युगम् ।
शाकिनी हाकिनी बीजे आकृष्य सुरसुन्दरि ! ॥
आद्यमेकारसंयुक्तमन्यदीकारमञ्जितम् ।
शक्तिसप्तान्वितं देवि ! तार्णीयं बीजमालिखेत् ।
बिन्दुनादकलाक्रान्तं त्रिनयं शूलसम्भवे ! ॥ ८ ॥

अथ नित्या भैरवी ।

एतस्या एव विद्यायाः षड्वर्णान् क्रमशः क्षिपेत् ।
विपरीतान् वद प्रौढ़े ! विद्येयं भोगमोक्षदा ।
न्यासपूजादिकं सर्व्वमस्याः पूर्व्ववदाचरेत् ॥ ९ ॥

अथ रुद्रभैरवी ।

शिवचन्द्रौ मादनार्णं फाल्गुं वह्निसमन्वितम् ।
शक्तिभिन्नं बिन्दुनादकलाढ्यं वामभं प्रिये ! ॥
सम्पत्प्रदाया भैरव्याः कामराजं तदेव हि ।
सदाशिवस्य बीजन्तु महासिंहासनस्य च ।
एषा विद्या महेशानि ! वर्णितुं नैव शक्यते ॥१०॥

अथ भुवनेश्वरी भैरवी ।

वसाद्यं वामभवस्थाद्यं वसकार्णं सुरेश्वरि ! ।
भूबीजं भुवनेशानी द्वितीयं बीजमुद्धरेत् ।
शिवचन्द्रौ महेशानि ! भुवनेशी च भैरवी ॥११॥

अथ त्रिपुरबाला भैरवी ।

अधरो बिन्दुनामार्द्धं शक्तिस्थः प्रथमो युतः ।
द्वितीयं भृगुसंगाढ्यो मनुस्तार्णीयमीरितम् ।
एषा बालेति विख्याता त्रैलोक्यवशकारिणी ॥१२॥

अथ नवकूटा बाला ।

बालाबीजत्रयं देवि ! कूटत्रयं नवाक्षरी ।
वियत्कूटत्रयं देवि ! भैरवी नवकूटकम् ॥१३॥

भो:

अग्नाग्नपूर्णा भैरवी।
प्रथमं भवनेशानि! श्रीबीजं कामबीजकम्।
हृदन्ते भगवल्लभे माहिश्वरिपदं ततः।
अन्नपूर्णे ठद्वयगं विन्दुत्रितयं विशङ्करि॥ १४॥"
इति तन्त्रसारे भैरवीमन्त्रपरिच्छेदः॥ रागिणी विशेषः। सा च भैरवरागस्य पत्नी। यथा,—
"भैरवी कौशिकी चैव भाषा वेलावली तथा।
पञ्चाली चेति रागिण्यो भैरवस्यैव वल्लभाः॥"
मतान्तरे मालवरागस्य पत्नी। यथा,—
"धानसी मालसी चैव रामकीरी च विन्ध्यका।
आसावरी भैरवी च मालवस्य प्रिया इमाः॥"
अस्या ध्यानं यथा,—
"सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्चयन्ती।
तालप्रयोगप्रतिबद्धगीति-
र्गौरीतनूर्नारद भैरवीयम्॥"
अस्या गानसमयः पूर्ब्बाह्णकालः। यथा,—
"विभाषा ललिता चैव कामोदी पटमञ्जरी।
रामकीरी रामकेली वेलोयारी च गुज्जरी॥
देशकारी च सुभगा पञ्चमी च गदा तुडी।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च।
एताः पूर्ब्बाह्णकाले तु गीयन्ते गायनोत्तमैः॥"
इति सङ्गीतदामोदरः॥ ॥

छन्दसमते एषा सम्पूर्णजातिः। अस्याः सप्तस्वरविन्यासक्रमः मध्यमपञ्चमधैवतनिषादषड्जगान्धारान्तः। अस्या ग्रहं मध्यमस्वरः। ग्रहतारौ प्रभाते अस्या गानसमयः। रागमालायां अस्याः स्वरूपम्। अल्पवयस्का। सुरूपा। सुनेत्रा। विस्तारवदना। पिङ्गलकेशा। कोमलाङ्गी। रक्तवर्णा। श्वेतवसना। गलशोभितचम्पकमाला। प्रफुल्लपद्मयुक्तपर्व्वतगुहायां शिवपूजापरायणा। तस्य मङ्गीरवादका गायन्ति च॥ ॥ कल्लिनाथसोमेश्वरभरतमतैक्यमेवम्॥

भैषं, क्ली, (भेषजमेव संज्ञायां स्वार्थे वा अण्।) लावकपक्षी। इति जटाधरः॥ भेषजञ्च॥

भैषज्यं, क्ली, (भेषजमेवेति। भेषज+"अनन्नावश्यकेतिहभेषजात्" आः।" ५। ४। ६३। इति ष्यञ्।) औषधम्। इत्यमरः। २। ६। ५०॥
(अस्य पर्य्यायो यथा,—
"भैषज्यं भेषजञ्चागदंयमगदमौषधम्॥"
इति वैद्यकरत्नमालायाम्॥
"तदेव युक्तं भैषज्यं यदारोग्याय कल्पते।"
इति चरके सूत्रस्थाने दिनौषेऽध्याये॥)

भो:, [भ्] अ, (भातीति। भा+बाहुलकादोसिः।) सम्बोधनम्। तत्पर्य्यायः। प्याट् २ पाट् ३ अङ्ग ४ वै ५ है ६। इत्यमरः।३।४।२॥ हंहो ७ हुम् ८ हो ९ अरे १० अये ११ अयि १२। इति भरतः॥ (यथा, मार्कण्डेये। १। ५२।
"भो भो विप्रेन्द्र! मुग्धस्त्वं मुग्धा बोधं बुधात्मक!।")

भव:। विषादः। इति शब्दरत्नावली॥

भोक्तृ

भोक्तव्यं त्रि, (भुज+कर्म्मणि तव्यत्।) भोजनीयम्। भोज्यम्। यथा,—
"यत्नेन भगिनीहस्ताद्भोक्तव्यं पृथिवर्द्धनम्।"
इति तिथ्यादितत्त्वम्॥
"अलाबु वर्त्तुलाकारा वार्त्ताकी दुग्धवर्जिका।
प्राणान्तेऽपि न भोक्तव्या दुग्धवर्णा कलम्बिका॥"
इति कर्म्मलोचनञ्च॥
(कर्म्मजन्ये अनुभवनीये। यथा च देवीभागवते। ११। ७। २८।
"प्रारब्धं किल भोक्तव्यं शुभं वाप्यथवा शुभम्।
उत्तमस्तद्वशे नित्यं कारयत्येव सर्व्वथा॥")

भोक्तृ [क्तृ] त्रि, (भुज्+कर्त्तरि क्तृच्।) भोजनकर्त्ता। यथा,—
"यज्ञेश्वरो हृषीकेशः कव्यभोक्ताव्ययात्मा हरिरीश्वरोऽज।"
इति आह्निकप्रयोगतत्त्वम्॥
सुखादिभोगकर्त्ता यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥
अथ भोक्तृलक्षणं यथा, पाकराजेश्वरे।
"स्नानः सुधौतबहुसुन्दरशुक्लवासा-
स्तत्कालधौतचरणः सह पुत्रमित्रैः।
सर्व्वो प्रसन्नहृदयो रसपाकवेत्ता
भोक्ता विशेच्च सदनं हि सशालवेद्यैः॥
नृत्तूलमये मृदुले चारुवस्त्रावगुण्ठिते।
आसने प्राङ्मुखो भोक्तोपविशेद्वाप्युदङ्मुखः॥"
(भोजनकर्त्तरि यथा,—
"यदा कारणमासाद्य भोक्तॄणां कुरुतेऽपि वा।
अनेकप्रक्रियोत्पत्त्याच्छास्त्रमस्तान् विमिर्हिंसेत्॥"
इति सुश्रुते सूत्रस्थाने ५६ अध्यायः॥
"भोक्तारं विजने रम्ये विःसम्बाधे शुभे शुचौ।
सुगन्धिपुष्परचिते रम्ये देशेऽथ भोजयेत्॥"
इति च तत्रैव तदध्याये॥
यथा च सांख्यशास्त्रे भोक्ता भोगकर्त्ता पुरुषः। यदि भोगशब्दे भोक्तृत्वं भवतीति तल्लक्षणमाह। "सिद्धवत्साधो भोगः।" इति सांख्यसूत्रम्। १। १०४॥ पुरुषस्वरूपे चैतन्ये पर्य्यवसानं यस्यैतादृशो भोगः सिद्धिरित्यर्थः। राज्ञो भृत्यवर्गः यथा, स्वामिने भोग्यजातमर्पयति, तथा, इन्द्रियाणि विषयजातं स्वस्वग्राह्यं गृहीत्वा अन्तःकरणप्रतिबिम्बिताय पुरुषाय अर्पयन्ति, स च पुरुषः प्रतिबिम्बग्रहणमात्रेण विषयजातं सुखरूपे प्रकाशयतीत्यर्थः। पुरुषस्य भोगः प्रतिबिम्बादानमात्रं अन्येषान्तु पुरुषादिः। इष्टस्यः परिणामरूपो भोगः पुरुषे निषिध्यते। "बुद्धेर्भोग इवात्मनि।" इत्यादिभिरिति। एतादृक् तथा पुरुषः भोगकर्त्ता वा भोक्ता॥" इति तत्त्वार्थे विज्ञानभिक्षुः॥

भोक्तृ [क्तृ] पुं, (भुङ्क्ते जीवरूपेणेति, भुनक्ति पालयतीति वा भुज+क्तृच्।) विष्णुः। यथा,—
"आत्मिष्णुर्भोजनं भोक्ता सच्चिष्णुर्ग्रसनादजः।"
इति महाभारते तस्य सहस्रनामस्तोत्रम्॥
भर्त्ता। इति हेमचन्द्रः। १। ६१॥

भोग:

भोग:, पुं, (भुज्यतेऽसौ इति। भुज+घञ्।) सुखम्। स्त्र्यादिभुक्तिः। पत्न्यश्लीलां भुक्तिर्भाक्तिः। आदिना हस्त्यश्वादिकर्म्मकराणाञ्च भुक्तिः। सर्पस्य फटा। सर्पशरीरम्। इत्यमरभरतौ। १। १। २३॥ (यथा, रघौ। १२। ५८।
"लक्ष्यते स्म तदनन्तरं रविः
वह्निभीमपरिवेषमण्डलः।
वैनतेयपथमिश्रितस्य भोगिनः
भोगवेष्टित इव च्युतो मणिः॥")
धनम्। (यथा, ऋग्वेदे। ७। १४। ६।
"हिरण्ययसुतभोगं ससान हत्वी दस्यून् प्रार्य्यं वर्णमावत्॥"
"हिरण्ययं सुवर्णमयं भोगं धनम्॥" इति तद्भाष्ये सायणः॥) रक्षणम्। (यथा मनुस्मृतौ। "भोगप्रदापहारे च भुज्यतेऽस्मिन्निति भोगो गृहं वा ससान आर्य्येभ्यो ददौ।" इति सायणः॥) पालनम्। अन्यव्यवहारः। इति मेदिनी। गे, १६॥ सर्पः। देहः। मानम्। इति शब्दरत्नावली॥* पुण्यपापजननयोग्यकालः। यथा,—
"अतीतानागतौ भोगौ नाद्यः पञ्चदशस्मृतः॥"
इति तिथ्यादितत्त्वे संक्रान्तिप्रकरणम्॥
(पुरम्। यथा, ऋग्वेदे। ५। ७६। ६।
"नव यदस्य नवतिञ्च भोगान्
साकं वज्रेण मघवा विवृश्चत्।"
भोगान् पुराणि। इति तद्भाष्ये सायणः।)
भृत्यादीनां भोगो यथा। विपुरुषभोगमाह व्यासः।
"प्रपितामहेन यद्दत्तं तत्पुत्रेण विना च तत्।
तौ विना यस्य पित्रा च तस्य भागस्त्रिपौरुषः।
पिता पितामहो यस्य जीवेच्च प्रपितामहः।
त्रयाणां जीवतां भोगो विज्ञेयस्त्रिपुरुषः॥
नारदः।
तथारूढविवादस्य प्रेतस्य व्यवहारिणः।
पुत्रेषु सोऽर्थः संयोध्यो यत्तं भोगो निवर्त्तयेत्॥"
इति व्यवहारतत्त्वम्॥
विभवभेदः। यथा,—
"कर्त्ता च देही भोक्ता च आत्मा भोजयिता सदा।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥
(वृक्षभेदः। यथा, कामन्दकीयनीतिसारे १६। अध्याये। ३१। ४८। ५४। श्लोकेषु॥
"यदि स्याद्रक्षणाशक्त्यं तदा चापः प्रकीर्त्तितः।
मक्षणोऽसंहतो भोगो दण्डश्चेति मनीषिभिः॥
गोन्यक्षिका हि सञ्चारी शकटो मकरस्तथा।
भोगभेदाः समाख्याताश्चया परियतनकः॥
असंहतास्तु षड्भूता भोगभूताश्च पञ्चधा॥"

भोगगृहं, क्ली, (भोगार्थं गृहम्।) वासगृहम्। यथा,—
"वासागारं भोगगृहं कन्यापत्न्याटनिष्कुटाः।"
इति हेमचन्द्रः॥

भोगदेहः, पुं, (भोगहेतुको भोगसाधको वा देहः।) स्वर्गजनकभोगार्थं सूक्ष्मशरीरम्। यथा,—
"क्षते सपिण्डीकरणे नरः संवत्सरात् परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते॥"
इति आह्निकतत्त्वम्॥
अपि च।
"शृणु देहविचारं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्।
देहिनां देहबीजञ्च सृष्टेः सृष्टिविधौ परम्॥
पृथिव्यादिपञ्चभूतैर्यो देहो निर्म्मितो भवेत्।
स क्षितिर्मो नश्वरञ्च भस्मसाच्च भवेदिह॥
वृद्धाङ्गुष्ठप्रमाणञ्च यो जीवपुरुषः स्मृतः।
विभर्त्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे॥
स देहो न भवेद्वह्नौ ज्वलदग्नौ यमालये।
जले न नष्टो देहो वा प्रहारे सुचिरे कृते॥
न शस्त्रे च न चास्त्रे च न लोष्टाकण्टके तथा।
तप्तत्रपे तप्तलोहे तप्तपाषाण एव च॥
प्रतप्तप्रतिमाग्नेषोऽप्यङ्गुपतनेऽपि च।
न च दग्धो न भस्मत्वं भुङ्क्ते सन्तापमेव च।
कथितं देहसृष्टाल्लक्षारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २८ अध्यायः॥

भोगपालः, पुं, (भोगं भोगसाधनमश्वादिकं पालयतीति। भोग+पालि+अण्।) अश्वरक्षकः। इति शब्दमाला॥ भोगरक्षके त्रि॥

भोगपिप्पलिका, स्त्री, (भोगे पिप्पलिका इव, तदाकारत्वात्।) क्षुधा। इति शब्दावली॥

भोगभूमिः, स्त्री, (भोगार्थेव भूमिः।) सुखस्थानम्। भारतवर्षातिरिक्तवर्षम्। यथा,—
"तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥"
इति विष्णुपुराणे २ अंशे ३ अध्यायः॥

भोगवती, स्त्री, (भोगः सर्पपुरोरं भूत्वा अस्त्यस्या मिति। भोग+मतुप् मस्य वः। "आज्झरबाद्यो ङीन्।" ४।१।७३। इति ङीन्।) पातालगङ्गा। नागपुरी। इति मेदिनी। ते, २१४॥ (नागपत्नी। यथा महाभारते। १।२०२।३२।
"नच भोगवतीं मन्ये न गन्धर्वीं न मानुषीम्।"
गङ्गा। यथा, च काशीखण्डे। २९।१२८॥
"भद्रा भोगवती भद्रा भवानी भूतभाविनी।"
तीर्थभेदः। यथा, महाभारते। ३।८५।८५॥
"तीर्थे भोगवतीं चैव वदिष्यामि प्रजापतेः।")

भोगवान्, [त्] पुं, (भोगः फणः कायो वा भूत्वा अस्त्यस्येति। भोग+मतुप् मस्य च वत्वम्।) सर्पः। इति मेदिनी। ते, २१२॥ नागम्। गानम्। इति त्रिकाण्डशेषः॥ भोगविशिष्टे त्रि॥

भोगसद्म, [न्] क्ली, (भोगार्थं उपभोगार्थं सद्म।) वासगृहम्। यथा,—
"गर्भागारं वासगृहं भोगसद्मापवाधकम्।"
इति शब्दरत्नावली॥

भोगार्ह्य, क्ली, (भोगाय अर्ह्यते इति अर्ह+"अर्हलोर्ण्यत्।" ३।१।१२४। इति ण्यत्।) धान्यम्। इति राजनिर्घण्टः॥

भोगावली, स्त्री, (भोगानां आवली श्रेणिर्यस्याम्।) स्तुतिपाठकस्य स्तुतिः। इति जटाधरः॥ (यथा माघे। ५।६७।
"भोगावलीः कलगिरोऽवमरेषु पेठुः।"
भोगावलीः प्रबन्धान्। इति तट्टीकायां मल्लिनाथः॥) नागपुरी। इति हेमचन्द्रः॥

भोगावासः, पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्। भोगार्थो वा आवासः।) वासगृहम्। इति शब्दावली॥

भोगिकः, पुं, (भोगे अन्नभोगे नियुक्त इति। भोग+वाहुलकात् ठन्।) अन्नरक्षकः। इति शब्दमाला॥

भोगिकान्तः, पुं, (भोगिनां कान्तः प्रियः।) वायुः। इति त्रिकाण्डशेषः॥

भोगिनी, स्त्री, (भोगः अस्त्या अस्तीति। भोग+इनिः। ङीप्।) महिषीभिन्नक्षत्रपत्नी। इत्यमरः। २।६।५॥

भोगिवल्लभं, क्ली, (भोगिनां वल्लभं प्रियम्।) चन्दनम्। इति राजनिर्घण्टः॥

भोगी, [न्] पुं, (भोगोऽस्त्यस्यास्तीति। भोग+इनिः।) सर्पः। इत्यमरः। १।७।८। (यथा, विष्णुपुराणे। १।३।२२।
"एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिपर्य्यागतः शेते त्रैलोक्यव्यासदेहिनः॥"
भोगयुक्तः। यथा, आर्य्यासप्तशत्याम्। २१७।
"भवनालिङ्गि भुजङ्गो जात; किल भोगिचक्रवर्त्ती त्वम्॥")
यामपालः। नृपः। इति मेदिनी। नि। १०२।
नागिनः। इति विश्वः॥ वेश्यावृत्तिकरः। इति हेमचन्द्रः॥

भोगीन्द्रः, पुं, (भोगिनामिन्द्रः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोगीशः, पुं, (भोगिनामीशः।) अनन्तदेवः। इति शब्दरत्नावली॥

भोज्यं, क्ली, (भुज+ण्यत्।) धनम्। धान्यम्। इति राजनिर्घण्टः॥ भोगमर्हतीति। भोग+यत्। भोगार्हे त्रि॥ (यथा, कामन्दकीये। ५।८१।
"यथा रत्नैश्च निपुणं ग्रस्यं काष्ठकिणाख्यया।
फलाय लगुडः काम्यस्तद्वद्भोग्यमिदं जगत्।")
आधिभेदः। यथाह नारदः।
"विक्रम्याहृतु द्वावत्र प्रतिभूराधिरेव च।
अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः॥
ऋणकालोपनेयश्च यावद्देयोपनेयया।
स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च॥"
गोप्यो रक्षणीयः। भोग्यस्यार्थः फलभोग्यपदे द्रष्टव्यः। तद्यथा,—
"काले कालकृतो नश्येत् फलभोग्यो न नश्यति।"
फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति। इति मिताक्षरायां व्यवहाराध्यायः॥

भोग्या, स्त्री (भुज्+कर्म्मणि ण्यत् टाप्।) वेश्या। इति राजनिर्घण्टः॥ भोग्या भूः। इति भोपदेवः॥ (तत्र त्रि।)

भोजः, पुं, (भोजस्येदमिति। भोज+"तस्येदम्।" ४।३।१२०। इत्यण्। अथो लोपः।) स्वनामख्यातदेशः। भोजपुर इति भाषा। तत्पर्य्यायः। भोजकटः ७। इति शब्दरत्नावली॥ धारानगरस्य राजविशेषः। तस्य वृत्तान्तो यथा। धारानामनगर्यां सिन्धुलसंज्ञो राजा आसीत्। तस्य राज्ञी सावित्री, तयोर्वृद्धावस्थायां भोजनामपुत्रो जातः। स यदा पञ्चवर्षवयस्कस्तदा तत्पिता आत्ममरणकालं विदित्वा आत्मे सुञ्जाय राज्यं ददौ, तदनन्तरं भोजश्च तमीयुः। ततो राज्ञि परलोकं प्राप्ते कियत्कालानन्तरं सभायां कश्चिद्दरिद्रब्राह्मणो ज्योतिर्विदागत्य सुखं प्राह राजन्! भोजस्य भाग्योदयं वक्तुं विधिरपि न समर्थः कोऽहं वराक उदरम्भरिर्ब्राह्मणः; तथापि वदामि भोजमिमः प्रेषय। ततो राजाज्ञया भोजोऽध्ययनशालां प्राप्ते आह यथा,—
"पञ्चाशत्पञ्चवर्षाणि तव भासा दिने दिने।
भोगराजेन भोक्तव्यं सप्तद्वीपं दक्षिणापथम्।"
इति श्रुत्वा मञ्जराजोऽचिन्तयत्, यदि राजलक्ष्मीर्भोजं गमिष्यति ततोऽहं जीवन्नपि मृतः। ततो राजा मन्त्रयित्वा वङ्गालाधीश्वरं महाबलं वनसराजमाकार्य्य निर्जने नं प्राह, वनसराज! त्वया भोजस्त्रिसुवनश्रीविपिने हन्तव्यः। वनसराजः भोजकुमारोपाध्यायमाकार्य्य प्राह, विप्र! भोजमानय। ततो विदितवृत्तान्तो भोजः कुपितः प्राह, आः पाप! राज्ञः कुमारं वधिष्यामीत्यु सद्य का शक्तिः। ततो वामचरणपादुकामादाय भोजेन भालदेशे हतो वनसराजः प्राह, भोजकुमार! त्वं राजादेशकारिणः। इत्युक्त्वा वधार्थं बलात् वनसराजेन निग्राह्यो विपिनं भोजं नीते वनसराजस्य भाषा भोजस्य वधोद्यममयमे।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्व्वमन्यच्च गच्छति॥"
इत्युक्तं निशम्य वनसराजो वैराग्यमापन्नो भोजं क्षमस्वेत्युक्त्वा प्रणम्य तं दत्वे निविश्य यष्टिमात्रया भूमिमुल्लाल्य भोजं रचित्वा क्षणिकं भोजमस्तकं कारयित्वा राजानमागत्य नत्वा प्राह श्रीमता यदादिष्टं तत्त्वया कृतम्। राजपुत्रवधं श्रुत्वा राजा तं प्राह वनसराज! पुत्रेण खड्गप्रहारावसरे किमपि उक्तम्। वनसराजः प्राह देव! किमपि पत्रं प्रेषितमस्ति तद्दिनं यष्टाक्षरं दर्शयति। ततो भोजमस्तकं दृष्ट्वा राजा रुरोद।

"मान्धातेति महीपतिः कृतयुगेऽलङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः कीर्त्या दशास्या न्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याताः कथाशेषतां
कैकेनापि समं गता वसुमती मन्ये त्वया यास्यति ॥"

इति भोजप्रबन्धश्लोकं पठित्वा उपपात च । ततो राजा पण्डितसमानीय मया पुत्रो हतः प्रायश्चित्तमुच्यतामित्युवाच । ततस्ते ऊचुः राजन् ! सवत्सा वह्निमाविश । ततो राज्ञो वह्निप्रवेशे निश्चिते सति तद्वार्त्तां श्रुत्वा नृपद्वारमागत्य वत्सराजो बुद्धिसागरं प्राह तान् । मया भोजो न मारितः बुद्धिसागरश्च तस्य कर्णे किमपि कथयति । ततो वत्सराजो निष्क्रान्तः । ततस्त्वत्पुत्रेण साक्षाच्छेश्वर इव एकः कापालिक आगतः । तं वीक्ष्य बुद्धिसागरः प्राह योगिन् ! कुत आगम्यते कापालिकं त्वयि जगन्मन्त्रकारो कलाविशेषश्चौषधिविशेषो वा अस्ति । ततो राजाप्याह मया सहसा हतं पुत्रं स्मर । कापालिकः प्राह राजन् ! मा भैषीः पुत्रस्ते नाथप्रसादेन न मरिष्यति प्रातस्तव गृहं स्वयमेव समेष्यति परं श्मशानभूमौ बुद्धिसागरमन्त्रिणा सह होमद्रव्यं प्रेषय । कापालिकेन यदुक्तं तत् सर्वं राज्ञा सम्पाद्य बुद्धिसागरः प्रेषितः ततश्च राज्ञो गुरुतया वत्सराजश्चटान् भोजस्तव मरीपुत्रिणं मीन; योगिना भोजकुमारो जीवित इति किंवदन्ती सर्वतोऽप्यजायत । ततः पौरामात्यैः परिवृतो भोजो राजभवनमागतः । ततस्तमालिङ्ग्य तदस्त्रं मुञ्च निधाय भोजः स्तौति । ततो राजा लज्जावनतमुखीव सन् निजसिंहासने भोजमुपवेश्य राज्यं दत्त्वा वनं गतः । ततो मुञ्जे वनं प्राप्ते बुद्धिसागरं सचिवमात्यं विधाय भोजः स्वयं राज्यसुखं बुभुजे । ततो राजसभायां सहसभ्यो बुधवरो दिग्भ्य समागम्य; ततो राजा अमात्यमाह ।

"लक्षं मङ्गलवेद्यां तदर्द्धं विबुधस्य च ।
देयं याच्यकवेदस्य तस्माच्यर्द्धं त्वयाप्यहम् ॥"

इति ॥

ततः क्रमेण वरवर्षिसुवस्तुग्रामाभरणमहेवहरिवंशमुक्तरकलिङ्गकर्पूरविनायकमदनविद्याविनोदकोकिलतारेन्द्रप्रमुखाः सर्वेऽप्यात्मावचनगाः सर्वथा इव राजसभामण्डपमलंकुर्वन्ति । कियत्कालानन्तरं कालिदासकवौ समागते तेन सार्द्धं राज्ञः परमा प्रीतिरजायत । अन्ये विद्वांसः कालिदासं वैद्यालम्पटं विदित्वा सर्वभावेन वैरचक्रुः न कश्चित् सभायां मृषति न कोऽपि वदति । किन्तु भोजनृपतिस्तेन सार्द्धं परमप्रीतो बभूव । अन्येषां पण्डितानामागमनं तेषां पद्यानि समस्यापूरणानि तेभ्यो

वस्त्रालङ्कारदानादिवर्णनञ्च अत्यन्तोपपर्यन्तमस्ति । ग्रन्थविस्तरभयात् न लिखितम् । इति भोजप्रबन्धपुस्तकात् सङ्कलितम् ॥* ऐन्द्रजालिकविद्यां भोजविद्यां वदन्ति ॥

भोजकटः, पुं, भोजदेशः । इति शब्दरत्नावली ॥ (यस्मिन्निन्मिते पुरे, स्त्री । यथा, विष्णुपुराणे । ५ । ७६ । १३ ।
"इत्युक्तेन परित्यक्तः ज्ञात्वाज्ञाक्षिप्तकर्मणा ।
रुक्मी भोजकटं नाम पुरं त्वत्रावसत्तदा ॥") ।

भोजनं, क्लीं, (भुज् + "ल्युट् च ।" ३ । ३ । ११५ । इति भावे ल्युट् ।) भक्षणम् । कठिनद्रव्यस्य गलाधःकरणम् । तत्पर्य्यायः । अन्धः २ नेमनम् ३ लेपः ४ आहारः ५ निघसः ६ ग्रासः ७ । इत्यमरः । १० । ६ । ५५ ॥ जग्धम् ८ विघसः ९ । इति तट्टीका ॥ अभ्यवहारः १० प्रत्यवसानम् ११ अशनम् १२ खादनम् १३ निगरः १४ । इति राजनिर्घण्टः ॥ * ॥

अथ भोजनगुणविधानादि ।

"भोजनाग्रे सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अग्निसन्दीपनं रुच्यं लवणार्द्रकभक्षणम् ॥
आयुष्टे गुडे रोगा न्यूनमांसो विदाहिषु ।
आरोग्यं कटुतिक्तेषु बलं मांसे पयःसु च ॥
अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ॥
घृतादष्टगुणं तैलं मईनात्र च भक्षणात् ।
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ॥*॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते
उदङ्मुखः ॥
कुर्य्यादर्द्धेन भागौ द्वावेकं पानेन पूरयेत् ।
वायोः सञ्चारणार्थञ्च चतुर्थमवशेषयेत् ॥
स्निग्धं चावगतं चान्नं सौचैनैवाहरेच्छनैः ।
कुर्य्यादनिगतं तद्धि सुखस्यानिष्टदायिनाम् ॥
भुक्त्वा प्राणितलं दृष्ट्वा चक्षुषोर्यदि दीयते ।
अचिरेणैव तद्धारि तिमिरादि व्यपोहति ॥
भुक्तोत्थस्य करं वामं दत्त्वा कुक्षौ ततः पठेत् ।
भुक्तं मद्देन्द्रकेन वैश्वानरसुरेण च ॥
गरुडस्य च कण्ठेन समुद्रस्य च वह्निना ।
वातापिर्भक्षितो येन पीतो येन महोदधिः ॥
जरया खादितं पीतं तदगस्त्यो जरिष्यति ।
पठित्वैतत् सुखासीनः; जलं सिञ्चेदनाकुलः ॥
भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ।
ऊर्द्धं ह्युच्चोगतं चान्नं सुखं निष्ठति जीर्य्यति ॥
भुक्तोपविष्टस्तुन्दं स्वयानस्य वपुर्भवेत् ।
आयुश्चंक्रमणात्तस्य मृत्युर्धावति धावतः ॥"

इति राजवल्लभः ॥ * ॥

अपि च ।

"ततो भोजनवेलायां कुर्य्यान्मङ्गलदर्शनम् ।
तस्य प्रदक्षिणं नित्यमायुर्धर्म्मश्रियर्द्धनम् ॥
लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
पादुकारोहणं कुर्य्यात् पूर्व्वं भोजनतः परम् ।

पादरोगहरं दृष्ट्यं चक्षुष्यं वायुषे हितम् ॥*॥
शरीरे जायते नित्यं वाञ्छा नृणां चतुर्विधा ।
बुभुक्षा च पिपासा च सुप्तक्षा सुरतेच्छा ॥
भोजनेच्छाविघातात् स्याद्वह्नेर्मान्द्यादि; श्रमः ।
तत्रा जीर्णदौर्ब्बल्यं धातुदाहो बलक्षयः ॥
विघातेन पिपासायाः शोषः कण्ठास्ययोर्भवेत् ।
अवसादावरोधश्च रक्तशोषो हृदि व्यथा ॥
निद्राविघाततो जम्भा शिरोजीर्णगौरवम् ।
अङ्गमर्द्दस्तथा तन्द्रा स्यादन्नापाक एव च ॥
बुभुक्षितो न योऽश्नाति तस्याहारेष्वनादरात् ।
मन्दीभवति कायाग्निर्यथा चाग्निर्निरिन्धनः ॥
आहारं पचति ग्रिन्धो दोषानाहार; पचति ।
दोषक्षये च धातून् पचति धातुक्षये प्राणान् ॥
आहारः प्रीणनः सद्यो बलकृद्देहधारणः ।
सद्यआयुःशुक्रिबलौजःसत्त्वशोभाविवर्द्धनः ॥
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ।
विचार्य्य दोषकालादीन् कालयोरुभयोरपि ॥"

उभयोः कालयोः प्रातः सायञ्च । तथा च ।

"सायं प्रातर्मनुष्याणामशनं श्रुतिबोधितम् ।
नान्तरा भोजनञ्चर्य्यादग्निहोत्रसमो विधिः ॥"

प्रातः प्रथमयामात् उपरि द्वितीययामात् अर्व्वाक् । तथा च ।

"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्मादबलक्षयः ॥"

अन्यच्च ।

"क्षुत् सम्भवति पक्वेषु रसदोषमजेषु च ।
काले या यदि वाकाले सोऽन्नकाल उदाहृतः ॥"

रसादीनां पाकं ज्ञातुमाह ।

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ।
लघुता क्षुत्पिपासा च यदा कालः स भोजने ॥"

स्थानमाह ।

"आहारं विजने कुर्य्यान्निहारमपि सर्व्वदा ।
उभाभ्यां सम्प्रयुक्तः स्यात् प्रकाशं क्षीयते
अथ ॥

निहारो मलमूत्रोत्सर्गः । अन्यच्च ।

"आहारनिहारविहारयोगाः
सदैव सद्भिर्विजने विधेया इति ॥" * ॥

भोजने येषां दृष्टिर्निवारणीया तानाह ।

"हीनदीनक्षुधार्त्तानां पापण्डैस्तेरोगिणाम् ।
कुक्कुटादिक्षुतां दृष्टिर्भोजने नैव शोभना ॥"

येषां दृष्टिः शुभदा तानाह ।

"पिप्पलादसुहृद्वैद्यापापण्डस्त्रीविवर्जिताम् ।
सारसस्य चकोरस्य भोजने दृष्टिरुत्तमा ॥"

कथञ्चित्तदृष्टदृष्टिपाते तद्दोषशान्तये ब्रह्मादीन् स्मरेत् । तद्यथा,—

"अन्नं ब्रह्म रसो विष्णुर्भोक्ता देवो महेश्वरः ।
इति सञ्चिन्त्य भुञ्जानो दृष्टिदोषो न बाधते ॥
अङ्गागर्भसम्भूतं कुमारं ब्रह्मचारिणम् ।
दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम् ॥"

भोजनमाह ।

"दोषघ्नदृष्टिदं पथ्यं हैमं भोजनभाजनम् ।
रौप्यं भवति चक्षुष्यं पित्तघ्नं कमलासजम् ॥

वांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनम् ।
पैत्तलं वातलघ्नत्वसृग्दं लघ्विकपथ्यकृत् ॥
आयसे कान्तपात्रे च भोजनं सिद्धिकारकम् ।
प्लीहपाण्डुहरं वल्यं कामलापहमुत्तमम् ॥
ग्रैवेलके लघुतये पात्रे भोजनं श्रीनिवारणम् ।
दारुजत्वे विशेषेण रुचिदं श्लेष्मकारि च ॥
पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत् ॥
जलपात्रन्तु ताम्रस्य तदभावे त्वदो हितम् ॥
पवित्रं घृतलं पात्रं घटितं स्फाटिकेन यत् ।
काचेन रचितं तद्वत्तथा वैदूर्यसम्भवम् ॥ * ॥
भोजनार्थे सदा पथ्यं लवणार्द्रकभक्षणम् ।
अग्निसन्दीपनं रुच्यं जिह्वाकण्ठविशोधनम् ॥"
लवणं सैन्धवं ग्रेयम् । आर्द्रकन्तु कटुकमपि न पित्तविरोधि मधुरपाकित्वात् ॥
"अश्नीयात्तज्जना भुक्त्वा पूर्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥
फलान्यादौ समश्नीयात् दाडिमादीनि बुद्धिमान् ॥
विना मोचाफलं तद्वद्भर्जनीया च कर्कटी ॥
मृद्वालविल्वशूलकेक्षुप्रभृतीन्यपि ।
पूर्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन ॥
गुरु पिष्टमयं द्रव्यं तण्डुलान् पृथुकानपि ।
न खादेत् भुक्तवान् खादेच्चाद्यात् खादेद्बुभुक्षितः ॥
घृतपूर्वं समश्नीयात् कठिनं प्राक् ततो मृदु ।
अन्ते पुनर्द्रवाद्यन्तु बलारोग्ये न मुञ्चति ॥"
अयमर्थः । प्राक् घृतपूर्वं कठिनं समश्नीयात् । यथा काश्यादिवासिनः प्रथमं सक्तूनां घृतपूर्वां रोटिकां भुञ्जते । ततो मृदुसूपादिकमोदनं भुञ्जते । अन्ते पुनर्द्रवाद्यौ भोजनान्ते दधितक्रदुग्धादि भुञ्जते ।
"यदत्यन्तं स्वादुतरं तद्धि विद्याद्गुरूत्तरम् ।
भुक्त्वा यत् प्रार्थ्यते भूयस्तदुक्तं स्वादु भोजनम् ॥"
स्वादुत्वस्य गुणमाह ।
"सौमनस्यं बलं पुष्टिमुत्साहं रसनासुखम् ।
स्वादु सञ्जनयत्यन्नमस्वादु च विपर्ययम् ॥
अत्युष्णान्नं बलं हन्ति घृतं मुञ्चति दुर्जरम् ।
अतिस्निग्धं ग्लानिकरं युक्तियुक्तं हि भोजनम् ॥
अतिद्रवाग्निसाहारो गुणान् दोषान्न विन्दति ।
भोज्यं घृतमहद्यच्च स्वाद्विलम्बितमश्नतः ॥"
गुरु त्रिविधं तन्निवारयन्नाह ।
"मन्दानलो नरो द्रव्यं मात्रागुरु विवर्जयेत् ।
स्वभावतश्च गुरु यत्तथा संस्कारतो गुरु ॥
मात्रागुरुस्तु सुश्रुतादिमात्रादिः प्रकृतेर्गुरुः ।
संस्कारगुरु पिष्टान्नं प्रोक्तमित्यपलक्षणम् ॥*॥
आहारं षड्विधं चव्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यादुयथोत्तरम् ॥"
चूष्यं इक्षुदाडिमादि । पेयं पानकयूषकोद्दालकादि । लेह्यं रसालाक्षयितादि । क्षयिता कटी इति लोके । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्यं पिण्डितगुडकादि ॥
स्वभावगुरुसंस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह ।
"गुरूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते ।"
अयमर्थः । माषपिष्टान्नादिभिरर्द्धं सौहित्यं कर्तव्यं मुद्गादिभिः स्वाभाविकया माषया तृप्तिः कर्तव्येत्यर्थः ।
"द्रवो द्रवोत्तरश्चापि न मात्रागुरुरिष्यते ।"
द्रवः पेयादि । द्रवोत्तरः तक्रात्पधिक ओदनादिर्माषात्तोऽधिकोऽपि मात्रागुरुर्न मन्तव्यः । पेयस्य सर्वतो लघुत्वात् । उक्तञ्च सुश्रुतेन । पेयलेह्यादभक्ष्याणां गुरु विद्यादयथोत्तरमिति । पेयं पय आदि । लेह्यं रसालादि । भक्ष्यं ओदनसूपादि । भक्ष्यं मोदकादि ।
"द्रवाद्यमपि शुष्कन्तु सम्यग्नेवोपपद्यते ।
विशुष्कमन्नमभ्यस्तं न पाकं साधु गच्छति ॥"
अयमर्थः । शुष्कमपि स्रोतोरोधकारमपि द्रवाद्यं सम्यक् पाकं याति । केवलस्य शुष्कस्यान्नस्य दोषमाह । विशुष्कमन्नमित्यादि ॥
अपक्वं तत् किं भवतीत्यपेक्षायामाह ।
"पिष्टीकृतमसंक्लिन्नं विदाहमुपगच्छति ।"
पिष्टीकृतं अष्टौलावद्भक्तम् । असंक्लिन्नं असम्यगार्द्रम् । विदाहमुपगच्छति विदग्धं भवतीत्यर्थः ॥ शुष्कादीनां वैगुण्यमाह ।
शुष्कं विरूक्षं विष्टम्भि वह्निव्यापादभावहेत् ।"
शुष्क पिण्याकादि । विरूक्षं क्षीरमत्स्यादि । विष्टम्भि चणकमसूरादि वह्निमान्द्यं कुर्यात् ।
"न भुक्त्वा न रहस्तिष्ठेत् न निद्रायां न वा बहून् ।
न जलान्तरितान्न द्विः भुक्तमात्रान्न केवलान् ॥
पुनर्द्रवान्नं पृथक् पानं सामिषं पयसा निशि ।
इक्षुक्षीरदनुमद्यानि सप्त भुक्त्वा वर्जयेत् ॥"
विषमाशनस्य लक्षणमाह ।
"बहुस्तोकमकाले वा क्षीयं तद्विषमाशनम् ।"
बहुलाल्पस्य भक्षितस्य दोषमाह ।
"आध्मानगौरवाटोपशब्दांश्च कुरुतेऽधिकम् ।
ह्रासमाशु तनोः कार्श्यं करोति च बलक्षयम् ॥"
अधिकं अन्नम् ॥ अकाले भुक्तस्य दोषमाह ।
"अप्राप्तकालो भुञ्जानोऽसमर्थस्तनुर्नरः ।
तांस्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति ॥"
अप्राप्तकालः कालादतिपाक् भुञ्जानोऽसमर्थशरीरो भवति । तथा सति तांस्तान् व्याधीन् शिरोग्रहव्याविसूचिकालसकविलम्बिकादीन् प्राप्नोति । तेषामाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ।
"कालेऽतीतेऽग्नयो जग्धे व्यायतानां प्रकुप्यति ।
अच्छादिपच्यते भुक्तं न स्याद्वोक्तं पुनः क्षुधा ॥
कुक्षेर्भागद्वयं भोज्येस्तृतीयं वारि पूरयेत् ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥
रसनास्य रसज्ञा प्रथमेनोपतर्पिता ।
न तथा स्वादुमाप्नोति ततः संख्याबुभुक्षितः ॥
अत्यन्नपानान्न विपच्यतेऽन्न-
मनन्नपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्द्धनाय
सुकुर्मुकुर्यादिह मिवेदभूरि ॥
भुक्तस्यादौ जलं पीतं कार्श्यमग्निविशोषणम् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥"
अन्यच्च ।
"समस्थूलकृशा भुक्तमध्यान्तप्रथमाम्बुपाः ।"
इति वाग्भटः ॥ भुक्तं भोजनम् ।
"लघिमस्तु न चाश्नीयात् क्षुधितो न विशेच्चलम् ॥
लघिमस्तु भवेद्दुःखी क्षुधितस्तु जलोदरी ॥"
ननु स्निग्धा भोजनान्ते दुग्धं पिबन्ति तत् कथं सुचितम् । यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागो वातस्य द्वितीयः पित्तस्य तृतीयः कफस्य । अतएवाह ।
"अश्नीयात्तज्जना भुक्त्वा पूर्वन्तु मधुरं रसम् ।
मध्येऽम्ललवणौ पश्चात् कटुतिक्तकषायकान् ॥"
अस्यायमभिप्रायः । भोजने पूर्वं भुक्तो मधुरो रसो बुभुक्षितस्य वातपित्तयोः शमको भवति ।
"भोजनमध्ये भुक्ताम्ललवणौ
पित्ताग्नये च वह्निवृद्धिं कुरुतः ।
भोजनान्त्यसमये भुक्ताः कटुतिक्त-
कषाया रसा कफं शमयन्तीति ।"
अतो भोजनावसानसमयस्य कफकालत्वात्तत्र कथं श्लेष्मजनकं दुग्धं पातुमुचितं भवति । यत उक्तम् ।
"दुग्धं स्वादुरसं स्निग्धभोजस्यं धातुवर्द्धनम् ।
वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलमिति ॥"
उच्यते ।
"विदाह्यन्नपानानि यानि भुक्ते हि मानवः ।
तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् ॥"
अतएव ब्रह्मपुराणे ।
"कुर्यात् क्षीरान्नमाहारं दध्यन्नं न कदाचनेति ॥
लवणाम्लकटून्यानि विदाह्यन्नानि यानि तु ।
तद्दोषं हर्षमाहारं मधुरेण समापयेत् ॥"
भोजनावसानसमये दध्यादिमधुरभोजनेन वह्निसकृतो लवणाम्लकटुभोजनजनितां पित्तस्य वृद्धिं नाशयति पित्तवृद्धिनाशनेन कफस्यापि वृद्धिरुपशान्ता भवति क्षीणकफवृद्धिरग्निमान्द्यादीन् व्याधीन् उत्पादयितुं न शक्नोति ॥
"एवं भुक्त्वा समाचामेत् कृत्वयङ्गमपूर्वकम् ।
भोजने दन्तलग्नानि निर्धूयाचमनक्रिया ॥
दन्तलग्नमनिर्धूय जपं मन्त्रं न दन्तवत् ।
न तत्र बहुशः कुर्याद्दृष्टं निष्ठुरं प्रति ॥
आचम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत् ।
भुक्त्वा पाणितले पृष्ट्वा चक्षुषोर्यदि दीयते ।
अक्षिरोगैर्न तद्वारि निमिषन्ति अपीडयेत् ॥
भुक्त्वा च संस्करेन्नित्यमगस्त्याद्यान् मुनीन्स्मरेत् ।
विप्रान्नाशो यथैवान्नं परिणामश्च वै यथा ।
सर्वेण तेन यद्दुष्टं तन्नाशमिदं तथा ॥
अगस्तिरग्निर्वडवानलश्च
भक्तं ममाग्रं जरयत्वशेषम् ।
सुखञ्च मे यत् परिणामसंज्ञकं
यच्छत्वरोगं मम चाशदेवि ॥
अङ्गारकमगस्तिञ्च पावकं सूर्यमग्निकौ ।
यश्चैनान् संस्मरेन्नित्यं भुक्तं तस्यापु जीर्यति ॥

दद्युरार्द्रं सहस्रेण परिमार्ज्यं ततोऽहरम्।
अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः॥"
अतन्द्रितः आयत्तिष्ठेत्र तु सुप्यात्। मुक्त-
मात्रस्य तु खप्नाज्जन्तोः कुपितः वात इति
वचनात्।
"जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्तमेधते।
भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि॥"
विदग्धे किञ्चित्पक्वे पित्तमेधते किञ्चिदपक्वे कफः॥
सुक्तमात्रे संजातकफस्य प्रतीकारमाह।
"धूमेनापोह्य कण्ठेवां कषायकटुतिक्तकैः॥
पूगकर्पूरकङ्कोलैः लवङ्गसुमनःफलैः।
फलैः कटुकषायैर्वा सुखवैद्यकादिभिः।
ताम्बूलयष्टिसहितैः सुगन्धैर्वा विचक्षणः॥"
धूमेन अगुर्वादिधूमेन। अपोह्य कफं दूरी-
कृत्य। कषायकटुतिक्तकैः फलैः कर्पूरकङ्कोल-
लवङ्गादिभिः। पूगैः क्रमुकैः। सुमनःफलैः
जातीफलैः॥ फलैः एलाहरीतक्यादिफलैः।
"रते सुप्तोत्थिते जाते भुक्ते वान्ते च सङ्करे।
सभार्यो विदुषा राज्ञा कुर्यात्ताम्बूलभक्षणम्॥
सुक्ता मुखपटौ गच्छेच्छनैस्तेन तु वाधते।
अन्नसंघातग्रथितं श्लेष्मालानुत्कटीसुखम्॥
सुक्तापविष्टनस्तुन्दं ग्रथितस्य तु पूरणा।
आयुःक्रममाणस्य स्तब्धभावनि धावतः॥"
क्रममाणस्य पदमुत्तं मुनेर्गच्छतः॥ * ॥
"श्वासानहौ समुत्पन्नस्तान् हिः पार्श्वे तु दक्षिणे।
ततस्तद्विगुणान् वामे पश्चात् सुप्यात् यथासुखम्।
वामदिग्भागमनसो नाभेरूर्ध्वोऽस्ति जन्तूनाम्।
तस्मात्तु वामपार्श्वे शयीत भुक्तपपाकार्थम्॥
चिरोषग्रमना खट्वा तूली वातकफापहा।
भूम्या दंशेषु दृष्या काष्टपट्टी तु वातुला॥"
इति भावप्रकाशः॥ * ॥

अत्रच।
"स्नातो यथावत् स्नात्वा च देवर्षिपितृतर्पणम्।
प्रयुक्तरत्नपाणिस्तु भुञ्जीत प्रयतो गृही॥
हते जप्ये हुते वह्नौ सुहृद्यक्षधरो नृप!।
दत्वातिथिभ्यो विप्रेभ्यो गुरुभ्यः संस्मिताय तु॥
पुष्पगन्धधरः शुक्लमाल्यधारी नरेश्वर!।
नेकवस्त्रधरोऽथार्द्रपाणिपादो नरेश्वर!॥
विशुद्धवदनः प्रीतो भुञ्जीत न विदङ्मुखः।
प्राङ्मुखोदङ्मुखो वापि न चैवान्यमना नरः॥"
"अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः।
न कुत्सितान्नसंपर्कं जुगुप्साबद्संस्कृतम्॥
दत्वा तु भक्तं विप्रेभ्यः क्षुधितेभ्यस्तथा गृही।
प्रयुक्तशुद्धपात्रेषु भुञ्जीताकुपितो नृप!॥
नासन्दीसंस्थितः पात्रे नादेये च नरेश्वर!।
नाकाले नातिसङ्कीर्णे दत्वायच्च महीतले॥
आसन्दी दारुमयविपदी।
"मलाभिमन्त्रितं भुक्तं न च पर्युषितं नृप!।
अन्यत्र धर्ममांसेभ्यः शुक्तशाकादिकात्तथा॥
सहरितकेभ्यश्च गुडपक्वेभ्य एव च।
भुञ्जीतोद्धृतसाराणि न कदाचिन्नरेश्वर!॥"
हरितकेभ्यः अपक्वेभ्यादिभ्यः॥

"नाधीयं पुरुषोऽश्नीयादन्यत्र क्षुतीपतेः!।
मध्यमुदधिवर्णिभ्यः शुक्लभ्यश्च विवेकवान्॥
अश्नीयात्तस्त्रयो भूत्वा पूर्वन्तु मधुरं रसम्।
लवणाम्ले तथा मध्ये कटुतिक्तादिकांस्ततः॥
प्राक् द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम्।
अन्ते पुनर्द्रवाशी तु बलारोग्ये न मुञ्चति।
अनिन्द्यं भक्षयेदित्थं वाग्यतोऽनसूयकः शुचिः।
पठ्यायासं महाभौमं प्राणाद्याप्यायनादि तत्॥
भुक्त्वा सम्यगथाचम्य प्राङ्मुखोदङ्मुखोऽपि वा।
यथावत् पुनराचामेत् पाणी प्रक्षाल्य सलिलम्॥
स्वस्थः प्रशान्तचित्तश्च कृतासनपरिग्रहः।
अभीष्टदेवतानाञ्च कुर्वीत स्मरणं नरः॥
अग्निराप्याययत्वङ्गं पार्थिवं पवनेरितः।
दत्तावकाशं नभसा जरयत्वन्न मे सुखम्॥
अन्नं बलाय मे भूमेरापस्तन्वन्तु जीवनाय च।
भवत्वेतत्परिणतौ ममाक्षयाहुतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं पुष्टिकरञ्चास्तु ममाक्षयाहुतं सुखम्॥
अग्निरग्निर्वडवानलश्च
भुक्तं मयान्नं जरयत्वशेषम्।
सुखञ्च मे तत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेवदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनाशममेतमन्न-
दारोग्यदं मे परिणाममेतु॥
विष्णुरन्नं तथैवान्नं परिणामश्च वै तथा।
सत्येन तेन मे भुक्तं जीर्यत्वन्नमिदं तथा॥
इत्युक्त्वाय सहस्रेण परिमृज्य ततोऽहरम्।
अनायासप्रदायीनि कुर्यात् कर्माण्यतन्द्रितः॥
सच्छास्त्रादिविनोदेन सन्मार्गादविरोधिना।
दिनं नयेत्तनः सन्ध्यामुपतिष्ठेत् समाहितः॥"
इति विष्णुपुराणे ३ अंशे ११ अध्यायः॥ * ॥
अपरच्च।
"भुञ्जीत प्रयतो नित्यं वाग्यतोऽनन्यमानसः।
भैक्षेण वर्त्तयेन्नित्यं नैकान्नादी भवेद्व्रती॥
भैक्षेण हविषो वृत्तिरुपवाससमा स्मृता।
पूजयेदशनं नित्यमदाभिनन्दकुत्सयन्॥
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रतिनन्देच्च सर्व्वशः।
अनारोग्यमनायुष्यमस्वर्ग्यञ्चातिभोजनम्॥
अपुण्यं लोकविद्विष्टं तस्मात्तत् परिवर्जयेत्॥
प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा।
नाद्यादुदङ्मुखो नित्यं विधिरेष सनातनः॥
प्रक्षाल्य पाणी पादौ च भुञ्जानो हि यशस्यभाक्।
सुखी देही समासीनो भुक्त्वा च ह्यशयस्यभाक्॥
नाश्नीयाद्भार्य्यया सार्द्धं नैनामीक्षेत चेहतीम्।
न भक्षयेदभक्ष्याणि नापेयं वा पिबेद्बुधः॥"
अभक्ष्यान्तु भक्तग्रन्थे द्रष्टव्यम्॥ * ॥
"भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽनन्यमानसः।
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तम!॥
भुञ्जीत चेदमूढात्मा तिर्य्यग्योनिं स गच्छति॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षया।

नाशयत्याशु पापानि देवानामर्चनन्तथा॥
यो मोहादथवालस्यादकृत्वा देवतार्चनम्।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते॥
तस्मात् सर्व्वप्रयत्नेन कृत्वा कर्म्माणि वै द्विजः।
भुञ्जीत स्वजनैः सार्द्धं स याति परमां गतिम्॥"
इति कौर्म्मे उपविभागे १७ अध्यायः॥ * ॥

व्यास उवाच।
"प्राङ्मुखोऽन्नानि भुञ्जीत सूर्य्याभिमुख एव वा।
आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय तु॥
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः॥
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः॥
पश्चाद्धौ भोजनं कुर्य्यादुभौ पादौ निधाय तु।
उपवासेन तत्तुल्यं मनुराह प्रजापतिः॥
उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ।
आचम्याद्भिर्मनोऽक्रोधः पश्चाद्धौ भोजनञ्चरेत्॥
मङ्गल्यादुत्तमं भिन्नं परिधायोदकेन तु।
अन्तर्जानुकरणमसंख्यापोऽशनक्रियाञ्चरेत्॥
स्वाहाप्रणवसंयुक्तां प्राणापानाहुतिन्ततः।
अपानाय ततः कृत्वा व्यानाय तदनन्तरम्॥
उदानाय ततः कुर्य्यात् समानायेति पञ्चमीम्।
विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजः॥
श्लेष्मघ्नं यथोक्तञ्च भुञ्जीत व्याजनेर्युतम्।
ध्यात्वा तज्जनसा देवमात्मानं वै प्रजापतिम्॥
अन्तर्जानुकरणमसंख्यापोऽशनक्रियाञ्चरेत्॥
आचान्तः पुनराचामेदाद्यं गौरीतिमन्त्रतः॥
हृदयं वा चिरावाप्य सर्व्वपापप्रणाशिनीम्।
प्राणानां ग्रन्थिरसीत्यालभेद्धृदयन्ततः॥
आभ्यामङ्गुष्ठमात्रेति पादाङ्गुष्ठौ च दक्षिणौ।
निःसावयेदङ्गुलजलं मूर्द्धानन्तः समाहितः॥
हुत्वान्नमन्नवन्तं कुर्य्यात् सन्ध्यायामिति मन्त्रतः।
अथान्तरेण स्वात्मानं योजयेद्ब्राह्मणोऽपि हि॥
सर्व्वेषामेव योगानामात्मयोगः परः स्मृतः।
योऽनेन विधिना कुर्य्यात् स याति ब्रह्मणः
क्षयम्॥
यज्ञोपवीती भुञ्जीत सगन्धस्त्रालकुण्डलो नरः।
सायं प्रातर्नान्तरा वै सन्ध्यायान्तु विशेषतः॥
नाद्यात् सूर्य्यग्रहान् पूर्व्वमहि सायं ग्रहियग्रहान्।
ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात् सुक्तयोः।
सक्ते ग्रहिणि भुञ्जीत यदि न स्याज्जहानिहा॥
असुक्तयोरक्तं गतयोः स्नात्वा हुत्वा परेऽहनि।
नाश्नीयात् प्रेतमाणानामप्रदायैव दुर्म्मतिः॥
नायज्ञग्रिर्हादन्यद्दृष्ट्वा न क्रुद्धो नान्यमानसः॥
आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम्।
धनार्थं यस्य चाधीतं निष्फलं तस्य जीवितम्॥
यद्भुङ्क्ते वेदविद्विप्रो यच्च भुङ्क्ते उदङ्मुखः।
सोपानत्कश्च यद्भुङ्क्ते सर्व्वं विद्यात्तदासुरम्॥
नार्द्धरात्रे न मध्याह्ने नाजीर्णे नार्द्धवस्त्रधृक्।
न च भिन्नासनगतो न शय्यास्थोऽपि वा॥
न भिन्नभाजने चैव न भूम्यां न च पाणिषु।
नोच्छिष्टो हतमादद्यान्न स्नानं क्वापि दापि न॥
न ब्रह्म क्षीरमेदद्यादपि न निःस्नेहं न भार्य्यया।
नान्धकारे च नाकाशे न च दैवालयादिषु॥

नैकवस्त्रस्तु भुञ्जीत न च यानस्थितोऽपि वा।
न पादुकानुगतो वा न छत्रस्थ विलपन्न हि॥
भुक्त्वैवं सुखमास्थाय तदन्नं परिणामयेत्॥"

इति कूर्मे उपविभागे १८ अध्यायः॥ * ॥

अपरच्च।

"दत्त्वा च हुत्वा पितृदेवताभ्यो
भुक्त्वातिथीन् भृत्यजनावशिष्टम्।
तुष्टः शुचिः श्रद्दधानोऽक्षि योऽन्नं
तस्यान्नतं स्यात् स पुमान् भुनक्ति॥

सायं प्रातर्मनुष्याणामशनं देवनिर्मितम्।
वैदिके लौकिकेऽग्नौ तु प्रत्यक्षे चाहरे तथा॥
उपलिप्ते समे देशे शुचिः श्रद्धासमन्वितः।
पात्रेष्वर्घादिरूपेषु पुष्पाग्न्याद्यभिपूजनः॥
सुसंस्कृतं हितं स्निग्धं भुञ्जीतान्नमकुत्सयन्।
यवगोधूमशाल्यान्नं मांसशाकादिभिर्युतम्॥
कटुलवणतिक्तैर्यञ्जनैस्तु सुगन्धिभिः।
भक्ष्यप्रकारान् विविधान् कन्दमूलफलानि च॥
प्राङ्मुखो भूमौ प्रतिष्ठाप्य योऽश्नीते वाग्यतः शुचिः।
भोजने भोजने चैव चिराच्चफलमश्नुते॥
धर्म्येण धारयेद्विप्रः पवित्रं दक्षिणे करे।
भुञ्जानस्तु विशेषेण अन्नदोषैर्न लिप्यते॥
यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा।
घ्नन्ति केवलमन्नस्य मङ्गलस्य विवर्जनात्॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः।
मङ्गलान्युपजीवन्ति तस्मात् कुर्वीत मङ्गलम्॥
चतुष्कोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु।
द्विकोणाकृति वैश्यस्य शूद्रस्य वर्तुलं सदा॥
न लौहे ताम्रजे पात्रे भिन्नेऽश्नीयात् कदाचन।
आपः पुनन्त्वितिमन्त्रेण शुद्धाक्षीर्यं समाचमेत्॥"

धृत्वा दोर्भ्यामुपविश्य पात्रं प्रक्षाल्य मूलमन्त्रं दक्षोरुतिमिलितपात्रमभिमन्त्र्य भूम्याद्वृत्तायनेति भूमौ पात्रं प्रतिष्ठापयेत्। आहृतवासाः शुक्लवासा वा पवित्रपाणिः प्राङ्मुख आसीनः पात्रौ प्रक्षाल्य दक्षहस्तेनान्नमादायेति ध्यायेदन्नं पुरुषम्। तत ओजोऽसीत्यन्नमादायमाणं प्रतिपद्येत्। ओजोसीत्यादिना प्रतिगृह्य अङ्गुष्ठानामिकाभ्यामभिमन्त्रयेत्। उद्वृत्यस्येति आचमनान्तरं प्रबोधयेत्। भूतपतये नमः भुवनपतये नमः भूतानां पतये नमः इति नमस्कारान्ते बलित्रयं भूमौ दद्यात्। अथात्मैवात्मानं चिन्तयेत्।

"प्राणस्य हृदयं स्थानमपानस्य गुदं स्मृतम्।
समानो नाभिदेशे तु उदानः कण्ठमाश्रितः॥
व्यानः स तु विज्ञेयो व्यानः सर्वाङ्गसन्धिषु।
राजीवसङ्काशः प्राणो हृदये नित्यसंस्थितः॥
तस्याधस्ताद्वपानस्तु स वै गोक्षीरसन्निभः।
नाभ्या मध्ये समानस्तु विद्युज्ज्वालासमप्रभः॥
प्राणस्योपर्युदानस्तु इन्द्रनीलसमप्रभः।
उभाभ्यामथ प्राणाभ्यामधस्ताच्चैकयाख्यया।
अमृतं पात्रं कुर्वीत एवं ज्ञानिनं जायते॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुख!।
त्वं यज्ञस्त्वं वषट्कारस्त्वं विष्णो! परमं पदम्॥"

अमृतोपस्तरणमसीत्यपः कृत्वोपस्पृश्य पात्रं निधत्ते। अमृतं महाव्याहृतिभिरद्भिः प्रदक्षिणं परिषिच्य सव्येन पाणिना प्राणमवितृप्तन्नन्नमोऽमृतोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चभिर्मुखैः प्राणाहुतीर्जुहोति। प्राणे निविष्टोऽन्नं जुहोमि अग्नीषोमाविमाप्रदाहाय प्राणाय स्वाहा। अपाने निविष्टोऽन्नं जुहोमि अग्नीषोमाविमाप्रदाहायापानाय स्वाहा। व्याने निविष्टोऽन्नं जुहोमि अग्नीषोमाविमाप्रदाहाय समानाय स्वाहा। इति तूष्णीं भूयो व्रतयेत्। प्रजापतिं मनसा ध्यायेत्॥ * ॥ प्राणाय स्वाहेति प्राणस्तृप्यति। प्राणे तृप्यति चक्षुस्तृप्यति। चक्षुषि तृप्यति आदित्यस्तृप्यति। आदित्ये तृप्यति द्यौस्तृप्यति। दिवि तृप्यन्त्यां यत्किञ्चिद्द्यौरादित्यश्चाधितिष्ठतस्तृप्यति तस्यानुतृप्तिमनु तृप्यति। व्यानाय स्वाहेति व्यानस्तृप्यति। व्याने तृप्यति श्रोत्रं तृप्यति। श्रोत्रे तृप्यति चन्द्रमास्तृप्यति। चन्द्रमसि तृप्यति दिशस्तृप्यन्ति। दिक्षु तृप्यन्तीषु यत्किञ्चिद्दिशः स्वं चन्द्रमाश्चाधितिष्ठन्ति। तत्तृप्यति तस्यानुतृप्तिमनु तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। अपानाय स्वाहेत्यपानस्तृप्यति। अपाने तृप्यति वाक् तृप्यति। वाचि तृप्यन्त्यां अग्निस्तृप्यति। अग्नौ तृप्यति पृथिवी तृप्यति। पृथिव्यां तृप्यन्त्यां यत्किञ्चिन पृथिवी चाग्निश्चाधितिष्ठतस्तृप्यति तस्यानुतृप्तिमनु तृप्यति। तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। समानाय स्वाहा इति समानस्तृप्यति। समाने तृप्यति मनस्तृप्यति। मनसि तृप्यति पर्जन्यस्तृप्यति। पर्जन्ये तृप्यति विद्युत्तृप्यति। विद्युति तृप्यन्त्यां यत्किञ्चिद्विद्युत्पर्जन्यश्चाधितिष्ठतस्तृप्यति तस्यानुतृप्तिमनु तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति। उदानाय स्वाहेति उदानस्तृप्यति। उदाने तृप्यति वायुस्तृप्यति। वायौ तृप्यति आकाशस्तृप्यति। आकाशे तृप्यति यत्किञ्चिद्वायुराकाशश्चाधितिष्ठतस्तृप्यति। तस्यानुतृप्तिमनु तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥ * ॥

"भुक्तोऽन्ने केचिन् काङ्क्षन्ति भुक्तोच्छिष्टं सुविक्षिपेत्।
केचिन काङ्क्षन्त्यनाशीयाः केचित् कर्म्मसमाधिनः॥
भुञ्जन्तु मम चोत्सृष्टं पात्रे वाथ भुवि क्षिपेत्।
अन्नेनापिधानमसीत्युपरिष्टादपः पिबेत्॥
अद्भिः पुनीत परिषिच्य पात्रं प्राणस्य निर्मार्ष्टीति।
भुक्त्वा पीत्वा च यः कश्चिन् शून्यं पात्रं समुत्क्षिपेत्॥
स पुनः क्षुत्पिपासार्त्तो भवेज्जन्मनि जन्मनि।
अन्नेनापिधानमसीत्युपरिष्टादपः पिबेत्॥"

अपः पीत्वाचान्तः प्राणस्थानान्यङ्गुष्ठेन स्पृशति। प्राणानां ग्रन्थिरसीति हृदयमालभ्य जपति प्राणानां ग्रन्थिरसि इति प्राणदेशम्। विष्णो-

जठरमसीतिनाभिदेशम्। यो देवानामधिपतीति पुनरपि हृदयदेशमालभ्य जपति। सावित्रीचानुभाष्य शिरायो स्वाहा रक्षसां रक्षसुक् तत्राला वर्म्मेति; प्रीयतां विश्वसुगिति ध्यायेदन्नं पुरुषम्॥ * ॥

"आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः।
अश्नन्त एव सिद्ध्यन्ति नेषां सिद्धिरनन्नताम्॥
गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत्।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत् सः॥
अन्तरा प्रातरश्नंश्च सायमाशनमेव च।
सदोपवासी भवति यो न भुङ्क्ते कदाचन॥
प्राणाग्निहोत्रमन्त्रांश्च निरङ्गे भोजने जपेत्।
वैश्वानरेऽग्निहोत्रमन्त्रांस्तु हव्यवाहेन तर्पयेत्॥
यथाहि गलमेधीकमग्निप्रोतं प्रदूषयेत्।
सङ्कल्पं सर्व्वाणि पापानि निर्दहत्यग्न्याहुतिः॥
यथेह क्षुधिता बाला मातरं पर्युपासते।
एवं सर्व्वाणि भूतानि अग्निहोत्रमुपासते॥"

इति॥ * ॥

"भोजनस्य निषेधेषु प्रक्षाल्याम्बुपुटेन वा।
नोच्छिष्टो भक्षयेत् किञ्चिन्न भक्ष्यं वा कदाचन॥
खट्वारूढो न भुञ्जीत न पात्रिण्यां कदाचन।
चन्द्रसूर्योपरागे च यस्यान्ने चन्द्रसूर्ययोः॥
गोव्राह्मणोपवासेन न वाचौर्ये तु भोजने।
निर्मार्ष्टि नैकवासास्तु न लघोच्छिष्टभाजने॥
न रात्रौ तिलसम्बद्धं दधि भुक्त्वा न माक्षिकम्॥
कोविदारवटाश्वत्थफलानि न कदाचन।
चणकश्च कौसुम्भं करमर्दिनस्य यद्दधि॥
वैद्या वदन्ति पुरीषाग्र्यं तुल्यं गोमांसभक्षणैः।
नोच्छिष्टेन घृतं स्पृष्ट्वा प्रक्षेत् वापदृशतोऽपि वत्।
पलाण्डुं लशुनं वापि भुञ्जानस्तूपपमाप्नुयात्॥
नानादृतुफलपाणिस्तु चक्रनाराकमीक्षयेत्।
भुञ्जन् कुर्वन् स्वमङ्गानि स्पृशेद् ब्रह्म न कीर्त्तयेत्॥
नाम्बरवासाः शिरःस्नातः सोपानत्को विरासनः।
ग्रसेत् प्रौढपादश्च कृत्वा चैवावसक्थिकम्॥
नाग्नीयान्न पित्रैव कृत्वा पर्यङ्किकां नरः।
पादप्रसारणं कृत्वा न च वेष्टितमस्तकः॥
न च आहृत्य यच्छेषं पात्रे पर्युषितच्च यत्।
दम्पत्योर्भुक्तशेषन्तु न भुञ्जीत कदाचन॥
नातिचरितमश्नीयान् भुक्त्वा शेषं विवर्जयेत्।
न भक्षयेत् तिलौदनमन्यत्र दधिसर्पिषोः॥
पयसो मधुशाकानां तिलानामोदनस्य च।
न लेखो मिश्रमश्नीयान्न बहूनाञ्च पक्वताम्॥
बहवस्तु न भुञ्जन्ति तथा चैकस्य पक्षतः।
ओष्ठौ च न लिखेत् पात्रिं नाङ्गुलिं पात्रमेव च॥
अन्यालयेऽग्निशालायां देवागारे तथैव च।
आयुर्विरस्यते तस्य मिष्टैकस्य बुभुक्षतः॥
अदत्त्वा गोऽग्निविप्रेभ्यः कुमारायानुजाम्बिने।
एकोऽन्नं मिष्टमश्नाति ततोऽन्यो नाश्नुयात्फलम्॥

यक्ष्मैकपद्भ्यां विषमं ददाति
जैवाद्भयाद्वा यदि वार्थहेतोः।
वेदेषु दृष्टान्यभिसृत्य गीतां
तां ब्रह्महत्यां सुधियो वदन्ति॥

एकपङ्क्त्युपविष्टानां दुष्कृतानां दुरात्मनाम् ।
सर्वेषां तत्फलं तावद्यावत् पङ्क्तिर्न भिद्यते ॥
एवं यो ब्राह्मणो भुङ्क्ते सन्ध्यपै पिङ्गदेवताः ।
स हि कुले वसुहृत्य ब्रह्मवायुष्यमाप्नुयात् ॥"

इति वह्निपुराणे भोजनविधानम् ॥ * ॥

विविधभोजनं यथा,—
"उच्छिष्टमवशिष्टं वा पर्य्युषितमभोजितम् ।
भक्तानां भोजनं विष्णोर्नैवेद्यं सात्त्विकं मतम् ॥
इन्द्रियप्रीतिजननं मुक्तशेषितवर्द्धनम् ।
भोजनं राजसं शुद्धमायुरारोग्यवर्द्धनम् ॥
अतः परं तामसानां कदन्नोष्णाविदाहिकम् ।
पूतिपर्य्युषितं क्षेयं भोजनं तामसप्रियम् ॥"

इति कल्किपुराणे ७५ अध्यायः ॥ * ॥

आर्द्रादि निमन्त्रितस्यान्यत्र भोजने दोषो यथा,—
"निमन्त्रितोऽन्यतो भुङ्क्ते आर्द्रे हैवे सपैतृके ।
स हि तो नरके वासं लभते नात्र संशयः ॥"

देवतादिव्यभुक्तवस्तु भोजने दोषा यथा,—
"देवताग्निबलमर्त्येषु भक्षणेषु ब्राह्मणेषु च ।
अभुक्तवत्सु येऽश्नन्ति बालपित्र्यभिभाक्षतु ॥
दुष्कृते पूर्वजिग्ये पितामहोऽधमागमाः ।
क्षुधासुखाच्च जायन्ते सुधार्मा: किरिविग्रहाः ॥"

"एकपङ्क्त्युपविष्टाश्च वसुत्वाय प्रयान्ति ये ।
विङ्भोजनं तासेन्द्र ! नरकन्ते प्रयान्ति हि ॥
एकसार्थप्रयातश्च तथान्यश्चार्थितं नरः ।
अर्द्धविभज्य भुञ्जन्ति ते यान्ति श्रेष्ठभोजनम् ॥
पायसं लवणं मांसं वृथा भुक्तश्च यैर्नरैः ।
तेषामयोगुडाक्षाणः क्षिप्यन्ते वदनेऽसुराः ॥"

इति वामनपुराणे १० अध्यायः ॥ * ॥

औषधादिरिक्तकिञ्चिद्भोजनवतो नित्यनैमित्तिक-क्रियानिषेधो यथा,—
"दध्ना भुक्ते तथौषं च नैव भुक्ता च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं ऋतके ऋतके तथा ॥
पथ्यं पुण्यञ्च तास्वलं मेघजलेन कल्पितम् ।
कषायादिपिष्टञ्चान्नञ्च फलं भुक्ता न चाचरेत् ॥
अलक्ष्यापि नरश्रेष्ठ ! भोजनाङ्गेषजाहते ।
'नक्रक्रिया विवर्त्तेत सह नैमित्तिकैः सदा ॥"

इति कालिकापुराणे ५६ अध्यायः ॥

भोजने पाकविधौ दिङ्नियमो यथा,—
"पूर्व्वाशाभिमुखो भूत्वा उत्तराशाभिमुखेन वा ।
पवित्रश्च मधाह्ने सायाह्ने च विवर्ज्जयेत् ॥
अथाशाभिमुखे पक्ता अन्नलाभं विचारयेत् ।
पूर्व्वाभिमुखो धर्म्मकामः श्रीकामश्चोत्तराभिमुखे ।
श्रीकामश्चोत्तराभिमुखे पतिकामश्च पश्चिमे ।
रोगान्वाभिमुखे पक्ता दरिद्रो जायते नरः ॥"

पाकपात्रविरूपणं यथा,—
"यदा तु आयसे पात्रे पक्ता अश्नाति वै द्विजः ।
स पापिष्ठोऽपि भुङ्क्तेऽन्नं रौरवे परिपच्यते ॥
ताम्रे पक्ता चतुर्हानिमेधावी भवति वै क्षयः ।
पित्तस्थां पक्वमन्नञ्च पित्तरोगेण यच्छति ॥
पुष्करीकस्य यज्ञस्य लभते फलमौत्तिमम् ।
मातुलेन तु यत् पक्वं भक्षित्वा च कपित्थम् ।
अलाबुनैव यत् पक्वं श्लेष्मितं तदपि क्षुतम् ॥
अभक्ष्येण च यत् पक्वं क्षिप्रा पक्वं तथैव च ।
पक्वपात्रे च यत् पक्वं तत् सर्व्वं निष्फलं भवेत् ॥"

पाककाष्ठविरूपणं यथा,—
"उदुम्बरेण काष्ठेन कदम्बस्य दलेन च ।
प्लाक्षेन करमर्दैन उदरावर्त्तकेन च ॥
पक्वान्नं नैव भुञ्जीत भुक्ता रात्रिमुपावसेत् ॥"

विविधान्नं यथा,—
"गर्हितान्नमवीरान्नं भुक्ता चान्द्रायणञ्चरेत् ।
अप्रजा या तु वनिता नारीयादेव तद्गृहे ॥
प्लाक्षकाष्ठस्य पक्वान्नं शिरीषकस्य चैव हि ।
कालचक्रातकस्यैव वज्रवारणकस्य च ॥
भेरण्डपालम्लेर्वापि पक्वान्नं गर्हितं क्षुतम् ॥"

पाकपात्रत्यागकालो यथा,—
"यदा लवणतापात्रे तु पक्वं वै सार्व्वकालिकम् ।
मासे पक्षे तथाष्टासु तत्पात्रं विसृजेद् बुधः ।
धनुःपाके तथा सिंहे मीने चैव वरानने ! ।
यः कुर्य्याद्भोजनं देवि ! क्षुत्क्षयेण विमुह्यति ॥"

पाकार्थजलदानं यथा,—
"एकदा तु जलं दद्याद् द्विवारं न प्रदापयेत् ।
त्रिभागं पूरयेत् पात्रं पक्वान्नार्थं न दापयेत् ॥"

भोजनत्यागादि यथा,—
"उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः ।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमवस्थितः ॥"

पीठनिरूपणं यथा,—
"साङ्गुष्ठस्य चतुष्कोणं सहकारविनिर्म्मितं ।
चामभद्रदारुमये प्राङ्नीचोच्छ्रायसंयुते ॥
वरुणासने भवेद्वृद्धिर्भद्रके श्रियमाप्नुयात् ।
चामे धनविवृद्धिः स्याद्बुम्बेवृद्धिस्तु भद्रके ।
प्लाक्षासने कपीतके किंशुके मरणं भवेत् ॥"

भोजने दीपनिरूपणं यथा,—
"घृतदीप्ता यज्ञफलं तैले धेनुफलं लभेत् ॥"

भोजने चाण्डालादिदृष्टिनिषेधो यथा,—
"यदा भोजनकाले तु चाण्डालैः पतितैस्तथा ।
शकृत्कुटवराहैश्च श्वभिश्च अन्यजैरपि ।
अन्नं वाप्यथ पात्रं वा दृष्टमात्रं परित्यजेत् ॥"

"रजस्वलायाः संस्पृष्टीवांचं श्रुत्वा प्रमादतः ।
अन्नस्थो वर्ज्जयेद्देवि ! अन्नते पीडयञ्चरेत् ॥
देवालये तथा तीर्थे सिद्धक्षेत्रे च शङ्करि ! ।
ब्राह्मणानां समाजे तु भुक्ता क्रतुफलं लभेत् ॥
आचान्तो भोजनं कुर्य्यादन्नमायां हिरण्ययुक् ।
सुवर्णेन सृणेर्दत्तं तदन्नमन्नदं विदुः ॥
रजःस्पृष्टं यदन्नञ्च भुक्ता भवति किल्बिषी ।
पौष्यकेण सृणेर्दत्तमन्नं विड्भासमं भवेत् ॥
वैदूर्य्येण माक्षिकेन स्फटिकेन सृणेरपि ।
स्वर्णेन संस्पृणेर्दत्तं तदन्नं शुचितामियात् ॥"

भोजने दिङ्नियमो यथा,—
"आयुष्यं प्राङ्मुखो भुङ्क्ते राज्ञौ चैव उदङ्मुखः ।
यशस्वी दक्षिणे चैव पश्चिमे तु विवर्ज्जयेत् ॥"

भोजने मन्त्रजपादि यथा,—
"मन्त्रजपं भोजने काले चतुर्व्वारं द्विजस्य च ।
क्षत्रियस्य भवेद्वैश्यं वैश्यस्य कूर्म्मपृष्ठकम् ।
शूद्रस्यापि भवेद्दृष्टं शकटाकारमेव वा ॥"

अथ भोजनकालः ।
"सायं प्रातर्द्विजातीनामशनं देवनिर्म्मितम् ।
नित्यमग्नि तमस्विन्यां सार्द्धप्रहरयामतः ॥
रात्रौ यामत्रयाग्ने च सन्ध्ययोर्न कदाचन ।
अकालभोजनं त्यक्त्वा प्राणायामेन शुद्ध्यति ।
अहोरात्रेण सन्ध्यायां भुक्ता क्षपां समाचरेत् ॥"

मोदकादिभक्षणानन्तरमन्नभोजनविधिर्यथा,—
"मोदकं कदलञ्च गव्याढ्यं घृतसंयुतम् ।
पुनः पुनर्भोजने च पुनरन्नं न दुष्यति ।
त्रिसन्ध्यं भुक्तवान् यस्तु न स याति दिवः क्षयम् ॥
भुक्ता रात्रिमुपागमे क्षपां क्षौमेण शुद्ध्यति ॥
कोलं खरिद्रा कौशेरं मरीचं जातिकोषकम् ।
यष्टिमधादिकं सर्व्वं गन्धदव्यं तथौषधिः ।
प्रयुक्तमेषामाघ्राणं क्षिप्तस्यापि न दुष्यति ॥
कुटुम्बभरणार्थाय पाकं पञ्चाग्निवेदयेत् ।
वैश्वदेवान्नमुद्धृत्य भोजयेन्न विचारयेत् ॥
नाश्नीयात् केवलं रात्रौ विल्वस्यैव तथा दधि ।
अङ्कुरं लशुनञ्चैव काष्ठस्वरूपेण वह्निना ॥
पङ्क्तिभेदं ततः कुर्य्यात् पश्चाद्भुञ्जीत वाग्यतः ।
क्षुत्तरस्तं यदन्नञ्च शूद्रादन्नं न भक्षयेत् ॥
घृतनैलञ्च लवणं पानीयं पायसं दधि ।
रविवारे तथा षष्ठ्यां भौमवारे दिनक्षये ।
पर्व्वकाले च द्वादश्यां द्विजक्षिप्तं न भक्षयेत् ॥
न वामेन पिबेत्तोयं न रसं तक्रमेव च ।
भेकाखुग्रिशुमार्ज्जारैस्तथा पारावतैरपि ॥
कलविङ्कैः पन्नगैश्च पाकं दृष्टेऽपि दुष्यति ।
गोधया वनमार्ज्जारैः पाकं न विक्षयेत् क्वचित् ॥
स्वर्णरौप्यमये पात्रे पाषाणे ब्रह्मपात्रके ।
सकृद्भुक्ता तु देवेशि ! पराकस्य फलं लभेत् ॥
पूर्व्वायां स्वर्णपात्रे च भोजनं यः समाचरेत् ।
पुष्करीकस्य यज्ञस्य लभते फलमौत्तिमम् ॥
स्वर्णपात्रे पश्चिमायां उत्तरामिमुखेन वा ।
तदन्नं घौकरं मांसं भुक्ता चान्द्रायणञ्चरेत् ॥
पद्मकामः स्वर्णपात्रे यज्ञस्थो स्वर्परेषु च ।
पद्मपत्रे भवेत् पुष्टिर्हविष्याशी तु पुण्यवान् ॥
स्थपी भवति ताम्रे च काचपात्रे दरिद्रता ।
वृन्तपत्रे भवेदायुः कदले कीर्त्तिमाप्नुयात् ॥
मधुपत्रे च रोगः स्याद्वटपत्रे तु वैष्णवः ।
प्लाक्षपत्रे भवेत्कामी पनसे चैव सद्गतिः ।
निम्बपत्रे प्ररोहे च पुनः संस्कारमर्हति ॥"

इति मत्स्यसूक्ततन्त्रे ४२ पटलः ॥

अथ क्षुत्युक्तभोजनविधिः । वह्निः प्रज्वालित-पात्रिमादवदनो रक्तपात्रिर्द्विधारा द्विरावाक्षो गोमयोपलिप्ते प्राङ्मुखे देशे मुहुः मुहुर्गीचारणो-पविष्टो धर्म्मदृद्धिकामः प्राङ्मुख उदङ्मुखो वा यशस्कामो दीर्घमिश्रमाहकेसरो दक्षिणा-मुखो धनकामः प्रत्यङ्मुखो भूमिमृदक्षिण-पाद आचमनाङ्कृत्वजपादोऽन्नमादाय दक्षि-

यद्दिक्कूलनदीजलपार्श्वी दक्षिणावर्त्तेन चतुष्कोणमण्डलं कृत्वा लोहितास्त्रदन्तक्षयभवादिदुष्टभयकोलकदन्त्यादिपक्वदुष्टपत्रपलाशपत्रेतरपात्रं विधाय प्रक्षाल्य च आत्मानं पात्रञ्च दक्षिणक्रमेण जलेन वेष्टयित्वा तदुपरि लोहेतरपात्रान्तरेण हस्ताभ्यां प्रतिषिद्धेतरमन्नादिकं स्थापयित्वा अन्नं दृष्ट्वा प्रहृष्येत्। अस्माकं नित्यमेवास्तु इत्यभिलष्य संप्रोक्ष्य आचाराचतुष्कोणमण्डलाभ्यन्तरे जललिखितचक्रोपरि ॐ नारायणाय नम इत्यन्नं सजलं मध्ये दद्यात्। तत्पार्श्वे ॐ भुवः पतये स्वाहा ॐ भुवनपतये स्वाहा ॐ भूतानां पतये स्वाहा। इति बलिचतुष्टयं दद्यात्। तदिदं सोपकरणमन्नं ॐ विष्वक्सेनाय नम इत्युच्चार्य तदग्रे किञ्चित ॐ विष्वक्सेनाय नम इति दत्त्वा अन्नोपरि विष्णुनिर्माल्यतुलसीपत्रं प्रक्षिप्य विष्णुपादोदकं पुराण गृहीत्वेदानीम्।

"ॐ हस्त हस्त महाबाहो भक्तानामार्त्तिनाशन!।
सर्वपापप्रशमनं पादोदकं प्रयच्छ मे॥"

इति गृहीत्वा दक्षदेवतानामपरेरितं श्रुत्वा स्वयं विरच्यार्घ्यं वा ॐ अमृतोपस्तरणमसि स्वाहा इत्यनेन पीत्वा।

"ॐ अकालमृत्युहरणं सर्वव्याधिविनाशनम्।
विष्णोः पादोदकं पुण्यं शिरसा धारयाम्यहम्॥"

इत्यनेन पादोदकार्घं शिरसि दद्यात्।

"ॐ उच्छिष्टभोजिनस्तस्य वयमुच्छिष्टकाङ्क्षिणः।
येन लोलावरोहेण स्थिरण्यायो निषादिनः॥"

इत्युक्त्वा अङ्गुष्ठानामिकाभ्यां घृतमुत्तोकमन्नमादाय महामौनी साङ्गुष्ठसव्याङ्गुलिभिर्व्वा ॐ प्राणाय स्वाहा इत्यनेन मुखे दत्त्वा अदन्नक्षिप्तं निगिरेत्। एवं ॐ अपानाय स्वाहा ॐ समानाय स्वाहा ॐ उदानाय स्वाहा ॐ व्यानाय स्वाहा। ततो वाग्यतो मौनी भुञ्जीत। ततः प्रथमं द्रवयुक्तमधुरं मध्ये कटिनाम्ललवणानि अन्ते द्रवयुक्तकटुतिक्तानि यथालाभं क्षीरान्नं साङ्गुष्ठेतरकरसव्याङ्गुलिभिः अनतिद्रुतं भुञ्जीत। पश्चादधिकं जलादिकं न पातव्यम्। अन्नक्षीरदधिघृतमधूष्णकयूक्तमांसेतरद्रव्याणां ग्रासं रसनीयम्। भोजनं संपूर्णं तु मांसभोजने करं प्रक्षाल्य तदभोजने तु करमप्रक्षाल्यैव वामेन हस्तेन जलं गृहीत्वा ॐ अमृतापिधानमसि स्वाहा इति जलगण्डूषं गृहीत्वा सान्नं तज्जलग्रासं ॐ रौरवेऽपुण्यनिलये पशूनां मृत्युवासिनाम्। उच्छिष्टभागिनामन्नमस्त्वयमुपतिष्ठतामिति भूमौ निक्षिपेत्। भोजनकाले तु विड़ालकर्म्मकरणत्यागः। विड़ालकर्तृकत्वे न दोषः। ततः स्थानान्तरं न गच्छेत्। परावृत्य वह्निर्मुखहस्तलेपमपनीय हस्तादिना शिक्षाघर्षणयोर्म्म दन्तेभ्यो गृहीतरसदन्नं रक्तपात्रस्थितादिकं विना अपनयेत्। यत्ने कृते यदि न निःसरति तदा न दोषः।

ततो जिह्वाञ्च संपूज्य जलगण्डूषैर्मुखाभ्यन्तरं संशोध्य पाणी पादौ च प्रक्षाल्य आसनस्थ एव भूमौ पादौ दत्त्वा स्थिरीकृत्य सुखं तुलसीपत्रादिना संशोध्य दक्षिणपादाङ्गुष्ठे दक्षिणहस्तेन--

"ॐ अङ्गुष्ठमात्रपुरुषो ह्यङ्गुष्ठस्थ समाश्रितः।
ईशः सर्व्वस्य जगतः प्रभुः प्रीणातु विश्वधृक॥"

इति मन्त्रेण जलं दद्यात्। ततो मक्षीमार्জ्জनाभावे अशुचित्वादविलम्बमेव भोजनपात्रमुद्धृत्य तत् स्थानं उच्छिष्टमपनीय गोमयोदकाभ्यां संलिप्य सिञ्चेत्। सुस्थः प्रशान्तचित्त आसने उपविश्याभीष्टदेवतानाम स्मृत्वा—

"ॐ अमिराप्यायय त्वन्नं पार्थिवं पवनेरितः।
दत्तावकाशो नभसा जरयत्वसु मे सुखम्॥
अन्नं बलाय मे भूमेरपामग्नेरनिलस्य च।
भवत्वनुपरिणतौ ममास्त्वयाहतं सुखम्॥
प्राणापानसमानानामुदानव्यानयोस्तथा।
अन्नं तुष्टिकरञ्चास्तु ममास्त्वयाहतं सुखम्॥
अगस्तिरग्निर्वडवानलश्च
भुक्तं ममान्नं जरयत्वशेषम्।
सुखं ममैतत्परिणामसम्भवं
यच्छत्वरोगं मम चास्तु देहे॥
विष्णुः समस्तेन्द्रियदेहदेहि-
प्रधानभूतो भगवान् यथैकः।
सत्येन तेनान्नमशेषमेत-
दारोग्यदं मे परिणामभेतु॥
विष्णुरन्नं तथैवान्नं परिणामञ्च यै यथा।
सत्येन तेन मद्भुक्तं सौम्यत्वमगमत् तथा॥"

इत्युच्चार्य वामहस्तोदरं परिस्पृशेत्। ततः पादप्रक्षालनानन्तरं वामपार्श्वेन किञ्चित्कालं शयितव्यम्। ततस्तान्ताम्बूलादि सुखवासनञ्च भोक्तव्यम्। इत्याह्निकाचारे पञ्चमयामार्द्धकृत्यम्॥ ॥ अथ भोजनादिदानफलम्।

"भोजनाच्छादनं दत्त्वा दत्त्वा चोपानहौ द्विज!।
स स्वर्गलोकं संभुज्य सर्व्वकामोत्थ आयते॥
विद्यां भक्त्या प्रयच्छेद्यः परब्रह्मक्षयावहाम्।
विद्याधिने च विप्राय यो दद्याद्भोजनं नरः॥
अन्नं प्राणो जलं प्राणः प्राणश्चौषधमुच्यते।
तस्मादौषधदानेन दत्ताः स्युरसवो द्विजाः॥

इति पराशरस्मृतिः॥

भोजने प्रतिषेधो यथा,—

"नात्यम्बुपीते पयःपानमुच्छिष्टे घृतभोजनम्।
दुग्धे च लवणं दद्यान् सद्यो गोमांसभक्षणम्॥
यः स्नुहीक्षीरसमाक्तौ भोजनं कुरुते द्विजः।
सुरापञ्च स विज्ञेयः सर्व्वधर्म्मबहिष्कृतः॥
आर्द्रं रक्तकपोतेषु भोजनं गणिकागृहे।
गृध्रयं पूर्व्वपाद्दे च ब्रह्महत्या दिने दिने॥"

इति कर्म्मलोचनम्॥

अथ घृतमूलं प्रथमान्नभोजनादिकं। यथा, यमः।

"ततोऽन्नप्राशनं मासि षष्ठे कार्य्यं यथाविधि।
अन्ने वाथ कर्त्तव्यं यदेष्टं मङ्गलं कुले॥"

यष्ठे इति सुखः वक्तव्यः प्रागुक्तन्यायात्। ज्ञात्यचिन्तामणौ।

"अन्नस्य प्राशनं प्रोक्तं मासि षष्ठेऽथमे वुधैः।
क्षीरान्नं पञ्चमे मासि सप्तमे प्रथमौ सुतेः॥
द्वादशीसप्तमीनन्दारिक्तासु पञ्चपर्व्वसु।
बलमायुर्यशो हन्यात् घृतमूलान्नभोजनम्॥"

भुजबलभीमे।

"षष्ठे मासि गुणाकरे शुभकरे रिक्तेतरे वै तिथौ
सौम्याहित्यसितेन्दुजीवदिवसे पक्षे च शुक्लेतरे।
प्राजेशादितिपौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरै-
रासेयाग्नितिपित्र्यभेषु नितरामन्नादिभक्षे शुभम्॥"

युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते अग्नितिथ्यङ्गादिविद्धर्क्षं विवर्जयेत्।

"वृषद्वन्द्वधनुर्मीनकन्यालयेऽन्नभक्षणम्।
त्रिकोणाष्टकयुक्लाब्धयश्च यद्यत्तथा फलम्॥
दृष्टः शुभग्रहो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे॥"

मार्कण्डेयपुराणम्।

"दैवतापुरतस्तस्य पितुरङ्गणस्य च।
अलङ्कृतस्य दानव्यमन्नं प्राश्ये च कांस्यके॥
मध्वाज्यकणकोपेतं प्राशयेत् पायसन्ततः।
क्षत्रप्राशनमन्नस्य मातुर्वाक्यन्तु तं त्यजेत्॥
देवायतनोद्यत विद्यस्य शिल्पभाक्तानि सर्व्वशः।
शास्त्राणि चैव शस्त्राणि ततः पश्चेत्तु लक्षणम्॥
प्रथमं यत्र सृष्टाहः शिल्पभाक्तं स्वयं तथा।
जीविका तस्य बालस्य तत्रैव तु भविष्यति॥"

भोमवारे दोषमाह भोजराजः।

"वाचालो बलवान् दिने दिनपतेरत्यन्तदीप्तो मनो
दृष्टौ क्षीणहुताशनः शिशिरगौ कौले बली पोढ़िमः।
कोपे भोगसुखोदयो प्रथमभुग्जीवे चिरायुः सुखी
शुक्रे सौख्यबलान्वितोऽतिसुभगो मन्दे च मन्दानलः॥"

इति ज्योतिस्तत्त्वम्॥

तद्दैदिकपर्य्यायाः। आवपति १ मर्षति २ वमति ३ वेपि ४ वेवेष्टि ५ अविष्यन् ६ वष्टि ७ भमथः ८ यक्ष्यन् ९ क्षरति १०। इति दयानन्दकर्म्मणाः। इति वेदविषयटीकायां १० अध्यायः॥

(तथा च सुश्रुते सूत्रस्थाने ४६ अध्याये।

"वक्ष्याम्यतः परं कनकमाहारस्योपकल्पनाम्।
पूतं कार्य्यायसे दृषदि पेया दृषा तु राजते॥
फलानि मृन्मयेष्वाहुः प्रदद्याद्दारवेषु च।
परिशुष्कपरिक्षीणानि सौवर्णेषु प्रकल्पयेत्॥
प्रदद्यादि रसांश्चैव राजतेषूपहारयेत्।
क्षौद्रादि स्वर्णपात्रेषु सर्व्वान् शैलेषु दापयेत्॥
इत्याहारमये पात्रे सुशीतं सुखदं पयः।
पानीयं पानकं मद्यं स्फटिकेषु प्रदापयेत्॥
काचस्फटिकपात्रेषु शीतलेषु शुभेषु च।
इत्यादेर्दूष्यपात्रेषु रागयाकृष्यसङ्कान्॥

भोजपु

पुरस्तादिमके पात्रे सुविस्तीर्णे मनोरमे ।
सदः सुपीतं दद्यात् प्रदेशांश्च सुसंस्कृतान् ॥
फलानि सक्षेभक्ष्यांश्च परिमुख्यानि यानि च ।
तानि दक्षिणपार्श्वे तु भुञ्जानस्योपकल्पयेत् ॥
प्रदद्याच्च रसांश्चैव प्राज्ञोयं प्रायकं प्रयः ।
लवणान् व्यञ्जनांश्च पेयांश्च सव्ये पार्श्वे प्रदापयेत् ॥
सर्व्वान् गुडविकारांश्च रागषाड्वसकटुकान् ।
पुरस्तात् स्थापयेत्प्राज्ञो दयोरपि च मध्यतः ॥
एवं विज्ञाय मतिमान् भोजनस्योपकल्पनाम् ।
भोक्तारं विजने रम्ये निःसम्बाधे शुभे शुचौ ॥
सुगन्धिपुष्परचिते समे देशेऽथ भोजयेत् ।
पूर्व्वं मधुरमश्नीयाज्जघन्येऽम्ललवणौ रसौ ॥
पश्चाच्छेषान् रसान् वैद्यो भोजनेष्ववचारयेत् ।
आदौ फलानि भुञ्जीत दाडिमादीनि बुद्धिमान् ॥
ततः पेयांस्ततो भोज्यान् भक्ष्यांश्चिन्तांस्ततःपरम् ।
जलपूर्व्वं समश्नीयात् केचिदाहुर्विपर्य्ययम् ॥
आदावन्ते च मध्ये च भोजनस्य तु शस्यते ।
अतीवायतयामासु यमा येष्वतु सहसा: ॥
तेषु तत्प्रत्यनीकांश्च भुञ्जीत प्राणरेव तु ।
येषु चापि भवेयुश्च दिवसा भ्रमकारणा: ॥
तेषु तत्कालविहितमपराह्णे प्रकल्पते ।
रजन्यो दिवसाश्चैव येषु चापि समा: सहसा: ॥
लवणाममहोरात्रं तेषु भुञ्जीत भोजनम् ।
सक्षात् सुसंस्कृतं युक्त्या दोषैरतैर्विवर्ज्जितम् ।
यथोक्तगुणसम्पन्नमुपसेवेत भोजनम् ॥"

भोजनपात्रं, क्ली, (भोजनस्य पात्रम् ।) भक्ष्यद्रव्याधारः । यथा,—

"निष्ठन्ति यच्च नवकाञ्चननिर्म्मितानि
श्रेष्ठोज्ज्वलानि परिमण्डु कटोरकाणि ।
राकाशशाङ्कसमशुभ्रलभास्करं यत्
स्त्रीणोज्झितां रजतनिर्म्मितथालकं स्यात् ॥
अथोर्द्धप्रतिमादर्द्धिकोत्थमादर्शवत् शुचि ।
पात्रं हठं सुविस्तीर्णं स्त्रीणामत्यन्तदुर्लभम् ॥
पत्रावली भवति वा नृपभोजनाय
निर्लक्षणप्रचुरशालरहिताम्रजम्बारिधौता ।
पालाशभूतरुदलैरचिता मनोज्ञा
तादृग्विधैर्नवकगर्त्तैः परिवेष्टिता च ॥"

इति पाकराजेश्वरः ॥

भोजपतिः, पुं. (भोजानां भोजवंशीयानां पतिः ।) कंसराजः । यथा.—

"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्
गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां
वृष्णीनां परदेवतेति विदितो रङ्गंगतः साग्रजः ॥"

इति श्रीभागवते १०स्कन्धे ४३ अध्याये ७ श्लोकः ॥

भोजपुरं, क्ली, (भोजस्य भोजराजस्य पुरम् ।) धारानामख्यातदेशः ।

"आसिरभूद्भोजपुरे साकमसुरवरैः ।
पुरे रेवापारे सबलो नूनं ते सधीयांस: ॥"

इति विदग्धमुखमण्डनम् ॥

भोजाना

भोजयिता, [तृ] त्रि, (भुज् + णिच् + कर्त्तरि तृच् ।) भोजनकारयिता । भोजनप्रयोजकः । यथा,

"कर्त्ता च हर्त्ता भोक्ता च आत्मा भोजयिता सदा ।
भोगो विभवभेदश्च निष्कृतिर्मुक्तिरेव च ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २६ अध्याये ॥

भोजाधिपः, पुं, (भोजस्य अधिपः ।) कंसराजः । इति शब्दरत्नावली ॥

भोज्यं, त्रि, (भुज्यते इति । भुज् + कर्म्मणि + ण्यत् । "भोज्यं भक्ष्ये ।" ७ । ३ । ६८ । इति निपातनात् न कुत्वम्) भोजनीयद्रव्यम् । यथा,

"भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरा: स्त्रिय: ।
विभवो दानशक्तिश्च नाल्पस्य तपस: फलम् ॥"

इति चाणक्ये ५१ श्लोकः ॥

अपि च ।

"आहारं द्विविधं चव्यं पेयं लेह्यं तथैव च ।
भोज्यं भक्ष्यं तथा चर्व्व्यं गुरु विद्यादधोत्तरम् ॥"

चव्यं इक्षुदण्डादि । पेयं पानकशर्करादि । लेह्यं रसालाक्षौद्रादि । भोज्यं भक्तसूपादि । भक्ष्यं लड्डुकमण्डकादि । चर्व्व्यं चिपिटचणकादि । इति भावप्रकाशः ॥ (पितॄणां तृप्त्यर्थं देयेऽन्नादौ च ॥)

भोज्यदानस्यैत्तिकर्त्तव्यता यथा । ॐ अद्येत्यादि अमुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रस्य पितुरमुकदेवशर्म्मणो नरकोद्दिष्टविधिकसाम्बत्सरिकश्राद्धवासरे अमुकगोत्रस्य पितुरमुकदेवशर्म्मणोऽक्षयस्वर्गकाम इदं सघृतसवस्त्रोपकरणामान्नभोज्यमधिदैवं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । ततो दक्षिणा । ॐ अद्येत्यादि अमुकेन सघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं काञ्चनमूल्यं श्रीविष्णुदैवतं यथासम्भवगोत्रनाम्ने ब्राह्मणायाहं ददानि । अनेतन्नमघृतसवस्त्रोपकरणामान्नभोज्यदानकर्म्माक्षिद्रमस्तु । इति श्राद्धप्रयोगतत्त्वम् ॥

भोज्यसम्भवः, पुं, (सम्भवत्यस्मादिति सम्भव उत्पत्तिकारणम् । भोज्यं सम्भवोऽस्य ।) शरीरस्थरसधातुः । इति शब्दचन्द्रिका ॥

भोटाङ्गः, पुं. (भोटस्य जातिरङ्गस्य ।) देशविशेषः । इति शब्दरत्नावली । भोटानू इति भाषा ॥ (भोटाम्बोऽपि पाठः ॥)

भोभो, व्य, सम्बोधनम् । इति हलायुधः ॥ (यथा, महानाटके । १ । १७ ।

"भोभो भुजङ्ग ! तरुपल्लवलोलजिह्व ! ॥")

भोलानाथः, पुं, शिवः । यथा,—

"ब्रह्मणो वचनं श्रुत्वा भोलानाथः कृपानिधिः ।
संहृत्य तां महाज्वालां सगणोऽलरगाच्छुने ॥"

इति श्रीशिवपुराणोत्तरखण्डे तुलियामदेवसंवादे वाराणसीमाहात्म्ये पञ्चक्रोशीयात्रायां महाकालगणोत्पत्तिर्नाम २५ अध्यायः ॥ ॥

पुस्तकान्तरे भोलानाथ इत्यत्र महादेव इति पाठः ॥

भौत्यः

भौलिः, पुं, उद्भटः । इति त्रिकाण्डशेषः ॥

भौतः, पुं, (भूतानि प्राणिनोऽधिकृत्य प्रवृत्तः । भूत + अण् ।) भूतयज्ञः । बलिकर्म्म । यथा,—

"होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

इत्याह्निकतत्त्वम् ॥ दैवतः । इति शब्दमाला ॥ (भिक्षादिभ्योऽण् । भूतसङ्घः । तस्येदमित्यण् ।) भूतसम्बन्धिनि, त्रि ॥

भौतिकं, क्ली, (भूतानां विकार इति ठक् ।) सुक्ता । इति राजनिर्घण्टः ॥ त्रि, भूतसम्बन्धि ॥ (भूतानि शिवादीनि तद्विकारश्च गोदत्तदृष्टादयः ।

"आहङ्कारिकसम्भूतेर्गं भौतिकानि ।" इति । २ । २० । सांख्यतत्त्वम् ॥ सृष्टिविशेषश्च । तथाच । "ईश्वरकृष्णकृतसांख्यकारिकायाम् । अष्ट विकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुष्यश्चैकविधः समासतो भौतिकः सर्गः ॥ अत्र च सर्गे चेतनोत्कर्षापकर्षविशेषात् तारतम्यम् । यथा, तत्रैव । ऊर्द्धं सत्त्वविशालस्तमोविशालश्च मूलतः सर्गः । मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्य्यन्तः ॥

भौतिकः, पुं, महादेवः । इति त्रिकाण्डशेषः ॥ (उपद्रवः । व्याध्यादिः । चक्षुरादिः । शरीरादि ॥ (भूतेषु महदादिचिदन्तेषु आत्मबुद्ध्या उपासकाः भौतिकाः । बौद्धविशेषाः ।

"भौतिकास्तु शून्यं पूर्णं सत्त्वसञ्ज्ञाभिमानिकाः ॥"

इति पातञ्जलयोगसूत्रव्यासभाष्यटीकायां वाचस्पतिमिश्रधृतवचनम् । २ । १२ ॥)

भौती, क्ली, (भूतानां भूतयोनीनामिदमिति । भूत + अण् । ङीप् । तस्यां भूतानामधिकारित्वविद्यमानत्वात्तथात्वम् ।) रात्रिः । इति हेमचन्द्रः । १४२ ॥

भौत्यः, पुं (भूतेरपत्यं पुमान् । भूतिः + अपत्यार्थे यञ् ।) भूतिमुनिपुत्रचतुर्दशो मनुः । यथा,—

मार्कण्डेय उवाच ।

"अतः परन्तु भौत्यस्य वक्ष्यन्वंशं निबोधत ।
देवावृधोऽन्धया पुत्रांस्तथैव वसुधाधिपान् ॥
बभूवाङ्गिरसः पुत्रो भूतिर्नाम्नातिकोपनः ।
तस्य भार्या सुवर्चोभूद् यत्र तेन निमन्त्रितः ॥
गियासुः प्राप्तिनामानं शिष्यमाह महामुनिः ।
सदोद्युक्तं सदाचारसुदारं सुनिसत्तमम् ॥

भूतिरुवाच ।

अहं यज्ञं गमिष्यामि भ्रातुः शास्त्रे ! सुवर्चसः ।
तेनाकृतत्वया चेह यत् कर्त्तव्यं ब्रवीहि तत् ॥
अनिज्ञागरणं वक्त्रेत्यया कार्य्यं ममाग्रमे ।
तथा तथाप्रमत्तेन यथायिर्यं शुभं व्रजेत् ॥
इत्याज्ञप्ते तथेत्युक्तः स तु शिष्येण शास्त्रिना ।
जगाम यज्ञं तं भ्रातुराकृतः सन् यवीयसा ॥
प्रयान्तस्तावदनलो योऽसौ भूतिपरिग्रहः ।
तं दृष्ट्वा सोऽनलं शास्त्रं शास्त्रिरत्यन्तदुःखितः ।
भीतश्च भूतेर्बहुधा चिन्तयन् स महामुनिः ॥

भौत्यः

मार्कण्डेय उवाच ।
बहुधैवं विचिन्त्यासौ भौतस्तस्य तदा गुरोः ।
ययौ मतिमतां श्रेष्ठः शरणं जातवेदसम् ॥
स चकार ततः स्तोत्रं समाहितमनास्तदा ।
भूत्वैकचित्तो मेदिन्यां न्यस्तजानुः कृताञ्जलिः ॥
स एवं संस्तुतस्तेन भगवान् हव्यवाहनः ।
ज्वालामालाकृतनतुस्तस्याबीदयतो मुने ! ॥
परितुष्टोऽस्मि ते विप्र ! भक्त्या यत्ते स्तुतिः कृता ।
वरं ददामि भवतः प्रार्थ्यतां यत्तदेप्सितम् ॥
भगवन् ! कृतकृत्योऽस्मि यत्त्वां पश्यामि रूपिणम् ।
तथापि भक्तिमत्तस्य भगवन् ! श्रूयतां मम ॥
ममापराधात् संयत्तं यत्तेऽधिष्ठं विभावसो ! ।
तत्त्वयाधिष्ठितं सोऽद्य पूर्ब्बवत् पश्यतां द्विज ! ॥
तथाप्यद्यापि मे देव ! प्रसादं कुरुषे यदि ।
पुत्रो विधिष्टो भवतु निरपत्यस्य मे गुरोः ॥
यथा च मैत्री तनये स करिष्यति मे गुरुः ।
तथा समस्तसत्त्वेषु भवत्वस्य मनो दृढ़ ॥

अग्निरुवाच ।
गुरोरर्थे त्वया ब्रह्मन् ! याचितं यदहद्वयम् ।
तातार्थे तेन मे प्रीतिरध्यतीव महामुने ! ॥
भविष्यत्येतदखिलं गुरोर्यत् प्रार्थितं त्वया ।
मैत्री समस्तभूतेषु पुत्रस्तस्य भविष्यति ॥
मन्वन्तराधिपः पुत्रो भौत्यो नाम भविष्यति ।
महाबलो महावीर्य्यो महाप्राज्ञो गुरोस्तव ॥
इत्युक्त्वा भगवानग्निः पश्यतस्तस्य वै मुने ! ।
बभूवादर्शनः सद्यः प्रदीपो निर्वृतो यथा ॥
एतस्मिन्नन्तरे सोऽपि गुरुस्तस्य महात्मनः ।
भ्रातुर्यवीयसो यज्ञादाजगाम स्वमाश्रमम् ॥
तस्यागतस्य शिष्योऽसौ चक्रे पादाभिवन्दनम् ।
गृहीत्वासनपूजञ्च तमाह स तदा गुरुः ॥
वत्साभिलषितं त्वयि मे तथाप्यस्ति जलुप्त ।
न वेत्ति किमिदं त्वद्य तेनैतत् कथयाशु मे ॥
ततः स प्राञ्जलिस्तस्य सर्व्वमाचार्य्याय महात्मने ।
अग्निमाद्यादिकं विप्र ! समाचष्ट यथातथम् ॥
श्रुत्वा स परिष्वज्य स्नेहाद्गुरुतया गुरुः ।
शिष्याय प्रददौ वेदान् साङ्गोपाङ्गान् महात्मने ॥
भौत्यो नाम महत्तस्य पुत्रो भूतेरजायत ।
तस्य मन्वन्तरे देवानृषीन् भूपांश्च मे शृणु ॥
भविष्यस्य भविष्यासु गदतो मम विस्तरात् ।
देवेन्द्रो यश्च भविता तस्य विख्यातकर्म्मणः ॥
चाक्षुषाश्च कनिष्ठाश्च पवित्रा भ्राजिरास्तथा ।
रुचोदृकाश्च इत्येते पञ्च देवगणाः स्मृताः ॥
शुचिरिन्द्रस्तथा तेषां विदुषामिव भविष्यति ।
महाबलो महावीर्य्यः सर्व्वैरिन्द्रगुणैर्युतः ॥
अग्नीध्राग्निबाहुश्च शुचिर्यश्चोच्यते माधवः ।
शुक्रो जितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रह्मश्च भरद्वाजस्य एव च ।
स्त्रोमाणी च प्रभीरश्च विष्णुः संकल्पनस्तथा ॥
तेजस्वी सुबलश्चैव भौत्यस्यैते मनोः सुताः ।
चतुर्दशं मयेत्तत्ते मन्वन्तरमुदाहृतम् ॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनंनामाध्यायः ॥

भौमिकः

भौमः, पुं, (भूमेरपत्यं । भूमि + शिवादिभ्योऽण् ।) मङ्गलग्रहः । (यथा, वृहत्संहितायाम् ।५।६०।
"पद्मन् यस्तं सौम्यो
घृतमधुतैलक्षयाय राज्ञां च ।
भौमः समरविमर्दं
शिखिकोपं तस्करभयञ्च ॥")
नरकराजः । (यथा, हरिवंशे । १२० । १४ ।
"तान्तां पुरवरं भौमोऽकारयन्मणि-
पर्व्वतम् ॥")
तस्येदमित्यण् । भूमिभवे, त्रि । इति मेदिनी । मे, २२ ॥ (यथा, महाभारते । १ । १३६ । २० ।
"भौमेन प्राविशद्भूमिं पार्व्वतेनाभवद्गिरिः ।
अम्बरीषेण चाक्षेण पुनरन्तर्हितोऽभवत् ॥")
अमरः । इति धरणिः ॥ रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
भौमजलं, क्ली, (भूमि + अण् ।) भूमिसम्बन्धि-सलिलम् । तच्च त्रिविधं यथा,—
"भौममम्भो निगदितं प्रथमं त्रिविधं बुधैः ।
जाङ्गलं परमानूपं ततः साधारणं क्रमात् ॥"
तेषां लक्षणानि गुणाश्च ।
"अल्पोदकोऽल्पतृणवान् पित्तरक्तामयान्वितः ।
देशोऽनूप इति ख्यात आनूपं तद्भवं जलम् ॥
मिश्रचिह्नस्तु यो देशः स हि साधारणः स्मृतः ।
तस्मिन् देशे यदुदकं तच्च साधारणं स्मृतम् ॥
जाङ्गलं सलिलं रूक्षं लवणं लघु तत्तनु ।
वह्निघ्नं कफघ्नञ्च पथ्यं विकारान् कुरुते बहून् ॥
आनूपं वार्य्यभिष्यन्दि स्वादु स्निग्धं घनं गुरु ।
वह्निघ्नं कफकृन्नित्यं विकारान् कुरुते बहून् ॥
साधारणन्तु मधुरं दीपनं शीतलं लघु ।
सर्व्वदोषहरं रोचनं हृष्यादाहदोषक्षयप्रणुत् ॥"
अथ भौमानामेव नादेयादीनां लक्षणानि गुणाश्च । तत्र नादेयस्य लक्षणं गुणाश्च ।
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ।
नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अभिष्यन्दि विष्टम्भि कटुकं कफपित्तहृत् ॥
नद्यः शीघ्रवहा लघ्व्यः सर्व्वा याश्चामलौदकाः ।
गुर्व्व्यः श्लैष्मलसंज्ञास्ता मन्दगाः कलुषाश्च याः ॥
नदीसरस्तडागस्थं कूपप्रस्रवणादिजं ।
उदकं देशभेदेन गुणान् दोषांश्च लक्षयेत् ॥"
इति भावप्रकाशः ॥
भौमनः, पुं, (आदिसर्गे भवतीति भू + कर्म्मणि मनच् । भूमा ब्रह्मा । तस्यापत्यम् । अण् । मनजत्वात् न टेर्लोपः ।) विश्वकर्म्मा । इति पुराणम् ॥ (यथा, महाभारते । १।२२६ । १२ ।
"ससर्ज्ज यं सुतपसा भौमनो भुवनप्रभुः ।
प्रजापतिरनिर्देश्यं यस्य रूपं रवेरिव ॥")
भौमरत्नं, क्ली, (भूमौ जातं । भूमि + अण् । तादृशं रत्नम् ।) प्रवालम् । इति राजनिर्घण्टः ॥
भौमिकः, त्रि, भूम्यधिकारी । भूमिमधिकरोतीति यः । तदर्थं शिल्पमस्येति निष्पन्नः ॥ (भूमिस्थितः । यथा, मनौ । ५ । १४२ ।
"शृङ्गाणि हिंस्रदंष्ट्राश्च हिंस्राणां निर्दशोदयोगम् ।
दूषणं देशभेदं
कर्त्तृंश्च व्याधिबाहुल्यम् ॥")

भ्रकुटिः

भ्रूः, पुं, (भुवा कुंसो भावयं यस्य । पृषोदरादित्वात् सस्य भः ।) स्त्रीवेषधारी नर्त्तकपुरुषः । इत्यमरटीकायाम् ॥ (अस्य विशेषो भ्रकुंसशब्दे द्रष्टव्यः ॥)
भ्रकुंसः, पुं, (भुवा कुंसो भावयं शोभा वा यस्य सः ।६। ३ । ६१ । इत्यस्य "भ्रकुंसादीनामकारो भवतीति वक्तव्यम् ।" इति वार्त्तिकोक्त्या उकारस्यात्वम् ।) स्त्रीवेषधारी नर्त्तकपुरुषः । तत्पर्य्यायः । भ्रुकुंसः २ भ्रुकुंभः ३ । इत्यमरः । २।७।१६। भ्रकुंसः ४ भ्रकुंभः ५ । इति शब्दरत्नावली ॥
भ्रकुटिः, स्त्री, (भ्रुवोः कुटिः कौटिल्यम् । "भ्रकुंसादीनामकारो भवतीति वक्तव्यम्।" ६।३।६१ । इत्यस्य वार्त्तिकोक्त्या । उकारस्यात्वम् ।) क्रोधादिना भ्रुवः कौटिल्यम् । इत्यमरः । १।७। ६७ ॥ अस्या रूपान्तराणि । भ्रुकुटिः । भ्रूकुटिः । भ्रकुटिः । भ्रकुटी । भ्रुकुटी । (यथा, माघे । १५।८। "भ्रुकुटीकुटीरितललाटमाननम् ।")
भ्रूकुटी । भ्रकुटी । इति भरतः ॥

भ्रम, गृम्भे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेणयुक्तः। भ्रमति। इति दुर्गादासः॥

भ्रमृग्, इर् य उ अधःपते। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्।) भ्रम्यति। इर् अभ्रमृत्। अभ्रंक्षीत्॥

भ्रमृग्, इ उ इ अधःपते। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ अभ्रमत्। उ भ्रंक्षित्वा भ्रष्टा। इ भ्रंक्षते। इति दुर्गादासः॥

भ्रम, इर् चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) इर् अभ्रमत् अभ्रमीत्। इति दुर्गादासः॥

भ्रम, भ य चाले। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) भ य भ्राम्यति। इति दुर्गादासः॥

भ्रम, उ ज अ चाले। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) उ भ्रमित्वा भ्रान्त्वा। ज भ्रामः भ्रमः। ज्वलादित्वान्मध्यस्थोऽपि चगवध इत्यादिना कुत्वे भ्रम इत्यपि। तेन ज्वलादावस्य पाठो निष्फल इति धातुप्रदीपादयः। वस्तुतस्तु ज्वलादिर्गाठनामर्थान्न ह्रस्वः। अ भ्रमतु; अभ्रमत्; य भ्रम्यति भ्रमति। चाल इह पादविहरणम्।

"न जाने को हेतुर्भ्रमति विषयं भिक्षुक इव।"

भ्रमुः स्निग्धोच्चयात् भीमादित्वाच्च मलर्थविधयः। सकर्मकत्वम्। इति दुर्गादासः॥

भ्रमः, पुं, (भ्रम्यतेऽनेनेति। भ्रम+भावे घञ्।) मिथ्याज्ञानम्। (यथा, राजतरङ्गिण्याम्। ३। ४२३।

"देवो जगाद तं भद्र! कोऽयं ते मनसि भ्रमः॥")

तत्पर्य्यायः। भ्रान्तिः २ मिथ्यामतिः ३। इत्यमरः। १। ५। ४। अम्बुनिर्गमः। कुन्दः। (यथा, रघौ। ६। ३२।

"अवन्तिनाथोऽयमुदग्रबाहु-
र्विशालवक्षास्तनुवृत्तमध्यः।
आरोप्य चक्रभ्रममुन्नतौजाः
स्वयैव यन्त्रोल्लिखितो विभाति॥"

"चक्रभ्रमं चक्राकारघूर्णोत्पत्तिजनयत्नम्।
भ्रमोऽम्बुनिर्गमे भ्रान्तौ कुन्दाम्बुस्थितिषयत्नके॥"

इति तट्टीकायां मल्लिनाथः॥)

भ्रमणम्। इति मेदिनी। मे, २०॥ (यथा, कथासरित्सागरे। २०। ४६।

"एवं त्रिलोका यद्वत्तं भ्रमाय वणिक्-
सुतम्।")

न्यायमते भ्रमस्य नामान्तरं अप्रमा। भ्रमोविविधः। विपर्य्यासः संशयश्च। आद्यो यथा। दोषे बालबुद्धिः। शुक्लादौ पीततामतिः। सा निश्चयरूपा। द्वितीयो यथा। किंशिखरो वा स्थाणुर्वा इत्यादिबुद्धिः। तस्य कारणम्। पित्तदूरत्वमोहभयादिनानाविधदोषः। यथा,

"अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते।
तत्रापि तत्प्रतिर्या स्यात्प्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो दोषे बालबुद्धिः शुक्लादौ पीततामतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्शते।
किंशिखरी वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः॥
तदभावप्रकारा धीस्तत्प्रकारा तु निश्चयः।
स संशयो भवेद् या धीरेकत्राभावभावयोः॥
साधारण्यादिधर्म्मस्य ज्ञानं संशयकारणम्।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्॥
पित्तदूरत्वादिरूपो दोषो नानाविधः स्मृतः।"

इति भाषापरिच्छेदः। १२७—१३२॥

(भ्रमणशीले, त्रि॥ यथा, ऋग्वेदे। ६। ६। ४।

"अधभ्रमस्य उर्विया विभाति
यातयमानो अधिसानुपृश्नेः॥"

"भ्रमो भ्रमणशीलो ज्वालासमूहः॥" इति तद्भाष्ये सायणः॥ रोगविशेषः। तद्यथा,—

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
चक्रवद्भ्रमतो गात्रं भूमौ पतति मूर्च्छिता।
भ्रमरोग इति ज्ञेयो रजःपित्तानिलात्मकः॥"

इति वैद्यकमाधवनिदानविनिश्चये मूर्च्छाधिकारे॥ तथाचास्य चिकित्सा॥

"घृतावरी बलामूलद्राक्षासिद्धं पयः पिबेत्।
सर्पिषं भ्रमनाशाय बीजं वाप्यालकस्य च॥
पिबेद्वृद्धालभाक्षार्थं सघृतं भ्रमशान्तये।
शिफलाया: प्रयोगो वा प्रयोगः पयसोऽपि वा॥"

इति वैद्यकचक्रपाणिसंग्रहे मूर्च्छाद्यधिकारे॥)

भ्रमणं, क्ली, (भ्रम+भावे ल्युट्।) गमनविशेषः। पर्य्यटनम्। (यथा, भाषापरिच्छेदे। ७।

"भ्रमणं रेचनं स्यन्दनोर्द्धज्वलनमेव च॥"

पुनःपुनर्गमनम्। यथा, देवीभागवते। २।१२।४६॥

"संसारेऽस्मिन्महाघोरे भ्रमणं नभचक्रवत्॥"

तथाच, कामन्दकीये। १४। २४।

"नवाम्बिधूमसंरोधो दृङ्मोहो भ्रमणानि च॥"

"भ्रमणान्यपि दिङ्भ्रमात् दुर्गमप्रदेशेषु चंक्रमणानि।"

भ्रमत्यस्मिन्निति वा। भ्रम+ल्युट्।) मण्डलम्। यथा, सूर्य्यसिद्धान्ते। १२। ७६।

"कालेनाल्पेन भ्रमणं सुकृतैरल्पभ्रमान्वितः।
ग्रहः कार्ष्णेन महता मण्डले भ्रमति भ्रमम्॥"

अल्पभ्रमणं स्वल्पपरिधिमण्डलमानमित्यर्थः। उत्तरपदे मण्डले भ्रमतीति दर्शनात्॥") हस्त्यश्वरथदोलादिद्वारा भ्रमणगुणाः। वातकोपनत्वम्। अङ्गमर्द्दकरत्वम्। बलाग्निविवर्द्धनत्वञ्च। इति राजवल्लभः॥

भ्रमणी, स्त्री, (भ्राम्यति अनयेति भ्रम+करणे ल्युट्। ङीप्।) कारञ्जिका। अघोण्टिका। क्रौञ्चाख्या। इति मेदिनी। ने, ६८॥

भ्रमत्कुटी, स्त्री, (भ्रमन्ती चलन्ती कुटी क्षुद्रगृहमिव।) तृणादिच्छदम्। तत्पर्य्यायः। खावारी २ अङ्गलकुटी। इति चिकित्साशेषः॥

भ्रमरः, पुं, (भ्रमति प्रतिकुसुममिति। भ्रमिकमीत्यादिना। "उषा० ३।१४२। इति अरः।) कीटविशेषः। (यथा, रघुवंशे। ८। ६८।

"भ्रमरैः कुसुमानुसारिभिः।")

तत्पर्य्यायः। मधुव्रतः२ मधुकरः३ मधुलिट् ४ मधुपः५ अलीः६ द्विरेफः७ पुष्पलिट् ८ भृङ्गः ९ षट्पदः१० अलिः११। इत्यमरः। २।५।२९॥ कज्जलाभः१२ स्निग्धसुखः१३ पुष्पन्धयः१४ मधुव्रतः १५ द्विपः १६ भसरः १७ चञ्चरीकः १८ सुकाङ्क्षी१९ मधुलोलुपः२० इन्दिन्दिरः२१ मधुमारकः२२। इति राजनिर्घण्टः॥ मधुपरः २३ लम्बः२४ पुष्पकीटः२५ मधुसूदनः२६ भृङ्गराजः २७ मधुलेड्डी २८ रेणुवासः २९। इति शब्दरत्नावली॥ कामुकः। इति मेदिनी। रे, १६१॥

भ्रमरकः, पुं, (भ्रमर इवेति भ्रमर+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्।) ललाटलम्बितचूर्णकुन्तलः। इत्यमरः। २। ६।९६॥ (स्वार्थे कन्। भृङ्गः। वालधूलिकः। इति। मेदिनी। के, २०४॥ अम्बुभ्रमः। इति विश्वः॥

भ्रमरकीटः, पुं, (भ्रमर इव कीटः।) कीटविशेषः। कुमरे पोका इति भाषा॥ यथा,—

"जीवन्मुक्तिस्तु तद्विद्वान् पूर्व्वोपाधिगुणात्यये।
सच्चिदानन्दधर्म्मत्वाद्भवेद्भ्रमरकीटवत्॥"

इत्यात्मबोधः॥

भ्रमरच्छली, स्त्री, (भ्रमरान् छलयतीति। छल+अच्। गौरादित्वात् ङीष्।) लताविशेषः। तत्पर्य्यायः। भृङ्गाङ्गा २ भ्रमरा ३ भृङ्गवल्लिका ४। अस्या गुणाः। यथा, राजनिर्घण्टे।

"भृङ्गच्छली च कटुका तिक्ता दीपनरोचनी।"

भ्रमरप्रियः, पुं, (भ्रमरस्य प्रियः।) धात्रीवृक्षः। इति रत्नमाला॥

भ्रमरमारी, स्त्री, (भ्रमरान् मारयति गन्धोत्कर्षेण व्याकुलयतीति। मृ+णिच्+अच्। गौरादित्वात् ङीष्।) मालवदेशप्रसिद्धपुष्पवृक्षविशेषः। तत्पर्य्यायः। भ्रमरारिः २ भृङ्गारिः ३ भृङ्गमारी ४ मांसपुष्पिका ५ कुठारिः ६ भ्रमरी ७ घण्टिलता ८। अस्या गुणाः। तिक्तत्वम्। पित्तश्लेष्मज्वरनाशित्वम्। श्लीपदकफकृमिकुष्ठव्रणदोषविदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

भ्रमरा, स्त्री, (भ्रमर+जात्यादित्वात् टाप्।) भ्रमरच्छली। इति राजनिर्घण्टः॥

भ्रमरातिथिः, पुं, (भ्रमरः अतिथिरभ्यागतो यस्य।) चम्पकः। इति राजनिर्घण्टः॥

भ्रमरानन्दः, पुं, (मधुवाहुल्यात् भ्रमराणामानन्दो यस्मात् सः।) वकुलः। अतिमुक्तकः। रक्ताशोकः। इति राजनिर्घण्टः॥

भ्रमरालकः, पुं, (भ्रमर इव अलति भूषयतीति। अल+ण्वुल्।) ललाटलम्बितचूर्णकुन्तलः। तत्पर्य्यायः। भ्रमरकः २ कुण्डलः ३। इति हेमचन्द्रः। ३। २३३॥

भ्रमरी, स्त्री, (भ्रमर+ङीष्।) जतुका। पुत्रदात्री। षट्पदी। इति राजनिर्घण्टः॥

भ्रमरेष्टः, पुं, (भ्रमराणामिष्टः।) श्लोनाकप्रभेदः। इति राजनिर्घण्टः॥

भ्रमरेष्टा, स्त्री, (भ्रमराणामिष्टा।) भार्गी। भूमिजम्बूः। इति राजनिर्घण्टः॥

भ्रमरोत्सवा, स्त्री, (भ्रमराणां उत्सवः प्रमोदो यस्याः।) माधवी। इति राजनिर्घण्टः॥

भ्रमासक्तः, पुं, (भ्रमे भ्रमणे आसक्तः युक्तः।) घूर्णमार्जकः। इति हेमचन्द्रः। ३। ५८०॥

भ्रमिः, स्त्री, (भ्रम+बाहुलकात् इः।) भ्रमणम्। तत्पर्य्यायः। भ्रमः २। इत्यमरः। ३।२।६॥ भ्रमी ३। इति भरतः॥ (मङ्गलाकारगतिः ४। तथाच नैषधचरिते। १। ७३।

"अथीकरत्वादहयेन या भ्रमी-
र्निजातपत्रस्य तलस्थले गलः।")

मङ्गलाकारसैन्यरचना। यथा,—

"वीरान् सङ्ग्रामगो दृष्ट्वा भ्रमिभिः पर्य्यवस्थितान्।
जवो लवेन सन्त्राय शूरान् रोषप्रपूरितः॥
भ्रमिराद्या सङ्गरेषु द्वितीयायुतसङ्ख्या।
तृतीयायुतयुग्मेन तुरीयायुतपञ्चभिः॥
षष्ठी लक्षयोधानां षष्ठी योधायुताधिकैः।
सप्तमी लक्षयुग्मेन सप्तभिर्भ्रमिभिर्युतान्॥
मध्ये लवो भ्रमिव्यूहः सञ्चरन् वह्निवत्तदा।
दाहयामास सर्व्वान् वै सैनिकान् भ्रमिकारकान्॥"

इति पाद्मे पातालखण्डे ६१ अध्यायः॥

भ्रमी, [न्] त्रि, (भ्रम+इनि।) भ्रमविशिष्टः। भ्रमो विद्यते अस्येति अर्शआद्यच्। भ्रमी॥

भ्रस्ज क उ अधःपतने। इति कविकल्पद्रुमः॥ (दिवा-पर०-अक०-सेट्।) य भ्रस्यति। उ भ्रष्ट्वा भ्रष्ट्वा। इति दुर्गादासः॥

भ्रष्ट, त्रि, (भ्रस्ज+कर्त्तरि+क्तः।) भुनम्। अस्य पर्य्यायो मलितशब्दे द्रष्टव्यः॥

"अर्थाद्भ्रष्टस्तीर्थयात्रां तु गच्छेत्
सत्याद्भ्रष्टो रौरवं वै व्रजेच्च।
योगभ्रष्टः सत्यभृतिञ्च गच्छेत्
राज्याद्भ्रष्टो नगयां वै व्रजेच्च॥"

इति गारुडे नीतिसारे १०८ अध्यायः॥

भ्रस्ज, औ० स्ज पाके। इति कविकल्पद्रुमः॥ (तुदा०-उभ०-सक०-अनिट्।) रेफयुक्तादिरन्योपधः। क्विपि संयोगादिलोपे भृट्। पाक इष्ट भर्জ্জনम्। भ्रस्ज भृज्जति भृज्जते मनुष्यं सूपकारः। औ अभार्क्षीत्। इति दुर्गादासः॥

भ्राज, ङ ञ क्ष टु भासि। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्,।) रेफयुक्तः। ङ भ्राजते ञ भ्रेजे वभ्राजे। अनुबन्धबलात् संयोगादिलोपाकारस्याणित्वम्॥ क्ष अविभ्रजत् अवभ्राजत्। टु भ्राजथुः। इति दुर्गादासः॥

भ्राजकं, क्ली, (भ्राज्+"ण्वुल् तृचौ।" ३। १। १३३। इति ण्वुल्।) घृतम्। इति शब्दचन्द्रिका॥

भ्राजिष्णुः, त्रि, (भ्राज्+इष्णुच्।) अलङ्कारादिना दीप्तियुक्तः। इत्यमरः। २। ६। १०१॥ (यथा, भागवते। २। ८। १२।

"भ्राजिष्णुर्भिये. परितो विराजते
लसद्विमाना बलिभिर्महात्मनाम्॥")

विष्णौ, पुं। यथा, तस्य सहस्रनामस्तोत्रे।

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः॥

भ्रातरौ, पुं, (भ्राता च भगिनी च। भ्रातृस्वसोरित्यादिना एकशेषः।) भ्रातृभगिन्यौ। लिङ्गद्विवचनान्तोऽयम्। इत्यमरः। २। ६। ३६॥

भ्राता, [तृ] पुं, (भ्राजते इति। भ्राज+"भ्रञ्-मृङ्भ्रस्जिभ्यस्तृन्। उणा०। २। ८६। इति तृन्। निपात्यते च।) एकगर्भजातः। "भाई" इति भाषा। तत्पर्य्यायः। सहोदरः २ समानोदर्य्यः ३ सोदर्य्यः ४ सगर्भः ५ सहजः ६ सोदरः ७। इति हेमचन्द्रः॥ पितरि मृते ज्येष्ठभ्रातुः पितृतुल्यत्वम्। यथा,—

"ज्येष्ठो भ्राता पितृतुल्यो मृते पितरि शौनक!।
सर्व्वेषां स पिता ह्येव स्यात् सर्व्वेषामनुपालकः॥
कनिष्ठस्तेषु सर्व्वेषु समत्वेनानुवर्त्तते।
समोपभोगजीवेषु यथैव तनयस्तथा॥"

इति गारुडे २१४ अध्यायः॥

तस्य भार्य्याहरणे तस्मै दायादाने च दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्याये।

"भ्रातृजायापहारी च भ्रातृगामी भवेन्नरः।
ब्रह्महत्यासहस्रञ्च लभते नात्र संशयः॥
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ।
तस्माद्दुर्नीच पापी च विष्ठायां जायते कृमिः॥
वर्षकोटिसहस्राणि तत्र स्थित्वा च पातकी।
ततो भवेच्छतजन्मावधी वर्षकोटिसहस्रकम्॥
पुंश्चलीयोनिगर्भे च कृमिरेव पुरन्दर!।
गृध्रः कोटिसहस्राणि शूनजन्मानि कूकुरः।
भ्रातृजायापहरणात् शूनजन्मानि शूकरः॥"

"यो ददाति न दायञ्च बलिष्ठो दुर्ब्बलाय च।
स याति कुम्भीपाकञ्च यावच्चन्द्रदिवाकरौ॥

भ्रातुरन्वयेषु भ्राता न गच्छेत्। यथा,—

नारद उवाच।

"हे हर्य्यश्वा महावीर्य्याः प्रजा यूयं करिष्यथ।
इष्टयो लक्ष्यते यत्नो भवतां अयनामिदम्॥
बालिशा बत यूयं ये नास्या जानीत वै भुवः।
अनन्तरूपमधर्व्वैव कथं सृक्ष्यथ वै प्रजाः॥
ऊर्द्धं तिर्य्यगधश्चैव यदाप्रतिहता गतिः।
तदा कस्ताङ्कुशो नाम्नां सर्व्वं द्रक्ष्यथ बालिशाः॥
ते तु तद्वचनं श्रुत्वा प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः।
वैरिण्यामथ पुत्राणां सहस्रमजनयद्विभुः॥
विवर्द्धयिषवस्ते तु सवलाश्वाः प्रजाः पुनः।
पूर्व्वोक्तं वचनं ब्रह्मनारदेन प्रचोदिताः॥
अन्योन्यमूचुस्ते सर्व्वे सम्यगाह महामुनिः।
भ्रातॄणां पदवीं चैव गन्तव्या नात्र संशयः॥
ज्ञात्वा प्रमाणं पृथ्व्यास्तु प्रजाः सृक्ष्यामहे पुनः।
तेऽपि तेनैव मार्गेण प्रयाताः सर्व्वतो दिशम्।
अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः॥
ततः प्रभृति वै भ्राता भ्रातुरन्वयेषु द्विज!।

प्रयातो नश्यति तथा तत्र कार्य्यं विजानता॥"

इति विष्णुपुराणे १ अंशे १६ अध्यायः॥

अपि च, मात्स्ये ५ अध्याये।

"तनः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति।
अन्विष्यन् दुःखमाप्नोति तेन तं परिवर्जयेत्॥"

ज्येष्ठभ्रातादेर्गुरुत्वं यथा,—

"उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरश्चाता मातामहपितामहौ।
बन्धुर्ज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः॥"

इति कौर्म्मे उपविभागे २१ अध्यायः॥

विभक्तानां तेषां धर्म्मेष्टद्धिर्यथा,—

व्यासः।

"भ्रातॄणां यौवनो; पित्रोः सह्यवासो विधीयते।
तदभावे विभक्तानां धर्म्मेष्टिर्या विवर्द्धते॥
भ्रातॄणां यस्तु नेहेत धनं शक्तः स्वकर्म्मणा।
स निर्भाज्यः स्वकादंशात् किञ्चिद्दत्त्वोपजीवनम्॥"

ज्येष्ठभ्रातृप्रशंसा यथा,—

"विप्रयाहुश्चतः सर्व्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राता शुक्रः कनिष्ठो वा शुक्रापेक्षा कुले स्थितिः॥
कुटुम्बार्थेषु योऽदृष्टस्तत्र कार्य्यं करोति तु यः।
स भ्रातृभिर्हृतांशो यात्राच्छादनवर्जितैः॥
अन्योन्यभेदो भ्रातॄणां सुहृदां वा बलाबलैः।
भवत्यनर्थकृद्देव! द्विषतां नात्र संशयः॥"

भ्रातृसंस्कारस्याधिकारित्वम्। यथा, नारदः।

"येषान्तु न जनाः पित्रा संस्कारविधयः क्रमात्।
कर्त्तव्या भ्रातृभिस्तेषां पैतृकादेव तद्धनात्॥
अविद्यमाने पित्र्यंशे स्वांशाद्दत्त्वा तु पुत्रकः।
अवश्यकार्य्याः संस्कारा भ्रातृभिः पूर्व्वसंस्कृतैः॥"

विभक्तानां तेषां साक्षित्वादि यथा,—

"साक्षित्वं प्रतिभाव्यञ्च दानं ग्रहणमेव च।
विभक्ता भ्रातरः कुर्य्युर्नाधिभक्ताः परस्परम्॥"

इति दायतत्त्वम्॥

भ्रातृक, त्रि, (भ्रातुरागत इति। भ्रातृ+"तत्रागतः।" ४। ३। ७८। इति ठक्। भ्रातुरागतधनादि।) भ्रातृदेयम्। इति विद्धान्तकौमुदी॥

भ्रातृज, पुं, (भ्रातुः सहोदरात् जायते इति। जन्+"मयूरव्यंसकादयश्च।" ३। २। ७८। इति डः।) भ्रातुष्पुत्रम्। तत्पर्य्यायः। भ्रात्रीयः २। इत्यमरः। २। ६। ३६॥ भ्रातृव्यः ३ भ्रातृपुत्रः ४। इति शब्दरत्नावली॥ (स्त्रियां टाप्। भ्रातृजा। भ्रातुष्पुत्रायाम्॥)

भ्रातृजाया, स्त्री, (भ्रातुर्जाया।) भ्रातृभार्य्या। (यथा, मेघदूते। १। १०।

"आषाढस्यप्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श॥")

तत्पर्य्यायः। प्रजावती २। इत्यमरः। २। ६। ३०॥

भ्रातृद्वितीया, स्त्री, (भ्रातृभक्तजायां भ्रातृभोजनार्थां वा द्वितीया इति मध्यपदलोपी कर्म्मधारयः।) कार्त्तिकशुक्लद्वितीया। तद्विवरणं यथा। यमद्वितीया तु प्रतिपद्युता याह्ये-

युतं निर्णयान्तरी । यमद्वितीया मध्याह्न-व्यापिनी पूर्वविद्धा वेति हेमाद्रिः । अत्र विधिर्यो हेमाद्रौ स्कान्दे ।

"कार्त्तिके शुक्लद्वितीयायामपराह्णेऽर्चयेत् यमम् । भ्रातरं ज्ञात्वा भ्रातृव्यां यमलोकं न पश्यति ॥ कार्त्तिके शुक्लद्वितीयायां पूजितस्तर्पितो यमः । वेदितः खिन्नरैर्दृष्टैस्तस्मै यच्छति वाञ्छितम् ॥"

तथा भविष्ये ।

"प्रथमा श्रावणी प्रोक्ता तथा भाद्रपदेऽपरा । तृतीयाश्वयुजे मासि चतुर्थी कार्त्तिके भवेत् ॥ श्रावणे वसुधा नाम तथा भाद्रे च गौरिला । आश्विने प्रेतसञ्चारा कार्त्तिके यामघण्टा मता ॥"

इत्युक्ता प्रथमायां व्रतं द्वितीयायां सरस्वती-पूजा तृतीयायां भ्रातृव्रता चतुर्थ्यामुक्तम् ।

"कार्त्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर ! । यमो यमुनया पूर्वं भोजितः स्वगृहेऽर्चितः ॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता । अस्यां विशेषतो विप्र ! न भोक्तव्यं तथा नरैः ॥ स्वसृभिः स्वगृहे भोक्तव्यं पुष्टिवर्द्धनम् । दानानि च प्रदेयानि भगिनीभ्यो विशेषतः ॥ वस्त्रालङ्कारवस्त्राद्यैः पूजास्कारभोजनैः । कन्या भगिन्यः संपूज्या अभावे प्रतिपन्नकाः ॥ प्रतिपन्ना मातामह्यस्तस्मै हेमाद्रिः ॥ पितृष्वसृभगिनीहस्तात् प्रथमायां युधिष्ठिर ! । मातुलस्य सुताहस्तात् द्वितीयायां तथा नृप ! ॥ पितुर्मातुः स्वसुः कर्त्तृ तृतीयायां तयोः करात् । चतुर्थ्यां सहजायाश्च भगिन्या हस्ततः परम् । सर्वासु भगिनीहस्तात् भोक्तव्यं बलवर्द्धनम् ॥

यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिजनस्वसृसौहृदेन ।
तस्यां स्वसुः करतलादिह यो सुनक्ति
प्राप्नोति रत्नसुखधान्यमनुत्तमं सः ॥

गौड़ास्तु ।

यमश्च चित्रगुप्तश्च यमदूतांश्च पूजयेत् । अर्घ्यञ्चात्र प्रदातव्यो यमाय सहजद्वयैः ॥

मन्त्रस्तु ।

एह्येहि मार्त्तण्डज ! पाशहस्त !
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाव्रततर्पणार्थं
गृहाण चार्घ्यं भगवन्नमस्ते ॥

भ्रातृव्यानुज्ञातार्हं भद्रमुखं भक्तमिदं शुभम् । प्रीतये यमराजस्य यमुनाया विशेषतः ॥"

अर्घ्यञ्चायमाहेति वदेदिति स्मार्त्ताः ॥ इत्यन्न-दानमित्याहुः । ब्रह्मवैवर्तपुराणेऽपि ।

"या तु भोजयते नारी भ्रातरं युग्मके तिथौ । अर्घ्येणापि सामूलेन सा वैधव्यमाप्नुयात् ॥ भ्रातुराशुः क्षयो राजन् ! न भवेत्तस्य कर्हिचित् ॥"

इति निर्णयसिन्धौ २ परिच्छेदः ॥

भ्रातृपत्नी, स्त्री, (भ्राता पतिर्यस्या इति भ्रातृ-पतीति वा । ऋन्नेभ्यो ङीप् । इति ङीप् । ततः + "नित्यं सपत्न्यादिषु ।" इति णत्वादिषु ।) भ्रातृजाया । इति शब्दरत्नावली ॥

भ्रातृपुत्रः, पुं, स्त्री, (भ्रातुः पुत्रः ।) भ्रातृजः । इति शब्दरत्नावली । भाइपो इति भाषा ॥

भ्रातृभगिन्यौ, स्त्री, (भ्राता च भगिनी च । इति इतरेतरद्वन्द्वसमासः ।) भ्रातरौ । द्विवचना-न्तोऽयम् । इत्यमरः । २ । ६ । ३६ ॥

भ्रातृव्यः, पुं, (भ्रातुरपत्यमिति । "भ्रातुर्व्यच ।" ४ । १ । १४४ । इति यत् ।) भ्रातृपुत्रः । (यथा, राजतरङ्गिण्याम् । ८ । २८४२ ।

"अवराजानुजं राज्ञा यशोराजं निवेशितम् । तन्मन्त्रिणावचस्कन्द भ्रातृव्यं राजकाभिधः ॥"

भ्रातृ + "यत् सपत्ने ।" ४ । १ । १४५ । इति यत् ।) शत्रुः । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । ११ । १७ ।

"भ्रातृव्यमेतं त्वमदभ्रवीर्य-
सुपेक्षयाधिरूढमप्रमत्तः ॥"

"तस्मात् भ्रातृव्यम् शत्रुम् ।' इति तट्टीकायां स्वामी ॥)

भ्रातृश्वशुरः पुं, (पत्युर्ज्येष्ठभ्राता श्वशुर इव पूज्य-त्वात् ।) पतिज्येष्ठभ्राता । भाशुर इति भाषा । तत्पर्य्यायः । श्वशुरकः २ । इति शब्दरत्ना-वली ॥ (भ्रातुः श्वशुरः ।) भ्रातुःपत्न्याः पिता च ॥

भ्रात्रीयः, पुं, (भ्रातुरपत्यं पुमानिति । भ्रातृ + "भ्रातुर्व्यच ।" ४ । १ । १४४ । इत्यत्र 'चकारा-च्छच ।' इति काशिकोक्तेः छः ।) भ्रातृपुत्रः । इत्यमरः । २ । ६ । ३६ ॥ भ्रातृसम्बन्धिनि, त्रि ॥

भ्रान्तः, त्रि, भ्रमणयुक्तः । भ्रान्तिविशिष्टः । (अतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने ॥" इति सांख्यसूत्रम् । २ । २६ ॥)

भ्रमधातोः कर्मणि क्तप्रत्ययेन निष्पन्नः ॥ भ्रमणे, क्ली । यथा, वाभटपशुपतिभ्यां व्याख्यातम् ।

"भ्रान्तं हैयङ्गवीनकटुगोविषमं प्राप्तं न किञ्चित् फलम् ।"

भ्रान्तः, पुं, (भ्रम् + कर्मणि क्तः । "अनुनासिक-स्येति । ६ । ४ । १५ । इति दीर्घः ।) राज-धत्तूरः । मत्तहस्ती । इति राजनिर्घण्टः ॥

भ्रान्तिः, स्त्री, (भ्रम् + क्तिन् । "अनुनासिकस्य क्विझलोः क्ङिति ।६। ४ ।१५ । इति दीर्घः ।) भ्रमः । इत्यमरः । १ । ५।४ ॥

("युक्तिहीनप्रकाशत्वाद् भ्रान्तेर्नास्ति लक्षणम् । यदि स्याल्लक्षणं किञ्चिद्भ्रान्तिरेव न सिध्यति॥"

इति तार्किकाः ॥)

सा तु नराणां षष्ठमासे जायते । यथा,—

"वायुप्रायिके तु संग्रामे भ्रान्तिः संजायते यतः । धावाशरावि सहसा पत्राण्यारूढान्यतः पुरा ॥"

इति ज्योतिस्तत्त्वम् ॥

भ्रमणम् । इति मेदिनी ॥ अनवस्थितिः । इति विश्वः ॥

भ्रान्तिहरः, पुं, (भ्रान्तिं हरतीति । हृ + कर्मणि पचाद्यच् ।) मन्त्री । इति शब्दमाला ॥ भ्रम-नाशके, त्रि ॥

भ्रामकः, पुं, (भ्रामयति भ्रमं जनयतीति । भ्रम् + णिच् । "ण्वुल् तृचौ ।" १ । १ । १३३ ।

इति ण्वुल् ।) धूर्त्तः । धूर्त्तधत्तूरः । धूर्त्तावर्त्तः । प्रस्तरभेदः । इति मेदिनी । के, १३३ ॥ घुमक पातर इति भाषा । भ्रमजनके, त्रि ॥

भ्रामरं, क्ली, (भ्रमरैः कृतं सम्भृतमिति । भ्रमर + "क्षुद्राभ्रमरवटरपादपाद्यण् ।" ४।३। १२८। इति अण् ।) मधु । इति मेदिनी । रे, २६२ ॥ तत्तु भ्रमरजमधु । तस्य गुणाः । पित्तश्लेष्मत्वम् । रूक्षत्वम् । मधुरत्वम् । सुखजाठराग्नित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

पैच्छिल्यात् स्वादु भूयस्त्वात् भ्रामरं गुरु कौर्णितम् ।"

इति राजवल्लभः ।

अन्यच्च ।

"किञ्चित् रूक्षं प्रसिद्धेभ्यः षट्पदेभ्योऽलिभि-श्चितम् ।
निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाठरकृद् गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥"

इति भावप्रकाशः ॥

वृत्तविशेषः । तत्पर्य्यायः । रासः २ मण्डल-वृत्तम् ३ वल्लीरसम् ४ । इति शब्दमाला ॥ भ्रमरसम्बन्धिनि त्रि । यथा,—

"तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम् ।"

इति देवीमाहात्म्यम् ॥

(यथा च हारीते प्रथमे स्थाने एकादशोऽध्याये । मध्यं लक्षणं गुणाश्च ।

"घ्राणं कषायं मधुरं लघु स्यात्
सन्दीपनं लेखनमेव गुल्मम् ।
संशोधनन्तु व्रणशोधनञ्च
संरोपणं क्षुद्यतमञ्च बल्यम् ॥
विदोषनाशं कुरुते च पुष्टिं
कासे क्षये वा क्षतजे च छर्द्दौ ।
हिक्काश्मे प्लीहगरौदरेषु
रक्तप्रमेहे च तथातिसारे ॥
रक्तातिसारे च सरक्तपित्ते
लक्ष्मीहरन्तु पार्श्वगदेऽपि शस्तम् ।
नेत्रामये वा ग्रहणीगदे वा
विषे प्रशस्तं भ्रमरैरितं यत् ॥
भ्रामरं सघनं ज्ञात्वा भूयिष्ठं मधुरञ्च यत् ।
रूक्षं विशेषतो ज्ञेयं प्रीतनं लघुलेखनम् ॥")

भ्रामरः, पुं, (भ्रामयति लोहमिति । भ्रामि + "अर्त्तिकमिभ्रमिदेवीति ।" उणा० ३ । १६० । इति अरः । बाहुलकात् दीर्घश्च ।) प्रस्तरभेदः । मेदिनी । रे, २६२ ॥ पुमक पातर इति भाषा ॥ (अपस्मारभेदः । इति भ्रामरी त्रि । यथा, मनौ । ३ । २६१ । [क्षया ॥"

"भ्रामरी गण्डमाली च स्त्रिचायी पिशुन-

"भ्रामरी अपस्मारी ।" इति तट्टीकायां मेधा-तिथिः ॥)

भ्रामरी, स्त्री, (भ्रमरस्यायं भ्रामरी भ्रमरवद्-वर्णः । सोऽस्या अस्तीति । अर्श आद्यच् ।

ङीप्।) पार्व्वती। इति त्रिकाण्डशेषः॥
यथा, मार्कण्डेये। ९१। ४७-६६।
"यदाऽरुणाच्यस्त्रैलोक्ये महाबाधां करिष्यति।
तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम्॥
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम्।
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्व्वतः॥"

भ्राश्, क ड ण टु } भासि। इति कविकल्पद्रुमः॥
भ्राश्, य ड } (भा०-आत्म०-अक० सेट्।
द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भ्राश्यते। क अवभ्राशत्। खमते अनयोर्णादि कृत्यविकल्पनेऽपि सम्प्रसारणानुबन्धोऽन्येषामनुरोधात्। ण भ्रेशे बभ्राशे। टु भ्राशयुः। ड भाशते। भाशि दीप्तौ। इति दुर्गादासः॥

भ्राष्टं, क्ली, (भ्रस्ज+क्तन्।) आकाशम्। अमरटीकम्। इति संक्षिप्तसारोणादिवृत्तिः॥

भ्राष्टः, पुं, (भ्रज्यते अनेन। भ्रस्ज+"भ्रस्जिगमिनमिहनिविशिपृच्छां क्तिच्च।" उणा०। ४। १५६। इति। क्त्।) यत्र कलायचणकादिकं भृज्यते सः। भाजना खोला इति ख्यातः। (यथा, नैषधचरिते। ३। १२८।
"रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्टं च यच्चित्तपे॥"
"अनुभ्राष्टं भर्ज्जनपात्रसङ्घेन।" इति तट्टीका।)
तत्पर्य्यायः। अम्बरीषम्२। इत्यमरः।२।६।३०॥

भ्रास, क ड ण टु } भासि। इति कविकल्पद्रुमः॥
भ्रास, य ड } भा०-आत्म०-अक०-सेट्।
द्वितीयस्तु दिवा०-आत्म०-अक०-सेट्।) य ड भास्यते। ड भासते। क अवभ्रासत्। ण भेसे बभ्रासे। टु भ्रासयुः। इति दुर्गादासः॥

भ्रुकुंसः, पुं, (भ्रुकुंसः। भ्रुकुंसः। भ्रुकुंसः। भ्रुकुंसः। इति रूपचतुष्टयम्। "चुरादौ पठपुटेत्यादिदण्डके कुसिर्भाषार्थः। यः स्त्रीवेषं धारयित्वा भ्रुवः कुंसयतीति। एरच् प्रत्ययः। ह्रस्वश्च वा। इति अमरटीकायां रघुनाथचक्रवर्त्ती॥)
स्त्रीवेषधारिनर्त्तकपुरुषः। इत्यमरः।१।७।११॥

भ्रुकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यमिति षष्ठीसमासः। अथ भ्रुकुंसादीनामिति वा ह्रस्वः।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, महाभारते।७। ७६२। ब्रह्मा च भ्रुकुटिं चक्रे क्रोधस्य परिलक्षणम्॥")

भ्रुकुटी, स्त्री, (भ्रुकुटि। ह्रस्वादिकारादिति पक्षे ङीष्।) क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः। १। ७। ३७॥ (यथा, माघे। १५। ८।
"भ्रुकुटीकटोरितललाटमागतम्॥")

भ्रू, स्त्री, (भ्राम्यति नेत्रोपरि इति। भ्रम्+"भ्रमेश्च कूः।" उणा० २। ६८। इति कूः।) ह्रगध्यास्थभागः। तत्पर्य्यायः। चिल्लिका २ नयनोर्द्ध्वभागरोमराजी३। इति राजनिर्घण्टः॥
तल्लक्षणम् यथा, गारुडे ६६ अध्याये।
"विशालोन्नता सुस्निग्धा दरिद्रा विषमभ्रुवः।
धनी दीर्घा संयुक्तभ्रूर्व्वाञ्छेद्भ्रूतसभ्रुवः।
आज्ञा निस्वस्य खड्गभ्रूर्मेध्याच्च विगतभ्रुवः॥"

अत्र षट्चक्रान्तर्गतभ्रूचक्रमुक्तम्। तत्तु द्विदलपद्माकारम्। तन्मध्ये मनस्तिष्ठति। यथा,—
"आज्ञाचक्रामभुजं तन्निमकरसङ्गतं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां प्रविलसितवपुर्नेत्रपत्रं सुशुभ्रम्।
तन्मध्ये हाकिनी सा शशिसमधवला षड्भुजं षट्कं दधाना
विद्यां सुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥
एतत्पद्मान्तराले विवसति च मनः सूक्ष्मरूपं प्रसिद्धम्॥"
इति श्रीतन्त्रचिन्तामणौ षष्ठप्रकाशः॥
(विधयोऽस्या यथा,—
"भ्रुवोर्वा यदि वा मूर्द्ध्नि सीमन्तावर्त्तकान् बहून्।
अपूर्व्वानतिलतान् अक्लान् दृष्ट्वा मरणमादिशेत्॥
आहमेते न जीवन्ति लक्षणैर्नातुरा नराः।
अरोगाणां पुनस्तेषां षड्भागं परमुच्यते॥"
इति चरके इन्द्रियस्थाने अष्टमोऽध्यायः॥
कर्णनेत्रनासाभ्रूस्रंसाधरकक्षस्तनवृषणपार्श्वस्फिग्जानुबाहूरुप्रभृतयो द्वे द्वे विण्मूत्रिरङ्गुलयः। इति सुश्रुते शारीरस्थाने पञ्चमोऽध्यायः॥)

भ्रूकुंसः, पुं, (भ्रू+कुंस+अच्। स्त्रीवेषधारी नर्त्तकपुरुषः। इत्यमरः। १। ७। ११।

भ्रूकुटिः, स्त्री, (भ्रुवः कुटिः कौटिल्यम्। क्रोधादिना भ्रुवः कौटिल्यम्। इत्यमरः॥

भ्रूण, क ड आशुविधकूर्य्योः। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-सक०-सेट्।) रेफयुक्तषकारवान्। क ड भ्रूणयते भ्रूणं लोकः। आशुविधयं करोतीत्यर्थः। इति दुर्गादासः॥

भ्रूणः, पुं, (भ्रूण्यते आशुस्त्रियते इति। भ्रूण+घञ्।) बालकः। स्त्रीगर्भः। इत्यमरः २।६।३६॥ (क्लीबमपि। यथा, ऋग्वेदे। १०। १४५। २।
"यत्तो इतश्चत्तासुतः सर्व्वाभ्रूणान्याददे॥")
अथ गर्भाधानादिकम्। ऋतोर्दर्शनादर्वाधियोड्शरात्रिपर्य्यन्तं ऋतुकालः। तत्राद्यास्तिस्रो निशाः परित्यज्य चतुर्दश्यष्टमी अमावास्या पूर्णिमा चैतासंक्रान्तिः पर्व्वाण्येतानि परित्यज्य च अन्यासु रात्रिषु चन्द्रादिशोभने काले भार्य्यामुपगच्छेत्। युग्मरात्रिषु गमने पुत्रो भवेत्। अयुग्मरात्रिषुगमने कन्या भवेत्। तत्र प्रशस्तनक्षत्राणि पुष्यः हस्ता मृगशिरा आर्द्रा पुनर्व्वसुः पूर्व्वाषाढा उत्तराषाढा अथवा पूर्व्वभाद्रपदोत्तरभाद्रपत्। तत्र निषिद्धनक्षत्राणि। ज्येष्ठाश्लेषा मघा मूला रेवती क्षत्रिकाग्निनी उत्तरफल्गुनी। तत्र तिथयः नन्दा भद्राः प्रशस्ताः। रिक्ता निषिद्धाः। तत्र रविमङ्गलहस्पतिवाराः प्रशस्ताः। इति समयप्रदीपः॥

भ्रूणहत्या, स्त्री, (हननं हत्या। भ्रूण+भावे क्यप्। भ्रूणस्य हत्या इति षष्ठीसमासः।) गर्भस्थबालकहननम्। यथा,—
"त्रिविधाङ्गं हतं येन न करोति चतुर्थकम्।
कुलानि पातयेत् सप्त भ्रूणहत्यामवाप्नुयात्॥"
इत्युद्वाहतत्त्वम्॥
भ्रूणहा, [न्] त्रि, (भ्रूणं हन्तीति। भ्रूण+हन्+"ब्रह्मभ्रूणवृत्रेषु।" ३। २। ८७। इति क्विप्।) गर्भस्थबालकहन्ता। भ्रूणं हन्ति इति भ्रूणशब्दोपपदहनधातोरुपपदेन निष्पन्नः। इति संक्षिप्तसारव्याकरणम्॥ (यथा, महाभारते। १। ८३। ६४।
"क्रतुं वै याचमानाया न ददाति पुमान्नृतुम्।
भ्रूणहेत्युच्यते ब्रह्मन्! स वृद्धैर्ब्रह्मवादिभिः॥")
तस्य प्रायश्चित्तम्। तत्र पुंसेन ज्ञाते पुंवधप्रायश्चित्तम्। स्त्रीत्वेन ज्ञाते स्त्रीवधप्रायश्चित्तम्। अविज्ञाते तु पुंवधप्रायश्चित्तमाह मनुः।
"हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत्।
गर्भहा च यथावर्णं तथाचैवौषिलस्तदम्॥"
इति प्रायश्चित्तविवेकः॥
(ब्रह्महत्या। यथा, मनुः। ८। ६२७।
"अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्य्यापचारिणी।"
"भ्रूणहा ब्रह्महा।" इति तट्टीकायां मेधातिथिः॥)

भ्रूभङ्गः, पुं, (भ्रुवो भङ्गः।) भ्रुवः कौटिल्यम्। यथा,
"क्षुद्राः सन्त्रासमेते विजहति हरयो भिन्नशृङ्गेभकुम्भा
युग्मद्देहेषु लज्जां दधति परममी ग्रामिका निष्प्रपञ्चाः।
सौमित्रे तिष्ठ पात्रं त्वमपि नहि वयं मन्महे मेघनादः
किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं रामममुं मेयमामि॥"
इति काव्यप्रकाशः॥

भ्रेज, क ड भासि। इति कविकल्पद्रुमः॥ (भा० आत्म०-अक०-सेट्।) रेफयुक्तः। क अबिभ्रेजत्। ड बिभ्रेजे। इति दुर्गादासः॥

भ्रेष, क ण चले। भये। इति कविकल्पद्रुमः॥ (भा० उभ० अक०-सेट्।) रेफयुक्तः। क अबिभ्रेषत्। ण भेषति भेषते बभ्रेषात् स्त्रम्। बिभ्रेषे। इति दुर्गादासः॥

भ्रेषः, पुं, (भ्रेष चलने+भावे घञ्।) तथाच यथोचितादृष्टभ्रंशः। इत्यमरः॥ (यथा, पातञ्जलभाष्ये। ३।१७। "आसमाद्विभ्रेषात्।" इति।) चलनम्। इति भ्रेषधात्वर्थदर्शनात्॥

भ्रेषणं, क्ली, (भ्रेष+भावे ल्युट्।) चलनम् इति भ्रेषधात्वोर्भावेऽनट्प्रत्ययेन निष्पन्नम्॥

भ्रेष्म, ण भर्त्सने। इति कविकल्पद्रुमः॥ (भा०-उभ० सक०-सेट्।) अन्तःस्थादन्तोपधः। ण भ्रेष्मति भ्रेष्मते। अभ्रेष्मीत् अभ्रेष्मत इति दुर्गासिंहः। इति दुर्गादासः॥

म

म मकारः। स तु पञ्चविंशतितमव्यञ्जनवर्णः। अस्योच्चारणस्थानमोष्ठः। इति व्याकरणम्॥ (“उपूपध्मानीयानामोष्ठौ।” इति सिद्धान्तकौमुदी॥) अस्य स्वरूपं यथा,—

“मकारं शृणु चार्वङ्गि! स्वयं परमकुण्डली।
तरुणादित्यसङ्काशं चतुर्बाहूदयक्रमम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।”

इति कामधेनुतन्त्रम्॥

(वङ्गीयाक्षरे;) अस्य लेखनप्रकारः। यथा,—

“ऊर्द्ध्वाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव तत ऊर्द्ध्वगता पुनः।
ब्रह्मा शम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति॥”

अस्य ध्यानं यथा,—

“ब्रह्मां दण्डभुजां भीमां पीतलोहितलोचनाम्।
हंसाम्बरधरां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत्॥”

तत्प्रकाममन्त्रो यथा,—

“त्रिशूलसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं सृष्टिस्थं प्रणमाम्यहम्॥”

इति वर्णोद्धारतन्त्रम्॥

तस्य नामानि।

“मः कालो ब्रह्मणिः काजो महाकालो महान्तकः।
वैकुण्ठो वसुधा चन्द्री रविः पुरुषराजकः॥
कालभद्रो जया मेधा विन्ध्यदा दीपसंज्ञकः।
अतरश्च भमा मानं लक्ष्मीर्मालाधरस्तनौ॥
विषं शिवो महावीरः शशिप्रभा जलेश्वरः।
प्रमत्तः प्रियसुहृत् सर्व्वाङ्गो यज्ञिमङ्गलम्।
मातङ्गमालिनी विष्णुः अवणा भरणो वियत्॥”३६॥

इति तन्त्रोक्तवर्णाभिधानम्॥

मः, पुं, (माति निर्म्माति जगदिति। मा+कः।) शिवः। चन्द्रमाः। ब्रह्मा। इत्येकाक्षरकोषः॥ यमः। समयः। विषम्। मधुसूदनः। इति मेदिनी। मे, ९॥

मक, हसे भूषे। मतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मक्षते। उ मक्षति हारो जलम्। मत्वर्थोऽयमिति रामः। इति दुर्गादासः॥

मकरः, पुं, (मक्नातीति। क हिंसायाम्। क+अच्। सनः मनुष्याणां करः हिंसकः। यद्वा, सुखं किरतीति। सुख+कृ+कः। उभयत्रापि पृषोदरादित्वात् साधुः। इति अमरटीकायां रघुनाथचक्रवर्त्ती।) जलजन्तुविशेषः। इत्यमरः। १। १०। २०॥ (यादिनी गणाक्षरगतो जलजन्तुविशेषः।

“कुम्भीरकूर्म्मनक्राद्या ग्राहामकरशङ्खवः।
चक्रिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः॥”

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। यथास्य गुणाः।

“मनुष्याणां मकरः श्रेष्ठो दीपनो वातनाशनः।
रुचिप्रदः शुक्रकरो ग्राही श्लेष्मविकारहा।
सूचाक्षरीणां ग्रसनो गुल्मानीसारनाशनः॥”

इति हारीते प्रथमस्थाने एकादशोऽध्याये॥)

मकर इति गङ्गाया वाहनत्वेन ख्यातः। इति सारसुन्दरी। यथा। सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रामित्यादि स्मृतमङ्गाध्यानम्॥ स च कामदेवस्य ध्वजचिह्नम्। मकरध्वज इत्यमरकोषदर्शनात्। मेषादिद्वादशराश्यन्तर्गतो दशमराशिः। तत्पर्य्यायः। आकोकेरः २। अस्य अधिष्ठातृदेवता शनिरयं मकरः। उत्तराषाढायाः शेषपादत्रयं श्रवणासमुदायः धनिष्ठायाः पूर्ब्वार्द्धं इतत्रयपादेन भवति। स च पृष्ठोदयः भूमिराशिः अर्द्धघण्टकरः दक्षिणदिक्स्वामी पिङ्गलवर्णः रूक्षः भूमिचारी शूद्रोत्तमस्वभावः अल्पसन्तानः अल्पस्त्रीसङ्गः वातप्रकृतिः वैश्यवर्णः शूद्राङ्गश्च। अत्र जातस्य फलम्। सदानन्दः। पित्तमात्रभक्तः श्रवणामकरजातश्चेत् बहुविवाहः। इति जातकादयः॥ अथ, रवियुक्तमकरजातफलम्।

“सदाटनो मित्रगणो विपत्तौ
प्रयाति नूनं धनवर्ज्जितः स्यात्।
यद्यूणारश्मिर्मकरोपगः स्यात्
प्रसूतिकाले स तु भाग्यहीनः॥”

अथ चन्द्रयुक्तमकरजातफलम्।

“कलिङ्गशीतभयः किल शीतवित्-
तमरुधा सहितो मदनातुरः।
निजकुलोक्तमहर्त्तिकरः परं
हिमकरे मकरे पुरुषो भवेत्॥”

अथ मङ्गलयुक्तमकरजातफलम्।

“पराक्रमप्राप्तवरः प्रनिष्ठः
सदङ्गनाप्राप्तिवराङ्गनः स्यात्।
श्रिया समेतो मकरे महीजे
प्रसूतिकाले कुलपालकश्च॥”

अथ बुधयुक्तमकरजातफलम्।

“रिपुभयेन युतः कुमतिर्नरः
स्मरविहीनतरः परकर्म्मठः।
मकरगे सति शीतकरात्मजे
यवनतः स नतः पुरुषो भवेत्॥”

अथ गुर्व्वाश्रितमकरजातफलम्।

“न मनोरथसिद्धिमुपैति नरो
वचसामधिपे मकरोपगते।
भवमुक् कुमतिः परकर्म्मरतो
बहुलोदयुतो मदनापहृतः॥”

अथ शुक्राश्रितमकरजातफलम्।

“अतिरतिर्जनने स्वजनने नृणां
भयभयं जगना बहुचिन्तया।
भृगुसुते मकरांशगते सदा
कविजने विजनेऽपि मतिर्भवेत्॥”

अथ शनियुक्तमकरजातफलम्।

“मकरोपगतः खलु भानुसुतः
कृपया सहितो दृढमानयुतः।
वरगन्धविभूषणभूषितगात्र-
स्तरुणीरमणः पङ्कजनेत्रः॥”

इति कोष्ठीप्रदीपः॥

(वृहद्भेदः। यथा, कामन्दकीये नीतिसारे। १८। ४८।

“यायाद्वृहद्भेदेन महता मकरेण पुरो भये॥”)

मकरकुण्डलं, क्ली, (कुण्डलम् मकर इवेत्युपमितसमासः।) मकराकृतिकर्णभूषणम्। यथा,

“वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः।
महाकिरीटकटकः स्फुरन्मकरकुण्डलः॥”

इति श्रीभागवते ४स्कन्धे ४अध्यायः ३७ श्लोकः॥ स्फुरन्तौ मकरकुण्डले यस्य सः। इति तट्टीकायां श्रीधरस्वामी॥

मकरकेतनः, पुं, (मकरेण चिह्नितं केतनं ध्वजो यस्य।) कन्दर्पः। इति मौलकेतनशब्दटीकायां भरतसेनसङ्कलितम्॥

मकरध्वजः, पुं, (मकरेण चिह्नितो ध्वजो यस्य।) कामदेवः। इत्यमरः। १। १। २७॥ (यथा, माघे। ३। ६१।

“शरीरिणा जेतुशरेण यत्न
निशुम्भमूषे मकरध्वजेन॥”)

रससिन्दूरविशेषः। तस्य नामान्तरं चन्द्रोदयः। तस्य करणप्रकारो यथा,—

“पलं शुद्धं स्वर्णदलं रसेन्द्रं
पलाष्टकं षोडशगन्धकस्य।
शोधे: सुकार्पासभवप्रकल्पैः
सर्व्वं विमर्द्याथ कुमारिकाद्यैः॥
तत् काचकुम्भे निहितं सुगाढ़ि
न्यूनकर्पटैस्तद्विवरञ्चयत्त्व।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे
ततो रजः पल्लवरागरम्यम्॥
निरस्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं सोषणमिन्द्रपुष्पं
कस्तूरिकाया दश गाद्य एकः॥
चन्द्रोदयोऽयं कथितोऽस्य माषो
भक्तोऽहिवल्लीदलमध्यवर्त्ती॥”

अस्य गुणाः।

“मदोन्मदानां प्रमदाप्रसादां
गर्व्वाधिकत्वं क्षयतत्वकाङ्क्षे।
भृतं घनीभूतमतीव दुग्धं
भूनि मांसानि समञ्जकानि।
मांसानि मिष्टानि भवन्ति पञ्च-
मानन्ददायीन्यपराजि चाथ॥
वलीपलितनाशनश्चसुहृतां वयस्तम्भनः
समस्तगदखण्डनः प्रचुरयोगपद्धानवः।
यदेष रसराड्यं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो ललनहृद्यं भवेद्वल्लभः॥”

इन्द्रपुष्पं लवङ्गम्। उक्तपरिमाणलवङ्गसुमस्तस्तम्। दाडिमत्वाचाः श्लोकार्द्धांसपुष्पद्वयमेव गृह्णन्ति। पाश्चात्याः निर्गुण्डीतत्पुष्पैरेव यावदर्थं मर्द्दयन्ति। उभयथैव निष्पत्तेरदोषः।

सर्वेषेति सर्वैकान्वयः ।*। प्राख्यान्तराद्विशेषो लिख्यते ।
"रतिकाले रतान्ते च पुनः सेवो रसोत्तमः ।
स्थावरं जङ्गमविषं जङ्गमं विषवारि वा ।
न विकाराय भवति साधकेन्द्रस्य वत्सरात् ॥
म्रियुक्तयो यथाभ्यासात् म्रियुं जयति देहिनः ।
तथाय साधकेन्द्रस्य जरामरणनाशनः ॥"
प्राख्यान्तरे मकरध्वजो नाम । इति चन्द्रोदयः ।
इति रसेन्द्रचिन्तामणिः ॥

मकरन्दः, पुं, (मकरमपि अन्दति बध्नाति धारयतीति वा । अदि बन्धने + अच् ततः पृषोदरादित्वात् साधुः ।) पुष्परसः । इत्यमरः । २ । ४ । १७ ॥ (यथा, रघौ । ४ । ८८ ॥
"प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥")
कुन्दपुष्पवृक्षः । किञ्जल्के क्ली । इति राजनिर्घण्टः ॥

मकरन्दवती, स्त्री, (मकरन्दस्तत्सम्बन्धोऽस्या अस्तीति । मकरन्द + मतुप् । मस्य वः ङीप् ।) पाटलापुष्पम् । इति शब्दचन्द्रिका ॥ मधुविशिष्टे त्रि ॥

मकरव्यूहः, पुं, (मकरः मकराकारः व्यूहः ।) मकराकारसैन्यविन्यासः । इति महाभारतम् ॥

मकराकरः, पुं, (मकराणामाकरः । षष्ठीतत्पुरुषः ।) समुद्रः । इति हेमचन्द्रः । १०७४ ॥ (यथा, कथासरित्सागरे । ४३ । १३७ ।
"मकराकरसञ्जञ्च प्राप तत्तीरवर्त्मि सः ॥")

मकराकारः, पुं, (मकरस्येवाकारो यस्य ।) षड्ग्रन्थः । इति शब्दचन्द्रिका ॥ कोटाकरञ्ज । इति भाषा ॥ मकरमत्स्याकृतिश्च ॥

मकरध्वजः, पुं, (मकरस्तदाकारोऽङ्कचिह्नं यस्य ।) कामदेवः । (मकरो ध्वजेऽस्य ।) समुद्रः । इत्यजयपालः ॥

मकरालयः, पुं (आलीयते अस्मिन्निति आलयः । मकराणामालयः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १४ । ७६ । १२ ॥
"ततस्तं वारयं कृत्वं परजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥")

मकरी, [न्] पुं, समुद्रः । मकरोऽस्यास्तीति-युत्पत्त्या इनप्रत्ययनिष्पन्नोऽयम् ॥

मकुटं, क्ली, (मकुटे अनेनेति । मकि भूषणे + बाहुलकात् उटः । आगमशास्त्रस्यानित्यत्वात् न तुम् ।) सुकुटम् । इति भरतधृतहिरूपकोषः ॥

मकुनिः, स्त्री, (मकि + उनिः । पृषोदरादित्वात् साधुः ।) मूदगशासनम् । इति त्रिकाण्डशेषः ॥

मकुरः, पुं, (मकुटे इति । मकि + "मकुर दकुरौ ।" उणा० । १ । ४१ । इति उरच् ।) कुलालदण्डः । वकुलः । कोरकः । आदर्शः । इति हेमचन्द्रः । ३ । ३४८ ॥

मकुलः, पुं, क्ली, (मकुटे भूषयति वृक्षम् । मकि + बाहुलकादुलच् ।) वकुलः । मकुलः । इति शब्दरत्नावली ॥

मकुष्कः, पुं, (मकि भूषायां + उः । पृषोदरादित्वात् साधुर्मकुः । मकुं भूषां लकति प्रतिहन्तीति । लक + पचाद्यच् ।) वनजातसुद्गः । मोठ इति हिन्दी भाषा ॥ तुगानि इति बङ्गभाषा । तत्पर्य्यायः । मयष्टः २ वनसुद्गः ३ क्षमीलकः ४ अन्नतः ५ अरण्यसुद्गः ६, वल्लीसुद्गः ७ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । रक्तपित्तज्वरदाहहरत्वम् । पथ्यत्वम् । रुचिकारित्वम् । सर्व्वदोषजयकारित्वञ्च । इति राजनिर्घण्टः ॥
"मकुष्टो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निविष्मधुरः पाके क्षमिक्षज्ज्वरनाशनः ॥"
इति भावप्रकाशः ॥

मकुष्टः, पुं, (मकुष्टे मक्नुते इति वा । बाहुलकात् उः मकुः । तिष्ठतीति स्था + कः स्थः । मकुः स्थासौ स्थश्चेति मकुष्टः । पूर्व्वपदादिति । ८ । ३ । १०६ । षत्वम् ।) ग्रन्थिभेदः । मन्थरे त्रि । इति मेदिनी । ष्ठे, १६ ।
"मकुष्टो वनसुद्गः स्याच्चकुष्टकसुकुष्टकौ ।
(ग्रन्थिभेदार्थे यथा, पद्यांथो गुणाश्च ।
मकुष्टो वातलो ग्राही कफपित्तहरो लघुः ।
वह्निविष्मधुरः पाके क्षमिक्षज्ज्वरनाशनः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मकुष्टकः, पुं, (मकुष्ट + स्वार्थे कन् ।) वनसुद्गः । इति भरतः ॥ (तथाच पर्य्यायाः ॥
मकुष्टो वनसुद्गः स्याच्चकुष्टकसुकुष्टकौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अ० ।
"मकुष्टकाः क्षमिकराः कलायाः प्रचुरानिलाः ॥")

मकुलकः, पुं, (मकि मण्डने + पिच्छादित्वादूलच् बाहुलकादनुषङ्गलोपः । स्वार्थे कन् ।" इत्यमरटीकायां रघुनाथः ।) सुकुलकः । इत्यमरटीकायां रमानाथः ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"लघुर्दन्ती विशल्या च स्यादुदुम्बरपर्ण्यपि ।
तर्पणैरण्डफला शीता प्रेमघण्टा व्रणप्रिया ।
वाराह्यौ चैव कथिता निकुम्भस्य मकुलकः ॥")

मक्ष, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) कोपधः । ङ मक्षते । इति दुर्गादासः ॥

मक्षक्षः, पुं, (मक्षं गमनं आत्मनिकगतिं मरणं क्षाति आदत्ते योजयतीत्यर्थः । क्षा + कः पृषोदरात् लकारागमे साधुः ।) मूलरोगविशेषः । यथा,
"क्षतायां वृच्छिरोवस्तिमूलं मक्षक्षसंज्ञितम् ।
यवक्षारं पिबेत्तत्र मस्तुमोण्डोदकेन वा ॥"
इति चक्रपाणिदत्तः ॥

मक्षुलं, क्ली, (मक्ष् + उलच् ।) शिलाजतु । इति शब्दरत्नावली ॥
(विवरणमस्य शिलाजतुशब्दे ज्ञातव्यम् ॥)

मक्षोलः, पुं, खटिका । यथा,—
"मक्षोलो घर्षणेखा च कठिनी कक्कटी खटी ।
इति श्वेतवर्गे त्रिकाण्डशेषः ॥

मख, शोषे । संज्ञाते । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मक्षति । इति दुर्गादासः ॥

मखः, पुं, (मख् + घञ् ।) अदोषाच्छादनम् । इति हारावली ॥ क्रोधः । यज्ञः । इति पूर्व्वोक्तधात्वर्थदर्शनात् ॥

मखवीर्य्यः, पुं, (मखं निर्विघ्नं वीर्य्यमस्य ।) प्रियालवृक्षः । इति राजनिर्घण्टः ॥

मक्षिका, स्त्री, (मक्षति भक्ष्यायते इति । मक्ष + "इगिमक्षिभ्यां सिकन् ।" उणा० । ४ । १५३ । इति सिकन् ।) कीटविशेषः । माछि इति भाषा ॥ (यथा, भागवते । ५ । २४ । ४२ ।
"आसंभरस्येह राजर्षेर्मघवापि महात्मनः ।
मानुवर्त्मार्हति नृपो मक्षिकेव गतत्रपः ॥")
तत्पर्य्यायः । मक्षीका २ भक्षः ३ माक्षिका ४ गन्धलोलुपा ५ पतङ्गिका ६ पत्तिका ७ । इति शब्दरत्नावली ॥ अन्तोत्पन्ना ८ वमनीया ९ पलङ्कषा १० । इति राजनिर्घण्टः ॥ नीला मक्षिका वर्ब्बरा ११ । इत्यमरः । २ । ५ । २६ ॥ तन्नामगुणधर्म्मो यथा,—
"त्रिफलाक्षौद्रपुष्पाणि भल्लातकगुडूचीपकम् ।
लाक्षालक्षरसश्चैव विड्भङ्गश्चैव गुग्गुलुः ।
एतैर्धूपैर्मक्षिकाणां मधुकानां विनाशनम् ॥"
इति गारुडे १८१ अध्यायः ॥

मक्षिकामलं, क्ली, (मक्षिकाणां मधुमक्षिकाणां मलम् ।) सिक्थकम् । इति राजनिर्घण्टः ॥ (विशेषोऽस्य सिक्थशब्दे ज्ञेयः ॥)

मक्षीका, स्त्री, (मक्षिका । पृषोदरात् दीर्घः ।) मक्षिका । इति राजनिर्घण्टः ॥ (रोगविशेषे शास्त्रा अरिष्टत्वं यथा,—
"स्नानानुलिप्तगात्रेऽपि यस्मिन् पथ्यन्ति मक्षिकाः ।
स प्रमेहेण संस्पर्शं प्राप्यते नेव हन्यते ॥"
इति चरके इन्द्रियस्थाने पञ्चमेऽध्याये ॥)

मख, सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मखति ॥

मख, ङ सर्पणे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ङ मखते इति दुर्गादासः ॥

मखः, पुं, (मखन्ति गच्छन्ति देवा अत्रेति । मख सर्पणे + "इगुपधज्ञ ।" ३।१।१३५ । इति कप् । संज्ञापूर्व्वकत्वान्न वृद्धिः । यद्वा, पुंसीति षः ।) यज्ञः । इत्यमरः । २ । ७ । १६ ॥ यथा, देवीभागवते । १ । १८ । २१ ।
"ज्ञात्वा तस्य मखं पूर्णं करिष्यामि तवापि वै ।"

मखजाता, [ङ] पुं, (जायते स्मेति जनेरिड्ढच् । मखस्य जाता । विश्वामित्रमखरक्षणात्तथात्वम् ।) रामः । यथा,—
"रावणारिर्मखजाता सीतायाः पतिरित्यपि ।"
इति शब्दरत्नावली ॥

मखवह्निः, पुं, (मखस्य वह्निः मखाराधौ वह्निरिति यावत् ।) यज्ञाग्निः । इति चटावरः ॥

मखानलः, पुं, (मखस्य अनलः मखसाध्योऽनल इत्यर्थः।) यज्ञाग्निः। तत्पर्य्यायः। मखावीरः २। इति त्रिकाण्डशेषः॥

मखान्नं, क्ली, (मखे मखकाले भोज्यमन्नम्।) खाद्यबीजभेदः। आखाना इति भाषा॥ तत्पर्य्यायः। पद्मबीजाभम् २ पानीयफलम् ३।

"मखान्नं पद्मबीजस्य गुणैस्तुल्यं विनिर्दिशेत्।"

इति भावप्रकाशः॥

मखासुहृत्, [द्] पुं, शिवः। मखस्य दक्षयज्ञस्य असहृत् प्रभुः नाशक इत्यर्थः। इति हेमचन्द्रः। २००॥

मग इ सर्पणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) इ, मङ्गति। इति दुर्गादासः॥

मगधः, पुं, (मगि+अच्। पृषोदरादित्वान्नियन्नः। मगं दोषं दधाति। धा+"आतोऽनुपसर्गे।" ३।२।३। इति कः। यद्वा, कङ्कादिमगध+अच्।) कौकटदेशः। अधुना वेहारान्तर्देशस्य दक्षिण भागः। तद्देशस्थे पुं भूम्नि। इति शब्दरत्नावली॥ (यथा, महाभारते। ८। ५५। ८८।

"इङ्गितज्ञाश्च मगधाः प्रेषितज्ञाश्च कोशलाः।
अहोक्ताः कुरुपाञ्चालाः शाल्वाः क्षत्रोपजीविनः॥")

बन्दी। इति हेमचन्द्रः। ७८५॥

मगधा, स्त्री, (मगधस्यापत्यमिव देशः उत्पत्तिस्थानत्वेनास्त्यस्या इत्यर्शआदिभ्योऽच्। स्त्रियां टाप्।) पिप्पली। इति रत्नमाला॥ (यथा, सुश्रुते कल्पस्थाने सप्तदशाध्याये।

"हरेणुमगधाजाम्बि मञ्जिलायष्टिदन्तिनम्॥")

मगधेश्वरः, पुं, (मगधस्य तदाख्यदेशस्येश्वरः।) जरासन्धराजः। इति हेमचन्द्रः॥ मगधदेशाधिपमात्रे च॥ (यथा, रघौ। ६। २०।

प्राक्सन्निकर्षं मगधेश्वरस्य
नीत्वा कुमारीमवदत् सुनन्दा॥")

मगधोद्भवा, स्त्री, (मगधे उद्भवो यस्याः।) पिप्पली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते कल्पस्थाने एकादशाध्याये।

"पक्वं हरीतकीं मगधोद्भवानां-
मादाय कल्कं फलपाककाले।")

मगधदेशजाते त्रि॥

मग्नः, त्रि, (मस्ज्+क्तः। "ओदितश्च।" ८।२।४५। इति निष्ठातकारस्य नत्वम्। "स्कोः संयोगाद्योरन्ते च।" ८। २। २९। इति सलोपः। चोः कुत्वञ्च।) ज्ञातः। जलान्तःप्रविष्टः। डोबा इति भाषा॥ (यथा, देवीभागवते। १।६।२५।

"मैत्रेय यदहं जातो मग्नायां जले स्थितौ॥")

मस्जधातोः कर्मणि क्तप्रत्ययेन निष्पन्नः॥

मघ, इ ङ मूर्खे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक० सेट्।) इ, मङ्घते। इति दुर्गादासः॥

मघ, इ ङ दैत्यदानार्थयोः। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-द्यूतक्रीड़ादौ अक०-अतौ निष्ठायां आरम्भे च सक०-सेट्।) दैत्यदानक्रियाऽत्यन्तकीड़नादिः। इ मङ्घते इ मङ्घते अर्थैः क्षितवः। अध्यर्थो मतिनिन्दारत्नजवाः। दैत्यदानयोरेवायमिति केचित्। इति दुर्गादासः॥

मघः, पुं, (मघि+अच्। पृषोदरात् साधुः।) द्वीपविशेषः। इति मेदिनी। घे, ४॥ देशविशेषः। स तु मगनामकब्रह्मेच्छानां स्थानम्। पुण्यविशेषे क्ली। इति शब्दरत्नावली॥ (क्लीं मंहनीयं धनम्। यथा, ऋग्वेदे। ७। २१।७।

"इन्द्रो मघानि दयते विचर्षणिरिन्द्रं वाजस्य ऊहति
सवीतवे॥"

"मघानि मंहनीयानि धनानि।") इति तद्भाष्ये सायणः।)

मघवती, स्त्री, (मघवत्+ङीप्। इन्द्राणी। इति मुग्धबोधव्याकरणम्॥

मघवा, [न्] पुं, (मङ्घते पूज्यते इति। मघपूजायाम्। "अनुदात्तङित आत्मनेपदम्।" उणा०। २। १५८। इति कनिन्। निपातनात् हस्वः यद्वुगागमश्च।) इन्द्रः। इत्यमरः। १। १। ४४॥ (यथा, रघौ। १। २६।

दुदोह गां स यज्ञाय सस्याय मघवा दिवम्।
सम्यग्विनिमयेनोभौ दधतुर्भुवनद्वयम्॥")

जिनानां द्वादशचक्रवर्त्तिनामष्टमतचक्रवर्त्तिविशेषः। इति हेमचन्द्रः॥ (सप्तमद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। २८।

"मघवा सप्तमे प्राप्ते वशिष्ठस्त्वष्टमे मुनेः।")

मघवान्, [न्] पुं, (भघवत्। "मघवा बहुलम्।" ६। ४। १२८। इति पक्षे ल-आदेशः। ऋदुदित्। इन्द्रः। इत्यमरटीकायां रमानाथः। व्याकरणञ्च॥ (यथा, महाभारते। ३।४५।१०।

"एको वै रक्षिता चैव त्रिदिवं मघवानिव॥")

दनोः पुत्रभेदः। यथा, मात्स्ये। ६। १८।

"मरीचिर्मघवांश्चैव दरागर्भाङ्गिरास्तथा।")

मघा, स्त्री, (मह्+घः। ह्रस्वः पक्षम्।) औषधविशेषः। इति धरणिः॥ अश्विन्यादिसप्तविंशनक्षत्रान्तर्गतदशमनक्षत्रम्। तच्च लाङ्गलाकृति पञ्चतारात्मकम्। मघाऋक्षमिति। इति केचित्। अस्याधिष्ठातृदेवता पितरः। यथा,—

"लाङ्गलाकृतिभि पञ्चतारकै
श्चारुभिर्भ्रि पितृभे भिरीरितै।
नीलनीरदविनिर्दिशोऽवने!
वृश्चिकाद्विगलितं कलाग्रतम॥१।४०॥"

इति कालिदासकृतराभिज्ञानशाकुन्तलम्॥

तस्य जातफलम्।

कठोरचित्तः पितृमाद्रभक्त-
स्त्रीद्वेषभावश्चलनवत्रविद्यः।
पैशुन्यभं यस्य मघानघः स्या-
ज्जनिः सदारातिविनाशदक्षा॥"

इति कोष्ठीप्रदीपः॥

मघाशब्दो बहुवचनान्तोऽपि दृश्यते। यथा,—

"लग्नपञ्चे त्रयोदश्यां मघाखिन्दुः करे रविः।
यदा तदा गजच्छाया आर्द्रे पुण्यैरवाप्यते॥

अपि च।

नवोदके नवाग्नौ च यज्ञप्रच्छादने यथा।
पितरः सृष्टयन्नमष्टकासु मघासु च॥"

इति तिथ्यादितत्त्वम्॥

एकवचनान्तप्रयोगो यथा,—

"मघायां पिण्डदानेन ज्येष्ठपुत्रो विनश्यति।"

इति मलमासतत्त्वम्॥

(अस्यां व्याधिजननेऽरिष्टत्वं यथा,—

"मघा भरण्यार्द्रासु मूले वा ज्वरितोऽपि वै।
म्रियमाणश्च सोऽपि नात्र कार्य्या विचारणा॥
"नवरात्रं तथाश्लेषा मघाक्षेति यमालयम्॥"

इति ज्वारीते द्वितीये स्थाने चतुर्थेऽध्याये॥)

मघात्रयोदशी, स्त्री, (मघा दशमनक्षत्रम्। मघायुक्ता त्रयोदशी। इति मध्यपदलोपी कर्म्मधारयः।) मघानक्षत्रयुक्तभाद्रशुक्लत्रयोदशी। यथा। प्रौष्ठपदर्क्षे कृष्णत्रयोदश्यां मघायुक्तायां व्यतिपातयुतकिञ्चिदूनत्रयेण आर्द्रमावश्यकम्। श्राद्धादिविधिवाक्येषु नक्षत्रविशिष्यते। ततश्च केवलत्रयोदशी केवलमघा आर्द्रार्थवादा अपि कुतपविशिष्टविधिप्राप्तकर्म्मणो नित्यत्वबोधका न तु केवलविध्यन्तरकल्पका गौरवात्। तथा च ब्रह्मः।

"प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम्।
प्राप्य आर्द्रं हि कर्त्तव्यं मधुना पायसेन च॥"

मनुः।

"यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम्।
तदप्यक्षयमेव स्यादर्द्रासु च मघासु च॥"

विष्णुधर्म्मोत्तरे।

"प्रौष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतांस्तु आर्द्रकालान् वै नित्यानाह प्रजापतिः॥"

ब्रह्मातपः।

"पितरः सृष्टयन्नमष्टकासु मघासु च।
तस्मादन्यात् सदोद्युक्तो विधिवत्तु श्राद्धवित् च॥"

अन्नमाचष्टे: मनुवचने यत्किञ्चित् श्रुतेश्च ब्रह्मोक्तपायसः फलातिशयार्थः गुडविशेषे फलविशेषः स्यादिति न्यायात्। यत्तु विष्णुधर्म्मोत्तरे।

"मघायुक्ता च तत्रापि ब्रह्मा राजंस्त्रयोदशी।
तत्राश्वत्थं भवेत् श्राद्धं मधुना पायसेन च॥
तत्र अश्वत्थकल्पपक्षे। अत्र यत् श्राद्धं तन्मधुयोगेन वा अक्षयं भवेत्। अतएव मनुवचने यत्किञ्चिन्मधुना मिश्रमित्यनेन मधुमात्रयुक्तस्य सत्त्वम्। अतोऽत्र सुतरां मूलस्याधिकारः॥*॥
अत्र गजच्छायायोगे फलातिशयः। तथा च चिन्तामणौ स्मृतिः।

"लग्नपञ्चे त्रयोदश्यां मघास्विन्दुः करे रविः।
यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते॥"

करे हस्तनक्षत्रे। कन्यादशमराशौ यथादत्रयोविंशांशः इति यावत्॥*॥ अविभक्तानामप्यत्र पृथक् श्राद्धमावश्यकम्। यथा, श्राद्धचिन्तामणौ स्मृतिः।

"विभक्ता अविभक्ता वा कुर्युः श्राद्धमदैविकम्।
मघासु च ततोऽप्यत्र नाधिकारः पृथग्विधा॥"

अरैषिकं प्रत्याब्दिकेकोद्दिष्टम्। अन्यत्र ज्ञाप्यादौ नाधिकारः न नित्याधिकारः सपिण्डीकरणान्तानि यानि श्राद्धानि षोढ़ा। पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचिदित्यापिना वसुचित्तस्यापृथग्द्रव्यस्य पुंसः सपिण्डीकरणान्तानीति विशेषणात्तदुत्तरश्राद्धानां पृथक्त्वमपि प्रतीयते॥ * ॥ मघाश्रयोदशीनिमित्तके श्राद्धे पुत्रवता पिण्डा न देयाः।

"भौमङ्गीं तिथिमासाद्य यावच्चन्द्रार्कसङ्गमम्।
तत्रापि मघती पूजा कर्त्तव्या पितृदैवते।
श्राद्धे पिण्डप्रदानन्तु ज्येष्ठपुत्री विवर्जयेत्॥"

इति देवीपुराणात्। भौमङ्गी पञ्चमी। चन्द्रार्कसङ्गमोऽमावास्या। पितृदैवते श्राद्धे मघायाम्।

ज्ञातातपः।

"पिण्डनिर्व्वापरहितं यत्तु श्राद्धं विधीयते।
स्वधावाचनलोपोऽत्र विकिरस्तु न लुप्यते॥
अक्षय्यं दत्तिका खस्ति सौमनस्यं यथाक्षिति।

इति तिथ्यादितत्त्वम्॥

मघाभवः, पुं, (मघायां भवः।) शुक्रग्रहः। इति हेमचन्द्रः॥ मघाजन्मजाते त्रि॥

मघाभूः, पुं, (मघायां मघासमीपस्थपूर्व्वफल्गुन्यां भवतीति भू+क्विप्।) शुक्राचार्य्यः। इति त्रिकाण्डशेषः॥

मघी, स्त्री, (मघा तदाख्यनक्षत्रं उत्पत्तिकारणतयास्त्यस्या इति। मघा+अर्शआद्यच्। गौरादित्वात् ङीष्।) धान्यभेदः। इति मेदिनी। षे, ७॥

मघोनी, स्त्री, (मघोनः पत्नीति। मघवन्+स्त्रियां ङीष्। वकारस्य च सम्प्रसारणम्।) इन्द्राणी। इति शब्दचन्द्रिकाकारः॥

मङ्कुरः, पुं, (मङ्कयति भूषयतीति। मङ्कि+बाहुलकादुरच्।) सुकुरः। इत्यमरटीकायां भरतः॥

मङ्क्ता, [क्तृ] त्रि, (मज्जति स्नाति इति। मज्ज्+तृच्। "मसृजिनशोर्झलि।" ७। १। ६०। इति नुम्।) स्नातकर्त्ता। इति मज्जधातोः कर्त्तरि तृनुप्रत्ययेन निष्पन्नम्॥

मङ्गः, पुं, (मङ्गति सर्पतीति मगि+अच्।) नौकाग्निः। इति हेमचन्द्रः॥

मङ्गलं, क्ली, (मङ्गति हितार्थं सर्पति मङ्गति दुरदृष्टमनेनाख्यादिति। मगि+"मङ्गेरलच्च।" उणा० ५। ७०। इत्यलच्।) अभिप्रेतार्थसिद्धिः। इति तिथ्यादितत्त्वम्॥ तङ्गति, त्रि। इत्यमरः॥ यथा, रामायणे। २। २३। २०।

"मङ्गलैरभिषिक्तश्च तत्र त्वं आप्तवो भव॥"

तत्पर्य्यायः। भावुकम् २ भव्यम् ३ कल्याणम् ४ भविकम् ५ शुभम् ६। क्षेमम् ७ प्रशस्तम् ८ भद्रम् ९ वरेण्यम् १० शिवम् ११ अरिष्टम् १२ कुशलम् १३ हितम् १४ मदम् १५ शुक्लम् १६। इति शब्दरत्नावली॥ (यथा, भागवते। ५। १३। ३४।

"मङ्गलाय च लोकानां क्षेमाय च भवाय च।"

"कल्याणं मङ्गलं क्षेमं भद्रं शिवं शुभम्।

इति वैद्यकरत्नमालायाम्॥

श्रिखिद्वयगजगोधा रासभो भृङ्गराजो
मुखरपिककपोतो पोतकी शूकरी वा।
तदनु विहगराजो मङ्गलाशंसिनः स्युर्
वदति शकुनवेत्ता वामतो निर्गमे वः॥"

इति हारीते द्वितीयस्थाने सप्तमेऽध्याये।)

सर्व्वार्थरत्नम्। इति मेदिनी। ले, १२०॥*॥

मङ्गलजनकदध्यादि। यथा,—

"पूर्णकुम्भं द्विजं वेश्या शुक्लधान्यञ्च दर्पणम्।
दध्याज्यं मधु लाजञ्च पुष्पं दूर्व्वाक्षतं सितम्॥
वृषं गजेन्द्रं तुरगं ज्वलदग्निं सुवर्णकम्।
प्रशस्तञ्च परिपक्वानि फलानि विविधानि च॥
प्रतिपुत्रवतीं नारीं प्रदीपं मणिमुत्तमम्।
मुक्तां प्रसूनमालाञ्च सद्योमांसञ्च चन्दनम्॥
इदमुक्तानि वस्तूनि मङ्गलानि पुरो मुनेः।
प्रशस्तं नकुलं चाषं शुभं वामे शुभावहम्॥
राजहंसं मयूरञ्च खञ्जनञ्च शुकं पिकम्।
पारावतं शुक्लचित्रं चक्रवाकञ्च मङ्गलम्॥
क्षीरसारञ्च सुरभीं चमरीं श्वेतचामरम्।
धेनुं वत्सप्रयुक्ताञ्च पताकां दधिपूर्णे शुभाम्॥
नानाप्रकारवाद्यञ्च शुश्राव मङ्गलध्वनिम्।
हरिशब्दस्य सङ्कीर्त्तं घण्टाशङ्खध्वनिस्तथा।
दृष्ट्वा श्रुत्वा स जगाम हर्षञ्च लेभे मन्दिरम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकागमनं नाम १६ अध्यायः॥ * ॥ अपि च।

"दृश्यं वर्ण्यञ्चैव मङ्गलार्हं शुभप्रदम्।
वाञ्छाफलप्रदं रम्यं पुरो मङ्गलसूचकम्॥
वामे भूर्व्वं घृतां पूर्णकुम्भं नकुलमेव च।
पतिपुत्रवतीं साध्वीं दिव्याभरणभूषिताम्॥
शुक्लपुष्पञ्च माल्यञ्च धान्यञ्च खञ्जनं शुभम्।
दक्षिणे ज्वलदग्निञ्च विप्रञ्च वृषभं गजम्॥
वत्सप्रयुक्तां धेनुञ्च श्वेताभं राजहंसकम्।
धैर्य्यञ्च पुष्पमालाञ्च पताकां दधि पायसम्॥
मणिं सुवर्णं रजतं मुक्तामाणिक्यमौक्तिकम्।
सद्योमांसं चन्दनञ्च माधवीकं घृतमुत्तमम्॥
क्षीरसारं फलं लाजान् स्निग्धान्नं दर्पणन्तथा।
विचित्रं विप्रालञ्च सुदीप्तां प्रतिमान्तथा॥
शुभं दृश्यं देवं तं पक्वबिल्वं त्रिलोचनम्।
शुक्लस्फटिकसङ्काशं नागराजैर्विराजितम्॥
शुक्लोत्पलं पद्मवनं शुक्लचित्रञ्च कोरकम्।
मार्জারं पर्व्वतं मेघं मयूरशुकसारसम्॥
शुक्लकोकिलवाद्यानां ध्वनिं शुश्राव मङ्गलम्।
विचित्रं ज्ञानसङ्कीर्त्तं हरिशब्दं जयध्वनिम्॥
एवंभूतं शुभं दृष्ट्वा श्रुत्वा प्रहृष्टमानसः।
प्रविवेश हरिं स्मृत्वा पुण्यं वृन्दावनं वनम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७० अध्यायः॥

अन्यच्च।

"लोकेऽस्मिन् मङ्गलाश्चारो ब्राह्मणो गौर्हुताशनः।

शिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
एतानि शुचिसंयुक्तानि मङ्गलेष्वर्चयेन्नरः।
प्रदक्षिणन्तु कुर्व्वीत तथा चायुर्न क्षीयते॥
दूर्व्वा दधि घृतं पद्मं सुवर्णम्।
धेनुं सवत्सां वृषभं सुवर्णम्॥
ब्रह्मोमयं खस्तिकमक्षतानि
लाजा मधु ब्राह्मणकन्यकाश्च॥
श्वेतानि पुष्पाणि तथा शमीञ्च
हुताशनं चन्दनमर्कबिम्बम्।
अश्वत्थवृक्षञ्च समालभेत
ततश्च कुर्य्याद्विजजातिधर्म्मम्॥"

इति मात्स्ये शक्तमहातन्त्रे ४६ पटलः॥

वर्णभेदे मङ्गलप्रश्नभेदो यथा,—

"ब्राह्मणान् कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव तु॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

मङ्गलः, पुं, (मगि+"मङ्गेरलच्च।" उणा० ५। ७०। इति अलच्।) यहविशेषः। तत्पर्य्यायः। अङ्गारकः २ भौमः ३ कुजः ४ वक्रः ५ महीसुतः ६ वर्षार्थिः ७ लोहिताङ्गः ८ क्षोणिजः ९ क्रूराख्यकः १०। इति शब्दरत्नावली॥ आरः ११ क्रूरदृक् १२ आवनेयः १३। इति ज्योतिषतत्त्वम्॥ स च रक्तगौरमिश्रितवर्णः। दक्षिणदिक्पुरुषपक्षियोनिसामवेदसमोगुणनिरूक्षरसमेषराशिप्रजालावन्तिदेशानामधिपतिः। मेषवाहनः। चतुरङ्गुलप्रमाणः। आरक्तमाल्यवसनः। भरद्वाजगोत्रसम्भवः। चतुर्भुजः शक्तिवराभयगदाधारी। स्कन्दाभिसृष्टः अस्याधिदेवता कार्त्तिकेयः। प्रत्यधिदेवता पृथिवी। स तु पित्तप्रकृतिः। युवा। क्रूरः वनचारी। मध्याह्नकाले प्रबलः। गैरिकादिधातुस्वामी। चतुष्पदानां प्रभुः। चतुष्कोणाकृतिः। सुवर्णकारादीनां स्वामी। ज्वलितभूमिचारी। किञ्चिदङ्गहीनः। कटुरसप्रियः। ताम्रवर्णरक्तध्वजस्वामी च। इति यहयोगतत्त्वलघुजातकादयः॥ * ॥ अस्योत्पत्तिर्यथा,—

"उपेन्द्रबीजात् पृथ्व्यान्तु मङ्गलः समजायत।
वसुन्धरायां बलवान् तस्मै आत्मासुमर्पयेः॥

सौनिरुवाच।

उपेन्द्ररूपमालोक्य कामार्त्ता च वसुन्धरा।
विधाय सुन्दरीं वेषमतना प्रौढ़यौवना॥
सस्मिता तस्य तल्पे च सहसा वसुपस्थिता।
सुरम्यां मालतीमालां ददौ तस्मै वरानना॥
उपेन्द्ररूपञ्च तां ज्ञात्वा कामी मन्मथपीड़ितः।
नानाप्रकारशृङ्गारं चकार च तया सह॥
तदङ्गसङ्गमासक्ता सर्व्वां प्राप सती तदा।
स्मरेव निर्दिता वाणी वीर्य्याधानञ्चकार हरौ॥
विधाय तत्र रहसि जगाम पुरुषोत्तमः।
उर्व्वशीं पथि गच्छन्तीं बोधयामास तां मुने!
सा च पप्रच्छ वृत्तान्तं कथयामास भूसुताम्
वीर्य्यं सम्भरणं कर्त्तुं वा चाशक्ता च दुर्ब्बला।
प्रवालखण्डरे धात्री वीर्य्याधानं चकार वा।

तेन प्रवालवर्णश्च कुमार: समजायत।
तेजसा कर्मणश्चैव नारायणसुतो महान्॥"
इति ब्रह्मवैवर्तपुराणे, ६ अध्याय:॥
अपि च।
"नमोऽङ्गारकजीवो हि वसुजश्च महीसुत:।
उत्पत्तिञ्चास्य वक्ष्यामि यथायं भूसुतोऽभवत्॥
पुरा हि श्वसनो विष्णो: स्वेदबिन्दु: प्रपात ह।
महाम्बुनि: कुमारोऽसौ लोहिताङ्गो महो-
दरात्॥
जात: खेदेन मेदिन्या वर्द्धित: पृथिवीपते!।
तपश्चाराध्य ब्रह्माणं ग्रहत्वमुपसेदिवान्॥"
इति प्राग्रे सर्गखण्डे १२ अध्याय:॥
स्कन्दश्च।
"पुरा दक्षविनाशाय कुपितस्य त्रिशूलिन:।
अपतद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटज:॥
भित्त्वा समस्तपातालानदहत् सप्त सागरान्।
अनेकवह्निसंयोगो ज्वलज्ज्वलनभीषण:॥
वीरभद्र इति ख्यात: करपादायुतैर्युत:।
हत्वा स यज्ञमथनं पुनर्भूतलसम्भव:॥
त्रिशूलमिदधन् भूय: शिवेन विनिवारित:।
ज्ञानं त्वया वीरभद्र! दत्तमस्मिन्महाक्रतौ॥
इदानीमखिलमेतेन लोकदाहेन कर्म्मणा।
प्राणिप्रदानात् सर्व्वेषां महतां प्रथमो भव॥
प्रसिद्धिस्ते जगा: पूजां करिष्यन्ति मम क्रमे।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज!॥
देवलोके द्वितीयश्च तव रूपं भविष्यति।
ये च त्वां पूजयिष्यन्ति मर्त्त्यास्तेह नरा:।
रूपमारोग्यमैश्वर्य्यं तेषामत्यं भविष्यति॥
एवमुक्त्वाऽथ सा प्राप्तिमगमत् कामरूपधृक्।
संजातस्तनयस्तस्माद्राजन्! यज्ञत्वमगमत पुन:॥"
इति मत्स्यपुराणे अङ्गारकजनं नाम १८८ अ:॥
कल्पभेदे अन्धकासुरवधकाले शम्भोरुत्पत्तिर्यथा,
"यो भूम्यां पतितश्चित्र! स्वेदबिन्दु: शिवान-
नात्।
तस्मादङ्गारपुञ्जाभो बालक: समजायत॥
स बालस्तत्क्षितौ रौद्रे ववौ रुधिरमात्मकम्।
कम्पा चोत्पेदिरे जाता सास्रसिलिलिहोऽद्भुता॥
तमसामाद्य बालार्कप्रभं भैरवमूर्त्तिमान्।
प्रादुरो वरदो लोकमयोऽथाय ववौ मरुत्॥
त्वां पूजयिष्यन्ति सुरा ऋषय: पितरस्तथा।
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि!॥
त्वां स्तोष्यन्ति सदा देवि! बलिपुष्पोत्करै: करै:।
चार्च्चनैरिति शुभं नाम यस्मादधिरचार्च्चना॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतानुयाता हरिचन्दनेवासिनी।
महीं समस्ताद्विचचार सुन्दरी
स्वयं गता शैलसमाश्रमोत्तमम्॥
तस्यां गतायां वरद: कुजस्य
प्रादाद्वरं सर्व्ववरोत्तमं यत:।
यद्वाञ्छितं जगत: शुभाशुभं
भविष्यति ह्यद्भुतं महात्मनाम्॥
इति वामनपुराणे ९० अध्याय:॥

अस्य स्तोत्रं यथा,—
"धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम्।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम्॥"
इति आशौचनवमहस्तोत्रान्तर्गतम्॥
ऋणपरिशोधनार्थस्तोत्रं यथा,—
"मङ्गलो भूमिपुत्रश्च ऋणहर्त्ता धनप्रद:।
स्थिरासनो महाकाय: सर्व्वकर्म्मविरोधक:॥
रोहितो लोहिताक्षश्च सामगानां कृपाकर:।
धरात्मज: कुजो भौमो भूमिजो भूमिनन्दन:॥
अङ्गारको यमश्चैव सर्व्वरोगापहारक:।
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रद:॥
एतानि कुजनामानि प्रातरुत्थाय य: पठेत्।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम्॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभक्तिभा।
मङ्गलं पूजयेद्यस्तु मङ्गलेऽहनि सर्व्वदा॥
ऋणरेखा: प्रकर्त्तव्या अङ्गारेण सदा बुधै:।
प्रोच्छ्येद्वामपादेन ऋणं तस्य विनश्यति॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे।
पुत्रपौत्रप्रदात्रे च मङ्गलाय नमो नम:॥
ऋणार्त्तो ह्यहमायातो ऋणं छिन्धि नमोऽस्तु ते॥
एतत् श्रुत्वा न सन्देहो ऋणं हत्वा धनी भवेत्।
इति स्कन्दपुराणम्॥ * ॥
मङ्गलवारे जातस्य फलं यथा,—
"उग्र: प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचा: सरोष:।
मत्तान्वित: शूरगणप्रणेता
कुजस्य वारे प्रभवो मनुष्य:॥"
इति कोष्ठीप्रदीप:॥
मङ्गलचण्डिका, स्त्री. (मङ्गला मङ्गलदायिका चासौ चण्डिका चेति। यद्वा, रुद्रौ मङ्गला प्रलये चण्डिका। अथवा मङ्गले चण्डिका दत्ता।) मङ्गलचण्डी। यथा, कालिकापुराणे।
"एषा ललितकान्ताख्या देवी मङ्गलचण्डिका।
वरदाभयहस्ता च द्विभुजा गौरदेहिका॥
रक्तपद्मासनस्था च रक्तकुङ्कुमलेपिता।
रक्तकौशेयवस्त्रा च स्मितवक्त्रा शुभानना॥
नवयौवनसम्पन्ना चारुनेत्री ललितप्रभा।
उमया भाषितं मन्त्रं यत् पूर्व्वमेकमक्षरम्॥
मङ्गलस्यास्तु सञ्ज्ञेयं तेन देवीं प्रपूजयेत्॥"
एकमक्षरं मन्त्रबीजरूपम्।
"अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विशेषत:।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकाम्॥
य: पूजयेद्भौमदिने शुभर्क्षे वाचने: शुभाम्।
सततं साधक: सोऽपि कामानिष्टमवाप्नुयात्॥*॥
मङ्गलवारे ह्यष्टमीचतुर्दश्यौ चेत् पुण्यतरे भवत:। यथा,—
"अनेश्वरस्य वारेऽथ वारेऽङ्गारकस्य च।
ह्यष्टमीचतुर्दश्यौ पुण्यात् पुण्यतरे स्मृते॥*॥
मङ्गलवारे शुक्ला चतुर्थी चेदत्यधा भवति। यथा,—
"सोमवारेऽमावास्या आदित्यारे च सप्तमी।
चतुर्थ्यङ्गारके वारे ह्यष्टमी च ह्यसौ तथा॥

अद्य यन् म्रियते पापमथवा धर्म्मसञ्चय:।
षष्टिवर्षसहस्राणि प्रतिजन्म तदश्नुयम्॥"
इति तिथ्यादितत्त्वम्॥
मङ्गलचण्डी, स्त्री, (मङ्गला चासौ चण्डी चेति यद्वा, देवानां मुख्यादिभक्तानां मङ्गलाय दुर्जयासुरादिमारणी चण्डी अयत्नकोपना। मङ्गलेचण्डी दत्तेति वा। अथवा रुद्रौ मङ्गला प्रलये चण्डी। भागवतेऽस्या नामनिरुक्तिर्यथा,—
"रुद्रौ मङ्गलरूपा च संहारे क्रोधरूपिणी।
तेन मङ्गलचण्डी सा पण्डितै: परिकीर्त्तिता॥")
दुर्गा। यथा,—
नारायण उवाच।
"कथितं वह्निपाख्यानं ब्रह्मपुत्र! यथागमम्।
देवी मङ्गलचण्डी या तदाख्यानं निगद्यताम्॥
तस्या: पूजादिकं सर्व्वं धर्म्मवक्त्रेण यत्कृतम्।
श्रुतिसम्मतमेवेदं सर्व्वेषां विदुषामपि॥
ह्यषायां वर्त्तते चण्डी कल्याणेषु च मङ्गलम्।
मङ्गलेषु च या ह्यद्धा सा च मङ्गलचण्डिका॥
पूर्ण्यायां वर्त्तते चण्डी मङ्गलेऽपि महीसुत:।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका॥
मङ्गलो मनुवंशश्च सप्तद्वीपधरापति:।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका॥
सर्ग्गिभेदेन सा दुर्गा सत्यप्रकृतिरीश्वरी।
कृपारूपाप्रियप्रत्या योषितामिष्टदेवता॥
प्रथमे पूजिता सा च ब्रह्मरुद्रैश्च पुर: पुरा।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च॥
ब्रह्मन्! ब्रह्मोपदेशेन दुर्गप्रस्थेन सङ्कटे।
व्याकाशात् पतिते याने देत्यैश्च पातिते तथा॥
ब्रह्मविद्यापदिष्टश्च दुर्गां तुष्टाव शङ्कर:।
सा च मङ्गलचण्डी च बभूव रूपमीदृशम्॥
उवाच पुरत: शम्भोर्भयं नास्तीति ते विभो!।
भगवान् हृषरूपश्च सर्व्वग्रश्च बभूव ह॥
युद्धशक्तिस्वरूपाहं भविष्यामि तदाश्रया।
मयासुना च हरिणा सहायेन वृषध्वज!॥
जहि दैत्यञ्च शम्भुञ्च सुराणां पदघातकम्।
इत्युक्त्वान्तर्हिता देवी शम्भो: शक्तिर्बभूव सा॥
विष्णुदत्तेन शस्त्रेण जघान तमुमापति:।
मुनीन्द्र! पतिते देत्ये सर्व्वे देवा महर्षय:॥
तुष्टुवु: शङ्करं देवं भक्तिनम्रात्मकन्धरा:।
सद्य: शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव च॥
ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम्॥
ब्रह्मविद्यापदिष्टश्च सुप्रात: शङ्कर: शुचि:।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम्॥
पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि।
पुष्पचन्दनवेद्यैश्च भक्त्या नानाविधैर्मुने!॥
छागैर्मेषैश्च महिषैर्गवेभैर्मायातिभक्तित:।
वस्त्रालङ्कारमाल्यैश्च पायसै: पिष्टकैरपि॥
मधुभिश्च सुधाभिश्च पक्वैर्नानाविधै: फलै:।
संगीतैर्नर्त्तनैर्वाद्यैरुत्सवै: स्तवकीर्त्तनै:॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम्।
ददौ द्रव्याणि मूलेन मन्त्रेणैव च नारद!॥

ॐ ह्रीं श्रीं क्लीं सर्व्वपूज्ये देवि मङ्गलचण्डिके।
दुं दुं फट् स्वाहेत्येवञ्चाष्टैकविंशाक्षरो मनुः॥
पूज्यः कल्पतरुश्चैव भक्तानां सर्व्वकामदः।
दद्यात्सञ्जपनेनैव मन्त्रसिद्धिर्भवेन्नृणाम्।
मन्त्रसिद्धिर्भवेद्यस्य स विष्णुः सर्व्वकामदः॥
ध्यानञ्च श्रूयतां ब्रह्मन्! वेदोक्तं सर्व्वसम्मतम्॥
देवीं षोड़शवर्षीयां शश्वत्सुस्थिरयौवनाम्।
सर्व्वरूपगुणाढ्याञ्च कोमलाङ्गीं मनोहराम्॥
श्वेतचम्पकवर्णाभां चन्द्रकोटिसमप्रभाम्।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम्॥
बिभ्रतीं कबरीभारं मल्लिकामाल्यभूषितम्।
बिम्बोष्ठीं सुदतीं शुद्धां शश्वत्पद्मनिभाननाम्॥
ईषद्धास्यप्रसन्नास्यां सुनीलोत्पललोचनाम्।
जगद्धात्रीञ्च दात्रीञ्च सर्व्वेभ्यः सर्व्वसम्पदाम्।
संसारसागरे घोरे पोतरूपां वरां भजे॥
ध्यानेनानेन देवेशि स्तवनं शृणुतां सुते!।
प्रयातः सङ्कटस्थो येन तुष्टाव शङ्करः॥

श्रीशङ्कर उवाच।

रक्ष रक्ष जगन्मातर्देवि मङ्गलचण्डिके!।
हारिके विपदां राशिं हर्षमङ्गलदायिके!॥
हर्षमङ्गलदे देवि हर्षमङ्गलचण्डिके!।
शुभे मङ्गलदे देवि शुभे मङ्गलचण्डिके!॥
मङ्गले मङ्गलार्हे च सर्व्वमङ्गलमङ्गले!।
सतां मङ्गलदे देवि! सर्व्वेषां मङ्गलालये!॥
पूज्ये! मङ्गलवारे च मङ्गलाभीष्टदेवते!।
पूज्ये मङ्गलभूपस्य मनोर्वंशस्य सन्ततम्॥
मङ्गलाधिष्ठातृदेवि! मङ्गलानाञ्च मङ्गले!।
संसारमङ्गलाधारे मोक्षमङ्गलदायिनि!॥
सारे च मङ्गलाधारे पारे च सर्व्वकर्म्मणाम्।
प्रतिमङ्गलवारे च पूज्ये च मङ्गलप्रदे!॥
स्तोत्रेणानेन शम्भुश्च स्तुत्वा मङ्गलचण्डिकाम्।
प्रतिमङ्गलवारे च पूजां लब्ध्वा गतः शिवः॥
देव्याश्च मङ्गलं स्तोत्रं यः शृणोति समाहितः।
सर्व्वमङ्गलं भवेत् तस्य भवेत्तदमङ्गलम्॥
प्रथमे पूजिता देवी शिवेन सर्व्वमङ्गला।
द्वितीये पूजिता देवी मङ्गलेन गणेश च॥
तृतीये पूजिता भद्रा मङ्गलेन नृपेण च।
चतुर्थे मङ्गले वारे सुन्दरीभिश्च पूजिता॥
मङ्गले मङ्गलाकाङ्क्षैर्नरैर्मङ्गलचण्डिका।
पूजिता प्रतिविश्वेषु विश्वेशपूजिता सदा॥
ततः सर्व्वत्र संपूज्या सा बभूव सुरेश्वरी।
देवादिभिश्च मुनिभिर्मनुभिर्मानवैर्मुने!॥
वर्द्धते तत्पुत्रपौत्रो मङ्गलञ्च दिने दिने॥"
इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे नारायणनारदीये मङ्गलचण्डिकोपाख्यानं तत्पूजास्तवकथनं नाम ४१ अध्यायः॥

मङ्गलच्छायः, पुं, (मङ्गला मङ्गलजनिका छायाऽस्य।) मत्स्यभेदः। इति राजनिर्घण्टः॥

मङ्गलनीराजनं, क्ली, (मङ्गलं मङ्गलकरं मङ्गलाय वा नीराजनम्।) आरात्रिकभूतकर्पूरकर्म्मभगवदाराधिकम्। मङ्गल आरती इति भाषा॥ यथा,—

"पतित्वाथ प्रियान् श्लोकान् महावादित्रनिःस्वनैः।
प्रभोर्नीराजनं कुर्य्यान्मङ्गलाख्यं जगद्धितम्॥
नीराजनन्त्विदं सर्व्वैः कर्त्तव्यं शुचिविग्रहैः।
परमश्रद्धयोत्थाय दृष्ट्वा च सदा नरैः॥
स्त्रीणां पुंसाञ्च सर्व्वेषामेतत् सर्व्वेष्टपूरकम्।
समस्तदैन्यदारिद्र्यदुरितान्युपघ्नन्निजम्॥"
इति श्रीहरिभक्तिविलासे ३ विलासः॥

मङ्गलपाठकः, पुं, (पठतीति। पठ+ण्वुल्। मङ्गलस्य पाठकः।) वन्दी। इति हेमचन्द्रः। ७। ८७॥ (यथा, वेणीसंहारनाटके। १, अङ्के "आः पाप! दुरात्मन्! वृथामङ्गलपाठक!।"

मङ्गलप्रदा, स्त्री, (मङ्गलं प्रददातीति। प्र+दा+"आतश्चोपसर्गे।" ३। १। १३६। इति कः। टाप्।) हरिद्रा। इति केचित्॥ मङ्गलदात्रि त्रि॥

मङ्गला, स्त्री, (मङ्गलमस्या अस्तीति। मङ्गल+अर्श आद्यच्। टाप्।) पार्व्वती। शुक्लदूर्व्वा। पतिव्रता। इति शब्दरत्नावली॥ करञ्जभेदः। इति शब्दचन्द्रिका॥ वृत्ताढ्यानामविशेषः। इति हेमचन्द्रः॥ हरिद्रा। गोलदूर्व्वा। इति राजनिर्घण्टः॥

मङ्गलागुरु, क्ली, (मङ्गलञ्च तत् अगुरु चेति। नित्यकर्म्मधारयः।) अगुरुचन्दनादन्यतमागुरुविशेषः। यथा, राजनिर्घण्टः।
"मङ्गल्या मल्लिकागन्धा मङ्गलागुरुवाचकाः।
मङ्गल्या गुरुगन्धिरा गन्धाढ्या योगवाहिका॥"

मङ्गल्यं, क्ली, (मङ्गलाय साधु इति। मङ्गल+"तत्र साधुः।" ४। ४। ९८। इति यत्।) दधि। इति मेदिनी। ये, १०१॥ चन्दनम्। मङ्गल्यागुरु। सिन्दूरम्। इति राजनिर्घण्टः॥

मङ्गल्य, त्रि, (मङ्गलाय साधु। मङ्गल+यत्।) शिवकरम्। इति मेदिनी। ये, १०१॥ (यथा, उत्तरचरिते। ७ अङ्के।
"प्राप्तश्च पुनाति वर्द्धयति च श्रेयांसि येषं कथा।
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च॥"
यथाच, महाभारते। १। १। २७।
मङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम्।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम्॥")
रुचिरम्। इति हेमचन्द्रः॥ साधुः। इति धरणिः॥

मङ्गल्यः, पुं, (मङ्गलाय साधुः। मङ्गल+"तत्र साधुः।" ४। ४। ९८। इति यत्।) छायामाषा। अश्वत्थः। विल्वः। मस्तरुः। इति मेदिनी। ये, १००॥ जीवकः। नारिकेलः। कपित्थः। दीप्ताकरञ्जः। इति राजनिर्घण्टः॥ (जीव इति ख्यातः शाकविशेषः। तत्पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गल्यकः, पुं. (मङ्गल्य+संज्ञायां कन्। यद्वा मङ्गलस्य मङ्गलग्रहस्य प्रियः इति यत्। ततः स्वार्थे कन्।) मस्तरुः। इत्यमरः। २। ८। १७॥ (तथास्य पर्य्यायः।
"मङ्गल्यको मस्तरुः स्यान्मङ्गल्या च मस्तरिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गल्यकुसुमा, स्त्री, (मङ्गल्यानि कुसुमानि यस्याः।) शङ्खपुष्पी। इति भावप्रकाशः॥

मङ्गल्यनामधेया, स्त्री, (मङ्गलं मङ्गलजनकं नामधेयं यस्याः।) जीवन्ती। इति जटाधरः॥

मङ्गला, स्त्री, (मङ्गलाय साधुरिति यत्। टाप्।) मल्लिकागन्धयुक्तागुरु। इत्यमरः। २।६।१२७॥ शमी। अधःपुष्पी। मिसी। शुक्लवचा। रोचना। इति मेदिनी। ये, १००॥ प्रियङ्गुः। शङ्खपुष्पी। इति हेमचन्द्रः॥ माषपर्णी। जीवन्ती। ऋद्धिः। वचा। हरिद्रा। चौड़ा। इति राजनिर्घण्टः॥ दूर्व्वा। इति रत्नमाला॥ दुर्गा। यथा,—
"शोभनानि च नामानि या देवी कुरुते हरे।
भक्तानामार्त्तिहरणी मङ्गल्या तेन सा स्मृता॥"
इति देवीपुराणे ७४ अध्यायः॥
(वचार्थे पर्य्यायो यथा,—
"तीक्ष्णोग्रगन्धा जटिला मङ्गल्या विजया वचा।
षड्ग्रन्थ्या च रुचोधी सिंहा हैमवती तु सा॥"
सिंह्यर्थे यथा,— [सिंही॥"
"अवाक्पुष्पी च हृद्या स्यान्मङ्गल्या मधुरा हिमपुष्पी। नत्यर्थे यथा,—
"अधाकपुष्पी लघुपुष्पी मङ्गल्यामरपुष्पिका॥"
इति च वैद्यकरत्नमालायाम्॥
रोचनार्थे पर्य्यायो यथा,—
"गोरोचना तु मङ्गल्या वन्द्या गौरी च रोचना॥"
मुस्तार्थे पर्य्यायो यथा,—
"मुरा भद्रकुला तुङ्गा केशहन्त्री कला शिवा।
मङ्गल्या च यवा लक्ष्मीः शामरीः सारिवा क्षुमा॥"
मस्तरुः। नत्यर्थायो यथा,—
"मङ्गल्यको मस्तरुः स्यान्मङ्गल्या च मस्तरिका।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मङ्गी, स्त्री, (मङ्गो नौरिवरत्नदत्वा अङ्गोति इनिः ङीष च।) नौका। इति हेमचन्द्रः॥

मङ्गुर, क्ली, (मङ्गुरयतीति। मङ्गु+क्विप्।) अङ्गारचूर्णम्। इति हारावली। १६८॥

मङ्गु, य, मज्जयतीति। मज्ज+बहुलवचनात् कुः।
"मज्जिज्वरोर्भ्रंशिलि।" ७। १। ६०। इति नुम्। "स्कोः संयोगाद्योरन्ते च।" ८। २। २९। इति सलोपः।) दूनम्। इत्यमरः। ३। ४। २। (यथा, माघे। ५। ६७।
"यद्वल्गितः कटकटाहतटाग्निमङ्गौ-
मङ्गुष्यति परितः पटलैरलीनाम्॥")
मज्जयार्थम्। इति मेदिनी। अवये। ये, ६६॥

मज्जसुखं, क्ली, (मज्जन । ऋहलोरण्यत् साधुः ।) अवगाहनम् । इति त्रिकाण्डशेषः ॥

मज्ज, ट ड उन्मज्जायङ्लुबन्ताभ्यां ङ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सकौ अनिटौ । यङ्-दीप्तौ उन्मीभावे च अक०-सेट् ।) ट मज्जति । ड मज्जते । उन्मज्जाय उन्मीभावः । इति दुर्गादासः ॥

मज्ज, ड च ङ्वप्ने । दम्भे । ग्राम्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-दम्भे ग्राम्ये च । अक०-ङ्वप्ने-सक०-सेट् ।) कल्कनमिति कल्कं करोतीति नौ रूपं चूर्णीकरणमित्यर्थः । ड मज्जते तङ्कुलं पिष्टा चकारात् मज्जि ड । इति दुर्गादासः ॥

मज्जधिका, स्त्री, (मं ग्रभुं चर्चनीवेति । चर्च + बाहुल् । टाप् । अत इत्वम् । वस्तुतस्तु रूढ्योऽयं शब्दः ।) प्रग्रन्थम् । इत्यमरः । १ । ४ । २७ ॥ (यथा, प्रग्रन्थो ब्राह्मणो ब्राह्मणमज्जधिका । "प्रग्रंसावचनेच्च । ७ । १ । ६६ । इति समासः ।)

मज्जः, पुं, (माद्यति मलिनीभवतीति । मद् + क्विप् । नत्वा सम् धीते इति । धी + डः ।) मलम् । इति शब्दरत्नावली ॥

मज्जकृत, क्ली, (मज्जानं करोतीति । कृ + क्विप् । तुगागमश्च ।) अक्षि । इति हेमचन्द्रः ॥

मज्जन, क्ली, (मज्ज् + ल्युट् ।) स्नानम् । इति जटाधरः ॥ (यथा, रामायणे बालकाण्डे ४५ । आङ्गैर्मज्जनपीनिं न जानन्ति मरुस्थिताः ॥") मज्जा । इति शब्दचन्द्रिका ॥

मज्जनसुखद, क्ली, (मज्जा मज्जनेन सुखदत्वं उत्पत्तिस्थानं यस्य ।) शुक्रम् । इति हेमचन्द्रः ॥

मज्जा, [न्] पुं, (मज्जति अस्थिष्विति । मज्ज् + "सृज् उज्झ् पूरुष् क्रीडन् क्रीडन् सृडन् मज्जिन्यादि ।" उणा० । १ । १५८ । इति कनिन् णिद्वाच्च ।) दृढादेकतमस्थिरभागः । सार इति ख्यातः । इत्यमरभरतौ ॥ फलमज्जगुणो यथा,—

"यस्य यस्य फलस्येह वीर्यं भवति यादृशम् ।
तस्य तस्येव वीर्यञ्च मज्जानमभिनिर्दिशेत् ॥"

इति राजवल्लभः ॥

अस्थिमध्यस्थक्षेहविशेषः । तत्पर्य्यायः । कौणिकः २ शुक्रकरः ३ अस्थिक्षेहः ४ अस्थिसम्भवः ५ । इति हेमचन्द्रः । ६ । १६ ॥ अस्थिसारः ६ तेजः ७ वीजम् ८ अस्थिजम् ९ जीवनम् १० देहसारः ११ । इति राजनिर्घण्टः ॥ अथ मज्जस्वरूपमाह ।

"अस्थि यत् स्यात्मिना पक्वं तस्य सारो द्रवो घनः ।
यः स्नेहवत् पृथग्भूतः स मज्जेत्यभिधीयते ॥"

अथ मज्जस्थानमाह ।

"श्लेष्मास्थिषु विशेषेण मज्जा तत्प्रभवे स्थितः ।"

इति भावप्रकाशः ॥

अस्य गुणाः ।

"बलशुक्रकरस्नेहमेदोमज्जविवर्द्धनः ।
मज्जा विशेषतोऽस्थ्नाञ्च बलकृत् स्नेहने हितः ॥"

इति चरकः ॥

मज्जाग्रन्थ आयुर्वेदोऽपि । यथा । ग्रन्थातसी-सूत्रकणिशुण्ठिहैः पियालमज्जासहितैस्तिलैरिति सुश्रुतः ॥ इयमेवाच्च चिकाण्डे भागुरिः ॥

"लज्जावन्नाजवज्जा मांससाराक्षिसारयोः ।"

इत्यमरटीकायां भरतः ॥

मज्जा, स्त्री, (मज्जतीति । मस्ज् + अच् । अजादित्वात् टाप् ।) अस्थिसारः । इत्यमरटीकायां भरतः ॥ अस्य गुणाः । वातनाशित्वम् । बलपित्तकफप्रदत्वम् । मांसतुल्यगन्धरूपत्वञ्च । क्षीरसर्पिर्घमज्जागुणाः । मधुरत्वम् । दृंहणत्वम् । बल्यत्वञ्च । मज्जसत्त्वगुणौ यथा । शैत्यम् । उष्णत्वञ्च । इति राजवल्लभः ॥

मज्जाजः, पुं, (मज्जाया जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

मज्जारसः, पुं, (मज्जाया रसः ।) शुक्रम् । इति राजनिर्घण्टः ॥

मज्जासारं, क्ली, (मज्जायां सारो यस्य ।) जातीफलम् । इति राजनिर्घण्टः ॥

मज्जिका, स्त्री, (मज्जन्ति दध्यादयश्च । मस्ज् + ऊकन् । टाप् निपा० ।) मज्जिका । इत्यमरटीकायां रायमुकुटः ॥

मञ्चः, पुं, (मञ्चति । उच्चीभवतीति । मञ्च + अण् ।) खट्वा । इत्यमरः । २ । ७ । १६८ ॥ कर्मवंशः । भाषा इति भाषा ॥ इति हारावली ॥ उच्चमञ्चविशेषः । यथा,—

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
दृष्ट्वा वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इति पुराणम् ॥

मञ्चकः, पुं, (मञ्च + स्वार्थे कन् ।) खट्वा । इति हेमचन्द्रः । ६ । ८३ ॥ (यथा, कथासरित्सागरे । २७ । ६१ ।

"वारिधानी तु कुम्भस्य माञ्चली मञ्चकक्रुधा ।
अहञ्च मत्पतिश्चेति युग्मचिह्नमेव नौ ॥")

इत्यमरकोषः । उच्चमञ्चः । इति त्रिकाण्डशेषः ॥

मञ्चकाश्रयः, पुं, (मञ्चकः खट्वादिराश्रयो यस्य ।) मत्कुणः । इति राजनिर्घण्टः ॥

मञ्चमञ्चः, पुं, (मञ्चो मञ्च इव ।) गृध्रस्थ्यर्थकुटिरम् । टं इति भाषा ॥ तत्पर्य्यायः । क्षुद्रङ्गः । इति हारावली ॥

मञ्जरं, क्ली, (मञ्जयति दीप्यते इति । मस्ज् + अरप्रत्ययः ।) मुक्ता । तिलकवृक्षः । वल्ली । इति शब्दरत्नावली ॥

मञ्जरिः, स्त्री, वल्लरिः । इत्यमरः । २ । ४ । १३ ॥ वल्लते वृणोति सर्वं वल्लरिः वल्लमि यल्ल इत्यौ णादिकः अरिः । मञ्जु मनोज्ञतां राति मञ्जरिः पूर्ववत् इः मनोवादित्वादुकारस्य अकारः पाक्षिकोऽरीति ङीपि मञ्जरी वल्लरी च । वल्लरिर्मञ्जरिर्द्वयोरिति शाब्दिकः ॥ वल्लिर्मुञ्जिश्च ।

"मञ्जरिमञ्जरी मञ्जिर्मञ्जरं त्रिषु वल्लरी ।
वल्लरं त्रिषु वल्लिश्च वल्लरिः पत्रवालिका ॥"

इति चतुरचन्द्रः ॥

लतामात्रेऽपि वल्लरिः । अतो बाहुवल्लरीति प्रयोग इति सुकुटादयः ॥ वल्लरीमञ्जर्योर्भेदमाहुः । यथा अभिनवनिर्गता आयता सुकुमारा वकुसुमा अकुसुमा च मञ्जरिः । यथा चूतमञ्जरिः कदलीमञ्जरिः । वल्लरिः पुनश्चिरभूतापि । यथा तालमञ्जरिः गुवाकवल्लरिरिति इयमेव नवे चिरन्तनेऽपीति लक्ष्मणसाङ्गौ । इति भरतः ॥

मञ्जरी, स्त्री, (मञ्जरि । ऋदिकारादिति ङीष् ।) मुक्ता । तिलकवृक्षः । लता । इति शब्दरत्नावली ॥ (यथा, राजतरङ्गिण्याम् । १ । ३०७ ।

"निर्गते मञ्जरीकुञ्जादपश्यत् पुरतक्षतः ।
कण्ठे नीलमणिश्रोणिलीलां स केशिचामरलीं चले ॥")

मञ्जरिः । इत्यमरटीकायां भरतः ॥ (यथा, आर्य्यासप्तशत्याम् । ५३३ ।

"वापीकच्छे वासः कण्टकवृक्षस्य सजागरा भ्रमराः ।
केनकविटपं किमेतैर्नमु वारय मञ्जरीगन्धम् ॥")

तुलसी । इति राजनिर्घण्टः ॥

मञ्जरीगन्धः, पुं, (मञ्जर्यां मञ्जर्यवस्थायामपि गन्धः ।) वेतसवृक्षः । इति राजनिर्घण्टः ॥

मञ्जा, स्त्री, (मज्ज् + पचाद्यच् । टाप् ।) छागी । इति त्रिकाण्डशेषः ॥ मञ्जरी । इति हेमचन्द्रः । ११ । २२ ॥

मञ्जिः, पुं, (मज्ज् + इन् ।) मञ्जरी । इति त्रिकाण्डशेषः ॥

मञ्जिका, स्त्री, (मञ्जयतीति । मञ्ज् + ण्वुल् । टाप् । अत इत्वञ्च ।) वेश्या । इति हारावली ॥

मञ्जिफला, स्त्री, (मञ्जिर्मञ्जरी फलेऽस्याः ।) कदली । इति त्रिकाण्डशेषः ॥

मञ्जिष्ठा, स्त्री, (अतिशयेनेयं मञ्जिमती । मञ्जिमती + इष्ठः । मतुपो लोपः स्त्रियां टाप् ।) स्वनामख्यातरक्तवर्णलताविशेषः । मजीठ इति हिन्दी भाषा । तत्पर्य्यायः । विकसा २ जिङ्गी ३ समङ्गा ४ कालमेषिका ५ मञ्जकपर्णी ६ भण्डीरी ७ भण्डी ८ योजनवल्ली ९ । इत्यमरः । ४ । ७ । ८० ॥ कालमेषी १० काम्पा ११ जिङ्गः १२ भण्डिरी १३ भण्डिका १४ भण्डिः १५ । इति शब्दरत्नावली ॥ हरिणी १६ रक्ता १७ गौरी १८ योजनवल्लिका १९ वप्रा २० रोहिणी २१ चित्रलता २२ चित्रा २३ चित्राङ्गी २४ जननी २५ विजया २६ मञ्जुला २७ रक्तयष्टिका २८ चन्द्रिणी २९ रागाढ्या ३० कालभाषिका ३१ अरुणा ३२ ज्वरहन्त्री ३३ कुचा ३४ नागकुमारिका ३५ भण्डीरत्नलिका ३६ रागाङ्गी ३७ वल्लभूषणा ३८ । पर्य्यायान्तरं यथा,—

"मञ्जिष्ठा विकसा जिङ्गी काला योजनवल्लिका ।

नाम्नवल्ली चित्रपर्णी कान्तारी रक्तयष्टिका ॥"
इति रत्नमाला ॥)
अस्या गुणाः । मधुरत्वम् । कषायत्वम् । उष्णत्वम् । गुरुत्वम् । व्रणमेहज्वरश्लेष्मविषनेत्रामयनाशित्वञ्च । सा चतुर्विधा । चोलः१ योजनीर कौन्नी ३ सिंहली च ४ । इति राजनिर्घण्टः ॥ क्रूरस्वरभङ्गश्लीपदनाशित्वम् । वर्णमिष्टकारित्वञ्च । इति राजवल्लभः ॥ अपि च ।
"मञ्जिष्ठा मधुरा तिक्ता कषाया स्वर्णवर्णकृत् ।
गुरुरुष्णा विषव्रेष्मघ्नी श्लीपदोन्मत्तिकर्णरुक् ।
रक्तातिसारकुष्ठासाविसर्पव्रणमेहनुत् ॥"
इति भावप्रकाशः ॥
मञ्जी, स्त्री, (मञ्जयति दीप्यते इति । मञ्ज + इन् । ङीदिकारादिति ङीष् ।) मञ्जरी । इति हेमचन्द्रः चिकाण्डशेषश्च ॥
मञ्जीरः, पुं, क्ली, (मञ्जति मधुरं शब्दायते । इति, मञ्ज् ध्वनौ सौत्रधातुः + बाहुलकात् इरन् ।) नूपुरः । इत्यमरः । २ । १०६ ॥ मञ्जीरोऽस्त्री च नूपुरः । इति रभसः ॥ (यथा, गीतगोविन्दे । ५ । ११ ।
"सुखरमधीरं त्यज मञ्जीरं
रिपुमिव केलिषु लोलम् ॥")
मञ्जीरः, पुं, (मञ्ज + ईरन् ।) मत्स्यानदक्षरज्जु अत्यनार्थलम्भः । तत्पर्य्यायः । विष्कम्भः २ कूटरः२ । इति हेमचन्द्रः ॥
मञ्जु, त्रि. (मञ्जतीति । मञ्ज ध्वनौ सौत्रधातुः । "मञ्जेर्यादयश्च ।" उणा० । १ । ३८ । इति कुः ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, पद्मपुराणे । १ ।
"व्रजन् गेहं भटिति यमुनामञ्जुकुञ्जं जगाम ॥")
मञ्जुकेशी, [न्] पुं, (मञ्जवो मनोहराः केशाः सन्त्यस्य । इति ।) श्रीकृष्णः । इति हलायुधः ॥ सुन्दरकेशविशिष्टे त्रि ॥
मञ्जुगमना, स्त्री, (मञ्जु मनोहरं गमनं यस्याः । स्त्रियां टाप् ।) हंसी । इति राजनिर्घण्टः ॥ सुन्दरगामिनि त्रि ॥
मञ्जुघोषः, पुं, (मञ्जुर्मनोहरो घोषः शब्दोऽस्य ।) पूर्व्वजिनभेदः । इति त्रिकाण्डशेषः । उपास्य देवताविशेषः । अस्य मन्त्रादि यथा,—
"जाड्यौघतिमिरध्वंसी संसाराम्बुधितारकः ।
श्रीमञ्जुघोषो जयतां साधकानां सुखावहः ॥"
तन्त्रागमोत्तरे ।
"माल्कादि समुद्धृत्य वह्निबीजं समुद्धरेत् ।
वामाक्षं कूर्म्मसंयुक्तं ततो मेघैस्समुद्धरेत् ॥
मौनेयुक्तं ततः कुर्य्यात् वामनेन्दुसंयुतम् ।
षड्वरो मनुः प्रोक्तो मञ्जुघोषस्य शम्भुना ॥
दयस्तु दीपनो प्रोक्ता मूलमन्त्रस्तु कथ्यते ।
अङ्कुशं शक्तिबीजञ्च रमाबीजं ततः प्रिये ! ॥
बालत्रयात्मको मन्त्रो जाड्यौघध्वान्तनाशनः ।
शक्तिबीजं रमाबीजं कामबीजं तथा प्रिये ! ॥
विद्या श्रुतिधरी प्रोक्ता एषा वर्णत्रयात्मिका ।
षकारो वह्निमारूढो बालनेत्रेन्दुभूषितः ।
प्रोक्ता सार्व्वज्ञविद्येयं एकवर्णात्मिका प्रिये ! ॥
सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुश्च वा ।
तदा मन्त्रो भवेद्व्यक्तं शुभदो बुद्धिदो भवेत् ॥
मध्याह्ने सलिले चैव भोजने भाजने तथा ।
गोमये तु वह्निहोत्रे मैथुने रमणीकुचे ॥
गोष्ठे च निम्ब गोमुखे यत्नं कमलसन्निभम् ।
विलिख्य मन्त्रवर्णांश्च न्यस्य ऊर्द्धे अधस्तथा ।
लिखेच्चन्दनलेखन्या प्रयत्नात् साधकोत्तमः ।
उच्चाटने लिखेदूर्द्ध्वं गोचर्म्मणि विशेषतः ।
सलिले विजयी नित्यं भजने च महेश्वरः ॥
गोमये वाग्वदूकः स्याद्गोष्ठे सर्व्वज्ञतां व्रजेत् ।
कुम्भे श्रुतिधरो नित्यं गोमुखे च महाकविः ॥
गोमयं वदरीमूलं चन्दनं पांशुमेव च ।
एकीकृत्याष्टधा जप्या तिलकं धारयेत् सदा ॥
नमस्कृत्य वरं मन्त्रं प्रार्थयेद्भक्तितत्परः ।
वरं प्राप्य च तन्मन्त्रे विहरेत्तु यथासुखम् ॥
नान्यदेवार्चनं ध्यानं प्रणवोच्चारणं न तु ।
वल्लाक्षत्रेण दन्तानां शोधनं लवणेन वा ॥
रात्रिवासो न सुचेत न शुचिः स्यात्कदाचन ।
एवं ज्ञात्वा प्रयत्नेन ज्ञात्वा गुरुमुखात् सुधीः ॥
मासैकेन कवीन्द्रः स्यात् द्विमासैनैव भूश्वरः ।
त्रिभिर्मासैर्भवेद्वाग्मी सर्व्वशास्त्रविशारदः ॥
पुत्रार्थी लभते पुत्रं धनार्थी विपुलं धनम् ।
आयुरारोग्यकामस्तु सर्व्वान् कामानवाप्नुयात् ॥
ततः कराङ्गन्यासौ ।
ह्रां ह्रीं अङ्गुष्ठाभ्यां नमः । इत्यादि एवं कुरु यादिषु । तथा च तन्त्रे ।
"सम्वर्मको वकेशश्च ह्रौं वर्म्मी कवची प्रिये ! ।
ह्रद्धीर्घभाग्भ्यामेताभ्यां षड्ङ्गानि समाचरेत् ॥
सम्वर्मः चकारः वकेशः ओकारः ॥" ध्यानम् ।
"शुभ्रधरमिव शुभ्रं खड्गपुस्ताङ्कपाणिं
सुरुचिरमतिशान्तं पञ्चचूडं कुमारम् ।
पृथुतरवरसख्यं पद्मपद्मायताक्षं
कुमतिदहनदक्षं मञ्जुघोषं नमामि ॥
पीठपूजां ततः कुर्य्यादाधाराद्यादिशक्तिकः ।
भूतप्रेतादिभिः कुर्य्यात् पीठासनमनन्तरम् ॥
ज्ञानदात्रे नमः पाद्यं वह्निकर्ज्जे तथार्घ्यम् ।
जाड्यनाशाय गन्धः स्यादर्घ्यं स्याद् यत्तपाय वै ॥
सर्व्वसिद्धिप्रदायेति पुष्पं दद्यादिचक्षणः ।
कुन्दपुष्पं समादाय भैरवाय पूजयेत्ततः ॥
असिनाङ्गो वरश्चक्षः क्रोध उल्लासलक्षकः ।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
ततो ध्वजादिकं दत्त्वा प्रणवोच्चारणं न तु ।
तैः पुष्पैः पूजयेद्दक्षे यक्षिणीश्च विशेषतः ॥
सुरारिसुन्दरी चैव मनोहारिण्यनन्तरम् ।
कनकावती तथा कामेश्वरी च रतिक्रमेण च ॥
पद्मिनी च वटी चैव अनुरागिण्यनन्तरम् ।
पूज्या एवास्तु योगिन्यो मूलमन्त्रार्णपूर्व्विकाः ॥
एवं संपूज्य देवेशं लक्षषट्कं जपेन्नरः ।
दशांशकुन्दपुष्पेण एकादशपलानि च ॥
जुहुयाद्वह्निते वह्नौ कान्तारे पिङ्गवेल्लजैः ।
एवं सिद्धमनुर्मन्त्री महायोगीश्वरो भवेत् ॥"
इति तन्त्रसारः ॥
प्रकारान्तरं कुक्कुटादितन्त्रे द्रष्टव्यम् ॥
मञ्जुपाटकः, पुं, (मञ्जु मनोहरं पटतीति पट + ण्वुल् ।) शुकपक्षी । इति राजनिर्घण्टः ॥ सुन्दरपाटकवति त्रि ॥
मञ्जुप्राणः, पुं, (मञ्जवः प्राणाः यस्य । सर्व्वप्रायकतया महाप्राणत्वादस्य तथात्वम् ।) ब्रह्मा । इति जटाधरः ॥
मञ्जुभद्रः, पुं, (मञ्जु मनोहरं भद्रं मङ्गलं यस्य ।) जिनविशेषः । तत्पर्य्यायः । मञ्जुश्रीः २ ज्ञानदर्शनः ३ मञ्जुघोषः ४ कुमारः ५ अष्टारचक्रवान् ६ स्थिरचक्रः ७ वज्रधरः ८ ब्रह्मकायः ९ वाग्विराट् १० नीलोत्पली ११ महाराजः १२ नीलः १३ ग्राह्यूर्जवाहनः १४ धियाम्पतिः १५ पूर्व्वजिनः १६ खड्गी १७ दक्षी १८ विभूषणः १९ वाग्ब्रह्मः २० पञ्चचीरः २१ सिंहकेलिः २२ शिखाधरः २३ वागीश्वरः २४ । इति त्रिकाण्डशेषः ॥
मञ्जुलं, क्ली, (मञ्ज मञ्जुत्वमश्नुत इति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मञ्जुशब्दात् लच् ।) जलाच्छलम् । निकुञ्जम् । इति मेदिनी । ले, २ । २२ । ॥ शुक्लः । इति विश्वः ॥
मञ्जुलः, पुं, (मञ्ज मञ्जुत्वमश्नुतीति । मञ्जु + सिध्मादिभ्यश्च लच् ।) जलपक्षी । इति मेदिनी । ले, २२ ॥ सुन्दरे त्रि । इत्यमरः । ३ । १ । ५२ ॥ (यथा, कालिकापुराणे ४८अध्याये ।
"मञ्जुलं यौवनोद्भेदं प्राप श्रीरिव माधवे ।"
नदीभेदे स्त्री । यथा, महाभारते । ६।८।३३ ।
"चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा ॥")
मञ्जुश्रीः, पुं, (मञ्जुर्मनोहरा श्रीः शोभा यस्य ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥
मञ्जुषा, स्त्री, (मञ्ज + षा । पृषोदरादित्वात् ह्रस्वः ।) मञ्जषा । पेटरा इति भाषा । यथा,—
"मञ्जुषापि च मञ्जषा पेटा च पेटिकेऽपि ।"
इति शब्दरत्नावली ॥
मञ्जषा, स्त्री । मज्जन्ति द्रव्यमस्याम् । "मसृजेर्मुट् च ।" उणा० । ४ । ७७ । इति मस्ज् + अषन् । मुट् च स च चार्थोऽन्त्यात् परः । ततो ह्रस्वत्वे मध्यमस्य लोपात् साधुः ।) पिटकः । इत्यमरः । २ । १० । ३० ॥ (यथा, देवीभागवते । १२ । ६ । ३३ ।
"मञ्जषायां सुतं कृत्वा सुचक्षुषी वाक्यमब्रवीत् ॥")
पाषाणः । इलुञादिकोणः ॥ मञ्जिष्ठा । इति राजनिर्घण्टः ॥ (मञ्जिष्ठार्थे प्रमाणो यथा,—
"मञ्जिष्ठा विकसा लिङ्गी समङ्गा कालमेषिका ।
मञ्जकपर्णी भण्डारी भण्डी योजनवल्लिपि ॥
रसायनकला काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतण्डी च गण्डीरी मञ्जषा वल्लरञ्जिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मट, वाद्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) सौत्रधातुरयम् । अस्य प्रयोगः । मटतः । इति दुर्गादासः ॥

मटची, स्त्री, (मटनं मटः। मट् अवसादे + भावे अप् मटः चीयते प्रचीयते एभिरिति। मट + चि + बाहुलकात् क्विः। मटचिः। ततः स्त्रियां ङीष्।) सर्वेषामवसादकत्वादस्याः तथात्वम्।) रक्तवर्णक्षुद्रपक्षिविशेषः। प्राचामुपदेशः। यथा, गोविन्दभाष्यधृत-छान्दोग्ये। १। १०। १॥ ("मटचीहतेषु कुरुष्वाटिषा सह जायथोपश्रिष्टं चाक्रायण इध्यमाने प्रजागाक उवाच॥ इति॥)

मटस्फटिः, पुं, (मटं अवसादं स्फटति निरा करोति। स्फट् + इः।) दर्पारम्भः। इति जटा धरः॥

मठर्कः, स्त्री, (मठति वसत्यत्रेति। मठ + अप्। पृषोदरादित्वात् टागमे साधुः। मठः। मठस्य कं शिरः।) एतस्य शिरोभागः। इति केचित्। मटका इति भाषा॥

मठ, वासमर्द्ययोः। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-वासे अक०-मर्द्दने सक० सेट्।) मठति। वासो निवासः। मर्द्दः केचिन्न मन्यते। इति दुर्गादासः॥

मठ, ह्रस्व आधाने। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) ह्रस्वमठते। आधानं स्तूप औन्नते इत्यत्र व्याख्यातम्। इति दुर्गादासः॥

मठः, पुं, (छात्रादिनिलयः। इत्यमरः। २। २। ८॥ मठन्ति वसन्ति छात्रादयोऽत्र मठः। मठ वासमर्द्ययोः अच्। छात्रयोगात् विद्यार्थिनश्छात्राः। छात्रैः सह गुरुसेवा लक्ष्यते गुरुदोषच्छादनात् छत्रं तच्छीलत्वात् छात्रः विकारमर्हतीति वा। आदिना परिव्राजकक्षपणकादीनां ग्रहः। छात्रादीनां निलयो गृहं छात्रादिनिलयः। अर्थकथनमेतत्। नामाप्येतदिति केचित्। छात्रप्राप्ता प्रतिश्रयश्चासौ च। इति भरतः॥ गल्लीरथः। इति हारावली॥ * ॥ अथ मठादिप्रतिष्ठाप्रयोगः।

यदि नद्यादौ प्रतिमादिप्रतिष्ठा क्रियते तदा तत्तीरे वृद्धिश्राद्धादिकं विधाय देवप्रतिष्ठावत्तोक्त विधिना देवप्रतिष्ठां विधाय गृहप्रतिष्ठा कर्त्तव्या। यदि गृहप्रतिष्ठामात्रं तदा प्रातः स्नानादिकृत्य; प्रक्षालितपाणिपादः आचान्तः प्राङ्मुख उदङ्मुखो वा कृतयुक्तासने उपविश्य ब्राह्मणत्रयं गन्धादिना परिपूज्य अस्मिन् विष्णुवेश्मप्रतिष्ठा कर्म्मणि ॐ पुण्याहं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ पुण्याहमिति त्रिरुक्त्वा अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ स्वस्ति भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ स्वस्तीति त्रिरुक्त्वा अस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणि ॐ ऋद्धिं भवन्तोऽधिब्रुवन्तु इति त्रिः आवयेत्। ॐ ऋद्धा तामिति त्रिरुक्त्वेयुः। यजुर्वेदिना ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु। इत्यनेनाशीर्वादान् क्षिपेत्। सामगानान्तु। —— सोमोऽयं सुतः। पिबन्तश्च मदन्तः। उतखराजो अश्विना। अस्ति सोमोऽयं सुतः। पिबन्तश्च मदन्तो ह्वाद। उतखराजो वा ह्वाद। इति गीयमानेनाशीर्वादान् क्षिपेत्। गायत्रीत्रिष्टुभौ त्रिधा ऋचं वाचयेत्। ततः।

"सूर्य्यः सोमो यमः कालः सन्धे भूतान्यहः क्षपा। पवनो दिक्पतिर्भूमिराकाशं खचरामराः। ब्राह्मं ब्राह्मणमास्थाय कल्पध्वमिह सन्निधिम्॥"

इति पठित्वा। ततः ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति विष्णुं स्मृत्वा नारायणं नमस्कृत्य ॐ तत् सवितुर्वरेण्यं कुशत्रयजलतण्डुलपुष्पाक्षतादाय ॐ अद्यामुके मासि अमुकपक्षेऽमुकतिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा एतत्तृणकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गलोकमहित्वकामः श्रीविष्णुप्रीतिकामो विष्णुलोकप्राप्तिकामो वा विष्णुवेश्मप्रतिष्ठामहं करिष्ये। इति संकल्पयेत् इष्टकादिमये तु एतदिष्टकादिमय वेश्मपरमाणुसमसंख्यकवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहित्वकाम इति विशेषः। प्राणप्रतिष्ठायान्तु तदूर्द्धं प्रयोगः॥ * ॥ ततः संकल्पसूक्तं पठेत्। सामवेदोक्तं तदृथा ॐ देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम्। उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते॥ यजुर्वेदोक्तं यथा,—

"ॐ यज्ञाग्नयो दूरमुदेतु देवं
तदसुप्रस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं
तन्मे मनः शिवसङ्कल्पमस्तु॥"

ततः सगणाधिपगौर्य्यादिषोडशमातृकापूजावसोर्धारासम्पातनायुष्यमन्त्रजपाभ्युदयिकश्राद्धानि कर्त्तव्यानि॥ * ॥ आयुष्यमन्त्रो यथा। ॐ आयुर्विश्वायुर्विश्वं विश्वमायुरसि। मह्यं प्रजाभ्यस्त्वं द्यावाधिविधे त्वमसि शतं जीवेम शरदो वयन्त॥ ॐ आयुषो मे पवस्व वर्चसो मे पवस्व विदुः पृथिव्या दिवो जनित्रा यज्ञस्यन्धायोधः शरन्नो सोमोऽहर्दृशाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्यैधा अमुकस्य राज्याय॥ * ॥ तच्च विष्णुवेश्मप्रतिष्ठाभ्युदयार्थमिति वाक्ये विशेषः। एवमन्यत्रापि। ततः उत्तराभिमुखं ब्राह्मणमुपवेश्य तत्समीपे आसनमासाद्य प्राङ्मुखो यजमानः प्राञ्जलिर्वदेत्। ॐ साधु भवानास्ताम्। ॐ साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उदङ्मुख उपविशति। ततो यजमानः ॐ अर्चयिष्यामो भवन्तं इति वदेत्। ॐ अर्चयेति प्रतिवचनम्। ततो गन्धपुष्पताम्बूलालङ्कारैरभ्यर्च्य दक्षिणं जानु स्पृष्ट्वा ॐ अद्येत्यादि अमुकगोत्रममुकप्रवरममुकदेवशर्म्माणं भवन्तं अस्मिन् सङ्कल्पितविष्णुवेश्मप्रतिष्ठाकर्म्माङ्गभूतहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धपुष्पताम्बूलालङ्कारवस्त्रैरहं वृणे। ॐ वृतोऽस्मीति प्रतिवचनम्। यथाविहितं ब्रह्मकर्म्म कुरु। ॐ यथाज्ञानं करवाणीति प्रतिवचनम्। स्वयं होमासामर्थ्ये होतुर्वरणमपि तथैव कार्य्यम्। तन्त्रधारकत्वेन आचार्य्यस्यापि तथैव कार्य्यम्। ब्रह्मत्वेन सदस्यस्यापि। गुरोर्वरणे तु संकल्पितेऽस्मिन् विष्णुवेश्मप्रतिष्ठाकर्म्मणीति वक्तव्यम्॥ * ॥ ततो यजमानः गुरोः पादौ धृत्वा पठेत्।

"नारायणस्वरूपस्त्वं संसाराब्धेर्हि मां प्रभो!। त्वत्प्रसादात् गुरो! यज्ञं प्राप्नोमि यज्ञयोदितम्॥
त्राहि नाथ! प्रपन्नं मां भीतं संसारसागरात्।
देवताख्यापने त्वञ्च मम शान्तिं कुरु प्रभो!॥"

ततो गुरुः।

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशूर्भवा सचा॥ प्रणयं धर्म्मकामार्थं दुष्प्रापं यत् सुरासुरैः॥ * ॥

ततो गुरुः।

ॐ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः। ऋषिभिः सम्भृतो रसो ब्राह्मणे स्वदतां हितम्॥

इति पावमानीस्तुत्तम्॥

"अभयं सततं पश्चात् भद्रमुत्तरतो गृहे॥"

इति शान्तिसूक्तम्॥

ॐ रक्षोहणो बलगहनः प्रोक्षामि वैष्णवान् रक्षोहणो बलगहनोऽवनयामि वैष्णवान् रक्षोहणो बलगहनोऽवस्तृणामि वैष्णवान्। रक्षोहणौ बलगहनावुपदधामि वैष्णवी। रक्षोहणौ बलगहनौ पर्य्यूहामि वैष्णवमसि वैष्णवाः स्थः। इति रक्षोघ्नसूक्तम्। इति पठित्वा।

"वेनाताक्ष पिशाचाश्च राक्षसाश्च सरीसृपाः। अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः॥
विनायका विघ्नकरा महोदरा
यज्ञद्विषो ये पितृमातृभक्षाः।
सिद्धार्थकैर्वेश्मसमानकल्पै-
र्मया निरस्ता विदिशः प्रयान्तु॥"

इति स्वेतसर्षपान् विकीर्य्य स्वैः स्वैर्मन्त्रैः पञ्चगव्यं शोधयेत्॥ * ॥ तच्छोधनमन्त्रा यथा।

ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।
इति गोमन्त्रम्।

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥
इति गोमयम्।

ॐ आप्यायस्व स मे तु ते विश्वतः सोमवृष्ण्यं। भवावाजस्य सङ्गथे।
इति दुग्धम्।

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत् प्रणआयूंषि तारिषत्॥
इति दधि।

ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ॥

इति घृतम् ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमादे। इति कुशोदकम् ॥ ॐ वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम्। जघेन यूप आप्यते प्रणीतो अग्निरग्निना। इति मन्त्रेण वेदौ संप्रोक्ष्य पञ्च घटान् घटस्थापनक्रमेण संस्थाप्य ॥ * ॥ घटस्थापनमन्त्रा यथा। सामगानाम्। ॐ महिषीणामवोस्तुतुर्थं मित्र स्यार्यम्णः दुराधर्षं वरुणस्य। इति भूमेः। ॐ धानावन्तं करम्भिणमपूपवन्तमुक्थिनं इन्द्र प्रातर्जुषस्व नः। इति धान्यस्य। ॐ आविघ्नं कलसं सुतो विश्वा अर्षन्नभिश्रिय इन्दरिन्द्राय धीयते। इति कलसस्य।

"ॐ अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भव। पर्ण वनस्पते त्वा त्वा च सदना रयि ॥"

इति पल्लवस्य।

ॐ आशोमित्रावरुणा हतेर्गयुतिमुच्चतं मघा रजांसि सुक्रतु। इति जलस्य। ॐ इन्द्रवरो नेमधिता हवन्ते यत्पार्या युनयते धियस्ताः शूरो नृषाताश्रवसश्च काम आशोमतिन्नासे भगाबन्नः। इति फलस्य। ॐ सिन्धोरुच्छ्वासे पतयन्तमुच्चैः शिरस्यपावाः पशुमाशु गिभूतै। इति सिन्दूरस्य। ॐ त्वावतः पुरुवसो वयमिन्द्र प्रणेतः सचिस्यातइरीणाम्। इति स्थिरी करणस्य। ॐ पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्विश्वस्मै भुवनाय कृण्वन्त्सोमो मती रुणद्धि वाचमिषयन्। इति घण्टायाः। ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञपतिं धिनुहि मां यज्ञियम्। इति धान्यस्य। ॐ आजिघ्रकलसमह्वा त्रिविष्वत्युन्दन्तः पुनरूर्जा निवर्त्तस्व सहसान्नः। सहस्रं धुक्षोरुधारा पयस्वतीमाविशतादयि। इति घटस्य। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋत सदन्यसि वरुणस्य ऋत सदनमसि वरुणस्य ऋत सदनीमासीद। इति जलस्य। ॐ धन्वना गा धन्वना जिगयेम धन्वना तीव्राः समदो जयेम। धनुःशत्रोरपकामं कृणोतु धन्वना सर्वाः प्रदिशो जयेम। इति पल्लवस्य। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः।

इति फलस्य।

"ॐ सर्वतीर्थमयं वारि सर्वदेवसमन्वितम्।
इमं घटं समारुह्य तिष्ठ देवगणैः सह ॥"

इति जलं दद्यात्। ॐ स्थिरो भव विष्णुस्त्वा पादुभ्यां वाजयतु पृथुभ्व सुषदस्त्वमग्ने पुरीषवाहनः। इति स्थिरीकरणस्य। ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः। पतयन्ति यह्वा इवस्य धारा अरुषीव वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः इति सिन्दूरस्य। ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपं अश्विनौ व्यात्तं इष्टन्मनीषाण सर्वलोकं मनीषाण। इति पुष्पस्य ॥*॥ ततः फलपुष्पयुतं विनानम्। ॐ विमान एष दिवो मध्य आस्त आपप्रवानोदसी अन्तरीयम्। सविस्ताचीरभिचष्टे घृताचीरन्तरा पूर्व्वमपरञ्च केतुम् ॥ सामगानाम्। ॐ ऊर्ज्ज ऊषु ण ऊतये तिस्रो देवीर्न सविता ऊर्ज्जो वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्विह्वयामहे। इति मन्त्रेण बध्नीयात्। * । "ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्। सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। इति मन्त्रेण मण्डलमध्ये सुवर्णपद्मं दत्त्वा स्वर्णशलाकया दलान्युत्कीर्य्य मण्डलमध्ये राजतीं प्रतिमां ॐ द्यौश्चाभाग पृथिवी त्वामनेहसं सुशर्म्माणमदितिं सुप्रणीतिम्। देवीं नावं स्वरित्रामनागसमस्रवन्तीं मारुहेमा स्वस्तये। इति मन्त्रेण निःक्षिप्य घटेषु देवान् पूजयेत्। * । प्रथमघटे गणेशं स्कन्दं द्वितीयघटे शिवं दुर्गां तृतीयघटे विष्णुं लक्ष्मीं सरस्वतीं चतुर्थे आदित्यं वास्तुपुरुषं क्षेत्रपालान् कार्त्तिकेयमश्विनौकुमारौ पञ्चमे यक्षान् लोकपालांश्च स्वैः स्वैर्मन्त्रैरावाह्य पूजयेत्। * । ततो गुरुर्देवं प्रतिमायां शालग्रामे वा यथोक्तविधिना स्थापयेत्।

"ॐ भद्रं कर्णेभिः शृणुयाम देवा
भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनू-
भिर्व्यशेमहि देवहितं यदायुः ॥"

इति मन्त्रेण निवेद्य ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे। निधीनां त्वा निधिपतिꣳ हवामहे वसो मम। आहमजानि गर्भधमा त्वमजासि गर्भधम्। इति मन्त्रेण गुडोदकेन स्थापयेत्। ॐ घृतवतीति घृतेनाभ्यज्य। ॐ अग्नो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्तधामभिः। इति मन्त्रेण वर्णोदकेन स्थापयेत्। ॐ मन्त्र ते अग्ने समिधः सप्तजिह्वा मन्त्र ऋषयः सप्त धामप्रियाणि मन्त्र होत्राः सप्तधा त्वा यजन्ति। सप्त योनीरापृणस्वा घृतेन। इति उष्णोदकेन स्नापयेत्। ॐ दृषदादिव सुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेव वाज्यापः शुन्धन्तु मैनसः इति चन्दनेनानुलिप्य ॐ आपोहिष्ठामयो भुवः स्थान ऊर्ज्जे दधातन। महेरणाय चक्षसे। इति नदीतोयेन स्नापयेत्। ॐ शुन्नो देवीरभिष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति तीर्थोदकुलसेन स्नापयित्वा गायत्र्या गन्धयुक्तजलेन स्नापयेत्। ॐ हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विन्द्रः। अग्नीया गर्भन्दधिरे विरूपास्तास्न आपः शꣳस्योना भवन्तु ॥ इति पञ्चमृत्तिकया। ॐ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया इति मन्त्रेण सिक्तजलेन। ॐ सहिष्णो: परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। इति वस्त्रीकृतोयेन। ॐ या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु। तासामस्त्रिप्रासनेऽच्छिद्रं शर्म्म यच्छत। इति सर्व्वौषधिजलेन। ॐ यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे। प्रप्रयमन्नमृताय प्रिये मित्रे न शंसिषम्। इति कषायमिश्रजलेन। पञ्चगव्येन स्वैः स्वैर्मन्त्रैः संस्नापयेत्। ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाम्। पयस्वतीः प्रदिशः सन्तु मह्यं सम्मा सृजामि पयसा घृतेन सम्मा सृज्यन्तपयसा। इति पञ्चगव्येन। ॐ तस्माद्यज्ञात् सर्व्वहुतः ऋचः सामानि जज्ञिरे। छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत। इति पञ्चामृतेन। ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः। इति फलोदकेन। ॐ सहस्रशीर्षाꣳ पुरुषं वक्ष्यमाणमन्त्रेण सहस्रधारया। ॐ इतोन्विन्द्रमिति पूर्व्वोक्तमन्त्रेण तुलसीचन्दनयुक्तजलेन। ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्। मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु। इत्यनेन वेदादि चतुष्टयेन। तद्यथा ॐ अग्निर्मौवे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्। १। ॐ इषेत्वोर्जत्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे।२। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि।३। ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः। ४। वक्ष्यमाणपुरुषसूक्तेन च एकाग्नीनिघटैः स्नापयेत्। अग्नौ अष्टाविंशतिघटैरष्टघटैर्वा स्नापयित्वा धौतवाससा जलमपनीय यथोपचारैः संपूज्य मण्डले आधारशक्त्यादीनि पूजयेत्। * । ॐ आधारशक्तये नमः। एवं सर्व्वत्र प्रणवादिनमोऽन्तम्। प्रकृतये कूर्म्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय रत्नद्वीपाय रत्नोज्ज्वलच्छिखरमहामणिमण्डपाय कल्पवृक्षाय रत्नवेदिकायै रत्नसिंहासनाय। आग्नेय्यां धर्म्माय नैर्ऋत्यां ज्ञानाय वायव्यां वैराग्याय ऐशान्यां ऐश्वर्य्याय पूर्व्वस्यां अधर्म्माय पश्चिमायां अवैराग्याय उत्तरस्यां अनैश्वर्य्याय। मध्ये ॐ अर्कमण्डलाय द्वादशकलात्मने सं सूर्य्यमण्डलाय मं षोडशकलात्मने सं सोममण्डलाय बं दशकलात्मने वं वह्निमण्डलाय सं सत्त्वाय रं रजसे तं तमसे। आं आत्मने ईं अन्तरात्मने पं परमात्मने हीं ज्ञानात्मने। पूर्व्वादिदिक्षु प्रादक्षिण्येन ॐ विमलायै नमः। एवं उत्कर्षिण्यै ज्ञानायै क्रियायै योगायै प्रह्वे सत्यायै ईशानायै। कर्णिकायां अनुग्रहायै। कर्णिकोपरि ॐ नमो भगवते विष्णवे सर्व्वभूतात्मने वासुदेवाय सर्व्वात्मसंयोगयोगपीठात्मने नमः ॥ * ॥ ततो मण्डले देवं संस्थाप्य पौराणिकमन्त्रेण वैदिकसूक्तेन वा षोढोपचारैः पूजयेत्। तद्यथा। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्व्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥१॥

सर्वत्र: स्थाने विश्वतो वृत्वा स्थाने सृष्ट्वा इत्यपि पाठः। इति पठित्वा भगवन् विष्णो इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निरुद्धस्व मम पूजां गृहाण। ततो यथाविधासनमानीय समिति वदन्यवीजेनार्घाम्भसा संप्रोक्षासनमभ्यर्च्य ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २। इति पठित्वा इदमासनकासनं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे नमः। एवं सर्वत्र स्थाने। ॐ भगवन् विष्णो स्वागतम्। इति स्वागतप्रश्नः। ततस्त्वाचम्याचम्य पद्मप्रासाकटूम्बरराजिकादि युक्तं जलं गृहीत्वा ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३। इति पठित्वा इदं पाद्यं पूर्ववन्मूलेन पादयोर्दद्यात्। ततो गन्ध-पुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वायुक्तजलं गृहादिपात्रे क्षिप्त्वा ॐ त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विश्वङ्व्यक्रामत् साशनानशने अभि ४। ततः स्थाने तस्मादित्यपि पाठः। इति पठित्वा सामगानामभिमतमर्घामर्घपात्रेषु अर्घः इति शिरसि दद्यात्। जातीलवङ्गकक्कोलयुक्तं केवलं वा पात्रस्थं जलं गृहीत्वा ॐ ततो विराडजायत विराजोऽधिपूरुषः स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः ५। इति पठित्वा इदमाचमनीयं ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वधा इति दद्यात्। ततः कांस्यपात्रस्थं दधिमधुघृतात्मकं कांस्येन पिहितं मधुपर्कं गृहीत्वा ॐ तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यं पशूंस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६। इति पठित्वा इदं मधुपर्कः ॐ नमो भगवते वासुदेवाय श्रीविष्णवे स्वाहा इति दद्यात्। ततः पूर्ववदर्घं पठित्वा पुनराचमनीयञ्च दद्यात्। कर्पूरवासितजलं गृहीत्वा ॐ तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ७। इति पठित्वा इदं स्नानीयजलं मूलेन दद्यात्। पूर्ववत् पुनराचमनीयं दत्त्वा वस्त्रं गृहीत्वा ॐ तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजायवः ८। इति पठित्वा इदं वस्त्रं मूलेन दद्यात्। एवमुत्तरीयवस्त्रं यज्ञोपवीतं पूर्ववदाचमनीयं दत्त्वा आभरणं गृहीत्वा ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ९। इति पठित्वा मूलेन दद्यात्। ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत् किं बाहू किमूरू पादा उच्येते १०। ऋग्वेदस्याश्वलायनशाखायान्तु मुखं किमस्य को बाहू कावूरू पादा उच्येते इति भेदः। इति पठित्वा मूलेन गन्धं दद्यात्। ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११। इति पठित्वा मूलेन पुष्पं दद्यात्। ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२। नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् १३। इति पठित्वा मूलेन धूपं दद्यात्। ॐ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् १३। इति पठित्वा मूलेन दीपं दद्यात्। ततो नैवेद्योपरि मत्स्यमुद्रया मूलमन्त्रं दशधा अभ्यर्च्य धेनुमुद्रां प्रदर्श्य ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४। इति पठित्वा नैवेद्यं मूलेन दद्यात्। ॐ सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् १५। इति पठित्वा कर्पूरादिवासितं पानीयं ताम्बूलं पुनराचमनीयं दर्पणञ्च दद्यात्। ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः स चन्त यत्र पूर्वे साध्याः सन्ति देवाः १६। इति पठित्वा अञ्जलित्रयं पुष्पं दत्त्वा आवरणानि संपूज्य मूलमन्त्रं यथाशक्ति जप्त्वा प्रणमेत्। *। ऋग्वेदस्याश्वलायनशाखायान्तु यत्पुरुषेण हविषा इत्यादिना आसीनं ६ तं यज्ञं बर्हिषीत्यादिना वस्त्रं ७ तस्मात् यज्ञात् सर्वहुतः संभृतमित्यादिना यज्ञोपवीतम् ८ तस्मात् यज्ञात् सर्वहुत ऋचः सामानीत्यादिना चन्दनम् ९ तस्मादश्वा अजायन्त इत्यादिना पुष्पं १० यत्पुरुषं व्यदधुरित्यादिना धूपम् ११ ब्राह्मणोऽस्य मुखमासीदित्यादिना दीपम् १२ चन्द्रमा मनसो जात इत्यादिना नैवेद्यम् १३ नाभ्या आसीदन्तरिक्षमित्यादिना ताम्बूलम् १४ सप्तास्यासन् परिधय इत्यादिना नीराजनम् १५ इति भेदः अन्यत् समानम्। *। ततो गुरुः कुलपञ्चमे उपविश्य कुम्भे स्थण्डिले वा ब्राह्मविधिना तदङ्गानि स्वगृह्योक्तविधिना साङ्गसनामानमग्निं संस्थाप्य ब्रह्मस्थापनानन्तरं अभिषेकार्थं ऐशान्यां नवमण्डलमध्यामं बहिर्हस्तप्रमितभूमिं पूतामत्यन्तमृदाधोदुम्बरपत्रपल्लवच्छन्नमुखं फलवन्तञ्चतुरं अन्तःछिद्रपञ्चरत्नं निर्मलजलपूर्णं हृत्कलसं अक्षतानामुपरि ॐ आजिघ्र कलशमित्यादिमन्त्रेण स्थापयेत्। तत्र वरुणस्योत्तम्भनमसीति वरुणं न्यसेत्।

"ॐ गङ्गाद्याः सरितः सर्वाः सप्तसमुद्राश्च सरांसि च।
सर्वे सप्तह्रदाः सरितस्तीर्थानि जलदा नदाः।
आयान्तु यजमानस्य दुरितक्षयकारकाः।"

इति तीर्थानि च न्यसेत्। तत्रैव कलसे अश्वस्थानाद्गजस्थानात् वल्मीकात् सङ्गमात् ह्रदात्। गोकुलात् रथ्याया आनीय सप्त मृदः क्षिपेत्॥ सर्वौषधीश्च। *। ततश्चरुसाधनं कुर्यात्। अग्नेरुत्तरे हस्तमात्रविस्तारायां प्रादेशपरिमितोत्सेधपरिमितस्रुचौ साङ्गीकृत्य विस्तारायतं

प्रादेशपरिमितोदुम्बरनिर्मितमेध्यं चरुस्थाली आज्यस्थाली उदूखलमुषले स्रुवं पूर्णाहोमार्थं स्रुवं समिधं आज्यादीनि उदगग्राणि प्राचं प्राचं विनियोगक्रमेणासादयति। संस्कार्य यवान् श्रीहीन् वा तदभावे तण्डुलान् पूर्वं निधाय। सामगः। ॐ विष्णवे त्वा जुष्टं निर्वपामि। इति यवादिप्रकृतिमेकां चरुस्थाल्यां हुत्वा उदूखलमध्ये स्थापयेत्। यजुर्वेदी तु ॐ विष्णवे त्वा जुष्टं गृह्णामि ॐ विष्णवे त्वा जुष्टं निर्वपामि चमसस्रुवेण ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति त्रयं कुर्यात्। ऋग्वेदी तु ॐ विष्णवे त्वा जुष्टं निर्वपामि ॐ विष्णवे त्वा जुष्टं प्रोक्षामीति निर्वापप्रोक्षणमात्रम्। यस्य गृह्यप्रतिष्ठा तस्यादौ जुह्वग्रहणम्। एवं सर्वत्र। एवमग्न्यादिषु। ॐ अग्नये त्वा जुष्टं निर्वपामि एवं वायवे सूर्याय द्यौः विष्णवे द्यौः अग्नये वायवे पुनरग्नये वसवाय पुनरपि अग्नये सूर्याय प्रजापतये अन्तरीक्षाय त्वष्ट्रे ब्रह्मणे पृथिव्यै महाराजाय सोमाय इन्द्राय अग्नये यमाय नैर्ऋताय वरुणाय वायवे कुबेराय ईशानाय ब्रह्मणे अनन्ताय आदित्याय सोमाय मङ्गलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे केतुभ्य इत्यं नवनिर्वपनं प्रकृतीः स्थापयेत्। द्विजानुपरिस्थदक्षिणवामसक्थिभ्यां सव्येनावहत्य मूर्ध्नेव प्रस्फोटयेत्। एवमपरावारहृयमवहत्य मूर्ध्नेव प्रस्फोटयेत्। तथा कर्तव्यं यथा वारत्रयेण तण्डुलनिष्पत्तिर्भवति। तदग्रतो संस्कारमात्रार्थं तण्डुलांश्चैवम्। ततस्तण्डुलान् द्विः प्रक्षाल्य चरुस्थाल्याममन्त्रकं क्षतोत्तरार्धं पवित्रं निःक्षिप्य तत्र तण्डुलान् निधाय कपिलाया दुग्धं निःक्षिप्य तदभावे अन्यधेनोर्दुग्धं निःक्षिप्य दर्व्या प्रागादिप्रदक्षिणमीषद्भ्रामयत्त्रयस्तथा पचेत् यथा दाहक्काथिन्यादिग्रन्थिलामङ्गालनरहितोऽन्नत्वप्राप्तकर्मा भवति स्थलद्वयेन स्थालीमध्यस्थं चरुं दृष्ट्वा ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततमित्यनेन मन्त्रेण ओमित्यनेन च घृतेन सिक्त्वा दर्व्या दक्षिणावर्तेन संमिश्रयेत्। ततोऽग्नेरुत्तरतोऽवताप्य पुनर्यवदुदूखलेन स्थालीमध्यस्थं हत्वा पुनर्घृतेनाभिघारयेत्। ततः पर्युक्षणान्तां कृत्वाग्निकां समाप्य सामगस्तु काम्यकर्माङ्गत्वेन तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यशौचश्च त्यागश्च धृतिश्च धर्मश्च सर्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा विरूपाक्षजपं कुर्यात्। ततः प्रकृते कर्मणि।

"ॐ पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽजः।
छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्ति-
धारकः।"

इत्यादिपुराणीयं ध्यात्वा विष्णुवेश्मप्रतिष्ठाकर्मणि अयं सं साङ्गसमाप्तीति नाम इत्वा

मठः

मठः

तूष्णीमग्नौ हुत्वा मेक्षणेन स्रुवं गृहीत्वा ॐ तद्विष्णोरित्यादिस्वाहान्तेन जुहुयात् सर्वत्र सामगानां मन्त्रान्ते देवतोद्देशो नास्ति। अग्नेर्वा इदं विष्णवे इति। ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्याय ॐ भूर्भुवः स्वः तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् स्वाहा इदं सूर्याय। ॐ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदं स्वाहा इदं विष्णवे। ॐ विष्णोरराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि वैष्णवमसि विष्णवे त्वा स्वाहा भूमी जनयन् देव एकः स्वाहा इदं विष्णवे। ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमं स्वाहा इदमग्नये। ॐ इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे स्वाहा इदं वायवे। ॐ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि स्वाहा इदमग्नये। ॐ शन्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा इदं वरुणाय। ॐ भूरग्नये स्वाहा ॐ सूर्याय स्वाहा ॐ प्रजापतये स्वाहा ॐ अन्तरिक्षाय स्वाहा ॐ द्यौः स्वाहा ॐ ब्रह्मणे स्वाहा ॐ पृथिव्यै स्वाहा ॐ महाराजाय स्वाहा एवमपि सामगेतरेतन्तद्देवतोद्देशः पश्चात् कार्यः। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय ॥ * ॥ ततो दिक्पालहोमः। ॐ आतारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं हयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं वृणीमहे होतारं विश्ववेदसं अस्य यज्ञस्य सुक्रतुं स्वाहा इदमग्नये। ॐ नाके सुपर्णमुपयत् पतन्तं हृदाविनन्दो अभ्यचक्षत त्वा हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं शरण्यं स्वाहा इदं यमाय। ॐ वैत्या हि निर्ऋतीनां वशश्चरसि रोदसी परिवृज्य क्षरेयः सिन्धुपरिपदामिव स्वाहा इदं निर्ऋतये। ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा स्वाहा इदं वरुणाय। ॐ वात आवातु भेषजं शम्भुमयो भुनो हृदे प्रण आयूंषि तारिषत् स्वाहा इदं वायवे। ॐ सोमं राजानं वरुणमग्निमन्वारभामहे आदित्यं विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिं स्वाहा इदं सोमाय। ॐ अभित्वा शूरनोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ सप्तमीघृतं मधुवा गन्धर्वाः सप्तिमिन्नाम्यश्वान् सप्तिरक्षाः सप्तिमिन्नाम्यश्वान् यजमादधुः स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय इहेषां कृणुहि भोजनानि ये बर्हिषो नमो उक्तिं न जग्मुः स्वाहा इदं कुबेराय। ॐ नमोऽग्नये जगतस्त्रायसे श्रियं जिन्वसे कृमहे वयं पुराणो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायता मारार्ष्टु राजन्य शूर इषव्योति व्याधी महारथो जायतां स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदमनन्ताय ॥ * ॥ ऋग्वेदी तु। ॐ आतारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रं हयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः स्वाहा इदमिन्द्राय। ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे देवा आसादयादिह स्वाहा इदमग्नये। ॐ यमाय सोमं सुनुत यमाय जुहुता हविः यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः स्वाहा इदं यमाय। ॐ एषते निर्ऋतेभागं जुषस्व स्वाहा अग्निनेत्रेभ्यो देवेभ्यः पुरः सद्भ्यः स्वाहा यमनेत्रेभ्यो दक्षिणासद्भ्यः विश्वदेवनेत्रेभ्यः देवेभ्यः स्वाहा पश्चात् सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो देवामादाय उत्तरा सद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्य उपरिषद्भ्यो पुरः सद्भ्यः स्वाहा इदं निर्ऋतये। ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थः वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनो मासीद स्वाहा इदं वरुणाय। ॐ वातो वायो मनो वा गन्धर्वाः सप्तविंशतिस्तेऽग्नेऽश्वमयुञ्जन्स्तेऽग्निं यवमादधुः स्वाहा। इदं वायवे। आश्वलायनश्राद्धायान्तु ॐ सोमुराः परापरा निर्ऋतिर्दुर्हणावधीत्। पदीष्ट तृष्णया सह स्वाहा इदं निर्ऋतये। ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुशंस मान आयुः प्रमोषीः स्वाहा इदं वरुणाय। ॐ वातो वायो मनो वा गन्धर्वाः सप्तविंशतिस्तेऽग्नेऽश्वमयुञ्जन्स्तेऽग्निं यवमादधुः स्वाहा। इदं वायवे। आश्वलायनश्राद्धायान्तु ॐ सह वाय इतस्यते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे स्वाहा इदं वायवे। ॐ कुविदङ्गयवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय इहेषां कृणुहि भोजनानि ये बर्हिषो नमो उक्तिं न जग्मुः स्वाहा इदं कुबेराय। ॐ नमोऽग्नये जगतस्त्रायसे श्रियं जिन्वसे कृमहे वयं पुराणो यथा वेद सामसद्वृधे रक्षिता पायुरदब्धस्वस्तये स्वाहा इदमीशानाय। ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः। सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः स्वाहा इदं ब्रह्मणे। ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः स्वाहा इदमनन्ताय ॥ * ॥ ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं भवावाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषस चित्रं राधोऽमर्त्य आदाशुषे जातवेदो वहा त्वमद्या देवां उषर्बुधः स्वाहा। ॐ हृषीकेशे पुरीष्या रथेन रथीतमा मिता अपवाक्षमाणः प्रभङ्गसीषा प्रस्कण्वो यथा यज्ञस्यासाकमेधिषा रयीणां स्वाहा। ॐ शुक्रन्तेऽन्यद्यजतं अन्यदिष्टुरुषे अहनो द्यौरिवासि विश्वा हि माया अवसि स्वधावन् भद्रास्ते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवीरभीष्टये शन्नो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। यजुर्वेदी तु। ॐ आब्रह्मणेत्यादि इदं सूर्याय। ॐ इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं ब्राह्मणानाꣳराजा स्वाहा। इदं सोमाय। ॐ आमित्वा दिवः ककुत्पतिः पृथिव्या अयं अपाꣳ रेताꣳसि जिन्वति स्वाहा। इदं मङ्गलाय। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयञ्च। अस्मिन् सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत स्वाहा। इदं वृषाय। ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजात

कृत प्रजात तदस्मासु द्रविणं धेहि चित्तय स्वाहा। इदं इन्द्राग्नये। ॐ अग्नात् परिस्रुतो रसं ब्रह्मणा व्यपिबत् क्षत्रं पयःसोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानय शुक्रमन्धसः। इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु स्वाहा। इदं शुक्राय। ॐ अग्नो देवीरभीष्टय आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः स्वाहा। इदं शुक्रेश्वराय। ॐ काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि एवानो दूर्वे प्रतनु सहस्रेण शतेन च स्वाहा। इदं राहवे। ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। इदं केतुभ्यः। ऋग्वेदी तु एभिरेव मन्त्रैर्जुहुयात्॥ * ॥ ततो मेरुसमस्तो प्रतिपेत्। एवं चरुहोमं समाप्य चरुणैवेशान दिग्भ्यो बलिहरणात्। तद्यथा। एष पायसबलिः ॐ प्राच्यै दिशे नमः। एवमाग्नेय्यै आवाच्यै निर्ऋत्यै प्रतीच्यै वायव्यै उदीच्यै ऐशान्यै ऊर्ध्वायै दिशे अधोदिशे॥ * ॥ ततो घृताक्तपलाशसमिधा अष्टोत्तरशतं जुहुयादनेन मन्त्रेण। ॐ सद्विशोरित्यादि स्वाहा इदं विष्णवे। ततः पूर्वोक्तिचरुहोममन्त्रैस्तावद्भिः सर्वेणाज्याहुतीर्जुहुयात्। तत आज्येन पुरुषसूक्तमन्त्रैरभिमन्त्र्य सामगो जुहुयात्। यथा। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं स मह्यमस्य पांसुरे स्वाहा। १। ॐ प्रत्नस्य विशो अक्तस्य नक्तोः प्रत्नवोचं विदथा जातवेदसः वैश्वानराय मतिर्नव्यसि शुचिः सोम इव पवते चारुरग्नये स्वाहा। २। ॐ प्रकाशमधर्णव सुवाजो देवो देवानां जनिमा विवक्ति महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभि गामनक्ति स्वाहा। ३। ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं सर्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलं स्वाहा। ४। ॐ त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वं व्यक्रामत् साशनानशने अभि स्वाहा। ५। ॐ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा। ६। ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा। ७। ॐ ततो विराळजायत विराजो अधिपूरुषः। स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः स्वाहा। ८। ॐ कयाशचित्र आभुवदूती सदा वृधः सखा कया शचिष्ठया वृता स्वाहा। ९। *। यजुर्वेदी तु। षोडशोपचारपूजोक्तपुरुषसूक्तषोडशमन्त्रैराज्येन षोडशाहुतीर्जुहुयात्। ऋग्वेदिनामयमेव॥ * ॥ तत आज्यमिश्रितान् तिलान् गृहीत्वा ॐ इरावती धेनुमती हि भूतं सूयवसिनी मनवे दशस्या व्यस्कभ्ना रोदसी विष्णवेते राधत पृथिवीमभितो मयूखैः स्वाहा। इदं विष्णवे। इति सप्तत जुहुयात्। ॐ ब्रह्मानुजाधिप्यः स्वाहा। ॐ विष्णवनुजाधिप्यः स्वाहा। ॐ इन्द्रानुजाधिप्यः स्वाहा। इदं पूर्वोक्तैर्नवग्रहमन्त्रैर्दशदिक्पालमन्त्रैश्च सप्तत सप्तत जुहुयात्। एवं पर्वतेभ्यः स्वाहा। ॐ नदीभ्यः स्वाहा। ॐ सप्तभ्यः स्वाहा। एवं तिलहोमं समाप्य स्रुवेण महाव्याहृतिभिराज्यं जुहुयात्। *। ततः प्रायश्चित्तहोमसङ्कल्पं कृत्वा ॐ अग्नेर्वं विधुनामासीति नाम कृत्वा आवाह्य पूजयित्वा परिभाषासिद्धं स्वशाखोक्तं प्रायश्चित्तहोमादि कृत्वा पूर्णाहुतीं हुत्वा नामानमग्निं पूजयित्वा हुतपूजेक्षुचा उत्थाय यजमानेनान्वारब्धः ॐ सद्विशोः परमग्नित्यादि वौषट् इत्युच्चार्य पूर्णाहुतित्रयं दद्यात्। ततः आचारात् ऐशान्यां दृषदि त्वं घृतेला भव इत्युच्चार्य दुग्धादि त्रिभ्यां स्रुवेणाग्नेयभागेन ॐ कश्यपस्य त्र्यायुषं इति शिरसि। ॐ यमदग्नेस्त्र्यायुषं कण्ठे। ॐ यद्देवानां त्र्यायुषं बाहुमूलयोः। ॐ तन्नोऽस्तु त्र्यायुषं हृदि। अन्यकर्तृकपक्षे तु तन्नोऽस्तु त्र्यायुषमिति विशेषः। ततो यजमानः पञ्चगव्यं चरुशेषञ्च प्राश्य घ्रात्वा वा पूर्णपात्रादिकां दक्षिणां ब्रह्मणे दद्यात् ततो हेमयुक्तं सवस्त्रतिलपात्रं अलङ्कृतगवीं तन्मूल्यं वा एतद्धोमकर्म्मप्रतिष्ठार्थमाचार्य्याय दद्यात्। अन्यद्धोमपक्षे तोये दद्यात्। एतत्कृतकर्म्मणा प्रीयतां भगवान् विष्णुरिति विष्णवे समर्पयेत्। *। ततः प्रासादसम्मुखे ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञमनक्तु नो मरुतः सुदानव इन्द्रः प्रातुर्ध्वानसा हविरन्नमेव देवसामानीय विष्णुग्रहस्य सम्मुखे गरुडं शिवग्रहस्य वृषं दुर्गाग्रहस्य सिंहं स्थापयेत्। ततो गन्धमाल्यवस्त्रादिना स्थण्डिलं परिसंपूज्य ॐ इदं विष्णुर्विचक्रमे इत्यादि पठित्वा ॐ चक्राय नमः इति चक्रं संपूज्य गृहोपरि यथायोग्यं चक्रादिकं विन्यस्य गर्भं वस्त्रेणाच्छाद्य गर्भद्वारानुरूपं तोरणं विधाय गर्भानुरूपघण्टाचामरकिङ्किणीजालवर्त्मपर्यन्तं सवस्त्रयवहविमेतं ध्वजं गर्भस्योत्तानकोणे वायुकोणे वा स्थापयेत्। *। ततो विष्णुग्रामयामादौ यथार्हं गर्भसमीपे नीत्वा पञ्चविंशतिघटेनारिकेलोदकैः पञ्चगव्यपञ्चाङ्गतैलौषधोदकैः स्नानं कारयित्वा षोडशोपचारादिभिः पूजयेत्। वक्ष्यमाणमन्त्रान्तां पौराणिकलक्षेन सूद्राणामप्यधिकारः। अर्घ्यपात्राभ्यां प्रोक्षितं आसनं गृहीत्वा इदमासनं ॐ सर्व्वात्मन्यर्कमूर्त्तिं देव सर्व्वलोकमयं ततम्। आत्मस्थाय परं सूक्ष्मासनं कल्पयाम्यहम्॥ ॐ विष्णवे नमः इति मूलेन दद्यात् १। ततः कृताञ्जलिः।

"ॐ यस्य दर्शनमिच्छन्ति देवाः स्वार्थोद्यतसिद्धये।
तस्मै ते परमेशाय स्वागतं स्वागतञ्च मे॥
कृतार्थोऽनुग्रहीतोऽस्मि सफलं जीवितं मम।
आगतो देवदेवेश! सुस्वागतमिदं वपुः॥"

विष्णो स्वागतमिति स्वागतमन्त्रः २। ताम्रपात्रस्थं ग्रामाकदूर्व्वापद्मापराजितायुक्तजलं गृहीत्वा।

"ॐ यद्भक्तिलेशसम्पर्कात् परमानन्दसम्भवः।
तस्मै ते चरणाम्भोज पाद्यं सुखाय कल्पये॥"

इत्युच्चार्य मूलेन पाद्योर्दद्यात् २। इदमासनमिनीव मन्त्रस्य पूर्वमेतत् पाद्यमिति प्रयोज्यमेवमुत्तरत्र यथायोग्यमुल्लेखः। गन्धपुष्पाक्षततुलसीसमेतं अर्घ्यं गृहीत्वा।

"ॐ तापत्रयहरं दिव्यं परमानन्दलक्षणम्।
तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम्॥"

इति मूलेन शिरसि दद्यात् ३। जातीलवङ्गकक्कोलयुक्तं केवलं वा जलं गृहीत्वा।

"ॐ देवानामपि देवाय देवानां देवतात्मने।
आचामं कल्पयामीश मुक्तानां मुक्तिहेतवे॥"

इति मूलेन दद्यात् ४। कांस्यस्थं दधिमधुघृतात्मकं कांस्यपिहितं मधुपर्कं गृहीत्वा।

"ॐ सर्व्वकल्मषहीनाय परिपूर्णसुखात्मने।
मधुपर्कमिमं देव कल्पयामि प्रसीद मे॥"

इति मूलेन दद्यात् ५। पुनराचमनीयं गृहीत्वा।

"ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्य स्मरणमाचरेत्।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम्॥"

इति मूलेन दद्यात् ६। लौकिकषट्त्रिंशदधिकशुभलक्षणोक्तकाण्यं तीर्थजलं गृहीत्वा।

"ॐ परमानन्दबोधाब्धिनिमग्ननिजमूर्त्तये।
साङ्गोपाङ्गमिदं स्नानं कल्पयाम्यहमीश ते॥"

ॐ सद्विशोरिति मूलेन दद्यात् ८। पूर्ववत् गृहीत्वा पुनराचमनीयञ्च दद्यात्। अर्घ्याम्भसा प्रोक्षितं वस्त्रं गृहीत्वा।

"ॐ मायाचित्रपटच्छन्ननिजगुह्योरुतेजसे।
निरावरणविज्ञाय वासस्ते कल्पयाम्यहम्॥"

इति मूलेन दद्यात् ९। उत्तरीयवस्त्रं गृहीत्वा।

"ॐ यमाश्रित्य महामाया जगत्सम्मोहिनी सदा।
तस्मै ते परमेशाय कल्पयाम्युत्तरीयकम्॥"

इति मूलेन दद्यात् १०। पूर्ववत् पुनराचमनीयञ्च दद्यात्। सुवर्णाद्याभरणमर्घ्याम्भसा प्रोक्ष्य।

"ॐ स्वभावसुन्दराङ्गाय नानाशुभ्राश्रयाय ते।
भूषणानि विचित्राणि कल्पयाम्यमरार्चित॥"

इति मूलेन दद्यात् १०। प्रोक्षितं गन्धं गृहीत्वा।

"ॐ परमानन्दसौरभ्यपरिपूर्णदिगन्तर।
गृहाण परमं गन्धं कृपया परमेश्वर॥"

इति मूलेन दद्यात् ११। ततश्चेवताप्रियपुष्पमादाय।

"ॐ तुरीयवनसम्भूतं नानागुणमनोहरम्।
आनन्दसौरभं पुष्पं गृह्यतां परमेश्वर॥"

इति मूलेन दद्यात् १२। धूपं प्रोक्ष्य घण्टां संपूज्य।

"ॐ वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः।
आघ्रेयः सर्व्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥"

इत्युच्चार्य वामहस्तेन घण्टां वादयन् मूलेन दद्यात् १३। ततो घृतादिप्रदीपमादाय।

"ॐ सुप्रकाशो महादीपः सर्व्वतस्तिमिरापहः।

सवाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् ॥"
इति मूलेन दद्यात् १३। प्रोक्षितनानाविधनैवेद्योपरि मत्स्यमुद्रया मूलं दृष्ट्वा जप्त्वाभ्यर्च्य धेनुमुद्रयाऽमृतीकृत्य।
"ॐ सत्पात्रसिद्धं सुहविर्विधानैकभक्षणम्।
निवेदयामि देवेश सानुगाय गृहाण तत् ॥"
इति मूलेन दद्यात् १५। जलमादाय।
"ॐ समस्तदेवदेवेश सर्वतृप्तिकरं परम्।
अखण्डानन्दसम्पूर्णं गृहाण जलमुत्तमम् ॥"
इति मूलेन दद्यात् १५। पूर्ववत् पुनराचमनीयञ्च। ताम्बूलं गृहीत्वा।
"ॐ ताम्बूलं देवदेवेश कर्पूरादिसुवासितम्।
कल्पयामि तवेशान वदनाम्भोजभूषणम् ॥"
इति मूलेन दद्यात् १५। ततस्तन्मूर्तिवतानमस्कारमन्त्रैर्वन्दनं कुर्यात्। १६। उपचारदया धारदाने साधारणेनोल्लेखः पृथगा तन्नानम्।*।
तत ॐ विष्णवे नमः इति त्रिः संपूज्य घण्टावितानतोरणयुक्तं वस्त्रादिच्छादितं वेदम प्रोक्ष्य ॐ विष्णवे नमः इति त्रिः संपूज्य ॐ तद्विष्णोरित्यनेन विष्णुं स्मृत्वा ॐ तत् सदित्युच्चार्य वामहस्तेन धृत्वा कुशतिलजलान्यादाय अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा ततत्पुण्यकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहितलकामः श्रीविष्णुप्रीतिकामो वा एतत्पूजाकाष्ठादिमयवेश्मपरमाणुसमसंख्यवर्षसहस्रदशगुणकालावच्छिन्नस्वर्गलोकमहितलकाम एतद्दिष्टकादीतिविशेषः। ततत्प्रतिष्ठार्थं सुवर्णं तन्मूल्यं वा दक्षिणां विष्णवे दद्यात्। पञ्चाद्याचार्य्यादौ प्रतिपत्तिः।*। ततो देवं स्वयं गृहीत्वा गृहप्रदक्षिणं कारयित्वा ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः। इत्यनेनाभिमन्त्रितं देवं गृहं प्रवेशयेत्। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तमादद इति मन्त्रेण पिष्टिकोपरि न्यसेत्। ॐ स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् पृथुर्भव सुषदस्त्वमग्ने पुरीष्यवाहनः। इत्यनेन स्थिरीकुर्यात्। पुनर्देवं संपूज्य यथाशक्ति चामरघण्टावितानगोद्धिरण्यश्यामवाद्यभाङ्गादिकं दद्यात्। ततः ॐ यावद्धरा धरो देवो यावत्तिष्ठति मेदिनी। तावत्त्वं जगन्नाथ सन्निधीभव केशव ॥ इति मन्त्रं पठेत्। ततो ध्वजसमीपं गत्वा संपोज्य तमारोपयेदनेन मन्त्रेण ॐ एह्येहि भगवन्नीश्वरविनिर्म्मित उपरिचरवायुमार्गानुसारिन् श्रीकर श्रीनिवास रिपुध्वंसकर दुष्टनाशिनय सर्व्वदेवतासम्मत कुरु ग्रामं सर्व्वमयनञ्च मे भवतु सर्व्वविघ्नान् हर हर स्वाहा ॐ ध्वजाय नम इति ध्वजं संपूज्य ॐ विष्णवे नम इति शिरश्चर्च्या ध्वजं संपोज्य वामहस्तेन धृत्वा अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा मद्गृहापनकादिदुष्कृतापनुत्तयकामो विष्णुप्रीतिकामो वा विष्णुदेवत्यमिमं ध्वजं विष्णुदैवतं विष्णवे तुभ्यमहं सम्प्रददे। इत्युत्सृज्य एतत्प्रतिष्ठार्थं दक्षिणां विष्णवे दद्यात्। पञ्चाद्याचार्य्यादौ प्रतिपत्तिः। ततो गरुडस्तम्भं समारोप्य ॐ सुपर्णोऽसि गरुत्मांस्त्रिवृते शिरो गायत्रं चक्षुर्बृहद्रथन्तरे पक्षौ। स्तोम आत्मा छन्दांस्यङ्गानि यजूंषि नाम सामते तनूर्वामदेव्यं यज्ञायज्ञियं पुच्छं धिष्ण्याः शफाः सुपर्णोऽसि गरुत्मान्दिवं गच्छ स्वःपत॥ यजुर्वेदी तु। ॐ सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुस्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दांस्यङ्गानि धिष्ण्याः शफाः यजूंषि नाम। सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पत इति पठित्वा। ॐ गरुडाय नम इति त्रिःसंपूज्य ॐ नमस्ते पतगश्रेष्ठ पन्नगान्तकर प्रभो। त्वत्प्रसादाज्जगन्नाथो मोदेयं दिवि देववत्॥ यथा त्वं संपुटकरः सततं ततकन्धरः। तथैव पुरतो विष्णोस्तत्प्रसादाद्भवाम्यहम्॥ इति पुटाञ्जलिः प्रार्थयेत्॥*॥ ततः पिष्टपदीपादिना निर्म्मञ्छनं कुर्यात्। ततो विष्वक्सेनाय ब्राह्मणेभ्यो भोज्यानि दद्यात्। दीनानाथकृपणबधिरेभ्यो यथाशक्ति दद्यात्। ततः प्रीयतां पुण्डरीकाक्षसर्व्वयज्ञेश्वरो हरिः। तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्। ततो वृत्तमौनवाग्विसर्जनमहोत्सवं कृत्वा अच्छिद्रावधारणं कृत्वा वैगुण्यसमाधानार्थं तद्विष्णो इति विष्णुं स्मरेत्।*। एवं रुद्रादिमठादिप्रतिष्ठार्थं आसनादिकन्तु तत्तन्मन्त्रं विहाय केवलं प्रणवादिनमोऽन्तेन तत्तन्नाम्ना दत्त्वा यथायोग्यं तत्तत्कर्म्मशेषं समापयेत्।*। एवं गोपथादि प्रतिष्ठार्थं तत्तन्मठोपे वैदिकीं कृत्वा तत्तत्फलकामो विष्णुप्रीतिकामो वा तत्तत्प्रतिष्ठां करिष्ये इति सङ्कल्प्य वृद्धिश्राद्धादिकं विधाय प्रागुक्तविधिनाग्निस्थापनादि तत्तत्कर्म्मणा प्रीयतां भगवान् विष्णुरित्यन्तं कर्म्म कृत्वा कूपादिवत् सर्व्वभूतेभ्य उत्सृज्य दक्षिणां दद्यात्।*। नित्यव्रतादिप्रतिष्ठायान्तु विष्णुरित्यन्तं कर्म्म कृत्वा व्रतानुष्ठानं कृत्वा दक्षिणादिकं कुर्य्यात्।*। ततो घटस्थजलेन यजमानमभिषिञ्चेत्। तद्यथा,—
"ॐ सुराख्यामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतस्तथा।
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः शेषा दिक्पालाः पान्तु ते सदा॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः पुष्टिश्च मातरः।
एनाख्यामभिषिञ्चन्तु देवपत्न्यः समागताः॥

आदित्यचन्द्रमा भौमो बुधजीवसितार्कजाः।
ग्रहाख्यामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः।
ऋषयो मुनयो गावो देवमातर एव च॥
देवपत्न्योऽप्सरो नागा दैत्याश्चाप्सरसां गणाः।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च॥
ओषधानि विचित्राणि कालस्यावयवाश्च ये।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः।
एताख्यामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये॥"*॥

इति मठादिप्रतिष्ठाप्रयोगतत्त्वं समाप्तम्॥

(प्रकरणाद्यवस्तुविशेषः। अस्य पाकप्रकारो यथा,
"समिता मर्दयेदम्बुजलेनापि च सन्नयेत्।
तस्मात्तु वटिकां कृत्वा पचेत् सर्पिषि गौरसम्॥
एला लवङ्गकर्पूरमरीचान्वितलङ्कृते।
मज्जयित्वा सितापाके ततस्तच्च समुद्धरेत्॥
अयमुक्तकारः संसिद्धो मठ इत्यभिधीयते॥"
[सन्नयेदर्द्धयेत्] तथास्य गुणाः॥
"मतस्तु दृष्टिजो दृष्यो मलः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मठः, पुं॥ (मन्यते मनुतेऽवबुध्यते इत्यर्थः। मन + "वचिमनिभ्यां किच्च।" उणा॰ ५। ६८। इति अथच्, टच्चान्तादेशः।) मुनिविशेषः। इत्यादिकोषः॥ (श्रौक्तः। मठरो मुनिश्रौक्तयोरिक्ष्वाकुवंशजयोः॥)

मठ ह क मोदे। इति कविकल्पद्रुमः॥ (चुरा॰ पर॰ अक॰ सेट्।) ह मठयति। इति दुर्गादासः॥

मठ ह कि भृतौ। इति कविकल्पद्रुमः॥ (चुरा॰ पक्षे भ्वा॰-पर॰-सक॰-सेट्।) मठयति मठति ह्रारो जलम्। ह मठ्यते। इति दुर्गादासः॥

मठ ह ठ विभागे। वेष्टे। इति कविकल्पद्रुमः॥ (भ्वा॰-आत्म॰-सक॰-सेट्।) ह मठ्यते ह मठते। इति दुर्गादासः॥

मठकः, पुं॥ (मठयति भूषयति क्षेत्रमिति। मठि + "कृञ् श्रिमिमठयोरूच्चस्यापि।" उणा॰ २। ३०। इति कन्। एषोदरादित्वात्साधुः।) ग्रन्थभेदः। मेड़ुया इति भाषा। इति जटाधरः॥

मठरः, पुं, (वाद्यविशेषः। इत्यमरः। १। ७। ८॥ पुष्पक इति स्थानः। विपुलो ऽमरमेकरुद्र इति कोषः। मठ इति रौतीति इति मठरः; पृषोदरादित्वात्साधुः। मठ्नाति ग्रन्थति मठ्नोति पालयति वा। इति भरतः॥

मठरुकः, पुं, (मठरुरेवेति मठरु + स्वार्थे कन्।) मठरुवाद्यम्। इति त्रिकाण्डशेषः॥

मठ कृत्वे। इति कविकल्पद्रुमः॥ (भ्वा॰-पर॰-अक॰-सेट्।) मठति। कृत्वेऽवस्थाने। इति दुर्गादासः॥

मणिः, पुं, स्त्री, (मन + "सर्व्वधातुभ्य इन्।" उणा॰ ४। १३७। इतीन्।) अक्षमणिः।

मणिक

(यथा, रघौ। १। ४।
"मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।")
सूत्रादिकम्। तत्पर्य्यायः। रत्नम् २ मणी ३।
इत्यमरः। २। ६। ६६। (तथास्य पर्य्यायः।
"रत्नं स्त्रीवे मणिः पुंसि क्लियामपि निगद्यते।
तनु पाषाणभेदोऽस्ति सूत्रादि च तदुच्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)
अस्य गुणाः।
"मणिरत्नं परं शीतं कषायं स्वादु लेखनम्।
चक्षुष्यं धारणात्तच्च पाण्डुरोगविनाशनम्॥"
इति राजवल्लभः॥
(तथास्य गुणाः।
"सूत्राविद्धमपद्मेन्द्रवैदूर्य्यस्फटिकादयः।
चक्षुष्या मणयः प्रोक्ता लेखना विषहारिणः।
पवित्रा धारणाच्चैव पाण्डुरोगविनाशहाः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्याये।)
अजायाः कण्ठस्थितलक्षणम्। लिङ्गाग्रम्। अलिञ्जरः। इति मेदिनी। २४। योन्यग्रभागः। इति शब्दरत्नावली॥ नागविशेषः। इति जटाधरः॥ मलिवस्यः। इति हेमचन्द्रः॥ (मुनिभेदः। यथा, महाभारते। २। ११। २२।
"अत्रिर्वसिष्ठः कश्यपश्च गौतमोऽथ भरद्वाजः।
जमदग्निश्च सप्तैते ऋषयः सप्त मणयः॥")

मणिक, क्ली, (मणिरेवेति मणि + "प्राणिरजतादिभ्यः कन्।" ५। ३। ७६। इति स्वार्थे कन्। अलिञ्जरः। इत्यमरः। २। ६। ६१॥ (यथा, मात्स्ये। १। २१।
"स समादाय मणिकं प्राक्षिपज्जलधारिणम्॥")

मणिकर्णः, पुं, कामरूपस्थशिवलिङ्गभेदः। यथा,
"भल्लकूटस्य चैशान्यां मणिकूटो महागिरिः।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः॥
स सद्योजातरूपस्तु मणिकर्ण इतीरितः।
सद्योजातस्य मन्त्रेण पूजितव्यः सदा शिवः॥"
इति कालिकापुराणे ८१ अध्यायः॥

मणिकर्णिका, स्त्री, (कर्णे भवा इति। कर्ण + "कर्णललाटात् कनलङ्कारे।" ४। ३। ६५। इति कन्। टाप्। अकारस्य इत्वम्। मणिमयी कर्णिका शुक्तिपार्श्ववादित्वात् समासः। मा विद्यते यत्रेति वा। विष्णोरुत्पन्नाप्लवदर्शनात् विस्मितनयनाभ्यां शिवस्य मणिमयकुण्डलपतनादस्याः कथात्वम्।) काशीस्थतीर्थविशेषः। तदुत्पत्तिर्यथा। विष्णुं प्रति शिववाक्यम्।
"अहीयस्यास्तपसो महोपचयदर्शनात्।
वपुर्मयाम्भोजितो मौलिरद्भिरवञ्चभूषणः॥
तदाम्भोजतः कर्णात् प्रपात मणिकर्णिका।
मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका॥
चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम्।
त्वया चक्रेण वदनाच्छूलचक्रगदाधर॥
मम कर्णात् प्रपातेयं यदा च मणिकर्णिका।
तदा प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका॥

श्रीविष्णुरुवाच।
सूक्ताकुण्डलपातेन तवाद्रितनयाप्रियम्।
तीर्थानां परमं तीर्थं मुक्तिक्षेत्रमिहास्तु वै॥
काशतेऽत्र यतो ज्योतिस्तदाख्येयमीश्वर!।
अतो नामापरञ्चास्तु काशीति प्रथितं विभो!॥
अन्यं वरं वरे देव! देयः सोऽप्यविचारितम्।
स ते परोपकारार्थं जगदध्यासमत्र शिव!॥
आब्रह्मस्तम्बपर्य्यन्तं यत्किञ्चिज्जन्तुसञ्चितम्।
चतुर्षु भूतग्रामेषु काश्यां तच्चुक्तिमाप्नुयात्॥
तस्मिंस्तीर्थवरे पुण्ये! मणिश्रवणभूषणे।
सन्ध्यां स्नानं जपं होमं वेदाध्ययनसत्तमम्॥
सर्व्वगं पिण्डदानञ्च देवतानाञ्च पूजनम्।
गोभूतिलहिरण्याश्वदीपान्नाम्बरभूषणम्॥
कन्याद्रानं प्रयत्नेन सप्तजन्मजनेकशः।
प्रतीक्षमर्गं तृणोत्सर्गं लिङ्गादिस्थापनं तथा॥
कर्त्ता न यो महाप्राज्ञो ज्ञात्वायुः क्षणभङ्गुरम्।
विपत्तिं विपुलाञ्चापि सम्पत्तिमनिभङ्गुराम्॥
अक्षया सुकृतैरेकास्तु विपाकस्तस्य कर्म्मणः।
अन्यत्रापि शुभं कर्म्म यद्दत्तं अक्षया हुतम्॥
विनाकृच्छ्रान्मोक्षान्न त्यक्त्वा प्रायोपवेशनम्।
नैःश्रेयस्याः श्रियो हेतुस्तदस्तु जगदीश्वर!॥
नानुशोचति नाश्नाति ज्ञात्वा कालान्तरेऽपि यत्।
तद्दिहास्तु यतामेषु तस्येयं! त्वद्दयाद्दतम्॥
तव प्रसादात्तस्यैव सर्व्वमस्त्वयमस्तु तत्।
यदस्ति यद्भविष्यच्च यद्भूतञ्च महाशिव!॥
तस्मादेतच्च सर्व्वस्मात् क्षेत्रमस्तु शुभोदयम्।"
इति काशीखण्डे मणिकर्णिकाख्यानं नाम २६ अध्यायः॥

मणिकर्णेश्वरः, पुं, (मणिकर्ण्या मणिकर्ण्यां वा ईश्वरः।) काशीस्थशिवलिङ्गविशेषः। यथा,—
"ओङ्कारं प्रथमं पश्येत् मत्स्योदर्य्यां ततोदकः।
त्रिपिण्डमण्डपे तस्मै वै क्षत्तिवासमम्॥
रत्नेश्वराय चक्रेशं केदारञ्च ततो व्रजेत्।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः॥
विश्वकर्म्मेश्वराय मणिकर्णेश्वरं ततः।
अविमुक्तेश्वरं दृष्ट्वा ततो विघ्नेशमर्च्चयेत्॥
एषा यात्रा प्रयत्नेन कर्त्तव्या शैववासिभिः।"
इति काशीखण्डे १०० अध्यायः॥

मणिकर्णेश्वरः, पुं, (मणिकर्णस्तदाख्य ईश्वरः।) कामरूपस्थशिवलिङ्गविशेषः। यथा,—
"सप्तनीर्थजले स्नात्वा दृष्ट्वा चक्रं सवासवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिभैक्षाचलं गते॥"
इति कालिकापुराणे ८१ अध्यायः॥

मणिकानन, क्ली, (मणीनां काननमिव। बहुमणिधारणादस्य तथात्वम्।) कण्ठः। इति शब्दरत्नावली॥ रत्नवनञ्च॥

मणिकारः, पुं, (मणिं करोतीति। मणि + अण्।) मणिनिर्म्मितालङ्कारादिकर्त्ता। जौहरि इति भाषा। तत्पर्य्यायः। वैकटिकः २। इति हेमचन्द्रः॥ आपणिकस्तामणिकर्त्ता च॥

मणिका

मणिकूटः, पुं, (मणयः मणिमयानि कूटानि शिखराणि यस्य सः।) कामरूपस्थपर्व्वतभेदः। यथा,—
"भल्लकूटस्य चैशान्यां मणिकूटो महागिरिः।
मणिकर्णो नाम हरस्तत्र तिष्ठति लिङ्गकः॥"
इति कालिकापुराणे ८१ अध्यायः॥
"मणिकूटस्याथ शिरेर्गन्धमादनकस्य च।
मध्ये स्रवति लोहित्यो ब्रह्मपुत्रः समाख्यितः॥
हत्वा ज्वरं तथा विष्णुस्तत्र वासमथाकरोत्।
नरदेवासुरादीनां यथा भवति वै हितम्॥
ज्वरेणापीड़िततनुर्ज्वरं हत्वा महासुरम्।
सर्व्वलोकहितार्थाय सोऽगदस्नानमाचरत्॥
अगदस्नानसंभूतं संजातञ्च महासरः।
तस्य स्वयं नाम चक्रे हयग्रीवोऽपुनर्भवम्॥
न पुनर्जायते यस्मात् तत्र स्नात्वा नरोत्तमः।
अपुनर्भवसंज्ञं तत् सरस्तु परिकीर्त्तितम्॥
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक्।
स च ग्रामप्रमाणेन विस्तारेणैव संस्थितः॥"
इति कालिकापुराणे ८० अध्यायः॥

मणिखनिः, पुं (मणीनां खनिः।) मणेराकरः। यथा। मणेः खनिः॥ इति सुग्धबोधव्याकरणम्॥

मणिग्रीवः, पुं, (मणयो ग्रीवायां कन्धरायां यस्य।) कुबेरपुत्रः। इति शब्दरत्नावली॥ रत्नकन्धरे त्रि॥ (यथा, ऋग्वेदे। १। १२२। १४।
"हिरण्यकर्णं मणिग्रीवमर्व्वाक्त्रो
विश्वे वरिवस्यन्तु देवाः॥"
"मणिग्रीवं रत्नानुपेतकण्ठम्।" इति तद्भाष्ये सायणः॥)

मणिच्छिदा, स्त्री, (मणेरिव छिदमस्याम्।) मेदानामौषधम्। ऋषभाख्यौषधम्। इति मेदिनी। रे, २६०॥ (तथास्याः सलक्षणपर्य्यायः।
"महामेदाभिधा श्रेष्ठा मेदालक्षणसंयुता।
शुक्लकन्दो नखच्छेद्यो मेदोधातुमिव स्रवेत्॥
यः स मेदेति विज्ञेयो जिह्वासातत्परैर्जनैः।
मूलपर्णी मणिच्छिदा मेदा मेदोभवाभरा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मणित, क्ली, (मण् + भावे क्तः। मैथुनकालीनवाक्यम्। "क्वणितमणितादि सुरते।" इति साहित्यदर्पणे।) तत्पर्य्यायः। रतजल्पितम् २। इति हेमचन्द्रः॥ (यथा, शिशुपालवधे। १०। ७५।
"सीत्कृतानि मणितं कलजोक्तिः
स्निग्धसूक्तमलमर्थवत्तासि॥")

मणितारकः, पुं, (मणेरिव दीप्तिमती तारका यस्य।) सारसपक्षी। इति राजनिर्घण्टः॥

मणिद्वीपः, पुं, क्ली, (मणिप्रचुरो द्वीपः।) क्षीरसमुद्रमध्ये पद्मरागादिमणिमयान्तरीपः। स च त्रिपुरसुन्दरीवासस्थानम्। यथा.—
"सुधासिन्धोर्मध्ये सुरविटपिवाटीपरिसरे
मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे।
शिवाकारे मञ्चे परमशिवपर्य्यङ्कनिलयां
भजन्ति त्वां धन्याः कति चन चिदानन्दलहरीम्॥"
इत्यानन्दलहरी॥

मणिपर्व्वतः, पुं, (मणीनां पर्व्वतः।) गिरिविशेषः। यथा,—
"ततोऽभ्ययाद्गिरिश्रेष्ठमभितो मणिपर्व्वतम्।
तत्र पुण्या बहुर्वासा ह्यभवंश्चामलाः प्रभाः॥
मणीनां हेमवर्णानामभिभूय दिवाकरम्।
तत्र वैदूर्य्यवर्णानि ददर्श मधुसूदनः॥
सतोरणपताकानि द्वाराणि शिखराणि च।
विद्युद्घनमेघाभः प्रबभौ मणिपर्व्वतः॥
हेमचित्रवितानेश्च प्रासादैरुपशोभितः।
तत्र ता हेमवर्णाभा ददर्श मधुसूदनः॥
गन्धर्व्वासुरमुख्यानां प्रिया दुहितरस्तथा।
ददर्श पृथुलश्रोणीः संगृह्य गिरिकन्दरे॥
नरकेण समानीता रक्ष्यमाणाः समन्ततः॥"
इति महाभारते हरिवंशे नरकवधाध्यायः॥

मणिपूरं, क्ली, षट्चक्रान्तर्गतनाभिमध्यस्थतनीयचक्रम्। यथा,—
"तदूर्द्धं नाभिदेशे तु मणिपूरं महाप्रभम्।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः।
मणिवद्भिन्नं तत्र पद्मं मणिपूरं तथोच्यते॥
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम्।
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम्॥"
इति तन्त्रम्॥
तन्तु स्वाधिष्ठानपद्मस्योर्द्धदेशे तिष्ठति। यथा,—
"एतत्पद्मस्योर्द्धदेशे महापद्मं सुदुर्लभम्।
दशपद्मं नीलवर्णं सजलं घोररूपकम्।
डादिफान्तैः सचन्द्रैश्च पङ्कजस्थानशोभनम्॥
तन्मध्ये बीजकोषे निवसति सततं वह्निबीजं सुसिद्धं
वाह्नौ तत्तेपुराख्यं नवतपनिभं स्वस्तिकं तन्निभागे॥
स्वर्णाकारमिदं देवि! सर्व्वदेवप्रपूजितम्।
साकारं वह्निबीजञ्च सदैव मेघवाहनम्॥
रुद्रालयं हि तत्रैव महामोहस्य नाशनम्।
भद्रकाली महाविद्या वामभागे सुशोभिता॥"
इति निर्व्वाणतन्त्रे ६ पटलः॥
तत्र देवतीर्थं यथा, रुद्रयामले।
मणिपूरे देवतीर्थं पञ्चकुण्डं सरोवरम्।
तत्र स्नात्वा नरः सम्यक् सर्व्वपापैः प्रमुच्यते॥
तत्र श्रीकामनातीर्थं स्नाति यो मुक्तिमिच्छति॥"
(मणीनां पूरोऽच।) स्वनामख्यातदैत्यश्च॥ (यथा, महाभारते १। २१८। २३।
"चित्राङ्गदां पुनर्द्रष्टुं मणिपूरपुरं ययौ॥")

मणिबन्धः, पुं, (मणिर्बध्यते यत्र। अधिकरणे घञ्।) प्रकोष्ठपाण्योः सन्धिस्थानम्। इत्यमरटीकायां भरतः। कब्जा इति भाषा॥ स च करस्याद्यभागः। (यथा, अभिज्ञानशाकुन्तले ३ अङ्कः।
"मणिबन्धान्नमितमिदं संक्रान्तोष्णैरपरिमलं तस्याः।")
तत्पर्य्यायः। मणिः २। इति हेमचन्द्रः॥ करग्रन्थिः ३ करग्रन्थिकः ४। इति शब्दरत्नावली॥ तस्य शुभाशुभलक्षणं यथा,—
"मणिबन्धेनिगूढैश्च सुस्निग्धशुभसन्धिभिः।
पृथा हीनैः करच्छेदैः सप्तभिर्धनवर्द्धिताः॥"
इति गारुडे ६५ अध्यायः॥

मणिभद्रः, पुं, (मणिश्च भद्रः, यद्वा मणिभिर्भद्रमस्य। मणिमुक्तादिधनाधिकत्वादस्य तथात्वम्।) जिनानां पूर्व्वजन्मविशेषः। तत्पर्य्यायः। जम्भलः २ पूर्णभद्रः ३ जलेन्द्रः ४। इति विकाण्डशेषः॥ (प्रधानयक्षभेदः। यथा, महाभारते। ३। ६४। १२७।
"ऋते त्वां मानुषीं मर्त्यो न पश्यामि महाबले।
तथा नो यक्षराड्द्य मणिभद्रः प्रसीदतु॥"
यथा च कथासरित्सागरे। १२। १६५।
"असद्देशे पुरस्यास्यमणिभद्र इति श्रुतः।
पूर्व्वैः कृतप्रतिष्ठोऽस्ति महायक्षः प्रभावितः॥")

मणिभूमिः, स्त्री, (मणीनां भूमिः आकरः। मणिमयी भूमिरिति वा।) रत्नस्य खनिः। तत्पर्य्यायः। कुट्टिमम् २। इति शब्दरत्नावली॥

मणिमण्डपः, पुं, (मणिमयः मण्डपः।) रत्नमयगृहम्। यथा, रुद्रयामले वगलोत्तरे।
"मध्ये सुधाब्धिमणिमण्डपरत्नवेदी-
सिंहासनोपरिगतां परिपीतवर्णाम्।
पीताम्बराभरणमाल्यविभूषिताङ्गीं
देवीं नमामि धृतमुद्गरवैरिजिह्वाम्॥"

मणिमन्थं, क्ली, (मणिरिव मथ्यते इति मणि+मन्थ+कर्म्मणि घञ्।) मेषवलयणम्। इति राजनिर्घण्टः॥ (मणयः मथ्यन्ते उपलान् विदार्य्य गृह्यन्ते अत्रास्मादिति। मन्थ+अधिकरणादौ घञ्।) पर्व्वतविशेषः। इति मणिमन्थशब्दटीकायां भरतः॥ (यथा, महाभारते। १३। १८। ३३।
"मणिमन्थेऽथ शैले वै पुरा सन्यसिनो मया॥")

मणिमान्, [न्] त्रि, मणिविशिष्टः। रत्नभूषितः। (यथा, भागवते। ३। १५। ४१।
"विद्युत्पिञ्जकरकुण्डलमण्डनार्ह-
गण्डस्थलोल्लसदमुं मणिमत्किरीटम्॥")
मणिरस्त्यर्थे मतुप्प्रत्ययेन निष्पन्नः॥ (पुं, नागविशेषः। यथा, महाभारते। २। ६।
"मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ॥"
राजसभेदः। स च कुबेरस्य सखा। यथा, महाभारते। ३। १३०। ५७।
"सखा वैश्रवणस्यासीन्मणिमान्नाम राक्षसः॥"
पश्चिमस्थदेशभेदः। यथा, बृहत्संहितायाम्। १४। २०।
"अपरस्यां मणिमान् मेघवान् वनौघः सुराष्ट्रपतोऽस्तगिरिः॥"
स्त्री, पुरभेदः। यथा, महाभारते। ३। ८६। ७।
"इक्ष्वाकोर्नाम दैत्येय आसीत् कौरवनन्दन!।
मणिमत्यां पुरि पुरा वातापिस्तस्य चानुजः॥")

मणिमाला, स्त्री, (मणिनिर्म्मिता माला शाकपार्थिवादित्वात् समासः।) हारः। रत्नखचनविशेषः। इति मेदिनी। ले, १६०॥ (मणिनिर्म्मिता माला यस्याः।) लक्ष्मीः। इति शब्दरत्नावली॥ दीप्तिः। इतिशब्दमाला॥ (छन्दोभेदः। यथा, छन्दोमञ्जर्य्याम्। "नौ नौ मणिमाला छिन्ना शुद्धवसौ।" अधिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)

मणिरागं, क्ली, (मणीरिव रागो वर्णोज्ज्वल्यमस्य।) शिङ्गुलम्। इति राजनिर्घण्टः॥ (मणेः रागः।) मणेर्वर्णे पुं॥ (गुणादयोऽस्य शिङ्गुलशब्दे विधेयाः॥)

मणिवः, पुं, नागविशेषः। मणिशब्दादस्त्यर्थे वप्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी॥

मणिबीजः, पुं, (मणिरिव दर्शनीयं बीजं यस्य।) दाड़िम्बवृक्षः। इति राजनिर्घण्टः॥

मणिभरः, पुं, (मणिभिः स्त्रियते गम्यते यद्यते इतिभावः। हृ+कर्म्मणि अप्।) मुक्ताहारः। यथा, गीतगोविन्दे ७ सर्गः।
"घटयति सघने कुचयुगगगने रुचिमदरुचिरुचिते।
मणिसरममलं तारकपटलं सखदयग्रधिभूषिते॥"

मणी, स्त्री, (मणि+ऋदिकारादिति पक्षे ङीष्।) मणिः। इति भरतसिंहरूपकोषः॥

मणीचक्रं, क्ली, (मणीम् चक्रते प्रतिबध्नन्ति दीप्त्या इति। चक्र+अण्।) चन्द्रवर्त्मरूपम्। तत्पर्य्यायः। इन्द्रकालः २। इति त्रिकाण्डशेषः॥ (शाकद्वीपस्य वर्षविशेषः। यथा, मात्स्ये। १२१। २३।
"श्यामपर्व्वतवर्षं तु मणीचक्रमिति स्मृतम्॥")

मणीचकः, पुं, (मणी+चक+अच्।) मत्स्यरङ्गपक्षी। यथा,—
"भल्याधी मत्स्यरङ्गः स्याच्चलमद्गुर्मणीचकः।"
इति शब्दावली॥

मणीव, अ, मणिसदृशम्। मणिशब्देन सह इवशब्दस्य बहुव्रीहिपुरुषसमासः। प्रथमाश्रुतत्वान्मणिशब्दात् इवार्थेवप्रत्ययेन वाशब्देनार्थे रूपम् यथा,—
"मणीवोष्णेति तु इवार्थे वप्रत्ययो वाशब्दो
या बोध्यः।"
इति सिद्धान्तकौमुदी॥

मणीवकं, क्ली, (मणीव+संज्ञायां कन्।) पूयम्। इति हेमचन्द्रः॥

मण्टपी, स्त्री, (मण्टमुन्मादं पाति रक्षतीति मण्ट+पा+कः। जातौ संज्ञायां वा ङीष्।) क्षुद्रोपोदकी। इति राजनिर्घण्टः॥

मण्डः, पुं, (मण्डते इति मडि+अच्।) वटकविशेषः। माड़ा इति हिन्दी भाषा। यथा,—
"मसिनां मर्द्दयेदाज्येनैलेनापि च सज्जयेत्।
अम्लाम्लु वटकं ज्ञात्वा पचेत् सर्पिषि गौरवम्॥
एलालवङ्गकर्पूरमरिचाद्यैरलङ्कृते।
मज्जयित्वा सितापाके तप्तखञ्च समुद्धरेत्।
अयं प्रकारः संसिद्धो मण्ड इत्यभिधीयते॥"
अस्य गुणाः।
"मण्डस्तु हृद्यो वृष्यो बल्यः सुमधुरो गुरुः।
पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजितः॥"

प्रकारान्तरं यथा,—
"समिता शर्करालाजैर्निर्मिता अपरेऽपि ये।
प्रकारा असना तुल्याश्चेऽपि चैतद्गुणाः
स्मृताः॥"
इति राजनिर्घण्टः॥

मण्डं, क्ली, पुं, (मण्यते ज्ञायते अनेन अन्नादिकमिति। मण + "अमन्ताड्डः।" उणा० १।११३। इति डः।) सर्व्वेषामन्नद्रव्यादीनामग्रभरः। इत्यमरभरतौ। माड़ इति भात इति च भाषा॥ (यथा, उत्तररामचरिते ४ अङ्के। १।
"नीवारौदनमण्डसुण्णमधुरं सद्यःप्रसन्नाप्रिया-
र्मीनाद्यधिकं तपोवनतरोः पर्य्याप्तमाचामति॥")
सारः। पिच्छम्। इति मेदिनी। डे, २१॥
मण्डं, क्ली, (मण्डनीति। मण्ड भूषादौ + अच।) मस्तु। इति मेदिनी। डे, २१॥ (यथा, भागवते। ५। २०। २४।
"समानेन दधिमण्डोदेन परितः॥")
मण्डः, पुं, (मण्डयति भोजं भूषयतीति मण्ड + अच्।) एरण्डवृक्षः। प्राकभेदः। इति मेदिनी। डे, २१॥ मस्तु। भूषा। सारः। पिच्छम्। हेमचन्द्रः॥ (मण्डति वर्णाङ्गे कृष्णतीति मण्ड + अच्।) दर्दुरः। भक्तादिभवरम्। तस्य लक्षणम्।
"भक्तेर्विना द्रवो मण्डः पेयं भक्तसमन्वितम्।"
इति राजनिर्घण्टः॥
("नक्राक्षवृषभो मण्डः।" इति च, सुश्रुते सूत्रस्थाने ४५ अध्यायः।) अथ मण्डस्य लक्षणं विधिर्गौणाच्च।
"लङ्घनानां सुसिद्धानां चतुर्दशगुणो जले।
रसः सिक्थैर्विरहितो मण्ड इत्यभिधीयते॥
"शुण्ठी सैन्धवसंयुक्तो दीपनः पाचनश्च सः।
अन्नस्य सम्यक् सिद्धाच्च पेया मण्डस्य सिद्धतः॥
पेया यवधवानां विलेपीभक्तयोरपि॥"
तस्य गुणाः।
"मण्डो मार्द्दो लघुः पीतो दीपनो धातुसाम्यकृत्।
ज्वरघ्नस्वेदजो बल्यः पित्तश्लेष्मश्रमापहः॥"
इति भावप्रकाशः॥

अपि च।
"सुदीपनो वह्निविशोधनश्च
प्राणप्रदः श्लोमितवर्द्धनश्च।
ज्वरापहारी कफपित्तहन्ता
वायुं जयेत्सद्गुणो हि मण्डः॥
बालमण्डोऽभिजनको दाहश्लाघानिवारणः।
ज्वरानीसारशमनो वृंहणो दोषभेदनः॥
वाल्यमण्डोऽभिजनकः शूलाजीर्णविनाशनः।
पाचनो दीपनो हृद्यः पित्तश्लेष्माभिलाषहः॥"
बालमण्डो भक्ष्यबलमण्डः। इति राजवल्लभः॥
(धान्याधिकृतमण्डगुणाः। क्लीबत्वं विवक्षितम्।
"धान्यमण्डं पित्तहरं श्रमघ्नक्षारदीपनम्।
बालं रक्तश्रमघ्नं व्याधि सन्दीपनं परम्॥"
इति धान्यमण्डगुणाः॥

"युगान्तरागां मण्डस्तु श्लेष्मश्रद्धानलं मतम्।
पित्तसंशमनीयश्च सूक्ष्मं ग्राहणश्च तत्॥"
इति युगान्तरमण्डगुणाः॥
"रक्तशाल्युद्भवं मण्डं मधुरं व्याधि शीतलम्।
प्रमेहानलहरीं हन्ति वातलं पित्तलक्तथा॥"
इति रक्तशालिमण्डगुणाः॥
"मधुरं शीतलं किञ्चित् स्निग्धं श्लेष्मलं शोभनाशनम्।
अग्निदीप्तिमेधस्कृद्दीपनं वातनं श्वेतशालिजम्॥"
इति श्वेतशालिमण्डगुणाः॥
"यवमण्डं कषायं स्याद् व्याधि दोषान् विषाकि च।"
इति यवमण्डगुणाः॥
"तद्वत् गोधूममण्डभूतं मधुरं पित्तवातजम्।"
इति गोधूममण्डगुणाः॥
"ग्लानिमूर्च्छाकरं मद्यः कोद्रवाद्यकृतं लघु।"
इति कोद्रवमण्डगुणाः॥
"तद्वच्च क्षुद्धान्यानां वातलं पित्तकारकम्।
करोति श्लेष्मदं गुल्मं प्रतिश्यायादिकोपनम्॥"
इति क्षुद्धान्यमण्डगुणाः॥
इति भावप्रकाशे प्रथमे स्थाने नवमेऽध्याये॥
"मण्डस्तु दीपयत्यग्निं वातश्लेष्मानुलोमयेत्।
स्रोतःकरोति मोक्षाय स्वेदं सञ्जनयत्यपि॥
लङ्घनानां विरिक्तानां आर्त्ते स्वेदे च तृष्यताम्।
दीपनत्वात्प्रबुद्धाग्नेः मण्डः स्यात् प्राणधारणः॥
ज्ञानेन्द्रियसारशमनो धातुसाम्यकरः स्निग्धः।
लाजमण्डोऽभिजनको दाहश्लाघानिवारणः॥
मन्दाग्निविषमार्त्तानां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः।
चुत्पिपासामण्डः पथ्यः शुद्धानाञ्च मलापहः॥"
इति चरके सूत्रस्थाने सप्तविंशोऽध्यायः॥
"लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः।
वातानुलोमनो रुच्यः पित्तश्लेष्मानुलोमनः॥"
इति सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)
मण्डकः, पुं, (मण्डेन जनः इति। मण्ड + मण्डार्थात् कन्।) पिष्टकविशेषः। माड़ा इति हिन्दी भाषा॥ यथा,—
"गोधूमा धवला घौना; कुट्टिना; शोभिनाह्वयः।
प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिता; समिता;
स्मृताः॥
वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत्।
हस्तचालेन या तस्या लोष्टो मध्यक् प्रसारयेत्॥
व्यधोमुखघटस्थेनाग्निना प्रक्षिप्तदृष्टिः।
स्नेहना वह्निना साध्यः सिद्धो मण्डक उच्यते॥"
लोष्टो लेचो इति लोके।
"दुग्धेन घाण्यवल्लेन मण्डकं भक्षयेन्नरः।
अथवा सिद्धमांसेन समक्षवटकेन वा॥"
तस्य गुणाः।
"मण्डको दुर्जरो दृष्यो बल्यो रुचिकरो गुरुः।
पाकेऽपि मधुरो व्याधी लघुर्दोषचयापहः॥"
इति भावप्रकाशः॥

(माधवीलता। तत्पर्य्यायो। यथा,—
"माधवी स्यात्तु वासन्ती पुष्पको मण्डकोऽपि च।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
गीनाङ्गविशेषः। यथा,—
"जयप्रियः कलापश्च कमलः सुन्दरस्तथा।
मङ्गलो वल्लभश्चेति मण्डकाः षट् प्रकीर्त्तिताः॥
जयप्रियो हंसनाले लघुमध्ये यदा गुरुः।
ऊनविंशत्यक्षरैर्युक्तो रसे वीरे स वर्णते।
लघुर्गुरुर्लघुर्यत्र हंसनालः स उच्यते॥ १॥
कलापो रङ्गनालेन युक्तो रौद्ररसे हि सः।
द्वाविंशत्यक्षरैर्युक्तो लघुरादौ गुरुद्वयम्।
लघुरादौ गुरुर्वृत्तं रङ्गनाल इतीरितः॥ २॥
लघुर्वृत्तं गुरुश्चेकोऽनिलोऽत्र सगणात्मकः।
पञ्चविंशत्यक्षरैः स्यात् कमलः शान्तहास्ययोः॥३
गुरुरेको लघुर्वृत्तं त्रिगुटे भगणात्मके।
अष्टाविंशत्यक्षरैस्तु षट्पादे सुन्दरे मतः॥ ४॥
आदौ गुरुर्लघुर्मध्ये प्लुतोऽन्ते भृङ्गनालके।
एकत्रिंशत्यक्षरेषु वीरे मङ्गलमण्डकः॥ ५॥
षट्पिनापुत्रके नाम्नि गलसाग्रलगात्मके।
चतुस्त्रिंशदक्षरोऽयं वल्गभो रौद्रके रसे॥ ६॥
इति सङ्गीतदामोदरः॥
मण्डनं, क्ली, (मण्डयते अनेन इति। मण्ड भूषे + करणे ल्युट्।) भूषणम्। यथा, अभिज्ञानशाकुन्तले। १। १४।
"किमिव हि मधुराणां मण्डनं नाकृतीनाम्।"
अलङ्क्रियाणि च। इति मेदिनी। ने, १०५।
"चतुर्धा मण्डनं वासोभूषामाल्यानुलेपनैः।"
इति महाभारते मोक्षधर्म्मे॥
मण्डयः, पुं क्ली, (मण्ड + भावे घञ्। मण्डः। मण्डं पाति। पा + कः।) जनविश्रामस्थानम्। तत्पर्य्यायः। जनाश्रयः २। इत्यमरः। २। ४। ६॥ (यथा, देवीभागवते। ७। ११। ५०।
"गङ्गातीरे शुभां भूमिं मापयित्वा द्विजोत्तमैः।
कुर्य्यान्मण्डपं स्वस्याः पुण्यलक्षं मनोहरम्॥")
देवादिदत्तवेश्म। इति शब्दरत्नावली॥ (यथा-विश्वकर्म्मप्रकाशे ६ अध्याये।
"प्रदक्षिणायास्तु समक्षयत्नो मण्डपो भवेत्।
अस्य चार्द्धेन कर्त्तव्यश्चयतो सुखमण्डपः॥"
इत्यादिमण्डपविवरणम् तत्रैव विस्तरशो द्रष्टव्यम्॥ मण्डं पिबतीपि। पा + कः।) मण्डपानकर्त्तरि त्रि॥
मण्डपा स्त्री, निम्बवृक्षः। इति राजनिर्घण्टः॥ (मण्डपोऽपि दृश्यते।)
मण्डयन्तृ, पुं, (मण्डयति भूषयतीति। मण्ड + "तृभूवहिवसिभासिसाधिगाड् मण्डिजि, नन्दि-, भ्यश्च।" उणा०। ३। १२८। इति तृच् स च दित्।) अन्नम्। वस्त्रसंघः। नटः। अलङ्कारः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
मण्डयन्ती, स्त्री, (मण्डयतीति। मण्ड + अच् स्त्रियां ङीप्।) योषित्। इति त्रिकाण्डशेषः॥

मण्डरी, स्त्री, (मण्डयति भूषयतीति । मण्ड् + अरप्रत्ययः । स्त्रियां ङीप् ।) घुर्घुरी । इति हारावली ॥

मण्डलं, क्ली, (मण्डयति भूषयतीति । मण्ड् + "कलत्पचि ।" उणा० । १।१०६ । इति कलः ।) चन्द्रसूर्य्ययोर्वेष्टिर्व्वेदनम् । चन्द्रसूर्य्ययोरुत्थानज-रश्मिमण्डलम् । यथा,—

"वातेन मण्डलीभूताः सूर्य्याचन्द्रमसोः कराः ।
मालाभा योषि तत्यन्ते परिवेषः प्रकीर्त्तितः ॥"

इति साहसाङ्कः ॥

तत्पर्य्यायः । परिवेषः २ परिधिः ३ उपसूर्य्यकम् ४ । इत्यमरः । १ । १ । ३२ ॥ परिवेषः सर्व्वस्थान्योऽपि । यथा,—

"पुंलिङ्गः परिवेषः स्यात् परिधौ परिवेषणे ।"

इति मेदिनी ॥

सूर्य्यमुपगतं उपसूर्य्यं स्वार्थे कः उपसूर्य्यकम् । चन्द्रपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थे कः । इति भरतः ॥ * ॥ चक्रवालम् । इत्यमरः । १ । ३ । ६ ॥ तत्तु मण्डलाकारेण परिणतं वस्तुमात्रम् । मण्डलाकारदिक्समूहः । इति माधवी ॥ चक्रस्येव वालो वलनमस्य चक्र-वालं वलेर्वलि वालः मनीषादित्वात् लस्य डत्वे चक्रवाड्श्च । किंवा चक्रेण चक्रा-कारेण वाड्यते चक्रवाड् वाड्ड आप्रावे अच् । इति भरतः ॥ * ॥ कोढरोगः । द्वादश-राजकम् । इति मेदिनी । १ के, २१ ॥ (उक्तञ्च तद्विवरणं कामन्दकीये नीतिसारे । ८ । १—२२ ।

"उमेशः कोषदण्डाभ्यां सामात्यः सह मन्त्रिभिः ।
दुर्गाण्यधिवसेत्तानि मण्डलं मण्डलाधिपः ।
रथी विराजते राजा विमुष्टे मण्डले चरन् ।
अमुष्टे मण्डले सर्पन् ग्रीष्मे रथचक्रवत् ॥
रोचते सर्व्वभूतेभ्यः प्रभावाखण्डमण्डलः ।
सम्पूर्णमण्डलत्वाद्धि जिगीषुः सदा भवेत् ॥
अमात्यराष्ट्रदुर्गाणि कोषो दण्डश्च पञ्चमः ।
एताः प्रकृतयस्तज्ज्ञैर्विजिगीषोरुदाहृताः ॥
एताः पञ्च तथा मित्रं सप्तमः पृथिवीपतिः ।
सप्तप्रकृतिकं राज्यमित्यत्राप्त दृढस्मृतिः ॥
सत्यव्रतस्तु प्रकृतिभिर्मण्डलात्मा ह्यकल्मषः ।
जेतुमेवञ्चशीलश्च विजिगीषुरिति स्मृतः ॥
कौलीनं दृढमविलसुत्साहः स्यात्प्रकृतिना ।
चिन्तना बुद्धिमत्त्वं प्रागल्भ्यं सत्यवादिता ॥
अदीर्घसूत्रताशौर्य्यं प्रश्रयः स्वप्रधानता ।
देशकालज्ञता दाढ्यं सज्जनप्रणयिष्णुता ॥
सर्व्वविज्ञानिता दाक्ष्यं मदा संवृतमन्त्रता ।
अविसंवादिता ग्रौढ्यं भक्तिज्ञत्वं कृतज्ञता ॥
शूरत्यागदयावात्सल्यममर्षित्वमचापलम् ।
स्वकर्म्मदृढ्ताज्ञत्वं क्षमित्वं दीर्घदर्शिता ॥
जितश्रमित्वं धर्म्मिष्ठमक्रूरपरिवारता ।
प्रकृतिस्फीलना चेति विजिगीषुगुणाः स्मृताः ॥
सर्व्वैर्गुणैर्विहीनोऽपि स राजा यः प्रतापवान् ।
प्रतापयुक्ता ह्यन्यन्ति परान् सिंहा इवागतान् ॥

प्रतापश्चिह्नो नृपतिः प्राप्नोति महतीं श्रियम् ।
तस्मात्तत्यागयोगेन प्रतापं जनयेत्परम् ॥
एकार्थाभिनिवेशित्वमविलम्बश्चतुर्थके ।
दारुणस्तु स्मृतः प्राज्ञैर्विजिगीषुगुणान्वितः ॥
शुभ्रः क्रोधोऽलसोऽसह्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखक्षेत्रो रिपुः स्मृतः ॥
अरिर्मित्रमरेर्मित्रं मित्रमित्रमतःपरम् ।
तथारिमित्रमित्रञ्च विजिगीषोः पुरः स्थिताः ॥
पार्ष्णिग्राहः स्मृतः पश्चादाक्रन्दस्तदनन्तरम् ।
आसारावनयोश्चैव विजिगीषोस्तु मण्डलम् ॥
अरेस्तु विजिगीषोस्तु मध्यमो भूम्यनन्तरः ।
अनुयाय्यरिसंहतयोः समर्थो यस्तयोर्वधे ॥
मण्डलेऽहि चैतेषामुदासीनो बलाधिकः ।
अनुयाय्यरिसंहतानां यस्तानाञ्च वधे प्रभुः ॥
मूलप्रकृतयश्चैताश्चतस्रः परिकीर्त्तिताः ।
आहैव मन्त्रकुशलश्चतुष्कं मण्डलं मयः ॥
विजिगीषुररिर्मित्रं पार्ष्णिग्राहोऽथ मध्यमः ।
उदासीनः पुलोमेन्द्रौ षट्कं मण्डलमब्रुवन् ॥
उदासीनो मध्यमश्च विजिगीषोस्तु मण्डलम् ।
उशना मण्डलमिदं प्राह द्वादशराजकम् ॥")
देशः । स च देशः समन्ताद्विंशतियोजनं चत्वा-रिंशद्योजनं वा । इति केचित् ॥ गोलम् । इत्य-नेकार्थकोषः ॥ चक्रम् । इति त्रिकाण्डशेषः ॥ संधानः । इति हेमचन्द्रः ॥ नखाघातः । इति शब्दमाला ॥ धन्विनां स्थानपक्षकालगत-स्थितिविशेषः । यथा,—

"मण्डलाकारपादाभ्यां मण्डलं स्थानमीरितम् ।"

इति शब्दरत्नावली ॥

व्याघनखाख्यायुधभेदश्च । इति शब्दचन्द्रिका ॥ अष्टविंशः । यथा,—

"निर्व्यूढवृत्तिश्च दृढः स्याद्वोगोऽन्यावृत्तिरेव च ।
मण्डलं सञ्चतोवृत्तिः पृथग्वृत्तिरसंहतः ॥"

इति भरतधृतकामन्दकिः ॥

(अस्य पुंस्त्वमपि । यथा, महाभारते । ५ । ७८ । २० ।

"भीष्मेण शान्तनुसुतेन महाबलेन
मण्डलः सुमहाञ्चमूर्दुर्भेद्योऽमित्रघातिनाम् ॥"

यथा च, कामन्दकीये । १६ । ४१ ।

"मण्डलोऽसंहता भोगो दण्डस्तेषां मण्डीयिभिः ॥")

ग्रहादीनां मण्डलसंस्थानं तत्परिमाणञ्च यथा,

"सर्व्वेषान्तु ग्रहाणां वै अधस्ताच्चरते रविः ।
रवेरूर्द्ध्वं स्थितः सोमः सोमान्नक्षत्रमण्डलम् ॥
नक्षत्रेभ्यो बुधस्तूर्द्ध्वं बुधाद्दूरन्तु भार्गवः ।
तस्मादङ्गारकश्चोर्द्ध्वं तस्य चोर्द्ध्वं दृढस्मृतिः ॥
तस्मात् शनैश्चरश्चोर्द्ध्वं तस्योर्द्ध्वन्तपिमण्डलम् ।
अविभ्यश्च ध्रुवश्चोर्द्ध्वमाधारं चिह्नितं ध्रुवे ।
आदित्यनिलयो राहुः कदाचित् सोममार्गतः ॥
सूर्य्यमण्डलसंस्थस्तु नित्यं केतुः प्रवर्त्तते ।
नवयोजनसहस्राणि विस्तारो भास्करस्य तु ॥
विस्तारात्त्रिगुणश्चास्य परिणाहे तु मण्डलम् ।
द्विगुणः सूर्य्यविस्तारादाहिस्तार इति स्मृतः ॥

द्विगुणं मण्डलस्यास्य यथैव सवितुस्तथा ।
चन्द्रतः षोडशो भागो भार्गवस्य विधीयते ॥
भार्गवात् पादहीनस्तु विज्ञेयो वै दृढव्रतिः ।
दृढव्रतेः पादहीनौ वक्रचौरावुदाहृतौ ॥
विस्तारमण्डलाभ्यान्तु पादहीनस्तयोर्बुधः ।
बुधतुल्यानि वक्राणि सर्व्वे क्रूराणि यानि तु ॥
योजनार्द्धप्रमाणानि तेभ्यो क्रूरं न विद्यते ।
राहुः सूर्य्यप्रमाणस्तु कदाचित् सोमसम्मितः ।
तस्मात् षड्प्रमाणस्तु केतुस्तनियतः स्मृतः ॥"

इति देवीपुराणे षड्ग्रहगतिर्नामाध्यायः ॥

लक्षिममण्डलविधिर्यथा,—

"चतुर्हस्तं समारभ्य यावद्धस्तशतं भवेत् ।
मण्डलं तत्र कर्त्तव्यमतः ऊर्द्धं न कारयेत् ॥
विमलं विजयं भद्रं विमानं सुभद्रं श्रियम् ।
वर्द्धमानञ्च देवेशं जनानां कामदायकम् ।
रुचकं स्वस्तिकाख्यञ्च हृदयं इति मण्डलाः ॥
सितादिरुचिरान्नाञ्च रजाः कार्य्याः सुशोभनाः ।
शालिषष्टिककौसुम्भरजनीहरितयवाः ॥
मणिविद्रुमरागाश्च मण्डना अभिमन्त्रिताः ।
सितसर्षपधृपाद्याः रजाः ज्ञात्वा तु पातयेत् ॥
अक्षराजं यमेन्द्रौ सम्पवेति पदं पि वा ।
समीरणं शुभं ज्ञात्वा गोमयेनोपलेपितम् ॥
चन्दनागुरुकर्पूरनीरधृपाधिवासितम् ।
भूभागं सुमितं सिद्धं पूर्व्वपश्चिमकोत्तरम् ॥
दार्व्यं स्वस्तिकमत्याङ्गैः सर्व्वैर्वीजैश्चपञ्चभिः ।
पञ्चपञ्चाङ्गकं मध्ये द्विगुणं त्रिगुणं पि वा ॥
द्वारादि समलङ्कारान्वि कर्णिकाङ्कुरोज्ज्वलम् ।
पद्मं तथावरोधाढ्यं सत्किञ्जल्कदलानि च ॥
सशालमलङ्कृतन्तु रजःपातं समाचरेत् ।
मध्यमानामिकाङ्गुष्ठैरपरिहृदयेन च ॥
अधोमुखाङ्गुलिं कृत्वा पातयेत्तु विचक्षणः ।
समा रेखा तु कर्त्तव्याविच्छिन्ना पृथिवीजिता ॥
अङ्गुष्ठप्रदेशेनैव समा कार्य्या विशालना ।
संसक्तं विषमं स्थानं विच्छिन्नं क्षतरोहितम् ।
पर्य्यस्तसर्पिनं क्षुभ्यमालिखेन्न कदाचन ।
संसक्ते कलहं विद्याद्दरेखे तु वियद्भयम् ॥
अतिस्थाने भवेद्व्याधिर्नित्यं पीडा विमिश्रिते ।
विच्छिन्नभयमाप्नोति क्षुभ्यतस्तान् संक्षयः ॥
क्षतायाश्चार्थहानिः स्यात् विच्छिन्ने मरणं ध्रुवम् ।
वियोगात्तु भवेत्तस्य हृदयस्यतस्य वा ॥
अविदित्वा लिखेद्यस्तु मण्डलन्तु यथेच्छया ।
सर्व्वदोषानवाप्नोति ये दोषाः पूर्व्वभाषिताः ॥"

इति देवीपुराणे पुण्याभिषेकविज्ञानामाध्यायः ॥

सर्य्यमण्डले देवानां स्थानं यथा,—

"अर्चयन् पूजयन् देवं जपंश्च रविमण्डले ।
आदित्यमण्डले देवं ध्यात्वा विष्णुमुपैति सम ॥"

भोजनमण्डलं यथा,—

"यातुधानाः पिशाचाश्च असुरा राक्षसास्तथा ।
भुञ्जन्ति केवलमत्रैव मण्डलस्य विवर्ज्जनात् ॥
आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः ।
मण्डलान्तूपजीवन्ति तस्मात् कुर्व्वन्ति मण्डलम् ॥

चतुःकोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य तु। द्विकोणाकृति वैश्यस्य शूद्रस्य वर्त्तुलं सदा॥" इत्याद्ये वह्निपुराणे आग्निकसंस्कारनामाध्यायः॥

मण्डलं, क्ली, विम्बम्। इत्यमरः। २।३।१५॥ हे चन्द्रस्य शरीरे उपचाराद्दादित्यस्य च। वेति शोभते विम्बः शोभकान्तिगत्यादौ णाच्छीति विम्बः। विम्बति भाति विम्बः। शौञ्छोऽयमिति स्वामी। मण्डयति मण्डलं णाच्छीति अलः स्त्रियां ङीप्। दादित्वात् मण्डली च। इति भरतः॥

मण्डलः, पुं, (मण्डं जाति गृह्णातीति। मण्ड + कः।) कुक्कुरः। इति मेदिनी। लं, १२१॥ सर्पविशेषः। इति विश्वः॥ (हेडलाङ्कारकारसन्धानगतसन्धिविशेषः। "त एते सन्धयोऽष्टविधाः। कोरोदूखल-सामुद्र-प्रतर-तुन्नसेवनीवायसतुल्य-मण्डल-गुह्यावर्त्ताः।" 'कण्डन्तुदवनच्छेदीम-नाद्दीषु मण्डलाः।' इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥)

मण्डलकं, क्ली, (मण्डल। स्वार्थे कन्।) विम्बम्। कुष्ठभेदः। दर्पणम्। इति मेदिनी। के, २०७॥ मण्डलाकारयूपः। इति शब्दार्थः॥

मण्डलकः, पुं, (मण्डल। स्वार्थे कन्।) कुक्कुरः। इति धरणिः॥

मण्डलकृत्, क्ली, (मण्डलेन मण्डलाकारेण पथा गन्तुं कृत्यमिति निरुक्तसमासः।) मण्डलाकार-कृत्यम्। तत्पर्य्यायः। हल्लीषः २॥ इति शब्द-माला॥

मण्डलपत्रिका, स्त्री, (मण्डलं मण्डलाकारं पत्रं यस्याः। कन्। टाप्। अत इत्वञ्च।) रक्तपुन-र्नवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्या रक्तपुनर्नवाशब्दे ज्ञातव्याः।)

मण्डलाग्रः, पुं, (मण्डलं गोलाकारं अग्रं यस्य।) खड्गः। इत्यमरः। २।८।८८॥ (यथा, सुश्रुते सूत्रस्थाने अष्टमेऽध्याये॥ तच्च मण्डलाग्र-करणञ्च स्थाता च्छेदने लेखने च।)

मण्डलाधित, क्ली, (मण्डलवदाचरितमिति। मण्डल + क्यङ्। दीर्घः। मण्डलाय नामधातुः क्तः।) वर्त्तुलम्। इति शब्दरत्नावली॥

मण्डलाधीशः, पुं, (मण्डलस्य अधीशः।) मण्डले-श्वरः। तत्पर्य्यायः। मध्यमः २। इति हेमचन्द्रः॥

मण्डली, [न्] पुं, (मण्डलं कुण्डलं कुण्डला-कारेण शरीरवेष्टनमस्यास्तीति। मण्डल + इनि।) सर्पः। इति विकाण्डशेषः॥ विड़ालः। इति शब्दमाला॥ जाहकः। इति हेमचन्द्रः॥ खड़ाग्र इति भाषा॥ वटवृक्षः। गोलाग्र-वर्षः। इति राजनिर्घण्टः॥

मण्डली, स्त्री, (मण्डलमस्त्यस्या इति। अर्श आद्यच्। गौरादित्वात् ङीष्।) दूर्व्वा। इति शब्दमाला॥ (स्त्री, गुडूची॥ तत्पर्य्यायो यथा, "गुडूची मधुपर्णी स्यादमृतात्मतवल्लरी। छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च॥ जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली। चक्रलक्षणिकाधीरा विश्वल्या च रसायनी॥ चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मण्डलेशः, पुं, (मण्डलस्य ईशः।) मण्डलेश्वरः। तत्पर्य्यायः। एकजन्मा २ भयापहः ३। इति चिकाण्डशेषः॥

मण्डलेश्वरः, पुं, (मण्डलस्य ईश्वरः।) भूम्येक-देशाधिपः। अन्यो भूम्येकदेशाधिपो मण्डले-श्वरः स्यात् मण्डलस्य अरिमित्रादिरूपस्य देशस्य ईश्वरो मण्डलेश्वरः। एकदेशाधिप इत्यर्थः। स्यान्मण्डलं द्वादशराजके च देशे च बिम्बे च कदम्बके च। इति विश्वः॥ इत्यमर-टीकायां भरतः॥ तस्य लक्षणान्तरम्। "चतुर्योजनपर्य्यन्तमधिकारं नृपस्य च। यो राजा लक्षणयुतः स एव मण्डलेश्वरः॥" इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अध्यायः॥

मण्डहारकः, पुं, (मण्डं हरति आहरति गृह्णा-तीति। हृ + "ण्वुल्तृचौ।" ३।१।१३३। इति ण्वुल्। सुरासम्पादनार्थं मण्डग्रहणा-दस्य तथात्वम्।) शौण्डिकः। इत्यमरः। १।२।१०॥

मण्डा, स्त्री, (मण्डः कारणत्वेनास्ति अस्या इति अर्शआदिभ्योऽच्। टाप्।) सुरा। इति हारा-वली॥ (मण्डयतीति। मडि + अच्। टाप्।) आमलकी। इति मेदिनी। डे, २२॥

मण्डितः, पुं, बौद्धगणाधिपविशेषः। इति हेम-चन्द्रः। (मडि + कर्म्मणि क्तः।) भूषिते त्रि। इत्यमरः। ६।२। १००॥ (यथा, गीत-गोविन्दे। २। ७।

"मणिमयमकरमनोहर-कुण्डलमण्डितगण्डसुदारम्।")

मण्डूकः, पुं, (मण्डयति भूषयति जलाशयमिति मडि + "शृमिमण्डिभ्यामूकण्" उणा० ४।४२। इति ऊकण्।) भेकः। इत्यमरः। १। १०। २४॥ (यथा, मनुः। ४। १६६।

"पशुमण्डूकमार्জ্জারश्वसर्पनकुलाखुभिः। अन्तरागमने विद्यादनध्यायमहर्निशम्॥"

भेकार्थे पर्य्यायो गुणाश्च यथा,—

"मण्डूकः प्लवगो भेको वर्षाभूर्दुर्दुरो हरिः। मण्डूकः शीतलो नातिपित्तलो बलकारकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

घोषकः। मुनिविशेषः। इति मेदिनी। के, १६६॥ गाढ़तेजाः। इति शब्दरत्नावलिः॥ बन्धविशेषे क्ली। इति विश्वः॥ (अस्य जाति-भेदः। यथा, महाभारते। २। २८। ६।

"तत्र तिस्त्रिरकल्माषान् मण्डूकाख्यान् हयो-त्तमान्।")

मण्डूकपर्णः, पुं, (मण्डूकाक्षति पर्णमस्य। यद्वा, मण्डूक इवोत्तानोदरं पर्णमस्य।) घोणाकतरुः। इत्यमरः। ३। २। ५६॥ (तथाचास्य पर्य्यायः॥

"घोणाकः घोषकश्च स्यात्कटङ्कटुरटुकः। मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः॥

दीर्घवृन्तोरुशाखापि एणपुष्पः कटम्भरः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

घोणकः। इति मेदिनी। णे, ११५॥

मण्डूकपर्णी, स्त्री, (मण्डूकपर्ण। गौरादित्वात् ङीष्।) मञ्जिष्ठा॥ (यथास्या पर्य्यायः।

"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका मण्डूकपर्णी भण्डीरी भण्डी योजनवल्लिपि॥ रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका। भण्डीतकी च गण्डीरी मञ्जुषा वस्त्ररञ्जिनी॥")

ब्राह्मी। इति मेदिनी। णी, ११५॥ आदित्य-भक्ता। इति राजनिर्घण्टः॥ ओषधि-विशेषः। घुलकुड़ी इति भाषा। तत्पर्य्यायः। भेकी २ मण्डूकी ३ मण्डपर्णी ४। इति रत्न-माला॥ मण्डूकपर्णिका ५। अस्या गुणाः। मण्डूकपर्णिका लघ्वी स्वादुपाका रसा हिमा। (मण्डूकपर्ण्यर्थे पर्य्यायान्तरं यथा,—

"मण्डूकपर्णी माण्डूकी ताद्री दिव्या मण्डूकधी।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

तथाचास्या गुणाः॥

कषाया तु हिना पित्ते स्वादुपाकरसा हिमा। लघ्वी मण्डूकपर्णी तु तद्वद्दोषविषापहा॥

इति सुश्रुते सूत्रस्थाने ३६ अध्याये।)

पाठान्तरम्। मण्डूकपर्णिका लघ्वी रूक्षा वातविबन्धनुत्। इति राजवल्लभः॥

मण्डूकमाता, [क्] स्त्री, (मण्डूकस्य मातेव मण्डूक-पोषकत्वादस्यास्तथात्वम्।) ब्राह्मी। इति राजनिर्घण्टः॥ भेकमाता च॥

मण्डूका, स्त्री, (मण्डूक + स्त्रियां टाप्।) मञ्जिष्ठा। यथा, शब्दमालायाम्।

"मण्डूका च लता यष्टिर्मधुपर्णी च भण्डिरी।"

मण्डूकी, स्त्री, (मण्डूक + स्त्रियां ङीष्।) मण्डूक-पर्णी। इति मेदिनी। के, १३७॥ आदित्यभक्ता। ब्राह्मी। इति राजनिर्घण्टः॥ क्षुपविशेषः। इति रत्नमाला॥ घुलकुड़ी। इति भाषा। भेकयोषित्। इति शब्दरत्नावली॥

मण्डूरं, क्ली, पुं, लौहमलम्। तत्पर्य्यायः। शिल्हाजम् २। इत्यमरः। २। ६। ६८॥ सिंहाणं ३। सिंहाजं ४। मण्डते लोहं वेष्टते अग्निदाहे लोहादिभञ्जते वा मण्डयति भूष-यति औषधत्वाद्रोगिजमिति वा मण्डूरं कि मडि भूषे मडि ड विभागे वेष्टे वा ब्राह्मीति ऊरः। इति तट्टीकायां भरतः॥ अस्य गुणः। लौहगुणतुल्यः। शतवर्षोर्द्धं मण्डूरसत्त्वम्। अर्द्धशतवर्षोर्द्धं मध्यमम्। षष्टिवर्षोर्द्धमधमम्। अतो न्यूनं विषतुल्यम्। यथा,—

"यल्लोहं यद्गुणं प्रोक्तं तत्किट्टस्यापि तद्गुणम्। शतोर्द्धसत्त्वं किट्टं मध्यमाशीतिवार्षिकम्॥ अधमं षष्टिवर्षोर्द्धं ततो हीनं विषोपमम्॥"

इति रसेन्द्रचिन्तामणिः॥

(तथा चास्य पर्य्यायान्तरम्। मण्डूरं लोहजं किट्टम्। इति वैद्यकरत्नमालायाम्॥ अस्य उत्पत्तिर्मरणञ्च यथा,—

"गायमानस्य लोहस्य मलं मक्षरसुच्यते ।
लोहसिंहानिका किट्टी सिंहाग्रञ्च निगद्यते ॥
यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"ये गुणा मारिते लुप्ते ते गुणा सुप्तकिट्टके ।
तस्मात् सर्व्वत्र मक्षरं रोगघ्नत्वे प्रयोजयेत् ॥"
अथास्य मारणविधिर्यथा,—
"दग्धाचकाष्ठैर्मलमायसस्तु
गोमूत्रनिर्व्यापितमष्टवारान् ।
विचूर्ण्य लीढ्वं मधुनान्वितेन
कुम्भाह्वयं पाण्डुगदं निहन्ति ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

मक्षोदकं, क्ली. (मक्ष इव उदकमस्य मक्षमिश्रितमुदकमत्रेति वा ।) चित्ररागः । विचित्रवर्णः । आलिम्पना । इति मेदिनी । कं, २०७॥ (यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"सस्य पिष्टस्य भागांस्त्रीन् क्षिपेद्भागत्रिमिश्रितान् ।
मक्षोदकार्थे क्षीरस्य दध्नो वा तत्प्रमेकतः ॥")

मत् य अनङ्मदम् । यत्तं त्वं भवति त्वद्भवति अनङ्मदं मद्भवतीति संक्षिप्तसारव्याकरणम् ॥ अस्मच्छब्दात्क्विप्प्रत्यये ङसे तद्भवति अस्मच्छब्दस्य मदादेशोऽन्त्यलुप्तम् । इति तट्टीकायां गोयीचन्द्रः ॥

मतं, क्ली, (मन् + भावे क्तः ।) सम्मतम् । तत्पर्य्यायः । छन्दः २ अभिप्रायः ३ आकूतम् ४ भावः ५ आशयः ६ । इति हेमचन्द्रः ॥

मत, त्रि, (मन् + कर्म्मणि क्तः ।) सम्मतः । ज्ञातः । इति मेदिनी । ते, ४२ ॥ (यथा, रघौ । २ । ५७ ।
"किमप्यहिंस्यस्तव चेन्मनोऽहं
यशःशरीरे भव मे दयालुः ॥")
अर्च्चितः । इति हेमचन्द्रः ॥

मतङ्गः, पुं, (मादयति मादयत्यनेन वेति । मद् + "मदोऽभिर्य्यन्नि हर्षे । इत्युणादिकोष टीकोक्तस्त्वादङ्गच् । दस्य तः ।) मुनिभेदः । (यथा, रघौ । ५ । ५३ ।
"मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ॥")
मेघः । इत्युणादिकोषः । १ । २५ ॥

मतङ्गजः, पुं, (मतङ्गः मेघ इव जायते तद्वाक्यसुनेर्जातो वेति । जन + ड ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, कामन्दकीये नीतिसारे । १५ । ७ ।
"स्रोत्रे प्रभूतास्त्वयेन यायात्
निर्वासनार्थं करिणां यथा तु ।
ऋतेऽम्भसो योगबलात् प्रतापात
भवन्ति कुम्भानि मतङ्गजानाम् ॥")

मतल्लिका, स्त्री, प्रपुन्नाटम् । इत्यमरः । २ । ४ । २७ ॥

मतिः, स्त्री, (मन्यतेऽनयेति । मन् + क्तिन् ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवीभागवते । १ । १७ । २६ ।
"किमप्यहिंस्यस्तव चेन्मनोऽहं
यशःशरीरे भव मे दयालुः ॥")
अर्च्चितः । इति हेमचन्द्रः ॥

मतङ्गः, पुं, (मादयति मादयत्यनेन वेति । मद् + "मदोऽभिर्य्यन्नि हर्षे । इत्युणादिकोष टीकोक्तस्त्वादङ्गच् । दस्य तः ।) मुनिभेदः । (यथा, रघौ । ५ । ५३ ।
"मतङ्गशापादवलेपमूला-
दवाप्तवानस्मि मतङ्गजत्वम् ॥")
मेघः । इत्युणादिकोषः । १ । २५ ॥

मतङ्गजः, पुं, (मतङ्गः मेघ इव जायते तद्वाक्यसुनेर्जातो वेति । जन + ड ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, कामन्दकीये नीतिसारे । १५ । ७ ।
"स्रोत्रे प्रभूतास्त्वयेन यायात्
निर्वासनार्थं करिणां यथा तु ।
ऋतेऽम्भसो योगबलात् प्रतापात
भवन्ति कुम्भानि मतङ्गजानाम् ॥")

मतल्लिका, स्त्री, प्रपुन्नाटम् । इत्यमरः । २ । ४ । २७ ॥

मतिः, स्त्री, (मन्यतेऽनयेति । मन् + क्तिन् ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ (यथा, देवीभागवते । १ । १७ । २६ ।
"मतिस्तु द्विविधा लोके युक्तायुक्तेति सर्व्वथा ।")
इच्छा । स्तुतिः । इति मेदिनी । ते, ४१ ॥
आर्य्यम् । प्राकमेदः । इत्यजयपालः ॥ * ॥
"विप्रेन्द्र ! का प्रशंसेयं जन्म ते ब्रह्ममानसे ।
यस्य यत्र कुले जन्म तन्निस्तारधुरी भवेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः ॥
मतिकरौषधम् । यथा,—
"पाठा हे जीरके कुष्ठमञ्जगन्धाजमोदकम् ।
वचा चिकटुकस्तेव लवणं चूर्णमुत्तमम् ॥
ब्राह्मीरसेर्भावितञ्च सर्पिर्मधुसमन्वितम् ।
सप्ताहं भक्षितं कुर्य्याद्धारणां मतिं
पराम् ॥"
इति गारुडे १८८ अध्यायः ॥

मतिदा स्त्री, (मतिं ददातीति । दा + कः ।) ज्योतिष्मती । शिखण्डीवृक्षः । इति राजनिर्घण्टः ॥ (मतिदात्रि, त्रि ।)

मतिभ्रमः, पुं. (मतेर्बुद्धेर्भ्रमः ।) बुद्धिभ्रंशः । ("अज्ञानं खलु कर्त्तव्यं मतिभ्रमः ।" इति पातञ्जलयोगसूत्रभाष्ये वेदव्यासः ।) तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिभ्रान्तिः, स्त्री. (मतेर्बुद्धेर्भ्रान्तिः ।) बुद्धिभ्रंशः । तत्पर्य्यायः । भ्रमः २ मिथ्यामतिः ३ भ्रान्तिः ४ । इति शब्दरत्नावली ॥

मतिविभ्रंशः, पुं. (मतेर्बुद्धेर्विभ्रंशः ।) उन्मादरोगः । इति राजनिर्घण्टः ॥

मतिमत्, त्रि, (अयमनयोरस्यनेनेमामस्मिन्नर्थेन मतिमान् वेति । मतिमत + इनच् । मतुपो लोपः ।) अतिशयबुद्धिमान् । इति सुग्धबोधव्याकरणम् ॥

मत्कः, पुं, (मादयतीति । मद् + क्विप् । ततः स्वार्थे कन् ।) मत्कुणः । इति शब्दमाला ॥ (मम अयम् । अस्मद् शब्दादिदमर्थे कन् । मदादेशश्च ।) मत्सम्बन्धिनि त्रि । इति व्याकरणम् ॥ (यथा, भट्टिः । ३ । ३२ ।
"नेतस्मात् मत्कमिति ब्रुवाणः
सङ्गच्छतोऽमी प्रथयानगृह्यम् ॥")

मत्कुणः, पुं, (मादयतीति । मद् + क्विप् कुणतीति कुण + क । ततः । मत्कायौ कुणन्तीति ।) कीटविशेषः । खटमोका इति भाषा । तत्पर्य्यायः । रक्तपायी २ रक्ताङ्गः ३ मत्कायः ४ । इति राजनिर्घण्टः ॥ उद्देशः ५ । (यथा, शिशुपालवधे । १४ । ५८ ।
"मत्कुणाविव पुरा परिम्लवौ
सिन्धुराधगयने निषेदुषः ।
गच्छतः स्म मधुकैटभौ विभो-
र्यस्य नैद्रसुखविघ्नमाचरन् ॥")
निर्विशङ्कबुद्धौ । निःशङ्कपुरुषः । माकुन्दा इति भाषा । मारिकेलः । इति मेदिनी । ते, ७० । अङ्गाङ्गारम् । इति हेमचन्द्रः ॥१॥२७५॥

मत्कुणा, स्त्री, अजातलोमभगम् । इति शब्दरत्नावली ॥

मत्ता, स्त्री. (मादयतीति । अन्तर्भूतण्यर्थाद्यतोः + क्तः + स्त्रियां टाप् ।) मदिरा ।

मत्तकुञ्जरादिः, पुं (मत्तकुञ्जरस्य आदिः । मत्तकुञ्जराग्रकत्वादस्य तथात्वम् ।) इन्द्राग्रजः । विष्टि इति भाषा । इति शब्दमाला ॥
(विष्टिनिरस्य इन्द्राग्रजशब्दे विष्टिता ॥)

मत्तः, पुं, (मादयतीति । मद् + कर्त्तरि क्तः ।) चरक्शब्दकृत्ती । मातओयाला ज्ञानी इति भाषा ॥ तत्पर्य्यायः । प्रभिन्नः २ गर्व्वितः ३ । इत्यमरः । २ । ८ । ६६ ॥ मत्तङ्गः ४ चरकशब्दः ५ । इति शब्दरत्नावली ॥ धुस्तूरः । कोकिलः । मदिरः । इति राजनिर्घण्टः ॥

मत्तः, त्रि, मत्ततानिमित्तः । सुरापाने विकलान्तःकरणः । तत्पर्य्यायः । प्रौढः २ उत्कटः ३ क्षीवः ४ । इत्यमरः । ३ । १ । ७३ ॥ मदोद्धतः ५ । इति जटाधरः ॥ (यथा, देवीभागवते । २ । ८ । ४ ।
"ते पीत्वा मदिरां मत्ताः कृत्वा युद्धं परस्परम् ।"
यथाच माधवनलकविनिबन्धे महाव्याह्वाधिकारे ।
"मधोश मत्तः पुरुषो मदेन ।")
क्रुद्धः । मदीभिर्य्यश्च हर्षे क्तः । इत्यमरभरतौ ॥ अविवेकी । (यथा रामायणे । १ । ४४ । २० । "कथमाक्षो मदाक्षः ।"
"मत्तोऽविवेकी ।" इति तट्टीकायां रामानुजः ॥)

मत्तकाशिनी, मत्तकाशिनी } स्त्री, उत्तमस्त्री । इत्यमरः । २ । ६ । ४ ॥ मत्त इव क्षीव इव कमपि गच्छति मत्तकाशिनी कस्य च मत्तो यद्वादित्वान्नङ् इत्यमरभरतौ । मत्तेव काशते भाति मत्तकाशिनी तालजङ्घायाम् । इति भरतः ॥ (यथा, महाभारते । १ । १७३ । ६८ ।
"न तासां सदृशो मर्त्ये कामश्चैव मत्तकाशिनि ।")

मत्तकोयष्टिः, पुं. (मत्तः सन् कोयष्टिर्वानर इव ।) हड्डी । इति शब्दमाला ॥

मत्तरः, पुं, ममाधिकः । मत्तोऽतिशयः । अञ्जश्चेत्यादि इनरप्रत्ययेन सिद्धः । इति सिद्धान्तकौमुदी ॥

मत्तवारणं, क्ली. (मत्तं वारयतीति । वृ + णिच् ल्युः ।) प्रासादादीनां वरण्डः । कोठार वाराण्डा इति भाषा ॥ (यथा, कुट्टनीमते ।
"दिग्धप्रहारजर्जरित राजति मत्तवारणश्रेणिः ।"
"प्रासादादीनां वरण्डकः ।" इति तट्टीका ॥)
अग्राग्रयः । प्राङ्गणावरणम् । इति हेमचन्द्रः । ३ । ७८ । त्रिषु ॥ प्रासादादीनां कुड्यदृषदृषिः । कुड्यदृषदृषि इति च पाठः । इति मेदिनी । षे, ११ । ४ ॥ पुमपुंसकः । इति शब्दमाला ॥

मत्तवारणः, पुं, (वार्य्यते संवर्य्यते प्रहरणादिभिः इति वारणः । वृ + णिच् कर्म्मणि ल्युट् । मत्तश्चासौ वारणश्चेति ।) प्रशिक्षितकटकुञ्जरः । मत्तहस्ती । इति मेदिनी । णे, ११ । ४ । हेमचन्द्रश्च । ३ । ७८ ॥

मत्ता, स्त्री. (मादयतीति । अन्तर्भूतण्यर्थाद्यतोः + क्तः + स्त्रियां टाप् ।) मदिरा ।

मत्सरः

इति राजनिर्घण्टः ॥ (षड्ज्ञमन्तर्गतः दन्त्याक्षरः छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्याम् ।

"श्रेया मत्ता मभसगहता ।"

अधिकन्तु छन्दःशब्दे द्रष्टव्यम् ॥)

मत्तालम्बः, पुं, (आलम्बते असावित्यालम्बः । आ + लम्ब + कर्म्मणि घञ् । मत्तस्यालम्बः आश्रयः ।) प्राङ्गणावरणम् । तत्पर्य्यायः । अपाश्रयः २ प्रघीवः ३ मत्तवारणम् ४ । इति हेमचन्द्रः । ४ । ७८ ॥

मत्तेभगमना, स्त्री, (मत्तेभस्य गमनमिव गमनं यस्याः ।) स्त्रीविशेषः । मत्तगजगामिनी । इति हेमचन्द्रः । ३ । १७० ॥

मत्यं, क्ली, (मतं ज्ञानं तस्य करणमिति । मत + "मतजनहजात् करणजल्पकर्म्मसु ।" ४ । ४ । ६७ । इति यत् । लक्षस्य चैवस्य सभीकरणादिसाधनपक्षकम् । यथा, ताण्ड्यमहाब्राह्मणे । २ । ६ । २ ।

"आङ्गरसवांस्तपोव्रतेन यथा सम्प्रियतेन मत्येन ।
मनोकरोत्येवं पाप्मानं भ्रातृव्यं प्रजनयति ॥"

"मत्यं नाम हविषस्य चैवस्य सभीकरणादिसाधनपक्षकम् ।" इति तद्भाष्ये सायणः ॥)

दाक्षादीनां सृष्टिः । तत्पर्य्यायः । वसुः २ । इति हेमचन्द्रः । ३ । ४५६ ॥

मत्स, इ ई क गुप्तौ । इति कविकल्पद्रुमः ॥ (चुरा० आत्म०-सक०-सेट् ।) इदित्परधातूपधः । इ क ई इति भूर्वं मत्सयते दृपोऽयमिति मुरारिः ॥ मत्स इत्यनेनेदितौ इदन्तवन्तौ वेदितव्यावागमभेदार्थौ । इति दुर्गादासः ॥

मत्स्यः, पुं, (माद्यतीति । मद् + बाहुलकात् सन् ।) मनस्यः । इत्यादिकोषः ॥

मत्स्यगण्डः, पुं, (मत्स्यानां गण्डोऽत्र पृषोदरादित्वात् साधुः ।) शुक्लनविशेषः । मत्स्यबण्ड इति ख्यातः । तत्पर्य्यायः । गलग्रहः २ । इति राजनिर्घण्टः ॥

मत्स्यरः, पुं, (मद्यते इति मद् + "हृषमदिभ्यः किन् ।" उणा० । ३ । ७३ । इति सरन् । म च किन् । यद्वा । मदा सरन्तीति अमरटीका ।) अन्यशुभद्वेषः । इत्यमरः । ३ । ३ । १७२ ॥ (यथा, कथासरित्सागरे । ४२ । ६५ ।

"ग्रीवान्नाद्वत्तयामास द्वितीयमपि तत्फलम् ।
निसर्गविद्वो नारीणां सपत्नीषु हि मत्सरः ॥")

क्रोधः । इति मेदिनी । रे, १८३ ॥

मत्सरः, त्रि, (माद्यतीति । मद् हर्षे + "हृषमदिभ्यः किन् ।" उणा० । ३ । ७३ । इति सरन् । म च किन् ।) असह्यपरसम्पत्तिः । मात्सर्य्ययुक्तः । (यथा, महानिर्व्वाणतन्त्रे । १ । ८ ।

"न मत्सरा नातिरुष्टा नातिलुब्धा न कामुकाः ।")

कपटः । इत्यमरमेदिनीकरौ ॥ आलस्याधिकारविशेषः । यथा, —

"निन्दन्ति मां सदा लोका धिगस्तु मम जीवनम् ।
इत्यालसि भवेद्यस्तु धिक्कारः स च मत्सरः ॥"

इति वाग्भटे शिवाधीगवासरे १६ अध्यायः ॥

मत्स्यः

मत्सरा, स्त्री, (मद् + सरन् । स्त्रियां टाप् ।) मक्षिका । इति मेदिनी । रे, १८३ ॥

मत्सरी, [न्] त्रि (मत्सरोऽस्यास्तीति मत्सर + इनिः ।) अन्यशुभद्वेषी । तत्पर्य्यायः । कर्णेजपः २ दुर्ज्जनः ३ पिशुनः ४ खलचकः ५ सूचकः ६ द्विजिह्वः ७ खलः ८ । इति हेमचन्द्रः ॥ (यथा, मनौ । २ । २०१ ।

"परिभोक्ता कलमिव भवति कौटो भवति मत्सरी ॥")

मत्स्यः, पुं स्त्री, (माद्यन्ति लोका अनेनेति । मद् + "हृषमदिभ्यः किन् ।" उणा० । ४ । २ इति स्यन् ।) स्वनामख्यातजलजन्तुः । माछ इति भाषा ॥ तत्पर्य्यायः । पृथुरोमा २ झषः ३ मीनः ४ वैसारिणः ५ अण्डजः ६ विसारः ७ शकली ८ । इत्यमरः । १ । १० । ११ ॥ ग्रन्थिली ९ झषः १० आत्मारी ११ संवरः १२ शकः १३ जलेशयः १४ कण्टकी १५ ग्रन्थी १६ मत्स्यः १७ अनिमिषः १८ । इति शब्दरत्नावली ॥ शुङ्गी १९ । इति जटाधरः ॥ तस्य गुणाः । वृंहणत्वम् । गुरुत्वम् । शुक्रबर्द्धनत्वम् । बलत्वम् । स्निग्धत्वम् । उष्णत्वम् । मधुरत्वम् । कफपित्तकरत्वम् । वायुमाश्वरत्नेोग्रामीनां पूजितत्वम् । वातरोगहरत्वञ्च ॥ * ॥ वृहन्मत्स्यगुणाः । गुरुत्वम् । शुक्रलत्वम् । मलबहुकारित्वञ्च ॥ * ॥ क्षुद्रमत्स्यगुणाः । लघुत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । बह्निवर्द्धनत्वञ्च ॥ * ॥ पाठरमत्स्यगुणाः । दोषलत्वम् । स्निग्धत्वम् । गुरुत्वम् । मलभेदित्वञ्च ॥ * ॥ कथितमत्स्यस्य अर्थात् पूतिमत्स्यस्य गुणः । दोषलत्वम् ॥ * ॥ शुष्कमत्स्यगुणौ । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ लवणभावित मत्स्यगुणाः । कफपित्तकरत्वम् । सारकत्वम् ॥ सामुद्रमत्स्यगुणाः । लघुत्वम् । वृष्यत्वम् । मधुरत्वम् । अल्पमलकारित्वञ्च ।

"सामुद्रा गुरवो वृष्याः स्निग्धोष्णा वातनाशनाः ।"

इति पाठान्तरम् ॥ * ॥

(तथास्य पर्य्यायाः गुणाश्च ।

"मत्स्यो मीनो विकारश्च उषो वैसारिणोऽब्जः ।
शकुलः पृथुरोमा च स सुदर्शन इत्यपि ॥
रोहितादास्तु ये जीवास्ते मत्स्याः परिकीर्त्तिताः ।
मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तलाः ॥
वातघ्ना हृंहणा वृष्या रोचका बलवर्द्धनाः ।
मत्स्यवायसकानां दीप्राग्नीनाञ्च पूजिताः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

"मत्स्या रोहितपाठीनकूर्म्मशुक्लोरुकण्टकाः ।
शुक्तिशङ्खोडुम्बूकशफरीवर्म्मिचन्द्रिकाः ॥
शुलूकीशकमकरशिशुमारतिमिङ्गिलाः ।
राजीवाः सिलिचिमाद्याश्च ॥"

इति वाभटे शब्दस्थाने षष्ठेऽध्याये ॥

मत्स्याश्च द्विविधा नादेयाः सामुद्राश्च । तत्र नादेयाः । रोहित-पाठीन-पाटला-राजीव-वर्म्मिशोमत्स्य-शङ्खमत्स्य-नागुञ्जार शुरल-सहस्र इन्दुप्रभृतयो नादेयाः ॥

"नादेया मधुरा मत्स्या गुरवो मारुतापहाः ।
रक्तपित्तकराश्लोष्णा वृष्याः स्निग्धाल्पवर्च्चसः ॥
कषायानुरसक्लेदा ग्रुप्यप्रेवाजभोजनाः ।
सरस्तडागजलभृताः स्निग्धाः स्वादुरसाः स्मृताः ।
महाह्रदेषु बलिनः स्वल्पेऽल्पबलाः स्मृताः ।"

तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालक-नन्दिवारलकमकरगार्गरकचन्द्रकमहामीन-राजीवप्रभृतयः सामुद्राः ॥

"सामुद्रा गुरवः स्निग्धा मधुरा वातपित्तलाः ।
उष्णावातहरा वृष्या बल्येष्वल्पबलाः ॥
बलावहा विशेषेण मांसाग्नित्वात् सहस्रदाः ।
तेषामप्यनिलघ्नत्वाच्छौण्ड्याकौण्ड्यौ गुणोत्तरौ ॥
स्निग्धत्वात् स्वादुपाकत्वात् तयोर्वाप्या गुणोत्तराः ।
नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः ।
सरस्तडागजानान्तु विशेषेण गिरौ लघु ॥
अदृग्गोचरा यस्मात्तत्कादुनीरोदभावजाः ।
किञ्चिन्मुक्ता गिरौदेशमत्यर्थं गुरवस्तु ते ॥
अधस्तादुगुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः ।
उरो विचरणात्तेषां पूर्व्वमङ्गं लघु स्मृतम् ।"

इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)

नादेयमत्स्यगुणाः । श्लेष्मलत्वम् । वृष्यत्वम् । मधुरत्वम् । अल्पमलभेदकत्वञ्च ॥ * ॥ सरस्तडागभवमत्स्यगुणौ । स्निग्धत्वम् । स्वादुरसत्वम् ॥ * ॥ महाह्रदभवमत्स्याः बलिनः । अल्पजलभवाः अबलाः ॥ * ॥ दग्धमत्स्यगुणाः । गुरुत्वम् । वृष्यत्वम् । हृंहणत्वम् । बलवर्द्धनत्वञ्च ॥ तैललवणयुक्तदग्धमत्स्यगुणाः । श्लीपमुक्तभग्नार्शरिनिलश्लीसंविद्रोधितेजसां हितकारित्वञ्च ॥ * ॥ पलाण्डुवेष्टितकर्दमलेपितांगार-दग्धबलवणावग्रहारपुरस्कृतसार्द्रकटुतैलसम्पो-लितमत्स्यगुणाः । स्वादुत्वम् । कफवातहरत्वम् । शुक्रलत्वम् । बलवर्द्धनत्वञ्च ॥ * ॥ शाकमत्स्याख्य-शङ्खगुणाः । हृद्यत्वम् । वृष्यत्वम् । पुष्टिदत्वञ्च ॥ मत्स्यघण्टगुणाः । बलकरत्वम् । वातहरत्वम् । अग्निप्रियरोचनत्वञ्च ॥ शिरसि खड्गकेशघण्टि-मत्स्यगुणाः । सुखप्रियत्वम् । हृद्यत्वम् । पुंस्त्व-घातकत्वञ्च । इति राजवल्लभः ॥ * ॥ अपि च ,

"निःशल्का निन्दिता मत्स्याः सर्व्वे शल्कयुता हिताः ।
वपुःसौख्यकरा वीर्य्यबलपुष्टिविवर्द्धनाः ॥
हृदकुल्याजलनिर्झरतडागवापीजलेषु ये मत्स्याः ।
तेऽतिबृहन्नादेया यथोत्तरं लघुतराश्च

नादेयाः ॥

चारान्मत्स्या गुरवो विदाहिनो
विष्टम्भदास्ते जलजाश्च वातदाः ।
नागाश्रिताः स्वादुजलस्थिता अपि
ज्ञेया जडास्तेऽपि तथाश्रिता इमे ।"

इति राजनिर्घण्टः ॥

अथ क्षुद्रमत्स्यगुणाः ।
"क्षुद्रमत्स्याः स्वादरसा दोषत्रयविनाशनाः ।
लघुपाका रुचिकराः सर्व्वदा ते हिता मताः ।
अथातिक्षुद्रमत्स्यगुणाः ।
अतिक्षुद्राः पुंस्त्वहरा रुक्षाः कासानिलापहाः ।
अथ मत्स्याङ्गगुणाः ।
मत्स्यगर्भो भृशं हृद्यः स्निग्धः पुष्टिकरो गुरुः ।
कफमेदःप्रदो बल्यो ग्लानिस्तम्भेहनाशनः ॥
अथ शुष्कमत्स्यगुणाः ।
शुष्कमत्स्या न बल्याः स्युर्दुर्जरा विष्टम्भिनः ॥
अथ दग्धमत्स्यगुणाः ।
दग्धमत्स्यो गुरुः श्रेष्ठः पुष्टिबलवर्द्धनः ॥
अथ कूपजादिमत्स्यगुणाः ।
कूपमत्स्याः शुक्रनूनकृच्छ्रमेहविषर्द्दनाः ।
सरोजा मधुराः स्निग्धा बल्या वातविनाशनाः ॥
नादेया दृंहणा मत्स्या गुरवोऽनिलनाशनाः ।
रक्तपित्तकरा हृद्याः स्निग्धोष्णाः स्वल्पवर्चसः ॥
चौड्राः पित्तहराः स्निग्धा मधुरा लघवो हिमाः ।
नाड़ागा गुरवो हृद्याः शीतला बलमूत्रदाः ।
ताड़ागवर्त्तिनिर्झरजा बलायुर्मेधिताकराः ॥
अथ ऋतुविशेषे मत्स्यविशेषगुणाः ।
हैमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ।
वसन्ते ते तु नादेया ग्रीष्मे चौड्राससुद्भवाः ॥
तड़ागजाता वर्षासु ताम्रपर्ण्या नदीभवाः ।
निर्झराः शरदि श्रेष्ठा विशेषोऽयमुदाहृतः ॥"
इति भावप्रकाशः ॥

मत्स्योत्पत्तिकारणं यथा,—
"ततस्तु मित्रावरुणौ भ्रातरौ ब्रह्मचारिणौ ।
तप्तुं देवं गतौ देवौ विचरन्तौ यदृच्छया ॥
ताभ्यां तत्र तदा दृष्टा उर्व्वशी तु वराप्सराः ।
जायन्तीसहिताभ्यामि: सखीभिः सा वरानना ॥
गायन्ती च हसन्ती च विभ्रमा निर्जने वने ॥
गौरी कमलगर्भाभा स्निग्धश्लक्ष्णाग्रिरोरुहा ।
पद्मपत्रविशालाक्षी रक्तोष्ठी मृदुभाषिणी ॥
प्रफुल्लेन्दुधवलैर्दन्तैरविरलैः समैः ।
सुभ्रूः सुनासा सुमुखी सुललाटा मनस्विनी ॥
संहतस्तनमध्याङ्गी पीनोन्नतघनस्तनी ।
मधुरालापचतुरा सुमध्या चारुहासिनी ॥
रक्तोत्पलकरा तन्वी सुपदो विनयान्विता ।
पूर्णचन्द्रनिभा बाला मत्तहिरदगामिनी ॥
दृष्ट्वा तस्यान्तु तद्रूपं तौ देवौ विस्मयं गतौ ।
यस्या हास्येन लास्येन स्मितेन ललितेन च ॥
मृदुना वायुना चैव घ्राणानिलसुगन्धिना ।
मत्तभ्रमरगीतेन पुंस्कोकिलरुतेन च ॥
सुस्वरेण हि गीतेन उर्व्वश्या मधुरेण च ।
इङ्गितौ च कटाक्षेण स्कन्दतुस्तावुभावपि ॥
तस्मिन्ना पतितं रेतः कमलेऽथ स्खले जले ।
कमलेऽथ वसिष्ठस्तु जातो हि मुनिसत्तमः ॥
स्खले त्वगस्त्यः सम्भूतो जले मत्स्यो महामते ! ॥"
इति नारसिंहपुराणे ६ अध्यायः ॥

मत्स्यभक्षणनिषेधो यथा,—
"यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विवर्ज्जयेत्॥
इति मानवे ५ अध्यायः ॥
जलस्थलचरा ये च प्राणिनस्तान् हतानपि ।
न भक्षेज्ज्ञानवान् ज्ञानी हन्ता तेषां भवेन्न हि ॥
हत्वा हत्वा तु मत्स्यादो सर्व्वेषां यो विशेषतः ।
मांसादः प्राणिनां सोऽपि तस्मान्मत्स्यं परित्यजेत्॥"
इति पाद्मोत्तरखण्डे १०५ अध्यायः ॥
वर्जनीयमत्स्या यथा,—
"ब्रह्म देवि ! प्रवक्ष्यामि मांसभेदानिबोध मे ।
नादेयं सिल्लकमठं पशुजङ्घिणमेव च ॥
गोमीनं चक्रमत्स्यकुलं वड़ाशं राघवं तथा ।
वामीनं चलकर्णञ्च सचक्रं चेङ्गमेव च ॥
भूविलञ्चानिरुद्धञ्च गाङ्गेयानि विवर्ज्जयेत ॥"
इति मत्स्यसूक्तमहातन्त्रम् ॥
रविवारे मत्स्यभक्षणनिषेधो यथा,—
"आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥"
इति भविष्यपुराणम् ॥
"माघमासिषमांसञ्च मसूरं निम्बपत्रकम् ।
भक्षयेद् यो रवेर्वारे सप्तजन्मान्यपुत्रकः ॥"
इति तिथ्यादितत्त्वम् ॥
कार्त्तिके मत्स्यभक्षणनिषेधो यथा,—
"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नाग्नदेव हि ।
चण्डालो जायते राजन् ! कार्त्तिके मांसभक्षणात् ॥"
इति नारदीयपुराणम् ॥
माघवैशाखयोर्हविष्यव्रतधर्म्मविधानात् मत्स्यभक्षणं निसर्गा निषिद्धमिति ज्ञायतत्त्वदर्पणात् ॥
ज्यैष्ठिकी मत्स्यभक्षणनिषेधो यथा,—
"आमिषं कलहं हिंसां वर्ज्जयेद्यो विवर्ज्जयेत् ॥"
अपि च ।
"भुङ्क्ते यस्तु निरामिषं स हि भवेच्छ्राद्धकरं पण्डितः ॥"
इति तिथ्यादितत्त्वम् ॥
श्रावणे मत्स्यभक्षणनिषेधो यथा,—
"क भक्षं क प्रिये भक्तिः क मांसं क्षत्रियार्चनम् ।
मत्स्यमांसरतानां वै दूरं तिष्ठति शङ्करः ॥"
इति कालीखण्डम् ॥
मा भक्षं नैवेद्यार्थं भक्षेष्वजामहिषीगोरं वर्जयेत् । पञ्चनखमत्स्यवराहमांसानि च । इत्याह्निकतत्त्वधृतविष्णुसूत्रम् ॥ * ॥ विन्ध्यपश्चिमस्य पश्चिमे मत्स्यभक्षणनिषेधो यथा,—
"विन्ध्यस्य पश्चिमे भागे मत्स्यभुक् पतितो नरः ।"
इति पुराणम् ॥
कामतो मत्स्यभक्षणप्रायश्चित्तं यथा,—
"मत्स्यांस्तु कामतो भक्ष्या सोपवासस्त्र्यहं वसेत् ॥"
अज्ञानतस्तदर्द्धम् । इति प्रायश्चित्तविवेकः ॥
मत्स्यभक्षणप्रतिप्रसवो यथा,—
"मत्स्यान् सशुल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च नान्यथा ॥
सघृतं सिंहतुण्डञ्च तथा पाठीन-रोहितौ ।
मत्स्याश्चैते सतुण्डिका भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेदेवां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥"
इति कौर्म्मे उपविभागे १६ अध्यायः ॥
अपि च ।
"पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः ।
राजीवान् सिंहतुण्डांश्च सशल्कांश्चैव सर्व्वशः ॥"
इति मानवे ५ अध्यायः ॥
"अनिवेद्य न भोक्तव्यं मत्स्यं मांसञ्च यद्भवेत् ।
अन्नं विष्ठा पयो मद्यं यद्विप्रोरनिवेदितम् ॥"
इत्याह्निकतत्त्वम् ॥
प्रेतश्राद्धे मत्स्यदानविधिर्यथा,—
"सपिण्डीकरणं यावत् प्रेतश्राद्धेषु षोड़शम् ।
पक्वान्नेनैव कर्त्तव्यं मासिकेषु द्विजातिभिः ॥"
इति श्राद्धतत्त्वधृतकामधेनुवचनम् ॥
मत्स्यः, पुं, (अत्ति भक्षयति मद्यमांसौदनादिकं मद् + "अत्यवपतिपदिकलिमदिभ्यः स्यन्।" उणा० ४।१२। इति स्यन्।) मागधिशेषः। विराटदेशः। नारायणः। इति हेमचन्द्रः। ४।४०८॥ देशविशेषे बहुवचनान्तः। इति मेदिनी। ये ४५॥ द्वादशराशिः। यथा,
"मत्स्यौ घटौ वृश्चिकुम्भौ सप्तमं सप्तमोत्तमम् ॥"
इत्यादि ज्योतिस्तत्त्वम् ॥
अष्टादशपुराणान्तर्गतपुराणविशेषः। (मत्स्य रूपेणावतीर्णेन भगवता उक्तत्वात् अस्य तथात्वम्। यथा,—
"पुराणं परिचक्षाय्यमिदानीं ब्रह्मणा द्विजाः ।
मात्स्यं पुराणमखिलं यच्चकाद मदाधरः ॥"
इति मत्स्यपुराणे १ अध्यायः ॥
दशावतारान्तर्गतप्रथमावतारः। यथा,—
सूत उवाच ।
"पुरा राजा मनुर्नाम सौमवान् विपुलं तपः ।
पुत्रे राज्यं समारोप्य क्षमावान् रविनन्दन ॥
मलयस्यैकदेशे तु सर्व्वाश्रमगुणान्वितः ।
समदुःखसुखो वीरः प्राप्तवान् योगमुत्तमम् ॥
बभूव वरदश्चास्य वर्षायुतशते गते ।
वरं वृणीष्व पोवाच प्रीतः स कमलासनः ॥
एवमुक्तोऽब्रवीद्राजा प्रणम्य स पितामहम् ।
एकमेवाहमिच्छामि त्वत्तो वरमनुत्तमम् ॥
भूतग्रामस्य सर्व्वस्य स्थावरस्य चरस्य च ।
मथिता रुद्रणो यानं प्रलये समुपस्थिते ॥
एवमस्त्विति विश्वात्मा सर्व्वेषान्तरधीयत ।
पुण्यवृष्टिश्च महती खात् पपात सुरार्पिता ॥
कदाचिदाश्रमे तस्य क्रतवे सिद्धसम्मतम् ।
पपात पाणावुत्तरि झषकी जलसंयुतः ॥
दृष्ट्वा तच्चपलाक्ष्यं स दयालुर्मनोपतिः ।
रक्षणायाकरोद्यत्नं स तस्मिन् करकोदरे ॥
अथोराचैव चैकेन मोक्षणाङ्गुलिचालनैः ।
सोऽभवन्मत्स्यरूपेण पाहि पाहीति चाब्रवीत् ॥
स तमादाय मनिके प्राक्षिपज्जलचारिणम् ।
तथापि चैक—

मत्स्यः

पुनः प्राह जगन्नाथं सत्यसङ्कल्पमव्ययम् ।
स मत्स्यः पाहि पाहीति त्वामहं शरणं गतः ॥
ततः स कूपे तं मत्स्यं प्रक्षिप्योद्विग्नमानसः ।
यदा न माति तत्रापि कूपे मत्स्यः सरोवरे ॥
क्षिप्तोऽसौ पृथुतामागात् पुनर्योजनसम्मितः ।
तमाप्याह पुनर्दीनः पाहि पाहि वृषोत्तम ॥
ततः स मधुना क्षिप्तो गङ्गायामप्यवर्द्धत ।
यदा तदा समुद्रे तं प्रक्षिप्यक्षोदनीपतिः ॥
यदा समुद्रमखिलं व्याप्यासौ समुपस्थितः ।
तदा प्राह मधुभीतः कोऽपि त्वमसुरेश्वरः ॥
अथवा वासुदेवस्त्वमन्य ईदृक् कथं भवेत् ।
योजनायुतविस्तारो यस्य तुल्यं भवेद्वपुः ॥
ज्ञातस्त्वं मत्स्यरूपेण मां खेदयसि केशव ! ।
हृषीकेश ! जगन्नाथ ! जगद्धाम ! नमोऽस्तु ते ॥
एवमुक्तः स भगवान् मत्स्यरूपी जनार्दनः ।
साधु साध्विति चोवाच सम्यक् ज्ञातस्त्वयानघ ॥
अचिरेणैव कालेन मेदिनी मेदिनीपते ! ।
भविष्यति जले मग्ना सप्तार्णवसकानना ॥
नौरियं सर्वदेवानां निकायेन विनिर्मिता ।
महाजीवनिकायस्य रक्षणार्थं मयोद्यते ! ॥
स्वदाक्षौद्भिदो ये वै ये च जीवा जरायुजाः ।
अस्यां निधाय सर्वांस्तानहमाप्यात् पाहि
सुव्रत ! ॥
युगान्तवाताभिहता यदा भवसि मेदिनि ! ।
तदैनामिह मम राजेन्द्र ! तदेमां संयामस्यसि ॥
ततो यथोक्तं सर्वस्य स्थावरस्य चरस्य च ।
प्रजापतित्वं भविता जगतः पृथिवीपते ! ॥
एवं स्तुतयुगस्यादौ सर्वज्ञो भूतिमान् नृपः ।
मन्वन्तराधिपत्वेन देवपूज्यो भविष्यसि ॥"
इति मत्स्यपुराणे मनुविष्णुसंवादे प्रथमे सर्गे प्रथमोऽध्यायः ॥ विस्तारस्तु श्रीभागवते ८ स्कन्धे २४ अध्याये द्रष्टव्यः ॥*॥ तस्य मन्त्रध्यानपूजादि यथा, —

ग्रन्थकर उवाच ।

"एक एवाभवत्तत्स्यावतारः कल्प आदिमे ।
तस्य मन्त्रं प्रवक्ष्यामि सुक्तिमुक्तिप्रदायकम् ॥
नारदो नमो भगवते मं मत्स्याय रमां वदेत् ।
हृदयान्तरमन्त्रोऽयं मुनिब्रह्मा समीरितः ॥
गायत्री छन्द उदितं देवता मीनविग्रहः ।
भगवान् प्रणवो नाथो बीजं त्रीपञ्चकोलकम् ॥
नाभ्यधो रोहितसम आकण्ठश्च नराकृतिः ।
घनश्यामचतुर्बाहुः शङ्खचक्रगदाधरः ॥
वक्षोमध्यगतो मूर्ध्ना लक्ष्मीवत्सोरसोज्ज्वलः ।
यद्यद्धितसर्वाङ्गः सुन्दराकारलोचनः ॥
अपेद्दृदादिन्यासाङ्गं विभज्यास्त्रैस्त्रिभिर्हरेत् ।
प्रणवं तद्वयाणिन वैशाखे कार्त्तिके तथा ।
माघे च मार्गशीर्षे च हविष्याशी जितेन्द्रियः ॥
आरभ्य भाद्रवकुलमष्ट वा षोडशाहकम् ।
लक्ष्मीमजं जपेन्नित्यमिदमापि कलाप्तम् ॥
तथैव होमः कर्त्तव्यस्तथान्यदिवसेषु तु ।
तर्पयेद्दादशाप्तं तिलतण्डुलचन्दनैः ॥
आज्यमन्त्रा तुलाधौ च तर्पयेच्च तथा श्रियम् ।
रक्तोत्पलैर्वा पद्मैर्वा मालत्यादैः सुगन्धिभिः ।
एवं कृते वर्षमेकं मन्त्रसिद्धिः प्रजायते ॥
नित्यं हृदयपद्मविप्राय श्रीरूपाय सुवासिनीम् ।
भोजयेत् पूजनस्यान्ते चरेत्तौ आप्नुयेत् सदा ॥
षट्पत्रकर्णिकायाञ्च श्रीयुतं देवमर्चयेत् ।
षट्पत्रेषु षडङ्गानि यजेदूर्ध्वाद्यचतुष्टये ॥
मत्स्यं मकरं कूर्म्मं शिशुमारञ्च पूर्व्वतः ।
महाशोऽदले पूज्याः आराद्याः सप्त सिन्धवः ॥
महाशोऽङ्कदले पूज्या वासुद्याद्याः फणीश्वराः ।
तस्य बाह्ये शङ्कदले रत्नानि तु चतुर्दश ॥
समुद्दलानि पूज्यानि लक्ष्मीकौस्तुभकानि च ।
गङ्गाद्याः षोडश ततो महानद्यः प्रपूजयेत् ॥
ततश्चाष्टदले वेदानुपवेदसमन्वितान् ।
दिगीशांश्च तदस्त्राणि नवावरणपूजनम् ।
एवं सिद्धमनुर्मन्त्री जायते सिद्धिभाजनम् ॥
एतद्रक्षणं मन्त्रं जपेदष्टोत्तरं शतम् ।
तद्दैवतादिने सिद्धः पुस्तकादेव जायते ॥
अकुण्ठितप्रयोगेषु न पुनस्तस्य संस्कृतिः ।
एतत्पल्लविता मन्त्रा मम सिद्धान्ति पार्व्वति ! ॥
एतन्मयपूतिना सर्व्वे वैदिकाः सिद्धिदाः कलौ ।
अनेन विधिना जप्ताः कलौ च दुःसिद्धिदाः ॥"
इति मेरुतन्त्रे २६ प्रकाशः ॥

मत्स्यकरण्डिका, स्त्री, (मत्स्यस्य करण्डिकेव ।) मत्स्यरक्षणपात्रम् । खालुई इति भाषा । तत्पर्य्यायः । मत्स्यधानी २ कुवेणी ३ । इति जटाधरः ॥

मत्स्यगन्धा, स्त्री, (मत्स्यस्येव गन्धो यस्याः । छान्दसादित्वाभावः ।) लाङ्गलीवृक्षः । स च जलपिप्पली । इति जटाधरः राजनिर्घण्टश्च ॥ यमभार्य्या ॥ (अस्या उत्पत्तिकथा यथा, एकदा चेदीश्वरो वसुराजः पितृगणनियोजितो मृगयार्थं वनं गत्वा स्वपत्नीं गिरिकां ऋतुस्नातां स्मरन् आस्ते । इत्यवसरे कामोद्दीपकवसन्तवायुना प्रेर्य्यमाणस्य तस्य रेतः प्रच्यस्कन्द । ततस्तद्दोषं सपत्रपुटे न्यधितवान् । एतत्तु श्येना न खलिनमिति निश्चित्य अभिमन्त्र्य च तत् स्वपालित शुनेन प्रियायै प्रेषयामास । तदादाय उड्डीयमानस्य आमिषेण च शुनेन सह विहायसि युध्यतस्तस्य पतात् भ्रष्टं कालिन्दीजले पपात दोषम् । अथ तद्रेतः मत्स्याप्यात्मरूपिणीं अद्रिका नाम्नीं काचिदप्सरा भक्षितवती दीधरास्तु सा पूर्णगर्भा मत्स्यी बभूव; ततस्तां तस्या उदरात् एकां स्त्रियमेकञ्च पुरुषमसूत । तयोस्तु पुरुषो मत्स्यो नाम राजा, सा कन्या च मत्स्यगन्धेति ख्याताऽभूत् ॥ हरिवंशे । तत्पर्य्यायो यथा,—
"तत्रस्थे प्रथमं पत्रं मत्स्यसङ्घं विसगन्धंद्वितीयं मत्स्यफलसङ्घं मत्स्यगन्धं तयोर्नामापि ।
"हरिवंशे पुण्यवक्त्रा च पराशरफला मता ।
मत्स्यगन्धा द्रौहदकी विश्रुती व्यासजननी ॥"
मत्स्याक्षी ॥ तत्पर्य्यायो यथा,—
"मत्स्याक्षी वाटिका मत्स्यगन्धा मत्स्याक्षदर्शनी च ।"

मत्स्यगन्धा

जलपिप्पल्यर्थे पर्य्यायो यथा,—
"जलपिप्पलिकाभिख्या ग्राहदी शकलादनी ।
मत्स्याक्षदर्शी मत्स्यगन्धा लाङ्गलीत्यपि
कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

मत्स्यघट्टः, पुं, (मत्स्यानां घट्टः विभिन्नजं यत्र सः ।) स्वनामख्यातमत्स्यबन्धनम् । तत्पर्य्यायः । गलघट्टः २ । इति शब्दचन्द्रिका ॥

मत्स्यजालं, क्ली, (मत्स्यधारणार्थं जालं शाकपार्थिवत् समासः ।) आनायः । इति हेमचन्द्रः । ३ ।५६३ । माछधरा जाल इतिभाषा ॥

मत्स्यण्डिका, स्त्री, (मदं मधुररसं स्यन्दते इति । स्यन्द + खुल + टाप् । अत इत्वञ्च । पृषोदरादित्वात् साधुः । शर्कराविशेषः । मिछिरि इति भाषा । यथा,—
"सर्पीकाक्षाक्षिनगुडखण्डमत्स्यण्डिकासिताः ।
निस्तेजा लघवो ज्ञेयाः शीतवीर्य्या यथोत्तरम् ।
यथा यथैषां वैमल्यं भवेच्छ्रेयं तथा तथा ॥"
इति राजवल्लभः ॥

गुड इति हिन्दीभाषा । तस्य लक्षणं यथा,—
"इक्षोरसो यः संपक्वो घनः किञ्चिद्द्रवान्वितः ।
मन्दं यत् स्यन्दते यस्मात्तन्मत्स्यण्डीति निगद्यते ॥"
अस्य गुणाः ।
"मत्स्यण्डी मेदिनी बल्या लघ्वी पित्तानिलापहा ।
मधुरा दृंहणी दृष्या रक्तदोषापहा स्मृता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥

मत्स्यधानी, स्त्री, (मत्स्या धीयन्ते यत्रेति मत्स्य + धाण् + ल्युट् ङीप् ।) मत्स्यरक्षणार्थपात्रम् । खारयी इति खालुइ इति च भाषा । तत्पर्य्यायः । कुवेणी २ । इत्यमरः । २ । १० । १६ ॥ मत्स्यकरण्डिका३ खारयिका४ मत्स्यबन्धनी ५ कुवेणिः ६ कुवेणा ७ कुपिनी८ कुपिनिः ९ । इतिभरतः ॥ सा कथ्या चेत् कुपिनी भवेत् इति शब्दरत्नावली ॥

मत्स्यघ्न

मत्स्यघ्नाग्रकः, पुं, (नाशयतीति नश् + णिच् + ण्वुल् । मत्स्यानां नाशकः । सदैव मत्स्यभक्षकतयास्य तथात्वम् ।) कुररपक्षी । इति भूरिप्रयोगः ॥ मत्स्यनाशनकर्मरि च ॥

मत्स्यनाशनः, पुं, (नाशयतीति नश् + णिच् + ल्युः । मत्स्यस्य नाशनः ।) कुररपक्षी । इति हेमचन्द्रः । ४ । ४०२ ॥

मत्स्यपित्ता, स्त्री, (कटुरोहिणी । इत्यमरः । २ । ४ । ८६ ॥ (तथा चास्याः पर्य्यायाः । "कट्वी तु कटुका तिक्ता शकुलादनी कटुम्भरा । अशोका मत्स्यघण्टा चक्राङ्गी शकुलादनी ॥ मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी ॥" इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

मत्स्यबन्धी, [न्] पुं, (मत्स्यान् बध्नं धर्म्मं शीलमस्य । मत्स्य + बन्ध + इनिः ।) धीवरः । यथा, "केवर्त्तो धीवरो दासो मत्स्यबन्धी च जालिकः ॥" इति हलायुधः ॥ ("अथान्येद्युस्तैर्यमकिङ्करामेमत्स्यबन्धिभिः प्रभात आगत्य जालैराच्छादितो ह्रदः ।" इति पञ्चतन्त्रे । ५ । २६ ।)

मत्स्यबन्धिनी, स्त्री, (मत्स्यबन्धिन् + स्त्रियां ङीप् ।) मत्स्यधानी । इति हलायुधः ॥

मत्स्यरङ्कः, पुं, (मत्स्यरङ्क । पृषोदरादित्वात् साधुः ।) मत्स्यरङ्गपक्षी । इति भूरिप्रयोगः ॥

मत्स्यरङ्गः, पुं, (मत्स्यान् रङ्गति भक्षणार्थं तत्समीपं गच्छतीति । मत्स्य + रङ्गि + अच् ।) पक्षिविशेषः । माछराङ्गा इति भाषा । (यथा, "त्रिभुवनविदितो ह्यो मत्स्यरङ्गे कलङ्कः ।" इत्युद्भटः ॥)

तत्पर्य्यायः । मत्स्याशी २ जलमद्गुः ३ मत्स्यीचक्रः ४ । इति शब्दरत्नावली ॥ मत्स्याशनः ५ मीनरङ्गुः ६ मत्स्यरङ्कः ७ सुचिचक्रः ८ । इति शब्दरत्नावली ॥

मत्स्यराजः, पुं, (मत्स्येषु राजा श्रेष्ठः समासान्तलुप्तच् ।) रोहितमत्स्यः । इति त्रिकाण्डशेषः ॥ विराटराजः । ("तस्य सङ्घर्षणं श्रुत्वा मत्स्यराजः प्रतापवान् ।" इति महाभारते । ४ । ६८ । २१ ।)

मत्स्यविद्धा, स्त्री, कटुका । इति वैद्यकम् ॥

मत्स्यवेधनं, क्ली, (मत्स्योविध्यतेऽनेनेति मत्स्य + विध + करणे ल्युट् । मत्स्यानां वेधनमिति वा ।) वडिशम् । इत्यमरः । १ । १० । १६ ॥

मत्स्यवेधनी, स्त्री, (मत्स्यवेधन + ङीप् ।) महगुपक्षी । इति जटाधरः ॥ वडिशम् । इति शब्दरत्नावली ॥

मत्स्यसन्तानिकः, पुं, (मत्स्यानां सन्तानिकाच् ।) मत्स्यभक्षणविशेषः । यथा,—
"दध्योदनारे मत्स्यण्डी वेणुवारैकपक्वकः ।
सार्द्रकः कटुतैलेन मत्स्यसन्तानिको भवेत् ॥"
इति शब्दचन्द्रिका ॥

मत्स्याक्षी

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षीणीव अक्षीणि पृथक्त्वादपि चक्षूंषि यस्याः । मत्स्याक्षि + "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।" ५ । ४ । ७३ । इति षच् ङीप् च ।) ब्राह्मी । इत्यमरः । २ । ४ । १२७ ॥ सा च सोमलतायाम् । ब्राह्मीशाके इति केचित् । इति भरतः ॥ यथा, "ब्राह्मी वयस्या मत्स्याक्षी मीनाक्षी सोमवल्लरी ।
मत्स्याक्षी शिखिरा रुद्रा ब्रह्मदेवस्वयम्प्रभा ॥"
इति राजनिर्घण्टः ॥
गण्डदूर्व्वा । इति राजनिर्घण्टः ॥
हिलमोचिका । ब्राह्मीशाकः । इति रत्नमाला ॥
(गण्डदूर्व्वार्थे पर्य्यायो यथा,—
"गण्डदूर्व्वा तु गण्डाली मत्स्याक्षी शकुलादनी ॥"
मत्स्यादनी ॥ तत्पर्य्यायो गुणाश्च यथा । मत्स्यैर्द्दो कुङ्कुमकेसरी आदत्तिश्च । इति लोके । "मत्स्याक्षी वाडिका मत्स्यगन्धा मत्स्यादनीति च ।
मत्स्याक्षी ग्राहिणी प्रोक्ता कुष्ठपित्तकफास्रजित् ॥
लघुस्तिक्ता कषायाच स्वादौ कटुविपाकिनी ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

मत्स्याक्षी, स्त्री, (मत्स्यानां अक्षिमिवाक्षं यस्याः ।) छिन्नमोचिका । इति त्रिकाण्डशेषः ॥

मत्स्यादनी, स्त्री (मत्स्यैरद्यते इति मत्स्य + अद् + ल्युट् गौरादित्वात् ङीष् ।) जलपिप्पली । इति राजनिर्घण्टः ॥ (तथा च पर्य्यायः ॥ "जलपिप्पल्यभिहिता शारदा शकुलादनी । मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता ॥"
मत्स्याक्षी । मक्षिका इति लोके ॥ तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे । "मत्स्याक्षी वाडिकामत्स्यगन्धा मत्स्यादनीति च ।")

मत्स्यायनः, पुं. (मत्स्यानश्नातीति मत्स्य + अश् + ल्युः ।) मत्स्यरङ्गपक्षी । इति त्रिकाण्डशेषः ॥ मत्स्यभक्षके त्रि ॥

मत्स्यी, स्त्री. (मत्स्य + जातौ ङीष् ।) स्त्रीमत्स्यजातिः । इति मुग्धबोधव्याकरणम् ॥

मत्स्योदरी, स्त्री, (मत्स्यस्य उदरं उत्पत्तिस्थानं यस्याः । मत्स्यगर्भे जातत्वादस्यास्तथात्वम् ।) सत्यवती सा च व्यासमाता । इति जटाधरः ॥ (यथा देवीभागवते । २ । १ । ३८ ।
"कालिका वसुता दत्ता तरसा जालजोदिते ।
नाम्ना कालीति विख्याता तथा मत्स्यो दरीति च ॥")
(मत्स्या उदरे गर्भे यस्याः ।) काशीस्थतीर्थविशेषः ॥ यथा,—
"कैलासाद्रेः समायाता सप्तकोटिमिता प्रभो ! ।
दुर्गाणि तेः कृतानीह सप्तस्वर्गसमानि च ॥
वह्वाराणि सदस्राणि कवाटविकटानि च ।

मत्स्योद

कोटिकोटिभटान्यानि सर्व्वास्त्रैरवहितान्यपि ॥
ततः शैलं महादुर्गं तैः काशीपरितः कृतम् ।
परिखा निर्म्मिताश्चित्रा मत्स्योदर्य्या जलाविला ॥
मत्स्योदरी शिवा ज्ञाता यद्विरत्नाकरा पुरः ।
तस्य तीर्थं महत् ख्यातं मिलितं गाङ्गवारिणि ॥
यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह
तदा मत्स्योदरीतीर्थं लभ्यते पुण्यगौरवात् ॥
सूर्य्याचन्द्रमसोः पर्व्व तदा कोटिगुणं फलम् ।
सर्व्वपर्व्वाणि तत्रैव सर्व्वतीर्थानि सन्ति वै ।
तत्रैव सर्व्वलिङ्गानि गङ्गा मत्स्योदरी यतः ॥
मत्स्योदर्य्याश्च ये स्नाता यत्र कुत्रापि मानवाः ।
स्नानपिण्डप्रदानास्ते न मातुरुदरेशयाः ॥
अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् ।
परितः स्वर्धुनीवारि संसारे परिवीक्षते ॥
मत्स्योदर्य्यां स्नानशीला ये नराश्चे नरोत्तमाः ।
स्नात्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् ॥
किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः ।
यदि मत्स्योदरीं स्नाताः कुलं गर्भमयं ततः ॥
यत्र यत्र हि लिङ्गानि कृत्तिवासकृतान्यपि ।
तत्र मत्स्योदरीं प्राप्य मुक्तानां मोक्षभाजनम् ॥
मध्ये तीर्थान्यनेकानि भूर्भुवःस्वर्गतान्यपि ।
न समानि परं तानि कोट्यंशेनापि निश्चितम् ॥
इत्थं तीर्थं ततं तेन विभो ! कैलासवासिना ।
गणाधिपेन सुमहत् सुमत्योदरकर्म्मजा ॥"
इति काशीखण्डे ६६ अध्यायः ॥

मथ इ कत्थे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ मन्थति । कुत्सो वधकर्म्मा । इति दुर्गादासः ॥

मथ ज ए गतौ । इति कविकल्पद्रुमः ॥ भ्वा०-पर०-सक०-सेट् ।) ज मन्थः मथः । ए अमन्थीत् । इति दुर्गादासः ॥

मथनं, क्ली. (मथ्यते इति मथ + भावे ल्युट् ।) विलोडनम् । मन्थेथा इति भाषा । यथा,—
"काहं मन्दमतिः क्वेदं मथनं भवारिधेः ।
किं मम परमाणुर्वै यत्र मज्जति मन्दरः ॥"
इति भागवते । १ । ११ । । टीकायां श्रीधरस्वामी ॥ अस्त्र विशेषः । यथा, हरिवंशे । २३६ । १० ।
"रथोत्तमसहस्रेण आग्नेयं शैलिरं तथा ।
वायव्यं मथनं नाम कापालमथ किङ्करम् ॥")

मथनः, पुं, (मथ्नाति रोगानिति मथ + कर्त्तरि ल्युः ।) मणिकारिकाद्रुः । इति रत्नमाला ॥ (मथनकारके, त्रि । कंग्रिमथनमुक्तमथनाद्यर्थानाम् ।)

मथितं, क्ली, (मथ + क्तः ।) निर्जलघोलम् । इत्यमरः । २ । ९ । ५३ । यथा, हरिवंशे । ५० । १ ।
"चारं कदल्यामथितेन युक्तं
दिनोषितं प्राशितमाश्वसं यत् ॥")
अस्य गुणाः । कफपित्तवातकरत्वम् । रोचनत्वम् । धातुपुष्टिदत्वञ्च । इति राजवल्लभः ॥ विलोडिते, त्रि ॥ (तथा च पर्य्यायान्तरं प्रकारान्तरञ्च यथा,—
"घोलन्तु मथितं तक्रमुदश्विच्छुक्तिकादि च ।

सरं निर्व्रणं शोकं मथितस्वसरोदकम् ।
तक्रं पादजलं प्रोक्तसुदाखिन्नवारिकम् ।
छच्छिका वारहीना स्यात् सच्छा प्रचुर-
वारिका ॥"

इति भावप्रकाशस्य पूर्वखण्डे द्वितीये भागे ॥
"सरं निर्व्रणं शोकं मथितं सरवर्जितम् ।"
इति च हारीते प्रथमस्थाने अष्टमेऽध्याये ॥)

मथुरा, स्त्री, (मथ्यते पापराशिर्यया इति । मथ + "मन्थिवाशौत्यादि ।" उणा० । १ । ६८ । इति उरच् ।) खनामख्यातपुरी । अधुना आगरा इति ख्यातस्थानस्य नगरम् । (यथा, रघौ । ६ । ४८ ।

"यस्यावरोधस्तनचन्दनानां
प्रक्षालनाद्वारिविहारकाले ।
कलिन्दकन्या मथुरां गतापि
गङ्गोर्मिसंसक्तजलेव भाति ॥")

सम्पर्याय: । मधुपद्मम् २ । इति त्रिकाण्डशेष: ॥
मधुपुरी ३ मधुरा ४ । इति शब्दरत्नावली ॥
सा च मोक्षदायकतीर्थम् । यथा.—

"अयोध्या मथुरा माया काशी काञ्ची त्व-
न्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिका: ॥
अयोध्या रामनगरी मथुरा कृष्णपालिता ।
कनात्तु पृथिवीमध्ये न गच्छन्ति कदाचन ॥
श्रीरामधनुरग्र्या अयोध्या सा महापुरी ।
मथुरा केशवोत्तस्थसुदर्शनविधारिता ॥"

इत्यादिभूतशुद्धितन्त्रम् ॥*॥

तस्य विष्णुदर्शनमाहात्म्यं यथा,

"यस्तोऽस्तुल्लादयां स्नात्वा वै यमुनाजले ।
मथुरायां हरिं दृष्ट्वा प्राप्नोति परमां गतिम् ॥
यमुनासलिले स्नात: पुरुषो मुनिसत्तम ! ।
श्वेतद्वीपनिवासी स पक्षे द्वादशमासुपवासजम् ॥
समभ्यर्च्याच्युतं सम्यक् मथुरायां समाहित: ।
अश्वमेधस्य यज्ञस्य प्राप्नोत्यधिकं फलम् ॥
कस्मिंश्चिज्जनकुले जात: कालिन्दीसलिलाप्लुत: ।
अर्चयिष्यति गोविन्दं मथुरायामुपोषित: ॥
श्वेतद्वीपनिवासी स येनेदं वपुरास्थित: ।
परान्धिमवाप्स्यामस्तारिता: सकुलोद्भवै: ॥"

इति विष्णुपुराणे ६ अंशे ८ अध्याय: ॥*॥

तस्या माहात्म्यं यथा,—

वराह उवाच ।

"न विद्यते च पातालं नान्तरीक्षे न मानुषे ।
समत्वं मथुरायाश्च प्रियं मम वसुन्धरे ! ॥"

भूत उवाच ।

"तच्छ्रुत्वा वचनं तस्य प्रणम्य शिरसा तदा ।
पुण्यानां परमं पुण्यं पृथ्वी वचनमब्रवीत् ॥

पृथिव्युवाच ।

पुष्करं नैमिषं चैव पुरी वाराणसी तथा ।
हृता स्थिता महाभाग ! मथुरां किं प्रशंससि ॥

वराह उवाच ।

अस्तु तावत्तवेदं वसुधे ! कथ्यमानं मयानघे ! ।
मथुरेति च विख्यातं नास्ति क्षेत्रं परं मम ।
सा रम्या च सुभद्रा च जन्मभूमि: प्रिया मम ॥
अस्तु देवि ! यथा क्षौमि मथुरां पापहारि-
णीम् ।
तन्निवासी नरो याति मोक्षं नास्त्यत्र संशय: ॥
महामाघ्यां प्रयागे तु यत् फलं लभते नर: ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
कार्त्तिक्यामेव यत् पुण्यं पुष्करे तु वसुन्धरे ! ।
तत् फलं लभते देवि ! मथुरायां दिने दिने ॥
पूर्णे वर्षसहस्रे तु वाराणस्यान्तु यत् फलम् ।
तत् फलं लभते देवि ! मथुरायां त्रयेण हि ॥
मथुरान्तु परित्यज्य योऽन्यत्र कुरुते रतिम् ।
स मूढो भ्रमति संसारे मोहितो मायया मम ॥
य: शृणोति वरारोहे ! माथुरं मम मङ्गलम् ।
अन्येनोच्चारितं शृण्वन् सोऽपि पापै: प्रमुच्यते ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
मथुरायां गमिष्यन्ति सप्त चैव जनार्द्दने ॥
मथुरां समनुप्राप्य आर्द्रं स्नात्वा यथाविधि ।
स्नानं यान्तीह पितरो यावत् स्थित्यब्दलक्षणम् ॥
ये वसन्ति महाभागे ! मथुरामिनरे जना: ।
तेऽपि यान्ति परां सिद्धिं मत्प्रसादान्न संशय: ॥
कलावत्रैके घोरतरे मथुरायां विशेषत: ।
विना सांख्येन योगेन मुच्यते नात्र संशय: ॥
मथुरायां महापुर्यां ये वसन्ति शुचिव्रता: ।
बलिभिश्चाप्रदातारो ये वा ते नरविग्रहा: ॥
भविष्यामि वरारोहे ! द्वापरे युगसंस्थिते ।
ययातिभूपवंशाच्च क्षत्रिय: कुलवर्द्धन: ॥
भविष्यामि वरारोहे ! मथुरायां न संशय: ।
मूर्त्तिं चतुर्विधां कृत्वा स्थास्यामि ऋषिभि:
स्तुत: ॥
स्थास्यामि वत्सरशतं युद्धेषु कृतनिश्चय: ।
एका चन्दनसङ्काशा द्वितीया कनकप्रभा ॥
अयोकसदृशा चान्या अन्या चोत्पलसन्निभा ।
तत्र गुह्यानि नामानि भविष्यन्ति मम प्रिये ! ॥
पुण्यानि च पवित्राणि संसारोच्छेदनानि च ।
यत्राहं स्नापयिष्यामि द्वापरिष्यति वसुन्धरे ! ॥
दैत्यान् घोरान् महाभागे ! कंसादीन् घोर-
दर्शनान् ।
यमुना यत्र सुभगा नित्यं सन्निहिता ध्रुवम् ॥
वैष्णवस्वरूपा रम्या यमुना यत्र विश्रुता ।
तां नदीं यमुनां गङ्गां प्रयागे सङ्गविश्रुताम् ॥
गङ्गाप्लुतगुणा पुण्या मथुरे मम मण्डले ।
यमुना विश्रुता देवि ! नात्र कार्य्या विचारणा ॥
तत्र तीर्थानि गुह्यानि भविष्यन्ति ममानघे ! ।
येषु स्नानपरो देवि ! मम लोके महीयते ॥
अत्रापि सुव्रते प्राणान् मम कर्म्मपरायण: ।
न जायते स मर्त्येषु जायते च चतुर्भुज: ॥
अविमुक्ते नर: स्नातो मुक्तिं प्राप्नोत्यसंशयम् ।
तथात्र सुव्रते प्राणान्मम लोकं स गच्छति ।
विश्रान्तिसंज्ञकं नाम तीर्थं त्रैलोक्यविश्रुतम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
सर्व्वतीर्थेषु यत् स्नानं सर्व्वतीर्थेषु यत् फलम् ।
तत् फलं लभते देवि ! दृष्ट्वा देवं गतश्रमम् ॥

न च यज्ञैर्न तपसा न ध्यानैर्न च संयमै: ।
तत् फलं लभते देवि ! स्नातो विश्रान्तिसंज्ञके ॥
कालञ्जयन्तु वसुधे ! य: पश्यति गतश्रमम् ।
स्नात्वा प्रदक्षिणे दे तु विष्णुलोकं स गच्छति ॥
अस्ति चान्यत् परं गुह्यं सर्व्वसंसारमोचनम् ।
यस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
प्रयागं नाम तीर्थन्तु देवानामपि दुर्लभम् ।
तस्मिन् स्नातो नरो देवि ! अग्निष्टोमफलं लभेत् ॥
इन्द्रलोकं समासाद्य नरो वै तत्र मोदते ।
अथात्र सुव्रते प्राणान् मम लोकं स गच्छति ॥
तथा कनखलं तीर्थं नाम गुह्यं परं मम ।
स्नानमात्रेण तत्रापि नाक्षपृष्ठे स मोदते ॥
अस्ति क्षेत्रं परं गुह्यं तिन्दुकं नाम नामत: ।
तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ॥
अस्मिंस्तीर्थे पुरावृत्तं तच्छृणुष्व वसुन्धरे ! ।
पाण्डवविषये देवि ! काम्पिल्याच्च पुरोत्तमम् ॥
धनधान्यसमायुक्तं ब्रह्मदत्तेन पालितम् ।
तस्मिंस्तु वसते देवि ! तिन्दुको नाम नामत: ॥
तस्मिंस्तु वसतस्तस्य नापितस्य पुरोत्तमे ।
कालेन महता तस्य कुटुम्ब: क्षयमागत: ॥
क्षीणे कुटुम्बे तु तदा सुभृशं दु:खपीड़ित: ।
सर्व्वसङ्गपरित्यागी यो गच्छन् मथुरापुरीम् ।
ब्राह्मणावसथे सोऽपि वसमानो वसुन्धरे ! ॥
तत्र कर्म्मव्रतं ज्ञात्वा स्नात्वैव यमुनां नदीम् ।
तत्र दानञ्च कुरुते नित्यकालं दृढ़व्रत: ॥
तत: कालेन महता पञ्चत्वं वसुपागत: ।
तस्य तीर्थप्रभावेण जातोऽसौ ब्राह्मणोत्तम: ॥
तस्मिन् वरारुहे देवि ! ब्राह्मणो योगिनां वर: ।
जातिस्मरो महाप्राज्ञो विष्णुभक्तो वसुन्धरे ! ॥
तस्य तीर्थप्रभावेण प्राप्ता मुक्ति: सुदुर्लभा ॥
तत: परं सूर्य्यतीर्थं सर्व्वपापप्रमोचनम् ।
वैरोचनेन बलिना सूर्य्यस्यारोपित: पुरा ॥
भूरराज्येन बलिना धनकामेन वै पुरा ।
ऊर्द्ध्वबाहुर्निराहारस्तप्तवानुत्तमं तप: ॥
साग्रं संवत्सरं देवि ! तत: कामवाप्नुयात् ।
तस्य प्रसन्नो भगवान् द्युमणि: प्रत्यभाषत ॥
किं कारणं बले ! ब्रूहि तपस्तप्तं महत्तम: ॥"

बलिरुवाच ।

"भूरराज्योऽस्मि देवेश ! पातालेऽस्मि निवासाच्छन्नम् ।
चिन्तितापि विभीतस्य कुटुम्बभरणं कृत: ॥
सकुटाम्बस्य वै सूर्य्य ददौ चिन्तामणिं तत: ।
चिन्तामणिं समासाद्य पातालमगमत्तदा ॥
तस्मिंस्तीर्थे नर: स्नात्वा सर्व्वपापै: प्रमुच्यते ।
तत्रापि सुव्रते प्राणान् मम लोकं स गच्छति ॥
आदित्योदयने संक्रान्तौ यद्वत्ते चन्द्रसूर्य्ययो: ।
तस्मिन् स्नातो नरो देवि ! राजसूयफलं लभेत् ॥
यच्च धुवेण सप्तानं दृष्ट्वा परमं तप: ।
अत्र वै स्नानमात्रेण ध्रुवलोके महीयते ॥
तत्रापि सुव्रते प्राणान् मम लोके महीयते ॥
ध्रुवतीर्थे च वसुधे य: श्राद्धं कुरुते नर: ।
पितॄंस्तारयते सर्व्वान् पितृपक्षे विशेषत: ॥
दक्षिणे ध्रुवतीर्थस्य तीर्थराजं प्रकीर्त्तितम् ।

तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ।
तत्राथ सुचते प्राणान्मम लोकं स गच्छति ॥
तद्विल्वे मद्गदेवि ! ऋषितीर्थं परं मम ।
तत्र स्नातो नरो देवि ! ऋषिलोकं प्रपद्यते ॥
अथात्र सुचते प्राणान्मम लोके महीयते ।
इन्द्रिलो ऋषितीर्थस्य मोक्षतीर्थं परं मम ॥
स्नानमात्रेण वसुधे ! मोक्षं प्राप्नोति मानवः ।
तत्राथ सुचते प्राणान् मम लोके महीयते ॥
तत्रैव कोटितीर्थं हि तीर्थानामपि दुर्लभम् ।
तत्र स्नानेन दानेन मम लोके महीयते ॥
कोटितीर्थे नरः स्नातः सन्तर्प्य पितृदेवताः ।
तारिताः पितरस्तेन सप्तैव प्रपितामहाः ॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते ।
तत्रैव वायुतीर्थन्तु पितृणामपि दुर्लभम् ॥
पिण्डं दद्यात्तु वसुधे ! पितृलोकं स गच्छति ।
गयापिण्डप्रदानेन यत् फलं लभते नरः ॥
तत् फलं लभते देवि ! ज्येष्ठे दानात् संशयः ।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च ॥
स्नानं दानं जपो होमः सहस्रगुणितं भवेत् ।
एषां स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्वान् कामानवाप्नुयात् ॥"

इत्यादि वराहपुराणे मथुरातीर्थप्रभावः ॥*॥
इतः प्रभृति सप्तविंशाध्यायेषु मथुरामाहात्म्यं ज्ञेयम् ॥

मथुरेशः, पुं, (मथुरायाः ईशः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥

मथुरा, स्त्री, (मथ् + बाहुलकात् उरः टाप् ।) मथुरा । इति हिरूपकोषः ॥

मद, इ ङ स्वप्ने । आद्ये । मदे । मोदे । स्तुतौ । गतौ । इति कविकल्पद्रमः ॥ (भ्वा०-आत्म०-स्वप्ने आद्ये मद मोदे अक०-स्तुतौ गतौ च सक०-सेट् ।) मन्यते । ङ मन्दते जनः स्वपिति जड़ो भवति माद्यति मोदते स्तौति गच्छति वा इत्यर्थः । इति दुर्गादासः ॥

मद, ई भ य हर्ष जि हर्षे । इति कविकल्पद्रमः ॥ (दिवा०-पर०-अक०-सेट् ।) ई जि मनोऽस्मि । भ य माद्यति । हर्ष अमदत् अमादीत् । अस्मात् पुषादित्वात् सिच् ङ इत्यत्र । इति दुर्गादासः ॥

मद, क ङ हर्षग्रियोगे । इति कविकल्पद्रमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ मनो मादयते यस्य घ्राणाभ्यासरसायनात् । इति दुर्गादासः ॥

मद, म गर्वे । स्तेपने । इति कविकल्पद्रमः ॥ (भ्वा०-पर०-अक०-सेट् ।) गर्वोऽहङ्कारः । स्तेपनं दैन्यम् । म मदयति नीचं सम्पत्तिः । मदयति घूर्णं भूरः । इति दुर्गादासः ॥

मदः, पुं, (मदयतीति । मद् + अच् ।) हस्तिगण्डजलम् । (यथा, भारवौ । २ । २८ ।
"मदस्खलन्मुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः ।")

तत्पर्य्यायः । दानम् २ ॥ (मद्यते इति । मद् + "मदोऽनुपसर्गे ।" ३ । ३ । ६७ । इति अप् ।) हर्षः । (यथा, ऋग्वेदे । १ । ४ । २ ।
"उप नः सवनागहि सोमपाः पिब गोदा इदेवतो मदः ॥" "मदो हर्षः ।" इति तद्भाष्येसायणः ।) तत्पर्य्यायः । आमोदः २ । इत्यमरः । ३ । २ । १२ ।) रेणः । कस्तूरी । (पर्य्यायो यथा,—
"मृगनाभिर्मृगमदो मदः कस्तूरिकाऽजः ॥"
इति वैद्यकरत्नमालायाम् ॥
रोगविशेषः । उन्मादस्य प्रथमावस्थायां यथा,
"स चाप्रबुद्धसदृशो मदसंज्ञां बिभर्त्ति च ।"
इति माधवकरनिदानेऽपस्मारोन्मादाधिकारे ॥
विशेषोऽस्य यथा.—
यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः ॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावनिद्धन्ते जायन्ते व्याधयस्तदा ॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गौषधाप्तिषु ॥
दुर्बलस्येतरः स्थानं यदा वायुः प्रपद्यते ।
मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा ॥
पित्तमेवं कफस्त्वेवं मनो विक्षोभयन् पृथक् ।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते ॥
स्वप्नालस्यदृताभाषश्चलत्ववलिसचेष्टितम् ।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाननम् ॥
सक्रोधपरुषाभाषं संप्रहारकलप्रियम् ।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताननम् ॥
स्वप्नसम्बन्धवचनं तन्द्रालस्यसमन्वितम् ।
विद्यात् कफमदाविष्टं गाढ़ं प्रश्वासनत्वरम् ॥
सर्व्वाण्येतानि रूपाणि सन्निपातजते मदे ।
जायन्ते ग्राम्यति त्वाशु मदो मद्यमदात्ययः ॥
यच्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः ।
सर्व्वं तत् मदानर्त्तं वातपित्तकफात्ययात् ॥"
इति चरके सूत्रस्थाने चतुस्त्रिंशोऽध्याये ॥)
गर्व्वः । इति मेदिनी । दे, १२ ॥ (यथा, भारवौ । २ । ४८ ।
"मदमानमसूचनं नृपं
न विवृण्वन्ति नियमेन मूढ़ना ॥")
मद्यम् । पेयम् । मत्तेति यावत् । इति हेमचन्द्रः । २ । २२६ ॥ (यथा, मनौ । ७ । ४७ ।
"मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।"
"तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥")
मदः । कल्याणवस्तु । इति धरणिः ॥ * ॥
मदलक्षणं यथा,—
"अहं महात्मा धनवान् मत्तान्यः कोऽस्ति भूतले ।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः ॥"
इति पाद्मे क्रियायोगसारे २६ अध्यायः ॥
तस्य उत्पत्तिर्यथा ।
"सुहृन्मोहः समभवदहङ्कारादभून्मदः ।"
इति मात्स्ये ३ अध्यायः ॥
(दानवभेदः । यथा, हरिवंशे । ३ । ८६ ।
"अश्विलोमा सुकेशी च मुदश्च बलवान् मदः ॥"

मदकटः, पुं, (मदं कटति प्रकटयतीति । कट् + अच् ।) वकः । डाँक् इति भाषा । यथा । दक्षरो दक्षरौ गोपतिः वको हयो मदकटो बलः । इति हेमचन्द्रः । ४ । ३२५ ॥
मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य ।) मत्तहस्ती । तत्पर्य्यायः । मदोत्कटः २ । इत्यमरः । २ । ८ । ३५ ॥ अव्यक्तप्रजापौ । इति शब्दरत्नावली ॥ महाव्यक्तवाचिनि त्रि । इति मेदिनी । ले, १५६ ॥ (यथा, उत्तरचरिते २ अङ्के ।
"मदकलमयूरकेकाच्छविभिरवकीर्णानि ।")
मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य ।) सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (विवरणन्तु सप्तच्छदशब्दे द्रष्टव्यम् ।)
मदगन्धा, स्त्री, (मदः मादकः गन्धोऽस्याः ।) मदिरा । अतसी । इति राजनिर्घण्टः ॥
मदनी, स्त्री, (मदं मत्ततां हन्तीति । मद् + ल्यु टक् ङीप् ।) पुत्रिका । इति जटाधरः ॥
मदनः, पुं, (मदयतीति । मद् + णिच् ल्युः ।) कामदेवः । इत्यमरः । १ । १ । ७६ ॥
तस्य जन्मा पुनरुत्पत्तिर्यथा । कूर्म्म ऊचुः ।
"यस्मात् प्रमथ्य चैतत्वं जातोऽकायतया विधेः ।
तस्मात्त्वमनघात्मा त्वं लोके गेयो भविष्यसि ॥
जगत्सु कामरूपत्वं त्वत्समो न हि विद्यते ।
अनङ्गं कामनाम्नापि ख्यातो भव मनोभव ! ॥
मदनान्मदनाख्यं तु भूभांदेर्यात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥"
इति कालिकापुराणे २ अध्यायः ॥
ब्रह्मणस्तस्योत्पत्तिर्यथा,—
"प्रहृष्टमानसः पुत्रं कन्दर्पञ्च ससर्ज्ज ह ।
हृषस्य कामिनः पुत्रः कामदेवो बभूव ह ॥
कन्या घोड़शवर्षीया रतिभूषणभूषिता ॥
उवाच पुत्रं स विधिः सुरोत्तम पुरतः स्थितम् ।
दुर्निवार्य्यं भवत्कान्तं स्वात्मारामं मनोहरम् ॥
ब्रह्मोवाच ।
स्त्रीपुंसोः क्रीड़नार्थाय सृष्टा त्वञ्च विनिर्म्मितः ।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि ॥
सम्मोहनं मनुष्यस्य स्त्रीत्वनिष्कारणम् ।
उन्मत्तबीजं ज्वलनं भूतचेतनहारकम् ॥
प्रयत्नेनाज्ञया दत्तान् सर्व्वान् सम्मोहनं कुरु ।
दुर्निवार्य्यो मम वराद्भव वत्स ! भवेश्च ॥
बाणाद्यैर्वसुधा च प्रभुत्वञ्च जगद्विधिः ।
दृष्ट्वा वाक्यं दृढतरं वरं दातुं समुद्यतः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १५ अध्यायः ॥
(योगाचार्य्यरूपः शिवस्यावतारविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । (० । १—२ ।
श्रीकृष्ण उवाच ।
"युगावर्त्तेषु सर्व्वेषु योगाचार्य्यस्वरूपिण सु ।
अवतारांश्च सर्व्वस्य ब्रूह्यांश्च भगवन् ! मम ॥"
उपमन्युरुवाच ।
"श्वेतः सुतारो मदनः सुहोत्रः कंक एव च ॥"
मदादेयः । मदयति भक्षणात् मनः इति

मद+क्युः। मदयति आनन्दजनकत्वादस्य तथात्वम्। यथा, महाभारते। १६। १०। ६८।
"उन्मादो मदनः कामो रूपवत्योऽर्थकरो वशः।"
मत्तता। वरारोहाणां कामिनीनां भावविशेषः इति भरतः। यथा, महाभारते। २। ४६। १३।
"सौधुपानेन चाक्षेण तुदाय मदनेन च।
विलासनेन विविधैः प्रेक्षणीयतरोऽभवत्॥")
वसन्तः। धुस्तूरः। सिक्थकम्। इति मेदिनी। मे। १०१॥ कुसुमभेदः। मयना इति भाषा। तत्पर्य्यायः। पिप्पकः२ सुषुकन्दः३ कण्टकी४। इति रत्नमाला॥ पिप्पलीतकः ५। (तथाचास्य पर्य्यायान्तरं गुणाश्च।
"मदनः कुहनः पिप्पो नटः पिप्पलीतकस्तथा।
करहाटो मदयकः शुल्यको विषपुष्पकः॥
मदनो मधुरस्निग्धो वीर्य्योष्णो लेखनो लघुः।
वान्तिकृद्विद्रधिहरः प्लीहश्वासव्रणान्तकः॥
रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः॥"
धुस्तूरार्थे पर्य्यायो यथा,—
"धत्तूरधूर्तधुस्तूरा उन्मत्तः कनकाह्वयः।
शिवप्रिया शिवस्तूरो महामोहः शिवप्रियः॥
मातुलो मदनश्चास्य फलं मादलपुष्पकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) भदयकः। ४ मदनः। ५ करहाटकः। ६ शुल्यः। ७ इक्षमरः। २। ४। ५२—५३॥ भ्रमरः। इति जटाधरः॥ मायः। इति हेमचन्द्रः॥ खदिरवृक्षः। इति शब्दचन्द्रिका॥ मद्योत्कृष्टः। बकुलवृक्षः। वृक्षविशेषः। मयना-फल इति भाषा। तत्पर्य्यायः। शुक्लः २ कोटर्य्यः ३ पिच्छः ४ धाराफलः ५ तगरः ६ करहाटः ७ पिप्पलीतकः ८ मदनः ९ मदकः १०। अस्य गुणाः। वमिकारकत्वम्। तिक्तत्वम्। उष्णवीर्य्यत्वम्। लेखनत्वम्। लघुत्वम्। रूक्षत्वम्। कुष्ठकफानाहशोफगुल्मव्रणापहत्वञ्च। इति राजनिर्घण्टः॥ आलिङ्गनविशेषः। तत्पर्य्यायम्। नायको नायिकायाः कण्ठे हस्तं दत्त्वा द्वितीयहस्तं तस्या मध्यदेशे दत्त्वा यदाश्लिष्यति। इति कामशास्त्रम्॥ ("अथ मदनम्।" मम् इति भाषा।
"मदनस्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम्।
मध्याधारो मदनकं मधूच्छिष्टमपि स्मृतम्॥
मदनं मदकृत्सुस्निग्धं भूतघ्नं व्रणरोपणम्।
मदनस्यानलघ्नातकुलवीसर्परक्तजित्॥"
इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥ मङ्गलिसर्षान्मर्षतसर्षविशेषः॥ "शिमुको मदनः पालिन्दिरः इत्यादि।" इति सुश्रुते कल्पस्थाने चतुर्थेऽध्याये॥)
मदनकः, पुं, (मदयतीति मद+णिच्+ल्युः स्वार्थे कः।) दमनकवृक्षः। इति रत्नमाला॥ (सिक्थकार्थे क्ली। तत्पर्य्यायो यथा,—
"मदनस्तु मधूच्छिष्टं मधुशेषञ्च सिक्थकम्।

मध्याधारो मदनकं मधूच्छितमपि स्मृतम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)
मदनकाङ्कुरवः, पुं, (मदनेन हेतुना काङ्कुः कामजन्यो विह्वलो रवः अस्फुटध्वनिर्यस्य।) पारावतः। इति राजनिर्घण्टः॥
मदनगोपालः, पुं, (मदनश्चासौ गोपालश्चेति। भक्तचित्तोन्मादकारित्वादस्य तथात्वम्।) श्रीकृष्णः। यथा,—
"वन्दे मदनगोपालं केशोराकारमद्भुतम्।"
इति पाद्मे पातालखण्डे ६ अध्यायः॥
मदनचतुर्दशी, स्त्री, (मदनोत्सवात्मिका चतुर्दशी।) चैत्रशुक्लचतुर्दशी। यथा। अथ मदनचतुर्दशी तत्र मदनस्य पूजा कार्य्या। स्कन्दपुराणसौराणमयोः।
"मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी।
प्रोक्ता मदनभङ्गीति सिद्धिदा तु महोत्सवे॥
पूजयिष्यन्ति ये मर्त्यास्तदङ्गभवपल्लवैः।
न यान्ति परमं स्थानं मदनस्य प्रभावतः॥
चैत्रे मासि चतुर्दश्यां मदनस्य महोत्सवः।
स्तुतिभिर्लोकिभिश्चैव गीतवाद्यादिभिर्नृणाम्।
भगवान्सुप्रीयत कामः पुत्रपौत्रसन्ततिदः॥
बलिं प्रति भगवद्वाक्यम्।
न मानयन्ति ये पञ्च मदनं मानवाधमाः।
तेषां पुण्यं फलं दत्तं मया ते चैत्रमासिकम्॥
देवलः।
चैत्रशुक्लचतुर्दश्यां यः जागर्त्ति वसन्निधौ।
विघ्नाश्चत्वं न तस्य स्यात् गङ्गायाश्च विशेषतः॥"
इति तिथितत्त्वम्॥
मदनत्रयोदशी, स्त्री, (मदनपूजार्था त्रयोदशी।) चैत्रशुक्लत्रयोदशी। तत्र मदनस्य व्रतं कर्त्तव्यम्। यथा भविष्ये।
"चैत्रशुक्लत्रयोदश्यां मदनं दमनात्मकम्।
स्नात्वा संपूज्य विधिवद्भोजयेद्ब्राह्मणान् तु॥
तत्र सन्तुष्टितः कामः पुत्रपौत्रविवर्द्धनः।
कामदेवस्त्रयोदश्यां पूजनीयो यथाविधि।
रतिप्रीतिसमायुक्तो लोकोऽसौ भूषितः॥"
दमनो दमनकवृक्षः। सन्तुष्टितः प्रीतिमान्। कामदेवध्यानन्तु।
"चापेक्षुधृक् कामदेवो रूपवान् विश्वमोहनः।"
तत्र स्तुतिमन्त्रः।
"पुष्पधन्वन्! नमस्तेऽस्तु नमस्ते मीनकेतन!।
सुतानां लोकपालानां धैर्य्यच्युतिकृते नमः॥
माधवायज! कन्दर्प! सम्बरारे! रतिप्रिय!।
नमस्तुभ्यं जिताक्षेषसुखनाथ मनोभुवे॥
आधयो मम नश्यन्तु आधयश्च शरीरजाः।
सम्पद्यतामभीष्टं मे सम्पदः सन्तु मे स्थिराः॥
नमो माराय कामाय देवदेवस्य सूनवे।
ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय च॥
इदं यः कुरुते पूजामनङ्गस्य महात्मनः।
भवन्ति नापदस्तस्य तस्मिन्नन्दे कदाचन॥"
इति तिथितत्त्वम्॥

मदनद्वादशी, स्त्री, (मदनपूजाविषयिणी द्वादशी।) चैत्रशुक्लद्वादशी। अत्र मदनव्रतं कार्य्यम्। यथा,
ऋषय ऊचुः।
"श्रोतुमिच्छामहे सूत! मदनद्वादशीव्रतम्।
सुतानेकोनपञ्चाशत् येन लेभे दितिः पुरा॥
सूत उवाच।
यद्वशिष्ठादिभिः पूर्व्वं दितेः कथितमुत्तमम्।
विस्तरेणैतदेवेदं मत्सकाशान्निबोधत॥
चैत्रे मासि सिते पक्षे द्वादश्यां नियतव्रतः।
स्थापयेदग्रतः कुम्भं सिततण्डुलपूरितम्॥
नानाफलयुतं तद्वद्दिव्यदर्भसमन्वितम्।
सितवस्त्रयुगच्छन्नं सितचन्दनचर्चितम्॥
नानाभक्ष्यफलोपेतं सहिरण्यञ्च शक्तितः।
ताम्रपात्रं शुभोपेतं तस्योपरि निवेदयेत्॥
तस्मादुपरि कामस्तु कदलीदलसंस्थितम्।
कुर्य्याच्छर्करयोपेतां रतिं तस्य च वामतः॥
गन्धधूपं ततो दद्यात् गीतवाद्यञ्च कारयेत्।
तदग्रे कथां कुर्य्यात् कामकेयूरयोर्नरः॥
कामनाम्ना हरेर्बाहौ स्थापयेद् गुडवारिणा।
शुक्लपुष्पाक्षततिलैरर्घयेन्मधुसूदनम्॥
कामाय पादौ संपूज्य जंघे सौभाग्यदाय च।
ऊरू स्मरायेति पुनर्मन्मथायेति वै कटिम्॥
स्वच्छोदरायेत्युदरं मनोभवायेत्युरो हरेः।
सुखं पद्मसुखायेति बाहू पुष्पधराय वै॥
नमः सर्व्वात्मने मौलिमर्चयेदिति केशवम्।
ततः प्रभाते तं कुम्भं ब्राह्मणाय निवेदयेत्॥
ब्राह्मणान् भोजयेद्भक्त्या स्वयञ्च लवणाहते।
भुक्ताय दक्षिणां दद्यादिमं मन्त्रमुदीरयेत्॥
प्रीयतामत्र भगवान् कामरूपी जगार्द्दनः।
हृदये सर्व्वभूतानामानन्दो यो विधीयते॥
अनेन विधिना सर्व्वं मासि मासि समाचरेत्।
उपवासी त्रयोदश्यामर्चयेद् विष्णुमव्ययम्॥
फलमेकञ्च संप्राश्य द्वादश्यां भूतले स्वपेत्।
ततस्त्रयोदशे मासि घृतं धेनुसमन्वितम्॥
घृत्वा दद्यादनङ्गाय सर्व्वोपस्करसंयुताम्।
काञ्चनं कामदेवञ्च शुक्लां गाञ्च पयस्विनीम्॥
वासोभिर्द्विजदम्पत्यं पूज्य शुक्ला विभूषणैः।
घृत्वा गवादिकं दद्यात् प्रीयतामित्युदीरयेत्॥
होमं शुक्लैस्तिलैः कुर्य्यात् कामनामानि कीर्त्तयन्।
गव्येन सर्पिषा चैव पायसेन च धर्म्मवित्॥
विप्रेभ्यो भोजनं दद्याद्दक्षिणाञ्चाविचारितः।
इक्षुदण्डानथो दद्यात् पुष्पमालाञ्च शक्तितः॥
यः कुर्य्यादिधिवानेवं मदनद्वादशीमिमाम्।
सर्व्वपापविनिर्म्मुक्तः प्राप्नोति हरिसाम्यताम्।
इह लोके वरान् पुत्रान् सौभाग्यञ्च समश्नुते॥"
इति मत्स्यपुराणे ७ अध्यायः॥
मदनपाठकः, पुं, (मदनं मदुद्दीपकं पठतीति। पठ+ण्वुल्। खरेण कामोद्दीपनात्तथात्वम्।) कोकिलः। इति राजनिर्घण्टः॥
मदनमोहनः पुं, (मदन उन्मादकश्चासौ मोहनश्चेति कर्म्मधारयः। मुह्+णिच् ल्युः।) श्रीकृष्णः। यथा,—

मदना

"वन्दे मदनगोपालं केयूराकारमद्भुतम्।
यमाकुर्यौवनोद्भिन्ने श्रीमज्जदनमोहनम्॥"
इति पाद्मे पातालखण्डे ६ अध्यायः॥

मदनग्रलाका, स्त्री, (मदनोद्दीपिका ग्रलाकेव। अस्याः कामोद्दीपकत्वात्तथात्वम्।) कामोद्दीपकौषधम्। सारिकापक्षी। इति मेदिनी। के, २३५। कोकिला। इति शब्दरत्नावली॥

मदनसारिका, स्त्री, (मदनोद्दीपनाय सारिका।) पक्षिभेदः। सालिक इति भाषा॥ तत्पर्य्यायः। ग्रलाका २ सारिका ३ चित्रलोचना ४ कुणपी ५। इति जटाधरः॥

मदना, स्त्री, (मदयति मत्तां जनयतीति। मद्+णिच्+युः। यद्वा, माद्यति अनया। मद्+ल्युट्। स्त्रियां टाप्।) सुरा। इति हेमचन्द्रः। ३। ५६७॥

मदनाङ्कुशः, पुं, (मदनस्य कामस्य अङ्कुश इव।) लिङ्गम्। इति त्रिकाण्डशेषः॥ नखम्। इति कामाङ्कुशग्रब्दरत्नात्। यथा,—
"कामाङ्कुशाङ्कुशितकामिमनङ्गजेन्द्रे।"
इति श्रुतबोधे कालिदासः॥

मदनाधिकः, पुं, (मदनं उन्मादकं अधं शिरोभागो यस्य।) कोद्रवः। इति राजनिर्घण्टः॥ (विवरणमस्य कोद्रवग्रब्दे ज्ञातव्यम्॥)

मदनायुधः, पुं, (मदनस्यायुधः।) भगम्। इति ग्रब्दचन्द्रिका॥

मदनायुधः, पुं, (मदनस्यायुधीवर्णं इव समासाभ्योऽच्। निपातनात् साधुः।) कामवर्द्धकत्वात्तथात्वम्। कामवर्द्धिचुपः। इति राजनिर्घण्टः॥

मदनालयः, पुं, (आलीयतेऽस्मिन्निति आ+ली+अधिकरणे अच्। मदनस्यालयः।) षष्ठीसमासः।) भगम्। मदनपर्य्यायकग्रब्दोत्तरग्रहपर्य्यायकग्रब्देन भगस्योक्तत्वात्। यथा,—
"स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपसि भक्तस्तव
मनुम्॥"
इति कर्पूरस्तवः॥

जघनस्यावधिप्रभमस्थानम्। तच्च जायास्थानम्। यथा,—
"सूर्य्यात्मजान् क्रियदधस्तनजीवराज्ञयुक्तं
दिक्षष्ठीस्थद्वयतिथिग्रहान् सप्तविंशांश्च विद्यात्।
अंगानेतान् वदति यवनस्थान्यसूत्रान् सुतृतीयान्
तानेवांग्रान् मदनभवनेष्वाह नीचान् सुनीचान्॥"
इति दीपिकायां मदनभवनग्रब्ददर्शनात्॥

मदनावस्था, स्त्री, (मदनस्यावस्था।) कामावस्था। सा तु उद्वेगरूपा। विरह इति यावत्। यथा। ततः प्रविशति मदनावस्थो राजा निःश्वस्य।
"जाने तपसो वीर्यं सा बाला परवतीति मे
विदितम्।

मदयि

न च निम्नादिव सलिलं निवर्त्तते मे ततो हृदयम्॥"
इत्यभिज्ञानग्राकुन्तले ३ अङ्कः॥ मदनावस्थ इति राज्ञोऽत्र उद्वेगरूपा पञ्चमी कामावस्था। यदाह भरतः। उद्वेगः पञ्चमः प्रोक्त इति। सञ्चिन्त्यमिति केनोपायेन मम ग्रकुन्तलालाभो भविष्यति। इति तट्टीका॥

मदनी, स्त्री, (माद्यति अनया इति। मद्+करणे ल्युट्। स्त्रियां ङीप्।) सुरा। इति हारावली॥ कस्तूरी। अतिमुक्तकः। इति राजनिर्घण्टः॥

मदनेच्छाफलः, पुं, (मदनेच्छां फलति जनयतीति अच्।) बदरसालः। इति राजनिर्घण्टः॥

मदनोत्सवः, पुं, (मदनाय उत्सवः।) उत्सवविशेषः। होलाका इति ख्याता। तत्पर्य्यायः। सुवसन्तकः २। इति हारावली॥

मदनोत्सवा, स्त्री, (मदनाय उत्सवो यस्याः।) स्वर्गवेश्या। इति ग्रब्दरत्नावली॥

मदप्रयोगः, पुं, (मदस्य प्रयोगः।) करिणां मदोद्गमः। तत्पर्य्यायः। यत्तारमुदः। इति त्रिकाण्डशेषः॥

मदभञ्जनी, स्त्री, (मदं उन्मत्ततां भनक्ति दूरीकरोतीति। मद्+भनज्+"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः।" ३। १। १३४। इति णिनिः। स्त्रियां ङीप्।) शतमूली। इति ग्रब्दचन्द्रिका॥ (गुणादयोऽस्याः शतमूलीग्रब्दे ज्ञातव्याः॥)

मदयन्तिका, स्त्री, (मदयन्ती+तत्रः कन् टाप्। पूर्ब्बह्रस्वश्च।) मल्लिका। इति ग्रब्दरत्नावली॥ (यथा, सुग्रुते चिकित्सितस्थाने ६ अध्याये।
"ग्रिग्रुमातृक चिकटुका सुरसा मदयन्तिका।
वायस्यारग्वधाद्याश्च तुल्या कृष्णात् पृथक् पृथक्॥")

मदयन्ती, स्त्री, (मद्+भ्वच्+ङीप्।) वनमल्लिका। इति रत्नमाला॥ काटमल्लिका इति भाषा॥ मल्लिका। इतिराजनिर्घण्टः॥ (तथाचास्याः पर्य्यायो यथा,—
"मल्लिका मदयन्ती च घोरनीलच भृङ्गरी।"
इतिभावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"मदयन्त्यङ्गिनः कायस्तद्वत् समभृङ्गकरः।"
इति च वैद्यकचक्रपाणिसंग्रहे रक्तपित्ताधिकारे॥)

मदयित्नु, स्त्री, (मदयतीति। मद्+णिच्।
"स्रजिकुधिपुषिगदिमदिभ्यो नित्रिन्नुच्।" उणा० ३। १६। इति मदि+इत्नुच्। "अयामन्ताल्वाय्येत्नुषु।" ६। ४। ५५। इति णेरयादेशः।) मद्यम्। इति मेदिनी। ने, २०२॥

मदयित्नुः, पुं, (मदयतीति। मद्+णिच्। "स्रजनीति।" उणा०। २। १६। इति इत्नुच्। णेरयादेशश्च।) कामदेवः। औषिकः। इति शब्दरत्नावली॥ मदयुक्तः। इति मेदिनी। ने, २०२॥ मेघः। इति त्रिकाण्डशेषः॥

मदात्य

मदविह्वलः, पुं, (मदेन विह्वलश्चलितमनाः।) मत्तहस्ती। इति शब्दचन्द्रिका॥

मदव्याकः, पुं, (मदकरः व्याकोऽस्य।) उपोदकी। इति राजनिर्घण्टः॥

मदसारः, पुं, (मदं सारयति दूरीकरोति। इति मद+ल+णिच्+अच्।) तुलसवृक्षः। इति राजनिर्घण्टः॥

मदहस्तिनी, स्त्री, (मदेन हस्तिनीव।) महाकरञ्जः। इति राजनिर्घण्टः॥

मदहेतुः, पुं, (मदस्य हेतुः कारणम्।) जातकी। इति वैद्यकम्। मत्ततोकारकत्वञ्च। (मदरोगस्य हेतुः यथा,—
"यदा तु रक्तवाहीनि रसवंग्रावहानि च।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः॥
मलिनाहारशीलस्य रजोमोहाहृतात्मनः।
प्रतिश्यायावनिद्रत्वे जायते आधयस्तदा॥
मदमूर्च्छाय संन्यासास्तेषां विद्याद्विचक्षणः।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपग्रान्तिषु॥"
इति चरके सूत्रस्थाने चतुर्विंग्रोऽध्याये॥)

मदस्थलं, क्लीं, (मदस्य स्थलम्।) मदस्थानम्। यथा, ग्रब्दरत्नावली।
"अवदंग्रः सुरापानं शुक्लापानं मदस्थलम्।"

मदस्थानं, क्लीं, (मदस्य स्थानम्।) मद्यपानस्थानम्। तत्पर्य्यायः। शुक्लापानम्२। इत्यमरः। २।१०।९२।

मदाढ्यः, पुं, (मदेन मदजनकरसेन ताढ्यति स्थानेन आढ्यः युक्तः।) नागकृष्णः। इति राजनिर्घण्टः॥ (गुणादिविवृतिरस्य नागग्रब्दे ज्ञातव्या॥) मदयुक्ते, त्रि॥

मदाढ्या, स्त्री, (मदेन आढ्या।) लोहितलज्जालुः। इति ग्रब्दचन्द्रिका॥

मदातङ्कः, पुं, (मदजनितः आतङ्कः रोगः।) मदात्ययरोगः। इति राजनिर्घण्टः॥

मदात्ययः, पुं, (मदेन अत्ययो नाग्रोऽस्मात्।) मद्यपानादिजन्यरोगविग्रेषः। तत्पर्य्यायः। मदातङ्कः२ पानात्ययः३ मदाधिः४ मदः५। इति राजनिर्घण्टः॥ अथ मदात्ययादीनां निदानाद्याह।
"विषस्य ये गुणा दृष्टा सन्निपातप्रकोपणाः।
त एव मद्ये दृश्यन्ते विषं तु बलवत्तरा॥
तस्मादविधिपीतेन तथा मात्राधिकेन च।
युक्तेन चाहितैरन्नैरकाले सेवितेन च॥
मद्येन खलु जायन्ते मदात्ययसुखा गदाः॥"
अविधिप्रयुक्तं मद्यं विकारान्तरमप्युत्पादयतीत्याह।
"निभक्तमेकान्तत एव मद्यं
निषेवमाणं मनुजेन नित्यम्।
उन्मादयेत् कष्टतमान् विकारा-
नुतपादयेच्चापि ग्रतैरभीक्ष्णम्॥
एकान्तनो नैरन्तर्य्येण विकारान् मदात्ययादीन्।
ग्रतैरस्य भेदं नाग्नम्॥ * ॥ मदात्ययादीनां चिकित्सान्तरमाह।

"क्रुद्धेन भीतेन पिपासितेन
शोकाभिनप्तेन कृशस्थितेन।
आयासभाराध्वपरिश्रितेन
वेगावरोधाभिहतेन चापि॥
अत्यम्लरूक्षावनतोदरेण
सात्मीर्यभुक्तेन तथाबलेन।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान्॥"

तानेव विकारान् विवृणोति।

"पानात्ययं परमदं पानात्मीर्यमथापि वा॥"

पानविकारान् विवृणोति।

"पानविभ्रममुपरिष्टाद् वक्ष्यामि लक्षणम्।"

तत्र मद्यात्ययस्य सामान्यं लक्षणमाह।

"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा।
अरतिः प्रसेकः क्लमो ज्वरः पीतोन्मादलक्षणम्॥
शिरःपार्श्वशिवनीनां वेदना विप्लुते यथा।
आयतैर्निमेषान् दृष्ट्वा स्फुरणं वेपथुभ्रमः॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः।
शरीरसन्धेः कर्कशसुप्तरोगास्त्रिकग्रहः॥
इन्द्रियविड्वेदवातलक्ष्मो वातपित्तकफात्मकः।
भ्रमः प्रलापो रूपाणामसत्यार्थेन दर्शनम्॥
हृल्लासभक्तारुचयोऽभिघातो मर्मसन्धिषु।
प्रधर्षणं सिद्धिरिह श्रान्तेष्टा च मन्यते॥
आकुलानामग्रस्तानां स्वप्नाशं दर्शनानि च।
मद्यात्ययस्य रूपाणि सञ्जानीयादिमानि लक्षयेत्॥"

अथ मद्यात्ययस्य वातिकस्य निदानमाह।

"स्त्रीभोजकभयभाराध्वकर्मभिर्योऽनिलकुपितः।
रूक्षान्नपरिमाणो च यः पिबत्यनिमात्रया॥
रूक्षं परिमितं मद्यं निशि निद्रां निहन्ति च।
करोति तस्य सन्क्षोभं वातप्रायं मदात्ययम्॥"

तत्र मद्यम्॥ * ॥ अथ तस्य लक्षणमाह।

"हिक्काश्वासशिरःकम्यपार्श्वशूलप्रजागरैः।
विद्याद्वातकृपाणस्य वातप्रायं मदात्ययम्॥"

अथ पैत्तिकस्य निदानमाह।

"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते।
अम्लोष्णान्नाभ्यवहारी च क्रोधनोऽत्यातपप्रियः।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः॥"

अथ तस्य लक्षणमाह।

"तृष्णादाहज्वरस्वेदमोहानीसारविभ्रमैः।
विद्याद्दीप्तिबलस्य पित्तप्रायं मदात्ययम्॥"

अथ श्लैष्मिकस्य मदात्ययस्य निदानमाह।

"मधुरस्निग्धगुर्वाशी यः पिबत्यतिमात्रया।
अव्यायामदिवास्वप्नप्रसक्तासुखवेश्मसु रतः।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम्॥"

अथ तस्य लक्षणमाह।

"छर्दिरोचकहृल्लासतन्द्रागौरवशीतकैः।
विद्याच्छ्लेष्मपरीतस्य कफप्रायं मदात्ययम्॥"

अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणञ्चाह।

"त्रिदोषहेतुभिः सर्वैः सर्वैर्लिङ्गैर्मदात्ययः॥"

अथ परमदमाह।

"श्लेष्मोष्मयोः क्षुगुदना विरसास्यता च
विण्मूत्रसन्निरथ तन्निररोचकत्वम्।
लिङ्गं परस्य तु मरस्य वदन्ति तज्ज्ञा
स्तृष्णा दला ग्लपिरसि सन्धिषु चापि भेदः॥"

तन्निदानम्॥ * ॥ पानाजीर्णमाह।

"आध्मानसूयमथयोद्गिरणं विदाहः
पाने त्वजीर्णसुपलक्षयति लक्षणानि।"

उद्गिरणं वान्तिः उद्गारो वा। पीयत इति पानं मद्यम्॥ * ॥ पानविभ्रममाह।

"कृष्णाचलोदकफलंसलकण्ठधूम-
मूर्च्छाविभीष्वरशिरोरुजनप्रदेहाः।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुपद्यसिलेषु धीराः॥"

कण्ठधूमः कण्ठाद्धूमनिर्गम इव। प्रदेहः कफेन लिप्तास्यता। द्वेषः सुरान्नविकृतेषु सुराविकारेषु अन्नविकारेषु च द्वेषः।

अथिलेषु मद्यविकारेषु॥ * ॥ असाध्यानां मदात्ययादीनां लक्षणमाह।

"दीनोत्तरोष्ठमतिपीतमसह्यदाहं
तैलप्रभास्यमतिपानहतं त्वतीव।
स्विद्यत्यदत्तमभिवक्त्यथवापि गीतं
पाते च यस्य नयने रुधिरप्रभे च॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासश्रमावपि च पानहतं त्यजेत्तम्॥"

अथ मदात्ययादीनां चिकित्सा।

"मदोत्यानान्तु रोगाणां मद्यमेव हि भेषजम्।
यथा दहनदग्धानां दहनस्यैव हितं।
मिथ्यानिर्हीनमद्येन यो व्याधिरुपजायते।
समेनैव निषीतेन मद्येन स हि शाम्यति॥
बीजपूरकदन्त्याम्लकोलदाडिमसंयुतम्।
यवानीदाडिमाजाजीशुण्ठीवरावचूर्णितम्॥
सर्वेहेः प्राक्तभिर्युक्तमवदंशैश्चिरोत्थितम्।
दद्यात् मलवलं मद्यं पैत्तिकं वातशान्तये॥
मद्यं सौवर्चलयोगयुक्तं किञ्चिज्जलान्वितम्।
क्षीणमद्याय दातव्यं वातपानात्ययापहम्॥
शुण्ठ्यं सौवर्चलं हिङ्गु पूरकं विश्वदीप्यकम्।
शृतं मद्यन पातव्यं पानात्ययरुजापहम्॥
लावतित्तिरिदक्षाणां रसेश्च गिरिवनामपि।
पक्षिणां शुगमत्यानामामपक्वं तथोदनैः॥
क्षिप्तौषालवणाम्लैश्च वेसवारैर्भुजप्रियैः।
जिघ्रेद्गोधूमिकैर्वेश्यानमद्यात्ययं जयेत्॥
नारीणां यौवनोत्थानां निर्हरेयैरुपग्रहनैः।
श्रीपयुरुकुचभारैश्च सरोधोगुरुखदैः॥
शयनाच्छादनैस्तल्पैरुष्णोष्णाङ्गगृहैः सुखैः।
उत्पन्नो मारुतान् शीघ्रं प्रशाम्यति मदात्ययः॥

पित्तपानात्यये योज्याः सर्वत्रैव क्रिया हिमाः।
सिताशर्करिकासंयुक्तं मद्यमर्द्धोदकं पिबेत्॥
मद्यं खर्जूरमृद्वीकापरूषकरसैर्युतम्।
सदाडिमरसं पीतं शक्तुभिश्चावचूर्णितम्॥
शुण्ठ्यर्कं वा माक्षीकं संयुक्तमथवापरम्।
दद्यात् बदूदकं काले पातुं पित्तमदात्यये॥

शूल्यान् कपिञ्जलानेणान् जाङ्गलशिखण्डकान्।
मधुराम्लान् प्रयुञ्जीत भोजने प्राक्शिखण्डिकान्॥
पटोलयूषमिश्रं वा छागलं कफ्यरेद्रसम्।
कणीजं सूक्ष्मभिश्रं वा दाडिमामलकान्वितम्॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधाम्लकान्॥
शीतानि चान्नपानानि शीतगव्याजलानि च।
शीतवातजलस्पर्शाः शीतान्युपवनानि च॥
शौभपद्मोत्पलानाञ्च मालानां मौक्तिकस्य च।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः॥
कृतलपेजसंयुक्तं यवागोधूमसंयुतम्।
यवगोधूमकं चान्नं कृत्वयवेन भोजयेत्॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा।
प्रभूतकटुसंयुक्तं यावान्नं वा प्रदापयेत्॥
छागमांसरसं कृत्वमम्लं वा जाङ्गलं रसम्।
शोषयूषं मनागम्लं पिबेत् कफमदात्यये॥
स्यात्यामथ कपोतं वा भृष्टं कृत्वा तु शीरसम्।
कट्फलवरं मांसं खादेत् कफमदात्यये॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम्।
मदात्यये कफोद्रिक्ते लङ्घनञ्च यथाबलम्॥
यद्दिष्टं कर्म निर्दिष्टं वातपित्तकफान् प्रति।
सर्व्वेषु सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः॥"

इति भावप्रकाशः॥

गरुड़पुराणोक्तमदात्ययनिदानादिकं तत्रैव १६० अध्याये द्रष्टव्यम्॥ (तथाचास्य सकारणलक्षणचिकित्सादिकं यथा,—

"हालाहलाहलसमं भजते वियोगात्
सेव्यं न विष्यमतुजैः कथितं मुनीन्द्रैः।
हत्वा वमिः श्वसनमोहनदाहहत्वा
संजायतेऽतिमरणं विकलेन्द्रियत्वम्॥
ये नित्यसेवनाद्दृष्टा मद्यस्य मनुजा भुवम्।
विषमाहारसदृशी सुरा मोहनकारिणी॥
यथा विषं प्राणहरं वियोगाद्
योगेन तच्चाणवन्तं वदन्ति।
तथा सुरा धोगयुता हिता स्या-
दयोगतस्तारभतेऽतिकष्टम्॥
क्षुधातुरे क्षुधाक्रान्ते सुरा वा भोजनं विना।
न च स्यौगेर्विना भक्ता विनाहारातिपातकम्॥
अप्यन्नेऽप्यजीर्णेऽपि सुरा पीता रजाकरी।
यस्य प्रलपनञ्चापि न च वातमदात्ययः।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये॥
हृद्रोगरोचकक्लासतन्द्रास्तैमित्यगौरवम्।
पीतता च प्रतिश्यायः कफजे च मदात्यये॥
त्रिषु दोषेषु समता लिङ्गैर्यैर्वासुपक्रमः।
स त्रिदोषसमुद्भूतो मदमूर्च्छां भिनत्ति वै॥
वमनञ्च प्रशस्तञ्च निद्रासंसेवनं पुनः।
क्षारं हितं पयःपानं भोजने सगुडं दधि॥
मस्तुखजं सखर्ज्जूरं मृद्वीका दाडिमाम्बिका।
आमला च परूषञ्च लेहो हन्ति मदात्ययम्॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा।
कल्पयेत् पयसा सपि पानं सर्व्वमदात्यये॥

पथ्या क्वाथेन संयुक्तं पयःपानं मदालये ।"
इति मदात्ययचिकित्सा ॥
अथ पूगीफलमदात्ययचिकित्सारभ्यते ।
"पूगीफलमदे कम्पो मोहो मूर्च्छा भ्रमस्तमः ।
प्रस्वेदो विप्लुतत्वञ्च लालास्रावश्च जायते ॥
भ्रमस्तमपरीतत्वं विज्ञेयं पूगजार्च्छितं ।
मानवो लक्षणैरेभिर्ज्ञेयः पूगविमूर्च्छितः ॥
तस्य घृतं जलं पीतं वस्तिवातहितं भवेत् ।
शर्करामक्षणे देया मुक्ता वा शर्करान्विता ॥
कोद्रवाणां भवेन्मूर्च्छा देयं क्षीरं सुशीतलम् ।
धुस्तूरकमदे देयं शर्करासहितं दधि ॥
फलिनी करवीरश्च मोहिनी मदयन्तिका ।
अन्येषामपि कन्दानां वमनञ्चाशु कारयेत् ॥
पाययेत् शर्करायुक्तं क्षीरं वा दधि शर्कराम् ।"
इति श्रीमहर्ष्याचेयभाषिते हारीतोत्तरे छत्तीय-
स्थाने मदात्ययचिकित्सानाम सप्तदशोऽध्यायः ॥

मदात्यानः, पुं, (मदाय मत्तत्वोद्रेकाय आत्यायते वाद्यते क्षीयते । आ + त्या + कर्म्मणि क्तः ।) गजदक्षा । इति हारावली । २०४ । हातीर उपरेर छड़ा इति भाषा ॥

मदाम्बरः, पुं, (मदो दानवारि अम्बरमिवाच्छादकत्वात् ।) मत्तहस्ती । इति त्रिकाण्ड-शेषः ॥

मदारः, पुं, (माद्यति मत्तो भवतीति । मद् + "अङ्गिमदिमन्दिभ्य आरन् ।" उणा० । ३ । १३४ । इति आरन् ।) हस्ती । धूर्त्तः । इति विश्वः ॥ शूकरः । कासुकः । गन्धभेदः । मत्त-छत्री । वृषभेदः । इत्यजादिकोषः ॥

मदार्म्मेदः, पुं, (मदार्म्मं मदजन्यं अर्म्म नेत्ररोग-विशेषं दत्तीति । दा + कः ।) पलकमत्स्यः । इति त्रिकाण्डशेषः ॥

मदालापी, [न्] पुं, (मदेन मत्तत्वया आलपतीति । आ + लप् + णिनिः ।) कोकिलः । इतिशब्दमाला॥

मदाष्टः, पुं, (मदो मृगमद आष्टाख्या यस्य । ह्रस्वः ।) कस्तूरी । इति त्रिकाण्डशेषः ॥ (कस्तूरीशब्दस्य विवरणं स्थानम् ॥)

मदिरः, पुं, (मद् + किरच् ।) रक्तखदिरः । इति शब्दचन्द्रिका ॥ मदकरे, त्रि । यथा, ऋग्वेदे । ५ । ६१ । ११ ।
"य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु॥"
"मदिरं मदकरं मधु।" इति तद्भाष्ये सायनः ।)

मदिरा, स्त्री (माद्यतीति । मद् + किरच् । अजादित्वात् टाप् ।) मत्तखञ्जनः । इति शब्दरत्नावली ॥ (यथा, श्राकुन्तले । ३ । ५ ।
"यदि मदिरायतनयनां
तामधिकृत्य प्रहरतीति ।"
माद्यत्यनयेति । मद् + "इषि मदीति । उणा० । १ । ५२ । इति किरच् ।) मादकद्रव्यविशेषः । मद इति भाषा ॥ (यथा,—
"हिक्का-श्वास-प्रतिश्याय-काम वर्च्चोग्रहारुचौ ।
वध्यागदविबन्धेषु वातघ्नी मदिरा हिता ॥"
इति चरके सूत्रस्थाने २७ अध्यायः ॥
यथाच भाल्लिसूत्रके । ४ । २४ ।
"पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ।")
तत्पर्य्यायः । सुरा २ वल्लिप्रिया ३ हाला ४ परिप्लुत् ५ वरुणात्मजा ६ गन्धोत्तमा ७ प्रसन्ना ८ हरा ९ कादम्बरी १० परिप्लुता ११ कश्यम् १२ मद्यम् १३ । इत्यमरः । २ । १० । ४० ॥ मालिका १४ । इति शब्दरत्नावली ॥ कपिशी १५ गन्धमादनी १६ माधवी १७ कत्तोयम् १८ मदः १९ कापिशायनम् २० । इति जटाधरः ॥ वारुणी २१ मत्ता २२ सीता २३ चपला २४ कामिनी २५ प्रिया २६ मदगन्धा २७ माध्वीकम् २८ मधु २९ सन्धानम् ३० आसवः ३१ अम्बुता ३२ वीरा ३३ मेधावी ३४ मदनी ३५ सुप्रतिभा ३६ मनोज्ञा ३७ विधाता ३८ मोदिनी ३९ हली ४० गुणा-रिष्टम् ४१ सरकः ४२ मधुलिका ४३ मदोत्-कटा ४४ महानन्दा ४५ । इति राजनिर्घण्टः ॥ सीधुः ४६ मैरेयम् ४७ वलवल्लभा ४८ । इति भावप्रकाशः ॥ कारवम् ४९ । तत्त्वम् ५० इति केवलानन्तम् ॥ मदिरा ५१ परिप्लुता ५२ कल्यम् ५३ स्वादुरसा ५४ मृद्वी ५५ हार-हूरम् ५६ माद्वीकम् ५७ मदना ५८ देवसृष्टा ५९ कापिशम् ६० अम्बिका ६१ । इति हेम-चन्द्रः । ३ । ५६६ ॥ सा द्वादशविधा यथा,—
"माध्वीकं पानसं द्राक्षं खार्জ্জूरं तालमैक्षवम् ।
मैरेयं माल्लिकं टाङ्कं मधूकं नारिकेलजम् ॥
गुरुमल्लविकारोत्थं मद्यानि द्वादशैव च ॥"
इति जटाधरः ॥
अस्याः सामान्यगुणाः । सुमधुरत्वम् । कफ-मारुतनाशनत्वम् । लघुत्वम् । पुष्टिकरत्वम् । रुचित्वम् । सारकत्वम् । मदावहत्वञ्च ॥ * ॥ धानकीरसगुड़ादिजना मदिरा गौड़ी । तद्-गुणा यथा । तीक्ष्णत्वम् । उष्णत्वम् । मधुर-त्वम् । वातनाशित्वम् । पित्तबलकारित्वम् । दीपनत्वम् । पथ्यत्वम् । कान्तिदीप्तिकारित्वञ्च ॥ पुष्पद्रवादिमधुसारमयी मदिरा माध्वी । तद्-गुणा यथा । मधुरत्वम् । गाढ़त्वम् । पित्त-वातनाशित्वम् । पाण्डुकामलगुल्मार्शःप्रमेह-शमनत्वञ्च ॥ * ॥ विविधधान्यजाता मदिरा पैष्टी । तद्गुणा यथा । कटुत्वम् । अम्लत्वम् । तीक्ष्णत्वम् । गौड़ीसमत्वम् । वातहरत्वम् । कफकरत्वम् । ईषत्पित्तकरत्वम् । मोहनत्वञ्च । नालादिरसनिर्य्यासजना मदिरा मैरेयी हाला च । तद्गुणा यथा । शीतत्वम् । कषायत्वम् । अम्लत्वम् । पित्तहरत्वम् । वातदाहत्वञ्च ॥ * ॥ सर्व्वलताकृतनिर्य्यासरूपमदिरागुणाः । शीतल-त्वम् । गुरुत्वम् । मोहनत्वम् । बलदत्वम् ॥ क्षुत्वम् । तृष्णासन्तापनाशकत्वञ्च ॥ * ॥ नाना-द्रव्यकदम्बजना मदिरा कादम्बरी । तद्गुणा-यथा । सुमधुरत्वम् । पित्तश्रमहरत्वम् । मद-कारित्वञ्च ॥ * ॥ ऐक्षवमदिरागुणौ । स्निग्धि-रत्वम् । मदोत्कटत्वञ्च ॥ * ॥ यवधान्यजात-मदिरागुणौ । गुरुत्वम् । विष्टम्भदायकत्वञ्च ॥ शर्करोधातकीतोयजातमदिरागुणौ । शीतत्वम् । मनोहरत्वञ्च ॥ * ॥ शार्करमद्यगुणाः । तृप्य-त्वम् । दीपनत्वम् । मोहनत्वञ्च । इति नाना-मद्यगुणाः ॥ * ॥ ऋतुविशेषे पेयमदिरा यथा,
"गौड़ी तु शिशिरे पेया पैष्टी हेमन्तवर्षयोः ।
शरद्ग्रीष्मवसन्तेषु माध्वी शस्ता न चान्यथा ॥
कादम्बरीशर्करजादिमद्यं
सुशीतलं तृष्णकरं मदाढ्यम् ।
माध्वीसमं स्यात् क्षणतृप्तजातं
मद्यं सुशीतं गुरु तर्पणञ्च ॥
अन्यथा कुरुते पानं मद्यं सन्तापशोषदम् ।
अमेदोमदात्ययादिकारकं मूर्च्छनञ्च यत् ॥"
वयोभेदेन मद्ययोग्यानि ।
"मद्यं नवं सर्व्वविकारहेतुः
सर्व्वेषु वातादिकदोषदायि ।
जीर्णन्तु मद्यं सकलामयघ्नं
वर्णप्रदं तृप्तिकरञ्च दीपनम् ॥"
अन्यच्च ।
"पर्य्युषितमसात्म्यमेलनमद्यं वा पित्तलं पिशाचं वा ।
दोषावहमधिशेषाज्जातं क्षुद्यं विवर्ज्जयेत् तेन ॥
मद्यप्रयोगं कुर्व्वन्ति शूरादिषु महाक्षितौ ।
द्विजैस्तिभिस्तु न शास्त्रं यद्यप्युक्तोपपत्तिमत् ॥"
इति मद्यवर्ज्यावर्ज्यम् ॥ * ॥
"अन्ये हृदयधा मद्यमेदानाहुर्मनीषिणः ।
उक्तस्यात्मभयन्तीति मार्द्वीका एव गौरिषम् ॥"
इति राजनिर्घण्टे मद्यकरणम् ॥
अथ मद्यानां मद्यस्य लक्षणं गुणाश्च ।
"येषां यज्जातकं द्रव्यं तज्जमभिधीयते ।
यथारिष्टं सुरा सौवीराम्बाद्यमनेकधा ।
मद्यं सर्व्वं भवेद्यस्मात् पित्तजन्म वातनाशनम् ।
भेदनं शीघ्रपाकञ्च रुच्यं कफहरं परम् ॥
अन्नस्य दीपनं कृच्छ्रं पाचनं शमुकारि च ।
तीक्ष्णं सूक्ष्मञ्च विशदं व्यवायि च विकाशि
च ॥"
अथारिष्टलक्षणं गुणाश्च ।
"पक्वौषधाम्बुसिद्धं यज्जग्धं तनु स्यादरिष्टकम् ।"
अरिष्टं मद्यमिति लोके । यथा, द्राक्षारिष्टम् । दशमूलारिष्टम् । बल्वलारिष्टमिति ।
"अरिष्टं लघुपाकेन सर्व्वं तच्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥"
अथ सुराया लक्षणं गुणाश्च ।
"शालिषष्टिकपिष्टादिजन्मं मद्यं सुरा स्मृता ।
सुरा गुर्व्वी बलस्तन्यपुष्टिमेदःकफप्रदा ।
शर्करा शीघ्रगुल्मार्शोविषदोषहरा वरा ॥"
अथ सुराभेदो वारुणी तस्या लक्षणं गुणाश्च ।
"पुनर्नवाग्निलाक्षिप्त्वा सिद्धा वारुणी स्मृता ।
संक्षिप्तैकालशर्क्करमेषी सापि वारुणी ॥
सुरावद्गुणवती लघ्वी पीनसशोषमूलहृत् ॥"
सुरातो मैरेयं लघ्वीति ॥ * ॥
अथ सीधुद्वयस्य लक्षणं गुणाश्च ।
"इक्षोः पक्वे रसे सिद्धः सीधुः पक्वरसश्च सः ।

मदिरा

आमेक्षोरेव यः सीधुः स च धीतरसः स्मृतः ॥
सीधुः प्रकारस्तेषां क्षारासिद्धलवर्जितम् ।
वातपित्तकरो हृद्यः क्षेदनो रोचनो हरेत् ॥
त्रिवन्मेदःश्लोषार्शः श्लोपोदरकृमिप्रियान् ।
तस्मादल्पगुणः श्रीतरसः संलेखनः स्मृतः ॥"
अभ्यासवस्य लक्षणं गुणाश्च ।
"यत्पक्वौषधमाधुर्य्यात् सिद्धं मद्यं स आसवः ।
आसवश्च गुणा ज्ञेया द्वौ भागौ द्रव्यगुणैः समाः ॥"
अथ नवपुराणमद्यगुणाः ।
"मद्यं नवमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं दृंहणं दाहि दुर्गन्धं विष्टदंगुरु ॥
जीर्णं तदेव रोचिष्णु लघ्वग्निबलप्रदम् ।
हृद्यं सुगन्धि गुणवल्लघुस्रोतोविशोधनम् ॥"
अथ खालिकानां मद्यं पित्तनाशनं पेटाग्निशोधनाः ।
खालिके गौलहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्म्माणि निद्राच्च मदिरापरेत् ॥"
आचरेत् कुर्य्यात् ।
"विधिना मात्रया काले हितैरन्नैर्यथाबलम् ।
प्रकृतौ यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥
किन्तु मद्यं स्वभावेन यथेष्टगुणं तथा दूषितम्
अयुक्तियुक्तं रोगाय मृत्तिकापात्रं यथा स्थितम् ॥
अथ मद्यानामगुणोपायाः ।
"सुस्नेहस्वेदलघनं शरत्कालोचितं पिबेत् ।
अक्षकालमरिष्टांश्च नवमभिषवांश्च ॥
स्वाभाविकं सुखतमुज्झति पूतिगन्धं
मद्यञ्च मद्यजगुणादिभवञ्च तनवं ॥"
इति भावप्रकाशः ॥
अपि च ।
"प्रकृत्या मद्यमात्रस्य विषाक्तस्य विशेष उपदिश्यते ॥
लघूनां सक्तमूलानां मद्यानां पैत्तिकारिणाम् ।
सुरा प्रधाना वातेषु रक्तपित्तक्षयेषु च ॥
प्रसन्ना गुरुमद्यानामरिष्टानाञ्च सर्पिषां ।
शूलप्रवाहिकाटोपकफवातार्शसां हिता ॥"
अजलो व्याहिरुक्षोष्णः श्लेष्मघ्नो भक्तपाचनः ।
श्लेष्मापित्तमेहगण्डदोषान् हन्त्यरिष्टः कषायवान्॥"
अरिष्टो मद्यविशेषः ॥
"प्रायशोऽभिनवं मद्यं गुरु दोषबलप्रदम् ।
श्लेष्मलं श्लेष्मणं श्लेष्मं दीपनं लघु रोचनम् ॥
हर्षणं प्रीणनं मद्यं मद्यं शोकश्रमापहम् ।
प्राणलभ्यपतिभापुष्टिवीर्य्यतुष्टिस्मरप्रदम् ॥"
इति राजवल्लभः ॥
अन्यत् मद्यशब्दे द्रष्टव्यम् ॥
(वसुदेवपत्नी । यथा, श्रीमद्भागवते । ६ । २४ । ४५ ।
"पौरवी रोहिणी भद्रा मदिरा रोचना इला ।
देवकीप्रमुखास्त्वासन् पत्न्य आनकदुन्दुभेः ॥")
मदिराक्षी, स्त्री, (मदिरे इव अक्षिणी यस्याः इति अक्षि + "अक्ष्णोऽदर्शनात् ।" ५।४।७६ । इति अच् । स्त्रियां ङीप् ।) मत्तलोचना । यथा,—
"अविहितसुखदुःखं निर्गुणं वस्तु किञ्चि-
ज्जडमतिरिह कश्चिन्नोत्तमं हन्ताचष्टे ।

मदु

मम तु मतमनङ्गक्लेशतारल्यपूर्वं-
मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥"
इत्यु भटः ॥
(पुं, विराटराजस्य भ्राता । यथा, महाभारते । ४ । ३० । ११—१२ ।
सदश्वायमगर्भन्तु कवचं तप्तकाञ्चनम् ।
विराटस्य प्रियो भ्राता शतानीकोऽभ्यहारयत् ॥
सर्व्वपारशवं वर्म्म कल्याणपटलं दृढम् ।
शतानीकादवरजो मदिराक्षोऽभ्यहारयत् ॥)
मदिराग्रहं, क्ली, (मदिराया ग्रहम् ।) मद्यस्य गृहम् । मद्यस्थानगृहम् । तत्पर्य्यायः । शुल्वा२ इत्यमरः । २ । ७ । ८ ॥ शुल्वा ३ । यथा,—
"भाण्डागारे विदुर्गुल्वं खनौ खल्वा सुराग्रहे ।
मद्यभाण्डे स्रुता गुल्वा गुल्वा स्यात् काक-
कुक्षिका ॥"
इति भरतधृतहलायुधः ॥
मदिरासखः, पुं, (मदिरायाः सखा भक्तत्वात् इति। मदिरा + सखि + "राजाहःसखिभ्यष्टच् ।" ५। ४। ९१ । इति टच् ।) आम्रवृक्षः । इति जटाधरः ॥
मदिष्ठा, स्त्री, (मदोऽस्या अस्तीति । मद् + इनिः । इयसनिष्ठयेन मदिनीति । इष्टन् । इनोलोपः ।) मदिरा । इति हेमचन्द्रः । ३ । ५६६ ॥
मदी, स्त्री, (स्तूनाति चूर्णीकरोति लवणेक्षु-लोष्टादिकमिति । स्तृ-इन् । ऋदिकारादिति पक्षे ङीष् । पृषोदरादित्वात् साधुः ।) चषक-वस्तु । इति मालार्थ हेमचन्द्रः । क्षयकवस्तु । इति वैद्यवर्गे जटाधरः ॥
मदीय, त्रि, मम इदम् । आमार इति भाषा ॥ अस्मच्छब्दादीयप्रत्यये एकवचनार्थे मदादेशेन सिध्यत्यमिदम् । इति सुग्धबोधव्याकरणम् ॥ (यथा, कथासरित्सागरे । २८ । ६० ।
"हे देववास्तपोयोग मदीयेनेव भूपति: ॥")
मदोत्कटः, पुं, (मदेन दानवारिणा उत्कटः ।) मत्तहस्ती । इत्यमरः । २ । ८ । ६४ ॥ (यथा, महाभारते । ३ । ६५ । ८ ।
"ते तान् व्याघ्रगजान् दृष्ट्वा सर्व्वे वनगजास्तदा ।
समाद्रवन्त वेगेन जिघांसन्तो मदोत्कटाः ॥")
मदोत्कटा, स्त्री, (मदेन मत्ततया उत्कटः उद्भटो यत्नः अस्याः । स्त्रियां टाप् ।) मदिरा । इति राजनिर्घण्टः ॥ (मदेन गर्व्वादिना उत्कटः । मदोन्मत्ते, त्रि ।)
मदोद्धतः, त्रि, (मदेन मत्ततया उद्धतः ।) मत्तः । इति जटाधरः ॥ (यथा, वेणीसंहारे १ अङ्के ।
"मदोद्धताः मधुरगिरः प्रसाधिताशा मदोद्वहा-
रम्भाः ॥")
मदोद्या, स्त्री, (मदेन उद्या ।) नारी । इति शब्दमाला ॥ (मदोद्वहते, त्रि । यथा रघौ । ४।२२।
"मदोद्याः करिणस्तस्य सरितां कूलसुद्वहाः ।")
मद्गु, पुं, (मज्जतीति । मस्ज + "मन्यङ्गीत-तरिलरितनमिनिमिमस्जिभ्य उः ।" उणा० । १ । ७ । इति उः ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३४ ॥ पानकौड़ि इति भाषा ॥ अस्य मांसगुणाः । वायुनाशित्वम् । स्निग्धत्वम् । मेदकत्वम् । शुक्रकारित्वम् । रक्तपित्तनाशित्वम् । शीतत्वञ्च । इति राजवल्लभः ॥ (पर्य्यायभेदः । यथा, सुश्रुते द्रव्यस्थाने ४६ अध्याये ॥
"मद्गुरधिकदृष्टिघ्राणिका वक्रमुखपूतिवासवातर-प्रभृतयः पर्य्यायाः ।")
मद्गुरः, पुं, (माद्यति जलं प्राप्य हृष्यतीति। मद् + "मद्गुरादयश्च ।" उणा० । १ । ४२ । इति उरच् निपातितश्च ।) मत्स्यविशेषः । इत्यमरः । २ । १० । १६ ॥ मागुर इति भाषा । (यथा । ललितविस्तरे । ३१० । ७ ।
"अमलो गौतमः श्यामको वत भो
अमलो गौतमो मद्गुरच्छविः ।")
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । रूक्षत्वम् । शुक्रत्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ यथाच भावप्रकाशपूर्व्वखण्डे द्वितीयभागे ।
"मद्गुरो बालकृच्छ्रघ्नो हृद्यः कफकरो लघुः ॥"
वर्णश्चक्रजातित्रिशेषः । यथा, महाभारते । १३ । २५।८३ ।
"निगादं सुद्गुरं हत्वा दाशं नावोपजीविनम् ।"
"मद्गुन् मीनविशेषान् रान्ति आदत्ते इति रा + कः । तम् ।" इति तट्टीकायां नीलकण्ठः ।)
मद्गुरकः, पुं, (मद्गुरः + स्वार्थे कन् ।) मद्गुरमत्स्यः । इति शब्दरत्नावली ॥
मद्गुरखी, स्त्री, (मद्गौ पक्षिविशेषे रसो यस्याः ङीप् ।) मद्गौ मत्स्यः । इति शब्दरत्नावली ॥
मद्य, क्ली, (माद्यति जनोऽनेन । मद् + "गदमदयमस्यानुपसर्गे ।" ३ । १ । १०० । इति करणे यत् ।) सुरा । इत्यमरः । २ । १० । ४० ॥ (यथा, साहित्यदर्पणे ।
"भिक्षो ! मांसनिषेधणं प्रकुरुषे किं तेन मद्यं विना
मद्यस्यापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं दूतेन चौर्य्येण वा,
एतावानपि संग्रहोऽस्ति भवतो नरस्य काष्ठा गतिः ॥")
अस्य गुणपर्य्यायौ मदिराशब्दे द्रष्टव्यौ ॥ * ॥
तत् द्वादशविधं यथा पुलस्त्यः ।
"पानसं द्राक्षमाधूकं खार्জ্জूरं तालमैक्षवम् ।
माध्वीकं टाङ्कमाध्वीकं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव तु ।
द्वादशन्तु सुरा मद्यं सर्व्वेषामधमं स्मृतम् ॥"
अनेन एकादशानां सुरात्वं निषेधयति मद्यशब्दो मदहेतुद्रव्यवचनः । अन्यादेव वचनात् तत्तु मद्यमात्रं सुराशब्दार्थः । यथा हारीतः ।
"गौड़ीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत् ।

सप्तलक्षं पराकश्च चान्द्रायणमनुक्रमात् ॥"
अयाज्या सुरासे क्रमेण प्रायश्चित्तत्रयं न स्यात्।
तथा भविष्ये।
"सुरा तु पैष्टी सुख्योक्ता न तस्याक्षित्तरे समे।"
पैष्टीति सक्तुविकारमाध्वीपलक्षणं इतरे
गौड़ीमाध्वी अन्नोत्थविकार एव सुराशब्दस्य
मुख्यत्वात् त्रिविधा सुरेति गौड़ीमाध्वीगौण-
सुरात्वज्ञापनार्थम्। तेन यत्तत्पाने पि महा-
पातकत्वमभिदधति यच्चैका तथा सच्चा इति
पैष्टीं पूर्व्वप्रसिद्धिं दर्शयति। यथा पैष्टी सुरा
तथा सच्चा गौड़ी माध्वी चेति पूर्व्ववचनोक्ता
तु पैष्टी दृष्टान्तत्वेनाह दर्शिता। न पातव्या
द्विजोत्तमैरिति ब्राह्मणैरित्यर्थः। त्रैवर्णिकपरत्वे
उत्तमपदानर्थक्यात् बहुवचनानर्थक्यपरी-
हारार्थमुत्तमपदानर्थक्यमयुक्तं अतो
ब्राह्मणस्य त्रिविधैव सुरा महापातकहेतुः।
क्षत्रियवैश्ययोस्तु सुरा वै मलमन्नानामिति
वचनेन पैष्टीव इति स्थितम्। अतएव।
"एका माध्वी च गौड़ी च पैष्टी च त्रिविधा
सुरा।
द्विजातिभिर्न पातव्या कदाचिदपि कर्हिचित्॥"
इति यमवचने द्विजातिपदं ब्राह्मणपरमेव।
अत एव द्विविधसुरापाने न क्षत्रियादीनां
महापातकम्॥*॥ तावदस्तु। दोषाभावमेवाह
शङ्खयाज्ञवल्क्यः।
"कामादपि हि राजन्यो वैश्यो वापि कथञ्चन।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते॥"
तदेवं पैष्टीनिषेधस्त्रैवर्णिकानां गौड़ीमाध्वीनि-
षेधस्तु ब्राह्मणानामेव॥*॥ तच्छक्तेः स्त्रीणा-
मपि सुरापाननिषेधः। यथा भविष्ये।
"तस्मान्न पेयं विप्रेण सुरा मद्यं कथञ्चन।
ब्राह्मण्यापि न पेया वै सुरा पापभयावहा॥"
"या ब्राह्मणी सुरापी स्यात्
न तां देवाः पतिलोकं नयन्ति॥"
इति श्रुतेः॥
"यत्तल्लक्षगुरोरेव भार्य्या यस्य सुरां पिबेत्।
पतिस्तल्लक्षगुरोस्तस्य निष्कृतिर्नोपपद्यते॥"
न चैवं क्षत्रियवैश्यस्त्रीणामनिषेधः। ब्राह्मणी-
पदस्य निषिद्धसुरापानकर्तृभार्य्योपलक्षणत्वाद्-
भार्य्या यस्य सुरां पिबेदिति सामान्यवचनाच्च।
पानञ्च द्रवीभूतस्याभ्यवहारः। न च कण्ठेऽङ्गा-
दर्धोनयनं न तु वक्त्रमात्रप्रवेशः। निर्व्वचनार्थं
कपोलधारणं पानशब्दप्रसङ्गात्। यच्चोक्तम्।
"जिघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते।
यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्॥
अत्र गण्डूषप्रमाणं अविवक्षितम्। गण्डूषा
हुपानेऽपि लोके पानशब्दप्रयोगात्। अतएव
मुखप्रवेशनं अत्राविवक्षितं किन्तु मुखप्रवेशे
कण्ठादधोनयनं भवति अतस्तल्लक्षोपपत्तयति।
अतएव ओष्ठमात्रलेपे न पानभाक्त्वम्। अत-
स्तत्रोत्तमाङ्गस्पर्शप्रायश्चित्तम्॥*॥
अथ सुरापानप्रायश्चित्तम्। तत्र मनुः।
"सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्।
तया स काये निर्दग्धे मुच्यते किल्बिषात्ततः॥
गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा।
पयो घृतं वामरणात् गोशकृद्रसमेव वा॥"
अग्निवर्णां अग्निसमस्पर्शाम्। पयो घृतं गोरेव
आदावन्ते च गोः कीर्त्तनात्। मोहशब्दोऽत्र
बुद्धिपरः। देवलः। सुरापाने ब्राह्मणो रूप्य-
नाल्लसीसकांस्यमन्यतममग्निवर्णं पीत्वा शरीर-
त्यागात् मुच्यते। रूप्यादयोऽत्र द्रवीभूताः
पीत्वेति निर्देशात्। स्वयमशक्तावन्यैरपि मुखे
सेचनीया। यथा गौतमः। सुरापस्य ब्राह्मणस्य
उष्णामासिच्येयुः सुरामांसे त्वनः शृतेन।
अनएव न सेचकानां वधो विहितत्वात् स्वयं
पान एव। एतच्च मरणप्रायश्चित्तं कामकृते।
यथा, हरीतः।
"सुरापाने कामकृते स्वयन्तां वा विनिःक्षिपेत्।
मुखे स हि विनिर्दग्धो मृत्युमाप्नुयात्॥"
कथञ्चिदिति सक्तुरित्यर्थः। अङ्गिराः।
सुरापानं सकृत् कृत्वा योऽग्निवर्णां सुरां पिबेत्।
स पावयेदात्मानमिह लोके परत्र च॥"
भविष्ये।
"मतिपूर्व्वं सुरापाने प्राणान्तिकमुदाहृतम्।
पैष्टीपाने तु कृमिभिर्नरकान्तं कथञ्चन॥
सकृदपि महाघोरा प्रायश्चित्तमुदाहृतम्।
सुरायाः कामतः पाने मृत्वायाः प्राणसंशयम्॥"
पुनःपुनःपैष्टीविषयलाभिधानम्। त्रिविधा सुरा
मुख्या इति भ्रमनिरासार्थम्। कथञ्चन सक्तु
रित्यर्थः।*। इतरासां असुरायां गौड़ी
माध्वीपक्षपातीनां ज्ञानतः सक्तुपाने मरणान्तिकं
न भवति गौड़ीमाध्वीन्तु ज्ञानतोऽभक्षणे
गौड़ीमाध्वीव्यतिरिक्तायाश्चसुरायाः अज्ञानतः-
भक्षणे मरणमुक्तं भविष्ये।
"गौड़ीमाध्वीक्तयोर्भाण्डे प्राणान्तिकमुदा-
हृतम्।
अन्यासे त्वसुरायास्तु नामेयाग्निनिभां पिबेत्॥"
तद्वीति ज्ञानत इत्यर्थः। अतएव।
"अज्ञानतः सकृत् पीत्वा वारुणीं यदि वा द्विजः।
मरणं तस्य निर्द्दिष्टं प्रायश्चित्तं विधीयते॥"
इति यमवचनमपि यत्तद्विषयमेव अन्याभ्यासे
मरणविधानात् द्विर्भोयवार एव मरणं कार्य्यम्।
गौड़ीमाध्वीः कामतः सकृत्पाने भविष्ये।
"असुरामद्यपाने तु कृते विप्रस्य कामतः।
चान्द्रायणं समभ्यस्येत् शुद्धिकामः समाहितः॥
यद्वास्मिन्नेव विषये मानवीयं प्रकल्पयेत्।
कृच्छ्रातिकृच्छ्रौ वा भक्त्या वा सक्तुसक्तिषु॥
सुरापानापनुत्यर्थं बालवासा जटी ध्वजी।"
पिप्पलाकं खलिम्॥*॥ उक्तसुरापानं प्राय-
श्चित्तेन पात्रेण दर्शयति यमः।
"प्राशेत् भाजने तप्तां ब्राह्मणीं वारुणीं पिबेत्।"
गोवालचीरवासा सक्तुकर्षं आह उशनाः।
गोवालचीरवासाः सुरापः सुरामग्निवर्णां
पीत्वा मृतो भवति॥*॥ अज्ञानतः सक्तु-
पेष्टीपाने ब्राह्मणस्य द्वादशवार्षिकम्। यथा
ब्रह्महत्याव्रतानुष्ठानो यमः।
"चरेत्तामेतदेवौभौ सुरापगुरुतल्पगौ।
सगोत्राद्दूषकश्चैव सुवर्णस्तेययाजकः॥"*॥
भविष्ये।
"अकामतः सुरां पीत्वा पैष्टीं मलकुलन्नरः।
कृच्छ्रातिकृच्छ्रौ कृत्वा वै पुनःसंस्कारतः शुचिः॥
कणान् वा भक्षयेदन्नं पिण्याकं वा बलान्वितः।
सुरापानापनुत्यर्थं बालवासा जटी ध्वजी॥"
सुरापानमाज्ञापनेयरोगस्य रोगिणोऽज्ञानतः
पानविषयमिदं इत्युक्तं भविष्ये। यथा,—
"तथाग्निरिव विषये वाग्निं परिकीर्त्तितम्।
यदि रोगेभवेद्रोगो नेतरस्य कदाचन॥
कृच्छ्राय सुरश्रेष्ठ! तप्तकृच्छ्रं ददातुनः।"
कृच्छ्रातिकृच्छ्रावित्यत्र कृच्छ्रपदं न प्राजापत्य-
परं किन्तु तप्तकृच्छ्रपरम्।*। अज्ञानतो
गौड़ीमाध्वीः सक्तुपाने उक्तं भविष्यपुराणे।
"स्कन्न पीत्वा तथा गौड़ीमज्ञानात् सुरसत्तमः।
कृच्छ्रातिकृच्छ्रौ विहितौ शुद्धप्राजापत्यमेव च॥"
यत्तानाभ्यासे तत्रैवोक्तम्।
'गौड़ीमज्ञानतः पीत्वा ब्राह्मणो ब्राह्मणप्रियः।
तप्तकृच्छ्रन्तु वै कृत्वा पुनःसंस्कारतः शुचिः॥
माध्वीं पीत्वा महाराज! अज्ञानाद् द्विज-
सत्तमः।
शुद्ध्यर्थं तप्तकृच्छ्रेण विधिमेभ्यासतश्चरेत्॥
रेतोमूत्रपुरीषाणां गौड़ीमाध्वीच प्राशने।
कृच्छ्रादपशुविष्ठानां संस्काराच्छुद्धिरिष्यते॥"
प्राणान्तिके च पादहानेरसम्भवात् क्षत्रिय-
वैश्ययोरपि यथोक्तं मरणान्तिकं प्रायश्चित्तमेव।
द्वादशवार्षिकादौ पादपादहानिरभ्यभक्षणे
क्षत्रियादीनां श्रवणदर्शनात्।
"विप्रे तु सकलं देयं पादोनं क्षत्रिये मतम्।
वैश्येऽर्द्धं पादशस्तु शूद्रजातिषु दृश्यते॥"
पानमात्रभक्षणे तु कामतोज्ञानतोऽभक्षण-
भक्षणे प्राणान्तिकं युक्तं ब्राह्मणस्य कामतया
सक्तुभक्षणे तु पराशरः।
"अगस्त्यागमने चैव मद्यगोमांसभक्षणे।
शुद्धौ चान्द्रायणं कुर्य्यात् नदीं गत्वा सहस्रगाम्॥
चान्द्रायणं ततश्चीर्णं कुर्य्याद्ब्राह्मणभोजनम्।
अनड्वत्सहितां गान्च दद्याद्विप्राय दक्षिणाम्॥"
अकामतः सक्तुपाने विशुद्धिः।
"पीत्वा प्रमादतो मद्यमविज्ञातं चरेद्द्विजः।
कारयेत् पुनःसंस्कारं भक्त्या विप्रांश्च भोजयेत्॥"
कामतोऽकामतश्चाभ्यासे व्रतादिमाह यमः।
"गोव्रवद्विदुषः कल्पश्चान्द्रायणमथापि वा।
अभ्यासे तु त्रयोभूयस्तः शुद्धिमवाप्नुयात्॥"
अपर्य्युषितपानसाद्वैकाहद्विजभक्षणे त्रिरा-
वरम्। पानञ्च ब्राह्मणाधिकमित्याह्यभिधाय
पुलस्त्यः।
"द्राक्षेक्षुटङ्कखर्ज्जूरपनसादेश्च यो रसः।
सद्योऽनासन्तु तं पीत्वा ब्राह्मणः शुद्धिमाप्नुयात्॥"

प्रयोक्तादीनां पादपादज्ञानिर्देशेन। बाल-हत्यक्षीणामर्द्धादिकं प्रायश्चित्तम्। इति प्रायश्चित्तविवेकः॥ * ॥ अथ पुराणे ब्राह्मणस्य मद्यपानादिनिषेधो यथा,—

"अज्ञेयचाप्यपेयञ्च तथैवाभक्ष्यमेव च।
द्विजातीनामनाजोष्यं नित्यं मद्यमिति स्थितम्॥
तस्मात् सर्व्वं प्रयत्नेन मद्यं नित्यं विवर्ज्जयेत्।
पीत्वा पतति कर्म्मभ्यस्तस्माद्यो द्विजोत्तमः॥
भक्षयित्वाप्यभक्ष्याणि पीत्वापेयान्यपि द्विजः।
नाधिकारी भवेत्तावद्यावत्तन्न जहात्यधः॥
तस्मात् परिहरेन्नित्यमभक्ष्याणि प्रयत्नतः।
अपेयानि च विप्रो वै पीत्वा तदयाति रौरवम्॥"

इति श्रीकूर्म्मपुराणे उपविभागे १६ अध्यायः॥

मद्यपस्य विष्णोरुपसर्पणे दोषादि यथा,—

वराह उवाच।

"मद्यं पीत्वा वरारोहे! यस्तु मामुपसर्पति।
तस्य दोषं प्रवक्ष्यामि शृणु सुन्दरि! तत्त्वतः॥
दत्त्वा वर्षसहस्राणि दरिद्रो जायते पुनः।
ततो भवेत् स पूतात्मा मद्भक्तश्च न संशयः॥
यस्तु भागवतो भूत्वा कामरागेण मोहितः।
दीक्षितो पिबते मद्यं प्रायश्चित्तं न विद्यते॥
अन्यच्च ते प्रवक्ष्यामि भक्ष्यभक्ष्य वसुन्धरे!।
अग्निवर्णां सुरां पीत्वा तेन मूत्रेण किल्बिषात्॥
एवमेवापराधानि येन मूत्रन्ति किल्बिषात्।
य एतेन विधानेन प्रायश्चित्तं समाचरेत्।
न स लिप्यति पापेन संसारञ्च न गच्छति॥

इति वराहपुराणे मद्यपानापराधप्रायश्चित्तम्॥

अपि च।

"अगम्यागमनं कृत्वा मद्यगोमांसभक्षणम्।
शुद्ध्येच्चान्द्रायणादिभिः प्राजापत्येन भूमिपः।
वैश्यः सान्तपनाच्छूद्रः पञ्चाहोभिर्विशुद्ध्यति॥"

इति गारुडे २२ अध्यायः॥

एतद्गौड़ीमाध्व्योः कामतः सन्तानपानविषयमिति प्रायश्चित्तविवेकदर्शनात्॥*॥ द्विजस्य पूजादौ मद्यदानविध्यनुकल्पनिषेधा यथा,—

"मदिरां पृच्छतो दद्यात् अन्यत् पानन्तु वामनः।
अभक्ष्यं विहितं यत्र मद्यं तत्र द्विजः पुनः॥
नारिकेलजलं कांस्ये ताम्रे च विल्वजेऽपि मधु।
नापक्वमपि द्विजो मद्यं कदाचित् विल्वजेऽपि॥
ऋते पुष्पासवादुक्ताद्यज्ञनाड्या विशेषतः।
राजपुत्रस्तथा मद्यं सचिवः सौत्रिकादयः॥
दद्युर्नरवरं भूपसम्मत्या विभवाय च।
भूपाज्ञातुमते मद्यं ददन् पापमवाप्नुयात्॥"

इति कालिकापुराणे ६६ अध्यायः॥

अथ ब्राह्मणस्य मद्यपानविधेकल्पकल्पापो यथा,

वैद्यनाथेन उवाच।

"सुरापानादृषेर्नाम प्राप्य विद्वान्
संज्ञानाम्नं प्राप्य चैवातिघोरम्।
हत्वा कञ्चापि तथाभिरूपं
पीतं तथा सुरया मोहितेन॥
समभ्युत्थाय महानुभाव-
स्तदोद्यता विप्रहितं चिकीर्षुः।

काव्यः स्वयं वाक्यमिदं जगाद
सुरापानं प्रति वै जातशङ्कः॥
यो ब्राह्मणोऽद्यप्रभृतीह कश्चित्
मोहात् सुरां पास्यति मन्दबुद्धिः।
अपेतधर्म्मो ब्रह्महा चैव स स्या-
दस्मिंल्लोके गर्हितः स्यात् परे च॥
मया चेमां विप्रधर्म्मोक्तसीमां
मर्य्यादां वै स्थापितां सर्व्वलोके।
सन्तो विप्राः शुश्रुवांसो गुरूणां
देवा लोकाश्चोपशृण्वन्तु सर्व्वे॥"

इति मद्याभारते आदिपर्व्वणि ७६ अध्यायः॥

अथ तन्त्रे मद्यपाननिषेधो यथा,—

"नारिकेलञ्च खार्জ্জूरं पानसञ्च तथैव च।
ऐक्षवं मधुकं टाङ्कं तालञ्चैव च माक्षिकम्॥
द्राक्षन्तु दशमं ज्ञेयं गौड़ं चैकादशं स्मृतम्।
पैष्टन्तु द्वादशं प्रोक्तं सर्व्वेषामधमं स्मृतम्॥
मध्यमं मधुजं गौड़ं शैवोत्तममिष्यते।
एतत् द्वादशकं मद्यं न पानञ्च द्विजैः क्वचित्।
क्षत्रियादिः पिबेत् सर्व्वं पैष्टीमेकान्तु वर्জ্জयेत्॥
सुरां पीत्वा द्विजो मोहात् कामात् तक्रादि-
मिश्रिताम्।
त्रैवार्षिकं व्रतं कुर्य्यादीषज्जिग्धे तु वार्षिकम्॥
तक्रादिमिश्रितां किञ्चित् सुरां पीत्वा त्वकामतः।
कृच्छ्राब्दपादमृच्छ्यं पुनः संस्कारमर्हति॥
सुखप्रवेशमात्रन्तु प्रायश्चित्तार्द्धमाचरेत्।
अनुपनीतो देवेशि! व्रतं त्रैवार्षिकं चरेत्॥
चतुर्थकालाहारी स्याद्ब्रह्मचर्य्यमथापि वा।
आ पञ्च वर्षं वृद्धं वा ज्ञानादर्द्धं विनिर्दिशेत्॥
शूद्रस्य च विशेषेण अतिकृच्छ्रद्वयं चरेत्।
व्यज्ञानिसाधिते तस्मिन् तदर्द्धं व्रतमाचरेत्॥
पैष्टीपाने ब्राह्मणस्य मरणान्तिकमुच्यते।
माध्वीगौड़ीसुरापाने द्वादशाब्दं विधीयते॥
इतरेषान्तु पानेन शुद्धिश्चान्द्रायणेन तु।
राजन्यवैश्ययोश्चापि गौड़ी माध्वी न शस्यते।
मोहात् क्षत्रञ्च वैश्यञ्च पीत्वा कृच्छ्रद्वयं चरेत्।
शूद्रोऽपि गौड़ीं पैष्टीञ्च न पिबेद्धीनसंस्कृताम्।
कामात् पीत्वा सुरां विप्रो मरणान्तिकमाचरेत्॥
चरेच्चान्द्रायणं ज्ञानात् क्षत्रियो वैश्य एव च।
पैष्टीपाने तु शूद्रस्य प्राजापत्यं विनिर्दिशेत्॥
ज्ञानादभ्यासयोगे तु चान्द्रायणशतं स्मृतम्।
नारिकेलं तथा ज्ञानाद्विप्रश्चान्द्रायणेन तु।
क्षत्रियश्चैव वैश्यश्च प्राजापत्येन शुध्यति॥
अपक्वं पनसञ्चैव आम्रञ्च बदरं तथा।
क्षीरविल्वा घटे नित्यं दद्यादामघयःपलम्॥
त्रैलोक्यविजयाञ्चैव मातुलुङ्गं तथैव च।
समेऽहनि ततो दद्यात् सन्धानात् सत्वमीरितम्॥
दधि मधु घृतञ्चापि माक्षिकं तिलकं तथा।
अनुपाने तु देवेशि! ब्राह्ममद्यं सुनिश्चितम्॥
विकृतं घ्राणतो मूत्रं————।
मधुना सह संस्थाप्य शैवपाकं समाचरेत्॥
पिप्पलीजवकं दत्त्वा मधुना मद्यमीरितम्।
पानसं पञ्चखार्জ্জूरं आर्द्रं सोमलतारसम्।

एकीकृत्याभिसन्धानात् खार्জ্জूरं मद्यमीरितम्॥
पक्वताजं दन्तिदाक्षं कङ्कुभञ्च तथैव च।
एतैरेव सुसन्धानात् ताजमद्यं प्रकीर्त्तितम्॥
इक्षुदण्डं मरीचञ्च बदरञ्च तथा दधि।
शैवे तु जवकं दत्त्वा इक्षु मद्यं प्रकीर्त्तितम्॥
नवं मधु तथा विल्वं पक्वं शर्करया सह।
सन्धानाज्जायते मद्यं माध्वीकं शुरतो रसम्॥
घृतावरी टङ्कमूलं लक्ष्मकं पद्ममेव च।
मधुना सह सन्धानात् टङ्कमाध्वीकमीरितम्॥
मातुरमूलं बदरी शर्करा च तथैव च।
एषामेकत्र सन्धानात् मैरेयं मद्यमीरितम्॥
इक्षुजिह्वा पक्वधात्री नारिकेलजलन्तथा।
कदलीफलसन्धानाद्भद्यं तन्नारिकेलजम्॥
दधि त्रैलोक्यविजया तथैव च करीकया।
गुड़ेन सह सन्धानात् गौड़ीमद्यं प्रकीर्त्तितम्॥
शुष्कमूलामर्द्धसिद्धान्नपुष्पोदकसमन्वितम्।
वस्त्रौ सन्तापयेत् किञ्चित् स्थापयित्वा दिनद्वयम्॥
शैवेऽहनि तु संप्राप्ते जीवनं तत्र निःक्षिपेत्।
शृङ्गवेरं मरीचञ्च मातुलुङ्गं तथैव च।
एतेषामेव सन्धानात् पैष्टीमद्यं प्रकीर्त्तितम्॥"

इति श्रीमत्सुखतन्त्रे महातन्त्रे चतुर्विंशति-साहस्रे ६६ पटलः॥ * ॥ अपि च।

"सिद्धमन्त्रो भवेद्वीरो न वीरो मद्यपानतः।
कलौ तु भारते वर्षे लोका भारतवासिनः॥
दृष्टे दृष्टे सुरां पीत्वा वर्णभ्रष्टा भवन्ति हि॥"

इति उत्पत्तितन्त्रे ६४ पटलः॥ * ॥

"दिव्यवीरमयो भावः कलौ नास्ति कदाचन।
केवलं पशुभावेन मन्त्रसिद्धिर्भवेन्नृणाम्॥"

इति महानिर्व्वाणतन्त्रम्॥ * ॥

यौक्तिके।

"न दद्याद् ब्राह्मणो मद्यं महादेवे कथञ्चन।
वामकामो ब्राह्मणो हि मद्यं मांसं न भक्षयेत्॥
भैरवतन्त्रे।
"नारिकेलोदकं कांस्ये ताम्रे गव्यं तथा मधु।
राजन्यवैश्ययोर्देयं न द्विजस्य कदाचन॥
एवं प्रदानमात्रेण हीनायुर्व्याधितो भवेत्।

इति आगमतत्त्वविलासः॥ * ॥

स्मृतौ कलौ मद्यपानादिनिषेधो यथा, याज्ञवल्क्यादीपकलिकायां ब्रह्मपुराणम्।

"नराश्वमेधौ मद्यञ्च कलौ वर्জ্জ्यौ द्विजातिभिः॥"

निषेधविषयं स्मारयति उशनाः। "मद्यमदेयमपेयमनिर्य्यात्यम्।" अनिर्य्यात्यमस्वीकार्य्यमिति कल्पतरुः॥ कालिकापुराणेऽपि।

"खगाजरुधिरं दत्त्वा आत्मरक्षामवाप्नुयात्।
मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते॥"

स्मृतिः।

"ताम्रे वैदूरसो मद्यं पयसा यवचूर्णकम्।
गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥
अतो मद्यप्रतिनिधिदानमपि न युक्तम्। इति तिथ्यादितत्त्वम्॥ * ॥ मद्यतुल्यं यथा,—

"नारिकेलोदकं कांस्ये ताम्रपात्रे स्थितं मधु।

गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना ॥"

इति कर्म्मलोचनः ॥ * ॥

अथ मद्यपानां तुष्ट्यर्थं कौलानां मद्यपानविधिर्लिख्यते।

"कुलाचाररतो वीरः कुलसङ्गी सदा भवेत्।
सम्मिश्रासेवनं कुर्य्यात् सोमपानं महेश्वरि!॥
सर्व्वथा कुरुते देवि! वीरश्चोच्छिष्टमानवः।
दिव्यन्तु देवताप्रायश्चन्दनागुरुलेपनैः॥
रक्तचन्दनगन्धेन सुरिभ्यो वाच संग्रवः।
भस्माङ्गधूसरो वीर उच्छिष्टवह्निवेष्टितः॥
सुरापानरतो नित्यं बलिपूजापरायणः।
वरश्चागश्च महिषो मेषः शूकर एव च॥
गृध्रकः गृध्रको गोधा खड्गी कूर्म्मो दशू
स्तथाः।
वानरश्च खरश्चैव गवाश्वादिविहङ्गमाः॥
इत्यादैस्तु बलैर्दानैः पूजयेत् स्वेष्टदेवताम्।
नित्यं नैमित्तिकं काम्यं प्रकुर्य्याच्च दिने दिने॥
कुलवारे कुलर्क्षे च तिथौ च कुलके तथा।
भैरवाः कल्पितं चक्रं संस्थाप्य पूर्ब्ववत् प्रिये!।
सुराणां शोधनं कुर्य्यादृथायावत् परमेश्वरि!॥
प्रकृते भैरवीचक्रे सर्व्वे वर्णा द्विजोत्तमाः।
विकृते भैरवीचक्रे सर्व्वे वर्णाः पृथक् पृथक्॥
विजयाद्याकुलकल्यञ्च द्विजो दद्यादृयुगे युगे।"

इति उत्पत्तितन्त्रे ६३ पटलः॥

"द्रव्याभावे चाकुलस्यो पूजयेत् परदेवताम्।
सुराभावे च गोक्षीरं द्विजो दद्यादृयुगे युगे॥"

इति निरुत्तरतन्त्रे ५ पटलः॥*॥

"असंस्कृतां सुरां पीत्वा ब्राह्मणो ब्रह्महा भवेत्।
संस्कृतान्तु सुरां पीत्वा ब्राह्मणो ब्रह्मवत् भवेत्॥
सौत्रामण्यां कुलाचारे ब्राह्मणः प्रपिबेत् सुराम्।
अन्यत्र कामतः पीत्वा ब्राह्मण्यादेव हीयते॥"

इति उत्पत्तितन्त्रम्॥*॥

"ब्राह्मणस्य महामोक्षं मद्यपाने प्रियंवदे!।
ब्राह्मणः परमेशानि! यदि प्राणादिकं चरेत्।
तत्तज्ज्ञानं शिवरूपोऽसौ सत्यं सत्यं हि नेतरे!॥
लोये लोयं यथा लीनं तैजसं तैजसे यथा।
घटे भग्ने यथाकाशं वायौ वायुर्यथा प्रिये!॥
तथैव मद्यपानेन ब्राह्मणो ब्रह्मणि प्रिये।
लीयते नात्र सन्देहः परमात्मनि नेतरे!॥
सायुज्यादिमहामोक्षं निर्युक्तं क्षत्रियादिषु।
मद्यपानं विना देवि! तत्त्वज्ञानं न लभ्यते॥
अतएव हि विप्रस्तु मद्यपानं समाचरेत्॥
वेदमातानपेनैव ब्राह्मणो नहि नेतरे!॥
ब्रह्मज्ञानं यदा देवि! तदा ब्राह्मण उच्यते॥
देवानामन्नं ब्रह्म तदेव लौकिकी सुरा।
सुरत्वं भोगमात्रेण सुरा तेन प्रकीर्त्तिता॥
मन्त्रमयं सदा पात्रं ब्रह्मणापादिमोचनम्।
प्रकुर्य्यात्तु हि येनैव तदा ब्रह्ममयी सुरा॥
घृतिरारोपमात्रेण वह्निर्दीप्तो यथा भवेत्।
पापमोचनमात्रेण सुरा मुक्तिप्रदायिनी।
अतएव हि देवेशि! ब्राह्मणः पानमाचरेत्॥
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः।
बहु किं कथ्यते देवि! स एव शिवसंज्ञकः॥
मुक्तिमार्गमिदं देवि! मोक्षयं पशुवर्ज्जिते।
प्रकाशात् सिद्धिहानिः स्यात् सिद्धयेयो न चान्यथा॥"

इति मालतीमाधवतन्त्रे ६ पटलः॥*॥

"कुलस्त्रीसेवनं कुर्य्यात् सर्व्वथा परमेश्वरि!।
रमते युवतीं रम्यां कामोन्मत्तविलासिनीम्॥
नटीं कापालिकां वेश्यां रजिपानां वराङ्गनाम्।
शूद्राणीं क्षेत्ररमणीं नवनीं परमेश्वरि!॥
मालत्योर्विविचारोऽस्ति मालतीं विना प्रिये!।
कुलाचारपरो वीरः कुलपूजापरायणः॥
भगलिङ्गसमायोगादालस्य जपमाचरेत्।
सिद्धिस्तु भवेत्तस्य कोटिसूर्य्यग्रहेण किम्॥
चले चित्ते भवेद्याधिर्निश्चले निश्चलं यथा।
द्रव्याणां साधनं देवि! सत्तासाधनमुत्तमम्॥
सिद्धायाः साधनं देवि! सिद्धिरस्ति कलौ युगे॥

इत्युत्पत्तितन्त्रम्॥

कालिकातारिणीदीक्षां गृहीत्वा मद्यसेवनम्।
न करोति नरो यस्तु स कलौ पतितो भवेत्॥
वैदिके तान्त्रिके चैव जपहोमयहिष्कृतः।
अब्राह्मणः स एवोक्तः स एव हरिनिन्दकः॥
गुरौमूचसमं तस्य तर्पणं यत् पितृष्वपि।
कालीतारामनुं प्राप्य वीराचारं करोति न॥
मूढत्वं तच्छरीरेण प्राप्नुयात् स न चान्यथा॥

इति कामाख्यातन्त्रे ५ पटलः॥

मद्यशोधनप्रकारो यथा। शिव उवाच।
शृणु पार्व्वति! वक्ष्यामि तेषां वै शोधनक्रियाम्।
पद्मासनेन संविश्य करपुटं समाचरेत्॥
वामे गुरुन्नमस्कृत्य दक्षिणे गणपतिं स्मरेत्।
मध्ये देवीं नमस्कृत्य प्राणायामत्रयञ्चरेत्॥
शरीरे मालतीं न्यस्य ऋष्यादिन्यासमाचरेत्।
स्वकल्पोक्तविधानेन षड़ङ्गन्यासमाचरेत्॥
पश्चाद्भूमौ त्रिकोणं वा षट्कोणं वा मनोहरे!।
विलिख्य मण्डलं शुद्धं तस्योपरि घटं न्यसेत्॥
बहुधा शोधनं कृत्वा षट्कारेण पुनः पुनः।
तत्तत्तस्मिन् कारणन्तु मूलेनैव च न्यापयेत्॥
मालतीकारणं देवेशि! विपरीतेन चैव हि।
पुनः षट्कारमन्त्रेण शोधनं कारयेत् सुधीः॥
ततो वियच्छक्तिबीजं चतुर्दशस्वरान्वितम्।
कादिक्षान्तं कृत्वा तस्योपरि घटं न्यसेत्॥
ततो मूलं जपेन्मन्त्रं मायाबीजं ततः परम्।
धेनुं योनिं मालिनीञ्च त्रिखण्डं मीनसंज्ञकम्।
दर्शयित्वा वरारोहे! घटं धृत्वा षडङ्गतुम्॥
ॐ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्।
कर्णौ धृत्वा ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
ॐ सूर्य्यमण्डलसम्भूते वरुणालयसम्भवे।
अमृतबीजमये देवि! शुक्रमापादिसूचताम्॥
ॐ वेदानां प्रणवो बीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन ते देवि! ब्रह्महत्यां व्यपोहतु॥
ततः षड़क्षरयुक्तञ्च वकारं बिन्दुसंयुतम्।
एवं वकारकञ्चापि वर्णाक्षरसमन्वितम्॥
जप्त्वा मन्त्रौ ततो ध्यायेत् क्षमस्व कुलसुन्दरि!।
आनन्दभैरवं ध्यायेदृथा तन्त्रानुसारतः॥
रक्तवर्णं चतुर्बाहुं त्रिनेत्रं वरदं शिवम्।
जटाजूटधरं देवं वासुकीकण्ठभूषितम्॥
डमरुञ्च कपालञ्च सुन्दरं पाशसुत्तमम्।
धारिणं नं यजेद्देवं आत्मधर्म्मोत्तरं शिवम्॥
एवं ध्यात्वा महेशानि! तस्य मध्ये प्रपूजयेत्।
मायाबीजं ततो हुंफट्मन्त्रेणासन संयजेत्॥
ततस्तस्मिन्नहेशानि! आनन्दभैरवीं स्मरेत्।
आनन्दभैरवीं देवीं वराभयलसत्करम्॥
घोररूपां वरारोहां त्रिनेत्रां रक्तवाससम्।
रक्तवर्णां महारौद्रीं सकलभैरवान्वितम्॥
ब्रह्मविष्णुमहेशाद्यैः स्तूयमानां शिवां भजे।
इति ध्यात्वा महेशानि! तैनैव मनुना यजेत्॥
तयोरैक्यं विभावेण गायत्रीं दशधा जपेत्।
भैरवं देहमध्यस्थं विद्धि तत्तन्मयम्॥
सुधादेवीं ततः पश्चात्तीर्थमावाहयेत् ततः।
तत्रो देवी ततः पश्चात्तस्मै च प्रणवेदयात्॥
इति ते कथिता देवी गायत्री परमाक्षरी।
तस्याः स्मरणमात्रेण द्रव्यशुद्धिश्च जायते॥
तस्य प्रसादादीशोऽहं सत्यं सत्यं न संशयः।
तस्य मध्ये मूलमन्त्रं विलिखदक्षिणेन सञ्जन्।
रक्तवर्णेन संपूज्य सुधां वर्णेन शोषयेत्॥*॥
धर्म्मार्थकाममोक्षाणां विषयाणाञ्च पार्व्वति!।
सर्व्वेषां कारणं यस्मात् कारणं परिकीर्त्तितम्॥
अस्माकञ्च महेशानि! शरीरकारणं हि तत्।
कदुत्तयोऽहं वीरेशि! वीरकार्य्यप्रसादतः॥
निर्व्विकारेण देवेशि! निर्व्विकल्पेन चेतसा।
सेव्यमानं कुलं भद्रे! भुक्तिमुक्तिप्रदायकम्॥
निर्व्विकल्पो महेशानि! मुक्तिभागी न संशयः।
सविकल्पो वरारोहे! रौरवं याति निश्चितम्॥"

इति कैवल्यतन्त्रे २ पटलः॥

(वैद्यकोक्तदोषादि यथा,—

"सौम्यौष्णरूक्षस्नेहाम्लं लवणाशुकरं लघु।
विकाशि विशदं मद्यमोजसोऽग्न्यादिपर्य्ययः॥
सौम्यादयो विषेऽप्युक्ताश्चोपग्राहिणो गुणाः।
जीविनाशाय जायन्ते विधे तूत्कर्षदूषिताः॥
सौम्यादिभिर्गुणैर्मद्यं मन्दादीनोजसो गुणान्।
दृग्भिर्दृग्संक्षयं हत्वा चेतो नयति विक्रियाम्॥
आशु मद्यं हितीये च प्रमादायतने स्थितः।
दुश्चिकित्स्यतमो मद्यः सुखलिप्सुरनुध्यते॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः।
निरङ्कुश इव व्यालो न किञ्चिन्नाचरेन्नरः॥
इयं भूमिरवद्यानां दोषाणामेतदास्पदम्।
एकोऽयं बहुमार्गाया दुर्गतेर्दैहिकः परम्॥
निषेढः प्रथमच्छेदे ह्यनीये तु मदे स्थिताः।
मरणादपि पापात्मा गतः पापतरां दशाम्॥
धर्म्माधर्म्मसुखं दुःखमर्थानर्थं हितानहितम्।
यदासक्तो न जानाति कथं तच्छोधयेदृनरः।
मद्ये मोहो भयं शोकः क्रोधो व्यायुच संक्षयः।

मद्यः

सोन्मादमदरुच्छ्वासाः वापस्कारापतानकाः ॥
यच्चैक: क्षुतिविभ्रंशश्च सर्वमसाधु यत् ।
अयुक्तियुक्तमसं हि आधये मरणाय वा ॥
मद्यं विवर्णधीवेर्यभक्ष्यादेरपि गर्हणम् ।
नाति मात्यन्ति वणिजः क्षताहारा मद्यगुणाः ॥
क्लिन्नाः सक्थशिरोयुक्ता मद्यनिन्दाक्षतक्षयाः ।
मेदःकफाधिकामन्दवातपित्ता दृढामयाः ॥
विपर्ययेऽतिमात्यन्ति विमध्याः कुपिताश्च ये ।
मद्येन चाक्षरूपेण वाजीर्णं बहु नाति च ॥"
इति वाभटे निदानस्थाने षष्ठेऽध्याये ॥)
एतानि सुश्रुतविरुद्धत्वान्नोद्धृतानीति मिश्रैः
कदाचिदपि नाचरणीयानि ॥

मद्यद्रुमः, पुं, (मद्योत्पादको द्रुमः ।) माङ्कवृक्षः । इति राजनिर्घण्टः ॥

मद्यपङ्कः, पुं, (मद्यानां पङ्क इव ।) सुराकल्कः । मेथा इति भाषा ॥ तत्पर्य्यायः । मेदकः २ अगलः ३ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यपाद्यूनं, क्ली, (मद्यपैरद्यते भुज्यते इति । अद्य + कर्म्मणि ल्युट् ।) मानसचक्रभक्ष्यम् । तत्पर्य्यायः । उपदंशः २ अवदंश ३ चक्षणम् ४ । इति हेमचन्द्रः । ३ । १७१ ॥

मद्यपुष्पा, स्त्री, (मद्यानि मदसाधनानि पुष्पाण्यस्याः ।) धातकी । इति राजनिर्घण्टः ॥
(गुणादिविवृतिरस्या धातकीशब्दे ज्ञातव्या ॥)

मद्यभक्तः, पुं, (मद्यस्य भक्तः ।) मद्यफेनः । तत्पर्य्यायः । कारोत्तमः २ । इति हेमचन्द्रः । ३ । ५६८ ॥ कारोत्तरः ३ सुरामण्डः ४ । इत्यमरः । २ । १० । ७६ ॥

मद्यवासिनी, स्त्री, (मद्यानामिव वासो गन्धोऽस्या अस्तीति । इनिः ङीप् ।) धातकीवृक्षः । इति रत्नमालाराजनिर्घण्टौ ॥

मद्यबीजं, क्ली, (मद्यस्य बीजम् ।) नानाद्रव्यसंस्कृतसुराबीजम् । तत्पर्य्यायः । किण्वम् २ नमक्तः ३ नमक्तुः ४ । इति हेमचन्द्रः । ३ । ५६८ । वाखर इति भाषा ॥

मद्यसन्धानं, क्ली, (मद्यस्य सन्धानमुत्पादनार्थं आयोजनम् ।) सुरासञ्जीकरणम् । वंशाङ्कुरबलादीन् बहुकालं सन्धाय यत् क्रियते तत् । तत्पर्य्यायः । आसुतिः २ आसवः ३ अभिषवः ४ । इति हेमचन्द्रः । ३ । ५६८ ॥

मद्यामोदः, पुं, (मद्यस्येवामोदो गन्धो यस्य ।) वकुलवृक्षः । इति राजनिर्घण्टः ॥

मदः, पुं, (मद्यते इति । मदि मोदादौ + "स्फायि तञ्जीति ।" उणा० २ । १३ । इति रक् ।) हेमविशेषः । हर्षः । हस्त्यादिकोषः ॥ तद्धेमविवरणं यथा,—
"वैराटपाञ्चायोर्मध्ये पूर्व्वदत्तक्रमेण तु ।
मदहेमः समाख्यातो माद्रीद्वा तत्र तिष्ठति ॥"
इति शुक्लिसङ्गमतन्त्रे ७ पटलः ॥
(मदे, क्ली । यथा, चतुर्थी चाग्निष्वात्तयुष्य मदमदकुलसुखार्थचिते: । २ । १ । ७१ । इत्यत्र कचे । मदं हेवदत्तस्यभूयात् । इति काग्निका ।

मधु

मदभद्रयोः पर्य्यायत्वादन्यतरो न पठनीयः । इति सिद्धान्तकौमुदी च ।)
मदकः, त्रि, (मदेषु जात इति । मद + "मदहृष्यो: कन् ।" ४ । २ । १३१ । इति कन् ।) मदहेमभवः । इति सिद्धान्तकौमुदी ॥ (हेमभिदः । यथा, मत्स्यपुराणे । ११३ । ४१ ॥
"गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥")
मदकारः, त्रि, (मदं करोतीति । क + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति पक्षे अण् ।) मद्यकरः । यथा क्षेमप्रियमद्रात् कुर्व्वंति सुखबोधयाकरणम् ॥
मदकरः, त्रि, (मदं भद्रं करोतीति । क + "क्षेमप्रियमद्रेऽण् च ।" ३ । २ । ४४ । इति चकारात् खच् । सुम् च ।) मङ्गलकारकः । यथा क्षेमङ्करोऽरिष्टनाशः स्याद्भद्रङ्करशङ्करौ । इति त्रिकाण्डशेषः ॥
मदसुता, स्त्री, (मदस्य सुता ।) मद्रराजकन्या । सा पाण्डुराजस्य द्वितीया भार्य्या नकुलसहदेवजननी च । इति शब्दरत्नावली ॥
मदगोण्यः, मदगोण्यः, मदर्ण्यः,) त्रि, (मद्गुरस्यायमिति । "अण्गुरे यत् खावन्यतरस्याम् ।" ४ । ३ । ६४ । इतिक्रमेण खद्यञनप्रत्ययाः ।) मद्गुरसम्बन्धी । इति सिद्धान्तकौमुदी ॥
मद्गा, [न्] पुं, (माद्यतीति । मद् + "ज्ञामदिपद्यर्त्तिपृधृक्रिभ्यो वनिप् ।" उणा० ४ । ११२ । इति वनिप ।) ग्रहः । इति सिद्धान्तकौमुदीशब्दरत्नावलीधृतिः ॥ (मदगोण्ये, त्रि । यथा, ऋग्वेदे । ८ । ८१ । १६ ।
"इन्द्राय मद्वने सुतं परिष्टोभन्तु नो गिरः ॥")
"मद्वने मद्गवीलाय ।" इति तद्भाष्ये सायणः ॥
मधु, क्ली, (मद्यन्ते विशेषेण जानन्ति जना यस्मिन् । मद् + "मदिपटिनमिमनिजनां गुरुपटिनाकिधनच्च । उणा० १ । १६ । इति उ: धच्चान्तादेशः । मद्यम् । (यथा, आर्य्यासप्तशत्याम् । ४२५ ।
"मधुमदवीतव्रीड़ा यथा यथा लपति सम्मुखं बाला ॥")
क्षीरम् । जलम् । इति विश्वः हेमचन्द्रश्च ॥ रसभेदः । मधुररसः इति यावत् । इति शब्दरत्नावली ॥ पुष्परसः । फुलेर मौ इति भाषा ॥ तत्पर्य्यायः । मकरन्दः २ । इत्यमरः । २ । ४ । २ । ७ ॥ मरन्दः ३ मरन्दकः ४ । इति शब्दरत्नावली ॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । मौ इति भाषा । क्षौद्रम् २ माक्षिकम् ३ । इत्यमरः । २ । ९ । ७ ॥ माक्षीकम् ४ कुसुमासवम् ५ पुष्पासवम् ६ पवित्रम् ७ पित्र्यम् ८ पुष्परसाकृयम् ९ । इति राजनिर्घण्टः ॥ माक्षीकम् १० सारघम् ११ मक्षिकावान्तम् १२ वरटीवान्तम् १३ भृङ्गवान्तम् १४ पुष्परसोद्भवम् १५ । इति भावप्रकाशः ॥ (तथास्य पर्य्यायः ।
"मधु पुष्परसं क्षौद्रं मकरन्दश्च माक्षिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥

मधु

मधु तु मधुरं कषायानुरसं वृष्यं शीतमग्निदीपनं वर्ण्यं बल्यं लघु सुकुमारं लेखनं छर्द्यं वस्त्यामयं श्लेष्मघ्नं दोषघ्नं वाजीकरणं संधानि चक्षुःप्रसादनं सूक्ष्ममार्गानुसारि पित्तश्लेष्ममेदोमेहहिक्काश्वासकासातिसारच्छर्द्यतीसारमिविषप्रशमनं आदिविदोषप्रशमनञ्च तत्तु लघुत्वात् कफघ्नं पैच्छिल्यान्मधुर्य्यात् कषायभावाच्च वातपित्तघ्नम् ।
"हृद्यं दीप्यं मधु नवं नातिश्लेष्मकरं सरम् ।
मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम् ॥
दोषत्रयहरं पक्वमामगन्धं विदोषजित् ।
तद्युक्तं विविधैर्योगैर्निहन्यादामयान् बहून् ॥
नानाद्रव्यात्मकत्वाच्च योगवाहि परं मधु ॥"
तत्तु नानाद्रव्यरसगुणवीर्य्यविपाकविरुद्धानां पुष्परसानां सविषमक्षिकासम्भवत्वाच्चानुष्णोपचारम् ।
"उष्णैर्विरुध्यते वर्च्चैः विषान्वयतया मधु ।
उष्णार्तसुप्तोरुरोगैर्वा तं निहन्ति यथा विषम् ॥
तत् सौकुमार्य्याच्च तथैव शैत्या-
न्नानौषधीनां रससम्भवाच्च ।
उष्णैर्विरुध्येत विशेषतश्च
तथाम्लरौक्षैश्च जलेन चापि ॥
उष्णेन मधु संयुक्तं वमनेष्ववचारितम् ।
अपाकादनवस्थानान्न विरुध्येत पूर्ब्बवत् ॥
मध्यमात् परतस्त्वस्यदामं कष्टं न विद्यते ।
विरुद्धोपक्रमत्वात्तत् सर्व्वं हन्ति यथा विषम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)
अस्य सामान्यगुणाः । शीतत्वम् । लघुत्वम् । स्वादुत्वम् । त्रिदोषघ्नत्वमग्निकृत्वम् । कषायानुरसत्वम् । रूक्षत्वम् । चक्षुष्यत्वम् । श्वासकासनाशित्वञ्च ॥ * ॥ तदष्टविधं यथा । पौत्तिकम् १ भ्रामरम् २ क्षौद्रम् ३ माक्षिकम् ४ छात्रम् ५ अर्घ्यम् ६ औद्दालकम् ७ दालम् ८ । एतेषां लक्षणानि यथा,—
"पिङ्गला मक्षिका ज्ञेया मक्षव्यक्ता च सा द्विधा ।
महती पुत्तिकानाम्नी स्वल्पा क्षुद्रेति कथ्यते ॥
मध्यमा मक्षिका नीला माक्षिकेत्यभिधीयते ।
पुत्तिकाभ्रमरक्षुद्रामक्षिकासम्भवं मधु ॥
पौत्तिकादुच्यते क्षौद्रं वरटीक्षतसम्भवम् ।
त्रपोवर्णं जरत्कारोरर्घ्यं मधुसदृक्षकम् ॥
औद्दालकन्तु वल्मीककारिकोटविनिर्म्मितम् ।
दालमित्यभिनिर्द्दिष्टं वृक्षकोटरकोटजम् ॥"
एतेषां वर्णा यथा,—
"माक्षिकं तैलवर्णं स्यात् घृतवर्णन्तु पौत्तिकम् ।
क्षौद्रं कपिलवर्णं स्याच्छ्वेतं भ्रामरमुच्यते ॥"
एतेषां गुणा यथा,—
पौत्तिकं तेषु वीर्य्योष्णं कषायानुरसान्वयात् ।
यातानुलोमि पित्तघ्नं हृद्यं विद्याच्च मक्षिकम् ॥
"पैच्छिल्यात् स्वादुभूयस्त्वाद् भ्रामरं गुरु
कीर्त्तितम् ।
क्षौद्रं विशेषतो ज्ञेयं शीतलं लघु लेखनम् ॥
तस्माल्लघुतरं रूक्षं माक्षिकं प्रवरं स्मृतम् ।

मधु

श्वासादिषु च रोगेषु प्रशस्तं तद्विशेषतः ॥
क्षौद्रं त्रिदोषशमनं रक्तपित्तहरं गुरु ।
अक्ष्यं चक्षुष्यमायुष्यं कफपित्तामवातजित् ॥
औद्दालकं कषायोष्णं कटुकुष्ठविषापहम् ।
दालं कफहरं रूक्षं दीपनं हृद्विमेहजित् ॥
उष्णसृष्टार्तसृष्टेषु हन्याच्चैव मधु विषान्वयात् ।
मधुसृष्टैर्विदग्धान्ते वर्ज्यमित्यार्यसंज्ञितम् ॥"
उष्णैः रौद्रैः करणैः उष्णं मधु उष्णार्तं रौद्रपीड़ितं जनं विषान्वयात् विषतुल्यत्वात् हन्यात् ॥ * ॥ नवपुराणमधुगुणाः ।
"इक्षुजीयं मधु नवं वातश्लेष्महरं परम् ।
पुराणं लघु संग्राहि स्निग्धं स्रौत्र्यनाशनम् ॥
दोषत्रयहरं पक्वमामगन्धं त्रिदोषजित् ॥"
अन्ये केचिन्मधुनोऽग्निसंयोगाभावात् कालपक्वतामाहुः ॥ * ॥ मधुजातभ्रमरगुणाः ।
"मधुषा भ्रमरा रूक्षा लघ्वाच्छर्द्यतिसारजित् ।"
इति राजवल्लभे मधुवर्गः ॥ * ॥

अपि च ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रकं तथा ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥
नानापुष्परसाहाराः कपिला वनमक्षिकाः ।
याः क्षुद्राभिहृतपक्षं मधु माक्षिकमुच्यते ॥
ये क्षिप्तधान्यगोलाभाः पुष्पासवपरायणाः ।
भ्रमरैर्जनितं तैस्तु भ्रामरं मधु भण्यते ॥
पिङ्गला मक्षिकाः क्षुद्राः क्षुद्रा इति हि विश्रुताः ।
ताभिर्हृतमादिनं यत्तु तत् क्षौद्रं मधु कथ्यते ॥
महत्यो मक्षिकाः पिङ्गाः पुत्तिका इति कीर्त्तिताः ।
तज्जातं मधु धीमद्भिः पौत्तिकं समुदाहृतम् ॥
छत्राकारन्तु पटलं तरुणाः पीतपिङ्गलाः ।
ये कुर्वन्ति तदुत्पन्नं मधुच्छात्रकमीरितम् ॥
मक्षिकाभिरुज्झितं या पीताः षट्पदसन्निभाः ।
तद्भृतं यदर्घार्हं तदार्घ्यं मधु भण्यते ॥
उद्दालाः कपिलाः कीटा भूमेरुद्दलनाः स्मृताः ।
वल्मीकाभ्यन्तरोत्पन्नमौद्दालकमुदीर्यते ॥
इन्द्रनीलदलाकाराः क्षुद्राभिवन्ति मक्षिकाः ।
यद्वृक्षकोटरान्तस्थं मधु दालमिदं क्रमात् ॥
इत्यसौ त्रिविधा मेदैरुदीरिताः कथिता क्रमात् ।
अथ वक्ष्याम्यहं तेषां वर्णवीर्यादिकं क्रमात् ।"
तद्यथा,—
माक्षिकं तैलवर्णं स्यात् क्षौद्रं भ्रामरमुच्यते ।
क्षौद्रन्तु कपिलाभासं पौत्तिकं घृतसन्निभम् ॥
आपीतवर्णं छत्रं स्यात् पिङ्गलमार्घ्यनामकम् ।
औद्दालं सर्वथाद्यन्तमापीतं दालमुच्यते ॥
माक्षिकं मधुरं रूक्षं लघु त्रिदोषघ्नुत् ।
भ्रामरं पिच्छिलं रूक्षं मधुरं सुखजाद्यजित् ॥
क्षौद्रन्तु स्रौत्रं चक्षुष्यं पिच्छिलं पित्तवातजित् ।
पौत्तिकं मधु रूक्षोष्णं क्षय्यपित्तदाहकृत् ॥
छत्रमेदकलिङ्गञ्च विद्याच्छात्रं गुणोत्तरम् ।
आर्घ्यं मक्षतिचक्षुष्यं कफपित्तादिदोषजित् ॥
औद्दालकन्तु कुष्ठादिदोषघ्नं सर्वसिद्धिदम् ।

दालं कटु कषायाक्तं मधुरं पित्तदाहि च ॥
नवं मधु भवेत् स्रौत्र्यं नातिश्लेष्महरं परम् ।
देहस्रौत्र्यापहं प्राहि पुराणं मधु चेक्षनम् ॥
पक्वं दोषत्रयघ्नं मधु विविधरुजाव्याधिक्रिमयादि-
ध्वंसं धत्ते च रूक्षं बलमतिपुष्टिदं वीर्यवृद्धिं विधत्ते ।
आमश्लेष्मामगुल्मामयपवनरुजापित्तदाहा-
सदोष-
नाशं नूनं विशेषं जनयति नयति ध्वंसमध्यक्ष-
वृद्धेः ॥

व्रणशोधनसन्धाने व्रणसंरोपणादिषु ।
साधारणाच्चाधु हितं तत्तुल्या मधुशर्करा: ॥
उष्णं सद्योजं काले वा स्वयमुष्णमथापि वा ।
आमं मधु मनुष्याणां विषवत्तापदायकम् ॥
कीटकादियुतमल्पदूषितं
यच्च पर्य्युषितकं मधु स्मृतं ।
कण्ठकोटरगतञ्च मेचकं
तच्च गेहजनितञ्च दोषलृत् ॥
दृक्तंनिहत्य यद्वृक्षात्समाहृत्य दंशा-
स्त्राडविधं मधु रसायनयोगयोग्यम् ।
शिक्षागुदाङ्कुरविशोषकपञ्चवादि-
दोषापहं भवति दोषदमन्यथा चेत् ॥
माक्षी सिता मधूत्पन्ना मधुजा मधुशर्करा ।
माक्षीकशर्करा चैषा क्षौद्रजा क्षौद्रशर्करा ॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणास्तस्य शर्करा: ।
विशेषाद्बलदृष्ट्या च तर्पणं क्षौद्रदृक्षिणाम् ।"
इति राजनिर्घण्टः ॥*॥

मतान्तरे मधुगुणाः ।
"मधु क्षौद्रं लघु स्वादु रूक्षं वाहि विलेखनम् ।
चक्षुष्यं दीपनं मेध्यं व्रणशोधनरोपणम् ॥
सौकुमार्यकरं स्निग्धं परं स्रौत्र्यविशोधनम् ।
कषायानुरसं हृद्यं प्रसादजनकं परम् ॥
वर्ण्यं मेधाकरं वृष्यं विषदं रोचनं हृद्यम् ।
कुष्ठार्शःकामपित्तास्रकफमेहक्रमक्रिमीन् ।
मेदस्तृष्णावमिश्वासच्छर्द्यतीसारविड्ग्रहान् ।
दाहश्वासत्रयांस्तु योगवाह्यप्रयोगतम् ॥"*॥

अथ मधुभेदाः ।
"माक्षिकं भ्रामरं क्षौद्रं पौत्तिकं छात्रमित्यपि ।
आर्घ्यमौद्दालकं दालमित्यष्टौ मधुजातयः ॥"*॥

अथ तेषां लक्षणानि गुणाश्च । तत्र माक्षिकस्य ।
"मक्षिकाः पिङ्गवर्णास्तु महत्यो मधुमक्षिकाः ।
ताभिः हृतं तैलवर्णं माक्षिकं तत् प्रचक्षते ॥
माक्षिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ।
कामलार्शःश्वासकासास्रक्षयविनाशनम् ॥"*॥

अथ भ्रामरस्य ।
"किञ्चित् रक्तैः प्रसिद्धैश्च पुष्पैश्च अलिभिश्चितम् ।
निर्मलं स्फटिकाभं यत्तन्मधु भ्रामरं स्मृतम् ॥
भ्रामरं रक्तपित्तघ्नं मूत्रकृच्छ्रकरं गुरु ।
स्वादुपाकमभिष्यन्दि विशेषात् पिच्छिलं हिमम् ॥*॥"

अथ क्षौद्रस्य ।
"मक्षिकाः कपिलाः क्षुद्राः क्षुद्राभ्राक्षतजत्विषः ।
क्षुद्रैर्मक्षिकया क्षौद्रं विशेषाच्छ्लेष्मनाशनम् ॥"

अथ पौत्तिकस्य ।
"याः क्षुद्रा मशकोपमा बहुतराः प्रायो महापिञ्जिलं
वृक्षाणां तरुकोटरान्तरगताः पुष्पासवं कुर्वते ।
ताभिर्मक्षिकया पुत्तिका निगदितास्ताभिः हृतं सर्पिषा
तुल्यं यन्मधु तद्गुणेश्वरजनैः संकीर्त्तितं पौत्तिकम् ॥
पौत्तिकं मधु रूक्षोष्णं पित्तदाहास्रवातजित् ।
विदाहि मेहजन्तूनं यक्ष्मादिघ्नमपि च ॥"

अथ छात्रस्य ।
"वरटाः कपिलाः पीताः प्रायो हिमवनो वने ।
कुर्वन्ति कृत्रकाकारं तज्जं छात्रं मधु स्मृतम् ॥
छात्रं कपिलपीतं स्यात् पिच्छिलं श्लेष्मलं गुरु ।
स्वादुपाकं क्रिमिश्लेष्मरक्तपित्तप्रमेहजित् ।
भ्रमहृद्रोगविषघ्नं तर्पणञ्च गुणाधिकम् ॥"

अथार्घ्यस्य ।
"मधुकृत्या निर्यासं जरत्काष्ठाश्मशोद्भवाः ।
सञ्चयार्घ्यं तदा ख्यातं श्लेष्मकं मालवे गुरु: ॥
तीक्ष्णासुक्षासु याः पीता मक्षिकाः षट्पदोपमाः ।
अर्घ्यालक्षणजं यत्तदार्घ्यं मित्यपरे जगुः ॥
आर्घ्यं मक्षतिचक्षुष्यं कफपित्तहरं परम् ।
कषायं कटुकं पाके तिक्तञ्च बलपुष्टिजत् ॥"*॥

अथौद्दालकस्य ।
"प्रायो वल्मीकमध्यस्थाः कपिलाः क्षुद्रकीटकाः ।
कुर्वन्ति कपिलं स्वल्पं तत् स्यादौद्दालकं मधु ॥
औद्दालकं रुचिकरं स्वर्घ्यं कुष्ठविषापहम् ।
कषायमुष्णमम्लञ्च कटुपाकञ्च पित्तजत् ॥"*॥

अथ दालस्य ।
"संभृत्य पतितं पुष्पात् यत्तु पक्षोपरि स्थितम् ।
मधुराम्लकषायञ्च तद्दालं मधु कीर्त्तितम् ॥
दालं मधु लघु प्रोक्तं दीपनीयं कषायकम् ।
कषायानुरसं रूक्षं रुच्यं हृद्विषमेहजित् ॥
अधिकं मधुरं स्निग्धं हृद्यं गुरुभारिकम् ॥"
लघु पाके । गुरुभारिकं तुल्यितम् ॥ * ॥ अथ नवपुराणमधुगुणाः ।
"नवं मधु भवेत् पुष्टेः नातिश्लेष्महरं वरम् ।
पुराणं याहकं रूक्षं मेदोघ्नमतिलेखनम् ॥
मधुनः शर्करायाश्च गुरुत्वाप्यधिकस्य तैः ।
एकसंवत्सरोतीते पुराणं स्मृतं बुधैः ॥"
अथ मधुनः शीतस्य गुणाधिक्यनुक्तताया निषेधः ।
"विषपुष्पादपि रसं सविषा भ्रमरादयः ।
गृहीत्वा मधु कुर्वन्ति तच्छीतं गुरुवन्मधु ॥

विधान्वयात्तद्गुणास्तु प्रयोक्तोक्तेन वा सह ।
उत्पादनेऽप्योषधाङ्गे च स्तनं विषमं मधु ॥"
इति भावप्रकाशः ॥

मधुः, पुं, (मद्+उ। नस्य धः।) मधुदमः। मौलसाड इति भाषा। वसन्तर्तुः। (यथा, कुमारसम्भवे। १। २६।
"निवेदयामास मधुर्दिशेषात्
मामाञ्चराजीव मनोभवस्य ॥")
दैत्यभेदः। (यथा, देवीभागवते। २। ६। १५।
"मधुञ्च कृपिनञ्चैव हरिणा सह संयुगे ॥")
इमं हत्वा विष्णुर्मधुरुदगोऽभूत्। वैजयन्तः।
इति मेदिनी। धे, १२ ॥ (यथा, रघुः। ११। ७।
"रेजतुर्मन्त्रिवद्यात् प्रवर्त्तिनौ
भास्करस्य मधुमाधवाविव ॥")
अशोकवृक्षः। इति हेमचन्द्रः। २।१५३ ॥ यष्टि-मधु। इति शब्दरत्नावली॥ असुरविशेषः। (यथा, भागवते। ६। ११। १४।
"शम्भुश्च मधोः पुत्रं लवणं नाम राक्षसम्।
हत्वा मधुवने चक्रे मथुरां नाम वै पुरीम् ॥")
स च शत्रुघ्नेन हतः। यस्य नाम्ना मथुरा मधु-पुरीति ख्याता ॥

मधुः, स्त्री, (मद्+उ। नस्य धः।) जीवन्तीवृक्षः। इत्यमरः। २। ४। १४२ ॥

मधुकं, क्ली, (मध्नाति। मधु+"संज्ञायां च।" ५। १। ६७। इति कन्। यद्वा, मधु मधुरं कायतीति। कै+कः।) यष्टिमधुवृक्षः। इत्यमरः। २। ४। १०८ ॥ (यथास्य पर्य्यायः।
"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका।
यष्टिमधु स्थलेजाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)
मधु। इति हेमचन्द्रः ॥

मधुकः, पुं, (मधु मधुरं कायतीति। कै+कः।) यष्टिमेदः। यष्ट्याह्वः। विहगान्तरः। इति विश्वः॥

मधुकण्ठः, पुं, (मधुर्मधुरः कण्ठः कण्ठस्वरो यस्य।) कोकिलः। इति त्रिकाण्डशेषः ॥

मधुकरः, पुं, (करोति सञ्चिनोतीति। कृ+अच्। मधुनः करः।) भ्रमरः। इत्यमरः। २। ५। २८ ॥ (यथा, श्रीमद्भागवते। ४। १८। २।
"सञ्चेतः खारमाहन्ति यथा मधुकरो बुधः।")
स्वामी। इति धरणिः ॥ भृङ्गराजवृक्षः। इति शब्दमाला ॥

मधुकर्कटिका, स्त्री, (मधुमधुरा कर्कटिकेव।) मधुरजम्बीरविशेषः। मउकड़ी इति भाषा। तत्पर्य्यायः। क्षुद्रा २। इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्या गुणाश्च यथा,—
"बीजपूरोऽपरः प्रोक्तो मधुरो मधुकर्कटी।
मधुकर्कटिका खाढ्यो रोचनो ग्रीतला गुरुः।
रक्तपित्तक्षयश्वासकासहिक्काश्रमापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मधुकर्ब्बुरिका। इति राजनिर्घण्टः ॥

मधुकर्कटी, स्त्री, (मधुमधुरा कर्कटी) मधुबीज-पूरः। इति राजनिर्घण्टः ॥

मधुका, स्त्री, (मधुक+टाप्।) मधुयष्टिका। इत्यमरः। २। ४। १०६ ॥ मधुपर्णीवृक्षः। इति मेदिनी। के, १४५ ॥ लक्ष्मणवर्णकक्षुपी। इति हेमचन्द्रः। ४। २४६ ॥

मधुकुक्कुटिका, } स्त्री, (मधुः मधुरा कुक्कुटीव।
मधुकुक्कुटी, } मधुकुक्कुट+स्त्रियां ङीप्।
स्वार्थे कन्। स्त्रियां टाप्। पूर्व्वस्य ह्रस्वत्वञ्च।) जम्बीरविशेषः। मधुर इति मधुर इति च भाषा। तत्पर्य्यायः। मातुलुङ्गा २ सुगन्धा ३ गिरिजा ४ पूतिपुष्पिका ५ अम्लाम्ला ६ देव-दूती ७। इति रत्नमाला ॥ अस्या गुणाः। शीतत्वम्। स्वादुत्वम्। गुरुत्वम्। स्निग्धत्वम्। वातपित्तविनाशित्वञ्च। इति राजवल्लभः ॥

मधुकृत्, पुं, (मधु करोति सञ्चिनोतीति। कृ+क्विप् तुगागमश्च।) भ्रमरः। इति हेमचन्द्रः ॥ (यथा, छान्दोग्योपनिषदि। ३। १। २।
"अथ यैतस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अक्षता आपः ॥")

मधुकैटभः, पुं, (मधुनः पुष्परसस्य के शिरसि अवयवभागे भटति गच्छतीति। भट+कर्म्मणि अच्।) भ्रमरः। इति त्रिकाण्डशेषः ॥

मधुकैटभौ, पुं, (मधुश्च कैटभश्च तौ। इतरेतर-द्वन्द्वः।) असुरविशेषौ। तयोरुत्पत्त्यादि यथा,
"ऐनन्दिने तु प्रलये प्रसुप्ते गरुडध्वजे।
तस्य श्रवणविड्जाताबसुरौ मधुकैटभौ ॥
कूर्म्मपृष्ठगता पृथ्वी विलीनेवाभवज्जले।
तां विज्ञायौ योगनिद्रा महामाया अलोकयत् ॥
तां वै दृढतरां कर्त्तुं पृथ्वीं प्रति महेश्वरी।
उपायं चिन्तयामास कथं पृथ्वी भवेद्दृढा ॥
इदानीमाप्यवत पृथ्वी मृत्स्ना कोमला जले।
सृष्टिकाले जगान् वोढुं कथं शक्ता भविष्यति ॥
इति सञ्चिन्त्य सा माता जगतां सृष्टिकारिणी।
उपगम्य तदा विष्णुमासवाद मुनिस्तिमम् ॥
तन्तु सुप्तं समालोक्य जगन्नाथं जगत्पतिम्।
वामश्रवणकलिन्नाग्रं तस्य कर्णं व्यवेष्टयत् ॥
निवेश्य नखराग्रेण प्रोद्धृत्य आवयं मलम्।
चकार सा देवी योगनिद्रा जगत्प्रभुः ॥
तत्कर्णमलसर्ज्जाभ्यो मधुनामासुरोऽभवत्।
ततो दक्षिणहस्तस्य कनिष्ठाग्रन्तु दक्षिणे ॥
कर्णे व्यवेष्टयद्देवी तस्मादप्युद्धृतं मलम्।
तदापि शोषयामास करघातायतेन तु ॥
ततोऽभूत् कैटभो नाम बलवानसुरो महान् ॥
उत्पन्नः स च पातार्थं यत्नात् सञ्जिघवाम्बधु।
अतस्तस्य महादेवी मधुनामाकरोत्तदा ॥
उत्पन्नः कैटवस्त्राति महामायाकरे यतः।
अतस्तं कैटभाख्यन्तु स्वयं देवी तदाकरोत् ॥
तावुवाच महामाया युध्यतां हरिणा सह।
युवानौ मद्वरेणात्र भवन्तौ निहनिष्यति ॥
यदा युवां प्रभाषेथे आवां विष्णो ! वधान्न तौ।
तदैवायं युवां हत्वा नान्यथा हरिरप्यथ ॥
महामायामोहितौ तौ विष्णुगात्रे तदा मुहुः।

भ्रममाणौ दृढग्रतुर्नाभियन्त्रस्थितं विधिम् ॥
तन्मुखचतुष्टौ धातारं दृष्ट्वायोऽत्र नाभितम्
त्वं जागरय वैकुण्ठं यदि जीवितुमिच्छसि ॥
ततो ब्रह्मा महामायां योगनिद्रां जगत्प्रसूम्।
प्रसादयामास तदा स्तुतिभिर्नतिभिर्मिथा ॥
चिरं स्तुताथ सा देवी ब्रह्मणा जगदात्मना।
प्रसन्नाभवदत्यर्थंसुवाच च तथा विधिम् ॥
किमर्थं संस्तुता चाहं किं करिष्याम्यहं तव।
तद्वद त्वं महाभाग ! करिष्याम्यद्यमद्य ते ॥
ततस्तेन महामाया प्रोक्ता धाता महात्मना।
प्रबोधय जगन्नाथं यावन्नो मां दृष्टिक्षतः।
संमोहयेतौ दुर्द्धर्षावसुरौ मधुकैटभौ ॥
इत्युक्ता सा तदा देवी ब्रह्मणा जगदात्मना।
बोधयामास वैकुण्ठं मोहयामास तौ तदा ॥
ततः प्रबुद्धः श्रीशः स ददर्श भयदाजिनम्।
ब्रह्माणं तौ तदा घोरावसुरौ मधुकैटभौ ॥
ततश्चाभ्यां स युयुधे ह्यसुराभ्यां जनार्द्दनः।
नाशकद् बाधितुं वीरावसुरौ मधुकैटभौ ॥
अजय्योऽपि जगन्नाथो ताभ्यां धर्षुं जगोऽभवत्।
वृध्यमानाञ्चहावीरान् वैकुण्ठमधुकैटभान् ॥
अथ ब्रह्मा शिलारूपां क्षितिग्रस्तां तदाकरोत्।
अर्द्धयोजनविस्तीर्णां सार्द्धयोजनमायताम् ॥
तस्यां शिलायां वैकुण्ठो युयुधे नृपसत्तम ! ।
सह ताभ्यां शिला सा तु प्रविवेश जलान्तरम् ॥
तस्यान्तु शय्यां मायायां लोकेषु युयुधे हरिः।
पञ्चवर्षसहस्राणि बाहुयुद्धेनिरन्तरम् ॥
यदा नैवाशकद्धन्तुं तौ विष्णुर्जगतां पतिः।
परां चिन्तां तदाधाय विधानापि भयाकुलः ॥
ततस्तावेव तं विज्ञाय्चतुर्व्वलदर्पितौ।
पुनः पुनस्तौ गर्ज्जन्तौ महामायाविमोहितौ ॥
तुष्टौ स्वकन्निगृह्येन वरं वरय माधव ! ।
तवेदं संप्रदास्यावः सत्यमेतद्ब्रवीमुना ॥
तयोरुदीरितं श्रुत्वा भगवान् गरुडध्वजः।
उवाच तौ युवां वध्यौ भवेतां मे महाबलौ।
इति हृद्धि वरं मह्यं दातव्यं यदि विद्यते ॥
तौ तदा प्राह युद्धज्ञो योग्यो नौ श्लोभनो वधः।
तत्रावां जहि नो यत्र तोयं सम्पृति विद्यते ॥
तयोरुदीरितं श्रुत्वा माधवो जगतां पतिः।
ब्रह्माणं माच श्लोक्षेण प्राहेदञ्चाब्जसंभवा ॥
ब्रह्मण्यस्तिशिलां श्लोक्षसुश्लक्ष्णां यथा।
तत्र स्थित्वा महाधारे हनिष्यामि महाबलौ
ततो ब्रह्मा तथेत्येव उद्धार शिलान्तु ताम्
तस्या मध्ये पूर्व्वभागे ह्यधं पर्व्वतरूपधृक्।
कृत्वा स्थित्वा शिलां भित्त्वा प्रविवेश रसातलम्
रेखात्यामभवन् कूर्म्मः पर्व्वतश्चाप्यशीत् शिलाः
वायव्याश्च तथाजग्मुः नैर्ऋताश्च सुरेश्वरी ॥
महामाया जगद्धात्री श्लोकरूपप्रधारिणी।
आग्नेयाश्च स्वयं विष्णुरेकरूपेण संस्थितः ॥
ब्रह्मण्यस्तिशिलां यत्नात् भगवान् परमेश्वरः।
मध्ये ब्रह्मा तथैवेव वराहश्च तथामरः ॥
ततो वराहरूपस्य धरणे जगतां पतिः।
स्थित्वा शिलामवष्टभ्य ब्रह्मण्यस्तिमधोगताम्॥

धामे खजघने यत्नादारोप्य शिरसी तयोः ।
जगदाधारभूतः स सर्व्वयत्नेन संयुतः ॥
सर्व्वैर्बलैः समाक्रम्य चिच्छेद च पृथक् पृथक् ।
मधुकैटभयोः सम्यक् वीरयोः पृथिवीपते ॥
तस्य चाक्रम्य संछागादूरुजङ्घाशिरोगता ।
धियमाणापि देवौघैर्यत्नादपि सुदुर्म्मुदुः ॥
ततस्तयोस्तु शतयोः शूरवीरे जगतां पतिः ।
ब्रह्मशक्तिं समुद्धृत्य मधाघातस्थां प्रयत्नतः ।
उद्धृतायां पृथिव्यान्तु तयोर्म्मेदोविलेपनैः ।
सुदृढामकरोत् पृथ्वीं क्लेदितां तोयराशिभिः ॥
मेदोविलेपिता यस्माद् गीयते मेदिनीति सा ।
अद्यापि पृथिवी देवी देवमानुषराक्षसैः ॥"

इति कालिकापुराणे ६१ अध्यायः ॥

(अनयोर्नामनिरुक्तिर्यथा, महाभारते । १२ । ३३७ । २४—२६ ।

"सत्यस्थः परमेष्ठी स ततो भूतगणान् सृजन् ।
पूर्व्वमेव च पद्मस्थ पद्मे सूर्य्यांशुसप्रभे ॥
नारायणसृतौ विन्दू अपामास्यां गुणोत्तरौ ।
तावपश्यत् स भगवानादिनिधनोऽच्युतः ॥
एकस्तत्राभवद्विन्दुर्म्मेधाभो रुचिरप्रभः ।
स तामसो मधुर्जातस्तदा नारायणाज्ञया ।
कल्पिनस्यपरो विन्दुः कैटभो राजसस्तु सः ॥")

मधुकोषः, पुं, (मध्ये क्षतः कोषः मध्याधारः कोषो वा ।) मधुमक्षिकाकृतकोषः । मौचाक् इति भाषा । तत्पर्य्यायः । मधुक्रमः २ । इति शब्दचन्द्रिका । (यथा,—

"अमरेणेव मयायं यास्यामधुकोष आरब्धः ।"

इति वाचस्पतिमिश्रविरचितटीकाकृद्भिरयेन लिखितम् ॥) छागलुञ्च इति मांसाग्निनो वदन्ति ॥

मधुक्रमः, पुं, (मधुनः क्रमः ।) पुनः पुनर्म्मधुपानक्रमः । तत्पर्य्यायः । मधुवारः २ । इत्यमरः । २ । १० । ४१ ॥ मधुकोषः । इति शब्दचन्द्रिका ॥

मधुक्षीरः, पुं, (मधुवत् क्षीरं निर्य्यासोऽस्य ।) खर्ज्जूरवृक्षः । इति शब्दरत्नावली ॥

मधुखर्ज्जूरिका, स्त्री, (मधुर्मधुरा खर्ज्जूरी । तत्र कन् टाप् । पूर्व्वस्य ह्रस्वत्वम् ।) खर्ज्जूरविशेषः । तत्पर्य्यायः । मधुकर्कटिका २ कोलकर्कटिका ३ कण्टकिनी ४ मधुफलिका ५ माध्वीमधुरा ६ मधुरखर्ज्जूरी ७ मधुखर्ज्जूरी ८ । अस्या गुणाः । मधुरत्वम् । दृष्यत्वम् । सन्तापपित्तग्लानिकारित्वम् । गुरुत्वम् । अल्पकफत्वम् । बहुवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥

मधुगायनः, पुं, (मधु गायतीति । गै + "ल्युट् च ।" ३ । १ । १४७ । इति ल्युट् । यद्वा, मधौ वसन्ते गायन इति सप्तमीसमासः ।) कोकिलः । इति राजनिर्घण्टः ॥

मधुगुञ्जनः, पुं, (मधु मधुरं गुञ्जनमस्य । पवनेरितशुष्कपत्रशब्दस्यास्य मधुरत्वात् तथात्वम् ।) भ्रीभाञ्जनवृक्षः । इति शब्दमाला ॥

मधुघोषः, पुं, (मधुर्मधुरो घोषो यस्य ।) कोकिलः । इति शब्दमाला ॥

मधुच्छदा, स्त्री, (मधुः मधुरच्छदः पर्णमस्याः । यद्वा मधु छादयति रक्षाधिक्येन पराभवतीति छद + क्विप् । तः । धे ह्रस्वश्च ।) मयूरशिखा । इति भावप्रकाशः ॥ (तथास्या गुणाः ।

"नीलकण्ठशिखा तिक्ता पित्तश्लेष्मातिसारजित् ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुजं, क्ली, (मधुनो जातम् इति । जन् + डः ।) घृतकुमारी । इति राजनिर्घण्टः ॥

मधुजम्बीरः, पुं, (मधुर्मधुरो जम्बीरः ।) मधुरजम्बीरः । इति राजनिर्घण्टः ॥

मधुजा, स्त्री, (मधोः मधुमेदसो जाता प्रादुर्भूता इति । जन् + डः टाप् ।) पृथिवी । इति शब्दचन्द्रिका ॥ (मधुनो जायते सा इति । जन + डः ।) सिता । तत्पर्य्यायः । महाश्वेता २ । इति त्रिकाण्डशेषः ॥

मधुजित्, पुं, (मधुं मधुनामानं दैत्यं जितवानिति । जि + क्विप् । तुगागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ५ । ६२ ।

"प्रिये ! किं वा ज्ञात्वा विविदिषसि भक्तिं मधुजितः ॥")

मधुलवणं, क्ली, (मधुरं लवणम् ।) इक्षुः । इति त्रिकाण्डशेषः ॥ (गुणादयोऽस्य इक्षुशब्दे ज्ञातव्याः ॥)

मधुलवणः, पुं, (मधुर्मधुरश्चासौ लवणः ।) इक्षुः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—

"महारसोऽसिपत्रः स्याच्छ्वपुष्पो मधुलवणः ।
इक्षुर्वंशककान्तारभिषग्वीक्षादिभेदवान् ॥"

इति वैद्यकरत्नमालायाम् ॥

"इक्षुर्दीर्घच्छदः प्रोक्तस्तथा भूरिरसोऽपि च ।
गुडमूलोऽसिपत्रश्च तथा मधुलवणः स्मृतः ॥"

इति च भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मधुत्रयं, क्ली, (मधूनां मधुरद्रव्याणां त्रयम् ।) मधुरत्रयम् । इति राजनिर्घण्टः ॥ (मधूक्षसिताज्यम् ॥)

मधुदीपः, पुं, (मधौ वसन्ते दीप्यत इति । दीप् + कः ।) कामदेवः । इति हेमचन्द्रः । २ । १४१ ॥

मधुदूतः, पुं, (मधोर्वसन्तस्य दूत इव । वसन्तागमनात् प्रागस्य सुकुलोद्गमदर्शनात् तथात्वम् ।) आम्रवृक्षः । इति त्रिकाण्डशेषः ॥ (तथास्य पर्य्यायः ।

"आम्रः प्रीतो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुदूती, स्त्री, (मधोर्वसन्तस्य दूतीव ।) पाटलावृक्षः । इति भावप्रकाशः ॥ (पर्य्यायादि विवरणमस्याः पाटलाशब्दे द्रष्टव्यम् ॥)

मधुदः, पुं, (मधुं ददाति पुष्पात् पुष्पं गच्छतीति । दा + कः ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

मधुद्रवः, पुं, (मधुर्मधुरो द्रवो निर्य्यासोऽस्य ।) रक्तशिग्रुः । इति शब्दरत्नावली ॥

मधुद्रुमः, पुं, (मधवे मधार्थं मधूत्पादको वा द्रुमः । तत् पुष्पेभ्यो मद्यसम्भवादस्य तथात्वम् ।)

द्रुवृक्षविशेषः । मौलगाछ इति भाषा ॥ तत्पर्य्यायः । मधूकः २ गुडपुष्पः ३ । इत्यमरः । २ । ४ । २७ ॥ (पर्य्यायान्तरमस्य यथा, वैद्यकरत्नमालायाम् । "मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुमः ॥")

मधुधातुः, पुं, (मधुना तत्पर्य्यायगाह्या प्रसिद्धो धातुः ।) माक्षिकम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।

"स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् ।
ताप्यं माक्षिकधातुश्च मधुधातुश्च स स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुधूलिः, स्त्री, (मधुर्मधुरा धूलिरिव ।) खण्डः । इति हेमचन्द्रः । २ । ६ ॥ खाँड् इति भाषा ॥

मधुधेनुः, स्त्री, (मधुरचिता धेनुः ।) दानार्थमध्यादिनिर्म्मितसवत्सा गौः । यथा,—

ईशानोवाच ।

"मधुधेनुं प्रवक्ष्यामि सर्व्वपातकनाशिनीम् ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्तरे ॥
धेनुं मधुमयीं कृत्वा संपूर्णां घटधोरणीम् ।
चतुर्थेन तथांशेन वत्सकं परिकल्पयेत् ॥
सौवर्णन्तु मुखं कृत्वा ब्रह्माग्यगुरुचक्षुषे ।
पृष्ठं चाज्यमयं कृत्वा साक्षां पट्टमयीं तथा ॥
पदानिक्षुमयान् कृत्वा सितकम्बलकम्बलाम् ।
सुवं गुडमयं कृत्वा जिह्वां शर्करया तथा ।
खोडौ पुष्पमयौ कृत्वा दन्ताः फलमयाः स्मृताः ।
दर्भरोमधरा देवी रौप्यखुरविभूषिता ॥
पयोघटसमायुक्ता प्रमाणात् परिलक्षणा ।
सर्व्वलक्षणसंयुक्ता सप्तधान्यान्विता तथा ॥
चत्वारि सितपात्राणि चतुर्दिक्षपि स्थापयेत् ।
क्षीरिणां वल्कयुग्मेन चतुष्पाभरणभूषिताम् ।
कांस्योपदोहनां कृत्वा गन्धपुष्पैस्तु धूपिताम् ॥
अयने विषुवे पुण्ये यतीपाते दिनक्षये ।
संक्रान्त्यामुपरागे च सर्व्वकालं यदृच्छया ॥
इत्यनाढ्यकसम्पन्ने दृष्ट्वा तान्तु प्रदापयेत् ।
ब्राह्मणाय दरिद्राय श्रोत्रियायाग्निहोत्रिणे ॥
आर्य्यावर्त्ते समुत्पन्ने वेदवेदाङ्गपारगे ।
साङ्गाय प्रदातव्या मधुधेनुर्नरोत्तम ! ॥
पुष्पदीपोपविष्टस्तु गन्धधूपादिपूजिताम् ॥
आच्छाद्य वस्त्रयुग्मेन सुद्रिकाकङ्कणाञ्चिते ॥
स्वयञ्चा दक्षिणां दत्त्वा विप्रहस्तेषु विसर्জ্জनः ।
जलपूर्व्वन्तु कर्त्तव्यं पश्चाद्दानं समर्पयेत् ॥
रमन्तां सर्व्वदेवाश्च सर्व्वभूतहिते रताः ।
प्रीयन्तां पितरश्चाथ मधुधेनो ! नमोऽस्तु ते ॥
एवमुच्चार्य्य तां धेनुं ब्राह्मणाय निवेदयेत् ॥
अद्यं गृह्णामि त्वां देवि ! कुटुम्बार्थे विशेषतः ।
कामं कामदुघे कामां मधुधेनो ! नमोऽस्तु ते ॥
मधुवातेरितमिति दत्त्वादाशु विसर्জ্জयेत् तु ।
दत्त्वा धेनुं महाराज ! कृतकोपानहौ तथा ॥
यत्रं यः कुरुते भक्त्या मधुधेनुं नराधिप ! ।
दत्त्वा दानं यथोक्तेन मधुना च दिवं व्रजेत् ॥
ब्राह्मणोऽपि चिरात्तस्य मधुपायससंयुतम् ।
यत्रं कृते तु यत् पुण्यं तत्रिबोध नराधिप ! ॥
यत्र नद्यो मधुवहा यत्र पायसकर्द्दमाः ।

मधुपः

अथवो सुनयः विद्वाल्लोक गच्छन्ति येगुदाः ॥
तत्र भोगानथो भुक्त्वा ब्रह्मलोके च तिष्ठति ।
क्रीडित्वा सुचिरं कालं पुनर्मर्त्यानुपागतः ।
स शुक्रो विपुलान् भोगान् विष्णुलोकं स
गच्छति ॥
दशपूर्व्वान् दशपरानात्मानञ्चैकविंशतिम् ।
नयते विष्णुसायुज्यं मधुधेनुप्रसादनः ॥
य इदं शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ।
सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति ॥"
इत्यादि वराहपुराणे श्वेतोपाख्याने मधु-
धेनुमाहात्म्यम् ॥

मधुनारिकेलः, पुं, (मधुर्मधुरो नारिकेलः स्वार्थे कन् । रलयोरैक्यात् रस्य लत्वं लस्य च रत्वम् ।) मधुनारिकेलः । हरनारिकेल इति कोङ्कणे प्रसिद्धम् । मोदानारल इति च ख्यातम् । तत्-पर्य्यायः । माध्वीकफलः २ मधुफलः ३ अधि-रसफलः ४ माक्षिकफलः ५ स्वादुफलः ६ बहु-कूर्चः ७ दृढफलः ८ । अस्य गुणाः । मधु-रत्वम् । स्निग्धत्वम् । दाहश्लेष्मापित्तहारि-त्वम् । बलपुष्टिमेधाकान्तिकारित्वम् । वीर्य-विवर्द्धनत्वम् । कफत्वञ्च । अपि च ।
"माध्वीकं नारिकेलं फलमतिमधुरं दुर्जरं
अल्पुक्कारि
स्निग्धं वातातिसारभ्रमगुमनमथ ध्वंसनं
वह्निदीप्तेः ।
आमश्लेष्मप्रकोपं जनयति कुरुते पाण्डुकान्तिं
बलञ्च
श्लेष्मं हेतुस्य धत्ते घनमदनकलावर्द्धनं पित्त-
नाशम् ॥"
इति राजनिर्घण्टः ॥

मधुनी, स्त्री, क्षुपविशेषः । माकड़ छाला इति माकड़ चाउली इति च भाषा ॥ तत्पर्य्यायः । इक्षुमक्षा २ वायसोली ३ सुमङ्गला ४ । इति रत्नमाला ॥

मधुनेत्रा, [त्र] पुं, (मधु नयति पुष्पेभ्यः संग्रहा-तीति । नी + क्विप् ।) भ्रमरः । इति शब्द-चन्द्रिका ॥

मधुपः, पुं, (मधु पिबतीति । पा + कः ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, राजतर-ङ्गिण्याम् । ३ । ७०६ ।
"गम्भूतिमाचमासन्ने देवीधामनि धैर्य्यवान् ।
धुन्वन् करार्भ्यां मधुपान् धावति क्ष स धीरधीः ॥"
मधु जलं पातीति । पा + कः । वारिरक्षके, त्रि । यथा, ऋग्वेदे । ५ । ३२ । ८ ।
"अं चिदर्यो मधुपं ग्रयानमक्षिन्वं वत्रं मघा
दृतयः ।"
"मधुपं मधुनोऽम्भसः पातारं पालयितारम् ।"
इति तद्भाष्ये सायणः ॥ मधुपानकर्त्तरि च, त्रि । यथा, ऋग्वेदे । १ । २८० । २ ।
"सखा यद्वां विश्वगूर्त्तिर्ददाति वाजायेडे मधु-
पायिषे च ।" "हे मधुपौ मधुरस्य सोमरसस्य
पातारौ ।" इति तद्भाष्ये सायणः ॥)

मधुप

मधुपर्के, स्त्री, (मधु + घञ् । मधुना पर्को योगो-ऽच ।) दधिसंयुक्तमधु । तत्पर्य्यायः । महोदयः २ । इति हेमचन्द्रः । ३ । ४६७ ॥ अपि च ।
"मधुपर्कं दधिमधुघृतमपिहितं कांस्येनेति ।
अपिहितमाच्छादितम् ।" इत्येकादशीतत्त्वे-
कात्यायनसूत्रम् ॥

मधुपर्कः, पुं, (मधु + घञ् । मधुना पर्कः सम्पर्को यस्य मधुना संयोजनात् तथात्वम् ।) षोड़शोपचारपूजान्तर्गतषष्ठोपचारः । तस्य प्रमाणं यथा,—
"दधि सर्पिर्जलं क्षौद्रं सितेताभिस्तु पञ्चभिः ।
प्रीयते मधुपर्कस्तु सर्व्वदेवौघतुष्टये ॥
जलन्तु सर्व्वतः स्वल्पं सिता दधि घृतं समम् ।
सर्व्वेषामधिकं क्षौद्रं मधुपर्के प्रयोजयेत् ॥
तद्दद्यात् कांस्यपात्रेण रौक्मेणैतदभावे वा ।
ज्योतिष्टोमाप्तमेधादौ पूर्त्ते चैत्ये प्रपूजने ॥
मधुपर्कः प्रतिष्ठोऽयं सर्व्वदेवौघतुष्टिदः ।
धर्म्मार्थकाममोक्षाणां साधकः परिकीर्त्तितः ॥
मधुपर्कः सौख्यभोग्यतुष्टिपुष्टिप्रदायकः ॥"
इति कालिकापुराणे ६७ अध्यायः ॥
अपि च ।
"आज्यं दधिमधुमिश्रं मधुपर्कं विदुर्बुधाः ॥"
इति तत्त्वसारः ॥
तद्दाने मुद्रा यथा,—
"संयुक्तावामिकाङ्गुष्ठा निम्नोन्नताः संप्र-
सारिताः ।
मधुपर्के च सा मुद्रा विहिता परिकीर्त्तिता ॥"
इति हरिभक्तिविलासः ॥

मधुपर्णिका, स्त्री, (मधुरिव हितं पर्णमस्याः । ततः स्वार्थे कन् टाप् । अत इत्वञ्च ।) गम्भारीवृक्षः । (अस्याः पर्य्यायो यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मरी काश्मरी धीरा काश्मर्य्यः पीत-
रोहिणी ॥
क्षुद्रवृक्षा मधुरसा महाकुसुमिकापि च ॥")
नीलीवृक्षः । इत्यमरः । २ । ४ । ६५ ॥ (अस्याः पर्य्यायो यथा,—
"नीली तु नीलिनी तूली कालदोला च
नीलिका ।
रक्तनी श्रीफली तुङ्गा श्यामीला मधुपर्णिका ॥
क्षीलिका कालकेशी च नीलपुष्पा च सा
स्मृता ॥")
वराहक्रान्ता । इति शब्दचन्द्रिका । गुडूची । सुदर्शना । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते गारीरस्थाने १० अध्याये ।
"पृश्निपर्णी बलाग्नियुक्तदंष्ट्रा मधुपर्णिका ॥"
अस्याः पर्य्यायो यथा,—
"सुदर्शना सोमवल्ली चक्राङ्गा मधुपर्णिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मधुपर्णी, स्त्री, (मधु इव हितं पर्णं यस्याः । गौरादित्वात् ङीष् ।) गुडूची । रत्नमरः । २ । ४ । ८४ ॥ (अस्याः पर्य्यायो रत्नमालायां यथा,

मधुभित्

"वल्लादनी छिन्नरुहा मधुपर्य्यन्तरामरा ।
कुण्डल्यमृतवल्ली च गुडूची चक्रलक्षणा ॥")
गम्भारीवृक्षः । नीलीवृक्षः । इति मेदिनी । ने, १०५ ॥ मधुवीजपूरः । इति राजनिर्घण्टः ॥ (विकङ्कतवृक्षः । तत्पर्य्यायो यथा,—
"विकङ्कतः खादुकण्टः शृङ्गदारु मधुपर्य्यपि ॥"
इति वैद्यकरत्नमालायाम् ॥)

मधुपाका, स्त्री, (पाकेन मधुर्मधुरा । राजदन्ता-दित्वात् पूर्व्वनिपातः । टाप् ।) बहुभुजा । इति राजनिर्घण्टः ॥

मधुपायी, [न्] पुं,(मधु पिबतीति । पा + णिनिः । तत: "आतोयुक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) भ्रमरः । इत्यमरटीकायां रामा-श्रमः ॥ मधुपानकर्त्तरि, त्रि ॥

मधुपालिका, स्त्री, (मधु पालयतीति । पालि + ण्वुल् । टाप् । अत इत्वम् ।) गम्भारी । इति शब्दमाला ॥ (विषयोऽस्या गम्भारीशब्दे द्रष्टव्यः ॥)

मधुपीलुः, पुं, (मधुर्मधुरः पीलुः ।) महापीलुः । इति राजनिर्घण्टः ॥

मधुपुरी, स्त्री, (मधूक्तलक्षणो देशस्य पुरी ।) मथुरा । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ७ । १४ । ३१ ।
"नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली ।
वाराणसी मधुपुरी पम्पा बिन्दुसरस्तथा ॥")

मधुपुष्पः, पुं, (मधुप्रधानानि पुष्पाण्यस्य ।) मधु-द्रुमः । इति रत्नमाला ॥ (मधूकः । तत्पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
"मधूको गुडपुष्पः स्यान्मधुपुष्पो मधुद्रवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽथ मधूलकः ॥")
गिरीषवृक्षः । अशोकवृक्षः । वकुलवृक्षः । इति राजनिर्घण्टः ॥

मधुपुष्पा, स्त्री, (मधुपुष्प + स्त्रियां टाप् ।) दन्ती-वृक्षः । नागदन्तीवृक्षः । इति राजनिर्घण्टः ॥

मधुप्रियः, पुं, (मधु मद्यं प्रियमस्य ।) बलरामः । इति त्रिकाण्डशेषः ॥ भूमिलम्बु । यथा,—
"नादेयी स्त्री नागरङ्गस्तुक्सुगन्धो मधुप्रियः ॥"
इति जटाधरः ॥ (मद्यप्रिये, त्रि ॥)

मधुफरः, पुं, (मधु मधुरं फलमस्य । यद्वा, मधु मद्यं फलाद् यस्य ।) मधुनारिकेलः । इति राजनिर्घण्टः ॥ विकङ्कतवृक्षः । इति शब्द-चन्द्रिका ॥ (मधुरफलविशिष्टे, त्रि ॥)

मधुफलिका, स्त्री, (मधु मधुरं फलं यस्याः । मधुफल + संज्ञायां कन् । टाप् । अत इत्वञ्च ।) मधुस्वर्जूरिका । इति राजनिर्घण्टः ॥ (गुणा-दयोऽस्या मधुस्वर्जूरिकाशब्दे ज्ञातव्याः ॥)

मधुबकुला, स्त्री, (मधुना मद्येन वा बकुला ।) वासन्तीलता । इति राजनिर्घण्टः ॥

मधुभित्, [द्] पुं, (मधुं तन्नामानं दैत्यं भिनत्ति वाग्भयतीति । भिद् + क्विप् । तुमागमश्च ।) विष्णुः । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ४ । २६ । ७० ।

"तस्मिन् महत्सुखरिता मधुभिश्चरित्र-
पीयूषपूर्णसरित: परित: स्रवन्ति ॥")

मधुमक्षिका, स्त्री, (मधुस्वाधिका मक्षिका ।) कीटविशेष: । मौमाछी इति भाषा । तत्पर्य्याय: । सरघा २ । इत्यमर: । २ । ५ । २६॥

मधुमज्जा, [न्] पुं, (मधुर्मधुरो मज्जा यस्य ।) आखोटवृक्ष: । इति राजनिर्घण्ट: ॥

मधुमती, स्त्री, (मधुर्मधुररसोऽस्यास्तीति मतुप् । ङीप् ।) काश्मरीवृक्ष: । नदीविशेष: । तस्या जलगुणा: । यथा, राजनिर्घण्टे ।

"चन्द्रभागागुणसाम्यं जलं
किञ्च माधुर्यमस्यितीरजम् ॥"

उपास्त्रनायिकाविशेष: । यथा,—

"तथा मधुमती चिह्नं जायते नात्र संशय: ।
देवचेटी घृतघ्नं तस्य वश्या भवन्ति च ॥
स्वर्गे मर्त्ये च पाताले स यत्र गन्तुमिच्छति ।
तत्रैव चेटिका: सर्व्वा नयन्ति नात्र संशय: ॥"

इति डाकार्णवे ३ पटल: ॥

(छन्दोभेद: । अस्या लक्षणं यथा, छन्दोमञ्जर्य्याम् । २ । १ ।

"नजौ भजौ मधुमती ।" अधिकं छन्द:शब्दे द्रष्टव्यम् ॥ समाधिविशेषभेद: । यथा, सर्व्वदर्शनसंग्रहे पातञ्जलदर्शने । "तत्र मधुमती नामाभ्यासवैराग्यादिसहायादपास्तरजस्तमोमलेऽग्रहणस्वरूपप्रकाशमयसत्त्वभावपर्य्यन्तवत्त्वेऽग्राह्यविशेषनिरूपकतत्त्वभरप्रज्ञाख्या समाधिसिद्धि: ॥ गङ्गा । यथा, काशीखण्डे । २८ । १३३ ।

"महोदया मधुमती महापुण्या सुखाकरी ॥"

इक्ष्वाकुपुत्रहर्य्यश्वस्य भार्य्या सा च मधोर्दैत्यस्य सुता । यथा, हरिवंशे । ६३ । १२—१३ ।

"आसीद्राजा मनोर्वंशे श्रीमानिक्ष्वाकुसम्भव: ।
हर्य्यश्व इति विख्यातो महेन्द्रसमविक्रम: ॥
तस्यासीद्दयिता भार्य्या मधोर्दैत्यस्य वै सुता ।
देवी मधुमती नाम यदोरस्य प्रभो तथा ।"

मधुरसविशिष्टे, त्रि । यथा, ऋग्वेदे । ७।६८।३।

"ऊर्ध्वायग्रसायातमश्वावद्दत्तमिधिं मधुमन्तं
पिबाथ: ॥")

मधुमथन:, पुं, (मधुं तन्नामानं दैत्यं मथ्नातीति । मथ + ल्यु ।) विष्णु: । इति हलायुध: ॥ (यथा, भागवते । ६ । ८ । ३८ ।

"सर्व्वात्मनि निरतिशयं तमसस्तु कथमुभे वा एते मधुमथन ! पुन: स्वार्थकुशला स्वात्मप्रिय-सुहृद: साधवस्त्वच्चरणानुजावुपसेवां विरहयन्ति न यत्र पुनरयं संसारपर्य्यावर्त्त: ॥")

मधुमल्ली, स्त्री, (मधुप्रधाना मल्ली ।) मालती । इति शब्दमाला ॥

मधुमस्तक, क्ली, (मधुर्मधुररस: मस्तके उपरिभागे यस्य ।) पिष्टकविशेष: । यथा,—

"मधुनैलघृतैर्मध्ये वेष्टिता: सन्मितास्तु या: ।
मधुमस्तकसंज्ञिं तस्यास्यापरिमार्जनम् ।"

इति शब्दचन्द्रिका ॥

अस्य गुणा: पिष्टशब्दे द्रष्टव्या: ॥

मधुमाक्षीकं, क्ली, (मधु माधुर्य्ययुक्तं माक्षीकम् ।) मधम् । इत्यमरटीकायां भरत: ॥

मधुमारक:, पुं, (मधूनां मारक: । मधुकत्वात्तथात्वम् ।) भ्रमर: । इति राजनिर्घण्ट: ॥

मधुमूलं, क्ली, (मधु मधुरं मूलम् ।) आलुकम् । इति शब्दचन्द्रिका । भौ आलु इति भाषा ॥

मधुयष्टि:, स्त्री, (मधुर्मधुरा यष्टि: ।) इक्षु: । इति शब्दचन्द्रिका ॥

मधुयष्टिका, स्त्री, (मधुर्मधुरा यष्टि: । तत: कन् टाप् ।) यष्टिमधु । तत्पर्य्याय: । मधुकम् २ क्लीतकम् ३ यष्टिमधुका ४ । इत्यमर: । २ । ४ । १०६ ॥ मधुयष्टी ५ । इति भरत: ॥ (तथास्या: पर्य्यायान्तरम् ।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका ।
यष्टिमधु स्यात्ते जाता जलजातिरसा पुरा ॥"

इति वैद्यकरत्नमालायाम् ॥)

मधुयष्टी, स्त्री, (मधुयष्टि । ऋदिकारादिति पक्षे ङीष् ।) मधुयष्टिका । इति शब्दमाला ॥

मधुर, क्ली, (मधु + र: ।) वङ्गम् । इति राजनिर्घण्ट: ॥ विषम् । इति मेदिनी । रे, १८५ ॥ (वङ्गशब्दे विषशब्दे च विवरणमस्य ज्ञातव्यम् ॥)

मधुर:, पुं, (मधु माधुर्य्यं रातीति । रा + क: । यद्वा, मधुमाधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो र: ।" ५ । २ । १०७ । इति र: ।) मिष्टरस: । इत्यमर: । १ । ५ । ६ ॥ स च द्रव्यादौ लक्ष्यते । तत्पर्य्याय: । गौड्य: २ । इति राजनिर्घण्ट: ॥ रसज्येष्ठ: ३ गुरु: ४ स्वादु: ५ मधुलक: ६ । इति हेमचन्द्र: । ६।२४ ॥ तस्य गुणा: । प्रीणनत्वम् । बल्यत्वम् । दृंहणत्वम् । वायुपित्तनाशित्वम् । रसायनत्वम् । गुरुत्वम् । स्निग्धत्वम् । चक्षुष्यत्वम् । तर्पणत्वम् । सरत्वञ्च । अस्य च ।

"रसो मधुरक: स्नौमो धातुस्तन्यबलप्रद: ।
चक्षुष्यो बालपित्तघ्न: कृमिघ्न: स्थौल्यकफप्रद: ॥
सोऽतियुक्तो ज्वरश्वासगलगण्डादिरोगकृत् ॥"

इति राजवल्लभ: ॥

अपि च ।

"मधुरस्तु रसज्ञिनोति केशान्
वपुष: स्थैर्य्यबलौजोवीर्य्यदार्ढ्यं ।
अतिसेवनत: प्रमेहगौल्य-
जड़तामान्द्यसुखान् करोति दोषान् ॥"

इति राजनिर्घण्ट: ॥

(यथा च वाभटे सूत्रस्थाने दशमेऽध्याये ॥

"रसानामिति रूपाणि कर्म्माणि मधुरो रस: ।
आजन्मसात्म्यात् कुरुते धातूनां प्रबलं बलम् ।
बालवृद्धक्षतक्षीणवर्णकेन्द्रियौजसाम् ॥
प्रशस्तो दृंहणो वृष्यो बल्यस्तन्यास्रदृग्गुरु: ।
आयुष्यो जीवन: स्निग्ध: पित्तानिलविषापह: ॥
कुरुते त्वल्पयोगेन समेद:कफजान् मदान् ।
स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥"

अपिच ।

"तत्र मधुरो रस: शरीरबालाद्यवयवधिरमांसमेदोऽस्थिमज्जौज: शुक्राभिवर्द्धन आयुष्य: षड़-

न्द्रियप्रसादनो बलवर्णकर: पित्तविषमारुतक्षयतृष्णाप्रशमन: चक्षु: केश: कण्ठ्य: प्रीणनो जीवनस्तर्पण: स्नेहन: स्नेहकर: स्तन्यसन्धानकर: शुक्रशुक्लौजस्तेजोऽग्निप्रसादनो दाहमूर्च्छाप्रशमन: षट्पदपिपीलिकाभिरुपसृत: स्निग्ध: शीतो गुरुश्च ।

स एवंगुणोऽप्येक एवाल्पैरुपसृज्यमान: स्त्रीक्षीमार्द्रवमालस्यमतिस्वप्नं गौरवमनन्नाभिलाषमसहैर्विलम्बमास्यकण्ठमांसाभिवृद्धिं श्वासकासप्रतिश्यायालसकगलगण्डस्वरोपघातमाधुर्य्यवमथुसंज्ञास्वरप्रणाशगलगण्डमालार्शीपदश्लीपवल्मीकधमनीगुदोपलेपाश्मानभिष्यन्दित्वेषप्रभृतीन् कफजान् विकारानुपजनयति ।

"स्नेहमप्रीणनाज्जादमार्द्रवैरुपजन्यते ।
सुखस्यो मधुरश्चास्यं आप्लुवँल्लिख्यतीव च ॥"

इति चरके सूत्रस्थाने २५ अध्याये ॥)

जीवक: । रक्तशिग्रु: । राजाम्र: । रक्तेक्षु: । गुड़: । प्रालि: । इति च राजनिर्घण्ट: ॥ (बीजपूरविशेष: । तत्पर्य्यायो यथा,—

"बीजपूरो मधुर: प्रोक्तो मधुरो मधुकर्कटी ।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ स्कन्दस्यसैनिकभेद: । यथा महाभारते । ६ । ६५ । ६८ ।

"मधुर: सुप्रसादश्च किरीटी च महाबल: ॥")

मधुर:, त्रि, (मधु माधुर्य्यमस्यास्तीति । "ऊषसुषिमुष्कमधो र: ।" ५ । २ । १०७ । इति र: ।) मधुररसविशिष्ट: । स्वादु: । (यथा, हितोपदेशे । १ । ७८ ।

"न धर्म्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मन: ।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पय: ॥")

प्रिय: । इति मेदिनी । रे, १८५ । पारिभाषिकमधुरादि यथा । विरुद्धोक्ति: । प्रियाधरकृष्णादि: । प्रभु: । स्त्रिय: । वाक्योक्ति: । इति कविकल्पलता ॥

मधुरक:, पुं, (मधुर + संज्ञायां कन् ।) जीवकवृक्ष: । इत्यमर: । २ । ४ । १४२ ॥ (यथा, सुश्रुते चिकित्सितस्थाने ४ अध्याये ।

"विषघ्नं मधुरकपटोलपत्रम् ॥")

मधुरकण्टका, स्त्री, (मधुरा: कण्टका यस्या: ।) मनस्यविशेष: । तत्पर्य्याय: । कञ्जली २ कञ्जला ३ अनन्ता ४ माध्वी ५ । इति शब्दरत्नावली ॥

मधुरजम्बीर:, पुं, (मधुरो जम्बीर: । मित्यकर्म्मधारय: ।) मधुजम्बीर: । तत्पर्य्याय: । मधुजम्ब: २ मधुजम्बज: ३ रसज्ञाबी ४ ग्रन्थिरक: ५ मिश्रशाखी ६ । अस्य गुणा: । मधुरत्वम् । स्निग्धत्वम् । कफपित्तशोषश्रमनाशित्वञ्च । इति राजनिर्घण्ट: ॥

मधुरत्रय:, पुं, (मधुरा त्रया यस्य ।) त्रयस्था: । इति त्रिकाण्डशेष: ॥ (गुडादयोऽस्य शब्दशब्दे ज्ञातव्या: ॥)

मधुरत्रयं, क्ली, (मधुराणां त्रयम् ।) त्रिफला माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, (मधुरा त्रिफला ।) द्राक्षा-खर्जूरकाश्मर्यफलं खर्जूरीफलञ्च । इति राजनिर्घण्टः ॥

मधुरत्रिवला, स्त्री, (मधुरो त्रिवलो यस्याः ।) मधुरत्रययुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः, पुं, (मधुरं फलमस्य ।) राजबदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, (मधुरा वल्लीति नित्यकर्म्मधारयः ।) मधुवीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, (मधुर्मधुरो रसोऽस्य ।) इक्षुः । इति शब्दमाला ॥ तालः । इति राजनिर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४। ८३ ॥ (अस्याः पर्य्यायो यथा,

"तेजनी पिलुनी देवी तिक्तवल्ली पृथक्त्वचा ।
मधुश्रेणी मधुरसा मूर्व्वा निर्हरणीति च ॥"

इति वैद्यकरत्नमालायाम् ॥

"मूर्व्वा मधुरसा देवी मोरटा तेजनी मुरा ।
मधुलिका मधुश्रेणी गोकर्णी पीलुपर्णिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

द्राक्षा ॥ (तत्पर्य्यायो यथा,—

"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
गोस्तनी हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरसना, स्त्री, (मधुरस्य मधुररसस्य रसो यस्याः ।) पिङ्गलवर्ण्णरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, (मधुर + टाप् ।) घृतपुष्पा । (अस्याः पर्य्यायो यथा,—

"घृतपुष्पा घृताङ्गा च मधुरा कारवी मिसिः ।
अतिजम्बी सिमक्षुच्या संहिता क्षुधिकापि च ।
क्षुद्रा घृतेयघ्राणौजौ मिश्रेया मधुरा मिसिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) मिश्रेया । मथुरानगरी । मधुकर्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १८७ ॥ काकोली । घृतावरी । हंसपदी । पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

मधुराम्लकः, पुं, (मधुरश्चासौ अम्लश्चेति नित्यकर्म्मधारयः । ततः स्वार्थे कन् ।) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्लफलः, पुं, (मधुरं मिष्टं आम्लवत् फलं यस्य ।) रेवतः । तत्पर्य्यायः । आरः २ । इति राजमाला ॥

मधुरालापा, स्त्री, (मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः ।) शारिका । इति राजनिर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलाबू + वाहुलकात् नङ् । एषोदरादित्वात् ङीष् च । ततः मधुरा चासौ अलाबुनी चेति विशेषकर्म्मधारयः ।) राजालाबुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर + स्वार्थे कन् + स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । ग्रावेयः २ घृतग्रिवः ३ क्षुद्रा ४ मिश्री ५ मिश्रेया ६ । इत्यमरः । २।४।२०५ ॥ सावेयः ७ मिसिः ८ मिसी ९ मिश्रिः १० । इति तट्टीका ॥ अवाक्पुष्पी ११ मद्गुरा १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्रकारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, (मधोरसुरविशेषस्य रिपुर्नाशकत्वात् ।) विष्णुः । इत्यमरः । १ । १ । २० ॥ (यथा गीतगोविन्दे । २ । ६ ।

"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपु-रूपम् ॥)

मधुरेणुः, पुं, (मधुर्मधुरो रेणुरस्य ।) कटभीवृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, (मधुराणि उदकानि यस्य ।) क्षीरसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः मन्दसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला + कः ।) मद्यम् । इति शब्दचन्द्रिका ॥ (निर्विषीकरण्यां मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । १६२ । १० ।

"सोचिन्नु नमरातिनो वयं मरामारे
अस्य योजनं हरिणामधुत्वामधुला चकार ॥"

"हे विध ! त्वा त्वां मधु अन्नं चकार विषस्य विषभावं दूरात्परोक्षान्नीचकारेति यथेव मधुला मधुदात्री निर्विषीकरणी मधुविद्या यद्वत्तदादित्यस्य मण्डले विषयोजनं तेन चान्नीकरणं यदस्ति यथा मधुविद्या ॥" इति तद्भाष्ये सायणः ॥)

मधुलसः, पुं, (मधुर्मधुररसो लसोऽत्र ।) रक्तशोभाञ्जनः । इति रत्नमाला ॥

मधुलता स्त्री, (मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः ।) मृलीलतम् । इति राजनिर्घण्टः ॥

मधुलिका, स्त्री, (मधुल + संज्ञायां कन् । टाप् अत इत्वञ्च ।) राजिका । इति राजनिर्घण्टः ॥ (विकृतिरस्या राजिका शब्दे ज्ञातव्या । स्वल्पानुचरमाल्लगजविशेषः । यथा, महाभारते । ८ । ४६ । १६ ।

"एथुवक्त्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ड्] पुं, (मधु लेढि आस्वादयतीति । लिह् + क्विप् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, रघुवंशे । ६ । २६ ।

"मधुलिड्भां मधुरामविशारदा
कुरवका रवकारवतां ययुः ॥")

मधुलेढी, [न्] पुं, (मधु लेढीति । मधु + लिह् + णिनिः ।) भ्रमरः । इति शब्दरत्नावली ॥

(यथा, भट्टिकाव्ये । २ । ७ ।

"दत्तावधानं मधुलेढिगीतौ
प्रणाल्यचेष्टं हरिणं जिघांसुः ॥")

मधुलोलुपः, पुं, (मधुनि लोलुपः ।) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, (मधुना तन्नाम्ना देवेन ज्ञातं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुरायाः वनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।

"तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"

(मधुप्रधानं वनमिति ।) किष्किन्धायां सुग्रीवस्य वनविशेषः । इति रामायणे किष्किन्धाकाण्डम् ॥ (यथा, महाभारते । ३ । २८१ । २७ ।

"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत् ।
त्वया च प्लवगश्रेष्ठ ! तद्भुक्तं पवनात्मज ! ॥")

मधुवनः, पुं, (मधौ वनति शब्दायते इति । वन + अच् ।) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, (मधुप्रधाना वल्ली ।) यष्टीमधु । क्लीतनकम् । इति राजनिर्घण्टः ॥ (कारवेल्लकम् । तत्पर्य्यायो यथा,—

"तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

मधुवारः, पुं, (मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः । २ । ४ । ४१ ॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टीकायां भरतः ॥

मधुवीजः, पुं, (मधु मधुरं वीजं यस्य ।) दाडिमः । इति राजनिर्घण्टः ॥ (गुणादिविवरणमस्य दाडिमशब्दे द्रष्टव्यम् ॥)

मधुवीजपूरः, पुं, (मधूनां मधुपूर्णानां वीजानां पूरः समूहो यत्र ।) मधुककर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरककर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वर्द्धमाना ८ । अस्य गुणाः । मधुरत्वम् । ग्रिग्धिरत्वम् । दाहनाशित्वम् । चिरदोषघ्नत्वम् । रुच्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, (मधु मधुसञ्चयो व्रतं व्रतमिव सततानुष्ठीयमानोऽयं यस्य । यद्वा, मधु व्रतयति वियतं सृजति इति । व्रति + अच् ।) भ्रमरः । इत्यमरः । २ । ५ । २६ ॥ (यथा, भागवते । ३ । २८ । २८ ।

"मालां मधुव्रतवरूथगिरोपघुष्टाम् ॥"

मधवर्थं व्रतं कर्म्म यस्य । उदकार्थकर्म्मणि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।

"मधुनो द्यावापृथिवी मिमिक्षतां मधुच्युता मधुदुघे मधुव्रते ॥"

"मधुव्रते उदकार्थकर्म्मणी ।" इति तद्भाष्ये सायणः ॥)

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजातशर्करा । सिताखण्ड इति भाषा ॥ यथा,—

मधुसू

"माक्षी क्षिता मधूत्पन्ना मधुजा मधुशर्करा।
माक्षीकशर्करा चैवा क्षौद्रजा क्षौद्रशर्करा॥
यद्गुणं यन्मधु प्रोक्तं तद्गुणा तस्य शर्करा।
विशेषाद्वातहृच्छ्वा च तर्पणं क्षौद्रदेहिनाम्॥"
इति राजनिर्घण्टः॥
("मधुशर्करा पुनर्मधुरतीक्ष्णोष्णवीर्यहरी रूक्षाहृद्यनी प्रज्ञादयनी कषायमधुरा मधुरविपाका च।"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये॥)

मधुश्राखः, पुं, (मधुमांसुर्यंयुक्ता श्राखा यस्य।) मधुष्ठीलः। इति शब्दचन्द्रिका॥ (मधुरश्राखाविशिष्टे, त्रि। यथा, वाजसनेयसंहितायाम्। २८। २०। "मधुश्राखः सुपिप्पलः।"
"मधुरा रसवती श्राखा यस्य।"
इति तद्भाष्ये महीधरः॥)

मधुश्रियुः पुं, (मधुप्रधानः श्रियुः।) रक्तश्रोभाञ्जनवृक्षः। इत्यमरः। २। ४। ३१॥ (श्रजिना। इति ख्यातः। यथा, सुश्रुते।१।३७। "वरुणार्जुनशिरीषश्रियुमधुश्रियुतर्कारीत्यादि।"
तत्पर्य्यायो यथा,—
"सुरङ्गा खादुगन्धा स्याच्छुधुश्रियुः श्रोभाञ्जनः॥"
इति वैद्यकरत्नमालायाम्॥
तद्गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"मधुश्रियुः सरक्तिकः श्रोषघ्नो दीपनः कटुः।")

मधुश्रेयं, क्लो, (मधुनः श्रेयो यत्र।) श्रिक्थकम्। इति राजनिर्घण्टः॥

मधुश्रेणी, स्त्री, (मधूनां मधुररसानां श्रेणिर्यत्र।) मृद्वी। इत्यमरः। २।४।८४॥ (अस्याः पर्य्यायो यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"मृद्वी मधुरसा देवी मोरटा तेजनी सुना।
मधुलिका मधुश्रेणी गोकर्णी पीलुपर्णयपि॥")

मधुश्राखा, स्त्री, (मधुमेधुरः श्राखोऽस्यात्।) जीवन्तीलता। इति राजनिर्घण्टः॥ (विवरणमस्या जीवन्तीशब्दे ज्ञातव्यम्॥)

मधुष्ठीलः, पुं, (मधु मकरन्दं ष्ठीवति निःक्षिपतीति। ष्ठीव्+इगुपधत्वात् कः। पृषोदरादित्वाद्वस्य लत्वम्।) मधूकवृक्षः। इत्यमरः। २। ४। २८॥ (अस्य पर्य्यायो यथा,—
"मधूको गुडपुष्पः स्याच्छुधुष्पो मधुद्रुमः।
वानप्रस्थो मधुष्ठीलो जलजश्च मधूलकः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मधुसखः, पुं, (मधोर्वसन्तस्य सखा इति। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कामदेवः। इति हलायुधः॥

मधुसारथिः, पुं, (मधुर्वसन्तः सारथिर्यस्य।) कामदेवः। इति त्रिकाण्डशेषः॥

मधुसिक्थकः, पुं, (सिञ्चतीति सिचेः स्वुक्। स्वार्थे कन् मधु मधुमयं सिक्थकं यस्य।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६४॥

मधुसूदनः, [न्] पुं, (मधोर्वसन्तस्य सूदनः।) कामदेवः। इति केचित्॥

मधुसूदनः, पुं, (मधु पुष्परसं सूदयति भक्षयतीति। सूद्+णिच्+ल्युः।) भ्रमरः। इति

मधुस्रा

जटाधरः॥ (मधुं तन्नामानं असुरं सूदयति गाद्ययतीति। सूद्+णिच्+ल्युः।) श्रीकृष्णः। इत्यमरटीकायां भरतः॥ (पद्यद्वये एकः श्लिष्टश्लोको यथा, छन्दोमञ्जर्य्याम्। १९। १।
"वनेषु कृत्वा सुरभिप्रचारं
प्रकामसुप्तो मधुवासरेषु।
गायन् कलं क्रीडति पद्मिनीषु
मधूनि पीत्वा मधुसूदनोऽसौ॥")
श्रीकृष्णपक्षे व्युत्पत्तिर्यथा,—
"सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः।
इति सन्तो वदन्त्येनं वेदैर्भिन्नार्थमीप्सितम्॥
मधु क्लीवञ्च माध्वीके कृतकर्म्मशुभाशुभे।
भक्तानां कर्म्मणाञ्चैव सूदनं मधुसूदनः॥
परित्यागाशुभं कर्म्म भक्तानां मधुरं मधु।
करोति सूदनं यो हि स एव मधुसूदनः॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११०अध्यायः॥
तस्य स्तवफलम्।
"महाविपत्तौ संसारे यः स्तवेन्मधुसूदनम्।
विपत्तौ तस्य सम्पत्तिर्भवेदित्याह शङ्करः॥"
तत्रैव प्रकृतिखण्डे १४ अध्यायः॥
(स्तवस्तुपनामकः कविविशेषः। यथा, श्रीमद्भगवद्गीताटीकायाम्। "व्याख्यातं भगवत्पदैः प्रतिपदं श्रीशङ्कराख्यैः पुनर्व्विस्पष्टं मधुसूदनेन सुधिया स्वज्ञानसिद्ध्यै कृतम्॥" अयं हि अद्वैतसिद्धिप्रस्थानभेदभगवद्गीताटीकामहिम्नस्तवटीकासिद्धान्तबिन्दुटीकाद्यनेकग्रन्थकर्त्ता॥)

मधुसूदनी, स्त्री, (मधु सूदयतीति। मधु+सूद्+णिच्+ल्युः। स्त्रियां ङीप्।) पालङ्क्यशाकम्। इति हेमचन्द्रः। ४। २५२॥

मधुस्रवः, पुं, (मधूनां मकरन्दानां स्रवः क्षरणं यस्मादिति।) मधूकवृक्षः। मोरटलता। इति राजनिर्घण्टः॥

मधुस्रवा, स्त्री, (मधुनः स्रवो यस्याः।) मधुयष्टिका। इति जटाधरः॥ जीवन्ती। इति शब्दचन्द्रिका॥
(अस्याः पर्य्यायो यथा,—
"जीवन्ती जीवनी जीवा जीवन्तीया मधुस्रवा।
मधुरस्कन्धनामधेया च शाकश्रेष्ठा पयस्विनी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
स्त्री। हंसपदी। इति राजनिर्घण्टः॥

मधुस्रवाः, [स्] पुं, (मधुनि स्रवति निःक्षिपतीति। स्रु+कर्त्तरि असुन्।) मधूकवृक्षः। इति जटाधरः॥

मधुस्वरः, पुं, (मधुरमनोहरः स्वरो ध्वनिर्यस्य।) कोकिलः। इति शब्दरत्नावली॥

मधुहा, [न्] पुं, (मधुं तन्नामानमसुरं हन्तीति। हन्+क्विप्।) विष्णुः। इति हेमचन्द्रः॥ (मधु हन्तीति। हन्+क्विप्। मधुनाशके, त्रि। यथा, महाभारते। ३। ३३। ६८।
"सर्व्वथा संहतैरेव दुर्ब्बलैर्बलवानपि।
अमित्रः शक्यते हन्तुं मधुहा भ्रमरैरिव॥"

मधूत्थ

प्रसङ्गजातिप्राणिविशेषः॥ यथा,—
"शुक्लौ भासकुररयधोलूककुलिङ्गकाः।
धूमिका मधुहा चेति प्रसहा जगतश्चिषः॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

मधूकं, क्लो, (मद्यतीति। मद्+"जलूकादयश्च।" उणा० ३। ३१। इति ऊकप्रत्ययो निपातितश्च।) वृक्षविशेषः। महुल इति मौल इति महुया इति च भाषा॥ तत्पर्य्यायः। गुडपुष्पः २ मधुद्रुमः ३ वानप्रस्थः ४ मधुष्ठीलः ५। इत्यमरः। २। ४। २८॥ मधुकः ६ मधुः ७ मधुपुष्पः ८। इति शब्दरत्नावली॥ मधुस्रवः ९। इति जटाधरः॥ मधुपुष्पः १० रोधपुष्पः ११ माधवः १२। (यथा, महाभारते। १५। २५। ११।
"चिबाङ्गदा चैव नरेश्वरस्य
यैषा सवर्ण्यामधुकपुष्पवर्णे॥")
अस्य गुणाः। मधुरत्वम्। शीतत्वम्। पित्तदाहश्रमापहत्वम्। वातलत्वम्। अल्पदोषघ्नत्वम्। वीर्य्यपुष्टिविवर्द्धनत्वञ्च। अस्य पुष्पगुणाः। मधुरत्वम्। स्निग्धत्वम्। हिमत्वम्। पित्तविदाहकारित्वञ्च। अस्य फलगुणाः। वातामयपित्तनाशित्वम्। श्रेयं मधूकहयमेधमेतत्। इति राजनिर्घण्टः॥ अपि च।
"मधूकपुष्पं मधुरं शीतलं गुरु दृंहणम्।
बलशुक्रकरं प्रोक्तं वातपित्तविनाशनम्॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तजित्।
अस्रघ्नं हृद्यं हन्याद्दाहश्वासक्षत-
क्षयान्॥"
इति भावप्रकाशः॥
अपरञ्च।
"मधूकपुष्पस्वाद्वम्लं तर्पणं दृंहणं परम्।
मधूकस्य फलं पक्वं वातपित्तप्रणाशनम्॥"
तच्छुष्कगुणाज्जनफलगुणवत्। यथा,—
"यस्य यस्य फलस्यैव वीर्य्यं भवति याद्दशम्।
तस्य तस्यैव वीर्य्यञ्च मज्ञानमभिनिर्द्दिशेत्॥"
तस्य त्वग्गुणाः।
"मधूकं रक्तपित्तघ्नं व्रणशोधनरोपणम्॥"
इति राजवल्लभः॥

मधूच्छिष्टं, क्लो, (मधुनः उच्छिष्टमवशिष्टम्।) मधूवशिष्टम्। मोम इति भाषा॥ (यथा, हरिवंशे भविष्यपर्व्वणि भाषायाम्। १६। २५।
"श्रीवेष्टकमोसीतगरकुङ्कुमसैन्धवादिवस्तूनाम्।
मधुररसमधूच्छिष्टानि चोरकर्क्षेति जीवस्य॥")
तत्पर्य्यायः। सिक्थकम् २। इत्यमरः। २। ९। १०७॥ श्लिक्थकम् ३ श्लिक्थम् ४। इति शब्दरत्नावली॥

मधूत्थितं, क्लो, (मधुनः उत्थितम्।) सिक्थकम्। इति राजनिर्घण्टः॥

मधू

मधूद्भवः, पुं, (मधोर्चैत्रस्य उद्भवो यत्र ।) चैत्री पूर्णिमा । इति जटाधरः ॥ (यथाभिज्ञान-शाकुन्तले । ६ ।
"वत्सुको । प्रविश्य । वञ्चोधम् । मा तावदनालप्ते ! देवेन प्रतिषिद्धोऽपि मधूद्भवे चूत-कलिकाभङ्गमारभते ॥")

मधूपपन्नं, क्ली, (मधोरुत्पन्नाद्यो देवस्य उपपन्नः आश्रयः । अभिधावात् क्लीवत्वम् ।) मथुरा । इति हेमचन्द्रः । ४ । ४४ ॥

मधूपपन्नः, पुं, (मधोरुत्पन्नाद्यो देवस्य उपपन्नः आश्रयः ।) मथुरा । इति जटाधरः ॥ (यथा, रघुवंशे । १५ । १५ ।
"स च प्राप मधूपपन्नं कुम्भीनसाख्यं कुधिजः । यमात् करमिवादाय सलराशिमुपस्थितः ॥")

मधूलः, पुं, (मधु उरति प्राप्नोतीति । मधु + उर गतौ औणादिकः + कः । रस्य लत्वम् ।) जलजगिरिजमधूकवृक्षौ । इति जटाधरः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"गौरपुष्पो मधूलोऽन्यो गिरिजः स्वल्प-पत्रकः ॥")

मधूलकः, पुं, (मधूल + स्वार्थे कन् ।) जलज-मधूकवृक्षः । तत्पर्य्यायः । दीर्घपत्रकः २ । इति जटाधरः ॥ गौरपुष्पः ३ मधूलः ४ स्वल्प-पत्रकः ५ । इति रत्नमाला ॥
"स्याज्जधूके तु जलजे गिरिजेऽपि मधूलकः ॥"
इति शब्दरत्नावली ॥
(पर्य्यायान्तरस्य यथा,—
"मधूको गुडपुष्पः स्याज्जधुपुष्पो मधूलवः ।
वानप्रस्थो मधुष्ठीलो जलजेऽच मधूलकः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
अस्य गुणाः । मधूकगुणतुल्याः । मधुररसः । इति हेमचन्द्रः ।६।२४॥ (क्लीवलिङ्गेऽपि दृश्यते । यथा, अथर्ववेदे । १ । ३४ । २ ।
"जिह्वाया अग्रे मधु मे जिह्वामूले मधूलकम् ॥")
तद्वति, त्रि ॥

मधूलिका, स्त्री, (मधूल + कन् । स्त्रियां टाप् अत इत्वञ्च ।) मूर्व्वा । इत्यमरः । २।४ । ८४ ॥ (अस्याः पर्य्यायो यथा,—
"मूर्व्वा मधुरसा देवी मोरटा तेजनी खुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्य्यपि ॥"
यष्टीमधु । तत्पर्य्यायो यथा,—
"यष्टीमधु तथा यष्टी मधुकं क्लीतकन्तथा ।
अन्यत्क्लीतनकन्तत्तु भवेत्तोये मधूलिका ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

मधूली, स्त्री, (मधूल + गौरादित्वात् ङीष् ।) क्लीतनकम् । मधुकवृक्षः । आम्रः । इति राज-निर्घण्टः ॥

मध्यं, क्ली, (मध्यते इति । मन् + "अन्नादयश्च ।" उणा० ४।१२१। इति यक्प्रत्ययेन निपातितः ।) दशाब्धिसंख्या । घृतसागरसंख्या । इति हेम-चन्द्रः ॥ (यथा, महाभारते । २ । ६१ । ४ ।
"मध्यञ्चैव परार्द्धञ्च वयश्चाग्र्य पयस्विनाम् ॥")

मधदे

अवसानम् । तत्पर्य्यायः । विरामः २ । इति त्रिकाण्डशेषः ॥ मन्दस्वरौचित्यभवेतरत्वयुक्त-वृत्त्यविषयकत्वमनविशेषः । इति भरतः ॥ लय-विशेषः । इति मधुः ॥ मध्यमाङ्गुलिः । इति वाक्षः ॥ यथा, अमरे । २ । ६ । ७६ ।
"विलम्बितं द्रुतं मध्यं तत्त्रयमोघो घनं क्रमात् ॥"

मध्यः, पुं, क्ली, (मन् + यक् । नस्य च धः ।) देह-मध्यभागः । माजा इति भाषा ॥ तत्पर्य्यायः । मध्यमम् २ अवलग्नम् ३ । इत्यमरः । २ । ६ । ७६ ॥ विलग्नम् ४ । इति मेदिनी । मे, ४४ ॥ (यथा,भट्टिकाव्ये । ३ । १६ ।
"दधाना बलिभं मध्यं कर्णजाहविलोचना ॥"
मध्यभागमात्रम् । यथा, मनुः । ४ । ३७ ।
"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ॥"
"आयुष्कालस्य मध्यमावस्थाविशेषः कालः । षोड़शसप्तत्योरन्तरे मध्यं वयस्तस्य विक्रमो वृद्धिर्यौवनं सम्पूर्णता हानिरिति । तच्चाविंशतेर्वृद्धिराविंशतो यौवनमाचत्वारिंशतः सर्व-धात्विन्द्रियबलवीर्यसम्पूर्णता । अत ऊर्द्धमीषत् परिहानिर्यावत् सप्ततिरिति ॥" इति सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यः, पुं, (मन् + यक् । नस्य धः ।) ग्रहस्फुट-साधकाङ्कविशेषः । स च अहर्गणजातदेशा-न्तरादिसंस्काररहिताङ्करूपग्रहः । इति ज्योतिषम् ॥

मध्यः, त्रि, (मन्यते इति । मन् + यक् । नस्य च धः ।) न्यायः । अन्तरः । अधमः । इति शब्दरत्नावली ॥ मध्यमः । यथा,—
"उत्तमाधममध्यानि बुद्ध्वा कार्य्याणि पार्थिवः ।
उत्तमाधममध्येषु पुरुषेषु नियोजयेत् ॥"
इति मात्स्ये ८६ अध्यायः ॥

मध्यगन्धः, पुं, (मध्ये फलाभ्यन्तरे गन्धोऽस्य ।) आम्रवृक्षः । इति शब्दचन्द्रिका ॥

मध्यतः, [स्] अ, (मध्य + तसिल् ।) मध्यात् । मध्ये । इति सिद्धान्तकौमुदी ॥ स्यादेः स्यात्तसादयो ये आदेशास्तेषामदन्तत्वमव्ययत्व-मिति प्राचः । तेन कुतः कुतः आगतं कौत-स्कुतम् । इत्यत्राव्ययत्वात् टिलोपः । इति दुर्गा-दासः ॥

मध्यदेशः, पुं, (मध्यश्चासौ देशश्चेति ।) देश-विशेषः । तत्पर्य्यायः । मध्यमः २ । इत्यमरः ॥ तस्य सीमा यथा, मनुः । २ । २१ ।
"हिमवद्विन्ध्ययोर्मध्यं यत् प्राग्विनशनादपि ।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्त्तितः ॥"
विनशनं तीर्थभेदः । मां धावति क्षरतीति क्षेवति मद्यो दकारवानिति साधुः । मनो धश्चेति यप्रत्यये नस्य धे सति चतुर्थमाचवा-नति रूपसाधकः । इति तट्टीकायां भरतः ॥

मध्यदेशजः, त्रि, (मध्यदेशे भवः इति यत् ।) मध्यदेशोद्भवः । यथा, वामनपुराणे १३ अः ॥
"शुकाश्चैव सशब्दाश्च मध्यदेशा जनास्त्विमे ॥"

मध्यमः

मध्यन्दिनः, पुं, (दिनस्य मध्यं राजदन्तादित्वात् मध्यशब्दस्य पूर्वनिपातः । पृषोदरादित्वात् नकारागमः । मध्यन्दिनं पुष्पविकासकालेनाश्नोति । अच् ।) वन्धूकवृक्षः । इति राज-निर्घण्टः ॥ (मध्याह्ने, क्ली, यथा, मनुः ।३।२७६।
"मध्यन्दिनेऽर्द्धरात्रे च आद्धं श्रद्धा च यामि-यम् ॥")

मध्यपत्रमूलकं, क्ली, (मध्यं मध्यमं पत्रमूलकम् ।) पत्रमूलपाचनविशेषः । यथा,—
"बला पुनर्नवैरण्डशूर्पपर्णीद्वयेन तु ।
एकत्र योजितैरेव स्याज्जधं पत्रमूलकम् ॥"
इति राजनिर्घण्टः ॥

मध्यमं, पुं, क्ली, (मध्ये भवः । मध्य + "मध्याज्जः ।" ४ । ३ । ८ । इति मः ।) देहमध्यभागः । इत्य-मरः । २ । ६ । ७६ ॥

मध्यमः, पुं, (मध्ये भवः । मध्य + मः ।) सप्त-स्वराणां मध्ये पञ्चमस्वरः । इत्यमरः ।१।७।२ ॥ गानशास्त्रमते चतुर्थस्वरः । स तु क्रौञ्चस्वर-तुल्यः । अस्योच्चारणस्थानं वक्षः । आकरग्रन्थमते अधरः । अयं विप्रवर्णः । अस्य संज्ञा अमरः । अर्थात्चतुःस्वरमिलितः । तस्य तानाः चतुर्विंशतिः तेषां प्रत्येकं द्वाविंशद्भेदेन ७६८ तानाः भवन्ति । इति संगीतशास्त्रम् ॥ उपपति-भेदः । तस्य लक्षणम् । प्रियायाः प्रकोपे यः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनो-भावं ददाति स मध्यमः । यथा,—
"आस्यं यद्यपि हास्यवर्जितमिदं जास्येन हीनं वचो
नेत्रे प्रोञ्छसरोजकान्तिरुचिरे द्वापि शुभ्रं स्रवते ।
मालायाः करजोद्गमे मकरिकारन्ध्राः कुचा-ज्जोजयो-
र्धूपः कुन्तलधोरणीषु सुतनोः सायन्तनो दृश्यते ॥"
इति रसमञ्जरी ॥

मध्यदेशः । इत्यमरः ॥ यद्यपां सामयिक-संज्ञाविशेषः । यथा,—
"त्रुटरचक्रहतो दिनसञ्चयः
क्व नु हतो भगणादिफलं यदः ।
दशशिरःपुरमध्यमभास्करे
क्षितिजसन्निधिगे सति मध्यमः ॥"
इति सिद्धान्तशिरोमणिः ॥

रागभेदः । रागभेदः । इति धरणिः ॥

मध्यमः, त्रि, (मध्ये भवः । मध्य + "मध्याज्ञः ।४। ३ । ८ । इति मः ।) मध्यभवः । इति मेदिनी । मे, ४६ ॥ (यथा, मनौ । ६ । ११२ ।
"ततोऽर्द्धं मध्यमस्य स्यात् तुरीयन्तु यवीयसः ॥")
तत्पर्य्यायः । माध्यमम् २ मध्यमीयम् ३ माध्यन्दिनम् ४ । इति हेमचन्द्रः ॥ (वयोमध्य-समयः ।
"वयश्चतुर्विधं प्रोक्तं मध्यमाधममुत्तमम् ।
क्षीणञ्च हारीत ऊचे तानि वक्ष्यामि साम्प्रतम् ॥

पथिश्रान्तः श्रमक्षीणः बालश्रीः सुकुमारकः ।
एतेषां मध्यमा संज्ञा प्रोच्यते वैद्यकागमे ।
मध्यमः सम्प्रतिं यावत् परतो वृद्ध उच्यते ॥"

इति भावप्रकाशे प्रथमे खण्डे पञ्चमेऽध्याये ॥

"बाले विवर्द्धते श्लेष्मा मध्ये पित्तमेव तु ।
भूयिष्ठं वर्द्धते वायुर्वृद्धे तद्वीक्ष्य योजयेत् ॥"

इति च सुश्रुते सूत्रस्थाने ३५ अध्याये ॥)

मध्यमपाण्डवः, पुं, (मध्यमश्चासौ पाण्डवश्चेति । तस्य पूर्व्वापरयोर्द्वयोर्द्वयोर्मध्यवर्त्तित्वात्तथात्वम् ।) अर्জ্জুनः । इति जटाधरः ॥ (यथा, किरातार्জ্জुनीये । १ । ४६ । श्लोकस्य टीकायां मल्लिनाथः ।

"तेता मध्यमपाण्डवो भगवतो नारायणस्यांशजः ॥")

मध्यमलोकः, पुं, (मध्यमश्चासौ लोकश्चेति कर्म्मधारयः ।) पृथिवी । इति त्रिकाण्डशेषः ॥ (यथा, रघुः । २ । १६ ।

"तां देवता पित्रतिथिक्रियार्था-
मन्वक् ययौ मध्यमलोकपालः ॥"

"मध्यमलोकपालः भूपालः ।" इति तट्टीकायां मल्लिनाथः ॥)

मध्यमशृतकः, पुं, (मध्यमश्चासौ शृतकश्चेति ।) क्षुद्रौषधबलशृतकः । क्षुधाज इति भाषा ॥ यथा,—

"उत्तमश्चायुर्धीयोज्ञ मध्यमस्तु क्षुधाबलः ।
अधमो भारवाही स्यादित्येष त्रिविधो भृतः ॥"

इति मिताक्षरा ॥

मध्यमसंग्रहः पुं, (मध्यमश्चासौ संग्रहश्चेति ।) स्त्रीसंग्रहणाख्यविवादविशेषः । स तु गन्ध माल्यवस्त्रभूषादिप्रेरणरूपः । यथा । प्रथमसाहसादिदण्डप्राप्त्यर्थं त्रेधा तत्स्वरूपं आसेन विवृतम् ।

"त्रिविधं तत् समाख्यातं प्रथमं मध्यमोत्तमम् ।
अदेशकालभावाभिर्निर्जने च परस्त्रियाः ।
कटाक्षावेक्षणं हास्यं प्रथमं साहसं स्मृतम् ॥
प्रेषणं गन्धमाल्यानां धूपभूषणवाससाम् ।
प्रलोभनान्नपानैर्मध्यमं समुदाहृतम् ॥
सहावसं विविक्तेषु परस्परमपाश्रयः ।
केशाकेशिग्रहश्चैव सम्यक् संग्रहणं स्मृतम् ॥"

इति मिताक्षरायां स्त्रीसंग्रहणप्रकरणम् ॥

मध्यमसाहसं, क्ली, (सहसा क्रियमाणं कर्म्म वा । सहसा + अण् । मध्यमञ्च तत् साहसञ्चेति ।) बलदर्पितेन वाक्पारुष्यपारुष्यादीनामङ्गच्छेदोपमर्दादिरूपं सहसा क्रियमाणं कर्म्म । यथा,

"बलस्थोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गच्छेदोपमर्दार्थैः प्रथमं साहसं स्मृतम् ।
वाक्पारुष्यपारुष्यादीनामङ्गच्छेदयोः ।
एतैरेव प्रकारैश्च मध्यमं साहसं स्मृतम् ॥"

इति मिताक्षरा ॥

मध्यमसाहसः, पुं, (मध्यमश्चासौ साहसश्चेति ।) दण्डविशेषः । स तु पञ्चशतपणरूपः । यथा,—

"पञ्चानां हि शते सार्द्धे प्रथमः साहसः स्मृतः ।
मध्यमं पञ्च विज्ञेयः सहस्रञ्चैव चोत्तमः ॥

लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् ।
भयाद्वा मध्यमौ दण्डौ मैत्र्यात् पूर्व्वं चतुर्गुणम् ॥"

इति मानवे सान्धिप्रकरणे ८ अध्यायः ॥

मध्यमा, स्त्री, (मध्यम + टाप् ।) क्षुद्रजन्तुकानारी । कर्णिका । अङ्गुलिभेदः । अक्षरच्छन्दः । इति मेदिनी । मे, ५० ॥ हृदयोत्थितबुद्धियुतनादरूपवर्णः । यथा, अलङ्कारकौस्तुभः ॥

"पश्चात् पश्यन्तथा हृदयगो बुद्धियुङ्मध्यमाख्यः ।"

स्त्रीयाद्यन्तर्गतनायिकाभेदः । तस्या लक्षणम् । हिताहितकारिण्यपि प्रियतमे हिताहितकारिणी या सा । अस्यास्तु व्यवहारानुसारिणी चेष्टा । इति रसमञ्जरी ॥ (अस्याभेदः । तत्पर्य्यायो यथा,—

"क्षुत्क्षामक्षामकायेत्यधीरपरा च मध्यमा ॥"

इति वैद्यकरत्नमालायाम् ॥)

मध्यमिका, स्त्री, (मध्यमैव । कन् टापि अत इत्वञ्च ।) क्षुद्रजन्तुका नारी । इति रत्नावली ॥

मध्यमीय, त्रि, (मध्यमे भवं मध्यमस्येदं वेति । "गहादिभ्यश्च ।" ४ । २ । १३८ । इति छः ।) मध्यमम् । इति हेमचन्द्रः । ६ । ६६ ॥

मध्यमेश्वरः, पुं, (मध्यमस्य स्थानस्य ईश्वरः ।) काशीस्थशिवलिङ्गविशेषः । यथा,—

"धन्यास्तु खलु ते विप्रा मन्दाकिन्यां कृतोदकाः ।
अर्चयन्ति महादेवं मध्यमेश्वरमीश्वरम् ॥
स्नानं दानं तपः आद्धं पिण्डनिर्व्वापणं त्विह ।
एकैकशः कृतं विप्राः पुनन्त्यासप्तमं कुलम् ॥
सन्निहित्वा अपस्नाय राहुग्रस्ते निशाकरे ।
यत् फलं लभते मर्त्यस्तस्मादष्टगुणं त्विह ॥
एवमुक्त्वा महायोगी मध्यमे शाम्भिके प्रभुः ।
उवास सुचिरं कालं पूजयन् वै महेश्वरम् ॥"

इति कौर्म्मे ३१ अध्यायः ॥

मध्ययवः, पुं, (मध्ये मध्यमो यवः ।) यवभेदः सर्षपपरिमाणम् । इति केचित् ॥

मध्यरात्रः, पुं, (मध्यं रात्रेः "पूर्व्वापराधरेति ।" २ । २ । १ । इति समासः । "अहःसर्व्वैकेति ।" ५ । ४ । ८७ । समासान्तोऽच् पुंवच्च ।) निशीथः । अर्द्धरात्रः । इति हलायुधः ॥ (यथा मनौ । ४ । १०६ ।

"उदके मध्यरात्रे च विण्मूत्रस्य विसर्জ্জने ।
उच्छिष्टः आद्धभुक् चैव मनसापि न चिन्तयेत् ॥")

मध्यलोकः, पुं, (मध्यश्चासौ लोकश्चेति ।) पृथिवी । मर्त्यलोक इति यावत् । वक्ष्यमाणग्रन्थार्थदर्शनात् ॥

मध्यलोकेशः, पुं, (मध्यलोकानां मर्त्यानां ईशः ।) राजा । इति हेमचन्द्रः । ३ । ३५३ ॥

मध्यस्थः, त्रि, (मध्ये वादिप्रतिवादिनोरन्तरे तिष्ठतीति । स्था + कः ।) मध्यस्थायी । तत्पर्य्यायः । निष्टङ्कः २ । इति त्रिकाण्डशेषः ॥ (यथा कथासरित्सागरे । १० । १८१ ।

"निर्विशङ्का मध्यस्थान्यूनाभ्यधिकपूर्व्वया ।
स श्रीदत्तसभां सार्द्धं तत्सन्निरमथाविशत् ॥"

यथा च भागवते । ६ । १६ । ५ ।

"वसुश्रवास्तरिमध्यस्थमिमोदावीर्णविद्विषः ।
सर्व्व एव हि सर्व्वेषां भवन्ति क्रमशो मिथः ॥")

उभयपक्षवीक्षः । यथा,—

"बुद्ध्वा युद्धोद्यमं रामः सुकृत्वां सह पाण्डवैः ।
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥"

इति श्रीभागवते १० स्कन्धे ७८ अध्यायः ॥

स्वार्थाविरोधेन परार्थघटकः । यथाह भोजः ।

"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य वाधेन ये
मध्यस्थाः परकीयकार्य्यकृपणाः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं ये: स्वार्थनो घ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥"

मध्यस्थं, क्ली, (मध्ये स्थितम् । मध्यशरीरमध्यवर्त्तित्वात्तथात्वम् ।) कटिदेशः । यथा,—

"कुचौ मरिचसन्निभौ सुरतमध्यमध्यस्थली ।
अहो निमिरमञ्जरी सहचरी नरीनृत्यते ॥"

इत्युद्भटः ॥

मध्या, स्त्री, (मध्य + टाप् ।) मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ नायिकाविशेषः । अस्या लक्षणम् । समानलज्जामदना । एवेव चानिश्चयादनिविष्टमनोरथा ॥ अस्याश्चेष्टा । सागसि प्रियसि धैर्य्यं वक्रोक्तिरधैर्य्यं परुषवाक् । यथा,—

"स्वापे प्रियाननविलोकनहानिरेव
स्वापच्युतौ प्रियकरग्रहणप्रसङ्गः ।
इत्थं सखीसहमुखौ परिचिन्तयन्ती
स्वापं विधातुमपि हातुमपि प्रपेदे ॥"

मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे । धीरा अधीरा धीराधीरा चेति । इति रसमञ्जरी ॥

मध्याह्नः, पुं, (मध्यं अह्नः समासान्तः टच् । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इत्यह्नादेशः पुंवच्च ।) अह्नोऽष्टमसुकृर्त्तात्मकमध्यभागः । स च कुतपकालस्य संज्ञाविशेषः । यथा,—

"अह्नो सुकृर्त्ता विख्याता दश पञ्च च सर्व्वदा ।
तत्राष्टमो सुकृर्त्तो यः सः कालः कुतपः स्मृतः ।
मध्याह्ने सर्व्वदा यस्मादग्नीभवति भास्करः ।
तस्मादनल्पफलदस्तत्कालो विधिरुच्यते ॥
मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम् ।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥
पापं कुतसितमित्याहुस्तस्य सन्तापकारिणः ।
अष्टावेते यतस्तस्मात् कुतपा इति संस्मृताः ॥"

इति मत्स्यपुराणे आद्धकल्पे २२ अध्यायः ॥

त्रिधाविभक्तदिनमध्यभागः । स च दशदण्डात्मकः दशदण्डरूपः । इति मुग्धबोधः अमरोक्तश्च ॥

पञ्चधाविभक्तदिनसप्तमभागः । स तु द्वादश-

दक्षात् परमदुःखात्मकः । इति ज्ञात्वैतत्समस्त-पुराणम् ॥ एष नित्यमस्निग्रहस्थादिनाभिप्रायेण न्यूनाधिके न्यूनाधिककाली ज्ञेयः ॥*॥ मध्याह्न-स्नानं यथा,—

"ततो मध्याह्नसमये स्नानार्थं त्वरमाहरेत् ।
पुण्याम्बुनं कुशतिलान् गोमयं शुद्धमेव च ॥
नदीषु देवखातेषु तडागेषु सरित्सु च ।
स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च ॥
परकीयनिपानेषु न स्नायादे कदाचन ।
पञ्च पिण्डान् समुद्धृत्य स्नायाद्वा सम्भवे पुनः ॥
त्वदेकया शिरः स्नात्वा द्वाभ्यां नाभेस्तथोपरि ।
अधश्च त्रिभिः कार्यं पादौ षड्भिस्तथैव च ॥
मृत्तिका च समुद्धृता स्नानार्थमलकमालिका ।
गोमयस्य प्रमाणन्तत्तनाङ्गं लेपयेत्ततः ॥
लेपयित्वाथ तीरस्थस्तस्मिन्नेव मनसा ।
प्रक्षाल्याचम्य विधिवत्ततः स्नायात् समाहितः ॥
अभिमन्त्र्य जलं मन्त्रैस्तस्मिन्नेवोदके शुभे ।
भावपूतस्तदङ्गानि ध्यायन् वै विष्णुमव्ययम् ॥
आपो नारायणोद्भूतास्ता एवास्यात्मनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः ॥
प्रेत्य ॐकारमादित्यं शिरोमन्त्रेण्यमाहरेत् ।
पुनः पुनरघाचामेन मन्त्रेणानेन मन्त्रवित् ॥
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृ-तम् ॥
द्विरारं वा शिरभ्यस्येन आङ्गनिप्रणवान्वितान् ।
सावित्रीं वा जपेदिद्वांस्तथा चैवाघमर्षणम् ॥
ततः सम्मार्जनं कुर्यादापोहिष्ठादिमयो मुवः ।
इदमापः प्रवहत आङ्गनिभिस्तथैव च ॥
ततोऽभिमन्त्र्य तत तीर्थमापोहिष्ठादिमन्त्रकैः ।
अन्तर्जले शिरावर्ता सर्वपापात् प्रमुच्यते ॥
अपः पाणौ समादाय जपन् वै मार्जनं ततः ।
विभ्रत्य मूर्ध्नि ततोयं मुच्यते सर्वपातकैः ॥
यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः ।
तथाघमर्षणं स्नानं सर्वपापापनोदनम् ॥
अघोपनिषदादित्यं मन्त्रं पुण्यान्विताञ्जलिम् ।
प्रक्षिप्यालोकयन्त्वेवमङ्गुष्ठं वैष्णवे परम् ॥
उद्यं चित्रं देवानामित्यादिभिरनन्तधीः ।
हंसः शुचिषदेतेन सावित्र्या च विशेषतः ॥
अन्यैश्च वैष्णवैर्मन्त्रैः सौरैः पापप्रणाशनैः ।
सावित्रीं वै जपेत् पश्चान्मयूखः स वै स्मृतः ॥
विविधानि पवित्राणि गुह्यविद्यास्तथैव च ।
ऋतसत्यमयब्रह्मेशिरः सौरमथो स्मृतः ॥
प्राक्कूलेषु समासीनः कुशेषु प्राङ्मुखः शुचिः ।
तिर्यगूर्ध्वदीप्तमार्कं जाप्यं कुर्यात् समा-हितः ॥
स्फाटिकैन्द्राक्षरुद्राक्षपुत्रजीवसमुद्भवैः ।
कर्णेषा अक्षमाला वा उत्तरादुत्तमा स्मृता ॥
अपकाले न भाषेत नाप्यानि प्रेक्षयेद्बुधः ।
न कण्डयेच्छरीरावीवाङ्गानेव प्रकाशयेत् ॥
गुह्यका राक्षसा; सिद्धा हरन्ति प्रसभमध्यात् ।
ब्रह्मणैव यमी देवी तस्माज्जप्यं समाचरेत् ॥

चण्डालाखौचिपतितान् स्पृष्ट्वाचम्य पुनर्जपेत् ।
तैरेव भाषणं कृत्वा स्नात्वा चैव जपेद्बुधः ॥
आचम्य प्रयतो नित्यं जपेदशुचिदर्शने ।
सौरान् मन्त्रान् यजुर्वेदे पावमानीस्तु काम्यतः ॥
यदि स्यात् क्लिन्नवासो वै वारिमध्यगतो जपेत् ।
अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
प्रदक्षिणं समाकृत्य नमस्कृत्वा ततः शिवौ ।
आचम्य च यथाशास्त्रं मुक्त्वा स्वाध्यायमाच-रेत् ॥
ततः सन्तर्पयेद्देवानृषीन् पितृगणान् क्रमात् ।
आदावोङ्कारमुच्चार्य नमोऽन्ते तर्पयामि च ॥
देवान् ब्रह्मऋषींश्चैव तर्पयेदम्बुनोदकैः ।
तिलोदकैः पितॄन् भक्त्या स्वसूत्रोक्तविधानतः ॥
अन्यारब्धेन सयेन पाणिना दक्षिणेन च ।
देवर्षीं स्तर्पयेद्भीमानुदकाञ्जलिभिः पितॄन् ॥
यज्ञोपवीती देवानां निवीती ऋषितर्पणम् ।
प्राचीनावीती पैत्र्यं तु स्वेन तीर्थेन भावतः ॥
नामोच्च स्नानवस्त्रं वै समाचम्य च वाग्यतः ।
स्वर्मन्त्रैरर्घयेद्देवान् पृथ्वैः पञ्चैरथाम्बुभिः ॥
ब्रह्माणं शङ्करं रुद्रं तथैव मधुसूदनम् ।
अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनो-ऽत्वरः ॥
प्रदद्यादथ पुष्पाणि स्वर्णेन पुरुषेण तु ।
आपो वा देवता; सर्वाञ्जलेन सम्यक् समर्चिताः ॥
नमस्कारेण पुष्पाणि विन्यसेद्वै पृथक् पृथक् ।
न विष्णोराधनात् पुण्यं विद्यते कर्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
सङ्क्षिप्तोरितिमन्त्रेण सूक्तेन पुरुषेण तु ।
नैनाभ्यां सदृशो मन्त्रो वेदेषूक्तश्चतुर्ष्वपि ॥
निवेदयेत् स्वमात्मानं विष्णावमलतेजसि ।
तदात्मा मन्त्रनाः स्नात्वादिष्टोरितिमन्त्रतः ॥
अथवा देवमीशानं भगवन्तं सनातनम् ॥
आराधयेन्महादेवं भावपूतो महेश्वरम् ।
मन्त्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः ।
ईशानेनाथवा सूक्तेनाग्नकेन समाहितः ॥
पुष्पैः पञ्चेरथाङ्गैश्च चन्दनाद्यैर्महेश्वरम् ।
अघोरम; शिवायेति मन्त्रेणानेन योजयेत् ॥
नमस्कृत्यान्महादेवन्तं सम्भिनीश्वरम् ।
निवेदयीत स्वात्मानं यो ब्राह्मणमनीश्वरे ॥
प्रदक्षिणं द्विजः कुर्यात् पञ्च ब्राह्मण वै जपन् ।
ध्यायेत्तं देवमीशानं ओममध्यगतं शिवम् ॥
अथावलोकयेदर्कं हंसः शुचिषदित्यृचा ।
कुर्यात् पञ्च महायज्ञान् गृहं त्यक्त्वा समाहितः ॥
देवयज्ञं पितृयज्ञं ऋषियज्ञं तथैव च ।
मानुष्यं ब्रह्मयज्ञश्च पञ्चयज्ञान् प्रचक्षते ॥
यदि स्यात् तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि ।
स्नात्वा मनुष्ययज्ञं वै ततः स्वाध्यायमाचरेत् ।
अग्नेः पश्चिमतो देवीं भूतयज्ञान्न एव वा ।
कुशासनसमासीनः कुशपाणिः समाहितः ॥
गृह्याग्नौ लौकिकाग्नौ वा जले भूम्यामथापि वा ।

वैश्वदेवनिमित्तं वै देवयज्ञः स वै स्मृतः ॥
यदि स्याल्लौकिके पक्वं ततोऽन्नं तत्र हूयते ।
ज्वालायां तत्र देवानां विधिरेष सनातनः ॥
देवेभ्यश्च हुनाद्यात् शेषान् भूतबलिं हरेत् ।
भूतयज्ञः स वै ज्ञेयो भूतिदः सर्वदेहिनाम् ॥
स्थभ्यश्च स्वपतीभ्यश्च वयोभ्यो नित्यमेव च ।
दद्याद्भुवौ बलिं स्नानं पक्षिभ्योऽथ द्विजोत्तमः ॥
सायं चान्नस्य सिद्धस्य कुर्यादेवमतन्द्रितः ।
भूतयज्ञः स्वयं नित्यं सायं प्रातर्विधीयते ॥
एकन्तु भोजयेद्विप्रं विद्वांसंहृद्य सत्तमम् ।
अथवायं यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे द्विजाये वोपपादयेत् ॥
पूजयेदतिथिं नित्यं नमस्येदर्चयेद्द्विजम् ।
मनोवाक्कर्मभिः प्राप्तमागतं स्वगृहन्तु तम् ॥
हन्तकारमथार्घ्यं वा भिक्षां वा भक्तितो द्विजः ।
दद्यादतिथये नित्यं बुद्धा तं परमेश्वरम् ॥
भिक्षामाकृष्यसमाचमनं स्यात् तच्चतुर्गुणम् ।
पुष्कलं हन्तकारन्तु तच्चतुर्गुणमुच्यते ॥
गोदोहमात्रं कालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम् ।
अभ्यागतान् यथाशक्ति पूजयेदतिथिं यथा ॥
भिक्षां वै भिक्षवे दद्याद्विधिवद् ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति स्वर्गिभ्यो लोभवर्जितः ॥
सर्वेषामप्यलाभे तु अन्नं गोभ्यो निवेदयेत् ।
भुञ्जीत बन्धुभिः सार्द्धं वाग्यतोऽन्नमकुत्सयन् ॥
अकृत्वा तु द्विजः पञ्च महायज्ञान् द्विजोत्तमाः ।
भुञ्जीत चेत् मुमूढात्मा तिर्यग्योनिं स गच्छति ॥
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमाः ।
नाशयन्त्याशु पापानि देवानामर्चनं तथा ॥
यो मोहादथवालस्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् शूकरेष्वभिजायते ॥
तस्मात् सर्वप्रयत्नेन कृत्वा कर्माणि वै द्विजः ।
भुञ्जीत सज्जनैः सार्द्धं स याति परमां गतिम् ॥"

इति कौर्मे उपविभागे १७ अध्यायः ॥

अत्र भोजनविधिर्भोजनशब्दे दृश्यः ॥

मध्वज्ञः, (मधु तत्त्वमर्थं जानातीति । ज्ञा + अक् । संज्ञापूर्वकत्वात् वृद्ध्यभावः ।) मध्वचार्यः । इति शब्दचन्द्रिका ॥

मध्वासु, क्ली, (मधु मधुरं आस्यं । मधुवल्लिरस्या-स्त्यस्य ।) मूलविशेषः । सौ आसु इति भाषा । अस्य गुणाः । रक्तपित्तनाशित्वम् । गुरुत्वम् । स्वादुत्वम् । शीतत्वम् । स्तन्यशुक्र-कारित्वञ्च । इति राजवल्लभः ॥

मध्वासुकं, क्ली, (मध्वासु + स्वार्थे कन् ।) कन्द-विशेषः । इति शब्दचन्द्रिका ॥ सौ आसु इति भाषा ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये । "निदारीकन्दशतावरीविसबलाजलङ्गाटक-कशेरुकपिण्डालुकमध्वासुककसेरुकाष्ठा-लुकपद्मालुकरक्तालुकेक्षुवरोत्पलकन्द-प्रभृ-तीनि ॥")

मध्वासवः, पुं, (मधु मधूकपुष्परसङ्कृत आसव; ।) मधूकपुष्पजातमद्यम् । तत्पर्यायः ।

माधवकः २ मधु ३ माध्वीकम् ४। इत्यमरः। २।१०।४१॥ (यथा, सुश्रुते १।४५ अध्याये। "सुखप्रियः क्षीरमद्यो विश्लेष्यो निलनाशनः। मधु मध्यासवश्छेदी मेहकुष्ठविषापहः॥" विवरणमस्य माध्वीकशब्दे ज्ञातव्यम्॥)

मध्यासवनिकः, पुं, (मध्यासवमनुत्पाद्यत्वेनास्त्यस्येति। मध्यासव + ठन्।) औत्सिकः। इति शब्दमाला॥

मधिजा, स्त्री, (मधु ईजते प्राप्नोति कारणत्वेनेति। ईज + कः। पृषोदरादित्वात् ह्रस्वः।) मदिरा। इति हेमचन्द्रः।३।५६७॥ (गुणादिविषयोऽस्या मदिराशब्दे ज्ञातव्यः॥)

मन, अर्च्चे। मर्च्चे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-मर्च्चे अक०-सेट्।) मनति। इति दुर्गादासः॥

मन, क ङ गर्व्वके। इति कविकल्पद्रुमः॥ (चुरा०-आत्म०-अक०-लम्भने सक०-सेट्।) क ङ, मानयते। गर्व्वकोऽहङ्कारः। मनस्तम्भने। इति प्राचः। मानयते प्रभुं यत्नो लम्भनासोऽर्थः। इति रमानाथः। इति दुर्गादासः॥

मन, तृ क धृतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) दन्त्यनोपधः। मनयति। इति दुर्गादासः॥

मन, द ङ बोधे। इति कविकल्पद्रुमः॥ (तना०-आत्म०-सक०-सेट्।) द ङ, मनुते। इति दुर्गादासः॥

मन, य औ ङ बोधे। इति कविकल्पद्रुमः॥ (दिवा-आत्म०-सक०-अनिट्।) य ङ, मन्यते। औ, अमंस्त। इति दुर्गादासः॥

मनआपः, त्रि, (आप्नोतीति। आप् + अच्। मनस आपः।) मनोज्ञः। इति त्रिकाण्डशेषः॥

मनः, पुं, (मन्यते सुरभित्वादिगुणेन आद्रियत इति। मन् + अच्।) अटामांसी। इति शब्दचन्द्रिका॥

मनः, [स्] क्ली, (मन्यते बध्यतेऽनेनेति। मन् + "सर्व्वधातुभ्योऽसुन्।" उणा० ४।१८८। इति असुन्।) लिङ्गशरीरावयवविशेषः। यथा। सप्तदशशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। अवयवास्तु ज्ञानेन्द्रियपञ्चकं बुद्धिमनसी कर्म्मेन्द्रियपञ्चकं वायुपञ्चकञ्चेति। मनो नाम सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिः। मनस्तु कर्म्मेन्द्रियैः सहितं सत् मनोमयकोशो भवति। इति वेदान्तसारः॥ ज्ञानेन्द्रियविशेषः। तत्तु बुद्धीन्द्रियाणां मध्ये प्रधानं श्रीलक्ष्मविभूतिश्च। यथा,—

"इन्द्रियाणां मनश्चास्मि भूतानामस्मि चेतना॥"

इति भगवद्गीता॥

तच्च गर्भस्थस्य सप्तमे मासि जायते। इति सुश्रुतबोधः॥ ("पञ्चमे मनः प्रतिबुद्धतरं भवति।" इति सुश्रुते शारीरस्थाने तृतीयेऽध्याये॥*॥)

तत्पर्यायः। चित्तम् २ चेतः ३ हृदयम् ४ स्वान्तम् ५ हृत् ६ मानसम् ७। इत्यमरः। १।४।३१॥ अनङ्गकम् ८ अङ्गम् ९। इति शब्दरत्नावली॥ अपि च।

"मनो मन्तान् मतिर्ब्रह्मा पूर्व्वबुद्धिः स्मृतिरीश्वरः।
प्रज्ञा संवित् चितिश्चैव स्मृतिश्च परिपठ्यते।
पर्य्यायवाचकाः शब्दा मनसः परिकीर्त्तिताः॥"

इति महाभारते मोक्षधर्म्मे॥*॥

न्यायमते अस्य गुणाः। परत्वम्। अपरत्वम्। संख्या। परिमितिः। पृथक्त्वम्। संयोगः। विभागः। वेगश्च। मनोज्ञानादि यथा। सुखम्। दुःखम्। इच्छा। द्वेषः। मतिः। यत्नश्च। इदं परमाणुस्वरूपम्। शिरोमणिमते वायवीयपरमाणुरूपम्। यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे।
मनोज्ञानं सुखं दुःखमिच्छा द्वेषौ मतिः कृतिः॥
अयोगपद्यज्ज्ञानानां तस्यायुत्वमिष्यते॥"

इति भाषापरिच्छेदः॥

जन्यज्ञानसामान्यं प्रति लक्षणायोगः कारणम्। यथा, तत्रैव।

"त्वचो योगो मनसा ज्ञानकारणम्॥"

तस्य नवगुणा यथा,—

"धैर्य्योपपत्तिर्व्याप्तिश्च विसर्गः कल्पना क्षमा।
सदसद्भावुना चैव मनसो नव वै गुणाः॥"

इति मोक्षधर्म्मे॥

अस्य व्याख्या। धैर्य्यम् १ उपपत्तिः ऊहापोहकौशलम् २ व्याप्तिः स्मरणम् ३ विसर्गः विषयेषु स्वातन्त्र्यम् ४ कल्पना मनोरथवृत्तिः ५ क्षमा ६ मनः वैराग्यादि ७ असत् रागद्वेषादिष्वनुत्ता अस्थिरत्वम् ८। इति तट्टीका॥*॥

अस्य चातुर्विध्यं यथा,—

"मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्।
संशयो निश्चयो गर्व्वः स्मरणं विषया अमी॥"

इति वेदान्तः॥

तस्य अध्यात्मत्वादि यथा,—

"अध्यात्मं मन इत्याहुः पञ्चभूतात्मधारकम्।
अधिभूतञ्च सङ्कल्पस्तदात्मा चाधिदैवतम्॥"

इति महाभारते आश्वमेधिकपर्व्वणि॥

तस्य स्वरूपं यथा,—

"अनिरूप्यमदृश्यञ्च ज्ञानमेतन्मनः स्मृतम्॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २३ अध्यायः॥

तस्य प्राप्यस्थाप्राप्यत्वानुमापकानि यथा,—

"जनानां हृदयं सत्यं सुकृतं वचनेन वै।
शिष्ये कलत्रे कन्यायां दौहित्रे बान्धवेऽपि च॥
पुत्रे पौत्रे च वत्सेषु प्रजासु च यशसि श्रियाम्।
वृद्धौ वारिणि विद्यायां ज्ञायते हृदयं नृणाम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १ अध्यायः॥

तस्य बन्धमोक्षहेतुत्वं यथा,—

"मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धस्य विषयासक्ति मुक्तेर्निर्विषयं तथा॥"

इति विष्णुपुराणे ६ अंशे ७ अध्यायः॥

("अतीन्द्रियं पुनर्मनः सत्त्वसंज्ञकं चेत्याहुरेके

तदर्थालम्बनदायत्तचेष्टम्। चेतःप्रत्ययभूतमिन्द्रियाणाम्। स्वार्थेन्द्रियार्थसङ्कल्पाभिचरणाद्यानेकमेकक्षिप्तं पुरुषं सत्त्वरजसाम् सत्त्वगुणयोगाच्च नानेकत्वं नानेकं क्षेत्रज्ञकालभेदेषु प्रवर्त्तते॥ तस्मान्नैककालाः सर्व्वेन्द्रियप्रवृत्तिः। यद्गुणत्वाभीक्ष्णं पुरुषमनुवर्त्तते सत्त्वं तत्सत्त्वमेवोपदिशन्ति ऋषयो वाङ्मुख्यानुगुण्यात्॥ मनःपुरःसराणीन्द्रियाण्यर्थग्रहणसमर्थानि भवन्ति॥"

"मनसस्तु चिन्त्यमर्थः। तच्च मनसो वृत्तेश्च न एव समानातिहीनमिथ्यायोगाः प्रज्ञानविज्ञानहेतवो भवन्ति॥" इति चरके सूत्रस्थाने अष्टमेऽध्याये॥

"लक्षणं मनसो ज्ञानस्याभावो भाव एव वा। सति ज्ञानेन्द्रियार्थानां सन्निकर्षेऽस्य वर्त्तते॥ वैधर्म्म्याज्जनसो ज्ञानं सान्निध्यात्तच्च वर्त्तते। अणुत्वमथ चैकत्वं द्वौ गुणौ मनसः स्मृतौ॥ चिन्त्यविचार्य्यसङ्कल्प्य ध्येयं सङ्कल्प्यमेव च। यत्किञ्चिन्मनसो ज्ञेयं तत् सर्व्वं ह्यर्थसंज्ञकम्॥ इन्द्रियाभिग्रहः कर्म्म मनसस्तस्य निग्रहः। ऊहो विचारश्च मतः परा बुद्धिः प्रवर्त्तते॥ इन्द्रियेन्द्रियार्थौ हि समनस्केन गृह्यते। कल्प्यते मनसाप्यं गुणतो दोषतो यथा॥ जायते विषये तत्र या बुद्धिर्निश्चयात्मिका। अवस्यते तथा वक्तुं कर्त्तुं वा बुद्धिपूर्व्वकम्॥ या यदिन्द्रियमाश्रित्य जन्तोर्बुद्धिः प्रवर्त्तते। याति सा तेन निर्देशं मनसा च मनोभवा॥ बुद्धीन्द्रियमनोर्थानां विद्याद् योगधरं परम्॥"

इति चरके शारीरस्थाने प्रथमेऽध्याये॥

तस्य गुणयुक्तस्य मनसो गुणा यथा,—

"आत्मिकं प्रविभज्य भोजनमनुत्तापश्च तथ्यं वचो मेधाबुद्धिधृतिस्मृतिश्च कलना ज्ञानञ्च निर्द्वन्द्वता। कर्म्मानिन्दितमप्रमादश्च विनयो धर्म्मः सदैवादरा दैते सत्त्वगुणान्वितस्य मनसो लीला गुणा ग्रामिणः॥"

अस्मिन् धर्म्ममोक्षपरलोकादिकल्पिनि वृद्ध्या चरतीत्यात्मिकस्य भाव आत्मिकं अनुत्तापः अक्रोधः धृतिः भूतप्रेतसरक्षोयक्षोन्मादाद्यधिष्ठितं ज्ञानमात्मज्ञानम्। निर्द्वन्द्वता कपटाभावः कर्म्म अनिन्दितं अकृष्णं निष्कामं च॥ रजोगुणयुक्तस्य मनसो गुणा यथा,—

"क्रोधस्तीक्ष्णमनोज्ञता च बहुलं दुःखं सुखे- ष्वाधिक्यं क्षमः कामुकत्वमलीकवचनं चार्द्रीरता चञ्चलतिः। ऐश्वर्य्यादभिमानितातिप्रियतामत्सर्य्योऽधिक्षमा- जयं प्रज्ञाता हि रजोगुणेन सहितस्यैते गुणा- श्चेतसः॥"

अलीकवचनं मिथ्याकथनं कटनं पृथ्वीपरिभ्रमणम्। अथ तमोगुणयुक्तस्य मनसो गुणा यथा.—

"नास्तिकं सुविषण्णत्वतिमूर्खिनालस्यच दुष्टा मतिः
प्रीतिर्निन्दितकर्मणष्वलसे सदा निद्रालुनाहर्निशम्।
अज्ञानं किल सर्वतोऽपि सततं क्रोधान्धता मूढ़ता
प्रख्याता हि तमोगुणेन सहितस्यैते गुणाश्चेतसः॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥*॥ सर्वे ज्ञाता अदन्ताश्चेति प्रमाणात् अकारान्तमनशब्दोऽप्यस्ति। यथा, उत्तरगीतायाम्। १६ अध्याये।

"मनसां मनमध्यस्थं मध्यस्थं मनवर्जितम्।
मनसा मनमालोक्य स्वयं सिद्धन्ति योगिनः॥")

मनःशिलः, पुं, (मनो मानसं शिलति आकर्षति स्वगन्धेनेति। शिल + कः।) मनःशिला। यथा,

"टङ्कैर्मनःशिलगुहैरविदार्यमाणा॥"

इत्यमरटीकायां भरतः॥

मनःशिला, स्त्री, (मनः शिलति आह्लादति आकर्षति गन्धेनेति। शिल + कः। स्त्रियां टाप्। यद्वा, मनःप्रह्लादिका शिला धातुविशेषः।) रक्तवर्णधातुविशेषः। मन्छल इति भाषा॥ (यथा, कुमारे। १। ५५।

"मनःशिलाविच्छुरिता निषेदुः
प्रैक्षेयनर्दासु शिलातलेषु॥")

सा तु लक्ष्मीवीर्यम्। इति वैद्यकम्॥ तस्याः पर्य्यायः। कुनटी२ मनोह्वा३ नागजिह्विका ४। इत्यमरः। २। ६। १०८॥ नेपाली ५ शिला ६। इति रत्नमाला॥ मनोह्वा ७ नेपालिका ८ मनोगुप्ता ९ कल्याणिका १० रोगशिला ११। इति राजनिर्घण्टः॥ गोला १२ हिङ्गोपधिः १३। इति भावप्रकाशः॥ अस्याः गुणाः। कटुत्वम्। स्निग्धत्वम्। लेखनत्वम्। विषभूतावेशभयोन्मादनाशित्वम्। वयस्थकारित्वञ्च। इति राजनिर्घण्टः॥ अपि च। तिक्तत्वम्। कषायाग्नित्वम्। मारकत्वम्। कुष्ठिकारित्वम्। कुष्ठव्यरपाण्डुकासश्वासनाशित्वम्। शुक्रमङ्गलकारित्वञ्च। इति राजवल्लभः॥ अन्यच्च।

"मनःशिला गुरुर्ज्ञेया सरोगा लेखनी कटुः।
तिक्ता स्निग्धा विषश्वासकासभूतकफापहा॥
मनःशिला मद्यबलं करोति
अन्नं ध्रुवं शोधनमन्तरेण।
मलानुबन्धं किल नश्यरोधं
सद्यःकरं लक्ष्मगदञ्च कुर्य्यात्॥"

इति भावप्रकाशः॥

(अस्याः पर्य्यायः शोधनं गुणाश्च यथा.—

"मनःशिला च नेपाली शिलाह्वा नागजिह्विका।
मनोह्वा कुनटी गोला करञ्जी करवीरिका॥
मनोह्वा शोधनपुष्पाभा ग्रस्यते सर्वकर्मसु॥"
"जयन्ती भृङ्गराजोत्थैः रक्तागस्त्यरसैः शिला॥
दोलायन्त्रे दिनं पाच्या यामं छागस्य मूत्रके।
नालयेदारनालेन सर्वरोगेषु योजयेत्॥"

मनान्तरे मनःशिलाशुद्धिर्यथा.—

"अगस्त्यपत्रतोयेन भाविता सप्तवासरम्।
भृङ्गवेररसैर्वापि विशुध्यति मनःशिला।
कटुः स्निग्धा शिला तिक्ता कफघ्नी लेखनी सरा।
भूतावेशभयं हन्ति कासश्वासहरा शुभा॥"

इति वैद्यकरत्नसारसंग्रहे नारसमारब्धाधिकारे॥)

मनन, क्ली, (मन्यत इति। मन् + ल्युट्।) श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिः अनवरतमनुचिन्तनम्। इति वेदान्तसारः॥ बोधनम्। (यथा, गायत्रीतन्त्रे। १। ७।

"मननात् पापतस्त्राति मननात् स्वर्गमश्नुते।
मननात् मोक्षमाप्नोति चतुर्व्वर्गमयो भवेत्॥")

धारणम्। इति मनधात्वर्थदर्शनात्। बुद्धिः। इति राजनिर्घण्टः॥

मनसा स्त्री. (मनः भक्ताभीष्टपूरणाय मननं अस्त्यस्या इति। मनस् + अर्श आदित्वादच्। ततष्टाप्। यद्वा, मनं मननमहङ्कारमिति यावत् स्यति नाशयतीति। सो + कः।) देवीविशेषः। तत्पर्य्यायः। कद्रूः २ मनसादेवी ३ विषहरी ४। इति जटाधरः॥ अस्याः प्रणाममन्त्रः।

"आस्तीकस्य मुनेर्माता भगिनी वासुकेस्तथा।
जरत्कारुमुनेः पत्नी मनसादेवि! नमोऽस्तु ते॥"

इति तस्याः पूजापद्धतिः॥

तस्या नाम्नां व्युत्पत्तिर्यथा,—

श्रीनारायण उवाच।

"शृणुष्व मनसाख्यानं यत् पुरा धर्म्मवक्त्रतः।
कन्या सा च भगवतो कश्यपस्य च मानसी॥
तेनेयं मनसादेवी मनसा या च दीव्यति।
मनसा ध्यायते या वा परमात्मानमीश्वरी॥
तेन सा मनसादेवी योगेन तेन दीव्यति।
आत्मारामा च सा देवी वैष्णवी सिद्धयोगिनी॥
त्रियुगञ्च तपस्तप्त्वा कृष्णस्य परमात्मनः।
जरत्कारुगुरोरेव लब्ध्वा यत्नं जरत्कारुः॥
गोपीपतिर्नाम चक्रे जरत्कारुरिति प्रभुः।
वाञ्छितञ्च ददौ तस्यै कृपया च कृपानिधिः॥
पूजाञ्च कारयामास चकार च पुनः पुनः।
स्वर्गे च नागलोके च पृथिव्यां ब्रह्मलोकतः॥
भूयं जगत्सु गौरी सा सुन्दरी च मनोहरा।
जगद्गौरीति विख्याता तेन सा पूजिता सती॥
शिवशिष्या च सा देवी तेन शैवीति कीर्त्तिता।
विष्णुभक्तानीव ग्रन्थदैष्णवी तेन नारद!॥
नागानां प्राणरक्षित्री यज्ञे जन्मेजयस्य च।
नागेश्वरीति विख्याता सा नागभगिनीति च॥
विषं संहर्त्तुमीशा सा तेन विषहरीति सा।
सिद्धं योगं हरात् प्राप तेनातिसिद्धयोगिनी।
महाज्ञानञ्च गोप्यञ्च मन्त्रसञ्जीवनीं पराम्।
महाज्ञानयुतां तान्च प्रवदन्ति मनीषिणः॥
आस्तीकस्य मुनेर्माता सा च तपस्विनः॥
आस्तीकमाता विख्याता जगत्सु सुप्रतिष्ठिता॥
प्रिया मुनेर्जरत्कारोर्मुनीन्द्रस्य महात्मनः।
योगिनी सिद्धपूज्यस्य जरत्कारुप्रिया सती॥
जरत्कारुर्जगद्गौरी मनसा सिद्धयोगिनी।
वैष्णवी नागभगिनी शैवी नागेश्वरी तथा॥
जरत्कारुप्रियास्तीकमाता विषहरीति च।
महाज्ञानयुता चैव सा देवी सिद्धपूजिता॥
द्वादशैतानि नामानि पूजाकाले च यः पठेत्।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च॥
नागभीते च गदिते नागग्रस्ते च मन्दिरे।
नागक्षते महादुर्गे नागवेष्टितविग्रहे।
इदं स्तोत्रं पठित्वा तु मुच्यते नात्र संशयः।
नित्यं पठेद् यस्तं दृष्ट्वा नागवर्गः पलायते॥
दशलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम्।
स्तोत्रसिद्धिर्भवेद्यस्य स सिद्धो जगतीतले।
सुधासमं विषं तस्य धन्वन्तरिसमो भवेत्॥
ब्रह्मन्नाषाढ़संक्रान्त्यां श्रवणाख्यासु यत्नतः।
आवाह्य देवीमीशान्यां पूजयेद् यो हि भक्तितः॥
पञ्चम्यां मनसाख्यायां देव्यै दद्याच्च यो बलिम्।
धनवान् पुत्रवांश्चैव कीर्त्तिमांश्च भवेद्ध्रुवम्॥
पूजाविधानं कथितं तदाख्यानं निशामय।
कथयामि महाभाग! यत् पुरा धर्म्मवक्त्रतः॥"

तस्या जन्मकारणं यथा.—

"पुरा नागभयाक्रान्ता वसुधुर्मानवा भुवि।
यान् यान् स्पृशन्ति नागाश्च ते न जीवन्ति नारद!॥
मन्त्रांश्च सहजे भीतः कश्यपः ब्रह्मणाधिपः।
वेदवीजानुसारेण चोपदेशेन ब्रह्मणः॥

मन्त्राधिष्ठातृदेवीञ्च मनसां सङ्गजे ततः ।
तपसा मनसा तेन बभूव मनसा च सा ॥"
तस्याश्चोपस्थादि यथा,—
"कुमारी सा च सम्भूय जगाम शङ्करालयम् ।
भक्त्या संपूज्य कैलासे तुष्टाव चन्द्रशेखरम् ॥
दिव्यं वर्षसहस्रञ्च तं सिषेवे मुनेः सुता ।
आशुतोषो महेशश्च तां च तुष्टो बभूव ह ॥
महाज्ञानं ददौ तस्यै पाटयामास नाम च ।
कृष्णमन्त्रं कल्पतरुं ददावष्टाक्षरं मुने ! ॥
लक्ष्मीमाया कामबीजं डेऽन्तं ज्ञानप्रदन्तया ।
त्रैलोक्यमङ्गलं नाम कवचं पूजनक्रमम् ॥
सर्वपूज्यञ्च स्तवनं ध्यानं भुवनपावनम् ।
पुरश्चर्याक्रमञ्चापि वेदोक्तं सर्वसम्मतम् ॥
प्राप्य मृत्युञ्जयाज्ज्ञानं परं मृत्युञ्जयं सती ।
जगाम तपसे साध्वी पुष्करं शङ्कराज्ञया ॥
त्रियुगञ्च तपस्तप्त्वा ज्ञानस्य परमात्मनः ।
सिद्धा बभूव सा देवी ददर्श पुरतः प्रभुम् ॥
दृष्ट्वा ज्ञानाङ्गीं बालाञ्च कृपया च कृपानिधिः ।
पूजाञ्च कारयामास चकार च स्वयं हरिः ॥
वरञ्च प्रददौ तस्यै पूजिता त्वं भवे भव ।
वरं दत्त्वा च कल्याण्यै सत्यज्ञानदेयै विभुः ॥
प्रथमे पूजिता सा च ज्ञानेन परमात्मना ।
द्वितीये शङ्करेणैव कश्यपेन सुरेण च ॥
मनुना मुनिना चैव नागेन मानवादिना ।
बभूव पूजिता सा च त्रिषु लोकेषु सुव्रता ॥"
तस्या विवाहः स्वामिकर्तृकत्यागश्च यथा,—
"जरत्कारुमुनीन्द्राय कश्यपस्तां ददौ पुरा ।
अयाचितो मुनिश्रेष्ठो जग्राह ब्रह्मणाज्ञया ॥
ज्ञानोद्राहं महायोगी विधानेनातपसा चिरम् ।
सुप्ताप देवी जघने वटमूले च पुष्कर ॥
निद्रां जगाम च मुनिः स्तुत्वा निर्गुणमीश्वरम् ।
जगामास्तं दिनकरः सायंकाल उपस्थितः ॥
संचिन्त्य मनसा तत्र मनसा सा प्रतिष्ठिता ।
धर्मलोपभयेनैव चकारालोचनं सती ॥
अङ्गत्वा पश्चिमां सन्ध्यां नित्यामेव द्विजन्मनाम् ।
ब्रह्महत्यादिकं पापं लभिष्यति पतिर्मम ॥
नोपतिष्ठति यः पूर्वां नोपास्ते यस्तु पश्चिमाम् ।
स च एवाशुचिर्नित्यं ब्रह्महत्यादिकं लभेत् ॥
वेदोक्तमपि संचिन्त्य बोधयामास तं मुनिम् ।
स च बुद्ध्वा मुनिश्रेष्ठश्चुकोप तां ददौ मुनिः ॥
जरत्कारुरुवाच ।
कथं मे सुव्रते ! साध्वि ! निद्राभङ्गः कृतस्त्वया ।
व्यर्थं व्रतादिकं तस्या या भर्तुश्चापकारिणी ॥
तपश्चानशनञ्चैव व्रतं दानादिकञ्च यत् ।
भर्तुरप्रियकारिण्याः सर्वं भवति निष्फलम् ॥
यया प्रियः पूजितश्च श्रीकृष्णः पूजितस्तया ।
पतिव्रतानतार्थेषु पतिरूपो हरिः स्वयम् ॥
सर्वदानं सर्वयज्ञः सर्वतीर्थनिषेवणम् ।
सर्वं व्रतं तपः सर्वमुपवासादिकञ्च यत् ॥
सर्वधर्मश्च सत्यञ्च सर्वदेवप्रपूजनम् ।
तत्सर्वं स्वामिसेवायाः कलां नार्हन्ति षोडशीम् ॥

सुपुण्ये भारते वर्षे पतिसेवां करोति या ।
वैकुण्ठं स्वामिना सार्द्धं सा याति ब्रह्मणः सदनम् ॥
विप्रियं कुरुते भर्तुर्विप्रियं वदति प्रियम् ।
असत्कुलप्रसूता या तत्फलं लभते ध्रुवम् ॥
कुम्भीपाकं व्रजेत् सा च यावच्चन्द्रदिवाकरौ ।
ततो भवति चाण्डाली पतिपुत्रविवर्जिता ॥
इत्युक्त्वा च मुनिश्रेष्ठो बभूव स्फुरिताधरः ।
चकम्पे मनसा साध्वी भयेनोवाच तं पतिम् ॥
मनसोवाच ।
सन्ध्यालोपभयेनैव निद्राभङ्गः कृतस्त्वया ।
कुरु शान्तिं महाभाग ! दुःखाया मम सुव्रत ! ॥
ब्रह्मशापाद्दारुणाया यश्च भङ्गं करोति च ।
स च व्रजेत् कालसूत्रञ्च स्वामिनञ्च विशेषतः ॥
इत्युक्त्वा मनसादेवी स्वामिनश्चरणाम्बुजे ।
पपात भक्त्या भीता च रुरोद च पुनः पुनः ॥
कुपितञ्च मुनिं दृष्ट्वा श्रीकृष्णः प्रभुमच्युतम् ।
तत्राजगाम भगवान् सन्ध्यया सह नारद ! ॥
तत्रागत्य मुनिश्रेष्ठमुवाच भास्करः स्वयम् ।
विनयेन च भीतश्च तया सह यथोचितम् ॥
श्रीसूर्य उवाच ।
सूर्योदयसमयं दृष्ट्वा धर्मलोपभयेन च ।
बोधयामास त्वां विप्र ! साधुसत्तं ज्ञानदाः ॥
क्षमस्व भगवन् ! ब्रह्मन् ! प्रायुं नोचितं मुने ! ॥
ब्राह्मणानाञ्च हृदयं नवनीतसमं तथा ।
तेषां क्रोधाद्दै क्रोधश्च ततो भक्तं भवेज्जगत् ॥
पुनः सृष्टुं द्विजः शक्तो न तेजस्वी द्विजात्परः ।
ब्राह्मणो ब्रह्मणो वंशः प्रज्वलन् ब्रह्मतेजसा ॥
शीघ्रं भावयेद्विश्वं ब्रह्मस्थोनिः सनातनम् ।
सूर्यस्य वचनं श्रुत्वा द्विजः शान्तो बभूव ह ॥
सूर्यो जगाम स्वस्थानं दृष्ट्वा ब्राह्मणाग्रिमम् ।
तत्याज मनसां विप्रः प्रतिज्ञापालनाय च ॥
हरन्ती शोकयुक्ता च हृदयेन विदूयता ।
सा सस्मार गुरुं शम्भुमिष्टदेवं हरिं विधिम् ॥
कश्यपं जन्मदातारं विपत्तौ भयकर्षिता ।
तत्राजगाम भगवान् मोपीशः शम्भुरेव च ॥
विधिश्च कश्यपश्चैव मनसा परिचिन्तितः ॥
दृष्ट्वा विधोर्भीष्टदेवं निर्गुणं प्रकृतेः परम् ।
तुष्टाव परया भक्त्या प्रणनाम मुहुर्मुहुः ॥
ननस्कार शम्भुञ्च ब्रह्माणं कश्यपस्तदा ।
कथमागमनं देवा इति प्रश्नं चकार सः ॥
ब्रह्मा तद्वचनं श्रुत्वा सहसा समयोचितम् ।
उवाच च नमस्कृत्य सुखोकैकपदाम्बुजम् ॥
ब्रह्मोवाच ।
यदि त्वया धर्मपत्नी धर्मिष्ठा मनसा सती ।
कृतश्चास्यां सुतोत्पत्तिं स्वधर्मपालनाय वै ॥
यतो वा ब्रह्मचारी वा भिक्षुर्ब्रह्मचरोऽपि वा ।
जायायाञ्च सुतोत्पत्तिं कृत्वा पश्चात् त्रजेन्मुने ! ॥
अकृत्वा तु सुतोत्पत्तिं वैरागी यस्त्यजेत् प्रियाम् ।
सर्वेषत्पत्तपुण्यञ्च चालयाच्च यथा जलम् ॥"
तस्याः पुत्रोत्पत्तिर्यथा,—

"ब्रह्मणो वचनं श्रुत्वा जरत्कारुर्मुनीश्वरः ।
चकार तत्राभिलाषं योगेन मनसापूर्वकम् ॥
तस्यै शुभाग्निं दत्त्वा ययुर्देवा मुदान्विताः ।
मुदान्विता च मनसा जरत्कारुर्मुदान्वितः ॥
मुनेः करस्पर्शमात्रात् सद्यो गर्भो बभूव ह ।
मनसायाः मुनिश्रेष्ठ ! मुनिश्रेष्ठ उवाच तम् ॥"
जरत्कारुरुवाच ।
गर्भेणानेन मनसे ! तव पुत्रो भविष्यति ।
जितेन्द्रियाणां प्रवरो धार्मिको वैष्णवाग्रणीः ॥
तेजस्वी च तपस्वी च यशस्वी च गुणान्वितः ।
वरो वेदविदाञ्चैव ज्ञानिनां योगिनामपि ॥
स च पुत्रो विष्णुभक्तो धार्मिकः कुलमुद्धरेत् ।
तृप्यन्ति पितरः सर्वे यज्ञलब्धमाजनो मुदा ॥
पतिव्रता सुशीला या सा प्रिया प्रियवादिनी ।
धर्मिष्ठपुत्रमाता च कुलजा कुलपालिका ॥
हरिभक्तिप्रदो बन्धुर्यस्मिंस्तनसुखप्रदम् ।
यो बन्धश्छित् स च पिता हरेर्नाम प्रदर्शकः ॥
सा गर्भधारिणी या च गर्भवासविमोचनी ।
विष्णुमन्त्रप्रदाता च स गुरुर्विष्णुभक्तिदः ॥
गुरुश्च ज्ञानदाता च तज्ज्ञानं ज्ञानभावनम् ।
आब्रह्मस्तम्बपर्यन्तं यतो विश्वं चराचरम् ॥
अविभूतं तिरोभूतं किं वा ज्ञानं तदन्यतः ।
वेदजं योगजं यद्यत्तत्सारं हरिसेवनम् ॥
तस्यानां सारभूतश्च हरिरित्यष्टिकक्षरम् ।
दत्तं ज्ञानं मया तुभ्यं स स्वामी ज्ञानदो हि यः ।
ज्ञानात् प्रमुच्यते बन्धात् न रिपुर्यो हि बन्धदः ॥
विष्णुभक्तिप्रदं ज्ञानं न ददाति हि यो गुरुः ।
स रिपुः शिष्यघाती च यो हि बन्धान्न मोचयेत् ॥
जन्मयोगभयात् क्लेशाद् यमयातनयातथा ।
न मोचयेद् यः स कथं गुरुस्त्राणो हि बान्धवः ॥
परमानन्दरूपञ्च ज्ञानमार्गप्रदर्शकम् ।
न दर्शयेद् यः स कथं कीदृशो बान्धवो गुणाम् ॥
अलं साध्वि ! परं ब्रह्मन्युतं ज्ञानञ्च निर्भयम् ।
निर्मूलञ्च पुरा कर्म भवेद् यत्सेवया ध्रुवम् ॥
मया ज्ञानेन तं ज्ञात्वा क्षम देवि ! मम प्रिये ! ।
क्षमायुक्तानां साध्वीनां सद्यात् क्रोधो न विद्यते ॥
पुष्करं तपसे यामि गच्छ देवि ! यथासुखम् ।
श्रीकृष्णचरणाम्भोजध्यानविच्छेदकातरः ॥
धनादिषु स्त्रियां योनिः प्रवृत्तिस्तत्र गच्छताम् ।
श्रीकृष्णचरणाम्भोजे विमूढानां मनोरथाः ॥
जरत्कारुवचः श्रुत्वा मनसा शोककातरा ।
सा साध्वीनेत्रा विनयादुवाच प्राणवल्लभम् ॥
मनसोवाच ।
दोषेणाहं त्वया ब्रह्मन् निद्राभङ्गेन ते प्रभो ! ।
यत्र यास्यामि तत्रैव मां मातर्गन्तुमिच्छसि ॥
बन्धुभेदः क्लेशतश्च पुत्रभेदस्ततः परः ।
प्राणभेदः प्राणानां विच्छेदात् सर्वतः परः ॥
पतिः पतिव्रतानान्तु गतपुत्राधिकः क्षणात् ।
सर्वस्मात् प्रियः स्त्रीणां प्रियस्तेनोदितं वृधैः ॥
पुत्रे यत्नैकपुत्राणां वैद्यानां यथा हरौ ।
नैके यत्नैकनेत्राणां क्षत्रियाणां यथा जये ॥
क्षत्रियाणां यथा युद्धे च ब्राह्मणानां यथा क्रियायाम्

यथा परस्मै चौराणां यथा चारे कुयोषिताम् ॥
विदुषाञ्च यथा ग्राह्ये वाणिज्ये वणिजां यथा ।
तथा ग्रन्थज्ञतः कान्ते साध्वीनां योषितां प्रभो ! ॥
दत्त्वा मनसा देवी ययौ तातस्य सन्निधिम् ।
तुष्टाव तातं क्रोडे तं तातया स कृपानिधिः ॥
तेजोदर्शेन मनसां ज्ञापयामास तां मुनिः ।
साश्रुश्च मुनेः क्रोडं विवेश भैरवाकारा ॥
तदा ज्ञानेन नौ दौ च विधोर्वा च बभूवतुः ।
क्षारं क्षारं पदाम्भोजं ज्ञात्वा परमात्मनः ॥
जगाम तपसे विप्रः स्वकान्तां सुप्रबोध्य च ।
जगाम मनसा ग्रन्थोः कैलासं मन्दिरं गुरोः ॥
पार्वती बोधयामास मनसां श्लोककर्त्रिकाम् ।
शिवस्यातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुषुवे मङ्गलप्रदे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो मन्त्रतन्त्रं श्रुत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिवोः ॥
रत्नसिंहासनञ्चैव ज्ञानेभ्यो ददौ शिवः ।
पार्वती च ददौ तस्मै रत्नानि विविधानि च ॥
ग्रन्थञ्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं तत्त्वत्रयं परम् ॥
भक्तिरस्तु सदाकाले यामीश्वरदेव गुरौ हरौ ।
यस्यास्य तेन सत्पुत्रो बभूवाशीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्करालया ।
संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥
दिव्यं वर्षसहस्रञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्तुं शिवं प्रभुम् ॥
शङ्करश्च नमस्कृत्य ज्ञात्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा मुदं प्राप प्रजापतिः ।
शतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने ! ॥
ब्राह्मणान् भोजयामास सोऽसंख्यान् श्रेयसे
शिवोः ।
अदितिश्च दितिश्चाह्वा मुदं प्रापुः परस्परम् ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये सदा ।
तदीयं पुनराख्यानं वक्ष्यामि सन्निधानय ॥"
तस्या माहात्म्यं यथा,—
"अथाभिमन्युतनये ब्रह्मशापः परीक्षिते ।
बभूव सहसा ब्रह्मन् ! देवदोषेण कर्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वाञ्च भोक्ष्यति ।
शशाप ब्रह्मणो नृपतिं कौशिक्याञ्च जलेन च ॥
राजा श्रुत्वा तच्छापं गङ्गाहारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुशाव धर्मसंहिताम् ॥
सप्ताहे समतीते तु तक्षकं पथि ।
धन्वन्तरिरूपं भोक्तुं ददर्श मानुषो नृपम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मन्त्रं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रफुल्लमानसः ।
तक्षको भक्षयामास नृपञ्च मन्त्रसंस्थितम् ॥
राजा जगाम वैकुण्ठं क्षारं क्षारं हरिं गुरुम् ।

सत्कारं कारयामास पितुर्मन्त्रेण यत्नतः ॥
राजा चकार यत्नञ्च सर्पसत्रं ततो मुने ! ।
ग्राणांस्तत्याज सर्पाणां सन्दहो ब्रह्मतेजसा ॥
स तक्षकञ्च भीतञ्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं त्यक्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च मुनयश्चायुर्मनसान्तिकम् ।
तानुवाच महेन्द्रश्च भयकातरविह्वलः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः स्तवेन ब्राह्मणायया ।
सर्वं समाप्य विप्रेभ्यो दक्षिणाश्च ददौ मुदा ॥
विप्राश्च मुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
भक्तः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोड़शोपचारं बलिञ्च तस्यियं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्वं किं भूयः श्रोतुमिच्छसि ॥"
इन्द्रकृतमनसापूजास्तोत्रं यथा,—

नारद उवाच ।

"केन तुष्टाव स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥

श्रीनारायण उवाच ।

स्नातः शुचिरथाचान्तो धृत्वा धौतं च वाससी ।
रत्नसिंहासनं देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव बहुकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
सर्वाङ्गे चन्दनं दत्त्वा पाद्यार्घ्यं भक्तिसंयुतः ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्यादौ देवषट्कं पूजयामास तां सतीम् ॥
ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवञ्च मन्त्रतः ।
दत्त्वाष्टाक्षरेण मन्त्रेण ददौ सर्वं यथोचितम् ॥
दत्त्वा षोड़शोपचारं दुर्लभं दुर्लभा हरिः ।
भक्त्या च पूजयामास ब्रह्मणा प्रेरितो मुदा ॥
वाद्यं नानाप्रकारञ्च वादयामास तत्र वै ।
बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥
देवविप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ।
तुष्टाव साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥

महेन्द्र उवाच ।

देवि ! त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां
वराम् ।
परात्परां परमां नहि स्तोतुं क्षमोऽधुना ॥
स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतत्परम् ।
न क्षमः प्रकृतं वक्तुं गुणानां तव सुव्रते ! ॥
शुद्धसत्त्वस्वरूपा त्वं कोपहिंसाविवर्जिता ।
न च भ्रमो मुनिस्तेन स्तुत्या च त्वया यतः ॥
त्वं मया पूजिता साध्वी जननी च यथादितिः ।
दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥
त्वया मे रक्षिताः प्राणाः पुत्रदारा सुरेश्वरि ! ।
अहं करोमि त्वां पूजां प्रीतिश्च वर्द्धतां मम ।

निद्रा यद्यपि पूज्या त्वं भवेश्च जगदम्बिके ! ।
तथापि तव पूजाञ्च वर्द्धयामि च सर्वतः ॥
ये त्वामाषाढ़संक्रान्त्यां पूजयिष्यन्ति भक्तितः ।
पञ्चम्यां मनसाख्यायामीप्सितां त्वां वा दिने दिने ॥
पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च ।
यशस्विनः कीर्तिमन्तो विद्यावन्तो गुणान्विताः ॥
ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ।
लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥
त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलालया ।
नारायणांशो भगवान् जरत्कारुर्मुनीश्वरः ॥
तपसा तेजसा त्वाञ्च मनसा सृष्टवान् पिता ।
अस्तीकं रक्षणायैव तेन त्वं मनसाभिधा ॥
मनसा देवितुं शक्ता त्वामतो विश्वयोगिनी ।
तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥
यां भक्त्या मनसा देवाः पूजयन्त्यनिशं भृशम् ।
तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः ॥
सत्त्वरूपा च देवि ! त्वं शुद्धसत्त्वनिषेवया ।
यो हि यद् भावयेन्नित्यं स तत् प्राप्नोति सत्तमः ॥
इत्युक्त्वा मनसां ज्ञात्वा गृहीत्वा भगिनीञ्च
ताम् ।
प्रजगाम स्वभवनं भूधराय परिच्छदाम् ॥
पुत्रेण सार्द्धं सा देवी स्थिरं तस्थौ पितुर्गृहे ।
ज्ञातिभिः पूजिता शुश्रूषिता वन्द्या च सर्वतः ॥
गोलोकात् सुरभी ब्रह्मन् ! तत्रागत्य सुपूजिताम् ।
तां ज्ञापयित्वा क्षीरेण पूजयामास सादरम् ॥
ज्ञानञ्च कथयामास गोप्यं सर्वसुदुर्लभम् ।
तया दत्ता पूजिता सा स्वलोकञ्च पुनर्ययौ ॥
इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
विषं भवेत् सुधातुल्यं विद्वेषी मो यदा भवेत् ।
पक्षलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ।
सर्पग्रायी भवेत् सोऽपि निश्चितं सर्पवाहनः ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४६ अध्यायः ॥
धन्वन्तरिकृतमनसाध्यानपूजादि यथा,—

धन्वन्तरिरुवाच ।

"इहागच्छ जगद्गौरि ! गृहाण मम पूजनम् ।
पूज्या त्वं त्रिषु लोकेषु परा कश्यपकन्यके ! ॥
त्वया जितं जगत् सर्वं देवि ! विष्णुस्वरूपया ।
तेन तैरस्त्रयोगश्च न क्षतो रणभूमिषु ॥
इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकन्धरः ।
गृहीत्वा शुक्लकुसुमं ध्यानं कर्तुं समुद्यतः ॥
शारदेन्दुप्रकाशाभां सर्वाङ्गसुमनोहराम् ।
ईषद्धास्यप्रसन्नास्यां शोभितां रत्नभूषणैः ॥
कबरीभारशोभाढ्यां रत्नाभरणभूषिताम् ।
सर्वाभयप्रदां देवीं भक्तानुग्रहकातराम् ॥
सर्वविद्याप्रदां शान्तां सर्वविद्याधिदेवताम् ।
नागेश्वराधिपां देवीं भजे नागेश्वरीं पराम् ॥
ध्यात्वैवं कुसुमं दत्त्वा नानोपचारसंयुतम् ।
दत्त्वा षोड़शोपचारं पूजयामास तां प्रिये ! ॥
स्तोत्रञ्चकार भक्त्या च पुलकाञ्चितविग्रहः ।
पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥*॥

मनस्का

धन्वन्तरिरुवाच ।
नमः सिद्धिस्वरूपायै सिद्धिदायै नमो नमः ।
नमः कश्यपकन्यायै वरदायै नमो नमः ॥
नमः शङ्करकन्यायै शङ्कराय नमो नमः ।
नमस्ते नागवाहिन्यै नागेश्वर्यै नमो नमः ॥
नमो नागभगिन्यै च योगिन्यै च नमो नमः ।
नमोऽस्तीकजनन्यै च जनन्यै जगतां नमः ॥
नमो जरत्कारुनाम्ने जरत्कारुप्रियायै नमः ॥
नमश्चिरं तपस्विन्यै सुखदायै नमो नमः ।
नमस्तपःस्वरूपायै फलदायै नमो नमः ॥
सुशीलायै च साध्वै च शान्तायै ते नमो नमः ।
इत्येवमुक्ता भक्त्या च प्रणनाम प्रयत्नतः ॥
तुष्टा देवी वरं दत्त्वा सत्वरं स्वालयं ययौ ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे धन्वन्तरिदर्प-भङ्गमनसाविजयो नाम ५१ अध्यायः ॥ * ॥
(कामरूपस्थितनदीविशेषः । यथा, कालिका-पुराणे । ७४ । ६६ ।
"ततस्तु मनसा नाम नदी पुण्यतमा परा ।
चरित्वा मनसाख्या तु ह्रदविन्दवतारिता ॥
वैशाखं सकलं मासं यस्यां स्नात्वा नरोत्तमः ।
विष्णुलोकमवाप्नैव ततो मोक्षमवाप्नुयात् ॥")

मनसादेवी, स्त्री. (मनसा चासौ देवी चेति । यद्वा, मनसा दीव्यतीति । दिव + अच् । ङीप् । "मनसः संज्ञायाम् ।" ६ । ३ । ४ । इति विभक्त्यलुक् च ।) मनसा । इति जटाधरः ॥ (यथा, ब्रह्मवैवर्ते प्रकृतिखण्डे । ४६ । ११८ ।
"समूह्य मनसादेवीं प्रययुः स्वालयञ्च ते ॥")
अस्या विवरणं मनसाशब्दे द्रष्टव्यम् ॥

मनसिज:, पुं, (मनसि जायत इति । जन् + डः । "ह्रलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ६ । इत्यलुक् ।) कामदेवः । इत्यमरः । १ । १ । २७ ॥ (यथा, भाकुन्तले द्वितीयाङ्के ।
"कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनास्वासि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥")

मनोजाते, त्रि ॥

मनसिशयः, पुं, (मनसि शेते इति । शी + "अधिकरणे शेतेः ।" ३ । २ । १५ । इति अच् । "ह्रलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ६ । इत्यलुक् ।) कामदेवः । इति हलायुधः ॥

मनस्कारः, पुं, (मनसि मनसो वा कारो निश्चय इति । यद्वा, कृ + भावे घञ् । मनसः कारो-विकारः करणमिति वा ।) मनसः सुखादिः । तत्पर्य्यायः । चित्ताभोगः २ । इत्यमरः । १ । ५ । ५ ॥ ते मनसः सुखादौ तत्परत्वे एकाग्र्यात् विषये मनसः पुनः पुनः प्रवृत्तिराभोगः । आभोगस्तात्पर्य्यमिति सर्व्वानन्दः । स्थैर्य-मित्यन्ये । आयार इत्यपरे । वाञ्छितवस्तु-प्राप्त्या चित्तस्य निराकाङ्क्षता । आभोगः परिपूर्णतेति परे । अनागतचिन्तनादिरूपो मनस्कार इत्यपरे । मनसो मनसि वा कारो

मनस्वि

निश्चयो मनस्कारः सेतु कश्चेति सः । मनसि करणं मनसि कारः इत्यपि दृश्यते अत्र बाहु-ल्यात् सप्तम्या अलुक् । इति तट्टीकायां भरतः ॥
मनस्तापः, पुं, (मनसः तापः पीड़ा ।) मनः-पीड़ा । यथा, गारुड़े १११ अध्याये ।
"मनस्तापं न कुर्व्वीत आपदं प्राप्य पार्थिवः ।
समबुद्धिः प्रसन्नात्मा सुखदुःखे समो भवेत् ॥"
अनुतापः । यथा, प्रायश्चित्ततत्त्वे ।
"ब्राह्मणीन यदा देवात् छिन्नं यज्ञोपवीतकम् ।
मनस्तापेन मुह्यन्ति ब्राह्मणास्तस्य वै क्षुभिताः ॥"
मनस्तालः, पुं (तल्यत इति । तल प्रतिष्ठायाम् + घञ् । मनसि तालः प्रतिष्ठा यस्य ।) दुर्गायाः सिंहः । इति त्रिकाण्डशेषः ॥ (हरितालः । तत्र क्लीवत्वमपि । यथा, वैद्यकरत्नमालायाम् ।
"हरितालं मनस्तालं वर्णकं नटभूषणम् ॥")
मनस्यं, त्रि, (मने मनसि वा हितं करोति । मना + क: । पक्षे विसर्गस्य लोपः ।) मनोऽवच्छिन्नम् । अन्तःकरणस्थितम् । यथा,—
"मनस्यं मनसध्यस्यं मध्यस्यं मनवर्च्छितम् ।
मनसा मनसालोक्य स्वयं सिद्ध्यन्ति योगिनः ॥"
इति श्रीमदुत्तरगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्জ্জুनसंवादे ब्रह्मनिरूपणं नाम १ अध्यायः ॥ "तादृशब्रह्मापरोक्षेण मुच्यते इत्याह मनस्यमित्यादि । मनस्यं मनोऽव-च्छिन्नम् । मनसध्यस्यं मनःसाक्षीभूतम् । मध्यस्यं सर्व्वसाक्षीभूतम् । मनवर्च्छितं सङ्कल्पविक-ल्पादिरहितम् । मननबोधात्मकम् । तदेवं मनसा परिशुद्धान्तःकरणेन । आलोक्य तद् गोचरापरोक्षचरमवृत्तिं लब्ध्वा । योगिनः ज्ञानिनः । स्वयमेव सिद्ध्यन्ति निवृत्ताविद्यका मुक्ता भवन्तीत्यर्थः ।" इति श्रीमदुत्तरगीताया: सुबोधिन्यां टीकायां श्रीगौड़पादाचार्य्यविर-चितायां १ अध्यायः ॥ * ॥ सर्व्वं मान्ता अद-न्तास्तेऽनेन प्रमाणादत्र मनश्शब्दोकारान्तः । मनःस्थितम् । यथा,—
"आजन्मं मन्मनस्थं यदपि मम मनोमन्थनः
क्वापि नाभूत
तत्ते पुण्यप्रतापादिह यदि मनः सिद्धमाभूत
सुरेन्द्र ॥"
इत्युद्भटः ॥
मनस्विनी, स्त्री, (प्रशस्तं मनोऽस्त्यस्याः इति । मनस् + विनि । ङीप् ।) प्रशस्तमनाः स्त्री । यथा, कुमारसम्भवे । ३ । ३० ।
"मनस्विनीमानविघातदक्षं
तदेव नाम वचनं स्मरस्य ॥"
सकलाः पत्नी । यथा, मार्कण्डेयपुराणे । ५२ । १७ ।
"प्राणैस्त्वं सकलञ्च मिना मम मनायायाः ।
मनस्विन्यामहं तस्मात् पुत्रो वेदशिरा मम ॥"
प्रजापतिपत्नी । सा च सोमस्य वसोर्जननी । यथा, महाभारते । १ । ६६ । १६ ।
"धूम्रायास्तु धरः पुत्रो ब्रह्मविद्यो ध्रुवस्तथा ।
चन्द्रमास्तु मनस्विन्याः श्यामायाः श्यसनस्तथा ॥")

मनीषी

मनस्वी, [न्] पुं, (प्रशस्तं मनोऽस्यस्येति । मनस् + विनिः ।) ऋषभः । इति राजनिर्घण्टः ॥ प्रशस्तमनोयुक्ते, त्रि । यथा,—
"मनस्विभिर्गर्हितः पन्थाः समारोढुमसाम्प्रतम् ॥"
इति कादम्बरीटीकायां दुर्गादासः ॥
मनाक्, अ, (मन्यते इति । मन ज्ञाने + बाहुल-कात् आक्प्रत्ययः ।) अल्पम् । इत्यमरः । १ । ४ । ८ ॥ (यथा, भागवते । १ । १० । ३५ ।
"मरुधन्वमतिक्रम्य सौवीराभीरयोः परान् ।
आनर्त्तान् भार्गवोपागाच्छ्रान्तवाहो मनाग्-विभुः ॥")
मन्दः । इति मेदिनी । अत्यय-के, ११ ॥
मनाकारं, क्ली, (मनाक् यथा तथा करोतीति, कृ + अच् ।) मङ्कला । मल्लिकागन्धयुक्तागुरु । इति शब्दचन्द्रिका । (मनाक् अल्पस्य करः ।) इषत्कारके. त्रि ॥
मनायौ, स्त्री, (मनोः पत्नीति । मनु + "मनोरौ वा ।" ४ । १ । ३८ । इति ङीप् उदादेशश्च ।) मनोः पत्नी । इति जटाधरः ॥
मनायी, स्त्री, (मनोः स्त्री । मनु + "मनोरौ वा ।" ४ । १ । ३८ । इति ङीप् औकारस्यान्तादेशः ।) मनुपत्नी । इति मुग्धबोधव्याकरणम् । (यथा, भागवते । २ । १ । ४ । १६ ।
"सा मनोरेव जायां मनायीं प्रविवेश ॥")
मनिषं, त्रि, (मन बोधे + क्तः ।) ज्ञातम् । इत्य-मरः । ३ । १ । १० ॥
मनीकं, क्ली. (मन्यते ग्रीभार्थमाद्रियते इति । मन + "अलीकादयश्च ।" उणा० ४ । २५ । इति कीकन्प्रत्ययेन निपातनात् साधु ।) अङ्ग नम् । इत्युज्ज्वलदत्तादिकोषः ॥
मनीषा, स्त्री. (ईष् + यः । टाप् । मनस ईषा गमनम् । "ग्रहकन्यादिषु परूपं वाच्यम् ।" १ । २ । ६७ । इत्यस्य वार्त्तिकोक्त्या साधुः ।) बुद्धिः । इत्यमरः । २ । ७ । ५ ॥ (यथा, ऋग्वेदे । १ । ५४ । ८ ।
"असमं क्षत्रमसमा मनीषा ॥"
स्तुतिः । यथा, ऋग्वेदे । ५ । ८३ । १० ।
"उत प्रजाभ्योऽविदो मनीषाम् ॥"
"मनीषा स्तुतिमविद् प्राप्नवानसि ॥" इति तद्भाष्ये सायणः ॥)
मनीषी, [न्] पुं, (मनीषा अस्त्यस्येति । मनीषा + वीह्यादित्वात् इनिः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ (यथा च मनौ । १ । २० ।
"यज्ञसाधनवयवा: स्तुत्यास्तस्यैमाश्चायतनञ्च घट ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥")
बुद्धियुक्ते, त्रि ॥ (यथा, ऋग्वेदे । १ । २६ । ४५ ।
"चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ॥"
"मनीषिणो मेधाविनः ।" इति तद्भाष्ये सायणः ॥)

मनुः, स्त्री, (मन्+"मृषृकमिकमीति।" उणा० १।११। इति उः।) एका। इति राजनिर्घण्टः॥ (मनोः पत्नीति। मनु+"मनोरौ वा।"॥ १।३८। इत्यत्र "वा बहुलेन ङावपि विकल्पेनेते। तेन नित्यं भवति। मनोः स्त्री मनायी मनावी मनुः।" इति काशिकोक्तेः पक्षे ङीषभावः।) मनुपत्नी। इति लिङ्गादिसंग्रहे अमरः॥

मनुः, पुं, (मन्यते इति। मन्+"मृषृकमिकमीति।" उणा० १।११। इति उः।) ब्रह्मणः पुत्रः। स च प्रजापतिर्धर्म्मशास्त्रवक्ता च। इति लिङ्गादिसंग्रहे अमरः॥ मनुष्यः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८। ४७। ४।
"मनोर्विश्वस्य येदिम आदित्याराय ईशते।
ऽनेहसो वरुतय; सुव्रतयो वरुतय; ॥"
"मनोः मनुष्यस्य।" इति तद्भाष्ये सायणः॥) जिनभेदः। इति त्रिकाण्डशेषः॥ मन्त्रः। इति जटाधरः॥ (यथा, गौतमीयतन्त्रे। ७। ५।
"गोत्रिरत्नयकवर्णाद्यैस्तोयवेद् गुरुमात्मनः।
यथा ददाति मन्त्रः; प्रसन्नवदनो मनुम् ॥"*॥)
प्रतिकल्पे चतुर्दश मनवो भवन्ति तेषां नामानि यथा। स्वायम्भुवः १ स्वारोचिषः २ उत्तमः ३ तामसः ४ रैवतः ५ चाक्षुषः ६ एते गताः। वैवस्वतः ७। वर्त्तमानोऽयम्। सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्म्मसावर्णिः ११ रुद्रसावर्णिः १२ देवसावर्णिः १३ इन्द्रसावर्णिः १४ एते भविष्यन्ति। इति श्रीभागवते ८ स्कन्धे १ अध्यायः॥ * ॥
एतेषामुत्पत्तिर्यथा,—
"आद्यो मनुर्ब्रह्मपुत्रः प्रतिरूपाप्रतिर्मनौ।
धर्म्मिष्ठानां वरिष्ठश्च गरिष्ठो मनुषु प्रभुः॥
स्वायम्भुवः शम्भुशिष्यो विष्णुव्रतपरायणः।
जीवन्मुक्तो महाज्ञानी भवतः प्रथितामहः॥
संप्राप ज्ञानदात्यश्च गोलोकञ्च जगाम सः।
दृष्ट्वा सुतं स्वपुत्रञ्च प्रहृष्टश्च प्रजापतिः॥
तुष्टाव शङ्करं तुष्टः सस्रजे मनुमण्डकम्।
स च स्वयम्भूपुत्रश्च पुरः स्वायम्भुवो मनुः॥
स्वारोचिषो मनुश्चैव द्वितीयो वह्निनन्दनः।
राजा वदान्यो धर्म्मिष्ठः स्वायम्भुवसमो महान्॥
प्रियव्रतसुतावन्यौ द्वौ मनू धर्म्मिणां वरौ।
तौ ह्लीध्रतुर्थौ च वैष्णवौ तामसोत्तमौ॥
तौ च शङ्करशिष्यौ च ज्ञानभक्तिपरायणौ।
धर्म्मिष्ठानां वरिष्ठश्च रैवतः पञ्चमो मनुः॥
षष्ठश्च चाक्षुषो ज्ञेयो विष्णुभक्तिपरायणः।
आदित्यदेवः सूर्य्यसुतो वैष्णवः सप्तमो मनुः॥
सावर्णिः सूर्य्यतनयो वैष्णवो मनुरष्टमः।
नवमो दक्षसावर्णिर्विष्णुव्रतपरायणः॥
दशमो ब्रह्मसावर्णिर्ब्रह्मज्ञानविशारदः।
तनयश्च धर्म्मसावर्णिर्मनुरेकादशः स्मृतः॥
धर्म्मिष्ठश्च वरिष्ठश्च वैष्णवानां सदा प्रणी।
त्रयोदशो रुद्रसावर्णिर्मनुश्च द्वादशः स्मृतः॥
धर्म्मात्मा देवसावर्णिर्मनुरेव त्रयोदशः।
चतुर्दशो महाज्ञानी चैत्रसावर्णिरेव च॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५१ अध्यायः॥
अपि च। स्वायम्भुवः १। स च गायत्र्यां ब्रह्मणो जातः। अस्य पुत्राः; दश। अग्निधः। अग्निबाहुः। रिपुञ्जयः। सवनः। ज्योतिष्मान्। द्युतिमान्। हव्यः। मेधाः। मेधातिथिः। वसुश्च। स्वारोचिषः २। अस्य पुत्राश्चत्वारः। नभः। नभस्यः। प्रहस्तिः। भावनश्च। औत्तमिः ३। अस्य पुत्राः; दश। ऊर्जः। ऊर्ज्जस्वः। भूर्ज्जः। शुचिः। शुक्रः। मधुः। माधवः। नभस्यः। नभः। सहश्च। तामसः ४। अस्य पुत्राः दश। अकल्मषः। तपोधन्वी। तपोमूलः। तपोधनः। तपोरतिः। तपस्यः। तपोद्युतिः। परन्तपः। तपोभागी। तपोयोगी च। रैवतः ५। तस्य पुत्राः; दश। अरुणः। तत्त्वदर्शी। धृतिमान्। हव्यपः। कविः। सुक्रतुः। निरुत्सुकः। सत्यः। निर्म्मोहः। प्रकाशकश्च। चाक्षुषः ६। स च ध्रुवपौत्रात् रिपुञ्जयात् ब्रह्मदीर्घिकायां वीरणकन्यायां वैरिण्यां जातः। तस्य भार्य्या नड्वला। तस्य पुत्राः; दश। उरुः। पुरुः। शतद्युम्नः। तपस्वी। सत्यवाक्। कविः। अग्निष्टुत्। अतिरात्रः। सुद्युम्नः। अभिमन्युश्च। वैवस्वतः ७। स च सूर्य्यात् संज्ञायां जातः। तस्य पुत्राः; दश। इलः। इक्ष्वाकुः। कुशनाभः। अरिष्टः। धृष्टः। नरिष्यन्तः। करूषः। शर्य्यातिः। पृषधः। नाभागश्च। सावर्णिः ८। स च सूर्य्यात् छायायां जातः। तस्य पुत्राः; दश। धृतिः। वरीयान्। यवसः। सुवर्णः। हविः। चरिष्णुः। ऊर्ध्वः। सुमतिः। वसुः। शुभ्राश्च। रौच्यः ९। असौ रुचेः प्रजापतेः पुत्रः। भौत्यः १०। असौ भूतिनामकप्रजापतेः पुत्रः। मेरुसावर्णिः ११। असौ ब्रह्मणः पुत्रः। ऋतुः १२। ऋतुधामा १३। विष्वक्सेनः १४। इति मात्स्ये नवमाध्यायावधि एकविंशत्यध्यायपर्य्यन्तम्॥ क्रमशस्तेषां विवरणानि यथा, १स्वायम्भुवः। यथा, मार्कण्डेये ५६ अध्याये॥
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपर्व्वता।
ससमुद्रा क्रतवो प्रतिवर्षं निवेशिता॥"
२ स्वारोचिषः। यथा, तत्रैव ६७ अध्याये।
मार्कण्डेय उवाच।
"ततः स्वारोचिषं नाम्ना द्युतिमन्तं प्रजापतिम्।
मनुत्वकार भगवांस्तस्य मन्वन्तरं शृणु॥
तन्वन्तरे तु ये देवा मनयश्चतसुताश्च ये।
भौपाला: कौष्टुके! ये तान् गदतस्तं निबोधमे॥
देवाः पारावतास्तत्र तथैव तुषिता द्विज!।
स्वारोचिषेऽन्तरे नेता विपश्चिदिति विश्रुतः॥
ऊर्ज्जस्तम्बस्तथा प्राणो दत्तोलिर्ऋषभस्तथा।
निश्चरश्चार्वरीवांश्च तत्र सप्तर्षयोऽभवन्॥
चैत्र-किंपुरुषाद्याश्च सुताश्चस्य महात्मनः।
सप्तासन् सुमहावीर्या; पृथिवीपरिपालकाः॥
तस्य मन्वन्तरं यावत्तावत्तदंशविस्तरे।
सक्षेयमवनि; सर्व्वा द्वितीयं वै तदन्तरम्॥
स्वरोचिषस्तु चरितं अत्र स्वारोचिषस्य च।
निगृह्य सुच्यते पापैः; श्रद्दधानो हि मानवः॥"
अस्याग्न्यद्विवरणं तत्रैव ६१ अध्यायमारभ्य ६६ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ ३ औत्तमः। यथा, तत्रैव ७३ अध्याये।
मार्कण्डेय उवाच।
"मन्वन्तरे तृतीयेऽस्मिन् औत्तमस्य प्रजापतेः।
देवानिन्द्रञ्च वीन् भूपान् निबोध गदतो मम॥
सुधामानस्तथा देवा यथानामानुकारिणः।
सत्याश्च द्वितीयोऽन्यश्चिदग्नाभा तथा गणः॥
तृतीये तु गणे देवाः; शिवाख्या मुनिसत्तम!।
शिवाः; सुरूपतस्ते तु श्रुताः पापप्रणाशनाः॥
प्रतर्दनाख्यश्च मनो देवानां मुनिसत्तम!।
चतुर्थस्तत्र कथित औत्तमस्यान्तरे मनोः॥
वशवर्त्तिनः पञ्चमेऽपि देवाश्चत्र गणे द्विज!।
यथाख्यातस्वरूपास्तु सर्व एव महात्मने!॥
एते देवगणाः; पञ्च स्मृता यज्ञभुजस्तथा।
मन्वन्तरे मनुश्रेष्ठे सर्वे द्वादशका गणाः॥
तेषामिन्द्रो महाभागस्त्रैलोक्ये स गुरुर्भवेत्।
शूरे क्रतूनामाहृत्य सुशान्तिर्नाम नामतः॥
यस्योपसर्गनाशाय नामाद्यरविभूषिता।
अद्यापि मानवैर्गाथा गीयते तु महीतले॥
सुशान्तिर्देवराट् काल; सुशान्तिं स प्रयच्छति।
सहिनः शिवसत्याद्यैस्तथैव वशवर्त्तिनः॥
अजः परशुचिर्दिव्यो महाबलपराक्रमः।
पुत्रास्तस्य मनोरासन् विख्यातास्त्रिदशोपमाः॥
तनूद्भवसम्भवैर्भूमिः पालिताभूत्सुरेश्वरैः।
यावन्मन्वन्तरं तस्य मनोरुत्तमतेजसः॥
चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः।
सनत्रैतादिसंज्ञानां यान्युक्तानि युगे मया॥
स्वतेजसा हि तपसो वशिष्ठस्य महात्मनः।
तनयाश्चान्तरे तस्मिन् सप्त सप्तर्षयोऽभवन्॥
ह्येतन्मयैतत्कथितं तव मन्वन्तरं मया॥"
अस्याग्न्यद्विवरणं तत्रैव ६८ अध्यायमारभ्य ७२ अध्यायपर्य्यन्तं द्रष्टव्यम्॥ ४ तामसः। यथा, तत्रैव ७४ अध्याये।
"तामसाख्यो मनुरभूत्तस्य मन्वन्तरं शृणु।
ये देवा यत्पतिर्यश्च देवेन्द्रो ये तथर्षयः।
ये पुत्राश्च मनोस्तस्य पृथिवीपरिपालकाः॥
सत्यास्तथाग्ये सुधियः; सुरूपा हरयस्तथा।
एते देवगणास्तत्र सप्तर्विंशतिका मुने!॥
महाबलो महावीर्यः; शतयज्ञोपलक्षितः।
शिखिरिन्द्रस्तथा तेषां देवानामभवद्विभुः॥
ज्योतिर्धामा पृथुः; काव्यश्चैत्रोऽग्निवेलकस्तथा।
पीवरश्च तथा अत्रन्!। सप्त सप्तर्षयोऽभवन्॥
नरः; ख्यातिः; प्रसादश्च जानुजङ्घादयस्तथा।
पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः॥"
अस्याग्न्यद्विवरणं तत्रैव द्रष्टव्यम्॥ ५ रैवतः। यथा, तत्रैव ७५ अध्याये।

मार्कण्डेय उवाच ।
"तामादाय ततो भूपः स्वमेव नगरं ययौ ।
तस्यादजायत सुतो रैवतो रैवतो मनुः ॥
समेतः सकलैर्धर्मैर्मानवैरपराजितः ।
विज्ञाताखिलशास्त्रार्थो वेदविद्यार्थपारगः ॥
तस्य मन्वन्तरे देवान् मुनिदेवेन्द्रपार्थिवान् ।
कथ्यमानान्मया ब्रह्मन् ! निबोध सुसमाहितः ॥
सुमेधसस्तथा देवास्तथा भूपतयो द्विज ! ।
वैकुण्ठाश्चामिताभाश्च चतुर्दश चतुर्दश ॥
तेषां देवगणानान्तु चतुर्णामपि चेश्वर ! ।
नाम्ना विभुरभूदिन्द्रः शतयज्ञोपलक्षकः ॥
हिरण्यलोमा वेदश्रीरूर्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ॥
वशिष्ठश्च महाभागो वेदवेदाङ्गपारगः ।
एते सप्तर्षयश्चासन् रैवतस्यान्तरे मनोः ॥
बलबन्धुर्महावीर्यः सुयज्ञस्तत्तथापरः ।
सत्यकाद्यास्तथैवासन् रैवतस्य मनोः सुताः ॥
रैवतान्तास्तु मनवः कथिता ये मया तव ।
स्वायम्भुवाश्रया ह्येते स्वारोचिषमतः परम् ॥"
अस्याग्निवरणं तत्रैव द्रष्टव्यम् ॥ ६ चाक्षुषः ।
यथा, तत्रैव ७६ अध्याये ।
"तस्य मन्वन्तरेशस्य येऽन्तरत्रिदशा द्विज ! ।
ये चर्षयस्तथैवेन्द्रो ये सुताश्चास्य तान् शृणु ॥
आर्या नाम सुरास्तत्र तेषामेकोऽष्टको गणः ।
प्रख्यातकर्मणां विप्र ! यज्ञे हविभुजामयम् ॥
प्रख्यातबलवीर्याणां प्रभामण्डलदुर्दृशाम् ।
द्वितीयश्च प्रसूताख्यो देवानामष्टको गणः ॥
तथैवाष्टक एवान्यो भव्याख्यो देवतागणः ।
चतुर्थश्च गणस्तत्र यूथगाख्यस्तथाष्टकः ॥
तेषसंज्ञास्तथैवान्ये तत्र मन्वन्तरे द्विज ! ।
पञ्चमे च गणे देवास्तत्रसंज्ञा महाबलाः ॥
सूनं क्रतूनामाहृत्य यस्तेषामधियोऽभवत् ।
मनोजवस्तथैवेन्द्रः संख्यातो यज्ञभागभुक् ॥
सुमेधा विरजाश्चैव हविष्मान्नुसतो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः ॥
उरुपुरुषसुतन्तुम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥"
अस्याग्निवरणं तत्रैवाध्याये द्रष्टव्यम् ॥ ७ वैवस्वतः । यथा, तत्रैव ७६ अध्याये ।
मार्कण्डेय उवाच ।
"आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः ।
भृगवोऽङ्गिरसश्चार्ष्टौ यज्ञे देवगणाः स्मृताः ॥
आदित्या वसवो रुद्रा विश्वेया नवमात्मजाः ।
साध्याश्च वसवो विश्वे धर्मपुत्रगणाश्चयः ॥
भृगोस्तु भृगवो देवाः पुत्रा ह्यङ्गिरसः सुताः ।
एष सर्गश्च मारीचो विज्ञेयः साम्प्रताधिपः ॥
अर्व्वरीवो नाम चैवेन्द्रो महात्मा यज्ञभागभुक् ।
अतीतानागता ये च वर्तन्ते साम्प्रतञ्च ये ॥
सर्वे ते त्रिदशेन्द्रास्तु विज्ञेयास्तुल्यलक्षणाः ।
सदृक्षाश्चाः कुलिशिनः सर्व एव पुरन्दराः ॥
मघवन्तो वृषा सर्वे ह्यङ्गिरो गणगामिनः ।
ते सुतन्तवः सर्वे भूताभिभवसंज्ञकः ॥

धर्मात्मजैः कारणैः सुहोराधिपत्यगुणान्वितः ।
भूतभव्यभवन्नाथाः शृणु चैतत् त्रयं द्विज ! ॥
भूर्लोकोऽयं स्मृता भूमिरन्तरीक्षं दिवः स्मृतम् ।
दिवादित्यश्च तथा स्वर्गश्चैलोक्यमिति गद्यते ॥
अत्रिश्चैव वशिष्ठश्च काश्यपश्च महामुनिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥
तथैव पुत्रो भगवान्मरीचेस्तस्य महात्मनः ।
जमदग्निस्तु सप्तैते सुतयोश्च तथान्तरे ॥
इक्ष्वाकुनाभगश्चैव धृष्टशर्मातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभागो दिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्राः प्रकीर्तिताः ॥
वैवस्वतमिदं ब्रह्मन् ! कथितन्ते मयान्तरम् ।
अस्मिन् श्रुते नरः सद्यः पठिते चैव सत्तम ! ॥
मुच्यते पातकैः सर्वैः पुण्यञ्च महदश्नुते ॥"
अस्याग्निवरणं ७७-७८ अध्याययोर्द्रष्टव्यम् ॥
८ सावर्णिः । यथा, तत्रैव ८० अध्याये ।
मार्कण्डेय उवाच ।
"कथितस्तव सावर्णिश्छायासंज्ञासुतश्च यः ।
पूर्व्वजस्य मनोस्तुल्यः स मनुर्भविताष्टमः ॥
रामो व्यासो गालवश्च दीप्तिमान् कृप एव च ।
ऋष्यशृङ्गस्तथा द्रोणिस्तत्र सप्तर्षयोऽभवन् ॥
सुतपास्तामिताभाश्च मुख्याश्चैव त्रिधा सुराः ।
विंशकः कथितास्तेषां चयाख्यो त्रिगुणो गणः ॥
तपस्तपश्च शुक्रश्च मुनिर्व्योनिः प्रभाकरः ।
प्रभावो दयितो धर्मस्तेजोरश्मिश्च वक्रतुः ॥
इत्यादिकस्तु सुतपा देवानां विंशको गणः ।
प्रसुविंसुविभासाद्यस्तथ्यो विंशको गणः ॥
सुराणामभिमानाख्यस्तृतीयमपि मे शृणु ।
दमो दान्तो वरः सोमो विख्याताश्चैव विंशतिः ॥
मुख्या ह्येते समाख्याता देवा मन्वन्तराधिपाः ॥
मारीचस्यैव ते पुत्राः काश्यपस्य प्रजापतेः ॥
भविष्याश्च भविष्यन्ति सावर्णस्यान्तरे मनोः ।
तेषामिन्द्रो भविष्यस्तु बलिर्वैरोचनिर्मुने ! ॥
पातालमाश्रितो योऽद्यापि दैत्यैः समयबन्धनः ।
विरजाश्चावतीरश्च निर्मोहः सत्यवाक् क्षितिः ॥
विख्याताश्चैव तनयाः सावर्णस्य मनोर्नृपाः ।"
अस्याग्निवरणं तत्रैव ८१-८३ अध्यायेषु द्रष्टव्यम् ॥ ६ दक्षसावर्णिः । यथा, तत्रैव ८४ अध्याये ।
"दक्षपुत्रश्च सावर्णो भावी यो नवमो मनुः ।
कथयामि मनोस्तस्य ये देवा सुरयो नृपाः ॥
पारामरीचिधर्माश्च सुधर्माणश्चथा सुराः ।
एते त्रिधा भविष्यन्ति सर्वे द्वादशका गणाः ॥
तेषामिन्द्रो भविष्यस्तु सद्रथाख्यो महाबलः ।
साम्प्रतं क्रान्तिकेयो यो वह्निपुत्रः षडाननः ॥
अद्भुतो नाम शुक्रोऽसौ भावी तस्यान्तरे मनोः ।
मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांश्चथा ॥
सप्तर्षयोऽत्र सवनश्चथ्यो हव्यवाहनः ।
पृथुकैर्नुर्वर्हकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाश्चथाचिष्मान् भूकुरिन्दो हरिद्वयः ॥
एते वृषसुतास्तस्य दक्षपुत्रस्य वै नृपाः ॥"

१० ब्रह्मसावर्णिः । यथा, तत्रैव ८७ अध्याये ।
"मनोस्तु दशमस्यास्यक्रतु मन्वन्तरं द्विज ! ॥
मन्वन्तरे च दशमे ब्रह्मपुत्रस्य धीमतः ।
सुक्षत्रौजा निरुद्धाश्च त्रिःप्रकाराः सुराः स्मृताः ।
शतसंख्या हि ते देवा भविष्या भाविनो मनोः ।
यत् प्राणिनां शतं भावि तद्देवानां तदा शतम् ॥
शान्तिरिन्द्रस्तथा भावी सर्वैरिन्द्रगुणैर्युतः ।
सप्तर्षींस्तान् निबोध त्वं ये भविष्यन्ति वै तदा ॥
व्यापोमूर्तिर्हविष्मांश्च सुतपो सत्य एव च ।
नाभागोऽप्रतिमश्चैव वाग्विष्टश्चैव सप्तमः ॥
सत्यश्चोत्तमौजाश्च भूमिसेनश्च वीर्यवान् ।
शतानीकोऽथ दृढमो दृढमित्रो जयद्रथः ॥
भूरिद्युम्नः सुपर्व्वा च सप्तैते तनया मनोः ॥"
११ धर्मसावर्णिः । यथा, तत्रैव ।
"भविष्या धर्मपुत्रस्य सावर्णस्यान्तरं शृणु ॥
विहङ्गमाः कामगाश्च निर्माणरतयस्तथा ।
त्रिःप्रकारा भविष्यन्ति एकैकस्मिंश्चतुर्दशा गणाः ॥
मासतुर्दिवसा ये तु निर्माणपतयस्तु ते ।
विहङ्गमा राचयोऽथ मौकुन्दाः कामगा गणाः ॥
इन्दो शुचाख्यो भविता तेषां प्रख्यातविक्रमः ।
हविष्मांश्च वरिष्ठश्च ऋतिरन्यस्तथार्जवः ॥
निस्वरश्चानघश्चैव विदिताश्चो महामुनिः ।
सप्तर्षयोऽत्रे तस्मिन्नधिदेवश्च सप्तमः ॥
सर्वतगः सुपर्व्वा च देवानीकः पृथुश्रुतः ।
हेमधन्वा हरिर्यज्ञ भाविनस्तनुजा नृपाः ॥"
१२ रुद्रसावर्णिः । यथा, तत्रैव ।
"द्वादशे रुद्रपुत्रस्य प्राप्ते मन्वन्तरे मनोः ।
सावर्णिकस्य ये देवा सुतपश्च शृणुष्व तान् ॥
सुधर्माणः सुमनसो हरिता रोहितास्तथा ।
सुवर्णाश्च सुराश्चैव पञ्चैते दशका गणाः ॥
तेषामिन्द्रस्तु विज्ञेय ऋतधामा महाबलः ।
सर्वैरिन्द्रगुणैर्युक्तः सप्तर्षीनपि मे शृणु ॥
तपोमूलस्तपोधैर्यस्तपोनिधिः ।
तपोरतिस्तपोधन्यः सप्तमस्तु तपोधृतिः ॥
देववानुपदेवश्च देवश्रेष्ठो विदूरथः ।
मित्रवान् मित्रविन्दश्च भाविनस्तनुजा नृपाः ॥"
१३ रौच्यः । यथा, तत्रैव ।
"त्रयोदशस्य पर्य्याये रौच्याख्यस्य मनोः सुताः ।
सप्तर्षींश्च नृपांश्चैव गदतो मे निबोधत ॥
सुधर्माणः सुराश्चैव सुकर्माणश्चथापरे ।
सुधर्माणः सुरा ह्येते समता सुनिसत्तम ! ॥
महाबलो महावीर्यस्तेषामिन्द्रो दिवस्पतिः ।
भविष्यानथ सप्तर्षीन् गदतो मे निबोधत ॥
धृतिमानव्ययश्चैव सत्यदर्शी निरुत्सुकः ।
निर्मोहः सुतपाश्चान्यो निष्प्रकम्पश्च सप्तमः ॥
चित्रसेनो विचित्रश्च नयनिर्भयो दृढः ।
सुतेजाः चित्रवृद्धिश्च सुतपश्चैव सप्तमः ॥"
१४ भौत्यः । यथा, तत्रैव १०० अध्याये ।
"भौत्यो नाम मनुस्तस्य पुत्रो भूतेरजायत ।
तस्य मन्वन्तरे देवानृषीन् भूपांश्च मे शृणु ॥

मनुः

भविष्यस्य भविष्यासु गरतो मम विस्तरात् ।
देवेन्द्रो यच्च भविता तस्य विख्यातकर्मणः ॥
चाक्षुषाच्च मनिष्ठाच्च पवित्रा आङ्गिरात्तथा ।
धारात्मकाच्च हत्येते पञ्च देवगणाः स्मृताः ॥
अग्निरिन्द्रस्तदा तेषां विद्वद्गणानां भविष्यति ।
महाबलो महावीर्यः सर्वैरिन्द्रगुणैर्युतः ॥
अमोघचाक्षिवाहुश्च सुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥
गुरुर्गभीरो ब्रह्मश्च भरतोऽनुग्रहस्तथा ।
स्त्रीमानी च प्रतीरश्च विष्णुः संकल्पनस्तथा ॥
तेजस्वी सुबलश्चैव औद्यस्यैते मनोः सुताः ।
चतुर्दश मयैतस्ते मन्वन्तरमुदाहृतम् ॥"
मन्वन्तरकथाश्रवणफलमाह तत्रैव १०० अध्याये ।
"श्रुत्वा मन्वन्तराण्येवं क्रमेण मुनिसत्तम ! ।
पुण्यमाप्नोति मनुजस्तथान्तोऽप्याप्नुते सद्गतिम् ॥
श्रुत्वा मन्वन्तरं पूर्वं धर्ममाप्नोति मानवः ।
स्वारोचिषस्य श्रवणात् सर्वकामानवाप्नुते ॥
औत्तमेयमवाप्नोति ज्ञानञ्चाप्नोति तामस ।
रैवते च श्रुते बुद्धिं सुरूपां विन्दते ध्रुवम् ॥
आरोग्यञ्चाक्षुषे पुंसां श्रुते वैवस्वते बलम् ।
गुणवत्पुत्रपौत्रन्तु सूर्यसावर्णिके श्रुते ॥
माहात्म्यं ब्रह्मसावर्णे धर्मसावर्णिके शुभम् ।
मनित्वमाप्नोति मनुर्ब्रह्मसावर्णिके जयम् ॥
ज्ञानिश्रेष्ठो गुणैर्युक्तो दक्षसावर्णिके श्रुते ।
निष्पापत्वमरिष्टं रौच्यं श्रुत्वा नरोत्तम ! ॥
देवप्रसादमाप्नोति भौते मन्वन्तरे श्रुते ।
तथाग्निष्वात्तपुत्रांश्च गुणयुक्तानवाप्नुते ॥
सर्वार्थयशुक्रमाद्यस्य श्रवणात् मुनिसत्तम ! ।
मन्वन्तराणि सप्तापि श्रुतानि फलमुत्तमम् ॥
तच्च देवासुरोत्पन्नान्नक्षत्रतिथयानुगान् ।
वंशांश्च श्रुत्वा सर्वेभ्यः पापेभ्यो विप्रमुच्यते ॥
देवर्षीन्नृपाश्चार्ये ये तन्मन्वन्तराधिपाः ।
ते प्रीयन्ते तथा पीता प्रयच्छन्ति शुभां मतिम् ॥
ततः शुभां मतिं प्राप्य त्यक्त्वा कर्म तथा शुभम् ।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्दश ॥
सर्वे सुकृतिनः सैन्याः सर्वे सौदामनयो यथाः ।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम् ॥"
विष्णुः । यथा, महाभारते । १३ । १४६ । १६ ।
"विश्वकर्मा मनुश्चैव त्वष्टाऽथ विरोचनः ।"
मननकर्त्ता विद्वान् । यथा, वाजसनेयसंहितायाम् । १५ । ४६ ।
"तच्छिल्पं त्रिदशैः पूर्वं तक्षाणमिव यमाहुर्मनवस्त्वौशनसं
वर्द्धकिम् ॥"
"मनवः मननकर्त्तारो विद्वांसः ॥" इति तट्टीकायां महीधरः ॥* अन्तःकरणम् । यथा, भागवते । ६ । ४ । २५ ।
"देहोऽसवोऽक्षा मनवो भूतमात्रा
मात्मानमन्यञ्च विदुः परं यत् ॥"
"मनसोऽन्तःकरणानि ।" इति तट्टीकायां श्रीधरः ॥
ज्ञानाश्चस्य पुत्रभेदः । यथा, भागवते । ६ । ६ । २० ।
"ज्ञानाशोऽग्नेऽपि भार्यायां धूमकेतुमजीजनत् ।
विद्वांसं वेदशिरसं देवलं वयुनं मनुम् ॥")

मनुष्यः

मनुजः, पुं, (मनोर्जात इति । जन + डः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, विष्णुपुराणे । १ । ६ । १० ।
"स्वर्गापवर्गौ मानुष्यात् प्राप्नुवन्ति नरा सुने ! ।
यथाभिरुचितं स्थानं तद्व्रजन्ति मनुजा
द्विज ! ॥")
मनुजी, स्त्री, (मनुज + गौरादित्वात् ङीष् ।) मानुषी । इति जटाधरः ॥ (टाप् इत्येके । यथा, हरिवंशे । १७६ । २६ ।
"विद्याधराणां नारीषु साध्वीषु मनुजासु च ॥")
मनुभूः, पुं, (मनोर्भवनीति । भू + क्विप् । मनुर्भूरुत्पत्तिस्थानं यस्येति वा ।) मनुष्यः । इति शब्दचन्द्रिका ॥
मनुराट्, [ज्] पुं, (मनुः मानव इव राजते इति । राज् + क्विप् । मनुष्यवदाचारवत्त्वादस्य तथात्वम् ।) कुबेरः । इति त्रिकाण्डशेषः ॥
मनुषी, स्त्री, (मनुष्यस्य स्त्री । मनुष्य + "हयगवयमनुष्यमत्स्यानामप्रतिषेधः ।" ४ । १ । ६३ । इत्यस्य वार्त्तिकोक्त्या ङीष् । "हलन्तात्सिः ।" ६ । ४ । १५० । इति यलोपः ।) मानुषी । इति शब्दरत्नावली ॥
मनुष्यः, पुं, (मनोरपत्यमिति । मनु + "मनोर्जातावञ्यनौ लुक् च ।" ४ । १ । १६१ । इति यञ् लुगागमश्च ।) मनोरपत्यम् । तत्पर्य्यायः । मानुषः २ मर्त्यः ३ मनुजः ४ मानवः ५ नरः ६ । इत्यमरः । ३ । ६ । १ ॥ भूमिजः ७ क्षितिजः ८ चेतनः ९ भूम्यः १० । इति राजनिर्घण्टः ॥ मनुः ११ पञ्चजनः १२ पुरुषः १३ पूरुषः १४ पुमान् १५ नृ १६ । इति शब्दरत्नावली ॥ मर्त्तः १७ विट् १८ । इति जटाधरः ॥ * ॥ (यथा, मनुः । २ । ४३ ।
"रक्षांसि च पिशाचाश्च मनुष्याश्च जरा-
युजाः ॥")
स तु अर्वाक्स्रोतो ब्रह्मणो नवमः सर्ग एकविधश्च । यथा,—
"अर्वाक्स्रोतस्तु नवमः सप्तरेकविधो नृणाम् ।
रजोऽधिकाः कर्मपरा दुःखे च सुखमानिनः ॥"
इति श्रीभागवते । ३ । १० । २४ ।
अपि च ।
"तस्यापि ध्यायतः सर्गं सत्याभिध्यायिनस्ततः ।
प्रादुर्बभूव चायत्नादर्वाक्स्रोतस्तु साधकः ॥
यस्मादर्वाक् प्रवर्त्तन्ते ततोऽर्वाक्स्रोतसस्तु ते ।
ते च प्रकाशबहुलास्तमोद्रिक्तरजोधिकाः ॥
तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः ।
प्रकाशा बहिरन्तश्च मनुष्याः साधकास्तु ते ॥"
इति वह्निपुराणे सर्गकथननामाध्यायः ॥*॥
मनुष्यजन्मसुक्तिकारणं यथा, —
"विमुक्तिहेतुकान्या तु नरयोनिः सतामपि ।
नासुवन्ति हि संसारे विभ्रान्तमनसो नराः ॥
जीवा मानुष्यतां मन्ये जन्मनामयुतैरपि ।
तदीदृक् दुर्लभं प्राप्य मुक्तिद्वारं विचेतसः ॥
पतन्ति भूयः संसारे विष्णुमायाविमोहिताः ।

मनोज

सुदुस्तरापि दुःसाध्या माया ह्यस्य मोहिनी ॥"
इति तत्रैव मुक्तिप्रतनामाध्यायः ॥*॥
"मनुष्याणां पिता माता भ्राता च श्रीहरिर्यथा ।
विशेषतो मनुष्याणां पिता माता जनार्द्दनः ।
भ्राता च सर्वलोकानां वात्सल्यगुणसागरः ॥"
इति पाद्मोत्तरखण्डे ७८ अध्यायः ॥*॥
स त्रिविधो यथा,—
"यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥"
इति श्रीभगवद्गीतायां १७ अध्यायः ॥
"ऊर्द्धं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥"
इति तत्रैव १४ अध्यायः ॥
(त्रि, स्तुतिकारकः । यथा, ऋग्वेदे । १ । ५६ । ४ ।
"होता मनुष्यो न इडः ॥"
"मनुष्यो लौकिको वन्दी दातारं प्रशंसं बहुविधया स्तुत्या स्तौति ।" इति तद्भाष्ये सायणः ॥ मनुष्यसम्बन्धी । यथा, ऋग्वेदे । १ । ६२ । ११ ।
"प्रमिनती मनुष्या युगानि ॥"
"मनुष्या मनुष्याणां सम्बन्धीनि युगानि ज्ञातॄनादीनि प्रमिनती स्वगमनागमनाभ्यां प्रक्षेपेण हिंसन्ती ॥" इति तद्भाष्ये सायणः ॥ मनुष्यहितः । यथा, ऋग्वेदे । २ । १८ । १ ।
"इषारित्रो मनुष्यः स्वर्वाः ॥"
"मधुष्यो मनुष्याणां हितः स्वर्वाः स्वर्गस्य दाता ।" इति तद्भाष्ये सायणः ॥)
मनुष्यधर्म्मा, [न्] पुं. (मनुष्यस्येव धर्म्मे आचारो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति समासान्तोऽनिच् ।) कुबेरः । इत्यमरः । २ । ६ । १ ॥
मनुष्ययज्ञः, पुं, (मनुष्येभ्यो मनुष्यार्थं यो यज्ञः ।) अतिथिपूजनम् । इति गृह्यसूत्रशब्दार्थनात् ॥ (यथा, शतपथब्राह्मणे । ११ । ५ । ६ । १ ।
"नान्येव मनुष्ययज्ञो भूतयज्ञो मनुष्ययज्ञः
पितृयज्ञो देवयज्ञो ब्रह्मयज्ञ इति ॥")
मनुष्यी, स्त्री, (मनुष्य + गौरादित्वात् ङीष् । योपधप्रतिषेधे "हयगवयमनुष्यमत्स्यानामप्रतिषेधः ।" इति ङीषि यलोपाभावः ।) मानुषस्त्रीजातिः । तत्पर्य्यायः । मानुषी २ नारी ३ मानवी ४ । इति शब्दरत्नावली ॥ मर्त्या ५ मनुजी ६ नरी ७ । इति जटाधरः ॥
मनोगुप्ता, स्त्री, (मनसा मनःशब्देन गुप्येव ।) मनःशिला । इत्यमरः । २ । ६ । १०८ ॥
मनोजन्मा, [न्] पुं, (मनसो जन्म यस्य ।) कन्दर्पः । इति त्रिकाण्डशेषः ॥
मनोजवः, पुं, (मनस इव जवोऽस्य । एकदेव सर्वगामित्वात् तथात्वम् ।) विष्णुः । यथा, महाभारते दानधर्म्मे सहस्रनामस्तोत्रम् । १३ । १४६ । ८७ ।
"मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ॥"
(मनसश्चित्तस्य जवः ।) मनसो वेगः । इति व्याकरणम् ॥ (अत्रिसप्तमस्या गिरायाः पुत्रः । यथा, हरिवंशे । ६ । ४२ ।

"अनिलस्य प्रिया भार्य्या वस्त्राः पुत्रो मनोजवः ॥")
तस्य पुत्रभेदः । यथा, मार्कण्डेये । ५२ । ११ ।
"भूतेश्वरस्तथा शुक्रो लोहिताङ्गो मनोजवः ॥"
तीर्थभेदः । यथा, महाभारते । ३ । ८३ । ८५ ।
"मनोजवे नरः स्नात्वा गोसहस्रफलं लभेत् ॥"
यज्ञभस्मस्थरुद्रेन्द्रः । यथा, मार्कण्डेये । ७६।५३।
"मनोजवस्तथैवेन्द्रः संस्थानो यज्ञभागभुक् ॥"
मेधातिथेः पुत्रभेदः । यथा, भागवते ।५ ।२० ।
२५ । "तस्य प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः। सोऽपि विभज्य सप्तवर्षाणि पुत्रनामानि तेषु स्वात्मजान् पुरोजवमनोजवपवमानधूम्रानीकचित्ररेफविशाधारसंज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्त आवेशितमतिस्तपोवनं प्रविवेश ॥")
मनोजवः, त्रि, (मनो जवं वेगवदृयस्मिन् । यद्वा, मनो जवति गिनायमिति स्नात्वा धावत्यस्मिन् इति। जु सौत्रधातुः + अच् ।) पित्तसुल्यः । तत्पर्य्यायः । पित्तसन्निभः ७ । इत्यमरः । १।२।१३॥
अतिशयवेगवान् । (यथा, मार्कण्डेये ।२१ । ८ ।
"तमन्वधावद्वेगेन तुरगोऽसौ मनोजवः ॥")
मनोजवसः, त्रि, (मनो जवत्यस्मिन् । जु + बाहुलकात् असच् ।) पित्तसन्निभः । इत्यमरटीकायां स्वामी । १ । १ । १३ ॥
मनोजवा, स्त्री, (मनो जवत्यनेति । जु + अच् टाप् ।) अग्निशिखावृक्षः । इति जटाधरः ॥ (गुणादिविवृतिरस्या अग्निशिखाशब्दे ज्ञातव्या॥
वह्निशिखाविशेषः । यथा, मार्कण्डेये । ६६।५७।
"मनोजवा च या शिक्षा लघिमा गुणसत्तमा ।
तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात् ॥"
स्कन्दस्य मातृगणभेदः । यथा, महाभारते । ६ । ३६ । १६ ।
"मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥"
क्रौञ्चद्वीपस्य वर्षविशेषः । यथा, मात्स्ये । १२१ । ८७ ।
"गौरी कुमुदती चैव सन्ध्या रात्रिर्मनोजवा ॥"
मन इव जवो यस्याः । वेगविशिष्टार्य्यां स्त्रियाम् । यथा, महाभारते । १ । १५६ । १८ ।
"अद्भुतेषु विहारेण यथाकामं मनोजवा ॥")
मनोजवृद्धिः, पुं, (मनोजस्य कामस्य वृद्धिर्यस्मात् ।) कामवृद्धिद्रुपः । इति राजनिर्घण्टः ॥
मनोज्ञं, क्ली, (मनो जानाति ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थो ज्ञा + कः ।) सरलकाष्ठम् । इति रत्नमाला ॥
मनोज्ञं, त्रि, (मनसा जानातीति । ज्ञा + कः । यद्वा, मनः ज्ञापयति तोषयतीति । अन्तर्भूतण्यर्थाद्धातोः कः ।) मनोहरम् । तत्पर्य्यायः । सुन्दरम् २ रुचिरम् ३ चारु ४ सुषमम् ५ साधु ६ शोभनम् ७ कान्तम् ८ मनोरमम् ९ रुच्यम् १० मञ्जु ११ मञ्जुलम् १२ । इत्यमरः । ३ । १ । ५२ ॥ मनोहरम् १३ घन्यम् १४ वन्यम् १५ पेशलम् १६ पेशलम् १७ सुमनसम् १८ वामम् १९ अभिरामम् २० नन्दितम् २१ । इति शब्दरत्नावली ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ।
"मनोज्ञं सुचि नात्युष्णं प्रत्यग्रमघृतं हितम् ।
पूर्वं मधुरमश्नीयात् मध्येऽम्ललवणौ रसौ ॥")
मनोज्ञा, स्त्री, (मनोज्ञ + स्त्रियां टाप् ।) मनःशिला । इति रत्नमाला ॥ (यथा, सुश्रुते उत्तरतन्त्रे त्रयोदशाध्याये।
"स्निग्धं मनोज्ञाकासीसयोषाञ्जनकसैन्धवैः ॥")
राजपुत्री । इति जटाधरः ॥ वन्याकर्कोटकी । आरण्यकी । शूलजीरकः । जाती । मदिरा । इति राजनिर्घण्टः ॥
मनोभवः, पुं, (मनसः मनसि वा भवतीति । भू + अच् । मनसः भव उत्पत्तिर्यस्मिन् वा ।) कन्दर्पः । इति हलायुधः ॥ (यथा, मार्कण्डेये । १८ । ४१ ।
"ते तां दृष्ट्वाग्रतो देव्याः साभिलाषा मनोभवम् ।
न शेकुरुद्धतं धैर्य्यान्मनसा वोढुमातुराः ॥"
मनोजन्ये, त्रि । यथा, भागवते । ६ । १५।२४।
"दृश्यमाना विनार्थेन न दृश्यन्ते मनोभवाः ।
कर्म्मभिर्ध्यायतो नाना कर्म्माणि मनसोऽनघ ॥")
मनोभूः, पुं, (मनसः मनसि वा भवतीति । भू + क्विप् ।) कामदेवः । इति शब्दरत्नावली ॥ (यथा, कलाविलासे । २ । ३३ ।
"श्यामा शुशुभे शुशुभा तया मनोभूर्मधुस्रवत्स्रजा ।
मरुद्गतिमानसानां तेनापि स्मरीहृदां लोला ॥")
मनोयोनिः, पुं, (मन एव योनिरुत्पत्तिस्थानमस्य ।) कामदेवः । इति हेमचन्द्रः ।२।१४२॥
मनोरथः, पुं, (मनसः रथ इव । मन एव रथोऽचेति वा) इच्छा । इत्यमरः । २ । ७ । २७ ॥ (यथा, रघौ । ११ । ५६ ।
"इत्यस्तवन्त्र वैदेहीमन्वेष्टुं भर्तृचोदिताः ।
कपयश्चेररार्तस्य रामस्येव मनोरथाः ॥"
कविविशेषः । यथा, राजतरङ्गिण्याम् ।४।५८६।
"मनोरथः शब्दलक्षटकः सन्धिसांख्या ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥")
मनोरमं, त्रि, (मनो रमयतीति । रम् + णिच् + अच् ।) मनोज्ञम् । इत्यमरः । ३ । १ । ५२ ॥ (यथा, सुश्रुते । १ । ४६ । अध्याये ॥
"पूरस्ताद्विमले पात्रे सुविस्तीर्णे मनोरमे ।
स्नेहः स्नेहोदकं दत्वा प्रदेहांश्च सुसंस्कृतान् ॥")
मनोरमा, स्त्री, (मनोरम + स्त्रियां टाप् ।) गोरोचना । इति राजनिर्घण्टः ॥ बुद्धिशक्तिविशेषः । तत्पर्य्यायः । तारा २ महाश्रीः ३ ओङ्कारा ४ स्वाहा ५ श्रीः ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वैष्णवी १४ नीलसरस्वती १५ वृद्धिनी १६ महातारा १७ वसुधारा १८ धनदहा १९ त्रिलोचना २० लोचना २१ । इति त्रिकाण्डशेषः ॥ (इन्दीवराक्षविद्याधरस्य कन्या । यथा च मार्कण्डेये । ६२ । १३ ।
"अस्मिन्द्वीपवराख्यस्य सुता विद्याधरस्य वै ।
नाम्ना मनोरमा जाता सुतायां मनश्चयनः ॥"
सप्तसरस्वतीनामेकतमा । यथा, महाभारते । ६ । ३८ । ४ ।
"सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा ।
सरस्वती चौघवती सुरेणुर्विमलोदका ॥"
तथा च तत्रैव । ८ । ३८ । २४—२५ ।
"उद्दालकेन यजता पूर्वं ध्याता सरस्वती ।
आजगाम सरित्श्रेष्ठा तं देशमृषिकारणात् ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोरमेति विख्याता सा हि तैर्मनसाहृता ॥"
छन्दोविशेषः । तल्लक्षणमुदाहरणञ्च यथा, छन्दोमञ्जर्य्याम् ।
"सरजगैर्भवेच्चमनोरमा ।"
"सरजिजालघटे विहारिणी मजविलासिनी विलासतः ।
सुरारिपोत्तुः पुनातु वः सुकृतग्राहिणी मनोरमा ॥")
मनोहरः, त्रि, (मनसा मनसि वा हृतः ।) प्रीतिहृतः । इत्यमरः । ३ । १ । ४९ ॥
मनोहरं, त्रि, (हरतीति । हृ + अच् । मनसो हरमिति ।) मनोज्ञम् । इति शब्दरत्नावली ॥ (यथा, मनौ । २ । ६६ ।
"स्त्रीणां सुखोपभोगं विषयार्थं मनोहरम् ॥"
यथा च मार्कण्डेये । १२२ । ३ ।
"स दृष्ट्वा तदा तत्र द्वीपमेषु मनोहरम् ॥")
कुन्दवृक्षे, पुं । सुवर्णे, क्ली । इति राजनिर्घण्टः ॥
मनोहरा, स्त्री, (मनोहर + टाप् ।) जाती । स्वर्णयूथी । इति राजनिर्घण्टः ॥ (धरस्य वसोः पत्न्यां । यथा, विष्णुपुराणे । १ । १५ । ११७ ।
"मनोहरायाः शिशिरः प्राणोऽथ धरजस्तथा ॥"
अक्षरवृत्तविशेषः । यथा, महाभारते ।२।१६।४५।
"मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ॥")
मनोहरा, [न्] त्रि, (मनो हरतीति । हृ + ल्युच् ।) मनोहरणकर्त्ता । यथा,—
"यस्तं तेऽपनेष्यामि शिलोञ्छा यदि भाषते ।
तमानेष्ये वरं यक्षे मनोहरा तमादिश ॥"
इति श्रीभागवते १० स्कन्धे ६२ अध्यायः ॥
मनोहारि, [न्] त्रि, (मनो हरति मनो हर्षं शीलमस्येति वा । हृ + णिनिः ।) मनोहरम् । इत्यमरटीकायां स्वामी । तथाहि ।
"गाङ्गं वारि मनोहारि मुरारिचरणच्युतम् ।
त्रिपुरारिशिरश्चारि पापहारि पुनातु मां ॥"
इति वाल्मीकिकृतगङ्गास्तोत्रम् ॥
मनोक्षा, स्त्री, (मनः क्षयति आक्षयतीवेति । क्षि + "आतोऽनुपसर्गे कः ।"३।२।३। इति कः । टाप् ।) मनःशिला । इत्यमरः । २ । ६ । १०८॥ (अस्याः पर्य्यायो यथा,—

"मनःशिला मनोगुप्ता मनोज्ञा गात्रजिह्विका।
नेपाली कुनटी गोजा शिला दिव्यौषधिः
स्मृता॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

मन्तव्यं, त्रि, (मन्यते इति। मन+तव्य।) मननीयम्। भाव्यम्। यथा। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।" इत्यादि छान्दोग्योपनिषत्॥

मन्ता, [तृ] त्रि, (मन्यते जानातीति। मन+"वसुकलमन्यशापि।" उणा० २।९५। इति तृच्।) विद्वान्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (मननकर्त्ता। यथा। "स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी सहजं प्राधान्यमस्यास्तीति गुणी यः प्रकृतिसंज्ञितभावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये॥)

मन्तुः, पुं, (मन्यते इति। मन+"कमिमनिजनिगाभ्यास्तिभ्यश्च।" उणा०। १। ७३। इति तुन्।) अपराधः। (यथा, नैषधचरिते। ६।११०।
"सतीव्रतैकोज्झितमन्तु मन्तु-
मन्तर्यदं वक्ष्यति मार्ज्जितात्मा॥")

मनुष्यः। प्रजापतिः। इति मेदिनी। ते, ४३॥

द्वाविंशत्यपराधा यथा। भगवद्भक्तानां क्षत्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा अस्नात्वा विष्णोरुपसर्पणम् ३ क्षतं नरं स्पृष्ट्वा अस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्रवेशगमनम् ५ मानवं शवं स्पृष्ट्वा अस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पायुपायुप्रयोगः ७ विष्णोः कर्म्म कुर्वतः पुरीषत्यागः ८ विष्णुगृहाङ्गमनात्पूर्व्वं प्रक्षाल्यान्यप्रपृच्छा ९ अतिमलिनं पादयोः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपस्पर्शनम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णोरर्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ क्षौमं वस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कृष्णरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० ग्राम्यपादपशुरादिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा क्षुरमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्माचरणं वा २२ श्मशानं गत्वा अस्नात्वा विष्णोरुपसर्पणम् २३ पित्र्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय स्पृष्ट्वा पीत्वा वा विष्णुगृहप्रवेशगमनम् २६ परकीयेणाशुचिना वा वस्त्रेण परिच्छिन्नेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तन्नोपभुञ्जनम् २८ गन्धपुष्पधूपदीपदानम् २९ उपानद्भ्यामाक्रम्य विष्णुस्थानप्रवेशगमनम् ३० भैरवोच्चण्डेन विना विष्णोः प्रबोधनम् ३१ अजौर्द्धं यति विष्णोरुपसर्पणम् ३२। एतदष्टाविंशतिविधं तथा च नरसिंहपुराणे।
"अपराधसहस्राणि अपराधशतानि च।
पञ्चैतेषु देवेशः क्षमते शैलजार्चितः॥"
इत्याह्निकाचारतत्त्वे चतुर्थयामार्द्धकृत्यम्॥
अपि च।
वराह उवाच।
"भुक्त्वा तु परकीयान्नं तप्तरक्तविवर्जनः।
प्रथमश्चापराधोऽयं धर्म्मविघ्नाय वै भवेत्॥
अभुक्त्वा दन्तकाष्ठानि यस्तु मामुपसर्पति।
द्वितीयश्चापराधस्तु कर्म्मविघ्नाय विद्यते॥
गत्वा मैथुनसंयोगे योऽनु मां स्पृशते नरः।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे!॥
स्पृष्ट्वा रजस्वलां नारीमस्नातं यः प्रपद्यते।
चतुर्थमपराधन्तु दृष्ट्वैव क्षमाम्यहम्॥
स्पृष्ट्वा तु मृतकञ्चैव असंस्कारेण नन्तु वै।
पञ्चमञ्चापराधञ्च न क्षमामि वसुन्धरे!॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम्।
षष्ठकञ्चापराधन्तु न क्षमामि वसुन्धरे!॥
मामेवार्च्चनकाले तु पुरीषं यस्य गच्छति।
सप्तमञ्चापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु नीलेन वस्त्रेण प्राङ्मुखो मां प्रपद्यते।
अष्टमञ्चापराधन्तु कल्पयामि वसुन्धरे!॥
मामेवार्च्चनकाले तु यश्चसत्यं प्रभाषते।
नवमञ्चापराधन्तु न रोचामि वसुन्धरे!॥
अविधानेन मां स्पृष्ट्वा यस्तु मां प्रतिपद्यते।
दशमञ्चापराधन्तु मम चाप्रियकारकम्॥
क्षुद्रकर्म्माणि कर्म्माणि कुरुते कर्म्मकारकः।
एकादशापराधन्तु कल्पयामि वसुन्धरे!॥
अकर्म्मणयानि पुण्यानि यस्तु मामुपकल्पयेत्।
द्वादशञ्चापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति।
त्रयोदशापराधन्तु कल्पयामि वसुन्धरे!॥
अन्तकालेऽपि मां देवि! यः स्पृशेत कदाचन।
चतुर्दशापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु क्षौमेन वस्त्रेण मम कर्म्माणि कारयेत्।
पञ्चदशापराधन्तु कल्पयामि वरानने!॥
अधौतेन च वस्त्रेण यस्तु मामुपकल्पते।
षोडशञ्चापराधानां कल्पयामि वरानने!॥
स्वयमश्नन्तु यो दद्यादन्नाद्यं च माधवि!।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे!॥
यस्तु मत्स्यानि मांसानि भक्षयित्वा वरानने!।
अष्टादशापराधानि अनुजातानि माधवि!॥
लशुनादं भक्षयित्वा यस्तु मामुपसर्पति।
एकोनविंशापराधं प्रतिजानामि सुन्दरि!॥
यस्तु मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि!।
विंशकञ्चापराधानां कल्पयामि वरानने॥
शवगन्धं यस्तु वै गत्वा यो मामेवाभिगच्छति।
एकविंशापराधानि कल्पयामि वसुन्धरे!॥
पित्र्याकं भक्षयित्वा तु यो मामेवोपचक्रमे।
द्वाविंशत्यपराधानां तान्यहं घोषकल्पये॥
यस्तु वाराहमांसानि प्राप्यौनोपपादयेत्।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे!॥
सुरां पीत्वापि यो मर्त्यः कदाचिदुपसर्पति।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे!॥
यः कुसुम्भञ्च मे शाकं भक्षयित्वोपचक्रमे।
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे!॥
परमान्नेनैव यस्तु मामुपसर्पति।
अपराधेषु षड्विंशं कल्पयामि वरानने!॥
नवान्नं यस्तु भक्षेत न स देवान् पितॄन् यजेत्॥
सप्तविंशापराधानि कल्पयामि शुभान्विते!॥
उपानद्भ्यां च प्रपदे तथा मे योपचक्रमे।
अष्टाविंशापराधानि कल्पयामि शुभान्विते!॥
पुरीषं मक्षयित्वा तु यो मामाप्नोति माधवि!।
एकोनत्रिंशमपराधं स स्वर्गेषु न गच्छति॥
अजौर्द्धेन समाविष्टो यस्तु मामभिगच्छति।
त्रिंशकञ्चापराधानां कल्पयामि वसुन्धरे!॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति।
एकत्रिंशापराधन्तु कल्पयामि यशस्विनि!॥
विना मैत्र्यादिशब्देन द्वारस्योद्घाटनं मम।
मद्भापराधं विद्धीत तद्वात्रिंशापराधकम्॥"
इति वाराहे द्वात्रिंशदपराधाध्यायः॥
(त्रि, ज्ञाता। यथा, ऋग्वेदे। १०। ९३। ८।
"य ईशिरे भुवनस्य प्रचेतसो
विश्वस्य स्थातुर्जगतश्च मन्तवः।")
"मन्तवः सर्व्वस्य वेदितारः।" इति तद्भाष्ये सायणः॥ मननीयः। यथा, ऋग्वेदे। १। १५२। १।
"युवोरच्छिद्रा मन्तवोह सर्गाः।"
"मन्तवोह मननीयाश्च।" इति सायणः॥)

मन्त्रः, पुं, (मन्त्रयते गुप्तं परिभाष्यते इति। मत्रि गुप्तभाषणे+घञ्। यद्वा, मन्त्रयते गुप्तं भाषते इति। मत्रि गुप्तभाषणे+अच्।) वेदभेदः। स च मन्त्रस्वरूपभागः॥ (यथा, ऋग्वेदे। ६७। ४। ७४।
"प्रत्नं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्॥"
यथा च मनुः। २। १६।
"विवेकादिह ब्राह्मणस्य मन्त्रेयस्योदितो विधिः।
तस्य ब्राह्मेऽधिकारोऽस्मिन् प्रेत्यो नान्यस्य
कस्यचित्॥"
तत्राद्युक्तमन्त्रभागश्च। यथा, मनौ। ७।२१७।
"सुपरीक्षितमन्त्राद्यमन्त्राब्धिर्विजापदैः॥")
गुप्तिवादः। स तु रहसि कर्त्तव्यावधारणं मन्त्रीति ख्यातम्। इत्यमरभरतौ॥ परामर्शः। मन्त्रणा। (यथा, माघे। २। २६।
"मन्त्रो योध इवाधीरः सर्व्वाङ्गैः संहतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया॥")
अङ्गादिभ्यो मन्त्रवाचकस्य निषेधो यथा,—
"अङ्गारङ्गीना वधिराः कुयोनिषु रताश्च ये।
तेषां मन्त्रो न सुखदः प्रोक्तः कविभिरेव च॥
कामुकानां जडानाञ्च स्त्रीजितानां तथैव च।
श्वशुरस्य गृहे नित्यं जामाता कर्म्मकारकः।

मन्त्रः

सङ्ख्यापि न भवेन्मन्त्रः कार्यसिद्धौ कदाचन ॥"
इति जैमिनिभारते आश्वमेधिकपर्व्वणि ९ अ: ॥
अन्यत् मन्त्रशब्दे द्रष्टव्यम् ॥ * ॥ देवादीनां साधनम् । इति मेदिनी । रे, ७४ ॥
"तन्मन्त्राद्यषड्वर्णीयं यत् तृतीयाद्गोचरम् ।
रहस्यालोचनं मन्त्रो रहस्यत्रयपञ्चकम् ॥"
इति हेमचन्द्रः ॥
मन्त्रव्याख्याऽऽदेकनवत्यृषयो यथा,—
"एते मन्त्रकृतः सर्व्वे कृतघ्नान्तु निबोधत ।
भृगुः काश्यः प्रचेताश्च दधीचो ह्यात्मवानपि ॥
और्व्वोऽथ जमदग्निश्च विदः प्राचेतसस्तथा ।
आर्ष्टिषेणो ह्यनन्तश्च वीतहव्यः सवेधसः ॥
वेणः पृथुर्हिरण्यो बन्ध्यश्वो गयसृञ्जयौ ।
एकोनविंशतिं ह्येते भृगवो मन्त्रकर्त्तमाः ॥१८॥
अङ्गिरा वेधसश्चैव भरद्वाजो गयात्मकः ।
तथा ह्यगस्त्यो गर्गः सितिः सुक्षत्रिरेव च ॥
गृत्समदश्च मान्धाता अम्बरीषस्तथैव च ।
युवनाश्वः पुरुकुत्सः सुमदगुः सदस्यवान् ॥
अजमीढो दृढायुश्च तरक्षः कविरेव च ।
पृषदश्वो विरूपश्च कण्वश्चैवाथ सुव्रतः ॥
उतथ्यश्च प्रस्कण्वश्च तथा वाजिश्रवा अपि ।
अयस्योऽथ सुमित्रश्च वामदेवस्तथैव च ॥
औघिजो दृढयुक्तिश्च ऋषिर्दीर्घतपा अपि ।
काक्षीवांश्च चयस्त्रिंशत् स्मृता ह्याङ्गिरसा वराः ॥ ३३ ॥
एते मन्त्रकृतः सर्व्वे काश्यपांस्तु निबोधत ।
काश्यपः सप्तवत्सारो निधुवो वैद्य एव च ।
असितो देवलश्चैव षडेते ब्रह्मवादिनः ॥ ६ ॥
अत्रिर्वैश्वस्वतश्चैव श्यावाश्वोऽथ गविष्ठिरः ।
वर्षागिरो ऋषिः सिद्धस्तथा पूर्व्वातिथिश्च यः ॥
इत्येते अत्रयः प्रोक्ता मन्त्रकर्त्तृषु सप्तमाः ॥४॥
वशिष्ठश्चैव शक्तिश्च तृतीयश्च पराशरः ।
मतस्तु इन्द्रप्रमतिः पञ्चमस्तु भवद्वसुः ॥
षष्ठस्तु मित्रावरुणिः सप्तमः कुण्डिनस्तथा ।
इत्येते सप्त विज्ञेया वाशिष्ठा ब्रह्मवादिनः ॥५॥
विश्वामित्रश्च गार्ग्यो देवरातस्तथौदलः ।
तथा विद्वान् मधुच्छन्दो ऋषिश्चान्यो घृतार्चिषः ॥
अष्टको लौहितश्चैव भूतकीलश्च नाभुभौ ।
देवश्रवा देवरातः पुराणश्च धनञ्जयः ॥
शिशिरश्च महातेजाः सालङ्कायन एव च ।
अथोदग्रैते विज्ञेया ब्रह्मिष्ठाः कौशिकाः वराः ॥१३॥
अगस्त्योऽथ दृढच्युत इध्मवाहस्तथैव च ।
ब्रह्मिष्ठागस्त्यो ह्येते चयः परमकीर्त्तयः ॥ ३ ॥
मनुर्वैवस्वतश्चैव इलो राजा पुरूरवाः ।
क्षत्रियाणां वरा ह्येते विज्ञेया मनुवादिनः ॥३॥
भनन्दश्चैव भल्लश्च वत्सश्चैव ते चयः ।
इत्येते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः स्मृताः ॥२
इत्येकनवतिः प्रोक्ता मया वेद्य ऋषिष्कृताः ।
ब्राह्मणाः क्षत्रिया वैश्या ऋषिपुत्रास्तथा स्मृताः ।
ऋषीणाञ्च सुता ह्येते ऋषिपुत्राः सुनयः ॥"
इति मात्स्ये १९१ अध्यायः ॥
कृष्णमन्त्रमाह्निकं यथा,—

मन्त्रः

"तावन्निबद्धः संसारकारागारे विधेर्जनः ।
न यावत् ज्ञानमन्त्रञ्च प्राप्नोति गुरुवक्त्रतः ॥
ज्ञानकर्म्मभोगरूपनिगडोच्छेदकारणम् ।
मायाजालोच्छेदकरमाद्यापाद्यनिकृन्तनम् ॥
गोलोकमार्गसोपानं निस्तारबीजकारणम् ।
भक्त्यङ्कुरस्वरूपञ्च नित्यं हृद्यमनश्चरम् ॥
सारञ्च सर्व्वतपसां योगानाञ्च तथैव च ।
सिद्धीनां वेदपाठानां व्रतादीनाञ्च निश्चितम् ॥
दानानां तीर्थस्नानानां यज्ञादीनां पुरन्दर ! ।
जपानामुपवासानामित्याह कमलोद्भवः ॥
पुंसो रक्तं पितुश्चाग्रं मातामहस्य च ।
पूर्व्वं परञ्च तत्संख्यं पितरं मातरं गुरुम् ॥
सहोदरं कलत्रञ्च बन्धुं शिष्यञ्च किङ्करम् ।
समुद्धरेच्च श्वशुरं श्वश्रूं कन्याञ्च तत्सुतम् ॥
आत्मानञ्च सतीर्थञ्च गुरुपत्नीं गुरोः सुतम् ।
उद्धरेद्बलवान् भक्तो मन्त्रग्रहणमात्रतः ॥
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः ।
तत्सार्द्धपूतस्तीर्थैश्च सद्यः पूता वसुन्धरा ॥
अनेकजन्मपर्य्यन्तं दीक्षाहीनो भवेन्नरः ।
तदाद्यदेवमन्त्रञ्च लभते पुण्यगौरवतः ॥ * ॥
सद्गुरूपदेवानां ज्ञात्वा सेवां स्वकर्म्मतः ।
लभते च दृढं मन्त्रं साधितः सर्व्वकर्म्मणाम् ॥
जन्मत्रयं भास्करञ्च निषेव्य मानवः शुचिः ।
लभेद्गणेशमन्त्रञ्च सर्व्वविघ्नहरं परम् ॥
जन्मत्रयं तं निषेव्य निर्विघ्नञ्च भवेन्नरः ।
विष्णोस्तस्य प्रसादेन दिव्यज्ञानं लभेन्नरः ॥
तदा ज्ञानप्रदीपेन समालोक्य मन्त्रामतिः ।
अज्ञानान्धतमो हित्वा महामायां भवेन्नरः ॥
विष्णुमायाञ्च प्रकृतिं दुर्गां दुर्गतिनाशिनीम् ।
सिद्धिदां सिद्धिरूपाञ्च परमां सिद्धयोगिनीम् ॥
वाणीरूपाञ्च पद्माञ्च भद्रां कृष्णप्रियात्मिकाम् ।
नानारूपां तां निषेव्य जन्मनां शतकं नरः ॥
तत्प्रसादाद्भवेत् ज्ञानी ज्ञानानन्दं ततो भजेत् ।
कृष्णज्ञानाधिदेवञ्च महाज्ञानं सनातनम् ॥
शिवं शिवस्वरूपञ्च शिवदं शिवकारणम् ।
परमानन्दरूपञ्च परमानन्ददायिनम् ॥
मन्त्रदं मोक्षदञ्चैव दासदं सर्व्वसम्पदाम् ।
अमरत्वप्रदञ्चैव दीर्घायुष्प्रदं परम् ॥
इन्द्रत्वञ्च मनुत्वञ्च दातुं शक्तश्च लीलया ।
राजेन्द्रवत्प्रदञ्चैव ज्ञानदं हरिभक्तिदम् ॥
जन्मत्रयं समाराध्य चाणुतोषप्रसादनः ।
सर्व्वदस्य वरेणैव निर्मलं ज्ञानमाप्नुयात् ॥
निर्मलज्ञानदीपेन सुप्रदीपेन सत्त्वतः ।
ब्रह्माण्डिगपर्य्यन्तं सर्व्वं मिथ्येव पश्यति ॥
इत्यनिधेः प्रसादेन प्राकृतस्य महात्मनः ।
वरदस्य वरेणैव हरिभक्तिं लभेत ध्रुवम् ॥
तदा सद्गुरुसंसर्गात् कृष्णमन्त्रं लभेत ध्रुवम् ।
तदा निश्चिन्तमाप्नोति सारात्सारं परात्परम् ॥
यत्र देहे लभेन्मन्त्रं तद्देहावधि भारते ।
तत् पापभौतिकं त्यक्त्वा बिभर्त्ति दिव्यरूपकम् ॥
करोति दास्यं गोलोके वैकुण्ठे वा हरेः पदे ।
परमानन्दसंयुक्तो मोदादिषु विवर्त्तितः ॥

मन्त्रः

न विद्यते पुनर्जन्म पुनरागमनं हर ! ।
पुनश्च न पिबेत् क्षीरं भूत्वा मातृस्तनं परम् ॥
विष्णुमन्त्रोपासकानां गङ्गादितीर्थसेविनाम् ।
स्वधर्म्मिणाञ्च भिक्षूणां पुनर्जन्म न विद्यते ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ३३ अध्यायः ॥
शिवमन्त्रा यथा,—
"प्रथमं ह्यनु तन्मन्त्रं ततोऽनुध्यानगोचरम् ।
ततः क्रमेण पूजायाः क्रमाद्विधिं वरेभौ ॥
समस्तानां स्वराणान्तु दीर्घाः प्रेयाः सबिन्दुकाः ।
ऋ ॠ क् शून्याः सार्द्धचन्द्रा उपास्तेनाभि-
संहिताः ॥
एभिः पञ्चाक्षरैर्मन्त्रः पञ्चवक्त्रस्य कीर्त्तितः ।
क्रमात् सम्मदसन्दोहमादगौरवसंज्ञकाः ॥
प्रासादस्तु भवेत् प्रेयः पञ्चमन्त्राः प्रकीर्त्तिताः ।
एकैकेन तथैवैकं मन्त्रेण पूजयेत् ॥
एकं समुद्दिशं ज्ञात्वा पञ्चभिर्वा प्रपूजयेत् ।
प्रासादेनाथवा पञ्चवक्त्रं देवं प्रपूजयेत् ।
सम्मदादिषु मन्त्रेषु प्रासादस्तु प्रशस्यते ॥
शम्भोः प्रसादनेनैव यस्मादुत्तस्तु मन्त्रकः ।
तेन प्रासादसंज्ञोऽयं कथ्यते मुनिपुङ्गवैः ।
तस्मात् सर्व्वेषु मन्त्रेषु प्रासादः प्रीतिदः प्रभोः ॥
आमोदकारकः शम्भोर्मन्त्रः सम्मद उच्यते ।
मनःप्रपूरणश्चापि सन्दोहः परिकीर्त्तितः ॥
आकर्षको भवेन्मादो गुरुत्वाद्गौरवाह्वयः ।
इत्येतास्तु समस्तेषु मन्त्रं शम्भोः प्रकीर्त्तितम् ॥
पञ्चाक्षरस्य यन्मन्त्रं पञ्चवक्त्रस्य कीर्त्तितम् ।
युवां तेनैव मन्त्रेण आराधय समीश्वरम् ॥"
इति कालिकापुराणे ५० अध्याये वेताल भैरवौ प्रति वशिष्ठवाक्यम् ॥ * ॥
मन्त्रस्य त्रिविधत्वमा यथा,—
"वाचिकश्च उपांशुश्च मानसश्च त्रिधा स्मृतः ।
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः ॥
यद्यन्योन्यसंख्यैः स्याद्यज्ञद्वयसमैः ।
मन्त्रमुच्चारयेद्वाक्यं जपयज्ञः स वाचिकः ॥
प्रणैरुच्चारयेन्मन्त्रमोष्ठौ प्रचालयन् ।
किञ्चित् शब्दं श्रयं विद्वानुपांशुः स जपः स्मृतः ॥
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात् पदम् ।
शब्दार्थचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
तेन स्वरादिसृष्टयर्थमीश्वरस्यवान् वाचिकः ।
स्वयंशब्दश्रवणमात्रार्थाय्यक्षिच्चक्षुरादयुपांशुः ।
जिह्वौष्ठकण्ठतालुस्पन्दैरप्य यत्नाच्चलत्कोऽ-
मानसः ॥"*॥
वाचिकोपांशुमानसजपविधिमाह शङ्खः ।
"नोच्चैर्जपं वधः कुर्य्यात् वाचिकाख्यं विशेषतः ।"
योगियाज्ञवल्क्यः ।
"न चक्षुषम् न विक्षुषम् न पार्श्वमवलोकयन् ।
नोपांशुर्न च जल्पंश्च न घ्राणमुद्वीक्षया ॥
न पदा पादमाक्रम्य न वै बाहुः करौ स्पृशेत् ।
नैवंविधं जपं कुर्य्यात् न च मंत्रार्थचिन्तनम् ॥
उत्तिष्ठन् वाक्यमाणोऽर्कमासीनः प्राङ्मुखो
जपेत् ।
प्राक् कूर्च्चवर्षमासीनो वस्त्रासी त्रिदम ॥"

मन्त्रः

हरिवंशः ।
"यदि स्यात् क्षिप्रवासा वै वारिमध्यगतो जपेत्।
अन्यथा तु शुचौ भूम्यां कुशोपरि समाहितः ॥"
यमः ।
"जपकाले न भाषेत व्रतहोमादिकेषु च ।
एतेष्वेवावधूतस्तु यद्यागच्छेत् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्तयेत् ॥"
योगियाज्ञवल्क्यः ।
"यदि वाग्यतमौनः स्यात् जपादिषु कदाचन ।
आहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥"
गौतमः ।
"क्रोधं मोहं क्षुतं निद्रां निष्ठीवनविजृम्भितम् ।
दर्शनं वनितानाञ्च वर्जयेज्जपकर्मणि ।
आचामेत् सलिले चैवं स्मरेद्विष्णुं सुरार्चितम्॥"
बौधायनः ।
"नामैरथञ्च संस्पर्शं कर्मकाले विवर्जयेत् ॥"
इत्याह्निकाचारतत्त्वम् ॥ * ॥

मन्त्रशब्दस्य व्युत्पत्तिर्यथा,—
"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकी-
र्त्तितः ।"
मन्त्रदीक्षारहितानां दोषो यथा, मन्त्रमहार्णवे ।
"अदीक्षितानां मन्त्राणां दोषं शृणु वरानने ! ।
अन्नं विड्भसमं तस्य जलं मद्यसमं स्मृतम् ।
तत्पूजनं तस्य वा आहुः सर्वं याति क्षयो-
गतिम् ॥"
अदीक्षस्य मन्त्रविशेषनिषेधमाह तत्रैव ।
"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा ।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाद्यपसंज्ञकम् ॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्विजः ।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ॥"
श्रुतिरपि ।

मन्त्रः

"सावित्रीं प्रणवं यजुर्वेदीं स्त्रीशूद्रयोर्नेच्छन्ति ।
सावित्रीं प्रणवं यजुर्वेदीं स्त्री शूद्रो यदि
जानीयात् स नरतोऽधो गच्छति ।"
विष्णुधर्म्मात्तरे वाराहीये ।
"गोपालस्य महर्दैयो मदेशस्य तु पादमे ।
तत्पत्न्याश्चापि सूर्य्यस्य गणेशस्य मनुस्तथा ॥
एषां दीक्षाधिकारी स्यादन्यथा पापभाग्-
भवेत् ॥"
मन्त्रदीक्षाप्रशंसा यथा, गोविन्दतन्त्रे ।
"अदीक्षितस्य मरणं प्रेतत्वं न च मुच्यति ॥"
नवरत्नेश्वरे ।
"सर्व्वासामपि दीक्षाणां मुक्तिः फलमखण्डितम्।
अविरोधाद्भवत्येव प्रासङ्गिकयस्तु भक्तयः ॥"
तथा ।
"उपपातकलक्षाणि महापातककोटयः ।
क्षणाद्दहति देवेशि ! दीक्षा हि विधिना कृता॥"
अथाप्यनुकूलमन्त्रं दीक्षेत ।
"स्वतारराशिकोष्ठानामनुकूलात् भजेज्जनुः ॥"
वाराहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत् ॥"
इति प्राघान्यतया बोध्यम् ॥
तथा च ।
"धनिमन्त्रन्तु यत्नेनादनुकूलन्तथैव च ।"
इत्यादिदर्शनात्तत्तच्चक्रविचारस्य आवश्यकत्वात्
प्रथमं तन्निरूप्यते । सिद्धसारस्वते ।
"तत्र वृषिंहार्कवराहाणां प्रासादप्रणवस्य च ।
सप्तिकाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च चाक्षरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥"
मालामन्त्रस्तु वाराहीये ।

मन्त्रः

"विंशत्यर्णाधिका मन्त्रा मालामन्त्राश्च कीर्त्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकद्व्यादिबीजस्य सिद्धादीन्नैव शोधयेत् ॥
तथा । एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति ! ।
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥"
तथा चानुज्ञातन्त्रे ।
"काली तारा महाविद्या षोढ़ाी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥
नाऽत्र सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चाग्न्यादिदूषणम् ।
सिद्धविद्यातया नाऽत्र युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखवार्त्ता कथञ्चन ॥'
पृथिव्यां पूर्णफलदा महाविद्या । यथा
मालिनीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले
दोषजालैरसंस्पृष्टाः सर्व्वा हि फलदाः सदा ॥
काली तारा महादुर्गा त्वरिता छिन्नमस्तका ।
बाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी गोत्रवासिनी
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नाऽत्र युगसेवापरिश्रमः ।
तथा चैता महाविद्याः कलिदोषान्न बाधिताः॥'
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु
इदं प्रकरणं सर्व्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिदेरिमन्त्रस्य स्वप्राप्तौ
प्राप्ता तत्तद्दोषस्य दुरुत्थानात् । इति तु साम्प्रदायिकाः ॥ * ॥ मन्त्रोद्धारार्थषट्चक्रप्रमाणानि
चक्रग्रन्थे दृश्यानि । तेषां लेखनप्रकारो यथा,

कुलाकुलचक्रम् ।


वायुः	अग्निः	भूमिः	जलम्	आकाशः
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	ब	भ	म
य	र	ल	व	श
ष	स	ह	क्ष	ह
वायुः	अग्निः	भूमिः	जलम्	आकाशः

अकथहचक्रम् ।


अ क थ ह	उ ड प		आ ख द	ऊ च ब
ओ ङ व	ल भ म		औ ठ ष	ख ज य
ई घ ग	ऋ ज भ		ई ग ध	ऋ छ ष
अः त स	ऐ ट ज		अं ष ब	ए ट र

मन्त्रः

अकडमचक्रम् ।



राशिचक्रम् ।



गचजचक्रम् ।

अ आ १ देवः	इ २ मानुषः	ई उ ऊ ३ राक्षसः	ऋ ॠ ऌ ॡ ४ मानुषः	ए ५ देवः	ऐ ६ मानुषः	ओ औ ७ देवः	क ८ देवः	ख ग ८ राक्षसः
घ ङ १० राक्षसः	च ११ मानुषः	छ ज १२ मानुषः	झ ञ १३ देवः	ट ठ १४ राक्षसः	ड १५ देवः	ढ ण १६ राक्षसः	त थ द १७ देवः	ध १८ राक्षसः
न प फ १८ राक्षसः	ब २० मानुषः	भ २१ मानुषः	म २२ देवः	य र २३ राक्षसः	ल २४ राक्षसः	व ग्र २५ मानुषः	ष स ह २६ मानुषः	अं अः ळ क्ष २७ देवः

कवर्गिधनिचक्रम् ।

६	६	६	०	३	४	४	०	०	०	१
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	ग्र	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

देवताभेदे चक्रविचारस्यावश्यकत्वमाह वाराहीतन्त्रे वामकादौ च ।
"तारशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च ।
राशिशुद्धिस्त्रैपुरे च गोपालेऽकडमः स्मृतः ॥
अकडमो वामने च गणेशे च तथैव च ।
कोष्ठचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम् ॥
नामादिचक्रं सर्व्वेषां भूतचक्रं तथैव च ।
त्रैपुरं तारचक्रं तु शुद्धमन्त्रं जपेद्बुधः ॥"
तथा ।
"वैष्णवं राशिसंशुद्धं शैवञ्चाकडमं स्मृतम् ।
कालिकायाश्च तारायास्तारचक्रं शुभावहम् ॥
चण्डिकायास्तारकोष्ठे गोपालेऽकडमः स्मृतः ।
हरचक्रं सर्व्वमन्त्रं धनाधिक्ये न चाश्रयेत् ॥
ऋणाधिक्ये शुभं विद्यात् धनाधिक्ये च नो विधिम् ।
दोषान् संशोध्य गृह्णीयाच्छ्रद्दधोद्भवस्य च ॥
मन्त्रस्यापी शुभफलोऽप्यशुभो धनी च
तुल्यं यदा समफलः कथितो मुनीन्द्रैः ॥"
अन्यत्रापि ।
"शून्ये मृत्युमवाप्नोति धने च विफलं भवेत् ।
ऋणी च प्राप्तिमाश्रित्य सर्व्वसिद्धिस्तु जायते ॥"
अथ मन्त्राणां दश संस्काराः । गौतमीये ।
"जननं जीवनं पश्चात् ताडनं बोधनन्तथा ।
अथाभिषेको विमलीकरणाप्यायने पुनः ॥
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ।
स्वर्णादिपात्रे संलिख्य मातृकायन्त्रमुत्तमम् ।
काश्मीरचन्दनेनापि भस्मना वाथ सुव्रत ! ॥
काश्मीरं शक्तिसंस्कारे चन्दनं वैष्णवे मनौ ।
शैवे भस्म समाख्यातं मातृकायन्त्रलेखने ॥
मन्त्राणां मातृकायन्त्रादुद्धारो जननं स्मृतम् ।
पंक्तिक्रमेण विधिना सुनिभिस्तच्च निश्चितम् ॥१॥
व्योमेन्दौ रसनार्थकर्णिकमचा द्वन्द्वैः स्फुरत् केशरं
पत्रोत्तावियतुच्छदं वसुमतीगेहेन संवेष्टितम् ।
आशास्वश्रिषु लान्तलाङ्गलियुजा क्षौणीपुरे- स्थापितं
यन्त्रं यत्रैतयोः परं निगदितं सौभाग्यसम्पत्- करम् ॥"
यन्त्रस्य दिक्षु वं विदिक्षु ठं लिखेत् । तथा च गौतमीये ।
"कादिमान्ताः पञ्चवर्गा दिक्षु पूर्व्वादितो न्यसेत् ।
यादिवान्ताः शादिहान्ता लक्षमीशे प्रविन्यसेत् ॥
चतुरस्रं चतुर्द्वारं दिक्षु वं ठं विदिक्षु च ॥"
इति मातृकायन्त्रम् ॥
"प्रणवान्तरितान् कृत्वा मन्त्रवर्णान् जपेत् सुधीः ।
एतेषां पृथगुच्चारं जीवनन्तदुदाहृतम् ॥ २ ॥
मन्त्रवर्णान् समालिख्य ताडयेच्चन्दनाम्भसा ।
प्रत्येकं वायुबीजेन पूर्व्ववत्ताडनं मतम् ॥ ३ ॥
विलिख्य मन्त्रवर्णांस्तु प्रसूनैः करवीरजैः ।
तन्मन्त्रवर्णसंख्याकैर्हन्याद्येन बोधनम् ॥" ४ ॥
"तन्त्रमन्त्रोक्तविधिना अभिषेकः प्रकीर्त्तितः ।"
तन्त्रान्तरे ।
"मन्त्रस्य चाश्वत्थं वर्णमभिषिञ्चामि कृत्स्नम् ।"
इति वचनात् प्रत्येकमभिषिञ्चेत् ।
"अश्वत्थपल्लवैः सिञ्चेत् मन्त्री मन्त्रार्णसंख्यया ॥५॥
संचिन्त्य मनसा मन्त्रं सुषुम्नामूलमध्यतः ।
ज्योतिर्मन्त्रेण विधिवत् दहेन्मलत्रयं यती ॥
तारं व्योमाग्निमनुयुक् दण्डी ज्योतिर्मनुर्मतः ॥"
तारं प्रणवः व्योम हकारः अग्नी रेफः मनुरौकारः दण्डी अनुस्वारः ॥ ६ ॥
"स्वर्णेन कुशतोयेन पुष्पतोयेन वा तथा ।
तेन मन्त्रेण विधिवदाप्यायनविधिः स्मृतः ॥७॥
मन्त्रेण वारिणा मन्त्रे तर्पणं तर्पणं मतम् ।
मधुना शाक्तमन्त्रेषु वैष्णवे चन्द्रमण्डलैः ॥
शैवे घृतेन दुग्धेन तर्पणं सम्यगीरितम् ॥"
अभिषेकेऽपि तथा ॥ ८ ॥
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥ ९ ॥
जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम् ॥१०॥
संस्कारा दश संप्रोक्ताः सर्व्वतन्त्रेषु गोपिताः ।
यान् कृत्वा सम्प्रदायेन मन्त्री वाञ्छितमाप्नुयात् ।"
मलत्रयमिति आनवं मायिकं कार्म्मणञ्च ।
प्रपञ्चसारे ।
"मायिकं नाम योषोत्थं पौरुषं कार्म्मणं मलम् ।
आनवं तद्द्वयं प्रोक्तं निषिद्धं तन्मलत्रयम् ॥"
न नवं अनवं तस्य भावः आनवं वृद्धत्वमित्यर्थः ।
तारमायारमायोग इति । तारमायारमाबीजपुटितम् मन्त्रमष्टोत्तरशतं जपेत् इत्यर्थः ।
तथा च विश्वसारे ।
"तारमायारमाबीजपुटितेन मनुं जपेत् ।
शतमष्टोत्तरञ्चैव दीपयेत् साधकोत्तमः ॥" * ॥
अथ दुर्गामन्त्रः ।
"अथ दुर्गामनुं वक्ष्ये इष्टाद्दष्टफलप्रदम् ।
मायादिः कर्णबिन्द्वाढ्यो भूयोऽसौ सर्गवान् भवेत् ॥
पञ्चान्तकः प्रतिष्ठावान् मारुतो भौतिकासनः ।
तारादिर्हृदयान्तोऽयं मन्त्रो वस्वक्षरात्मकः ॥"
अद्रिरीकारः । कर्णं उकारः । पञ्चान्तको गकारः । प्रतिष्ठा आकारः । मारुतो यकारः । भौतिक ऐकारः । ॐ ह्रीं दुं दुर्गायै नमः ॥*॥
अथ विष्णुमन्त्रः ।
"तारं नमःपदं ब्रूयात् नरौ दीर्घसमन्वितौ ।
पवनो णायमन्त्रोऽयं प्रोक्तो वस्वक्षरः परः ॥"
ॐ नमो नारायणाय ॥ * ॥ अथ शिवमन्त्रः ।
"शान्तमौकारसंयुक्तं विन्दुभूषितमस्तकम् ।
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनुः ॥"
हौं ॥ * ॥ अथ गणेशमन्त्रः ।
"पञ्चान्तकं शशिधरं बीजं गणपतेर्विदुः ॥"
पञ्चान्तको गकारः । गं ॥*॥ अथ सूर्य्यमन्त्रः ।
"तारो वृषिर्भृगुः सर्गवामकर्णविभूषितः ।
वह्न्यासनो मतवृषिः सनेत्रोऽङ्गिस्तपश्चिमः ॥
अष्टाक्षरो मनुः प्रोक्तो भानोरभिमतः परः ॥"
ॐ घृणि सूर्य्य आदित्य ॥ * ॥
पञ्चदेवतानामेक एको मन्त्रो लिखितः । एतासामन्यासाञ्चान्यमन्त्रा ग्रन्थविस्तारभयान्न लिखिताः ॥ कलावागमोक्तमन्त्रजपविधिर्यथा,—
"आगमोक्तविधानेन कलौ मन्त्रं जपेत् सुधीः ।
नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥"
तथा ।
"कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ।
द्वापरे तु पुराणोक्तः कलावागमसम्भवः ॥
मन्त्राणां देवताः प्रोक्ता देवता गुरुरूपिणी ।
तेषां भिदा न कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥"
पित्रादितो मन्त्रग्रहणनिषेधो यथा,—
"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च ।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च ॥
न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत् ॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्वेन वरारोहे ! न च सा कन्यका भवेत् ॥"
तथा गर्गशृविमर्षिण्याम् ।
"यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः ।
विविक्ताश्रमिणां दीक्षा न सा कल्याणदायिका ॥"
इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादित्यर्थः । इति तन्त्रसारः ॥ (ज्वरादिनाशकमन्त्रो यथा,—
"वानराकृतिमालिख्य खटिकाभिः पुनः प्रदृशम् ।
गन्धपुष्पाक्षतैर्धूपैरर्च्चयेद्भिषजां वरः ॥
मन्त्रः ।
ॐ ह्रां ह्रीं श्रीं सुग्रीवाय महाबलपराक्रमाय सूर्य्यपुत्राय अमिततेजसे ऐकाहिक-द्व्याहिक-त्र्याहिक चातुर्थिक-महाज्वर-भूतज्वर-भयज्वर शोकज्वर-क्रोधज्वर-वेलाज्वर-प्रभृतिज्वराणां दह दह हन हन पच पच अवतर अवतर किलिकिलि वानरराजज्वराणां बन्ध बन्ध ह्रां ह्रीं हूं फट् स्वाहा ।" इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ॥)
मन्त्रकृत्, पुं, (मन्त्रं कृतवान् । मन्त्र + कृ + क्विप् । तुगागमश्च ।) मन्त्री । मन्त्रव्याकारकः । इति सिद्धान्तकौमुदी ॥ (दौत्यकारी । यथा, श्रीमद्भागवते । ३ । १ । २ ।
"यदा अयं मन्त्रकृद्वो भगवानखिलेश्वरः ।
पौरवेन्द्रगृहं हित्वा प्रविवेशात्मसात्कृतम् ॥"
"मन्त्रकृत् दौत्यकर्मा सन् ।" इति तट्टीकायां श्रीधरस्वामी ॥*॥ त्रि, मन्त्रप्रयोगकारी । यथा, रघुवंशे । १ । ६१ ।
"तव मन्त्रकृतो मन्त्रैर्दूरात् प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥"
"मन्त्रकृतः मन्त्राणां स्रष्टुः प्रयोक्तुर्वा ।" इति तट्टीकायां मल्लिनाथः ॥)
मन्त्रगण्डकः, पुं, (मन्त्रप्रधानो गण्डकः मध्यपदलोपी कर्म्मधारयः ।) विद्या । इति हारावली । १८६ ॥

मन्त्रगूढः, पुं, (मन्त्रे मन्त्रणाधिकारे गूढः गुप्तः ।) चरः । इति शब्दरत्नावली ॥

मन्त्रगृहं, क्ली, (मन्त्रस्य मन्त्रणायाः गृहम् ।) मन्त्रणागारम् । (यथा, महाभारते । १५ । ५ । २२ ।

"सुसंवृतं मन्त्रगृहं स्यात् चारस्य मन्त्रये: । अरण्ये निःशलाके वा न च राज्ञौ कथञ्चन ॥")

मन्त्रजा, स्त्री, (मन्त्रात् जायते इति । मन्त्र + जन् + डः । टाप् ।) मन्त्रशक्तिः । इति पुराणम् ॥

मन्त्रजिह्वः, पुं, (मन्त्र एव जिह्वा यस्य ।) अग्निः । इति हेमचन्द्रः । ५ । १६५ ॥ (यथा, माघः । २ । १०७ ।

"अस्तं नाम यत् सन्तो मन्त्रजिह्वेषु जुह्वति । श्रीभेव मन्दरक्षुब्धक्षुभिताम्भोधिवर्जना ॥")

मन्त्रज्ञः, पुं, (मन्त्रं जानातीति । मन्त्र + ज्ञा + कः ।) चरः । इति हलायुधः ॥ मन्त्रज्ञातरि, त्रि । (यथा, मनुसंहितायाम् । ८ । ४ ।

"अवहारान् दिदृक्षुस्तु आह्वयेत् सह पार्थिवः । मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥")

मन्त्रणं, क्ली, (मन्त्र + ल्युट् ।) मन्त्रणा । मन्त्र-धातोर्भावे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, मार्कण्डेयपुराणे । ५० । ८७ ।

"अवस्करे मन्त्रणञ्च यत्तेनदुपलक्षय ॥")

मन्त्रणा, स्त्री, (मन्त्र + भावे युच् । टाप् ।) रक्षसि कर्त्तव्यावधारणम् । इति मन्त्रशब्द-टीकायां भरतः ॥ मन्त्रः । यथा,—

"वादी मुकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति । गर्व्वी खर्व्वति सर्व्वविच्च जड़ति त्वन्मन्त्रणा-यन्त्रितः श्रीनित्ये वगलामुखि ! प्रतिदिनं कल्याणि तुभ्यं नमः ॥"

इति तन्त्रसारे वगलास्तोत्रम् ॥ * ॥

मन्त्रणायां वर्ज्जनीयानि यथा,—

"मन्त्रे पञ्चाङ्गनाग्निक्षाड्गुण्योपायसिद्धयः । उदयास्त्रिबलत्वाच्च स्त्रीयोन्नत्यादिहेतवः ॥"

इति कविकल्पलता ॥ * ॥

यन्त्रिनयादिज्ञातमन्त्रणायां दोषो यथा,—

"षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णश्च धार्य्यते । द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्येको न बुध्यते ॥"

इति गारुड़े २१४ अध्यायः ॥

राज्ञा विद्यादिगुणयुक्तविप्रा मन्त्रिणः कार्य्याः । यथा,—

"मन्त्रिणस्तु नृपः कुर्य्यात् विप्रान् विद्याविशारदान् । विमुक्तांश्च कुलीनांश्च धर्म्मार्थकुशलान्नृजून् ॥ मन्त्रयेत्तैः समं कार्य्यं नात्यर्थं बहुभिश्चरेत् । एकैकेनैव कर्त्तव्यं मन्त्रस्य तु विनिश्चयम् ॥ अन्येश्चैव समस्तैश्च वाच्यस्य व्यपदेशनः । स्वयं दृष्टं मन्त्रगृहं सृजेत् आवृत्य मन्त्रयेत् ॥

अरण्ये निःशलाके वा न यामिन्यां कदाचन । शिष्यून् भ्रात्रादिकान् पक्षान् शुकान् वैद्या-रिकांस्तथा ॥ वर्जयेन्मन्त्रणस्थेषु मनुष्यानुद्धतांस्तथा । दूषणं मन्त्रभेदेषु नृपाणां यत्र जायते ॥ न तत् सम्यक् समाधातुं दक्षैर्भूपतिरपि ॥"

इति कालिकापुराणे ८५ अध्यायः ॥

अथ मन्त्रनिर्णयः ।

"मन्त्रमूलं यतो राज्यं ततो मन्त्रं सुरक्षितम् । कुर्य्यादाजा सदा मन्त्रान् कर्म्मणामाफलोदयात् ॥ अर्थानर्थौ हि यत्रोभौ संशयस्थौ परीक्ष्यते । स मन्त्र इति विज्ञेयः श्रेषाश्च खलु विभ्रमाः ॥ एकमेव विषं हन्ति मूढ्यानेकञ्च वधते । सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः ॥ करिष्यन् न प्रभाषेत प्रज्ञावानेव तु दर्शयेत् । धर्म्मार्थकामसंकार्य्याणि श्रुतो मन्त्रो न भिद्यते ॥ गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः । अपथे निःशलाके वा तत्र मन्त्रो विधीयते ॥ तत्र साम प्रयोक्तव्यं कार्य्येषु गुणवत्स्वपि । दानं लुब्धेऽपि भेदश्च शक्तिहीनेष्वपि निश्चयः ॥ अङ्गमृक्कान्तवधिरान् तिर्य्यग्योनीन् वयोऽधि-कान् । स्त्रीम्लेच्छव्याधितव्यङ्गान् मन्त्रकाले निवेशयेत् । इति सम्यनयः प्रोक्तो राजनीतिरियं मया ॥ यत्तिवर्गाविरुद्धं स्यादाजनीतिरुदाहृता ॥"

इति युक्तिकल्पतरौ नीतियुक्तिः ॥

मन्त्रनः, [स्] अ, (मन्त्रादिति । मन्त्र + "पञ्चम्यास्तसिल् ।" ५ । ३ । ७ । इति पञ्चमी-स्थाने तसिल् ।) मन्त्रात् । इति सिद्धान्त-कौमुदी ॥

मन्त्रदः, पुं, (मन्त्रं ददातीति । मन्त्र + दा + कः ।) शिष्यकर्णे तदिष्टदेवमन्त्रप्रदानकर्त्ता । मन्त्र-दाता गुरुः । यथा,—

"परापरगुरूणाञ्च निर्णयं शृणु पार्व्वति ! । आदौ सर्व्वत्र देवेशि ! मन्त्रदः परमो गुरुः । परापरगुरुत्वं हि परमेष्ठी स्वयं गुरुः ॥"

इति हरबन्नीलतन्त्रे २ पटलः ॥ * ॥

तत्पित्रादीनामपि परमगुरुत्वादिर्यथा,—

"मानवस्य महेशानि ! सद्गुरोर्व्याहृदामि ते । गुरुः परमगुरुश्चैव परापरगुरुस्तथा । स्वगुरुः परमेशानि ! साक्षाद्ब्रह्म न संशयः ॥ तत्पिता परमगुरुः स्वयं विष्णुः स्थितौ सदा । तत्पिता परापरगुरुर्ब्रह्मैश्वरसमः सदा ॥"

इति शाक्तानन्दतरङ्गिणीधृतमहिषमर्द्दिनी-तन्त्रम् ॥

मन्त्रदाता, [तृ] त्रि, (मन्त्रं ददातीति । मन्त्र + दा + तृच् ।) मन्त्रदानकर्त्ता । गुरुः । यथा,—

"सर्व्वेषाञ्च गुरुत्वाच्च अन्नदाता परो गुरुः । पितुः शतगुणैर्माता पूज्या वन्द्या गरीयसी ॥ विद्यादाता मन्त्रदाता ज्ञानदो हरिभक्तिदः । पूज्यो वन्द्यश्च सेव्यश्च मातुः शतगुणैर्गुरुः ॥ मन्त्रसुतैरयत्नेन गुरुरित्युच्यते बुधैः ।

अन्यो वन्द्यो गुरुरयमन्यश्चारोपितो गुरुः ॥ अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ अदीक्षितस्य मूर्खस्य निष्कृतिर्नास्ति निश्चितम् । सर्व्वकर्म्मक्षमर्हस्य नरके तत्प्रभोः स्थितिः ॥ अन्नदातान्नदाता वा मातार्थे गुरवस्त्रयः । पारं कर्त्तुं न शक्तास्ते घोरे संसारसागरे ॥ विद्यामन्त्रज्ञानदाता निपुणः पारकर्म्मणि । न शक्तः शिष्यसन्तुष्टौ श्वरश्वेश्वरोऽपरः ॥ गुरुर्विष्णुर्गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः । गुरुर्धर्म्मो गुरुः श्रेष्ठः सर्व्वाला निर्गुणो गुरुः ॥ सर्व्वतीर्थाश्रमश्चैव सर्व्वदेवाश्रयो गुरुः । सर्व्ववेदस्वरूपश्च गुरुरूपी हरिः स्वयम् ॥ अभीष्टदेवे रुष्टे च गुरुः शक्तो हि रक्षितुम् । गुरौ रुष्टेऽभीष्टदेवो नहि शक्तश्च रक्षितुम् ॥ सर्व्वे यज्ञाश्च यं तुष्टा यं तुष्टा देवताजनाः । तमेव रुष्टो भवति गुरुरेव हि देवतः ॥ न गुरोश्च प्रियज्ञाता न गुरोश्च प्रियः सुतः । धनं प्रियं न च गुरोर्न च भार्य्या प्रिया तथा ॥ न गुरोश्च परो धर्म्मो न गुरोश्च परन्तपः । न गुरोश्च परं सत्यं न पुण्यञ्च गुरोः परम् ॥ गुरोः परो न त्राता च नहि बन्धुर्गुरोः परः । देवो राजा च त्राता च शिष्याणाञ्च सदा गुरुः ॥ यावत् शक्तो दातुमन्नं तावत् त्राता तदन्नदः । गुरुः त्राता च शिष्याणां प्रति जन्मनि जन्मनि ॥ मन्त्रो विद्यागुरुर्देवः सर्व्वज्ञो यथा प्रभुः । प्रतिजन्मनिबन्धेन सर्व्वेषामुपरि स्थितः ॥ पिता गुरुश्च बन्धुश्च यस्य जन्मनि जन्मनः । गुरवोऽन्ये तथा माता गुरुश्च प्रतिजन्मनि ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे प्रथमोऽध्याय-श्लोकवर्णनं नाम ५८ अध्यायः ॥ अपि च ।

"मान्यः पूज्यश्च सर्व्वेभ्यः सर्व्वेषां जनको भवेत् । अहो यस्य प्रसादेन सर्व्वान् पश्यति मानवः ॥ जनको जन्मदाता च रक्षकश्च पिता नृणाम् । ततो विस्तीर्णकरणात् कन्यया स प्रजापतिः ॥ पितुः शतगुणैर्माता पीडाजन्मभरात्रात् । वन्द्या पूज्या च मान्या च प्रत्यक्षरूपा वसुन्धरा ॥ मातुः शतगुणैर्वन्द्यः पूज्यो मान्योऽन्नदायकः । यतिना नश्वरो देहो विष्णुश्च कन्यया स्मृतः ॥ अन्नदातुः शतगुणोऽभीष्टदेवः परः स्मृतः । गुरुस्तस्माच्छतगुणो विद्यामन्त्रप्रदायकः ॥ अज्ञानतिमिरान्धस्य ज्ञानदीपेन चक्षुषा । यः सर्व्वार्थं दर्शयति तत्परः कोऽपि बान्धवः ॥ गुरुदत्तेन मन्त्रेण तपसेष्टसुखं लभेत् । सर्व्वत्रैवं सर्व्वसिद्धिं तत्परः कोऽपि बान्धवः ॥ सर्व्वं जयति सर्व्वत्र विद्यया गुरुदत्तया । तस्मात् पूज्यो हि जगति को वा बन्धुस्ततो-ऽधिकः ॥ विद्वान्यो वा धनाढ्यो वा योऽज्ञो न भवेद्-गुरुम् । ब्रह्महत्यादिभिः पापैः स लिप्तो नात्र संशयः ॥

दरिद्रं पतितं क्षुद्रं गर-ब्रह्मोपरेतुरम् ।
योऽशुचिर्वीर्यशालोऽपि नाधिकारी च कर्मसु॥
पितरं मातरं भार्यां गुरुपत्नीं गुरुं परम् ।
यो न पुष्णाति कापट्यात् स महापातकी
ग्रिय ! ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म गुरुभ्यो गुरवे नमः ॥
गुरुश्चन्द्रश्च सूर्यश्च वायुश्च वरुणोऽनलः ।
सर्वरूपो हि भगवान् परमात्मा स्वयं गुरुः ॥
नास्ति वेदात् परं शास्त्रं नहि ज्ञानात् परः
सुरः ।
नास्ति गङ्गासमं तीर्थं न पुण्यं तुलसीपरम् ॥
नास्ति क्षमावती भूमेः पुत्रान्नास्ति परः प्रियः ।
न च दैवात् परा शक्तिर्वर्तते नैकाग्निं विना ॥
ब्रह्मलग्नात्परो यज्ञो न लेभे भारतात् परम् ।
परं पुण्यस्थलानाञ्च पुण्यं वृन्दावनं यथा ॥
मोक्षदानां यथा काशी वैष्णवानां यथा शिवः ।
न पार्वतीपरा साध्वी न गणेशात् परो वशी ॥
न च विश्वासमो बन्धुर्नास्ति कश्चिद्गुरोः परः ।
विद्यादातुः पुत्रदारौ तत्समौ नात्र संशयः ॥"
इति ब्रह्मवैवर्तपुराणे गणपतिखण्डे ४४
अध्यायः ॥

मन्त्रदीधितिः, पुं, (मन्त्रेण दीधितिर्दीप्तिर्यस्य ।) वह्निः । इति त्रिकाण्डशेषः ॥

मन्त्रपूतः, त्रि, (मन्त्रेण पूतः ।) मन्त्रेण पवित्रीकृतः । यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये । ८६ । ६६ ।
"ब्रह्माणीमन्त्रपूतेन तोयेनाम्बु निराकृताः ॥"

मन्त्रपूतात्मा, [त्मन्] पुं, (मन्त्रेण पूतः आत्मा यस्य ।) गरुडः । इति धरणिः ॥

मन्त्रवित्, [द्] (पुं, मन्त्रं पञ्चाङ्गमन्त्रयां वेत्तीति । विद् + क्विप् ।) चरः । इति हेमचन्द्रः । ३ । ६८७ ॥ (यथा, महाभारते । ५ । १८६ । ५ ।
"श्रुत्वा हृषीको यज्ञेन:
सर्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन् !
यथायुक्तं रक्षणे वै प्रजानाम् ॥")
मन्त्रज्ञानवति, त्रि ॥ (यथा, छान्दोग्योपनिषदि । ७ । १ । ३ ।
"सोऽहं भगवतो मन्त्रविदेवास्मि ॥"
मन्त्रं वेदार्थं वेत्तीति । विद् + क्विप् । वेदार्थवित् । यथा, मनौ । ३ । १३१ ।
"सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते ।
एकस्तान् मन्त्रवित् प्रीतः सर्वानर्हति धर्मतः ॥")
मन्त्रशल्क, [ल्क्] त्रि, (मन्त्रेण शल्यतीति । "शल्योऽनुदके क्विन् ।" ३ । २ । ५८ । इति क्विन् ।) मन्त्रकरणकस्यार्थकर्ता । इति सिद्धान्तकौमुदी ॥

मन्त्रित:, त्रि, मन्त्रेण संस्कृतः । अभिमन्त्रितः । मन्त्रोऽस्य जातः । इति मन्त्रिधातोः क्तप्रत्ययेन मन्त्रशब्दात् इतप्रत्ययेन च निष्पन्नः ॥ (यथा, निषधे ।
"स्निग्धं खलकृतं वेश्मासुपाग्निमुपवेशयेत् ।
मन्त्रितं घोषजोतोये: घ्राणिकुम्भबलेक्षया ।
मूलमन्त्रेणाष्टशतं मन्त्रितैरभिषेचयेत् ॥")

मन्त्री, [न्] पुं. (मन्त्रो गुप्तभाषणमस्यास्ति । मन्त्र + इनिः । यद्वा, मन्त्रयते इति । मन्त्र + "सन्धिमन्धीति ।" ३ । २ । १३४ । इति णिनिः ।) मन्त्रजातकर्मनिश्चयकर्ता । तत्पर्य्यायः । धीसचिवः २ अमात्यः ३ । इत्यमरः । २ । ८ । ४ ॥ सचिवः ४ धीसखः ५ सामवायिकः ६ । इति हेमचन्द्रः । ३ । ३८३ । तस्य लक्षणं यथा,—
"मन्त्री भक्तः शुचिः शूरोऽनुद्धतो बुद्धिमान् क्षमी ।
आन्वीक्षिक्यादिकुशलः परिच्छेदी सुदेशजः ॥"
इति कविकल्पलता ॥
"बहुभिर्मन्त्रयेत् कामं राजा मन्त्रं पृथक् पृथक् ।
मन्त्रिणामपि वो कुर्यान्मन्त्री मन्त्रप्रकाशनम् ॥
न क्वचित् कस्य विश्वासो भवनीह सदा नृणाम् ।
निश्चयश्च सदा मन्त्रे कार्य्य एकेन सूरिणा ॥
भवेद्धि निश्चयाबाप्तिः परबुद्ध्यनुजीवनात् ।
एकस्यैव मतीभूभूयः कार्य्यो विनिश्चयः ॥"
इति मत्स्यपुराणे १८८ अध्यायः ॥

मन्थ, कृत्थे । गाहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मन्थति । कुन्थः कैश्चिन्न मन्थते । इति दुर्गादासः ॥

मन्थ, ग गाहे । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) गाहो विलोडनम् । ग, मथ्नाति दधि वल्लवी । रथं ममन्थ सहयम् । इति दुर्गादासः ॥

मन्थः, पुं, (मथ्यतेऽनेन । मन्थ + करणे घञ् ।) मन्थदण्डकः । इत्यमरः । २ । ८ । ७४ ॥ (यथा, महाभारते । १२ । ३४३ । ११ ।
"आमथ्य मतिमन्थेन ज्ञानोदधिमनुत्तमम् ।
नवनीतं तथा दध्नो मलयाच्चन्दनं यथा ॥"
मथ्यते विलोड्यते इति । मन्थ + कर्म्मणि घञ् ।) सक्तवः । (मथ्नाति स्वकरेण त्रिभुवनं पीडयतीति । मन्थ + अच् ।) दिवाकरः । इति मेदिनी । थे, ११ ॥ सक्तवो यथा,—
"मन्थुभिः सर्पिषाभ्यक्तैः पीतवारिपरिप्लुतैः ।
नात्यच्छो नातिसान्द्रश्च मन्थ इत्यभिधीयते ॥"
इति राजनिर्घण्टः ॥
पेयविशेषः । तस्य विधिर्यथा,—
"जले चतुर्गुणे घृष्टे क्षुण्णं द्रव्यं पलं क्षिपेत् ।
मृत्पात्रे मन्थयेत् सम्यक् तच्चाष्ट द्विपलं
पिबेत् ॥"
क्षुण्णं चूर्णीकृतम् । मन्थयेत् मद्दीयात् । इति भावप्रकाशः ॥ (मन्थ + भावे घञ् ।) मारणम् । इति त्रिकाण्डशेषः ॥ नेत्रमलम् । इति धरणिः ॥ नेत्रामयः । इति विश्वः ॥ अंशुः । इति शब्दरत्नावली ॥ कुत्सनम् । विलोडनम् । इति मन्थशब्दार्थदर्शनात् । (यथा, रघौ । १० । ३ ।
"अतिष्ठत् प्रलयापेक्षस्तस्थौ चिरं नृपः ।
प्राक्षुत्वादभिभक्षस्तरक्षोत्पत्तिरिवार्णवः ॥")

मन्थजं, क्ली, (मन्थेन मन्थनेन जायते इति । जन् + डः ।) नवनीतम् । इति रत्नमाला ॥ (विवरणमस्य नवनीतशब्दे ज्ञातव्यम् ॥)
मन्थदण्डकः, पुं. (मन्थाय मन्थनाय यो दण्डः । ततः स्वार्थे कन् ।) मन्थनदण्डः । हाँचुनी इति घोलमौनी इति खड़ेन् इति च भाषा ॥ तत्पर्य्यायः । वेधनाख्यः २ मन्थः ३ मन्थानः ४ मन्थाः ५ । इत्यमरः । २ । ६ । ७४ ॥ करकर्षकः ६ मन्थनः ७ भस्राटः ८ । इति शब्दरत्नावली ॥ तक्राटः ९ । इति जटाधरः ॥
मन्थनं, क्ली, (मन्थ + ल्युट् ।) विलोडनम् । कुत्सनम् । इति मन्थधातोर्माधे अनट्प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते ।१। १८ । १० ।
"क्षिरार्णवमिवाप्यापि सागरस्यापि मन्थनम् ॥")
मन्थनः, पुं, (मथ्नात्यनेनेति । मन्थ + करणे ल्युट् । यद्वा, मथ्नातीति । मन्थ + ल्युः ।) मन्थनदण्डः । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ८४ । ३६ ।
"गोभिश्च समकीर्णासु व्रजनिर्य्याणभूमिषु ।
मन्थनावर्तपूर्णेषु गर्तरेषु नदत्सु च ॥")
मन्थनघटी, स्त्री, (अल्पो घटः । अल्पार्थे ङीष् । मन्थनार्था मन्थनस्य वा घटी ।) दधिमन्थनपात्रम् । यथा,—
"कलसी मन्थनघटी मन्थनी चापि गर्गरी ॥"
इति जटाधरः ॥
मन्थरं, क्ली, (मन्थति क्लेशयतीति । मन्थ + बाहुलकात् अरन् ।) कुसुम्भी । इति मेदिनी । रे, १६८ ॥
मन्थरः, पुं, (मन्थ + बाहुलकात् अरन् ।) कोपः । फलम् । बाधः । मन्थानः । इति मेदिनी । रे, १६८ ॥ क्षुपकः । इति विश्वः ॥ मन्दगामियोद्धा । इति त्रिकाण्डशेषः । २ । ८ । ७२ । कोपः । इत्यजयः ॥
मन्थरः, त्रि, (मन्थति प्राणानिति । मथि + अरन् ।) मन्दः । (यथा, साहित्यदर्पणे । ३ । ६८
"दत्ते बालसमन्थरं मुखि पदं निर्याति नाम्नः-
पुरात् ॥")
पृथुः । वक्रः । इति मेदिनी । रे, १६८ । (निष्फलः । यथा, आर्य्यासप्तशत्याम् । ४८८ ।
"राज्याभिषेकसलिलप्लावितमौलेः कथासु
लग्नस्य ।
गर्वभरमन्थराणी पश्यति पदपङ्कजं राधा ॥")
जड़ः । इति शब्दरत्नावली ॥ नीचः । इति हेमचन्द्रः । ६ । ६५ ॥ (मन्दगामी । इति हेमचन्द्रः । ३ । १५६ ॥)
मन्थरा, स्त्री, (मन्थर + स्त्रियां टाप् ।) कैकय्या दासी । यथा,—
"रामाभिषेके विघ्नार्थं यतस्व ब्रह्मवाक्यतः ।
मन्थरां प्रविशस्वाद्यो कैकेयीञ्च ततः परम् ॥"
इत्यध्यात्मरामायणे अयोध्याकाण्डे २ अध्यायः॥
मन्थरः, पुं. (मन्थ + बाहुलकात् अरः ।) चामरवातः । तत्पर्य्यायः । कुटेरः २ । इति त्रिकाण्डशेषः ॥

मन्थशैलः, पुं. (मन्थाय मथनदण्डमन्थनाय कल्पितः शैलः ।) मन्दरपर्व्वतः । इति जटाधरः ॥

मन्था, स्त्री, (मथ्यते इति । मथ + घञ् । ततः स्त्रियां टाप् ।) मेथिका । इति राजनिर्घण्टः ॥ (यथा, भावप्रकाशे पूर्व्वखण्डे ।

"बलारी चक्रिका मन्था मिश्रपुष्पा च कैरली ॥")

मन्थाः, [थिन्] पुं, (मन्थ + "मन्थः ।" उणा० ४ । ११ । इति इनिः । स च किन् ।) मन्थानदण्डः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, किरातार्জ্জुनीये । ४ । २६ ।

"मरुद्भः प्रस्थवेषु मथां विवर्त्तनै-
र्नदत्सु कुम्भेषु महद्भिरम्बरम् ॥")

मन्थानः, पुं. (मथ्यते अनेनेति । मन्थ + बाहुलकात् आनच् ।) मन्थदण्डकः । इत्यमरः । २ । ६ । ७४ ॥ (यथा, देवीभागवते । १ । १० । २५ ।

"मन्थानारणिसंयोगान्मन्थनाच्च समुद्भवः ।
पावकस्य यथा तद्वत् कर्त्तव्यं मे स्यात् सुतोद्भवः ॥")

आरम्भः ॥ इति राजनिर्घण्टः ॥ (मन्थनदण्डकत्वादस्य तथात्वम् । मन्दरपर्व्वतः । यथा, रामायणे । १ । ४५ । २७ ।

"प्रविवेशाथ पातालं मन्थानः पर्व्वतोत्तमः ॥"

मन्थादेवः । यथा, महाभारते । १३ । १७ । १२८ ।

"मन्थानो बहुलो वायुः सकलः सर्व्वलोचनः ॥")

मन्थानकः, पुं, (मन्थान इवेति । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) तृणभेदः । तत्पर्य्यायः । हरितः २ दृढमूलः ३ तृणाढ्यप्रियः ४ । अस्य गुणाः । स्निग्धत्वम् । दीर्घाणां प्रियत्वम् । मधुरत्वम् । बहुवीर्य्यत्वञ्च । इति राजनिर्घण्टः ॥

मन्थिनी, स्त्री, (मन्थो मन्थनमस्त्यस्याम् । मन्थ + इनिः । ङीप् ।) दधिमन्थनपात्रम् । तत्पर्य्यायः । गर्गरी २ कलशी ३ । इति हेमचन्द्रः । ४ । ८८ ॥

मन्थोदधिः, पुं, (मथ्यतेऽसौ । मन्थ + कर्म्मणि घञ् । मन्थश्चासौ उदधिश्चेति । मन्थाय उदधिरिति वा ।) क्षीरसमुद्रः । इति केचित् ॥

मन्दः, पुं, (मन्दते इति । मदि + अच् ।) ऋषिः । (यथा, ज्योतिषे ।

"शुक्रेज्यबुधजीवानां वाराः सर्व्वत्र शोभनाः ।
भानुभूसुतमन्दानां शुभकर्म्मसु केष्वपि ॥")

हस्तिजातिविशेषः । इति मेदिनी । दे, १३ ॥ यमः । इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे । ३२ । १५५ ।

"तत्र मन्दमिषालोक्य साभिप्रायः स मां नृपः ।
पप्रच्छ रे किमीदृक्तं सञ्जातः कथयामिति ॥")

प्रलयः । इत्यजयः ॥ (जठराग्निविशेषः । यथा, भावप्रकाशे चिकित्सितस्थाने ६ अध्याये ।

"तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः ।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः ॥")

मन्दः, त्रि, (मदि + अच् ।) अतीक्ष्णः । अल्पः । (यथा, रघुवंशे । १ । ३ ।

"मन्दः कवियशःप्रार्थी गमिष्याम्युपहास्यताम् ॥")

खेदः । अभाग्यः । रोगी । अल्पः । इति मेदिनी । दे, १३ ॥ (यथा, मेघदूते । १ । ४ ।

"मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम् ॥"

आलसः । यथा, श्रीमद्भागवते । १ । १ । १० ।

"प्रायेणाल्पायुषः सभ्य ! कलावस्मिन् युगे जनाः ।
मन्दाः सुमन्दमनसो मन्दभाग्या ह्युपद्रुताः ॥"

"मन्दाः आलसाः ।" इति तट्टीकायां श्रीधरस्वामी ॥)

मदरतः । खलः । इति हेमचन्द्रः । ३ । ४८ ॥

मन्दगः, त्रि, (मन्दं अल्पं गच्छतीति । गम् + डः ।) मन्दगामी । यथा,—

"मन्दगाश्च गृध्रिश्वानिष्टषण्ढसंसर्गवर्জ্জिताः ॥"

इति कविकल्पलता ॥

(पुं. प्लाक्षद्वीपस्थजनपदभेदः । यथा, महाभारते । ६ । ११ । ३१ ।

"तत्र पुण्या जनपदाश्चत्वारो लोकसम्मताः ।
मगाश्च मशकाश्चैव मानसा मन्दगास्तथा ॥")

मन्दगामी, [न्] त्रि, (मन्दं गच्छतीति । गम् + णिनिः ।) मन्दगमनशीलः । तत्पर्य्यायः । मन्थरः २ । इत्यमरः । २ । ८ । ७२ ॥ खेरगामी ३ मन्दः ४ । इति शब्दरत्नावली ॥

मन्दजननी, स्त्री, (मन्दस्य शनैश्चरस्य जननी माता ।) शनैश्चरमाता । सूर्य्यपत्नी । इति त्रिकाण्डशेषः ॥

मन्दटः, पुं, (मन्दमटतीति । अट् + अच् । प्रकृत्यादित्वात् साधुः ।) पारिभद्रवृक्षः । इति शब्दरत्नावली ॥

मन्दता, स्त्री, (मन्दस्य भावः । मन्द + भावार्थे तल् । स्त्रियां टाप् ।) आलस्यम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते शारीरस्थाने ।

"दुर्म्मेधत्वं मन्दता च स्वप्ने मैथुनित्यता ।
निराकरिष्णुता चैव विज्ञेयाः पापजा गुणाः ॥")

मन्दत्वम् । (यथा, चन्द्रालोके । १ । १ ।

"उच्चैरस्यति मन्दतामरसतामिन्दोः कलङ्कच्छटा ॥"

क्षीणता । यथा, साहित्यदर्पणे । ३ । ६८ ।

"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां
दूरं यात्युदरञ्च रोमलतिका नैवार्ব্বयं धावति ॥")

मन्दनं, क्ली, (मन्दते स्तौति अनेन । मन्द् + "कृपृवृजिमन्दिनिधान्यः क्युः । उणा० २ । ८१ । इति करणे क्युः ।) स्तोत्रम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

मन्दरः, पुं, (मन्द् + बाहुलकात् अरः ।) मन्थशैलः । (यथा, महाभारते । १ । १८ । १३ ।

"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ॥")

मन्दारपादपः । इति मेदिनी । रे, १८६ ॥ स्वर्गः । हारभेदः । इति हेमचन्द्रः । ४ । ६६ ॥ सुकरः । इति शब्दरत्नावली ॥ (कुशद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये । १२१ । ६१ ।

"मन्दरः शैव विज्ञेयः सर्व्वधातुमयः शुभः ।
मन्द इत्येष यो धातुरुपार्জ্জने प्रकाशकः ॥
अर्থা विदारणात् चैव मन्दरः स निगद्यते ॥")

मन्दरः, त्रि, (मन्द् + अरः ।) बधिरः । मन्दः । इति मेदिनी । रे, १८६ ॥

मन्दसानः, पुं, (मन्दते स्तुत्यादिकं प्राप्नोतीति । मन्द + "ऋज्विग्मदिधृषिमन्दिसहिभ्यः क्सितृ ।" उणा० २ । ८७ । इति असानच् ।) ऋषिः । प्राज्ञः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ जिह्मः । इत्युणादिकोषः ॥ (त्रि, मोदमानः । यथा, ऋग्वेदे । १ । १०० । १४ ।

"मन्दसानो मरुत्वान् ।"

"मन्दसानो मोदमानः सन् ॥" इति तद्भाष्ये सायणः ॥)

मन्दसानुः, पुं, (मन्दं मन्दतां सनोति ददातीति । मन्द + सन् + बाहुलकात् उण् ।) खद्योतः । जीवः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मन्दा, स्त्री, (मन्द + स्त्रियां टाप् ।) संक्रान्तिविशेषः । सा उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदारोहिणीमघासु रविसंक्रान्तिर्यदा भवति । तस्याः सन्निहितदक्षयज्ञस्य पुण्यतमत्वम् । यथा,—

"मन्दा मन्दाकिनी भ्रांक्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः समधा नृप ! ॥
मन्दा भुवेषु विज्ञेया खरी मन्दाकिनी तथा ।
स्त्रिये भ्रांक्षी विजानीयाद्ये घोरा प्रकीर्त्तिता ॥
चरेष्वेषादरी ज्ञेया क्रूरेष्वंशेषु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रेष्वंशेषु संक्रमः ॥"

इत्येतेषांदशसु संक्रान्तिषु ध्रुवादिनक्षत्रयोगात् मन्दादिरूपतया समधा भिन्नासु त्रिचतुःपञ्चषट्सप्ताष्टनवाहोरात्र एव च । क्रमेण घटिका क्षेतासत् पुण्यं पारमार्थिकमिति देवीपुराण एव त्रिचतुरादिघटिकानां पुण्यत्वमुक्तम् । इति तिथ्यादितत्त्वम् ॥

मन्दाकं, क्ली, (मन्दते स्तूयते इति । मन्द् + बाहुलकात् आकः ।) स्तवनम् । इत्युणादिकोषः ॥ (स्तोत्रः । इत्युज्ज्वलदत्तः । ४ । १६ ॥)

मन्दाकिनी, स्त्री, (मन्दाकानि स्तोत्राणि सन्त्यस्याः इति । मन्दाक + इनिः । यद्वा, "मन्दमकितुं शीलमस्याः । इनिः । यद्वा, मन्दनाम्नः सरसः अकति गच्छतीति । नयनागन्दः ।" इत्यमरटीकायां रघुनाथचक्रवर्त्ती ।) स्वर्गगङ्गा । तत्पर्य्यायः । त्रिपथगा २ खर्नदी ३ सुरदीर्घिका ४ । इत्यमरः । १ । १ । ५२ ॥ खर्गङ्गा ५ देवभूतिः ६ स्वर्गपगा ७ सुरेश्वरी ८ । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ६ । ८२ ।

"मन्दाकिनीनन्दनयोर्विहारे
देवे भवद्देवरि माधवे वा ॥")

तस्या विवरणं यथा,—

"प्रधानधारा या स्वर्गे वा च मन्दाकिनी स्मृता।
योजनायुतविस्तीर्णा प्रस्थेन योजना स्मृता॥
क्षीरतुल्यजला पुण्यदत्युत्तरङ्गिणी।
वैकुण्ठाद्ब्रह्मलोकाच्च ततः स्वर्गं समागता॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे जाह्नवी-जन्मप्रस्तावे १४ अध्यायः॥*॥ संक्षान्ति-विशेषः। अस्य प्रमाणं मन्दाग्निशब्दे द्रष्टव्यम्॥ (चित्रकूटस्थनदीविशेषः। यथा, महाभारते। ३। ८५। ५८।
"ततो गिरिवरश्रेष्ठे चित्रकूटे विराज्यते।
मन्दाकिनीं समासाद्य सर्वपापप्रणाशिनीम्॥"
द्वारकास्थनदीविशेषः। यथा, महाभारते। हरिवंशपर्वणि। १५५। २२।
"वैदूर्यपत्रैर्ज्वलनैस्तथा मन्दाकिनी नदी।
भाति पुष्करिणी रम्या पूर्णस्वा दिग्विभारत!॥"
छन्दोविशेषः। यथा, छन्दोमञ्जर्याम्।
"न न र र-घटिता तु मन्दाकिनी॥"
उदाहरणादिकन्तु छन्दःशब्दे द्रष्टव्यम्॥)
मन्दाक्रान्ता, स्त्री, (मन्दं यथा तथा आक्रान्ता।) छन्दोविशेषः। यथा,—
"चत्वारः प्राक् सुनतु गुरवो हौ दशैकादशौ नेऽ-नुस्वौ वर्णौ तदनु कुसुदाभोदिनि! द्वादशान्त्यौ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र काञ्ची। विरामो मन्दाक्रान्ता प्रवरकवयस्तान्वि! तां संगिरन्ते॥"
इति श्रुतबोधः॥
(अन्याक्रान्ता। यथा,—
"मन्दाक्रान्ता वितरति रसं नेक्षुयष्टिः समग्रम्॥"
इत्युद्भटः॥)
मन्दार्त्त, क्ली, (मन्दे सङ्कुचिते अक्षिणी नेत्रे यस्मात्। "अक्ष्णोऽदर्शनात्।"७। ४। ७६। इति समासान्तः अच्।) लज्जा। इत्यमरः। २।७।२३॥
(यथा, नैषधचरिते। ३। ६१।
"मन्दार्त्तमन्दाक्षरसद्मसक्ता
तस्यां समाकुञ्चितवाचि हंसः।
तच्छंसिते किञ्चन संशयानु-
गिरा सुखाम्भोजमयं बुबोध॥")
मन्दाग्निः, पुं, (मन्दः प्राचनासमर्थश्चासावग्निश्चेति।) कफद्वाराप्यजठराग्निः। तस्य निदानादि यथा,—
"मन्दस्त्वग्नेरथ विषमः समश्चेति चतुर्विधः।
कफपित्तविकाधिक्यात्ततसाम्याच्चाठरोऽनलः॥
विषमो वातजान् रोगान्करोत्यन्यविपर्ययात्।
करोत्यग्निसमो मन्दो विकारान् कफसम्भवान्॥
समा समाग्नेरग्नेता मात्रा सम्यग्विपच्यते।
अथापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः।
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते॥"
इति माधवकरः॥*॥
तस्यौषधं यथा,—
"चित्रकस्याष्टभागानि शूरणस्य च षोडश।
शुष्कशाकसमानि मरीचानां त्रयं तथा॥
पिप्पली पिप्पलीमूलं चित्रकाणां चतुष्टयम्।
अष्टौ सुनिषभागाश्च त्रिफलायाश्चतुष्टयम्॥
द्विगुणेन गुडेनैषां मोदकानि च कारयेत्।
तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलाम्।
अतिसारोदितमन्दाग्निग्रहाश्च निवारयेत्॥"
इति गारुडे १६८ अध्यायः॥*॥
अथ जठराग्निविकाराधिकारः। तत्र सन्निहितनिदानपूर्व्वकान् उदराग्निविकारानाह।
"कफपित्तानिलाधिक्यात्तत्साम्याच्चाठरोऽनलः।
मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः॥"
तत्र मन्दस्याग्नेर्लक्षणमाह।
"स्वल्पापि नैव मन्दाग्नेर्भोज्या सुक्तापि पच्यते।
हृद्दाहः प्रसेकः स्याच्छिरोगौरवजाठरम्॥"
मन्दाग्निजन्यान् विकारानाह।
"मन्दोऽग्निर्हन्ति कुप्यादिविकारान् कफसम्भवान्॥"*॥
अथ चिकित्सा।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुडेन वा।
सैन्धवेन युता वा स्यात् सानलेनाग्निदीपनी॥१॥
गुडेन शुण्ठीमथवोपकुल्यां
पथ्यालवणीयामथ दाडिमं वा।
आमेष्वजीर्णेषु गुदामयेषु
वर्चोविबन्धेषु च नित्यमद्यात्॥२॥
योगं हरीतकीचूर्णं क्षाराग्निलवणान्वितम्।
तप्तपूर्णे गुडसंमिश्रं भक्षयेत् प्रातरुत्थितः॥
एतद्गुडाष्टकं नाम बलवर्णाग्निवर्द्धनम्।
शोथोदावर्तमूलघ्नं श्लीपपाण्डुमयापहम्॥"
सर्व्वचूर्णसमो गुडो देयः। गुडाष्टकम्॥३॥
"दहनाजमोदसैन्धवनागरमरिचानि चाम्ल-वेतसकञ्च।
समभागादधिकं पाण्डुरोगिणमुत्तरं परमम्॥"*॥
वैश्वानरः चारः।
"सामुद्रलवणं ग्राह्यमष्टकर्षमितं बुधैः।
सौवर्चलं पञ्चकर्षं विड्सैन्धवधान्यकम्॥
पिप्पली पिप्पलीमूलं पञ्चकं क्षाराजीरकम्।
तालीशं केशरं चथमम्लवेतसकं तथा।
द्विकर्षमाचार्य्येतानि प्रत्येकं कारयेद्-बुधः॥५॥
मरिचं जीरकं विश्वमेकैकं कर्षमाचकम्।
दाड़िमं स्याच्चतुष्कर्षं लवणे वाष्टकर्षके।
एतच्चूर्णीकृतं सर्व्वं लवणं भास्कराभिधम्॥
भक्षयेच्छाणमात्रं तत् तक्रमस्तुककाञ्जिकैः।
वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयम्॥
अर्शांसि ग्रहणीं कुष्ठं विबन्धञ्च भगन्दरम्।
शूलं शोथं श्वासकासावामदोषञ्च दुर्जयम्॥
अश्मरीं शर्करां चापि पाण्डुरोगं ज्वरानपि।
मन्दाग्निं नाशयेदेतद्दीपनं पाचनं परम्॥
हिताय सर्व्वलोकानां भास्करैरेतदीरितम्।
हन्यात् सर्व्वाण्यजीर्णानि शुक्तमात्रमसंशयम्॥

निम्बुरसादिकं दत्त्वा गुटिकामप्येके कुर्व्वन्ति॥६॥
टङ्कणं रसगन्धौ च समं भागं समं विधात्।
कपर्दैः सर्ज्जिकाक्षारो भागधी विश्वभेषजम्॥
एषक् पृथक् सर्वसमं वसुभागमिहोषणम्।
जम्बीराम्लैर्दिनं घृष्टं भवेदग्निकुमारकः॥
विष्णुचीमूलवातादिवह्निमान्द्यप्रणाशये॥"
चारो यवक्षारः। अग्निकुमारो रसो विष्णु-बीजजीर्णे॥७॥
"पारदाभ्रलवङ्गगन्धकं
भागयुग्ममरिचेन मिश्रितम्।
तच्च जातिफलमर्द्धभागिकं
निम्बिकीफलरसेन मर्द्दितम्॥
वह्निमान्द्यदशूवक्त्रवाशूनो
रामबाण इति विश्रुतो रसः।
संग्रहग्रहणिकुम्भकर्णकं
सामवातखरदूषणञ्जयेत्॥
दीयते तु चणकानुमानतः
सद्य एव जठराग्निदीपनः।
रोचकः कफकुलान्तकारकः
श्वासकासवमिजन्तुनाशनः॥"८॥
पारदभागः २ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागः ८ जातीफलभागः ॥०। रामबाणो रसोऽजीर्णे। इति भाव-प्रकाशः॥ (विवरणमस्य यथा,—
"अग्निश्चतुर्विधः प्रोक्तः समो विषमतीक्ष्णकः।
मन्दश्चापरः प्रोक्तः शृणु चिह्नानि साम्प्रतम्॥
वातपित्तकफे साम्यात् समत्वं जायतेऽनलः।
तैरेव विषमं प्राप्ते विषमो जायतेऽनलः॥
तीक्ष्णः पित्ताधिकत्वेन जायते जठराग्निकः।
वातश्लेष्माधिकत्वेन जायते मन्दसंज्ञकः॥"
इति हारीते चिकित्सितस्थाने षष्ठेऽध्याये॥
"अन्नमक्षं पिबेदुष्णं शिशुसौवर्चलान्वितम्।
विषमोऽपि समत्वेन मन्दो दीप्येत पावकः॥"
"सिन्धूत्थशिग्रुविफलायमानी-
योषैर्गुडाग्नैर्गुडिकां प्रकुर्य्यात्।
तैर्भक्षितैस्तृप्तिमवाप्नुवन्ना
भुञ्जीत मन्दाग्निरपि प्रभूतम्॥"
इति वैद्यकचक्रपाणिसंग्रहेऽग्निमान्द्याधिकारे॥
मन्दः अग्निर्यस्येति। अल्पाग्निविशिष्टे, त्रि। यथा, मार्कण्डेये। १५। १३६।
"सोऽजीर्णाधिदुःखार्त्तो मन्दाग्निः संप्रजायते।
परनिन्दा कृतघ्नत्वं परमर्म्मावघट्टनम्॥")
मन्दायुः, [स्] त्रि, (मन्दमल्पमायुर्यस्य।) अल्पायुः। यथा, श्रीभागवते। १। १६। १०।
"मन्दस्य मन्दप्रज्ञस्य वयो मन्दायुषश्च वै।
निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः॥"
मन्दारः, पुं, (मन्दते स्तूयते प्रशस्यते येति। मदि +"अङ्गिमदिमन्दिभ्य आरन्।" उणा० ३। १३४। इति आरन्।) खर्गीयपञ्चवृक्षान्तर्गतदेवतरुविशेषः। यथा, अमरकोषे। १।१।५३।
"पञ्चैते देवतरवो मन्दारः पारिजातकः।

सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥"
(यथा, अभिज्ञानशाकुन्तले ७ अङ्के।
"अनन्तरप्रार्थनमल्लिकस्य
जयन्तसङ्कीर्त्य तपस्विनेव।
आन्दोलयन्नोष्ठहरिच्चन्दनाङ्गा
मन्दार-माला हरिणा पिनद्धा॥")
पारिभद्रवृक्षः। पालिता मादार इति भाषा।
यथा, अमरकोषे। २। ४। २६।
"पारिभद्रे निम्बतरुर्मन्दारः पारिजातकः॥"
अर्कवृक्षः। आकन्द इति भाषा। यथा,—
"अर्काकवसुकास्फोतगजाह्वपविकीरणाः।
मन्दारश्चार्कपर्णेऽथ शुक्लेऽलर्कप्रतापवौ॥"
इत्यमरः। २। ४। ८१॥
शक्रः। भूमिः। इति मेदिनी। रे, १८७॥
तीर्थविशेषः। यथा,—
वराह उवाच।
"शृणु सुन्दरि! यत्नेन यच्चां त्वं परिपृच्छसि।
कथयिष्यामि ते गुह्यां मन्दारस्य महाक्रियाम्॥
क्रीड़मानोऽहमहं तत्र दृष्ट्वा मन्दारपुष्पितम्।
मन्दारपुष्पमादाय मनोज्ञं न्यस्य वै हृदि॥
तत्रैकादशकुल्यानि निःसृतानि गिरौ धरे।
विन्ध्ये च मत्प्रभावेन मन्दारस्य महाद्रुमः॥
स्थितोऽहं तत्र सुभगे! भक्तानुग्रहकाम्यया।
दर्शनीयतमं स्थानं मनोज्ञं तु शिलातलम्॥
यत्र तिष्ठाम्यहं देवि! मन्दारद्रुममाश्रितः।
विस्तारं शृणु सुश्रोणि! मन्दारेऽस्मिन् द्रुमे तथा॥
द्वादशाहं चतुर्हस्तो न पुष्यति द्रुमोत्तमः।
तत्र मध्याह्नवेलायां वीक्ष्यमाणो जनैस्ततः।
ततोऽन्यदिनमासाद्य दृश्यते न कदाचन॥
तस्मिन् मन्दारकुञ्जे तु एकभक्तोषितो नरः।
स्नानं करोति शुद्धात्मा स गच्छेत् परमां
गतिम्॥
अथ प्राणान् प्रमुञ्चेत कुञ्जे मन्दारसंस्थिते।
ततः स्नात्वा वरारोहे! मम लोकाय गच्छति॥
तस्य चोत्तरपार्श्वे तु प्राग्वहं नाम तं गिरिम्।
तिस्रो धाराः पतन्त्यत्र दक्षिणां दिशमाश्रिताः॥
स्नानकुञ्जमिति ख्यातं तस्मिन् वैत्रे परं मम।
दक्षिणे पतते धारा अपरे चोत्तरासुखम्॥
तत्र स्नातो वरारोहे! एकरात्रोषितो नरः।
मोदते दक्षिणे भङ्गे तस्मिन् मेरौ गिरोत्तमे॥
तत्राथ सुञ्चते प्राणान् मम कर्म्मपरायणः।
सर्व्वं सङ्गं परित्यज्य मम लोकं प्रपद्यते॥
नाकपृष्ठं समासाद्य मोदते देवतैः सह।
तथात्र सुञ्चते प्राणान् ज्ञानतस्तत्वः सुनिश्चितः।
तारयित्वा कुलं सर्व्वं मम लोकं प्रपद्यते॥
तस्य दक्षिणपूर्व्वेण समश्रोतो वराङ्गने!।
पतते विन्ध्यशृङ्गेषु अगाधश्च महाह्रदः॥
तत्र स्नातस्तु यः कुर्य्यादेकभक्तोषितो नरः।
मोदते पूर्व्वपार्श्वे तु तस्मिन्मेरौ गिरोत्तमे॥
अथात्र सुञ्चते प्राणान् मम चित्तव्यवस्थितः।
हित्वा वै सर्व्वसंसारं मम लोकाय गच्छति॥
मन्दारस्य तु पूर्व्वेण शुभ्रं कोटरसंस्थितम्।
यत्र धारा पतन्त्येका सुबलेन समन्विता॥
तत्र स्नानं प्रकुर्व्वीत पक्षभक्तोषितो नरः।
मोदते पूर्व्वपार्श्वे तु तस्मिन् मेरौ गिरोत्तमे॥
तत्राथ सुञ्चते प्राणान् ज्ञात्वा कर्म्म सुदुष्करम्।
मेरुपृष्ठं समुत्सृज्य मम लोकञ्च गच्छति॥
तस्य दक्षिणपार्श्वे तु गुह्यं विन्ध्यविनिःसृतम्।
पञ्च धाराः पतन्त्यत्र सुबलेन समन्विताः॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते दक्षिणे भङ्गे महामेरौ गिरोत्तमे॥
अथात्र सुञ्चते प्राणान् ज्ञात्वा कर्म्म सुदुष्करम्।
मेरुपृष्ठं परित्यज्य मम लोकं प्रपद्यते॥
दक्षिणे पश्चिमे भागे मन्दारस्य गुणस्थिते!।
तत्र धारा पतन्त्येका आदित्यसमतेजसा॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते पश्चिमे भागे ध्रुवो यत्र प्रवर्त्तते॥
अथात्र सुञ्चते प्राणान् मम कर्म्मव्यवस्थितः।
सर्व्वपापविनिर्मुक्तो मम लोके च मोदते॥
तस्य पश्चिमपार्श्वे तु गुह्यं देवसमन्वितम्।
चक्रावर्त्त इति ख्यातमगाधञ्च महाह्रदः॥
स्नानं करोति यस्तत्र पक्षभक्तोषितो नरः।
मोदते सर्व्वभङ्गेषु स्वच्छन्दगमनालयः॥
अथ वै सुञ्चते प्राणान् चक्रावर्त्ते महाह्रदे।
भङ्गान् सर्व्वान् परित्यज्य मोदते मम सन्निधौ॥
दैत्यं वायव्यमाश्रित्य तस्मिन् विन्ध्यगिरोत्तमे।
तिस्रो धाराः पतन्त्यत्र सुबलाञ्जनयः शुभाः।
तत्र स्नानं प्रकुर्व्वीत मम चित्तव्यवस्थितः।
मोदते सर्व्वभङ्गेषु एकचित्तसमाश्रितः।
तथात्र सुञ्चते प्राणांस्तस्मिन् गुह्ये वरस्थिते!।
सर्व्वसङ्गं परित्यज्य मम लोकाय गच्छति॥
तस्य त्रिक्रोशमात्रेण दक्षिणां दिशमाश्रितः।
गुह्यं गम्भीरकं नाम अगाधश्च महाह्रदम्॥
तत्र स्नानन्तु कुर्व्वीत अष्टभक्तोषितो नरः।
मोदते सर्व्वद्वीपेषु सर्व्वत्र गमनालयः॥
अथैवं सुञ्चते प्राणान् मम कर्म्मव्यवस्थितः।
सर्व्वद्वीपान् परित्यज्य मम लोकं प्रपद्यते॥
तस्य पश्चिमपार्श्वे तु गुह्यं मे परमं महत्।
सप्त धाराः पतन्त्यत्र अगाधश्च महाह्रदः॥
तत्र स्नानन्तु कुर्व्वीत अहोरात्रोषितो नरः।
मोदते शक्रलोकन्तु स्वच्छन्दगमनालयः॥
अथ वै सुञ्चते प्राणान् स्वकर्म्मपरिनिष्ठितः।
सर्व्वसङ्गं परित्यज्य मम लोकं प्रपद्यते॥
मङ्गलं तस्य शैलस्य कथ्यमानं मया शृणु।
स्यमन्तपञ्चकश्चैव मन्दारस्य गिरौ मम॥
तत्र तिष्ठामि सुश्रोणि! विन्ध्यस्य गिरिमर्द्दनि।
मन्दारे परमं गुह्यं तस्मिन् गुह्यगिरोत्तमे॥
दक्षिणे संस्थितं चक्रं वामे स्थाने च वै गदा।
लाङ्गलं सुबलश्चैव शुभ्रं निष्ठति चायतः॥
य एनत् शृणुयान्नित्यं गुह्यं मन्दारसंज्ञितम्।
तस्य चैव प्रियार्थाय मम भक्तसुखावहम्॥
एतन्न जातु कस्मिञ्चन मायाविमोहितः।
तस्य भागवतान् शुद्धान् ये च वाराहसंश्रि-
तान्॥"

इत्यादि वाराहपुराणे भगवच्छास्त्रे मन्दार-गुह्यवर्णनं नामाध्यायः॥
मन्दारस्थं, क्ली, (मन्दं आत्मसमाहितिं।) जप्यं।
इति शब्दरत्नावली॥
मन्दिकुञ्जरः, पुं, मत्स्यविशेषः। इति भूरि-प्रयोगः॥ अन्यत्रापि मल्लिकुञ्जरोऽपि पाठः॥
मन्दिरं, क्ली, (मन्दते सुप्यतेऽत्र मन्दते स्तूयते इति वा। मदि ङ स्वप्ने स्तुतौ +"इषि मदिमुदीति।" उणा० १।१५२। इति किरच्।) गृहम्। इत्यमरः। २। २। ५॥ "मन्दते सुप्यतेऽत्र मन्दिरम्। मदि ङ स्वप्ने आर्द्ध मोदे स्तुतौ गतौ माद्यति इरः। नगरं मन्दिरं पुरमिति पुंनपुंसकयोरत्रैव पद्यते। स्त्रियां मन्दिरा च प्रयोगश्च मन्दिरायाश्चरावाविति मधुसूदनटीकायः।" इति तट्टीकायां भरतः॥*॥
अथ भगवन्मन्दिरनिर्म्माणमाहात्म्यम्।
"यः कारयेन्मन्दिरं केशवस्य
पुराणोक्तान् स जयेच्छाश्वतान् वै।
इत्वावासान् पुण्यफलाभिपन्नान्
भोगान् भुङ्क्ते कामतः शाश्वतीयान्॥
आसप्तमं पितृकुलं तथा मातृकुलं नरः।
तारयेदात्मना सार्द्धं विष्णोर्म्मन्दिरकारकः॥
इमाञ्च पितरो देवगाथा गायन्ति योगिनः।
पुरुषो यदुसिंहस्य शतवर्षस्य तपस्विनः॥
अपि नः स्वकुले कश्चिद्विष्णुभक्तो भविष्यति।
हरिमन्दिरकर्त्ता यो भविष्यति सुचिव्रतः॥"
इति वामने ग्रेषाध्यायः॥*॥
अपि च। अग्निपुराणे।
"ये ध्यायन्ति सदा बुद्ध्या करिष्यामो हरे-र्गृहम्।
तेषां विलीयते पापं पूर्व्वजन्मशतोद्भवम्॥"
किञ्च।
"समतीतं भविष्यञ्च कुलानामयुतं नरः।
विष्णुलोकं नयत्याशु कारयेद्या हरेर्गृहम्॥"
किञ्च।
"लक्षेणाथ सहस्रेण शतेनार्द्धेन वा हरेः।
तुल्यं फलं समाख्यातमिष्टेश्वरदरिद्रयोः॥"
विष्णुधर्म्मोत्तरे तृतीयकाण्डे।
"श्रुत्वा वासमृषे तस्य देवस्य परमेष्ठिनः।
राजसूयाश्वमेधानां फलेन सह युज्यते॥
प्रासादे लक्षणे पुण्यं मयैतत् कथितं
द्विजाः।
तस्माद्दारुमये पुण्यं शतगुणं भवेत्॥
ततो दशगुणं पुण्यं तथा शैलमये भवेत्।
ततो दशगुणं लौहे ताम्रे शतगुणं ततः॥
सहस्रगुणितं रौप्ये तस्मात् फलमवाप्नुते।
ततः शतसहस्रं वै सौवर्णे द्विजसत्तमाः॥
अनन्तं फलमाप्नोति रत्नचित्रे मनोहरे॥"
स्कान्दे।
"आरभ्य लक्षणविधानञ्च यत्नवत्तानि यत् कृतम्।
पापं विलयमाप्नोति नरकाद्धरेत् पितॄन्॥
प्रासादादौ लक्षणञ्च यावत्तिष्ठन्ति देवताः।

तावद्वर्षसहस्राणि वसते विष्णुसद्मनि ॥
प्रासादे लक्षदेवस्य चित्रकर्मे करोति यः ।
वसते विष्णुलोके तु यावत्तिष्ठन्ति सागराः ॥"
नारसिंहे ।
"यः कुर्याच्छोभनं वेश्म नरसिंहस्य भक्तिमान् ।
सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्नुयात् ॥"
हयशीर्षे ।
"देवागारं करोमीति मनसा यस्तु चिन्तयेत् ।
तस्य कायगतं पापं तदह्ना विप्र ! नश्यति ।
कृते तु किं पुनस्तस्य प्रासादे विधिनैव तु ॥
अष्टहस्तसमायुक्तं यः कुर्याद्देवयं गृहम् ।
न तस्य फलसम्पत्तिर्वक्तुं शक्येत केनचित् ॥
अनेनैवानुमेयन्तु फलं प्रासादविस्तरात् ।
मरजश्च त्रसेज्जन्तुं यः कृत्वा प्रथमेष्टकाम् ॥
स समाप्तस्य यज्ञस्य फलं प्राप्नोत्यसंशयम् ॥"
विष्णुरहस्ये ।
"बाल्ये च क्रीडमाना ये पांशुभिर्भवनं हरेः ।
वासुदेवस्य कुर्वन्ति तेऽपि तल्लोकगामिनः ॥"
आदिपुराणे ।
"लेपनाच्छादनञ्चैव यः करोति पुनर्नरः ।
देवस्यायतनं कृत्वा न भवेत् कोटजं भयम् ॥"
अथ मन्दिरनिर्म्माणकालः । मात्स्ये ।
"वैत्रे व्याधिमवाप्नोति यो गृहं कारयेन्नरः ।
वैशाखे धनरत्नानि ज्येष्ठे मृत्युं तथैव च ॥
आषाढे भृत्यरत्नानि पशुवर्गमवाप्नुयात् ।
श्रावणे मित्रलाभन्तु स्थानं भाद्रपदे तथा ॥
पत्नीनाशञ्चाश्वयुजे कार्त्तिके धनधान्यकम् ।
मार्गशीर्षे तथा भक्तं पौषे तस्करजं भयम् ।
लाभन्तु बहुशो विद्यादग्निं माघे विनिर्दिशेत् ॥
क्षयञ्च फाल्गुने पुत्रानिति कालफलं स्मृतम् ।
अश्विनी रोहिणी मूलमृगशिरा-त्रयमैन्द्रम् ॥
स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते ।
आदित्यभौमवर्ज्यञ्च सर्वे वाराः शुभावहाः ॥
वज्रव्याघातमूलानि अतीपातातिगण्डके ।
विष्कम्भशूलपरिघान् वर्ज्यं योगेषु कारयेत् ॥
स्थिरमैत्रे च माहेन्द्रे गान्धर्वाभिजिदौडुपे ।
तथा वैराजसावित्रे मुहूर्ते गृहमारभेत् ॥
चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम् ।
लग्नोच्छ्रायं प्रकर्त्तव्यमन्यत्र परिवर्ज्जयेत् ॥"
हयशीर्षे ।
"वास्तुकर्म्मे न चारभ्यं वर्षाकाले विजानता ।
शुक्लपक्षे विभागाद्ये शुक्लपादौ द्वितीयके ॥
चतुर्थी नवमी वर्ज्या तिथिष्वापि चतुर्दशी ।
भौमस्य तु दिनं वर्ज्यं करणं विष्टिसंज्ञितम् ॥
खिलमन्दरीक्षदिग्दोलैरन्यातैर्भयपीडितम् ।
उपग्रहं ग्रहैर्भग्नं व्यतिपातहतं तथा ॥
चन्द्रताराबलोपेते च कार्यं कर्म विजानता ।
ध्रुवाणि चात्र मूलानि नैर्ऋतं शुक्रदैवतम् ॥
पुष्यं पौष्णञ्च सावित्रं वायव्यं वैष्णवं तथा ।
स्थिरांशे च स्थिरे लग्ने कर्त्तुश्चोपचयालये ॥
केन्द्रे सौम्यग्रहो यस्य त्रिकोणे तु सुरोत्तम ! ।
प्रारम्भोपचयस्थाने तदा कार्यं समारभेदिति ॥"

अथ प्रासादस्थानम् । हयशीर्षे ।
"पूर्वं देवकुलं पीठं प्रासादं खण्डकत्रया ।
समं वाप्यधिकं वापि न कर्त्तव्यं विजानता ॥
उभयोर्दिग्गुणां सीमां त्यक्त्वा चोच्छ्रायसंमिताम् ।
प्रासादं कारयेद्धन्यं नोभयं पीडयेद्बुधः ॥"*॥
अथ स्थानशोधनानि । देवीपुराणे ।
"देवो विष्णुस्तथा रुद्रो ब्रह्माद्याः सुरसत्तमाः ।
प्रतिष्ठाप्याः शुभे स्थाने अन्यथा ते भयावहाः ॥
गर्त्तादिलक्षणा धात्री गन्धस्वादेन या भवेत् ।
वर्णेन च सुरश्रेष्ठ ! सा मही सर्वकामदा ॥"
मात्स्ये ।
"पूर्वं भूमिं परीक्षेत पश्चात् वास्तुं प्रकल्पयेत् ।
श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्व्वशः ॥
विप्रादेः ग्रस्यते भूमिरतः कार्यं परीक्षणम् ।
विप्राणां मधुरास्वादा कषाया क्षत्रियस्य च ॥
कषाये कटुता तद्वैश्यशूद्रेषु ग्रस्यते ।
अरत्निमात्रं वै गर्त्तं खनुलिप्ते च सर्वतः ॥
पूरयेत्पूरयेत्तत्र पूर्णं तत् सर्वदिङ्मुखम् ।
दीप्ता पूर्वादि गृह्णीयाद्वर्णानामनुपूर्व्वशः ।
वास्तुः समधिको नाम दोषदो सर्वतस्तु यः ॥
शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च ।
अरत्निमात्रकं गर्त्तं परीक्ष्यं खातपूरणे ॥
अधिके म्रियमाणोऽन्ये न्यूने हानिं समे समम् ।
पालक्षष्ठेऽथवा देशे सर्वबीजानि रोपयेत् ॥
त्रिपक्षसप्तरात्रेण यत्र रोहन्ति तान्यपि ।
ज्येष्ठा मध्या कनिष्ठा भूर्वर्ज्यनीयेतरा सदा ॥"
हयशीर्षे ।
"सुरभीणां रतिर्यत्र सधवानां नृपः सह ।
सुन्दरीणां रतिर्यत्र पुरुषैः सह सत्तम ! ॥
राज्ञां पूर्वं गृहं यस्यामग्नीनां यज्विनां तथा ।
कालीरक्तचन्दनामोदा कर्पूरागुरुगन्धिनी ॥
कमलोत्पलगन्धा च जातीपद्मकगन्धिनी ।
पाटलामल्लिकागन्धा नागकेशरगन्धिनी ॥
दधिक्षीराज्यगन्धा च मदिरासवगन्धिनी ।
सुगन्धिन्योदिगन्धा च शुभगन्धखना च या ॥
सर्वेषां वर्णिनां भूमिः सर्वमाधारणा मता ।
दुर्गन्धा दुःखदा या च नानावर्णा च दुर्भगा ॥
वृत्ताङ्गचन्द्रसदृशा विस्तारादृद्धिगुणायता ।
विवर्णा वर्जहीना च वक्रा शुचिसुखी तथा ॥
द्विवर्णा कूर्मसदृशी गोमुखी च चिकोलिका ।
यङ्खा मूलसदृशी दन्तिपृष्ठोपमा च या ॥
सरीसृपसमा या च दिङ्मुखा शकटाकृतिः ।
एवं प्रकारा या भूमिर्वर्ज्या यत्नेन देशिकैः ॥"
किञ्च ।
"प्रासादस्य विशेषेण प्रोक्ता भूमिश्चतुर्विधा ।
सुपद्मा भद्रिका पूर्णा शुभ्रा रागिण्यथापरा ॥
तिलकैर्नारिकेलैश्च वर्हिःकाष्ठैश्च शोभिता ।
पद्मेन्दीवरसंयुक्ता सा सुपद्मेति विश्रुता ॥
नदीसमुद्रायतनतीर्थपर्य्यन्तशोभिता ।
पुष्पद्रुमसमाकीर्णा क्षीरद्रुमोपशोभिता ॥

वनोद्यानलतागुल्मफुल्लस्वस्समावृता ।
यक्षीयद्रुमसंयुक्ता भद्रेति कीर्त्तिता ॥
बकुलाशोकबहुला तथा ब्रह्मद्रुमोद्भवैः ।
माधवीवेष्टिता या च सुस्निग्धावकोद्भवैः ॥
शूकधान्यैश्च पुन्नागैर्गिरिपार्श्वगता च या ।
तोयञ्च स्वल्पकं यस्यां सा पूर्णा परिकीर्त्तिता ॥
विस्वार्कस्नुहिपीलूनां वनैर्या परितो वृता ।
सशर्करा च कठिना युक्ता कण्टकिभिर्द्रुमैः ॥
गृध्रगोमायुकाकानां ग्रसनानां या कुलाकुलैः ।
धूम्रेति कीर्त्तिता सातु तां यत्नात् परिवर्ज्जयेत् ॥
ततो भूमिं परीक्षेत पूर्व्वोदक्प्लवनां शुभाम् ।
अकृष्टां तथाच्छन्नामस्पतोयां परिद्रुताम् ॥
संपूर्य्यमाणे खाते तु तथाधिकतरं शुभम् ।
कुसुम्भसदृशं वर्णं यस्यां न ग्लानिमृच्छति ॥
न निर्व्वाति तथा दीपस्तोयं शीघ्रं न जीर्य्यते ।
श्वेतारक्ता पीतकृष्णा विप्रादीनां प्रशस्यते ॥
आढ्यसङ्कल्पमज्ञानां तुल्यगन्धा तु या भवेत् ।
मधुरा च कषाया च अम्ला च कटुका च या ॥
कुम्भैः प्रस्थैस्तथा काष्ठैः तूर्णाभिर्या च संततां ।
तस्यां पुण्येऽथ नक्षत्रे कुर्याद्भूमिपरिग्रहम् ॥"
अथ भूमिपरिग्रहः । तत्रैव ।
"प्राकारसीमापर्य्यन्तं ततो भूतबलिं हरेत् ।
मांसं हरिद्राचूर्णञ्च सलाजदधिशुक्लवः ॥
एभिर्भूतबलिं दत्त्वा स्वयमष्टाक्षरेण तु ।
प्रार्थयित्वा ततः शङ्कुनष्टदृष्टिषु निवेशयेत् ॥
राक्षसाश्चापि भूताश्च ये क्षिप्तिष्ठन्ति भूतले ।
ते सर्वे अपगच्छन्तु स्थानं कुर्य्यामहं हरेः ॥
इत्यनुज्ञाप्य भूतादीन् तां भूमिं परिशोधयेत् ।
आदित्यादित्यहाशाश्च लोकपालैः समं क्षती ॥
आर्यमिष्टविधानेन ततो वै होममाचरेत् ।
चतुर्होमं ततः कुर्याच्छूलमन्त्रेण देशिकः ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषट्कृतेन देशिकः ।
वृषभौ कपिलौ यस्य सवर्णौ वा विचक्षणः ।
योजनार्थं हलञ्चैव गृह्णीयादक्षतोक्षणम् ॥
प्राङ्मुखं योज्य मन्त्रज्ञो वस्त्रालङ्कारभूषितः ।
आसनीं यष्टिमादाय द्वादशाक्षरविद्यया ॥
संमंत्रेण समीक्षेत शुभबीजानि वापयेत् ।
संप्राप्ते शुभकाले तु गोभिस्तत् खादयेद्बुधः ।
पुनस्तं कर्षयित्वा तु समीक्षेत गृहं गुरुः ॥"
मात्स्ये च ।
"हीनाधिका गता वास्तोः सर्वतः परिवर्ज्जयेत् ।
नगरग्रामदेशेषु सर्वत्रैव विवर्ज्जयेत् ॥"*॥
अथ दिक्साधनम् । हयशीर्षे ।
"वास्तुदास्तु समं कृत्वा चतुरस्रं समन्ततः ।
भूमिं तोयसमां कृत्वा दर्पणोदरसन्निभाम् ॥
द्वादशाङ्गुलमानेन चाष्टौ वारान्तु भ्रामयेत् ।
मध्ये सुनिश्चलं शङ्कुं स्थाप्य च्छायां निरीक्षयेत् ॥
प्रवेशे निष्क्रमे तस्यां शङ्कुच्छायां निरूपयेत् ।
वेधुवे विमले योज्ये शङ्कुना साधयेद्दिशम् ॥
प्राङ्मध्याह्नयोरेवमादित्यात् साधयेद्दिशम् ।
प्राचीं वा पुष्यवेधेन विचित्रामन्तरेण वा ॥

उदीचीं ध्रुववेधेन मध्ययोगेन चोन्नयेत् ।
चतुरस्रां शिलां यत्र दृषदं वा सुशोभनाम् ॥
चतुर्दिक्षु निवेश्याथ क्षत्रचिह्नानु कारयेत् ।
एवं कृत्वा क्षत्रचिह्नं ब्राह्मणांश्चैव भोजयेत् ।
वेणुवान् पायसेनाग्र्यान् द्वादशैव समाहितः ॥"
अथ प्रश्नोद्धरणम् । मात्स्ये ।
"गृहारम्भेति कर्त्तारः स्वाम्यङ्गे यत्र जायते ।
प्रश्नलक्षणयेत्तत्र प्रासादे भवनेऽथवा ।
सप्तधा भयदं यस्मात्प्रश्नं भयनाशनम् ॥"
हयशीर्षे ।
"आदित्येद्वास्तुगः प्रश्नं यद्दिशोऽङ्गविकारतः ।
भ्रुकुटो दृश्यते वापि यस्य वा श्रूयते ध्वनिः ।
कीर्त्यते यस्य वै नाम प्रश्नं तस्य विनिर्दिशेत् ॥"
अथ वास्तुमण्डलम् । मात्स्ये ।
"पञ्चगव्यौषधिजलैः परीक्षित्वावसेचयेत् ।
एकाशीतिपदं कुर्याद्रेखाभिः कनकेन तु ।
प्रक्षाल्येवेन चालिप्य क्षत्रेणालोच्य सर्वतः ।
दश पूर्व्वायता रेखा दश चैवोत्तरायताः ॥
सर्ववास्तुविभागेषु विद्येया नवका नव ।
एकाशीतिपदं कृत्वा वास्तुविद् सर्ववास्तुषु ॥
पदस्थान् पूजयेद्देवान् चिंशत् पञ्चदशैव च ।
द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्ते चयोदश ॥
नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोध
मे ।
ईशकोणादिषु सुरान् पूजयेच्च विधानतः ॥
शिखी चैवाथ पर्ज्जन्यो जयन्तः कुलिशायुधः ।
सूर्य्यः सत्यो भृशश्चैव आकाशो वायुरेव च ॥
पूषा च वितथश्चैव गृहक्षतयमावुभौ ।
गन्धर्व्वो भृङ्गराजश्च मृगः पितृगणस्तथा ॥
दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः ।
असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च ॥
भल्लाटः सोमसर्प्पौ च अदितिश्च दितिस्तथा ।
बहिर्द्वात्रिंशदेते तु तद्वत्सर्व सुरान् क्रमात् ॥
ईशानादिचतुष्कोणे संस्थितान् पूजयेद्बुधः ।
आपश्चैवाथ सावित्रो जयो रुद्रश्चैव च ॥
मध्ये नवपदो ब्रह्मा तस्याधो च समीपगाः ।
सर्व्वानेकोत्तरान् विद्यात् पूर्व्वादीन्नामतः क्रमात् ॥
अर्य्यमा सविता चैव विवस्वान् विबुधाधिपः ।
मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः
क्रमात् ॥
अष्टमञ्चापवत्सञ्च परितो ब्रह्मणः स्थिताः ।
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ॥
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ।
आपश्चैवापवत्सञ्च पर्ज्जन्योऽग्निर्दितिस्तथा ॥
पदिकानाञ्च वर्गोऽयमेवं कोणेष्वपि स्थितः ।
तन्मध्ये तु बहिर्द्वात्रिंशद्द्विपदास्ते तु सर्व्वतः ॥
अर्य्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा ।
ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्व्वतः ॥
वंशानिदानीं वक्ष्यामि रज्जूरपि पृथक् पृथक् ।
वायुं यावत्तथा रोगात् पितृभ्यः शिखिनस्तथा ॥
सुखाद्भृशं तथा शोषाद्दितिं यावद्दिनं तु ।
सुग्रीवाददितिं यावत् भृङ्गात् पर्ज्जन्यमेव च ॥
एते वंशाः समाख्याता ऋषिभिस्तत्त्वदर्शिभिः ।
एतेषां यस्तु सम्पातः पदमध्यं समं तथा ॥
समं चैतत् समाख्यातं त्रिमूलं कोणगञ्च यत् ।
क्षत्रमन्यासु वर्ण्यानि तुलाविधिषु सर्व्वदा ॥
कीलोत्तरङ्गशोषाद्यानादि वर्ज्जयेदयत्नतो नरः ।
सर्वत्र वास्तुनिर्दिष्टः पितृवंशोत्तरायतः ॥
मूर्द्धन्यग्निः समाख्यातो मुखे चापः समाश्रितः ।
पृथ्वीधरोऽथमा चैव स्तनयोस्तावधिष्ठितौ ॥
वक्षःस्थले त्वापवत्सः पूजनीयः सदा बुधैः ।
नेत्रयोर्दितिपर्ज्जन्यौ श्रोत्रे दितिजयन्तकौ ॥
सर्पेन्द्रा वंशसंस्थौ तु पूजनीयौ प्रयत्नतः ।
सूर्य्यः सोमादयस्तद्वद्बाहौ पञ्च च पञ्च च ॥
वह्निश्च राजयक्ष्मा च वामहस्तं समाश्रितौ ।
सावित्रः सविता तद्वद्दक्षिणं दक्षिणमाश्रितौ ।
विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ ।
पूषा च वितथश्चैव ऊरुस्थौ सम्भिवस्थले ॥
तथैवासुरयक्षौ च वामपार्श्वे समाश्रितौ ।
पार्श्वे तु दक्षिणे तद्वद्रुद्रजयतः ॥
उत्क्षेप्यमाणुपौ स्थौ जान्वोर्गन्धर्व्वपुष्पकौ ।
जङ्घयोर्मृगसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः ॥
जयः प्रकृतिस्था मेढ्रे पादयोः पितरस्तथा ।
मध्ये नवपदो ब्रह्मा हृदये तु स पूज्यते ॥
चतुःषष्टिपदो वास्तु प्रासादे ब्रह्मणः स्मृतः ।
ब्रह्मा चतुष्पदस्तद्वत् कोणेष्वेकपदास्तथा ॥
बहिःकोणेषु चार्यो तु साद्धांशोभयतः स्मृताः ।
त्रिंशत्तिद्विपदास्तेषां चतुःषष्टिपदं स्मृतः ॥"*॥
हयशीर्षे ।
"वास्तुक्षं क्षत्रयेत् प्राज्ञः श्वेताम्बरधरः शुचिः ।
श्वेतगन्धानुलिप्ताङ्गः सज्जालङ्कारभूषितः ॥
चतुःषष्टे तु प्रासादे एकाशीति गृहे सदा ।
चतुरस्रीकृते क्षेत्रे अर्द्धांशमयमाहिते ॥
कोणरेखां ततो दत्त्वा शुरभागांस्तु कल्पयेत् ।
शिवः कोणार्द्धतो ज्ञेयः पर्ज्जन्यः पदसंस्थितः ॥
द्विपदस्थो जयो ज्ञेयः सुग्रीवश्चैकपादिकः ।
भास्करस्तु पदे ज्ञेयो द्विपदः सत्य एव च ॥
भृशः पदस्थो विज्ञेयो व्योमश्चैव पदार्द्धगः ।
हुताशनः पदार्द्धश्च पूषा च पदसंस्थितः ॥
वितथो द्विपदस्थश्च पदैकश्च गृहक्षतः ।
वैवस्वतः पदैकस्थो गन्धर्व्वो द्विपदस्थितः ॥
भृङ्गश्चैकपदो ज्ञेयो मृगश्चार्द्धपदे स्थितः ।
पितरश्चार्द्धतो ज्ञेयाः पदे दौवारिकस्तथा ॥
सुग्रीवश्च पदे ज्ञेयो शैकस्थः पुष्पदन्तकः ।
यादसाम्पतिरेकस्थो ह्यसुरस्तु द्वि संस्थितः ॥
शोषश्चैकपदे ज्ञेयो रुद्रोगः पाप इष्यते ।
रोगश्चार्द्धपदे ज्ञेयो नागश्चापि पदे स्थितः ॥
मुख्यश्च द्विपदे ज्ञेयो भल्लाटः पदसंस्थितः ।
सोमेश्वरः पदे ज्ञेयो नागस्तु द्विपदे स्थितः ।
पदस्था श्रीमदार्द्धेयो अदितिश्चार्द्धसंस्थिता ।
आपो ज्ञेयास्तु पदगा दितौ द्विपदसंस्थितः ॥
चतुष्पदस्था विज्ञेयश्चर्य्यमा पूर्व्वमध्यगः ।
सविता तु पदे ज्ञेयः सावित्रो च पदे स्थितः ॥
ततो विवस्वान् विज्ञेयश्चतुष्पदपदे स्थितः ।

इन्द्रश्चन्द्रो जयश्चैव एकैके संव्यवस्थिताः ॥
मित्रश्चतुष्पदस्थश्च पश्चिमे तु व्यवस्थितः ॥
रुद्रः पदैकसंस्थो वै यक्ष्मा वैकपदे स्थितः ।
धराधरश्च विज्ञेयो कुबेरे च चतुष्पदः ।
चतुर्मुखश्चतुष्कस्थो मध्ये ज्ञेयः प्रजापतिः ॥"
अथ वास्तुपूजा । मात्स्ये ।
"अथातः संप्रवक्ष्यामि प्रासादविधिनिर्णयम् ।
वास्तौ परीक्षिते सम्यग्वास्तुदेहविचक्षणाः ॥
वास्तुपूजनं कुर्य्यात् पूर्व्वमेव विचक्षणः ।
एकाशीतिपदं लिख्य वास्तुमध्ये तु पिष्टकैः ॥
होमस्थिमेखले कार्ये; कुण्डे हस्तप्रमाणके ।
यवैः सप्ततिलैश्चैव समिद्भिः क्षीरवृक्षजैः ॥
पालाशैः खादिरैश्चापि मार्गोदुम्बरसम्भवैः ।
कुशपूर्णैश्चमसैश्चापि मधुसर्पिःसमन्वितैः ॥
कार्य्यस्तु पञ्चभिर्विप्रैस्त्रिभिर्वापि द्वयेन वा ।
होमान्ते भक्ष्यभोज्यैश्च वास्तुदेवं बलिं हरेत् ॥
तद्वद्विघ्नविनेत्रादि इदात् क्रमेण तु ।
ईशकोणे घृतान्नन्तु शिखिने विनिवेदयेत् ॥
व्योदनं सफलं दद्यात् पर्ज्जन्याय घृतान्वितम् ।
जयन्ताय धनं पीतं पेयं कूष्माण्डसंयुतम् ॥
इन्द्राय पञ्च रत्नानि पेयं कुलिशं तथा ।
वितानकञ्च सूर्य्याय धूम्रं रक्तं तथैव च ॥
सत्याय घृतगोधूमं मांसान् दद्याद्भृशाय च ।
मृष्टान्नं चान्तरीक्षाय दद्याच्छस्त्रञ्च वायवे ॥
पृथ्वीं लाजास्तु दातव्या वितथे चणकौदनम् ।
गृहक्षताय मध्वन्नं यमाय पिण्डितौदनम् ॥
गन्धौदनञ्च गन्धर्व्वे भृङ्गे मेघस्य शङ्खकम् ।
मृगाय यावकं दद्यात् पितृभ्यः क्षीरा मताः ॥
दौवारिके दन्तकाष्ठं पेयं छत्रं बलिं तथा ।
सुग्रीवे पूपकं दद्यात् पुष्पदन्ताय पायसम् ॥
कुशस्तम्बेन सहितं दद्यात् पद्मञ्च वारुणे ।
पेयं हिरण्मयं दद्यादसुराय सुरा मता ॥
घृतौदनं च शोषाय गांधर्वे पायसन्तथा ।
घृतलड्डुकांश्च रोगाय नागे पुष्पं फलान्वि-
तम् ॥
सर्पेभ्यो मुख्याय दातव्यं मुद्गौदनमतः परम् ।
भल्लाटाय ततो दद्यात् सोमाय घृतपायसम् ॥
सर्पाय पेयं शालूकमदितौ लोपिकास्तथा ।
दितौ तु पूरिकां दद्यात् हव्यं वास्तोर्बलिम् ॥
क्षीरभाषाय दातव्यमापवत्साय वै दधि ।
सवित्रे लड्डुकान् दद्यात् समरीचान् कुशौ-
दनम् ।
सवितृगुंडपूपांश्च अर्य्याय घृतचन्दनम् ।
विवस्वते तथा दद्यात् रक्तचन्दनपायसम् ॥
हरिद्रालोदनं दद्याद्विप्राय घृतसंयुतम् ।
घृतौदनञ्च मित्राय रुद्राय घृतपायसम् ॥
आमं पक्वं तथा मांसं हेयं स्यादाजयक्ष्मणे ।
पृथ्वीधराय मांसानि कुशाङ्गाय च दापयेत् ॥
सशर्करान्नं संदद्यादर्य्यम्णे सर्व्वतः क्रमात् ।
नमस्कारान्तयुक्तेन मन्त्रेण पुनरेव च ॥
पञ्चगव्यं यवोपेतं तिलाक्षतसहाचितम् ।
भक्ष्यं भोज्यञ्च विविधं ब्रह्मणे निवेदयेत् ॥

एवं सम्पूजिता देवाः शान्तिं कुर्वन्ति ते सदा।
सुरेभ्यः काञ्चनं दद्याद्ब्रह्मणे गां पयस्विनीम् ॥
राक्षसीनां बलिर्देयः अपि याहक् तथा शृणु।
मांसौदनं घृतं पात्रं कैशरं हविषान्वितम्।
ईशानभागमाश्रित्य चरवे विनिवेदयेत् ॥
दध्योदनं सरुधिरमस्त्रिखण्डेन संयुतम्।
पीतरक्तबलिं दद्यात् पूतनाया तु राक्षसी ॥
वायवे पापराक्षस्यै मत्स्यमांससुरासवम्।
पायसं वापि दातव्यं स्वनाम्ना सर्व्वतः क्रमात्।
नमस्कारान्तयुक्तेन प्रणवादिन सर्व्वतः ॥" * ॥
ततः सर्व्वौषधिस्नानं यजमानस्य कारयेत्।
द्विजांस्तु पूजयेद्भक्त्या ये चान्ये गृहमागताः ॥
एतद्वास्तुप्रशमनं ज्ञात्वा कर्म्म समारभेत्।
प्रासादभवनोद्यानप्रारम्भे परिवर्त्तने ॥
परवेश्मप्रवेशेषु सर्व्वदोषापनुत्तये।
इति वास्तुप्रशमनं ज्ञात्वा स्वस्थेन चेतसा ॥
रक्षोघ्नपवमानेन स्वस्थेन भवनादिकम्।
कृत्वा मङ्गलघोषेण कुर्याद्ब्राह्मणवाचनम् ॥
अनेन विधिना यस्तु प्रतिसंवत्सरं बुधः।
गृहे वास्तुशमं कुर्य्यान्न स दुःखमवाप्नुयात् ॥
न च व्याधिभयं तस्य न च बन्धुधनक्षयः।
लोकेऽस्मिन्नृतं स्वर्गे कल्पमेकं वसेन्नरः ॥" * ॥
इत्यग्नीर्षपुराणे।
"एवं प्रकृत्य काष्ठानि रजसापूर्य्य देशिकः।
तत्तेषामेव देवानां बलिं दद्यात्तु कामिकम् ॥
ईशानाय प्रदातव्यं पायसं मधुना सह।
पर्ज्जन्याय जलं देयं पुष्पगन्धादिवासितम् ॥
जयन्ताय प्रदातव्या पताका पीतवर्णिका।
सूर्य्याय च रत्नानि भास्कराय घृतं तथा ॥
धान्यकं पीतवर्णं वा सत्ये दद्याद्विचक्षणः।
दद्याद्भृशे पक्वमांसं भीमाय सक्तमन्थके ॥
पूषणे धानाः सक्ताजास्तु सुवर्णं वितथे तथा।
गृहक्षताय मध्यन्नं यमाय पिण्डितौदनम् ॥
गन्धं गन्धर्व्वदेवाय भृङ्गे दद्यात् शाकुनम्।
मृगे सिताश्वखण्डे पितृभ्यः क्षीरं तथा ॥
दौवारिके दन्तकाष्ठं सुग्रीवे यावकं तथा।
पुष्पदन्ते कृशा देया वरुणे पद्ममृत्पलम् ॥
असुरायेत्तथा देयं रक्तं शौण्डे घृतौदनम्।
यवाक्षु देयाः पापाय रोगाय घृतमक्षकम् ॥
नागाय नागपुष्पाणि भल्लाय सुरसाय दापयेत्।
चित्रौदनञ्च भल्लाटे सोमाय मधुपायसम् ॥
नागाय चापि मूलकं अदितेः पूरिका देया क्षीरं चाङ्गो ददेद्बलिम्॥
दधि क्षीरं चापवत्सो अर्य्यम्णे लड्डुकं बलिम्।
कृशोदकं सवित्रे च सावित्रे गुडपूजकम् ॥
विवस्वते रक्तपुष्पं रक्तगन्धमेव च।
दरिद्राजं सवेदाय साव्यामन्नं जयाय च ॥
घृतपूरन्तु मित्राय तद्वद गुडपायसम्।
आमपक्वानि मांसानि प्रदद्याद्रोलयक्षाणे ॥
पृथ्वीधरायामपक्वं खड्गिमांसं बलिं हरेत्।
सावित्रं बलिमेवं पक्वान्नं तथा चरुम् ॥
कुर्य्यात् गन्धं तथा पुष्पं ब्रह्मस्थाने निवेदयेत्।

आममांसं पूर्व्वभागे सर्व्वरक्तं सुधोदकम् ॥
सितपद्मं घृतं मांसं विदार्य्यै चाग्निकोणके।
कृशं वा पूपकं मांसमर्य्यमृणयेव दक्षिणे ॥
पिङ्गलेव तथा रक्तं पूतनाये नैर्ऋते तथा।
सास्रमांसं प्रदातव्यं जृम्भकायेव पश्चिमे ॥
अस्त्रिखण्डेन सहितं रक्तपिङ्गेन मिश्रितम्।
प्रदेयं पापराक्षस्यै वायव्यां मांसमेव च ॥
उत्तरे पिलिपिच्छायै साङ्गं रक्तं बलिं हरेत्।
वाराहे छागमांसानि ऐशान्यां दिशि दापयेत्॥
ततो भूतगणानान्तु राक्षसानां सुरोत्तम!।
पिशाचानां गणानान्तु बलिर्देयस्तु कामिकः ॥
एवान् वा पूजयेत् सर्व्वान् कृतपुष्पाक्षतैर्बुधः।
एवं सम्पूजिता देवाः शान्तिपुष्टिप्रदा नृणाम् ॥
अपूजिता विहिंसन्ति कारकं स्थापकं तथा।
तस्मादेतान्तु संपूज्य गन्धपुष्पैर्मनोहरैः।
प्रासादं कारयेद्विद्वान् गृहं वा सुरसत्तम!॥"
अथ प्रासादमारम्भः। तत्रैव।
"ब्रह्मस्थाने ततः कुर्य्याद्वासुदेवस्य पूजनम्।
श्रियः संपूजनं कुर्य्यात् तुर्य्यौकेशगणस्य च ॥
पूजनञ्च ततः कुर्य्याद्वासुदेवगणस्य च।
गन्धाद्यैः पुष्पनैवेद्यधूपदीपैः सुरोत्तम!॥
ततः संपूजयेत्तस्मिन् सर्व्वलोकधरां महीम्।
सुरूपां प्रमदारूपां विद्याभरणभूषिताम् ॥
ध्यात्वा समर्चयेत्तत्र यत्तद्वास्तुमयं नरः ॥
ब्रह्मस्थाने ततो विद्वान् कुर्य्यादाधारमच्युते।
तस्मिन् संस्थापयेत् कुम्भं वह्न्या सह पूजितम् ॥
हैमं वा राजतं वापि ताम्रमयं वा दृढं नवम्।
सर्व्वबीजौषधीयुक्तं सुवर्णरजतान्वितम् ॥
रत्नगर्भं सुसंपूर्णं पञ्चपूतेन वारिणा।
प्रशस्तपल्लवोपेतं चन्दनचर्चितम् ॥
पुष्पैः सुमालितं कृत्वा गन्धपुष्पैर्विधानतः।
आच्छेन च शुक्लेन वस्त्रयुग्मेन वेष्टितम् ॥
ब्रह्मस्थाने ततो मन्त्री कलसं स्थाप्य पूजयेत्।
तस्मिंश्चतुर्मुखं देवं प्रजेशं मन्त्रविग्रहम् ॥
गन्धपुष्पैश्च नैवेद्यैः पूजयेत् सुमनोहरैः।
ततो मङ्गलवाद्यैस्तु प्राच्यां वा प्राङ्मुखः स्थितः ॥
आचार्य्यो गृह्य संभारान् ग्रहार्चीस्तर्पयेत्ततः।
एतैस्तैस्तैर्यवैर्मन्त्रैर्ग्रहादीस्तर्पयेत्ततः ॥
प्रजेशं तर्पयेद्विद्वान्नाकुलीनां घृतेन च।
इतरान् दशभिर्हवनाहुतिभिः प्रतर्पयेत् ॥
दद्यात् पूर्णाहुतिं पश्चात् वौषडन्तेन मन्त्रवित्।
तत्र प्रणम्य विज्ञाप्य कृत्वा वै स्वस्तिवाचनम् ॥
प्रगृह्य कर्करीं सम्यक्शुक्लसूत्रं प्रदक्षिणम्।
सूत्रमार्गेण दिव्येन तोयधारान्तु भ्रामयेत् ॥
पूर्व्वयत्नेन मार्गेण सूत्रबीजानि भ्रामयेत्।
सुशोभनं शुभं स्थानं तथा खातस्य कारयेत् ॥

ततो गर्त्तं खनेन्मध्ये हस्तमात्रप्रमाणकम्।
चतुरङ्गुलमानं तदधः खन्यात् सुसम्मितम् ॥
गोमयेनोपलिप्याथ चन्दनेन च भूषयेत्।
मध्ये दत्त्वा तु पुष्पाणि शुक्लान्यक्षतमेव च ॥
आचार्य्यः प्राङ्मुखो भूत्वा ध्यायेद्देवं चतुर्भुजम्।
तूर्य्यमङ्गलघोषेण ब्रह्मघोषरवेण च ॥
अर्घ्यं दद्यात् सुरश्रेष्ठ! कुम्भतोयेन मन्त्रवित्।
प्रगृह्य कर्करीं तावत्कुम्भं प्रपूरयेज्जलैः ॥
सर्व्वरत्नसमाकीर्णैर्निर्मलैः सुसुगन्धिभिः।
सक्षिप्त्वा शुक्लानि पुष्पाणि प्रक्षिपेदोमिति स्वरम् ॥
सदावर्त्तं परीक्षेत वेदाद्यैनाक्षतं क्षिपेत्।
शुभं स्याद्दक्षिणावर्त्तेऽशुभं वामे भवेत्ततः ॥
बीजैः शालियवाद्यैस्तं गर्त्तं पूरयेद्बुधः।
पञ्चगव्यैः पवित्राभिर्मृद्भिर्गर्त्तं प्रपूरयेत् ॥
एवं पुण्याहविधिना चार्घ्यदानं सुरोत्तम!।
सुवर्णं गां वस्त्रयुगमाचार्य्याय निवेदयेत् ॥
कालज्ञस्यपनीं पूर्व्वां वेणुवान् शल्लितोऽक्षयेत्।
ब्राह्मणान् भोजयित्वा च गेयवृत्तादि कारयेत् ॥
ततस्तं खानयेद्दूयन्नाञ्जलान्तं यावदेव तु।
पुरुषाधः स्थितं शल्यं न गृहे दोषदं भवेत् ॥
प्रासादे दोषदं शल्यं भवेद्यावज्जलान्तिकम्।
तस्मात् प्रासादिकीं भूमिः शोधा यावज्जलान्तिकम् ॥
ग्रिवान्तं कर्करान्तं वा यावद्वा भूः कुमारिका।
आकोच्यनां समीक्ष्य ततो योगं समाचरेत्।"
किञ्च।
"पूरयेत् खातकं यत्नात् पादं पादं यथाक्रमम्।
आच्छादनं ततः कुर्य्यात् सुदृढैर्बहुदण्डकैः ॥
पादोनं पूरयेत् खातं सुधया चैव कारयेत्।
दैशिकः पञ्चगव्येन तां भूमिं प्रोक्षयेद्बुधः ॥
सुवर्णग्रीहिगर्भेण घृतपल्लवशोभिना।
तीर्थतोयसुपूर्णेन स्वर्णताम्रमयेन वा ॥
सेचयेदभिजप्तेन वारिणा कलसेन तु।
ततः शुद्धा भवेद्भूमिर्घृतयुक्तापि या भवेत् ॥"
अथ शिलालक्षणं माह्ये।
"आदावेवं समासेन शिलालक्षणमुत्तमम्।
शिलान्यासविधानञ्च प्रोच्यते तदनन्तरम्।
शिला वार्थेष्टका वापि चतस्रो लक्षणान्विताः।
प्रासादादौ विधानेन न्यसेया; सुमनोहराः ॥
चतुरस्राः समाः कृत्वा समन्तादथ वेष्टकाः।
शिलारूपाः स्मृता विद्वा नन्दाद्याश्चेष्टकात्मिकाः ॥
संपूर्णाः सुतलाः स्निग्धाः सुषमा लक्षणान्विताः।
कुशदूर्व्वाङ्किता धन्याः सध्वजच्छत्रचामराः ॥
साङ्कुराक्षोरवर्णोपेताः कूर्म्मसत्यफलान्विताः।
दर्पणा हस्तिवज्राङ्काः प्रशस्तद्रव्यलाञ्छिताः ॥
प्रशस्तपक्षिनागाङ्काश्च वृषाङ्काः सर्व्वदा हिताः।

स्वस्तिका वेदिका मुक्ता नन्द्यावर्तकलाञ्छिता: ॥
पद्मादिलक्षणोपेता: शिला: सर्वार्थसिद्धिदा: ।
तथा गोवाजिपादाङ्का: शिला धन्या: सुखावहा: ॥
क्रव्यादव्यालपादाङ्का न ग्राह्या: पक्षिणस्तथा ।
दिङ्मूढा दिग्विहीनाश्च दीर्घह्रस्वा: क्षताञ्चिता: ॥
विवर्णा: स्फुटिता भग्ना: संख्याच्या लक्षणच्युता:।
यश्चरक्षपाशिरूपाङ्का: प्रग्रस्तव्रणलाञ्छिता: ॥
यथोक्तलक्षणोपेता: शिला नित्यहितावहा: ॥"
अथ इष्टकालक्षणम् । तत्रैव ।
"इष्टकानां समासेन लक्षणं ह्रस्व सांप्रतम् ।
एकवर्णा: सुपक्वाश्च सुप्रमाणा मनोरमा: ॥
नन्द्यावर्ताकृतिका: कार्याश्चतुरस्रा: सुसंमिता: ।
अस्याङ्गारान्विता नेष्टा: कृष्णवर्णा: सपूतिका:॥
मन्दपक्वा विपक्वाश्च बहुदिग्धाश्च वर्जिता: ।
भग्नाश्च विषमा हीना वर्जनीया: प्रयत्नत: ॥"
हयशीर्षपञ्चरात्रे ।
"इष्टकानां प्रमाणञ्च लक्षणं सांप्रतं ह्रस्व ।
सुमला लक्षणोपेता द्वादशाङ्गुलसम्मिता: ॥
हृद्विस्तारविभागेन नेपुण्येन च सम्मिता: ।
सुपक्वा: सुप्रमाणाश्च एकवर्णा मनोहरा: ।
विमला इष्टका: कार्याश्चतुरस्रा: सुसम्मिता: ।
छिन्नकर्णाश्चाग्रग्रस्ता: पार्श्विपादविवर्जिता: ॥
सपूतिका: कृष्णवर्णा अस्याङ्गारचिताश्च या: ।
विवर्णा मन्दगन्धाश्च या: पीना: पिच्छिकाश्च
या: ॥
हीनाश्च विषमा भग्ना वर्जनीयाश्च विवर्जिता: ॥"
अथ शिलादिन्यासस्थानम् । मानसे ।
"शिलान्यासस्तु कर्तव्य: प्रासादे तु शिलामये ।
इष्टकानान्तु विन्यास: प्रासादे चेष्टकामये ॥
शैलजे शैलज: पीठ ऐष्टिके ऐष्टिक: स्मृत: ।
शिलान्यासादिको भद्रे मूलपादो विधीयते ॥"
हयशीर्षपञ्चरात्रे ।
"कर्तव्यश्चेष्टकान्यास: प्रासादे चेष्टकामये ।
शैले शिलानां विन्यास: कार्करे कर्करा न्यसेत्॥
कृत्वा शिलादिन्यासे च प्राक्शिलाभ्यधिवासनम् ।
इष्टकानां प्रतिष्ठाञ्च गर्भाधानञ्च कारयेत् ॥
गुरवे दक्षिणां दत्वा पीठबन्धञ्च साधयेत् ।
स्वयं शीर्षयशीर्षेण प्रोक्तलक्षणविधि: स्फुटम् ॥"
अथ पीठबन्धनम् । हयशीर्षे ।
"पीठबन्धं तत: कुर्याज्जगत्प्रासादमानत: ।
पीठोत्तमं चोच्छ्रयेत्र प्रासादस्योर्ध्वमानत: ॥
पादहीनं मध्यमं स्यात् कनिष्ठं चार्धमानत: ।
उत्तमं वासुदेवस्य कुर्यात् पीठं विचक्षण: ॥
अथ प्रासादलक्षणानि । मानसे ।
एवं वास्तुबलिं कृत्वा भजेत् षोडशभागिकम् ।
तस्य मध्ये चतुर्भिस्तु भागैर्गर्भञ्च कारयेत् ॥
भागद्वादशकं तत्र भित्त्यर्थं परिकल्पयेत् ।
चतुर्भागेन भित्तीनामुच्छ्राय: स्यात् प्रमाणत: ॥
द्विगुण: शिखरोच्छ्रायो भित्युच्छ्रायात् प्रमाणत: ।
शिखरार्धेन चार्धेन विधेया तु प्रदक्षिणा ॥
चतुर्दिक्षु तदा ज्ञेयो निर्गमस्तु तथा बुधै: ।
गर्भसूत्रत्रयं भागो विस्तारो मण्डपस्य तु ॥
आयत: स्यात्त्रिभिर्भागैर्भद्रयुक्त: सुशोभन: ।
पञ्चभागेन संभज्य गर्भमानं विचक्षण: ॥
भागमेकं गृहीत्वा तु प्राग्वदेव कल्पयेद्बुध: ।
गर्भसूत्रसमो भागादन्यो सुखमरूप: ।
एतत् सामान्यसुद्दिष्टं प्रासादस्येह लक्षणम् ॥
किञ्च ।
मेरुमन्दरकैलासकुञ्जरसिंहगालया ।
विमानच्छन्दकस्तद्वद्भद्रौशोऽथ नगाधिप: ॥
वलभिच्छन्दकस्तद्वद्वर्तुल: सर्वभद्रक: ।
गजश्च नन्दनश्चैव नन्दिवर्द्धन एव च ॥
हंसो हय: सुपर्णश्च पद्मकोऽथ सप्तमक: ।
प्रासादा नामत: प्रोक्ता विभागं शृणुत द्विजा: ॥
शतसङ्ख्यचतुर्द्वारो भूमिकाषोडशोच्छ्रित: ।
नानाविचित्रशिखरो मेरुप्रासाद उच्यते ॥
मन्दरो द्वादश: प्रोक्त: कैलासो दशभूमिक: ।
विमानच्छन्दकस्तद्वदनेकशिखरानन: ॥
स चाष्टभूमिकस्तद्वत् सप्तभिर्नन्दिवर्द्धन: ।
त्रिंशाङ्ककसमायुक्तो नन्दन: समुदाहृत: ॥
षोडशाङ्ककसंयुक्तो नानारूपसमन्वित: ।
अनेकशिखरस्तद्वत् सर्वतोभद्र उच्यते ॥
चक्रशालसमोपेतो विज्ञेय: पञ्चभूमिक: ।
वलभिच्छन्दकस्तद्वच्चुकनासान्वयान्वित: ॥
वृषस्योच्छ्रयतुल्यो मण्डलश्चास्रिवर्जित: ।
सिंह: सिंहगतिर्ज्ञेयो नगो नगसमस्तथा ॥
कुम्भ: कुम्भाकृतिस्तद्वद्भूमिकानवकोच्छ्रय: ।
अनुलोमोत्कसंस्थानपञ्चाङ्गकविभूषित: ॥
षोडशाम: समस्तात्तु विज्ञेय: स समुद्गक: ।
पार्श्वयोश्चक्रशालस्य उच्छ्राधो भूमिकाह्ययम् ॥
षोडशाम: स विज्ञेयो विचित्रशिखर: शुभ: ।
नगराजस्तु विज्ञानश्चक्रशालाविभूषित: ॥
प्राग्वंशेन विशालेन भूमिकासु षडुन्नत: ।
अनेकचक्रशालस्तु गज: प्रासाद उच्यते ॥
पर्यङ्कगृहराजो वै गरुडो नाम नामत: ।
सप्तभूम्युच्छ्रयस्तद्वच्चक्रशालाद्ययान्वित: ॥
भूमिकाषडशीतिस्तु वाहुत: सर्वतो भवेत् ।
तथाश्वो गरुडस्तद्वदृक्षायाद्दशभूमिक: ॥
पद्मक: षोडशाम्रस्तु भूमिद्वयसमन्वित: ।
पद्मतुल्यप्रमाणेन श्रीवृक्षक इति स्मृत: ॥
पञ्चाङ्ककक्षिभूमिस्तु गर्भे ह्यस्रचतुष्टयम् ।
वृषो भवति नाम्ना य: प्रासाद: सर्वकामिक: ॥
सप्तादौ पञ्चकाश्चैव प्रासादा ये मयोदिता: ।
सिंहस्य तै समा ज्ञेया ये चान्ये तत्प्रमाणत: ॥
चक्रशालै: समोपेता: सर्वे प्राग्वंशसंयुता: ।
ऐष्टका दारवाश्चैव शैला वा स्यु: सुतोरणा: ॥
मेरु: पञ्चाग्रहस्त: स्यात् मन्दर: पञ्चशैलक: ।
चत्वारिंशत्तु कैलासश्चतुस्त्रिंशद्गृहमानक: ॥
नन्दिवर्द्धनकस्तद्वद्वात्रिंशत् समुदाहृत: ।
त्रिंशता नन्दन: प्रोक्त: सर्वतोभद्रकस्तथा ॥
वर्तुल: पद्मकश्चैव त्रिंशद्वस्त्र उदाहृत: ।
गज: सिंहश्च तुल्यश्च वलभिच्छन्दकस्तथा ॥
एते षोडशहस्ता: स्युश्चत्वारो देववल्लभा: ।
श्रीवृक्षो नगराजश्च सप्तहस्तौ तथा ॥
एते द्वादशहस्ता: स्युरेषां हंसक: समृ: ।
गरुडोऽष्टकरो ज्ञेयो हयो दश उदाहृत: ॥
एवमेते प्रमाणेन कर्तव्या: शुभलक्षणा: ।
यक्षराक्षसनागानां मानहस्ता: प्रशस्यते ॥
तथा मेर्व्यादय: सप्त त्र्यङ्गुलिहे सुखावहा: ।
श्रीवृक्षकादयश्चाष्टौ मध्यमस्य उदाहृता: ॥
तथा हंसादय: पञ्च कनिष्ठे शुभदा मता: ॥"
हयशीर्षपञ्चरात्रे ।
"प्रासादं संप्रवक्ष्यामि सर्वसाधारणं शृणु ।
चतुरश्रीकृतं क्षेत्रं भवेत् षोडशधा पुन: ॥
मध्ये तस्य चतुर्भिस्तु कुर्याद्गर्भसमन्वितम् ।
द्वादशैव तु भागानि भित्त्यर्थं परिकल्पयेत् ॥
अङ्गोच्छ्रायस्तु कर्तव्य: चतुर्भागेन चायतम् ।
अङ्गयोर्द्विगुणोच्छ्रायं मञ्जर्या: कल्पयेद्बुध: ॥
चतुर्भागेन मञ्जर्या: कार्या सम्यक् प्रदक्षिणा ।
तस्मात् निर्गमं कार्यसुभयो: पार्श्वयो: समम् ॥
शिखरेण समं कार्यमग्रे जगति विस्तरम् ।
त्रिगुणेनापि कर्तव्यं यथाशोभानुरूपत: ॥
विस्तरं मण्डपस्याग्रे गर्भसूत्रद्वयेन तु ।
दैर्घ्यात् पादाधिकं कुर्याच्छेषे खण्डैर्विभूषितम् ॥
प्रासादगर्भमानं वा कुर्वीत सुखमरूपम् ।
एकाशीतिपदैर्वापि यद्वा मण्डपमारभेत् ॥
शुकनाड्यादारि विन्यासे प्रादक्षिण्यात् यजेत् सुरान् ।
तथा प्राकारविन्यासे यजेद्दिक्षिग्रदन्तगान् ॥
सर्वसाधारणक्षेत्रं प्रासादस्य तु लक्षणम् ।
मानेन प्रतिमाया वा प्रासादमपरं शृणु ॥
प्रतिमाया: प्रमाणेन कर्तव्या भित्तिका शुभा ।
गर्भस्तु भित्तिकार्द्धेन गर्भमानास्तु भित्तय: ॥
भित्तेरायाममानेन उच्छ्रायस्तु प्रकल्पयेत् ।
भित्युच्छ्रायात्तद्विगुणं शिखरं कल्पयेद्बुध: ॥
शिखरस्य तु तुर्यांश भ्रमणं परिकल्पयेत् ॥
शिखरस्य चतुर्थेन अयतो सुखमरूपम् ।
अष्टकांशेन गर्भस्य रथकानान्तु निर्गम: ॥
परिधेर्गणभागेन रथकांश्चाऽपि कल्पयेत् ।
तत्तृतीयेन वा कुर्याद्रथकानान्तु निर्गमम् ॥
वासवयं न्यायतोयं रथकश्चित्रये सदा ।
शिखरार्थेन शृङ्गाणि रङ्गाणि विनिपातयेत् ॥
शिखरस्यार्द्धभागस्थं सिंहं तत्र च कारयेत् ।
शुकनासां स्थिरीकृत्य मध्यसूत्रौ विवर्जयेत् ॥
अपरे च तथा पार्श्वे सदृक् सूत्रं निधापयेत् ॥
सदृक्तु भवेदंश: कर्कटे ग्रामसंस्थानात् ।
स्कन्धभागस्तु कर्तव्यं विकरालं तथैव च ।
ऊर्ध्वन्तु वेदिकामानात् कलसं परिकल्पयेत् ॥"
किञ्च ।
"गरुडस्तम्भं तथा कुर्यादुपरिष्टाच्चतुर्गुणम्

कुर्य्याद्विक्प्रतिमायामान् दिक्षु चाष्टासु
चोपरि ॥
मङ्गलाष्टमनेत्राग्नि गरविंशन्तु दक्षिणे ।
प्रतीच्यां श्रीधरं देवमुदीच्यां हयशीर्षकम् ॥
आग्नेय्यां वामदग्न्यञ्च नैर्ऋते राममेव च ।
वामनञ्चैव वायव्यां वासुदेवमथापरे ॥" *॥
किञ्च ।
"पूर्व्वभूमौ तु प्रथमं द्वितीये चासनं भवेत् ।
स्थानमेव तृतीये तु चतुर्थे यानमेव च ॥
पञ्चमे योगनिद्रा तु षष्ठे योगासनं भवेत् ।
स्थानं योगसमायुक्तं सप्तमे परिकल्पयेत् ॥
नानाभावाश्रयैर्युक्तात् पञ्चवक्त्रादिभूषितम् ।
नानाप्रकारपुष्पाद्यैर्यथाशोभं प्रकल्पयेत् ॥
कनिष्ठमध्यज्येष्ठानां प्रासादानां यथाक्रमम् ।
वसुभागा च ऋक्षिभिः प्रदेया रचना बुधैः ॥
द्वारस्य चाष्टमे युक्ते नवमे दशमे तथा ।
ललाटवेधो नैवं स्यादायस्य ह्रस्व सान्वितम् ॥
यावद्भस्तैरभिप्रेतः प्रासादकर्त्तृजानघ ! ।
तावद्विरङ्गुलैरायो वसुभागेन वा भवेत् ॥
एकस्मिंश्च त्रयो ज्ञेयो द्विस्त्रिभा वेदिका मता ।
दशभूम्यन्तरे नित्यं चतुस्त्रिंशं प्रकल्पयेत् ॥"*॥
अथ मङ्गलशब्दनिर्णयः । मात्स्ये ।
"अथातः सम्प्रवक्ष्यामि मङ्गलानामनुक्रमम् ।
मङ्गलान् प्रवरान् वक्ष्ये प्रासादस्यानुरूपतः ॥
विविधा मङ्गलाः कार्य्या ज्येष्ठमध्यकनीयसः ।
नामतस्तान् प्रवक्ष्यामि शृण्वध्वं द्विजसत्तमाः ! ॥
पुष्पकः पुष्पभद्रश्च सुवृत्तो नन्दनन्दनः ।
कौशल्यो वृद्धिसञ्ज्ञौ राजभद्रो जयावहः ॥
श्रीवृक्षो विजयश्चैव वास्तुकीर्त्तः शुनिं धरः ।
यज्ञभद्रो विशालश्च संज्ञितः शुभमर्द्दनः ।
भागपद्मो नन्दनश्च मानवो मानभद्रकः ।
सुग्रीवो हर्षणश्चैव कर्णिकारः पदार्द्धकः ॥
सिंहश्च ग्रामभद्रश्च सुभद्रश्च तथैव च ।
सप्तविंशतिराख्याता लक्षणं शृणुत द्विजाः ॥
क्षमा यत्र चतुःषष्टिः गुप्तकः स उदाहृतः ।
द्वाषष्टिः पुष्पभद्रस्तु षष्टिः सुवृत्त उच्यते ॥
अष्टपञ्चाशकक्षेत्रः कथितः नन्दनन्दनः ।
कौशल्यः षट्पञ्चाशच्चतुःपञ्चाशता पुनः ॥
राजा तु वृद्धिसञ्ज्ञौ द्विहीनो राजभद्रकः ।
जयावहस्तु पञ्चाशच्छ्रीवृक्षस्तु द्विहीनकः ॥
विजयस्तद्विहीनः स्यात् वास्तुसञ्ज्ञौ तथैकया ।
द्वाभ्यामेव प्रहीयेत ततः शुनिधरोऽपरः ॥
चत्वारिंशद्दयक्षभद्रो द्विहीनोऽथ विशालकः ।
षट्त्रिंशच्चैव संज्ञितो द्विहीनः शुभमर्द्दनः ॥
द्वात्रिंशद्भागपद्मस्तु त्रिंशता नन्दनः स्मृतः ।
अष्टाविंशच्चानवस्तु मानभद्रो द्विहीनकः ॥
चतुर्व्विंशस्तु सुग्रीवो द्वाविंशद्भर्षणो मतः ।
विंशतिः कर्णिकारः स्यादष्टादश्च पदार्द्धकः ।
सिंहो भवेद्विहीनश्च ग्रामभद्रो द्विहीनकः ॥
सुभद्रस्तु तथा प्रोक्तो द्वादशक्षत्रसंस्तुतः ।
मङ्गलाः कथिता क्षेत्रे यथालक्षणलक्षिताः ।
त्रिकोणं वृत्तमर्द्धेन्दुमर्द्धकोणं द्विरष्टकम् ॥
चतुष्कोणञ्च कर्त्तव्यं संस्थानं मङ्गलस्य तु ।
राज्यञ्च विजयश्चैवमायुर्वर्द्धनमेव च ॥
पुत्रलाभः श्रियः पुष्टिस्त्रासादिषु भवेत् क्रमात् ।
इत्येते शुभदाः प्रोक्ता अन्यथा तु भयावहाः ॥"
अथ तत्र द्वारनिर्णयः । हयशीर्षपञ्चरात्रे ।
"याममध्ये च पूर्व्वे च प्रत्यग्द्वारं प्रकल्पयेत् ।
विदिक्षासु च सर्व्वासु तथा प्रत्यङ्मुखं भवेत् ॥
दक्षिणे चोत्तरे चैव पश्चिमे प्राङ्मुखं भवेत् ॥"
किञ्च ।
"विस्तारादिगुणं द्वारं कर्त्तव्यन्तु सुशोभनम् ।
जातरूपं सरत्नञ्च तद्वदुच्छ्रयसंयुतम् ॥
औड्डम्बरोर्द्धतः स्वर्णं दत्त्वा शाखां न्यसेद्बुधः ।
तूर्य्यमङ्गलघोषेण ब्राह्मणान् स्वस्तिवाच्य च ॥
द्वारस्य च चतुर्थांशे कार्य्यौ षड्रचण्डकौ ।
दण्डहस्तौ तु कर्त्तव्यौ चिव्वक्सेनोपमावुभौ ॥
शाखोर्द्धं न्यस्य रत्नानि न्यसेदूर्द्धमुडुम्बरम् ।
तस्य मध्ये स्थिता देवी साक्षाल्लक्ष्मीः सुरेश्वरी ॥
कर्त्तव्या दिग्गजैः सा तु स्नाप्यमाना घटैस्तु ।
शाखोड्डम्बरकौ कार्य्यौ पत्रवल्ल्यादिभूषितौ ॥
एकशाखं त्रिशाखं वा षट्शाखं द्वारमिष्यते ।
नवशाखञ्च कुर्व्वीत अत ऊर्द्धं न कारयेत् ।
विष्णुवतारूपाद्यैः शाखां रत्नैन भूषयेत् ॥"
मात्स्ये ।
"चतुःषष्टिपदं कृत्वा मध्ये द्वारं प्रकल्पयेत् ।
विस्तारादिगुणोच्छ्रायस्त्रिभागा कटिर्भवेत् ॥
विस्तारार्द्धभवेद्गर्भो भित्तयोरुभयोः समन्ततः ।
गर्भपादेन विस्तीर्णं द्वारं द्विगुणमायतम् ॥
उच्छ्रायात् पादविस्तीर्णा शाखा तद्वदुडुम्बरः ।
विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम् ॥
त्रिपञ्चसप्तनवभिः शाखाभिर्द्वारमिष्यते ।
कनिष्ठं मध्यमं ज्येष्ठं यथायोगं प्रकल्पयेत् ॥
अङ्गुलानां शतं सार्द्धं चत्वारिंशद्विरुत्तमम् ।
धन्यमुत्तममायुष्यं धनधान्यदमेव च ॥
शतं चाशीतिसहितं यानविर्गमनं भवेत् ।
अधिकं दशभिस्तद्वत्तथा षोड्शभिः शतम् ॥
शतमानं द्वितीयस्तु भवत्यशीतिभिस्तथा ।
दशद्वाराणि चैतानि क्रमेणोक्तानि सर्व्वदा ॥
अन्यानि वर्ज्जनीयानि मानसंहिंसदानि तु ।
द्वारवेधस्तु यत्नेन सर्व्ववास्तुषु वर्ज्जयेत् ॥
वृक्षकोणाग्र भूदारात् स्तम्भकूपध्वजादपि ।
कुल्याम्बुभेद वा विद्धं न द्वारं शुभदं भवेत् ॥
क्षयश्च दुर्गतिश्चैव प्रवासः क्षुद्भयं तथा ।
दौर्भाग्यं बन्धनं रोगो दारिद्र्यं कलहं तथा ।
विरोधश्चार्थनाशश्च सर्व्वं वेधे भवेत् क्रमात् ॥"
अथ प्राकारादिनिर्णयः । हयशीर्षपञ्चरात्रे ।
"प्रासादस्य चतुर्भागैः प्राकारस्योच्छ्रयो भवेत् ।
पञ्चहस्तस्य देवस्य एकहस्ता तु पीठिका ॥
तद्वात्तु द्विगुणः प्रोक्तस्तथा गरुडमण्डपः ।
एकहस्तादि कुर्व्वीत त्रिंशद्धस्तान्तमेव च ॥"
अथ वृक्षरोपणनिर्णयः । मात्स्ये ।
"पूर्व्वेण पलिनो वृक्षाः क्षीरवृक्षास्तु दक्षिणे ।
पश्चिमेन जलं श्रेष्ठं पद्मोत्पलविभूषितम् ॥
उत्तरेण तलैस्तालैः शुभा स्यात् पुष्पवाटिका
सर्व्वतस्तु जलं श्रेष्ठं स्थिरमस्थिरमेव च ॥
सर्व्वत्रापि कर्त्तव्यं परिखाबलयादिकम् ।
याम्ये तपोवनस्थानमुत्तरे मालकाग्रहम् ॥
मङ्गलं तथाग्नेये नैर्ऋते तु विनायकः ।
वारुणे श्रीनिवासश्च वायव्ये गृहमालिका ॥
उत्तरे यज्ञशालां तु निर्म्माल्यस्थानमुत्तरे ।
वारुणे सोमदेवत्यं बलिनिर्व्वपणं स्मृतम् ॥
पुरतो गरुडस्थानं तथान्येषां यथोचितम् ।
एवमायतनं कुर्य्याच्छुभमङ्गलसंयुतम् ॥
घण्टाविताननक्षत्रतोरणध्वजयुक्तं
निर्ल्लोलवप्रसुदृष्टिशेन जनेन चार्द्रम् ।
यः कारयेत् सुरगृहं विविधध्वजाढ्यं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"
अथ जीर्णोद्धारः । विष्णुधर्म्मे तृतीयकाण्डे ।
"यस्य राष्ट्रस्तु विषये देवेशश्च विशीर्य्यते ।
तस्य क्षीयति तद्राज्यं देवेशश्च यथा तथा ॥
कृत्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनः ।
द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा ॥'
विष्णुरहस्ये ।
"पतितस्य च यः कर्त्ता पतमानस्य रक्षिता ।
विष्णोरायतनस्येह स नरो विष्णुलोकभाक् ॥"
अग्निपुराणे ।
"पतितं पतमानन्तु तथार्द्धस्फुटितं नरः ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥"
देवीपुराणे ।
"मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः ।
तस्मात् सर्व्वप्रयत्नेन जीर्णस्योद्धारमाचरेत् ॥"
हयशीर्षपञ्चरात्रे ।
"वापीकूपतडागानां सुरधान्नां तथानघ ! ।
प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि ।
पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः ॥
प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्म्मिते ।
प्रायः श्रीहयशीर्षोक्तैरनुसारेण वैष्णवैः ॥
देवालयप्रतिष्ठा च ख्याता सल्लिखनेन किम् ।
श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषतः ॥"

इति श्रीहरिभक्तिविलासे २० विलासः ॥

मन्दिरं, क्ली, पुं (मन्दन्ति मोदन्ते लोका यत्र । मदि + "इषिमदिमुदीति ।" उणा० १ । ५२ । इरि किरच् ।) नगरम् । इति मेदिनी । रे, १६७ पुंलिङ्गोऽप्ययं शब्दः । यथा । नगरं मन्दिरं पुरमिति पुंनपुंसकयोरत्नेन मयूरः । इति भरटीकायां भरतः ॥ (अस्यजानुपश्चिमभागः यथा, अश्ववैद्यके । २ । २१ ।
"अधरं च तनो जानु निर्दिष्टं शास्त्रकोविदैः ।
मन्दिरं पश्चिमो भागः कलायो जानुनोऽग्रिमः ॥"
मन्दिरः, पुं, (मदि + किरच् ।) सदनः । इति मेदिनी । रे, १६७ ॥ जानुपश्चाद्भागः । इति हेमचन्द्रः । ३ । २७८ ॥
मन्दिरपशुः, पुं, (मन्दिरचरः मन्दिरपालितो वा पशुः । मध्यपदलोपी कर्म्मधारयः ।) बिडालः इति शब्दचन्द्रिका ॥

मन्दिरा, स्त्री, (मन्दिर + स्त्रियां टाप्।) मन्दिरम्। यथा, मन्दिरायास्त्वरावानिति मधुसूदनटाद्यः॥

मन्दुरा, स्त्री, (मन्दन्ते स्वपन्ति मोदन्ते वा अश्वा यत्र। मन्द् + "मन्दिवाशिमथीनि।" उणा० १। ६६। इति उरच्। स्त्रियां टाप्।) वाजिशाला। इत्यमरः। २। २। ७॥ (यथा, नैषधचरिते। १। ५७।

"उपाहरन्नग्रमनल्पचञ्चले:
सुराचलैः क्षोभितमन्दरोदरम्॥")

ग्रयनीयार्थवस्तु। इति मेदिनी। रे, २००॥ माडुर इति भाषा॥

मन्दोदरी, स्त्री, (मन्दं उदरं यस्याः। स्त्रियां ङीष्।) रावणमहिषी। सा तु मयदानवकन्या। इति रामायणम्॥ (यथा, महाभारते। ३। २८०। १६।

"भार्य्या मे भव सुश्रोणि! यथा मन्दोदरी तथा॥"

कुमारानुचरमातृगणभेदः। यथा, महाभारते। ६। ४६। १७।

"मन्दोदरी सुदुर्जया च कोटरा मेघवाहिनी॥")

मन्दोदरीशः, पुं, (मन्दोदर्य्याः ईशः पतिः।) रावणः। इति त्रिकाण्डशेषः॥

मन्दोदरीसुतः, पुं, (मन्दोदर्य्याः सुतः।) इन्द्रजित्। इति जटाधरः॥

मन्दोष्णं, क्ली, (मन्दं अल्पं च तदुष्णञ्चेति।) ईषदुष्णम्। तद्धति, त्रि। इत्यमरः। १। ४। २५॥

मन्त्रः, पुं, (मन्त्यते बुध्यते अनेन। मदि + "स्फायितञ्चीति।" उणा० २। १३। इति रक्।) गम्भीरध्वनिः। इत्यमरः। १। ७। २॥ (यथा, मेघदूते। १००।

"मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि॥")

वाद्यविशेषः। तत्पर्य्यायः। मञ्जुः २ स्वरङ्गकः ३। इति शब्दरत्नावली॥ (त्रि, हृष्टः। यथा, ऋग्वेदे। १। ५। ७।

"होता मन्द्रो वरेण्यः॥"

"मन्द्रो हृष्टः।" इति तद्भाष्ये सायणः॥ मादनशीलः। यथा, ऋग्वेदे। १। १७४। ७।

"अग्ने! जुषस्व प्रतिहर्य्यतद्वचो
मन्द्र स्वधावन्तर्पणास्यादनो॥"

"मन्द्र! मादनशील!।" इति तद्भाष्ये सायणः॥)

मन्मथः, पुं, (मनो मथ्नाति विकरोतीति। मन्थ् + पचाद्यच्। पृषोदरादित्वात् साधुः। अस्य नामनिरुक्तिर्यथा, ब्रह्मवैवर्ते। १। ४। ७।

"मनो मथ्नाति सर्व्वेषां पञ्चबाणेन कामिनाम्।
तस्मान्मन्मथनामेन प्रवदन्ति मनीषिणः॥")

कामदेवः। (यथा, नैषधचरिते। ८। ७६।

"न मन्मथस्यं स हि नास्त्रिभूर्भिः॥")

कपित्थवृक्षः। इत्यमरः। १। ४। २१॥ कामचिन्ता। इति मेदिनी। थे, २२॥ * ॥ कामदेवस्योत्पत्तिर्यथा,—

"एवं चिन्तयतस्तस्य ब्रह्मणो सुनिसत्तमाः।
मनसः पुरुषो वत्सुरविर्भूतो विनिःसृतः॥
काञ्चनीचूर्णपीताभः पीनोन्नतसुनासिकः।
सुवृत्तोरुकटीजङ्घो गौलावल्लितकंधरः॥
लम्बभ्रूयुगलो लोलः पूर्णचन्द्रनिभाननः।
कपाटविस्तीर्णवक्षा रोमराजीविराजितः॥
शुभ्रमातङ्गकरवत्पीननिस्तुलबाहुकः।
आरक्तपाणिनयनसुखपादकरोद्भवः॥
क्षौममध्यस्थारुदन्तः प्रमत्तराजकन्धरः।
प्रफुल्लपद्मपत्राक्षः केशरश्मश्रुतर्पणः॥
कम्बुग्रीवो मीनकेतुः प्राणुर्मकरवाहनः।
पञ्चपुष्पायुधो योगी पुष्पकोदण्डमण्डितः॥
कान्तः कटाक्षपातेन श्रमयन्नयनद्वयम्।
सुगन्धिमारुताघ्रातं भृङ्गारैरुपसेवितम्॥
वीक्ष्य तं तादृशं दक्षप्रमुखा मानसाश्च ते।
मरीच्याद्या दृशं ततो विस्मयाविष्टचेतसः॥
औत्सुक्यं परमं जग्मुरापूर्व्वैकारिकं मनः।
स चापि वेधसं वीक्ष्य सस्मारं जगतां पतिम्।
प्रणम्य पुरुषः प्राह विनयानतकन्धरः॥

श्रीपुरुष उवाच।

किं करिष्याम्यहं कर्म्म ब्रह्मंस्त्वञ्च नियोजय।
मानार्थे पुरुषो यस्मादुचिते श्लोभिते विधे॥
अभिधानञ्च यदृच्छयं स्थानं पत्नी च या मम।
तन्मे कुरुष्व लोकेश! स्रष्टा त्वं जगतां यतः॥

मार्कण्डेय उवाच।

इत्यं तस्य वचः श्रुत्वा पुरुषस्य महात्मनः।
स्मयं न किञ्चित् प्रोवाच स्वहृदावपि विस्मितः॥
मनो मनः सुसंयम्य सम्यगुत्सृज्य विस्मयम्।
उवाच पुरुषं ब्रह्मा तत्कर्म्मोद्यमभावहन्॥

ब्रह्मोवाच।

अनेन चारुरूपेण पुष्पबाणैश्च पञ्चभिः।
मोहयन् पुरुषास्त्रीश्च कुरु सृष्टिं सनातनीम्॥
न देवा न च गन्धर्व्वा न किन्नरमहोरगाः।
नासुरा न च दैत्या वा न विद्याधरराक्षसाः॥
न यक्षा न पिशाचाश्च न भूता न विनायकाः।
न गुह्यका न सिद्धाश्च न मनुष्या न पक्षिणः॥
पशवो न मृगाः कीटाः पतङ्गा जलजाश्च ये।
न ते सर्व्वे भविष्यन्ति न लप्स्या ये परस्य ते॥
अहं वा वासुदेवो वा स्थाणुर्वा पुरुषोत्तम!।
भविष्यामस्तव वशे किमन्यैः प्राणधारिभिः॥
प्रच्छन्नरूपो जन्तूनां प्रविशन् हृदये सदा।
सृष्टहेतुः स्वयं भूत्वा कुरु सृष्टिं सनातनीम्॥
तवपुष्पबाणस्य सदा सुखं लप्स्यं मनोरथं च।
सर्व्वेषां प्राणिनां नित्यं मदमोदकरो भवान्॥
इति ते कर्म्म कथितं सृष्टिप्रावर्त्तकं पुनः।
नामानि च वदिष्यामि यस्ते योग्यं भविष्यति॥

मार्कण्डेय उवाच।

इत्युक्त्वा सुरवर्य्यो मानसानां सुखानि च।
आलोक्य चासने पद्मे स्वपविष्टोऽभवत् स्वयात्॥"
इति कालिकापुराणे कामप्रादुर्भावो नाम २ अध्यायः॥

मार्कण्डेय उवाच।

"ततस्ते सुनयः सर्व्वे तदभिप्रायवेदिनः।
चक्रुस्तदुचितं नाम मरीच्यत्रिसुखादयः॥
सुखावलोकनादेव ज्ञाता दक्षात्मजस्य तः।
दक्षादयश्च सस्मारुः स्थानं पत्नीञ्च ते ददुः॥
ततो निश्चित्य नामानि मरीचिप्रमुखा द्विजाः।
ऊचुः सङ्गतमेतत्ते पुरुषाय द्विजोत्तमाः॥

ऋषय ऊचुः।

यस्मात् प्रमथ्य चेतस्तं जातोऽसाकं तथा विधेः।
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव!॥
मदनाज्जदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि॥
त्वदाद्यगानां यद्दीर्य्यं तद्दीर्य्यं न भविष्यति।
वैष्णवानाञ्च रौद्राणां ब्रह्मस्थानाञ्च तादृशम्॥
स्वर्गो मर्त्यश्च पातालं ब्रह्मलोकः सनातनः।
अवस्थानानि सर्व्वाणि सर्व्वत्रापी भवान् यतः॥
किंवा चापि विशेषेण सामान्ये नास्ति ते समः।
यत्र यत्र भवेत् प्राणी प्राङ्निसर्गात्तथोद्यतः॥
तत्र तत्र तव स्थानमस्त्रत्रासदोदयम्।
दक्षोऽयं भवतः पत्नीं स्वयं दास्यति शोभनाम्॥"

इति कालिकापुराणे २ अध्यायः॥

मन्मथानन्दः, पुं, (मन्मथं आनन्दयतीति। आ + नन्द + णिच् + पचाद्यच्। कामवर्द्धकत्वादस्य तथात्वम्।) महाराजभूतः। इति राजनिर्घण्टः॥

मन्मथालयः, पुं, (मन्मथस्य आलय इव। कामवर्द्धकत्वादेवास्य तथात्वम्।) आम्रः। इति राजनिर्घण्टः॥

मन्मनः, पुं गद्गदध्वनिः। इति त्रिकाण्डशेषः॥ (दम्पत्योः कथनविशेषः। यथा, चिन्तामणिभूतवचनम्।

"सुरते कर्णमूले तु निजदेष्टीयभाषया।
दम्पत्योः कथनं यत्तु मन्मनं तं विदुर्बुधाः॥")

मन्या, स्त्री, (मन्यते ध्यायते सुखमनयादिकमनया। मन् + करणे क्यप्। स्त्रियां टाप्।) ग्रीवायाः पश्चात् शिरा। इत्यमरः। २। ६। ८५॥ (यथा, सुश्रुते उत्तरतन्त्रे २५ अध्यायः।

"दोषास्तु दुष्टाश्चय एव मर्म्मा
संपीड्य घाटां सुरुजां सुतीव्राम्।
कुर्व्वन्ति सान्निभुवमाशुदेहे
स्थितिं करोत्याशु विशेषतस्तु॥")

मन्याका, स्त्री, (मन्यैवेति। मन्या + स्वार्थे कन्। स्त्रियां टाप्। सकन्याक इति वत् न विभाषया ह्रस्वः।) मन्या। इति शब्दरत्नावली॥

मन्युः, पुं, (मन्यो ध्यायतीत्सौ। मन + "यजिमनिशुन्धिदसिजनिभ्यो युच्।" उणा० ३। २०। इति युच्।) क्रोधः। (यथा, भट्टिकाव्ये। ६। ३०।

"मन्युर्मन्थे ममाक्षम्णोद्विषादोऽक्षभङ्गभयनिम्॥")

देवम्। क्रतुः। (यथा, राजतरङ्गिण्याम्। १। १७३।
"आविर्भूयाभिमन्युः शुनमन्युरिवापरः॥")
क्रोधः। इत्यमरः। १। १। १५१॥ (यथा, महाभारते। १। ७८। ५।
"यः सञ्चारयते मन्युं क्षोऽतिकाक्षेतिचर्यते।
यश्च तप्तो न तपति दृढं सोऽधैर्यस्य भाजनम्॥")
अहङ्कारः। इति शब्दरत्नावली॥ (क्रोधाभिमानिदेवः। यथा, ऋग्वेदे। १०। ८३। १।
"यस्ते मन्यो! विधनद्य सायक
सह ओजः पुष्यति विश्वमानुषक्॥"
वितथपुत्रः। यथा, भागवते। ८। २२। १।
"वितथस्य सुतान् मन्योर्दृढव्रतपरायणान्।
नरवाहनः॥"
नरदेवः। यथा, भागवते। ४। ५। ५।
"आत्मन्य एव कुपितेन मन्युना
स देवदेवं परिचक्रमे विभुम्॥")
मन्वन्तरं, क्ली, (मनोरन्तरमस्मिन्निति।) दिव्यानां युगानामेकसप्ततिः। इत्यमरः। १। ४। २२॥ देवमानेनैकसप्ततियुगानि मन्वन्तरमुच्यते मनोरन्तरमवकाशोऽवधिर्वा अस्मिन्निति मन्वन्तरम्।
"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः।
ज्ञातव्येतादृशानां मनोरन्तरमुच्यते॥"
इति लिङ्गपुराणम्॥
मनवः स्वायम्भुवादयस्तेषामन्तरमवकाशोऽवधिर्वा मन्वन्तरमिति वा। एकसप्ततिरिति यद्यपि गणनया अष्टयुगेनाधिका।
"दैविकानां युगानान्तु सप्तत्या ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश॥"
तत्किञ्चिदधिका दिव्ययुगानामेकसप्ततिरिति नामविधाने सर्व्वसमाहारायैवोक्तत्वात् तथापि अल्पत्वादिह नोक्तम्। मन्वन्तरस्य संख्यातवर्षाणि यथा,—
"त्रिंशत्कोट्यस्तु वर्षाणां मानुषेण द्विजोत्तमाः।
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु॥
त्रिंशत्तिस्तु सहस्राणि कालो यः साधिको विना।
मन्वन्तरस्य संख्येया लिङ्गैरेतान् कथिता द्विजाः॥"
एतदङ्का यथा, ३०६,७००,००० । एवं चतुर्दशमन्वन्तरैरहर्दिनम्। युगानि यथा लैङ्गे।
"पूर्व्वं कृतयुगं नाम तत्रस्त्रेता विधीयते।
द्वापरञ्च कलिश्चैव युगान्येतानि सुव्रताः॥"
युगमानानि यथा,—
"चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्।
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः॥"
इति॥
अन्यच्च।
"चत्वार्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्।
तस्य तावत् शती सन्ध्या सन्ध्यांशश्च तथाविधः॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्षाणां सहस्राणि शतानि च॥"
इति॥

अस्यार्थः। देवमाने कृतस्य वर्षाणि ४००० चतुःसहस्राणि सन्ध्यावर्षाणि ४०० चत्वारि शतानि सन्ध्यांशवर्षाणि ४०० चत्वारि शतानि। एवं देवमाने कृतस्य वर्षाणि अष्टशताधिकचतुःसहस्राणि ४८०० एवं त्रेतायाः षट्शताधिकत्रिसहस्रं ३६०० एवं द्वापरस्य चतुःशताधिकं द्विसहस्रम् २४०० एवं कलेः शतद्वयाधिकमेकसहस्रम् १२०० सप्तदशेन द्वादशसहस्राणि १२००० । मानुषमानेन सत्यादीनां मानं यथा, ज्योतिषे।
"वस्वग्निमेघा ऋतुरन्ध्रमासा
वेदा रसाष्टौ भुजवह्निवेदाः।
एतानि सूत्यक्षयनाब्दितानि
युगाब्दसंख्याः परिकीर्त्तितानि॥"
एतदङ्कैर्दृश्यते सत्यस्य यथा, १,७२८,०००। त्रेतायाः यथा, १,२९६,०००। द्वापरस्य यथा, ८६४,०००। कलेर्यथा, ४३२,०००। सप्तदशेन १,२२०,०००। अपरं ब्राह्मवर्षादिमानं बाहुल्यभिया नोक्तम्। इति तट्टीकायां भरतः॥
अपि च। ब्रह्मणो दिनमध्ये चतुर्दशमन्वन्तराणि भवन्ति। एकौ मनुर्यावदधिकारी भवति स कालो मन्वन्तरसंज्ञको भवति। तत्र मनूनां नामानि। प्रथमः स्वायम्भुवो मनुः। द्वितीयः स्वारोचिषो मनुः। तृतीय उत्तमो मनुः। चतुर्थस्तामसो मनुः। पञ्चमो रैवतो मनुः। षष्ठश्चाक्षुषो मनुः। सप्तमो वैवस्वतो मनुः। वर्त्तमानोऽयम्॥ अष्टमः सावर्णिर्मनुः। नवमो दक्षसावर्णिर्मनुः। दशमो ब्रह्मसावर्णिर्मनुः। एकादशो धर्म्मसावर्णिर्मनुः। द्वादशो रुद्रसावर्णिर्मनुः। त्रयोदशो देवसावर्णिर्मनुः। चतुर्दश इन्द्रसावर्णिर्मनुः। प्रतिमन्वन्तरं भगवदवतारेन्द्रदेवगणसप्तर्षिमनुमनुपुत्रादयः पृथक् पृथग्भवन्ति। यथा। स्वायम्भुवे मन्वन्तरे यज्ञोऽवतारः स एवेन्द्रः। यमादयो देवाः। मरीचिप्रभृतयः सप्तर्षयः। स्वायम्भुवो मनुः। प्रियव्रतोत्तानपादौ मनुपुत्रौ॥ १॥ स्वारोचिषे विभुरवतारः। रोचन इन्द्रः। देवास्तुषितादयः। ऊर्ज्जस्तम्बादयः सप्तर्षयः। अग्निसुतः स्वारोचिषो मनुः। द्युमत्सुषेणरोचिष्मत्प्रमुखा मनुपुत्राः॥ २॥ उत्तमे सत्यसेनोऽवतारः। सत्यजिदिन्द्रः। सत्यवेदश्रुतभद्रादयो देवाः। वशिष्ठसुताः सप्तर्षयः प्रमदादयः। प्रियव्रतसुत उत्तमो मनुः। पवनञ्जययज्ञहोत्राद्यास्तत्सुताः॥ ३॥ तामसे हरिरवतारः। त्रिशिख इन्द्रः। वैधृतादयो देवाः। ज्योतिर्धामादयः सप्तर्षयः। तामसो मनुः। पृथख्यातिनरादयस्तत्सुताः॥ ४॥ रैवते विकुण्ठोऽवतारः। विभुरिन्द्रः। भूतरयादयो देवाः। हिरण्यरोमादयः सप्तर्षयः। रैवतो मनुः। बलिविन्ध्यादयस्तत्सुताः॥ ५॥ चाक्षुषे अजितोऽवतारः। मन्त्रद्रुम इन्द्रः। आप्यादयो देवाः। हविष्मदीरकादयः सप्तर्षयः। चाक्षुषो मनुः। पुरुषसम्भूत्यादयस्तत्सुताः॥ ६॥ वैवस्वते वामनोऽवतारः। पुरन्दर इन्द्रः। आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणा अश्विनावृषभ इत्याद्या देवाः। कश्यपोऽत्रिर्वसिष्ठो विश्वामित्रो गौतमो जमदग्निर्भरद्वाज एते सप्तर्षयः। वैवस्वतो मनुः। इक्ष्वाकुः धृगः धृष्यादिः इष्टः धृष्टः करूषकः नरिष्यन्तः पृषधः नाभागः कविः एते मनुपुत्रा दश॥ ७॥ अथ भविष्याणि। सावर्णिके सार्व्वभौमोऽवतारः। बलिरिन्द्रः। सुतपसो विरजा अमृतप्रभा देवाः। गालवः दीप्तिमान् परशुरामः अश्वत्थामा कृपः ऋष्यशृङ्गः व्यास एते सप्तर्षयः। सावर्णिर्मनुः। निर्म्मोकविरजस्काद्याश्चतस्तनूजाः॥ ८॥ दक्षसावर्णिके ऋषभोऽवतारः। अद्भुत इन्द्रः। पारमरीचिगर्भाद्या देवाः। द्युतिमदाद्याः सप्तर्षयः। दक्षसावर्णिर्मनुः। भूतकेतुर्दीप्तिकेत्वाद्याश्चतस्तनूजाः॥ ९॥ ब्रह्मसावर्णिके विष्वक्सेनोऽवतारः। शम्भुरिन्द्रः। सुरसेनविरुद्धाद्या देवाः। हविष्मदाद्याः सप्तर्षयः। ब्रह्मसावर्णिर्मनुः। भूरिसेनाद्याश्चतस्तनूजाः॥ १०॥ धर्म्मसावर्णिके धर्म्मसेतुरवतारः। वैधृत इन्द्रः। विहङ्गमकामगमाद्या देवाः। अरुणादयः सप्तर्षयः। धर्म्मसावर्णिर्मनुः। सत्यधर्म्मादयश्चतस्तनूजाः॥११॥ रुद्रसावर्णिके। सुधामाख्योऽवतारः। ऋतधामा इन्द्रः। हरितादयो देवाः। तपोमूर्त्यादयः सप्तर्षयः। रुद्रसावर्णिर्मनुः। देववत्रुपदेवादयश्चतस्तनूजाः॥ १२॥ देवसावर्णिके योगेश्वरोऽवतारः। दिवस्पतिरिन्द्रः। सुकर्म्मसूत्राद्या देवाः। निर्म्मोकतत्त्वदर्शाद्याः सप्तर्षयः। देवसावर्णिर्मनुः। चित्रसेनविचित्राद्याश्चतस्तनूजाः। १३॥ इन्द्रसावर्णिके बृहद्भानुरवतारः। शुचिरिन्द्रः। पवित्रचाक्षुषादयो देवाः। अग्निबाहुशुचिशुद्धमागधाद्याः सप्तर्षयः। इन्द्रसावर्णिर्मनुः। उरुगम्भीरबुधाद्याश्चतस्तनूजाः॥ १४॥ अथैषां कर्म्माण्युच्यते। इन्द्रो देवराट् यथावर्षं च। मनुरादौ पृथिव्यां राजा भवति तत्पुत्रपौत्रादयो मन्वन्तरसमाप्तिपर्य्यन्तं राजानो भवन्ति। देवताः प्रजानां यज्ञादिकर्म्मानुष्ठानतत्फलं प्रयच्छन्ति। सप्तर्षयो धर्म्मशास्त्राणि प्रकाशयन्ति। भगवदवतारा एतान् स्वस्वकर्म्मणि नियोजयन्ति देवराट्सहायीधर्म्मद्रुहो घ्नन्ति च। चतुर्दशमन्वन्तरैरेकः ब्रह्मण एकं दिनं भवति तन्मनुष्यमानेनैकः कल्पः। त्रिंशत्कल्पैरेकश्च एको मासो भवति। इति श्रीभागवतमतम्॥ * ॥ अन्यच्च।
"वर्षसप्तशतानि चत्वारि भवेत् कलियुगं क्रमे।
द्वात्रिंशत्या सहस्रेषु सहितान्यपि संख्यया॥
चतुःषष्टिसहस्राणि लक्षाण्यष्टौ च संख्यया।
वर्षाणां द्वापरं प्रोक्तं युगं पूर्व्वनिदर्शनात्॥
तेषां द्वादशलक्षाणि वर्षाणां परिकीर्त्तिता।
षष्ठ्यधिका सहस्रेषु संयुक्तानि भवन्ति हि॥
दश षट्च शतान्याहुर्वर्षाणाञ्च कृतं युगम्।

सप्तर्षेरष्टविंशत्या संयुतान्यपि संख्यया ॥
त्रिचत्वारिंशल्लक्षाणि सहस्राणि च विंशतिः ।
मानुषेण प्रमाणेन भवेत् चातुर्युगं क्रमात् ॥
सप्तर्षिदेव लक्षाणि त्रिंशत्कोट्यस्तथैव च ।
विंशतिश्च सहस्राणि मन्वन्तरमिहोच्यते ॥
चतुर्युगैकसप्तत्या मन्वन्तरमिति श्रुतिः ।
कल्पो मन्वन्तरैरेभिश्चतुर्दशभिरुच्यते ॥
कोट्यो द्वादश षट्त्रिंशल्लक्षाणि तु भवन्ति च ।
अष्टाशीतिसहस्राणि जीवेत् स्वायम्भुवो मनुः ॥"

इति वह्निपुराणम् ॥

अपरञ्च ।

मार्कण्डेय उवाच ।

"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति स्मृतम् ॥
तदेकसप्तनियुगैर्देवानामिह जायते ।
तैश्चतुर्दशभिः कल्पो दिनमेकन्तु वेधसः ॥"

इति कालिकापुराणे २७ अध्यायः ॥

अन्यदपि ।

"मन्वन्तराणयेतानि श्रोतुमिच्छाम्यनुक्रमात् ।
मन्वन्तराधिपांश्चैव शक्रदेवपुरोगमान् ।
भवता कथितानेतान् श्रोतुमिच्छाम्यहं गुरो ! ॥

श्रीपराशर उवाच ।

अतीतानागतानीह यानि मन्वन्तराणि वै ।
तान्यहं भवतः सम्यक् कथयामि समासतः ॥
स्वायम्भुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ।
औत्तमिस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥
षडेते मनवोऽतीताः साम्प्रतन्तु रवेः सुतः ।
वैवस्वतोऽयं तस्येतत् सप्तमं वर्ततेऽन्तरम् ॥
स्वायम्भुवस्तु कथितः कल्पादावन्तरं मया ।
देवाद्यन्तर्भवश्चैव यथावत् कथितो मया ॥ १ ॥
अतः ऊर्द्धं प्रवक्ष्यामि मनोः स्वारोचिषस्य तु ।
मन्वन्तराधिपान् सम्यग्देवर्षीन्तत्सुतांस्तथा ॥
पारावताः सप्तविधा देवाः स्वारोचिषेऽन्तरे ।
विपश्चित्तत्र देवेन्द्रो मैत्रेयासीन्महाबलः ॥
ओजस्तम्भस्तथा प्राणो दत्तोलिर्ऋषभस्तथा ।
विश्वरश्मिश्चरीवांश्च तत्र सप्तर्षयोऽभवन् ॥
चैत्रकिंपुरुषाद्याश्च सुताः स्वारोचिषस्य तु ।
द्वितीयमेतद्व्याख्यातमन्तरं ब्रह्म चोत्तमम् ॥ ८ ॥
तृतीयेऽप्यन्तरे ब्रह्मन्नौत्तमिर्नाम यो मनुः ।
सुधामानन्तथा सत्या; शिवाश्चाथ प्रहर्षणाः ।
वशवर्तिनश्च पञ्चैते गणा द्वादशका; स्मृताः ॥
वसिष्ठतनयाश्चात्र सप्त सप्तर्षयोऽभवन् ।
अजः परशुरिद्याद्याश्चैत्यौत्तमिमनोः सुताः ॥ ३ ॥
तामसस्यान्तरे देवाः स्वरूपा हरयस्तथा ।
सत्याश्च सुधियश्चैव सप्तविंशतिका गणाः ॥
शिविरिन्द्रस्तथा चासीच्छतयज्ञः पलाशजः ।
सप्तर्षयश्च ये तत्र तेषां नामानि मे शृणु ॥
ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्वनक-
स्तथा ।
पीवरश्चर्षयो ह्येते सप्त तत्रापि चान्तरे ॥
नरः ख्यातिः प्रकाशश्च जानुजङ्घादयस्तथा ।

पुत्रास्तु तामसस्यापि राजानः सुमहा-
बलाः ॥ ४ ॥
पञ्चमे चापि मैत्रेय ! रैवतो नाम नामतः ।
मनुर्विभुश्च तत्रेन्द्रो देवाश्चैवान्तरे शृणु ॥
अमिताभा भूतरया वैकुण्ठाश्च सुमेधसः ।
एते देवगणास्तत्र चतुर्दश चतुर्दश ॥
हिरण्यरोमा वेदश्रीरूर्ध्वबाहुस्तथापरः ।
वेदबाहुः सुधामा च पर्जन्यश्च महामुनिः ।
एते सप्तर्षयो विप्र ! तत्रासन् रैवतान्तरे ॥
बलबन्धुः सुसम्भाव्यः सत्यकामाश्च तत्सुताः ।
नरेन्द्राः सुमहावीर्या बभूवुर्मुनिसत्तम ! ॥
स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा ।
प्रियव्रतान्वया ह्येते चत्वारो मनवः स्मृताः ॥
विष्णुमाराध्य तपसा स राजर्षिः प्रियव्रतः ।
मन्वन्तराधिपानेतान् लब्धवानात्मवंशजान् ॥ ५ ॥
षष्ठे मन्वन्तरे चासीच्चाक्षुषाख्यस्तदा मनुः ।
मनोजवस्तथेवेन्द्रो देवानपि निबोध मे ॥
आर्याः प्रसूता भव्याश्च पृथुगाश्च दिवौकसः ।
महानुभावा लेखाश्च पञ्चैतेऽप्यथ का गणाः ॥
सुमेधा विरजाश्चैव हविष्मान्नुत्तमो मधुः ।
अतिनामा सहिष्णुश्च सप्तासन्नित्ति चर्षयः ॥
ऊरुः पूरुः शतद्युम्नप्रमुखाः सुमहाबलाः ।
चाक्षुषस्य मनोः पुत्राः पृथिवीपतयोऽभवन् ॥ ६ ॥
विवस्वतः सुतो विप्र ! श्राद्धदेवो महाद्युतिः ।
मनुः स वर्तते धीमान् साम्प्रतं सप्तमेऽन्तरे ॥
आदित्यवसुरुद्राद्या देवास्त्राच महासुने ! ।
पुरन्दरश्चैवात्र मैत्रेय ! विदितेश्वरः ॥
वसिष्ठः कश्यपोऽथात्रिर्जमदग्निः सगौतमः ।
विश्वामित्रभरद्वाजौ सप्त सप्तर्षयोऽत्र च ॥
इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ।
नरिष्यन्तश्च विख्यातो नाभ उद्दिष्ट एव च ॥
करूषश्च पृषध्रश्च वसुमान् लोकविश्रुतः ।
मनोर्वैवस्वतस्यैते नव पुत्रास्तु धार्मिकाः ॥ ७ ॥
विष्णुशक्तिरनौपम्या मन्वादिष्वखिलेषु च ।
मन्वन्तरेष्वशेषेषु देवस्त्रिनाधितिष्ठति ॥
अंशेन तस्य यज्ञोऽसौ जज्ञे स्वायम्भुवेऽन्तरे ।
आकूत्यां मानसो देव उत्पन्नः प्रथमेऽन्तरे ॥
ततः पुनः सर्व एव देवाः प्राप्ते स्वारोचिषेऽन्तरे ।
तुषिताद्या समुत्पन्ना ह्यजितस्तुषितैः सह ॥
औत्तमेऽन्तरे चापि तुषितस्तु पुनः सर्वे ।
सत्यायामभवन् सत्याः सत्ये; सह सुरोत्तमैः ॥
तामसस्यान्तरे चैव संप्राप्ते पुनरेव हि ।
हर्यायां हरिभिः सार्द्धं हरिरेव बभूव ह ॥
रैवतेऽप्यन्तरे देवाः सम्भूता भानसोऽभवन् ।
सम्भूतो राजसे सार्द्धं देवैर्देवेश्वरो हरिः ॥
चाक्षुषे चान्तरे देवो वैकुण्ठः पुरुषोत्तमः ।
विकुण्ठायाममी जज्ञे वैकुण्ठैर्देवसैः सह ॥
मन्वन्तरे तु संप्राप्ते तथा वैवस्वते द्विजः ।
वामनः कश्यपादित्यामदित्यां संबभूव ह ॥
त्रिभिः क्रमैरिमान् लोकान् जित्वा येन महा-
त्मना ।
पुरन्दराय त्रैलोक्यं दत्तं निष्कण्टकं पुनः ॥

इत्येतानखिलस्यास्य सप्तमन्वन्तरेषु वै ।
सप्तर्षयोऽभवन् विप्र ! याभिः संरक्षिताः प्रजाः ॥
यज्ञादिरिदमखिलं तस्य ब्रह्मा महात्मनः ।
तस्मात् संप्रोच्यते विष्णुर्विष्णोर्धातोः प्रवेशनात् ॥
सर्वे च देवा मनवः समस्ता;
सप्तर्षयो ये मनुसूनवश्च ।
इन्द्रश्च यो यच्चिदंशभूतो
विष्णोरशेषास्तु विभूतयस्ताः ॥"

इति विष्णुपुराणे ३ अंशे मन्वन्तराख्यानं नाम १ अध्यायः ॥ * ॥

श्रीमैत्रेय उवाच ।

प्रोक्तान्येतानि भवता सप्त मन्वन्तराणि वै ।
भविष्याण्यपि विप्रर्षे ! समाख्यातुं त्वमर्हसि ॥

श्रीपराशर उवाच ।

"छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः ।
पूर्वजस्य सवर्णोऽस्य सावर्णिरिति कथ्यते ॥
तस्य मन्वन्तरं ह्येतत् सावर्णिकमथोऽमनु ।
तत्कृणुष्व महाभाग ! भविष्यं कथयामि ते ॥
सावर्णिस्तु मनुर्योऽसौ मैत्रेय ! भविता ततः ।
सुतपामामिताभाश्च मुख्याश्चापि तदा सुराः ॥
तेषां गणास्तु देवानामेकैको विंशकः स्मृतः ।
सप्तर्षीनपि वक्ष्यामि भविष्यानथ सप्त च ॥
दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।
मनुपुत्रश्च तथा व्यासः ऋष्यशृङ्गश्च सप्तमः ॥
विष्णुप्रसादाद्दत्तश्च पातालान्तरगोचरः ।
विरोचनसुतस्त्वीशो बलिरिन्द्रो भविष्यति ॥
विरजाश्चाकरीवांश्च निर्मोकाद्याश्चतापरे ।
सावर्णस्य मनोः पुत्रा भविष्यन्ति नरेश्वराः ॥ ८ ॥
नवमो दक्षसावर्णिर्मैत्रेय ! भविता मनुः ।
पारा मरीचिगर्भाश्च सुधर्माणस्तथा विधा ॥
भविष्यन्ति तदा देवा एकैको द्वादशो गणः ।
तेषामिन्द्रो महावीर्यो भविष्यत्सुनृतो द्विज ! ॥
दशमो द्युतिमान् ह्यथो वसुर्मेधातिथिस्तथा ।
ज्योतिष्मान् सप्तमः सत्यस्तत्रैते च महर्षयः ॥
धृतिकेतुर्दीप्तिकेतुः पञ्चहस्तो निरामयः ।
पृथुश्रवाद्याश्च तथा दशसावर्णिकात्मजाः ॥ ८ ॥
दशमो ब्रह्मसावर्णिर्भविष्यति सुते ! मनुः ।
सुधामानोऽभिरुद्धाश्च शतसंख्यास्तथा सुराः ॥
तेषामिन्द्रश्च भविता शान्तिर्नाम महाबलः ।
सप्तर्षयो भविष्यन्ति ये तदा तान् शृणुष्व च ॥
हविष्मान् सुकृतिः सत्यो ज्योतिर्वान् मूर्तिमांस्तथापरः ।
नाभागो प्रतिमौजाश्च सत्यकेतुश्चतेषु च ॥
सुक्षेत्रश्चोत्तमौजाश्च भूरिषेणादयो दश ।
ब्रह्मसावर्णिपुत्राश्च रक्षिष्यन्ति वसुन्धराम् ॥ १० ॥
एकादशश्च भविता धर्मसावर्णिको मनुः ।
विहङ्गमाः कामगमा निर्माणरतयस्तथा ॥
गणास्तेषां तदा सत्या देवानां हि भविष्यताम् ।
एकैकस्मिंश्चगणके गणास्तेषु च वै दश ॥
निश्चरश्चाग्निवेताश्च वपुष्मान् हरिषादयः ।
हविष्मानन्तरश्चैव भाषाः सप्तर्षयस्तथा ॥
सर्वगः सर्वधर्मा देवानीकादयस्तथा ।

भविष्यन्ति मनोस्तस्य तनयाः पृथिवीश्वराः॥२२॥
यस्तुत्तरस्तु सावर्णिर्भविता द्वादशो मनुः।
ऋतधामा च तस्येन्द्रो भविता प्रभुराट् सुराः।
हरिता लोहिता देवास्तथा सुमनसो द्विज!।
सुकर्म्माणः सुरापाश्च दशका: पञ्च वै गणाः॥
तपस्वी सुतपाश्चैव तपोमूर्त्तिस्तपोरतिः।
तपोधृतिर्दृढिताश्वः सप्तमस्तु तपोधनः॥
देववानुपदेवश्च देवश्रेष्ठादयस्तथा।
भविष्यन्ति मनोस्तस्य मन्त्रार्थौजसः सुता
नृपाः॥ २९॥
अयोदशो रौच्यनामा भविष्यति तृतीये मनुः।
सुत्रामाणः सुकर्म्माणः सुधर्म्माणस्तथापरे॥
अयस्त्रिंशद्गणश्चैव देवानां ये तु वै गणाः।
दिवस्पतिर्महावीर्यस्तेषामिन्द्रो भविष्यति॥
निर्मोहस्तत्त्वदर्शी च निष्प्रकम्पो निरुत्सुकः।
धृतिमानव्ययश्चाग्र्यः सप्तमः सुतपा मुनिः॥
सप्तर्षयश्चिमे तस्य पुत्रानपि निबोध मे।
चित्रसेनविचित्राद्या भविष्यन्ति महौजसः॥१३॥
भौत्यस्तुदशमश्चात्र मैत्रेय! भविता मनुः।
शुचिरिन्द्रः सुरगणाश्चत्र पञ्च प्रकाश्य तान्॥
चाक्षुषश्च पवित्राश्च कनिष्ठा भाजिनस्तथा।
वाताधृताश्च वै देवाः सप्तर्षीणामि मे शृणु॥
अग्निबाहुः शुचिः शुक्रो मागधोऽग्नीध्र एव च।
युक्तस्तथाजितश्चाग्र्यो मनुपुत्रागतः शृणु॥
उरुगम्भीरबुध्याद्या मनोस्तस्य सुता नृपाः।
कथिता मुनिशार्दूल! पालयिष्यन्ति मेदिनीम्॥ १४॥
चतुर्युगान्ते वेदानां लोपते किल विप्लवः।
प्रवर्त्तयन्ति तानेत्य भुवि सप्तर्षयो दिवः॥
क्षते क्षते क्षतेर्विप्र! प्रजेशा जायते मनुः।
देवा यज्ञभुजश्चैते तु यावन्मन्वन्तरन्तु तत्॥
भवन्ति ये मनोः पुत्रा यावन्मन्वन्तरं हि ते।
तदन्वयोद्भवैश्चैव तावद्भूः परिपाल्यते॥
मनुः सप्तर्षयो देवा भूपालाश्च मनोः सुताः।
मन्वन्तरे भवन्त्येते प्रकल्पेष्वधिकारिणः॥
चतुर्हायनैरेतैस्तु गतैर्मन्वन्तरैर्द्विज!।
सहस्रयुगपर्य्यन्तः कल्पो निःशेष उच्यते।
तावत्प्रमाणा च निशा तस्यो भवति सत्तम!॥"
इति विष्णुपुराणे ३ अंशे २ अध्यायः॥*॥
मन्वन्तरश्रवणफलं यथा,—
"श्रुते मन्वन्तरे पूर्व्वे धर्म्ममाप्नोति मानवः।
आरोग्यमायुषे पुंसां श्रुते वैवस्वते बलम्॥
सुखवत् पुत्रपौत्राश्च सावर्णेऽपि श्रुते नृणाम्।
माहात्म्यं ब्रह्मसावर्णेर्धर्म्मसावर्णिके शुभाम्।
मतिमाप्नोति मनुजो रुद्रसावर्णिके जयम्॥
जातिमेधो गुणैर्युक्तो दक्षसावर्णिके श्रुते।
विष्णुतत्त्वस्मरित्वं रौच्यं श्रुत्वा मनूत्तमम्॥
देवप्रासादमाप्नोति भौत्ये मन्वन्तरे श्रुते।

तथाग्निदीप्तिं पुत्रांश्च शुक्रयुक्तानवाप्नुते॥
सर्व्वाण्यशुक्रमाद्यस्तु शृणोति मुनिसत्तम!।
मन्वन्तराणि तस्यापि शृणुष्व फलमुत्तमम्॥
तत्र देवादृषीन् विप्रान्मनूंश्चैवान्वयान् नृपान्।
इन्द्रांश्च श्रुत्वा सर्व्वेभ्यः पापेभ्यो विप्रमुच्यते॥
देवेन्द्रर्षिनृपाद्यार्थे ये तन्मन्वन्तराधिपाः।
ते प्रीयन्ते तथा प्रीताः प्रयच्छन्ति शुभां मतिम्॥
ततः शुभां मतिं प्राप्य लभते कर्म्म तथा शुभम्।
शुभां गतिमवाप्नोति यावदिन्द्राश्चतुर्दश॥
सर्व्वे स्युरुत्तमाः सौम्याः सर्व्वे सौम्यास्तथा
नराः।
भवन्त्यसंशयं श्रुत्वा क्रमान्मन्वन्तरस्थितिम्॥"
इति मार्कण्डेयपुराणे मन्वन्तरानुवर्णनं नामाध्यायः॥

मनुष्टः, पुं, (मनुष्टक:। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।१७॥
मनुष्टकः, पुं, (मनुष्ट एव। मनुष्ट+स्वार्थे कन्।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।१७॥
मनुष्टकः, पुं, (मनुष्टकः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः।२।६।१७॥
मन्थ, गतौ। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) ओष्ठ्यवर्णचतुर्थोपधः। मन्थति। इति दुर्गादासः॥
मम, य, मदीयम्। आमार इति भाषा। यथा,
"ममत्वं मम राज्यस्य राज्याङ्गेष्वखिलेष्वपि।
जानतोऽपि यथाज्ञस्य किमेतन्मुनिसत्तम!॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
"तेषु ममदीयत्वं जानतोऽपि मम यथाज्ञस्य अज्ञस्येव राज्यादिषु ममत्वमेतत् किं किं निबन्धनमित्यर्थः।" इति तट्टीकायां नागोजीभट्टः॥
अस्यार्थयत्वेन षष्ठ्यमाणं ममत्वशब्दे द्रष्टव्यम्। अस्माच्छब्दस्य षष्ठ्येकवचनान्तस्येदं रूपं तत्पदं त्रिषु लिङ्गेषु सदृशम्॥
ममता, स्त्री, (मम+भावे तल्। टाप्।) दर्पः। अभिमानः। इति हेमचन्द्रः। २। २३१॥
ममत्वम्। यथा,—
"तथापि ममतावर्त्ते मोहगर्त्ते निपातिताः॥"
इति देवीमाहात्म्यम्॥
(उतथ्यपत्नी। सा तु दीर्घतमोमाता। यथा, ऋग्वेदे। ६। ६०। ७।
"क्षोमं यमस्य ममतेव मूर्धनि
घृतं न शुचि मतयः पवन्ते॥"
"ममता नाम ब्रह्मवादिनी दीर्घतमसो माता।" इति तद्भाष्ये सायणः॥)
ममतायुक्तः, पुं, (ममतया युक्तः।) क्षपणः। इति शब्दमाला॥ अभिमानादिविशिष्टे, त्रि॥
ममत्वं, क्ली, (मम+भावे त्व।) मदीयत्वम्। यथा, मार्कण्डेयपुराणे।
"दुःखायतनभूतो हि ममत्वाज्जन्तवो यतः॥"
क्षेदः। यथा,—
"सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टचेतनः।"
इति देवीमाहात्म्यम्॥

"ममत्वेन क्षेत्रेण आत्मनो चेतना मतिर्यस्य।
ममेति षष्ठ्यन्तरूपमव्ययं तस्य भावः ममत्वम्।"
इति तट्टीकायां नागोजीभट्टः॥
ममापत्यजः, पुं, (मयति बध्नाति जनानिति। मय बन्धने+"मयतेर्यलोपो मश्चापतुट् चाजः।" उणा० ५। ५०। इति आजप्रत्ययः। धातोर्यलोपः मकारश्चान्तस्य प्रत्ययस्यापतुट्कागमश्च।) विषयः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
मय, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ, मयते। इति दुर्गादासः॥
मयः, पुं, (मयते इतं गच्छतीति। मय्+यच्चात्यच्।) उदकः। इत्यमरः।१।१०।५॥ अमरः। दानवविशेषः। स तु दैत्यानां शिल्पी। इति मेदिनी। ये, ७७॥ (अयं हि युधिष्ठिरस्य राज्ञः सभां विरचितवान्। यथा, शिशुपालवधे। २। ५०।
"उपनीय विष्णुसरसो मयेन या
मणिदारुचारु किल वार्षपर्व्वणम्।
विदधेऽवधूतसुरसद्मसम्पदं
सनुपासदत् सपदि संसदं स ताम्॥")
तस्य सन्तानपत्यानि यथा, वह्निपुराणे।
"मयस्य जाता दैमायां पुत्राः सप्त महाबलाः।
मायावी दुन्दुभिश्चैव सुनश्च महिषस्तथा।
वालिका वज्रकन्या च कन्या मन्दोदरी तथा॥"
(सुखम्। चि, गन्ता। यथा, वाजसनेयसंहितायाम्। २२। १८।
"द्रयोऽस्त्रयोऽसि मयोऽस्त्र्यसि।" "मयोऽसि मयते गच्छति मयः मय गतौ पचाद्यच्। यद्वा मय इति सुखनाम सुखरूपोऽसि।" इति तद्भाष्ये महीधरः।)
मयट्, पुं, (मयते गच्छत्यनेति। मय+"ग्रुकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) लक्षणयुक्तहर्म्यः। इति हारावली॥ इलच्प्रत्ययेन तद्रूपार्थे प्राचुर्य्यार्थे च मयट् इति प्रत्ययो भवति॥
मयष्टकः, पुं, (मयुष्टकः। पृषोदरादित्वात् साधुः।) वनमुद्गः। इत्यमरटीकायां भरतः॥
मया, स्त्री, (मयते गच्छति रोगोऽनया। मय्+कः। स्त्रियां टाप्।) चिकित्सा। इति शब्दचन्द्रिका॥ त्रि, तृतीयैकवचनान्ताज्जश्शब्दस्य रूपम्॥ (यथा, हितोपदेशे। १। २२१।
"इहैव हरति मयेव तानि
अज्ञानराशीव दयान्वितश्च॥")
मयी, स्त्री, (मय+"मयो मेदादिति।" ४। १। ४८। इति ङीष्।) मयस्य स्त्रीजातिः। उद्भौ। इति आकरग्रन्थः॥
मयुः, पुं, (मयट् गतौ+व्याप्त्यादित्वात् कुः। इत्यमरटीकायां रघुनाथः॥ यद्वा, मिनोति सुखञ्च करोतीति। मि+"अन्येभ्योऽपि दृश्यन्ते इति मिमसृजिभ्य उः।" उणा०१।७। इति उः।

मयूरः

किन्नरः। इत्यमरः। २। १। ७४॥ खगः। इति मेदिनी। मे, ४२॥ (यथा, वाजसनेय-संहितायाम्। १३। ४०।

"मयुं पशुं मेधमग्ने! जुषस्व
तेन चिन्वानस्तन्वो निषीद।"

"मयुं पशुं तुरङ्गवदनं किम्पुरुषं पशुं मयुं छागलकं वा जुषस्व।" इति तद्भाष्ये महीधरः॥)

मयूराजः, पुं, (मयूनां किन्नराणां राजा। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कुबेरः। इति शब्दरत्नावली॥

मयूरकः, पुं, (मयून् खगान् खादति प्रीणयतीति। खद्+अच्। वत्वम्।) वनस्पतिः। इत्यमर-टीका॥

मयूखः, पुं, (मायया गगनं प्रमाणयन् ओखति गच्छतीति। पृषोदरादिः। इत्यमरटीकायां रघुनाथः। यद्वा, मातिं परिमातीव। मा+"माङ उखो मय च।" उणा० ५। २५। इति उखः। मयादेशश्च।) किरणः। (यथा, महाभारते। ६। ३८। ४१।

"यद्वज्जयद्रथवधा राजन्! मयूखानिव भास्करः॥")

दीप्तिः। ज्वाला। इत्यमरः। १। ४। ३३॥ (यथा, रघौ। २। ७६।

"अथान्धकारं गिरिगह्वराणां
इंद्वामयूखैः शकलानि कुर्वन्।
भूयः स भूतेश्वरपार्श्ववर्त्ती
विविक्तिहस्यार्थपतिं बभाषे॥")

शोभा। इति मेदिनी। खे, ११॥ कीलः। इत्यजयः॥ (पर्व्वतः। यथा, ऋग्वेदे। ७।६६।३।

"दाधर्ष पृथिवीमभितो मयूखैः॥"

"मयूखैः पर्व्वतैः।" इति तद्भाष्ये सायणः॥")

मयूरः, पुं, (मयुरिव राति शब्दायते इति। रा+कः। पृषोदरादित्वात् साधुः। यद्वा, मीनाति क्षिपति सर्पाणीति। मी+"मीनातेरूरन्।" उणा० १।६८। इति ऊरन्।) खनामख्यातपक्षि-विशेषः। तत्पर्य्यायः। बर्हिणः २ बर्ही ३ नीलकण्ठः ४ सुभद्रभुक् ५ शिखावलः ६ शिखी ७ केकी ८ मेघनादानुलासी ९। इत्यमरः। २। ५।३०॥ प्रचलाकी १० चन्द्रकी ११ सितापाङ्गः १२। इति शब्दरत्नावली॥ ध्वजी १३ मेघानन्दी १४ कलापी १५ शिखण्डी १६ चित्रपिच्छिकः १७ सुभगभोगी १८ मेघनादानुलासकः १९। तस्य प्रच्छस्य विचित्रताकारणं यथा,—

"प्रविष्टायां पुलाग्न्यां वेदवत्यां स रावणः।
पुष्पकस्थः समारुह्य परिचक्राम मेदिनीम्॥
ततो मरुत्तं नृपतिं यजन्तं सह दैवतैः।
उशीरबीजमास्राव्य ददर्श स तु रावणः॥
संवर्त्तो नाम ब्रह्मर्षिः साम्नाद्भाता बृहस्पतेः।
याजयामास धर्म्मज्ञः सर्व्वैर्देवगणैर्वृतः॥
ब्रह्मा देवास्तु तद्यज्ञो वरदानेन दुर्जयम्।
तिर्य्यग्योनिं समाविश्य तस्य धर्म्मभीरवः॥

इन्द्रो मयूरः संवृत्तो धर्म्मराजस्तु वायसः।
लक्षलाभो धनाध्यक्षो हंसश्च वरुणोऽभवत्॥" इत्यादि॥

"इत्याकर्ण्य वचो दिव्यं मयूरं नीलबर्हिणम्।
प्रीतोऽस्मि तव धर्म्मज्ञ! सुखमाह्नि न ते भयम्॥
इदं नेत्रसहस्रन्तु वपुषस्तेऽद्य भविष्यति।
वर्षमात्रे मयि गते प्राप्स्यसे प्रीतिलक्षणम्॥
एवमिन्द्रो वरं प्रादान्मयूरस्य सुरेश्वरः।
नीलाः किल पुरा बर्हा मयूराणां नराधिप!।
सुराधिपादरं प्राप्य गताः सर्व्वे विचित्रताम्॥"

इत्यन्नं वाल्मीकीये रामायणे उत्तरकाण्डे १८ सर्गः॥ अस्य मांसगुणाः।

"मयूरः शोभनेत्राग्निमेधावर्णस्वरायुषाम्।
हितो बल्यो गुरुश्चोष्णो वातघ्नः शुक्रमांसदः॥
हेमन्तकाले शिशिरे वसन्ते
हेयं हि मायूरमुपाग्नि मांसम्।
उष्णो हि वह्नौ विषभोजनेच
वर्षाशरद्ग्रीष्मसुखेष्वपथ्यः॥"

इति राजनिर्घण्टः॥

एतन्मांसमेरण्डतैलभृष्टं विषतुल्यम्। इति राजवल्लभः॥*॥ मयूरशिखाद्युपः। तत्पर्य्यायः। खराष्टा २ कारवी ३ दीप्यः ४ लोचमस्तकः ५। इत्यमरः। २। ४। २११॥ अपामार्गः। इति मेदिनी। रे, १६६॥ (यथा, सुश्रुते चिकित्सितस्थाने २३ अः। "पिप्पलीपिप्पलीमूलं चव्यचित्रकमयूरवर्षाभूसिद्धं वा क्षीरं पिबेत्॥" असुरविशेषः। यथा, महाभारते। १।६७।१६६।

"मयूर इति विख्यातः श्रीमान् यस्तु महासुरः।
स विश्व इति विख्यातो बभूव पृथिवीपतिः॥"

सुमेरोरुत्तरवर्त्ती पर्व्वतविशेषः। यथा, मार्कण्डेये। ५५। १६।

"खर्णशृङ्गो ज्ञातशृङ्गी पुष्पको मेघपर्व्वतः।
विरजाश्चो वराहाद्रिर्मयूरो दारुशिखश्च॥"

कविविशेषः। स च मयूरभट्ट इति लोके प्रसिद्धः। अयं खलु बाणभट्टस्य श्वशुरः उज्जयिन्यां वृद्धभोजमहीपतेः सभायामासीदिति मानतुङ्गाचार्य्यप्रणीतभक्तामरस्तोत्रटीकाप्रारम्भे मेरुतुङ्गप्रणीतप्रबन्धचिन्तामणौ च समुपलभ्यते। प्रबन्धचिन्तामणौ बाणभट्टो मयूरस्य भगिनीपतिरासीदित्युक्तमस्ति। अथ च।

"अहो प्रभावो वाग्देव्या यन्मातङ्गदिवाकरः।
श्रीहर्षस्याभवत् सख्यः समो बाणमयूरयोः॥"

इति प्राङ्नैषधचरितादिप्रसिद्धराजशेखरपद्येनापि बाणमयूरयोः समकालत्वं प्रतीयते।

अयं हि कुष्ठरोगग्रस्तः सूर्य्यमाराधयामासुः सूर्य्यशतकं नाम स्तोत्रमेकं प्रणीय ततः सम्यक् निष्कृतिमवाप। सूर्य्यशतकस्यादिमः श्लोको यथा,—

"श्लोका लोकस्य भूत्वै शतमिति रचिता
श्रीमयूरेण भक्त्या

युक्तश्चेतान् पठेद् यः सकलरुपि पुमान् सर्व्वमापेदिवित्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुः-प्रकर्षं
विद्यामैश्वर्य्यमर्थं सुखमपि लभते सोऽत्र सूर्य्य-प्रसादात्॥")

मयूरकं, क्ली, (मयूरः मयूरस्यौषध प्रतिकृतिरिति। मयूर+"इवे प्रतिकृतौ।" ५। ३। ९६। इति कन्। अस्य मयूरकाक्षकाग्निसुत्थयुतिलाक्षणमस्तम्।) अञ्जनविशेषः। तुतिया इति भाषा। तत्पर्य्यायः। तुत्थाञ्जनम् २ शिखिग्रीवम् ३ वितुन्नकम् ४। इत्यमरः। २। ६। १०१॥ (यथा, भावप्रकाशे। १।

"तुत्थं वितुन्नकं प्राहुः शिखिग्रीवं मयूरकम्॥")

मयूरकः, पुं, (मयूर+स्वार्थे कन्।) अपामार्गः। इत्यमरः। २। ४। १०१॥ (यथा, सुश्रुते सूत्रस्थाने। ३६। १६।

"मयूरको राजवृक्षो निम्बः कोशाम्रको तिलाः॥")

तुत्थकम्। (स्वार्थे कन्।) मयूरः। इति विश्वः॥ मयूरशिखा। इति जटाधरः॥

मयूरग्रीवकं, क्ली, (मयूरस्य ग्रीवायाः कन्धरस्य वर्ण इव वर्णो यस्य। बहुव्रीहौ कन्। ह्रस्वश्च।) तुत्थम्। इति राजनिर्घण्टः॥

मयूरचटकः, पुं, (मयूर इव चटकः।) मद्गुकुक्कुटः। इति शब्दरत्नावली। ८०॥

मयूरचूडं, क्ली, (मयूरस्येव चूडा अग्रभागो यस्य तत्।) खौषधिकम्। इति राजनिर्घण्टः॥

मयूरचूडा, स्त्री, (मयूरस्य चूडेव चूडा शिखा यस्याः।) मयूरशिखा। इति वैद्यकम्॥

मयूरजङ्घः, पुं, (मयूरस्य जङ्घेव जङ्घा यस्य।) श्लोणाकः। इति राजनिर्घण्टः॥

मयूरतुत्थं, क्ली, (मयूर इव तुत्थम्। मयूरवर्ण-त्वादस्य तथात्वम्।) तुत्थम्। इति राज-निर्घण्टः॥

मयूरपदकं, क्ली, (मयूरस्येव पदकं स्थानम्।) नखाघातः। यथा, शब्दमालायाम्।

"तथावकेरकोलो च नखाघाते तु सूचकम्।
मयूरपदकं व्याघ्रनखकोत्पलपत्रके॥"

मयूरविदला, स्त्री, (मयूराः विशेषेण दलति खण्डयादिशोभया तिरस्करोतीति। वि+दल+अच्। स्त्रियां टाप्।) अम्लता। इति वैद्यकम्॥

मयूरशिखा, स्त्री, (मयूरस्य शिखेव शिखा अग्रं यस्याः।) खनामख्यातखुपविशेषः। तत्पर्य्यायः। बर्हिचूडा २ शिखिनी ३ शिखावती ४ सुशिखा ५ शिखा ६ शिखावला ७ केकिशिखा ८। अस्या गुणाः। रसे खादुत्वम्। सूत्रकृच्छ्र-वातमेहादिदोषनाशित्वम्। वयसः स्तम्भकत्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मयूराख्या शिखा प्रोक्ता सङ्ग्राह्यङ्घ्रिर्नखच्छदा।
नीलकण्ठशिखा ज्ञेया पित्तश्लेष्मातिसारजित्॥"

इति भावप्रकाशः॥

मयूरिका, स्त्री. (मयूरवत् वर्णोऽस्त्यस्याः । मयूर + ठन् । टाप् ।) चमरडा । इति राजनिर्घण्टः ॥

मयूरी, स्त्री, (मयूर + स्त्रियां ङीप् ।) मयूरस्त्रीजातिः । इति भरतः । किन्नादिवंशजश्च ॥ (यथा, उत्तररामचरिते । १ । ८ ।

"किमयमुतोऽपि निजदे कुतश्चनेऽपि त्वमीदृशी ।
त्वयविनोर्मयूरीव चकितोत्कण्ठिता स्थिता ॥")

मरकः, पुं, (म्रियन्ते जना यस्मात् । म्र + अपादाने अप् । ततः स्वार्थे संज्ञायां वा कन् । यद्वा, म्र + भावे अप् । मरो मरणमिति शब्देन कायति शब्दायते इति । के + कः ।) मारिः । इति हेमचन्द्रः । २ । २६८ ॥ मड्क इति भाषा । तत्पर्य्यायः । मारी २ मारकः ३ । इति जटाधरः ॥ (यथा, कामन्दकीयनीतिसारे । १३ । २० ।

"क्षुताग्नी जलं व्याधिर्दुर्भिक्षो मरकस्तथा ।
इति पञ्चविधं देवं व्यसनं मानुषं परम् ॥")

तस्य कारणादि यथा,—

"यावन्नार्णवजलमुर्व्वि घनुधि भसि मज्जथे
वाह्नि नार्यां
तावद्भिक्षमरीढ़ा भवति च मरकं संश्रयं
यान्ति लोकाः ।
हाहाकारा तथोर्व्वी मनुजभयकरी फेरवरावैश्च
भीमैः
शून्याभा भवेत्पुनरपतिरहिता भूरिकङ्काल-
माला ॥

यत्नं करोति रविजो धरणीसुतो वा
मज्जन्तुलग्नमपरेषतिमैत्यमित्र ।
क्षुद्रोपभङ्गपतनानि च सैनिकानां
सर्व्वत्र लोकमरकं जलधौतदेशः ॥

मांसास्थीनि समादाय शृङ्गाणादृश्यधायवाः ।
या शृगालोऽथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति गृहादौ च शृङ्गाणां सा मही
भवेत् ।
क्षौरेण क्षयते लोकः परचक्रसमागमः ॥
संग्रामश्च महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रदृश्यन्ते तस्य देशस्य विप्लवः ॥"

इति ज्योतिस्तत्त्वम् ॥

अपि च ।

"वाहैश्चाग्निभयं गोरिकरूपे च युद्धानि ।
दूर्व्वाकाशग्रामे क्षारिर्द्रे चापि निर्दिशेत्
मरकम् ॥"

इति यन्त्रप्रकरणे तिथ्यादितत्त्वम् ॥

अन्यच्च ।

"रवाविन्दौ मघारूढ़ा शून्यागारे तुरङ्गमे ।
नौकया शुक्रशुक्राभ्यां दोलया बुधवासरे ॥
गजे च जलदा देवी क्षुभङ्गस्तुरङ्गमे ।
नौकायां शृङ्गहन्त्रिः स्यात् दोलायां मरकं
भवेत् ॥"

इति पत्रिकाप्रवेशप्रकरणे ज्योतिषम् ॥ * ॥

अस्य शान्तिः । देवीभागवतोक्तपाठः । षट्कभैरवस्तवपाठः । तुलसी विष्णुपूजनञ्च । यथा,

"उपसर्गानशेषांस्तु महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥"

इति मार्कण्डेयपुराणम् ॥

"मारीभये राजभये तथा चौराग्निजे भये ।
औत्पातिके महाघोरे तथा दुःखप्रदर्शने ।
वन्धने च तथा घोरे पठेत् स्तोत्रं समाहितः ॥"

इति विश्वसारोद्धारतन्त्रे आपदुद्धारकथ्यः ॥

"ग्रहपीड़ाः शान्तिकेन किं क्षिप्यन्ति नरा
द्विज ! ॥
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्तान्यशेषतः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो
हरिः ॥"

अथ ब्रह्मपुराणोक्तो मन्त्रः ।

"ॐ नमस्ते वसुरूपाय विष्णवे परमात्मने
स्वाहेति ।"

इति ज्योतिस्तत्त्वम् ॥

(जातिविशेषः । यथा, मार्कण्डेये । ५८ । ५१ ।

"दार्व्वादा मरकाश्चैव कुरटाश्चारदारकाः ।
एकपादाः खशा घोषाः खर्गभोजाश्च-
टाकाः ॥")

मरकतं, क्ली, (मरकं मारिभयं तरत्यनेन । तॄ + कः । यद्वा, मरकं मरणं तनोतीति । लोभाच्चरजनमादत्य तस्मिन् रत्ने प्रवर्त्तते इति मरकतमिति स्वरन्नीति वृद्धाः । इत्यमरटीकायां भरतः ।) हरिद्वर्णमणिविशेषः । पान्ना इति भाषा ॥ तस्य देवता बुधः । इति ज्योतिषम् ॥ तत्पर्य्यायः । गारुत्मतम् २ अक्षगर्भम् ३ हरिन्मणिः ४ । इत्यमरः । २ । ६ । ६२ ॥ मरकतम् ५ राजनीलम् ६ गरुड़ाङ्कितम् ७ । इति शब्दरत्नावली ॥ दौहित्रीयम् ८ सौपर्णम् ९ गरुड़ोद्गीर्णम् १० बुधरत्नम् ११ अक्षगर्भजम् १२ गरलारिः १३ वापवीजम् १४ गारुड़म् १५ । कुत्रचित् पुस्तके गरुड़ोद्गीर्णस्थाने गरुड़ोत्तीर्णं वापवीजस्थाने वाप्रवालं इति च पाठः ॥ अस्य गुणाः । विषघ्नत्वम् । नयनीतलत्वम् । रसे मधुरत्वम् । आमपित्तहरत्वम् । वयस्त्वम् । पुष्टिदत्वम् । भूतनाशकत्वञ्च ॥ * ॥ अस्य लक्षणम् ।

"लक्ष्यञ्च गुरु सच्छायं स्निग्धं गात्रञ्च मार्द्दवसमेतम् ।
अक्षगर्भं वसुरत्नं शुद्धारी मरकतं शुभं विभ्रयात् ॥"

तस्य कृत्रिमत्वम् ।

"शुकेरिजकलिलरूपं मलिनं लघुहीनकान्ति कल्माषम् ।
आसयुतं विज्ञेयं मरकतममरोऽपि गोपयेत् ॥" * ॥

तस्य परीक्षा ।

"यच्छैवालग्निस्निग्धाहतहरिताभेन बाधच्छदैः
खद्योतेन च बालशीरवपुषा शैरीषपुष्पेण च ।
छायाभिः वमतां दधाति तदिदं निर्दिष्टमष्टालकं
जात्यं यत्तपनातपेऽपरितो गात्रात्तमं रञ्जयेत् ॥

इति राजनिर्घण्टः ॥ * ॥

अन्यान्तरे तस्य परीक्षादि यथा,—

ईश्वर उवाच ।

"दानवाधिपतेः पित्तमादाय भुजगाधिपः ।
द्विधा कुर्व्वन्निव क्षोमं सत्वरं वासुकिर्ययौ ॥
स तदा क्षीरोदतप्रभादीप्ते नभोऽम्बुधौ ।
राजतः स महानेकः खञ्जरीटुरिवाबभौ ॥
ततः पक्षनिपातेन संक्षरन्निव रोदसी ।
गरुत्मान् पन्नगेन्द्रस्य प्रहर्त्तुमुपचक्रमे ॥
सहसैव सुमोच ततः फणीन्द्रः
सुरसाद्युक्ततुरङ्गपादपाथाम् ।
जलिकावगन्धवासितार्थां
वरमाक्षिकगिरेरुपत्यकायाम् ॥
तस्य प्रपातसमनन्तरकालमेव
तद्वद्वराजयमतीत्य रमासमीपे ।
स्थानं क्षितेरुपरयोगिधितीरवेलं
ततप्रत्ययान्मरकताकरतां जगाम ॥
तत्रैव किञ्चित् पततस्तु पित्ता
दुत्पत्य जग्राह ततो गरुत्मान् ।
मूर्च्छापरीतः सहसैव धोवा-
रन्ध्रद्वयेन प्रसुमोच सर्व्वम् ॥
तत्राकठोरमुकवक्षगिरीवपुष्प-
खद्योतपृष्ठचरशाद्वलशैवलानाम् ।
कङ्कारशल्ककसुजङ्गसुजाच्च पत्र-
प्रान्तत्विषो मरकताः शुभदा भवन्ति ॥
तदृग्यजोगोत्रसुजा विसृष्टं
पपात पित्तं दिलिजाधिपस्य ।
तस्याकरत्वातितरां स देशो
दुःखोपलभ्यश्च शुचेश्च युक्तः ॥

तत्किञ्चरकतस्थाने यत्किञ्चिदुपजायते ।
तत्सर्व्वं विषरोगाणां प्रशमाय प्रकीर्त्तितं ॥
सर्व्वमन्त्रौषधिगणैर्यत्न शुक्लं चिकित्सितुम् ।
महाहिदंष्ट्राप्रभवं विषमन्त्रेण शाम्यति ॥
अन्यमप्याकरे तस्य यद्दोषैरुपवर्ण्यितम् ।
जायते तत् पवित्राणामुत्तमं परिकीर्त्तितम् ॥
अत्यन्तहरितवर्णं कोमलमर्द्धेन्दुभेदजटिलञ्च
काञ्चनपूर्णस्थाल्याः पूर्णमिव लक्षयते यच्च ॥
युक्तं संस्थानशुद्धैः समरागं गौरवेण विहीनम्
सवितुः करसंस्पर्शात्स्फुरति सर्व्वाअं दीप्त्या
हिला च हरितभावं यस्यान्तर्विनिहिता
भवेद्दीप्तिः ।
अचिरप्रभाप्रभाहतनवशाद्वलसन्निभा भाति ।
यच्च मनसः प्रसादं विदधाति विरोचितमति
माज्यम् ।
तन्मरकतं महागुणमिति रत्नविदां मनोदृष्टिः
यस्तु भास्करसंज्ञातः कृष्णवक्त्रो महाभयदः
रक्तवेदालपादैस्तु महामरकतं हि तत् ॥
चतुर्धा जातिभेदस्तु महामरकते मतौ ।
छायाभेदेन विज्ञेया चतुर्वर्णस्य लक्षणैः ।" * ।

अथ छाया।
"भवेद्दृढविधच्छाया मणेर्मरकतस्य च।
बर्हिपृच्छसमाभासा चाषपक्षसमापरा॥
हरिकोकनिभा चान्या तथा ग्रैवालसन्निभा।
खद्योतषट्पदसंकाशा बालकीरसमा तथा॥
नवग्राद्दलसच्छाया शिरीषकुसुमोपमा।
एवमष्टौ समाख्याताश्छाया मरकताश्रयाः॥
छायाभिर्यैस्तमेताभिः श्रेष्ठं मरकतं भवेत्।
पद्मरागगतः स्वच्छो जलबिन्दुर्यथा भवेत्।
तथा मरकतच्छाया श्यामला हरितामला॥"
अथ दोषगुणाः।
"दोषाः सप्त भवन्त्यस्य गुणाः पञ्चविधो मतः।
स्निग्धं रूक्षमिति त्यक्तं याधिक्तस्य धृते भवेत्॥
विस्फोटः स्यात् सपिड़के तच्च ग्रस्तक्षतिर्भवेत्।
सपाषाणे भवेद्दिनाशो मरकते धृते॥
विच्छायं मरकतं प्राहुर्वार्य्यते न तु धार्य्यते।
ग्रकारं कर्करायुक्तं पृक्तगोकपदं धृतम्॥
अतरं कान्तिहीनन्तु दंष्ट्रिदन्तिभयावहम्।
कुल्माषवर्णं धवलं ततो मृत्युभयं भवेत्॥
इति दोषाः समाख्याता वर्ण्यन्तेऽथ महा-
गुणाः।
निर्मलं कथितं स्वच्छं गुरु स्यादुगुणसायुतम्॥
स्निग्धं रूक्षविनिर्मुक्तमरजस्कमरेखकम्।
सुरागं रागवद्युक्तं मणेः पञ्च गुणा मताः॥
एतैर्युक्तं मरकतं सर्व्वपापभयापहम्।
गजवाजिरथान्दत्त्वा विप्रेभ्यो विक्तराहि मे॥
तत् फलं समवाप्नोति गृहे मरकते धृते।
धनधान्यादिकरणे तथा सैन्यक्रियाविधौ॥
विषरोगोपशमने कर्म्मस्वाथर्व्वणेषु च।
ग्रस्यते मुनिभिर्यस्मादयं मरकतो मणिः॥"
तथा च।
"स्वच्छता गुरुता कान्तिः स्निग्धत्वं पित्तकार
शमम्।
हरिद्विरङ्गकत्वेव सप्त मरकते गुणाः॥"
अथ कृत्रिमाकृत्रिमपरीक्षा।
"कृत्रिमत्वं सहजत्वं दृश्यते स्फटिकैः क्वचित्।
घर्षयेत् प्रस्तरे वज्रकाचपक्षसादिपद्यते॥
लेखयेल्लौहदण्डेन चूर्णनाथ विलेपयेत्।
सहजः कान्तिमाप्नोति कृत्रिमो मलिनायते॥
वर्णस्यातिबहुत्वात् यस्मान्नः स्वच्छकिरण-
परिधानम्।
काञ्चस्निग्धविमुक्तं कोमलत्वेप्रभादिसमकान्ति॥
चलोज्ज्वलया कान्त्या साक्षाकारं विभासया
भाति।
तदपि गुणवत्संज्ञामाप्नोति हि याङ्गी पूर्व्वम्॥
वज्रजकठोरं मलिनं रूक्षं पाषाणकर्करोपेतम्।
दिग्धच्छ शिलाजतुना मरकतमेवंविधं विगुणम्॥
यत्सन्निधिस्थितं रत्नमन्यन्मरकताश्रयेत्।
श्रेयस्कामेन तद्धार्य्यं क्रेतव्यं वा कथञ्चन॥
भल्लातकपुत्रिका च तद्वर्णसमयोगतः।
मणेर्मरकतस्येते लक्षणीया विजातयः॥
चौमेव वासवा दृष्टा दीप्तिं जनति पुत्रिका।
लाघवेनैव काचस्य ग्रहणं कर्त्तुं विभावना॥
कस्यचिदनेकरूपैर्मरकतमनुगच्छतोऽपि गुण-
वर्णैः।
भल्लातकस्य निर्लेपस्तैर्वेग्रह्यसुपैति वर्णश्च॥
वल्लाणि सुक्ताः सन्त्यन्ये ये च केचिज्जातयः।
तेषामप्रतिबद्धानां भा भवत्यूर्द्धगामिनी॥
कदुत्थाश्चैव केषाञ्चित्कथञ्चिदुपजायते।
निर्यंगालोक्यमानानां सद्यश्चैव प्रणश्यति॥
स्नानाचमनजप्येषु रत्नाभरणक्रियाविधौ।
दर्द्दुरगोहिरण्यानि कुर्व्वद्भिः साधनानि च॥
दैवपित्र्यातिथेयेषु गुरुसंपूजनेषु च।
वाध्यमानेषु विघ्नैर्दोषजातैर्विधोद्भवैः॥
दोषैर्हीनं गुणैर्युक्तं काञ्चनप्रतियोजितम्।
संग्रामे विचरद्भिश्च धार्य्यं मरकतं बुधैः॥"
अथ मूल्यम्।
"तुलया पद्मरागस्य यन्मूल्यमुपजायते।
लभतेऽभ्यधिकं तस्मात् गुणैर्मरकतं स्फुटम्॥
तथा च पद्मरागाणां दोषैर्मूल्यं प्रलीयते।
ततोऽभ्याप्यधिका हानिर्दोषैर्मरकते भवेत्॥
गुणपिच्छसमायुक्ते हरितश्यामभास्वरे।
मूल्यं द्वादशकं प्रोक्तं जातिभेदेन सूरिभिः॥
यवैकेन घृतं पञ्चसप्तकं हितये यवे।
त्रिभिस्त्रैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम्॥"
इति गारुडे मरकतपरीक्षा ७१ अध्यायः
युक्तिकल्पतरुश्च॥
मरकतपर्णी, स्त्री, (मरकतमिव पर्णं यस्याः।
ङीष्। नडवर्णसादृश्यादेवास्यास्तथात्वम्।)
पाचौ। इति राजनिर्घण्टः॥
मरकी, स्त्री, (मरकतम्। पृषोदरादित्वात्
साधुः।) मरकतमणिः। इति शब्दरत्नावली॥
मरङ्ग, क्ली, (म्रियतेऽनेनेति। मृ+करणे घञ्।)
वत्सनाभः। इति राजनिर्घण्टः॥ (भावे घञ्।)
विजातीयात्ममनःसंयोगध्वंसः। इति न्याय-
मतम्॥ मृत्युपर्य्यायः। पचता २ कालधर्म्मः ३
हृद्दाल्लः ४ प्रलयः ५ अत्ययः ६ अन्तः ७
नाशः ८ मृत्युः ९ निधनम् १० इत्यमरः।
२। ८। ११६॥ भूमिलाभः ११ निपातः १२
ध्यात्यिकम् १३ मृतिः १४। इति शब्दरत्ना-
वली॥ कौशिश्रेयः १५ महानिद्रा १६ महा-
प्रयाणम्। १७ संज्ञानम् १८। इति जटाधरः॥
मरणदुःखाद्याह।
"मरणे यानि दुःखानि प्राप्नोति मृत्यु तान्यपि।
शृणुष्वावहित्तिश्चैव यावो वेपथुना नरः॥
सुहृन्मित्रैः परवशो सुहृन्मित्रबलान्वितः।
हिरण्यधान्यतनयभार्य्याभृत्यगृहादिषु।
मृते कथं भविष्यन्तीत्यतीवममताकुलः॥
मर्म्मभिर्द्धिर्मशारोगैः क्रकचैरिव दारणैः।
शरैरिवान्तकस्योग्रैश्छिद्यमानासुबन्धनः॥
विवर्णमानसाराच्छिन्नस्रस्तपादं सुदुः क्षिपन्।
संशुष्यमाणतालोष्ठपुटो घुरघुरायते॥
निरुद्धकण्ठो दीर्घैश्च दहनश्वासपीडितः।
तापेन महता याग्रस्तृषा चार्त्तस्तथा क्षुधा॥
क्लेशादुत्क्रान्तिमाप्नोति यान्यकिङ्करपीडितः।
ततश्च यातनादेहं क्लेशेन प्रतिपद्यते।
एतान्यन्यानि घोराणि दुःखानि मरणे
नृणाम्॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः॥ * ॥
सुहृन्मरणमाशङ्कानिषेधो यथा,—
"अग्नौ न क्षिपेदस्थि नाङ्गैः प्रग्रमयेत्तथा।
सुहृन्मरणमार्त्तिं वा न स्वयं आवयेत् परान्॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥*॥
अथ धार्म्मिकमरणलक्षणम्।
सोमशर्म्मोवाच।
"धन्यो हि कीदृशो मृत्युर्जन्म चैव वदस्व मे।
उभयोर्लक्षणं काले! तमेवं हि वदस्व मे॥
सुमनोवाच।
सत्यं शौचं क्षमा शान्तिस्तीर्थं पुण्यादिकं तथा।
धर्म्मश्च पालितं येन तस्य मृत्युं वदाम्यहम्॥
रोगो न जायते तस्य न च पीड़ा कलेवरे।
न भ्रमो वै न च ग्लानिर्न च स्वेदो भ्रमस्तथा॥
दिव्यरूपधरा भूत्वा गन्धर्व्वा आप्सराश्चथा।
वेदपाठसमायुक्ता गतिज्ञानविशारदाः॥
तस्य पार्श्वं समायान्ति स्तुतिं कुर्व्वन्ति चानु-
क्षणम्।
सुप्तो हि आसने युक्तो देवपूजारतः किल॥
तीर्थञ्च लभते प्राज्ञः स्नानार्थं धर्म्मतत्परः।
क्षमागारे च गोष्ठे च देवतायतनेषु च॥
आरामे च तड़ागे च यज्ञाश्वत्थो वटस्तथा।
ब्रह्मस्थं समाश्रित्य श्रीवृक्षन्तु तथा पुनः॥
अश्वत्थानं समाश्रित्य गजस्थानं ततो नरः।
अशोकं चूतवृक्षञ्च समाश्रित्य यदा स्थितः॥
सन्निधिं ब्राह्मणानाञ्च राजवेश्मगतोऽपि वा।
रणभूमिं समाश्रित्य पुरा यत्र हता भटाः॥
हत्युत्थानानि पुण्यानि केवलं धर्म्मकारणम्।
गोग्रहन्तु समं प्राप्य तथा समरमाकुटम्॥
शुद्धधर्म्मकरो नित्यं धर्म्मतो धर्म्मवत्सलः।
एवं स्थानं समाप्नोति यदा मृत्यु समाश्रितः॥
मातरं पश्यते पुण्यं पितरञ्च नरोत्तमम्।
भ्रातरं श्रेयसा युक्तमन्यं स्वजनबान्धवम्॥
बन्धिजनं तथा पुण्यं स्तूयमानं पुनः पुनः।
प्रापिण्डं नैव पश्येत मातृपित्रादिकं पुनः॥
गीतं गायन्ति गन्धर्व्वाः स्तुवन्ति स्तावकाः कवेः।
मन्त्रपाठैस्तथा विप्रा माता क्षौमेण पूजयेत्॥
पिता स्वजनवर्गैश्च धर्म्मात्मानं महामतिम्।
एवंभूताः समाख्याताः पुण्यस्थानानि ते
विभो!।
प्रत्यक्षान् पश्यते भूतान् स्वास्थ्यक्लेशसमाविलान्॥
न च स्वप्नेन मोहेन क्लेशरक्तेन वै पुनः।
धर्म्मराजो महाप्राज्ञो दूरात्तन्तु समाक्षयेत्॥
एतावद्धि त्वं महाभाग! यत्र धर्म्मः स तिष्ठति॥
तस्य मोहो न च भ्रान्तिर्न ग्लानिर्न च
विक्रिया।
जायते नाथ सन्देहः प्रसन्नात्मा प्रतिष्ठते॥
ज्ञानविज्ञानसम्पन्नः शरत्पद्मं जगाद्दनम्।

तेन सार्द्धं प्रयात्येषं वस्तुटो दुष्टमानवः ॥
दग्धमङ्गारमात्रेण आत्मा तस्य हि गच्छति ।
ग्रिविद्धा तस्य चायाति सुघोरं सुमनोहरम् ॥
विमानेरेव वाप्येव वायोर्वेगेन चोत्तमः ॥
हर्म्येश्च त्रिदशावीव चामरद्रुमवेल्लया ।
दीप्यमानः स धर्मात्मा पुण्यैरेव समन्ततः ॥
क्षीयमाणस्तु धर्मात्मा क्षयमाणस्तु पक्षिते: ।
वन्दिभिश्चामरैर्दिव्यैर्नाकस्त्रीभिर्वरोरगैः ॥
साधुभिः स्तूयमानस्तु सर्वसौख्यसमन्वितः ।
यथाज्ञानप्रभावेण फलमाप्नोति तत्र सः ॥
आरामवाटिकामध्ये स प्रयाति सुखेन वै ।
अप्सरोभिः समाकीर्णो दिव्याभिर्मङ्गलैर्युतः ॥
देवैस्तु स्तूयमानस्तु धर्मराजं प्रपद्यति ।
देवाश्च धर्मसंयुक्ता जग्मुः सांसुख्यमेव ते ॥
एष्येहि त्वं महाभाग ! भुङ्क्ष्व भोगान्मनोरमान् ।
एवं संप्राप्यते धर्मं दीप्यरूपं महामतिः ॥
अस्य पुण्यस्य भावेन भुक्त्वा स्वर्गमनुत्तमम् ।
भोगक्षयात् स धर्मात्मा पुनर्जन्म प्रयाति च ॥
निजधर्मप्रसादात् स कुलं पुण्यं प्रयाति च ।
ब्राह्मणस्य सुपुण्यस्य क्षत्रियस्य तथैव च ॥
धनाढ्यस्य सुपुण्यस्य वैश्यस्य च महामते ! ।
धर्मेण मोदते भद्रं पुनः पुण्यं करोति सः ॥"
इति श्रीपद्मपुराणे भूमिखण्डे सुमनोपाख्याने १५ अध्यायः ॥ * ॥

अथ पापिनां नरकगमनम् ।

सोमशर्मोवाच ।

"पापिनां नरकं भद्रे ! कीदृग्रूपेण चैव हि ।
तन्मे त्वं विस्तरादूब्रूहि यदि जानासि भाविनि ! ॥

सुमनोवाच ।

शृणुष्वाभिधास्यामि तत्तात ! विस्तात् श्रुतं मया ।
पापिनां नरकं काम्य ! यादृग्रूपं विरूपमेव च ॥
महापातकिनाञ्चैव स्थानमेषां वदाम्यहम् ।
शिग्राममेध्यसंकीर्णैर्भूमिं पापसमन्विताम् ॥
स तां प्राप्य सुदुष्टात्मा प्राक्तनैः दुःखेन सुध्यति ।
यात्नाभूमिं संप्राप्य नरकं याति दुःखितः ॥
गर्दभाचरितां भूमिं वैश्यानारं समाश्रितः ॥
मद्यपानगृहं गत्वा नैघण्यसुपगच्छति ।
अग्निचर्मगलैः पूर्णामाग्निनां पापकिल्बिषैः ॥
तामवाप्य स दुष्टात्मा स्वल्पं प्राप्नोति निश्चितम् ।
अन्यां पापसमाचारां प्राप्य स्वल्पं स गच्छति ॥
अथ चेष्टां प्रवक्ष्यामि दूतानां प्रिय ! निश्चितम् ॥
भैरवान् दारुणान् घोरानतिरौद्रान्भयोद्भवान् ।
पिङ्गाक्षान् पीतनेत्रांश्च अतिश्वेताक्षदर्शनान् ॥
चतुरश्च करालांश्च शुष्कमांसबलोपमान् ।
रौद्रदंष्ट्राकरालांश्च सिंहास्यान् सर्पहस्तकान् ॥
स तान् दृष्ट्वा प्रवक्ष्यते क्लिश्यते च मुहुर्मुहुः ।
ग्रिवासंवादवद्घोरान्धकारान्धकामते ! ॥
तच्छ्रुत्वा दूतकाः सर्वे कर्षन्ति तु तस्य हि ।
गले पाशप्रबद्धाके नरके वह्निसोदरे ॥

समाक्रम्य गच्छन्ते द्वावेति वदतो मुहुः ।
क्रियमाणस्य या चेष्टा तामेवं प्रवदाम्यहम् ॥
परदारापहरणं परभार्याविलम्बनम् ।
कृतं परस्य सर्वस्वं यद्दत्तं वैस्तु पापिभिः ॥
पुनर्जन्म प्रदत्तं हि लोभाद्यविमोहितैः ।
अन्यदेव महापापं कृतमित्यहमेव च ॥
कर्षमायान्ति ते सर्वे क्रियमाणस्य तस्य च ।
यानि कानि च पापानि पूर्वमेव कृतानि च ॥
आयान्ति कर्षमाणं हि महापापस्य नान्यथा ।
दुःखसृत्पाद्यन्यते कर्षवन्धेन दारुणम् ॥
पीड़ाभिर्दारुणाभिश्च कर्षो क्षुरक्षुरायते ।
रोदते क्रन्दते त्यर्थं मातरं पितरं पुनः ।
स्मरति भ्रातरं तत्र भार्यां पुत्रं पुनः पुनः ॥
पुनर्विस्मरणं याति महापापेन मोहितः ।
तस्य प्राणा न गच्छन्ति बहुपीड़ासमाकुलाः ॥
पतते क्रम्यते चैव मूर्च्छते च पुनः पुनः ।
एवं पीड़ासमायुक्तो दुःखं भुङ्क्तेऽतिमोहितः ॥
तस्य प्राणा सुदुःखेन महाकष्टैः प्रचालितः ।
अपानं मार्गमाश्रित्य ब्रह्मन् काल! प्रयान्ति ते ॥
एवंप्राया दुरात्मानो लोभमोहसमन्विताः ।
गीयन्ते च महाभूतैस्तेषां दुःखं वदाम्यहम् ॥"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापिनरकं नाम १६ अध्यायः ॥ * ॥

पापिनां यमालयगमननानायोनिप्राप्तिविवरणं यथा,—

सुमनोवाच ।

"अङ्गारसञ्चये मार्गे क्षप्यमाणो हि नीयते ।
दह्यमानः स दुष्टात्मा चेष्टमानः पुनः पुनः ॥
यत्नातपो महातीव्रो दाहग्लानिश्रमापितः ।
नीयते तेन मार्गेण सन्तप्तः सूर्यरश्मिभिः ॥
पर्वतेष्विव दुर्गेषु छायाहीनेषु दुर्मतिः ।
नीयते तेन मार्गेण क्षुधाक्षामाहिपीड़ितः ॥
स दूतैर्भ्रम्यमाणस्तु परा दण्डैः परश्वधैः ।
कशाभिर्ताड्यमानस्तु निष्क्रमाणस्तु दूतकैः ॥
ततः प्रीतमये मार्गे वायुना सेव्यते पुनः ।
तेन प्रीतेन दुःखी स भूत्वा याति न संशयः ॥
आक्रम्यमाणो दूतैस्तु नानादुःखेन नीयते ।
एवं पापी स दुष्टात्मा देवब्राह्मणनिन्दकः ॥
सर्वपापसमायुक्तो नीयते यमकिङ्करैः ।
यमं पश्यति दुष्टात्मा ज्वालाङ्गारचयोपमम् ॥
तप्तयं दारुणं भीमं यमदूतैः समाहृतम् ।
सर्वव्याधिसमाकीर्णं चित्रगुप्तसमन्वितम् ॥
आरूढमहिषं देवं धर्मराजं द्विजोत्तम ! ।
दण्डाकरालमत्युग्रं लम्बास्यं कालसन्निभम् ॥
पीतवासं महाहस्तं रक्तगन्धानुलेपनम् ।
रक्तमालाञ्चिताभूषं गदाहस्तं भयङ्करम् ॥
एवंविधं महाकायं यमं पश्यति दुर्मतिः ।
तं दृष्ट्वा समनुप्राप्तं सर्वधर्मबहिष्कृतम् ॥
यमः पश्यति तं दुष्टं पापिष्ठं धर्मैकण्टकम् ।
ज्ञातयेस्तु महादुःखैः पीड़ाभिर्दारुणैरपि ॥
यावद्युगसहस्राणां तावत् कालं प्रपच्यते ।
नानानरकदेशेषु पच्यते च पुनः पुनः ॥

नरकेषु प्रयात्येवं ज्ञग्निकीटेषु पापवत् ।
अमेध्ये पच्यते नित्यं दाहाभूतो विचेतनः ॥
मरणेनैव पापात्मा एवं याति सुनिश्चितम् ।
एवं पापस्य सम्भोगं भुङ्क्ते चैव सुदुर्मतिः ॥
पुनर्जन्म प्रवक्ष्यामि यासु योनिषु जातिषु ।
अयोनिं समनुप्राप्य भुञ्जते पातकं पुनः ॥
श्वानो भवति दुरात्मा राक्षसं याति वै पुनः ।
मार्ज्जारयोनिकरीं योनिं सर्पयोनिमथैव च ॥
नानानिंदासु सर्वासु तिर्यक्षु च पुनः पुनः ।
पापपक्षिषु संयाति अन्यासु गर्हितासु च ।
चाण्डालभिल्लजातिषु पुलिन्दीं याति पापवत् ॥
एतत्ते सर्वमाख्यातं पापिनां कर्म चैव हि ।
पापपुण्यसमाचारस्वरूपे कथितो मया ॥"
इति पाद्मे भूमिखण्डे सुमनोपाख्याने पापपुण्यविवेको नाम १७ अध्यायः ॥ * ॥

ग्रात्मज्ञानग्निज्ञानार्थं मरणकथनम् । यथा,—

राजोवाच ।

"युवां नारायणस्याग्रे कल्पे: भ्यस्तां गतौ ।
वयं कृपा इमे लोका ऋषयो ब्राह्मणाश्च ये ॥
प्रेक्ष्य भक्तिवितानं वां हरौ विन्यस्तमानसाः ।
एच्छामस्वामियं भक्तिः स्त्रस्या परमात्मनः ॥
कस्य वा ग्रिचिता राजन् ! किं वा नैवर्णिकी तव ।
श्रोतुमिच्छामहे राजन् ! त्रिजगज्जनपावनीम् ।
कथां भागवतीं तस्य: संसाराश्रमनाशिनीम् ॥

ग्रग्निभ्रज उवाच ।

स्त्रीपुंसोरावयोर्यूयं ग्रस्मृतामोघविक्रमाः ।
दृष्टं यज्ञक्रमोद्दिष्टं तद्गृहिलक्षणात्मकम् ॥
पुरा युगसहस्रान्ते मधोरहं पूतिमांसभुक् ।
मधीयं मे प्रियारण्ये क्षतनीड़ो वनस्पतौ ॥
चकार कामं सर्वत्र वनोपवनसंकुले ।
स्तनानां पूतिपलले: प्राणिनां दृप्तिकाङ्क्षकौ ॥
एकदा शुष्कः क्रूरो लुलोभ पिङ्गिलाग्निजौ ।
आवां वीक्ष्य गृहे पुष्टं गर्भं तत्प्राप्ययोनयत् ॥
तं वीक्ष्य जातविश्रम्भौ क्षुधया परिपीड़ितौ ।
स्त्रीपुंसौ पतितौ तत्र मांसशोणितचेतसौ ॥
महावाघां वीक्ष्य ग्रिग्वा हर्षादागत्य शुष्कः ।
जघ्राह कण्ठे तरसा चक्षुष्याघातयोद्धतः ॥
आवां गृहीत्वा गच्छन्त्या: ग्रिलायां बलिजान्तिके ।
मस्तिष्कं भक्षयामास शुष्कः पिङ्गिलाग्रजः ॥
चक्राङ्कितग्रिलाचक्राक्षरवादपि सत्त्वरात् ।
ज्योतिर्मयविमानेन सद्यो भूत्वा चतुर्भुजौ ॥
प्राप्तौ वैकुण्ठनिलयं सर्वलोकनमस्कृतम् ।
ततः स्थित्वा युगशतं ब्रह्मणो लोकमागतौ ॥
ब्रह्मलोके पदशतं युगानामुपभुज्य वै ।
देवलोके कालवशात्ततं युगचतुःशतम् ॥
ततो भुवि कृपाक्षावत् बहुरूपुरुषं क्षरम् ।
हरेरनुग्रहं लोके ज्ञानयाग्निज्ञानमयम् ॥
जातिस्मरत्वं सञ्जग्मा: किं तस्या: कथयाम्यहम् ।

"भानुर्लब्धाक्रुद्यामिर्विन्ध्या साध्या मरुत्वती ।
वसुर्मुहूर्त्ता संकल्पा धर्म्मेपत्न्याः सुतान् प्रभु ॥")

मरुत्सखः, पुं, (मरुतां देवानां सखा । "राजाहः सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्रः । इति धरणिः । (मरुतो वायोः सखा ।) अग्निः । वायुसखे त्रि । यथा, रघौ । ११ । ३ ।

"तावदाशु विदधे मरुत्सखेः
सा सपुष्पजलवर्षिभिर्घनैः ॥")

मरुदान्दोलः, पुं, (मरुत् वायुरान्दोल्यतेऽनेनेति । आङ्पूर्वात् दुलि घञ् ।) श्वसितम् । इति शब्दमाला ॥

मरुदिष्टः, पुं, (मरुतां देवनामिष्टः प्रियः ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य गुग्गुलुशब्दे आख्यातः ॥)

मरुद्धजं, क्ली, (मरुत्सु वायुषु ध्वजः पताकेव । नभसि वायुवशाच्चलितत्वादस्य तथात्वम् ।) वाततूलम् । बुड़ोर सुता इति भाषा । यथा,—

"गौरश्वासं वंशकथं वाततूलं मरुद्धजम् ॥"
इति शब्दरत्नावली । २६ ॥

मरुद्भवा, स्त्री, (मरुद्भ्यो वायुभ्य उत्पत्तिकारणं यस्याः ।) ताम्रलताभेदः । इति रत्नमाला । खिरारइ इति भाषा ॥

मरुद्रथः, पुं, (मरुद्भ्यो रथो यानमिवास्य । ऊर्ध्वं लोकं वियति बहुतरं गच्छतीति तथात्वम् ।) अश्वः । इति त्रिकाण्डशेषः ॥ देवरथः । इति हेमचन्द्रः । ३ । ४१६ ॥

मरुद्रुमः, पुं, (मरोर्निर्जलदेशस्य द्रुमः । मरुजातो द्रुमो वा ।) विटखदिरः । इति रत्नमाला ॥

मरुद्वर्त्म, क्ली, (मरुतां वायूनां देवानां वा वर्त्म यत्र्याः ।) आकाशम् । इति त्रिकाण्डशेषः ॥

मरुद्वाहः, पुं, (मरुता वायुना उह्यतेऽसौ इति । वह + कर्म्मणि घञ् । यद्वा, मरुद्भ्यो वह इव यस्य ।) धूमः । इति त्रिकाण्डशेषः ॥ अग्निः । इति शब्दमाला ॥

मरुद्विषः, पुं, (मरौ निर्जलदेशे द्विषो हस्तीव ।) उष्ट्रः । इति त्रिकाण्डशेषः ॥

मरुन्माला, स्त्री, (मरुद्भिर्म्मन्यते धार्य्यते इति । मन धारणे + कर्म्मणि घञ् । टाप् ।) पृक्का । इत्यमरः । २ । ४ । १३३ ॥ पिड़िंगशाक इति भाषा ॥ (पर्य्यायोऽस्य यथा,—

"वृक्काढ्यक् शाकयोनी देवी मरुन्माला लता जयुः ।
वसुप्राणा वधूः कोटिवर्षा लङ्कापिकेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मरुप्रियः, पुं, (मरुन्निर्जलदेशः प्रियोऽस्य ।) उष्ट्रः । इति हेमचन्द्रः । ४ । ११८ ॥

मरुभूः, स्त्री, (मरुन्निर्जला भूर्भूमिः ।) दाक्षिणात्यदेशः । इति त्रिकाण्डशेषः ॥ मारवोयार इति भाषा ॥ निर्जलभूमिश्च ॥

मरुभूरुहः, पुं, (मरुष्वि रोहति जायते इति । रुह + "इगुपधज्ञाभ्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) करीरवृक्षः । इति भावप्रकाशः ॥

मरुभूमिजाते, त्रि ॥ (यथा, आर्य्यासप्तशत्याम् । ६०६ ।

"वसुपुंसो मरुभूरुह इव जीवनमात्रमाख्यान् ॥")

मरुलः, पुं, (म्रियते जलं विनेति । मृ + उलः ।) कारण्डवपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

मरुवः, पुं, (मरुं निर्जलदेशं वाति प्राप्नोतीति । वा + कः ।) वृक्षविशेषः । मरुवा इति भाषा । तत्पर्य्यायः । खरपत्रः २ गन्धपत्रः ३ फणिज्झकः ४ बहुबीर्य्यः ५ घृतेलकः ६ सुराढ्यः ७ समीरकः ८ अमीरः ९ प्रस्थकुसुमः १० मरुवकः ११ आजव्यसुरभिपत्रः १२ मरिचः १३ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिकुष्ठविड्बन्धाध्मानमूलमान्द्यत्वगदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

"मरुवको मरुवको मरुजस्तरपि स्मृतः ।
पत्री फणिज्झकश्चापि प्रस्थपुष्पः समीरकः ॥
मरुवस्त्रिदोषहृत्पित्तश्लेष्मा पित्तलो लघुः ।
कृमिकासविषश्वासवातकृच्छ्रप्रणाशनः ।
कटुपाकरसो रुच्यस्तिक्तो रूक्षः सुगन्धिकः ॥"
इति भावप्रकाशः ॥

मरुवकः, पुं, (मरुव + स्वार्थे इवार्थे वा कन् ।) कण्टकिवृक्षविशेषः । मयना इति भाषा । तत्पर्य्यायः । पिच्छोलकः २ भ्रमरः ३ करञ्जाटकः ४ घृष्टः ५ मदनः ६ । (पर्य्यायान्तरं यथा,—

"मदनस्तहैनः पिच्छो नटः पिच्छीलकस्तथा ।
करञ्जाटो मरुवकः घृष्टको विषपुष्पकः ॥")

खरपत्रचतुरसौ । तत्पर्य्यायः । समीरकः २ प्रस्थपुष्पः ३ फणिज्झकः ४ अमीरः ५ । इत्यमरः । २ । ४ । ७८ ॥ (इतरपर्य्यायो यथा,—

"मरुवको मरुवको मरुजस्तरपि स्मृतः ।
पत्री फणिज्झकश्चापि प्रस्थपुष्पः समीरकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

अमीरभेदः । इत्यमरटीकायां भरतः ॥ पुष्पवृक्षविशेषः । मरुयाफुल इति भाषा । तत्पर्य्यायः । घृष्टपुष्पः २ तिलकः ३ कुलकः ४ । क्षुपविशेषः । नागदाना इति भाषा । तत्पर्य्यायः । खरपत्रः २ गन्धपत्रः ३ । इति रत्नमाला ॥ व्याघ्रः । राहुः । अयाचके त्रि । इति जटाधरः ॥

मरुसम्भवं, क्ली, (मरुः सम्भव उत्पत्तिस्थानमस्य ।) चामरमूलम् । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम् ।
ग्राममर्कटकं विप्रं ग्रामलं मरुसम्भवम् ॥
चामरमूलकं तीक्ष्णं तथा मूलकपोतिका ।
नेपालमूलकञ्चाम्लं तद्भेदाश्चतुरस्मृताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मरुसम्भवा, स्त्री, (मरौ सम्भवो यस्याः । टाप् ।) मरुजमर्कटी । क्षुद्रदुराजभा । इति राजनिर्घण्टः ॥

मरुस्था, स्त्री, (मरौ तिष्ठतीति । स्था + कः । स्त्रियां टाप् ।) क्षुद्रदुराजभा । इति राजनिर्घण्टः ॥

मरूकः, पुं, (म्रियते इवेति । मृ + "मृजाजिभ्यामूकोलूकौ ।" उणा० ४ । ६८ । इति ऊकः । भयशीलत्वादस्य तथात्वम् ।) मत्स्यविशेषः । रत्नमालादिकोषः ॥ मयूरः । छुटी । इति संक्षिप्तसारोणादिवृत्तिः ॥

मरूद्भवा, स्त्री, (मरौ मरुप्रदेशे उद्भवतीति । उत् + भू + अच् । स्त्रियां टाप् ।) कार्पासी । यवासः । क्षुद्रखदिरः । इति राजनिर्घण्टः ॥

मरोलिः, पुं, (मरौ निर्जलदेशे लीयते श्लिष्यते इति । मरु + ली + इन् । पृषोदरादित्वात् साधुः ।) मकरः । यथा,—

"जलरूपस्तु मकरो मरोलिरलिसंज्ञकः ॥"
इति त्रिकाण्डशेषः ॥

मरोलिकः, पुं, (मरोलि + स्वार्थे कन् ।) मकरः । इति शब्दरत्नावली ॥

मर्क, सर्पे । सौभधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० सेट् ।) मर्कटः । इति दुर्गादासः ॥

मर्कः, पुं, (मर्कति चेष्टते इति । मर्क + "इक् भीकापाशल्यतिमर्केभ्यः कन् ।" उणा० ३ । ४३ । इति कन् । यद्वा, मर्कति सर्पतीति । मर्क + अच् ।) देवः । वायुः । रत्नमालादिकोषः ॥ (शुक्रपुत्रः । यथा, राजवल्लभसंहितायाम् । ७ । १६ ।

"उपयामगृहीतोऽसि मर्काय त्वा ॥"
"मर्कः शुक्रपुत्रोऽसुरपुरोहितः ।" इति तद्भाष्ये महीधरः ॥) वानरः । इति शब्दरत्नावली ॥ (यथा, श्रीमद्भागवते । १० । ८ । २६ ।

"मर्कान् भोक्ष्यन् विभजति स वेदानग्निं भक्षं भिनत्ति ॥"

"मर्कान् मर्कटान् ।" इति तट्टीकायां श्रीधरस्वामी ॥ त्रि, मार्ज्जयिता । यथा, ऋग्वेदे । १० । २७ । २० ।

"क्षुरश्च मर्क उपरो बभूवान् ॥"
"मर्को मार्ज्जयिता ।" इति तद्भाष्ये सायणः ॥)

मर्कटः, पुं, (मर्क + स्वार्थे संज्ञायां वा कन् ।) गलगण्डपक्षी । इति शब्दरत्नावली ॥ चाड़शिल इति भाषा ॥

मर्कटः, पुं, (मर्कति गच्छतीति । मर्क + "शकादिभ्योऽटन् ।" उणा० ३ । ८१ । इति अटन् ।) वानरः । रत्नमालः । २ । ५ । ३ ॥ (यथा, राजवल्लभसंहितायाम् । २७ । ३० ।

"धनाय लक्ष्म्यै मनुजराजाय मर्कटः ॥")

कर्कनामा । (यथा आर्य्यासप्तशत्याम् । ६२२ ।

"अयमुदयशैलशिखरः मर्कट इव मर्कटः पुरतः ॥"

"मर्कटी जूता ।" इति तट्टीका ॥) स्थावरविषभेदः । इति हेमचन्द्रः ॥ गवीशङ्खपर्णी । इति चिकाण्डशेषः । काकुलिया इति भाषा ॥

मर्कटकः, पुं, (मर्कट + स्वार्थे संज्ञायां वा कन् ।) वानरः । जूता । सूक्ष्मभेदः । इति मेदिनी । के, ७०८॥ (यथा, विष्णुपुराणे । १ । ६ । २५ ।

"ग्रामाकाक्षव नीवारा जर्त्तिलाः सगवेधुकाः।
तथा वेणुयवाः प्रोक्ताश्चणक मर्कटका
सुने ! ॥")

मत्स्यभेदः । हेत्वः । इति शब्दरत्नावली ॥

मर्कटपिप्पलिकः, पुं, (मर्कटप्रियपिप्पलिकः । मध्यपदलोपी कर्म्मधारयः ।) कपीपुः । इति भावप्रकाशः ॥

मर्कटपिप्पली, स्त्री, (मर्कटस्य पिप्पलीव ।) अपामार्गः । इति राजनिर्घण्टः ॥ (विवरणमस्या अपामार्गशब्दे ज्ञातव्यम् ॥)

मर्कटप्रियः, पुं, (मर्कटस्य प्रियः ।) चीरदलः । इति शब्दमाला ॥

मर्कटवासः, पुं, (मर्कटः ऊर्णनाभस्तस्य वासः आवासस्थानम् ।) लूतागर्भः । माकड़ार खाल इति भाषा ॥ तत्पर्य्यायः । आवासस्थः २ । इति शब्दरत्नावली ॥

मर्कटशीर्षं, क्ली, (मर्कटस्य शीर्षमिव तद्वर्णत्वादेवास्य तथात्वम् ।) शिलुजम् । इति रत्नमाला ॥ (यथा, वैद्यकरत्नमालायाम् ।

"रक्तं मर्कटशीर्षञ्च शिलुजं दरदो रसः ॥")

मर्कटास्थि, क्ली, (मर्कटस्य अस्थिमिव तद्वर्णत्वादेवास्य तथात्वम् ।) लाक्षम् । इति हेमचन्द्रः । ४ । २०६ ॥ (मर्कटस्यास्थिम् ।) वानरसम्बन्धि । (मर्कटस्यास्थिमिवास्थि यस्य ।) वानरसदृशे, त्रि ॥

मर्कटी, स्त्री, (मर्कति वायुवेगेन इतस्ततो गच्छतीति । मर्क + अटन् । स्त्रियां ङीप् ।) कपिकच्छुः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"कपिकच्छुरालगुप्ता दृष्या प्रोक्ता च मर्कटी ।
आजरा कण्डुरा अङ्गा दुःस्पर्शा पादपायनी ॥
जाङ्गली शूकशिम्बी च सैव प्रोक्ता महर्षिभिः ॥")

अपामार्गः । (यथा,—

"अपामार्गस्तु शिखरी शुक्लो मयूरकः ।
मर्कटी दुर्ग्रहा चापि किणिही खरमञ्जरी ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) अजमोदा । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ३३ । ५ ।

"कुष्ठटीं मर्कटीं शिग्रोर्मूलान्यापि धारयेत् ।
मांसमासं तथा पक्वं पीत्वाक्षं चतुरक्षके ॥")

करञ्जभेदः । इत्यमरः । २ । ४ । ८७ ॥ माकड़ा करञ्जा इति भाषा ॥ (यथास्याः पर्य्यायो भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।

"उदकीर्य्यजतीवीजः वह्नपत्रा वह्निसावनी ।
मर्कटी वायसी चापि करञ्जी करभञ्जिका ॥"

मर्कट + ङीष् ।) वानरी च ॥

मर्कटेष्टः, पुं, (मर्कटे खगविशेषे इष्टुरिव ।) काकतिन्दुकवृक्षः । यथा,—

"काकेष्टुः कुलकः काकपीलुकः काकतिन्दुके ।
मर्कटेष्टुः सिन्धुपुत्रो द्वावेतौ तस्य कीर्त्तितौ ॥"

इति शब्दचन्द्रिका ॥

मर्करः, स्त्री, (मर्कति गच्छतीति । मर्क + बाहुलकात् अरः ।) भृङ्गराजः । इति शब्दरत्नावली ॥ (गुणादयोऽस्य भृङ्गराजशब्दे ज्ञातव्याः ॥)

मर्करा, स्त्री, (मर्करः + स्त्रियां टाप् ।) दरी । भाण्डम् । सुरङ्गा । निष्कला स्त्री । इति विश्वः ॥

मर्क्ष, क अवहे । सौत्रोऽयं धातुः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) लालयवर्गप्रथमान्तः । मर्क्षः । इति दुर्गादासः ॥

मर्क्षः, स्त्री, (मृज्यते इति । मृज् शुद्धौ + "मृजेर्गुणश्च ।" उणा० १ । ८१ । इति क्षः । गुणश्च ।) शुद्धिः । इति मेदिनी । क्षे, १३ ॥

मर्क्षः, पुं, (मार्ष्टि प्रोक्षयति वसनमिति । मृज् + क्षः ।) रजकः । इति हेमचन्द्रः ॥ पीठमर्दः । इति शब्दरत्नावली ॥

मर्त्यः, पुं, (म्रियतेऽसौ इति । मृ + "हविमृभ्यामिति ।" उणा० ३ । ८६ । इति तन् ।) मनुष्यः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, मार्कण्डेये । २०० । १८ ।

"पौर्णमास्यामसावस्यां पर्व्वस्वन्येषु प्रस्तवः ।
ममैष संश्रुतो मर्त्तैर्भविता पापनाशनः ॥")

माणवकः । इति संक्षिप्तसारोणादिवृत्तिः ॥ (म्रियतेऽत्रेति । भूलोकः । इत्युज्ज्वलदत्तः । ३ । ८६ ॥)

मर्त्यः, पुं, (म्रियतेऽत्रेति । मर्त्ते भूलोकेऽत्र भवः । मर्त्त + यत् । यद्वा, मर्त्त एव यदित्यमरटीकायां भरतः ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, ब्रह्मवैवर्त्ते । २ । १ । २६ ।

"एते च गृहलक्ष्मीश्च मर्त्यानां गृहिणां तथा ॥")

मध्यमलोकः । इति जटाधरः ॥ (क्ली, शरीरम् । यथा, भागवते । ३ । ३३ । ३१ ।

"तस्यात्तदुर्योगविधुतमार्गं मर्त्यमभूत् सदित् ॥")

मर्दनं, क्ली, (मृद् + भावे ल्युट् ।) अङ्गमर्दनम् । गाटेपा इति भाषा ॥ तत्पर्य्यायः । संवाहनम् २ । इत्यमरः । २ । ६ । ७२ ॥ सम्बलम् ३ । इति शब्दरत्नावली ॥ (यथा, "यत् पुनर्वहिःस्नानानुलिप्तस्याभ्यङ्गस्वेदप्रदेहपरिषेकोन्मर्दनाटेरामयात् प्रमार्ष्टि तद्वहिः परिमार्ज्जनम् ॥" इति चरके सूत्रस्थाने २१ अध्यायः ॥) अस्य गुणाः । अमत्वरत्वम् । निद्रासुखप्रदत्वम् । मांसरक्तत्वक्प्रसन्नकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ चूर्णनम् । इति तदधीतवर्णदर्शनात् ॥ (कदनम् । यथा, भागवते । ३ । ४ । २ ।

"तेषां मेरयदोषेण विषमीक्षतचेतसाम् ।
निम्लोचति रवावासीत् वेणूनामिव मर्दनम् ॥")

मृद् + ल्युट् । मर्दनकारके, त्रि । यथा, महाभारते । १६ । १४ । ६०२ ।

"प्रजे क्षितिजलानां मर्दनं विद्धेश्वरम् ॥")

मर्दलः, पुं, (मर्दं मर्दनं लातीति । ला + कः ।) वाद्यविशेषः । इत्यमरः । २ । ७ । ८ ॥ मादल इति भाषा । तत्पर्य्यायः । गुरुः २ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ८ । ४४ । २६ ।

"मृदङ्गानकगुह्यानां मर्दलानाञ्च निस्वनैः ।
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ॥")

मर्म्मन्, त्रि, (मृद् + कर्म्मणि मः ।) यन्त्रितम् । इति विश्वप्रकाशवर्गटीकायां भरतः ॥ चूर्णितम् । यथा,—

"निम्निकीफलरञ्जेन मर्म्मितो
रामवाण इति विष्णुनो रथः ॥"

इति भावप्रकाशः ॥

मर्म्म, गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मर्म्मति । इति दुर्गादासः ॥

मर्म्म, [न्] क्ली, (मृ + "सर्व्वधातुभ्यो मनिन् ।" उणा० ४ । १४४ । इति मनिन् ।) सक्थ्यम् । तत्त्वम् । यथा, नैषधे । २ । ६ ।

"न्यगाद्या न विगीयते कृपै-
रपि धर्म्मागममर्म्मपारगैः ।
अरसुन्दर ! मां यदत्थ त्व धर्म्मः सदयो दयोज्ज्वलः ॥"

सन्धिस्थानम् । इति लिङ्गादिसंग्रहे अमरभरतौ ॥ जीवस्थानम् । इति राजनिर्घण्टः ॥ अथ मर्म्मादि ।

"सन्निपातः शिरास्नायुसन्धिमांसास्थिसम्भवः ।
मर्म्मादि तेषु तिष्ठन्ति प्राणाः खलु विशेषतः ॥
सप्तोत्तरं शतं सन्ति हेहे मर्म्मादि देहिनाम् ।
तान्येकादश मांसे स्युरष्टावस्थिषु सन्धिषु ॥
सप्तोनां विंशतिस्तानि स्नायूनां सप्तविंशतिः ।
चत्वारिंशत्तथैकञ्च शिरामर्म्मादि सप्त तु ॥
द्वाविंशतिः सक्थियुगे तावत्येव भुजद्वये ।
द्वादशोरसि कुक्षौ च पृष्ठदेशे चतुर्दश ॥
ग्रीवाया जर्द्धभागे तु सप्तविंशत्यमानि हि ।
मर्म्मादि तानि सन्ति षड्विधा भवन्ति ।
तान्याह ।
सद्यःप्राणहराणि स्युर्मर्म्मांशेष्वेकोनविंशतिः ।
मर्म्मदेशाश्रयस्थिभ्रंशात् स्युः कालान्तरमारकाः ।
चत्वारिंशच्च चत्वारि वैकल्यं जनयन्ति हि ।
मर्म्माहतं वृणाकारि विशल्यघ्नं क्षिपं मतम् ॥
ललाटकाक्षधिपतिः शङ्खौ कण्ठशिरागुदम् ।
हृदयं वस्तिनाभ्यौ च सद्यो घ्नन्ति हतानि षैत्
ललाटकादि ज्ञानश्रोत्राक्षिजिह्वाघ्राणमर्म्माद
शिरासुखानां शिरसो मध्ये संयोगस्थानं तानि
चत्वारि शिरामर्म्माणि चतुरङ्गुलप्रमाणानि
हतानि सन्ति सद्योमारकाणि । अधिपतिः
मस्तकस्याभ्यन्तरे सन्धिशिरयोः सन्निपा
उपरिष्टाद्रोमावर्त्तः स एषः सन्धिमर्म्मेदं अङ्गु
ङ्गुलप्रमाणं सद्योमारकम् । भ्रुवौ भ्रुवोरन्तोपरि
कर्णललाटमध्ये ते द्वे अक्षिमर्म्माणी अङ्ग
ङ्गुले सद्योमारके । कण्ठशिराः मातृका
ग्रीवाया उभयपार्श्वेऽवस्थितास्तिस्रः शिराः
अष्टौ शिरामर्म्माणि चतुरङ्गुलानि सद्योमा

काणि। गुदं प्रविष्ठमेकं मांसमर्म्म चतुरङ्गुलं सद्योमारकम्। हृदयं स्तनयोर्मध्यमामाग्रयद्वारमेकं शिरामर्म्म चतुरङ्गुलं सद्योमारकम्। वस्तिः नाभिपृष्ठकटीसन्धिगुदवङ्क्षणवृषणानां मध्ये वस्तिस्तनमूलक एकद्वारो ह्यधोमुखः स्नायुमर्म्मेदं चतुरङ्गुलं सद्योमारकम्। नाभिः प्रसिद्धा। शिरामर्म्मेदं चतुरङ्गुलं सद्योमारकम्॥ सद्योमर्म्माणि सीमन्तास्तनवस्तिप्रेङ्खवस्तयः।
हृदयौ पार्श्वजौ सन्धी कटीकतरुणे च ये।
नितम्बाविति चैतानि कालान्तरहराणि तु॥
सद्योमर्म्माणि स्तनमूलस्तनरोहितापलापापस्तम्भाः स्तनमूले स्तनयोरधस्ताद्वङ्क्षणं यावत् द्वे शिरामर्म्मणी द्वाङ्गुले कफपूर्णकोष्ठतया कालान्तरमारके। स्तनरोहिते स्तनयोरुपरि द्वाङ्गुलं यावत् द्वे मांसमर्म्मणी रक्तपूरितकोष्ठतया कालान्तरमारके। अपलापौ अंसकूटयोरधस्तात् पार्श्वयोरुपरि द्वौ शिरामर्म्मणी अर्द्धाङ्गुले रक्तेन पूयताङ्गते न कालान्तरमारके। अपस्तम्भौ उरस उभयतो बाह्यौ वातपूर्णकोष्ठतया कासश्वासाभ्यां कालान्तरमारके। सीमन्ताः शिरसि पञ्च सन्धयः सन्धिमर्म्माणि चतुरङ्गुलानि उच्चादभयचित्तविनाशैः कालान्तरमारकाणि। तलानि मध्याङ्गुलिमङ्गुष्ठ स्तलभध्यं तलं एवमपरस्य स्तलस्य पादयोश्च चत्वारि तलानि मांसमर्म्माण्यर्द्धाङ्गुलानि कफाभिः कालान्तरमारकाणि। क्षिप्राणि अङ्गुष्ठाङ्गुल्योर्मध्यं क्षिप्रं तच्च हस्तयोर्द्वे पादयोर्द्वे एवञ्चत्वारि स्नायुमर्म्माण्यर्द्धाङ्गुलान्याश्रीपकैश्च कालान्तरमारकाणि। इन्द्रबस्तयः प्रकोष्ठयोर्मध्ये द्वे जङ्घयोर्मध्ये द्वे एवं चत्वारि मांसमर्म्माणि द्व्याङ्गुलानि शोणितक्षयेण कालान्तरमारकाणि। हृदयौ स्तनमूलाद्वभयतः एकैकयं यावत् शिरामर्म्मणी अर्द्धाङ्गुले शोणितातिप्रवृत्तिविभ्रमैरुपद्रवैः कालान्तरमारके। पार्श्वसन्धी अक्षनपार्श्वयोः सन्धी शिरामर्म्मणी अर्द्धाङ्गुले शोणितपूर्णकोष्ठतया कालान्तरमारके। कटीकतरुणे त्रिकसन्निधाने उभयतः शोणिकाकृते लक्षीलाक्षाक्षिणी अक्षिमर्म्मणी अर्द्धाङ्गुले शोणितक्षयात् पाण्डुविवर्णरूपं कृत्वा कालान्तरमारके। नितम्बौ प्रसिद्धौ। द्वे अक्षिमर्म्मणी अर्द्धाङ्गुले अधःकायशोषेण दौर्ब्बल्येन च कालान्तरमारके॥ *॥
लोहितार्द्राक्षिजानूरुकूर्चाविटपकूर्पराः।
कुकुन्दरे कक्षधरे विधुरे सक्थकाटिके॥
अंसांसफलकापाङ्गा गोले मन्थे वधौ तथा।
वैकल्यकारकाण्याहुरावर्त्तौ द्वौ तथैव च॥
लोहितार्द्राक्षि ऊर्ध्वोरुजानुमध्योरुजङ्घसन्धिलोहितार्द्रं तच्च द्वे बाह्वोर्द्वे ऊर्ध्वोरिवं तानि चत्वारि शिरामर्म्माण्यर्द्धाङ्गुलानि वैकल्यकारकाणि तच्च शोणितक्षयेण पश्चाघातः सङ्कुचितादो वा। आजवः जानुन ऊर्द्धसुभयोः पार्श्वयोरङ्गुला एकैकस्मिन् जानुनि द्वे अपरस्मिन् द्वे एवं चतस्रः स्नायुमर्म्माण्यर्द्धाङ्गुला वैकल्यकर्य्यः तत्र शोणितक्षयेण सङ्कुचितश्च। जानुनी जङ्घोर्य्वोः सन्धी सन्धिमर्म्मणी द्व्याङ्गुले वैकल्यकरे। तत्र स्तब्धता। ऊर्य्वोः द्वे ऊर्ध्वोरुसन्धी द्वे प्रागजयोर्म्मध्ये एवं चतस्रः शिरामर्म्माण्येकाङ्गुला वैकल्यकर्य्यः तत्र शोणितक्षयात् सङ्कुचितशोथः। कूर्चौ पादयोरङ्गुष्ठाङ्गुल्योर्म्मध्ये तयोरूर्द्धमधश्च एवं चत्वारः। स्नायुमर्म्माणि वैकल्यकराणि तत्र पादयोर्धमनवेपनं भवतः। विटपे द्वे वङ्क्षणवृषणयोर्म्मध्ये स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र बाह्यमणशुक्रता वा। कूर्परौ कफोणी तौ द्वौ सन्धिमर्म्मणौ द्व्याङ्गुलौ वैकल्यकरौ तत्र बाहुमध्ये सङ्कोचः। कुकुन्दरे नितम्बकूपके द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र स्नायुस्तम्भनमधःकाये चेष्टोपघातश्च। कक्षधरे वक्षःकक्षयोर्म्मध्ये द्वे स्नायुमर्म्मणी एकाङ्गुले वैकल्यकरे तत्र पश्चाघातः। विधुरे कर्णपृष्ठतोऽधःसंस्थिते किञ्चिन्निम्नाकारे द्वे स्नायुमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाधिर्य्यम्। सक्थकाटिके शिरोग्रीवयोरुभयतः सन्धी द्वे सन्धिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र शिरःकम्पः। अंसौ स्कन्धौ स्नायुमर्म्मणौ अर्द्धाङ्गुलौ वैकल्यकरौ तत्र बाहुस्तम्भः। अंसफलके पृष्ठोपरि पृष्ठवंशसुभयतश्चिक्षसम्बन्धे ग्रीवाया अंसद्वयस्य च संयोगो यत्र तस्मिन्नक्षिमर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र बाहोः शून्यता शोषश्च। अपाङ्गौ नेत्रयोरन्तौ शिरामर्म्मणी अर्द्धाङ्गुलौ वैकल्यकरौ तत्रान्धं दृष्टेरुपघातो वा। गोले मन्थे च कण्ठनाड्योरुभयतश्चत्वारो धमन्यो द्वे गोले द्वे मन्थे तत्र एका गोला एका मन्या एकस्मिन् पार्श्वे। अन्या मन्या अन्या गोला अपरस्मिन् पार्श्वे। द्वे द्वे शिरामर्म्मणी द्व्याङ्गुले द्व्याङ्गुले वैकल्यकरे तत्र मूकता विस्वरता स्वराग्राहिता च। वधौ बाह्यमार्गसुभयतः अभ्यन्तरे शिरामर्म्मणी अर्द्धाङ्गुले वैकल्यकरे तत्र गन्धाज्ञानम्। आवर्त्तौ भ्रुवोरुपरि निम्नयोः सन्धिमर्म्मणौ अर्द्धाङ्गुलौ वैकल्यकरौ तत्राप्यन्धं दृष्टेरुपघातो वा॥ *॥
गुल्फौ द्वौ मणिबन्धौ द्वौ तथा कूर्चशिरांसि च।
कराकराणि जानीयादष्टादशानि बुद्धिमान्॥
गुल्फौ घुटिके सन्धिमर्म्मणौ द्व्याङ्गुलौ वैकल्यकरौ तत्र खञ्जता पादस्तम्भः खञ्जता वा। मणिबन्धौ हस्तप्रकोष्ठसन्धी सन्धिमर्म्मणौ द्व्याङ्गुलौ वैकल्यकरौ तत्र हस्तयोः क्रियाराहित्यम्। कूर्चशिरांसि गुल्फसन्धिरध उभयतः एकस्मिन् पादे द्वे द्वे च द्वितीये एवं चत्वारि स्नायुमर्म्माण्येकाङ्गुलानि वैकल्यकराणि तत्र खञ्जता शोफश्च॥ *॥ विशल्यघ्नानि।
उत्क्षेपौ स्थपनौ चैव विशल्यघ्नं त्रिकं मतम्।
उत्क्षेपौ गुदयोरुपरि कण्डरान् यावत् स्नायुमर्म्मणौ अर्द्धाङ्गुलौ तयोर्विद्धयोः सद्यस्को

जीवेत् प्राकात् पतितशल्यो वा उद्धृतशल्यस्तु त्रियेत अतएव विशल्यघ्नमुद्धृतशल्यं हन्तीति विशल्यघ्नं मर्म्म। स्थपनी एका भ्रुवोर्म्मध्ये शिरामर्म्मेदमर्द्धाङ्गुलं विशल्यघ्नम्।
सद्यराजान्तरे चक्षुः सद्यः प्राणहराणि त्रि।
कालान्तरप्राणहरं पञ्चे मासे च मारकम्॥
सद्यःप्राणहरं चाग्ने विद्धं कालेन मारयेत्।
कालान्तरप्राणहरमग्ने विद्धन्तु दुःखदम्॥
अन्ते मर्म्मसमीपे।
मर्म्माश्रयिणि काये हि ये विकारा
जन्मन्ति काये विविधा नराणाम्।
प्रायेण ते जन्मतमा भवन्ति
वैद्येन यत्नैरपि साध्यमानाः॥"
इति भावप्रकाशः॥ *॥

मर्म्मज्ञत्वनिर्णयो यथा,—
"परश्चेदं वा चरन्तं न चाचक्षीत कस्यचित्।
न संवसेत् स्तनकं च न कं वै मर्म्मणि क्षिपेत्॥"
इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥
("सद्योत्तरं मर्म्मशतम्। तानि मर्म्माणि पञ्चाशत्कानि। तद्यथा मांसमर्म्माणि। शिरामर्म्माणि। स्नायुमर्म्माणि। सन्धिमर्म्माणि। सन्धिमर्म्माणि पेशि। न खलु मांसशिरास्नायुसन्धिसन्निपातैरेकैकाश्रयाणि मर्म्माणि भवन्ति यस्माच्चोपलभ्यन्ते॥ तत्रैकादशमांसमर्म्माणि। एकचत्वारिंशत्शिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सद्योत्तरं मर्म्मशतम्।" इति सुश्रुते शारीरस्थाने षष्ठेऽध्याये।)
मर्म्मकीलः, पुं, (मर्म्मे कीलति विध्यतीति। कील + कः।) यदा, मर्म्मणि गुदविषये कीलः इवेति। इव।) भर्शः। इति जटाधरः॥
मर्म्मज्ञः, त्रि, (मर्म्म तत्त्वं जानातीति। ज्ञा + कः।) मर्म्मविद्। तत्त्वज्ञः। मर्म्म स्वरूपं सन्धिस्थानं वा तज्ज्ञानात्। यः सः॥ (यथा, महाभारते। ७। ३५। ३०।
"तथामापतता वीरः शीघ्रं पूर्व्वमथो दृढम्।
विपाठो व्यधीद्बाणान्मर्म्मज्ञो मर्म्मभेदिभिः॥")
मर्म्मरः, पुं, (मर्म्म तत्त्वं मर्म्मव्यक्तत्वञ्च राणोति। रा + कः।) वल्कस्य पत्रस्य च ध्वनिः। इत्यमरः। १। ७। ६१। मड्मड् शब्द इति भाषा। (यथा, रघुवंशे। १३। ५६।
"अभ्यभूयत वाहानां चरतां वाग्भिरिङ्गितैः।
मर्म्मरः पवनोद्धूतशालीवनध्वनिः॥")
मर्म्मरी, स्त्री, (मर्म्मर + गौरादित्वात् ङीष्।) पीलुवृक्षः। हस्तिशुण्डिका इति ख्याता। इति मेदिनी। रे, २०॥
मर्म्मरीकः, पुं, (क्षिपत इत्यर्थादिति। क्षि + "पर्परीकादयश्च।" उणा०। ३। २०। इति ईकन् प्रत्ययेन निपातनात् साधुः।) दीनः। इत्युणादिकोषः॥

मर्म्मविद्, [द्] पुं, (मर्म्म वेत्तीति। विद्+क्विप्।) मर्म्मज्ञः। तत्पर्य्यायः। कार्पटिकः २। इति त्रिकाण्डशेषः॥ मर्म्मिकः ३ मर्म्मवेदी ४। इति जटाधरः॥ (यथा, कथासरित्सागरे। ६२। ६०।
"वक्त्रायत्ततयोऽवादीन्मध्योऽयं पदमर्म्मविद्॥")

मर्म्मवेदी, [न्] पुं, (मर्म्म वेत्तीति। विद्+णिनिः।) मर्म्मविद्। तत्पर्य्यायः। इति जटाधरः॥

मर्म्मस्पृक्, [क्] त्रि, (मर्म्म स्पृशतीति। स्पृश्+"स्पृशोऽनुदके क्विन्।" ३।२।५८। इति क्विन्।) मर्म्मपीडकः। तत्पर्य्यायः। अरुन्तुदः २। इत्यमरः। ३।१।८३॥ खलः ३। इति हेमचन्द्रः। ६।१४५॥

मर्म्मविद्, [द्] त्रि, (मर्म्म विध्यतीति। मर्म्म+व्यध्+क्विप्। "व्यधिजभोरचि।" ६।१।१६। इति सम्प्रसारणम्। "मध्यहृतिहृविधिवविवहितनिशु क्वौ।" ६।३।११६। इति दीर्घत्वम्।) सन्धिस्थानवेधकर्त्ता। मर्म्मज्ञः। यथा, भट्टिकाव्ये। ५। ५८।
"चिरं क्षितिक्षा मर्म्मविदामो विभुभिस्तवम्।
ग्रन्थायमानमचलोद्गयं खलदाचरम्॥"
"मर्म्माणि विध्यतीति क्विप् तिः दीर्घश्च। यद्वाहादिषु दीर्घैर्दीर्घाद् क्वचिद् क्विबन्ते पूर्वपदेदीर्घत्वं स्यादिति दीर्घत्वं व्याद्पूर्वस्य रूपं वा मर्म्माविद् मर्म्मज्ञो वा वैत्त रूपम्।" इति तट्टीकायां भरतः॥

मर्म्मिकः, त्रि, (मर्म्म वेत्तीति। मर्म्म+ठक्।) मर्म्मविद्। इति जटाधरः॥

मर्य्यः, पुं, (म्रियतेऽवधिर्यतेऽत्र। मृ+यत्। टाप्।) सीमा। इति मर्य्यादाशब्दटीकायां रायमुकुटः॥

मर्य्यादकः, त्रि, मर्य्यादाकर्त्ता। मर्य्यादां करोतीति कर्म्मणि ट्वुः कादिना कप्रत्यये केऽकः। स्त्रीत्वे वैत्ति आकारस्य ह्रस्वे निष्पन्नोऽयं शब्दः॥

मर्य्यादा, स्त्री, (मर्य्या+दा+अङ्। न्यायपथस्थितिः। (यथा, महाभारते। १५।२०।२५।
"मर्य्यादायां स्थितो धर्म्मः प्रमत्तैवास्य लक्षणम्॥")
तत्पर्य्यायः। संख्या २ धारणा ३ स्थितिः ४। इत्यमरः। २।८।२६॥ "पर्य्यादीयते मर्य्यादा पर्य्याङ्पूर्वात् दाञो डः विपानलात् पस्य मः।" इति तट्टीकायां भरतः॥ "मर्य्यते सीमार्थे अवधं तत्र दीयते मर्य्यादेति स्वामी।" इति रायमुकुटः॥ "स्त्रियन्तेऽवेति मर्य्या तां ददातीति मर्य्यादा।" इति शब्दसुन्दरी॥ सीमा। इति जटाधरः॥
क्रूजनम्। इति हेमचन्द्रः। ३।१४३॥ (यथा, प्रबोधचन्द्रोदये। १।६।
"लक्ष्यालक्षगतयं सीमलङ्घिताधिवभूभृतः।
स्वैरंप्रचारमर्य्यादाला एव हि महोदधेः॥"
देवातिथेः मतौ। यथा, महाभारते। १।८५।२३। [वाम॥")
"देवातिथिः कुरुं वैदेहीमुपयेमे मर्य्यादां

मर्य्यादागिरिः पुं, (मर्य्यादा सीमा तज्ज्ञापको गिरिः।) कुलाचलः। वर्षसीमापर्व्वतः। यथा।
"उत्तरोत्तरेऽलाहतं नीलः श्वेतः शृङ्गवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्य्यादागिरयः प्रागायताः। उभयतः क्षारोदावधयो द्विसहस्रयोजनपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्ये एव भवन्ति। एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः। अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यम्। तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते।" इति श्रीभागवते ५ स्कन्धे १६ अध्यायः॥

मर्व्व, पूर्त्तौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) मर्व्वति पयसा कुम्भं चेटी। इति दुर्गादासः॥

मर्व्वः, पुं, क्लान्तिः। मृङ्धातोर्भावे घञ् प्रत्ययेन निष्पन्नः॥ (यथा, किरातार्জ্জुनीये। १। ६३।
"अ-मर्षमूर्च्छेव जनस्य जन्तुना
न जातहार्देन न विद्विषादरः॥")

मर्षणं, क्लीं, (मृष्+ल्युट्) क्षमा। मृषधातोर्भावे अनट्प्रत्ययेन निष्पन्नम्॥ (धर्म्मजम्। यथा, महाभारते। ३। ३१३। २६।
"न चाप्यधर्म्मे न सुहृद्विभेदने
परस्वहारे परदारमर्षणे।
कदर्य्यभावे च रमेज्जनः सदा
वृथा सदाख्यानमिदं विजानताम्॥")

मर्षयतीति। मृष+णिच्+क्विप्। मर्षके, त्रि। यथा, श्रीमद्भागवते। ४।७।५८।
"इदं पवित्रं परमीशचेष्टितं
यच्छश्वदायुस्यमघौघमर्षणम्॥")

मर्षितः, त्रि, क्षमायुक्तः। शान्तिविशिष्टः। मृष धातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नः॥ (यथा, श्रीमद्भागवते। १। ७। ५१।
"तत्राहमर्षितो भीमस्यास्य अेयान् वधः स्मृतः।
न भर्त्तुर्नात्मनश्चार्थे योऽहन् सुप्तान् शिशून् वृथा॥")

भावे क्तं, क्लीं। (मर्षणम्॥)

मर्षितवान्, त्रि, शान्तः। मृषधातोः कर्म्मणि क्तवतुप्रत्ययेन निष्पन्नः॥

मल, धारणे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ङ मलते। इति दुर्गादासः॥

मलः, पुं, क्लीं, (मल्यते शोध्यते इति। मल्+"मलेर्डिलोपश्च।" उणा० १। १०६। इति असच् डिलोपश्च। यद्वा, मलते धारयति आधारादीर्गन्धमिति। मल+अच्।) पापम्। (यथा, मनुः। २। १०२।
"पश्चिमाम्तु समासीनो मलं शनकि दिवाकृतम्॥"
"दिवार्জ্জितं पापं निहन्ति।" इति तट्टीकायां

मलः
कुल्लूकभट्टः॥ *॥) विट्। (यथा, मनुः। ४। २२०।
"पूयं चिकित्सकस्यान्नं पुंश्चल्याश्चान्नमिन्द्रियम्।
विष्ठा वार्द्धुषिकस्यान्नं ग्राम्यकुक्कुटयोर्मलम्॥"
"विष्ठा मलमेकमेव च।" इति शब्दार्णवे मेघातिथिः॥) किट्टम्। इत्यमरः। २। ६। ६५॥ (यथा, अभिज्ञानशाकुन्तले। ६।
"छाया न लङ्घयति मलीहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा॥")
"पापं किल्बिषम्। विट्। विष्ठा। किट्टं कलङ्को मलूरादि खेदादि च एतत् मलः।
'वसा शुक्रमसृङ्मज्जा मूत्रं विट्कर्णविड्त्वचः।
श्लेष्मास्थूषिका खेदो दादशैते मृजा मलाः॥'
इति स्मृतिः।" इति तट्टीकायां भरतः॥ कर्पूरम्। इति शब्दचन्द्रिका॥ वातपित्तकफाः। यथा,—
"सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः।
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्॥"
इति माधवकरः॥
(पारिभाषिकमलं यथा, महाभारते। ८। ४५। २३।
"क्षत्रियस्य मलं भैक्षं ब्राह्मणस्यानृतं मलम्।
मलं पृथिव्या राजानः स्त्रीणां मरणियो मलम्॥")

मलघ्नः, पुं, (मलं हन्तीति। हन्+टक्।) ग्राम्यालोकन्दः। इति राजनिर्घण्टः॥ मलघ्नाद्यकि, त्रि॥

मलघ्नी, स्त्री, (मलघ्न+स्त्रियां ङीष्।) नागदमनी। इति राजनिर्घण्टः॥

मलजं, क्लीं, (मलाज्जायते इति। जन्+डः।) पूयः। इति शब्दचन्द्रिका॥ मलोद्भवे, त्रि॥

मलदूषितं, त्रि, (मलेन दूषितम्।) मलिनम्। इत्यमरः। ३। १। ५५॥

मलद्रावी, [न्] पुं, (मलं विष्ठां द्रावयति चालयतीति। द्रु+णिच्+णिनिः।) जयपालः। इति राजनिर्घण्टः॥

मलनं, क्लीं, (मल्यते मर्द्यते इति। मल्+ल्युट्।) मर्द्दनम्। इति मेदिनी। ने, १०४॥

मलनः, पुं, (मलते धारयति दृष्टिशक्तौ। मल धृतौ+ल्युः।) पटवासः। इति मेदिनी। ने, १०२। तौंतु इति भाषा॥

मलपूः, स्त्री, (मलात् पापात् पुनातीति। पू+क्विप्।) काकोदुम्बरिका। इत्यमरः। २। ४। ६१॥ (यथा, भावप्रकाशे।
"विभीतकाख्यं मलपूलटानां
क्षायेण लाला गुडसंयुतेन॥")

मलभुक्, [ज्] पुं, (मलं भुङ्क्ते इति। भुज्+क्विप्।) काकः। इति शब्दरत्नावली॥

मलभेदिनी, स्त्री, (मलं भिनत्तीति। भिद्+णिनिः। स्त्रियां ङीप्।) कटुका। इति राजनिर्घण्टः॥

मलमासः, पुं, (मलो मलिनत्वादौ मासश्चेति कर्म्मधारयः।) अधिकमासः। तत्पर्य्यायः।

मलमा

मलिम्लुच: २ अधिमास: ३ असंक्रान्तमास: ४ नपुंसक: ५। तस्य लक्षणं यथा। रविसंक्रान्तभावविशिष्टचान्द्रमासत्वं मलमासत्वम्। इति आहुविवेकटीकायां श्रीलक्ष्मीधरकालंकार:॥ अपि च। ज्योतिषे।

"अमावास्याहयं यत्र रविसंक्रान्तिवर्जितम्।
मलमास: स विज्ञेयो विष्णु: स्वपिति कर्कटे॥
अमावास्याहयम् अमावास्याहयान्तरालस्थमहयम्। रविसंक्रान्तिभ्यां रविक्रियोत्पत्तिरूपोत्तरसंयोगरूपाभ्यां यथाक्रमं वर्जितं तेन दर्शद्वयान्तरालस्थमहयपूर्वापरयोरेव रवे: क्रियोत्पत्युत्तरसंयोगाभ्यां यथाक्रमं योगेनाधिमास:। संक्रान्तेरेकत्वे क्रियोत्पत्तिरपरत्र पूर्वसंयोगनाश: उत्तरसंयोगोत्पत्तिश्चेति चतुष्टयदृष्टित्वमिति मीमांसकसिद्धान्तात्। यत्पुनरिह ज्योति:पराशरौ।

रविक्रान्तो लङ्घितो मासचान्द्र: स्यात्तो मलिम्लुच:।
तत्र यद्विहितं कर्म उत्तरे मासि कारयेत्॥

पराशर:।

पक्षद्वयेऽपि संक्रान्तिर्यदि न स्यात् सितासिते।
तदा तन्मासविहितमुत्तरे मासि कारयेत्॥

अत्र लङ्घनमसंक्रमणत्वं रवेस्तदा भवति यदा तन्मासतत्पर्वमासान्तरचतुष्टयोरेकराश्यवस्थितस्य रवेस्तन्मासानन्तरमेव राश्यन्तरसंयोग: तत्रैकराशिस्थितस्य मासद्वयगमनमात्रं तथात्वे चतुर्णामेकराशौ संक्रान्तस्य प्रतिपत्प्रथमक्षणोऽपरराशौ तत्परराशौ च द्वितीयायां प्रतिपदि वा रवे: संयोगोऽपरस्यापि मलमासता स्यात् अतएव ज्योतिषे।

अमावास्यापरिच्छिन्नं रविसंक्रान्तिवर्जितम्।
मलमासं विजानीयान्नक्षितं सर्वकर्मसु॥
तस्यार्को दर्शकस्यैकराशौ दर्शद्वयातिग:॥
अत्रैकराशिस्थार्कस्य दर्शद्वयातिगत्वमुक्तम्॥
एतच्च पूर्वोपरदर्शयोर्मासयो: पूर्वस्यैव सम्भवति न परस्य॥* मलमासकार्यन्तु ज्योतिषे।

दिवसस्य चरार्कस्य षष्टिभागस्तनो मत:।
करोत्येकमहश्छेदं सर्वेषैकत्र चन्द्रमा:॥
एवमष्टसप्ततीयानामब्दानामधिमासकम्।
यौग्मे जनयत: पूर्वं पश्चाद्भाग्मे तु पश्चिमम्॥

तेन दिवसस्य तिथे: षष्टिभागं दण्डमेकं रविर्हरति छिनत्ति उत्तरे छिन्नमित्यभिधानात्। सप्तत्र ऋतौ मासद्वये षष्टिभाग: छेदादृष्टत्रिंशच्छेदमाकर्षकं करोति। एवं चन्द्रोऽपि। एवमुक्तक्रमेण वर्षे द्वादशतिथ्यात्मककाला कर्षादृष्टसप्ततीयानामब्दानामन्ते अष्टमे सप्ततीये वेषां ते तथा यौग्मे माधवादिषट्के पूर्वं माधवादिचित्रपतितं पश्चाद्भाग्मे तु पश्चिमं आषाढादिचित्रपतितं मलमासं चन्द्रार्कौ जनयत:। यौग्मे माधवादिषट्के इति यदुक्तं तत् उक्तमाह मिश्रिर:।

माधवादिषु षट्केषु मासि दर्शद्वयं यदा।
द्विराषाढ: स विज्ञेय: प्रोक्ते तु श्रावणोऽधुत:॥
द्विराषाढो द्विराषाढादि:। श्रावणे सौरश्रावणे। तथा च ज्योतिषे।

मिथुनस्थो यदा भास्करमासस्यादयं व्रजेत्।
द्विराषाढ: स विज्ञेय: विष्णु: स्वपिति कर्कटे॥
अमावास्याहयं तदन्यत्तच्चाहयं व्रजेत् संयुक्त्यात् न तत्रार्के राश्यन्तरसंयोग इत्यर्थ:॥* ॥ ननु कर्कटादिमिथुने अधिमासपाते तत्पूर्वं मिथुनस्थ एव सूर्यो भवेत् तत् कथं माधवादिषट्कमात्रे कर्कटे तत्। तत्राह राजमार्तण्ड:।

कन्यासिंहकुलीरेषु यदा दर्शद्वयं भवेत्।
आगामिनि तदा वर्षे कुलीरे माधव: क्षपेत्॥

माधवादिचित्रिकआषाढादिचित्रिकाधिमासविवेचनमप्येतदर्थम्। इदन्तु सार्द्धवर्षद्वयाधिमासपातमौचित्यक्रमादुक्तं क्वचित्तिथीनां ह्रासवाहुल्येन दक्षवशाधिकन्यूनदर्शनादुक्तकालन्यूनाधिककालेऽपि मलमासो भवतीति समयप्रकाशकृत्। वस्तुतस्तु वैपरीत्यं यतो न्यूनदक्षतिथे: प्रायिकत्वे तत्र तिथिक्षयस्य झटित्युपलभ्यमानत्वात् स्वल्पकालेन तिथ्यन्तरसम्बन्धात् शीघ्रं रविलङ्घनप्रतीते: शीघ्रमेव मलमासो भवतीति अधिकदक्षतिथे: प्रायिकत्वे तत्र तिथिक्षयस्य झटित्युपलभ्यमानत्वेनाधिकेनैव कालेन तिथ्यन्तरसम्बन्धात् विलम्बेनैव रविलङ्घनप्रतीतेश्चिरेणैव मलमासो भवतीति। तथा च विष्णुधर्मोत्तरम्।

सौरसंवत्सरस्यान्ते मासेन शशिनेव तु।
एकादशाभिरिक्तेऽब्दे दिनानि भृगुनन्दन॥
समाहृते साष्टमासे तस्मान्मासोऽतिरिच्यते।
स चाधिमासक: प्रोक्त: काव्यकर्मसु गर्हित:॥

इदन्तु नियतमेकस्मादधिमासात्तृतीयाब्दे अधिमासान्तरमिति। यद्यपि।

यां तिथिं समनुप्राप्य तुला गच्छति भास्कर:।
तयैव सर्वसंक्रान्तिर्यावच्चैवं न गच्छति॥

इति राजमार्तण्डवचनात्तुलादिषण्मासे तिथिवृद्ध्याभावार्थं द्वादशतिथिवृद्धिरनुपपन्नातथापि।

मध्ये विषुवतोर्भानुर्यस्मिन्मासे तु वर्द्धयेत्।
स: सम्भूयाधिको मास: पतत्येव त्रयोदश:॥

इति यद्यपरिगृहीतत्वाद्वे विषुवतोर्मेषतुलासंक्रान्त्योर्मध्ये मेषादिषण्मास एव तिथिवृद्धिकर्ता। अङ्गीकृते मेषादिषण्मासे मन्दभुक्त्या सप्तदशवृद्धितुलादौ शीघ्रभुक्त्या दिनद्वयह्रास इति। तथा च ज्योति:प्राक्षम्।

मेषादीनामृक्षवृन्दं यस्मात् सप्तदशन्दकम्।
तुलादीनामृक्षसप्तचक्रकन्तु त्रिंशेन पृथक्॥
चक्र एक:। अक्षस्य वामा गतिरित्यृक्षविदां समयात् क्षुत्क्रमेण अङ्का बोधा:। तेन दिनवृद्धिक्रमसङ्ख्याभ्यां मेषादिषट्क एव एकादशादितिथिवृद्धि:। यतश्च।

गतेऽब्दत्रितये सार्द्धे पञ्चमे दिवसे।
दिवसस्याष्टमे भागे पतत्येकोऽधिमासक:॥

इति राजमार्तण्डोक्ते: सप्तदशाहिनाधिकाष्टमासाधिकवर्षद्वये अधिमास:। स च सौरे मासि सप्तदशदिनोत्तरं चान्द्रमासलक्षणासम्भवात् श्रावणमासेन ज्ञेय:। तथा च विष्णुधर्मोत्तरप्रथमकाण्डम्।

सौरेणाब्देन मासेन यदा भवति भागवे!।
सावनेन च मासेन दिनषट्कं प्रपूर्यते॥
सौरसंवत्सरे दिनषट्काधिक: सावनसंवत्सरो भवतीति। सौरमासाष्टकाधिकवर्षद्वये सप्तदशदिनानि वर्द्धन्ते सावनक्रमेणेति पूर्वोक्तविष्णुधर्मोत्तरोक्तसमानविषयतास्फुटेति॥"" ज्योतिषे।

दर्शानां कालगुणादीनां प्रायो मासस्य च क्वचित्।
नपुंसकत्वं भवति न पौरुषस्य कदाचन॥

नपुंसकत्वं मलमासत्वम्। तथा चोक्तम्।

असंक्रान्तो हि यो मास: कदाचित्तिथिवृद्धित:।
कालान्तरात् समायाति स नपुंसक उच्यते॥

प्राक्षित्योऽपि।

प्रायशो न शुभ: सौम्यो ज्येष्ठाषाढ़कलया।
मध्यमौ चैत्रवैशाखावधिकोऽन्य: सुभिक्षकृत्॥
सौम्यो मार्गशीर्ष:। अधिकोऽधिमास:॥"*॥

"तदयं संक्षेप:। शुक्लप्रतिपदादिरमावास्यान्तो रविसङ्क्रान्तो मासो मलमास:। स च माधवादौ औत्सर्गिक: कदाचित् कार्तिकादावपि। अयञ्चाभिप्रेतस्तु माधवादि कार्तिकादिषट्कयोरपि सङ्क्रमणयोगे माधवादावेव तुलादिषट्क एवोभयमासे सङ्क्रमणयोगे पूर्व एव। आश्विनवैशाखयोस्तुलासङ्क्रमणयोगे पर एव मलमास:, तदभिप्रेतस्तु भानुसङ्क्रान्ति:। मलमासे आषाढादेर्दिनत्वम्। भानुसङ्क्रान्तौ तु नैवदिनि विस्तर:॥*॥

मलमासे निषिद्धानि यथा, काठकग्रह्यम्।

चूड़ां मौञ्जीव्रतञ्चैव व्यायोग्यं मखालयम्।
राजाभिषेकं काम्यञ्च न कुर्याद्धिमासके॥
चूड़ां मौञ्जीव्रतञ्चैव व्यायोग्यं मखालयम्।
राजाभिषेकं काम्यञ्च न कुर्याद्धातुसङ्क्षिप्ते॥

मखालयं कन्यार्कमाहम्। भौमपराशरोऽपि।

अधिमासे दिनपाते धनुषि रवौ भानुसङ्क्षिप्ते मासि।
चक्रिणि सुप्ते कुर्याद्यो मात्रयं विवाहञ्च॥
दिनपाते दिनक्षये।
अधिमासे विवाहं यात्रां चूड़ां व्रतोपनयनादि।
कुर्यान्न सावकाशं मात्रयं न तु विधिवेद्याम्। इति।

अत्र विवाहादिकीर्तनं निरवकाशस्यापि निषेधार्थम्। अन्यथा सावकाशमित्यनेनैव सिद्धे:। सावकाशत्वञ्च सम्भवत्कालान्तरं सत्त्वे सतो निरवकाशस्यानन्यगतिकस्य प्रतिप्रसवोऽभ्युपेत्य लक्षित:। तथा च मलमासाधिकारे काठकग्रह्यम्।

कार्येऽन्यगतिं गत्वा कुर्यान्नैमित्तिकीं क्रियाम् ॥"
इति मलमासतत्त्वम् ॥७॥

अपि च।
"अग्न्याधानं प्रतिष्ठाञ्च यज्ञदानव्रतानि च।
ऐषन्नवश्राद्धोनृक्षकर्मचूडाकरणमेखलाः।
माङ्गल्यमभिषेकञ्च मलमासे विवर्जयेत् ॥"
इति शारदे १२८ अध्यायः ॥८॥

अथ मलमासकर्त्तव्यतादि। "चातुर्मास्यव्रतमाषाढ़ाद्युज्झेन विहितं तदप्यारब्धं आषाढ़ादिमलमासेऽपि कर्त्तव्यं आषाढ़ादिप्रतिदिनकर्त्तव्यत्वेन शिरस्काद्यात्।
'षष्ठ्या तु दिवसैर्मासः कथितो बादरायणैः ॥'
इति ज्योतिःशास्त्रे पितामहेन एकमासत्वाभिधानाच्च। यथा।
'संवत्सरन्तु यः पूर्णमेकभक्तेन तिष्ठति।'
इत्यादौ माघाद्यशुक्लप्रतिपत्संवत्सरव्रतमारब्धं तन्मलमासेऽपि कर्त्तव्यम्।
'ऋक्षितयोदशमासाः संवत्सर इति स्मृतेः ॥'
यच्च प्रतिमासविहितं नमाघाद्युज्झेन तन्मलमासेऽपि कर्त्तव्यम्। तथा च रत्नाकरोधृतं शिवरहस्यम्।
'मासि मलिम्लुचेऽप्येवं यत्रेष्टौ नप्तृकारणम्।
किन्तु नोदूढपत्नं कार्य्यमित्याह भगवान् शिवः॥'
उदूढापत्नं प्रतिष्ठा। प्रतारम्भेऽपि निषिद्धः। पूर्व्वोक्तकाम्यप्रयोगवचनात्। ज्येष्ठादिमासविशेषविहितं सावित्रीव्रतादिकन्तु नावकाशत्वान्मलमासे न कार्य्यम्। किन्तु प्रकृत एव ज्येष्ठादौ कर्त्तव्यमिति। हेमाद्रिः।
'नित्यनैमित्तिके कुर्य्यात् प्रयत्नः सन् मलिम्लुचे।
नोपेक्षणं नित्यकार्य्यात् प्रेतश्राद्धं तथैव च॥'
नित्यमहरहः पुरस्कारविहितं ज्ञानसन्न्यासपञ्चमहायज्ञादि काम्यमपि तथाविधं संकल्पितं यत्किञ्चिद्ग्रन्थदानाग्निष्टोमपूजादि। उक्तं भविष्ये।
'कुर्य्यात् प्रातर्दिकं कर्म्म प्रयत्नः सन् मलिम्लुचे।
नैमित्तिकञ्च कुर्व्वीत वावकाश्यं न यद्भवेत्॥'
कालमाधवीये मत्स्यपुराणम्।
'वर्षं चाहरहः श्राद्धं दानञ्च प्रतिवासरम्।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे॥'
काठकग्रह्यपरिशिष्टम्।
'प्रवृत्तं मलमासात् प्राक् यत् कर्म्म न समापितम्।
आगते मलमासेऽपि तत् समाप्यमसंशयम्॥'
मलमासतत्त्वे।
'आरब्धं कर्म्म यत्किञ्चित्तत्कार्य्यं हि मलिम्लुचे॥'
नैमित्तिकं माससंवत्सरदिवसादिविशेषविहितमभ्युदयप्रकरणैकदेशकादाचित्कनिमित्तोत्पन्नम्॥
जातकर्म्माद्यपि मलमासे कार्य्यम्।
'जातकर्म्मान्त्यकर्म्मादि नवश्राद्धं तथैव च।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश॥
चन्द्रसूर्य्यग्रहे स्नानं दानश्राद्धक्रियादिकम्।
कार्य्यं तन्मलमासेऽपि नित्यं नैमित्तिकं तथा॥'

स्मृतेः।
'श्राद्धजातकर्मनामादि यै च संस्कारमाश्रिताः।
मलिम्लुचेऽपि कर्त्तव्याः काम्या दर्शेच वर्ज्जयेत्॥'
संस्कारा अन्नप्राशनचूडिकाव्रतादयः। इति माधवाचार्य्यः। अन्त्यकर्म्मादि यद्यनदहनोदकदानपिण्डदानास्थिसञ्चयादीनि। नवश्राद्धम्।
'चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते॥'
इति यमोक्तम्॥
अत्र चतुर्थाब्दादिग्रहणं मरणदिनावधीति। बालग्रहभूतग्रहणराधिपग्रहलग्नदुःसहरोगाभिभवाद्भुतदुःस्वप्नग्रहदौस्थ्यादिनिमित्तं शान्तिकर्म्मापि मलमासेऽपि कर्त्तव्यम्। विष्णुना शान्तिस्वस्ययनैर्देवोपघातान् शमयेत् परचक्रोपघातांश्च इत्युक्तम्।" इति मलमासतत्त्वम्॥

मलयः, पुं, (मलते धरति चन्दनादिकमिति। मल्+"वसिमलितनिभ्यः कयन्।" उणा० ४। ६६। इति कयन्।) स्वनामख्यातपर्व्वतः। तत्पर्य्यायः। आषाढ़ः २ दक्षिणाचलः ३। इति हेमचन्द्रः। ४। ६५॥ चन्दनाद्रिः ७ मलयाचलः ५। इति शब्दरत्नावली॥ (स च सप्तकुलाचलान्तर्गतः। यथा, मार्कण्डेये। ५७। १०—११।
"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः।
विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः॥")
शैलाङ्गम्। देशविशेषः। (यथा, मात्स्ये। ११३। ४७।
"अङ्गा वङ्गा मद्रका अन्तर्गिरिबहिर्गिरी।
सतः प्रवङ्गमानङ्गमलयामलवर्षिकाः॥")
आरामः। इति मेदिनी। ये, ६६॥ चन्दनवनम्। इति धरणिः॥ अष्टादशद्वीपान्तर्गतद्वीपविशेषः। इति शब्दमाला॥ ऋषभदेवस्य शतपुत्रान्तर्गतपञ्चमपुत्रः। (यथा, श्रीभागवते। ५। ४। १०। "तमनु कुशावर्त्त इलावर्त्तो ब्रह्मवर्त्तो मलयः केतुभद्रसेन इन्द्रस्पृक्विदर्भः कीकट इति नव नवतिप्रधानाः॥"
गरुड़वंशीयानामस्यतम। यथा, महाभारते। १। २०१। १४।
"सुम्बरो मधुपर्कश्च हेमवर्णश्च एव च।
मलयो मातरिश्वा च निशाकरदिवाकरौ॥")

मलयगन्धिनी, स्त्री, (मलयस्य गन्धः अस्त्यस्याः। मलयगन्ध+इनिः। स्त्रियां ङीप्।) उमाशाखीविशेषः। इति शब्दमाला॥

मलयजं, पुं, क्ली, (मलयात् जायते इति। जन्+डः।) चन्दनम्। इत्यमरः। २। ६। १६१॥ (यथा, गीतगोविन्दे। ३। ११।
"क्षुदि विषलतादाहो नायं शुचङ्गमनायकः
कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः॥
मलयजरजो नेदं भस्म प्रियारहिते मयि
प्रहर न हरन्भ्रान्त्यानङ्ग! क्रुधा किमु धावसि॥")

मलयजाते, त्रि। यथा, महाभारते। १। २७। ६।
"उत्पतद्भिरिवाकाशं हृष्टैर्मलयजैरपि॥")
यथा च।
"राहुं मलयजं मूलं पैठीनं द्वादशाङ्गुलम्।
लक्षं लक्षाम्बरं सिंहासनं ध्यात्वा तथाऽर्चयेत्॥"
इति ग्रहयज्ञतत्त्वम्॥

मलया, स्त्री, (मल+कयन्। टाप्।) चिरुता। इति मेदिनी। ये, ६६॥

मलयाचलः, पुं, (मलयश्चासावचलश्चेति।) मलयपर्व्वतः। इति शब्दरत्नावली॥ (यथा, सुश्रुते उत्तरतन्त्रे। ४० अध्याये।
"पुन्नागनागकरवीरलतोपकारे
तस्मिन् मृगे कमलरेखकरे शयीत।
यन्नाङ्गनानिलविकम्पितपुष्पहासि
हेमन्तविन्ध्यहिमवन्मलयाचलानाम्॥")

मलयानिलः, पुं, (मलयस्यानिलः।) वसन्तकालीनवायुः। तत्पर्य्यायः। वासन्तः २। इति त्रिकाण्डशेषः॥ (यथा, साहित्यदर्पणे। ३।१२६।
"स एव सुरभिः कालः स एव मलयानिलः।
सैवेयमबला किन्तु मनोऽन्यदिव वर्त्तते॥")

मलयूः, स्त्री, (मलपूः। पृषोदरादित्वात् यस्य यत्वम्।) मलपूः। इति शब्दरत्नावली॥

मलयोद्भवं, क्ली, (मलयः उद्भव उत्पत्तिकारणं यस्य।) चन्दनम्। इति राजनिर्घण्टः॥

मलविनाशिनी, स्त्री, (मलं विनाशयतीति। वि+नश्+णिच्+णिनिः। स्त्रियां ङीप्।) शुक्लपुष्पी। इति राजनिर्घण्टः॥

मलह्वला, [ह्व] पुं, (मलं ह्वलतीति। ह्वल्+ह्वच्।) शालमलीवृक्षः। इति राजनिर्घण्टः॥

मला, स्त्री, (मल+अच्। टाप्।) भूम्यामलकी। इति शब्दचन्द्रिका॥

मलाकर्षी, [न्] पुं, (मलं विष्ठां आकर्षति स्थानात् स्थानान्तरं नयतीति। आ+कृष्+णिनिः।) हड्डिकः। इति शब्दमाला। हाड़ि इति भाषा॥

मलाका, स्त्री, (मलेन मनोमालिन्येन अक्नति कुटिलं गच्छतीति। अक्+अच्। स्त्रियां टाप्।) कामिनी। दूती। इति संक्षिप्तसारोणादिवृत्तिः॥

मलापकर्षणं, क्ली, (अप+कृष्+भावे ल्युट्। मलस्यापकर्षणम्।) पापमोचनम्। मलदूरीकरणम्। इति केचित्॥

मलापहा, स्त्री, (मलमपहन्तीति। अप+हन्+डः। स्त्रियां टाप्।) वटीविशेषः। यथा,—
"मलापहा भीमरथी च चङ्गा
यथा च लक्ष्मा जलसाम्बगा शुभे!।
मलापहावङ्गयवोत्थयापि
पथ्यं लघु स्वादुतरं सुखान्वितम्॥"
इति राजनिर्घण्टः॥

मलावष्टं, क्ली, (मलं आवष्टनीति। आ+वस्+अच्।) नवविधपापान्तर्गतपापविशेषः। यथा, मानवे। ११। ७१।

"कृमिकीटवयोदृष्टा मलाद्युगतभोजनम्।
पलैश्चःकुसुमस्तेयमधैर्यं च मलावहम्।"

मलारिः, पुं, (मलस्यारिर्नाशको रेचकत्वात्।) सर्जक्षारः। इति राजनिर्घण्टः॥

मलिनं, त्रि, (मलते धारयतीति। मल+"बहुल-मन्यत्रापि।" उणा० २। ७६। इति इनच्। यद्वा, "ज्योतृज्वातमिलेति।" ५। २। ११४। इत्यत्र। "मलशुल्हादिनलीमसचौ प्रत्ययौ निपात्येते।" इति काशिकोक्त्या इनच्।) मलयुक्तवस्तु। तत्पर्य्यायः। मलीमसम् २ कश्मलम् ३ मलदूषितम् ४। इत्यमरः। ३। १। ५५॥ (यथा, मार्कण्डेयपुराणे। १। ७२।
"परपट इव रजकीभिर्मलिनो भुक्तापि निर्दयं ताभिः।
अर्थग्रहणेन विना जघन्य! मुक्तोऽपि कुलटाभिः॥")
लक्षम्। इति मेदिनी। ने, १०४॥ निन्दनेमित्तिकक्रियाङ्गानी। इति मार्कण्डेयपुराणम्॥ (निन्दितम्। यथा, शिशुपालवधे। ६। २३।
"द्युतिमय्यहीदृग्वहगतो जवतः
प्रकटीभवन्ति मलिनाश्रयतः॥"
"मलिनाश्रयतः निन्दिताश्रयत्वात्।" इति तट्टीकायां मल्लिनाथः॥)

मलिनं, क्ली, (मलते धरति दोषमिति। मल+इनच्।) घोलम्। इति शब्दचन्द्रिका॥ दोषः। इति हेमचन्द्रः॥ टङ्कणः। इति राजनिर्घण्टः॥

मलिनसुखः, पुं, (मलिनं सुखमयभागो यस्य।) अग्निः। गोलाङ्गुलः। इति मेदिनी। खे, १८॥ प्रेतः। इति हेमचन्द्रः॥

मलिनसुखः, त्रि, (मलिनं दूषितं सुखं यस्य।) क्रूरः। खलः। इति मेदिनी। खे, १८। हेमचन्द्रश्च॥ ज्ञानवदन्यश्च॥

मलिनाम्बु, क्ली, (मलिनं दूषितमम्बु।) मसी। इति हेमचन्द्रः। ३। ४८॥

मलिनास्यः, त्रि, (मलिनं दूषितमास्यं यस्य।) खलः। इति शब्दमाला॥

मलिनी, स्त्री, (मलमस्या अस्तीति। मल+इनिः। स्त्रियां ङीप्।) रजस्वला नारी। इत्यमरः। २। ६। २०॥

मलिम्लुचः, पुं, (मलौ सन् म्लोचतीति। म्लुच् इर् गत्याम्+कः।) मलमासः। यथा,—
"तमतिक्रम्य तु रविर्यदा गच्छेत् कथञ्चन।
आद्यो मलिम्लुचो नाम द्वितीयः प्रसृतः स्मृतः॥
यदा तं दशमान्तमासमतिक्रम्य तत्पूर्व्वमासान्त्यचन्द्रवृत्तिरात्रिस्थः सन् सूर्य्योऽतिक्रान्तमासो मलिम्लुचो नाम। मलौ सन् म्लोचति गच्छतीति मलिम्लुचः। द्वितीयस्तु प्रसृतः शुद्धः कर्म्मार्हत्वात्।" इति मलमास-तत्त्वम्॥ अग्निः। चौरः। इति मेदिनी। चे, २१॥ (यथा, माघे। १६। ५२।
"प्रहितः प्रधनाय साधना-
नहमाकारयितुं मलीमुचा।
न परेतु महौजसम्बला-
दपकुर्व्वन्ति मलिम्लुचा इव॥")
वायुः। इति शब्दमाला॥ (पक्षपक्षपरिमाणम्। इति हेमचन्द्रः। ३। ५२२॥)

मलिम्लुचा, स्त्री, (अतिशयेन मलिनी। मलिनी+इष्ठः। स्त्रियां टाप्।) रजस्वला नारी। इति त्रिकाण्डशेषः॥

मलीमसं, क्ली, (मलमस्यास्तीति। मल+"ज्योत्स्नातमिस्रेति।" ५। २। ११४। इति ईमसच् प्रत्ययेन निपातितः।) लौहम्। पुष्पकासीसम्। इति मेदिनी। से, ५८॥

मलीमसः, त्रि, (मलमस्यास्तीति। मल+ईमसच्। निपात्यते।) मलिनः। इत्यमरः। ३। १। ५५॥ (यथा, माघे। १। ३८।
"उपप्लुतं पातुमदो महोदधे-
स्त्वमेव विश्वम्भर! विश्वमौग्धिये।
ऋते रवेः क्षालयितुं क्षमेत कः
क्षपातमस्काण्डमलीमसं नभः॥"
लक्षणञ्च। यथा, श्रीकृष्णचरिते। ६। ३८।
"मलीमसश्रीर्मधुपानसक्तो
भिनत्ति लताः पुष्पवतीः स्फुटं यः।
स एव चैत्रेण वनं हिरण्य-
पुष्पेपुराज्ये विहितः पुरोधाः॥")

मलूकः, पुं, (मल+बाहुलकात् ऊकः।) लूमिविशेषः। इत्युज्ज्वलदत्तः॥

मल्ल, ड धृतौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) ड, मल्लते। इति दुर्गादासः॥

मल्लः, पुं, (मल्लते धरति बलमिति। मल्ल+अच्।) बाहुयोधी। इत्यमरभरतौ। माल इति भाषा॥ (यथा, श्रीमद्भागवते। १०। ४३। १७।
"मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान्॥")
वर्णसङ्करजातिविशेषः। माला इति भाषा। स च ब्राह्मणक्षत्रियात् सवर्णायां जातः। इति मानवे १० अध्यायः॥ स च वेटात् तीवर कन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ तन्तुवाय्यां कुन्दकाराज्जातः। इति पराशरपद्धतिः॥ पाचम्। कपोलम्। मल्लभेदः। इति मेदिनी। ले, ४४॥ देशविशेषः। यथा,—
"दशार्णा नवराष्ट्रञ्च मल्लाः शाल्वा युगन्धराः॥"
इति विराटपर्व्वणि १ अध्यायः॥

मल्लकः, पुं, (मल्ल इव। मल्ल+कन्। ह्रस्वादस्य तथात्वम्। यद्वा, मल्ल धारणे+ण्वुल्।) दत्तः। इति हेमचन्द्रः। ३। २८४॥ (ब्राह्मणविशेषः। यथा, राजतरङ्गिण्याम्। ८। २३२०।
"विलोक्य चैकनाथौ तौ बहुतत्त्वाभिधौ तथा।
खड्गासिधेनुकस्थौ द्विजन्मा मल्लकाभिधः॥")

मल्लकः, पुं, क्ली, (मल्लते धारयति मद्यमिति। मल्ल+ण्वुल्।) दीपाधारः। वारिकेलफलाद्यवयवजपात्रविशेषः। माला इति भाषा। स्त्रियां मल्लिका। इत्यमरभरतौ॥ मद्यपः। इति मधुरेशः॥

मल्लजं, क्ली, (मल्ले उदाहरणे जायते इति। जन्+डः।) मरिचम्। इति जटाधरः॥

मल्लतूर्य्यं, क्ली, (मल्लैर्वाद्यमानं तूर्य्यम्। मल्लाय तूर्य्यमिति वा।) वाद्यविशेषः। तत्पर्य्यायः। मल्लाङ्गम् २। इति त्रिकाण्डशेषः॥

मल्लनागः, पुं, (नागो हस्तीव मल्लः। पूर्व्वनिपातः।) वात्स्यायनमुनिः। (मल्लो बलीयान् नागः।) अश्वमात्रः। इति मेदिनी। गे, ५७॥ (मल्लो नाग इव।) वेत्रधारः। इति शब्दरत्नावली॥ कामशास्त्रविशेषः। इति धरणिः॥

मल्लभूः, स्त्री, (मल्लानां भूर्भूमिः।) मल्लभूमिः। इति जटाधरः॥

मल्लभूमिः, स्त्री, (मल्लानां भूमिः स्थानम्।) मल्लक्रीड़ास्थानम्। तत्पर्य्यायः। अक्षवाटः २ रङ्गभूमिः ३ रङ्गस्थली ४। इति शब्दरत्नावली॥ मल्लभूः ५ अक्षपाटः ६। इति जटाधरः॥ देशविशेषश्च॥ (यथा,—
"अयःपात्रे पयःपानं शालपत्रे च भोजनम्।
शयनं तालपत्रे च मल्लभूमेरियं गतिः॥"
इत्युद्भटः॥)

मल्लयाचा, स्त्री, (मल्लानां याचा।) मल्लानां युद्धार्थयाचा। तत्पर्य्यायः। माल्लवी २। इति शब्दावली॥

मल्लयुद्धं, क्ली, (मल्लानां युद्धम्।) मल्लानां संग्रामः। तत्पर्य्यायः। नियुद्धम् २ बाहुयुद्धम् ३। इति शब्दरत्नावली॥ तत्प्रकारो यथा,—
"अथ खड्गेन तं मल्लं बोधयामास मल्लराट्।
बोध्यमानस्ततो भीमो दुःखेनैवाकरोन्नतिम्॥
नहि शक्नोति विवृतं प्रत्याख्यातुं नराधिपम्।
ततः स पुरुषव्याघ्रः प्रादुर्जिघ्रिधिषन्धरम्॥
प्रविवेश महारङ्गं विराटमभिपूजयन्।
यत्र कृष्णा कौन्तेयस्ततः संजघ्रिवान् जनात्॥
ततस्तं हृष्टसङ्काशं भीमो मल्लं समाह्वयत्॥
जीमूतं नाम तं मल्लं तत्र ख्यातपराक्रमम्।
ताडुभौ समहोत्साहावुभौ तीव्रपराक्रमौ॥
मत्ताविव महाकायौ वारणौ धरिहायनौ।
ततस्तौ नरशार्दूलौ बाहुयुद्धे समौयतुः॥
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ।
आसीत् सुभीमः सम्पातो वज्रपर्व्वतयोरिव॥१०॥
उभौ परमसंहृष्टौ वज्रेणातिबलावुभौ।
अन्योन्यमन्तरेप्सू परस्परजयैषिणौ॥
उभौ परमसंहृष्टौ मत्ताविव महागजौ।
ततप्रतिहतैश्चित्रैर्बाहुभिश्च सकृष्टिभिः॥ ११॥
सन्निपातावधूतेन प्रमाथोज्झयनेन च।
क्षेपणैर्मुष्टिभिश्चैव परावोड्डनविग्रहैः॥
तलैर्वज्रनिपातैश्च प्रहरद्भिश्च चक्रतुः।
मुखाकारप्रहारैश्च प्रादीर्घाभिश्च दारणैः॥

मञ्जुल

जानुभिश्चाञ्चलिर्बद्धैः शिरोभिश्चावचुम्बितैः ।
तद्भूयसमभवद्धीरमग्रयं बाहुतेजसा ॥
वज्रप्राकीन मूरार्वा क्षमाजोद्भवशत्रिधौ ।
आरब्धत जयः शब्दैः क्षोत्तुकुटनिनदोत्थितः ।
बलिनो संयुगे राजन् ! इन्द्रवासवयोरिव ।
प्रकर्षजावकर्षाभ्यां बाहुभिश्चाभिजघ्नतुः ॥१२॥
आकर्षतामथान्योन्यं बाहुभिश्चाभिजघ्नतुः ॥१२॥
ततः शब्देन महता भर्त्सयन्तौ परस्परम् ।
क्रूरोरस्कौ दीर्घभुजौ निर्मुद्गरभुजाविव ॥
बाहुभिः क्षमयञ्जेतामावर्षैः परिवेरिव ।
चक्रतुर्दोर्भासुत्पात्य भीमो मल्लमभिद्रवत् ॥
विगृह्यमभिक्रोशन् बाहूँश्च इव धारयन् ।
ततस्तयन्य महाबाहुर्भामयामास भीमवान् ॥
ततो मल्लाश्च मल्लाश्च विस्मयं चक्रिरे परम् ।
भ्रामयित्वा शतगुणं गतसत्त्वमचेतनम् ।
प्रक्षिप्य च महाबाहुर्भूमौ हत्वोदरः ॥१३॥
तस्मिन् विनिहते मल्ले क्रोष्टके लोकविश्रुते ।
विराटः परमं हर्षमगच्छद्भ्रातृभिः सह ॥
स वर्षाणि प्रहर्षी किं वहु राजा मत्स्यवान् ।"

इति विराटपर्व्वणि १२ अध्यायः ॥

अस्य टीका यथा ।"दुःखेन सम्प्रकटनराजाज्ञालङ्घनहृष्टेन । विहतं लोकसमक्षम् । बाहूँल्लिखितः सिंह इव व्याघ्र इव वा लिखितः स्यात् । स्यात् संदेहेऽपि च बाहूँश्च इति दर्शनात् । कक्षां कक्षम् । सञ्जातः संघर्षः ॥ १० ॥ सकुटेः कुटः करघर्षणम् किम्; कक्षा इति प्रसिद्धः । ज्ञातप्रतिज्ञतेः परप्रयुक्तिप्रतिज्ञतेः । चित्रैश्चित्रैश्चैर्न्यैरिति शेषः ॥ ११ ॥ सन्निपातैत्यादि । इते मल्लानां शिक्षाविशेषाः । सन्निपातैः परस्परसंघातैरवधूतैर्वञ्चनसहितैर्भुजाघातैः प्रमाथैः पातयित्वा पेषणैः । उत्क्षेपणैः अन्तरीयैः सुजाभ्यां मथनैः । पीडनैः स्थानात् प्रच्यावनैः । महाबाहुलिकरो सृष्टिः ।

'अवाक्सुखं स्वप्नगतं श्रमयित्वा तथैव यः ।
चिरस्य मुक्तः स भवेद्वराद्दोत्तुनिजनः ॥
तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः ।
संप्रहारस्तलाख्यस्तु संज्ञो वक्षसि यः ॥'
अङ्गैश्चन्द्रतुल्यमल्लसृष्टिर्वक्षसि इत्यर्थः ।
'प्रक्षताङ्गुलिहस्तेन प्रहृष्टः प्रहृतिः स्मृता ।
द्विगुणीकृतबाहुर्यत्कदीर्घार्थे यथाबलम् ॥
प्रहारः सगुणाका स्यात् पादोद्धूतः पदाहतम् ॥'

जानुभिश्चाञ्चलिर्बद्धैः पाणाग्रजोषसङ्गणाञ्जलिभिः करजैर्नाम्नवचुम्बितानि ते;। वज्रप्राकीन वज्रोत्तमैश्च । क्षोत्तुकुटनिनदोत्थितः उत्क्रोधन निनदोत्थानसहितः । प्रकर्षजं बाहुसंसक्तानयनं प्रसक्ताकर्षणं तदेवाकर्षजमीषत्सम्मुखानयनम् । अध्याकर्षः समन्ततः कर्षणम् । विकर्षजं पश्चात् नयनं तदेव विपरीतकर्षणमुच्यते उपसर्गभेदादर्थभेदोऽपीति ॥ १२ ॥ शुतगुणं शुतधारम् ॥ १३ ॥" इत्यर्जुनमिश्रकृतभारतार्थदीपिका ॥

मल्लः

मल्ला, स्त्री, (मल्लते धारयति विद्यादिकमिति । मल्ल धारणे + अच् । स्त्रियां टाप् ।) नारी । पद्मवल्ली । मल्लिका । इति शब्दरत्नावली ॥ (लोहनराजपत्नी । यथा, राजतरङ्गिण्याम् । ८ । १६९० ।

"तमेव पुत्रा द्योचन्ती द्योकाग्रकुचताम्रया ।
ततः प्रपेदे प्रलयं मल्ला लोहनवल्लभा ॥")

मल्लारः, पुं, (मल्लं मल्लत्वं प्राप्नोतीति । मल्ल + अण् ।) रागविशेषः । स तु षष्ठ्यां रागाणां मध्ये द्वितीयः । यथा,—

"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरामस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकीर्तिताः ॥"

अस्य षट्रागिण्यो यथा,—

"वेलावली पूरवी च कामोदा माधवी तथा ।
कोदा केदारिका चैव मल्लारस्य प्रिया इमाः ॥"

अस्य गानसमयः ।

"मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥"

अस्य स्वरूपं यथा,—

"शुक्लावदातं पलितं दधानः
प्रलम्बकर्णः कुसुदेन्दुवर्णः ।
कौपीनवासाः सविचारचारी
मल्लारराजः शुचिशुक्लमूर्त्तिः ॥"

इति सङ्गीतदामोदरः ॥

(तथा च सङ्गीतदर्पणे रागाध्याये ।

"भैरवः पञ्चमो नाटो मल्लारो गौडमालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यते लोकविश्रुताः ॥"

"मेघमल्लारिका मालकौशिकः पटमञ्जरी ।
आशावरीति विज्ञेया रागा मल्लारसंज्ञया ॥"

इति रागार्णवमतम् ॥)

मल्लारी, स्त्री, (मल्लार + ङीप् ।) वसन्तरागस्य रागिणी । यथा,—

"आन्दोलिता च देशाख्या लोला प्रथममल्लरी ।
मल्लारी चेति रागिण्यो वसन्तस्य सदानुगाः ॥"

इति सङ्गीतदामोदरः ॥

मेघरागस्य रागिणी । इति हलायुधः ॥

(अस्या उदाहरणादिकं यथा संगीतदर्पणे ।

"मल्लारी सपदीना स्यात् गम्भीरग्रन्थिसंयुता ।
औडवा गौडरीयुक्ता वर्षासु सुखदा सदा ॥"

ध नि रि ग म ध । अस्या ध्यानं यथा,—

"गौरी लग्ना कोकिलकण्ठनादा
गीतच्छेदैर्नाम्पतिं स्मरन्ती ।
आदाय वीणां मलिना वदन्ती
मल्लारिका यौवनदूनचित्ता ॥")

मल्लः, पुं, (मल्लते धारयति विद्यानमिति । मल्ल + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) चतुर्विंशतिहस्ताईतां मध्ये स्तम्भविशेषः । इति हेमचन्द्रः ॥ १ । २८ ॥

मल्लः, स्त्री, (मल्ल + इन् ।) मल्लिका । इति शब्दरत्नावली ॥

मल्लिका

मल्लिकः, पुं, (मल्लते धार्य्यतेऽसौ । मल्ल + इन् । स्वार्थे कन् ।) मल्लिकपक्षिविशेषः । मल्लिके; किञ्चिद्धूसरवर्णैरालोहितैश्चञ्चुचरणैरुपलक्षितः शुक्लहंसः । इत्यमरभरतौ ॥ शुक्लानुपाधिविशेषश्च । (यथा, भरतमल्लिकः । तथा च भट्टिकाव्यटीकारम्भे मङ्गलाचरणश्लोकः ।

"नत्वा शङ्करमम्बुजोद्भवगौराङ्गमल्लिकाञ्जलः ।
भट्टिटीकां प्रकुरुते भरतो सुग्धबोधिनीम् ॥")

मल्लिका, स्त्री, (मल्लिरेवेति । मल्लि + स्वार्थे कन् । स्त्रियां टाप् । यद्वा, मल्लिरेव स्वार्थे शुक्लत्वात् । मल्लि + स्वार्थे कन् ।) स्वनामख्यातपुष्पवृक्षः । वेलफुल इति भाषा ॥ (यथा, कथासरित्सागरे । २ ।

"मल्लिकासुकुले चक्षि ! भाति शुक्लमधुव्रतः ।
प्रयाणे पञ्चबाणस्य शुक्लमापूरयन्निव ॥")

तत्पर्य्यायः । जलजमूल्यम् २ भूपदी ३ शुक्लभीरुः ४ । इत्यमरः । २ । ४ । ६८ ॥ जलजमूल्या ५ शुक्लभीरुः ६ । इति भरतः ॥ मदयन्ती ७ गौरी ८ वनचल्लिका ९ प्रिया १० सौम्या ११ नारीष्टा १२ मिरिला १३ सिता १४ मल्ली १५ मदयन्ती १६ चल्लिका १७ मोदिनी १८ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुष्यत्वम् । सुखपाककफविस्फोटकृमिविषव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफनाशित्वम् । इति राजवल्लभः ॥ उष्णत्वम् । लघुत्वम् । हृद्यत्वम् । वातपित्तास्रदाहाश्रुरुचिनाशित्वञ्च । इति भावप्रकाशः ॥ * ॥

अस्या उत्पत्तिर्यथा,—

"विचरन्तं तदा भूयो मदेशं कुसुमायुधः ।
आरात् स्थित्वायतो धन्वी सन्तापयितुमुद्यतः ॥
ततस्तमयतो दृष्ट्वा क्रोधाद् आतङ्गया हरः ।
स्मरमालोकयामास शिखायाश्चरजान्तिकम् ॥
आलोकितस्त्रिनेत्रेण मदनो द्युतिमानपि ।
प्रादह्यत तदा ब्रह्मन् ! पादादारभ्य कृत्स्नवत् ॥
प्रदह्यमानो चरणौ दृष्ट्वासौ कुसुमायुधः ।
उत्ससर्ज्ज धनुः श्रेष्ठं तच्चगामाथ पञ्चधा ॥
यदासौ भुविपतितं तद्भूमिपृष्ठं मनोरमम् ।
स च कल्पतरुर्ज्ञातः सम्भवाद्यो गुणाकरः ॥
नाहस्थानं शुभाकारं यदासीद्भवभूषितम् ।
तज्जातं केशवारण्यं बकुलं वामनो नगैः ॥
या च कोटी शुभा ज्ञासीद्दिव्यनीलविभूषिता ।
जाता सा पाटला रम्या भूरुहाणविभूषिता ॥
नाहोपरि तथा सुरो ज्ञातं चन्द्रमणिप्रभम् ।
पद्मगुल्माभवज्जाती शुभ्राङ्गकिरणोज्ज्वला ॥
जङ्घे तस्या अवः कक्षाः ज्ञातं विद्रुमभूषितम् ।
तस्माद्बहुपुटा मल्ली सञ्जाता विविधा सुने ! ॥"

इति वामनपुराणे ६ अध्यायः ॥

मल्लविशेषः । रत्नपात्रभेदः । इति मेदिनी । के, १२७ ॥ पानपात्रम् । इति हेमचन्द्रः ॥

मल्लिकाक्षः, पुं, (मल्लिकापुष्पमिव अक्षिणी यस्येति । "अक्ष्णोऽदर्शनात् ।" ५ । ४ । ७६ ।

इति अत्र ।) मलिनचञ्चुचरणयुक्तहंसः । इति हेमचन्द्रः । । ४ । ३८२ ॥ शुक्लवर्णवेष्टितचञ्चु-र्दयुक्तहयः । इति हलायुधः ॥ (यथा, हरिवंशे । २४१ । २५—२६ ।

"मल्लिकाक्षान् विरूपाक्षान् क्रौञ्चवर्णान् भगो-
जवान् ।
अश्वसैन्यं महाबाहुस्तदप्रतिमपौरुषः ।
निरुदयामास बली गदया भीमविक्रमः ॥")

मल्लिकाक्षः, पुं, मलिनचञ्चुचरणयुक्तहंसः । इत्य-मरटीका ॥ ते विना हंसा मलिनैः किञ्चि दसरधवलैरालोहितैश्चञ्चुचरणैर्लक्षिता मल्लि-काख्या मल्लिकनामानः । मल मल्ल ड धृतौ लान्तः नाञ्चीति इकः । मल्लिको हंसभेदे स्यात्तत्समूहस्तु मल्लिका । इति भरतः । शुक्ला-ङ्गत्वान्मल्लिकापुष्पमिव अक्षि येषां ते मल्लि-काक्षा इति स्वामी । इति भरतः ॥ (यथा, उत्तररामचरिते । १ । २६ ।

"यत्तस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुदरच्छपुष्करीकाः ।
वाष्पाम्भःपरिपतनोन्मनारवाले
संदृष्टाः कुवलयिनो भुवो विभागाः ॥")

मल्लिकाख्या, स्त्री, (मल्लिकेति आख्या यस्याः ।) त्रिपुरमालीपुष्पम् । तत्पर्य्यायः । मोहिनी २ वटपत्रा ३ मोहना ४ । इति रत्नमाला ॥

मल्लिकागन्धं, क्ली, (मल्लिकाया इव गन्धो यस्य ।) मङ्गलागुरु । इति राजनिर्घण्टः ॥

मल्लिकापुष्पः, पुं, (मल्लिकाया पुष्पमिव पुष्पं यस्य ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥ करञ्जवृक्षः । इति हेमचन्द्रः । करञ्जा लेतु इति भाषा ॥ स्वनामख्यातपुष्पवृक्षश्च ॥

मल्लिगन्धि, क्ली, (मल्लेरिव गन्धो यस्य तत् । "उपमानाच्च ।" ५ । ४ । १३८ । इति इकार-प्रत्ययः ।) अगुरु । इति शब्दचन्द्रिका ॥

मल्लिपर्णं, क्ली, (मल्लेः पत्रमिव पत्रं यस्य ।) कुञ्जाकः । इति त्रिकाण्डशेषः ॥

मल्ली, स्त्री, (मल्लि + ङ्यादिकारादिति पक्षे ङीष् । मल्लिका । इति राजनिर्घण्टः शब्दरत्ना-वली च ॥ (यथा, राजेन्द्रकर्णपूरे । ४८ ।

"किं राकेन्दुकरच्छटाभिरहितं किं मौक्तिकै-
रञ्चितं
किं मल्लीमुकुलैः स्थितं विकसितं किं मालती-
कुड्मलैः ॥")

मल्लीकरः, त्रि, (अञ्जलमपि आत्मानं मल्लमिव करोतीति । मल्ल + अच् ।) चौरः । इति शब्द-रत्नावली ॥

मल्लु, पुं, (मल्लते भयं धारयतीति । मल्ल + बाहु-लकात् उः ।) भालुकः । इति शब्दचन्द्रिका ॥

मव, बन्धे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मवो बन्धनम् । मवति चौरं लोकः । इति दुर्गादासः ॥

मवितः, त्रि, (मव + कर्म्मणि क्तः ।) बद्धः । इत्यमरटीकायां स्वामी ॥

मश, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मशति चौरं राजा । यद्यया-लोऽयमित्येके । इति दुर्गादासः ॥

मश, भक्षे । रोषे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) मशति मशकः । इति दुर्गादासः ॥

मशकः, पुं, (मशति भक्षतीति । मश् + अच् । संज्ञायां कन् ।) कीटविशेषः । मशा इति भाषा ॥ तत्पर्य्यायः । दंशकः २ क्षुद्रास्यः ३ क्षुद्र-मक्षिकः ४ रात्रिजागरदः ५ । इति राज-निर्घण्टः ॥ (यथा, श्रीमद्भागवते । ३ । ३१ । २७ ।

"तुदन्त्यमत्सरं दंश्या मशका मत्कुणादयः ।
वदन्तं विगतज्ञानं क्षमयः क्षमिकं यथा ॥")

तन्नाशकधूपो यथा,—

"त्रिफलार्ज्जुनपुष्पाणि भल्लातकशिरीषकम् ।
लाक्षासर्ज्जरसश्चैव त्रिवृच्चैव गुग्गुलुः ।
एतैर्धूपैर्मशकिकाणां मशकानां विनाशनम् ॥"

इति गारुडे १८१ अध्यायः ॥

चर्म्मभेदः । स तु स्वनामख्यातचर्म्मनिर्म्मित-स्नेहादिपात्रम् । रोगविशेषः । माशा इति हिन्दी । आँचिल इति बङ्गभाषा ॥ इति शब्द-रत्नावली ॥ * ॥ मशकरोगमाह ।

"अवेदनं स्थिरश्चैव यस्तु गात्रे प्रदृश्यते ।
माषवत् श्लक्ष्णसुस्निग्धं मलिनं मशकं विदुः ॥"

स्थिरं अचलम् । अस्य चिकित्सा यथा,—

"चर्म्मकीलं जतुमणिं मशकाख्यिलकालकान् ।
उत्खन्य शस्त्रेण दहेत् क्षारामिभ्यामनौषधैः ॥"

इति भावप्रकाशः ॥

अपि च

"लशुनानान्तु चूर्णस्य चर्षो मशकनाशनः ।"

इति गारुडे १७५ अध्यायः ॥

मशकी, [न्] पुं, (मशकाः सन्त्यस्यामिनि । मशक + इनिः ।) उदुम्बरवृक्षः । इति हेम-चन्द्रः । ४ । १८८ ॥

मशकहरी, स्त्री, (मशं मशकं हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ८ । इति अच् । स्त्रियां ङीष् ।) मशकनिवारकप्रावरण-विशेषः । मशारि इति भाषा ॥ चतुष्की २ । इति जटाधरः ॥

मशुरः, पुं, (मे मस्मिन् शेते शयति वर्द्धते इति । शि + बहुलवचनात् कः । मसः निपातितः ।) कुक्कुरः । इति शब्दमाला ॥

मष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक० सेट् ।) मषति । इति दुर्गादासः ॥

मषिकूपी, स्त्री, (मषेः कूप इव । मषिकूप + अस्त्यर्थे ङीष् ।) मस्याधारः । इति हेमचन्द्रः ॥ ३ । २४८ ॥

मषिधानं, क्ली, (धीयतेऽस्मिन्निति । धा + अधि-करणे ल्युट् । मषेर्धानं स्थानम् ।) मस्याधारः । इति हेमचन्द्रः । ३ । २४८ ॥

मषीपत्रदलः, पुं, (मषीभिर्लेखनं लेखनयोग्यं दलं यस्य ।) शीतालवृक्षः । इति राजनिर्घण्टः ॥

मस, दर्द्द ण्ड परिमाणे । परिणामे । इति कवि-कल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् । निष्ठाया-मनिट् ।) दर्द्द, अमसत् अमासीत् अमसीत् । अस्मात् पुषादित्वात्सिचि ङ इत्यत्वे । य, मस्यति धान्यं यन्त्री । परिमातीत्यर्थः । ण्ड, मसः । परि-णामं कस्यचिदनुरोधात् । इति दुर्गादासः ॥

मसकः, पुं. (मस्यते परिमीयतेऽनौ । मस + कर्म्मणि घञ् । अल्पार्थे कन् ।) क्षुद्ररोम-विशेषः । माशा इति लोके प्रसिद्धः । तल-क्षणं यथा,—

"अवेदनं स्थिरश्चैव यस्तु गात्रे प्रदृश्यते ।
माषवत् श्लक्ष्णसुस्निग्धं मलिनं मसकं विदुः ॥"

अवेदनं वेदनारहितम् । स्थिरम् अचलम् । तच्चिकित्सा यथा,—

"चर्म्मकीलं जतुमणिं मसकाख्यिलकालकान् ।
उत्खन्य शस्त्रेण दहेत् क्षारामिभ्याम-
नौषधैः ॥"

इति भावप्रकाशः ॥

मसनं, क्ली, (मस्यते इति । मस + ल्युट् ।) सोम-राजीवृक्षः । इति शब्दचन्द्रिका ॥

मसरा, स्त्री, (मस् + बाहुलकात् अरच् । स्त्रियां टाप् ।) मसूरः । इति जटाधरः ॥

मसारः, पुं, (मस + भावे घञ् । मसं परिमाणं ऋच्छतीति । ऋ + अण् ।) इन्द्रनीलमणिः । इति शब्दरत्नावली ॥ (यथा, नैषधचरिते । ८ । १०४ ।

"चकास्ति विष्वक्चपलाकृतिश्चासुरी-
घनाम्बुविच्छुर्त्तिकैवाम्बरे ।
मसारनारावि ! मसारमालना
तनोषि संसारमसंग्रहं यतः ॥")

मसारकः, पुं. (मसार + स्वार्थे कन् ।) इन्द्रनील मणिः । इति शब्दरत्नावली ॥

मसिः, स्त्री, पुं, (मस्यते परिक्रमते इति । मस + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११० । इति इन् ।) लिपिप्रयोजना । लेखनवस्तु । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । मसि-लसम् २ पत्राञ्जनम् ३ । इति त्रिकाण्डशेषः ॥ मेला ४ कालौ ५ अञ्जनम् ६ मसी ७ । इति शब्दरत्नावली ॥ रञ्जनी ८ । इति स्वामी ॥ मसिनाम्नु ८ मसौ १० । इति हेमचन्द्रः । ३ । १४८ ॥ शैवालिकाद्रव्यम् । इति वैद्यः शब्द-रत्नावली च ॥

मसिका, स्त्री, शैवालिका । इति शब्दरत्नावली ॥ मलिका इति ग्रन्थान्तरे पाठः ॥

मसिधानं, क्ली. (मसेर्धानं आधारः ।) मस्या-धारः । इति शब्दरत्नावली ॥

मसिधानी, स्त्री, (मसेर्धानी ।) मस्याधारः । दोयात इति भाषा ॥ तत्पर्य्यायः । मसिमञ्जिः २ मेलाम्बुः ३ वर्णकुपिका ४ मेलाभद्रा ५ मेलाम्बु ६ मसिधानम् ७ । इति शब्दरत्नावली ॥ मसिकूपी ८ । इति हेमचन्द्रः ॥ मसिकूपिका ९ । इति जटाधरः ॥

मसूरः

मसिनं, क्ली, (मस्यते परिमीयते गण्यतयेति। मस् + "बहुलमन्यत्रापि।" उणा० २। ४८। इति इनच्।) सधिक्यम् २। इत्युणादिकोषः॥

मसिपत्रयः, पुं, (मसिः कालो पत्रयमस्य।) लेखकः। इति त्रिकाण्डशेषः॥

मसिप्रस्थः, स्त्री, (मसिं प्रकर्षेण स्थते उच्चिरतीति। प्र + स्था + किप्।) मस्याधारः। इति हारावली॥ लेखनी। इति केचित्॥

मसिमञ्जिः, स्त्री, (मस्याधारो मञ्जिरिवेति।) मस्याधारः। इति शब्दरत्नावली॥

मसिवर्द्धनं, क्ली, (मसिं वर्द्धयतीति। वृध् + णिच् + ल्युः।) रसगन्धः। इति त्रिकाण्डशेषः॥

मसी, स्त्री, (मसि + ङादिकारादिति ङीष्।) कालो। (यथा, नैषधचरिते। ८। ६१।

"खदास्य निर्यज्जदलीकटुर्यथो-
मसीमयं वक्ष्यपिकरूपभागिव।")

पीषालिकाद्रव्यम्। इति शब्दरत्नावली॥

मसीजलं, क्ली, (मस्या जलम्। राहोः शिर इतिवत् अभेदे षष्ठी।) मसी। कालो। इति त्रिकाण्डशेषः॥

मसीधानी, स्त्री, (मस्या धानी पात्रम्।) मस्याधारः। इति त्रिकाण्डशेषः॥

मसीना, स्त्री, (मस् + "बहुलमन्यत्रापि।" उणा० २। ४८। इति। इनच्। पृषोदरादि त्वाद्दीर्घः। स्त्रियां टाप्।) खनामख्यातग्रन्थम्। यथा, ग्रन्थचन्द्रिकायाम्।

"मसीना चातसी चिङ्गा क्षुमोनामालिका मिता॥"

मसुरः, पुं, (मस्यते परिमीयतेऽसौ। मस् + "मसेरच्।" उणा० १। ४१। इति। उरच्।) मसुरकलायः। इति त्रिकाण्डशेषः॥

मसुरा, स्त्री, (मस्यति प्रयत्नेन परिणमत्यसाविति। मस् + उरच्। स्त्रियां टाप्।) वेधा। औद्भिदभेदः। इति मेदिनी। रे, २०१॥

मसूरः, पुं क्ली, (मस्यते परिमीयतेऽसौ। मस् + "मसेरूरच्।" उणा० ५। ३। इति ऊरच्।) औद्भिदभेदः। मसुरी कलाई इति भाषा॥ (अस्याधिपतिर्मेषराशिः। यथा, बृहत्संहितायाम्। ४१। २।

"वस्त्राधिकृतुपानां
मसूरगोधूमराजकयवानाम्।
क्षारलवणौषधीनां
कनकस्य च कीर्त्तितो मेषः॥")

तत्पर्य्यायः। मङ्गल्यकः २। इत्यमरः। २।४।१७॥ मसुरः ३ औद्भिकाख्यः ४। इति त्रिकाण्डशेषः॥ मसूरा ५ मसूरा ६। इति मेदिनी। रे, २०१॥ रागहारिः ७ मङ्गल्यः ८ पृथुबीजकः ९ मूरः १० कल्याणबीजः ११ गुडबीजः १२ मसूरकः १३। इति राजनिर्घण्टः॥ मङ्गल्याः ७ मसूरकाः १५। इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। संग्राहित्वम्। अपित्तनाशित्वम्। शोणितप्रसादकरत्वम्। अक्षिरोगहरत्वम्। अग्निदीप्तिकरत्वम्। इति राजनिर्घण्टः॥ अस्य गुरुत्वम्। रूक्षत्वम्। ज्वरनाशित्वञ्च। इति भावप्रकाशः॥ तस्य यूषगुणाः। संग्राहित्वम्। स्वादुपाकित्वम्। प्रमेहपित्तश्लेष्मज्वरातीसारनाशित्वञ्च। इति राजनिर्घण्टः॥

मसूरकः, पुं, (मसूर इव प्रतिकृतिरिति। मसूर + कन्। संज्ञायां कन् वा।) उपदंशविशेषः। गोल वालिशू इति भाषा। तत्पर्य्यायः। चतुरः २ चातुरः ३ अङ्गेरुः ४ चक्रगण्डुः ५। इति शब्दरत्नावली॥ (स्त्रीत्वेऽपि दृश्यते। यथा, बृहत्संहितायाम्। ४३। ७२।

"अष्टाभि नीलरक्तं
श्लेष्मोत्थमिन्द्रेण भूषणं दत्तम्।
असितं यमस्य तुण्ड
मसूरकं कान्तिमदयच्छत्॥")

मसूरविदला, स्त्री, (मसूरस्येव विशिष्टं दलमस्याः। स्त्रियां टाप्।) लक्ष्मणिवृक्षः। इत्यमरः। २। ४। १०९॥ (यथा, राजतरङ्गिण्याम्। ६। १८७।

"मसूरविदलाकारतूलाक्षिप्तक्षणेश्वरः।
पौषे चान्द्रे चतुस्त्रिंशे नवमेऽब्दे सिते ऽहनि॥")

श्यामलता। इति रत्नमाला॥

मसूरा, स्त्री, (मस्यति परिणमतीति। मस् + ऊरच्। स्त्रियां टाप्।) वेधा। मसूरकलायः। इति मेदिनी। रे, २०१॥

मसूरिका, स्त्री, (मसूरेव। मसूरा + कन्। स्त्रियां टाप्। अत इत्वञ्च।) कुष्ठभेदः। इति शब्दमाला॥ * ॥ यस्मसूरोगः। तस्योत्पादनक्रिया टीका इति ख्याता। सा तु गोलत्वक्-मसूरकाख्य-मसूरिकापूर्व्वेण भवति। यथा,—

"धेनुस्तन्यमसूरिका मसूराख्य मसूरिका।
तन्मूलं बाहुमूलाख्य शुक्लान्तेन गृहीतवान्॥
बाहुमूले च शुक्लाख्ये रक्तोत्पत्तिकराणि च।
तन्मूलं रक्तमिलितं स्फोटकल्वरसम्भवम्॥"

इति धन्वन्तरिशल्यतन्त्रोक्तयमस्य॥

तत्पर्य्यायः। मसूरोगः २ रक्तबटी ३ मसूरी ४। इति शब्दरत्नावली॥ * ॥ अथ मसूरिकाधिकारः। "तत्र मसूरिकाविप्रलब्धनिदानपूर्व्विका संप्राप्तिमाह।

'कट्वम्ललवणक्षारविरुद्धाध्यशनाशनैः।
दुष्टनिष्यावमाषाढ्यैः प्रदुष्टपवनोदकैः॥
क्षुद्रयष्टिचणाद्यापि देशे दोषाः समुद्भवाः।
जनयन्ति शरीरेऽस्मिन् दुष्टरक्तेन सङ्गताः॥
मसूराकृतिसंस्थानाः पिडकाः स्युर्मसूरिकाः॥'

क्षारो यवक्षारः। विरुद्धाध्यशनाशनैः कट्वादिविरुद्धान्नामशनैः। अथ च अध्यशनाशनं अधिकमशनं अध्यशनम्। दुष्टनिष्यावमाषाढ्यैः। दुष्टैर्निष्यावमाषाढ्यैः। आद्यशब्दाभ्यामन्यान्नकादिसंग्रहः। प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् क्षुद्रयष्टिचणाद्यापि देशे देशे क्षुद्रयष्टा राजशुक्लेक्षुरादयश्चणा अन्ये च शुष्कशाकादयः तेषां देशे देशे जलमपि मसूरिकोत्पत्तिनिमित्तं। तत्र

तदाधारत्वात्। अतएवाग्रे भ्रमरेणेव विद्धानि कुर्वन्त्यक्षीणि सर्वत इति। मर्म्मधामानि मर्म्मस्थानानि ॥ * ॥ शुक्रगतामाह।

'प्रभाभाः पिड़काः स्निग्धाः श्लक्ष्णाश्चाश्वर्ध-
वेदनाः।
क्षमित्यारतिसम्मोहदाहोन्मादसमन्विताः॥
शुक्रगाया मसूर्य्यास्तु लक्षणानि भवन्ति हि।
निर्द्दिष्टं केवलं चिह्नं जीवनन्तु न दृश्यते॥'

प्रभाभाः प्रभाकाराः न तु प्रभाः। श्लक्ष्णाः कोमलाः। निर्द्दिष्टं केवलं चिह्नं तत्त्वज्ञाधिकित्सा युक्ता यतो जीवनं न दृश्यते। सन्नाप्येता दोषहेतुं विना न भवन्ति। दोषमन्तरेण रसादिदुष्टेरभावादित्यत आह।

'दोषमिश्रास्तु सन्नेता दृष्ट्वा दोषलक्षणैः॥'

चर्म्मजामाह।

कण्डरोधावृती तन्द्रा प्रलापारतिसंयुताः।
दुश्चिकित्स्याः ससुहिदाः पिड़काश्चर्म्मसंज्ञिताः॥'

रोमान्तिकामाह।

'रोमकूपोन्नतिसमा रागिण्यः कफपित्तजाः।
कासारोचकसंयुक्ता रोमाख्यज्वरपूर्व्विकाः॥'

साध्याः प्राह।

'त्वग्जा रक्तगाश्चैव पित्तजाः श्लेष्मजास्तथा।
श्लेष्मपित्तकृताश्चैव सुखसाध्या मसूरिकाः।
रसा विनापि क्रियया प्रयान्त्यन्ति पुरी-
षिणाम्॥'

त्वग्जा रक्तजाः॥*॥ कष्टसाध्यतमाः प्राह।

'वातजा वातपित्तोत्था वातश्लेष्मकृताश्च याः।
कष्टसाध्यतमास्तास्तु यत्नादेता उपाचरेत्॥'

असाध्याः प्राह।

'असाध्याः सन्निपातोत्थास्तासां वक्ष्यामि
लक्षणम्।
प्रवालसदृशाः काश्चित् काश्चिज्जम्बुफलोपमाः।
लोहजालसमाः काश्चिदतसीफलसन्निभाः॥
आसां बहुविधा वर्णा जायन्ते दोषभेदतः॥'

प्रवालसदृशा इत्यादि। आसां प्रवालजम्बुफललोहगुटिकातसीफलसादृश्यं वर्णेन। अयुक्तवर्णसंग्रहार्थमाह। आसां बहुविधा वर्णा इति॥ * ॥ अपराश्चासाध्याः प्राह।

'कासो हिक्का प्रमोहश्च ज्वरश्छर्दिः सुदारुणः।
प्रलापारतिमूर्च्छाश्च तृष्णा दाहोऽतिघर्षणा॥'

दाहस्थाने दौर्गन्ध्य इति च पाठः।

'सुखेन प्रसवेद्रक्तं तथा ग्रासेन चक्षुषा।
कण्ठे घुर्घुरकं कृत्वा श्वसित्यर्थदानवम्॥
मसूरिकाभिभूतस्य यस्येतानि भिषग्वरैः।
लक्षणानीह दृश्यन्ते न दद्यात्तत्र भेषजम्॥'

मसूरिकाखरिष्टमाह।

'मसूरिकाभिभूतो यो भृशं ग्रासेन निश्वसेत्।
स भृशं त्रसति प्राणान् तृष्णार्त्तो वायुदूषितः॥'

वायुदूषितः अपतानकादिवातव्याधिदूषितः॥

मसूरिकाहेतुकं घोरविषमाह।

'मसूरिकान्ते घोरः स्यात् क्रूपरे मक्षिवन्मुखे।
तथाविधमुखे वापि दुश्चिकित्स्यः सुदारुणः॥'

दुश्चिकित्स्यः कष्टसाध्यः। दुःशब्दोऽत्र निषेधे तेनासाध्य इत्येके।

'काश्चिद्दिनापि यत्नेन सिध्यन्त्यासु मसूरिकाः।
दृष्टाः श्लक्ष्णतराः काश्चित् काश्चित् सिध्यन्ति
वा नवा॥
काश्चिन्नैव तु सिध्यन्ति साध्यमानाः प्रयत्नतः॥'

अथ मसूरिकायाश्चिकित्सा।

'मसूरिकायां कुष्ठोक्ता लेपनादिक्रिया हिता।
पित्तश्लेष्मविसर्पोक्तक्रिया चात्र प्रयुज्यते॥
श्वेतचन्दनकल्कोक्तं हिलमोचीभवं द्रवम्।
पिबेन्मसूरिकारम्भे नैव वा केवलं रसम्॥'

हिलमोचिका शाकविशेषः। कुरकुर इति लोके।

'हे पञ्चमूल्यौ राजा च धान्यपूरं दुरालभा।
सान्तं धान्यकं सुखं जयेद्वातमसूरिकाम्॥
मञ्जिष्ठा बहुपादश्च शिरीषोदुम्बरत्वचः।
वातजायां मसूर्य्यां स्यात् प्रलेपः सहलो हितः॥'

बहुपादः।

'गुडूची मधुकं द्राक्षा मोरटं दाड़िमैः सह।
पाककाले प्रदातव्यं मेषशृं गुड़संयुतम्॥
तेन कुप्यति नो वायुः पाकं यान्ति मसूरिकाः।
मसूरिकासु सर्व्वासु शालीन् सुहान् मसूर-
कान्॥
रसं मधुरमेवाद्यात् सैन्धवाज्यमात्रकम्।
पटोलमूलं कथितं मोरटं सुरसं तथा॥'

पटोलमूलं कथितमित्यत्र पटोलं कथितस्येति वा पाठः।

'आदावेव मसूर्य्यासु पित्तजायां प्रयोजयेत्।
निम्बपर्पटकः पाठा पटोलश्चन्दनद्वयम्॥
उशीरं कटुका धात्री तथा वासा दुरालभा।
एषां पानं शुभं घृतसुतं शर्करान्वितम्।
मसूर्य्यां पित्तजायान्तु प्रयोक्तव्यं विजानता॥
दाहे ज्वरे विसर्पे च रक्ते पित्ताधिकेऽपि च।
मसूर्य्यां रक्तजा नाम्न्यां यान्ति शीतिमाशुगैः॥
वासासुरकभूनिम्बत्रिफलेन्द्रयवासकम्।
पटोलारिष्टकं वापि कार्थयित्वा समाश्रितम्।
पिबेत्तेन प्रशाम्यन्ति मसूर्य्यः कफसम्भवाः॥'

इन्द्रः इन्द्रयवः॥ * ॥

'घृतौलोऽम्बरत्यग्र्यो खदिरारिष्टऊर्ज्जलैः।
कफोत्थासु मसूरीषु लेपः पित्तोत्थितासु च॥'*॥

निम्बपर्पटकः पाठा पटोलः कटुरोहिणी।
चन्दने द्वे उशीरञ्च धात्री वासा दुरालभा॥
एष निम्बादिकः क्वाथः घृतः शर्करयान्वितः।
मसूरीः सर्व्वजा हन्ति ज्वरवीसर्पसंयुताम्॥*॥

उत्पिष्टा प्रविगृह्य त्वचं पुनर्व्याकुलां नयेत्।
काञ्चनारत्वचः क्वाथः काथ्यश्चूर्णावचूर्णितः॥'

साध्यं सुवर्णमाक्षिकम्।

'धात्रीफलं समधुकं क्वथितं मधुसंयुतम्।
मुखे कण्ठे व्रणे जाते गण्डूषार्थं प्रशस्यते॥*॥

अक्षतोः सेकं प्रशंसन्ति गवेधुमधुकाम्बुना।
गवेधुर्गवेधुका। गवदुया इति लोके।
मधुकं पिप्पली मूर्व्वा दार्व्वी त्वक् शीतसुन्दरम्।
उशीरलोध्रसंक्लिष्टा प्रलेपाच्छोणिते हिताः।
गण्डस्थलेन हनुजाता मसूर्य्यो न भवन्ति च॥
प्रलेपं चक्षुषोर्दद्याद्दुग्धारक्ष वस्त्रकैः।
पल्लवस्कन्धचूर्णेन क्षौद्रीमवधूनयेत्।
भक्षणा केचिदिच्छन्ति केचिन्नीलयवरेणुना॥
सुखवीर्य्यजनियांसं हरिद्राचूर्णसंयुतम्।
रोमजज्वरसंयुक्तप्रजानां शान्तये पिबेत्॥'

नियांसं दधम्॥ * ॥ अथ मसूरिकाभिदस्य शीतलाया अधिकारः। तत्र शीतलाया रूपमाह।

'देवता शीतलाक्रान्ता मसूर्य्यैव हि शीतला।
ज्वर एव तथा भूताधिष्ठितो विषमज्वरः।
सा च सप्तविधा ख्याता तासां भेदान् प्रचक्षते॥
ज्वरपूर्व्वा हनुस्फोटैः शीतला हनुमी भवेत्।
सप्ताहान्निःसरत्येषा सप्ताहात् पूयतां व्रजेत्॥
ततस्तृतीये सप्ताहे शुष्यति स्खलति स्वयम्।
तासां मध्ये यदा कांचित् पाकं गत्वा स्फुटं
स्रवेत्॥
तत्रावधूनं कुर्य्याद्दग्धगोमयभस्मना।
निम्बसत्यत्वगाख्याभिर्मक्षिकामपसारयेत्॥
जलञ्च शीतलं दद्यात् ज्वरेऽपि न तु दापयेत्।
स्थापयेत्तां क्षणे पूते रम्ये रक्षेत शीतले॥
नाशुचिः संस्पृशेत्तान्तु न च तस्यान्तिकं व्रजेत्।
वृद्धो भिषग्वा नाम्न्येव भेषजं योजयन्ति हि॥
केचित् प्रयोजयन्त्येव मनसेषामथ ज्वरे॥ * ॥
ये शीतलेन सलिलेन विधिज्ञा सम्यक्
क्षिप्त्वाजशीजसहितां रजनीं पिबन्ति।
तेषां भवन्ति न कदाचिदपीह देहे
पीड़ाकरा अमित शीतलिका विकाराः॥
मोचारसेन सहितं सितचन्दनेन
वासारसेन मधुकं मधुकेन वाथ।
आदौ पिबन्ति सुमनाःस्वरसेन भिक्षुं
ते नाप्नुवन्ति भुवि शीतलिकाविकारान्॥
मोचारसेन कदलीस्तम्भजेन। मधुकेन वाथ
अथवा मधुना। आदौ पूर्व्वरूपे ज्वरागमनमात्रे। सुमनाःस्वरसेन जातीपत्ररसेन।

'शीतलासु क्रिया कार्य्या शीतला रक्षया सह।
धर्म्मोयान्निम्बपत्राणि परितो भवनान्तरे॥
कदाचिदपि नो कार्य्यमुच्छिष्टस्य प्रवेशनम्।
स्फोटेष्वधिकदाहेषु रक्षारेणुस्करो हितः॥
सेन ते शीघ्रमायान्ति प्रपाकं न भजन्ति च।
रक्षारेणुस्करः शुष्कगोमयभस्मचूर्णतः॥
चन्दनं वासको मूलं गुडूची द्राक्षया सह।
एषां शीतकषायस्तु शीतलाज्वरनाशनः॥'

शीतकषायो हिमः।

'जपहोमोपचारैश्च दानस्वस्ययनार्चनैः।
विप्रगोग्न्यग्निगौरीणां पूजनैश्चाशु शमं नयेत्॥
स्त्रीभिश्च शीतलादेवाः पठेयुः शीतलिकोत्थिते।
आरक्ष्यः मड्डया युक्तस्तेन शाम्यति शीतला॥

स्कन्द उवाच।

भगवन्! देवदेवेश! शीतलायाः कथं शुभम्।
वक्तुमर्हस्यशेषेण विस्फोटकभयापहम्।

मङ्क

ईश्वर उवाच ।
नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् ।
मार्जनीकलशोपेतां सूर्पालङ्कृतमस्तकाम् ॥
वन्देऽहं शीतलां देवीं सर्वरोगभयापहाम् ।
यामासाद्य निवर्त्तेत विस्फोटकभयं महत् ॥
शीतले शीतले चेति यो ब्रूयाद्दाहपीडितः ।
विस्फोटकभयं घोरं क्षिप्रं तस्य प्रणश्यति ॥
यस्यातुरस्मरेन्नाम तु भुक्त्वा संपूजयेन्नरः ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
शीतले ज्वरदग्धस्य पूतिगन्धयुतस्य च ।
प्रनष्टचक्षुषः पुंसस्त्वामाहुर्जीवनौषधम् ॥
शीतले तनुजान् रोगान् नृणां हरसि दुस्तरान् ।
विस्फोटकविषीर्णानां त्वमेकामृतवर्षिणी ॥
गलगण्डग्रहा रोगा ये चान्ये दारुणा नृणाम् ।
त्वदनुध्यानमात्रेण शीतले यान्ति ते क्षयम् ॥
न मन्त्रो नौषधं किञ्चित् पापरोगस्य विद्यते ।
त्वमेका शीतले ! धात्री नान्या पश्यामि देवताम् ॥
त्वगात्मस्तनसृक्पूर्णो नाभिहृन्मध्यसंस्थिताम् ।
यस्त्वां विचिन्तयेद्देवी तस्य मृत्युर्न जायते ॥
अष्टकं शीतलादेव्या यः पठेच्छ्रावयेत् सदा ।
विस्फोटकभयं घोरं कुले तस्य न जायते ॥
शीतलं पठितव्यञ्च नरैर्भक्तिसमन्वितैः ।
उपसर्गविनाशाय परं स्वस्त्ययनं महत् ॥
शीतलाष्टकमेतद्धि न देयं यस्य कस्यचित् ।
दातव्यं हि सदा तस्मै भक्तिश्रद्धान्वितो हि यः ॥'

इति श्रीस्कन्दपुराणे काशीखण्डे शीतलाष्टकस्तोत्रं समाप्तम् ।" इति भाषाप्रकाशे मध्यखण्डे चतुर्थो भागः ॥

मङ्करिका, स्त्री, मशूचरी । मगारि इति भाषा । यथा—
"दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत् ।
मङ्करिकाभिः प्राकृत्य मक्षणाधिनमक्षतम् ॥"
इति पाद्मे क्रियायोगसारे १२ अध्यायः ॥

मङ्करी, स्त्री, (मङ्कर + स्त्रियां ङीष् ।) पापरोगः । इति मेदिनी । रे, २०१ ॥ स तु वमन्तरोग इति प्रसिद्धः । त्रिवृत् । रक्तत्रिवृत् । इति राजनिर्घण्टः ॥

मङ्गलं, क्ली. (वन्द्यतेऽसौ दीप्यते इति । वन्द्य दीप्तौ + इगुपधेति कः । पृषोदरादित्वात् साधुः ।) अकलङ्कम् । क्षेमम् । इति मेदिनी । ले, ७० ॥ (यथा, रघुवंशटीकारम्भे मल्लिनाथः ।
"कलङ्कामङ्गले: कटाक्षपातैः
कुरु मामम्ब ! कृतार्थसार्थभाजम् ॥")

मङ्गला, स्त्री, (मङ्गल + स्त्रियां टाप् ।) उमा । इति मेदिनी । ले, ७० । मङ्गीना इति भाषा ॥

मङ्ग, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) दन्त्यमध्य इति दुर्गादासः । क्विप् संयोगादेर्लोपे मक् । मङ्क्तेऽन्यमध्य इत्येके । क्विप् संयोगान्तलोपे मट् । ङ, मङ्क्ते । इति दुर्गादासः ॥

मङ्कः

मङ्करः, पुं, (मङ्कते गच्छत्यनेनेति । मङ्क + बाहुलकादरः । यद्वा, मकार + "मङ्करमङ्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति सट् निपात्यते । इति काशिका ।) वंशः । इत्यमरः । २ । ४ । १६१ ॥ रन्ध्रवंशः । इति राजनिर्घण्टः ॥

मङ्करी, [न्] पुं, (मङ्कते इतस्ततो गच्छत्यनेनेति । मङ्क + बाहुलकादरः । मङ्करो दक्षः सोऽस्यास्तीति । मङ्कर + इनिः । यद्वा, मा कर्तुं कर्म निषेद्धुं शीलमस्य । "मङ्करमङ्करिणौ वेणुपरिव्राजकयोः ।" ६ । १ । १५४ । इति इनिर्निपात्यते ।) भिक्षुः । इत्यमरः । २ । ७ । ४७ ॥ (यथा, भट्टिकाव्ये । ५ । ६३ ।
"अधीयन्नात्मावद्दिष्टां धारयन् मङ्करिव्रतम् ।
वदन् वक्त्रङ्गुलिस्फोटं भ्रूक्षेपञ्च विलोकयन् ॥") चन्द्रः । इति शब्दरत्नावली ॥

मस्ज, ओ ष्वञ् शौचे । इति कविकल्पद्रुमः । (तुदा०-पर०-अक०-अनिट् ।) दन्त्यमध्यः क्विप् संयोगादिलोपे मक् । ओ, मग्नः । ग्न, मग्नवती मग्नवती । ट्, मग्नवृ । अमार्ङ्गात् । स्नायतेऽनेनेति स्नानमिह जलान्तःप्रवेशः । मज्जति प्रस्तरो जले । इति दुर्गादासः ॥

मङ्क्षु, क्ली, (मङ्क्षते परिभीयते । मङ्क्ष + उः ।) मस्तकम् । इति हिरूपकोषः ॥ (यथा, अमरटीकायां मनुष्यवर्गे । ८५ । रघुनाथचक्रवर्त्तिधृतश्लोकः ।
"दण्डकमण्डलुमक्षिनाहस्तः
सुललितनिलकविभूषितमङ्क्षुः ॥")

मस्तकः, पुं, क्ली, (मस्यते परिभीयते । मस् + "इष्यशिभ्यां तकन् ।" उणा० ३ । १४८ । इत्यत्र । "बाहुलकात् मस्यतेरपि तकन् ।" इत्युज्ज्वलदत्तोक्त्या तकन् ।) प्रधानाङ्गम् । माथा इति भाषा ॥ (यथा, मार्कण्डेयपुराणे । १४ । ७८ ।
"अभ्रन्तु क्षीणमवाप्नोति सोऽधिकं शिरसा शिलाम् ।
क्षुत्क्षामोऽहर्निशं भारपीडाक्षपितमस्तकः ॥")
तस्योपायः । उत्तमाङ्गम् २ शिरः ३ शीर्षम् ४ मूर्द्धा ५ । इत्यमरः । २ । ६ । ८७ ॥ सुक्षम् ६ शिरम् ७ । इति शब्दरत्नावली ॥ वराङ्गम् ८ । इति जटाधरः ॥ कम् ९ पुरुषम् १० मौलिः ११ कपालम् १२ केशभूः १३ । इति राजनिर्घण्टः ॥ (मस्तम् १४ । इति हिरूपकोषः ।) तस्य शुभाशुभलक्षणं यथा,—
"कृष्णाकारैः शिरोभिस्तु कृपा निस्वशिरा धनी ।
चिपिटैश्च पितृमृत्युर्गवाढ्याः परिमण्डलैः ॥
घटमुण्डा पापरुचिर्धनाढ्यैः परिवर्जितः ॥"
इति गारुडे ६६ अध्यायः ॥

मस्तके अधोमुखसहस्रदलकमलमस्ति तत् कर्णिकायां परमात्मा तिष्ठति । यथा । स्वाङ्गे उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्थाधिष्ठानमणिपूरानाहतविशुद्धाज्ञाख्यषट्चक्राणि भित्त्वा शिरोऽवस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्येत्यादि तन्त्रसारः ॥ तथा च ।
"सुषुम्नावर्त्मना योऽहमिति मन्त्रेण योजयेत् ।
सहस्रारे शिरःस्थाने परमात्मनि देशिकः ॥"
इति गौतमीयतन्त्रम् ॥

मस्तकशूलः, पुं, (मस्तकस्य शूलः ।) शिरोमज्जा । यथा,—
"गोदन्तु मस्तकशूलो मस्तिष्को मस्तुलुङ्गकः ॥"
इति हेमचन्द्रः । ३ । ८८६ ॥

मस्तकाग्रः, पुं, (मस्तकमिति आख्या यस्य ।) वृक्षशिरः । इति शब्दचन्द्रिका ॥

मस्तकारुः, क्ली, (मस्तं मस्तकमिव उच्चं दारु ।) देवदारु । इति भावप्रकाशः ॥

मस्तकमूलकं, क्ली, (मूलमेव मूलकं स्वार्थे कन् । मस्तस्य मूलकम् ।) शिरोऽघः । इति शब्दचन्द्रिका । घाड़ इति भाषा ॥

मस्तिष्कं, क्ली, (मस्तं मस्तकं स्थितं स्वाधारत्वेन प्राप्नोतीति । ष्टक गतौ + कः । पृषोदरादित्वात् साधुः ।) मस्तकभवपृथुलाकारखेदः । मगज इति पारस्यभाषा ॥ तस्योपायः । गोदम् २ । इत्यमरः । ३ । ६ । ६५ ॥ गोदम् ३ मस्तकखेदः ४ मस्तुलुङ्गकः ५ । इति हेमचन्द्रः । ३ । ८८६ ॥ (यथा, ऋग्वेदे । १० । १६३ । १ ।
"यस्मै शीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते ॥")

मस्तु, क्ली, (मस्यति परिणमतीति । मस् + "सिनसिगमिमसिसक्यविधान् कुशिभ्यस्नुन् ।" उणा० १ । ७० । इति स्नुन् ।) दधिभवमण्डम् । दधिर मात् इति भाषा ॥ इत्यमरः । २ । ८ । ८४ ॥ दधिजलम् । त्रिगुणवारियुतं दधि । अस्य गुणाः ।
"उष्णार्त्तं रुचिपित्तदं श्रमहरं वह्निं कषायं सरं
मुक्तिच्छर्दिकरं लघूदरगदश्लेष्मार्शसां नाशनम् ।
शीतःशुद्धिकरं कफाधिलहरं विष्टम्भशूलापहं
पाण्डुश्वासविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥"
इति राजनिर्घण्टः ॥

अपि च ।
"मस्तु क्षमहरं स्वस्थं लघु शुक्राभिलाषकृत् ।
शीतोविशोधनं स्निग्धं कफरक्तविलापहम् ॥
अहृद्यं पीवनं शीघ्रं भिनत्ति मलसंग्रहम् ॥"
इति भावप्रकाशः ॥

मस्तुलुङ्गः, पुं, (मस्तु इव लिङ्गं स्वाङ्गमस्य । पृषोदरादित्वात् इकारस्य उकारः ।) मस्तिष्कम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते सूत्रस्थाने २३ अध्याये । "भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं शिरोवलिङ्गप्रादुर्भावः कालस्यावो वा यस्येति ॥")

महङ्कः

महत्तुङ्कः, पुं, (महत्तुङ्ग + स्वार्थे कन्।) मल्लिकम्। इति हेमचन्द्रः। ३। २८६॥

मह, पूजे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) महति। इति दुर्गादासः॥

मह, इ क लिधि। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) इ क, मंहयति। लिधि दीप्तौ। इति दुर्गादासः॥

मह, इ ड वृद्धौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) इ, मंह्यते। ड, मंहते। इति दुर्गादासः॥

मह, न् क पूजे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-सक०-सेट्।) महयति। इति दुर्गादासः॥

मह:, पुं, (महयते पूज्यतेऽसौ इति। मह + "पुंसि संज्ञायां घः प्रायेण।" ३। ३। ११८। इति घः। मह + अच् इत्युज्ज्वलदत्तः।४।१८८।) उत्सवः। इत्यमरः। १। ७। १८८॥ (यथा, माघे। ६। १६।

"न खलु दूरगतोऽप्यनिवर्त्यते
महमसाविति बन्धुनयोदितैः॥"

महते पूज्यते इति।) तेजः। इति मेदिनी। हे, ७॥ यज्ञः। इति शब्दरत्नावली॥ (यथा, हरिवंशे। ७१। १८।

"तस्मात् प्रावृषि राजानः सर्व्वे एकं मुदा युताः।
महैः सुरेशमर्च्चन्ति वयमत्रे च मानवाः॥")

महिषः। इति हेमचन्द्रः॥ (त्रि, महत्। यथा, ऋग्वेदे। १०। ६१। ८।

"महे दृणते नाव्यं वचः॥"

"महे महति।" इति सङ्क्षिप्तसारोणादिवृत्तौ सायणः॥)

मह:, [स्] क्ली, (महयते पूज्यतेऽसिन्निति। मह + "सर्व्वधातुभ्योऽसुन्।" उणा० ४।१८८। इति असुन्।) उत्सवः। (महयते पूज्यते इति। मह + असुन्।) तेजः। इति मेदिनी। से, ३०॥ (यथा, रघुटीकायां मल्लिनाथः।

"अन्तरायनिमित्तोपप्लवाभावे
ग्राह्यप्रावल्यमचिन्त्यवैभवम्।
तं नरं वपुषि कृच्छ्रदुःखिते
मन्यते किमपि तुच्छलं महः॥")

महयते पूज्यते देवादयोऽसिन्निति। मह + असुन्।) यज्ञः। इति शब्दरत्नावली॥ (उदकम्। इति निघण्टुः।१।१२॥ पूज्यमाने, त्रि। यथा, वाजसनेयसंहितायाम्। २०। ६।

"जिह्वा मे भद्रं वाङ्मही मनो मन्युः स्वराण् भामः॥"

"वाक् वागिन्द्रियं महः पूज्यमानास्तु।" इति सङ्क्षिप्तसारोणादिवृत्तौ सायणः॥ महति। यथा, ऋग्वेदे। ८। २३। १६।

"मही राये असुत्वा समिधीमहि।" "मही महते राये धनाय।" इति सङ्क्षिप्तसारोणादिवृत्तौ सायणः॥)

महङ्कः, पुं, (महः कायति प्रकाशयतीति। महस् + कै + कः। पृषोदरादित्वात् साधुः।) बहुलामोदः। इति जटाधरः॥

महती

महत्, क्ली, (मह + अति। निपातितश्च।) राज्यम्। इति मेदिनी। ते, १४०॥ (यथा, छान्दोग्योपनिषदि। ५। २। ४।

"अथ यदि महच्छ्रमिवेदमादाख्यायां दीक्षिता पौर्णमास्यां रात्रौ इत्यादि॥" ब्रह्म। यथा, महाभारते। ३। ३१२। ७३।

"श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्॥"

उदकम्। इति निघण्टुः। १। १२॥)

महत्, त्रि, (महयते पूज्यतेऽसौ इति। मह + "वर्द्धमाने पृषद्बृहन्महज्जगच्छतवच।" उणा० २। ८४। इति अतिः निपात्यते।) महान्। महतौ। बहुः। इति मेदिनी। ते, १४०॥ तत्पर्य्यायः। विशङ्कटम् २ पृथु ३ बृहत् ४ विशालम् ५ पृथुलम् ६ बडम् ७ उरु ८। विपुलम् ९। इत्यमरः। २। १। ६०॥ पृथम् १० विस्तीर्णम् ११। इति शब्दरत्नावली॥ (यथा, रघौ। १२। ४०।

"तस्मिन् रामशरोत्क्षिप्ते बले महति रक्षसाम्॥")

तद्वैदिकपर्य्यायः। ब्रध्नः २ ध्रुवः ३ बृहत् ४ उक्षितः ५ तवसः ६ तविषः ७ महिषः ८ अभ्रः ९ ऋभुक्षाः १० उक्षा ११ विहायाः १२ यक्षः १३ वर्द्धिथ १४ विवक्षसे १५ अम्भगः १६ माहिनः १७ गभीरः १८ ककुहः १९ रभसः २० आधृषः २१ विरप्शी २२ अद्भुतम् २३ बंहिष्ठः २४ बर्हिषत् २५। इति पञ्चविंशतिर्महन्नामानि।

इति वैद्यनिघण्टौ ३ अध्यायः॥ * ॥ (प्रकृतेराद्योविकारः। यथा, सांख्यतत्त्वम्। १। ६१।

"सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारः॥" इति॥) महच्छब्दस्य ब्रह्मादिशब्दविशेषाणां पूर्व्वं प्रयोगनिषेधो यथा,—

"घृते तैले तथा मांसे वेदे ज्योतिष्टोमे द्विजे।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते॥"

इति भट्टिप्रथमब्रह्मकाण्डचतुर्थश्लोकटीकायां भरतः॥

महती, स्त्री, (महत् + ङीष्।) वल्लकीभेदः। इति मेदिनी। ते, १४०॥ नारदवीणा। बृहत्प्रमाणा। इत्यमरटीकायां भरतः॥ (यथा, शिशुपालवधे। १। १०।

"स्फुटीभवदृयामविशेषमूर्च्छना-
मवेत्समाप्तं महतीं सहस्रधुः॥")

हरितकी। वासकी। इति राजनिर्घण्टः॥ (कुशद्वीपस्थनदीविशेषः। यथा, मात्स्ये। १२१। ७१।

"महती सप्तमी प्रोक्ता पुनश्चैवा धृतिः स्मृता।
अन्याभ्योऽपि सञ्जाता घृतपूर्णेति महती॥"

पारिपात्रनिवासिनदीविशेषः। यथा, मात्स्ये। ११३। २३—२४।

"वर्णाशा चन्दना चैव कावेरी महती तथा।
पादा चर्म्मण्वती पुण्या विदुषा वेणुमत्यपि।
शिप्रा चावन्ती कुन्ती च पारिपात्राश्रिताः स्मृताः॥")

महत्तरी

महत्तरी, स्त्री, (महत्तरेति ख्याता द्वादशी।) अवज्ञाद्वादशी। यथा,—

"माघे भाद्रपदे शुक्ले द्वादशी अवज्ञान्विता।
महत्तरी द्वादशी स्यात् उपवासे महाफला॥"

इति गारुडे १९१ अध्यायः॥

महत्तत्त्वं, क्ली, (महच्च तत् तत्त्वञ्चेति।) चतुर्विंशतितत्त्वान्तर्गतद्वितीयतत्त्वम्। तत्तु प्रकृतेरुत्पन्नम्। समष्टिबुद्धिस्वरूपम्। तत्पर्य्यायः। यथा,—

"महानात्मा मतिर्ब्रह्मा पुरुषश्च धीर्य्यवान्।
बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः।
पर्य्यायवाचकैः शब्दैर्ज्ञानात्मा विभाव्यते।
तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति॥"

इति महाभारते आश्वमेधिकपर्व्व॥

अपि च।

"एका मूर्त्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः।
सविकारात् प्रधानात्तु महत्तत्त्वं प्रजायते॥
महानिति यतः ख्यातिर्लोकानां जायते सदा।
अहङ्कारश्च महतो जायते मानवर्षभ॥"

इति मात्स्ये २ अध्यायः॥

महत्तरः, पुं, स्त्री, (अयमनयोरतिशयेन महान्। महत् + तरप्।) शूद्रः। यथा,—

"शूद्रः स्यात् पादजो दासो यामकूटो महत्तरः।"

इति त्रिकाण्डशेषः॥

(यथा, कथासरित्सागरे। ५। ६४।

"केनायं रचितोऽवेति सोऽपृच्छच्च महत्तरान्।
ते च सर्व्वेदयंस्तस्मै कर्त्तारं निजकस्य माम्॥")

अतिशयमहति, त्रि॥ (यथा, महाभारते। ७। १६६। ५८।

"हृदयं भ्रूयुदुःखं सर्व्वदेवैरभिष्टुतम्।
अक्षीयासमणीयश्च हृद्यश्च महत्तरम्॥")

महत्त्वं, क्ली, (महत् + त्व।) महतो भावः। यथा, भाषापरिच्छेदे।

"महत्त्वं षड्विधं हेतुरिन्द्रियं करणं मतम्॥"

"महत्त्वं षड्विध इति। द्रव्यप्रवृत्तौ महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्म्मसामान्यानां प्रवृत्तौ स्वाश्रयसमवायसम्बन्धेन। द्रव्यसमवेतसमवेतानां रूपादीनां प्रवृत्तौ स्वाश्रयसमवेतसमवायसम्बन्धेन कारणम्।" इति सिद्धान्तमुक्तावली॥ (ऐश्वर्य्यम्। यथा, रामायणे। १। १। १०१।

"जनश्च सूनोरपि मङ्गलैश्वर्य्यात्॥"

"महत्त्वं श्रेष्ठम्।" इति तट्टीकायां।)

महर्लोकः, पुं, (महत्संज्ञो लोकश्चेति। कर्म्मधारयः।) भूरादिसप्तलोकान्तर्गतचतुर्थलोकः। यथा,—

"भूर्भुवः स्वर्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते लोकास्तु परिकीर्त्तिताः।
चतुर्मुखस्त्रिलोकात्मा जगद्वीजचराचरम्॥

तदा हि वक्ष्यते सर्वं त्रैलोक्यं भूर्भुवादिकम्।
अर्थं प्रयान्ति तापार्त्ता महर्षीणामिवाखिलाः॥"
इति वह्निपुराणम्॥
"चतुर्थे तु महर्षीके तिष्ठन्ते सत्यवादिनः॥"
इति देवीपुराणम्॥

महर्षभी, स्त्री, (महतो चासौ ऋषभी चेति कर्म्मधारयः।) कपिकच्छुः। इति राजनिर्घण्टः॥

महर्षिः, पुं, (महांश्चासौ ऋषिश्चेति।) आसादिः। इति त्रिकाण्डशेषः॥ अस्य व्युत्पत्त्यादिर्यथा,—
"ऋषिर्दृष्टेस्तपोमन्त्रसन्निधानाच्छतक्रतोः।
एष वह्निरयो यस्मादृ ब्राह्मणश्च ततस्मृषिः॥
विश्वसिसमकालन्तु बुद्ध्या यस्तिष्ठतिक्षयम्।
ऋषते परमं यस्मात् परमर्षिस्ततः स्मृतः॥
सप्तर्षीणामतिर्धातोर्नामनिर्वृतिकारणम्।
यस्मादेष क्षयप्राप्तसप्तसप्तःशृतेः।
तेनेश्वराः क्षयप्राप्ता ब्रह्मणो मानसाः सुताः।
विवर्द्धमानैस्तैर्व्याप्ता महान् परिगतः परः॥
यस्मादृषिः परत्वेन महांस्तस्मान्महर्षयः।
ईश्वराणां सुतास्तेषां मानसाश्चोरसाश्च ये॥
क्षयप्राप्तान्यरत्वेन भूतादिक्षयप्राप्तः।
ऋषिपुत्रा ऋषीकाच्च मैथुनाङ्गमेसम्भवात्॥
परत्वेवर्द्धमाने वै भूतादिक्षयिकासतः।
ऋषीकाणां सुता ये ये विप्रेया ऋषिपुत्रकाः॥
सूता ऋषं परत्वेन नाम तस्मात् सूतर्षयः।
अयस्तापा महातापाहारातापा तथैव च॥
भूतापा वैश्यिकापाश्च तेषान्तु ज्ञानमुच्यते।
इत्येवन्विधाभिस्तु पञ्च तान् नामभिः प्रभुः॥
भृगुर्ब्भरोचिरश्चिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उत्पन्नाः स्वयमीश्वराः।
परत्वेनर्द्धयस्तस्माद्भूताद्यास्तेन ऋषयः॥"
इति मात्स्ये १९० अध्यायः॥

महल्लकः, पुं, (महतः क्षीरस्यादिरूपान् विपुलान् भारान्लाति गृह्णातीति। ला + "आतोऽनुपसर्गे कः।" ३। २। ३। इति कः। ततः स्वार्थे कन्। यद्वा, महान्तं चरित्रगुणं लाति आस्वादयतीति। लक् आस्वादने + अच्।) अन्तःपुररक्षकः। तत्पर्य्यायः। सौविदल्लः२ लघुकी३ स्थापत्यः४ सौविदः५ विदाढ्यः६। इति जटाधरः॥ सौविदल्लकः७ अन्तर्वेशिकः८। इति शब्दरत्नावली॥

हल्लिकः, पुं, (महान्त चरित्रगुणं लिखतीति। महत्+लिख+कः; एषोदरादित्वात् साधुः।) अन्तःपुररक्षकः। खोजा इति भाषा॥ तस्य लक्षणं यथा,—
"शुष्कशून्योऽनुपस्थो यः क्षीणभावो महल्लिकः॥"
इति शब्दमाला॥

हर्ष, स्त्री, (महते पूज्यतेऽनेनेति। मह + "अर्त्तिपिपलिमलिमहीति।" उणा० १।११७। इति अर्षच्।) ज्ञानम्। प्रकाशः। इत्युणादिकोषः॥

महा, स्त्री, (महति पूज्यते इति। मह्+घ। स्त्रियां टाप्।) गोपवल्ली। इति शब्दचन्द्रिका। गोरक्षचाकुलिया इति भाषा॥ क्षीरशवी। इति शब्दरत्नावली॥

महाकच्छः, पुं, (महान् विपुलः कच्छो जलप्रायदेशोऽस्य।) वसुदः। वरुणः। इति मेदिनी। छे, ६॥ पर्व्वतः। इति शब्दरत्नावली॥

महाकण्टकिनी, स्त्री, (महती चासौ कण्टकिनी चेति।) विश्वसारकम्। इति शब्दचन्द्रिका। धमिमनसा इति भाषा॥

महाकन्दः, पुं, (महांश्चासौ कन्दश्चेति।) रसोनकः। इत्यमरः। २। ७। १४८॥ लशुनकम्। इति शब्दरत्नावली॥ चाणक्यलशुनकम्। रसोनशुनम्। राजपलाण्डुः। इति राजनिर्घण्टः॥

महाकपित्थः, पुं, (महांश्चासौ कपित्थश्चेति।) विल्ववृक्षः। इति त्रिकाण्डशेषः॥

महाकरञ्जः, पुं, (महांश्चासौ करञ्जश्चेति।) करञ्जविशेषः। बड़ करञ्जा इति भाषा॥ तत्पर्य्यायः। बहुपत्रिका२ हस्तिचारिणी३ उद्रवीर्य्यः४ विषघ्नी५ काकघ्नी६ मदहस्तिनी७ प्राग्रहेष्टा८ मधुमती९ रसायनी१० हस्तिरोहणकः११ हस्तिकरञ्जकः१२ सुमनाः१३ काकभाण्डी१४ मधुमत्ता१५। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। कटुत्वम्। विषकफकृमिवर्द्धिकाकुष्ठव्रणदोषव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥

महाकर्णिकारः, पुं, (महांश्चासौ कर्णिकारश्चेति।) आरग्वधः। इति राजनिर्घण्टः॥

महाकायः, पुं, (महान् कायोऽस्य।) नन्दी। स च शिवद्वारपालः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। १३। १५०। २४।
"नन्दीश्वरो महाकायो यामलीर्वृषभध्वजः॥")
हस्ती। इति केचित्॥ (महान् कायः शरीरमिति।) हस्तिशरीरम्॥ तद्वति, त्रि॥ (यथा, महाभारते। १। १५६। ३२।
"महाजवं महाकायं महामायमरिन्दमम्॥"
स्त्रियां टाप्। कुमारानुचरमातृगणविशेषः। यथा, महाभारते। ८। ४६। २४।
"रोहिताक्षी महाकाया हरिपिङ्गा च
भूमिप!॥")

महाकार्त्तिकी, स्त्री, (महती चासौ कार्त्तिकी चेति।) रौहिणीनक्षत्रयुक्ता कार्त्तिकी-पूर्णिमा। यथा,—
"प्राजापत्यं यदा ऋक्षं तथैतस्यां नराधिप!।
सा महाकार्त्तिकी प्रोक्ता देवानामपि दुर्लभा॥"
इति पाद्मे २ खण्डे ३ अध्यायः॥

महाकाल, पुं, (महांश्चासौ कालश्चेति।) विष्णुस्वरूपाक्षरक्षयमानसमयः। यथा। कालो यदत्यन्तं महाकालत्वात्। इति सिद्धान्तलक्षणम्॥ महादेवः। (तन्निरुक्तिर्यथा महाभिर्भावतत्त्वैः। ४। ३१।

"कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः।
महाकालस्य कलनात् तस्माद्या कालिका परा॥")
प्रमथगणविशेषः। इति मेदिनी। ले, १५६॥ (उज्जयिनीस्थशिवलिङ्गविशेषः। यथा, कथासरित्सागरे। ११। ३१—३२।
"अस्तीहोज्जयिनी नाम नगरी भुवनं स्वः।
हसन्तीव सुधाधौतैः प्रासादैरमरावतीम्॥
यस्यां वसति विश्वेशो महाकालवपुः स्वयम्।
शिथिलीकृतकैलासनिवासव्यसनो हरः॥"
तीर्थविशेषः। यथा, महाभारते। ३।८२।३७।
"महाकालं ततो गच्छेत् नियतो नियताशनः।
कोटितीर्थसमासृष्टं क्षयमेधफलं लभेत्॥")
जलाधिशेषः। माकाल इति भाषा॥ तत्पर्य्यायः। उत्कालः२ किम्पाकः३ काकमर्द्दकः४। इति राजमाला॥ काकमर्द्दः५ देवदालिका६ शाला७ दालिका८ जलजः९ घोषकाह्वयिः१०। इति राजनिर्घण्टः॥ (यथा,
"अनर्मलिनदेहेन बहिराडाहकारिणा।
महाकालमलेनेव कः खलेन न वञ्चितः॥"
रत्नमुकुटः॥)
शिवपुत्रविशेषः। तस्य जन्मवृत्तान्तं यथा,—
श्रीदेवा ऊचुः।
"एष वैश्वानरः श्रीमान् भूरितेजोमयो बली।
महामैथुनबीजन्तु रक्षेत्रः संग्रहीष्यति॥
इत्युक्ता त्रिदशाः सर्व्वे वीतिहोत्रं पुरःस्थितम्।
तस्मै निदेशयामासुः सम्भवे सर्व्वहेतवे॥
ततः षड्भं खं रेफो वायुरिति दहनागमे।
उत्सस्रुर्ज्ज महाबाहुर्महामैथुनकारकम्॥
अमावसुरुच्यमानस्य तेजसः शुक्लभङ्गतः।
अशुद्धयमतिस्वर्णं गिरिप्रस्थे पपात ह॥
तयोः कारणयोः सद्यः संभूतौ शुक्लरक्तजौ।
एको भङ्गसमः श्रीमान् भिन्नाञ्जननिभोऽपरः॥
भङ्गो तस्य तदा ब्रह्मा नाम भङ्गीति चाकरोत्।
महाकालैकरूपस्य महाकालेति लोकभृत्॥
ततस्तौ पालयामास शुक्लः प्रमथोत्करैः।
अपर्णया चापि तथा क्रमात्तावभिवर्द्धितौ॥
प्रहृष्टौ तौ महाकायौ हरोमाप्रतिपालितौ।
क्रमाद्गणेशौ ज्ञात्वा तौ हरो वारि स्वयोऽब्रवीत्॥"
इति कालिकापुराणे ४५ अध्यायः॥
तस्य वानरमुखकारणं जन्मान्तरञ्च यथा,—
"अथैकदोमया सार्द्धं निगूढे रतिमन्दिरे।
मन्मथाकरोच्चण्डदेवो मोदयुतो रतिप्रियः॥
यदा सा मन्मथे याता गौरी क्षारहरात्मिकम्।
तदा भङ्गिमहाकालौ द्वाक्षौ द्वारि प्रतिष्ठितौ॥
मन्मथावसाने सा देवी सुरक्तध्वजिनीवनम्।
मन्थिशैलगलद्गात्रा वक्त्रमालम्ब्य पाणिना॥
अलसद्वारा मन्थपुष्पैराकुलैर्जातिशोभना।
विद्युत्प्रकुङ्कुमा दृढदृष्टनष्टरविभ्रमा॥
विःस्रुता रतिसङ्क्लेशाज्जाता जलजानना।
ईषद्दाक्षूर्णनयना निषिक्ता स्वेदबिन्दुभिः॥

तां निःसरन्तीं सहसा तथाभूतामनिन्दिताम् ।
अयोग्यां वीक्षितुं चान्यैर्देवजन्मजनैः प्रियम् ॥
दहत्यतुलतेजोभागौ नातिस्वरालमानसौ ।
भङ्गी चापि महाकालः प्राप्तकालश्च कोपतः ॥
दृष्ट्वा तौ मातरं दीप्तौ तदा भूताधिपोत्सुकौ ।
चिन्ताक्रान्तमतुल्यौजां निशुम्भबलदुर्मदम् ॥
तौ पप्रच्छतुः तदा देवीं दरग्रं हिमवत्सुताम् ।
चुकोप च तदा पार्वती वाक्यमेतदुवाच ह ॥
एवंभूतान्तु मां कस्मादम्बाम्बेति प्रपद्यताम् ।
भवन्तौ तनयौ शुम्भौ हीमर्थादाविवर्जितौ ॥
तस्मादिमामम्बिकां भवन्तौ विरूपाक्षौ ।
अकुर्वातां ततो भूयाद्भवतोर्जन्म मानुषे ॥
मानुषौ योनिमासाद्य मातुरीक्षणदोषतः ।
भविष्यतो भवन्तौ तु ग्राम्याऽऽरण्यसुखौ भुवि ॥
इति तामुमया प्रोक्तौ दरशुम्भौ महामतौ ॥"
"अथोमया समं देवो वियता चन्द्रशेखरः ।
आजगाम तदा गच्छन् प्रासादं प्रति तं नृप ! ॥
दृष्ट्वोच्च चरन्तीं तामुमायाः सदृशीं शुभे ।
सर्वलक्षणसम्पूर्णां माधवस्येव माधवीम् ॥
तां दृष्ट्वा भगवद्देवीं गौरीं वृषभकेतनः ।
क्षिप्तप्रसन्नवदनः प्रहसन्निव भाविनीम् ॥
ईश्वर उवाच ।
इयं ते मानुषी मूर्तिः प्रिये तारावतीति या ।
भङ्गीमहाकालयोस्ते जन्मने विहिता स्वयम् ॥
तस्तो क्षणमयकाम्योऽहं यास्यां गन्तुमिहोत्सहे ।
तस्मिन्नवसरे चास्यां मूर्त्या प्रविश
भाविनि ! ॥
तत उत्पादयिष्यामि महाकालञ्च भङ्गिनम् ॥
श्रीदेव्युवाच ।
ममैव मानुषी मूर्त्तिरियं वृषभकेतन ! ।
विद्यामि तेऽहं वचनादुत्पाद्य सुतद्वयम् ॥
प्रविवेश ततो देवी स्वयं तारावतीतनौ ।
महादेवोऽपि तस्यान्तु कामार्थं समुपस्थितः ॥
ततः कामयमानां तां देवीं तारावतीं सतीं ।
कामयानं महादेवं स्वयमेवाभजच्छुभा ॥
तस्मिन् काले भवद्गर्भः कायाती चाम्बिकाल्प-
मृक् ।
कामावसाने तस्यान्तु सद्यो जातं सुतद्वयम् ।
अभवन्मुम्भदूंज ! तथा ग्राम्याऽऽरण्यगानवम् ॥"
इति कालिकापुराणे ४६—४८ अध्यायाः ॥
बाणासुरस्य महाकालत्वं यथा,—
अनय उवाच ।
"कथितो भवता सर्गः संग्रया अपि ग्रातिताः ।
स्वप्नवादान्महाभाग ! जनलब्धा वयं गुरो ! ॥
भूयश्च श्रोतुमिच्छामो वयमेतद्विजोत्तम ! ।
कोऽन्यो भङ्गी महाकालो जातौ वेतालभैरवौ ॥
वेतालश्च महाकालं भैरवं भङ्गिनं तथा ।
ब्रह्मन् मे द्विजग्रादूंज ! वधमेषां चतुष्टयम् ॥
मार्कण्डेय उवाच ।
शृणु गते महाकाले मानुषत्वे च भङ्गिनि ।
वेतालभैरवाख्ये च तथाभूते द्विजोत्तमाः ॥
वरलब्धे च वेताले भैरवे तेन संगते ।
अन्धकं तपसा तुष्टं भङ्गिनश्चाकरोद्वरः ॥
अन्धकस्तु वरं पूर्वं विरञ्चापदमागतः ।
प्रसादवरं समाराध्य पुत्रोऽभूत्तस्य घोरसुरः ॥
भङ्गिनेदाद्भङ्गिनं तं संज्ञया चाकरोद्वरः ।
क्षेत्रेण तु महाकालं वाणं वलिसुतं वरः ॥
विष्णुना च्छिन्नबाहुं तं महाकालमथाकरोत् ।
एवं मुनिवरास्तेषां संजातश्च चतुष्टयम् ॥
वेतालो भैरवो भङ्गी महाकालेत्यनुक्रमात् ॥"
इति कालिकापुराणे ८५ अध्यायः ॥*॥
तस्य ध्यानादि यथा,—
"महाकालं यजेद्देव्या दक्षिणे धूम्रवर्णकम् ।
बिभ्रतं दक्षखट्वाङ्गौ दंष्ट्राभीममुखं गिरुम् ॥
व्याघ्रचर्माहृतकटिं तुन्दिलं रक्तवाससम् ।
त्रिनेत्रमर्द्धेन्दुयुक्तं मुण्डमालाविभूषितम् ॥
जटाभारलसच्चन्द्रखण्डत्रयं ज्वलन्निभम् ॥
तथा च कुमारीकल्पे ।
देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत् ।
क्रूं क्रौं यां रां लां वां क्रौं महाकालभैरव
सर्वविघ्नान्नाशय नाशय ह्रौं श्रीं फट् स्वाहा ।
इत्यनेन पाद्यादिभिराराध्य विल्वपर्णयित्वा मूलेन
देवीं पञ्चोपचारैः पूजयेत् । तथा च कालो-
त्तरे ।
महाकालं यजेद्दक्षात् पश्चाद्देवीं प्रपूजयेत् ।
कालीकल्पे ।
कवचं क्रौं सहदृत्य यां रां लां वाञ्च कोल्लतः ।
महाकालभैरवेति सर्वविघ्नान्नाशयेति च ॥
नाशयेति पुनः प्रोच्य मायां लज्जां सहद्धरेत् ।
फट् स्वाहया समायुक्तो मन्त्रः सर्वार्थसाधकः ॥"
इति तन्त्रसारः ॥
महाकाली, स्त्री, (महाकाल + पत्न्यर्थे ङीष् ।)
महाकालस्य पत्नी । सा तु पञ्चवक्त्राष्टभुज-
कालीविशेषः । इति तन्त्रम् । (इयमेव पराशक्ते-
स्तामसी शक्तिः । यथा, देवीभागवते १।७।२०।
"तस्यास्तु सात्त्विकी मूर्त्तिः राजसी तामसी
तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः
त्रियः ॥")
अथ महाकालीमन्त्रः ।
"ॐ फ्रें फ्रें क्रीं क्रीं पशून् मह्यं क्रूं फट्
स्वाहा । श्मशानभैरवीमन्त्रेण यावत् क्रूर-
कर्म्मणि प्रयोगः कर्त्तव्यः । अथ महाकाली-
मन्त्रप्रयोगः । तत्र न्यासशुद्ध्यादिकं न कर्त्त-
व्यम् । तथा च ।
न्यासशुद्ध्यादिकं किञ्चिन्नात्र कार्य्या विचारणा ।
ज्ञानसोपेत्र संपूर्णं ज्ञानकुम्भेऽथ कालिकाम् ॥
पञ्चवक्त्रां महारौद्रीं प्रतिवक्त्रत्रिलोचनाम् ।
मुक्तिमूलधनुर्बाणखड्गखेटवराभयान् ॥
दधादष्टभुजैर्देवीं विभ्राणां भूरिभूषणाम् ।
ध्यात्वैवं साधकः साध्यं साधयेज्जपसंख्यितम् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री चामुण्डा चण्डिका-
दमी ।
पूर्वादीशानपर्य्यन्तं कृत्वाऽग्रे स्थिता दश ॥
तत्र क्रमः । देवीं ध्यात्वा यथाविभवोपचारैश्च
संपूज्य ब्राह्मयादयश्चण्डी पूर्वादिक्रमेण पूज-
येत् । तथा ।
नामोच्चारणसंरब्धौ वह्नौ प्रज्वलितेऽनले ।
शुद्ध्यादेरिव्यां शुद्धौ देवीमन्त्रं जपेत्ततः ॥
समिधः पिप्पलस्यैव तथा विभीतकाद्भिकाः ।
यद्धूमगन्धमाघ्राय विभीतान्नारदोमतः ॥
समाधाद्देरिदं चक्रं कालिकामन्त्रयोगतः ।
उच्चाटनं चापराद्धे सन्ध्यायां मारणं तथा ॥
दक्षिणस्यां दिशि स्थित्वा यामादेर्दक्षिणा-
शुक्रः ॥"
इति तन्त्रसारः ॥
जिनानां चतुर्विंशतिशासनदेवतानामगौतदेवी-
विशेषः । इति हेमचन्द्रः ॥ *॥
महाकाव्यं, क्ली, (महच्च तत्काव्यञ्चेति ।) काव्य-
ग्रन्थविशेषः । तत्पर्य्यायः । सर्गबन्धः २ । इति
त्रिकाण्डशेषः ॥ तस्य लक्षणं यथा,—
"सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः ।
सदंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः ॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा ।
शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते ॥
अङ्गानि सर्व्वेऽपि रसाः सर्व्वे नाटकसन्धयः ।
इतिहासोद्भवं वृत्तमन्यदा सज्जनाश्रयम् ॥
चत्वारस्तत्र वर्गाः स्युस्तेष्वेकञ्च फलं भवेत् ।
आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा ॥
क्वचिन्निन्दा खलादीनां सतान्च गुणकीर्त्तनम् ।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः ॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह ।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते ॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत् ।
सन्ध्यासूर्य्यसुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥
कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा ।
नामास्य सर्गोपादेयकथया सर्गनाम तु ॥"
इति साहित्यदर्पणे ६ परिच्छेदः ॥ *॥
महाकाव्यस्य यथा, कालिदासस्तत्कुमार-
सम्भवरघुवंशप्रभृतयः । भट्टिकाव्यम् । भारविरचितकिरातार्জুनीयम् । श्रीहर्ष-
रचितनैषधीयचरितम् । माघरचितशिशुपालवध-
मित्यादयः ॥
महाकुमुदा, स्त्री, (महती चासौ कुमुदा चेति ।)
काम्पिल्लवृक्षः । इति राजनिर्घण्टः ॥
महाकुम्भी, स्त्री, (महती चासौ कुम्भी चेति ।)
कटफलम् । इति राजनिर्घण्टः ॥
महाकुलः, त्रि, (महत् कुलं यस्येति ।) उत्तम-
कुलजातः । तत्पर्य्यायः । कुलीनः २ आर्य्यः ३
सभ्यः ४ सज्जनः ५ साधुः ६ । इत्यमरः । २ ।
७ । ३ ॥ कुलः ७ अभिजातः ८ कौलेयकः ९

जातः २०। इति हेमचन्द्रः। ३। १६६॥ महाकुलः ११ कौलेयः १२ कोलेयकः १३। इत्यमरटीकायां भरतः॥ कुलजः १४ साधुः १५ कुलश्रेष्ठः १६। इति शब्दरत्नावली॥ (यथा, हरिवंशे। १७। ४।

"भेदे हरिविनाशो भैरः सुहृदां महाकुलानाञ्च॥"

स्त्री, उत्तमं कुलम्। यथा, राजतरङ्गिण्याम्। २। ६१।

"इयोरालोकितं चित्रं जज्ञेकस्मिन् महाकुले॥")

महाकुलीनः, त्रि, (महाकुलस्य अपत्यम्। महाकुल + "महाकुलादञ्खञौ।" ४।१।१३१। इति छप्रत्ययः।) महाकुलः। यथा,—

"महाकुलीन ऐणाके वंशे दाशरथिर्मम।
पितुः प्रियहरो भर्त्ता क्षेमकारक्षपक्षिणाम्॥"

इति भट्टिः। ५। ७७ श्लोकः॥

(स्त्रियां टाप्। यथा, रामायणे। २।२८।३।

"सीते! महाकुलीनासि धर्म्मे च निरता सदा॥")

महाकुष्ठं, क्ली, (महच्च तत् कुष्ठमेति।) दुरन्तकुष्ठरोगः। तत् सप्तविधं यथा,—

"पूर्व्वचिक्यं तथा सिध्मं तत्रः काकणकं तथा।
पुण्डरीकर्ष्यजिह्वे तु महाकुष्ठानि सप्त च॥
पूर्व्वचिक्यं कपालोदुम्बरमण्डलाख्यम्। सिध्मग्रन्थोऽकारान्तो नपुंसकलिङ्गः। तत्र कथं सिध्मस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्रकुष्ठेषूक्तत्वात्। उच्यते। लघुमात्रगता सिध्मपूर्व्विका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुषु प्रविष्टत्वं सिध्मं महाकुष्ठमेव। एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात्। एषां महाकुष्ठत्वञ्च प्रोक्तसप्तरोगरूपत्वमाश्रित्य उक्तलक्षणयुक्तत्वात् चिकित्सावाहुल्याच्च।" इति भावप्रकाशः॥ (एषां चिकित्सा क्षुद्रकुष्ठग्रन्थे द्रष्टव्या॥)

महाकूपः, पुं, (महांश्चासौ कूपश्चेति।) दुरन्तकूपः। तत्पर्य्यायः। अरघट्टः २। इति जटाधरः॥

महाकूलः, पुं, (महत् कूलमस्य।) महाकुलः। वृक्षकुलः। इति हिरूपकोषः।

महाकोशफला, स्त्री, (महान् कोशः फले यस्याः।) देवदाली लता। इति राजनिर्घण्टः॥

महाकोशातकी, स्त्री, (महती चासौ कोशातकी चेति।) घण्टिघोषा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—

"महाकोशातकी प्रोक्ता घण्टिघोषा महाफला।
धामार्गवो घोषकश्च घण्टिपर्णश्च स स्मृतः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महागदः, पुं, (महांश्चासौ गदश्चेति।) ज्वरः। इति राजनिर्घण्टः॥ (महारोगः। यथा, सुश्रुते। १। ३३ अध्याये।

"वातव्याधिः प्रमेहश्च कुष्ठमर्शो भगन्दरः।
अश्मरी मूढगर्भश्च सप्तैवोदरमष्टमम्।
अष्टावेते महागदाः दुश्चिकित्सा महागदाः॥"

औषधविशेषः। यथा, सुश्रुते कल्पस्थाने ५ अध्याये।

"एषोऽगदो बलिभि विषं प्रयुक्तः
पानाञ्जनाभ्यञ्जनस्नयोगैः।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभावः॥"

महती गदाख्येतिविग्रहे महागदादिसिद्धिः, त्रि। यथा, श्रीमद्भागवते। १। १८। ६।

"परानुरक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्।
मत्सैनिकाभीक्ष्णं प्रसुदन्नं दुरुक्तैः
प्रत्यक्षमन्युः प्रहसंस्तं बभाषे॥")

महागन्धं, क्ली, (महान् गन्धोऽस्य।) हरिचन्दनम्। गोलम्। इति राजनिर्घण्टः॥ (महागन्धयुक्ते, त्रि। यथा, हरिवंशे। १४३। ४४।

"तत्र कण्ठे समासज्य महागन्धं नराधिप!।
आयतायतबाहुर्यो यत्र दुरात्मा बलदर्पितः॥")

महागन्धः, पुं, (महान् गन्धोऽस्य।) कुटजवृक्षः। इति राजनिर्घण्टः॥ अजवेतसः। इति शब्दचन्द्रिका॥

महागन्धा, स्त्री, (महान् गन्धो यस्याः। स्त्रियां टाप्।) नागबला। केविकापुष्पम्। इति राजनिर्घण्टः॥ चासुक्षा। यथा, हेमचन्द्रः। २।१२०।

"चासुक्षा चर्च्चिका चर्म्मसुक्षा माण्डारिकर्णिका।
कर्णमोटी महागन्धा भैरवी च कपालिनी॥"

महागवः, पुं, (महांश्चासौ गौश्चेति। "गोरतद्धितलुकि।" ५।४।९२। इति समासान्तटच्। गोशब्दस्यलादस्य तथात्वम्।) गवयः। यथा,—

"वनगौर्गवयः प्रोक्तो बलभद्रो महागवः॥"

इति राजनिर्घण्टः॥

महागिरिः, पुं, (महान् गिरिरिवाकारोपाधिर्यस्य। यद्वा, महान् गिरिरिव।) बौद्धभिदः। यथा—

"महागिरिः सुदत्तस्यात्रा वचान्ता दध्रपूर्व्विकाः॥"

इति हेमचन्द्रः। २। ३४॥

महान् गिरिः पर्व्वतः।) दुरन्तपर्व्वतश्च॥ (यथा, महाभारते। ३। २२०। १५।

"नातप्ततपसा शक्यो द्रष्टुमेष महागिरिः।
आरोढुं वापि कौन्तेय! तत्तावियतवाग्भव॥"

दावविशेषः। यथा, हरिवंशे। ३। ८६।

"तस्यामेव निशायान्तु उर्जयन्तो महागिरिः॥")

महागुरुः, पुं, (महांश्चासौ गुरुश्चेति।) अतिगुरुः। स च पुरुषस्य पिता माता आचार्य्यश्च। स्त्रियाः पतिः। अदत्तकन्यायाः पिता माता च। यथा। त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्य्यश्चेति। इति विष्णुसूक्तम्॥ पशुर्महागुरुत्वमाह रामायणे।

"मातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रियाः।
पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च॥"

भ्रातातपः।

"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।
पतिरेको गुरुः स्त्रीणां सर्व्वाभ्यागतो गुरुः॥"

एकपदेन दशस्त्रीणां पितृमातृश्वशुरादीनां गुरुत्वमाह पद्मपुराणे सृष्टिखण्डे प्रह्लादं प्रति नारदः॥ * ॥

सपितृकमरणं प्रस्तुत्य आश्वलायनः। चिराजमचारजवयाग्राग्निः खुर्द्वादशरात्रं महागुरुषु। आचार्य्यश्च उपनीय ददद्वेदमाचार्य्यः स उदाहृतः। इति याज्ञवल्क्योक्तेः। तच्चरणे चिराजाग्नौचित्येन नैतावद्भवियम्॥ आश्वलायनः। नैतस्यां रात्रावन्नं पचेयुः। अन्नं न पचेयुरित्यनेनोपवासः सूचितः। अथ मध्यरात्रे आहवनीयस्य आसीरन् इति वक्ष्यमाणवचनात्। अथशब्दः कदाचित्। अत्यारूढज्वरं चारम्भसिकादिप्रतिषेधज्वरभिन्नं तप्तेक्षुवत् साधारि च। इति शुद्धितत्त्वम्॥ *॥

महागुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि यथा, कर्म्मलोचने।

"महागुरुविपाते च कार्य्यं किञ्चिन्न चाचरेत्
आर्त्विज्यं ब्रह्मचर्य्यञ्च यावत् पूर्णो न वत्सरः॥
अन्नमाद्यं परान्नञ्च गन्धं माल्यञ्च मैथुनम्।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सरः॥
तीर्थयात्रां विवाहञ्चाध्यापनं तर्पणन्तथा।
संवत्सरं न कुर्व्वीत महागुरुनिपातने॥"

अपि च।

"विशेषतः शिवापूजां प्रह्लतर्पिहवी द्विजः।
यावत्संवत्सरपर्य्यन्तं मनसापि न चाचरेत्॥
महागुरुनिपाते तु कार्य्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्य्यञ्च श्राद्धं देवयुतञ्च यत्॥"

इति कालिकापुराणे ५७ अध्यायः॥

महागुल्मा, स्त्री, (महान् गुल्मो यस्याः।) सोमवल्ली। इति राजनिर्घण्टः॥

महागुहा, स्त्री, (महती गुहा यस्याः।) पृश्निपर्णी। इति राजनिर्घण्टः॥

महागोधूमः, पुं, (महांश्चासौ गोधूमश्चेति। हृद्गोधूमः। वड़ गम इति भाषा। यथा,—

"गोधूमः सुमनोऽपि स्यान्निविडः स च कीर्त्तितः।
महागोधूम इत्याख्यः पञ्चाङ्गुल्यात् स चागतः॥
मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा।
निःशूको दीर्घगोधूमः कथितस्त्वीषदाभिधः॥
गोधूमो मधुरः स्निग्धो वातपित्तहरो गुरुः।
कफशुक्रप्रदो बल्यः स्त्रिग्धः सन्धानकृद्वरः॥
जीवनी दृंहणो वर्ण्यो ह्रस्वो बल्यः स्थिरत्वकृत्॥"

कफप्रदो नवीनो यतु पुराणः। पुराणयवगोधूमचौद्रजाङ्गलमूलासुगिति वाग्भटे वसन्ते ग्रहीतत्वात्।

"मधुली स्निग्धा स्निग्धा पित्तघ्नी मधुरा लघुः।
शुक्रला दृंहणी पथ्या तद्वन्मध्यासिता स्मृता॥"

इति भावप्रकाशः॥

महाच्छ

महाग्रीवः, पुं, (महती दीर्घा ग्रीवा गलरन्ध्रो यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ८६ ।
"महानासो महाकम्बुर्महाग्रीवः प्रलम्बभाक् ॥"
शिवानुचरभूतविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । १४ । ३ ।
"कुक्षोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः ।
पार्श्वघण्टः सिंहसख उन्नतांसो महाहनुः ॥"
देवयोनिविशेषः । यथा, मार्कण्डेये । ५८ । १७ ।
"आत्रग्रीवा महाग्रीवा खेपुरा प्रलम्बधारिणः ॥")
हृद्दृग्रीवायुक्ते, त्रि ॥

महाघासः, पुं, महतो देवस्य महत्या भूमेर्वा घासः । इति सुग्धबोधव्याकरणवटीकायां दुर्गादासः ॥

महाघूर्णा, स्त्री, (महती घूर्णा शरीरभ्रमणं यस्याः ।) सुरा । इति शब्दचन्द्रिका ॥ (महतीघासौ घूर्णा चेति ।) अतिशयभ्रमिश्च ॥

महाघोरः, त्रि, (महांश्चासौ घोरश्चेति ।) अतिशयभयानकः । यथा, शुद्धितत्त्वे ।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी ।
तान्तु तर्तुं ददात्येनां छाया वैतरणीच गाम् ॥"

महाघोषं, क्ली, (महान् घोषः कोलाहलो यस्मिन् ।) हट्टम् । इति मेदिनी । षे, ५६ ॥ हृद्दृच्छब्दयुक्ते, त्रि ॥ यथा,महाभारते । १ । २२१ । ११ ।
"तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं तथा ।
समाजन्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥")

महाघोषः, पुं, (महांश्चासौ घोषश्चेति ।) अतिघोषयुक्तम् । इति मेदिनी । षे, ५६ ॥

महाघोषा, स्त्री, (महान् घोषो यस्याः । टाप् ।) कर्कटशृङ्गी । इति मेदिनी । षे, ५६ । कुरुरकी । इति शब्दचन्द्रिका ॥

महाङ्गः, पुं, (महान्ति दीर्घाणि अङ्गान्यस्य ।) उष्ट्रः । इत्यमरः । २ । ९ । ७५ ॥ गोखुरकः । रक्तपिचकः । इति राजनिर्घण्टः ॥ हृद्दृदवयवयुक्ते, त्रि ॥ (यथा, महाभारते । १३ । १७ । ७८ ।
"खलिनः खलिभावश्च भागी भागकरो लघुः ।
उलूखश्च महाङ्गश्च महागर्भपरायणः ॥")

महाचक्षुः, स्त्री, (महती चक्षुरिन्द्रियमस्याः ।) शाकविशेषः । तत्पर्य्यायः । हृद्दचक्षुः २ विशालिः ३ सुचक्षुका ४ स्थूलचक्षुः ५ दीर्घपत्री ६ दिव्यगन्धा ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मशूलोदरार्शोऽनिलविबन्धनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ पुं, हृद्दचक्षुर्युक्तपक्षी च ॥

महाचण्डः, पुं, (महांश्चासौ चण्डश्चेति ।) यमभटः । इति हैमचन्द्रिकाकोषौ ॥ प्रचण्डे, त्रि ॥

महाच्छदः, पुं, (महान् छदः पत्रमस्य ।) देवताडवृक्षः । इति रत्नमाला ॥ हृद्दत्पत्रश्च ॥

महाज

महाच्छायः, पुं, (महती छायास्य ।) वटवृक्षः । इति राजनिर्घण्टः ॥ हृद्दच्छायायुक्ते, त्रि ॥

महाच्छिद्रा, स्त्री, (महच्छिद्रमस्याः ।) महामेदा । इति राजनिर्घण्टः ॥ हृद्दच्छिद्रयुक्ते, त्रि ॥

महाजः, पुं, (महांश्चासौ अजश्चेति ।) हृद्दच्छागः । (महतो जायत इति । महत्+जन् +कर्म्मणि डः । पृषोदरादित्वात् साधुः ।) महाकुलोद्भवे, त्रि ॥

महाजटा, स्त्री, (महती जटास्याः ।) वटजटा । इति राजनिर्घण्टः ॥ (महती जटा ।) हृद्दज्जटा च ॥

महाजनः, पुं, (महांश्चासौ जनश्चेति ।) साधुः । यथा, महाभारते । १ । ३१७ । ११२ ।
"वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
मन्वादिः । यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं
देवो विमोहितमतिर्बत मायया लम् ।
त्वय्यब्जनाभसदनेऽखिलसत्त्वधाम्नि
वैतानिके महति कर्म्मणि युज्यमानः ॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने यमवाक्यव्याख्याने श्रीधरस्वामी ॥ (धनी । यथा, रत्नकोटिके । १ ।
"सङ्गं नैव हि कांचिदस्य कुरुते सम्भाष्यते नादरात्
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेवमहाजनस्य विशदस्वच्छाशयो लज्जया
मन्ये निर्धनता प्रकाममपरं धत्ते महापातकम् ॥")

महाजवः, पुं, (महान् जवो वेगो यस्य ।) गवयः । श्रीकारी मृगः । इति राजनिर्घण्टः । अतिवेगयुक्ते, त्रि ॥ (यथा, श्रीमद्भागवते । ७ । ८ । २८ ।
"लक्षाकृष्टासं खरसुतखनोत्खातं
निर्भीजिताक्षं जघ्ने महाजवः ॥"
स्त्री, कुमारानुचरमातृविशेषः । यथा, महाभारते । ९ । ४६ । २२ ।
"ग्रहोलूकमुखी लम्बा खरजङ्घा महाजवा ॥")

महाजम्बुः, स्त्री, (महती चासौ जम्बुश्चेति ।) हृद्दज्जम्बुवृक्षः । यथा,—
"महाजम्बुर्महापत्रा राजजम्बुर्हृदम्बला ॥"
इति रत्नमाला ॥

महाजम्बूः, स्त्री, (महती चासौ जम्बूश्चेति ।) हृद्दज्जम्बुः । तत्पर्य्यायः । राजजम्बुः २ खलेमाता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ हृद्दत्फला ८ । अस्य गुणाः । उष्णत्वम् । मधुररसत्वम् । कषायत्वम् । अमहरत्वम् । अटित्वाल्पजठिमनाशित्वम् । खरकरत्वम् । विष्टम्भित्वम् । शोषघ्नमलत्वम् । भ्रमातीसारार्शिवर्द्धकत्वम् । श्वसितकफकासप्रघ्नमलत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।

महाज्यो

"पक्षेन्द्रः कथितो नन्दो राजजम्बुर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥
राजजम्बूफलं स्वादु विरूक्षि गुरु दोषजम् ॥"
इति भावप्रकाशः ॥

महाजातिः, स्त्री, (महती जातिरिव रक्षा इति । यद्वा, महती जातिरिव तदाकृतित्वात् ।) वासन्ती लता । इति राजनिर्घण्टः ॥ (महती जातिरिति ।) श्रीवृक्षश्च ॥

महाजातीयः, त्रि, (महत्+"प्रकारवचने जातीयर् ।" ५ । ३ । ६८ । इति जातीयर् । ततः । "आतु महतः समानाधिकरणजातीययोः ।" ६ । ३ । ७६ । इति महतः आकारादेशः ।) महतः प्रकारः । इति आकरग्रन्थः ॥

महाजाली, स्त्री, (जालयति आच्छादयतीति । जाल आच्छादने+घञर्थात् । स्त्रियां ङीष् । ततः । महती चासौ जाली चेति । यद्वा, महांश्चासौ जालश्चेति स अस्या अस्ति अर्शआद्यच् ततः ङीष् । हलायुधटीकायां रभसः ।) पीतवर्णघोषा । इत्यमरः । २ । ४ । २१७ ॥ राजकोशातकी । इति राजनिर्घण्टः ॥ हृद्दज्जालवाचके, त्रि ॥

महाज्येष्ठी, स्त्री, (महती चासौ ज्येष्ठी चेति ।) नक्षत्रविशेषादियुक्तज्येष्ठीपूर्णिमा । सा पञ्चधा । यथा, ब्रह्मपुराणे ।
"ऐन्द्रे गुरुः शुक्रो चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्येष्ठी प्रकीर्त्तिता ॥
ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम् ॥ २ ॥
विना गुरुवारेणापि ।
ऐन्द्रे गुरुः शुक्रो चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ॥ २ ॥
अनुराधास्थगुरावपि ।
ऐन्द्रे मैत्रे यदा जीवस्तत्पक्षदशके रविः ।
पूर्णिमा शुक्रवारेण महाज्येष्ठी प्रकीर्त्तिता ॥ ३ ॥
अनुराधास्थे चन्द्रेऽपि । आदभूतिः ।
ऐन्द्रर्क्षे त्वथवा मैत्रे गुरुशुक्रौ यदा स्थितौ ।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्त्तिता ॥ ४ ॥
राजमार्त्तण्डे ।
ज्येष्ठे संवत्सरे चैव ज्येष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्येष्ठी प्रकीर्त्तिता ॥ ५ ॥
ज्येष्ठसंवत्सरश्च ।
ज्येष्ठानलोपमे जीवे वर्षं स्यात् शक्रदेवतम् ।
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः ।
न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्येष्ठ इति वर्षविशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यादिति पाठः साधनिकः ॥ * ॥
महाज्येष्ठान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ।"
इति तिथ्यादितत्त्वम् ॥

महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती चेति ।) लताविशेषः । वड़ी मालकङ्गनी इति हिन्दी भाषा । तत्पर्य्यायः । तेजोवती २ मधुरसा ३ शुक्लकप्रभा ४ तीक्ष्णा ५ सुवल्लीवल्ली ६

जवला ७ अग्निदीप्ता ८ तेजस्विनी ९ सुरलता १० अग्निजटा ११ अग्निगर्भा १२ अरुणी १३ शैलसुता १४ सुनेला १५ सुवेगा १६ वायवी १७ सीमा १८ आकाशी १९ वायवादनी २० मोर्जता २१ श्रीजता २२ सौम्या २३ माझी २४ जयन्तिंशुजा २५ पारावतपदी २६ पीता २७ पीततेजा २८ यज्ञस्त्रिनी २९ मेध्या ३० मेधावती ३१ धीरा ३२। अस्या गुणाः। तिक्ततरत्वम्। रूक्षत्वम्। किञ्चित्कटुत्वम्। वातकफापहत्वम्। दाहप्रदत्वम्। दीपनत्वम्। मेधाप्रज्ञाकारित्वञ्च। इति राजनिर्घण्टः॥

महाज्वालः, पुं, (महती ज्वाला यस्यास्य।) होमाग्निः। इति हेमचन्द्रः।३।५००॥ (नरकविशेषः। यथा, विष्णुपुराणे। २। ६। १२।

"क्षुधा सुतापापि गता महाज्वालेति विश्रुता॥"

महादेवः। यथा, महाभारते।१३।१७।८२।

"अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः॥")

महाज्वाला, स्त्री, (महती ज्वाला दीप्तिर्यस्याः।) जिनानां विद्याधरीविशेषः। इति हेमचन्द्रः। ३।५००॥ (महती ज्वाला।) हरहरमिश्रिका च॥

महाटाट्यः, पुं, (महान् आटाट्यः शोभासम्पन्नः।) कदम्बः। इति राजनिर्घण्टः॥ (महाशाटाट्यः।) अतिशयधनवति, त्रि॥ (यथा, कथासरित्सागरे। २५। ११८।

"ततः प्रभृति चैतस्यां वाराणस्यामुवास सः। अभ्यर्थितो महाटाट्य तस्यैव वणिजो गृहे॥")

महातमःप्रभा, स्त्री, (महती तमसां प्रभा प्रकाशोऽस्याम्।) नरकविशेषः। स चातिशयान्धकारमयः। यथा, हेमचन्द्रः। ५। ३।

"घनोदधिघनवाततनुवाततमःस्थिताः।
रत्नशर्कराबालुकापङ्कधूमतमःप्रभाः॥
महातमःप्रभा चैतेष्वधोऽधो नरकभूमयः॥"

महातरुः, पुं, (महांश्चासौ तरुश्चेति।) जटी वृक्षः। इति हेमचन्द्रः। ४। २०६॥ (महाकवेः कालिदासस्य जटीवृक्षसहित्य वक्रोक्तिप्रयोगो यथा,—

"तरवः पारिजाताद्याः जटीवृक्षो महातरुः॥")

हरहरश्च॥

महातलं, क्ली, (महच्च तत्तलञ्चेति।) पातालविशेषः। यथा, शब्दमालायाम्।

"अतलं वितलञ्चैव नितलञ्च तलातलम्।
महातलञ्च सुतलं तलमञ्च रसातलम्॥"

(यथा च श्रीमद्भागवते। २। १। २६।

"पातालमेतस्य हि पादमूलं
पठन्ति पार्ष्णिप्रपदे रसातलम्।
महातलं विश्वसृजोऽथ गुल्फौ
तलातलं वै पुरुषस्य जङ्घे॥")

महातारा, स्त्री, (तारयति संसारादिति। तॄ+णिच्+अच्। स्त्रियां टाप्। ततो महती तारेति कर्म्मधारयः।) जिनानां देवीविशेषः। तत्पर्य्यायः। तारा २ महाश्रीः ३ ओड्डारा ४ खड्गा ५ श्रीः ६ मनोरमा ७ तारिणी ८ जया ९ अनन्ता १० घिवा ११ लोकेश्वरा १२ आलजा १३ सुदूरवासिनी १४ भद्रा १५ वेला १६ नीलसरस्वती १७ भृकुटी १८ वसुधारा १९ धनंददा २० विलोचना २१ लोचना २२। इति हेमचन्द्रः॥

महातालो, स्त्री, (महान् अतेलक्षालो यत्र। स्त्रियां ङीष्।) आवर्त्तकी। इति राजनिर्घण्टः॥

महातिक्तः, पुं, (महानतिशयस्तिक्तस्तिक्तरसो यत्र।) महानिम्बः। इति राजनिर्घण्टः॥ अतिशयतिक्तरसयुक्ते, त्रि॥

महातिक्ता, स्त्री, (महती गुरुतरा तिक्ता।) यवतिक्ता। इति राजनिर्घण्टः॥ (यथा, गोविन्दविद्याददतभैषज्यरत्नावल्याम्।

"आयु जिक्नी महातिक्ता विद्याला कृमिघातकम्॥")

पाठा। इति शब्दचन्द्रिका॥

महातीक्ष्णा, स्त्री, (महती तीक्ष्णा।) भल्लातकवृक्षः। इति राजनिर्घण्टः॥ अतिशयतीक्ष्णे, त्रि॥

महातेजः, [स्] क्ली, (महदतिशयं तेजोऽस्य।) पारदः। इति राजनिर्घण्टः॥

महातेजाः, [स्] पुं, (महदतिशयं तेजो यस्यास्य।) कार्त्तिकेयः। इति हलायुधः। अग्निः। इति शब्दचन्द्रिका॥ (महादेवः। यथा, महाभारते। १३। १७। ५६।

"उग्रतेजा महातेजा जयो विजयकालवित्॥")

अतिशयतेजस्विनि, त्रि॥ (यथा, मनुः।१।६२।

"स्वारोचिषश्चौत्तमिश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विख्यातस्तनव एव च॥")

महात्मा, [न्] त्रि, (महानात्मा स्वभावोऽस्य।) उत्तमस्वभावयुक्तः। (यथा, कामन्दकीयनीतिसारे। ३। ११।

"महावातानलध्वान्तिमेघमालातिपेलवैः।
कथं नाम महात्मानो ह्रियन्ते विषयारिभिः॥")

तत्पर्य्यायः। मनीषः २ उद्भटः ३ उदारः ४ उदात्तः ५ उदीर्णः ६ महाशयः ७ महामनाः ८। इति हेमचन्द्रः। ३। ३१॥ (पुं, परमात्मा। यथा, मनुः। १। ५७।

"युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः॥"

"तस्मिन् परमात्मनि।" इति तट्टीकायां कुल्लूकः॥ महत्तत्त्वम्। यथा, श्रीमद्भागवते। ६। ७। २५।

"मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत्।
खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि॥"

"महात्मनि महत्तत्त्वे।" इति तट्टीकायां श्रीधरस्वामी॥ पिङ्गलवर्त्तिनीयः। यथा, मार्कण्डेये। ६६। ७६।

"महान् महात्मा महितो महिमावान् महाबलः॥"

महादेवः। यथा, महाभारते। १३।१७।३७।

"महारूपो महाकायो वृषरूपो महायशाः।
महात्मा सर्व्वभूतात्मा विश्वरूपो महाहनुः॥")

महादक्षः, पुं, (महान् दक्षस्ताडनबाधनमस्य।) यमदूतभेदः। इति हरहर्म्मपुराणे ५६ अध्यायः॥ (महान् दक्षः।) हरहरश्च॥ (यथा, महाभारते। ५। १६३। ३७।

"यस्माज्जानन् स मन्दात्मा मामसौ नोपसर्पति।
तस्मात्तस्मै महादक्षो धार्य्यः स्यादिति मे मतिः॥")

महादन्तः, पुं, (महांश्चासौ दन्तश्चेति।) गजदन्तः। तत्पर्य्यायः। हैमदन्तः २। इति त्रिकाण्डशेषः॥ हरहरश्च॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥")

महान् दन्तोऽस्य।) तद्वति, त्रि॥

महादानं, क्ली, (महच्च तद्दानञ्चेति।) श्रेष्ठदानम्। तच्च तुलापुरुषादिषोड़शप्रकारम्। यथा, मत्स्यपुराणे।

"अथातः संप्रवक्ष्यामि महादानस्य लक्षणम्॥"

इत्यभिधाय।

"आद्यन्तु सर्व्वदानानां तुलापुरुषसंज्ञितम्।
हिरण्यगर्भदानञ्च ब्रह्माण्डं तदनन्तरम्॥
कल्पपादपदानञ्च गोसहस्रन्तु पञ्चमम्।
हिरण्यकामधेनुञ्च हिरण्याश्वस्तथैव च॥
पञ्चलाङ्गलकं तद्वद्धरादानन्तथैव च।
हिरण्याश्वरथञ्चैव हेमहस्तिरथस्तथा॥
द्वादशं विष्णुचक्रञ्च ततः कल्पलतात्मकम्।
सप्तसागरदानञ्च रत्नधेनुस्तथैव च।
महाभूतघटश्चैव षोड़श्यः परिकीर्त्तिताः॥"

अत्र सामान्यलक्षणम्। कृष्णजपाकुसुमदानं महादानम्। विनायकादिपञ्चाग्नीन्द्रेवताहोमाङ्गकं वा। तथा मत्स्यपुराणम्।

"विनायकादिग्रहलोकपाल-
वसुद्रुकादित्यमरुद्गणानाम्।
ब्रह्माच्युतेशानहुताशनीनां
क्रमक्रमतो होमचतुष्टयं स्यात्॥
जप्यानि सूक्तानि तथैव चैषा-
मनुक्रमेणापि यथास्वरूपम्॥"

इत्यादिना कृष्णजपहोमरूपाङ्गयोर्विधानात् प्रत्येकं षोड़शतुलापुरुषप्रधानाभिहितोक्तं महादानत्वेनोद्दिश्येति। अतो नेतरेतरावयवः। न तु कृष्णमृगरूपेतिकर्त्तव्यतायोगित्वजिघृक्षणीयलक्षणम्। अचलदानेऽपि गतत्वात् एवञ्च।

"कनकाग्नितिला गावो दासी रथमहीगृहाः।
कन्या च कपिला धेनुर्म्मेदादानानि वै दश॥"

इति कूर्म्मपुराणोक्तदानपदं गौणम्॥ अन्यथा बहुग्रन्थिकल्पनापत्तेः; कनकदानादि-

साधारणानुगतैकरूपाभावाच्च । अतो न वैपरीत्यमिति ।

"सर्व्वेषामेव दानानामेकज्ञानानुगं फलम् ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥

महादार, क्ली, (महत् दारु अस्य ।) देवदारु ।

इति जटाधरः ॥ (महत् दारु ।) इत्यन् कर्म्मधा० ॥

महादेवः, पुं, (महांश्चासौ देवश्चेति । यद्वा, महतां देवादीनां देवः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ अस्मूर्त्तोऽनर्गतसोमस्मूर्त्तिरयम् । यथा, महादेवाय सोमस्मूर्त्तये नमः । इति शिवपूजापद्धतिः ॥ * ॥ अस्य उत्पत्तिर्यथा—

"ब्रह्मादीनां सुराणाञ्च मुनीनां ब्रह्मवादिनाम् ।
तेषाञ्च महतां देवो महादेवः प्रकीर्त्तितः ॥
महती पूजिता विश्वे मूलप्रकृतिरीश्वरी ।
तस्या देवः पूजितश्च महादेवः स च स्मृतः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५३ अध्यायः ॥

तस्य पञ्चवक्त्रत्वचिन्नेत्रत्वकारणं यथा,—

"अतीव कमनीयाङ्गं किशोरं श्यामसुन्दरम् ।
अहो निर्व्वचनीयञ्च दृष्ट्वा रूपमनुत्तमम् ।
न बभूव विरूपाक्ष लोचनाभ्यां त्रिलोचनः ॥
पश्यन्निमेषरहित इति मत्वा स्वमानसे ।
भक्तानुकम्पाभावज्ञो हरोद प्रेमविह्वलः ॥
सहस्रवदनोऽनन्तो भाग्यवांश्च चतुर्म्मुखः ।
बहुभिर्लोचनैर्दृष्ट्वा तुष्टाव बहुभिर्मुखैः ॥
पश्यामि किं वा किं स्तौमि संप्राप्य नाथ-
मीदृशम् ।
आस्येकेन लोचनाभ्यां चतुर्भ्यां स पुनः पुनः ॥
स्वमानसे कुर्व्वतीदं शङ्करे च तपस्विनि ।
तद्बभूव चतुर्व्वक्त्रं पूर्व्वेण सह पञ्चमम् ॥
एकैकवक्त्रं शुशुभे लोचनैश्च त्रिभिस्त्रिभिः ।
बभूव तेन तन्नाम पञ्चवक्त्रस्त्रिलोचनः ॥
चत्वारि गुणरूपाणि तस्य ब्रह्मस्वरूपिणः ।
सत्त्वं रजस्तम इति तस्य हेतुं निशामय ॥
सत्त्वगुणेन हरणं प्रभुः पञ्चमुखं पाति च साक्षि-
कान् ।
राजसेन राजसिकान् तामसेन च तामसान् ॥
चतुष्पत्तामसात् पश्चात् ललाटस्याहरस्य च ।
संहारकाले संहर्त्तुरग्निरार्विभवेत् क्रुधा ॥
कोटितालप्रमाणश्च सूर्य्यकोटिसमप्रभः ।
लेलिहानो दीर्घजिह्वस्त्रैलोक्यं दग्धुमीश्वरः ॥"

तस्य भस्मधारणकारणं यथा,—

"विभूतिगात्रः स विभुः सतीसत्कारभञ्जनात् ।
धत्ते तस्या अस्थिमालां प्रेमभावेन भक्त्या च ॥
स्वात्मारामो यद्यपीश्वरत्वाप्ति पूर्णमद्वयम् ।
सतीमृतं गृहीत्वा च भ्रमं भ्रमं हरोद ह ॥
प्रत्यङ्गाङ्गञ्च तस्याश्च पपात यत्र यत्र च ।
सिद्धपीठञ्च तत्र बभूव मन्त्रसिद्धिदम् ॥
तदा ग्रहावशेषञ्च ज्ञात्वा वक्षसि शङ्करः ।
पपात मूर्च्छितो भूत्वा विष्णोश्चैव च राधिके ! ॥
तदा गत्वा महैश्वर्य्यं ज्ञात्वा क्रोडे प्रबोध्य च ।
अदत्त दिव्यज्ञानञ्च तस्मै श्रीकृष्णमन्त्रकम् ॥
तदा शिवश्च सन्तुष्टः स्वलोकञ्च जगाम ह ।
मूर्त्यन्तरेण कालेन तां संप्राप प्रियां सतीम् ॥"

तस्य दिगम्बरत्वजटाधारित्वकारणं यथा,—

"दिग्वस्त्रधारी योगेन नेच्छाऽनित्ये पटे विभोः ।
जटाद्यपस्याकालीना धत्तेऽद्यापि विवेकतः ॥
न चेच्छा कैशवंस्कारे स्नाङ्गवैगेन योगिनः ।
समता चन्दने पङ्के लोष्ट्रे रत्ने मणीश्वरे ॥"

तस्य नागभूषणत्वत्रिपुरवधकत्वकारणं यथा,—

"गरुडद्विषो नागाः शङ्करं शरणं ययुः ।
बिभर्त्ति कृपया स्वाङ्गे तानेव शरणागतान् ॥
वाहनं वृषरूपोऽहमस्यत्तं वोढुमक्षमः ।
त्रिपुरस्य वधे पूर्व्वं मत्कर्णांशुसमुद्भवः ॥"

तस्य धुस्तूरपुष्पविल्वपत्रप्रियत्वाद्यत्वमेधारित्वध्यानस्थायित्वकारणं यथा,—

"पारिजातादिकं पुष्पं सुगन्धिचन्दनादिकम् ।
मयि संन्यस्य तेष्वेव प्रीतिर्नास्ति कदाचन ॥
धुस्तूरे तत् सदा प्रीतिर्विल्वपत्रानुलेपने ।
गन्धहीने प्रसूने च योगैश्वर्य्ये आत्मकर्म्मणि ॥
दिव्यलोके दिव्यरूपे जनानां न मनः ।
ध्यानेऽनीवरहसि ध्यायते मामहर्निशम् ॥"

तस्य महिमादि यथा,—

"आब्रह्मस्तम्बपर्य्यन्तं स्वप्रवक्तव्यते शिवः ।
ममानिर्व्वचनीयेऽत्र रूपे तत्त्वमयमानसम् ॥
ब्रह्मणः पतनेनापि मूलपाणेः क्षणो भवेत् ।
तस्यायुषः प्रमाणञ्च नाहं जानामि का श्रुतिः ॥
ज्ञानं स्तम्भुत्रयं मूलं धत्ते मत्तेजसा समम् ।
विना मया न कश्चित्तं शङ्करं जेतुमीश्वरः ॥
शङ्करः परमात्मा मे प्राणेभ्योऽपि परः शिवः ।
त्रयाणां मध्यतः शम्भुः प्रियो मे भवात् परः ॥
न संवसामि गोलोके वैकुण्ठे तव वक्षसि ।
महाशिवस्य हृदये निवसः प्रेमपाशतः ॥
कर्त्तुं शक्तो हि नष्टञ्च भ्रूभङ्गलीलया हि यः ।
ब्रह्माण्डनिकरं योगात्र योगी शङ्करात् परः ॥
दिव्यज्ञानेन यः कर्त्तुं नष्टुं भ्रूभङ्गलीलया ।
मृत्युकालादिकं शक्तो न ज्ञानी शङ्करात् परः ॥
मम भक्तिञ्च दास्यञ्च मुक्तिञ्च सर्व्वसम्पदम् ।
सर्व्वेभ्यश्च दातुमीशो न दाता शङ्करात् परः ॥
पञ्चवक्त्रेण मद्गाम यशो गायत्यहर्निशम् ।
मद्रूपं ध्यायते शश्वत् भक्तः शङ्करात् परः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३६ अध्यायः ॥

शिवनैवेद्यभक्षणदोषकारणादिकं यथा,—

राधिकोवाच ।

"सर्व्वभूतस्य च विभोः सर्व्वेशस्य महात्मनः ।
न भुक्तं कथमुच्छिष्टं ब्रूहि सन्देहभञ्जन ! ॥"

श्रीकृष्ण उवाच ।

शृणु देवि ! प्रवक्ष्येऽहमितिहासं पुरातनम् ।
पापिध्वंसनकं दक्षे ज्वलदग्निशिखोपमम् ॥
सनत्कुमारो वैकुण्ठलोकात् कदा च जगाम ह ।
ददर्श भुक्तवन्तञ्च नाथं नारायणं द्विजः ॥
तुष्टाव मन्त्रैः स्तोत्रैश्च प्रणम्य भक्तितो मुदा ।
अवशेषं ददौ तस्मै सन्तुष्टो भक्तवत्सलः ॥
प्राप्तमात्रेण तत्रैव भुक्तं तेनापि किन्तु ।
किञ्चिदत्र वस्तूनां भक्षणाय च दुर्ल्लभम् ॥
विद्याप्राप्तेः च तद्दत्तं गुरवे मूलपाणिने ।
भक्तानुकम्पाच्च तत् सर्व्वं भुक्तञ्च प्राप्तिमात्रतः ॥
भुक्त्वा सुदुर्ल्लभं वस्तु ननर्त्त प्रेमविह्वलः ।
पपात ज्वलदङ्गात् प्रस्खलच्च आत्मकर्म्मणे च ॥
स्वयं निपत्य पश्चाच्च ददर्शात्मानमेव च ।
एतस्मिन्नन्तरे देवी दुर्गा दुर्गतिनाशिनी ॥
सुदा जगाम शीघ्रं तत्प्रसन्नवदनेक्षणा ।
रुदन्तं मूर्च्छितं दृष्ट्वा निपतन्तञ्च भक्तितः ।
प्रहस्य वाणी पप्रच्छ कुमारं मूलपाणिनः ॥
सर्व्वं तां कथयामास कुमारः संपुटाञ्जलिः ।
श्रुत्वा चुकोप सा देवी शिवं प्रस्फुरिताधरा ॥
श्रुत्वा मनोहरं स्तोत्रं न जघ्राप शिवं शिवा ।
दुष्टं चक्रे तदुच्छिष्टमभक्ष्यं विदुषामपि ॥
सुचिरञ्च तपस्तप्तं मया लब्धस्त्वमीश्वरः ।
त्वया विष्णोः प्रसादेन वञ्चितोऽहं कथं विभो ! ॥
यतो न दत्तं नैवेद्यं विष्णोर्मह्यं त्वयाधुना ।
अतो मत्तो गृहाणेतत् फलमेव महेश्वर ! ॥
अद्य प्रभृति ये लोका नैवेद्यं भुञ्जते तव ।
ते भक्ष्यैकं सारमेया भविष्यन्त्येव भारते ॥
इत्युक्त्वा पार्व्वती माताद्रोद पुरतो विभोः ।
दृष्टिः पपात तत्पृष्ठे नीलवस्त्रो बभूव सः ॥
अपूर्व्वं तव नैवेद्यं जगज्जन्तुजराहरम् ।
छलं दुष्टं यतस्तस्मात् पश्च देहं त्यजामि च ॥
लिङ्गोपरि च यद्दत्तं तदेवाग्राह्यमीश्वर ! ।
सुपवित्रं भवेत्तत्र विष्णोर्नैवेद्यमित्यतम् ॥
इत्येवं कथितं सर्व्वं त्वया दृष्टं सुरेश्वरि ! ।
अभिशप्तं शङ्करस्य निर्म्माल्यं येन हेतुना ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६० अध्यायः ॥

तस्यावतारा यथा,—

सूत उवाच ।

"वेदव्यासावताराणि द्वापरे कथितानि तु ।
महादेवावताराणि कलौ शृणुत सुव्रताः ॥
आदौ कलियुगे चैते देवदेवो महाद्युतिः ।
लोका हिताय विप्राणामभूद्देवस्तपोधने ॥
हिमवच्छिखरे रम्ये क्षेत्रे पर्व्वतोत्तमे ।
तस्य शिष्याः शिखायुक्ता बभूवुरमितप्रभाः ॥
श्वेतः श्वेतशिखश्चैव श्वेताश्वः श्वेतलोहितः ।
जटाधरस्ते महात्मानो ब्राह्मणा वेदपारगाः ॥
सुभावो दमनश्चाथ सुहोत्रः कङ्कणस्तथा ।
लोकाक्षिश्च योगीन्द्रो जैगीषव्यस्तु षष्ठमे ॥
अष्टमे दधिवाहुः स्यान्नवमे ऋषभः प्रभुः ।
भृगुस्तु दशमे प्रोक्तऋक्षादुग्रपरः स्मृतः ॥
द्वादशोऽत्रिः समाख्यातो वाली चाथ त्रयोदशे ।
चतुर्दशे गौतमस्तु वेदशीर्षा ततः परम् ॥
गोकर्णश्चाभवत्तस्माद्गुहावासः शिखण्डधृत् ।
जटामाली च हासश्च दारुको लाङ्गली क्रमात् ॥
श्वेतस्तथा परः सूली निकुञ्जः सुकुटी च वै क्रमात् ।
सहिष्णुः सोमशर्म्मा च कुलीशो वायुनाभ्यः ॥
वैवस्वतेऽन्तरे शम्भोरवतारास्त्रिसप्तजाः ।
अष्टाविंशतिविख्याता ह्यस्मे कलियुगे प्रभोः ।
तीर्थकार्य्यावतारः स्याद्देवेशो नकुलीश्वरः ॥"

इति कूर्म्मे ५० अध्यायः ॥*॥

तस्याष्टोत्तरशतनामानि क्षेत्राणि च यथा,—
मनुरुवाच ।
"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम् ।
केन केन च स्थानेन ब्रह्मोऽपि मया प्रभो ! ॥
ईश्वर उवाच ।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिषे देवदेवेशं गयायां प्रपितामहम् ॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे त्र्यम्बिभूषणम् ।
पुष्करे तु अपोनम्बिं विल्वे विमलेश्वरे ॥
अरुणाशे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम् ॥
ग्रहुकर्णे महातेजं गोकर्णे च महाबलम् ।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः ॥
उमं कनखले चैव भद्रकर्णह्रदे शिवम् ।
देवदारुवने दिव्यं चण्डीशं मध्यमञ्जसे ॥
जलेशे जलदे तु चकलाक्षे कपर्दिनम् ।
क्षत्तिवासवनेकाम्रे स्थाणुं तारातिकेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मलयेश्वरे ।
धाम विल्वेश्वरं योगी गायत्रीचोत्तरेश्वरे ॥
विजयं नाम कान्तारे जयन्तं मकरेश्वरे ।
चरित्रन्ते चरित्रेशं पुरित्रन्ते तु शङ्करम् ॥
जटावासेश्वरे विद्यां सौम्यं कुलटकेश्वरे ।
भूतेश्वरे भद्रगात्रं जलशिल्पे जलेश्वरम् ॥
भिन्नुकं कर्णिकायान्तु वाराहं विन्ध्यपर्वते ।
लाङ्गं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम् ॥
हमेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम् ।
जलशिल्पे विदुः कालिं कापालिं करवीरके ॥
दीप्तचक्रेश्वरे देवं नेपाले पशुपतिं पतिम् ।
श्रीकारारोहणे कूटं हैविकायासुमापतिम् ॥
मङ्गलायां सागरे त्वमरोद्धारममरकण्टके ।
सप्तगोदावरे भीमं स्वयम्भुं नकुलेश्वरे ॥
कर्णिकारे गजाध्यक्षं कैलासे च गजाधिपम् ।
हेमकूटे विरूपाक्षं भृगुं वस्त्यादने ।
विल्वेश्वरन्तु आकाशे पाताले चक्रकेश्वरम् ॥
अष्टशतञ्च नामानि देवदेवस्य धीमतः ।
पुराणे चोपगीतानि ब्राह्मणस्य स्वयम्भुवा ॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा
अशुचिः ।
मुच्यते सर्वपापेभ्यः शिवलोकं स गच्छति ॥"
इत्याद्ये देवीपुराणे अष्टशतनामानि महादेवस्य ॥*॥ तस्य द्वादशनामस्तोत्रम् ।
"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः ।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो हरभञ्जनः ॥
पञ्चमः क्षत्तिवासाश्च षष्ठः कामाङ्गनाशनः ।
सप्तमो देवदेवेशः श्रीकण्ठश्चाष्टमः स्मृतः ॥
ईश्वरो नवमो ज्ञेयो दशमः पार्वतीपतिः ।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
सप्तजन्मकृतं पापं तत्क्षणादेव मुच्यते ॥
बालत्वे चैव यत्पापं यत्पापं तरुणे कृतम् ।
वार्द्धके यत्कृतं पापं सर्वपापैः प्रमुच्यते ।
मुच्यते सर्वपापेभ्यः शिवलोकं स गच्छति ॥"
इति स्कन्दपुराणम् ॥*॥

तन्नामोच्चारणफलं यथा,—
"कोटयो ब्रह्महत्यानामभक्ष्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥
महादेव महादेव महादेवेति वादिनम् ।
वसुधं गौरिव गौरीशो धावन्तमनुधावति ॥"
इति पुराणम् ॥*॥
तस्य प्रणाममन्त्रः ।
"नमस्ते त्वं महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराद्रिपम् ॥"
इति श्रीभागवतम् ॥
"महादेवं महात्मानं महायोगिनमीश्वरम् ।
महापापहरं देवं मकाराय नमो नमः ॥"
इति तन्त्रम् ॥*॥
तस्य कालरूपवर्णनं यथा,—
नारद उवाच ।
"कालरूपी त्वया ख्यातः शम्भुर्गगनगोचरे ।
तल्लक्षणञ्च स्वरूपञ्च सर्वं व्याख्यातुमर्हसि ॥
पुलस्त्य उवाच ।
स्वरूपं त्रिपुरघ्नस्य वक्ष्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिका प्रथमांघ्रिकम् ॥
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम् ।
आग्नेयोऽक्षय्यो ब्रह्मन् ! प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं हरनामेदं वदनं परिकीर्तितम् ।
मृगार्द्धमार्द्रादित्यांघ्रिक्षयः सौम्यग्रहस्त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य मूर्तिनः ।
आदित्यांघ्रिश्च पुष्यश्च अश्लेषा घ्रियुगो ग्रहम् ॥
राशिः कर्कटको नाम पार्श्वेन खविलासिनः ।
पित्र्यर्क्षं भगदैवत्यं उत्तरांघ्रिश्च केशरी ॥
सूर्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्तितम् ।
उत्तरांघ्रिक्षयः पाणिश्चित्रार्द्धं कन्यका त्विदम् ॥
सोमपुत्रस्य सदृशेनं द्वितीयं जठरं विभोः ।
चित्रांघ्रिहस्तयं स्वाती विशाखायांघ्रिकत्रयम् ॥
द्वितीयं शुक्रसदनं तुलाराशिरुदाहृतम् ।
विशाखायांघ्रिमनुराधा ज्येष्ठा भौमग्रहं त्विदम् ॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ।
मूलं पूर्वोत्तरांघ्रिश्च देवाचार्यग्रहं धनुः ॥
ऊरुयुगलमीशस्य अमर्षे ! प्रगीयते ।
उत्तरांघ्राक्षयो रात्रं अवमं मकरो मुने ! ॥
धनिष्ठार्द्धं घ्रनिक्षेत्रं जानुनो परिकीर्तिते ।
धनिष्ठार्द्धं शतभिषा प्रोष्ठपद्यांघ्रिकत्रयम् ॥
सौरं सङ्ग्रापरमिदं कुम्भो जङ्घे च विश्रुते ।
प्रोष्ठपद्यांघ्रिमेकन्तु उत्तरा रेवती तथा ॥
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥
एवं ज्ञात्वा कालरूपं त्रिनेत्रो
यत्नं क्रोधाच्चार्गलैराजघान ।
विद्युच्चासौ वेदनाबुद्धियुक्तः
खे सन्नद्धौ तारकाभिश्चिताङ्गः ॥"
इति वामनपुराणे ५ अध्यायः ॥
महादेवी, स्त्री, (महादेवस्य पत्नीति । पत्न्यर्थे ङीष् ।) दुर्गा । यथा,
"अपर्णा स्याच्चण्डिकादेवी गिरिजा मेनकात्मजा ।"
इति हलायुधः ॥

तस्या व्युत्पत्तिर्यथा,—
"पूज्यते या सुरैः सर्वैर्महांश्चैव प्रभावतः ।
धातुर्मयेति पूजायां महादेवी ततः स्मृता ॥"
इति देवीपुराणे ३५ अध्यायः ॥
राज्ञी । पाटरानी इति भाषा । तत्पर्य्यायः ।
महिषी २ महार्हा ३ महादेवी ४ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ५ । २८ ।
"अलिखत् स च महादेवीं योगनन्दच्च तं पटे ।
सजीवमिव तच्चित्रं वाक्चेष्टारहितं बभूव ॥")
महादेव्यः, पुं, (महांश्चासौ देवश्चेति ।) औषधविशेषः । यथा,—
"चतुर्द्वारस्य भौमस्य ब्रह्म पुत्राक्षनोमम ।"
इत्युपक्रम्य ।
"भृङ्गिरिक्षो महादेव्यौ रिपुर्हन्ता हरिः स्वयम् ॥"
इति गारुडे ७८ अध्यायः ॥
महाद्रावकः, पुं, (द्रावयति रोगानिति । द्रु + णिच् + ण्वुल् । महांश्चासौ द्रावकश्चेति ।) औषधविशेषः । द्रावक इति भाषा । यथा,—
"यवक्षारस्य भागौ द्वौ स्फटिकारेक्षयो मताः ।
एकीकृत्य प्रयिष्यापि मूर्वैरण्डसरोभवैः ॥
शुष्कं कृत्वा क्षिपेत् पात्रे सेवके वज्रजेपिते ।
अन्यसौवर्चकपात्रमु द्विसुखं मेलयेद्बुधः ॥
दृढवेधोपदेशेन पचेत् पात्रस्थमौषधम् ।
ततो ज्वालाधतः स्थाप्यं पात्राभ्यं लभते रसम् ॥
ततो रसं विनिष्कृष्य स्थापयेत् क्षिप्तभाजने ।
लवङ्गेन वटीं कुर्यादथवा क्षततालके ॥
प्लीहादिशूलरोगेषु दापयेत् रक्षिकां भिषक् ।
द्रवीकरोति रोगञ्च महाद्रावकसंज्ञकः ॥
श्लिपे च दद्रुरोगे च प्लेपं द्रावकस्य च ।
वह्निवज्वलनं तस्य दधि दत्त्वा प्रक्षेपयेत् ॥"*॥
अपि च ।
"वृषचित्रमपामार्गं चित्रा कृष्णाकनाटिका ।
खुरी तालस्य पुष्पञ्च वर्षाभूर्चेतसं तथा ॥
एतेषां चारमाकृष्य लिम्बाकस्वरसेन च ।
भावयित्वा चारतोयं वज्रपूतञ्च कारयेत् ॥
पक्वातपेन संशोष्य चार्द्धं तद्द्रवयोचितम् ।
एतस्य द्विपलं चार्द्धं यवक्षारपलद्वयम् ॥
स्फटिकारिपलञ्चैव नरसारपलं तथा ।
पलार्द्धं सैन्धवं चार्द्धं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकञ्चैव सुराग्रञ्च तोलकम् ।
दारुमोचं कर्षकञ्च तोलं सप्तदशैनकम् ॥
सर्वमेकत्र संचूर्ण्य वज्रकल्केन साधयेत् ।
महाद्रावकमेतद्धि शोष्यञ्च रसजारणे ।
श्लिप्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च ॥" * ॥
इति भैषज्यरत्नावली ॥
(तथापरञ्च ।
"मृद्वं काञ्चनमाक्षिकं मृदुतरं कांस्याभिधेयं तथा
सिन्धूत्थं विमलं रसाञ्जनवरं पेलं सवन्तीपतेः ।

चारौ सर्ज्जिकखञ्जवौ सुविमलौ भागाख्य-
मीषां समाः
समानां षड्गुणं टङ्कणमिह लवणं दुसारः
क्षुतः ॥
तत्तुल्या स्फटिकारिका विषड्गुः गुडो यव-
क्षाग्रजः
काश्मीग्रद्वितयं यवाग्रजसमं सर्व्वं चूर्णं सर्व्वं
चतेत् ।
पाके काचमये मृदम्बरवृते सोऽयं महाभास्करो
नो वक्तुं प्रभवेदसुष्य निखरां सम्यग्गुणं भूतले ॥
एतल्लक्षचतुष्टयं पिबेदयो मुक्त्वा लवङ्गेन वा
तत्पश्चात् परिवासितं बहुगुणं ताम्बूलकं
भक्षयेत् ।
प्रासङ्गात् कथयामि ते ग्रहस्य गुणान् कांचि-
त्तथान्यान् परान्
निःशेषं विनिहन्ति तानि चिरजान्यहौदराणि
ध्रुवम् ॥
गुल्मं पाण्डुकलीमकं सुकठिनामष्ठीलिकां
कामलां
मन्दाग्निं विषमाग्नितां बहुविधान् ग्रोथांश्च
मूलान्यपि ॥"*॥

इति वैद्यकक्रियासंग्रहे ग्रीहाधिकारे ॥)

महादमः, पुं, (महांश्चासौ दमश्चेति ।) अश्वत्थ-वृक्षः । इति शब्दचन्द्रिका ॥ ङहदृक्षश्च ॥ (यथा, हरिवंशे । २२६ । ७२ ।

"चकोराः शुकपत्राश्च मत्तकोकिलसारसाः ।
पुष्पितान् फलितांश्चैव संपतन्ति महाद्रमान् ॥"

प्राक्कद्रीपपतेर्भवस्य सुतमः पुत्रः । यथा, मार्कण्डेये । ५३ । २१ ।

"अजश्च कुमारश्च सुकुमारो मनोबकः ।
कृशोत्तरोऽथ मेधावी सप्तमस्तु महाद्रमः ॥")

महादोणा, स्त्री, (महती चासौ द्रोणा चेति ।) वृक्षविशेषः । बड़ी द्रोणपुष्पी इति हिन्दी भाषा । तत्पर्य्यायः । देवकुसुमा २ दिव्यपुष्पा ३ महाद्रोणी ४ देवी ५ काञ्ची ६ देवद्रोणा ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मेधात्वम् । भूतार्शोवातकफामिमान्द्यनाशित्वम् । पुंसां पारदशोधनत्वञ्च । इति राजनिर्घण्टः ॥

महाद्रोणी, स्त्री, (महती चासौ द्रोणी चेति ।) महाद्रोणाक्षुपः । इति राजनिर्घण्टः ॥

महाद्वन्द्वः, पुं, (महान् द्वन्द्वः कोलाहलो यत्र ।) युद्धवाद्यम् । इति शब्दरत्नावली ॥ अतिशय-कलहश्च ॥

महाधनं, क्ली, (महत् अनेकं धनं मूल्यत्वेनास्य ।) बहुमूल्यवस्त्रम् । इत्यमरः । २ । ६ । ११३ ॥ सुवर्णम् । सिन्दूरम् । इति मेदिनी । ने, २०१ । चारुवस्त्रम् । इति हेमचन्द्रः ॥ क्षत्रियः । इति शब्दरत्नावली ॥ (महद्भिरनेकं धनमस्मात् । संग्रामः । इति निघण्टुः । २ । १७ ॥ यथा, ऋग्वेदे । ८ । ६४ । १२ ।

"मा नो अस्मिन्महाधने परावर्गभारभृद्
यथा ॥"

"महाधने संग्रामे ।" इति तट्टीकायां सायणः ॥ महच्च तद्धनञ्चेति । प्रभूतधनम् । यथा, ऋग्वेदे । १ । ७ । ५ ।

"इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ॥"

"महाधने प्रभूतधननिमित्तम् ।" इति तट्टीकायां सायणः ॥ बहुमूल्ये, त्रि । यथा, किरातार्জ্জुनीये । १ । ३८ ।

"पुराधिरूढं गुरुणा महाधनं
विबोधसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य संस्थलीं
जहासि निद्रामसुरैः शिवाशतैः ॥")

अतिशयधनयुक्ते, त्रि ॥

महाधातुः, पुं, (महांश्चासौ धातुश्चेति ।) स्वर्णम् । इति शब्दचन्द्रिका ॥

महाध्वनिकः, पुं, (अध्वनि गच्छतीति । अध्वन् + ठक् । महांश्चासौ आध्वनिकश्चेति ।) पुण्यार्थं हिमालयादिकमहापथगमनेन सम्पादितमरणः । यथा, "अश्वमेधजलसंग्रामदेशान्तरस्थसंन्यासानशनाग्न्यग्निमहाध्वनिकानाशुदकक्रिया कार्य्या सद्यःशौचं भवतीति ।" इति शुद्धितत्त्वधृतशुद्धिकौमुदीवचनम् ॥

महान्, [न्] त्रि, (मह्यते पूज्यते यैति । मह + "वर्षमाने पृषद्बृहन्महज्जगच्छतवच ।" उणा० २ । ८४ । इति अनि: । निपात्यते ।) बृहन् । इत्यमरः । ३ । १ । ६० ॥ (यथा, मनौ । ८ । ७६ । "ग्राणभृत्सु महत्स्वङ्गे गोगजोष्ट्रहयादिषु ॥") अस्य पर्य्यायः महच्छब्दे दृश्यः ॥

महान्, पुं, (मह्यते सेव्यते आश्रीयते गमनायेति । मह + अनि: ।) उडुः । इति राजनिर्घण्टः ॥ दुर्गा । यथा,—

"महान् याप्य स्त्रिया सर्व्वं मङ्गा वा प्रकृतिर्मता ।
क्षुतिः संसारजाहेवी नियती च नियामता ॥"

इति देवीपुराणे ४५ अध्यायः ॥

महत्तत्त्वम् । यथा —

"अविकारात् प्रधानात् महत्तत्त्वं प्रजायते ।
महानिति यतः ख्यातिर्लोकानां जायते सदा ॥"

इति मात्स्ये ३ अध्यायः ॥

(महादेवः । यथा, महाभारते । १३ । १७ । १२ ।

"अग्रणी ग्रामणी क्षत्रगी पद्मिणी चायुधी
महान् ॥")

महच्छब्दप्रयोगनिषेधो यथा,—

"ग्रहे नेत्रे तथा मांसे वैद्ये ज्यौतिषिके द्विजे ।
राज्ञ्यां पथि क्रियायां महच्छब्दो न दीयते ॥"

इति भट्टिप्रयोगसंग्रहे चतुर्थश्लोकटीकायां भरतः ॥

महानटः, पुं, (महांश्चासौ नटो वर्णसङ्घेति । उड्डनवर्णसङ्घत्वादस्य तथात्वम् ।) शिवः । इति त्रिकाण्डशेषः ॥

महानदी, स्त्री, (महती चासौ नदी चेति ।) पुरुषोत्तमक्षेत्रान्तर्गतकटकस्योत्तरदेशस्थनदी-विशेषः । तस्या नामान्तरं चित्रोत्पला । यथा, "नदी तत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्व्वपापहरा शुभा ॥
चित्रोत्पला महानदी ।" इति पुरुषोत्तमतत्त्वम् । गङ्गा । यथा,—

"अम्बुजमम्बुनि जातं
जातु न जायते अम्बुजादम्बु ।
सुरवर ! तव विपरीतं
पादाम्बुजाज्जातजाह्नवी जाता ॥"

इत्युद्भटः ॥

महानन्दः, पुं, (महाश्चासौ नन्दश्च ।) मुक्तिः । इति हलायुधः ॥ (महान् आनन्दः ।) अतिशयाह्लादश्च ॥ (नृपतिविशेषः । यथा, मार्कण्डेये । १३४ । ४० ।

"इत्युक्त्वा तान् महीपालान् महानन्दसुखान्
बली ।
अथाजयोत्तदा सर्व्वान् महारिदमनो दमः ॥"

वेश्यविशेषः । यथा, सङ्गीतदामोदरे ।

"महानन्दश्चथा नन्दो विजयोऽथ जयश्चथा ।
चत्वार उत्तरवंश्या मातङ्गसुविलासताः ॥")

महानन्दा, स्त्री, (महाश्चासौ नन्दाश्चेति ।) सुरा । इति राजनिर्घण्टः ॥ माघशुक्ला नवमी । यथा, भविष्ये ।

"माघमासस्य या शुक्ला नवमी लोकपूजिता ।
महानन्देति सा प्रोक्ता सदानन्दकरी शुभा ॥
स्नानं दानं जपो होमो देवार्चनमुपोषणम् ।
सर्व्वं तदक्षयं प्रोक्तं यदस्यां क्रियते नरैः ॥"

इति तिथ्यादितत्त्वम् ॥

नदीविशेषः । सा पद्मायां विनिःसृता रामपुराख्यग्रामात् पश्चिमत उत्तरदिग्गामिनी ॥ (दक्षिणदेशीयो नदीभेदः । यथा, महाभारते । १३ । २५ । ४३ ।

"पुनरावर्त्तनन्दाश्च ह्रदानन्दाश्च सैन्धवे ।
नन्दने सेवते दाल्भ्यश्चरोभिरहिंसकः ॥")

महानन्दिः, पुं, (आ समन्तात् नन्दतीति । आ + नन्द + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततः । महानासौ नन्दिश्चेति ।) नन्दिवर्द्धनराजपुत्रः । यथा,—

"चत्वारिंशत्तथा भाव्यो राजा वै नन्दिवर्द्धनः ।
चत्वारिंशत्तथैव महानन्दिर्भविष्यति ॥
महानन्दिसुतश्चापि शूद्रायां कलिकांशजः ।
उत्पत्स्यते महापद्मः सर्व्वक्षत्रान्तको नृपः ॥
ततः प्रभृति राजानो भविष्या; शूद्रयोनयः ।
एकराट् स महापद्म एकच्छत्रो भविष्यति ॥"

इति मत्स्यपुराणे २७६ अध्यायः ॥

अपि च ।

"महानन्दिसुतः शूद्रागर्भोद्भवोऽतिलुब्धो महापद्मानन्दः परशुराम इवापरोऽखिलक्षत्रियान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्ति । तेन महानन्दिपर्य्यन्तं क्षत्रिय आसीत् ।" इति शुद्धितत्त्वधृतविष्णुपुराणम् ॥

महानरकः, पुं, (महांश्चासौ नरकश्चेति । अतिशयमहानिष्टकारणत्वात्तथात्वम् ।) अतिशयमहानिष्टकारणजातनाविशेषो नरकः ।) इति पुराणम् ॥ (यथा, मनुः । ४ । ८८ ।

"तामिस्रमन्धतामिस्रं महारौरवरौरवौ।
नरकं कालसूत्रञ्च महानरकमेव च॥")

महानसः, पुं, (महांश्चासौ नसश्चेति।) देवनसः। इति राजनिर्घण्टः॥ (महांश्चासौ अनसश्चेति।) दुष्टवृषभश्च॥

महानवमी, स्त्री, (महती चासौ नवमी चेति।) आश्विनशुक्लनवमी। यथा,—

श्रीभगवानुवाच।

"दुर्गातन्त्रेण मन्त्रेण कुर्यादुर्गामहोत्सवम्।
महानवम्यां प्रहरे बलिदानं पृथक्पृथक्॥
आश्विने शुक्लपक्षस्य भवेदुषा अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥
ततोऽनु नवमी या स्यात् सा महानवमी स्मृता।
सा तिथिः सर्वलोकानां पूजनीया प्रियाप्रिया॥"

इति कालिकापुराणे ५७ अध्यायः॥

अपि च।

"प्रावृट्काले विशेषेण आश्विने शुक्लपक्षके च।
महापुण्यो नवम्यान्तु लोके ख्यातिं गमिष्यति॥"

इति तिथ्यादितत्त्वम्॥

महानसं, क्ली, (महच्च तत् अनश्चेति। +"अनोऽश्मायःसरसां जातिसंज्ञयोः।" ५। ४। ८४। इति संज्ञायां टच्। "आज्जहतसमानाधिकरणजातीययोः।" ६। ३। ४६। इति महत आकारादेशः।) रन्धनगृहम्। तत्पर्य्यायः। रसवती २ पाकस्थानम् ३। इत्यमरः। २। ९। २७॥ (तथास्य लक्षणं यथा,—

"प्रागुत्तरदिग्देशगतं शुचिभाजं महच्छुचि।
गवाक्षजालमार्गाय सूर्य्यभित्त्युपशोभितम्॥
विकचनवदलसंस्थं सवितानं स्तम्भार्चनम्।
परीक्षितस्त्रीपुरुषं भवेच्चापि महानसम्॥
तत्राधस्तं नियुञ्जीत प्रायो वैद्यगुणान्वितम्।
सुतयो दक्षिणा दत्ता विनीताः प्रियदर्शनाः॥
नवभक्ताः सुमनसो नीचकैर्गुणसक्ताः स्थिराः।
आता दृढं संयमिनः शुचयोऽधीवाः सुसंयुताः॥
तस्य चाज्ञा विधेयाः स्युर्विविधाः परिकर्मिणः।
आहारस्थितयश्चापि भवन्ति प्राणिनो यतः॥
तस्मात्तद्भागसे वैद्यः प्रमादरहितो भवेत्।
माहानसिकवीचारः सौपौदनिकपौषिकाः॥
भवेयुर्वैद्यवर्गा ये चाप्यन्ये तु केचन॥")

इति सुश्रुते कल्पस्थाने प्रथमेऽध्याये।)

तद्विवरणं यथा,—

"आग्नेयां दिशि कर्त्तव्यमाधारस्य महानसम्।
गवाक्षजालमार्गाय सूर्य्यभित्त्युपशोभितम्॥
चुल्ली तत्र प्रकर्त्तव्या पूर्व्वपश्चिमायता।
स्रुक्स्रुवादीनि भाण्डानि स्थापितानि च वारिणा॥
तैलं घृतं पचेत्तत्र गुडवत् सर्व्वसञ्चितम्।
तदभावे पचेत्तैले चक्षुरग्नेर्विकारजित्॥
कांस्यजे पात्रितं यद्धि तद्धितं मतिदं शुचि।
यत्र ताम्रमये चित्तं न स्थं तत्पित्तजित्॥
लौहजे राजते पात्रे माक्षिकाद्रिभूमिजाः यदि।
तत्पात्रं सर्व्वदोषघ्नं श्रियमोजस्करायणम्॥"

अथ महानसोपयोग्युपकरणानि।

"वस्तूनि भोजनार्हाणि विविधानि पुनः पुनः।
सर्व्वाणि गुणयुक्तानि स्थापितानि महानसे॥
दास्याग्रमार्ज्जनी वाढ़ा पूतहड्डी सकुर्चिका।
कर्षश्च वैणवं पात्रं जलपूर्णञ्जलिङ्करः॥
वह्निसंजननो भावः कुद्दालं सकटारकः।
दारुखण्डानि शुष्काणि चूल्लमात्राणि चैव-मम्॥
अजीर्णान्नमतिस्थूलान्यजल्पन्यमलानि च।
तिलयुक्तालनी पीठो मुसलं चाप्युदूखलम्॥
स्रुपलोदूखिला दर्व्वी चतुरस्रावघट्टिका।
संदंशकस्तु युगलं वल्लखण्डचतुष्टयम्॥
नालिका क्षुरिका चैव सुमूलं सुकटाङ्कुशम्।
वह्निसञ्चालनार्थाय दर्व्वी दीर्घा सुलोहजा॥
तन्दूरभर्भरी स्रावा सप्तकं दृढवेष्टनी।
इत्यादि वस्तुजातं हि युज्यते च महानसे॥"

इति पाकराजेश्वरः॥

तत्र रन्धनीया जना यथा,—

"सदयाश्चविधानज्ञाः परामेज्याः कुलोद्गताः।
सर्व्वे महानसे धार्य्या सुप्रकेशनखा जनाः॥"

इति मात्स्ये १८६ अध्यायः॥

महानसोऽपि पुंसि। इत्यमरटीकायां रमानाथः॥

महानाटकं, क्ली. (महच्च तत् नाटकञ्चेति।) नाटकविशेषः। तस्य लक्षणं यथा,—

"एतदेव यदा सर्व्वैः पताकास्थानकैर्युतम्।
अङ्कैश्च दशभिर्धीरा महानाटकमूचिरे॥
एतदेव नाटकम्। यथा, बालरामायणम्।"

इति साहित्यदर्पणः॥ स्वनामख्यातहनूमन्नथितरामचरितग्रन्थविशेषः। यथा,—

"अथ श्रीलङ्कनूमता विरचिते श्रीमन्महानाटके वीरश्रीयुतरामचन्द्रचरिते प्रत्युद्भूते विक्रमैः।
मिश्रश्रीमधुसूदनेन कविना सम्पूर्य्य सञ्शोधिते स्वर्गारोहणनामकोऽत्र नवमो यातोऽङ्क एवेत्यसौ॥"

इति तस्यान्तिमः श्लोकः॥

महानाड़ी, स्त्री, (महती चासौ नाड़ी चेति।) कङ्करा। इति राजनिर्घण्टः॥ (विवरणमस्याः कङ्करशब्दे द्रष्टव्यम्॥)

महानादः, पुं, (महान् नादोऽस्य।) हस्ती। वर्षुकमेघः। (महाञ्चासौ नादश्चेति।) महाशब्दः। इति मेदिनी। दे, ५१॥ (यथा, महाभारते। ५। ६६। २।

"इदमग्निः स्वयं प्राप्तो ये केचिद्धुवजन्तवः।
प्रविशन्तो महानादं नदन्ति भयपीडिताः॥")

सिंहः। कर्णः। इति हेमचन्द्रः॥ उलूकः। शुक्रः। इति राजनिर्घण्टः॥ काहलवाद्यम्। इति शब्दरत्नावली॥ (महादेवः। यथा, महाभारते। १३। १७। ४८।

"निशाचरः प्रेतचारी भूतचारी महीश्वरः।
कालयोगी महानादः सर्व्वकामश्चतुष्पथः॥"

महानादयुक्ते, त्रि। यथा, रामायणे। ४। ४०। ६८।

"तृणाजनेव प्रतिमं महोरसनिषेवितम्।
अभिमन्य महानादं तीर्थेनैव महोदधिम्॥")

महानिद्रा, स्त्री, (महती चासौ निद्रा चेति।) मरणम्। इति अटाधरः॥

महानिम्बः, पुं, (महांश्चासौ निम्बश्चेति।) निम्बवृक्षविशेषः। बड़ा निम इति भाषा। तत्पर्य्यायः। कैटर्य्यः २ पनगेष्टः ३ प्रान्तरः ४। इति रत्नमाला॥ (यथा,—

"स्वल्पक्षीराम्लमाक्षश्च सर्व्वं तुल्यं प्रकल्पयेत्।
महानिम्बस्य चूर्णन्तु चतुर्भिः सममाहरेत्।
मधुना लेहयेन्नित्यं लालामेहप्रणाशये॥"

इति वैद्यकरत्नसारसंग्रहे प्रमेहाधिकारे॥)

अस्य गुणाः। परमग्राहित्वम्। कषायत्वम्। अम्लत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ (तथास्य पर्य्यायान्तरं गुणाश्च।

"महानिम्बः क्षुतोद्रेकी रक्तको विषसर्षिका।
केशान्तर्दिनिम्बकश्च कार्म्मुको जीव इत्यपि॥
महानिम्बो द्विमो रूक्षश्लेष्मो याही कषायकः।
कफपित्तश्रमच्छर्दिकृमिकुष्ठज्वररक्तजित्।
प्रमेहवातगुल्मार्शो व्रणविषविनाशनः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महानिशा, स्त्री, (महती चोरा निशा। निशामध्यभागः। तत्पर्य्यायः। निशार्द्धः २ निशीथः ३। इति हेमचन्द्रः। २। ५६॥ *। स्वल्पलक्षमहानिशा सार्द्धप्रहरोपरि प्रहरद्वयम्

"महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम्।
तत्र स्नानं न कुर्व्वीत कान्यत्रैमित्तिकादृते॥"

इति रघुनन्दनभट्टाचार्य्यधृतवचनात्। महानिशापरकालस्य नाड़ीचतुष्टयस्य परदिनादित्वेन तदानीं पूर्व्वदिनसौयभोजनानुपपत्तेः। तद्दिनत्रयलोपापत्तेश्चेति तिथितत्त्वीयलिखनस्वरसाच्च॥ *। तत्र भक्षणनिषेधो यथा,—

"यत्प्रदुष्टे व्रतीते तु रात्रावेव महानिशा।
लभते ब्रह्महत्यां च तत्र शुद्धा च नारद!॥
गोमांसविण्मूत्रसमं ताम्बूलञ्च फलं जलम्।
पुंसामभक्ष्यं शुद्धायामोदनस्यापि का कथा॥"

इति ब्रह्मवैवर्त्तपुराणम्॥

तत्र पारणनिषेधो यथा,—

"न रात्रौ पारणं कुर्य्याद्व्रते वै रौहिणीयुतात्।
निशायां पारणं कुर्य्याद्धुत्वैवं विधिवत्ततः
महानिशायां प्राप्तायां तिथिभानं यदा भवेत्।
तृतीयेऽह्नि मुनिश्रेष्ठ! पारणं कुरुते व्रती॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्यायः

ऐन्द्रलोक्या महानिशा रात्रिमध्यमदण्डद्वयात्मिका। सा तिथ्यष्टप्रहरीयदण्डद्वयीयप्रहर

प्रथमदलरूपा । तस्यां शिवलिङ्गोद्भवो यथा,
"मालतस्याश्चतुर्ग्रामादिदेवो महानिधिः ।
शिवलिङ्गतयोद्भूतः कोटिसूर्यसमप्रभः ॥"
अथ ।
"महानिधा हे वटिके राजन्मेधप्रभामयोः ।"
इति देवलोक्ता महानिधा ॥
वटिका दलरूपा । इति तिथ्यादितत्त्वम् ॥
तान्त्रिकमहानिधा यथा, तन्त्रसारे ।
"गते तु प्रथमे यामे द्वितीयप्रहरावधि ।
महानिधायां जपेत्तं रात्रिशेषे जपेन्न तु ॥"
अपि च ।
"निधा तु परमेशानि ! सूर्य्ये चास्तमुपागते ।
प्रहरे च गते रात्रौ वटिके द्वे परे च ये ।
महानिधा समाख्याता ततश्चातिमहानिधा ॥
अर्द्धरात्रे गते देवि ! पशुभावेन पूजयेत् ।
दलदले तु या पूजा तत् सर्व्वमक्षयं भवेत् ॥
वसुकोष्ठे महेशानि ! तत् सर्व्वमक्षतोपमम् ।
वसुमकोष्ठके देवि ! सर्व्वं चौरोपमं भवेत् ॥
अष्टमकोष्ठके देवि ! द्रव्यतुल्यं न संशयः ।
अतःपरं महेशानि ! विषतुल्यो न संशयः ॥
एतत् सर्व्वं महेशानि ! पशुभावे मयोदितम् ।
दिव्यवीरगते देवि ! तत्तज्ज्ञानेन पूजयेत् ॥
पञ्चतत्त्वं समानीय यदि पूजापरो भवेत् ।
कालाकालं महेशानि ! विचारं तत्र वर्ज्जयेत् ॥
अर्द्धरात्रगते देवि ! कुलपूजा प्रकीर्त्तिता ।
भवेत्तत्रानुरूपेण सर्व्वं पूजादिकञ्चरेत् ॥
अतिरहस्येन देवेशि ! तव स्नाने प्रकाशितम् ।
पशोरग्रे कदाचिद्वै प्रकाशं नैव कारयेत् ॥"
इति गुप्तसाधनतन्त्रे ६ पटलः ॥

महानीचः, पुं, (महान्तश्चासौ नीचश्च ।) रजकः । इति शब्दमाला । अतिशूद्रजातीनवर्णश्च ॥

महानीलः, पुं, (महान् नीलः नीलवर्णः ।) भृङ्गराजः । नागविशेषः । मल्लिविशेषः । इति मेदिनी । ले, १६१ ॥ (यथा, शिशुपालवधे । २ । १६ ।
"महामहानीलशिलाश्च पूरो
निषेदिवान् कंसवधः स विष्टरं ॥"
"सिंहलस्याकराद्भूता महानीलास्तु ते स्मृताः ॥
इति भगवानगस्त्यः ॥" इति तट्टीकायां मल्लिनाथः ॥) तस्य लक्षणं यथा,—
"यस्तु वर्णस्य भूयस्त्वात् चौरे घृतगुडे स्थितः ।
नीलतां तनुयात् सर्व्वं महानीलः स उच्यते ॥"
इति गारुडे ७२ अध्यायः ॥
(गुग्गुलुजातिभेदः । तदुक्तं यथा,—
"महिषाक्षो महानीलः कुसुदः पद्म इत्यपि ।
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥
महानीलस्तु विज्ञेयः खनामसमलक्षणः ।
महिषाक्षो महानीलो गजेन्द्राणां हिताबुभौ ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
सुमेरोर्दक्षिणपार्श्वस्थपर्व्वतविशेषः । यथा, मार्कण्डेये । ५५ । ७ ।

"द्रोणार्भकश्च कृतवर्म्मा कृपीसुतश्च सुकल्पवान् ।
सञ्जयोजोऽथ वसुवान् महानीलो भवाचलः ॥")
महानीला, स्त्री, (महती चासौ नीला नीलवर्णा चेति ।) महाजम्बूः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य महाजम्बूशब्दे विलोक्यः ॥)
महानीली, स्त्री, (नील + "नीलाद्दोषधौ ।" ४ । १ । ४२ । इति वार्त्तिकोक्त्या ङीष् । ततः । महती चासौ नीली चेति ।) नीलापराजिता । इन्द्रनीली । तत्पर्य्यायः । अमरा २ अजिनीलिका ३ तुत्था ४ श्रीपत्रिका ५ नेला ६ केशार्हा ७ भर्तृसम्पत्रिका ८ । अस्या गुणाः । गुल्मारुच्यत्वम् । रक्तपैत्तहत्वम् । सुवर्णदालुत्वम् । नीलिकामर्पेक्ष्य सर्व्वकर्म्मसु सगुणत्वम् । इति राजनिर्घण्टः ॥
महानुभावः, त्रि, (महानुभावो माहात्म्यमस्य ।) महाशयः । यथा,—
"सुव्रती पुण्यवान् धन्यो धर्म्मी च धर्म्मवानपि ।
महाशयो महेच्छः स्याच्छानुभाव इत्यपि ॥"
इति शब्दरत्नावली ॥
(महात्मा । यथा, शिशुपालवधे । १ । १७ ।
"महीतुमार्य्यान् परिचर्य्यया सुहु-
र्महानुभावा हि नितान्तमर्थिनः ॥")
महान्तः, पुं, (महत् + प्रथमाबहुवचनरूपम् ।) नवधाभक्तियुक्तलक्षणभक्ताः । ते शिवशैवधर्म्माश्रयः । यथा,—
"शिवः शैवश्च धर्म्मश्च ब्रह्मा विष्णुर्महान् विराट् ।
सनत्कुमारः कपिलः सनकश्च सनन्दनः ॥
वोढुः पञ्चशिखो दक्षो नारदश्च सनातनः ।
भृग्वङ्गिरोभिर्दुर्वासाः कश्यपः पुलहोऽङ्गिराः ॥
मेधसो लोमशः शुक्रो वशिष्ठः क्रतुरेव च ।
दक्षस्यन्दिः कर्दमश्च ऋभुरत्रिः पराशरः ॥
मार्कण्डेयो बलिश्चैव प्रह्लादश्च गणेश्वरः ।
यमः सूर्य्यश्च वरुणो वायुश्चन्द्रो हुताशनः ॥
अङ्गारः उलूकश्च नाड़ीजङ्घश्च वायुजः ।
नरो नारायणः कूर्म्मो दत्तात्रेयो विभीषणः ॥
नवधाभक्तियुक्ताश्च लक्षणस्य परमात्मनः ।
एते महान्तो धर्म्मिष्ठा भक्तानां प्रवरास्तथा ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥
महापञ्चमूलं, क्ली, (पञ्चानां बिल्वादिमूलानां समाहारः । ततः महच्च तत् पञ्चमूलञ्चेति ।) दशमूलं पञ्चमूलम् । तद्यथा,—
"बिल्वोऽग्निमन्थः श्योनाकः काश्मर्य्यः पाटला तथा ।
सर्व्वेषु मिलितेष्वेतेः स्यान्महापञ्चमूलकम् ॥"
इति राजनिर्घण्टः ॥
(यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये ।
"बिल्वमग्निमथं वायोश्च खदेयेच्च सदुर्मुहुः ।
शीर्षं महापञ्चमूलं स्त्रियां चाम्लवच्चितम् ॥")
महापञ्चविधं, क्ली, (पञ्चानां विधानां समाहारः । ततो महच्च तत् पञ्चविधञ्चेति ।) दशविधपञ्चकम् । तद्यथा,—

"द्राक्षा च खार्জ্জूरञ्च सुकला बल्लजाभया ।
गुडकञ्चेति योगोऽयं महापञ्चविधाभिधः ॥"
इति राजनिर्घण्टः ॥
महापञ्चा, स्त्री, (महान्ति पञ्चाङ्गान्यस्याः ।) महाजम्बूः । इति रत्नमाला ॥ इन्द्रवर्ज्जयुक्ते, त्रि ॥
महापथः, पुं, (महांश्चासौ पन्थाश्चेति । "आज्ञदृत इति ।" ६ । ३ । ४६ । इति महत आकारादेशः । "अक् पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति समासान्तोऽकारः ।) प्रधानपथः । तत्पर्य्यायः । वरुष्टापथः २ संसरणम् ३ श्रीपथः ४ राजवर्त्म ५ उपनिष्क्रमणम् ६ उपनिष्करम् ७ । इति हेमचन्द्रः । ३ । ५३ ॥ (यथा, रामायणे । २ । ८० । १६ ।
"पताका योभिनाः सर्व्वे सुनिर्म्मितमहापथाः ॥"
यथा च महाभारते । ५ । ६४ । २० ।
"संक्षरसंसिक्तरजः प्रतिपेदे महापथम् ॥"
स्वपथः । "याचायां पथि निद्रायां महच्छब्दो न दीयते ।" इत्यस्य प्रतिप्रस्थतार्थवत्त्वात् तथात्वम् । यथा, कथासरित्सागरे । २ । ४३ ।
"तच्छोकादिन्ददत्तस्य पिता यातो महा-
पथम् ॥"
सुश्रुता । यथा, दृढयोगप्रदीपिकायाम् । ३ । ४ ।
"सुषुम्णा शून्यपदवी ब्रह्मरन्ध्रं महापथः ।
सामाख्या योगिनी मध्यमार्गश्चेत्येकवाचकाः ॥")
महापथगमः, पुं, (महापथस्य महापथे वा गमः गमनम् ।) मरणम् । इति जटाधरः ॥
महापद्मः, पुं, (महत् पद्मं तात्स्थ्यं निधौ यस्य ।) अष्टमाम्नायगतनवनागभेदः । तत्पर्य्यायः । अतिशुक्लः २ दग्धविद्रुमसन्निभः ३ । इति हेमचन्द्रः । ४ । ३०५ ॥ (यथा, हरिवंशे । ३ । २१२ ।
"ऐरावतो महापद्मः कम्बलाश्वतरावुभौ ॥"
दर्व्वीकरान्तर्गतसर्पविशेषः । तद् यथा । "ब्रह्मसर्पो महाब्रह्मः ब्रह्मोदरः श्वेतकपोतो महाकोपोनो बलाहको महासर्पः यक्षपालो लोहितास्यो गवेधुकः परिसर्पः सुखप्रसः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुष्करीको भुजङ्गीसखो विष्किरः पुष्पाभिकर्णो गिरिसर्पः कुसुमः श्वेतोदरो महाशिरा अलगर्दः आशीविष इति ।" इति सुश्रुते कल्पस्थाने चतुर्थोऽध्याये ॥) कुबेरस्य नवनिधान्तर्गतनिधिविशेषः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ६४ । १५ ।
"यस्या वत्से ! प्रभावेण विद्यावान्तं ग्रहाश्च मे ।
पद्मिनी नाम विद्येयं महापद्माभिपूजिता ॥"
पुरभेदः । यथा, महाभारते । १२ । ३५३ । १ ।
"आसीत् किल नरश्रेष्ठ ! महापद्मे पुरोत्तमे ।
गङ्गाया दक्षिणे तीरे कश्चिद्विप्रः समाहितः ॥"
देवभेदः । यथा, हरिवंशे । २३२ । ३ ।
"महापद्मो विष्णुश्च पूर्णेन्दुश्च वीर्य्यवान् ॥"
वृक्षभेदः । यथा, महाभारते । ६ । ६१ । ५१ ।

"तस्य चाप्येऽपि विद्वांसो वसुदेवदृशान्विताः।
अज्ञानो बालवच्चैव महापद्मश्च सुप्रभः॥")
स्त्री, अयुतकोटिसंख्या॥ इति जीमूतवती॥ (यथा, महाभारते। २। ६९। १।
"अयुतं प्रयुतं चैव पद्मं चार्बुदमर्बुदम्।
शङ्खश्चैव महापद्मं निखर्वं कोटिरेव च॥")
शुक्लपद्मम्। इति रत्नमाला॥

महापातकं, क्ली, (महदतिशयितं पातकम्।) पापविशेषः। तच्च पञ्चविधम्। यथा,—
"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥"
इति मानवे ११ अध्यायः॥
"महापातकजं चिह्नं तत्प्रजाभ्यो व्यपैति।
बाधते व्याधिरूपेण तस्य ज्ञात्वादिभिः समः॥"
इति प्रायश्चित्तपीयूषकर्मविपाकः॥
"तुलामारमेधेषु प्रातःस्नानं विधीयते।
हविष्यं ब्रह्मचर्यञ्च महापातकनाशनम्॥"
इति मलमासतत्त्वम्॥
"ज्ञानेति मङ्गलं वाम यस्य वाचि प्रवर्त्तते।
भस्मीभवन्ति राजेन्द्र! महापातककोटयः॥"
इति पुराणम्॥

महापातकी, [न्] त्रि, (महापातकमस्त्यस्येति। महापातक+इनिः।) पञ्चप्रकारमहापातकयुक्तः। स च पतितः। यथा,—
"महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः।
पतितानां न दाहः स्यान्नाग्न्यौर्ध्वदैहिकक्रियाः॥
न चाम्बुपातः पिण्डो वा कार्य्यः श्राद्धादिकं क्वचित्।
एतानि पतितानान्तु यः करोति विमोहितः॥
तत्तस्यैवोपरिष्टाच्च तस्य शुद्धिर्न चान्यथा॥"
इति शुद्धितत्त्वधृतविष्णुपुराणवचनम्॥
पारिभाषिकमहापातकी यथा,—
"ज्ञानप्राणप्रतिष्ठाञ्च नीत्वैवं प्रतिमां द्विज!।
दुर्गां न प्रणमेद्यस्तु स महापातकी स्मृतः॥"
इति देवीपुराणे नारदसंवादः॥
अपि च।
"पितरं मातरं भार्य्यां गुरुपत्नीं गुरुं परम्।
यो न पुष्णाति कोपात्तात् स महापातकी स्मृतः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४४ अध्यायः॥
(यथा च महानिर्व्वाणतन्त्रे। १।६२।
"आत्मनिन्दो न कर्त्तव्यः प्रलापे परमात्मनः।
योऽशुद्धबुद्धिं कुरुते स महापातकी भवेत्॥")

महापापं, क्ली, (महच्च तत् पापञ्चेति।) महापातकम्। यथा,—
"महापापेषु सर्व्वं स्यात् तदर्द्धन्तूपपातके।
ज्ञात्वा पापेषु पापज्ञं ज्ञात्वा व्याधिबलाबलम्॥"
इति मलमासतत्त्वम्॥

महापारेवतं, क्ली, (महच्च तत् पारेवतञ्चेति।) फलवृक्षविशेषः। बड़ा पारेवत इति हिन्दी भाषा॥ तत्पर्य्यायः। खर्जूरपारेवतम् २ खात्राभिधम् ३ खारिकम् ४ रक्तपारेवतकम् ५ दृढतृपारेवतम् ६ द्वीपजम् ७ द्वीपखर्जूरम् ८। अस्य गुणाः। मधुरत्वम्। बलकारित्वम्। पुष्टिवर्द्धनत्वम्। दृष्यत्वम्। मूर्च्छाभ्रमनाशत्वम्। पारेवतादधिकगुणत्वञ्च। इति राजनिर्घण्टः॥

महापाशुः, पुं, (पाशुरिव। पाशु+ऽच्।) यमदूतविशेषः। इति हरिवंशे भविष्यपर्व्वणि ५६ अध्यायः॥ (महांश्चासौ पाशुश्चेति।) हरितपाशुश्च॥

महापापकः, पुं, (पचति पापयति निराकरोति परकालेश्वरादिकमिति। पच्+ण्वुल्। ततः महांश्चासौ पापकश्चेति।) वृहन्निम्बवृक्षः। तत्पर्य्यायः। पेलुकः २ आमलीरः ३ प्रव्रजितः ४ गोमीनः ५। इति त्रिकाण्डशेषः॥ (महोपापक इति पाठः कुत्रचित् दृश्यते॥)

महापिङ्गलकः, पुं, (पिङ्गौ तनोतीति। तनु+डः संज्ञार्थे कन्। ततः महांश्चासौ पिङ्गलकश्चेति। पिङ्गाकारपल्लवत्वादस्य तथात्वम्।) लक्षवर्षमहामदनवृक्षः। तत्पर्य्यायः। वारादः २। अस्य गुणाः। मेध्यत्वम्। कटुतिक्तरसान्वितत्वम्। छर्द्दनत्वम्। कफकृद्रोगपक्वामाशयशोधनत्वञ्च। इति राजनिर्घण्टः॥

महापिङ्गलतरुः, पुं, (महांश्चासौ पिङ्गलतरुश्चेति।) वृक्षविशेषः। पेड़िरा इति हिन्दी भाषा। तत्पर्य्यायः। श्वेतपिङ्गलकः ५ करहाटः ६ क्षुरः ४ शुक्लकोषतरुः ५ घरः ६ पिङ्गलतरुः ७। अस्य गुणाः। कषायत्वम्। उष्णत्वम्। त्रिदोषघ्नत्वम्। चर्म्मरोगापहत्वम्। विशेषात् रक्तदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

महापीलुः, पुं, (पीलति प्रतिष्ठते विषपित्तादिकमिति। पील+"सृगयादयश्च।" उणा० १।१८। इति कुः। ततो महान् पीलुरिति कर्म्मधारयः।) पीलुवृक्षविशेषः। तत्पर्य्यायः। वृहत्पीलुः २ महाफलः ३ राजपीलुः ४ महावृक्षः ५ मधुपीलुः ६। अस्य फलगुणाः। मधुरत्वम्। दृष्यत्वम्। विषनाशित्वम्। पित्तप्रशमनत्वम्। रुच्यत्वम्। आमघ्नत्वम्। दीपनीयकत्वञ्च। इति राजनिर्घण्टः॥

महापुराणं, क्ली, (महच्च तत् पुराणञ्चेति।) एकादशलक्षणयुक्तषोडशग्रन्थोक्तादशसंख्यकपुराणविशेषः। तस्य लक्षणं यथा,—
"सृष्टिश्चापि विसृष्टिश्च स्थितिस्तेषाञ्च पालनम्।
कर्म्मणां वासना वार्त्ता मन्वन्तराणि च क्रमेण च॥
वर्णनं प्रलयानाञ्च मोक्षस्य च निरूपणम्।
उत्कीर्त्तनं हरेरेव देवानाञ्च पृथक् पृथक्।
एतैरधिकं लक्षणञ्च महतां परिकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः॥
(अष्टादशमहापुराणानां विशेषविवरणलक्षणादिकं पुराणशब्दे द्रष्टव्यम्॥)

महापुरुषः, पुं, (महांश्चासौ पुरुषश्चेति।) श्रेष्ठनरः। (यथा, श्रीमद्भागवते। ६। १९।२०।
"भवानताभ्यां भुवि ये च पथ्यां जनमोहिनीम्।
वह्निश्चायासुतं भार्य्यं महापुरुषतां गतः॥")
नारायणः। यथा,—
"श्रियं वरां परिभवन्नमश्रीदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष! ते चरणारविन्दम्॥
लक्ष्मा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम्।
मायामृगं दयितयेप्सितमन्वधाव-
द्वन्दे महापुरुष! ते चरणारविन्दम्॥"
इत्यादिकृतस्तवस्तवीभागवतम्॥

महापुरुषदन्ता, स्त्री, (महापुरुषस्य दन्ता इव दन्ता यस्याः।) अतसलता। इति रत्नमाला॥ (विवरणमस्याः। अतसलीशब्दे ज्ञातव्यम्॥)

महापुरुषदन्तिका, स्त्री, (महापुरुषदन्ता+स्वार्थे कन्। स्त्रियां टाप् अत इत्वञ्च।) महाशतावरी। इति राजनिर्घण्टः॥

महापुष्पा, स्त्री, (महत् प्रशस्तं पुष्पमस्याः। स्त्रियां टाप्।) अपराजिता। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते उत्तरतन्त्रे ५४ अध्याये।
"दर्भपुष्पा महापुष्पा प्रसूनाक्षिपिटाह्वयाः॥"
महापुष्पविशिष्टे, त्रि॥)

महाप्रकृतिः, स्त्री, (महती श्रेष्ठा प्रकृतिर्जनकत्वात्मूलकारणत्वम्।) दुर्गा। यथा,—
"चितिस्त्वे तत्त्वभावाद्वा चेतना वा चितिः स्मृता।
महान् व्याप्य स्थिता सर्व्वं महा वा प्रकृतिः स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥

महाप्रभः, त्रि, महती प्रभा यस्येति। अतिशयदीप्तियुक्तः। (यथा, हरिवंशे भविष्यपर्व्वणि। २६। १२।
"ततश्चक्रं महाघोरं सहस्रारं महाप्रभम्॥")

महाप्रभा, स्त्री, (महती चासौ प्रभा चेति।) महती दीप्तिः। यथा। महाप्रभालावच्छिन्नाभावोऽन्धकारः। इति सामान्यलक्षणायां जगदीशः॥

महाप्रभुः, पुं, (महांश्चासौ प्रभुश्चेति।) परमेश्वरः। यथा,—
"वन्देऽनन्ताद्भुतैश्वर्य्यं श्रीचैतन्यं महाप्रभुम्।
नीचोऽपि यत्प्रसादात् स्यात् सदाचारप्रवर्त्तकः॥"
इति हरिभक्तिविलासे १ विलासः॥
"अनन्तमद्भुतज्ञानवैराग्यैश्वर्य्यं प्रभावो यस्य तं यतो महाप्रभुं परमेश्वरम्।" इति तट्टीकायां जीवगोस्वामी॥ श्रीचैतन्यः। यथा,—
"सोऽयं नीलगिरीश्वरः सविभवो याता च सा द्युद्धिचा

ते ते दिग्विदिगागताः सुप्तातिगम्भीरा
दिङ्मात्रार्णवः ।
आरामश्च त एव नन्दनवनश्रीर्वा तिरस्कारिणः
सर्व्वाण्येव महाप्रसुप्तवत विना भूम्यादि मन्या-
महे ॥"

इति चैतन्यचन्द्रोदयनाटकम् ॥

महाप्रलयः, पुं, (महांश्चासौ प्रलयो जगना-
मवसानश्चेति ।) विलोकनाशः । तत्पर्य्यायः ।
संहारः २ । इति हलायुधः ॥ तस्य विवरणं
यथा,—

श्रीमार्कण्डेय उवाच ।

"मन्वन्तरं मनोः कालो यावत् पालयते प्रजाः ।
एको मनुः स कालस्तु मन्वन्तरमिति स्मृतम् ।
तदेकसप्ततियुगैर्देवानामिह जायते ।
सैकचतुर्दशभिः कल्पो दिनमेकन्तु वेधसः ॥
दिनान्ते वेधसो याते सुप्तस्तस्य जायते ।
योगनिद्रा महामाया समायाति पितामहम् ॥
नाभिपद्मं प्रविश्याथ विष्णोरमिततेजसः ।
सुखं स शेते भगवान् ब्रह्मा लोकपितामहः ॥
ततो विष्णुः स्वयं भूत्वा रुद्ररूपी जनार्द्दनः ।
पूर्ब्ववन्नाशयामास स सर्व्वं भुवनत्रयम् ॥
वायुना वह्निना सर्व्वं दाहयामास वै यथा ।
महाप्रलयकालेषु तथा सर्व्वं जगत्त्रयम् ॥
जनं यान्ति प्रतापार्त्ता महर्लोकनिवासिनः ।
त्रैलोक्यं दाहयामास पौड़िता दाहशक्तिना ॥
ततः कालाम्बुदैर्म्मेघैर्नानावर्णैर्महास्वनैः ।
सप्तत्वाद्य महावृष्टिमापूर्य्य भुवनत्रयम् ॥
चलत्तरङ्गैर्लोलौघैरार्द्रयामास सङ्गतैः ।
निधाय जठरे लोकानिमांस्त्रीन् स जनार्द्दनः ॥
नागपर्य्यङ्कशयने शेते स परमेश्वरः ।
शयानं नाभिकमले ब्रह्माणं स जगत्प्रभुः ॥
संस्थाप्य शीतिमाल्लोकान् दग्ध्वा दग्ध्वा श्रिया
सह ।
शेते स भोगिशय्यायां ब्रह्मा नारायणात्मकः ॥
योगनिद्रावशं यातस्त्रैलोक्यग्रासतृप्तिदः ॥
त्रैलोक्यमखिलं दग्धं यदा कालाग्निना तदा ।
अनलः पृथिवीं त्यक्त्वा विष्णोरन्तिकमागतः ॥
तेन त्यक्ता तु पृथिवी जलमात्रादधो गता ।
पतिता कूर्म्मपृष्ठे तु विष्णोर्व्वै तदाभवत् ॥
कूर्म्मोऽपि महतो यत्नाच्चलन्तीं पृथिवीं जले ।
ब्रह्माण्डपञ्जरारूढ एष्टे दध्रे धरां तदा ॥
ब्रह्माण्डखण्डसंयोगाच्चर्ण्यिता पृथिवी भवेत् ।
इति सां परिजग्राह कूर्म्मरूपी जनार्द्दनः ॥
चलच्चलौघसंसर्गाच्चलन्त्या धरया तदा ।
कूर्म्मपृष्ठं बहुतरैरब्जैर्विततीकृतम् ॥
अनन्तरूपं गत्वा तु यत्र क्षीरोदसागरः ।
तत्र स्थं श्रिया युक्तं सुप्तरूपं जनार्द्दनम् ॥
जलया मध्यया दृष्ट्वा त्रैलोक्यग्रासतृप्तिनम् ।
पूर्ब्बं वर्णं वितत्योर्द्ध्वं पद्मं ज्ञात्वा महाबलः ।
विष्णुमाच्छादयामास योगाख्यः परमेश्वरः ॥
तस्योपधानमकरोदम्भो दक्षिणां धराम् ।
उत्तरां पादयोश्चक्रे उपाधानं महाबलः ॥

तालवृन्तं तदा चक्रे स शेषः पश्चिमां धराम् ।
स्वयन्तु बीजयामास शीतरूपी जनार्द्दनम् ॥
शङ्खं चक्रं गदाखड्गमिषुधी च महाबलः ।
ऐशानयाथ पूजया स दधे गरुडं तदा ॥
गदां पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधम् ।
यानि चान्यानि तस्यासन्नाग्नेय्या पूजया दधौ ॥
एवं ज्ञात्वा स्वकं कार्य्यं शयनीयं तदा हरेः ।
पृथ्वीमधरकायेन मयामाक्रम्य चाम्भसि ॥
त्रैलोक्यग्रासहरिणं सत्त्वश्रीकं जनार्द्दनम् ।
सोपासङ्गजगद्बीजं जगत्कारणकारणम् ॥
नित्यानन्दं वेदमयं ब्रह्मण्यं परमेश्वरम् ।
जगत्कारणकर्त्तारं जगत्कारणकारणम् ॥
भूतभव्यभवन्नाथं परापरपतिं हरिम् ।
दधार शिरसानम्रः स्वयमेव स्वकां तनुम् ॥
एवं ब्रह्मदिनस्यैव प्रमाणेन निशां हरिः ।
सन्ध्याञ्च समधिप्राप्य शेते नारायणोऽव्ययः ॥
यस्यादयन्तु प्रलयो ब्रह्मणः स्याद्दिने दिने ।
तस्याहैनन्दिनमिति ख्यापयन्ति पुराविदः ॥
अतीतायां निशायान्तु ब्रह्मा लोकपितामहः ।
ब्राह्मा विद्यां समुत्तस्थौ स पुनः सृष्टये विभुः ॥"

इति कालिकापुराणे २७ अध्यायः ॥

न्यायमते अन्यभावानधिकरणकालः । स च
चरमध्वंसरूपः ॥

महाप्रसादः, पुं, (महांश्चासौ प्रसादश्चेति ।)
विष्णुनैवेद्यादिः । यथा,—

"पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः ।
महाप्रसाद इत्युक्ता यात्रां विष्णोः प्रयत्नतः ॥"

इत्येकादशीतत्त्वधृतमत्स्यसूक्तवचनम् ॥

श्रीजगन्नाथस्य महाप्रसादमाहात्म्यं जगन्नाथ-
शब्दे द्रष्टव्यम् ॥ अतिशयप्रसन्नता च । (महान्
प्रसादोऽस्य । मित्रः । यथा, महाभारते १३ ।
१७ । १३६ ।

"महाप्रसादो दमनः प्रभुत्वा सेनजिद्बलः ।")

महाप्रस्थानगमनं, क्ली, (प्रस्थीयते अस्मिन्निति ।
प्र + स्था + ल्युट् । महत् प्रस्थानं महापथः ।
तत्र गमनम् ।) महापथगमनम् । तच्च मरणो-
द्देशेन हिमालयपर्य्यन्तपथागमम् । तच्च कलौ
निषिद्धम् । यथा, हरिवंशे ।

"सप्तदश्यामाभीराः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥
देवरेण सुतोत्पत्तिर्म्मधुपर्के पशोर्व्वधः ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ।
दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च ।
दीर्घकालं ब्रह्मचर्य्यं गोमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधञ्च तथा मखम् ।
इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्म्मनी-
षिणः ॥"

इत्युद्वाहतत्त्वम् ॥

महाप्राणः, पुं, (महान्तो दीर्घकालस्थायिनः
प्राणा यस्य सः ।) शोभाञ्जनः । इति राज-
निर्घण्टः ॥ वर्णविशेषः । स च । ख घ ङ झ ढ
ढ थ ध फ भ ष स ह क्ष एषः । यथा,—

"वर्गाणां प्रथमद्वितीयपञ्चमाः प्रथमद्वितीयचतुर्थौ
य र ल वाच्चाल्पप्राणाः । अन्ये महाप्राणा
इत्यर्थः ।" इति विद्वान्मनोरमा ॥ (महाबले,
त्रि । यथा, श्रीमद्भागवते । ६ । ११ । ६ ।

"एवं सुरगणान् क्रुद्धो भीषयन् वपुषा रिपून् ।
जनदत् सुमहाप्राणो येन लोका विचेतसः ॥")

महाफलः, पुं. (महत् पूजादौ प्रशस्तं पूज्यं वा
फलमस्य ।) बिल्ववृक्षः । इति रत्नमाला ॥
(महच्च तत् फलञ्चेति ।) डहुमूषी, स्त्री ॥ (यथा,
मनौ । ६ । १२८ ।

"श्रोत्रियायैव देयानि हव्यकव्यानि दापिभिः ।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥")

महाफला, स्त्री, (महत् फलं आरोग्यादिकं
यस्याः ।) द्राक्षावल्ली । इति जटाधरः ॥
(अस्याः पर्य्यायो भावप्रकाशस्य पूर्ब्बखण्डे
प्रथमे भागे ।

"ऐन्द्रीद्राक्षावल्ली चिरा गवाक्षी च गवादनी ।
वाटली च पराप्युक्ता सा विशाला महाफला ॥
स्वेतपुष्पा जलाक्षी च जर्जरोत्कण्टकादनी ॥"

राजजम्बूः । तत्पर्य्यायो यथा, तत्रैव ।

"फलेन्द्राकथितानन्दो राजजम्बूर्महाफला ॥"

कट्फलवृक्षः । तत्पर्य्यायो यथा, तत्रैव ।

"इक्ष्वाकुः कटुफलो स्यात् स तुम्बी च महा-
फला ।"

महाकोशातकी । तत्पर्य्यायो यथा, तत्रैव ।

"महाकोशातकी प्रोक्ता दक्षिणेषा महा-
फला ।
धामार्गवो घोषकश्च दक्षिणश्चैव स स्मृतः ।")

महाभेषजा, स्त्री, (महतो भेषजा ।) हिङ्गोः ।
इति शब्दचन्द्रिका ॥

महाबलं, क्ली, (महदनिर्गुथितं बलं सामर्थ्यमस्मात् ।
महत् बलमस्येति वा ।) सीसकम् । इति
हेमचन्द्रः ॥ (तथास्य पर्य्यायः ।

"नागं महाबलं चीनं पिच्चं योगेष्टसीसकम् ॥"

इति वैद्यकरत्नमालायाम् ॥)

महाबलः, पुं, (महदुत्कृष्टं बलं ऐश्वर्य्यं यस्य ।)
शुक्रः । इति त्रिकाण्डशेषः ॥ (पिप्पलीविशेषः ।
यथा, मार्कण्डेये । ८६ । ४६ ।

"महान् महात्मा महितो महिमावान् महा-
बलः ।
गजाः पञ्च सधेनवे पिप्पलीं पायनाशुना ॥")

वायुः । बलीयसि, त्रि । इति हेमचन्द्रः । ३ ।
१०१ ॥ (यथा, रामायणे । १ । १ । ३४ ।

"नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः ।
स जगाम वनं वीरो रामभाद्यप्रजापतिः ॥")

महाबला, स्त्री, (महच्च तत् बलञ्चेति ।) बला-
विशेषः । पीतवाट्यालकः । तत्पर्य्यायः । अत्यप्रोक्ता २
अतिबला ३ पीतपुष्पी ४ । इति रत्नमाला ॥
(अस्याः पर्य्यायो यथा,—

"वाट्या वाट्यालिका वाट्या सैव वाट्यालकापि च ।
महाबला पीतपुष्पा सहदेवी च सा स्मृता ॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

(तथाच्या शुक्ला: । "हरेश्चरितवत्सा च्छन्दं भवेदातानुलोमनी ।" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

महाबोधि:, पुं, (बुध्यते सर्वं जानातीति । बुध् + "सर्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ततो महांश्चासौ बोधिश्चेति ।) बुद्ध: । इति हैमचन्द्र: । २ । १४६ ॥

महाब्राह्मण:, पुं, (महान्तिश्च्यवनिन्दित: ब्राह्मण: । "वैद्ये ज्योतिषिके द्विजे ।" इति निषिद्धवचनस्वरवादेवास्य तथात्वम् ।) निन्दितब्राह्मण: । इति पाणिनिव्याकरणम् ॥

अस्मिन् देशे अयं अयदानित्वेन प्रसिद्ध: ॥ (यथा, स्कन्दपुराणे २ अङ्के । "विट: । महाब्राह्मण ! सर्वथा सर्वथा ॥")

महाभट:, पुं, (महांश्चासौ भटश्चेति ।) अतिशूरयोद्धा । यथा,—

"तदोजसा दैत्यमहाभटार्पितं
चक्राखदन्त: स्व उदीक्षदीश्वर: ।
चक्रेण चिच्छेद निशातनेमिना
हरिर्यथा तार्क्ष्यपतत्रसुच्छ्रितम् ॥"

इति श्रीभागवते ६ स्कन्धे १८ अध्याय: ॥

महाभद्रा, स्त्री, (महत् भद्रं मङ्गलं यस्या: ।) गङ्गा । इति शब्दमाला: कात्यायनी । इति राजनिर्घण्ट: ॥ (मेरोरुत्तरपार्श्वस्थमरोवरे, स्त्री । यथा, मार्कण्डेये । ५५ । ३ ।

"अश्वकोटं सर: पूर्वे मानसं दक्षिणे तथा ।
शीतोदं पश्चिमे मेरोर्महाभद्रं तथोत्तरे ॥")

महाभारतं, क्ली, (महत् भारतम् । यद्वा, महान्तं भारं तनोतीति । महाभार + तन् + क: ।) आख्यायीतेतिहासाख्याख्यम् । तन्नामकारणं यथा,—

"एकतश्चतुरो वेदा भारतञ्चैतदेकत: ।
पुरा किल सुरै: सर्वै: समस्य तुलया धृतम् ।
चतुर्भ्य: सरहस्येभ्यो वेदेभ्योऽधिकं यदा ।
तदाप्रभृति लोकेऽस्मिन् महाभारतमुच्यते ।
महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते ॥"

इति महाभारते आदिपर्व्व ॥*॥

लोकविशेषेषु तस्य लोकसंख्या वाचकाश्च यथा, "षष्टिं शतसहस्राणि चकारान्यां स संक्षिताम् ।
त्रिंशच्छतसहस्रञ्च देवलोके प्रतिष्ठितम् ।
पित्र्ये षोडश च प्रोक्तं रक्षोयक्षे चतुर्दश ।
एकं शतसहस्रन्तु मानुषेषु प्रतिष्ठितम् ।
नारदोऽश्रावयद्देवानसितो देवल: पितॄन् ।
गन्धर्वयक्षरक्षांसि आययामास वै शुक: ।
अस्मिंस्तु मानुषे लोके वैशम्पायन उक्तवान् ॥"

इति महाभारते १ पर्व्वणि अनुक्रमणिकाध्याय: ॥*॥ तस्य शतपर्व्वाणि तेष्वष्टादश सुख्यानि यथा,—

"आदिसभाविराटानि उद्योगभीष्मद्रोणकर्ण: ।
शल्यसौप्तिकपर्व्व तथा स्त्री-
शान्त्यनुशासनाश्वमेधा: ॥

आश्रमवासपुत्रसौतिकशाका:
पर्व्वणि पर्व्वणि गाम विद्वेषा: ॥
इति भारतटीका ॥*॥

हरिवंशसहितस्यास्य पर्व्वसंख्यानामक्रमेणशतशत-पर्व्वविभागेषामध्यायश्लोकसंख्या च यथा,—

१ आदिपर्व्वणि १६ पर्व्वाणि २२७ अध्याया: ८६८४ श्लोका: ॥ २ सभापर्व्वणि ६ पर्व्वाणि ७८ अध्याया: २५१२ श्लोका: ॥ ३ आरण्यकपर्व्वणि २६ पर्व्वाणि २६८ अध्याया: ११६६४ श्लोका: ॥ ४ विराटपर्व्वणि ४ पर्व्वाणि ६७ अध्याया: २०५० श्लोका: ॥ ५ उद्योगपर्व्वणि ११ पर्व्वाणि १८६ अध्याया: ६६२८ श्लोका: ॥ ६ भीष्मपर्व्वणि ५ पर्व्वाणि ११७ अध्याया: ५८८४ श्लोका: ॥ ७ द्रोणपर्व्वणि ८ पर्व्वाणि १७० अध्याया: ६६०६ श्लोका: ॥ ८ कर्णपर्व्वणि १ पर्व्व ६६ अध्याया: ४६६४ श्लोका: ॥ ६ शल्यपर्व्वणि ४ पर्व्वाणि ५६ अध्याया: ३२२० श्लोका: ॥ १० सौप्तिकपर्व्वणि ३ पर्व्वाणि १८ अध्याया: ८७० श्लोका: ॥ ११ स्त्रीपर्व्वणि ५ पर्व्वाणि २७ अध्याया: ७७५ श्लोका: ॥ १२ शान्तिपर्व्वणि ४ पर्व्वाणि ३३६ अध्याया: १४७३२ श्लोका: ॥ १३ अनुशासनपर्व्वणि १ पर्व्व १४६ अध्याया: ८००० श्लोका: ॥ १४ अश्वमेधपर्व्वणि २ पर्व्वाणी १०३ अध्याया: ३३२० श्लोका: ॥ १५ आश्रमवासपर्व्वणि ३ पर्व्वाणि ४६ अध्याया: १५०६ श्लोका: ॥ १६ मौषलपर्व्वणि १ पर्व्व ८ अध्याया: ३०० श्लोका: ॥ १७ महाप्रास्थानिकपर्व्वणि १ पर्व्व ३ अध्याया: ३२० श्लोका: ॥ १८ स्वर्गपर्व्वणि १ पर्व्व ५ अध्याया: २०० श्लोका: । १६ हरिवंशे आर्य्यपर्व्वणि १ पर्व्व २४४ अध्याया: १२००० श्लोका: ॥ हरिवंशे भविष्यपौष्करप्राडुर्भावे १ पर्व्व ११२ अध्याया: ३४४८ श्लोका: ॥ इति महाभारते आदिपर्व्वणि पर्व्वसंग्रहनामक: २ अध्याय: ॥*॥

तच्छ्रवणविधादि यथा,—

जनमेजय उवाच ।

"भगवन् ! केन विधिना श्रोतव्यं भारतं बुधै: ।
फलं किं के च देवाश्च पूज्या वै पारकेऽस्मिन् ॥
देयं समाप्ते भगवन् ! किञ्च पर्व्वणि पर्व्वणि ।
वाचक: श्रोतृयाच्च एतत्सर्व्वं ब्रवीहि मे "*॥

वैशम्पायन उवाच ।

शृणु राजन् ! विधिमिमं यथा यथापि भारतम् ।
श्रुताद्भवति राजेन्द्र ! यत्त्वं मामनुपृच्छसि ॥
दिवि देवा महीपाल ! क्रीड़ार्थमवनिं गता: ।
ज्ञात्वा कार्य्यमिदञ्चैव ततश्च दिवमागता: ॥
शृण्वन् यस्ते प्रवक्ष्यामि तच्छृणुष्व समाहित: ।
ऋषीणां देवतानाञ्च सम्भवं वसुधातले ॥
अत्र ब्रह्मादया साध्या विश्वेदेवाश्च आप्तता: ।
आदित्या अश्विनौ देवौ लोकपाला महर्षय: ॥
गुह्यकाश्च खगन्धर्व्वा नागा विद्याधराश्चया ।
श्रित्वा धर्म्मं स्वयम्भुञ्च सृष्टि: कालायनो वर: ॥

गिरय: सागरा यक्षराक्षसैश्चाश्रयं गता: ।
यद्वा: संवत्सरश्चैव अयनान्यृतवस्तथा ।
स्थावरं जङ्गमञ्चैव जगत् सर्व्वं सुरासुरम् ।
भारते भरतश्रेष्ठ ! सङ्क्षेपेण प्रकाशते ॥
तेषां श्रुत्वा प्रतिष्ठानं नामकर्म्मानुकीर्त्तनात् ।
लब्धापि पातकं घोरं सद्यो मुच्येत मानव: ॥*॥
इतिहासमिमं श्रुत्वा यथावदनुपूर्व्वश: ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारत ! ॥
तेषां आह्वानि देयानि श्रुत्वा भारत ! भारतम् ।
ब्राह्मणेभ्यो यथान्यायं भक्त्या च भरतर्षभ ! ॥
महादानानि देयानि रत्नानि विविधानि च ।
गाव: क्षौमोपदोहाश्च कन्याश्चैव स्वलङ्कृता: ॥
सर्व्वकामगुणोपेता यानानि विविधानि च ।
भवनानि विचित्राणि भूमिर्ग्रामाणि काञ्चनम् ।
वाहनानि च देयानि हया मत्ताश्च वारणा: ।
ग्रामणं शिबिकाश्चैव स्वलङ्काश्च स्वलङ्कृता: ॥
यद्यदृद्धे वरं किञ्चित् यद्यदिष्टं महद्धनम् ।
तत्तद्देयं द्विजातिभ्य आत्मा दारांश्च रक्षत: ॥
अक्षया ह्यस्य दत्तं क्रमशश्चस्य पारगं: ।
शृण्वन्त: सुमना नित्यं शुश्रूषुरविकत्थन: ॥*॥
सत्यार्ज्जवरतो दान्त: शुचि: शौचसमन्वित: ।
श्रद्दधानो जितक्रोधो यथा विधति तच्छृणु ॥
शुचि: शौचान्विताचार: शुक्लवासा जितेन्द्रिय:
संस्कृत: सर्व्वशास्त्रज्ञ: श्रद्दधानोऽनसूयक: ॥
रूपवान् शुभगो दान्त: सत्यवादी जितेन्द्रिय: ।
दानमानगृहीतश्च कार्य्यो भवति वाचक: ॥
अविजन्यमनायत्तमहतं धीरमूर्ज्जितम् ।
अक्षरक्षाक्षरपदं रसभावसमन्वितम् ।
विरतिवर्त्मसंयुक्तमदुष्टाशयसमन्वितम् ।
वाचयेद्वाचक: क्षत्र: खासीन: सुसमाहित: ॥
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीञ्चैव ततो जयमुदीरयेत् ॥
ईदृगाह्वाचकाद्राजन् ! श्रुत्वा भारत ! भारतम्
विजयस्य: शुचि: श्रोता प्राप्नुयात् स फलमनुते ॥
पारायं प्रथमं प्राप्य द्विजान् कामैश्च तर्पयन् ।
अग्निष्टोमस्य यागस्य फलं वै लभते नर: ॥
अक्षरोगणसङ्ख्यातं विमानं लभते महत् ।
प्रहृष्ट: स तु देवैश्च दिवं याति समाहित: ॥
द्वितीयं पारायं प्राप्य अतिरात्रफलं लभेत् ।
सर्व्वरत्नमयं दिव्यं विमानमधिरोहति ॥
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषित: ।
दिव्याङ्गदधरो नित्यं देवलोके महीयते ॥
तृतीयं पारायं प्राप्य द्वादशाहफलं लभेत् ।
वसव्यमरुद्राद्या वर्त्तयन्युतयो दिवि ॥
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।
उदितादित्यसङ्काशं व्यक्तस्तम्भशोभितम् ॥
विमानं विभुधै: सार्द्धमाक्रम्य दिवि गच्छति ।
वर्षायुतानि भवने शक्रस्य दिवि मोदते ॥
षष्ठे द्विगुणमश्नीह सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैडूर्य्यमयवेदिकम् ॥
परिक्षिप्तञ्च बहुधा मणिविद्रुमभूषितम् ।
विमानं समधिरुह्य कामगं वाक्षरोगणम् ॥

सर्वान् लोकान् विचरते द्वितीय इव भास्करः ।
अहमे राजसूयस्य पारणे लभते फलम् ॥
चन्द्रादित्यनिभं दिव्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥
सेव्यमानो वरस्त्रीभिः चन्द्रात् कान्ततरैर्मुखैः ।
मेखलानां निनादेन नूपुराणाञ्च निस्वनैः ॥
अङ्के परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ! ॥
काञ्चनस्तम्भनिर्यूहं वैदूर्यैश्चित्रवेदिकम् ।
जाम्बूनदमयैर्हैयैर्गवाक्षैः सर्वतो वृतम् ॥
सेवितं चारणैः सङ्घैर्गन्धर्वैर्हरिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते देवतैः सार्द्धं दिवि देव इवापरः ॥
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किङ्किणीजालनिर्घोषं पताकाध्वजशोभितम् ॥
वसुदैविकसंकाशं वैदूर्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालवरभीसुखम् ॥
गन्धर्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुखसावासं सुखेनैवोपपद्यते ॥
सुकुटेनार्कवर्णेन जाम्बूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः ।
दिव्यान् लोकान् विचरति दिव्यैर्भोगैः समन्वितः ।

विबुधानां प्रसादेन श्रिया परमया युतः ॥
अथ वर्षशतान्ते वै स्वर्गलोके महीयते ॥
अथ गन्धर्वसहितः सहस्राक्ष्यकविद्युतिम् ।
पुरन्दरपुरे रम्ये शक्रेण सह मोदते ॥
दिव्ययानविमानेषु लोकेषु विविधेषु च ।
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ॥
ततः सूर्यस्य भवने चन्द्रस्य भवने तथा ।
श्रियस्य भवने राजन् ! विष्णोर्याति सलोकताम् ॥

एवमेतन्महाराज ! नात्र कार्या विचारणा ।
अश्वमेधेन वै भाग्यमेवमाह गुरुर्मम ॥ ॥
लोकस्य तु दातव्यं मनसा यदृदिच्छति ।
हस्त्यश्वरथयानानि वाहनञ्च विशेषतः ॥
कटकं कुण्डलञ्चैव ब्रह्मसूत्रं तथापरम् ।
वस्त्रञ्चैव विचित्रञ्च गन्धञ्चैव विशेषतः ।
देववत् पूजयेत्तञ्तु विष्णुलोकमवाप्नुयात् ॥ * ॥
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमानं तु विप्रेभ्यो राजन् ! पर्वणि पर्वणि ॥
जातिं देशञ्च वयश्च माहात्म्यं भरतर्षभ ! ।
धर्मतश्चिन्त्य विज्ञाय क्षत्रियाणां नराधिप ! ॥
खल्वाट्यं द्विजातीनां ततः कार्यं प्रवर्तते ।
समाप्ते पर्वणि ततः स्वशक्त्या पूजयेत् द्विजान् ॥
आढ्यो तु वाचकस्तत्र वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन् ! मधु पायससंयुतम् ॥
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आत्मीकं भोजयेद्राजन् ! दद्याच्चैव गुडौदनम् ॥
अपूपेश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्वणि राजेन्द्र ! हविष्यं भोजयेद् द्विजान् ॥

आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरण्यपर्व चाश्राद्ध जलकुम्भान् प्रदापयेत् ॥
तर्पणानि च सूक्तानि दद्यन्मूलफलानि च ॥
सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ।
विराटपर्वणि तथा वासांसि विविधानि च ॥
उद्योगे भरतश्रेष्ठ ! सर्वकामगुणान्वितम् ।
भोजनं भोजयेद्विप्रान् गन्धमाल्यैरलङ्कृतान् ॥
भीष्मपर्वणि राजेन्द्र ! दत्त्वा यानमनुत्तमम् ।
ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ॥
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ।
प्रदाय देया राजेन्द्र ! चामान्यसिवरास्तथा ॥
कर्णपर्वण्यपि तथा भोजनं सार्वकामिकम् ।
विप्रेभ्यः संस्कृतं सम्यक् दद्यात् संयतमानसः ॥
शल्यपर्वणि राजेन्द्र ! मोदकैः सगुडौदनैः ।
अपूपैस्तर्पयेच्चैव सर्वमन्नं प्रदापयेत् ॥
गदापर्वण्यपि तथा तृप्तमिश्रं प्रदापयेत् ॥
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदनं पुरस्कृत्य ऐषीके दापयेत् पुनः ॥
ततः सर्वगुणोपेतमन्नं दद्यात् सुसंस्कृतम् ।
शान्तिपर्वण्यपि तथा हविष्यं भोजयेद्
द्विजान् ॥
आश्रमेधिकमासाद्य भोजनं सार्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यभोजयेद् द्विजान् ॥
मौषले सार्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत् सर्वकामगुणान्वितम् ॥
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ॥
पारणे पारणे राजन् ! यथावद्भरतर्षभ ! ।
समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः ॥**॥
शुभे देशे निवेश्याथ स्थौमवस्त्राभिसंवृताः ।
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलङ्कृतः ॥
अर्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक् ।
संहितापुस्तकान् राजन् ! प्रयतः सुसमाहितः ॥
भक्ष्यैर्भोज्यैश्च पेयैश्च कामैश्च विविधैः शुभैः ।
हिरण्यञ्च सुवर्णञ्च दक्षिणामथ दापयेत् ॥
देवताः कीर्तयेत् सर्वा नरनारायणौ तथा ।
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान् ॥
तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा ।
अनिराकृत्य यत्तस्य फलं प्राप्नोति मानवः ॥
प्राप्नुयाच्च क्रतुफलं तथा पर्वणि पर्वणि ।
वाचको भरतश्रेष्ठ ! अक्षान्तरपदस्वरः ॥
भविष्यं भावयेद्विद्वान् भारतं भरतर्षभ ! ।
मूलवत्सु द्विजेन्द्रेषु यथावत् संप्रदापयेत् ॥
वाचकं भरतश्रेष्ठ ! भोजयित्वा स्वलङ्कृतम् ।
वाचके परितुष्टे तु सुभगा प्रीतिरुत्तमा ॥
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः । * ।
ततो हि वरदं कार्यं द्विजानां भरतर्षभ ! ॥
सर्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ।
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर ! ॥
अश्वमेधेन वै भाग्यं यज्ञानां त्वं परिप्रक्षसि ।

भारतस्यास्य वक्ताऽसौ पारणे च नृपोत्तम ! ॥
यदा यजसता भाग्यं श्रेयस्तु परमिच्छता ।
भारतं श्रावयेद्विद्वं भारतं परिकीर्तयेत् ।
भारतं भवने यस्य तस्य हस्तगतो जयः ॥
भारतं परमं पुण्यं भारते विविधाः कथाः ।
भारतं सेव्यते देवैर्भारतं परमं पदम् ॥
भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ ! ।
भारतात् प्राप्यते मोक्षस्तस्मादेतद्बुभूषितैः ॥
महाभारतमाख्यानं चिंतिं गाच्च सरस्वतीम् ।
ब्राह्मणान् केशवश्चैव कीर्तयन्नावसीदति ॥
वेदे रामायणे पुण्ये भारते भरतर्षभ ! ।
आदौ चान्ते च मध्ये च हरिः सर्वत्र गीयते ॥
यत्र विष्णुकथा दिव्याः श्रुतयश्च समासताः ।
तच्छ्रोतव्यं मनुष्येण परं पदमिच्छता ॥
इदं पवित्रं परममेतद्भक्तिनिदर्शनम् ।
इदं सर्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ॥"
इति महाभारते हरिवंशे सर्वपर्वानुक्रमणीनाम ॥ * ॥ त्रिषष्टिवर्णसंयुक्तमित्यत्र त्रिषष्टिवर्णाः । अ इ उ ऋ ऌ इति ह्रस्वपञ्चकम् । आ ई ऊ ॠ ॡ इति दीर्घपञ्चकम् । आ ई ऊ ॠ ॡ इति प्लुतपञ्चकम् । ए ओ ऐ औ च दीर्घाः । प्लुतस्त्वेषामपरस्तुल्यः । अं अः क+पर इति चत्वारः । यद्वा इति अनुस्वारौ द्वौ । अनुनासिकस्त्वेकः । तथा कादिमावसानाः पञ्चविंशतिवर्णाः । अन्तःस्थाश्चत्वारः । उष्मचतुष्टयमिति त्रिषष्टिः । इति ॥ * ॥ वर्णानां किंमाणि स्थानानि भवन्ति तानि यथा,—
"उरः कण्ठः शिरस्तालु जिह्वादन्तौष्ठ-
नासिकाः ।
अष्टौ स्थानानि वर्णानां ये विदुस्ते हि
पाठकाः ।"*॥
प्रयत्नं यथा,—
"भारतं प्रथमं पर्व सुविधा तच्चतुर्विधा ।
पर्वभिर्हरिवंशेन पर्वजां पारणं स्मृतम् ।"
इति विश्वप्रकाशः ॥
"वृत्तानां प्रथमं प्रोक्तं द्वितीयं वनवासिकम् ।
उद्योगानां तृतीयन्तु भीष्माणाञ्च तुरीयकम् ॥
पञ्चमं द्रोणपर्वाणं कर्णानां पारणं ततः ।
विराटकाणां षष्ठन्तु ग्लानिपर्वाणमष्टमम् ॥
नवमं स्वर्गपर्वाणमाश्वमेधानमतः परम् ॥"
इति च भारतटीकायां नीलकण्ठः ॥
(अन्यत्सर्वं भारतशब्दे द्रष्टव्यम् ।)

महाभीना, स्त्री, (महत्यधिका भीरिव ।) लज्जालुवृक्षः । यथा, शब्दचन्द्रिकायाम् ।
"लज्जालुका महाभीना वशिनी च मही-
वधिः ।"
(महानतिशयो भीतः ।) अतिशयभययुक्ते, त्रि ॥

महाभीमः, स्त्री, (महानतिशयो भीमः । भीषणाकृतित्वात् स्त्रियांङीषभावाभावश्च तथात्वम् ।) शालवृक्षः । इति जटाधरः । अस्त्रिणामकण्टकिवृक्षः । इति त्रिकाण्डशेषः । अतिशयभयानके, त्रि ॥

महाओ

महाओदः, पुं, (महाश्चतिश्चयो ओदः ।) गोपालिकाखजीटविशेषः । इति हेमचन्द्रः । ३ । २३७ । अतिमत्तगौडे, त्रि ॥

महाओड्रः, पुं, (महाश्चतिश्चयो ओड्रः ।) ब्राह्मणभेदराजः । इति शिक्षाक्षीरः ॥

महाभूतं, क्ली, (महत् भूतम् । पञ्चतन्मात्रेभ्यः स्थौल्यादस्य तथात्वम् ।) पृथिव्यादिपञ्चभूतम् । यथा,—

"महाभूतानि पञ्चैव ज्ञानिज्ञाप्यान्युभूमिभिः ॥"

इति शब्दचन्द्रिका ॥

(अस्य विषय उत्पत्तिश्च यथा,—

"तन्मात्रेभ्यो विवदायुवह्निवायुवसुन्धराः ।
एतानि पञ्च जायन्ते महाभूतानि तत्क्रमात् ॥"

एकोत्तरपरिद्धद्धा वियदादयो जायन्त इत्यर्थः । तद्यथा । शब्दतन्मात्राच्छब्दगुणं वियज्जायते । शब्दतन्मात्रावच्छिन्तात् स्पर्शतन्मात्राच्छब्दस्पर्शगुणो वायुर्जायते । शब्दतन्मात्रस्पर्शतन्मात्रावच्छिन्तात् रूपतन्मात्राच्छब्दस्पर्शरूपगुणो वह्निर्जायते । शब्दतन्मात्रस्पर्शतन्मात्ररूपतन्मात्रावच्छिन्नात्रसतन्मात्राच्छब्दस्पर्शरूपरसगुणा वसुन्धरा जायते ।" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥" "मालतादयोऽप्यस्य महाभूतविकारा एव तत्रास्याकाशात्मकं शब्दः श्रोत्रं लाघवं शौच्यं विवेकश्च । वायवात्मकं स्पर्शः स्पर्शनञ्च रौक्ष्यं प्रेरणं धातूपचयनं चेष्टाश्च धारोर्य्यः । अग्न्यात्मकं रूपं दर्शनं प्रकाशः पक्तिरौष्ण्यञ्च । अबात्मकं रसो रसनं क्लेद्यं मार्दवं क्लेदः क्लेदश्च । पृथिव्यात्मको गन्धः घ्राणं गौरवं स्थैर्य्यं सर्म्मेच ।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥ विद्वादयः महाप्राणिनः । यथा, महाभारते । १ । ११६ । ४८ ।

"रक्षमाणो महाभूतैः विद्वैश्च परमर्षिभिः ॥")

महाभृङ्गः, पुं, (महांश्चासौ भृङ्गश्च ।) गोलभृङ्गराजः । इति राजनिर्घण्टः ॥

महाभैरवः, पुं, (महान् भैरवः ।) शरभरूपी हरः । यथा,—

"योऽसौ महाभैरवाख्यः सकायः शरभो हरः ।
भैरवः पृथगीशायं गजाध्यक्षो हरात्मजः ॥"

इति कालिकापुराणे ४६ अध्यायः ॥

(क्ली, विद्याविशेषः । तथा च प्रबोधचन्द्रोदये । ३ । २४ । "तन्महाभैरवीं विद्यां धर्म्मअक्षयोराहरन्नाय प्रस्थाप्रयामः ॥")

महाभोगा, क्ली, (महान् आभोगः परिपूर्णतास्याः । यद्वा, महान् भोगः सुखरूपमस्याः ।) दुर्गा । यथा, देवीपुराणे ४५ अध्यायः ।

"सर्व्वार्थसाधनी देवी महाभोगा ततः स्मृता ।"

(महानाभोगो विस्तारोऽस्य । महाविस्तारविशिष्टे, त्रि । यथा, कथासरित्सागरे । १७ । १०६ ।

"ततश्च महाभोगं सञ्चायस्वप्नसुन्दरम् ।
गुरुचक्रो ददर्शासावेकं न्यग्रोधपादपम् ॥")

महाभा

महाभक्तूकः, पुं, (महान् भक्तूकः ।) पीतभक्तूकः । इति राजनिर्घण्टः । सोनावेड् इति भाषा ॥

महामतिः, त्रि, (महती मतिर्यस्य ।) अतिबुद्धिमान् । यथा,—

"किमेतन्नाभिजानासि जानन्नपि महामते ! ।
यत् प्रेमप्रवणश्चित्तं विशुद्धीष्वपि वस्तुषु ॥"

इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

महामदः, पुं, (महान् मदोयस्य ।) मत्तहस्ती । इति शब्दरत्नावली ॥ (महान् मदः ।) अतिप्रमदः । अतिप्रमत्तता च । तद्युक्ते, त्रि ॥

महामनाः, [स्] त्रि, (महत् प्रणस्तं मनो यस्य ।) महाशयः । यथा,—

"महेच्छे तुङ्गटोदारोदात्तोर्व्वमहाशयाः ।
महामना महात्मा च————॥"

इति हेमचन्द्रः । ३ । ३१ ॥

(यथा, ऋग्वेदे । १० । १०३ । ६ ।

"इन्द्रस्य वृष्णो वरुणस्य राज्ञ
आदित्यानां मरुतां जवानां
सोमो वेदानां अयनाय दध्यात् ॥"

"महामनसां उदारमनसाम् ।" इति तद्भाष्ये सायणः ॥ महाशालपुत्रः । यथा, हरिवंशे । ३१ । २० ।

"महामना नाम सुतो महाशालस्य धार्म्मिकः ॥")

महामहावारुणी, क्ली, (महती चासौ महावारुणी चेति ।) गङ्गाजलस्य योगविशेषः । स तु प्रतिवारप्रणतभिषानचतुर्थभयोगयुक्तगौणचान्द्रचैत्रकृष्णचतुर्दश्यौरूपः । यथा,—

"शुभयोगसमायुक्ता यदि स्यात् शततिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥"

इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥

महामांसं, क्ली, (महद् गर्हितं मांसम् । अत्र मांसशब्दस्य पूर्व्वप्रयुक्ततया महच्छब्दस्य गर्हितार्थत्वम् ।

"गृध्रे श्वेते तथा मांसे श्वेते ज्योतिष्मके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दोषते ॥"

इति स्मरणात् ।)

नरादिपिशितम् । यथा,—

"अश्वस्य रुधिरैर्म्मांसैर्म्महामांसैः सुगन्धिभिः ।
पूजयेद्दुर्गतीर्थैश्चलिभिर्भोजनैः शिवाम् ॥"

इति तिथ्यादितत्त्वधृतकालिकापुराणम् ॥

अन्यच्च ।

"गोनरेभाश्वमहिषवराहोष्ट्रोरगोद्भवम् ।
महामांसाष्टकं देवि ! देवताप्रीतिकारकम् ॥"

इति कौलावलीदीपिका ॥

महामात्रः, पुं, (महती मात्रा मर्य्यादापरिमाणं यस्य ।) प्रधानः । इत्यमरः । २ । ८ । ५ ॥ सेनापत्यादिषु महती मात्रा धनं परिच्छदो वा येषां ते तथा । इति तट्टीकायां भरतः । (यथा, रामायणे । २ । ६६ । १८ ।

महामा

"तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।
शुचिर्वंशुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥"

सन्दृष्टः । (यथा, महाभारते । २ । ३१ । ६० ।

"राज्ञे भोजकटस्थाय महामात्राय धीमते ॥")

अमात्यः । (यथा, कामन्दकीये । ६ । ६६ ।

"दूषिते हि महामात्ये रिपुस्थोऽपि धीमता ।
स्वपक्षे यस्य विश्वास्य इत्यभूतश्च निष्क्रियः ॥")

हस्तिपकाधिपः । इति मेदिनी । रे, १६० ।

(यथा च कथासरित्सागरे । १३ । १० ।

"इदञ्च महामात्रो हिरदेङ्गितवित्तदा ।
मद्येन चोदयां मेघो नैतच्चेतयते यथा ॥"

महादेवः । यथा, महाभारते । २३ । २७ । ८५ ।

"महान्तञ्चार्थं महामात्रो महांश्चैनो निग्रहवः ॥")

महामात्री, स्त्री, (महामात्र । ङीष् ।) आचार्य्यपत्नी । इति जटाधरः ॥ महामात्रपत्नी च ॥

महामानसी, स्त्री, (महत् मानसं भक्तान् प्रति सदयं चेतो यस्याः ।) जिनानां विद्यादेवीभेदः । इति हेमचन्द्रः । २ । १५४ ॥

महामायः, स्त्री, (अघटनघटनापटीयस्त्वेन विस्तृतप्रपञ्चोत्पत्तिसाधनं माया । महती चासौ माया चेति । यद्वा, महती माया विश्वनिर्म्माणशक्तिर्यस्याः सा ।) दुर्गा । इति शब्दरत्नावली ॥ तस्याः स्वरूपं यथा,—

"गर्भान्तर्म्मानसभ्यन्नं प्रेरितं कृतिभाजनैः ।
उत्पन्नं ज्ञानरहितं जायते या निरन्तरम् ॥
पूर्व्वातिपूर्व्वसंवृत्तसंस्कारेण निशोभ्य च ।
आहारादौ ततो मोहं ममत्वं ज्ञानसंक्षयम् ॥
क्रोधोपरोधलोभेषु क्षिप्त्वा क्षिप्त्वा पुनः पुनः ।
पश्चात् काले नियोज्याशु चिन्तायुक्तमशक्तिग्रम् ॥
आमोदवृत्तं व्यसनासक्तं जन्तुं करोति या ।
महामायेति सा प्रोक्ता तेन सा जगदीश्वरी ॥"

इति कालिकापुराणे ६ अध्यायः ॥

(यथा च देवीभागवते । १ । ६ । ४० ।

"नमो देवि ! महामाये ! सृष्टिसंहारकारिणि ! ॥"

गङ्गादेवी । यथा, काशीखण्डे । २६ । १३६ ।

"महाविद्या महामाया महामेधा महोदयम् ॥")

महती माया च ॥ (यथा, मार्कण्डेये । ८१ । ४१ ।

"महामाया हरेश्चैतत् तया सम्मोह्यते जगत् ॥")

महामायी, स्त्री, (महती मायास्य । स्त्रियां ङीष् ।) दुर्गा । इति शब्दरत्नावली ॥

महामारी, स्त्री, (महतः दुर्ज्ञानात् ज्ञानवादीन् मारयति इति । मृङ् + णिच् + अण् । ङीष् ।) महाकाली । यथा,—

"आद्यं तथैतत् सकलं ब्रह्माण्डं मनुजेश्वर ! ।
महाकाला महाकाले महामारीस्वरूपया ॥
सैव काले महामारी सैव सृष्टिर्भवत्यजा ।
स्थितिं करोति भूतानां सैव काले सनातनी ॥"

इति मार्कण्डेयपुराणम् ॥

(स्त्रियन्ते प्राणिनो यस्या इति। मृङ्+घञ्। ङीष्। महती मारी।) अतिशयमरकच्च॥

महामाषः, पुं, (महांश्चासौ माषश्चेति।) राजमाषः। इति शब्दरत्नावली॥ (यथा, सुश्रुते सूत्रस्थाने २१ अध्याये। "माषमहामाषगोधूमतिलपिष्टविल्वतिन्दिधिदुग्धक्षुद्रराघायसेक्षुविकारानूपौदकमांसवसाविसन्धानकशैलेयकक्षुद्राटकमधुरवल्लीफलसमग्राध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते॥" तथास्य प्रशमायो गुणाश्च। "राजमाषो महामाषश्चणलक्षवनः स्मृतः। श्वेतो रक्तस्तथा श्यामस्त्रिविधः स प्रकीर्त्तितः॥ यो महांस्तेषु भवति स एवोक्तो गुणाधिकः॥" इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

महासुखः, पुं, (महत् सुखमस्य।) कुम्भीरः। इति हेमचन्द्रः। ३। ४१६॥ (महत् सुखम्।) दृढमुखे, क्ली। (यथा, दृढमुसंहितायाम्। ६७। ५४।

"वक्त्रं सौम्यं संहतममलं श्लक्ष्णं समस्य भूपानाम्।
विपरीतं क्षीणसुखा महासुखं दुर्भगानाञ्च॥"

महत् सुखं यस्य।) महति, त्रि॥ (महादेवः। यथा, महाभारते। १३। १७। ८७।

"महादंष्ट्रो महादंष्ट्रो महाजिह्वः महासुखः॥"

सिन्धुराजस्य सैनिकभेदः। यथा, महाभारते। ३। २७०। १६।

"नकुलस्यभिसन्धाय क्षेमङ्करमहासुखौ।
उभावुभयसैन्यानां शरवर्षैरवर्षताम्॥")

महासुनिः, पुं, (महांश्चासौ सुनिश्चेति।) अगस्त्यः। बुद्धः। इति शब्दरत्नावली॥ (कपिलाचार्य्यः। कालः। दक्षजयपालः॥ व्यासः। (श्रीनारायणः।) यथा, श्रीभागवते। १।१।२।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किंवापरैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥

(महासुनिः श्रीनारायणः। इति तट्टीकायां श्रीधरः।) तुम्बुरुवृक्षः। इति राजनिर्घण्टः॥

महासुनि, क्ली, (महान् सुनिरिवेति। सर्व्वोपकारित्वात्तथात्वम्। अभिधानात् क्लीबत्वम्।) औषधम्। इति शब्दरत्नावली॥ घण्टाकम्। इति जटाधरः॥

महास्कन्धः, [न्] पुं, (महान् स्कन्धो यस्य। आपत्वात् तथात्वम्।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ दृढस्कन्धयुक्ते, त्रि॥

महास्थूलः, पुं, (महत् स्थूलं स्थूलं यस्य।) राजपलाण्डुः। इति राजनिर्घण्टः॥ (छिलिछिटोऽपि। यथास्य पर्य्यायः।

"छिलिछिटो महास्थूलः पलाण्डुगरुडाह्वयः॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

महास्थ्नी, क्ली, महार्घम्। बहुमूल्यम्। महच्च तन्मूल्यं चेति कर्म्मधारयसमासनिष्पन्नम्। (महत् मूल्यं यस्य।) तद्युक्ते, त्रि॥

महास्थविकः, पुं, (महान् स्थविकः।) दृढदुकूलः। तत्पर्य्यायः। स्थूली २ विघ्नेशवाहनः ३ महाङ्गः ४ ग्रहमारी ५ भूपलः ६ भित्तिपातनः ७। इति राजनिर्घण्टः॥

महाह्वगः, पुं, (महान् ह्वगः पशुः।) कच्छपी। इति हेमचन्द्रः। ४। २८३॥ शरभः। इति राजनिर्घण्टः॥

महाह्वतुलयः, पुं, (महाह्वतुं यमं जयतीति। जि+खच् तुम् च।) शिवस्य मन्त्रविशेषः। यथा,—

देव्युवाच।

"यदि मे महती प्रीतिस्तवास्ति कुलभैरव!।
कथयस्व विशेषेण महाह्वतुलयाभिधम्॥

भैरव उवाच।

शृणु देवि! प्रवक्ष्यामि महाह्वतुलयाभिधम्।
आयुर्वृद्धिकरं पुंसां मृत्योर्हन्तुकरं परम्॥
यस्य विज्ञानमात्रेण चिरञ्जीवी निरामयः।
नित्यमृद्यतं जप्त्वा मृत्युं मृत्युपथं नयेत्॥"

इति मृत्युञ्जयतन्त्रम्॥

महाम्भेघः, पुं, (महान् मेघ इव।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (महान् मेघः।) अतिशयमेघश्च॥ (यथा, महाभारते। १२। ११७। ४।

"महामेघनिभं दृष्ट्वा स भीतो न्यपतद्गजः॥"

क्षत्रियराजविशेषः। यथा, महाभारते। ७। ४७। १५।

"शत्रुञ्जयं चन्द्रकेतुं महाम्भेघं सुवर्च्चसम्।
सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम्॥")

महामेदः, पुं, (मेदयति स्निग्धीकरोतीति। मिद्+णिच्+अच्। महान् मेदः।) अष्टवर्गे प्रसिद्धौषधविशेषः। तत्पर्य्यायः। पुरोऽङ्गः २। इति रत्नमाला॥ दृढमूमेदश्च॥

महामेदा, स्त्री, (मेदयतीति। मिद्+णिच्+घञ्। टाप्। महती मेदा।) अष्टवर्गे प्रसिद्धौषधविशेषः॥ तत्पर्य्यायः। वसुच्छिदा २ जीवनी ३ पशुरागिणी ४ देवेष्टा ५ सुरामेदा ६ द्विधा ७ देवमणिः ८ देवगन्धा ९ महाच्छिदा १० दृष्टार्हा ११। अस्याः गुणाः। त्रिदोषत्वम्। रूक्षत्वम्। कफशुक्रदृष्टिकारित्वम्। दाहास्रपित्तज्वरवातज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ * ॥ अथ मेदमहामेदयोरुत्पत्तिलक्षणनामगुणाः।

"महामेदाभिधः कन्दो मोरङ्गादौ प्रजायते।
महामेदा वनौमेदा स्यादित्युक्तं मुनीश्वरैः॥
शुक्लार्द्रकनिभः कन्दो लताजातः स पाण्डुरः।
महामेदाभिधो ज्ञेयो मेदालक्षणसंयुतः॥
शुक्लकन्दो नखच्छेद्यो मेदो धातुरिव स्रवेत्।
यः स मेदेति विज्ञेयो निश्वासान्ततपरैर्जनैः॥
कन्दपर्व्वी मज्जिच्छिदा मेदा मेदोभवाभरा।

महामेदा बहुच्छिदा चिरन्ती देवताभिधः॥
मेदायुगं गुरु वादु हृद्यं शीतकफापहम्।
हंहत्रं प्रीतलं पित्तरक्तवातज्वरघ्नञ्च॥"

इति भावप्रकाशः॥

महामैत्रः, पुं, (मित्रस्य भावः। मित्र+अण्। मैत्रम्। महद्भिः सह महद्वा इति मैत्रमस्तीति।) बुद्धभेदः। इति हेमचन्द्रः। २।१७८॥

महामोहः, पुं, (मोहः अज्ञानम्। अतथाभूते वस्तुनि तथाज्ञानमित्यर्थः। महान् मोहः।) भोगेच्छारूपाज्ञानम्। इति कैश्चित्॥ संसारमूलकारणरागरूपमोहः। (महान् मोहो यस्मादिति च।) महामोहजनककामराजबीजम्। इति षट्शतीप्रथममाहात्म्यटीकायां नागोजीभट्टः॥ अपि च।

"सत्त्वाभ्रेऽभ्रतामिस्रमथ तामिस्रमादिशत्।
महामोहश्च मोहश्च तमश्चाज्ञानहेतवः॥"

इति श्रीभागवते ३ स्कन्धे १२ अध्यायः॥

अथ इति ब्रह्मा स्वदेहौ प्रथममविद्याहरौ; ससर्ज्ज तत्र तमो नाम स्वरूपाप्रकाशः। मोहो देहादहंबुद्धिः। महामोहो भोगेच्छा। तामिस्रः तन्नप्रतिघाते क्रोधः। अन्धतामिस्रः तन्नाशे अहमेव मतोऽन्योऽपि बुद्धिः। तदेवोक्तं वैद्यके।

"तमोऽविवेको मोहः स्यादन्धः करणविभ्रमः।
महामोहश्च विज्ञेयो ग्राम्यभोगसुखेषणा॥
मरणं ह्यन्धतामिस्रं तामिस्रं क्रोध उच्यते।
अविद्या पञ्चपर्व्वा या प्रादुर्भूता महात्मनः॥"

इति तट्टीकायां श्रीधरस्वामी॥

महाम्लं, क्ली, (महत् अम्लं अम्लरसयुक्तम्। यद्वा, महान् अम्लः अम्लरसो यस्मिन्।) तिन्तिड़ीकम्। इति जटाधरः॥ (अम्लवरसविशिष्टे त्रि॥)

महायज्वा, पुं, (यजयते पूजयति इति। यज्+अच्। महान् यज्वा।) अर्हदुपासकविशेषः। इति हेमचन्द्रः। १। ४१॥

महायज्ञः, पुं, (महान् यज्ञः।) वेदपाठादिरूपपञ्चप्रकारयज्ञः। यथा,—

"पाठो होमश्चातिथीनां सपर्य्या तर्पणं बलिः।
एतैः पञ्च महायज्ञा ब्रह्मयज्ञादिनामकैः॥"

इत्यमरः। २। ७।१७॥

अपि च।

"द्विजो भौमश्चया पेत्रो मानुषो ब्राह्म एव च।
एतैः पञ्च महायज्ञा ब्रह्मता विजितास्त्रिभिः॥
ब्राह्मणानां हितार्थाय इतरेषाञ्च सन्नृणाम्।
इतरेषान्तु वर्णानां नाम्नैवः कारिताः शुभाः॥
एवं ज्ञात्वा नरो मुक्ताज्ञाह्नद्विजे! विमुच्यति।
अन्यथा क्रीडयोऽप्येते एकैके ह्यघपञ्चिकाः॥
मत्तया दारुभोक्तृणां महामांसन्तु तत् स्मृतम्॥"

इति वराहपुराणम्॥

(यथा च मनौ। २। ६८।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥")

महायष्टिकः, त्रि, (महत् यष्टी यस्य । "ग्रीवादिभ्यश्च ।" ५ । ४ । १५४ । इति समासान्तः कप्प्रत्ययः ।) अतिदीर्घयष्टीविशिष्टः । इति पाणिनिप्रकरणम् ॥

महायष्टिः, [स्] पुं, (महत् यष्टी यस्य विभाषा यष्टेरात् न कप् ।) भूतार्जुनवृक्षः । इति हेमचन्द्रः । २ । ५० ॥ (शिवः । यथा, महाभारते । १३ । १७ । ३७ ।

"महारूपी महाकायो वृषरूपो महायष्टिः ॥" स्त्री, लम्बमालतीवृक्षः । यथा, महाभारते । ६ । ७६ । २८ ।

"प्रभुता विपदा चैव सुखदा च महायष्टिः ॥") अतिदीर्घयष्टियुक्ते, त्रि ॥ (यथा, महाभारते । ३ । ७२ । ७१ ।

"इमं च संक्रमं कृत्वा स्वर्गलोके महायष्टिः । गतो दशार्हं शक्रस्य पुरीममरावतीम् ॥")

महारजतं, क्ली, (महच्च तद्रजतञ्चेति ।) सुवर्णम् । (यथा, मार्कण्डेये । ६० । ७ ।

"महारजतसङ्काशा जायन्ते तत्र मानवाः ॥") धुस्तूरः । इत्यमरः । २ । ६ । ६५ ॥ दन्तदौष्ठ्यञ्च ॥

महारजनं, क्ली, (रज्यतेऽनेनेति । रञ्ज + करणे ल्युट् । ततः । "अनिदितामिति ।" ६ । ४ । २४ । इत्यत्र "रजकरजनरजःक्षपसंख्यानं कर्त्तव्यम् ।" इति कात्यिकोक्त्या नलोपः । महच्च तद्रजनञ्चेति कर्म्मधारयः ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ६ । १०६ ॥ स्वर्णम् । इति मेदिनी । ने, २४० ॥

महारण्यं, क्ली, (महत् अरण्यम् ।) दण्डकवनम् । (यथा, रामायणे । ३ । १ । १ ।

"प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् । रामो ददर्श दुर्धर्षस्तापसाश्रममण्डलम् ॥") तत्पर्य्यायः । अरण्यानी २ । इत्यमरः । २ । ४ । १ ॥ काननः ३ । इति जटाधरः ॥

महारथः, पुं, (रमन्ते लोका यस्मिन्निति । रम + "इगिकुधिनीरमिकाशिभ्यः कथन् ।" उणा० २ । २ । इति कथन् । महांश्चासौ रथश्चेति ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । १२१ ॥ (महान् रथोऽस्य ।) अयुतधन्विभिः सहाकेलग्रन्थनिपुणयोद्धा । यथा,

"एको दशसहस्राणि योधयेद्यस्तु धन्विनाम् । अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः ॥"

इति भगवद्गीताटीकायां श्रीधरस्वामी ॥ (महान् रथः ।) इन्द्रध्वजः । (यथा, महाभारते । ३ । ४२ । १७ ।

"यातयूपपशवो साध्व एव द्विजो महारथः ।" राजविशेषः । यथा, मार्कण्डेये । ११८ । २६ ।

"महारथस्य वाग्विप्रः पुरोधाभूच्छतोभ्रतः ।") महारम्भं, क्ली, (महान् आरम्भो प्रकृतकरणे ब्रह्मो यस्य ।) गरुडध्वजम् । इति राजनिर्घण्टः ॥ (महारम्भविशिष्टे, त्रि । यथा, कामन्दकीये । ४ । ५४ ।

"ज्ञातीनां भूगुजैर्युक्तः साक्ष्यः सर्व्वत्राभवः । मूलकार्य्यक्रियाप्राप्तौ महारम्भक्रियोद्यतः ॥")

महारत्नं, क्ली, (महान् अधिको रत्नोऽस्य । दधिप्रदत्वात् तथात्वम् ।) काञ्जिकम् । इति जटाधरः ॥ (गुणादयोऽस्य काञ्जिकशब्दे दृश्याः । महारत्नविशिष्टे, त्रि । यथा, महाभारते । ३ । १११ । १४ ।

"तान्यूष्ट्रयुक्तस्य महारथानि भद्रं सुकल्पानि रथिं वहन्ति ॥")

महारसः, पुं, (महान्तिमिष्टो रसोऽस्य ।) खर्জ্জूरः । लोमकारः । कपोतः । इति मेदिनी । से, ५६ ॥ इक्षुः । इति जटाधरः ॥ (अस्यपर्य्यायो यथा,—

"महारसोऽसितश्चः स्वाम्लपुष्पो मधुद्रवः । दन्तुर्वृन्तकाकारभीषणौष्ठादिमेदवान् ॥"

इति वैद्यकरत्नमालायाम् ॥ (महान् रसः धातुश्चः ।) पारदः । इति राजनिर्घण्टः ॥ (यथास्य पर्य्यायः ।

"पारदो रसधातुश्च रसेन्द्रश्च महारसः । चपलः शिववीर्य्यश्च रसः सूतः शिवाक्षयः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महारसाढ्यं, क्ली, (महारसानां आढ्यम् ।) आढ्यधातुविशेषः । यथा,—

"हरितः पारदः सस्यो वैक्रान्तं कान्तमभ्रकम् । माक्षिकं विमलञ्चेति स्मरेतेऽष्टौ महारसाः ॥"

इति राजनिर्घण्टः ॥

महाराजः, पुं, (महांश्चासौ राजा प्रभावविशेषवानिति ।) पूर्ब्बजनविशेषः । (महत्या दीप्त्या राजतेऽनुजिघ्रु शोभत इति । राज् + अच् ।) नखः । इति हेमचन्द्रः । ३ । ८५ । (महान् राजा । सर्व्वत्र "राजाहःसखिभ्यष्टच् ।५ । ४ । ९१ । इति समासान्तष्टच् ।) श्रेष्ठराजः । यथा,—

"अर्थस्य पुरुषो दासो दासस्वर्थो न कस्यचित् । इति सत्यं महाराज ! बद्धोऽस्म्यर्थेन कौरवैः ॥"

इति महाभारते उद्योगपर्व्व ॥

महाराजकः, पुं, (राजते इति । राज + वुन् । महांश्चासौ राजकश्चेति ।) महाराजिकगणः । इत्यमरटीकायां रामाश्रमः ॥

महाराजपूतः, पुं, (महता मिष्टादिगुणेन राजते आद्रियते । इत्यच् ततः कर्म्मधारयः ।) उत्तमाम्रः । तत्पर्य्यायः । महाराजाम्रकः २ स्थूलाम्रः ३ मध्यमाम्रः ४ कटुः ५ नीलकपित्थकः ६ कामाम्रः ७ कामफलः ८ राजपुत्रः ९ कृपालम्बः १० महाराजफलः ११ कामः १२ महापूतः १३ । कोमलस्य तस्य गुणाः । कटुत्वम् । अम्लत्वम् । पित्तदाहदाहत्वञ्च । सुपक्वस्य तस्य गुणाः । स्वादुत्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥

महाराजद्रुमः, पुं, (महाराजोऽतिश्रेष्ठो द्रुमः ।) आरग्वधः । इति राजनिर्घण्टः ॥ (गुणादिविशेषोऽस्यारग्वधशब्दे ज्ञातव्यः ॥)

महाराजिकः, पुं, (महती राजिः पङ्क्तिरस्य "ग्रीवादिभ्यश्च ।" ५ । ४ । १५४ । इति कप् ।) गणदेवताविशेषः । स तु विंशत्यधिकशतत्रयसंख्यकः । इत्यमरभरतौ । १ । १ । १० ॥

महाराजोपचारः, पुं, (महाराजार्थं उपचारः । महाराजानामुपचारो वा ।) राजार्हपूजोपकरणम् । तद्यथा,—

"ततश्च चामरच्छत्रपादुकादीन् प्रदापयेत् । महाराजोपचारांश्च दत्त्वादर्शं प्रदर्शयेत् ॥"

विष्णुधर्म्मोत्तरे ।

"यथार्हेयं यथाकालं राजलिङ्गं सुराजये । दत्त्वा भवति राजैव नात्र कार्य्या विचारणा ॥'

तत्र चामरमाहात्म्यं विष्णुधर्म्मोत्तरे ।

'तथा चामरदानेन श्रीमान् भवति भूतले । सुखते च तथा पापैः स्वर्गलोकञ्च गच्छति ॥'

छत्रस्य तत्रैव ।

'छत्रं बहुगुणाकञ्च भास्करीवल्लसंयुतम् । दिव्यवस्त्रैश्च संयुक्तं हेमदण्डसमन्वितम् ॥ यः प्रयच्छति छत्रस्य छत्रच्छायातलेषुतः । प्रार्थ्यते सोऽमरैः सर्व्वैः क्षीरुदे पितृभिः सह ॥'

तत्रैवान्यत्र ।

'राजा भवति लोकेऽस्मिन् छत्रं दत्त्वा द्विजोत्तमाः । नाप्नोति रिपुजं दुःखं संग्रामे रिपुजिद्भवेत् ॥'

'उपानत्संप्रदानेन विमानमधिरोहति । यथेष्टं तत्र लोकेषु विचरत्यमरप्रभः ॥'

व्यजस्य तत्रैव ।

'लोकेषु व्यजभूतः स्याद्दत्त्वा विष्णोर्वरं व्यजम् । शुक्ललोकमवाप्नोति बहुवर्षगणान्तरः ॥'

किञ्च ।

'युक्तं पीतपताकाभिर्जिवेत्र गरुडध्वजम् । केशवाय द्विजश्रेष्ठाः शुक्ललोके महीयते ॥ यत्प्रासादे व्यजारोपमाहात्म्यं लिखितं पुरा । तदत्राप्यखिलं ज्ञेयं तत्रायत्नमिदन्तया ॥'

किञ्च । भविष्ये ।

'विष्णोर्ध्वजे तु सौवर्णं दण्डं कुर्य्याद्विचक्षणः । पताका चापि पीता स्यात् गरुडस्य समीपगा ॥'

व्यजस्य । विष्णुधर्म्मोत्तरे ।

'तालवृन्तप्रदानेन निर्वृतिं प्राप्नुयात् पराम् ॥'

वितानस्य तत्रैव ।

'वितानकप्रदानेन सर्व्वपापैः प्रमुच्यते । परां निर्वृतिमाप्नोति यत्र यत्राभिजायते ॥'

खड्गादीनाम् ।

'दत्त्वा निस्त्रिंशकान् खड्गान् शत्रुभिर्नाभिभूयते । दत्त्वा तदन्यं खड्गमयाद्येयफलं लभेत् ॥'

किञ्च ।

'एतद्व्यजं तथा दत्त्वा शुभगत्वमभिजायते । पादपीठप्रदानेन स्थानं सर्व्वत्र विन्दति ॥'

'दर्पणस्य प्रदानेन रूपवान् दर्पवान् भवेत् । मार्ज्जयित्वा तथा तत्र सुभगत्वमभिजायते ॥ यत्किञ्चिद्देवदेवाय दद्याद्भक्तिसमन्वितः । तदेवाक्षयमाप्नोति स्वर्गलोकं स गच्छति ॥'

किञ्च । वामनपुराणे श्रीबलिं प्रति प्रह्लादोक्तौ

'अहन्यनेकभक्तिपरैर्यान्युद्दिश्य जगाद्गुरुम् । यस्मिन्दानानि दीयन्ते अक्षयाणि विदुर्बुधाः ।

अद्यापि केचिदिच्छन्ति दत्त्वा पुष्पाञ्जलित्रयम्।
पूर्व्वोक्ता दश ग्रहाद्या मुदा: सम्पूजयेदिति ॥"
इति श्रीहरिभक्तिविलासे ८ विलास: ॥

महारात्रि:, स्त्री, (महत्यां प्रलयावस्थायां रात्रि आत्मस्वरूपं ददाति सुप्तप्रायान् सर्व्वान् जीवानात्मस्वरूपेणावस्थापयति जायते पञ्चपर्व्वलक्षणाया अविद्याया सकाशात् रक्षतीति। वे+ड।) ब्रह्मलयोपलक्षिता महाप्रलयरात्रि:। इति चण्डीटीकायां नागोजीभट्ट:॥ महत ईश्वरस्य रात्रि:। ब्रह्मसरूपोपलक्षिता रात्रिरित्यर्थ:। इति देवीमाहात्म्यटीकायां विद्याविनोद:॥ अपि च।

"ब्रह्मरात्रे विपाते च महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रि: सा एव च पुराविदै:॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५ अध्याय:॥
(दुर्गा। यथा च मार्कण्डेये। ८१। २०।

"महारात्रि! महाविद्ये! नारायणि! नमोऽस्तु ते॥")

अर्द्धरात्रात् परं मुहूर्त्तद्वयम्। यथा,—

"अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमुच्यते।
सा महारात्रिरुदिता तद्व्रतमत्यर्थं भवेत्॥"
इति तत्त्वम्॥

आश्विनशुक्लाष्टमी। नवरात्रम्। यथा,—

"शुक्लाष्टमी चाश्विनस्य नवरात्रं तु तस्य वै।
महारात्रिर्महेशानि! कालरात्रिं प्रचक्ष्यते प्रिये!॥"
इति शक्तिसङ्गमतन्त्रम्॥

महाराष्ट्र:, पुं, (महान् भूयान् प्रशस्तो वा राष्ट्र:। महत् राष्ट्रं यत्रेति वा।) देशविशेष:। मारहाट्टा इति भाषा॥ यथा,—

"नैर्ऋते द्रविडानर्म्महाराष्ट्राञ्च रैवत:।
जवन: पञ्चव: सिन्धु: पारसीकादयो मता:॥"
इति ज्योतिषतत्त्वे कूर्म्मचक्रम्॥

महाराष्ट्री, स्त्री, (महाराष्ट्रदेशे उत्पत्तिस्थानत्वेनास्त्यस्या इत्यच्। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टु:॥ शाकभेद:। मारोटी इति भाषा। अस्या गुण:। कफवातुनाशित्वम्। इति राजवल्लभ:॥ (विषयोऽस्या यथा,—

"जयन्ती सुखिरी वासा दृहती च गुडूचिका।
महाराष्ट्री जन्तुरसैस्तथा नीलोत्पलद्रवै:॥"
इति वैद्यकरसेन्द्रसारसंग्रहे मूलाधिकारे पञ्चालकरसे॥ महाराष्ट्राज्जातमिति। महाराष्ट्र। अञ् ङीप्।) अष्टादशभाषान्तर्गतभाषाविशेष:। यथा, साहित्यदर्पणे ६ परिच्छेदे।

"आसामेव तु भाषासु महाराष्ट्रीं प्रयोजयेत्।
अत्रोक्ता मागधी भाषा राजान्त:पुरचारिणाम्॥"

महारिष्ट:, पुं, (महान् अरिष्ट:।) महानिम्बविशेष:। तत्पर्य्याय:। कैटर्य्य: २ रामठ: ३ रमठ: ४ गिरिनिम्ब: ५ शुक्लसाल: ६। अस्य गुणा:। कटुत्वम्। तिक्तत्वम्। कषायत्वम्। शीतलत्वम्। मधुरत्वम्। वल्लनपञ्चोषकुष्ठाक्षमिभूनविषापहत्वञ्च। इति राजनिर्घण्टु:॥

महारुद्र:, पुं, (रुद्राणां महान् स्वयं ईश्वर इत्यर्थ:। इति महारुद्र:।) महादेव:। यथा,—

"महाकाल्या महाकालश्चक्राकाररूपत:।
मायया च्छादितात्मा च तच्चक्रे समभागत:॥
महारुद्र: स एवात्मा महाविष्णु: स एव हि॥"
इति निर्व्वाणतन्त्रम्॥

महारूप:, पुं, (महत् महत्त्वादिरूपमस्य।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ३४॥ (महद्रूपं यस्य।) अतिशयरूपयुक्ते, त्रि॥

महारूपकं, क्ली, (महत् रूपकं यत्र।) नाटकम्। इति विश्वप्रकाश:॥

महारोग:, पुं, (महान् घोरानिष्टकारक: रोग:। यद्वा, महद्भ जन्मान्तरीयासुकृतविशेषातिशयपातकेन जनित: रोग:।) पापरोग:। स चाष्टविधो यथा। उन्माद: १ अपस्मार: २ राजयक्ष्मा ३ श्वास: ४ मधुमेह: ५ भगन्दर: ६ उदर: ७ अश्मरी ८। इति श्रुद्धितत्त्वे नारद:॥ (यथा च आश्वलायने। २। ७। १७।

"महारोगैश्च बाधितम: प्राप्नोत्यन्धतरां गतिं गच्छति॥"

"महारोगैश्च क्षयकुष्ठादिनेति" तट्टीकायां नारायण:॥ विषयोऽस्य यथा,—

"महारोगाष्टके कासे ज्वरे श्वासातिसारके॥"
अस्य आख्यायां यथा,—

"वातव्याधिस्तरीकुष्ठमेदोदरभगन्दरा:।
अर्शांसि ग्रहणीत्यष्टौ महारोगा: प्रकीर्त्तिता:॥"
इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्मणि रत्नगर्भपोट्टलीटीका॥)

महारोगी, [न्] पुं, (महा रोग: क्षयादिरस्यस्येति। महारोग+इनि:। महारोगयुक्त:। यथा,—

"क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याकुर्म्मैरणान्नमशौचकम्॥"
इति श्रुद्धितत्त्वधृतकूर्म्मपुराणवचनम्॥

महारोमा, [न्] पुं, (महान्ति रोमाणि वृक्षादिरूपाणि विराटरूपे यस्य।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३। १७। ८८॥ (महान्ति रोमाण्यस्य।) वृहद्रोमयुक्ते, त्रि॥ (क्षत्रियरातस्य पुत्रविशेष:। यथा, भागवते। ९। १२। १७।

"मरो: प्रतीपकस्तस्माच्चूतस्तदात्मज: यत:।
देवमीढस्तस्य पुत्रो विबुधोऽथ महाधृति:॥
कृतिरातस्ततस्तस्मान्महारोमा च तत्सुत:॥")

महारौरव:, पुं, (रुरुणामयं इति। रुरु+अण्। महान् रौरव:। तत्र गता जीवा: क्रव्यभुजामकैरुद्भि: पीड्यन्ते अत एवास्य तथात्वम्।) नरकविशेष:। इत्यमर:। १। ८। १॥ महान् रौद्रो रवोऽत्र महारौरव: मध्यपदलोपात् ब्रह्मोप:। इति भरत:॥ अपि च।

"महारौरवसंज्ञस्तु अधोऽर्द्धे ताडसंपुटम्।
घन्यते खदिराङ्गारैर्व्वदारामलनायक:॥
देवब्रह्मापहारी च पच्यते कालसञ्चयम्॥"
इति वह्निपुराणे पापमार्गनरकवर्णनाध्याय:॥

महार्घ, त्रि, (महान् अधिक: अर्घो मूल्यमस्य।) महामूल्यम्। इति मेदिनी॥ घे, १०। (यथा, कथासरित्सागरे। १२। १४५।

"तत्तस्मै महार्घाणि रत्नानि सुबहूनि च।
विभीषणो ददौ ज्ञ मथुरां गन्तुमिच्छते॥")

महार्घ:, पुं, (महान् अर्घो मूल्यमादरो वास्य।) लावकपक्षी। इति विश्व:॥

महार्णव:, पुं, (महान् सुविस्तीर्ण: अर्णव:।) महासमुद्र:। यथा,—

"आपूर्णितो वा वातेन स्थित: पोते महार्णवे॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥
(महान् अर्णव एव। प्रसादादित्वात् तथात्वम्।) शिव:। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (कूर्म्मरूपिभगवन्नारायणस्य दशपदोद्भव: जनपद:। यथा, मार्कण्डेये। ५८। ३२।

"सौरट्टा दरदाश्चैव चाविड्राश्च महार्णवा:।
एते जनपदा: पादे स्थिता वै दक्षिणेऽपरे॥")

महार्द्ध:, पुं, (महान् विपुलोऽर्द्धोऽस्य।) वृक्षविशेष:। इति शब्दचन्द्रिका। महाधा इति भाषा॥

महार्हकं, क्ली, (महत् आर्हकम्।) वनार्हकम्। अस्य गुणा:। अग्निदीपनत्वम्। धारकत्वम्। रूक्षत्वम्। वायुकफनाशित्वञ्च। इति राजवल्लभ:॥

महार्बुदं क्ली, (महत् अर्बुदम्।) दशार्बुदम्। शतकोटिसंख्या। इति ज्योतिषम्॥

महार्घं, क्ली, (महान् अर्घ: मूल्यं मर्य्यादा वास्य।) श्वेतचन्दनम्। इति राजनिर्घण्टु:॥ (महामूल्यवति, त्रि। यथा, महाभारते। १। २१०। २८।

"महार्घाभरणोपेतौ विरजोऽम्बरधारिणौ॥")

महार्घा, स्त्री, महापूजायोग्यम्। यथा, रामायणे। २। ६६। २०।

"यक्ष्माङ्गागार्घिनो भागान् नाकल्पयत मे सुरा:।
वराङ्गानि महार्घाणि धनुषा ज्ञातयामि व:॥"
"महार्घाणि महापूजार्थोपयोगीनि।" इति तट्टीकायां रामानुज:॥)

महालय:, पुं, (महतां देवानामालय:। महान् आलय इति वा।) विष्णु:। (महतां योगिप्रभृतीनामालय:।) तीर्थं:। (महद्भिर्दीनां लयो यस्मिन्।) परमात्मा। इति मेदिनी। ये, १२५॥ सौरान्विनीयलक्षणपक्ष:। यथा, भविष्ये।

"येयं दीपान्विता राजन्! ख्याता पञ्चदशी शुचि।
तस्यां दत्त्वान्न पेतृणां पितृणां वै महालये॥"
महालये कन्यागतापरपक्षे। इति तिथ्यादितत्त्वम्॥

महालक्ष्मी:, स्त्री, (महती लक्ष्मी:।) राधा। नारायणशक्ति:। यथा,—

"यज्ञाधया मोदिताश्च ब्रह्मविष्णुशिवादय:।

वैद्यवाक्यां महालक्ष्मीं परां दारां वदन्ति ते ॥
यद्वांछा महालक्ष्मीः प्रिया नारायणस्य च ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५६ अध्यायः ॥
अथ महालक्ष्मीमन्त्रः ।
"तारो वाग्भवं माया रमाकामः वृषो-
ध्वगप्रकृते नमः ॥"
तथा च ।
"वाग्भवं ग्रन्थुवनिता रमा मकरकेतनः ।
तारोयञ्च जगत्यार्यो वह्निजीवसमुज्ज्वलः ॥
अर्धोणाढ्यो धृगुखेन्दुभ्यामोऽयं द्वादशाक्षरः ।
महालक्ष्म्याः समुद्दिष्टस्तारादः सर्वसिद्धिदः ॥"
तस्या ध्यानं यथा, तन्त्रसारे ।
"बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारो-
ज्ज्वलां
रत्नाकल्पविभूषितां कुचनतां घ्राणैः करैर्मेखल-
रीम् ।
पद्मौ कौस्तुभरत्नमप्यविरतं संबिभ्रतीं संस्मितां
पुल्लाम्भोजविलोचनत्रययुतां ध्यायेत् परा-
मम्बिकाम् ॥"
(अस्या बीजम् । ॐ ऐं ह्रीं श्रीं क्लीं वृषो जगत्प्रकृते नमः ।)
महालिकटभी, स्त्री, (महान्तः अलयः । तेषां कटभी आश्रयभूतवृक्षः ।) श्वेतकिंशिल्पी-वृक्षः । इति राजनिर्घण्टः ॥
महालिङ्गः, पुं, (महान् पूज्यतमो विपुलो वा लिङ्गोऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (यथा, राजतरङ्गिण्याम् । २ । १६० ।
"अकरोत् स महाधर्म्मो महालिङ्गमहार्चनैः ।
महाविभूतेर्महती महामाहेश्वरो मही ॥"
महत् वृहल्लिङ्गमस्य ।) वृहल्लिङ्गयुक्तश्च ॥
महालीलासरस्वती, स्त्री, (लीलया सरस्वती । महती लीलासरस्वतीति कर्म्मधारयः ।) तारा विद्येव ।
"लीलया वाक्प्रदा चेति तेन लीलासरस्वती ।
ताराक्षरयुता चार्या महालीलासरस्वती ॥"
इति तन्त्रसारः ॥
महालोध्रः, पुं, (महान् लोध्रः ।) लोध्रविशेषः । इति रत्नमाला । पाटियालोध इति भाषा ॥
महालोलः, पुं, (अतिशयितं लोलं लोलत्वमस्य ।) काकः । इति राजनिर्घण्टः ॥ अतिचञ्चले, त्रि ॥
महालोहं, क्ली, (महत् अतिशयगुणवत् लोहम् ।) अयस्कान्तः । इति राजनिर्घण्टः ॥
महावनं, क्ली, (महत् विपुलं वनम् ।) वृहद्वनम् । तत्पर्य्यायः । अरण्यानी २ महारण्यम्३ महाटवी४ । इति राजनिर्घण्टः ॥(यथा, रामायणे । "निरस्ताः पथि धावन्ति वध्यन्ते यज्ञदावने ॥") वृन्दावनस्यचतुरशीतिवनान्तर्गतवनविशेषश्च ॥
महावपः, पुं, (महती वपा यस्य । यद्वा, महान्तं धातुमौल्यादिकं वपतीति । वप + अच् ।) महामेदः । इति शब्दचन्द्रिका ॥
महावरा, स्त्री, (ब्रियते असौ देवादिभिरिति । वृ + अप् । टाप् । महती वरा ।) दूर्व्वा । इति शब्दरत्नावली ॥
महावराहः, पुं, (महांश्चासौ वराहश्चेति वा ।) वराहरूपी भगवान् । यथा,—
"महावराहो गोविन्दः सुषेणः कनकाङ्गदी ॥"
इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (राजविशेषः । यथा, कथासरित्सागरे । ५२ । ८२ ।
"अस्ति भूरपुरं नाम यथार्थं नगरं भुवि ।
महावराह इत्यासीद्राजा तत्रातिदुर्म्मदः ॥")
महावरोहः, पुं, (महान् अवरोहः शिखानां अधोऽवतरणं यस्य ।) वृक्षवृक्षः । इति राजनिर्घण्टः ॥ (विशेषोऽस्य शब्दशब्दे द्रष्टव्यः ॥)
महावल्ली, स्त्री, (महती चासौ वल्ली चेति ।) माधवीलता । इति शब्दचन्द्रिका ॥ (उत्तमा लता च । यथा, कथासरित्सागरे । ३३ । ८५ ।
"उपायरसवंशिला देशकालोपहंहिता ।
सेयं नीतिमहावल्ली किं नाम न फलेत् फलम् ॥")
महावसः, पुं, (महती वसा वपास्य । वृक्षः ।) शिशुमारः । इति हेमचन्द्रः । ४ । ४१६ ॥
महावक्षाः, [स्] पुं, (महत् वक्षः विराड्देहेऽस्य ।) शिवः । इति महाभारते तस्य सहस्रनामस्तोत्रम् । १३ । १७ । ८६ ॥ (महत् वक्षोऽस्य ।) वृहद्वक्षोयुक्ते, त्रि ॥
महावाक्यं, क्ली, (महत् वाक्यम् ।) योग्यता-काङ्क्षासत्तियुक्तवाक्यसमूहः । इति साहित्य-दर्पणः । २ । २ ॥ न्यायमते तु । खण्डवाक्येक-नामलभ्यतात्पर्य्यार्थकम् । प्रकृतार्थमात्रावच्छिन्न-प्रत्ययार्थबोधं प्रत्ययोग्यवाक्यं वा । इति शब्द-शक्तिप्रकाशिका ॥ (महत् महदर्थप्रकाशकं वाक्यम् ।) तत्त्वमसीति आदिवाक्यम् । प्रतिष्ठा-दानुत्सर्गवाक्यञ्च ॥
महावारुणी, स्त्री, (वरुणो देवतास्याः । वरुण + अण् । ङीप् । महती वारुणी ।) गङ्गा-स्नानस्य योगविशेषः । स तु शनिवारशतभिषा-नक्षत्रयुक्तगौणचान्द्रचैत्रज्यैष्ठज्योदशीरूपः । यथा,—
"वारुणेन समायुक्ता मघौ ज्ञेया त्रयोदशी ।
गङ्गायां यदि लभ्येत कुर्य्यशतगुणैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्य्यग्रहैः समा ॥"
इति तिथ्यादितत्त्वधृतस्कन्दपुराणवचनम् ॥
महाविद्या, स्त्री, (विद्यते ज्ञायते इति । विद् + क्यप् । टाप् । महती विद्या ज्ञानं तत्त्वसाक्षात्-कारो वा यस्याः ।) देवीविशेषः । सा दशधा । यथा चामुण्डातन्त्रे ।
"काली तारा महाविद्या षोढ़शी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥
नास्य सिद्धाद्यपेक्षास्ति न नक्षत्रविचारणा ।
कालादिशोधनं नास्ति न चामिचारादिदूषणम् ॥
सिद्धविद्यातया नाम युगसेवापरिश्रमः ।
नास्ति किञ्चिन्महादेवि ! दुःखबाधं कथञ्चन ॥"
मातङ्गीविजये ।
"अथ वक्ष्याम्यहं या या महाविद्या महीतले ।
दोषजालैरसंस्पृष्टाः सर्व्वा हि फलदैः सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
बाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया नाम युगसेवापरिश्रमः ।
अथ चैता महाविद्याः कलिदोषान्न बाधिताः ॥"
इति तन्त्रसारः ॥ * ॥
तासां दशावतारत्वं यथा,—
"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः ।
एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्हरेः ॥
लक्ष्मीरूपा कालिका स्यात् रामरूपा च तारिणी ।
वगला कूर्म्मरूपिः स्याच्छीनो धूमावती भवेत् ॥
छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी ।
सुन्दरी वामदेवाः स्याद्वामनो भुवनेश्वरी ॥
कमला बौद्धरूपा स्यात् दुर्गा स्यात् कल्कि-
रूपिणी ।
स्वयं भगवती काली कृष्णस्तु भगवान् स्वयम् ।
स्वयञ्च भगवान् कृष्णः कालीरूपो भवेद्वृजे ॥"
इति सुरूढमालातन्त्रम् ॥
(गङ्गा । यथा, काशीखण्डे । २६ । १३६ ।
"महाविद्या महामाया महामेधा महो-
दयम् ॥")
महाविराट्, [ज्] पुं, (विशेषेण यो राजते प्रकाशते । इति । वि + राज् + क्विप् । महांश्चासौ विराट् चेति ।) महाविष्णुः । यथा,—
सुनिरुवाच ।
"विश्वानां गोलोकं राजन् ! विश्वतश्च नभः-
समम् ।
ग्रन्थन्नित्यं शिवरूपं श्रीकृष्णोच्छ्वासमुद्भवम् ॥
जलेन परिपूर्णञ्च कृष्णस्य सुखबिन्दुना ।
सृष्ट्युन्मुखस्यादिसर्गे परिभ्रान्तस्य क्रीडतः ॥
प्रकृत्या सह युक्तेन कलया निजया नृप ! ।
तत्राधारो महद्विष्णोर्विश्वाधारस्य विश्रुतः ॥
प्रकृतीगर्भसंभूतडिम्बोद्भूतस्य भूमिप ! ।
सुविस्तृते जलाधारे शयानश्च महान् विराट् ॥
राधेश्वरस्य कृष्णस्य घोढ़शांशः प्रकीर्त्तितः ।
दूर्व्वादलश्यामरूपः सच्चिदात्मा चतुर्भुजः ।
वनमालाधरः श्रीमान् शोभितः पीतवाससा ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५१ अध्यायः ॥
महाविलं, क्ली, (महच्च तत् विलञ्चेति ।) आकाशम् । इति जटाधरः ॥ वृहच्छिद्रञ्च ॥
महाविषः, पुं, (महत् अत्युत्कटं विषमस्य ।) हिंसुरवृक्षः । यथा,—
"महाविषः कालसर्पो राजार्हिंसुरोरगः ।"
इति जटाधरः ॥

(महाविषविधिर्दृष्टे, त्रि। यथा, सुश्रुते कल्पस्थाने ८ अध्याये।
"त्रिविधा दष्टिकाः मन्दमध्यमहाविषाः।"
(महट् विषम्। महाविधि, स्त्री। यथा, सुश्रुते कल्पस्थाने २ अध्याये।
"महाविधेय हृदये ग्रन्थिर्भूलोर्द्धगो भृशम्।")

महाविष्णुः, स्त्री, (विषु व्याप्तौ + क्नु। विषु + "वषकरक्नेऽन्येभ्योऽपि दृश्यन्त इति वक्तव्यम्।" ५। २। २०६। इत्यस्य वार्त्तिकात् वप्रत्ययः। महच्च तत् विष्णुश्चेति। अस्मिन् समये दिवाराज्योः समत्वात्तथात्वम्।) मेषसंक्रान्तिः। यथा,—
"महाविष्णुदिनमाख्यातं ज्योतिर्भिश्चैत्रचिन्तितम्॥"
इति ज्योतिस्तत्त्वावली॥
तस्मिन् महत्तरनिम्बपत्रदधिभक्षणम्। यथा, ज्योतिश्चिन्तामणौ।
"महत्तरं निम्बपत्राभ्यां योऽस्मि मेषगते रवौ।
अपि रोगान्वितस्यास्य तत्क्षणः किं करिष्यति॥"
तत्र गुडादिदानं यथा,—
"मेषादौ गुडकुम्भो देया वारिपूर्णा च गर्गरी॥"
वारिपूर्णघटदानमन्नादि यथा,—
"एष धर्म्मघटो दत्तो ब्राह्मविष्णुशिवात्मकः।
अस्य प्रदानात् सफला मम सन्तु मनोरथाः॥
वैशाखे यो घटं पूर्णं सशोभं वै द्विजन्मने।
ददाति सुरराजेन्द्र! स याति परमां गतिम्॥"
महार्घवे।
"यो ददाति हि मेषादौ गुडकुम्भघटान्वितान्।
पितृन्तृप्तिप्रदान् विप्रेभ्यः सर्व्वपापैः प्रमुच्यते॥"
तत्र छत्रपादुकादानं यथा,
"विप्रेभ्यः पादुकाच्छत्रं पितृभ्यो विष्णवे शुभम्।"
पितृभ्यः पितृतृप्तिप्रदेभ्यः। इति तिथ्यादितत्त्वम्॥

महाविष्णुचक्रं, क्ली, (महाविष्णोः चक्रम्।) नक्षत्रघटितनराकारचक्रम्। यथा,
"मस्तिष्के वसु सुखे जीवि हृदये पक्ष विन्यसेत्।
त्रितयं हस्तपादेषु महाविष्णुप्रभक्रमात्॥
मस्तके भूपतेः सौख्यं वदने पटुता क्षमे।
हृदये च धनाढ्योऽर्थप्राप्तिर्दक्षिणे करे॥
वामे करे महद्दुःखं सुखं पादे च दक्षिणे।
भ्रमणं वामपादे च कथितं विष्णुवत्फलम्॥"
इति ज्योतिषतत्त्वम्॥

महाविष्णुः, पुं, (महांश्चासौ विष्णुः सर्व्वव्यापकश्चेति।) महाविराट्। यथा। 'यस्या जले कोटिकोटिब्रह्माण्डानि महाविष्णुरोमकूपगतानि तस्या विरजायाः परिखाभूतायाः उपरि महावैकुण्ठलोकः। तस्योर्द्धभागे गोलोकः। तस्य नाथः कृष्णो देवलीलः स परिवारेण वर्णते। इति भागवतानन्तकल्पिका। स च श्रीकृष्णस्य कलाविशेषः। यथा,—
"विष्णुमेकान्तं स इह यस्य कलाविशेषो
गोविन्दमादिपुरुषं तमहं भजामि॥"
इति भागवतानन्तपूर्व्वखण्डः॥

महावीचिः, पुं, (न विद्यते वीचिः सुखं यत्र। महान्तश्चासौ वीचिश्च।) नरकविशेषः। यथा, मनुः।
"नरकं कालसूत्रञ्च महारौरवमेव च।
सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्॥"
यातीति पूर्व्ववचनस्थमनुवर्त्तते।
"महावीचिर्यत्र महाक्लेशेन तु नीयते।"
इति प्रायश्चित्तविवेकः॥

महावीर्य्यं, क्ली, (वीर्य्याय साधु इति यत्। महच्च वीर्य्यम्।) विटपम्। तन्तु सुश्रवद्वयोरन्तरम्। इति हेमचन्द्रः॥

महावीरः, पुं, (वीरान् पक्षिणः ईरयतीति। ईर + कः। ततो महांश्चासौ वीरश्चेति।) गरुडः। वीरयतीति। वीर + कः। महान् वीर इति कर्म्मधारयः। शूरः। सिंहः। मखाग्निः। (स च मनुपुत्रविशेषः। यथा, श्रीभागवते। ५।१२५।
"अग्नीध्रेध्मजिह्मयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति॥")
वज्रः। श्वेततुरङ्गः। सन्ध्यानपक्षी। इति मेदिनी। रे, २८६॥ अग्निमन्थिनः। (अयमेव सिद्धार्थस्य त्रिशलागर्भजातः पुत्रः। तद्विवरणं यथा, अरिष्टनेमिपुराणान्तर्गतजैनहरिवंशे।
"सर्व्वार्थश्रीमतीजन्मा तस्मिन् सर्व्वार्थदर्शनः।
सिद्धार्थोऽभवत्कीर्त्तिर्भूपः सिद्धार्थपौरुषः॥
यत्र पाति धरित्रीयमभूदेकवदीतिजौ।
धर्म्मार्थिन्योऽपि यत्राक्तपरलोकभयाः प्रजाः॥
कस्तस्य नाम गुणानुद्यान्नरस्तुत्तयितुं क्षमः।
वर्द्धमानगुरुत्वं यैः प्रापितः स नराधिपः॥
उच्चैः कुलाद्रिसम्भूता सहजस्नेहवाहिनी।
महिषी श्रीसमुद्रस्य तस्यासीत् प्रियकारिणी॥
पेतचेटकराजस्य यात्राः सप्तप्रसूरिजाः।
अतिस्नेहाकुलत्वक्तुस्ताभ्यो प्रियकारिणी॥
कर्त्तुं योजयितुं शक्तस्त्रिशूलां गुणवर्णने।
या स्वपुण्यैर्महावीरप्रसवाय नियोजिता॥
सर्व्वतोऽथ नमन्तीषु सर्व्वासु सुरकोटिषु।
प्रभावान्निपतन्तीषु नभसो वसुवृष्टिषु॥
वीरोऽवतरति ज्ञातुं धरित्रीमसुधारिणः।
तीर्थनाथुतकल्पोक्तैः पुष्पोत्तरविमानतः॥
सा तं षोडशसुस्वप्नप्रदर्शनोल्लसत्पूर्व्वकम्।
दधे गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी॥
पक्षसप्ततिवर्षोनमासमासार्द्धसंयुतः।
चतुर्थेषु तदा कालो दुःखमः सुखमोत्तरः॥
आषाढशुक्लषष्ठ्यान्तु गर्भावतरणेऽर्हतः।
उत्तराषाढ़गुणोत्तुङ्गसुतुङ्गराजद्विजन्मिते॥
दिक्कुमारीकृताभिख्या द्योतिन्यभिषेचनक्षणौम्।
प्रच्छन्नो भास्वदभ्रस्थां रविः प्रावृषं यथा॥
नवमासेष्वतीतेषु स जिनोऽर्द्धदिनेषु च।
उत्तराषाढ़गुणोत्विन्दौ वर्त्तमानेऽजनि
प्रभुः॥
ततोऽम्बजिनमाहात्म्याकुतत्पीठकिरीटकाः।
प्रयीसुरवधिज्ञानतदृष्टान्ता सुरेश्वराः॥
मुक्तभेरीहरिध्वानघण्टानिर्घोषघोषणम्।

समाकर्ण्य सुरानूर्द्धं चूर्णितार्ब्बरवाहिनः॥
सप्तानीकमहाभेदाः सच्छोभाः कृतभूषणाः।
ऐन्द्राच्चतुर्दिशायाशे प्रायुः कुञ्जरपुरं पुरम्॥
त्रिःपरीत्य पुरं देवाः पुरन्दरपुरःसराः।
जिनमिन्द्रसुखं देवं तमुरुं च ववन्दिरे॥
मातुः प्रियुं विज्ञतार्थं सुप्तायाः सुरमायया।
इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ॥
यद्दोर्लीला करपद्माभ्यां तमभ्यर्च्य चिरं हरिः।
चक्रे नेत्रसहस्रोत्पुष्करीकवनार्चितम्॥
ततश्चन्द्रावदातानुभिन्नसुप्तमतङ्गजम्।
ग्रहभीषमिव हेमाद्रेर्मुक्ताधो मदनिर्झरम्॥
गण्डस्थलमदामोदभ्रमद्भ्रमरमञ्जुलम्।
तमिवाधित्यकावस्थतमालवनमञ्जितम्॥
कर्णान्तरततायत्तरक्तचामरसंहतिम्।
तं यथाधित्यकाधीरक्तांशोर्लोकमहावनम्॥
सुवर्णरत्नया चार्या परिवेष्टितविग्रहम्।
तमेव च यथोपात्तक्षत्रकर्मकलेवलम्॥
अनेकरदसंक्षुण्णतृणसञ्चीतपोषितम्।
तमिवोत्तुङ्गपद्मायतृणन्नायतसुराङ्गनम्॥
सुदृष्टदीर्घसञ्चारिकरदण्डद्विजान्तरम्।
तमिवात्यायतिस्थूलस्फुरद्भोगभुजङ्गमम्॥
ऐरावतधारितस्फीतध्वलातपवारणम्।
तमिवोडुस्थितार्भ्यर्क्षसम्पूर्णाग्निमण्डलम्॥
चामरेन्द्रभुजोत्क्षिप्तचलचामरहारिणम्।
तं यथा चमरीक्षिप्तवालव्यजनधीजितम्॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मज्जनम्।
देवैः सह गतः प्राप मन्दरं स पुरन्दरः॥
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरेः।
पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे॥
संस्थाप्य विबुधागीतक्षीरसागरवारिभिः।
प्रातकुम्भमयैः कुम्भैरभिषिच्य सुरैः समम्॥
वस्त्राभरणमालाद्यैरलङ्कृत्य स्तुतस्तुतिः।
आनीयमातुरुत्सङ्गे जिनं कृत्वा कृतोचितः॥
सिद्धार्थप्रियकारिण्योः सममानन्दायकम्।
वर्द्धमानाख्यया स्तुत्वा स देवो वासवोऽगमत्॥
मासात् पक्षदशाभ्यन्तुन्नधारा दिने दिने।
याः पूर्व्वमापतंस्ताभिस्तर्पितोऽर्थी जनोऽखिलः॥
वर्द्धमानः सुरैः सेव्यो वर्द्धते स यथा यथा।
पितृबन्धुजिनोकानामनुरागस्तथा तथा॥
सुरासुरनराधीशमौलिमालार्चितक्रमः।
सिंहस्यैवप्रमाणोऽभूद्वीरो भोगैः परिष्कृतः॥
गुरुवृत्तं न भोगेषु चित्तं तस्य चिरं क्षिरम्।
कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम्॥
ग्राम्यचित्तं महाचित्तं ज्ञात्वं सुप्तमबोधयत्।
नत्वा सारस्वतादित्यमुख्यालौकान्तिका सुराः॥
सौधर्म्मेशैः सुरैरेत्य कृतोऽभिषवपूजनः।
आरुह्य शिबिकां दिव्यामुह्यमानां सुरेश्वरैः॥
उत्तराषाढ़गुणोर्ज्येव वर्त्तमाने निशाकरे।
क्षत्रस्य मार्गशीर्षस्य दशम्यामग्रहणम्॥
अपनीय तगोः सर्व्वं वस्त्रमाल्यादिभूषणम्।
पञ्चमुष्टिभिरुद्धृत्य मूर्द्धजानभवत् सुधीः॥
वैराग्यकल्पवल्लीतं जिनस्य भ्रमरायितम्।

प्रतिमास्य सुराधीशो निदधौ दुग्धवारिधौ ॥
इन्द्रनीलमयैरेव क्षिप्तैर्मेरौ च चारुभात् ।
जिनेन्द्रकेशपुञ्जेन रक्षितः क्षीरसागरः ॥
जिनसिद्धमयं दृष्ट्वा तुष्टाः सर्वे सुरासुराः ।
लब्धा दशैवमत्याश्चर्यपूजाक्षणप्रयोपायकम् ॥
मनःपर्ययपर्यन्तचतुर्ज्ञानमहेक्षणः ।
मघो द्वादशवर्षाणि चकार द्वादशाङ्गकम् ॥
विहरन्नथ नाथोऽसौ गुणग्रामपरिग्रहः ।
ऋजुकूलापगाकूले भूभिकग्राममीयिवान् ॥
तप्तातापनयोगस्थः शालाभ्याशक्षिलातले ।
वैशाखशुक्लपक्षस्य दशम्यां वसुमाश्रितः ॥
उत्तराषाढगौ प्राप्ते शुक्लध्यानी निशाकरे ।
निहत्य घातिसङ्घातं केवलज्ञानमाप्तवान् ॥
केवलस्य प्रभावेण सहसा चलितासनाः ।
आगत्य महिमां चक्रुस्तस्य सर्वे सुरासुराः ॥
षट्षष्टिदिवसान् भूयो मौनेन विहरन् विभुः ।
आजगाम जगत्ख्यातं जिनो राजगृहं पुरम् ॥
आरुरोह गिरिं तत्र विपुलं विपुलश्रियम् ।
प्रबोधार्थं स लोकानां भानुमानुदयं यथा ॥
ततः प्रवृद्धसान्द्रैरापतद्भिरितस्ततः ।
जगत्सुरासुरैर्व्याप्ति जिनेन्द्रस्य गुणैरिव ॥
सौधर्मेन्द्रोऽथ देवैः परीतोऽभात् स भूधरः ।
नाभेयाधिष्ठितः पूर्वं यथाष्टापदपर्वतः ॥
चतुराशातुरङ्गारक्षितद्वादशगोपुरम् ।
क्षणं रत्नमयं दैवैः प्राकारवलयत्रयम् ॥
जाते योजनविस्तीर्णे पुरश्च समवादिके ।
विभागा द्वादशाभासन्नभःस्फाटिकभित्तयः ॥
प्रातिहार्यैर्युतोऽष्टाभिश्चतुस्त्रिंशद्गुणाद्भुतैः ।
तत्र देवैर्वृतोऽभासीज्जिनचन्द्र इव ग्रहैः ॥
इन्द्राग्निवायुभूत्याद्याः कौण्डिन्याद्याश्च पण्डिताः ।
इन्द्रभोदनयायाताः समवस्थानमर्हतः ।
प्रत्येकं सहिताः सर्वे शिष्याणां पञ्चभिः शतैः ।
तत्काश्यरादिसम्बन्धाः संयमं प्रतिपेदिरे ॥
श्रुत्वा चेटकराजस्य कुमारी चन्दना तदा ।
धौनैकाग्रसंवीताद्यार्यार्याणां पुरःसरी ॥
श्रेणिकोऽपि च संप्राप्तः सेनया चतुरङ्गया ।
सिंहासनोपविष्टं तं प्रणनाम जिनेश्वरम् ॥
छत्रचामरभृङ्गारैः कलसञ्जलदर्पणैः ।
व्यजनैः सुप्रतीकैश्च प्रसिद्धैरष्टमङ्गलैः ॥
जलाचलदुकूलाब्जगजसिंहवृषध्वजैः ।
गरुडध्वजसंयुक्तैरष्टभेदैर्मनोरमैः ॥
मानस्तम्भैस्त्रयोऽप्येकैश्चतुर्भिश्च महावनैः ।
वाप्यम्भोरुहखण्डैश्च वल्लीवलनताद्यैः ॥
नेत्रेष्टैर्दैवैः कृतैः सर्वैरन्येश्चातिशयैकया ।
यथा ख्यातस्तिसृभिर्मौनी समवस्थानभूरभूत् ॥
अर्केन्दोरिव शुक्लाद्या लिपया गुणैधिष्ठिताः ।
बाह्यतोऽभ्यन्तरस्थाने ज्ञातरूपाश्च विस्मृताः ॥
ततः कल्पनिवासिन्यो देव्यः कल्पलतासृजः ।
मेरोरिव जिनस्थाने ता वसुर्भोगभूमयः ॥
ततोऽजडतनारीभिरार्यिकाततिरावभौ ।
असुरद्विड्भिरारूढा शरदीव वनावली ॥
ज्योतिर्देवस्त्रियो तत्र रेजुरभ्रलतामृगयः ।
ताराका इव संक्रान्ता समवस्थानवाटके ॥
कल्पाधस्तरदेवानां ततस्तत्र विरेजिरे ।
करकुट्मलहारिण्यः साक्षादिव वनश्रियः ॥
ततो नागकुमारादिदेवो नागफणोज्ज्वलाः ।
नागलोकसमायाता नागवल्ल इवा बभुः ॥
ततोऽप्यग्निकुमाराद्या देवाः पातालवासिनः ।
ज्वलिनोज्ज्वलवेषास्ते दशभेदा बभासिरे ॥
ततः किन्नरगन्धर्वयक्षकिंपुरुषादयः ।
षोढाष्टाष्टविकल्पास्ते व्यन्तराश्च चकासिरे ॥
सप्रकीर्णकनक्षत्रसूर्याश्चन्द्रमसोग्रहाः ।
पञ्चभेदास्तदानल्पवपुषो ज्योतिषो बभुः ॥
मौलिकुण्डलकेयूरप्रालम्बकटिसूत्रिणः ।
हारिणः कल्पवृक्षाभास्ततोऽभान् कल्प-
वासिनः ॥
सपुत्रागमिनानैकविद्याधरपुरःसराः ।
व्यधीदन्वानुगा नानाभाषावैशद्यरञ्जनात् ॥
ततो हि नकुलेभेन्द्रवृषभद्विषदादयः ।
जिनानुभावसम्भूतविश्वास्याः स्वामिनो बभुः ॥
इति द्वादशभेदेषु परीतं विपुलं गिरिम् ।
गणेषु प्रथमं ज्ञात्वा क्षितेषु परितो जिनम् ॥
प्रत्यक्षीकृतविश्वार्थं कृतदोषक्षयक्षयम् ।
जिनेन्द्रं गौतमोऽपृच्छत्तीर्थार्थं पापनाशनम् ॥
स दिव्यध्वनिना विश्वसंशयच्छेदिना जिनः ।
दुन्दुभिध्वनिधीरेण योजनान्तरयायिना ॥
श्रावणस्यासिते पक्षे नक्षत्रेऽभिजिते प्रभुः ॥
प्रतिपद्यह्नि पूर्वाह्णे शासनार्थमुदाहरत् ॥
आचाराङ्गस्य तत्त्वार्थं तथा सूत्रकृतस्य च ।
जगाद भगवान् वीरः संस्थानसमवाययोः ॥
व्याख्या प्रज्ञप्तिहृदयं ज्ञातधर्मकथास्थितम् ।
श्रावकाध्ययनस्यार्थमन्तकृद्दशगोचरम् ॥
अनुत्तरदशस्यार्थं प्रश्नव्याकरणस्य च ।
तथा विपाकसूत्रस्य पवित्रार्थं ततः परम् ॥
त्रिषष्टिः त्रिशती यत्र दृष्टीनामभिधीयते ।
दृष्टिवादस्य तस्यार्थं पञ्चभेदस्य सर्वदृक् ॥
जगाद जगतां नाथः प्रथमं परिकर्मणः ।
सूत्रस्याद्यानुयोगस्य तथा पूर्वगतस्य च ॥
उत्पादपूर्वपूर्वस्य परमार्थं ततः परम् ।
अग्रायणीयपूर्वार्थमग्रगीरग्रहिताम् ॥
वीर्यप्रवादपूर्वार्थमस्तिनास्तिप्रवादजम् ।
ज्ञानसत्यप्रवादार्थमात्मकर्मप्रवादयोः ॥
प्रत्याख्यानस्य विद्यानुवादकल्याणपूर्वयोः ।
प्राणावायस्य पूर्वस्य तत्त्वार्थं तदनन्तरम् ॥
क्रियाविशालपूर्वस्य विशालार्थमशेषवित् ।
लोकबिन्दुसारार्थं चूलिकार्थं सवस्तुकम् ॥
अङ्गप्रविष्टतत्त्वार्थं प्रतिपाद्य जिनेश्वरः ।
अङ्गबाह्यमथोचत्तत्प्रतिपाद्यार्थकल्पनः ॥
सामायिकं यथार्थाख्यं स चतुर्विंशतिस्तवम् ।
वन्दनाख्यं ततः पूजां प्रतिक्रमणमेव च ॥
वैनयिकं विनेयेभ्यः कृतिकर्म ततोऽवदत् ।
दशवैकालिकां पुण्यीमुत्तराध्ययनं तथा ॥
तं कल्पव्यवहारं च कल्पाकल्पं * * *
कल्पं च पुष्करीकं च महापुष्करीकम् ॥
तथा निषद्यकां प्रायः प्रायश्चित्तोपवर्णनम् ।
जगत्त्रयगुरुः प्राह प्रतिमाद्यं स्थितोद्यतः ॥
मत्यादि केवलं तस्य स्वरूपं विषयं फलम् ।
अपरोक्षपरोक्षस्य ज्ञानस्योवाच संख्यया ॥
मार्गणास्थानभेदैश्च गुणस्थानविकल्पनैः ।
जीवस्थानप्रभेदैश्च जीवद्रव्यमुपादिशत् ॥
सत्संख्यानानुयोगैश्च सन्नामाद्यैः किमादिभिः ।
द्रव्यं क्षेत्रं च कालैर्भिन्नं पुद्गलादिविलक्षणम् ॥
विविधं कर्मबन्धं च हेतुं मुक्तदुःखदम् ।
मोक्षं मोक्षस्य हेतुं च फलं चाद्यगुणात्मकम् ॥
बन्धमोक्षफलं यत्र मुच्यते तन्निबन्धनम् ।
अन्तस्थितं जगौ लोकमलोकं च बहिःस्थितम् ॥
अथ सम्यक्त्वसंज्ञं स्वनाथं जिनभाषितम् ।
द्वादशाङ्गश्रुतं स्कन्धं सोपाङ्गं गौतमो ऽधात् ॥
त्रैलोक्यं संसदि स्फूर्तं जिनार्कवचनांशुभिः ।
सुस्फुटीभूतमद्यानिद्रं सुप्तोत्थितमिवाबभौ ॥
जिनभाषाधरस्कन्धमन्तरेण विभूतिभिः ।
तिर्यग्देवमनुष्याणां दृष्टिमोहमलीनयत् ॥
ततो जिनोक्तनानार्थमार्गमग्रहा च जन्यजम् ।
ग्रहाकाङ्क्षादिदानादिकलङ्कविगमोज्ज्वलम् ॥
सम्यग्दर्शनसद्रत्नं ज्ञानालङ्कारभायकम् ।
स्वकर्मक्षयहेत्वेकं पिनद्धमक्षिलाञ्छिभिः ॥
कायेन्द्रियगुणस्थानजीवस्थानकुलायुषाम् ।
भेदाद्यो निर्विकल्पांश्च निरूप्यागमचक्षुषा ॥
क्रियासु ज्ञानपूर्वासु यथादिपरिवर्जनम् ।
यस्यां जीवनिकायानामहिंसाद्यं महाव्रतम् ।
चक्षुर्गोचरजीवौघान् परिरक्षन् यतेर्यतः ।
दृर्याद्यसमितिराद्या सा व्रतशुद्धिकरी मता ॥
त्यक्त्वा कार्कश्यपारुष्यं यतेर्यत्नवतः सदा ।
भाषणं धर्मकार्येषु भाषासमितिरिष्यते ॥
पिच्छशुद्धिविधानेन शरीरस्थितये तु यत् ।
आहारग्रहणं साध्वादेषणा समितिर्यतेः ॥
निक्षेपणं यदा दानमीक्षित्वा योग्यवस्तुनः ।
समितिः सा तु विज्ञेया निक्षेपादाननामिका ॥
शरीरान्मर्मलत्यागं प्रगतासु सुभूमिषु ।
यत्नतस्समितिरेषा तु प्रतिष्ठापनिका मता ॥
एवं समितयः पञ्च गोप्याश्चित्तस्य गुप्तयः ।
वाङ्मनःकाययोगानां शुद्धरूपा प्रहस्तयः ॥
चित्तेन्द्रियनिरोधश्च षड्वावश्यकसत्क्रियाः ।
शौचमाचेलकमस्नं स्थितभुक्तिरदन्तता ॥
भूमिशय्याव्रतं दन्तमलमार्जनवर्जनम् ।
तपः संयमचारित्रं परीषहजयः परः ॥
अनुप्रेक्षाश्च धर्मश्च समाधिदुर्लभस्तवः ।
ज्ञानदर्शनचारित्रतपोविनयसंवरम् ॥
इति सप्तदशोऽयं कर्मनिर्मोक्षहेतुकः ।
सुरासुरनराध्यक्षं जिनोक्तं तदा नराः ॥
संसारभीरवः शुद्धजातिरूपकुलादयः ।
सर्वसङ्गविनिर्मुक्ता प्रगत्य प्रतिपेदिरे ॥
सम्यग्दर्शनसंशुद्धाः शुद्धैकव्रतनायकाः ।
सङ्घस्थो बभुः शुद्धा आर्यस्त्वार्यिकाव्रतम् ।
पञ्चधाणुव्रतं केचित् त्रिविधं च गुणव्रतम् ।

ग्रिव्याव्रतं चतुर्भेदं तच्च स्त्रीपुरुषा दधुः ॥
तिर्यञ्चोऽपि यथाशक्ति नियमेष्ववतस्थिरे ।
देवाः सद्दर्शनज्ञानजिनपूजासु रेमिरे ॥
श्रेणिकेन तु यत् पूर्वं नरकायुष्कमर्जितम् ।
परस्त्रीतिक्रमारब्धं नारकायुष्कमक्षते ॥
तत्तु क्षायिकसम्यक्त्वात् स्वस्थितिं प्रथमस्थितौ ।
प्रापद् वर्षसहस्राणामशीतिं चतुरुत्तराम् ॥
चयस्त्रिंशत् चतुरा: क क चेयमपराश्रिति: ।
अहो क्षायिकसम्यक्त्वप्रभावोऽयमनुत्तर: ॥
अक्रूरो वारिषेणो यो यो भय: स तथापरे ।
कुमारा मातरश्चैषां पराक्षान्त:पुरस्त्रिय: ॥
सम्यक्त्वं शीलसद्रत्नं प्रौषधं जिनपूजनम् ।
प्रतिपद्य विनेतुस्तं जिनेत्वं श्रेणिकं जिनम् ॥
तत: प्रणम्य देवेन्द्रा जिनेन्द्रं स्तोत्रपूर्वकम् ।
यथास्थं ययुर्युक्ता निजवर्गैर्निनादयन् ॥
श्रेणिकोऽपि गुणश्रेणीसुचकैरभिरूढवान् ।
अभिष्टुत्य जिनं नत्वा प्रविवेशपुरीपुरम् ॥
नि:सरद्भिर्विशद्भिश्च सभा जैनी जनोत्तमै: ।
क्षुभ्यो क्षुभितैर्वेला नदीपूरैरिवाम्बुधि: ॥
आकीर्णमेव तैर्निर्त्यं सभामण्डलमर्हत: ।
क्षीयते वा कदा स्फीतिं भानुभिर्भानुमण्डलम् ॥
नोदयास्तमितं तत्र ज्ञायते ज्ञप्तमण्डलम् ।
धर्मचक्रप्रभाचक्रप्रभामण्डलरोचिषाम् ॥
तच्च तीर्थकर: कुर्वन् प्रत्यहं धर्मदेशनम् ।
सेवित: श्रेणिकेनास्य न हि तृप्तिस्त्रिवर्गजा ॥
गौतमश्च समासाद्य तदा तदुपदेशत: ।
सर्वानुयोगमार्गेषु प्रवीण: स बभूवत् ॥
ततो जिनपतेस्तुङ्गैराज्ञा राजगृहं पुरम् ।
ज्ञातमण्डलबहिर्याममण्डलं महिमोत्सवै: ॥
ज्ञत: सामन्तसंघातैर्महामन्त्रिपुरोहितै: ।
प्रजाभिश्चैलगेहाद्यो मगधो विषयोऽखिल: ॥
पुरेषु ग्रामघोषेषु पर्वताग्रे ह्रदान्तरे ।
नदीतटवनान्तेषु सदा यद्दर्शिनावली ॥
तिष्ठन्नेव महोदये विघटयन्मोहान्धकारोन्नतिं
प्राग्देशप्रजया विधाय मगधादेशं प्रबुद्धप्रजम् ।
तद्दृत्या पृथुदेशमध्यमगमन्मध्यन्दिनश्रीधरं
मिथ्याज्ञानहिमान्तलब्धजिनरविर्बोधप्रभा-
मण्डल: ॥")
कोकिल: । इति हेमचन्द्र: ॥ धनुर्धर: । इति शब्दरत्नावली ॥ एकवीरस्तथा: । इति राजनिर्घण्टः ॥ लक्ष्मण: । यथा,—
"लक्ष्मणश्च महावीरं पतितं रणभूतले ॥"
अङ्गदादि: । यथा,—
"अङ्गदाद्यैर्महावीरैर्वेष्टितं रक्षकुञ्जरम् ॥"
इति तन्त्रसारे हनूमत्कवच: ॥
हनूमान् स्वयमपि महावीरत्वेन प्रसिद्ध: ॥
महावीरा, स्त्री, (महावीर + टाप् ।) वीरकाकोली । इति रत्नमाला ॥
महावीर्य:, पुं, (महत् विग्रहादये विपुलं वीर्यमस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (महत् वीर्यं तपोबलमस्य ।) बुद्धभेद: । इति त्रिकाण्डशेष: ॥ वाराहीकन्द: । इति राजनिर्घण्टः ॥
(वितथस्य पुत्रभेद: । यथा, भागवते । ६ । २१ । १ ।
"वितथस्य सुतास्तस्योर्वत्तत् वत्सो जयत्कत: ।
महावीर्यो नरो गर्ग: संकृतिस्तु नरात्मज: ॥")
अतिशयबलयुक्ते, त्रि ॥ (यथा, महाभारते । ५ । १७१ । ४६ ।
"तत: क्षिप्त महावीर्यो भीम: प्राज्ञतमो कृपान् ।
अधिक्षिप्य महातेजाश्चिक्षेप: कन्या जहार ता: ॥"
विराज: पुत्र: । यथा, विष्णुपुराणे । २ । १ । १६ ।
"नरो नयस्य तनयस्तत्पुत्रोऽभूद्विराट् तत: ।
तस्य पुत्रो महावीर्यो धीमांस्तस्मादजायत ॥")
महावीर्या, स्त्री, (महत् वीर्यमस्या: टाप् ।) संज्ञा। सा च स्त्र्यैपत्नी । इति त्रिकाण्डशेष: ॥ वनकार्पासी । इति शब्दरत्नावली ॥ महाव्रतावरी । इति राजनिर्घण्टः ॥
महावृहती, स्त्री, (महती वृहती ।) वार्ताकी । इति त्रिकाण्डशेष: ॥
महावृक्ष:, पुं, (महान् वृक्ष: ।) खदीवृक्ष: । इति हलायुध: ॥ (यथास्य पर्य्यायः ।
"वज्रवृक्षो महावृक्ष: खदी खुर सुधा गुडा ॥"
यथा, सुश्रुते सूत्रस्थाने ४४ अध्याये ।
"महावृक्षपय:पीतैर्यवागूस्तखदै: कृता ।
पीता विरोचयत्याशु गुडेनोत्कारिका कृता ॥")
वृहद्वृक्षश्च ॥
महावेग:, पुं, (महान् अमोघो दुर्वारो वा वेगो यस्य ।) शिव: । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ (महान् वेग: ।) अतिजव: । (महान् वेगोऽस्य ।) तद्युक्ते, त्रि ॥ (यथा, महाभारते । १ । १५५ । १२ ।
"विकर्मस्थौ महावेगौ गर्ज्जमानौ परस्परम् ।
पश्य त्वं युधि विक्रान्तावेतौ च नररात्तसौ ॥")
महाव्याधि:, पुं, (महांश्चासौ व्याधिश्चेति ।) महारोग: । स तु कुष्ठादि: । यथा,—
"सर्व्वव्याधिविनिर्मुक्तो महाव्याधिर्विमोचन: ।
पठनात् संप्रजप्तेन जीवन्मुक्तो भवेन्नर: ॥"
इति ब्रह्मयामले गायत्रीकवचम् ॥
महाव्याहृति:, स्त्री, (महती चासौ व्याहृतिश्चेति ।) प्रणवसहायुक्तव्याहृतित्रयम् । यथा । ॐ भू: स्वाहा ॐ भुव: स्वाहा ॐ स्व: स्वाहा । इति भवदेवभट्ट: ॥ (यथा, मनौ । २ । ८१ ।
"ओङ्कारपूर्विकास्तिस्र: महाव्याहृतयोऽव्यया: ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥")
महाव्रणं, क्ली, (महच्च तद्व्रणश्चेति ।) दुश्चिकित्स्यव्रणम् । नाली वा इति भाषा । यथा,—
"कुर्य्यात् सप्तदशाङ्गुलं तथाष्टादशकं प्रिये ! ।
महाव्रणविमोक्षाय विंशाङ्गुलं प्रदेशत: ॥"
इति तिथ्यादितत्त्वधृतवाराहीतन्त्रवचनम् ॥
महाव्रतं, क्ली, (महच्च तद्व्रतञ्चेति ।) ब्राह्मणवार्षिकव्रतम् । यथा । 'तेन यज्ञकालादूर्द्धं विंशत्यधिकशततस्य यावदवग्रहं तावत्परिमाणमहाव्रतानुरूपा धेनवो दातव्या: ।' इति प्रायश्चित्तविवेके भवदेवभट्टधृततम् ॥ शरत्कालीनदुर्गापूजनम् । यथा,—
"महाव्रतं महापुण्यं ब्रह्मरुद्रैरनुष्ठितम् ।
कर्त्तव्यं सुरराजेन्द्र ! देवीभक्तिसमन्वितै: ॥"
इति तिथ्यादितत्त्वधृतदेवीपुराणवचनम् ॥
अरुणोदयकालीनमाघस्नानम् । यथा,—
"वासुदेवं हरिं कृष्णं श्रीधरञ्च स्मरेन्नत: ॥
दिवाकर ! जगन्नाथ ! प्रभाकर ! नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं महाव्रतम् ॥"
इति मत्स्यसूक्तधृतपद्मपुराणवचनम् ॥
(महाव्रतधारिणि, त्रि । यथा, महाभारते । १३ । ५७ । २१ ।
"ततोऽन्यस्मिन् वनोद्देशे पुनरेव ददर्श तम् ।
कौशल्यां दृश्यां समासीनं अपमानं महाव्रतम् ॥")
महाव्रती, [न्] पुं, (महाव्रतं योगनियमादिकमस्यास्तीति । व्रत + इनि: ।) शिव: । इति हेमचन्द्र: । २ । १११ ॥ उरुक्रट: । इति त्रिकाण्डशेष: ॥ महाव्रतयुक्ते, त्रि ॥ (यथा, कथासरित्सागरे । ३७ । ५८ ।
"इत्यवोचत्तथा सावज्ञाक्षे महाव्रतिनरुद्धा ।
ऊचुर्निश्चयदक्षं ते चत्वार: सहयायिन: ॥")
महाव्रीहि:, पुं, (महान् व्रीहि रव हृदयशूलत्वात् ।) मालुवालु । संज्ञाविशेष: । स च दशनिखर्व्वः । ललाटम् । इति मेदिनी । खे, १६ ॥ (महान् महार्घ: व्रीहि: ।) निधिविशेष: । इति विश्व: ॥ कर्णनेत्रयोर्मध्यगतास्थि । यथा,—
"कर्णनेत्रान्तरालास्थि महाव्रीहि: प्रकीर्त्तित: ।"
तस्य मालया जपविधिर्यथा,—
"महाव्रीहिमयी माला नीलसारस्वते विधौ ।
वृत्तललाटास्थिखण्डेन रचिता जपमालिका ॥
महाव्रीहिमयी माला तारादिसाधने प्रिये ! ।"
इति तन्त्रसारधृतसुरुक्ममालातन्त्रम् ॥
(महान् व्रीहि: ।) वृहद्व्रीहि: । यथा,—
"पौण्ड्रं दधौ महाव्रीहिं भीमकर्म्मा वृकोदर: ।'
इति श्रीभगवद्गीतायाम् १ अध्याय: ॥
(सर्पभेद: । यथा, भागवते । ५ । २४ । ११
"ततोऽधस्तात् पातालं नागलोकपतयोवासुकि प्रमुखा: यद्धकुलिकमहाव्रीहिशङ्खश्वेतधनञ्जयधृत राष्ट्रपद्मकर्कोटकमहाशङ्खशङ्खचूडकम्बलाश्वतरैरावतादयो महाभोगिनो महामर्षा निवसन्ति ।")
महाव्रीहि:, पुं, राजधान्य: । इति राजनिर्घण्टः (महांश्चासौ व्रीहिश्चेति ।) अतिधूर्त्ते, त्रि ॥
महाव्रीह्यपुष्पिका, स्त्री, (अल्पं पुष्पं इति अल्पार्थे ङीष् । ततः स्वार्थे कन् स्त्रियां टाप् पूर्वस्य ह्रस्वश्च । व्रीह्यपुष्पिका यस्या: । महती चासौ व्रीह्यपुष्पिका चेति ।) वृहद्व्रीह्यपुष्पी

तत्पर्य्यायः। हस्तपर्णी २ श्वेतपुष्पा ३ महाश्विता ४ महाश्वेतबला ५ महाश्वेता ६। अस्या गुणाः। कषायत्वम्। उष्णत्वम्। ग्रहत्वम्। रक्तनिवारकत्वम्। कृमिदूषणमोहनत्वमत्रणादिषु प्रोक्तत्वञ्च। इति राजनिर्घण्टः॥

महाश्रुता, स्त्री, (महत् श्रुतञ्च मूलानि यस्याः। टाप्।) महाश्रुतावरी। इति राजनिर्घण्टः॥

महाश्रुतावरी, स्त्री, (महती चासौ श्रुतावरी चेति।) हस्वश्रुतावरी। तत्पर्य्यायः। श्रुतवीर्य्या २ सहस्रवीर्य्या ३ सुरसा ४ महाशुक्लदन्तिका ५ वीरा ६ तुङ्गिनी ७ बहुपुत्रिका ८ कर्कटशृङ्गी ९ महावीर्य्या १० गजिभिक्षा ११ महाश्रुता १२ सुवीर्य्या १३। अस्या गुणाः। वश्यत्वम्। मधुरत्वम्। पित्तनाशित्वम्। हिमत्वम्। मेहकफवातनाशित्वम्। तिक्तत्वम्। मेहत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"महाश्रुतावरी लघ्वी श्रुतस्तन्यकफप्रिया।
सहस्रवीर्य्यासिद्धा च ज्ञेया प्रोक्ता महोदरी॥
महाश्रुतावरी मेध्या कृष्णा दृष्या रसायनी।
श्रुतवीर्य्या सिद्धनाम्नी शिखण्डीनयनाभया॥"

इति भावप्रकाशः॥

महाश्रुतिः, त्रि, महान् आश्रुतिरभिप्रायो मनो वा यस्य सः। इति भरतः॥ तत्पर्य्यायः। मनीषः २। इत्यमरः। ३। २। ३॥ महानुभावः ३। इति शब्दरत्नावली॥ उदात्तः ४ महामनाः ५। इति जटाधरः॥ उद्भटः ६ उदारः ७ उदीर्णः ८ महात्मा ९। इति हेमचन्द्रः। ३। १३१॥ (यथा, कथासरित्सागरे। ७२। १२८।

"देवात्मबुद्धः शुभाव स वराहो महाश्रयः॥"

महान् आश्रयो जलानामाधारः।) समुद्रे, पुं। इति शब्दरत्नावली॥

महाश्रेया, स्त्री, (महती चासौ श्रेया चेति।) राजश्रेया। इति हेमचन्द्रः। ३। ३८०॥ हस्वश्चेया च॥

महाश्वरः, पुं, (महांश्चासौ श्वरश्चेति।) स्थूलश्वरः। इति राजनिर्घण्टः॥

महाश्वल्कः, पुं, (महान् हस्वः श्वल्को यस्य।) चिल्लटशाकः। इति शब्दरत्नावली।१८७॥ (यथा, मनुः। ३। २७२।

"कालशाकं महाश्वल्काः खड्गलोहामिषं मधु।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः॥"

(महान् श्वल्कः।) हस्वश्चल्कश्च। तद्युक्ते, त्रि॥

महाश्वाकं, क्ली, (महच्च तत् श्वाकञ्च।) हस्वश्वाकविशेषः। इति केचित्॥

महाश्वाखा, स्त्री, (महती श्वाखा यस्याः।) नागबला। इति राजनिर्घण्टः॥

महाश्वालिः, पुं, (महांश्चासौ श्वालिश्च।) स्थूलश्वालिः। इति राजनिर्घण्टः॥ तत्पर्य्यायः। सुशल्किकः २। इति हेमचन्द्रः। ३। २७५॥ (स च धान्यविशेषः। तद्यथा,—

"रक्तश्वालिः सवालश्च पाण्डुकः श्वुक्लनामतः।
सुगन्धकः कर्दमको महाश्वालिश्च दूषकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महाश्विः, पुं, (महांश्चासौ श्विश्चेति।) महादेवः। यथा,—

"रत्नसिंहासनस्थञ्च महाभूषणभूषितम्।
महाश्विं श्विवकरं श्विवबीजं श्विवाश्रयम्॥"

इति ब्रह्मवैवर्त्ते गणपतिखण्डे २६ अध्यायः॥

महाश्रीता, स्त्री, (महत्यधिका श्रीता श्रीतवीर्य्या।) श्रुतश्रेणी। इति शब्दचन्द्रिका॥ (महत् श्रीतं श्रीतगुणोऽस्याः।) अतिश्रीतवीर्य्ययुक्ते, त्रि॥

महाश्रुक्तिः, स्त्री, (महती श्रुक्तिः। शुक्लाकरत्वेनास्या महत्वम्।) शुक्लामाता। सा च श्रुक्तिः। इति राजनिर्घण्टः॥ (महती स्थूलाश्रुक्तिः।) हस्वश्रुक्तिश्च॥

महाश्रुक्ला, स्त्री, (महती चासौ श्रुक्ला श्रुक्लवर्णा च।) सरस्वती। इति भूरिप्रयोगः॥ अतिश्रुक्लवर्णयुक्ते, त्रि॥

महाश्रुभ्रं, क्ली, (महान् श्रुभ्रो वर्णोऽस्य।) रजतम्। इति राजनिर्घण्टः॥ अतिश्रुभ्रवर्णयुक्ते, त्रि॥

महाश्रूद्रः, पुं, (महान् श्रूद्रः।) आभीरः। इति महाश्रूद्रीशब्ददर्शनात्॥

महाश्रूद्री, स्त्री, (महाश्रूद्रस्य भार्य्या इति। "अजाद्यतष्टाप्।" ४। १। ४। इत्यत्र। "महत्पूर्व्वस्य प्रतिषेधः।" इति काशिकोक्त्या पुंयोगलक्षणा ङीष्।) आभीरी। इत्यमरः। २। ६। १९॥

महाश्वेता, स्त्री, (महती चासौ श्वेता च।) श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥

महाश्वेताश्मन्, क्ली, (महच्च तत् श्वेताश्मच। अत्र हि जीवानां मरणे सकलकर्म्मनाशतः पुनर्जन्ममरणाद्यभावादस्यातथात्वम्।) काशीं। इति काशीखण्डम्॥

महाश्यामा, स्त्री, (महती चासौ श्यामा च।) श्यामालता। इति रत्नमाला॥ श्विंशपावृक्षः। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये। "श्यामामहाश्यामाश्वदण्डीत्यादि॥" वृक्षादिवृक्षः। तत्पर्य्यायो यथा,—

"कण्टकाख्या महाश्यामा वृक्षपादीति
वक्ष्यते॥"

इति गारुडे २०८ अध्याये॥)

महाश्रमणः, पुं, (महान् श्रेष्ठश्चासौ श्रमणो बौद्धभिक्षुश्चेति।) बुद्धविशेषः। स च श्राक्यमुनिः। तत्पर्य्यायः। सर्व्वार्थसिद्धः २ कुलिश्राक्षवः ३ गोपेश्वः ४। इति हेमचन्द्रः॥

महाश्रावणिका, स्त्री, (महती चासौ श्रावणिका च।) क्षुपविशेषः। वड़ धुलकुड़ी इति भाषा। तत्पर्य्यायः। महाश्रुक्षी २ लोचनी ३ कदम्बपुष्पी ४ विकषा ५ क्रोड़ा ६ चोड़ा ७ मलकुषा ८ नदीकदम्बः ९ सुक्काख्या १० महाश्रुक्लिका ११ माता १२ श्रविरा १३ लोतनी १४ भूकदम्बः १५ अलम्बुषा १६। अस्य गुणाः। उष्णत्वम्। तिक्तत्वम्। दीपनमधुरत्वम्। वायुश्रमनत्वम्। खरत्वम्। रेचनत्वम्। श्लेष्मत्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥ तत्पर्य्यायगुणाः।

"सुक्षी भिक्षुरपि प्रोक्तः श्रावणी च तपोधना।
श्रवणाढ्या सुक्षितिका तथा श्रवणपुष्पिका॥
महाश्रावणिकाख्या तु सा स्मृता भूकदम्बिका।
कदम्बपुष्पिका च स्यादम्बया तु तपस्विनी॥
सुक्षितिका कटुः पाके वीर्य्योष्णा मधुरा लघुः।
मेध्या गजाग्निचौरक्षुत्कृमिमेदोगुदार्शिजित्॥
श्लीपदाढ्यव्रणकारश्लीपदमेदोगुदार्शिजित्।
महासुक्षी च सुक्षी च गुणैरुक्ता महर्षिभिः॥"

इति भावप्रकाशः॥

महाश्रीः, स्त्री, (महती श्रीरिव।) बुद्धशक्तिविशेषः। तत्पर्य्यायः। तारा २ ओङ्कारा ३ खाहा ४ श्रीः ५ मनोरमा ६ तारिणी ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदूरवासिनी १२ भद्रा १३ वेष्मा १४ नीलसरस्वती १५ शुक्लिनी १६ महातारा १७ वसुधारा १८ धनदा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥

महाश्वेता, स्त्री, (महत्यतिशुद्धा श्वेता। महान् श्वेतो वर्णो यस्या वा।) सरस्वती। इति त्रिकाण्डशेषः॥ ब्रह्मभूमिकुष्माण्डः। तत्पर्य्यायः। श्वीरविदारी २ क्षत्रगन्धिका ३। इत्यमरः। २। ४। ११०॥ श्वीरविदारिका ४ श्वीरवल्ली ५ श्वीरकन्दा ६। इति जटाधरः॥ श्वीरिका ७। इति शब्दरत्नावली॥ श्वेतापराजिता। इति रत्नमाला॥ (पर्य्यायोऽस्या यथा,—

"गिरिकर्णी महाश्वेता स्थलपुष्पा सिता
क्वचित्॥"

इति वैद्यकरत्नमालायाम्॥)

सिता। तत्पर्य्यायः। मधुला २। इति त्रिकाण्डशेषः॥ श्वेतकिणिहीवृक्षः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा,—

"कटभी किणिही श्वेता महाश्वेता च
रोहिणी॥")

दुर्गा। यथा, देवीपुराणे ७५ अध्याये।

"श्वेतं शुक्लं श्विवस्थानं यस्माच्चेह समागता।
महाभावसमुत्पन्ना महाश्वेता ततः स्मृता॥"

(किम्पुरुषवर्षस्थितहंसनामकगन्धर्वराजस्य गौरीगर्भोत्पन्ना कन्या। तत्कथा कादम्बर्य्यां विस्तरशो दृश्या॥)

महाषष्ठी, स्त्री, (महती चासौ षष्ठी च। महामङ्गलदात्री षष्ठी वा।) दुर्गा। यथा,

ॐ दुं दुं दुं दुर्गे दुर्गे त्राय्य त्राय्य स्वाहा दह दह मथ मथ वधवधसर्व्वदुष्टान् महाषष्ठीरूपेण बालकं रक्ष रक्ष शिरजीविनं कुरु कुरु श्रीं ह्रीं दूं षट् स्वाहा।" इति योगिनीतन्त्रे महाषष्ठीकवचम्॥

महाष्टमी, स्त्री, (महत्या महाद्देया अष्टमी। महती अष्टमीति वा।) आश्विनशुक्लाष्टमी। यथा,—
"आश्विने शुक्लपक्षस्य भवेद् या अष्टमी तिथिः।
महाष्टमीति सा प्रोक्ता देव्याः प्रीतिकरा परा॥"
इति कालिकापुराणे ५६ अध्यायः॥
तस्यां पूजाविधिः पुत्रवत उपवासनिषेधश्च यथा,—
"अष्टम्यां रुधिरैर्मांसैर्महामांसैः सुगन्धिभिः।
पूजयेद्दुर्जातीयैर्बलिभिर्भोजनैः शिवाम्॥
सिन्दूरैः पट्टवासैश्च नानाविधविलेपनैः।
पुष्पैरनेकजातीयैः फलैर्बहुविधैरपि॥
उपवासं महाष्टम्यां पुत्रवान्न समाचरेत्।
यथा तथैव पूजाला व्रती देवीं प्रपूजयेत्॥
पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा।
विसर्जयेद्द्वयन्यान्तु अवधी सावरोत्सवैः॥"
इति तन्त्रे ६० अध्यायः॥
तच्चार्हराजपूजा। यथा,—
"कन्यासंस्थे रवावीशे शुक्लाष्टम्यां प्रपूजयेत्।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः॥
पूजां समारभेद्वा नक्षत्रे वारुणेऽपि वा।
पशुघातस्य कर्त्तव्यो गवलाजवधस्तथा॥"
इति देवीपुराणवचने वारुणपदेन पूर्वाषाढोक्तेः। इति तिथ्यादितत्त्वम्॥

महाष्टमः, पुं, (महाश्चासौ अष्टमश्च। यद्वा, महतो हिमाद्रेर्महादेवस्य वा आश्रमः निकटवर्त्ती।) कुबेरः। इति शब्दमाला॥ (महदस्याश्रमः) अतिनिकटश्च॥

महासकरः, पुं, (महांश्चासौ सकरश्च।) दुष्टशूकरः। अस्य गुणाः। यथा,—
"महासकरसंज्ञस्तु स्निग्धः पित्तकफापहः।
गुरुर्गुरौ मधुरो वृष्यो वातसाधारणः स्मृतः॥"
इति भावप्रकाशः॥

महासमङ्गा, स्त्री. (महती चासौ समङ्गा च।) वृक्षविशेषः। कशहिया इति हिन्दीभाषा। तत्पर्य्यायः। ओदनिका २ ओदनाह्वया ३ हृद्या ४ वरा ५ दृढबला ६ तण्डुला ७ भुजङ्गजिह्वा ८ घृतपाकिनी ९ घृतबला १० घृतोत्तमा ११ बलोत्तरा १२ बला १३ क्षीरशिम्बी १४ बालजिह्वा १५। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। दोषत्रयनाशित्वम्। युक्ता वृद्धा प्रयोगे ज्वरदाहनाशित्वञ्च। इति राजनिर्घण्टः॥

महासर्ज्जः, पुं, (महांश्चासौ सर्जश्च।) धनसः। अस्यगुणाः। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम्।
"अन्यसर्जौ धनेसर्जौ महासर्जोऽसनस्तु सः॥")

महाषड्जः, पुं, (षड्जते इति। षड्ज+अच्। महान् षड्जः।) कुलकदम्बः। इति राजनिर्घण्टः॥ (बाङ्गल्य इति गौड़ादौ प्रसिद्धः। यथास्य पर्य्यायः।

"अम्लासोऽम्लाटनः प्रोक्तस्तथाम्लासक इत्यपि।
कुरण्टको वर्षपुष्पः स एवोक्तो महासहः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासहा, स्त्री, (महासह+स्त्रियां टाप्।) माषपर्णी। (पर्य्यायोऽस्या यथा,—
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा।
ह्रस्वशुम्बा च काम्बोजी पाण्डुलोमघ्नपर्णिनी॥"
इति वैद्यकरत्नमालायाम्॥
पर्य्यायान्तरं यथा,—
"माषपर्णी सूर्य्यपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमघ्नपर्णी च ह्रस्वशुम्बा महासहा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
अम्लानसहः। इत्यमरः। २।४।७१। (कुलकः। तत्पर्य्यायो यथा,—
"कुलको भद्रतरणी हृद्यपुष्पोऽतिकेसरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महासाम्पनं, क्ली, (महत् साम्पनम्।) व्रतविशेषः। यथा। अथ महासाम्पनम्। तत्र ह्यहसाध्यसाम्पनसङ्का याज्ञवल्क्यः।
"पृथक्साम्पनदैर्द्रव्यैः षड्हः सोपवासकः।
सप्ताहेनैव साध्योऽयं महासाम्पनः स्मृतः॥"
इदन्तु सप्ताहसाध्यम्। जाबालः।
"गोघृतं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
एकैकं क्रमशोऽश्नीयादहोरात्रमभोजनम्॥
ह्रस्वः साम्पनो नाम सर्व्वपापप्रणाशनः।
एकैकमेनदेवं हि चिराच्चतुपयोजयेत्॥
अष्टरात्रोपवासेदमं महासाम्पनमे विधिः॥"
इदन्तु सप्ताहसाध्यसाम्पनसङ्का एकविंशतिदिनसाध्यं महासाम्पनसङ्कम्। महासाम्पनं षैतुघटकदानसमम्। जाबालोक्तमहासाम्पनस्य एकविंशतिदिनसाध्यत्वेन सप्ताहसाध्यसाम्पनात् त्रिगुणत्वाच्चतुर्घटकं महासाम्पनमे षैतुघटकं देयम्। इति प्रायश्चित्तविवेकः॥

महासारः, पुं, (महान् सारः स्थिरांशो यस्य।) दृढस्खदिरः। इति राजनिर्घण्टः॥

महासाहसं, क्ली, (महच्च तत् साहसञ्च।) अतिबलात्कारजनकार्य्यम्। अतिप्रयत्नजः। इति साहसशब्दार्थे मेदिनी। से, ४५॥ (महत् साहसमत्र।) अतिदुष्कृतकर्म्म। अतिप्रयत्नः। इति साहसशब्दार्थे हेमचन्द्रः। १। ७००॥

महासाहसिकः, त्रि, (महानतिप्रयः साहसिकः।) चौरः। इति केचित्॥ अतिसाहसयुक्तश्च। बलपूर्व्वापहारकः। यथा,—
"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः।
पीड्यमानाः प्रजा रक्षेन् नायस्त्रेण विशेषतः॥"
इति याज्ञवल्क्यवचनम्॥
चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणः तस्कराः। दुर्वृत्ताः दूषणालिङ्गितसवाद्यः। सर्व्वो वर्णं सहसा बलेन लब्धं साहसं महच्च तत् साहसञ्च महासाहसं तेन वर्त्तन्त इति महासाहसिकाः

प्रच्छन्नापहारिणः। इति मिताक्षरायामाचाराध्यायः १॥

महासिंहः, पुं, (महान् सिंह इव।) शूरभटः। इति राजनिर्घण्टः॥ (महांश्चासौ सिंहश्च।) हृद्यसिंहः। स च देवीवाहनम्। यथा,—
"उत्पाद्य च महासिंहं देवी चक्रमधारयत्।"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम्॥

महासुखं, क्ली, (महत् सुखमस्मिन्।) ब्रह्मपदम्। इति त्रिकाण्डशेषः॥ (महच्च तत् सुखञ्च। अतिप्रयानन्दः। महत् सुखमस्य तद्वति, त्रि॥)

महासुखः, पुं, (महत् सुखं ईश्वरानन्दोऽस्य अस्माद् वा।) शुद्धः। इति त्रिकाण्डशेषः॥

महासुगन्धा, स्त्री, (महान् सुगन्धोऽस्याः।) गन्धनाकुली। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे २६ अध्याये।
"महासुगन्धामथवा पालिन्दीषाञ्चपेषिताम्।
ग्रीवांषाञ्च परीषेकान् प्रदेहानञ्च योजयेत्॥")
अतिसुगन्धयुक्ते त्रि॥

महाकुम्भा, स्त्री, (महदसौ कुम्भा।) वाकुची। इति राजनिर्घण्टः॥ अतिप्रयकुम्भे, त्रि॥

महासेनः, पुं, (महती सेना यस्य।) कार्त्तिकेयः। इत्यमरः। १।१।४१॥ (यथा अनर्घराघवे। ४।१२।
"महासेनो यस्य प्रमदमदहासङ्करैः
शरैर्मुक्तो जीवन्हरिरिव शरज्जन्म समभवत्।
इमाश्च ज्वालाली सुजवनमहादुर्गविषमा
मयं वीरो वारानजयदुपविंशान् वसुमतीम्॥"
महती सेना अनुचरोऽस्य।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ महासेनापतिः। इति मेदिनी। ने, २०१॥ (यथा महाभारते। ५। १६१। २१।
"स च राजा दयार्णेषु महासेनो सुदुर्जयः।
हिरण्यवर्मा दुर्द्धर्षो महासेनो महामनाः॥")
दुष्टार्द्धनुपिष्टविशेषः। इति हेमचन्द्रः। राजविशेषः। यथा, कथासरित्सागरे। १।१।६४॥
"अथसेनस्य तस्याथ पुत्रोऽतिमदोत्कटः।
समुत्पन्नो महासेनसंज्ञा नृपतिकुञ्जरः॥")

महास्कन्धा, स्त्री, (महान् स्कन्धः शाखाबहिर्भागो यस्याः।) जम्बूवृक्षः। इति राजनिर्घण्टः॥ (महान् स्कन्धोऽस्य॥) दृढस्कन्धयुक्ते त्रि॥

महास्थाली, स्त्री, (स्थाल+"आयामदकुक्षजोर्ङीत्यादि।" ४। १। ४२। इति ङीष्। महती स्थाली।) पृथिवी। इति शब्दमाला॥ मेरुस्थानञ्च॥

महास्नायुः, पुं, (महती स्नायुः अस्थिबन्धनरज्जुः।) कच्छपः। इति हेमचन्द्रः। ३। २८५॥

महास्रग्वी, [न्] पुं, (महती स्रक् अस्त्रिमाला। सा अस्यास्तीति विनिः।) शिवः। इति महाभारते तस्य सहस्रनामस्तोत्रम्। १३।१७।१३३॥

महास्वनः, पुं, (महान् स्वनः शब्दो यस्य।) मज्जतूर्य्यम्। इति त्रिकाण्डशेषः॥ (महान्स्वनः।) दृढशब्दः। तद्युक्ते, त्रि॥ (यथा, महाभारते। ५। १५। ५।

महित°

"अमर्षश्च कौन्तेयो दृढवैरश्च पाण्डवः।
अनर्हश्चासौ सोऽन्यादृक्षियं वक्ष्यति मह-
स्वनः॥")

महाहनुः, पुं, (महती हनुर्यस्य।) गृध्रः। इति महाभारते तस्य सहस्रनामस्तोत्रम्।१३।१७। १३४॥ हनुशब्दयुक्ते, त्रि॥ (सर्पविशेषः। यथा, महाभारते। १। ५७। १०।
सुहनुः गृध्रशिरोमा च सुरोमा च महाहनुः।
एते तक्षकजा नागाः प्रविष्टा हयवाहनम्॥")

महाहविः, [स्] क्ली, (महत् सुप्रशस्तं हविः।) गव्यघृतम्। यथा,—
"गव्यायामथवा पिण्डं खड्गमांसं महाहविः।
कालशाकं तिलाज्यं वा लशुरं मासलक्षये॥"
इति मार्कण्डेयपुराणे आह्निकल्पः॥
(महाप्रशस्तया सर्वं जगत् हूयतेऽस्मिन्। यद्वा, महान्ति हवींषि आज्यपुरोडाशादिरूपाण्यस्य।) विष्णुः॥ इति महाभारते तस्य सहस्रनामस्तोत्रम्॥ (महान्तिहवींष्यत्र। हवहूयागविशेषः। यथा, शतपथब्राह्मणे। २। ५। ३। २०।
"अथातो महाहविषि एव तद् यथा महा-
विषक्तयो तस्य॥"
"साकमेधेषु प्रधानभूताया महाहविराख्यायाः इष्टेरारम्भं प्रतिजानीते अथात इति।" इति तद्भाष्यम्॥")

महाहासः, पुं, (महान्तुच्चैर्हासः।) अट्टहासः। इति शब्दरत्नावली॥

महाह्निगत्वा, स्त्री, (अहर्गन्त्री लोष्ट्र इवर्द्विसाक्षरः सन्यक्रीऽस्यस्यामिति। गम्ब + अप्रे आदित्वात् टाप् च। महतो अह्निगत्वा।) गन्धनाकुली। इति राजनिर्घण्टः॥

महाह्वा, स्त्री, (महती चासौ ह्वा च।) कपिकच्छुः। इति शब्दमाला॥ अतिखर्व्वे त्रि॥

महिः, स्त्री, (मह्यते इति। मह पूजायां अदन्तः पुरादिः + "सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्।) पृथिवी। इति शब्दमाला॥ (महत्। यथा, ऋग्वेदे। २। २४। १४।
"सत्यो मन्युर्महि कर्म करिष्यतः॥"
"महि महत् कर्म करिष्यतः।" इति तद्भाष्ये सायणः॥ महिमा। यथा, भागवते। ८। ८। ४।
"तत ऐरावतो नाम वारणेन्द्रो विनिर्गतः।
दन्तैश्चतुर्भिः श्वेताद्रेर्हरन् भगवतो महिम्॥"
"महिं महिमानम्।" इति तट्टीकायां श्रीधरः॥ महत्त्वम्। यथा, भागवते। २। १। ३५।
"विज्ञानमेतत् महिमामनन्ति॥"
"महिं महत्त्वम्।" इति तट्टीकायां श्रीधरः॥)

महिका, स्त्री, (मह + "कुन्मिलिभ्यां संज्ञायोरपूर्व्वस्यापि।" उणा० २। ३०। इति कुन् टाप्। अत इत्वम्।) हिमम्। इत्यमरः। २। ३। १८॥

महित, त्रि, (मह्यते स्मेति। मह पूजायाम् + "मतिबुद्धिपूजार्थेभ्यश्च।" ३। २। १८८। इति क्तः।) पूजितम्। यथा, भट्टिः। १०। २।

महिषा

रजपक्षितोऽप्यविबुधारिपुरे
बलवद्द च राममर्षितः क्षतवान्।
ज्वलदग्निरावमयहच्च बलात्
कलहंसराममर्षितः क्षतवान्॥"
(पिङ्गगणविशेषः। यथा, मार्कण्डेये। ६६। ४६।
"महाज्महाला महिलो महिमावाज्महावलः।
गणाः पञ्च तथैवेते पितॄणां पापनाशनाः॥"
स्त्रियां टाप्। नदीभेदः। यथा, महाभारते। ६। ६। २१।
"गौरवां महिलाश्चापि सुप्रयोगां जगाधिप!॥")

महिन्, क्ली, (महति मन्यते वा। मह पूजायां + "महेरिनन् च।" उणा०। २। ५६। इति इकारादित्वे इनन्।) राज्यम्। इत्यादिकोषः॥ (पूजनीये, त्रि॥ यथा, ऋग्वेदे। ६। २६। ८।
"वयं ते ऽस्यामिन्द्र! सुष्टुतौ सवायः स्याम महिन! प्रेष्ठाः।"
"हे महिन पूजनीय इन्द्र!।" इति तद्भाष्ये सायणः॥)

महिमा, [न्] पुं.(महतो भावः। महत् + "पृथ्वादिभ्य इमनिज् वा।" ५। १। १२२। इति इमनिच्। तस्य: "टेः।" ६। ४। १५५। इति टिलोपः।) गृध्रस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। इति हेमचन्द्रः। २। ११६॥ स च महत्त्वं येन चतुर्दश भुवनान्यस्योदरे वर्त्तन्ते। इत्यमरटीकायां भरतः॥ (तदुक्तं यथा,—
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥"
माहात्म्यम्। यथा, भागवते। ८। ५। १३।
"तया संकल्पमानेन महिम्ना मानवीं पतेः।
नाति तृप्यति मे चित्तं सुचिरं तापतापितम्।")
उत्कर्षः। यथा, पुराणम्।
"अधोऽधः पश्यतः कस्य महिमा नोपजायते।
उपर्य्युपरि पश्यन्तः सर्व्व एव दरिद्रति॥"
(मन्त्रिविशेषस्य सुतः। यथा, राजतरङ्गिण्याम्। ६। २२०।
"समाय चक्रुर्नैराश्यं महिम्नः पत्तमाश्रितः।")

महिरः, पुं. (महयते पूज्यत इति। मह + "सलिकल्यनिमहीति।" उणा०। १। ५५। इति इलच्। लस्य रत्वम्।) सूर्य्यः। इति त्रिकाण्डशेषः॥

महिला, स्त्री, (महयत इति। मह पूजायाम् + "सलिकल्यनिमहीति।" उणा०। १। ५५। इति इलच् टाप्।) स्त्रीमात्रम्। प्रियङ्गुलता। इत्यमरः। २। ६। २॥ रेणुकानामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥ मदमत्ता स्त्री। इति शब्दरत्नावली॥

महिलाकृया, स्त्री, (महिला इत्याकृतिर्यस्याः।) प्रियङ्गुलता। इत्यमरः। २। ४। ५५। (यथास्याः पर्य्यायः।

महिषः

"प्रियङ्गुः फलिनी काम्या लता च महिलाह्वया।
गुन्द्रा गुन्द्रफला ग्रामा विश्वक्सेनाङ्गनाप्रिया॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

महिषः, पुं. (मंहति पूजयति देवानमेनेति। मंह + "अधिमन्थोष्टिषच्।" उणा०। १। १६। इति टिषच्।) स्वनामख्यातपशुविशेषः। तत्पर्य्यायः। शुलापः २ वाहद्विषत् ३ कासरः ४ सैरिभः ५। इत्यमरः। २। ५। ४। यमवाहनः ६ विषज्वरनुः ७ वंशपत्रीरुः ८ रजस्वलः ९। इति शब्दरत्नावली॥ आनूपः १० रत्नाढ्यः ११ अम्बारिः १२। इति जटाधरः॥ क्रोधी १३ कलुषः १४ मत्तः १५ विषाणी १६ मदली १७ बली १८। तस्य पर्य्यायो यथा,—
"विषाणे दृढसन्धानं कुरुते येन हेतुना।
भारं वहति या दूरं महिषोऽसाविरूप्यते॥
ब्रह्मक्षत्रियविट्शूद्रास्त्रयमेवेन पञ्चधा॥"
तद्यथा।
'भद्रं शाणाः पवित्राश्च दृढदृढवलयोगकाः।
बर्हाग्निनो मारकाश्च महिषा ब्रह्मजातयः॥१॥
केकराः कामलाः स्थूला भद्रं क्रुङ्गाश्च मारकाः।
बर्हाग्निनो बहुबला महिषाः क्षत्रजातयः॥२॥
श्वेताङ्गाः श्वेतवक्त्राश्च सुकुङ्गा भारवाहिनः।
अमारका बहुबला महिषा वैश्यजातयः॥३॥
श्वेताः श्वेतबलाः श्वेतशृङ्गश्वेताक्षयश्च ये।
अस्थाग्निनो भारसहा महिषाः शूद्रजातयः॥४॥
सर्व्वदा जलमिच्छन्ति येऽल्पसत्त्वा महौजसः।
भारसहाः कृशङ्गाश्च तेऽन्त्यजा महिषा
मताः॥ ५॥
एषां दोषा गुणा वापि हयवल्लक्षयेद्बुधः।
पोषणञ्चापि संख्यानं हयतुल्यं तथा मतम्॥"
इति युक्तिकल्पतरुः॥
वनमहिषमांसगुणाः। दोषकारित्वम्। लघुत्वम्। दीपनत्वम्। बलदायित्वञ्च॥ ग्रामीणमहिषमांसगुणाः। स्निग्धत्वम्। मलिनकरत्वम्। पित्तहरत्वञ्च। इति राजनिर्घण्टः॥ तर्पणत्वम्। स्निग्धत्वम्। उष्णत्वम्। मधुरत्वम्। गुरुत्वम्। निद्रापुंस्त्वस्तन्यवर्द्धनत्वम् मांसदार्ढ्यकरत्वञ्च। इति राजवल्लभः॥ अपि च
"महिषो घोटकारिः स्यात् कासरश्च रजस्वलः।
पीनस्कन्धः शुक्लकायो शुलापो यमवाहनः॥
महिषस्यामिषं स्वादु स्निग्धोष्णं वातनाशनम्
निद्राशुक्रबलस्तन्यसतुदीर्घकरं गुरु॥
हृद्यञ्च हृद्विषूचिघ्नं वातपित्तास्रनाशनम्।"
इति भावप्रकाशः॥
शस्त्रधारिम्लेच्छजातिविशेषः॥ स च पुरा क्षत्रिय आसीत् सगररोषेणास्य वेदयागादावनधिकारो वेद्याग्यत्वं धर्म्मनाशश्च कृतः। यथा, हरिवंशे
"सगरस्तां प्रतिज्ञाय गुरोर्व्वाक्यं निशम्य च
धर्म्मं जघान तेषां वै वेद्याग्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्
जवनानां शिरः सर्व्वं काम्बोजानां तथैव च
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।

निःस्वाध्यायवषट्काराः क्षतास्तेन महात्मना ॥
भ्राजका अवनकाम्बोजाः पारदाः पह्लवास्तथा ।
कोलिसर्पाः समहिषा दार्व्याभीराः सकेरलाः ।
वशिष्ठवचनाद्राजन् ! सगरेण महात्मना ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
अहेर्हननविशेषः । इति हेमचन्द्रः । ४ । ३७७ ॥
महिषासुरः । यथा, मार्कण्डेये । ८२ । १-२ ।
"महिषेऽसुराणामधिपे देवानाञ्च पुरन्दरे ।
तत्रासुरैश्चमहारौद्रैर्देवसैन्यं पराजितम् ॥
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः॥"
(देवगणभेदः । यथा, निरुक्ते । ७ । ७ । "अपां-सुपक्षे महिषा अभ्यभवन् विष्णो राजानसुपतस्थु-रित्यस्मिन्यम् ।" महिषाः माध्यमिका देवगणाः ।
अथवा महिषाः त एव "महान्तः ।" इति नागेशीकायाम् दुर्गाचार्य्यः ॥ कुशद्वीपस्थपर्व्वत-विशेषः । यथा, भारते । १२१ । ५६ ।
"यस्तस्तु पर्व्वतस्तत्र महिषो मेघसन्निभः ।"
अग्निविशेषः । यथा, तत्रैव । १२१ । ६० ।
"तस्मिन् सोऽग्निर्निवसति महिषो नाम योऽप्-सुजः ।"
कुशद्वीपस्य वर्षविशेषः । यथा, तत्रैव । १२१ । ६८ ।
"महिषं महिषस्यापि पुनश्चापि प्रभाकरम् ॥"
क्षत्राभिधकः भूपालः ।
'क्षत्राभिधेके भूपाले क्षत्रापे महिषः क्षतः ॥'
इत्यमरटीकायां रुद्रः ॥ देशभेदः । यथा, बृहत्-संहितायाम् । ६ । १० ।
"भरणीपूर्ब्बे मण्डलदत्तचतुष्कं सुभिक्षकर-माद्यम् ।
वङ्गाङ्गमहिषवाङ्किककलिङ्गदेशेषु भयजन-नम् ॥"
अनुजादस्य पुत्रभेदः । यथा, भागवते । ६ । १८ । १६ ।
"अनुजादस्य सूर्य्यायां वास्कलो महिषस्तथा ॥"
माध्यापुत्रः । यथा, हरिवंशे । १८६ । ४५ ।
"महिषश्च तनूजश्च विज्ञातमनसावपि ॥")
महिषकन्दः, पुं, (महिषाख्यया प्रसिद्धः कन्दः ।) महाकन्दविशेषः । तत्पर्य्यायः । शुभ्रालुः २ क्षुद्रालुकन्दः ३ शुक्लकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवात-नाशित्वम् । सुखजाहरत्वम् । रुच्यत्वम् । अग्निवर्द्धकत्वञ्च । इति राज-निर्घण्टः ॥
महिषघ्नी, स्त्री, (महिषं महिषासुरं हन्तीति । हन् + क्विप् । टाप् ।) दुर्गा । यथा, दुर्गास्तवपठनौ ।
"महिषघ्नि ! महामाये चामुण्डे मुण्ड-मालिनि ! ।
आयुरारोग्यविजयं देहि देवि ! नमोऽस्तु ते ॥"
अपि च । देवीपुराणे ।
"सिंहमारुह्य कल्पान्ते निहनो महिषो यथा ।
महिषघ्नी ततो देवी कन्या वै सिंहवाहिनी ॥"

महिषध्वजः, पुं, (महिषो ध्वजचिह्नं वाहनत्वेन यस्य ।) यमः । अहर्दिवीशः । इति हेमचन्द्रः । २ । ६६ ॥
महिषमर्द्दिनी, स्त्री, (महिषं महिषाख्यमसुरं मृद्नातीति । मृद् + णिनिः । ङीप् ।) दुर्गा । इति शब्दरत्नावली ॥ अस्या मन्त्रा यथा, शार-दायाम् ।
"भान्तं विषत् सनयनं ङेतो महिनि ठद्वयम् ।
अष्टाक्षरी समाख्याता विद्या महिषमर्द्दिनी ॥"
नारायणीतन्त्रे ।
"विषं हि मन्त्रा कालोऽग्निरदिरिन्दो वितठ-द्वयम् ॥"
विषं मकारः । हि स्वरूपम् । मन्त्रा मकारः । कालो मकारः । अग्नी रेफः । अदिरीकारः । इन्दु इति वचनादिकारयुक्तो दकारः । अयं मन्त्रोद्धारादिर्मायादिः कामादिर्वाग्भवादि-र्लक्ष्म्यादिः कवचादिश्च गवाक्षरः । तथा च विश्वसारे ।
"प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत् सुधीः ।
वधूबीजादिकां वापि कवचाद्यां जपेत्तथा ॥
सर्व्वकालेषु सर्व्वत्र कामाद्यां प्रजपेत् सुधीः ।
वाग्भवाद्यां जपेत्तासु देवीं वाक्यविशुद्धये ॥
अस्या ध्यानम् । मारुढोपलसन्निभां मणिमय-कुण्डलमण्डितां नौमि भालविलोचनां महिषो-त्तमाङ्गनिषेदुषीम् । प्रालम्बकल्पपाशखेटकवाण-कार्म्मुकशूलकान् तर्ज्जनीमपि बिभ्रतीं निज-बाहुभिः शुम्भशुम्भखराम् । इति तन्त्रसारः ॥
महिषवल्ली, स्त्री, (महिषशब्दवाच्या वल्ली । प्राकृतपार्थिवादिवत् समासः ।) लताविशेषः । छिरहिट्टी इति हिन्दी भाषा ॥ तत्पर्य्यायः । सौम्या २ प्रतिसोमा ३ अल्पवल्लिका ४ खण्ड-प्राखा ५ । अस्या गुणः । रसवीर्य्यविपाके सोमवल्लीसमत्वम् । इति राजनिर्घण्टः ॥
महिषवाहनः, पुं, (महिषो वाहनं यस्य ।) यमः । इति शब्दरत्नावली ॥
महिषासुरः, पुं, (महिष एव महिषाख्यो वा असुरः । रम्भासुरपुत्रः । तस्य उत्पत्तिर्यथा,—
और्व्व उवाच
"आराधितो महादेवो रम्भेण सुरवैरिणा ।
चिरेण स च सुप्रीतस्तपसा तस्य पुष्कर ॥
अथ तुष्टो महादेवः प्रत्यक्षं रम्भमुक्तवान् ।
प्रीतोऽस्मि ते वरं रम्भ ! वरयस्व यथेप्सितम् ॥
एवमुक्तः प्रत्युवाच रम्भस्तं चन्द्रशेखरम् ॥
अपुत्रोऽहं महादेव ! यदि ते मय्यनुग्रहः ।
मम जन्मन्यये पुत्रो भवान् भवतु शङ्कर ! ॥
अवध्यः सर्व्वभूतानां जेता च त्रिदिवौकसाम् ।
चिरायुश्च यशस्वी च लक्ष्मीवान् मत्तसङ्गरः ॥
एवमुक्तस्तु देवेन प्रत्युवाच वृषध्वजः ।
भवत्तेजसाच्छिन्नस्ते भविष्यामि सुतस्तव ॥
इत्युक्त्वा स महादेवस्तत्रैवान्तरधीयत ।
रम्भोऽपि यातः स्वस्थानं हर्षानुफुल्लविलो-चनः ॥

पथि गच्छन् स रम्भोऽथ ददर्श महिषीं सुभाम् ।
त्रिहायणीं चित्रवर्णां सुन्दरीं ऋतुशालिनीम् ॥
स तां दृष्ट्वाथ महिषीं रम्भः कामेन मोहितः ।
दोर्भ्यां गृहीत्वा च तदा चकार सुरतोत्सवम् ॥
तयोः प्रवृत्ते सुरते सा तदा तस्य तेजसा ।
दधार महिषी गर्भं तदाभून्महिषासुरः ॥
तस्यां खाङ्गेषु गिरिशृङ्गतुल्यत्वमवाप्तवान् ।
बभूव स तदा वाग्भिः सुरूपश्च बहुश्रुतः ॥"
तस्य योनिविशेषत्वं यथा,—
"तन्तु कात्यायनसुनिः प्राप्तवान् महिषासुरम् ।
दुर्गायं वीक्ष्य शिष्यार्थे शिष्यानुग्रहकारकः ॥
कात्यायनेन शप्तं तं विज्ञाय महिषासुरम् ।
प्राह प्रणयपूर्व्वन्तु चण्डिकां चन्द्रशेखरः ॥"
ईश्वर उवाच ।
"देवि ! कात्यायनेनापि शप्तोऽयं महिषा-सुरः ।
योनिविघ्नात्मकत्वेति भविष्यति न संशयः ॥
निःसंशयस्तवैवायं भविष्यति न संशयः ॥
मदीयो महिषः कायस्तथा देवि ! जगन्मयि ! ।
हृत्तस्थः सततं योगयुक्तः पूर्व्वं परेऽपि च ॥
हरिर्हरिस्वरूपेण त्वां वोढुमक्षमोऽधुना ।
ममायं महिषः कायस्तव वोढा भविष्यति ॥
इति पूर्व्वं महादेवो देवीं प्रार्थितवान् पुरा ॥
तेन देवी महादेवं जघ्राह महिषासुरम् ॥
विप्र जन्मसु पुत्रोऽभूत् रम्भस्य भगवान् शिवः ।
स्वहृदयं स रम्भोऽपि रम्भ एव व्यजायत ॥
असुरत्वाद्वृक्षेषु तपः परमदारुणम् ।
तथैवाराधितः शम्भुः पुत्रार्थे प्रददौ वरम् ॥
तथैव महिषीं भेजे प्रथमं सुरताय सः ।
तस्यां तथाभवद्वीरो दानवो महिषासुरः ।
तथैव शप्तो भगवान् मुनिः कात्यायनस्तु तम् ॥
इति प्रवृत्ते पूर्व्वस्मिन् परस्मिन् स तु जन्मनि ।
महिषः पूजयित्वाथ देवीं वरमयाचत ॥
तृतीये जन्मनि वरं प्राप्य कल्याणशोभनः ।
नेह मे जन्म भवितेत्येवं वरमयाचत ॥
तेन देवीपदत्वे निहतोऽसुरोऽभूना ।
नोत्पत्तिरपि तस्यास्ति संसारात् बहुन् नृप ! ॥
एवं देवीप्रसादेन महादेवाङ्गसम्भवः ।
परामवाप सदनं प्रतिपत्तिं महासुरः ॥
इति ते कथितं राजन् ! यथा स महिषा-सुरः ।
देवीपादतलं प्राप्य यथा सोऽद्यापि मोदते ॥"
इति कालिकापुराणे ५६ अध्यायः ॥ * ॥
अपि च ।
नारद उवाच ।
"कस्यासौ महिषो नाम रम्भबीजादयञ्च कैः ।
कासौ कात्यायनी नाम या जघ्ने महिषा-सुरम् ।
एतान् विस्तरतस्तात ! यथावद्वक्तुमर्हसि ॥"

महिषा

पुलस्त्य उवाच ।
"शृणुष्वं संप्रवक्ष्यामि कथां पापप्रणाशिनीम् ।
सर्व्वेषां वरदां दुर्गां सैन्यं कात्यायनी मुने ! ॥
सुरासुरवरौ रौद्रौ जगत्क्षोभकरावुभौ ।
रम्भश्चैव करम्भश्च दानवानां कुलाधवौ ॥
तावपुत्रौ च देवर्षे ! पुत्रार्थे तेपतुस्तपः ।
वह्वृचसंगजान् देवौ स्त्रिनौ पञ्चनदे जले ॥
तत्रैको जलमध्यस्थो द्वितीयोऽप्यग्निपञ्चमौ ।
करम्भश्चैव रम्भश्च यत्तं मालवटं प्रति ॥
एकं निमग्नं सलिले व्याहरूपेण दानवः ।
चरणाभ्यां समादाय निजघान यथेच्छया ॥
ततो भ्रातरि नष्टे च रम्भः कोपपरिप्लुतः ।
बद्धौ स्वमूर्द्धि संछिन्न होतुमेच्छन्करावलः ॥
ततः प्रयत्नं कंधेषु खड्गाच्च रविसंप्रभम् ।
छेत्तुकामो निजं शीर्षं वह्निना प्रतिषेधितः ॥
उत्तिष्ठासुर ! मा मैवं नाशयात्मानमात्मना ।
दुस्तरा परवध्यापि स्ववध्याप्यतिदुस्तरा ॥
यच्च प्रार्थयसे वीर ! तद्दास्यामि यथेप्सितम् ।
मा म्रियस्व ततस्त्वेष मदा भ्रातरि वै कथा ॥
ततोऽब्रवीद्दचो रम्भो यदि देयो दरो मम ।
त्रैलोक्यविजयी पुत्रः स्यान्मे त्वत्तेजसाधिकः ॥
अजेयो देवनैः सर्व्वैः पुंभिर्वैवाथ पावक ! ।
महाबलो वायुरिव कामरूपी छलाच्छवित् ॥
तं प्रोवाच कविर्व्वह्निः ! वाढमेवं भविष्यति ।
यस्त्वां चित्तं समालम्बि करिष्यसि ततोऽसुर ! ॥
इत्येवमुक्तो दैवेन वह्निना दानवो ययौ ।
यद्गृहं तत्रिवर्त्तं यत्तेषां परिवारिणम् ॥
तेषां पद्मनिधिश्चैव वसते नाम्बुचेतनः ।
गजाश्च महिषाश्वाश्वा गावोऽजाविपरिप्लुताः ॥
तान् दृष्ट्वैव तदा चक्रे भागं दानवपार्थिवः ।
महिष्यां रूपयुक्तायां त्रिहायण्यां तपोधन ! ॥
समागच्छच्च दैत्येन्द्रं कामयन्ती तरस्विनी ।
न चाभिगमनं चक्रे भवितव्यप्रचोदिता ॥
तस्यां समभवद्गर्भस्तां प्रगृह्याथ दानवः ।
पातालं प्रविवेशाथ ततः स्वभवनं गतः ॥
दृष्ट्वा दानवैः सर्व्वैः परित्यक्तश्च बन्धुभिः ।
अकार्य्यं कारयित्वैवं भूयो मालवटं गतः ॥
तापि तेनैव पतिना महिषी चारुदर्शना ।
समं जगाम तत्पुण्यं यत्तमण्डलमुत्तमम् ॥
ततस्तु वडवस्तस्य श्यामा सा सुषुवे सुते ! ।
अजोजनत् सुतं शुभ्रं महिषं कामरूपिणम् ॥"

इति वामनपुराणे १० अध्यायः ॥ * ॥

अन्यच्च । धरण्युवाच ।
"या सा माया हरेरास्त ब्रह्मणोऽद्भुतजन्मनः ।
गायत्र्याश्च सुता भूत्वा चैत्यासुरमयोधयत् ॥
सैव नन्दाभवद्देवी देवकार्य्यचिकीर्षया ।
महिषाख्यासुरवधं कुर्व्वती ब्रह्मणेरिता ॥
वैशाखा च ततो देव ! कथमेतन्हि संभवः ॥

वराह उवाच ।
इयं जगद्धिता देवी गङ्गा शङ्करसुप्रिया ।
कथितं किञ्चिदेवेदं सपदं वेद सर्व्वगम् ।
स्वायम्भुवे हनौ देवो वैशाखा मन्दरे गिरौ ॥

महिषी

महिषाख्योऽपरः पश्चात् स वै चैत्यासुरः पुनः ।
नन्दया निहतो विप्रे महाबलपराक्रमः ॥
अथवा ज्ञानशक्तिः सा महिषोऽज्ञान-
मूर्त्तिमान् ।
अज्ञानं ज्ञानसाध्यत्वं भवतीति न संशयः ॥
मूर्त्तिपत्नी चेतिहासमन्वर्त्ते चैकवद्वदि ।
ख्यायते वेदवाक्येषु दक्ष सा वेदवादिभिः ॥"
इति वराहपुराणम् ॥

महिषासुरसम्भवः, पुं, (महिषासुरात् सम्भवतीति । सम् + भू + अच् ।) भूमिज-गुग्गुलुः । इति राजनिर्घण्टः ।

महिषासुरहन्त्री, स्त्री, (हन् + ष्टच् + ङीप् । महिषासुरस्य हन्त्री ।) दुर्गा । यथा,—
"महिषासुरहन्त्र्याश्च प्रतिष्ठा दक्षिणायने ।"
इति प्रतिष्ठातत्त्वधृतपद्मपुराणवचनम् ॥

महिषाक्षः, पुं, (महिषस्य अक्षीवेति । "अक्ष्णोऽदर्शनात् ।"५।४।७४। इति समासान्तोऽच् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥ (तस्यास्य पर्य्यायः ।
"जटायुः कालनिर्य्यासः कौग्गिको गुग्गुलुः पुरः ।
दैत्यधूपः सर्व्वसहो महिषाक्षः पलङ्कषा ॥"
इति वैद्यकरत्नमालायाम् ॥
अस्य व्यवहारविषयो यथा,—
"महिषाक्षो महाक्षीलो गजेन्द्राक्षो हिनायुधौ ।
विघ्नेशश्च मनुष्याणां कनकः परिकीर्त्तितः ॥
कदाचिन्महिषाक्षश्च यतः कैश्चिन्नगामपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महिषाख्यः, पुं, (महिषाच्च । स्वार्थे कन् ।) गुग्गुलुः । इति राजनिर्घण्टः ॥

महिषी, स्त्री, (महिषस्य क्षत्राभिषिक्तस्य नृपस्य पत्नी । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीष् ।) क्षत्राभिषिक्ता राजपत्नी । इत्यमरः । २ । ६ । ५ ॥ (यथा, रघौ । २ । २५ ।
"इत्थं व्रतं धारयतः प्रजार्थं
समं महिष्या महनीयकीर्त्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

मेदिन्यौ । ओषधिभेदः । इति मेदिनी । षे, ३६ ।

महिष्यौषधम् । तत्पर्य्यायः । मन्दगमना २ महाक्षीरा ३ पयस्विनी ४ क्षुद्रापत्रा ५ कनुपा ६ तुरङ्गदमनी ७ ॥ अस्याः क्षीरगुणाः । मधुरत्वम् । विपाके स्निग्धत्वम् । गुरुत्वम् । बलपुष्टिप्रदत्वम् । वृष्यत्वम् । पित्तदाहास्रनाशित्वञ्च ।
"माहिषं मधुरं गव्यात् स्निग्धं शुक्रकरं गुरु ।
निद्राकरमभिष्यन्दि क्षुधाधिक्यकरं हिमम् ॥"
तस्या दधिगुणाः । मधुरत्वम् । स्निग्धत्वम् । श्लेष्मकारित्वम् । रक्तपित्तनाशित्वम् । बलासवर्द्धनत्वम् । बद्धत्वम् । श्रमघ्नत्वम् । शोधनत्वञ्च ।
"माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तजुत् ।

महीजं

स्वादुपाकमभिष्यन्दि वृष्यं गुर्व्वसदृशम् ॥*॥"
अस्या नवनीतगुणाः । कषायत्वम् । मधुरत्वम् । शीतत्वम् । वृष्यत्वम् । बल्यत्वम् । वाहित्वम् । पित्तघ्नत्वम् । तुन्दत्वञ्च ।
"नवनीतं महिष्यास्तु वातश्लेष्मकरं गुरु ।
दाहपित्तश्रमहरं मेदःशुक्रविवर्द्धनम् ॥"
अस्या घृतगुणाः । उत्तमत्वम् । वृष्यकरत्वम् । सुखदत्वम् । कान्तिदत्वम् । वातश्लेष्मनाशित्वम् । बलकरत्वम् । वर्णप्रदाने श्रमत्वम् । दुर्नाम ग्रहणीविकारगमनत्वम् । मन्दानलोद्दीपनत्वम् । चक्षुष्यत्वम् । मेधायो न श्रेष्ठत्वम् । लघुत्वम् । मनोहारित्वञ्च ।
"माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् ।
शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते ॥"
इति भावप्रकाशः ॥ * ॥

अस्या मज्जगुणाः । आनाहशीफगुल्मदोषनाशित्वम् । कटुत्वम् । उष्णत्वम् । कुष्ठकण्डूतिशूलोदररोगनाशित्वञ्च । इति राजनिर्घण्टः ॥ (अस्या दुग्धगुणाश्च यथा, चरके सूत्रस्थाने २७ अध्याये ।
"महिषीणां गुरुतरं गव्याच्छीततरं पयः ।
स्नेहानूनमनिद्राय स्निग्धमम्लमये च तत् ॥"

महिषीप्रिया, स्त्री, (महिषीणां प्रिया ।) शूलीलक्षणम् । इति राजनिर्घण्टः ॥

मही, स्त्री, (मन्यते इति । मह् + अच् । मह + "गौरादिभ्यश्च । ४ । १ । ४१ । इति ङीष् । यद्वा, मह्यते । ह्रस्वादिति ङीष् ।) पृथिवी । इत्यमरः । २ । १ । १ । (यथा विष्णुपुराणे । १ । ४ । २६ ।
"उत्क्षिप्तस्तस्य जलाद्वराहेण महीं विघ्नाये ।
विधुन्वतो वेदमयं शरीरं
रोमान्तरस्था मुनयो स्तुवन्ति ॥")

नदीविशेषः । सा च मालवदेशे वर्त्तते । इति मेदिनी । हे, । ७ ॥ तज्जलगुणाः ।
"महीजलन्तु सुस्वादु बल्यं पित्तहरं गुरु ।"
इति राजनिर्घण्टः ॥
गौः । इति जटाधरः ॥ छिलमोषिका । इति त्रिकाण्डशेषः ॥ (लोकः । यथा, ऋग्वेदे । ३ । ५६ । २ ।
"तिस्रो महीरुपरास्तस्थुः ।"
"मही; लोकाः ।" इति तद्भाष्ये सायणः ।)

महीक्षित्, पुं, (मह्यां क्षयते ईष्टे । क्षि + क्विप् । तुक् च ।) राजा । इत्यमरः । २ । ८ । १ ॥ (यथा, महाभारते । ७ । ६४ । २४ ॥
"हयमेधाक्षमायाभिर्भोहयित्वा परन्तपः ।
विभेद शतधा राजन् ! शरीराणि महीक्षिताम् ॥")

महीजं, क्ली, (मह्यां जायते इति । जन + डः ।) आर्द्रकम् । इति राजनिर्घण्टः ॥ भूमिजाते । त्रि ॥ (यथा, महाभारते । १३ । ८७ । ३-४ ।
"आर्द्राणां महीजानां सिन्धुजानाञ्च सर्व्वशः ।

वाजायुजानां शुभ्राणां तथा पर्व्वतवासिनाम् । वाजिनां बहुभिः संख्ये समन्तात् पर्य्यवारयन्॥")

महीजः, पुं, (मह्यां जातः । जन+डः ।) मङ्गलग्रहः । यथा, समयप्रदीपे ।

"रवौ रसाब्धौ सितगौ हयाब्धौ
हयं महीजे विधुजे शराष्टौ ।
गुरौ शराष्टौ भृगुजे हतौयं
शनौ रसाब्धन्तमिति क्षपायाम् ॥"

महीधः, पुं, (महीं धरतीति । धृ+कः ।) पर्व्वतः । इत्यमरः । २ । ३ । १ ॥ (यथा, श्रीभागवते । २ । ७ । ३२ ।

"गोपैर्मखे प्रतिहते व्रजविप्लवाय
देवेऽभिवर्षति पशून् कृपया दिदृक्षुः ।
धर्त्तोच्छिलीन्ध्रमिव सप्तदिनानि सप्त-
वर्षो महीध्रमनघैककरे सलीलम् ॥"

महीं धरति उद्धरतीति । धृ+कः । महीरूपत्वात् । यथा, तत्रैव । ३ । १३ । २६ ।

"उत्पत्तिप्रबलः खरः कठोरः
सटा विद्युन्वन् खररोमशत्वक् ।
खुराहतानभ्रः सितदंष्ट्र ईक्षा-
ज्योतिर्विभासो भगवान् महीधः ॥"

"महीधः पृथिवा उद्धर्त्ता ।" इति तट्टीकायां स्वामी ॥)

महीपालः, पुं, (महीं पालयतीति । पाल+अण् ।) राजा । यथा, मार्कण्डेयपुराणे । ८८ । ६१ ।

"स ययात महीपृष्ठे शुक्रसंघसमाहतः ।
नीरुक्च महीपाल ! रुक्मबीजो महासुरः ॥"

(राजविशेषः । यथा, कथासरित्सागरे । ५६ । ७ ।

"चन्द्रस्वामिन् ! महीपालो नाम्ना कार्य्यः
सुतस्तया ।
राजा भूत्वाचिरं यस्मात् पालयिष्यत्ययं
महीम् ॥")

महीप्राचीरं, क्ली. (मह्याः प्राचीरमिव । सर्व्वदिक्स्थितत्वात्तथात्वम् ।) लवणः । इति त्रिकाण्डशेषः ॥

महीभृत्, पुं, (महीं बिभर्त्ति धरतीति । भृ+क्विप् । "दृक्षस्य पितिदृक्षि सुक् ।" ६ । १ । ७२ । इति तुगागमश्च ।) पर्व्वतः । यथा, कुमारसम्भवे । १ । २७ ।

"महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनल्पपुण्यस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा ॥"

(महीं बिभर्त्ति पालयतीति । भृ+क्विप् ।) राजा । यथा, मार्कण्डेयपुराणे । ८१ । १३ ।

"ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्व्वन्त्वद्यमहीभृताम् ॥"

महीमयः, त्रि, (मह्या विकारोऽवयवो वेति । मही+मयट् ।) मृत्तिकानिर्म्मितः । यथा,—मार्कण्डेयपुराणे । ६३ । ७ ।

"तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्त्तिं
महीमयीम् ।
अर्हणाभ्यक्तुस्तस्याः पुष्पधूपार्चितर्षभैः ॥"

महीरुहः, पुं, (मह्यां रोहति जायत इति । रुह+कः ।) वृक्षः । इत्यमरः । २ । ४ । ५ । (यथा, विष्णुपुराणे । १ । १५ । २ ।

"तपश्चरन्तु पृथिवीं प्रपेतुःस्तु महीरुहाः ।
अरण्यमाणामावन्ध्यं बभूवाथ प्रजाक्षयः ॥")

शाकवृक्षः । इति राजनिर्घण्टः ॥

महीलता, स्त्री, (मह्या लतेव ।) किणुलुकः । इत्यमरः । १ । १० । २१ ॥ (विशेषोऽस्याः किणुलुकशब्दे ज्ञातव्यः ॥)

महीसुतः, पुं, (मह्याः सुतः ।) मङ्गलः । इत्यमरः । १ । ३ । २५ ॥ (यथा, बृहत्संहितायाम् । १०४ । १७ ।

"रिपुशस्त्रकोपभयानि पञ्चमे
तनयक्षतानि शुचौ महीसुते ।
द्युतिरपि नास्य चिरं भवेत् स्थिरा
शिरसि कपेरिव मालती लता ॥")

महेच्छः, पुं, (महती इच्छा यस्य । बहुव्रीहिसामासिकः ।) महाशयः । इत्यमरः । ३ । १ । ३ ॥ (यथा, बृहत्संहितायाम् । १६ । ६८ ।

"प्रत्यक्षधनिमहेच्छव्यवसायपराक्रमोपेताः ॥")

महेन्द्रः, पुं, (महांश्चासाविन्द्रश्च ऐश्वर्य्यवानित्यर्थः ।) विष्णुः । इति महाभारते तस्य सहस्रनामस्तोत्रम् ॥ शक्रः । (यथा, भागवते । ६ । १२ । ६ ।

"ऋषयस्तदुपाकर्ण्य महेन्द्रमिदमब्रवीत् ॥")

जम्बुद्वीपस्य पर्व्वतविशेषः । इति मेदिनी । रे, २०० ॥ (स च सप्तकुलाचलानामन्यतमः । यथा, मार्कण्डेये । ५७ । १० ।

"महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्व्वतः ।
विन्ध्यश्च पारिपात्रश्च सप्तैवात्र कुलाचलाः ॥")

महेन्द्रकदली, स्त्री, (महेन्द्रसम्भवा तद्गुणा वा कदली ।) कदलीभेदः । इति राजनिर्घण्टः ॥

महेन्द्रनगरी, स्त्री, (महेन्द्रस्य नगरी ।) अमरावती । इति शब्दरत्नावली ॥

महेन्द्रवारुणी, स्त्री, (महेन्द्रवरुणयोरियं प्रियत्वात् । अण् । ङीष् ।) लताविशेषः । वड़माकाल इति भाषा । तत्पर्य्यायः । चित्रवल्ली २ महाफला ३ महेन्द्री ४ चित्रफला ५ अपुर्षी ६ अपुसा ७ आम्रस्था ८ विशाला ९ दीर्घवल्ली १० महत्फला ११ महादारुणी १२ बृहत्फला १३ बृहदारुणी १४ सौम्या १५ गजचिर्भिटा १६ चित्रदेवी १७ धनुःश्रेणी १८ स्थाणुकर्णी १९ मरुत्सम्भवा २० । अस्या गुणाः । इन्द्रवारुणीगुणभागित्वम् । ईषत् वीर्य्ये विपाके च किञ्चिद्गुणाधिकत्वञ्च । इति राजनिर्घण्टः ॥

महेन्द्राणी, स्त्री, (महेन्द्रस्य भार्य्येति । महेन्द्र । "पुंयोगादाख्यायाम् ।" ४ । १ । ४८ । इति ङीष् । "इन्द्रवरुणेति ।" ४ । १ । ४९ । इति आनुगागमः ।) इन्द्रभार्य्या । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । ४१ । १६ ।

"तनो सुदुर्म्मादगवानैरावतशिरोगतः ।
आजगाम महेन्द्राणी शक्रः सुरगणैर्वृतः ॥")

महेरणा, स्त्री, (महत् ईरणं प्रेरणमस्याः । यद्वा, महं गजोत्सवमीरयतीति । ईर+ल्युः । टाप् ।) शुक्लकोष्ठः । इत्यमरः । २ । ४ । ३४ ॥ महेरुणा इत्यपि पाठः । इत्यमरटीकायां भरतः ॥ (यथास्याः पर्य्यायः ।

"शुक्लको गजभक्ष्या च सुवहा सुरभीरसा ।
महेरणा कुलुत्थको वल्लको च मधुस्रवा ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

महेला, स्त्री, (मह्यते पूज्यत इति । मह+"सलिकल्यनिमहीति ।" उणा० १ । ५५ । इति इलच् । पृषोदरादित्वादिकारस्येकारः । यद्वा, महस्योत्सवस्य इला भूमिः ।) नारी । इति शब्दरत्नावली ॥ (यथा, वलोदये । २ । ५८ ।

"ससम्भ्रममहेलाभिस्त्वरित-
गुणाभिस्तत्क्षरमहेलाभि
श्रीः प्रवरमहेलाभिस्तथैव
युवपंक्तिभिः परमहेलाभिः ॥")

महेलिका, स्त्री, (महेल+स्वार्थे कन् । टाप् । अकारस्येत्वम् ।) नारी । इति शब्दरत्नावली ॥

महेशः, पुं, (महान् ईशः ।) शिवः । इति शब्दरत्नावली ॥ (यथा, शिवध्यानम् ।

"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारु-
चन्द्रावतंसम् ॥")

महेशवन्धुः, पुं, (महेशो बध्यते वध्योक्रियते येन लक्ष्मोक्षनजन्यत्वात् ।) औषधभेदः । इति शब्दचन्द्रिका ॥

महेश्वरः, पुं, (महांश्चासावीश्वरश्च कर्त्तुमकर्त्तुमन्यथाकर्त्तुं वा समर्थः । यद्वा, महत्या महामायया ईश्वरः ।) शिवः । इत्यमरः । १ । १ । ३२ ॥ अस्य व्युत्पत्तिर्यथा,—

"विश्वस्यानाच्च सर्व्वेषां महतामीश्वरः स्वयम् ।
महेश्वरश्च तेनेमं प्रवदन्ति मनीषिणः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ।

अस्य विवाहस्मरणफलं यथा,—

"महेश्वरसमायुक्तमोद्वाहं यः स्मरेत् सुदा ।
सततं तस्य कल्याणं वाञ्छितञ्च भविष्यति ॥"

इति कालिकापुराणे शिवविवाहे ३३ अध्यायः ।

(परमेश्वरः । तदुक्तं न्यायशास्त्रे ।

वायोर्नवैकादशसु तेजसो गुणा
जलक्षितिप्राणभृतां चतुष्टये ।
दिक्कालयोः पञ्च चतुष्टये त्रये
महेश्वरोऽहो मनसश्चयेव च ॥"

महान् ईश्वरः प्रजानां प्रभुः । ऐश्वर्य्ययुक्तो राजा । यथा, महाभारते । १ । २२८ । ५ ।

"ततः शुक्रोऽतिसंक्रुद्धस्त्रिदशानां महेश्वरः ।
पाञ्चरं मन्त्रमाख्याय तासुरो वसुपाश्रयत् ॥")

महेश्वरकरच्युता, स्त्री, (महेश्वरस्य करात् च्युता ।) करतोया नदी । इति केचित् ॥ गौरीविवाहसमये शङ्करकरगलितसंप्रदानतोयप्रभवत्वात्

करस्य सोयं विद्यतेऽनेति करतोया। इत्यमर-टीकायां भरतश्च ॥

महेश्वरी, स्त्री, (महेश्वरस्य स्त्री। महेश्वर + ङीष्। महती चासौ ईश्वरी महादीनां नित्य-त्वादिति वा।) महेश्वरपत्नी। यथा,—

"ऐं पातु दक्षनेत्रं मे ह्रीं पातु वामलोचनम्।
श्रीं पातु दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी॥"

इति तन्त्रसारे भुवनेश्वरीकवचम्॥

अपराजिता। इति शब्दचन्द्रिका॥ काश्यम्। इति हेमचन्द्रः। ३। २१३॥ राजनीतिः। इति राजनिर्घण्टः॥

महेरक्षः, पुं, (महांश्चासावेरक्षश्च।) स्थूलेरक्षः। इति राजनिर्घण्टः॥

महेला, स्त्री, (महती चासावेला च।) स्थूलेला। इति राजनिर्घण्टः॥ (गुणादिविषयोऽस्या; स्थूलेलाशब्दे द्रष्टव्यः॥)

महोक्षः, पुं, (महान् उक्षा। "अचतुरविचतु-रेति।"५। ४। ७७। इति समासान्तः अच्। निपातितश्च।)दृढदृढ़षः। इत्यमरः। २। ६। ६२॥ तत्पर्य्यायः। वृषभः २ वृषः ३ पुङ्गवः ४ बली ५ गोवाहः ६ ऋषभः ७ गोप्रियः ८ उक्षा ९ गोपतिः १०। इति राजनिर्घण्टः॥ (यथा, कथासरित्सागरे। ६०। ६६।

"महोक्षः स त्वया दृष्टः संस्तवश्च कृतो यदि।
तदिहागत्य तं युक्त्या तावत् पश्यामि
कौतुकम्॥")

महोटिका, स्त्री, (महान्तः फलेभ्यः स्थूला उटा पत्राण्ययस्याः। ततः स्वार्थे कन्। टाप्। अकार-स्येत्वम्।) दृढतरी। इति राजनिर्घण्टः॥

महोटी, स्त्री, (महान्त उटाः पत्राणि यस्याः।) दृढतरी। इति भावप्रकाशः॥ दृढदुग्धलता च॥

महोत्क, स्त्री, (महान् उत्कः दर्शनोत्सुको लोको यस्याः।) विद्युत्। इति केचित्॥

महोत्पलं, क्ली, (महच्च तत् उत्पलञ्च।) पद्मम्। सारसपक्षी। इत्यमरः। १। ३०। ३८॥

महोत्सवः, पुं, (महांश्चासावुत्सवश्च।) अतिप्रय-सुखजनककर्म्म। यथा,—

"सर्व्वेषु जन्मदिवसे ज्ञातेर्म्मङ्गलपार्व्वणि।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः॥
स्वस्तयश्च पितरौ तथा देवप्रजापतिः।
प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः॥"

इति तिथ्यादितत्त्वे ब्रह्मपुराणवचनम्॥

अपि च। कालिकापुराणे ६८ अध्याये।

"दुर्गातिथौ च मन्त्रेण कुर्य्याद्दुर्गामहोत्सवम्।
महानवम्यां प्रददि बलिदानं नृपादयः॥"

महोत्साहः, त्रि, (महान् उत्साहो यस्य।) अति-प्रशस्तोत्साहयुक्तः। (यथा, महाभारते।५।५१।१।

"सर्व्व एते महोत्साहा ये त्वया परिकीर्त्तिताः।
एकतश्चैव ते सर्व्वे समेता भीम एकतः॥")

तत्पर्य्यायः। महोद्यमः २। इत्यमरः। ३।१।२॥ (विष्णुः। यथा, महाभारते।१३।१४८।११।

"अतीन्द्रियो महामायो महोत्साहो महाबलः॥")

महोत्साहः, पुं, (महान् उत्साहो यस्य।) राज्याङ्गप्राप्तराजपुत्रः। यथा,—

"सन्धत्तस्तु प्रकृतिभिर्महोत्साहः कृतक्रमः॥"

इति शब्दमाला॥

अतिप्रयोत्तमश्च॥

महोदधिः, पुं, (महांश्चासावुदधिश्च।) समुद्रः। यथा, महाभारते।

"लङ्घा दग्धा वनं भग्नं लङ्घितञ्च महोदधिः।
यत् कृतं रामदूतेन स रामः किं करिष्यति॥"

महोदयं, क्ली, (महान् उदय उन्नतिर्यस्मिन्।) पुरविशेषः। तत्पर्य्यायः। काण्यकुब्जम् २ काश्या-कुब्जम् ३ गाधिपुरम् ४ कौशम्५ कुशस्थलम्६। इति हेमचन्द्रः॥

महोदयः, पुं, (महान् उदयः समुन्नतिर्यस्मिन्।) काण्यकुब्जदेशः। आधिपत्यम्। (महान् उदय उत्कर्षो यस्मिन्।) अपवर्गः। इति मेदिनी। ये, १२६॥ (महान् उदय उत्कर्षो यस्य।) स्वामी। इति हेमचन्द्रः। ३। ४८७॥ (महान् उदयः फलं यस्मिन् यस्माद्वा। महा-फले, त्रि। यथा, मनौ। ७। ५५।

"अपि यत् सुकरं कर्म्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम्॥"

"महोदयं महाफलम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

महोदया, स्त्री, (महानुदयो यस्याः। टाप्।) नागबला। इति राजनिर्घण्टः॥

महोदरी, स्त्री, महागुदावरी। इति भाव-प्रकाशः॥ (महत् उदरमस्य।) दृढदुदरयुक्ते, त्रि॥ (महच्च तदुदरञ्च। दृढदुदरे, क्ली। यथा, श्रीभागवते। ८। ७। १७।

"पितरं वरुणपाशात् श्रुत्वा ज्ञातमहोदरम्।
रोहितो ग्राममेयाय तमिन्द्रः प्रत्यषेधत॥"

पुं, नागविशेषः। यथा, महाभारते। १। ३५। १६।

"कर्कराकर्करौ नामौ कुक्षोदरमहोदरौ॥"

दानवविशेषः। यथा, तत्रैव। १। ६५। ८५।

"एकपाद्दैकचक्रश्च विरूपाक्षमहोदरौ।"

उत्तराङ्गस्य पुत्रविशेषः। यथा, तत्रैव। १। ६७। ८७।

"सेनापतिः सुसेनश्च कुक्षोदरमहोदरौ।")

महोद्यमः, त्रि, (महान् उद्यमो यस्य।) महोत्-साहः। इत्यमरः। ३। १। ३। (यथा, राज-तरङ्गिण्याम्। ५। १४९।

"अथ निर्जित्य दायादांल्लब्ध्वा लक्ष्मीं चिरो-न्मराः।
चिक्षुर्दिग्विजयं कर्त्तुं श्रीमाणाधीन्महो-द्यमः॥"

महोद्यमः।) अतिप्रयोद्योगे, पुं॥

महोन्नतः, पुं, (महानतिप्रशस्य उन्नतः।) ताल-वृक्षः। इति भावप्रकाशः॥ अत्युन्नतियुक्ते, त्रि॥

महोन्नतिः, स्त्री, (महती चासावुन्नतिश्च।) अतिप्रशस्तवृद्धिः। यथा,—

"भूयात्ते महदैश्वर्य्यं पुत्रादीनां महोन्नतिः।
अद्याधिका शरीरेऽस्य चिरं जीव सुखी भव॥"

इत्युद्भटः॥

महोल्बणः, पुं, (महानतिशयेन उल्बणः।) अत्य-धिकः। यथा इति भाषा। यथा,—

"राजयक्ष्मविशेषश्च फलकी च महोल्बणः॥"

इति शब्दरत्नावली॥

अत्युल्बणे त्रि॥

महोरगं, क्ली, (महान् उरग इव।) नगर-मूलम्। इति रत्नमाला॥

महोरगः, पुं, (महांश्चासावुरगश्च।) सर्पगण-विशेषः। इति हेमचन्द्रः। २। ७॥ दृढसर्प-मात्रञ्च॥ (यथा, भागवते। ८। २०। ४७।

"महोरगाः समुत्पेतुः दन्दशूकाः सहस्रिकाः॥")

महोल्का, स्त्री, (महती चासावुल्का च।) उल्काविशेषः। यथा,—

"विद्युत्स्तनितनिर्घातमहोल्कानाञ्च संप्लवे।
आकालिकमनध्यायमेतेषु मनुरब्रवीत्॥
महोल्कानाञ्च संप्लवे इतस्ततोऽनेकमहोल्कानां सन्निपाते। उल्कालक्षणमाह दृढदृष्टिः।
"दृढच्छिखा च रूक्षाभ्या रक्तनीलशिखो-ज्ज्वला।
पौरुषी च प्रमाणेन उल्का नानाविधा स्मृता॥"

इति तिथ्यादितत्त्वम्॥

महौजाः, [स्] त्रि, अतितेजोयुक्तः। महदोजो यस्येति विग्रहे बहुव्रीहौ प्रथमैकवचने असञो-ऽधावित्यनेन दीर्घे सति महौजा इतिपदं निष्पन्नम्॥ (यथा, मनौ। १। ६१।

"स्वायम्भुवस्यास्य मनोः षड्वंश्या मनवोऽपरे।
दृढवन्तः प्रजाः स्वाः स्वा महात्मानो महौ-जसः॥"

कालेयपुत्रासुरविशेषः। यथा, महाभारते १। ६७। ५३।

"पञ्चमस्तु बभूवैषां प्रवरो यो महासुरः।
महौजा इति विख्यातो बभूवेह परन्तपः॥")

महौषधं, क्ली, (महत् औषधम्।) भूम्या-कुष्माण्डम्। शुण्ठी। (पर्य्यायो यथा,—

"शुण्ठी विश्वा च विश्वञ्च नागरं विश्वभेषजम्
ऊषणं कटुभद्रञ्च शृङ्गवेरं महौषधम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

लशुनम्। (पर्य्यायो यथा,—

"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वाराहीकन्दः। वत्सनाभः। इति राजनिर्घण्टः। पिप्पली। इति शब्दचन्द्रिका॥ अतिविषा। इत्यमरः।२।४।३८॥ (महाभेषजम्। यथा, कथासरित्सागरे। ६६। ६६।

"स्वभर्त्तुः प्रेम्णे तेषाञ्च महासत्त्वाश्चकार सः।
चिकित्सां कारयामासुर्नोत्तस्थुश्च तदन्ति-कात्॥")

मह्यौषधिः, स्त्री, (महती चौषधिः ।) दूर्व्वा । लक्ष्मणाकुसुमः । इति शब्दचन्द्रिका ॥ महाज्ञानीयद्रव्यविशेषः । यथा,—
"सहदेवी तथा वाही बला चातिबला तथा ।
शुक्लपुष्पी तथा सिंही अष्टमी च सुवर्चला ॥
महौषधगणं प्रोक्तं महाज्ञाने नियोजयेत् ॥"
इति गोविन्दानन्दधृतमत्स्यपुराणवचनम् ॥
अपिच ।
"पृश्निपर्णी श्यामलता भृङ्गराजः गुणावरी ।
गुडूची सहदेवी च महौषधिगणः स्मृतः ॥"
इति शब्दचन्द्रिका ॥
अथौषधिश्च । (यथा, महाभारते ।३।१८८।६।
"विशल्यौ चापि सुग्रीवः सञ्जीवेनेति चकार ह ।
विशल्यया महौषध्या दिव्यमन्त्रप्रयुक्तया ॥"
सञ्जीवनी । यथा, रघौ । १२ । ६१ ।
"इत्या विचिन्तना तेन लङ्कायां राक्षसीसृता ।
जानकीविषवल्लीभिः परीतेव महौषधिः ॥"
"महौषधीः सञ्जीवनी लतेव ।" इति तट्टीकायां मल्लिनाथः ॥)

महौषधी, स्त्री, (महौषधि + ङीप् ।) श्वेतकण्टकारी । ब्राह्मी । (पर्य्यायोऽस्या यथा,—
"ब्राह्मी कपोतवङ्का च सोमवल्ली सरस्वती ।
मण्डूकपर्णी माण्डूकी वाट्टी दिव्या महौषधी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
कटुका । अतिविषा । इति राजनिर्घण्टः ॥
छिन्नरोहिका । इति निघण्टुशेषः ॥

मा ङ य माने । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) ङ य मायते । इति दुर्गादासः ॥

मा ङ लि शब्दे । माने । इति कविकल्पद्रुमः ॥ (जुहो०-आत्म०-सक०-अनिट् ।) ङ लि मिमीते । स्तुता धर्म्मं मिमीते यः । इति हलायुधः ॥ इति तट्टीकायां दुर्गादासः ॥

मा ल माने । इति कविकल्पद्रुमः ॥ (अदा० पर० सक०-अनिट् ।) ल माति भूमिं नलेन राजा ।
न माति मानिनो यस्य यशश्चन्द्रभुवनोदरे ॥"
इति हलायुधः ॥ इति दुर्गादासः ॥

मा, य (मा + क्विप् ।) वारणम् । (यथा रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ॥")
विकल्पः । इति मेदिनी । अव्ययवर्ग, ७६ ॥

मा, स्त्री, (मा + क्विप् । यद्वा, मा + क । ततष्टाप् ।) लक्ष्मीः । इति मेदिनी । मे, १ ॥

माता । (यथा, साहित्यदर्पणे । १० म ।
"मारमा सुषमा चारुरुचा मारबधूत्तमा ।
मातर्धरणिसमावासा सा वामा मेऽस्तु मा रमा ॥")
मानम् । इत्येकाक्षरकोषः शब्दरत्नावली च ॥

मा, त्रि, (अस्मद् + द्वितीयैकवचने । "त्वामौ द्वितीयायाम्याः ।" ८ । १ । २३ । इति मामित्यस्य स्थाने विकल्पेन मादेशः ।) मदीया कन्मेता । आमाके इति भाषा ॥ अस्मच्छब्दात् द्वितीयैकवचनविषयं पदम् । इति व्याकरणम् ॥ (यथा, देवीभागवते । १ । ५ । ६६ ।
"सिन्धोः पुत्र्यां रोहिता किं त्वमाद्ये !
कस्माद्देवा प्रेषसे नाथहीनाम् ।
त्वन्नाथस्ते खांशजातापराधो
युत्याथेनं मोदिनां मां कुरुष्व ॥")

मांसं, क्ली, (मन्यते इति । मनज्ञाने + "मनेर्दीर्घश्च ।" उणा० ४ । ६७ । इति स: दीर्घश्च ।) रक्तजधातुविशेषः । मास् इति भाषा ॥ स तु गर्भस्थबालकस्याहभिर्मांसैर्भवति । इति सुखबोधः ॥ भागवतमते चतुर्भिर्मांसैर्भवति । तत्पर्य्यायः । पिण्डितम्२ तरसम् ३ पललम् ४ क्रव्यम् ५ आमिषम् ६ पलम् ७ । इत्यमरः ।२।६।६३॥ आस्रजम् ८ आङ्गलम् ९ कौरम् १०। सर्व्वमांसगुणाः । वातनाशित्वम् । दृढत्वम् । बल्यत्वम् । रुच्यत्वम् । हृंहणत्वम् । देहस्यानसात्म्यसंस्थाभावैर्भूयो नानारूपत्वञ्च ॥ * ॥ प्रसहभूमयानूपवारिजवारिचारिमांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातघ्नत्वम् । शुक्रवर्द्धनत्वञ्च ॥ * ॥ पिष्किरप्रतुदाङ्गलमांसगुणाः । लघुत्वम् । शीतत्वम् । मधुरत्वम् । कषायत्वम् । वृष्यत्वम् । हृद्यत्वञ्च ॥*॥ अङ्गविशेषमांसगुणाः ।
'एकदेशेऽपि पूर्व्वार्द्धं मृगाणां पक्षिणां परम् ।
सर्व्वेषाञ्च शिरस्कत्वग्रीहृत्पर्म्मयकृदुदम् ॥
पादपुच्छाण्डमस्थिशृङ्गमुष्कक्रोडाश्च मेहनाः ।
धातवः शोणिताद्याश्च गुरवः स्युर्यथोत्तरम् ॥'
प्रशस्ताप्रशस्तमांसं यथा,—
'वयस्थं निर्विषं सद्यो हतं मांसं प्रशस्यते ॥
हतञ्च आधितं युष्टं वृद्धं बालं विषेक्षितम् ।
अगोचरहतं याङ्गहृदितं मांससूनहतञ्च ॥'
अष्टविधा मांसयोनिर्यथा । प्रसहाः १ प्रसह्यभक्षणात् कुररग्रेनादयः । भूमयाः २ विलशायित्वात् नकुलगोधादयः । आनूपाः ३ खड्गमहिषवराहादयः । जलजाः४ कुम्भीरादयः । जलेचराः ५ हंसबकप्रभृतयः । आङ्गलाः ६ हरिणच्छागादयः । विष्किराः ७ विकीर्णचरणात् तित्तिरमयूरकुक्कुटादयः । प्रतुदाः ८ प्रतुद्यचरणात् कपोतपारावतादयः । इति राजनिर्घण्टः ३ * ॥ अपि च ।
'मांसं वातहरं सर्व्वं हृंहणं बलपुष्टिदम् ।
प्रीणनं गुरु स्निग्धञ्च मधुरं रसपाकयोः ॥' * ॥
अथ तद्भेदाः ।
'मांसवर्गो द्विधा स्त्रीयो आङ्गलानूपमेहनः ॥'
तत्र आङ्गलस्य लक्षणं गुणाश्च ।
'मांसवर्गोऽत्र आङ्गला विलशायाश्च गुहाशयाः ।
तथा पर्णमृगा ज्ञेया विष्किराः प्रतुदा अपि ॥
प्रसहा अथ च ग्राम्या अष्टौ आङ्गलजातयः ।
आङ्गला मधुरा रूक्षास्तुवरा लघवस्तथा ॥
बल्यास्ते हृंहणा वृष्या दीपना दोषहारिणः ।

मृगाणां मिश्रितत्वञ्च गह्वरस्थार्हिते तथा ॥
बाधिर्य्यमरुचिं हृद्रोगमेकैकमुत्तरोत्तरान् ददात् ।
क्षीणं गलगण्डञ्च नाशयत्यनिलामयान् ॥'*॥
अथानूपस्य लक्षणं गुणाश्च ।
'कूर्मेचराः प्लवाश्चापि कोशस्थाः शार्ङ्गलक्षणाः ।
माह्या इति समाख्याताः पञ्चधानूपजातयः ॥
आनूपा मधुराः स्निग्धा गुरवो बद्धिलादनाः ।
श्लेष्मलाः पिच्छिलाश्चापि मांसपुष्टिप्रदा भृशम् ॥
तथाभिष्यन्दिनश्चैते हि प्रायोऽपथ्यतमाः स्मृताः ॥' * ॥
अथ जाङ्गलानां गजना विशिष्टा गुणाश्च ।
'हरिणैणकुरङ्गर्क्षपृषतस्यकुशम्बराः ।
राजीवोऽपि च सृक्वी चेत्याद्या जाङ्गलसंज्ञकाः ॥
हरिणस्तालवर्णः स्यादेणः शस्यः प्रकीर्त्तितः ।
कुरङ्ग ईषच्छ्यावः स्याद्धरिणात्तनिको महान् ॥
ऋष्यो नीलाङ्गको लोके सरोरु इति कीर्त्तितः ।
पृषतश्चन्द्रबिन्दुः स्याद्धरिणात् किञ्चिदल्पकः ॥
स्यादृश्यश्चेषुविषाणोऽथ शम्बरो गवयो महान् ।
राजीवस्तु रुरो श्रेयो राजीभिः परितो वृतः ॥
यो भृगः शृङ्गहीनः स्यात् स तु क्षुद्रोति निगद्यते ।
जङ्गलाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः ॥
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥'
अथ विलेशयानां गजना गुणाश्च ।
'गोधाशल्लशशकाखुगजकर्य्याद्या विलेशयाः ।
विलेशया वातहरा मधुरा रसपाकयोः ।
हृंहणा बहुविण्मूत्रा दीप्ताग्नीया अपि कीर्त्तिताः ॥
अथ गुहाशयानां गजना गुणाश्च ।
'सिंहव्याघ्रतरक्षूनां लक्षणैरनुहीपिनस्तथा ।
वभ्रुजम्बुकमार्জ্জারा इत्याद्यास्तु गुहाशयाः ॥
स्थूलपुच्छो रक्तनेत्रो बभ्रुभेदः सलाकुलः ।
गुहाशया वातहरा गुरुस्निग्धमधुराश्च ते ।
स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारिणाम् ॥'
अथ पर्णमृगाणां गजना गुणाश्च ।
'वर्णीकोलूलमार्জ্জारश्वसमर्कटिकादयः ।
इति पर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः ॥
स्मृताः पर्णमृगा वृष्याश्चक्षुष्या; प्लीहिनि
हिताः ।
श्वासार्शःकासगुल्मघ्नाः स्वरौजःपुष्टिवर्द्धकाः ॥'
अथ विष्किराणां गजना गुणाश्च ।
'वर्षाकालाविकिरकपिञ्जलक्षतित्तिराः ।
कृत्रिमकुक्कुटाद्याश्च विष्किराः सप्तदाहृताः ॥
विकीर्य भक्षयन्त्येते यस्मात् तस्मात्ति विष्किराः ।
कपिञ्जला इति प्राज्ञैः कथिता गौरतित्तिराः ॥
विष्किरा मधुराः स्निग्धाः कषायाः कटुपाकिनः ।
बल्या वृष्याक्षिदोषघ्नाः पथ्यास्ते लघवः
स्मृताः ॥'
अथ प्रतुदानां गजना गुणाश्च ।
'कालकण्ठकलाकारीतकपोतशुकपक्षिकाः ।
सारिका खञ्जरीटश्च शिखाद्याः प्रतुदाः स्मृताः ॥
प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदाः स्मृताः ।

कपोती धवला: माकु: घृतपक्वो हविष्यक: ।
प्रतुदा मधुरा: पित्तक्षयश्लेष्मकरा हिमा: ।
लघवो बृंहणकरा: किञ्चिद्वातकरा: स्मृता: ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध्र उलूकश्च शिक्षश्च श्येनघातक: ।
चाषो भासश्च कुरर इत्याद्या: प्रसहा: स्मृता: ।
प्रसहा: कीर्तिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहा: स्मृतु वीर्य्योष्णा: पक्वमांसं भजन्ति ये ॥
ते गोघ्नभक्षकौल्वादै: शुक्लपक्षा भवन्ति हि ॥'
गृध्रघातकस्थाने घृतघातकोऽपि पाठ: । वात्र
इति लोके ॥* अथ श्यावानां गणना गुणाश्च ।
'छागमेषहयाश्वाद्या श्यावा: प्रोक्ता महर्षिभि: ।
श्यावा वातहरा: सर्वे दीपना: कफपित्तला: ।
मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धना: ॥'
अथ कूर्मेचराणां गणना गुणाश्च ।
'कुलाघगजवाराहचमरीवारणादय: ।
एते कूर्मेचरा: प्रोक्ता यत: कूर्मे चरन्त्यमी ॥
कूर्मेचरा मरुत्पित्तहरा हृद्या बलावहा: ।
मधुरा: स्निग्धला: स्निग्धा मज्जला: श्लेष्मवर्द्धना: ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंसचारसकाश्चाम्बुकुक्कुटोत्प्लवरारिका: ।
नन्दीमुखी सकादम्बा बलाकाद्या: प्लवा: स्मृता: ।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवा: स्मृता: ॥
स्थूला कठोरा हृद्या च यस्याच्छदपरिस्थिता ।
गुटिका चक्षुषद्वयी श्रेष्ठा नन्दीमुखीति सा ॥
प्लवा: पित्तहरा: स्निग्धा मधुरा गुरवो हिमा: ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकरा: सरा: ॥'
अथ कोयष्टीनां गणना गुणाश्च ।
'गृध्र: गृध्रनखश्चापि गृध्रिग्राम्यकुक्कुटौ: ।
जीवाश्चैवंविधाश्चान्ये कोयष्ट्या: परिकीर्तिता: ॥
कोयष्ट्या मधुरा: स्निग्धा: पित्तवातहरा हिमा: ।
बृंहणा बहुवर्चस्का हृद्याश्च बलवर्द्धना: ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्मनक्राश्च गोधाशकरघट्टका: ।
खड्गिक: शिशुमारश्चेत्याद्य: पादिन: स्मृता: ॥
पादिनोऽपि च ये तेषु कोयष्टीनां गुणै: समा: ॥'
इति भावप्रकाश: ॥

अन्यच्च ।
मांसं वातहरं हृद्यं बृंहणं बलवर्द्धनम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयो: ॥'
तस्योत्पत्तिस्थानभेदविधं यथा,—
'प्रसह्य भक्षयन्ति ये प्रसह्यास्तेन कीर्तिता: ।
भूमया बिलशायिभ्योदानूपोऽनूपसंश्रयात् ॥
जले निवासाज्जलजा जले चर्य्याज्जलेचरा: ।
स्थलजा जाङ्गला: प्रोक्ता जगा जङ्गलचारिण: ॥
विष्किरैर्य विष्किराश्चैव प्रतुद्य प्रतुदास्तथा ।
योनिरष्टविधा ह्येषा मांसानां संप्रकीर्तिता ॥'
'प्रसह्या भूमयानूपवारिजा वारिचारिण: ।
गुरुस्निग्धमधुरा: स्निग्धा वातघ्ना: शुक्रवर्द्धना: ॥
लावाद्यो वैष्किरो वर्ग: प्रतुदा जाङ्गला मृगा: ।
लघव: प्रीतमधुरा: बलकृद्वाता हिता नृणाम् ॥'
अथ मांसयूषगुणा: ।
'रसो मांसस्य चक्षुष्यो दृंहण: प्राणवर्द्धन: ।
दृष्टो वातविकारघ्न: स्नेहतोज:स्वरवर्द्धन: ।
भग्नविश्लिष्टसन्धीनां व्रणानां क्षतिनां हित: ॥'
अथ तैलपक्वमांसगुणा: ।
'मांसं घृतसंसिद्धं वीर्य्योष्णं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं हृद्यं पुष्टिबृंहणं गुरु ॥'
घृतपक्वमांसगुणा: ।
'मांसन्तु घृतसंसिद्धं हृद्यं पुष्टिबलप्रदम् ।
प्रीणनं सर्व्वधातूनां विशेषाच्छुक्रशोधिनाम् ॥'
परिशुष्कघृतदग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्थं चोष्णाम्बुना मृदु: ।
क्षीरकाद्यै: समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हृद्यं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौज:शुक्रवर्द्धनम् ॥
तत्रैव घृतपक्वानां प्रदिष्टं सक्थिमानकम् ।
प्रदिष्टं बलमांसाग्निवर्द्धनं वातपित्तजित् ॥'
शूलिकापक्वमांसगुणा: ।
'मांसन्तु शूलिकाप्रोतमङ्गारेण विपाचितम् ।
श्रेष्ठं गुरुतरं हृद्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिण्डितं पिष्टं सिद्धं गुडघृतान्वितम् ।
लवणामरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरु: स्निग्धो बलोपचयवर्द्धन: ।
दर्शेण येन येनेह यद्भक्षणं मत्स्यमांसयो: ।
तस्य तस्य तयोस्तेन दृग्दोषैर्न्निर्भवेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा, —
'अजादष्टगुणं पिष्टं पिष्टादष्टगुणं पय: ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मद्यान्न च भक्षणात् ॥'
इति राजवल्लभ: ॥
वर्জ্জनीयमांसानि यथा,—
'क्रव्यादपक्षिहारीतकुक्कुटमांसानि वर्জ्जयेत् ।
सारसैकशफान् हंसान् बलाकावकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटस्तगर्हितान् ।
पीवसान् मानुष्यान् रक्तपीतान् जग्ध्वा वै
कामतो नर: ॥
बन्धुरं कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।'
इति गारुडे ६६ अध्याय: ॥
मांसभक्षणे दोषो यथा, —
'लोभात् स्वभक्षणार्थाय जीवितं हन्ति यो नर:।
मज्जाकुक्षे वसेत् सोऽपि तन्नोमी लक्षवर्षकम् ॥
ततो भवेत् स प्राणको मीनश्च सप्तजन्मसु ।
क्षयादयश्च कर्म्मभ्यस्तत: शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्याय: ॥
अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च जालपादञ्च कोकिलम् ॥
खञ्जरीटञ्च गृध्रेण गृध्रं तथैव च ।
उल्लूकं चक्रवाकञ्च भासं पारावतञ्चपि ॥
कपोतं टिटिभञ्चैव श्यामटिट्टिभमेव च ।
सिंहव्याघ्रञ्च मार्জ্জारं श्वानं सूकरमेव च ॥
प्रमादात् मक्कटञ्चैव गर्हितञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वमांसान् पक्षिणोऽन्यान् वने-
चरान् ॥
जलेचरान् स्थलेचरान् ग्राम्यांश्चैव विवर्জ্जयेत् ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्याय: ॥
अन्यच्च ।
'नाद्याद्विधिना मांसं विधिज्ञो नापदि द्विज: ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवश: ॥
न तादृग् भवतो मेध्यं यादृग् भवति खादत: ॥
कुर्य्यादृतुसमं सार्द्धं कुर्य्यान् पितृसमं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्न: प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवध: स्वर्ग्यस्तस्मान्मांसं विवर्জ্जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोकप्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन् देवान् ततोऽन्यो नास्त्य-
पुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समा: ।
मांसानि च न खादेद्यस्तयो: पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनै: ।
न तत्फलमवाप्नोति यन्मांसपरिवर्জ্জनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाह्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिण: ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्याद: सर्व्वमांसादस्तस्मान्मत्स्यान् विव-
र्জ্जयेत् ॥'
इति मानवे ५ अध्याय: ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धगद्यम् । 'ये त्विह
वै पुरुषा: पुरुषमेधेन यजन्ते । याश्च स्त्रियो
वृषशून् खादन्ति तांश्च ताश्च ते पशव इह
निहता यमसदने यातयन्तो रुजोगमा: ।
धौनिका इव सुधितिना वदायाङ्कं पिबन्तीति ॥'
ब्रह्मपुराणम् ।
'पशोस्तु मार्ग्गमाणस्य न मांसं भक्षयेत् क्वचित्
दृष्टमांसं गर्भगृध्यं शुष्कमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नात्ता-
लोलुप: ।
फलमाप्नोत्यश्वमेधशतस्य च ॥'
नन्दिपुराणम् ।
'यश्चोपदेशं कुरुते परस्य तु मुहुर्मुहु: ।
मांसस्य वर्জ্জनफलं सोऽमांसादफलं लभेत् ॥'
भविष्यपुराणम् ।
'आमिषं रक्तगात्रञ्च यो भुङ्क्ते च रवेर्दिने ।
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'

विष्णुपुराणम् ।
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
स्त्रीतैलमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवम् ॥'
इति तिथ्यादितत्त्वम् ॥
अथ मांसभक्षणविधिः ।
'श्राद्धे देवान् पितॄन् प्रार्च्य खादन् मांसं
न दोषभाक् ।
वसेत् स नरके घोरे दिनानि पशुरोमभिः ॥
सम्मितानि दुराचारो यो हन्यविधिना पशून् ।
मांसं संभक्ष्य संप्राप्य कामान् याति ततो
हरिम् ॥'
इति गारुडे ६६ अध्यायः ॥
अपि च ।
'गोधा कूर्म्मः शशः खड्गो शल्लकश्चेति
सप्तमाः ।
भक्ष्याः पञ्चनखाश्चेमं मनुराह प्रजापतिः ॥
मत्स्यान् सशल्कान् भुञ्जीत मांसं रौरवमेव च ।
निवेद्य देवताभ्यश्च ब्राह्मणेभ्यश्च शास्त्रतः ॥
मायूरं तैत्तिरञ्चैव कपोतञ्च कपिञ्जलम् ।
वार्द्धीणसं वकं भक्ष्यं नीलपंखं परावतान् ॥
सारसं चक्रवाकञ्च तथा पाठीनरोहितौ ।
मनुष्याश्चैते मुनिश्रेष्ठा भक्षणाय तपोधनैः ॥
प्रोक्षितं भक्षयेद्यां मांसञ्च द्विजकाम्यया ।
यथाविधिनियुक्तञ्च प्राणानामपि चात्यये ॥
भक्षयन्नपि मांसानि यौषभोजी न लिप्यते ।
औषधार्थमशक्तौ वा नियोगाद्यज्ञकारणात् ॥
आमन्त्रितस्तु यः श्राद्धे दैवे वा मांसमुत्सृजेत् ।
यावन्ति पशुरोमाणि तावतो नरकान् व्रजेत् ॥
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अपि च ।
'मांसस्यातः प्रवक्ष्यामि विधिं भक्षणवर्ज्जने ।
प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया ॥
यथाविधिनियुक्तस्तु प्राणानामेव चात्यये ।
प्राणस्यान्नमिदं सर्व्वं प्रजापतिरकल्पयत् ॥
स्थावरं जङ्गमञ्चैव सर्व्वं प्राणस्य भोजनम् ।
चराणामन्नमचरा दंष्ट्रिणामप्यदंष्ट्रिणः ॥
अहन्यहन्यानां मूढाश्चैव भीरवः ।
नाशा दुष्यत्यदन्नाद्यान् प्राणिनोऽहन्यहन्यपि ॥
प्राणेन रक्षा त्राणाच्च प्राणिनोत्तार एव च ।
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः ॥
अतोऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ।
क्रीत्वा स्वयं वाप्युत्पाद्य परोपकृतमेव वा ।
देवान् पितॄनर्चयित्वा खादन् मांसं न दुष्यति ॥
नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥
न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥'
इति मात्स्ये ५ अध्यायः ॥ * ॥
देवीपुराणम् ।
'अष्टमीं नवमीञ्चैव नक्षत्रामपरेऽहनि ।
मत्स्यमांसोपहारेण दत्त्वान्नैवेद्यमुत्तमम् ।
तेनैव विधिनात्मन्तु स्वयं भुञ्जीत नान्यथा ॥'
याज्ञवल्क्यः ।
'प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄन् समभ्यर्च्च्य खादन् मांसं न
दोषभाक् ॥'
यमः ।
'भक्षयेत् प्रोक्षितं मांसं सकृत् ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे च विवर्ज्जयेत् ॥'
इति तिथ्यादितत्त्वम् ॥ * ॥
भाक्तामिषं यथा,—
'गोवर्ज्यमामिषं चौरं पत्ये जन्यौरमामिषम् ।
आमिषं रक्तगाक्षञ्च सर्व्वञ्च दग्धमामिषम् ॥'
गोवर्ज्यमामिषं चौरमित्यत्र पत्न्याश्चामामिषं
पर्णमिति च पाठः । इति कल्पलोचनः ॥
(अस्योत्पत्तिर्यथा,—
'रसाद्रक्तं ततो मांसं मांसान् मेदः प्रजायते ॥'
इति सुश्रुते सूत्रस्थाने १४ अध्याये ॥)
मांसः, पुं (मन + सः । दीर्घश्च ।) कालः ।
कीटः । इति शब्दरत्नावली ॥ (वर्णसङ्करजातिविशेषः । यथा, महाभारते । १३ । ४८ । २२ ।
"चतुरो भागधो सूते क्रूराचारोपजीविनः ।
मांसं खादुकरं चौद्रं सौगन्धमिति विश्रुतम् ॥")
मांसकारि, स्त्री, (मांसं करोतीति । क + णिच् + इन् ।)
रक्तम् । इति हेमचन्द्रः । ३ । २८६ ॥
मांसच्छदा, स्त्री, (मांस इव छदः पर्णमस्याः । तदुपरिलोमोत्पत्तेरस्यास्तथात्वम् ।) मांसरोहिणीविशेषः । तत्पर्य्यायः । मांसी २ मांसरोही ३ रसायनी ४ सुलोमा ५ लोमकरिणी ६ । इति राजनिर्घण्टः ॥
मांसज, स्त्री, (मांसाज्जायते इति । जन् + डः ।) मेदः । इति हेमचन्द्रः । ३ । १८८ ॥ (मांसजाते, त्रि ॥)
मांसतेजः, [स्] स्त्री, (मांसात् तेजोऽस्य ।) मेदः । इति हेमचन्द्रः । ३ । १८८ ॥
मांसदलनः, पुं, (मांसं श्लेष्मात्मकं दलति छिनत्ति क्षयीकरोतीति । दल + ल्युः ।) श्लेष्मघ्नवृक्षः । इति शब्दचन्द्रिका ॥
मांसदारी, [न्] पुं, (मांसं दारयति शिथिलीकरोतीति । दृ + णिच् + णिनिः ।) अम्लवेतसः । इति राजनिर्घण्टः ॥ (विस्तरोऽस्याम्लवेतसशब्दे द्रष्टव्यः ।)
मांसपचनं, स्त्री, (मांसस्य पचनम् ।) मांसपाकः । तस्य रूपान्तरं मांसाकः । इति शब्दरत्नम् ॥
मांसपेशी, स्त्री, (मांसस्य पेशी ।) गर्भस्थावयवविशेषः । यथा,—
"बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहात् भवेत् पेशी रक्तमांसचिता दृढा ॥
बीजस्थैवाङ्कुराः पेश्यः पञ्चविंशतिरात्मतः ॥"
इति सुश्रुतबोधः ॥ * ॥
अथ मांसस्य पेशीरुक्ताः ।
यथार्थेक्षणवान् युक्तो वायुः श्रोतांसि दारयेत् ।
अनुप्रविश्य पिण्डितं पेशीर्जनयते तथा ॥"
यथार्थं यथाप्रयोजनम् ॥ * ॥ मांसपेशीनां संख्यामाह ।
"मांसपेश्यः समाख्याता वृत्ता पञ्चशतानि च ।
तासां शतानि चत्वारि ग्रीवासु कथितान्यथ ॥
कोष्ठे षडुत्तरा षष्टिः कथिता मुनिपुङ्गवैः ।
शीर्षाया जङ्घयोस्तासु चतुस्त्रिंशत् प्रकीर्त्तिताः ॥"
ताः ग्रीवागताः प्राह । एकैकस्यां पार्श्वास्थ्नां तिसृष्वित्यर्थः पञ्चदश १५ पार्श्वये दश १० पार्श्वोपरिकूर्चसन्निविष्टा दश १० गुल्फतलयोर्दश १० गुल्फजानुनोः अन्तरे विंशतिः २० जानुनि पञ्च ५ ऊरौ विंशतिः २० वंक्षणे दश १० एवमेकस्मिन् सक्थ्नि शतम् १०० भवन्ति । एतेनेतरसक्थ्नि बाहू च व्याख्यातौ ॥ अथ कोष्ठगताः प्राह । गुदे तिस्रः पेशीस्त्रिकेका १ वैक्लव्यामेका २ वृषणयोर्द्वे २ स्फिचोः पञ्च पञ्च ५ । ५ वस्तिमर्म्मणि द्वे २ उदरे पञ्च ५ नाभौ एका १ दृष्टोर्द्वयसन्निविष्टा उभयतः पञ्च पञ्च दीर्घाः ५ । ५ पार्श्वयोः षट् ६ वक्षसि दश १० अक्षकासौ प्रति समग्रात् सप्त ७ । अक्षकौ अंसयोः इति लोके । अंसौ स्कन्धौ । हृदि द्वे २ यकृति द्वे २ प्लीह्नि द्वे २ उण्डुके द्वे २ ॥ * ॥ अथ ग्रीवोर्द्धगा आह । ग्रीवायां चतस्रः ४ हनुमूलयोः = कण्ठमणी घण्टिकायामिति यावत् एका १ गले एका १ तालुनि द्वे २ जिह्वायामेका १ ओष्ठयोर्द्वे २ नासायां द्वे ललाटे चतस्रः ४ शिरस्येका १ एवं मांसपेश्यः पञ्चशतानि भवन्ति ॥ * ॥
"स्त्रीणामपि भवन्त्येताः किन्तु विंशतिरुत्तराः ।
गर्भाशये गर्भमार्गे योनौ च स्तनयोरपि ॥"
एताः पञ्चशतानि मांसपेश्यः । अधिका विंशतिर्यथा । गर्भाशये तिस्रः ३ गर्भच्छिद्रसंख्याताः । शुक्रार्त्तवप्रवेशिन्यां तिस्रः ३ योनावभ्यन्तरतो मुखाभिते प्रदरे द्वे २ योनावेव बहिर्निर्गतशोणितपार्श्वद्वयस्थिते वर्त्मनि योनिकर्णिके इति यावत् द्वे २ स्तनयोः पञ्च पञ्च ५ । ५ यौवने तासां वृद्धिर्भवति ।
"पुंसां पेश्यः पुरस्तात् याः प्रोक्ता मेहनसुश्रुताः ।
स्त्रीणामाहुस्तिस्रस्ता यत्समन्ततं हि ताः ॥"
अस्यायमर्थः । पुंसां मेहनसुश्रुतयोश्च याश्चतस्रो मांसपेश्यः पूर्व्वसूत्रात्ताः स्त्रीणां मेहनसुश्रुताभावात् यत् गर्भाशयं आहुस्तिस्रस्ता इत्यदोषत्वात् । स्त्रीणां मांसपेश्यश्चाभिर्द्वीपानि पञ्चशतानि । तथा च भोजः ।
"पञ्चपेशीशतान्येव स्त्रीवर्ज्जं विद्धि भूमिप ! ।
अतश्च तिस्रो वीवर्ज्ये स्त्रीणां गर्भाशये सुश्रुतः ॥
अथ मांसपेशीनां कर्म्माण्याह ।
"शिरःस्कन्धपृष्ठपार्श्वादि सन्धयस्तु शरीरिणाम् ।
पेशीभिः संहितान्येव बलवन्ति भवन्ति हि ॥"
इति भावप्रकाशः ॥

(यथा, महाभारते । १ । ११५ । १२ ।
"ततो जघ्ने मांसपेशी लोहाङ्गीवेव संहता ॥")
मांसपला, स्त्री, (मांसमिव पलमस्याः ।) वार्त्ताकी। इति राजनिर्घण्टः ॥
मांसभक्षः, त्रि, (मांसं भक्षयतीति । भक्ष + "कर्म्मण्यण् ।"३।२।१। इत्यण् ।) मांसभक्षण-कर्त्ता। मांसं भक्षयतीति छात् वक्ष्यति कर्म्मणि वयःप्रत्ययेन निष्पन्नः ॥ (दानवविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । २३२ । ६ ।
"मांसपो मांसभक्षश्च वेगवान् केतुमाञ्छिखिः ॥")
मांसमासा, स्त्री, माषपर्णी । इति राजनिर्घण्टः ॥
मांसरोहिणी, स्त्री, (मांसं रोपयतीति । रुह + णिच् + णिनिः । ङीप् । नञ् पुक् ।) सुवर्णवृक्षभेदः। तत्पर्य्यायः। अस्थिरुहा २ वृत्ता ३ चर्म्मकला ४ वसा ५ विकसा ६ मांसरोहिणी७ । अस्या गुणाः। वृष्यत्वम्। वातकत्वम्। दोषत्रयनाशित्वञ्च। इति राजनिर्घण्टः ॥ (तथाचास्याः पर्य्यायो गुणाश्च ।
"मांसरोहिण्यस्थिरुहा वृत्ता चर्म्मकरी क्षया। प्रहारवल्ली विकसा वीरवल्ल्यपि कथ्यते ॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मांसलं, क्ली, (मांसं बहुत् पुष्टिकरो गुणोऽस्य स्यादिन् वा । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) काव्यस्य गौड़ीरीत्य-न्तर्गतस्य ओजोगुणस्याङ्गविशेषः । यथा,—
"ओजः समासभूयस्त्वं मांसलं पदडम्बरम् ॥"
इति काव्यचन्द्रिका ॥
मांसलः, त्रि, (अतिशयेन मांसमस्त्यस्येति । मांस + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) बलवान् । इत्यमरः । २ । ६ । ४४ । स्थूलः । यथा, भारते ६६ अध्याये ।
"निखाताश्च मरुद्रक्षाः स्थूलैर्द्रव्याक्षिवुकैः शुभैः । मांसलैश्च घनोपेतैरक्षैरधरैर्नृपाः ॥"
(मांसयुक्तः । यथा, हरिवंशे । ६८ । २८ ।
"हृदयं वसुजातं पृथु न वेपनं मांसलञ्च नृपतीनाम् ॥"
अतिबहुलः । यथा, मेघदूते । ६ । २० ।
"हृदस्य हंसावलिमांसलश्रियो
बलाकयेव प्रबला विड़म्बना ॥")
मांसलपला, स्त्री, (मांसलं पलमस्याः ।) वृन्ताकी। इति राजनिर्घण्टः ॥
मांसविक्रयी, [न्] त्रि, (मांसविक्रयोऽस्यास्तीति । मांसविक्रयेण जीवति वेति इनिः ।) आमिष-विक्रयकर्त्ता । इति हलायुधः ॥ तत्पर्य्यायः । वैतंसिकः २ कौटिकः ३ मांसिकः ४ । इत्यमरः । २ । ९० । १४ ॥ शौल्किकः ५ । इति जटाधरः ॥ कौटकिकः ६ । इति शब्दरत्नावली ॥ (यथा मनौ । ३ । १५१ ।
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्याः स्युर्वाचयन्तयोः ॥")

मांसवारः, पुं, (मांसस्य वारः ।) मेदः । इति राज-निर्घण्टः ॥ (मांसेऽपि वारो वर्जं यस्य । यवन-शूकरादयः । यथा, हरवंशसंहितायाम् । ६८।९००।
"उपचितदेहो विद्वान् धनी सुरूपश्च मांस-वारो यः ।
सङ्गात इति च सुस्निग्धसन्धितास्तुरगसुतो ज्ञेयाः ॥")
मांसशेफः, पुं, (मांसानां शेफः ।) मेदः । इति राजनिर्घण्टः ॥
मांसहासा, स्त्री, (मांसेन हासः प्रकाशो यस्याः ।) चर्म्म । इति शब्दरत्नावली ॥
मांसाष्टका, स्त्री, (मांसेन सम्पन्ना अष्टका । मांसप्रधाना अष्टका वा ।) गौणचान्द्रमाघ-कृष्णाष्टमी । तत्र मांसोपकरणकश्राद्धमावश्यक-कम् । यथा । अथाष्टकाश्राद्धम् ।
"पित्र्यादानाय मूले क्षुरकाक्षिम्न एव च ।
छायापत्ये वरिष्ठा हि पूर्व्वा चैन्द्री विभाव्यते ॥
प्राजापत्या द्वितीया स्यात् तृतीया वैश्वदेवकी।
आद्या पूर्वेः सदा कार्य्या मांसैरन्या भवेत्तथा ॥
प्राकेः कार्य्या तृतीया स्यादेष क्रमगतो विधिः ॥"
मूले प्रधानस्थाने । अमावास्या हि श्राद्धस्य प्रधानकालः तद्दिति यावत् । ऐन्द्री चाग्ने रिन्द्रदेवताकयागसम्बन्धात् । एवं प्राजापत्या वैश्वदेवकी च । मांसैः पशोः । तथा च गोभिलः । यत्नवाक्यतरसंभारः स्यात् तदा पशुनैव कुर्य्यादिति । यत्नवेति निपातसमुदायो यद्यर्थे । पशुरपि छाग एव । छागोऽजादेशे पशुरिति गोभिलात् । न च तेष्वा जर्द्धं अष्टम्यां गौरिति गोभिलसूत्रेण गवोपदेशात् कथमजा-पदिष्टमिति वाच्यम् । तदसम्भवे पशुने-त्यनेन यः पशुरुपदिष्टस्तस्य विशेषनोऽनुप-दिष्टत्वात् । वस्तुतस्तु हरिवंशे छागोऽपि विहितः ।
"इक्ष्वाकुस्तु विकुक्षिं वै अष्टकायामथादिशत् ।
मांसमानय श्राद्धाय छागं हत्वा मदाय ल ! ॥"
इत्यादिना छागमांसबोधनात् । पशुभावे स्थाली-पाकेन । यथा, गोभिलः । अपि वा स्थाली-पाकं कुर्व्वीतेति । तद्विधानन्तु ।
"स्थालीपाकं पशुस्थाने कुर्य्याद्व्यञ्जनकल्पितम् ।
अपयेत्तं सवनसायाच्चरुणा गोः पयस्तु ॥"
इति छन्दोगपरिशिष्टीयं ज्ञात्वम् । अन्विति ओदनचरोः पश्चात् । अतएव ।
"पितरः स्नेहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विदुषस्तु त्रयोदशीषु च ॥"
इति ग्रातातपेनोक्तम् । तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन मुख्यानामावश्यकं सदेति भवत्यात् । इति श्राद्धतत्त्वम् ॥
मांसिकः, पुं, (मांसाय प्रभवति "तस्मै प्रभवति वसनादिभ्यः ।"५। १। १०१ । इति । मांस + ठञ् । मांसेन जीवतीति ठञ् वा । मांसं पण्य-मस्य । "तदस्य पण्यम् ।"४।४ । ५१ । इति ठक् वा । अथवा, मांसं नियुक्तमस्मै भोजने । इति

"आवश्यामांसौदनाट्टिठन् ।"४। ४ । ६७ । इति टिठन् ।) मांसविक्रयी । इत्यमरः ।२।९०।१४॥
मांसिनी, स्त्री, (मांसवत् पदार्थोऽस्यास्तीति । इनिः । ङीप् ।) जटामांसी । इति राज-निर्घण्टः ॥
मांसी, स्त्री, (मांसवत् पदार्थोऽस्यास्तीति । मांस + अर्शआदित्वात् अच् । गौरादित्वात् ङीष् ।) जटामांसी । कक्कोली । इति मेदिनी । से, ८ । मांसच्छदा । इति राजनिर्घण्टः ॥ (यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेषी मांसी लक्ष्मजटा जटी ॥")
मांसेष्टा, स्त्री, (मांसमिष्टं प्रियमस्याः ।) वल्लुजा । इति राजनिर्घण्टः ॥
माकन्दः, पुं, (मातीति । मा + किप् । माः परि-मितः सुघटितः कन्द इव फलमस्य ।) आम्र-वृक्षः । इति मेदिनी । दे, ३८ ॥ (यथा, गीतगोविन्दे ।
"माकन्द ! क्रन्द कान्ताधर ! धरणितलं
गच्छ यच्छन्ति यावद्
भावं भृङ्गारसारश्रुतमिह जयदेवस्य विश्व-
वचांसि ॥"
तथास्य पर्य्यायः ।
"आम्रः प्रोक्तो रसालश्च सहकारोऽतिसौरभः ।
कामाङ्गो मधुदूतश्च माकन्दः पिकवल्लभः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
माकन्दी, स्त्री, (माकन्द + ङीष् ।) आम्रवृक्षी । नगरभेदः । इति मेदिनी । दे, ३८ ॥ (यथा, महाभारते । ५ । ७२ । १५ ।
"——————पञ्चग्रामा वृता मया ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानञ्च गोविन्द ! कपिदेवाञ्च पञ्चमम् ॥")
पीतचन्दनम् । इति शब्दमाला ॥ माद्राजी इति माङ्गनी इति च हिन्दी भाषा । तत्-पर्य्यायः । बहुमूली २ मादनी ३ गन्धमूलिका ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । मधु-रत्वम् । दीपनत्वम् । कफत्वम् । अग्निवात-कारित्वम् । पथ्यत्वम् । वर्षासु न सितासधिक-त्वञ्च । एका विशदमूली च श्यामला च तथा-परा । इति राजनिर्घण्टः ॥
माकरी, स्त्री, (मकरयुक्ता पौर्णमास्यत्रेति । मकर + अण् + ङीष् ।) माघशुक्लसप्तमी । अस्य स्नानादिविधिर्यथा । भविष्ये ।
"सूर्य्यग्रहशतैस्तुल्या हि शुक्ला माघस्य सप्तमी ।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
माघे मासि सिते पक्षे सप्तमी कोटिभास्करा ।
दद्यात् स्नानार्घ्यदानाभ्यामायुरारोग्यमश्नुते ॥
अरुणोदयवेलायां शुक्ला माघस्य सप्तमी ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
कोटिभास्करा कोटिसप्तमीतुल्या सप्तम्या भास्करदेवताकत्वात् । सूर्य्यग्रहशतं स्नान-जन्यफलसमफलजनकत्वात् तुल्येयम् ॥ * ॥ स्नानपद्धतिर्यथा

गङ्गायां स्नानमहं करिष्ये इति वाक्ये विशेषः। अर्घार्थदानमहं इतत् स्नानादेव माघमासः-स्नानं तन्त्रेणैव सिध्यति ॥ * ॥

अथ विधानसप्तमीव्रतम्।

प्रथमतो ब्राह्मणान् क्षत्रियान्वाद्य ॐ सूर्यः सोम इत्यादि पठित्वा स्नानादिमार्गे कुशतिलजलान्यादाय ॐ तत् सवितुर्वार्यं ओमद्य माघे मासि शुक्ले पक्षे सप्तम्यादितिवाद्यारभ्य प्रतिमासीयशुक्लसप्तम्यां पौषसप्तमीं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य संयमपात्रजलक्षिप्तं तत्तत्स्थानि तत्तन्नियमं कुर्यात्। तत्र माघे अर्घार्थमाषं मुञ्चीत। फाल्गुने अञ्जलौच्यगृहीतं कपिलाविड्वयमात्रप्रमाणं तदभावे अन्यगोमयमधौति। चैत्रे मरीचमेकम्। वैशाखे किञ्चिज्जलम्। ज्येष्ठे अपक्वकदलीफलमधाक्षतामाषम्। आषाढे खच्छायद्विगुणमये यवप्रमाणं कुशमूलम्। श्रावणे नक्तं काले अव्यङ्गविल्वोदनम्। भाद्रे मुद्गोपवासः। आश्विने पञ्चमार्द्धयामे मयूराक्षप्रमाणं हविष्यान्नम्। कार्त्तिके अर्द्धप्रस्थप्रमाणं कपिलाक्षीरं तदभावे क्षीरान्तरम्। मार्गशीर्षे प्राङ्मुखो वायुग्रहणम्। पौषे खव्यं घृतम्। तदनन्तरञ्च।

"ब्राह्मणान्भोजयेत् भक्त्या गुडक्षीरतिलाज्यैः। विप्राय दक्षिणां देया विभवस्यानुरूपतः॥ अशक्तौ पारणं कुर्यात् सङ्कल्परहितेन च। सप्तमाद्यतिलादीनि घृतञ्चैव विवर्जयेत्॥ एकविंशं भक्तमुक्तमर्कैतन्नानुसारतः॥"

चान्द्रमासविशेषोक्तेरुक्तवत् अनन्तादिव्रतवत्-मलमासेतरे तत्तु कर्त्तव्यम् ॥ * ॥

अथारोग्यसप्तमी।

तत्र पूर्ववत् सप्तम्यादितिवाद्यारभ्य ऐहिकारोग्य धनधान्यपारलौकिकशुभज्ञानप्राप्तिकामः संवत्सरं यावत् आरोग्यसप्तमीव्रतमहं करिष्ये इति सङ्कल्प्य प्रतिमासशुक्लसप्तम्यां ग्रालग्रामे घटादिस्थजले वा पूजयेत्। रक्ताम्बुजासनमिति ध्यात्वा इतत् पात्रं ॐ सूर्याय नम इत्यादिभिः संपूज्य।

"आदित्य भास्कर रवे भानो सूर्य दिवाकर। प्रभाकर नमस्तेऽस्तु रोगान्हरतु मे रविः॥"

इति शिरःपूजयेत्। इदं संवत्सरे पूर्णे दक्षिणां दद्यात्। ब्राह्मणांश्च भोजयेत्। विशेषमासानुद्देश्यादमावास्यास्नानवत् मलमासेऽपि कर्त्तव्यम्॥

अथ भीष्माष्टमी।

अस्यां ब्राह्मणः पितृतर्पणं कृत्वा

"ॐ वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च। अपुत्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे॥"

इति पितृवत् भीष्मं तर्पयेत्। ततः स्नात्वा शक्ति।

"भीष्मः शान्तनवो वीरः सत्यवादी जितेन्द्रियः। आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम्॥"

इत्यनेन प्रार्थयेत्। अस्त्रियादिभिः पितृतर्पणात् पूर्वं इतत् कर्त्तव्यम्॥ * ॥ भैष्यामेकादश्यामुपोष्य द्वादश्यां तिलोदकैर्नामावशेषं कर्त्तव्यम्। स्नानतर्पणमहादानभोजनादि यथाशक्ति कुर्य्यात्॥ * ॥ माघपौर्णमास्यां युगाद्यावेन पार्व्वणविधिना श्राद्धं कर्त्तव्यम्। अनन्तफलकामनया स्नानदानञ्च कर्त्तव्यम्।

तस्यां दानप्रमाणन्तु तिथितत्त्वेऽनुसन्धेयम्॥

इति स्नानतत्त्वम्॥*॥*॥

अथ माघस्नानफलम्।

"व्रतदानेज्यपोभिश्च न तथा प्रीयते हरिः। माघमज्जनमात्रेण यथा प्रीणाति केशवः॥ न समं विद्यते किञ्चित् तैजः सौरेण तेजसा। तद्वत् स्नानेन माघस्य न समाः क्रतुजाः क्रियाः॥ प्रीतये वासुदेवस्य सर्व्वपापापहित्तये। माघस्नानं प्रकुर्व्वीत स्वर्गलाभाय मानवः॥ किं रक्षितेन देहेन सुपुष्टेन बलीयसा। अध्रुवेणाशु हेयेन माघस्नानं विना भवेत्॥ मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ। कथं सोपैः प्रमुच्येत कथं स त्रिदिवं व्रजेत्॥ ब्रह्महा क्षेमहारी च सुरापो गुरुतल्पगः। माघस्नायी विपापः स्यात्तत्संसर्गी च पञ्चमः॥ उपपातकानि सर्व्वाणि पातकानि महान्ति च। भस्मीभवन्ति सर्व्वाणि माघस्नायिनि मानवे॥ पावका इव दीप्तेऽग्नौ माघस्नाता नरोत्तमाः। विमुक्ताः सर्व्वपापेभ्यो मेघेभ्य इव चन्द्रमाः॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनःकर्म्मभिः कृतम्। माघस्नानं दहेत् सर्व्वं पावकः समिधो यथा॥ ग्रामादिकञ्च यत् पापं ज्ञानाज्ञानकृतञ्च यत्। स्नानमात्रेण तत्सर्व्वं मकरस्थे दिवाकरे॥ निष्पापास्त्रिदिवं यान्ति पापिष्ठा यान्ति शुद्धताम्। सन्देहोऽत्र न कर्त्तव्यो माघस्नाने नराधिप!॥ सर्व्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृप!। सर्व्वेषां स्वर्गदो माघः सर्व्वेषां पापनाशनः॥ इतदेव परो मन्त्रो ह्येतदेव परं तपः। प्रायश्चित्तं परञ्चैव माघस्नानमनुत्तमम्॥ वृथा जन्मान्तराभ्यासात् माघस्नानमतिर्भवेत्। अध्यात्मज्ञानकौशल्यं जन्माभ्यासाद्यथा नृप!॥ संसारकर्द्दमालेपप्रक्षालनविधारदम्। पावनं पावनानाञ्च माघस्नानं परन्तप!॥ स्नाता माघे च ये राजन्! सर्व्वकामफलप्रदे। ते यान्ति शुक्लते लोकांश्चन्द्रसूर्य्यग्रहोपमान्॥"

इति श्रीपद्मपुराणे उत्तरखण्डे ४ अध्यायः॥

माधवनी, स्त्री, (मघवान् देवताऽस्याः यद्वा मघवत इयमिति। मघवन्+अण्। "मघवा बहुलम्।" ६। ३। १२८। इति आदेशः। ङीप्।) पूर्व्वादिक्। इति राजनिर्घण्टः॥

माधवनं, क्ली, इन्द्रसम्बन्धि वस्तु। मघवत इदमित्यर्थे अण्प्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥ (मघवन्+अण्। "मघवा बहुलम्।" ६। ३। १२८। इति विकल्पादादेशः। ङि, यथा, माघे। ६। २५।

"वसुधान्तनिःक्षत्रमिवाधिपतेः
पटलं पलाशविसदृक्षरुचाम्।
स्फुरदंशुजालमथ प्रौतरुचः
ककुभं समरुक्षत माधवनीम्॥")

माघी, स्त्री, (मघया युक्तः कालः अस्यां इति। मघा+"नक्षत्रेण युक्तः कालः।" ४। २। ३। इत्यण् ङीप्।) मघायुक्ता पौर्णमासी। यथा,

"पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा।
माघा च पौषी माघाद्याश्चैवमेकादशापरे॥"

इत्यमरः। १। ४। १३॥ माघी पूर्णिमा। यथा, अयोध्याकाण्डे भरतप्रश्ने।

"आषाढी कार्त्तिकी माघी तिथयः पुण्यसम्भवाः।
अप्रदानवतो यान्तु यस्यार्थोऽनुमतो गतः॥"

विष्णुधर्म्मोत्तरे।

"पौर्णमासी तथा माघी माघस्नाने च नरोत्तम!।
प्रौष्ठपद्यामतीतायां तथा ज्ञेया त्रयोदशी॥
एतासु श्राद्धकालान्तु वै नित्यानाह प्रजापतिः॥"

सा च कलियुगादा। यथा,—

"अथ भाद्रपदे कृष्णे त्रयोदश्यान्तु द्वापरम्।
माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्॥"

अस्यां कर्म्मणोऽनन्तफलं यथा, मात्स्ये।

"श्रुतमिद्धत्तये पुण्यं सङ्गमस्तु दिवत्तये।
विष्णवे श्रुतसाङ्गमा का मा वैष्णवत्तकम्॥"

आ का मा वैषु आषाढीकार्त्तिकीमाघीवैशाखीषु। इति निष्पादितत्तम्॥ माघ्यां मघायोगाभावे सिंहस्थगुरावकालप्रतिप्रसवो यथा, ज्ञातातपः।

"माघ्यां यदि मघा गच्छेत् सिंहे गुरुरकारणम्॥"

राजमार्त्तण्डे दक्षः।

"गुरौ हरिस्थे न विवाहमाहुः
हरौ तथास्तंप्रसुखा सुरेज्याः।
यदा न माघी मघसंयुता स्यात्-
तदा च कन्योद्वहनं वदन्ति॥"

इत्यत्र माघ्यां मघायोगाभावेऽपि श्रुतिवैधादिमघास्थेऽपि गुरौ भवति विवाहस्तु गुरोर्मौढ्यापरित्यागादेव। इति मलमासतत्त्वम्॥

माघोनी, स्त्री, (मघवान् देवताऽस्याः। मघोन इयमिति वा। इति मघवन्+अण् ङीप्।) पूर्व्वा दिक्। इति राजनिर्घण्टः॥ (इन्द्रसम्बन्धिनि, त्रि। यथा, ऋग्वेदे। १०। ६६। २।

"मरुद्गणो हवने मम्ह धीमहि
माघोने यज्ञे जनयन्त सूरयः॥"

"माघोने मघवत इन्द्रस्य सम्बन्धिनि मरुद्गणे।" इति तद्भाष्ये सायणः॥)

माठरः

माठं, क्ली, (माठे जातमिति। माठ+"तत्र जातः।" ४।३।२५। इति यत्।) कुन्दपुष्पम्। इत्यमरः। २।४।७२॥

माङ्गल्यं, त्रि, (मङ्गलाय हितमिति। मङ्गल+यञ्।) मङ्गलाय हितम्। यथा, राजमार्त्तण्डे।

"माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च।
दृष्ट्वा माता: प्रशस्यन्ते चैत्रपौषविवर्जिता:॥"
इत्युद्वाहतत्त्वम्॥

अपि च। भौमपराशरे।

"अधिमासे दिनपतौ धनुषि रवौ भानुलङ्घिते मासि।
चक्रिणि सुप्ते कुर्य्यान्न माङ्गल्यं विवाहञ्च॥"
इति मलमासतत्त्वम्॥

(मङ्गलस्य भाव:। "मङ्गलेरलच्।" उणा० ५।७०। इत्यस्य वृत्तौ "भावे अणि माङ्गल्यम्।" इत्युज्ज्वलदत्त:।)

माङ्गल्यार्हा, स्त्री, (माङ्गल्यस्य अर्हा।) आयमाता लता। इति राजनिर्घण्टः॥

माच:, पुं, (मा अच्यतीति। अनुच+क:।) पन्था:। इति शब्दरत्नावली॥

माचक:, पुं, (मा चलति भोगमदत्वाधिरेणैव स्थानं न त्यजतीति। चल+अच्।) व्रण:। रोग:। (मा चलति स्वच्छन्दं न प्रसरतीति। चल्+अच्।) वन्दी। चौर:। इति शब्दरत्नावली॥ मेदिन्यां यकृत्स्थाने माच इति पाठ:॥

माचिका, स्त्री, (मा अच्यति चलादिकं त्यक्त्वा न गच्छतीति। अनुच+क:। तत: कन्। टाप्। अत इत्वम्।) मक्षिका। इति त्रिकाण्डशेष:॥ अमक्षा। इति राजनिर्घण्टः॥

माचिरं, व (मा चिरम्।) शीघ्रम्। यथा,—

"अथाब्रवीत्तदा मत्स्यस्तापसीन् प्रशमन् शुचः।
अस्मिन् हिमवत: शृङ्गे नावं बध्नीत माचिरम्॥"
इति वनपर्व्वणि मात्स्योपाख्यानम्॥

माचीपत्रं, क्ली, सुरपर्णम्। इति राजनिर्घण्टः॥

माजल:, पुं, (मा जलमिच्छत्यभिप्रायोऽस्य। वर्षणवारिभोऽस्य पक्षयोर्भारजत्वात् तथात्वम्।) चातकपक्षी। यथा, शब्दचन्द्रिकायाम्।

"माजलश्चातक: कृष्णो विहारो विन्दुरेखक:।"

माञ्जिष्ठं, क्ली, (मञ्जिष्ठया रक्तम्। "तेन रक्तं रागात्।" ४।२।४। इत्यण्।) लोहितवर्णः। (यथा, हरिवंशे। ३०।१२।

"कक्षाश्वबभ्रुकपिलाविचित्रमाञ्जिष्ठहरितप्रभाभा:।"

तद्वति, त्रि। इति हेमचन्द्रः॥

माटाल्लक:, पुं, (माटाल्ल आल्ल:। तत: कन्।) वृक्षभेद:। यथा,—

"वल्लभौ वार्क्षटीव्रीह: सेटुमाटाल्लकौ समौ।"
इति भूरिप्रयोगः॥

माठर:, पुं, सूर्य्यपार्श्वपरिवर्त्तिविशेष:। यथा,—

"माठर: पिङ्गलो दण्डश्चण्डो: पार्श्वचिका:।"
इत्यमरः। १।३।११॥

माणवकः

मठति निवसति सूर्य्यसमीपे माठर: मठ वासमर्द्दयो: गाञ्चीति अरञ् मठस्यापत्यं माठर इति स्वामी॥ पिङ्गलवर्णत्वात् पिङ्गल:। दण्डकारित्वाद्दण्ड:। इति स्वामी॥ परित: पार्श्वे वर्त्तन्ते पारिपार्श्विका: ठञि कादिति ठिक:। सूर्य्य: कार्त्तिकमाहेत्यानां वरं दास्यतीति धिया इन्द्रादयोऽद्दादशयामान्तरेषु प्रच्छन्ना अस्य पार्श्वेषु स्थिता:। अत्र प्राधान्यान्नयो ऽभिहिता:। अत्र माठरनामा यम:। पिङ्गलनामा वह्नि:। दण्डनामा यक्ष:। तथाचागम:।

"तत्र यक्षो वामपार्श्वे दण्डाख्यो दण्डनायक:।
वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च स:॥
यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञक:।"

एवमपरे हरगुहादय: कुलालाधपक्षादिसंज्ञका: पूर्व्वद्वारादिषु स्थिता:। इति तट्टीकायां भरत:॥ आय:। इति मेदिनी। रे, २०३॥ विप्र:। इति हेमचन्द्र:। ३।५१०॥ शौल्किक:। इति सिद्धान्तकौमुद्यादिवृत्ति:॥

माड़:, पुं, वृक्षविशेष:। माड़वेनी इति लोकेषु प्रसिद्ध:। तत्पर्य्यायः। माड़ाहम: २ दीर्घ: ३ ध्वजवृक्ष: ४ वितानक: ५ मल्लद्रुम: ६। अस्य गुणाः। मोहकारित्वम्। भ्रमहरत्वम्। श्लेष्मकारकत्वञ्च। इति राजनिर्घण्टः॥

माड़व:, पुं, वर्णसङ्करजातिविशेष:। यथा,—

"वेटस्त्रीवरकन्यायां जनयामास वत्सरान्।
माड़ं मल्लं माड़वञ्च भड़ं कोलञ्च कन्दरम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्याय:॥

पुस्तकान्तरे माड़वस्थाने मातर इति पाठ:। कन्दरस्थाने कलन्दर इति पाठ:॥

माड्डुक:, पुं, (मड्डुकवाद्यं शिल्पमस्येति। "मड्डुकझर्झराद्दण्यतरस्याम्।" ४।४।५६। इति अण्।) माड्डुकिक:। मड्डुवादक:। इति सिद्धान्तकौमुदी॥

माढ़ि:, स्त्री, (माढ़नीति। माढ़+"अन्येभ्योऽपि दृश्यन्ते।" उणा० ४।१०५। इति क्तिन्।) देशभेद:। पञ्चशिरा। इति रत्नकोष:॥ दण्डभेद:। इति केचित्। इत्यमरटीकायां भरत:॥ पत्रभङ्गम्। दैन्यप्रकाशनम्। इति मेदिनी। ढि, २। शब्दरत्नावली च॥ माढ़िर्दैन्यं पत्रशिरायां स्त्रीलिङ्गे। इति हेमचन्द्र:। ४।१६०॥

माढ़ी, स्त्री, (माढ़+ऋहिकारादिति ङीष।) दण्डशिरा। इति शब्दरत्नावली॥

माणकं, क्ली, (मीयते पूज्यते परिमीयते वेति। मान मापा+घञ्। स्वार्थे कन्। निपातनात्साधुत्वम्।) कन्दविशेष:। माणकचु इति भाषा। अस्य गुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। शोथहरत्वम्। कटुत्वञ्च। इति राजवल्लभ:॥ यथा, सुश्रुते सूत्रस्थाने। ४६ अध्याये।

"माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम्॥"

माणक:, पुं, (मान्+घञ्। तत: कन् निपातनात्साधुत्वञ्च।) स्वनामख्यातवृक्ष:। माणकचुगाछ

माणिक्यं

इति भाषा। तत्पर्य्यायः। लोहितपद्म: २ रत्नमाला॥ माण: ३ दृढच्छद: ४ हृत्पद्म: इति केचित्॥ (यथा, सुश्रुते सूत्रस्थाने ४०अ "सूक्ष्मसूरणमाणकप्रभृतय:॥")

माणव:, पुं, (मनोरपत्यं पुमान्। मनु+अपत्यविवक्षायां अण्।

"अपत्ये क्षुत्क्षिते मृढे मनोरौत्सर्गिक: क्षत:।
नकारस्य च मूर्द्धन्यलेन सिद्धति माणव:॥"
४।१।१६२। इत्यत्र काशिकावृत्ति:।) मनुष्य:। बालक:। इति शब्दरत्नावली॥ षोड़शवर्षिकबालक:। इति हेमचन्द्र:। ३। ३०४। ४॥

माणवक:, पुं, (अल्पो माणव:। "अल्पे।" ५। ३। ८५। इति कन्।) बालक:। स च षोड़शवर्षपर्य्यन्तप्रथमवयस्क:॥ (यथा, श्रीभागवते। ८।१८।३२।

"एष ते ज्ञानमैश्वर्य्यं श्रियं तेजोयश: श्रुतम्।
दास्यत्यक्षिपथ्य प्रकाय मायामाणवको हरि:॥"

माणवको बाल: स एव।) हारभेद:। स तु विंशतियष्टिक:। विंशनरहार इति भाषा। इत्यमरभरतौ। २। ६। १०६॥ (हृदयसंहितामते तु षोड़शयष्टिको हार:। यथा, तत्रैव। ८१। ३१।

"हारविंशतिका गुच्छो विंशत्या कीर्त्तितोऽर्द्ध-
गुच्छाख्य:।
षोड़शभिर्माणवको हारश्चाभिधार्द्धमाणवक:॥")

कुपुरुष:। इति मेदिनी। के, २०८॥ वटु:। इति हेमचन्द्र:॥

माणवीनं, त्रि, माणवस्यैदमित्यर्थे खीनप्रत्ययेन निष्पन्नम्॥ (माणवाय हितं। "माणवचरकाभ्यां खञ्।" ५।१।११। इति माणव+खञ्।)

माणवं, क्ली, शिशुसमूह:। इत्यमरः। ३।२।४१॥ माणवानां समूहो माणवं विकारसंज्ञेति क्ष्या:। माणवो बाल: सूर्द्धन्यमध्य इत्येके। इति तट्टीकायां भरत:॥ (माणवानां समूह:। "ब्राह्मणमाणववाड़वाद् यन्।" ४। २। ४२। इति यन्।)

माणिका, स्त्री, (माणक+टाप् अकारस्येत्वम्।) अष्टपलपरिमाणम्। इति शब्दमाला॥

माणिक्यं, क्ली, (मणिप्रकार:। मणि"+ज्ञाजनादिभ्य: प्रकारवचने कन्।" ५।३।३। इति प्रकारार्थे कन्। ततो मणिकमेवेति। मणिक+"पातुर्वर्णादीनामुपसंख्यानम्।" ५।१।१२३। इति वार्त्तिकबलात् अण्।) रत्नविशेष:। माणिक् इति भाषा। तत्पर्य्यायः। लोहितरत्नम् २ रत्नराट् ३ रविरत्नकम्॥ शब्दरत्नावली ५ रक्तमाणिक्यम् ६ तरुणम् ७ रत्ननामकम् ८ रागरत्नक् ९ पद्मराग: १० रत्नम् ११ शोणोपल: १२ सौगन्धिकम् १३ लोहितकम् १४ कुरविन्दम् १५। अस्य गुणाः। मधुरत्वम्।

स्निग्धत्वम्। वातपित्तघ्नत्वम्। रत्नप्रयोगे प्रधानत्वम्। परं रक्षायत्नकारित्वञ्च। तस्य लक्षणं यथा,—

"स्निग्धं गुरुगात्रयुतं दीप्तं स्वच्छं समाकृष्य
सुरङ्गच्च॥"

इति जात्यमाणिक्यं कल्याणं धारणात् कुरुते॥

तस्य दोषो यथा,—

"स्निग्धायमश्मपिहितं कर्कशं शार्करिलं
भिन्नं धूम्रच्च।
विरूपं रागविगतं लघुमाणिक्यं न धारये-
द्धीमान्॥"

तस्य चतुर्विधा जातिर्यथा।

"तन्नीलं यदि पद्मरागसदृशं तत्पीतसंतिरक्तं द्विधा।
जानीयात् कुरुविन्दकं यदरुणं स्यादेषु सौग-
न्धिकम्।
तन्नीलं यदि नीलजम्बुकमिति ज्ञेयं चतुर्धा बुधैः
माणिक्यं खलु वर्णभेदविकलं रागेण जातं
जगुः॥

इति राजनिर्घण्टः॥ * ॥

मतान्तरे तस्य दोषा यथा,—

"माणिक्यस्य समाख्याता अष्टौ दोषा मुनीश्वरैः
स्निग्धायच्च विरूपच्च सभेदः कर्करस्तथा॥
अग्नीभवं कोकिलच्च जलं धूम्राभिधच्च वै।
गुणाश्चत्वार आख्याताम्नायाः षोडश
कीर्त्तिताः॥"

छायायाञ्च पूर्व्वोक्ता एव तासु पद्मरागशब्दे द्रष्टव्याः।

"छायादितयसम्बन्धात्स्निग्धायं वस्तुगात्रजम्।
द्विरूपं द्विपदं तेन माणिक्यैव पराभवः॥
सभेदो भिन्नमित्युक्तं गुरुघातविधायकम्।
कर्करं कर्करायुक्तं पशुवन्मुनिनाप्यजत्॥
दुग्धेनेव समाक्षिप्तमग्नौ पुटसुपच्यते।
अग्नीभवं समुद्दिष्टं माणिक्यं बहुदुःखजत्॥
मधुबिन्दुसमच्छायं कोकिलं परिकीर्त्तितम्।
आयुर्लक्ष्मीयशो हन्ति सदोषं तन्न धारयेत्॥
रागहीनं जलं प्रोक्तं धनधान्यापघातजत्।
धूम्रं धूमसमाकारं वैद्यतं भयमावहेत्॥"

तथा।

"शोभाद्वितयवन्तो ये मण्यः क्षतिकारकाः।
उभयत्र पदं येषां तेन च स्यात् पराभवः॥
भिन्नेन युद्धे खलु स्यात् कर्करस्थनगात्रजत्।
दुग्धेनेव समाक्षिप्तः पुटके यस्तु सम्पचेत्॥
दुःखजत् स समाख्यातो न नृपे रत्नयोधकः।
मधुबिन्दुसमा शोभा कोकिलानां प्रकीर्त्तिता।
तेषाञ्च बहुभेदाः स्युर्न ते धार्य्याः कदाचन॥"

अथ गुणाः।

"गुरुत्वं स्निग्धता चैव वैमल्यमतिरक्तता।"

तथा च।

"यज्जातिकं गुरुत्वञ्च स्निग्धता च तथाच्छता।
अत्यैश्वर्य्यता महत्ता च मणीनां गुणसंग्रहः॥"

फलम्।

"ये कर्करास्थिसमशोभदिग्धाः
प्रभाविमुक्ताः प्रभया विवर्णाः।
न ते प्रशस्ता मणयो भवन्ति
समाश्रितो जातिगुणैः समस्तैः॥
दोषोपहतं मध्यमप्रबोधाद्
बिभर्त्ति यः कञ्चन कञ्चिदेकम्।
तं बन्धुदुःखामयबन्धुवित्त-
नाशादयो दोषगणा भजन्ते॥
सपक्षमप्यौषधिसाधितार्थं
प्रमादतश्चावपि वर्त्तमानम्।
न पद्मरागस्य महागुणस्य
भर्त्तारमायत् सहसेति काचित्॥
दोषोपसर्गप्रभवाच्च ये ते
शोपद्रवाख्यं समभिद्रवन्ति।
गुणैः समस्तैः सकलैरुपेतं
यः पद्मरागं प्रयतो बिभर्त्ति॥
बालार्ककरसंस्पर्शात् यः स्निग्धां लोहितां
वमेत्।
रक्षयेदाश्रमं वापि स महागुण उच्यते॥
दुग्धे घृतगुणी स्निग्धो रक्षयेद्यः समन्ततः।
वमेच्छिखां लोहितां वा पद्मरागः स उत्तमः॥
अन्धकारे महाघोरे यो व्यक्तः सन् महामणिः।
प्रकाशयति सूर्य्याभः स श्रेष्ठः पद्मरागकः॥
पद्मकोषे तु यो व्यक्तो विकाशयति सतृप्तवात्।
पद्मरागवरो ज्ञेय इन्द्रागामपि दुर्लभः॥
सर्व्वरिष्टप्रशमनाः सर्व्वसम्पत्तिदायकाः।
चत्वारस्तु मयोद्दिष्टा गुणिनश्च यथोत्तरम्॥
यो मज्जिष्ठाप्रभे दूराज्ज्वलदग्नियमच्छविः।
वज्रकान्तिः स विज्ञेयः सर्व्वसम्पत्तिदायकः॥
पद्मसप्तनवविंशतिरागः
सम्मतोऽपि सकलः खलु यस्य।
वर्जयेद्रमति वा करजालं
उत्तरोत्तरमहागुणिनस्ते॥
नीलीरसं दुग्धरसं जलं वा
ये रञ्जयन्ति द्विगुणप्रमाणम्।
ते ते यथापूर्व्वमतिप्रशस्ताः
सौभाग्यसम्पत्तिविधानदायकाः॥
गुञ्जाफलप्रमाणस्तु दशसप्तत्रिगुञ्जकान्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
क्रौष्टुकोलफलाकारो द्वादशाष्टाधिगुञ्जकान्।
पद्मरागस्तुलयति यथापूर्व्वं महागुणः॥
बदरीफलतुल्यो यः खरदिग्वसुमाषकः।
तथा धात्रीफलत्रिंशत्सविंशतिद्वयमाषकः॥
तथाम्रफलतुल्यो यो वह्निपक्वैकमाषकः।
ताम्बूलमूलमानो यश्चतुस्त्रिंशद्विकतोलकः।
विल्वफलसमाकारो वसुषड्दशतोलकः॥
अतःपरं प्रमाणेन मानेन च न लभ्यते।
यदि लभ्येत पुण्येन सदा सिद्धिमवाप्नुयात्॥
केचिच्चारतराः सन्ति जात्यानां प्रतिरूपकाः।
विज्ञातयः प्रयत्नेन सिद्धास्तां मूल्यमाहरेत्॥
काङ्कलकाः सिंहलदेशोत्पन्नमालीयाः।
श्रीपर्णिकाश्च षड्या विज्ञातयः पद्मरागाणाम्॥

तुषोपसङ्गाद्दलनाभिधानं
मणिः समाख्यादपि तुल्यरूपः।
काञ्चीतथा सिंहलदेशजातं
सुक्ताभिधानं नभसः स्वभावात्।
श्रीपर्णकं दीप्तिविराजितत्वा-
द्विज्ञातिलिङ्गाश्रयमेव सद्यः॥"

तथा च।

"क्षेत्रप्रदेशो ह्यवृता जगुर्यं
विज्ञातिलिङ्गं खलु सार्व्वजन्यम्।
यः प्रार्थिकां पुष्यति पद्मरागो
यो वा तुषाग्रामिव चूर्णमध्यः॥
क्षेत्रप्रदिग्धो न च यो विभाति
यो वा प्रशस्यः प्रजहाति दीप्तिम्।
आक्रान्तमूर्द्धा च तथाकुलिप्तां
यः काञ्चिकां पार्श्वगतां बिभर्त्ति॥
संप्राप्य तःखोऽपि कथं खदत्तं
बिभर्त्ति यः सर्व्वगुणानतीव।
तुल्यप्रमाणस्य च तुल्यजाते-
र्यो वा गुरुत्वेन भवेन्न तुल्यः।
प्राप्यापि नानाकरदेशजातं
ज्ञात्वा बुधो जातिगुणेन लक्षेत्॥
अप्रशस्तासि सन्दिग्धे म्लायां परिघर्षयेत्।
दृष्ट्वा योऽत्यल्पशोभावात् परिमार्क्षं न तुष्यति॥
स ज्ञेयः शुद्धजातिस्तु ज्ञेयाज्ञेये विजानयः।
स्वजातकं संमुखेन लिखेद्वा परस्परम्॥
यत्तं वा कुरुविन्दं वा विमुञ्चान्योन्यर्षणेन चेत्।
न शुक्लं लेखनं कर्त्तुं पद्मरागेन्द्रनीलयोः॥
गुणोपपन्नेन सहावबन्धो
मणिस्वजात्यो विगुणेन जातः।
सुखं न कुर्य्यादपि कौस्तुभेन
विद्वान् विजानन्ति न भ्रष्यादुपस्तम्॥
चक्षान्न एकोऽपि तथाभिजातान्
समेत्य दूरान्नपहन्ति यत्नात्।
तथा मणीन् भूरिगुणोपपन्नान्
शुक्लोऽपिविद्रावयितुं विजातः॥" * ॥

अथ मूल्यम्।

"बालार्काभिमुखं क्षिप्त्वा दर्पणे धारयेन्मणिम्।
तत्र कान्तिविभागेन च्छायाभागं विनिर्दिशेत्॥
वज्रस्य यत्तण्डुलसंख्ययोक्तं
मूल्यं समुन्मापितगौरवस्य।
तत् पद्मरागस्य गुणान्वितस्य
स्याच्चापकाख्यातुलितस्य मूल्यम्॥
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्त्तितम्।
तावन्मूल्यं तथा शुद्धे कुरुविन्दे विधीयते॥
सगुणे कुरुविन्दे च यावन्मूल्यं प्रकीर्त्तितम्।
तावन्मूल्यं चतुर्थांशहीनं स्यादे सुगन्धिके॥
यावन्मूल्यं समाख्यातं वैद्यवर्य्यैश्च ऋषिभिः।
तावन्मूल्यचतुर्थांशं हीयते म्लानजानि॥
पद्मरागः पलं यस्तु धत्ते जात्यारुणप्रभः।
कार्षापणसहस्राणि त्रिंशन्मूल्यं लभेत सः॥
रत्नगोपकसङ्काशः कर्बुरच्छायवृतो मणिः।
द्वात्रिंशतिसहस्राणि तस्य मूल्यं विनिर्दिशेत्॥
एकोनो नूयते यस्तु अवाङ्मुखसमप्रभः।

मातङ्गः

कार्यापणसहस्राणि तस्य मूल्यं चतुर्दश ॥
बालादित्यद्युतिनिभः कर्षे यस्तु प्रतुष्यते ।
कार्षापणशतानान्तु मूल्यं सप्तेः प्रकीर्तितम् ॥
यस्तु दाडिमपुष्पाभः कर्षार्द्धेन तु सज्जितः ।
कार्षापणशतानान्तु विंशतिर्मूल्यमादिशेत् ॥
चत्वारो मारका यस्तु रक्तोत्पलदलप्रभः ।
मूल्यं तस्य विधातव्यं ऋषिभिः शतपञ्चकम् ॥
द्विमाषको यस्तु शुभैः सर्व्वैरेव समन्वितः ।
तस्य मूल्यं विधातव्यं दिशतं तत्त्ववेदिभिः ॥
माषकैकमितो यस्तु पद्मरागो गुणान्वितः ।
शतैकसम्मितं वाच्यं मूल्यं रत्नविचक्षणैः ॥
अतो न्यूनप्रमाणास्तु पद्मरागा गुणोत्तराः ।
सर्व्वद्विगुणमूल्येन मूल्यं तेषां प्रकल्पयेत् ॥
कार्षापणः समाख्यातः पूरणाद्दयसम्मितः ।
अन्ये कुञ्जलपानीयमल्लिखोदकसन्निभाः ॥
काचाभा इति विज्ञाताः स्फटिकप्रभवाश्च ते ।
तेषां दोषो गुणो वापि पद्मरागवदादिशेत् ॥
मूल्यमल्पन्तु विज्ञेयं धारणेऽल्पफलं तथा ।
ब्रह्मक्षत्रियवैश्यानां चतुर्धा ये प्रकीर्तिताः ॥
चतुर्विधैर्नृपतिभिर्धार्य्याः सम्पत्तिहेतवे ।
अतोऽन्यथा धृताः कुर्य्युरोगशोकभयञ्चयम् ॥"
इति युक्तिकल्पतरुः ॥
(यथा, कथासरित्सागरे । २६ । ४४ ।
"सोऽपि प्राप्तस्तदाचीनाम्बिकयस्तम्भभास्वरम् ।
सौवर्णभित्ति सङ्केतकेतनं सम्ददर्शिव ॥"
कदलीविशेषः । तद्यथा,—
"मालिकम्मन्त्रीक्षतचम्पकाट्या
भेदाः कदल्या बहवोऽपि सन्ति ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालिका, स्त्री, (मालिक + टाप् ।) ज्येष्ठी । तत्पर्य्यायः । सुबली २ गृहगोधिका ३ गृहगोलिका ४ भित्तिका ५ पल्ली ६ कुड्यमत्स्यः ७ गृहोलिका ८ । इति हेमचन्द्रः । ४ । ३६४ ॥

माल्यवन्तं, क्ली, (मल्यवन्ते गिरौ भवम् । मल्यवन्त + अण् ।) सैन्धवलवणम् । इत्यमरटीकायां स्वामी ॥

माल्यवन्तं, क्ली, (मल्यवन्तगिरौ भवम् । मल्यवन्त + अण् ।) सिन्धुजलवणम् । इत्यमरः । २।९।४॥ (अस्य पर्य्यायः । [अम् ॥"
"सैन्धवोऽस्त्री शीतशिवं माल्यवन्तञ्च सिन्धु-
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मातङ्गः, पुं, (मतङ्गस्येदं । मतङ्गस्यापत्यं पुमान् वा । मतङ्ग + अण् ।) हस्ती । इत्यमरः । ३ । १ । २१ ॥
(यथा, रामायणे । १ । ६ । २३ ।
"विन्ध्यपर्व्वतसङ्काशैः पूर्व्वा हैमवतैरपि ।
महाद्विपैरतिबलैर्मातङ्गैः पर्व्वतोपमैः ॥")
अन्त्यजातिः । किरातजातिविशेषः । इति तट्टीकायां मथुरेशः ॥ चण्डालः । इति मेदिनी । गे, ४७ ॥ (यथा, कथासरित्सागरे । ७१ । २ ।
"सुदूरमन्यगायातं कार्य्याय ज्ञातसंविदम् ।
सखा दुर्गशिवाख्येन मातङ्गपतिना युतम् ॥")
अर्हदुपासकविशेषः । इति हेमचन्द्रः । ३ । २८१ ।

मातरि

मातङ्गमकरः, पुं, (मातङ्गाकारो मकरः ।) महामत्स्यभेदः । इति राजनिर्घण्टः ॥

मातङ्गी, स्त्री, (मतङ्गस्य मुनेरपत्यं स्त्री । मातङ्ग + अण् ङीष् ।) दशमहाविद्यान्तर्गतनवमविद्या ।
अथ मातङ्गीमन्त्रः । वामकेश्वरतन्त्रे ।
"अथ वक्ष्ये महादेवीं मातङ्गीं सर्व्वसिद्धिदाम् ।
अस्योपासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् ॥
प्रणवञ्च ततो माया कामबीजञ्च कूर्च्चकम् ।
मातङ्गी ङेयुता चास्त्रं वह्निजायावधिर्मनुः ॥
ऋषिः स्याद्दक्षिणामूर्त्तिर्विराट् छन्दः प्रकीर्त्तितम् ।
मातङ्गीदेवता देवी सर्व्वसिद्धिप्रदायिनी ॥
अङ्गन्यासकरन्यासौ कुर्य्यात्पञ्चौ समाहितः ।
षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् ॥
षट्कोणाष्टदलं पद्मं लिखेद्यन्त्रं मनोरमम् ।
तत्र पूजा प्रकर्त्तव्या जवापुष्पैश्च मन्त्रवित् ॥
अष्टपत्रीष्वाष्टदले पूजयेत् सुसमाहितः ।
रतिः प्रीतिर्मनोभवा क्रिया श्रद्धा च मूलतः ॥
अनङ्गकुसुमानङ्गमदना मदनातुरा ।
दलाग्रतश्चतुः संपूज्य उपहारसमन्वितः ॥
ततो देवीं परां ध्यायेत् साधकः स्थिरमानसः ॥
श्यामाङ्गीं शशिशेखरां त्रिनयनां रत्नसिंहासनस्थिताम् ।
वेदैर्बाहुदण्डैरसिखेटकपाशाङ्कुशधराम् ॥
एवं ध्यात्वा महादेवीं मन्त्रपूर्व्वमनोरमैः ।
नैवेद्यन्तु महादेव्यै पायसं गुर्व्वरान्वितम् ॥
पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ।
तद्दशांशं घृतेनाज्यैः शर्करामधुभिः सह ॥
ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह ।
एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥
चतुष्पथे श्मशाने वा कलामध्ये च मालिकः ।
मत्स्यं मांसं पायसञ्च दत्त्वाऽन्नञ्च गुग्गुलुम् ॥
रात्रियोगेन कर्त्तव्यं सदा पूर्णश्च साधकः ।
एवं प्रयोगमात्रेण कविता जायते ध्रुवम् ॥
अमिलम्भं जलम्भं वाक्स्तम्भं कारयेन ध्रुवम् ।
मन्त्री जयति शत्रूंश्च तार्क्ष्यो भोगिकुलं यथा ॥
शास्त्रे वादे कवित्वे च दृढस्तिष्ठिवापरः ।
अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥
नूनं तद्गृहमागत्य कुबेरैर्दीयते वसु ।
विना मत्स्यैर्विना मांसैर्नाचयेन् परदेवताम् ॥"
इति तन्त्रसारः ॥

मातरपितरौ, पुं, (माता च पिता च । "मातरपितरावुदीचाम् ।" ६ । ३ । ३२ । इत्यारडादेशो मातृशब्दस्य निपात्यते ।)तातजनयित्र्यौ । नित्यद्विवचनान्तौ । इत्यमरः । २ । ६ । ३७ ॥

मातरिश्वा, पुं, (मातरि अन्तरीक्षे श्वयति वर्द्धते इति । यद्वा, मातरि जनन्यां श्वयति वर्द्धते बलवत्त्वादिति । श्वि + "सृन् उणादि" इति । उणा० १ । १५८ । इति कनिन् । मातरि बलवत्त्वा अजुक् । धातोरिकारलोपश्च निपात्यते ।) वायुः । इत्यमरः । २ । ५ । ६४ ।
(यथा, ऋग्वेदे । १ । ९३ । ६ ।

माता

"आत्मं दिवो मातरिश्वाजभारामथ्नाद्यं
परिश्रेणी अग्नेः ॥"
"मातरिश्वा वायुः ।" इति तद्भाष्ये सायणः ॥
मातर्य्यन्तरिक्षे श्वयति वेष्टते इति । श्वि + कनिन् । अधिभेदः । यथा, ऋग्वेदे । ३ । २९ । ११ ।
"तनूनपादुच्यते गर्भ आसुरो
नराशंसो भवति यद्विजायते ।
मातरिश्वा यदमिमीत मातरि
वातस्य सर्गो अभवत् सरीमणि ॥"
"यदाग्निरप्सूत गर्भरूपतया जगौ तदा तनूनपान्नामको भवति यदान्तरिक्षे विद्योतते तदा मातरिश्वनामको भवति ।" इति तद्भाष्ये सायणः ॥)

मातलिः, पुं, (मतं जानातीति । ज्ञा + कः । पृषोदरादित्वात् साधुः । मतलस्यापत्यं पुमानिति वा । मतल + "अत इञ् ।" ४ । १ । ९५ इञ् ।) इन्द्रसारथिः । इत्यमरः । १ । १ । ६८ (यथा, महाभारते । ५ । ९७ । ११ ।
"मतस्खिलोकराजस्य मातलिर्नाम सारथिः ।
तस्येकैव कुले कन्या रूपेणा लोकविश्रुता ॥")

माता, [ऋ] स्त्री, मान्यते पूज्यते या सा । मा ङ पूजायां वाच्यति ज्ञाङ इति भरतः ॥ (यद्वा "मनेर्नेट्चच्छ्वोऽपोऽपाङ्जामाङ्मापिष्टृदृङ्भ्यः ।" उणा० २ । ९६ । इति ऋच् निपातितश्च । ऋकारादित्वाङ्ङीप् निषेधः । मा इति भाषा । तत्पर्य्यायः । जनयित्री २ जननी ३ । इत्यमरः । २ । ६ । २९ सवित्री ५ जनिः ६ जनी ७ जनित्री ८ अम्बा ९ अम्बिका १० अम्मा ११ अम्बालिका १२ । इति शब्दरत्नावली ॥ मातृका १३ इति जटाधरः ॥ ॐ ॥ षोडशप्रकारा मातरः यथा,—
"स्तनदात्री गर्भधात्री भक्षदात्री गुरुप्रिया ।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका ॥
सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः ।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा ॥
मातुः पितुश्च भगिनी मातुलानी तथैव च ।
जनानां वेदविहिता मातरः षोडश स्मृताः ॥
इति ब्रह्मवैवर्त्ते गणपतिखण्डे कार्त्तिकेयसंवादे १५ अध्यायः ॥ तस्या गौरवं यथा,—
"जनको जन्मदात्रत्वात् पालनाच्च पिता स्मृतः ।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने ।
विनान्नान्नेश्वरो देहो न नित्यः पितुरङ्गजः ॥
तयोः शतगुणे माता पूज्या मान्या च वन्दिता ।
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी ॥"
इति तत्रैव ४० अध्यायः ॥

अपि च ।
"स गुरुर्यः क्रियाः कृत्वा वेदमन्त्रैः प्रयच्छति ।
उपनीय ददद्वेदमाचार्यः स प्रकीर्त्तितः ॥
एकादश उपाध्याया ऋत्विग्यज्ञसदुच्यते ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ॥"
इति नारदे ६४ अध्यायः ॥

अन्यच्च ।
"न पितुर्व्यंचनं कार्य्यं यथा मातुः सुतेन हि ।
पिता च पतितस्त्याज्यो न माता सतृसुतेन हि ।
गर्भधारणपोषाभ्यां ततो माता गरीयसी ॥
दशश्रोत्रियानुपाध्यायो गौरवेणातिरिच्यते ।
तेभ्यः पिता दशभ्यस्तु माता चैव गरीयसी ।
माहतोऽन्यो न देवोऽस्ति तस्मात् पूज्या सदा सुतैः ॥
मातुश्च यद्धितं किञ्चित् कुरुते भक्तितः पुमान् ।
तद्धर्म्मं हि विजानीयादेवं धर्म्मविदो विदुः ॥"
इति वह्निपुराणम् ॥

अपरञ्च ।
"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः ।
तेषामाद्यालयः श्रेष्ठास्तेषां माता सुपूजिता ॥
यो भावयति या स्तौति येन विद्योपदिश्यते ।
ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः ॥
आत्मनः सर्व्वयत्नेन प्राणत्यागेन वा पुनः ।
पूजनीया विशेषेण पञ्चैते भूतिमिच्छता ॥
यावत् पिता च माता च द्वावेतौ निर्व्विकारिणौ ।
तावत् सर्व्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
पिता माता च सुप्रीतौ स्यातां पुत्रशुभैर्यदि ।
स पुत्रः सकलं धर्म्मं प्राप्नुयात्तेन कर्म्मणा ॥
नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः ।
तयोः प्रत्युपकारोऽपि न कथञ्चन विद्यते ॥
तयोर्नित्यं प्रियं कुर्य्यात् कर्म्मणा मनसापि वा ।
न ताभ्यामननुज्ञातो धर्म्ममन्यं समाश्रयेत् ॥"
इति कौर्म्मे उपविभागे २१ अध्यायः ॥

मातृशब्दसम्भाषया मातृतुल्यत्वम् यथा,—
"मातरित्येव शब्देन यां च संभाषते नरः ।
सा मातृतुल्या सत्येन धर्म्मः साक्षी सतामपि ॥
तया सहितसङ्कारे कालस्तूर्णं प्रयाति सः ।
सत्य घोरे वसत्येव यावद्वै ब्रह्मणो वयः ॥
प्रायश्चित्तं भवेत्तस्य तस्य नैव श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

शिवस्य परिवारविशेषः । स च असुरमारणे ब्रह्मादीनां खेदनिर्गतत्वात् अष्टशक्तिदेवता-रूपो यथा,—
"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा ।
कौमारी चैव चामुण्डा सप्तैकत्र मातरः ॥"
सप्तविधोऽपि यथा,—
"ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥"
इत्यमरटीकायां भरतः ॥

गौर्य्यादिषोडशमातृकाः । यथा,—
"गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह ।
आदौ विनायकः पूज्यो अन्ते च कुलदेवता ॥"
इति आह्निकतत्त्वे वह्निपुराणपरिग्रहम् ॥

वैष्णवपूज्या मातृका यथा,—
"यत्र मातृगणाः पूज्याश्चक्रञ्च स्थितः प्रपूजयेत् ।

सदा भागवती पीठमाद्यौ पद्मान्तरङ्गिका ॥
गङ्गाकलिन्दनद्यागोपीवृन्दावनीक्षया ।
गायत्रीतुलसीवाणीपृथिवीगाश्च वैष्णवीः ॥
श्रीयशोदादेवकूनीदेवकीरोहिणीसखाः ।
श्रीसीता द्रौपदी कुन्ती रुक्मिणी या महर्षयः ।
सत्यभामाजाम्बवती चाष्ट महिष्यौर्याश्च ता अपि ॥"
इति पाद्मे उत्तरखण्डे ७८ अध्यायः ॥

सप्त मातरो यथा,—
"आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
धात्री धात्री तथा पृथ्वी सप्तैता मातरः स्मृताः ॥"
इति कैश्चित् पठितम् ॥

मातृतुल्या यथा ।
"मातृष्वसा मातुलानी पितृष्वस्री पितृष्वसा ।
श्वश्रूः पूर्व्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः ॥"
इति दायभागः ॥

गौः । भूमिः । इति मेदिनी । ते, ७१ ॥ (निरुक्ते च । ८।३ । "यदूर्ध्वक्लिन्ना प्रविशेद्ध धात्रादृष्टा-त्ययो मातुरस्या उपस्थे ।" "मातुः अस्या पृथिव्याः ।" इति तट्टीकायां दुर्गाचार्य्यः ।) विभूतिः । इति शब्दरत्नावली ॥ लक्ष्मीः । इति हेमचन्द्रः । ३।३२१ । रेवती । इत्यजयपालः ॥ आखुकर्णी । इन्द्रवारुणी । महाश्रावणी । जटा-मांसी । इति राजनिर्घण्टः ॥ परिमाणकर्त्तरि, त्रि । अस्मिन्नर्थे परिमाणार्थमाधातोः कर्त्तरि ल्युप्रत्ययेन निष्पन्नः ॥ (निर्म्माणकर्त्तरि च, यथा, ऋग्वेदे । १ । ६१ । ७ ।
"अस्रेधन्तो मातुः सवनेषु सद्योमहः ।"
"मातुः दृष्टिद्वारेण सकलस्य जगतो निर्म्मातुः ।"
इति सङ्क्षिप्ते सायणः ॥)

माता, स्त्री, (मान्यते पूज्यते इति । मान पूजायां + तनू ततष्टापि निपातनात् साधुः ।) जननी । यथा
'विश्वेश्वरीं विश्वमातां चण्डिकां प्रणमाम्यहम् ।'
इति शिवरहस्ये दुर्गास्तवदर्शनात् आवश्यो ऽयं शब्दः ॥

मातापितरौ, पुं, (माता च पिता च । "आनङ् ऋतोद्वन्द्वे ।" ६ । ३ । २५ । इत्यानङादेशः ।) जननीजनकौ । तत्पर्य्यायः । पितरौ २ मातर-पितरौ ३ मातृजनयितृौ ४ । इत्यमरभरतौ । २ । ६ । ३७ ॥ नित्यद्विवचनान्तोऽयम् ॥ (यथा, मनौ । ३ । १५७ ॥
"अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा ॥")

मातामहः, पुं, (मातुः पिता । "पितृव्यमातुल मातामहपितामहाः । ४ । २ । ३६ । इति डामहच् निपातनच्च ।) मातुः पिता । इत्य-मरः । २ । ६ । ३३ ॥ दौहित्रस्य मातामह-साधर्म्म्यं यथा,—
"आसीद्राजा नृपश्रेष्ठो यज्ञशीलो दृढव्रतः ।
यजनः सुमहत्कालादेव एकोऽभवत्ततः ॥
कन्यो: कन्या सुनीथा या मातुर्दुःशीलकारणात् ।
क्रूरा दुष्टिरभूत्तस्य जगतोऽस्यापि पीडने ॥
तपस्विनां कुले जाता अधीत्याथ यमुक्तिनाम् ।

वसुधां निर्गुणो वापि याति मातामहीं सदम् ॥"
इत्यग्निपुराणम् ॥

तत्करणे शिराचाग्रौर्च यथा । मातामहानां मरणे शिराचं स्यादशौचकम् । इति शुद्धितत्त्वे कूर्म्मपुराणम् ॥ * ॥ दुहितृपर्य्यन्ताभावे तस्य आद्धे दौहित्रस्याधिकारो यथा,—
"मातामहानां दौहित्राः कुर्य्युरन्यत्र चादरे ।
ते च तेषां प्रकुर्व्वन्ति द्वितीयेऽह्नि सदैव हि ॥"
इति शुद्धितत्त्वम् ।

दुहितृपर्य्यन्ताभावे तस्य धने दौहित्रस्याधि-कारो यथा । तदभावे दौहित्रः ।
"पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्म्मतः ।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः ॥"
इति मनुवचने पौत्रतुल्याभिधानेन यथा पुत्राभावे पौत्रस्तथा दुहितृभावे दौहित्रः । इति प्रागेवोक्तत्वात् ।
"मातुलो भागिनेयस्य श्वशुरो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सप्तैते मातामहस्य च ॥
एतेषामेव भार्य्याभ्यः श्वश्रूर्मातुः पितुस्तथा ।
पितृदानन्तु कर्त्तव्यमिति वेदविदो विदुः ॥"
इति हेमाद्रौ मातामहश्राद्धे साक्षा-दौहित्रेण पिण्डदानश्रुतेः धनाधिकारित्वाच्च ।
इति शुद्धितत्त्वम् ॥ * ॥ तस्य अयौतुकधने पौत्रपर्य्यन्ताभावे दौहित्राधिकारः । यौतुकधने तु पुत्रपर्य्यन्ताभावे दौहित्राधिकारी यथा ।
"दौहित्रोऽपि च स्वसुर्य्येवं सन्तारयति पौत्रवत् ।"
इति मनुवचने दौहित्रे पौत्रधर्म्मातिदेशात् पुत्रेण परिशोधदुहितुर्बाधात् बाधकपुत्रेण बाधदुहितृपुत्रबाधस्य न्याय्यत्वात् । इति दाय-तत्त्वम् । पुत्राभावे दौहित्रोऽधिकारी । पुत्रा-

मातुला

धिकारात् प्राक्दुहितृधिकारस्मृतेः तदाधिकायादुहितुः पुत्रेण बाध्यपुत्रनाधस्तेव न्यायत्वात्। इति दायक्रमसंग्रहश्च ॥

मातालो, स्त्री, (मातुः आलो। पृषोदरादित्वात् ऋकारलोपः। यद्वा, मातायाः आलो।) मातुः सखी। इति शब्दमाला ॥

मातुल:, पुं, (मातुर्भ्राता। "पितृव्यमातुलेति।" ४।१।१६। इति निपातने। तत्र "मातुर्डुलच्।" इति वार्त्तिकात् डुलच्।) माहृभ्राता। पितृश्यालकः। इत्यमरः। २। ६। ३१। मामा इति भाषा ॥ तत्करजे भागिनेयस्य पञ्चिमयग्रौचम्। यथा, शुद्धितत्त्वे।

"मातुले पञ्चिमीं रात्रिं स्निग्धास्निग्धान्धवेषु च।" स च मातामहपर्य्यन्तरहितस्य मृतस्य प्रेतक्रियाद्यधिकारी। यथा,—

"मातुली भागिनेयस्य स्वस्रीयो मातुलस्य च।" इति प्रातातपीयपाठक्रमात्। इति शुद्धितत्त्वम् ॥ (मात्यति स्नाय्यादिना मीयते। मात + बाहुलकात् डुलच्।) श्रीहमेदः। मदनदमः। (माद्यतीति। मद + णिच् + बाहुलकात् उलच् पृषोदरादि दस्य तकारत्वञ्च।) धुस्तूरः। इति मेदिनी। ले, १२१ ॥ पर्य्यायो यथा,—

"धुस्तूरो धूर्त्त धुत्तूरो उन्मत्तः कनकाह्वयः। देवतातितवस्तूरी महामोहः शिवप्रियः। मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ मा विद्यते तुला तुलना यस्य।) सर्षपविशेषः। इति हेमचन्द्रः। ३। २१६ ॥

मातुलकः, पुं, (मातुल + स्वार्थे कन्।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ (मातुलः। यथा, पञ्चतन्त्रे। १। २४१ ॥

"सोऽपि तव मातुलको न समायातः॥")

मातुलपुत्रकः, पुं, (मातुलस्य धुस्तूरस्य पुत्रकः।) धुस्तूरफलम्। इत्यमरः। २। ४। ७८ ॥ (यथास्य पर्य्यायः।

"मातुलो मदनश्चास्य फले मातुलपुत्रकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मातुलतनयः। इति मेदिनी। के, २१५ ॥

मातुला, स्त्री, (मातुल + टाप्। मातुलस्य
मातुलानी, स्त्री। "इन्द्रवरुणेति।" ४।१।४६। ङीष् आनुक् च।) मातुलपत्नी। इत्यमरभरतौ। २।६।१०। मामी इति भाषा ॥ तन्मरणे पञ्चिमयग्रौचम्। यथा,—

"श्वशुरयोर्भगिन्याञ्च मातुलान्याञ्च मातुले। पित्रोः स्वसरि तद्वच्च पञ्चिमीं त्वपरेन्नि-शाम् ॥"

इति शुद्धितत्त्वम् ॥

मातुलानी, स्त्री, (मा निषेधे तुला नयति प्राप्नोतीति। नी + क्विप्। ङीष्।) कलायः। भङ्गा। इति मेदिनी। ने, २०३ ॥ (यथास्या पर्य्यायः। भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।

"भङ्गा गङ्गा मातुलानी मादनी विजया जया ॥")

शुक्रः। इति हेमचन्द्रः। ४। २४५ ॥ प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका ॥

मातुलाहिः, पुं, (मातुलाहेरयं इति। तुल + अलविसुजादित्वात् कः। मातुलजायां अहिश्च।) सर्पविशेषः। मातुया साप इति पैशुयाटी इति च भाषा। अयं खट्वाजनिः आयतदेहः दीर्घलाङ्गूलः चतुष्पात्। इति मधुमाधवादयः॥ तत्पर्य्यायः। मातुधानः २। इत्यमरः। १। ८। ६॥

मातुली, स्त्री, (मातुलस्य स्त्री। "मातुल + इन्द्रवरुणभवेति।" ४।१।४६। इति ङीष् "मातुलोपाध्याययोरानुग् वा।" इति वार्त्तिकोक्तेः पक्षे आनुगभावः।) मातुलपत्नी। इत्यमरः। २। ६। ३०॥ भङ्गा इति शब्दचन्द्रिका ॥

मातुलुङ्गः, पुं, (मा न तुलं गच्छतीति। गम + डः। पृषोदरादित्वात् अकारस्योकारः समुच।) बीजपूरः। इत्यमरटीकायां भरतः॥ (यथा, सुश्रुते उत्तरतन्त्रे ३६ अध्याये।

"कैशरं मातुलुङ्गस्य मधुसैन्धवसंयुतम्। शर्करादाडिमाभ्यां वा द्राक्षाखर्जूरयोस्तथा॥"

(तथास्य पर्य्यायः।

"बीजपूरो मातुलुङ्गः सुफलः फलपूरकः। लुङ्गः पूरकः पूरी बीजपूर्योऽम्लकेशरः॥"

इति वैद्यकरत्नमालायाम्।

तथास्य गुणाः।

स्यान्मातुलुङ्गः कफवातहन्ता
हृद्या लघ्वीर्य्या जठरामयघ्नः।
स दीपरक्तादिविकारपित्त-
सन्दीपनः शूलविकारहारी॥

श्वासकासरुचिहरं हृद्यान्नं कफशोधनम्। दीपनं लघु रुच्यञ्च मातुलुङ्गसदाहृतम्॥

त्वक्तिक्ता दुर्जरेति स्यात् क्षमिवातकफापहा।

स्वादु शीता गुरुः स्निग्धा त्वङ्मांसं वातपित्तजित्॥

मेध्यं शूलानिलच्छर्द्दिकफारोचकनाशनम्। दीपनं लघु संग्राहि गुल्मार्शोघ्नन्तु केशरम्॥

हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम्। शूलाजीर्णादिरोगेषु मन्दाग्नौ कफमारुते॥

अरुचिश्वासकासेषु स्वरसोऽस्योपदिश्यते। रसोऽतिमधुरो हृद्यो वीर्य्यपित्तानिलापहा॥

कफलदुर्जरः पाके मातुलुङ्गस्य कल्ककः। तिक्तं पुष्यन्तु बीजञ्च गुल्मवृद्ध्यानयापहम्॥"

इति भावप्रकाशे प्रथमे खण्डे दशमेऽध्याये॥

"त्वक्तिक्ता कटुका स्निग्धा मातुलुङ्गस्य वातजित्।

हृद्यं मधुरं मांसं वातपित्तहरं गुरु॥

लघु तत्केसरं श्वासकासहिक्कामदाल्पयान्। आस्यप्रीणनिलश्लेष्मविबन्धच्छर्दिरोचकान्॥

गुल्मोदरार्शः शूलानि मन्दाग्निञ्च नाशयेत्॥"

इति च वाभटे सूत्रस्थाने षष्ठेऽध्याये॥)

मातृका

मातुलुङ्गकः, पुं, (मातुलुङ्ग + संज्ञायां जातौ वा कन्।) छोलङ्गवृक्षः। तत्पर्य्यायः। फलपूरः २ बीजपूरः ३ रुचकः ४। इत्यमरः। २। ४। ७८ ॥ मातुलुङ्गः ५ रुचफलः ६ फलपूरकः ७ तुङ्गुरुः ८ पूरकः ९ पूरः १० बीजपूरः ११ अम्लकेशरः १२ छोलङ्गः १३। इति रत्नमाला ॥ अस्य गुणाः। हृद्यत्वम्। अग्नित्वम्। लघुत्वम्। अग्निदीपनत्वम्। आध्मानगुल्लाजीर्णहृद्रोगोदावर्त्तनाशित्वम्। विबन्धच्छिन्नामूलच्छर्दिरोगे प्रशस्तत्वञ्च। अस्य स्वगुणाः। तिक्तत्वम्। दुर्जरत्वम्। कफवातनाशित्वम्। विशदत्वत्वञ्च। तन्मांसगुणाः। स्वादुत्वम्। शीतत्वम्। गुरुत्वम्। वायुपित्तनाशित्वञ्च। इति राजवल्लभः ॥

मातुलुङ्गा, स्त्री, (मातुलुङ्ग + टाप्।) मधुकुक्कुटी। यथा,—

"मातुलुङ्गा सुगन्धाख्या गिरिजा पूतिपुष्पिका। अम्लवेतसदूती च सा क्वचिन्मधुकुक्कुटी॥"

इति रत्नमाला ॥

मातुलुङ्गिका, स्त्री, (मातुलुङ्ग + संज्ञायां कन्। टाप् अकारस्येत्वम्।) वनबीजपूरः। इति राजनिर्घण्टः ॥

मात्रकच्छिदः, पुं, (मातुः कं शिरश्छिनत्तीति। छिद + कः। पितृदेशात् मात्रशिरश्छेदनादस्य तथात्वम्।) परशुरामः। इति केचित् ॥

मात्रका, स्त्री,(मातेव। मातृ + "इवे प्रतिकृतौ।" ५। ३। ९६। इति कन् टाप्।) धात्रका ॥ (यथा, हरवंशे। ४३। ६६।

"रज्जुस्रङ्मुच्छेदने बालपोढ़ा राज्ञो मातुः पीड़नं मात्रकायाः॥"

मातेव। मातृ + स्वार्थे कन्।) माता। देवीभेदः। वर्णमाला। इति मेदिनी। के, १३८॥ करणम्। स्वरः। उपमाता। इति हेमचन्द्रः। मात्रकागणोत्पत्तिर्यथा,—

"तत्र देवोऽथ दैत्यं त्रिशूलेनाहनद्भृशम्। तस्याहतस्य यत्तस्मात्पतद्भूतले क्षिति॥ तत्तान्धका असंख्याता बभूवुरपरे भृशम्। तद्दृष्ट्वा महदाश्चर्यं रुद्रः शूलेऽन्धकं न्यधि॥ गृहीत्वा त्रिशिखायेव ननर्त्त परमेश्वरः। इतरेऽप्यन्धकाः सर्व्वे चक्रिरे परमेष्ठिना॥ नारायणेन निहतास्तत्र येऽन्ये समुत्थिताः। अहन्धाराप्रहारेषु शूलप्रोतस्य चासृजत्॥ अनारतं स्रवत्तस्मात् खतो रक्तो रजान्वितः। तस्य क्रोधेन महता सुखाज्ज्वाला विनिर्यय्यौ॥ तद्रूपधारिणीं देवीं याम्यां योगीश्वरीं विदुः। स्वरूपधारिणी चाग्र्या विष्णुनापि विनिर्मिता॥ अजया कार्त्तिकेयेन इन्द्रेण च यमेन च। वाराहेण च देवेन विष्णुना परमेष्ठिना॥ पातालोद्भवरूपं तस्या देव्या विनिर्ममे। माहेश्वरी च माहेन्द्री इत्येता अष्ट मातरः॥ कारणं यस्य यत् प्रोक्तं शैवशक्तेरवधारितम्॥ शरीरादेव नाना तु तदिदं कीर्त्तितं मया।

कामः क्रोधस्तथा लोभो मदो मोहोऽथ पञ्चमः ॥
मात्सर्यं षष्ठमित्याहुः पैशुन्यं सप्तमं तथा ।
अनृतन्यष्टमो ज्ञेया इत्येता अष्ट मातरः ॥
कामं योगीश्वरीं विद्धि क्रोधं माहेश्वरीं तथा ।
लोभस्तु वैष्णवी प्रोक्ता ब्रह्माणी मद एव च ।
मोहः खलु कौमारी मात्सर्यं चेन्द्रजा विदुः ॥
यामी दण्डधरा देवी पैशुन्यं खयमेव च ।
अनृतन्वा वराहास्या इत्येताः परिकीर्तिताः ॥
कामादिगज एवोऽयं शरीरं परिकीर्तितम् ।
जघान मुनिभिस्तु यथा तथा ते कीर्तितं मया ॥
एताभिर्देवताभिश्च तस्य रक्षे तु प्रोक्षिते ।
स्वयं गतासुरी माया स च सिंहोऽन्तकोऽभवत् ॥
एतत्ते सर्वमाख्यातमात्मविद्याव्रतं मया ।
य एतच्छृणुयान्नित्यं मातृणामुद्भवं शुभम् ॥
तस्य ताः सर्वदा रक्षां कुर्वन्त्यनुदिनं नृप ! ।
येनैतत् पठ्यते जन्म मातृणां पुरुषोत्तम ! ॥
स धन्यः सर्वदा लोके त्रिवर्गलाभ गच्छति ।
तासाञ्च ब्रह्मणा दत्ता अष्टमी तिथिरुत्तमा ॥
एताः संपूजयेद्भक्त्या विद्याहारो नरः सदा ।
तस्य ताः परितुष्टाश्च क्षेमारोग्यं ददन्ति च ॥"
इत्यादि वाराहपुराणे कामादिमातृगणोत्पत्ति-
र्नामाध्यायः ॥ अपि च ।
"ब्रह्मेशगुहविष्णूनां तथेन्द्रस्य च शक्तयः ।
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥
हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥
कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥
यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ।
शक्तिः साप्याययौ तत्र वाराही बिभ्रती तनुम् ॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र घटाजेपत्रिप्रभवस्यसंहतिः ॥
वज्रहस्ता तथैवेन्द्री गजराजोपरिस्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
चण्डिकामसुराः प्रीत्यं मम प्रीत्याह चण्डिकाम् ॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिका शक्तिरतुला शिवाशतनिनादिनी ॥"
इति मार्कण्डेयपुराणम् ॥
मातृवर्गो यथा,—
"गुरोः पत्नी राजपत्नी विप्रपत्नी च या सती ।
पत्नी च मातृसतयोर्मित्रपत्नी च सप्तमः ॥
प्रसूः पितृष्वसुर्भ्रातुः पत्नी स्वसृः स्वकन्यका ।
जननी तत्सपत्नी च भगिनी सुरभी तथा ॥
स्वामीष्टसुरपत्नी च धात्री कान्ताप्रदायिका ।
गर्भधात्रीक्षणात्री च भयात्रातुश्च कामिनी ॥
एता वेदप्रसीताश्च सर्व्वाः मातरः स्मृताः ।
एतास्वपि च सर्व्वासु न्यूनता नास्ति काचन च ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः ॥
षोड़श मातरो यथा,—
"गुरुपत्नी राजपत्नी देवपत्नी तथा वधूः ।
पितोः स्वसा शिष्यपत्नी भृत्यपत्नी च मातुली ॥
पितृपत्नी मातृपत्नी सखी च भगिनीसुता ।
गर्भधात्र्यष्टदेवी च पुंसः षोड़श मातरः ॥"
इति तत्रैव ५६ अध्यायः ॥

अथ मातृकान्यासः ।

भगवानुवाच ।

"मातृकान्यासमधुना शृणु वैतालभैरव ! ।
येन देवत्वमायाति नरोऽपि विधिवेत्तेन वै ॥
वाग्ब्रह्माणीमुखा देव्यो मातृका परिकीर्तिताः ।
तासां मन्त्राणि सर्व्वाणि अङ्गानि स्वराश्च तथा ॥
चन्द्रबिन्दुप्रयुक्तानि सर्व्वकामप्रदानि च ।
ऋषिस्तु मातृमन्त्राणां ब्रह्मैव परिकीर्तितः ॥
प्रोक्ता छन्दस्तु गायत्री देवता च सरस्वती ।
शरीरशुद्धिप्रसवसर्व्वकामार्थसाधने ॥
विनियोगः समुद्दिष्टो मन्त्राणां न्यूनपूरणे ।
अकारेण समं कादिवर्गा यः प्रथमः स्मृतः ॥
तेऽन्तबिन्दुसंयुक्तैश्चतुर्थैरेव वर्णकैः ।
आकारञ्च तथोच्चार्य अङ्गुष्ठाभ्यां नमस्तथा ॥
प्रथमं मातृकामन्त्रमङ्गुष्ठद्वयतो न्यसेत् ॥
परे वर्गाः स्वरैः साद्धं ये चान्ये न्यासकर्म्मणि ।
ते सर्व्वे चन्द्रबिन्दुभ्यां युक्ताः कार्य्यास्तु सर्व्वतः ॥
इकारेण च वर्गाद्य दीर्घेकारान्तगेन तु ।
तर्जनीभ्यां विन्यसेत् सम्यक् स्वाहान्तेन तु पूर्ब्बवत् ॥
उकारेणाद्यवर्गेण दीर्घोकारान्तगेन तु ।
मध्यमाभ्यां तथा सम्यक् वषट्कारेण विन्यसेत् ॥
एकारादिस्वरान्तेन ऐकारान्तेन चैव हुम् ।
न्यसेदनामिकाभ्यां तु नियतं तत्र भैरव ! ॥
ओकारादिस्वरान्तु औकारान्तेन यौगिकम् ।
पौषड्वन्तं कनिष्ठाभ्यां विन्यसेत् कार्य्यसिद्धये ॥
अंकारादिस्वकारादिवर्गेण चान्तकेन च ।
यः स्वरान्तेन तलयोर्विन्यसेत् पार्श्वपृष्ठयोः ॥
वषट्कारं ग्रीवभागे मन्त्रन्यासे नियोजयेत् ।
हृदयादिषडङ्गेषु पूर्ब्बवत् क्रमतो न्यसेत् ॥
अङ्गुष्ठाद्युक्तवर्गस्तु क्रमात् षड्भिस्तथाविधैः ।
पुनस्तथा पादजानुककुद्गुह्ये तु पार्श्वयोः ।
बाह्वोः पाणयोस्तथा कण्ठे नाभौ च जठरे तथा ।
तलयोरपि विन्यासं तथा षड्भिः समाचरेत् ॥
चक्रे च चिबुके गण्डे कर्णयोश्च ललाटके ।
अंसे कण्ठे च षड्वर्गैः पूर्ब्बवन्न्यासमाचरेत् ॥
रोमकूपे ब्रह्मरन्ध्रे गुदे जङ्घायुगे तथा ।
नखेषु पादपार्ष्ण्योश्च तथा पूर्ब्बवदाचरेत् ॥
एवन्तु मातृकान्यासं यः कुर्य्यान्नरसत्तमः ।
स धन्यस्तस्य पूजासु पूतो योग्यश्च जायते ॥

नातः परतरं मन्त्रं विद्यते ऋषिदेव हि ।
यः सर्व्वकामदं पुण्यं चतुर्व्वर्गफलप्रदम् ॥
वाग्देवतां सुदि ध्यात्वा सद्भिं सर्व्वाक्षराणि च ॥
त्रिधा च मातृकामन्त्रैः संक्रमेच्च विधेः क्रमम् ।
स वाग्मी पण्डितो धीमान् जायते च वरः कविः ॥
चन्द्रबिन्दुसमायुक्तान् स्वरान् पूर्ब्बान् पठेद्बुधः ।
अङ्गानि च सर्व्वाणि केवलानि पठेत्ततः ॥
अकारादिक्षकारान्तान्येवं न्यासेषु पूर्ब्बकैः ।
यत्तं करतले कृत्वा पठित्वाक्षरसंचयम् ॥
अभिमन्त्र्य तु ततोयं प्रथमं पूरकैः पिबेत् ।
द्वन्द्वकेन द्वितीयन्तु तृतीयन्त्वथ रेचकैः ॥
एवं सकृन्निवारन्तु पीत्वा तोयं विचक्षणः ।
दृढ़ाङ्गः पण्डितो भूयात् पुत्रपौत्रसमन्वितः ॥
त्रिसन्ध्यमथ पीत्वैव मातृकामन्त्रमन्त्रितम् ।
तोयं कवित्वमाप्नोति सर्व्वान् कामांस्तथैव च ॥
सततं कुरुते यस्तु मातृकामन्त्रमन्त्रितम् ।
तोयपानं महाभाग पूरकाख्यरेचकैः ॥
स सर्व्वकामान् संप्राप्य पुत्रपौत्रसमन्वितः ।
भूत्वा महाकविर्लोके बलवान् सत्यविक्रमः ॥
सर्व्वत्र वल्लभो भूत्वा चान्ते मोक्षमवाप्नुयात् ।
राजानमथवा राजभार्य्यां पुत्रमथापि वा ॥
वशीकरोति न चिरात् मातृकामन्त्रपालकः ।
न्यासक्रमे क्रमः प्रोक्तो वर्णक्रम इहैव तु ॥
अक्षराणां क्रमेणाथ तोयपानं समाचरेत् ।
ये ये मन्त्रा देवतानां ऋषीणामथ रक्षसाम् ॥
ते भक्ता मातृकामन्त्रे नित्यमेव प्रतिष्ठिताः ।
सर्व्वमन्त्रमयश्चायं सर्व्वदेवमयस्तथा ॥
चतुर्व्वर्गफलश्चायं मातृकामन्त्र उच्यते ।
इति ते कथितः पुत्र ! मातृकान्यास उत्तमः ॥"
इति श्रीकालिकापुराणे मातृकान्यासः ७६ अः ॥

अथ तस्य प्रयोगः ।

अस्य मातृकामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दो मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयो मातृकान्यासे विनियोगः । शिरसि ॐ ब्रह्मणे ऋषये नमः । मुखे ॐ गायत्रीच्छन्दसे नमः । हृदि ॐ मातृकासरस्वत्यै देवतायै नमः । गुह्ये ॐ बीजेभ्यो नमः । पादयोः ॐ स्वरेभ्यः शक्तिभ्यो नमः । तथा च ध्यानम् ।

"मातृका मम देवेशि ! न्यसेत् पापनिकृन्तनीम् ।
ऋषिर्ब्रह्मास्य मन्त्रस्य गायत्रीच्छन्द उच्यते ॥
देवता मातृकादेवी बीजं व्यञ्जनसञ्चयम् ।
शक्तयस्तु स्वरा देवि ! षड्ङ्गन्यासमाचरेत् ॥"
ततः षड्ङ्गन्यासौ । अं कं खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः । इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा । उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट् । एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम् । ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट् । अं यं रं लं वं शं षं सं हं लं

सं अः करतलपृष्ठाभ्यां फट्। एवं हृदयादिषु। अं कं ५ आं हृदयाय नमः। इत्यादि। तथा च ज्ञानार्णवे।

"अं आं मध्ये कवर्गन्तु इं ईं मध्ये चवर्गकम्। उं ऊं मध्ये टवर्गन्तु ऋं ॠं मध्ये तवर्गकम्॥ ऌं ॡं मध्ये पवर्गन्तु विन्दुयुक्तं न्यसेत् प्रिये!। अनुस्वारविसर्गान्तयंग्वर्गौ वलक्षकौ॥ हृदयञ्च शिरो देवि! शिखा कवचकं तथा। नेत्रमस्त्रं न्यसेन्मन्त्री नमः स्वाहा क्रमेण तु॥ वषट् हुं वौषड्नाम्ना फड्न्तं योजयेत् प्रिये!। षड्ङ्गोऽयं मातृकायाः सर्व्वपापहरः स्मृतः॥"*॥

अथान्तर्मातृकान्यासः।

अकारादिषोड़शस्वरान् सविन्दून् षोड़शदलकमले कण्ठदेशे न्यसेत्। ककारादिहादशवर्णान् सविन्दून् हादशदलकमले हृदये न्यसेत्। ठकारादिदशवर्णान् सविन्दून् दशदलकमले नाभौ न्यसेत्। वकारादिषड्वर्णान् सविन्दून् षड्दलकमले लिङ्गदेशे न्यसेत्। वकारादिचतुरो वर्णान् सविन्दून् चतुर्दलकमले मूलाधारे न्यसेत्। क्षवर्णद्वयं सविन्दुं द्विदलपद्माभ्रूमध्ये न्यसेत्॥ तथा च ज्ञानार्णवे।

"हारुपचाम्बुजे कण्ठे स्वरान् षोड़श विन्यसेत्। हादशच्छदसंयुक्ते कादीन् हादश विन्यसेत्॥ दशपत्राम्बुजे नाभौ ठकारादींश्चसेद्दश। षट्पत्रमध्ये लिङ्गाख्ये वकारादींश्च षट् यजेत्॥ आधारे चतुरो वर्णांश्चसेद्वादीन् चतुर्दले। क्षञौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये!॥"

अग्निपुराणेऽपि संहितायाम्।

"एकैकवर्णमेकैकपत्रान्ते विन्यसेत् प्रिये!। एवमङ्गः प्रविन्यस्य मनसातो बहिर्न्यसेत्॥"*॥

वैष्णवे तु।

एकैकवर्णसुद्धार्य्य मूलाधाराच्छिरोऽन्तकम्। नमोऽन्तमिति विन्यास आन्तरः परिकीर्त्तितः॥

अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले। सुवर्णाभे व श ष स चतुर्व्वर्णविभूषिते॥ षड्दले वैद्युतनिभे स्वाधिष्ठानेऽम्बुजेऽपि। व भ म य र लैर्युक्ते वर्णैः षड्भिश्च सुव्रते!॥ मणिपूरे दशदले नीलजीमूतसन्निभे। डादिफान्तदलैर्युक्ते विन्दुद्वादशितमण्डलैः॥ अनाहते हादशारे प्रवालरुचिसन्निभे। कादिठान्तदलैर्युक्ते योगिनां हृदयाम्बुजे॥ विशुद्धे षोड़शदले धूम्राभे स्वरभूषिते। आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाङ्किते॥ सहस्रारे शिरस्यब्जे सर्व्ववर्णविभूषिते। अकथादिचिरेखाढ्ये ह ल क्ष चयभूषिते॥ तन्मध्ये परविन्दुञ्च सृष्टिस्थितिलयात्मकम्। एवं समाहितमना ध्यायेन्मातृकामयं वरम्॥"

ततो वाङ्मातृकान्यासः।

"पञ्चाशद्भिर्विभेदैस्तु खरदोःपञ्चषष्ठयोः। सुखाभ्यां हृन्नाभिलिङ्गपद्मगुह्यकलामयीं नतुङ्गस्तनीम्। सुधामत्तगुणं सुधाढ्यकलसं विद्याञ्च हस्ताम्बुजै-

विद्याक्षमालां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥"

एवं ध्यात्वा न्यसेत्। तत्राङ्गुलिनियमस्त्वत्रे।

"ललाटोन्नाभिकामध्ये विन्यसेन्मुखपङ्कजे। तर्जनीमध्यमानामा इष्टानामे च नेत्रयोः॥ अङ्गुष्ठं वर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः। मध्यास्तिस्रो गण्डयोश्च मध्यमाद्योऽधरोष्ठयोर्न्यसेत्॥ अनामां दन्तयोर्न्यस्य मध्यमास्तत्तमाक्षके। सुखेऽनामां मध्यमाञ्च हस्तपादे च पार्श्वयोः॥ कनिष्ठानामिकामध्यास्तासु पृष्ठे च विन्यसेत्। ताः सास्रुजा नाभिदेशे सर्व्वाः कुक्षौ च विन्यसेत्॥ हृदये च तलं सर्व्वं अंसयोश्च ककुत्स्थले। हृत्पूर्व्वं हस्तपत्कुक्षि सुखेषु तलमेव च॥ एतास्तु मातृकास्रस्राः क्रमेण परिकीर्त्तिताः। अन्यथा विन्यसेद्यस्तु व्याधः स्यात्तस्य निश्चितः॥"

गौतमीये।

"ललाटमुखवक्षोबाहुसन्धिषूदरे गुह्यदेशयोः। ओष्ठद्वन्द्वोत्तमाङ्गांसदोःपत्सन्ध्यन्त्रकेषु च॥ पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेऽंसके। ककुत्संधे च हृत्पूर्व्वं पाणिपादयुगे तथा। जठरागनयोरन्त्यमातृकावर्णान् यथाक्रमात्॥"

तद्यथा। अं नमो ललाटे। आं नमो मुखवृत्ते। इं ईं चक्षुषोः। उं ऊं कर्णयोः। ऋं ॠं नसोः। ऌं ॡं गण्डयोः। एं ओष्ठे। ऐं अधरे। ओं ऊर्द्धदन्ते। औं अधोदन्ते। अं अक्षरन्ध्रे। अः मुखे। कं दक्षबाहुमूले। खं कूर्परे। गं मणिबन्धे। घं अङ्गुलिमूले। ङं अङ्गुल्यग्रे। एवं चं ५ वामबाहुमूलसन्ध्यग्रकेषु। एवं टं ५ दक्षिणपादमूलसन्ध्यग्रकेषु। एवं तं ५ वामपादमूलसन्ध्यग्रकेषु। पं दक्षिणपार्श्वे। फं वामपार्श्वे। बं पृष्ठे। भं नाभौ। मं जठरे। यं हृदि। रं दक्षबाहुमूले। लं ककुदि। वं वामबाहुमूले। शं हृदादिदक्षहस्ते। षं हृदादिवामहस्ते। सं हृदादिदक्षपादे। हं हृदादिवामपादे। लं हृदाद्युदरे। क्षं हृदादिमुखे। सर्व्वत्र नमोऽन्तेन न्यसेत्। तथा च।

"ओमाद्यन्तो नमोऽन्तो वा सविन्दुर्विन्दुवर्জ্জितः।
पञ्चाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः॥"

इति भट्टः॥*॥

अथ संहारमातृकान्यासः।

तस्या ध्यानं यथा,—

"अक्षस्रजं हरिणपोतमुदग्रदण्डं
विभ्राणः करैरविरतं दधतीं त्रिनेत्राम्।
अर्द्धेन्दुमौलिमरुणामरविन्दरागां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम्॥"

न्यासस्तु अकाराद्यकारान्तः। यथा अं नमो हृदादिमुखे इत्यादि॥*॥ अपरञ्च।

"चतुर्धा मातृका प्रोक्ता केवला विन्दुसंयुता। सविसर्गा सोभया च रहस्यं त्रयञ्च कथ्यते॥

विद्याकरी केवला च क्षोभया मुक्तिदायिनी।
पुत्रदा सविसर्गा तु सविन्दुर्भित्तिदायिनी॥"

विष्णुरहस्ये।

वाग्भवाद्या च वाक्सिद्धेः रमाद्या श्रीप्रदायिनी। दुर्गाद्या सर्व्वसिद्धेः कामाद्या मोक्षदायिनी। श्रीकण्ठाद्यात्रिमाद्यस्तेः सर्व्वसम्पत्प्रदीरिता॥"

श्रीविद्याविषये नवरत्नेश्वरे।

"वाग्भवाद्या नमोऽन्ताश्च न्यस्तव्या मातृकाक्षराः।
श्रीविद्याविषये मन्त्री वाग्भवाद्यष्टसिद्धये॥"

इति तन्त्रसारः॥

(मातृ+"छन्दसि घस्।"५।१।७८। इति घस्। त्रि। मातुरागतम्। यथा, महाभारते। ६। ८०। ६०।

"योऽन्वयो मातृकस्तस्य स एनमभिपेदिवान्॥")

मातृकेयटः, पुं, (मातृके कुले यटति पुत्रत्वेन गच्छतीति। यट+अच्।) मातुलः। इति त्रिकाण्डशेषः॥

मातृनन्दनः, पुं, (मातृणां नन्दनः पुत्र आनन्दवर्द्धनो वा। कार्त्तिकेयः। यथा,—

"कथं त्वं कृत्तिकापुत्रसत्तमवान् तं सुरं गुहम्।
कथञ्च पावकिरसौ कथं वा मातृनन्दनः॥"

इत्यादि वाराहपुराणे स्कन्दोत्पत्तिर्नामाध्यायः॥

मातृमङ्गलं, क्ली, (मातृणां मङ्गलम्।) नेत्रयोर्मध्यम्। तत्तु आसन्नदृष्टयुर्द्ध पश्यति। यथा, काश्मीरखण्डे ७२ अध्याये।

"अरुन्धती ध्रुवश्चैव विष्णोर्भौमि पदानि च।
आसन्नदृष्टयुर्ध्वं पश्येत्तुर्यं मातृमङ्गलम्॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रसुच्यते।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मातृमङ्गलम्॥"

(यथा च हरनृसंहितायाम्। "मातृणामपि मातृमङ्गलविदो विप्रान् विदुर्ब्रह्मणः॥")

मातृमुखः, पुं, जड़ः। इति हेमचन्द्रः। ३। १६॥

मातृबन्धुः, पुं, (मातुर्बन्धुः।) मातृबान्धवः। यथा। बन्धवस्त्रिविधाः। आत्मबन्धवः पितृबन्धवो मातृबन्धवश्चेति। यथोक्तम्।

"आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः।
आत्ममातुलपुत्राश्च विज्ञेया ह्यात्मबान्धवाः॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥
मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः।"

इति मिताक्षरा॥

मातृबान्धवः, पुं, (मातुर्बान्धवः।) मातृबन्धुः। स च मातामहभगिनीपुत्रः। मातामहीभगिनीपुत्रः। मातृमातुलपुत्रश्च। यथा,—

"मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥"

इत्युद्वाहतत्त्वम्॥

मातृवाहिनी, स्त्री, (मातरं वहतीति। वह+णिनिः।) वल्गुलापक्षी। इति राजनिर्घण्टः॥

माल्लग्राहितः, पुं, (माल्या ग्राहितः । केवलाधिक्यात् केवलं माल्येव ग्राहितः न तु पित्रा-पार्ष्णादिभिरिति भावः ।) मूर्खः । इति हेमचन्द्रः । ३ । २६ ॥

माल्लश्वसा, स्त्री, (मातुः स्वसा । "माल्लपितृभ्यां स्वसा ।" ८ । ३ । ८७ । इति षत्वम् ।) माल्लभगिनी । मासी इति भाषा । सा माल्लतुल्या यथा,—

"माल्लश्वसा मातुलानी पितृष्वस्री पितृष्वसा ।
स्वभूः पूर्वजपत्नी च माल्लतुल्याः प्रकीर्तिताः ॥"

इति दायभागः ॥

माल्लश्वसेयः, पुं, (माल्लश्वसुरपत्यं पुमान् । माल्लश्वश्र + "माल्लश्वसुरश्च ।" ४ । १ । १३४ । इत्यत्र "कृञ्प्रत्ययो ढकिलोपश्च ।" इति काशिकोक्तेः ढक् ।) माल्लश्वश्रूपुत्रः । मासितुता भाइ इति भाषा । तत्पर्य्यायः । माल्लश्वसीयः २ । इति हेमचन्द्रः । ३ । २०६ ॥

माल्लश्वसेयी, स्त्री, (माल्लश्वसुरपत्यं स्त्री । माल्लश्वश्र + "माल्लश्वसुरश्च ।" ४ । १ । १३४ । इति ढक् । ढकिलोपश्च । ङीष् ।) माल्लभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी । इति भाषा ॥ (टावन्तोऽप्ययं शब्दः । यथा, महाभारते । ३ । २२३ । ५ ।

("मम माल्लश्वसेया त्वं माता दाक्षायणी मम ॥")

माल्लश्वसीयः, स्त्री, (माल्लश्वसुरपत्यं पुमान् । माल्लश्वश्र + "माल्लश्वसुरश्च ।" ४ । १ । १३४ । इति छण् ।) माल्लभगिनीपुत्रः । इत्यमरः । २ । ६ । २५ । मासितुता भाइ इति भाषा ॥

माल्लश्वसीया, स्त्री, (माल्लश्वसीय + टाप् ।) माल्लभगिनीकन्या । इत्यमरः । २ । ६ । २५ । मासितुता भगिनी इति भाषा ॥

माल्लसिंही, स्त्री, वासकः । इति शब्दरत्नावली ।

मात्रं, क्ली, (मीयत इति । मा + त्रन् ।) कार्त्स्न्यम् । अवधारणम् । इत्यमरः । ३ । ३ । २७७ ॥ कार्त्स्न्ये यथा जीवमात्रं न हिंसेत । अवधारणे यथा पयोमात्रं भुङ्क्ते । इति तट्टीकायां भरतः ॥

मात्रा, स्त्री, (भीयते अनया । मा + "कृयामाशुभसिभ्यष्ट्रन् ।" उणा० ४ । १६८ । इति ष्ट्रन् टाप् ।) परिच्छदः । अल्पः । परिमाणम् । इत्यमरः । ३ । ३ । २७७ ॥ परिच्छदो दृश्यश्चादिः । अल्पे यथा । ग्राकमात्रा । परिमाणे यथा । किं हस्तिमात्रोऽकुशः । इति तट्टीकायां भरतः ॥ (यथा, हनूमत्संहितायाम् । ५८ । २ ॥ "अङ्गुलप्रमेकं भवति मात्रा ।") कर्णभूषा । वित्तम् । अवयवः । इति मेदिनी । त्रे, ७५ ॥ ॥ (छन्दसां ह्रस्वदीर्घादिप्रभेदः । यथा, श्रुतबोधे ।

"यस्याः पादे प्रथमे द्वादश मात्रा तथा तृतीयेऽपि ॥")

कालविशेषः । यथा,—

"क्षणेन यावता पाणिः पर्य्येति जानुमण्डले ।
सा मात्रा कविभिः प्रोक्ता ह्रस्वदीर्घप्लुते मता ॥
इति प्राचीनाः ॥

अपि च ।

"वामजानुनि तल्लग्नमग्रं यावता भवेत् ।
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः ॥"

इति तन्त्रसारः ॥

इन्द्रियवृत्तिः । यथा,—

"मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः ।
आगमापायिनो नित्यास्तांस्तितिक्षस्व भारत ॥"

इति भगवद्गीता ॥

"भीयन्ते आभिर्विषयाः मात्रा इन्द्रियवृत्तयः ।"

इति तट्टीकायां श्रीधरस्वामी ॥

इन्द्रियम् । इति पूर्व्वोक्तश्लोकटीकायां मधुसूदनसरस्वती ॥ अंशुः । यथा,—

"न योधिद्भ्यः पृथगद्यादवयानहिनाहते ।
स्वभर्तृपिण्डमात्राभ्यक्तृप्तिरासां यतः स्मृता ॥"

इति आह्निकतत्त्वम् ॥

(श्लोकाद्यः । यथा, ऋग्वेदे । ३ । ४ । ६ । २ ।

"प्र मात्राभी रिरिचे ।"

"मात्राभिः मीयन्ते परिच्छिद्यन्त इति मात्राः श्लोकाद्यः ।" इति तद्भाष्ये सायणः ॥ शक्तिः । यथा, पञ्चतन्त्रे । १ । ३५८ । "का मात्रा वस्तुद्रव्यस्य यो मम प्रकृतिं दूषयिष्यति ॥" अवयवः । यथा, मनौ । ७ । ४ ।

"चक्रवित्तग्रयोश्चैव मात्रानिर्हृत्य शाश्वतीः ॥"

"मात्रा अवयवाः ।" इति तट्टीकायां मेधातिथिः ॥ रूपम् । यथा, भागवते । २ । ५ । २५ ॥

"तस्य मात्रा गुणः शब्दः ॥" "मात्रा सूक्ष्मं रूपम् ।" इति तट्टीकायां स्वामी ॥

मात्सर्य्यं, क्ली, (मत्सर + ष्यञ् ।) मत्सरस्य भावः । परगुणद्वेषः । यथा, —

"मागाधिरार्येकनरः प्रमादं
वसन्नसम्बाधगिरेरपि दर्गे ।
मात्सर्य्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥

इति भारते ३ अध्यायः ॥

मात्स्यिकः, त्रि, (मत्स्योऽस्य पण्यम् । "तदस्य पण्यम् ।" ४ । ४ । ५१ । इति मत्स्य + ठक् ।) जालिकः । मत्स्यघातकः । इति सिद्धान्तकौमुदी ॥

माथ इ कृत्ये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ, माथ्यते । कृत्यौ वधक्लेशौ । इति दुर्गादासः ॥

माथः, पुं, (माथ्यते पीड्यते जनः अस्मिन् । माथ + घञ् । ज्वलादित्वात् णो वा । निपातनात् गुणभावः ।) पन्थाः । इति चिकाण्डशेषः ॥ (मथ + भावे घञ् ।) मन्थनम् । इति शब्दरत्नावली ॥

माथुरः, पुं, (मथुरा + अण् ।) मथुरायाः आगतः । इति मुग्धबोधव्याकरणम् ॥ (तत्र जात इत्यण् वा । मथुराजातः । यथा, कथासरित्सागरे । ६६ । ७१ ।

"ततः स हरदत्तश्रीर्ब्राह्मणीं पुत्रवोऽब्रवीत् ।
सुग्धे ! पवनसेनाख्यो वणिक्पुत्रोऽस्ति
माथुरः ॥"

अन्येन जाता माथुरेण प्रोक्ता । "तेन प्रोक्तम् ।" ४ । ३ । १०१ । इति अण् ङीप् । माथुरीवृत्तिः । इति व्याकरणम् ॥)

माद्यः, पुं, (माद्यत इति मद + घञ् । तुमभावः ।) दर्पः । इत्यमरः । ३ । २ । १२ ॥ हर्षः । इति तट्टीकायां भरतः । मत्तता । इति शब्दरत्नावली ॥

मादकः, पुं, (माद्यति वर्षागमे हृष्यतीति । मद + ण्वुल् ।) दात्यूहपक्षी । इति शब्दमाला ॥ (मादयति स्वगुणेन भूतानीति । मद + णिच् ण्वुल् ।) मदकारकद्रव्ये, त्रि ॥ (यथा, देवीभागवते । १ । १४ । ६४ ।

"इन्द्रियाणि महाभाग ! मादकानि सुनिश्चितम् ।
अदारस्य दुरन्तानि पक्षेव मनसा सह ॥")

मादनं, क्ली, (माद्यति विरहिणः । इति मद + णिच् + ल्युः ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (मादयतीति मद + णिच् + ल्युः ।) हर्षकारयितरि, त्रि ॥)

मादनः, पुं, (माद्यति चित्तविकारमुत्पादयतीति । मद + णिच् + ल्युः ।) कामदेवः । मदनवृक्षः । धुस्तूरः । इति केचित् ॥

मादनी, स्त्री, (मादन + स्त्रियां ङीप् ।) माकन्दी । इति राजनिर्घण्टः ॥ विजया । इति भावप्रकाशः ॥

माद्रयः, त्रि, (अहमिव द्रष्टव्यः इति । दृश + "ण्यदादिषु दृशोऽनालोचने कञ्च ।" ३ । २ । ६० । इति कञ् ।) मत्सदृशः । इति व्याकरणम् ॥ (यथा, महाभारते । ७ । १०८ । ८८ ।

"तस्य त्वं पदवीं गच्छ गच्छेयुस्त्वादृशा यथा ।
माद्रयस्त्वेदृशे काले माद्रयैरभिचोदितः ॥
कथं नु भार्य्या पार्थानां तव कृष्णा ! सखी विभो ! ।
धृष्टद्युम्नस्य भगिनी सभां कृष्येत माद्रयी ॥")

माद्री, स्त्री, (मद्रे जाता । मद्र + अण् ङीप् । भर्गादित्वात् न प्रत्ययलुक् ।) पाण्डुराजपत्नी । सा नग्नजीभूतस्य सुतः शापात् मैथुनरहितस्य स्वामिन आज्ञया अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास । इति महाभारतश्रीभागवतमतम् ॥ (यथा, महाभारते । १ । ६७ । १५६ ।

"कुन्ती माद्री च भ्रातृभ्यां मतिश्च सुबलात्मजा ।")

अतिविषा । इति राजनिर्घण्टः ॥

माद्रीपतिः, पुं, (माद्र्याः पतिः ।) पाण्डुराजः । इति शब्दरत्नावली ॥

माधवः, पुं, (यदुपुत्रस्य मधोरपत्यं पुमान् । इति मधु + अण् । मा लक्ष्मीस्तस्याः धवः । माया विद्यायाः धव इति वा ।) विष्णुः । तस्य व्युत्पत्तिर्यथा,—

"मा च ब्रह्मस्वरूपा या मूलप्रकृतिरीश्वरी ।

नारायणीति विख्याता विष्णुमाया सनातनी ॥
महालक्ष्मीस्वरूपा च वेदमाता सरस्वती ।
राधा वसुन्धरा गङ्गा तासां स्वामी च
माधवः ॥"
इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २१० अध्यायः ॥
(यथा, महाभारते । ५ । ७० । ७ ।
"सौभाद्रात्राच्च योगाच्च विद्धि भारत !
माधवम् ।")
तन्नाममाहात्म्यं यथा,—
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मैकामार्थमोक्षदम् ॥"
इति वह्निपुराणम् ॥
(मधोर्वसन्तस्यायम् मधूनि मधुमन्ति कुसुमानि अस्त्यस्मिन् वा । मधु + "मधोर्ञ च ।" ४ । ४ । १२६ । इति अः ।) वैशाखमासः । इत्यमरः । १ । ४ । १६ ॥ (यथा, मार्कण्डेये । ११७।२७ ।
"स तेन सख्या सहितो जगामाम्रवणं वनम् ।
पक्षीभिः स समं रन्तुं माधवे मासि पार्थिव ! ॥"
(मधु + स्वार्थे अण् ।) वसन्तः । इति त्रिकाण्डशेषः ॥
(यथा, स्मृतौ । १ । १६ । ६ । "मधुमाधवौ वसन्तः ।"
"माधवप्रथमे मासि नभस्यप्रथमे पुनः ॥"
इति चरके सूत्रस्थाने षष्ठेऽध्याये ॥
"माधवनभस्यसहस्यानां यथासंख्यं वैशाखभाद्रपौषाणां सुश्रुतेऽभिहितत्वात् तेषां प्रथमेऽग्येऽवर्णिनि माघि चैत्रादौ विषय इति निष्कर्षः । इति चरकटीकायां भरतः ॥)
मधुकरः । भृङ्गराजः । इति राजनिर्घण्टः ॥
(भौत्यमन्वन्तरीयसप्तर्षीणामन्यतम ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अगौरश्चायिवाहुश्च शुचिर्मुक्तोऽथ माधवः ।
शुक्रोऽजितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥"
सायनाचार्य्यस्य भ्राता । यथा, सायनकृतधातुवृत्तौ । इति पूर्व्वदक्षिणपश्चिमसमुद्राधीश्वरकम्पराजसुतसङ्गमराजमहामन्त्रिणा सायनपुत्रेण माधवसहोदरेण सायनाचार्य्येण विरचिता माधवीया धातुवृत्तिः ॥)
माधविका, स्त्री, (माधवी + कन् टाप् । पूर्व्वहृस्वश्च ।) माधवीलता । इत्यमरटीकायां भरतः ॥
माधवी, स्त्री, (मधौ साधुपुष्यति । मधु + "कालात् साधुपुष्यत्पच्यमानेषु ।" ४ । ३ । ७२ । इत्यण् । ङीप् ।) स्वनामख्यातपुष्पलता । तत्पर्य्यायः । अतिमुक्तः २ पुष्पकः ३ वासन्ती ४ लता ५ । इत्यमरः । २ । ४ । ७२ ॥ अतिमुक्तकः ६ माधविका ७ माधवीलता ८ । इति तट्टीकायां भरतः ॥ चम्पकवल्ली ९ सुगन्धा १० भ्रमरोत्सवा ११ भृङ्गप्रिया १२ भ्रमरता १३ भूमिमण्डपभूषणा १४ वसन्तीकुसुमी १५ । इति जटाधरः ॥ अस्यामाधवी १६ । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । १२ । ७ ।
"आम्रैर्नीपैर्मधूकैश्च माधवीमण्डपावृताम् ।")
अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । मदगन्धित्वम् । पित्तकफव्रणदाहशोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"माधवी स्यात्तु वासन्ती पुष्पको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥
माधवी मधुरा ग्रीता जयी दोषत्रयापहा ।"
इति भावप्रकाशः ॥
मिसिः । मधुशर्करा । कुड्मली । (मधुनो विकार इत्यण् ङीप् ।) मदिरा । इति मेदिनी । वे, ४६—४७ ॥ (यथा, महाभारते । ४। १५ । ६ ।
"अस्ति मे गृहजं दिव्यं स्वदर्थमुपकल्पितम् ।
एहि तत्र मया सार्द्धं पिबस्व मधुमाधवीम् ॥"
माधवस्येयमित्यण् ङीप् । तत्प्रियत्वात्तथात्वम् ।) तुलसी । इति शब्दमाला ॥ (मधौ वसन्ते सेव्यार्चनीयेति अण् ।) दुर्गा । इति शब्दरत्नावली ॥ माधवस्य पत्नी च ॥ (मधुर्गुणा कन्या । यथा, महाभारते । १।६५।१२ । 'जनमेजयः स्वस्वसारं नामोपयेमे माधवीं तस्यामस्य जज्ञे प्राचिन्वान् ।')
माधवीलता, स्त्री, (माधव्याख्या लता ।) स्वनामख्यातपुष्पलता । इत्यमरटीकायां भरतः ॥
माधवेष्टा, स्त्री, (माधवस्य इष्टा ।) वाराहीकन्दः । इति राजनिर्घण्टः ॥
माधवोचितं, क्ली, (माधवस्योचितम् । सुगन्धित्वात् तथात्वम् ।) कक्कोलकम् । इति राजनिर्घण्टः ॥ (विस्तरोऽस्य कक्कोलशब्दे ज्ञातव्यः ॥)
माधवोद्भवः, पुं, (माधवादुद्भवोऽस्य ।) राजादनी । इति राजनिर्घण्टः ॥
माधुकः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ (यथा, महाभारते । १३ । ४८ । २० ।
"मैरेयकस्य वैदेहः सम्भूतोऽथ माधुकम् ॥")
माधुमताः, पुं, (मधुमत्सु भवाः । मधुमत् + "कच्छादिभ्यश्च ।" ४ । २ । १३३ । इत्यण् ।) काश्मीरदेशभवाः । इति हेमचन्द्रः ।४।२४॥
माधुरं, क्ली, (मधु अस्ति अस्य अस्मिन् वेति । मधु + "ऊधसुधिसुरुक्षमधोः रः ।" ५।२।१०७। इति रः । ततः स्वार्थेऽण् ।) मल्लिका । इति त्रिकाण्डशेषः ॥ (मधुरात् सम्भवतीत्यण् ।) मधुरसम्भवे, त्रि ॥
माधुरी, स्त्री, (माधुर + गौरादित्वात् ङीष् ।) मद्यम् । इति भूरिप्रयोगः ॥ माधुर्य्यम् । यथा,
"तानि स्वर्गसुखानि ते च तरलाः स्निग्धा
ह्रदोविभ्रमा-
स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां
वक्रिमा ।
सा विम्बाधरमाधुरीति विषयासङ्गेऽपि चैष्णा-
नसं
तस्यां जन्मसमाधि हन्त विरुद्धव्याधिः कथं
वर्त्तते ॥"
इति गीतगोविन्दे ३ सर्गः ॥
माधुर्य्यं, क्ली, (मधुरस्य भावः । मधुर + "वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३ । इति ष्यञ् ।) मधुरस्य भावः । मधुरत्वम् । इति हेमचन्द्रः । ३ । १०३ । (यथा, सुश्रुते सूत्रस्थाने एकादशाध्याये ।
"माधुर्य्यं भजतेऽर्थं तीक्ष्णभावं विमुञ्चति ।")
लावण्यम् । यथा,—
"रूपं किमप्यनिर्व्वाच्यं तनोर्माधुर्य्यमुच्यते ।"
इत्युज्ज्वलनीलमणिः ॥
पाञ्चालीरीतिविशिष्टकाव्यगुणः । यथा,—
"मधुरा सुकुमाराद्या पाञ्चाली कवयो विदुः ।"
इति साहित्यदर्पणे ९ परिच्छेदः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे ८ परिच्छेदे ।
"चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥
ट्वर्गैर्ड वर्गान्त्यवर्णैश्च युक्ताः ट ठ ड ढान् विना ।
रणौ लघु च तद्व्यक्तौ वर्णाः कारणतां गताः ॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।"
(नायिकानामयत्नजोऽलंकारविशेषः । यथा, साहित्यदर्पणे । ९ । १२६ ।
"सङ्गोभेष्वनुद्वेगो माधुर्य्यं परिकीर्त्तितम् ।"
सात्त्विकनायकगुणभेदः । यथा, तत्रैव ।३।६१।
"सर्व्वावस्थाविशेषेषु माधुर्य्यं रमणीयता ।")
माध्यन्दिनं, त्रि, (मध्ये भवम् । मध्य + "अमः-पूर्व्वपदात् ठञ् ।" ४।३।६० । इत्यश्वपाणिकाकृतवृत्तौ "मध्योमध्यं दिनञ् चाद्यात् ।" इति दिनञ् ।) मध्यमम् । इति हेमचन्द्रः । ६ । ८६ ॥ (मध्यन्दिनसम्बन्धि । यथा, ऋग्वेदे । ३ । २८ । ४ ।
"माध्यन्दिने सवने जातवेदः पुरोडाशमिह
कवे ! जुषस्व ।"
"माध्यन्दिने मध्यन्दिनसम्बन्धिनि" तथा "माध्यन्दिने मध्ये दिनस्येदमित्यर्थे उत्सादिभ्योऽञ् भिलादादिदृष्टिः भिलादेवाद्युदात्तत्वम् ।" इति च तद्भाष्ये सायनः ॥ मध्यन्दिनेन प्रोक्ताधीता वा । इत्यण् ङीप् । शुक्लयजुर्व्वेदस्य शाखाभेदः । यथा, आश्वलायनीयश्रौतसूत्रे । ५ । ५ । १८ ।
"पिबा सोममभियमुग्रतर्द इति तिस्रोऽर्वाङेहि सोमकाम त्वाहुस्त्वायं सोमस्त्वमेवार्वाङिमाय सोमाः प्र दिवो विदाना आ पृथ्वीं अस्य कलया: स्वाहेति माध्यन्दिनाः ।")
माध्यमं, त्रि, (मध्ये भवं । मध्य + "अमः पूर्व्वपदाट्ठञ् ।" ४ । ३ । ६० । इत्यस्य काशिकाकृतवृत्तौ "मध्यमीयौ च प्रत्ययौ वक्तव्यौ ।" इति मध्यम ।) मध्ये भवम् । यथा,—
"मध्यमं माध्यमं मध्यमीयं माध्यन्दिनञ्च तत् ।"
इति हेमचन्द्रः । ६ । ८६ ॥
माध्यस्थं, क्ली, (मध्यस्थ + ष्यञ् ।) मध्यस्थस्य भावः । मध्यस्थकरत्वम् । यथा, कुमारसम्भवे । १ । ५२ ।
"अथाचितारं नहि देवदेव-
मद्रिः सुतां प्रार्थयितुं शशाक ।

अभ्यर्थनाभङ्गभयेन साधु-
र्माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे ॥"

माध्वं, क्ली, (माध्वीक । एषोदरादित्वादीकारस्याकारः ।) माध्वीकम् । इत्यमरटीकायां भानुदीक्षितः ॥

माध्वी, स्त्री, (मधुनो विकारः । मधु + अण् । ङीप् । "अत्यावाखाद्यावास्यमाध्वीति ।" ४ । ४ । १०५ । अपि स्त्रियां यथादेशो निपात्यते ।) मद्यम् । इति त्रिकाण्डशेषः ॥ मध्वादिजाता सुरा । इति राजनिर्घण्टः ॥ (यथा, मनौ । ११ । ९५ ।

"गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा ।"

मधु मधुररसोऽस्त्यस्य कण्टकावच्छेदे अण् ।) मधुरकण्टकमत्स्यः । इति शब्दरत्नावली ॥ (मधुमति, त्रि । यथा, ऋग्वेदे । ७ । ७१ । २ ।

"दिवानक्तं माध्वी नासीथां नः ॥"

हे माध्वी ! मधुमत्यौ ॥ इति तद्भाष्ये सायणः ॥ नदीविशेषः । यथा, भारते । १२० । ७१ ।

"तेभ्यः स्रोता च माध्वी च ते नद्यौ सम्प्रसुस्रुवाताम् ।")

माध्वीकं, क्ली, (माध्वी + स्वार्थे कन् ।) मधूकपुष्पजातमद्यम् । तत्पर्य्यायः । मध्वासवः २ माधवकः ३ मधु ४ । इत्यमरः । २ । १० । ४१ ॥ मधुमाध्वीकमित्येकं नामेति केचित् ॥ पूर्व्वौ द्वौ पुष्पमद्ये । (यथा, महाभारते । ३ । २७७ । ३६ ।

"अर्घं हि पीत्वा माध्वीकं पीत्वा च मधुमाधवीम् ।
लोभं सौवीरके कुर्य्यान्नारी कांचिदिति स्मरेत् ॥")

परौ द्वौ द्राक्षाविकारे । इति भरतः ॥ माद्वीकमिति वा पाठः । इति रमानाथः । माध्वीकस्थाने माध्वकमिति भानुदीक्षितः ॥ (मधु । यथा, नैषधे । १६ । ३३ ।

"अथवा मलिने माध्वीकं वा न वाऽभिनवागतः ।
कुसुदमकरन्दौघैः कुक्षिम्भरिर्भ्रमरोत्करः ।
इह तु लिह्यते राजीतर्षं रथाङ्गविहङ्गमा
मधु निजवधूवक्त्राम्भोजेऽधुनाऽधरनामकम् ॥"

"माध्वीकं मकरन्दम् । इति तट्टीकायां नारायणः ॥) तत्पर्य्यायो यथा,—

"मधुमाध्वीकमाध्वीकपुष्पसारघमीरितम् ।
मक्षिकावरटीभक्षवातपुष्परसोद्भवम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

माध्वीकफलः, पुं, (माध्वीकं मधुमत् फलमस्य ।) मधुनालिकेरिकः । इति राजनिर्घण्टः ॥

माध्वीमधुरा, स्त्री, (माध्वीमदतएव मधुरेति ।) मधुरखर्ज्जूरिका । इति राजनिर्घण्टः ॥

माग, कि अर्च्चे । इति कविकल्पद्रुमः ॥ (चु०-पक्षे भ्वा०-पर०-सक०-सेट् ।) कि मागयति मागति । इति दुर्गादासः ॥

माग, ङ विचारे । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ मीमांसने

ग्राह्यं धीरः । अर्थाया तिवादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

मागं, क्ली, (मीयतेऽनेनेति । मा + करणे घञ् ।) परिमाणम् । तत्पर्य्यायः । यौतवम् २ हव्यम् ३ पाय्यम् ४ यौतवम् ५ । तच्च तुलाकुलिप्रस्थेक्षिविधं भवति । तत्र तुलाग्रहणेनोन्मानमुपलक्ष्यते । अङ्गुल्या हस्तादि । प्रस्थेन द्रोणादि । इत्यमरभरतौ ।२।६।८५॥ प्रमाणम् । इति मेदिनी । गे, १५ ॥ यत्र तालो विरमति तत् । तदेव ग्रहसुच्यते । तच्चतुर्विधम् । समं विषमं अतीतं अनागतञ्च । इति सङ्गीतशास्त्रम् ॥*॥

अथ मानपरिभाषा ।

"न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् ।
अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया ॥
चरकस्य मतं वैद्यैराद्रियन्ताच्च तत्तः ।
विहाय सर्व्वमानानि मागधं मानमुच्यते ॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः ।
त्रसरेणुस्तु पर्य्यायनाम्ना ध्वंसीति गद्यते ॥
जालान्तरगतैः सूर्य्यकरैर्ध्वंसौ विलोक्यते ।
षड्ध्वंसीभिर्भवेद्रीचिः स्यात्ताभिः षड्भिश्च राजिका ।
तिसृभी राजिकाभिश्च सर्षपः प्रोच्यते बुधैः ।
यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् ॥
षड्भिस्तु रत्तिकाभिः स्यान्माषको हेमधारणे ।
माषैश्चतुर्भिः शाणः स्यात्तस्य तौ निगद्यते ॥
टङ्कः स एव कथितस्तद्वयं कोलमुच्यते ।
क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते ॥
कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः शाणिमात्रिकः ।
अक्षः पिचुः पाणितलं किञ्चित् पाणिश्च तिन्दुकम् ॥
विडालपदकश्चैव तथा षोडशिका मताः ।
करमध्यो हंसपदं सुवर्णं कवलग्रहम् ॥
उत्तुम्बरश्च पर्य्यायैः कर्ष एव निगद्यते ।
स्यात् कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा ।
शुक्तिभ्याञ्च पलं ज्ञेयं तुष्टिराज्यं चतुर्थिका ।
प्रकुञ्चः षोडशी विल्वं पलमेभान्न कीर्त्यते ॥
पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतश्च निगद्यते ।
प्रसृतिभ्यामञ्जलिः स्यात् कुडवोऽञ्जलयश्चतस्रः ॥
अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका ।
सरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥
प्रसरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैश्चथाढकः ।
भाजनं कांस्यपात्रञ्च चतुःषष्टिपलञ्च सः ॥
चतुर्भिराढकैर्द्रोणः कलशो नल्वणोर्मणः ।
उन्मानञ्च घटो राशिर्द्रोणपर्य्यायसंज्ञितः ॥
द्रोणाभ्यां खारिकैका च चतुःषष्टिपलात्मकः ।
खारीभ्याञ्च भवेद्वाहो गोणी च सा स्मृता ॥
द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः ।
चतुःसहस्रपलिका वस्तुवस्त्वधिका च सा ॥

पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः ।
तुलापलप्रसृतं श्रेया सर्व्वत्रैवैष निश्चयः ॥
माघटङ्काक्षविल्वानि कुडवः प्रस्थमाढकम् ।
राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणाः ॥"*॥
मागधपरिभाषायां षड्रत्तिको माषश्चतुर्म्मिर्द्रत्तिकटङ्कः यस्मात्तिरत्तिकः कर्षः । अयं चरकसम्मतः ॥ सुश्रुतमते । पञ्चरत्तिको माषो विंशतिरत्तिकटङ्कोऽशीतिरत्तिकः कर्षः । अयमेव कलिङ्गपरिभाषायामपि । यतस्तत्राष्टरत्तिको माषो द्वात्रिंशद्रत्तिकटङ्कः । सार्द्धटङ्कद्वयमितः कर्षः ।

"गुञ्जादिमानमारभ्य यावत् स्यात् कुडवस्त्रिभिः ।
द्रव्यार्द्धशुष्कद्रव्याणां तावन्मानं समं मतम् ॥
प्रस्थादिमानमारभ्य द्विगुणन्तु द्रवार्द्रयोः ।
मानं तथा तुलायास्तु द्विगुणं न क्वचित् क्वतम्॥
दृष्टश्रवेणुलोष्ठादेर्भाण्डं यत्तुरकुलम् ।
विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत् ॥"

इति मागधमानम् ॥*॥

अथ कालिङ्गमानम् ।

"यतो मन्दायवो द्रक्षा हीनसत्त्वा नरा: कलौ ।
अतस्तु मात्रा तद्योग्या प्रोच्यते मुनिसम्मता ॥
यवो द्वादशभिर्गौरैः सर्षपः प्रोच्यते बुधैः ।
यवद्वयेन गुञ्जा स्यात्तिगुञ्जो वल्ल उच्यते ।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित् ॥
चतुर्भिर्माषकैः प्राणः स निष्कटङ्क एव च ।
प्राणानां माषकैः षड्भिः कर्षः स्याद्द्रव्यमाधिकः ॥
चतुःकर्षः पलं प्रोक्तं दशद्रव्याणमितं बुधैः ।
चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्व्ववन्मताः ॥
स्थितिर्नास्त्येव माषाद्या: कालमद्यि यथौ बलम् ।
प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत् ॥
मात्रां हन्त्यौषधं व्याधिं यथान्नोऽल्पं महाबलम् ।
अतिमात्रञ्च दोषाय यथा घ्नन्नेऽबलं बलम् ॥"

इति मानपरिभाषा । इति भावप्रकाशः ॥

मानः, पुं, (मन्यते बुद्ध्यतेऽनेन इति । मन + घञ् ।) चित्तसमुन्नतिः । इत्यमरः । १ । ७ । २२ ॥ चित्तस्य समुन्नतिरक्षुब्धता मानः । साङ्ख्ये धनाद्युत्कर्षणात्मनि चित्तोन्नतिर्मान इति । मन्यमो नास्तीति मननं मानः । इति तट्टीकायां भरतः ॥ (यथा, मनौ । ४ । १६३ ।

"हर्षं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥")

आत्मनि पूज्यताबुद्धिः । इति नीलकण्ठः ॥ अनुरक्तयोरेकत्वीभावविशेषः । यथा,—

"इमावेकीभाव एकत्र मनोरज्ञुरक्तयोः ।
स्वाभीष्टाश्लेषवीक्षादिनिरोधी मान उच्यते ॥"

इत्युज्ज्वलनीलमणिः ॥

पूज्यत्वम् । यथा,—

"अधमाः कामिमिच्छन्ति सन्धिमिच्छन्ति मध्यमाः ।

मानकं

उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥
मानो हि महतामर्थस्त्यागे त्याने धनेन किम् ।
प्रभवत्यभिमानदर्पस्य किं धनेन किमायुषा ॥
अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां
धनम् ॥"

इति गारुडे १२५ अध्यायः ॥

प्रियापराधबन्धिका चेष्टा मानः । स च लघु-मध्यमो गुरुश्चेति । अक्षमापनेयो लघुः । कष्टा-पनेयो मध्यमः । कष्टतमापनेयो गुरुः । असा-ध्यस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्या लघुः । गोत्रस्खलनादिजन्या मध्यमः । अपर-स्त्रीसम्भोगदर्शनादिजन्या गुरुः । अन्यथाविध-कुतूहलाद्यपनेयो लघुः । अन्यथाविधप्रथाद्य-पनेयो मध्यमः । चरणपातभूषणदानाद्यपनेयो गुरुः । अपरस्त्रीदर्शनादिजन्या यथा,—

"खेदाम्बुभिः क्षपय पिच्छिलमङ्गभूमौ
श्यामोदरि क्षपय कष्टकितत्वकाक्षि ।
अन्यां विलोकयति भाषयति प्रियेऽपि
मानः क्व धास्यति पदं तव तन्न विद्मः ॥"

गोत्रस्खलनादिजन्या यथा,—

"यद्गोत्रस्खलनं तनु भ्रमो यदि न मन्यते ।
रोमालिबालसंस्पर्शं प्रपद्यं तन्वि ! कारय ॥"

अपरस्त्रीसम्भोगदर्शनादिजन्या यथा,—

"हृदितस्य निरीक्ष्य भालदेशं
चरणालक्तकपिञ्जरं सपत्न्याः ।
सुदृशो नयनस्य कोणभासः
स्मृतिसुप्ताः शिखरोपमा बभूवुः ॥"

इति रसमञ्जरी ॥

अद्रिः । इति मेदिनी । के, १५ ॥ (परिच्छेदकं, त्रि । यथा, ऋग्वेदे । ७ । ८८ । ५ ।

"दृहन्तं मानं वरुण स्वधावः
सहस्रद्वारं जगमा गृहन्ते ।"

"मान्यन्तिन् सर्वाणि भूतानि इति मानं सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः ।" इति तद्भाष्ये सायनः ॥ पुं, मन्त्रः । यथा, ऋग्वेदे । १ । १८६ । ८ ।

"अवोचाम निवचनान्यस्मिन्मानस्य सनुः
सहसान अग्नौ ।"

"मीयत इति मानो मन्त्रः तस्य सनुरग्निः मन्त्रेणोत्पद्यमानत्वात् सप्तम्यर्थे प्रथमा ।" इति तद्भाष्ये सायनः ॥ निर्माता । यथा तत्रैव । १० । १४४ । ५ ।

"यं ते द्यावापृथिवी यं समुद्रो यं सिन्धवो
यमद्रयो बर्हमाणं महान्तं पर्जन्यमाप
मानमुक्थम् ।"

"मानं यागद्वारा निर्मातारम् ।" इति तद्भाष्ये सायनः ॥)

मानकं, क्ली, पुं, (मानं दृहत्परिमाणमस्य । "गोवादिभ्यश्च ।" ५ । ४ । १५४ । इति कप् ।) मापकम् । मापकयन्त्र इति भाषा ।

"कर्षो तु पिच्छिला प्रोक्ता विस्तीर्णपर्णमानके ।"

इति शब्दचन्द्रिका ॥

मानव

"खजकन्दो वाल्यकन्दः खजपद्मस्तु मानकः ।"

इति रत्नमाला ॥

अस्य गुणाः ।

"मानकं स्वादु शीतञ्च गुरु श्लेष्मकरं कटु ।"

इति राजवल्लभः ॥

अपि च ।

"मानकः स्याच्छदापत्रः कथ्यते तद्गुणा अथ ।
मानकः श्लेष्मकृच्छीतः पित्तरक्तहरो लघुः ॥"

इति भावप्रकाशः ॥

(विषयोऽस्य यथा, —

"पुराणं मानकं पिष्ट्वा त्रिगुणीकृततण्डुलम् ।
साधितं क्षीरतोयाभ्यामभ्यसेत् प्रायसस्तु तत् ॥
क्षुत्तृं वातोदरं श्लीपं गण्डमालीं पाण्डुतामपि ।
सिद्धो भिषग्भिराख्यातः प्रयोगोऽयं निरत्ययः ॥"

इति वैद्यकचक्रपाणिसंग्रह उदराधिकारे ॥)

मानयन्थिः, पुं, (मानस्य ग्रन्थिरिव । बाहुलकात् ।) अपराधः । इति हारावली ॥ (मानस्य ग्रन्थिः । अभिमानवर्द्धनम् । यथा, कृष्णोमङ्ग-ल्याम् । ५ । ७ ।

"कैशवबंशजगौतिलोकमनोज्ञगन्धहारिणी जयति ।
गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाख्या ॥")

मानधानिका, स्त्री, कर्कटी । इति शब्दमाला ॥

मानगौर्य, त्रि, (मान्यते पूज्यत इति । मान + अनौयर् ।) मान्यम् । यथा,—

"मानो मान्योऽसि वृत्तेषु मानगौर्यः सुरा-
सुरैः ।
ज्ञापयामि महादेवीं मानं देहि गृहे मम ॥"

इति दुर्गोत्सवपद्धतिः ॥

मानरन्ध्रा, स्त्री, (मानार्थं समयपरिमाणज्ञापकं रन्ध्रमस्याम् ।) ताम्बी । तांबी । इति भाषा । यथा,—

"यामघोषोऽथ ताम्बी स्यान्मानरन्ध्रा विका-
लिका ।"

इति त्रिकाण्डशेषः ॥

मानवः, पुं, (मनोरपत्यम् मनोर्गोत्रापत्यं वा पुमान् । मनु + अण् ।) मनोरपत्यम् । मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, महाभारते । १ । ७५ । १२—१३ ।

"मनोर्वैवस्वतो मानवानां ततोऽयं प्रथितोऽभवत् ।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ॥")

बालः । इति शब्दरत्नावली ॥ (मनुना प्रोक्तम् । मनु + अण् ॥ उपपुराणविशेषः । यथा, देवी-भागवते । १ । ३ । १६—१४ ।

"सनत्कुमारं प्रथमं नारसिंहं ततः परम् ।
नारदीयं शिवञ्चैव दौर्वाससमनुत्तमम् ।
कापिलं मानवञ्चैव तथा चौशनसं स्मृतम् ॥")

मानवर्जितः, त्रि, (मानेन वर्जितः ।) मान-रहितः । यथा, महाभारते । ३ । ४६ । ४८ ।

"तस्मात् त्वं नर्मन: पार्थ ! स्त्रीमध्ये मान-
वर्जितः ।")

गौरः । इति धरणिः ॥

मानसं

मानवी, स्त्री, (मानव + स्त्रीत्वात् ङीप् ।) मनुष्य-स्त्रीजातिः । तत्पर्य्यायः । मानुष्यी २ मानुषी ३ नारी ४ । इति शब्दरत्नावली ॥ (यथा, नैषधे । ८ । ४१ ।

"दिवौकसं कामयते न मानवी
नवीनमभ्राभि तवाननादिदम् ।")

ग्रासनदेवताविशेषः । इति हेमचन्द्रः ।१।४५॥

स्वायम्भुवमनुकन्या । इति महाभारतम् ॥ (यथा, भागवते । ३ । २३ । ३ ।

"स वै देवर्षिवर्य्यस्तां मानवीं समनुव्रताम् ।")

मानवौघः, पुं, (मानवानां ओघः यस्मिन् ।) तारा-विद्यायाः पीठस्य उत्तरे वायव्यादीशपर्य्यन्तं पूज्यगुरुषट्शक्तिविशेषः । यथा । तारावल्लभभानु-मत्यम्बजयाम्बिकाम्बमहोदर्यम्बसुखानन्दनाथ-परानन्दनाथपारिजातानन्दनाथकुबेरेश्वरानन्द-नाथविरूपाक्षानन्दनाथभैरवाख्याः पूजयेत् । एते मानवौघाः । तथा च तन्त्रे ।

"अथ तारागुरून् वक्ष्ये दृष्टादृष्टफलप्रदान् ।
ऊर्द्धकेशो वोमकेशो नीलकण्ठो वृषध्वजः ॥
दिव्यौघाः सिद्धिदा वत्स ! सिद्धौघान् शृणु
यत्नतः ।
वशिष्ठः कूर्म्मनाथश्च मीननाथो महेश्वरः ॥
हरिनाथो मानवौघान् शृणु वक्ष्यामि तद्-
गुरून् ।
तारावती भानुमती जयाविद्या महोदरी ॥
सुखानन्दः परानन्दः पारिजातः कुबेरश्वरः ।
विरूपाक्षः भैरवी च कथितं तारिणीकुलम् ॥
आनन्दनाथशब्दान्ता गुरवः सर्व्वसिद्धिदाः ।
स्त्रियोऽपि गुरुरूपास्तु अन्यान्याः परिकी-
र्त्तिताः ॥"

इति तन्त्रसारः ॥

मानव्यं, क्ली, (मानवानां समूहः इति । "ब्राह्मण-माणवकवाडवाद्यन् ।"४ । २ । ४२ । इति यन् ।) मानवसमूहः । मानवानां समूहो मानव्यं विकारसंघेति शब्दः । मानवो बालः । क्षुद्रजन्तु-मध्यः इन्त्यमध्य इत्येके । इत्यमरटीकायां भरतः॥ (मनोर्गोत्रापत्यं । "मनु + गोत्रादिभ्यो यञ् ।" ४ । १ । १०५ । इत्यनेन यञ् । मनु-वंश्यौघे, त्रि ॥)

मानसं, क्ली, (मन एव । मनसु "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थे अण् ।) मनः । इत्य-मरः ।१।४।३१ ॥ (यथा, मार्कण्डेये । १५ । ६१ ।

"यज्ज्ञानतपसोश्चैव परञ्च न न भूतये ।
भवन्ति तस्य यस्यासौ परिज्ञाने न मानसम् ॥")

तस्य गुणा यथा,—

"परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ।"

इति भाषापरिच्छेदः ॥

(मनसि भवो जातो वा । मनस् + अण् ।) मनोभवे, त्रि । यथा, सङ्कल्पः कर्म्ममानसम् ॥ इत्यमरः । १ । ५ । २ ॥

"विषयेष्वतिसंरागो मानसो मल उच्यते ।"

इत्येकादशीतत्त्वम् ॥

"अनूढानङ्गपीडेव मनेयं मानसी यथा ॥"
इति प्राहः ॥
मानसतापो यथा,—
"कामक्रोधभयद्वेषलोभमोहविषादजः ।
शोकाद्यया वमानेर्ष्या मात्सर्य्यादिभवस्तथा ॥
मानसोऽपि द्विजश्रेष्ठ ! तापो भवति नैकधा ॥"
इति विष्णुपुराणे ६ अंशे ५ अध्यायः ॥
त्रिविधमानसकर्म्म । यथा,—
"परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥"
इति तिथ्यादितत्त्वम् ॥
मानसरोगा यथा,—
कामक्रोधलोभमोहभयाभिमानद्वेष्यपैशुन्य-
विषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथवा ।
उन्मादापस्मारशूलाभिमतसंज्ञासप्रभृतयः ।
इति भावप्रकाशः ॥*॥ (मनसा सङ्कल्पेन ज्ञातमित्यण् ।) सरोवरविशेषः । इति मेदिनी । से, ३१ ॥ स च कैलासे ब्रह्मणा निर्म्मितः ।
यथा,—
"कैलासपार्श्वेऽपि दुरत्ययो दानवेन्द्रैश्च कम्पितः ।
यक्षराक्षसगन्धर्व्वैर्नित्यं सेवितकन्दरः ॥
श्रीमान्मनोहरश्चैव नित्यं पुष्पितपादपः ।
हेमपुष्करसंछन्नं तेन वैखानसं सरः ॥
कम्पितं मानसश्चैव राजहंसनिषेवितम् ॥"
इति महाभारते हरिवंशे नारसिंहे २२८अः॥
अपि च ।
"कैलासपर्व्वते राम ! मनसा निर्म्मितं परम् ।
ब्रह्मणा नरशार्दूल ! तेनेदं मानसं सरः ॥
तस्मात् सुस्राव सरसः सायोध्यामुपगूहते ।
सरःप्रसूता सरयूः पुण्या ब्रह्मसरश्च्युता ॥"
इति रामायणे आदिकाण्डे २४ सर्गः ॥*॥
(पुं, नागविशेषः । यथा, महाभारते ।१।५७।१६।
"अमाहठः कामठकः सुषेणो मानसो जयः ।"
ग्राम्यलौहीपस्य वर्षविशेषः । यथा, मात्स्ये ।
५३ । ७३ ।
"मेनश्च हरितश्चैव ऋक्षवानृष्टिमांस्तथा ।
वैद्युतो मानसश्चैव केतुमान् सप्तमस्तथा ॥"
पुष्करद्वीपस्थपर्व्वतविशेषः । यथा, मात्स्ये ।
"द्वीपार्द्धस्य परिक्षिप्तः पश्चिमे मानसो गिरिः ।")
मानसजपः, पुं, (मानसेन ज्ञातो जपः ।) धिया वर्णश्रेण्युच्चारणम् । यथा,
"धिया यदक्षरश्रेणीं वर्णरूपपदात्मिकाम् ।
उच्चरेदर्थसुद्दिश्य मानसः स जपः स्मृतः ॥
तज्जपे नियमो नास्त्येव । तथा च ।
"अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि ।
मन्त्रैकशरणो विद्वान् मनसैव समभ्यसेत् ॥
न दोषो मानसे जाप्ये सर्व्वदेशेऽपि सर्व्वदा ॥"
इति तन्त्रसारः ॥
मानसतीर्थं, क्ली, (मानसं तीर्थमिव । रागाद्यभावात् तथात्वम् ।) रागादिरहितं मनः ।
यथा,

स्कन्द उवाच ।
"तीर्थानि कथितान्येवं भौमानि मुनिसत्तम ! ।
मानसानीह तीर्थानि फलदानि विशेषतः ॥
मनो निर्म्मलतीर्थं हि रागादिभिरनाविलम् ॥"
इति नारसिंहपुराणे ७६ अध्यायः ॥
मानसपूजा, स्त्री, (मानसज्ञता पूजा । प्राकृपार्थिववत् समासः ।) मनोरचितद्रव्यकरणकसपर्य्या । यथा, कुलार्णवे ।
कुण्डलीपात्रसंस्थेन सहस्रारोद्गतेन पात्रं देव्याकरे दद्यात् । ततो मनस्यार्घ्यं दत्त्वा सहस्रदलपद्मोद्गारगलितपरमामृततुलेन आचमनीयं कल्पे । पश्चिमेति तत्त्वेन गन्धच । अहिंसा विज्ञानं क्षमा दया अलोभं अमोहं अमात्सर्य्यं अमायां अनहङ्कारं अरागं अद्वेषं इन्द्रियाणि द्वादश एतानि पुष्पाणि च प्रदापयेत् । ततस्तेजोरूपं दीपं वायुरूपं धूपं दद्यात् अम्बरं चामरं दर्पणं सूर्य्यं चन्द्रं छत्रं पादुके मेखलां आनन्दं हारमुत्तमं अनाहतध्वनिमर्घौ घण्टां निवेदयेत् । ततः सुधारसाम्बुधिं मांसपर्व्वतं ब्रह्माण्डपूरितं पायसञ्च दत्त्वा ।
"मनोनर्म्मनसत्ताले: पद्मकारादिरसोद्भवैः ।
कृतैर्गन्धैश्च वाद्यैश्च तोषयेत् परमेश्वरीम् ॥"
एवं संपूज्य अभेदेन जपः कार्य्यः । इति तन्त्रसारे त्रिपुराप्रकरणम् ॥ * ॥ मानसैर्न्यूनपूजा यथा, नीलतन्त्रे ।
"ततो मानसगन्धाद्यैः पूजयेत् स्वसुतया ।
कनिष्ठा पृथिवीतत्त्वं तदूर्ध्वगाङ्गन्धयोजनम् ॥
अङ्गुष्ठो गगनं तत्त्वं तेनैव पुष्पयोजनम् ।
तर्জ्जनी वायुतत्त्वं स्याद्धूपं तेनैव योजयेत् ॥
अनामा ज्वलतत्त्वं स्यात्तेनैव योजयेच्च माम् ।
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥
अयं समर्थ्य भक्त्या च प्रणमेद्दण्डवद्भुवि ॥"
अपि च ।
"मिथुनं चिन्तयित्वा तु मानसैरुपचारकैः ।
भौतिकैः पूजयेद्विद्वान् सुधामण्डलसंयुतैः ॥
भूम्याकाशमरुद्वह्निवारिमयैः सचिन्दुकैः ।
कनिष्ठाङ्गुलितर्জ्जन्यौ मध्यमानामिकै तथा ॥
अङ्गुष्ठेन समायोगान्मुद्राः पञ्च प्रकीर्त्तिताः ।
पृथिव्यात्मकगन्धः स्यादाकाशात्मकपुष्पकम् ॥
धूपो वायात्मकः प्रोक्तो दीपो वह्न्यात्मकः परः ।
रसात्मकञ्च नैवेद्यं पूजा पञ्चोपचारिका ॥
ततस्तु वाग्भवं जप्यादष्टोत्तरशतं सुधीः ॥"
इत्यन्नदानकल्पः ॥
अन्यच्च ।
"मानसैरुपचारैश्च संपूज्य कल्पयेन्मुदा ।
गन्धं भूम्यात्मकं दद्याद्भावपुष्पं ततः परम् ॥
धूपं वायात्मकं देयं तेजसा दीपमेव च ।
नैवेद्यममृतं दद्यात् पानीयं वरुणात्मकम् ॥
अम्बरं सुकुरं दद्याच्चामरं व्योमजेव च ।
तत्तन्मुद्राविधानेन संपूज्यात्मगुरुं जपेत् ॥
यथाशक्ति जपं कृत्वा समाप्य कवचं पठेत् ॥"
इति कङ्कालमालिनीतन्त्रम् ॥

पूजाक्रमस्तु । निजगुरुं आत्मातत्त्वकाकन्दनाथानुकल्पसाम्राज्यपादुकां पूजयामीति मानसैर्गन्धाक्षतपुष्पैरर्चयेत् । क्षितिताभ्यां लं पृथिव्यात्मकं गन्धं समर्पयामि नमः । अङ्गुष्ठाभ्यां हं आकाशात्मकं पुष्पं समर्पयामि नमः । तर्জ्जनीभ्यां यं वायात्मकं धूपं समर्पयामि नमः । मध्यमाभ्यां रं वह्न्यात्मकं दीपं समर्पयामि नमः । अनामिकाभ्यां वं अमृतात्मकं नैवेद्यं समर्पयामि नमः । इति कुलचूडावतारकाल्पसूत्रटीकायां तृतीयकाण्डम् ॥
मानसव्रतं, क्ली, (मानसज्ञतं व्रतम् । प्राकृपार्थिववत् समासः ।) अहिंसादि । यथा,—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यमकल्कता ।
एतानि मानसान्याहुर्व्रतानि तु धराधरे ॥"
इति वराहपुराणम् ॥
मानसालयः, पुं, (मानसे आलयो यस्य ।) हंसः । इति राजनिर्घण्टः ॥
मानसिकं, त्रि, (मानस + ठञ् ।) मनोभवम् । मानसगृह्यात् लिकप्रत्ययेन निष्पन्नम् ॥ (पुं, विष्णुः । यथा, महाभारते । १२ । ३३८ ।४ ।
"नमस्ते देवदेवेश ! निष्क्रिय !
निर्गुण ! मानसिक ! नामनामिक ! ।")
मानसी, स्त्री, (मानस + स्त्रीत्वात् ङीप् ।) विद्यादेवीविशेषः । इति हेमचन्द्रः ।२।१५॥ मनोभवा च ॥ (यथा, विष्णुपुराणे । १ । ७ । २ ।
"ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः ॥")
मानसूत्रं, क्ली, (मानस्य गात्रप्रमाणस्य तन्मानार्थं वा सूत्रम् ।) स्वर्णादिनिर्म्मितकटिसूत्रम् । इति धनञ्जयः । गोट् इति भाषा ॥
मानसौकाः, [स्] पुं, (मानसं सर ओको वासस्थानं यस्य ।) हंसः । इत्यमरः । २ । ५ । २६ । (यथा, महाभारते । ८ । ४१ । १३ ।
"वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।")
मानिका, स्त्री, (मानयति गर्व्वीकरोतीति । मन + णिच् + ण्वुल् टाप् अकारस्येत्वञ्च ।) मद्यम् । इति शब्दरत्नावली ॥ (माने प्रभवतीति । मान + ठक् ।) सुरावः । इति वैद्यकपरिभाषा । शीर इति भाषा ॥
मानिनी, स्त्री, प्रशस्ता स्त्रियः । इति मेदिनी । ने, १०६॥ (मानं अस्त्यस्याः । मान + इनिः । ङीप् । मानवती च ॥ (यथा, गौतमीयतन्त्रे । ६ । २ ।
"हरिरभिसरति वहति मरुदुपवने ।
किमपरमधिकसुखं सखि ! भवने ॥
माधवे माकुरु मानिनि ! मानमये ॥"
अभिमानवती च । यथा, कुमारे ।५।५३।
"इयं मदेनप्रभृतीनधिक्षिप-
न्नतुर्दिगीशानवमत्य मानिनी ।
अरूपतार्थं मदनस्य नियतात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥"
"मानिनीत्वादीप्रभृतीरतिशय्य वर्णितश्चमिलभिमानवती ।" इति तट्टीकायां मल्लिनाथः ॥)
राज्ञश्चर्द्धनस्य पत्नी । यथा,मार्कण्डेये ।१०६।२०।

"विदूरथस्य तनया दाक्षिण्यात्तस्य भूभृतः ।
तस्य पत्नी बभूवाथ मानिनी नाम मानिनी ॥")

मानी, [न्]वि, (मानोऽस्यास्तीति । मान + इनिः ।) मानविशिष्टः । इति मेदिनी । नि, २०६ ॥ (यथा, मार्कण्डेये । १२६ । २२ ।
"ततस्ते भूभृतः सर्वे बहुयुद्धक्षमेण मानिना ।
निराकृताः सुनिर्विण्णाः प्रोचुरन्योन्यमाकुलाः ॥")

सिंहः । इति राजनिर्घण्टः ॥

मानुषः, पुं, (मनोर्जातः । मनु + "मनोर्जातावञ् यञौ सुक् च ।" ४ । १ । १६१ । इत्यञ् सुगागमश्च ।) मनुष्यः । इत्यमरः । २ । ६ । १६ ॥ (यथा, मनौ । ६ । २८७ ।
"चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः ।
अमानुषेषु प्रथमो मानुषेषु तु मध्यमः ॥"

मनुष्यस्येदम् । अण् । मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १३ । ६ । २० ।
"अजस्रमानुषं कर्म्म यो देवमनुवर्त्तते ।
वृथा आत्मेति संप्राप्य पतिं स्त्रीषमिवाङ्गना ॥")

मानुषिकं, त्रि, (मनुष्यस्य भावः कर्म्म वा । मनुष्य + ठञ् ।) मनुष्यस्य कर्म्मादि । मनुष्यस्येदमितीदमर्थे स्त्रियाम्प्रत्ययेन निष्पन्नम् ॥

मानुषी, स्त्री, (मानुषस्य स्त्री । मानुष + जातित्वात् ङीष् ।) मनुष्यस्त्रीजातिः । यथा,—
मनुष्यो मानुषो नारी मानवी मानुषस्त्रियाम् ।
इति शब्दरत्नावली ॥
(मनुष्य + अण् + ङीष् ।) चिकित्साविशेषः । यथा,—
"आसुरी मानुषी देवी चिकित्सा सा त्रिधा मता ।"
इति शब्दचन्द्रिका ॥

मानुष्यं, क्ली, (मनुष्यस्य भावः । मनुष्यस्येदमिति वा । मनुष्य + अण् ।) मनुष्यस्य भावः । मनुष्यत्वम् । (यथा, भागवते । ४ । २६ । २८ ।
"स वचिनो वनात्प्रयुक् लक्ष्येण महता भुवि ।
जह्यापवर्ग्यं मानुष्यं विषयेषु विषज्जते ॥")

मनुष्यशरीरम् । यथा,—
"मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसन्निभे ॥"
इति मुक्तितत्त्वे याज्ञवल्क्यवचनम् ॥
(मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । १ । १५३ । ११ ।
"गच्छ जानीहि के त्वेते शेरते वनमाश्रिताः ।
मानुष्यो बलवान् गन्धो घ्राणं तर्पयतीव मे ॥")

मानुष्यकं, क्ली, (मनुष्याणां समूहः । मनुष्य + "गोचोचोष्ट्रोरभ्रेति ।" ४ । २ । ३८ । इति वुञ् ।) मनुष्यसमूहः । इत्यमरः । २ । २ । ३३ । (मनुष्यस्येदं मानुष + यत् । स्वार्थे कन् । (मनुष्यसम्बन्धिनि, त्रि । यथा, महाभारते । ५ । ७० । ८ ।
"सुमन्त्रितं सुनीतञ्च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म्म देवेनापि विरुध्यते ॥")

मानोन्नकं, क्ली, (मनोन्नस्य भावः कर्म्म वेति । "हृन्मनोन्नाद्यिभ्यश्च ।" ५ । १ । १२३ । इति वुञ् ।) मनोन्नता । मनोन्नस्य भाव इत्यर्थे कञ् प्रत्ययेन निष्पन्नम् ॥

मान्यं, क्ली, (मन्दस्य भावः कर्म्म वा । मन्द + "पत्यन्तपुरोहितादिभ्यो यक् ।" ५ । १ । १२८ । इति यक् ।) रोगः । इति हेमचन्द्रः ॥ मन्दता च । (यथा, कथासरित्सागरे । २४ । १३५ ।
"विश्वस्ते च तत्तस्मिन् पुरोधसि चकार सः ।
मान्द्यमप्यतराद्वारलघ्वीक्षणतत्पुरन्ध्रिया ॥")

मान्धाता, [ऋ] पुं, (मां धास्यतीति । धेट् + लृच् ।) युवनाश्वराजपुत्रः । तत्पर्य्यायः । युवनाश्वजः २ । इति हेमचन्द्रः । ३ । ३६३ । तद्विवरणं यथा । 'तस्मात् प्रसेनजित् ततो युवनाश्वोऽभवत् । तस्य च पुत्रस्यात्तिनिर्व्वेदान्मुनीनामाश्रममण्डले निवसतः कृपालुभिस्तैर्मुनिभिरपत्योत्पादनायेष्टिः कृता । तस्याश्चार्द्धरात्रे निष्टप्तायां मन्त्रपूतजलपूर्णकलशं वेदीमध्ये निवेश्य ते सुप्ताः सुषुपुः । सुप्तेषु च तेष्वतीवदृष्टपरीतः स भूपालस्तमाश्रममण्डलं विवेश । सुषुप्राण च तानृषीन् नैवोत्थापयामास । तच्च कलशजलमपरिमेयमाहात्म्यं मन्त्रपूतं पपौ । प्रबुद्धाश्च ऋषयः पप्रच्छुः । केनैतज्जलपूतं वारि पीतम् । अत्र हि पीते राज्ञोऽस्य युवनाश्वस्य पत्नी महाबलपराक्रमं पुत्रं जनयिष्यति । इत्याकर्ण्य स राजा अजानता मया पीतमित्याह । गर्भश्च युवनाश्वोदरेऽभवत् । क्रमेण च ववृधे । प्राप्तसमयश्च दक्षिणं कुक्षिमवनीपतेर्निभिद्य निष्क्रामत् । न चासौ राजा ममार । जातो नामैष मां धास्यतीति ते सुताः प्रोचुः । अथागत्य देवराड्ब्रवीत् । मामयं धास्यति । ततोऽसौ मान्धाता नामतोऽभवत् । वक्त्रे चास्य प्रदेशिनी देवेन्द्रेणाक्षिप्ता सा पपौ । ताभ्यान्तमाविर्भावमाशाद्यावेवैकेन अवर्द्धत । स तु मान्धाता चक्रवर्त्ती सप्तद्वीपां महीं बुभुजे । भवति चात्र श्लोकः ।
"यावत् सूर्य्य उदेतिस्म यावच्च प्रतितिष्ठति ।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥"
मान्धाता शशबिन्दुदुहितरं बिन्दुमतीमुपयेमे । पुरुकुत्समम्बरीषं सुयुकुन्दञ्च तस्यां पुत्रत्रयमुत्पादयामास । पञ्चाशच्च दुहितरस्तस्यामेव तस्य नृपतेर्बभूवुः ।" इति विष्णुपुराणे ४ अंशे २ अध्यायः ॥

मान्यः, त्रि, (मान्यत इति । मान + कर्म्मणि ण्यत् ।) अर्च्यः । तत्पर्य्यायः । पूज्यः २ प्रतीक्ष्यः ३ भगवान् ४ भट्टारकः ५ । इति जटाधरः ॥ (यथा च मनौ । २ । १३६ ।
"तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ ।"
प्रार्थनीयः । यथा, रामायणे । २ । ८ । १८ ।
"यथा वै भरतो मान्यस्तथा भूयोऽपि राघवः ।
कौशल्यातोऽतिरिक्तञ्च मम सम्भवते बहु ॥"
"मान्यः प्रार्थनीयः श्रेयस्करः । तथा तद्वत् ।"
इति तट्टीकायां रामानुजः ॥)

मान्यस्थानं, क्ली, (मान्यस्य स्थानं ।) पूज्यस्थानम् । यथा,—
"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यदुयदुत्तरम् ॥
पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥"
इति मानवे २ अध्यायः । कौर्म्मे ११ अध्यायेऽप्येवम् ॥

माया, स्त्री, (मान्य + स्त्रियां टाप् ।) मरुज्जाता । यथा,—
"अग्निर्मान्या तु माया च मरुज्जाता च मोहना ॥"
इति शब्दमाला ॥
पूज्या च ॥

मापतः, पुं, (मा विद्यतेऽपत्यमस्य ।) कामः । इति हलायुधः ॥

मापनः, पुं, (मापयति स्वर्गादिकमनेनेति । मा + णिच् + करणे ल्युट् ।) तूलः । इति शब्दचन्द्रिका ॥ परिमाणे, क्ली ॥ (स्त्रियामप्यत्र । यथा, महाभारते । १ । ५१ । १५ ।
"यस्मिन् देशे च काले च मापनेयं प्रवर्त्तिता ॥")

मामकं, त्रि, (ममेदम् । अस्मद् + "तवकममकावेकवचने ।" ४ । ३ । ३ । इति अञ् ममकादेशश्च ।) मदीयम् । इति मेदिनी । के, १६८ ॥ (यथा, महाभारते । १ । १०५ । १२ ।
"ततो मामाह स सुतिर्गर्भसुतृड्जन मामकम् ॥")

ममतायुक्तः । इति शब्दमाला ॥ यथा च महाभारते । ४ । ५० । १७ ।
"अत्र या मामिका बुद्धिः श्रयतां यदि रोचते ॥")

मामकः, पुं, (मम + स्वार्थे कन् ।) मातुलः । इति मेदिनी ॥ के, १६८ ॥ ममायं वा ममेदमिति बुद्धिर्यस्य । कप् ।) ज्ञपणः । इति शब्दमाला ॥

मामकीनं, त्रि, (ममेदम् । अस्मद् + "तवकममकावेकवचने ।" ४ । ३ । ३ । इति खञ् । ममकादेशश्च ।) मदीयम् । ममेदमित्यर्थे क्वौ क्लेर्लोपे अस्मद एकत्वाच्चादेशे अस्य च ममकादेशे वृद्धौ मामकीनम् । इति दुर्गादासः ॥ (यथा, कथासरित्सागरे । ३२ । १४५ ।
"एतच्च मे कियत् किं हि न बुद्ध्या साध्यमात्मनम् ।
प्रज्ञानं मामकीनं च श्रयतां वर्णयामि ते ॥")

मायः, पुं, (माया अस्त्यस्मिन् । माया + अर्शआदित्वादच् ।) पीताम्बरः । (यथा, महाभारते । १३ । २४ । ३११ ।
"नमो विष्णाय मायाय चित्रायाचिन्त्याय वै नमः ॥")

(मयस्यापत्यं पुमान् । मय + अण् ।) असुरः । इति मेदिनी ॥ ये, ४६ ॥

माया, स्त्री, (मीयते अपरोक्षवत् प्रदर्श्यतेऽनया इति । मा + "माङ्घाबहुलेभ्यो यः ।" उणा० ४ । १०६ । इति यः टाप् ।) इन्द्रजालादिः ।

तन्त्रार्थाय: । ग्राम्यरी २ । इत्यमर: । २ । १० । ११ । इन्द्रजालि: ३ कुहकम् ४ कुहकति: ५ ग्राम्यादि: ६ । इति जटाधर: । ग्राम्यरी ७ । इति ग्रन्दरत्नावली । मातिं विश्वमस्यां मनी-षादि: । ग्रम्यरस्य दैत्यस्य इयं ग्राम्यरी तेन प्राड्निर्मितत्वात् । इति भरत: । * । वृद्धि: । इति मेदिनी । ये, ७६ । (मीमिते जानाति संख्याय्यनयेति । मा+य: टाप् ।) क्षमा । इन्म: । इति नानार्थे हेमचन्द्र: । ग्रथिता । यथा,—

"माया तु ग्रथिता ग्राढ्या कुहकैर्निर्मितिश्च सा ॥"

(ग्रन्था । यथा, ऋग्वेदे । २ । १७ । ५ ।

"ग्रधारयत् पृथिवीं विश्वधायस मरुद्भान् मायया वामवस्यव: ।"

"मायया ग्रन्थया ।" इति तद्भाष्ये सायण: ॥) राज्ञां क्षुद्रोपायविशेष: । यथा,—

"मायोपेक्षेन्द्रजालानि क्षुद्रोपाया इमे त्रय: ॥"

लक्ष्मी: । इति च हेमचन्द्र: ॥ बुद्धमाता । इत्यमरकोषे मायादेवीसुतग्रब्ददर्शनात् । दुर्गा । यथा,—

"दुर्गे स्मृतेरभये माये नारायणि सनातनि ।
जये मे मङ्गलं देहि नमस्ते सर्वमङ्गले ॥
राजन् ! श्रीवचनो माद्य याद्य प्रापणवाचक: ।
सा प्रापयति या सद्य: सा माया परिकीर्त्तिता ॥
माद्य मोहार्थवचनो याद्य प्रापणवाचक: ।
तं प्रापयति या नित्यं सा माया परिकीर्त्तिता ॥

इति ब्रह्मवैवर्ते श्रीकृष्णजन्मखण्डे २७ ग्रध्याय: ॥

ग्रपि च ।

"विचित्रकार्य्यकारित्वा ग्रचिन्तितफलप्रदा ।
ग्रतोऽत्रजगतां लोके माया तेन प्रकीर्त्तिता ॥"

इति देवीपुराणे ४५ ग्रध्याय: ॥ * ॥ विसदृग्रप्रतीतिसाधनं माया । इति नागोजी-भट्ट: ॥ ग्रघटनघटनपटीयसी माया । इति कैश्चित् ॥ ईश्वरग्रक्ति: । तस्या नामान्तरं यथा । प्रकृति: २ ग्रविद्या ३ ग्रज्ञानम् ४ प्रधानम् ५ ग्रक्ति: ६ ग्रजा ७ । सृष्टिकाले भगवान् ग्रादौ मायां प्रकाग्रयामास । सा दृष्टद्रग्रानुसन्धानरूपा कार्य्यकारणरूपा च । सत्त्वरजस्तमोगुणमयी । तस्या: ग्रक्तिद्वयं ग्रावरणं विक्षेपग्च । तस्या मायाया महत्तत्त्वं जातम् । तस्मादहङ्कार: । तस्मात् पञ्चभूतम् । तस्मात् ब्रह्माण्डम् । इति श्रीभागवतमतम् ॥ (मायास्वरूपम् । यथा च ब्रह्मदग्राम् । ६ । १२२—१४१ ।

"तत्त्वनिग्रयकामेन न्यायागमविचारिणाम् ।
एकैव प्रतिपत्ति: स्यात् साध्यत्व स्फुटमुच्यते ॥
मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।
ग्रस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥
इति श्रुत्यनुसारेण न्याय: निर्णय ईश्वरे ।
तथा सत्यविरोध: स्यात् स्यावरान्तैग्रवादिनाम् ॥
माया चेयं तमोरूपा तापनीये तदीरणात् ।
ग्रनुभूतिं तत्र मानं प्रतिजज्ञे श्रुति: स्वयम् ॥
ग्रतं मोहात्मकं तत्त्वमनुभावयति श्रुति: ।
ग्रावालगोपं ग्रास्त्वादागम्यं तस्य बालधीत् ॥
ग्रचिदात्मघटादीनां यत् स्वरूपं जड़ं हि तत् ।
यत्र क्षुब्धोभवेद् बुद्धि: स मोह इति लौकिका: ॥
इत्थं लौकिकदृष्टेस्तत् सर्वैरप्यनुभूयते ।
युक्तिदृग्रा त्वनिर्वाच्यं नासदासीदिति श्रुते: ॥
नासदासीद् विभातत्वान्नो सदासीच्च बाधनात् ।
विद्यादृग्रा श्रुतं तुच्छं तस्य नित्यनिवृत्तित: ॥
तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ।
त्रेया माया त्रिभिर्बोधै: श्रौतयौक्तिकलौकिकै: ॥
ग्रस्य सत्त्वमसत्त्वञ्च जगतो दर्ग्ग्यत्यसौ ।
प्रसारत्वाच्च सङ्कोचात् यथा चित्रपटस्तथा ॥
ग्रसत्तत्त्वा हि माया स्यादप्रतीतेर्विना क्वचित् ।
सत्तत्त्वापि तथैव स्यादसङ्गस्यान्यथाजते: ॥
कूटस्थासङ्गमात्मानं जड़त्वेन करोति सा ।
चिदाभासस्वरूपेण जीवेग्रापि निर्म्ममे ॥
कूटस्थमनपाश्रित्य करोति जगदादिकम् ।
दुर्घटैकविधायिन्यां मायायां का चमत्कृति: ॥
द्रवत्वसुदके वह्नावौष्ण्यं काठिन्यमम्बनि ।
मायाया दुर्घटत्वञ्च स्वत: सिध्यति नान्यथा ॥
न वेत्ति मायिनं लोको यावत् सावच्चमत्कृतिम् ।
धत्ते मनसि पश्चात्तु मायेयेत्युपपद्यते ॥
प्रवर्त्तन्ति हि चोद्यानि जगद्वस्तुत्वबादिषु ।
न चोदनीयं मायायां तस्याश्चोद्यिकरूपत: ॥
चोद्येऽपि यदि चोद्यं स्यात् तच्चोद्ये चोद्यते मया ।
परिहार्य्यं ततश्चोद्यं न पुन: प्रतिचोद्यताम् ॥
विसदृग्रैकग्ररीरोया मायायाश्चोद्यरूपत: ।
ग्रन्वेष्य: परिहारोऽस्या बुद्धिमद्भि: प्रयत्नत: ॥
मायात्वमेव निश्चेयमिति चेत् तर्हि निश्चिनु ।
लोकप्रसिद्धमायाया लक्षणं यत् तदीक्ष्यताम् ॥
न निरूपयितुं ग्रक्या विसदृग्रं भासते च या ।
सा मायेतीन्द्रजालादौ लोका: सम्प्रतिपेदिरे ॥")

विष्णुमायास्वरूपं यथा,—

"यामेतां भाषसे देव ! मम मायेति नित्यग: ।
का माया कीदृग्री विष्णो ! किं वा मायेति चोच्यते ।
ज्ञातुमिच्छामि मायार्थं रहस्यं परमत्तमम् ॥

तत्तस्या वच: श्रुत्वा विष्णुर्मायाकरण्डक: ।
प्रहस्य मधुरं वाक्यं प्रत्युवाच वसुन्धराम् ॥
भूमे ! मा पृच्छ मायां मे यक्षां पृच्छसि सादरम् ।
तथा क्षेत्रं किमर्थं त्वं प्राग्ग्यसे मद्विलोकनात् ।
ग्रद्यापि मां न जानन्ति सुरेन्द्रा: ग्रपि नामहा: ॥
मम माया विग्रालाक्षि ! किं पुनस्त्वं वसुन्धरे ! ॥
पर्ज्जन्यो यत्र यत्र तज्जलेन प्रपूर्य्यते ।
देग्रो निर्ज्जलतां याति एषा माया: मम प्रिये ! ॥
सोमोऽपि क्षीयते पक्षे पक्षे वापि विवर्द्धते ।
ग्रमायां स न दृग्र्येत मायेयं मम सुन्दरि ! ॥
हेमन्ते सलिलं कूपे उष्णं भवति तत्त्वत: ।
ग्रग्नेश्च ग्रीतलं ग्रीघ्रं मायेयं मम तत्त्वत: ॥
पश्चिमां दिग्रमाग्राय यदस्तं याति भास्कर: ।
उदेति पूर्व्वत: प्रातर्मायेयं मम सुन्दरि ! ॥
ग्रोणितञ्च ग्रुक्रञ्च उभे प्राकृतु संस्थिते ।
गर्भे च जायते जन्तुर्मम मायेव चोत्तमा ॥
जीव: प्रविग्रन्न गर्भे तु सुखदु:खानि विन्दति ।
जातञ्च विस्मरेत् सर्व्वमेषा माया ममोत्तमा ॥
ग्रात्मकर्म्माग्रितो जीवो नटसंज्ञो गतत्वृष्ट: ।
कर्म्मणा नीयतेऽन्यत्र मायेषा मम घोत्तमा ॥
ग्रुक्रग्रोणितसंयोगाज्जायन्ते यदि जन्तव: ।
ग्रङ्गुलाङ्गरणौ चैव भुजौ ग्रीर्षं कटिस्तथा ॥
एतं तथोदरञ्चैव दन्तौष्ठपुटनासिका ।
कर्णौ नेत्रकपोलौ च ललाटं जिह्वया सहा ॥
एतया मायया युक्ता जायन्ते यदि जन्तव: ।
तस्येव जीर्य्यते जन्तोर्भुक्तं पीतञ्च वह्निना ।
ग्रयञ्च स्रवते जन्तुरेषा माया ममोत्तमा ॥
गन्ध: पार्थ्वञ्च रूपञ्च रसो गन्धञ्च पञ्चम: ।
ग्रनात् प्रवर्त्तते जन्तुरेषा माया मम प्रिये ! ॥
सर्व्वन्तु निजाकार: स्थावरे जङ्गमे तथा ।
तत्त्वं न ज्ञायते तस्य मायेषा मम सुन्दरि ! ॥
ग्रापो विद्यात्तथा भौमा ग्रापो येषु प्रतिष्ठिता: ॥
न च वृष्टिं प्रयान्त्यत्र मायेषा परमा मम ॥
वृष्टौ बहूदका: सर्व्वे मरुस्थलानि सर्व्वाणि च ।
योगे सर्व्वाणि शुष्यन्ति एतन्मायाबलं मम ॥
हिमवच्छिखराद्युक्ता नाना मन्दाकिनी नदी ।
गाङ्गता सा भवद्गङ्गा मायेषा मम कीर्त्तिता ॥
मेघा यच्छन्ति सलिलं लवणात् सलिलाम्बुवात् ।
वर्षन्ति मधुरं लोके सर्व्वं मायाबलं मम ॥
रोगार्त्ता जन्तव: केचित् भक्षयन्ति महौषधम् ।
तस्य वीर्य्यं समाश्रित्य माया तु विहजाम्यहम् ॥
ग्रौषधे दीयमाने तु जन्तु: पञ्चत्वमेति यत् ।
निर्व्वीर्य्यमौषधं कृत्वा कालो भूत्वा हराम्यहम् ॥
प्रथमं जायते गर्भ: पश्चाज्जायते वै पुमान् ।
जायते मध्यमं रूपं ततोऽपि जरया पुन: ।
तत इन्द्रियनाग्रश्च एतन्मायाबलं मम ॥
एकबीजात् प्रकीर्णादि जायन्ते तानि भूरिग्र: ।
तत्त्वाहं विहजामि मायायोगेन माधवि ! ॥
लोक एवं विजानाति गरुड़ो वहतेऽच्युतम् ।
भूत्वा वेगेन गरुड़ो वहाम्यात्मानमात्मना ॥
या एता देवता: सर्व्वा यज्ञभागेन तोषिता: ।
मायामेतामहं ज्ञात्वा तोषयामि दिवौकस: ॥
लोका: सर्व्वे विजानन्ति देवा नित्यं मखाग्निग: ।
मायामेतामहं ज्ञात्वा यज्ञामि चिदात्मना सदा ॥
सर्व्वोऽपि यजते लोको यद्यत्त्वं हृदयस्थितम् ।
मायामाङ्गिरसीं ज्ञात्वा याजयामि दिवौकस: ॥
सर्व्वे लोका विजानन्ति वरुण: पाति सागरम् ।
मायान्तु वारुणीं ज्ञात्वाहं रक्षामि महौदधिम् ॥
सर्व्वे लोका विजानन्ति कुबेरोऽयं धनेश्वर: ।
कुबेरमायामादाय ग्रहं रक्षामि तद्धनम् ॥
एवं लोका विजानन्ति दुष्ट: शुक्रेण रक्षित: ।
ग्राकीं मायां समाग्राय मया दुष्टो निसूदित: ॥
एवं लोका विजानन्ति ग्रादित्यश्च ध्रुवो महान् ।
मेरुं मायामयं ज्ञात्वा वहाम्यादित्यमेव च ॥
एवं चाभाषते लोको जगं किमग्रतेऽखिलम् ।
वड़वासुखमाग्राय पिबामि तदहं जलम् ॥
वायुं मायामयं ज्ञात्वा मेघेषु विहजाम्यहम् ।
यदिदं भाषते लोक: कुर्व्वे तिष्ठते जगत् ॥

देवा अपि न जानन्ति अन्तरं कुत्र तिष्ठति ।
मम मायानियोगेन तिष्ठते क्षौरधर्म वने ॥
लोको क्षौरं विजानाति राजा पालयते प्रजाः ।
राजमायामहं ज्ञात्वा पालयामि वसुन्धराम् ॥
ये तु वै द्वादशादित्या उदेष्यन्ति युगक्षये ।
प्रविश्य तानहं भूमे ! मायां लोके सृजाम्यहम् ॥
वर्षेच्च पांशुना भूमिलोकेषु यतते सदा ।
मायां पांशुमयीं कृत्वा पूरयाम्यखिलं जगत् ॥
वर्षते यच्च संवर्त्तो धाराभिर्मुषलाकृतिः ।
मायां सांवर्त्तकीं कृत्वा पूरयाम्यखिलं जगत् ॥
यत् क्षपामि वरारोहे ! क्षौरस्योपरि वारिणः ।
अनन्तमायया चाहं धारयामि क्षपामि च ॥
वराहमायामादाय भूमे ! जानामि किञ्च वै ।
देवा यच्च निलीयन्ते सा माया मम कीर्त्तिता ॥
त्वमपि वैष्णवीं मायां ज्ञात्वा जानासि किञ्च
तत् ।
धारितासि च सुश्रोणि ! वाराहं वपुरास्थितः तु ॥
माया तु मम देवीयं ज्ञात्वा लोकार्णवां महीम् ।
मम मायाबलं क्षौरदृष्टेन तिष्ठाम्यहं जले ॥
प्रजापतिं सृतं वह्निं हनामि च हरामि च ।
तेऽपि मायां न जानन्ति मम मायाविमो-
हिताः ॥
अथ पिङ्गजटाजूटैर्ज्वलते सूर्य्यवर्चसः ।
मायां पिङ्गमयीं क्षौरां गृह्णामि हि च तत्त्वतः ॥
किन्तु मायेव सुश्रोणि ! अन्यच्च शृणु
सुन्दरि ! ॥"
इति वाराहे मायाचक्रम् ॥*॥

अथ मायाशौचम् ।

शौनक उवाच ।
"अग्निध्वजो महाराजः श्रुत्वा मायां गतः
कुतः ।
का वा मायाश्रुतिः सूत ! वद तत्त्वविदांवर ! ।
या त्वत्कया विष्णुकथा वक्तव्या सा विशुद्धये ॥"
सूत उवाच ।
"शृणुध्वं मुनयः सर्व्वे मार्कण्डेयाय पृच्छते ।
शुकः प्राह विशुद्धात्मा मायात्वममलोत्तमम् ॥
तत् शृणुध्व प्रवक्ष्यामि यथाधीतं यथाश्रुतम् ।
सर्व्वकामप्रदं नृणां पापनाशविनाशनम् ॥"
शुक उवाच ।
"भक्ताटनगरं त्यक्त्वा विष्णुभक्तः अग्निध्वजः ।
आत्मसंसारमोक्षाय मायात्वममलं ययौ ॥"
अग्निध्वज उवाच ।
"ॐ क्षौंकारां सत्त्वसारां विशुद्धां
ब्रह्मादीनां मातरं वेदबोध्याम् ।
तन्वीं स्वाहां भूतनक्षत्रकक्षां
वन्दे वन्द्यां देवगन्धर्व्वसिद्धैः ॥
लोकातीतां दैत्यभीतां समीढ्यां
भूतैर्भव्यां आससामाखिलार्थैः ।
नानारूपैर्देवतिर्य्यङ्मनुष्यै-
स्त्वामाधारां ब्रह्मरूपां नमामि ॥
यस्या भाया विजगन्नाति भूतै-
र्न भाव्येतत्तद्भावे विधातुः ।

विद्महीतां कालकक्षोज्ज्वलोलां
लोलापाङ्गीं चिन्नसंसारदुर्गाम् ॥
पूर्णां प्राप्यां दैत्यलभ्यां गुरव्या-
मार्द्रे पैथि मध्यगो या विभाति ।
कालीं दैवं कर्म्म सोपाधयो ये
तस्यां तासां तां विशिष्टां नमामि ॥
भूमौ गन्धो रसनायम्बु प्रतिष्ठा
रूपं तेजस्येव वायौ स्पृश्यत्वम् ।
खे शब्दो वै यद्विदा भाति नाना
तामाद्यां तां विश्वरूपां नमामि ॥
सावित्री त्वं ब्रह्मरूपा भवानी
भूतेशस्य श्रीपतेः श्रीस्वरूपा ।
शक्तौ शक्रस्यापि नाकेश्वरस्य
पत्नी श्रेष्ठा भासि माये ! जगत्सु ॥
बाल्ये बाला युवती यौवने त्वं
वार्द्धक्ये या स्थविरा कालकल्पा ।
नानाकारैर्योगयोगैश्च धर्म्मो
भक्त्या वै त्वं कामदात्री बिभर्षि ॥
वरेण्या त्वं वरदा लोकसिद्धा
साध्वी धन्या लोकमान्या सुकन्या ।
चण्डी दुर्गा कालिका कालिकाख्या
नानादैत्यैः रूपवेषैर्विभासि ॥
तव चरणसरोजं देवि ! देवादिवन्द्यं
यदि हृदयसरोजे भावयन्तीह भक्त्या ।
सुकलतमतिशुद्धं हृत्सरोजे धरन्ति
श्रुतियुगकुहरे वा संश्रुतं धर्म्मसत्यम् ॥
जनयति जगदादौ सर्व्वसिद्धिश्च तेषाम् ॥
मायात्वमिदं पुण्यं शुकदेवेन भाषितम् ।
मार्कण्डेयादयश्चापि सिद्धिं लेभे ग्रहिध्वजः ॥
लोकासुखे तपस्तप्त्वा हरिं ध्यात्वा वना-
न्तरे ।
सुदर्शनेन निहतो वैकुण्ठशरणं ययौ ॥"
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये माया-
त्व ऊनत्रिंशोऽध्यायः ॥ (शक्तिः सामर्थ्यं वा ।
यथा, ऋग्वेदे । ४ । ३ । २१ ।
"दासा नामिन्द्रो मायया ।"
"मायया स्वकीयया शक्त्या ।" इति तद्भाष्ये
सायणः ॥)

मायाकारः, पुं, (मायां इन्द्रजालशास्त्रं करो-
तीति । कृ + अण् ।) ऐन्द्रजालिकः । बाजी-
कर इति भाषा । तत्पर्य्यायः । प्रातिहारिकः
२ । इत्यमरः । २ । १० । २१ ॥ मायां स्थल-
जलादौ जलस्थलादिज्ञानं करोतीति माया-
कारः घञ् । प्रतिहरणं प्रतिहारो ज्ञानं भावे
घञ् स प्रयोजनमस्य प्रातिहारिकः ठिणकः
ठित्त्वे ङिरिति वृद्धिः । प्रतिहारक इत्यपि
पाठः । तत्र प्रति प्रथमं सुष्ठु मनो नयने च
हरति ज्ञाते न किञ्चिदिति प्रतिहारकः ॥
शकाल्लात् स्वार्थे णे प्रातिहारकञ्च धनि प्रति-
हारच्च । इति तट्टीकायां भरतः ॥

मायाज्ञ, पुं, (मायां स्थलजलादौ जलस्थलादि
ज्ञानं करोति कारयतीति । कृ + क्विप् । तुगा-
गमश्च । करोतिरत्राभूततद्भावार्थः ।) माया-
कारः । यथा,—
"ग्राम्भरी शाम्भरी माया मायाज्ञश्च भिक्षुके
नटे ।"
इति शब्दरत्नावली ॥

मायाजीवी, [न्] पुं, (मायया इन्द्रजालविद्यया
जीवति जीवनयात्रां सम्पादयति इति ,
जीव + णिनिः ।) प्रातिहारिकः । इति हेम-
चन्द्रः । ३ । ५८६ ॥

मायातिः, पुं, (मायया सह अतति । यद्वा, मा
अततीति । अत + "अन्यतिभ्यां च ।" उणा०
४।१३०। इति इञ् ।) नरबलिः । यथा,—
"मायातीनाञ्च निर्णीतं शृणुष्व मुनिसत्तम ! ।
यस्याभ्यर्च्चयेद्देवीं फलन्तस्यातिरिक्तमे ॥
पिङ्गमाल्यविहीनञ्च युवकं आश्विनजितम् ।
विवाहितं दीक्षितञ्च परदारविहीनकम् ॥
अजारिकं विष्णुभक्तञ्च सक्तूनं मूलकं वरम् ।
तद्वन्मुख्यो धनं दत्त्वा क्रीतं मूल्यातिरेकतः ॥
स्नापयित्वा च तं धर्म्मं संपूज्य वस्त्रचन्दनैः ।
माल्यैर्धूपैश्च सिन्दूरैर्दधिगोरोचनादिभिः ॥
तस्य वर्म्मं भ्रामयित्वा चरदारेण यत्नतः ।
वर्म्मान्ते च वसुतस्तस्य दुर्गायै तं निवेदयेत् ॥
अष्टमीनवमीसन्धौ दद्यान्मायातिमेव च ।
इत्येवं कथितं सर्व्वं बलिदानप्रसङ्गतः ॥
बलिं दत्त्वा च स्तुत्वा च धृत्वा च कवचं बुधः ।
प्रणम्य दण्डवद्भूमौ दद्याद्विप्राय दक्षिणाम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १६ अध्यायः ॥

मायादः, पुं, (मायया छलेन धृत्वेत्यर्थः अत्ति
भक्षयतीति । अद + अच् ।) कुम्भीरः । इति
त्रिकाण्डशेषः ॥

मायादेवीसुतः, पुं, (मायादेव्याः सुतः ।) बुद्धः ।
इत्यमरः । १ । १ । १५ ॥

मायाफलं, क्ली, फलविशेषः । माइफल इति
भाषा । तत्पर्य्यायः । मायिफलम्२ मायिकम्३
छिद्राफलम् ४ मायि ५ । अस्य गुणाः । वात
हरत्वम् । कटुत्वम् । उष्णत्वम् । ग्रैथिल्यसङ्गो-
चकत्वेग्रकार्य्यादालत्वञ्च । इति राजनिर्घण्टः ॥

मायामोहः, पुं, (मायया मोहयति असुरादिनिति ।
मुह + णिच् + अच् । माया च मोहश्च तौ
यस्येति वा ।) विष्णुदेहनिर्गतासुरमोहक-
पुरुषविशेषः । यथा,—
श्रीपराशर उवाच ।
"इत्युक्तो भगवांस्तेभ्यो मायामोहं ग्वरीरतः ।
तत्क्षणाद्य ददौ विष्णुः प्राह चैनं हरोत्तमान् ॥"
श्रीभगवानुवाच ।
"मायामोहोऽयमखिलान् दैत्यांस्तान्
मोहयिष्यति ।
ततो वध्या भविष्यन्ति वेदमार्गबहिष्कृताः ॥
स्थिती स्थितस्य मे वध्या यावन्तः परिपन्थिनः ।
यज्ञो योऽधिकारस्य देवदैत्यादिकाः सुराः ॥
तद्गच्छत न भीः कार्य्या मायामोहोऽयमच्युतः ।
गच्छत्यलोपकाराय भवतां भविता सुराः ॥"

श्रीपराशर उवाच ।
"इत्युक्ता प्रणिपत्यैनं ययुर्देवा यथागतम् ।
मायामोहोऽपि तैः सार्द्धं ययौ यत्र महासुराः ॥"
इति विष्णुपुराणे ३ अंशे १७ अध्यायः ॥

मायावती, स्त्री, (मायास्त्यस्यामिति । माया + मतुप् । मस्य वः । उकिरनेकाच् ङीप् ।) दनिः । कामपत्नी । इति जटाधरः ॥ तस्या नामकारणं यथा,—

श्रीपराशर उवाच ।
"एतस्मिन्नन्तरे प्राप्तः सङ्घ ब्रह्मेव नारदः ।
अन्तःपुरचरीं देवीं रुक्मिणीं प्राह हर्षयन् ॥
एष ते तनयः सुभ्रु ! हृत्वा शम्बरमागतः ।
तुल्यो येनाभवद्बालो भवत्याः कृतिकाग्रहात् ॥
इयं मायावती भार्या तनयस्यास्य ते सती ।
शम्बरस्य च भार्येयं शृणुतामत्र कारणम् ॥
मन्मथे तु गते नाशं तद्भवप्रार्थया ।
शम्बरं मोहयामास मायारूपेण रूपिणी ॥
अवाप्यानुपभोगेषु रूपं मायामयं शुभम् ।
दर्शयामास दैत्यस्य तस्येयं महिरेतया ॥"
इति विष्णुपुराणे ५ अंशे २७ अध्यायः ॥

(विद्याधरीविशेषः । यथा, कथासरित्सागरे । १२ । ३५ ।
"अहं मायावती नाम राजन् ! विद्याधराङ्गना ।
इयन्तं कालमभवं शापदोषेण हस्तिनी ॥"
राजकन्याविशेषः । यथाचैव । १२२ । ११२ ।
"अभून्नलयसिंहाख्यो राजा राजपुरे पुरा ।
तस्य मायावतीलावण्यरूपेणाप्रतिमा सुता ॥")

मायावयिकः, त्रि, (मायया वयं आच्छादनं करोतीति ठन् ।) परप्रतारकः । इति शब्दमाला ॥ (मायारक्षिक इति वा पाठः ॥)

मायावान्, [त्] पुं, (माया अस्त्यस्य । माया + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति मत्वर्थे मतुप् । मस्य वः ।) कंसराजः । इति शब्दरत्नावली ॥ मायायुक्ते, कपटयुक्ते च त्रि । (यथा, ऋग्वेदे । ७ । १६ । ६ ।
"अतिभिक्षमिषणो द्युक्षकृतो नि मायावान् ।
अजा इत्पुरुभ्यः ।"
"मायावान् कपटवान् ।" इति तद्भाष्ये सायणः ॥)

मायावी, [न्] पुं, (प्रशस्ता मायाकापट्यमस्त्यस्येति । माया + "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ।) मायाकारः । तत्पर्य्यायः । ध्वंसकः २ मायी ३ मायिकः ४ ऐन्द्रजालिकः ५ । इति जटाधरः ॥ (यथा, मार्कण्डेये । २२ । ७ ।
"मायावी दानवः सोऽथ सुनिरूपं समास्थितः ।
स प्राह राजपुत्रं तं पूर्ब्बवैरमनुस्मरन् ॥")
त्रिकालः । इति राजनिर्घण्टः ॥ (मोक्षनशक्तियुक्तः परमात्मा । यथा, पञ्चदश्याम् । ६ । ७ ।
"स्वतश्चिदन्तर्यामी तु मायावी सृष्टिहृष्टितः ।
स्वात्मा मूलस्वरूपेण विराड्डिम्बुच्यते परः ॥")

मायासीता, स्त्री, (मायाकल्पिता सीता ।) योगेन अग्निस्तसीताप्रतिकृतिः । यथा,—

अग्निरुवाच ।
"भगवन् ! श्रूयतां वाक्यं कालेन यदुपस्थितम् ।
सीताहरणकालोऽयं तत्रैव समुपस्थितः ॥
दैवञ्च दुर्निवारञ्च न च दैवात् परं बलम् ।
मन्यसू मयि संन्यस्य छाया रक्षोनिकेऽधुना ॥
दास्यामि सीतां तुभ्यञ्च परीक्षासमये मम ।
देवैः प्रस्थापितोऽहञ्च न च विप्रो हुताशनः ॥
रामस्याङ्गवचनं श्रुत्वा न प्रकाश्य च लक्ष्मणम् ।
स्वीचकार च सच्छन्दं हृदयेन विदूयता ॥
वह्निर्योगेन सीतायां मायासीतां चकार सः ।
तदूपगुणसञ्चाढ्यां ददौ रामाय नारद ! ॥
सीतां गृहीत्वा स ययौ गोप्यं वक्तुं निषिध्य च ।
लक्ष्मणो नैव बुबुधे गोप्यमन्यस्य का कथा ॥
लङ्कां गत्वा रघुश्रेष्ठो जघान सायकेन च ।
सबान्धवं रावणञ्च सीतां संप्राप दुःखिताम् ॥
साञ्च वह्निपरीक्षाञ्च कारयामास सत्वरम् ।
हुताशस्तञ्च काले च साक्षतीं जानकीं ददौ ॥
उवाच छाया वह्निञ्च रामञ्च विनयान्विता ।
करिष्यामीति किमहं तदुपायं वदस्व मे ॥"
वह्निरुवाच ।
"त्वं गच्छ तपसे देवि ! पुष्करञ्च सुपुण्यदम् ।
कृत्वा तपस्यां तत्रैव स्वर्गलक्ष्मीर्भविष्यसि ॥
सा च तद्वचनं श्रुत्वा प्रणम्य पुष्करे तपः ।
दिव्यं त्रिलक्षवर्षञ्च स्वर्गलक्ष्मीरभूत् च ॥
सा च कालेन तपसा यज्ञकुण्डसमुद्भवा ।
कामिनी याज्ञसेनाच्च द्रौपदी द्रुपदात्मजा ॥
कृते युगे वेदवती कुशध्वजसुता शुभा ।
त्रेतायां रामपत्नी सा सीतेति जनकात्मजा ॥
तच्छाया द्रौपदी देवी द्वापरे द्रुपदात्मजा ।
त्रिष्वायतीति सा प्रोक्ता विद्यमाना युगत्रये ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १४ अध्यायः ॥

मायासुतः, पुं, (मायायाः मायादेव्याः सुतः ।) बुद्धः । इति हेमचन्द्रः । १ । १५२ ॥

मायिकं, क्ली, (माया मोहनगुणः विद्यतेऽस्मिन् । माया + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाफलम् । इति राजनिर्घण्टः ॥ अन्यान्तरे मायिका मादका इत्यपि पाठः ॥

मायिकः, पुं, (माया अस्त्यस्य । माया + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।) मायाकारः । इति जटाधरः ॥ (यथा, देवीभागवते । ४ । १६ । ४ ।
"यज्ञमायामोहितत्वाद्धं सदा वर्त्ते परात्मनः ।
परवान् दारुपात्वाली मायिकस्य यथा वशे ॥"
मायाविशिष्टे, त्रि ॥)

मायी, [न्] पुं, (मायाऽस्त्यस्य । माया + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति इनिः ।) मायाकारः । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ ध्वंसकः ४ कुहकः ५ दाम्भिकः ६ जालिकः ७ । इति हेमचन्द्रः । ३ । ४२ ॥

(मायायुक्ते, त्रि । यथा, कुमारे । २ । ४६ ।
"यत्त्वभिः सम्भृतं हव्यं वितते मध्वरेषु वः ।
जातवेदोमुखाज्जायौ मिषतामाच्छिनत्ति नः ॥"
मायोपाधिके परमेश्वरे च । यथा, पञ्चदश्याम् । ६ । १२६ ।
"मायान्तु प्रकृतिं विद्यान् मायिनन्तु महेश्वरम् ॥")

मायुः, पुं, (मिनोति प्रक्षिपति देहे उत्पादयतीति । मिञ् प्रक्षेपणे + "ज्ञवापाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा० १ । १ । इति उण् । "मीनातिमिनोतिदीङां लपि च ।" ६ । १ । ५० । इत्यात्वम् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) पित्तम् । इत्यमरः । २ । ६ । ४२ ॥ (शब्दः । यथा, ऋग्वेदे । १ । १६४ । २८ ।
"ब्रह्माणं धर्म्मसभिवावघ्राणा मिमाति मायुं
पयते पयोभिः ॥"
"मायुं शब्दं मिमाति निर्म्माति करोति ।" इति तद्भाष्ये सायणः ॥ वाक् । इति निघण्टौ । १ । ११ ॥)

मायुराजः, पुं, कुबेरपुत्रः । इति त्रिकाण्डशेषः ॥

मायूरं, क्ली, (मयूराणां समूहः । मयूर + "प्राग्रहतादिभ्योऽञ् ।" ४ । २ । १५७ । इत्यञ् ।) मयूरसमूहः । इत्यमरः । २ । ५ । ७३ ॥ (मयूराणामिदमित्यण् ।) तत्सम्बन्धिनि, त्रि ॥ यथा, महाभारते । १३ । १०४ । ६० ।
"आजं गव्यं तथा मांसं मायूरञ्चैव वर्ज्जयेत् ॥")

मायूरिकः, पुं, (मयूरं हन्ति । मयूर + "पक्षिमत्स्यमृगान् हन्ति ।" ७ । ३ । ७५ । इति ठक् । मयूरघाती । इति सिद्धान्तकौमुदी ॥

मायूरी, स्त्री, अजमोदा । इति राजनिर्घण्टः ॥

मारः, पुं, (मृ + भावे घञ् ।) मृतिः । (यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ३१ ।
"सुस्वारब्धदृढघटनिभः खण्डो दृषद्वा पिरी-
धिर्निर्भग्नः ।")
म्रियन्ते प्राणिनोऽनेन । मृ + घञ् ।) कामदेवः । (यथा, वैद्यके । ४ । ७६ ।
"अशुममार न मार ! कथं तु सा
दयितयापि तयासि किमुज्झितः ॥")
विघ्नः । इति मेदिनी । रे, ७६ ॥ (मृ + णिच् + घञ् ।) मारणम् । इति हेमचन्द्रः । २ । ३६ ॥ धुस्तूरः । इति शब्दचन्द्रिका ॥ मारणोत्पत्तिर्यथा,—

मार्कण्डेय उवाच ।
"मनोभवस्य वचनं श्रुत्वाथ चतुराननः ।
विचक्षुरपि तद्वाक्यं श्रुत्वातुत्साहकारकम् ॥
सर्व्वस्य मोहने ब्रह्मा चिन्ताविष्टोऽभवत्तदा ।
समर्थो मोहितुमिति निश्चक्राम सुदुर्म्मुदः ॥
निश्वासमारुतात्तस्य नानारूपा महाबलाः ।
जाता गणा लोलजिह्वा लोलाक्षाश्चातिभयङ्कराः ॥
तुरङ्गवदनाः केचित् केचिद्गजमुखास्तथा ।
सिंहव्याघ्रमुखाश्चान्ये शूकराहखराननाः ॥

अन्यमार्जारवदनाः शरभास्याः शुकाननाः ।
शशगोमायुवक्त्राश्च वराहमुखसन्निभाः परे ॥
गोरूपा गोमुखाः केचित्तथा पक्षिमुखाः परे ।
महादोर्भा महाकक्षा महास्फोला महानखाः ॥
पिङ्गाक्षा विरलाक्षाश्च भ्रान्तेक्षाश्च महोदराः ।
एकजङ्घोर्ध्वजङ्घाश्च चतुर्जङ्घास्तथापरे ।
स्थूलजङ्घा दीर्घजङ्घा बहुजङ्घा विजङ्घकाः ।
दीर्घास्या स्थूलनेत्राश्च सूक्ष्मनेत्रा विहस्तयः ॥
चतुष्पादाः पञ्चपादाश्चित्रपादैकपादकाः ।
ह्रस्वपादा दीर्घपादाः स्थूलपादा महापदाः ॥
एकहस्ताश्चतुर्हस्ता द्विहस्ताश्चित्रहस्तकाः ।
विहस्ताश्च विरूपाश्च गोधिकाननाः परे ॥
मनुष्याननाः केचिन् मिश्रमारमुखाः परे ।
क्रौञ्चाकारा बकाकारा हंससारसरूपिणः ॥
तथैव मद्गुरबकबलाकासमुखास्तथा ।
अर्द्धनीला अर्द्धरक्ताः कपिलाः पिङ्गलास्तथा ॥
नीलाः शुक्लास्तथा पीता हरिताश्चित्ररूपिणः ।
अवादयन्त ते ग्रहान् पटहान् परिवादिनः ॥
ऋक्षान् डिण्डिमांश्चैव गोमुखान् पणवांस्तथा ।
सर्वे जटाभिः पिङ्गाभिस्तुङ्गाभिश्च करान्विताः ॥
निरन्तराभिर्निम्नेक्षा गजाः स्थूलनगामिनः ।
शूलहस्ताः पाशहस्ताः खड्गहस्ता धनुर्धराः ॥
शक्त्यङ्कुशगदाबाणपट्टिसप्रासपाशयः ।
नानायुधा महानादं कुर्वन्तस्ते महाबलाः ॥
मारय च्छेदयेत्युच्चैरूचुः परितो गणाः ।
तेषान्तु वदनं तत्र मारय च्छेदयेत्युत ।
योगनिद्राप्रभावात् स विधिर्वक्तुं प्रचक्रमे ॥
अथ ब्रह्माणमाभाष्य तान् दृष्ट्वा मदनो गणान् ।
उवाच वारयन् वक्तुं गणानामग्रतः स्थितः ॥

मदन उवाच ।

किं कर्त्तेते करिष्यन्ति कुत्र स्थास्यन्ति वा विधे ! ।
किं नामधेया एते वा तन्नेतान् विनियोजय ॥
नियुङ्क्ष्वैतान् जिते ज्ञात्वे स्थानं दत्त्वा च नाम च ।
श्रुत्वा पश्चाज्जहामायाप्रभावं वक्तुमर्हसि मे ॥"

मार्कण्डेय उवाच ।

"अथ तद्वाक्यमाकर्ण्य सर्व्वलोकपितामहः ।
गणान् समदनानाह तेषां कर्म्मादिकं दिशन् ॥

ब्रह्मोवाच ।

"एते तूत्पन्नमात्रा हि मारयेति यदब्रुवन् ।
सुदुर्मुदुरतोऽमीषां नाम मारेति जायताम् ॥
मारात्मकत्वादेते मारा: सन्तु च नामतः ।
सदैव विघ्नं जन्तूनां करिष्यन्ति विनार्च्चनम् ।
तवानुगमनं कर्म्म तुल्यमेषां मनोभव ! ॥
यत्र यत्र भवान् याता स्वकर्म्मार्थं यदा यदा ।
गन्तारश्चैव सर्व्वत्र साहाय्याय तदा तदा ॥
विघ्नोद्भावनं करिष्यन्ति त्वदस्त्रवशगैर्नराः ।
ज्ञानिनां ज्ञानमार्गञ्च विघ्नयिष्यन्ति सर्व्वदा ।
यथा सांसारिकं कर्म्म सर्व्वे कुर्व्वन्ति जन्तवः ।
तथा चैते करिष्यन्ति सविघ्नमपि सर्व्वतः ॥
इमे स्थास्यन्ति सर्व्वत्र वेगिनः कामरूपिणः ।
त्वमेवैषां गणाध्यक्षः पञ्चबाणोऽग्निभोजिनः ।
निजक्रियावतां सौख्यभोगिनोऽपि भवन्त्विमे ॥"

इति कालिकापुराणे ६ अध्यायः ॥

मारकः, पुं, (म्रियन्ते प्राणिनः यस्मिन् येनेति वा । मृ + ण्वुल् । ततः संज्ञायां कन् ।) मरकः । तत्पर्य्यायः । मारिः२ उत्पातः३ । इति त्रिकाण्डशेषः ॥ पक्षिविशेषः । वाज् इति भाषा । तत्पर्य्यायः । वातिपक्षी २ श्वाङ्कः ३ । इति भूरिप्रयोगः ॥ मारजकमपि च ॥

मारजित्, पुं, (मारं कामं जितवान् । जि + क्विप् । तुगागमः ।) बुद्धः । इत्यमरः । १ । १ । २३ ॥

मारणं, क्ली, (मार्य्यते इति । मृ + णिच् + भावे ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११४ ॥ (यथा, मनौ । ५ । ३८ ।
"यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥")
अभिचारविशेषः । यथा,—
"एवन्तु मारणं देवि ! विशेषात् कथयामि ते ।
वाग्भं वह्निसमायुक्तं वामनेत्रविभूषितम् ॥
कूर्च्चद्वयं ततो देवि ! अमुकं मारय मारय ।
चतुर्दशाक्षरो मन्त्रो महाघोरः प्रजप्यते ॥
खदिराङ्गारमादाय कृष्णाष्टम्यां विशेषतः ।
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपट्टके ॥
शिखायां मस्तके नेत्रे ललाटे हृदये करे ।
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये ॥
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत् ।
संहारमुद्रां बद्ध्वा तु ध्यायेद्देवीं जयप्रदाम् ॥
दीर्घाकारां कृष्णवर्णां सदार्द्धोलङ्घमस्तकाम् ।
वृषभध्वजसंरूढां चर्म्मयन्त्रीं दिगम्बरीम् ॥
शत्रुनाशकरीं देवीं ध्यायेत् शत्रुक्षयाय च ।
एवं ध्यात्वेष्टकाचूर्णैर्व्वामहस्तेन शत्रुरि ! ॥
ॐ शत्रुनाशकार्य्यै नमः इति दत्त्वा महेश्वरि ! ।
हरिद्राचूर्णसहितां धारां दद्याद्दिनेन तु ॥
अमुकस्य शरीरस्थं पिब पिबेति तत्परम् ।
मांसं खादय खादय हौं नमः इति मन्त्रम् ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शतादिकम् ।
जपेदेकादशाहे च रोगः स्यान्नात्र संशयः ॥
दक्षाधिकैकविंशाहे म्रियतेऽरिर्न संशयः ॥ * ॥
अथवान्यप्रकारेण शत्रुक्षयमहं वदे ।
पुंगोशकृत् समादाय पूजयेदुग्धवारिणा ॥
विपरीतक्रमेणैव जपपूजादिकं चरेत् ।
महादेवाय नमः इति पुंगोशकृत् समाहरेत् ॥
शिवाय नमः इति मन्त्रेण घटनञ्च समाचरेत् ।
पशुपतये नमः इति प्राणान् संस्थापयेत्ततः ॥
लौहपात्रं महेशानि ! खदिराङ्गारयोगतः ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेत् शिवम् ॥
ततो ध्यायेन्महारुद्रं ध्यानन्तु सुसमाहितः ।
शूलोर्ध्वन्तु स्थितं रुद्रं ज्वलदग्निसमप्रभम् ॥
वामहस्तधरं कृष्णं दक्षिणं प्राणकर्षणम् ।
नरचर्म्माम्बरं देवं महाघोरादिवेष्टितम् ॥
पिशाचवक्त्रं रुद्रागच्छागच्छ इत्यादिनावाह्य यजेत् ।
शूलपाशाय नमः इति क्षमयेत् साधकोत्तमः ।
मन्त्रेश्वराय नमः इति पाद्यादिना प्रपूजयेत् ।
दुःखानादिरूपया मन्त्रैर्मूलमन्त्रमेव प्रपूजयेत् ॥
अग्निकोणादिपर्य्यन्तं पूर्व्ववरीत्या मन्त्रेश्वरि ! ।
नमः शिवायेति मूलमष्टावित्यनि संजपेत् ।
हुँ चमस्वेति वामेन करेण तु विसर्ज्जयेत् ॥
अमित तेजव विष्णो हरे सर्व्व जगार्हण ।
हुंस नारायण स्वाहा मन्त्रमेव सदाजपेत् ॥
हुँ नमो भगवते वासुदेवाय स्वाहा नमः इत्यं सदाजपेत् ।
एवमेकादशाहेन शत्रूच्छेदनमञ्जसा ।
अवश्यं जायते देवि ! सत्यं सत्यं त्रिलोचने ! ॥'

इति योगिनीतन्त्रे पूर्व्वखण्डे ४ पटलः ।

अपि च ।
"शत्रास्थिञ्च शवास्थिञ्च मूषनिर्म्माक्षमेव च ।
अरेर्यो निखनेत् द्वारे पक्षत्रयमुपयाति सः ॥"

इति गारुडे १८६ अध्यायः ।

मारिः, स्त्री, (मार्य्यते इति । मृ + णिच् + इन् मारयति । वधः । इति मेदिनी । रे, ७७ जनाश्रयः । तत्पर्य्यायः । मारकः २ मरकः ३ उत्पातः ४ । इति त्रिकाण्डशेषः ॥

मारिचिकं, त्रि, (मरिच + "संस्कृतम् ।" ४।४। इति ठक् ।) मरिचेन संस्कृतम् । इति सिद्धान्तकौमुदी ॥

मारिषः, पुं, (मार्य्यते नाश्यते भक्षणीक्रियत इति मृ + णिच् + कर्म्मणि क्तः ।) मत्स्यजातः । भक्षं जातः । यथा, भावप्रकाशे ।
"असम्यक्सारितं स्वर्णं वलं वीर्य्यञ्च नाशयेत् ।
करोति रोगान् बहुन् तस्मात् यत्नतस्त्यजेत् ।
अपि च ।
"पूर्व्वं वज्रसमं नाम्ना शिग्रुबीजेन विमर्द्दयेत् ।
ततो गजपुटे पक्वा पुनरर्द्धेन मर्द्दयेत् ॥
तालेन दशमांशेन यामेनैकं ततः पुटेत् ।
एवं दशपुटैः पक्वं वज्रं भवति मारिषम् ॥"
अपरञ्च ।
आर्द्रत्वञ्च घनत्वञ्च तेजो गौरवचापलम् ।
यस्यैतानि न दृश्यन्ते तं विद्यान्मृतसूतकम् ॥
अन्यच्च ।
"शुक्लो रक्तो भवेद्ब्रह्मा मूर्च्छितस्तु जनार्द्दन
मारितो रुद्ररूपी स्यात् बद्धः साक्षात् सदाशिवः ॥'

इति वैद्यदर्पणः ।

मारिषसत्रवारकः, पुं, (मारिषस्य अक्षणं सहारः तीति । दृ + णिच् + अण् ।) राजर्षिविशेषः यथा,—
"कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ।
व्रतस्थमोक्षो धर्म्मात्मा मारिषसत्रवारकः ॥"

इति हेमचन्द्रः । १ । ३०७

मारिषः, पुं, (मर्षति दोषानिति । मृष + अच् निपातनात् सिद्धम् । यद्वा, मा हिंसति हिनस्ति

कश्चिदपीति । दिव + क्तः ।) गाधोक्तौ श्रेष्ठः । इत्यमरः । १ । ७ । १४ ॥ (क्वचित् पुराणादावपि । यथा, देवीभागवते । १ । ११ । ६५ ।
"साहाय्यं ते करिष्यामि मन्मन्त्रस्या महामते ! ।
भविता यदि संग्रामस्तव वैरूपेण मारिष ! ॥"
तथा च महाभारते । ७ । २६ । १२ ।
"दार्व्यमाणाच्चमूं दृष्ट्वा भगदत्तेन मारिष ! ॥")
तत्कुलीयशाकविशेषः । मरसा इति हिन्दी भाषा । तत्पर्य्यायः । कस्तरः २ मार्षिकः ३ । (ग्राम्यार्थे पर्य्यायो गुणाश्च यथा । [अथ श्वेतमरसा । लोहितमरसा तत्रता इति च लोके ।]
"मारिषो वाध्यको मार्षः श्वेतो रक्तश्च स स्मृतः ।
मारिषो मधुरः शीतो विष्टम्भी पित्तमुद्गुरुः ॥
वातश्लेष्मकरो रक्तपित्तमुदिषमग्निजित् ।
रक्तमार्षो गुरुर्नाति सक्षारो मधुरः सरः ।
श्लेष्मलः कटुकः पाके स्वल्पदोष उदीरितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मारिषा, स्त्री, (मारिष + टाप् ।) दक्षमाता । इति मेदिनी । षे, ४४ ॥ (यथा, मत्स्यपुराणे । ४ । ४६ ।
"सोमकन्याभवत् पत्नी मारिषा नाम विश्रुता ।
तेभ्यस्तु दक्षमेकं सा पुत्रमग्र्यमजीजनत् ।"
अस्या जन्मवृत्तान्तो यथा, विष्णुपुराणे । प्रथमांशे १५ अध्याये ।
"कर्दमो नाम मुनिः पूर्व्वमासीदेदविदांवरः ।
सुरम्ये गोमतीतीरे स तेपे परमं तपः ॥
ततश्चोभाय सुरेन्द्रैश्च प्रजोत्पाद्या वराप्सराः ।
प्रयुक्ता क्षोभयामास तन्मनं सा शुचिस्मिता ॥"
इत्यारभ्य—
"यावदित्थं स विप्रर्षिस्तां ब्रवीति समन्मथाम् ।
तावद्गलत्स्वेदजला सा बभूवातिवेपथुः ॥
प्रवेपमानां सततं स्खलद्गात्रलतां सतीम् ।
गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।
आकाशगामिनी खेटं समाप्तं तरुपल्लवैः ॥
हृष्टादृष्टं ययौ बाला तदप्यारब्धपल्लवैः ।
निर्माप्यमाणा गात्राणि गलत्स्वेदजलानि वै ॥
ऋषिणा यत्तदा गर्भस्तस्या देहे समाहितः ।
निष्क्रामत स रोमाग्र स्वेदरूपी तदद्भुतः ॥
तं दृष्ट्वा जगृहुर्गर्भं एकं चक्रे तु मारुतः ।
मया चाप्यायिनो गोभिः स तदा वर्द्धतां शुभैः ॥
दक्षाद्यगर्भसंभूता मारिषाख्या वराङ्गना ।
तां प्रदास्यन्ति वो दृष्ट्वा कोपं एष प्रशाम्यताम् ॥
कण्डोरपत्यमेवं सा दृष्टीभ्यश्च समुद्गता ।
ममापत्यं तथा वायोः प्रजोत्पादनया च सा ॥"
सूरस्य पत्नी । यथा, भागवते । ६ । २४ । २७ ।
"देवमीढस्य सूरस्य मारिषा नाम पत्न्यभूत् ॥")

मारी, स्त्री, (मारि + ङीप्, यद्वा मार + इन् + ङीप् ।) यक्षी । जलचरः । इति मेदिनी । रे, ७६ ॥ मारेश्वरी शक्तिः । यथा,—
"मारी त्रिमूर्त्तेन जयान्त चान्यान्
सङ्घाङ्गपातैरपरांश्च कौशिकी ।"
इति वामने ५२ अध्यायः ॥

मारीचः, पुं, (मरीचेरपत्यं पुमान् । मरीचि + अण् ।) राक्षसविशेषः । स च तारकाराक्षसीपुत्रः रावणस्यानुचरः सीताहरणकाले मायामृगरूपोऽसौ श्रीरामेण हतश्च । इति रामायणम् । अस्य विवरणं यथा,—
"एतस्मिन्नन्तरे रामो ददर्श कनकं मृगम् ।
सीता तं प्रेरयामास तदर्थं यत्नपूर्व्वकम् ॥
संत्यज्य लक्ष्मणं रामो जानक्या रक्षणे वने ।
स्वयं जगाम तूर्णं तं विधाय शरकर्षणं च ॥
हा लक्ष्मणेति शब्दश्च श्रुत्वाथ मायया मृगः ।
प्राणांस्त्यजन् सहसा पुरो दृष्ट्वा हरिं स्मरन् ॥
मृगदेहं परित्यज्य दिव्यं देहं विधाय च ।
रत्नविमानमारुह्य वैकुण्ठं स जगाम ह ॥
वैकुण्ठद्वारे द्वार्य्यौ तौ किङ्करौ द्वारपालयोः ।
जयश्च विजयश्चैव बलवांश्चाजितोऽभिधः ॥
शापेन मुनकादीनां संप्राप्य राक्षसीं तनुम् ।
पुनर्जगाम च द्वारमादौ च द्वारपालयौ ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १२ अध्यायः ॥
कश्यपः । यथा,—
"इति संचिन्त्य भगवान् मारीचः कुरुनन्दन ! ।
उवाच किञ्चित् कुपित आत्मानञ्च विगर्हयन् ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(तथा च महाभारते । १३ । ८५ । १०७ ।
मरीचिभ्यो मरीचिस्तु मारीचः कश्यपोऽभवत् ॥")
कल्लोलकम् । यागकव्याद्धाग्नः । इति मेदिनी । चे, १७ ॥ राजहंसी । इति जटाधरः ॥

मारीची, स्त्री, (मरीचेरियम् । इत्यण् । ङीप् ।) देवताभेदः । इति मेदिनी । चे, १७ ॥ सा तु मायादेवी । तत्पर्य्यायः । त्रिसुखा २ वज्रकालिका ३ विकटा ४ वज्रधारिणी ५ गौरी ६ पौत्रिरथा ७ । इति त्रिकाण्डशेषः ॥

मारुतः, पुं, सर्व्वाङ्गः । पत्थ्यः । गोमयमङ्गलम् । इति मेदिनी । ते, ३५ ॥

मारुतः, पुं, (मरुतां देवः । मरुत् + "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इति स्वार्थेऽण् ।) वायुः । इत्यमरः । १ । १ । ६५ ॥ म्रियतेऽनेन क्रुद्धेन नाशयति म इ उत् मरुत् मरुदेव मारुतः स्वार्थे अण् । इति तट्टीकायां भरतः ॥
(यथा, मनौ । ४ । १२२—१२३ ।
"अतिथिञ्चासनुत्थाप्य मारुते वाति वा भृशम् ।
क्षिरं च स्रुते गात्राच्छ्लेष्म च परिवर्त्तते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥)
अस्योत्पत्तिर्यथा,—
कश्यप उवाच ।
"पुत्रस्ते भविता भद्रे ! इन्द्रहा देववान्धवः ।
संवत्सरं व्रतमिदं यद्यसौ धारयिष्यति ॥"
अक्षौ यथावत् ।
"संवत्सरं पुंसवनं व्रतमेतदविप्लुतम् ।
धारयिष्यति चेत्पुत्रं शक्रहा भविता सुतः ॥
वाढमित्यभ्युपेत्याथ दितौ राजन् ! महामनाः ।
कश्यपाद्गर्भमाधत्त व्रतचर्य्यां दधार सा ।
मारुतस्तुरभिप्रायमिन्द्र आज्ञाय मानद ! ॥
शुश्रूषणेनाश्रमस्थां दितिं पर्य्यचरत् कविः ।
एवं तस्या व्रतस्थाया व्रतच्छिद्रं हरिर्नृप ! ॥
प्रेप्सुः पर्य्यचरत् सिद्धो न्यूनेष्व न्यूनाशनिः ।
नाध्यगच्छद्व्रतच्छिद्रं तन्यरोऽथ महीपते ! ॥
चिन्तां तीव्रां गतः शक्रः केन मे स्यादिदं त्रिषु ॥
एकदा सा तु सन्ध्यायामुच्छिष्टा व्रतकर्षिता ।
अशुद्धवार्द्रशिराऽङ्घ्रिः सुप्ताप विधिमोहिता ॥
लब्ध्वा तदन्तरं शक्रो निद्रापहृतचेतसः ।
दितेः प्रविश्य उदरं योगेशो योगमायया ॥
चकर्त्त सप्तधा गर्भं वज्रेण कनकप्रभम् ॥
रुदन्तं सप्तधैकैकं मा रोदीरिति तान् पुनः ।
तमब्रुवन् पाट्यमानास्ते सर्व्वे प्राञ्जलयो नृप ! ॥
किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
मा भैष्ट भ्रातरो मह्यं यूयमित्याह कौशिकः ॥
अनन्यभावान् पार्षदानात्मनो मरुतां गणान् ।
न ममार दितेर्गर्भः श्रीनिवासानुकम्पया ॥
सञ्जरिक्षेण पप्राच्छात् देवाक्षे मरुतोऽभवन् ।
अपोह्य मारुतं दोषं ते हरित्वा सोमपाः स्मृताः ॥
दितिरुत्थाय ददृशे कुमारानमलप्रभान् ।
इन्द्रेण सहितान्देवी पर्य्यतुष्यदनिन्दिता ॥
अथेन्द्रमाह तानाहमादित्यानां भयावहम् ।
अपत्यमिच्छन्त्यचरं व्रतमेतं सुदुष्करम् ॥
एकः सङ्कल्पितः पुत्रः सप्तसप्तगणोऽभवत् कथम् ।
यदि ते विदितं पुत्र ! सत्यं कथय मा मृषा ॥
इन्द्र उवाच ।
अम्ब ! तेऽहं व्यवसितमुपधार्य्य गतोऽन्तिकम् ।
लब्ध्वान्तरोऽच्छिनं गर्भमपविद्धं धर्म्मदृक् ॥
कृतो मे सप्तधा गर्भ आसन् सप्त कुमारकाः ।
तेऽपि चैकैकशो दृक्ताः सप्तधा नापि मस्मिरे ॥
ततस्तत्परमाश्चर्यं दीक्ष्य व्यवसितं मया ।
महापुरुषपूजायाः सिद्धिः काप्यनुषङ्गिकी ॥
तदिदं मम दौर्जन्यं बालिशस्य महीयसि ! ।
क्षन्तुमर्हसि मातस्तं दिष्ट्या गर्भो न्यपातयत् ॥
श्रीशुक उवाच ।
इन्द्रस्यामर्षणं ज्ञात्वा शुद्धभावेन तुष्टया ।
मरुद्भिः सह तां नत्वा जगाम त्रिदिवं प्रभुः ॥"
इति श्रीभागवते ६ स्कन्धे १८ अध्यायः ॥
(जनपदविशेषः । यथा, महाभारते । ६ । ४७ । ४६—५० ।
"मारुता धेनुकाश्चैव तङ्गणाः परतङ्गणाः ।
वार्ज्जीकाश्चित्तिराश्चैव चोलाः पाण्ड्याश्च भारत ! ॥
एते जनपदा राजन् ! दक्षिणं पक्षमाश्रिताः ॥"
अग्निभेदः । यथा, यजुर्व्वेदभाष्यपरिशिष्टे । १ । २ ।
"अग्निस्तु मारुतो नाम गर्भाधाने विधीयते ॥"
मरुत्सम्बन्धिनि, त्रि । यथा, ऋग्वेदे । ७ । ११ । १ ॥

"रात्रि स्वयं रात्रि मिथमस्मे रात्रि सुवे इन्द्र मारुतं नः ॥"
"मारुतं मरुतां देवविशां सम्मिश्रं।" इति तद्भाष्ये सायणः ॥)
मारुतव्रतं, क्ली, (मारुतस्य व्रतमिव व्रतं नियमोऽस्य।) राजधर्मभेदविशेषः। यथा,—
"प्रविश्य सर्वभूतानि यथा चरति मारुतः।
तथा चरेः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥"
इति मात्स्ये २०० अध्यायः ॥
मारुतात्मजः, पुं, (मारुतस्यात्मजः।) हनूमान्। इति जटाधरः ॥ (भीमश्च ॥)
मारुतामहः, पुं, (मारुतमहन्ति। मरुत+ऊः।) बहुमहः। इति राजनिर्घण्टः ॥ वायुनामके, त्रि ॥
मारुताशनः, पुं, (मारुतोऽशनमस्य। अश्नातीति। अश+ल्युः।) मारुतानां अशनो भक्षकः।) सर्पः। पवनाशन इत्यमरदर्पणात्। (यथा, महाभारते। ५। १०६। १६।
"भक्तः प्रह्लाद सर्वा वै बाहुभ्यां संप्रसारयन्।
क्षिप्तः क्ष्माधरिवाभ्यासे निर्भेदो मारुताशनः ॥")
वायुमात्रभक्षके, त्रि ॥ (कार्त्तिकेयसैनिकविशेषः। यथा, महाभारते। ९। ४५। ६०।
"विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ॥")
मारुतिः, पुं, (मारुतस्यापत्यं पुमान्। मरुत+"अत इञ्।" ४। १। ९५। इति इञ्।) हनूमान्। इति शब्दरत्नावली ॥ (यथा, रघौ। १२। ६०।
"प्रहस्तादुपलब्धार्था लङ्घा: सम्यातिदर्शनात्।
मारुतिः सागरं तीर्त्वा संसारमिव निर्ममः ॥")
भीमसेनः। इति जटाधरः ॥ (यथा, देवीभागवते। २। ७। २१।
"तच्छ्रुत्वा वचनं भ्रातुर्ज्येष्ठस्यामिततेजसः।
संग्रहेऽस्य महाबाहुर्मारुतिः कुपितोऽब्रवीत् ॥")
मार्कः, पुं, भल्लराजः। इति रत्नमाला ॥
मार्कण्डः, पुं, (मृकण्डोरपत्यम्। मृकण्डु+अण्।) मार्कण्डेयमुनिः। इति शब्दरत्नावली ॥
मार्कण्डिका, स्त्री, लताविशेषः। भूइ खखसा इति हिन्दीभाषा ॥ सा तु काकरोलभेदः। तत्पर्य्यायः। भूमिचरी २ मार्कण्डी ३ मृदुरेचनी ४। अस्या गुणाः। कुष्ठहरत्वम्। ऊर्द्ध्वाधःकायशोधनत्वम्। विषदुर्गन्धकासगुल्मोदरनाशित्वञ्च। इति भावप्रकाशः ॥
मार्कण्डीयं, क्ली, भूम्याङ्गुल्यम्। इति राजनिर्घण्टः ॥
मार्कण्डेयः, पुं, (मृकण्डोरपत्यं। मृकण्डु+शुभ्रादिभ्यश्च।"४। १। १२३। इति ढक्।) मृकण्डुमुनिपुत्रः। अष्टसिद्ध्यादौ पूजायां तस्य ध्यानं यथा,
"द्विभुजं जटिलं सौम्यं सुहृद्वं चिरजीविनम्।
मार्कण्डेयं वरो भक्त्या पूजयेच्च चिरायुषम् ॥"
तस्य प्रार्थनामन्त्रः।

"चिरजीवी यथा त्वं भो भविष्यामि तथा मुने!।
रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्व्वदा ॥
मार्कण्डेय महाभाग! सप्तकल्पान्तजीवन!।
आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव ॥"
इति तिथ्यादितत्त्वम् ॥
तस्योत्पत्त्यादिर्यथा,
मार्कण्डेय उवाच।
"देवौ धातृविधातारौ भृगोः ख्यातिरसूयत।
श्रियश्च देवदेवस्य पत्नी नारायणस्य या ॥
आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः।
भार्य्ये धातृविधात्रोक्ते तयोर्जातौ सुतावुभौ ॥
प्राणश्चैव मृकण्डुश्च पिता मम महातपाः।
अनघिष्यामहं तस्मात् पुत्रो वेदशिरा मम ॥
धूम्रवत्यां समभवत् प्राणस्यापि निबोध मे ॥"
इति श्रीमार्कण्डेयपुराणे ब्रह्मवर्णाध्यायः ॥
अपि च।
पुलस्त्य उवाच।
"अथ ते संप्रवक्ष्यामि मार्कण्डोत्पत्तिमुत्तमाम्।
पुरा कल्पे मुनिः पूर्व्वं मृकण्डुर्नाम विश्रुतः ॥
भृगोः पुत्रो महाभागः सभार्य्यस्तप्तवांस्तपः।
तस्य पुत्रस्तदा जातो वसतस्तु वनान्तरे ॥
स पञ्चवर्षको जातो बाल एव गुणान्वितः।
ज्ञानिनं स तदा दृष्ट्वा भ्रमित्वा लघुप्राङ्मुखी ॥
स्थित्वा स सुचिरं कालं जीवनञ्च ततो हितम्।
चौक्ष्य चिन्तापरो ज्ञानी किं वर्षा बालकस्य च ॥
हितं खण्डितम्।
संख्यया चाष्टवर्षाणि जानातीति व्यवेदयत्।
मृकण्डुनैव सुस्थस्तु स ज्ञानी वाक्यमब्रवीत् ॥
मासमायुष्य पुत्रस्य तेऽवशिष्टं मुनीश्वर!।
नैव शोकस्त्वया कार्य्यः सत्यमेतदुदाहृतम् ॥
एतत् श्रुत्वा वचो भीम! ज्ञानिना यदुदाहृतम्।
व्रतोपनयनं चक्रे बालकस्य पिता तदा ॥
आह चैनं पिता पुत्रमृषिं त्वमभिवादय।
एवमुक्तः स वै पित्रा ऋषिं भक्त्या ननाम सः ॥
एतस्मिन्नन्तरे तत्र प्रदीप्ताः पावकोपमाः।
मार्गेणापि समायातास्तेन समर्षयोऽमलाः ॥
बालेन तेन दृष्टास्ते सर्व्वे समभिवादिताः।
आयुष्मान् भव तैरुक्तः स ऊर्द्ध्वौ दक्षमेखलाम् ॥
उक्तास्ते च पुनर्व्वाणी पश्यन्तः चौक्ष्यजीवितम्।
दिनानि पञ्च ते चायुर्ज्ञात्वा भीताभवन् पुनः ॥
तमुत्थाप्य ततो वाक्यं ते गतास्ते ब्रह्मणोऽन्तिकम्।
प्रतिसृज्य च तं बालं प्रणिपेतुः पितामहम् ॥
आयुष्मान् भव इत्याह तेन ब्रह्माभिवादितः।
चिरायुर्ब्रह्मणा बालः प्रोक्तः स ऋषिसन्निधौ ॥
ततस्ते मुनयः प्रीताः श्रुत्वा वाक्यं पितामहात्।
पितामहस्तु सम्पर्श्य दृष्ट्वा प्रोवाच विस्मितान् ॥
कार्य्यं येन वा याताः कोऽयं बालो निवेद्यताम्।
ततः समर्षयो राजन्! सर्व्वं तस्मै व्यवेदयन् ॥
भृगोः सुतुर्मृकण्डुस्तु चौक्ष्ययुक्तस्य बालकः।
अल्पायुषस्ततस्तस्य ब्रह्मन्नेनास्य मेखला ॥
यज्ञोपवीतं दण्डश्च दत्त्वा तेन प्रबोधितः।

वं कञ्चित् पश्यसे लोकं भ्रमन्तं भूतले जनम् ॥
तस्याभिवादनं कार्य्यमेवमाह पितामहः।
तावद्भ्रमनेनाथ स्थितौ द्वौ परिभ्रमन् ॥
एकत्वमार्षम्।
तीर्थयात्राप्रसङ्गेन दैवयोगात् पितामह!।
चिरायुर्भव वै विप्र! वाक्यैस्तैरीरितम् ॥
कथं चिरायुः स्यादिप्रवालकः साम्प्रतं प्रभो!।
कथं जानुतिनो देव! भवामो भवता वयम् ॥
एवमुक्तस्तदा तेषु ब्रह्मा लोकपितामहः।
ऋतवाचो भविष्यामः सर्व्वे एव वयं स्थिताः ॥
मनुसमश्चायुषा बालो मार्कण्डेयो भविष्यति।
ऋषीणां सुखसञ्चासौ मनुसञ्चायो भविष्यति।
कल्पस्यादौ तथा चान्ते कृती मुनिभिरुत्तमैः ॥
एवमुक्ते मुनयो वाक्यं ब्रह्मा लोकपितामहः।
सम्बोध्य प्रेषयामास भूयोऽप्येवं परन्तप!॥
तीर्थयात्रां गता विप्रा मार्कण्डेयो निजं गृहम्।
जगाम गत्वा तं विप्रं पितरं स तथाब्रवीत्॥"
इति प्राक्षे हरिवंशे ३० अध्यायः ॥
अपरञ्च।
व्यास उवाच।
"मार्कण्डेयेन मुनिना यथा मृत्युः पराजितः।
तथा ते कथयिष्यामि शृणु वत्स! महामते!॥
भृगोः पौत्रो महाभागो बालत्वे च महाद्युतिः।
वर्षे द्वादशमे पूर्णे मृत्युरस्य भविष्यति ॥
श्रुत्वा तन्मातापितरौ दुःखितौ तौ बभूवतुः।
तौ दृष्ट्वा दुःखसन्तप्तौ मार्कण्डेयो महामतिः॥
उवाच वचनं तत्र किमर्थं दुःखमीदृशम्।
वक्तुमर्हसि दुःखस्य कारणं मम पृच्छतः॥
कथयामास तत् सर्व्वमादेशौ यदुवाच ह।
तत् श्रुत्वा तौ मुनिः प्राह मातरं पितरं पुनः॥
पित्रा चार्द्धं त्वया मातर्न कार्य्यं दुःखमन्वहम्।
अपनेष्यामि मे मृत्युं तपसा नात्र संशयः।
यथा चाहं चिरायुः स्यां तथा कुर्य्यामहं तपः।
सूत उवाच।
इत्युक्त्वा तौ समाश्वास्य पितरौ वनमभ्यगात्।
तत्र विष्णुं प्रतिष्ठाप्य गन्धपुष्पादिभिः क्रमात्।
पूजयामास देवेशं मार्कण्डेयो महामुनिः॥
पूजयित्वा हरिं तत्र तपस्तेपे सुदुष्करम्।
निराहारो मुनिस्तत्र वर्षमेकमतन्द्रितः॥
मार्कण्डेयपुराणोक्तमरणासन्नदिने तत्र महामतिः।
स्नात्वा यथोक्तविधिना कृत्वा विष्णोश्चार्च्चनम्॥
हृदि कृत्वेन्द्रियग्रामं विष्णुध्येनान्तरात्मना।
आसनं स्वस्तिकं बद्ध्वा कृत्वासौ प्राणसंयमम्॥
ओंकारोच्चारणाद्धीमान् हृदि पद्मं विकाशयन्।
तन्मध्ये रविसोमाग्निमण्डलानि यथाक्रमम्॥
कल्पयित्वा हरेः पीठं तस्मिन्नेव समाहितः।
पीताम्बरधरं विष्णुं शङ्खचक्रगदाधरम्।
ब्रह्मरूपं हरिं ध्यायंस्तमो मन्त्रमुदीरयन्॥
इत्येवं ध्यायतस्तस्य मार्कण्डेयस्य धीमतः।
मनस्तस्मिन् संसक्तं देवदेवजगत्पतौ॥

ततो यमाज्ञयायत्तत्र आगता यमकिङ्कराः ।
पाशहस्तास्तु तं नेतुं विष्णुदूतेषु ते हताः ॥
सुबलेर्ह्यमाणास्ते दण्डहस्ता पुनः पुनः ।
वयं निहता गच्छामो ब्रह्मणोवाग्मिष्यति ॥
आगत्य सर्वमेवाच ब्रह्मणः पार्श्वे महाबलम् ।
मार्कण्डेयस्य वधाय विष्णुकिङ्करप्रहृया ॥
ते चाप्युद्गम्य सुबलान्यभयुर्विष्णुकिङ्कराः ।
विष्णाज्ञया वनिष्यामो ब्रह्मन्निति संस्थिताः ॥
ततो विष्णुर्पितमना मार्कण्डेयो महामतिः ।
तुष्टाव प्रणतो भूत्वा देवदेवं जनार्दनम् ।
विष्णुनैवोपदिष्टन्तु स्तोत्रं कर्णे महाबलम् ।
स्वभावितेन मनसा तेन तुष्टाव माधवम् ॥
ॐ नमो भगवते वासुदेवाय ।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम् ।
प्रणतोऽस्मि हृषीकेशं किमो ब्रह्मन् करिष्यति ॥
गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किमो ब्रह्मन् करिष्यति ॥
वासुदेवं जगद्योनिं भानुमन्तमतीन्द्रियम् ।
दामोदरं प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
शङ्खचक्रधरं देवं कृष्णरूपिणमव्ययम् ।
अधोक्षजं प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
नारसिंहं वामनं विष्णुं नारसिंहं जनार्दनम् ।
माधवञ्च प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
पुरुषं पुष्करं बीजं क्षेमबीजं जगत्पतिम् ।
लोकनाथं प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम् ।
विश्वरूपं प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
सहस्रशिरसं देवं शङ्खचक्रगदाधरम् ।
महायोगं प्रपन्नोऽस्मि किं मे ब्रह्मन् करिष्यति ॥
ब्रह्मणैरितमाकर्ण्य स्तोत्रं तव महात्मनः ।
अपयातस्ततो ब्रह्मन्विष्णुदूतैश्च पीडितः ॥
इति तेन जितो ब्रह्मन्मार्कण्डेयेन धीमता ।
प्रसन्ने पुष्करीकाक्षे दुर्लभं नास्ति दुर्लभम् ॥
ब्रह्मन्नष्टकमिदं पुण्यं ब्रह्मप्रश्नमनं शुभम् ।
मार्कण्डेयहितार्थाय स्वयं विष्णुश्चकार च ॥"

श्रीभगवानुवाच ।

"य इदं पठते भक्त्या त्रिकालं नियतः शुचिः ।
नाकाले तस्य ब्रह्मन् स्यान्मरणाच्युतचेतसः ॥"

व्यास उवाच ।

"शङ्खपद्मगदे पुण्ये पुराणं
नारायणं शाश्वतमादिदेवम् ।
सञ्चिन्त्य सूर्य्यादपि राजमानो
ब्रह्मं स योगी जितवांस्तदैव ॥"

इति नारसिंहपुराणे मार्कण्डेयब्रह्मस्तवो नाम ७ अध्यायः ॥ (मार्कण्डेयेन प्रोक्तम् । मार्कण्डेय + अण् । पुराणविशेषः । यथा, देवीभागवते । १ । ३ । १—३ ।

"ब्रह्मन्तु संप्रवक्ष्यामि पुराणानि मुनीश्वराः ।"

इत्यारभ्य—

तथा ब्रह्मसहस्रन्तु मार्कण्डेयं महाद्भुतम् ॥")

मार्करः, पुं, भृङ्गराजः । इत्यमरः । २ । ४ । १५१ ।

मार्कवः, मर्कति केशरञ्जनार्थं गच्छति मर्कवः ।

मर्के सर्वे भवीति अवः निपातनाद्वृद्धिः ।
मार्कवोऽन्तःस्थचतुर्थान्तः मर्केवैद्यादिलाङ्गः
पृषोदरादित्वादागमो दीर्घश्चेति परेण साधितत्वात् । (यथा, सुश्रुते चिकित्सास्थाने । १०अ० ।
"स्याच्मार्कवस्य च दर्शेन निद्रानि तेजं
नाशो कफानिलक्षतामपत्यौ व्रणांश्च ।")
मार्कवो रेफान्त इति केचित् । इति तट्टीकायां भरतः ॥ (अथानयोः पर्य्यायो यथा,—
"भृङ्गराजः केशराजो भृङ्गः पत्रङ्गमार्कवम् ।
इति वैद्यकरत्नमालायाम् ॥
भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एवच ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
मार्कवः केशराजश्च भृङ्गराजो निगद्यते ।"
इति गारुडे ३८ाधिकद्विशततमेऽध्याये ॥)

मार्ग, क संस्कारे । सर्पणे । इति कविकल्पद्रुमः ॥ (चु०-पर०-सक०-सेट् ।) क मार्गयति । इति दुर्गादासः ॥

मार्ग कि अन्वेषे । इति कविकल्पद्रुमः ॥ (चु०-पक्षे भ्वा०-पर०-सक०-सेट् ।) अन्वेषः प्रतिसन्धानम् । कि मार्गयति मार्गति गुणं गुणी । मार्गणा हे देहभावानित्यात्मनेपदं गत्वतानित्यत्वात् । इति दुर्गादासः ॥

मार्गः, पुं, (मार्ग्यते संस्क्रियते पादेन ब्रह्मते गमनायान्विष्यते इति वा । मार्ग वा ब्रह्म + + घञ् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ तत्परिमाणं यथा,—
"चिंशद्धनूंषि विज्ञेयो देशमार्गस्तु तैः शतः ।
विंशद्धनुर्ग्रामपथः सीमामार्गो दशैव तु ॥
धनूंषि दशविज्ञेयः श्रीमान्राजपथः शतः ।
वृषाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शास्त्रारण्यास्तु निर्मिताः ।
त्रिकराश्चोपरण्यास्तु द्विकाण्युपरथाश्च ।
अङ्गापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
द्वौपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ॥
अवकरः परिवारः पादमात्रः समन्ततः ।
प्रावृट्काले तु प्रावृत्ती कर्त्तव्या अन्यथा क्वचित् ॥
इति देवीपुराणे त्रैलोक्याभ्युदये गोपुरद्वारलक्षणाध्यायः ॥*॥ (यथा, महाभारते । १ । ६० । १७ ।
"एका बालाभिभिन्ना च मार्गाणामतथोचिता ।
क्षुत्पिपासापरीताङ्गी दुष्करं यदि जीवति ॥")
गुदम् । तत्पर्य्यायः । पायुः २ तनुरुहः ३ । इति त्रिकाण्डशेषः ॥ अपानम् ४ । इत्यमरः । २ । ६ । ७३ ॥ ब्रह्मगदः । (ब्रह्मस्येदम् । ब्रह्म + अण् । ब्रह्मसम्बन्धिनि, त्रि । यथा, सुश्रुते । शारीरे ३ अः ।
"मार्गाङ्गिक्रान्तजन्तूनां सदा वनचरं सुतम् ।"
यथा च मार्कण्डेये । ३८ । १७ ॥
"तद्वन्यं सलिलं तात सदेव पिल्लकर्मणि ।
मार्गमाविकमौद्रञ्च सर्वमेकशफञ्च यत् ॥"
(ब्रह्मो ब्रह्मगिरात्मदृयुक्ता पौर्णमासश्च ।

ब्रह्म + अण् ।) मार्गशीर्षमासः । अन्वेषणम् । इति मेदिनी ॥ गे, १७ । ब्रह्मशिरो नक्षत्रम् । इति हेमचन्द्रः ॥ विष्णुः । इति तस्य सहस्रनाम स्तोत्रम् ॥ (यथा, ब्रह्माभारते । १३ । १४८ । ५३ ।
"विश्वरो रोहिती मार्गो हेतुर्दामोदरः सहः ॥")

मार्गकः, पुं, (मार्ग । स्वार्थे कन् ।) अन्वेषणमासः । इति शब्दमाला ॥

मार्गणं, क्ली, (मार्ग्यते अन्विष्यत इति । मार्ग + भावे ल्युट् ।) अन्वेषणम् । तत्पर्य्यायः । याच्ञा २ विचयनम् ३ ब्रह्मणा ४ ब्रह्मः ५ इत्यमरः । ३ । २ । ३० ॥ याच्ञा । इति मेदिनी ॥ णे, ७१ । प्रणयः । इति जटाधरः ॥ (मार्गयतीति । मार्ग + ल्युः ।) याचके, त्रि । इत्यमरः । ३ । १ । ४६ ॥

मार्गणः, पुं, (मार्गयति ब्रह्मयमिति । मार्ग + ल्युः ।) शरः । इत्यमरः । २ । ८ । ८७ ॥ यथा, महाभारते । ६ । ११५ । ४४ ।
"ते सर्वे ब्रह्मधन्वानः संयुगेष्वपलायिनः ।
बहुधा भीष्ममाच्छुर्मार्गणैः क्षतमार्गणैः ॥
मार्गयति धनाद्यं दातारमिति । मार्ग + ल्युः ।) याचकः । इति मेदिनी । णे, ७१ ॥

मार्गणकः, पुं, (मार्गण + स्वार्थे कन् ।) याचकः । इति हलायुधः ॥

मार्गणेयुः, पुं, (मार्गस्य इयुः परिमाणम् ।) योजनपरिमाणम् । इति शब्दमाला ॥

मार्गणेयुकं, क्ली, (मार्गणेयु + स्वार्थे कन् ।) योजनम् । इति त्रिकाण्डशेषः ॥

मार्गपाली, स्त्री, (मार्गं पालयति क्षिप्तेभ्यो रक्षतीति । पाल + अच् । गौरादित्वात् ङीष् ।) खलः । यथा,
"ततोऽपराह्णसमये पूर्व्वस्यां दिशि नारद ! ।
मार्गपाली प्रवधीयाद्गोस्तम्भे च पादपे ॥
कृष्णकाण्डमयैर्दिव्यैः संस्कारैर्बहुभिर्मुदा ।
भूषयित्वा गजानश्वान्कुमाद्यैः संयुतान् ॥
गोदधान् महिषांश्चैव चतुष्टाभरणभूषितान् ।
भैरीमृदङ्गपटहवादित्रध्वनिनादितान् ।
तस्याः स्थाने नयेत् सायं ब्राह्मणपाठादि-
मङ्गलैः ॥
मार्गपालि नमस्तुभ्यं सर्व्वलोकप्रवर्द्धिके ।
तस्मे तव सुखेनाद्य गजा गावः प्रयान्तु मे ॥
राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ।
मार्गपालीं समासाद्य वार्त्ता: स्युश्च सदैव हि ॥
ततो गावश्च संपूज्या गन्धपुष्पादिभिः क्रमात् ।
आत्मनः श्रेयसे भूप इति पूजां करोति हि ॥
अद्यतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे सर्व्वतः सन्तु गवां मध्ये वसाम्यहम् ॥
या लक्ष्मीर्लोकपालानां धेनुरूपेण संस्थिता ।
क्षीरं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
या कामधेनुर्भुवने च विप्रो-
र्या कामधेनुर्यमदग्निगेहे ।
या सौरभेयी तु वसिष्ठगेहे
सा कामधेनुर्वरदा ममास्तु ॥

ज्ञलेनतु सर्वमाप्नुह्याद्राची देवपतिर्यतेः।
पूजां ज्ञात्वा ततः पश्चात् सध्यमुद्धृत्य समारभेत्।"
इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये १२४ अध्यायः॥

मार्गशिरः, पुं, (मृगशिरानक्षत्रयुक्ता पौर्णमास्यत्र। मृगशिरा+अण्।) मार्गशीर्षमासः। इति शब्दरत्नावली। (यथा, भागवते। ६। १८। २।
"शुक्ले मार्गशिरे पक्षे योविल्वैस्तुलसीदलैः।
आरभेत व्रतमिदं सर्व्वकामिकमादितः॥")

मार्गशीर्षः, पुं, (मार्गशीर्षी+अण्।) अग्रहायणमासः। मृगशीर्षेण युक्ता पौर्णमासी मार्गशीर्षी यस्मिन् मासे भवति मार्गशीर्षः। अण्। इत्यमरटीकायां भरतः॥ तत्पर्य्यायः। सहा २ मार्गः ३ आग्रहायणिकः ४। इत्यमरः। १। ४। १७॥ मार्गशिरः ५ सहः ६। इति शब्दरत्नावली॥ कृत्तिकानक्षत्रविशारभ्य मृगप्रतिपदादिदर्शान्तोऽयं सौम्यचान्द्रः। एतदनुसारेण चान्द्रमासीयपौर्णमास्यन्तः अयं गौणचान्द्रः। कृत्तिकाराशिरविकोऽयं सौरः। इति स्मृतिः॥ * ॥ तत्र ज्ञातव्यम्।
"यस्य प्रकृतिः खलु मार्गमासे
तीर्थे प्रयासे सततं मतिः स्यात्।
परोपकारी धृतसाधुवृत्तिः
सद्वृत्तियुक्तो खलनाभिलाषी॥"
इति कोष्ठीप्रदीपः॥*॥
(तथास्य विधयः॥ कार्त्तिकमार्गशीर्षौ व्रतम्। इति सुप्तते सूत्रस्थाने षष्ठेऽध्याये॥)

अथ मार्गशीर्षलक्षणम्।
आश्विनशुक्लपक्षे नवान्नश्राद्धाकरणे मार्गशीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्यन्तरे शुक्लपक्षे तत् श्राद्धं कर्त्तव्यम्। तत्र मार्गशीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयेतरेषु कृष्णचतुर्दशीवारेतरेषु नन्दारिक्ताव्ययोदशीतरतिथिषु जन्माष्टमचन्द्रजन्मतिथिजन्मनक्षत्रत्रयपञ्चमनाराधयेतरेषु पूर्व्वान्वयमघाभरण्यश्लेषार्द्रेतरेषु नक्षत्रेषु श्राद्धं नक्षत्रेषभोजनञ्च कुर्य्यात्। श्राद्धानधिकारिणा तु प्रागुक्तकाले देवादिभ्यो नवान्नं दत्त्वा भोक्तव्यम्। किन्तु अश्वयुक्शुक्लाष्टम्यादिपूर्व्वभाद्रपदकृष्णे अपि नवान्नभोजनं न कर्त्तव्यम्। चन्द्रसाराद्यशुद्धौ प्रतीकारमाह देवलः।
"कर्म्म कुर्य्यात् पलाशेन पञ्चाहिंसीभवे बुधः।
सुस्थकाले त्विदं सर्व्वं नार्म्मः कालमपेक्षते॥
चन्द्रे च ग्रहं जयञ्च तारे
तिथावभद्रे वितनक्षुलाभे।
धान्यञ्च दद्यात् करणर्क्षवारे
योगे सिद्धान् हेममणिञ्च लग्ने॥
राजमार्त्तण्डे तारामेदान्नवज्ञपरिमाणमाह।
"एकत्रिपञ्चसप्त च द्विनाथ दद्यात् पलानि
जयञ्च।
क्रमशो जन्मविपत्प्रत्यरिमरणाक्षतारासु॥
प्रवदन्ति लौकिकेमार्गे: वास्तवन्तिथिमादृतम्।
तोलक्षत्रियं ज्ञेयं ज्योतिर्विद्भिः क्षुतिसम्मतम्॥
तत एवं दध्याज्यसंयुक्तं नवं विप्राभिमन्त्रितम्।
मन्त्रमाहेदं गायत्रीति गायत्राभिमन्त्रितम्॥
नवमन्नं ब्राह्मणानुज्ञां गृहीत्वा प्राश्नीयात्।
नूतनधान्यासम्भवे पुरातनेनापि श्राद्धं कर्त्तव्यम्।
दक्षिणे शुक्लपक्षे तत्करणे हरिशयनात् पूर्व्वं मीनधनुस्थरवौतरत्र माघादौ कर्त्तव्यम्॥*॥
वृश्चिकस्थरवौ शुक्लचतुर्दश्यां सौभाग्यकामः पाषाणाकारपिष्टकैर्द्वौ पूजयेत् तदपि भक्षयेदुक्तम्॥*॥ अग्रहायण्यां पौर्णमास्यां पार्व्वणविधिना श्राद्धमावश्यकम्॥*॥ भविष्यपुराणे।
"दोहित्रेण प्रतिपदयुक्ता मार्गे माघि सितेतरा।
गङ्गायां यदि लभ्येत कुर्य्यन्नरकगतेः क्षमा॥"
इति ज्ञानतत्त्वम्॥
(स्त्रियां आग्रहायणी पूर्णिमा। यथा, महाभारते। ३। ८३। २६।
"मार्गशीर्ष्यामतीतायां पुष्येण प्रयुक्तः॥")

मार्गिकः, त्रि, (मृगान् हन्तीति। मृग+"पत्तिमात्यहस्तिमृगान् हन्ति।"४।४।३५। इति ठक्।) मृगहन्ता। (मार्गो गन्त्यनेनास्यास्त। ठन्।) पथिकः। इति सिद्धान्तकौमुदी॥

मार्गितं, त्रि, (मार्ग अन्वेषणे+क्तः।) अन्वेषितम्। इत्यमरः। ३। १। १०५॥

मार्ग्यं, त्रि, (मृज्यते इति। मृज्+"मृजेर्विभाषा।" ३। १। ११३। इति यत्। वृद्धिश्च। "चजोः कुघिण्ण्यतोः।"७। ३। ५२। इति कुत्वम्।) मार्ज्जनीयम्। इति सिद्धान्तकौमुदी॥ (यथा, भट्टिकाव्ये। ६। ५६।
"मनुष्यस्य त्वया मार्ग्यो मृग्यः श्लोकश्च
तेन ते।")
अन्वेषणीयश्च॥

मार्ज्ज क मार्ज्जने। अनौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क मार्ज्जयति। इति दुर्गादासः॥

मार्ज्जः, पुं, (मार्ज्जयति पापमलं प्रक्षाल्य उद्धरति जनानिति। मार्ज्ज+घिञ्+अच्।) विष्णुः। इति हेमचन्द्रः। २। ४४॥ (मार्ज्जयति वसनमलमिति। मार्ज्ज+अच्।) रजकः। इति शब्दमाला॥ मार्जनम्। इत्यमरटीकायां भरतः॥

मार्ज्जनं, क्ली, (मार्ज्ज्यते इति। मार्ज्ज्+भावे ल्युट्।) प्रोक्षणादिना अङ्गनिर्म्मलीकरणम्। माजा इति भाषा। तत्पर्य्यायः। मार्ष्टिः २ मार्ष्टी ३ मार्ज्जना ४ मृजा ५। इति शब्दरत्नावली। मार्ज्जः ६ मार्ज्जा ७। इत्यमरटीकायां भरतः॥ (यथा, श्रीमद्भागवते। ८। ४। १८।
"स वै मनः कृष्णपदारविन्दयो
र्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्म्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये॥")

जानकाये शरीरमार्ज्जनयुक्ता:।
"दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम्।
खेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम्॥
इति राजवल्लभः॥

देवीपुराणोक्तमार्ज्जनफलं यथा,—
"देवीं यजन्तु यः शुक्ल! संमार्ज्जयति निश्चयः।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः॥
देवीं यजन्तु यः शुक्ल! गोमयेनानुलेपयेत्।
स्त्रियो वा यदि वा पुंसः सर्व्वान्कामान् निरन्तरम्।
स लभेदीप्सितान् कामान् देवीं लोकञ्च
गच्छति।"
इति देवीपुराणे ४९ अध्यायः॥

अथ भगवन्मन्दिरमार्ज्जनमाहात्म्यम्।
"नरसिंहयुगे नित्यं यः संमार्ज्जनमाचरेत्।
समस्तपापनिर्मुक्तो विष्णुलोके स मोदते॥"
इति वृद्धिंहपुराणम्॥
"संमार्ज्जनन्तु यः कुर्य्यात् पुरुषः केशवालये।
रजस्तमोभ्यां निर्म्मुक्तः स भवेन्नात्र संशयः॥
पांसूनां यावतां राजन्! कुर्य्यात् संमार्ज्जनं
नरः।
तावत्सहस्राणि स सुखी नाकमाक्रम्य मोदते॥"
इति विष्णुधर्म्मोत्तरम्॥
"यावत्कानि प्रवाहाणि भूमिसंमार्ज्जने दृढः।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वितः।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्जितः॥
ततो भुक्त्वा सर्व्वभोगान् तीर्त्वा संसारसागरम्।
शाकद्वीपात् परिभ्रष्टः स्वर्गलोकं स गच्छति॥
तत्रत्यं वनमाश्रित्य मोदते चाप्सरैः सह।
तत्रत्यान् परिभोगान् मम कर्म्मक्षयस्थितः।
सर्व्वसङ्गात् परित्यज्य मम लोकन्तु गच्छति॥"
इति वराहपुराणम्॥*॥

ज्ञानविशेषः। यथा। आसुरात्यात्मु।
"अग्निरक्तं भवेत् ज्ञानं ज्ञानाग्नौ तु
कल्मिषाम्।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः॥"
इति जाबालवचनाच्छरीरं विहाय मात्मप्रक्षालनं तदुक्तौ सर्व्वगात्रमार्ज्जनं आर्द्रेण वाससा कुर्य्यात्। इत्यात्मिकाचारतत्त्वम्॥*॥ वैदिकसन्ध्योपासनाङ्गतमार्ज्जनं यथा। छन्दोगपरिशिष्टम्।
"शिरसो मार्ज्जनं कुर्य्यात् कुशैः सोदकबिन्दुभिः।
प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयिका॥
अन्वेवं ऋचश्चैव चतुर्थमिति मार्ज्जनम्॥"
ओङ्कारो भूरादिव्याहृतित्रयं तिसृणां च गायत्री चतुर्थमापोहिष्ठेति ऋक्त्रयम्। इतीदं मार्ज्जनं मार्ज्जनक्रियाकरणमित्यर्थः। रामायणम्।
"जलान्ते मार्ज्जनं कुर्य्यात् पादान्ते वा समाहितः।
आपोहिष्ठेत्यृचा कार्य्यं मार्ज्जनन्तु कुशोदकैः॥
प्रतिप्रणवसंयुक्तं शिरस्यद्भिर्मुदं पदे।
ऋचस्यान्ते ऽथवा कुर्य्याद्धीरो मतमोहनम्।

आपोऽधिदेवतिस्तस्य विष्णुर्द्वीप ऋषिः स्मृतः।
आपो वै देवता च्छन्दो गायत्री मार्जनं
स्मृतम्॥"
इत्याह्निकाचारतत्त्वम्॥

मार्ज्जनः, पुं, (मार्ज्यतेऽनेनेति। मार्ज्ज+ल्युट्।) लोध्रवृक्षः। इत्यमरः। २। ४। ६२॥ श्वेतलोध्रः। इति सुभूतिः॥ रक्तलोध्रः। इति स्वामी॥

मार्जना, स्त्री, (मार्ज्यत इति। मार्ज्ज+भावे युच्।) मार्जनम्। इत्यमरः। २। ६। १२१॥ सुरजश्चनिः। इति हेमचन्द्रः। ३। ३००॥

मार्जनी, स्त्री, (मार्ज्यते अनयेति। मार्ज्ज+करणे ल्युट्+स्त्रियां ङीप्।) सम्मार्जनी। झाँटा इति भाषा। यथा,—
"नमामि शीतलां देवीं रासभस्थां दिगम्बरीम्।
मार्जनीकलसोपेतां शूर्पालङ्कृतमस्तकाम्॥"
इति स्कान्दे शीतलाष्टोत्तरम्॥

मार्जनीयः, त्रि, (मार्ज्यते इति। मृज्+अनीयर्।) मार्जनयोग्यः। मार्ज्यः॥ इति मृजधातोः कर्म्मण्यनीयप्रत्ययेन निष्पन्नः। अग्निः। शोधनम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मार्जारः, पुं, (मृज्+"कञ्क्रीदञ्जिभ्यां चित्।" उणा० ३। १३७। इति आरन् चित्। "मृजेर्वृद्धिः।" इत्युज्ज्वलदत्तोक्तेर्वृद्धिश्च।) रक्तचित्रकः। इति राजनिर्घण्टः॥ विड़ालः। इत्यमरः। २। ५। ६॥ (यथा, महाभारते। ५। १५६। १६।
"मार्ज्जारः किल दुष्टात्मा निषेद्यः सर्व्वकर्म्मसु॥")
खट्टासः। इति हेमचन्द्रः। ४। ३६७॥ *॥
मार्जारस्यार्थे दोषो यथा,—
"अभोज्यशूनिकाघस्रमार्जारास्त्रुच्च कुक्कुरान्।
पतितापविद्धचण्डालसूतिहारांश्च धर्म्मवित्।
संस्पृश्य शुध्यते स्नानादुदक्यायाममूकरौ॥"
इति मार्कण्डेयपुराणे सदाचाराध्यायः॥ *॥
पारिभाषिकमार्जारो यथा,—
"दम्भार्थं जपते यश्च तप्यते यजते तथा।
न परत्रार्थसंयुक्तो मार्जारः परिकीर्त्तितः॥"
तस्यान्नमभोज्यं यथा,—
'अभोज्याः शूनिकाघस्रमार्जारास्त्रुच्चकुक्कुटाः॥'
इति वामनपुराणे १५ अध्यायः॥

मार्जारकः, पुं, (मृज्+आरन् वृद्धिश्च। "संज्ञायां कन्।" ५। ३। १४७। इति कन् च।) मयूरः। इति त्रिकाण्डशेषः॥ (मार्जार+स्वार्थे कन्। विड़ालः। यथा, महाभारते। १। २३३। २४।
"इमे मार्ज्जारकाः शुक्र! नित्यमुद्वेजयन्ति नः॥")

मार्जारकण्डः, पुं, (मार्ज्जारस्येव कण्डः कण्डूरो यस्य। यद्वा, मार्ज्जारो मस्तकः कण्डो यस्य।) मयूरः। इति शब्दरत्नावली॥

मार्जारकर्णिका, स्त्री, (मार्ज्जारस्य कर्णौ इव कर्णौ यस्याः। स्त्रियां ङीप् स्वार्थे कन्। टाप् पूर्व्वस्य ह्रस्वश्च।) चासुका। यथा,—
"चासुका चर्चिका चर्म्मसुका मार्जारकर्णिका॥"
इति हेमचन्द्रः॥

मार्जारकर्णी, स्त्री, मार्ज्जारस्येव कर्णावस्याः। ङीप्। चासुका। यथा,—
"मार्जारकर्णी चासुका कर्णमोटिश्च चर्चिका॥"
इति त्रिकाण्डशेषः॥

मार्जारगन्धा, स्त्री, (मार्ज्जारस्येव गन्धोऽस्याः।) सुरपर्णीविशेषः। इति रत्नमाला॥

मार्जारगन्धिका, स्त्री, (मार्ज्जारगन्ध। कन्। टाप्। अत इत्वञ्च।) सुरपर्णी। इति राजनिर्घण्टः॥ (तथास्याः पर्य्यायः।
"सुरपर्णी काकपर्णी सूर्य्यपर्य्यायिका सहा।
काकसुङ्गा च सा प्रोक्ता तथा मार्जारगन्धिका॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मार्जारी, स्त्री, (मार्ज्जं शोधयति केशादिकमनया। मृज्+आरन्। स्त्रियां ङीष्।) कस्तूरी। जन्तुविशेषः। गन्धगजुला इति खाटाशी इति च भाषा। तत्पर्य्यायः। पूतिका २ पूतिकणः ३ गन्धचेलिका ४। अस्या गुणाः। वातनिधारकत्वम्। चक्षुष्यत्वम्। कफवातनाशित्वञ्च। इति राजनिर्घण्टः॥

मार्जारीयः, पुं, (मार्ज्जारस्यायम्। मार्जार+"गर्गादिभ्यश्च।" ४। १। १०५। इति ढक्।) विड़ालः। सूदः। कायशोधनम्। इति मेदिनी। ये, १२७॥

मार्जालः, पुं, मार्जारः। रलयोरैक्यात्॥

मार्जालीयः, पुं, (मृज्+"स्याच्चतिमृजेरालच् बालमालीयच्च।" उणा० २। ११५। इति आलीयच्।) विड़ालः। सूदः। कायशोधनम्। इति हेमचन्द्रः॥ (महादेवः। यथा, महाभारते। १३। १६। ७७।
"ललाटाक्षाय सर्व्वाय मीढुषे शूलपाणये।
पिनाकगोप्त्रे त्र्यम्बाय मार्जालीयाय वेधसे॥")

मार्जिता, स्त्री, (मार्ज्यते दृश्यते पापिनेति। मृज्+णिच्+कर्म्मणि क्तः। स्त्रियां टाप्।) रसाला। इत्यमरः। २। ६। ४४॥ सा तु दधिखण्डमधुसर्पिर्मरिचादिलसत्कर्पूरादिवासितसद्भक्ष्यविशेषः। इत्यमरटीकायां भरतः॥ (गुणादयोऽस्या रसालाशब्दे ज्ञातव्याः॥) शोधिते, त्रि॥

मार्त्तण्डः, पुं, (मृतमण्डमसौ अण्डमिति। मृताण्डे भवतीति। मृताण्ड+"तत्र भवः।" ४। ३। ५३। इति अण्।) सूर्य्यः। (तन्निरुक्तिश्च। यथा,—
"अनिष्पन्नेषु गर्भेषु पुत्रं दृष्ट्वा पितामहः।
आर्त्तण्डं भव माण्डेति मार्त्तण्डस्तेन संस्मृतः॥"
यथा, मार्कण्डेये। ७७। १।
"मार्त्तण्डस्य रवेर्भार्य्या तनया विश्वकर्म्मणः।
संज्ञा नाम महाभाग तस्यां भानुरजीजनत्॥"
अर्कवृक्षः। इत्यमरः॥ शूकरः। इति मेदिनी। ते, ३५॥ मार्त्तण्डोत्पत्तिर्यथा,—

मार्कण्डेय उवाच।
"दृष्ट्वा सा नियता देवी चक्रे क्षौमसहर्षिणम्।
निराहारा विवस्वन्तमाराधयितुमुद्यते!॥
ततः कालेन महता भगवांस्तपनो मुने!।
प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तम!॥
स दृदर्श महाजूटं तेजसोऽम्बरसंस्थितम्।
भूमौ च संस्थितं भास्वज्ज्वालामालातिदुर्ग्रहम्॥
तञ्च दृष्ट्वा ततो देवी साध्वसं परमं गता।
जगादाद्य! प्रसीदेति न त्वां पश्यामि गोपते!॥
यथा दृश्यसे पूर्व्वमम्बरस्थं सुदुर्ग्रहम्।
संघातं तेजसस्तस्मादिह पश्यामि भूतले॥
प्रसादं कुरु पश्येयं यद्रूपं ते प्रभाकर!।
भक्तानुकम्पन! विभो! भक्तार्त्तं पाहि मे सुतान्॥"

श्रीमार्कण्डेय उवाच।
"ततः स तेजसस्तस्मादाविर्भूतो विभावसुः।
अदृश्यत तदादित्यस्तप्ताब्जोपमप्रभः॥
अथ तां प्रणतां देवीं तस्य चन्द्रार्द्धधारिणः।
प्राह भास्वान् दृशुश्लेष्टं वरं मत्तो यमिच्छसि॥
प्रणता शिरसा सा च जानुपीड़ितमेदिनी।
प्रत्युवाच विवस्वन्तं वरं सम्प्रार्थितम्॥
देव! प्रसीद पुत्राणां क्षन्तं मिश्रवणं मम।
यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः॥
तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते!।
अंशेन तेषां साहाय्यं गत्वा नाशय तद्रिपून्॥
यथा मे तनया भूयो यज्ञभागभुजः प्रभो!।
भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर!॥
तथानुकम्यां पुत्राणां सुप्रसन्नो रवे! मम।
कुरु प्रसन्नार्त्तिहर! स्थितिकर्त्ता त्वमद्य मे॥"

मार्कण्डेय उवाच।
"ततस्तामाह भगवान् भास्करो वारितस्करः।
प्रणतामदितिं विप्र! प्रसादसुमुखो विभुः॥
सहस्रांशेन ते गर्भं सम्भूयाहमपीश्वरि!।
तनूजन्मचनर्दित्ते! नाशयाम्याशु निर्हृता॥
इत्युक्ता भगवान् भास्वानन्तर्द्धानमुपागमत्।
निवृत्ता सापि तपसः संप्राप्ताखिलवाञ्छिता॥
ततो दधिसहस्रान्नः सुषुम्नाख्यो रवेः करः।
विप्रावतारं संचक्रे देवमातुरथोदरे॥
जन्मक्षत्राब्दायनादीनि सा चक्रे सुसमाहिता।
शुचिः सत्यारयान्येन दिव्यं गर्भमिति द्विज!॥
ततस्तां कश्यपः प्राह किञ्चित्कोपमुपाश्चरम्।
किं मारयसि गर्भाङ्कमिति निर्व्योपवासिनीं॥
सा च तं प्राह गर्भाङ्कमेतत् पश्येति कोपना।
न मारितं विपद्यायां जन्तवे यद्भविष्यति॥
इत्युक्ता तं तदा गर्भसुतसत्त्वं सुरारणिः।
जाज्वल्यमानं तेजोभिः प्रत्युवाच न कोपिता।
तं दृष्ट्वा कश्यपो गर्भसुतद्वाक्सरघर्षसम्।
तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात्॥
संस्तूयमानः स तदा गर्भाद्भात् प्रकटोऽभवत्।
पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः॥
अथान्तरीक्षादाभाष्य कश्यपं मुनिसत्तमम्।
सतोयमेघगम्भीरो वागुवाचाशरीरिणी॥

मारितश्च यतः प्रोक्तमेतदस्मै मयादितिम् ॥
तस्मात्त्वमुने! सुतस्तेऽयं मार्तण्डाख्यो भविष्यति ॥
सूर्याधिकारञ्च विभुर्भगवांश्च करिष्यति ।
इत्युक्त्वासुरांचार्यं यज्ञभागहरानरीन् ॥
देवा निर्मुच्यतेति वचो गगनात् समुपागतम् ।
प्रहर्षमतुलं याता दानवाश्च हतौजसः ॥
ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ।
सह देवैर्मुदायुक्तो दानवाश्च समाययुः ॥
तेषां युद्धमभूद्घोरं देवानामसुरैः सह ।
ग्रस्ताखण्डोग्रसप्तद्वीपसमस्तभुवनान्तरम् ॥
तस्मिन् युद्धे भगवता मार्तण्डेन निरीक्षिताः ।
तेजसा दह्यमानास्तु भस्मीभूता महासुराः ॥
ततः प्रहर्षमतुलं प्रापुः सर्वे दिवौकसः ॥
तुष्टुवुस्तेजसां योनिं मार्तण्डमदितिस्तथा ॥
स्वाधिकारं ततः प्राप्य सूर्यश्च भगवांश्च पूर्ववत् ।
भगवानपि मार्तण्डः स्वाधिकारमथाकरोत् ॥
कदम्बपुष्पवद्ग्लानघर्मोर्द्धं रश्मिभिः ।
वृतोऽभिपिङ्गसद्वर्णो दधे नातिस्फुटं वपुः ॥"

इति मार्कण्डेयपुराणे सूर्यमाहात्म्ये मार्तण्डोत्पत्तिनामाध्यायः ॥

मार्तण्डवल्लभा, स्त्री, (मार्तण्डस्य वल्लभा प्रिया । यद्वा, मार्तण्डो वल्लभः प्रियोऽस्याः ।) आदित्यभक्ता । इति राजनिर्घण्टः ॥ सूर्यपत्नी च ॥

मार्त्तिकः, पुं, (मृत्तिकाया विकार इति । मृत्तिका + "तस्य विकारः ।" ४ । ३ । १३४ । इति ठक् ।) घृतादयः । इति शब्दरत्नावली ॥ मृत्तिकानिर्म्मिते, त्रि ॥

मार्दङ्गं, क्ली, (मृदङ्ग अङ्गमस्य । ततः स्वार्थे अण् ।) पत्तनम् । इति हारावली ॥ (मृदङ्गवादनं शिल्पमस्येति । अण् ।) मृदङ्गवादके, त्रि ॥

मार्दङ्गिकः, त्रि, (मृदङ्गवादनं शिल्पमस्य । मृदङ्ग + "शिल्पम् ।" ४ । ४ । ५५ । इति ठक् ।) मृदङ्गवादकः । तत्पर्य्यायः । मौरजिकः २ । इत्यमरः । २ । १० । १२ ॥ सार्द्धिकः ३ और्द्धिकः ४ । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ६१ । ४६ ।

"विक्रया मार्दङ्गिका आसंश्चर्म्मव्यायाच्च विभीतकाः ।
अश्वत्था गर्गकाश्चासन् भरद्वाजस्य तेजसा ॥")

मार्दवं, क्ली, (मृदोर्भाव इति । मृदु + "पृथ्वादिभ्य इमनिज् वा ।" ५ । १ । १२२ । इत्यत्र । "वावचनमज्ञादेः समावेशार्थम् ।" इति काशिकोक्तेरण् ।) परदुःखप्रदर्शनात् पीड़ानुद्वृत्तिः । मृदुता । यथा,—

"मार्दवं कोमलस्यापि संसर्गात्सहतोच्यते ।
उत्तमं मध्यमं प्रोक्तं कनिष्ठञ्चेति तत्त्रिधा ॥"

उत्तमं यथा,—

"अभिनवमालिकामियं साधय-
नवपरिग्रहाधिका विभूतिस्ते ।
न कुसुमपटलं दरापि जन्तौ
तदनुभवात्तनुरेव सम्प्रयासीत् ॥"

मध्यमं यथा,—

"चित्रं धनिष्ठे तनुवाससोऽपि
चीनस्य शीनत्वमि ! सङ्गमेव ।
लिप्तेन तल्लोहितचन्दनेन
मूर्त्तिर्दिदृक्षा सखि ! लोहितासीत् ॥"

कनिष्ठं यथा,—

रससुधाकरे आमोदमामोदन-
मादधानं जिनीवनीलालकचञ्चरीकम् ।
क्षणेन पद्मात्सखपद्ममासीत्
लिखा रवेः कोमलयापि ताम्रम् ॥"

इत्युज्ज्वलनीलमणिः ॥

(अकाट्यत्वम् । यथा, रघौ । ८ । ४३ ।

"विललाप सवाष्पगद्गदं
सहजामप्यपहाय धीरताम् ।
अभिनन्दनमप्यहो मार्दवं
भजते कैव कथा शरीरिषु ॥")

मार्दवः, पुं, (मार्दवं मृदुत्वमस्यास्तीति । मार्दव + अर्श आद्यच् ।) वर्णसङ्करजातिविशेषः ।

"माधुको मार्दवश्चुक्कारघा छिप्पिकादयः ।"

इति जटाधरः ॥

मार्ग्गः, पुं, (मृज्यति शमयति जनानिति । मृज् + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । मृजः । ततः । स्वार्थे अण् ।) गवीश्वरः श्रेष्ठः । इति हेमचन्द्रः । २ । ७४ ॥ मारिषग्राकः । इत्यमरटीकायां भरतः ॥ (ग्राकार्थे पर्य्यायो यथा,—

"मारिषो वाप्यको मार्ग्गः श्वेतो रक्तश्च स स्मृतः ।"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

मार्ग्गिकः, पुं, (मार्ग्ग + ठक् ।) मारिषग्राकः । इति राजनिर्घण्टः ॥

मार्ज्जः, स्त्री, (मृज् + क्तिन् । "मृजेर्वृद्धिः ।" ७ । २ । ११४ । इति वृद्धिश्च ।) मार्जनम् । इत्यमरः । २ । ६ । १२१ ॥ तैलन्नयणम् । यथा,

"तैलमभ्यं यदङ्गेषु न भवेत् बाहुसङ्गतम् ।
सा मार्ज्जः पृथगभ्यङ्गो मल्लकादौ प्रकीर्त्तितः ॥"

इत्याह्निकतत्त्वम् ॥

मालं, क्ली, (माति मानहेतुर्भवतीति । मा + "कृञ्चेन्द्रायवरुणेत्यादि ।" उणा० २ । २८ । इति रक् । पृषोदरादित्वादस्य लत्वम् ।) क्षेत्रम् । इति मेदिनी ॥ ले, ४५ । (यथा, मेघदूते । १६ ।

"सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किञ्चित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥")

कपटम् । वनम् । इति हेमचन्द्रः ॥ (हरितालम् । यथा,—

"हरितालं तालमालं मालं शैलूषभूषणम् ।
पिञ्जकं रोमशरजं तालकं पालमित्यपि ॥"

इति वैद्यकरत्नसारसंग्रहे जारणमारणाद्यधिकारे ।)

मालः, पुं, (मालतीति । मा + रन् । रस्य लत्वम् ।) जातिविशेषः । इति मेदिनी ॥ ले, ४५ । स च म्लेच्छजातिः । यथा,— [जातयः ॥"

"माला भिल्लाः किरातास्च सर्व्वेऽपि म्लेच्छ-

(यथा, महाभारते । ६ । ८ । १६ ।

"सर्व्वे मे कुरुपाञ्चालाः प्राच्या माद्रेयकाञ्जलाः ।
शूरसेनाः पुलिन्दाश्च योधा मालास्तथैव च ॥")

जनः । इति च हेमचन्द्रः । ३ । ५८८ । देशविशेषः । स च मेदिनीपुरप्रदेशे मालभूमित्वेन ख्यातः । विष्णुः । यथा,—

'मां लक्ष्मीं लातीति मालो विष्णुः तं अनतीति मालती ।'

इति मालतीशब्दटीकायां भरतः ॥

मालकं, क्ली, (मलते धारयति शोभामिति । मलधारणे + ण्वुल् ।) स्रजपद्मम् । इति जटाधरः ॥

मालकः, पुं, (मलते धारयत्युत्तमवीर्य्ये रोगनाशने इति । मलधारणे + ण्वुल् ।) निम्बवृक्षः । इत्यमरः । २ । ४ । ६२ ॥ (निम्बशब्दोऽस्य विवरणं ज्ञातव्यम् ॥)

मालका, स्त्री, (मलते धारयति शोभाम् । मल + ण्वुल् । स्त्रियां टाप् ।) माल्यम् । इति शब्दरत्नावली ॥

मालकौशः, पुं, (मालस्य हरेः कोशात् कण्ठादिर्गत इति । अण् ।) रागविशेषः । तस्य नामान्तरं कौशिकः । स च कस्मिन्मते षड्रागाणां मध्ये द्वितीयरागः । हरस्य हरेर्वा कण्ठादिर्गतः । अस्य जातिः सम्पूर्णा तच्च सप्तस्वरकमः षड्जग्रामप्रभवः । अस्य गृहं षड्जस्वरः । प्रहरद्वयं रात्रिप्रथमे गानसमयः । रागमालायामस्य स्वरूपम् । पाटलवर्णपृथुः । नीलपरिच्छदः । यष्टिहस्तः । यौवनमदमत्तः स्त्रीभिः सह हास्यकौतुकान्वितः शुचुमल्लकमाल्यगलोऽथवा हरनूपुरमाल्यगलः । अस्य रागिण्यः पञ्च यथा । टोड़ी १ गौरी २ गुणकरी ३ खम्भावती ४ कोकभा ५ । अस्याष्टौ पुत्रा यथा । मारुः १ मेवाड़ः २ वङ्गहंसः ३ प्रबलः ४ चन्द्रकः ५ नन्दः ६ भ्रमरः ७ खुखरः ८ अत्र मिश्राङ्गोऽपि पाठः । भरतमते तस्य रागिण्यः पञ्च यथा । गौरी १ दयावती २ देवदासी ३ खम्भावती ४ कोकभा ५ । तस्यते अष्टौ पुत्रा यथा । गान्धारः १ शुद्धः २ मकरः ३ त्रिच्छलः ४ सङ्गालः ५ शुक्लवल्लभः ६ मालीगौरः ७ कामोदः ८ । अष्टपुत्रभार्य्या यथा । धनाश्रीः १ मालश्रीः २ जयतश्रीः ३ सुघोरायी ४ दुर्गा ५ गान्धारी ६ भीमपलाशी ७ कामोदी ८ । इति सङ्गीतशास्त्रम् ॥

मालचक्रकं, क्ली, (माला सञ्जातः अस्यामस्येति । अर्श आदित्वादच् । स चक्रमिवेति । कन् ।) सक्थ्यूरुपर्व्वसन्धिः । इति शब्दचन्द्रिका । मालाइचाकि इति भाषा ॥

मालती, स्त्री, (मलते शोभां धारयतीति । मल + "भृञ्जिधारिसहितनिभ्यः शतरि ।" उणा० २ । ११० । इत्यत्र "बाहुलकात् मलतेरतच् । गौरादिनिपातनाड्डुपधाया दीर्घत्वम् ।" इत्युज्ज्वलदत्तोक्तेः अतच् उपधाया दीर्घत्वम् ङीष् च । मां लक्ष्मीं

मालती

लातीति माली विष्णुः तं अतनोति । अण् । (अमरटीकायां भरतः ।) स्त्रीनामख्यातपुष्पलता । तत्पर्य्यायः । सुमना २ जातिः ३ । (अमरः । सुमनाः ४ जाती ५ । इति भरतः ॥ यथा, शिशुपालवधे । ११ । १७ ।

"त्वलयति मदनाग्निं मालतीनां रजोभिः ।")

अस्या गुणाः । कफपित्तसुखरोगव्रणकृमिमिक्तनाशित्वम् । इति राजवल्लभः ॥ तस्या उत्पत्तिर्यथा,—

आद्याशक्तिरुवाच ।

'अङ्गमेतत्त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः ॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ते च ता सुराः ॥

नारद उवाच ।

इत्युक्त्वामिति सा वाचमन्तर्द्धानमगाच्छिवः ।
देवाश्च विस्मयोत्फुल्लनेत्रास्तत्र तदा नृप ! ॥
ततः सर्व्वेऽपि ते देवा गत्वा तद्वाक्यचोदिताः ।
गौरीं लक्ष्मीं स्वधाञ्चैव प्रणेमुर्भक्तितत्पराः ॥
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः ।
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा ॥

देव्य ऊचुः ।

इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठति ।
निर्व्विघ्नञ्च ततः कार्य्यं भवतां सिद्धिमेष्यति ॥

नारद उवाच ।

ततः प्रहृष्टाः सुरसिद्धसंघाः
प्रगृह्य बीजानि विचिन्त्य पुष्पम् ।
विन्ध्याटिकाभूमितले च यत्र
विष्णुः सदा तिष्ठति सौख्यवृत्तिः ॥

नारद उवाच ।

तत्रैवस्तत्र बीजेभ्यो वनस्पत्यक्षयोऽभवत् ।
धात्री च मालती चैव तुलसी च कृपोत्तम ! ॥
धात्युद्भवा क्षुता धात्री माधवा मालती क्षुता ।
गौरीभवा च तुलसी रजःसत्त्वतमोगुणा ॥"

इति पाद्मे उत्तरखण्डे १४६।१५० अध्यायौ ॥*॥

युवती । काचमाली । विप्रकन्या । ज्योत्स्ना । निशा । नदीविशेषः । इति हेमचन्द्रः । ४ । २१६ ।

(सुवर्चला मालतीत्यर्थः । तत्पर्य्यायो यथा,—

"चक्रको मालती सौम्या रुद्रपत्नी सुवर्चला ।"

पुष्पार्थे पर्य्यायो यथा,—

"मालती सुमना जातिः ।" इत्यमरे वैद्यकरत्नमालायाम् । तथाच ।

जातिजाती च सुमना मालती राजपुत्रिका ।
चेतिका क्षुद्रगन्धा च सा पीता स्वर्णजातिका ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालतीतीरजः, पुं, (मालत्यां तद्राख्यायां नद्यां तस्यास्तीरे जायते इति । जन् + डः ।) टङ्कजः । इति हेमचन्द्रः । ४ । १० ॥

मालतीतीरसम्भव, क्ली, (मालत्या तीरे सम्भवोऽस्य ।) सैनटङ्कणम् । इति राजनिर्घण्टः ॥

मालवि

मालतीपत्रिका, स्त्री, (मालत्याः पत्रीव । मालतीपत्र + प्रतिज्ञानौ कन् टाप् अत इत्वम् ।) जातीपत्री । इति राजनिर्घण्टः ॥ (जातीपत्रीशब्दोऽस्य विषयो द्रष्टव्यः ॥)

मालतीफलं, क्ली, (मालत्याः फलम् ।) जातीफलम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः । "जातीफलं जातिकोशं मालतीफलमित्यपि ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालयः, पुं, (मा शोभा तस्याः लयः आस्पदम् ।) चन्दनवृक्षः । इति त्रिकाण्डशेषः ॥ मलयसम्बन्धिनि, त्रि ॥ (यथा, मलादौ । ३ । ६७ ।

"तनुच्छटोत्तमालया तया सुवोत्तमालया ।
अहारि प्रीतमालयानिलाबधूतमालया ॥"

क्ली, अभिसारस्यभेदः । यथा, साहित्यदर्पणे । ६ । अभिसारिकाप्रकरणे ।

"क्षेत्रं वाटी भवद्देवालयो दूतीगृहं वनम् ।
मालयश्च श्मशानञ्च नद्यादीनां तटी तथा ॥")

मालवः, पुं, (मालः उन्नतक्षेत्रमस्त्यत्र । माल + "केशाद्वोऽन्यतरस्याम् ।" ५ । २ । १०९ । इत्यत्र "अन्येभ्योऽपि दृश्यन्ते ।" इति काशिकोक्तेः षप्रत्ययः ।) अवन्तिदेशः । इति हेमचन्द्रः । ४ । ९२ ॥ मालओया इति हिन्दीभाषा ॥ (यथा, मात्स्ये । ११३ । ४४ ॥

"अङ्गा वङ्गा मद्गुरका अन्तर्गिरि बहिर्गिरी ।
सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः ॥"

मालवेषु जात इत्यण् । तद्देशजे, त्रि ॥)

रागविशेषः । स च षड्रागाणां मध्ये प्रथमरागः । मतान्तरे भैरवरागोऽयम् । यथा,—

"आदौ मालवरागेन्द्रस्तनौ मञ्जारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः प्रकीर्त्तिताः ॥

तस्य स्वरूपं यथा,—

"निलिम्पिनीपुञ्जितवक्त्रपद्मः
शुकस्तुतिः कुञ्जलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥"

इति सङ्गीतदामोदरः ॥

(मालया तन्नामिकायां सावित्रीमातरि जातः इत्यण् । अश्वपतेरृषेः मालव्यां जातः पुत्रभेदः । यथा, महाभारते । ३ । २६६ । ५८ ।

"पितुस्ते पुत्रशतं भविता तव मातरि ।
मालव्यां मालवा नाम शाश्वताः पुत्रपौत्रिणः ॥
भ्रातरस्ते भविष्यन्ति क्षत्रियास्त्विदृशोपमाः ।"

स्त्री, नदीविशेषः । यथा, महाभारते । १३ । १६५ । २५ ।

"हिरण्वती विपाशा च तथा शतवती नदी ।
वेदस्मृतिर्वेदवती मालवाधाश्वतत्यपि ॥")

मालविका, स्त्री, (मालवेषु जाता । मालव + टक् टाप् ।) चिरुत्। इति राजनिर्घण्टः ॥

माला

मालसी, स्त्री, (मल + आर्थे अण् । मलं स्यति-नाशयति । सो + डः । ङीप् ।) केशपुष्पवृक्षः । यथा,—

'मालसी दुर्गपुष्पी च बालाम्बी केशधारिणी ॥'

इति शब्दचन्द्रिका ॥

रागिणीविशेषः । सा तु मालवरागस्य पत्नी । यथा,—

"धानुकी मालसी रामकिरी च सिन्धुका तथा ।
अम्बवारी भैरवी च मालवस्य प्रिया इमाः ॥"

इति हारीतः ॥

मतान्तरे मेघरागस्य पत्नी । यथा,—

"ललिता मालसी गौडी वाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्त्येमाः सुमध्यमाः ॥"

तस्याः स्वरूपं यथा,—

"नीलारविन्दस्य दलानि बाला
विधारयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तले निषण्णा
ध्येया सदुन्मालसिका प्रदिष्टा ॥"

तस्या गानसमयो यथा,—

"इन्द्रोत्थानात् समारभ्य यावद्दुर्गामहोत्सवम् ।
गेया भवेदुषर्नैत्यं मालसी सा मनोहरा ॥"

अपि च ।

"गान्धारी दीपिका चैव कल्याणी पूरवी तथा ।
अम्बवारी कानड़ा च गौरी केदारपाहिड़ा ॥
माधवी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने रागिणीरेता: प्रगायन्ति चतुर्दश ॥"

इति सङ्गीतदामोदरः ॥

माला, स्त्री, (माति मानहेतुर्भवतीति । मा + "ऋज्रेन्द्राग्रवज्रे ।" उणा० २ । २८ । इति रन् रस्य लत्वम् टाप् च । यद्वा, मां शोभां लाति इति । ला + कः टाप् ।) श्रेणी । तत्पर्य्यायः । राजिः २ लेखा ३ सती ४ वीची ५ आली ६ आवलिः ७ पङ्क्तिः ८ धारणी ९ । इति हेमचन्द्रः । ३ । ३१५ । मूर्द्ध्नि व्यक्तपुष्पदाम । अन्यत्राप्युपचारात् ॥ तत्पर्य्यायः । माल्यम् २ स्रक् ३ । इत्यमरः । २ । ६ । १३५ ॥ मालिका ४ मालाका ५ मालका ६ । इति शब्दरत्नावली ॥ गणनिका ७ गुणान्तिका ८ । इति वराहपुराणम् ॥ सा त्रिविधा यथा,—

"माला तु त्रिविधा देवि ! वर्णान्तिपर्व्वभेदतः ।"

इति मत्स्यसूक्तवचनम् ॥ * ॥

अथ मालानिर्णयः । तत्र करमाला । सनत्कुमारसंहितायाम् ।

'तर्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ॥
तिस्रोऽङ्गुलास्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वत्रयं मध्यमाया मेरुत्वेनोपकल्पयेत् ॥
क्रममाह ।
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमूलपर्य्यन्तं एकपर्व्वसु संजपेत् ॥
तथा,—
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥

एतद्वचनम् अष्टोत्तरशतादिविषयम् ॥ * ॥
शक्तिविषये पुनः । श्रीक्रमे ।
अनामिकाद्यं पर्व कनिष्ठादित्रिपर्विका ।
मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि ।
तर्जन्यग्रे तथा मध्यं यो जपेत् स तु पापजित् ॥
हंसपारमेश्वरे ।
पर्वत्रयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्वद्वयं मध्यमायास्तर्जन्येकं समाचरेत् ॥
पर्वद्वयन्तु तर्जन्या मेरुं तद्विद्धि पार्वति ! ।
शक्तिमाला समाख्याता सर्वतन्त्रप्रदीपिका ॥
तथा ।
अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
मध्यमामूलपर्यन्तमष्टपर्वसु संजपेत् ॥ * ॥
श्रीविद्यायामयं विशेषः ।
अनामाया मध्यमाया मूलाग्रे च इयं इयं ।
कनिष्ठायाश्च तर्जन्याश्चयं पर्व सुरेश्वरि ! ॥
अनामामध्यमायाश्च मेरुः स्यादङ्गितयं शुभम् ।
प्रदक्षिणक्रमाद्देवि ! जपेन्निपुरसुन्दरीम् ॥"
इति यामलवचनात् ॥

सुरूपमालातन्त्रे ।
"अनामिका इयं पर्व प्रादक्षिण्यक्रमेण तु ।
तर्जनीमूलपर्यन्तं करमाला प्रकीर्त्तिता ॥
कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्जनीमूलपर्यन्तमष्टपर्वसु संजपेत् ॥"
इदमपि अष्टोत्तरशतादिविषयम् ॥ * ॥
अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अन्यत्रापि ।
अङ्गुल्ययेषु यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्वसन्धिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥
गणनाविधिमुल्लङ्घ्य यो जपेत्तज्जपं यतः ।
गृह्णन्ति राक्षसास्तेन गणयेत् सर्वथा बुधः ॥
सव्याङ्गुलिजपं कुर्व्वन् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
साङ्गुष्ठेन विना कर्म्म कृतं तदफलं भवेत् ॥
विश्वसारे ।
जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः ।
असंख्याकारकस्यास्य सर्वं भवति निष्फलम् ॥
तन्त्रे ।
हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥
इति करमाला ॥ * ॥
जपसंख्यायां निषिद्धदशमाह यामले ।
नाङ्गुलैर्हस्तपर्व्वैर्वा न धान्येनैव पुष्पकैः ।
न चन्दनैर्मृत्तिकया जपसंख्यां न कारयेत् ॥
विद्धिसद्दशमाह ।
लाक्षाकुङ्कुमसिन्दूरगोमयैश्च करीषकम् ।
एभिर्निर्म्माय गुटिकां जपसंख्यान्तु कारयेत् ॥
अथ वर्णमाला । सनत्कुमारे ।
क्रमोत्क्रमगतैर्मालामातृकावर्णैः क्रमेरकैः ।
सबिन्दुकैः साष्टवर्णैरन्तर्जनकर्म्मणि ॥
आदिशक्तु टुटुपु प्रयोगौ वर्णाः प्रकीर्त्तिताः ।
तद्यथा । अकारादिवर्णान् सबिन्दून् प्रत्येकं

हत्वा ङ्यं संजप्य अकारादीनां वर्णानां कवर्गादीनाञ्चान्तिमं वर्णं सानुस्वारं कृत्वा पूर्व्वसूत्राय शतवारमन्त्रजपः कार्य्यः । अनेन प्रकारेण अष्टोत्तरशतसंख्यो जपो भवति ।
अन्तर्यजनेष्वुपलक्षयम् । तथा ।
सबिन्दुं वर्णसूत्राय पञ्चाशत्कं जपेद्बुधः ।
अकारादिक्षकारान्तं बिन्दुयुक्तं विभाव्य च ।
वर्णमाला समाख्याता अनुलोमविलोमतः ॥
इति नारदवचनात् ।
विष्णुरहस्ये ।
अनुलोमविलोमेन वर्गाष्टकविभेदतः ।
मन्त्रेष्वान्तरितान् वर्णान् वर्णान्तरितान् मनून् ।
कुर्य्याद्वर्णमयीं मालां सर्वतन्त्रप्रकाशिनीम् ॥*॥
मालिनीविजये सूचनियमः ।
अन्तर्विद्दमभासमानभुजगीकुण्डोत्तवर्णोज्ज्वलाम् ।
आरोहप्रतिरोहतः शतमयीं वर्गाष्टकाष्टोत्तराम् ॥
इति वर्णमाला ॥ * ॥
अथात्ममाला । तत्र मालायां मणिनिर्णयः ।
पद्मबीजादिभिर्माला वक्ष्यमाणे ग्रहाश्च ताः ।
रुद्राक्षपद्मपद्माक्षपुत्रजीवकमौक्तिकैः ॥
स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा ।
राजते कृष्णसूत्रे च ग्रहस्यस्यात्ममालिका ॥*॥
अङ्गुलीगणनाद्येकं पर्व्वत्रयगुणं भवेत् ।
पुत्रजीवैर्द्विगुणं शतं शतैः सहस्रकम् ॥
प्रवालैर्मणिरत्नैश्च दशसाहस्रकं मतम् ।
तदेव स्फाटिकैः प्रोक्तं मौक्तिकैर्लक्षमुच्यते ॥
पद्माक्षैर्द्विगुणं स्यात् सौवर्णैः कोटिरुच्यते ।
कुशग्रन्थ्या कोटिशतं रुद्राक्षैः स्यादनन्तकम् ॥
सर्व्वैर्विरचिता माला वृथा मुक्तिफलप्रदा ।
कालिकापुराणे ।
रुद्राक्षैर्वा यदि जपेत् रुद्राक्षैः स्फाटिकैस्तथा ।
मान्यमध्ये प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यत्किञ्चित् प्रयुञ्जीत मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
सुरूपमालायाम् ।
ब्रह्मज्ञानभृगुरेमाला श्रेया धूमावतीविधौ ।
नराङ्गुष्ठास्थिभिर्माला ग्रथिता सर्व्वकामदा ॥
नाथा संग्रथनं कार्य्यं रक्तेन वाससा प्रिये ! ।
सदा गोप्या प्रयत्नेन जनन्या जारवत् प्रिये ! ॥
कामनाविशेषे तु ।
पद्माक्षैर्विहिता माला शत्रूणामुच्चाटकरी मता ।
कुशग्रन्थिमयी माला सर्व्वपापप्रणाशिनी ॥
पुत्रजीवफलैः कृत्वा कुरुते पुत्रसम्पदम् ।
निर्म्मिता रुद्रमणिभिर्जपमालेप्सितप्रदा ।
प्रवालैर्विहिता माला ग्रथयेत् विपुलं धनम् ॥
भैरवीविद्यायान्तु वाराहीतन्त्रे ।
सुवर्णमणिभिर्म्माला स्फाटिकी मुक्तिभिस्तथा ।
प्रवालैरेव वा कुर्य्यात् पुत्रजीवं विवर्ज्जयेत् ।
पद्माक्षैरेव रुद्राक्षमिश्राक्षैश्च विशेषतः ॥*॥

त्रिपुराभैरवजपादौ तु रक्तचन्दनबीजादिभिरभिमन्त्रिता । तथा च तन्त्रराजे ।
रक्तचन्दनमाला तु भोगदा मोक्षदा भवेत् ॥
तथा ।
वैष्णवे तुलसीमाला गजदन्तैर्गजानने ।
त्रिपुराया जपे प्रोक्ता रुद्राक्षे रक्तचन्दने ॥*॥
कुमारीकल्पे ।
रुद्राक्षैः शक्तिमन्त्रञ्च मन्त्री यः प्रजपेत् प्रिये ! ।
स दुर्गतिमवाप्नोति निष्फलस्तस्य तज्जपः ॥
कालिका च्छिन्नमस्ता च त्रिपुरा तारिणी तथा ।
एताः सर्व्वा न दुष्यन्ति जपे रुद्राक्षमालया ॥
दिवा नैव प्रजप्तव्यं रुद्राक्षमालयापि च ।
पुरश्चर्य्याश्रिते चात्र दूषणन्तु वरानने ! ॥
महाशङ्खमयी माला नीलसारस्वते विधौ ।
मूलताटास्थिखण्डेन रचिता जपमालिका ॥
महाशङ्खमयी माला तारादिविद्याजपे प्रिये ! ।
कर्त्तव्येत्यन्तरालास्थि महाशङ्खः प्रकीर्त्तितः ॥
मणिनियमस्तु सुरूपमालायाम् ।
अन्योन्यसमरूपाणि नातिस्थूलकृशानि च ।
कीटादिभिरदुष्टानि न जीर्णानि नवानि वै ॥
तथा गौतमीये ।
पद्माक्षशक्तिपिभिर्माला विहिता सर्व्वकर्म्मसु ।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता ॥
चार्थे मेरुसुखं तत्र कल्पयेच्छुभिसत्तम ! ।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः ॥*॥
चासुरुद्धातन्त्रे ।
नित्यं जपं करे कुर्य्यात् न तु काम्यमबोधनात् ।
काम्यमपि करे कुर्य्यात् मालाभावेऽपि सुन्दरि ! ॥
तेन मालायाः प्राधान्यम् ॥ * ॥ कामनाभेदे तु गौतमीये ।
समासेनात्तसूत्रस्य विधानमिह कथ्यते ।
पञ्चविंशतिभिर्मौक्तं त्रिंशद्भिर्धनसिद्धये ॥
सप्तविंशतिभिर्मुक्तं पञ्चदशभिरारके ।
पञ्चाशद्भिः काम्यसिद्धिः स्यात्तथा चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्व्वसिद्धिरुक्ता मनीषिभिः ॥
अथ मालासंस्कारः । तत्र सनत्कुमारीये ।
'कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम् ।
तच्च विप्रेन्द्रकन्याभिर्निर्म्मितञ्च सुशोभनम् ॥'
यदा ।
'शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा ।
शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च ॥
शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् ।
सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम् ॥
आश्रमेषु तथा चैव रक्तं सर्व्वसुसिद्धिदम् ।
त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्रतः ॥
एकैकं मातृकावर्णं सतारं प्रजपन् सुधीः ।
मणिमादाय सूत्रेण ग्रथयेन्मध्यमध्यतः ॥
ब्रह्मग्रन्थिं विधायेत्थं मेरुञ्च ग्रन्थिसंयुतम् ।
ग्रथयित्वा पुरो मालां ततः संस्कारमारभेत् ॥
कस्यचिन्मते मूलविद्यया ग्रथयेत् । तथा च एकवीराकल्पे ।
'मातृकामन्त्रतो ग्रन्थिं विद्यया वाथ कारयेत् ।

सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः ॥
ब्रह्मग्रन्थिं ततो दद्यान्नागपाशमथापि वा ।
कवचेनावगुण्ठ्याथ मालां ध्यानपरायणः ॥
सर्वमेरुं ततो मेरुं सूत्रद्वयसमन्वितम् ।
ग्रथयेत्तारयोगेन वर्णीयात् साधकोत्तमः ।
एवं निष्पाद्य देवेशि ! प्रतिष्ठाच समाचरेत् ॥'
गौतमीये ।
'सुत्रे सूत्रञ्च संयोज्य पुच्छे पुच्छं नियोजयेत् ।
गोपुच्छसदृशी माला यदा सम्पद्यते शुभा ।
एवं निर्माय मालां वै शोधयेच्छुभसत्तमः ॥
अश्वत्थपत्रवर्णैः पञ्चाक्षरन्तु कारयेत् ।
सम्पुटे स्थापयेन्मालां मालकां मूलसुच्चरन् ।
शोधयेत् पञ्चगव्येन सद्योजातेन सज्जलैः ॥'
सद्योजातस्तु ।
'ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ।
भवेऽभवेऽनादिभवे भजस्व मां भवोद्भवाय नमः ॥
चन्दनागुरुकर्पूरैर्वामदेवेन वर्जयेत् ॥'
वामदेवमन्त्रस्तु । ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः । धूपयेत्तामघोरेण । अघोरमन्त्रस्तु । अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः । लेपयेत्तत्पुरुषेण तु । तत्पुरुषमन्त्रस्तु । ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ।
'मन्त्रयेत् पञ्चमेनैव प्रत्येकन्तु घृतं घृतम् ।
मेरवञ्च मन्त्रयेच्चैव मनुना च घृतं घृतम् ॥'
मन्त्रस्तु । ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः शिरो मेऽस्तु सदाशिवोम् । प्रत्येकन्तु सप्तधा सप्तधा । इति वा । तथा च तत्रैव ।
'प्रत्येकं मन्त्रयेन्मन्त्री पञ्चमेन सप्तधा सप्तधा ।'
तथा च गौतमीये समुदायमालामधिकृत्य ।
'पञ्चमेनैव सूक्तेन घृतान्येन मन्त्रयेत् ।'
इति दर्शनान्मालायां वा घृतजपः ।
तत्रावाह्य यजेद्देवं यथाविभवविस्तरैः ।
मालायाः प्राणप्रतिष्ठानन्तरं देवतां पूजयेत् ॥
तथा सनत्कुमारे ।
'संस्कृत्यैवं बुधो मालां तत्प्राणांस्तत्र स्थापयेत् ।
मूलमन्त्रेण तां मालां पूजयेद्विजसत्तम ! ॥'
वाराहीतन्त्रे ।
'माले माले महामाये सर्वतत्त्वस्वरूपिणि ! ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
मायाबीजादिकां कृत्वा रक्तपुष्पैः समर्चयेत् ॥'
इति शुक्लविधये ॥
विष्णुविधये तु रुद्रयामले ।
'वाग्भवञ्च तथा लक्ष्मीमन्त्रादिमालिकां ततः ।
लेखां हृदयवर्णान्तां मन्त्रेणानेन पूजयेत् ॥
मन्त्रयेन्मूलमन्त्रेण क्रमेणोत्तमयोगतः ।
तत्रैव मालकायर्थमन्त्रयेत्तान्तु मन्त्रवित् ॥'
योगिनीतन्त्रे ।
'होमकर्म्म ततः कुर्य्याद्देवताभावसिद्धये ।
अष्टोत्तरशतं हुत्वा सम्यगाज्यं विनिःक्षिपेत् ।
होमकर्म्मणश्चशक्तश्चेत् द्विगुणं जपमाचरेत् ॥
गान्धमन्त्रं जपेन्मन्त्री कन्यायेन विधूनयेत् ।
कन्यनात् सिद्धिहानिः स्याज्जपनं बहुदुःखदम् ॥
ग्रन्थे जाते भवेद्रोगः करभङ्गो विनाग्निका ।
छिन्ने सूत्रे भवेन्मृत्युस्तस्मात्तूयत्नपरो भवेत् ॥
जपान्ते कर्णदेशे वा उच्चदेशे तथा न्यसेत् ।
तं माले सर्वभूतानां सर्वसिद्धिप्रदा मता ॥
तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते ।
इत्युक्त्वा परिपूज्याथ गोपयेत्तूयत्नतो गृही ॥'
मालासंस्कारस्य नित्यतामाह रुद्रयामले ।
'अप्रतिष्ठितमालाभिर्मन्त्रं जपति यो नरः ।
सर्वं तद्विफलं विद्यात् कृत्वा भवति देवता ॥'
कामनाभेदे तु अङ्गुलिनियमः । गौतमीये ।
'तर्जन्यङ्गुष्ठयोगेन ग्रन्थिभाटनसत्तमम् ।
अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता ॥
अङ्गुष्ठानामिकायोगादुच्चाटोत्साहने मते ।
ज्येष्ठाकनिष्ठायोगेन ग्रन्थिभेदं नाशनं मतम् ॥'
वैष्णव्यायनसंहितायाम् ।
'अङ्गुष्ठमध्यमाभ्याञ्च चालयेन्मध्यमाङ्गुलीः ।
तर्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः ॥
जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा घृतं जपेत् ।
प्रमादात् पतितां दृष्ट्वा घृतमष्टोत्तरं जपेत् ॥
जपेन्निखिलमन्त्रस्य मालयित्वा यथोदितम् ।
छिन्नेऽप्यष्टोत्तरशतजपः कार्यः । करभङ्गच्छिन्नयोस्तुल्यत्वात् ॥*॥ प्रकारान्तरं आगमकल्पद्रुमे ।
'भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् ।
गणेशसूर्यविष्णूंश्च दुर्गामावाह्य मन्त्रवित् ॥
पञ्चगव्ये ततः स्नात्वा हृत्सौम्यमन्त्रेण मन्त्रवित् ।
तस्मादुत्थाय तां मालां स्वर्णपात्रे विधाय च ॥
पयोदधिघृतक्षौद्रगन्धकैरादरेणक्रमात् ।
तोयधृपान्तरैः स्नात्वा पञ्चान्ततर्विधिं बुधः ॥
क्रमादत्रैव संस्थाप्य स्थापयेच्छीतले जले ॥
ततश्चन्दनसौगन्धिकस्तूरीकुङ्कुमादिभिः ।
तामालिप्य हृत्सौम्यमन्त्रेणोत्तरशतं जपेत् ॥
तस्यां नवग्रहांश्चैव दिक्पालांश्च प्रपूजयेत् ।
ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभाम् ॥
अक्षमालाञ्च सदाच गुरोरपि न दर्शयेत् ।
भूतराक्षसवेतालाः सिद्धगन्धर्वचारणाः ।
हरन्ति प्रकटं यस्मात्तस्मादृग्रं समाचरेत् ॥'
इति अक्षमाला । इति तन्त्रसारः ॥
अपिच ।
'विद्याधराप्सरोयक्षा विबुधासुरराक्षसाः ।
भूतानि किन्नराः सिद्धाः पिशाचाश्च चारणादयः ॥
हरन्ति जपफलान्येते यानि तानि च नारद ! ।
अतूर्णां पेढ्हिजानु चार्द्रवासादिभिर्जपेत् ॥
दृष्टादर्वीत्वनमयी तुलसीकाष्ठसम्भवा ।
हस्ताङ्गुलिमयी हैमी दर्भग्रन्थिमयी तथा ॥
भद्राक्षेन्द्राक्षरुद्राक्षपद्मबीजभवाप्यथ ।
शङ्खपुत्रजीवपद्मैर्मौक्तिकी वा परिकीर्तिता ॥
हस्तामलकमयी रौप्या स्फाटिकी वैष्णवी तथा ।
जपकर्म्मसु सर्वेषु शस्तमाला प्रकीर्तिता ॥*॥
लक्ष्मीमन्त्रजपे माला ह्युद्दारण्यसमुद्भवा ।
मान्या माला अनन्यानां हस्ताङ्गुलिमयी विना ॥
हैमी मणिमयी माला प्रशस्ता कमलाजपे ।
सरस्वत्या मन्त्रजपे रौप्या मुक्ताविनिर्मिता ॥
प्रजापतिजपे माला पुत्रजीवसमुद्भवा ।
पुत्रकामनराज्ञाच सदा पुत्रप्रदा तु सा ॥
राममन्त्रजपे माला पद्मबीजसमुद्भवा ।
शाक्षीफलमयी माला विष्णोः कामनया जपे ॥
रुद्राक्षेन्द्राक्षभद्राक्षशङ्खबीजसमुद्भवा ।
मन्त्रैश्वर्यमन्त्रजपे श्वेता माला; फलप्रदाः ॥
कुशग्रन्थिमयी गुह्या गायत्री वेणवी जपे ।
स्फाटिकी सर्वदेवानामथवा तत्तदीजपे ।
श्रीहरेर्हस्तिमयी जपे माला द्विजन्मनाम् ॥'
इति पाद्मोत्तरखण्डे १०८ अध्यायः ॥
अपरञ्च ।
'जपादौ पूजयेन्मालां तोयैरभ्युक्ष्य यत्नतः ।
निधाय मण्डलस्याग्रे सव्यहस्तगताच सा ॥
ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ! ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
पूजयित्वा ततो मालां गृहीत्वा दक्षिणे करे ।
मध्यमाया मध्यभागे वन्दयित्वा तु तर्जनीम् ॥
अनामिकाकनिष्ठाभ्यां युताया नखभागतः ।
स्थापयित्वा तच मालामङ्गुष्ठाग्रेण सङ्गतम् ॥
प्रत्येकं बीजमादाय जपं कुर्य्यात्तु भैरव ! ।
प्रतिवारं पठेन्मन्त्रं शतैरष्टौ न चालयेत् ॥
मालाबीजन्तु जपगं स्पृशेन्न हि परस्परम् ।
पूर्वजापप्रयुक्तेनैवाङ्गुष्ठाग्रेण भैरव ! ॥
पूर्वबीजं जपन् यस्तु परबीजन्तु संस्पृशेत् ।
अङ्गुष्ठेन भवेत्तस्य निष्फलत्वञ्च तत्क्षणः ॥
मालां स्वहृदयासन्ने धृत्वा दक्षिणपाणिना ।
देवीं विचिन्तयन् जप्यं कुर्याद्वामेन न स्पृशेत् ॥
स्फाटिकेन्द्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः ।
सुवर्णमणिभिः सम्यक् प्रवालैरथवा नकैः ॥
अक्षमाला तु कर्त्तव्या देवी प्रीतिकरा परा ।
जपेदुपांशु सततं कुशग्रन्थ्या तु पाणिना ॥
नागाब्धीजेषु सर्वेषु रुद्राक्षो मन्त्रियात्मियः ।
रुद्रप्रीतिकरो यस्मात्तस्माद्रुद्राक्षको बली ॥
प्रवालैरथवा कुर्यादशविंशति बीजकैः ।
पञ्चपञ्चाशता वापि न न्यूनैर्नाधिकैश्च वा ॥
रुद्राक्षैर्यदि जप्यन्तु रुद्रलोकः स्फाटिकैस्तथा ।
नाम्नां मध्ये प्रयोक्तव्यं पुत्रजीवादिकञ्च यत् ॥
यदन्यत् प्रयुज्यते मालायां जपकर्म्मणि ।
तस्य कामञ्च मोक्षञ्च न ददाति प्रियङ्करी ॥
जन्मान्तरे जायते स वेदवेदाङ्गपारगः ।
मित्रीभावं सदा याति चाक्षालैः पापकर्म्मभिः ॥
एको मेरुस्तत्र देयः सर्वेभ्यः स्थूलसम्भवः ।
आद्यं सूत्रं ततस्तस्मात् सूत्रं सूत्रतरं तथा ॥
विन्यसेत् क्रमतस्तस्मात् सर्पाकारा हि सा यतः ।
ब्रह्मग्रन्थियुतं कुर्यात् प्रतिबीजं यथा स्थितम् ॥

अथवा यत्थिरहितं ह्रदरज्जुसमन्वितम् ।
चिराहृत्याथ मध्येनैवार्द्धहृत्याग्रदेशतः ॥
यन्त्रिः प्रदक्षिणावर्तैः स ब्रह्मग्रन्थिसंयुतः ।
मालया बीजयेन्मालां मालामन्त्रो योजयेद्बुधः ॥
ह्रदं स्वयं नियुञ्जीत जपे चुक्षति नो यथा ।
यथा स्खलान्न पतते जपतः सक् तथाचरेत् ।
स्खलाच्युतायां विघ्नः स्याच्छिन्नायां मरणं
भवेत् ।
एवं यः कुरुते मालां जप्यं च मयकोदितम् ।
स प्राप्नोतीप्सितं कामं ह्रीने स्यात्तु विपर्ययः ॥
अन्यत्रापि जपेन्मालां जप्यं दैवमनोहरम् ।
ईदृशं साधकः कुर्यात् नान्यथा तु कदाचन ॥
यथाशक्ति जपं कुर्यात् संख्यायैव प्रयत्नतः ।
असंख्यातन्तु यज्जप्तं तत् सर्वं निष्फलं भवेत् ।
जप्त्वा मालां शिरोदेशे प्रांगुष्ठाग्रेऽथवा न्यसेत् ॥
इति कालिकापुराणे ५७ अध्यायः ॥*॥*॥

अथ मालादिधारणम् ।

ततः स्नात्वार्पिता माला धारयेत्तुलसीदलैः ।
पद्माक्षैस्तुलसीकाष्ठैः फलैर्वाप्यथ निर्मिता ॥
धारयेत्तुलसीकाष्ठभूषणानि च वैष्णवः ।
मस्तके कर्णयोर्बाह्वोः करयोश्च यथारुचि ॥*॥

अथ मालाधारणविधिः ।

स्कान्दे ।
संनिवेद्यैव हरये तुलसीकाष्ठसम्भवाम् ।
मालां पश्चात् स्वयं धत्ते स वै भागवतोत्तमः ॥
हरये नार्पयेद्यस्तु तुलसीकाष्ठसम्भवाम् ।
मालां धत्ते स्वयं मूढः स याति नरकं ध्रुवम् ॥
स्नातिलां पञ्चगव्येन मूलमन्त्रेण मन्त्रिताम् ।
गायत्र्या चाष्टशतो वै मन्त्रितां धूपयेच्च ताम् ।
विधिवत् परया भक्त्या सद्योजातेन पूजयेत् ॥
तुलसीकाष्ठसम्भूते माले कृष्णजनप्रिये ।
बिभर्मि त्वामहं कण्ठे कुरु मां कृष्णवल्लभम् ॥
यथा त्वं वल्लभा विष्णोर्नित्यं विष्णुजनप्रिया ।
तथा मां कुरु देवेशि ! नित्यं विष्णुजनप्रियम् ॥
दासे मा धातुरद्रिष्टो लासि मां हरिवल्लभे ! ।
भक्तेभ्यश्च समस्तेभ्यस्तेन माला विगद्यसे ॥
एवं संप्रार्थ्य विधिवन्मालां कृष्णाग्रतोऽर्पिताम् ।
धारयेद्देवयो यो वै स गच्छेद्वैष्णवं पदम् ॥"*॥

अथ मालाधारणनित्यता ।

तत्रैव स्कान्दे कार्त्तिकप्रसङ्गे ।
"धात्रीफलकृता मालां कण्ठस्थां यो वहेन्न हि ।
वैष्णवो न स विज्ञेयो विष्णुपूजारतो यदि ॥"
गारुडे ।
"धारयन्ति न ये मालां हैतुकाः पापबुद्धयः ।
नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना हरेः ॥"
अतएव स्कान्दे तत्रैव ।
"न जह्यात्तुलसीमालां धात्रीमालां विशेषतः ।
महापातकसंदग्धौ धर्म्मकामार्थदायिनीम् ॥*॥

अथ मालामाहात्म्यम् ।

अगस्त्यसंहितायाम् ।
"निर्म्माल्यतुलसीमालायुक्तो यश्चार्चयेद्धरिम् ।
यद्दुष्कृतं करोति तत् सर्व्वमनन्तफलदं भवेत् ॥

यः कुर्यात्तुलसीकाष्ठैरक्षमालास्वरूपिणीम् ।
कण्ठमालाञ्च यत्नेन धृतं तस्याक्षयं भवेत् ॥"
नारदीये ।
"ये कण्ठलग्नतुलसीनलिनाक्षमाला
ये वा ललाटफलके जलदूर्द्धपुण्ड्राः ।
ये बाहुमूलपरिचिह्नितशङ्खचक्रा-
स्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥"
विष्णु ।
"तुलसीकाष्ठमालाञ्च कण्ठस्थां वहते तु यः ।
अपूतोऽपवित्राचारो मामेवेति न संशयः ॥"
स्कान्दे ।
"धात्रीफलकृता माला तुलसीकाष्ठसम्भवा ।
दृश्यते यस्य देहे तु स वै भागवतो नरः ॥
तुलसीदलजां मालां कण्ठस्थां वहते तु यः ।
विष्णोर्नैवेद्यभोगेषु स नमस्यो दिवौकसाम् ॥
तुलसीदलजा माला धात्रीफलकृतापि वा ।
ददाति पापिनां मुक्तिं किं पुनर्विष्णुसेविनाम् ॥
तत्रैव कार्त्तिकप्रसङ्गे ।
यः पुनस्तुलसीमालां कृत्वा कण्ठे जनार्द्दनम् ।
पूजयेत् पुण्यमाप्नोति प्रतिपुष्पं गवायुतम् ॥
अयुतसंख्यगोदानफलमित्यर्थः ।
यावच्छुठति कण्ठस्था धात्रीमाला नरस्य हि ।
तावन्नास्य शरीरे तु प्रीत्या तुष्ठति केशवः ॥
रोमाणि यानि लोमानि धात्रीमाला कलौ
नृणाम् ।
तावद्वर्षसहस्राणि वसते केशवालये ॥
यावद्दिनानि वहते धात्रीमालां कलौ नरः ।
तावद्युगसहस्राणि वैकुण्ठे वसतिर्भवेत् ॥
मालायुग्मञ्च यो नित्यं धात्रीतुलसिसम्भवम् ।
वहते कण्ठदेशे च कल्पकोटिं दिवं वसेत् ॥"
तुलसिसम्भवमिति हृत्सम्बन्धात् ।
गारुडे च मार्कण्डेयोक्तौ ।
"तुलसीदलजां मालां कृष्णोक्तीर्णां वहेत्तु यः ।
पदे पदेऽश्वमेधानां दशानां लभते फलम् ॥*॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
फलं यच्छति हैयारिः प्रत्यहं द्वारकोद्भवम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसम्भवाम् ।
वहते यो नरो भक्त्या तस्य पे नास्ति पातकम् ।
सदा प्रीतमनास्तस्य कृष्णो देवकिनन्दनः ॥
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
प्रायश्चित्तं न तस्यास्ति नाशौचं तस्य विद्यते ।
तुलसीकाष्ठसम्भूतां यो मालां वहते नरः ।
तुलसीकाष्ठसम्भूतं शिरसो वस्तुभूषणम् ।
बाह्वोः करे च मर्त्यस्य देहे तस्य सदा हरिः ॥
तुलसीकाष्ठमालाभिर्भूषितः पुण्यमाचरेत् ।
पितॄणां देवतानाञ्च लक्षं कोटिगुणं कलौ ।
तुलसीकाष्ठमालान्तु प्रेतराजस्य दूतकाः ।

दृष्ट्वा नश्यन्ति दूरेण वातोद्धूतं यथा दलम् ॥
तुलसीकाष्ठमालाभिर्भूषितो भ्रमते यदि ।
दुःस्वप्नं दुर्निमित्तञ्च न भयं ग्रसते क्वचित् ॥"
गौतमीये पुरश्चरणप्रसङ्गे ।
"तथामलकसम्भूतैस्तुलसीकाष्ठनिर्म्मितैः ।
इत्यादि ॥*॥ तत्रैव ।
पुष्करीकभवा माला गोपालमनुविद्धदा ।
आमलकीभवा माला सर्व्वसिद्धिप्रदा मता ।
तुलसीसम्भवा या तु मोक्षं विन्दति चिरात् ॥
इति हरिभक्तिविलासः ॥*॥*॥

अथ रुद्राक्षमालाधारणफलादि ।

लिङ्गपुराणे ।
विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥
संवत्सरप्रदीपे ।
त्रिपुरस्य वधे काले रुद्रस्याक्ष्णोऽपतंस्तु ये ।
अश्रुणो बिन्दवस्ते तु रुद्राक्षा अभवन् भुवि ॥
यद्यप्येकादिचतुर्दशमुखरुद्राक्षेषु मन्त्रफल-
विशेषाः सन्ति तथापि तुलसमत्वात् पञ्चवक्त्रस्य
फलमत्राभिधीयते । यथा, स्कान्दे ।
"पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः ।
अगम्यागमनाच्चैव अभक्तस्य च भक्षणात् ।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात् ॥"
इति तिथ्यादितत्त्वम् ॥
मालाकण्टः, पुं, (मालाकारः कण्टः कण्टको
अस्य ।) अपामार्गः । इति राजनिर्घण्टः ॥
मालाकन्दः, पुं, (माला गुच्छमाला नाम्नः कन्दः ।
आकपार्थिववत् मध्यपदलोपी ।) मूलविशेषः ।
तत्पर्य्यायः । आविलकन्दः २ विम्बिखिदला ३
यत्थिदला ४ पादिकन्दः ५ कन्दलता ६ । अस्य
गुणाः । तुवरत्वम् । गुच्छमालानाम्नित्वम् ।
दीपनत्वम् । गुल्महारित्वम् । वातश्लेष्मापकर्ष-
कारित्वञ्च । इति राजनिर्घण्टः ॥
मालाका, स्त्री, (माला एव । माला + स्वार्थे कन्
टाप् ।) माला । इति शब्दरत्नावली ॥
मालाकारः, पुं, (मालां करोतीति । कृ + अण् ।)
वर्णसङ्करजातिविशेषः । मालिकः । माली
इति ख्यातः । तत्पर्य्यायः । मालिकः २ । इत्य-
मरः । २ । १० । ५ । मालाकारः ३ पुष्पा-
जीवी ४ वनार्थकः ५ पुष्पलावः ६ । इति जटा-
धरः ॥ पुष्पलावकः ७ । इति शब्दरत्नावली ॥
स तु शूद्रायां विश्वकर्म्मणो जातः । इति ब्रह्म-
वैवर्त्तपुराणम् ॥ अपि च ।
"सैलिक्यां कर्म्मकारात्च मालाकारस्य सम्भवः ।
इति पराशरपद्धतिः ॥
तद्गृहस्थितपुष्पस्य पर्य्युषितदोषाभावो यथा,
"न पर्य्युषितदोषोऽस्ति तुलसीविल्वचम्पके ।
जलजे बकुलेऽगस्त्ये मालाकारगृहेषु च ॥"
इति मेरुतन्त्रे ५ प्रकाशः ॥
(यथा, हरिवंशे । १० । ६ ।
"हस्ते नापितचाक्षिक-
चौरभिषक्क्षत्रियकीटपयाहाः ।

मालिः

वसवश्च: कौशलका मालाकाराश्च पीठगणे॥"
स्त्रियां ङीप्। यथा तत्रैव। ७८। ६।
"भिक्षुणिका प्रव्रजिता दासी धात्री कुमारिका रजिका।
मालाकारी दुहाङ्गना सखी मालिनी दूत्यः।")
मालाग्रन्थिः, पुं, (माला इव ग्रन्थिरस्य।) मालादूर्वा। इति राजनिर्घण्टः॥
मालाङ्गम्, क्ली, (मालाकारं ङ्गम्।) भूङ्गम्। इति राजनिर्घण्टः॥
मालाङ्गकम्, क्ली. (मालाङ्ग। स्वार्थे कन्।) भूङ्गम्। इत्यमरः।२।४।१६७॥ दे गन्धखड इति ख्याते। मालाङ्गं ङ्गं मालाङ्गं स्वार्थे कः। भृवल्लृवं भूलमत्वात् भूङ्गं मनीषादित्वात् साधुः। मालाङ्गकभूङ्गौ। इति क्षीरे। इति भूभूवादयः॥ मालाङ्गकभूङ्गावित्यपि पुंसि पठन्ति केचित्॥ स्वामी तु। ङ्गजातिच्छन्दादिभूङ्गजातं पर्य्यायमाह यथा,—
"भूङ्गो रौहिषो भूतिर्भूमिकोऽथ कुटुम्बकः।
मालाङ्गश्च पालङ्गश्चातिच्छत्रकस्तथेति॥"
रामकर्पूरं बहुपत्रकाख्यं कर्पूरसुगन्धि।
इदन्तु घृतपुष्पिकाबहुत्वगन्धं भूङ्गमत्र भवतीत्यनयोर्भेदः। इति तट्टीकायां भरतः॥ (तथास्य पर्य्यायः।
"गुच्छपीलन्तु भूनीकं सुगन्धं जम्बुकप्रियम्।
भूङ्गन्तु भवेच्छत्रा मालाङ्गकमित्यपि॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
मालादूर्व्वा, स्त्री, (माला इव ग्रन्थियुक्ता दूर्व्वा।) दूर्व्वाविशेषः। गाठिया दूर्व्वा इति भाषा। तत्पर्य्यायः। वल्लिदूर्व्वा २ अनिदूर्व्वा ३ मालाग्रन्थिः ४ ग्रन्थिला ५ ग्रन्थिदूर्व्वा ६ शूलग्रन्थिः ७ वेल्लनी ८ ग्रन्थिमूला ९ रोहत्पर्व्वा १० पर्व्ववल्ली ११ ग्रिवाख्या १२। अस्या गुणाः। तुमधुरत्वम्। तिक्तत्वम्। ग्रिग्धरत्वम्। पित्तदोषप्रशमनत्वम्। कफवातश्लेष्मापहत्वञ्च। इति राजनिर्घण्टः॥
मालारिष्टा, स्त्री, पाची। इति राजनिर्घण्टः॥
मालालिका, स्त्री, (मालां अलतीति। अल + ण्वुल् टाप् अत इत्वञ्च।) पूक्का। इति राजनिर्घण्टः॥
मालाली, स्त्री, (मालामलति। अल + अच्। ङीप्।) पूक्का। इति राजनिर्घण्टः॥
मालिः, पुं, सुकेशराक्षसपुत्रः। यथा,—
"ग्रामणीर्नाम गन्धर्व्वो विश्वावसुसमप्रभः।
तस्य देववती नाम द्वितीया ग्रीरिवात्मजा॥
ग्रिषु लोकेषु विख्याता रूपयौवनशालिनी।
तां सुकेशाय धर्म्मात्मा ददौ रक्षःग्रियं यथा॥
वरदानबलैश्वर्य्यं सा तं प्राप्य पतिं प्रियम्।
आसीद्देववती तुष्टा धनं प्राप्येव निर्द्धनः॥
स तया सह सन्तुष्टो रराज रजनीचरः।
ततः काले सुकेशस्तु जनयामास राघव!॥
ग्रीन् पुत्रान् जनयामास चेताग्निसमविग्रमान्।

मालिनी

माल्यवन्तं सुमालिञ्च मालिञ्च बलिनांवरम्॥"
इति रामायणे उत्तरकाण्डे ५ सर्गः॥
मालिकः, पुं, (मालाऽस्य पण्यम्। माला + "तदस्य पण्यम्।" ४।४।५१। इति ठक्। यद्वा, मालामर्थयते ग्रिक्षयमस्येति। "ग्रिक्षम्।" ४।४।५५। इति ठक्।) मालाकारः। इत्यमरः।२।१०।५॥ (यथा,राजतरङ्गिण्याम्।६।१६।
"निदाघे पुष्पताम्बूलीपर्य्यादृयचातिग्रीतले।
न्यस्तग्रिर्मालिकैर्दत्तात् वा जीवेन्नाटकादिति॥")
पश्चिमेदः। इति मेदिनी। के, १३६॥ रञ्जकः। इति ग्रब्दरत्नावली॥
मालिका, स्त्री, (मालैव। माला + कन् टाप् अत इत्वञ्च।) सप्तला। पुत्री। ग्रीवालङ्करणम्। पुष्पमाल्यम्। नदीविशेषः। इति मेदिनी। के, १३६॥ सुरा। इति हारावली॥ क्षुमा। इति ग्रब्दचन्द्रिका॥
मालिनी, स्त्री, (माला सुक्तमालाद्यस्याः अस्यां वा। माला + "ग्रीत्रादिभ्यश्च।"५।२। ११६। इति इनिः ङीप्।) मालाकारभेदः। वृत्तभेदः। (मालिन् + ङीप्।) मालिकपत्नी॥ गौरी। चम्पानगरी। (यथा, महाभारते।१२। ५।६—७।
"ग्रीत्या ददौ च कर्णाय मालिनीं नगरीमथ।
अङ्गेषु नरग्रार्दूल! स राजासीत् सपत्नजित्॥
पालयामास चम्पाञ्च कर्णः परबलार्दनः॥")
मन्दाकिनी। नदीभेदः। इति मेदिनी॥ (यथा, महाभारते। १। ७२। ८।
"जनयामास सुनिर्मलकायां शुक्लमालाम्।
प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम्।")
अग्निग्रिखावृक्षः। दुरालभा। इति ग्रब्दचन्द्रिका॥ स च वृत्तभेदः पञ्चदग्राक्षरपादच्छन्दः। यथा,—
"न न म य य युतेयं मालिनी भोगिलोकैः।
नगमदृतनयौ यौनकौन्नेयवासा
नचिरग्रिखिग्रिखण्डाबद्धधम्मिल्लपाग्रा।
अनृतुनिहितमंसे वंग्रसुतत्क्षायग्यामी
घृतमधुरिपुलीला मालिनी पातु राधा॥"
इति छन्दोमञ्जरी॥
अप्सरोविशेषः। यथा, कथासरित्सागरे। ४५। ६५२।
"पिङ्गलाच गणाख्याता दग्रमी केग्रावली।
एकादग्री मालिनीति गाथा कमलनन्दिनी॥
स्कन्दमातृगणमध्यगता। सैव ग्रिग्रुमातृगणमध्यगता। यथाचैव। ३। ६२७। १०।
"काली च हलिमा चैव मालिनी हंसिला तथा।
आर्य्या पलाला वैमित्रा सप्तैताः ग्रिग्रुमातरः॥"
मालाग्रयनं ग्रिल्पमस्याः। इनिः। ङीप्। द्रौपद्या नामान्तरम्। यथा, महाभारते। ४। ८। २१।
"मालिनीत्येव मे नाम स्वयं देवि चकार सा।
वासमभ्यागता देवि! सुदेष्णे! तव वेग्मनि॥"

मालुः

राक्षसीभेदः। सा च विभीषणस्य माता। यथा, महाभारते। ३। २७४। ३—८।
"स राजराजो लङ्कायां निवसन्नरवाहनः।
राक्षसीः प्रहरौ तिस्रः पितुर्वै परिचारिकाः॥
ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः।
ऋषिं भरतशार्दूल! वृत्तगीतविशारदाः॥
पुष्पोत्कटा च राका च मालिनी च विग्राम्पते!।
अन्योन्यस्पर्द्धया राजन्! ग्रेयस्कामा सुमध्यमाः॥
स तासां भगवांस्तुष्टो महात्मा प्रददौ वरान्।
लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान्॥
पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ।
कुम्भकर्णदृग्रग्रीवौ बलेनाप्रतिमौ युधि॥
मालिनी जनयामास पुत्रमेकं विभीषणम्।
राकायां मिथुनं यत्ते खरः ग्रूर्पणखा तथा॥"
रौक्षमनुमाता। यथा, मार्कण्डेये।८८।५—७।
"तथेति तेन चाप्युक्ता तत्रागोयाङ्गुलातीम्।
उज्जहार ततः कन्यां मालिनीं नाम नामतः॥
तथाच पुलिने तस्मिन् स ददर्ग्गनिवत्तमः।
जग्राह पाणिं विधिवत् समागाय्य महामुनीन्॥
तस्यां तस्य सुतो जज्ञे महाबीर्य्यो महामतिः।
रौक्षोऽभवत् पितुर्नाम्ना ख्यातोऽच वसुधातले॥"
ग्रीतकर्मणस्य पत्नी। यथा, हरिवंग्रे।१८५।७।
"तस्मादृवनगतादृग्रं यादवी प्रत्यपद्यत।
सुचारोर्दुहिता सुभ्रूर्मालिनी भालमालिनी॥")
मालिन्यं, क्ली, (मलिन + "वृष्ण् ङ्गण् कठजिलसेनिरक्ष्ण् ग्रेति।" ४।२।८०। इति संज्ञायामिञ्प्रत्ययः।) मलिनत्वम्। मलिनस्य भाव इत्यर्थे ञ्यप्रत्ययेन निष्पन्नम्॥ (यथा, राजतरङ्गिण्याम्। १। १७८।
"भोगयोगेन मालिन्यं नेतुं मध्यगतोऽपि सः।
न ग्रक्यते खा पङ्केन प्रतिमेन्दुरिवामलः॥")
माली, [न्] पुं, (माला प्रयोजनमस्यास्य। माला + "ग्रीत्रादिभ्यश्च।"५।२। ११६। इति इनिः।) मालाकारः। इति मालिनीग्रब्ददर्ग्गनात्॥ सुकेग्रराक्षसपुत्रः। यथा,—
"सुकेग्रपुत्रैर्भगवन्! पितामहवरोद्धतैः।
अहं विष्णुरहं रुद्रो ब्रह्माहं देवराड्महम्॥
अहं यमश्च वरुणश्चन्द्रोऽहं रविरप्यहम्।
इति माली सुमाली च माल्यवांश्चैव राक्षसः।
बाधन्ते समरोद्धर्षा ये च तेषां पुरःसराः॥"
इति रामायणे उत्तरकाण्डे ६ सर्गः॥
(अस्थिमाला अस्त्यस्येतीनिः। महादेवः। यथा, महाभारते। १३। १७। ६०।
"बालरूपो गुहावासी गुह्यो माली सरन्नवित्।"
माला अस्त्यस्येतीनिः। मालायुक्ते, त्रि। यथा, रामायणे। २। ५६। ६।
"आदीप्तानिव वैदेहि! सर्व्वतः पुष्पितान् द्रुमान्।
खैः पुष्पैः किंशुकान् पश्य मालिनः ग्रिग्रिरात्यये॥")
मालुः, पुं, (मृ + "ग्रॄ रक्ष ल्वः।" १। ५। इत्यस्य बाहुलकात् लुण्। इत्युज्ज्वलदत्तोक्तेः लुण्।) पनसतरुः। गारी। इति मेदिनी। ले, ४५॥

माल्य

मालुधानः, पुं, (मालु मरुं विदधातीति। धा + ल्युः।) मालुजाहिः। इत्यमरः। २। ८। ६। मालुया साप इति भाषा। अष्टनागान्तर्गत-नागविशेषः। यथा,—

"मालुधानश्चित्रवर्णे महापद्मोऽपि डुण्डति।"

इति हारावली॥

मालुधानी, स्त्री, लतामेदः। इति मेदिनी। ने, २०३॥

मालूकः, पुं, क्षत्त्रियजातेकः। इति राजनिर्घण्टः॥

मालूरः, पुं, (मां परेषां हृत्कान्तराणां श्रियं प्रभावं लुनातीति। लूञ् + बाहुलकात् रः।) बिल्ववृक्षः। इत्यमरः। २। ४। २२॥ (यथा, वैद्यके। २। ६४।

"स वारणारीकुचचर्चितोपमं
दृढं मालूरफलं पचेलिमम्।")

कपित्थवृक्षः। इति राजनिर्घण्टः। (बिल्ववृक्षार्थे पर्य्यायो यथा,—

बिल्वो महाकपित्थाख्यः शीफलो गोहरीतकी।
पूतिवातोऽथ माङ्गल्यो मालूरश्च महाफलम्॥"

इति वैद्यकरत्नमालायाम्॥

"बिल्वः शाण्डिल्यशैलूषौ मालूरश्रीफलावपि।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च॥)

मालेया, स्त्री, (मल + ढक् टाप्।) म्लेच्छा। इति रत्नमाला॥ (म्लेच्छाशब्देऽस्या विशेषो ज्ञेयः॥)

माल्यं, क्ली, (मालेव। माला + चतुर्व्वर्णादित्वात् ष्यञ्।) पुष्पम्। पुष्पस्रक्। इति मेदिनी। ये, ४५॥ पुष्पार्थकमाल्यशब्दस्य प्रयोगो यथा,

"यथा चार्द्रेण माल्येन वासितं तिलसर्षपम्।
न सञ्चष्टे स्वकं गन्धं तद्वत् सूक्ष्मस्य दर्शनम्॥"

इति महाभारते मोक्षधर्म्मे १०५ अध्यायः॥

मूर्द्ध्नि न्यस्तपुष्पदाम। इत्यमरः। २। ७। १५५॥

अस्य पर्य्यायादिर्मालाशब्दे द्रष्टव्यः॥ ✱॥

(पुष्पसामान्ये गुणा यथा,—

"दृष्टं सौगन्ध्यमायुष्यं कान्यं पुष्टिबलप्रदम्।
सौमनस्यमलक्ष्मीघ्नं गन्धमाल्यनिषेवणम्॥"

इति चरके सूत्रस्थाने पञ्चमेऽध्याये॥)

माल्यदानफलं यथा,—

"गन्धमाल्यैरलङ्कारैस्तुष्टा तुष्टाश्च नित्यशः।
गन्धमाल्यप्रदा ये तु दानसिद्धयतत्परा॥
धर्म्मज्ञाः सत्यशीलाश्च सर्व्वदुःखविवर्ज्जिताः।
सुचिरं देवतैः सार्द्धं क्रीड़न्ति हि महात्मने!॥"

इति वह्निपुराणम्॥

अपि च। नारसिंहे।

"जातीपुष्पसहस्रेण यश्चैकामालां सुशोभनाम्।
वैष्णवो विधिवद्भक्त्या तस्य पुण्यफलं शृणु॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च।
वसेद्विष्णुपुरे श्रीमान् विद्युत्तुल्यपराक्रमः॥
जातीपुष्पसजं मालां कर्पूरपटवासिताम्।
निवेद्य देवदेवाय यत्फलं प्राप्नुयान्नरः।
न तद्वर्षयितुं शक्यमपि वर्षशतैरपि॥"

स्कान्दे।

"मालतीकलिकामालामीषद्विकसितां हरेः।

माल्यवा

दत्त्वा शिरसि विप्रेन्द्र! वाजिमेधफलं लभेत्॥"

तथैव।

"मालतीमालया विष्णुः पूजितो येन कार्त्तिके।
पापाचरणजां मालां यटात् सौरिः प्रमार्ष्टि॥"

सौरिर्यमः। विष्णुरहस्ये।

"स्वर्णलक्षाधिकं पुण्यं माला कोटिगुणाधिका॥"

इति श्रीहरिभक्तिविलासे ७ विलासः॥ ✱॥

माल्यगलस्य बहिर्गमननिषेधो यथा,—

"बहिर्माल्यं बहिर्गन्धं भार्य्यया सह भोजनम्।
विहाय वासं स्नात्वा वा प्रवेशञ्च विवर्जयेत्॥"

इति कूर्म्मपुराणे उपविभागे १५ अध्यायः॥✱॥

स्वयं माल्यापकर्षणनिषेधो यथा,—

"नाश्नीयात् सन्धिवेलायां न गच्छेन्नापि संविशेत्।
न चैव प्रलिखेद्भूमिं नात्मनोपहरेत् स्रजम्॥"

इति मानवे ४ अध्यायः॥

न च मालां धृतां स्वयमेवापनयेत्। अर्थादन्येनापनयेदित्युक्तम्। इति कुल्लूकभट्टः॥✱॥

केशवाग्रे माल्यधारणनिषेधो यथा,—

"नहि गर्ह्यकथां कुर्य्यात् बहिर्माल्यं न धारयेत्।
गवाञ्च यानं पृष्ठेन सर्व्वथैव विगर्हितम्॥"

इति च मानवे ४ अध्यायः॥

केशकलापादहिर्माल्यं न धारयेदिति कुल्लूकभट्टः॥✱॥ स्वयं माल्यधारणनिषेधो यथा,—

"स्वयं मालां स्वयं पुष्पं स्वयं घृष्ट्वा च चन्दनम्।
नापितस्य गृहे चौरं मृकाद्दपि हरेत् श्रियम्॥"

इति कर्म्मलोचनम्॥✱॥

माल्यचन्दनदानविधिर्यथा,—

"आमन्त्रयित्वा यो विप्रान् गन्धमाल्येश्च मानवः।
तर्पयेच्छ्रद्धया युक्तः स मामर्चयते सदा॥"

इति वह्निपुराणम्॥

माल्यपुष्पः, पुं, (माल्याकारादपि पुष्पाण्यस्य।) गुणद्रुमः। इति राजनिर्घण्टः॥

माल्यपुष्पिका, स्त्री, (माल्यपुष्प + कन् टाप्। अत इत्वञ्च।) गुणपुष्पी। इति राजनिर्घण्टः॥ (गुणाद्योऽस्याः गुणपुष्पीशब्दे ज्ञेयाः॥)

माल्यवान्, [न्] पुं, (माला + मतुप्। मस्य वः।) पर्व्वतविशेषः। इत्यमरः। २। ३। ३।

माल्यं मालाकारता विद्यतेऽत्र माल्यवान् वसु। इति तट्टीकायां भरतः॥ स च केतुमालेलावृतवर्षयोः सीमापर्व्वतः। नीलनिषधपर्व्वतपर्य्यन्तविस्तारः। इति सिद्धान्तशिरोमणिः॥ (यथा, महाभारते। ३। १५८। ३५।

"उपनम्योर्म्मिभागा माल्यवन्तं महागिरिम्।")

राक्षसविशेषः। स च सुकेशराक्षसात् यामिनीनामकगन्धर्व्वस्य कन्यायां देववत्यां जातः। अस्य भ्राता सुमाली तस्य कन्यायां निकषायां पुलस्त्यपुत्रविश्रवसो रावणो जातः। इति रामायणे उत्तरकाण्डे ५ सर्गः॥ (मालाविशिष्टे, त्रि। यथा, महाभारते। १। १७१। ३१।

"शिरोदेशे जयाद्य माल्यवतस्तु धनञ्जयः।"

माष

स्त्रियां ङीप्। नदीभेदः। यथा, रामायणे २। ५६। ३५।

"सुरम्यमासाद्य तु चित्रकूटं
नदीञ्च तां माल्यवतीं सुतीर्थाम्।
ननन्द रामो जनपदिजुष्टां
जहौ च दुःखं पुरविप्रवासात्॥")

माल्यः, पुं, (मल्ल + चातुरार्थिकत्वात् अञ्।) वर्णसङ्करजातिविशेषः। स च लेटात्तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥

माल्लवी, स्त्री, (मल्ल + स्वार्थेऽण्। तस्य वी गमनं यत्र।) मल्लयात्रा। इति हारावली॥

माघ्नस्त्रिक, त्रि, (मा इत्यादिर्यस्य। माघ्नस्त्र + "प्राग्वहतेष्ठक्।" ४। ४। १। इत्यत्र। "तदादेरिति माघ्नस्त्रादिभ्य उपसंख्यानम्।" इति वार्त्तिकात् ठक्।) निषेधकर्म्मा। तत्पर्य्यायः। प्रतिषेधः २। इति त्रिकाण्डशेषः॥

माषः, पुं, (माषस्य फलम्। माष + अण्। "तुप् च।" ४। ३। १४४। इत्यस्य "फलपाकशुषाहुपसंख्यानम्।" इति कात्यिकोक्तेरणो लुप्। यद्वा, मस + घञ् पृषोदरादित्वात् साधुः।) व्रीहिभेदः। माषकलाद इति उरिट् इति च भाषा। तत्पर्य्यायः। कुरुविन्दः २ धान्यवीरः ३ शुक्राकरः ४ मांसलः ५ बलाढ्यः ६ पित्रयः ७ पित्तभोजनः ८। अस्य गुणाः। स्निग्धत्वम्। बहुमलकरत्वम्। शोषजत्वम्। श्लेष्मकारित्वम्। अशुक्रवीर्य्यत्वम्। झटितिरक्तपित्तप्रकोपणत्वम्। वातहरत्वम्। गुरुत्वम्। बलकरत्वम्। रोचकत्वम्। स्वादुत्वम्। श्रमसुखवतां नराणां नित्यं सेवनीयत्वम्। इति राजनिर्घण्टः॥ अपि च।

"माषो गुरुः स्वादुपाकः स्निग्धो रुच्योऽनिलापहः।
उष्णः सन्तर्पणो बल्यः शुक्रलो दृंहणः परः॥
भिन्नमूत्रमलक्लन्यमेदःपित्तकफप्रदः।
गुदकीलार्हितश्वासपंक्तिशूलानि नाशयेत्॥"

इति।

कफपित्तकरा माषाः। इति च भावप्रकाशः॥

अन्यच्च।

"माषो बहुमलो वृष्यः स्निग्धोष्णो मधुरो गुरुः।
वातनुद्दृंहणो बल्यो मेदोमांसकफप्रदः॥"

इति राजवल्लभः॥

माषरूपेण मूलकभक्षणं निषिद्धं यथा,—

"मूलकं माषरूपेण मधुना च न भक्षयेत्॥"

इति च राजवल्लभः॥

चतुर्द्दश्यां रविवारे च माषभक्षणनिषेधो यथा, चिररोगी च माषकृत्। इति।

"माषमामिषमांसञ्च मसूरं नित्यपञ्चकम्।
भक्षयेद्यो रवेर्वारे सप्तजन्मपुनर्भवः॥"

इति च तिथ्यादितत्त्वम्॥✱॥

परिमाणविशेषः। माषा इति भाषा। तत्-

पर्य्यायः। माषकः २ माषः ३। इत्यमरभरतौ। हेमः ४ धानकः ५। स च माषमाने सुश्रुतमते ५ गुञ्जापरिमाणम्। चरकमते ६।८ गुञ्जापरिमाणम्। कालिङ्गमाने सुश्रुतमते ५। ७। ८ गुञ्जापरिमाणम्। इति भावप्रकाशः॥ वैद्यकान्तरे १० गुञ्जापरिमाणम्। यथा,—

"गुञ्जाभिर्दशभिर्माषः प्राणो माषचतुष्टयम्।"

इति वैद्यकपरिभाषा॥

(माषार्थे यथा,—

"द्वात्रिंशन्माषकैर्मानचरकस्य तु तैः पलम्।
चरकार्द्धपलोन्मानं चरके दशरत्तिके।
मानैः पलं चतुःषष्ट्या यद्वैद्यैस्तत्परिग्रहम्॥"

इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे।)

ज्योतिःस्तुतिमते १२ गुञ्जापरिमाणम्। यथा,

"पलं तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्।
लोकक्रीतयं क्षेयं ज्योतिर्ज्ञैः स्तुतिसम्मतम्॥"

इति तिथ्यादितत्त्वधृतवचनेन पलं अष्टरत्तिकाधिकमाषद्वयाधिकतोलकचयम्। एतेन माषकपरिमाणं द्वादशरत्तिकं भवति॥ * ॥ मूर्खः। लगडोषभेदः। इति मेदिनी। षे, २१॥

माषकः, पुं, (माषप्रकारः। माष + "स्वार्थादिभ्यः प्रकारवचने कन्।" ५। ४। २। इति कन्।) माषकः। पञ्चरत्तिकपरिमाणम्। यथा। गुञ्जाः पञ्चाद्यमाषकः। इत्यमरः॥

"इत्याहुर्गुञ्जं प्रवदन्ति माषं
माषाक्षयैः षोड़शभिश्च कर्षम्॥"

इति लीलावती च॥

"षड्भिस्तु रत्तिकाभिः स्याद्माषको हेमधानकौ।
माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्॥"

इति भावप्रकाशः॥

(द्वीहिविशेषः। तदर्थे विषयो यथा,—

"द्वात्रिंशद्माषकैर्माषः।"

परिमाणार्थे यथा,—

"————————सुश्रुतस्य तु माषकः।
द्वादशभिर्माष्यमाषैश्चतुःषष्ट्या तु तैः पलम्॥"

इत्युभे वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

माषकलायः, पुं, (माषसंज्ञः कलायः प्राकृतपार्थिववत् समासः।) खनामख्यातशस्यम्। यथा। कलायशब्दो विशेषे सामान्ये च यतस्त एव माषकलाय इत्यादि प्रयोगः। इत्यमरटीकायां भरतः॥

माषपर्णी, स्त्री, (माषस्य पर्णमिव पर्णं यस्याः। ततो ङीष्।) वनमाषः। माषाणी इति भाषा। तत्पर्य्यायः। हयपुच्छी २ काम्बोजी ३ महाबला ४। इत्यमरः। २।४।१३८॥ सिंहपुच्छी ५ ऋषिप्रोक्ता ६ लक्ष्मणा ७ पाण्डुलोमशपर्णिनी ८। इति रत्नमाला॥ आढ्यमाषा ९ मांसमाषा १० मङ्गल्या ११ हयपुच्छिका १२ हंसमाषा १३ अश्वपुच्छा १४

पाण्डुरा १५ माषपर्णिका १६ कल्याणी १७ वनमूली १८ घण्टालिपर्णी १९ विसारिणी २० आलोडवा २१ बहुफला २२ स्वयम्भूः २३ सुलभा २४ घना २५ सिंहविक्रा २६ विघ्नाचिका २७। अस्या गुणाः। तिक्तरसत्वम्। दृष्यत्वम्। दाहज्वरापहत्वम्। शुक्रवृद्धिकारित्वम्। बलत्वम्। शीतलत्वम्। पुष्टिवर्द्धनत्वञ्च। इति राजनिर्घण्टः। अपि च भावप्रकाशे।

"माषपर्णी हयपर्णी काम्बोजी हयपुच्छिका।
पाण्डुलोमशपर्णी च लक्ष्मणा महासहा॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलाग्रहृत्।
मधुरा गुरुहृद्योष्णा वातपित्तज्वरास्रजित्॥"

माषभक्तबलिः, पुं, (माषश्च भक्तञ्च तदुक्तो बलिः।) माषतण्डुलदधिमिश्रितपूपोपहारविशेषः। अत्र केचित् हरिद्राद्यूतमप्यपि मिश्रयन्ति। यथा। एष माषभक्तबलिः।

"ॐ जय त्वं कालि! सर्व्वेषु सर्व्वभूतसमाहृते।
इमं मां निजभूतेभ्यो बलिं गृह्ण शिवप्रिये!॥"
ॐ कालै नमः। प्रार्थनामन्त्रो यथा,—
"ॐमातर्मातर्व्वरे दुर्गे सर्व्वकामार्थसाधिनि!।
अनेन बलिदानेन सर्व्वान् कामान् प्रयच्छ मे॥"

इति लघुतन्त्रम्॥

भूतेभ्योऽप्ययं बलिर्देयः॥

माषवर्द्धकः, पुं, (माषं वर्द्धयतीति। वृध + ण्वुल्।) स्वर्णकारः। इति शब्दमाला॥

माषाग्रः, [स्] च, प्रतिमाषम्। माषं माषं ददाति इत्यर्थे ग्रसूपत्ययेन निष्पन्नम्। इति सिद्धान्तकौमुदी॥

माषादः, पुं, (माषमत्तीति। अद् + अण्।) कच्छपः। इति शब्दरत्नावली॥ माषभक्षके, त्रि॥

माषीयं, माष्यं, } क्ली, (माषाणां भवनं क्षेत्रम्। माष + "विभाषा तिलमाषोमाभङ्गाद्यर्थेभ्यः।" ५।२।४। इति यत् पक्षे खञ्।) माषक्षेत्रम्। यथा,—

"तिल्यतैलीनयञ्माषीमाषुभङ्गादिरूपता।"

इत्यमरः॥

यथा तिलस्य क्षेत्रं तिल्यं तैलीनञ्च भवति तथा माषादीनामपि द्विरूपता द्वैरूप्यं भवति। इति तट्टीकायां भरतः॥

मास्, पुं, (मस + मासे "सर्व्वधातुभ्योऽसुन्।" ४।१८८। इत्यसुन्।) चन्द्रः। (यथा, ऋग्वेदे। १०। १२। ७।

"सूर्य्यं ज्योतिरदधुर्मास्यक्तून्
परिद्योतानिं चरतो अजस्रा॥"

"मासि चन्द्रमसि।" इति तद्भाष्ये सायणः॥ मीयतेऽनेनेति। मा + "चन्द्रे मो डित्।" उणा० ४। २२७। इत्यत्र "बाहुलकात् कैवलादपि मोऽसिः।" इत्युज्ज्वलदत्तोक्तेरसिः।) मासः। इति मेदिनी। से, ७॥ अस्य प्रथमैकवचनान्तरूपं मा॥ (यथा, मनौ। २। ३४।

"चतुर्थे मासि कर्त्तव्यं शिशोर्निष्क्रमणं गृहात्।

षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले॥"

मांसे, क्ली। यथा, ऋग्वेदे। ५। २६। ८।

"श्रीयञ्छता महिषाणामघो
माक्षीसरांसि मघवा सोम्यापाः।"

"माः मांसानि।" इति तद्भाष्ये सायणः॥)

मासः, पुं, (मस् परिमाणे + भावे घञ्।) मासपरिमाणम्। इत्यमरटीकायां भरतः। मास इति भाषा॥ (मस्यते परिमीयते असावनेनवेति मस् + घञ्।) शुक्लप्रतिपदारभ्यामावस्यान्तकालः। स च पौषमासादिद्वादशसंज्ञकः। इत्यमरः। १।४।१२॥ मासशब्दस्यार्थं मासः। चान्द्रमासस्येयं व्युत्पत्तिः। सौरादिषु तु मस्यते परिमीयतेऽनेनार्कादौ वा मासः। मसिर्थे परिमाणे घञ्। मा इति भाषा॥ मासुमासोऽपि दृश्यते। इति भरतः। इति भरतः॥ *॥ स्मृतिमतेऽपि पौषादिद्वादशसंज्ञकः। यथा,—

"चक्रवत् परिवर्त्तन्ते दुःखानि सुखानि च।
अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिन्तनम्॥
मासचिन्तनं कर्त्तव्यं पौषमाघात्मनेव हि।
यतस्तच्च विधानेन च मासः परिकीर्त्तितः॥"

इति लघुहारीतः॥

कार्त्तिकादिद्वादशसंज्ञकोऽपि। यथा,—

"अन्योपान्त्यौ विभौ क्षेयौ फाल्गुनश्च विभो मतः।
शेषा मासा द्विभा क्षेयाः कृत्तिकादिव्यवस्थया॥"

स च चैत्रादिद्वादशसंज्ञकश्च। यथा चक्तं ब्रह्मपुराणम्।

"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति॥
प्रवर्त्तयामास तदा कालस्य गणनामपि।
ग्रहानृक्षाणि राशीन्तु मासान् वत्सरान् वत्सराधिपान्।
इत्यनेन मासवत्सरयोः चान्द्रत्वसत्त्वम्।
ब्रह्मसिद्धान्तेऽपि।
"चैत्रसितादेरुदयाद्भानोर्मेषसंक्रमावधियुगकल्पाः।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनैर्मेषे॥"

चैत्रसितादेश्चैत्रशुक्लप्रतिपदस्तामारभ्येत्यर्थः॥

अपि च।

"मीनादिस्थो रविर्यैर्मासारम्भप्रथमचन्द्रौ।
भवतोऽब्दे चान्द्रमासास्तैश्चाद्या द्वादश स्मृताः॥"

चान्द्रसावनसौरभेदेन स च चतुर्व्विधः। शुक्लप्रतिपदादिदर्शान्तश्चान्द्रः। तत्र चान्द्रोऽपि द्विविधः। शुक्लप्रतिपदादिदर्शान्तो मुख्यः। कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणः। यत्किञ्चित्स्निग्धप्रवृत्तिध्यानात्मकश्चेति द्विविधो गौणः। स्निग्धदहोराध्यानात्मकः सावनः। आदित्यैकराशिभोगावच्छिन्नः सौरः। सप्तविंशतिनक्षत्रावच्छिन्नस्निग्धप्राणचन्द्रदिनात्मकश्च नाक्षत्रः। तथा च ब्रह्मसिद्धान्ते।

"चान्द्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः।
एकराश्यौ रविर्यावत् कालं मास इह स्मृतः॥

सर्व्वत्रैवंविधेनैव मासाब्दं इति घोष्यते ॥"
सूर्य्यसिद्धान्ते ।
"नाड़ीघट्या तु मासस्य महोरात्रं प्रचक्षते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥
ऐन्दवस्तिथिभिस्तद्वत् संक्रान्त्या सौर उच्यते ॥"
तत्त्रिंशता मासस्तत्त्रिंशता मासो मासस्य-
मासः । तथा त्रिंशता । * ॥ ज्यौतिःशूलपाणि-
मते तुल्यमासान्न एव मासपदप्रवृत्तेः । जीमूत-
वाहनमते सौर एव ग्राह्यः । चान्द्रप्रमाणं प्रागुक्तम् । सौरप्रमाणन्तु । सौरास्तु मासादयो
द्वादश एव गौणाः । तथा च स्मृतिः । तप-
स्तपस्यौ श्रैष्मिरार्तवः । मधुश्च माधवश्च वास-
न्तिकार्तवः । शुक्रश्च शुचिश्च शैशिरार्तवः । अथै-
सदुदगयनं देवानां दिनम् । नभाश्च नभस्यश्च
वार्षिकार्तवः । इषश्च ऊर्जश्च शारदार्तवः । सहश्च सहस्यश्च हैमन्तिकार्तवः । अथैत-
दक्षिणायनं देवानां रात्रिरिति । अत्रायनस्य
सौरत्वेन तद्घटकनक्षत्रपरस्यादीनामपि सौर
परत्वेति । अतो भूयसामनुरोधेन वैशाखादयः
सौरवार्षिणोऽवधार्यन्ते । इति मलमासतत्त्वम् ॥
अपि च ।
"मेषस्थितो रवेर्मासो वैशाखोऽब्दसुखः
स्मृतः ।"
इति सङ्केतकौमुदी ॥
अथ कर्म्मविशेषे मासविशेषादिः । तत्र पिता-
महः ।
"आब्दिके पिण्डदाने च मासस्याब्दमसः स्मृतः ।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
प्रथमादिपदं यात्रायज्ञचारपरम् । यत् कर्म्म
सूर्य्यभोग्यराश्युक्तेन यच्च विष्णोरुदगयनादि
विहितं तत्परञ्च अयनस्य सौरमासघटित-
त्वात् । तच्च चूड़ोपनयनादि । हिरण्यादिपदं
सचन्द्रतिथिद्वादशप्रायश्चित्तायुर्दायाग्नौपासनगर्भाधान-
पुंसवनसीमन्तोन्नयननामकरणान्नप्राशननिष्क्र-
मणचूड़ादिपरम् । तथा च विष्णुधर्म्मोत्तरे ।
"अध्ययनञ्च ग्रहचारकर्म्म
सौरेण मासेन सदाध्यवस्येत् ।
सज्ञाणयुपास्त्राग्रथ सावनेन
सौक्यञ्च यत् स्यादवहारकर्म्म ॥"
अध्ययनं अध्यगमनं यात्रेति यावत् ॥ * ॥
अथ सौरादिमासविहितकर्म्माणि ।
"विवाहोत्सवयज्ञेषु सौरं मासं प्रशस्यते ।
पार्व्वणे श्राद्धकाम्यादौ चान्द्रमिष्टं तथाब्दिके ॥"
अत्र यज्ञपदमुदगयनादिविहितपशुयागाभिप्रायं
पितामहोक्तन्तु विष्णुधर्म्मोत्तरोक्तसत्रपरम् ।
गर्गः ।
"आयुर्दायविभागञ्च प्रायश्चित्तक्रिया तथा ।
सावनेन तु कर्त्तव्या मन्त्राणामप्युपासना ॥"
सूर्य्यसिद्धान्ते ।
"व्रतकादिपरिच्छेदो दिनमासाब्दपात्तथा ।
मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता ॥"
मध्यमग्रहभुक्तिर्ज्योतिर्गणना प्रसिद्धा ॥ * ॥
नाक्षत्रमासप्रयोजनं विष्णुधर्म्मोत्तरे ।
"नक्षत्रसञ्ज्ञानि मासस्याभ्ययागविशेषरूपाणि
याज्ञिकप्रसिद्धानि । इष्टेरयनानि सोमाय-
नाख्यसञ्ज्ञानि । इति समयप्रकाशः ॥ एवं जन्म-
नक्षत्रे शनिभौमवारे वा नाक्षत्रमासेन योग्य-
त्वात् । यथा, मलमासतत्त्वे ।
"जन्मर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ ।
स मासः कल्पधो नाम मनोदुःखप्रदायकः ॥"
मलमासविवरणं मलमासशब्दे द्रष्टव्यम् ॥ * ॥
अथ मासकृत्यम् ।
"आषाढ़शुक्लैकादश्यां कुर्य्यात् स्नानं महोत्-
सवम् ।
आषाढ़े च रथं कुर्य्यात् श्रावणे श्रवणाविधिम् ॥
भाद्रे च जन्मदिवसे उपवासपरो भवेत् ।
प्रसुप्तञ्च पार्श्वपरिवर्त्तमाश्विने मासि कारयेत् ॥
उत्थानं श्रीहरेः कुर्य्यादन्यथा विष्णुदोषभाक् ।
शुभे चैवाश्विने मासि महामायाञ्च पूजयेत् ॥
कार्त्तिके मासि यत् स्नानं प्रदद्यु देवि वरानने ! ।
सप्तजन्मा: प्रमाणेन दीपः स्याच्चतुरङ्गुलः ॥
पक्षान्ते च प्रकर्त्तव्या दीपमाला बलिः शुभा ।
मार्गशीर्षे सिते पक्षे षष्ठ्याञ्च सितवस्त्रकैः ॥
पूजयेज्जगदीशञ्च तूलवस्त्रैर्विशेषतः ।
पौषे पुण्याभिषेकञ्च वस्त्रयेच्चन्दनं तथा ॥
संक्रान्त्यां माघमासे च साधिवासितनस्तुलान् ।
निवेद्य विष्णवे भक्त्या दमं मन्त्रमुदीरयेत् ॥
जीवनं सर्व्वभूतानां जनकत्वं जगद्गुरो ! ।
तस्मायालीनता प्राप्ता त्वयैव जनिता प्रभो ! ॥
कर्पूरादितिद्रव्याणि घृताक्तानि निवेदयेत् ।
ब्राह्मणान् भोजयेद्भक्त्या देवदेवपुरःस्थितान् ॥
अभ्यर्च्य भगवद्भक्त्या द्विजांश्च भगवद्धिया ।
एकस्मिन् भोजिते भक्ते कोटिर्भवति भक्तितः ॥
विप्रभोजनमात्रेण यज्ञः साङ्गः भवेदुध्रुवम् ।
पक्वान्नं गुडपक्वं तु स्नापयित्वा च केशवम् ॥
पूजयेद्भगवद्भक्त्या चतुष्पञ्चवसम्मितैः ॥
फलगुग्गुलैश्च विविधैर्वासितैः पटवासितम् ।
कारयेत् रमणीयञ्च प्रदीप्तदीपदीपितम् ॥
प्राचेतुरुशीरजीरनागरङ्गकपूगकम् ।
नारिकेलञ्च धात्री च वंशतालहरीतकी ॥
अर्घ्यञ्च दत्त्वाच्च सर्व्वर्त्तुकुसुमार्चितम् ।
पुष्पैश्च विविधैश्चैव फलपुष्पसमन्वितम् ॥
वितानैः कुसुमोद्यानैर्वारिपूर्णघटैस्तथा ।
चूतशाखोपशाखाभिः शोभितं छत्रचामरैः ॥
विशेषतः कलियुगे दोलोत्सवो विधीयते ।
फाल्गुने च चतुर्दश्यामर्द्धमे यामसङ्गमे ॥
अथवा पौर्णमास्यान्तु प्रतिपत्सन्धिसम्मितौ ।
पूजयेद्विधिवद्भक्त्या फलगुग्गुलैश्चतुर्विधैः ॥
सितरक्तैर्गौरपीतैः कर्पूरादिविमिश्रितैः ।
हरिद्राचारयोगाच्च रङ्गरम्यैर्मनोहरैः ॥
अन्यैर्वा रङ्गरम्यैश्च प्रीणयेत् परमेश्वरम् ।
एकादश्यां समारभ्य पक्षत्रयन्तु समापयेत् ।
पक्षाद्वानि त्र्याह्नानि स्युर्होलोत्सवो विधीयते ॥
दक्षिणाभिस्तुष्टं तस्यां दोलयानं सुखप्रदः ।
दुष्टापराधनिचयैर्मुच्यते नात्र संशयः ॥
निक्षिप्य जलमात्रे तु मासं माधवसंज्ञिते ।
सौवर्णपात्रे ताम्रे वा रौप्ये वा स्फटिकेऽपि वा ॥
तोयन्तं योऽर्घ्ययेद्देवं प्रातःस्नानमसम्भवम् ।
प्रत्यहं मां महाभागे ! तस्य पुण्यं न गण्यते ॥
दमनारोपणं कृत्वा श्रीविष्णौ च समर्पयेत् ।
वैशाख्यां श्रावणे भाद्रे कार्त्तिकञ्च तदर्पणम् ॥
वैशाखे च तनौघायां जलमध्ये विशेषतः ।
अथवा मण्डपे कुर्य्यात् मञ्चके वा हरेर्गृहे ॥
सुगन्धचन्दनेनाङ्गमुपलिप्तो दिने दिने ।
यथा प्रयत्नतः कार्य्यः स्नानाङ्गो नैव पूजितः ॥
चन्दनागुरुकस्तूरीकुङ्कुमरोचना ।
जटामांसी वचा चैव विष्णोर्गन्धाष्टकं तथा ।
एतैर्गन्धयुतैश्चापि हरेरङ्गानि लेपयेत् ॥
पृथक् च तुलसीकाष्ठं कर्पूरागुरुयोगतः ।
अथवा कुङ्कुमैर्योज्यं हरिचन्दनसञ्ज्ञितं ॥
अस्मिन् काले स्नानभक्त्या ये प्रयच्छन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
सुगन्धिमांसितैस्तोयैः स्नापयित्वा जगद्गुरुम् ।
अथवा पुष्पमध्ये च स्नापयेज्जगदीश्वरम् ॥
वृन्दावनं तत्र कृत्वा उपस्कृतफलानि च ।
विष्णुभक्तेन योग्येन भोजयेत्तदर्पणम् ॥
नारिकेलफलं नीरं कोषस्थोदृत्य दापयेत् ।
कपित्थफलञ्च पनसं कोषसहृत्य दीयते ॥
यथा पक्वैस्तथा दद्यादथाप्युक्तं नियोगतः ।
दध्ना विमिश्रितञ्चान्नं घृतेनाप्लुत्य दापयेत् ॥
पायितं पिष्टकं धातुरत्नादञ्च घृतेन च ।
तिलैश्च तिलसंमिश्रैः फलं गुड़ञ्च दापयेत् ॥
यद्यदेवात्मनः श्रेयस्तत्तदीप्सिताय कल्पयेत् ।
दत्त्वा नैवेद्यवस्त्रादीनादद्यात् कथञ्चन ।
उक्तयं विष्णुसृष्टिश्च तद्भक्तेभ्यो विशेषतः ॥
इति ते कथितं किञ्चित् समासेन मयेश्वरि ! ।
गोप्यञ्च प्रयत्नेन स्वयोनिरिव पार्व्वति ! ॥"
इति पाद्मे पातालखण्डे १९ अध्यायः ॥

मासकः, पुं, माषकपरिमाणम् । यथा । शुक्लाः पक्षाद्यमासकः । इत्यमरः ॥ पक्षशुक्लाः शुक्लाः आद्यः प्रथमो मासकः । दशशुक्लापेक्षया आद्यत्वम् । प्राक्षीयत्वात् सुट्को माष इत्यर्थो वा । मस्यते परिमीयतेऽनेन माषः मसिर् ई परिमाणे परोक्षाप्ते घञ् स्वार्थे कः मासोऽर्थ इत्यादिः । मघ हिंसार्थो महेन्द्राण्यन्तस्तस्मादृ-घञ् तेन माघो महेन्द्राण्या इति जिनेन्द्रप्रभृ-तयः । इत्यमरटीकायां भरतः ॥

मासज्ञः, पुं, ज्ञातृहपक्षी । इति शब्दरत्ना-वली ॥ (मासं जानातीति । ज्ञा + कः ॥) मासज्ञातरि, त्रि ॥

मासनं, क्ली, सोमराजी । इति शब्दचन्द्रिका ॥

मासमात्रः, पुं, (मासैर्द्वादशभिर्मानमस्य ।) वत्स-रः । इति त्रिकाण्डशेषः ॥ (मासस्य मानम् ॥) मासपरिमाणे, क्ली ॥

मासरः, पुं, (मस + शिच् + बाहुलकात् अरन् ।) भल्लातसुद्गवमक्षः । तत्पर्य्यायः । आचामः २ निस्रावः ३ । इत्यमरः । २ । ६ । ४६ ॥

मासवर्त्तिका, स्त्री, सर्षपीपत्तिविशेषः । इति शब्दमाला ॥

मासान्तः, पुं, (मासस्यान्तः ।) अमावस्या । यथा,—

'पक्षान्ते निष्फला यात्रा मासान्ते मरणं ध्रुवम् ।
इति समयप्रदीपः ॥

संज्ञान्तरमिदम् । यथा,—

"मासान्ते म्रियते कन्या तिथ्यन्ते स्यादपुत्रिणी ।
नक्षत्रान्ते च वैधव्यं विद्यो ह्यत्युदयोर्भवेत् ॥
मासान्ते दिनमेकन्तु तिथ्यन्ते घटिकाद्वयम् ।
घटिकात्रितयं भान्ते विवाहे परिवर्जयेत् ॥"
इति रत्नमाला ॥

मासिकं, क्ली. (मासे भवम् । मास + "कालाट् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) प्रेतस्य संवत्सराभ्यन्तरे प्रतिमासीयमृतसपिण्डतीयतिथि कर्त्तव्यश्राद्धम् । प्रतिमासकर्त्तव्यत्वात्तथात्वनिमित्तक श्राद्धम् । तत्पर्य्यायः । अन्वाहार्य्यम् २ । इत्यमरः । २ । ७ । ३१ ॥ मासि भवं मासिकं पार्व्वणश्राद्धं तत्र अन्वाहार्य्यं वर्ण्यते । पक्षौषधि अमावास्यायां हेयत्वात् । अतु पक्षादाहियते अन्वाहार्य्यं हरदत्तस्तोरिति घञ् स्वार्थे क अन्वाहार्य्यकञ्च । अतएव पिण्डीकरणस्य वत्सराभ्यन्तरे प्रतिमासं यत् श्राद्धं तच्चान्वाहार्य्यमिति केचित् । इत्यमरटीकायां भरतः ॥ तयोः प्रमाणम् ।

"यावच्छ्राद्धिकाब्दिके श्राद्धे स्यातां पूर्ब्बवदेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशापि च ॥"
इति पैठीनसिः ॥

'पितृणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः ।
तच्चामिषेण कर्त्तव्यं प्रयत्नेन प्रयत्नतः ॥'
इति मनुः । ३ । १२३ ॥*॥

मासिककरणस्य अवश्यता यथा । पौष्टकर्त्तोपाशहरहितानि इहलोकं परित्यज्य इत्यादि सर्व्वः सुगन्ध इत्यादि श्रिया देवा इत्यादि वनस्पतिरस इत्यादिमन्त्रचतुष्टयरहितानि च आष्टकोद्दिष्टवत् कृताहे कृताहे द्वादश मासिकानि कार्य्याणि । एकादशमासाभ्यन्तरे मलमासपाते अयोदशमासिकानि । षष्ठमासाभ्यन्तरे मलमासपातेऽपि षष्ठमासिकपूर्ब्बतिथावेव प्रथमषाण्मासिकम् । तथा त्रयोदशमासिकस्य पूर्ब्बतिथौ द्वितीयषाण्मासिकम् । एवं षाण्मासिकोक्तेः प्रथमषाण्मासिकद्वितीयषाण्मासिकर्त्तव्यतोक्तेश्च । एवं मध्ये यत् पतितं तत् लक्षणोक्तदर्शे अमावास्यायां मासिकान्तरतिथौ वा कृत्वा प्रकृतं कर्त्तव्यम् । अग्रौषपतितश्चेत्तदग्रौषाभावे कर्त्तव्यम् । एकादशाहादिश्राद्धानि कतिचित् कृत्वा यदि मृतस्तदा शेषाग्रयणेनाधिकारिणा समाप्यानि ॥*॥ अथ मासिकैकोद्दिष्टश्राद्धप्रयोगः । पूर्ब्बदिने निरामिषैकभक्तः परदिने

स्नानादिकं कृत्वा एकोद्दिष्टश्राद्धविहितकाले भोज्यमन्नञ्च कृत्वा ब्राह्मणं स्नापयित्वा वास्तुपुरुषादि पूजयित्वा भूस्वामिपितृभ्यः श्राद्धाग्रभागं दत्त्वा दक्षिणामुखः अमुक्तां कुर्य्यात् । यथा अद्यामुके मासि अमुकपक्षे अमुकतिथौ अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः प्रथममासिकैकोद्दिष्टश्राद्धं दर्भमयब्राह्मणोऽहं करिष्ये । ॐ कुरुष्वेत्युत्तरम् । ततो गायत्रीं जपेत् । देवताभ्य इत्यादि त्रिधा पठेत् । ततः पुष्करीकाक्षं स्मृत्वा न्यञ्चनेन श्राद्धीयद्रव्यं प्रोक्षयेत् । रक्षार्थमुदकपूर्णपात्रमेकदेशे स्थापयेत् । ततः ॐ अमुकगोत्र प्रेत अमुकदेवशर्म्मन्नेतत्ते दर्भासनं स्वधा । इत्यनेन ब्राह्मणवामपार्श्वे दद्यात् । अपहतेत्यादिना तिलान् विकीर्य्य जलं स्पृष्ट्वा ब्राह्मणाग्रभूमौ कृशपत्रमेकं पातयित्वा तदुपरि अर्घ्यपात्रं संस्थाप्य ॐ पवित्रास्थ वैष्णव्यौ सवितुर्व्वः प्रसवस्थिद्रं ॐ विष्णोर्मनसा पूतमसीत्यनेन प्रोक्षितमेकदलं पवित्रं तत्पात्रे निधाय ॐ अग्नेर्देवीरित्यादिमन्त्रेण जलं दद्यात् । ततः ॐ तिलोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः । प्रत्नमद्भिः पृक्तः स्वधया प्रेतान् लोकान् प्रीणाहि नः स्वाहा । इत्यनेन तिलान् दत्त्वा गन्धपुष्पादिना अर्घ्यं निर्म्माय कृशान्तरेणाच्छाद्य तत् कृशमुदघाद्य ब्राह्मणे पवित्रं दत्त्वा जलान्तरञ्च दत्त्वा पुष्पान्तरेण शिरःप्रभृतिसर्व्वगात्रेभ्यो नम इति संपूज्य तत् पात्रं वामहस्ततले विन्यस्य दक्षिणहस्तेनाच्छाद्य ॐ या दिवा इति पठित्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽर्घ्यं स्वधा । ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतानि ते गन्धपुष्पधूपदीपाच्छादनानि स्वधा । इत्युक्त्वा एष ते गन्धः एतत्ते पुष्पं एष ते धूप एष ते दीपः एतत्ते आच्छादनम् । ततो ब्राह्मणाग्रभूमौ कृशादिकमपनीय नैर्ऋतिमारभ्य दक्षिणाग्रान्तरेखया वामावर्त्तेन जलेन चतुष्कोणमण्डलं कृत्वा तत्र भोजनपात्रं निदध्यात् । तत्र सामिषं सर्व्वमन्नादिकं परिवेष्य ॐ इदं विष्णुरित्यादिमन्त्रेण अन्नादावनवाकृष्टं निक्षिप्य ॐ अपहतेत्यादिना तिलान् विकीर्य्य ब्राह्मणे जलगण्डूषं दत्त्वा गायत्रीं जप्त्वा अन्ने मधु दत्त्वा तदभावे गुडं दत्त्वा घृतं दत्त्वा ॐ मधुवातेत्यादि मधु मधु मध्वित्रि च पठित्वा अन्नमभिमन्त्र्य प्रोक्ष्य ब्राह्मणे जलगण्डूषं दत्त्वा वामहस्तेनान्नपात्रं धृत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते सामिषान्नं सोपकरणं स्वधेत्युत्सृजेत् । इदं सामिषान्नं इदं हविः इमा गङ्गाया आपः एतान्युपकरणानि यथासुखं वागयतः सद्य इत्यनेन जलगण्डूषं दद्यात् । ततो गायत्रीं त्रिः सकृद्वा ॐ मधुवाता इत्यादि मधु मधु मध्वित्रि ॐ अन्नहीनमित्यादि च पठेत् । कृशब्राह्मणपक्षे पुनर्गायत्र्यादि पठेत् । ॐ यज्ञेश्वरो हव्य इत्यादि ॐ योगीश्वरमित्यादि यान्

वस्त्राशोकवयं ॐ तद्विष्णोरित्यादि ॐ दुर्य्योधन इत्यादि ॐ युधिष्ठिर इत्यादि सर्व्वं पठेत् । ततो दक्षिणाग्यान् कृशान् भूमौ संस्थाप्य भूमिं प्रोक्ष्य सर्व्वप्रकारमन्नमुद्धृत्य सतिलमेकीकृत्य वारिणाप्लुत्य ॐ अग्निदग्धाश्चेत्यादिमन्त्रद्वयेन कृशोपरि विकिरेत् । ततो हस्तौ प्रक्षाल्याचम्य दक्षिणकर्णं स्पृष्ट्वा वा हरिं स्मृत्वा ब्राह्मणाय जलगण्डूषं दत्त्वा पूर्ब्ववन्नायत्रीं मधुवाता इत्यादिकं मधु मधु मध्वित्रि च जप्त्वा ॐ प्रीयमन्नं न देयमित्यनुज्ञाप्य ॐ इदाय दीयतामित्युत्तरं गृहीत्वा ॐ पिण्डदानमहं करिष्ये ॐ कुरुष्वेत्युक्ते ब्राह्मणसम्मुखे ॐ निहन्मीत्यादिना नैर्ऋतिमारभ्य दक्षिणाग्ररेखया जलेन वामावर्त्तेन चतुष्कोणमण्डलं कृत्वा पवित्रं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा वामहस्तात्तारभ्य दक्षिणपाणिना दक्षिणाग्रां रेखां मण्डलमध्यस्थाने ॐ अपहतेत्यादिनिहन्मीत्यादिमन्त्राभ्यां कुर्य्यात् । तद्भस्मोत्तरस्यां दिशि क्षिपेत् । रेखोपरि सन्मूलान् साग्रान् कृशानास्तीर्य्य ॐ देवताभ्य इति पठित्वा ॐ एहि प्रेत सौम्य गम्भीरेभिः पथिभिः पूर्ब्बेभिर्देवयानैरुत्तरभ्यं हविषो मदं रयिञ्च नः सर्व्ववीरं नियच्छ इत्यावाह्य तिलांस्तास्तीर्णकुशेषु विकिरेत् । ततो वामहस्तेन सतिलजलं गृहीत्वा वामहस्ताद्दक्षिणहस्तेन संगृह्य ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व स्वधा इत्यनेन दद्यात् ततः आज्यप्लुतं सव्यञ्जनं मध्वाप्लुतसंयुक्तं सामिषं गृहीत्वा पिण्डं कृत्वा ॐ मधुवातेत्यादि ऋक्त्रयं अक्षन्नमीत्यादि च पठित्वा पिण्डप्रमाणं पिण्डं सतिलं द्विगुणसुमनकुशत्रयसहितं वामहस्तस्थितपाणाद्दक्षिणहस्तेन गृहीत्वा ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेष ते सामिषपिण्डः स्वधा इत्यवनेजनस्थाने वामहस्तात्तारभ्य दक्षिणहस्तेन दद्यात् । ततः आचम्य हरिं स्मृत्वा पिण्डपात्रं प्रक्षाल्य वामहस्ताद्दक्षिणहस्तेन गृहीत्वा प्रक्षालितजलं ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व स्वधा इति पिण्डोपरि दद्यात् । ततः ॐ अत्र प्रेत मादयस्व यथा भागमा वृषायस्व इति जप्त्वा वामावर्त्तेनोदङ्मुखो भूत्वा आगमनाच्छ्वासं धृत्वा तेनैव पथा परावर्त्तमानः प्रेतं भास्करस्थं आयन् ॐ अमीमदन्त प्रेत यथा भागमा वृषायिष्ट इति दक्षिणाभिमुखो भवन् जपेत् । ततः श्वासं त्यजेत् । ॐ नमस्ते प्रेत प्रेत नमस्ते इति कृताञ्जलिर्जपेत् । ॐ यज्ञान्नः प्रेत देहि इति गृहिणीं पश्येत् । ॐ सदस्ते प्रेत देव इति पिण्डं पश्येत् । ततो नवमनवं वा सुवर्णदग्धाभावे रूप्यं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा ॐ एतद्रः प्रेता वास इति पठित्वा पिण्डोपरि निदध्यात् । ततः ॐ अमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते वासः स्वधा । इत्यनेनोत्सृजेत् । ततस्तूष्णीं पिण्डं संपूज्य ॐ यस्ते गात्रेषु इत्यादि-

मन्त्रेण यद्दूनमस्तुर्य्यात्। तत ॐ सुप्रोक्षितमस्तु इति ब्राह्मणायभूमिमासिञ्चेत्। ॐ शिवा आपः सन्तु इति ब्राह्मणे जलं दद्यात्। ॐ स्वस्तिति प्रतिवचनम्। ॐ सौमनस्यमस्त्विति पुष्पं ॐ अक्षतिति प्रतिवचनम्। ॐ अक्षतञ्चारिष्टञ्चास्तु इति यवान् दद्यात्। ॐ अक्षिन्नमस्तु इति प्रतिवचनम्। ततस्तिलाज्यमधुयुक्तं जलं गृहीत्वा ॐ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो दत्तमिदमन्नपानादिकमुपतिष्ठताम्। ॐ उपतिष्ठतामिति प्रतिवचनम्। ॐ अघोरः प्रेतोऽस्तु इति वदेत्। ॐ अक्षितिति प्रतिवचनम्। ॐ गोत्रं नो वर्द्धतामिति वदेत्। ॐ वर्द्धतामिति प्रतिवचनम्। ततः पिण्डोपरि सपवित्रकुशाग्राक्षीरं ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे प्रेतमित्यनेन वारिधारया सिञ्चेत्। ततः ॐ अद्येत्यादि अमुकगोत्रस्य प्रेतस्य अमुकदेवशर्म्मणः क्षत्रियत्वमासपिण्डैकोद्दिष्टाहकर्म्मणः प्रतिष्ठार्थं दक्षिणाग्निदं रजतं तन्मूल्यं वा विष्णुदैवतं यथा नामगोत्राय ब्राह्मणायाहं ददानीति दद्यात्। ततो दक्षिणां दिशं प्रयान् वरं याचेत। नात्र पात्रमालभ्य जपेत्। नाग्निमः प्रार्थयेदिति प्रचेतोवचनादाग्निषं न प्रार्थयेत्। ततः ॐ दैवताभ्य इति त्रिः पठेत्। ॐ अभिरम्यतामिति विसर्জ্জनम्। ॐ अभिरतोऽस्मीति प्रतिवचनम्। ॐ आमावाजेति प्रदक्षिणवारिधारया वेष्टयेत् पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा क्षिपेत्। आशौचदग्धं ब्राह्मणाय दद्यात् जले वा क्षिपेत्। ततो वामदेव्यं गायेत् अच्छिद्रावधारणं दीपाच्छादनं विष्णुस्मरणञ्च कुर्य्यात्। एवं प्रकारेण द्वितीयादिमासिकं कर्त्तव्यम्। इति स्मार्त्तभट्टाचार्य्यधृतश्राद्धप्रयोगतत्त्वम्॥ * ॥ अन्यत् श्राद्धशब्दे द्रष्टव्यम्॥

मासिकः, त्रि, माससम्बन्धी। मासि भव इत्यर्थे ष्ठिकप्रत्ययेन निष्पन्नः॥ (यथा, मनौ ।७।१२६।
"पणो देयोऽवकृष्टस्य षड्भुत्कृष्टस्य वेतनम्।
द्वात्रिंशिकस्तथाच्छादो धान्यद्रोणस्तु
मासिकः॥")

मासुरी, स्त्री, (मसुर+अण् ङीष्।) ऋक्षभुः। इति हेमचन्द्रः। ३।२०७॥ (मालभवी। यथा, ब्रह्मवैवर्त्ते। १।१०।१४५।
"पितृष्वसा पितुर्भगी मालभवी च मासुरी।")

मास्क, अ, (मा च स्क च तयोः समाहारः।) वारणम्। तत्पर्य्यायः। मा २ अलम् ३। इत्यमरः। ३।४।११। (यथा, रामायणे ।२।२०।८२।
"मास्कमे भरतः कार्षीत् प्रेतत्वं गतायुषः।")

माह ऋ अ मानें। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ अममाहत्। अदनुबन्धत्वात् वृद्धस्वरानुबन्धत्वं इत्यके। अ माहति माहतें। इति दुर्गादासः॥

माहाकुलः, त्रि, (महाकुलस्यापत्यमिति।) "महाकुलादञ्खञौ।" ४।१।१४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहाकुलीनः, त्रि; (महाकुलस्यापत्यमिति। "महाकुलादञ्खञौ।" ४।१।१४१। इति खञ्।) महाकुलोद्भवः। इत्यमरटीकायां रायमुकुटः॥

माहात्म्यं, क्ली, (महात्मनो भावः इति। महात्मन्+ष्यञ्।) महात्मता। महिमेति यावत्। यथा, तिथ्यादितत्त्वे।
"माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम्।
पाठस्यास्य जपः प्रोक्तः पठेद्देवीमनाकुलः॥"

माहानामिकः, पुं. ("तदस्य ब्रह्मचर्य्यम्।" माहानाम्निकः, ५।१।६४। इत्यत्र। "माहानाम्न्यादिभ्यः पदान्तेभ्य उपसंख्यानम्॥" महानाम्नी नाम विद्यामधवन्।' इत्यादौ ऋचः। तासां ब्रह्मचर्य्यमस्य इति ठञ्। हरदत्तस्तु "भस्याढे।" इति पुंवद्भावान् माहानामिक इत्याह। इति सिद्धान्तकौमुदी।) महानाम्नीऋचावेत्ता ब्राह्मणः। इति केचित्॥

माहिनं, क्ली, (महते पूज्यते अस्मिन् इति। मह+"महेरिनण् च।" उणा०। २।५६। इति इनण्।) राज्यम्। इत्यादिकोषः॥ (संहनीये, त्रि। यथा, ऋग्वेदे ।३।३६।६।
"इन्द्र! यत्ते माहिनं दत्रमस्ति।"
"माहिनं संहनीयम्।" इति तद्भाष्ये सायणः॥
प्रवृद्धे च। यथा, तत्रैव। १।५६।६।
"इन्द्र! सदनेषु माहिनः।"
"माहिनः प्रवृद्धः।" इति तद्भाष्ये सायणः॥)

माहिरः, पुं, (मह्यते पूज्यतेऽसौ। मह+बाहुलकात् इरच्।) इन्द्रः। इति त्रिकाण्डशेषः॥

माहिषिकः, पुं. (महिष्ये रोचतेऽसौ। महिषी+ठक्।) महिषीपतिः। अभिचारिण्यनुरक्तपतिः। यथा,—
"महिषीत्युच्यते नारी या च स्याद्दाभिचारिणी।
तां दुष्टां कामयत्येषः स वै माहिषिकः स्मृतः॥"
इति स्कान्दे काशीखण्डम्॥
महिषीपजीवी॥ (महिषी नारी पण्यमस्येति। महिषी+"तदस्य पण्यम्।" ५।१।५१। इति ठक्।) भगदारोपार्জ্জितस्त्रीधनोपजीवी। यथा,
"महिषीत्युच्यते भार्य्या भगेनोपार्জ্জितं धनम्।
उपजीवति यत्तस्याः सर्वे माहिषिकाः स्मृतः॥"
इति विष्णुपुराणे २।६।१५ श्लोकस्य टीकायां श्रीधरस्वामी॥

माहिष्यः, पुं, (महिष्यां साधुरिति महिषी+ष्यञ्।) वर्णसङ्करजातिविशेषः। स च क्षत्रियाद्वैश्यायां जातः। इत्यमरः। २।१०।३॥ (यथा, याज्ञवल्क्यसंहितायाम्। १।६२।
"वैश्यान्मूद्रास्तु राजन्यान् माहिष्योग्रौ सुतौ स्मृतौ॥")

माहेन्द्रः, पुं, (महेन्द्रस्यायम्। महेन्द्र+अण्।) शुभदक्षविशेषः। रथादिसप्तवारेषु वायुवरुणयममाहेन्द्राणामेकैकदक्षा भवन्ति। तत्र यत्र-

माहेन्द्रयोर्हक्षौ शुभौ। वायुयमयोर्हक्षावशुभौ। यथा,—
"ख्यातं वा व यमा क्षुर्य्यं मा वा व य कला निधौ।
व य मा वा कुजे त्रेया मा वा व य सुधा शुजे॥
गुरौ वा व य मा चैव मा वा व य तथा भृगौ।
क्षुर्य्यपुत्रे य मा वा व घटौयुग्मं शुभाशुभम्॥
माहेन्द्रे विजयो नित्यं वारुणे च धनागमः।
वायौ च भ्रमते नित्यं यमेऽपि मरणं ध्रुवम्॥")
इति ज्योतिस्तत्त्वम्॥

(माहेन्द्रकायपुरुषस्य लक्षणं यथा,—
"माहात्म्यं शौर्य्यमाज्ञा च सततं शास्त्रवृद्धिता।
भक्तानां भरणञ्चापि माहेन्द्रं कायलक्षणम्॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥
महेन्द्रो देवतास्येति। महेन्द्र+"महेन्द्राद्घाणौ च।" ४।२।२६। इति अण्। महेन्द्रदेवते, त्रि। यथा, भट्टिकाव्ये ।१५।६३।
"अविध्यत्तत्तनुत्राणं राक्षसो रथे।
तदध्वसदसास्त्रं माहेन्द्रं लक्ष्मणोरसि॥")
महेन्द्रसम्बन्धिनि च। (यथा, रघौ ।१२।८६।
"मातलिस्तस्य माहेन्द्रं स्यन्दनोपनतुच्छदम्॥")

माहेन्द्री, स्त्री, (महेन्द्रस्येयम्। महेन्द्र+अण्+स्त्रियां ङीष्।) इन्द्राणी। इति शब्दरत्नावली॥ गौः। इति राजनिघण्टः॥

माहेयः, त्रि, (मही+ढक्) मह्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥ (जनपदभेदे, पुं। यथा, महाभारते। ६।६।४८।
"कुट्टाः परान्ता माहेयाः कक्षाः सामुद्रनिष्कुटाः॥")
मङ्गलग्रहः। यथा, समयाचारे।
"कफपित्तसमुद्भूतां शिरःपीड़ां भयावहाम्।
माहेयः कुरुते शोकं बुधस्यान्तर्दशां गतः॥")

माहेयी, स्त्री, (मह्याः सुरभ्याः अपत्यमिति। मही+"तद्यादिभ्यो ढक्।" ४।२।६७। इति ढक्। स्त्रियां ङीष्।) गौः। इत्यमरः। २।९।६०॥ (यथा, महाभारते। ४।१६।१०।
"सर्व्वमेतेव माहेयी वने जाता चिकायणी।
उपानिहत पाञ्चाली वासितेव महावृषम्॥"
अस्याः पर्य्यायो यथा,—
"सुरभिः सौरभेयी च माहेयी गौरदाक्षुना॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

माहेशी, स्त्री, (महेशस्येयम्। महेश+अण्+स्त्रियां ङीष्।) दुर्गा। यथा,—
"महादेवात् समुत्पन्ना महाम्नैरीक्ष्यते यतः।
माहेश्वर्य्या तनुर्यस्या माहेशी तेन सा स्मृता॥"
इति देवीपुराणे ४५ अध्यायः॥
(महेशेन कृतमित्यण्। क्ली, व्याकरणविशेषः।
"यान्युच्चकार माहेशाद् आत्मो व्याकरणार्थवान्।
तानि किं पदरत्नानि सन्ति पाणिनिगोध्यहे॥"
इत्युक्तः॥)

माहेश्वरी, स्त्री, (महेश्वरस्येयम् । महेश्वर + अण्, ङीष् ।) यवतिक्ता । इति राजनिर्घण्टः । दुर्गा ॥ (यथा, महाभारते । १३ । ४३ । १४ ।
"भगवत्यनुयातायां सर्व्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्व्वती हि सा ॥")
माङ्ग-भेदः । इति शब्दरत्नावली ॥ (यथा, मन्त्रकोषे । ६ । ॐ ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ।) विष्णुः । यथा,—
कन्या उवाच ॥
"कथं विभासि कान्ता केयं वा नवविप्रभा ।
लोक्यं भाति वपुषा पङ्कजायतलोचन ॥
निशम्य तासां वचनं हरिश्चरवाहनः ।
आजहार महायोगी भूताधिपतिरव्ययः ॥
अयं नारायणो गौरी जगन्माता सनातनः ।
विभज्य संस्थितो देवः स्वात्मानं बहुधेश्वरः ॥
न मे विदुः परं तत्त्वं देवाद्या न महर्षयः ।
एकोऽयं देवदेवात्मा भवानी विष्णुरेव च ॥
अहं हि निश्चयः प्राज्ञः केवलो नित्यविग्रहः ।
मायेव केवलं देवमाकुर्व्वीमथाम्बिकाम् ॥
एष धाता विधाता च कारणं कार्य्यमेव च ।
कर्त्ता कारयिता विष्णुर्भक्तिमुक्तिफलप्रदः ॥
भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृक् ।
सदा धाता वासुदेवो विश्वात्मा विश्वतोमुखः ॥
क्षूटस्थो ह्यक्षरो व्यापी योगी नारायणः स्वयम् ।
तारकः पुरुषो ह्यात्मा केवलं परमं पदम् ॥
एषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना ।
ह्यात्मा सत्या सदानन्दा परं पदमिति मुनिः ॥
अस्याः सर्व्वमिदं जातमत्रैव लयमेष्यति ।
एषैव सर्व्वभूतानां गतीनामुत्तमा गतिः ॥"
इति कौर्म्मे १७ अध्यायः ॥
(पीठस्थानभेदः । इति देवीभागवते । ७ । ३० । ७२ ।
माहेश्वरेण जातम् । महेश्वर + अण् । क्लीं । उपपुराणविशेषः । यथा, देवीभागवते । १ । ३ । १६ ।
"माहेश्वरं भागवतं वाशिष्ठञ्च सविस्तरम् ।
एतान्युपपुराणानि कथितानि महात्मभिः ॥"
महेश्वरसम्बन्धिनि, त्रि । यथा, मार्कण्डेये । १०६ । ७१ ।
"ब्राह्मी माहेश्वरी चैव वैष्णवी चैव ते तनुः ।
त्रिधा यस्य स्वरूपन्तु भागोभांस्तान् प्रसीदतु ॥")
मि ञु म न क्षेपे । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-अनिट् ।) ञु मिञ्चिमम् । म न मिनोति मिनुते । इति दुर्गादासः ॥
मिच्छ, ग्र वाधे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) ग्र मिच्छसी मिच्छन्ती । बाधो विहतिः । इति दुर्गादासः ॥
मितः, त्रि, (मा + क्तः "ह्यतिस्यतिमास्थामित्तिष्किति ।" ७ । ४ । ४० । इत्याकारस्येकारादेशः ।) परिमितः । ग्रन्थितः । क्षिप्तः । इति माधातोर्मिधातोश्च क्तप्रत्ययेन निष्पन्नम् ॥ (यथा, भागवते । ८ । १३ । ३६ ।
"राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्य्ययः ॥"
यथा च नैषधचरिते । ६ । ८ ।
"मितञ्च सारञ्च वचो हि वाग्मिता ॥")
मितङ्गमः, पुं, स्त्री, (मितं परिमितं गच्छतीति । गम + "प्रियवशेवदः खच् ।" ३ । २ । ३८ । इत्यत्र "खच् प्रकरणे गमेः सुप्युपसंख्यानम् ।" इति काशिकोक्तेः खच् । मुम् च ।) वल्गी । इति सिद्धान्तकौमुदी ॥ परिमितगामिनि, त्रि ॥
मितद्रुः, पुं, (मितं द्रवतीति । द्रु + "हरिमितयोर्द्रुवः ।" उणा० १ । ३५ । इति कुः । स च ञित् ।) वल्गुदः । इति हेमचन्द्रः । ४ । १६६ ॥ (परिमितगतौ, त्रि । यथा, ऋग्वेदे । ४ । ६ । ५ ।
परिज्मना मितद्रवेति होतारमिळस्पदे मधुमन्तं
ऋता वा ।"
"मितद्रुः परिमितगतिः खन् ।" इति तद्भाष्ये सायणः ॥ मितमार्गे च । यथा, ऋग्वेदे । १० । ६४ । ६ ।
"तेनो अर्वन्तोऽवनयुतोहवं विश्वे शृण्वन्तु
वाजिनो मितद्रवः ।"
"मितद्रवो मितमार्गाः अध्वानं परिच्छिन्दन्तः ।" इति तद्भाष्ये सायणः ॥")
मितम्पचः, त्रि, (पक्वः । इत्यमरः ॥ ३ । २ । ४८ ॥ (मितं परिमितं पचतीति । मित + पच् + "मितनखे च ।" ३ । २ । १४ । इति खश् । "अत्यल्पेऽदजन्तस्य मुम् ।" ६ । ३ । ६२ । इति मुम् च ।) परिमितपाककर्त्ता च ॥
मिताशनः, त्रि, परिमितभोजी । मितमत्ति यः इति भुजुपक्त्या कर्त्तरि (क्यु) अनप्रत्ययेन निष्पन्नः ॥
मितिः, स्त्री, (मीयते इति । मा + भावे क्तिन् ।) मानम् । विज्ञानम् । अवच्छेदः । इति शब्दरत्नावली ॥ (यथा, कुसुमाञ्जलौ । ७ । ४ ।
"मितिः सम्यक् परिच्छित्तिः ॥")
मित्रं, क्ली, (मिनोति मानं करोति इति । "अमिचिमिदिशिसिभ्य क्रः ।" उणा० ४ । १६३ । इति क्रः ।) ग्रहोः परम् । इत्यमरः । २ । ८ । ६ ॥ अतः ग्रहोः परमवस्थितो राजा मित्रं उपकारित्वात् । मेद्यति स्निह्यतीति आसुसिति यः निपातात् गुणाभावः । द्वित्वकारं एकतकारमपेक्ष्येके । इति तट्टीकायां भरतः ॥ अपि च ।
"राजा शत्रुरिति ख्यात एकार्थाभिनिवेशतः ।
भूम्येकान्तरितो राजा स मित्रं मित्रकार्य्यतः ॥"
इति शब्दरत्नावली ॥
मित्रं, क्ली, बन्धुः । मिता इति भाषा । तत्पर्य्यायः । सखा २ सुहृत् ३ । इत्यमरः । २ । ८ । १२ ॥ मायति जानाति सर्व्वं मित्रं मी कि गत्यां नात्रीति डित्रः मित्रमलङ्किङ्गम् । निपातात्तस्य द्वित्वे द्वित्वकारश्च । इति तट्टीकायां भरतः ॥ तच्चतुर्व्विधम् । सहार्थः १ भजमानः २ सहजः ३ कृत्रिमः ४ । इति महाभारते राजधर्म्मः ॥ * ॥ मित्रलोत्पत्तिर्यथा,—
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥"
वर्ज्यमित्रं यथा,—
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुवन्धुञ्च कुदेशञ्च दूरतः परिवर्जयेत् ॥
कुमित्रे नास्ति विश्वासः कुराजे नास्ति जीवितम् ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं मायामयमरिन्यथा ॥"
विश्वासस्यैव मित्रत्वं यथा,—
"सा भार्य्या न भयं कुर्य्यात् स तु पुत्रो ह्यधोक्षजे भक्तिमान् ।
तन्मित्रं यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥"
इति गारुडे १३ । १४ । १५ । अध्यायाः ॥*॥
मित्रप्रशंसादिर्यथा,—
"यस्य मित्रेण संभाषो यस्य मित्रेण संस्थितिः ।
यस्य मित्रेण संलापस्त्रैलोक्ये पुण्यवान् ॥
यानि कानि च मित्राणि कर्म्माणि शुभानि च ।
पञ्च ह्यधिकमित्रेण कथिता सुरवन्दना ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ॥
अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्व्वशून्या दरिद्रता ॥"
इति हितोपदेशः ॥
मित्रः, पुं, सूर्य्यः । इत्यमरः । १ । ३ । ३० ॥ (यथा, मोः रामायणे । २ । २५ । २२ ।
"स्वस्ति मित्रः सहादित्यैः स्वस्ति कद्रा दिशन्तु ते ॥")
द्वादशादित्यानामन्यतमः । यथा, महाभारते । १ । ६५ । १५ ।
"धाता मित्रोऽर्य्यमा शक्रो वरुणश्चांश एव च ।"
मरुतामन्यतमः । यथा, हरिवंशे । १६६ । ५२ ।
"मरुत्वतो मरुत्वन्तो देवाजनयन् सुतान् ।
अग्निसन्तुहविर्ध्यातिः सावित्रो मित्र एव च ॥"
वशिष्ठस्य ऊर्ज्जागर्भजातः पुत्रभेदः । यथा, भागवते । ४ । १ । ३७ ।
चित्रकेतुः सुरोचिश्च विरजा मित्र एव च ।
उल्बणो वसुभृद्यानो द्युमान् शुक्रादयो ऽपरे ॥")
मित्रयुः, त्रि, (मित्रं यातीति । या + "आशूयाजियजिराजिसाध्यशीभ्यः क्रिन् ।" उणा० १ । ३० । इति उः ।) मित्रयत्नसः । इति हेमचन्द्रः । ३ । १५३ ॥
मित्रयुः, पुं, (मित्रं यातीति । या + "ऋतयुयाद्यश्च ।" उणा० १ । ३८ । इति कुः । निपातितश्च ।) लोकयात्रिकः । इत्युणादिकोषः । संक्षिप्तसारोणादिवृत्तिश्च ॥ (ऋषिभेदः सलोमहर्षणपुत्रः । यथा, विष्णुपुराणे । ३ । ६ । १८ ।
"सुमतिश्चाग्निवर्च्चाश्च मित्रयुः सोमपायनः ॥")

मिथिः

मिथुयुद्धं, क्ली, (मिथेव सह युद्धम् ।) सुहृत्-संग्रामः । तत्पर्य्यायः । मैथेयिका २ । इति त्रिकाण्डशेषः ॥

मिथुलब्धिः, } स्त्री, पुं, (मिथस्य लब्धिः । यद्वा ।
मिथुलाभः, } मिथस्य लब्धिर्यस्मात् ।) सुहृत्-प्राप्तिः । यथा, हितोपदेशे ।

"मिथुलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ॥"

मिथुवत्सलः, त्रि, (मिथस्य मित्रे वा वत्सलः ।) मित्रप्रियः । तत्पर्य्यायः । मिथ्यु: २ । इति हैमचन्द्रः ॥

मिथुघ्नीः, [स्] त्रि, (मिथं घ्नन्ति इति । घ्नस्+"घ्नस्व हश्छन्दसीः ।" ६ । ४ । ६७ । इत्यत्र "क्वौ च घ्नस्व इत्वं भवतीति वक्तव्यम् ।" इति काशिकोक्तेः क्विप् इत्वं ततो दीर्घश्च ।) सुहृद्घातकः । मिथं घ्नन्ति यः । इति सुधाबोधव्याकरणम् ॥

मिथुसप्तमी, स्त्री, (मित्राय मित्रजन्मने मिथस्य वा सप्तमीति समासः ।) मार्गशीर्षशुक्लसप्तमी । यथा,—

"अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः ।
मार्गशीर्षस्य मासस्य शुक्ले पक्षे शुभे तिथौ ॥
सप्तम्यां तेन सा ख्याता लोकेऽस्मिन् मित्रसप्तमी ।
तत्रोपवासः कर्त्तव्यो भक्त्यागत्य फलानि वा ॥"

इति श्रीगोविन्दानन्दाचार्य्यकृतसंवत्सरकौमुदी-धृतभविष्यपुराणवचनम् ॥

मित्रा, स्त्री, (मित्र + स्त्रियां टाप् ।) सुमित्रा । शत्रुघ्नजननी । इति शब्दरत्नावली ॥ (अक्षरी-विशेषः । यथा, महाभारते । १३ । १६ । ४४ ।

"अजमुखा घृताची च मित्रा चित्राङ्गदा ऋचिः ॥"

परागरश्मिश्यामैक्षेयजननी । यथा, श्रीमद्भाग-वते । ६ । ४ । ६५ ।

"कालिन्द्याः कतिभिः सिद्धः अहोभिर्भरतर्षभ ।
पापवत्त्व:सरितं यत्र मित्रासुतो मुनिः ॥")

मिथ ऋ ज वधे । मेधायाम् । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) ऋ अमिमेथत् । ज मेथति मेथते शास्त्रार्थं ग्रन्थः धारयतीत्यर्थः । इति दुर्गादासः ॥

मिथः, [स्] अ, (मेथति इति मेथृ सङ्गमे असुन् । पृषोदरादित्वात् साधुः ।) अन्योन्यम् । रहः । इत्यमरः । ३ । ३ । २५५ ॥ (यथा, मनुः । १० । ५ ।

"अवहारो मिथस्त्वेषां विवाहः सदृशैः सह ॥")

मिथिः, पुं, (मेथते छिनत्ति शत्रुकुलं इति । मिथ + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् ।) निमिराजपुत्रः । स तु जनकराजः । यथा । अपुत्रस्य तस्य निमेर्भूभुजः शरीरमराजक-मौरवद्धे सुतयः अरण्यां ममन्थुः । तत्र च कुमारो जज्ञे । जननाज्जनकसंज्ञो बभूव ह । अभूद्विदेहोऽस्य पितेति वैदेहः । मथ-नाज्मिथिरभूत् । तस्योदावसुः पुत्रोऽभवत् । इति विष्णुपुराणे ४ अंशे ५ अध्यायः ॥ (तथाच रामायणे । १ । ७१ । ४ ।

मिथुनं

"निमिः परमधर्म्मात्मा सर्व्वसत्त्ववतां वरः ।
तस्य पुत्रो मिथिर्नाम जनको मिथिपुत्रकः ॥")

मिथिला, स्त्री, (मथ्यन्ते शत्रवो यस्याम् । मथ् + "मिथिलादयश्च" उणा० १ । ५८ । इति इलच् अकारस्येत्वं निपात्यते ।) स्वनामख्यातनगरी । सा तु जनकराजपुरी । यथा । विदेहा मिथिला प्रोक्ता । इति हलायुधः ॥ (यथा, महाभारते । १ । ११३ । २८ ।

"ततः कोशं समादाय वाहनानि च भूरिशः ।
पाण्डुना मिथिलां गत्वा विदेहाः समरे जिताः ॥")

अथ मिथिलाया निरुक्त्यादिकं यथा,—

"शक्रकीर्तेरमारभ्य चम्पारण्यान्तकं शिवे ! ।
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ॥"

इति शक्तिसङ्गमतन्त्रे ७ पटलः । तैरभुक्ता मिथुन इति ख्याता । तन्नामकारणं यथा,—

"अराजकभयं नृणां मन्यमाना महर्षयः ।
देहं ममन्थुः स्म निमेः कुमारः समजायत ॥
जन्मना जनकः सोऽभूद्देहस्तु विदेहजः ।
मिथिलो मथनाज्ज्ञातो मिथिला येन निर्म्मिता ॥"

इति श्रीमद्भागवते ९ स्कन्धे १३ अध्यायः ॥

अपि च ।

"निमेः पुत्रस्तु तत्रैव मिथिर्नाम महान् सुतः ।
प्रथमं सुतबलैर्येन तैरभुक्तस्य पार्श्वतः ।
निर्म्मितं स्वीयनाम्ना च मिथिलापुरमुत्तमम् ॥
पुरीजननसामर्थ्यात् जनकः स च कीर्त्तितः ॥"

इति भविष्यपुराणम् ॥

मिथुनं, क्ली, (मेथतीति । मिथ् + "सुधिमिथि-मिथः कित् ।" उणा० ३ । ५५ । इति उनन् किच्च वादृगुणाभावश्च ।) स्त्रीपुंसयो-र्युग्मम् । तत्पर्य्यायः । द्वन्द्वम् २ । द्वयम् ३ । युग्मम् ४ । यमलम् ५ । यमः ६ । ३८ ॥ (यथा, रामायणे । १ । २ । १५ ।

"मानिषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥")

युगलम् । इति तट्टीकायां रामाश्रमः ॥ मेषादि द्वादशराश्यन्तर्गतजलधरादिराशिः । तत्पर्य्यायः । जितुमः २ । तच्च द्विपदं शास्त्रं समसंज्ञकम् । अस्योदयस्य स्थूलमानं घटपलाधिकपञ्चदशकम् ॥ इति ज्योतिषतत्त्वम् ॥ अस्याधिष्ठाष्टदेवता गदाधारिपुरुषः वीणाधारिस्त्री च । ऋगग्निः-शीर्षार्द्धं आदानमुदायः पुनर्व्वसोश्चिपादं यजे-र्भवति । तत्तु शीर्षोदयं पश्चिमदिक्स्वामिवायु-प्रकृतिरुदङ्मुखं वनस्थितं शूद्रवर्णं स्निग्धं मधुस्वभावं मध्यमसत्त्वानञ्च । तच्च जातो जनः सुनयनचक्षुः मिष्टभाषी शूरः वञ्चकः धर्म्ममतिः विनयभाजनञ्च भवति । इति बृहज्जातकादयः ॥ अथ मिथुनलग्नजातफलम् ।

"मिथुनोदयसंजातो मानी स्वजनवत्सलः ।
त्यागी भोगी धनी कामी दीर्घस्फुरोरि-महनः ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

रात्रौ तल्लग्ननिरूपणं यथा,—

मिश्रा

"इन्दुसंख्यभवने भृगुजाता-
वन्यभे लसदनन्तमध्यगे ।
कोमलाङ्गि ! मिथुनोदयात् प्रिये !
कालखानलकलाः प्रियेऽजनि ॥"४।६॥

इति कालिदासकृतराशिलग्ननिरूपणम् ॥

मिथ्या, अ, (मथते इति । मथविलोडने । मेथते छिनत्ति वेति । मथ वा मेथ + क्यप् । निपा-तनात् साधुः) असत्यम् । तत्पर्य्यायः । वृथा २ वितथः ३ अनृतम् ४ । इति शब्दरत्नावली ॥ मिछा इति भाषा ॥ (यथा,—

"यदसद्भासमानं तन्मिथ्या स्वाप्नजादिवत् ।"

इति सांख्यप्रवचनभाष्यधृतम् ॥

सा चाधर्म्मपत्नी । यथा,—

"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता ।
यया विना जगज्जन्तुश्छन्नं विधिनिषेवितम् ॥
सत्ये चादर्शना या च त्रेतायां छद्मरूपिणी ।
अङ्गविद्यवक्त्रया च द्वापरे संवृता भिया ॥
कलौ महाप्रभावा च सर्व्वत्र व्यापिका बलात् ।
कपटेन समं भ्राता भवत्येव युगे युगे ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥

अपि च ।

"अधर्म्मस्य प्रिया रम्या मिथ्या माया[1]र-लोचना ।
तस्याः पुत्रोऽतितेजस्वी दम्भः परमकोपनः ॥
स मायायां भगिन्यान्तु लोभं पुत्रञ्च कन्यकाम् ।
निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥"

इति कल्किपुराणे १ अध्यायः ॥

विषयभेदे मिथ्याभाषणे दोषाभावो यथा,—

धर्म्मिष्ठोवाच ।

"न धर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीषु राजन्न विवाहकाले ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"

मिथ्याकथने दोषो यथा,—

"एकान्तु साक्ष्ये प्रवदन्ति येऽन्यथा
भवन्ति मिथ्यापतिता नरेन्द्र ! ।
एकार्थनायान्तु समाहितायां
मिथ्या वदन्नं ह्यनृतं हिनस्ति ॥"

ययातिरुवाच ।

"राजा प्रमाणं भूतानां स विनश्येन्मृषा वदन् ।
अर्थैश्छन्नमपि प्राप्य न मिथ्या कर्त्तुमुत्सहे ॥"

इति मात्स्ये ३१ अध्यायः ॥

अथासत्याभिधानप्रायश्चित्तम् । तत्र सहस-सत्यभाषणे ह्लाणानुस्मरणं प्रायश्चित्तम् । यथा, विष्णुपुराणम् ।

"ह्लते पापेऽनुतापो वै यस्य पुंसः प्रजायते ।
प्रायश्चित्तन्तु तस्यैकं ह्लाणानुस्मरणं परम् ॥"

अत्यन्ताभ्यासे विष्णुः । निन्दितेभ्यो धनादानं वाणिज्यं कुसीदञ्जीवनम् । असत्यभाषणं शूद्र-सेवनमित्यपात्रीकरणं ह्लात्वा तप्तकृच्छ्रेण शुध्यति । अतिबहुतरकालाभ्यासे मनुः ।

"सकृदापाद्यजत्वासु मासं शोधनमेन्दवम् ।"

चातुर्व्वर्ण्यवधे साक्ष्येऽनृतभाषणेऽनुपातकत्वाभावाच्चास्य प्रायश्चित्तमाह याज्ञवल्क्यः ।
"वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥"
शूद्रे तु विप्रः । तत्पावनाय कृष्णाजीभिर्द्विजोऽग्निं जुहुयात् । शूद्रस्यैकोद्दिष्टं गोदानकस्य न्यासं विदध्यात् । विषयविशेषेऽपवादमाह हारीतः । सोमविक्रयकन्याविवाहभयमैथुनबालकसंज्ञपनं गोब्राह्मणहितञ्च कुर्व्वन् मिथ्या न लिप्यत इति । तथा च यमः ।
"न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रीवाक्यं न च मैथुनार्थे ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥"
इति प्रायश्चित्तविवेकः ॥

मिथ्याचारः, पुं, (मिथ्या आचारोऽस्य ।) कपटाचारः । दाम्भिक इत्यर्थः । इति वज्रमाणश्लोकटीकायां श्रीधरस्वामी ॥ यथा,—
"कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ॥"
इति श्रीभगवद्गीतायां ३ अध्यायः ॥

मिथ्यादृष्टिः, स्त्री, (मिथ्या न सा दृष्टिश्चेति ।) कर्म्मफलापवादकज्ञानम् । तत्पर्य्यायः । नास्तिकता २ । इत्यमरभरतौ । १ । ५ । ४ ॥ असत्यदर्शनञ्च ॥

मिथ्याध्यवसितिः, स्त्री, (मिथ्या असत्या च सा अध्यवसितिश्चेति ।) मिथ्याध्यवसायः । असत्योत्साहः । इति केचित् ॥

मिथ्यानिरसनं, क्ली, (मिथ्या असत्यं निरस्यते अनेन । निर् + अस् + करणे ल्युट् ।) प्रायश्चित्तम् । इत्यमरटीकायां भरतः ॥

मिथ्याभियोगः, पुं, (मिथ्या असत्यमभियोगः ।) मिथ्यापवादः । यथा मे धारयसीत्यादि मिथ्योद्भावनम् । तत्पर्य्यायः । अभ्याख्यानम् २ । इत्यमरभरतौ ॥

मिथ्याभिशंसनं, क्ली, (मिथ्या असत्यस्य अभिशंसनं कथनम् ।) स्वर्गस्तेयं त्वया कृतमित्यादि मिथ्यादूषणं वाक्यम् । तत्पर्य्यायः । अभिशापः २ । इत्यमरभरतौ ॥

मिथ्याभिशापः, पुं, (मिथ्या अभिशापः ।) मिथ्यापवादः । यथा, भोजराजः ।
"शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तञ्च तं ततः ॥"
इति मिथ्यादिनत्वम् ॥

मिथ्यामतिः, स्त्री, (मिथ्या चासौ मतिश्चेति ।) भ्रान्तिः । इत्यमरः । १ । ५ । ४ ॥ असत्यबुद्धिश्च ॥

मिथ्यासाक्षी, [न्] त्रि, (मिथ्याभाषी साक्षी-साक्षाद् द्रष्टा चेति ।) कूटसाक्षी । तस्य च नानाप्रकारमाह याज्ञवल्क्यः ।
"उक्तेऽपि साक्षिभिः साक्ष्येऽर्थे गुणवत्तमाः ।
द्विगुणा दापयेयुः कूटाः स्युः पूर्व्वसाक्षिणः ॥"

मिथ्यासाक्ष्यकथने दोषमाह याज्ञवल्क्यः ।
"ये पातकज्ञतां लोका ब्रह्मघातकिनां तथा ।
अग्निदानाच्च ये लोका ये च स्त्रीबालघातिनाम् ॥
एतान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ।
सुकृतं यत्त्वया किञ्चित् जन्मान्तरशतैः कृतम् ।
तत् सर्व्वं तस्य जानीहि यं पराजयसे मृषा ॥"
इति मिताक्षरा ॥

मिथ्योत्तरं, क्ली, (मिथ्या असत्यमुत्तरं ।) चतुर्धोत्तरान्तर्गतोत्तरविशेषः । तस्य लक्षणम् ।
"अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥"
इति नारदः ॥
तच्चतुर्व्विधम् । मिथ्येतत् १ अहं नाभिजानामि २ मम तत्र न सन्निधिः ३ सत्कालेऽहमजातः ४ । यथा, व्यासनारदौ ।
"मिथ्येतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्व्विधम् ॥"
इति व्यवहारतत्त्वम् ॥

मिह् इ क सिञ्चि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इ क मिन्दयति वर्त्तिका तैलेन । इति दुर्गादासः ॥

मिह् इर् य या ञि ह सिञ्चि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) इर अमिदत् अमेदीत् । य इति शायामशीलोऽसौ मद्राकायो न मेद्यतीति चलायुधः । या मेदितं मिन्नं तेन । इति दुर्गादासः ॥

मिह् क्त व वधमेधयोः । इति कविकल्पद्रुमः ॥ (भ्वा०-उभ०-सक०-सेट् ।) क्त अमिमेहत् । व मेहति मेहते ग्राम्यार्थे स्त्रियो धारयतीत्यर्थः । मिमिदुः मिमेहुः । इति दुर्गादासः ॥

मिह, क ञि ह सिञ्चि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) क अमिहत् । ञि मिम्होऽस्ति । ह मेहते । इति दुर्गादासः ॥

मिह, क सिञ्चि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क मेहयति वर्त्तिका तैलेन । इति दुर्गादासः ॥

मिञ्जिनः, त्रि, सानुनासिकवाग्विशिष्टः । खोना इति भाषा । तस्य निदानं यथा,—
"आहत्य वायुः सकफो धमनीः शब्दवाहिनीः ।
नरान् करोत्यक्रियकान् मूकमिञ्जिनगद्गदान् ॥"
इति माधवकरः ॥
अक्रियकान् इत्यत्रावचनानिति च पाठः । अवचनान् अवेयर्थे नञ् । तेन ईषद्वचनान् । स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनान् मिञ्जिनान् सानुनासिकान् । गद्गदान् मुग्धपदवल्गनाभिधायिनः करोतीत्यन्वयः । एषां समानकारणत्वेऽपि दुष्टरक्तार्त्तादिना अदृष्ट-

वधाद्वा भेदो बोद्धव्यः ॥* ॥ अथ तेषां चिकित्सा ।
"प्रस्थं घृतस्य पलिके: शिग्रुवचालवणक्षारकोद्रवैः ।
आजे पयसि विपक्वं सिद्धं सारस्वतं नाम्ना ॥
विधिवदुपयुज्यमानं जडगद्गदमूकतां क्षणात् जित्वा ।
स्मृतिमतिमेधाप्रतिभाः कुर्य्यात् संश्रद्दधाग्भवति ॥
सारस्वतं घृतम् ।
"सहरिद्रा वचा कुष्ठं शिग्रुबी विश्वभेषजम् ।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ।
तच्चूर्णं सर्पिषालोड्य प्रस्थार्द्धं भक्षयेन्नरः ॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ।
मेधादुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥"
इति भावप्रकाशस्य द्वितीये भागे मध्यखण्डे वातव्याध्यधिकारे ॥

मिल, ग्लृ श्लृ श्लिषि । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-सेट् ।) श्लिषि सम्बन्धीभावे । ग्लृ श्लृ मिलति मिलते लता वृक्षेण । अयं कुटादिरिति कुलचन्द्रः । तेन बालमिलयमिलवेन गरलमिव कलयति मलयसमीरम् । इति जयदेवः । मिलिष्यन्ति ।
"महापातकिनः पञ्च मिलितव्यं न तैः सह ।"
इति दुर्गादासः ॥

मिलितः, त्रि, मिलधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । श्लिष्टः । सम्बन्धविशिष्टः । युक्तः । (यथा, देवीभागवते । १ । ११ । ८० ।
"पुनर्विवादः सञ्जातो मिलिता देवदानवाः ।
युद्धार्थमागतास्तत्र समाजः समजायत ॥")

मिव, इ सेके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) इ मिम्वति । इति दुर्गादासः ॥

मिश, ध्वनौ । कोपे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० अक०-सेट् ।) मेशति । इति दुर्गादासः ॥

मिश्रिः, स्त्री, (मिश्र + इन् ।) मधुरिका । शतपुष्पा । इत्यमरटीकायां भरतः ॥ जटामांसी । इति शब्दरत्नावली ॥

मिश्री, स्त्री, (मिश्रि + ङीष्कारादिति पक्षे ङीष् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इत्यमरटीकायां भरतः ॥

मिश्र, त् क युक्तौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् । इत्यमध्य इति वर्णदेशनायाम् । युतिः संयोजनम् । मिश्रयति मिश्रापयति सूतेनार्द्धं लोकः । इति दुर्गादासः ॥

मिश्र, क्लीं, (मिश्र + बाहुलकात् रक् ।) चाक्षुषमूलकम् । इति राजनिर्घण्टः ॥ मिश्रितम् । यथा,—
"कैश्चिदाहुः क्वचिद्देशे यावत्तु दिनवाड्मिकाः ।
तावदेव त्वनध्यायो न तस्मिन् दिनान्तरे ॥"
इति तिथ्यादितत्त्वम् ॥

মিশ্রः, पुं, (मिश्र + बाहुलकात् रक् ।) गजजातिविशेषः । यथा,—
"भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः ।"
इति हैमचन्द्रः । ४ । २८४ ॥
श्रेष्ठः । यथा । गौरवितार्थाद्यर्थमिश्राः । इति भूरिप्रयोगः ॥ संयुक्ते, त्रि । यथा,—
"वरत्रः कावरो मिश्रः संपृक्तः खचितः समाः ।
इति हैमचन्द्रः । ६ । १०५ ॥
ऊष्मादिसप्तमजात्यन्तर्गतषष्ठमगणः । स तु क्षत्रिका विप्रकन्याभ्यां भवति । इति ज्योतिषतत्त्वम् ॥

मिश्रकं, क्ली, (मिश्र + कन् ।) देवोद्यानम् । इति जटाधरः ॥ औषरलवणम् । इति राजनिर्घण्टः ॥ (मिश्र + ण्वुल् । त्रि, मिश्रयकर्त्ता । यथा, मनौ । ११ । ५० ।
"पिशुनः पौतिनाशिकं क्षत्रकः पूतिपक्वताम् ।
धान्यचौरोऽङ्गहीनत्वमतिरेक्यन्तु मिश्रकः ।"
तीर्थभेदः । यथा, महाभारते ।३।८३।८२।
"ततो गच्छेत धर्म्मज्ञ ! मिश्रकं लोकविश्रुतम् ।
तत्र तीर्थानि राजेन्द्र ! मिश्रितानि महात्मना ॥")

मिश्रकावर्त्त, क्ली, (मिश्रकाणां वनम् । "वनगिर्य्योः संज्ञायां कोटरकिंशुलकादीनाम् ।" ६ । ३ । ११७ । अकारस्याकारः "वर्त्तं पुरगामिश्रकाम्रिकाग्नारिकाकोटराग्नेभ्यः ।" ८ । ४ ।७ । इति णत्वम् ।) इन्द्रस्योद्यानम् । यथा,—
"नन्दनं कन्दरारं स्यान्मिश्रकावर्त्तमित्यपि ।"
इति त्रिकाण्डशेषः ॥

मिश्रजः, पुं, (मिश्रात् भिन्नजातीययोः सम्मेलनात् जात इति । जन + डः ।) खेचरः । इति राजनिर्घण्टः ॥

मिश्रत्वं, क्ली, मिश्रधातोर्भावेऽणट् (ष्ण्युट्) प्रत्ययेन निष्पन्नम् । संयोजनम् । एकत्रीकरणम् । (यथा, प्रबोधचन्द्रोदये । २ । ५ ।
"तदेतैर्वाक्छिश्रत्वमपि गुरुतरदुरितोदयाय ॥")

मिश्रपुष्पा, स्त्री, (मिश्राण्यि परस्परं संश्लिष्टानि पुष्पाण्यस्याः ।) मेथिका । इति राजनिर्घण्टः ॥

मिश्रवर्ण, क्ली, (मिश्रः मिलितः वर्णोऽस्य ।) लाक्षागुग्गुलु । इति राजनिर्घण्टः ॥ नानावर्णयुक्ते, त्रि ॥

मिश्रवर्णफला, स्त्री, (मिश्रवर्णं फलमस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

मिश्रशब्दः, पुं, (मिश्रः मिलितः अक्षरासभयोरिव शब्दोऽस्य ।) खेचरः । इति राजनिर्घण्टः ॥

मिश्रितं, त्रि, (मिश्रः मेलनमस्य संजातम् । मिश्र + इतच् । यद्वा, मिश्र + क्तः ।) गौरवितम् । इति जटाधरः ॥ मिलितञ्च ॥

मिश्रिता, स्त्री, (मिश्रित + टाप् ।) मन्दादिसप्तमस्संक्रान्त्यन्तर्गतसंक्रान्तिविशेषः । यथा,
"मन्दा भुवेन्दु विज्ञेया बुधौ मन्दाकिनी तथा ।
त्रिपे भार्गवी विज्ञानीयादुग्रे घोरा प्रकीर्त्तिता ॥
चरेमन्दोदरी ज्ञेया क्रूरेऽर्कजेषु राक्षसी ।
मिश्रिता चैव विज्ञेया मिश्रितश्चन्द्र संक्रमे ।"
इति तिथ्यादितत्त्वम् ॥

मिश्रेया, स्त्री, मधुरिका । इत्यमरः । २।४।१०५ ॥ मौरि इति भाषा ।
"मिश्रेया सुरसा पेया हृताढ्या स्कन्दवल्लना ।"
इति शब्दचन्द्रिका च ॥ ग्राकविशेषः । श्रुतपुष्या । शुचुका इति भाषा । तत्पर्य्यायः । ताम्रपर्णी २ ताम्रपर्णी ३ मिषिः ४ शालेया ५ शीतशिवा ६ शालीना ७ वनजा ८ अवाक्पुष्पी ९ मधुरिका १० हृद्या ११ संहितपुष्पिका १२ सुपुष्पा १३ सुरसा १४ वल्या १५ । अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । कटुत्वम् । परमकफहरत्वम् । वातपित्तोत्थदोषद्वीहजन्तुविनाशित्वञ्च । इति राजनिर्घण्टः । तत्पर्य्यायगुणाः ।
"श्रुतपुष्या शुताढ्या च मधुरा कारवी मिषिः ।
अतिलम्बी सितच्छद्मा संहितच्छदिकापि च ॥
हृद्या शालेयशालिन्यौ मिश्रेया मधुरा मिषिः ।
श्रुतपुष्या लघुस्तीक्ष्णा पित्तलहीपनी कटुः ॥
उष्णा ज्वरानिलश्वासव्रणशूलास्रिरोगहृत् ।
मिश्रेया तद्गुणा प्रोक्ता विशेषाद्योनिशूलनुत् ॥
अधिमान्द्यहरी हृद्या बह्विट्कमिशूलनुत् ।
रूक्षोष्णा पाचनी कासवमिस्नेह्यानिलान् हरेत् ॥"
इति भावप्रकाशः ॥

मिष उ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) उ मेषित्वा मिष्ट्वा । इति दुर्गादासः ॥

मिष ग्र स्पर्द्धे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) स्पर्द्धः पराभिभवेच्छा । इति बोपदेवः ॥ ग्र मिषति बली बलवन्तम् । इति दुर्गादासः ॥

मिषं, क्ली, (मिष् + कः ।) छलम् । इति मेदिनी । षे, २१ ॥ (यथा, नैषधे । १ । ११८ ।
"प्रियासु बालासु रतश्रमार्त्त च
द्विषच्चितं पञ्चवितञ्च विभ्रतम् ।
जराजितं रागमहीरुहाङ्कुरं
मिषेण चक्षुश्चरजद्दयस्य च ।")

मिषः, पुं, (मिष् + कः ।) स्पर्द्धनम् । इति मेदिनी । षे, २१ ॥ (यथा, कथासरित्सागरे । ६४ । १२५ ।
"इति ध्यायन् मिषं लब्धा तदैवास्फुटया गिरा ।
निर्गत्यैव विरक्तात्मा धनदेवाग्रिमं ययौ ॥")

मिषिः स्त्री, (मिष् + इन् ।) जटामांसी । इति शब्दरत्नावली ॥ मधुरिका । इति शब्दचन्द्रिका ॥ (यथास्य पर्य्यायः ।
"अवाक्पुष्पी च हृद्या स्यान्मिश्रेया मधुरा मिषिः ।"
इति वैद्यकरत्नमालायाम् ॥)
श्रुतपुष्या । इत्यमरटीकायां भरतः ॥

मिषिका, स्त्री, (मिषि + कन् + टाप ।) जटामांसी । इति शब्दरत्नावली ।

मिष्टं, त्रि, क्लिन्नम् । आर्द्रितम् । इति मिष्धातोः क्तप्रत्ययेन निष्पन्नम् ॥

मिष्टः, पुं, (मिष् + क्तः ।) मधुररसः । यथा,
"मिष्टः कटुश्च मधुरमम्लेऽम्लं पच्यते रसः ।
कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः ॥"
इति भावप्रकाशः ॥
"नूतनसर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ! ग्राम्यजनो मिष्टमश्नाति ॥"
इति छन्दोमञ्जरी च ॥

मिष्टपाकः, पुं, (मिष्टेन पाको यस्य ।) मधुरादिरसपक्वफलादिः । मोरब्बा इति पारस्यभाषा ॥ तदेकप्रकारो यथा । अपक्वाम्रं स्निग्धं कृत्वा तन्नाद्ये मृत्पात्रस्थे छिद्रजालकरजाम्रं चूर्णमिश्रितजले दग्धचतुर्थं स्थापयित्वा जलेन धौतं कुर्य्यात् । ततो जलेन सिक्तं कृत्वा जलत्यागपूर्व्वकसेकसारवद्गुडक्षीरसे मधुकरजानन्तरं तापं दद्यात् । रसे घनीभूते अर्द्धदग्धं यावत् तापेन निष्पन्नो भविष्यति । इति पाकराजेश्वरः ॥

मिष्टान्नं, क्ली, (मिष्टमन्नम् ।) मधुरद्रव्यम् । इति छलायुधः ॥ अपि च ।
"मिष्टान्नपानदाताथ सततं अन्नयान्वितः ।
देवपूजापरो नित्यं न प्रेतो जायते क्वचित् ॥"
इत्यग्निपुराणम् ॥

मिसिः, स्त्री, मिसी, (मस्यति परिणमतीति + इन् बाहुलकादत इकारः । पक्षे ङीष् ।) मधुरिका । (यथास्य पर्य्यायः ।
"मिसिर्मधुरिका मता ।"
इति शार्ङ्गः । २०८ अः ॥) जटामांसी । श्रुतपुष्या । इत्यमरभरतौ ॥ (श्रुतपुष्यार्थे पर्य्यायो यथा,—
"श्रुतपुष्या श्रुताढ्या च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छद्मा संहितच्छदिकापि च ॥
हृद्या शालेयशालिन्यौ मिश्रेया मधुरा मिसिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
उशीरं । इति राजनिर्घण्टः ॥ अजमोदा । इति मेदिनी । से, ८ ॥

मिस्र तृ क गुल्याम् । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) ताम्रमध्योऽयम् । इत्यमध्य इति वर्णदेशनायाम् । युतिः संयोजनम् । मिस्रयति मिस्रापयति कृतेनान्नं लोकः । इति दुर्गादासः ॥

मिह औ सेचने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर० सक० अनिट् ।) औ अमिक्षत् । इति दुर्गादासः ॥

मिह्निका, स्त्री, (मेहति क्षिपतीति । मिह + संज्ञायां कुन् टाप् अत इत्वम् ।) नीहारः । इति शब्दरत्नावली ॥ (यथा, नैषधे ।१६।३५ ।
"विभ्रति युवतिलाभे राज्ञीसुखं मिह्निकाद्यम् ।
दिनमभिमखिं तापे चित्तानिलाश्च विषादति ॥")

मीढ्वान्

मिहिरः, पुं, (मेहयति सेचयति मेघजलेन भूमिमिति। मिह + "इषिमदिसुदिक्षिहिञ्छिदिभिदिमन्दिचन्दितिमिमिहीति।" उणा० १। ५२। इति किरच्।) सूर्य्यः। (यथा, मार्कण्डेये। १०७।७।

"भव तिमिरासवपानमदात्
भवति विलोहितविग्रहात्।
मिहिर! विभासि यतः सुतरां
त्रिभुवनभावनभानिकरैः॥")

अर्कश्वशुरः। इत्यमरः। १। ३। ७८॥ वृक्षः। इति मेदिनीशब्दरत्नावल्यौ। रे, २०४॥ मेघः। इति हेमचन्द्रः। २। ११॥ वायुः। चन्द्रः। इति नानार्थरत्नमाला॥ विक्रमादित्यभूपस्य नवरत्नान्तर्गतरत्नविशेषः। यथा,—

"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥"

इति नवरत्नम्॥

मिहिराग्यः, पुं, (मिहिरेणाप्यायतेवर्द्धयत इति। आप् + यक्।) शिवः। इति त्रिकाण्डशेषः॥

मीञ् ओ ग च वधे। इति कविकल्पद्रुमः॥ (क्रया०-उभ०-सक०-सेट्।) ओ मीनः। ग च मीनाति मीनीते। इति दुर्गादासः॥

मीञ् क्षि गत्याम्। मत्याम्। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा० सक०-अनिट्।) क्षि माययति मयति। इति दुर्गादासः॥

मीञ् ड य वधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-अनिट्।) ड य मीयते। इति दुर्गादासः॥

मीढ़, त्रि, सूचितम्। इत्यमरः। ३। १। ६६॥ ई क्षतमूत्रोत्सर्गे। मिहौ सिचि सूचत् क प्रत्यये आत्वं धात्वर्थेनोपसंग्रहादकर्मकत्वात् कर्मणि क्तः। इति भरतः॥

मीढ़ष्टमः, पुं, (मीढ़स् तमप् प्रत्ययेन एषोदरादित्वात् साधुः।) शिवः। यथा,—

"तदा सर्व्वाणि भूतानि! श्रुत्वा मीढ़ष्टमोदितम्।
परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढ़ष्टमः शिवस्तेनोक्तम्।" इति तट्टीकायां श्रीधरस्वामी॥

मीढ़ान्, [स्] पुं, (मिह सेचने। "दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।" ३। २। १८२। इति क्तिन्। क्तस्य नः। द्वित्वाभावः अनिट्त्वं उपधादीर्घत्वं ढत्वञ्च निपात्यते।) शिवः। यथा,—

"ततो मीढ़ांसमामन्त्र्य सुनाभीरः सहर्षभिः।
भूयस्तद्दयजनं समीढ़ेधसो ययुः॥"

इति श्रीमद्भागवते ४ स्कन्धे ६ अध्यायः॥

"मीढ़ांसं शिवं मीढुषा वेधसा च वर्त्तमानः।" इति तट्टीकायां श्रीधरस्वामी॥ (वर्षितरि, त्रि। यथा, ऋग्वेदे। २। २४। १।

"यथा नो मीढ़ान् स्तवते सखा तव द्वयते।"

"मीढ़ान् सेक्ता स्तुतेर्वर्षिता।" इति तद्भाष्ये सायणः॥)

मीनः, पुं, (मीयते इति मीञ् हिंसायाम्। "मेघमीनौ।" उणा० ३।३। इति नक् निपातितश्च।) मत्स्यः। इत्यमरः। १। १०। १७॥ (यथा, भागवते। ३। २। ८।

"दुर्भगो बत लोकोऽयं यदवो नितरामपि।
ये संवसन्तो न विदुर्हरिं मीनमिवोडुपम्॥")

मेषादिद्वादशराश्यन्तर्गतान्तिमराशिः। तत्पर्य्यायः। अन्त्यभम् २। स च पूर्व्वभाद्रपदाशीर्षपादोत्तरभाद्रपदारेवतीसमुदायेन भवति। अस्याधिष्ठातृदेवता क्षीरसमुद्रयं स च कोटसंज्ञः। जलजः। सौम्यः। अङ्गना। युग्मः। समः। द्व्यात्मकः। भक्षः। उत्तरदिङ्नाथः। गुरुक्षेत्रम्। दिनात्मकश्च। इति ज्योतिस्तत्त्वम्॥ अपि च। शीर्षपृष्ठोदयः। चरस्थरहितः। कफप्रकृतिः। जलचारी। निःशब्दः। पिङ्गलवर्णः। स्निग्धः। अल्पान्त्रजीवकृत्। बहुसन्तानः। ब्राह्मणवर्णः। दयालुश्च। तत्र जातः अतिक्रोधनः। शीघ्रगतिः। अशुचिः। कर्म्मभोगी। प्रचुरविवाहश्च भवति। इति वृहज्जातकादयः॥ अपि च।

"मीनलग्ने समुत्पन्नो रत्नकाञ्चनपूरितः।
अल्परोमा महाप्राज्ञो दीर्घकालपरीक्षकः॥"

इति कोष्ठीप्रदीपः॥ *॥

रात्रौ तल्लग्नमिरूपणं यथा। सूर्य्याकारतारात्रितुर्य्यात्मकपूर्व्वाषाढानक्षत्रे मस्तकोपरि इष्टे सति मीनलग्नस्य १। ४६ जनपक्षाग्नितुपलाधिकैकदण्डो भवति। प्रकारान्तरे। सूर्य्यांशतिथितारात्रितुर्य्यात्मकोत्तराषाढानक्षत्रे मस्तकोपरि उदिते सति मीनलग्नस्य २। ३६ षट्त्रिंशत्पलाधिकदण्डद्वयं भवति। यथा,—

"खपैर्नन्दैर्नगे शिरोगते
चतुस्तारके करिकरोरुवारिमे।
अतिभाद्रजलवासि! निर्गताः
खेचराम्बरशुभाकुलिप्रिका॥ इं १।४६।
शीर्षभाजिभचतुष्टयाङ्किते
विश्वभे तरणि खर्कवासतौ।
भूतिरक्षतमनोज्ञकामुके!
यान्ति कालतिथिलिप्रिका भवात्॥"

इं २। ३६॥

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥*॥

भगवद्गुणावतारान्तर्गतप्रथमावतारः। यथा,

"प्रीते च चित्तशयने मम मीन कूर्म्म-
क्रोडोऽभवन् वृहरिवामनजामदग्न्याः।
योऽभूद्बभूव भरतायजलाब्धुद्दः
कल्की सताञ्च भविता प्रहरिष्यतेऽरीन्॥"

इति सुग्धबोधव्याकरणम्॥

अस्य विवरणं मत्स्यशब्दे द्रष्टव्यम्॥ *॥

विशेषश्चात्र कथ्यते।

"प्रकृतिर्विष्णुरूपा च पुंरूपश्च महेश्वरः।
सर्व्वं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश॥

मीनांस

ज्ञानरूपा कालिका स्यात्कामरूपा च तारिणी।
वगला कूर्म्ममूर्त्तिः स्याच्छीतो धूमावती भवेत्॥
छिन्नमस्ता वृश्चिकः स्यादराद्यश्चैव भैरवी।
सुन्दरी मातरश्याः स्याद्धूमतो भुवनेश्वरी॥
कमला बौद्धरूपा स्यात् मातङ्गी कल्किरूपिणी।
स्वयं भगवती काली ज्ञानात्तु भगवान् स्वयम्॥
स्वयञ्च भगवान् ज्ञेयः कालीरूपो भवेद्यजे।"
दुर्गा स्यात् कल्किरूपिणीति पाठान्तरम्।

इति मुक्तमालातन्त्रम्॥

मीनकेतनः, पुं, (मीनः केतने अस्य।) कन्दर्पः। इत्यमरः। १। १। २६॥ (यथा, रघुकुमारचरिते। ५।

"अथ मीनकेतनसेनानायकेन।"

मीनगोधिका, स्त्री, (मीनगोधिकानामावासोऽत्र।) जलाशयः। यथा,—

'पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका।'

इति त्रिकाण्डशेषः॥

मीनघाती, [न्] पुं, (मीनं हन्तीति। हन + णिनिः।) बकः। इति राजनिर्घण्टः॥ मत्स्यघातके, त्रि॥

मीननेत्रा, स्त्री, (मीनस्य नेत्राकारा अस्त्यस्याः।) गन्धदूर्व्वा। इति राजनिर्घण्टः॥

मीनरः, पुं, (मीनाः भक्षत्वेन सन्त्यस्य। मीन + "वृन् छगलकठजिलेति।" ४। २। ८०। इति अञ्प्रत्ययादित्वात् रः।) धीवरः। इति त्रिकाण्डशेषः॥ झाङ्गर इति भाषा॥

मीनरङ्गः, पुं, (मीनरङ्ग। एषोदरादित्वात् साधुः।) मत्स्याशनपक्षी। इति त्रिकाण्डशेषः। माछराङ्गा इति भाषा॥ क्वचित् पुस्तके मत्स्यरङ्ग इत्यपि पाठः॥

मीना, स्त्री, उषाकन्या। सा तु कश्यपभार्य्या। यथा, वह्निपुराणे।

"उषायास्तु प्रवक्ष्यामि सर्गं पञ्च सुतोद्भवः।
मीना मेना तथा दृष्टा अदृष्टा तथैव च॥
परिदृष्टा च विज्ञेया तासाञ्च प्रसृता प्रजाः।"

मीनाक्षी, स्त्री, शर्करा। इति राजनिर्घण्टः॥ (विशेषोऽस्याः शर्करा शब्दे विधेयः॥)

मीनाक्षीशः, पुं, दर्दुराजः। खञ्जनः। इति मेदिनी। शे, १०५॥

मीनालयः, पुं, (मीनानामालयः।) वडवः। इति धनञ्जयः॥

मीनाक्षी, स्त्री, (मीनस्याक्षिणी इव अक्षिणी अस्याः।) मत्स्याक्षी। गन्धदूर्व्वा। इति राजनिर्घण्टः॥ कुबेरकन्या। इति पुराणम्॥

मीम च शब्दे गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-शब्दे अक०-गतौ सकं पर०-सेट्।) च अमिमीमत्। इति दुर्गादासः॥

मीमांसकः, पुं, (मीमांसामधीते वेद वेत्ति। मीमांसा + "क्रमादिभ्यो वुन्।" ४। २। ६१। इति वुन्।) मीमांसाशास्त्रवेत्ता। तत्पर्य्यायः। विद्वान् २। इति जटाधरः॥ मीमांसाशास्त्राध्येता च। (विषयोऽस्य यथा,—

"अयत्नं समसोऽपि श्रोभवधियां मीमांसकानां मतम्।"
छायावाक्षमसक्षापि सम्बन्धात्तुल्यकर्म्मणोः।
अयत्नं कैचिदिच्छन्ति मीमांसकमतास्थया:॥"
इति वैद्यकरावणभक्षतवादार्थेदर्पणे प्रथमश्लोके॥)

पूर्व्वमीमांसाकृत्प्रकर्त्ता जैमिनि:। इष्टिकर्त्ता कुमारिलभट्ट:। भाष्यकर्त्ता शबरस्वामी। प्रभाकर: कुमारिलभट्टस्य छात्र:। स एव गुरुत्वेन भण्यते। तन्मतं गुरुमतम् तच्छिष्या: प्राभाकरा:। अतएव स्मार्त्तभट्टाचार्य्येण प्राभाकरैरभिहितमित्युक्तम्। उत्तरमीमांसाकृत्प्रकर्त्ता वेदव्यास:। तस्य भाष्यकर्त्ता शङ्करा-चार्य्य:। स च अद्वैतवादी। रामानुज: विशिष्टाद्वैतवादी। माध्व: द्वैतवादी च॥ (यथा, भक्तिरत्नाकरे विन्ध्यौ। १। १। ३।

"मीमांसको बड़वामे: कठिनामपि
कुण्ठयन्नसौ लिङ्गाम्॥")

मीमांसा, स्त्री, (मानविचारे+"मान् बधदान् धात्वृथो दीर्घश्चाभ्यासस्य।"३।१।६। इति सन्। अ: टाप्। अभ्यासस्येकारस्य दीर्घश्च।) षड्दर्शनान्तर्गतदर्शनशास्त्रविशेष:। तत्पर्य्याय:। विचारणा २। इति हेमचन्द्र:।२।१६५॥ अस्या अध्याया विंशति:। तत्र पूर्व्वमीमांसा द्वादशाध्यायात्मिका जैमिनिप्रणीता यज्ञादिकर्म्मकाण्ड-निरूपिका। अस्या अन्तर्गतानि लोकव्यवहारनियमार्थं मनुयाज्ञवल्क्यादिभि: बहूनि धर्म्मशास्त्राणि प्रणीतानि। तत्रोत्तरमीमांसा चतुरध्यायात्मिका वेदव्यासप्रणीता ब्रह्मनिरूपिका। अस्या नाम वेदान्त:। अपराध्याय-चतुष्टयं सङ्कर्षणप्रणीतं उपासनाकाण्डं षड्दर्शनबहिर्भूतम्॥ *॥ प्रमाणादय: प्रसङ्गात्ता द्वादश पदार्था: क्रमात् द्वादशानामध्यायानां विषया:। प्रथमेऽध्याये विध्यर्थवादात्मकं धर्म्मं प्रमाणं निरूपितम्। १। द्वितीये याग-दानादिकर्म्मभेद:। २। तृतीये प्रयाजादीनां दर्शपूर्णमासार्थैकत्वेन तच्छेषत्वम्। ३। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्ता अनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्तेत्येवमादय:। ४। पञ्चमे क्रम-नियतिविधेयत्वादय:। ५। षष्ठे कर्त्तुरधिकारो नाम्नादेरित्यादय:। ६। सप्तमे समानमितर-च्छेषेण इत्यादि प्रकृतिवचनेनाग्नेयादि-नाम्नातुमितवचनेन च सामान्यतोऽतिदेश:। ७। अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्व्वापसंस्कृ-तेन देवतानिर्देश: एकदेवतत्वमैन्द्राग्नत्वमि-त्यादिना लिङ्गेनाग्नेयपुरोडाशैतिकर्त्तव्यता-नाम्नस्तेत्येवमादिविशेषातिदेश:। ८। नवमे प्रकृतावयुक्ते युक्तं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावपि पदपरिवर्त्तनेन सूर्य्यपद-प्रक्षेपेण सूर्य्याय युक्तं निर्व्वपामीत्येवमादिरूह:। ९। दशमे क्रत्वर्थेषु शोदकप्राप्तस्यावघातस्य विकृतौ करणासम्भवेन लोप इत्येवमादिर्बाध:। १०। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि सप्तम्। ११। द्वादशे प्रधानस्य पशोरुपकाराय अनुष्ठितेन प्रयाजाद्यङ्गेन पशुपुरोडाशेऽप्युप-कार इत्यादिप्रकृत:। १२॥ (एतदध्यायप्रति-पाद्यार्थानां विवरणं यथा,—

'प्रथमाध्यायस्य प्रथमे पादे विधिरूपं मान-मीरितम्। द्वितीयेऽर्थवादरूपम् अर्थवादो मन्त्रस्याप्युपलक्षक:। तृतीये स्मृतिरूपम्। स्मृतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चा-दिनामरूपम्। द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकम्। अपूर्व्वसद्भाव इत्यादिक: कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णित:। द्वितीये धातुभेदपुनरुक्त्यादिभि: कर्म्मभेद:। तृतीये दध्यन्नादीनां कर्म्मभेद-प्रामाण्यापवाद:। चतुर्थे नित्यकाम्ययो: प्रयो-गयोर्भेद:।

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां स्मृतिलिङ्गादीनां मध्ये स्मृतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णय-हेतु: स्मृत्यादे: परस्परविरोधसदसद्भाव:। पञ्चमे प्रतिपत्तिकर्म्माणि। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे याजमानानि।

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतानिषा-दधानयजनस्य प्रयोजकेत्यादि प्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्सापकरणं ग्राम्याश्छन्दे प्रयोजकमित्यादि अप्रधानप्रयोक्तृत्वम्। तृतीये जुहूपर्णमयीत्वादेरपाप्तश्लोकश्रवणादि-फलभावाभावचिन्ता। चतुर्थे राजसूयगत-जघन्याङ्गाच्चयूतादिचिन्ता।

पञ्चमाध्यायस्य प्रथमे पादे स्मृत्यर्थपाठादिभि: क्रमो निरूपित:। द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादिक्रम-विशेष:। तृतीये पञ्चप्रयाजादीनामावर्त्तनेने-कादशत्वमित्यादिदृष्टि:। अदृष्टयज्ञचिच्चित्ययो: रनावृत्तिरित्यादि दृष्टाभाव:। चतुर्थे क्रमनि-यामकानां स्मृत्यर्थपाठादीनां प्रबलदुर्ब्बलभाव:।

षष्ठाध्यायस्य प्रथमे पादे कर्म्माधिकार:। कर्त्तुरधिकारस्याहेर्नास्ति स्त्रिया अस्ति। योऽस्ति स च पत्या सहेत्येवमादिनाधिकारी निरूपित:। द्वितीये सर्व्वाधिकारिणां प्रत्येकं श्रुतं फलम्। दर्शपौर्णमासयो: कर्त्रैक्यनियम: काम्यकर्म्म-समापनीयमित्येवमादयोऽधिकारिधर्म्मा उक्ता:। तृतीये द्रव्यस्य प्रतिनिधिरुक्त:। देवादीना-मम्बादीनामधिकारित्वाच्च स नास्तीत्यादि-निरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तगाणे सत्याज्येन यजेत। दृढ़ार्थगाणे सति श्रीयान्नग्राह्यमित्यादिकम्। पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टि: प्रायश्चित्तम्। ज्योतिष्टोमस्यैकादयोदीक्षा:। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सप्ताधिकारिप्रयुक्तकर्म्मा एव सर्व्वं विप्रस्ये-त्येवमादिकं चिन्तितम्। सप्तमे पित्र्यादिकं न देयम्। महाभूमिर्न देयेत्येवमादिदेय-विचार:। अष्टमे लौकिकाग्न्युपनयन-होम:। स्त्रापतौदिक्षयेत्येवमाद्यग्निविचार: कृत:।

सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छे-नेत्यादिप्रकृतवचनातिदेश:। द्वितीये पूर्व्वो-क्तातिदेशस्य शेषो विचारित:। तृतीयेऽग्नि-होत्रनाम्नातिदेश:। चतुर्थे निर्व्वापौषधप्रयाजा-दिलिङ्गातिदेश:।

अष्टमाध्यायस्य प्रथमे पादे अदृष्टेन लिङ्गे-नातिदेशविशेष:। तद्यथा सौर्य्यचरावति-देशकानि निर्व्वापसंहितेन देवतानिर्देश एक-देवतात्वमौषधद्रव्यकत्वमित्यादीनि ऐन्द्राग्नेय-लिङ्गानि। द्वितीये त्वदृष्टैर्लिङ्गैरतिदेश:। तद्-यथा वाजिने क्षविःसामान्येन लिङ्गेन प्रयो-विध्यन्तोऽतिदिश्यते तत्र लिङ्गमसंस्कृतम्। शेषं तद्दृष्टानुमापनात्। तृतीये प्रबलेन लिङ्गे-नातिदेश:। तद्यथा। आभिचारिकेषु-वाग्यावैष्णवसारस्वतबार्हस्पत्येषु क्षविःषु लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्वि-देवत्वत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीय-स्यामीषोमीयस्य विध्यन्तोऽतिदिष्ट:। प्रबलञ्च द्विदेवत्वत्वम्। शब्दोच्चारणमात्रेण सहसा प्रतिभासात्। क्रमस्तु विलम्बितप्रतीत्या दुर्ब्बल:। चतुर्थे द्रव्यहोमेष्वतिदेशोऽपोह्यते।

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्व्वक-मूहविचारप्रारम्भ:। तत्र प्रयाजादयो धर्म्मा अपूर्व्वप्रयुक्ता:। अवघातमन्त्रादिष्वविवक्षितं श्रौत्यग्न्यादिरूपं साधनविशेषत्वमात्रं विव-क्षितमित्यादिरूपोपोद्घात:। सविच्चन्निपूष-शब्दानां विकृतिषु नास्त्यूह:। अग्निशब्दस्या-स्त्यूह इत्यादि ऊहविचारारम्भ:। द्वितीये सपरिकर: सामोह:। तृतीये समोह:। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचार:।

दशमाध्यायस्य प्रथमे पादे बाधदुर्ब्बलोपो निरूपित:। तद्यथा स्वयं हुता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पाद-कानामाहवनीयादीनां बाध:। द्वारलोपेषु वितुषी-करणरूपस्य द्वारस्य लोपेनावघातस्य बाध:। द्वितीये संक्षेपोक्तस्य द्वारलोपस्य बहुभि-रुदाहरणैर्विस्तार:। तृतीये बाधकारणं कार्य्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादिदक्षि-णायाः ऋत्विक्परिक्रय: कार्य्यम्। तथा विकृतिरूपे भूनाख्यकाण्डे धेनुरूपाया दक्षि-णायाश्चोदक एव कार्य्यम्। ततो धेन्वा गवाश्वादि-दक्षिणाविकृतौ चोदकप्राप्ता बाध्यते। चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तेनाग्नेष्ट-होमेन सह समुच्चीयन्त इत्यादि: समुच्चय:। पञ्चमे षोढ़ाधिकरणं प्रकृतिगामी। स चायमव-

प्राचादेव यज्ञीतस्य इत्यादिवाधप्रसङ्गागतो ब्रह्मादिविचारः। षष्ठे सामन्नये गेयमित्यादिवाधप्रसङ्गागतः सामविचारः। सप्तमे पन्थङ्गेषु ऋविर्भेदः। अष्टमेधीयमपूर्व्वकर्म्मेत्यादिवाधप्रसङ्गागतः प्रयोजविचारः। अष्टमेनानुवाकेष्विति पर्य्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिवाधोपयुक्तो नञर्थविचारः।

एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रसुद्धाहरणवाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः।

द्वादशाध्यायस्य प्रथमे पादे पशुधर्म्माणां पशुपुरोडाशे प्रसङ्गः। सौमिकवेदेऽत्तरकालीनकर्म्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशूक्तन्त्रितम्। न तु सवनीयपुरोडाशानाम्। विकृतिसन्निधौ न प्रकृतिः। अन्वारम्भणीया विकृतिष्वपि स्यात्। न तु प्रकृतावेवेत्यादिविचारः। तृतीये तन्त्रावापौ; सप्तधयः। आधारगतानान्नातृत्वसम्तत्वादीनां सप्तधय इत्यादिकं प्राधान्येन। यवागूपोर्व्विकल्प इत्यादिकं सप्तधयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैन्द्रावार्हत्यस्याज्यानुवाक्ययुगलयोर्व्विकल्प इत्यादिकं प्राधान्येन। याज्यानुवाक्ययोः सप्तधय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। सप्तमे द्वादशाध्यायगतेषु षट्त्रिंशत्कण्डिकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः।" इत्यधिकरणमाला॥

उत्तरमीमांसाध्यायपादप्रतिपाद्यार्था यथा,—

"ग्राह्यं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः।
समन्वयाविरोधौ द्वौ साधनञ्च फलन्तथा॥
समन्वये पदलिङ्गमवाक्यैरुपास्यगम्।
ज्ञेयं पदमाद्यञ्च चिन्त्यं पादेष्वनुक्रमात्॥
द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुक्तया।
भूतभोक्तृगते लिङ्गस्मृतेरप्यविरुद्धता।
तृतीये विरतिस्तत्त्वं पदार्थपरिशोधनम्।
गुणोपसंहृतिर्ज्ञानैक्यस्थैर्य्यादि साधनम्॥
चतुर्थे जीवतो मुक्तिरुत्क्रान्तिर्मोक्षिणस्तरा।
ब्रह्मप्राप्तिर्ब्रह्मलोकादिति पादार्थसंग्रहः॥"

इति व्यासाधिकरणमाला॥ मीमांसाद्वयमतसंग्रहो यथा,—

अथ मैमांसकम्।

"मीमांसको द्विधा कर्म्मब्रह्ममीमांसकः स्मृतः।
वेदान्ती मन्यते ब्रह्म कर्म्म भट्टप्रभाकरौ॥
प्रत्यक्षमनुमानञ्च वेदाख्योपमया सह।
अर्थापत्तिरभावञ्च भट्टानां षट्प्रमाण्यकौ॥
प्रभाकरमते पञ्चैतान्यभावस्य वर्ज्जनात्।
अद्वैतवादी वेदान्ती प्रमाणन्तु यथातथा॥
सर्व्वमेतदिदं ब्रह्म वेदान्तेऽद्वैतवादिनाम्।
आत्मन्येव लयो मुक्तिर्वैदान्तिकमते मता॥
अकुकर्म्मा सवट्कर्म्मा मुद्गलादिद्विवर्ज्जकः।
ब्रह्मसूत्री द्विजो भट्टो यज्ञस्यामसंस्थितः॥

भगवन्नामधेयात्तु द्विजा वेदान्तदर्शने।
विप्रगेहसुजन्यत्वोपवीता ब्रह्मवादिनः॥
चत्वारो भगवद्भेदाः कुटीचरबहूदकौ।
हंसः परमहंसश्चाधिकोमीषु परः परः॥"

इति जिनदत्तसूरिविवेकविलासः। सर्व्वदर्शनसंग्रहधृत जैमिनिमतसंग्रहो यथा। अथातो धर्म्मजिज्ञासा इति प्रथमाधिकरणसूत्रम्। तत्राधिकरणं पञ्चावयवमाचक्षते परीक्षकाः। अस्मिन् सूत्रे स्वाध्यायोऽध्येतव्य इतिश्रुतिवाक्यमाश्रित्य विधयसंशयपूर्व्वपक्षसिद्धान्तनिर्णयरूपपञ्चाङ्गाधिकरणेन मीमांसाशास्त्रारम्भस्यावश्यकता प्रदर्शिता। मीमांसा हि वेदविचारशास्त्रं तदारम्भो निष्प्रयोजनः स्वाध्यायोऽध्येतव्य इतिश्रुत्या वेदाध्ययनं विहितं तच्च विचारशास्त्रं स्वर्गरूपं फलमपरत्रदृश्यमानमपेक्षतेऽपि सम्भवति न तत्रार्थबोधापेक्षाप्यस्ति असत्याञ्च वेदार्थबोधापेक्षायां तदधीनायाः विचारशास्त्रायाः अपि अनावश्यकत्वात् अथवा यागादिकर्म्मावबोधाय स्वाध्यायोऽध्येतव्यः तस्य चार्थबोधरूपं दृष्टमेवफलं ततश्च दृष्टार्थत्वेन तस्य वैधत्वाभावात् वेदार्थविचारस्यापि तदेकप्रयोजनस्य वैधत्वं नास्तीति तद्विचारशास्त्रमनारम्भणीयम्। स्वाध्यायाध्ययनानन्तरं विचारशास्त्रेऽधीतवतया श्रूयते वेदमधीत्य स्नायादितिविधिबोधितं वेदाध्ययनसमावर्त्तनयोरानन्तर्य्यं बाधित्वा तस्मात्तद्विचारशास्त्रारम्भणीयमितिपूर्व्वपक्षसङ्गत्या अध्ययनस्य दृष्टफलकत्वेऽपि अधीतेन इत्यत्र तृतीयया भावनाप्रतिपादनात् अर्थबोधस्य तत्र भावनैकान्वयादध्ययनविधेरवघातादिविधिवन्नियमापूर्व्वार्थत्वं। तथाच यथा दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिजन्यमवान्तरापूर्व्वं कल्पयति तथा समस्तक्रतुजन्यमपूर्व्वजातं क्रतुज्ञानसाधनाध्ययनविधिजन्यमपूर्व्वं कल्पयिष्यति। अन्यथा अध्ययनविधेर्वैफल्यं स्यात्। अर्थबोधरूपदृष्टफलस्य सम्भवे विधिशक्त्यायात्त स्वर्गफलकल्पना इति सिद्धान्तितम्। यथा यागे यवाद्यैर्व्रीह्यादिनापि विकृतीकरणसम्भवे अवघातविधिना अवघातो नियम्यते तथा अध्ययनविधिना अध्ययनं नियम्यते। तथाच अध्ययनेन च वेदार्थे परिज्ञाते तत्र संशये तन्निर्णयार्थं विचारशास्त्रमवश्यमपेक्षितव्यमिति विचारशास्त्रमारम्भणीयमेवेति प्रथमाधिकरणनिष्कर्षः; एवंरीत्या अधिकरणसङ्घात्मकं कर्म्ममीमांसाशास्त्रं जैमिनिना प्रणीतम्। अस्मिन् शास्त्रे वेदस्यापौरुषेयत्वम्। वर्णानां ककारादीनां नित्यत्वं तत्र सोऽयं क इत्यादिप्रत्यभिज्ञैव प्रमाणं कण्ठताल्वाद्यभिघात एव तदभिव्यञ्जकः। ततश्च वेदस्यापौरुषेयतया निरस्तसमस्तपुरुषाकलङ्काङ्कुरत्वेन स्वतः सिद्धं धर्म्मे प्रामाण्यमिति सुस्थितम्।

प्रमाज्ञानस्य स्वतःप्रामाण्यम्। विज्ञानसामग्री-जन्यत्वे सति तदतिरिक्तदोषजन्यत्वं प्रमायाः स्वतस्त्वमिति॥

मीरः, पुं, (मिनन्ति प्रक्षिपन्ति वस्त्रो जलान्यनेति। मिन्+"मुचिचिमिमां दीर्घश्च।" उणा० २। २५। इति क्रन् दीर्घश्च।) वस्त्रम्। इत्यु-णादिकोषः॥ पर्व्वतैकदेशः। सीमा। पानीयम्। इति संक्षिप्तसारोणादिवृत्तिः॥

मील, क्ष निमेषे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) क्ष अभिमीलतु अभीमिलत्। मीलति चक्षुः पक्ष्मभिराहतं क्षणादित्यर्थः। इति दुर्गादासः॥

मीलं, क्ली, (मीलतीति। मील+कः।) वनम्। इति केचित्॥

मीलनं, क्ली, पक्ष्मभिरावरणम्। मीलयतीभांवे ल्युट् (क्युट्) प्रत्ययेन निष्पन्नम्॥

मीलितं, त्रि, (मील+क्तः।) अप्रफुल्लम्। तत्पर्य्यायः। सङ्कुचितम् २ निमीलम् ३ सुप्तिम् ४। इति हेमचन्द्रः॥ (अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ११५।

("मीलितं वस्तुनो गुप्तिः केनचित् तुल्यजातिना।")

मीव, णीवे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) मीवति। पीवः; स्थूलीभावः। इति दुर्गादासः॥

मीवरः, त्रि, (मीवति क्षिणोतीति। मीव्+"क्षित्वरच्छत्वरधीवरपीवरमीवरेति।" उणा० १। १। इति अरच् निपातितश्च। अथोणादिकेन तु माधातोः अरच् निपातितश्चेत्युच्यते तत्र।) हिंस्रः। इत्युणादिकोषः॥ (मीयते इति, मा+अरच्। निपातितः।) सेनानी। पूज्यः। इति संक्षिप्तसारोणादिवृत्तिः॥

मीवा, स्त्री, (मीवति क्षिणोतीति। मी+"शेवायच्छिक्षायीवापामीवाः।" उणा० १। १५४। इति वन् निपात्यते च।) उदरस्थमिः। इत्युणादिकोषः॥ वायुः। इति सिद्धान्तकौमुद्युणादिवृत्तिः॥ शीकरः। सारः। इति संक्षिप्तसारोणादिवृत्तिः॥

सुः, पुं, (सव्+बाहुलकात् कुन्। टिलोपश्च।) वन्धनम्। इत्येकाक्षरकोषः॥ मशैघ्रः। इति हलायुधश्चन्द्रः॥

सुकन्दकः, पुं, पलाण्डुः। केचित्तु सुकन्दशब्दात् सुकन्दक इति पठित्वा जघनानां सुखं वर्द्धं प्रायेण कन्दति आकृयति यदि आह्वाने रोदने च अकः पृषोदरादित्वात् दलुक् सुकन्दक इति व्याचक्षते। इत्यमरटीकायां भरतः॥

सुकुः, पुं, (सुच्+बाहुलकात् कुः। पृषोदरादित्वात् साधुः।) सुक्तिः। यथा,—

"सुकुर्मुक्तौ मशैघ्रे स्यात् कुः पृथिव्यामशोभने।"

इति दुर्गादासधृतहलायुधश्चन्द्रः॥

सुकुट, क्ली, (मकुते मञ्चयति। मकि+उटन् नलोपश्चेति साधुः।) जनामख्यातशिरोभूषणम्। तत्पर्य्यायः। किरीटम् २। इत्यमरः।

२ । ६ । १०२ ॥ मौलिः ३ कोटीरम् ४ उष्णीषम् ५ । इति हेमचन्द्रः । ३।३१४ ॥ मकुटम् ६ मौलीकः ७ शेखरम् ८ अवतंसः ९ वतंसः १० उत्तंसः ११ उष्णीषकम् १२ कोटीरकम् १३ । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । ८६ । ७७ ।
"सुकुटापतत्तस्य काञ्चनो वज्रभूषितः ।"
तथा च महाभारते । १ । ३० । ३८ ।
"रजांसि सुकुटान्येषां सत्यितानि अधर्षयन् ।"
टाप् । स्त्री, मालतीविशेषः । यथाचैव । ८ । ४६ । २३ ।
"कालेहिका वामनिका सुकुटा चैव भारत ॥")

सुकुटी, स्त्री, अङ्गुलिमोटनम् । इति शब्दरत्नावली ॥

सुकुन्दः, पुं, विष्णुः । तस्य व्युत्पत्तिर्यथा,—
"सुकुमक्षयमाक्षत्व निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो सुकुन्दस्तेन कीर्त्तितः ॥
सुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यत्तद्ददाति विप्रेभ्यो सुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
निधिविशेषः । (यथा, मार्कण्डेये । ८८ । ५ ।
"यत्र पद्ममहापद्मौ तथा मकरकच्छपौ ।
सुकुन्दो नन्दकश्चैव नीलः शङ्खोऽष्टमो निधिः ॥"
अस्य गुणादिकं निधिशब्दे उक्तम् ।) रत्नभेदः । कुन्दुरः । इति मेदिनी । दे, ३८ ॥ (यथा च पर्य्यायः ।
"कुन्दुरस्तु सुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि ।"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
पारदः । इति हेमचन्द्रः । २ । १२८ ॥

सुकुन्दकः, पुं, पलाण्डुः । केचित्तु सुकन्दकस्थाने सुकुन्दक इति पठित्वा जवनानां सुदं कन्दलीति पृषोदरादित्वात् दलुक् कन्देरत उच्चेति व्याचक्षते । इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते । १ । ४६ ।
"विशोषो तच भूयिष्ठं वरुकः ससुकुन्दकः ।")
षष्टिकशालिः । यथा, भावप्रकाशे ।
"षष्टिकः ग्रसतुष्यश्च प्रमोदकसुकुन्दकौ ।
महाषष्टिक इत्याद्याः षष्टिकाः सदृशाक्षुना ॥"

सुकुन्दः, पुं, (मोचयति विषयाक्षरानुरागमिति । अन्तर्भूतण्यर्थे सुच् + कः । शकन्ध्वादित्वात् कुत्वम् । तं उन्दत्यार्द्रीकरोतीति । उन्द + उण् । पृषोदरादित्वात् साधुः ।) कुन्दुरुः । इत्यमरटीकायां मथुरानाथः ॥

सुकुम, त्र, निर्व्वाणम् । भक्तिरसः । प्रेम । यथा,
"सुकुमक्षयमाक्षत्व निर्व्वाणमोक्षवाचकम् ।
तद्ददाति च यो देवो सुकुन्दस्तेन कीर्त्तितः ॥
सुकुं भक्तिरसप्रेमवचनं वेदसम्मतम् ।
यत्तद्ददाति विप्रेभ्यो सुकुन्दस्तेन कीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अः ॥

सुकुरः, पुं, (सक + "सकुरदृदृरौ ।" उणा० १।४१। इत्यत्र । बाहुलकादकारस्थाने उकारः इत्युज्ज्वलदत्तोक्तेः उरच् ।) दर्पणः । (यथा, नैषधे । ४।५६।
"कुरु करे मुखमेकमधोवनं
बहिरितो सुकुरच्च कुरुष्व मे ॥")

वकुलद्रुमः । कुलालदरुः । इति मेदिनी । रे, २०२ ॥ मल्लिकापुष्पवृक्षः । इति विश्वः ॥ (यथा,
सुकुरकुसुमभङ्गानातपत्रं अजं वा
दधिफलमथ नौकामन्नसाम्बूलवस्त्रम् ।
कमलकलसयुग्मं भूषणं काञ्चनं वा
भवति सकलसिद्धेः श्रेयसे रोगिणाञ्च ॥"
इति हारीते द्वितीयस्थाने द्वितीयेऽध्याये ॥)
कुलवृक्षः । इति शब्दरत्नावली ॥ कोरकः । इति हेमचन्द्रः ॥

सुकुलः, पुं, क्लीं, (सुचति कलिकात्वम् । सुच् + कुलक् । इति भरतः ॥ सुचेरलः । कालसुत्वञ्चेति कत्वे अकारस्योत्वे सुकुल इति रायः ।) ईषद्विकसितकलिका । तत्पर्य्यायः । कुटमलः २ । इत्यमरः । २ । ४ । १६ ॥ (यथा, रघौ । ८।३१।
उपहितं शिशिरापगमश्रिया
सुकुलजालमशोभत किंशुके ।")
मकुलः २ पौटकोरकः ३ । इति शब्दरत्नावली ॥ शरीरम् । आत्मा । इति धरणिः ॥ (राजपुत्रविशेषः । यथा, राजतरङ्गिण्याम् । ६।२५३।
"दत्वा लक्षत्रया राज्ञी तत्त्वज्ञाऽत्यर्हदद्युवा ।
यशोधरं शुभधरं सुकुलञ्च सबान्धवम् ॥")

सुकुष्टः, पुं, वनमुद्गः । तत्पर्य्यायः । मयष्टः २ । इति रत्नमाला ॥ अस्य गुणाः । शीतलत्वम् । श्लेष्मलत्वम् । कफपित्तज्वरनाशित्वञ्च । इति राजवल्लभः ॥

सुकुष्टकः, पुं, (सुकुं स्तकानि प्रतिहन्ति । स्तक + अच् पृषोदरादित्वात् साधुः ।) वनमुद्गः । सुगानी इति भाषा । तत्पर्य्यायः । मयष्टकः २ । इत्यमरः । २।९।१७॥ सुकुष्टः ३ मयष्टः ४ । इति श्रीधरः ॥ मयष्टकः ५ । इत्यन्ये । इति भरतः ॥ सुद्गष्टकः ६ मकुष्टकः ७ मयुष्टकः ८ । इति टीकान्तरम् ॥ (तथास्य विषयः ॥
"विदलान्नानि वक्ष्यामि शृणु पुत्र ! यथाक्रमम् ।
यवगोधूममुद्गानां माषासुद्गाढकी तथा ॥
सुकुष्टका कुलत्थाश्च मसूराख्यपुटास्तथा ।
निष्पावकाः कलायाद्या विदलान्नानि कीर्त्तयेत् ॥
इति हारीते प्रथमे स्थाने द्वादशेऽध्याये ॥
सुद्गान् मसूरांश्चणकान् कुलत्थान् वसुकुष्टकान् ।
आहारकाले यूषार्थे ज्वरितायं प्रदापयेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)

सुकूलकः, पुं, (सुच् + वाहुलकादूलच् पृषोदरादित्वात् कुत्वम् । ततः संज्ञायां कन् ।) वह्निवृक्षः । इत्यमरटीकायां रामाश्रमः ॥ (तथास्य पर्य्यायः ॥
"चित्रा वह्नी शिखिभः स्यादुपचित्रा सुकूलकः ।
दाह्यायवी विशल्या च सघोडुम्बरपर्णयपि ॥"
इति वैद्यकरत्नमालायाम् ॥
"हस्त्युदुम्बरपर्णी स्याच्छिखिभोऽथ सुकूलकः ।
हवली नामतश्चित्राव्यथोघा शूचिकाह्वया ॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये ॥)

सुक्तः, त्रि, (सुच् + क्तः ।) प्राप्तमोक्षः । मोचितः । इति मेदिनी । ते, ४४ ॥ नष्टितः । इति शब्दरत्नावली ॥ (नृपविशेषः । यथा, राजतरङ्गिण्याम् । ७ । १६३५ ।
"सुदत्तस्यकभृत्यस्य जैलकाख्यस्य तत्त्वगम् ।
सुक्तो नामाल्लिकं प्राप्तो नृपतेरात्मतामगात् ॥"
ऋषिविशेषः । यथा, मार्कण्डेये । १०० । ३१ ।
"अमीषञ्चाग्निमाहुश्च शुचिमुक्तोऽथ माधवः ।
शुक्रोऽलितश्च सप्तैते तदा सप्तर्षयः स्मृताः ॥")

सुक्तकं, क्लीं, (सुच्यते क्षेपति । सुच् + क्तः । संज्ञायां कन् ।) क्षेपणीयास्त्रम् । इति केचित् ॥ (काथविशेषः । यथा, साहित्यदर्पणे । ६ । २६५ ।
"दृक्तगन्धोज्झितं गाढं सुक्तकं दृक्तगन्धि च ॥")

सुक्तकञ्चुकः, पुं, (कञ्चुक इव कञ्चुकः सुक्तः कञ्चुको येन ।) अचिरत्यक्तसर्पकञ्चुकसर्पः । तत्पर्य्यायः । निर्मुक्तः २ । इत्यमरः । १ । ८ । ६ । उज्झितकञ्चुके, त्रि ॥

सुक्तचक्षुः, [स्] पुं, (सुक्तं सर्वतः क्षिप्तं चक्षुर्येन ।) सिंहः । इति शब्दमाला ॥ सुक्तनेत्रे, त्रि ॥

सुक्तरसा, स्त्री, (सुक्तः रसो यस्याः ।) राजा । इति रत्नमाला ॥ (विवरणमस्या राजशब्दे ज्ञातव्यम् ।) त्यक्तरसे, त्रि ॥

सुक्ता, स्त्री, (सुच्यते स्म । मोच्यते निःसार्य्यते इति वा । सुच् + क्तः । टाप् ।) राजा । इति रत्नमाला ॥ रत्नविशेषः । मोती इति हिन्दीभाषा । अस्या अधिष्ठात्री देवता चन्द्रः । इति ज्योतिषम् ॥ तत्पर्य्यायः । मौक्तिकम् २ । इत्यमरः । २ । ६ । ६६ ॥ सौम्या ३ शौक्तिकेयम् ४ तारम् ५ तारा ६ भौतिकम् ७ तौतिकम् ८ अम्भःसारम् ९ शीतलम् १० नीरजम् ११ नक्षत्रम् १२ इन्दुरत्नम् १३ लक्ष्मीः १४ सुक्ताफलम् १५ विन्दुफलम् १६ सुक्तिका १७ शौक्तेयकम् १८ शुक्तिमणिः १९ अग्निप्रभम् २० स्वच्छम् २१ हिमम् २२ हिमबलम् २३ सुधांशुभम् २४ शुधांशुरत्नम् २५ । लक्ष्मीस्थाने लक्ष्मं अग्निप्रभस्थाने अग्निप्रियं हिमबलस्थाने हैमवतं सुधांशुभस्थाने भूरत्नं इति च पाठः । इति राजनिर्घण्टः ॥ शौक्तिकम् २६ । इति भावप्रकाशः ॥ सुक्तिबीजम् २७ हारी २८ । इति शब्दरत्नावली ॥ कुवलम् २९ । इति जटाधरः ॥ अस्या गुणाः । सारकत्वम् । शीतत्वम् । कषायत्वम् । स्वादुत्वम् । लेखनत्वम् । चक्षुष्यत्वञ्च । तद्धारणगुणः । पापालक्ष्मीविनाशित्वम् । इति राजवल्लभः ॥ हृद्यत्वम् । बलपुष्टिदत्वञ्च । इति भावप्रकाशः ॥ * ॥ अपि च ।
"मौक्तिकञ्च मधुरं सुशीतलं
हृद्विरोगशमनं विषापहम् ।
राजयक्ष्मपरिकोपनाशनं
शौर्य्यवीर्य्यबलपुष्टिवर्द्धनम् ॥"
अस्या लक्षणं यथा,—
"नक्षत्राभं गुरुमत्यन्तसुक्तं
स्निग्धं स्थूलं निर्म्मलं निर्व्रणञ्च ।

अस्तं धत्ते गौरवं यत्तुलायां
तन्मौक्तिकं मौक्तिकं सौख्यदायि ॥"

अस्या दोषलक्षणं यथा,—

"यद्दिच्छायं मौक्तिकं यद्वकायं
शुक्तिस्थूणं रक्तताम्राभिधत्ते ।
मत्स्याक्ष्यक्षं रूक्षसुस्रावनम्रं
नैतद्धार्य्यं धीमता दोषदायि ॥"

अष्टधा मौक्तिकं यथा,—

"मातङ्गोरगमीनपोत्रिशिरसत्कक्षारशङ्खाम्बुभ-
च्छुक्तीनासुदराच्च मौक्तिकमणिः स्यादष्टधा भवत्य-
ष्टधा ॥"

मौक्तिकविशेषो यथा,—

"छायापाटलनीलपीतधवलाज्जातामपि सामान्यत:
सप्तानां बहुशो न लक्षयितुमिति चेच्छौक्तेयकं
तूक्तवत्म् ॥"*॥

मौक्तिकपरीक्षा यथा,—

"लवणक्षारचोदिनि पात्रेऽजगोमूत्रपूरिते
क्षिप्तम् ।
महितमपि मुक्तालीतुषैर्यदधिवासितं तन्मौक्तिकं
जात्यम् ॥"

इति राजनिर्घण्टः ॥ * ॥

तदुत्पत्तिस्थानानि यथा,—

"मुद्गो गजश्च क्रोडश्च फणी मत्स्यश्च दर्दुरः ।
वेणुरेते समाख्यातास्तज्जन्मौक्तिकयोनयः ॥"

इति भावप्रकाशः ॥ * ॥

अथ प्रकारान्तरमुक्तापरीक्षा ।

"द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्यादिषूक्तास्वभवेषु जानि ।
मुक्ताफलानि प्रथितानि लोके-
तेषान्तु मुक्तास्वभवमेव भूरि ॥
वेध्यन्तु मुक्तास्वभवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ।
मतङ्गजा ये तु विशुद्धवंशा-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
उत्पद्यते मौक्तिकमेषु दन्त-
मापीतवर्णं प्रभया विहीनम् ॥

तस्य गजपरीक्षायां गजजातिश्चतुर्विधा ।
मौक्तिकं तेषु जातं हि चतुर्विधमुदीर्यते ॥
ब्राह्मणं पीतशुक्लन्तु क्षत्रियं पीतरक्तकम् ।
पीतश्यामन्तु वैश्यं स्यात् शूद्रं स्यात् पीत-
नीलकम् ॥

काश्मीजकुसुमसदृशं धात्रीफलनिभं गुरु ।
अतिपिङ्गरसच्छायं मौक्तिकं मन्ददीधिति ॥
धाराधरेषु जायेत मौक्तिकं जलविन्दुभिः ।
दुर्लभं तन्मनुष्याणां देवैस्तत् क्षियतेऽम्बरात् ॥
कुक्कुटाण्डसमं वृत्तं मौक्तिकं निबिडं गुरु ।
धवलं भानुसङ्काशं देवयोग्यमसानुषम् ॥"* ॥

तथाहि गारुडे ।

"नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं बह्विधा हरन्ति ।
अर्चिःप्रभानावृतदिग्विभाग-
मादित्यवद्दुःखविभाव्यबिम्बम् ॥
तेजस्तिरस्कृत्य हुताशुनेन्दु-
नक्षत्रतारायहसम्भवञ्च ।
दिवा यथा दीप्तिकरस्तथैव
तमोऽपहाऽस्यपि तन्निगद्यते ॥
विचित्ररत्नद्युतिचारुतोय-
चतुःसमुद्रा भवनाभिरामा ।
स्यात् न वा स्यादिति निश्चयो मे
क्षतक्षमा मद्दी तस्य सुवर्णपूर्णा ॥
क्षीणोऽपि यत्तत्क्षमते कथञ्चित्
विपाकयोगाज्जहतः शुभस्य ।
सपत्नक्षीणः पृथिवीं समग्रां
भुनक्ति तत्तिष्ठति यावदेव ॥
न केवलं तच्छुभक्षत्नृपस्य
भाग्यैः प्रजानामपि जज्ञ तस्य ।
तद्योजनानां परितः प्रतस्थ
सर्व्वाननर्थान् विसुखीकरोति ॥
जलज्योतिर्मरुद्व्योम्नां मेघानां त्रिविधं भवेत् ।
जलाधिकेऽधिकं स्वच्छं कोमलं गुरु कान्ति-
मत् ॥
ज्योतिषं कान्तिमद्वृत्तं दुर्निरीक्षं रविप्रभम् ।
कान्तिमत् कोमलं वृत्तं मारुतं विमलं लघु ॥
वराहदंष्ट्राप्रभवं वरिष्ठं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भुवः प्रदेशे
प्रजायते शूकरवद्वरिष्ठः ॥
ब्रह्मादिजातिभेदेन वराहोऽपि चतुर्विधः ।
तेषु जाता भवेन्मुक्ता समासेन चतुर्विधा ॥
ब्राह्मणः शुक्लवर्णस्तु शूद्रमस्तोऽस्य लक्ष्यते ।
क्षत्रियः शुक्लरक्तस्तु वर्णे कर्केतरत्न च ॥
वैश्यः स्यात् शुक्लपीतस्तु कोमलः कोमलप्रभः ।
शूद्रः स्याच्छुक्लनीलस्तु कर्कशः श्यामरत्न च ॥"

तथा च ।

"कोमलं कोमलच्छायं तद्वराहशरीरजम् ।
अलभ्यं गरुडे रत्नं मौक्तिकं पुण्यवर्जिते ॥"*॥

ये कम्बवः प्राङ्मुखावर्त्तमध्या-
पीतस्य शङ्खप्रवरस्य गोत्रे ।
स्याद्मौक्तिकानामिह तेषु जन्म
तल्लक्षणं संप्रति कीर्त्तयामः ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
शुक्लादृढच्छकोलफलप्रमाणम् ॥

तथा च ।

वर्षोपलसमं दीप्त्या पाञ्चजन्यकुलोद्भवम् ।
कपोताण्डप्रमाणं तदतिकान्ति मनोहरम् ॥"*॥

विशेषो यथा,—

"अस्मिन्नादिकलक्षणे ये जाताः कम्बवः शुभाः ।
मौक्तिकं तेषु जातं हि सप्तविंशतिभेदभाक् ॥
शुक्लाशुक्लाः पीतरक्ता नीलाः लोहितपिङ्गराः ।
आकर्बुराः पाटलाश्च नववर्णाः प्रकीर्त्तिताः ॥
मद्धन्मध्यलघुश्यामैः सप्तविंशतिधा भवेत् ।
क्रमतस्तेषु विज्ञेयं नक्षत्रेषु मनीषिभिः ॥*॥

पाठीनपृष्ठस्य समानवर्णं
मौक्तात् सुवृत्तं लघु नातिसूक्ष्मम् ।
उत्पद्यते वारिचरानने च
मीनाश्च ते मध्यचराः पयोधेः ॥"

तथा च ।

"गुञ्जाफलकायस्थौल्यं मौक्तिकं तिमिजं
लघु ।
पाटलापुष्पसङ्काशमल्पकान्ति सुवर्त्तुलम् ॥
वातपित्तकफद्वन्द्वसन्निपातप्रभेदतः ।
सप्त प्रकृतयो मौक्ते सप्तधा तेन मौक्तिकम् ॥
लघिष्ठमरुजं वातात् आपीतं रूक्षं पित्ततः ।
शुक्लं गुरु कफोद्रेकात् वातपित्तान्वितं दुर्लघु ॥
वातश्लेष्मभवं स्थूलं पित्तश्लेष्मजमच्छकम् ।
सर्व्वलिङ्गप्रयोगेण सान्निपातिकमुच्यते ॥
एकाः शुभदाः प्रोक्तास्त्रयो वै सान्नि-
पातिकाः ॥*॥

भौमङ्गमं नीलविशुद्धवर्णं
सर्व्वं भवेत् प्रज्वलवर्णशोभम् ।
निनान्तधौतप्रतिकल्पमान-
निस्त्रिंशधाराऽसमवर्णशोभम् ॥
भुजङ्गमास्ते विषवेगहीनाः
श्रीवासुकेर्व्वंशभवाः पृथिव्याम् ।
क्वचित् कदाचित् खलु पुण्यदेशे
तिष्ठन्ति ते पश्यति ताञ्जनुष्यः ॥
फणिजं वर्त्तुलं रत्नं नीलच्छायं महाद्युति ।
पुण्यहीना न पश्यन्ति वासुकेः कुलसम्भवम् ॥
मृगालकोशामलकोशगुञ्जा-
फलप्रमाणास्तु चतुर्विधास्ते ।
स्वर्णं जवाबुद्बुदवेणुजाह-
सर्पेषु जाताः प्रवरास्तु सर्व्वे ॥
प्राप्यापि रत्नानि धनं श्रियंवा
राजश्रियंवा महतीं दुरापाम् ।
तेजोऽन्विताः पुण्यजनो भवन्ति
मुक्ताफलस्यास्य विधारणेन ॥
जिज्ञासया रत्नविनिश्चयज्ञैः
शुभे मुहूर्त्ते प्रयतैः प्रयत्नात् ।
रक्षाविधानं सुमहद्विधाय
हस्तोपविष्टं क्रियते यदा तत् ।
तदा महद्दुन्दुभितूर्य्यघोषै-
र्घनैर्घनैरारिवतेऽम्बरीषम् ॥
न तं भुजङ्गा न तु जातुधाना
न राक्षसा नापि च दुष्टलोकाः ।
हिंसन्ति यस्याहिशिरःसमुत्थं
मुक्ताफलं तिष्ठति कोषमध्ये ॥
मेकादिष्वपि जायन्ते मनुष्यो ये कथञ्चन कथञ्चन ।
भौमङ्गममणीस्तुल्यान्ते विज्ञेया बुधोत्तमैः ॥
नक्षत्रमालेव दिवो विभूषा
दन्तावली तस्य महासुरस्य ।
विचित्ररूपेषु विचित्रवर्णा
पयःसु पद्मैः पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ति-
र्भणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमत्सुस्थितिमाप बीज-
मासत् पुराऽन्यभवानि यानि ॥

यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुधाद्यसूक्तामणिरत्नबीजम्।
तस्मिन् पयस्तोयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकनामवाप ॥ * ॥

सैंहलिकपारलौकिक-सौराष्ट्रिकताम्रपर्णपारसवाः।

कौवेरपाण्ड्यविराटसूक्ता इत्याकराश्चौ ॥
"स्वात्यां स्थिते रवौ मेघैर्यें मुक्ता जलबिन्दवः।
भूत्वा: शुक्तिषु जायन्ते तेमुक्ता निर्मलत्विषः॥
स्थूला मध्यास्तथा कृच्छ्रा बिन्दुमानानुसारतः।
स्निग्धमधुरच्छायं मौक्तिकं सिंहलोद्भवम् ॥
पारलौकिकसम्भूतं मौक्तिकं त्रिविधं गुरु।
सौराष्ट्रिकभवं स्थूलं वृत्तं स्वच्छं सितं घनम् ॥
ताम्रपर्णभवं ताम्रं पीतं पारसवोद्भवम्।
ईषत् प्रमाणच्च रूक्षच्च कौवेरोद्भवमौक्तिकम् ॥
पाण्ड्यदेशोद्भवं पाण्डु सितं रूक्षं विराटजम्।
रत्नमाणिक्यास्तु या शुक्तिस्तत्प्रकृतिः सुदुर्लभा॥
तत्र जातं सितं स्वच्छं जातीफलसमं वरम्।
छायावद्दृश्यदूरस्थं निर्दोषं यदि लभ्यते ॥
अमूल्यं तद्विनिर्दिष्टं रत्नलक्षणकोविदैः।
दुर्लभं कृपयोग्यं स्यादल्पभाग्यैर्न लभ्यते ॥"
अन्यच्च।
"सर्वस्य तस्याकारज्ञा विशेषात्
रूपप्रमाणे च यथैव विद्वान्।
तद्वि यवस्थान्ति गुणागुणेषु
सर्वत्र सर्वज्ञतयो भवन्ति ॥
ब्रह्मादिजातिभेदेन शुक्तयोऽपि चतुर्विधाः।
तासु सर्वासु जातं हि मौक्तिकं स्याच्चतुर्विधम्॥
ब्राह्मणास्तु सितः स्वच्छो गुरुः शुक्लः प्रभान्वितः।
क्षत्रियः क्षत्रियः स्थूलस्तथारुणविभान्वितः॥
वैश्यस्त्वपीतवर्णोऽपि स्निग्धः श्वेतः प्रभान्वितः।
शूद्रः शुक्लवपुः स्थूलस्तथा स्थूलोऽसितद्युतिः॥
वर्णोपमानां समवर्णशोभं
त्वक्सारमध्यप्रभवं प्रदिष्टम्।
ते वैणवो द्विजनोपभोग्ये
स्यातां प्ररोहन्ति न सार्वजन्ये ॥
वंशजं शुक्तिसङ्घाग्रं कक्कोलीफलमात्रकम्।
प्राप्यते बहुभिः पुण्यैस्तद्धि वैदलमुच्यते॥
पञ्चभूतससुद्रेकाद्यंशे पञ्चविधे भवेत्।
मुक्ता पञ्चविधा तासां यथालक्षणमुच्यते ॥
पार्थिवी गुरुवत्सा च तैजसी तेजसा लघुः।
वायवी च स्नदुः स्थूला गागनी कोमला लघुः।
आप्याः स्निग्धा भृशं शुक्लाः पञ्चैताः प्रवरा
मताः।
आसां धारणमात्रेण व्याधिः कोऽपि न
जायते ॥"*॥
एवमन्यत्रापि।
"गजाहिकोलमत्स्यानां शीर्षे मुक्ताफलोद्भवः।
त्वक्सारशुक्तिशुक्लानां गर्भे मुक्ताफलोद्भवः॥
धाराधरेषु जायेत मौक्तिकं जलबिन्दुभिः।
शीर्यते शुचिरूपच्च गजे पाटलभास्वरम्॥
मत्स्ये श्वेतच्च निस्तेजः फणीन्द्रे नीलभास्वरम्।

हरिच्छ्यं तथा वंशे पीतश्वेतच्च शूकरे।
शुक्तिशुक्लुद्भवं श्वेतं सुक्तारत्नमनुत्तमम् ॥
चतुर्धा मौक्तिके च्छाया पीता च मधुरा सिता।
नीला चैव समाख्याता रत्नतत्त्वपरीक्षकैः॥
पीता लक्ष्मीप्रदा छाया मधुरा वृद्धिवर्द्धिनी।
शुक्ला यशस्करी छाया नीला सौभाग्यदायिनी॥
सिता छाया भवेद्विप्रः क्षत्रियश्चारुरश्मिवान्।
पीतच्छाया भवेद्वैश्यः शूद्रः श्यामरुचिर्मतः॥*
अथ गुणाः।
सुतारत्वं वृत्तत्वं स्वच्छत्वं निर्मलं तथा।
घनं स्निग्धत्वं सच्छायं तथा स्फुटितमेव च।
अष्टौ गुणाः समाख्याता मौक्तिकानामशेषतः॥
तद्यथा,—
तारकानुतिसङ्काशं सुतारमिति गद्यते।
सर्वतो वर्त्तुलं यच्च सुवृत्तं तन्निगद्यते॥
स्वच्छं दोषविनिर्मुक्तं निर्मलं मलवर्जितम्।
गुरुत्वं तुलने यस्य तद्घनं मौक्तिकं वरम्॥
क्लेदेनैव विलिप्तं यत्तत् स्निग्धमिति गद्यते।
छायासमन्वितं यच्च सच्छायं तन्निगद्यते॥
व्रणरेखाविहीनं यत्तत् स्यादस्फुटितं शुभम्॥
भाजिष्णु कोमलं कान्तं मनोज्ञं स्फुरतीव च।
सवतीव च सत्त्वानि तन्मुक्तारत्नसंज्ञितम्॥
श्वेतकाचसमाकारं शुभ्रासुप्रतयोजितम्।
भूभिराजप्रतिच्छायं मौक्तिकं देवभूषणम्॥"*॥
गारुडे।
त्वक्सारनागेन्द्रशिरःप्रभूतं
यच्छुद्धजं यच्च वराहजातम्।
प्रायो विमुक्तानि भवन्ति भासा
शुक्लानि माङ्गल्यतया तथापि॥
प्रमाणवर्णैरवरश्रियुक्तं
सितं सुवृत्तं समरूपरत्नम्।
अक्लेदरम्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम्॥
एवं समस्तैः गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात्।
न तस्य भर्त्तारमनर्थजात
एकोऽपि दोषः समुपैति सद्यः॥
एवं सर्वगुणोपेतं मौक्तिकं येन धार्य्यते।
तस्यायुर्वर्द्धते लक्ष्मीः सर्व्वपापं प्रणश्यति॥
गुणवद्गुरु यद्दृष्टं मौक्तिकैकं हि तिष्ठति।
चञ्चलापि स्थिरा भूत्वा कमला तत्र तिष्ठति॥"
दोषो यथा, —
"चत्वारः स्युर्महादोषाः षट्सप्तास्य प्रकीर्त्तिताः।
एवं दश समाख्यातास्तेषां वक्ष्यामि लक्षणम्॥
यच्चैकदेशे संलग्नः शुक्तिखण्डो विभाव्यते।
शुक्तिलग्नः समाख्यातः स दोषः कुष्ठकारकः॥
मौनलोक्तसङ्काशो दृश्यते मौक्तिके तु यः।
मत्स्याक्तः स तु दोषः स्यात् पुत्त्रनाशकरो ध्रुवम्॥
दीप्तिहीनं गतच्छायं जठरं तद्विदुर्बुधाः।
तस्मिन् संधारिते स्यात्तु जायते गात्र संप्लवः॥
मौक्तिकं विद्रुमच्छायमतिरक्तं विदुर्बुधाः।
दारिद्र्यजनकं ह्येतत् तस्मात्तत् परिवर्जयेत्॥

उपर्य्युपरि तिष्ठन्ति वलयो यत्र मौक्तिके।
चिट्टत्तं नाम तत्प्रोक्तं सौभाग्यत्त्वयकारकम्।
अवृत्तं मौक्तिकं यच्च चिपिटं तन्निगद्यते।
मौक्तिकं म्रियते येन तस्याकीर्त्तिर्भवेत् सदा॥
चिक्कोणं त्र्यस्रमाख्यातं सौभाग्यक्षयकारकम्।
दीर्घं यत्तत् लम्बं प्रोक्तं प्रज्ञाविध्वंसकारकम्॥
निर्भग्नमेकतो यत्र लम्बपार्श्वं तदुच्यते।
सदोषं मौक्तिकं निन्द्यं निरर्थयोगकरं हि
तत्।
अवृत्तं पिङ्कलोपेतं सर्वसम्पत्तिहारकम्॥*॥
यत्र लक्ष्मसन्देहः क्वचिद्भवति मौक्तिके।
उष्णे सलवणे क्षेत्रे निधाल्लक्षयेच्चले॥
श्रीव्हिभिर्मर्दनीयंवा शुष्कवस्त्रोपवेष्टितम्।
यत्तु नायाति वैवर्ण्यं विद्धेयं तदलक्ष्मिमम्॥*॥
तथा हि।
चिपेऽम्लोल्लभाण्डे तु लवणक्षारसंयुते।
स्वेदयेद्वह्निना वापि शुष्कवस्त्रेण वेष्टयेत्॥
दृष्टे मौक्तिकमादाय श्रीव्हिभिश्चोपघर्षयेत्।
लक्ष्मिमं भङ्गमाप्नोति सहसाचाति दीप्यते॥
ज्ञात्वा पचेत् सुपिष्टेन शुभदारभाण्डे
मुक्ताफलं निहितनूतनमुक्तिकाक्वथम्।
स्फोटन्तथा प्रविदधीत ततश्च भाण्डात्।
संस्थाप्य धान्यनिचये च तमेकमासम्॥
आदाय तत् सकलमेव ततोऽन्यभाण्डं
जम्बीरजातरसयोजनया विपक्वम्।
दृष्टं ततो मृदुतनूजनपिष्टमूलैः
कुर्य्यादृयथेच्छमिह मौक्तिकमाशु विद्वन्॥
स्निग्धमभत्यपुटमध्यगतन्तु लब्ध्वा
पश्चात् पचेत्तु ततश्च वितानपत्त्रा।
दुग्धे ततः पयसि तद्विपचेत् सुरायां
पक्वन्ततोऽपि पयसा सुचि चिक्कणेन।
शुद्धं ततो विमलवस्त्रनिघर्षणेन
स्यात् मौक्तिकं विमलसद्गुणकान्तिजालम्॥'
अथ मूल्यम्।
"पञ्चभिर्माषकैर्ज्ञेयो गुञ्जाभिर्माषकैस्तथा।
चतुर्भिः प्राणमाख्यातं मानकैर्मणिवेदिभिः॥
एकस्य शुक्तिप्रभवस्य शुद्ध-
मुक्तामणेः प्राणकसम्मितस्य।
मूल्यं सहस्राणि कपर्द्दकानि
त्रिंशत् प्रतैरभ्यधिकानि पञ्च॥
यन्माषकार्द्धेन ततो विहीनं
चतुःसहस्रं लभतेऽस्य मूल्यम्।
यन्माषकांशोन विभज्यमानं गुरुत्वे
ह्येतस्य मूल्यं परमं प्रदिष्टम्॥
अर्द्धाधिकद्वौ यदि माषकस्य मूल्यं
त्रिंशत् प्रतैरभ्यधिकं सहस्रम्।
हिमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम्॥
अर्द्धाधिकमाषकसम्मितस्य
सपञ्चविंशं चितयं शतानाम्।
यन्माषकोन्मापितमानमेकं
तस्याधिकं विंशतिभिः प्रतं स्यात्॥

गुञ्जाश्च षड्धारयतः शतं वै
मूल्यं परं तस्य वदन्ति तज्ज्ञाः ।
गुञ्जाचतस्रो विधृतं प्रतार्ह-
दृष्टं लभेताप्यधिकं विभिन्द्यात् ॥
अतः परं स्याद्धरणप्रमाणं
संख्याविनिर्देशविनिश्चयोक्तैः ।
चयोदशानां धरणी धृतानां
द्विकेति नाम प्रवदन्ति तज्ज्ञाः ॥
अर्धार्धमात्रश्च धृतं शतं स्यात्-
मूल्यं गुणेनास्य समन्वितस्य ।
यदि षोडशभिर्भवेत् सुपूर्णं
धरणं तत्प्रवदन्ति दार्विकाख्यम् ॥
अधिकं दशभिः शतस्य मूल्यं
समवाप्नोत्यपि वालिशस्य हस्तात् ।
यदि विंशतिभिर्भवेत् सुपूर्णं
धरणं मौक्तिकजं वदन्ति तज्ज्ञाः ॥
नवसप्ततिमाप्नुयात् स्वमूल्यं
यदि न स्याद्गुणयुक्तितो विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्येति परिकीर्त्यते ।
चत्वारिंशत्परं तस्य मूल्यमेव विनिश्चयः ॥
चत्वारिंशत् भवेत् शिक्या त्रिंशन्मूल्यं लभेत सा ।
पञ्चाशत्तु भवेत् सोमस्तस्य मूल्यन्तु विंशतिः ॥
षष्टिर्निकरणीयं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्नवतिश्चेति कुप्येति परिकल्प्यते ॥
एकादश स्युर्नव च तयोर्मूल्यमनुक्रमात् ।
शतमर्द्धाधिकं हेम चर्णोऽयं परिकीर्तितः ॥
सप्त पञ्च चयश्चैव तेषां मूल्यमनुक्रमात् ॥
प्राणात् परं माषकमेककमेकं
यावद्विवर्द्धेत गुणैरपीदम् ।
मूल्येन तावद्विगुणेन योग-
मासाद्य नाद्यापि हि तैरपि देवैः ॥
सूक्ष्मातिसूक्ष्मोत्तममध्यमानां
यन्मौक्तिकानामिह मूल्यसूत्रम् ।
तन्नातिमात्रेण न जातु कार्यं
गुणैरहीनस्य हि तत् प्रदिष्टम् ॥
यत्तु चन्द्रांशुसङ्काशमौषद्विम्बफलाकृति ।
स्वमूल्यात् सप्तमं भागमर्हत्तत्वाल्लभेत तत् ॥
पीतस्य भवेदर्द्धमर्हत्तस्य विभागतः ।
विषमच्छत्रजातीनां षड्भागं मूल्यमादिशेत् ॥
अर्द्धरूपाणि यत्स्फोटात् पङ्कपूर्णानि यानि च ।
असाराणि च यानि स्युः करकाकारवन्ति च ॥
एकदेशप्रभावन्ति सकलार्घेषितानि च ।
यानि चातकवर्णानि कांस्यवर्णानि यानि च ॥
मीननेत्रसवर्णानि यन्थिभिः संहतानि च ।
सदोषाणि च यानि स्युस्तेषां मूल्यं पदांशिकम् ॥
अन्यच्च तु ।
सच्चाली प्रोच्यते गुञ्जा सा तिस्रो रूपकं भवेत् ।
रूपकैर्दशभिः प्रोक्तः कलञ्जो नाम नामतः ॥
कलञ्जनामकं द्रव्यमेकदेशे निधापयेत् ।
अन्यतो जलबिन्दूंस्तु शोषणार्थं विनिःक्षिपेत् ॥
चत्वारि त्रीणि युग्मं वा तथैकं बहु वा स्थितम् ।
समं कलञ्जमानेन तुलामानादतः क्रमात् ॥
नवमात् पञ्चमं यावत् कलञ्जेन समं यदा ।
तत्क्रमादुत्तमं त्रैयं मौक्तिकं रत्नवेदिभिः ॥
चतुर्द्धात् समारभ्य दशसंख्याविधिं क्रमात् ।
कलञ्जस्य समानं वा मौक्तिकं मध्यमं विदुः ॥
आरभ्य विंशतितमात् क्रमात् पञ्चदशावधि ।
लङ्घयित्वा कथिता मुक्ता मूल्यञ्च तद्गुणक्रमात् ॥
कलञ्जहृदयमानेन यत्तोकं मौक्तिकं भवेत् ।
न धार्यं नरनाथेस्तु देवयोग्यममानुषम् ॥
इत्थं विचार्य्य यो मुक्तां परिधत्ते नराधिपः ।
तस्यायुष्यं यशो वीर्य्यं विपरीतमतोऽन्यथा ॥"
इति युक्तिकल्पतरुः ॥
(अथास्याः शोधनम् ।
"स्नेहदोलिकायन्त्रे जयन्त्याः स्वरसेन च ।
मणिमुक्ताप्रवालानि यामैकं शोधनं भवेत् ॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे ॥) अन्यत् मुक्ताफलशब्दे द्रष्टव्यम् ॥*॥ अथ मुक्ताधारणविधिः ।
"रविवह्निधनिष्ठासु हस्तादिषु च पञ्चसु ।
शुक्लविद्रुममुक्तानां परिधानं प्रशस्यते ॥"
इति समयप्रदीपः ॥

मुक्ताकलापः, पुं, (मुक्तानां कलापः समूहोऽत्र ।) मुक्ताहारः । यथा,—
"हारो मुक्तानां प्रालम्बमुक्ताकलापावलीलसाः ।"
इति हेमचन्द्रः । ३ । ३२२ ॥
(यथा, कुमारसम्भवे । १ । ४२ ।
"कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निष्कलस्य
अन्योन्यशोभाजननाद्बभूव
साधारणो भूषणभूष्यभावः ॥")

मुक्तागारं, क्ली, (मुक्तायाः आगारमिव । मुक्तोत्पादनाधारत्वादस्य तथात्वम् ।) शुक्तिः । इति शब्दचन्द्रिका ॥ मौक्तिकगृहञ्च ॥

मुक्तापुष्पः, पुं, (मुक्ता इव पुष्पाण्यस्य ।) कुन्दवृक्षः । इति राजनिर्घण्टः ॥ (गुणादिविवृतिरस्य कुन्दशब्दे द्रष्टव्या ॥)

मुक्ताप्रसूः, स्त्री, (मुक्तां प्रकर्षेण सूते जनयतीति प्र + सू + क्विप् ।) शुक्तिः । इति राजनिर्घण्टः ॥

मुक्ताप्रालम्बः, पुं, (मुक्तानां प्रालम्बः हारभेदः ।) मुक्ताहारः । इति हेमचन्द्रः । ३ । ३२२ ॥

मुक्ताफलं, क्ली, (मुक्ताफलमिव ।) कर्पूरम् । (मुक्तेव फलमिव ।) मौक्तिकम् । (यथा, सुश्रुतसंहितायां कल्पस्थाने । ३ । दुर्गादासधृतम् ।
"मुक्ताफलाय करिणं हरिणं फलाय
सिंहं निहन्ति भुजविक्रमसञ्चयाय ॥")
लवलीफलम् । इति मेदिनी । ले, १६६ ॥
(मौक्तिकार्थोऽस्य पर्य्यायः ।
"मौक्तिकं शौक्तिकं मुक्ता तथा मुक्ताफलञ्च तत् ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
यथास्य भस्मकरणविधिः ।

"मुक्ताफलानि शुद्धानि खल्वे क्षिप्ता पुटेऽनघ ।
एवं भस्मत्वमाप्नोति———— ॥"
इति वैद्यकरत्नसारसंग्रहे जारणमारणाधिकारे ॥) वोपदेवस्तस्यान्यविशेषः । यथा,—
"मुक्ताफलेन यत्नेन वज्रागारसमुक्तिना ।
भक्तिस्नात्मनुना सुधमार्कक्षीरपिष्टुमिश्रया ॥
विद्रुद्भनेत्रपिष्टेन भिषक्शिग्रुवल्गुना ।
वैमात्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥"
इति तस्य चतुर्थोपान्त्यश्लोकद्वयम् ॥
अथ मुक्ताफल परीक्षा ।
"द्विपेन्द्रजीमूतवराङ्गशुक्ल-
मत्स्यास्थिसुक्त्युद्भवभेदजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषाञ्च मुक्ताद्भवमेव भूरि ॥
तत्रैव चैकस्य हि मूलमाप्या
निर्दिश्यते रत्नपरस्य जातु ।
वेध्यन्तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ॥
त्वक्सारगोमेदनिभप्रकाशं
यत् शुक्लवर्णं यच्च वराङ्गजातम् ।
प्रायो विमुक्तानि भवन्ति भासा
शुक्लानि माङ्गल्यतया तथापि ॥
या मौक्तिकानामिह जातयोऽष्टौ
प्रकीर्त्तिता रत्नविनिश्चयज्ञैः ।
कम्बूद्भवं तैष्वधमं वदन्ति
सुप्रसूयते यच्च गजेन्द्रकुम्भात् ॥
स्वयोनिमध्यच्छवितुल्यवर्णं
प्राहुः बुधाः कोलफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दापीतवर्णं प्रभया विहीनम् ॥
ये कम्बवः प्राहसुखावमर्ष-
पीतस्य शुक्लपवरस्य गोत्रे
मतङ्गजाचापि विशुद्धवंशजा-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥
पाटीनपृष्ठस्य समानवर्णं
मौनात् सुवृत्तं लघुनातिसूक्ष्मम् ।
उत्पद्यते वारिचरानने तु
मत्स्याच्च ते मध्यचराः पयोधेः ॥
वराहदंष्ट्राप्रभवं प्रदिष्टं
तस्यैव दंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित् कथञ्चित् स भवः प्रदेशे
प्रजायते शूकरवद्विशिष्टः ॥
वर्षोपलानां समवर्णशोभं-
त्वक्सारपत्वप्रभवम्प्रदिष्टम् ।
ते वैणवो द्विपजनोपभोग्ये
स्थाने परोहन्ति न सार्वजन्ये ॥
भौजङ्गमं भीमविशुद्धवृत्तं
संस्थानतोऽत्युज्ज्वलवर्णशोभम् ।
सितान्नधौतप्रविकल्प्यमान-
निष्पिण्डधारासमवर्णकान्ति ॥
प्राप्येति रत्नानि महाप्रभाणि
राज्यं श्रियं वा महतीं दुरापाम् ।

मुक्ताफ

पार्श्वं हि नापुण्यवतो भवन्ति
मुक्तामयस्याद्रिशिरोभवस्य ॥
जिज्ञासया रत्नधनं विधिज्ञै:
शुभे मुहूर्ते प्रयते: प्रयत्नात् ।
रत्नाधिधानं शुभदक्षिणाय
कन्यां पितरिक्षं क्रियते यदा तत् ॥
तदा महाद्युन्नभिमन्त्रयोवै-
र्विद्युल्लतापिङ्गलितान्तराले: ।
पयोधराक्रान्तिविलम्बलम्बै-
र्घनैर्घनैर्नो म्रियतेऽम्बरीषम् ॥
न तं मुजङ्गा न च जातुधाना
न व्याधयो वाप्युपसर्गदोषा: ।
हिंसन्ति यस्याद्रिशिर:सभस्थं
मुक्तामयं तिष्ठति पूज्यमानम् ॥
नाम्नेति मेघप्रभवं धरित्रीं
विभ्रद्गतं तद्विबुधा हरन्ति ।
अर्घै:प्रभातारुणदिग्विभाग-
मादित्यवद्द:खविभाग्यविघ्नम् ॥
तेजस्तिरस्कृत्य घृताग्निकङ्क-
नक्षत्रतारामभवं समग्रम् ।
दिवा यथा दीपिकरं तथैव
तमोऽवगाढास्वपि तन्निशासु ॥
विचित्ररत्नद्युतिसारतोय-
चतु:समुद्राभरणोपपन्ना ।
जनस्य न वा स्यादिति निश्चयो मे
मुक्ता मही तस्य सुवर्णपूर्णा ॥
हीनोऽपि यस्तत्प्रभवं कदाचिद्
विपाकयोगाज्जनत: शुभस्य ।
सपत्नहीनां च महीं समग्रां
भुनक्ति तस्तिष्ठति यावदेव ॥
न केवलं तच्छुभलक्षणस्य
भाग्यै: प्रजानामपि तस्य जन्म ।
यद्योजनानां परित: सहस्रं
सर्वाजनर्घान् विमुखीकरोति ॥
नक्षत्रमालेव दिवो विभूतीर्या
इन्द्रावली तस्य महासुरस्य ।
विचित्रवर्णेषु विभुद्रवर्णा
पय:सु पद्मै: पयसां पपात ॥
सम्पूर्णचन्द्रांशुकलापकान्ते-
र्मौक्तिप्रवेकस्य महागुणस्य ।
तच्छुक्तिमप्सु स्थितमाप्तयोज-
मासन्न पुराण्यम्भवानि यानि ॥
यस्मिन् प्रदेशेऽम्बुनिधौ पपात
सुधाद्य मुक्तामणिरत्नबीजम् ।
तस्मिन् पयस्योयधरावकीर्णं
शुक्तौ स्थितं मौक्तिकतामवाप ॥
सैंहलिकपारलौकिकसौरा-
ष्ट्रिकताम्रपर्णपारसवा: ।
कौवेरपाक्याहटक-
हैमका इत्याकराख्यौ ॥
मुक्तामुद्भवं नातिनिकृष्टवर्णं
प्रमाणसंस्थानगुणप्रभाभि: ।

मुक्ताफ

उत्पद्यते यद्गजपारलौक-
पातालजौकान्तरसिंहलेषु ।
चित्वा न तस्याकरजा विशेषा
रूपे प्रमाणे च यतेत विद्वान् ।
न च व्यवस्थास्ति गुणागुणेषु
सर्वत्र सर्वाजनयो वसन्ति ।
एकस्य मुक्तिप्रभवस्य मुक्ता-
फलस्य ग्राह्येण वसुञ्जिनस्य ।
मूल्यं सहस्राणि तु रूपकाणां
त्रिभि: शतैरभ्यधिकानि पञ्च ॥
यच्चापकार्षेण ततो विहीनं
तत्पञ्चभागद्वयहीनमूल्यम् ।
यच्चापकार्षोन् विभ्रयात् सहस्रे
द्वे तस्य मूल्यं परमं प्रदिष्टम् ॥
अर्द्धाधिकौ द्वौ सहसोऽस्य मूल्यं
त्रिभि: शतैरभ्यधिकं सहस्रम् ।
द्विमाषकोन्मापितगौरवस्य
शतानि चाष्टौ कथितानि मूल्यम् ॥
अर्द्धाधिकं माषकसुञ्जितस्य
सप्तर्षिविंशत्रितयं शतानाम् ।
गुञ्जास्तु षड् धारयत: शते द्वे
मूल्यं परं तस्य वदन्ति तज्ज्ञा: ॥
अर्धार्द्धसुञ्जापलतं प्रमं स्यात्
मूल्यं गुणैस्तस्य समन्वितस्य ।
यदि षोडशभिर्भवेदूनं
धरणं तत्प्रवदन्ति दार्विकाख्यम् ॥
अधिकं दशभि: शतैस्तु मूल्यं
समवाप्नोत्यपि वाजिशस्य दक्षात् ।
द्विगुणैर्दशभिर्भवेदूनं
धरणं तद्वावकं वदन्ति तज्ज्ञा: ॥
नवसप्ततिमाप्नुयात् सहस्रं
यदि न स्याद्गुणसम्पदा विहीनम् ॥
त्रिंशता धरणं पूर्णं शिक्यं तत्रेति कीर्त्यते ॥
चत्वारिंशद्भवेत्तस्या: परं मूल्यं विनिश्चय: ।
चत्वारिंशद्भवेच्छिक्थो विंशं मूल्यं लभेत सा ॥
षष्टिर्निकरणीयं स्यात्तस्य मूल्यं चतुर्दश ।
अशीतिर्नलिनीयं तु कुप्यैति परिकीर्त्यते ॥
एकादश स्यात्तव च तयोर्मूल्यमनुक्रमात् ॥
आदाय तत् सकलमेव ततोऽम्बभाजं
जम्बीरजातरसयोजनया विपक्वम् ।
दृष्टं ततो मृदुतनूकृतपिच्छमूलै:
कुर्यादृयथेष्टमनुमौक्तिकमासु विद्वम् ॥
लक्षिप्तमल्पपुटमध्यगतन्तु कृत्वा
प्रक्षात् पचेत्तु तसच्च वितानपक्वा ।
दुग्धे तत: पयसि तं विपचेत् सुधार्यां
पक्वं ततोऽपि पयसा मुचि चिक्कणेन ॥
मृद्वं ततो विमलवस्त्रनिघर्षणेन
स्याद्मौक्तिकं विपुलसद्गुणकान्तियुक्तम् ।
आह्रिर्जगाद जगतां हि महाप्रभाव-
श्चित्तो विदग्धहितततत्परया दयालु: ॥
चेतकाचसमं तारं हेमांशुग्रथितयोजितम् ।
रत्नमध्ये प्रधार्येत मौक्तिकं देहभूषणम् ॥

मुक्ति:

एवं हि सिंहले देशे कुर्वन्ति कृपणा जना: ।
यस्मिन् क्षत्रियसञ्ज्ञेऽब्ज: क्षत्रियत्वमि मौक्तिके ॥
उक्ते सलवणे क्षेत्रे निशां सद्मावयेच्चले ।
श्रीहिभिर्मर्दनीयं वा मुञ्जवल्लीपवेष्टितम् ॥
यत्तु नायाति वैवर्ण्यं विज्ञेयं तत्क्षत्रियम् ॥
स्निग्धं प्रमाणवत् स्निग्धं गुरु स्वच्छं सुनिर्व्रणम् ।
तेजोऽधिकं सहत्तच्च मौक्तिकं गुणवत् स्मृतम् ॥
प्रमाणवद्गौरवरश्मियुक्तं
स्निग्धं सुवृत्तं समसञ्चयोधम् ।
अक्लेतुरप्यावहति प्रमोदं
यन्मौक्तिकं तद्गुणवत् प्रदिष्टम् ॥
एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगसुपागतं स्यात् ।
न तस्य भर्तारमनर्घजातं
एकोऽपि कश्चित् वसुपैति दोष: ॥"

इति गारुडे ६८ अध्याय: ॥

मुक्तामुक्त:, त्रि, (मुक्तश्च असुक्तश्चेति विशेषयोर्द्वन्द्वम् ।) स्निग्धाक्षिप्त: । अस्य प्रयोगो अक्षे शब्दे च प्रायो वर्त्तते । इति हलायुध: ॥

मुक्तालता, स्त्री, (मुक्ताभिर्लतेव ।) मुक्ताहार: । इति हेमचन्द्र: । ३ । ३२२ ॥

मुक्तावली, स्त्री, (मुक्तानां आवल्यश्च) मुक्ताहार: । इत्यमर: । २।६।१०५ ॥ (मुक्तानामावली ।) मौक्तिकश्रेणी च ॥ (तालविशेष: । यथा, सङ्गीतदामोदरे ।

"ध्रुवयं धविरामान्तं गौ पुन: ध्रुवयं तथा ।
ध्रुतौग: ध्रुयुगं गच्छ यत्र मुक्तावली तु सा ॥")

मुक्तास्फोट:, पुं, (मुक्तानां स्फोट: विकाशोऽत्र ।) मुक्ति: । इत्यमर: । १ । १० । २३ ॥

मुक्तास्फोटा, स्त्री, (मुक्तास्फोट + टाप् ।) मुक्ति: । इति राजनिर्घण्ट: ॥

मुक्ति:, स्त्री, (मुच् + भावे क्तिन् ।) आत्यन्तिकदु:खनिवृत्ति: । इति नैयायिका: ॥ नित्यसुखावाप्ति: । इति वैदान्तिका: । शरीरेन्द्रियाभ्यां आत्मनो मुक्तत्वं मुक्ति: । इति भरत: । मोक्ष: । तत्पर्य्यायाः । कैवल्यम् २ निर्व्वाणम् ३ श्रेय: ४ नि:श्रेयसम् ५ अमृतम् ६ मोक्ष: ७ अपवर्ग: ८ । इत्यमर: । १।५।६ ॥ अपुनर्भव: ९ क्षिति: १० अच्युतम् ११ । इति जटाधर: ॥ सा पञ्चविधा । सार्ष्टि:१ सालोक्यम् २ सारूप्यम् ३ सायुज्यम् ४ निर्व्वाणम् ५ । यथा,—

"सार्ष्टिसारूप्यसालोक्यसामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जना: ॥"

इति श्रीभागवतम् ॥

"मुक्तिस्तु विविधा साध्वि! शृणुष्वा सर्वसम्मता ।
निर्व्वाणपददात्री च हरिभक्तिप्रदा कृपाम् ॥
हरिभक्तिस्वरूपाच्च मुक्तिं वाञ्छन्ति वैष्णवा: ।
अन्ये निर्व्वाणरूपाच्च मुक्तिमिच्छन्ति साधव: ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २२ अध्याय: ॥*॥

मुक्तिकरयोगो यथा,—

"वक्ष्ये साङ्गमहायोगं मुक्तिमुक्तिकरं परम् ।
सर्वपापप्रशमनं भक्त्यानुपतितं ध्रुवम् ॥

मुक्तिः

ममेति मूलं दुःखस्य न ममेति च निर्वृतेः ।
दत्तात्रेयो हृज्जकांय ममाह महामतिः ॥
अहमित्यङ्कुरोत्पन्नौ ममेति स्कन्धवान् महान् ।
महदेवोपशाखश्च पुत्रदारादिपल्लवः ॥
धनधान्यमहापत्रोऽनेककामैर्हि वर्द्धितः ।
पुण्यापुण्यसपुष्पश्च सुखदुःखमहाफलः ।
विधिवत् सुखमाप्तार्थं जातोऽज्ञानमहातरुः ॥
संसाराध्वपरिश्रान्ता येऽत्र च्छायां समाश्रिताः ।
भ्रान्तिज्ञानसुखासीनास्तेषामात्यन्तिकं कुतः ॥
येषु सत्सङ्गपाषाणनिघृतेन महातरुः ।
छिन्नो विद्याकुठारेण ते गता लयमीश्वरे ॥
प्राप्य ब्रह्मरसं पीत्वा नीरजस्कमकण्टकम् ।
प्राप्नुवन्ति परां प्राप्तां ज्ञाननिर्वृत्तिमेव च ॥
मूर्तेन्द्रियमयं मूलं मत्वं राजा मनाप्यहम् ।
न मन्मात्रादिकं वाप्ता नैवान्तःकरणात्मधा ॥
कं वा पश्यसि राजेन्द्र ! प्रधानमिदमावयोः ।
ऋते परेऽहि चैतन्यं संज्ञानोऽयं गुणात्मकः ॥
ममको दुःखमाप्नोर्थं जातो मत्स्योऽस्मया यथा ।
एकत्वेऽपि पृथग्भावस्तथा चैवात्मनो नृप ! ॥
ज्ञानपूर्वाभियोगोऽनिच्छानेन सह योगिनः ।
सा मुक्तिर्ब्रह्मणा चैवमनेकं पुत्र ! ते गुणैः ।
तदृग्दृश्यं यत्र वसतिस्तद्धोऽयं येन जीवति ॥"

इति गारुडे २३० अध्यायः ॥*॥

अपि च ।

"हरिरात्मा न सन्देहो यदा तत्र ममत्वायत ।
तदा मुक्तः स संसारी विष्णोरत्वात्मतां व्रजेत् ।
नान्यथा मुच्यते जन्तुर्भ्रमन् वै घटियन्त्रवत् ॥
पूर्वकर्म्मनिबद्धोऽपि सर्व्वयोनिषु नित्यशः ।
कूटस्थः प्रभुतां याति ज्ञानविवर्जितः ॥
कुर्व्वन्नहं ममेतीदमेव दुःखाय कल्पते ।
मन्त्रतोऽहं यथा कार्य्यं लिप्यते वै त्वनीश्वरः ॥
क्षीराधानादिभिर्यद्वद्भाण्डं तद्रक्षणात्मकैः ।
चक्रकान्तमणिर्यद्वद् गृह्णीते लोपचान् गुणान् ।
सुखं दुःखं तथा क्षेमं संसरन् नृनमीश्वरः ॥
स्वप्ने यः पुरुषो नित्यमटते कर्म्मबन्धनात् ।
मन्यमानः सुखं दुःखं सोऽप्येव विप्र ! सुप्यते ॥
जागर्म्युक्ते न सृष्टिः स्यादसुप्ते वर्द्धते सदा ।
तस्माज्जागरणार्थं विद्वान् ज्ञानं नाधिकमेव च ॥
यत्र तत्र स्थितो ज्ञानी परमात्मरतिर्यदा ।
विषयान्तरसक्तो वा याति देहे मृते हरिम् ॥
न तस्य प्रतिबन्धोऽस्ति यद्यनीहोऽपि लीलया ।
कुरुते गृह्णते नैव पद्मपत्रमिवाम्भसा ॥
यथा दुर्दिनसंघातं मेघवृन्दैर्वलस्थितम् ।
तद्विच्छिन्नं मलावस्थो ज्ञानी विषयसंस्थितः ॥
सर्व्वावस्थोऽपि सुप्तेन भावयुक्तः परे पदे ।
जीवन्मुक्तः स मुक्तः स्याद्विद्याविरहितस्तु यः ॥
कर्त्ता हर्त्ता च भोक्ता च सर्व्वज्ञः सर्व्वगो हरिः ।
एकं स्वच्छन्दलीलस्य मुक्तिरित्यभिधीयते ॥
जीवमुक्तिमजानन्तो मूर्च्छितास्तत्त्वविर्जिताः ।
विषसुधा इवाभान्ति मूढास्तैस्तत्त्वविर्जिताः ॥

मुक्तिदं

निर्गुणः स तु विज्ञेयः सुखदुःखमतीतवान् ।
जीवनाग्नौ भवेद्यत्र तत् सुखं निष्प्रयोजनम् ॥
स्वप्निबुद्धस्वप्नोच्चस्वप्नोच्चस्तु भवेद्वृथा ।
निद्रन्ति काष्ठवद्ये च संविन्निपरिवर्जिताः ॥
ते च मायोदरे जीवा जडान्धबधिरोपमाः ।
आकाशवद्भवेदात्मा विदेहो निष्प्रचेतनः ॥
अलं स्वप्नेन मोक्षेण चेतनारहितेन च ।
वरमेव च संसारी विषयासक्तचेतनः ॥
सुखस्थानन्तरं दुःखं दुःखस्थानन्तरं सुखम् ।
भुञ्जन्नात्मा उभौ पार्श्वौ संसारे संव्यवस्थितः ॥
द्वैतं हि परं ज्ञानं वेदादीनामगोचरः ।
सुखस्य च फलं भुङ्क्ते स्वर्गे चेह द्विजोत्तम ! ॥
यत्र वासः परे स्थाने सुखदुःखविवर्जितः ।
केवलं जीवनाग्नेरयं प्रोक्तज्ञानमजानता ॥
चेतनारहितो ज्ञानमाकाशस्योऽप्यचेतनः ।
स्वप्नविबुद्धदृक्षोष्टादिग्विलापकृकुथवत् ॥
अथ आत्मा नरो यद्वत् सुप्तप्रः सुखमश्नुते ।
बोध्यमानः सचेतापि सुखाद्धोढुं न मन्यते ॥*॥
केयं मुक्तिरिदं मोक्षः सुखमत्यन्तकेवलम् ।
तदहं संप्रवक्ष्यामि शृणुष्व गदतो मम ॥
दुःखानाभागमो नास्ति यत्र सौख्यं निरन्तरम् ।
विद्यते तत् परं दृष्ट्वा योऽप्यानन्दसुखी भवेत् ॥
ब्रह्मज्ञानप्रविलाप्त स्वच्छन्दात्मबलान्विताः ।
न तेषां पुनरावृत्तिर्यान्ति विष्णुलयं बुधाः ॥
अस्ति देवो हरिः शान्तः कारणोपायवर्जितः ।
तं ज्ञात्वा तु भवेन्मुक्तिर्निर्म्मला कायवोगिनः ॥
ब्रह्मा विष्णुश्च रुद्रश्च चन्द्रसूर्य्यादयः सुराः ।
न विमुक्तिं शरीरस्य यान्ति मुक्तिर्न विद्यते ॥
तस्मादाराधनीयोऽपि संयमेन्द्रियगोचरः ।
विष्णुर्मायापतिर्यो वै यदीच्छेन्मुक्तिमात्मनः ॥
नान्यच्च विद्यातपसो नान्यच्चेन्द्रियनिग्रहात् ।
नान्यत्र सर्व्वसंत्यागात् मोक्षं विन्दन्ति मानवः ॥
तस्माद्धर्म्मसुखो भूत्वा संयम्यात्मानमात्मना ।
धर्म्मं कुर्य्यादिहायेन धर्म्मोत्मा सुखमेधते ॥
धर्म्मादवाप्यते देहो दारा: पुत्रा धनं तथा ।
धर्म्मात् स्वर्गश्च मोक्षश्च यदन्यदपि दुर्लभम् ॥
ऋषयो देवगन्धर्वाः स्वधर्म्ममनुगामिनः ।
स्वर्गं तिष्ठन्ति विप्रर्षे ! ततो यान्त्यपि सद्गतिम् ॥
धर्म्ममर्थञ्च कामञ्च मोक्षञ्च ऋषिसत्तम ! ।
समाप्नोति नरो नित्यं नारायणपरायणः ॥"

इति वह्निपुराणम् ॥

(निरुक्तिर्यथा, सांख्यतत्त्वम् । ६ । २० ।

"मुक्तिरन्तरायध्वंसेन परः ।"

यथाच, अष्टावक्रसंहितायाम् । १ । २ ।

"मुक्तिमिच्छसि रे तात ! विषयान् विषवत्त्यज ।
क्षमार्ज्जवदयातोषसत्यं पीयूषवद्भज ॥")

मुक्तिदं, क्ली, (मुक्तिं ददातीति । मुक्ति + दा + कः ।) भगवन्नामविशेषः । यथा,—

"अन्त्याक्षरञ्च वक्त्रं महासारञ्च मुक्तिदम् ।
नानासिद्धिप्रदातारं परं चिन्तागुरुक्रमम् ॥
गुह्यात् गुह्यतरं चान्यन्नाम चाष्टाक्षरं परम् ।
मन्त्रं सुखसमृद्धार्थमग्र्यार्थप्रसाधकम् ॥

मुखं

प्राह नारायणायेति नमोऽन्तार्थो नियोगतः ।
ओमित्येकाक्षरे मन्त्रे स्थितः सर्व्वगतो हरिः ।
माधवायेति वै नाम धर्म्मकामार्थमोक्षदम् ॥"

इति वह्निपुराणम् ॥

मुक्तिदातरि, त्रि ॥ (यथा, देवीभागवते १ । २ । २० ।

"सां धात्रा सगुणां मायां मुक्तिदां निर्गुणां तथा ॥")

मुक्तिमण्डपः, पुं, (मुक्तिदायकः मण्डपः । यद्वा मुक्तेर्मण्डपः ।) विश्वेश्वरस्य दक्षिणपार्श्वस्थमण्डपः । यथा,—

"निमेषमात्रं स्थिरचित्तवृत्ता-
स्तिष्ठन्ति ये दक्षिणमण्डपे च ।
अनन्यभावा अपि गाढभावा
न ते पुनर्गर्भदृशामुपासते ॥"

इति काशीखण्डम् ॥

श्रीजगन्नाथमन्दिरदक्षिणपार्श्वस्थमण्डपश्च ॥

मुक्तिमुक्तः पुं. (मुक्त्या मोचनेन मुक्तः हीनः ।) शिवकम् । इति रत्नमाला ॥

मुखं, क्ली, (खनति विदारयति अन्नादिकमनेन खन्यते विधात्रा सुखमनेनेति वेति । खन् + "खित्-खनेर्मुट् चोदात्तः ।" उणा० । ५ । २० । इति करणे अच् । स च खित् मुडागमश्च ।) शरीरावयवविशेषः । स तु सुखविवरम् ॥ (निरुक्तिर्यथा,—

'प्रजाहुजा यतः खातं तस्मादाहुर्मुखं बुधाः ।'

इत्यमरटीकायां भरतः ।)

कवयस्तु तदुपलक्षिते समुदाये प्रयुञ्जते । इति भरतः ॥ तत्तु गर्भस्थस्य पञ्चमासैर्भवति । इति सुश्रुतः ॥ तत्पर्य्यायः । वक्त्रम् २ आस्यम् ३ वदनम् ४ तुण्डम् ५ आननम् ६ लपनम् ७ । इत्यमरः । २ । ६ । ८६ ॥ (यथा, नैषधचरिते ८ । ७४ ।

"सुखं विसृज्य श्वसितस्य धारया
दृशैव नासापथधावनश्रमः ।")

तस्य स्वरूपं यथा,—

'ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं समाङ्गं मुखमुच्यते ॥'

इति भावप्रकाशः ॥

रतिक्रियायां स्त्रीमुखस्य चुम्बनात् स्वबालकमुखस्य च चुम्बने शुद्धत्वं यथा,—

"मातृका सन्ततं धारा मार्ज्जारो ब्रह्मविन्दवः ।
स्त्रीमुखं बालकमुखं न दुष्टं मनुरब्रवीत् ॥"

इति कर्म्मलोचनम् ॥ * ॥

निःसरणम् । इत्यमरः । २ । ३ । १६ ॥ तत्तु गृहस्य निष्क्रमणप्रवेशनत्वात् । इति सर्व्वधराश्रयः । गृहादेर्द्वारप्रवेशः । इति स्वामी । हट्टमण्डपादेः प्रवेशनिर्गमः । इति कोकटः । गृहाङ्गणादिनिःसरणपथः । इति रमानाथः । इत्यमरटीकायां भरतः ॥ प्रारम्भः ॥ (यथा, रघुवंशे । ३ । १ ।

"अथोपनिन्ये भरतेन भक्तिमान्
सखीजनोद्वीक्षणकौतुकी सुतः ।

सुखदू

निदानमिच्छाकुकुलस्य चक्रतेः
सुदक्षिणा दौर्हृदलक्षणं दधौ ॥"
"कौसुद्याः सुखं प्रारम्भम् ।" इति तट्टीकायां मल्लिनाथः ।) उपायः ॥ सन्धिविशेषः ॥ (यथा, दशरूपके । १ । २६ ।
"सुखं बीजसमुत्पत्तिर्नानार्थरसभावना ।
अङ्गानि द्वादशैतस्य बीजारम्भसमन्वयात् ॥")
नाटकादेः प्रारम्भः । इति मेदिनी । खे, ४ ॥ आद्यम् ॥ (यथा, रामायणे । २ । ५० । ७ ।
"अचक्षुर्विषयं प्रायाद् यथार्कः सप्तदासखे ॥")
प्रधानम् ॥ (यथा, महाभारते । २ । ३८ । २७—२९ ।
"राजा सुखं मनुष्याणां नदीनां सागरो सुखम् ।
नक्षत्राणां सुखं चन्द्र आदित्यस्तेजसां सुखम् ॥
पर्व्वतानां सुखं मेरुर्गरुडः पतनां सुखम् ।
सदेवकेषु लोकेषु भगवान् केशवो सुखम् ॥")
शब्दः । नाटकः । वेदः । इति शब्दरत्नावली ॥ (द्वारम् । यथा, रघुवंशे । ६ । ७८ ।
"शिरोभिर्यावदुद्यद्भिरीक्षितुं पार्थिवैः पुरम् ।
नदीमुखेनेव समुद्रमाविशत् ॥"
"नद्या सुखं द्वारम् । सुखन्तु वदने सुस्यारम्भे द्वाराभ्युपाययोरिति यादवः ।" इति तट्टीकायां मल्लिनाथः ॥ अग्रभागः । यथा, हठयोगप्रदीपिकायाम् । ३ । ५ ।
"तस्मात् सर्व्वप्रयत्नेन प्रबोधयितुमीश्वरीम् ।
ब्रह्मद्वारमुखे सुप्तां मुद्राभ्यासं समाचरेत् ॥")
सुखः, पुं, क्लीवः । यथा,—
'लकुचो लिकुचो वृक्षः खगवल्को मुखो डहुः ।'
इति शब्दचन्द्रिका ॥
सुखगन्धकः, पुं, (सुखे गन्धः यस्मात् । कप् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
सुखघण्टा, स्त्री, (सुखे घण्टेव शब्दसाधुत्वात् ।) कुलकुलीध्वनिः । इति त्रिकाण्डशेषः ॥
सुखचीरी, स्त्री, (सुखस्य चीरं वस्त्रविशेष इव । सुखचीर + स्वार्थे ङीष् ।) जिह्वा । इति शब्दमाला ॥
सुखज, पुं, (सुखात् जायते इति । जन् + डः ।) ब्राह्मणः । इति पुराणम् ॥ वक्तव्यातं त्रि ॥
सुखतीर्थं, त्रि, (सुखस्य इति । सुख + तसिल् । सुखतः । ततः "सुखपार्श्वाभ्यां तसन्ताभ्यां तीर्थप्रत्ययौ वक्तव्यौ ।" ४।३।६०। इत्यस्य वार्त्तिकोक्त्या ईय्यः । "सुखपार्श्वतसोर्लोपश्च ।" ४।२।१३८। इत्यत्र काशिकोक्तेश्च टिलोपः ।) सुखसम्बन्धि । इति सिद्धान्तकौमुदी ॥
सुखदूषणः, पुं, (सुखं दूष्यते अनेनेति । दुष् + णिच् + करणे ल्युट् ।) पलाण्डुः । इति राजनिर्घण्टः ॥
सुखदूषिका, स्त्री, (सुखं दूषयति विवर्णं करोतीति । दुष् + णिच् + ण्वुल् टाप् अत इत्वञ्च ।) सुखजातक्षुद्ररोगविशेषः । वयसूफोड़ा इति भाषा । तल्लक्षणमाह ।
"श्लेष्मलीकगण्डकप्रख्याः कण्डमारुतपित्तजाः ।

सुखय

जायन्ते पिड़का युनां श्वेयास्ता सुखदूषिकाः ॥"
प्रख्याः सदृशाः । इता युनामेव सुखे भवन्ति स्वभावात् ॥ * ॥ अथ नखिकिलासा ।
"अङ्गुलस्य चतुर्थांशो सुखे लेपः कनिष्ठकः ।
मध्यमस्तु विभागः स्यादुत्तमोऽङ्गुलो भवेत् ॥
क्षितिकाजोऽपि तस्योक्तो यावत् कक्षो न मुञ्चति ।
मुक्तस्तु गुणहीनः स्यात्तथा दूषयति त्वचम् ॥"
सुखलेपमाह ।
"लोध्रधान्यवचालेपप्रलाक्षाग्र्यपिड़कापहः ।
सहदारोचनायुक्तं मरिचं सुखलेपनम् ॥
सिद्धार्थकवचालोध्रैः सैन्धवेन च प्रलेपनम् ।
वमनञ्च निहन्त्याशु पिड़कां यौवनोद्भवाम् ॥
केवलाः पयसा पिष्टास्तीक्ष्णाः प्राक्तक्षि-
कण्टकाः ।
आलिप्तं त्र्याहमेतेन भवेत् पद्मोपमं सुखम् ॥"
इति भावप्रकाशः ॥
सुखधावनं, क्लीवं, (सुखस्य धावनं । धावृञ् अवे ल्युट् + ल्युट् ।) आस्यप्रक्षालनम् । मुखधोया इति भाषा । यथा, भावप्रकाशे ।
"पटोलनिम्बजम्ब्वाम्रमालतीवनपल्लवैः ।
पक्वपल्लवजः श्रेष्ठः कषायो सुखधावने ॥"
सुखधौता, स्त्री, (सुखं धौतं माक्षितमनेनेति । धाव् + कर्म्मणि + क्तः स्त्रियां टाप् ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका ॥
सुखनिवासिनी, स्त्री, (सुखे निवसति या सा । नि + वस् + णिनिः स्त्रियां ङीप् । वाणीरूपत्वादस्यास्तथात्वम् ।) सरस्वती । इति केचित् ॥
सुखनिरीक्षकः, पुं, (सुखं निरीक्षते इति । निर् + ईक्ष् + ण्वुल् । उदयोगं विहायान्यसुखापेक्षित्वेनावस्थानादस्य तथात्वम् ।) आलसः । इति शब्दरत्नावली ॥
सुखपूरणं, क्लीवं, (सुखं पूर्य्यते अनेनेति । पूर् + करणे ल्युट् ।) गण्डूषः । इति वैद्यकम् ॥
सुखप्रियः, पुं, (सुखस्य प्रियः ।) नारङ्गः । इति भावप्रकाशः ॥ वक्त्ररोचके, त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"सुखप्रियः स्थिरमदो विद्वेषी चानिलनाशकः ।")
सुखभूषणं, क्लीवं, (सुखं भूषयति रक्तिश्चालङ्करोतीति । भूष् + णिच् + ल्युः ।) ताम्बूलम् । इति वैद्यकम् ॥
सुखमञ्जनकः, पुं, (सुखं मण्डयति भूषयतीति । मण्ड् + ल्युः स्वार्थे कन् ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ आस्यभूषके, त्रि । (सुखमञ्जनमप्यत्र ॥)
सुखमोदः, पुं, (सुखस्य मोदः हर्षः अस्मात् ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥
सुखयन्त्रणं, क्लीवं, (सुखं अभ्यर्थीनां यन्त्र्यते सङ्कोच्यते येनेति यन्त्रि सङ्कोचने + करणे ल्युट् ।) कविका । यथा,—
"कवौ खलीनं कविका कवियं सुखयन्त्रणम् ।"
इति हेमचन्द्रः । ४ । ३१६ ॥

सुखरो

सुखरः, त्रि, (सुखं अस्यास्तीति । सुख + उपसृष्टिमुष्कमधो रः ।" ५ । २ । १०७ । इत्यत्र "रप्रकरणे खसुखकुक्षेश्च उपसंख्यानम् ।" इति काशिकोक्त्या सर्व्वस्मिन् वक्तव्ये रः । "निष्टितं सुखमस्यास्तीति रः ।" इत्यमरटीका ।) अप्रियवादी । तत्पर्य्यायः । दुर्मुखः २ अवद्यमुखः ३ । इत्यमरः । ३ । १ । ३६ ॥ (यथा,—
"एका भार्य्या प्रकृतिसुखरा चञ्चला च
द्वितीया ।"
इत्युद्भटः ॥
ध्वन्द्यायमानः । यथा, रुक्मकाटिकनाटके १ अङ्के ।
"त्वां रुचयिष्यति तु माल्यमसङ्गवोऽयं
गन्धश्च भीरु ! सुखराणि च नूपुराणि ॥"
अप्रियवादी । यथा, हितोपदेशे ।
"यदि कार्य्ये विपत्तिः स्यान् मुखरत्वञ्च
क्षम्यते ॥")
सुखरः, पुं, (सुख + रः ।) काकः । शब्दः । इति राजनिर्घण्टः ॥
सुखरोगः, पुं, (सुखस्य रोगः ।) वक्त्रामयः । (यथा, मार्कण्डेये । १५ । ३५ ।
"पङ्गुत्वं बधिरः कुष्ठी यक्ष्मणा च प्रपीड़ितः ।
सुखरोगात्तिरोगेण गुदरोगेण बाध्यते ॥")
तत्र सुखस्य स्वरूपमाह ।
"ओष्ठौ च दन्तमूलानि दन्ता जिह्वा च तालु च ।
गलो गलादि सकलं समाङ्गं सुखसञ्ज्ञितं ॥"
अथ सुखरोगाणां संख्यामाह ।
'स्यूरदाधोष्ठयोर्दन्तमूले तु दृग् षट् तथा ।
दन्तपञ्चकं रसज्ञायां पञ्च स्युर्नव तालुनि ॥
कण्ठे त्वष्टादश प्रोक्ताश्चय: सर्व्वसरा: क्षुताः ।
एवं सुखामया: सर्व्वे समषष्टिर्मता बुधैः ॥'
सुखरोगाणां निदानान्याह ।
'अनूपपिशितक्षीरदधिमाषादिसेवनात् ।
सुखमर्म्म गदान् कुर्य्युः कृद्धा दोषाः कफोत्तराः ॥'
तत्रौष्ठरोगाः ।
तेषां निदानपूर्व्विकां संख्यामाह ।
'पृथग्दोषैः समस्तैश्च रक्तजो मांसजस्तथा ।
मेदोजश्चाभिघातोत्थ एवमष्टौष्ठजा गदाः ॥'
तत्र वातिकस्य लक्षणमाह ।
'कर्कशौ परुषौ रूक्षौ स्फुटितौ तीव्रसुप्तिनौ ।
दाल्येते परिपाट्येते ओष्ठौ मारुतकोपतः ॥'
परुषौ रूक्षौ । दाल्येते विदार्य्येते । परिपाट्येते किञ्चिद्विदीर्णत्वौ क्रियेते ॥ पैत्तिकमाह ।
'पीयेते पिड़काभिस्तु सरुजाभिः समन्ततः ।
मद्यौदुम्बरपिड़कौ पीताभासौ च पित्ततः ॥'
श्लैष्मिकमाह ।
'सवर्णाभिस्तु चीयेते पिड़काभिरवेदनौ ।
बाह्यभग्नौ कफादोष्ठौ पिच्छिलौ श्वेतलौ गुरू ॥'
सान्निपातिकमाह ।
'सञ्जतु रूक्षौ सञ्जतु पीतौ सञ्जतु श्यावौ तथैव च ।
सन्निपातेन विद्येयावनेकपिड़कान्वितौ ॥'

रक्तजमाह ।
'खर्जूरफलवर्णाभिः पिड़काभिर्निपीड़ितौ ।
रक्तोपसृष्टौ रुधिरं स्रवन्तौ श्लोणितप्रभौ ॥'
मांसजमाह ।
'मांसदुष्टौ गुरू स्थूलौ मांसपिण्डवदुन्नतौ ।
जन्तवश्चात्र मूर्च्छन्ति तरस्योभयतो मुखात् ॥'
जन्तवः कृमयः । मूर्च्छन्ति वर्द्धन्ते । मुखादुभयतः मुखाग्रयोः ॥ * ॥ मेदोजमाह ।
'सर्पिर्मेदप्रतीकाशो मेदसा कण्डुरौ गुरू ।
स्वच्छस्फटिकसङ्काशमासावं स्रवतो भृशम् ॥'
अभिघातजमाह ।
'क्षतजाभौ विदीर्येते पीड़िते चाभिघातजः ।
मथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥'
मथितौ मर्दिताविव । अतएव क्षतजाभौ रुधिराभाविति सङ्गतम् ॥ * ॥ अथौष्ठरोगाणां चिकित्सा ।
'गलदन्तमूलदग्धच्छदेषु रोगाः कफास्र-
भूयिष्ठाः ।
तस्मादेतेष्वसृग्दुधिरं विस्रावयेदृष्टम् ॥
चतुर्विधेन क्षेदेन मधूच्छिष्टयुतेन च ।
वातजेऽभ्यङ्गनं कुर्यान्नाड़ीस्वेदश्च बुद्धिमान् ॥'
चतुर्विधेन क्षेदेन तैलघृतवसामज्जरूपेण ।
वेधं शिराणां वमनं विरेकं
तिक्तस्य पानं रसभोजनञ्च ।
ग्रीवाः प्रदेहाः परिषेचनञ्च
पित्तोपसृष्टेष्वधरेषु कुर्य्यात् ॥
शिरोविरेचनं धूमः क्षेदः कवल एव च ।
क्षते रक्ते प्रयोक्तव्यं ओष्ठकोपे कफात्मके ॥
मेदोजे क्षेदिते भिन्ने श्लोधिते कवलो हितः ।
प्रियङ्गु त्रिफला लोध्रं सर्ज्जौद्रं प्रतिसार-
णम् ॥'
प्रतिसारस्य विधिमाह ।
'दन्तजिह्वासुखानां यच्चूर्णकल्कावलेहनैः ।
घृतैर्घर्षणमङ्गुल्या तदुक्तं प्रतिसारणम् ॥
ओष्ठरोगेष्वशेषेषु दृष्ट्वा दोषमुपाचरेत् ।
तेषु व्रणत्वं यातेषु व्रणवत् तमुपाचरेत् ॥'
अथ दन्तवेष्टरोगाः । तत्र दन्तवेष्टरोगाणां नामानि संख्यामाह ।
'श्लीपादौ गदितः पूर्वं दन्तपुप्पुटकस्तथा ।
दन्तवेष्टः श्लैष्मिरश्च महाश्लैष्मिर एव च ॥
ततः परिदरः श्लीपस्तत्पक्वस्रुतः क्षतः ।
वैदर्भश्च ततः प्रोक्तः खलिवर्द्धन एव च ॥
अधिमांसकनामा च दन्तनाड्यश्च पञ्च च ।
दन्तविद्रधिरप्यत्र दन्तवेष्टेषु षोड़श ॥'
तत्र श्लीपादस्य लक्षणमाह ।
'श्लोणितं दन्तवेष्टेभ्यो यत्राकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सलक्षाणि उत्क्लेदीनि मृदूनि च ॥
दन्तमांसानि श्लीर्य्यन्ते पच्यन्ति च परस्परम् ।
श्लीपादो नाम स व्याधिः कफश्लोणितसम्भवः ॥'
दन्तवेष्टेभ्यः दन्तवेष्टनमांसेभ्यः । अकस्मात् अभिघातं विना श्लीर्य्यन्ते गलन्ति । पच्यन्ति च परस्परं पाकोन्मुखा मांसानि श्लोणितं पच्यन्ति श्लोणितं मांसानि पचति ॥ दन्तपुप्पुटमाह ।
'दन्तयोस्तिसु वा यत्र शोथपुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥'
दन्तवेष्टमाह ।
'स्रवन्ति पूयं रुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टश्लोणितसम्भवः ॥'
अत्र दन्तमूलानीति वाक्यपदमध्याहरणीयम् ॥
श्लैष्मिरमाह ।
'शोथपुर्दन्तमूलेषु रुजावान् कफपातजः ।
जालाक्षावी कण्डुरश्च विज्ञेयः श्लैष्मिरो गदः ॥
महाश्लैष्मिरमाह ।
'दन्तास्तलन्ति वेष्टेभ्यस्तासु चाप्यवदीर्य्यते ।
यस्मिन् स सर्व्वतो व्याधिर्महाश्लैष्मिरसंज्ञकः ॥'
तासु चाप्यवदीर्य्यते चकारात् दन्तवेष्टौ चाप्यवदीर्य्येते । परिदराच्च मारकत्वाय यत आह भोजः । महाश्लैष्मिर इत्येव परिदराच्च विशेषणम् ॥ * ॥ परिदरमाह ।
'दन्तमांसानि श्लीर्य्यन्ते यस्मिन् स्रवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥'
उपक्रममाह ।
'वेष्टेषु दाहः पाकश्च ताभ्यां दन्तास्तलन्ति हि ।
आवर्त्तिताः प्रस्रवन्ति श्लोणितं मन्दवेदनम् ॥
आघायते स्रुते रक्ते सुखं पूति च जायते ।
यस्मिन्नुपक्रमः स स्यात् पित्तरक्तसमुद्भवः ॥'
आवर्त्तिताः दृष्टाः ॥ * ॥ वैदर्भमाह ।
'दुष्टेषु दन्तमूलेषु संरम्भो जायते महान् ।
चलन्ति च रुजायस्मिन् स वैदर्भोऽभिघातजः ॥'
संरम्भः शोथः । चलन्ति चेति चकाराद्दन्तादाहपाकाः ॥ * ॥ खलिवर्द्धनमाह ।
'मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ संजाते तक्र प्रणाश्यति ॥'
सञ्जाते दन्ते ॥ * ॥ अधिमांसकमाह ।
स्थानेषु पञ्चमे दन्ते महान् श्लोथो महारुजः ।
जालाक्षावी कफक्लेदी विज्ञेयः सोऽधिमांसकः ॥
स्थानेषु दन्तभवे पञ्चमे दन्ते ॥ * ॥ पञ्चदन्तनाड़ीराह ।
'दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।'
यथेरिता यथा नाड़ीत्रये वातपित्तकफसन्निपातानामुल्लिङ्गिताः पञ्चनाड्यः कथिताश्चतस्रोऽपीत्यर्थः ॥ * ॥ दन्तविद्रधिमाह ।
'दन्तमांसमलैः सार्द्धैर्व्याप्ताःक्षयपुर्गच्छति ।
सदाहरुक् स्रवेच्छिद्रः पूयासृं दन्तविद्रधिः ॥'
दन्तमांसमलैः दन्तवेष्टगतदोषैः । सार्द्धैः सरक्तैस्त्रिभिः ॥ * ॥ अथ दन्तवेष्टरोगाणां चिकित्सा ।
'श्लीपादे स्रुतरक्ते तु लोध्रे नागरसर्षपान् ।
निष्काथ्य त्रिफलाक्वाथे कुर्य्यात्कवलधारणम् ॥
'काश्मीरलोध्रलाक्षाम्रशिलाजप्रियङ्गुतेजाह्वाः ।
एषां चूर्णं मधुयुक् श्लीपादे पूतिमांसहरम् ॥'
तेजाह्वा तेजवल्कल इति लोके ।
'तैलं घृतं वा वातघ्नं श्लीपादे संप्रयुज्यते ।'* ।
'दन्तपुप्पुटके कार्य्यं तरुणे रक्तमोक्षणम् ॥
सपल्लवत्वक्ः क्षारः सर्ज्जौद्रः प्रतिसारणम् ।
शिरोविरेचनञ्च हितो नस्यं जिघ्रेच्च भोजनम् ॥
विस्राविते दन्तवेष्टे व्रणवत् प्रतिसारयेत् ।
लोध्रपत्रत्वमधुकलाक्षाचूर्णैर्मधुप्लुतैः ॥'
प्रतिसारयेत् अङ्गुल्या घर्षयेत् । घृतङ्गं घोषकं इति लोके ।
'गण्डूषे क्षीरिणो योज्याः सर्ज्जौदुम्बरतुण्डेरकाः ।
चलदन्तस्थैर्यकरं कार्यं वकुलचर्म्मजम् ॥
भद्रमुस्ताभयाखदिरकङ्कारिष्टयष्टयैः ।
गोमूत्रपिष्टैर्वर्त्तिका छायाशुष्का प्रकल्पयेत् ॥
तां निधाय मुखे श्लोथमूलदन्तातुरो नरः ।
ततःपरतरं किञ्चिच्चलदन्तस्य भेषजम् ॥'
भद्रमुस्तादिवर्त्तिका ।
'तुला घृतं गोजसङ्घाचरस्य
श्लोणाम्बसा संभवेदृग्यथावत् ।
ततश्चतुर्भागरसेन तेजं
पचेच्छनैरर्द्धपलप्रमाणैः ॥
कल्कैरनन्तासदिरारिमेद-
जङ्घाव्ययष्टीमधुकोत्पलानाम् ।
तत्तैलमाश्चैव घृतं सुखेन
स्थैर्य्यं दिजानां विदधाति सद्यः ॥'
गोजसङ्घाचरः गोजपुष्पकटरैया । अनन्ता दुरालभा नदलाभे सवासो ग्राह्यः । अरिमेदो दृग्गन्धखदिरः । जङ्घाचरात्तैलम् ॥ * ॥
'श्लैष्मिरे घृतरक्ते तु लोध्रसत्सारसाञ्जनैः ।
सर्ज्जौद्रैः प्रस्थते लेपो गण्डूषे क्षीरिणो हिताः ॥
क्रियां परिदरे कुर्य्याच्छीतादोक्तां विचक्षणः ।
संशोध्योभयतः कार्यं शिरश्चोपक्रमेत् तथा ॥
काकोदुम्बरिकापत्रैर्व्रणं विस्रावयेद्भिषक् ।
लवणैः क्षौद्रयुक्तैश्च सर्ज्जौद्रैः परिसारयेत् ॥*॥
'गण्डूषेणोत्तरे वै दर्भे दन्तमूलानि श्लोधयेत् ।
ततः क्षारं प्रयुञ्जीत क्रियाः सर्व्वाश्च श्लीपजाः ॥
उद्धृत्याधिकदन्तन्तु ततोऽभिमवचारयेत् ।
छिन्नदन्तवदाचार विधिः कार्य्यो विजानता ॥'
इयं खलिवर्द्धनस्य चिकित्सा ॥ * ॥
'छित्त्वाधिमांसं सर्ज्जौद्रैरेतैश्चूर्णैरुपाचरेत् ।
वचातेजोवतीपाठाखर्ज्जिकायावशूकजैः ॥'
तेजोवती तेजवल्कलं खर्ज्जौवल्लीति च ।
'सौवर्चलतृतीयाभिर्व्रणे चाम्ल क्षीरिणः ।
पटोलनिम्बत्रिफलाकषायक्षार धावने ॥'*॥
'नाड़ीव्रणहरं कर्म्म दन्तनाड़ीषु कारयेत् ।
यद्दन्तमध्ये जायेत नाड़ीदन्तं तदुद्धरेत् ॥
छित्त्वा मांसानि शस्त्रेण यदि नोपरितो भवेत् ।
उद्धृत्य च दहेच्चापि क्षारेण ज्वलनेन वा ॥
भिनत्त्युपरिचिते दन्ते हनूकास्थिगतं ध्रुवम् ।
सन्मूलं दग्धमं तस्मादुद्धरेद्दग्धमस्थि च ॥
उद्धृते तूत्तरे दन्ते श्लोणितं प्रस्रवेदति ।
रक्ताभिषेकात् पूर्व्वोक्ता घोरा रोगा भवन्ति हि ॥
काणः संजायते जन्तुरर्हितं तस्य जायते ।
चलमप्युत्तरं दन्तमतो नैवोद्धरेद् भिषक् ॥
धावनं जातिमदनस्वादुकण्टकखादिरैः ।"
कषायैरिति शेषः ।
कषायैर्जातिमदनकटुकी-स्वादुकण्टकैः ।



शब्दकल्पद्रुमः।

अर्थात्

एतद्ग्रन्थस्य समस्तकोषाग्नेयग्रन्थस्य सङ्कलितानां कारादिवर्णक्रमविन्यस्तशब्द-तन्निरूप-नानार्थ-पर्य्याय-प्रमाण-प्रयोग-धातु-तदनुबन्धाभिधेय-घटित-तत्तच्छब्दप्रसङ्गोत्थित-वेद-वेदाङ्ग-वेदान्त-न्याय-पुराणेतिहास-सङ्गीत-शिल्प-सुपकारशास्त्र-ज्योतिष-तन्नाख्यान-काव्यालङ्कार-च्छन्दःप्रभृति-नाम-लक्षणोदाहरण-द्रव्यगुण-रोगनिदानौषध-सायुर्वेद्यवस्त्वादिसंयुक्त-सर्व्वदर्शनमतानुसारि-संकलनाभिधानग्रन्थः।

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः।

याज्ञिकमतानुसारि-प्रत्येकशब्दव्युत्पत्ति-मूलग्रन्थादिविरचितबङ्गलशब्दार्थ-प्रमाण-प्रयोग-पर्य्याय-धातुपदोदाहरणादिभिः
मूलसङ्कलितबङ्गलशब्द-तदर्थ-तत्प्रमाण-प्रयोगादिसहित-
सुप्रशस्तपरिशिष्टेन च सार्द्धम्

श्रीवरदाप्रसादवसुना तदनुजेन श्रीहरिचरणवसुना च

अग्नेयग्रन्थविशारदकोविदवृन्दसाहाय्येन संपरिवर्द्धितः। नागराक्षरैः प्रकाशितश्च।

तृतीयः काण्डः।

यज्ञनवर्णः। प—म।

कलिकाता-राजधान्यां

रामनारायण-यन्त्रे मुद्रितः। ७१ नं० पाथुरियाघाट-ष्ट्रीट्-स्थितभवनात् प्रकाशितश्च। शकाब्दाः १८१३

PRINTED BY K. P. BASU, RAMNARAYAN PRESS; AND CONSIDERABLY IMPROVED, CAREFULLY REVISED AND PUBLISHED BY HARADA PRASAD BASU, AND HARI CHARAN BASU. 71, PATHURIAGHATA STREET. CALCUTTA:

To be had at the Sabdakalpadruma Office, No. 71. Pathuriaghata Street, Calcutta: and at the Baptist Mission Press. No. 24. Lower Circular Road, Calcutta: Price for Subscribers in India, Re. 1. and Countries out of India 3s. for each number.

All rights reserved.

'मञ्जिष्ठालोध्रखदिरपद्माकैश्चापि यत् कृतम्।
तैलं तत्त्वाधितं तच्च हन्यात् दन्तगतां गतिम्॥'
आम्रादिचतुष्टयस्य कषायेण मञ्जिष्ठादिचतुष्टयस्य च कषायेण तैलमिदं पचेत्। जातिः चमेली इति लोके। तस्याः पत्रं ग्राह्यम्। मदनो धुस्तूरस्तस्यापि पत्रमत्र ग्राह्यम्। कण्टकी दुरालभाटः तस्या मूलं ग्राह्यम्। स्वादुकण्टकोगोक्षुरः तस्य पञ्चाङ्गं ग्राह्यम्। आम्रादितैलम्॥ * ॥

'विद्ध्युक्तं विधिं युक्तं विद्ध्याद्दन्तविद्रधौ।
शस्त्रकर्म नरस्तत्र कुशलेनैव कारयेत्॥' * ॥

अथ दन्तरोगाः। तत्र रोगाणां नामानि संख्यामाह।

'दालनः कथितः पूर्वं क्रमिदन्तक एव च।
प्रोक्तो भञ्जनको दन्तहर्षो वै दन्तशर्करा॥
कपालिकाच कथिता ग्लावदन्तक एव च।
करालसंज्ञ इत्येते दन्तरोगाः प्रकीर्तिताः॥'

तत्र दालनस्य लक्षणमाह।

'दीर्यमाणेव्विव दता यत्र दन्तेषु जायते।
दालनो नाम स व्याधिः सहागतिनिमित्तजः॥'

क्रमिदन्तकमाह।

'क्षणाच्छिद्रबलस्रावी ससंरम्भो महारुजः।
अनिमित्तरुजः क्षयघटनादिनिमित्तं विनैव महारुजावान्॥ * ॥ भञ्जनकमाह।

'यद्भं यद्भं भवेद्यत्र दन्तभङ्गश्च जायते।
कफवातहतो व्याधिः स भञ्जनकसंज्ञकः॥'

दन्तहर्षमाह।

'घृतस्कन्धप्रवातान्धस्पर्शानामसहा द्विजाः।
यत्र स्युर्वातपित्ताभ्यां दन्तहर्षः स कीर्तितः॥'

दन्तशर्करामाह।

'मलो दन्तगतो यस्तु कफश्चानिलमूर्छितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥'

शर्करा सिकता॥ * ॥ कपालिकामाह।

'कपालेष्विव दीर्यन्तु दन्तेषु समलेषु च।
कपालिकेति विज्ञेया दन्तच्छित् दन्तशर्करा॥'

कपालानि खण्डघटादिघटकानि तैष्विव। समलेषु दन्तेषु मलसहितदन्तावयवेषु दीर्यन्तु या दन्तशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दन्तच्छित् दन्तनाशिनी॥ *॥

ग्लावदन्तकमाह।

'योऽल्पश्लिष्मेण पित्तेन दग्धो दन्तस्त्रवेद्यतः।
ग्लायतां नीलतां वापि गतः स ग्लावदन्तकः॥'

दग्धः दग्ध इव॥ * ॥ करालमाह।

'अग्नेः अग्नेः प्रजायते यत्र दन्ताश्रितोऽनिलः।
करालान् विकटान् दन्तान् स करालो न संशयति॥'

करालान् भयानकान्। अयं सुश्रुतेनोक्तः। संग्रहकारेण गृहीतश्च॥*॥ अथ दन्तरोगाणां चिकित्सा।

'तैलं ग्राह्यादयं क्षीरं गव्यं पञ्चाग्निकं पचेत्।
अग्नेः पलमितैरेतैः क्वाथेष्वापि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥'

कट्फलस्थाने पत्तङ्ग इति च पाठः।

'दालनं दन्तचालञ्च दन्तमोक्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विद्रधिं विरसास्यताम्॥
हन्याद्दाम्नु गदानेतान् कृम्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥'

लाक्षादितैलम्॥ * ॥

'जयेत् विस्रावणैः स्निग्धमधुरं क्रमिदन्तकम्।
तथावपीड्यैर्व्रातघ्नैः क्षेपैर्गण्डधारणैः॥
भद्रदार्व्यादिवर्षाभूनिम्बैः क्षिप्तैश्च भोजनैः।
क्रमिदन्तापहं कोष्णं क्षिप्तु दन्तान्तरे स्थितम्॥
दृष्टनीभूमिकदम्बीपञ्चाङ्गुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रमिदन्तकवेदनाशमनः॥
नीली वायसजङ्घा कटुतुम्बी मूलमेकैकम्।
सक्षारं दग्धविधृतं दग्धलक्रमिघातनं प्राहुः॥
क्षेप्तानां कवला: कोष्णाः सर्षपक्षौद्रसंयुक्ता च।
निर्यूहाश्चानिलग्लानां दन्तहर्षप्रमर्दनाः॥'

क्षौद्रसंयुक्त सर्षपः क्षौद्रसंयुक्त सर्षपः कवल इत्यर्थः।

'क्षौद्रिकोऽत्र हितो धूमो नस्यं क्षौद्रिकमेव च।
पेया रसा यवान्नञ्च क्षीरमज्यानिकाहृतम्॥
शिरोविरिक्तिहितश्चापि क्रमो यश्चानिलापहः।'

अत्र दन्तहर्षे।

'अच्छिद्रं दन्तमूलानि शर्करामुद्धरेद् भिषक्।
लाक्षाचूर्णैर्मधुयुतैस्तत्तां प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका ह्यच्छुतमा तत्राप्येषा क्रिया हिता॥'

अत्र दन्तशर्करायाम्। इयं क्रिया दन्तहर्षक्रिया॥ *॥

'फलान्यम्लानि घृताक्तं रूक्षान्नं दन्तघावनम्।
तथामिषकठिनं भक्ष्यं दन्तरोगी विवर्जयेत्॥'

अथ जिह्वारोगाः।

तत्र जिह्वारोगाणां निदाननामसंख्याः प्राह।

'वातजः पित्तजश्चापि कफजोऽलासंज्ञकः।
उपजिह्विका च गदा जिह्वायां पञ्च कीर्तिताः॥'

तत्र वातजस्य लक्षणमाह।

'जिह्वानिलेन स्फुटिता प्रसुप्ता
भवेच्च शाकच्छदनप्रकाशा।'

स्फुटिता मलाग्विहीना। प्रसुप्ता रसाज्ञभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजो द्रुमस्तद्वत् कण्टकाचिता॥ *॥ पित्तजमाह।

'पित्तात् सदाहैरुपचीयते च
दीर्घैः सरक्तैरपि कण्टकैश्च॥'

अयं रोगो लोके जली इति ख्यातः॥ * ॥ कफजमाह।

'कफेन गुर्वी बहला चिता च
मांसोच्छ्रयैः श्लाक्ष्णसिताग्रकण्टकैः।'

बहलाः स्थूलाः मांसोच्छ्रयैः मांसजकण्टकैः॥

'जिह्वातले यः सुषिरः प्रगाढः
सोऽलासंज्ञः कफरक्तमूर्त्तिः।
जिह्वां स तु स्तब्धयति प्रवृद्धो
मूले च जिह्वा भृशमेति पाकम्॥'

प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरत्यन्त बोद्धव्यः। भृशपाकेन पित्तञ्च। अतस्त्रिदोषोऽयमसाध्यलक्षणः॥*॥

उपजिह्विकामाह।

'जिह्वाग्ररूपश्चयवुर्हि जिह्वा-
मुत्तान्य जातः कफपित्तयोनिः।
प्रसेककण्डूपरिदाहयुक्तः
प्रकथ्यतेऽसावुपजिह्विकेति॥'

जिह्वाग्ररूपो जिह्वाग्रजातिः॥ * ॥ अथ जिह्वारोगाणां चिकित्सा।

'जिह्वागतविकाराणां ग्रस्तं ग्रोथितमोक्षणम्।
गुडूचीपिप्पलीनिम्बकवलः कटुभिः सुखः॥
ओष्ठप्रकोपेऽनिलजे यदुक्तं प्राक् चिकित्सितम्।
कण्ठजेष्वनिलोत्थेषु तत्कार्यं भिषजा खलु॥
पित्तजे परिदग्धे तु निःस्रुते दुष्टशोणिते।
प्रतिसार्यगण्डूषस्यानि मधुरं हितम्।
कण्टकेषु कफोत्थेषु जिह्वितेष्वरुजः क्षये॥
पिप्पल्यादिर्मधुयुतः कार्य्यस्तु प्रतिसारणे॥
उपजिह्वास्तु संलिख्य क्षारेण प्रतिसारयेत्।
शिरोविरेकगण्डूषधूमैश्चैनामुपाचरेत्॥
ओषधारामयावच्चूर्णमेतत् प्रघर्षणम्।
उपजिह्वाप्रशान्त्यर्थमेभिर्लेपञ्च पाचयेत्॥'

अथ तालुरोगाः। तत्र तालुरोगाणां नामानि संख्यामाह।

'गलशुण्डी तुण्डिकेरी अधुषः कच्छप एव च।
तालुर्बुदश्च कथितो मांससंघात एव च।
तालुपुप्पुटनामा च तालुशोषस्तथैवच॥
तालुपाकश्च कथितास्तालुरोगा अमी नव॥'

तत्र गलशुण्डीलक्षणमाह।

'श्लेष्मास्रगभ्यां तालुमूलात् प्रवृद्धो
दीर्घः शोथो मारुतश्लिष्मकाभ्यः।
श्वासाकासश्वासजुष्टं वदन्ति
वैद्या व्याधिं कण्ठशुण्डीति नाम्ना॥'

श्लेष्मास्रगभ्यां वातपूरितचर्म्मपुटतुल्यः॥*॥

तुण्डिकेरीमाह।

'शोथः स्थूलस्तोददाहप्रपाकी
प्रागुक्ताभ्यां तुण्डिकेरी मता तु।'

प्रागुक्ताभ्यां श्लेष्मास्रगभ्याम्। तुण्डिकेरी वनकार्पासीफलं तत्तुल्येति॥*॥ अधुषमाह।

'शोथस्तस्मा लोहितः शोणितोत्थो
ज्ञेयोऽधुषः सज्वरस्तीव्ररुक् च।'

कच्छपमाह।

'कूर्म्मोन्नतो वेदनोऽग्रीवजन्मा
रोगो ज्ञेयः कच्छपः श्लेष्मणा स्यात्।'

कूर्म्मोन्नतः मध्ये शोथं प्राप्ते गतः॥ * ॥

तालुर्बुदमाह।

'पद्माकारं तालुमध्ये तु शोथं
विद्याद्रक्तादर्बुदं पित्तलिङ्गम् ।'
पद्माकारं पद्मकर्णिकाकेसरैरिव पार्श्वतो दीर्घ-
मांसाङ्कुरैर्वेष्टितम् ॥*॥ मांससंघातमाह ।
'दुष्टं मांसं श्लेष्मणा नीरुजञ्च
ताम्रन्तस्थं मांससंघातमाह ।'
तालुपुप्पुटमाह ।
'नीरुक् स्थायी कोलमात्रः कफात्मा
मेदोयुक्तः पुप्पुटस्तालुदेशे ॥
तालुशोषमाह ।
'शोषोऽत्यर्थं दीर्यते चापि तालु
श्वासो वातात्तालुशोषोऽयमुक्तः ।'
तालुपाकमाह ।
'पित्तं कुर्यात् पाकमत्यर्थघोरं
तालुन्येनं तालुपाकं वदन्ति ॥'
अथ तालुरोगाणां चिकित्सा ।
'कुष्ठोषणवचाविन्धुकणापाठाग्निवैः सह ।
सक्षौद्रैर्भिषजा कार्यं गलशुण्डीप्रघर्षणम् ॥'
अवः कैवर्तमोथा गुडूची इति च लोके ।
'अङ्गुष्ठाङ्गुलिसन्दंशेनाक्ष्य गलशुण्डिकाम् ।
छेदयेन्मण्डलाग्रेण जिह्वोपरि तु संस्थिताम् ॥'
मण्डलाग्रेण शस्त्रविशेषेण ।
'अतिच्छेदात् स्रवेद्रक्तं ततो हेतोर्म्रियेत च ।
हीनच्छेदाच्छ्लेष्मशोथो जालाम्बावो भवेत्
तथा ॥
तस्मात् वैद्यः प्रयत्नेन दृष्टकर्मा विशारदः ।
गलशुण्डीं तु संछिद्य कुर्यात् प्राज्ञामिमां
क्रियाम् ॥
पिप्पलीविषाकुष्ठवचामरिचनागरैः ।
क्षौद्रयुक्तैः सलवणैस्तत्तां प्रतिसारयेत् ॥
वचामतिविषापाठाराजाकटुकरोहिणीः ।
निष्क्वाथ्य पिचुमर्दञ्च कवलं तत्र कारयेत् ॥
तुल्यकैर्मधुघे कूर्मे संघाते तालुपुप्पुटे ।
एष एव विधिः कार्यो विशेषः शुष्ककर्मणि ॥
तालुपाके तु कर्तव्यं विधानं पित्तनाशनम् ।
क्षेदस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥'
अथ गलरोगाः । तत्र गलरोगाणां नामानि
संख्यामाह ।
'रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च बलयोऽलासनामैकतुण्डकः ॥
ततो वृन्दः प्लुतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः प्रसरश्चैव मांसतानस्तथैव च ॥
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥'
तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्ति-
माह ।
'गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निरुन्धतश्च व्याधिरयं हि रोहिणी ॥'
अनिलः मूर्च्छितः प्रदुष्टः । पित्तकफौ च
मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः ।
ननु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अवि-
वक्षणात् ॥ * ॥ तस्य वातजाया लक्षण-
माह ।
'जिह्वासमन्तादभ्यन्नवेदनास्तु
मांसाङ्कुराः कण्ठनिरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता ॥'
समन्तात् जिह्वायाः सर्वतः । वातात्मकोपद्रव-
गाढयुक्ता स्तम्भादिभिरतिशूलेन युक्ता ॥ * ॥
पित्तजामाह ।
'शिरोरुमास्यिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ।'
श्लेष्मजामाह ।
'स्रोतोनिरोधिन्यपि मन्दपाका
गुर्वी स्थिरा सा कफसम्भवा तु ।'
स्रोतोऽत्र कण्ठस्रोतः ॥*॥ सन्निपातजामाह ।
'गम्भीरपाकित्यनिवार्यवीर्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ।'
रक्तजेतरा संहारकत्वावधिमाह ।
'सप्तद्विदोषणा हन्ति चाष्टात् कफसमुद्भवा ।
पञ्चाहात् पित्तसंभूता सप्ताहात् पवनोत्थिता ॥'
कण्ठशालूकमाह ।
'कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शुष्कनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥'
कण्टकशूकभूतः कण्टकवच्छूकवच्च वेदनाजनकः ।
अधिजिह्वमाह ।
'जिह्वाग्रूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादधजेव निम्नान् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्ययेद्रागतपाकमेनम् ॥'
अधजा निम्नादेवेत्यन्वयः ॥ * ॥ बलयमाह ।
'बलाग्र एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य ।
तं सर्वथैवाप्रतिवार्यवीर्यं
विवर्जनीयं बलयं वदन्ति ॥'
अलासमाह ।
'गले तु शोथं कुरुतः प्रदुष्टौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्मच्छिदं दुस्तरमेतदाहु-
रलाससंज्ञं भिषजो विकारम् ॥'
मर्मच्छिदं हृदयमर्मणि छेदेनेव वेदनाजनकम् ॥
एकतुन्दमाह ।
'वृत्तोन्नतोऽल्पः श्वयथुः सदाहः
सकण्डुरोऽपाकघनष्टदुर्नरश्च ।
नाम्नैकतुन्दः परिकीर्तितोऽसौ
व्याधिर्बलाग्रः जनतप्रसूतः ॥'
अल्पः गलमध्ये । अपाकी ईषत्पाकी । अनष्ट-
ईषन्नष्टः ॥ * ॥ वृन्दमाह ।

'सप्तप्लवं वृन्दममन्ददाहं
तीव्रज्वरं वृन्दसदाहरन्ति ।
तत्रापि पित्तप्लवनप्रकोपाद्-
विद्यात् सतोदं पवनात्मकन्तु ॥'
प्लुतघ्नीमाह ।
'वर्त्मघ्ना कण्ठनिरोधिनी तु
चिताप्तिमात्रं पिशितं प्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया प्लुतघ्नीसदृशी प्लुतघ्नी ॥'
घ्ना कठिना । अनेकरुक् वातपित्तकफजनोद-
दाहकण्ड्वादियुक्ता । प्लुतघ्नीसदृशी लौहकण्टक-
संज्ञा प्लुतघ्नी मन्दतरी शिला तत्तुल्या यतः
प्राणहरी ॥ * ॥ गिलायुमाह ।
'यस्त्यिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्तिः ।
संजायते सक्तमिवावसिक्तञ्च
स गृध्रसाध्यस्तु गिलायुसंज्ञः ॥'
गलविद्रधिमाह ।
'सर्वं गलं व्याप्य समुत्थितो यः
शोथो रुजः सन्ति च यत्र सर्वाः ।
स सर्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्वजस्य ॥'
गलौघमाह ।
'शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतिनिरुद्धा ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्यतेऽसौ ॥'
वायुगतिनिरुद्धा उदानवायुगतिरोधकः ॥ * ॥
स्वरघ्नमाह ।
'यस्तास्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपरुद्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥'
तास्यमानस्तम्भः पश्यन् । शुष्कविमुक्तकण्ठः
शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः ।
अस्वाधीनता शुष्कं गिलितुमशक्यत्वात् । अनि-
लायनेषु वायुवर्त्मसु श्वसनात् घातात् ॥ * ॥
मांसतानमाह ।
'प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितावलम्बो
प्राणप्रणुत् सर्वजनो विकारः ॥'
प्रतानवान् विस्तारवान् । सुकष्टः अतिशयितं
कष्टं यत्र सः ॥ * ॥
विदारीमाह ।
'सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन पीते ॥'
पार्श्वे विशेषात् स तु येन पीते स पुरुषो येन
पार्श्वेन विशेषाद्दाहयुक्तेन पीते तस्मिन् पार्श्वे सा
विदारी भवति इत्यर्थः ॥ * ॥

अथ गलरोगाणां चिकित्सा ।
'रोहिणीगान्तु साध्यानां हितं ग्रोक्षितमोक्ष-
णम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म वा ॥
वातजान्तु क्षते रक्ते लवणै: प्रतिसारयेत् ।
स्नेहोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णश: ॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभि: ।
घर्षयेत् कवलो द्राक्षापरूषै: क्षथितैर्हित: ॥
आगारधूमकटुकै: कफजां प्रतिसारयेत् ॥'
आगारधूम झुल इति लोके । कटुकानि शुण्ठी-
पिप्पलीमरिचानि ।
'श्वेतावि‌ड्वृहतीभ्यां तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवले च कफोदये ॥'
श्वेता अपराजिता ।
'पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नं वा भुञ्जीत स्निग्धमल्पश: ।
उपजिह्वकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुञ्चापि यो व्याधिस्तञ्च शुण्ठ्या साधयेत् ।
अमर्म्मस्थं सुसम्पक्वं छेदयेत् गलविद्रधिम् ॥'
अथ सामान्यानां कण्ठरोगाणां चिकित्सा ।
'कण्ठरोगेष्वसृङ्मोक्षैस्तीक्ष्णैर्नस्यादिकर्म्मभि: ।
चिकित्सकश्चिकित्सान्तु कुर्य्यालोऽत्र समाचरेत् ॥
क्वाथं दद्याच्च दार्व्यौत्वड्निम्बनार्ष्यकलिङ्गजम् ।
हरीतकीकषायो वा क्षितौ माक्षिकसंयुत: ॥
कटुकातिविषादारुपाठामुस्ताकलिङ्गका: ।
गोमूत्रक्वथिता: पीता: कण्ठरोगविनाशना: ॥
गृहीकाकटुकाक्वाथो दार्व्यौत्वक्चित्रफलाक्वथम् ।
पाठां रसाञ्जनं दारु तेजोवतीति सूचर्णितम् ॥
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम् ।
योगाश्चैते जय: प्रोक्ता वातपित्तकफापहा: ॥
यवान्नञ्च तेजवतीञ्च पाठां
रसाञ्जनं दारु निशां सलक्षाम् ।
क्षौद्रेण कुर्य्यात् गुटिकां सुखेन
तां धारयेत् सर्व्वगलामयेषु ॥'
अथ समस्तमुखरोगा: । तत्र तेषां निदानं
संख्यामाह ।
'पृथग्दोषैस्त्रयो रोगा: समस्तमुखजा:
स्मृता: ।'
तत्र वातिकस्य लक्षणमाह ।
"स्फोटै: सतोदैर्वदनं समन्ता-
द्यत्राचितं सर्व्वसर: सवातात् ॥ *॥
पैत्तिकमाह ।
'रक्तै: सदाहै: पिडकै: सपीतै-
र्यत्राचितं चापि स पित्तकोपात् ॥'*॥
श्लैष्मिकमाह ।
'अवेदनै: कण्डुयुतै: सवर्णै
र्यत्राचितं चापि स वै कफेन ।'
अवेदनै: ईषदेदनै: । यत उक्तं सुश्रुतेन ।
—— गाह ।

'ओष्ठप्रकोपे वर्ण्या: स्युर्मांसरक्तविदोषजा: ।
दन्तवेष्टेषु वर्ण्यौ तु चिलिङ्गगतिशौषिरौ ॥'
चिलिङ्गगति: चिदोषजा नाड़ी । महाशौषि-
रञ्च ।
'दन्तेषु च न सिध्यन्ति स्यादन्तनखभञ्जना: ।
जिह्वारोगेष्वालसस्तु तालुजेष्वर्व्वदस्तथा ॥
खरघ्नो बलयो वृन्दो बलाघ्न: स हि दारुण: ।
गलौघो मांसनाड्यश्च ग्रसन्ती रोहिणी गले ॥
असाध्या: कीर्त्तिता ह्येते रोगा दृष्ट्वा भवो-
त्तरा: ।
तेषु चापि क्रियां वैद्य: प्रत्याख्याय समाचरेत् ॥'
अथ समस्तमुखरोगाणां चिकित्सा ।
'वातात् सर्व्वसरं चूर्णैर्लवणै: प्रतिसारयेत् ।
तैलं वातहरै: सिद्धं हितं कवलनस्ययो: ॥*॥
पित्तात्मके सर्व्वसरे भुञ्जीतायस्य देहिन: ।
सर्व्वपित्तहर: कार्य्यो विधिर्मधुरशीतल: ॥*॥
प्रतिसारणगण्डूषधूमसंशोधनानि च ।
कफात्मके सर्व्वसरे क्रमं कुर्य्यात् कफापहम् ॥*॥
सुखपाके सिरावेध: शिरसश्च विरेचनम् ।
मधुसूक्ष्मघृतक्षौद्रै: शीतैश्च कवलग्रह: ॥१॥
जातीपत्रान्तताम्राया सदार्व्यौफलचित्रके: ।
क्वाथ: क्षौद्रयुत: शीतो गण्डूषो सुखपाकनुत् ॥२॥
कार्य्यश्च बहुधा नित्यं जातीपत्रस्य चर्व्वणम् ।
लवणोरककुष्ठेन्द्रयवचर्व्वणतस्त्वहात् ।
सुखपाकव्रणक्लेददौर्गन्ध्यमुपयान्ति ॥ ३ ॥
पटोलनिम्बजम्बाम्रमालतीनवपल्लवै: ।
पञ्चपल्लवज: श्रेष्ठ: कषायो मुखधावने ॥ ४ ॥
पञ्चपल्लवज: क्वाथस्त्रिफलासम्भवोऽथवा ।
मुखपाके प्रयोक्तव्य: सक्षौद्रो मुखधावने ॥५॥
स्वरस: क्षथितो दार्व्या घनीभूतो रसक्रिया ।
सक्षौद्रा मुखरोगाह्वदोषनाड़ीव्रणापहा ॥६॥
समक्षदोषैरपटोलसक्त-
हरीतकीनिक्तकरोहिणीभि: ।
यष्ट्याकरालद्रुमचन्दनैश्च
क्वाथं पिबेत् पाकहरं मुखस्य ॥७॥'
राजद्रुम: धनवहेरा इति लोके ।
'तिला नीलोत्पलं सर्पि: शर्करा क्षीरमेव च ।
क्षौद्राज्यदिग्धकल्कस्य गण्डूषो मुखपाकनुत् ॥८॥
आस्वादितो सकृदपि मुखगन्धं सकलमपनयति ।
त्वग्बीजपूरफलजा पवनमबाधञ्च नाशयति ॥९॥
हरिद्रां निम्बपत्राणि मधूकं नीलमुत्पलम् ।
तैलमेभिर्विपक्वं स्यं मुखपाकहरं परम् ॥१०॥
यष्टीमधुफलमेकं चित्रकनीलोत्पलस्य तैलस्य ।
प्रस्थं तद्विगुणपयोविधिना पक्वं तु नस्येन ॥
निश्चि वदनस्य स्रावं शमयति गात्रस्य दोष-
संघातम् ।
कण्ठस्वरबलमवश्यं क्रमशोऽभ्यङ्गेन जन्तूनाम् ॥११
इति मुखरोगाधिकार: । इति भावप्रकाश: ॥*॥
अपि च ।
तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम् ।
कामलाश्मरिहरं प्रोक्तं मुखरोगहरं तथा ॥१२॥
शुष्कमूलकमुण्डीनां क्षारो हिङ्गुलवागरम् ।
शुष्कं चतुर्गुणं दद्यात्तैलमेतैर्विपाचयेत् ॥
बाधिर्य्यं कर्णमूलस्य पूयस्रावञ्च कर्णयो: ।
पूरणादस्य तैलस्य क्षमय: कर्णयो: क्षिता: ॥
क्षिप्रं विनाशमायान्ति प्रणाङ्कुलतणेश्वर ! ।
क्षारतैलमिदं श्रेष्ठं सुखदन्तामयापहम् ॥१३॥"
इति गारुड़े १८८।१९८ अध्यायौ ॥
(तथाचास्य सलक्षणचिकित्सितम् ।
"मुखामये मारुतजे तु शोष-
कार्कश्यरौक्ष्याणि चलारुजश्च ।
क्षाराम्लं स्निग्धतनं सुशीतं
प्रसंसनस्यन्दननोदभेदा: ॥
क्षाराम्बरस्फोटकतालुदाहा-
धूमाधनश्वाप्यवदीर्णता च ।
पित्तात् सनक्तिर्भा विविधारुजश्च
वर्णाश्च शुक्लारुणधूम्रवर्ण्या: ॥
कण्डूर्गुरुत्वं सितविच्छवित्वं
क्लेदोऽरुचिर्जाड्यकफप्रसेकौ ।
उत्क्लेशुमन्द्यानिलता च तन्द्रा
रुजश्च मन्दा: कफवक्त्ररोगे ॥
सर्व्वाणि रूपाणि तु वक्त्ररोगे
भवन्ति यस्मिन् स तु सर्व्वज: स्यात् ।
संख्यानदूष्याकृतिनामभेदा-
श्चैते चतु:षष्टिविधा भवन्ति ॥
शुक्लाक्षतन्त्रे विहितानि तेषां
निमित्तरूपाकृतिभेषजानि ।
यथाप्रदेशन्तु चतुर्विधस्य
क्रियां प्रवक्ष्यामि सुखामयस्य ॥'
इति सुखरोग: ॥ * ॥
'शुक्लातिक्तकटुक्षौद्रकषाये: कवलग्रह: ।
धूम: प्रधमनं शुद्धिरधश्छर्द्दनलङ्घनम् ॥
भोज्यञ्च सुखरोगेषु यथास्वन्नोपबृंहणम् ।
पिप्पलीगुरुदार्व्यौत्वग् यवक्षारो रसाञ्जनम् ॥
पाठां तेजोवतीं पथ्यां समभागं सुचूर्णितम् ।
सुखरोगेषु सर्व्वेषु सक्षौद्रं तद्विधारयेत् ॥
क्षौद्रमाधवमाक्षीकै: श्रेष्ठोऽयं कवलग्रह: ।
तेजोऽह्वाभयामेलां समङ्गां कटुकां घनम् ।
पाठां ज्योतिष्मतीं लोधं दार्व्यौ कुष्ठञ्च चूर्णयेत् ।
दन्तानां धर्षणञ्चैव स्रावकण्डूरुजापहम् ॥'
'गृहधूमो यवक्षारपाठालोधं रसाञ्जनम् ।
तेजोह्वा त्रिफला लोधं चित्रकश्चेति चूर्णितम् ॥
सक्षौद्रं धारयेदेतत् गलरोगविनाशनम् ॥'
इति कालकचूर्णम् ॥*॥
मन:शिला यवक्षारो हरितालं सचैत्यकम् ।
दार्व्यौत्वक् चेति तच्चूर्णं माक्षिकेण समायुतम् ॥
मूर्च्छितं घृतमङ्केन कण्ठरोगेषु धारयेत् ।
सुखरोगेषु च श्रेष्ठं पीतकं नामकीर्त्तितम् ॥'
इति पीतकचूर्णम् ॥*॥
'कटुकातिविषापाठा दार्व्यौमुस्तकलिङ्गका: ।
गोमूत्रक्वथिता: पेया: कण्ठरोगविनाशना: ॥
स्वरस: क्वथितो दार्व्या घनीभूतोरसक्रिया ।
सक्षौद्रमुखरोगाह्वदोषनाड़ीव्रणापहा ॥
तालुशोषे लक्षणास्य सर्पिरौत्तरभक्तिकम् ॥

सुखवा

लावणं मधुरा: स्निग्धा: शीताश्चैव रसा हिता:।
सुखपाके शिराकर्म्म शिर:कायविरेचनम्।
मूत्रनेलसृतस्नौद्रश्चीरैश्च कवलग्रह:॥
सचौद्राक्षिफलापाठा ह्रद्दीकाजातिपल्लवा:।
कषायतिक्तका: शीता: काथाश्च सुखधावना:।
तुला खदिरसारस्य द्विगुणामरिमेदस:॥
प्रक्षाल्य जर्ज्जरीकृत्य चतुर्द्रोणेऽम्भस: पचेत्।
द्रोणशेषं कषायन्तं पूता भूय: पचेच्छनै:॥
ततस्तस्मिन् घनीभूते चूर्णीकृत्याश्वभागिकम्।
चन्दनं पद्मकोशीरं मञ्जिष्ठां धातकीं घनम्॥
प्रपुण्डरीकं यष्ट्याह्वत्वगेलापत्रकैरग्रम्।
जाती रसाञ्जनं मांसीं त्रिफलां लोध्रबालकम्॥
रजन्यौ पद्मिनीमेलां समङ्गां कटफलं पचाम्।
यवामगुरुपत्तङ्गैरिकाञ्जनमावपेत्॥
लवङ्गनखकक्कोलजातिकोशान् पलोन्मितान्।
कर्पूरकुङ्कुमाच्चापि पुन:शीतेऽवतारिते॥
ततस्तु गुलिका: कार्य्या: शुष्काश्चास्येन धारयेत्।
तैलक्षारेण कवलं कषायेण च साधयेत्॥
इत्यानाश्वलनभंग्नशीर्षक्षिमिरोगनुत्।
सुखपाकास्यदौर्गन्ध्यजाड्यारोचकनाशनम्॥
स्रावोपलेपपैच्छिल्यवैस्वर्य्यगलरोगनुत्।
इत्यास्यगलरोगेषु सर्व्वेषां तत्परायणम्॥"

इति खदिरादिगुटिकातैलञ्च। इति सुखरोगचिकित्सा॥ इति चरके चिकित्सास्थाने २६ अध्याय:॥)

सुखलाङ्गल:, पुं, (सुखं लाङ्गलमिव भूविदारकमस्य।) शूकर:। इति जटाधर:॥

सुखबन्धनं, क्ली, (सुखं प्रारम्भविषय: तस्य बन्धनं संग्रहोऽत्र।) ग्रन्थारम्भे तत्र वक्तव्यकथनम्। तस्य नामान्तरम्। अनुक्रमणिका। भूमिका। इति छन्दोमञ्जर्य्यां सुखबन्धनाख्यप्रथमस्तबक:। इति तद्ग्रन्थकर्त्तृगङ्गादासवैद्येन लिखितम्॥

सुखवल्लभ:, पुं, (सुखस्य वल्लभ: प्रीतिकर:।) दाड़िमवृक्ष:। इति शब्दमाला॥ सुखप्रिये, त्रि॥

सुखवाचिका, स्त्री, (सुखं वाचयति श्रोधयतीति। वच्+णिच्+ण्वुल्+स्त्रियां टाप्। अत इत्वं च।) अम्बष्ठा। इति राजनिर्घण्ट:॥

सुखवाद्यं, क्ली, (सुखेन वाद्यम्।) वक्तव्यालवाद्यम्। बाँक इति भाषा। इति त्रिकाण्डशेष:॥ सुखस्य मुखेन च वाद्यच्च। ग्रिवपूजान्ते वम् इति शब्देन गालवाद्यम्। यथा,—

"लिङ्गं निर्म्माय विधिवत् विधिवत् पूजयेच्च तम्।
षड्क्षरं जपित्वा वै सुखवाद्यं शुचिस्मिते!॥"

इति लिङ्गार्चनतन्त्रे १५ पटल:॥

अपि च।

"सुखवाद्यं समुद्यं हि कृत्वा तु परमेश्वरि!।
माङ्गल्यमन्त्रसहितं सुखवाद्यं सुदुर्ल्लभम्॥
अकाराद्यिकारान्तमनुलोमविलोमत:।
उच्चार्य्य परमेशानि! सुखवाद्यं शुचिस्मिते!॥
सबिन्दुं वर्णमुच्चार्य्य पश्चाच्चन्द्रार्द्धकं प्रिये!।
अनुलोमविलोमेन सर्व्वेण च वरानने!॥

सुखष्ठी

अनेनैव विधानेन सुखवाद्यं करोति य:।
स सिद्ध: सगण: सोऽपि सश्रिवो नात्र संशय:।
ब्रह्मक्षयोऽहं देवेशि! सुखवाद्यप्रसादत:॥
यस्मिन् काले महेशानि! असुरो बलवान् भवेत्।
तस्मिन् काले महेशानि! सुखवाद्यं करोम्यहम्॥
तत् श्रुत्वा परमेशानि! असुरा राक्षसाश्च ये।
पलायन्ते महेशानि! तत्श्रुत्वा परमेश्वरि!॥
ये नरा भुवि तिष्ठन्ति सुखवाद्यं विना प्रिये!।
स सर्व्वयातनाभोगी अन्ते कुम्भीरतां व्रजेत्॥"

इति च लिङ्गार्चनतन्त्रे ८ पटल:॥

सुखवास:, पुं, (सुखस्य वास: सौरभ्यमस्मात्।) गन्धद्रव्यम्। इति राजनिर्घण्ट:॥

सुखवासन:, पुं, (सुखं वासयतीति। वस्+णिच्+ल्यु:।) सुखसद्गन्धकारकद्रव्यम्। तत्पर्य्याय:। आमोदी २। इत्यमर:।१।५।११॥ हे सुखवासनवटिकादौ आमोदयुक्त: कर्पूरादिरामोदी इन्। सुखं वासयति सुखवासन: नन्द्यादित्वादन:। नानाद्रव्यरचित एकैकद्रव्य एव वा कर्पूरादिभिर्मुखोपयोग्यसुखवासनवटिरामोदीति सर्व्वस्वम्। शुभवासन इति पाठे शुभं मनोहरं वासनं वासो यस्य कर्पूरादे: स आमोदीत्याहुरितिसुभूति:। चौरस्वामिना तु समाकर्षादिचतुष्टयेन दृष्टगन्धादिचतुष्टयेन च पर्य्यायद्वयमाख्यातम्। ग्रब्दार्णवे तु।

"कस्तूरिकायामामोद: कर्पूरे सुखवासन:।
बकुले स्यात् परिमलश्चम्पके सुरभिस्तथा।
गन्धे द्वियोरप्येते गुणिवृत्तौ त्रिलिङ्गका॥"

इति भरत:॥

सुखविलुण्ठिका, स्त्री, (सुखेन विलुण्ठयतीति। लुण्ठ+णिच् ण्वुल्। स्त्रियां टाप्। अत इत्वं च।) छागी। इति ग्रब्दरत्नावली॥

सुखविष्ठा, स्त्री, (सुखे विष्ठा मलमस्या:।) तैलपायिका। यथा,—

"वल्गुलिका सुखविष्ठा परोष्णी तैलपायिका।"

इति हैमचन्द्र:॥

सुखशूक:, पुं, (सुखं शूकं शूर इव तीक्ष्णमस्य।) दुर्ल्लभ:। इति ग्रब्दमाला॥

सुखशुद्धि:, स्त्री, (सुखस्य शुद्धि:।) वक्तशोधनम्। यथा, आह्निकतत्त्वे।

"अभावे दन्तकाष्ठानां प्रतिषिद्धदिने तथा।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते॥"

सुखशोधनं, क्ली, (सुखस्य शोधनम्।) लवणम्। इति राजनिर्घण्ट:॥

सुखशोधन:, पुं, (सुखं शोधयत्यनेनेति। शुध्+णिच्+करणे ल्युट्।) कट्फल:। इति हैमचन्द्र:॥

सुखशोधी, [न्] पुं, (सुखं शोधयतीति। शुध्+णिच्+णिनि:।) जम्बीर:। इति राजनिर्घण्ट:॥ (गुणादयोऽस्य जम्बीरशब्दे ज्ञातव्या:॥)

सुखशीलः, त्रि, (सुखं शीलयति निरस्यति विकृतं करोतीति भाव:। शील+इगुपधत्वात् क: पृषोदरादित्वात् वस्य लत्वम्।) दुर्मुख:। इति ग्रब्दमाला॥

सुगूढ:

सुखसम्भव:, पुं, (सुखात् सम्भव उत्पत्तिरस्य।) ब्राह्मण:। इति हैमचन्द्र:। २। ७७६॥

सुखसुरं, क्ली, (सुखस्य सुरा इति "विभाषा सेनासुराच्छायाशालानिशानाम्। २।४।२५। इति षष्ठीसमासे सुराग्रब्दस्य क्लीबत्वम्।) तालसुरा। इति त्रिकाण्डशेष:। ताड़ी इति भाषा॥

सुखस्राव:, पुं, (सु भावे+घञ्। सुखात् स्राव: पतनमस्य।) लाला। इति राजनिर्घण्ट:॥

सुखाग्नि:, पुं, (सुखं सुखोऽग्नि:।) दावाग्नि:। यथा,—

"हैमकेलिर्द्वयोश्चाय ह्रदाक्ष: स्याद्दवानल:।
सुखोल्का भूतसञ्चारी सुखाग्निर्भैरवस्वर:॥"

इति ग्रब्दमाला॥

ग्रवसुखे दत्तवद्धि:। इति लोके। ग्राद्धे तु शिर:स्थाने। यथा,—

"देवाश्चाग्निसुखा: सर्व्वे गृहीत्वा तु हुताशनम्।
गृहीत्वा पाणिना चैव मन्त्रमेतदुदीरयेत्॥
ज्ञात्वा तु दुष्कृतं कर्म्म जानता वाप्यजानता।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम्॥
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतम्।
दहेयं सर्व्वगात्राणि दिव्यान् लोकान् स गच्छतु॥
एवमुक्त्वा तत: घृतं ज्ञात्वा चैव प्रदक्षिणम्।
ज्वलमानं तथा वह्निं शिर: स्थाने प्रदापयेत्॥
चातुर्व्वर्ण्येषु संस्थानमेवं भवति पुत्रिके!।"

इति शुद्धितत्त्वम्॥

सुखामय:, पुं, (सुखस्यामय:।) सुखरोग:। इति राजनिर्घण्ट:॥

सुखार्त्तक:, पुं, अर्त्तक:। इति राजनिर्घण्ट:॥

सुखाह्व: पुं, (सुखं अह्वमिवास्य।) कर्कट:। इति त्रिकाण्डशेष:॥

सुखोल्का, स्त्री, (सुखं उल्केव यस्या:।) दावानल:। इति ग्रब्दमाला॥

सुख्य:, पुं, प्रथम: कल्प:। इत्यमर:। २। ७।४०॥ यागादिषु ग्राम्नोक्त: प्रथम: कल्पो सुख्य: स्यात्। यथा, ग्रौहिभिर्यजेतेत्यादिना उक्तलक्षणत्वात् सुखमिव सुख्य: विकारसंज्ञेत्यादिना इवार्थे य:। इति तट्टीकायां भरत:॥

मुख्य:, त्रि, श्रेष्ठ:। इत्यमर:। ३। १। ५७॥ (तथास्य पर्य्याय:।

"प्रधानमुत्तमं रम्यं श्रेष्ठं सुख्यमनुत्तमम्।
वरं वरेण्यं प्रसुखं परार्द्ध्यं प्रवरञ्चथा॥"

इति वैद्यकरत्नमालायाम्॥

यथा, भागवते। ४। २५। ४६।

"सुख्यानामपुरस्ताद्धास्त्ययापणबहूदनौ॥")

सुख्यसर्ग:, पुं, (सुख्यानां सर्ग इति।) स्थावरसृष्टि:। यथा,—

"सुख्यसर्गश्चतुर्थस्तु सुख्या वै स्थावरा: स्मृता:।"

इति वराहपुराणम्॥

सुगूढ:, पुं, दारुहरिद्रा। इति भूरिप्रयोग:॥

सुग्धा

सुग्धः, त्रि, (सुह + क्तर्णरि क्तः ।) मूढः । (यथा, ऋग्वेदे । ५ । ४० । ५ ।
"अवेत्वविड् यथा सुग्धो भुवनान्यदीधयुः ॥")
सुन्दरः । इति विश्वः ॥ (यथा, मेघदूते । १७ ।
"इष्टोत्साहश्चकितचकितं सुग्धसिद्धाङ्गनाभिः ॥")

सुग्धबोधं, क्ली, (सुग्धः सुन्दरः बोधः ज्ञानं पदपदार्थानां भवत्यस्मात् । यद्वा, सुग्धान् मूढान् अल्पबुद्धीन् जनान् बोधयतीति । सुग्धबोधम् । इति दुर्गादासः । सुग्ध + बुध् + "कर्म्मण्यण् । ३ । २ । १ । इति अण् ।) बोपदेवप्रणीतव्याकरणविशेषः । यथास्याद्यश्लोकः ।
"सकृन्नं सच्चिदानन्दं प्रणिपत्य प्रवीयते ।
सुग्धबोधं व्याकरणं परोपकृतये मया ॥"

सुग्धा, स्त्री, (सुग्ध + टाप् ।) नायिकाविशेषः । (सा च नायिका स्वीयापरकीयाभेदेन द्विविधा ।) तत्र स्वीयापि त्रिविधा । सुग्धा मध्या प्रगल्भा च । तत्राङ्कुरितयौवना सुग्धा । सा च ज्ञातयौवना अज्ञातयौवना च । सैव क्रमशो लज्जाभयपराधीनरतिर्नवोढा । सैव ज्ञातप्रक्रया विश्रब्धनवोढा । अस्याश्चेष्टा क्रिया मनोहरा । कोपे मार्दवं नवविभ्रमश्री समीहा च ॥ सुग्धा यथा ।
"आश्लिष्टं किल कामदेवधनुषोपालेन काले शुभे
वस्तुं वास्तुविधिं विधास्यति तनौ तारुण्यमेणीदृशः ।
इत्या खञ्जनचातुरी सुखरुचा सौधाकरी माधुरी
वाचा किञ्च सुधासमुद्रलहरी लावण्यमामन्त्र्यते ॥"*॥

अज्ञातयौवना यथा,—
"नीरान्तीरमुपागता अवयवैः सीत्कि स्फुरन्नेत्रयोः
ओष्ठे लग्नमिदं किमुत्पलमिति ज्ञातुं करं व्यस्यति ।
ग्रैवालाङ्कुरशङ्कया घ्रुणिसखी रोमावलीं प्रोञ्छति
आत्मानञ्जीति सद्गुः सखीभिरविदितश्रोणीभरा पृच्छति ॥"

ज्ञातयौवना यथा,—
"स्वयम्भूः पद्मभूरब्जोदरे स्तनपयोधरः ।
नखेन कस्य धन्यस्य चक्रचूडो भविष्यति ॥"

नवोढ़ा यथा,—
"हस्तं धृतापि प्रयत्ने विनिवेशितापि
क्रोडे कृतापि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वक्षा
यः पारदं स्थिरयितुं क्षमते करेण ॥"

द्वितीया यथा,—
"बलान्नीता पार्श्वं सुखमनुसुखं नैव कुरुते
धुनाना सङ्गीतं क्षिपति वदनं चुम्बनविधौ ।
क्षुद्रि व्यक्तं हस्तं क्षिपति गमनारोपितमना
नवोढ़ा षोढ़ारं रमयति च वक्षामयति च ॥"

सुघुटी

"इरसङ्कलितनेत्रपालिनीवी-
नियमितबाहुलतोरुयुग्मवस्त्रम् ।
करकलितकुचस्थलं नवोढ़ा
क्षपिति समीपमुपेत्य कस्य यत्नः ॥"

इति रसमञ्जरी ॥

सुच इ क } कल्कने । एभे । ग्लावे । इति कविसुच क } कल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) द्वौ पञ्चमस्वरिणौ । इ सुच्यते । क सुचते क मोचते । इति दुर्गादासः ॥

सुच ल्ल ग्ल प ञ औ मोचे । इति कविकल्पद्रुमः ॥ (तुदा०-उभ०-सक०-बन्धनरहितीभावे अक०-अनिट् ।) मोचनत्यागः । ल असुचत् । ग्ल प ञ सुचति सुचते धनं दाता । बन्धनरहितीभावे अकर्म्मकोऽयम् । आलानाच्मुक्तो गजः कर्म्मरि क्तः । एवं पाशाच्मुक्त इत्यादौ पाशबन्धनाच्मुक्त इत्यर्थः । इति दुर्गादासः ॥

सुच क मोचे । इति कविकल्पद्रुमः ॥ (चुरा०-पर० सक०-सेट् ।) क मोचयति । मोचनत्यागः । इति दुर्गादासः ॥

सुचिरः, त्रि, (सुचति धनादिकं ददातीति । सुच् + "इषिमदिमुदिखिदिछिदिभिदिमन्दिक्षन्दितिमिमिक्षिमुक्षिसुचिभ्यः किरच् ।" उणा० १ । ५२ । इति किरच् ।) दाता । इति चिकाण्डशेषः ॥

सुचिरः, पुं, (सुच् + बाहुलकात् कुः । सुचुः कुन्द इवेति । राजदन्तादित्वात् पूर्वनिपातः ।) पुष्पवृक्षविशेषः । मेकचन्द इति हिन्दी भाषा । (यथा, राजेन्द्रकर्णपूरे । १० ।
"आनन्दं सुचुकुन्दकन्दलि ! भज स्वस्थासि वासल्लिके ! ।")

तत्पर्य्यायः । कुब्जवृक्षः २ चित्रकः ३ प्रतिविषाणुकः ४ । इति भावप्रकाशः ॥ बहुपुष्पः ५ सुदलः ६ हरिवल्लभः ७ सुपुष्पः ८ अर्घ्यार्हः ९ लक्षपत्रकः १० रक्तप्रसवः ११ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कफवातनाशित्वम् । कण्ठकारत्वम् । व्रणदोषग्रीपग्रमनत्वम् । जीर्णज्वरविनाशनत्वञ्च । इति राजनिर्घण्टः ॥ शिरःपीड़ापित्तास्रविषनाशित्वम् । इति भावप्रकाशः ॥ * ॥ मान्धातृराजपुत्रः । इति श्रीभागवतम् । ९ । ७ । ३८ ।
(यथा च देवीभागवते । ७ । १० । ४ ।
"तस्यासुतत्रयमासीन्मान्धाता ह्यौ सुतौ नृप ! ।
पुरुकुत्सं सुविख्यातं सुचुकुन्दं तथापरम् ॥")

सुचुटी, स्त्री, अङ्गुलिमोटनम् । आङ्गुलमट्काव इति भाषा । यथा,—
"सुचुटी सुकुटी चैव भवेदङ्गुलिमोटने ।"

इति शब्दरत्नावली ॥

सुट्टः । सुठा इति भाषा । यथा,—
"सन्धिक्षिताङ्गुलिः पाणिर्मुष्टिर्मुष्टु सुचुरपि ।"

सुट

सुज इ क } स्पृष्टाभ्यो: । इति कविकल्पद्रुमः ॥
सुज क } (चुरा०-पर०-मार्ज्जने सक०-अनौ अक०-सेट् ।) द्वौ पञ्चमस्वरिणौ । इ क सुञ्जयति । क मोजयति । इति दुर्गादासः ॥

सुञ्चकः, पुं, (सुञ्चिज + बुल् ।) सुञ्चकवृक्षः । इति राजनिर्घण्टः ॥

सुञ्जः, पुं, (सुञ्जन्ते स्पृज्यते अनेन । सुञ्ज + करणे अच् ।) लवणविशेषः । सुँज इति भाषा ॥ (यथा, पञ्चदश्याम् । १ । ४२ ।
"यथा सुञ्जादीधिकैवमाला युक्ता वसुद्रुमैः ।
शरीरक्षितयाद्यैरैः परं ब्रह्मैव जायते ॥")

तत्पर्य्यायः । सौञ्जीलवणाख्यः २ आञ्जनयः ३ तेजनाकयः ४ वाणीरकः ५ सुञ्जनकः ६ घ्रौरी ७ दर्भाकयः ८ दूरस्थलः ९ ढट्टलजः १० ढट्टलः ११ बकुपलः १२ रञ्जनः १३ प्रचुभङ्गः १४ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । कफपित्तजदोषनाशित्वम् । अपहरत्वासु दीप्तासु च पाचनत्वम् । भूतनाशित्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"सुञ्जो सुञ्जानको बाल्यः स्थूलदर्भः सुमेधसः ।
सुञ्जद्वयन्तु मधुरं तुवरं स्निग्धरं तथा ॥
दाहहृल्लासविसर्पास्रमदवस्त्यरुचिरोगजित् ।
दोषत्रयहरं तृष्यं मेखलासूपयुज्यते ॥"

इति भावप्रकाशः ॥

शूरः । इति रत्नमाला । उपनयनकाले सुञ्जमेखलाधारणविधेर्यथा । अथैनं माणवकमाचार्य्यस्त्रिःप्रदक्षिणं चिरतं सुञ्जमेखलां परिधापयन् मन्त्रमयं वाचयति । इति भवदेवभट्टः ॥

सुञ्जकेशी. [न्] पुं, (सुञ्जा इव केशाः यस्यस्य । इनिः ।) विष्णुः । इति त्रिकाण्डशेषः । २ । १३१ ॥

सुञ्जरं, क्ली, (सुञ्जायते प्रचाल्यते इति । सुञ्ज + बाहुलकात् अरन् ।) प्रक्षालकम् । इति शब्दमाला ॥

सुञ्जातकः, पुं, (सुञ्जं अतति तत्स्वादयं प्राप्नोतीति । अत + अच् । ततः स्वार्थे कन् ।) पुष्पप्रकभेदः । अस्य गुणाः । परं स्वादुत्वम् । वृष्यत्वम् । पित्तानिलापहत्वञ्च । इति राजवल्लभः ॥ (यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये ।
"हस्तिकर्णसुञ्जातकलाभण्यकप्रभृतीनि ।")

सुट इ मर्द्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । इ सुण्ट्यते । मर्द्दो मर्द्दनम् । इति दुर्गादासः ॥

सुट कि क्षुद्रि । इति कविकल्पद्रुमः ॥ (चुरा० पक्षे भ्वा०-सक०-सेट् ।) क्षुद्रि चूर्णीकरणे । कि मोटयति तण्डुलं स्त्रिया । यस्तु दुर्गञ्च मोटयतीति छलायुधः ॥

सुट ग्रि आक्षेपे च । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) पवर्गयोषादिः । ग्रि सुटति असुटीत् सुमोट । ककारात् क्षुद्रि च । सुटति स्त्रियां दर्पं च इति छलायुधः ।

मुण्डः

मुड ए ड प्रलायने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-प्राज्ञने सक०-सेट् ।) पवर्गद्वितीयादिः । पञ्चमस्वरी । ए मुण्डते । ड मुण्डते चौरः । इति दुर्गादासः ॥

मुड ए छिदि । मर्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरी । ए मुण्डति । छेदे एव लोमच्छेद एव । मुण्डति मुण्डं नापितः । लोमरहितं करोतीत्यर्थः । इति दुर्गादासः ॥

मुड ए ड मदे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) पवर्गद्वितीयादिः । पञ्चमस्वरी । ममभिति मज्जधातोः क्ते रूपं मज्जनमित्यर्थः । ए मुण्डते । ड मुण्डते प्रस्तरो जले । चतुर्भुजस्तु मार्ज्जन इति पठित्वा मार्ज्जनं शुद्धिरिति व्याख्याय मुण्डते जलेन गात्रं लोक इत्युदाहृतवान् । इति दुर्गादासः ॥

मुण प्र प्रतिज्ञाने । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-सेट् ।) प्र मुणति व्रतं लोकः । प्रतिजानातीत्यर्थः । मौञ्जिता । इति दुर्गादासः ॥

मुण्डं, क्ली, (मुण्ड्यते उप्यते केशा अस्मात् यद्वा, मुण्डते मज्जतीति । मुण्ड + अच् ।) शिरः । इति नपुंसकलिङ्गसंग्रहे अमरः ।२ । ५ । ३७ ॥ (यथा, मोहमुद्गरे । १५ ।

"अङ्गं गलितं पलितं मुण्डं
दन्तविहीनं यातं तुण्डम् ।
करधृतकम्पितशोभितदण्डं
तदपि न मुञ्चत्याशाभाण्डम् ॥"

उपनिषद्विशेषः । तदुक्तं यथा,—

"ईषाकेनकठप्रश्नमुण्डमाण्डुक्यतित्तिरि ।
छान्दोग्यं बृहदारण्यमेतत्तयं तथा दश ॥")

बालम् । मुण्डायसम् । इति राजनिर्घण्टः ॥

मुण्डः, पुं, (मुण्डनं मुण्डः केशापनयनं मुडि खण्डने भावे घञ् । ततः अर्शं आद्यच् इत्यमरटीकायां रायमुकुटः ।) बलिराजस्य सैनिकदैत्यविशेषः ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । २२२ । ५ ।

"एकाक्ष एकपात्मुण्डो विद्युदृक्षचतुर्भुजः ।"

शुम्भसेनापतिदैत्यभेदः । यथा, मार्कण्डेयपुराणे । ८७ । २८ ।

"हे चण्ड ! हे मुण्ड ! बलैर्बहुभिः परिवारितौ ।")

मुण्डमेवार्थवत्त्वेनाख्यस्य । अच् ।) राहुग्रहः । इति मेदिनी । डे, २२ ॥ (मुण्डं मुण्डनं जीविकात्वेनाख्यस्य । अच् ।) नापितः । इति जटाधरः ॥ (मुण्डनं स्कन्धावच्छेदे खण्डनमस्यस्य । अच् ।) स्थाणुवृक्षः । इति केचित् ॥

मुण्डः, पुं, क्ली, (मुण्ड + अच् ।) मूर्द्धा । इति मेदिनी । डे, २२ ॥

मुण्डः, त्रि, मुण्डितः । इत्यमरः । २ । ६ । ४८ ॥ दे मुण्डितमुण्डे । मुडि खण्डने भावे घञि मुण्डो मुण्डनं केशापनयनं तद्योगात् अर्शं आद्यचि मुण्डः पुमान् स्त्रियां मुण्डा । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । १ । ११६ । ८ ।

'चरन् भैक्षं मुनिर्मुण्डश्चरिष्यामि महीमिमाम् ॥')

मुण्डकं, क्ली, (मुण्डमेवेति मुण्ड + स्वार्थे कन् ।) मस्तकम् ॥ (उपनिषद्विशेषश्च ॥)

मुण्डकः, पुं, (मुण्डयतीति । मुडि + ण्वुल् ।) नापितः । इति हेमचन्द्रः । ३ । ३३० ॥

मुण्डकषायकः, पुं, (मुण्डित इव कषायः ।) कलायः । इति राजनिर्घण्टः ॥

मुण्डनं, क्ली, (मुण्ड + ल्युट् ।) केशच्छेदनम् । तत्पर्य्यायः । भद्रकरणम् २ वपनम् ३ परिवापनम् ४ क्षौरम् ५ । इति हेमचन्द्रः ।३।४८७॥ (यथा, महाभारते । १२ । २३ । ४६ ।

"भ्रातुरस्य हितं वाक्यं ब्रूयाः धर्म्मेऽनुशासतम् ! ।
दण्ड एव हि राजेन्द्र ! क्षत्रधर्म्मो न मुण्डनम् ॥")

मुण्डफलः, पुं, (मुण्डवत् फलमस्य ।) नारिकेलवृक्षः । यथा,—

"तथा मुण्डफलश्चापि विल्वामित्रप्रियोऽपि च ।"

इति शब्दरत्नावली ॥

मुण्डमालिः, पुं, (मुण्डो मुण्डित इव मालिः ।) मालिभेदः । तत्पर्य्यायः । मुण्डनकः २ निःशूकः ३ अमूककः ४ । अस्य गुणाः । विदोषनाशित्वम् । मधुराम्लत्वम् । बलप्रदत्वम् । कफिकारित्वम् । दीपनत्वम् । पथ्यत्वम् । मुखजाड्यरुजापहत्वञ्च । इति राजनिर्घण्टः ॥

मुण्डा, स्त्री, (मुण्ड + स्त्रियां टाप् ।) मुण्डीरिका । इति मेदिनी । डे, २२ ॥ मुण्डिता स्त्री । इत्यमरटीकायां भरतः ॥

मुण्डाख्या, स्त्री, (मुण्डेत्याख्यास्याः ।) महाश्रावणिका । इति राजनिर्घण्टः ॥

मुण्डायसं, क्ली, (मुण्डश्च तत् अयश्चेति । मुण्ड + अयस् + "अनोऽप्राणः सरसां जातिसंज्ञयोः ।" ५ । ४ । ८४ । इति टच् ।) लोहम् । इति राजनिर्घण्टः ॥

मुण्डितं, क्ली, (मुण्ड्यते स्म मुण्डयते इति । मुडि खण्डने + कर्म्मणि क्तः ।) लोहम् । इति राजनिर्घण्टः ॥ वापितमुण्डे, त्रि । इत्यमरः । ३ । १ । ८५ ॥

मुण्डिनिका, स्त्री, (मुण्डित + स्वार्थे कन् + स्त्रियां टाप् अत इत्वं ।) वृत्तविशेषः । मुण्डीरी इति भाषा । तत्पर्य्यायः । अलम्बुषा २ आवर्णी ३ पलङ्कषा ४ कदम्बपुष्पा ५ अवणा ६ भूतघ्नी ७ कुम्भला ८ अरुणा ९ । इति रत्नमाला ॥

मुण्डी, [न्] पुं, (मुण्डयति केशान् वपति इति । मुण्ड + णिनिः ।) नापितः । इत्यमरः । २ । १० । १० ॥ (योगाचार्य्यविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । १० । ५—६ ॥

'महाकालश्च मूली च दण्डी मुण्डी सदैव च ।'

इत्यादावारभ्य ।

अष्टाविंशतिसंख्याता योगाचार्य्या युगक्रमात् ।'

सम्यादितकेशच्छेदनः । यथा, महाभारते ।१३। १४ । ३७४ ।

"दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि ।
दण्डी मुण्डी कुशी चीरी प्रतास्त्री मेखलाजिनः ॥")

मुण्डीरिका, स्त्री, (मुण्डि + बाहुलकात् ईरच् । स्त्रियां ङीष् स्वार्थे कन् । स्त्रियां टाप् "केशाः ।" ७।४।१३ । इति पूर्व्वस्य ह्रस्वः ।) मुण्डिनिका । इति जटाधरः ॥

मुद्, स्त्री, (मोदतेऽनया इति । मुद् + क्विप् ।) दृष्टिनामौषधम् । इति राजनिर्घण्टः ॥

मुद्, [द्] स्त्री, (मोदनमिति । मुद् + भावे क्विप् ।) हर्षः । इत्यमरः । १ । ४ । २७ ॥ (यथा, रघुवंशे । ३ । २५ ।

"उवाच धात्र्या प्रथमोदितं वचो
यशौ तदीयामवलम्ब्य चाङ्गुलिम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः ॥")

मुद क संसर्गे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक० सेट् ।) क मोदयति घृतेनान्नं लोकः । इति दुर्गादासः ॥

मुद ञि ड हर्षे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक० सेट् ।) हर्षश्चित्तोत्साहः । ञि मुदितोऽस्ति ड मोदते घनौ । इति दुर्गादासः ॥

मुदा, स्त्री, (मुद् + चञर्थे कः ततष्टाप् ।) हर्षः । यथा । सुखमागन्दधुर्मुदा । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १२६ । ३० ।

"तं मन्त्रं क्रियमाणं तु मन्त्रिभिस्तेन भूभृता ।
तत्पार्श्ववर्त्तिनी कन्या शुश्रावाथ मुदावती ॥")

मुदितः, त्रि, (मुद् + क्त । यद्वा, मुदा अस्य जाता । मुदा + इतच् ।) आनन्दितः । यथा,—

"आर्त्तायै मुदिता तुष्टे प्रोषिते मलिना कृशा ।
मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता ॥"

इति मुग्धबोधव्याकरणविशेषः । तस्य लक्षणं यथा । नायिकया नायकस्य वामपार्श्वे उपविश्य वामपादं तस्योरुहयमध्ये स्थापयित्वा उभौ मिलित्वा यदवस्थानम् । इति कामशास्त्रम् ॥

मुदिता, स्त्री, (मोदते इति मुद् + सर्व्वधातुभ्य इन् संज्ञापूर्व्वकविधेरनित्यत्वात् गुणाभावः । मुदिः तस्य भावः इति तल् + टाप् ।) मुदा । हर्षः । इत्यमरटीकायां मथुरेशः ॥ (यथा, पातञ्जलसूत्रम् । १ । ३३ ।

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥")

मुदिरः, पुं, (मोदन्ते अनेन प्रजा इति । मुद् + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) मेघः । इत्यमरः ।१।३।७॥ (यथा,—गीतगोविन्दे । २ । ३ ।

"प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिर-
सुवेशम् ।")

कामुकः । इति मेदिनी । रे, २०५ । भेकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

मुद्गपर्णी

मुद्गः, पुं, (मोदते अनेन इति । मुद् + "मुदिग्रो-र्गंगौ ।" उणा० १ । १२७ । इति गक् ।) पक्षिविशेषः । तत्पर्य्यायः । जलवायसः २ । इति हैमचन्द्रः । ४ । २१८ ॥ ग्रमौधान्यभेदः । मुग इति भाषा । (यथा, मनुः । ६ । १६ ।

"क्रीहयः शालयो मुद्गास्तिलमाषास्तथा यवाः ।")

तत्पर्य्यायः । क्षुपमेहः २ वर्षाहूः ३ रक्तोत्तमः ४ सुक्तिप्रदः ५ हयानन्दः ६ सुफलः ७ वाजिभोजनः ८ । अस्य गुणाः । कषायत्वम् । मधुरत्वम् । कफपित्तास्रजित्वम् । लघुत्वम् । ग्राहित्वम् । शीतत्वम् । पाके कटुत्वम् । चक्षुष्यत्वम् । नातिवातलत्वञ्च । तदूषगुणाः । पित्तश्रमार्त्ति-ग्रमनत्वम् । लघुत्वम् । वस्त्रापहारित्वम् । अरोचकनाशित्वम् । तत्सेव्यवयुक्तस्येत् रक्त-प्रसादनत्वम् । सर्व्वरुजापहारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । रूक्षत्वम् । स्वादुत्वम् । अल्पानिलत्वम् । ज्वरघ्नत्वञ्च । इति भावप्रकाशः ॥*॥ वनमुद्गगुणाः ।

"मुकुटः शीतलो ग्राही कफपित्तज्वरापहः ॥"

तद्विशेषा यथा, राजवल्लभे ।

"प्रधाना हरितास्तत्र वन्यमुद्गास्तु मुद्गवत् ।
लघ्वमुद्गा महामुद्गा गौरा हरितपोतकाः ।
श्वेता रक्ताश्च निर्दिष्टा लघवः पूर्व्वपूर्व्ववत् ॥"

मुद्गपर्णी, स्त्री, (मुद्गस्येव पर्णान्यस्याः मुद्गपर्ण + जातौ ङीष् ।) वनमुद्गः । मुगानी इति भाषा । तत्पर्य्यायः । काकमुद्गा २ मुद्गा ३ । इत्यमरः ॥ क्षुद्रमुद्गा ४ गृध्री ५ मार्ज्जार-गन्धिका ६ वनजा ७ हरिद्रिणी ८ हृद्या ९ सुपर्णी १० कुरङ्गिका ११ कौशिका १२ वनोद्भवा १३ वनमुद्गा १४ आरण्यमुद्गा १५ धन्या १६ । कुरङ्गिकास्थाने करङ्गिका इति च पाठः । अस्या गुणाः । हिमत्वम् । कास-वातरक्तक्षयपित्तदाहज्वरनाशित्वम् । चक्षुष्य-त्वम् । शुक्रवृद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ अपि च । यथा, भावप्रकाशे ।

"मुद्गपर्णी काकपर्णी सुपर्णपर्य्यपर्णिका ।
काकमुद्गा च सा प्रोक्ता तथा मार्ज्जारगन्धिका ॥
मुद्गपर्णी हिमा रूक्षा तिक्ता स्वादुस्तु शुक्रला ।
चक्षुष्या क्षयशोथघ्नी ग्राहिणी ज्वरदाहनुत् ।
दोषत्रयहरी लघ्वी यकृत्प्लीहातिसारनुत् ॥"

मुद्गभुक्, [ज्] पुं, (मुद्गं भुंक्ते इति । भुज् + क्विप् ।) घोटकः । इति जटाधरः ॥

मुद्गभोजी, [न्] पुं, (मुद्गं भुंक्ते इति । भुज् + णिनिः ।) अश्वः । इति राजनिर्घण्टः ॥

मुद्गमोदकः, पुं, (मुद्गेन साधितो मोदकः ।) मोदक-विशेषः । मतिचुर इति भाषा । यथा,—

"मुद्गानां धूमसीं सम्यग्घोलयेन्निम्बुलाम्बुना ।
कटाहस्थघृतस्योर्द्धं झार्झरं स्थापयेत्ततः ॥
धूमसीषु द्रवीभूतां प्रक्षिपेत् झार्झरोपरि ।
पतन्ति बिन्दवस्तत्रास्तान् सुपक्वान् समुद्धरेत् ।
सितापाकेन संयोज्य कुर्य्यात् युक्तेन मोदकान् ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

मुद्गार्द्र

"लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ।
चक्षुष्यो ज्वरहृत् बल्यस्तर्पणो मुद्गमोदकः ॥"

मुद्गरं, क्ली, (मुद्गं आनन्दं गिरति विकिरतीति । गॄ + अच् ।) मल्लिकाभेदः । लोष्टादिभेदने, पुं । इति मेदिनी । रे, २०४ । (यथा, महाभारते । १ । २११ । ३ ।

"गदापट्टिशधारिण्या शूलमुद्गरहस्तया ।
प्रक्षिप्तौ सहधर्म्मिण्या महत्या सैन्यसेनया ॥")

मुद्गरः, पुं, (मुद् + गॄ + अच् ।) कर्म्मारवृक्षः । पुष्यवृक्षविशेषः । तत्पर्य्यायः । गन्धसारः २ सप्तपत्रः ३ अतिगन्धः ४ गन्धराजः ५ विट-प्रियः ६ प्रियः ७ जनेष्टः ८ दृष्टेष्टः ९ । अस्य गुणाः । मधुरत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यदायकत्वम् । मनोज्ञकारित्वम् । मधु-पानन्दकारित्वम् । पित्तप्रकोपनाग्नित्वञ्च । इति राजनिर्घण्टः ॥ * ॥ अस्त्रविशेषः । सुगुर इति भाषा । तत्पर्य्यायः । हुघणः २ घनः ३ । इत्यमरः ॥ हुघनः ४ । इति भरतः ॥ प्रघणः ५ । इति जटाधरः ॥ मुद्गरः कोरकाख्यौ । इति हैमचन्द्रः ॥ (यथा, रघौ । १२ । ७३ ।

"पादपाविद्धपरिघः ग्लानिमध्यष्टमुद्गरः ॥")

मुद्गरकः, पुं, (मुद्गरमिवेति प्रतिकृतौ कन् ।) कर्म्मारः । इति राजनिर्घण्टः । कामराङ्गा इति भाषा ॥

मुद्गल, क्ली, रोहिषतृणम् । इति राजनिर्घण्टः ॥

मुद्गलः, पुं, हर्य्यश्वराजपुत्रः । यथा,—

"मुद्गलात् पुरुजानुः तस्माच्चर्षिः ततश्च हर्य्यश्वः हर्य्यश्वान्मुद्गलस्तस्यश्चतस्रः दिव्यवीरकाम्पिल्य-संज्ञाः । पञ्चानामेतेषां विषयाणां रक्षणायालमेते मत्पुत्रा इति पित्राभिहिता इति पञ्चालाः । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (मुद्गं लातीति । ला + कः । इत्यु-णादिवृत्तौ उज्ज्वलदत्तः ।) गोत्रकारकमुनि-विशेषः । तस्य भार्य्या इन्द्रसेना । इति पुराणम् ॥ (उपनिषद्विशेषः ।)

मुद्गलः, पुं, वनमुद्गः । इति शब्दरत्नावली ॥

मुद्गलकः, पुं, (मुद्गल + स्वार्थे कन् ।) वनमुद्गः । इत्यमरः । २ । ९ । १७ ॥

मुद्गलवटः, पुं, (मुद्गलेनार्द्धः वटः ।) वटक-विशेषः । आदावड़ा इति भाषा । यथा,—

"मुद्गपिष्टीविरचितान् वटकांस्तैलपाचितान् ।
हस्तेन चूर्णयेत् सम्यक् तस्मिंश्चूर्णे विनिक्षिपेत् ॥
भृष्टं हिङ्गार्द्रकं सूक्ष्मं मरिचं जीरकं तथा ।
निम्बूरसं यवानीञ्च युक्त्या सर्व्वं विमिश्रयेत् ॥
मुद्गपिष्टीं पचेत् सम्यक् स्थालीमङ्गारकोपरि ।
तस्यास्तु गोलकं कुर्य्यात्तन्मध्ये पूरणं क्षिपेत् ॥
तैले तान् गोलकान् पक्वा क्वथितायां निम-ज्जयेत् ।
गोलकाः पाचकैः प्रोक्तास्ते मुद्गलवटा अपि ॥"

अस्य गुणाः । यथा, भावप्रकाशे ।

"मुद्गार्द्रवटकाः रुच्या लघवो बलकारकाः ।
दीपनास्तर्पणाः पथ्याश्चिरादपि प्रपूजिताः ॥"

मुद्रा

मुद्रा, स्त्री, (मोदते अनयेति । मुद् + "स्फायि-तञ्चीत्यादि ।" उणा० २ । १३ । इति रक् अतः टाप् ।) प्रत्ययकारिणी । इति त्रिकाण्ड-शेषः । नामेर मोहर इति भाषा ॥ अङ्गुलि-मुद्रा । इति शब्दरत्नावली ॥ छापेर आङ्गटी इति भाषा । स्वर्णरौप्यादिमुद्रिका च । (यथा, अभिज्ञानशाकुन्तले । २ ।

"इमां मुद्रां त्वदङ्गुली निवेशयितुं मया ।"

चिह्नम् । यथा, श्रीमद्भागवते । ३ । २४ । १७ ।

"ध्यानविज्ञानयोगेन कर्म्मलासुद्गरम् जटाः ।
हिरण्मयेन पात्रेण पद्महस्तमुपस्थितः ॥")

मोहर टाका इत्यादि भाषा । इति लोक-प्रसिद्धिः ॥*॥ पञ्चधात्वित्यन्तर्गतत्रिपितृविशेषः । छापार अक्षर इति भाषा । यथा,—

"मुद्राजिपिः शिल्पलिपिर्लिपिर्जैनिसमाभवा ।
गुह्यिकाद्युलसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्व्याप्ता धरित्री शुभदा हर ! ॥"

इति वाराहीतन्त्रम् ॥

"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥

इति खड्गमालातन्त्रम् ॥*॥

पञ्चमकारान्तर्गतभक्षद्रव्यविशेषः । यथा,—

"पृथुकाश्चक्षुला भृष्टा गोधूमचणकादयः ।
तस्य नाम भवेद्देवि ! मुद्रा मुक्तिप्रदायिनी ॥"

इति निर्व्वाणतन्त्रे ११ पटलः ॥

तस्याः शोधनं यथा,—

"ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः
दिवीव चक्षुराततम् । ॐ तद्विप्रासो विपन्यवो
जाग्वांसः समिन्धते विष्णोर्यत् परमं पदम् ।
इति मन्त्रार्च्चां शोधनम् । इति रुद्रयामलतन्त्रम् ॥
शरीरे धार्य्यभगवदायुधादिचिह्नम् । छाप इति
भाषा । यथा,—

"सतो नारायणौ मुद्रां धारयेत् प्रीतये
हरेः ।
मत्स्यकूर्म्मादिचिह्नानि चक्रादीन्यायुधानि च ॥
अथ मुद्राधारणनिषेधः स्मृतौ ।
"अङ्कितः शङ्खचक्राद्यैरुभयोर्बाहुमूलयोः ।
समर्च्चयेद्धरिं नित्यं नान्यथा पूजनं भवेत् ॥"
आदिपुराणे ।
"शङ्खचक्रोर्द्धपुण्ड्रादिरहितं ब्राह्मणाधमम् ।
गर्हयं तु समारोप्य राजा राष्ट्रात् प्रवासयेत् ॥"
गारुड़े श्रीभगवदुक्तौ ।
"सर्व्वकर्म्माधिकारञ्च शुचीनामेव चोदितः ।
शुचित्वञ्च विजानीयाच्छङ्खचक्रादियुधारणात् ॥"
इति पाद्मे चोत्तरखण्डे ।
"शङ्खचक्रादिभिश्चिह्नैर्विप्रः प्रियतमैर्हरेः ।
रहितः सर्व्वधर्म्मेभ्यः प्रच्युतो नरकं व्रजेत् ॥"
स्मृतौ च यजुःकठशाखायाम् ।
"धृतोर्द्धपुण्ड्रः शतचक्रधारी
विष्णुं परं ध्यायति यो महात्मा ।
स्मरेच्च मन्त्रेण सदा हृदि स्थितं
परात्परं यत्पुरुषो महान्तम् ॥"

अथर्वणि च ।

'एभिर्भगवतश्चक्रमस्य चिह्नै-
रङ्किता लोके सुभगा भवेम ।'

तद्विष्णोः परमं पदं ये गच्छन्ति जाग्रिताः ।
इत्यादि ॥

अतएव ब्रह्मपुराणे ।

'शङ्खायुधाङ्कितं दृष्ट्वा सम्मानं न करोति यः ।
द्वादशाब्दार्जितं पुण्यं तस्याफलायोपगच्छति ।'*॥

अथ मुद्राधारणमाहात्म्यम् ।

स्कान्दे श्रीसनत्कुमारमार्कण्डेयसंवादे ।

'यो विष्णुभक्तो विप्रेन्द्र ! शङ्खचक्रादिचिह्नितः ।
स याति विष्णुलोकं वै दाहप्रलयवर्जितम् ॥'

तत्रैवान्यत्र ।

'नारायणायुधैर्नित्यं चिह्नितं यस्य विग्रहम् ।
पापकोटिप्रयुक्तस्य तस्य किं कुरुते यमः ॥
शङ्खोद्धारे तु यत् प्रोक्तं वसतां वर्षकोटिभिः ।
तत् फलं लिखिते शङ्खे प्रत्यहं दक्षिणे भुजे ॥
यत् फलं पुष्करे नित्यं पुण्डरीकाक्षदर्शने ।
शङ्खोपरिक्षते पद्मे तत् फलं समवाप्नुयात् ॥
वामे भुजे गदा यस्य लिखिता दृश्यते कलौ ।
गदाधरो गयापुण्यं प्रत्यहं तस्य यच्छति ॥
यज्ञवाराहपुरे प्रोक्तं चक्रस्वामिसमीपतः ।
गदाधो लिखिते चक्रे तत् फलं लक्ष्मदर्शने ॥'

श्रीभगवद्गीतासु च ।

'यः पुनः कलिकाले तु मत्पुरीसम्भवां त्वदम् ।
मत्स्यकूर्म्मादिकं चिह्नं गृहीत्वा कुरुते नरः ॥
देहे तस्य प्रविष्टोऽहं जानन्तु त्रिदशोत्तमाः ।
तस्य मे नान्तरं किञ्चित् कर्त्तव्यं मेय रक्षता ।
ममावतारचिह्नानि दृश्यन्ते यस्य विग्रहे ।
मर्त्यमर्त्यो न विज्ञेयः स मे मामकी तनुः ॥
पापं सुकृतरूपन्तु जायते तस्य देहिनः ।
ममायुधानि यस्याङ्गे लिखितानि कलौ युगे ॥
उभाभ्यामपि चिह्नाभ्यां योऽङ्कितो मत्स्य-
सुद्रया ।
कूर्म्मेणापि स्वकं तेजो निक्षिप्तं तस्य विग्रहे ॥
शङ्खं च पद्मं च गदां रथाङ्गं
मत्स्यं च कूर्म्मं रचितं स्वदेहे ।
करोति नित्यं सुकृतस्य वृद्धिं
पापक्षयं जन्मशतार्जितस्य ॥'

तत्रैव श्रीब्रह्मनारदसंवादे ।

'शङ्खचक्राङ्कवक्षं दुर्भेद्यं देवदानवैः ।
अदृश्यं सर्वभूतानां शस्त्राणां रक्षसामपि ॥
लक्ष्मीः सरस्वती दुर्गा सावित्री हरवल्लभा ।
नित्यं तस्य वसेद्देहे यस्य शङ्काङ्किता तनुः ॥
गङ्गा गया कुरुक्षेत्रं प्रयागं पुष्करादि च ।
नित्यं तस्य सदा तिष्ठेद्यस्य पद्माङ्कितं वपुः ॥
यस्य कौमोदकीचिह्नं भुजे वाथ कलिप्रिय ! ।
प्रत्यहं तत्र वृद्धयो गङ्गासागरसङ्गमः ॥
सर्वे करे गदाधस्ताद्यस्याङ्गं तिष्ठते यदि ।
क्षणेन सहितं तत्र त्रैलोक्यं सचराचरम् ॥
त्रयोऽग्नयस्त्रयो देवा विष्णोस्त्रीणि पदानि च ।
निवसन्ति सदा तस्य यस्य देहे सुदर्शनम् ॥'

किञ्च ।

'शङ्खायुधाङ्किता मुद्रा यस्य नारायणी करे ।
जगल्लोकाधिकारी च स श्रेयश्चिदर्थां पतिः ॥
शङ्खमुद्राप्रयुक्तस्तु देवं पित्र्यं करोति यः ।
नित्यं नैमित्तिकं काम्यं प्रत्यहश्चाक्षयं भवेत् ॥
पीड़यन्ति न तत्रैव ग्रहा ऋक्षाणि राशयः ।
अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी करे ॥'

वाराहे श्रीसनत्कुमारोक्तौ ।

'शङ्खायुधाङ्कितं देहं गोपीचन्दनलक्षया ।
प्रयागादिषु तीर्थेषु स गत्वा किं करिष्यति ॥
यदा यस्य प्रपश्येत देहं शङ्खादिचिह्नितं ।
तदा तदा जगत्स्वामी तुष्टो हरति पातकम् ॥
भवते यस्य देहे तु अष्टोराद्यं दिने दिने ।
शङ्खचक्रगदापद्मं लिखितं वोऽच्युतः स्वयम् ॥
नारायणायुधैर्युक्तं कृत्वात्मानं कलौ युगे ।
कुरुते पुण्यकर्म्माणि मेरुतुल्यानि तस्य वै ॥
शङ्खादिनाङ्कितो भक्त्या आर्द्रं यः कुरुते द्विजः ।
विधिर्हीनन्तु संपूर्णं पिष्टपाल्लु गयासमम् ॥
यथाग्निर्दहते कक्षं वायुना प्रेरितो भृशम् ।
तथा दहन्ति पापानि दृष्ट्वा शङ्खायुधानि वै ॥'

वाराहे श्रीब्रह्मनारदसंवादे ।

'विष्णुनामाङ्किता मुद्रा अष्टाक्षरसमन्विताम् ।
शङ्खादिकायुधैर्युक्तां स्वर्गरूप्यमयीमपि ॥
धत्ते भागवतो यस्तु कलिकाले विशेषतः ।
प्रह्लादस्य समो ज्ञेयो नान्यथा कलिवल्लभ ! ॥'

किञ्च ।

'शङ्काङ्किततनुर्विप्रो मुद्रां धत्ते यस्य च वैष्णवीम् ।
तदन्नं खयमश्नाति पितृभिः सह केशवः ॥
शङ्खायुधाङ्कितो यस्तु प्रयागे त्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य नारद ! ॥
शङ्खायुधैः कलौ नित्यं मण्डितं यस्य विग्रहम् ।
तत्राश्रयं प्रकुर्व्वन्ति विबुधा वासवादयः ॥
यः करोति हरेः पूजां शङ्खशङ्काङ्कितो नरः ।
अपराधसहस्राणि नित्यं हरति केशवः ॥
कृत्वा काष्ठमयं बिम्बं शङ्खशङ्केषु चिह्नितम् ।
यो न्यस्यति चात्मानं तत्समो नास्ति वैष्णवः ॥
पापक्षपतितब्राह्मेनास्तिकालापपातकैः ।
न लिप्यते कलिकृतैः शङ्खशङ्काङ्कितो नरः ॥'

किञ्च ।

'अष्टाक्षराङ्किता मुद्रा यस्य धातुमयी भवेत् ।
शङ्खपद्मादिभिर्युक्ता पूज्यतेऽसौ सुरासुरैः ॥
धृता नारायणी मुद्रा प्रह्लादेन पुरा कृता ।
विभीषणेन बलिना ध्रुवेण च शुकेन च ॥
मान्धात्रम्बरीषेण मार्कण्डप्रमुखैर्द्विजैः ।
शङ्खादिचिह्नितैः शङ्खैर्देहे कृत्वा कलिप्रिय ! ।
आराध्य केशवात् प्राप्तं समीहितफलं महत् ॥'

किञ्च ।

'गोपीचन्दनसंलक्षया लिखितं यस्य विग्रहे ।
शङ्खपद्मादिचक्रं वा तस्य देहे वसेद्धरिः ॥'

तत्रैव श्रीसनत्कुमारोक्तौ ।

'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
घण्टापल्लवसंयुक्ता माला तुलसीकाष्ठसम्भवा ॥

द्वादशाक्षरमन्त्रेण नियुक्तानि कलेवरे ।
आयुधानि च विप्रस्य मस्तकः स च वैष्णवः ॥'

किञ्च ।

'यस्य नारायणी मुद्रा देहे शङ्खादिचिह्नितां ।
सर्व्वाङ्गं चिह्नितं यस्य शङ्खेनारायणोद्भवैः ॥
प्रवेशो नास्ति पापस्य कवचं तस्य वैष्णवम् ॥'

अन्यत्र च ।

'एभिर्भागवतैश्चिह्नैः कलिकाले द्विजातयः ।
भवन्ति मर्त्यलोके ते पापापशुयज्ञकारकाः ॥'*॥

अथ मुद्राधारणविधिः । गौतमीये ।

"ललाटे च गदा कार्य्या मूर्द्ध्नि चापः शरः शिखा ।
नन्दकश्चैव कुक्षौ शङ्खचक्रं भुजद्वये ॥
शङ्खचक्राङ्कितो विप्रः शस्त्राघाते म्रियते यदि ।
प्रयागे या गतिः प्रोक्ता सा गतिस्तस्य गौतम ! ॥
चक्रञ्च दक्षिणे बाहौ शङ्खं वामेऽपि दक्षिणे ।
गदां वामे गदाधस्तात् पुनश्चक्रञ्च धारयेत् ॥
शङ्खोपरि तथा पद्मं पुनः पद्मञ्च दक्षिणे ।
खड्गं वक्षसि चापञ्च शरं शिरसि धारयेत् ॥
इति पञ्चायुधान्यादौ धारयेद्वैष्णवो जनः ।
मत्स्यञ्च दक्षिणे हस्ते कूर्म्मं वामकरे तथा ॥'

तथा चोक्तम् ।

'दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् ।
मत्स्यं पद्मञ्चापरेऽथ शङ्खं कूर्म्मं गदां तथा ॥
साम्प्रदायिकमुद्राणामाचाराच्च यथारुचि ।
शङ्खचक्रादिचिह्नानि सर्व्वेष्वङ्गेषु धारयेत् ॥
भक्त्या निजेष्टदेवस्य धारयेल्लक्षणान्यपि ।
चक्रशङ्खौ च धार्य्येते संमिश्रावेव केशव ॥'

यत उक्तं ब्रह्मवैवर्त्ते ।

'केवलं गोदहेच्छङ्खमादौ चासुरविग्रहम् ।
असच्चक्रविमिश्रं तं बिभृयाद्वैष्णवः सदा ॥
श्रीगोपीचन्दनेनैव चक्रादीनि बुधोऽन्वहम् ।
धारयेच्छयनादौ तु तन्नामानि किल तानि हि ॥'

अथ चक्रादीनां लक्षणानि ।

'द्वादशाक्षरतु षट्कोणं वलयत्रयसंयुतम् ।
चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्च श्रीहरेः स्मृतः ॥
गदापद्मादिकं लोकसिद्धमेव मतं बुधैः ।
मुद्रा च भगवन्नाम्नाङ्किता यादृच्छरादिभिः ॥'

इति श्रीहरिभक्तिविलासः ॥ * ॥

अपि च ।

'यथा मुद्रा श्रीतलाख्या तथा तन्त्रा न संशयः ।
तन्त्रायाः श्रीतलायाश्च विभेदो नैव वर्त्तते ॥
नामचिह्नादिना देहे वह्निना वा ह्यदाङ्कनम् ।
सा दीक्षा प्रोच्यते भूप ! वाञ्छानां ज्ञानिनामपि ॥
वैष्णवैर्विष्णुभक्तैश्च ब्राह्मणैर्वेदपारगैः ।
सन्ध्यायां सतिलां मुद्रां गोपीचन्दनसंयुताम् ॥'

इति नारदपञ्चरात्रम् ॥

'शङ्खनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना ।
स लोकपावनो भूत्वा विष्णुलोकमवाप्नुयात् ॥
अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः ।
अङ्कयित्वा जपेज्जन्तुः संसाराज्जीवमाप्नुयात् ॥'

इति पद्मपुराणम् ॥

'तन्नाम्ना चाङ्कितं सर्व्वं वसनं भाजनादिकम् ।'
इति हारीतस्मृतिः ॥ * ॥

देवताविशेषप्रीतिजनिकाङ्गुलिरचना । यथा, मुद्रापदव्युत्पत्तिमाह तत्रै ।

'मोदनात् सर्व्वदेवानां द्रावणात् पापसन्ततेः ।
तस्मान्मुद्रेति सा ख्याता सर्व्वकामार्थसाधनी ॥
अथ मुद्राः प्रवक्ष्यामि सर्व्वतन्त्रेषु कल्पिताः ।
याभिर्विरचिताभिश्च मोदन्ते मन्त्रदेवताः ॥
अर्च्चने जपकाले च ध्याने काम्ये च कर्म्मणि ।
स्नाने चावाहने ग्रन्थे प्रतिष्ठायाञ्च रक्षणे ॥
नैवेद्ये च तथान्यत्र तत्तत्कल्पप्रकाशिते ।
स्थाने मुद्राः प्रदर्श्याः खलु सत्त्वसमन्विताः ॥
आवाहनादिका मुद्रा नव साधारणा मताः ।
तथा षड्ङ्गमुद्राश्च सर्व्वमन्त्रेषु योजयेत् ॥
एकोनविंशतिर्म्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
वनमाला तथा ज्ञानमुद्रा विघ्नाङ्कया तथा ।
गरुडाख्या परा मुद्रा विष्णोः सन्तोषवर्द्धिनी ॥
नारसिंही च वाराही हयग्रीवी धनुस्तथा ।
बाणमुद्रा ततः परशुर्ज्ञानोद्दीपनिका परा ॥
काममुद्रा पराख्याता शिवस्य दश मुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्यामालेष्टाभीत्यङ्काङ्कयाः ।
खट्वाङ्गा च कपालाख्या डमरुः शिखतोद्भवा ॥
सूर्य्यस्यैकैव पद्माख्या मन्मुद्रा गणेशितुः ।
दण्डपाशाङ्कुशा विघ्नपरशुलड्डुकसञ्ज्ञिताः ।
बीजपूराङ्कया मुद्रा विज्ञेया विघ्नपूजने ॥
पाशाङ्कुशवराभीतिखड्गचर्म्मधनुःशराः ।
मौद्गली मुद्रिका दौर्गी मुद्राः शक्तेः प्रियङ्कराः ॥
लक्ष्मीमुद्रार्च्चने लक्ष्म्या वाग्वादिन्याश्च पूजने ।
अक्षमाला तथा वीणाव्याख्यापुस्तकमुद्रिकाः ॥
सप्तजिह्वाङ्कया मुद्रा विज्ञेया वह्निपूजने ।
मत्स्यमुद्रा च कूर्म्माख्या लेलिहा मुखसञ्ज्ञिका ॥
महायोनिरिति ख्याता सर्व्वसिद्धिसमृद्धिदा ।
शङ्खार्च्चने महायोनिः श्यामादौ मुखमुद्रिका ॥
मत्स्यकूर्म्मलेलिहाख्या मुद्रा साधारणा मता ।
नारार्च्चने विशेषास्तु कथ्यन्ते पञ्च मुद्रिकाः ॥
योनिश्च भूनिगौ चैव वीणाख्या दैत्यधर्म्मिणी ।
लेलिहानेति संप्रोक्ताः पञ्चमुद्राः प्रकाशिताः ॥
दण्डिका मुद्रिका ज्ञेयाग्निपुराणाः प्रपूजने ।
संक्षोभद्राघणाकर्षवश्योन्मादमहाङ्कुशाः ।
खेचरी बीजयोन्याख्या त्रिखण्डा परिकीर्त्तिताः ॥
कुम्भमुद्राभिधेके स्यात् पद्ममुद्रासने तथा ।
कालकर्णी प्रयोक्तव्या विघ्नप्रथमकर्म्मणि ॥
मालिनी च प्रयोक्तव्या जलशोधनकर्म्मणि ।
श्रीगोपालार्च्चने वेणुर्हरेर्नारसिंहिका ॥
वराहस्य च पूजायां वाराहाख्यां प्रयोजयेत् ।
हयग्रीवार्च्चने चैव हायग्रीवीं प्रदर्शयेत् ॥
रामार्च्चने धनुर्ब्बाणमुद्रे परशुरक्षयार्च्चने ।
परशुरामस्य विज्ञेया जगन्मोहनसञ्ज्ञिका ॥
वासुदेवाङ्कया ध्याने कुम्भमुद्रा तु रक्षणे ।
सर्व्वत्र प्रार्थने चैव प्रार्थनाख्यां प्रयोजयेत् ॥*॥
उद्देशानुक्रमादासामुच्यते लक्षणान्यथ ।

हस्ताभ्यामञ्जलिं बद्ध्वानामिकामूलपर्व्वगोः ॥
अङ्गुष्ठौ निक्षिपेत् सेयं मुद्रा स्यादावाहनी स्मृता ।१।
अधोमुखौ त्रियं नेतु स्यात् स्थापनी मुद्रिका स्मृता ॥ २ ॥
उच्छ्रिताङ्गुष्ठमुष्टीनां संयोगात् सन्निधापनी ।३।
अन्तःप्रवेशिताङ्गुष्ठा सैव संबोधनी मता ॥४॥
उत्तानमुद्वियुगला संमुखीकरणी मता । ५ ।
देवताङ्गे षड्ङ्गानां न्यासः स्यात् सकलीकृतिः ॥६॥
तथैवोत्तानता मुष्टिर्दीर्घाधोमुखतर्ज्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रामिता मता ॥ ७ ॥
अन्योन्याभिमुखाश्लिष्टा कनिष्ठानामिका पुनः ।
तथैव तर्ज्जनी मध्या धेनुमुद्रा प्रकीर्त्तिता ॥
अन्तीकरणं कुर्य्यात्तया साधकसत्तमः । ८ ।
अन्योन्यग्रथिताङ्गुष्ठा प्रसारितपराङ्गुली ॥
महामुद्रेयमुदिता परमीकरणे बुधैः ।
प्रयोजयेदिमां मुद्रां देवताज्ञानकर्म्मणि ॥९॥*॥
वैष्णवीनान्तु मुद्राणां कथ्यन्ते लक्षणान्यथ ।
वामाङ्गुष्ठन्तु संगृह्य दक्षिणेन तु मुष्टिना ॥
ऊर्द्ध्वोत्तानं ततो मुष्टिमङ्गुष्ठन्तु प्रसारयेत् ।
वामाङ्गुल्यस्तथाश्लिष्टाः संयुक्ताः स्युः प्रसारिताः ॥
दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका । १ ।
हस्तौ तु संमुखौ कृत्वा सन्नतप्रोथिताङ्गुली ॥
तलाग्रमिलिताङ्गुष्ठौ कृत्वैषा पद्ममुद्रिका । २ ।
ओष्ठे वामकराङ्गुष्ठो लग्नस्तस्य कनिष्ठिका ॥
दक्षिणाङ्गुष्ठसंयुक्ता तत्कनिष्ठा प्रसारिता ।
तर्ज्जनीमध्यमानामाः किञ्चित् संकुच्य चालिताः ॥
वेणुमुद्रा भवत्येषा सुगुप्ता प्रेयसी हरेः । ५ ।
अन्योन्यपृष्ठकरयोर्मध्यमानामिकाङ्गुली ॥
अङ्गुष्ठेन तु यद्गीयात् कनिष्ठामूलसंस्थिते ।
तर्ज्जन्यौ कारयेदेषा मुद्रा श्रीवत्ससञ्ज्ञिका ॥६॥
अनामापृष्ठसंलग्ना दक्षिणस्य कनिष्ठिका ।
कनिष्ठयान्यया बद्ध्वा तर्ज्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके ।
अङ्गुष्ठमध्यमे वामे संयोज्य सरलाः परा ॥
चक्रसोऽप्यसंलग्ना मुद्रा कौस्तुभसञ्ज्ञिका ।७।
स्पृशेत् कण्ठादिपादान्तं तर्ज्जन्याङ्गुष्ठया तथा ॥
करद्वयेन मालावत् मुद्रेयं वनमालिका । ८ ।
तर्ज्जन्यङ्गुष्ठकौ सक्तावग्रतो विन्यसेत् हृदि ॥
वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी ॥ ९ ॥
अङ्गुष्ठं वामसुहृत्कृतमितरकराङ्गुष्ठकेनापि बद्ध्वा
तस्याग्रं पीड़यित्वाङ्गुलिभिरपि च ता वाम-
हस्ताङ्गुलीभिः ।
बद्ध्वा गाढ़ं हृदि स्थापयतु विमलधीर्व्याहरन्
मारबीजं

विख्याख्या मुद्रिकेषा स्फुटमिह गदिता गोप-
गोप्या विधिज्ञैः ॥ १० ॥
हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठिके ।
मिथस्तर्ज्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा ॥
मध्यमानामिके ते तु ह्यौ पक्षाविव चालयेत् ।
एषा गरुड़मुद्रा स्याद्विष्णोः सन्तोषवर्द्धिनी ॥११॥
आस्यमध्ये करौ कृत्वा चिबुकौष्ठौ समाश्रयौ ।
हस्तौ तु भूमिसंलग्नौ कम्प्यमानः पुनः पुनः ॥
सुखं विस्तृतकं कुर्य्यात् लेलिहानाख्य जिह्मिकाम् ।
नारसिंही भवेदेषा मुद्रा तत्प्रीतिवर्द्धिनी ॥'
अथवा ।
'अङ्गुष्ठाभ्यान्तु करयोरुत्तथाक्रम्य कनिष्ठिके ।
अधोमुखीभिः सर्व्वाभिर्म्मुद्रेयं वृहरैर्म्मता ॥१२॥
देवोपरि करं वामं कृत्वोत्तानमधः सुधीः ।
नमयेदिति संप्रोक्ता मुद्रा वाराहसञ्ज्ञिका ॥'
यद्वा ।
'दक्षहस्तश्चोर्द्धमुखं वामहस्तमधोमुखम् ।
अङ्गुल्यग्रन्तु संयुक्तं मुद्रा वाराहसंज्ञिका ॥१३॥
वामहस्ततले दत्त्वा अङ्गुलीस्ताश्चधोमुखीः ।
संरोप्य मध्यमां तासामुन्नम्याधो विकुञ्चयेत् ॥
हयग्रीवप्रिया मुद्रा तत्प्रीतेरनुकारिणी ।१४।
वामस्य मध्यमाग्रन्तु तर्ज्जन्यग्रेण योजयेत् ॥
अनामिकां कनिष्ठाञ्च तस्याङ्गुष्ठेन पीड़येत् ।
दर्शयेदामके स्कन्धे धनुर्म्मुद्रेयमीरिता ॥ १५ ॥
दक्षमुष्टेस्तु तर्ज्जन्या दीर्घया बाणमुद्रिका ।१६।
यद्वा ज्ञानार्णवे ।
'यथा हस्तगतं चापं तथा हस्तं कुरु प्रिये ! ।
चापमुद्रेयमाख्याता वामहस्ते व्यवस्थिता ॥१७॥
यथा हस्तगता बाणास्तथा हस्तं कुरु प्रिये ! ।
बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥१८॥
तले तलन्तु करयोरित्यर्थक् संयोज्य चाङ्गुलीः ।
संहताः प्रहताः कुर्य्यात् सुदा परशुसञ्ज्ञिका ॥१९
उच्छ्रिताङ्गुष्टमुष्टी द्वे मुद्रा त्रैलोक्यमोहिनी ॥२०॥
हस्तौ तु संपुटौ कृत्वा प्रहताङ्गुलिकौ तथा ।
तर्ज्जन्यौ मध्यमाश्लिष्टे अङ्गुष्ठौ मध्यमाश्रितौ ।
काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी ॥२१॥*॥
महादेवप्रियाणान्तु कथ्यन्ते लक्षणान्यथ ।
उच्छ्रितं दक्षिणाङ्गुष्ठं वामाङ्गुष्ठेन वेष्टयेत् ॥
वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च वन्धयेत् ।
लिङ्गमुद्रेयमाख्याता शिवसान्निध्यकारिणी ॥१॥
मिथः कनिष्ठिके बद्ध्वा तर्ज्जनीभ्यामनामिके ।
अनामिकोर्द्धसंश्लिष्टदीर्घमध्यमयोरधः ॥
अङ्गुष्ठाग्रद्वयं न्यस्येत् योनिमुद्रेयमीरिता ।२।
अङ्गुष्ठेन कनिष्ठास्तु बद्ध्वा श्लिष्टाङ्गुलीत्रयम् ॥
प्रसारयेत् त्रिमूलाख्या मुद्रैषा परिकीर्त्तिता ।३
अङ्गुष्ठतर्ज्जन्ययेतु ग्रथयित्वाङ्गुलित्रयम् ॥
प्रसारयेदक्षमाला मुद्रेयं परिकीर्त्तिता । ४ ।
अधःस्थितो दक्षहस्तः प्रहतो वरमुद्रिका ॥५॥
ऊर्द्ध्वस्थितो वामहस्तः प्रहतोऽभयमुद्रिका ।६। ।
मिलितानामिकाङ्गुष्ठं मध्यमाग्रे नियोजयेत् ॥
श्लिष्टाङ्गुल्युच्छ्रिते कुर्य्यात् मृगमुद्रेयमीरिता ।७
पक्षाङ्गुल्यो दक्षिणास्तु मिलिता ऋजुसंस्थिताः ॥

खड्गाङ्गमुद्रा विख्याता शिवस्यातिप्रिया मता ।८।
पाचवङ्गामहस्तस्तु कृत्वाङ्गे वामके तथा ॥
निधायोच्छ्रितवत् कुर्यात् सुद्रा कापालिकी मता । ९ ।
मुष्टिं च शिथिलां बद्धा ईषदुच्छ्रितमध्यमाम् ॥
दक्षिणाग्रहसव्यस्य कर्णदेशे प्रचालयेत् ।
एषा सुद्रा समाख्याता सर्वविघ्नविनाशिनी ॥१०॥*॥
तथा गणेशमुद्राणामुच्यन्ते लक्षणान्यथ ।
उत्तानोर्ध्वमुखौ मध्या सरला बहुसुष्टिका ॥
दन्तमुद्रा समाख्याता सर्वागमविशारदैः ।११।
वामसुष्टेस्तु तर्जन्या दक्षसुष्टेस्तु तर्जनीम् ॥
संयोज्याङ्गुष्ठकाभ्यां तर्जन्यग्रे स्वकं क्षिपेत् ।
एषा पाशाह्वया मुद्रा विघ्नहृद्भिः परिकीर्तिता ॥१२॥
ऊर्ध्वौ च मध्यमौ कृत्वा तर्जनीमध्यपर्वणि ।
संयोज्याङ्गुष्ठयेत् किञ्चिन्मुद्रेषाङ्कुशसंज्ञिका ॥१३॥
तर्जनीमध्यमानामाकनिष्ठाङ्गुष्ठसुष्टिका ।
अधोमुखी दीर्घरूपा मध्यमा विघ्नसुद्रिका ॥१४॥
परशुमुद्रा ५ निगदिता प्रसिद्धा लड्डुसुद्रिका ।१५।
बीजपूराह्वया मुद्रा प्रसिद्धत्वादुपेक्षिता ॥१७॥*॥
शक्तियोनाश्च मुद्राणां कथ्यन्ते लक्षणान्यथ ।
पाशा १ कुश २ वरा ३ भीति ४ धनु ५
बाणाः समीरिताः ॥ ६ ॥
कनिष्ठानामिके बद्धा स्वाङ्गुलेनैव दक्षतः ।
श्लिष्टाङ्गुली तु प्रहते संश्लिष्टे खड्गसुद्रिका ॥७॥
वामहस्तं तथा तिर्यक् कृत्वा चैव प्रसार्य च ।
आकुञ्चिताङ्गुलीः कुर्यात् चर्ममुद्रेयमीरिता ॥८
सुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरिदक्षिणम् ।
कुर्याच्चुसलमुद्रेयं सर्वविघ्नविनाशिनी ॥ ९ ॥
सुष्टिं कृत्वा कराभ्याञ्च वामस्योपरि दक्षिणम् ।
कृत्वा शिरसि संयोज्य दुर्गा मुद्रेयमीरिता ॥१०॥
चक्रमुद्रां तथा बद्धा मध्यमे तु प्रसार्य च ।
कनिष्ठिके तथानीय तदग्रेऽङ्गुष्ठकौ क्षिपेत् ॥
लक्ष्मीमुद्रा परा ह्येषा सर्वसम्पत्प्रदायिनी ॥११॥
वीणावादनवद्धस्तौ कृत्वा सञ्चालयेच्छिरः ।
वीणामुद्रेयमाख्याता सरस्वत्याः प्रियङ्करी ।१।
वामसुष्टिं स्वाभिमुखीं कृत्वा पुस्तकसुद्रिका ।२।
दक्षिणाङ्गुष्ठतर्जन्यावग्रसक्ते पराङ्गुलीः ॥
प्रसार्य संहतीस्ताना एषा व्याख्यानसुद्रिका ।३।
श्रीरामस्य सरस्वत्या अत्यन्तप्रेयसी मता ॥*॥
मणिबन्धस्थितौ कृत्वा प्रहस्ताङ्गुलिकौ करौ ।
कनिष्ठाङ्गुष्ठयुगले मिलित्वान्तः प्रसारयेत् ॥
सप्तजिह्वाह्वयमुद्रेयं वैश्वानरप्रियङ्करी ।१। * ।
कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ॥
तर्जनी मध्यमानामा संहता सुप्रवर्त्तिता ।
मुद्रेषा गालिनी प्रोक्ता ग्रहस्योपरि चालिता ॥
दक्षाङ्गुष्ठं पराङ्गुष्ठं क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशामेकमुष्टिं कुर्यात् सा कुम्भमुद्रिका ॥
मुष्टीकृत्यौकृताङ्गुष्ठौ तर्जन्यग्रे तु विन्यसेत् ।
सर्वैरुच्चाकरी ह्येषा दन्तमुद्रा प्रकीर्तिता ॥*॥
प्रहस्ताङ्गुलिकौ हस्तौ मिथःश्लिष्टौ च संमुखौ ।
कुर्यात् स्वे हृदये सेयं मुद्रा प्रार्थनसंज्ञिका ॥*॥
अञ्जल्यञ्जलिमुद्रा स्याद्वासुदेवाह्वया च सा ।

अङ्गुष्ठावुन्नतौ कृत्वा सुष्ठ्वोः संलग्नयोर्द्वयोः ॥
तावेवाभिमुखौ कुर्यात् मुद्रेयं कालकर्णिका ।*।
दक्षिणा निविड़ा मुष्टिर्नासिकार्पिततर्जनी ॥
मुद्रा विघ्नध्वंसकृत् स्यात् विघ्नयावेशकारिणी ।
मुष्टिरूर्ध्वीकृताङ्गुष्ठा दक्षिणा नादमुद्रिका ॥
तर्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका । * ।
अधोमुखे वामहस्ते ऊर्ध्वास्यं दक्षहस्तकम् ॥
क्षिप्त्वाङ्गुलीरङ्गुलीभिः संग्रथ्य परिवर्त्तयेत् ।
एषा संहारमुद्रा स्यात् विसर्जनविधौ स्मृता ॥
दक्षपाणिपृष्ठदेशे वामपाणितलं न्यसेत् ।
अङ्गुष्ठौ चालयेत् सम्यक् मुद्रेयं मत्स्यरूपिणी ॥
वामहस्तस्य तर्जन्या दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्जन्या वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पिहितीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्यात् दक्षिणस्य करस्य च ॥
कूर्मपृष्ठसमं कुर्यात् दक्षपाणिञ्च सर्वतः ।
कूर्ममुद्रेयमाख्याता देवताध्यानकर्मणि ॥'
पृष्ठे क्रोडे ॥ * ॥
'अन्तराङ्गुष्ठमुष्टिन्तु कृत्वा वामकरस्य च ।
मध्यमाग्रं दक्षिणस्य तथालम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्जन्यामङ्गुष्ठाग्रेण योजयेत् ।
दक्षिणं योजयेत् पार्श्वं वामसुष्ठौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे मुखमुद्रेयमुच्यते ॥ * ॥
तर्जनीमध्यमानामाः समं कुर्यादधोमुखम् ।
अनामायां क्षिपेदङ्गुष्ठौ ऊर्ध्वौ कृत्वा कनिष्किकाम् ॥
लेलिहा नाम मुद्रेयं जीवन्यासे प्रकीर्तिता ।
तर्जन्यनामिकामध्याकनिष्ठाक्रमयोगतः ॥
करयोर्योजयेत्पश्च कनिष्ठाग्रलयोगतः ।
अङ्गुष्ठाग्रे तु निःक्षिप्य मध्ययोनिः प्रकीर्तिता ॥'
तारायाः योन्यादिमुद्रा—यथा । योनिमुद्रा च
यक्ष्यमाणा भवित्री वक्ष्यमाणा बीजाख्यापि ॥
'परिवर्त्तौ करौ कृत्वा कनिष्ठाङ्गुष्ठमध्यमे ।
अनामायुगलञ्चाधस्तर्जनीयुगलं पृथक् ॥
अन्योन्यं निविड़ं बद्धाङ्गुष्ठाग्रेनामिके ततः ।
दानबन्धमकेत्याख्या मुद्रेषा कथिता प्रिये ! ॥
अस्यामेव बन्धनाभ्यन्तरे बन्धनाङ्गुष्ठते ध्रुवम् ॥
वक्त्रं विस्तारितं कृत्वाप्यधो जिह्वाञ्च चालयेत् ।
पार्श्वस्थं सुष्ठियुगलं लेलिहानेति कीर्तिता ॥'
एषा ताराराधनेऽन्या लेलिहाना यक्ष्यमाणा ।
'योनिर्मायाधरः सेन्दुर्बधूः कूर्चैः क्रमाद्विदुः ।
बीजानि चोच्चरन् मन्त्री मुद्राबन्धनमाचरेत् ॥
तर्जन्यङ्गुष्ठसंयोगादग्रतो बिन्दुमुद्रिका ।
वामकेश्वरतन्त्रोक्ताः प्रकाश्यन्तेऽथ मुद्रिकाः ॥
शृणु देवि ! प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः ।
याभिर्विरचिताभिस्तु साधिष्यं चैपुरं भवेत् ॥
परिवर्त्तौ करौ कृत्वाङ्गुष्ठौ कारयेत् समौ ।
अनामाग्रगते कृत्वा तर्जन्यौ कुटिलाकृतौ ॥
कनिष्किके नियुञ्जीत निजस्थाने महेश्वरि ! ।
त्रिखण्डेयं समाख्याता त्रिपुराध्यानकर्मणि ॥

मध्यमामध्यगे कृत्वा कनिष्ठेऽङ्गुष्ठरोधिते ।
तर्जन्यौ दण्डवत् कृत्वा मध्यमोपर्यनामिके ।
एषा च प्रथमा मुद्रा सर्वसंक्षोभकारिणी ॥
एतस्या एव मुद्राया मध्यमे सरले यदा ।
क्रियेते परमेशानि ! सर्वविद्राविणी तदा ॥
मध्यमातर्जनीभ्याञ्च कनिष्ठानामिके समे ।
अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि ! ॥
अङ्गुष्ठौ तु नियुञ्जीत कनिष्ठानामिकोपरि ।
इयमाकर्षिणी मुद्रा त्रैलोक्याकर्षिणी परा ॥
पुटाकारौ करौ कृत्वा तर्जन्यावङ्कुशाकृती ।
परिवर्त्तक्रमेणैव मध्यमे सदधोगते ॥
क्रमेण देवि ! तेनैव कनिष्ठानामिके तथा ।
संयोज्य निविड़ाः सर्वा अङ्गुष्ठावग्रदेशतः ॥
मुद्रेयं परमेशानि ! सर्ववश्यकरी मता ।
सम्मुखौ तु करौ कृत्वा मध्यमामध्यगेऽन्यके ॥
अनामिके तु सरले तद्वच्छिलष्टतर्जनीद्वयम् ।
दण्डाकारौ तदङ्गुष्ठौ मध्यमानखदेशगौ ॥
मुद्रेषोच्चादिनी नाम्ना कर्षिणी सर्वयोषिताम् ।
अस्यास्त्वनामिकायुग्ममधः कृताङ्कुशाकृती ॥
तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् ।
इयं महाङ्कुशा मुद्रा सर्वकामार्थसाधिनी ॥*॥
सव्यं दक्षिणदेशे तु सव्यदेशे तु दक्षिणम् ।
बाहुं कृत्वा महादेवि ! हस्तौ संपरिवर्त्य च ।
कनिष्ठानामिके देवि ! युक्ते तेन क्रमेण च ।
तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्यमे ॥
अङ्गुष्ठौ तु महेशानि ! सरलावपि कारयेत् ।
इयं सा खेचरी नाम्ना पार्थिवस्थानयोजिता ॥
परिवर्त्तौ करौ कृत्वा मुष्टावङ्गुष्ठचन्द्रान्तरौ प्रिये ! ।
तर्जन्यङ्गुष्ठयुगलं युगपत् कारयेत्ततः ॥
अधः कनिष्ठावष्टब्धे मध्यमे विनियोजयेत् ।
तथैव कुटिले योज्ये सर्वाधस्तादनामिके ।
बीजमुद्रेयमचिरात् सर्वसिद्धिविधायिनी ।*।
मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते ॥
अनामिके मध्यगते तथैव हि कनिष्ठिके ।
सर्वा एकत्र संयोज्या अङ्गुष्ठपरिपीड़िताः ॥
एषा तु परमा मुद्रा योनिमुद्रेयमीरिता ।*।
एता मुद्रा महेशानि ! त्रिपुराया मयोदिताः ।
पूजाकाले प्रयोक्तव्या यथानुक्रमयोगतः ॥
यानहस्तेन सुष्ठिन्तु बद्धा कर्णप्रदेशके ।
तर्जनीं सरलां कृत्वा भ्रामयेन्मुहुरुत्तमः ॥
सौभाग्यदर्शनी मुद्रा व्यासकालेऽपि सूचिता ।
अन्तरङ्गुष्ठमुष्ट्या तु निरुध्य तर्जनीमिमाम् ॥
रिपुजिह्वाग्रहा मुद्रा व्यासकाले तु सूचिता ।
बद्धा तु योनिमुद्रां वै मध्यमे कुटिले कुरु ॥
अङ्गुष्ठेन तदग्रे तु मुद्रेयं भूतिनी मता ।*।
वामसुष्टिं विधायाथ तर्जनीमध्यमे ततः ॥
प्रसार्य तर्जनीमुद्रा निर्दिष्टा वज्रधारिणा ॥'

इति तन्त्रसारे मुद्राप्रकरणं समाप्तम् ॥*॥*॥

अपि च ।

'उक्ताः स्तवनमस्काराः शृणुतं पुरतो युवाम् ।
मुद्राणां परिसंख्यानं स्वरूपञ्च यथाक्रमम् ॥
धेनुञ्च सम्पुटञ्चैव प्राञ्जलिञ्चिल्लपद्मकौ ।

मुद्रा

नाराचो मुखदण्डौ च योनिरर्द्धं तथैव च ॥
वन्दनी च महामुद्रा महायोनिस्तथैव च ।
भगश्च पुटकश्चैव निःशङ्कोऽथार्द्धचन्द्रकः ॥
अङ्कुश द्विमुखश्चैव शङ्खमुद्राथ सृष्टिकः ।
वज्रश्चैव तथा बद्धं सयोनिर्विमलस्तथा ॥
घटः शिखरिणी तुङ्गः पृष्ठोऽथ लम्बितेशुकः ॥
संमीलनी च कुक्कुश्च चक्रं मूलं तथैव च ॥
सिंहचक्रं गोमुखश्च प्रोन्नामोन्नमनं तथा ।
विम्बं पाशुपतं गुह्यं त्यागोऽथ साधनी तथा ॥
प्रसाधनी चोग्रमुद्रा कुक्कली गूहनेव च ।
विमुखश्चासिवक्त्री च योगो भेदोऽथ मोहनम् ॥
बाणो धनुश्च तूणीरं मुद्रा एतास्तु सत्तमाः ।
अष्टोत्तरशतं मुद्रा ब्रह्मणा याः प्रकीर्तिताः ॥
तासान्तु पञ्चपञ्चाशदेताः प्राधान्यतः पुनः ।
प्रेषास्तु याश्चिपञ्चाशन्मुद्राश्चा समयेषु च ।
ध्यानावयनसंकेतनटनादिषु ताः स्मृताः ॥
देवानां चिन्तने योगे ध्याने जप्ये विसर्जने ।
आत्मास्तु पञ्चपञ्चाशन्मुद्रा भैरव ! कीर्तिताः ॥
मुद्रां विना तु यज्जप्यं प्राणायामः सुरार्चनम् ।
योगो ध्यानासने चापि निष्फलानि च भैरव ! ॥
प्रत्येकं लक्षणं तेषां शृणुतं तनयौ युवाम् ॥
दक्षिणामध्यमाग्रेण सव्यहस्तस्य तर्जनीम् ।
योजयेत् सव्यमध्यान्तु तर्जन्या दक्षिणेन वै ॥
तथा दक्षानामिकया वामहस्तकनिष्ठिकाम् ।
अनामिकान्तु वामस्य दक्षिणस्य कनिष्ठया ॥
योजयेद्बलिमान् सम्यक् दक्षिणावर्त्तनेन तु ।
धेनुमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ॥१॥
संयोज्य हौ तलौ सर्व्वाङ्गुष्ठाग्राणि क्षुक्तयोः ।
संयोज्य पार्श्वतोऽङ्गुष्ठौ संपुटः प्रोच्यते सुरैः ॥
सर्व्वेषामथ देवानां संपुटः प्रस्मृतः सदा ।
ध्यानसंपुटयोगादौ सम्पुटः प्रस्मृतः सदा ॥२॥
निकुञ्चयुगलं पार्श्वोः संयोज्यार्द्धेन एव च ।
मध्यशून्यः पुटाकारः प्राञ्जलिः परिकीर्तितः ॥३॥
अङ्गुष्ठमन्तरं कृत्वा पाणयोर्मुष्टिं विधाय च ।
संयोज्य विस्वयते तु विस्वमुद्रा प्रकीर्तिता ॥४॥
मणिबन्धादाकरभं संयोज्य करयोर्द्वयोः ।
अङ्गुष्ठे चापि संयोज्य तथैव च कनिष्ठिके ॥
निसाक्तिको दयोः पार्श्वयोरङ्गुलीर्विरलाकृतः ।
पद्ममुद्रा समाख्याता चतुर्वर्गप्रदा नृणाम् ॥५॥
अङ्गुष्ठाग्रेण तर्जन्याः संयोज्याधोरेखया ।
अन्याङ्गुलीस्तथानम्य नाराचः स्यात् प्रसार्य्यते ॥

मम चैव प्रियायाश्च प्रीतिदेयं प्रियङ्करी ।
नाराचमुद्रा सततं प्रीत्यै वेतालभैरव ! ॥६॥
अन्तराङ्गुष्ठमुष्टिञ्च कृत्वा वामकरस्य तु ।
मध्यमाभ्यां दक्षिणस्य तथानम्य प्रयत्नतः ॥
मध्याङ्गुलीनाथ तर्जन्या अङ्गुष्ठाग्राणियोज्य च ।
दक्षिणं योजयेत् पार्श्वं वामसृष्टौ तु साधकः ॥
दर्शयेद्दक्षिणे भागे सुखमुद्रेयमिष्यते ।
इयन्तु गणनाथस्य प्रीतिदा मुद्रिकोत्तमा ॥
सर्व्वेषामपि देवानां तुष्टिदा सर्व्वकर्म्मसु ।७।
अङ्गुष्ठमध्यमादौच सव्यगानम्य तर्जनीम् ॥

मुद्रा

प्रसार्य दक्षमुद्रेति दक्षिणस्य करस्य तु ।८।
सर्व्वाङ्गुलीस्तु संयोज्य करयोरुभयोरपि ॥
संवेष्ट्य रज्जुवद्दृढे तु पार्श्वयोरपि कनिष्ठिके ।
वामस्य वामभूतेन तदग्रं विनियोजयेत् ॥
दक्षस्य मध्यभूतेन तथाग्रं वाममेव च ।
योजयेत् योजनात् पश्चादावर्त्य करशाखिकाः ॥
योन्याकारन्तु तन्मध्यं योनिमुद्रा प्रकीर्तिता ।
कामाख्यायाः पश्चमूर्त्तेर्दुर्गाया अपि भैरव ! ॥
प्रीतिदा योनिमुद्रेयं मम कामस्य च प्रिया ।९।
संयुक्ताङ्गुलीः सर्व्वाः प्रसार्य्याङ्गुष्ठपर्व्वणा ॥
अन्येन च कनिष्ठाया अन्येनापि च योज-
येत् ।
करस्य दक्षिणस्येयमर्द्धयोनिः प्रकीर्तिता ॥१०॥
संपुटं प्राञ्जलिं वापि यदि मूर्ध्नि नियोजयेत् ।
वन्दनीया समाख्याता मुद्रा विष्णुप्रमोदिनी ॥११॥
सैव चेत् श्रवणासक्ता महामुद्रा प्रकीर्तिता ।१२।
दक्षिणार्द्धे तु सा सक्ता वैष्णवी परिकी-
र्त्तिता ॥ १३ ॥
महायोनिस्तु कथिता वैष्णवीतन्त्रगोचरे ।
द्वयोर्मूले त्वङ्गुष्ठाग्रमङ्गुलीश्च कनिष्ठयोः ॥
नियोज्य प्रहतीकृत्य ते पार्श्वे योजयेत् पुनः ।
भगमुद्रा च सा ख्याता लक्ष्मीवाणीप्रिया-
प्रिया ॥ १४ ॥
सर्व्वाङ्गुलीनामग्रौघं दक्षिणस्य करस्य च ।
संयोज्यैकत्र पुरतो निर्देशः पुटकः स्मृतः ॥१५॥
कनिष्ठागामिकाङ्गुष्ठाङ्गुलीनां योजयेद्बुधः ।
अग्राण्येकत्र मध्यानु तर्जनीश्च प्रसार्य वै ॥
कुञ्चीकृत्य करद्वन्द्वं पृथगग्रे नियोजयेत् ।
निःशङ्को नाम मुद्रेयं नरसिंहवराह्योः ॥१६॥
कनिष्ठानामिकामध्यामाकुञ्च्य दक्षिणस्य च ।
करस्य तर्जन्यङ्गुष्ठे प्रसार्ये क्रियते तु या ॥
सा मुद्रा त्वर्द्धचन्द्राख्या ग्रहाणां प्रीतिदा-
यिनी । १७।
ऊर्द्धीकृत्य तथाङ्गुष्ठं दक्षिणस्य करस्य च ।
कृत्वा मध्यं तदङ्गुष्ठं वाममुष्टिं तथोर्द्धतः ।
ऊर्द्धाङ्गुष्ठं तथा कुर्य्यादङ्गमुद्रा प्रकीर्तिता ॥१८॥
एतस्या एव मुद्राया कनिष्ठादिविमोचनः ।
अष्टौ मुद्राः समाख्याता नाम तासां पृथक्
पृथक् ॥

द्विमुखश्चैव १९ सृष्टिश्च २० वज्रं २१ मावद्ध २२
मेव च ।
विमलश्च २३ घटश्चैव २४ तुङ्गः २५ पृष्ठ २६
स्तथैव च ॥
नवानां विष्णुमुद्रीणां सार्द्धमङ्गेन सुद्रिकाः ।
क्रमात्तव समाख्याता नायिकानां तथैव च ॥
संयोज्य करयोः पृष्ठं तथावर्त्तो तु वै समम् ।
प्रसार्य तर्जनीयुग्मं संयुक्तं सञ्चेतः पुनः ॥
अङ्गुष्ठौ च तथा सक्तौ शङ्खमुद्रा प्रकीर्तिता ।२७।
उत्तानमञ्जलिं कृत्वा अङ्गुष्ठे हे कनिष्ठयोः ॥
मूले निःक्षिप्य तु करौ संयोज्याथ प्रदर्शयेत् ।
सयोनिरिति सा ख्याता मुद्रा देवीसुतुष्टिदा ॥२८॥
सृष्टिर्दक्षिणहस्तस्य यदोर्द्धाङ्गुष्ठिका भवेत् ।

मुद्रा

सा स्यात् शिखरिणी मुद्रा ब्राह्मीलक्ष्मीप्रिया
च सा ॥ २९ ॥
अनामिके कनिष्ठे तु संयोज्य ऋजुना पुनः ।
मध्यमातर्जनीनान्तु धेनुमुद्रेव बन्धनम् ॥
सार्द्धधेनुरिति ख्याता चन्द्रमौलिविवर्द्धिनी ।३०।
करयोरङ्गुलीः सर्व्वाः सर्व्वाग्राग्रेषु संस्थिताः ॥
नियोज्यार्द्धतले चैव तदधोऽपि वियुज्य च ।
अग्रैरग्रं योजयेत्तु मुद्रा सम्मीलनी तु सा ॥३१॥
भौमभूमिसुतज्ञानामियं प्रीतिविवर्द्धिनी ।
सर्व्वाङ्गुलीस्तु संसक्ता दक्षिणस्य करस्य च ॥
कियद्भागं तथाग्रस्य तलं कुर्य्यात्तु कुक्कुवत् ।
समाख्याता कुक्कुमुद्रा बुधवार्णीप्रियाप्रिया ॥३२॥
सर्व्वाङ्गुलीनां मध्यैस्तु वामहस्तस्य चाङ्गुलीः ।
प्रसार्याङ्गुष्ठयुगलं संयोज्याग्रेण भैरव ! ॥
तदङ्गुष्ठद्वयं कार्य्यं सम्मुखं वितरेत्ततः ।
चक्रमुद्रा समाख्याता गुरुविष्णुप्रियप्रिया ॥३३॥
अङ्गुष्ठं मध्यमाश्चैव नामयित्वा करस्य च ।
दक्षिणस्यापराङ्गिस्तो योजयेदग्रतः पुनः ॥
मूलमुद्रा समाख्याता मम शुक्रगुरुप्रिया । ३४ ।
निकुञ्चीकृत्य तु करौ वामाङ्गुलिगणस्य तु ॥
अग्राणि योजयेदधो तलस्यासक्तहस्तयोः ।
अधः कृत्वा वामहस्तं मुद्रा सिंहसुखी
स्मृता ॥ ३५ ॥
इयं प्रीत्यै तु दुर्गायाः सूर्य्यपुत्रस्य चक्रिणः ।
भगमुद्रा कर्णमूले गोमुखाख्या प्रकीर्तिता ॥
मम विष्णोस्तथा राहोः सर्व्वदा प्रीति-
दायिनी । ३६ ।
सृष्टित्रयमधोक्तानं कृत्वा संयोज्य पार्श्वतः ॥
दक्षिणस्य कनिष्ठादीन् प्रसार्य्य क्रमतः पुनः ।
तथा वामकनिष्ठाभ्यामेकैकेन प्रसारयेत् ॥
अष्टौ मुद्राः समाख्याता नामतः क्रमतः शृणु ।
प्रोन्नामो ३७ नमन ३८ श्चैव विम्बं ३९ पाशु-
पतं ४० तथा ॥
गुह्यं ४१ त्यागः ४२ साधनी ४३ च तथा चैव
प्रसाधनी ४४ ।
आकुञ्च्य करशाखास्तु दक्षिणाः सा तु मुद्रिका ॥
उग्रमुद्रा समाख्याता स्वङ्गुलस्य विपर्ययात् ।४५।
इन्द्रादिलोकपालानां दश मुद्राः प्रकीर्तिताः ॥
सर्व्वेषामपि देवानां परमप्रीतिवर्द्धनाः ।
अङ्गुष्ठाग्रन्तु तर्जन्या अग्रभागेन योजयेत् ॥
आकुञ्च्य मध्यमाभ्यान्तु दक्षहस्तस्य चाङ्गुलीः ।
दर्शयेत् कुक्कुलाकारं कुक्कुलीप्रीतितुष्टिदम् ॥
सर्व्वेषामपि देवानां तथा तुष्टिकरं महत् ।४६।
अङ्गुष्ठतर्जनीमध्या अग्रभागे नियोज्य च ॥
मध्यमाश्च कनिष्ठाश्च आकुञ्च्य दक्षिणे करे ।
चित्सुखाख्या समाख्याता विश्वदेवप्रिया सदा ॥
कैनोः प्रियेयं सततं मातृणामपि तुष्टिदा ।४७।
तर्जन्यङ्गुष्ठयोरग्रभागौ संयोज्य चाङ्गुलीः ॥
अन्या आकुञ्चयेत् तिस्रः साक्षिवक्त्री प्रकीर्तिता ।
पितृणामथ साध्यानां रुद्राणां विघ्नकर्म्मणाः ॥
सर्व्वदा प्रीतिजननी अक्षिवक्त्री प्रकीर्तिता ।४८।
पादौ तलाभ्यां संयोज्य तदङ्गुष्ठद्वयं ततः ॥

मुद्रा

ऊर्द्धं संयोजयेन्नाभौ अस्योपरि तथाञ्जलिः ।
योगमुद्रा समाख्याता योगिनां तत्त्वदायिनी ॥
सर्व्वेषामपि देवानां पूजने चिन्तने तथा ।
योगमुद्रा समाख्याता तुष्टिप्रीतिकरी सदा॥४६॥
प्राञ्जलिर्नाम मुद्रा तु उर्द्धाधोभावयोजिनाम् ।
विभिद्य दर्शयेद्धस्तौ उर्द्धाधः प्रसृतौ शुभौ ॥
मेदमुद्रा समाख्याता मम विष्णोर्विधेः प्रिया।५०।
अङ्गुष्ठे वै तु निःक्षिप्य करयोरुभयोस्तले ॥
अग्रेण योजयेत् पश्चात् कनिष्ठायुगलं ततः ।
उभयोर्हस्तयोस्तान्यान्यत्तर्ज्जन्याद्यान्च योजयेत् ॥
अग्राग्रेषु पृथक्कृत्य दर्शयेत्तत् कनिष्ठिकाम् ।
मुद्रा सम्मोहनं नाम कामदुर्गारमाप्रिया ॥
सर्व्वेषामपि देवानां मोहनं प्रीतिदं स्मृतम्।५१।
आनम्य सव्यहस्तस्य मध्यमानामिके तथा ॥
तयोः पृष्ठे तु संयोज्य अङ्गुष्ठाग्रं ततः परम् ।
कनिष्ठां तर्ज्जनीञ्चैव अग्रेण योजयेत्ततः ॥
वाराहमुद्रा समाख्याता सर्व्वदेवस्य तुष्टिदा ।५२।
सर्व्वाङ्गुलीस्तु सङ्कोच्य अङ्गुष्ठमथ तर्ज्जनीम् ॥
प्रसार्य्य करयोः पश्चादङ्गुष्ठाग्रन्तु योजयेत् ।
अङ्गुष्ठाग्रेण तर्ज्जन्या अग्रेणापि च तर्ज्जनीम् ॥
यथाग्नाति प्रसार्य्यापि धनुर्मुद्रा प्रकीर्त्तिता ।५३।
सर्व्वाङ्गुलीनामग्राणि ब्राह्मतीर्थे नियोजयेत् ॥
अनामिकायाः पृष्ठे तु अङ्गुष्ठाग्रं नियोजयेत् ।
शून्यं तूणीरवत् कृत्वा तेषामन्तस्तु भैरव ! ।
तूणीरमुद्रा चाख्याता सर्व्वेषां प्रीतिवर्द्धिनी॥५४॥
मुद्रासु संस्थिता पूजा मुद्रासु परिचिन्तनम् ।
मुद्रासु संस्थिता योगा मुद्रा मोदकरास्ततः ॥
यदा यदा पूजनेषु चिन्तने ध्यानकर्म्मणि ।
यस्मादौ स्नपने वापि हस्तकृत्यं न विद्यते ।
तदा मुद्रायुतं कुर्य्यादिष्टापूर्त्ते करद्वयम् ॥
यद्यत्कर्म्मसु वैच्छस्तो हस्तो मुद्रासु च क्रमः ।
तदा मुद्रां विधायैव तत्तु कृत्वं समाचरेत् ॥
मुद्राविमुक्तहस्तन्तु क्रियते कर्म्मदैविकम् ।
कृत्वा तन्निष्फलं यस्मात्तस्माच्छुद्रान्वितो भवेत् ॥
विसर्जने तु देवानां यस्य या परिकीर्त्तिता ।
मुद्रां तां पूजनादौ तु तस्य नैव प्रयोजयेत् ॥
विसृष्टौ स्नाप्तने मुद्रां मुद्रायुक्तः समाचरेत् ।
पूजनादि समस्तञ्च कर्म्म दृष्टं विचक्षणः ॥
ततो मुद्रा परं धाम मुद्रा पुण्यप्रदायिनी ।
देवानां मोददा मुद्रा तस्मात्तां यत्नतश्चरेत् ॥
ब्राह्मीयोनिर्म्महायोनिर्योनिर्ब्राह्मी च वैष्णवी ।
मुद्रा विसर्ज्जने प्रोक्ता शिवाग्निपुरयोः सदा ॥
दुर्गायाः सर्व्वरूपेषु मुद्रा एताः प्रकीर्त्तिताः ।
योनिञ्च सम्पुटञ्चैव महायोनिस्तथैव च ॥
वर्ज्जयित्वा यस्माद्भावाद्दुःखदान्यत्र योजयेत् ।
भवेयुस्तु त्रिपञ्चाद्यदया मुद्राः समस्ततः ॥
ता यस्मात्भावाद्दामाः स्युर्मुद्रा मोदकराः पराः ।
एवं वां कथिता मुद्राः पूजने पुण्यतुष्टिदाः ॥"

इति कालिकापुराणे ६५ अध्यायः ॥

मुद्राङ्कितः, त्रि, (मुद्रया अङ्कितः ।) मुद्रया चिह्नितः । छापाकरा मोहरकरा इत्यादि भाषा । यथा,—

मुनिः

"धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरी-
सुधा-
श्लेषानन्दविवर्द्धमानहृदयो दत्ताधरध्वंसतः ।
दैत्यारिः कमलाकपोलमकरीमुद्राङ्कितोरःस्थलः
प्रीतोऽभ्यावितरेषु जन्तुषु पुनः का नाम याच्ञे-
कथा ॥"

इति प्रबोधचन्द्रोदयनाटके १ अङ्कः ॥

मुद्रालिपिः, स्त्री, (मुद्रया लिपिः ।) पञ्चधा-लिप्यन्तर्गतलिपिविशेषः । छापार अक्षर इति भाषा । यथा,—

"मुद्रालिपिः पुस्तलिपिर्लिपिर्लेखनिसम्भवा ।
गुप्तिकाधुगसम्भूता लिपयः पञ्चधा स्मृताः ।
एताभिर्लिपिभिर्याता धरित्री शुभदा हर ! ॥"

इति वाराहीतन्त्रम् ॥

अस्याः पाठ्यत्वं धार्य्यत्वञ्च यथा,—

"लेखन्या लिखितं विप्रैर्मुद्राभिरङ्कितञ्च यत् ।
शिल्पादिनिर्म्मितं यच्च पाठ्यं धार्य्यञ्च सर्व्वदा ॥"

इति खड्गमालातन्त्रम् ॥

मुद्रिका, स्त्री, (मुद्रा स्वार्थे कन् + स्त्रियां टाप् । पूर्ब्बाकारस्य ह्रस्वत्वम् । अत इत्वं च ।) स्वर्ण-रूप्यादिनिर्म्मितमुद्रा । मोहर टाका इत्यादि भाषा । यथा,—

"सौवर्णीं राजतीं ताम्रीमायसीं वा सुशो-
भिताम् ।
सलिलेन सहस्रौतां प्रक्षिपेत् तत्र मुद्रिकाम् ॥"

इति मिताक्षरायां व्यवहाराध्यायः ॥

मुद्रित, त्रि, (मुद्रा मुद्रणं अस्य जातेति । मुद्रा इतच् ।) अप्रफुल्लम् । मोदा इति भाषा । तत्पर्य्यायः । सङ्कुचितम् २ निद्राणं ३ मीलितम् ४ । इति हेमचन्द्रः ॥ मुद्राङ्कितञ्च ॥ (परित्यक्तम् । यथा, नैषधचरिते । ५ । १२ ।

"मुद्रितान्यजनसंकथनः मनु
नारदं बलिरिपुः समवादीत् ।"

"मुद्रितं परित्यक्तम् ।" इति तट्टीका ॥)

मुधा, अ, (मुह्यतीति । मुह् + बाहुलकात् का । पृषोदरादित्वात् हस्य धः ।) व्यर्थकम् । इत्यमरः ।३।४।४। (यथा, महाभारते ।१४।६७।३।

"सुधा स्नानं सुधा वृत्तं सुधा सेवा सुधा श्रमः ।
एवं यो युक्तधर्म्मः स्यात् सोऽचाल्यमनुते ॥")

मुनिः, पुं, मनुते जानाति यः । (इति मन् + "मनेरुच्च ।" उणा० ४ । १२२ । इति इन् + अत उच्च ।) मौनव्रती । इत्यर्थे । इति भरतः ॥ तत्पर्य्यायः । वाचंयमः २ । इत्यमरः ।२।७।४२। मौनी ३ व्रती ४ ऋषिः ५ प्राप्ताक्षः ६ सत्यवाक् ७ । इति जटाधरः ॥ (यथा, नैषधे ।१।१३६।

"फलेन सूनेन च वारिभूरुहां
मुनेरिवेत्थं मम यस्य वृत्तयः ॥")

तस्य लक्षणं यथा,—

"दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥"

इति श्रीभगवद्गीता ॥*॥

तस्य धर्म्मो यथा,—

मुनिः

ब्रह्मोवाच ।

"मुनिभिश्चरिता धर्म्मा उक्ता व्यास ! मया तव ।
यैर्विष्णुस्तुष्यते देवः सुखादिपरिभाविकः ॥
तर्पणेन च होमेन सन्ध्यया वन्दनेन च ।
प्राप्यते भगवान् विष्णुर्म्मोक्षकामार्थमोक्षदः ॥
धर्म्मो विष्णुर्व्रतो विष्णुः पूजा विष्णुस्तु तर्पणम् ।
होमः सन्ध्या तथा ध्यानं धारणा सकलं
हरिः ॥"

इति गारुडे २२६ अध्यायः ॥*॥

तस्याश्रमे वर्ज्जनीयानि यथा । अतिथिपूजा १ हरिणविश्वासः २ हिंसजन्तुप्राप्तता ३ यज्ञधूमः ४ मुनिसुतः ५ द्रुमसेकः ६ वल्कलः ७ हरस्य ८ । इति कविकल्पलता ॥*॥ मुनिविशेषाणां ब्रह्मणोऽङ्गविशेषादुत्पत्तिर्यथा,—

"पुलस्त्यो दक्षकर्णाच्च पुलहो वामकर्णतः ।
दक्षनेत्रात्तथात्रिश्च वामनेत्रात् क्रतुः स्वयम् ॥
अरणिर्नासिकारन्ध्रात् अङ्गिराश्च मुखाद्विधेः ।
भृगुश्च वामपार्श्वाच्च दक्षो दक्षिणपार्श्वतः ॥
छायायाः कर्द्दमो जातो नाभेः पञ्चशिखस्तथा ।
वक्षसश्चैव वोढुश्च कण्ठदेशाच्च नारदः ॥
मरीचिः स्कन्धदेशाच्च आपस्तम्बस्तथा गलात् ।
वशिष्ठो रसनादेशात् प्रचेता अधरोष्ठतः ॥
हंसश्च वामकुक्षेश्च दक्षकुक्षेर्यतिः स्वयम् ।
सृष्टिं विधातुञ्च विधिश्चकाराज्ञां सुतानपि ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे ८ अध्यायः ॥*॥

गयासुरशरीरे यज्ञार्थं ब्रह्मणा मानसात् सृष्टा मुनयो यथा,—

"ब्रह्मा सम्भृतसम्भारो मानसान्मुनिसत्तमान् ।
अग्निशर्म्माणमत्रिञ्च शौनकं भार्गवं क्रतुम् ॥
कृशमश्वं वैदकौण्डिन्यं हारीतं कश्यपं ऋषम् ।
गर्गं कौशिकवाशिष्ठौ मुनिं भार्गवमत्रयम् ॥
वृद्धं पाराशरं कण्वं माण्डव्यं मुनिकेवलम् ।
श्वेतं सुनालं दमनं सुहोत्रं कपिलेव च ॥
गौरान्वितञ्च महाबाहुं जैगीषव्यं तथैव च ।
दधिपञ्चमुखं विप्र ! ऋषभं कर्कमेव च ॥
कामाधनं गोभिलञ्च मुनिसूर्य्यं महाव्रतम् ।
जटामालिनमत्रेयं चाटुहासञ्च दारुणम् ॥
आत्रेयञ्चाप्यङ्गिरसमौपमन्यं महाव्रतम् ॥
गौकर्णञ्च गुहावासं शिखण्डिनमुमाव्रतम् ॥
सुपालकं गौतमञ्च तथा वेदशिरो व्रतम् ।
एतानन्यांश्च विप्रेन्द्रान् ब्रह्मा लोकपितामहः ।
परिकल्प्याकरोद्यागं गयासुरशरीरके ॥"

इति वायुपुराणे गयामाहात्म्यम् ॥*॥

मुनिविशेषनाम्नां व्युत्पत्तिर्यथा,—

"कल्पिकल्पान्तरेऽतीते सृष्टुः सृष्टिविधौ पुनः ।
मरीचिमिश्रैर्म्मौनिभिः सार्द्धं कण्ठाद्बभूव सः ॥
विधेर्नरदनाम्नश्च कण्ठदेशाद्बभूव सः ।
नारदस्तेन विख्यातो मुनीन्द्रस्तेन हेतुना ॥
यः पुत्रश्चेतसो धातुर्ब्बभूव मुनिपुङ्गवः ।
तेन प्रचेता इति तन्नाम चक्रे पितामहः ॥
बभूव धातुर्यः पुत्रः सहसा दक्षपार्श्वतः ।
सर्व्वकर्म्मसु दक्षश्च तेन दक्षः प्रकीर्त्तितः ॥

मुनिः

वेदेषु कहोड: ग्रन्थस्थायां वर्णते स्फुट: ।
बभूव कहोमाहाल: कहोमस्तेन कीर्तित: ॥
तेजोभेदे मरीचिश्च वेदेषु वर्णते स्फुटम् ।
जात: सद्योऽतितेजस्वी मरीचिस्तेन कीर्तित: ॥
क्रतुसंज्ञश्च यज्ञेन ज्ञानो जज्ञान्तरेऽधुना ।
ब्रह्मपुत्रोऽपि तन्नाम्ना क्रतुरित्यभिधीयते ॥
प्रधानाङ्गं सुखं धातुस्तनो जातश्च बालक: ।
इरस्तेजस्विवचनोऽङ्गिरास्तेन प्रकीर्तित: ॥
अतितेजस्विनि भृगुर्व्यवते नास्मि शौनक ! ।
जात: सद्योऽतितेजस्वी भृगुस्तेन प्रकीर्तित: ॥
वर्णीभूतश्च शिष्टश्च जात: सद्यो हि बालक: ।
अतिप्रियश्च धातुश्च वशिष्ठस्तेन कीर्तित: ॥
शोणोऽग्निवर्णश्च जात: सद्यो हि तेजसा ।
प्रज्वलन् पूर्व्वतपसा चारुणस्तेन कीर्तित: ॥
हंस आत्मा वशो यस्य योगेन योगिनो ध्रुवम् ।
बाल: परमयोगाद्धस्तेन हंस: प्रकीर्तित: ॥
सन्ततं यस्य यज्ञश्च तप:सु बालकस्य च ।
प्रकीर्तितो यतिस्तेन संयत: सर्व्वकर्म्मसु ॥
पुलस्तप:सु वेदेषु वर्णते ह स्फुटोऽपि च ।
स्फुटं तप:स्वरूपश्च पुलहस्तेन कीर्तित: ॥
पुलस्तप:समूहश्च यस्यास्ति पूर्व्वजन्मनाम् ।
तप:संघ: समूहश्च पुलस्त्यस्तेन बालक: ॥
चित्रगुप्तायां प्रकृत्यां चित्रिण्यामपि पर्व्वते ।
तयोर्भक्ति: समा यस्य तेन बालोऽचिरश्चते ॥
अटाग्न्यग्निशिखारूपा: पञ्च सन्ति च मस्तके ।
तपस्तेजोभवा यस्य स च पञ्चशिख: स्मृत: ॥
अपाम्नरतमे देशे तपस्तेनाऽन्यजन्मनि ।
अपाम्नरतमा नाम शिखीस्तेन प्रकीर्तितम् ॥
स्वयम्तप: समाप्नोति वाहयेत् प्रापयेत् परान् ।
ऊढु: समर्थस्तपसि वोढुस्तेन प्रकीर्तित: ॥
तपसस्तेजसा बालो दीप्तिमान् क्रतुतो सुने ! ।
तप:सु रोचते चित्तं रुचिस्तेन प्रकीर्तित: ॥"

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्याय: ॥

वङ्गसेनसख: । जिन: । इति मेदिनी । ने, १५ ॥ प्रियालवृक्ष: । पलाशवृक्ष: । इति हेमचन्द्र: । १ । ७६ ॥ दमनकवृक्ष: । इति राजनिर्घण्टः ॥ (स्त्री, दक्षकन्या । सा च कश्यपपत्नीनामन्यतमा । यथा, महाभारते । १।६५।१९-१२ ।
"मरीचे: कश्यप: पुत्र: कश्यपात्तु इमा: प्रजा: ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥
अदितिर्दितिर्दनु: काला दनायु: सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला मुनि: ॥"

अष्टवस्वन्तर्गतस्य आपनामकस्य वसो: पुत्रे, पुं । यथा, हरिवंशे भविष्यपर्व्वणि । ३ । ७० ।
"आपस्य पुत्रो वैतण्ड्य: श्रम: शान्तो मुनिस्तथा ।"

क्रौञ्चद्वीपस्य देशविशेष: । यथा, मत्स्यपुराणे । १२१ । ८३-८५ ।
"क्रौञ्चस्य कुशलो देशो वामनस्य मनोरुग: ।
मनोरुगात् परे चोष्णास्तृतीयोऽपि स उच्यते ॥

मुनिपु

उष्णात् परे पावनक: पावनादन्धकारक: ।
अन्धकारकदेशात्तु मुनिदेशस्तथापर: ॥"
(द्युतिमत: पुत्राणामन्यतम: । यथा, मार्कण्डेये । ५३ । २२ ।
"तथा द्युतिमत: सप्तपुत्रास्तांश्च निबोध मे ।
मुनिश्च दुन्दुभिश्चैव सप्तम: परिकीर्त्तित: ॥"
क्रतुपुत्रभेद: । यथा, महाभारते ।१।६७।४६॥
"अविचिन्तमभिव्यक्तं तथा चैवरथं मुनिम् ॥")

मुनिखर्ज्जूरिका, स्त्री, (मुनिप्रिया खर्ज्जूरिका इति मध्यपदलोपी समास: ।) खर्ज्जूरीभेद: । यथा,
"मुनिखर्ज्जूरिका त्वन्या राजेष्टा ऋतुसंमिता ॥"
इति राजनिर्घण्टः ॥

मुनिच्छद:, पुं, (मुनय: अत्रादय: सप्त तत्संख्यका: छदा: पत्राण्यस्य ।) सप्तच्छदवृक्ष: । इति राजनिर्घण्टः ॥ (स्त्री । मेधिका । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
'मेधिका मेधिनी मेधी दीपनी बहुपुत्रिका ।'
इत्यादि ।
'कुम्भिका बहुपर्णी च पीतबीजा मुनिच्छदा ।'
इत्यन्तम् ॥)

मुनिनद:, पुं, (मुनेरगस्त्यस्य प्रिय: नद: । इति मध्यपदलोपी समास: ।) वकवृक्ष: । इति रत्नमाला ॥

मुनिद्रम:, पुं, (मुनेरगस्त्यस्य प्रिय: द्रम: । इति मध्यपदलोपी समास: ।) ग्रोनाकवृक्ष: । इति रत्नमाला ॥ ग्रोनाकप्रभेद: । वकवृक्ष: । इति राजनिर्घण्टः ॥ (यथा, नैषधचरिते ।१।६६।
"मुनिद्रम: कोरकित: प्रीतिद्युति-
र्वेनेऽमुनाऽमन्यत सिंहिकासुत: ॥"
"मुनिद्रम: वकवृक्ष: ।" इति तट्टीका ॥ अस्य पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रम: ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"ग्रोनाको भूतपुष्पश्च पूतिवृक्षो मुनिद्रम: ।
दीर्घवृन्तश्च कटुको भल्लकटपटकोऽपरम् ॥"
इति वैद्यकरत्नमालायाञ्च ॥)

मुनिनिर्म्मित:, पुं, (मुनिना निर्म्मित: ।) डिण्डिश्च: । यथा, भावप्रकाशे ।
"डिण्डिश्चो रोमशफलो मुनिनिर्म्मित इत्यपि ।
डिण्डिश्चो रुचिरत्वभेदी पित्तश्लेष्मापह: स्मृत: ।
सुग्राही वातलो रूक्षो मूत्रलश्चाश्मरीहर: ॥"

मुनिपित्तलं, क्ली, (मुनीनां पित्तलमिव ।) ताम्रम् । इति त्रिकाण्डशेष: ॥

मुनिपुङ्गव:, पुं, (मुनि: पुङ्गव इव ।) मुनिश्रेष्ठ: । इत्यमरटीका ॥ (यथा, रामायणे ।१।१।१।
"तप:स्वाध्यायनिरतं तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥")

मुनिपुत्र:, पुं, (मुनीनां पुत्र इव । मुनिप्रियत्वादस्य तथात्वम् ।) दमनकवृक्ष: । इति भावप्रकाश: ॥ ऋषिसुतश्च ॥

मुनिपुत्रक:, पुं, खञ्जन: । इति त्रिकाण्डशेष: ॥ (यथा, तिथितत्त्वे कृत्यविधिप्रकरणे ।
"त्वं योगयुक्तो मुनिपुत्रकस्त्वं
अदृश्यनामेषि शिखोद्गमेन ।
संदृश्यसे प्रावृषि निर्गतायाम्
त्वं खञ्जनाख्यमयो नमस्ते ॥")

मुनिपुष्पं, क्ली, (मुनिद्रम इति । "ठाजादावूर्द्ध्वं द्वितीयादय: ।"५ । ३ । ८३ । इत्यत्र "विभाषा प्रत्ययेन पूर्व्वोत्तरपदयोर्विभाषालोपो वक्तव्य: ।" इति काशिकोक्ते: द्रम इत्यस्य लोपे मुनि: तस्य पुष्पम् ।) वकपुष्पम् ॥ (यथा, तिथितत्त्वे ।
"विहाय सर्व्वपुष्पाणि मुनिपुष्पेण केशवम् ।
कार्त्तिके योऽर्च्चयेद्भक्त्या वाजिमेधफलं लभेत् ॥"
वकवृक्षे, पुं । तत्पर्य्यायो यथा,—
"अथागस्त्यो वङ्गसेनो मुनिपुष्पो मुनिद्रम: ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मुनिपुष्पकं, क्ली, (मुनिपुष्प + संज्ञायां कन् ।) वकपुष्पम् । यथा, योगिनीतन्त्रे ।
"बिल्वपत्रञ्च माध्यञ्च तमालामलकीदलम् ।
ककारं तुलसीञ्चैव पञ्चञ्च मुनिपुष्पकम् ।
एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिकात्मकम् ॥"
इत्येकादशीतत्त्वम् ॥

मुनिपूग:, पुं, (मुनिप्रिय: पूग: ।) गुवाकविशेष: । तत्पर्य्यायः । रामपूग: २ कामीन: ३ सुरेवट: ४ । इति त्रिकाण्डशेष: ॥

मुनिभक्षं, क्ली, (मुनीनां भक्षणम् ।) आगस्त्य: । हरीतकी । लङ्घनम् । इति मेदिनी कोषे, १६ ॥

मुनिसुव्रत:, पुं, (मुनिषु सुव्रत: ।) तीर्थङ्कर् । स च बुद्धविशेष: । इति हेमचन्द्र: । १ । ५१ ॥

मुनिस्थानं, क्ली, (मुनीनां स्थानम् ।) आश्रम: । इति हेमचन्द्र: । ४ । ६७ ॥

मुनीन्द्र:, पुं, (मुनीनां मननशीलानां योगिनामिन्द्र: श्रेष्ठ: ।) बुद्ध: । इत्यमर: ।१ । १ । १४ ॥ ऋषिश्रेष्ठश्च ॥ (यथा, कथासरित्सागरे ।७०।३०६।
"पतत्स्वेव तस्माच्च प्राणिभ्यां स समग्रहीत् ।
मुनीन्द्र: प्रकटीभूय समाश्वास्य जगाद च ॥"
दानवभेद: । यथा, हरिवंशे । २५५ । ५ ।
"वृषपर्व्वा विरूपाक्षो मुनीन्द्रश्चन्द्रलोचन: ।")

मुनृच उ गत्याम् । इति कविकल्पद्रम: ॥ (भ्वा०-पर०-सक०-सेट् ।) पञ्चमस्वरो । ओष्ठ्यवर्ग-योगादि: । नोपध: । उ मुनित्वा मुक्त्वा । इति दुर्गादास: ॥

मुमुक्षु:, पुं,(मोक्तुमिच्छतीति । मुच् + सन् + उ:।) मुक्तिमिच्छु: ॥ (यथा, श्रीमद्भगवद्गीतायाम् । ४ । १५ ।
"एवं ज्ञात्वा कृतं कर्म्म पूर्व्वैरपि मुमुक्षुभि: ।
कुरु कर्म्मैव तस्मात्त्वं पूर्व्वै: पूर्व्वतरं कृतम् ॥")
तत्पर्य्याय: । श्रमण: २ यति: ३ वाचंयम: ४ व्रती ५ साधु: ६ अनगार: ७ ऋषि: ८ मुनि: ९ निर्ग्रन्थ: १० भिक्षु: ११ । इति हेमचन्द्र: । १ । ७५ ॥ अथ मुमुक्षुलक्षणम् । मनु: ।
"इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्यते ।
निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते ॥

प्रवृत्तं कर्म संसेव्य देवानामेति साष्टिताम्।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥"
कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं तदेव कर्म्म कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वात् निवृत्तमुच्यते। साष्टितां समानगतितां ऋषेर्गौत्यर्थत्वात् पञ्चभूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः। विष्णुपुराणे च ।६।७।२८। विधिरुक्तफलदा काम्या निष्कामाणान्तु मुक्तिदा। भगवद्गीतासु।
"युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥"
युक्तः ईश्वराय कर्म्माणि न फलाय इत्येवं समाहितः। फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः। शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धेः ज्ञानप्राप्तेः सर्व्वकर्म्मसंन्यासः ज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्तद्विपर्य्ययः। कामकारेण कामप्रेरितत्वया कामतः प्रवृत्तेरिति यावत्। फले सक्तः सन् फलायेदं कर्म्म करोमीत्येवं फले सक्तो नितरां बद्धं प्राप्नोति। तथा च अर्জ্জुनं प्रति भगवद्वाक्यम्।
"मयि सर्व्वाणि कर्म्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥"
संन्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या ईश्वराय भृत्यवत् करोमि इत्यनया बुद्ध्या निराशीरित्युक्तकामसङ्कल्पः। अतएव निर्म्ममः ममतारहितः। विगतज्वरः विगतसन्तापः। यत्तमाह स एव।
"यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत् तपस्यसि कौन्तेय! तत् कुरुष्व मदर्पणम् ॥"
विष्णुपुराणम्।
"कर्म्मोद्यसङ्कल्पितसत्फलानि
संन्यस्य विष्णौ परमात्मरूपे।
अवाप्य तां कर्म्ममहोमनन्ते
तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥"
कर्म्ममहीं भारतवर्षरूपाम्। एकादशस्कन्धे।
"वेदोक्तमेव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥"
वेदोक्तमेव कुर्व्वाणो न तु निषिद्धम्। ननु कर्म्मणि क्रियमाणे तस्मिन्नासक्तिसत्त्वत्फलं स्यादेव न तु नैष्कर्म्म्यरूपा फलसिद्धिरत एवाह निःसङ्गोऽनभिनिवेशवान् ईश्वरेऽर्पितुं न तु फलोद्देशेन। अथ फलस्य श्रुतत्वात् कर्म्मणि सति फलं भवत्येवेत्याह रोचनार्थेति कर्म्मणि रुच्युत्पादनार्था। अतएव तत्रैव।
"फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्।
श्रेयोविमूढचेता प्रोक्ता यथा भैषज्यरोचनम् ॥
उत्पत्त्यैव हि कामेषु प्राणिषु स्वजनेषु च।
आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु ॥
न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि।
कथं युञ्जात् पुनस्तेषु तांस्तमो विशतो बुधः ॥

एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः।
फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि ॥"
इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्म्मुखानां नृणां मोक्षविवक्षया अवान्तरकर्म्मफलैः कर्म्मसु रुच्युत्पादनमात्रं यथा, भैषज्ये औषधे रुच्युत्पादनम्। यथा,—
"पिब निम्बं प्रदास्यामि खलु ते खण्डगुडुकान्।
पित्तेवसक्तः पिबति न फलं तावदेव तु ॥"
तत्त्यागदर्शनस्य न खलु खण्डादिलाभ एव प्रयोजनं किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते। ननु कर्म्मकाण्डे मोक्षस्य नामापि न श्रूयते कथमेवं आख्यायते यथाश्रुतस्यैव घटनात् इत्याह उत्पत्त्येति द्वाभ्याम्। उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु स्वजनेषु पुत्रदारादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु आसक्तान् स्वार्थं परमसुखमविदुषः अजानतः अतो न तान् प्रलोभूतान् बुधो वेदो यद्बोधयति तदेव श्रेयः इति विश्वसितान् इत्यर्थः। तान् एवम्भूतान् वृजिनाध्वनि कामवर्त्मनि देवादियोनौ भ्राम्यतः ततः पुनस्तमोभूतस्थावरादियोनिं विशत इति। पशुकाम इति च सुखपुत्रादिकाम इति च कथं पुनस्तेष्वेव कामेषु अयं बुधो वेदो युञ्जात् प्रवर्त्तयेत्। तथा सत्यनार्षः स्यात् इति भावः। कथं नर्हि कर्म्ममीमांसकाः फलपरतां वदन्ति तत्राह। एवमिति अवसितं वेदस्याभिप्रायं अविज्ञाय कुसुमितामवान्तरफलरोचनया रमणीयां परमफलश्रुतिं वदन्ति कुतस्तं कुबुद्धयस्तत्राह हि यस्मात् वेदज्ञा यासादयः न तथा वदन्ति इति। अतएव निष्कामकर्म्मणा आत्मज्ञानार्थमुक्ता यथा,—
"अयमेव क्रियायोगो ज्ञानयोगस्य साधकः।
कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते ॥"
सोऽपि दृश्यतेऽयद्वारा न साक्षात्। तथा च।
"ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्म्मणः ॥"
तथा स्मृतिः।
"तमेवं वेदार्थवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्य्येण तपसा श्रद्धया दानेन यज्ञेनानशनेन चेति।"
तं आत्मतत्त्वसाक्षात्कारं अतएव यज्ञादीनां ज्ञानप्रतिबन्धापधार्य्य निष्कामेषु कर्म्मसु प्रवर्त्तते। पण्डितेनापि मूर्खः काम्ये कर्म्मणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कन्धे।
"स्वयं निःश्रेयसं विद्वान्न वक्त्यज्ञाय कर्म हि।
न राति रोगिणोऽपथ्यं वाञ्छतेऽपि भिषक्तमः ॥"
राति ददाति इति समयप्रदीपे श्रीदत्तः ॥
"दासीदासमलङ्कारमन्नं षड्रससम्भवम्।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्व्वकालिकम् ॥
यदृद्यदिष्टतमं लोके यच्चाप्यतिप्रियं गृहे शुचि।
तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः ॥"

इदं दानं ब्राह्मणसम्प्रदानकमेव विष्णुप्रीतिसुहृद्यं एवं सर्व्वत्र दाने। विष्णुप्रीतेः सामान्यतः श्रुतत्वात्। अथ विष्णुप्रीतौ देवताधिकरणन्यायविरोध इति चेन्न स्वर्गवदधिकारिविशेषत्वेन तत्तत्त्वप्रसाधनात् इत्याहुः। ब्राह्मणसम्प्रदानकत्वे किं मानमिति चेत् वामनपुराणे तत्तन्मासभेदेन तत्तद्दानमभिधाय।
"विष्णुप्रीत्यर्थमेतानि देयानि ब्राह्मणेष्वथ।
देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये ॥"
इत्यभिधाय दासीदासमित्यादिवचनद्वयाभिधानात्। तथा च विष्णुधर्म्मोत्तराग्निपुराणयोः।
"यत्र यत्र भवेत् प्रीतिर्विष्णवे मधुहन्तृने।
तत्तदभ्यर्चनसुहृद्यं विप्रेभ्यः प्रतिपादयेत् ॥"
विष्णुधर्म्मोत्तरतृतीयकाण्डे तु विष्णुसंप्रदानकमेव दानं यथा,—
'विष्णोः शुक्लप्रदानेन वारुणं लोकमाप्नुयात्।' इत्यादिना।
"क्षीरपक्वसंयुक्तान् कलसान् सुविभूषितान्।
दत्त्वा वै देवदेवाय वाजिमेधफलं लभेत् ॥"
इत्यन्तेन तत्तत् फलं तत्तद्दानमभिधायोक्तम्।
"अकामः सात्त्विको लोको यत्किञ्चिद्दीयते परेण।
तेनैव स्थानमाप्नोति यत्र गत्वा न शोचति ॥
धर्म्मबाणिजिका मूढाः फलकामा नराधमाः।
अर्चयन्ति जगन्नाथं ते कामागाभुवन्युत ॥
अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ॥"
तथा।
"पद्भ्यां प्रतीच्छते देवः सकामेन निवेदितम्।
मूर्द्ध्ना प्रतीच्छते दत्तमकामेन द्विजोत्तमाः ॥"
उक्तवामनपुराणवचने सार्व्वकालिकमित्यनेन मलमासादावपि विष्णुप्रीत्यर्थं देयमिति। इति मलमासतत्त्वम् ॥
(तत्र समुच्चयानुदयनानि व्याख्यास्यामः। तत्र लोकदोषदर्शिनो समुच्चोरादित एवाचार्य्याभिगमनं तस्योपदेशानुष्ठानम्। अनेरवोपचर्य्या धर्म्मशास्त्रानुगमनं तदर्थावबोधरक्षिनावलम्बनत्व यथोक्ताः क्रियाः सतामुपासनमसतां परिवर्জ্জनं न सङ्गतिर्दुর্জ্জनैन सख्यं सर्व्वभूतहितमपरुषमनतिकाले परीक्ष्य वचनं सर्व्वप्राणिषु आत्मनीवावेक्षा सर्व्वासामक्षरक्षमसङ्कल्पनमप्रार्थना अनभिभाषणञ्च स्त्रीणां सर्व्वपरिग्रहत्यागः कौपीनं प्रच्छादनार्थं धातुरागनिवसनं कन्थासीवनहेतोः स्रुची पिप्पलकं ग्रीवाधारणहेतोः जलकुल्लिका दण्डधारणं भक्ष्याचार्य्यार्थपात्रं प्राणधारणार्थमेककालमश्नीयो यथोपपन्न एवाभ्यवहारः। श्रमापनयनार्थं ग्रीष्मे शुष्कपर्णशय्यान्तरणोपधानं ध्यानहेतोः कायनिबन्धनं वनेष्वनिकेतवास तत्कालनिद्रालस्यादिकर्म्मवर्জ্জनं इन्द्रियार्थेष्वनुरागोपतापनिमित्तः सुप्रक्षितगतप्रेक्षितभाषितविहारप्रत्यङ्गचेष्टादिकेष्वारम्भेषु स्मृतिपूर्व्विका प्रवृत्तिः सत्कारस्तुतिगर्हावमानक्षमत्वं क्षुत्पिपासायासश्रम-

मुमूर्षुः

ग्रीनोष्णवातवर्षासुखदुःखसंसर्गसहत्वं शोकदैन्यदर्पमदमानलोभरागेर्ष्याभयक्रोधादिभिरसञ्चलनं अहङ्कारादिदृष्टसर्गसंज्ञा लोकपुरुषयोः स्वर्गादिसामान्यावेत्तव्यं कार्यकालात्ययभयं योगारम्भे सततमनिर्वेदः सत्त्वोत्साहोऽपवर्गाय धीधृतिस्मृतिबलाधानं नियमनमिन्द्रियाणां चेतसि चेतस आत्मन्यात्मनश्च धातुभेदेन प्रतीराशयसंख्यानं अभीक्ष्णं सर्वं कारणवदुःखमन्यमनित्यमित्यभ्युपगमः। सर्वप्रवृत्तिषु दुःखसंज्ञा सर्वसंन्यासे सुखमित्यभिनिवेशः एषमार्गोऽपवर्गाय अतोऽन्यथा बध्यते इत्युदयनानि आख्यातानि॥ इति चरके प्रतीरस्थाने पञ्चमेऽध्याये॥)

मुमुचानः, पुं, (मुच्यति जलं इति। मुच्+"मुचिमुधिभ्यां सनुच्च।" उणा०। २। ६१। इति आनच्। कित् सन्वच्च। मेघः। इति संक्षिप्तसारोणादिवृत्तिः॥ (मुक्तः। यथा, सन्यासमन्त्रे। "दग्धादिव मुमुचानः स्विन्नः स्नातो मलादिव।" "क्लिन्नो घर्मार्क्तो जनो समुचानो मुक्तोभवति।" इति तत्र गुणविष्णुटीका॥)

मुमूर्षुः त्रि, (मर्तुमिच्छुः। मृ+सन्+उः।) आसन्नमृत्युः। (यथा श्रीमद्भागवते। ७।८।११। "यत्तं त्वं मर्त्यकामोऽसियोऽतिमात्रं विकत्थसे। मुमूर्षूणां हि मन्दात्मन्! ननु स्युर्विक्लवा गिरः॥")

अथ मुमूर्षुकृत्यानि। हारीतः।

'भूदानेन तु भुक्तेन उदरस्थेन यो मृतः। स वै खरत्वमश्वत्वं भूदत्वाधिगच्छति॥'

भूदानं भूदस्वामिकान्नम्। तद्भुक्तमपि भोजनकाले तद्गृहावस्थितं यत् तदपि भूदानम्। तदाह अङ्गिराः।

'भूदत्तेनापि विप्रेण क्षीरं वा यदि वा दधि। निष्क्रयेण न भोक्तव्यं भूदानं तदपि स्मृतम्॥'

अपिशब्दात् साक्षात् तद्दत्तघृततक्रादि न तु तद्दत्तकपर्दकादिना क्रीतमपि। स्वगृहागते पुनरङ्गिराः।

'यथायतस्तनो ह्यापः शुद्धिं यान्ति नदीं गताः। भूदाङ्गिप्रगृहेष्वन्नं प्रविष्टमु सदा शुचि॥'

प्रविष्टं सत्तापादकप्रतिग्रहादिना इति शेषः। अतएव पराशरः।

'तावद्भवति भूदानं यावन्न स्पृशति द्विजः। द्विजातिकरसंस्पृष्टं सर्वं तद्विरुध्यते॥'

स्पृशति प्रतिगृह्णाति इति कल्पतरुः॥ तच्च संप्रोक्ष्य याज्ञमाह विष्णुपुराणम्।

'संप्रोक्षयित्वा मन्त्रैर्याच्छूद्रान्नं गृहमागतम्।'

तच्च पात्रान्तरे याज्ञमाह अङ्गिराः।

'स्वपात्रे यस्तु विन्यस्तं भूदो यच्छति निश्चयः। यात्रान्तरगतं यात्रं दुग्धं स्वगृहमागतम्॥'

एतेन स्वगृहमागतस्यैव शुद्धत्वम्। तद्गृहगतस्य भूदानदोषभागित्वं प्रतीयते। तत्रैतादृगपि मुमूर्षुणा सर्वथा भूदानं न भोक्तव्यम्॥

मुमूर्षुः

पूजारत्नाकरे।

'प्रयागमथुरा यत्र तत्र सन्निहितो हरिः। तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदम्॥'

लिङ्गपुराणे।

'प्रयागसमीपे तु क्रोशमात्रं समन्ततः। कौकटेऽपि मृतो याति वैकुण्ठभवनं नरः॥' कीकटो मगधः॥ * ॥ वेणायास्ते व्यासः।

'तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्। स निर्भर्त्स्य यमं पापी लीलयैव हरिं व्रजेत्॥ प्रयागकाले यस्यास्ये दीयते तुलसीदलम्। निर्व्याजं याति पक्षीन्द्र! पापकोटियुतोऽपि सः॥'

कूर्मपुराणम्।

'गङ्गायाश्च जले मोक्षो वाराणस्यां जले स्थले। जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे॥'

स्कान्दे।

'गङ्गायां त्यजतः प्राणान् कथयामि वरानने!। कर्णे तत् परमं ब्रह्म ददामि मामकं पदम्॥'

तथा।

'तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते। अत्र दानं जपो होमो गङ्गायां नात्र संशयः॥ अत्रस्थास्त्रिदिवं यान्ति ये मृतास्तेऽपुनर्भवाः॥'

गव्यूतिः क्रोशयुगम्। तीर्थचिन्तामणौ ब्रह्मपुराणम्।

'अत्र दूरे समीपे च सप्तधं योजनद्वयम्। गङ्गायां मरणेनेह नात्र कार्या विचारणा॥'*॥

एवं गङ्गादिमरणेन प्राप्तस्वर्गलोकस्याप्यौर्ध्वदेहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्यत्वात्। तथा च श्रीमद्भागवते।

'कृष्ण एवं भगवति मनोवाक्दृष्टिवृत्तिभिः। आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत्॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये॥ तस्य निर्हरणादीनि संपरेतस्य भार्गव!। युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोऽभवत्॥'

कृष्णे आत्मनि परमात्मनि आत्मानं स्वीयात्मानं निवेश्य एकीकृत्य स भीष्मः उपारमत् मुक्तिं गतवान्। 'निष्कले निरुपाधौ ब्रह्मणि संपद्यमानं मिलितं आज्ञाय आलक्ष्य तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक् परेतस्य मृतस्यापि। भार्गवेति शौनकस्य सम्बोधनम्। एवञ्च एतेषामपि तत्तत्कर्म्मणि तत्तद्वचनोपात्तप्रेतपदस्य पिण्डपदस्य च मन्त्रादिषु यथायथं वाचनिकत्वात् प्रयोगः सङ्गच्छते।

'आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत्। तदभावे च गौरेका नरकोद्धरणाय वै॥ तदा यदि न मुञ्चेति दातुं वैतरणीञ्च गाम्। मुञ्चोच्चरेत् तदा दत्त्वा श्रेयो ह्यानृण्यमेव च॥'

पूर्ववद्धेमगङ्गादिना।

अत्र मृतस्य चेति श्रवणात् एकादशाद्यहेऽपि वैतरणीदानाचारः। वचनञ्चेदं।

मुरला

'मार्गे प्रवसतो मित्रं भार्या मित्रं गृहे सतः। आतुरस्य भिषङ्मित्रं दानं मित्रं मरिष्यतः॥"

वराहपुराणे।

"अतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः। पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः॥ गोभूतिलहिरण्यादि दत्तमक्षयतामियात्॥" निरवकाशत्वादत्र मलमासादिदोषो नास्ति मृतकमपि न। तथा च शुद्धितत्त्वाकरे हरः।

"मृत्युकाले लिखं सर्वं मृतकं परिकीर्त्तितम्। आपद्गतस्य सर्वस्य मृतकेऽपि न मृतकम्॥"

इति शुद्धितत्त्वम्॥

मुर, ग्र वेष्टने। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) पवर्गद्वितीयादिः। ग्र मुरति इत्यं लता। मोरिता। इति दुर्गादासः॥

मुरं क्ली, (म्रियते इति। मृ+अच्चापीति भावे कः।) वेष्टनम्। इत्यमरटीकायां मथुरेशः॥

मुरः, पुं, (मुरति वेष्टतेऽसौ। मुर+इगुपधत्वात् कप्रत्ययेऽपि कः।) दैत्यविशेषः। इति मेदिनी। रे, ७७॥ यं हत्वा विष्णुर्मुरारिनामाभूत्॥ (यथा, श्रीमद्भागवते। २। ३। ११।

"ग्रम्बरं हिविदं बाणं मुरं बल्वलमेव च। अन्यांश्च दन्तवक्त्रादीनवधीत् कांश्च घातयत्॥")

मुरगण्डः, पुं, (मुरं वेष्टनमिव गण्डति रुजति अनेन। गण्ड+अच्।) मरण्डः। इति जटाधरः। वर्णक इति भाषा॥

मुरजः, पुं, (मुरात् संवेष्टनात् जायतेऽसौ। मुर+जन+डः।) गदङ्गः। इत्यमरः। १। ७। ५॥ (यथा, रामायणे। २। ३६। ४१।

"मुरजपणवभेघघोषवद्-
दधरथवेश्म बभूव यत् पुरा।
विलपितपरिदेवनाकुलं
व्यसनगतं तदभूत् सुदुःखितम्॥")

मुरजफलः, पुं, (मुरजवत् फलमस्य।) पनसवृक्षः। इति त्रिकाण्डशेषः॥

मुरण्डः, पुं, (मुरेण वेष्टनेन अण्ड इव गोलाकृतिरिव। प्रकन्धादित्वादकारस्य परुरूपम्।) लम्बकदेशः। तद्देशस्थे, पुं भूम्नि। इति हेमचन्द्रः। ४। २७॥

मुरन्दला, स्त्री, (मुरं वेष्टनं सेतुं दलति भिनत्ति। दल्+अच्+स्त्रियां टाप्।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥

मुरमर्दनः, पुं, (मुरं तन्नामानमसुरं मृद्नाति चूर्णीकरोतीति। मृद्+ल्युः।) विष्णुः। इति पुराणम्॥

मुररिपुः, पुं, (मुरस्य रिपुः।) विष्णुः। इति शब्दरत्नावली॥ (यथा, छन्दोमञ्जर्याम्। २। ३।

"त्वरितगतिर्जयुवतिस्तरणिसुता विपिनगता।
मुररिपुणा रतिगुरुणा सहमिलिता प्रमदमिता॥")

मुरला, स्त्री, (मुरं वेष्टनं लाति। ला+कः।) नर्म्मदानदी। इति त्रिकाण्डशेषः॥ (यथा, उत्तररामचरिते। २। १॥ ततः प्रविशति नदीद्वयं

नमसा सुरला च । नमसा । सखि सुरले ! किमसि मन्मान्नैव । केरलदेशख्या काचिन्नदी । यथा च । रघुवंशे । ४ । ५५ ।

"सुरलामारुतोद्धूतमगमत् केतकं रजः ।
तदूर्योधवारवाणानामयत्नपटवासताम् ॥"

"सुरला नाम केरलदेशेषु काचिन्नदी ।" इति तट्टीकायां मल्लिनाथः ॥)

सुरली, स्त्री, (सुरं अङ्गुलिवेष्टनं लाति प्राप्नोतीति ला + कः + स्त्रियां ङीष् ।) स्वनामख्यातसुषिरवाद्यम् । तत्पर्य्यायः । वंशी २ वंशिका ३ वंशनालिका ४ सानेयिका ५ सानेयी ६ मानिका ७ सुरलासिका ८ । औषधचतुष्टयं सानायि । इति शब्दरत्नावली ॥ (यथा, राधातन्त्रे । २३ ।

"वादयन् सुरलीं कृष्णः प्रहृष्टं वेणुं तथापरम् ।
कात्यायनीं नमस्कृत्य हरिः पद्मदलेक्षणः ॥")

सुरलीधरः, पुं, (धृ + अच् । सुरल्याः धरः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, तन्त्रे ।

"वैकुण्ठदक्षिणे भागे गोलोकं सर्व्वमोहनम् ।
तत्रैव राधिका देवी द्विभुजो सुरलीधरः ॥")

सुरहा, [न्] पुं, (सुरं हन्तीति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

सुरा, स्त्री, (सुरति मोहयति । सुर + इगुपधत्वात् कः टाप् च ।) स्वनामख्यातगन्धद्रव्यम् । (यथा, गरुडपुराणे । १६० ।

"तथा छिन्ना हरेत् पीता सौवर्च्चलसुनासुरा ।"

तत्पर्य्यायः । तालपर्णी २ दैत्या ३ गन्धकुटी ४ गन्धिनी ५ । इत्यमरः । २ । ७ । १२३ ॥ (तथास्याः पर्य्यायान्तरं गुणाश्च ।

"सुरा गन्धकटी दैत्या सुरभिः गन्धपत्रिका ।
सुरा तिक्ता हिमा स्वादी लघ्वी पित्तानिलापहा ।
ज्वरारुग्भूतरक्षोघ्नी कृमिकासविनाशिनी ।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥ तस्या लक्षणं यथा । सुरा पीता वरा प्रोक्ता । इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥) अस्या अनुलेपनगुणाः । अलक्ष्मीरक्षोज्वरनाशित्वम् । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ पुराणग्रन्थे दृष्टौ ॥

मुरारिः, पुं, (पुरस्यारिः ।) श्रीकृष्णः । अस्य व्युत्पत्तिर्यथा,—

"सुरः क्षेपे च सन्तापे कर्म्मभोगे च कर्म्मिणाम् ।
दैत्यभेदेऽपरिक्लेशां मुरारिस्तेन कीर्त्तितः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥ अस्य स्वरूपं यथा,—

श्रीनारद उवाच ।

"कोऽसौ मुरारिर्देवर्षे ! देवो यक्षो गुरुः किं नरः ।
दैत्यो वा राक्षसो वापि पार्थिवो वा तदुच्यताम् ॥"

पुलस्त्य उवाच ।

"योऽसौ रजःसत्त्वमायागुणवांश्च तमोमयः ।
निर्गुणः सर्व्वगो व्यापी मुरारिर्मधुसूदनः ॥"

श्रीनारद उवाच ।

"योऽसौ मुर इति ख्यातः कस्य पुत्रश्च गीयते ।
कथञ्च निहतः संख्ये विष्णुना तद्वदस्व मे ॥"

पुलस्त्य उवाच ।

"शृणुष्व कथयिष्यामि मुरासुरनिबर्हणम् ।
विचित्रमिदमाख्यानं पुण्यं पापप्रणाशनम् ॥
काश्यपस्यौरसः पुत्रो मुरो नाम महाबलः ।
स दृप्तो रणे शक्रं दितिपुत्रोऽसुरोत्तमः ॥
ततः स मरणाद् भीतरूपा वर्षगणान् बहून् ।
आराधयामास विभुं ब्रह्माणमपराजितम् ॥
ततोऽस्य तुष्टो वरदः प्राह वत्स ! वरं वृणु ।
स च वव्रे तदा देवो वरमेनं पितामहात् ॥
यं यं करतलेनाहं स्पृशेयं समरे विभो ! ।
स स मद्धस्तसंस्पृष्टस्मरोऽपि स्त्रियतां व्रज ! ॥
बाढ़मुक्त्वा स भगवान् ब्रह्मा लोकपितामहः ।
ततोऽभ्यगान्महातेजा सुरः सुरगिरिं बली ।
जगाम धर्म्मराजानं विजेतुं दण्डपाणिनम् ॥"

सुर उवाच ।

"यम ! प्रजासंयमनान्निवृत्तिं कर्त्तुमर्हसि ।
नो चेत्तवाद्य छिन्धाहं मूर्द्धानं पातये भुवि ॥
तमाह धर्म्मराड्वाक्यं यदि मां संयमेद्भवान् ।
गोपितासि पुरा सत्यं करिष्ये वचनं तव ॥
सुरस्तमाह भवतः कः संयन्ता वदस्व माम् ।
अहं तच्च पराजित्य वारयामि न संशयः ॥
यमस्तं प्राह मां विष्णुर्दैवचक्रगदाधरः ।
श्वेतद्वीपनिवासी यः स मां संयमतेऽव्ययः ॥
इत्येव मुक्तो वचनं दुरब्धिमगमन्मुरः ॥
तमागतं प्राह मुने ! मधुघ्नः
प्राप्तोऽसि केनासुर ! कारणेन ।
स प्राह युद्धं सह वै त्वयाद्य
तं प्राह भूयः सुरशत्रुहन्ता ॥
यदीह मां योद्धुमुपागतोऽसि
तन् कम्पसे ते हृदयं किमर्थम् ।
ज्वरातुरस्येव मुहुर्मुहुर्च्चै
र्नम्रेव योनस्य सह कातरेण ॥
इत्येवमुक्तो मधुसूदनेन
सुरस्तदा स्वे हृदये सहस्रम् ।
कथं तु कर्म्मेति मुहुस्तदोक्तो
निपातयामास विपन्नबुद्धिः ॥
हरिश्च चक्रं प्रहितं लाघवेन
समोच तस्य शिरस्तु शत्रोः ।
चिच्छेद देवात्तु गतं यथाभवत्
दैत्यं प्रणंसन्ति च पद्मनाभम् ।
ततः प्रसिद्धं ससृजे जगाम
मुरारिरित्येव हरिर्महात्मा ॥"

इति वामने ५७ । ५८ अध्यायौ ॥ * ॥

अनर्घराघवमन्यकर्त्तृकं । यथा । 'अस्ति मौद्गलगोत्रसम्भूतस्य महाकवेर्भट्टश्रीवर्द्धमानात्मजस्य तन्तुमनोहृदयनन्दनस्य मुरारिनामधेयस्य कवेः कृतिरनर्घराघवं नाम नाटकं तत्प्रयुञ्जानाः सामाजिकानुपाख्यन्ते ।' इति तत्कृतनाटकगद्यम् ॥

मुच् वा मोक्षे । उच्छाये । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) पयर्गोषादिः । इत्वी । तेन क्विपि राज्ञोपः इति कुलो मुरौ मुरः । आ मूर्च्छितं मूर्त्तं तेन । मोहो ज्ञानरहितोभावः । उच्छ्रायो वृद्धिः । मूर्च्छति रोगी । मुमूर्च्छ संख्यं रामस्य समानयसने छरावति रघुः । इति दुर्गादासः ॥

मुर्भिणी, स्त्री, अङ्गारधानिका । इति शब्दचन्द्रिका ॥

मुर्मुरः, पुं, तुषाग्निः ॥ (यथा माघे । ६ । ६ ।

"मरकृतास्थनमुर्मुरचूर्णनां
दधुरिवास्त्रवणस्य रजःकणाः ।
निपतिताः परितः पथिकव्रजा-
नुपरि ते परितेपुरतो भृशम् ॥")

मन्मथः । रविवाजिः । इति मेदिनी । रे, २०५ ॥ (स्त्रियां टाप् । नदीभेदः । यथा, महाभारते । ६ । २०१ । २५ ।

"भारती सुप्रयोगा च कावेरी सुर्मुरा तथा ।
तुङ्गवेणा कृष्णवेणा कपिला प्रोष्ण एव च ॥")

मुर्व्व ई नहे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । निष्ठायामनिट् ।) आद्यः पञ्चमस्वरी । मूः मुरौ सुरः । नह्यो बन्धनम् । ई मूर्णः । इति दुर्गादासः ॥

मुल क रोपणे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् । अस्यार्थे भ्वा०-उभ०-अक०-सेट् ।) रोपणं आरोपणम् । क मोलयति वृक्षं लोकः । गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्म इति व्याख्याति । इति दुर्गादासः ॥

मुशटी, स्त्री, (मुष + अटन् । पृषोदरादित्वात् साधुः ।) सितकक्कुः । इति हेमचन्द्रः ॥

मुशल(य)लिका, स्त्री, (मुश + "वृषादिभ्यश्चित्" उणा० १।१०८। इति कलच्चित् स्यात् । टाप् । ततः संज्ञायां कन् । अकारस्येत्वम् ।) पक्षी । तालमूली । तत्पर्य्यायः सुवहा २ तालपत्रिका ३ गोधापदी ४ हेमपुष्पी ५ भूतालौ ६ दीर्घकन्दिका ७ सुषली ८ तालिका ९ तालमूलिका १० । इति शब्दरत्नावली ॥ अग्नौम्नी ११ । इति जटाधरः ॥ अस्या गुणाः । मधुरत्वम् । शीतत्वम् । दृष्यत्वम् । पुष्टिबलप्रदत्वम् । पित्तिश्लेष्मत्वम् । कफहत्वम् । पित्तदाहश्रमहरत्वञ्च ।

"मुशली च द्विधा प्रोक्ता श्वेता चापर-
संज्ञिका ।
श्वेता स्वल्पगुणोपेता अपरा च रसायनी ॥"

इति राजनिर्घण्टः ॥

"तालमूली तु विदङ्गिर्म्मुषली परिकीर्त्तिता ।
मुषली मधुरा वृष्या वीर्य्योष्णा कृमिनाशनी गुरुः ।
तिक्ता रसायनी हन्ति गुदवात्यनिलं तथा ॥"

इति भावप्रकाशः ॥

मुष वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) मोषति । इति दुर्गादासः ॥

मुष ग स्तुतौ । इति कविकल्पद्रुमः ॥ (क्रया०-पर०-सक०-सेट् ।) ग मुष्णाति । इति दुर्गादासः ॥

मुष्कक:

सुष् य दर् छिदि । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) छेद इह खण्डनम् । य सुष्यति विपक्षं चतुर: । दर् असुषत् अमोषीत् अक्षात् पुषादित्वान्नित्यं ड इत्यन्ये । इति दुर्गादास: ॥

सुषल:, पुं, क्ली, (मोषति सुष्यतेऽनेन वेति । सुष् + "इषादिभ्यश्चित् ।" उणा० १ । १०८ । इति कलच्चित् स्यात् ।) अयोऽग्नम् । इत्यमरटीकायां भरत: ॥ इत्यमध्योऽपि ॥ (यथा, मार्कण्डेये । ११६ । १८ ।

"सुनन्दं नाम सुषलं खड्गं यन्निर्मितं पुरा ।
तत्प्रहार च दुष्टात्मा तेन हन्ति रणे रिपून् ॥"

विश्वामित्रसुत: । यथा, महाभारते । १३ । ४ । ५२ ।

"बाहुलिर्मुषलश्चैव वचोग्रीवश्चथैव च ॥"

(तालव्यमध्योऽप्ययम् । "सुष् खण्डने सुषल: ।" उणा० १ । १०८ । इत्यज्वोज्ज्वलदत्तवृत्ति: ॥)

सुषली, स्त्री. (सुष्यत इति । सुष् + कल: ङीष् ।) नासनलिका । गृहगोधिका । इति शब्दरत्नावली ॥

सुषल्य:, त्रि, (सुषलमर्हतीति । सुषल + "दण्डादिभ्यो य: ।" ५ । १ । ६६ । इति य: ।) सुषलवध्य: । इत्यमरटीकायां भरत: ॥

सुषा, स्त्री, (सुष् + क: टाप् ।) सूचा । इत्यमरटीकायां रायमुकुट: । २ । १० । ३३ । सुई इति भाषा ॥

सुषित, त्रि, (सुष् + कर्म्मणि क्त: ।) चोरित-द्रव्यम् । तत्पर्य्याय: ॥ मुषितम् २ । इत्यमर: । ३ । २ । ८८ ॥ (यथा, भागवते । १ । १३ । ३७ ।

"नाहं वेद्मि व्यवसितं पित्रोर्व: कुलनन्दन ! ।
मात्र्याऽर्थ्या वा महाभाग ! सुषितोऽस्मि महात्मभि: ॥"

"सुषितो वञ्चितोऽस्मि ॥" इति तट्टीकायां श्रीधर: ॥)

सुष्क:, पुं, (सुष्यति शौर्य्यमिति । सुष् + "वृष भृशुषिसुषिभ्य: कक् । उणा० ३ । ४१ । इति कक् ।) अक्षकोष: । इत्यमर: । २ । ६ । ६ ॥ (यथा, वाग्भटे निदानस्थाने नवमे अध्याये ॥

"स्थानाच्युतमसृक्कं हि सुष्कयोरन्तरेऽनिल: ॥")

मोचकवृक्ष: । संघात: । इति मेदिनी । के, ११ ॥ तस्कर: । मांसल: । इति हेमचन्द्र: । ३ । २०६ ॥

सुष्कक:, पुं, (सुष्क । संज्ञायां कन् ।) वृक्षविशेष: । घण्टापारुल इति बङ्गभाषा । मोचा इति हिन्दी भाषा । तत्पर्य्याय: । गोजीह्व: २ भाटल: ३ घण्टापाटलि: ४ मोच: ५ । इत्यमर: । २ । ४ । ३६ ॥ मोचक: ६ सुष्क: ७ मोचक: ८ सुचक: ९ गौलिक: १० मेहन: ११ क्षारवृक्ष: १२ पाटली १३ विषापह: १४ भटाल: १५ वनवासी १६ सुनीलक: १७ । इति राजनिर्घण्टु: ॥ गोजिह्व: १८ क्षार-श्रेष्ठ: १९ घण्टा २० घण्टाक: २१ भाट: २२ । इति शब्दरत्नावली ॥ स तु पलाशवनपर्व्वत-दृश्य: । श्वेतरक्तभेदेन द्विविध: । तस्य गुणा: ।

मुष्टि:

कटुत्वम् । तिक्तत्वम् । याहित्वम् । उष्णत्वम् । कफवातकारित्वम् । विषमेदोगुल्मकण्डूवस्ति-रोगक्रिमिशुक्रनाशित्वञ्च । इति भावप्रकाश: ॥ रेचनत्वम् । पाचनत्वम् । प्लीहोदरार्शोनाशित्वञ्च । इति राजनिर्घण्टु: ॥ (यथा, सुश्रुते । चिकित्सास्थाने । ६ अध्याय: ।

"जीर्णं पक्वं तक्रहरिद्राद्रवेण
हन्यात् कुष्ठं सुष्कके चापि सर्पि: ॥")

सुष्कर:, पुं, (प्रशस्त: सुष्कोऽस्त्यस्मात् । सुष्क + "अश्वसुषिसुष्कमधोर: ।" ५ । २ । १०७ । इति र: ।) प्रजम्बाक्ष: । इति हेमचन्द्र: । ३ । ४२१ ॥ (यथा, शुक्लयजुर्व्वेदे । ३ । ७ । २ । ८ । "रेतो विकरोति सुष्करो भवत्येव वै प्रजननवितो यत्सुष्करस्तस्मात्सुष्करो भवति तं न सेवेत ॥")

सुष्कसूच्य:, पुं, (सुष्केण सूच्य: ।) वृषणरहित: । स तु राज्ञोऽन्त:पुररक्षक: । खोजा इति भाषा । तत्पर्य्याय: । अनुपस्थ: २ क्लीबाभाय: ३ महल्लिक: ४ । इति शब्दमाला ॥

सुष्टि:, पुं,क्ली, (सुष् + क्तिच् ।) पलपरिमाणम् । चारि तोला इति भाषा । (वैद्यके आठतोला इति प्रसिद्धि: ।

"स्यात् कर्षाभ्यामर्द्धपलं मुक्तिरष्टमिका तथा ।
मुक्तिभ्याञ्च पलं ज्ञेयं सुष्टिरान्त्रचतुर्थिका ॥"

इति वैद्यकशास्त्रेऽधरे पूर्व्वखण्डे प्रथमेऽध्याये ॥

'पलार्द्धं मुक्तिमिच्छन्ति तथाष्टमाषकाक्षिति ।'
पलं विज्ञेय सुष्टि: स्यात्————————॥"

इति गारुडे अष्टाधिकद्विशततमेऽध्याये ।)

बहुपाणि: । मुट्ठा इति भाषा । तत्पर्य्याय: । सम्पिञ्जिताङ्गुलिपार्णि: २ मस्तु: ३ मुष्टी ४ । इति हेमचन्द्र: । ३ । २६१ ॥ ह्रस्व: । इति मेदिनी । टे, २५ ॥ खड्गेर मुट् इति भाषा । (यथा, महाभारते । १ । १६ । १७ ।

"परिघैरायसैस्तीक्ष्णै: सन्निकर्षे च मुष्टिभि: ।
निघ्नन्तं समरेऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥")

कुष्माण्डभाग: । छटाक इति भाषा । यथा.—

"अष्टमुष्टिर्भवेत् कुक्षि: कुक्षयोऽष्टौ च पुष्कल: ।"
इति प्रायश्चित्ततत्त्वम् ॥

(सुष् + क्तिन् ।) मोचनम् । इति सुषधातोरर्थ-दर्शनात् । प्रहारविशेष: । किल इति भाषा । यथा, मार्कण्डेयपुराणे । ६० । १५—१६ ।

"चिच्छेदापततस्तस्य सुदूरं निशितै: शरै: ।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ॥
स मुष्टिं पातयामास हृदये दैत्यपुङ्गव: ।
देवात्तस्यापि सा देवी तलेनोरस्यताडयत् ॥"

पथि क्षुधार्त्तस्य तिलादीनां मुष्टिग्रहणे चौर्य्याभाव: । यथा, कौर्म्मे उपविभागे १५ अध्याये ।

"तिलमुद्गयवादीनां मुष्टिमात्रा पथि स्थिते: ।
क्षुधार्त्तेनान्यथा विप्र ! विधिविद्भिरिति स्मृति: ॥"

(मुष् स्तेये + अधिकरणे क्तिन् । ग्रहणगोपन-काल: । यथा, महाभारते । २ । ५ । ६५ ।

"कच्चिच्चयश्च मुष्टिश्च परराष्ट्रे परन्तप ! ।
अविहाय महाराज ! निहंसि समरे रिपून् ॥"

मुसला

"मुष्टि: ग्रस्यार्थं गोपनकाल: दुर्भिक्षमिति यावत् ॥" इति तट्टीकायां नीलकण्ठ: ॥)

मुष्टिक:,पुं, (मुष्णाति परवीर्य्यमिति । मुष् + क्विप् संज्ञायां कन् ।) कंसराजमल्लविशेष: । इति श्रीमद्भागवतम् ॥ (यथा च हरिवंशे । ४१ । १६० ।

"नागं कुवलयापीड़ं चाणूरं मुष्टिकं तथा ।"

मुष्टि: प्रयोजनमस्य । मुष्टि + कन् ।) स्वर्ण-कार: ॥ इति हेमचन्द्र: । ३ । ५७२ ॥

मुष्टिकान्तक:, पुं, (मुष्टिकस्यान्तक: ।) बल-देव: । इति शब्दरत्नावली ॥

मुष्टिद्यूतं, क्ली, (मुष्टा द्यूतं क्रीड़ितम् ।) द्यूत-क्रीड़ाविशेष: । पुरसुट् खेला इति भाषा । तत्पर्य्याय: । द्यूतकम् २ । इति शब्दमाला ॥

मुष्टिन्धय:, पुं, (मुष्टिं धयति पिबति । धेट् + "नाड़ीमुष्टेश्च ।" ३ । २ । ३० । इति खश् । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् ।) बालक: । इति त्रिकाण्डशेष: ॥

मुष्टिबन्ध:, पुं, मुष्टिबन्धनक्रिया । मुटाबाँधा इति भाषा । तत्पर्य्याय: । संग्राह: २ । इत्यमर: । ३ । २ । १४ ॥ मुष्टेर्बन्धो मुष्टिबन्धो मुष्टिना बन्धो दृढ्यग्रहणं संग्राह इत्यपरे । मुष्टाभेव संग्रह इत्यन्ये । मुष्टि: स्त्रियाञ्च संग्रह इति वोपालित: । इति भरत: ॥

मुष्टीमुष्टि, य, मुष्टामुष्टि । मुष्टिभिर्मुष्टिभि: प्रहृत्य यद्युद्धं दृष्टं तत् । किलाकिलि इति भाषा । इति मुग्धबोधव्याकरणम् ॥

मुष्टक:, पुं, (मुष् + बाहुलकात् कथन् । तत: संज्ञायां कन् ।) राजसर्षप: । इति रत्नमाला ॥ यष्टक इति वा पाठ: ॥

मुस य दर् छिदि । खण्डने । इति कविकल्पद्रुम: ॥ (दिवा०-पर०-सक०-सेट् ।) य मुस्यति विपक्षं चतुर: । दर् अमुसत् अमोसीत् । अक्षात् पुषादित्वान्नित्यं ड इत्यन्ये । इति दुर्गादास: ॥

मुसल:, पुं, क्ली, (मुस्यति खण्डयतीति । मुस् + "इषादिभ्यश्चित् ।" उणा० १ । १०८ । कल: चित् स्यात् ।) खनामख्याततण्डुलादिकण्डनार्थनिर्म्मित-लौहाग्रयष्टि: । तत्पर्य्याय: । अयोऽग्नम् २ । इत्यमर: । २ । ६ । २५ ॥ मुषलम् ३ कण्डनो-दख: ४ । इति शब्दरत्नावली ॥ मुस्यति मुसल मुस यिच्छिदि नाशनीति कल: । मुसलो दण्ड-सकार: । एवं मुस्य दर्च्छिदीति मूर्द्धन्यान्तात् कल: मूर्द्धन्यषकारश्च । इत्यमरटीकायां भरत: ॥ (आयुधविशेष: । तत्प्रकारो यथा, वैद्यशास्त्रा-नोक्तधनुर्व्वेदे ।

"मुसलस्त्रञ्जिग्रीवाभ्यां करै: पादैर्विवर्त्तिन: ।
मूले चान्तेऽतिसम्बन्ध: पातनं पोथनं द्वयम् ॥")

यथा, मनौ । ८ । ३१५ ।

"स्त्रक्स्रेनादाय मुसलं लगुड़ं वापि खादिरम् ।
शक्तिशोभयतस्तीक्ष्णामायसं दण्डमेव वा ॥")

मुसलामुसलि, य, मुसलेन च मुसलेन च प्रहृत्य युद्धं दृष्टम् । इति सिद्धान्तकौमुदी ॥

मुसली, स्त्री, (मुसल + गौरादित्वात् ङीष्।) तालमूलिका। मूसली इति भाषा। इत्यमरः। २। ५। १२।

मुसली, [न्] पुं, (मुसलं प्रहरणत्वेनास्त्यस्येति। मुसल + इनिः।) बलदेवः। इत्यमरः। १।१।२५॥

मुसल्यः, त्रि, (मुसलमर्हतीति। मुसल + यः।) मुसलेन वध्यः। इत्यमरः। ३। १। ७५॥

मुस्त क संहतौ। इति कविकल्पद्रुमः॥ (चुरा०-उभ०-अक०-सेट्।) प्रथमग्रैषादिः। क मुस्तयति। इति दुर्गादासः॥

मुस्तः, पुं, (मुस्तयति एकत्र संहतीभवतीति। मुस्त + कः। एकग्रिफायामस्य बहुमूलसमूहतया तथात्वम्।) मुस्तकम्। इति हारावली॥ (यथा हलायुधसंहितायाम्। ७७। ११।

"भार्गैश्चतुर्भिः सितपत्रैर्मुस्ताः
श्रीपर्णभागौ नखगुग्गुलू च।
कर्पूरबोधो मधुपिच्छितोऽयं
कोपच्छदो नाम नरेन्द्रधूपः॥")

मुस्तकः, पुं क्ली, (मुस्त + स्वार्थे कन्।) लघुमूलविशेषः। सुता इति भाषा। तत्पर्य्यायः। कुरुविन्दः २ मेघनामा ३ मुस्ता ४। इत्यमरः। २। ४। १५६॥ मुस्तः ५ राजकसेरुः ६। इति हारावली॥ मेघाख्यम् ७ गाङ्गेयम् ८ भद्रमुस्तकम् ९। इति रत्नमाला॥ अभ्रनामकः १० श्रीभद्रा ११ भद्रकः १२ भद्रा १३। इति शब्दरत्नावली॥ अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। वायुनाशित्वम्। ग्राहित्वम्। दीपनत्वञ्च। इति राजवल्लभः॥ अपि च।

"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकः।
कुरुविन्दश्च स ख्यातोऽपरः कोरकसेरुकः॥
भद्रमुस्तश्च गुह्यश्च तथा नागरमुस्तकः।
मुस्तं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्॥
कषायं कफपित्तास्रदाहज्वरविषनुच्छ्रुत्।
अनूपदेशे यज्जातं मुस्तकं तत् प्रशस्यते।
तत्रापि मुनिभिः प्रोक्तं वरं नागरमुस्तकम्॥"

इति भावप्रकाशः॥

मुस्तकः, पुं, (मुस्तयति संहतीकरोति कफधिरमिति। मुस्त + कः। ततः संज्ञायां कन्।) स्थावरविषभेदः। इति हेमचन्द्रः। २। २५६॥ (यथा, सुश्रुते कल्पस्थाने। २।

"चत्वारिंशत्सनाभानि मुस्तके द्वे प्रकीर्त्तिते॥")

मुस्ता, स्त्री, (मुस्त + टाप्।) मुस्तकः। इत्यमरः। २। ४। १५६॥ (तथास्याः पर्य्यायः।

"मेघाख्यं मुस्तकं मुस्ता गाङ्गेयं भद्रमुस्तकम्।"

इति वैद्यकरत्नमालायाम्॥

यथा सुश्रुते सूत्रस्थाने। ४४।

"दोषघ्ना ग्रहणीपाण्डुरोगार्शःकृमिनाशनाः।
ओषं त्रिजातकं मुस्ता विड्गन्धामलके तथा॥")

मुस्ताद्यः, पुं, (मुस्तामस्तीति। अद + अच्।) शूकरः। इति जटाधरः॥

मुस्ताभं, क्ली, (मुस्तस्येवाभा यस्य।) मुस्तकविशेषः। नागर सुता इति भाषा। तत्पर्य्यायः। कूटमटम् २ पुरम् ३ वल्यम् ४ परिपेलवम् ५। इति रत्नमाला॥ (गुणा अस्य कुटजटशब्दे ज्ञातव्याः॥)

मुस्तुः, पुं, (मुस्नाति खण्डयत्यन्नेन। मुस्ना + बाहुलकात् तुक्।) सुष्टिः। इति हेमचन्द्रः। ३।२६१॥

मुस्नं, क्ली, मुस्नमम्। मुसधातोरौणादिकरक्प्रत्ययेन निष्पन्नम्। २। १३। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (नयनजलमित्यमुज्वलः॥)

मुह्च वञ्च ल क्लि वैचित्त्ये। इति कविकल्पद्रुमः॥ (दिवा०-पर०-अक०-सेट्। वधादित्वाट्टक्।) वैचित्त्यं ज्ञानरहितीभावः। य, तेन मुह्यति चिराय मे मनः। इति मुरारिः। क मोहिष्यति मोक्ष्यति। ल अमुहत्। णि मुग्धः मूढोऽस्ति। इति। दुर्गादासः॥

मुहिरः, पुं, (मुह्यति ज्ञानरहितीभवत्यनेन लोकः मुह्यति सभायामिति वा। मुह्च + "इषिमदीति उणा०।" १। ५२। इति किरच्।) कामः। मूर्खः। इति मेदिनी। रे, । २०५॥ (असभ्यः हलायुधस्तु।)

मुहुः, [स्] य, (मुह्च + "मुहेः किच्च।" उणा० २। १२१। इति उसिः किच्च।) पुनः पुनः। इत्यमरः। ३। ७। १॥ (यथा, पञ्चदश्याम्। ७। १०१।

"खखप्रमापरोक्षेण दृष्ट्वा पश्यन् खजागरम्।
चिन्मयेदप्रमत्तः सन्नुभावनुदिनं सुहुः॥")

मुहुर्भावः, स्त्री, (मुहुः भावः भावणम्।) पुनः पुनःकथनम्। तत्पर्य्यायः। अनुलापः २। इत्यमरः। १। ६। १६॥

मुहूर्त्तः, पुं क्ली, (कृच्छ्रतीति। "अन्निहृसिभ्यः क्तः।" उणा० ३। ८६। इत्यत्र बाहुलकात् हुर्च्छेरपि इति उज्ज्वलदत्तः। मुहागमश्च प्राक्। "राजीपः।" ६। ४। २१। इति सूत्रेण ह्रस्वलोपः।) दादशक्षणपरिमितकालः। इत्यमरः। १। १। ११३॥ घटिकाद्वयम्। इति राजनिर्घण्टः॥ (अस्य विवृतिर्यथा। तत्र लघुस्वरोच्चारणमात्रोऽत्यल्पनिमेषः। पञ्चदशात्यल्पनिमेषाः काष्ठा॥ त्रिंशत्काष्ठाः कलाः। विंशतिकलो मुहूर्त्तः कलादशभागश्च। त्रिंशन्मुहूर्त्तमहोरात्रम्। इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये॥) दिनपञ्चदशभागैकभागः। यथा,

"प्रातःकालो मुहूर्त्तौ द्वौ सङ्गवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्त्तः स्यात् सायाह्नं तत्र न कारयेत्।
रात्रौ सा नाम सा वेला गर्हिता सर्व्वकर्म्मसु॥"

इति तिथ्यादितत्त्वधृतवचनम्॥*॥

कर्म्मविशेषे तस्य परिमाणं यथा। नतु व्रतोपवासज्ञानादौ घटिकैकापि या भवेदित्यत्र घटिकापदं दण्डपरं मुहूर्त्तपरं वा स्वस्वाचारधृतचतुर्दण्डात्मकार्द्धोदयव्यापके चतस्रो घटिकाः प्रातरर्द्धोदय उच्यते इत्यादौ प्रभाते घटिकाद्वयं प्रदोषे घटिकाद्वयम्। दिनवत् सर्व्वकार्य्येष्वि कारयेन्न विचारयेदिति हलायुधः

पूर्णलिखित्यमावास्यिमामामिति वचनयोरेकमूलयोश्च उभयत्र प्रयोगदर्शनादिति संक्षेपः। अत्रोच्यते। आह्नादावस्तगामिनीति घटिकानियामकवचनचतुर्थचरणे पार्व्वणयोग्यतया घटिकाया मुहूर्त्तात्मकत्वस्यावश्यमङ्गीकारात् तात्पर्य्यलाघवेन व्रतादावपि तथात्वम्।

"घटिकैकाप्यमावास्यां प्रतिपत्सु न पेदृयदा।
सर्व्वं तदासुरं दानं देवे कर्म्मणि चोदितम्॥"

इति घटिकाभूने निन्दामभिधाय घटिकालामे कर्म्माहेति वक्तव्ये मुहूर्त्तमप्यमावास्यां प्रतिपत्सु भवेदृयदा। तद्दानमुत्तमं ज्ञेयं श्रेयं पूर्व्वं हि पूर्व्ववदित्यनेन मुहूर्त्तलाभे कर्म्माहेत्वज्ञापनाच्च। तथापि मुहूर्त्तः किं तत्तद्दिवाराभिपक्वदण्डांश उत दण्डद्वयम्। नाद्यः प्रतिदिनदिवाराभ्रोर्द्धसृष्टिभ्यां तद्भागानामपि न्यूनाधिक्यादधिभेदापत्तेः। नापि द्वितीयः दण्डद्वयस्य त्रिंशद्दण्डात्मकदिवाराभिपक्वदण्डांशस्य मुहूर्त्तत्वञ्च दण्डद्वयाधिकन्यूनकालानामपि त्रिंशद्दण्डाधिकन्यूनदिवाराभिपक्वदण्डांशानां मुहूर्त्तत्वप्रतिपादनेन विनिगमनाविरहात् किन्त्वमरङ्गतया कर्म्माङ्गदिवारात्र्यन्यतरपक्वदण्डांशस्य ग्रहणप्रवृत्तौ अयनांशक्रमेणोत्तरायणपूर्व्वाह्णदिनमानषष्टिपादघट्यधिकदण्डद्वयानां पञ्चदण्डांशस्य पादोनदण्डद्वयस्य मुहूर्त्तत्वात्तद्विनविहितक्रियायां तावन्मानकालस्यापि ग्रहणात् सर्व्वत्र न्यूनकालत्वच्छेदे आवश्यकतया तस्यैव पादोनदण्डद्वयात्मकस्य मुहूर्त्तस्य ग्रहणं लाघवात्।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत्।
अमावास्या तीयमाना तदैव आद्धमिष्यते॥"

इति कात्यायनोक्तस्य चतुर्दशीसम्बन्धिदिनचतुर्थयाममात्रव्याप्यमावास्यायां आद्धविधानस्य मत्स्यपुराणोक्तसुखापराह्णीयमुहूर्त्तावाधेन विषयलाभाय पादोनदण्डद्वयात्मकमुहूर्त्तग्रहणस्यावश्यकत्वाच्च। तादृग्यामावास्यायां तद्धिकसुख्यापराह्णसम्भवात्। तत्र च सुख्यापराह्णीयपादोनदण्डद्वयात्मकदर्शलाभस्तु चत्वारिंशत्पलाधिकत्रयस्त्रिंशद्दण्डात्मकदिवस एव। अत एव स्मार्त्तभट्टाचार्य्यैरपि यदा चतुर्दशीयाममित्यस्य व्याख्याने तिथ्यादितत्त्वे तथा लिखितम्। न च निरूढलक्षणातो रूढ्यर्थस्य बलवत्त्वात्। तासु त्रिंशत्त्रयस्त्रिंशत्तु मुहूर्त्ता दादशाह्नियाम्। ते तु त्रिंशद्दहोरात्र इत्यमरोक्तो दादशक्षणात्मकः अहोरात्रत्रिंशांशो दण्डद्वयरूपमुहूर्त्तो लाघवतः सर्व्वानुगततया न्यूनकालव्यवच्छेदको वक्तव्य इति वाच्यं निरूढलक्षणापि शक्तितुल्येति न्यायेन तात्पर्य्यज्ञानेनान्तरङ्गेति सन्निहिते बुद्धिरन्तरङ्गेतिन्यायाच्च निरूढलक्षणाया एव बलवत्त्वात्। दर्शिका; सपवित्रक इत्यत्र पवित्रपदस्य कुशगतकोशोक्तरूढिशक्त्यपेक्षया त्रिंशद्दकुशपवित्रद्वयगतकात्यायनोक्तनिरूढलक्षणाया इव। निरूढलक्षणायाः शक्तितुल्यत्वन्तु रूढ्यशक्तेरिव

मूत्रार्थबोधशानं मूत्रसम्बन्धज्ञानञ्च विना प्रदीपादिपर्य्यायाणामनुपदमेव पदार्थोपस्थापकत्वात्। या च निरूढलक्षणा क्वचित्तात्पर्य्यबोधकत्वात् क्वचिदर्थप्रयोगतोऽनुमानादपि निर्णीयते। वस्तुतस्तु मुनिभिः पञ्चदशांशाधिकसप्तभूर्णपदलक्षया विनिगमनाविरहगौरवाभ्यामेव कुक्षिता अतोऽत्यन्तन्यूनपादोनदण्डद्वयात्मकसप्तभूर्णमेवाहरयं मूत्रसमयमेव। अथात्यन्तन्यूनतया सर्व्वानुगमाय तदूर्द्धमभिमितेत् अत्यन्ताधिकतया सपाददण्डद्वयात्मकसप्तभूर्णस्यैव कुतो न ग्रहणं स्यात् तत्राह "प्रभाते घटिकायुग्मं प्रदोषे घटिकाद्वयम्। दिनवत् सर्व्वकार्य्याणि कारयेन्न विचारयेत्॥" इति लघुहारीतवचनत्रियामां रजनीं प्राहुरित्यत्राट्यलक्षचतुष्टयम्। नाडीनाम्नादुभे सन्ध्ये दिवसाद्यन्तसंज्ञित इति ब्रह्मवैवर्त्तवचनयोरेकदण्डद्वयात्मककाले घटिकापदनिरूढलक्षणाश्रियाद्वौ तया पर्य्यायद्वारा कोषोक्तरूढ्या च समञ्जसतः पार्व्वणयोग्यदण्डद्वयात्मककाल एव घाटिकापदादुपस्थाप्यते अतः सर्व्वसाधारण्येन न्यूनकालत्रयवच्छेदाय सैव ग्राह्या लाघवात्। अतएव यदा चतुर्थ्यामं तुरीयमनुपूरयेदित्यत्र यदा यत्र दिने अमावास्यासुरुयापराह्णीयदण्डद्वयान्यूनकालव्यापनं यथा स्यात्तथैव चतुर्थ्यामं तदूर्द्धलक्षतीययाममनुलक्षीकृत्य तत्र प्रहृत्य चतुर्थयामं पूरयेत् व्याप्नोतीत्यन्वयः। अन्यथा चतुर्थ्यसृक्कूर्त्ताधिकपूरणाभिधानं व्यर्थं स्यात्। एतेनैव दर्शश्राद्धेऽपि सुख्यापराह्णादरः कार्य्यः। प्रातःकालादिपञ्चधाविभागे कुतपादिसंज्ञायाञ्च दिनमानपञ्चदशांशसप्तभूर्णस्यैव स्वैव ग्रहणम्। तद्बोधकशास्त्रसंवादात्। अत एकोद्दिष्टे दिनमानपञ्चदशांशसप्तभूर्त्तौ योग्यतया च न्यूनकालत्रयवच्छेदको ग्राह्यः। कुतपरौहिणान्यतरमात्रयाहकयुक्तेः। एवं विप्रेषाभिधानात् सुखरात्रौ दक्षमाद्यं जन्माहन्यैकादशौद्वादशौ च कलाकाष्ठारूपोऽपि प्रतिष्ठादौ तूक्तयुक्त्या स्वयोग्यकाल एव न्यूनकालत्रयवच्छेदको ग्राह्यः। ततश्च विप्रेषकालप्राप्तकर्म्मेतरकर्म्मणः प्रयुक्तादिकाले स्वयोग्यदण्डद्वयान्यूनकतिथिरेव ग्राह्येत्यनुगतविधिः सर्व्वसामञ्जस्यादिति तत्त्वम्। इति चन्द्रशेखरवाचस्पतिकृतहेतनिर्णयः॥

सचेरः, पुं, (सचति विचित्तीभवतीति। सच+"सचेरादयः।" उणा० १।६२। इति एरक्।) मूर्खः। इति संक्षिप्तसारोणादिवृत्तिः॥

मूङ बन्धे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) पवर्गपञ्चमादिः। ङ मवते। इति दुर्गादासः॥

मूः, [र्] स्त्री, मूर्च्छा। इति मूर्च्छेधातोर्भावे क्विप् वा निष्पन्नम्। इति सुग्धबोधव्याकरणम्॥

मूः, स्त्री, (मवते इति। मव+क्विप्। "ज्वरत्वरस्रिव्यविमवामुपधायाश्च।" ६।४। २०। इति सांघोवकास्योट् रत्वादेशः।) बन्धनम्। इति क्षिप्तात्मकौमुदी॥

मूकः, त्रि, (मवते बध्यतेऽसौ। मव+बाहुलकात् कक्।" उणा० ३। ४१। इति उपधायाया वकारस्य चोट्।) वाक्यरहितः। गोंगा इति भाषा। तत्पर्य्यायः। अवाक् २। इत्यमरः। ३। १। ११। (यथा, महाभारते। २। ५। १२५।

"कचिदन्धश्च मूकश्च पङ्गुश्च बहवो जनाः। पितेव पासि धर्म्मज्ञ! तथा प्रव्रजितानपि॥"

अस्योत्पत्तिहेतुर्यथा, गर्भवैगुण्यात्

"गर्भो वातप्रकोपेण दीर्घं वै चावमानितः। भवेत् कुब्जः कुणिः पङ्गुर्मूको मिमिमिमेव च॥"

इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये॥ रोगत्वेनास्य विषयो यथा,—

"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः। नरान् करोत्यक्रियकान् मूकमिमिमिकान् गदान्॥"

इति च तत्र निदानस्थाने प्रथमेऽध्याये॥)

मूकः, पुं, (मवते बध्यते जालिकैरिति। मव+कक्। पूर्ब्ववत्सर्वम्।) मत्स्यः। इति त्रिकाण्डशेषः॥ दैत्यः। इति मेदिनी। के, ११॥ (दानवभेदः। यथा, महाभारते। ३।३६।७।

"स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः। मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम्॥")

दोनः। इति हेमचन्द्रः। ३। १३। (तक्षकपुत्रः। यथा, महाभारते। १। ५७। १०।

"श्लिष्टो श्लक्ष्णकरो मूकः सुकुमारः प्रवेपनः। सुन्दरः श्लिष्टरोमा च सुरोमा च महाहनुः॥ एते तक्षकजा नागाः प्रविष्टा हव्यवाहनम्॥")

मूढः, त्रि, (मूह+क्तः।) मूर्खः। इत्यमरः। ३। १। ४८॥ (यथा, पद्मपुराणे। ७। १०।

"अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः। एकीभूय भवेन्मुखस्तच्च मूढैः प्रयुज्यते॥")

बालः। तन्द्रितः। इति मेदिनी। ढे, ३॥ जड़ः। इति हेमचन्द्रः॥

मूतः, त्रि, (मव मूर्त्तौ वा क्तः।) बद्धः। इत्यमरः। ३। १। ६५॥ (धान्यरक्षणार्थं तृणमय आधारविशेषः। यथा, श्रुतपथब्राह्मणे। २। ६। २। १७। "तान् द्वयोर्मूनकयोरुपनह्य वेणुयष्ट्यां वा कुपे वोभयत आवध्नीयात् परेत्य यदि तृणं वा स्याणुं वा वेणुं वा वल्मीकं वा विन्देत्॥" 'यच्च तृणमये आवपने धान्यं बध्यते तन्मूतं मूतमेव मूनकम्। वेणुमय्यां यष्ट्यामुभयतः बद्धा।' इति तद्भाष्ये महीधरः॥)

मूत्र, तृ क प्रस्रावे। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-उभ०-सक०-सेट्।) दीर्घौ। मूत्रयति मूत्रापयति। इति दुर्गादासः॥

मूत्रं, क्ली, (मूत्र्यते इति। मूत्र+घञ्। लोकाश्रयत्वात् क्लीबत्वम्। यद्वा, सुच्यते त्यज्यते इति। मूच+"सिवादिसुच्योष्टेरूङ च।" उणा० ४।१६२। इति ष्ट्रन् किद्भवति। टेरूकारादेशः।) उपस्थनिर्गतजलम्। सत्पर्य्यायः। प्रस्रावः २। इत्यमरः। २। ६। ६०॥ मेहनम् ३। इति जटाधरः॥ गुह्यनिस्यन्दः ४ स्रवणम् ५ स्रवः ६। इति राजनिर्घण्टः॥ *॥ (अस्योत्पत्तिविषयो यथा,—

"आहारस्य रसः सारः सारहीनो मलद्रवः। शिराभिस्तज्जलं नीतं वस्तौ मूत्रत्वमाप्नुयात्॥"

इति पूर्ब्वखण्डे चतुर्थेऽध्याये ब्राह्मेश्वरोक्तम्॥

"वस्तिपूरणविक्लेदलघुत्वम्।"

तथास्य क्षयवृद्धिलक्षणं यथा,—

"मूत्रक्षये वस्तिशोथोऽल्पमूत्रता च।"

"मूत्रं सुदुर्मुहुः प्रवृत्तिं वस्तिशोथमाध्मानञ्च।"

इति सुश्रुते सूत्रस्थाने पञ्चदशेऽध्याये॥ तथास्य दोषादि विज्ञानस्य परीक्षा लक्षणम्॥

"वातेन पाण्डुरं मूत्रं रक्तनीलञ्च पित्ततः। रक्तमेव भवेदक्तात् धवलं फेनिलं कफात्॥"

इति भावप्रकाशस्य पूर्ब्वखण्डे द्वितीये भागे॥) तस्योत्सर्गविधिर्यथा,—

"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः। कुर्य्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः॥"

इति गारुड़े ६४ अध्यायः॥

अपि च।

"मूत्रोच्चारसमुत्सर्गं दिवा कुर्य्यादुदङ्मुखः। दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा॥"

इति मनुः। ४। ५०॥

"छत्वा यज्ञोपवीतन्तु दृढतः कण्ठलम्बितम्। विण्मूत्रे च सदा कुर्य्याद् यद्वा कर्णे समाहितः॥"

इति यमः॥

यज्ञोपवीती यज्ञोपवीतं कर्णे छत्वा अवगुण्ठित इति। कर्णे दक्षिणकर्णे। इति सांख्यायनः॥

"छायायामन्धकारे वा रात्रावहनि वा द्विजः। यथासुखमुखः कुर्य्यात् प्राणबाधभयेषु च॥*॥

न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन। न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके। वायुग्निविप्रादित्यगुरुः पश्यंस्तथैव गाः। न कदाचन कुर्व्वीत विद्वान्मूत्रस्य विसर्जनम्॥"

इति मनुः। ४। ४५—४८॥*॥

"आहारनिद्राविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः।
वाग्बुद्धिकार्य्याणि तपस्विनैव
धनायुषी गुप्ततमे तु कार्य्ये॥"

इति वशिष्ठः॥

निर्हारो मूत्रपुरीषोत्सर्गः॥ *॥

"सोमाग्न्यर्काम्बुवायूनां पूज्यानाञ्च न संमुखे। कुर्य्यात् स्त्रीब्राह्मणविप्रमूत्रसमुत्सर्गञ्च पण्डितः॥"

इति विष्णुपुराणम्॥

न च सोपानत्को मूत्रपुरीषे कुर्य्यादिति। इत्यापस्तम्बः।

"करयुद्धीतपात्रेण लब्धा मूत्रपुरीषके ।
मूत्रतुल्यन्तु पानीयं पीत्वा चान्द्रायणञ्चरेत् ॥"
इति वृहन्मनुः ॥ * ॥

मूत्रहीनजलपानस्य मूत्रोत्सर्गे दोषो यथा,—
"वारिपात्रं करे धृत्वा मूत्रं त्यजति यो नरः ।
सुरापात्रसमं पात्रं तज्जलं मदिरासमम् ॥"
इति कर्म्मलोचनम् ॥ * ॥

सशब्दमूत्रस्य दोषो यथा,—
"निःस्वाः सशब्दमूत्राः स्युर्नृपा निःशब्दधारया ।
भोगाढ्याः समलक्षरा निःस्वाः स्युर्घट-
सन्निभाः ॥"
इति गारुडे ६१ अध्यायः ॥ * ॥

"विष्णुक्रान्तामनुक्रम्य चौरयाज्ञादिरुच्यते ।"
इति तन्त्रे १८८ अध्यायः ॥ * ॥ अथ गोमूत्रगुणाः । तीक्ष्णत्वम् । उष्णत्वम् । लवणत्वम् । पित्तकारित्वम् । कटुत्वम् । लघुत्वम् । रूक्षत्वम् । शस्युदरानाहगुल्मार्शोविषकुष्ठनाशित्वञ्च । इति राजवल्लभः ॥

मूत्रलक्षुः, स्त्री, (मूत्रे लक्षुम् । मूत्रजन्यं लक्षुमिति वा ।) रोगविशेषः । तत्पर्य्यायः । मूत्ररोधः २ अश्मरी ३ लक्षुम् ४ । इति राजनिर्घण्टः ॥ * ॥ अथ मूत्रलक्षाधिकारः । तत्र मूत्रलक्षुस्य विपक्षं निदानमाह ।

"व्यायामतीक्ष्णौषधरूक्षमद्य-
प्रसङ्गकृत्यद्रुतदृष्टयानात् ।
आनूपमस्याध्यशनादजीर्णात
स्युर्मूत्रलक्षाणि वृथा तथाष्टौ ॥"

तीक्ष्णौषधं राजिकाशूरणादियुक्तम् । रूक्षेति मद्यविशेषणम् । प्रसङ्गः सततं सेवा । कृत्यं नर्त्तनम् । द्रुतेति द्विविधः पाठः । द्रुतदृष्टयानात् अश्वादिना गमनात् । आनूपं प्रचुरजलदेशभवं मद्यम् । अष्टौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशुक्रजशकृज्जाश्मरी जानि । तस्य संप्राप्तिपूर्ब्बकं लक्षणमाह ।

"पृथग्जुलाः स्वैः कुपिता निदानैः
सर्व्वेऽथवा कोपमुपेत्य वस्तौ ।
मूत्रस्य मार्गं परिपीड़यन्ति
यदा तदा मूत्रयतीह लक्षात् ॥"

तेषु वातिकमाह ।

"सीत्वा रुजो वङ्क्षणवङ्क्षिमेढ्रं
स्वल्पं मुहुर्मूत्रयतीह वातात् ।"

सीत्वा मारणात्मिका वङ्क्षणावूरुमेढ्रान्तरालसन्धी । * । पैत्तिकमाह ।

"पीतं सरक्तं सरुजं सदाहं
लक्षुं मुहुर्मूत्रयतीह पित्तात् ।"

लक्षुमिति क्रियाविशेषणम् । श्लैष्मिकमाह ।

"वस्तेः सलिङ्गस्य गुरुत्वशोथौ
मूत्रं सपिच्छं कफमूत्रलक्षे ।"

सपिच्छं पिच्छिलम् । सान्निपातिकमाह ।

सर्व्वाणि रूपाणि च सन्निपातात्
भवन्ति तत् लक्षुतमं हि लक्षुम् ।"

शुक्रं मूत्रलक्षुम् ॥ * ॥ शल्यजमाह ।

"मूत्रवाहिषु शल्येन क्षतेष्वभिहतेषु वा ।
मूत्रलक्षुं तदाघातान्नायते भृशदारुणम् ॥
वातलक्षुणा तुल्यानि तस्य लिङ्गानि निर्दिशेत् ।"
मूत्रवाहिषु स्रोतःसु । शल्येन कण्टकेन । क्षतेषु सञ्चलीढतेषु अथवा अभिहतेषु शस्त्रादिभिरभिहतेषु । तदाघातात् मूत्रमार्गाघातात् मूत्रलक्षुं जायते । भृशदारुणं मारकं तस्य शल्यजस्य ॥ * ॥ पूरीषजमाह ।

"शुक्लतस्तु प्रतीघातान्नायुर्विगुणतां गतः ।
आध्मानं वातमूत्रञ्च मूत्रलक्षुं करोति च ॥"
प्रतीघातात् निरोधात् । विगुणतां दुष्टताम् ।
शुक्रजमाह ।

"शुक्रदोषैरुपहते मूत्रमार्गे विधारिते ।
सशुक्रं मूत्रयेत् लक्षुाद्दलिमेहनमूलवान् ॥"
उपहते दूषिते ॥ * ॥ अश्मरीजमाह । अश्मरीहेतुकत्वादपि मूत्रलक्षुसदाकृतम् । सुश्रुतः शर्करारुजमपि मूत्रलक्षुसुक्तमत्र तु तस्य लक्षणसंख्यानिरासार्थमश्मरीशर्करयोः साध्यमाह ।

"अश्मरी शर्करा चैव तुल्यसम्भवलक्षणे ।
विशेषं शर्करायाः शृणु कीर्त्तयतो मम ॥"
सम्भवः कारणम् ।

"पच्यमानाश्मरी पित्ताच्छोष्यमाणा च
वायुना ।
विसृजत्यकफसंस्थाना शरभी शर्करा मता ॥"
पित्तेन पच्यमाना मूत्रशुक्रश्लेष्मसंहतिः प्रथमं पित्तेन बन्धनकर्म्मणा पच्यमाना । पश्चाद्वातेन शोषिता कफेनाश्लिष्टा अश्मरी । सैव विसृजत्यकफसंस्थाना त्यक्तकफाश्लेषा सती शर्करारूपा मूत्रमार्गात् शरभी शर्करा मता । एतावता किञ्चिदेव भेदः ॥ * ॥ शर्करायाः उपद्रवानाह ।

"क्षुत्पीड़ा वेपथुः शूलं कुक्षावस्मिंश्च दुर्बलः ।
तया भवति मूर्च्छा च मूत्रलक्षुस्य दारुणम् ॥"
शूलं कुक्षाविति अन्वयः । तया शर्करया ॥ * ॥
अथ मूत्रलक्षुस्य चिकित्सा ।

"चिकटाटकारग्वधदर्भकाश-
यवासधान्यौगिरिभेदपथ्याः ।
विभ्रन्ति पीता मधुनाश्मरीञ्च
समीपवर्त्तीरपि मूत्रलक्षुम् ॥"
चिकटादिक्वाथः ॥ १ ॥

"रसाञ्जनभेदकगिरिजातगुडूचिराजा-
मेर्व्वारुबीजलवणोत्तमकुङ्कुमानाम् ।
चूर्णानि तण्डुलजले तुलितानि पीत्वा
प्रत्यूषजत्युरपि जीवति मूत्रलक्षी ॥"
रसाद्यं चूर्णम् । २ ।

"अयोरजः सूक्ष्मपिष्टं मधुना सह योजितम् ।
मूत्रलक्षुं निहन्त्याशु संजीर्णं द्विदिनत्रयात् ॥३॥
गुड़ेन मिश्रितं क्षीरं कट्फलं कामतः पिबेत् ।
मूत्रलक्षुषु सर्व्वेषु शर्करायाञ्च निश्चयः ॥४॥

धात्रीरसक्षौद्रयुतं पिबेद्वा
लक्षे सरक्ते मधुना विमिश्रम् ।
शल्याभिघातोत्थितमूत्रलक्षे
कार्य्या क्रिया मारुतलक्षतुल्या ॥५॥

धात्री गोक्षुरबीजस्य यवक्षारसमन्वितः ।
पीतः प्रातर्मयत्येव लक्षुं विदारगन्धोत्थितम् ॥६॥
त्रिफलायाः सुपिष्टायाः कल्कं कोलसमन्वितम् ।
वारिणा लवणीकृत्य पिबेन्मूत्रजलाशयम् ॥"७॥
कोलं बदरम् ।

गुड़मामलकं दृष्ट्वा अमन्नं तर्पणं प्रियम् ।
पित्तासृग्दाहमूलघ्नं मूत्रलक्षुहरं परम् ॥ ८ ॥
समादद्यात्तुलितो यवक्षारः सितायुतः ।
भक्षितो नाशयत्येव मूत्रलक्षुं न संशयः ॥९॥
दार्व्वासितोपलाकल्कः पीतः कर्षमितो नरैः ।
मस्तुना पलमात्रेण मूत्रलक्षुं व्यपोहति ॥१०॥
समूलगोक्षुरक्वाथः सितामाक्षिकसंयुतः ।
नाशयेन्मूत्रलक्षुाणि तथैवोष्णसमीरणम् ॥"११॥
उष्णसमीरणं उष्णवातं मूत्राघातविशेषम् ।
इति भावप्रकाशः । (तथास्य चिकित्साप्रकारान्तरम् ।

"सुशीतलं जलं कर्षमात्रं स्यात् मूत्रलक्षुहृत् ।
दध्यम्बुना च संमिश्रमयश्चूर्णं सुखप्रदम् ॥
मूत्रलक्षे यवक्षारचूर्णं क्षौद्रप्रयोजितम् ।
कुष्माण्डञ्च समादाय शर्करारोधितं पिबेत् ॥
यो हि त्रिदोषसम्भूतमूत्रलक्षुनिवारणः ॥"
"आरग्वधफलं मूलं दुरालभा धान्यकगुडूचीवर्षाः ।
पाषाणभेदपथ्या क्वाथोऽयं मूत्रलक्षे स्यात् ॥"
इति हारीते चिकित्सितस्थाने २६ अध्याये ॥
अथास्य पथ्यानि ।

"अथो यथादोषमयं गवोऽपि
पुरातना लोहितशालयश्च ।
तक्रं पयो दध्यपि गोप्रसूतं
धन्वामिषं सुरसाः सिता च ॥
पुराणकुष्माण्डफलं पटोलं
मद्यार्द्रकं गोक्षुरकः कुमारी ।
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाद्याश्च शिरांसि पथ्या ॥
नालाम्बिमज्जाघृतपूपं त्रुटिञ्च
घृतानि पानान्यथ गानि चापि ।
प्रनीरनीरं हिमवालुका च
मित्रं वृषा स्यात् सति मूत्रलक्षे ॥"
अथापथ्यानि ।

"मद्यं श्रमं निधुवनं गजवाजियानं
सर्व्वं विरुद्धमथनं विषमाशनञ्च ।
ताम्बूलमत्यजवणार्द्रकतैलभृष्टं
पिण्याकदधिकुलित्थसर्षपवेगरोधान् ॥
माषान् करीरमसिसीव्यविदाहिरूक्षं
मन्थञ्च मूत्रतुजनः सति मूत्रलक्षे ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्रलक्षाधिकारे ॥)

मूत्रदोषः, पुं. (मूत्रस्य दोषो यस्मात् ।) प्रमेहः ।
इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । सूत्रस्थाने ३८ अः ।

"पक्वकादिरिवेक्षो गवोऽनिलविनाशनः ।
मूत्रदोषहरो वृष्यः पिपासाघ्नो रुचिप्रदः ॥"

मूत्राघातादिः। अस्य चिकित्सा यथा,—
"निदिग्धिकायाः स्वरसं पिबेत् कुड़वसम्मितम्।
मूत्रदोषहरं कल्कमथवा क्षौद्रसंयुतम्॥"
"अतः ऊर्द्धं प्रवक्ष्यामि मूत्रदोषे क्रमं हितम्।
श्लेष्मदोषोपसृष्टानां हितस्तेषु विरेचनम्॥
ततः संशुद्धदेहानां हिताशोत्तरवस्तयः॥"
"क्षौद्रार्द्धपाचं दत्त्वा तु पाययेत् क्षीरसर्पिषोः।
स्वयङ्गुप्ताफलस्यैव तथैव क्षुरकस्य च॥
पिप्पलीचूर्णसंयुक्तमर्द्धभागं प्रदापयेत्।
ततश्चैकध्यमानीय स्वेनाभिप्रमन्थयेत्॥
तस्य प्राशितस्य चूर्णं लीढ्वा क्षीरं ततः पिबेत्।
एतत्सर्पिः प्रयुञ्जानः शुद्धदेहो नरः सदा॥
मूत्रदोषान् जयेत् सर्व्वानन्ययोगैः सुदुर्ज्जयान्।
जयेत् प्रोक्षितदोषांश्च वन्ध्या गर्भं लभेत च।
नारी चैतत् प्रयुञ्जाना योनिदोषात् प्रमुच्यते॥"
इत्युत्तरतन्त्रेऽष्टपञ्चाशत्तमेऽध्याये सुश्रुतेनोक्तम्॥)

मूत्रनिरोधः, पुं, (मूत्रस्य निरोधः। यद्वा मूत्रं निरुणद्धीति। रुध्+अण्।) मूत्रप्रतिबन्धकरोगविशेषः। अस्य चिकित्सा यथा,—
"पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्करयान्वितम्।
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्कराम्॥"
इति गारुड़े १६१ अध्यायः॥
(चिकित्सान्तरं यथा,—
"नलेन पद्मिनीकन्दं पक्वगोमूत्रमिश्रितम्।
पिबेन्मूत्रनिरोधे तु सशीतवेदनान्विते॥"
इति हारीते चिकित्सितस्थाने त्रिंशोऽध्याये॥)

मूत्रपतनः, पुं, (मूत्रस्य पतनमस्मात् पुरीषनिरोधकरणादस्य सततमूत्रपतनात् तथात्वम्।) गन्धमार्জ্জारः। इति राजनिर्घण्टः॥

मूत्रपुटं, क्ली, (मूत्रस्य पुटम्।) नाभेरधो भागः। यथा,—
"नाभेरधो मूत्रपुटं वस्तिर्मूत्राशयोऽपि च।"
इति हेमचन्द्रः। ३। २७०॥

मूत्रफला, स्त्री, (मूत्रं मूत्रवर्द्धनं फलं परिणामे यस्याः।) कर्कटी। त्रपुषी। इति राजनिर्घण्टः॥
(कर्कटीत्रपुषीग्रन्थ्योरस्या विषयो ज्ञेयः॥)

मूत्रबलं, क्ली, (मूत्रं लाति आदत्ते वर्द्धयतीत्यर्थः। ला+कः।) त्रपुषम्। इति शब्दचन्द्रिका॥
मूत्रवर्द्धके, त्रि॥ (यथा, सुश्रुते। सूत्रस्थाने। ४५ अः।
"जाम्बवो बहुनिस्यन्दस्तुवरो वातकोपनः।
तोयाः सुरासवो दध्नो मूत्रलः कफवातनुत्॥")

मूत्रला, स्त्री, (मूत्रल+टाप्।) कर्कटी। इति त्रिकाण्डशेषः॥ बालुकी। इति राजनिर्घण्टः॥

मूत्राघातः, पुं, (मूत्रस्याघातो निरोधो येन।) प्रस्रावरोधकरोगविशेषः। अथ मूत्राघातस्य विप्रकृष्टं सन्निकृष्टञ्च निदानं संख्याञ्चाह।
"प्रायोमूत्रविघातार्त्तैर्ज्ञानकृच्छ्रादयः।
जायन्ते कुपितैर्दोषैर्मूत्राघातास्त्रयोदश॥"
मूत्रविघातार्त्तैरित्यादिशब्देन पुरीषशुक्रादिवेगविघातानां कृच्छ्राश्मर्य्यादीनाञ्च ग्रहणम्। मूत्रविघातादैः कुपितैर्दोषैरित्यन्वयः। ननु मूत्रकृच्छ्रमूत्राघातयोः को भेदः। उच्यते। मूत्रकृच्छ्रे कृच्छ्रमधिकं विबन्धोऽल्पः। मूत्राघाते तु विबन्धो बलवान् कृच्छ्रमल्पं इत्यनयोर्भेदः॥*॥
वातकुण्डलिकाया निदानं संप्राप्तिं लक्षणञ्चाह।
"रौक्षादेगविघाताद्वा वायुर्बस्तौ सवेदनः।
मूत्रमावृत्य चरति विगुणः कुण्डलीकृतः॥
मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते।
वातकुण्डलिकां तान्तु व्याधिं विद्यात् सुदारुणम्॥"
रौक्षात् कायस्य। वेगविघातात् मूत्रादिवेगनिरोधात् आवृत्य प्रावृत्य रौक्षादिभिर्वेगविघातादिभिश्च विगुणो दुष्टः कुण्डलीकृतो वायुर्बस्तौ मूत्राशये चरति प्रतिघावति आवर्त्तवादृध्नमंस्तिष्ठति इत्यर्थः। वात्यावत्। मूत्रमिति तत्कालभूत्रमल्पमल्पं सरुजं प्रवर्त्तते। तद्व्याधिं वातकुण्डलिकामाहुः। सुदारुणम्। मारणात्मकत्वात्॥ १॥*॥ अष्ठीलामाह।
"आध्मापयन् बस्तिगुदं रुद्धा वातश्लोमतां।
कुर्य्यात्तीव्रार्त्तिमष्ठीलां मूत्रविड्वायुरोधिनीम्॥"
वातः बस्तिगुदं रुद्धा अर्थात् तद्भागं मूत्रं मलञ्च निरुध्य बस्तिगुदं बस्तिं गुदञ्च आध्मापयन् आध्मानं कुर्व्वन् अष्ठीलां ष्ठीलातुल्यां व्याधिं कुर्य्यात्। श्लोमतां श्लां उन्नताञ्च॥२॥
वातबस्तिमाह।
"वेगं विधारयेद्यस्तु मूत्रस्याकुशलो नरः।
निरुणद्धि सुखं तस्य वस्तिर्वस्तिगतोऽनिलः॥
मूत्रसङ्गो भवेत्तेन बस्तिकुक्षिनिपीड़ितः।
वातबस्तिः स विज्ञेयो व्याधिः कष्टप्रसाधनः॥"
अकुशलो मूर्खः। तस्य पुरुषस्य बस्तिसुखं निरुणद्धि बस्तिगतो वायुः। तेन वायुना मूत्रसङ्गो मूत्रविघातो भवति बस्तिकुक्षिनिपीड़ित इति बस्तौ कुक्षौ च निपीड़ितः संपीड़ितो वायुरिति सम्बन्धः॥३॥ मूत्रातीतमाह।
"चिरं धारयते मूत्रं त्वरया न प्रवर्त्तते।
मेहमानस्य मन्दं वा मूत्रातीतः स उच्यते॥"
मेहमानस्य मूत्रसृजतः। मन्दं वा अल्पं वा॥ ४॥*॥ मूत्रजठरमाह।
"मूत्रस्य वेगोऽभिहते तदुदावर्त्तहेतुकः।
अपानः कुपितो वायुरुदरं पूरयेदृध्वम्॥
नाभेरधस्तादाध्मानं जनयेत्तीव्रवेदनाम्।
तं मूत्रजठरं विद्यादधोबस्तिनिरोधनम्॥"
तदुदावर्त्तहेतुक इति मूत्रवेगधारणगतितोदावर्त्तनिदानमाध्मानं कुर्य्यात्। अधोबस्तिनिरोधनं बस्तेरधोदेशे विबन्धकारकम्॥ ५॥
मूत्रौकसङ्गमाह।
"बस्तौ वाप्यथवा नाभौ मणौ वा यस्य देहिनः।
मूत्रं प्रकृतं सज्यते सरुजं वा प्रवाहतः॥
सवेच्छमेरत्यमल्पं सरुजं वाथ नीरुजम्।
विगुणानिलजो व्याधिः स मूत्रौकसङ्गसंज्ञितः॥
नाभौ मेढ्रे मणौ मेहनाग्रयन्त्रौ सज्यते निरुजं

स्यात् सरुजं सदु वा प्रवर्त्तते। प्रवाहत इति कष्टकृच्छ्रेण सशब्दं मूत्रपुरीषवातानामधः प्रेरणं प्रवाहणं तेन कुपितेन वायुना वस्त्यादिभेदात् सरुजं मूत्रं सवेदित्यर्थः॥ ६॥ मूत्रक्षयमाह।
"रूक्षस्य क्षामदेहस्य वस्तिस्थौ पित्तमारुतौ।
मूत्रक्षयं सरुग्दाहं जनयेतां तदाक्षयम्॥"
क्षामदेहस्य क्षामदेहस्य तदाक्षयं मूत्रक्षयसंज्ञम्॥ ७॥ मूत्रयन्त्रिमाह।
"अन्तर्बस्तिसुखे वृत्तः स्थिरोऽल्पः सहसा भवेत्।
अश्मरीतुल्यरुग्ग्रन्थिर्मूत्रयन्त्रिः स उच्यते॥"
अन्तर्बस्तिसुखे बस्तिसुखस्याभ्यन्तरे अल्पः क्षुद्रामलकप्रमाणः। नन्वस्य अश्मर्य्या सह को भेदः। उच्यते। अश्मरी क्रमशः सञ्चयेन स्यादयन्तु सहसा भवेदिति भेदः। अपरो भेदः। अश्मर्य्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव। यत उक्तं तन्त्रान्तरे।
"रक्तं वातकफाद्दुष्टं बस्तिद्वारे सुदारुणम्।
ग्रन्थिं कुर्य्यात् स शस्त्रेण स्वेज्यमूत्रं सदारुणम्॥"८॥ इति॥

मूत्रशुक्रमाह।
"मूत्रितस्य स्त्रियं यानो वायुना शुक्रसृक्षणम्।
स्थानच्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्त्तते।
भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते॥"
मूत्रितस्य मूत्रवेगयुक्तस्य शुक्रं स्थानात् च्युतं पश्चाद्वायुना उन्नतं ऊर्द्धं नीतम्। भस्मोदकप्रतीकाशं भस्मसहिततजलसदृशम्॥ ९॥ उष्णवातमाह।
"व्यायामाध्वातपैः पित्तं बस्तिं प्राप्यानिलावृतम्।
बस्तिं मेढ्रं गुदञ्चैव दहत् स्रावयेदधः॥
मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा।
कृच्छ्रं पुनः पुनर्जन्तोरुष्णवातं वदन्ति तम्॥"
व्यायामादिविरोधत्वेन सौम्यधातुक्षयात् तेजोवृद्ध्या पित्तवृद्धिः स्यात्तत् कुपितं पित्तं असंयुतं बस्तिं प्राप्य बस्त्यादिकं दहत् मूत्रमधः स्रावयेत्। कीदृशं हारिद्रं अथवा सरक्तं ईषल्लोहितम्॥ १०॥ मूत्रसादमाह।
"पित्तं कफो द्वावपि वा संहन्येतेऽनिलेन चेत्।
कृच्छ्राच्छ्वेतं तदा पीतं रक्तं श्वेतं घनं स्रवेत्॥
सरक्तं रोचनाशङ्खचूर्णवर्णं भवेत्ततः।
शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति हि॥"
संहन्येते घनीक्रियेते। शुष्कं अल्पं समस्तवर्णं उक्तसकलवर्णयुक्तम्॥ ११॥ विड्विघातमाह।
"रूक्षदुर्ब्बलयोर्घातिनोदावृतं ग्रहणी यदा।
मूत्रस्रोतोऽनुपद्येन विट्सङ्घट्टं तदा नरः॥
विड्गन्धं मूत्रयेत् कृच्छ्राद्विड्विघातं तमादिशेत्॥"
उदावृतं ऊर्द्धं नीतं विड्गन्धं वा। वायुब्दोऽत्र योजनीयः॥ १२॥*॥ बस्तिकुक्षलमाह।
"हताध्वलङ्घनायासैरभिघातात् प्रपीड़नात्।
स्वस्थानादस्तिरुद्वृत्तः शूलस्तिष्ठति गर्भवत्॥

मूत्राघा

मूत्रस्यन्दनदाहार्त्तौ विड्विड्भ्रंशवत्यपि ।
पीड़ितस्तु रुजेड़ारां संरुद्धोद्वेष्टनार्त्तिमान् ॥
वस्तिकुण्डलमाकुलं घोरं शस्त्रविषोपमम् ।
यवनप्रबलं प्रायो दुर्निरोधमबुद्धिभिः ॥
तस्मिन् पित्तान्विते दाहः मूलं मूत्रविवर्जना ।
शैत्यगुरुत्वं शोथो मूत्रं स्निग्धं घनं सितम् ॥"
द्रुताधोजत्रुगं ग्रीवं मार्गचलनम् । उद्वृत्तः उत्थितः । स्यन्दनं किञ्चिच्चलनम् । घोरं मारकम् । शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रमारकम् । विषमत्र गरः तद्वत् विलम्बमारकम् । एतावता मारकमत्यग्रं शीघ्रं विलम्बेन वा ॥ १२ ॥ * ॥ तस्यैवासाध्यस्य च लक्षणमाह ।
"शैत्यगुरुत्वविलो वस्तिः पित्तोदीर्णो न सिध्यति ।
अविभ्रान्तविलः साध्यो न च यः कुण्डलीकृतः ॥
स्याद्वस्तौ कुण्डलीभूते हृल्लासोद्वेष्टनश्वास एव च ॥"
विलं वस्तिसुखस्पर्शं पित्तोदीर्णः पित्तेनोद्भूतः । अविभ्रान्तविलः कफेनाद्भूतविलः पश्चात् कुण्डलीकृतः स साध्यः । एतेन कुण्डलीभूतोऽसाध्यः । कुण्डलीभूतस्य लक्षणमाह । स्तब्धित्वादि-कुण्डलीभूतस्यायमर्थः । कफेन विलावरोधात्तत्र वातः कुण्डलाकारेण स्थितोऽयमर्थः ॥ * ॥ अथ मूत्राघातस्य चिकित्सा ।
"तलकुसुमकाशेक्षुबलाजाद्यं प्रातः सुशीतलं सक्षितम् ।
पिबतो नश्यति नियतं मूत्रयुगच्छ्रमुद्याच्च कविः ॥"
कविः शुक्रः ।
"कर्पूररजसा युक्ता वस्त्रवर्त्तिः घृतेन घृतेन ।
मेढ्रमार्गान्तरे न्यस्ता मूत्राघातं व्यपोहति ॥
धान्यगोक्षुरकः काथः कल्कसिद्धं क्षितं घृतम् ।
मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे ॥"
धान्यगोक्षुरकं घृतम् ।
"मूत्रकृच्छ्रेऽश्मरीरोगे भेषजं यत् प्रकीर्त्तितम् ।
मूत्राघातेषु सर्व्वेषु तत् कुर्य्याद्दोषकालवित् ॥"
इति मूत्राघाताधिकारः । इति भावप्रकाशः ॥
गरुड़पुराणोक्तविदाहं तस्य १६३ अध्याये द्रष्टव्यम् ॥ (तथास्य विषयः ।
"वस्तिवस्तिशिरोमेढ्रकटीवृषणपायवः ।
एकसम्बन्धिनः प्रोक्ता गुदास्थिविवराश्रयाः ॥
अधोमुखोऽपि वस्तिर्हि मूत्रवाहिसिरासुखैः ।
पार्श्वेभ्यः पूर्य्यते क्षिप्रं स्यन्दमानैरनारतम् ॥
यैस्तैरेव प्रविश्यैनं दोषाः कुर्व्वन्ति विप्लुतिम् ।
मूत्राघातान् प्रमेहांश्च तस्माच्चास्मै समाश्रयान् ॥"
इति वाग्भटे निदानस्थाने नवमेऽध्याये ॥
अथास्य पथ्यापथ्यानि ।
"अभ्यञ्जनक्षौद्रविरेकवस्ति-
स्वेदावगाहोत्तरवस्तयश्च ।
पुराणयवा लोहितशालयश्च
मांसानि धन्वप्रभवानि मद्यम् ॥
तक्रं पयोऽप्यपि मायूषः
पुराणकुल्माषफलं पटोलम् ।

मूर्खः

महादृढं तालफलास्थिमज्जा
हरीतकीकोमलनारिकेलम् ॥
गुवाकखर्ज्जूरकनारिकेल-
तालद्रुमाणामपि मस्तकानि ।
यथाक्रमं सर्व्वमिदञ्च मूत्रा-
घातातुराणां हितमावहन्ति ॥
शिरस्तानि च सर्व्वाणि यावामं मार्गशोधनम् ।
रूक्षं विदाहिविष्टम्भियावामं वेगधारणम् ।
करीरं वमनञ्चापि मूत्राघाती विवर्ज्जयेत् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे मूत्राघाताधिकारे ॥)

मूत्राग्रयः, पुं, (मूत्रस्याग्रयः आधारः ।) नाभेरधोदेशः । तत्पर्य्यायः । मूत्रपुटम् २ वस्तिः ३ ।
इति हेमचन्द्रः । २।२७० ॥ (अथास्य विषयः ।
"मूत्राग्रये वा गुदसुप्तयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ॥"
इति सुश्रुते उत्तरतन्त्रे ५५ अध्यायः ॥
यथा च तत्रैव निदानस्थाने ६ अध्याये ।
"एकसम्बन्धिनो ह्येते गुदास्थिविवरश्रिताः ।
मूत्राग्रयो मलाधारः प्राणायतनमुत्तमम् ॥")

मूत्रितः, त्रि, (मूत्रमस्य संजातम् । मूत्र + इतच् । यद्वा मूत्रयतीति इति । मूत्र + क्तः ।) जातमूत्रोत्सर्गः । तत्पर्य्यायः । मीढः २ । इत्यमरः । ३ । १ । ६६ ॥

मूर्खः, पुं, (मुह् + "मुहेः खो मूर् च ।" उणा० ५।२२। इति ख; धातोः मूरादेशश्च ।) माषः । इति त्रिकाण्डशेषः ॥ गायत्रीरहितः । यथा,
"क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥
क्रियाहीनस्य नित्यनैमित्तिकक्रियानुष्ठायिनः ।
मूर्खस्य गायत्रीरहितस्य । सार्थगायत्रीरहितस्येति हरदत्तः ॥ महारोगिणः पापरोगाः एकान्यतमरोगवतः ते च उन्मादस्वग्दोषौ राजयक्ष्मा श्वासो मधुमेहो भगन्दरः । उदरोऽश्मरीत्यष्टौ पापरोगा नारदोक्ताः । यथेष्टाचरणस्य दूषवेश्यादासक्तस्य । इति शुद्धितत्त्वम् ॥

मूर्खः, त्रि, (मुह् + खः । मूरादेशः ।) मुह्यति यः । तत्पर्य्यायः । अज्ञः २ मूढः ३ यथाजातः ४ वैधेयः ५ बालिशः ६ । इत्यमरः । ३।१।७८॥
तस्य वशीकरणोपायो यथा,—
"मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं
कार्य्येण द्विजमादरेण युवतीं प्रेम्णा गुरुं सेवया ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं
विद्याभी रसिकं रसेन सकलं लोकं कुर्य्याद्वशम् ॥"
इति नवरत्नानि ॥
"पयःपानं भुजङ्गानां केवलं विषवर्द्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥"
इति हितोपदेशः ॥

मूर्च्छा

मूर्खता, स्त्री, (मूर्खस्य भावः । मूर्ख + "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति तल् टाप् ।) मूर्खत्वम् । यथा,—
"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"
इति चाणक्यम् ॥
"अथास्यां नारिकेलभक्षणे मूर्खत्वं यथा,—
"कलङ्की जायते विप्रे तिर्य्यग्योनिश्च निम्बके ।
ताले शरीरनाशः स्यान्नारिकेले च मूर्खता ॥"
इति तिथ्यादितत्त्वम् ॥

मूर्खभालकः, पुं, (मूर्खो भाता यस्य सः । इति सिद्धान्तकौमुदी ॥

मूर्च्छना, स्त्री, (मूर्च्छ् + युच् । टाप् ।) मोताङ्गविशेषः । सा तु ग्रामस्य सप्तमभागः । तस्या लक्षणं एकविंशतिनामानि च यथा,—
"स्वरः संमूर्च्छितो यत्र रागतां प्रतिपद्यते ।
मूर्च्छनामिति तामाहुः कवयो ग्रामसम्भवाम् ॥
ललिता मध्यमा चित्रा रोहिणी च मनोज्ञजा ।
सौवीरी हस्तमध्या च षड्जमध्यमपञ्चमा ॥
मत्सरी मृदुमध्या च शुद्धान्ध्रा च कलावती ।
तीव्रा रौद्री तथा भ्राजी वैष्णवी खेदरी सुरा ॥
नादावती विशाला च विषु यामेषु विश्रुताः ।
एकविंशतिरित्युक्ता मूर्च्छना चन्द्रमौलिना ॥
मूर्च्छनां कलयतो मुरघ्नो-
र्वंशिकाध्वनिविशेषविलासैः ।
मूर्च्छनां ययुरनङ्गशरौघै-
रङ्गना रतिपतेरिव सेना: ॥"
इति सङ्गीतदामोदरः ॥
हनूमते षड्जादिस्वरत ऋषभादिस्वरोत्थाने यत्र स्वरो विरमति सा मूर्च्छना । भरतमते वाद्यस्य गानस्य वा समये यत्र हस्तस्य गलस्य वा कम्पनं सा मूर्च्छना । सा एकविंशतिप्रकारा । तत्र षड्जग्रामस्य मूर्च्छना ललिता १ मध्यमा २ चित्रा ३ रोहिणी ४ मतङ्गजा ५ सौवीरी ६ हस्तमध्या च ७ । मध्यमग्रामस्य मूर्च्छना पञ्चमा १ मत्सरी २ मृदुमध्या ३ शुद्धा ४ अन्ध्रा ५ कलावती ६ तीव्रा च ७ ॥ गान्धारग्रामस्य मूर्च्छना रौद्री १ भ्राजी २ वैष्णवी ३ खेदरी ४ सुरा ५ नादावती ६ विशाला च ७ । इति सङ्गीतग्राह्यम् ॥

मूर्च्छा, स्त्री, (मूर्च्छ् + "गुरोश्च हलः ।" ३। ३। १०२। इति अः टाप् ।) संमोहः । तत्पर्य्यायः । कश्मलम् २ मोहः ३ । इत्यमरः । २।८।१०६। मूर्च्छनम् ४ । इति शब्दरत्नावली ॥ मूर्च्छायः ५ । अथ मूर्च्छाधिकारः । तत्र मूर्च्छाया निदानपूर्ब्बिकां संप्राप्तिमाह ।
"लोकस्य बहुदोषस्य विरुद्धाहारसेविनः ।
वेगाघातादभिघाताद्दीनसत्त्वस्य वा पुनः ॥
करणायतनेभ्यो वा त्रयाणामन्यतमेषु च ।
निविशन्ते यदा दोषास्तदा मूर्च्छन्ति मानवाः ॥"
बहुदोषस्य अधिकदोषस्य । न त्वनेकदोषस्य तदा मूर्च्छा त्रिदोषजैव स्यात् तथवास्य को

दोषः तत्र। पृथग्दोषजानां मूर्च्छानां वक्ष्यमाणत्वात्। वेगाघातात् मद्यादौ अभिघातात् जयुद्वादिना क्षीणसत्त्वस्य स्वल्पसत्त्वगुणस्य अर्थादधिकतमोगुणस्य यत उक्तं मूर्च्छा पित्ततमःप्रायेति करणायतनेषु करणं मनस्तस्यायतनेषु स्थानेषु वाङ्मुखेषु कर्मेन्द्रियेषु। अभ्यन्तरेषु बुद्धीन्द्रियेषु॥ * ॥ सामान्यं लक्षणमाह।

"संज्ञावहासु नाडीषु पिहितासन्निलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखयपोहतः॥
सुखदुःखयपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः सन्निधा सा प्रकीर्तिता॥"

तमोगुणः अज्ञानहेतुः। अभ्युपैति आगच्छति। सुखदुःखयपोहतः सुखदुःखज्ञानाभावकरम्। नरे सुखदुःखज्ञाने नरः काष्ठवत् पतति तां मोहो मूर्च्छेति प्राहुरित्यन्वयः। मूर्च्छाया मूर्च्छायोऽपि पर्यायः। यत उक्तम्।

"संज्ञोपघातो मूर्च्छायो मूर्च्छा स्यान्मूर्च्छनं तथा।
कामलं प्रलयो मोहः संन्यासस्तु क्लमोपमः॥"
इति॥

षड्पि मूर्च्छा विशेषेति।

"वातादिभिः प्रोक्तिलेन मद्येन च विषेण च।
षट्स्वपीतासु पित्तस्य प्रभुत्वेनावतिष्ठते॥"

यत उक्तम्। मूर्च्छा पित्ततमःप्रायेति॥ * ॥ पूर्वरूपमाह।

"क्षुत्पीड़ा जृम्भणं ग्लानिः संन्यासौन्मेषमेव च।
सर्वासां पूर्वरूपाणि यथास्वं तां विभावयेत्॥"

तत्र वातिकं मूर्च्छायमाह।

"नीलं वा यदि वा श्यामाकाशमथवारुणम्।
पश्यंस्तमः प्रविशति शीघ्रञ्च प्रतिबुध्यते॥
वेपथुश्चाङ्गमर्दश्च प्रलापो हृदयस्य च।
कार्ष्ण्यं श्यावारुणा छाया मूर्च्छायें वातसम्भवे॥"

नीलं नीलवर्णम्। श्यामं कज्जलाभम्। अरुणं अत्यन्तरागम्। तमः प्रविशति मूर्च्छति। श्यावारुणा च्छाया गात्रस्य॥ * ॥ पैत्तिकमाह।

"रक्तं हरितवर्णं वा वियत् पीतमथापि वा।
पश्यंस्तमः प्रविशति सस्वेदः प्रतिबुध्यते॥
सपिपासः ससन्तापो रक्तपीताकुलेक्षणः।
सन्निभवर्चाः पीताभो मूर्च्छायें पित्तसम्भवे॥"

श्लैष्मिकमाह।

"मेघनक्षत्रमाकाशं तमोभिर्वा घनैर्वृतम्।
पश्यंस्तमः प्रविशति चिराच्च प्रतिबुध्यते॥
गुरुभिः प्रावृतैरङ्गैर्वेधेवार्द्रेण चर्मणा।
सप्रसेकः सहृल्लासो मूर्च्छायें कफसम्भवे॥"

मेघसङ्काशं शुभ्रमेघसङ्काशमित्यर्थः। यत आह सुश्रुतः।

"कफेन पश्येद्यदपि श्वेताभप्रतिमानि तु।"
घनैर्निविड़ैस्तमोभिः। गुरुभिरङ्गैरुपलक्षितः। सुश्रुतेन मूर्च्छायः षड्विध उक्तः॥ * ॥ चरकस्तु सान्निपातिकमपि मूर्च्छायमाह।

"सर्वाकृतिः सन्निपातादपस्मार इवागतः।
स जन्तुं पातयत्याशु विना बीभत्सचेष्टितैः॥"

अपस्मार इव तेन महताभिघातेन पतति चिरेण प्रतिबुध्यते। तर्हि तयोः को भेद इत्यत आह। स सान्निपातिको मूर्च्छायः विना बीभत्सचेष्टितैः फेनवमनदन्तघट्टनाक्षिविप्लुतादिभिः विना पातयति॥ * ॥ रक्तजाया मूर्च्छाया निदानमाह।

"दृष्टियज्ञस्तमोरूपं रक्तगन्धस्तदन्वयः।
तस्मादस्तस्य गन्धेन मूर्च्छन्ति भुवि मानवाः॥"

तमोरूपं तमोबहुलम्। मानवाश्च ये तामसाः न तु सात्त्विका राजसाश्च। अत्रैके वदन्ति नैषा युक्तिः समीचीना तर्हि चम्पकादिगन्धेनापि मूर्च्छा प्रसज्येत तत्रापि गन्धस्य पार्थिवत्वात्। अत आह।

"द्रव्यस्वभाव इत्येके यदृच्छापि विमुह्यति।"

अत्राह भोजः।

"दर्शनादद्यजस्रत्वान्नान्यत्वेन प्रमुह्यति॥"

रक्तेन मूर्च्छितस्य लक्षणमाह।

"लब्धाङ्गदृष्टिर्लब्धेन गूढोच्छ्वासस्तु मूर्च्छितः।"

मद्यजविषजयोर्निदानमाह।

"गुणास्तीव्रतरत्वेन स्थिनास्तु विषमद्ययोः।
त एव तस्मात्ताभ्यान्तु मोहौ स्यातां यथोत्तरौ॥"

ये गुणा लघूरूक्षास्तु विशदव्यवायितीक्ष्णाविकासिसूक्ष्मोष्णानिर्देश्यरसत्वादयः। तैलादौ द्रव्ये यस्ताः तीव्राश्च सन्ति त एव गुणाः विषमद्ययोस्तु तीव्रतरत्वेन स्थिनाः। तत्रापि भेदः। त एव मद्ये द्रव्यन्ते विषे तु बलवत्तरा इति॥ * ॥ मद्यजाया मूर्च्छाया लक्षणमाह।

"मदेन प्रलपन् याते नष्टविभ्रान्तमानसः।
गात्राणि विक्षिपन् भूमौ जरां यावन्न यात्यतन्॥"

नष्टविभ्रान्तमानसः नष्टं सर्वथा स्मृतिहीनं विभ्रान्तं रज्जौ सर्पज्ञानयुक्तं मानसं यस्य सः। जरां जीर्णताम्। अतन् मद्यम्॥ * ॥ विषजाया लक्षणमाह।

"वेपथुश्चप्रलापाः स्युस्तमश्च विषमूर्च्छिते।
वेदितव्यं तीव्रतरं यथास्वं विषलक्षणम्॥"

विषस्य मूलकन्दफलपत्रक्षीरादिभेदभिन्नस्य यथा स्वकं स्वकं लक्षणमुक्तं सौश्रुते कल्पस्थाने तल्लक्षणं मद्यापेक्षया तीव्रतरं वेदितव्यम्। ननु संज्ञानाशेन साधर्म्यान्मूर्च्छाभ्रमसन्न्यादीनां को भेद इत्यत आह।

"मूर्च्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः।
तमोवातकफात्सन्न्यो निद्रा श्लेष्मतमोभवा॥"

रजःपित्तानिलाद्भ्रम इति नात्र समुच्चयः। केवलपित्तज्वरे भ्रमस्योक्तत्वात्। भ्रमश्चक्रारूढस्येव भ्रमदस्तुज्ञानं स्वदेहस्य भ्रमत इव ज्ञानं वा॥ * ॥ तन्द्राया लक्षणमाह।

"इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः।
निद्रार्तस्येव यस्येहा तस्य तन्द्रां विनिर्दिशेत्॥"

इन्द्रियाणामर्थः प्रयोजनं येषु तेषु अर्थादविषयेषु असंवित्तिः असम्यक् ज्ञानम्। इति इन्द्रियार्थासम्यग्ज्ञानादि। निद्रायां प्रवृत्तस्य ज्ञानाभावस्तन्द्रायान्तु प्रबोधितस्यापि ज्ञानं इत्यनयोर्भेदः॥ * ॥ क्लमस्य लक्षणमाह।

"योऽनायासः श्रमो देहे प्रवृत्तः श्वासवर्जितः।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः॥"

इन्द्रियार्थप्रबाधकः इन्द्रियाणां बुद्धीन्द्रियाणां कर्मेन्द्रियाणाञ्च अर्थैः प्रयोजनं विषयग्रहणं तस्य प्रबाधकः आवरणेन॥ * ॥ निद्रालक्षणमाह।

"यदा तु मनसि ग्लानि कर्मात्मानः क्लमान्विताः।
विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः॥"

ग्लानि ग्लाने आत्मनि इति यावत्। कर्मात्मानः कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च ग्लानान्विताः आत्मानः॥ * ॥ संन्यासस्य संप्राप्तिपूर्वकं लक्षणमाह।

"वाग्देहमनसां चेष्टामाविष्यात्मबला मलाः।
संन्यस्यन्त्यबलं जन्तुं प्राणायतनमाश्रिताः॥
स नाम संन्यासमूर्च्छितः काष्ठीभूतो मृतोपमः।
प्राणैर्विमुच्यते शीघ्रं सद्यः फलां क्रियाम्॥"

आविष्य विनाश्य संन्यस्यन्ति मूर्च्छयन्ति। प्राणायतनं हृदयम्। संन्यस्तः मूर्च्छितः। काष्ठीभूतः क्रियारहितः। अतएव मृतोपम इति। सद्यःफलां क्रियां सूचीव्यधनजलावपीड़नकपिकच्छुघर्षणवृश्चिकादिदंशनादिरूपाम्॥ * ॥ संन्यासस्य मूर्च्छातो भेदमाह।

"दोषैर्मदमूर्च्छाया गतवेगेषु देहिनः।
स्वयमप्युपशाम्यन्ति संन्यासो नौषधैर्विना॥"

मदमूर्च्छायाः मदः अप्रवृत्त उन्मादः। मूर्च्छायाः मूर्च्छा॥ * ॥ अथ मूर्च्छायाश्चिकित्सा।

"सेकावगाहा मद्यस्य सहाराः
पीताः प्रदेहा व्यजनानिलाश्च।
पीतानि पानानि च गन्धवन्ति
सर्वासु मूर्च्छासु निवारितानि॥"

मद्यस्य मद्यकान्तादयः। हाराः मुक्तादिहाराः। पीताः प्रदेहाः सकर्पूरचन्दनाद्यनुलेपनानि। पीतानि पानानि सितामलकादिपानकानि। गन्धवन्ति कर्पूरादिसुगन्धवन्ति। सर्वासु मूर्च्छासु निवारितानि। अस्यायमभिप्रायः। सेकादीन्यासु मूर्च्छासु हितान्येव किन्तु वातश्लेष्मजासु मूर्च्छासु न निवारितानि। तत्रापि पित्तस्य प्राधान्यात्।

"सिद्धानि वर्गे मधुरे पयांसि
सदाड़िमा आज्यलजा रसाश्च।
तथा यवा लोहितशालयश्च
मूर्च्छासु पथ्याः ससतीनसक्ताः॥"

सतीनः कलायः।

"कोलमज्जोषणोशीरं केशरं पीतवारिणा।
पीतं मूर्च्छां जयेल्लीढ़ा क्षौद्रा वा मधुसंयुता॥
पीतेन तोयेन भृष्टं मृणालं
क्षौद्राच्च पथ्या मधुनावलिह्यात्।

र्छर्दि

कुर्य्याच्च नासावदनावरोधं
क्षीरं पिबेद्वाप्यथ मानुषीणाम् ॥
द्राक्षासितादाड़िमलाजवन्ति
कङ्कारनीलोत्पलपद्मवन्ति ।
पिबेत् कषायाणि च शीतलानि
पित्तज्वरं यानि च यापयन्ति ॥
घृतौषधीजगोमूत्रक्षाराग्निरिचसैन्धवैः ।
अञ्जनं स्यात् प्रबोधाय सरसोनघृताक्तवैः ॥"
अन्यच्च ।
"अञ्जनं सत्यगारञ्च मधुसिन्धुघृतौषधैः ।
प्रमोहदोषे भवति भाषितं भिषजांवरैः ॥"
घृता मनःशिला । उषणं मरीचम् ।
"मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णं पिष्टाश्चसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥"
अथ रक्तजादीनां मूर्च्छानां चिकित्सा ।
"रक्तजायान्तु मूर्च्छायां हितः शीतक्रियाविधिः ।
मद्यजायां पिबेन्मद्यं निद्रां सेवेत वा सुखम् ।
विषजानां विषघ्नानि भेषजानि प्रयोजयेत् ॥"
अथ संन्यासस्य चिकित्सा ।
"प्रभूतदोषक्लमसोऽतिरेकात्
संमूर्च्छितो नैव विबुध्यते यः ।
संन्यस्तसंज्ञः स हि दुश्चिकित्स्यो
नरो भिषग्भिः परिकीर्त्तितोऽसौ ॥
अञ्जनाद्यवपीड़श्च धूमाः प्रधमनानि च ।
सूचीभिस्तोदनं नस्तः दाहः पीड़ा नखान्तरे ॥
सुप्तनं केशलोम्नाञ्च दन्तैर्दशनमेव च ।
आत्मगुप्तावघर्षश्च हितस्तस्य प्रबोधने ॥"
अवपीड़ः कल्कीकृतौषधरसस्य नासापुटे दानम् । तस्य संन्यस्तस्य ॥ * ॥ अथ मूर्च्छायां रसः ।
"कणामधुघृतं सूतं मूर्च्छायां प्राशयेद् भिषक् ।
शीतसेकावगाहादि सर्व्वाङ्गे पीड़नं हठात् ॥"
सूतं मारितम् ।
"ताम्रचूर्णं समोद्वीरं केशरं घृतवारिणा ।
पीतं मूर्च्छां द्रुतं हन्यात् दृष्टमिन्द्रायुधिर्यथा ॥"
ताम्रचूर्णं मारिततास्रचूर्णम् ॥*॥ अथ भ्रमस्य चिकित्सा ।
पिबेदुरालभाक्काथं सघृतं भ्रमशान्तये ।
पथ्याक्काथेन संसिद्धं घृतं धात्रीरसेन वा ॥
शुण्ठीलशाग्रसाङ्गानां साभयानां पलं पलम् ।
सुरसस्य पटं पलान्येषां गुटिका भ्रमनाशिनी ॥
ताम्रं दुरालभाक्काथैः पीतमू घृतसंयुतम् ।
निवारयेद्भ्रमं शीघ्रं तं यथा शम्भुभाषितम् ॥"
अथ तन्द्राया अतिनिद्रायाश्चिकित्सा ।
"तुरङ्गलालालवणोत्तमेङ्ग-
मनःशिलामागधिकामधूनि ।
नियोजितान्यक्षिणि विनिघ्नयेन
तन्द्रां सनिद्रां विनिवारयन्ति ॥"
इन्दुः कर्पूरम् ।
"सैन्धवं श्वेतमरिचं सर्षपः कुष्ठमेव च ।
वस्तमूत्रेण संपिष्टं नस्यं तन्द्रानिवारणम् ॥"
श्वेतमरिचं विष्णुबीजम् ।
"मुण्डीकणागस्तिरसोपणानि
नस्येन तन्द्राधिजयोक्तवाणि ।
क्षुद्राम्लतापौष्करनागराणि
भार्गीशिग्वाभ्यां जयितानि पानात् ॥"
शिग्रु हरीतकी । इति मूर्च्छाभ्रमतन्द्रातिनिद्रासंन्यासाधिकारः । इति भावप्रकाशः ॥
(अथास्यां पथ्यविधिः ।
"शैवालगाङ्गौ मद्यः सद्वाराः
शीताः प्रदेहा व्यजनानिलश्च ।
शीतानि पानानि च मन्यवन्ति
धारागृहं शीतमरीचिरोचिः ॥
धूमोऽञ्जनं लावयमसमोक्षो
दाहश्च सूचीपरिशोदनानि ।
रोम्णां कषायाणामपि कर्षणानि
नखान्तपीड़ा दशनोपदंशः ॥
नासासुखद्वारमरक्तिरोधो
विरेचनच्छर्दनलङ्घनानि ।
क्रोधो भयं दुःखकरी च घृणा
कथा विचित्रा च मनोहरा च ॥
छायातपोऽभ्रः घृतधौतसर्पि-
र्दूनि तिक्तानि च लाजमद्यः ।
जीर्णा यवा लोहितशालयश्च
कौद्रं हविर्मुद्गरसौनयूषाः ॥
धन्वौद्भवा मांसरसाश्च रागाः
सद्राड्वा गव्यपयः सिता च ।
पुराणकुष्माण्डपटोलमोच-
हरीतकीदाड़िमसारिकेलम् ॥
मधूकपुष्पाणि च तद्फलीयं
उपोदिकाशाकानि लघूनि चापि ।
प्रवीरवीरं सितचन्दनानि
कर्पूरवीरं हिमवालुका च ॥
अत्युच्चशब्दोऽद्भुतदर्शनानि
गीतानि वाद्यान्यपि चोत्कटानि ।
अमः स्तुतिश्चिन्तनमात्मयोधा-
धैर्यञ्च मूर्च्छावति पथ्यवर्गः ॥"
अथापथ्यविधिः ।
"ताम्बूलं पत्रशाकानि दृष्टसंघर्षणमातपम् ।
विरुद्धान्नपानानि व्यवायं स्वेदनं कटुम् ।
दृष्टनिद्रार्थोद्वेगरोधं तक्रं मूर्च्छामयी त्यजेत् ॥"
इति वैद्यकपथ्यापथ्यविधौ मूर्च्छाधिकारे ॥)
मूर्च्छालः, त्रि, (मूर्च्छा अस्त्यस्येति । "सिध्मादिभ्यश्च ।"५ । २ । ९७ । इति लच् ।) मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥
मूर्च्छितः, त्रि, (मूर्च्छास्य संजाता । मूर्च्छा + तारकादित्वात् इतच् ।) मूर्च्छायुक्तः । तत्पर्य्यायः । मूर्त्तः २ मूर्च्छालः ३ । इत्यमरः ।२। ६ । ६१ ॥ (यथा, भट्टौ । ६ । २३ ।
"तथाभ्यधिक्तवारीणि पिष्टभ्यः श्लोकमूर्च्छितः ।")
उच्छ्रयः । मूढः । इति मेदिनी ॥ वृद्धः । इत्यजयः ॥ (यात्रः यथा, रामायणे ।२।११४।१६-२०॥

मूर्च्छा

"किं नु खल्वय गम्भीरो मूर्च्छितो न विबुध्यते ।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥
वारुणीमदगन्धश्च माल्यगन्धश्च मूर्च्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥")
मूर्च्छः, त्रि, (मुर्च्छनर्हे + क्तः ।) वृद्धः । इति मूर्च्छग्रन्थटीकायां रायमुकुटः ॥
मूर्च्छः, त्रि, (मूर्च्छ + क्तः "राजोपः ।"६।४।२१। इति छलोपः । "न ध्याख्यापृमूर्च्छिमदाम् ।"८। २ । ५७ । इति निष्ठातकारस्य नत्वाभावः ।)
मूर्च्छितः । इत्यमरः । २ । ६ । ६१ ॥ कठिनः । मूर्त्तिमान् । इति मेदिनी । ते, ७५ ॥
भ्रायमते पृथिवी जलं तेजः वायुः मनश्च । रूपं गुणाः । रूपं रसः गन्धः स्पर्शः परत्वं अपरत्वं गुरुत्वम् । स्नेहः वेगश्च । मूर्त्तामूर्त्तसाधारणगुणाः । यथा, भाषापरिच्छेदे ।
संख्या परिमितिः पृथक्त्वं संयोगः विभागश्च ।
(यथा, मार्कण्डेये । २१ । ४७ ।
"यच्चामूर्त्तं यच्च मूर्त्तं समस्तं
यद्वा भूतैर्व्येकमेकञ्च किञ्चित् ।
यद्विद्यन्ति व्याप्तमे खेऽन्यतो वा
तत्सम्बन्धं तन्मयैर्व्यञ्जनैश्च ॥")
मूर्त्तिः, स्त्री, (मूर्च्छ + क्तिन् । "न ध्याख्येति ।" ८ । २ । ५७ । इत्यत्रोक्त्या तकारस्य नत्वम् ।) काठिन्यम् । शरीरम् । इत्यमरः । ३ । ३ । ६६ ॥ (यथा, मनौ । १२ । १२० ।
"खं सन्निवेशयेत् खेषु चेष्टनञ्चानिलं स्पर्शने ऽनिलम् ।
पक्तिदृष्टयो परं तेजः क्लेदे ऽपो गात्र मूर्त्तिषु ॥")
प्रतिमा । इति हेमचन्द्रः ॥ स्वरूपः । यथा,—
"आचार्य्यो ब्रह्मणो मूर्त्तिः पिता मूर्त्तिः प्रजापतेः ।
भ्राता मरुत्पतेर्मूर्त्तिर्म्माता साक्षात् क्षितेस्तनूः ॥
दयाया भगिनी मूर्त्तिर्धर्म्मस्यात्मातिथिः स्वयम् ।
अग्नेरभ्यागतो मूर्त्तिः सर्व्वभूतानि चात्मनः ॥"
इति श्रीभागवते । ६ । ७ । २६—३० ॥
(ब्रह्मसावर्णिपुत्रविशेषः । यथा, तत्रैव । ८ । १३ । २१—२२ ।
"तपसता भूरितेजसा हविर्भुतप्रसुता द्विजाः सुवासना विरुद्धात्मा जयो मूर्त्तिरदा द्विजाः ॥"
मूर्त्तिमत्, क्ली, (मूर्त्तिः काठिन्यमस्त्यस्मिन् । मूर्त्ति + मतुप् ।) शरीरम् । इति हेमचन्द्रः ।३।२२७।
मूर्त्तिमान्, [त्] त्रि, (मूर्त्तिरस्त्यस्य । मूर्त्ति + मतुप् ।) मूर्त्तिविशिष्टः । यथा,—
"मङ्गलानामग्रनिर्मृगां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् ।"
इत्यादि श्रीभागवतम् ॥ (यथा च रघौ ।१२।६७।
"हृदयं स्वयमायातं वैदेह्या इव मूर्त्तिमत् ।"
कुशपुत्रः । यथा, हरिवंशे । २७ । १२ ।
"कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः ।
कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा ॥"
स्त्रियां ङीप् । यथा, महाभारते ।३।१०८।१४ ।
"दर्शयामास तं गङ्गा तदा मूर्त्तिमती स्वयम् ।"।

मूर्द्धकः, पुं, (मूर्द्धन्यभिषिक्त इति। मूर्द्धन्+संज्ञायां कन्।) क्षत्रियः। इति शब्दरत्नावली॥

मूर्द्धकर्णौ, स्त्री, द्वयम्। इति हारावली॥

मूर्द्धखोलं, क्ली, (मूर्द्ध्नः खोल इव।) छत्रम्। इति त्रिकाण्डशेषः॥

मूर्द्धजः, पुं, (मूर्द्धनि जायते। जन+डः।) केशः। इति जटाधरः॥ (यथा, हरिवंशे। ६८। ८२।

"बहुमूलविषमकपिला
स्थूलस्फुटिताग्रपरुषरूक्षाश्च।
अतिकुटिलाश्चातिघनाश्च
मूर्द्धजा वित्तहीनानाम्॥")

मूर्द्धनि जाते, त्रि॥

मूर्द्धन्यः, त्रि, (मूर्द्धन्+यत्।)मूर्द्धनि भवः। यथा। ऋवर्णं ट ठ ड ढ ण र ष मूर्द्धन्याः। इति सुग्धबोधव्याकरणम्॥ (यथा च भागवते।१। ७। ५५।

"अर्जुनः सहसाजाय हरेर्हार्दमथासिना।
मणिं जहार मूर्द्धन्यं द्विजस्य सहमर्द्धजम्॥")

मूर्द्धपुष्पः, पुं, (मूर्द्धनि पुष्पमस्य।) शिरीषवृक्षः। इति शब्दमाला॥ (गुणादयोऽस्य शिरीषशब्दे विधेयाः॥)

मूर्द्धरसः, पुं, (मूर्द्धन्यस्नदुपरिस्थो रसः।) भक्तफेनः। इति शब्दचन्द्रिका॥

मूर्द्धवेष्टनं, क्ली, (मूर्द्ध्नः वेष्टनम्।) उष्णीषः। इति हेमचन्द्रः। ३। ३३१॥

मूर्द्धा, [न्] पुं, (मूर्व्वति बध्नाति यच्चेति। मूर्व्व+"अन् उच्चन् पूषन्। उणा०। १५८। इति कनिन्। उकारस्य दीर्घः वकारस्य धकारश्च।) मस्तकः। इत्यमरः। २। ६। ८५। (यथा, हरिवंशे। ७७। २।

"लोहे पात्रे तक्रलान् कोद्रवाणां
शुक्ले पक्षाक्षोद्यचूर्णेन साकम्।
पिष्टान् कृत्वा मूर्द्धि शुक्लाम्बरेण
दत्वा तिष्ठेद्दैवयित्वार्कपत्रैः॥")

मूर्द्धाभिषिक्तः, पुं, क्षत्रियः। राजा। इत्यमरः। ३। ३। ६१॥ मूर्द्धन्यभिषिक्तो मूर्द्धाभिषिक्तः राज्यारोपणसमये प्रथमः क्षत्रियो मूर्द्धाभिषिक्तः। तत्प्रभवत्वात् योगत्वयानभिषिक्तोऽपि मूर्द्धाभिषिक्तः। (यथा, भागवते। ६।१५।४१।

"राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः।
तीर्थसंसेवया चांहो ब्रह्मघ्नाप्युत्तमेतनः॥")

वर्णसङ्करविशेषः। स तु विप्रात् क्षत्रियायां जातः॥ प्रधानः। इति भरतः॥ मन्त्री। इति मेदिनी। ते, २३२॥

मूर्द्धावसिक्तः, पुं, वर्णसङ्करभेदः। स तु क्षत्रियायां ब्राह्मणेनोत्पादितः। यथा,—

"क्षीणजन्मरजातासु द्विजैरुत्पादितान् सुतान्।
सदृशानेव तानाहुर्मात्रदोषविगर्हितान्॥"

इति मानवे १० अध्याये ६ श्लोकः॥ * ॥

'क्षीणेति आनुलोम्येन ब्राह्मणक्षत्रियवैश्यासु भार्यासु द्विजातिभिर्ये उत्पादिताः पुत्राः। यथा। ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायाम्। तान् मातृदोषान् जातीयत्वदोषेण गर्हितान् पितृसदृशान् न तु पितृसजातीयान् मन्वाद्य आहुः। पितृसदृशग्रहणात् मातृजातेरुत्कृष्टाः पितृजातितो निकृष्टा ज्ञेयाः। एतेषाञ्च नामानि मूर्द्धावसिक्तमाहिष्यकरण्याख्यानि याज्ञवल्क्यादिभिरुक्तानि। वृत्तयश्चैषामुशनसोक्ताः। वृत्त्यभावेऽग्निशास्त्रधारणञ्च मूर्द्धावसिक्तानाम्। वृत्त्यर्थं तनयजीवनं शस्त्रस्त्रा च माहिष्याणाम्। द्विजातिशुश्रूषा धनधान्याध्यक्षता राजसेवा दुर्गान्तःपुररक्षा च पारशवयोग्यकरणानामिति। इति तट्टीकायां कुल्लूकभट्टः॥

मूर्द्धा, [न्] पुं, (मूर्व+कनिन्। वस्य धः दीर्घश्चोकारस्य।) शिरः। यथा,—

मूर्द्धा मूर्द्धा शिरोदेशे पुंसि स्यातामिमौ समौ।
इत्युणादिकोषः॥

मूर्द्धौ नदे मूर्द्धा मूर्द्धा च। अस्य धडध्वडौ। इति तट्टीका॥ (यथा, देवीभागवते।२।७।२८।

"दृष्ट्वा वेणीं क्षतां मूर्द्धि कज्जलं लोचने तथा।
असिं गृहीत्वा तरसा छेत्स्याहं नात्यथा
सुखम्॥")

मूर्व्वा, स्त्री, (मूर्व्वति इति। मूर्व+अच् टाप्।) लताविशेषः। धनुर्गुणोपयुक्ता सुरसा इति ख्याता। तत्पर्य्यायः। देवी २ मधुरसा ३ मोरटा ४ तेजनी ५ मधा ६ मधुलिका ७ धनुःश्रेणी ८ गोकर्णी ९ पीलुपर्णी १०। इत्यमरः। २। ४। ८३॥ सुवा ११ मूर्व्वी १२। मधुश्रेणी १३ धनुः १४ श्रेणी १५। इति तट्टीकायां भरतः॥ सुरङ्गिका १६। देवश्रेणी १७ पृथक्पत्रा १८ मधुस्रवा १९ अतिरसा २० पीलुपर्णिका २१ दिव्यलता २२ ज्वलिनी २३ गोपवल्ली २४। अस्या गुणाः। अतितिक्तत्वम्। कषायत्वम्। उष्णत्वम्। कृमिरोगकफवातवमिप्रमेहकुष्ठविषमज्वरनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च।

"मूर्व्वा सरा गुरुः स्वादुस्तिक्ता पित्तासमेहनुत्।
त्रिदोषहृच्छ्वासकृमिरोगकण्डूकुष्ठज्वरापहा॥"

इति भावप्रकाशः॥

(तस्याः पर्य्यायः।

"तेजनी पिशुनी देवी तिक्तवल्ली पृथक्पत्रा।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च॥"

इति वैद्यकरत्नमालायाम्॥

"मूर्व्वा मधुरसा ज्ञेया तेजनी तिक्तवल्लका।"

इति गारुडे २०८ अध्याये॥)

मूल क रोपणे। इति कविकल्पद्रुमः॥ (चुरा० उभ०-सक०-सेट्।) दीर्घौ रोपणमारोपणम्। कं मूलयति वृक्षं लोकः। गोविन्दभट्टस्तु रोहणे इति पठित्वा रोहणं जन्मेति व्याख्याति। इति दुर्गादासः॥

मूलं, क्ली, (मवते बध्नाति वृक्षादिकमिति। मू+"मूङ्मूलबिभ्यः कः।" उणा० ४।१०८। इति कः।) शिफा। झिकड़ इति भाषा। तत्पर्य्यायः। ब्रध्नः २ अङ्घ्रिनामकः ३। इत्यमरः।२।४।१२॥ कन्दः ४ वृक्षः ५। इति शब्दरत्नावली॥ जटा ६। इति जटाधरः॥ (यथा, मनौ।३।२२७।

"भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च।
पुष्पाणि चैव सर्वाणि पत्राणि सुरभीणि च॥")

आद्यम्॥ (यथा, महाभारते।१।२६१।९।

"कुतोमूलमिदं दुःखं ब्रातुमिच्छामि तत्त्वतः।
विदित्वाप्यपकर्षेयं शक्त्यपेक्षमकर्षितुम्॥")

नक्षत्रविशेषः॥ (यथा, मार्कण्डेये।३३।१६।

"कुर्वन्त्वाधुरधासु लभन्तां चक्रवर्त्तिताम्।
आधिपत्यञ्च ज्येष्ठासु मूले चारोग्यसुत्तमम्॥"

निकृष्टः। अन्तिकम्। इति विश्वः॥ (यथा, मार्कण्डेये।८६।६।

'जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः।)

मूलवित्तम्। इति भरतधृतमेदिनी॥ (यथा, मनौ। ८। २०२।

"अथ मूलमनाहार्य्यं प्रकाशक्रयशोधितः।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्॥")

निजम्। इत्यजयपालः॥ चरणम्। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। १०। ८७। १०।

"अधा मूलं धातुधानस्य वृश्च।"

"मूलं पादम्।" इति तद्भाष्ये सायणः॥)

टीकार्हग्रन्थः। यथा। समानबलेत्यादि मूलम्। इति सत्प्रतिपत्तौ गदाधरभट्टाचार्य्यः। मूलम्। इति शब्दचन्द्रिका॥ पिप्पलीमूलम्। पुष्करमूलम्। इति राजनिर्घण्टः॥ विशेषमूलस्य अन्वेषणनिषेधो यथा,—

"नदीनामभिहोत्राणां भारतस्य कुलस्य च।
मूलान्वेषो न कर्त्तव्यो मूलाद्दोषो न हीयते॥"

इति गारुडे ११६ अध्यायः॥

(कारणम्। यथा, मनौ। ११। ८४॥

"धर्म्मस्य ब्राह्मणो मूलमग्रं राजन्य उच्यते।

"मूलं कारणम्।" इति तट्टीकायां कुल्लूकभट्टः॥)

मूलः, त्रि. (मूलयतीति। मूलप्रतिष्ठायाम्+कः।) अश्विन्यादिसप्तविंशतितमनक्षत्राधिष्ठितनक्षत्रम्। यथा,—

"इत्था स्थानी अवया अक्षीवे मूलमूधिरो नपुंसि।
स्यात् पुंसि पुनर्वसुपूर्व्वौ मूलमक्षौ स्त्रियां
शीर्षा:॥"

इति तिथ्यादितत्त्वम्॥

"मूलमाद्ये शिफायाञ्च निकटे मे तु वाच्यिम्।"

इति शब्दरत्नावली च॥

मूलकं

स तु निर्ऋतिदेवताकः। इति ज्योतिस्तत्त्वम्॥ सिंहपुच्छाकारः। इति हुडूर्णचिन्तामणिः॥ ग्रहनक्षत्रैर्नवतारामयश्च। अस्मिन् मस्तकोपर्युदिते मौनव्रतस्याष्टौ पलानि गतानि भवन्ति। यथा,—

"मौलिभागि नवतारकाङ्किते
मूलभे सुतनु! ग्रहनक्षत्रिणि।
लिम्पिकाष्टकमराजकुञ्जरे
निर्जगाम पृथुरोमजव्रतः॥"

इति कालिदासकृतराजनिघण्टवचनम्॥

अस्मिन् नक्षत्रे जातस्य फलम्।

"मूलं विनाशावयवं वनमूलं
कुलं दहत्येव वदन्ति सन्तः।
पैतृव्यघातः पुरुषा विपीडात्
सौभाग्यमायुश्च कुलानुवृद्धिः॥"

इति कोष्ठीप्रदीपः॥

अस्मिन् मांसभक्षणनिषेधो यथा,—

"चिञ्चाखर्जूरकाश्यपर्णासु तैलं
चौरं विप्राख्याप्रतिपत्सु वर्ज्यम्।
मूले नृणां भाद्रपदासु मांसं
योषिन्मघाज्येष्ठिकयोत्तरासु॥"

इति तिथ्यादितत्त्वम्॥

मूलकं, क्ली, पुं, (मूल+संज्ञायां कन्।) कन्दविशेषः। मूला इति भाषा। तत्पर्य्यायः। राजालुकः २ महाकन्दः ३ हस्तिदन्तकः ४। इति हारावली॥ गौलकच्छम् ५ मूलाङ्कम् ६ दीर्घमूलकम् ७ अत्र दीर्घपञ्चकमपि पाठः। क्षतक्षारम् ८ कन्दमूलम् ९ हस्तिदन्तम् १० सितम् ११ ग्रहमूलम् १२ हरिप्रपर्णम् १३ रुचिरम् १४ दीर्घकन्दकम् १५ क्षुद्रकरक्षारमूलम् १६। अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। कटूष्णनाशिदीपनत्वम्। दुर्नामगुल्मकृच्छ्रदोषवातनाशित्वम्। रुचिदत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ * ॥ अपि च।

"बालमूलकपत्री तु रोचनी वह्निदीपनी।
मूलकं गुरु विष्टम्भि तीक्ष्णमामं त्रिदोषजित्॥
तदेव स्निग्धसिद्धन्तु पित्तलं कफवातजित्।
शुष्कं त्रिदोषशमनं शोथघ्नं गरजिल्लघु॥
तत्पुष्पं कफपित्तघ्नं तत्फलं कफवातजित्॥"

इति राजवल्लभः॥

अन्यच्च।

"मूलकं द्विविधं प्रोक्तं तत्रैकं लघुमूलकम्।
ग्रालामकटकं विद्धं ग्रालेयं मरुसम्भवम्॥
पाण्डुमूलकं तीक्ष्णं तथा मूलकपोतिका।
नैपालमूलकञ्चान्यत्तदुभवैन्नजदन्तवत्॥
लघुमूलकमुष्णं स्यादुष्णं लघु च पाचनम्।
दोषत्रयहरं स्वर्य्यं स्वरश्वासविनाशनम्॥
नासिकाकण्ठरोगघ्नं नयनामयनाशनम्।
मध्यमदेवकन्दोक्तं गुरु दोषत्रयप्रदम्।
स्निग्धसिद्धं तदेव स्याद्दोषत्रयविनाशनम्॥"

इति भावप्रकाशः॥

(तथाचास्य गुणाः।

"बालं दोषहरं प्रोक्तं त्रिदोषं मारुतापहम्।
स्निग्धसिद्धं विशुष्कन्तु मूलकं कफवातजित्॥"

इति चरके सूत्रस्थाने। २७ अध्यायः॥)

सौरभाष्ये तद्भक्षणे दोषो यथा,—

"मकरे मूलकञ्चैव सिंहे चाजाविकन्तथा।
कार्त्तिके सूरणञ्चैव यदि गोमांसभक्षणम्॥"

इति वर्ज्यनीयवचनम्॥

पौर्णमास्यान्तमाचमनप्रकाश्य।

"पितृणां देवतानाञ्च मूलकं नैव दापयेत्।
दद्यात्तत्कर्मणाप्नोति भुङ्क्ते श्राद्धञ्च यदि॥
ब्राह्मणो मूलकं भुक्त्वा चरेच्चान्द्रायणं व्रतम्।
अन्यथा याति नरकं यावो विट् मूत्र एव च॥
तथा।
"वरं भक्ष्यमभक्ष्यञ्च पिवेद्वा गर्हितञ्च यत्।
वर्ज्जनीयं प्रयत्नेन मूलकं मदिरासमम्॥"

इति मलमासतत्त्वम्॥

मूलकः, पुं, (मूले जातः। मूल+"पूर्वाह्णापराह्णार्द्धमूलप्रदोषावस्करादण्।" ४। ३। २८। इति वुन्।) चतुस्त्रिंशत्तमाक्षरविषजातमन्त्रभेदः। इति हेमचन्द्रः। ४। २६८॥ (मूलप्रकार इति। मूल+"मूलादिभ्यः प्रकारवचने कन्।" ५। ३। ३। इति कन्। मूलस्वरूपः। यथा, भागवते। ६। ६। ४१।

"नारीकवच इत्युक्तो निःसत्त्वे मूलकोऽभवत्॥")

मूलकपर्णी, स्त्री, (मूलकस्य पर्णमिव समानत्वादस्याः पर्णमस्याः। ङीष्।) घृतभाजनः। इति रत्नमाला॥

मूलकर्म्म, क्ली, (मूलञ्च तत् कर्म्म चेति।) ओषधादिमूलेन यत् आसनोच्चाटवस्त्रस्तम्भनवशीकरणादिकर्म्म। जो इति ख्यातम्। इति भरतः॥ टोना इति मुकुटः॥ तत्पर्य्यायः। काम्मेणम् २। इत्यमरः। ३। २। ७॥ ऊनपञ्चाशदुपपातकान्तर्गतोपपातकविशेषः। यथा,—

"सर्व्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्।
हिंसौषधीनां स्त्रीजीवोऽभिचारो मूलकर्म्म च॥"

इति मनुः। ११। ६४॥

"मन्त्रौषधादिना वशीकरणम्।" इति मूलकर्म्मशब्दव्याख्यायां कुल्लूकभट्टः॥

मूलकमूला, स्त्री, (मूलकमिव मूलमस्याः।) क्षीरकर्कटीवृक्षः। इति रत्नमाला॥

मूलकारः, पुं, (मूलं करोतीति। मूल+कर्म्मण्यण्। इत्यण्।) मूलग्रन्थकर्त्ता। यथा। नायं गणकारः किन्तु मूलकारः। इति संक्षिप्तसारटीकायां गोयीचन्द्रः॥

मूलकारिका, स्त्री, (मूलकारक+स्त्रियां टाप्। अकारस्येत्वम्।) वृक्षी। इति हारावली॥ मूलग्रन्थार्थप्रकाशकपद्यम्। मूलधनस्य वृद्धिविशेषश्च॥

मूलकृच्छ्रं, क्ली, (मूलेन तद्भक्षणेन कृच्छ्रम्।) एकादशविधपर्णकृच्छ्रव्रतान्तर्गतव्रतविशेषः।

यदा क्षयितानि दृष्टमूलानि मासं पीयन्ते तदा मूलकृच्छ्रमुपदेश्यं भवति। यथाह मार्कण्डेयः।

"फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः।
श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माद्यैरपरस्तथा॥
मासेनामलकैरेव श्रीकृच्छ्रमपरं स्मृतम्।
पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते॥
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु॥"

इति मिताक्षरायां प्रायश्चिताध्यायः॥

(पुंलिङ्गोऽप्ययं मार्कण्डेयपुराणोक्तत्वात्।)

मूलजं, क्ली, (मूलात् जायते इति। जन+डः।) आर्द्रकम्। इति राजनिर्घण्टः॥ (विशेषोऽस्यार्द्रकशब्दे ज्ञातव्यः॥)

मूलजः, पुं, (मूलाद् जायते। जन+डः।) उत्पलादिः। इति हेमचन्द्रः। ४। २६६॥ मूलोद्भवे त्रि॥

मूलत्रिकोणं, क्ली, (मूलञ्च तत्त्रिकोणञ्चेति।) अर्कादित्रयाणां राशिरूपत्रयविशेषः। स तु रवेः सिंहः। चन्द्रस्य वृषः। भृगोस्तुला। भौमस्य मेषः। बुधस्य कन्या। गुरोर्धनुः। शनेः कुम्भः। यथा,—

"सिंहो वृषश्च मेषश्च कन्या धन्वी घटो घटः।
अर्कादीनां त्रिकोणानि मूलानि राशयः
क्रमात्॥"

अथ मूलत्रिकोणाग्रत्वफलम्।

"रविभौमशनीवभागवग्रनेशराशी त्रिकोण-
भागाः स्युः।
नखरविदिक्तिथिनखरा वेदोदिग्भागका
स्मृताः॥"

इति ज्योतिस्तत्त्वम्॥

मूलदेवः, पुं, (मूलश्चासौ देवो राजा चेति।) कंसराजः। इति त्रिकाण्डशेषः॥

मूलद्रव्यं, क्ली, (मूलञ्च तद्द्रव्यञ्चेति।) मूलधनम्। इति हेमचन्द्रः। ३। ५३३॥

मूलधनं, क्ली, (मूलञ्च तद्धनञ्चेति।) आदिद्रव्यम्। पुँजी इति भाषा। तत्पर्य्यायः। परिपणम् २ नीवी ३। इत्यमरः। २। ६। ८०।

मूलपर्णी, स्त्री, (मूले पर्णमस्याः। ङीष्।) मक्कटपर्णी। इति रत्नमाला॥

मूलपुष्करं, क्ली, (मूले पुष्करमस्य। पुष्करमिव मूलमस्येति वा।) पुष्करमूलम्। इति राजनिर्घण्टः॥

मूलपोती, स्त्री, (मूलप्रधाना पोती।) पूतिकाशाकभेदः। तत्पर्य्यायः। क्षुद्रवल्ली २ पोतिका ३ क्षुद्रपोतिका ४ क्षुद्रपोतकशाकी ५ वल्लिशाकपोतिका ६। अस्या गुणाः। त्रिदोषघ्नत्वम्। हृद्यत्वम्। बल्यत्वम्। लघुत्वम्। वह्निपुष्टिकारित्वम्। रुच्यत्वम्। जठराग्निदीपनत्वञ्च। इति राजनिर्घण्टः॥

मूलप्रकृतिः, स्त्री, (मूला चासौ प्रकृतिश्चेति।) आद्या शक्तिः। यथा,—

"सर्व्वप्रकृतेः प्रकृतिः श्रीकृष्णः प्रकृतेः परः।
न भक्तः परमेशोऽपि तां शक्तिं प्रकृतिं विना।

सृष्टिं विधातुं मायेशो न सृष्टिर्मायया विना ।
सा च लये तिरोभूता सृष्टिसंहारकारके ।
आविर्भूता सृष्टिकाले सा च नित्या यथेश्वरः ॥
कुलालश्च घटं कर्त्तुं यथाशक्तो मृदं विना ।
स्वर्णं विना स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥
सा शक्तिः सृष्टिकाले च पञ्चधा चेश्वरेच्छया ।
राधा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥
प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः ।
प्राणाधिकप्रियतमा सा राधा परिकीर्त्तिता ॥
ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी ।
परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता ॥
विद्याधिष्ठातृदेवी या परमेशस्य दुर्लभा ।
वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता ॥
बुद्ध्यधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ।
सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी ॥
वागधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा ।
कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती ॥
पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ।
ततः सृष्टिक्रमेणैव बहुधा कलया च सा ॥
योषितः प्रकृतेरंशाः पुमांसः पुरुषस्य च ।
मायया सृष्टिकाले च तद्विना न भवेद्भवः ॥
सृष्टिश्च प्रतिबिम्बं च ब्रह्मन् ! ब्रह्मोद्भवा सदा ।
पाता विष्णुश्च संहर्त्ता शिवः शश्वच्छिवप्रदः ॥”
इति ब्रह्मवैवर्त्तपुराणे गणपतिखण्डे ४० अः ॥

मूलफलदः, पुं, (मूले च फलं ददातीति । दा+कः ।) पनसवृक्षः । इति राजनिर्घण्टः ॥ (पनसशब्देऽस्य विषयो ज्ञातव्यः ॥)

मूलभद्रः, पुं, (मूलश्चासौ भद्रश्चेति ।) कंसराजः । इति त्रिकाण्डशेषः ॥

मूलरसः, पुं, (मूले रसोऽस्याः ।) मोरटलता । इति रत्नमाला ॥

मूलशाकटः, त्रि, (मूलानां भवनं क्षेत्रम् । मूल +“भवने क्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ।” ५ । २ । २९ । इत्यत्र वार्त्तिकबलात् शाकटः ।) मूलक्षेत्रम् । क्षेत्रवाचि शाकटप्रत्ययेन निष्पन्नम् ॥

मूलशाकिनः, त्रि, (मूल+शाकिनः ।) क्षेत्रवाचि शाकिनप्रत्ययेन निष्पन्नम् ॥

मूला, स्त्री, (मूलानि बहुलानि सन्त्यस्याः । मूल +अर्श आदित्वादच् टाप् ।) शतावरी । इति राजनिर्घण्टः ॥ मूलनक्षत्रम् । इति शब्दरत्नावली ॥ (यथा, कालनाथविरचिते रत्नमाले १ अध्यायः ।
“कृत्तिकां वर्ज्जयेत् शाम्यकर्म्म च ।
अश्विनीज्येष्ठामूलाश्च पुष्या पुनर्वसुस्तथा ॥”)

[मूल]ाधारः, पुं, (मूलानामाधारः । मूलं प्रधानं आधार इति वा ।) गुह्यलिङ्गयोर्मध्ये अङ्गुलिद्वयमितस्थानम् । स तु शरीरस्थचक्रानाड्रीनां मूलस्थानम् । अत्र व श ष स सान्तयुक्तस्वर्णवर्णचतुर्द्दलपद्ममस्ति । तन्मध्ये इच्छाज्ञानक्रियास्वरूपत्रिकोणं वर्त्तते । तन्मध्ये कोटिसूर्य्यसमप्रभस्वयम्भुलिङ्गमस्ति । अत्र पृथिवी वर्त्तते । तत्रैव स्वयम्भुलिङ्गवेष्टितविद्युत्तुल्यप्रभभुजङ्गकुण्डलिनी वर्त्तते । यथा,—
“मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे हेमवर्णाभं व स वर्णचतुर्द्दलम् ॥”
इति तन्त्रसारः ॥

“अथाधारपद्मं सुषुम्नास्यलग्नं
ध्वजाधो गुदोर्द्ध्वं चतुःशोणपत्रम् ।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णै-
र्वकारादिसान्तैर्युतं वेदवर्णैः ॥
अमुष्मिन् धरायाश्चतुष्कोणचक्रं
समुद्भासि शूलाष्टकैरावृतं तत् ।
लसत्पीतवर्णं तड़ित्कोमलाङ्गं
तदन्तः समास्ते धरायाः स्वबीजम् ॥
वज्राख्या वक्त्रदेशे विलसति सततं कर्णिकामध्यसंस्थं
कोणं तत्त्रैपुराख्यं तड़िदिव विलसत् कोमलं कामरूपम् ।
कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्तात्
जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्य्यप्रकाशः ॥
तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो
ज्ञानध्यानप्रकाशः प्रथमकिशलयाकाररूपः स्वयम्भूः ।
विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी
काशीवासी विलासी विलसति सरिदावर्त्तरूपः प्रकारः ॥
अस्योर्द्ध्वे बिसतन्तुसोदरलसत् सूक्ष्मा जगन्मोहिनी
ब्रह्मद्वारमुखं मुखेन मधुरं संच्छादयन्ती स्वयम् ।
शङ्खावर्त्तनिभा नवीनचपलामाला विलासास्पदा
सुप्ता सर्पसमा शिवोपरिलसत्सार्द्धत्रिवृत्ताकृतिः ॥”
इति श्रीतत्त्वचिन्तामणौ षट्चक्रभेदः ॥*॥

तत्रस्थतीर्थानि यथा, तन्त्रयामले ।
“इड़ा गङ्गास्थाननिवासिनी या
सूर्य्यात्मिका या यमुनाप्रवाहिका ।
तथा सुषुम्ना मलदेशगामिनी
सरस्वती इन्ति मज्जनात्मकम् ॥
मनोगतज्ञानपरो मनुष्यो
मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।
मध्येस्थतीर्थे विमले जले सदा,
मूलाम्बुजे स्नाति स मुक्तिभाग्भवेत् ॥
सर्व्वाणि तीर्थे सुरतीर्थपावनी
[illegible]
करोति पापक्षयमेव मुक्तिं
ददाति साक्षादमलार्थपुण्यदा ॥”

मूलाह्वं, क्ली, (मूलमाह्वा आख्या यस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

मूली, [न्] पुं, (मूलमस्यास्तीति । मूल+इनिः ।) वृक्षः । इति शब्दचन्द्रिका ॥ (स्त्रियां ङीप् । ओषधिः । यथा, सुश्रुते चिकित्सितस्थाने ३० अध्याये ।
“चक्रकामोषधिं विद्याज्जराम्रत्युनिवारिणीम् ।
मूलिनीपञ्चभिः पत्रैः सुरक्तांशुककोमलैः ॥”)

मूली, स्त्री (मूल+गौरादित्वात् ङीष् ।) ज्येष्ठी । इति त्रिकाण्डशेषः ॥ (नदीभेदः । यथा, मात्स्ये । ११४ । ३१ ।
“ताम्रपर्णी तथा मूली शरवा विमला तथा ॥”)

मूलेरः, पुं, (मूलतीति । मूल+“मूलेरादयः ।” उणा० १ । ६२ । इत्येरक् । जटा । इत्युणादिकोषः । राजा । इत्युज्ज्वलदत्तः ।)

मूल्यं, क्ली, (मूलेन आनाम्यते अभिभूयते मूलेन समं वा इति । मूल+“नौवयोधर्म्मेत्यादिना ।” ४ । ४ । ९१ । इति यत् ।) पटादीनामुत्पत्तिकारणम् । मूलं मूलेन क्रयविक्रयार्थमिदं दधे कारितिः यः । इति भरतः ॥ दर इति दाम इति च भाषा । तत्पर्य्यायः । वस्नः २ अवक्रयः ३ । इत्यमरः । २ । १० । ३९ ॥ (यथा, मनौ । ८ । ३०२ ।
“पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥”)
मूल्यते अर्प्यते इदम् । माहिना इति भाषा इति च भाषा । तत्पर्य्यायः । कर्म्मण्या २ विधा ३ भृत्या ४ भृतिः ५ भर्म्म ६ वेतनम् ७ भरण्यम् ८ भरणम् ९ निर्व्वेशः १० पणः ११ । इति च अमरः । २ । १० । ३८ ॥ (यथा, मिताक्षरायाम् ।
“मूल्येन यः कर्म्म करोति स भृतकः ।”)

मूल्यं, त्रि, (मूलं रोपणमर्हतीति । मूल+यत् ।) प्रतिष्ठायोग्यः । रोपणयोग्यः । इति मूलशास्त्रदर्शनात् ॥ (मूलेन उत्पाद्यते इति । “मूलमस्यावर्हि ।” ४ । ४ । ८८ । इति यत् । मूलतउत्पाटनयोग्ये तृणादौ ॥)

मूष लुण्ठने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) षष्ठस्वरी । षो मूषति परद्रव्यम् । इति हलायुधः ॥ इस्वीत्यके । मोषति । इति दुर्गादासः ॥

मूषः, पुं-स्त्री, (मोषति अपहरतीति । मूष्+इगुपधत्वात् कः ।) मूषिकः ॥ (यथा, पञ्चतन्त्रे । ३ । २२२ । “एष प्रतिभाति ते मूषराजः ।”) तैजसावर्त्तनी । इति शब्दरत्नावली ॥

मूषकः, पुं-स्त्री, (मूष+स्वार्थे कन् ।) उन्दुरः । इति शब्दरत्नावली ॥ (यथा, रामायणे । २ । ३३ । १९ ।
“रत्नाभ्यवकीर्णानि परित्यक्तानि दैवतैः ।
मूषकैरावृतानि च ॥”)

मूषककर्णी, स्त्री, (मूषिकस्य कर्णवत् पत्राकारोऽस्याः। ङीष्।) आखुकर्णी। इति राजनिघण्टः॥

मूषकमारी, स्त्री, (मूषकं उन्दुरुं मारयतीति। मृ+णिच्+"कर्म्मण्यण्।" ३। २। १। इति अण्। ङीष्।) सुतप्रेणीवृक्षः। इति राजनिर्घण्टः॥

मूषका, स्त्री, (मूषक+स्त्रियां टाप्। त्रिषकादित्वात् न अत इत्वम्।) मूषिका। इति शब्दरत्नावली॥

मूषकारातिः पुं, (मूषकानां अरातिः घातकः।) विड़ालः। इति राजनिघण्टः॥ मूषिकारातिः। इति च पाठः॥

मूषा, स्त्री, (मूषति मुष्णातीति। मूष+कः+स्त्रियां टाप्।) स्वर्णाद्यावर्त्तनपात्रम्। मूसी इति भाषा॥ (यथा, पद्मदशाम्। ७। २।
"मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा।
रूपादीनुत्थापयुक्तं तन्निभं दृश्यते ध्रुवम्॥")
तत्पर्य्यायः। तैजसावर्त्तनी २। इत्यमरः। २। १०। ३३॥ मुषा ३ मुषी ४ आवर्त्तनी ५ मूषी ६। इति भरतः॥
"दृढसन्धे तुषैः पूर्णां मध्ये मूषां विधारयेत्।
चिन्मात्रं सुवर्णेस्तन्मात्रं पुटसुध्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥) मूषिका ७। इति रमानाथः॥ देवनाडकः। इति शब्दचन्द्रिका॥ मूषिकस्त्रीजातिः। इति शब्दरत्नावली॥ गवाक्षः। यथा,—
"एकद्वित्र्यादिमूषावदनमितिमहो ब्रूहि मे
भूमिभर्त्तुर्हर्म्ये रन्ध्रेऽमुष्मिन् चतुरविरचिते भक्षणायाखिलानां।
विश्वासे।"
इत्यादि लीलावत्यां भेदोपव्यवहारः॥

मूषाकर्णी, स्त्री, (मूषायाः कर्ण इव पत्राकारोऽस्याः।) आखुकर्णी। इति शब्दरत्नावली॥

मूषातूत्थं, क्ली, (मूषाजातं तूत्थम्।) नीलतूत्थम्। तत्पर्य्यायः। कांस्यनीलम् २ हेमतूत्थम् ३ वितुन्नकम् ४। इति हेमचन्द्रः। ४। ११८॥

मूषिकः, पुं, (मूषानि द्रव्याण्यत्तीति। मूष+"मुषेर्दीर्घश्च।" उणा० २। ४२। इति किकन् दीर्घश्च।) जन्तुविशेषः। इन्दुर इति भाषा। (यथा, हितोपदेशे मित्रलाभप्रकरणे। १३१।
"धनेन बलवान् सर्व्वो धनाद्भवति पण्डितः।
पश्यायं मूषिकः पापः स्वजातिसमतां गतः॥")
तत्पर्य्यायः। उन्दुरः २ आखुः ३। इत्यमरः। २। ५। १२॥ मूषः ४ मूषीकः ५ उन्दुरः ६ वभ्रुः ७ वृषः ८ आखनिकः ९ वृषः १०। इति शब्दरत्नावली॥ मूषकः ११ पिङ्गः १२ उन्दरकः १३ नखी १४ खनकः १५ विलकारी १६ घाण्यारिः १७ बहुप्रजः १८। अस्य मांसगुणाः।
"अहिनकुलशल्यगोधामूषकसुखा विलेशयाः
कथिताः।
श्वासानिलकासहरं तन्मांसं पित्तदाहकरम्॥
अन्ये विलेशया ये स्युः कैकिडोन्दुरकादयः।
गर्हितं तस्य मांसञ्च मत्स्यगौरघदुर्ज्जरम्॥"
इति राजनिर्घण्टः॥
अपि च।
"मूषिको मधुरः स्निग्धो वयायी बलवर्द्धनः।"
इति राजवल्लभः॥*॥
पारिभाषिकमूषिको यथा,—
"विभवे सति नैवापि न ददाति शृणोति च।
तमाहुरार्द्रं तस्यान्नं भुक्त्वा लक्षेण शुध्यति॥"
इति मार्कण्डेयपुराणे आचाराध्यायः॥
(जनपदविशेषः। यथा, महाभारते। ६।९।५८।
"द्रविड़ाः केरलाः प्राच्या मूषिका वनवासिकाः॥")

मूषिकपर्णी, स्त्री, (मूषिककर्णवत् पर्णानि यस्याः।) जलजलताविशेषः। इँदुरकानीपाता इति भाषा। (यथा, चरके विमानस्थाने सप्तमेऽध्याये।
"मूषिकपर्णीं समूलाग्रपत्रागामपहृत्य॥")
तत्पर्य्यायः। चित्रा २ उपचित्रा ३ मण्डोधी ४ द्रवन्ती ५ सम्वरी ६ वृषा ७ प्रत्यक्श्रेणी ८ सुतप्रेणी ९ रक्ता १०। इत्यमरः। २। ४। ८८॥ पुत्रश्रेणी ११ आखुपर्णिका १२ वृषपर्णी १३ आखुपर्णी १४ मूषिका १५ फल्गुपत्रिका १६। इति रत्नमाला॥ मूषिपर्णिका १७ सचित्रा १८ मूषीकपर्णी १९ सुकर्णिका २०। इति शब्दरत्नावली॥

मूषिका, स्त्री, (मूषिक+अजाद्यतष्टाबित्युज्ज्वलदत्तः।) मूषिकपर्णी। इति रत्नमाला॥ उन्दुरः। इति शब्दरत्नावली॥ मूषा। इत्यमरटीकायां रमानाथः॥ (यथा, सुश्रुते चिकित्सितस्थाने २० अध्याये।
"क्षीरं महापद्मभूलं मूषिकां चाम्रवर्च्चिनाम्।")

मूषिकाङ्कः, पुं, (मूषिकः उन्दुरुर्वाहनत्वेन अङ्कः चिह्नमस्य।) गणेशः। इति जटाधरः॥

मूषिकाशनः, पुं, (मूषिकं अत्ति स्ववाहनतया प्राप्नोतीति। अद्+ल्युः।) गणेशः। इति त्रिकाण्डशेषः॥

मूषिकारातिः पुं, (मूषिकाणामरातिः।) विड़ालः। इति राजनिर्घण्टः॥

मूषिकाह्वयः, पुं, (मूषिकस्य आह्वा आह्वा आख्या यस्य।) मूषिकपर्णी। इति जटाधरः॥ (तथास्य पर्य्यायः।
"हस्त्युत्कुम्बरपर्णी स्यात्सिकुम्भोऽथ सुकूलकः।
द्रवन्तीनामसञ्चित्रा त्वयोधा मूषिकाह्वयाः॥"
इति चरके कल्पस्थाने द्वादशेऽध्याये॥)

मूषिपर्णिका, स्त्री, (मूषिपर्ण+कन् टाप् अत इत्वम्।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषी, स्त्री, (मूष्+कः। स्त्रियां ङीष्। मूषा। स्वर्णाद्यावर्त्तनपात्रम्। इत्यमरटीकायां भरतः॥ मद्गुमूषिकः। यथा,—
"अन्धो महान्मूषिकः स्यान्मूषी पिङ्गेक्षणाननः।
महाङ्गः शल्यमारी च भूपञ्जी भित्तिपातनः॥"
इति राजनिर्घण्टः॥

मूषीकः, पुं, स्त्री, (मोषतीति। मूष+बाहुलकात् ईकन्।) मूषिकः। इति शब्दरत्नावली॥

मूषीककर्णी, स्त्री, (मूषीकस्य कर्णवत् पर्णमस्याः।) मूषिकपर्णी। इति शब्दरत्नावली॥

मूषीका, स्त्री, (मूषीक+टाप्।) उन्दुरः। यथा,
"दीना मूषीका मूषा च मूषीका मूषिकेत्यपि।"
इति शब्दरत्नावली॥

मूष्यायणः, त्रि, (मोषति अपहरतीति। मूष+कः चौरजारः। तस्यापत्यम् इति। मूष+फक्। बाहुलकात् वृद्ध्यभावः।) अज्ञातपितृकः। गुप्तोत्पन्नः। इति केचित्॥

मृ, ड मृ म्रतौ। इति कविकल्पद्रुमः॥ (तुदा०-आत्म०-अक०-अनिट्।) म्रतिः प्राणत्यागः। ड मृ म्रियते प्राणी। हिक्काश्वास्य म्र ड डीटौ ममिति म्रियमेव अन्यच्च परस्मैपदम्। ममार मर्त्ता मरिष्यति अमरिष्यत्। इति दुर्गादासः॥

मृकण्डकः, पुं, (मृगस्य कण्डूरिति समासे पृषोदरादित्वात् गलोपः। इत्युज्ज्वलदत्तः।) मृकण्डुः मृकण्ड इति केचित्तु पठन्ति इत्युज्ज्वलदत्तः। ततः संज्ञायां कन्।) मृकण्डुसुनिः। इति शब्दरत्नावली॥

मृकण्डः, पुं, (मृगस्य कण्डूरिति समासे पृषोदरादित्वात् गलोपः। इत्युज्ज्वलदत्तः।) मुनिविशेषः। (यथा, मार्कण्डेये। ५२। १६।
"प्राणेभ्येऽपि मृकण्डश्च पिता मम महायशाः।")
तस्य पुत्रो मार्कण्डेयः। यथा,—
"मार्कण्डेयोऽपि मार्कण्डो मृकण्डश्च मृकण्डकः।"
इति शब्दरत्नावली॥

मृग तृ क ड मार्गणे। (चुरा०-आत्म०-सक०-सेट्।) ड रामो मृगं मृगयते वनवीथिकासु। इति महानाटकम्। कामन्नादौ मृग्य अन्वेषणे इति दिवादिपरस्मैपदी धातुश्च दृश्यते दुर्गाविलोचनयोरसम्मतत्वात् अनेनोपेक्षितः। मृग्यन्तः पदवीं तथाप्यकरुणा याधा न मुञ्चन्ति माम्। इति तु अकारान्तस्यैव भावे क्विपि अकारलोपे मृगं करोतीति कण्ड्वादित्वात् कौ साध्यम्। इति दुर्गादासः॥

मृगः, पुं, (मृगयते अन्विष्यति हन्यते वा इति। मृग+दृगुपधत्वात् कर्त्तरि कः।) पशुमात्रम्। (यथा, मनुः। ५। ६।
"आरण्यानाञ्च सर्व्वेषां मृगाणां माहिषं विना।"
मृगशब्दोऽत्र महिषपर्य्युदासात् पशुमात्रपरः। इति तट्टीकायां कुल्लूकः।) हस्तिविशेषः। नक्षत्रभेदः। (यथा, हरिवंशे।
"अश्विनीमृगमूलाश्च पुष्या पुनर्व्वसुस्तथा॥")
अन्वेषणम्। (यथा, साहित्यदर्पणे। ४। १७।
"जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमदस्मृ प्रलपितम्।

लतालङ्घाभर्त्सवेदनपरिपाटीघुघटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥"
कनकस्य सुवर्णस्य मृगे अन्वेषणे। पचे।
कनकमृगे हेममरिणे या तृष्णा इत्यर्थः।)
याच्ञा। इति मेदिनी। गे, १८॥ मार्गशीर्ष-
मासः। यक्षविशेषः। इत्यजयपालः॥ मृग-
नाभिः। इत्यमरटीकायां भरतः॥ मकर-
राशिः। यथा,—
"मृगकर्कटसंक्रान्तौ ह तूदगुदक्षिणायने।
विषुवती तुलामेषे गोलमध्ये मधापरा॥"
इति तिथ्यादितत्त्वम्॥
खनामख्यातपशुविशेषः। मृग्यते अन्विष्यतेऽसौ
व्याधैः। (यथा, अभिज्ञानशाकुन्तले। १।१०।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः।")
तत्पर्य्यायः। कुरङ्गः २ वातायुः ३ हरिणः ४
अजिनयोनिः ५। इत्यमरः॥ प्रारङ्गः ६
चारुलोचनः ७ जिनयोनिः ८ कुरङ्गमः ९
ऋष्यः १० ऋष्यः ११ रिष्यः १२ रिष्यः १३
रङ्गः १४ एणकः १५। इति शब्दरत्नावली॥
स नवविधः। यथा,—
"सम्बरो रोहितो व्यङ्कुः सम्बरो बभ्रुणो रुरुः।
एणश्च हरिणश्चेति मृगा नवविधा मताः॥
पाठान्तरं यथा,—
"सम्बरः रोहितो व्यङ्कुः सम्बरो बभ्रुणो रुरुः।
एणश्च हरिणश्चेति मृगा नवविधा मताः॥
हरिणश्चापि विज्ञेयः पञ्चभेदोऽत्र भैरव!।
कृष्णः खड्गो रुरुश्चैव पृषतश्च मृगस्तथा।
एते बलिप्रदाने च चर्म्मदाने च कीर्त्तिताः॥"
इति कालिकापुराणे ६७ अध्यायः॥ * ॥
अपि च। अथ जाङ्गलानां गणना।
"हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुसम्बराः।
राजीवोऽपि च सृक्को चेत्यादा जाङ्गलसंज्ञकाः॥
हरिणस्ताम्रवर्णः स्यादैणः श्वेतः प्रकीर्त्तितः।
कुरङ्ग ईषत्ताम्रः स्याद्धरिणात्तलिको महान्॥
ऋष्यो नीलाङ्कितो लोके सरोरुरिति कीर्त्तितः।
पृषतस्त्वन्द्रबिन्दुः स्याद्धरिणात् कियदल्पकः॥
न्यङ्कुर्बहुविधाणोऽथ सम्बरो गवयो महान्।
राजीवस्तु मृगो श्रेष्ठो राजीभिः परिभो
वृतः।
यो मृगः शृङ्गहीनः स्यात् स सृक्कीति निग-
द्यते॥"
अथ तेषां गुणाः।
जङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः।
किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः॥"
इति भावप्रकाशः॥
अथ मृगपरीक्षा।
"मृगनाभिं समादातुं कौतुकार्थं तथा पुनः।
मृगाः पोष्या महीन्द्राणां तेषां वक्ष्यामि
लक्षणम्॥
पृथिव्यब्वायुमृगनाक्षेजोऽधिकास्तु पञ्चधा।
भिद्यन्ते नैकभेदास्ते समस्ता मृगजातयः॥"
तद्यथा,—
'ये गन्धिनः क्षीणशरीरकर्णा-
स्ते पार्थिवा गन्धमृगाः प्रदिष्टाः।
सर्व्वाङ्गमेधा सुरभि प्रकामं
पुण्ये प्रदेशे प्रभवन्ति ते तु॥
ये वै विशाला गुरुदीर्घशृङ्गा
अमांसलाक्षीजखुरप्रदेशाः।
आप्यास्तु ते वै प्रसरन्ति भूरि
सर्व्वत्र देशे प्रभवन्ति चैव॥
धावन्ति ये वातमिवाशुरीचे
दीर्घास्तु ते वातमृगाः प्रदिष्टाः।
ते यत्र यत्रैव भवन्ति मुक्ता-
स्तत्रैव सर्व्वाणि शुभानि सन्ति॥
लघुप्रमाणा लघुवीर्य्यसत्त्वा
निर्गन्धदेहाश्वगलप्रमाणाः।
ते मागना वेगकरा नराणां
सङ्ख्या न ते नापि निरीक्षणीयाः॥
ये कृष्णवर्णा गुरुदीर्घशृङ्गाः
क्रुद्धा भृशं यान्ति च वायुवेगाः।
ते कृष्णसारास्तु खलु तैजसास्तु
पुण्यप्रदेशे प्रभवन्ति ते तु॥'
भोजोऽप्याह।
'पार्थिवादिमृगः सर्व्वश्चतुर्जातिर्भवेत् पृथक्।
सुशृङ्गाक्षतुलोमानो ब्राह्मणा मृगजातयः॥
कृष्णाः पञ्चरिशृङ्गाश्च क्षत्रिया खरलोमशाः।
आवर्त्तशृङ्गास्तनवो हरिणा वैश्यजातयः॥
कृशशृङ्गा वाप्यशृङ्गा वा शूद्राः खरतनूरुहाः।
अश्वानां ये गुणा दोषास्ते ज्ञेया हरिणेष्वपि॥
तथापि दोषाः पञ्चामी वक्ष्यन्ते हरिणाश्रयाः।
नेत्रयोरन्तरे यस्य लोमावर्त्तः स पापकृत्॥
विषमौ विकृतौ शृङ्गौ यस्य स क्षेमनाशनः।
आवर्त्तः पृष्ठतो यस्य आनाभिमभिविन्दति॥
पश्चाङ्गं यस्य वावर्त्तौ त्याज्यौ भयकारकौ।
घर्षणेऽपदादीनां क्षेत्रताडननाशनः॥'
गार्ग्यः।
'दोषवन्मृगजातीनां विजातीनामथापि वा।
दर्शनात् स्पर्शनाच्चैव गन्धादानाच्च पोषणात्।
भवत्युच्चैपदः सर्व्वास्तथा चैवाप्यपोषणात्॥'
शुक्रोऽपि।
'हरिणपोषणतो धरणीभुजां
नहि भवेन्महदल्पमपीह नम्।
न पविवज्रिरुजारिपुजं भयं
तदव तं हरिणं गुणिनं नृप!॥'
इति मृगपरीक्षा॥ इति युक्तिकल्पतरुः॥
(अस्य गुणविशेषो यथा,—
"दूरे जलान्तनिलया दूरे पानीयगोचराः।
ये मृगाश्च विहङ्गाश्च तेऽस्याभिष्यन्दिनो
मताः॥
जलीवासन्ननिलया समीपोदकगोचराः।
ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः॥)
मृगादिविकारोपशमो यथा,—
गर्ग उवाच।
"प्रविशन्ति यदा ग्राममारण्या मृगपक्षिणः।
अरण्यं यान्ति वा ग्राम्याः स्थलं यान्ति
जलोद्भवाः॥
स्थलजाश्च जलं यान्ति घोरं रासन्ति
निर्भयाः।
गृहं कपोतः प्रविशेत् क्रव्यादो ह्रीमृगं भीयते॥
मधु वा मक्षिकाः कुर्य्युर्मृत्युं गृहपतेर्वदेत्॥
मृगपक्षिविकारेषु कुर्य्याद्धोमं सदक्षिणम्।
देवाः कपोत इति च जप्यया पञ्चभिर्द्विजैः॥
गावश्च दद्या विधिवत् द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः।
एवं कृते शान्तिमुपैति पापं
मृगोद्भवं वा विनिवेदितं यत्॥"
इति मात्स्ये २११ अध्यायः॥
चतुर्विधपुरुषमध्ये पुरुषविशेषः। तस्य लक्षणं
यथा,—
वदति मधुरवाणीं दीर्घनेत्रोऽतिभीरु-
रुपलमतिसुदेहः श्रीघ्रवेगो मृगोऽयम्।
"मृगके प्रश्निनी तुष्टा मृगे तुष्टा च चित्रिणी।
वृषभे गृश्निनी तुष्टा हये तुष्टा च हस्तिनी॥
पश्निनीमृगयोर्योनिमेडूकी चतुरङ्गुली।
चित्रिणीमृगयोर्योनिमेडूकी च तथाविधौ॥"
इति रतिमञ्जरी॥
(अन्वेषा। यथा, ऋग्वेदे। १। १५४। २।
"मृगो न भीमः कुचरो गिरिष्ठाः।"
"मृगः अन्वेषा।" इति तद्भाष्ये सायणः॥)
मृगक्षीरं, क्ली, मृगीदुग्धम्। तरादौ चेति चकार-
स्यानुक्तसमुच्चयार्थत्वात् स्त्रियाः क्षीरं मृगक्षीरं
स्त्रियाः पदं मृगपदं इत्यादिष्वपि पुंवद्भावः।
इति सुग्धबोधटीकायां दुर्गादासः॥
मृगगामिनी, स्त्री, (मृग इव गच्छतीति। गम+
णिनिः। ङीप्।) विङ्गा। इति राजनिर्घण्टः॥
मृगसदृशगमनशीला च॥
मृगधर्म्मजं, क्ली, (मृगधर्म्मात् मृगनाभिधर्म्मात्
मृगगन्धवत् जायते इत्यर्थः। जन्+डः।)
जवादिनामकगन्धद्रव्यम्। इति राजनिर्घण्टः॥
मृगधर्म्मजात, त्रि॥
मृगप्रेटकः, पुं, (मृगान् पशून् प्रेटयति प्रेरयति
स्वशब्देन रात्रिशेषं ज्ञापयतीति। प्रिट्+
णिच्+ण्वुल्।) खट्टासः। इति शब्दमाला॥
मृगमालिका, स्त्री, (मृगाणां मालिका।) मृग-
बन्धनार्थजालम्। तत्पर्य्यायः। वागुरा २।
इति हेमचन्द्रः। ३। ५८२॥
मृगजीवनः, पुं, (मृगैः पशुभिः जीवतीति। जीव
+ल्युः।) व्याधः। इति शब्दरत्नावली॥
(यथा, महाभारते। ३। ६३। २८।
"निर्विचेष्टं शुनश्चं तं विश्वस्तं मृगजीवनः।")
मृगया, स्त्री, (मृग+युच्।) अपहृतत्रयस्यान्व-
षणम्। यथा,—
"संशोधनं विचयनं मार्गणं मृगया मृगः।"
इत्यमरः। ३। २। ३०॥

मृगलट्, [ष्] स्त्री, (मृगाणां लट् पिपासा अत्र जलाभासकत्वात् ।) मृगतृष्णा । इति शब्दरत्नावली ॥

मृगलया, स्त्री, (मृगाणां लया अस्यस्यामिति । अर्शं आदित्वात् अच् । टाप् ।) मृगतृष्णा । इति शब्दरत्नावली ॥ (यथा, कामन्दकिनीतिसारे । १ । १३ ।

"अगच्छन्मृगलयातुल्यं वीक्ष्येदं सकलं जगत् ।
स्वजनैः सङ्गतः कुर्य्यात् धर्म्माय च सुखाय च ॥")

मृगलष्णा, स्त्री, जलाभासत्वात् मृगाणां लष्णा विद्यतेऽस्याम् । यौ मरुदेशे सिकतादावर्ककराः प्रतिफलिताः दूरस्थानां जलमेवाभान्ति तद्वाचिका । इति टीकाकारः ॥ उत्कटरविरश्मिजन्यत्तिवाष्पजालं मरीचिका । दूरभूमौ यन्मयूखैर्जलमिव दृश्यते इत्यपरे । इति भरतः ॥ तत्पर्य्यायः । मरीचिका २ । इत्यमरः । १ । ७ । ६५ ॥ मृगतृष्णिका ३ । इति भरतः ॥ मृगलट् ४ मृगलया ५ । इति शब्दरत्नावली ॥

मृगतृष्णिका, स्त्री, (मृगतृष्णा + स्वार्थे कन् + स्त्रियां टाप् अत इत्वञ्च ।) मृगतृष्णा । इत्यमरटीकायां भरतः ॥ (यथा, अभिज्ञानशाकुन्तले । ६ ।

"स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे ! प्रलयवान् मृगतृष्णिकायाम् ॥")

मृगदंशकः, पुं, (मृगान् पशून् दशति । दृनश् + ण्वुल् ।) कुक्कुरः । इत्यमरः ॥

मृगधूर्त्तः, पुं, (मृगेषु पशुषु धूर्त्तः । वञ्चकत्वात् ।) शृगालः । इति संक्षिप्तसारे समासपादः ॥

मृगधूर्त्तकः, पुं, (मृगधूर्त्त + स्वार्थे कन् ।) शृगालः । इत्यमरः । २ । १० । २१ ॥

मृगनाभिः, पुं, (मृगस्य नाभिः । तदभ्यन्तरे जातत्वात् तथात्वम् ।) कस्तूरी । तत्पर्य्यायः ।

"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् ।
कस्तूरिका च कस्तूरी बोधसुखा च सा स्मृता ॥"

सा त्रिविधा यथा,—

'कामरूपोद्भवा श्रेष्ठा नेपाली नीलवर्णयुक् ।
काश्मीरी कपिलच्छाया कस्तूरी त्रिविधा स्मृता ॥
कामरूपोद्भवा श्रेष्ठा नेपाली मध्यमा भवेत् ।
काश्मीरदेशसंभूता कस्तूरी क्षुधमा स्मृता ॥'

अस्या गुणाः ।

'कस्तूरिका कटुस्निग्धा चारोष्णा मुक्तला गुरुः ।
कफवातविषच्छर्द्दिर्मोतदौर्गन्ध्यदोषहृत् ॥'

इति भावप्रकाशः ॥

अन्यत् कस्तूरीशब्दे द्रष्टव्यम् ॥ (तथास्य पर्य्यायान्तरम् ।

'मृगनाभिर्मृगमदो मदः कस्तूरिकाह्वयः ।'

इति वैद्यकरत्नमालायाम् ॥)

मृगनाभिजा, (स्त्री, मृगनाभेर्जायते । जन् + डः । स्त्रियां ङीष् ।) कस्तूरी । यथा,—

"घनसारः सिताभश्च चन्द्रोऽथ मृगनाभिजा ।
मृगनाभिर्मृगमदः कस्तूरी गन्धधूल्यपि ॥"

इति हेमचन्द्रः । ३ । ३०७-८ ॥

मृगनेत्रा, स्त्री, (मृगनेत्र + "नेत्रान्तञ्च उपसंख्यानम् ।" ५ । ४ । १२६ । इत्यत्र काशिकोक्तेः अप् ।) मृगो मृगाधिपो नेता प्रापयिता यस्याः राज्ञेः सा रात्रिः । इति सुग्धबोधटीकायां दुर्गादासः ॥ सा अग्रहायणस्य विंशतिदण्डाधिकत्रयोविंशतिदिनावधिसंक्रान्तिपर्य्यन्तं प्रायः सम्भवति । तत्र नवान्नाद्युनिषेधो यथा । ब्रह्मपुराणे ।

"दक्षिणे शुक्लपक्षे तु नवान्नं प्रस्यते बुधैः ।
अपरे क्रियमाणं हि धनुष्येव हुतं भवेत् ॥
धनुषि यत् हुतं आद्धं मृगनेत्रासु रात्रिषु ।
पितरस्तन्न गृह्णन्ति नवान्नामिषकाङ्क्षिणः ॥"

अपरे कृष्णपक्षे । मृगो नेता प्रापयिता यासां रात्रीणामिति युत्पत्त्या नक्षत्रान्तरित्यनेनाद्विधानात्तत्पदं सिद्धम् । ततश्च मृगाधिरःपूर्व्वार्द्धेन दक्षिणयनभागे रात्र्यारम्भात्चत्वारिंशद्दण्डाधिकषट्रात्रयो मृगनेत्राः । इति मलमासतत्त्वम् ॥ (मृगस्य नेत्रे इव नेत्रे यस्य । मृग तुल्यनेत्रे, त्रि ॥)

मृगपतिः, पुं, (मृगाणां पशूनां पतिः ।) सिंहः । इति हेमचन्द्रः ॥ (यथा, भागवते । ५ । १५ । १० ।

"यल्लीलां मृगपतिराददेऽनवद्या-
मादातुं खजनमनांस्युदारवीर्यः ।"

'मृगपतिः सिंहः ।' इति तट्टीकायां श्रीधरस्वामी ॥ कामप्रदश्रेष्ठः । यथा तत्रैव टीकायाम् । "मृगस्य इति मृगाः कामप्रदास्तेषां पतिर्मुख्यः ॥")

मृगपिप्रुः, पुं, (अपिप्नवते भासते इति । अपि + प्रु + बाहुलकात् संज्ञायां कुः । अपेरलोपश्च । मृगः हरिणः पिप्रुरत्र ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

मृगप्रियं, क्ली, (मृगाणां प्रियम् ।) पर्व्वतलवणम् । इति राजनिर्घण्टः ॥

मृगबधाजीवः, पुं, (मृगबधेन आजीवतीति । आ + जीव् + अच् ।) व्याधः । इत्यमरः । २ । १० । २१ ॥

मृगबन्धनी, स्त्री, (मृगः बध्यते अनयेति । बन्ध + ल्युट् + स्त्रियां ङीष् ।) मृगबन्धनार्थजालम् । तत्पर्य्यायः । वागुरा २ । इत्यमरः । २ । १० । २६ ॥

मृगभक्षा, स्त्री. (मृगैर्भक्ष्यतेऽसौ । भक्ष + कर्म्मणि अप् टाप् ।) जटामांसी । इति राजनिर्घण्टः ॥

मृगमदः, पुं, (मृगाः मादयन्ति अनेनेति । मद् + अप् ।) कस्तूरी । इत्यमरः । २ । ६ । १२६ । (यथा, छन्दोमञ्जर्य्याम् । २ । १५ । ४ ।

"मृगमदतनचर्चापीतकौषेयवासा
रुचिरशिखिशिखण्डस्रग्वतंसावतंसा ।"

मृगमदवासा, स्त्री, (मृगमदस्येव वासः सौरभोऽस्याः ।) कस्तूरीमल्लिका । इति राजनिर्घण्टः ॥

मृगया, स्त्री, (मृग्यन्ते पशवोऽस्यां इति । मृग + क्विप् । "इच्छा ।" ३ । ३ । १०१ । इत्यत्र परिचर्य्या परिसर्य्यान्तमृगयाटाट्यानासुपसंख्यानम् । इति वार्त्तिकोक्त्या से यकि निर्जोपः । इति सिद्धान्तकौमुद्यां ॥) राज्ञां वनेषु मृगहननक्रिया । मृग्यन्ते अन्विष्यन्तेऽस्याम् । घिकार इति भाषा । तत्पर्य्यायः । आच्छोदनम् २ मृगव्यम् ३ आखेटः ४ । इत्यमरः ॥ तन्नियमविधिर्यथा,—

"चचार मृगयां तत्र हृत्व आत्मेप्सुकाम्बुकः ।
विहाय जायामतदर्हां मृगव्यसनलालसः ॥५॥
आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः ।
व्यहनत् निशितैर्बाणैर्वनेषु वनगोचरान् ॥६॥
तीर्थेषु श्रुतिदृष्टेषु राजा मेध्यान् पशून् वने ।
यावदर्थमलं क्षुद्घ्नान्नियुञ्जन्नियमार्थवित् ॥"७॥

इति श्रीभागवते ७ स्कन्धे २६ अध्यायः ॥

आत्मा गृहीता इन्द्रियो रागद्वेषादिरूपाः कामुकश्च भोगाद्यभिनिवेशरूपं येन । जायां विवेकवतीं बुद्धिं विहाय । अतदर्हां त्यागानर्हाम् । त्यागे हेतुः मृग्यन्ते इति मृगाः विधयः तेषु व्यसनं भोगासक्तिस्तेन लालसा अतिस्पृहा यस्य ॥५॥ वाणैः रागादिभिः । वनेषु भजनीयदेशेषु । वनगोचरान् भजनीयविषयान् । व्यहनत् भजनीयदेशादात्मसात् कृतवान् । कथापक्षे तु स्पष्टमेव ॥ ६ ॥ नन्वासुरीं वृत्तिमाश्रित्य इति किमिति मृगया निन्द्यते । कथापक्षे तावद्राज्ञो विहितैव सा । अध्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एव इत्याशङ्क्याह तीर्थेष्विति त्रिभिः । अयं भावः । न हि मृगया विधीयते रागप्राप्तत्वात् किन्तु नियम्यते प्रवृत्तिः सङ्कोच्यते । नियममेव षड्विधं दर्शयति । यदि अलमत्यर्थं लुब्धो रागी स्यात् तर्हि तीर्थेषु आद्धादिष्विव तत्रापि श्रुतिदृष्टेषु प्रख्यातेष्वेव न नित्यश्राद्धादिषु । तत्रापि राज्ञेव । मेध्यानेव । वन एव । यावदुपयोगमेव इति । एवं जीवस्य विषयसेवापि यावदुपयोगं न यथेष्टमिति नियम एव इत्यर्थः ॥ ७ ॥ इति तट्टीकायां श्रीधरस्वामी ॥ सा राज्ञां पापाय न स्यात् । यथा,—

"अवलम्बकुलाग्निनो भवा-
निजनीढद्रुमपीड़िनः खगान् ।
अनवद्यलयार्हिणो मृगान्
मृगयाघाय न भूभृतां व्रतम् ॥"

इति नैषधे २ सर्गे १० श्लोकः ॥

सा च कामजव्यसनविशेषः । यथा,—

"मृगयाक्षो दिवास्वप्नः परीवादः स्त्रियो मदः ।
तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥"

इति मलमासतत्त्वम् ॥

मृगयुः, पुं, (मृगं याचतीति । मृग + "मृगाद्यच्च ।" उणा० १ । ३८ । इति कुः । निपात्यते च ।) व्याधः । शृगालः । व्याधः । इति मेदिनी । ये, १०१ ॥ (यथा, भट्टिकाव्ये । ४ । ४४ ।

"मृगयुमिव मृगोऽथ दक्षिणेभ्रा
दिग्रमिव दाहवतीं मरावुदन्वान् ।")

मृगरसा, स्त्री, (मृगस्य मृगमांसस्येव रसोऽस्याः । सप्तदेवी । इति राजनिर्घण्टः ॥

मृगधि

मृगराजः, पुं, (मृगाणां पशूनां राजा अधिपतिः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) सिंहः। इति शब्दरत्नावली॥ (यथा, रघुवंशे। ६। ९।

"शिलाविभङ्गैर्नृगराजशाव-
स्तुङ्गं नगोत्सङ्गमिवारुरोह॥"

व्याघ्रः। यथा, महाभारते। १। १४१। ३४।

"इदमु मे त्वं महाबाहो! यद्वाक्यं मूषिकोऽब्रवीत्।
धिग्बलं मृगराजस्य मयात्यार्य मृगो हतः।")

मृगराट्, [ज्] पुं, (राजते दीप्यतेऽसौ राज्+क्विप्। ततः मृगाणां राट्।) सिंहः। इति शब्दरत्नावली॥ (यथा, शिशुपालवधे। ६।१८।

"पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ।")

मृगराटिका, स्त्री, (मृग+राट्+खुल्+स्त्रियां टाप् अत इत्वञ्च।) जीवन्ती। इति राजनिर्घण्टः॥

मृगरिपुः, पुं, (मृगाणां रिपुः।) सिंहः। इति हलायुधः॥

मृगरोमजं, त्रि, (मृगाणां रोमभ्यो जायते इति। जन्+डः। पशुलोमजातवस्त्रादि। तत्पर्य्यायः। राङ्कवम् २। इत्यमरः। २। ६। १११॥

मृगलाञ्छनः, पुं, (मृगः लाञ्छनं चिह्नमस्य।) चन्द्रः। इति शब्दरत्नावली॥

मृगवल्लभः, पुं, (मृगाणां वल्लभः प्रियः।) कुन्दरुक्षम्। इति राजनिर्घण्टः॥

मृगवाहनः, पुं, (मृगो वाहनमस्येति।) वायुः। इति जटाधरः॥

मृगया, स्त्री, (मृगान् विध्यति अत्र इति। व्यध्+"अन्येष्वपि दृश्यते।" ३। २। ७८। इति काशिकोक्त्या अधिकरणे डः।) मृगया। इत्यमरः। २। १०। २३॥ (यथा, मार्कण्डेये। १२७। १।

"कदाचिद्राजपुत्रोऽसौ मृगयामचरद्वने।")

मृगशिरः, [स्] क्लीं, (मृगस्येव शिरोऽस्य।) सप्तर्विमृगलिनचन्द्रागस्त्यमघमनश्चक्रम्। तत्पर्य्यायः। मृगशीर्षम् २ आग्रहायणी ३। इत्यमरः। १। ३। २३॥ (यथा, हृहत्संहितायाम्। १०। ५।

"मृगशिरसि वत्सयाजक-
यजमानार्घ्यजनमध्यदेशाश्च।")

तत्तु विड़ालपदाक्रान्तिसाराज्ययालर्क चन्द्राधिदैवतम्। इति ज्योतिषम्॥ गगनमध्ये तस्योदये कन्यालग्नस्य द्वाविंशत्युपलानि गतानि भवन्ति। यथा,—

"मूषिकाग्रनखदाक्षतौ विधौ
योममध्यमिलिते जितारके।
प्रारभेच्छुभदिने! कन्यकोदया-
दीक्षणानलकलाः कलावति!॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम्॥

तत्र जातफलम्। यथा,—

"प्रश्नासनाभ्यासरतो विनीतः
सदानुरक्तो गुणिनां गुणेषु।

मृगाङ्कः

भक्तानुपक्लेहभरेण पूर्णः
सन्मार्गवर्त्ती मृगलक्षभागी॥"

इति कोष्ठीप्रदीपः॥

मृगशिरा, स्त्री, (सर्व्वे सान्ता अकारान्ताश्चेति मृगशिरोऽस्यस्याः। मृगशिर+टाप्।) मृगशिरोनक्षत्रम्। इति शब्दरत्नावली॥

मृगशिराः, [स्] पुं, (मृगस्येव शिरो यस्य।) मृगशिरोनक्षत्रम्। इत्यमरटीकायां रायमुकुटः॥

मृगशीर्षं, क्लीं, (मृगस्य शीर्षमिव शीर्षमस्य।) मृगशिरोनक्षत्रम्। इत्यमरः॥ (यथा, भागवते। ५। २३। ६।

"तथैव मृगशीर्षादीन्युदगयनानि।")

मृगशीर्षः, पुं, (मृगस्येव शिर्षोऽस्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगशीर्षा, स्त्री, (मृगशीर्ष+टाप्।) मृगशिरोनक्षत्रम्। इति चिकाण्डे वोपालितः। इत्यमरटीकायां भरतः॥ (यथा, हृहत्संहितायाम्। २१। ६।

"मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च।")

मृगशीर्षा, [न्] पुं, (शीर्षस्य शीर्षन् इत्यादेशः। ततो मृगस्येव शीर्षास्य।) मृगशिरोनक्षत्रम्। इति केचित्॥ इत्यमरटीकायां भरतः॥

मृगा, स्त्री, (मृगः मृगमांसतुल्यः रसोऽस्त्यस्याः अर्शआदिभ्योऽच्।) सहदेवीलता। इति राजनिर्घण्टः॥

मृगाक्षी, स्त्री, (मृगस्येव अक्षि तद्वत्पूर्व्वं अक्षिणी वा अस्याः। अक्षि+"अक्ष्णोऽन्यतरस्याम्।" ५। ४। ७६। इति अच्। स्त्रियां ङीष्।) विशाला॥ (यथास्याः पर्य्यायः।

"ऐन्द्रीब्रह्मवारुणी चित्रा गवाक्षी च गवाक्षिणी।
वारुणी वामराप्युक्ता सा विशाला महाफला।
श्वेतपुष्पा मृगाक्षी च मृगेक्षीवारुमृगाक्षिणी॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृगलोचनतुल्यनेत्रा स्त्री। इति मेदिनी। षे, ४७॥ (यथा, छन्दोमञ्जर्य्याम्। २। ११। ८।

"वज्रवंशा सुरारिपुर्मृगि-
र्गोपिमृगाक्षीहृतरतिपूर्णिः।
वाञ्छितसिद्धौ प्रणतिपरस्य
स्यादनुकूला जगति न कस्य॥")

मृगाङ्कः, पुं, (मृगः अङ्को यस्य।) चन्द्रः॥ (यथा, नैषधचरिते। १। ७८।

"विनिद्रपद्मालिगलालिकेतवान्
मृगाङ्कचूडामणिवर्ज्जनार्ज्जितम्।")

कर्पूरः। इत्यमरः। १। ३। १७॥ वायुः। इति विश्वः॥ मृगचिह्नम्। चन्द्रे तच्चिह्नकारणं यथा,—

"लोकच्छायामयं लक्ष्म तवाङ्के मृगसंस्थितम्।
न विदुः सोमदेवापि ये च नक्षत्रयोगिनः॥"

इति महाभारते हरिवंशः॥

मृगारा

यथा, दर्पणं प्राप्य पराङ्मुखा नयनरक्षयो श्रीवास्यमेव सुखं दर्पणगतमिव पश्यन्ति एवं चन्द्रमण्डलं प्राप्य पराङ्मुखास्ते दूरत्वदोषात् पृथिवीमयकलङ्करूपामिव चन्द्रमण्डलगतां पश्यन्ति स एव चन्द्रे कलङ्क इत्युपचर्य्यते। इति तट्टीका॥ यक्ष्मरोगस्य औषधविशेषः। यथा,

"स्याद्रसेन समं हेम मौक्तिकं द्विगुणं भवेत्।
गन्धकस्तु समस्तेन रसपादस्तु टङ्कणः॥
सर्व्वं तन्नीलकं लत्वा कार्ष्णिकेन विशोषयेत्।
भार्ङ्गे लवणपूर्णेऽथ पचेद् यामचतुष्टयम्।
मृगाङ्कसंज्ञको ह्येष रोगराजनिकृन्तनः॥"

अपि च।

'रसस्य भस्मनो हेम पिष्टीकृत्य प्रयोजयेत्।
गुञ्जाचतुष्टयाच्यमरिष्टैर्भक्षयेन्नरः॥'

इति मधुमती॥

(एतन्नामकौषधान्तरं यथा,—

"रसभस्म हेमभस्म तुल्यं गुञ्जाद्वयं द्वयम्।
दोषं बुद्ध्वानुपानेन मृगाङ्कोऽयं क्षयापहः॥"*॥

इति वैद्यकरसेन्द्रसारसंग्रहे यक्ष्माधिकारे॥)

मृगाजीवः, पुं, (मृगैः आजीवतीति। जीव्+घञ्।) व्याधः। इत्यमरः। २। १०। २१॥

मृगाण्डजा, स्त्री, (मृगाण्डात् जायते इति॥ जन्+डः+स्त्रियां टाप्।) कस्तूरी। इति राजनिर्घण्टः॥ (तथास्या विषयः।

"एतैः समस्तैर्द्विपलप्रमाणै-
रालोड्य सर्व्वं विधिना विपक्वम्।
कर्पूरकाश्मीरमृगाण्डजानां
चूर्णीकृतानां त्रिपलप्रमाणम्॥"

इति भैषज्यरत्नावलौ वातरोगे मध्यमनारायणतैले॥)

मृगादः, [द्] पुं, स्त्री, (मृगान् अत्तीति। अद्+क्विप्।) व्याघ्रः। इति केचित्॥

मृगादनः, पुं, (अत्तीति। अद्+ल्युः। मृगस्य अदनः।) क्षुद्रव्याघ्रः। तत्पर्य्यायः। तरक्षुः २। इत्यमरः। २।५।१॥ तर्क्षुः ३ तरुक्षुः ४ तरक्षकः ५। इति शब्दरत्नावली॥ क्षुद्रकुक्कुराकारे क्षुद्रजन्तुविशेषे नेकड़ा इति ख्याते। इति भरतः॥ चीता इति ख्याते। इत्यन्यत्रः॥

मृगादनी, स्त्री, (मृगैरद्यते भुज्यतेऽसौ इति॥ अद्+कर्म्मणि ल्युट्+स्त्रियां ङीष्।) इन्द्रवारुणी। सहदेवी। मृगेक्षारुः। इति राजनिर्घण्टः॥ (यथा,—

"शिरीषश्च महातिक्ता जरातुम्बी मृगादनी।"

इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठचिकित्सायाम्।) क्षुद्रव्याघ्री च॥

मृगान्तकः, पुं, (मृगाणां अन्तकः नाशकः।) चित्रव्याघ्रः। इति राजनिर्घण्टः॥

मृगारातिः, पुं, (मृगाणां अरातिः।) कुक्कुरः। इति शब्दमाला॥ मृगशत्रुः। यथा,—

"मार्गं मार्गं मृगयति मृगारातिरामे विरामे
श्लोकं श्लोकं गतवति गते लक्ष्मणे लक्ष्मणेन।"

इति महानाटकम्॥

मृगेन्द्र

मृगारिः, पुं, (मृगाणामरिः।) सिंहः। व्याघ्रः। इति मेदिनी। रे, २०६॥ कुक्कुरः। रक्तशिग्रुः। इति राजनिर्घण्टः॥

मृगाविध्, [ध्] पुं. (मृगान् विध्यति इति। व्यध्+क्विप्। "अन्येषामपि दृश्यते।" ६। ३। १३७। इति दीर्घश्च।) व्याधः। इति जटाधरः॥ (मृगावेधनशीलः। यथा, भक्तिकाण्डे ५।५८।

"भ्रातरि न्यस्य यानो मां मृगाविन् मृगयामसौ।")

मृगित, त्रि, (मृग+क्तः।) अन्वेषितः। इत्यमरः॥

मृगी, स्त्री, (मृग+जातौ ङीष्।) मृगजातिस्त्री। इति व्याकरणम्॥ (यथाभिज्ञानशाकुन्तले।६।

"व्याख्याताभिनवत्वलस्य च तरोर्निर्मातुमिच्छा मम
व्यक्तं लक्षणमन्मथस्य वामनयनं कण्डूयमानां मृगीम्॥")

अस्या दुग्धगुणाः छागीदुग्धगुणतुल्याः। यथा, 'मृगीणां जाङ्गलीत्यानां अजाक्षीरगुणं पयः।' इति भावप्रकाशः॥

पुलहभार्य्या। सा कश्यपकन्या। तस्या अपत्यं हरिणादि। यथा,—

"क्रोधाच्च जज्ञिरे कन्या द्वादशैवात्मसम्भवाः।
ता भार्य्याः पुलहस्य स्युर्मृगी मन्दा हरावती॥
भूता च कपिला दंष्ट्रा कषा तिष्या तथैव च।
श्वेता च सरमा चैव सरसा चेति विश्रुताः॥
मृग्यास्तु हरिणाः पुत्रा मृगाश्चान्ये मृगाः स्मृता।
तथा।
शूकराः शरभा ये च पुरवः पृषताश्च ये॥"
इति वह्निपुराणम्॥

छान्दसरुक्मोविशेषः। यथा। रौ मृगौ। 'सा मृगीलोचना। राधिका श्रीपतेः॥' इममध्या। इति छन्दोमञ्जरी॥ अपस्मारयोगः। इति लोके ख्यातः॥ (होमोक्तसुदाविशेषः॥)

मृगेक्षणा, स्त्री, (मृगैरीक्ष्यते प्रियत्वात् इति। ईक्ष्+ल्युट्+स्त्रियां टाप्।) मृगेक्षारः। इति राजनिर्घण्टः॥ मृगनयना स्त्री च॥ (यथा, हरिवंशे भविष्यपर्व्वणि। ४८। १४।

"काञ्चीकलापनूपुरगुरुजघनोद्वहनविन्नितपदाभिः।
श्रीमति मृगेक्षणाभिर्गृहेऽभ्यसतवल्गुवचनाभिः॥")

मृगेन्द्रः, पुं. (मृगाणामिन्द्रः श्रेष्ठः।) सिंहः। इत्यमरः। २। ५। १॥ (यथा, श्रीमद्भागवते। १। १२। २२।

"मृगेन्द्र इव विक्रान्तो निषेव्यो गिरिमानिव।
तितिक्षुर्वसुधेवासौ सहिष्णुः पितराविव॥"
भगवद् विभूतिः। यथा, श्रीमद्भगवद्गीतायाम्। १०। ३०।

"मृगाणाञ्च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्॥"
छन्दोविशेषश्च॥)

मृगेन्द्रचटकः, पुं, (मृगेन्द्र इव विक्रमी चटकः।) श्येनपक्षी। इति जटाधरः॥

मृड

मृगेन्द्राणी. स्त्री, (मृगेन्द्रेण अण्यते इति। अण्+घञ्+गौरादित्वात् ङीष्।) वासकः। इति राजनिर्घण्टः॥ (विशेषोऽस्या वासकशब्दे ज्ञातव्यः॥)

मृगेर्व्वारुः, स्त्री, (मृगस्य प्रिया इर्व्वारुः।) श्वेतेन्द्रवारुणी। मँधिनी इति हिन्दीभाषा॥ तत्पर्य्यायः। मृगाक्षी २ श्वेतपुष्पा ३ मृगादनी ४ चित्रवल्ली ५ बहुफली ६ कपिलाक्षी ७ मृगेक्षणा ८ चित्रा ९ चित्रफला १० पथ्या ११ विचित्रा १२ मृगाक्षिभिण्टा १३ मरुजा १४ कुम्भिनी १५ देवी १६ कट्फला १७ लघुचिर्भिटा १८। अस्या गुणाः। दुर्ज्जरत्वम्। गुरुत्वम्। मन्दानलकारित्वम्। रक्तपित्तहारित्वञ्च। इति राजनिर्घण्टः॥

मृगेष्टः, पुं, (मृगाणामिष्टः।) सुन्दरवृक्षः। इति राजनिर्घण्टः॥

मृग्यः, त्रि, (मृग्यते अन्विष्यते असौ। मृग्+कर्म्मणि यत्।) मृगितव्यः। अन्वेषणीयः। इति व्याकरणम्॥ (यथा, श्रीमद्भागवते। ७। ७। २३।

"दृश्यन्तु सर्व्वसंघातो जगत्तस्थुरिति द्विधा।
अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्त्यजन्॥")

मृज ऊ ष कि भूषे। शुद्धौ। इति कविकल्पद्रुमः॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट्।) ऊ अमार्जीत् अमार्ष्टाम्। ष मृजा। किं मार्ज्जयाञ्चक्रे अपनेर्दिजान्। यो मार्ज्जयति ग्राह्यार्थमिति हलायुधः। इति दुर्गादासः॥

मृज ल ऊ ष गुद्धौ। इति कविकल्पद्रुमः॥ (अदा०-पर०-सक०-सेट्।) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च। ल मार्ष्टि तीर्थोदकैर्नित्यमिति हलायुधः। ऊ अमार्ज्जीत् भस्मनो मलम्। अमार्ष्टाञ्चक्रे पयोदोनिति भट्टिः। ष मृजा। इति दुर्गादासः॥

मृज्, पुं, (मृज्यतेऽसौ। इति मृज्+क्तयक्लुटो बहुलमिति कर्म्मणि कः।) वातविशेषः। मादल इति भाषा। यथा। मर्दलो दारुजो मृजः। इति शब्दरत्नावली॥

मृजा, स्त्री, (मृज्यते इति। मृज्+"ऋदृभिदादिभ्योऽङ्।" ३। ३। १०४। इति अङ्+टाप् च।) मार्জ্জনम्। इत्यमरः। २।६।१२१॥ (यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।

"अभ्यङ्गो मार्दवकरः कफवातनिरोधनः।
धातूनां पुष्टिजननो मृजावर्णबलप्रदः।")

मृज्य, त्रि, मृज्यते यत् इति। मृज्। "ऋजेर्विभाषा।" ३। १। ११३। इति क्यप्।) मार्জ্জनम्। मार्জ্জनीयम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टौ। ६। ५६।

"मन्युरुक्तस्य त्वया मार्ग्यो मृज्यः श्लोकश्च
तेन ते॥")

मृड ग ग्र मोदे। इति कविकल्पद्रुमः॥ (क्रा०-वा तुदा०-अक०-सेट्।) मोद इह हृष्टीकरणम्॥ ग मृड्नाति सरस्वत्या च यः; सदेति

मृणालि

हलायुधः। ग्र मृड्नति दीनं दाना। अमृड्विता सहस्राक्षमिति भट्टिः। मर्ज्जिता। इति दुर्गादासः॥

मृड्, पुं, (मृड्नति हृष्यतीति। मृड्+इगुपधत्वात् कर्त्तरि कः।) शिवः। इत्यमरः। १। १। २३॥ (यथा, श्रीमद्भागवते। ४। २। ७।

"प्राङ्निषण्णं मृडं दृष्ट्वा नाम्ब्यगत्तदनाहृतः।")

मृडकृण्, पुं, (मृडकृणाति सुखयतीति। मृड्+"मृडः कौकन् कंकणौ।" उणा० ४। २४। इति कंकण्।) बालकः। इत्युणादिकोषः॥

मृडा, } स्त्री. (मृड्+टाप् ङीप् च।) दुर्गा।
मृडी, } इति हलायुधः॥

मृडीकः, पुं, (मृड्नतीति। मृड्+"मृडः कौकन् कङ्कणौ।" उणा० ४। २४। इति कौकन्।) हरिणः॥

मृण, ग्र हिंसे। इति कविकल्पद्रुमः॥ (तुदा०-पर०-सक०-सेट्।) मर्ज्जिता। इति दुर्गादासः॥

मृणालं, क्ली, पुं, मृण्यते हिंस्यते भक्षणायर्थं यत्। (मृण्+"तमिविधिविडिभ्यलिकुलिकपिपलिपचिभ्यः कालन्।" उणा० १। ११७। इति कालन्। पङ्कजादीनां नालम्।) मोलाम इति ख्यातम्। इति भरतः॥ (यथा, नैषधचरिते। १। १३७।

"मदर्थसन्देशमृणालमन्थरः
प्रियः कियद्दूर इति त्वयोदिते।")

तत्पर्य्यायः। विसम् २। इत्यमरः।१।१०।४२॥ विग्रम् ३। इति हिरूपकोषः॥ पद्मनालम् ४ मृणाली ५ मृणालिनी ६ पद्मतन्तुः ७ विसिनी ८ नलिनीरुहम् ९। अस्य गुणाः। स्निग्धिरत्वम्। तिक्तत्वम्। कषायत्वम्। पित्तदाहमूत्रकृच्छ्रविकाररक्तवान्तिहरत्वञ्च। इति राजनिर्घण्टः॥ (मृणालकविशेषः। तत्पर्य्यायो यथा,

"पद्मादिकन्दः मृणालकं करहाटञ्च कथ्यते।
मृणालं मूलं भिस्साढ्यं लज्जालुकञ्च कथ्यते॥"
तथास्य गुणाः। विग्रार्द्धं मृणालकार्द्धं च॥

"मृणालं शीतलं हृद्यं पित्तदाहास्रजिद्गुरु॥
दुष्करं स्वादुपाकञ्च स्वल्पानिलकफप्रदम्।
संग्राहि मधुरं रूक्षं मृणालकमपि तद्गुणम्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

मृणालं, क्ली, (मृण+कालन्।) वीरणमूलम्। इति मेदिनी। ले, १२४॥ (अस्य पर्य्यायो यथा,

"मृणालमभयं सेव्यं लामज्जकमुशीरकम्॥"
इति वैद्यकरत्नमालायाम्॥

"स्यादुशीरं मृणालञ्च सेव्यं लामज्जकन्तथा॥"
इति गारुडे पूर्व्वखण्डे २०८ अः॥)

मृणालिनी, स्त्री, (मृणालानि अस्याः सन्तीति। मृणाल+"पुष्करादिभ्यो देशे।" ५।२।१३५। इति इनिः। ङीप् च।) पद्मिनी। इति जटाधरः॥ सा तु पद्मायुक्तदेशः पद्मसमूहः पद्मलता च॥ (यथा, रघुवंशे। १६। ७।

"विभर्त्ति चाकारमनिर्वृतानां
मृणालिनी हैममिवोपरागम्।"

मृणाली. स्त्री, (मृणाल + गौरादित्वात् ङीष् ।) मृणालम् । इति राजनिर्घण्टः ॥ (यथा, उत्तरचरिते । १ ।
"परिम्लानमृणालीदुर्बलाग्रैरङ्गकानि
त्वयुरसि मम कृत्वा यच्च निद्रामवाप्ता ॥")
(अल्पं मृणालं इति । मृणाल + अल्पार्थे ङीष् ।) खल्पमृणालजातिः । यथा,—
"साम्रं चन्दनमङ्गके वलयिताः पाणौ मृणालीलताः ।
इति राजशेखरः । इत्यमरटीकायां भरतः ॥
मृणाली. [न्] पुं, (मृणालमस्यास्तीति । मृणाल + इनिः ।) पद्मः । इति केचित् ॥
मृत्,[द्] स्त्री, (मृद्नाति प्रलये चूर्णनया स्वकारणे लीयत इति । मृद् + कर्मणि क्विप् ।) मृत्तिका । इत्यमरः । २ । १ । ४ । (यथा, मनुसंहितायाम् । ४ । ७६ ।
"मृदं गां देवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्वीत प्रज्ञातांश्च वनस्पतीन् ॥"
(यथास्या गुणाः ।
"कषाया मारुतं पित्तमुधरा मधुरा कफम् ॥
कोपयेन्मृदसादींश्च रौक्ष्यादुक्तांश्च रूक्षयेत् ।
पूरयत्यविपक्वेव स्रोतांसि निरुणद्धि च ।
इन्द्रियाणां बलं हत्वा तेजोवीर्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥"
इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे ।) तुवरी । इति राजनिर्घण्टः ॥ * ॥
मृत्तिकाग्रौषधं यथा,—
"दिवास्वप्नात्तु कर्णस्रवरुक्षत्व उदङ्मुखः ।
कुर्यात् मृत्पूरणं तु रात्रौ वै दक्षिणामुखः ॥
गृहीतग्निमृदोत्याय मृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपप्रियकरं ग्रौषं कुर्याच्छरावता ॥"
इति गारुडे ६४ अध्यायः ॥
मृतं, क्ली, (मृ + क्तः ।) याचितम् । इत्यमरः । ७ । ६ । ३ ॥ याचनवृत्तिर्मरणमिव दुःखजनकत्वात् मृतं भावे कर्मणि वा क्तः । इति भरतः ॥ मृत्युः । इति हेमचन्द्रः ॥
मृतं, त्रि, याचितवस्तु । गतप्राणः । मरा इति भाषा । तत्पर्य्यायः । परासुः २ प्राप्तपञ्चत्वः ३ परेतः ४ प्रेतः ५ संस्थितः ६ प्रमीतः ७ । इत्यमरः ।२।६।३॥ कलौ मृतस्य धन्यत्वं यथा,
"धर्म्मः प्रव्रजितस्वप्नः प्रवृत्तिं चैव दूरे गतं
पृथ्वी मन्दफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ।
मर्त्याः स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नता
हा कष्टं खलु जीवितं कलियुगे धन्या नरा ये मृताः ॥"
इति गारुडे ११५ अध्यायः ॥
(कार्य्यवशाज्जीवितावस्थायामपि मृतत्वं तद्यथा,—
"चतुर्थे तु मृदे मूढो भयदार्त्त इव क्रियः ।
कार्य्याकार्य्यविभागज्ञो मृतादप्यधरो मृतः ॥"
इति माधवकरकृतरुग्विनिश्चये पाण्डुरोगाधिकारे । यथा च ।
"उत्तिष्ठोत्तिष्ठ गच्छ त्वं वद मौनं समाचर ।
ये पराधीनतां यान्ति तेऽपि जीवन्ति के मृताः ॥"
इत्युद्भटः ॥)
मृतकं, क्ली, (मृत + स्वार्थे कन् ।) शवः । इति हेमचन्द्रः । ३ । २७६ ॥ मरणाशौचम् । यथा,
"यदि स्यात् सूतके सूतिर्मृतके च मृतिस्तथा ।
शेषेणैव भवेच्छुद्धिरहःशेषे द्विरात्रकम् ॥"
इति शुद्धितत्त्वम् ॥
मृतकल्पः, त्रि, (मृत + "ईषदसमाप्तौ कल्पब् । ईषदसमाप्तौ ।"५ । ३ । ६७ । इति कल्पप् ॥) मृतप्रायः । ईषदूनो मृतः । इति मृतशब्दादीषदूनार्थे कल्पप्रत्ययेन निष्पन्नम् ॥
मृतकान्तकः, पुं, (मृतकस्य अन्तकः नाशको भक्षकत्वात् ।) शृगालः । इति शब्दरत्नावली ॥
मृतजीवः, पुं, (मृतश्चासौ जीवश्चेति नीललोहितादिवत् विशेषणसमासः ।) तिलकवृक्षः । इति राजनिर्घण्टः ॥ (विवरणमस्य तिलकशब्दे ज्ञातव्यम् ॥)
मृतदण्डः, पुं, (मृतः दण्डः कारणत्वेन यस्य शक्तन्यादित्वात् परनिपातः ।) खड्गपिता । इति मार्कण्डेयशब्दटीकायां भरतः ॥
मृतमत्तः, पुं, (मृतेन शवेन मत्तः । भक्ष्यलाभात् ।) शृगालः । इति त्रिकाण्डशेषः ॥
मृतमत्तकः, पुं, (मृतमत्त + स्वार्थे कन् ।) शृगालः । इति शब्दरत्नावली ॥
मृतवत्सा, स्त्री, (मृता वत्सा यस्याः ।) मृतापत्या । अजीवत्सन्ताना । गर्भावधिवर्षत्रयं यावत् पुनः पुनर्मृतसन्ताना । अस्या दोषशान्तिर्यथा,—
"सप्तमौषधपत्रं वक्ष्ये सर्व्वलोकहिताय वै ।
जातस्य मृतवत्सायाः सप्तमे मासि नारद ! ।
अथवा शुक्लसप्तम्यामेतत् सर्व्वञ्च शस्यते ॥
यद्वसारावलं लब्ध्वा कृत्वा वा विप्रवाचनम् ।
बालस्य जन्मनक्षत्रतिथिदेवान् यजेद्बुधः ॥
तद्वद्दृष्ट्वातुरागान्तु कृत्वा स्नात्वा रवेश्च ।
गोमयेनानुलिप्तायां भूमावेकाग्निवत्तदा ॥
सङ्कुले रक्तशालीयैरक्तं गोक्षीरसंयुतम् ।
निर्व्वपेत् सूर्य्यरुद्राभ्यां तन्नाभ्यां विधानतः ॥
कीर्त्तयेत् सूर्य्यदेवञ्च सप्तार्च्चिश्च हुताशनीः ।
जुहुयाद्दक्षकल्पेन तद्वदग्नाय नारद ! ॥
होतव्याः समिधश्चाज्यं तथैवार्कपलाशयोः ।
यवक्षीरतिलैर्होमः कर्त्तव्योऽष्टशतं पुनः ॥
आहुतिभिरथाज्येन तथैवाष्टशतं द्विज ! ।
हुत्वा स्नानञ्च कर्त्तव्यमङ्गाङ्गेन च धीमता ॥
विप्रेण वेदविदुषा विधिवद्भूषणादिना ।
आमयित्वा तु चतुरः कुम्भान् कोणेषु शोभनान् ॥
पञ्चमञ्च पुनर्मध्ये दध्यक्षतविभूषितम् ।
आपयेदन्नं कुम्भं सप्तधान्याभिमन्त्रितम् ।
सौरेण तीर्थतोयेन पञ्चरत्नसमन्वितम् ॥
सर्व्वान् सर्व्वौषधैर्युक्तान् पञ्चगव्यसमन्वितान् ।
पञ्चरत्नफलैर्युक्तान् वासोभिरभिवेष्टयेत् ॥
गजाश्वरथ्यावल्मीकसङ्गमात् ह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निःक्षिपेत् ॥
चतुर्ष्वपि च कुम्भेषु रत्नगर्भेषु मध्यमम् ।
गृहीत्वा ब्राह्मणस्तन्तु सौराण्यन्यानुदीरयेत् ॥
सप्तभिरपि नारीभिरथङ्गाभिरथाप्लुतम् ।
पूजिताभिर्यथाशक्त्या माल्यवस्त्रविभूषणैः ।
सविप्राभिश्च कर्त्तव्यं स्नपनन्त्वाभिषेचनम् ।
दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी ॥
आदित्यचन्द्रमाः सार्द्धं ग्रहनक्षत्रमण्डलैः ।
शक्रः सलोकपालो वै ब्रह्मविष्णुमहेश्वराः ।
ऋषयश्चान्ये च देवौघाः सदा पान्तु कुमारकम् ॥
मिश्रोग्निर्मा हुतभुक्षा च बालग्रहाः कचित् ।
पीडां कुर्व्वन्तु बालस्य मा मातुर्जनकस्य वै ॥
ततः शुक्लाम्बरधरा कुमारी पतिसंयुता ।
स्नपकं पूजयेद्भक्त्या स्त्रीणामग्र्य गुरुं पुनः ॥
काञ्चनीञ्च ततः कृत्वा तिलपात्रोपरिस्थिताम् ।
प्रतिमां कूर्म्मराजस्य गुरवे विनिवेदयेत् ॥
वस्त्रकाञ्चनरत्नौघैर्भक्ष्यैः सघृतपायसैः ।
पूजयेद्ब्राह्मणं तद्वद्विप्तभ्राकृविधर्च्छितः ॥
शुक्ला च गुरुणा नेयमुषाख्या मन्त्रसन्ततिः ।
दीर्घायुरस्तु बालोऽयं यावद्वर्षशतं समम् ।
यत्किञ्चिदस्य दुरितं निःक्षिप्तं वडवानले ।
ब्रह्मा रुद्रो वसु स्कन्दो विष्णुर्देवो हुताशनः ।
रक्षन्तु सर्व्वदुष्टेभ्यो वरदाः सन्तु सर्व्वदा ॥
एवमादीनि वाक्यानि वदन्तं पूजयेद्गुरुम् ।
प्रक्षिप्तः कपिलां दद्यात् प्रणिपत्य विसर्ज्जयेत् ॥
गुरुञ्च पुत्रसहितां प्रणम्य रविमङ्कुरौ ।
हुताशेषं तदाश्नीयादादित्याय नमोऽस्तु ते ॥
इदमेवाद्भुतोद्दिष्टं खस्वप्नेषु प्रशस्यते ।
कर्त्तृजन्मर्क्षदिवसे देवान् संपूजयेत् सदा ॥
शान्त्यर्थं शुक्लसप्तम्यामेतत् कुर्व्वन्न सीदति ॥
स चानेन विधानेन दीर्घायुरभवत्ततः ।
सम्वत्सराणामयुतं शशास पृथिवीमिमाम् ॥"
इति मात्स्ये ६४ अध्यायः ॥
नक्षत्रगणशान्त्यौषधानि यथा,—
"गर्भः संजातमात्रो वा पक्षात् मासाच्च वत्सरात् ।
म्रियते द्विचिवर्षाद्वा यस्याः सा मृतवत्सिका ॥
तत्र योगं प्रकर्त्तव्यं यथा शङ्करभाषितम् ।
मार्गशीर्षे तथा ज्येष्ठे पूर्णिमायोपिते सति ।
नूतनं कलसं पूर्णं पूजयेन्माल्यकाः सुधीः ॥
शाखाफलसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णसूत्रिकायुक्तं षट्कोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीं एकानंशाभिधां शुभाम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपनैवेद्यसंयुतैः ।
पूजयेद्भक्तिभावेन मद्यमांसैः समस्यकैः ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथा चैन्द्री षट्पत्रेषु च मातरः ॥
पूजयेन्नवपूर्णेन ॐकारे नाम विस्मृते ।

दधिभक्तानि पिण्डानि समसङ्ख्यानि कारयेत् ॥
घटसङ्ख्येषु च पात्रेषु माहेश्वर्यः कल्पयेत् पृथक् ।
चिह्नेभ्यः समभं पिण्डं शुचिस्थाने बहिः क्षिपेत् ।
नैर्ऋते गृहमागत्य चण्डकाल्यै बलिमारभेत् ॥
कन्यकां योगिनीं वामां भोजयेत् सकुटुम्बकैः ।
दक्षिणां दापयेत्तासां देवतायै न चान्यथा ॥
विसृज्य देवताश्चाथ नत्वा तत्कलसोदकम् ।
गृहकुड्यं चौक्षयेद्धीमान् शुभेन शुभमादिशेत् ॥
विपरीते पुनः कार्य्यं यागं तत्तु सुविस्तरम् ।
प्रतिवर्षमिदं कार्य्यं दीर्घजीविसुतं लभेत् ॥"
ॐ ह्रीं फें एकानंशदेवतायै नमः । अनेन मन्त्रेण पूजा जपश्च कार्यः ॥ * ॥
"प्राङ्मुखः क्षत्तिकाक्षेत्रे वन्ध्याकर्कोटकीं हरेत् ।
तत्कन्दं पेषयेत्तोयैः कर्षमात्रं सदा पिबेत् ॥
या बीजपूरं द्रवमूलमेकं
क्षीरेण पक्वं प्रपिबेत् विमिश्रम् ।
ऋतौ निजं या तु पतिं प्रयाति
दीर्घायुषं सा तनयं प्रसूते ॥
मल्लिष्ठा मधुकं कुष्ठं चिफला गुर्करा बला ।
मेदा पयस्या काकोलीमूलक्षीरवाशुगन्धजम् ॥
अजमोदा हरिद्रे द्वे हिङ्गुः कटुकरोहिणी ।
उत्पलं कुमुदं द्राक्षा काकोल्यौ मूलकद्वयम् ।
एतेषां कर्षकैर्भागैर्घृतप्रस्थं विभावयेत् ॥
प्रतावरीरसं क्षीरं घृतस्येदं चतुर्गुणम् ।
संपिबेन्नियतं नारी नित्यं स्त्रीषु च मुच्यते ।
पुत्रान् जनयते नारी मेधाढ्यान् प्रियदर्शनान् ॥
या चैवास्थिरगर्भा स्यात् या नारी जनयेन्
मृतम् ।
अल्पायुषञ्च जनयेत् या च कन्याः प्रसूयते ॥
योनिदोषे रजोदोषे गर्भस्रावे च मुच्यते ।
प्रजावर्द्धनमायुष्यं सर्व्वमङ्गलिवारणम् ॥
गत्वा फलघृतं स्तोदायुष्यं परिकीर्त्तितम् ।
नोक्तञ्च लक्ष्मणामूलं वदन्यच्च चिकित्सकाः ॥
जीववत्साशुक्लवर्णाघृतमेव तु दीयते ।
अरण्यगोमयेनाथ वह्नेर्ज्वाला प्रदीयते ॥"
अत्र पयस्या क्षीरयुक्तभूमिकुष्माण्डम् । उत्पलं नीलम् । इति इन्द्रजालतन्त्रे मृतवत्साचिकित्सा ॥ * ॥ अन्यच्च । अथ मृतवत्सासुतजीवनोपायः ।

ईश्वर उवाच ।

"गर्भः संजातमात्रेण पश्चान् मासाच्च वत्सरात् ।
म्रियते द्विचिवर्षादिर्यस्याः सा मृतवत्सका ॥
गृहीत्वा शुभनक्षत्रे अपामार्गस्य मूलकम् ।
गृहीत्वा लक्ष्मणामूलं एकवर्णगवां पयः ।
पीत्वा सा लभते गर्भं दीर्घजीविसुता भवेत् ॥
यस्मै कस्मै न दातव्यं नान्यथा गुरुरोदितम् ॥
वन्ध्याकर्कोटिकाकन्दं मोचाराजेन पेषयेत् ।
ऋतुकाले तु सप्ताहं दीर्घजीविसुता भवेत् ।
सत्यं सत्यं पुनस्तेयं यथा गुरुरभाषितम् ॥ * ॥
मार्गशीर्षेऽथवा ज्येष्ठे पूर्णायां क्षपिते गृहे ।
नूतनं कलसं पूर्णं गन्धतोयेन कारयेत् ॥
प्राक्षाफलसमायुक्तं नवरत्नसमन्वितम् ।
सुवर्णसुद्रिकायुक्तं घटकोणमण्डले स्थितम् ।
तन्मध्ये पूजयेद्देवीमेकानंशाभिधानिकाम् ॥
गन्धपुष्पाक्षतैर्धूपैर्दीपैर्नैवेद्यसंयुतैः ।
अर्घयेद्भक्तिभावेन दुग्धं माषं तथा मधु ॥
वाराही च तथा चैन्द्री ब्राह्मी माहेश्वरी तथा ।
कौमारी वैष्णवी देवी षट्सु कोणेषु मातरः ।
पूजयेत्क्रमभावेन दधिपिण्डानि कारयेत् ॥
समसङ्ख्याप्रमाणानि घटसङ्ख्या घटेषु पात्रतः ।
समभन्तु पृथक् कृत्वा शुचिस्थाने विशेषतः ॥
तद्भक्तं यष्टमागत्य कन्यका षटुकस्त्रियः ।
भोजयेद्भक्तिभावेन दत्वा प्रणामं कारयेत्ततः ॥
विसृज्य स्वेष्टदेवीञ्च आशां तत्कलशेष्टदाम् ।
गृहकुड्यं चौक्षयेद्धीमान् शुभेन शुभमादिशेत् ॥
विपरीते पुनः कार्य्यं यागं तावत् सुविस्तरम् ।
प्रतिवर्षमिदं कुर्य्यात् दीर्घजीविसुतं लभेत् ॥"
सिद्धियोगमिदं ख्यातं नान्यथा गुरुरोदितम् ॥"
अथ मन्त्रः । ॐ परं ब्रह्म परमात्मने अमुकीगर्भे दीर्घजीविसुतं कुरु कुरु स्वाहा ॥ * ॥
अथ काकवन्ध्या । ईश्वर उवाच ।
"पूर्व्वं पुत्रवती या सा कस्मिंश्चन्ध्या भवेद्यदि ।
काकवन्ध्या तु सा ज्ञेया चिकित्सा तत्र कथ्यते ॥
विष्णुक्रान्तां समूलान्तु पिष्ट्वा माहिषदुग्धके ।
महिषीनवनीतेन ऋतुकाले तु भक्षयेत् ॥
एवं सप्तदिनं कुर्य्यात् पथ्ययुक्तिञ्च पूर्ब्बवत् ।
गर्भं सा लभते नारी काकवन्ध्या सुशोभनम् ॥
अश्वगन्धीयमूलन्तु याङ्क्षयेत् पुष्यभास्करे ।
पेषयेन्महिषीक्षीरे पलार्द्धं भक्षयेत् सदा ॥
सप्ताहाल्लभते गर्भं काकवन्ध्या चिरायुषम् ।
यस्मै कस्मै न दातव्यं नान्यथा गुरुरोदितम् ॥"
अथ मन्त्रः । ॐनमः शुक्तिरूपाय अस्यै मृते पुत्रं कुरु कुरु स्वाहा । १०००० जपात् सिद्धिः ।
इति श्रीदत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे जन्मवन्ध्यादीनां पुत्रकरणं नाम सप्तदशपटलः ॥
क्वचिद्ग्रन्थे २० पटलः ॥

मृतसञ्जीवनी, स्त्री, (मृतं मृतप्रायम् जीवयतीति । जीव् + ल्युट् + ङीप् च ।) गोरक्षदुग्धा । इति राजनिर्घण्टः ॥
मृतजीवनार्थिका विद्या । यथा । अथ मृतसञ्जीवनी विद्या ।
"आदौ प्रासादबीजं तदनु मृतिहरं तारकं
आकृतीच्च
प्रोद्यार्ण्यं चाम्बकं यो जपति च सततं संपुटं
चानुलोमम् ।"
मृतिहरं त्र्यक्षरमृत्युञ्जयमन्त्रम् । संपुटितमिति अनुलोमक्रमेणैव संपुटमित्यर्थः । तेन ह्रौं ततः प्रणवः ततो जूं सः ततः सप्तव्याहृतिः । मध्ये त्र्यम्बकमन्त्रः । ततो ह्रौं प्रणवः जूं सः ततः सप्तव्याहृतिः । अस्य जपात् सर्व्वसिद्धिर्भवति ॥*॥ अथ शुक्रोपासिता मृतसञ्जीवनी विद्या । गायत्र्या एकैकपादानन्तरं त्र्यम्बकमन्त्रस्य एकैकपादश्च । ततश्च गायत्र्याः प्रथमपादानन्तरं सुगन्धिं पुष्टिवर्द्धनम् ।

द्वितीयपादानन्तरं उर्व्वारुकमिव बन्धनात् ।
तृतीयपादानन्तरं मृत्योर्मुक्षीयमाऽमृतात् ॥
अस्य ध्यानम् ।
"स्वच्छं स्वच्छारविन्दस्थितसुभयकरे संस्थितौ पूर्णकुम्भौ
द्वाभ्यामेवाभयाढ्यौ निजकरकमलैर्दधतौ पूर्णकुम्भौ ।
द्वाभ्यां द्वौ च स्रवन्तौ शिरसि शशिकलां चारुतैः स्रावयन्तं
देवं देवी दधानः प्रदिशतु विपदाकल्यजालः श्रियं वः ॥"
एवं ध्यात्वावाह्य प्रणवादिचाम्बकाय हृदय नमः । इत्यनेन पूजयेत् । अस्य जपात् सर्व्वसिद्धिः । इत्यागमतत्त्वविलासः ॥ (तथा च ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे ४५ । ११ ।
"महाज्ञानञ्च मोक्षञ्च मृतसञ्जीवनीं पराम् ।
महाज्ञानयुतां नाम प्रवदन्ति मनीषिणः ॥"
(स्त्री । यथा, मार्कण्डेये । २४ । ४२ ।
"ततः कुवलयाश्वं तं समाश्वास्य भुजङ्गमः ।
कथयामास तत्सर्व्वं मृतसञ्जीवनादिकम् ॥)

मृतज्ञानः, त्रि, (ज्ञानिबन्धादीनामन्यतमस्मिन् मृते सति मृतसुद्दिश्य विधिना ज्ञातः ।) मृतोद्देशेन ज्ञातः । तत्पर्य्यायः । अपज्ञानः २ । इत्यमरः । ३ । १ । १६ ॥ मृतसुद्दिश्य ज्ञातज्ञाने जने । संस्कारार्थं ज्ञापिते मृते । इति स्वामी । इति तट्टीकायां भरतः ॥

मृतज्ञानं, क्ली, (मृतसुद्दिश्य ज्ञानम् ।) मृतोद्देशेन ज्ञानम् । तत्पर्य्यायः । अपज्ञानम् २ । इति हेमचन्द्रः । ३ । ३६ ॥

मृतज्ञमोक्षा, [क्ष] पुं, (मृतवत् स्वराज्यधनादिकं भुङ्क्तीति । भुज् + वासरूपोऽस्त्रियाम् । ३ । १ । ६४ । इति पचे क्षच् ।) राजर्षिः । इति हेमचन्द्रः । ३ । ३०७ ॥

मृतामदं, क्ली, (मृतः गतः आमदः अजीर्णात् ।) तुल्यम् । इति शब्दचन्द्रिका ॥

मृतालकं, क्ली, (मृतमालयति भूषयतीति । आल + णिच् + वुल् ।) आढकी । इत्यमरः । २ । ४ । १६१ ॥ (तस्याः पर्य्यायः ।
"सौराष्ट्री तुवरी काञ्चो मृतालकसुराष्ट्रजे ।
आढकी चापि सा ज्ञेया मृत्स्ना च सुरमृत्तिका ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

मृतिः, स्त्री, (मृ + क्तिः ।) मरणम् । इति हेमचन्द्रः । २ । २३६ । (यथा, श्रीमद्भागवते । ६ । १४ । ७४ ।
"परे तु जीवत्यपरस्य या मृतिः
विपर्य्ययश्चेत्समसि ध्रुवः परः ॥"
तस्याः विषयः ।
"यो गौरवर्णो विदधाति कार्ष्ण्यं
कृष्णोऽपि गौरत्वमुपेति यच्च ।
तथा मृतिं याति नरप्रजात्या
धीरं विजात्या जडतोऽपि यो वै ॥

मृत्तिका

यो वैपरीतं अवगेन ग्रस्तं
ग्रसति वा गो ग्रसते स शीघ्रं ।
स वै मृतिं पश्यति यो न पश्येत्
छायां स्वकीयां धरणीप्रपन्नाम् ।"

इति हारीते द्वितीयेऽध्याये तृतीयेऽध्याये ॥)

मृत्करः, पुं, (करोतीति कृ + अच् । मृदां करः । घटादिनिर्म्माणकर्त्तृत्वात्तस्य तथात्वम् ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥

मृत्कांस्यं, क्ली, शरावः । इति त्रिकाण्डशेषः ॥

मृत्किरा, स्त्री, (मृदं किरतीति । कृ + "दृशु-पधज्ञाप्रीकिरः कः ।" ३।२।१५५ । इति कः । "ऋत इद्धातोः ।"७ । १ । १०० ॥ इति इत् ।) घुघुरी । इति त्रिकाण्डशेषः । घुघुरिया इति भाषा ॥

मृत्खनिनी, स्त्री, कर्म्मकषादृश्यः । इति शब्द-चन्द्रिका ॥

मृत्ताजं, क्ली, (मृदं तालयति प्रतिष्ठापयतीति । तल् + णिच् + "कर्म्मण्यण् ।"३ । २ । १ । इति अण् ।) आढकी । इति शब्दरत्नावली ॥

मृत्तालकं, क्ली, (मृत्ताल + संज्ञायां कन् ।) तुवरिका । तुवरिकलाय इति अड़र इति च ख्यातम् । इत्यमरटीकायां भरतः । सौराष्ट्र-मृत्तिका । इति राजनिर्घण्टः ॥

मृत्तिका, स्त्री, (मृदेव इति । मृद् + "मृदस्तिकन् ।" ५।३।५६ । इति स्वार्थे तिकन् । स्त्रियां टाप् ।) तुवरी । इति राजनिर्घण्टः ॥ मृत् । इत्य-मरः । २ । १ । ४ ॥ माटी । इति भाषा । तत्पर्य्यायः । मृदा २ क्षत्तिः ३ । इति भरतः ॥ (अस्या भक्षणात् पाण्डुरोगोत्पत्तिः । तद्यथा, "मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ॥ कषाया मारुतं पित्तं उषरा मधुरा कफम् ॥"

इति माधवकरसंगृहीतरुग्विनिश्चये पाण्डु-रोगाधिकारे । अन्यत् मृत्तिकाशब्दे द्रष्टव्यम् ।) स्नानकाले मृत्तिकालेपनविधिर्यथा,—

"मृदा प्रक्षाल्य लिङ्गन्तु हाभ्यां नाभेस्तथोपरि । अथच त्रिभिः कार्यं षड्भिः पादौ तथैव च ॥ कटिञ्च तिसृभिश्चापि हस्तयोर्द्वे च मृत्तिके । प्रक्षाल्य कार्यं हस्तौ च द्विराचम्य यथाविधि । ततः संमार्जनं कृत्वा मृदमेवाभिमन्त्रयेत् ॥ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ! । उद्धृतासि वराहेण कृष्णेनाभिमतबाहुना ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्मदत्तासि प्रजया च धनेन च ॥ मृत्तिके त्वाञ्च गृह्णामि काश्यपेनाभिमन्त्रिताम् । मृत्तिके जहि मे पापं यन्मया दुष्कृतं कृतम् । त्वया हृतेन पापेन ब्रह्मलोकं व्रजाम्यहम् ॥"

इति वह्निपुराणम् ॥*॥

शौचार्थमृत्तिकायाग्रहणविधिर्यथा,—

"आहृत्य मृत्तिकां कूलान्नदीगन्यापकर्षणम् । कुर्य्यादतन्द्रितः शौचं विप्रहस्तोद्धृतोदकैः ॥ नाहरेत् मृत्तिकां विप्रः पांशुक्षारं च कर्द्दमात् ।

मृत्युः

न मार्गान्नोषराद्देशाच्छौचशिष्टां परस्य च ॥ न देवायतनात् कूपात् गेहान्न च जलाशया । उपस्पृश्येततो नित्यं पूर्व्वोक्तेन विधानतः ॥"

इति कौर्म्मे उपविभागे १२ अध्यायः ॥

तस्याः परीक्षा मन्त्रिरत्नशब्दे द्रष्टव्या ॥

मृत्फली, स्त्री, (मृदि फलमस्याः । ङीष् ।) कुष्माण्डवृक्षः । इति हारावली ॥

मृत्युः, पुं, (म्रियते अस्मादिति मृ + "मृजिमृदृभ्यां युक् तुक्च ।" उणा० । ३ । २१ । इति त्युक् ।) यमः । इति हेमचन्द्रः ॥ कंसः । यथा,—

"प्रत्यर्थं मृत्यवे पुत्रान् मोचये क्षपयामिमाम् । सुता मे यदि जायेरन् मृत्युर्वा न म्रियेत चेत् ॥"

इति श्रीभागवते १० स्कन्धे १ । ३६ ॥

मृत्युः, पुं, क्ली, प्राणवियोगः । तत्पर्य्यायः । पञ्चता २ कालधर्म्मः ३ दिष्टान्तः ४ प्रलयः ५ अन्तयः ६ अन्तः ७ नाशः ८ मरणम् ९ निधनः १० । इत्यमरः ॥ पञ्चत्वम् ११ मृतम् १२ मृतिः १३ । इति तट्टीकायां रमानाथः ॥ नैधनम् १४ । इति मट्टीकासारसुन्दरी ॥ संज्ञा १५ काजः १६ परलोकगमः १७ दीर्घनिद्रा १८ निमीलनम् १९ अस्तम् २० अवसानम् २१ । इति हेमचन्द्रः ॥ भूमिलाभः २२ निपातः २३ विलयः २४ आत्य-यिकम् २५ । इति शब्दरत्नावली ॥ अपयः २६ । (मरणार्थे यथा,—

"शौनस्य यस्य क्षुत्तृष्णे क्षुद्भिर्भैर्हितैस्तथा । न ग्राम्यतोऽन्नपानेच्छा तस्य मृत्युरुपस्थितः ॥ प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम् । पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः ॥"

इति सुश्रुते सूत्रस्थाने ३१ अः ॥

"एकोत्तरं मृत्युशतमथर्व्वाणः प्रचक्षते । तत्रैकः कालसंज्ञस्तु शीघ्रास्त्वागन्तवः स्मृताः ॥ दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ । रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ ॥"

इति च तत्र तत्स्थाने । ३४ अः ॥)

तत्प्रमाणं यथा,—

"अहमात्मोद्भवानीषां भूतानां सुरदीश्वरः । अहं सर्व्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ॥"

इति श्रीमद्भागवते ११ स्कन्धे । १६ । १० ॥

स तु ब्रह्मणो गुदतो जातः । यथा,—

"आयुर्यज्ञस्य मित्रस्य परिमोक्षस्य नारद ! । हिंसाया निर्ऋतेर्मृत्योर्निरयस्य गुदं स्मृतम् ॥"

इति श्रीभागवते २ स्कन्धे ५ अध्यायः ॥

कल्पान्तरे भयात् मायायां जातः । यथा,—

"हिंसा भार्य्या अधर्म्मस्य तयोर्जज्ञे तथानृतम् । कन्या च निर्ऋतिस्ताभ्यां भयं नरकमेव च ॥ माया च वेदना चैव मिथुनं त्विदमेतयोः । भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् । वेदना च सुतश्चापि दुःखं जज्ञेऽथ रौरवात् ॥*॥

अस्यापत्यादि यथा,—

"मृत्योर्व्याधिर्जराशोकस्तृष्णाक्रोधाश्च जज्ञिरे । दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।

मृत्युः

नैषां भार्य्यास्ति पुत्रो वा सर्व्वे ते ऊर्द्ध्वरेतसः ॥ निर्ऋतिश्च तथा चान्या मृत्योर्भार्य्याभवन् सुते ! ॥ अलक्ष्मीर्नाम तस्याश्च मृत्योः पुत्राश्चतुर्दश ॥ अलक्ष्मीलक्षणा ह्येते मृत्योरादेशकारिणः । विनाशकाले च नरान् भजन्त्येते ह्यशुभ्र तान् ॥ इन्द्रियेषु दशस्वेते तथा मनसि च स्थिताः । स्वे स्वे नरं स्त्रियं वापि विषये योजयन्ति च ॥ तथेन्द्रियाणि चाक्रम्य रागलोभादिभिर्नरान् । योजयन्ति तथा हानिं यान्ति धर्म्मादिभिर्हि ते ॥ अहङ्कारगताश्चान्ये तथान्ये बुद्धिसंस्थिताः । विनाशाय नरस्यैते यतन्ते मोहसंश्रयाः । एवं स्वधर्म्मैर्योत्पन्नाः सर्व्वे चापि भयङ्कराः ॥"

इति मार्कण्डेयपुराणे दुःसङ्घानुग्रासनं नामाध्यायः ॥ विष्णुपुराणे प्रथमेंऽशे सप्तमोऽध्यायश्च ॥

मृत्युव्यापकारिष्टानि यथा,—

दत्तात्रेय उवाच ।

"अरिष्टानि महाराज ! शृणु वक्ष्यामि तानि ते । येषामालोकनान्मृत्युं निजं जानाति योगवित् ॥ दैवमार्गं ध्रुवं शुक्लं सोमच्छायामरुन्धतीम् । यो न पश्येन्न जीवेत् स नरः संवत्सरात् परम् ॥ अरश्मिं विम्बं सूर्य्यस्य वह्निचैवाप्युमालिनम् । द्वादशादित्यमासेभ्यो नरो नोर्द्धं स जीवति ॥ वाम्यां मूर्द्ध्नि पुरीषे वा सुवर्णं रजतं यथा । प्रत्यक्षमथवा स्वप्ने जीवितं दशमासिकम् ॥ दृष्ट्वा प्रेतपिशाचादीन् गन्धर्व्वनगराणि च । सुवर्णवर्णान् वृक्षांश्च नव मासान् स जीवति ॥ स्थूलः कृशः कृशः स्थूलो योऽकस्मादेव जायते । प्रकृतेश्च निवर्त्तेत तस्यायुष्याष्टमासिकम् ॥ स्वकं यस्य पदं पाण्ण्र्योः पादस्याग्रेऽथवा भवेत् । पांशुकर्द्दमयोर्म्मध्ये सप्त मासान् स जीवति ॥ कपोतगृध्रकाकोला वायसो वापि मूर्द्धनि । क्रव्यादो वा खगो लीनः षण्मासायुःप्रदर्शकः ॥ हन्यते काकपङ्क्तीभिः पांशुवर्षेण वा पुनः । स्वच्छायाश्चान्यथा दृष्ट्वा पञ्च मासान् स जीवति ॥ अनभ्रे विद्युतं दृष्ट्वा दक्षिणां दिशमाश्रिताम् । पयसीन्द्रधनुर्व्वापि जीवितं द्वित्रिमासिकम् ॥ घृते तैले तथादर्शे तोये वा चात्मनस्तनुम् । यः पश्येदशिरस्कां वा मासादूर्द्धं न जीवति ॥ यस्य वस्त्रसमो गन्धो गात्रे ग्रावसमोऽपि वा । तस्यार्द्धमासिकं क्षेयं योगिनो नृप ! जीवितम् ॥ यस्य वै स्नानमात्रस्य क्षुत्पादमवबुध्यति । पिबतश्च जलं शीघ्रो दशाहं सोऽपि जीवति ॥ स्तम्भितो मारुतो यस्य मर्म्मस्थानानि लम्भति । न कुप्यत्यनुसंस्पर्शात्तस्य मृत्युरुपस्थितः ॥ ऋक्षवानरयुग्मस्थो गायन् यो दक्षिणां दिशम् । स्वप्ने प्रयाति तस्यापि न मृत्युः कालमृच्छति ॥ रक्तकृष्णाम्बरधरा गायन्ती हसती च यम् । दक्षिणाशां नयेन्नारी स्वप्ने सोऽपि न जीवति ॥ नग्नं क्षपणकं स्वप्ने हसमानं प्रदृश्य वै । एणं वा वीक्ष्य वल्गन्तं विद्यान्मृत्युमुपस्थितम् ॥ आमलकतलादृश्यं निमग्नं पङ्कसागरे । स्वप्ने पश्येत्तथात्मानं नरः सद्यो म्रियेत सः ॥

केशाङ्गारांस्तथा भस्म भुजगं निर्जलां मही॥
दृष्ट्वा स्वप्ने दशाहन्तु मृत्युरेकादशेऽहनि॥
करालैर्विकटैः कृष्णैः पुरुषैरुद्यतायुधैः।
पाशाञ्जैस्ताड़ितः स्वप्ने सद्यो मृत्युं समाप्नुयात्॥
सूर्योदये यस्य शिवा क्रोशन्ती याति सम्मुखम्।
विपरीतं परीतं वा स सद्यो मृत्युमृच्छति॥
यस्य वै सूक्तमात्रेऽपि हृदयं पीड्यते मुधा।
जायते दन्तसंघर्षः स गतायुरसंशयम्॥
दीपादिगन्धं नो वेत्ति वमत्यग्निं तथा निशि।
नात्मानं परनेत्रस्थं वीक्षते न स जीवति॥
शुक्लायुधश्चार्द्धरात्रे दिवा गन्धर्वसंज्ञकाः तथा।
दृष्ट्वा मन्येत संक्षीणमात्मजीवितमात्मवान्॥
नासिका वक्रतामेति कर्णयोर्नम्रतोन्नतौ।
नेत्रञ्च वामं स्रवति यस्य तस्यायुरुद्यतम्॥
आरक्ततामेति सुखं जिह्वा वापि सिता तथा।
तदा ज्ञानी विजानीयान्मृत्युमासन्नमात्मनः॥
उष्ट्रराक्षभयानेन यः स्वप्ने दक्षिणां दिशम्।
प्रयाति तं विजानीयात् सद्यो मृत्युं नरेश्वर!॥
पिधाय कर्णौ निर्घोषं न शृणोत्यात्मसम्भवम्।
नश्यते चक्षुषोर्ज्योतिर्यस्य सोऽपि न जीवति॥
पतनो यस्य वै गर्ते स्वप्ने हारं पिधीयते।
न चोत्तिष्ठति यः स्वप्नात्तदन्तं तस्य जीवितम्॥
ऊर्द्धा च दृष्टिर्न च संप्रतिष्ठा
रक्ता पुनः संपरिवर्त्तमाना।
सुखस्य चोष्मा शिथिरा च नाभिः
शंसन्ति पुंसामपरं शरीरम्॥
स्वप्नेऽग्निं प्रविशेद्यस्तु न च निष्क्रमते नरः।
जलप्लवेनाप्लवितो नद्यन्तं तस्य जीवितम्॥
यस्याभिहन्यते दुष्टैर्भूतैः रात्रावथो दिवा।
न मृत्युं समरात्रान्तात् पुमानाप्नोत्यसंशयम्॥
स्वच्छममलं शुक्लं रक्तं पश्यत्यथोऽसितम्।
यः पुमान् मृत्युमापन्नं तस्यापि हि विनिर्हरेत्॥
स्वभाववैपरीत्यन्तु प्रकृतेश्च विपर्ययः।
कथयन्ति मनुष्याणां समासन्नौ यमान्तकौ॥
येषां विनीतः सततं यस्य पूज्यतमा मताः।
तानेव योऽवजानाति तानेव च विनिन्दति॥
देवता गार्हपत्येदृष्टान् गुरून् विप्रांश्च निन्दति।
मातापित्रोरसत्कारं जामातृणां करोति यः॥
योगिनां ज्ञानविदुषामन्येषाञ्च महात्मनाम्।
प्राप्तान्तकालः पुरुषस्तद्विद्येयं विचक्षणैः॥
योगिना सततं यत्नादरिष्टान्यवनीपते!।
संवत्सरान्ते तज्ज्ञेन फलदानि दिवानिशम्।
विलोक्यानि सदा चैव फलपक्तिषु भोक्तृभिः॥"
इति मार्कण्डेयपुराणे अलर्कोपाख्याने ७३ अः॥
कर्म्मविपाकेन मृत्युविशेषो यथा,—
"येनाशुभानि लोकानि प्रीतिभेदः कृतो भवेत्।
आस्तिकः श्रद्दधानश्च स सुखं मृत्युमृच्छति॥
आगारदाहिनो दाहं क्षुधं चान्नप्रदायिनः।
प्राप्नुवन्ति नराः काले तस्मिन् मृत्यावुपस्थिते॥
देवब्राह्मणपूजायां ये रताश्चानसूयवः।
श्रद्धा वदान्या धीमन्तस्ते नराः सुखमृत्यवः॥
यो न कामान्न संरम्भान्न देवाद्धर्म्मसुतृष्णजेत्।

यथोक्तकारी सौम्यश्च स सुखं मृत्युमृच्छति॥
प्रीतिं जनयन्नीश्वरदानापं चोदकदायिनः।
प्राणान्नो वेदनां कष्टां ये चान्ये हिंसकारिणः॥
मोहाज्ञानप्रदातारः प्राप्नुवन्ति मरद्वयम्।
कूटसाक्षी मृषावादी यश्चासदनुशास्ति वै।
ते मोहमृत्यवः सर्वे तथान्ये वेदनिन्दकाः॥"
इति मार्कण्डेयपुराणे पितापुत्रसमाद्दे १० अध्यायः॥ * ॥
मृत्युकालकर्त्तव्यक्षुद्रजन्तुवधप्रायश्चित्तं यथा,—
"वधेऽपि क्षुद्रजन्तूनां हिंसकानाञ्च पक्षिणः।
कार्षापणं समुत्सृज्य मृत्युकाले प्रमुच्यते॥
अहिंसकानां क्षुद्राणां वधे मूलगुणं ध्रुवम्।
प्रायश्चित्तं मृत्युकाले कथितं पद्मयोनिना॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥
मृत्युसमये गङ्गागमनमावश्यकं यथा,—
"अहो सगरवंशेभ्यो निर्व्वाणमुक्तिदायिनी।
वैकुण्ठगामिनां मार्गसोपानरूपिणी वरा॥
अतोऽपि मृत्युसमये सतां पुण्यस्वरूपिणाम्।
आदौ पादौ च विन्यस्य मुखे तोयं प्रदीयते॥
गङ्गासोपानमारुह्य सन्तो यान्ति ममालयम्॥"
इति तत्रैव ३४ अध्यायः॥ * ॥
जन्मवतां मृत्योरपरिहार्यत्वं यथा,—
"मृत्युर्जन्मवतां वीर! देहेन सह जायते।
अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः॥"
इति श्रीभागवते १० स्कन्धे १ अध्यायः॥
अपि च।
"जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि॥"
इति श्रीभगवद्गीता॥ * ॥
अकालमृत्युप्रशमनं स्तोत्रं यथा,—
सूत उवाच।
"स्तोत्रं तत्तु संप्रवक्ष्यामि मार्कण्डेयेन भाषितम्।
नारायणं सहस्राक्षं पद्मनाभं पुरातनम्।
प्रणतोऽस्मि हृषीकेशं किं मे मृत्युः करिष्यति॥१॥
गोविन्दं पुष्करीकाक्षमनन्तमजमव्ययम्।
केशवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥२॥
वासुदेवं जगद्योनिं भानुमन्तममेयात्मकम्।
दामोदरं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥३॥
शङ्खचक्रधरं देवं कृष्णरूपिणमव्ययम्।
अधोक्षजं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥४॥
वाराहं वामनं विष्णुं नारसिंहं जनार्द्दनम्।
माधवञ्च प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥५॥
पुरुषं पुष्करं पुण्यं क्षेत्रबीजं सनातनम्।
लोकनाथं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥६॥
सहस्रशीर्षं देवेशं शङ्खचक्रासिधारिणम्।
महायोगं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥७॥
भूतात्मानं महात्मानं यज्ञयोनिमयोनिजम्।
विश्वरूपं प्रपन्नोऽस्मि किं मे मृत्युः करिष्यति॥८॥
इत्युदीरितमाकर्ण्य स्तोत्रं तस्य महात्मनः।
अपयातस्ततो मृत्युर्विष्णुदूतैः प्रपीड़ितः॥
इति तेन जितो मृत्युर्मार्कण्डेयेन धीमता।
प्रसन्ने पुष्करीकाक्षे ऋषिं हे नास्ति दुर्लभम्॥

स्तवाष्टकमिदं पुण्यं मृत्युप्रशमनं शुभम्।
मार्कण्डेयहितार्थाय स्वयं विष्णुरुवाच ह॥
य इदं पठति स्तोत्रं त्रिकालं नियतः शुचिः।
नाकाले तस्य मृत्युः स्यान्नृनरस्याच्युतचेतसः॥
कृतपद्मपुटे पुरुषं पुराणं
नारायणं शाश्वतमादिदेवम्।
विचिन्त्य सूर्य्यादितिराजमानं
मृत्युं स योगी जितवांस्तदैव॥"
इति गारुड़े २३८ अध्यायः॥ * ॥
शुभकर्म्मप्रतिबन्धकमृत्युदा योगा यथा,—
"आदित्यभौमयोर्नन्दा भद्रा शुक्रशुभाह्वयोः।
बुधे जया गुरौ रिक्ता शनौ पूर्णा च मृत्युदा॥"
अपि च।
"रव्यादिदिवसैर्युक्ता विष्णुखाद्यितुथयुतः।
उत्पाटा मृत्यवः कालाः अन्यानि यथाक्रमम्॥"
इति ज्योतिस्तत्त्वम्॥
मृत्युञ्जयः, पुं, (मृत्युं जितवान्। जि + क्यच् + मुन् च।) शिवः। इत्यमरः॥ तन्नामकारणं यथा,—
सूत उवाच।
"शिवो लीनो निर्गुणे चेत् श्रीकण्ठे प्राह ते लये।
कथं तव गुरोर्नाम मृत्युञ्जय इति श्रुतौ॥"
सुतपा उवाच।
"ब्रह्मणोऽन्ते मृत्युकन्या प्रनष्टा जलबिन्दुवत्।
संहर्त्री सर्व्वलोकानां ब्रह्मादीनां नराधिप!॥
कतिधा मृत्युकन्यानां ब्रह्मणां कोटिधो लये।
कालेन लीनः शम्भुश्च सत्यरूपी च निर्गुणे॥
मृत्युकन्या जिता शम्भुः शिवेन गुरुणा मम।
न मृत्युना जितः शम्भुः कल्पे कल्पे श्रुतौ श्रुतम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५१ अध्यायः॥
रोगशान्त्यर्थं तस्य पूजाविधिर्यथा,—
"मृत्युञ्जयं समापूज्य लिङ्गं त्रिसुवनेश्वरम्।
रोगार्त्तो मुच्यते रोगाद्धो मुच्येत बन्धनात्॥
यस्तु संपूजयेद्भक्त्या लिङ्गं मृत्युञ्जयाभिधम्।
यमोऽपि प्रणमेद्भक्त्या किं करिष्यति चामयः॥
तस्य पूजाविधिं वक्ष्ये शृणु मन्त्राध्वजन्मभे!।
आत्मभद्रे मृत्तिकान्तु गृहीत्वाग्नौ तिलोलकम्॥
निर्म्माय पार्थिवं लिङ्गं कांस्याधारे निवेशयेत्।
पौराणिकेन मन्त्रेण कुर्य्याच्च मठनं बुधः॥
स्नापयेत् पञ्चगव्येन प्रत्येकस्याष्टलोलकम्।
स्नपनञ्चैव प्रत्येकदर्भेण स्नापयेत् सुधीः॥
रोगक्षयकामनया नाममोचादिपूर्व्वकम्।
उपविश्यासने विप्रो धृत्वा धौते च वाससी॥
रुद्राक्षमालां कण्ठे वै धृत्वा भस्मत्रिपुण्ड्रकम्।
उपचारं षोड़शकं देयं भक्त्या प्रयत्नतः॥
सुवर्णस्थापनं देयं तथैवाभरणानि च।
वस्त्रयुग्मं प्रदद्यात्तु परिधेयं यथा भवेत्॥
मधुपर्कं कांस्यपात्रे दद्याद्भोजनयोग्यकम्।
विल्वपत्रसहस्रञ्च अभग्नं विनिवेदयेत्॥
एवं संपूज्य लिङ्गैकं अयुतञ्च सहस्रकम्।
ततो होमं प्रकुर्य्याच्च दक्षिणां ब्राह्मणे ददेत्॥

सुवर्णं वा तदर्द्धं वा देवि ! विभवमानतः ।
अङ्गहीना न कर्त्तव्या पूजा चाफलदा यतः ॥
एकलिङ्गं समाराध्य फलं स्यादश्वमेधजे ।
तत् फलं लभते देवि ! कलौ संख्या चतुर्गुणा ॥
ताम्रपात्रे तु संस्थाप्य अष्टोत्तरोत्तरं जलम् ।
तज्जलेनैव देवेशि ! कुर्य्याः संमार्ज्यं रोगिणम् ॥
त्रिपेट्टीपत्रिखायाश्च मन्त्रमुच्चार्य मामकम् ।
एवंविधिविधानेन पूजयेल्लिङ्गकम् ॥
याहगयाहगभवेद्रोगो नाशमेति मयोदितः ।
साङ्गेन पूजयित्वा च लभते वाञ्छितं फलम् ॥
अङ्गन्यासमनेनैव कृत्वा भवति वासना ।
रोगी प्रमुच्यते सद्यो भोगीव कञ्चुकोज्झितः ।
यदि मद्वचने भक्तिस्तदा मुक्तो भवेन्नरः ॥"

इति ज्वरघ्नयन्त्रम् ॥

(ज्वरनाशकौषधविशेषः । तद्यथा,—
"अयक्तः सिन्दुरः शुष्को रोगघ्नः कीर्त्तिवर्द्धनः ।
यशःप्रदः श्रियः सारात् मल्लज्वरहरः स्मृतः ॥
विषस्येवास्तथा भागो मरीचं पिप्पली कणा ।
गन्धकस्य तथा भागो भागः स्याद्भृङ्गजस्य वै ॥
सर्व्वत्र समभागः स्याद्विष्णुक्रान्तस्तु द्विभागकम् ।
चूर्णयेत् खलमध्ये तु सप्तमानां वटीश्चरेत् ॥
रसयेत् समभागः स्याद्विष्णुक्रान्तं नेष्यते तदा ।
ज्वरघ्नं ज्वरं हन्ति ज्वरघ्नज्वरहरः स्मृतः ॥
ज्वरघ्निर्जितो यस्मात्तस्मात्तज्ज्वरघ्नः स्मृतः ।
मधुना वेष्टनं प्रोक्तं सर्व्वज्वरनिवृत्तये ॥
दध्योदकानुपानेन वातज्वरनिवर्हणः ।
आर्द्रकस्य रसैः पानं दाहजे सान्निपातिके ॥
जम्बीररसयोगेन सर्व्वज्वरविनाशनः ।
अजाजीगुडसंयुक्तो विषमज्वरनाशनः ॥
तीव्रज्वरे महाघोरे पुरुषे यौवनान्विते ।
पूर्णमात्रा प्रदातव्या पूर्णं वटीचतुष्टयम् ॥
स्त्रीबालवृद्धयोश्चैव अर्द्धमात्राः प्रकीर्त्तिताः ।
नवज्वरे महाघोरे यामैकान्नाशयेद्ध्रुवम् ॥
मध्यज्वरे तथार्द्धे त्रिरात्रान्नाशयेद्ध्रुवम् ।
यस्माद्धात् सन्निपातोत्थं ज्वराणामेकसंज्ञकम् ॥"

इति ज्वरघ्नो रसः ॥ इति वैद्यकरसेन्द्रसार-संग्रहे ज्वराधिकारे ॥ स्त्री, स्नानविशेषः । यथा, ब्रह्मवैवर्त्तपुराणे प्रकृतिखण्डे । ४६ । ६५ ।
"गृह्यसूत्रं चतुरो वेदान् वेदाङ्गानितरांस्तथा ।
बालकं पाठयामास स्नानं ज्वरघ्नं परम् ॥")

ज्वरनाशकः, पुं, (नाशयतीति । नश् + णिच् + ण्वुल् । ज्वरस्य नाशकः ।) पारदः । इति राजनिर्घण्टः ॥ मरुवकवृक्षे, त्रि ॥

ज्वरपुष्पः, पुं, (ज्वराय निजनाशाय पुष्पमस्य । सति पुष्पोद्गमे अस्य वा तथात्वम् ।) इक्षुः । इति रत्नमाला ॥

ज्वरफलः, पुं, (ज्वराय स्वनाशाय फलमस्य ।) महाकालफलम् । इति मेदिनी । ले, १६२ ॥

ज्वरफला, स्त्री, (ज्वराय फलमस्याः ।) कदली ।

ज्वरबीजः, पुं, (ज्वराय स्वनाशाय बीजमस्य ।) वंशः । इति त्रिकाण्डशेषः ॥

ज्वरभञ्जकः, पुं, मरुवकालवादनीयपटहः । यथा,
"भवेत् प्रेतपटहो ज्वरभञ्जकश्च सः ।"

इति त्रिकाण्डशेषः ॥

ज्वरभयः, पुं, (ज्वरोभयं यस्मिन् किङ्कर इव । मरण-हेतुत्वात् ।) रोगः । इति राजनिर्घण्टः ॥

ज्वरवचनः, पुं, (ज्वरं वचयतीति । वच् + ल्युः ।) शिवः । विल्ववृक्षः । दक्षकाकः । इति मेदिनी । ने, २४५ ॥

ज्वरशुक्तिः, स्त्री, ज्वराय शुक्तिः प्रसवो यस्याः सा । कर्कटी । यथा,—
"यथा कर्कटकी गर्भमाधत्ते ज्वरमालवः ।"

इति महाभारते विराटपर्व्वे ॥

ज्वरा, स्त्री, (प्रशस्ता ज्वर् इति । ज्वर् + "सर्व्वो प्रशंसायाम् ।"५ । ३ । ८७ । इति सः । टाप् ।) प्रशस्तज्वरिका । इत्यमरः । २ । १ । ३ ॥

ज्वरिका, स्त्री, (प्रशस्ता ज्वर् इति । ज्वर् + कः । टाप् ।) प्रशस्तज्वरिका । (यथा, श्रीमद्भागवते । ८ । ६ । १० ।
"त्वमादिरन्तो जगतोऽस्य मध्यम्
घटस्य मृल्लेव परः परस्मात् ॥")
काञ्ची । इत्यमरः । २ । ६ । ३ ॥ (अस्याः पर्य्यायो यथा.—
"सौराष्ट्री पार्व्वती ज्वरिका काञ्ची च षड्-
पर्य्यटी ।"

इति वैद्यकरत्नमालायाम् ॥)

ज्वरिकाभाण्डकः, पुं, (ज्वरिकानिर्म्मितं भाण्डम् । ततः कन् । अभिधानात् पुंस्त्वम् ।) भाण्डविशेषः । तत्पर्य्यायः । सृष्टिका २ । इति त्रिकाण्डशेषः ॥

ज्वर्द, ग क्षुद्दि । इति कविकल्पद्रुमः ॥ (क्र्या०-पर०-सक०-सेट् ।) ग, ज्वर्दनाति ममर्द । क्षुदि चूर्णीकरणे । इति दुर्गादासः ॥

ज्वर्द्, [त्] स्त्री, (ज्वर्दते चूर्णीक्रियते इति । ज्वर्द् + कर्म्मणि क्विप् ।) ज्वर्त् । ज्वर्त्तिका । इत्यमरः । २ । १ । ४ ॥ (यथा, मनौ । ४ । ६८ ।
"ज्वर्दं गां देवसं विप्रं छत्रं मधुघृतुष्यथम् ।")

ज्वर्द्दुरः, पुं, हारीतपक्षी । इति हेमचन्द्रः । ४ । ४०७ ॥

ज्वर्द्रः, पुं, (ज्वर्दति आक्रम्यते असौ इति । ज्वर्द् + "विड्वादिभ्यः कित् ।" उणा० १ । १२० । इति अङ्गच् । सच कित् । यद्वा, ज्वर्त् अङ्गमस्येत्यमर-टीकायां रघुनाथः ।) खनामख्यातवाद्यम् । तत्पर्य्यायः । मुरजः २ । इत्यमरः । २ । ७ । ५ ॥ (यथा, शिशुपालवधे । ११ । २ ।
"रजनिविरतिसूचौ कामिनीनां भविष्यद्-
विरहविधिहतानिद्राभङ्गसुप्तेष्टदक्षः ॥")
पटहः । घोषः । इति मेदिनी । गे, ४७ ॥ वंशः । इति शब्दमाला ॥ (ज्वर्द्रादेर्मङ्गल-जनकत्वमाह स्मृतिः ।
"गेयं नृत्यं तथा वेणु ज्वर्द्रं शङ्खं तथैव च ।

अथ ज्वर्द्रादिविधिरुच्यते ।
"मर्द्दलः खादिरः श्रेष्ठो बीजः स्यादश्वदारुजः ।
रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्यते ॥
सार्द्धहस्तप्रमाणन्तु दैर्घ्यमस्य विधीयते ।
त्र्यष्टद्व्यङ्गुलं वाममथवा द्व्यङ्गुलम् ॥
दक्षिणञ्च भवेद्धीनमेकेनाङ्गुलेन वा ।
करलाघवदक्षो मध्ये चैव पृथुर्भवेत् ॥
यस्यायोयो भवेद्वर्त्तुलश्चर्म्मैकरणं मतम्
चर्म्मिकानिर्म्मितश्चैव ज्वर्द्रः परिकीर्त्तितः ॥
पातयेत् खरलिं वाद्यवादनार्थेच मर्द्दले ।
विभूतिर्गैरिकं भक्तं कैङ्कुमेन च संयुतम् ॥
यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम् ।
सर्व्वमेकत्र पिष्ट्वातु लेपः खरलिरुच्यते ॥
वामास्ये पूरिकां कृत्वा लेपं दद्याच्च दक्षिणे ।
एवं मर्द्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥
अस्य संयोगमासाद्य सर्व्वं वाद्यञ्च शोभते ।
एतद्वृक्षे बीजकाष्ठे दलमर्द्दोऽङ्गुलं विदुः ॥ * ॥
तधि धोंतेभिति ज्ञेयाः पाठवर्णा ज्वर्द्रजाः ।
धों दं टें धिकटत्तद्दो ताकं दं दं धोगं धिधि ॥
खर्भाभिं नं गटं दं था कुटपाटा मता अमी ।
तधिं धोंटें तक्कधी दों दं दं धिगुवां ततं तधि ॥
तक्क तं धं धि दों ताधि पाठ्यक्रमे त्वयं क्रमः ।"
तथा च यतिमाने पाठ्यक्रमः । द्रगतधेजां द्रगतधेजां धों धों धिकता धिका धोजां धोजां तक ततां धिका धोतां द्रग ततां धि धि धिधि कट ताकट नाधोधिक धोजां धोतांद्रगत तांद्रगत तांद्रगत तांधि । इति यतिमाने पाठ्यक्रमः । * ॥
"यतिरोढोऽवच्छेदो गजरो रूपकं ध्रुवम् ।
गजपः सारिगोजौ च नादश्च कथितं तथा ।
प्रहरणं वृन्दञ्च प्रबन्धा द्वादश स्मृताः ॥"
यथा । दं थात इत्येकताल्यां यतिः । * ॥ ओढ़वाद्यं यथा । दां तधों तधिक तधिक दं थाइं था धोधि धोधि तत ततथ धिध धिदिद्धां दिद्धां टटु ग किं टटु गकिं तद टङ्ग तद टङ्ग खवटङ्ग खवटङ्ग तगि गगि तगि गगि दां दां दं दं दीं दीं दं ता तथा । इत्योढ़वाद्यम् । * ॥ अवच्छेदवाद्यं यथा । दं थात: दं थात: धिक्कि धिक्कि दिद्धगं दं थात: । इत्यवच्छेदवाद्यम् ॥*॥ गजरवाद्यं यथा । धोक टेन्न नेन्न टें डें गधो गधोङ्क टेङ्क धोगतकि धिक तकि धिक टेङ्कन धि धि कट तक धोक तधिकट तङ्कक तधोग तङ्गीम् । इत्येकताल्यां गजरः । * ॥ रूपक-वाद्यं यथा। तकधिक् तकधिङ्क धविसकि धवि-तङ्कि धिक्क दं थात: । इति रूपकवाद्यम् ॥*॥ ध्रुवकवाद्यं यथा । तक्क तङ्कट धिक्क धिक्कट । इति निसारतालें ध्रुवक: । * ॥ गजपो यथा । तधिङ्कि धिक तक तधि गजगं था था दं तथा टन्नग । इत्येकताल्यां गजप: । * ॥ सारिगोजौ यथा । धोङ्कटेन्न तङ्क धिक्क तकधिक् तकधो ङ्कटङ्कन ङ्कटङ्कन धोगङ्क धो: । इति प्रथम-

दक्ष तगदक्ष धिक्क तदिदक्ष दं गदं गखो गखोक तक तक धिक् तधिक् तधो टेन धोटेन घटे गल खोगगल खोग खोहट गें टगें खोहटन। इत्यस्य छन्दनम्। इति वारिगोखो॥ नादो यथा,—

"दांकारचितयं पूर्व्वं दां धिगिति ततक्षयम्।
दां दां धिक्कत्रयं यत्र इति नादः प्रचौदिय:॥"
इति नादः॥

"इतं मानवमारब्धं मुद्गं कूटविनिर्म्मितम्।
वप्रवक्त्रमयं वाद्यं कथितं तद्विशेषते॥" *॥

श्रुतमानत्वात् प्रतितालो यथा। तत्तत तत्तत तक्कि तक्कि दिदं धिगनथो धिगनथो धिक् धिक् धिक्क धिक्क धिक्क नगि नगमि थो थो धि धि धि: दां दां धिक्क थो थो थो हथो हनगि थो नगिथो थोह थोह छेटि छेटि थोह थोह तटि तटि तटुक गीं गीं धगि धगि तत तधे तत तधे ततत गिडी जडी थोग थोग थों थोगग थोगथो तत्ततो।

"इति वप्रपदाख्यातु: कथितं वाद्यपण्डिता:।
प्रतितालेन तालेन पादवर्ज्जसमाश्रत:॥
गन्धर्व्वपतिना पूर्व्वसुर्व्वशीलास्यनर्त्तने।
सुधर्म्मारङ्गवार्थेच कथितं प्रकटीकृतम्॥"

प्रहरणं यथा। थोगक्का तक्किका थाग कट गगों दं थोग दिक्किक धिक्क धिकटेन। इत्येक-तालो प्रहरणम्॥ *॥

"वाद्यं विमुच्यते येन छन्दनं तन्निगद्यते।"

यथा,तक्किथो दिम टेन तन:। इति छन्दनम्॥*॥

मर्द्दलश्चयोदग्राङ्गुलवामसुखो द्वादग्राङ्गुल-दक्षिणमुख:। सुरजश्चद्वादग्राङ्गुलवामसुख: सप्तदग्राङ्गुलदक्षिणमुख: मर्द्दलसुरजयोरयं भेद:। इति सङ्गीतदामोदर:॥

मृदङ्गफल:, पुं, (मृदङ्गस्येवाकृतिर्यस्य फलस्य।) पनसवृक्ष:। इति शब्दरत्नावली॥

मृदङ्गफलिनी, स्त्री, (मृदङ्गवत् फलमस्यास्या:। इनि: ङीप् च।) कोषातकी। इति राजनिर्घण्ट:॥ (विषयोऽस्या: कोषातकीशब्दे ज्ञेय:॥)

मृदङ्गी, स्त्री, (मृदङ्ग: तदाकारफलमस्यास्या इति। मृदङ्ग+अर्शआद्यच् ङीप् च।) कोषातकी। इति रत्नमाला॥ चेतघोषा इति भाषा॥

मृदा, स्त्री, (मृद्+टाप्।) मृत्तिका। इति त्रिरूपकोष:॥

मृदाकर:, पुं, वप्रम्। इति शब्दमाला॥

मृदित:, त्रि, मृदधातो: कर्म्मणि क्त:। चूर्णी-कृत:। (यथा,—

"चिप्तोच्छ्रितोये मृदित: पाण्ड इत्यभिधीयते॥"
इति वैद्यकपरिभाषायाम्॥)

मृदिनी, स्त्री, (मृद्+भावे क:। मृद: चूर्णी-करणमस्यास्या:। मृद+इनि:। स्त्रियां ङीप्।) प्रसृतनस्तिका। इति शब्दचन्द्रिका॥

मृद्, त्रि, (म्रद्यते म्रदितं भवति इति। म्रद+

उणा० १। २६। इति कु:।) अतीक्ष्ण:। कोमल:। इत्यमर:। १। १। ७८॥ (यथा,—

"मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च।"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे॥)

मृद्वीका स्त्री। इति राजनिर्घण्ट:॥ (पुं, नृपञ्जयराजपुत्र:। इति विष्णुपुराणे। ४। २१। ३॥)

मृदुलक्षायसं, क्ली, (मृदु च तत् लक्षायसं चेति।) घोषकम्। इति राजनिर्घण्ट:॥

मृदुगव:, पुं, (मृदूनां गव:।) चित्राश्वराधा-मृगाश्विरोरेवतीनक्षत्राणि। यथा। चित्रामिश्च मृगाक्ष्यभं मृदुगव:। इति ज्योतिस्तत्त्वम्॥

मृदुगमना, स्त्री, (मृदु गमनमस्या:।) हंसी। इति राजनिर्घण्ट:॥ मन्दगमना स्त्री च॥

मृदुचर्म्मी, [न्] पुं, (मृदु कोमलं चर्म्म तक्। तदस्यास्य। चर्म्म+"श्रोत्रादिभ्यश्च।"५।२।९२। इति इनि:।) भूर्ज्जवृक्ष:। इति राजनिर्घण्ट:॥ कोमलचर्म्मविशिष्टे, त्रि॥

मृदुच्छद:, पुं, (मृदु: छद: पत्रमस्य।) भूर्ज्जवृक्ष:। इति हेमचन्द्र:। ४।२९०॥ गिरिजपीलुवृक्ष:। इति जटाधर:॥ कुक्कुरदु:। श्वेताल:। इति राजनिर्घण्ट:॥

मृदुता, स्त्री, (मृदु+तल्+टाप्।) मृदुत्वम्। मृदोर्भाव:। इति व्याकरणम्॥ (यथा, रघौ। ५। ५७॥

"स चातुनीत: प्रणतेन पश्चात्
मया महर्षिर्मृदुतामगच्छत्॥")

मृदुताल:, पुं, (मृदूनि तालफलान्यस्य।) श्वेतताल-वृक्ष:। इति राजनिर्घण्ट:॥ कोमलतालश्च॥

मृदुत्वक्, [च्] पुं, भूर्ज्जवृक्ष:। इत्यमर:॥२।४।४६॥

मृदुत्वच:, मृदवस्त्वचोऽस्य मृदुत्वक् वान्त:। भूर्ज्जोऽथ भूर्जपत्र: स्यात् मृदुत्वक् पत्रपुष्पक:। इति कोषान्तरमिति मधु:। अदन्तनपुंसकत्वच-ग्रहणेन आवन्तत्वचाग्रहणेन वा विग्रहे मृदु-त्वचोऽन्योऽपि भूर्जो भृजो बहुपटो बहुत्वको मृदुत्वच:। इति स्वामी। इत्यमरटीकायां भरत:॥

मृदुत्वकं, क्ली, (मृदो मृत्परिणामेन उत् ऊर्द्धं नीयते यत् इति। उत्+नी+डप्रकरणे "अन्येभ्यपि दृश्यते।" ३। २। ७८। इत्यस्य कार्य्यिकोक्त्या क:। तत: स्वार्थे कन्।) सुवर्णम्। इति शब्दचन्द्रिका॥

मृदुपत्र:, पुं, (मृदूनि पत्राण्यस्य।) नल:। इति राजनिर्घण्ट:॥ कोमलपर्णे, क्ली। तद्वति, त्रि॥

मृदुपत्री, स्त्री, (मृदूनि पत्राणि यस्या:।) चिल्लो-शाकम्। इति राजनिर्घण्ट:॥

मृदुपर्व्वक:, पुं, (मृदूनि पर्व्वाण्यस्य कप्।) वेत्र:। इति राजनिर्घण्ट:॥ कोमलपर्व्वविशिष्टे, त्रि॥

मृदुपुष्प:, पुं, (मृदूनि कोमलानि पुष्पाण्यस्य।) [illegible]

मृदुफल:, पुं, (मृदूनि फलान्यस्य।) विकङ्कत:। मधुनालिकेरिक:। विकङ्कतरुश्च:। इति राज-निर्घण्ट:॥ कोमलफलवति, त्रि॥

मृदुलं, क्ली, (मृदु मृदुत्वमस्त्यस्य। मृदु+"सिध्मा-दिभ्यश्च।"५। २। ९७। इति लच्।) जलम्। इति शब्दरत्नावली॥ कोमले, त्रि। इत्यमर:। २। ९। ७८॥ (यथा, शिशुपालवधे।६। २।

"मृदुलताम्रलतास्तमलोकयन्
स सुरभिं सुरभिं सुमनोभरै:॥")

मृदुलोमक:, पुं, (मृदूनि स्वार्थेसूक्ष्माणि लोमानि यस्य स:। स्वार्थे कन्।) शशक:। इति हेमचन्द्र:। ४। ३६१॥ कोमललोमविशिष्टे, त्रि॥

मृदूत्पलं, क्ली, (मृदु कोमलं उत्पलम्।) नील-पद्मम्। इति शब्दरत्नावली॥

मृद्गर:, पुं, (मृदं पङ्कं गच्छति कारणत्वेन प्राप्नो-तीति। गम्+ड:।) मत्स्यभेद:। इति संक्षिप्त-सारोणादिवृत्ति:॥

मृदङ्गं, क्ली, (मृदु कोमलं अङ्गं यस्य।) वङ्गम्। इति हेमचन्द्र:॥ (मृदु च तदङ्गञ्चेति।) कोमलावयवश्च॥

मृद्वी, स्त्री, (मृदु+"वोतोगुणवचनात्।" ४। १। ४४। इति ङीष्।) कोमलाङ्गी। इति सुग्ध-बोधव्याकरणम्॥ अपि च।

"सद्य: पुरीपरिसरेषु गिरीधवृद्धी
सीता जवाच्चिचतुराणि पदानि गत्वा।
गन्तव्यमस्ति कियदित्यबलानुयाता
रामानुज: श्रमवती प्रथमावतारम्॥"
इति महानाटकम्॥

कपिलद्राक्षा। इति राजनिर्घण्ट:॥

मृद्वीका, स्त्री, (मृदु+बाहुलकात् ईकन् टाप् च।) द्राक्षा। इत्यमर:। २। ४। १०७॥ (यथा, हरिवंशे। ५५। १०।

"जम्बूपनसबालीरकदम्बोदुम्बरार्ज्जुना:।
बीजपूरकमृद्वीकालकुचाश्च वराड़िमा:॥")

कपिलद्राक्षा। इति राजनिर्घण्ट:॥

मृध, उ न क्लिदे। इति कविकल्पद्रुम:॥ (भ्वा०-उभ०-अक०-सेट्। ज्ञावेट्।) उ, मर्द्धति मर्द्धते। क्लिदे आर्द्रीभावे। इति दुर्गादास:॥

मृधं, क्ली, (मर्द्धते क्लिद्यतीति। मृध्+क:।) युद्धम्। इत्यमर:। २। ८। १०४॥ (यथा, हरिवंशे। १८२। १।

"अपयाते ततो देवे लक्ष्मी चैव महात्मनि।
पुनरावर्त्तत मृधं परेषां लोमहर्षणम्॥")

मृधा, व, मृषा। इत्यमरटीकासारसुन्दरी॥

मृध्वर:, पुं, (मृत्तु मर:।) पाषाण:। इति शिवकाञ्चीश:॥

मृघ्र, ग्र ओ मृघ्रि। इति कविकल्पद्रुम:॥ (तुदा०-पर० सक०-अनिट्।) ग्र, मृघ्रति। ओ,

दिष्टार्थत्वात् अर्थेन प्रतिधानञ्च अस्यार्थः। अर्थाने। यथा, रघौ। १। ६८।

"परान्दधत् वर्षवलेन याचिना
तदीयमङ्गं कुलिशव्रणाङ्कितम्।"

प्रतिधाने।

"रामप्रवासे यदयुग्म दीर्घं
जगापवादं खनरेन्द्रवत्म्।"

कैकयीति भरतिः।३।७॥

विमर्शं परामर्शः। मृषि इति मूर्द्धन्यान्तपाठो हेयः। तर्हि चमेवार्थः स्यात्। इति दुर्गादासः॥

मृष, तृ क्ष } क्षान्तौ। इति कविकल्पद्रुमः॥
मृष, तृ ष्य } (अदन्त चुरा०-पर०-सक०-सेट्। अन्यत्र, अदन्त भ्वा०-उभ०-सक०-सेट्।) मूर्द्धन्योपधौ। क, मृषयति। ष्य, मृष्यति मृष्यते। इति दुर्गादासः॥

मृष, उ सेचने। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) उ, मर्षिता मृष्टा। इति दुर्गादासः॥

मृष, क क्षान्तौ। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, मर्षयति। अधमाक्षमेपदीत्येके। इति दुर्गादासः॥

मृष, ष ड उ क्षान्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-आत्म०-च-सक०-सेट्। क्रावेट्।) ष, मर्षति मर्षते। ड, मर्षते। उ, मर्षित्वा मृष्ट्वा। अपि गुरुमपराधं मर्षति ब्राह्मणानामिति हलायुधः। इति दुर्गादासः॥

मृष, य ष क्षान्तौ। इति कविकल्पद्रुमः॥ (दिवा०-उभ०-सक०-सेट्।) य ष्, मृष्यति मृष्यते ममर्ष। इति दुर्गादासः॥

मृषा, य, (मृष्यत इति। मृष्+का।) मिथ्या। इत्यमरः।३।४।२५॥ (यथा, नैषधचरिते।१।६८।

"मृषाश्रद्धं सादिवले कुतूहला-
न्नलस्य नासीरमते वितेनतुः॥")

वृथा। इति तट्टीकासारसुन्दरी॥

मृषार्थकं, क्ली, (मृषा अर्थोऽस्य। बहुव्रीहौ कप्।) अत्यन्तासम्भवार्थवाचकम्। तत्पर्य्यायः। आहतम् २। इत्यमरः। १। ६। २१। अत्यन्तासम्भवार्थे वर्त्तते। आहन्यते स्म आहतं क्तः। मृषा मिथ्या अर्थोऽस्य मृषार्थकं इह मृषार्थं यत् सर्व्वथा न घटते। यथा,—

"इयं वन्ध्यासुतो याति खपुष्पकृतशेखरः।
कूर्म्मक्षीरमतल्लाभः शशशृङ्गधनुर्द्धर इति॥
यावज्जीवमहं मौनी ब्रह्मचारी पिता मम इति।
अस्य चार्थं भेदः मौनित्वं ब्रह्मचारित्वं अन्यच्च सिद्धमेव वन्ध्यासुतत्वं खपुष्पत्वान्यत्रासिद्धमिति। इति भरतः॥

मृषाध्यायी, [न्] पुं, (मृषा ध्यायति चिन्तयतीति। धै+णिनिः।) बकः। यथा,—

"बहवो बकवत्तोटच्च तीर्थसेवी च तापसः।
[illegible]"

मृषालकः, पुं, (मृषा मिथ्या अचिरस्थायित्वेन मुकुलोद्गमकाल एवेत्यर्थः। अलं अलङ्करणं कायति प्रकाशयतीति। कै+कः।) आम्रवृक्षः। इति शब्दचन्द्रिका॥

मृषावादः, पुं, (मृषा मिथ्या वादः कथनम्।) मिथ्यावाक्यम्। तत्पर्य्यायः। चतुरी २। इति जटाधरः॥ (यथा, महाभारते।३।१८८।३३।

"बहवो ब्रह्महत्याश्च पृथिव्यां मनुजाधिप!।
मृषानुप्रालिनः प्राप्ता मृषावादपरायणाः॥")

मृषावादी, [न्] त्रि, (मृषा वदतीति। वद्+णिनिः।) मिथ्यावादकः। तत्पर्य्यायः। मृषोद्यः। इति शब्दमाला॥ मिथ्याभियोक्ता, च॥

मृषोक्तं, क्ली,(मृषा+वच्+"राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याघ्याः।"३।१।११४। इति कर्म्मणि क्यप्। निपातितश्च।) मिथ्यावाक्यम्। इति मुग्धबोधव्याकरणम्॥ (यथा, भट्टिकाव्ये। ५। ६०।

"मृषोक्तं प्रवदन्तीं तां सत्यवतो रघूत्तमः॥")

मृषोद्यः, त्रि, मिथ्यावादी। इति शब्दमाला॥

मृष्टं, क्ली. (मृज+क्तः।) मरिचम्। इति राजनिर्घण्टः॥

मृष्टः, त्रि, (मृज+क्तः।) शोधितम्। इत्यमरः। ३।४।५६॥ (यथा, हरिवंशसंहितायाम्।८५।६।

"अशुभकरमनोऽन्यथाप्रदिष्टं
क्षितपतितं च करोति मृष्टमन्नम्॥")

मृष्टिरुकः, पुं, वदान्यः। मिष्टाशी। अतिथिहिट्। इति मेदिनी। के, २०८॥

मृ, गि वधे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-सेट्।) गि, मृणाति। मृणः। मृत्तिः। इति दुर्गादासः॥

मे, ङ प्रतीदाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-अनिट्।) प्रतीदानं परिवर्त्तः। ङ, मयते धान्येन मार्षं लोकः। इति दुर्गादासः॥

मे, त्रि, मत्सम्बन्धम्। आमाके इति भाषा। मम आमार इतिभाषा। एते अस्मच्छब्दस्य चतुर्थी-षष्ठ्येकवचनाभ्यां निष्पन्ने। इति व्याकरणम्॥

मेक, पुं, (मे इति कायति शब्दं करोतीति। के शब्दे+कः।) छागः। इति राजनिर्घण्टः॥

मेक(ख)लकन्यका, स्त्री, (मेक(ख)लः मेखलायुक्तः विन्ध्यपर्व्वतः तस्य कन्यका। तस्य नितम्बदेशात् निःसृतेत्यर्थः।) नर्म्मदानदी। इत्यमरः। १। १०। ३२॥

मेक(ख)लाद्रिजा, स्त्री,(मेक(ख)लात् नितम्बदेशोपलक्षितात् अद्रेर्जाता। जन+डः+स्त्रियां टाप्।) नर्म्मदानदी। यथा,—

"रेवेक्षुजा पूर्व्वगङ्गा नर्म्मदा मेकलाद्रिजा।"

इति हेमचन्द्रः॥

मेक्षणं, क्ली, यज्ञीयपात्रविशेषः। (यथा, आश्वलायनश्रौतसूत्रे।२।६।१२।

"मेक्षणेनादायावदानसम्भरा जुहुयात्॥")

यथा, मेक्षणादीनाञ्च छन्दोगपरिशिष्टम्।

दृत्तं वार्क्षञ्च पृथ्वग्रमवदानक्रियाक्षमम्॥"

इत्यार्द्धप्रमाणम्।

प्रादेशप्रचयमित्यस्य प्रमाणं परिकल्पितमिति। तदर्द्धम्। एवेव दर्व्यौ। विशेषस्तु मद्धातुवे।

"दर्व्यौ द्व्यङ्गुलपृथ्वया तुरीयेण तु मेक्षणम्।
सुवलोदूखलं वार्क्षे स्रुवौ स्यातां सुहृट् तथा॥"

इति संस्कारतत्त्वम्॥

मेखला, स्त्री, (मीयते प्रक्षिप्यते कायमध्यभागे इति। मि+संज्ञायां खल्। गुणश्च स्त्रियां टाप्। इत्यमरटीकायां भरतमतम्।) स्त्रीकट्याभरणम्। चन्द्रहार गोट् इत्यादि भाषा॥ (यथा, रघुवंशे। ८। ६३।

"अथमाप्य विलासमेखलां
किमिदं किन्नरकण्ठि! सुप्यते॥")

तत्पर्य्यायः। काञ्ची २ सप्तकी ३ रसना ४ सारसनम् ५। इत्यमरः।२।६।१०८॥ काञ्चिः ६ रशना ७ कक्षा ८ रसनम् ९ रशनम् १० कक्षा ११ सप्तका १२ सारशनम् १३। इति शब्दरत्नावली॥ कलापः १४। इति जटाधरः॥ सारसनं स्त्रीकट्यां वस्त्रमन्यत्नम्। इति स्वामी॥ केचित्तु।

"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका।
रसना षोड़श्र ज्ञेया कलापः पञ्चविंशतिकः॥"

इति पठन्ति। इह त्वभेदात् पर्य्यायता। इति भरतः॥ खड्गादिनिबन्धनम्। इत्यमरः। २। ८। ६०॥ शिञ्जिनिका। चन्द्रहारादि। सुष्टिदाढ्यार्थं उपरि यो लौहबन्धः। इत्येके। इत्यपि भरतः॥ * ॥ श्रोणिगतस्त्रीभूषणभेदः। इति मेदिनी। खे, १०५॥ नर्म्मदानदी। इति शब्दरत्नावली॥ पृश्निपर्णी। इति राजनिर्घण्टः॥ *॥ उपनयनकाले धारणीयसूत्रनिर्म्मितसप्तत्रयम्। यथा।

अथैनं मागधकमाचार्य्यस्त्रिः प्रदक्षिणं त्रिवृत्त-सूत्रमेखलां परिधापयन् मन्त्रद्वयं वाचयति। इति भवदेवभट्टः॥ अपि च। गोभिलः। सूत्र-काण्डनाल्यो रसनाः। सूत्रं सूत्रः। तालुनः सूत्रसङ्घा तालुनी। रसना मेखला। तथा च मनुः।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्व्वीया वैश्यस्य शणजा तथा॥
सर्व्वाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा॥"

इति संस्कारतत्त्वम्॥

अन्यच्च।

"गर्भाष्टमेऽब्दे वाब्दे स्वस्रुचोक्तविधानतः।
दण्डी च मेखली स्त्री क्षौमाजिनधरो सुनिः॥
मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
मौञ्जाभावे कुशैर्नार्य्या ग्रन्थिनैकेन च त्रिभिः॥"

इति कौर्म्मे उपविभागे ११ अध्यायः॥

होमकुण्डोपरिस्थटितवेष्टनविशेषः। यथा,

"यावान् कुक्षस्य विस्तारः खननं तावदिष्यते ।
हस्तैके मेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः ॥
कुक्षे द्विहस्ते ता स्रेया रसवेदगुणाङ्गुलाः ।
चतुर्हस्ते तु कुक्षे ता वसुनर्तुगुणाङ्गुलाः ॥"
मेखला ब्रह्मचारिमेखलावत् कुक्षवेष्टिता दृढ़-घटिता नाभ्र खातदंष्ट्राग्राह्मे एकाङ्गुलिरूपं कण्ठं परित्यज्य उच्छ्रायेण विस्तारेण चैत्यादि क्रमेण वेदाद्यङ्गुलाः एतद्विपरीतास्तत्स्थानस्थरोक्ता व्यवहारविरुद्धाः । वेदाश्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः । वसुतर्कयुगानि अष्टषट्चत्वारि । पिङ्गलामतेऽपि । खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत् । इति तिथ्यादितत्त्वं दुर्गोत्सववृत्तम् ॥ (यजुर्वेदभाष्यसूत्रम् । यथा, श्रीमद्भागवते । ४ । ५ । १५ ।
"रत्नकुर्यज्ञपात्राणि तथैकेऽमीमनाद्रयन् ।
कुक्षेप्वसूत्रयन् केचिद्दिभिर्वेदिमेखलाः ॥"
"मेखलाः सीमाबन्धाश्च ।" इति तट्टीकायां श्रीधरस्वामी ॥)
मेखलकन्यका, स्त्री, (मेखलस्य मेखलोपलक्षितस्य विन्ध्यगिरेः कन्यकेव प्रसूता ।) नर्म्मदानदी । इत्यमरटीकायां भरतः ॥
मेघः, पुं, (मेहतीति । मिह् + अच् । "व्यङ्घादीनाञ्च ।" ७ । ३ । ५३ । इति कुत्वम् ।) मुस्तकः । राक्षसः । इति शब्दरत्नावली ॥ खनामख्यातद्रव्यपदार्थः । मेहति सिञ्चति यः । तत्पर्य्यायः । अब्भम् २ वारिवाहः ३ स्तनयित्नुः ४ बलाहकः ५ धाराधरः ६ जलधरः ७ तड़ित्वान् ८ वारिदः ९ अम्बुभृत् १० घनः ११ जीमूतः १२ सुहृत् १३ जलमुक् १४ धूमयोनिः १५ । इत्यमरः । १ । ३ । ७ ॥ अभ्रम् १६ पयोधरः १७ अम्भोधरः १८ ओमघूमः १९ घनाघनः २० वायुदारः २१ नभश्वरः २२ कन्धरः २३ कन्धः २४ नीरदः २५ गगनध्वजः २६ वारिमुक् २७ वार्मुक् २८ वनमुक् २९ अब्दः ३० पर्ज्जन्यः ३१ नभोगजः ३२ मदयित्नुः ३३ कदः ३४ कन्दः ३५ गवेडुः ३६ गदामरः ३७ खतमालः ३८ वातरथः ३९ श्वेतनीलः ४० नागः ४१ जलकरङ्कः ४२ पेचकः ४३ भेकः ४४ दर्दुरः ४५ । इति शब्दरत्नावली ॥ अम्बुदः ४६ तोयदः ४७ अम्बुवाहः ४८ । इति रत्नमाला ॥ पाथोदः ४९ गदाम्बरः ५० गाङ्गवः ५१ वारिमुचिः ५२ । इति त्रिकाण्डशेषः ॥ तद्दैविकपर्य्यायाः । अद्रिः १ यावा २ गोत्रः ३ बलः ४ अस्त्रः ५ पुरुभोजाः ६ वलिघ्नाः ७ अक्षा ८ पर्व्वतः ९ गिरिः १० व्रजः ११ चरः १२ वराहः १३ शम्बरः १४ रौक्मिणः १५ रैवतः १६ पलिगः १७ उपरः १८ उपलः १९ चमसः २० अद्रिः २१ अभ्रम् २२ बलाहकः २३ मेघः २४ क्षितिः २५ ओदनः २६ वृत्रन्नयः २७ वृत्रः २८ असुरः २९ कोशः ३० । इति चिन्त्यमेघनामानि । इति वैद्यनिघण्टौ ।१।२०॥
(यथा, उत्तररामचरिते । २ ।
"मेघमालेव यस्यायमाराद्पि विभाव्यते ॥")
मेघनायका यथा,—
"च्युते प्राकवर्षे तु चतुर्भिः प्रोक्षिते क्रमात् ।
आवर्त्तं विद्धि सम्वर्त्तं पुष्करं द्रोणमम्बुदम् ॥"
एषां फलानि ।
"आवर्त्तो निर्जलो मेघः सम्वर्त्तश्च बहूदकः ।
पुष्करो दुष्करजलो द्रोणः सस्यप्रपूरकः ॥"
इति ज्योतिस्तत्त्वम् ॥*॥
त्रेतायुगे तस्योत्पत्तिर्यथा,—
"अपां सिद्धे प्रतिगते तदा मेघाम्बुना तु वै ।
मेघेभ्यस्तनयित्नुभ्यः प्रवृत्तं वृष्टिवर्ज्जनम् ॥
सप्तदेव तया वृष्ट्या संपृक्ते पृथिवीतले ।
प्रादुरासंस्तदा तासां वृष्ट्या वै यज्ञसङ्गिताः ॥
सर्व्वप्रजोपभोगस्तु तासां तेभ्यः प्रजायते ।
वर्षयिष्यन्ति ते सस्याक्षेत्रायुगसुखे प्रजाः ॥"
इति कौर्म्मे २६ अध्यायः ॥*॥
प्रलयकालीनमेघा यथा,—
"ततो गजकुलोन्नादास्तनितैः समलङ्कृताः ।
उत्तिष्ठन्ति सदा घोरा घोराः सम्वर्त्तका घनाः ॥
केचिन्नीलोत्पलश्यामाः केचित् कुसुमसन्निभाः ।
धूम्रवर्णास्तथा केचित्तथा पीताः पयोधराः ॥
केचिदक्ताभवर्णाश्च स्थूलाः शतगिभास्तथा ।
गुञ्जकुन्दनिभाश्चान्ये जात्याञ्जननिभाः परे ॥
मनःशिलानिभाश्चान्ये कपोतसदृशाः परे ।
केचिद्रुद्राक्षवर्णाभाश्चान्ये क्षौद्रसन्निभाः ॥
तथा कर्ब्बूरवर्णाभा भिन्नाञ्जननिभास्तथा ।
इन्द्रगोपनिभाः केचित् हरितालनिभास्तथा ॥
काकाण्डकनिभाः केचिदुत्तिष्ठन्ति घना दिवि ।
केचित् पर्व्वतसङ्काशाः केचिद्गजकुलोपमाः ॥
कूटागारनिभाश्चान्ये केचिज्जीमकुलोद्वहाः ।
बहुरूपा घोररूपा घोरस्वरनिनादिनः ।
तदा जलधराः सर्व्वे पूरयन्ति नभस्थलम् ॥
ततस्ते जलदा घोरा वारिणा भास्करात्मजाः ।
सप्तधा संवृतात्मानस्तमग्निं शमयन्त्युत ॥
ततस्ते जलदा वर्षं वर्षन्तोऽह महौघवत् ।
सुघोरमग्निं सर्व्वं नाशयन्ति च पावकम् ॥
प्रवृत्तेन तदात्यर्थमम्भसा पूर्य्यते किल ।
अङ्गिरोजोंऽशभूतत्वात्तदाग्निं प्रविशत्यपि ॥
नष्टे चाग्नौ वर्षयन्ते पयोदा जलसम्भवाः ।
प्लावयन्तोऽथ भुवनं महाजलपरिप्लवैः ॥
धाराभिः पूरयन्तोदं चोद्यमानाः स्वयम्भुवा ।
उत्सन्नं सलिलौघैश्च वेला इव महोदधेः ॥
सादिद्वीपा तथा पृथ्वी जलैः संछाद्यते भृशैः ।
आदित्यरश्मिभिः पीतं जलमभ्रेषु तिष्ठति ॥
पुनः पतति तद्भूमौ पूर्य्यन्ते तेन चार्णवाः ॥"
इति कौर्म्मे उपविभागे ४२ अध्यायः ॥*॥
मेघस्य उत्पत्तिर्यथा,—
"तपो ह सर्व्वभूतेभ्य आदत्ते रश्मिभिर्जलम् ।
सप्तधात्मात्मसां योगाद्रश्मयः प्रवहन्त्यपः ॥
ततोऽयनवशात् काले परिवृत्तो दिवाकरः ।

अभ्रस्थाः प्रपतन्त्यापो वायुना सप्तधीरिताः ।
सर्व्वभूतहितार्थाय वायुभूताः समन्ततः ॥
ततो वर्षति सोऽभ्राणि सर्व्वभूतविवृद्धये ।
वायव्यं स्तनितत्वेव विद्युदग्निसमप्रभम् ॥
मेरुसानुमिवेत्यानो मेघत्वं याञ्चयन्ति च ।
भ्रमिष्यन्ति यथा चापस्तदन्नं कवयो विदुः ॥"
अपि च ।
"मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते ।
अग्निजा ब्रह्मजाश्चैव पद्मजाश्च पृथग्विधाः ।
त्रिधा त्रिधायनास्तेषां वक्ष्यामि वित्तसम्भवम् ॥
आग्नेयाः खलजाः प्रोक्तास्तेषां धूमः प्रवर्त्तनम् ।
जाता दुर्दिनवातार्द्रे सगुणास्ते व्यवस्थिताः ॥
महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः ।
भूत्वा घरग्निमर्थेत्य रमन्ते विचरन्ति च ॥
जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः ।
विद्युद्गुणविहीनाश्च जलधारावलम्बिनः ॥
वृद्धसंज्ञा महाकाया आवहस्य च सानुगाः ।
क्रोधमाचाश्च वर्षन्ति क्रोधाद्वर्षन्ति वा पुनः ।
पर्व्वतायतनस्थेषु वर्षन्ति विधिनेषु च ॥
बलाका गर्भभाश्चैव बलाकागर्भधारिणः ।
ब्रह्मजा नाम ते मेघा ब्रह्मनिश्वाससंभवाः ॥
द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः ।
इतो योजनमाचाश्च सार्द्धाद्वर्षन्ति विक्षसादपि ।
वृष्टिसर्गाद्विवर्त्तेषां धारासाराः प्रकीर्त्तिताः ॥
शुक्रेण यत्ता यज्ञेन पर्व्वतानां महौजसाम् ।
कामगानां प्रवृत्तानां प्रजानां शिवमिच्छता ।
पुष्करावर्त्तकाद्यानि करणेनेह विद्युना ॥
नानारूपधराश्चैव महाघोरस्वनाश्च ते ।
कल्पान्तवृष्टेः स्रष्टारः सम्वर्त्तार्त्तनियामकाः ।
वर्षन्ति ते युगान्तेषु त्रेतायाद्ये प्रकीर्त्तिताः ॥
अनेकरूपसंस्थानाः पूरयन्तो महीं जलैः ।
वायुं परिवहन्ते सुरात्मिकाः कल्पसाधकाः ॥
योऽन्यस्याक्षस्य भिन्नस्य प्राक्षतप्रभवस्तदा ॥
यस्मादृक्षा समुत्पन्नस्तुर्व्वक्त्रः स्वयम्भुवः ।
तस्येवाक्षस्य पाला हि सर्व्वे मेघाः प्रकीर्त्तिताः ॥
तेषामध्यायनं धूमः सर्व्वेषामविशेषतः ।
तेषां श्रेष्ठस्तु पर्ज्जन्यश्चत्वारश्चैव दिग्गजाः ॥
गजानां पर्व्वतानाञ्च मेघानां भोगिभिः सह ।
कुलमेकं पृथग्भूतं योनिश्चैका जलं स्मृतम् ॥
पर्ज्जन्यो दिग्गजाश्चैव हेमन्ते प्रीतसंभवाम् ।
तुषारवृष्टिं वर्षन्ति हिमग्रस्तविवृद्धये ॥"
इति ब्रह्माण्डे ५८ अध्यायः ॥*॥
षड्रागाणामर्गतरागविशेषः । यथा,—
"भैरवोऽथ वसन्तश्च पटो नारायणस्तथा ।
श्रीरागो मेघरागश्च सङ्गीते पुरुषाकृयाः ॥"
तस्य रागिण्यो यथा,—
"ललिता मालसी गौड़ी गाटी देवक्रिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
अयं हनूमन्मते षड़रागो ब्रह्मणो मुखजात् निर्गतः । आकाशाज्जात इति च वदन्ति ।
अस्य जातिः औडवः । अर्थात्

वर्षर्त्तौ रागिणीषु गानसमयः। अस्याकारः। सुन्दरपुरुषः। श्यामवर्णः। उष्णीषवद्वल्कलैश्चः। ग्राम्बितखड्गग्रहस्तः। हनूमन्मते अस्य पञ्च-रागिण्यो यथा। टङ्का १ मल्लारी २ गुर्ज्जरी ३ भूपाली ४ देशकारी च ५। अस्याष्टपुत्रा यथा। जालन्धरः १ सारः २ नटनारायणः ३ ग्रहराभरणः ४ कल्याणः ५ गजधरः ६ मान्धारः ७ सहाना ८। कलानाथमते। अस्य रागिण्यः षट् यथा। वङ्गाली १ मधुरा २ कामोदा ३ धनाश्रीः ४ तीर्थकी ५ देवाली ६। एतन्मतेऽपि अष्टौ पुत्राः किन्तु नटनारायण-ग्रहराभरणकल्याणस्थाने केदारामालवजभरता ज्ञेयाः॥ सोमेश्वरमते अस्य षड्रागिण्यो यथा। मल्लारी १ सौरटी २ वावेरी ३ कौशिकी ४ गान्धारी ५ हरप्रहारी ६। एतन्मतेऽपि पुत्राः पूर्ब्बवत्। रागिणीसहितस्तेतद्गानस्य वर्षर्त्तौ गानसमयः॥ भरतमते तस्य पञ्च रागिण्यो यथा। मल्लारः १ मलतानी २ देशी ३ रतिवल्लभा ४ कावेरी ५। तन्मते अष्टौ पुत्रा यथा। कलायरः १ वागेश्वरी २ सहाना ३ पुरीया ४ कानरा ५ तिलकः ६ स्तम्भः ७ ग्रहराभरणः ८। तन्मते अष्टपुत्राणां भार्य्या यथा। करण्याटी १ कादर्थी २ कदमगाटः ३ पाहारी ४ मोंभाः ५ परजः ६ नटमल्लरी ७ ग्रहनटः ८। इति सङ्गीतग्राह्यम्॥

मेघकदः, पुं, (मेघानां कद इव।) करका। इति हारावली। ५८॥

मेघकालः, पुं, (मेघानां कालः समयः।) वर्षर्त्तुः। इति जटाधरः॥ (यथा, हरिवंशे। ८५। ५८।

"स्थलसलिलचराणां चक्रयो मेघकाले।
प्रचुरसलिलहृष्टा गोधकाले भयाय॥")

मेघचिल्लकः, पुं, (चिल्लयतीति। चिल्लि+खुल्। मेघानां चिल्लकः तस्येव जलपायित्वात्।) चातकपक्षी। इति शब्दचन्द्रिका॥ (मेघ-चिल्लनविशिष्टे, त्रि॥)

मेघजं, त्रि, मेघभववस्तु। मेघाज्जायते इति युत्-पत्त्या जलघातोः डप्रत्ययेन निष्पन्नम्॥

मेघजालं, क्ली, (मेघानां जालम्।) अभ्रियम्। इति शब्दचन्द्रिका॥

मेघजीवनः, पुं, (मेघो जीवनं जीवनोपायो यस्य।) चातकपक्षी। इति राजनिर्घण्टः॥

मेघज्योतिः, [स्] पुं, (मेघस्य ज्योतिरग्निर्मेघा-दुत्पन्नो ज्योतिर्वा।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इत्यमरः।१।३।१०॥ मेघस्य ज्योति-रग्निर्मेघज्योतिः। ज्योतिरग्नौ समाख्यातं ज्योतिश्चन्द्रो निगद्यते। इति रत्नि:॥ इरया जलेन माद्यति दीप्यते इति इरम्मदः। मेघाग्निर्हि जलेनैव दीप्यते। मरीभिर्यत्नि सूर्ये भू भृ भृ भृ भृ जीति खः खित्यव्याजिति मनुस्मौ। अन्योन्य-संघर्षेण मेघाग्निरुत्थ यज्ज्योतिर्वृक्षादौ पतति स इरम्मदः। मेघ इत्युपलक्षणं तेन वातजो-ऽपीरम्मदः सोऽपि हि इरया जलेन माद्यतीति कौस्तुभी। मेघाग्न्यादिरिरम्मद इति शब्दार्णवः। इति तट्टीकायां भरतः॥

मेघडम्बरः, पुं, मेघस्याडम्बरः। मेघगर्জ্জनम्। यथा,—

"अलायुद्धे कपिग्राह्ये प्रभाते मेघडम्बरे।
दम्पत्योः कलहे चैव बलारम्भे लघुक्रिया॥"

इत्युद्भटः॥

मेघतिमिरं, क्ली, (मेघेन तिमिरं अन्धकारो यत्र।) मेघाच्छन्नदिनम्। इति हलायुधः॥

मेघदीपः, पुं, (मेघजनितो दीप इव।) विद्युत्। इति शब्दमाला॥

मेघनादः, पुं, (मेघं नादयतीति। नद्+णिच्+अच्।) वरुणः। (मेघस्य नाद इव नादो यस्य।) रावणपुत्रः। इति मेदिनी। दे, ५२॥ (यथा, रघौ। १२। ७६।

"गजकक्षापातविश्लिष्टमेघनादाद्यबन्धनः॥"

मेघस्य नादः।) मेघशब्दः। इति हेमचन्द्रः॥ (यथा, महाभारते। ३। ७१। ७।

"ते श्रुत्वा रथनिर्घोषं वारणाः शिक्षितैस्तथा।
प्रणेदुस्तुमुखा राजन्! मेघनाद रवोत्-सुकाः॥")

पलाशवृक्षः। इति शब्दचन्द्रिका॥ तद्धुलीय-प्राकः। इति राजनिर्घण्टः॥ (यथा, भाव-प्रकाशे।

"तद्धुलीयो मेघनादः काञ्चेरत्तण्डुलेरकः॥"

अस्य गुणादिकं तद्धुलीयशब्दे द्रष्टव्यम्॥ दानवभेदः। यथा, हरिवंशे। ३३०। ३०।

"सुबाहुर्मेघनादश्च भीमगर्भश्च वीर्य्यवान्॥"

मेघसङ्घशब्दविशिष्टे, त्रि। यथा, रामायणे। २। १६। २६।

"मेघनादमसम्बाधं मणिहेमविभूषितम्॥")

मेघनादजित्, पुं, (मेघनादं जितवानिति। जि+क्विप्।) लक्ष्मणः। इति त्रिकाण्डशेषः॥

मेघनादानुलासकः, पुं, (मेघनादं अनु लक्षीकृत्य लसति क्रीडतीति। लस+ण्वुल्।) मयूरः। इति राजनिर्घण्टः॥

मेघनादानुलासी, [न्] पुं, (मेघनादमनुलसतीति। लस+णिनिः।) मयूरः। इत्यमरः।२।५।३०॥

मेघनामा, [न्] पुं, (मेघस्य नाम नाम यस्य।) तुलकः। इत्यमरः। २। ४। १५८॥ (पर्य्यायो-ऽस्य यथा,—

"तुलको मेघनामा स्यात्।"

इति गारुडे २०८ अध्यायः॥)

मेघनिर्घोषः, पुं, (मेघस्य निर्घोषः।) मेघशब्दः। तत्पर्य्यायः। स्तनितम् २ गर्জितम् ३ रसितम् ४। इत्यमरः। १।३।८॥ ध्वनितम् ५ ह्रादितम् ६। इति भरतः॥ (मेघस्य निर्घोष इव निर्घोषो यस्य। मेघतुल्यशब्दविशिष्टे, त्रि। यथा, महा-भारते। ३। ७१। ११।

"यदि मां मेघनिर्घोषो नोपगच्छति मैथवः।
अद्य चामीकरप्रख्यं प्रवेक्ष्यामि हुताशनम्॥")

मेघपुष्पं, क्ली, (मेघस्य पुष्पमिव।) जलम्। इत्य-मरः। १। १०। ५॥ शिलाभ्रम्। गदौजलम्। इति मेदिनी। पे, २८॥

मेघपुष्पः, पुं, (मेघ इव पुष्पमिति प्रकाशते इति। पुष्प विकाशने+अच्।) ग्रहभेदः। इति शब्द-रत्नावली॥ श्रीहरिवंशे॥ (यथा, महाभारते। ४। ४३। २१।

"तं मन्ये मेघपुष्पस्य जवेन सदृशं हयम्॥")

मेघप्रसवः, पुं, (मेघः प्रसव: उत्पत्तिस्थानमस्य इति।) जलम्। इति राजनिर्घण्टः॥ मेघ-जाते, त्रि॥

मेघभूतिः, पुं, (मेघात् भूतिर्जन्मास्य।) वज्रम्। इति शब्दरत्नावली॥

मेघमालः, पुं, (मेघमाला वर्ज्जनाद्यस्येन अस्त्यस्य। अर्शं आद्यच्।) रमागर्भजातकल्किदेवपुत्रः। यथा। "तथा रमा सिते पक्षे।" इत्युपक्रम्य। "सा पुत्रं सुषुवे साध्वी मेघमालबलाहकौ। महोत्साहौ महावीर्य्यौ सुभगौ कल्किसम्मतौ।" इति कल्किपुराणे ३१ अध्यायः॥ (प्लक्षद्वीपस्थपर्व्वतविशेषः। यथा, भागवते। ५। २०।४।"सुवर्णो हिरण्यष्ठीवो मेघमाल इति सेतु-शैलाः॥" राक्षसविशेषः। इति रामायणे। ३। २६। ३१॥)

मेघमाला, स्त्री, (मेघानां माला।) मेघश्रेणी। तत्पर्य्यायः। कादम्बिनी २। इत्यमरः।१।२।८॥ (यथा, उत्तररामचरिते। २।

"मेघमालेव यद्यायमारादपि विभाव्यते।"

स्कन्दमाहात्म्यजातमन्यतमा। यथा,महाभारते। ६। ४६। २६।

"एकवक्त्रा मेघरवा मेघमाला विरोचना॥")

मेघयोनिः, पुं, (मेघस्य योनिः उत्पत्तिकारणम्।) धूमः। इति शब्दरत्नावली॥

मेघरागः, पुं, (मेघनामको रागः।) षड्रागान्त-र्गतरागविशेषः। इति हलायुधः॥ (यथा, संगीतदर्पणे रागाध्याये। ३१।

"भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।
श्रीरागो मेघरागश्च षड्रेते पुरुषाह्वयाः॥")

अस्य विवरणं मेघशब्दे द्रष्टव्यम्॥

मेघवर्णा, स्त्री, (मेघस्येव वर्णोऽस्याः। स्त्रियां टाप्।) नीलीवृक्षः। इति शब्दचन्द्रिका॥ (मेघतुल्यवर्णे, त्रि। यथा, महाभारते। ३। ४६। २५।

"सुरक्तपीतोत्तरीयेण मेघवर्णेन राजता॥")

मेघवर्त्म, [न्] क्ली, (मेघानां वर्त्म पन्थाः।) आका-शम्। इति त्रिकाण्डशेषः॥

मेघवह्निः, पुं, (मेघस्य मेघजन्यो वा वह्निः।) वज्राग्निः। तत्पर्य्यायः। इरम्मदः २। इति हेमचन्द्रः। ३। १६७॥

मेघवाहनः, पुं, (मेघो वाहनमस्य।) इन्द्रः। इत्य-मरः।१।१।४७॥ (यथा, शिशुपालवधे।१३।१८।

"अविलम्बितमेतदम्बिपालिपक्षवः
अयति त्वा मेघमिव मेघवाहनः॥")

मेघकः

मेघवेश्म, [न्] क्ली, (मेघानां वेश्म भवनम्।) आकाशम्। इति जटाधरः॥

मेघसारः, पुं, (मेघस्य सार इव।) चौरकपूरः। इति राजनिर्घण्टः॥

मेघसुहृत्, [द्] पुं, (मेघाः सुहृदो मित्राणि यस्य।) मयूरः। इति हेमचन्द्रः॥

मेघस्तनितोद्भवः, पुं, (मेघस्य स्तनितादुद्भव उत्पत्तिरस्य। नवमेघशब्देनास्य अङ्कुरोत्पत्तेस्तथात्वम्।) विकङ्कटकवृक्षः। इति राजनिर्घण्टः॥ (विशेषोऽस्य विकङ्कटकशब्दे ज्ञेयः॥)

मेघाख्यं, क्ली, (मेघस्य आख्या नामास्य।) सुवर्णम्। इति रत्नमाला॥

मेघागमः, पुं, (मेघानां आगमोऽत्र।) वर्षाकालः। इति शब्दरत्नावली॥ (यथा, घटकर्परकाव्ये।२।

"नवाम्बुभृताः स्निग्धिनो वहन्ति
मेघागमे कुन्दसमानवर्णाः!॥")

मेघस्यागमनञ्च॥

मेघानन्दा, स्त्री, (मेघेन आनन्दोऽस्याः।) बलाका। इति राजनिर्घण्टः॥

मेघानन्दी, [न्] पुं, (मेघेन आनन्दतीति। आ+नन्द+णिनिः।) मयूरः। इति राजनिर्घण्टः॥

मेघान्तः, पुं, (मेघानां अन्तोऽवसानमत्र।) ग्रीष्मकालः। इति राजनिर्घण्टः॥

मेघाह्वि, क्ली, (मेघानां अह्नीव।) करका। इति त्रिकाण्डशेषः॥

मेघाह्वं, क्ली, (मेघानां आह्वं स्थानम्।) आकाशम्। इति धनञ्जयः॥

मेघोदरः, पुं, (मेघस्येव उदरमस्य।) अर्जुनवृक्षः। इति हेमचन्द्रः॥

मेचकं, क्ली, (मचति वर्णान्तरेण मिश्रीभवतीति। मच्+"ज्वलादिभ्यः संज्ञायां वुन्।" उणा० ५। ३५। इति वुन्। ततः "पचिमचोरिच।" उणा० ५।६०। इति इत्वे लघूपधगुणः। यद्वा, मच मचि कल्कने+अकन्। मचि परिसृचां नार्णोत्वम्। मेचकः ज्ञानीजः स्यादतसीपुष्पसन्निभः। इति शब्दार्णवः। युतपक्षिस्तु मचति मिश्रीभवति वर्णान्तरेण इति भरतः। इत्यमरटीकायां रघुनाथचक्रवर्त्ती।) श्रोतोऽञ्जनम्। अन्धकारः। इति मेदिनी। के, १७०॥ नीलाञ्जनम्। इति राजनिर्घण्टः॥ (यथा,—

"मेचकं मर्दनाञ्जनपिञ्जवदीषत्कृष्णरूक्षम्।"

इति माधवकरहस्तनिदानव्याख्याने श्रोतोरोगाधिकारे विजयरक्षितः॥)

मेचकः, पुं, मयूरचन्द्रकः। श्यामलः। इति मेदिनी। के, १७०॥ (यथा, "मेचकामं आगारधूमाभञ्च सप्तसारगन्धकादिमञ्जिष्ठाक्षतकृष्णवर्णस्येव वर्णो मेचक इति जेज्जड़ादयः प्राहुः चिक्कणकृष्णा इत्यर्थः।" इति रुग्विनिश्चयस्य रक्तपित्तव्याख्याने विजयेनोक्तम्॥) धूमः। मेघः। श्रोताञ्जनः। इति शब्दरत्नावली॥ श्यामलगुणयुक्ते, त्रि। इत्यमरः। १।५।१४॥ (यथा, शिशुपालवधे। ६। २६।

मेढ्रम्

"गजकदम्बकमेचकसुच्चकै-
र्नभसि धौरय नवाम्बुदमम्बरे॥")

मेचकाभिधा, स्त्री, (मेचकस्याभिधा नामास्याः।) पातालगरुड़लता। इति राजनिर्घण्टः॥

मेट्, ऋ उन्नादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिमेटत्। मेटति लोकः। उन्नादतीत्यर्थः। इति दुर्गादासः॥

मेटुला, स्त्री, (मेटतीति। मेट् बाहुलकात् उलच्। टाप् च।) आमलकी। इति शब्दचन्द्रिका॥

मेठः, पुं, (मेटति उन्नादतीति। मेट्+अच्। पृषोदरादित्वात् साधुः।) हस्तिपकः। इति त्रिकाण्डशेषः॥

मेड, ऋ उन्नादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिमेडत्। मेड़ति उन्नादतीत्यर्थः। इति दुर्गादासः॥

मेढ्रः, पुं, (मेहत्यनेनेति। मिह सेचने+"दाज्ञी-घसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे।" ३।२।१८२। इति ष्ट्रन्। ।) शिश्नः। (यथा, मनौ। ८। २८०।

"अवमूत्रयतो मेढ्रमवशृङ्गयतो गुदम्॥")

स तु गर्भस्थस्य षण्मासेभ्यो भवति। इति सुश्रुतः॥ (यथा, "अवशृनयनवदनघ्राणगुदमेढ्राणि नवस्रोतांसि नराणां बहिर्मुखान्येतान्येव॥" इति सुश्रुते शारीरस्थाने पञ्चमेऽध्याये॥ शिरः पर्य्यन्तं गतायां वङ्क्षणाद्या मूलस्थानम्। यथा, पूर्व्वखण्डे नवमपटलचक्रनिरूपणे। "वङ्क्षणा मेढ्रदेशाच्छिरसि परिगता मध्यमे स्याच्छलाकी।" मेढ्रस्याप्राहतत्वं जन्मान्तरे जनस्य महापापस्य चिह्नं कुष्ठविशेषः। यथा, भविष्यपुराणीयमध्यमखण्डस्थाध्याये।

"ब्रह्मन् कुष्ठगणं विप्र! उत्तरोत्तरतो गुरुम्।
विचर्चिका तु दुश्चर्म्मा चर्चरीयस्तथैव कः॥
विकर्त्तनं व्रणताख्यो च लक्ष्यन्ते तथाष्टकम्।
एषां मध्ये तु यः कुष्ठी गर्हितः सर्व्वकर्म्मसु॥
व्रणवत्सर्व्वगात्रेषु गर्ह्यं भाले तथा नसि।"

दुश्चर्म्मा अपाहतमेढ्रः इति स्मृतिसंग्रहितारः॥ पञ्चभूतानां मध्ये पृथिव्या रजोगुणांशात उत्पन्नौ मेढ्रः तथाच वेदान्तपञ्चदश्याम्।

"रजोंशैः पञ्चभिस्तेषां क्रमात् कर्म्मेन्द्रियाणि तु।
वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे॥"

उपस्थेन्द्रियं नाम उपस्थगतिरिक्तं उपस्थाश्रयं स्पर्शवत्त्वोत्सर्गशक्तिमदिन्द्रियं इत्यात्मानात्मविवेके ग्रन्थकारार्थः। अस्य लक्षणादिकं लिङ्गशब्दे उपस्थशब्दे च द्रष्टव्यम्॥) मेहनः। इत्यमरः। २। ६। ८६॥ (यथास्य पर्य्यायः।

"मेढ्रो भेढ्रो वृषो मेह उरभ्र उरणोऽपि च।
अविर्वाजिन्नयोर्नाम्नः कथ्यन्ते तद्गुणा अथ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मेढ्रवङ्क्षी, स्त्री, (मेढ्रस्य वङ्क्षमिव वङ्क्षमस्याः। गौरादित्वात् ङीष्।) मेघवङ्क्षीवृक्षः। इति रत्नमाला॥

मेदः

मेदटः, पुं, वल्लिपकः। इति शब्दरत्नावली॥

मेदकः, पुं, वल्लिपकः। इति त्रिकाण्डशेषः॥

मेदटः, पुं, मेघः। इति शब्दरत्नावली॥

मेध, भ ऋ सङ्गे। वधे। मेधायाम्। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-वधे-मेधायाञ्च सक०-सेट्।) भ, मेधति मेधते धीरो गुणिना सङ्गत इत्यर्थः। ऋ, अमिमेधत्। मिमेध। इति दुर्गादासः॥

मेधिः, पुं, (मेधन्ति पशवोऽत्रेति। मेध सङ्गे+"सर्व्वधातुभ्य इन्।" उणा० ४। २।७। इति इन्।) खले पशुबन्धनार्थन्यस्तदारु। मेड़ काठ इति भाषा। यथा,—

"मेधिर्मेधिः खलेवाली खले गोबन्धदारु यत्।"

इति हेमचन्द्रः। ३।५५८॥

(स्त्री, मेधिका। तत्पर्य्यायो यथा,—

"मेधिका मेधिनी मेधिर्दीपनी बहुपत्रिका।
बोधिनी बहुबीजा च ज्योतिर्गन्धफला तथा॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च केरवी।"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

क्वचित् मेथीति पाठो दृश्यते॥)

मेधिका, स्त्री, (मेधतीति। मेध्+ण्वुल्। टापि अत इत्वम्।) क्षुपविशेषः। मेथिशाक इति भाषा। तत्पर्य्यायः। मेधिनी २ मेथी ३ दीपनी ४ बहुपत्रिका ५ बोधिनी ६ गन्धबीजा ७ ज्योतिः८ गन्धफला ९ वल्लरी १० चन्द्रिका ११ मन्था १२ मिश्रपुष्पा १३ केरवी १४ कुञ्चिका १५ बहुपर्णी १६ पीतबीजा १७। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपणत्वम्। अरोचकहरत्वम्। दीपिकारित्वम्। वातघ्नत्वम्। दीपनत्वञ्च। इति राजनिर्घण्टः॥ अथ मेथी वनमेथी। तयोर्नामगुणाः।

"मेथिका मेथिनी मेथी दीपनी बहुपत्रिका।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च केरवी।
कुञ्चिका बहुपर्णी च पीतबीजा सुनिच्छदा॥
मेथिका वातघ्नमनी दीपनी ज्वरनाशिनी।
ततः स्वल्पगुणा वन्या वाजिनां सा तु पूजिता॥"

इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥

मेथिनी, स्त्री, (मेथतीति। मेथ्+इनिः। ङीप्।) मेथिका। इति राजनिर्घण्टः॥

मेथी, स्त्री, (मेथिः+ऋदिकारादिति पक्षे ङीष्।) मेथिका। इति राजनिर्घण्टः॥ (लम्भः। यथा, शतपथब्राह्मणे। १। ५। १। २१।

"विष्णवे त्वेति मेथीमुपनिष्क्रीणीतस्तनूर्वै यज्ञ मानुषे॥"

"मेथीं लम्भम्।" इति तद्भाष्यम्॥)

मेद, ऋ भ वधमेधयोः। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) ऋ, अमिमेदत्। भ, मेदति मेदते ग्राम्यार्थं ग्रिन्थः धारयतीत्यर्थः। मिमेदुः। इति दुर्गादासः॥

मेदः, [स्] क्ली, (मेदति स्निह्यतीति। मिद्+"सर्व्वधातुभ्योऽसुन्।" उणा० ४। १८८। इति

असृज् ।) मांसप्रभवधातुविशेषः । तत्पर्य्यायः । वपा २ वसा ३ । इत्यमरः ।२।६।८४॥ मेदः ४ । अकारान्त इति भरतः ॥ अस्य गुणाः । वातनाशित्वम् । बलपित्तकफदात्रत्वञ्च । इति राजवल्लभः ॥ अथ मेदसः स्वरूपमाह ।

"यन्मांसं स्नायुना पक्वं तन्मेद इति कथ्यते ।
तदतीव गुरु स्निग्धं बलकार्श्यतिदूषणम् ॥"

अथ मेदसः स्थानमाह ।

"मेदो हि सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

इति भावप्रकाशः ॥

रोगविशेषः । तत्र मेदसो विप्रकारं निदानमाह ।

"अव्यायामदिवास्वप्नश्लेष्मलाहारसेविनः ।
मधुरोऽन्नरसः प्रायः स्नेहाच्चैवो विवर्द्धयेत् ॥"

अन्नरसः आमरसः । तथा च सुश्रुतः ।

आमत्वान्नरसो मधुरश्च भवतीति । मेदसोऽतिप्रवृद्धौ वैगुण्यमाह ।

"मेदसाऽतमार्गत्वात् पुष्यत्यन्ये न धातवः ।
मेदस्तु पीयते तस्मादशक्तः सर्व्वकर्म्मसु ॥"

अन्ये धातवः अस्थ्यादयः शुक्रान्ताः । न पुष्यन्ति न पुष्टा भवन्ति । पीयते सञ्चितं भवति बर्द्धत इति यावत् । तस्मात् मेदस्वी सर्व्वकर्म्मसु अशक्तः स्यात् । मेदसः सौकुमार्य्यात् । अपरानपि दोषानाह ।

"क्षुद्व्यायामसहत्वामोष्णस्वप्नक्लमासहैः ।
युक्तः क्षुत्स्वेददौर्गन्ध्यैरल्पप्राणोऽल्पमैथुनः ।
मेदसः स्वेददौर्गन्ध्याज्जायते जन्तवो नरः ॥"

कथं उच्छ्वासावरोधः । कफेन घुर्घुर इत्यर्थे । जन्तवः क्रिमयः । मेदसः स्थानमाह ।

"मेदस्तु सर्व्वभूतानामुदरेष्वस्थिषु स्थितम् ।
अतएवोदरे वृद्धिः प्रायो मेदस्विनो भवेत् ॥"

मेदस्विनोऽपि वृद्धौ हेतुमाह ।

"मेदसाऽतमार्गत्वाद्वायुः कोष्ठे विशेषतः ।
चरन् सन्दूषयत्यग्निमाहारं शोषयत्यपि ॥
तस्मात् शीघ्रन्तु जरयत्याहारञ्चापि काङ्क्षति ।
विकारान् सोऽनुते घोरान् कांश्चित् काल-
व्यतिक्रमात् ॥"

सन्दूषयति प्रदीपयति । स मेदस्वी आहारं शीघ्रं जरयति पुनर्भोक्तुं काङ्क्षति स दीप्ताग्निः कालव्यतिक्रमात् भोजनकालातिक्रमात् । कांश्चिद्विकारान् वातपित्तकरान् घोरान् अश्नुते प्राप्नोति । एते वातपित्ते मेदसावरुद्धे विशेषादुपद्रवकरे इत्याह ।

"एतावुपद्रवकरौ विशेषात् पित्तमारुतौ ।
एतौ हि दहतः स्थानं वनं दावानलो यथा ॥"

एतौ पित्तमारुतौ मेदसा रुद्धमार्गत्वात् कोष्ठमध्ये प्रवृद्धौ सन्तौ विशेषादुपद्रवकरौ दहतः नाशयेताम् । मेदसोऽतिवृद्धेर्विनाशहेतुत्वमाह ।

"मेदस्यतीवसंवृद्धे सहसैवानिलादयः ।
विकारान् दारुणान् कृत्वा नाशयन्त्याशु जीवितम् ॥"

विकारान् प्रमेहपिडकज्वरभगन्दरविदधिवातरोगानामग्रतमान् । अतिस्थूलतया वैगुण्यमाह ।

"अतिस्थूलेषु संवृद्धा विसर्पाः सभगन्दराः ।
ज्वरातीसारमेहार्शःश्लीपदा यक्ष्मकादयः ॥"

अतिस्थूलस्य लक्षणमाह ।

"मेदो मांसातिवृद्धत्वाच्चलस्फिग्गुदरस्तनः ।
अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥"

अयथोपचयोत्साहः न यथा उपचयो मांसोपचयः उत्साहो बलञ्च यस्य सः ॥७॥८॥ अथ मेदस्य चिकित्सा ।

"पुराणाः शालयो मुद्गाः कुलत्थोद्दालकोद्रवाः ।
तेलञ्च वस्तयश्चापि सेव्या मेदस्विना सदा ॥
श्रमश्चिन्ताव्यवायाध्वशौद्रजागरणप्रियः ।
स्वप्नव्यायामतिस्त्यौल्यं यवश्यामाकभोजनः ॥
सारं वातारिपत्रस्य सिद्धयुक्तं पिबेन्नरः ।
सक्षितं भक्तमश्नन मेदोवृद्धिनिवृत्तये ॥
गुडूचीत्रिफलाक्वाथः पीतो मेदोहरः परः ।
गुडूचीत्रिफलाक्वाथस्तथा लोहरजोयुतम् ।
चौद्रेण त्रिफलाक्वाथः पीतो मेदहरः परः ॥
प्रातर्मधुयुतं वारि सेवितं स्थौल्यनाशनम् ।
उष्णमम्बु मद्यं वा पिबेत् लङ्घनतुर्भवेत् ॥
शोधयित्रिफलासुस्तविडङ्गैर्गुग्गुलुं समम् ।
खादेत् सर्व्वान् जयेद्रोगान्मेदःश्लेष्मामवातजान् ॥
पिप्पली मधुना लेह्या मेदःकफविनाशिनी ॥
धत्तूरपत्तस्वरसेन गाढ-
सुद्वर्त्तनं श्लौल्यहरं प्रदिष्टम् ॥
वासादलरसो लेपाच्छर्करूर्णेन संयुतः ।
बिल्वपत्तरसो वापि देहदौर्गन्ध्यनाशनः ॥
निम्बपत्तस्वरसः प्रक्षितक्षत्रादियोजितं जयति ।
दग्धहरिद्रोद्वर्त्तनमचिराच्छिरदेहदौर्गन्ध्यम् ॥
गिरीषलामज्जकहेमजोर्ध्व-
खगदोषसंस्वेदहरः प्रघर्षः ।
शरीरदौर्गन्ध्यहरः प्रदेहः
पद्माम्बुलोधाभयपद्मनागाम् ॥"

गिरीषस्याऽत्र पत्रं ग्राह्यं व्यवहारात् । लामज्जकं सुगन्धिद्रव्यविशेषस्तदाभे उशीरं ग्राह्यम् । हेम नागकेशरम् । अम्बु बालकम् । अभयं उशीरम् ।

"हरीतकीं तु संपिष्य देहमुद्वर्त्तनं नरः ।
पश्चात् स्नानं प्रकुर्व्वीत देहस्वेदोपशान्तये ॥
वकुलस्य दलैः सम्यग्वारिणा परिपेषितैः ।
देहमुद्वर्त्तयेत् पश्चाद्धरीतक्या सुपिष्टया ॥
भूय उद्वर्त्तनं कुर्य्यात् पश्चात् स्नानं समाचरेत् ।
प्रस्वेदान् सुरुते शीघ्रं मेदोवृद्धिसमुद्भवान् ॥"

इति मेदोऽधिकारः ॥ इति भावप्रकाशः ॥

(तथास्य विशेषः । यथा,—

"मेदः स्नेहस्वेदौ दृढत्वं पृष्ठिमस्याश्च ॥"

अस्य चौणलक्षणं यथा,—

"मेदः क्षये श्लेष्माभिवृद्धिः सन्धिशून्यता रौक्ष्यं मेदूरमांसप्रार्थना च ।" अस्यातिवृद्धिलक्षणं यथा,—

"मेदः स्निग्धाङ्गनासुदरपार्श्वदृढं कासश्वासादीन् दौर्गन्ध्यञ्च ।"

"पूर्व्वः पूर्व्वोऽतिवृद्धत्वाद्वर्द्धयेद्धि परं परम् ।
तस्मादतिप्रवृद्धानां धातूनां क्षपणं हितम् ॥"

"अपचेर्वृंहणेचापि दोषधातुमलान् भिषक् ।
तावद्यावद्रोगः स्यान्नरो रोगसमन्वितः ॥"

इति सुश्रुते सूत्रस्थाने १५ अध्यायः ॥

"तृतीया मेदोधरा नाम मेदो हि सर्व्वभूतानामुदरास्थिमज्जसु च मज्जनसु च मज्जा भवति ॥"

इति सर्व्वत्र शारीरस्थाने ४ अध्याये ॥)

मेदः, पुं, (मेदयति स्निह्यतीति । मिद् + अच् ।) वपा । इति शब्दचन्द्रिका ॥

"ह्रस्वाकक्षुल्लमिश्रो मलग्नो मेदकुहृदा ॥"

इति भरतधृतशालिहोत्रः ॥)

म्लेच्छजातिविशेषः । इति जटाधरः ॥ अलम्बुषा । इति राजनिर्घण्टः ॥ (ऐरावतकुलजो नागविशेषः । यथा, महाभारते ।१।५७।११।

"विरूपः शरभो मेदः प्रमोदः संहतापनः ।
ऐरावतकुलाद्दैते प्रविष्टा दशयोजनम् ॥")

मेदकः, पुं, (मिद् + ण्वुल् ।) जगलः । इत्यमरः । २ । १० । ४२ ॥ मेया इति भाषा ॥

मेदजः, पुं, (मेदात् जायते इति । जन् + डः ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ मेदोभवश्च ॥

मेदःसारा, स्त्री, (मेदः सारोऽस्याः ।) मेदा । इति राजनिर्घण्टः ॥ (विवृतिरस्या मेदाशब्दे द्रष्टव्या ॥)

मेदस्कृत्, क्ली, (मेदः करोतीति । मेदस् + क + क्विप् ।) मांसम् । इति हेमचन्द्रः ॥

मेदा, स्त्री, (मेदो अस्याः अस्तीति । मेदस् + अच् । टाप् ।) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मेदोद्भवा २ जीवनी ३ श्रेष्ठा ४ मणिच्छिद्रा ५ विभावरी ६ । इति रत्नमाला ॥ वसा ७ खल्यपर्णिका ८ मेदःसारा ९ जीवन्ती १० मेदिनी ११ मधुरा १२ स्निग्धा १३ मेघा १४ द्रवा १५ साध्वी १६ शुक्लदा १७ बहुरन्ध्रिका १८ पुरुषदन्तिका १९ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तदाहार्शिःकासपुराजयत्वम् ज्वरनाशित्वम् । वातदोषकारित्वञ्च । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथा,

"शुक्लकन्दो नखच्छिन्नो मेदो धातुमिव स्रवेत् ।
यः स मेदेति विज्ञेयो लिङ्गासाततपरैर्जनैः ॥"

मेदामेदाभेदास्थाने शुतावरी मूली । इति भावप्रकाशः ॥ अस्या विवरणं महामेदाशब्दे द्रष्टव्यम् ॥ (अनुकल्पोऽस्या यथा । "मेदाभावे चाश्वगन्धा ।" इति वैद्यकपरिभाषायाम् ॥)

मेदिनी, स्त्री, (मेदोऽस्या अस्तीति । मेदस् + इनिः । ङीष् ।) मेदा । काश्मरी । इति राजनिर्घण्टः ॥ पृथिवी । इत्यमरः । २ । १ । ३ ॥ मेदो विद्यतेऽस्यां मेदिनी शाल्मलेर्मेदःशब्दादिन् सलोपश्च निपात्यते इति परे । क्ष्मते मेदः समानार्थोऽन्यो मेदशब्दोऽस्ति । ह्रस्वाकक्षु-

मेदोऽङ्ग

ङमिश्चरो मलग्नो मेदकुष्ठश्चेति ग्राजिश्चोक्तः। नैकाजादिति इन्। यथा चोक्तम्।
"मधुकैटभयोरासीन्मेदसैव परिप्लुता।
तेनेयं मेदिनी देवी प्रोच्यते ब्रह्मवादिभिः॥"
मेद्यतीति वा मेदिनी इञ्जिला ङिच्चि यङादिलाञ्ङिन्। इति तट्टीकायां भरतः॥ (एतन्नामनिरुक्तिर्यथा, देवीभागवते। १।६। ८३-८४।
"गतप्राणौ तदा जातौ दानवौ मधुकैटभौ।
सागरः सकलो व्याप्तस्तदा वै मेदसा तयोः॥
मेदिनीति ततो जातं नाम पृथ्व्याः समन्ततः।
अभक्ष्या भक्षिका तेन कारणेन सुरेश्वराः॥"
अपि च। तत्रैव। ३। २३। ८।
"मधुकैटभयोर्मेदःसंयोगाच्चैव मेदिनी स्मृता।
धारणाच्च धरा प्रोक्ता पृथ्वी विस्तारयोगतः॥")
तस्या उत्पत्तिर्यथा,—
"शृणुतां वसुधायाश्च सर्व्वमङ्गलकारणम्।
विघ्ननिघ्नकरं पापनाशनं पुण्यवर्द्धनम्॥
अहो केचिद्दानवौ मधुकैटभमेदसा।
बभूव वसुधायाश्च तद्विरूढमतं शृणु॥
ऊचतुस्तौ पुरा विष्णुं तुष्टौ युद्धेन तेजसा।
आवां वध्यौ न यत्रोर्व्वी प्लावसा संवृतेति च॥
तयोश्चौवनकालेन प्रत्यक्षा सा भवेत् स्फुटम्।
ततो बभूव मेदस्य मरणस्यान्तरं तयोः।
मेदिनीति च विख्यातेत्युक्ता वेलक्षतं शृणु॥
जलधौता क्षणा पूर्व्वं वर्द्धिना मेदसा यतः।
कथयामि च तच्चाद्य सार्थकं सर्व्वसम्मतम्॥
पुरा मृतं यत् मृत्युक्तं धर्म्मवक्त्राच्च पुष्करे।
महाविराट्शरीरस्य जलस्थस्य चिरं स्फुटम्॥
मलो बभूव कालेन सर्व्वाङ्गव्यापको ध्रुवम्।
स च प्रविष्टः सर्व्वेषां तस्रोतां विवरेषु च॥
कालेन महता तस्माद्बभूव वसुधा सुते!।
प्रत्येकं प्रतिलोमाच्च कूपेषु सा स्थिरा स्थिता॥
आविर्भूता तिरोभूता सा जले च पुनः पुनः।
आविर्भूता सृष्टिकाले तच्चलोपर्य्यवस्थिता।
प्रलये च तिरोभूता जलाभ्यन्तरवस्थिता॥"
इति श्रीब्रह्मवैवर्त्ते प्रकृतिखण्डे नारायणनारदसंवादे पृथिव्युपाख्याने ७ अध्यायः॥

मेदिनीदवः, त्रि, (मेदिन्याः दवः।) भूमिः। इति त्रिकाण्डशेषः॥

मेदुरः, त्रि, (मेदति स्निह्यतीति। मिद्+"भृञ्भासमिदो घुरच्।"३। २। १६१। इति घुरच्।) अतिस्नग्धस्निग्धः। तत्पर्य्यायः। स्नात्स्निग्धः २। इत्यमरः। ३।१।३०॥ (यथा, गीतगोविन्दे।१।१।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे! गृहं प्रापय।")

मेदुरा, स्त्री, (मेदुर+टाप्।) काकोली। इति राजनिर्घण्टः॥ (गुणादयोऽस्याः काकोलीशब्दे ज्ञेयाः॥)

मेदोजं, क्ली, (मेदसो जायते इति। जन्+डः।) अभ्रं। इति राजनिर्घण्टः॥

मेदोद्भवा, स्त्री, (मेदादुद्भवोऽस्याः।) मेदा। इति राजनिर्घण्टः॥

मेधा

मेदोन्धुः पुं, (मेदोबहुलः अन्धुः।) वर्णसङ्करजातिभेदः। इति जटाधरः॥ (यथा, मनुः।१०।४८।
"मेदोन्ध्रपुण्ड्रमृगलुब्धकाभीरचण्डालपुक्कसानाम्॥"
क्वचित् मेदान्ध्र इत्यपि पाठः॥)

मेदोवती, स्त्री, (मेदोऽस्याः अस्तीति। मेदस्+मतुप्। मस्य वः।) मेदा। इति राजनिर्घण्टः॥ (मेदोविशिष्टे, त्रि॥)

मेध, ङ्क च यज्ञमेधासङ्गमेषु। इति कविकल्पद्रुमः॥ (भ्वा०उभ०-वधे सक०-अन्यत्र अक०-सेट्।)
ङ्क, अमिमेधत्। ञ, मेधति मेधते। इति दुर्गादासः॥

मेधः, पुं, (मेध्यते वध्यते पश्वादिरत्रेति। मेध+घञ्।) यज्ञः। इति जटाधरः॥ (यथा, महाभारते। १। १२६। ६८।
"ग्रामणीश्च महीपालानेष जित्वा महाबलः।
आहृतैः सहितो वीरस्त्रीन् मेधानाहरिष्यति॥"
ऋषिः। इति ऋग्वेदे। १०। १००। ६। मन्त्रभाष्ये सायणः॥)

मेधा, स्त्री, (मेधते सङ्गच्छते अस्यामिति। मेध्+"घिड्भिदादिभ्योऽङ्।" ३। ३। १०४। इत्यङ्। टाप्।) धारणावती बुद्धिः। इत्यमरः।१।५।२॥ धारणाशक्तियुक्ता धीर्मेधा मेधते सङ्गच्छतेऽस्यां सर्व्वं बहुश्रुतं विषयीकरोति इति वा मेधा मेधृ सङ्गे मेधायां सेमक्तात् सर्व्वोरिता: आपबहुश्रुतविषयीकरणं धारणा यदुक्तं धारणा बुद्धेर्गुणविशेषः इति। इति भरतः॥ *॥ (यथा, मुक्तिकोपनिषदि। १। २। ३।
"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम्॥")

मेधाकरं औषधं यथा,—
"ब्रह्मपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला।
अभया च गुडूची च अटरूषकवाकुची।
एतैरष्टसमैर्भागैर्घृतं प्रस्थं विपाचयेत्॥
कल्कार्थं रस प्रस्थं दृष्ट्वा च समन्वितम्।
एतद्ब्राह्मीघृतं नाम स्मृतिमेधाकरं परम्॥"
इति गारुडे १९८ अध्यायः॥ *॥

मेधाकरणं यथा। सततमध्ययनम्। तत्त्वज्ञानकथा। श्रुतस्तत्त्वज्ञाखावलोकनम्। सद्भिराचार्य्यसेवा च। इति पुराणम्॥ (दक्षप्रजापतिकन्याविशेषः। यथा,—
"कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥"
इति वह्निपुराणे गणमेदनामाध्याये॥

धनम्। इति निघण्टुः। २। १०॥ "मिधृ मेधृ सङ्गमे च। चकारात् हिंसामेधयोश्च। मिधिः सङ्गत्यर्थः। इति माधवः। घञ्। सङ्गच्छतेऽनेन सर्व्वं तद्वता हिंस्यते वा तदात् चौरादिभिः। ज्ञस्मि चैवार्थकारणात् इति महाभारतम्॥ यदा, मतौ धीयते अर्जयितव्यं रक्षितव्यं दातव्यमिति धनवता बुद्धौ धनं धार्य्यते। तत्र मति-

मेधावी

ग्रह्व उपपदे धातोः वर्त्तमाने कविधानम् इति कः। पृषोदरादित्वात् मतिग्रह्वस्य मेभावः।" इति तट्टीकायां देवराजयज्वा॥)

मेधाः, [स्] पुं, (मेधते इति। मेध्+असुन्।) स्वायम्भुवमनुपुत्रः। यथा,—
"अग्निध्रश्चाग्निबाहुश्च सवनः सवन एव च।
ज्योतिष्मान् द्युतिमान् हव्यो मेधा मेधातिथिर्वसुः।
स्वायम्भुवस्यास्य मनोर्दशैते वंशवर्द्धनाः॥"
इति मात्स्ये ९ अध्यायः॥

मेधाकृत्, क्ली, (मेधां करोतीति। कृ+क्विप्।) सितावरशाकम्। इति राजनिर्घण्टः॥ मेधाकारके, त्रि॥

मेधाजित्, पुं, (मेधां जितवानिति। जि+क्विप्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥

मेधातिथिः, पुं, (मेधायाः धारणावद्बुद्धेरतिथिरिव।) मनुसंहिताटीकाकृत्। मुनिविशेषः। यथा, श्रीभागवते। १। १६। १०।
"मेधातिथिर्देवल आर्ष्टिषेणो
भरद्वाजो गौतमः पिप्पलादः॥"
(प्रियव्रतपुत्रः स च शाकद्वीपाधिपतिः। यथा, श्रीमद्भागवते। ५। २०। २४—२५।
"यस्मिन् हि शाको नाम महीरुहः स्वक्षेत्रोपदेशकः। यस्य ह महासुरभिगन्धस्तद्द्वीपमनुवासयति। तस्यापि प्रियव्रत एवाधिपतिर्नाम्ना मेधातिथिः॥"* सप्तदशे द्वापरयुगस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।
"मेधातिथिः सप्तदशे व्रती व्यासोऽष्टादशे तथा॥"
प्रजापतेः कर्द्दमस्य पुत्रः। यथा, मार्कण्डेये। ५३। १५।
"अग्निध्रो मेधातिथिश्च वपुष्मांश्च तथापरः॥"
दक्षसावर्णिमन्वन्तरे सप्तर्षीणामेकतमः। यथा, मार्कण्डेये। ६४। ८।
"मेधातिथिर्वसुः सत्यो ज्योतिष्मान् द्युतिमांस्तथा।
सप्तर्षयोऽत्र सवनस्तस्याग्नो हव्यवाहनः॥"
नदीविशेषे, स्त्री। यथा, महाभारते। ३। २२१। २३।
"चर्म्मण्वती महीं चैव मेधां मेधातिथिस्तथा।
तान्नावती वेत्रवतीं नद्यश्चिक्षोऽथ कौशिकीं॥")

मेधारुद्रः, पुं, (मेधया रुद्र इव।) कालिदासः। इति त्रिकाण्डशेषः॥

मेधावती, स्त्री, (मेधा देवत्वेन अस्ति अस्याः इति। मेधा+मतुप्। मस्य वः। ङीप्। मेधाबहुत्वादस्यास्तथात्वम्।) महाज्योतिष्मती। इति राजनिर्घण्टः॥ मेधाविशिष्टा च॥

मेधाविनी, स्त्री, (मेधाऽस्याः अस्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति विनिः। ततो ङीप्।) ब्रह्मण्यः पत्नी। इति मेदिनी। ने, २०४॥

मेधावी, [न्] पुं, (मेधाऽस्यास्तीति। मेधा+"अस्मायामेधास्रजो विनिः।"५। २। १२१। इति

विनि:) शुकपक्षी। इति मेदिनी। ने,२०४॥ मदिरा। इति राजनिर्घण्टः॥ पक्षिणः। इति हेमचन्द्रः।३।६॥ आढ्यः। इति त्रिकाण्डशेषः॥ (कस्यचित् ब्राह्मणस्य पुत्रः। यथा, महाभारते, १२। १७५। ३।

"द्विजातेः कस्यचित् पार्थ! स्वाध्यायनिरतस्य वै।
बभूव पुत्रो मेधावी मेधावी नाम नामतः॥")

मेधायुक्त, त्रि। इति मेदिनी। ने, २०४॥ (यथा, रामायणे। १। ४। ६।

"स तु मेधाविनौ दृष्ट्वा वेदेषु परिनिष्ठितौ।
वेदोपबृंहणार्थाय तावग्राहयत प्रभुः॥")

तद्वेदिकपर्य्यायः। विप्रः १ विप्यः २ यतुप्रः ३ धीरः ४ वेनः ५ वेधाः ६ कवः ७ ऋभुः ८ नवेदाः ९ कविः १० मनीषी ११ मन्वाता १२ विधाता १३ विपः १४ मनश्चित् १५ विपश्चित् १६ विपन्यवः १७ आकेनिपः १८ उशिजः १९ कौशलाः २० अङ्गातयः २१ मनयः २२ मनुषाः २३ वाघतः २४। इति चतुर्विंशतिर्मेधाविनामानि। इति वेदनिघण्टौ। ३। १५॥

मेधिः, पुं, (मेधन्ते खले क्षाल्यन्ते इति। मेध+"सर्व्वधातुभ्य इन्।" उणा० ४।११३। इति इन्।) खले पशुबन्धनार्थस्थलादेः। इत्यमरः। २। ९। १५॥ खले धान्यमर्द्दनस्थानमध्ये पशुबन्धननिमित्तं निखितं यूपादेः स मेधिः। मेह इति ख्याते। इति भरतः॥ तत्पर्य्यायः। मेधिः २ खलेवाली ३। इति हेमचन्द्रः॥ अस्य स्थापनदिनं तच्च वारौ शुक्लदशमी। तत्रत्याग्निं वैष्णवी स्थापयेत् हुत्वा मूलमग्निरस्य। तच्च लग्नं स्थिरम्। इति ज्योतिस्तत्त्वम्॥

मेधिरः, त्रि, (मेधास्यास्तीति। मेधा+"मेधास्रग्भ्यामिरच्चौ वक्तव्यौ।" ५। २। १०९। इति काशिकोक्त्या इरच्। मेधावी। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे। १। २५। २०।

"त्वं विश्वस्य मेधिर! दिवश्च ग्मश्च राजसि।"

"हे मेधिर! मेधाविन्! वरुण।" इति तद्भाष्ये सायणः॥ यज्ञवान्। हविष्मान्। यथा, ऋग्वेदे। १०। १००। ६।

"इन्द्रस्य सुतुकं देवं सहोभिर्गृणते वरिता मेधिरः कविः।"

"मेधो यज्ञः हविर्वा तद्वान्।" इति तद्भाष्ये सायणः॥)

मेधिरः, त्रि, (अयमेषामतिशयेन मेधावीति। मेधाविन्+"अतिशायने तमबिष्ठनौ।" ५।३।५५। इति इष्ठन्। "विन्मतोर्लुक्।" ५। ३। ६५। इति विनो लुक्।) अतिशयमेधायुक्तः। इति व्याकरणम्॥

मेध्यं, त्रि, (मेधते इति। मेध+"ऋहलोर्ण्यत्।" ३। १। १२४। इति ण्यत्। यद्वा, मेधामर्हतीति। मेधा+दृक्षादित्वात् यत्।) पवित्रम्। इत्यमरः। २। १। ५५॥ (यथा,—

"ज्ञानेन मेध्यमखिलमेध्यं ज्ञानतो भवेत्।
ब्रह्मज्ञाने सदुत्पन्ने मेध्यामेध्यं न विद्यते॥"

इति चिन्तामणिधृतवचनम्॥)

"पवित्रः प्रयतः पूत इति ब्रह्मवर्गे प्राप्तिविषयमात्र उक्तं इह त्वप्राप्तिदशे।" इति भरतः॥

"पूतं मेध्यं पवित्रं स्याद्धीमं प्रयतनिर्म्मलम्।
निष्प्रोथं प्रोक्षितं दृष्टं निर्लिक्तमनवस्करम्॥"

इति शब्दरत्नावली॥

(नित्यमेध्यम्। यथा, मनुः। ५। १२६।

"नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्।
ब्रह्मचारिगतं भैक्ष्यं नित्यमेध्यमितिस्थितिः॥")

शुचिः। इति मेदिनी। ये, ४७॥ (यथा, अनर्घराघवे। २। १७।

"तत्ताटक! त्वयपूलकोपनयनक्लेशाग्निरद्येविभिः
मेधा वत्सतरी विहस्य बटुभिः सोल्लुण्ठमालभ्यते॥"

मेधाजनकः। यथा,—

"मण्डूकपर्ण्याः स्वरसः प्रयोज्यः
क्षीरेण यष्टीमधुकस्य चूर्णम्।
रसो गुडूच्यास्तु सशर्करायाः
कल्कः प्रयोज्यः खलु शुक्लपुष्पाः॥
आयुः प्रदान्यामयनाशनानि
बलाग्निवर्णस्वरवर्द्धनानि।
मेधा विशेषेण च शुक्लपुष्पौ॥"

इति चरके चिकित्सास्थाने प्रथमेऽध्याये॥)

मेध्यः, पुं, (मेधायै हितः। मेधा+"उगवादिभ्यो यत्।" ५। १। २। इति यत्।) खदिरः। यवः। छागः। इति राजनिर्घण्टः॥

मेध्या, स्त्री, (मेधायै हिता। मेधा+यत्। टाप्।) रक्तवचा। रोचना। इति मेदिनी। ये, ४७॥ केतकी। ज्योतिष्मती। शुक्लपुष्पी। ब्राह्मी। श्वेतवचा। भ्रमरी। मण्डूकी। इति राजनिर्घण्टः॥ (नदीविशेषः। यथा, महाभारते। ३। २२१। २३।

"चर्म्मण्वती महीं चैव मेध्या मेधातिथिस्तथा॥")

मेनका, स्त्री, (मन्यते इति। मन्+"मनेरादिश्च।" इति उन्। ततः "नश्चिमन्योरलिर्व्वक्तव्यः।" ६। ४। १२०। इत्यत्र काशिकोक्त्या अकारस्य एत्वम्।) सर्व्वया। इति शब्दरत्नावली॥ तस्याः कन्या शुकन्तला। यथा,—

"विश्वामित्रात्तवैवाहं त्यक्ता मेनकया वने।
वेदेतद्भगवान् कण्वो वीर! किं करवाम ते॥"

इति श्रीभागवते। ९। २०। १३॥

(मेनैव। मेना+स्वार्थे कन्।) उमामाता। यथा,

"ततः प्रीतास्तु पितरस्तां दत्त्वात्मजया निजाम्।
मेनां देवाय शैलाय हिमयुक्ताय वै ददुः॥
तां मेनां हिमवाँल्लब्ध्वा प्रसादाद्देवतेष्वथ।
प्रीतिमानभवच्चापौ ररास च यथेच्छया॥
ततो हिमादिः पित्रुकन्यया समं
सुखं विवेद विषयं यथेप्सितम्।
अजीजनत् सा तनयास्तु मेना
रूपाभियुक्ताः सुरयोषितोपमाः॥

मेना

पुलस्त्य उवाच।

मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विताः।
सुनाभ इति विख्यातश्चतुर्थस्तनयोऽभवत्॥
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना।
रूपेणानुपमा काली जज्ञे मेनकासुता॥
जातास्ताः कन्यकास्तिस्रः षड्ब्दात् परतो मुने!।
कर्त्तुं तपः प्रयातास्ता देवास्ता ददृशुः शुभाः॥
ततो गते कन्यके द्वे ज्ञात्वा मेना तपस्विनी।
तपसो वारयामास उमे त्येवाब्रवीच्च सा॥
तदैव माता नामास्याश्चक्रे पित्रसुता शुभा।
उमेत्येव हि कन्यायाः सा जगाम तपोवनम्॥"

इति वामने ७४—७५ अध्यायः॥ *॥

अपि च।

"कथं गिरिसुता काली बभूव जगतां प्रसूः।
दाक्षायणी व्यक्ततनुः कथमाप हरं पतिम्॥"

मार्कण्डेय उवाच।

यदात्यजत्तनुं देवी पूर्व्वं दाक्षायणी सती।
तदैव मनसागच्छन्मेनकां हिमवद्गिरिम्।
त्यक्त्वात्मा तदा देवी भूत्वा हिमवतः सुता॥
शिवाविन्यस्तमनसा सप्तविंशतिवत्सरान्।
निनाय मेनका देवी परमाप्तुमिच्छती॥
सप्तविंशतिवर्षान्ते जगन्माता जगन्मयी।
सुप्रीता भवदत्यर्थं प्राह प्रत्यक्षतां गता॥

श्रीदेव्युवाच।

यत् प्रार्थितं त्वया देवि! मत्तस्तत् प्रार्थयाधुना।
ततः सा प्रथमं पुत्रसुतं वव्रे यशस्विनी॥
पश्चात्तु तनयामेकां स्वरूपगुणशालिनीम्।
कुलद्वयानन्दकरीं भुवनत्रयदुर्लभाम्॥
ततो भगवती प्राह मेनकां सुनिसन्निभाम्॥

श्रीदेव्युवाच।

शृणु पुत्रा: संभवन्तु भवत्या वीर्य्यसंयुताः।
सुता च तव देवानां मानुषाणाञ्च रक्षसाम्॥
हिताय सर्व्वजगतां भविष्याम्यहमेव ते।
एवमुक्त्वा जगद्धात्री तत्रैवान्तरधीयत॥
ततः सा कालिका देवी योगनिद्रा जगन्मयी।
पूर्व्वत्यक्तसतीरूपा जज्ञार्थं मेनकां ययौ॥
समयस्यानुरूपेण मेनकाजठरे शिवा।
समुद्भूय समुत्पन्ना सा लक्ष्मीरिव सागरात्॥
वसन्तसमये देवी नवम्यां भृगुयोगतः।
अर्द्धरात्रौ समुत्पन्ना गङ्गेव शुभ्रिमच्छलात्॥"

इति कालिकापुराणे ४० अध्यायः॥

मेनकात्मजा, स्त्री, (मेनकाया आत्मजा।) दुर्गा। इति हलायुधः॥ (शुकुन्तला। यथा, महाभारते। १। ७२। ११।

"नेमां हिंस्युर्वने बालां क्षुधार्ता मांसगृद्धिनः।
पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम्॥")

मेनकाप्राणेशः, पुं, (मेनकायाः प्राणेशः पतिः।) हिमालयः। इति हेमचन्द्रः। ४। ६६॥

मेना, स्त्री, (मान्यते पूज्यते इति। मान पूजायाम् "बहुलमन्यत्रापि।" उणा० २। ७६। इति इनच् प्रत्ययेन निपातनात् साधुः।) मेनका। इति भरतद्विरूपकोषः॥ सा पित्रुकन्या। यथा,

मेरुः

"तां मानसीं मेरुसुतः पितृणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे॥"

इति कुमारसम्भवे। १। १८॥ *॥

यथा च, कौर्म्मे १२ अध्याये।

"अग्निष्वात्ता बर्हिषदो द्विधा तेषां व्यवस्थितिः।
तेभ्यः स्वाहा स्वधा चैव मेना धैरण्वती तथा॥"

(स्त्री। यथा, ऋग्वेदे। १। ६२। ७।

"भगो न मेने परमे व्योमन्यधारयद्रोदसी सुदंसाः।"

"मेनेति स्त्रीनाम। मेने स्त्रीरूपमापन्ने रोदसी।"

इति तद्भाष्ये सायणः॥ *॥ हृषभस्यकन्या। यथा, ऋग्वेदे। १। ५१। १३।

"मेना भवो हृषभस्यास्य।"

"हे इन्द्र! त्वं हृषभस्यास्य एतदाख्यस्य राज्ञो मेना भवः मेनानाम कन्यका भूः।" इति तद्भाष्ये सायणः॥*॥ वाक्। इति निघण्टुः। १। ११॥

"मानपूजायां इत्यसात् 'बहुलमन्यत्रापि इनच् भवति।' इति वचनादिनच्। बहुलग्रहणात् नलोपः। पूज्यतेऽनया गुर्व्वादिरूपदेशवाक्येन पूज्या वा देवतात्वात्।" इति तट्टीकायां देवराजयज्वा॥ *॥ नदीविशेषः। यथा, महाभारते। ६। ९। २३।

"कारविणीमसिक्नीञ्च कुमुचीरां महानदीम्।
मरुद्वृधां प्रवरां मेनां हेमां हृतवतीं तथा॥")

मेनाजा, स्त्री, (मेनायाः जायते इति। जन्+डः। स्त्रियां टाप्।) पार्व्वती। इति हेमचन्द्रः॥

मेनादः, पुं, (मे इति नादोऽस्य।) विड़ालः। छागः। मयूरः। इति मेदिनी। दे, ३८॥

मेनाधवः, पुं, (मेनायाः धवः स्वामी।) हिमालयः। इति त्रिकाण्डशेषः॥

मेन्धिका, स्त्री, (मां श्रीभामिन्धयतीति। इन्ध+णिच्+ण्वुल्। टापि अत इत्वम्।) क्षुपविशेषः। इति केचित्। मेन्दी इति भाषा॥

मेन्धी, स्त्री, (मां श्रीभामिन्धयतीति। इन्ध+णिच्+अण्। गौरादित्वात् ङीष्।) क्षुपविशेषः। इति केचित्। मेन्दी इति भाषा॥

मेप, ञ्च ड गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ड, मेपते। ञ्च, अभिमेपत्। इति दुर्गादासः॥

मेरकः, पुं, विष्णुग्रन्थभेदः। इति हेमचन्द्रः॥

मेरुः, पुं, (मि+"मिपीभ्यां रुः।" उणा० ४। १०१। इति रुः।) पर्व्वतविशेषः। तत्पर्य्यायः। सुमेरुः २ हेमाद्रिः ३ रत्नसानुः ४ सुरालयः ५। इत्यमरः॥ मिनोति क्षिपति व्योतीषि उच्चत्वात् मेरुः। डुमि ञ् क्षेपे नार्व्वीति रुः। इति भरतः॥*॥ (यथा, माघे। १२१। ८।

"देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते।
प्रागायतः सवैदूर्य्य उदयो नाम पर्व्वतः॥")

अपमालाग्रवर्त्तिन्येका माला। यथा,—

"मालामेकैकमादाय स्वरे सम्यातयेत् सुधीः।
सुखे सुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्॥
गोपुच्छसदृशी कार्य्याथवा सर्पाकृतिर्भवेत्।
तत्त्वजातीयमेकाक्षं मेरुत्वेनाश्रयेत् सुधीः॥"

इत्युत्पत्तितन्त्रे ६० पटलः॥ *॥

करमालायां मेरुर्यथा,—

"तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका।
पर्व्वद्वयं मध्यमाया मेरुत्वे नोपकल्पयेत्॥"

इदन्तु शक्तिभिन्नविषयम्॥ *॥

शक्तिविषये मेरुर्यथा,—

"पर्व्वद्वयमनामायाः परिवर्त्तेन वै क्रमात्।
पर्व्वत्रयं मध्यमायास्तर्ज्जन्यैकं समाहरेत्।
पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्व्वति!॥"

श्रीविद्याविषये मेरुर्यथा,—

"अनामामध्यमायाञ्च मूलाग्रन्तु द्वयं द्वयम्।
कनिष्ठायाञ्च तर्ज्जन्यास्त्रयं पर्व्व सुरेश्वरि!।
अनामामध्यमायाञ्च मेरुः स्यादितरं शुभम्॥"

तल्लक्षितजपे दोषो यथा,—

"अङ्गुल्ययेषु यज्जप्तं यज्जप्तं मेरुलङ्घने।
पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत्॥"

इति तन्त्रसारः॥

मेरुकः, पुं, (मिनोति क्षिपति गच्छतीति। मि+रुः। संज्ञायां कन्।) यज्ञधूपः। इति शब्दचन्द्रिका॥ धुना इति भाषा। (मध्यदेशस्य प्रदेशभेदः। यथा, हृहत्संहितायाम्। १४। २६।

"ऐणाख्यां मेरुकनदराख्यपशुपालकोरकाक्षीरा।
अभिसारदरदतङ्गणकुलूतसैरिन्ध्वनदराष्ट्राः॥")

मेरुसावर्णः, पुं, एकादशमनुः। यथा,—

"ततस्तु मेरुसावर्णो ब्रह्मक्षत्रमनुः स्मृतः।
ऋतुश्च ऋतुधामा च विष्वक्सेनो मनुस्तथा॥"

इति मात्स्ये ९ अध्यायः॥

मेलकः, पुं, (मिल्+भावे घञ्। स्वार्थे कन्।) सङ्गः। इत्यमरः। ३। २। २६॥ ("बहुमाश्च मेलके बलाबलसूक्तम्।" इति। २। १३६। मनुटीकायां कुल्लूकभट्टः॥)

मेलकलवणं, क्ली, (मिलतीति। मिल+ण्वुल्।) मेलकं लवणम्। औषरलवणम्। इति राजनिर्घण्टः॥

मेला, स्त्री, (मिल्+णिच्+अङ्। टाप्।) मेलकः। मसिः। इति मेदिनी। ले, ४६॥ अञ्जनम्। इति हेमचन्द्रः॥ महानीली। इति राजनिर्घण्टः॥

मेलानन्दा, स्त्री, (मेलया मस्या आनन्दो यस्याः।) मस्याधारः। इति शब्दरत्नावली॥

मेलान्धुः, स्त्री, (मेलानां अन्धुः कूपिका।) मस्याधारः। इति जटाधरः॥

मेलाम्बुः, पुं, (मेलेव अम्बु अत्र।) मस्याधारः। इति शब्दरत्नावली॥

मेव, ञ्च ड सेवने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) ञ्च, अभिमेवत्। ड, मेवते। इति दुर्गादासः॥

मेघः

मेघः, पुं, (मिहति अन्योन्यं आर्द्रयते इति। मिह् आर्द्रतायाम्+अच्।) पशुविशेषः। भेड़ा इति भेड़ा इति च भाषा॥ (यथा, पञ्चतन्त्रे। ५। ६२।

"मेषेण कृपकाराणां कलहो यत्र वर्त्तते।
स भविष्यत्यसन्दिग्धं वानराणां भयावहः॥")

तत्पर्य्यायः। मेढ्रः २ उरभ्रः ३ उरणः ४ ऊर्णायुः ५ वृष्णिः ६ एडकः ७। इत्यमरः। २। ६। ७६॥ भेड़ः ८ हुड़ः ९ अविकः १० अविः ११ लोमशः १२ वली १३ रोमशः १४ भेडुः १५ भेडकः १६ मेण्टः १७ डुलुः १८। इति शब्दरत्नावली॥ मेण्टकः १९ डुड़ः २० संबलः २१। इति हेमचन्द्रः। ४। ३४१॥ अस्य मांसगुणाः। मधुरत्वम्। शीतत्वम्। गुरुत्वम्। विष्टम्भित्वम्। हृंहणत्वञ्च। इति राजनिर्घण्टः॥ अपि च। पित्तश्लेष्मकरत्वम्। कुसुम्भशाकेन सह त्याज्यत्वञ्च। इति राजवल्लभः॥ *॥ जयविशेषः। औषधविशेषः। इति मेदिनी। घे, १२९॥ (यथा, सुश्रुते उत्तरतन्त्रे। २७ अध्याये।

"मेषस्य पृष्ठ्यैर्मधुकेन संयुतं
तद्भक्षणं सर्व्वरुजे प्रयोजयेत्।
क्रियाञ्च सर्व्वाः शतशोऽत्र दर्शिताः
क्रमः परिज्ञायिनि चापि चित्तजित्॥")

राशिविशेषः॥ तत्पर्य्यायः। क्रियः २। (यथा, श्रीमद्भागवते। ५। २१। ४। "यदा मेषतुलयोर्वर्त्तते तदाहोरात्राणि समानानि भवन्ति। यदा हृषभादिषु षट्सु च राशिषु चरति तदाहान्येव वर्द्धन्ते क्षपति च मासि मासि एकैका घटिका राशिषु॥") अस्याधिष्ठात्री देवता पुंमेषः। अश्विनीभरणीकृत्तिकापादैकेन मेषराशिर्भवति। अत्र जातः ईदृशो भवति। मेषदशायां नेचदुःखी दयालुः धनी मानसुखी धार्म्मिकः धीरः मद्यमांसाशी च। स तु पुष्टोदरः। अस्य वर्णः। आरक्तः पीतश्च। अयं क्रूरः। पित्तोल्बणस्वभावः। कान्तिरञ्जितः। समाजाङ्गः। पर्व्वतचारी। पूर्व्वदिगधिपतिः। वैश्यवर्णः। अल्पस्त्रीसङ्गः। अल्पसन्तानः। सुदृढ़ः। अस्थिरश्च। इति ज्योतिषम्॥ *॥ एषाश्रिततद्राशिजातफलं यथा,—

"मेषे दिनेशे पुरुषः सुवेशः
सत्साहसः स्यान्नृपतेः समानः।
बुद्ध्या युतः पित्तरुजा च पीड़ा
वक्षोद्भवा वा सततं महीजाः॥"*॥

वक्राश्रिततद्राशिजातफलं यथा,—

"स्थिरजनो रहितः स्वजनैर्नरः
सुतयुतः प्रमदाविजितो भवेत्।
व्रजगते द्विजराज इतीरितं
विभुतयाद्भुतया सहितः श्रिया॥"*॥

तल्लग्नजातफलं यथा,—

"मेषलग्ने समुत्पन्नश्चण्डो मानी धनी शुभः।
क्रोधी स्वजनहन्ता च विक्रमी परवत्सलः॥"

इति कोष्ठीप्रदीपः॥

तलमस्य शूलमानम् । १ । ६७ । इति ज्योतिस्तत्त्वम् ॥ * ॥ चितारकशरराहतिभ्रमवमानच्यस्य गगनमध्योदये मेषलग्नस्य अष्टादशपलाधिकदण्डैको गतो भवेत् । यथा,—

"तारकाचयमिते शरराहतौ
केशवे गगनमध्यवर्तिनि ।
मत्तवारणगतेऽलयनो
निर्ययुर्गजमहीधरिणिका: ॥"

मङ्गलाहतिपञ्चतारकधनिहानत्यक्तस्य मस्तकोपर्युदये मेषलग्नस्य षट्त्रिंशत्पलाधिकदण्डद्वयं गतं स्यात् । यथा,—

"मस्तकोपरि समागते धने
मङ्गलाहतिजि पञ्चतारके ।
यान्ति कान्तिमति मेषलग्नत:
सारसाक्षि रसचन्द्रलिप्तिका: ॥"

इति कालिदासहृतत्रात्रिजन्मनिरूपणम् ॥

मेषक:, पुं, (मिषतीति । मिष् + अच् । संज्ञायां कन् ।) जीवग्राक: । राजनिर्घण्ट: ॥

मेषकम्बल:, पुं, (मेषलोमनिर्म्मित: कम्बल: । मध्यपदलोपी कर्म्मधारय: ।) मेषलोमनिर्म्मितवस्त्रम् । तत्पर्य्याय: । ऊर्णायु: २ । इत्यमर: । २ । ६ । १०७ ॥

मेषलोचन:, पुं, (मेषस्य लोचनमिव पुष्पमस्य ।) चक्रमर्द: । इति भावप्रकाश: ॥ मेषचक्षुस्तुल्यचक्षुषि, त्रि ॥

मेषवल्ली, स्त्री, (मेषप्रिया वल्ली ।) अजशृङ्गी । इति भावप्रकाश: ॥

मेषविषाणिका, स्त्री, (मेषस्य विषाणं शृङ्गमिव प्रतिकृतिरस्या: । विषाण + प्रतिकृतौ कन् । टापि अत इत्वम् ।) मेषशृङ्गी । इति रत्नमाला ॥

मेषशृङ्ग:, पुं, (मेषस्य शृङ्गमिव । तदाकृतित्वात् ।) स्थावरविषभेद: । इति हेमचन्द्र: । ४ । २६२ ॥ (यथा, सुश्रुते उत्तरतन्त्रे । १७ अध्याये ।

"मेषशृङ्गस्य पुष्पाणि शिरीषधवयोरपि ॥")

मेषशृङ्गी, स्त्री, (मेषशृङ्ग + गौरादित्वात् ङीष् ।) अजशृङ्गीवृक्ष: । मेढ़ाशृङ्गी इति भाषा । (यथा, सुश्रुत । १ । ३६ ।

"मेषशृङ्गी मातुलुङ्गी सुरङ्गीत्यादि ॥")

तत्पर्य्याय: । जन्तुघ्न: २ मेषविषाणिका ३ चक्षु: ४ चक्षुश्शृङ्गम् ५ मेढ्रशृङ्गी ६ शृङ्गहमा ७ । इति रत्नमाला ॥ (तथास्या: पर्य्यायो गुणाश्च ।

"मेषशृङ्गी विषाणी स्यान्मेषवल्लीजशृङ्गिका ॥
मेषशृङ्गी रसे तिक्ता वातला श्वासकासजित् ।
कटूष्णा पाके कटुस्तिक्ता व्रणश्लेष्मास्रिमूलजित् ॥
मेषशृङ्गीफलं तिक्तं कृष्णमेहकफप्रणुत् ।
दीपनं संशमनं कासक्षयव्रणविषापहम् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मेषा, स्त्री, (मिष्यतेऽसौ । मिष् + कर्म्मणि घञ् । टाप् ।) त्रुटि: । इति शब्दचन्द्रिका । गुजराटी एलाइच इति भाषा ॥

मेषाक्षिकुसुम:, पुं, (मेषाणां अक्षिवत् कुसुममस्य ।) चक्रमर्द: । इति रत्नमाला ॥

मेषाक्ष:, पुं, (मेषस्याक्षमिवाक्षमस्य ।) इन्द्र: । इति पुराणम् ॥

मेषाक्षी, स्त्री, (मेषस्य अक्षमिव अक्षं यस्यास्ता: ।) वल्लाक्षीवृक्ष: । इति राजनिर्घण्ट: ॥

मेषाक्षु:, पुं, (मेषप्रिय: आक्षु: ।) वर्व्वराश्व: । इति शब्दचन्द्रिका ॥

मेषाक्ष्य:, पुं, (मेषस्याक्ष्य: आकारास्य ।) चक्रमर्द: । इति राजनिर्घण्ट: । (विवरणमस्य चक्रमर्दशब्दे ज्ञातव्यम् ॥)

मेषिका, स्त्री, (मेषी + स्वार्थे कन् । टाप् । इत्व: ।) मेषी । इति शब्दरत्नावली ॥

मेषी, स्त्री, (मिष्यते गृह्यते असौ इति । मिष + घञ् । ङीष् ।) तिनिशवृक्ष: । जटामांसी । इति राजनिर्घण्ट: ॥ मेषलोमजाति: । भेड़ी । (यथा, वाजसनेयसंहितायाम् । ३ । ५६ ।

"मेषजमसि मेषजं गवेऽश्वाय पुरुषाय मेषजं
सुखं मेषाय मेष्ये ॥")

तत्पर्य्याय: । जालकिनी २ अवि: ३ । इति त्रिकाण्डशेष: ॥ एडका ४ मेषिका ५ इति शब्दरत्नावली । कुररी ६ रुजा ७ अविला ८ वेणी ९ । इति हेमचन्द्र: । ४ । ४०३ । अस्या दुग्धगुणा: । मधुरत्वम् । गाढ़त्वम् । स्निग्धत्वम् । कफापहत्वम् । वातामयकरत्वम् । स्रौल्यत्वम् । लोमश्यायाश्चेत् गुरुत्वम् । वृद्धिदत्वञ्च । इति राजनिर्घण्ट: ॥*॥ अपि च ।

"आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत् ।
अल्पत्वं तर्पणं केश्यं शुक्रपित्तकफप्रदम् ।
गुल्मकासेऽनिलोद्भूते कंवले वातिले वरम् ॥"

इति भावप्रकाश: ॥

अस्या दधिगुणा: । सुस्निग्धत्वम् । कफपित्तकरत्वम् । गुरुत्वम् । वाते रक्तवाते च पथ्यत्वम् । श्लीपदव्रणनाशित्वञ्च ॥ * ॥ अस्या नवनीतगुणा: । स्निग्धगन्धत्वम् । शीतलत्वम् । मेधाहरत्वम् । पुष्टिदत्वम् । स्रौल्यत्वम् । मन्दाग्निदीपनत्वम् । सारकत्वम् । पाके हिमत्वम् । लघुत्वम् । योनिशूले कर्णे वाते दुर्नाम्नि च हितत्वञ्च । दुर्नाम्नि स्थाने गुदशूले इति पुस्तकान्तरे पाठ: ॥ * ॥ तस्या घृतगुणा: । अतीवगौरवात् सुकुमारदेहिनां वर्ज्यत्वम् । वृद्धिपाटवहरत्वम् । बलावहत्वम् । वपुषां विलम्बिकारित्वञ्च । इति राजनिर्घण्ट: ॥ तन्मांसगुणा: । यथा, भावप्रकाशे ।

"छागमेषवृषाश्वाद्या: याम्या: प्रोक्ता महर्षिभि: ।
याम्या वातहरा: सर्व्वे दीपना: कफपित्तला: ।
मधुरा रसपाकाभ्यां हृद्या बलवर्द्धना: ॥"

मेषुरणं, क्ली, दशमलवम् । यथा,—

"कर्म्मस्थानञ्च दशमं खं मेषुरणमाख्यदम् ।"

इति ज्योतिस्तत्त्वम् ॥

मेह:, पुं, (मेहति क्षरति शुक्रादिरनेनेति । मिह् + घञ् ।) प्रमेहरोग: । इत्यमर: । २।६।५६ ॥ (अस्यौषधं यथा,—

"वङ्गभस्म द्विवल्लञ्च लेहयेन्मधुना सह ।
तनौ गुरुसमं गन्धं भक्षयेत् कर्षमात्रकम् ॥
गुडूचीसत्त्वमथवा शर्करासहितन्तथा ।
सर्व्वमेहहरो ह्येष वङ्गवल्लेह उत्तम: ॥"

इति वङ्गवल्लेह: ॥

"भल्लातकं समं कालमभ्रकञ्च शिलाजतु ।
शुद्धताप्यं शिलायोर्धं त्रिफलाकोठजीरकम् ॥
कार्षांशसम्भारजनी समं भाव्यञ्च भृङ्गिणा ।
विंशद्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा ॥
माषमात्रं हरेन्मेहं मेघनादरसो महान् ॥"

इति मेघनादरस: ॥

"रसभस्म समायुक्तं वङ्गभस्म प्रकल्पयेत् ।
अस्य माषद्वयं खादेन्मेहान् सौद्रसमन्वितम् ॥"

इति वङ्गेश्वररस: ॥

इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ॥ अन्यत् प्रमेहशब्दे द्रष्टव्यम् ॥ * ॥ मिहनोति । मिह + अच् ।) मेघ: । इति शब्दचन्द्रिका ॥ प्रस्राव: । इति हेमचन्द्र: । ३।२६७ ॥ (अस्याघ्राभिसुखं तत्करणे दोषो यथा, ज्ञानौ । ४।५२ ।

"प्रत्यग्निं प्रतिसूर्य्यञ्च प्रतिसोमोदकद्विजान् ।
प्रतिगां प्रतिवातञ्च प्रज्ञा नश्यति मेहत: ॥"

"अग्निसूर्य्यचन्द्रजलब्राह्मणगोवाताभिसुखं मूत्रपुरीषे कुर्व्वत: प्रज्ञा नश्यति ।" इति तट्टीकायां कुल्लूकभट्ट: ॥)

मेहनी, स्त्री, (मेहं हन्तीति । हन् + टक् । ङीष् ।) हरिद्रा । इति रत्नमाला ॥

मेहनं, क्ली, (मेहति सिञ्चति मूत्ररेतसीति । मिह् सेचने + ल्यु: ।) शिश्न: । इत्यमर: । २।६।७६ ॥ (यथा, ऋग्वेदे । २० । २६३ । ५ ।

"मेहनादनं कारणाल्लोम ।"

"मेहनात् मेढ्रात् ।" इति तद्भाष्ये सायण: ॥ यथा, च सुश्रुते । १ । ३५ ।

"दृश्यानि यस्य पर्व्वाणि सुमहच्चापि मेहनम् ।
तयोरस्यवलीढ़ानि न च स्यात् पृष्ठमायतम् ॥
ऊर्द्ध्वञ्च श्रवणौ स्थानान्नासा चोच्चा शिरीरिण: ।
हसतो जल्पतो वापि दन्तमांसं प्रदृश्यते ।
प्रेक्षते यश्च विभ्राणं स जीवेत् पञ्चविंशतिम् ॥")

मूत्रम् । इति मेदिनी । ने, ११ ॥ (यथा, सुश्रुते । १ । ३२ ।

"वस्त्रवद्विलपन् यश्च भूमौ पतति सस्तसुष्कस्रस्तमेढ्रो भयशोक: प्रसक्तमेहनश्च मनुष्य: ॥")

भावेऽनट् प्रत्यये सूत्रोत्सर्गश्च ॥

मेहन:, पुं, (मेहति सिञ्चति रसमिति । मिह + ल्यु: ।) सुष्ककवृक्ष: । इति राजनिर्घण्ट: ॥

मेहना, स्त्री, (मेह्यते आर्य्यते शुक्रमस्यामिति । मिह चरणे + घञ् + अधिकरणे युच् । स्त्रियां टाप् ।) महिला । इति केचित् ॥ (मेहनोयम् । यथा, ऋग्वेदे । ५ । ६८ । १ ।

"यदिन्द्रचित्रमेहनास्ति त्वादातमदिव: ॥")

मैत्रं

मैत्रं, क्ली, (मित्रादागतमिति । यद्वा, मित्रस्येदमिति । मित्र + "तस्येदम् ।" ४।३।१२० । इति अण् ।) अनुराधानक्षत्रम् । १७ । यथा,—

"मैत्राद्यपादे खलितोऽपि विष्णु-
र्वैष्णाद्यमर्धे परिवर्त्तते च ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ।"

इति तिथ्यादितत्त्वम् ॥*॥

(मित्रः सूर्य्यो देवतास्येति । आदित्यलोकः । यथा, महाभारते । १२ । ३१७ । ३ ।

"प्रायुनोत्क्रममाणस्तु मैत्रं स्थानमवाप्नुयात् ।
पृथिवीं जघनेनाथ ऊरुभ्याञ्च प्रजापतिम् ॥"

यद्वा, मनुः । १२ । ७० ।

"मैत्राच्यौतिकः प्रेतो वैश्यो भवति पूयभुक् ॥")

पुरीषोत्सर्गः । यथा,—

"ततः कल्यं समुत्थाय कुर्य्याच्चैत्रं नरेश्वर ! ।
नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः ॥
कल्यं उषःकालम् । मैत्रं मित्रदेवताकपायुसम्बन्धात् पुरीषोत्सर्गः ।" इत्याह्निकाचारतत्त्वम् ॥

अपि च ।

"ग्रामेऽथ सन्ध्ये चोत्सृज्य सुस्थो रक्षार्थमायुषः ।
शरीरचिन्तां निर्व्वर्त्त्य मैत्रं कर्म्म समाचरेत् ॥"

मैत्रं मलमूत्रोत्सर्गः । इति राजवल्लभः ॥*॥

तच्च निषिद्धस्थानादि यथा,—

"छायाकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु ।
अग्नौ चैव श्मशाने च विण्मूत्रे न समाचरेत् ॥
न गोमये न दृष्टे वा महादृक्षे च प्राङ्मुखे ।
न तिष्ठन् वा न निर्व्वासा न च पर्व्वतमस्तके ॥
न जीर्णदेवायतने न वल्मीके कदाचन ।
न ससत्त्वेषु गर्त्तेषु न गच्छन् वा समाचरेत् ॥
तुषाङ्गारकपालेषु राजमार्गे तथैव च ।
न क्षेत्रे न विले वापि न तीर्थे न चतुष्पथे ॥
नद्यां नदसमीपे वा गोष्ठरे न पराङ्मुखौ ।
न सोपानत्पादुको हि छत्री वा नान्तरीयकः ॥
न चैवाग्निमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम् ।
न देवदेवालययोरपामपि कदाचन ॥
न ज्योतींषि निरीक्षेत न वायुभिमुखो-
ऽथवा ।
प्रत्यादित्यं प्रत्यनलं प्रतिसोमं तथैव च ॥"

इति कौर्म्मे उपविभागे १२ अध्यायः ॥

अस्य विस्तारस्तु पाद्मे उत्तरखण्डे १६० अध्याये द्रष्टव्यः ॥*॥ (मित्रस्य भावः । मित्र + अण् । मित्रता । यथा, मनुः । ८ । २१८ ।

"लोभात् मोहात् भयात् मैत्रात् कामात्
क्रोधात् तथैव च ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥")

त्रि, मित्रसम्बन्धी । (यथा, महाभारते । १२ । १४४ । २३ ।

"प्रियमुक्तं ये न भाषन्ते मित्रभेदकरीं गिरम् ।
ऋतं मैत्रञ्च भाषन्ते ते नराः स्वर्गगामिनः ॥"

मित्रताग्राही । यथा, श्रीमद्भगवद्गीतायाम् । १२ । १३ ।

"अद्वेष्टा सर्व्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥"

"मित्रभावो मैत्रो मित्रतया वर्त्तते ।" इति श्रीशङ्करभाष्यम् ॥ "मैत्रः स्नेहेषु कृपालुः ।" इति श्रीधरस्वामी ॥ "मैत्री मित्रता सञ्जातो मैत्रः ।" इति श्रीमधुसूदनसरस्वती ॥)

मैत्रः, पुं, ब्राह्मणः । इति त्रिकाण्डशेषः ॥ (यथा, मनुसंहितायाम् । २ । ८७ ।

"अधीयेत त्रिसंवित्सरं ब्राह्मणो नियतेन्द्रियः ।
ब्रह्मण्यत्र वा ब्रह्मान् मैत्रो ब्राह्मण उच्यते ॥"

"मित्रमेव मैत्रः स्वार्थे अण् ।" इति तट्टीकायां मेधातिथिकुल्लूकौ ॥ (उदयसुकूर्त्तात् तृतीयसुकूर्त्तः । तथा च हलायुधः ।

"आर्द्रः सार्पस्तथा मैत्रः शुभो वासव एव च ॥"

यथा, कुमारे । ७ । ६ ।

"मैत्रे मुहूर्त्ते शुभलग्नयोगे
योगं गताश्चन्द्रबलानुकूल्ये ॥"

वर्णशङ्करविशेषः । यथा, मनुः । १० । २३ ।

"वैश्यात्तु जायते ब्रात्यात् सुधन्वाचार्य्य एव च ।
कारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

मैत्रभं, क्ली, (मैत्रञ्च तत् भञ्चेति ।) अनुराधानक्षत्रम् । इति जटाधरः ॥

मैत्रावरुणः, पुं, (मित्रश्च वरुणश्चेति । "देवताद्वन्द्वे च ।" ६।३।२६ । इत्यनङ् । ततः "देवताद्वन्द्वे च ।" ७ । ३ । २१ । इति मित्रस्य वृद्धिः । "दीर्घाच्च वरुणस्य ।" ७ । ३ । २३ । इति वरुणस्य न वृद्धिः । तयोरपत्यमिति । मित्रावरुण + अण् ।) अगस्त्यः । इति शब्दरत्नावली ॥ (यथा, अथर्ववेदे । ५ । १६ । १५ ।

"न वर्षं मैत्रावरुणं ब्रह्मण्यमभिवर्षति ॥"

अस्य विवरणं यथा, ऋग्वेदे । ७ । ३३ । ११ ।

"उतासि मैत्रावरुणो वसिष्ठोर्व्वश्या ब्रह्मन्
मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवा पुष्करे
त्वाददन्त ॥"

"उतापि च हे वसिष्ठ ! मैत्रावरुण ! मित्रावरुणयोः पुत्रोऽसि ब्रह्मन् वसिष्ठ ! उर्व्वश्या अप्सरसो मनसो ममायं पुत्र इति ईदृशात् संकल्पात् द्रप्सं रेतः मित्रावरुणयोर्व्वश्यूदर्शनात् स्कन्नमासीत् । तस्मादधिजातोऽसि । तथा च वक्ष्यते । सत्रेहजाताविति । एवं जातं त्वां दैव्येन देवसम्बन्धिना ब्रह्मणा वेदरायिणा अहम्भृवा युक्तं पुष्करे विश्वेदेवा अददन्त अधारयन् । तथाचादितिर्मित्रावरुणौ जनयति इति प्रक्रम्य पठ्यते ।

तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्व्वशीम् ।
रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥
तेनैव तु मुहूर्त्तेन वीर्य्यवन्तौ तपस्विनौ ।
अगस्त्यश्च वसिष्ठश्च तत्रर्षी सम्बभूवतुः ॥
बहुधापतितं रेतः कलशे च जले स्थले ।
स्थले वसिष्ठस्तु मुनिः सम्भूत ऋषिसत्तमः ॥

मैत्रावरुणः

कुम्भे जगस्त्यः सम्भूतो जले मत्स्यो महाद्युतिः ।
उदियाय ततोऽगस्त्यः ग्राम्यामाजो महातपाः ॥
मानेन सम्मितो यस्मात्तस्मान्मान्य इहोच्यते ।
यद्वा कुम्भाद्विजातः कुम्भेनापि हि मीयते ॥
कुम्भ इत्यभिधानञ्च परिमाणञ्च लक्ष्यते ।
ततोऽप्सु मृत्स्यमाणासु वसिष्ठः पुष्करे स्थितः ।
सर्व्वतः पुष्करे तं हि विश्वे देवा अधारयन् ॥"

इति तद्भाष्ये सायणः ॥)

मैत्रावरुणिः, पुं, (मैत्रावरुणयोरपत्यमिति । मैत्रावरुण + "अत इञ् ।" ४ । १ । ९५ । इति इञ् ।) अगस्त्यः । इत्यमरः । १ । ३ । २०-

(यथा, महाभारते । ३ । १०३ । १४ ।

"तेऽभिगम्य महात्मानं मैत्रावरुणिमच्युतम् ।
आश्रमस्थं तपोराशिं कर्म्मभिः स्वैरभिष्टुवन् ॥")

मैत्री, स्त्री, (मैत्र + ङीप् । यद्वा, मित्र + भावे ष्यञ् + ङीष् । ततः "हलस्तद्धितस्य ।" ६ । ४ । १५० ।" इति यलोपः ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ ॥ शक्तिविशेषे मैत्रीकरणनिषेधो यथा,—

"विद्विष्टपतितोन्मत्तबन्धुवैरातिकोटकैः ।
बन्धकीबन्धकीभर्तृक्षुद्रातृतकथैः सह ।
तथाऽतिव्ययशीलेन परीवादरतैः शठैः ।
बुधो मैत्रीं न कुर्व्वीत नैकः पन्थानमाश्रयेत् ॥"

इति विष्णुपुराणे तृतीयेंऽशे ११ अध्यायः ॥

"विद्विष्टादिभिर्मैत्रीं न कुर्व्वीत । बहुभिर्वैरं यस्य । अतिकोटकः अत्यन्तं कोटवत् पीडकः । कण्टकैरिति पाठेऽपि स एवार्थः । बन्धकी असती ।" इति तट्टीका ॥

मैत्रीबलः, पुं, (मैत्री मित्रता बलमस्य ।) बुद्धः । इति त्रिकाण्डशेषः ॥

मैत्रेयः, पुं, (मैत्रे मित्रतायां साधुरिति । मैत्र + ढञ् ।) बुद्धभेदः । इति त्रिकाण्डशेषः ॥ (मित्रयोः अपत्यमिति । मित्रयु + "दृष्यादिभ्यश्च ।" ४ । १ । १३६ । इति ढञ् । ततः "कंकयमित्रयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति युस्थाने इयादेशे प्राप्ते । "दाक्षिगायणहास्तिगायण ।" ६ । ४ । १७४ । इति युलोपो निपातितः ।) मुनिविशेषः । यथा,—

"एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः ।
प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत ॥"

इति श्रीभागवते । ३ । ७ । १ ॥

(सूर्य्यः । यथा, महाभारते । ३ । ३ । २७ ।

"देहकर्त्ता प्रभुरात्मात्मा विश्वात्मा विश्वतोमुखः ।
चराचरात्मा सूक्ष्मात्मा मैत्रेयः करुणान्वितः ॥"

वर्णसंकरजातिविशेषः । यथा, मनुसंहितायाम् । १० । ३३ ।

"मैत्रेयकन्तु वैदेहो माधूकं सम्प्रसूयते ।
नृत्तं प्रेष्यत्वजञ्च यो घण्टाताडोऽनुजीवति ॥"

"मैत्रेयकं नाम्ना वर्णम् ।" इति तत्र मेधातिथिः ॥

स्त्री । मैत्रेयेण उच्चारिता मैत्रेयी उपनिषद् ॥ याज्ञवल्क्यस्य पत्नी च ॥) मित्रसम्बन्धिनि, त्रि ॥

(मिथुयुर्वंशोद्भवादौ च । यथा, हरिवंशे । ३२ । ७७—७८ ।
"अत ऊर्द्धं प्रवक्ष्यामि दिवोदासस्य सन्ततिम् ।
दिवोदासस्य दायादो ब्रह्मर्षिर्मैथयुर्नृपः ।
मैथायनी ततः शाखा मैथेयास्तु ततः स्मृताः ॥")
मैथेयिका, स्त्री. मिथयुडुम् । इति त्रिकाण्डशेषः ॥ (मिथयुनां भावः कर्म्म वा । मिथयु+"गोत्रचरणाच्छाघात्याकारतदवेतेषु ।" ५।१।१३४ । इति वुञ् । ततः "केकयमिथयुप्रलयानां यादेरियः ।" ७ । ३ । २ । इति इयादेशः । यथा, "मैथेयिकया शाघते ।" इति काशिका । ७ । ३ । २ ॥)
मैथ्रं, क्ली, क्लीं, (मित्र+ष्यञ् ।) मित्रस्य भावः । मित्रस्य कर्म्म । इत्यमरभरतौ । ३ । ५ । ३६ ॥ (यथा, पद्मतन्त्रे । ४ । ७० ।
"प्राहुः सामपदं मैत्रं जनाः शास्त्रविचक्षणाः ।
मित्रताञ्च पुरस्कृत्य किञ्चिद्वक्ष्यामि तच्छृणु ॥")
मैथिली, स्त्री, (मिथिला निवासोऽस्येति । मिथिला +"सोऽस्य निवासः ।" ४ । २ । ८६ । इति अण् । मैथिलस्तन्नामा राजा तस्यापत्यं स्त्री । मैथिल+ङीष् । ङीष् ।) सीता । इति हेमचन्द्रः ॥ (यथा, भट्टिकाव्ये । २ । ४७ ।
"हिरण्मयी शालभञ्जिकेव जङ्गमा
द्युनादिवः स्थाणुरिवाचिरप्रभा ।
शशाङ्ककान्तेरधिदेवतेव ज्योतिः
सुता दद्दे तस्य सुताय मैथिली ॥"
मिथिलापतिमात्रे, पुं । यथा, महाभारते । १२ । ६६ । ३ ।
"जनको मैथिलो राजा महात्मा सर्व्वतत्त्वविद् ।
योधान् स्वान् दर्शयामास स्वर्गं नरकमेव च ॥")
मैथुनं, क्लो, (मिथुने सम्भवतीति । मिथुन+"संभूते ।" ४।३।४१ । इति अण् । मिथुनस्येदमित्यण् वा ।) अभ्याधानम् । यथा, मनुः ।
"असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने ।
मैथुने मिथुनशब्दवाच्ये स्त्रीपुंसयोरभ्याधानपुत्रोत्पत्त्यादौ ।"इत्यद्वाहतत्त्वम् ॥*॥ सङ्गतम् । रतम् । इत्यमरः ।३।३।१२१॥ "सङ्गतिः सङ्गमो दारसंयोगः विवाह इति कल्पद्रुः ॥ रतं सुरतम् । अनयोर्मैथुनम् । मिथुनात् सङ्गमे इदमर्थे स्वार्थे रतौ निष्पाद्यार्थे वा घञ् । समन्ते सुरते युग्मे रागौ मिथुनमिष्यते । इति भरतः ।" इति तट्टीकायां भरतः ॥*॥ क्लेशस्य पर्य्यायः । सुरतम् २ अभिमानितम् ३ घर्षितम् ४ संप्रयोगः ५ अनारतम् ६ अग्रक्षर्य्यकम् ७ उपहृतम् ८ विभ्रमम् ९ क्रीड़ारतम् १० महासुखम् ११ । इति त्रिकाण्डशेषः ॥ अपायः १२ व्याधर्म्मः १३ रतम् १४ निधुवनम् १५ । इत्यमरः । २ । ७ । ५७॥ अस्य गुणाः । धातुक्षयकारित्वम् । रतिसन्तानदार्ढ्यत्वञ्च । अतिप्रियमैथुनस्य श्वासकासज्वरकारित्वम् । अमैथुनस्य प्रमेहमेदस्थिरोगाग्निमान्द्यकारित्वम् । स्त्रीसंसर्गरहितस्य आयुरजराशरीरबलवर्णास्थिरोपचितमांसानि भवन्ति । पूज्यस्थानाशुचिस्थानसैकस्थानलोकसमीपप्रातःकालसन्ध्याकालपर्व्वकालेषु तस्य त्याज्यत्वम् । एतत्कर्म्मणि रजस्वलाकामा मलिना बन्ध्या वर्णाश्रेष्ठा वयोश्रेष्ठा व्याधियुक्ताङ्गहीनासती वेश्या योनिदोषयुक्ता सगोत्रा गुरुपत्नी भिक्षुकी कपटव्रतधारिणी वृद्धा च त्याज्या । रजस्वलागमने दृष्टायुस्तेजःक्षयोऽधर्म्मश्च भवति । कपटव्रतयुक्तागुरुपत्नी सगोत्राभृद्वागमने एवं पर्व्वकाले सन्ध्याकाले च स्त्रीमैथुने पापमायुःक्षयश्च भवति । वयोरूपगुणोपेतां कुलशीलसमन्विताम् । अधिकामां हृष्टामलकृतां वाक्यीकरणपीड़िताञ्च प्रमदां हृष्टोऽधिकामश्च पुरुषः सेवेत । घृतक्षौद्रकदलं सशर्करं घृतलवणं वा पीत्वा कामवागपचलां सुरूपामनिन्द्यां हृष्टां प्रमदामाद्यप्रहरे हृष्टः कामुको गत्वा तदनु सुखं स्वपेत् । सप्तकृत्वो गमने तु नरो धातुवैषम्यमेति । रतान्ते स्नानं सशर्करक्षीरपानं निद्रा गौड़िकरसभोजनञ्च हितम् । इति राजवल्लभः ॥ *॥ ("तत्र प्रथमे दिवसे ऋतुमत्यां मैथुनगमनमनायुष्यं पुंसां भवति । यञ्च तत्राधीयते गर्भः स प्रसवमानो विमुच्यते । द्वितीयेऽप्येवं सूतिकागृहे वा । द्वितीयेऽप्येवमसम्पूर्णाङ्गोत्पत्त्यायुर्वा भवति । न च प्रवर्त्तमाने रक्ते बीजं प्रविष्टं गुणकरं भवति यथा नद्यां प्रतिस्रोतः प्राविदृश्यं प्रक्षिप्तं प्रतिनिवर्त्तते नोर्द्धं गच्छति तद्वदेव द्रष्टव्यम् । तस्मात् नियमवतीं चिरात्तं परिहरेत् । अतःपरं मासादुपेयात् ।"
"ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत् ।
आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि ॥
मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् ।
कललं जायते तस्या वर्च्छितं पेल्लकेर्गुणैः ॥"
इति सुश्रुते शारीरस्थाने द्वितीयेऽध्याये ॥)
व्रतदिवसे अहोरात्रमैथुनस्य त्याज्यत्वं यथा,—
"स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
सङ्कल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ।
मैथुनं विविधं त्याज्यं व्रते क्रीड़ाविहृतये ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ४ अध्यायः ॥
अस्य विधिनिषेधौ यथा,—
"ऋतावुपगमः प्रोक्तः स्वपत्न्यामवनीपते ! ।
पुण्यामर्क्षे शुभे काले व्यष्टयुग्मासु रात्रिषु ॥
नाक्रान्तां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टां न प्रकुपितां नाप्रशस्तां न गर्व्विणीम् ॥
नादक्षिणां नाशुचिकां नाकामां नान्ययोषितम् ।
क्षुत्क्षामामतिभुक्तां वा स्वयं वैभिर्गुणैर्युतः ॥
स्नातः सम्मार्ज्यकृत् प्रीतो नाश्नातः क्षुधितोऽपि वा ।
सकामः सानुरागश्च व्रजेत्तां पुरुषो व्रजेत् ॥
चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च ॥
सैलस्त्रीमांससंभोगी पर्व्वस्वेतेषु वै पुमान् ।
विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवम् ॥
अर्णोषपर्व्वस्वेतेषु तस्मात् संयमिभिर्व्वरैः ।
भाव्यं सच्छास्त्रदेवेज्याध्यानजप्यपरैर्नरैः ॥
नाश्ययोनावयोनौ वा नोपभुक्तौषधस्तथा ।
देवद्विजगुरूणाञ्च व्रतायी नाश्ययी भवेत् ॥
चैत्यचत्वरसौधेषु नैव गोष्ठे चतुष्पथे ।
नैव प्रधानोपवने सलिलेषु महीपते ! ॥
प्रोक्तपर्व्वस्वृषिषु नैव भूपाल ! सन्ध्ययोः ।
गच्छेदावायं मतिमान्न मूत्रोच्चारपीड़ितः ॥
पर्व्वस्वभिगमोऽधन्यो दिवा पापप्रदो नृप ! ।
भुवि रोगावहो नृणामप्रशस्तो जलाशये ॥
परदारान्न गच्छेत मनसापि कदाचन ।
किन्तु वाचास्त्रियन्योऽपि नास्ति तेषु व्रतायिनाम् ॥
म्लेच्छो नरकमाप्नोति क्षीयतेऽचापि चायुषः ।
परदारगतिः पुंसामुभयत्रापि भीतिदा ॥
इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ।
यथोक्तदोषहीनेषु सकामेष्वव्रतायिषु ॥"
इति विष्णुपुराणे । ३ । ११ । १११-१०४ ॥*॥
परस्त्र्यादिगमने दण्डो यथा,—
"ब्राह्मणः क्षत्रियो वैश्यः शूद्रविट्शूद्रयोषितः ।
व्रजन्नाद्यो भवेद्राज्ञा दण्ड उत्तमसाहसम् ॥
वैश्यागमे च विप्रस्य क्षत्रियस्यान्त्यजागमे ।
मध्यमं प्रथमं वैश्यो दण्ड्यः शूद्रागमाद्भवेत् ॥
शूद्रः सवर्णागमने प्रथमं दण्ड्यो महीभुजा ।
वैश्यश्च द्विगुणं राजन् ! क्षत्रियश्च त्रिगुणं तथा ॥
ब्राह्मणश्च भवेद्दण्ड्यस्तथा राजंश्चतुर्गुणम् ।
अगम्यासु भवेद्दण्डः स्वगुप्तास्वधिको भवेत् ॥
माता भार्य्यसा स्वसृर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तनयस्त्री तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च ।
तथा प्रव्रजिता नारी वर्णोत्तमतमा तथैव च ॥
इत्यगम्यास्तु निर्दिष्टास्तासासु गमने नरः ।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥
भ्रातृभार्य्यागमे पूर्व्वादण्डस्तु द्विगुणो भवेत् ।
चाण्डालीञ्च श्वपाकीं वा गच्छन् वधमवाप्नुयात् ॥
तिर्य्यग्योनौ च गोवर्ज्यं मैथुनं योऽभिसेवते ।
न पापं प्राप्नुयाद्दण्डं तस्याञ्च यवसोदकम् ॥
सुवर्णञ्च भवेद्दण्डो गां व्रजन् मनुजोत्तम ! ।
वैश्यागामी द्विजो दण्ड्यो वैश्यशुल्कसमं पणम् ॥
गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति ।
वेतनं द्विगुणं दद्याद्दण्डञ्च द्विगुणन्तथा ॥
अन्यमुद्दिश्य यो दद्यात् नयेदन्यस्य कारणात् ।
तस्य दण्डं भवेद्राजन् ! सुवर्णस्य च माषकम् ॥
भुक्त्वा भोगान्न यो दद्याद्दाप्यो द्विगुणवेतनम् ।
राज्ञश्च द्विगुणं दण्डमथा धर्म्मो न हीयते ॥
बहूनां व्रजतामेकां सर्व्वे ते द्विगुणं दमम् ।
दद्युः पृथक् पृथक् सर्व्वे दण्डञ्च द्विगुणं परम् ॥"
इति मात्स्ये २०१ अध्यायः ॥
मैनाकः, पुं. (मेनकाया अपत्यं पुमान् । मेनकायां भव इति वा । मेनका+अण् । पृषोदरादित्वात्

साधुः ।) पर्व्वतविशेषः । तत्पर्य्यायः । हिरण्यनाभः २ सुनाभः ३ हिमवत्सुतः ४ । इति जटाधरः ॥ स तु हिमालयस्य ज्येष्ठपुत्रः । यथा,—
"ततो भगवती प्राह मेनकां मुनिसन्निभाम् ।
स्मितपूर्व्वं तदा तस्याः पूरयन्ती मनोरथम् ॥
श्रीदेव्युवाच ।
भ्रातं पुत्राः संभवन्तु भवत्या वीर्य्यसंयुताः ।
तत्रैको बलवान् मुख्यः प्रथमं संभविष्यति ॥
एवमुक्ता जगद्धात्री तत्रैवान्तरधीयत ।
मेनका च सुतं लब्ध्वा स्वस्थानं प्रविवेश ह ॥
ततः काले तु संग्रामे मेनाकमचलोत्तमम् ।
पक्षेण सह योऽद्यापि सिन्धुमध्ये प्रवर्त्तते ॥
मेनका सुषुवे देवी देवेन्द्रं सहसा गतम् ।
अन्यानूनशतं पुत्रान् क्रमात् सा सुषुवे च ह ॥"
इति कालिकापुराणे ४० अध्यायः ॥
(दानवविशेषः । इति हरिवंशे भविष्यपर्व्वणि । २३२ । ३ ॥)

मैनाकस्वसा, [ऋ] स्त्री, (मैनाकस्य स्वसा ।) पार्व्वती । इति हेमचन्द्रः । २ । ११८ ॥

मैनिकः, पुं, (मीनं हन्तीति । मीन + "पचि-मत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) जालिकः । इति सिद्धान्तकौमुदी ॥

मैन्दः, पुं, विष्णुवध्यासुरविशेषः । इति हेमचन्द्रः । २ । १३४ ॥ (यथा, हरिवंशे । ७१ । १५८—१६० ।
"अपरः केशवस्यायं प्रादुर्भावो महात्मनः ।
विख्यातो माथुरे कल्पे सर्व्वलोकाहिताय वै ॥
यत्र ग्रामश्च मैन्दश्च द्विविदं कंसमेव च ।
हत्वान् मानुषदेहस्थान् स्तूयामास वीर्य्यवान् ॥"
वानरविशेषः । इति रामायणम् ॥ (यथा, महाभारते । २ । ३१ । १८ ।
"तत्र वानरराजाभ्यां मैन्देन द्विविदेन च ।
युयुधे दिवसान् सप्त न च तौ विजितिं गतौ ॥")

मैन्द्हा, [न्] पुं, (मेन्द्रं हतवानिति । हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ॥

मैरेयं, क्ली, (मारं कामं जनयतीति । मार + ढक् । निपातनात् साधुः ।) मद्यविशेषः । इत्यमरः । २ । १० । ४२ ॥ "यद्यपि ।
'गौडीपिष्टपक्वैः पक्वैरपक्वैरासवो भवेत् ।
मैरेयं धातकीपुष्पगुडधावान्नसंहितम् ॥'
इति माधवेन भेदः कृतः । तथापि सूत्रमनादृत्यैतदुक्तम् । मारं कामं जनयति मैरेयं स्त्रीयः । निपातनादात् ऐत्वम् ।" इति भरतः ॥ (यथा,
"मद्यन्तु गौडमैरेयमिरा च मदिरा सुरा ।
कादम्बरी वारुणी च हालापि बलवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
क्वचित् पुंलिङ्गेऽपि दृश्यते । यथा,—
"तीक्ष्णः कषायो मदकृत् दुर्नामकफगुल्मजित् ।
क्षमिमेदोऽनिलहरो मैरेयो मधुरो गुरुः ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥)

मैलन्दः, पुं, भ्रमरः । यथा । "श्रीमन्मुरद्विरपदपार्थोरुहनिःसरन्मकरन्दसन्दोहास्वादनतुन्दिलमनोमैलन्द इत्यादि ।" इति वरदचिद्गतपत्रकौमुद्यां राजप्रशस्तिः ॥

मोच, किं क्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे भ्वा०-पर०-सक०-सेट् ।) किं, मोचयति मोचति । इति दुर्गादासः ॥

मोचः, पुं, (मोच + भावे घञ् । मोच्यते दुःखमनेन । मोच + करणे घञ् । इति भरतः ।) मुक्तिः ॥ (यथा, सांख्यसारे । २ । ७ । २५ ।
"न मोचो नभसः पृष्ठे न पाताले न भूतले ।
सर्व्वाशासंक्षये चेतःक्षयो मोक्ष इति स्मृतः ॥")
मोक्षधर्म्मस्तु महाभारते शान्तिपर्व्वणि द्रष्टव्यः ॥
पाटलिवृक्षः । मोचनम् ॥ इति मेदिनी । घे, २५ ॥ (यथा, मेघदूते । ६१ ।
"ताभ्यो मोचस्तव यदि सखे ! धर्म्मलब्धस्य न स्यात्
क्रीड़ालोलाः श्रवणपरुषैर्गर्জ्जितैर्भापयेस्ताः ॥")
मृत्युः । इति हेमचन्द्रः । १ । ७५ ॥ (विश्लेषः । यथा, श्रीमद्भगवद्गीतायाम् । ७ । २९ ।
"जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म्म चाखिलम् ॥"
"मोक्षाय विश्लेषणार्थम् ।" इत्यानन्दगिरिः ॥ आत्मस्वरूपदर्शनम् । इति रामानुजः ॥ निरसनम् । इति श्रीधरस्वामी ॥ पतनम् । यथा, कुमारसम्भवे । ३ । ३१ ।
"मदोद्धताः प्रत्यनिलं विचेरु-
र्वनस्थलीर्मर्म्मरपत्रमोक्षाः ।"
"मर्म्मरपत्रमोक्षाः शीर्णपर्णपाताः ।" इति तट्टीकायां मल्लिनाथः ॥)

मोचकः, पुं, (मोचयतीति । मोच + ण्वुल् ।) सुष्ककदलः । इति राजनिर्घण्टः ॥ (यथा, हठरत्नसंहितायाम् । ५४ । ११३ ।
"तोयं पूतं मोचकभक्षणाद्वा
यत्नप्रकाशः परिवेचनं तत् ॥"
त्रि, मोचनकर्त्ता । यथा, मनुसंहितायाम् । ४ । ३४२ ।
"व्यसनिनानां सन्त्राता सन्धिताताच्च मोचकः ॥")

मोक्षोपायः, पुं, (मोक्षस्य मुक्तेरुपायः ।) मुक्ति साधनम् ॥ तत्तु तपः । ध्यानादिः । योगः । ज्ञानञ्च । इति हेमचन्द्रः । १ । ७७ ॥ (यथा, हरिवंशे । २५५ । ६३ ।
"स तं दृष्ट्वागतं दृष्ट्वा कृपयाभिपरिप्लुतः ।
उवाच दानवश्रेष्ठं मोक्षोपायं ददामि ते ॥")

मोघं, त्रि, (मुच्यतेऽस्मिन्निति । मुच + घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) निरर्थकम् । इत्यमरः । ३ । १ । ८१ ॥ (यथा, मनौ । ६ । ५० ।
"यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् ।
गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम् ॥"
यथा च ।
"प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च ।
मरणाभिमुखं नित्यमुपसर्पन्ति मानवम् ॥
तानि भेषजवीर्य्याणि प्रतिघ्नन्ति जिघांसया ।
तस्मान्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः ॥"
इति सुश्रुते सूत्रस्थाने २१ अध्याये ॥)
हीनम् । इति मेदिनी । घे, ४ ॥ (यथा, आर्य्यासप्तशत्याम् । ६७० ।
"सज्जन एव हि विद्या श्लोभायै भवति दुर्জ्जने मोघा ॥")

मोघः, पुं, (मुच्यतेऽस्मिन् । मुच + घञ् । कुत्वम् ।) प्राचीरम् । इति शब्दमाला ॥

मोघपुष्पा, स्त्री, (मोघं पुष्पं रजो यस्याः ।) बन्ध्या । इति राजनिर्घण्टः ॥

मोघा, स्त्री, पुं, (मुच्यतेऽनया । मुच + घञ् । कुत्वम् । स्त्रियां टाप् ।) पाटला । इति मेदिनी । घे, ४ ॥ (अस्याः पर्य्यायो यथा,—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
शुण्डतृष्णा कुबेराक्षी कालस्थाऽम्बुजिवल्लभा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विड्डङ्गम् । इति शब्दमाला ॥

मोघोलिः, पुं, प्राचीरम् । इति हारावली ।६८॥

मोचं, क्ली,(मुञ्चति त्वगादिकमिति । मुच् + अच् ।) कदलीफलम् । इत्यमरः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ।३१ अः । "नालनाड़िकेरपनसमोचपियालविल्वमधुकक्षीरातकास्रफलरूक्षाः पित्तसंज्ञे वायौ ॥" विवरणमस्य कदलीफलशब्दे ज्ञातव्यम् ॥)

मोचः, पुं, (मुञ्चति त्वचमिति । मुच् + अच् ।) शोभाञ्जनवृक्षः । इति मेदिनी । चे, ८ ॥ (यथा, महाभारते । ३ । १५८ । ४३ ।
"घनसारकुचान् मोचान् खर्জ्जूरानम्बुवेतसान् ॥")

मोचकः, पुं. (मोचयति संसारादिति । मुच् + णिच् + ण्वुल् ।) मोक्षः । (मुञ्चति गन्धं त्वचमिति वा । मुच् + ण्वुल् ।) कदली । शिग्रुः । (मुञ्चति विषयानिति ।) विरागी । इति हेमचन्द्रः । ४ । २०० ॥ सुष्ककदलः । इति राजनिर्घण्टः ॥ (सुक्तिकारके, त्रि । यथा, शिवपुराणे वायुसंहितायां पूर्व्वभागे ।२।५१।
"असक्तो मोचकश्चायमकालः कालचोदकः ॥")

मोचनं, क्ली, (मुच् + ल्युट् ।) मोक्षः । (यथा, महाभारते । ५ । ८४ । २१ ।
"अवतीर्य्य रथात्तूर्णं स्नात्वाग्नौचं यथाविधि ।
रथमोचनमादिश्य सन्ध्यामुपविवेश ह ॥")
कल्कनम् । दम्भः । शाल्मलम् । इति मुग्धबोधव्याकरणम् ॥ (मोचयतीति । मोचि + ल्युः । मोचनकर्त्तरि, त्रि । यथा, भागवते । ६ । १२ । २३ ।
"धन्यं यशस्यं निखिलाघमोचनं
रिपुञ्जयं स्वस्त्ययनं तथायुषम् ॥")

मोचनी, स्त्री, (मोचयति रोगादिति । मुच् + णिच् + ल्युः । स्त्रियां ङीप् ।) कण्टकारी । इति शब्दरत्नावली ॥ मोचकर्त्री च ॥

मोचरसः, पुं, (मोचस्य रसः ।) शाल्मलिनिर्य्यासः । तत्पर्य्यायः । मोचसुत २ मोचस्रावः ३ मोच-

मोट्टायि

निर्यासः ४ पिच्छिलसारः ५ सुरसः ६ ग्राम्यालीवेष्टः ७ मोचसारः ८। अस्य गुणाः। कषायत्वम्। कफवातहरत्वम्। रसायनत्वम्। बलपुष्टिवर्णवीर्य्यप्रज्ञायुर्दृक्सिद्धिदत्वम्। व्याधिघ्नत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। उत्तरतन्त्रे। ४० अध्याये।

"तिलामोचरसौ लोध्रं तथैव मधुकोत्पलम्।
कच्छुरातिलकल्कञ्च योगाश्चत्वार एव तु॥
आजेन पयसा पेयाः सरक्ते मधुसंयुताः॥")

मोचा, स्त्री, (सुचति त्वचमिति। सुच्+अच्। टाप्।) ग्राम्यालिवृक्षः। (यथा,—

"ग्राम्यालिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी॥"
इति भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे॥)

कदलीवृक्षः। इत्यमरः। २। ४। १९३॥ (यथास्याः पर्य्यायः।

"कदली वारणा मोचाम्बुसारांशुमतीफला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नीलीवृक्षः। इति राजनिर्घण्टः॥

मोचाटः, पुं, (ग्राम्यजीरः। रम्भास्थि। मलयोद्भवः। इति मेदिनी। टे, ५४॥

मोची, स्त्री, (सुच्यते रोगो ययेति। सुच्+घञ्। ङीष्।) छिन्नमोचिका। इति रत्नमाला॥ (विवृतिरस्या छिन्नमोचिकाशब्दे ज्ञातव्या॥)

मोटकं, क्ली, (सुच्यते सुखीक्रियते इति। सुट+घञ्। ततः कन्।) पिण्डदानार्थदिगुणशुभकुशत्रयम्। यथा। "इति दिगुणशुभदर्भमोटकं पितृब्राह्मणवामपार्श्वे दद्यात्।" इति श्राद्धप्रयोगतत्त्वम्॥

मोटकी, स्त्री, (मोटक+ङीष्।) रामिणीविशेषः। इति हलायुधः॥

मोटनं, क्ली, (सुट+ल्युट्।) चूर्णीकरणम्। आक्षेपः। इति सुटधात्वर्थदर्शनात्॥

मोटनः, पुं, (मोटयतीति। सुट+ल्युः।) वायुः। इति राजनिर्घण्टः॥

मोटनकं, क्ली, (मोटनेन कायतीति। के+कः।) एकादशाक्षरच्छन्दोविशेषः। यथा,—

"स्याद्मोटनकं तजभाश्च लगौ॥"
"रङ्गे खलु मल्लकलाकुशलः
श्यामो रमहाभटमोटनकम्।
यः कंसबधेन चकार स मे
संसाररिपुं प्रति मोटयतु॥"
इति छन्दोमञ्जरी॥

मोटा, स्त्री, (सुट+अच्। टाप्।) बला। इति राजनिर्घण्टः॥

मोट्टायितं, क्ली, (सुट+भावे घञ्। बाहुलकात् घञ्सुट्। ततो भृग्वादित्वात् यण्। ततो भावे क्तः।) स्त्रीणां स्वाभाविकदशविधालङ्कारान्तर्गतालङ्कारविशेषः। इति हेमचन्द्रः॥ तल्लक्षणं यथा, उज्ज्वलनीलमणिः॥

"कान्तस्मरणवार्त्तादौ हृदि तद्भावभावतः।
प्राकट्यमभिलाषस्य मोट्टायितमुदीर्य्यते॥"

मोदा

मोदः, पुं, (सुद+भावे घञ्।) हर्षः। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। ८।१३१।११।

"यच्चानन्द्राच्च मोदश्च सुदः प्रसुद आसते॥")

मोदकः, पुं, क्ली, (मोदयति बालादीनिति। सुद+णिच्+ण्वुल्।) खाद्यविशेषः। इत्यमरः। २। ५। ३३॥ मोया इति भाषा। अस्य दानमन्त्रो यथा,—

"मोदकं खाद्युसंयुक्तं गुर्करादिविनिर्म्मितम्।
मया निवेदितं भक्त्या गृहाण परमेश्वरि!॥"
इति दुर्गोत्सवपद्धतिः॥

गुडः। यवासगुर्करा। इति राजनिर्घण्टः॥ गुर्करादिद्वारापक्वौषधविशेषः। अस्य पूर्णवीर्य्यं षण्मासं तिष्ठति। इति सुखबोधः॥ (यथा,—

"वटका अथ कथ्यन्ते तन्नाम गुटिका वटी।
मोदको वटिका पिण्डी गुडो वर्त्तिस्तथोच्यते॥
द्रवन्तु द्विगुणं देयं मोदकेषु भिषग्वरैः॥
द्रवं द्रवरूपद्रव्यं कर्षप्रमाणं तन्नाचा बलं दृष्ट्वा प्रयुज्यते। बलमिति कालादेरप्युपलक्षणम्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

हर्षके, त्रि। इति मेदिनी। के, १४१॥ (यथा, महाभारते। ७। ६५। ६८।

"हतारोहांश्छिन्नवल्गान् क्रथादगणमोदकान्॥")

मोदकः, पुं, (मोदयति मिष्टान्ननिर्म्माणेनेति। सुद+णिच्+ण्वुल्।) वर्णसङ्करजातिविशेषः। मयरा इति भाषा। स च शूद्रायां क्षत्रियात्। इति स्मृतिः॥

मोदनं, क्ली, (मोदयतीति। सुद+णिच्+ल्युः।) घृतकर्दमः। इति राजनिर्घण्टः॥ (सुद+भावे ल्युट्।) हर्षः। सुदधात्वर्थदर्शनात्॥ (हर्षजनके, त्रि। यथा, महाभारते। ८।२३।७६।

"हृकरुग्रहगालानां तुमुले मोदनेऽहनि।
आसीद्बलवतो घोरस्तव पुत्रस्य पश्यतः॥")

मोदमोदिनी, स्त्री, (मोदात् मोदो महान् हर्षः, सोऽस्या अस्तीति। मोदमोद+इनि। ङीप्।) जम्बूः। इति राजनिर्घण्टः॥

मोदयन्ती, स्त्री, (मोदयतीति। सुद+णिच्+शतृ। ङीप्।) वनमल्लिका। काठमल्लिका इति भाषा॥ यथा,—

"मदयन्ती गन्धवती मोदयन्ती खरस्वरा।"
इति रत्नमाला॥

अपि च।

"तृणशून्या मोदयन्ती भूपद्मी मदयन्तिका॥"
इति शब्दरत्नावली॥

(यथा च सुश्रुते। २। २५।

"पिष्ट्वाथ सर्व्वं सह मोदयन्त्या
मारामजा बीजकसम्भवेन॥")

मोदा, स्त्री, (मोदयति गन्धेन सोषयतीति। सुद+णिच्+अच्। टाप्।) अजमोदा। इति राजनिर्घण्टः॥

मोरटा

मोदाख्यः, पुं, (मोदमाख्याति रसपक्वत्वादिना विस्तारयतीति। आ+ख्या+कः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

मोदाढ्या, स्त्री, (मोदेन आमोदगन्धेन आढ्या बहुला।) अजमोदा। इति राजनिर्घण्टः॥ मोदेन आढ्या। हर्षयुक्ता च॥

मोदिनः, त्रि, (मोदो हर्षोऽस्य जातः। मोद+तारकादित्वात् इतच्।) हर्षयुक्तः। इति व्याकरणम्॥

मोदिनी, स्त्री, (मोदयति गन्धेनेति। सुद+णिच्+णिनिः। ङीप्।) अजमोदा। मल्लिका। यूथिका। कस्तूरी। मदिरा। मल्लिकापुष्पविशेषः। तत्पर्य्यायः। वटपत्री २ कुमारिका ३ वृत्तमल्लिका ४। अस्या गुणाः। नेत्ररोगापहन्तृत्वम्। कटुत्वम्। उष्णत्वम्। व्रणघ्नत्वम्। गन्धबहुलत्वम्। आस्यजरोगनाशित्वञ्च। इति राजनिर्घण्टः॥ (हर्षदायके, त्रि। यथा, महाभारते। ६। ५६। १३।

"वराप्सरसनागानां पुरोरप्रभवा तदा।
परलोकार्थवसुखा गृध्रगोमायुमोदिनी॥")

मोरटं, क्ली, (सुर वेष्टने+"शुकादिभ्योऽटन्।" उणा० ४। ८१। इति अटन्।) इक्षुमूलम्। अङ्कोटपुष्पम्॥ समराच्चात् परत्वीरम्। इति मेदिनी। टे, ५४॥ (यथा, वैद्यकरत्नमालायाम्।

"परतो मोरटं विद्यादग्रासन्नं कफालकम्॥"
यथा च।
"नष्टदुग्धभवन्मोरं मोरटञ्चेक्षुडोऽब्रवीत्।"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे॥)

मोरटः, पुं, (सुर+अटन्।) लताप्रभेदः। चोरमोरटा इति भाषा। तत्पर्य्यायः। कर्णपुष्पः २ पोलुपत्रः ३ मधुस्रवः ४ घनमूलः ५ दीर्घमूलः ६ पुरुषः ७ चोरमोरटः ८। क्वचित् पुस्तके कर्णपुष्पस्थाने चोरपुष्प इति पोलुपत्रस्थाने पोलुपुत्र इति च पाठः॥ (तथास्य पर्य्यायान्तरम्।

"पोलुपर्णी घनरसो हस्तिपर्णी च मोरटः॥"
इति वैद्यकरत्नमालायाम्॥)

अस्य गुणाः। चोरबहुलत्वम्। मधुरत्वम्। कषायत्वम्। पित्तदाहज्वरनाशित्वम्। हृद्यत्वम्। बलविवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४५ अध्याये।

"गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः।
मधुरौ दृंहणौ हृद्यौ तद्वत्पीयूषमोरटौ॥")

मोरटकं, क्ली, (मोरट+स्वार्थे कन्।) इक्षुमूलम्। इति राजनिर्घण्टः॥

मोरटा, स्त्री, (मोरट+टाप्।) मूर्वा। इत्यमरः। २। ४। ८३॥ (यथा, सुश्रुते। १। ३८ अः।

"धीरतरुसहचरहृयदर्भवृक्षादनी गुन्द्रानलकुशकाशाग्र्यभेदकाग्निमन्थमोरटावसुकबलिरमल्लक कुरण्टकेन्दीवरकपोतवङ्काः॥" तथास्याः पर्य्यायो यथा,—

मोहः

"सर्व्वा मधुरसा देवी मोरटा तेजनी खुवा।
मधूलिका मधुश्रेणी मोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मोषकः, पुं. (मुष्णातीति। मुष + ण्वुल्।) तस्करः। इत्यमरः। २। १०। २४ ॥

मोषणं, क्ली, (मुष्यतेऽनेनेति। मुष + करणे ल्युट्। "ल्युट् ॥" ३।३।११७। मुष्णातीति। मुष + ल्युः। अपहारके, त्रि। यथा, भागवते। ५।२४।२२। "न वै भगवान् नूनमसुष्यानुजग्राह यदुत पुनरात्मानुस्मृतिमोषणं मायामयं भोगैश्वर्य्यमेवानुतेनेति ॥")

मोषिता, [ऋ] त्रि, मोषणकर्त्ता। चौरः। इति सुधातोस्तृन्प्रत्ययेन निष्पन्नः ॥

मोहः, पुं, (मोहनमिति। मुह + भावे घञ्।) मूर्च्छा। इत्यमरः। २। ८। १०६ ॥ (यथा उत्तररामचरिते ३ अङ्के।

"वीचिवातैः शीकरस्नोदशीतै-
राकर्षद्भिः पद्मकिञ्जल्कगन्धान्।
मोहे मोहे रामभद्रस्य जीवं
खेदं खेदं प्रेषितैस्तर्पयेति ॥"

अस्य विषयो यथा,—

"संज्ञावहासु नाडीषु पिहितास्वनिलादिभिः।
तमोऽभ्युपैति सहसा सुखदुःखव्यपोहजम् ॥
सुखदुःखव्यपोहाच्च नरः पतति काष्ठवत्।
मोहो मूर्च्छेति तां प्राहुः षड्विधा सा प्रकीर्त्तिता ॥"

इति सुश्रुते उत्तरतन्त्रे ४६ अध्याये ॥)

अविद्या। इति मेदिनी। हे, ७ ॥ दुःखम्। इति शब्दरत्नावली ॥ देहादिषु आत्मबुद्धिः। इति गीतासुबोधिन्यां श्रीधरस्वामी ॥ असौ ब्रह्मणो बुद्धिनो जातः। यथा,—

"बुद्धेर्मोहः समभवद्दङ्कारादभूनदः।
प्रमोदश्चाभवत् कण्ठात्तस्तुलोचनतो नृप! ॥"

इति मात्स्ये २ अध्यायः ॥

मोहस्वरूपं यथा,—

"मम माता मम पिता ममेयं गृहिणी गृहम्।
एतदत्यं ममत्वं यत् स मोह इति कीर्त्तितः ॥"

इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥*॥

धर्म्मेविभ्रष्टत्वम्। यथा,—

"अकामतः कृतं पापं वेदाभ्यासेन नश्यति।
कामतस्तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैरिति ॥"

तत्रत्र मोहादिति को मोहः। अत्र।

"मोहशब्देन देवेन्द्र! बुद्धिपूर्व्वो व्यतिक्रमः।
उच्यते पण्डितैर्नित्यं पुराणे सांप्रपायनः ॥"

इति भविष्यपुराणवचनात् ज्ञातबुद्धिपूर्व्वो व्यतिक्रमो मोहः। इति त्रिकाण्डः। तत्र कामनासामर्थ्यादेव बृहत्त्वलभ्यत्वात्। उच्यते। मूढस्य ब्रह्मार्थो मोहादुच्यते इत्यादौ मुह वैचित्ये इति धात्वर्थानुसारात् अज्ञानमात्रं मोहः। यत्र तु कामनाशब्दोक्तिः तत्र भविष्यपुराणसङ्गतिर्मोहशब्दो न याह्यः। किन्तु धर्म्मे-

मोहनः

विभ्रष्टत्वं मोहः स चाधर्म्मबुद्धौ सत्यामप्यकर्त्तव्ये रागात् कर्त्तव्यताभ्रमः। यथा, व्यासः।

"मोहो धर्म्मविभ्रष्टत्वं मानस्यात्माभिमानिता।"

एवञ्च भविष्यपुराणीयबुद्धिपूर्व्वशब्दोऽप्यधर्म्मज्ञानमेवाभिधत्ते सत्यधर्म्मज्ञाने पापगौरवार्थमिदमुक्तं मोहादिति। इति प्रायश्चित्तविवेकः ॥*॥

मोहदत्तो यथा,—

सुमनोवाच।

"श्रूयतामभिधास्यामि सर्व्वसन्देहनाशनम्।
स्वरूपसदृशं शस्य सर्व्वविज्ञानदर्शनम् ॥
लोभः पापस्य बीजोऽयं मोहो मूलन्तु तस्य हि।
अनृतं तस्य च स्कन्धो माया शाखासुविस्तरः ॥
दम्भकौटिल्यपत्राणि कृत्वा पुष्पित सदा।
पैशुन्यं तस्य सौगन्ध्यमज्ञानं फलमेव हि ॥
क्रूरप्रायश्च चौराश्च कूटाः क्रूराश्च पापिनः।
पक्षिणो मोहदत्तस्य मायाशाखाः समाश्रिताः ॥
अज्ञानन्तु फलं तस्य रसोऽधर्म्मफलस्य हि।
भावोदकेन संवृद्धस्य सत्त्वात् स तु प्रियः ॥
अधर्म्मस्तस्य सुरभिः क्रौञ्च मधुरायते।
तादृशैश्च फलैश्चैव सुफलो लोभपादपः ॥
तस्य छायां समाश्रित्य यो नरः परिवर्त्तते।
फलानि तस्य योऽश्नाति सुपक्वानि दिने दिने ॥
फलानान्तु रसेनैव अधर्म्मेण तु पोषितः।
सुखंपुष्टो भवेज्जन्तुः पतनाय प्रयच्छति ॥"

इति पाद्मे भूमिखण्डे ११ अध्यायः ॥

मोहनं, क्ली, (मह्यतेऽनेनेति। मुह + ल्युट्।) सुरतम्। इति हेमचन्द्रः। ३। २००॥ यथा, मार्कण्डेये। ५१। ७७।

"प्रविश्य गर्भमस्त्रीको सुक्ता मोहयतेऽपरा।
आधत्ते मोहनात्तस्याः सर्व्वमङ्गककच्छपाः ॥")

होममन्त्रौषध्यादिद्वारासुग्धताकरणम्। तच्च होमेऽङ्गुलिनियमो यथा,—

"मोहनं वश्यकामस्य प्रीतिसंवर्द्धनं तथा।
प्रदक्षिणोत्तरिताभ्यां सर्व्वमेतत् प्रसिध्यति ॥
मोहनाकर्षणस्यैव क्षोभणोच्चाटनं तथा।
कनिष्ठामध्यमाङ्गुष्ठसंयोगेन तु लीलया ॥
विधियुक्तेन होमेन तथा मन्त्रानुयोगतः।
सर्व्वे मन्त्राः प्रसिध्यन्ति सुदामन्त्रप्रयोगतः ॥"

इति तन्त्रसारः ॥

(नगरभेदः। यथा, महाभारते। ७।२५३।६।

"मोहनं पत्तनञ्चैव त्रिपुरां कोशलां तथा।
एतान् सर्व्वान् विनिर्जित्य करमादाय सर्व्वशः ॥")

मोहनः, पुं, (मोहयतीति। मुह + णिच् + ल्युः।) धुस्तूरवृक्षः। इति राजनिर्घण्टः ॥ कामदेवस्य पञ्चबाणान्तर्गतबाणविशेषः। इति त्रिकाण्डशेषः ॥ (यथा, कथासरित्सागरे। ७१। १३२।

"कामस्यैव जगज्जैत्रमोहनाख्याधिदेवतम्।
तदुपक्लृप्तचित्ताभूत् समाधिस्थेव तत्क्षणम् ॥"

नृपविशेषः। यथा, कथासरित्सागरे। ४७। ६१।

"वीक्ष्य प्रसन्नं गिरिशं मोहनो नाम भूपतिः।

मोहशा

सन्निपत्याकृष्टासं तं ताडयामास सायकैः ॥"

मोहकारके, त्रि ॥ यथा, गीतायाम्। १८।३६।

"यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥"

"अत्र मोहनं मोहकरम्।" इति आनन्दगिरिः ॥)

भोहनभोगः, पुं. (मोहनश्चासौ भोगश्चेति।) सर्पिःशर्करादधिसहितान्नविशेषः। इति पाकराजेश्वरः ॥

मोहना, स्त्री, (मोहयति पुष्पेणेति। मुह + ल्युः। टाप्।) त्रिपुरमालीपुष्पम्। इति रत्नमाला ॥ मरुन्माला। इति शब्दमाला ॥

मोहनी, स्त्री, (मुह्यत्यनयेति। मुह + ल्युट्। स्त्रियां ङीष्।) उपोदकी। इति राजनिर्घण्टः ॥ वटपत्री। इति भावप्रकाशः ॥ (तथास्याः पर्य्यायः।

"मोहनी मल्लिकाख्या तु वटपत्री च मोहना।"

इति वैद्यकरत्नमालायाम् ॥)

माया। यथा, महाभारते। १४। ८०। ४५।

"मया तु मोहनी नाम मायैषा संप्रदर्शिता॥")

मोहरात्रिः, स्त्री. (मोहस्य रात्रिः।) दैनन्दिनप्रलयः। यथा,—

"एवं पञ्चाशदब्दे च गते तु ब्रह्मणो नृप!।
दैनन्दिनन्तु प्रलयं वेदेषु परिकीर्त्तितम् ॥
मोहरात्रिश्च सा प्रोक्ता वेदविद्भिः पुरातनैः।
तत्र सर्व्वे प्रनष्टाश्च ब्रह्मादिस्तम्बगोचराः ॥
आदित्या वसवो रुद्रा मन्विन्द्रा मानवादयः।
ऋषयो नृनयश्चैव गन्धर्व्वा राक्षसादयः ॥
मार्कण्डेयो लोमशश्च पैप्पलश्चिरजीविनः।
इक्ष्वाकुश्च नृपतिश्चाकूपारश्च कच्छपः।
नाडीजङ्घो वकश्चैव सर्व्वे नष्टाश्च तत्र वै ॥
ब्रह्मलोकादधः सर्व्वे लोका नागालयास्तथा।
ब्रह्मलोकं ययुः सर्व्वे ब्रह्मलोकादधस्तथा ॥
गते दैनन्दिने ब्रह्मा लोकांश्च सृजते पुनः।
एवं प्रतिदिनं यावत् परमायुश्च ब्रह्मणः ॥
ब्रह्मणश्च निपातेन महाकल्पो भवेन्नृप!।
प्रकीर्त्तिता महारात्रिः सा एव च पुरातनैः।"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे। ५४। ७२—७८ ॥*॥

मोहः कर्म्मव्यामोहः स एव रात्रिरिव रात्रिर्बुद्धिमोहकत्वान्निद्रारूपा। इदानीन्तनजनानां रात्रिरिति वा। इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥*॥ जन्माष्टमीरात्रिः। यथा,—

"दीपोत्सवचतुर्द्दश्याममया योग एव चैत्।
कालरात्रिर्महेशानि! तारकालीप्रियङ्करी।
जन्माष्टमी महेशानि! मोहरात्रिः प्रकीर्त्तिता ॥
क्षणदा माधवे शुक्ला कुलवारर्क्षसंयुता।
दारुणा कीर्त्तिता देवि! सर्व्वसिद्धेश्वरी परा ॥"

इति शक्तिसङ्गमतन्त्रम् ॥

मोहप्राप्तं, क्ली, (मोहोत्पादकं प्राप्तमिति मध्यपदलोपिकर्म्मधारयः।) अविद्याजनकप्राप्तम्। यथा,—

"गोपतिं प्राह विप्रेन्द्रानालोक्य भगवान् हरिः

मौक्तिकं

न वेदवाह्यपुरुषे पुण्यलेशोऽपि शङ्कर ! ॥
सङ्गच्छते महादेव ! धर्म्मो वेदादि निर्म्मलौ ।
तथापि भक्तवात्सल्यादिच्छतश्च महेश्वर ! ॥
अस्माभिः सर्व्व एवैते गच्छामो नरकानपि ।
अस्माद्वै वेदवाह्यानां रक्षणाय च पापिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ! ॥
एवं सम्बोधितो ब्रह्मा माधवेन सुरारिणा ।
चकार मोहशास्त्राणि कैटभोऽपि शिवेरितः ॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम् ।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ॥"

इति कौर्म्मे १७ अध्यायः ॥

मोहिनी, स्त्री, (मोहयति सौन्दर्य्यादिनेति । मुह + णिच् + णिनिः । स्त्रियां ङीप् ।) त्रिपुरमालीपुष्पम् । इति रत्नमाला ॥ (वटपत्री । तत्पर्य्यायो यथा,—

"वटपत्री तु कथिता मोहिनी रेचनी बुधैः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

समुद्रमन्थनकाले देवानामन्धतपानायासुराणां मोहनाय च भगवदवतारविशेषः । यथा,—

"धान्वन्तरं द्वादशमं त्रयोदशममेव च ।
अपाययत् सुरानन्यान् मोहिन्या मोहयन् स्त्रिया ॥"

इति श्रीभागवते २ स्कन्धे ७ अध्यायः ॥

सर्व्वज्ञत्वादिगुणैः । यस्याः घ्राणात् ब्रह्मणोऽपूज्यत्वं जातम् । यथा,—

"यतो हसति गर्व्वेण ततोऽपूज्यो भवाचिरम् ।
अचिराद्दर्पभङ्गं ते करिष्यति हरिः स्वयम् ।
निबोध गुरवं ब्रह्मन् ! सर्व्वज्ञायाश्च साम्प्रतम् ॥
तवैव कवचं स्तोत्रं मन्त्रं यन्नाति यो नरः ।
भविता तस्य विघ्नश्च स यास्यत्युपहास्यताम् ॥
भविता वार्षिकी पूजा देवतानां युगे युगे ।
तव माघाच्च संक्रान्त्यां न भविष्यति सा पुनः ॥
इत्युक्त्वा मोहिनी शीघ्रं जगाम मदनालयम् ।
तेन सार्द्धं रतिं कृत्वा बभूव विरहातुरा पुनः ॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३१ अध्यायः ॥

विस्तरस्तु ब्रह्मवैवर्त्तग्रन्थे द्रष्टव्यः ॥ (मोहकर्म्मणि च । यथा, भागवते । ३ । ६ । १५ ।

"अतो भागवतीं माया मायिनामपि मोहिनीं ।
यत् स्वयञ्चात्मवर्त्मात्मा न वेद किमुतापरे ॥")

मौकुलिः, पुं, काकः । इति हेमचन्द्रः । ४ । १८८ ॥ (यथा, उत्तररामचरिते २ अङ्के ।

"कूजत्कुक्कुटकोटीरकौशिकघटाहुङ्कारवत्
कौशिक-
स्वाध्यायस्मरमन्थकमौकुलिकुलः कौशावतोऽयं
गिरिः ।
एतस्मिन् प्रचलाकिनां प्रचलतासुद्वेजिता
कूजिते-
ष्वद्वेल्लन्ति पुराणपन्नगतरक्षून्येषु कुक्षीनडाः ॥")

मौक्तिकं, क्ली, (मुक्तैव । मुक्ता + "विनयादिभ्यष्ठक् ।" ५ । ४ । ३४ । इति ठक् ।) मुक्ता । इत्यमरः । २ । ९ । ९२ । (यथा, याज्ञवल्क्यस्मृतौ । १५५ ।

"मौक्तिकं प्रौक्तिकं मुक्ता तथा मुक्तापलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्तामुक्तिं प्रयोजयेत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुलः, पुं, (मौक्तिकमिव मुक्ताः तण्डुलोऽस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

मौक्तिकप्रसवा, स्त्री, (मौक्तिकस्य प्रसवा ।) शुक्तिः । इति राजनिर्घण्टः ॥

मौक्तिकशुक्तिः, स्त्री, (मौक्तिकानां शुक्तिः ।) शुक्तिः । इति राजनिर्घण्टः ॥ मुक्ताकार भिनुक् इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धाधीनपापम् । तच्च अभक्ष्यभक्षणरूपं तच्च क्लीवम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । सुमन्तुः । यच्च तैर्य्यग्मौखश्वौवाणां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात् । इयात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थः । अत्र याज्ञवल्क्यादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते । इति मूलपाठितप्रायश्चित्तविवेकः ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वं । मुखरस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे ष्ठिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला ॥ (यथा, ऋग्विधानभाष्ये । १ । ६ ।

"पिप्पलमौञ्जीयुतमर्ज्जुनच्छविं
वसानमेणाजिनमक्षमक्षतुम् ।
सुवर्णकेशाकलिताम्बराधरां
विडम्बयन्तं स्थितिवासवस्तनुम् ॥"

"मुञ्जस्तृणविशेषस्तन्मयीमेखला मौञ्जी ।" इति तट्टीकायां भट्टभीनाथः ॥) यथा,—

"विप्रस्य चक्षत्रियस्यापि मौञ्जी स्याद्विधायने ।
दर्भिश्च वैष्णवी कार्य्या वानप्रस्थाय च क्रमे ॥"

मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
सङ्घाताभे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीदण्डाख्यः, पुं, (मौञ्जीदण्डमित्याख्यास्य ।) मुञ्जः । इति राजनिर्घण्टः ॥

मौञ्जीपञ्चा, स्त्री, (मौञ्जीपञ्चमिव पञ्चमस्याः ।) वल्वजा । इति राजनिर्घण्टः ॥

मौञ्जीबन्धः, पुं, (मौञ्ज्या बन्धः बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,

"वज्रभाद्दृमे सिंहे गोचर्म्मे मृगुभे गुरौ ।

मौञ्जीव

"शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्व्वत्र चन्दनं न वने वने ॥"

तथास्य पर्य्यायः ।

"मौक्तिकं प्रौक्तिकं मुक्ता तथा मुक्तापलञ्च तत् ।
अभावे मौक्तिकस्यापि मुक्तामुक्तिं प्रयोजयेत् ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥)

मौक्तिकतण्डुलः, पुं, (मौक्तिकमिव मुक्ताः तण्डुलोऽस्य ।) धवलयावनालः । इति राजनिर्घण्टः ॥

मौक्तिकप्रसवा, स्त्री, (मौक्तिकस्य प्रसवा ।) शुक्तिः । इति राजनिर्घण्टः ॥

मौक्तिकशुक्तिः, स्त्री, (मौक्तिकानां शुक्तिः ।) शुक्तिः । इति राजनिर्घण्टः ॥ मुक्ताकार भिनुक् इति भाषा ॥

मौखं, क्ली, (मुखस्येदमिति । मुख + अण् ।) मुखसम्बन्धाधीनपापम् । तच्च अभक्ष्यभक्षणरूपं तच्च क्लीवम् । संसर्गरूपस्य तस्य प्रायश्चित्तं यथा । सुमन्तुः । यच्च तैर्य्यग्मौखश्वौवाणां सम्बन्धानामन्यतमेन सह सम्पर्कमियात् तस्याप्येतदेव प्रायश्चित्तं विदध्यात् । इयात् कुर्य्यात् । एतदेवेति द्वादशवार्षिकमित्यर्थः । अत्र याज्ञवल्क्यादीनामन्यतमेन संवत्सरेण पततीत्यवगम्यते । इति मूलपाठितप्रायश्चित्तविवेकः ॥ मुखसम्बन्धिनि, त्रि ॥

मौखर्य्यं, क्ली, मुखरत्वं । मुखरस्य भाव इत्यर्थे ष्यञ्प्रत्ययेन निष्पन्नम् ॥

मौखिकं, त्रि, मुखसम्बन्धि । मुखस्येदमित्यर्थे ष्ठिक् (ठक्) प्रत्ययेन निष्पन्नम् ॥

मौञ्जी, स्त्री, (मुञ्जस्येयमिति । मुञ्ज + अण् । स्त्रियां ङीप् ।) मुञ्जनिर्म्मितमेखला ॥ (यथा, ऋग्विधानभाष्ये । १ । ६ ।

"पिप्पलमौञ्जीयुतमर्ज्जुनच्छविं
वसानमेणाजिनमक्षमक्षतुम् ।
सुवर्णकेशाकलिताम्बराधरां
विडम्बयन्तं स्थितिवासवस्तनुम् ॥"

"मुञ्जस्तृणविशेषस्तन्मयीमेखला मौञ्जी ।" इति तट्टीकायां भट्टभीनाथः ॥) यथा,—

"विप्रस्य चक्षत्रियस्यापि मौञ्जी स्याद्विधायने ।
दर्भिश्च वैष्णवी कार्य्या वानप्रस्थाय च क्रमे ॥"

मनुः ।

"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवी ॥
सङ्घाताभे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः ।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा ॥"

इति संस्कारतत्त्वम् ॥

मौञ्जीदण्डाख्यः, पुं, (मौञ्जीदण्डमित्याख्यास्य ।) मुञ्जः । इति राजनिर्घण्टः ॥

मौञ्जीपञ्चा, स्त्री, (मौञ्जीपञ्चमिव पञ्चमस्याः ।) वल्वजा । इति राजनिर्घण्टः ॥

मौञ्जीबन्धः, पुं, (मौञ्ज्या बन्धः बन्धनम् ।) मुञ्जमेखलाबन्धनम् । उपनयनमिति यावत् । यथा,

"वज्रभाद्दृमे सिंहे गोचर्म्मे मृगुभे गुरौ ।

मौनेयः

मौञ्जीबन्धः शुभः प्रोक्तश्चैत्रे भीनगते रवौ ॥"

इति ज्योतिर्निबन्धे नारदवचनम् ॥

मौटं, क्ली, (मुटस्य भावः कर्म्म वा । मुट + "गुरुवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ । इति ष्यञ् ।) मोहः । इति हेमचन्द्रः । २ । २१४ ॥ (यथा, श्रीमद्भागवते । १ । २६ । २२ ।

"यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम् ।
हित्वार्च्चां भजते मौढ्याद्भस्मन्येव जुहोति सः ॥"

पुं, मुट + "कुर्व्वादिभ्यो ण्यः ।" ४ । १ । १५१ । इति ण्यः । मुटपुत्रः । इति व्याकरणम् ॥)

मौढ्यः, पुं, काकः । इति त्रिकाण्डशेषः ॥

मौद्गल्यः, पुं, (मुद्गलस्यापत्यमिति । मुद्गल + यञ् ।) मुद्गलमुनिपुत्रः । स च गोत्रकारकः । अस्य पञ्च प्रवराः यथा । और्व्यच्यवनभार्गवजामदग्न्याप्नुवन्तः । इति कुलदीपिका ॥ (यथा, हरिवंशे । ३२ । ७० ।

"मुद्गलस्य तु दायादो मौद्गल्यः समहायशाः ॥")

मौद्गीनं, क्ली, (मुद्गानां भवनं क्षेत्रमिति । मुद्ग + "धान्यानां भवने क्षेत्रे खञ् ।" ५ । २ । १ । इति खञ् ।) मुद्गभवोचितक्षेत्रम् । इत्यमरः । २ । ९ । ८ ॥

मौनं, क्ली, (मुनेर्भाव इति । मुनि + अण् ।) शब्दप्रयोगराहित्यम् । तत्पर्य्यायः । अभाषणम् २ । तूष्णीम् ३ तूष्णीकाम् ४ । इत्यमरः । २ । ७ । ३६ ॥ (यथा, रघुवंशे । १ । २२ ।

"शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥"

कर्म्मविशेषे मौनाचरणं यथा,—

"उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥"

इति तिथ्यादितत्त्वम् ॥

मौनी, [न्] पुं, (मौनमस्त्यस्येति । मौन + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) मुनिः । इति जटाधरः ॥ (यथा, मार्कण्डेये । ७५ । १६ ।

"ततः स चिन्तयामास राजा जामाढ्यकारणम् ।
विवेद च न तज्ज्ञानी जगद्वैरञ्च तं नृपः ॥")

मौनयुक्ते, त्रि । यथा,—

"शिवरात्रौ कृष्णपक्षे यदि सोमदिने भवेत् ।
गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम् ॥
एतच्च मौनमरुणोदयमारभ्य स्नानपर्य्यन्तं कार्य्यं न तु स्नानकालमात्रे ।" इति तिथ्यादितत्त्वम् ॥

मौनेयः, पुं, (मुनेरपत्यं पुमान् । मुनि + "इतश्चानिञ् ।" ४ । १ । १२२ । इति ढक् ।) गन्धर्व्वगणविशेषः । यथा,—

"गन्धर्व्वाप्सरसः पुण्या मौनेयास्तु निबोधत ।
चित्रसेनोग्रसेनौ तु ऊर्णायुरनिघस्तथा ॥
धृतराष्ट्रस्तथोर्णायुः सूर्य्यवर्च्चाश्चतेव च ।
युगतृणयपत्काश्च निदिक्किरथस्तथा ॥
अयोदग्नः शालिशिरः पर्य्यायश्च चतुर्दशः ।
इत्येते देवगन्धर्व्वाश्चतुस्त्रिंशच्छुभाक्षराः ॥"

इति वह्निपुराणम् ॥

मौलिः

(अक्षरोमेदे, स्त्री। यथा, हरिवंशे।२।१८।४७।
"काश्या ग्रारहती चैव मौनेयाक्षरच: स्मृता:॥")
मौरविकः, त्रि, (सुरजस्कादानं शिल्पमस्य।
सुरज+"शिल्पम्।"४।४। ५५। इति ठक्।)
सुरजवादकः। इत्यमरः।२।१०।१३॥
मौर्ख्यं, क्ली, (मूर्खस्य भावः। मूर्ख+"वर्णदृढ़ादिभ्यः ष्यञ् च।"५।१।१२३। इति ष्यञ्।)
जाड्यम्। इति हेमचन्द्रः।२।२२६॥ (यथा,
सुश्रुते शारीरस्थाने ४ अः।
"अनवस्थितता मौर्ख्यं भीरत्वं संशितार्थिता॥")
मौर्व्वी, स्त्री, (मूर्व्वाया विकारः। मूर्व्वा+"अवयवे च प्राण्योषधिवृक्षेभ्यः।" ४।३।१३५।
इति अञ्। ङीप्।) धनुर्गुणः। इत्यमरः।
२।८।८५। (यथा, रघुः।१।१६।
"प्रागेव कुण्ठिता बुद्धिर्मौर्व्वी धनुषि चातता॥"
अजश्च स्त्री। इति रत्नमाला॥ कोँगा इति भाषा॥ (मूर्व्वामयी। यथा, मनौ।२।४२।
"मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणजा-मयी॥")
मौलः, पुं, (मूलं वेदेति। मूल+अण्।) भूम्यादेर्मूलज्ञाता। मोड़ल इति भाषा। यथा,—
"यतु परम्परया मौला: सामन्ता: स्वामिनं विदुः।
तदन्वयस्यागतस्य दातया गोचरैर्मही॥"
इति दायतत्त्वम्॥
तस्य लक्षणं यथा,—
"ये तत्र पूर्व्वं सामन्ता: पञ्चाद्देशान्तरं गता:।
तन्मूलत्वात्तु ते मौला ऋषिभिः परिकीर्त्तिता:॥"
इति मिताक्षरा॥
(विजिगीष्वरिमध्योदासीन:। यथा, कामन्दकीये।८।३४।
"चत्वार: पार्थिवा मौला: षड्भिश्चैः सह षट्कम्॥"
मूलभूते, त्रि। यथा, तत्रैव।८।२५। [या:।
"मौला द्वादश याज्ञेया अमात्याद्यास्तथा च सप्रतिद्वाधिका ज्ञेया: सर्व्वे प्रकृतिमण्डलम्॥")
मौलिः, पुं, स्त्री, (मूल+सुतङ्गमादित्वात् इञ्।)
चूड़ा। (यथा, महाभारते। ६।५६।५।
"एवमुक्त्वा स वामेन पदा मौलिमपाक्षिपत्॥
शिरश्च राजसिंहस्य पादेन समलोड़येत्॥")
किरीटम्। (यथा, हरिवंशे।६७।३०।
"दृष्ट्वा सा मया मौलिरङ्गता वरुणालयात्॥")
संयतकेशः। इत्यमरः।२।६।१६२। (यथा, रघौ।७।६६।
"स चापकोटीनिहितैकबाहुः
शिरस्त्रनिष्कर्षणभिन्नमौलिः।
ललाटबद्धश्रमवारिबिन्दुः
भीतां प्रियामेत्य वचो बभाषे॥")
मस्तकम्। इति हेमचन्द्रः।३।२।२६०॥
(यथा, आर्य्यासप्तशत्याम्।४२४।

मौलिकः

"भालनयनेऽभिरिन्द्रमौलौ शाखे सुजङ्गमणिदीपाः॥"
प्रधानः। यथा, मार्कण्डेये।५६।१७।
"मौलयस्ते महाकाया: शाकपोतकरम्भकाः॥")
मौलिः, पुं, (मूलस्यादूरभवः। मूल+सुतङ्गमादित्वादिञ्।) अधोकदलः। इति मेदिनी॥
मौलिः, स्त्री, (मूले जाता। मूल+इञ्।)
भूमिः। इति मेदिनी॥
मौलिकः, पुं, (मूले जाते जातः। मूल+ठञ्।)
कुलीनभिन्नः। यथा राढ़ीयवारेन्द्रब्राह्मणस्य श्रोत्रिय: तथा कायस्थस्य मौलिकः। एवं दाक्षिणात्यवैदिकब्राह्मणस्य अग्रपूजोपरिगीतापि सत्पदवाच्यः। वङ्गजकायस्थस्य च मध्यग्रन्थवाच्यः। यथा। अथ मध्यग्रन्थलक्षणमाह।
मध्यग्रन्थो रूढ़ इत्यर्थः। कित्यङ्वित्यवत्।
मध्यः कुलमध्यकुलीनस्य विश्रामस्थलमित्यर्थः। मध्यग्रन्थस्य लक्षणान्तरम्। कुलीनेतरसिद्धवंशजातकले सति दशपुरुषावधि अनवच्छिन्नकुलार्च्चकत्वं मध्यत्वम्। स च द्विविधः। सिद्धः साध्यश्च। सिद्धत्वं प्रकृतमध्यत्वम्। प्रकृतसिद्धवंशजातत्वे सति दशपुरुषावधिकुलार्च्चकत्वं सिद्धत्वम्। सिद्धपदाकाङ्क्षिते सति दशपुरुषावधिकुलार्च्चकत्वं साध्यत्वम्। अस्य प्रशंसामाह।
"कुलीनकुलरत्नार्थं विवादेषु मीमांसया।
एतेषां गुणमाश्रित्य मध्यस्थः कुलसुत्तमम्॥"
इति कुलदीपिका॥*॥
दक्षिणराढ़ीयकायस्थस्याष्टसद्मौलिका यथा,—
"गौड़ेऽष्टौ कीर्त्तिमन्तश्चिरवसतिकृता मौलिका ये हि सिद्धास्ते दत्ताः सेनदासाः करगुहसहिताःपालिताः सिंहदेवाः।
ये वा पद्माभिमुख्याः क्षितिविनययुतः सप्रतिस्ते द्विपूर्व्वा
मिश्राद्या वीक्ष्य राज्ञा चरणगुणयुता मौलिकस्तेन साध्याः॥"
अपि च।
"सेनो दत्तः करो घोषो दासो देवः प्रतिष्ठितः।
पालितः सिंहधर्म्मश्चो गुहः सद्मौलिकाः स्मृताः॥"*॥
द्विसप्तसिसाध्यमौलिका यथा,—
"घोड़: खरधरधरणी वाण
आयिच सोम: पेसुर साम:।
भञ्जो विन्दो गुह बल लोध:
ग्रम्भो वम्भो हुड़ भूँयि चन्द्र:॥
रुद्रो रक्षित राजादित्यो
विष्णुनाग: खिल पिल गूत:।
दत्तो गुप्त: पालो भद्र
ओमचाङ्कुर वन्धुर नाथ:॥
घाँयिर्दैघो मानो मल्लो
राहा राणा राहुत सेना।
राहा दासा गण उपमाना॥

मौषलं

खाम: चोमो घर वे ओघ:
चौदत्तेजचार्जव आप्त:।
शक्तिभूतो ब्रह्मो ग्राम:
चेमो हेमो वर्द्धन रङ्ग:।
गुह: कीर्त्तिर्यश: कुण्डो
नन्दी ग्रीलो धनुर्गुण:॥"
इति द्विसप्ततिमौलिका:॥७॥
अन्यच्च।
"देवो भूदेवभक्तो गुहसदृशगुणो दास ईशानदास:
सेनो दत्त: सुरत्नामहितजनजय: पालितो धर्म्मपाल:।
सिंह: सिंहप्रताप: क्षितिनिकरकरादानदक्ष: करोऽसौ
गौड़ेऽष्टौ संस्मितास्ते गुणगणनिपुणा मौलिकस्तेन सिद्धा:॥"
घोड़वाणधरणीखिलसोमा
शुक्लविन्दगुहराजराहुता:।
रुद्रपालबलसामरक्षिता
लोधगर्म्भमुँयिचन्द्रभेन्धरा:॥
चन्द्रगाँयिगुयिभद्रपैसुरा
गङ्गगुप्तधरकीर्त्तिवर्द्धना:।
चेमहेमगणनाथविष्णवो
अक्षरङ्गपिलकुरुधनुर्गुणा:॥
तैजोऽग्र्यवस्वरधराधिच शक्तिभूता:
चोमौघ ग्राम विदशौल यशोम नन्दी।
दाहाङ्कुरेन्द्रशुभकुण्डमनोपमाना
दानाद्यगुणविदिता भुवि कीर्त्तिमन्त:॥
शेषादिद्यौ राज्ञ राहा सेना च खामक-
लक्षा।
द्विसप्ततिमिता: साध्या मौलिका विदिता:
क्षितौ॥"
इति कुलाचार्य्यकारिका॥*॥
(देशविशेषः। यथा, मार्कण्डेये।५७।४८।
"पौरिका मौलिकाश्चैव अङ्गका भोगवर्द्धना:॥")
त्रि, मूलसम्बन्धिनि मौलसम्बन्धिनि च॥ (भारभूतं मूलं हरति वहत्यावहति वा। मूल+
"तद्धरति वहत्यावहति भारात् वंशादिभ्यः।"
५।१।५०। इति ठञ्। मूलभारहारके मूलभारवाहके मूलभारानेतरि च। इति व्याकरणम्॥)
मौषलं, क्ली, (मूषलमिव। मूषलस्येदमिति वा।
मूषल+अण्।) मूषलवत्। यथा,—
"गङ्गायां मौषलं स्नानं महापातकनाशनम्।"
इति प्रायश्चित्ततत्त्वधृतभविष्यपुराणवचनम्॥
महाभारतस्याष्टादशपर्व्वान्तर्गतपर्व्वविशेषः।
यथा,—
"मौषलं पर्व चोद्दिष्टं ततो घोरं सुदारुणम्।
महाप्रस्थानिकं पर्व स्वर्गारोहणिकं ततः॥"
इति महाभारते आदिपर्व॥
मूषलसम्बन्धिनि, त्रि॥

मौहा, स्त्री, मुष्टिप्रहरणक्रीड़ा। इत्यमरः।३।५।५॥ "मुष्टिप्रहरणं अस्यां क्रीड़ायां मौष्टा व्याः(अण्) णित्त्वे त्रिरिति वृद्धिः यथोर्लोपः इति इकारलोपः। स्त्रियामत इत्याप्।" इति तट्टीकायां भरतः॥

मौहूर्तः, पुं, (मुहूर्तं अधीते वेद वा। मुहूर्त+"तदधीते तद्वेद।" ४।२।५०। इत्यण्।) ज्योतिर्वेत्ता। इत्यमरः।२।८।१४॥ (यथा, महाभारते।१२।२२१।७६।

"भिक्षुकाः प्राडविवाकाश्च मौहूर्ता दैवचिन्तकाः॥")

मौहूर्तिकः, पुं, (मुहूर्तं तद्बोधकं ग्राह्यमधीते वेद वा। मुहूर्त+"क्रतूक्थादिसूत्राभ्यां ठक्।" ४।२।६०। इति ठक्।) ज्योतिर्वेत्ता। इत्यमरः।२।८।१४॥ (यथा, कथासरित्सागरे।२२।१३३।

"ततो मौहूर्तिकादेशादन्येद्युर्वत्सकन्यका।
सा मया परिणीता भूम्नितिताखिलबन्धुना॥"

दत्तकन्यासुहूर्तोद्भवदेवगणविशेषः। यथा, भागवते।६।६।८।

"मौहूर्तिका देवगणा सुहूर्तायाश्च लज्जिरे॥"

सुहूर्तोद्भवे, त्रि। यथा, भागवते।५।१३।२२।

"मौहूर्तिकादृश्यस्य समागमाच्च मे
दुरन्तमूलोऽपहतोऽविवेकः॥")

म्ना, अभ्यासे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-अनिट्।) अभ्यासः पौनःपुन्येनानुशीलनम्। मनति सन्ध्यां ब्राह्मणः। इति दुर्गादासः॥

म्रक्ष, संघाते। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षति पयसा शुष्कान् लोकः। इति दुर्गादासः॥

म्रक्ष, क म्रक्षणे। क्षेहने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) रेफयुक्तादिः। म्रक्षयं द्रव्यस्य द्रव्यान्तरेण योजनम्। क, म्रक्षयति घृतेनान्नं लोकः। इति दुर्गादासः॥

म्रक्षः, पुं, (म्रक्ष+घञ्।) स्नेहोपगूहनम्। इति त्रिकाण्डशेषः॥ अक्षयश्च॥ (यथः। यथा, ऋग्वेदे।८।५०।१०।

"उपयामगृहीतोऽसि म्रक्षायै त्वा म्रक्षयतं देवेभ्यो मधुमत्तमं पुरन्दरो यदिमे शृतास इति।"

"म्रक्षयतं म्रक्षकर्मणा।" इति तद्भाष्ये सायणः॥)

म्रक्षणं, क्ली, (म्रक्ष+कर्मणि ल्युट्।) तैलम्। इति हेमचन्द्रः।३।८२॥ द्रव्यस्य द्रव्यान्तरेण संयोजनम्। क्षेहनम्। राशीकरणम्। इति म्रक्षधातोर्भावेऽनट् प्रत्ययेन निष्पन्नम्॥

म्रद, म ष ड चोदे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) रेफयुक्तः। चोदश्चूर्णीकरणम्। म, म्रदयति। ष, म्रदा। ड, म्रदते कणानं दन्ती। इति दुर्गादासः॥

म्रदिमा, [न्] पुं, (म्रदोभावः। म्रदु+"पृथ्वादिभ्य इमनिज्वा।" ५।१।१२२। इति इमनिच्। "र ऋतो हलादेर्लघोः।" ६।४।१६१। इति ऋकारस्य रादेशः। "टेः।" ६।४।१५५। इति टेर्लोपः।) म्रदुता। यथा, राजतरङ्गिण्याम्। ८।५६६।

"म्रदिम्ना पापिनस्तस्य नाशाधि क्रूरता जनैः।
मधुरिम्णी विषस्येव शक्तिः प्राणापहारिणी॥")

म्रदिष्ठः, त्रि, अतिशयेन म्रदुः। म्रदुशब्दादिष्ठप्रत्ययेन निष्पन्नः॥

म्रदीयान् [स्] त्रि, अतिशयेन म्रदुः। म्रदुशब्दादीयसुप्रत्ययेन निष्पन्नः॥

म्रातनं, क्ली, कैवर्त्तोसुस्तकम्। इति शब्दचन्द्रिका॥

म्रुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्रावेट्।) उ, म्रोचित्वा म्रोक्ता। इर्, अम्रुचत् अम्रोचीत्। इति दुर्गादासः॥

म्रुनृच, उ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्रुचित्वा म्रुक्ता। इति दुर्गादासः॥

म्रेटृ, ऋ उच्छादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेटत्। म्रेटति लोकः उच्छादतीत्यर्थः। इति दुर्गादासः॥

म्रेड, ऋ उच्छादे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-अक०-सेट्।) ऋ, अमिम्रेडत्। म्रेडति लोक उच्छादतीत्यर्थः। इति दुर्गादासः॥

म्रक्तं, क्ली, (म्रक्ष+क्तः।) चोरितम्।। यथा,—

"चोरितं सुचितं म्रक्तं प्रतीतम्तु प्रतीच्छितम्॥"

इति भूरिप्रयोगः॥

म्लानं, त्रि, (म्लै हर्षक्षये+क्तः। "संयोगादेरातो धातोर्यण्वतः।"८।२।४३। इति निष्ठातस्य नः।) मलिनम्। यथा,—

"मलिनं कचरं म्लानं कश्मलञ्च मलीमसम्॥"

इति हेमचन्द्रः॥

(यथा, मार्कण्डेये।६२।१६।

"स चिन्तयामास तदा किं म्लेच्छा गजगामिनी।
निश्वासपवनम्लाना गिरावच्च वरूथिनी॥")

दुर्बलम्। (यथा,—

"अग्नेषु शूरं परिहीनमध्यं
म्लानन्तथाग्नेषु च मध्यशूरम्॥"

इति माधवकृतरुग्विनिश्चयस्य पाण्डुरोगव्याख्याने विजयेनोक्तम्॥ (म्लै+भावे क्तः। म्लानिः। यथा, मार्कण्डेये।३५।२४।

"दृष्ट्वावसन्नञ्च म्लानक्षुत्पानस्नानकर्मसु।
आत्मानञ्च यथान्यायं वासो विपरिधाय च॥")

म्लानिः, स्त्री, (म्लै+निः। स च नित्। इत्युज्ज्वलदत्तः। ४।५१।) कान्तिक्षयः। यथा, देवीभागवते।१।६।१८।

"प्रेक्षकस्तु तदा ब्रह्मा देवी चैवान्तरीक्षगा।।
न मन्वन्तुस्तदा तौ तु विष्णुस्तु म्लानिमान्यवान्॥")

म्लिष्टं, क्ली, (म्लेच्छ+क्तः+"शुष्कम्लानश्लानम्लिष्टविरिब्धेत्यादि।" ७।२।१८। इति निपातितम्।) असाधुशब्दम्। तत्पर्य्यायः। अविसृष्टम् २। इत्यमरः।१।६।२१॥

म्लिष्टः, त्रि, (म्लेच्छ+क्तः।) अव्यक्तवाक्। म्लानः। इति मेदिनी। टे, २५॥

म्लुच, उ इर् गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्।) उ, म्लोचित्वा म्लुक्ता। इर्, अम्लुचत् अम्लोचीत्। इति दुर्गादासः॥

म्लेच्छ, कि देश्योक्तौ। इति कविकल्पद्रुमः॥ (चुरा०-वा भ्वा०-पर०-अक०-सक० च-सेट्।) देश्या याम्या उक्तिर्देश्योक्तिरसंस्कृतकथनमित्यर्थः। कि, म्लेच्छयति म्लेच्छति मूढः। अनार्षितामसौ विद्वान् म्लेच्छति दूषणम् इति हलायुधः॥ अनेकार्थत्वादव्यक्तशब्देऽपि। तथा चामरः। अथ म्लिष्टमविस्पष्टमिति। म्लेच्छ अव्यक्तायां वाचि इति प्राचः। तच्च रमागाधस्तु। म्लेच्छति घटुर्वक्तं वदतीत्यर्थः। अव्यक्तायामिति पाठे कुत्सितायां वाचीत्यर्थः।

'तत्साहश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः॥'

इति भाष्यवचनेन नञोऽप्राशस्त्यार्थत्वात् इति व्याख्यानाय हलायुधोक्तमुदाहृतवान्। इति दुर्गादासः॥

म्लेच्छं, क्ली, (म्लेच्छस्तद्देशः उत्पत्तिस्थानत्वेनास्त्यस्य। अर्शआद्यच्।) हिङ्गुलम्। इति राजनिर्घण्टः॥ (तस्यास्य पर्य्यायः।

"हिङ्गुलन्दरदं म्लेच्छमिङ्गुलघूर्णपारदम्॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥)

म्लेच्छः, पुं, (म्लेच्छयति वा म्लेच्छति असंस्कृतं वदतीति। म्लेच्छ+अच्।) किरातशबरपुलिन्दादिजातिः। इत्यमरः॥ पामरभेदः। प्रापरक्तः। अपभाषणम्। इति मेदिनी। छे, ६॥ म्लेच्छादीनां सर्व्वधर्म्मराहित्यमुक्तं यथा, हरिवंशे।१४।१५—१६।

"सगरः स्वां प्रतिज्ञाञ्च गुरोर्व्वाक्यं निशम्य च।
धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह॥
अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत्।
जवनानां शिरः सर्व्वं काम्बोजानामथैव च॥
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना॥
शकाः जवनकाम्बोजाः पारदाः पह्लवास्तथा।
कोलसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः।
सर्व्वे ते क्षत्रियास्तात धर्म्मस्तेषां निरासतः॥
वशिष्ठवचनाद्राजन् सगरेण महात्मना॥"

शकानां शकदेशोद्भवानां क्षत्रियाणाम्। इयं जवनादीनामिति। अत्र जवनशब्दस्तद्देशोद्भववाचौ चवर्गलक्षणीयादिः। जवनो देशभेदिनोरिति त्रिकाण्डशेषाभिधानदर्शनात्॥ * ॥ तेषां म्लेच्छत्वमप्युक्तं विष्णुपुराणे। तथाह्यनानू जवनादीनुपक्रम्य ते चात्मधर्म्मपरित्यागात् म्लेच्छत्वं ययुरिति। बौधायनः।

"गोमांसखादको यश्च विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"

इति प्रायश्चित्ततत्त्वम्॥ * ॥

अपिच। देवयान्यां ययातेर्द्वौ पुत्रौ यदुः तुर्व्वसुश्च।

ग्रस्मिंस्त्रायां त्रयः पुत्राः हव्यः अनुः पुरुश्च। तत्र यदुप्रभृतयश्चत्वारः पितुराज्ञाधारणं कृतवन्तः पित्रा भ्रात्राः। ज्येष्ठपुत्रं यदुं भ्रात्राप तव वंशे राजा चक्रवर्त्ती मा भूदिति। तुर्व्वसुद्रुह्यानून् भ्रात्राप युष्माकं वंशा वेदबाह्या म्लेच्छा भविष्यन्ति। इति श्रीभागवतमतम् ॥ * ॥

("अश्वजत् पश्चयान् पुच्छात् प्रसावाद्दाविडान् शकान्।
योनिदेशाच्च यवनान् शकृतः शबरान् बर्ब्बरान्॥
मुखतश्चाजयत् काञ्चीम्ह्रस्वांश्चैव पार्श्वतः
गोलाङ्गान् किरातान् यवनान् सिंहलान् बर्ब्बरान् खशान्॥
चिबुकांच्च पुलिन्दांच्च चीनान् हूणान् सकेरलान्।
ससर्ज्ज फेनतः सा गौर्म्लेच्छान् बहुविधानपि॥"
सा वशिष्ठस्य धेनुः। इति महाभारते।१।१७६। ३५—३७॥) अन्यच्च। "शकजवनकाम्बोजपारदपह्लवा हन्यमानास्तत्कुलगुरुं वशिष्ठं शरणं ययुः। अथैतान् वशिष्ठो जीवन्मृतकान् कृत्वा सगरमाह। वत्स यत्तालमेभिर्जीवन्मृतकैरनुसृतैः। एते च मयैव तत्प्रतिज्ञापालनाय निजधर्म्मविहितसङ्गपरित्यागं कारिताः। स तथेति तद्गुरुवचनमभिनन्द्य तेषां वेषान्यत्वमकारयत्। अवनाम्मुण्डितशिरसोऽर्द्धमुण्डान् शकान् प्रलम्बकेशान् पारदान् पह्लवांश्च श्मश्रुधरान्निःस्वाध्यायवषट्कारानेतानन्यांश्च क्षत्रियांश्चकार। ते चाधर्म्मपरित्यागाद्ब्राह्मणैश्च परित्यक्ता म्लेच्छतां ययुः।" इति विष्णुपुराणे।४। ३।१८—२१॥ * ॥ प्रकारान्तरेण तत्सोत्पत्तिर्यथा,—

सूत उवाच।

"वंशे त्वायम्भुवस्याधीदङ्गो नाम प्रजापतिः।
मृत्योस्तु दुहिता तेन परिणीतातिदुर्म्मुखी॥
सुनीथा नाम तस्यास्तु वेनो नाम सुतः पुरा।
अधर्म्मनिरतः कामी बलवान् वसुधाधिपः।
लोकेऽधर्म्मं प्रज्ञातः परभार्य्यापहारकः॥
धर्म्मचारप्रसिद्ध्यर्थं जगतोऽस्य महर्षिभिः।
अनुनीतोऽपि न ददावनुज्ञां स यदा ततः॥
शापेन मारयित्वैनमराजकभयार्दितान्।
ममन्थुर्बाहवस्तस्य बलाद्देहमकल्मषाः॥
तत्कायान्मथ्यमानात्तु निपेतुर्म्लेच्छजातयः।
प्रारोरे मातुरंगेन छायाङ्गनसमप्रभाः॥"

इति मत्स्यपुराणे।१०।१—८॥ * ॥

म्लेच्छभाषाध्ययननिषेधो यथा,—

"न सानयेदिष्टकाभिः बलानि वै फलेन तु।
न म्लेच्छभाषां शिक्षेत नार्य्यैव पदासनम्॥"

इति कौर्म्मे उपविभागे १५ अध्यायः॥ ४॥

तस्य मध्यमा तामसी गतिर्यथा, मानवे।
१२।४३।
"हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः।
सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः॥"
(मन्वन्तराणि म्लेच्छापसारणमुक्तं यथा, मनुसंहितायाम्।७।१४६।
"जडमूकान्धबधिरांस्तैर्यग्योनान् वयोऽतिगान्।
स्त्रीम्लेच्छव्याधितदस्यून् मन्त्रकालेऽपसारयेत्॥"
"अथवा एवंविधा मन्त्रिणो न कर्त्तव्याः। बुद्धिविभ्रमसम्भवात्।" इति तट्टीकायां मेधातिथिः॥
म्लेच्छानां पशुधर्म्मित्वम्। यथा, महाभारते।१।८४।१५।
"गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च।
पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि॥")

म्लेच्छकन्दः, पुं, (म्लेच्छप्रियः कन्द इति मध्यपदलोपी कर्म्मधारयः।) लशुनम्। इति राजनिर्घण्टः॥ (तस्य पर्य्यायो यथा,—
"लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम्।
अरिष्टो म्लेच्छकन्दश्च पवनेष्टो रसोनकः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

म्लेच्छजातिः, स्त्री, (म्लेच्छस्य जातिरिति षष्ठीतत्पुरुषः म्लेच्छरूपा जातिरिति कर्म्मधारयो वा।) गोमांसखादकबहुविरुद्धभाषकसर्व्वाचारविहीनवर्णः। यथा,—
"गोमांसखादको यस्तु विरुद्धं बहु भाषते।
सर्व्वाचारविहीनश्च म्लेच्छ इत्यभिधीयते॥"
इति प्रायश्चित्ततत्त्वधृतबौधायनवचनम्॥
अपि च।
"भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः॥"
इत्यमरः।२।४०।२०॥
अन्यच्च।
"पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥
मुखबाहूरुपज्जानां या लोके जातयो बहिः।
म्लेच्छवाचश्चार्य्यवाचः सर्व्वे ते दस्यवः स्मृताः॥"
इति मानवे १० अध्यायः॥

म्लेच्छदेशः, पुं, (म्लेच्छानां देशः म्लेच्छप्रधानो देशो वा।) चातुर्व्वर्ण्यव्यवस्थादिरहितस्थानम्। तत्पर्य्यायः। प्रत्यन्तः २। इत्यमरः। २।१।७॥ भारतवर्षस्थानं प्रतिगः प्रत्यन्तः। म्लेच्छति शिष्टाचारहीनो भवत्यत्र म्लेच्छः अल्। स चासौ देशश्चेति म्लेच्छदेशः। किंवा म्लेच्छयन्ति असंस्कृतं वदन्ति शिष्टाचारहीना भवन्तीति वा प्रचाद्यण्। म्लेच्छा नीचजातयः तेषां देशो म्लेच्छदेशः। भारतवर्षस्थानः शिष्टाचाररहितः कामरूपवङ्गादिः। उक्तञ्च।
"चातुर्व्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।
म्लेच्छदेशः स विज्ञेय आर्य्यावर्त्तस्ततः परमिति॥"
इति भरतः॥
(अपि च, मनुः।२।२३।
"लक्षणारस्तु चरति मृगो यत्र स्वभावतः।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततःपरम्॥")

म्लेच्छभोजनं, क्ली, (म्लेच्छैर्भुज्यते यदिति। भुज्+कर्म्मणि ल्युट्। ततो म्लेच्छानां भोजनम्।) यावकः। इति शब्दरत्नावली॥

म्लेच्छभोजनः, पुं, (भुज्यतेऽसौ इति। भुज्+ल्युट्। म्लेच्छानां भोजनः।) गोधूमः। इति त्रिकाण्डशेषः॥

म्लेच्छमण्डलं, क्ली, (म्लेच्छानां मण्डलं समूहोऽत्र म्लेच्छदेशः। इति हेमचन्द्रः॥

म्लेच्छसुखं, क्ली, (म्लेच्छे म्लेच्छदेशे सुखसम्पत्तिरस्य। इत्यमरटीकायां रघुनाथः।) ताम्रम्। इत्यमरः।२।६।९७॥ (तथास्य पर्य्यायः।
"ताम्रमौदुम्बरं म्लेच्छसुखं दिव्यं रविप्रियम्।
म्लेच्छसुखं सूर्य्यपर्य्यायनामकम्॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥
"ताम्रमौदुम्बरं म्लेच्छसुखं दिव्यात् म्लेच्छसु, नञ्।
म्लेच्छ
इति गारुडे २०८ अध्यायः॥)

म्लेच्छाग्रः, पुं, (म्लेच्छैरग्र्यते इति। अग्र्+कर्म्मणि+घञ्।) म्लेच्छभोजनः। गोधूमः। इति केचित्॥

म्लेच्छाह्वं, क्ली, (म्लेच्छे म्लेच्छदेशे आह्वसुतूपत्तिरस्य।) ताम्रम्। इति हारावली॥

म्लेच्छितं, क्ली, (म्लेच्छ् देशोक्तौ+क्तः।) म्लेच्छभाषा। अपभ्रंशः। तत्पर्य्यायः। परभाषा २। इति हारावली॥

म्लेट, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) ऋ, अमिम्लेटत्। म्लेटति। उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्लेड, ऋ उन्मादे। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) ऋ, अमिम्लेडत्। म्लेडति। उन्मादतीत्यर्थः। इति दुर्गादासः॥

म्लेव, ऋ ङ सेवने। इति कविकल्पद्रुमः॥ (भ्वा० आत्म०-सक०-सेट्।) ऋ, अमिम्लेवत्। म्लेवते। इति दुर्गादासः॥

म्लै, कान्तिसंघाते। इति कविकल्पद्रुमः॥ (भ्वा० पर०-अक०-सेट्।) म्लायति चन्द्रो दिवसे। इति दुर्गादासः॥

NOTICE.

AGENTS

Messrs. Trubner & Co., London.

AGENT

Pandit Jaistaram Mukundaji, Bombay

RAJA SIR RADHAKANTA'S IMPROVED AND ENLARGED SABDAKALPADRUMA.

A Sanskrit Encyclopedic Lexicon.

The new edition is issuing in monthly parts of 8 formes (Royal quarto, 32 pages) each, and we expect to complete it in four years: generally a fasciculus will contain double parts or numbers.

To bring the book within reach of the general public, we offer it for sale to those who register themselves as subscribers in India at the lowest possible price of one Rupee for each part, and in countries out of India at 3*s.* for each part. The number of parts in which the new Appendix would be completed, cannot *now* be guessed, they will bear the same price except to those who had subscribed before 1st January 1888. Subsequent subscribers in India, if they choose to pay in advance, can obtain the whole work exclusive of the Appendix, for 75 Rupees, and in countries out of India, for £8. The advance payments being exclusive of Postage. To non-subscribers in and out of India, the price for each part will be Rs. 1-8 and 4*s.* respectively. Muffussil dents are requested to send Rs. 10 in advance to ensure their enlistment as subscribers, or in lieu of such nent, to order despatch of books to them by value payable parcels. We make it a rule to defer supplying subscribers any part or parts of the work till all arrears due for the preceding ones, are paid.

All remittances and communications, except where special Agents may be preferred, are to be made to Babu Hari Charan Vasu, No. 71, Pathuriaghata Street, Calcutta. Subscribers are requested to see that receipts for money (when sent to him) bear his seal and signature.

We conclude this announcement by an earnest appeal to all students of Sanskrit, Savants, Princes and other patrons of learning in India, Europe and America, to help us to lay before them a grand Repertory of Indo-Aryan learning replenished with new treasures. We specially urge our claim to the aid of our brother n all parts of our country, who cannot but feel it a duty to encourage attempts to preserve and improve unique monument of the genius, scholarship, industry and philanthropy of our great patrirach of g and zealous friend of education whom, we loved to call as the Hindu of Hindus. We hope that by ical improvements and enlargement of its scope, the Sabdakalpadruma of Raja Sir Radhakanta would become the Encyclopædia Indica of the future, which, it would be the common aim of all to see accomplished.

THE SABDAKALPADRUMA OFFICE,
71, *Pathuriaghata Street*,
Calcutta, 20*th August* 1888.

VARADA PRASADA VASU,
HARI CHARANA VASU,
Proprietors of the Sabdakalpadruma.

বিজ্ঞাপন।

শ্রীমদ্দেবীভাগবত।

এই বিরল-প্রচার মহার্হ ধর্ম্মগ্রন্থখানি অতি প্রাচীন ও উপাদেয় এবং এপর্য্যন্ত ইহা বঙ্গাক্ষরে মুদ্রিত হয় নাই। ইহার অন্তর্গত বিষয়গুলি অতি সংক্ষেপে বর্ণনা করা বড় সহজ নহে। কেবল সংক্ষেপে এইমাত্র বলিলেই বোধ করি গ্রন্থের যথেষ্ট পরিচয় দেওয়া হইবে যে, পূজ্যপাদ বৈষ্ণবগণ যেমন শ্রীমদ্ভাগবতকে অষ্টাদশ মহাপুরাণের অন্তর্গত পঞ্চম পুরাণ বলিয়া নির্দ্দেশ করেন; সেইরূপ সম্প্রদায় নিরপেক্ষ অনেকানেক কৃতবিদ্য মহোদয়গণের মতে এই দেবীভাগবতই অষ্টাদশ মহাপুরাণের অন্তর্গত পঞ্চম পুরাণ। এ সম্বন্ধে তাঁহারা যে সকল যুক্তি প্রদর্শন করেন তাহা এক প্রকার অখণ্ডনীয় বলিলেও বোধ হয় অত্যুক্তি হয় না। এই মহাপুরাণখানিও অস্মদ্দেশপ্রচলিত শ্রীমদ্ভাগবতের ন্যায় দ্বাদশ স্কন্ধে ও ১৮০০০ অষ্টাদশ সহস্র শ্লোকে বিরচিত এবং ভাগবতসম্বন্ধীয় অন্যান্য লক্ষণে বিভূষিত। ইহার রচনা এরূপ প্রাঞ্জল যে অধ্যয়ন করিলেই প্রাচীন বলিয়া বোধ হয়। ইহা দেবী ভগবতীর মাহাত্ম্য ও ব্রহ্মতত্ত্বনিরূপণে পরিপূর্ণ। আমাদের এই কথা কতদূর সত্য তাহা প্রসিদ্ধ টীকাকার নীলকণ্ঠকৃত দেবীভাগবতের মহাপুরাণত্ব-সংস্থাপন সম্বন্ধীয় বিচার পাঠে সমস্ত অবগত হইতে পারিবেন।

যদিচ শব্দকল্পদ্রুমের কিয়দংশ প্রচারিত হওয়ার পর আমাদিগের অন্তঃকরণে একটী অভিনব ভাবের উদয় হইয়াছিল, অর্থাৎ দুই একখানি এতদ্দেশবিরল-প্রচার অথচ উপাদেয় বিদ্বন্মণ্ডলীর স্পৃহণীয় পুরাণশাস্ত্র যথাসম্ভব টীকা ও অনুবাদ সহ প্রচার করিয়া উক্ত বিষয়ের অভাব মোচনের নিমিত্ত যথাসাধ্য যত্নপর হইব, কিন্তু কালের কুটিলগতি দেখিয়া সহসা প্রবৃত্ত হইতে সাহস করিতে পারি নাই। পরন্তু, সেই সর্ব্বনিয়ন্তা পরমকরুণাময় পরমেশ্বরের কৃপায় শব্দকল্পদ্রুমের প্রথমকাণ্ড গ্রাহক মহোদয়গণের হস্তে সমর্পণের পরই আমার অগ্রজ রায় বরদাপ্রসাদ বসু বাহাদুর এবং আর কতকগুলি দেশহিতৈষী বিদ্বদ্বর মহাত্মগণ কর্ত্তৃক নির্ব্বন্ধাতিশয় সহকারে অনুরুদ্ধ হইয়া পূর্ব্বসঙ্কল্পিত বিষয়ের মধ্যে প্রথমত এই অনর্ঘ্য দেবীভাগবতেরই মূল, নীলকণ্ঠ-বিরচিত টীকা, টিপ্পনী এবং অবিকল বাঙ্গালা অনুবাদ প্রচারিত হইয়া সাধারণের সুগোচর ও সুখলভ্য হওয়া আবশ্যক বিবেচনায়, আমরা ইহার মূল, টীকা ও গদ্যানুবাদের প্রচারে প্রবৃত্ত হইলাম। আমরা যথাসাধ্য বর্গীয় 'ব' ও অন্তঃস্থ 'ব' প্রভেদ করিতে যত্ন করিতেছি।

১। কার্ত্তিক মাস হইতে প্রতিমাসে রয়াল ৮ পেজি ৯ ফর্ম্মায় এক এক খণ্ড প্রকাশিত হইতেছে কোন কোন মাসে দুই বা ততোঽধিক খণ্ড প্রকাশিত হইয়া সমগ্র গ্রন্থখানি দুই বৎসরের মধ্যে সম্পূর্ণ হইবে। অনুমান ৫৬ খণ্ডে গ্রন্থখানি সম্পূর্ণ হইবে।

২। প্রতি খণ্ডের মূল্য ॥০ আনা; কিন্তু নিয়মিত গ্রাহকগণের পক্ষে ।৵০ আনা; এবং ১২ খণ্ডের অগ্রিম মূল্য ৪৲ টাকা; আগামী চৈত্র মাসের মধ্যে এক কালীন অগ্রিম মূল্য ১৫৲ টাকা; অসমর্থ পক্ষে এখন ৮৲ টাকা এবং বাকি ৭৲ টাকা আগামী আশ্বিন মাসের মধ্যে দিলেই চলিবে।

৩। যিনি এক খণ্ড দেবীভাগবত লইবেন তাঁহাকে আদ্যোপান্ত সমস্ত খণ্ডই গ্রহণ করিতে হইবে। অগ্রিম মূল্য না পাইলে কাহাকেও পুস্তক দেওয়া হইবে না।

৪। কোন গ্রাহক স্থান পরিবর্ত্তন করিলে তাঁহার নূতন ঠিকানা পত্র দ্বারা জানাইবেন। গ্রহণাভিলাষিগণ স্ব স্ব নাম ধাম সত্বর জানাইয়া বাধিত করিবেন।

ঈশ্বরোপাসনা।

যাহাদের পরিণামবিরস ক্ষণপরিবর্ত্তসহ বিষয় ভোগবাসনা তিরোহিত হইয়া মন প্রতি নিয়ত নিত্য সত্তোসরূপ মহামণিময় খনির অনুসন্ধানে লালায়িত; তাদৃশ মহাত্মাদিগের অন্তঃকরণ যদি মুহূর্ত্তকালের নিমিত্ত পরমার্থ রসাস্বাদনে আকর্ষণ করিতে পারি তাহা হইলেও আপনাকে সফলজন্মা জ্ঞান করিব, এইরূপ বলবতী আশার উত্তেজনায় উৎসাহিত হইয়া বেদান্ত, ভগবদ্গীতা, সেশ্বরসাঙ্খ্য, যোগসংহিতা, তন্ত্র ও পুরাণ প্রভৃতির সারসঙ্কলনরূপ ঈশ্বরোপাসনা নামে একটী সংস্কৃত ক্ষুদ্র অনুবন্ধ আমাদিগের দেবনাগর অক্ষরে প্রচারিত অভিনব শব্দকল্পদ্রুমের উপাসনা শব্দে সন্নিবেশিত করি; পরন্তু, উহার দ্বারা সংস্কৃতভাষায় অনভিজ্ঞ ব্যক্তিদিগের কোন প্রকার উপকার সাধিত হইবে না বলিয়া কতিপয় পরমার্থ পথ-অনুসন্ধিৎসু বন্ধুগণ উহার বঙ্গভাষায় অনুবাদ করিয়া দিবার নিমিত্ত আমায় অনুরোধ করেন। প্রস্তাবটী যুক্তিযুক্ত বিবেচনায় অথচ অবিকল অনুবাদে অত্যন্ত কর্কশ হইবে এই আশঙ্কায় সংস্কৃত উপাসনা-গ্রন্থখানি অবলম্বনমাত্র করিয়া গুরুশিষ্যের প্রশ্নোত্তরচ্ছলে এখানিকে পৃথক্ গ্রন্থরূপে সম্পন্ন করা হইল ইহাতে জ্ঞান, ভক্তি ও কর্ম্মের কি প্রভেদ, কে কিরূপ উপাসনার অধিকারী এবং অজ্ঞান কর্ম্মাসক্ত দুর্ব্বলাধিকারী কি উপায়ে উন্নত হইয়া তত্ত্বজ্ঞান লাভে সমর্থ হইতে পারে বিশেষত অন্ধ-ভক্তি ও জ্ঞানপ্রদায়িনী নির্গুণা ভক্তি কাহাকে বলে তাহা বিশদরূপে বিবৃত হইয়াছে। অতএব পরমার্থ-রসিকগণ অবসর মত ইহার আদ্যোপান্ত পাঠ করিলে আপনাকে কৃতার্থম্মন্য বোধ করিব। অলমতি পল্লবিতেন ইতি।

এই গ্রন্থখানি অগ্রহায়ণ মাসে প্রকাশিত হইয়াছে। মূল্য ।০ চারি আনা মাত্র।

শ্রীহরিচরণ বসু
সম্পাদক।

শব্দকল্পদ্রুম-কার্য্যালয়।
৭১ নং পাথুরিয়াঘাটা ষ্ট্রীট—কলিকাতা।
শক ১৮০৯—চৈত্র।